एतेन तृतीयभागप्रस्तावोपन्यस्तपराभिसंधानाविमुखत्वं भगवतस्तीर्थकरस्य रागद्वेषजेतृत्वेन सर्वतोभावेन समर्थितम् । किञ्च-समवसरणाऽऽदिसमये देशनाऽपरपर्यायेण जिनवचनेन योऽर्थः समर्थितस्तत्र विप्रतिपन्नस्य जमालेरिव दुर्गतिगमनमवश्यमेव संपद्यते।तथाहि तृतीयभागप्रस्तावे-" से नूणं भंते ! चलमाणे चलिए" इत्यादि भगवत्प्ररूपितार्थवाचकं प्रश्नोत्तररूपं सूत्रमुपन्यस्तम् । तत्र विप्रतिपन्नस्य जमालेश्चरितमित्थम्-इहैव भरतक्षेत्रे कुण्डपुरं नाम नगरम् , तत्र भगवतः श्रीमन्महावीरस्य भागिनेयो जमालिर्नाम राजपुत्र आसीत् , तस्य च भार्या श्रीमन्महावीरस्य दुहिता सुदर्शना, अथ कदाचित् पञ्चशतपुरुषपरिवारो जमालिर्भगवतो महावीरस्याग्रे प्रव्रज्यां जग्राह, सुदर्शनाऽपि सहस्रस्त्रीपरिवारा तदनु प्रव्रजिता । ततश्चैकादशस्वङ्गेष्वधीतेषु जमालिना भगवान् विहारार्थमुत्कलापितः, ततो भगवता तूष्णीमास्थाय न किञ्चित् प्रत्युत्तरमदायि, तत एवममुष्कलितोऽपि पञ्चशतसाधुपरिवृतो निर्गतः श्रीमन्महावीरान्तिकात् , ग्रामानुग्रामं च पर्यटन् गतः श्रावस्तीनगर्याम् ,तत्र च तैन्दुकाभिधानोद्याने कोष्ठकनाम्नि चैत्ये स्थितः, ततश्च तत्र तस्यान्तप्रान्ताऽऽहारैस्तीव्रो रोगाऽऽतङ्कः समुत्पन्नः, तेन च न शक्नोत्युपविष्टः स्थातुम् , ततो वभाण श्रमणान्-मन्निमित्तं शीघ्रमेव संस्तारकमास्तृणीत, येन तत्र तिष्ठामि, ततस्तैः कर्तुमारब्धोऽसौ । बाढं च दाहज्वराभिभूतेन जमालिना पृष्टम्-संस्तृतः संस्तारको,न वेति? । साधुभिश्च संस्तृतप्रायत्वादर्धसंस्तृतेऽपि प्रोक्तम्-संस्तृत इति । ततोऽसौ वेदनाविह्वलितचेता उत्थाय तत्र तिष्ठासुरर्द्धसंस्तृतं तद् दृष्ट्वा क्रुद्धः-' क्रियमाणं कृतम् । ' इत्यादिसिद्धान्तवचनं स्मृत्वा मिथ्यात्वमोहनीयोदयतो वक्ष्यमाणयुक्तिभिर्वितथमिति चिन्तयामास । ततः स्थविरैर्वक्ष्यमाणाभिरेव युक्तिभिः प्रतिबोधितो यदा कथमपि न प्रतिबुद्धयते, तदा गतास्ते परित्यज्य भगवत्समीपे, अन्ये तु तत्समीपमेव स्थिताः । सुदर्शनाऽपि तदा तत्रैव श्रावकढङ्ककुम्भकारगृहे आसीत् । जमालेश्चानुरागेण च तन्मतमेव प्रपन्ना, ढङ्कमपि तद् ग्राहयितुं प्रवृत्ता । ततो ढङ्केन मिथ्यात्वमुपगतेयमिति ज्ञात्वा प्रोक्तम्-नेदृशं वयं किमपि जानीमः, अन्यदा च पाकाग्निमध्ये मृद्भाजनोद्वर्तनपरावर्तने कुर्वताऽङ्गारकमेकं प्रक्षिप्य तत्रैव प्रदेशे स्वाध्यायं कुर्वत्याः सुदर्शनायाः संघाट्यञ्चलो दग्धः। ततस्तया प्रोक्तम्-श्रावक ! किं त्वया मदीयसंघाटी दग्धा ? । तेनोक्तम्-ननु ' दह्यमानमदग्धं भवति, इति भवत्याः सिद्धान्तः, ततः क्व केन त्वदीया सङ्घाटी दग्धा ? । इत्यादि तदुक्तं परिभाव्य संबुद्धाऽसौ सम्यक्प्रेरिताऽसीत्यभिधाय मिथ्यादुष्कृतं ददाति, जमालिं च गत्वा प्रज्ञापयति । यदा चासौ कथमपि न प्रज्ञाप्यते, तदाऽसौ सपरिवारा, शेषसाधवश्चैकाकिनं जमालिं मुक्त्वा भगवत्समीपं जग्मुः, जमालिस्तु बहुजनं व्युद्ग्राह्य अनालोचितप्रतिक्रान्तः कालमासे कालं कृत्वा किल्बिषिकदेवेषूत्पन्नः । एतच्च चरितं विस्तरतः प्रज्ञापनासूत्रादवसेयम् । अथ जमालेर्विप्रतिपत्तिरुद्भाव्यते-सर्वमपि वस्तु क्रियमाणं कृतं न भवति, किन्तु कृतमेव कृतमुच्यते, ततो भगवत्यादौ यदुक्तम्-" चलमाणे चलिए, उदीरिज्जमाणे उदीरिए, वेइज्जमाणे वेइए । " इत्यादि, तत्सर्वं मिथ्या । किञ्च-यस्य क्रियमाणं वस्तु कृतमित्यभ्युपगमः , तेनेह विद्यमानस्य करणरूपाः क्रिया अङ्गीकृताः, तथा च सति बहूनां दोषाणां प्रतिपत्तिर्भवति । तथाहि-इह क्रियमाणं कृतं न भवतीति प्रतिज्ञा कृतस्य विद्यमानत्वादिति हेतुः, चिरन्तनघटवदिति दृष्टान्तः । अथ कृतमपि क्रियत इत्यभ्युपगम्यते, तर्हि नित्यमनवरतमेव क्रियताम् , कृतकत्वाविशेषात्, एवं च सति न कदाचिदपि कार्यक्रियापरिसमाप्तिरिति । यदि च क्रियमाणं कृतमिष्यते, तर्हि घटाऽऽदिकार्यार्थं या मृन्मर्दनचक्रभ्रमणाऽऽदिका क्रिया, तस्या वैफल्यं प्राप्नोति, तत्काले कार्यस्य कृतत्वाभ्युपगमात् । तथा च प्रयोगः-इह यत्कृतं,तत्क्रिया विफलैव,यथा चिरनिष्पन्नघटे, कृतं चाभ्युपगम्यते क्रियाकाले कार्यं, ततो विफला तत्र क्रियेति । किञ्च क्रियमाणकृतवादिना कृतस्य (विद्यमानस्य) क्रियेति प्रतिपादितं भवति, एवं च प्रत्यक्षविरोधः, यस्मादुत्पत्तिकालात् पूर्वमविद्यमानमेव कार्यं जायमानं दृश्यते, उत्पत्तिकाले तस्मात् क्रियमाणमकृतमेवेति । किञ्च आरम्भक्रियासमय एव कार्यमुत्पद्यते इति तवाभ्युपगमः । एतच्चायुक्तम् । यस्माद् घटाऽऽदिकार्याणामुत्पद्यमानानां दीर्घ एव निर्वर्तनक्रियाकालो दृश्यत इति। ननु दृश्यतां नाम दीर्घः क्रियाकालः, परं घटाऽऽदिकार्यमारम्भक्रियासमय एव, शिवकाऽऽदिकाले वा द्रव्यत इति चेत् , तदयुक्तम् । यतो नाऽऽरम्भक्रियासमय एव घटाऽऽदिकार्यं भवद् दृश्यते, नाऽपि शिवकस्थासकोशकुशूलाऽऽदिसमयेष्वपि दृश्यते, किन्तु दीर्घक्रियाकालस्यान्ते घटाऽऽदिकार्यं भवद् दृश्यत, तस्माच्च क्रियाकाले कार्यं युक्तं, तस्य तदानीमदर्शनात्। दीर्घक्रियाकालस्यान्ते तु युक्तं कार्यम्, तदानीमेव तस्य दर्शनादिति सकलजनस्य प्रत्यक्षसिद्धमेवेदम् *। तदा जमालेरेवमाचक्षाणस्य अप्येके निर्ग्रन्था एनमर्थं श्रद्दधति, अप्येके न श्रद्दधति, तत्र ये न श्रद्दधति, ते एवमाहुः-भगवन् ! भवतोऽयमाशयः-" यथा घटः पटो नैव, पटो वा न घटो यथा । क्रियमाणं कृतं नैव, कृतं न क्रियमाणकम् ॥१॥ " प्रयोगश्च-यौ निश्चितभेदौ, न तयोरैक्यम् , यथा घटपटयोः,निश्चितभेदे च कृतक्रियमाणके । अत्र चाऽसिद्धो हेतुः। तथाहि-कृतक्रियमाणे किमेकान्तेन निश्चितभेदे, अथ कथञ्चित् ? । यद्येकान्तेन, तर्हि तदैक्ये सतोऽपि करणप्रसङ्गतः, उत क्रियाऽनुपरमप्राप्तेः, आहोस्वित् प्रथमाऽऽदिसमयेष्वपि कार्योपलम्भप्रसङ्गः,अथ क्रियावैफल्याऽऽपत्तितो दीर्घक्रियाकालदर्शनानुपपत्तेर्वा ? । तत्र न तावत् सतोऽपि करणप्रसङ्गत इति युक्तम् । असत्करणे हि खपुष्पाऽऽदेरेव करणमापद्यत इति कथञ्चित् सत एव करणमस्माभिरभ्युपगतम् ,न चाभ्युपगतार्थस्य प्रसङ्गनं प्रयुज्यते ॥ नाऽपि क्रियाऽनुपरमप्राप्तेः, यत इह क्रिया किमेकविषया,भिन्नविषया वा?। यद्येकविषया,न दोषः। तथाहि-यदि कृते क्रियमाणमुच्यते तदा तन्मतेन निष्पन्नमेव कृतमिति, तस्यापि क्रियमाणतायां क्रियाऽनुपरमप्राप्तिलक्ष-

णो दोषः स्यात् । न तु क्रियमाणं कृतमिति, तथोक्तौ च तत्र क्रियावेशसमय एव कृतत्वाभिधानात् । उक्तं हि-क्रियाकालनिष्ठाकालयोरैक्यमिति । अथैवमपि कृतक्रियमाणयोरैक्ये कृतस्य सत्त्वात् ततोऽपि करणे तदवस्थप्रसङ्गः स्यात्, न तु क्रियासमकालसत्ताऽवासौ । अथ भिन्नविषया क्रिया, तदा सिद्धसाधनम् । प्रतिक्षमयमन्यान्यकारणतया वस्तुनोऽभ्युपगमनेन भिन्नविषयक्रियाऽनुपरमस्यास्माकं सिद्धत्वात् । अथ प्रथमाऽऽदिसमयेष्वपि कार्योपलम्भप्रसक्तेरिति पक्षे क्रियमाणस्य हि कृतत्वप्रथमाऽऽदिसमयेष्वपि सत्त्वाद्युपलम्भः प्रसज्यत इति । तदपि न । तदा हि शिवकाऽऽदीनामेव क्रियमाणता, ते चोपलभ्यन्त एव । उक्तं च विशेषाऽऽवश्यके-" अन्नारंभे अन्नं, कह दीसउ जइ घमो पडाऽऽरंभे । सिवगाऽऽदयो न कुंभी, किह दीसउ सो तदारंभे ?॥ २३१६ ॥" घटगताभिलाषतया च मूढः शिवकाऽऽदिकरणेऽपि घटमहं करोमीति मन्यते । तथा चाऽऽह-" पइसमयकज्जकोमी-निरवेक्खं घडगयाभिलासोऽसि । पइसमयकज्जकालं, घूअमई ! घडम्मि तावसि ॥ २३१८ ॥ " नापि क्रियावैफल्याऽऽपत्तिरुः, यतः प्रागवासत्तास्कस्य करणे क्रियावैफल्यं स्यात्, न तु क्रियमाणकृतत्वे, तत्र हि क्रियमाणं क्रियाऽपेक्षमिति तस्याः साफल्यमेव, अनेकान्तवादिनां च केनचिद्रूपेण प्राक् सत्त्वेऽपि रूपान्तरेण करणं न दोषाय । दीर्घक्रियाकालादर्शनानुपपत्तिरित्यपि न युक्तम् ; यतः शिवकाऽऽद्युत्तरोत्तरपरिणामविशेषविषय एव दीर्घक्रियाकालोपलम्भो, न तु घटक्रियाविषयः । उक्तं हि-" पइसमयउप्पण्णाणं, परोप्परविलक्खणाण सुबहूणं । दीहो किरियाकालो, जइ दीसइ किं च कुंभस्स ॥ २३१५ ॥" अथ कथञ्चिन्निश्चितभेदे कृतक्रियमाणे, तत्तीर्थकृदुक्तमेव, निश्चयव्यवहारानुगतत्वात् तद्वचसः, तत्र च निश्चयनयाऽऽश्रयणेन कृतक्रियमाणयोरभेदः । यदुक्तम्-" क्रियमाणं कृतं दग्धं, दह्यमानं स्थितं गतम । तिष्ठच्च गम्यमानं च, निष्ठितत्वात् प्रतिक्षणम ॥ १ ॥ " व्यवहारनयमते तु नानात्वमप्यनयोः, तथा च क्रियमाणं कृतमेव, कृतं तु क्रियमाणमेव स्यात्, क्रियमाणं क्रियावैशसमये, क्रियोपरमे पुनरक्रियमाणमिति । उक्तं च-" तेणेह कज्जमाणं, नियमेण कयं कयं तु भयणिज्जं । किंचिदिह कज्जमाणं, उवरयकिरियं च होज्जाहि ॥ २३२० ॥ " किञ्च भवतो मतिः-क्रियाऽन्त्यसमय एवाभिमतकार्यभवनं,तथापि प्रथमसमयादारभ्य कार्यस्य कियत्यपि निष्पत्तिरेष्टव्या, अन्यथा कथमकस्मादन्त्यसमये सा भवेत् ? ।

उक्तं च-

"आद्यतन्तुप्रवेशे च, नोतं किञ्चिद् यदा पटे ।
अन्त्यतन्तुप्रवेशे च, नोतं स्यान्न पटोदयः ॥ १ ॥
तस्माद् यदि द्वितीयाऽऽदि-तन्तुयोगात् प्रतिक्षणम ।
किञ्चित् किञ्चिदुतं तस्य, यदुतं तदुतं हि तत् ॥ २ ॥ "

इह प्रयोगः-यद् यस्याः क्रियाया आद्यसमये न भवति, तत्तस्या अन्त्यसमयेऽपि न भावि, यथा घटक्रियाऽऽदिसमयेऽनवन् पटो, न भवति च कृतक्रियमाणयोर्नैदे क्रियाऽऽदिसमये कार्यम्, अन्यथा घटान्त्यसमयेऽपि पटोत्पत्तिः स्यात् । एवं च-" यथा वृतो धावश्चेति,न विरुद्धं मिथो द्वयम् । क्रियमाणं कृतं चेति, न विरुद्धं तथोद्वयम ॥ २ ॥ " प्रयोगश्च-यद् येनाविनाभूतं,न तदेकान्तेन भिद्यते, यथा वृक्षत्वाद् धवत्वम, कृतत्वाविनाभूतं च क्रियमाणत्वमिति , सकललोकप्रसिद्धत्वाच्च भेदस्य घटपटयोस्तदाश्रयेणैवमुक्तं संस्तारकाऽऽदावपि योज्यम् । तत्प्रतिपद्यस्व भगवन् ! " चलमाणे चलिए " इत्यादि तीर्थकृतां चात्यन्तमवितथमिति । स चैवमुच्यमानोऽपि न प्रतिपन्नवान्;* किन्तु पूर्वोक्तयुक्तिभिः संबुद्धाः शेषसाधव एकाकिनं जमालिं मुक्त्वा गता जिनसमीपम् । जमाली तु (महावीरजिननिह्नवरूपः)कालमासे काल कृत्वा लान्तके कल्पे त्रयोदशसागरोपमस्थितिकेषु किल्बिषिकेषु देवेषु देवत्वेनोत्पन्नः, तस्य पञ्चदश भवाः सन्ति । तस्मान्न जिनवचनेषु कदाचनापि संशायितव्यमिति चतुरक्षम् । विस्तरतो दर्शनेच्छुभिः ' जमालि' शब्दे १४०१ पृष्ठाद्दारभ्य १४९३ पृष्ठपर्यन्तं विलोकनीयम् । * जमालिभवप्रसङ्गानुप्रसङ्गाद् जिज्ञासोत्पद्यते-केन प्रकारेण जन्म जीवानां जायते ?* अत्राऽऽह-स्त्रीपुंसयोर्वेदोदये सति पूर्वकर्मनिर्वर्त्तितायां योनौ मैथुनप्रत्ययिको रताभिलाषोदयजनितोऽग्निकारणयोररणिकाष्ठयोरिव संयोगः समुत्पद्यते, तत्संयोगे च तच्छुक्रशोणिते समुपादाय तत्रोत्पित्सवो जन्तवस्तैजसकार्मणाख्यां कर्मरज्जुसंदानितास्तत्रोत्पद्यन्ते । ते च प्रथममुभयोरपि स्नेहमाचिन्वन्त्यविध्वस्तायां योनौ सत्यामिति,विध्वस्यते तु योनिः-'पञ्चपञ्चाशिका नारी सप्तसप्ततिः पुरुष इति ।' तथा द्वादश मुहूर्तानि यावत् शुक्रशोणिते अविध्वस्तयोनिके भवतः,तत ऊर्ध्वं ध्वंसमुपगच्छत इति । तत्र जीवा उभयोरपि स्नेहमाहार्य स्वकर्मविपाकेन यथास्वं स्त्रीपुंनपुंसकभावेन समुत्पद्यन्ते, तदुक्तं स्त्रीकुक्षौ प्रविष्टाः सन्तः स्त्रिया ऽऽहारितस्याऽऽहारस्य निर्यासं स्नेहमाददति, तदभेदेन च तेषां जन्तूनां कर्मोपचयाऽऽदानेन क्रमेण निष्पत्तिरुपजायते । " सत्ताहं कललं होइ, सत्ताहं होइ बुब्बुयं । " इत्यादि । तदेवमनेन क्रमेण तदेकदेशेन वा मातुराहारमोजसा मिश्रेण वा लोमभिर्वाऽऽनुपूर्व्येणाऽऽहारयन्ति, यथाक्रममानुपूर्व्येण वृद्धिमुपगताः सन्तो गर्भपरिपाकमुपपन्नाः, ततो मातुः कायादभिनिवर्तमानाः पृथग् भवन्तः सन्तस्तथोर्नेर्गच्छन्ति, ते च तथाविधकर्मोदयादात्मनः स्त्रीपुंनपुंसकभावं जनयन्ति । तयोक्तम-" अज्ञानपांशुपिहितं, पुरातनं कर्मबीजमविनाशि । तृष्णाजलाभिषिक्तं, मुञ्चति जन्माङ्कुरं जन्तोः ॥१॥ " इति । ' जम्म ' शब्दे विस्तरतो विवेचितमिति १४१४ पृष्ठे विलोकनीयम् ।* पूर्वोक्तवचनानुरोधेन निर्धार्यतेऽयमर्थो यत् सुकर्मदुष्कर्मवशादेव जन्तुरनीशो जन्मजरामरणाऽऽदिक्लेशाननुभूय पुनरपि गड्डरिकाप्रवाहन्यायेन तेष्वेव निपततीति । अत एव जिनवचनाऽविश्वासरूपदुष्कृतिपरिणामतो जमालेः किल्बिषिकदेवेषूत्पत्तिर्व्यावर्णिता, भगवद्वचसि श्रद्धामादधती जयन्ती श्राविका तु सुगतिमुररीचकारेति निर्विवादम् । इत्थं च-"समस्तवस्तुविस्तारे,व्यासपीठे तैलवज्जले । जीयात् श्रीशासनं जैनं, धीदीपोद्दीपितत्रिदर्शधनम् ॥१॥ " तस्माद् जिनवचनश्रद्धायां यतनावता भव्येन भाव्यम । उक्तं च सैद्धान्तिकैः-

"जयणेह धम्मजणणी, जयणा धम्मस्स पालणी चेव ।
तवबुड्ढिकरी जयणा, एगंतसुहावहा जयणा ॥ १ ॥
जयणाए वट्टमाणो, जीवो सम्मत्तनाणचरणाणं ।
सद्धाबोहाऽऽसेवण-भावेणाऽऽराहगो भणिओ ॥ २ ॥"

किञ्च-

" यत्नं विना धर्मविधावपीह, प्रवर्त्तमानोऽसुमतां विघातम ।
करोति यस्माच्च ततो विघ्नेयो,धर्मात्मना सर्वपदेषु यत्नः ॥१॥"

अथ (जमालिप्रसङ्गादेव) तृतीयभागस्थप्रस्तावस्य २ पृष्ठे स-

त्वार्थेव भूतानि तत्त्वम्, न तु तद्व्यतिरिक्तो भवान्तरानुसरणक्षम नयानात्मेति चार्वाकचर्चापराकरणं विधाय जीवसिद्धिरुपपादिता इह तु जीवाजीवाऽऽदितत्त्वनिरूपणप्रस्तावे श्रीमदर्हच्छासने तस्य जीवस्य कथञ्चिन्नित्यत्वं कथञ्चिदनित्यत्वं जमालिमनिमुखीकृत्य भगवानाह-"सासए जीवे जमाली ! जं ण कयाइ णासि० जाव णिच्चे। असासए जीवे जमाली ! जं णेरइए भवित्ता तिरिक्खजोणिए भवइ, तिरिक्खजोणिए भवित्ता मणुस्से भवइ, मणुस्से भवित्ता देवे भवइ।" * ननु कोऽसौ जीवो जीव इति भवद्भिरिष्यते, यस्य वा सिद्धिरुपपादिता ?, इत्यत्राऽऽह-"पञ्चेन्द्रियाणि त्रिविधं बलं च, उच्छ्वासनिश्वासमथान्यदायुः। प्राणा दशैते भगवद्भिरिष्टाः, तेषां वियोगीकरणं चहिंसा ॥१॥" इत्यादिवचनप्रसिद्धान् दशविधप्राणान् जीवति कोऽर्थो धरतीति शब्दार्थवशादेव जीवत्येव जीव उच्यते। तादृशः संसार्येव भवति, सिद्धस्तु जीवशब्देन न व्यपदिश्यते। तथा च तत्त्वार्थोपदेशे-" सिद्धो न तस्माते जीवः, प्रोक्तः सत्त्वाऽऽदिसंश्रयोपि। महाभाष्ये च तत्त्वार्थ-भाष्ये धात्वर्थबाधतः ॥ ४० ॥" एवं च सिद्धत्वसिद्धत्वेन सेन्द्रियानिन्द्रियत्वेन सकायिकाऽकायिकत्वेन सयोगायोगित्वेन सवेदकावेदकत्वेन सकषायाकषायत्वेन सलेश्याऽलेश्यात्वेन ज्ञान्यज्ञानित्वेन साकारोपयुक्ताऽनाकारोपयुक्तत्वेन, आहारकानाहारकत्वेन भाषकाभाषकत्वेन चरमाचरमत्वेन जीवानां द्वैविध्यम्, त्रसस्थावरनोत्रसस्थावरत्वेन परीतापरीतनोपरीतापरीतत्वेन स्त्रीपुरुषनपुंसकत्वेन सम्यग्दृष्टिमिथ्यादृष्टिसम्यग्मिथ्यादृष्टित्वेन पर्याप्तकापर्याप्तकनोपर्याप्तकापर्याप्तकत्वेन सूक्ष्मबादरनोसूक्ष्मबादरत्वेन संज्ञ्यसंज्ञिनोसंज्ञ्यसंज्ञित्वेन भवसिद्धिकाऽभवसिद्धिकनोभवसिद्धिकाभवसिद्धिकत्वेन जीवानां त्रैविध्यम्, नैरयिकतिर्यग्योनिकमनुष्यदेवत्वेन मनोयोगिवचोयोगिकाययोग्ययोगित्वेन स्त्रीवेदकपुरुषवेदकनपुंसकवेदकावेदकत्वेन चक्षुर्दर्शनाचक्षुर्दर्शनावधिदर्शनकेवलदर्शनत्वेन संयतासंयतसंयतासंयत-नोसंयतासंयतत्वेन जीवानां चातुर्विध्यम्, एकद्वित्रिचतुःपञ्चेन्द्रियत्वेन नैरयिकतिर्यग्योनिकमनुष्यदेवसिद्धत्वेन, क्रोधमानमायालोभकषायित्वाकषायित्वेन जीवानां पञ्चविधत्वम्, पृथिव्यप्तेजोवायुवनस्पतित्रसकायिकत्वेन, आभिनिबोधिकाऽऽदिपञ्चविधज्ञानित्वेन अज्ञानित्वेन च, एकद्वित्रिचतुःपञ्चेन्द्रियत्वेन अनिन्द्रियत्वेन च, औदारिकवैक्रियकाऽऽहारकतैजसकार्मणशरीरत्वेन असरीरत्वेन च जीवानां षड्विधत्वम्, नैरयिकतिर्यग्योनिकत्वेनतिर्यग्योनिकत्वेन च-मनुष्यमानुषीदेवदेवीत्वेन, पृथिव्यप्तेजोवायुवनस्पतित्रसकायिकाकायिकत्वेन, कृष्णनीलकापोततेजःपद्मशुक्ललेश्याऽलेश्यात्वेन जीवानां सप्तविधत्वम्, प्रथमाप्रथमसमयनैरयिकत्वेन प्रथमाप्रथमसमयतिर्यग्योनिकत्वेन प्रथमाप्रथमसमयमनुष्यत्वेन, प्रथमाप्रथमसमयदेवत्वेन; नैरयिकतिर्यग्योनिकमनुष्यदेवसिद्धत्वेन तिर्यग्योनिकामानुषीदेवीत्वेन च जीवानामष्टविधत्वम्, पृथिव्यप्तेजोवायुवनस्पतिद्वित्रिचतुःपञ्चेन्द्रियत्वेन; अथवा-एकद्वित्रिचतुरिन्द्रियनैरयिकपञ्चेन्द्रियतिर्यग्योनिक-मनुष्यदेवसिद्धत्वेन, प्रथमाप्रथमसमयनैरयिकप्रथमाप्रथमसमयतिर्यग्योनिकप्रथमाप्रथमसमयमनुष्यप्रथमाप्रथमसमयदेवसिद्धत्वेन जीवानां नवविधत्वम्, प्रथमाप्रथमसमयैकेन्द्रियद्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियपञ्चेन्द्रियत्वेन, पृथिव्यप्तेजोवायुवनस्पतिद्वित्रिचतुःपञ्चेन्द्रियतिर्यग्योनिन्द्रियत्वेन, प्रथमाप्रथमसमयनैरयिकतिर्यग्योनिकमनुष्यदेवसिद्धत्वेन जीवानां दशविधत्वम्, सूक्ष्मापर्याप्तकपर्याप्तक-बादरापर्याप्तकपर्याप्तक-द्वीन्द्रियश्रोत्रियचतुरिन्द्रियसंज्ञ्यसंज्ञिपञ्चेन्द्रियपर्याप्तकापर्याप्तकत्वेन जीवानां चतुर्दशविधत्वं च 'जीव' शब्दे १५२५ पृष्ठे न्यक्षेण निरूपितमिति। * किं नाम जीव इति प्रश्नस्य यद्यपि प्रकारद्वयेन लेशतो भावितमुत्तरं तथाऽपि विशेषबुबोधयिषया किञ्चिदिह प्रतायते-उपशमौदयिकक्षायिकक्षायोपशमिकपारिणामिकैर्भावैः सांमिश्रं ऊर्ध्वं जीवशब्देनोच्यते। आह-औदयिकान् भावान् परित्यज्य किमितीहौपशमिकस्य भावस्य साक्षादुपादानम्?। उच्यते-इह जीवस्य स्वरूपं तदेव वक्तव्यं यदसाधारणं स्वरूपम्। एवं हि पदार्थान्तरस्वरूपेभ्यो वैधिक्येन तत् प्रतिपादितं भवति, नान्यथा, औदयिकपारिणामिकौ च भावावजीवानामपि भवतः, अतस्तौ साक्षान्नोपात्तौ, क्षायिकोऽपि च भाव औपशमिकभावपूर्वकः, न खल्वौपशमिकभावमनासाद्य कश्चिदपि क्षायिकं भावमासादयति, क्षायोपशमिकोऽपि च भावो नौपशमिकाद् भावाद् अत्यन्तभेदी, तत इह साक्षादौपशमिकस्य भावस्योपादानमिति। ततः कस्य प्रभवः स्वामिनो जीवाः इति प्रश्नावसरे, आत्मीयस्य रूपस्योत्तरम्। तथाहि-कर्मविनिर्मुक्तस्वरूपा आत्मानो न केषामपि प्रभवः, किन्तु स्वरूपस्यैव, तथास्वाभाव्यात्। यस्तु स्वस्वामिभावः संसारे, स कर्मोपाधिजनितत्वादौपाधिकः, न पारमार्थिक इति। ननु केन निर्मिता जीवा इति प्रश्ने कृते सति समाधिः-न केनचित् कृताः, किन्तु नभस्वद्वदकृत्रिमा एव, यथा चाकृत्रिमता जीवानां तथा धर्मसंग्रहणीटीकायां संप्रपञ्चं व्याख्याता, विशेषजिज्ञासुभिस्तत एवावधार्या। * ननु किं जीवाः शरीरे लोके वाऽवतिष्ठन्ते?, इति प्रश्नस्योत्तरम्-सामान्यचिन्तायां लोके, नालोके, अलोके स्वभावत एव धर्माधर्मास्तिकायजीवपुद्गलानामसंभवात्। विशेषचिन्तायां शरीरे, नान्यत्र, शरीरपरमाणुभिरेव सह आत्मप्रदेशानां क्षीरनीरवदन्योन्यानुगमभावात्। उक्तं च-"अन्नोन्नमणुगयाइं, इमं च तं चत्ति विनयणमजुत्तं। जह खीरपाणियाइं।" इति। सर्वकालमेव जीवा भवन्ति, अनादिनिधनाश्च जीवा इति मुक्तावस्थायामपि जीवा न विनश्यन्ति, किन्तु ज्ञानाऽऽदिके स्वस्वरूपेऽवतिष्ठन्ते इति श्रद्धेयम्। तेन यत् केश्चिदुक्तम्-"दीपो यथा निर्वृतिमभ्युपेतो, नैवावनिं गच्छति नान्तरिक्षम्। दिशं न काञ्चिद् विदिशं न काञ्चिद्, स्नेहक्षयात् केवलमेति शान्तिम् ॥ १ ॥ जीवस्तथा निर्वृतिमभ्युपेतो, नैवावनिं गच्छति नान्तरिक्षम्। दिशं न काञ्चिद् विदिशं न काञ्चिद्, स्नेहक्षयात् केवलमेति शान्तिम् ॥ २ ॥ अर्हन्मरणचिह्नस्य, प्रतिसन्धिर्न विद्यते। प्रदीपस्येव निर्वाणं, विमोक्षस्तस्य चोच्यते ॥ ३ ॥" इति। तदपास्तं द्रष्टव्यम्। सतः सर्वथा विनाशायोगात्, तथादर्शनादिति कृतं प्रसङ्गेन। विस्तरेच्छुभिः 'जीव' शब्दो वीक्ष्यः। त्रिषष्ट्यधिकषडशतभेदा जीवानां 'जीव' शब्दे १५३६ पृष्ठे द्रष्टव्याः। जिनवचनस्य श्रद्धाऽऽस्पदत्वादेव "चंदो चंदो अभिव-ड्ढिओ य चंदमभिवड्ढिओ चेव। पंचसहियं जुगमिणं, दिट्ठं तेलोक्कदंसीहिं ॥ १ ॥ पढमविइयाउ चंदा, तइय अभिवड्ढियं वियाणाहि। चंदे चेव चउत्थे, पंचममभिवड्ढियं जाण ॥ २ ॥" इति सुगवचनाऽऽदि 'जुग' शब्दे १५६७ पृष्ठत आरभ्य १५७३ पृष्ठपर्यन्तं निरीक्षणीयम्। पूर्वोक्तकारणादेव ज्योतिष्कानां पञ्चविधत्वनिरूपणानन्तरं चलत्वस्थिरत्वविचारः, सर्वलोके प्रतिद्वीपं प्रतिसमुद्रं चन्द्राऽऽदीनां परिमाणप्रतिपादनार्थमन्यतीर्थिकानां द्वा-

दश प्रतिपत्तीः परिभाव्य जगवत्सिद्धान्तनिरूपणम् । जम्बूद्वीपगतमनुष्यक्षेत्रस्य चन्द्रसूर्याऽऽदीनां संख्यानिर्देशः, चन्द्राऽऽदयो यत्र यथा भ्रमन्ति तन्निरूपणमित्यादि एकपञ्चाशद्विषयप्ररूपणप्रस्तावे मनुष्यक्षेत्रप्ररूपणमित्थम्-" जंबूदीवो लवणो-दही य दीवो य धायईसंडे । कालोदहिपुक्खरवर-दीवड्ढो माणुसं खेत्तं ॥ १ ॥ एतं माणुसखेत्तं, एत्थ विचारीणि जोइसगणाणि । परतो दीवसमुद्दे, अवट्ठियं जोइसं जाण ॥ २ ॥" तत्र च-" चंदा सूरा य गहा, नक्खत्ता तारया य पंच इमे । एगे चलजोइसिया, घंटायारा थिरा अवरे ॥ १४७ ॥" तथा च-"दो चंदा दो सूरा, णक्खत्ता खलु हवंति छप्पण्णा । बावत्तरं गहसतं, जंबुद्दीवे वियारीणं ॥ १ ॥ एगं च सयसहस्सं, तित्तीसं खलु जवे सहस्साइं । णव य सता पण्णासा, तारागणकोडिकोडीणं ॥ २ ॥" सर्वं चैतत् 'जोइसिय' शब्दे विद्वद्भिर्विलोकनीयम् । * जिनवचनमेतत् जिनाऽऽगमे-योगादेव कर्मक्षयो भवतीति तस्य योगस्य माहात्म्यम्, तथा च योगमार्गाधिकारिणः, योगनिष्पन्नस्य चिह्नानि । तथाहि-" अलौल्यमारोग्यमनिष्ठुरत्वं, गन्धः शुभो मूत्रपुरीषमल्पम् । कान्तिः प्रसादः स्वरसौम्यता च, योगप्रवृत्तेः प्रथमं हि लिङ्गम् ॥ १ ॥ " इत्यादि द्वात्रिंशद् विषयाः "जोग" शब्दे सम्यक् प्रतिपादिताः । तथा-"गुरुभत्तो अपमत्तो, संतो दंतो य निरुवगत्तो य । थीरचित्तो दढसत्तो, विणयजुतो भवविरत्तो य ॥ १ ॥ जियलोहो जियनिद्दो, हिंसपियमियजंपिरो मिउअसतथो । अप्पाहारो अप्पो-वही य दक्खो सुदक्खिओ ॥ २ ॥ पंचसमिओ तिगुत्तो, उज्जुत्तो संजमे तवे चरणे । परिसहसहु होइ मुणी, विसेसओ जोगवाहि त्ति ॥ ३ ॥ कयसोहिलोयकम्मे, निवासपरियाइपण कालेणं । आयारपकप्पाई, उद्दिसिउं कप्पई जुगो ॥ ४ ॥ " इत्यादि तु 'जोगविहि' शब्दे द्रष्टव्यम् । * तथा जिनोक्तं ध्यानस्वरूपं, ध्यानाध्यानयोर्विवेचनं, ध्यानस्यैव भेदाः, प्रशस्ताप्रशस्तानि ध्यानानि, ध्यातव्यभेदाः, ध्यातुः स्वरूपं, संसारप्रतिपन्नतया मोक्षहेतुर्ध्यानं, ध्यानस्य फलानि चेत्यादि 'झाण' शब्दे १६६१ पृष्ठत आरभ्य १६७३ पृष्ठपर्यन्तं द्रष्टव्यम् ।

तथा च-

" ध्याता ध्येयं तथा ध्यानं, त्रयं यस्यैकतां गतम् ।
मुनेरनन्यचित्तस्य, तस्य दुःखं न विद्यते ॥ १ ॥
ध्याताऽन्तरात्मा ध्येयस्तु, परमात्मा प्रकीर्तितः ।
ध्याने चैकाग्र्यसंचिंतेः, समापत्तिस्तदेकता ॥ २ ॥
जितेन्द्रियस्य धीरस्य, प्रशान्तस्य स्थिराऽऽत्मनः ।
सुखाऽऽसनस्य नाशाग्र-न्यस्तनेत्रस्य योगिनः ॥ ३ ॥
रुद्धबाह्यमनोवृत्ते-र्धारणाधारया स्वयम् ।
प्रसन्नस्याप्रमत्तस्य, चिदानन्दसुधाव्रिहः ॥ ४ ॥
साम्राज्यमप्रतिद्वन्द्व-मन्तरे च वितन्वतः ।
ध्यानिनो नोपमा लोके, सदेवमनुजेऽपि हि ॥ ५ ॥ "

एतादृशध्यानविरहितो रागाऽऽद्युपहतचेतास्तु परमार्थमजानानोऽतत्स्वज्ञानेऽपि तत्स्वभावाऽऽरोपणेनान्धादप्यन्धतमः कामी मोदते । तत आह-

" दृश्यं वस्तु परं न पश्यति जगत्यन्धः पुरोऽवस्थितं,
रागान्धस्तु यदस्ति तत् परिहरन् यन्नास्ति तत्पश्यति ।
कुन्देन्दीवरपूर्णचन्द्रकदलश्रीमल्लतापल्लवा-
नारोप्याऽऽशुचिराशिषु प्रियतमागात्रेषु मुह्यन्मतिः ॥ १ ॥ "

यतोऽर्हद्वचनमेवास्माकं जीवातुभूतं ततस्तदनुज्ञातं 'नवकार' चिन्तनं विधेयम्-

" सत्त पण सत्त सत्त य, नव अक्खरपमाणपयडपेचपयं ।
तित्तीसक्खरचूलं, सुमिरह नवकारवरमंतं ॥ १ ॥
एसो पंचनमुक्कारो, सव्वपावप्पणासणो ।
मंगलाणं च सव्वेसिं, पढमं हवइ मंगलं ॥ २ ॥
अरिहंतनमुक्कारो, जीवं मोएइ भवसमुद्दाओ ।
भावेण कीरमाणो, होइ पुणो बोहिलाभाए ॥ ३ ॥"

ननु सूत्रं संक्षेपविस्तरावतिक्रम्य न वर्तते, तत्र संक्षेपवद् यथा सामायिकसूत्रम्, विस्तरवद् यथा चतुर्दश पूर्वाणि, इदं पुनर्नमस्कारसूत्रमुभयातीतं, यतोऽत्र न संक्षेपो, नापि विस्तरः। यद्ययं संक्षेपः स्यात् ततस्तस्मिन् सति द्विविध एव नमस्कारो भवेत् सिद्धसाधुभ्यामिति, परिनिर्वृताहदादीनां सिद्धशब्देन ग्रहणात्, संसारिणां तु साधुशब्देनेति । संसारिणो हि अर्हदाचार्याऽऽदयो न साधुत्वमतिवर्तन्ते ॥ यद्ययं विस्तरः । तदप्ययुक्तम् । यतो विस्तरतोऽनेकविधो नमस्कारः प्राप्नोति । तथाहि-ऋषभाजितसंभवाऽऽदिभ्यो नामग्राहं सर्वतीर्थकरेभ्यः । तथा सिद्धेभ्योऽप्येकद्वित्रिचतुष्पञ्चाऽऽदिसमयसिद्धेभ्यो यावदनन्तसमयसिद्धेभ्यः । तथा-तीर्थसिद्धप्रत्येकबुद्धाऽऽदिविशेषणविशिष्टेभ्य इत्यादिभिर्भेदैर्विस्तरतोऽनन्तभेदो नमस्कारः प्राप्नोति । यतश्चैवं तस्मादमुं पक्षमप्यङ्गीकृत्य पञ्चविधोऽयं नमस्कारो न युज्यत इति ॥ * इह चेदं प्रतिविधानम्-न संक्षेपो नापि विस्तर इत्येतदसिद्धम्, संक्षेपत्वादस्य । किञ्च-इहार्हदादयो नियमात् साधवः, तद्गुणानामपि तत्र भावात् । साधवस्तु तेष्वर्हदादिषु विकल्पनीयाः, यतस्ते न सर्वेऽप्यर्हदादयः, किं तर्हि, केचिदर्हन्तः, येषां तीर्थंकरनामकर्मोदयोऽस्ति, केचित्तु सामान्यकेवलिनः, अन्ये त्वाचार्या विशिष्टसूत्रार्थदेशकाः, अपरे तूपाध्यायाः सूत्रपाठकाः, अन्ये त्वेतद्विशिष्टाः सामान्यसाधव एव शिक्षकाऽऽदयो, न पुनरर्हदादयः । तदेवं साधूनामर्हदादिषु व्यभिचारात् यन्नमस्करणेऽपि नार्हदादिनमस्कारसाध्यस्य विशिष्टस्य फलसिद्धिः । ततश्च संक्षेपेण द्विविधनमस्करणमयुक्तमेव, अव्यापकत्वादिति । तस्मात् संक्षेपतोऽपि पञ्चविध एव नमस्कारो, न तु द्विविधः, अव्यापकत्वात् । विस्तरतस्तु नमस्कारो न विधीयते, अशक्यत्वात् । * ननु जिनवचनस्य मिथ्यादर्शनसमूहमयत्वेऽपि प्रामाण्यमभ्युपगच्छद्भिर्भवद्भिर्नयनिकुरम्बोपन्यासः कृतस्तत्र किं नाम नयत्वम् ? । उच्यते-बहुधा वस्तुनः पर्यायाणां संभवाद् विवक्षितपर्यायेण यन्नयनमधिगमनं परिच्छेदोऽसौ नयो नाम । तथाहि-इह हि जिनमते सर्वं वस्त्वनन्तधर्माऽऽत्मकतया संकीर्णस्वभावमिति तत्परिच्छेदकेन प्रमाणेनापि तथैव ज्ञातव्यमित्यसंकीर्णप्रतिनियतधर्मप्रकारकव्यवहारसिद्धये नयानामेव सामर्थ्यम् । तदुक्तम्-

" निःशेषांशजुषां प्रमाणविषयीभूयं समालेङ्घ्यां,
वस्तूनां नियतांशकल्पनपराः सप्त श्रुताऽऽख्या नयाः ।
औदासीन्यपरायणास्तदपरे चांशे भवेयुर्नया-
श्चेदेकान्तकलङ्कपङ्ककलुषास्ते स्युस्तदा दुर्नयाः ॥ १ ॥"

नयोपन्यासस्तु 'णय' शब्दे १८५३ पृष्ठत आरभ्य १९०२ पृष्ठपर्यन्तं विस्तरतो निरूपितः । ननु यदुक्तं जिनवचनमनाचरतो नियमाद् निरयाऽऽदिषु पातो भवति, तत्र दीक्षादि यातनाऽनुचू-

यते प्राणिना ? । उच्यते-दुःसहे तीव्रे खदिराङ्गारमहाराशितापादनन्तगुणेऽभितापे बहुवेदनेऽपरित्यक्तविषयाग्निवञ्चा जिनवचनानादरपराः स्वकृतकर्मगुरवः पतन्ति निरयाऽऽदिषु, तत्र च नानारूपा वेदनाः समनुभवन्ति ।

तथा चोक्तम-

" गिद्धमुहणिद्धउक्खि-त्तबंधणोम्मुक्ककंधरकबंधे ।
दड्ढगइयत्तसंमा-सयग्गविसमुक्खुभियजीहे ॥ १ ॥
तिक्खंकुसमाकड्ढिय-कंटयरुक्खग्गजज्जरसरीरे ।
निमिसंतरं पि दुल्लह-सुक्खेऽवक्खेवदुक्खम्मि ॥ २ ॥
बद्धंधयारदुग्ग-धबंधणागारदुद्धरकिलेसे ।
निच्चकरचरणसंकर-रुहिरवसाकुग्गमप्पवहे ॥ ३ ॥
सुक्कंदकड्ढादु-क्कंतदुक्खयकयंतकम्मंते ।
मूलविभिन्नुक्खिप्प-क्कदेहणिस्संतपब्भारे ॥ ४ ॥
जंतंऽतरभिज्जंतु-च्छलंतसंसद्दभरियदिसिविवरे ।
मज्जंतुक्किमियसमु-च्छलंतसीसट्ठिसंघाए ॥ ५ ॥
इय भीसणम्मि निरए, पमंति जे विविहसत्तवहनिरया ।
सव्वन्नट्ठा य नरा, जयम्मि कयपावसंघाया ॥ ६ ॥ "

इत्थं च बहवोऽपि विषया नरकसंबन्धिनः ' णरग ' शब्दे विषयसूच्यां १६२५ पृष्ठे विभावनीयाः । प्रत्यक्षपरोक्षत्वेन ज्ञानस्य द्वैविध्यम्, केवलनोकेवलज्ञानत्वेन प्रत्यक्षस्याऽपि द्वैविध्यम्, अवधिमनःपर्यवज्ञानत्वेन केवलज्ञानस्यापि द्वैविध्यम्, परोक्षज्ञानस्य तु आभिनिबोधिकश्रुतज्ञानत्वेन द्वैविध्यम् । ननु यदि चैतन्यं ज्ञानमात्मनोऽत्यन्तव्यतिरिक्तम्, तदा कथमात्मनः संबन्धि ज्ञानमिति व्यपदेशः ?, यद्यात्मनो ज्ञानादव्यतिरिक्तत्वमिष्यते, तदा दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तराभावाद् बुद्ध्यादीनां नवानामात्मविशेषगुणानामुच्छेदावसरे आत्मनोऽप्युच्छेदः स्यात्,तदव्यतिरिक्तत्वात् ; अतोऽभिन्नाभिन्नमेवाऽऽत्मनो ज्ञानं यौक्तिकमिति । प्रपञ्चितं चैतत् ' णाण ' शब्दे १६५७ पृष्ठे न्यक्षेण परतीर्थिकमतोपन्यासनिरसनाख्यम् ।

ज्ञानाज्ञानाख्यां यद् भवति तदाह-

" मज्जत्यज्ञः किलाज्ञाने, विष्ठायामिव शूकरः ।
ज्ञानी निमज्जति ज्ञाने, मराल इव मानसे ॥ १ ॥
निर्वाणपदमप्येकं, भाव्यते यद् मुहुर्मुहुः ।
तदेव ज्ञानमुत्कृष्टं, निर्बन्धो नास्ति भूयसा ॥ २ ॥
स्वभावलाभसंस्कार-कारणं ज्ञानमिष्यते ।
ध्यानमात्रमतस्त्वन्यत्, तथा चोक्तं महात्मना ॥ ३ ॥
वादाँश्च प्रतिवादाँश्च, वदन्तोऽनिश्चितांस्तथा ।
तत्त्वान्तं नैव गच्छन्ति, तिलपीडकवद् गतौ ॥ ४ ॥
अस्ति चेद् ग्रन्थिभिद् ज्ञानं, किं चित्रैस्तन्त्रयन्त्रणैः ।
प्रदीपाः कोपयुज्यन्ते, तमोघ्नी दृष्टिरेव चेत् ॥ ५ ॥
पीयूषमसमुद्भूत्यै, रसायनमनौषधम् ।
अनन्यापेक्षमैश्वर्यं, ज्ञानमाहुर्मनीषिणः ॥ ६ ॥ "

" जो विणओ तं नाणं, जं नाणं सो अ वुच्चई विणओ ।
विणयण लहइ नाणं, नाणेण वि जाणई विणयं ॥ ७ ॥ "

" क्रियानयः क्रियां ब्रूते, ज्ञानं ज्ञाननयः पुनः ।
मोक्षस्य कारणं तत्र, तूभयस्यो युक्तयो ह्यः ॥ ८ ॥
नित्यनैमित्तिकैरेव, कुर्वाणो दुरितक्षयम् ।
ज्ञानं च विमलीकुर्व-न्नभ्यासेन तु पाचयेत् ॥ ९ ॥
अभ्यासात् पक्वविज्ञानः, कैवल्यं लभते नरः ॥ "

" नाणी गिण्हइ नाणं, मुणेइ नाणेण कुणइ किच्चाइं ।
भवसंसारसमुद्दं, नाणी नाणठिओ तरति ॥ १ ॥ "
" तम्हा न वज्झकरणं, मज्झ पमाणं न यावि चारित्तं ।
नाणं मज्झ पमाणं, नाणे च ठियं जओ तित्थं ॥१॥ "

परन्तु ज्ञानिनाऽपि चरणवता भाव्यम्-

" जाणंतो वि य तरिउं, काइयजोगं न जुंजई जोगं ।
सो बुड्ढइ सोएणं, एवं नाणी चरणहीणो ॥१॥ "

ननु तत्र तत्र जिनवचने निगोदजीवानां चर्चा कृताऽस्तीति के ते निगोदजीवाः ?,

उच्यते-

" जह अयगोलो धंतो, जाओ तत्ततवणिज्जसंकासो ।
सव्वो अगणिपरिणओ, णिगोयजीवे तहा जाण ॥ १९ ॥
एमस्स दोण्ह तिण्ह व,संखेज्जाण व न पासिउं सक्का ।
ईसंति सरीराइं, णिगोयजीवाणऽणंताणं ॥ २० ॥ "

यथाऽयोगोलो ध्मातः सन् तप्ततपनीयसंकाशोऽग्निपरिणतो भवति, तथा निगोदजीवानपि जानीहि,निगोदरूपेऽप्येकैकस्मिन् शरीरे तच्छरीराऽऽत्मकतया अनन्तान् जीवान् जानीहि । ननु कथं निगोदरूपं शरीरं नियमादनन्तजीवपरिणामाऽऽविर्भावितं भवतीति ?। उच्यते-जिनवचनात् । तथेदम्-" गोला य असंखेज्जा, होंति निगोया असंखया गोले । एक्केक्को य निगोओ, अणंतजीवो मुणेयव्वो ॥ १ ॥ " तद्भेदास्तु "णिगोय " शब्दे २०२७ पृष्ठे द्रष्टव्याः । जिनवचनादेव 'निर्ग्रन्थ' शब्दे पुलाकबकुशकुशीलनिर्ग्रन्थस्नातकभेदेन पञ्चविधनिर्ग्रन्थस्वरूपनिरूपणानन्तरं तेषां साधकविचारः , कूजनताकर्करणताऽऽपध्यानताऽऽदिभेदेन निर्ग्रन्थानां, निर्ग्रन्थीनामसुखत्वाऽऽदि प्ररूप्य तद्विपरीतत्वेन सुखत्वाऽऽदिनिरूपणमेवमादयो विषयाः पञ्चचत्वारिंशद् द्रष्टव्याः । निर्ग्रन्थीशब्दे निर्ग्रन्थीनामाचाराऽऽदिनिर्देशः । ' णितियवास ' शब्दे साधुसाध्वीनां नित्यवास एकत्र निषिद्धः । तथाहि-विहारपरिहारेण सर्वदैकत्र निवासवतां प्रासुकैषणीयवसतिलाभाभावाद् गृहस्था इवाऽऽश्रयान्तरेषु मुक्तसमस्तजीवोपमर्दाऽऽदयः स्वयंग्रहकरणकारणानुमोदनाऽऽदौ प्रवर्त्तन्ते, ततश्चैषणायामपि जीवनिकायानामाकुट्यापि विराधनोत्पद्यते, ततश्च प्राणातिपातविरमणमहाव्रतभङ्गनिरर्थकतायां अपि शिरस्तुण्डमुण्डनाऽऽदेर्वैयर्थ्यं स्यात् । अन्यथैकत्र निवासे प्रतिदिनमाहाराऽऽदिदानवन्दनाऽऽदिप्रतिपत्त्योपगृहीतानां साधूनामनादिनवाभ्यासवशवर्तिनां प्रतिबन्धाऽऽदयः संभवन्ति । उक्तं च-" पमिबंधो लहुयत्तं, न जणुवयारो न देसविसाणं । नाणाऽऽराहणमेव, दोसा अविहारपक्खम्मि ॥ १ ॥ " ततश्च प्रतिबन्धात् संबन्धः, संबन्धात् चित्तविप्लुतिः, चित्तविप्लुतेरकार्यप्रवृत्तिरिति । यदा च चित्तविप्लुत्या प्रेरितः स्त्रीसेवाऽऽदौ प्रवर्तते, तदा न केवलं प्रथममव्रतभङ्गः, अपि तु पञ्चानामपीति । किंतु-

" जो होज्जउ असमत्थो, रोगेण व पेल्लिओ मुसियदेहो ।
सव्वमवि जहाजाणियं, कयाइ न तरिज्ज काउं जे ॥ १ ॥
सो वि य नियथपरक्कम-ववसायधिइबलं अगूहंतो ।
मोत्तूण कूरचरियं, जयई जइ तो अवस्स जई ॥ २ ॥
निम्मम निरहंकारा, उज्जुत्ता नाणदंसणचरित्तम्मि ।
एगक्खेत्ते वि ठिया, खवेंति पोराणयं कम्मं ॥ ३ ॥
जियकोहमाणमाया, जियलोभपरीसहा य जे धीरा ।
बूढावासेऽवि ठिया, खवेंति पोराणयं कम्मं ॥ ४ ॥

पंचसमिया तिगुत्ता, उज्जुत्ता संजमे तवे चरणे ।
वाससयं पि वसंता, मुणिणो आराहगा भणिया ॥ ५ ॥"
नित्यवासविषये संगमस्थविरचरितं तु २०७१ पृष्ठे द्रष्टव्यम् ।
ननु जिनवचनश्रद्धावतो निर्वाणं श्रूयते, तत्किं नाम निर्वाणम्।

तथाहि-

" मन्नसि किं दीवस्स व, नासो निव्वाणमस्स जीवस्स ।
दुक्खक्खयाइरूवा, किं होज्ज व से सओऽवत्था ॥१९७५॥ "

तद् यथा सौगताः प्राऽऽहुः-

" दीवो यथा निर्वृतिमभ्युपेतो,
नैवावनिं गच्छति नान्तरिक्षम् ।
दिशं न काञ्चिद् विदिशं न काञ्चित्,
स्नेहक्षयात् केवलमेति शान्तिम् ॥ १ ॥
जीवस्तथा निर्वृतिमभ्युपेतो,
नैवावनिं गच्छति नान्तरिक्षम् ।
दिशं न काञ्चिद् विदिशं न काञ्चिद्,
क्लेशक्षयात् केवलमेति शान्तिम् ॥ २ ॥ "

किं वा यथा जैनाः प्राऽऽहुस्तथा निर्वाणं भवेत् ? । तथाहि-रागद्वेषमदमोहजन्मजरारोगाऽऽदिदुःखक्षयरूपा विशिष्टा काचिदवस्था विद्यमानस्य जीवस्य । उक्तं च-" केवलसंविद्दर्शन-रूपाः सर्वार्तिदुःखपरिमुक्ताः । मोदन्ते मुक्तिगताः, जीवाः क्षीणान्तरारिगणाः ॥ १ ॥" अथवा-क्षय्येवानादित्वात् कर्मजीवयोः संयोगस्यावियोगात् संसाराभाव एव न भवेत् । जीवाऽऽकाशयोरिव ययोरनादिः संयोगः तयोर्वियोगो न भवति, अनादिश्च जीवकर्मणोः संयोगः, ततो वियोगाऽनुपपत्तिः, ततश्च न संसाराभावः, तथा च सति कुतो मोक्षः ? ।

अथात्रैव प्रतिविधीयते-नायमेकान्तो यदनादिसंयोगो न भिद्यते यतः काञ्चनधातुपाषाणयोरनादिरपि संयोगोऽन्यादिसंपर्केण विघटत एव, तद्वद् जीवकर्मसंयोगस्यापि सम्यग् ज्ञानक्रियाभ्यां वियोगो मस्सिडकवत् प्रतिपद्यताम् । ननु यथा कर्मणो नाशे संसारो नश्यति, तथा तन्नाशे जीवत्वस्यापि नाशाद् मोक्षाभावो भविष्यति ?। एतदप्यसारम् । यतः कर्मजनितः संसारः, तन्नाशे संसारस्य नाशो युज्यत एव, कारणाऽभावे कार्याऽभावस्य सुप्रतीतत्वात् । जीवत्वं पुनरनादिकालप्रवृत्तत्वात् कर्मकृतं न भवति, अतस्तन्नाशे जीवस्य न कश्चिद् नाशः, कारणव्यापकयोरेव कार्यव्याप्यनिवर्तकत्वात्, कर्म तु जीवस्य न कारणं, नापि व्यापकम् । इतश्च जीवो न नश्यति-"न विगारानुवलंभा-दागासं पि व विणासधम्मो सो । इह नासिणो विगारो,दीसइ कुंभस्स वाऽवयवा ॥१९८१॥ कालंतरनासी वा, घडो व्व कयगाइओ मई होज्जा । नो पक्खसाभावो, भुदि तज्झम्मा वि जे निच्चो ॥१९८२॥ " इति । अथ यदुक्तम्-दीपो यथा निर्वृतिमित्यादि । तत्रोत्तरम्-"न य सव्वहा विणासो-ऽणलस्स परिणामओ पयस्सेव । कुंभस्स कवालाण व, तहा विगारोवलंभाओ ॥१९८७॥ " ततः-"जह दीवो निव्वाणो, परिणामंतरमिओ तहा जीवो । भणइ परिनिव्वाणो, पत्तोऽणावाहपरिणामं ॥१९९१॥ " किञ्च-" मुत्तस्स परं सोक्खं, णाणाणावाहओ जहा मुणिणो । तद्धम्मा पुण विरहा-दावरणाऽऽवाहहेऊणं ॥१९९२॥" इत्यादि निर्वाणविषयविस्तरः 'णिव्वाण' शब्दे निर्वाणजिज्ञासुभिर्निपुणं निभालनीयः । तच्च निर्वाणं तपोऽन्तरा न लभ्यते इति प्रसङ्गतः तपःस्वरूपमुच्यते-

"ज्ञानमेव बुधाः प्राहुः, कर्मणां तापनात् तपः । तदाभ्यन्तरमेवेष्टं, बाह्यं तदुपबृंहकम् ॥ १ ॥ तदेव हि तपः कार्यं, दुर्ध्यानं यत्र नो भवेत् । येन योगा न हीयन्ते,क्षीयन्ते नेन्द्रियाणि वा ॥ २॥ मूलोत्तरगुणश्रेणि-प्राज्यसाम्राज्यसिद्धये । बाह्यमाभ्यन्तरं चेत्थं,तपः कुर्याद् महामुनिः ॥३॥" "एसो बारसभेओ, सुत्तब्भिवद्धो तवो मुणेयव्वो । एय विसेसो उ इमो, पइसमयोऽणेगभेउ त्ति ॥४॥ तित्थयरनिग्गमाई,सव्वगुणपसाहणं तवो होइ । भव्वाण हिओ नियमा,विसेसओ पढमठाणीणं॥५॥जम्हा एसो सुद्धो, अणियाणो होइ भावियमईणं । तम्हा करेह सम्मं, जह विरहो होइ कम्माणं ॥४४॥" "सो हु तवो कायव्वो,जेण मणो ऽमंगलं न चिंतेइ । जेण न इंदियहाणी, जेण य जोगा न हायंति ॥ १४ ॥" " तपश्च त्रिविधं ज्ञेय-मफलाऽऽकाङ्क्षिभिर्नरैः । श्रद्धया परया तप्तं, सात्विकं तप उच्यते ॥१॥ सत्कारमानपूजार्थं, तपो दम्भेन चैव यत् । क्रियते तदिह प्रोक्तं, राजसं चलमध्रुवम् ॥२॥ मूढग्रहेण यच्चाऽऽत्म-पीडया क्रियते तपः । परस्योच्छेदनार्थं वा, तत्तामसमुदाहृतम् ॥ ३ ॥ " इति ।

अनेकजन्माभ्यस्ततपःप्रभावात् तीर्थंकरनामकर्मणो संवेद्य निर्वाणमधिरोहति जीव इति सिद्धान्तमनुस्मृत्य तीर्थंकरविषयमेवावतारयामः । तथाहि-तीर्थंकरणशीलास्तीर्थंकराः, अचिन्त्यप्रभावमहापुण्यसंज्ञिततन्नामकर्मविपाकतः, तस्यान्यथा वेदनायोगात् । तत्र येनेह जीवा जन्मजरामरणसलिलं मिथ्यादर्शनाविरतिगम्भीरं महाभीषणकषायपातालं सुदुर्लङ्घ्यमोहाऽऽवर्तरौद्रं विचित्रदुःखौघदुष्प्रापदं रागद्वेषपवनविक्षोभितं संयोगवियोगवीचीयुक्तं प्रबलमनोरथवेलाऽऽकुलं सुदीर्घं संसारसागरं तरन्ति तत्तीर्थमिति । एतच्च यथाऽवस्थितसकलजीवाऽऽदिपदार्थप्ररूपकम् अत्यन्तानवद्यान्याविज्ञातचरणकरणक्रियाऽऽधारं त्रैलोक्यगतशुद्धधर्मसंपद्युक्तमहासत्त्वाऽऽश्रयम् अचिन्त्यशक्तिसमन्विताविसंवादिपरमबोहित्थकल्पं प्रवचनं, निराधारस्य प्रवचनस्यासंभवात् सङ्घो वा ततश्चैतदुक्तं भवति-घातिकर्मक्षये ज्ञानकैवल्ययोगात् तीर्थंकरनामकर्मोदयस्तत्स्वभावतया आदित्याऽऽदिप्रकाशनिदर्शनतः शास्त्रार्थप्रणयनाद् मुक्तकैवल्ये तदसंभवेनाऽऽगमानुपपत्तेः, भव्यजनधर्मप्रवर्तकत्वेन परम्पराऽनुग्रहकरास्तीर्थंकरा इति तीर्थंकरत्वसिद्धिः । किञ्च-सर्वेऽपि निरुपमधृतिसंहननाश्छद्मस्थावस्थायां चतुर्ज्ञाना अतिशयसत्त्वसंपन्ना अच्छिद्रपाणिपात्रा जितसमस्तपरीषहाश्च यस्मात्तेन वस्त्राभावेऽपि संयमविराधनाऽऽदीन् दोषान् न प्राप्नुवन्ति । तथा च सवस्त्रा एव साधवश्चिरं स्थास्यन्ति इत्यस्यार्थस्य ज्ञापनार्थं गृहीतैकवस्त्राः सर्वेऽपि तीर्थंकृतोऽभिनिष्क्रामन्ति, तस्मिंश्च वस्त्रे क्वापि पतिते वस्त्ररहितास्ते भवन्ति, न पुनः सर्वदा । * ननु सर्वोऽपि प्रेक्षावान् फलार्थी प्रवर्तते, अन्यथा प्रेक्षावत्ताक्षतिप्रसङ्गः । ततोऽसौ तीर्थं कुर्वन्नवश्यं फलमपेक्षते, फलं चापेक्षमाणोऽस्मादृश इव व्यक्तरागवीतरागः । तदयुक्तम् । यतस्तीर्थंकरः स एव भवति, यस्तीर्थंकरनामकर्मोदयसमन्वितः । न हि सर्वेऽपि भगवन्तो वीतरागास्तीर्थप्रवर्तनाय प्रवर्तन्ते, तीर्थंकरनामकर्मैव तीर्थप्रवर्तनफलम् । ततो भगवान् वीतरागोऽपि तीर्थंकरनामकर्मोदयतस्तीर्थप्रवर्तनस्वभावः सवितेव प्रकाशमुपकार्योपकारानपेक्षं तीर्थं प्रवर्तयतीति न कश्चिद् दोषः । उक्तं च-

" तीर्थप्रवर्तनफलं, यत्प्रोक्तं कर्म तीर्थंकरनाम ।

तस्योदयात् कृतार्थो-ऽप्यर्हंस्तीर्थं प्रवर्तयति ॥ १ ॥
तत्स्वाभाव्यादेव, प्रकाशयति भास्करो यथा लोकम् ।
तीर्थप्रवर्तनाय, प्रवर्तते तीर्थंकर एवम् ॥ २ ॥ "

ननु तीर्थप्रवर्तनं नाम प्रवचनार्थप्रतिपादनं, प्रवचनार्थं चेद् भगवान् प्रतिपादयति,तर्हि नियमादसर्वज्ञः,सर्वस्यापि वक्तुरसर्वज्ञतयोपलम्भात् । तथा चात्र प्रयोगः-विवक्षितः पुरुषः सर्वज्ञो न भवति,वक्तृत्वात्, रथ्यापुरुषवदिति । तदसत् । सन्दिग्धव्यतिरेकतया हेतोरनैकान्तिकत्वात् । तथाहि-वचनं न सर्ववेदनेन सह विरुद्धयते,अतीन्द्रियेण सह विरोधानिश्चयात् । द्विविधो हि विरोधः-परस्परपरिहारलक्षणः, सहानवस्थानलक्षणश्च । तत्र परस्परपरिहारलक्षणः तादात्म्यप्रतिषेधे, यथा घटपटयोः । न खलु घटः पटाऽऽत्मको भवति, नापि पटो घटाऽऽत्मको भवति, "न सत्ता सत्ताऽन्तरमुपैति ।" इति वचनात्, ततो नानयोः परस्परपरिहारलक्षणो विरोधः । एवं सर्वेषामपि वस्तूनां भावनीयम् । अन्यथा वस्तुसाङ्कर्यप्रसक्तेः । यस्तु सहानवस्थानलक्षणो विरोधः, स परस्परबाध्यबाधकभावसिद्धौ सिद्ध्यति, नान्यथा, यथा वह्निशीतयोः । तथाहि-विवक्षिते प्रदेशे मन्दमन्दमभिज्वलनवति वह्नौ शीतस्यापि मन्दमन्दभावः । यदा पुनरत्यर्थज्वालामतिविमुञ्चति वह्निस्तदा सर्वथा शीतस्याभाव इति भवत्यनयोर्विरोधः। उक्तं च-"अविकलकारणमेकं, तदपरभावे यदाऽऽभवन्न भवेत् । भवति विरोधः स तयोः, शीतहुताशाऽऽत्मनोर्दृष्टः ॥१॥" न चैवं वचनसंवेदयोः परस्परं बाध्यबाधकभावः,न हि संवेदने तारतम्येनोत्कर्षमासादयति वचखिताया: तारतम्येनापकर्ष उपलभ्यते, तत्कथमनयोः सहानवस्थानलक्षणो विरोधः, अथ सर्ववेदी वक्ता नोपलब्ध इति विरोध उद्घुष्यते । तदयुक्तम् । अत्यन्तपरोक्षो हि भगवान्, ततः कथमनुपलम्भमात्रेण तस्याभावनिश्चयः, अदृश्यविषयस्यानुपलम्भस्याभावनिश्चायकत्वायोगात् । सर्वं चैतत् तीर्थंकरसंबन्धिविषयाः 'तित्थयर' शब्दे २२४६ पृष्ठतः २३१२ पृष्ठपर्यन्तं विद्वद्भिर्विलोकनीयाः ।

अथ द्रव्यस्तव-भावस्तवयोः को विशेषः,कुत्र च फलाऽधिक्यमित्यत्राऽऽह-ननु वित्तपरित्यागाऽऽदिना द्रव्यस्तव एव ज्यायानिति अल्पबुद्धीनां शङ्कासंभवः, तत्राऽऽह-" दव्वत्थओ य भाव-त्थओ य दव्वत्थओ बहुगुणो त्ति । बुद्धि सिया अनिउणमइ-वयणमिणं छज्जीवहियं॥४॥ छज्जीवकायसंजमो, दव्वथए सो विरुज्झई कसिणो । तो कसिणसंजमविऊ, पुप्फाईयं न इच्छंति ॥५॥" यद्येवं किमयं द्रव्यस्तव एकान्ततो हेय एव वर्तते, आहोस्विदुपादेयोऽप्यस्ति ?। उच्यते-साधूनां हेय एव, श्रावकाणामुपादेयोऽपि । तथाहि-"अकसिणपवत्तयाणं, विरयाविरयाण एस खलु जुत्तो । संसारपयणुकरणे, दव्वत्थए कूवदिट्ठंतो ॥६॥" आह-यः प्रकृत्येवासुन्दरः स कथं श्रावकाणामपि युक्तः ? । उच्यते-कूपदृष्टान्तोऽत्र बोद्धव्यः । यथा कोऽपि तृषाऽपनोदार्थं कूपं खनति । यद्यपि पूर्वं तस्य मृत्तिकाकर्दमाऽऽदिना शरीरं मलिनीभवति, तथाऽपि तदुद्गतेन पानीयाऽऽदिना प्रक्षाल्यते गात्रं, ततः स अन्ये च जनाः सुखभाजना भवन्ति । एवं द्रव्यस्तवेऽपि यद्यप्यसंयमस्तथाऽपि तत एव सा परिणामवृद्धिर्भवति, याऽसंयमवर्जं सर्वं निरवशेषं क्षपयति । किञ्च-"अप्पविरियस्स पढमो, सहकारिविसेसभूओ सेओ । इयरस्स वज्झभावा,इयरो च्चिय एस परमत्थो ॥२॥ दव्वत्थयं पि काउं, ण तरइ जो अप्पवीरियत्तेणं । परिसुद्धं भावथयं, काही सो संभवो एस ॥ ३ ॥ " एतदेव स्पष्टयति-" जो वज्झभावएणं, णो इत्तरियं पि णिग्गहं कुणइ । इह अप्पणो सयासे, सव्वच्चाएण कह कुज्जा ? ॥ ५ ॥ " किञ्च-आरम्भत्यागेन ज्ञानाऽऽदिगुणेषु वर्धमानेषु द्रव्यस्तवहानिरपि न भवति कर्तुः दोषाय । विवेचनमस्य ' थय ' शब्दे २३८५ पृष्ठपर्यन्तं द्रष्टव्यं प्रज्ञावद्भिः ।

'थविरकप्प' शब्दे २३८६ पृष्ठे स्थविरकल्पविचारः । तथाहि-द्विविधा भवन्ति साधवः । गच्छप्रतिबद्धाः, गच्छबहिर्गताश्च । पुनरेकैकशो द्विधा जिनकल्पिकाः, स्थविरकल्पिकाश्च । एतेषां स्थविरकल्पिकजिनकल्पिकानां परस्परमयं विशेषः । तथाहि-

" थेराणं नाणत्तं, अतरंतं अप्पिणंति गच्छस्स ।
गच्छे निरवज्जेणं, करेंति सव्वं पि पडिकम्मं ॥ १ ॥
एक्केक्कपडिग्गहगा, सप्पाउरणा हवंति थेरा उ ।
जेसिं उण जिनकप्पे, न य तेसिं वत्थपायाणि ॥ २ ॥
निप्पडिकम्मसरीरा, अवि अच्छिमलं पि नेव अवणेंति ।
विसहंति जिणा रोगं, कारेंति कयाइ न तेगिच्छं ॥ ३ ॥
संजमकरणुज्जोया, णिप्फातग णाणदंसणचरित्ते ।
दीहाउ वुड्ढवासे, वसहीदोसेहि य विमुक्का ॥ ४ ॥
मोत्तुं जिणकप्पठिइं, जा मेरा एस वन्निया हेट्ठा ।
एसा उ दुपदजुत्ता, होति ठिती थेरकप्पस्स ॥ ५ ॥ " इति ।

ननु द्रव्यस्तवो गृहस्थैः कर्तव्य इति पूर्वं यदुक्तं तत्र " वाक्यार्थज्ञाने पदार्थज्ञानस्य कारणता " इति न्यायाद् द्रव्यस्वरूपनिर्वचनं कर्तव्यम् । उच्यते-" गुणपर्याययोः स्थान-मेकरूपं सदाऽपि यत् । स्वजात्या द्रव्यमाख्यातं, मध्ये भेदो न तस्य वै ॥ १ ॥ " व्याख्या चैषा-गुणपर्याययोर्भाजनं कालत्रये एकरूपं द्रव्यं स्वजात्या निजत्वे एकस्वरूपं भवति, परं पर्यायवद् न परावृत्तिं लभते तद् द्रव्यमुच्यते । यथा ज्ञानाऽऽदिगुणपर्यायभाजनं जीवद्रव्यम्, रूपाऽऽदिगुणपर्यायभाजनं पुद्गलद्रव्यम्, सर्वरक्तत्वाऽऽदिघटत्वाऽऽदिगुणपर्यायभाजनं मृद्द्रव्यम् । यथा वा तन्तवः पटापेक्षया द्रव्यं, पुनस्तन्तवोऽवयवापेक्षया पर्यायाः । कथम् ? , यतः पटविचाले पटावस्थाविचाले च तन्तूनां भेदो नास्ति, तन्तवयवावस्थायामन्वयत्वरूपो भेदोऽस्ति, तस्मात् पुद्गलस्कन्धमध्ये द्रव्यपर्यायत्वमापेक्षिकं बोध्यम् । अथ कश्चिदेवं कथयिष्यति-द्रव्यत्वं तु स्वाभाविकं न जातम्, आपेक्षिकं जातं, तदा तं समाधत्ते-यत् सकलवस्तूनां व्यवहारापेक्षयैव जायते, न तु स्वभावेनैव, तस्मादत्र न कश्चिद् दोषः । ये च समवायिकारणप्रमुखैर्द्रव्यलक्षणं मन्वते, तेषामपि अपेक्षामनुसर्तव्यैवेति । ' गुणपर्यायवद् द्रव्यम् । ' इति तत्त्वार्थे ।

" सहभावी गुणो धर्मः, पर्यायः क्रमभाव्यथ ।
भिन्ना अभिन्नास्त्रिविधाः, त्रिलक्षणयुता इमे ॥ १ ॥
मुक्ताभ्यः श्वेतताऽऽदिभ्यो, मुक्तादाम यथा पृथक् ।
गुणपर्याययोर्यक्षे-र्द्रव्यशक्तिस्तथाऽऽश्रिता ॥ २ ॥ "

किञ्च-' गुणाऽऽश्रयो द्रव्यम् । ' यदुक्तम्-" गुणाणमासओ दव्वं, एगदव्वस्सिया गुणा । लक्खणं पज्जवाणं तु, दुहओ अस्सिया भवे ॥६॥" तथाहि-गुणानामाश्रयो,यत्रस्थास्ते उत्पद्यन्ते, उत्पद्य चावतिष्ठन्ते, प्रलीयन्ते च तद् द्रव्यम् । अनेन रूपाऽऽदय एव वस्तु, न तद्व्यतिरिक्तमन्यदिति तात्पर्यार्थः

तमतमपास्तम् । तथाहि-यदुत्पादविनाशयोर्न यस्योत्पादविनाशौ, न तत्ततोऽभिन्नम्, यथा घैटान्पटः, न भवतः पर्यायोत्पादविनाशयोर्द्रव्यस्योत्पादविनाशौ । न चायमसिद्धो हेतुः, स्थासकोशकुशूलाऽऽद्यवस्थासु मृदादिद्रव्यस्याऽऽनुगामित्वेन दर्शनात् । न चास्य मिथ्यात्वं, कदाचिदन्यथादर्शनासिद्धेः । उक्तं च-" यो ह्यन्यरूपसंवेद्यः, संख्येयेतान्यथा पुनः । स मिथ्या न तु तेनैव, यो नित्यमवगम्यते ॥ १ ॥ ' तथैकस्मिन् स्वाऽऽधारभूते द्रव्ये आश्रिता गुणाः रूपाऽऽदयः । एतेन च ये द्रव्यमेवेच्छन्ति, तद्व्यतिरिक्तांश्च रूपाऽऽदीन् अविद्योपदर्शितानाहुः, तन्मतनिषेधः कृतः । संविन्निष्ठा हि विषयव्यवस्थितयः । न च रूपाऽऽद्युत्कलितरूपं कदाचित् केनचिद् द्रव्यमवगतम्, अवगम्यते वा, अतस्तद्विवर्त एव रूपाऽऽदयो, न तु तात्त्विकाः केचन तद्भेदेन सन्ति । नन्वेवं रूपाऽऽदिविवर्तो द्रव्यमित्यपि किं न कल्पते ?, अथ तथैव प्रतीतिः,एवं सति प्रतीतिरुभयत्र साधारणेत्युभयमुभयाऽऽत्मकमस्तु* । अनेन च य एवमाहुः-यदाद्यन्तयोरसत्, मध्येऽपि तत्तथैव,यथा मरीचिकाऽऽदौ जलाऽऽदि । न सन्ति च कुशूलकपालाऽऽद्यवस्थयोर्घटाऽऽदिपर्यायाः, ततो द्रव्यमेवाऽऽदिमध्यान्तेषु सत्, पर्यायाः पुनरसन्तः, यैराकाशकेशाऽऽदिभिः सदृशा अपि भ्रान्तैः सत्यतया लक्ष्यन्ते । यथोक्तम्- " आदावन्ते च यन्नास्ति, मध्येऽपि हि न तत् तथा । वितथैः सदृशाः सन्तोऽ-वितथा इव लक्षिताः । ॥ १ ॥ " ते अपाकृताः । तथाहि-आद्यन्तयोरसत्त्वेन मध्येऽप्यसत्त्वं साधयतामिदमाकूतम्-यत् क्वचिदसत् तत् सर्वस्मिन्नसत् इति, ततश्च मृद्द्रव्यैः अब्द्रव्यस्यासत्त्वात् सर्वस्मिन्नप्यसत्त्वप्रसङ्गः । अथेष्टमेवैतत्, सत्तामात्रस्यैव तत्त्वत इष्टत्वात् । उक्तं हि-' सर्वमेकं सदविशेषात् । ' नन्वेवमभावे भावाभावाद् भावस्यापि सर्वत्राभावप्रसङ्गः, तस्माद् बाधकप्रत्ययोदय एवासत्त्वेऽपि नियन्धनमिति न क्वचिदसत्त्वं तस्यावश्यंभावः, ततो द्रव्यवत् पर्यायाणामप्यबाधितबोधविषयत्वे सत्यमस्तु, तथा गुणेष्वपि नवपुराणाऽऽदिपर्यायाः प्रत्यक्षप्रतीता एकं कियत्कालभाविनः, प्रतिसमयभाविनस्तु पुराणत्वाऽऽद्यन्यथाऽनुपपत्तेरनुमानतोऽवसीयन्ते । ततश्च द्रव्यगुणपर्यायाऽऽत्मकमेकं सबलमणिवत् चित्रपटाऽऽदिवद् वा वस्त्विति स्थितम् । " दव्वं पज्जवविजुयं, दव्वविउत्ता य पज्जवा नऽत्थि । उप्पायट्ठिइभंगा, हंदि दवियलक्खणं एयं ॥ १२ ॥ " अथ द्रव्यभेदा इमे-" धम्मो अधम्मो आगासं, कालो पुग्गल-जंतवो । एस लोगो त्ति पन्नत्तो, जिणेहिं वरदंसिहिं ॥ ७ ॥ " अनन्तरोक्तद्रव्यषट्काऽऽत्मकत्वं लोकस्य । उक्तं हि-" धर्माऽऽदीनां वृत्ति-र्द्रव्याणां भवति यत्र तत् क्षेत्रम् । तैर्द्रव्यैः सह लोकः, तद्विपरीतं ह्यलोकाऽऽख्यम् ॥ १ ॥ " किञ्च-एतेऽपि भेदवन्तः । तथा चाऽऽह-"धम्मो अधम्मो आगासं एगं दव्वं वियाहियं । अणंताणि उ दव्वाणि, कालो पोग्गल-जंतवो ॥८॥ " वैशेषिकरीत्या द्रव्यप्रतिपादनं, तत्खण्डनं च ' दव्व ' शब्दे २४६५ पृष्ठे द्रष्टव्यम् ।

जिनवचनादेवाभयदानाऽऽदीनां महाफलदत्वमुक्तमस्ति । तथाहि-

" दानेन महाभोगो, देहिनां सुरगतिश्च शीलेन ।
भावनया च विमुक्तिः, तपसा सर्वाणि सिद्ध्यन्ति ॥ १ ॥ "

' दाणं च तत्थ तिविहं, नाणपयाणं च अभयदाणं च ।
धम्मोवग्गहदाणं, च नाणदाणं इमं तत्थ ॥ ५२ ॥ '
" दिंतो य नाणदाणं, भुवणे जिणसासणं समुद्धरइ ।
सिरिपुंडरीयगणहर, इव पावइ परमपयमतुलं ॥ ६५ ॥
ता दायव्वं नाणं, अणुसरियव्वा सुनाणिणो मुणिणो ।
नाणस्स सया भत्ती, कायव्वा कुसलकामेहिं ॥ ६६ ॥
वीयं तु अभयदाणं, तं इह अभयेण सयलजीवाणं ।
अभउ त्ति धम्ममूलं, दयाइधम्मो पसिद्धमिणं ॥ ६७ ॥
इक्कं चिअ अभयपया-णमित्थ दाऊण सव्वसत्ताणं ।
वज्जाऽऽउह व्व कमसो, सिज्झंति पहीणजरमरणा ॥६८॥ "
" धम्मोवग्गहदाणं, तइयं पुण असणवसणमाईणि ।
आरंभनियत्ताणं, साहूणं इंति देयाणि ॥ १०० ॥
तित्थयरचक्कवट्टी-बलदेवा वासुदेवमंडलिया ।
जायंति जगब्भहिया, सुपत्तदाणप्पभावेण ॥ १०१ ॥
जह भयवं रिसहजिणो, घयदाणबलेण सयलजयनाहो ।
जाओ जह भरहवई, भरहो मुणिभत्तदाणेण ॥ १०२ ॥
दंसणमित्तेण-वि मुणि-वराण नासेइ दिणकयं पावं ।
जं देइ ताण दाणं, तेण जए किं न सुविढत्तं ॥ १०३ ॥ "
"न तवो सुट्ठु गिहीणं, विसयाऽऽसत्ताण होइ न हु सीलं ।
सारंभाण न भावो, तो साहीणं सया दाणं ॥ १०६ ॥ "
" ता तेसिं दायव्वं, सुद्धं दाणं गिहीहिँ भत्तीए ।
अणुकंपोचियदाणं, दायव्वं नियसत्तीए ॥ १०५ ॥ "

अनूदितं चैतत् श्रीहेमसूरिभिः-

" प्रायः शुद्धैस्त्रिविधविधिना प्रासुकैरेषणीयैः,
कल्पप्रायैः स्वयमुपहितैः वस्तुभिः पानकाऽऽद्यैः ।
काले प्राप्तान् सदनमसमश्रद्धया साधुवर्गान्,
धन्याः केचित् परमविहिताः, हन्त संमानयन्ति ॥ १ ॥ "

तथा च दाने मनोहारिणी कृतपुण्यकथा २४६१ पृष्ठे विलोकनीया । दानं प्रति विधिनिषेधविचारौ २४६६ पृष्ठे विद्वद्भिरवधार्यौ । जिनवचनप्रसङ्गात् साम्प्रतं ज्ञानत्रयभावाभावयोर्दीक्षाऽधिकारित्वानधिकारित्वप्रतिपादनायाऽऽह-"अस्मिन् सति दीक्षायाः, अधिकारी तत्त्वतो भवति सत्त्वः । इतरस्य पुनर्दीक्षा, वसन्तनृपसन्निभा ज्ञेया ॥ १ ॥" इत्यादि दीक्षासम्बन्धिनं सर्वं विषयं ' दिक्खा ' शब्दे २५०६ पृष्ठतः २५०८ पृष्ठपर्यन्तं विलक्षणविचक्षणाः पश्यन्तु ।

दीक्षाया दुःखनिवारकत्वेन फलदत्वमुक्तम् । दुःखस्वरूपं तु जिनवचने-"दुःखं स्त्रीकुक्षिमध्ये प्रथममिह भवेद् गर्भवासो नराणां, बालत्वे चाऽपि दुःखं मललुलिततनुस्त्रीपयःपानमिश्रम् । तारुण्ये चापि दुःखं भवति विरहजं वृद्धभावोऽप्यसारः, संसारे रे मनुष्याः !, वदत यदि सुखं स्वल्पमप्यस्ति किञ्चित् ? ॥१॥" तथाहि-" जाणंति अणुहवंति य, अणुजम्मजरामरणसंभवे दुक्खे । न य विसएसु विरज्जंति, दुग्गइगमणपत्थए जीवे ॥१॥ " " दुक्खमेवमवीसामं, सव्वेसिं जगजंतुणो । एगं समयं तसभावे, जं सम्मं अहियासियं ॥ १ ॥ " " सर्वं परवशं दुःखं, सर्वमात्मवशं सुखम् । एतदुक्तं समासेन, लक्षणं सुखदुःखयोः ॥ १ ॥ " पुण्यापेक्षमपि ह्येवं, सुखं परवशं स्थितम् । ततश्च दुःखमेवैतद्, ध्यानजं तात्त्विकं सुखम् ॥ १ ॥" तथा च " सूईहिं अग्गिवन्नाहिं, संभिन्नस्स निरंतरं । जावइयं गोयमा ! दुक्खं, गब्भे अट्ठगुणं तओ ॥ १ ॥

गब्भाओ निप्पडंतस्स, जोणिजंतनिपीलणे । कोटीगुणं तयं दुक्खं, कोडाकोडीगुणं पि वा ॥ २ ॥ जायमाणाए जं दुक्खं, मरमाणाए जंतुणो । तेण दुक्खविवागेण, जाइं नसरंति अप्पणो ॥ ३ ॥ " तथाच दुःखवर्णकः-"कालं गमेंति दुक्खेहिं, मणुया पुन्नेहि उज्झिया । दुक्खं मणुयजाईणं, गोयम ! जं तं निबोधत ॥१॥ जमणुसमयमणुभवंताण, सयहा उव्वेइयाण वि । निव्विसाणं पि दुक्खेहिं, वेरग्गं न तहा भवे ॥२॥" अच्छिनिमीलणमित्तं, नत्थि सुहं दुक्खमेव अणुबद्धं । नरए नेरइयाणं, अहोनिसं पच्चमाणाणं ॥ १ ॥ जं निरए नेरइया, दुक्खं पावंति गोयमा ! तिक्खं । तं पुण निगोयमज्झे, अणंतगुणियं मुणेयव्वं ॥ १ ॥ " इत्यादि सर्वं ' दुक्ख ' शब्दे विवृतम् ।

जिनवचनाऽश्रद्दधानस्य जमालेरिव ' दोकिरिय ' शब्दे आर्यगङ्गस्य चरितम् । तथाहि-उल्लुकातीरं नाम नगरम्, तत्र च महागिरिशिष्यो धनगुप्तो नाम, तस्यापि शिष्य आर्यगङ्गो नामाऽऽचार्यः । अयं च नद्याः पूर्वतटे, तदाचार्यास्त्वपरतटे, ततोऽन्यदा शरत्समये सूरिवन्दनार्थं गच्छन् गङ्गो नदीमुत्तरति, स च खल्वाटः । ततस्तस्योपरिष्टाद् उष्णेन दह्यते खल्ली, अधस्तात्तु नद्याः शीतलजलेन शैत्यमुत्पद्यते । ततोऽत्रान्तरे कथमपि मिथ्यात्वमोहनीयोदयादसौ चिन्तितवान्-अहो सिद्धान्ते किल युगपत् क्रियाद्वयानुभवो निषिद्धः, अहं त्वेकस्मिन् एव समये शैत्यमौष्ण्यं च वेदयामि, अनुभवविरुद्धत्वान्नेदमागमोक्तं शोभनमाभातीति विचिन्त्य गुरुभ्यो निवेदयामास । ततस्तैर्वक्ष्यमाणयुक्तिभिः प्रज्ञापितोऽसौ यदा च स्वाग्रहग्रस्तबुद्धित्वाद् न किञ्चित् प्रतिपद्यते, तदा उद्घाट्य बाह्यः कृतो विहरन् राजगृहनगरमागतः । तत्र च महातपस्तीरप्रभवनाम्नि प्रश्रवणे मणिनागनाम्नो नागस्य चैत्यमस्ति । तत्समीपे च स्थितो गङ्गः पर्षत्पुरस्सरं युगपत् क्रियाद्वयवेदनं प्ररूपयति स्म । तच्च श्रुत्वा प्रकुपितो मणिनागः तमवादीत्-अरे दुष्ट शिक्षक ! किमेवं प्रज्ञापयसि ? । यतोऽत्रैव प्रदेशे समवसृतेन श्रीमद्वर्धमानस्वामिना एकस्मिन् समये एकस्या एव क्रियाया वेदनं प्ररूपितम् । तच्चेह मयाऽपि श्रुतम् । तत् किं ततोऽपि लघुतरः प्ररूपको भवान्, येनैवं युगपत् क्रियाद्वयवेदनं प्ररूपयसि ? । तत् परित्यज चैतां कुटप्ररूपणाम्, अन्यथा नाशयिष्यामि त्वाम् । इत्यादि तदुदितभयवाक्यैर्युक्तिवचनैश्च प्रबुद्धोऽसौ मिथ्यादुष्कृतं दत्त्वा गुरुमूलं गत्वा प्रतिक्रान्त इति । ' दोकिरिय ' शब्दे २६३५ पृष्ठत आरभ्य विलोकनीयोऽयं विषय इति विस्तरभयाद् विरम्यतेऽस्मिन् विषयेऽस्माभिः ।

ननु जिनवचनश्रवणं जिनाऽऽज्ञापालनं च जैनानां सम्यक्त्वनां परमो धर्म इति धर्मपदार्थसार्थनिरूपणा निरूपयितव्येति तामेवाऽऽचष्टे द्विधा हि धर्मशब्दस्य प्रवृत्तिर्लोके विलोक्यते । तथाहि-सर्वत्र वस्तुनि यद् वस्तुनः स्वभावः स धर्म उच्यते । यथा घटे घटत्वं, मनुष्ये मनुष्यत्वमित्यादि । तथा चोक्तम्-"धर्माः सहभाविनः, पर्यायाः क्रमभाविनः । " 'धम्मो त्ति वा सभावो त्ति वा एगट्ठा ।' दुर्गतौ प्रपतन्तं जीवं धारयतीति धर्मः, स च क्लेशनिवृत्तिनिर्वृतिप्राप्तिसाधनः स्वर्गमोक्षाऽऽदिप्रापको मनुष्यैरेतिकर्तव्यतारूपो हृदयसंवेद्यो मातापितृसुहृत्संवेद्यः संसारगर्ताऽऽपदनिपतनप्रहाणप्रवणः परमपुनीतः कस्य चेतो नावस्कन्दति । तत्र शब्दप्रवृत्तिनिमित्तरूपस्य(गौणस्य)धर्मस्य धर्मिणा सहैकान्तेन भेदेऽभ्युपगम्यमाने धर्मिणो निःस्वभावताऽऽपत्तिः, स्वभावस्य धर्मत्वात् तस्य च ततोऽन्यत्वात्, स्वो भावः स्वभावः, तस्यैवाऽऽत्मीया सत्ता; न तु तदर्थान्तरं धर्मरूपं, ततो न निःस्वभावताऽऽपत्तिरिति चेत् । न । इत्थं स्वरूपसत्ताऽभ्युपगमे तदपरसत्तासामान्ययोगकल्पनाया वैयर्थ्यप्रसङ्गात् । अपि च-यद्येकान्तेन धर्मधर्मिणोर्भेदः ततो धर्मिणो ज्ञेयत्वाऽऽदिभिर्धर्मैरनभ्युपेधात् तस्य सर्वथाऽनवगमप्रसङ्गः, न ह्यज्ञेयस्वभावे ज्ञातुं शक्यते इति । तथा च सति तदभावप्रसङ्गः, कदाचिदप्यवगमाभावात्, तथाऽपि तत्सत्त्वाप्रगमेऽतिप्रसङ्गः, अन्यस्यापि यस्य कस्यचित् कदाचिदप्यनवगतषष्ठभूताऽऽदेर्भावाऽऽपत्तेः । एवं च धर्म्यभावे धर्माणामपि ज्ञेयत्वप्रमेयत्वाऽऽदीनां निराश्रयत्वादभावाऽऽपत्तिः । न हि धर्म्याधाररहिताः क्वापि धर्माः संभवन्ति, तथाऽनुपलब्धेः । अन्यच्च-परस्परमपि तेषां धर्माणामेकान्तेन भेदाभ्युपगमे सत्त्वाऽऽद्यननुवेधात् कथं भावाभ्युपगमः ?, तदन्यसत्त्वाऽऽदिधर्माभ्युपगमे च धर्मित्वप्रसक्तिरनवस्था च । तन्नैकान्ताभेदपक्षे धर्मधर्मिभावः । नाप्येकान्तभेदपक्षे, यतस्तस्मिन् अभ्युपगम्यमाने धर्ममात्रं वा स्यात्, धर्मिमात्रं वा ? । अन्यथैकान्तभेदानुपपत्तेः, अन्यतराभावाद् वा अन्यतरस्याप्यभावः, परस्परनान्तरीयकत्वात् । धर्मनान्तरीयको हि धर्मी, धर्मिनान्तरीयकाश्च धर्माः, ततः कथमेकाभावे पररूपावस्थानमिति ? । कल्पितो धर्मधर्मिभावस्ततो न दूषणमिति चेत्तर्हि वस्त्वभावप्रसङ्गः । न हि धर्मधर्मिस्वभावरहितं किञ्चिद् वस्त्वस्ति, धर्मधर्मिभावश्च कल्पित इति तदभावप्रसङ्गः । धर्मा एव कल्पिता न धर्मी, तत्कथमभावप्रसङ्ग इति चेत्, न । धर्माणां कल्पनामात्रभावत्वाभ्युपगमेन परमार्थतोऽसत्त्वाभ्युपगमात्, तदभावे च धर्मिणोऽप्यभावाऽऽपत्तिः । अथ तेषैकं स्वलक्षणं सकलसजातीयविजातीयव्यावृत्त्येकस्वभावाः धर्मिव्यावृत्तिनिबन्धनाश्च या व्यावृत्तयो भिन्ना इव विकल्पितास्ता धर्मास्ततो न कश्चिद् दोषः, तदप्यसङ्गतम् । एवं कल्पनायां वस्तुनोऽनेकान्तात्मकताप्रसङ्गः । अन्यथा सकलसजातीयविजातीयव्यावृत्त्ययोगात्, न हि येन निजस्वभावेन घटाद् व्यावर्तते पटस्तेनैव स्तम्भादपि, स्तम्भस्य घटरूपताप्रसङ्गः । तथाहि-घटाद् व्यावर्तते घटव्यावृत्तिस्वभावतया, स्तम्भादपि चेत् घटव्यावृत्तिस्वभावतयैव व्यावर्तते, तर्हि बलात् स्तम्भस्य घटरूपताप्रसक्तिः । अन्यथा-ततः तत्स्वभावतया व्यावृत्त्ययोगात् । तस्माद् यतो यतो व्यावर्तते तत्तद्व्यावृत्तिनिमित्तभूताः स्वभावा अवश्यमभ्युपगन्तव्याः, ते चानेकान्तेन धर्मिणो भिन्नाः, तदभावप्रसङ्गात् । तथा च तदवस्थ एव पूर्वोक्तो दोषः, तस्माद् भिन्ना अभिन्नाश्च । भेदाभेदोऽपि धर्मधर्मिणोः कथमिति चेत्, उच्यते-इह यद्यपि तादात्म्यतो धर्मिणा धर्माः सर्वेऽपि लोलीभावेन व्याप्ताः, तथाऽप्ययं धर्मी, एते धर्मा इति परस्परं भेदोऽप्यस्ति, अन्यथा तद्भावानुपपत्तिः । तथा च सति प्रतीतिबाधा, मिथो भेदेऽपि च विशिष्टान्योन्यानुवेधेन सर्वधर्माणां धर्मिणा व्याप्तत्वादभेदोऽप्यस्ति, अन्यथा तस्य धर्मा इति प्रसङ्गानुपपत्तेरित्यलमप्रासङ्गिकवस्तुस्वभावरूपधर्मनिरूपणेन ।

अथ प्रकृतं निर्वृतिप्राप्तिसाधनीभूतं धर्मं प्रस्तुमः-

" वत्थुसहावविरुद्धा, य-दणुट्ठानं यथोदितम् । मैत्र्यादिभावसंमिश्रं, तद्धर्म इति कीर्त्यते ॥ ३ ॥ " तथाहि-यदनुष्ठानमिहलोकपरलोकावपेक्ष्य हेयोपादेययोरर्थयोरिहैव शास्त्रे वक्ष्यमाणलक्षणा प्रवृत्तिरिति तद्धर्म इति कीर्त्यते । " धर्मश्चित्तप्रभवो, यतः क्रियाऽधिकरणाऽऽश्रयं कार्यम् । मलविगमेनैतत् खलु, पुष्ट्यादिमदेव विज्ञेयः ॥ २ ॥ रागाऽऽद्वेषो मलाः खल्वागमसदुपयोगतो विगम एषाम् । तदयं क्रियाल एव हि, पुष्टिश्चित्तस्य शुद्धस्य ॥ ३ ॥ पुष्टिः पुण्योपचयः, शुद्धिः पापक्षयेण निर्मलता । अनुबन्धनि द्वयेऽस्मिन्, क्रमेण मुक्तिः परा ज्ञेया ॥ ४ ॥ " अमुमेव धर्मं भेदतः प्रभेदतश्च वर्णयन्ति चतितिपतयः-" स द्विधा स्यादनुष्ठातृ-गृहिव्रतिविभागतः । सामान्यतो विशेषाच्च, सुहृधर्मोऽप्ययं द्विधा ॥ ४ ॥ " " धम्मो बारसविहो, अगारधम्मोऽणगारधम्मो य । पढमो च बारसविहो, दसहा पुण बीयओ होइ ॥१२॥ " व्यासार्थं चाऽऽहुः सूरयः-" सम्मत्तमूलमणुव्वय-पणगं तिन्नि उ गुणव्वया होंति । सिक्खावयाइँ चउरो, बारसहा होइ गिहिधम्मो ॥ २ ॥ " तथा च-" थाणे य नाइवाएज्जा, अदिन्नं वि य णादए । सादिसं ण मुसं बूया, एस धम्मे वुसीमओ ॥ १६ ॥ अतिक्कमं ति वायाए, मणसा वि न पत्थए । सव्वओ संवुडे दंते, आयाणं सुसमाहरे ॥ २० ॥ " सम्यगश्यस्तथाचक्रधर्मस्यातिताद्रूप्यैकान्ततो भवभ्रमणविमुखस्य संयतातिशिवसुखाभिलाषाऽतिरेकस्य यतिधर्मकरणश्लोपपद्यते, अतस्तत्स्वरूपनिरूपणायेदमाह-" खंती य महवज्जव, मुत्ती तव संजमे य बोधव्वे । सच्च सोयं आकिं-चणं च बंभं च जइधम्मो ॥ ५ ॥ " तथाहि-" पञ्चाऽऽश्रवाद्विरमणं, पञ्चेन्द्रियनिग्रहः कषायजयः । दण्डत्रयविरतिश्चे-ति संयमः सप्तदशभेदः ॥ १ ॥ " " दुविहो उ भावधम्मो, सुयधम्मो खलु चरित्तधम्मो य । सुयधम्मे सज्झाओ, चरित्तधम्मे समणधम्मो ॥ १ ॥ " अथवा-"छह होइ भावधम्मो, सुयचरणे वा सुयम्मि सज्झाओ । चरणम्मि समणधम्मो, खंती मुत्ती भवे दसहा ॥ १ ॥ " अथवा-"छोइयलोउत्तरिओ, दुविहो पुण होति भावधम्मो उ । दुविहो वि दुविहतिविहो, पंचविहो होति णायव्वो ॥ १ ॥ " तथाहि-भावधर्मो नोआगमतो द्विविधः । तद्यथा-लौकिको, लोकोत्तरश्च । तत्र लौकिको द्विविधः-गृहस्थानां, पाखण्डिनां च । लोकोत्तरस्त्रिविधः-ज्ञानदर्शनचारित्रभेदात् । तत्राप्याभिनिबोधिकं ज्ञानं पञ्चधा । दर्शनमप्यौपशमिकसास्वादनक्षायोपशमिकवेदकक्षायिकभेदात् पञ्चविधम् । चारित्रमपि सामायिकाऽऽदिभेदात् पञ्चविधम् । " दव्वं च अत्थिकाओ, पयारधम्मो य भावधम्मो य । दव्वस्स पज्जवा जे, ते धम्मा तस्स दव्वस्स ॥ ४० ॥ " तथाहि-" धम्मत्थिकायधम्मो, पयारधम्मो य विसयधम्मो उ । छोइय कुप्पावणिओ, लोगुत्तर लोगिणेगविहो ॥ ४१ ॥ " अनेकविधत्वं तु-" गम्मपसुदेसरज्जे, पुरवरगामगणिगोट्ठिराईणं । सावज्जो न कुतित्थिय-धम्मो न जिणेहिँ न पसत्थो ॥ ४२ ॥ " " औदार्यं दाक्षिण्यं, पापजुगुप्साऽथ निर्मलो बोधः । क्षिप्रानि धर्मसिद्धेः, प्रायेण जनप्रियत्वं च ॥ १ ॥ " " आरोग्ये सति यद्वद् व्याधिविकारा भवन्ति नो पुंसाम् । तद्वद् धर्माऽऽरोग्ये, पापविकारा अपि ज्ञेयाः ॥ १ ॥ तस्मात्स्य विषयतृष्णा, प्रभवत्युच्चैर्न दृष्टिसंमोहः । अरुचिर्न धर्मपथे, न च पापाक्रोधकण्डूतः ॥ २ ॥ " " जीवदया सच्चवयणं, परधणपरिवज्जणं सुसीलं च । खंती पंचिंदियनि-ग्गहो य धम्मस्स मूलाइं ॥१॥ " धर्मानधिकारिणस्तु-" सुत्तेण चोइओ जो, अप्पं उड्डासिय तं ण पडिवज्जे । सो तत्तवादवज्झो, न होइ धम्मम्मि अहिगारी ॥६॥ " सद्धर्मग्रहणयोग्यस्तु-" संविग्गस्तच्छ्रुतेरेव, ज्ञाततत्त्वो नरोऽनघः । दृढं स्वशक्त्या जातेच्छः, संग्रहेऽस्य प्रवर्तते ॥ २० ॥ " किञ्च-यः कश्चिद् विदितसंसारस्वभावतया धर्मैकरसैकप्रवणमनाः पूर्वं प्रव्रज्याऽवसरे संयमानुष्ठानोत्थायी, पश्चाच्च श्रद्धासंवेगतया विशेषेण वर्द्धमानपरिणामो नो जिघांसति, सिंहतया निष्क्रान्तः, सिंहतया विहारी च, गणधराऽऽदिवत् । अथवा पूर्वोत्थायी, पुनर्विचित्रत्वात् कर्मपरिणतेस्तथाविधभवितव्यतानियोगात् पश्चाच्च्यावी स्यात्, नन्दिषेणाऽऽदिवत् । कश्चिद् गोष्ठामाहिलवत् दर्शनतोऽपि, इत्यादि सर्वं ' धम्म ' शब्दे २६७३ पृष्ठे विवृतम् । तदुद्धावकाश्चामी-" प्रावचनी धर्मकथी, वादी नैमित्तिकस्तपस्वी च । विद्यासिद्धः कविरपि चोद्भावकाश्चामी ॥ १ ॥ " तथा च परिपक्वबुद्धित्वात् मध्यमवया विशेषतो धर्माहः । यत उक्तमाचाराङ्गे-" मज्झिमेणं वयसा एगे संबुज्झमाणा समुट्ठिता सोच्चा मेधावी वयणं पंडियाणं णिसामिया समियाए धम्मे आरियेहिं पवेदिते ते अणवकंखमाणा अणतिवायमाणा अपरिग्गहमाणा णो परिग्गहावंति, सव्वावंति च णं लोगंसि णिहाय दंडं पाणेहिं अकुव्वमाणे एस महं अगंथे वियाहिए । " ततश्च-" धम्मो गुणा अहिंसा-इया उ ते परममंगलपक्खा । देवा वि लोगपुज्जा, पणमंति सुधम्ममिह हेऊ ॥ १ ॥ दिट्ठंतो अरहंता, अणगारा य बहवो उ जिणसीसा । वत्तणुवत्ते नज्जइ, जं नरवइणो वि पणमंति ॥ २ ॥ उवलंभारो देवा, जह तह राया वि पणमइ सुधम्मं । तम्हा धम्मो मंगल-मुक्किट्ठमिइ य निगमणं ति ॥ ३ ॥ " साम्प्रतं प्रतिक्रान्तरुचिरभिधीयते-" जह जिणसासणनिरया, धम्मं पालेंति साहवो सुद्धं । न कुतित्थिएसु एवं, दीसइ परिपालणोवाओ ॥ ६३ ॥ " अत्राऽऽह त्वेवमपि च तत्त्वान्तरीयधर्मेषु धर्मशब्दो लोके रूढः, तथा च यथानथं नैजमेव धर्मं प्रशंसन्ति, ततश्च कथमेतदिति ? अत्रोच्यते-ननूक्तः पूर्वं सावद्यः कुतीर्थिकधर्मः तीर्थकरैः, षड्जीवनिकायपरिज्ञानाऽऽद्यनावादेवेत्यपि बहु वक्तव्यं, तन्नोच्यते, विस्तरभयात् । तथा च-तत्त्वान्तरीयेषु धर्मेषु धर्मशब्दो यः स उपचारेण, निश्चयेन तु जिनशासने, यथा सिंहशब्दः सिंहे प्राधान्येन व्यवस्थितः, उपचारेण तु माणवकाऽऽदौ । उपचारनिमित्तं च शौर्यक्रौर्याऽऽदयः, धर्मे त्वहिंसाऽऽद्यभिधानाऽऽदयः । हेतुविशुद्धिस्तु-" जं भत्तपाणउवगर-णवसहिसयणाऽऽसणाइसु जयंति । फासुय अकयअकारिय-अणुमयअणुद्दिट्ठभोई य ॥ ६७ ॥ " तदग्ये पुनः-" अप्फासुयकयकारिय-अणुमयउद्दिट्ठभोइणो हंदि । तसथावरहिंसाए, जणा अकुसला उ छिप्पंति ॥ ७८ ॥ " दृष्टान्तविशुद्धिः-" जह दुमस्स पुप्फेसु, भमरो आविय रसं । ण य पुप्फं किलामेइ, सो य पीणेइ अप्पयं ॥ १ ॥ " अत्र चैवं व्यवस्थिते सति कोऽपि ब्रूयात्-यदिदं पाकनिर्वर्तनं गृहिभिः क्रियते, इदं पुण्योपादानसंकल्पेन श्रमणानां क्रियते सुविहितानां, गृह्णन्ति च ते ततो भिक्षामित्यतः पाकोपजीवन-

इति कृत्वा लिप्यन्ते आरम्भदोषेणाऽऽहारकरणक्रियाफलेनेति । लौकिका अप्याहुः-" कपेण कायको हन्ति, उपलेपेन खादकः । घातको बधचित्तेन, इत्येष त्रिविधो वधः ॥ १ ॥ " अत्र प्रतिविधीयते-" वासइ न तणस्स कए, न वणं वहुइ कए मयकुव्वाणं । न य रुक्खा सयसाहा, फुल्लंति कए महुयराणं ॥ १०३ ॥ " पुनरपि चोदको वदति-इह यदुक्तं-वर्षति न तृणार्थमित्यादि । तदसाधु । यतः-" अग्गिम्मि हवी हूयइ, आइच्चो तेण पीणिओ संतो । वरिसइ पयाहिएणं, तेणोसहिओ परोहंति ॥ १०४ ॥ " अत्र पुनः प्रतिविधीयते-यद्येवं, किं दुर्भिक्षं जायते ?, यतः तद्धविः सदा हूयत एव, ततश्च कारणाविच्छेदेन कार्यविच्छेदोऽयुक्त एव । अथ भवेद् दुर्नक्षत्रं, दुर्यजनं वा ? । अत्राप्युत्तरम्-किं जायते सर्वत्र दुर्भिक्षम्, नक्षत्रस्य दुरिष्टस्य वा नियतदेशविषयत्वात्, सदैव सदृयजनां भावात् ? । उक्तं च-" सदैव देवाः सदृयाजो, ब्राह्मणाश्च क्रियापराः । यतयः साधवश्चैव, विद्यन्ते स्थितिहेतवः ॥ १ ॥ " साम्प्रतं परामिप्रायः प्रदर्श्यते-" कस्सइ बुद्धी एसा, चित्ती उवकप्पिया पयावइणा । सत्ताणं तेण दुमा, पुप्फंती महुयरिगणट्ठा ॥ १०८ ॥ " अत्र प्रतिविधीयते-" तं पभवइ जेण दुमा, नामागोयस्स पुव्वविहियस्स । उदयेणं पुप्फफलं, निवत्तइंतो इमं चऽन्नं ॥ १०९ ॥ अत्थि बहू वणसंडा, भमरा जत्थ न उवेंति न वसंति । तत्थ वि पुप्फंति दुमा, पगई एसा दुमगणाणं ॥ ११० ॥ " अत्रोच्यते-यदि प्रकृतिः, किमिति पुनः सर्वकालं न प्रयच्छन्ति पुष्पफलम्, यच्छियते एव काले पुष्पफलं ददति; अत एव एषा पादपानां प्रकृतिर्यद् ऋतुसमये वसन्ताऽऽद्यागते सति वृक्षसंघाताः पुष्यन्ति, तथा फलं च काले बध्नन्ति, तदर्थानभ्युपगमे तु नित्यप्रसङ्गः । साम्प्रतं प्रकृतेऽप्युक्तार्थयोजनामुपन्यस्यति-" किं तु गिहीं रंधंती, समणाणं कारणा अहासमये । मा समणा भगवंतो, किलामपज्जा अणाहारा ॥ ११३ ॥ " अत्राऽऽह-न ह्येते हिरण्यग्रहणाऽऽदिनाऽस्माकमनुकम्पां कुर्वन्ति इति मत्वा भिक्षादानार्थं पाकं निर्वर्तयन्त्यतः श्रमणानुकम्पानिमित्तं, तथा सामान्येन पुण्यनिमित्तं च गृहनिर्वासन एव पाकं कुर्वन्ति । नैतदेवम् । यतः कान्तारे दुर्भिक्षे, उक्तरूपे महति समुत्पन्ने रात्रौ श्रमणाः सर्वाऽऽहारं न भुञ्जते, अथ किमिति पुनर्गृहस्थास्तत्रापि आदरतरेण राध्यन्ति, अतः प्रकृतिरेषा गृहिणां वर्तते यद् गृहिणो आमनगरनिगमेषु राध्यन्ति आत्मनः परिजनस्यार्थाय, तत्र श्रमणाः तपस्विनः परार्थमारब्धे परार्थे च निष्ठितं धूमरहितमाहारमेषन्ते मनोयोगाऽऽदीनां संयमयोगानां वा साधनार्थम । " ण हणइ ण हणावेइ, हणंतं णाणुजाणइ । न किणइ न किणावेइ, किणंतं नाणुजाणइ । न पयइ न पयावेइ, पयंतं नाणुजाणइ । " एताभिर्नवकोटिभिः परिशुद्धं, तथोद्गमोत्पादनैषणाशुद्धम्-" वेयण वेयावच्चे, इरियट्ठाए य संजमट्ठाए । तह पाणवित्तियाए, छट्ठं पुण धम्मचिंताए ॥ १ ॥ " इति षट्स्थानकनिमित्तं भवान्तरे प्रशस्तभावनाऽभ्यासादहिंसाऽनुपालनार्थं च भुञ्जते । किञ्च-" अवि भमरमहुयरिगणा, अविदिंते आवियंति कुसुमरसं । समणा पुण भगवंतो, नादिन्नं भोत्तुमिच्छंति ॥ १२१ ॥ " ' जह कुसुमगया उ तहं नग-रत्तणया पयाणपायणसहावा । जह भमरा तह मुणिणो, नवरि अदत्तं न भुंजंति ॥ १३२ ॥ कुसुमे सहावफुल्ले, आहारंति भमरा जह तहा उ । भत्तं सहावसिद्धं, समणसुविहिया गवेसंति ॥ १३३ ॥ " ' तम्हा दयाइगुणसु-द्धिएहिं भमरो व्व अवहवित्तीहिं । साहूहिं सादिओ सो, उक्किट्ठं मंगलं धम्मो ॥ १३७ ॥ " " पमिपुण्णधम्मविरयल-क्खणेण इह अंतरायविरओ । जीवा ण हुंति णियमा, तो जत्तो तत्थ कायव्वो ॥ १ ॥ " लब्भइ सुरसामित्तं, लब्भइ पहुअत्तणं न संदेहो । इक्को नवरि न लब्भइ, जिणिंदवरदेसिओ धम्मो ॥ १ ॥ धम्मो पवित्तिरूवो, लब्भइ कइया वि निरयदुक्खन्नया । जो नियवत्थुसवणधम्मं, दुल्लहं वुत्तं जिणिंदआणा य । अंतप्फासणमेग-न्त हुंति केसिंचि धीराणं ॥ ३ ॥ जत्त धम्माउ सोऽहंग,धम्मेणं हुंति सयलरिद्धीओ । धम्मेण पवररूवं, तत्तो संविभाए भणियं ॥ १ ॥ " तथा च-" नहा सयलं किरियं, कुणंति मुणिणो सिवत्थमेव सया । तं पुण लब्भइ मयसय-लरागदोसेण धम्मेण ॥ १३ ॥ " किञ्च-" धम्मेण सरागेण उ, लब्भइ ममाइयं फलं सो वि । जायइ परंपराए, नियमेणं सुक्खहेउ त्ति ॥ १४ ॥ " धर्मस्य मोक्षकारणत्वमित्थमामनन्ति जैनप्रौढाः-" जे धम्मं सुद्धमक्खंति, पडिपुण्णमणेलिसं । अणेलिसस्स जं ठाणं, तस्स जम्मकहा कओ ? ॥ १९ ॥ " तथोक्तम्-" दग्धे बीजे यथाऽत्यन्तं, प्रादुर्भवति नाङ्कुरः । कर्मबीजे तथा दग्धे, न रोहति भवाङ्कुरः ॥ १ ॥ किञ्चान्यत्-" कओ कयाइ मेधावी, उप्पज्जंति तहागया । तहागया अपडिपुण्णा, चक्खू लोगस्सऽणुत्तरा ॥ २० ॥ " केवलिप्रज्ञप्तस्य धर्मस्य श्रवणतोऽपि दुर्लभा सामान्यलोकस्य । यतोऽवाचि-" सुलहा सुरलोयसिरी, रयणायरमेहला मही सुलहा । निक्कुसुहजणियरुई, जिणवयणसुई, जए दुलहा ॥ १ ॥ " श्रुतस्य वा अज्ञानता दुर्लभा । उक्तं च-" आहच्च सवणलद्धं, सद्धा पुण दुल्लहा । सोच्चा नेयाउयं मग्गं, बहवे परिभस्सइ ॥ १ ॥ " " भक्ष्याभक्ष्यविवेकाच्च, गम्यागम्यविवेकतः । तपोदयाविशेषाच्च, स धर्मो व्यवतिष्ठते ॥ १ ॥ " इत्यलं बहुविस्तरोपन्यासेन । प्रकृतमनुसरामः-

इह हि दुरन्तानन्तचतुरन्तासारविसारिसंसारापारपारावारे निमज्जता भव्यजन्तुना जिनप्रवचनप्रतीतचोल्लकाऽऽदिदृष्टान्तदर्शनदुष्प्रापां कथमपि प्रशस्तसमस्तमनुजजन्माऽऽदिसामग्रीमनाप्य प्रवज्जलधिसमुत्तरणप्रवणप्रवहणस्वधर्मसद्धर्मविधाने प्रयत्नो विधेयः । यदवादि-' भवकोटीदुष्प्रापाम्, अवाप्य नृभवाऽऽदिसकलसामग्रीम । भवजलधियानपात्रे, धर्मे यतः सदा कार्यः ॥ १ ॥ " कामार्थयोस्तु बाधायामपि धर्मो रक्षणीयः, धर्ममूलत्वादर्थकामयोः । उक्तं च-" धर्मश्चेन्नावसीदेत, कपालेनापि जीवतः । आढ्योऽस्मीत्यवगन्तव्यं, धर्मवित्ता हि साधवः ॥ १ ॥ " अथवा धर्मावासौ कामार्थयोः क्षतिरित्यादरणीया-" जाव न दुक्खं पत्ता, माणब्भंसं च पाणिणो पायं । ताव न धम्मं मेएहं-तिभावओ तेथलिसुय व्व ॥ १ ॥ " अथवा-" नेह लोके सुखं किञ्चि-च्चादितस्त्यंहसा भृशम् । मितं च जीवितं नृणां, तेन धर्मे मतिं कुरु ॥ १ ॥ " प्रक्रान्तमेव समर्थयमाह-" जरा जाव न पीलेइ, वाही जाव न वड्ढइ । जाविंदिया न हायंति, ताव धम्मं समायरे ॥ ३६ ॥ " " ते धन्ना जे धम्मं, चरिउं जिणदेसियं पयत्तेणं । गिहिपासबन्धणाओ, उम्मुक्का सव्वजत्तेणं ॥ १ ॥ " तथाहि-

" निर्वाणाऽऽदिसुखप्रदे नरभवे जैनेन्द्रधर्मान्विते,
लब्धे स्वल्पमचारु कामजसुखं नो सेवितुं युज्यते ।

वैदूर्याऽऽदिमहोपलौघनिचिते, प्राप्तेऽपि रत्नाकरे,
लातुं स्वल्पमदीप्ति काचशकले, किं चोचितं साम्प्रतम् ॥१॥"

अपरञ्च-" वदत यदीह कश्चिदनुसंततसुखपरिभोगलालितः । प्रयत्नशतपरोऽपि विगत-व्यथमायुरवाप्तवान् नरः ॥ १ ॥ न खलु नरः सुरौघसिद्धा-सुरकिन्नरनायकोऽपि यः । सोऽपि कृतान्तदन्तकुलि-शाऽऽक्रमेण कृशितो न नश्यति ॥ २ ॥ " मृत्यु-मुखप्रतिषेधस्थोपायोऽपि न कश्चिदस्तीति । उक्तं च-

" नश्यति नौति याति वितनोति करोति रसायनक्रियां,
चरति गुरुव्रतानि विवराण्यपि विशति विशेषकातरः ।
तपति तपांसि खादति मितानि करोति च मन्त्रसाधनं,
तदपि कृतान्तदन्तयन्त्रकचक्रमणैर्विदार्यते ॥ १ ॥ "

अथवा-" जो चासलयं जीवइ, सुहीजोगे य जुंजइ । तस्स वि सेविउं सेओ, धम्मो य जिणदेसिओ ॥ २४ ॥ किं पुण सपच्चवाए, जो नरो निच्चदुक्खिओ । सुट्ठुयरं तेण कायव्वो, धम्मो य जिणदेसिओ ॥ २३ ॥ " तस्मात्-" नंदमाणो चरे धम्मं, वरं मे लट्ठुतरं भवे । अनंदमाणो वि चरे, मा मे पावतरं भवे ॥ २४ ॥ " किञ्च-" न वि जाई कुलं वा वि, विज्जा नावि सुसिक्खिया । तारेइ नरं व नारिं वा, सव्वं पुव्वेहिं वट्टइ ॥ २५ ॥ पुव्वेहिं हीयमाणेहिं, पुरिसागारो वि हायई । पुव्वेहिं वट्टमाणेहिं, पुरिसागारो वि वट्टइ ॥ २६ ॥ " अथवा-" संघयणं संठाणं, उच्चत्तं आउयं च मणुयाणं । अणुसमयं परिहायइ, ओसप्पिणिकालदोसेणं ॥ १ ॥ कोहमयमाणलोभा, ओसन्नं वट्टए य मणुयाणं । कूरतुलकूडमाणा, तेणऽणुमाणेण सव्वं पि ॥ २ ॥ विसमा अज्ज तुलाओ, विसमाणि य जणवएसु माणाणि । विसमा रायकुलाइं, जेण उ विसमाइं वासाइं ॥ ३ ॥ विसमेसु य वासेसु, हुंति असाराइं ओसहिवलाइं । ओसहिदुव्वलेण य, आऊ परिहायइ नराणं ॥ ४ ॥ एवं परिहायमाणे, लोए चंडुव्व कालपक्खम्मि । जे धम्मिया मणुस्सा, सुजीवियं जीवियं तेसिं ॥ ५ ॥" यतो मरणसमये-" पुत्ता चयंति मित्ता, चयंति नज्जा वि णंऽप्पमं चयति । तं मरणदेसकाले, ण चयइ सुविअज्जिओ धम्मो ॥ ११ ॥ धम्मो ताणं धम्मो, सरणं धम्मो गई पइट्ठा य । धम्मेण सुचरिएण य, गम्मइ अजरामरं ठाणं ॥ १३ ॥ पोइकरो पइकरो, भासकरो जसकरो रइकरो य । अभयकरो निवुइकरो, परत्त वी अज्जिओ धम्मो ॥ १३ ॥ अमरवरेसु अणोवम-रूवं भोगोवभोगरिद्धी य । विज्जाण नाणमेव य, लब्भइ सुकएण धम्मेण ॥ १४ ॥ देविंदचक्कवट्टि-त्तणाइं रज्जाइं इट्ठिया भोगा । एयाइं धम्मलाभो, फलाइं जं चावि निव्वाणं ॥ १५ ॥ " किञ्च-" दुर्गतिप्रसृतान् जन्तून्, यस्माद् धारयते ततः । धत्ते चैतान् शुभे स्थाने, तस्माद् धर्म इति स्मृतः ॥ १ ॥ " तस्मात्-" धम्माओ धणलाभो, त्ति जं पि वुत्तं तयं पि न हु जुत्तं । सव्वो वि हु पुरिसत्थो, धम्माउ च्चिय जओ भणिया ॥ १५ ॥" उक्तं च-"धनदो धनार्थिनां धर्मः,कामदः सर्वकामिनाम् । धर्म एवापवर्गस्य, पारम्पर्येण साधकः ॥ १६ ॥ "

" धर्मोऽयं धनवल्लभेषु धनदः कामार्थिनां कामदः,
सौभाग्यार्थिषु तत्प्रदः किमथवा पुत्रार्थिनां पुत्रदः ।
राज्यार्थिष्वपि राज्यदः किमपरं नानाविकल्पैर्नृणां,
तत् किं यन्न ददाति किञ्च तनुते स्वर्गापवर्गावपि ॥ ५४ ॥ "

एवं च-" धर्मश्रवणे यत्नः, सततं कार्यो बहुश्रुतसमीपे । हितकाङ्क्षिभिर्मुनिभिः-वचनं ननु दीप्तिदीपम् ॥ १७ ॥ " अनेकविद्याविशारदोऽपि धर्मशासनानभिज्ञो विकल एव । यदुक्तम्-

"साहित्यस्य विशारदो यदि परं जानाति सल्लक्षणं,
तर्के कर्कशमानसोऽतिविदुषा यद्यस्ति सा ज्योतिषि ।
किञ्चानेककलाऽऽलयोऽपि विकलः प्राणी परं गीयते,
यो जानाति न स्वर्गमोक्षसुखदं धर्मानुगं शासनम् ॥१॥"

अथवा कियद् ब्रूमः-

" यत्प्रोद्दाममदान्धसिन्धुरघटं साम्राज्यमासाद्यते,
यन्निःशेषजनप्रमोदजनकं संपद्यते वैभवम् ।
यत्पूर्णेन्दुसमद्युतिर्गुणगणः संप्राप्यते यत्परं,
सौभाग्यं च विजृम्भते तदखिलं धर्मस्य लीलायितम् ॥१॥ "

किञ्च-

" यच्च प्लावयति क्षितिं जलविधिः कल्पेऽखिलाऽऽकुलो,
यत् पृथ्वीमखिलां धिनोति सलिलाऽऽसारेण धाराधरः ।
यच्च क्रोणरुजो जगत्युदयतः सर्वौषधागच्छिदे,
तत्र शेषजनेऽपि ध्रुवं विजयते धर्मस्य विस्फूर्जितम् ॥ १ ॥ "

किन्तु साम्प्रतमनेकानि धर्माभिधेयधुराधराणि मिथ्यात्विमतानि प्रचलितानि सन्ति, ततो विवेकः कर्तव्यः । यदुक्तम्-" तं शब्दमात्रेण वदन्ति धर्मं, विश्वेऽपि लोका न विचारयन्ति । स शब्दसाम्येऽपि विचित्रभेदं विभिद्यते क्षीरमवत्तुनीयम् ॥१॥" यथा " ब्रह्मा विधातुं सकलां समर्थः, दुर्लक्षनं विश्वजनीनमेनम् । परीक्ष्य गृह्णन्ति विचारदक्षाः, सुवर्णवद्धन्त न भीतचित्ताः ॥१॥ " अथवा-"सत्कारयशोलाभार्थिभिश्च मूढैरिहान्यतीर्थंकरैः । अवसादितं जगदिदं, प्रियाप्रियपथ्यान्युपदिशद्भिः ॥ १ ॥ " किञ्च-" प्रायेण हि यदपथ्यं, तदेव चातुरजनप्रियं भवति । विषयाऽऽतुरस्य जगत-स्तथाऽनुकूलाः प्रिया विषयाः ॥ १ ॥ " अन्यच्च-" पूर्वापरविरुद्धानि, हिंसाऽऽदेः कारकाणि च । वचांसि चित्ररूपाणि, व्याकुर्वद्भिर्निजेच्छया ॥ २ ॥ कुतीर्थिकैः प्रणीतस्य, सद्गतिप्रतिपन्थिनः । धर्मस्य सकलस्यापि, कथं स्वाख्यातता भवेत् ? ॥ ४ ॥ यच्च तत्समये क्वापि, दयासत्याऽऽदिपोषणम् । दृश्यते तद् वचोमात्रं, बुद्धैर्ज्ञेयं न तत्त्वतः ॥ ५ ॥ " किन्तु-" स्वाऽऽख्यातः खलु धर्मोऽयं, भगवद्भिर्जिनोत्तमैः । यं समालम्बमानो हि, न मज्जेद् भवसागरे ॥ १ ॥ " अतः-" अर्हता कथितो धर्मः, सत्योऽयमिति भावयन् । सर्वसंपत्करे धर्मे, धीमान् दृढतरो भवेत् ॥ १ ॥ " अत एवोक्तम्-" न श्रद्धयैव त्वयि पक्षपातो, न द्वेषमात्रादरुचिः परेषु । यथा यदाप्तत्वपरीक्षया तु, त्वामेव वीरं प्रभुमाश्रयामः ॥ १ ॥ " अथवा-" पञ्चैतानि पवित्राणि, सर्वेषां धर्मचारिणाम् । अहिंसा सत्यमस्तेयं, त्यागो मैथुनवर्जनम् ॥ १ ॥ " इति ।

इह हि हेयोपादेयाऽऽदिपदार्थसार्थपरिज्ञानप्रवीणस्य जन्मजरामरणरोगशोकाऽऽदिदुर्गदौर्गत्यनिपीडितस्य भव्यसत्त्वस्य स्वर्गापवर्गाऽऽदिसुखसंपत्संपादनाद्यन्यनिबन्धनं सद्धर्मरत्नमुपादातुमुचितं, तदुपादानोपायश्च गुरूपदेशमन्तरेण न सम्यक् विज्ञायते, न चानुपायज्ञस्यानायासेनार्थार्थसिद्धिरिति । स चाऽऽद्यऽऽदिपदार्थसार्थस्वरूपपर्यालोचनैकाग्र्यरूपस्य धर्मस्य ध्यानावस्थितिरिति । तच्च ध्यानं द्विविधम्-बाह्यम्, आध्यात्मिकं च । तत्र बाह्यम्-सूत्रार्थपर्यालोचनम्, दृढव्रतता, शील-

गुणानुरागो, निवृतकायवाङ्व्यापाराऽऽदिरूपम् । यदुक्तं दशवैकालिकटीकायाम्-"सूत्रार्थसाधनमहाव्रतधारणेषु, बन्धप्रमोक्षगमनाऽऽगमहेतुचिन्ता । पञ्चेन्द्रियव्युपरमश्च दया च भूते, ध्यानं तु धर्ममिति संप्रवदन्ति तज्ज्ञाः ॥१॥" आत्मनः स्वसंवेदनाग्राह्यमन्येषामनुमेयमाध्यात्मिकं तु तत्त्वार्थसंग्रहाऽऽदौ चातुर्विध्येन प्रदर्शितं, संक्षेपतोऽन्यत्र दशविधम् । तद् यथा-"अपायोपायजीवाजीवविपाकविरागभवसंस्थानाऽऽज्ञाहेतुविचयानि चेति ।" तथाहि-उष्टमनोवाक्कायव्यापारविशेषाणामपायः कथमनुमानं स्यादित्येवंभूतः संकल्पप्रबन्धो दोषपरिवर्जनस्य कुशलप्रवृत्तित्वादपायविचयम् । तेषामेव कुशलानां स्वीकरणमुपायः स कथमनुमेयः स्यादिति संकल्पप्रबन्ध उपायविचयम् । असंख्येयप्रदेशाऽऽत्मकसाकाराऽनाकारोपयोगलक्षणानादिस्वकृतकर्मफलोपभोगित्वाऽऽदिजीवस्वरूपानुचिन्तनं जीवविचयम् । धर्माधर्माऽऽकाशकालपुद्गलानामनन्तपर्यायाऽऽत्मकानामजीवानामनुचिन्तनमजीवविचयम् । मूलोत्तरप्रकृतिभेदभिन्नस्य पुद्गलाऽऽत्मकस्य मधुरकटुफलस्य कर्मणः संसारिस्ववियविपाकविशेषानुचिन्तनं विपाकविचयम् । कुत्सितमिदं शरीरकं शुक्रशोणितसमुद्भूतमशुचिभूतघट्टोपममनित्यमपरित्राणं गदाशुचि नवद्विस्रतयाऽशुचि आधेयाशौचं न किञ्चिदत्र कमनीयतरं समस्ति, किम्पाकफलोपभोगोपमाः प्रमुखरसिका विपाककटवः प्रकृत्या भङ्गुराः पराधीनाः सन्तोषामृताऽऽस्वादपरिपन्थिनः सदुर्निर्निन्दिता विषयाः, तदुद्भवं च सुखं दुःखानुषङ्कि दुःखजनकं च, नातो भोगिनां तृप्तिः, न चैतदात्यन्तिकमिति नाऽऽस्थाऽस्थाविवेकेनाऽऽधातुं युक्तेति विरतिरेवातः श्रेयस्करीत्यादिविरागहेतुचिन्तनं वैराग्यविचयम् । प्रेत्य स्वकृतकर्मफलोपभोगार्थं पुनः प्रादुर्भावो भवः, स चारघट्टघटीयन्त्रवद् मूत्रपुरीषान्त्रतन्त्रनिबद्धदुर्गन्धजठरपुरकोटराऽऽदिष्वजस्रमावर्तनं, न चात्र किञ्चिद् जन्तोः स्वकृतकर्मफलमनुभवतश्चेतनमचेतनं वा सहायभूतं शरणतां प्रतिपद्यत इत्यादिभवसंक्रान्तिदोषपर्यालोचनं भवविचयम् । तथा च-"संसाराम्बुनिधौ सख्याः, कर्मोर्मिपरिघट्टिताः । संयुज्यन्ते वियुज्यन्ते, तत्र कः कस्य बान्धवः ?॥ १ ॥" तथा-"अत्रायं तेऽस्मिन् संसारे, भूयो जन्मनि जन्मनि । सत्यो वैधास्यसौ कश्चिद्, यो न बन्धुरनेकधा ॥ १ ॥" भवनवननगसरित्समुद्भूरुहाऽऽदयः पृथ्वीव्यवस्थिताः, स्वाऽपि घनोदधिघनवाततनुवातप्रतिष्ठा, तेऽप्याकाशप्रतिष्ठाः, तदपि स्वाऽऽत्मप्रतिष्ठ, तच्चाधोमुखमल्लकसंस्थानं वर्णयत्यूर्ध्वलोकमित्यादिसंस्थानानुचिन्तनं संस्थानविचयम् । अतीन्द्रियत्वाद् हेतूदाहरणाऽऽदिसद्भावेऽपि बुद्ध्यतिशयशक्तिविकलैः परलोकबन्धमोक्षधर्माधर्माऽऽदिभावेष्वत्यन्तदुःखबोधेष्वासप्रामाण्यात् तद्विषयं तद्वचनं तथैवेत्याज्ञाविचयम् । आगमविषयप्रतिपत्तौ तर्कानुसारिबुद्धेः पुंसः स्याद्वादप्ररूपकाऽऽगमस्य कषच्छेदतापशुद्धिसमाश्रयणीयत्वगुणानुचिन्तनं हेतुविचयम् । एतच्च सर्वं धर्मध्यानम्, श्रेयोहेतुत्वात् इति सर्वं सुस्थम् । इतोऽप्यधिकविषयजिज्ञासुभिः सूक्ष्मधिया धर्मशब्दोऽत्र निरीक्षणीयः । प्रतायते नेह, विस्तरभयादिति ।

उपसंहारः-

इह संसारे स्वभावत एव शरीरिमात्रमिष्टमभिलाषुकञ्जानिष्टं च्युदसितुं चास्तीतीष्टनिष्टप्राप्तिपरिहारोपायप्रकाशनैदम्पर्येण भगवांस्तीर्थङ्करकल्पद्रुमामर्षवद्धमानो जीवाजीवाऽऽश्रवबन्धसंवरनिर्जरामोक्षतत्त्वविभागप्रविभागज्ञप्तां सर्वाभ्युदयसाधनां नानाविधसमधिगम्यद्विफलां द्वादशाङ्गीमेकादशाङ्गीं वाऽर्थतो विदधदभिदधौ तस्मिंश्चर्षे निजचरणान्तेवासिन्यो धीरधीरेयेभ्यो गणधरप्रवरेभ्यो गौतमाऽऽदिभ्यः । जग्रन्थुश्च सुधर्मस्वामिप्रमुखा जम्बूस्वामिप्रभृतिसुपक्वश्रद्धार्धमागधीभाषयाऽङ्गोपाङ्गानि । गहनातिगहनतया च तद्विषयाणां संक्लिष्टतराणां तेषां क्रमशो विस्तारभरेभिरन्ये चाऽऽचार्याः । यद्यपि किल बुध्यमारप्रभावतः पुरुषाणां मन्दमतितया स्मरणशक्तिहैन्ध्यतया च श्रीमद् भद्रबाहुस्वामी तच्छ्रुतविषयमात्रसूचिरूपनिर्युक्तिगाथाभिर्निबन्धविषयान् सद्यः स्फूर्तिकराभिः,तथापि साऽप्रतकालीनबलवत्तरपञ्चमकालप्राज्यसाम्राज्यतो दुर्बलतरधिषणानां जनानां मनःसु कथाशेषतामेवागमत् तदु जैनसिद्धान्तरहस्यमिति सद्गुरुधार्यैव श्रीमद्विजयराजेन्द्रसूरीश्वरमहानुभावाः सङ्क्षिप्तसुखावबोधं शुश्रूषितं परमोपयोगिसकलाऽऽगमविषयसंग्रहाऽऽत्मकं कोशमसुं व्यरीरचन्निति क्रियासमभिहारेण तत्र तत्रोद्घातप्रस्तावभूमिकाऽऽदौ निरूपितमस्माभिः । श्रीमन्तो विजयराजेन्द्रसूरीश्वराः खलु दुर्लभगुणगणमूर्तय इत्यत्र किमिव बहूदूमः ?, किन्त्वेतावदेव पर्याप्तं नाम, यदित्थं प्राप्तोऽनेकगुणगणभाजोऽन्ये सूरयो देशनामादिशन्तोऽपि नो खलु प्राप्नुवन्ति तथाविधं विपश्चिच्चिन्ताऽऽसेचनकवैदुष्यशालित्वम् । अथवाकिं बहुना सकलजगत्प्रसिद्धस्य तस्य परिचयप्रदानेन । प्रकृतं प्रस्तुमः-एतदुग्रन्थपरिशोधनविषये क्षेत्राऽऽदिप्रत्यूहानां केवलमेकैकाऽऽदर्शपुस्तकप्राप्तात् लेखकालवधानतो द्विरावृत्तिपङ्क्तिवैकल्याऽऽदिदोषाऽऽघातत्वाच्च तेषामनेककालतः पठनपाठनपरिपाटीविरहात् बहुषु स्थलेषु सामञ्जस्याऽभावात् सम्मत्यादितर्कग्रन्थानामपि जटिलातिजटिलविषयेषु विक्षेपरलेखकलेखनमन्तुप्रभावतोऽलग्नकत्वाद् महती दुःस्थता समुद्भूता, तथापि ' श्रेयांसि बहुविघ्नानि, भवन्ति महतामपि ।' इति स्मरणाद् " प्रारभ्यते न खलु विघ्नभयेन नीचैः, प्रारभ्य विघ्नविहता विरमन्ति मध्याः । विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः, प्रारब्धमुत्तमगुणा न परित्यजन्ति ॥ १ ॥" इत्यनुस्मरणाच्च मूलग्रन्थं टीकानो, टीकाग्रन्थं च मूलतो विविच्य, निशीथमहानिशीथाऽऽदिकेवलाऽर्धमागधीग्रन्थानां टीकाविकलानां प्राकृतव्याकृत्याऽऽदिसाहाय्यात् तत्प्रकृतविषयप्रतिपादकग्रन्थान्तरमननाच्च गुरुचरणसरोजमकरन्दसमास्वादनलब्धनवनवोन्मेषशालिप्रज्ञाबलैरस्माभिर्दत्तावधानतः संशोधितोऽयं कोशग्रन्थो, विशेषतश्चायं भागः, परन्तु-

I deem no skill in acting perfect, till the learned are satisfied; the heart of even those, that are deeply read, has little confidence in itself. अथवा-When delegated agents successfully carry out any great undertaking, the credit of success belongs to their masters गुरवः. Could dawn ever dispel darkness, had not the thousand-rayed luminary placed her, in front of his car ?.

इति निवेदयन्ति-

संशोधकाः ।

अर्हम् ।

ग्रन्थनिर्माणकारणम्-

श्रीवर्धमानजिनगौतमसत्सुधर्म-
जम्बूमुनीन्द्रजगदर्चितजङ्घबाहोः ।
यो वर्धितो निजकृपोदकसेचनाजि-
र्धर्मद्रुमो निखिलधर्मतरुप्रधानः ॥ १ ॥

काले गते बहुतिथेऽथ विलुण्ठितं तं,
मूलार्थविप्लवनसाहसमाश्रयद्भिः ।
मिथ्यात्विभिः पुनरपीह समुद्धधीर्षुः,
सूरीश्वरो भुवि दयोदधिराविरासीत् ॥ २ ॥

कामाऽऽदिवैरिनिवहोन्मथनाद्भूत्सुहृष्टः,
बाह्याऽऽभ्यन्तरोजयविचित्रचरित्रहृष्टः ।
कारुण्यपूर्णरसपूरितजव्यपुण्य-
नीराब्धिसंगतसुधोन्मथने समर्थः ॥ ३ ॥

चेतोऽन्धकारोद्धरणे विरोचनो,
राजेन्द्रसूरिर्विबुधार्चिताङ्घ्रिकः ।
संघोपकर्ता न च कोऽपि तादृशः,
पुण्यैकमूर्तिर्भविकौघबोधदः ॥ ४ ॥

निजमतच्युतिजैनमतग्रहा-
न्यतरमाहवभङ्गपणं दिशन् ।
विततवादकथासमरे परान्,
व्यजयताऽजयतां प्रथयन्निजाम् ॥ ५ ॥

अथ विजित्य दिशो दश शिष्यतां,
गतवतः करुणावरुणाऽऽलयः ।
मुनिगणान् नववादरणाङ्गणे,
निजधियाऽजधिया समयोजयत् ॥ ६ ॥

सूत्राण्युपास्य तदुपोद्बलितैः स्ववाक्ये-
राख्यानकैश्च विततैर्निजदेशनाभिः ।
यो जैनसंघमखिलं कृपयोदधार,
सूरिः स वै विजयते स्म पवित्रकीर्तिः ॥ ७ ॥

इत्थं स जैनाऽऽगममत्र लोके,
सम्यग् व्यवस्थाप्य न संतुतोष ।
कालक्रमेणास्य पुनर्विनाश-
माशङ्कमानो विजितान्यमानः ॥ ८ ॥

ततोऽन्यगात् शिष्यगणैः सुविज्ञै-
र्वृतो विहारेण मरुस्थलं तु ।
उवास कालं चिरमात्मतत्त्वं,
तान् बोधयन् धर्मशिरःप्रतिष्ठम् ॥ ९ ॥


अथैकदा संसदि सन्निविष्टो,
निजाऽऽप्तशिष्याऽऽदिविभूषितायाम् ।
सङ्घोपकण्ठं च निजाभिलाषं,
व्यजिज्ञपत् सूरिवरः कृपालुः ॥ १० ॥


जैनाऽऽगमानां निजयुक्तियोगात्,
संयोक्तुमेकत्र नवीनरीत्या ।
कोशं विधित्सामि जिनेन्द्रभाषा-
मयं न लुप्येत यतः कदाचित् ॥ ११ ॥

श्रुत्वा पुनस्तमुपदेशवरं प्रहृष्टा-
मूर्ध्नाऽग्रहीषत गुरोरनुशासनं तत् ।
संगृह्य द्रव्यमतुलं च ततोऽभिधान-
राजेन्द्रकोशममलं निरमापयँस्ते ॥ १२ ॥

इति विज्ञपयन्ति-

श्रीमदुपाध्यायमोहनमुनयः ।





इति

श्रीमत्सौधर्मबृहत्तपागच्छीय-कलिकालसर्वज्ञकल्प-सर्वतन्त्रस्वतन्त्र

जैनश्वेताम्बराचार्य श्री श्री १००८ भट्टारक—

श्रीमद्विजयराजेन्द्रसूरीश्वरमहाराज विरचिते

शब्दसङ्कलनात्मके "श्री अभिधानराजेन्द्रकोषे"

चतुर्थो भागः समाप्तः ।

॥ श्रीवीतरागाय नमः ॥

अभिधानराजेन्द्रः ।

नमिऊण वद्धमाणं, सारं गहिऊण आगमाणं च ।
अहुणा चउत्थअङ्गाणं, वोच्छं अभिहाणराइंदे ॥ १ ॥

जकार

ज–ज–पुं० । जकारो व्यञ्जनवर्णभेदः स्पर्शसंज्ञकः, तस्योच्चारणस्थानं तालु, आभ्यन्तरप्रयत्नः जिह्वामध्यनागेन तालुस्पर्शः । बाह्यप्रयत्नाश्च घोषसंवारनादाः, अल्पप्राणश्च । वाच० । जि-जन-जु वा कः । मृत्युञ्जये, जन्मनि, पितरि, जनार्दने, त्रि० । विष्णौ, मुक्तौ, तेजसि, पिशाचे, वेगे, जेतरि । वाच० । " जः पुमान् विजये मेरौ, विस्तरे मत्सरे जने ॥ २४ ॥ जस्त्र्यविरते शब्दे, जा स्त्रियां देवयोषिति । योनिः समुद्रवेला च, जं नपुंसकमम्बुनि " ॥ २५ ॥ एका० । गुरुमध्ये प्रान्तयोर्लघुद्वययुक्ते छन्दःशास्त्रप्रसिद्धे (। ऽ ।) त्रिवर्णे गणे च । वाच० ।

य–त्रि० । "यकारः पुंसि यवनो-पमे, दातरि, मातरि ॥ ७० ॥ त्यागावयवयोः शिष्ये, विनये कल्पपादपे । या स्त्रियामनसूयायां, शोभालक्ष्म्यां च निर्मितौ ॥ ७१ ॥ नपुंसके यकारस्तु यशोरूपकयोर्मतः " । इत्यादि । एका० ।

यद्–त्रि० । यज् अदि-क्विप् । ' जो ' इत्येवं बुद्धिविशेषविषयं, वाच० । अनिर्दिष्टनिर्देश्ये, नं० । आ० म० । नि० चू० । " जे त्ति वा से त्ति वा के त्ति वा एवमादिनिद्देसवयणा होंति । जेकारस्स निद्देसनिद्दिसणं, जे असंतएण अब्भक्खाणेणं अब्भक्खाइ " इत्यादि । नि० चू० । " जेगारो पुण अणिद्दिट्ठवायगुद्देसे, जहा जेण च जं च पडुच्चेत्यादि । अहवा-जहा इमो चेव जेगारो उस्सग्गऽववायचिएण पडिसेवियं व त्ति न निद्दिट्ठं गुरुं लहुं वा जयणाए, जयणाहि वा, तेण जेगारेण निद्देसः कृतेत्यर्थः । अहवा-जेकारेण अनिद्दिट्ठभिक्खुस्स निद्देसो कतो" । नि० चू० २० उ० । यदित्युद्देशः । आव० ४ अ० ।

जइ–यति–पुं० । यत्-इन् । यतते चारित्रं प्रति प्रयतो भवतीति यतिः । चरणोद्यते साधौ, औ० । यतते उत्तरगुणेषु विशेषेण इति यतिः । विचित्रद्रव्याऽऽभिग्रहाऽऽश्रुपेते साधौ, रा० । तपस्विनि साधौ, आव० १ अ० । साधौ, दश० ४ तत्त्व । प्रयत्नवति, द्वा० ७६ द्वा० 'यती' प्रयत्ने, "जयमाणो जई होइ" नि० चू० २० उ० । यतमानो जायतस्तथा तथा गुणेषु यतिर्भवेत् । द्वा० ५ द्वा० । धर्मक्रियासु प्रयत (प्रयत्न) माने, भ० ७ श० ३३ उ० । ओघ० । प्रव्रजिते, पं० व० २ द्वार । नि० चू० । गृहीतप्रव्रज्यो यतिरुच्यते । तथा च धर्मबिन्दुः-" एवं यः शुद्धयोगेन , परित्यज्य गृहाऽऽश्रमम् । संयमे रमते नित्यं , स यतिः परिकीर्तितः ॥ १ ॥ " ध० ३ अधि० । संयमानुमतेरपि विरते, क० प्र० । मुनौ, पञ्चा० १ विव० । संयते, दश० ३ अ० । उत्तमाऽऽश्रमिणि. द्वा०२७द्वा० । ध० । "ब्रह्मचारी गृहस्थश्च,वानप्रस्थो यतिस्तथा ।" इति लोकप्रसिद्धचतुर्थाऽऽश्रमिणि, नि० ३ वर्ग । यम्यते जिह्वा यत्र । यम-क्तिन् । छन्दोग्रन्थव्यवस्थिते जिह्वाया विश्रामस्थाने श्लोकचरणकाद्यविच्छेदे, स्त्री० । सा च "क्वचित् छन्दस्यास्ते यतिरनिहिता पूर्वकृतिभिःपदान्ते सा शोभां बभ्रति पदमध्ये त्यजति च" इत्यादुक्त्या सुतिङन्तरूपपदान्ते पद्य छन्दोग्रन्थानुसारेण जिह्वाया विश्रामरूपोच्चारणाभावरूपा । विधवायां, रागे, सन्निधौ, पाठविच्छेदे, निकारे, विष्णौ, वाद्याङ्गप्रबन्धभेदे च । यत्-परिमाणे क्तिः । यत्परिमाणे, त्रि० । वाच० । स्था० ।

यतिन्–पुं० । यम-भावे क्तः । यतं यमनं, यतमनेन इनिः । संन्यासिनि परिव्राजके, विधवायां, स्त्री० । ङीप् । वाच० । विच्छेदे, आ० म० प्र० । विरतौ, अनु० । " ज्ञेया सकामा यतिनाम " इति योगशास्त्रे दैमप्रयोगः ।

जयिन्–त्रि० । जयवति, औ० ।

जविन्–त्रि० । वेगवति, औ० ।

यदि–अव्य० । यद्-णिच्-इन् णिलोपः । पक्षान्तरे, संभावनायां, गर्हायां, विकल्पे च । वाच० । अभ्युपगमे,नि० चू० १ उ० । जी० । पञ्चा० । आव० । आ०म० । विशे० । यदीति पराभ्युपगमसंसूचकः । दश० १ अ० ।

जइअव्व–यतितव्य–न० । कार्ये प्रयत्ने, पं० व० १ द्वार । " जइअव्वं जाया " प्राणेषु संयमयोगेषु प्रयत्नः कार्यः । भ० ३ श० ३३ उ० । ऐहिकाऽऽमुष्मिकफलप्राप्त्यर्थिना सत्त्वेन प्रवृत्त्यादिलक्षणः प्रयत्नः कार्यः । प्रयतितव्ये, सूत्र० १ श्रु० ५ अ० १ उ० । कार्ये उद्यमे, पं० व० १ द्वार । घटितव्ये, नि०चू०१ उ० ।

जइकिच्च–यतिकृत्य–न० । साधोः कर्तव्ये, पञ्चा० १२ विव० । साध्वनुष्ठाने, जीवा० ३ प्रति० अधि० ।

जइच्छा–यदृच्छा–स्त्री० यदृ-ऋच्छ-अ-टाप् । स्वातन्त्र्ये, स्वैरतायां च । " यदृच्छालाभसंतुष्टः, " वाच० । अनभिसंधिपूर्विकार्थप्राप्तौ, (आचा०) यदृच्छातोऽपि नास्तित्वमात्मनः, का पुनर्यदृच्छा ?, अनभिसंधिपूर्विकाऽर्थप्राप्तिर्यदृच्छा ।
" अतर्कितोपस्थितमेव सर्वं, चित्रं जनानां सुखदुःखजातम् ।
काकस्य तालेन तथाऽभिघातो, न बुद्धिपूर्वोऽव वृथाऽभिमानः ॥१॥
सत्यं पिशाचस्य वने वसामो, भेरीं कराग्रैरपि न स्पृशामः ।
यदृच्छया सिद्ध्यति लोकयात्रा, भेरीं पिशाचाः परिताडयन्ति" ॥१॥
यथा काकतालीयमबुद्धिपूर्वकं, न काकस्य बुद्धिरस्ति-मयि ताल पतिष्यति, नापि तालस्यान्निप्रायः-काकोपरि पतिष्यामि, अथ तत्तथैव भवति, एवमन्यदप्यतर्कितोपगतमजाकृपाणीयमातुरभेषजीयमन्धकवर्तकीयमित्यादि द्रष्टव्यम् । एवं

सर्वजातिजरामरणाऽऽदिकं लोके यादृच्छिकं काकतालीयाऽऽदिकल्पयसेयम् । आचा० १ श्रु० १ अ० १ उ० । एवमेव यदृच्छया गोपालदारकादेर्नाम क्रियते 'डित्थ, कपित्थ' इत्यादि । आ० म० प्र० ।

जइच्छावाइ [ण्]–यदृच्छावादिन्–पुं० । अकारणोत्पत्तिवादिनि, न० । यद्यपि यदृच्छावादिनः प्रलपन्ति–न खलु प्रतिनियतो वस्तूनां कार्यकारणभाव इत्यादि । तदपि च कार्याकार्यविवेचनपटीयःशेमुषीविकलतासूचकम्, कार्यकारणभावस्य प्रतिनियततया संभवात् । तथाहि–यः शालूकाङ्कुपजायते शालूकः स सदैव शालूकाद्देव, न गोमयादपि । योऽपि च गोमयादुपजायते शालूकः सोऽपि सदैव गोमयादेव, न शालूकादपि । न चानयोरेकरूपता, शक्तिवर्णाऽऽदिवैचित्र्यतः परस्परं जात्यन्तरत्वात् । योऽपि च वह्निरुपजायते वह्निः सोऽपि सदैव वह्नेरेव, नारणिकाष्ठादपि । योऽपि चारणिकाष्ठादुपजायते सोऽपि सर्वदाऽरणिकाष्ठादेव, न वह्नेरपि । यदपि चोक्तम्-बीजादपि जायते कदलीत्यादि । तत्रापि परस्परं विभिन्नत्वादेतदेवोत्तरम् । अपि च-या कन्दादुपजायते कदली,साऽपि परमार्थतो बीजादेव वेदितव्या,परम्परया बीजस्यैव कारणत्वात् । एवं वटाऽऽद्ययोऽपि शाखैकदेशादुपजायमानाः परमार्थतो बीजादवगन्तव्याः, शाखातः शाखा प्रभवति,न च सा शाखा शाखाहेतुका लोके व्यवह्रियते, किन्तु वटबीजस्यैव, सकलशाखाप्रशाखाऽऽदिसमुदायस्य वटहेतुत्वेन प्रसिद्धत्वात् । एवं शाखैकदेशादुपजायमानो वटः परमार्थतो मूलवटप्रशाखारूप इति मूलवटबीजहेतुकएव सोऽपि वेदितव्यः । तस्माच्च क्वचिदपि कार्यकारणव्यभिचारः, निपुणविचारप्रवीणेन च प्रतिपत्त्रा भवितव्यं, ततो न कश्चिद्दोषः । एवं च यदुच्यते–न खल्वन्यथा वस्तुसद्भावं पश्यन्तोऽन्यथाऽऽत्मानं प्रेक्षावतः परिक्लेशयन्तीति वाक्यमसमिति स्थितम् । नं० ।

जइजण–यतिजन–पुं० । साधुलोके, आचा० १ अ० । सूत्र० । आ० । "वज्जेयव्वो य सया, सुयप्पमाओ जइजणेणं" । सूत्र० १ श्रु० २ अ० १ उ० ।

जइजीयकप्प–यतिजीतकल्प–पुं० । श्रीसोमप्रभसूरिविरचिते यतिजीतकल्पनामके प्रकरणे, एतद्वृत्तिश्च श्रीसाधुरत्नसूरिकृताऽस्ति । ग० १ अधि० ।

जइजुत्त-यतियुक्त–त्रि० । परिवारभूतसाधुसमेधिते, प० ३ अधि० ।

जइजोग-यतियोग-पुं० । स्वाध्यायादिसाधुव्यापारे, पञ्चा० ६ विव० ।

जइण–जैन–त्रि० । जिनः केवली, तस्यायं जैनः । जिनसंबन्धिनि, विशे० । सर्वज्ञसंबन्धिनि, नि० चू० १ उ० । "जइणसासणवइरित्ता परा" । नि० चू० १ उ० । अतिशीघ्रगतौ, "लंघण-पवण-जइण-समत्थे" रा० । जी० । (एतद्वक्तव्यता 'जिण' शब्दे चतुर्थभागे १४५९ पृष्ठे वक्ष्यते)

जयिन्–त्रि० । जयवति, औ० ।

जविन्–त्रि० । वेगवति, "लंघण-वग्गण-धावण-धोरण-तिवई-जइण-सिक्खिअ-गमणं" । वृत्तिर्यथा-जविनी गमनान्तरजयवती, जविनी वा वेगवती । औ० । जविनशब्दः शीघ्रवचनः । अनु० । शीघ्र, "उवइयउप्पइयतुरियचवलजइणसिग्घवेगादि" औ० ।

जविन–त्रि० । अतिशीघ्रगतौ, "लंघण-पवण-जइण-पमद्दण-समत्थे" रा० ।

जइणटिप्पणग–जैनटिप्पनक–न० । जैनाऽऽम्नायेन निष्पादिते टिप्पनके, ताट्टेप्पनक त्वधुना सम्प्रयं न दृश्यते । कल्प० ७ क्षण ।

जइणवायाम–जविनव्यायाम–पुं० । शीघ्रव्यापारे, "लंघणपवणजइणवायामसमत्थे" उत्त० ६ अ० । जविनशब्दः शीघ्रवचनः । अनु० ।

जइणवेग-जयिवेग-पुं० । शेषवेगवद्वेगजयिनि वेगे, भ० ३ श० २३० ।

जइणी-जैनी–स्त्री० । जिनसंबन्धिन्याम, पञ्चा० ३ विव० । प्रति० ।

जयिनी–स्त्री० । जयवत्याम , औ० ।

जविनी–स्त्री० । वेगवत्याम , औ० ।

जइत्ता–जित्वा–अव्य० । जयं कृत्वेत्यर्थे, स्था० ६ ठा० २ उ० ।

जेत्री–स्त्री० । रिपुबलजयकर्त्र्याम, स्था० ६ ठा० २ उ० ।

जइदेवुत्तरवेउव्विय–यतिदेवोत्तरवैक्रिय–न० । यतिदेवैर्मूलशरीरापेक्षयोत्तरकालं क्रियमाणे वैक्रियशरीरे, तत्र यतयश्च साधवो देवाश्च सुरा यतिदेवाः । कर्म० १ कर्म० ।

जइदोस–यतिदोष–पुं० । मन्दशक्त्यपेक्षयतिभङ्गे, अस्थानविरतौ, सर्वथा विरतौ वा । विशे० । अनु० । अस्थानविच्छेदे, तदकरणे वा । आ० म० प्र० । तदात्मके सूत्रदोषभेदे, बृ० १ उ० ।

जइधम्म–यतिधर्म–पुं० । क्षान्त्यादिके दशावधे यतिधर्मे, उत्त० १६ अ० । "खंती अज्जव मद्दव, मुत्ती तव संजमे य बोधव्वे । सच्चं सोयं आकिंचणं च बंभं च जइधम्मो ॥ १४ ॥" नवतत्त्वे, (विशेषव्याख्या 'अणगारधम्म' शब्दे प्रथमभागे २७९ पृष्ठे लिखिता)

जइपज्जव–यति [पर्याय] पर्यव–पुं० । यतिदीक्षापालनकाले, पर्यायो द्विधा गृहस्थपर्यायो, यतिपर्यायश्च । प्रव० ६७ द्वार ।

जइपज्जाय–यतिप [र्याय] र्यव–पुं० । 'जइपज्जव' शब्दार्थे, प्रव० ६७ द्वार ।

जइपज्जुवासणपर–यतिपर्युपासनपर–त्रि० । साधुसेवापरायणे, पञ्चा० ६ विव० ।

जइपरिसा–यतिपर्षत्–स्त्री० । चरणोद्यतसाधूनां पर्षदि, औ० । विचित्रद्रव्याद्यभिग्रहाऽऽद्युपेतानां साधूनां पर्षदि, रा० ।

जइपुच्छा–यतिपृच्छा–स्त्री० । साधुशरीरसंयमयात्रापृच्छने, पञ्चा० १ विव० ।

जइय–जयिक–त्रि० । जयावहे, "जइएसु सव्वसउणेसु" जयिकेषु जयावहेषु सर्वशकुनेषु वायसादिषु । आ० १ श्रु० ८ अ० । कल्प० ।

यदि च–अव्य० । यदीत्यर्थे, कल्प० ४ क्षण ।

जइवंस–यतिवंश–पुं० । यतीनामन्वये,समवायाङ्गनामकचतुर्थाङ्गे च । तद्वंशस्य तत्र समनुमरणाधिकारे प्रतिपादितत्वात् । सम० ।

जइवा–यदिवा–अव्य० । प्रकारान्तरे, अथ वेत्यर्थे, व्य० १ उ० ।

जइविस्सामण–यतिविश्र [श्रा] मण–न० । यतेर्देहखेदविनोदने, यतीनां साधूनां वैयावृत्याऽऽदिनिःश्रान्तानां पृष्ठाऽऽदमर्दनेन तथाविधश्रावकादेरपि देहखेदापनोदमिच्छतां विश्रमणं खेदविनोदनं यतिविश्रमणम्, करणीयमिति गम्यते । एवं सर्वत्रोचितक्रियाऽध्याहारः कार्यः । प्राकृतत्वाच्च विश्राम्यतेरुपान्त्यदीर्घत्वम् । यद्वा-विश्राम्यतः करणमिति शतृप्रत्ययस्य कारिते घुटि च विश्रामणमिति भवति । पञ्चा० १ विव० ।

जइस–यादृश–त्रि० । अपभ्रंशे यादृगर्थे, "अतां मइसः" । ८

। ४ । ४०३ । इति सूत्रेण मदन्तानां वाहशादीनामादेरवयवस्य डित् 'अइस' इत्यादेशो भवति । 'जइसो' । प्रा०४ पाद ।

जउगोल–जतुगोल–पुं० । लाक्षागोलके, स्था० ४ ठा० ४ उ० ।

जउण–यमुन–पुं० । तन्नामकराजविशेषे, यो० विं० । संथा० । (तत्कथानकं तु 'आप(व)इ'शब्दे द्वितीयभागे २४६ पृष्ठे संगृहीतम्)

जउणअग्ग–यमुनातट–त्रि० । कालिन्दीतीरे, "दीर्घह्रस्वौ मिथो वृत्तौ" ८ । १ । ४ । इति सूत्रेण पक्षे ह्रस्वता । प्रा० १ पाद ।

जउणराय–यमुनराज–पुं० । यमुनाख्यराजविशेषे, भाव०४म० ।

जउणा–यमुना–स्त्री० । "यमुनाचामुण्डाकामुक्तातिमुक्तके मोऽनुनासिकश्च" ।८।१।२७८। इति सूत्रेण मकारलोपः। प्रा०१ पाद । कालिन्द्यां नद्यां यमभगिन्यां सूर्यसुतायाम्, दुर्गायाम्, वाच० । सा च गङ्गां संगच्छते । स्था० १ ठा० २ उ० । यमुनानदीकूले पूर्वदिग्वधूकरणनिवेशितमुक्ताफलकरिणकेव कौशाम्बी नाम नगरी । विशे० ।

जउणाअग्ग–यमुनातट–त्रि० । कालिन्दीतीरे, प्रा० १ पाद ।

जउणाउर–यमुनापुर–मथुराया भागविशेषे, मथुराया यमुनापुरं समुद्गः । ती० ४५ कल्प ।

जउणावंक–यमुनावक्र–न० । यमुनातटवर्तिनि स्वनामकोद्याने, यो० विं० । "इत्थ जउणावंके जउणराएण हयस्स दंडअणगारस्स केवले उप्पन्ने महिमत्थं इंदो आगओ । " ती० ६ कल्प ।

जउप्पल–जयोत्पल–न० । विंशतिव्याकरणेषु तन्नामके व्याकरणे, कल्प० १ क्षण ।

जउव्वेय–यजुर्वेद–पुं० । यजुषामृक्सामभिन्नानां मन्त्राणां प्रतिपादको वेदः । वेदश्चेदे, स च शुक्लकृष्णभेदेन द्विधा । तद्विचरणं चरणव्यूहे । वाच० । "रिउव्वेए जउव्वेए, सामवेए अथव्वणे । " विपा० १ श्रु० ५ अ० । "चत्तारि वेया ।" मनु० ।

जओ–यतः–अव्य० । यस्मादित्यर्थे, यत्रेत्यर्थे च । उत्त० १ अ० ।

जं–यत्–अव्य० । यस्मादित्यर्थे, नि० चू० १५ अ० । "जं पि य मए इमस्स धम्मस्स " इत्यादिसूत्रे यमिति विभक्तिव्यत्ययाद् यः प्राणातिपात इति योगः। भाषामात्रे वा यदिति पदं व्याख्येयम् । पा० । अम्बुनि, यशोरूपकयोः, एका० ।

जंकिंचिभासग–यत्किञ्चिद्भाषक– पुं० । असंयतप्रलापिनि, पं० व० ४ द्वार ।

जंकिंचिमिच्छापडिक्कमण–यत्किञ्चिन्मिथ्याप्रतिक्रमण–न० । षड्भेदप्रतिक्रमणस्य पञ्चमे भेदे, "जं किंचि मिच्छ त्ति" । खेलसिङ्घाणविधिनिसर्गभोगानाभोगसहसाकाराद्यसंयमस्वरूपं यत् किञ्चित् मिथ्या असम्यक् तद्विषयं मिथ्येदमित्येवं प्रतिपत्तिपूर्वकं मिथ्यादुष्कृतकरणं यत्किञ्चिन्मिथ्याप्रतिक्रमणमिति ।

उक्तं च—

" संजमजोगे अब्भु-ट्ठियस्स जं किंचि तह समायरियं ।
मिच्छा पयं ति विया-णिऊण मिच्छ त्ति कायव्वं " ॥ १ ॥

तथा-

खेलं सिंघाणं वा, अप्पडिलेहापमज्जिओ तह य ।
वोसिरिय पडिक्कमई, तं पि य मिच्छुक्कडं देइ ॥१॥ " इत्यादि ।

स्था० ६ ठा० ।

जंगम–जङ्गम–त्रि० । गम–यङ्–अच् । सततगतियुते, "शरीरिणां स्थावरजङ्गमानाम् " "गुल्मैः स्थावरजङ्गमैः " वाच० । द्वीन्द्रियादित्रसजन्तौ, आ० । स्था० ।

जंगमविस–जङ्गमविष–न० । जङ्गमप्राणिनां नखदंष्ट्रादिगते विषे, दुष्टस्य प्राणिनो दंष्ट्राविषादिना यत् पीडाकारि तदपि जङ्गमविषम् । स्था० ६ ठा० ।

जंगल–जङ्गल–न० । गल–यङ्–अच्–पृषो० । वने, रहसि, मांसे, वाच० । निर्वारिदेशे, बृ० । देशो द्विधा–अनूपो, जङ्गलश्च । नद्यादिपानीयबहुलोऽनूपः ; तद्विपरीतो जङ्गलः, निर्जल इत्यर्थः । बृ० १ उ० । अष्टिच्छत्रप्रतिबद्धे आर्यदेशे च । प्रव० १४८ द्वार । प्रज्ञा० । सूत्र० ।

जंगा–देशी–गोचरभूमौ, दे० ना० ३ वर्ग ।

जंगिय–जाङ्गमिक–न० । जङ्गमजन्तुवयवनिष्पन्ने कम्बलादौ वस्त्रभेदे, जङ्गमास्रसास्तदवयवनिष्पन्नं जाङ्गमिकं कम्बलादि ।

इह गाथे-

" जंगमजायं जंगिय, तं पुण विगलिंदियं च पंचेंदि ।
एक्केक्कं पि य पत्तो, दोह विभागेण उणगविहं ॥ १ ॥
पट्टसुवण्णे मलए, अंसुए चीणंसुए य विगलिंदी ।
उण्णोट्टियमियलोमे, कुतवे किट्टीय पंचेंदी ॥ २ ॥ "

पट्टः सुवर्णं सुवर्णसूत्रं कृमिकाणां मलये मलयविषय एव अंशुकं श्लक्ष्णपट्टं, चीनांशुकं कौसिकारश्लक्ष्णविषये वा यद्भवति श्लक्ष्णात् पट्टादिति मृगरोमजं शशलोमजं मूषकरोमजं वा, कुतपश्चङ्गागले किट्टिजमेतेषामेवावयवनिष्पन्नमिति । स्था० ५ ठा० ३ उ० । सूत्रे प्राकृतत्वाद् मकारलोपः । बृ० २ उ० । " जंगिओ अंगमाइ " । नि० चू० १ उ० ।

जंगुलि–जाङ्गुलि–पुं० । गम–यङ्–जुक् वा गुलिः । विषवैद्ये, वाच० । स्त्री० । गारुडिमन्त्रविशेषे, " जागर्ति ज्ञानदृष्टिश्चेत्, तृष्णाकृष्णाहिजाङ्गुलिः । पूर्णानन्दस्य तत् किं स्यात्, दैन्यवृश्चिकवेदना ? ॥ १ ॥ " अष्ट० १ अष्ट० ।

जंगुलिविज्जा–जाङ्गुलिविद्या–स्त्री० । विषविद्यायां, आवश्यां श्रीसंभवदेवो जाङ्गुलिविद्याऽधिपतिः । ती० ४५ कल्प ।

जंगोल्ल–जाङ्गोल–न० । विषविघातक्रियाविधायके गदतन्त्रे, तद्धि सर्पकीटलूतादष्टविषचिनाशार्थं विविधविषसंप्रयोगप्रशमनार्थं च । विपा० १ श्रु० ७ अ० । एतद्धि आयुर्वेदस्य पञ्चमो भेदः । वाच० ।

जंगोली–जाङ्गोली–स्त्री० । विषविघातन्त्रे, स्था० ८ ठा० ।

जंघट्ठिया–जङ्घास्थिका–स्त्री० । ऊर्वोः प्रतिष्ठानभूते जङ्घाया उपरिभागवर्तिनि अस्थनि, जङ्घास्थिकयोरूरूप्रतिष्ठितौ, तं० ।

जंघलोह–जङ्घलोह–पुं० । अनागतोत्सर्पिणीकालभाविनि त्रिंशतितमे प्रतिवासुदेवे, ति० ।

जंघा–जङ्घा–स्त्री० । जङ्घ्यते कुटिलं गच्छति । गत्यर्थकस्य हन्तेः कौटिल्ये यङ्–लुकि–अच्–पृषो० । गुल्फजानूवोरन्तराले अवयवे, पादजङ्घयोः संधाने गुल्फः, जङ्घयोः संधाने जानु नाम । " चत्वार्यरत्निकास्थीनि, जङ्घयोस्तावदेव च । " वाच० । जङ्घे जान्वोरधोवर्तिन्यौ । उत्त० २ अ० । जं० ।

जंघाचर–जङ्घाचर–पुं० । पादचारिणि, अनु० ।

जंघाचारण–जङ्घाचारण–पुं० । चारणमुनिभेदे, ये चारित्रतपोविशेषप्रभावतः समुद्भूतगमनागमनविषयलब्धिसंपन्नास्ते जङ्घाचारणाः । प्रव० ६७ द्वार । आ० म० । प्रज्ञा० प्रति० रा० नं० । लूतातन्तुनिर्वर्तितपुटकतन्तून् रविकरान् वा निश्रां कृत्वा जङ्घाव्यायामाकाशेन चरतीति जङ्घाचारणः । अस्य च सातिशयाष्टमभक्तकरणेन विकृष्टतपसा सर्वदैव तपस्यतो जङ्घाचारणलब्धिरुपजायते । विशे० । पा० । जङ्घाव्यापारोपकृताश्चारणाः जङ्घाचारणाः । प्र० २० श० ८ उ० । ('चारण' शब्देऽस्मिन्नेव भागे ११७३ पृष्ठे विशेषव्याख्योक्ता)

जंघाबल–जङ्घाबल–न० । जानुसामर्थ्ये, जी० १ प्रति० ।

जंघासंतारिम–जङ्घासंतार्य–त्रि० । जानुदघ्नादिके उदकादौ, आचा० २ श्रु० ३ अ० २ उ० ।

जंणाम–यन्नाम–त्रि० । यानि नामानि यस्येति यन्नामा । यदभिधाने, प्रश्न० १ आश्र० द्वार ।

जंत–यन्त्र–न० । यत्रि–अच् । संयमने, प्रपञ्चविशेषे, रा० । जी० । " विज्जाहरजमलजुगलजंताणि " जी० ३ प्रति० । रक्षादियन्त्रे, जै० गा० । उच्चाटनाद्यर्थकरलेखनप्रकारके, प्रश्न० २ आश्र० द्वार । यन्त्राणि नानाप्रकाराणि । जी० ३ प्रति० । प्रज्ञा० । तद्यथा–जलयन्त्रमरघट्टकादि । स्था० ६ ठा० । प्रश्न० संथा० । प्रव० । तिलयन्त्रं प्राणकादि । प्रश्न० २ आश्र० द्वार । जलसंग्रामादियन्त्राणि । प्रश्न० २ आश्र० द्वार । पाषाणक्षेपयन्त्रम् । औ० । स० । रथोपकरणविशेषाः । कल्प० १ क्षु० १ अ० । शिलोदूखलमुशलादि । प्रव० ६ द्वार । तन्त्रोक्ते देवाद्यधिष्ठाने, चक्रभेदे, औषधपाकार्थे पात्रभेदे, ज्योतिश्चक्राद्यवेक्षणसाधने, पदार्थभेदने, सूत्रधारादेर्दारुवेधकादौ पदार्थे, अग्न्यादेः क्षेपणसाधने पदार्थे, अग्नियन्त्रे, वाच० ।

जंतग–जन्त्रक–न० । यन्त्रमिव इवार्थे कन् । दारुग्रामकयन्त्रभेदे, वाच० । गन्त्र्यादौ, ध० २ अधि० ।

जंतपत्थर–यन्त्रप्रस्तर–पुं० । गोफणादि (यन्त्रमुक्त) पाषाणे, प्रश्न० २ आश्र० द्वार । घरट्टादौ, वाच० ।

जंतपासग–यन्त्रपाशक–पुं० । द्यूते जयार्थं यन्त्रस्थापिते पाशके, आ० म० प्र० ।

जंतपिल्लणकम्म–यन्त्रपीडनकर्मन्–न० । उपभोगपरिभोगाख्यस्तस्मात्रतस्य कर्मतोऽतिचारेष्वेकादशेऽतिचारे, यन्त्रेण तिलेक्षुप्रभृतीनां यत्पीडनरूपं कर्म तत् यन्त्रपीडनकर्म तस्मिन् , उत्त० १ अ० । भ० । आ० चू० । आ० । पञ्चा० । आव० । यन्त्रे उदूखलादौ पीडनं धान्यस्यैतेन कर्म जीविका यन्त्रपीडनकर्म । (ध०) यन्त्रपीडनकर्म शिलोदूखलमुशलघरट्टारघट्टकहुतादिविक्रयः तिलेक्षुसर्षपैरण्डफलादि तस्य पीडनं दलतैलविधानजलयन्त्रवाहनादि वा । यतः–"तिलेक्षुसर्षपैरण्डजलयन्त्रादिपीडनम् । दलतैलस्य च कृति–र्यन्त्रपीडा प्रकीर्तिता " ॥ १ ॥ अत्र यन्त्रशब्दः प्रत्येकं संबध्यते, तत्र तिलयन्त्रं तिलपीडनोपकरणम्, इक्षुयन्त्रं कोल्हुकादि, सर्षपैरण्डयन्त्रं तत्पीडनोपकरणं, जलयन्त्रमरघट्टादि, दलतिलं यत्र दलं तिलादि दीयते तैलं च प्रतिगृह्यते तद्दलतैलं, तस्य कृतिर्विधानम् । अत्र दोषस्तु तिलादितोदात्तकृतत्रसजीववधाद्यः । लौकिका अप्याहुः–" दशगुना सम चक्रम् " इति । ध० २ अधि० । प्रव० ।

जंतपीलणकम्म–यन्त्रपीडनकर्म–न० । ' जंतपिल्लणकम्म ' शब्दार्थे, उत्त० १ अ० ।

जंतपुरिस–यन्त्रपुरुष–पुं० । लोहमये यन्त्रेण च पुरुषचेष्टाकारके पुत्तलके, आ० म० प्र० ।

जंतलट्ठी–यन्त्रयष्टी–स्त्री० । यन्त्रोपयोगिनि लकुटे, दश० ७ अ० ।

जंतवाहयचुल्ली–यन्त्रपा (वा) टकचुल्ली–यन्त्रमिक्षुपीडनयन्त्रं तत्प्रधानः पा(वा)टका यन्त्रपा(वा)टकः, तत्र चुल्ली यन्त्रपा(वा)टकचुल्ली । इक्षुरसपाकाय कृतायां चुल्ल्याम्, जी० ३ प्रति० । स्था० ।

जंतवाहण–यन्त्रवाहन–न० । पञ्चदशकर्मादानान्तर्गतयन्त्रपीडनकर्मणि , प्रव० ६ द्वार ।

जंतु–जन्तु–पुं० । जन–तुन् । जायते इति जन्तुः । उत्त० २ अ० । भ० । प्राणिनि , सूत्र० १ श्रु० १ अ० २ उ० । पं० व० । आचा० । आ० म० । विशे० । जीवद्रव्ये, उत्त० १३ अ० ।

जंतुग–जन्तुक–न० । वनस्पतिविशेषे, सूत्र० २ श्रु० २ अ० । तृणविशेषोत्पन्ने संस्तारके, आचा० २ श्रु० २ अ० ३ उ० ।

जंतुजोहण–जन्तुयोधन–न० । कुक्कुटादीनां परस्परेणाहनने, ध० २ अधि० ।

जंपंत–जल्पत्–त्रि० । ब्रुवाणे , प्रश्न० ३ सम्व० द्वार । सूत्र० ।

जंपग–जल्पक–त्रि० । भाषके, " बहुविहअलियसयजंपयाणं " वृत्तिः–बहुविधालीकशतजल्पकानाम् । प्रश्न० २ आश्र० द्वार ।

जंपमाण–जल्पमान–त्रि० । ब्रुवाणे, प्रश्न० १ आश्र० द्वार ।

जंपाण–जम्पान–न० । द्विहस्तप्रमाणे चतुरस्रे वेदिकोपशोभिते गोल्लदेशप्रसिद्धे युग्यनाम्नि वाहने, कूटाकारच्छादितायां शिबिकायाम्, पुरुषप्रमाणायां स्यन्दमानिकायां च । स्था० ४ ठा० ३ उ० । अनु० । औ० । जं० । जी० । ज्ञा० । पर्यङ्कादौ, दशा० ६ अ० ।

जंपिर–जल्पिन्–त्रि० । " शीलाद्यर्थस्णेरः " । ८ । २ । १४५ । इति सूत्रेणेरादेशः । जल्पनशीले, प्रा० २ पाद ।

जंबवइ-जाम्बवती–स्त्री० । कृष्णाग्रमहिष्याम्, आ० चू० १ अ० । आ० म० । विशे० । सा च अरिष्टनेमेरन्तिके प्रव्रज्य संलेखनां कृत्वा सिद्धेत्यन्तकृद्दशानां पञ्चमवर्गस्य षष्ठेऽध्ययने सूचितम् । अन्त० ४ वर्ग । स्था० ।

जंबाल–जम्बाल–पुं० । जम्ब–घञ्–जम्बमालाति आदत्ते आला–कः । शैवाले, वाच० । कर्दमे, स्था० ३ ठा० ३ उ० । जरायौ च । जरायुजा जम्बालवेष्टिताः समुत्पद्यन्ते, ते च गोमहिषाजाविकमनुष्यादयः । सूत्र० १ श्रु० ७ अ० । जलनीलिकायाम्, दे० ना० ३ वर्ग ।

जंबु–जम्बु–न० । जम्बूफले, " जम्बु भक्खेमो " आव० ४ अ० । जम्बूफलादिषु कृष्णो वर्णः । जं० ३ वक्ष० । प्रज्ञा० ।

जंबुदीव–जम्बूद्वीप–न० । ' जंबूदीव ' शब्दार्थे, जं० १ वक्ष० ।

जंबुल–देशी–वानीरे, मद्यभाजने, दे० ना० ३ वर्ग ।

जंबू–जम्बू–स्त्री० 'जम' अदने, कू–नि०–बुक् । वृक्षविशेषे, वाच० । " ककारेना जंबू : " एतद्वृत्तिः–जम्बूः स्त्रीलिङ्गवृत्तिर्वनस्पतिविशेषः । अनु० । प्रज्ञा० । त्रयोदशजिनस्य चैत्यवृक्षो जम्बूः । स्था० १ ठा० १ उ० । पृथ्वीपरिणामरूपायां (स० ८ समo)जम्बूवृक्षाकारायां सर्वरत्नमय्यां सुदर्शनानाम्न्यां शाश्वतायामनावृतदेवावासभूतायां जम्ब्वाम्, एतयैवायं जम्बूद्वीपोऽभिधीयते ।

निक्षेपः-

जम्बूशब्दस्य नामस्थापनाद्रव्यभावभेदाच्चतुर्धा निक्षेपः । तत्र नामजम्बूर्यस्य जम्बूरिति नाम, यथा–जम्बूरन्तिमकेवली, जम्बाऽभिधाने वा । स्थापनाजम्बूर्या जम्बूरिति स्थापना क्रियते । यथा–चित्रलिखितजम्बूवृक्षादि । द्रव्यजम्बूर्द्विधा–आगमतो नो आगमतश्च । आगमतस्तदर्थज्ञातानुपयुक्तो, नोआगमतो ज्ञशरीरभव्यशरीरोभयव्यतिरिक्तभेदात्त्रिधा । तत्राऽऽद्यौ भेदौ सुप्रतीतौ । उभयव्यतिरिक्तद्रव्यजम्बूरपि त्रिधा, एकभविकबद्धायुष्काभिमुखनामगोत्रजन्तुभेदात् । तत्रैकभविको नाम य एकभवानन्तरं जम्बूत्वेनोत्पत्स्यते ; बद्धायुष्कस्तु येन जम्ब्वायुर्बद्धम् ; अभिमुखनामगोत्रस्तु यस्य जम्ब्वा नामगोत्रे कर्मणी अन्तर्मुहूर्तानन्तरमुदयमायास्यत इत्ययं त्रिविधोऽपि भाविभावजम्बूकारणत्वाद् द्रव्यजम्बूरिति । भावजम्बूरपि द्विधा–आगमतो । नो आगमतश्च । तत्रागमतो ज्ञानोपयुक्तः, नो आगमतस्तु जम्बूद्रुम एव । जम्बूद्रुमनामगोत्रकर्मणी वेदयन्निति आह–यथा अभिमुखजम्बूभावस्य जीवस्य द्रव्यजम्बूत्वम्, " भाविनि भूतवदुपचारः " इति न्यायात्, तथाऽऽसन्नपक्षात्कृतजम्बूभावस्याऽपि, " भूतपूर्वकस्तद्वदुपचारः" इति न्यायात् । कथं न द्रव्यजम्बूत्वं निर्दिष्टम् ? उच्यते–इदमुपलक्षणं, तेन तस्याऽपि द्रव्यनिक्षेप एवान्तर्भावः, भूतस्य भाविनो वेत्यादि द्रव्यलक्षणस्य सद्भावात् । अथानिर्देशकारणं तु श्रीउत्तराध्ययनद्रुमपत्रीयाध्ययननिर्युक्तौ श्रीनेमिबाहुस्वामिपादैः द्रुमनिक्षेपेऽविवक्षणम्, तल्लक्ष्यन्यायत्वाद्दस्य निक्षेपस्येति, प्रस्तुते च नोआगमतो ज्ञावजम्ब्वाधिकारः । जं० १ वक्ष० ।

कहि णं भंते ! उत्तरकुराए कुराए जंबूपेढे णामं पेढे पण्णत्ते ? गोयमा ! णीलवंतस्स वासहरपव्वयस्स दक्खिणेणं मंदरस्स उत्तरेणं मालवंतवक्खारपव्वयस्स पच्चत्थिमेणं सीआए महाणईए पुरच्छिमिल्ले कूले; एत्थ णं उत्तरकुराए कुराए जंबूपेढे णामं पेढे पण्णत्ते । पंच जोअणसयाइं आयामविक्खंभेणं, पण्णरसएकासीयाइं जोअणसयाइं किंचि विसेसाहियाइ परिक्खेवेणं बहुमज्झदेसभाए बारस जोअणाइं बाहल्लेणं, तयणंतरं च णं मायाए २ पदेसपरिहाणीए २ सव्वेसु णं चरिमपेरंतेसु दो दो गाउआइं बाहल्लेणं सव्वजंबूणयामए अच्छे, से णं एगाए पउमवरवेइआए एगेण य वणसंडेणं सव्वओ समंता संपरिक्खित्ते, दुण्हं पि वण्णओ-तस्स णं जंबूपेढस्स चउद्दिसिं एए चत्तारि तिसोवाणपडिरूवगा पण्णत्ता । वण्णओ० जाव तोरणाइं, तस्स णं जंबूपेढस्स बहुमज्झदेसभाए, एत्थ णं मणिपेढिआ पण्णत्ता । अट्ठजोअणाइं आयामविक्खंभेणं, चत्तारि जोअणाइं बाहल्लेणं ; तीसे णं मणिपेढिआए उप्पिं एत्थ णं जंबू सुदंसणा पण्णत्ता । अट्ठ जोअणाइं उड्ढं उच्चत्तेणं अद्धजोअणं उव्वेहेणं, तीसे णं खंधो दो जोअणाइं उड्ढं उच्चत्तेणं अद्धजोअणं बाहल्लेणं, तीसे णं साला छ जोअणाइं उड्ढं उच्चत्तेणं बहुमज्झदेसभाए अट्ठजोअणाइं आयामविक्खंभेणं साइरेगाइं अट्ठ जोअणाइं सव्वग्गेणं, तीसे णं अयमेयारूवे वण्णावासे वइरामयमूला रययसुपइट्ठिअविडिमा० जाव अहिअमणणिव्वुइकरी पासाईआ दरिसणिज्जा,जंबूए णं सुदंसणाए चउद्दिसिं चत्तारि साला पण्णत्ता । तेसि णं सालाणं बहुमज्झदेसभाए एत्थ णं सिद्धायतणे पण्णत्ते, कोसं आयामेणं अद्धकोसं विक्खंभेणं देसूणं कोसं उड्ढं उच्चत्तेणं अणेगखंभसयसन्निविट्ठे० जाव दारा पंच धणुसयाइं उड्ढं उच्चत्तेणं० जाव वणमालाओ मणिपेढिआ, पंच धणुसयाइं आयामविक्खंभेणं अड्ढाइज्जाइं धणुसयाइं बाहल्लेणं ; तीसे णं मणिपेढिआए उप्पिं देवच्छंदए पंचधणुसयाइं आयामविक्खंभेणं साइरेगाइं पंचधणुसयाइं उड्ढं उच्चत्तेणं जिणपडिमावण्णओ णेयव्वो त्ति । तत्थ णं जे से पुरच्छिमिल्ले साले एत्थ णं भवणे पण्णत्ते, कोसं आयामेणं, एवमेव णवरमित्थ सयणिज्जं सेसेसु पासायवडेंसया सीहासणा य सपरिवारा इति, जंबूए णं बारसहिं पउमवरवेइयाहिं सव्वओ समंता संपरिक्खित्ता,वेइआणं वण्णओ, जम्बू णं अणेणं अट्ठसएणं जंबूणं तदद्धुच्चत्ताणं सव्वओ समंता संपरिक्खित्ता,तासि णं वण्णओ,ताओ णं जंबू छहिं पउमवरवेइयाहिं संपरिक्खित्ता, जंबूए णं सुदंसणाए उत्तरपुरच्छिमेणं उत्तरपच्चच्छिमेणं एत्थ णं अणाढिअस्स देवस्स चउण्हं सामाणिअसाहस्सीणं चत्तारि जंबूसाहस्सीओ पण्णत्ताओ; तीसे णं पुरच्छिमेणं चउण्हं अग्गमहिसीणं चत्तारि जम्बूओ पण्णत्ताओ; "दक्खिणपुरच्छिमेणं,दक्खिणेणं तह अवरदक्खिणेणं च । अट्ठसवारसेव य,भवंति जंबूसहस्साइं१अणिआहिवाण पच्चच्छिमेण सत्तेव होंति जंबूओ । सालम साहस्सीओ , चउद्दिसिं आयरक्खाणं ॥१॥" जंबूए णं तिहिं सइएहिं वणसंडेहिं सव्वओ समंता संपरिक्खित्ता जंबूए णं पुरच्छिमेणं पण्णासं जोअणाइं पढमं वणसंडं ओगाहित्ता, एत्थ णं भवणे पण्णत्ते, कोसं आयामेणं, सो चेव वण्णओ, सयणिज्जं च, एवं सेसासु विदिसासु भवणा, जंबूए णं उत्तरपुरच्छिमेणं पढमं वणसंडं पण्णासं जोअणाइं ओगाहित्ता, एत्थ णं चत्तारि पुक्खरिणीओ पण्णत्ताओ । तं जहा–पउमा,पउमप्पभा, कुमुदा, कुमुदप्पभा । ताओ णं कोसं आयामेणं,अद्धकोसं विक्खंभेणं, पंचधणुसयाइं उव्वेहेणं, तासि णं मज्झे पासायवडेंसगा

कोसं आयामेणं अद्धकोसं विक्खंभेणं देसूणं कोसं उद्धं उच्चत्तेणं, वणओ-सीहासणा सपरिवारा, एवं सेसासु वि दिसासु ।

गाहा—

" पउमा पउमप्पभा चेव, कुमुदा कुमुदप्पभा ।
उप्पला गुम्म णलिणा, उप्पला उप्पजुज्जला ॥ १ ॥
भिंगा भिंगप्पभा चेव, अंजणा कज्जलप्पभा ।
सिरिकंता सिरिमहिआ, सिरिचंदा चेव सिरिनिलया" ।२।

जंबूए णं पुरच्छिमिल्लस्स भवणस्स उत्तरेणं उत्तरपुरच्छिमिल्लस्स पासायवडेंसगस्स दक्खिणेणं, एत्थ णं कूडे पण्णत्ते, अट्ठ जोअणाइं उद्धं उच्चत्तेणं, दो जोअणाइं उव्वेहेणं, मूले अट्ठ जोयणाइं आयामविक्खंभेणं बहुमज्झदेसभाए छ जोअणाइं आयामविक्खंभेणं, उवरिं चत्तारि जोअणाइं आयामविक्खंभेणं । "पणवीसहारसवा-रसेव मूले अ मज्झि उवरिं च । सविसेसाइं परिओ, कूडस्स इमस्स बोधव्वो" ॥१॥ मूले वित्थिण्णे मज्झे संखित्ते उवरिं तणुए सव्वकणगामए अच्छे, वेइआवणसंडवण्णओ,एवं सेसा वि कूडा जंबूए णं सुदंसणाए दुवालस णामधेज्जा पण्णत्ता ।

तं जहा—

" सुदंसणा अमोहा य, सुप्पबुद्धा जसोहरा ।
विदेहजंबूसोमणसा, णियया णिच्चमंडिया ॥ १ ॥
सुभद्दा य विसाला य, सुजाया सुमणा वि य ।
सुदंसणाए जंबूए, णामधेज्जा दुवालस ॥ २ ॥ "

जंबूए णं अट्ठट्ठ मंगलगा, से केणट्ठेणं भंते ! एवं वुच्चइ ?। गोयमा ! जंबूए सुदंसणाए अणाढिए णामं जंबूदीवाहिवई परिवसइ, महिड्ढिए, से णं तत्थ चउण्हं सामाणियसाहस्सीणं० जाव आयरक्खसाहस्सीणं जंबूदीवस्स णं दीवस्स जंबूए सुदंसणाए अणाढियाए रायहाणीए अण्णेसिं च बहूणं देवाण य०जाव विहरइ, से तेणट्ठेणं गोअमा ! एवं वुच्चइ, अदुत्तरेणं च णं गोयमा !० जाव जंबू सुदंसणा०जाव णिच्चे च धुवाणि अ आसासया अक्खया अवट्ठिया । कहि णं भंते ! अणाढिअस्स देवस्स अणाढिआ णामं रायहाणी पण्णत्ता । गोयमा ! जंबुदीवे दीवे मंदरस्स पव्वयस्स उत्तरेणं जे चेव पुव्ववण्णिअं जम्मिगप्पमाणं तं चेव णेयव्वं० जाव जवणाओ अजिसेओ अ निरवसेसो त्ति । कतिदन्त ! उत्तरकुरुषु जम्बूपीठं प्रज्ञप्तम् ?। निर्वचनसूत्रे गौतमेत्यामन्त्रणं गम्यम्,नीलवतो वर्षधरपर्वतस्य दक्षिणेन मन्दरस्य पर्वतस्य उत्तरेण माल्यवतो वक्षस्कारपर्वतस्य गजदन्तापरपर्यायस्य पश्चिमेन पश्चिमायां सीतायाः महानद्याः पूर्वकूले, सीता द्विधा-गौकृतोत्तरकुरुपूर्वार्द्धे,तत्रापि मध्यभागे,अभ्यन्तरे उत्तरकुरुषु जम्बूपीठं नाम पीठं प्रज्ञप्तं,पञ्चयोजनशतान्यायामविष्कम्भेन,योजनानां पञ्चदश तान्येकाशीत्यधिकानि किञ्चिद्विशेषाधिकानि परिक्षेपेण बहुमध्यदेशभागे विवक्षितदिक्प्रान्तादर्धतृतीयशतयोजनातिक्रमे इत्यर्थः। बाहल्येन द्वादश योजनानि, तदनन्तरं मात्रया २ क्रमेण २ प्रदेशपरिहाण्या परिहीयमाणः २ "सव्वेसु वि" प्राकृतत्वात् पञ्चम्यर्थे सप्तमी। तेन सर्वेभ्यः चरमप्रान्तेषु मध्यतोऽर्द्धतृतीययोजनशतातिक्रमे इत्यर्थः। द्वौ द्वौ क्रोशौ बाहल्येन सर्वात्मना जम्बूनदमयम् "अच्छं" इत्यादि। "से णं एगाए पउम"इत्यादि। तदिति अनन्तरोक्तं जम्बूपीठम,एकपद्मवरवेदिकया एकेन च वनखण्डेन सर्वतः समन्तात्, संपरिक्षिप्तमिति शेषः। ऊर्ध्वोरपि पद्मवरवेदिकावनखण्डयोर्वर्णकः स्मर्तव्यः प्राक्तनः, तच्च जघन्यतोऽपि चरमान्ते द्विचरमान्ते द्विक्रोशोच्चम्, कथं पुनरारोहावरोहमित्याशङ्क्याह-"तस्स णं"इत्यादि। तस्य जम्बूपीठस्य चतुर्दिशि एतानि दिग्नामोपलक्षितानि चत्वारि त्रिसोपानप्रतिरूपकाणि प्रज्ञप्तानि, एतानि च त्रीणि मिलितानि द्विक्रोशोच्चानि भवन्ति । क्रोशविस्तीर्णानि,अत एव प्रान्ते द्विक्रोशबाहल्यात् पीठात् उत्तरत एव भरतैरावतां च सुखावहद्वारभूतानि, वर्णकश्च तावद्वक्तव्यो यावत् तोरणानि " तस्स णं " इत्यादि व्यक्तम । " तीसे णं " इत्यादि । तस्या मणिपीठिकाया उपरि, अत्र जम्बूः सुदर्शनानाम्नी प्रज्ञप्ता, अष्टयोजनान्यूर्द्धोच्चत्वेन,अर्धयोजनमुद्वेधेन प्रवेशः। अथास्या एवोच्चत्वस्याष्टयोजनानि विभागतो द्रष्टव्यां सूत्राभ्यां दर्शयति-"तीसे णं" इत्यादि । तस्याः जम्ब्वाः स्कन्धः स्कन्धादुपरितनः शाखाप्रभवपर्यन्तोऽष्टयोजने ऊर्द्धोच्चत्वेनार्धयोजनं बाहल्येन पीठेन तस्याः शालाविडिमापरपर्यायाया दिक् प्रसृता शाखामध्यभागप्रभवा ऊर्द्धगता शाखा षड्योजनान्यूर्द्धोच्चत्वेन, तथा बहुमध्यदेशभागे प्रकरणात्,जम्बूरिति गम्यम् । अष्टौ योजनान्यायामविष्कम्भाभ्यां, तान्येव अस्याः स्कन्धोपरितनभागे चतसृष्वपि दिक्षु प्रत्येकमेकैका शाखा निर्गता च, क्रोशोनानि चत्वारि योजनानि, तेन पूर्वापरशाखादैर्घ्यस्कन्धबाहल्य संबन्धार्धयोजनमीलनेनोक्तसंख्यानयनं, बहुमध्यदेशभागश्चात्र व्यावहारिको ग्राह्यः, वृक्षादीनां शाखाप्रभवस्थाने मध्यदेशस्य लोकैर्व्यवह्रियमाणत्वात्, पुरुषस्य कटिका इव, अन्यथा विडिमायाः द्वियोजनातिक्रमे निश्चयप्राप्तस्य मध्यभागस्य ग्रहणे पूर्वापरशाखाद्वयविस्तारस्य ग्रहणसंभवः, विषमश्रेणिकत्वात् । अथवा-बहुमध्यदेशभागः, शाखानामिति गम्यते । को ऽर्थः ?, यतश्चतुर्दिक्शाखामध्यभागः, तस्मिन्निति यावत् । अष्टयोजनानयने तु तथैव, उच्चत्वेन तु सर्वाग्रेण सर्वसंख्यया स्कन्धविडिमापरिमाणमीलने सातिरेकाण्यष्टौ योजनानीति । अथास्या वर्णकमाह-"तीसे णं" इत्यादि । तस्या जम्ब्वा अयमेतद्रूपो वर्णावासः प्रज्ञप्तः-वज्रमयानि मूलानि यस्याः सा वज्रमयमूला । तथा रजतमयी विडिमा बहुमध्यदेशभागे ऊर्द्धविनिर्गता शाखा यस्याः सा रजतसुप्रतिष्ठितविडिमा, ततः यावत्पदात् चैत्यवृक्षवर्णकः सर्वोऽप्यत्र वाच्यः। कियत्पर्यन्तमित्याह-अधिकमनोनिर्वृतिकरी प्रासादीया दर्शनीया इत्यादि । अथास्याः शाखाव्यक्तिमाह-"जंबूए णं" इत्यादि । जम्ब्वाः सुदर्शनायाः चतुर्दिशि चतस्रः शाखाः वा शाखाः प्रज्ञप्ताः । तासां शालानां बहुमध्यदेशभागे उपरितनविडिमाशालायामित्यध्याहार्यं, जीवाऽभिगमे तथादर्शनात् । शेषं सुलभम्, वैताढ्यसिद्धकूटगतसिद्धायतनप्रकरणतो ज्ञेयमित्यर्थः । अत्र पूर्व, शालादौ यत्र यदस्ति तत्र तदुक्तमाह-" तत्थ णं " इत्या-

दि । तत्र तासु चतसृषु शालासु, या सा पौरस्त्या शाला, सूत्रे प्राकृतत्वात् पुंस्त्वनिर्देशः । अत्र भवनं प्रकृतं, क्रोशमायामेन, एवमेवेति सिद्धायतनवदिति, अर्द्धक्रोशं विष्कम्भेन देशोनं क्रोशमुच्चत्वेनेति प्रमाणं, द्वारादिवर्णकश्च वाच्यः । नवरमत्र शयनीयं वाच्यम्, शेषासु दाक्षिणात्यादिशालासु प्रत्येकमेकैकभावेन त्रयः प्रासादावतंसकाः सिंहासनानि सपरिवाराणि च वक्तव्यानि, तेषां प्रमाणं च भवनवत्, तत्र चोदाप-नोदाश्च भवनेषु शयनीयानि प्रासादेषु त्वास्थानसभा इति । ननु भवनानि विषमायामविष्कम्भानि, पद्मद्रहादिमूलपद्मभवनादिषु तथा दर्शनात्, प्रासादास्तु समायामविष्कम्भाः, दीर्घवैताढ्यकूटगतेषु वृत्तवैताढ्यगतेषु वैजयादिराजधानीगतेषु अन्येष्वपि विमानादिगतेषु च प्रासादेषु समचतुरस्रत्वेन समायामविष्कम्भत्वस्य सिद्धान्तसिद्धत्वात्, तत्कथमत्र प्रासादानां भवनतुल्यप्रमाणता घटते ? उच्यते-"ते पासाया कोसं, समूसिआ अद्धकोसविच्छिण्णा ।" इत्यस्य पूज्यश्रीजिनभद्रगणिक्षमाश्रमणोपक्षेत्रविचारगाथार्द्धस्य वृत्तौ-ते प्रासादाः, क्रोशमेकं देशोनमिति शेषः, समुच्छ्रिता उच्चाः क्रोशार्द्धमर्द्धक्रोशं विस्तीर्णाः, परिपूर्णमेकं क्रोशं दीर्घा इति श्रीमलयगिरिपादाः। तथा जम्बूद्वीपसमासप्रकरणे-प्राच्ये शाले भवनम्, इतरेषु प्रासादमध्ये सिद्धायतनसर्वाणि विजयार्द्धमानानीति श्रीउमास्वातिवाचकपादाः । तथा तपागच्छाधिराजपूज्यश्रीसोमतिलकसूरिकृतनव्यबृहत्क्षेत्रविचारसत्कायाः "पासाया सेसदिसा, सालासु विअडुगिरिगिय व्व तओ ।" इत्यस्या गाथाया अवचूर्णौ शेषासु तिसृषु शालासु प्रत्येकमेकैकभावेन तत्र त्रीणि आस्थानोचितानि मन्दिराणि, देशोनं क्रोशमुच्चाः क्रोशार्द्धं विस्तीर्णाः,पूर्णक्रोशं दीर्घा इति श्रीगुणरत्नसूरिपादाः यदाहुः, तदाशयेन प्रस्तुतोपाङ्गस्योत्तरत्र जम्बूद्वीपपरिक्षेपकवनवापीपरिगतप्रासादप्रमाणस्तदनुसारेण चेत्येवं निश्चिनुमो जम्बूप्रकरणप्रासादा विषमायामविष्कम्भा इति । यत्तु श्रीजीवाभिगमसूत्रवृत्तौ-क्रोशमेकमूर्द्धमुच्चैस्त्वेन, अर्द्धक्रोशं विष्कम्भेनेत्युक्तं, तद् गम्भीराशयं न विद्मः । अथास्याः पद्मवरवेदिकादिस्वरूपमाह-" जम्बूए णं " इत्यादि । जम्बूद्वीपदशभिः पद्मवरवेदिकाभिः प्राकारविशेषरूपाभिः, सर्वतः समन्तात् संपरिक्षिप्ता वेदिकानां वर्णकः प्राग्वत्, इमाश्च जम्बूमूलं जम्बूपरिवृत्य स्थिताः ज्ञातव्याः । या तु पीठपरिवेष्टिका सा तु प्रागेवोक्ता । अथास्याः प्रथमपरिक्षेपमाह-" जंबूए णं " इत्यादि । जम्बूः, णमितिवाक्यालङ्कारे । अन्येनाष्टशतेन जम्बूनां जम्बूवृक्षाणां तदर्द्धोच्चत्वानां, तस्या मूलं जम्ब्वा अर्द्धप्रमाणमुच्चत्वं यासां तास्तथा तासां, सर्वतस्समन्तात् संपरिक्षिप्ता उपलक्षणं चैतत्-तेनाबाधायामविस्तारा अपि अर्द्धप्रमाणा ज्ञेयाः । तथाहि-ता अष्टाधिकशतसंख्या जम्ब्वा प्रत्येकं चत्वारि योजनान्युच्चैस्त्वेन क्रोशमेकमवगाहनम्, एकं योजनमुच्चः स्कन्धः, त्रीणि योजनानि विटिमा सर्वाग्रेणोच्चैस्त्वेन सातिरेकाणि चत्वारि योजनानि, तत्रैकैका शाखा अर्द्धक्रोशहीने द्वे योजने दीर्घा, क्रोशपृथुत्वः स्कन्ध इति भवति सर्वसंख्यया आयामविष्कम्भतश्चत्वारि योजनानि, आसु चानादृतदेवस्याभरणादीनि तिष्ठन्ति । एतासां वर्णकज्ञापनायाह-(ताणि णं वणसंडाणि) तासां च वर्णको मूलजम्बूसदृश एवेति। अथासां वाच्यः पद्मवरवेदिकाः ता आह-" ताओ णं " इत्यादि उक्तार्थं, नवरं प्रतिजम्बूवृक्षं षट् षट् पद्मवरवेदिका इत्यर्थः । एतासु च १०८ जम्बूषु, अत्र सूत्रे जीवाजिगमे बृहत्क्षेत्रविचारादौ सूत्रकृद्भिः वृत्तिकृद्भिश्च जिनभवनप्रासादचिन्ता काऽपि न चक्रे, बहवोऽपि च बहुश्रुताः आवश्यकप्रतिक्रमणसूत्रचूर्णिकारादयो मूलजम्बूवृक्षगतप्रथमभवनचतुष्कगतकूटाष्टकजिनभवनैः सह सप्तदशोत्तरं शतं जिनभवनानां मन्यमाना इहाप्येकैकं सिद्धायतनं पूर्वोक्तमानं मेनिरे, ततोऽत्र तत्त्वं केवलिनो विदुरिति । संप्रति शेषान् परिक्षेपान् वक्तुं सूत्रचतुष्टयमाह-" जंबूए णं " इत्यादि । जम्ब्वाः सुदर्शनाया उत्तरपूर्वस्यामीशानकोणे उत्तरस्यामुत्तरपश्चिमायां कोणे, अभ्यन्तरे, दिक्त्रयेऽपि इत्यर्थः । अनाहतनाम्नो जम्बूद्वीपाधिपतेर्देवस्य चतुर्णां सामानिकसहस्राणां चत्वारि जम्बूसहस्राणि प्रज्ञप्तानि । "तीसे णं" इत्यादि कण्ठ्यम् । गाथाबन्धेन पार्श्वदेवजम्बूराह-"दक्खिण " इत्यादि । दक्षिणपौरस्त्ये आग्नेयकोणे, दक्षिणस्याम्, अपरदक्षिणस्यां नैर्ऋतकोणे, चः समुच्चयार्थः । एतासु तिसृषु दिक्षु यथासंख्यं अष्टादश द्वादश जम्बूनां सहस्राणि भवन्ति, एवोऽवधारणे, तेन नाधिकानि, न न्यूनानीत्यर्थः । चः प्राग्वत् । अनीकाधिपजम्बूस्तृतीयपरिक्षेपजम्बूश्च गाथाबन्धेनाह-" अणियाहिवाण " इत्यादि । अनीकाधिपानां गजादिकदटकाधीशानां सप्तानां सप्तैव जम्ब्वः पश्चिमायां भवन्ति, तृतीयः परिक्षेपः पूर्णः । अथ तृतीयमाह—आत्मरक्षाणामनाहतदेवसामानिकचतुर्गुणानां षोडशसहस्राणां जम्ब्वः एकैकासु दिक्षु चतुस्सहस्रसहस्रसद्भावात् षोडशसहस्राणि भवन्ति, यद्यपि चानयोः परिक्षेपयोः जम्बूनामुच्चत्वादिप्रमाणं न पूर्वाचार्यैर्भिन्नितं, तथाऽपि पद्मह्रदपद्मपरिक्षेपन्यायेन, पूर्वपूर्वपरिक्षेपजम्ब्यपेक्षयोत्तरोत्तरपरिक्षेपजम्ब्वोऽर्द्धमाना ज्ञातव्याः । अत्राप्येकैकस्मिन् परिक्षेपे एकैकस्यां पङ्क्तौ क्रियामपेक्ष्य क्षेत्रसांकीर्णेनावकाशदोषस्तथैवोद्भावनीयः,तेन परिक्षेपजातयस्तथैव वाच्याः । संप्रत्यस्या एव वनत्रयपरिक्षेपान् वक्तुमाह-"जंबूए णं" इत्यादि । सा चैवंपरिवारेति गम्यम् । त्रिभिः शतिकैर्योजनशतप्रमाणैर्वनखण्डैः सर्वतः संपरिक्षिप्तः। तद्यथा-अभ्यन्तरेण, मध्यमेन, बाह्येनेति। अथाऽत्र यदस्ति तदाह-" जम्बूए णं " इत्यादि । जम्ब्वाः सपरिवाराया: पूर्वेण पञ्चाशद्योजनानि प्रथमवनखण्डमवगाह्य, अत्रान्तरे भवनं प्रज्ञप्तं, क्रोशमायामेन, उच्चत्वादिकथनायातिदेशमाह-स एव मूलजम्बूपूर्वशाखागतभवनसंबन्धी वर्णको ज्ञेयः । शयनीयं चानाहतयोग्यम् । एवं शेषास्वपि दक्षिणादिदिक्षु दिशि पञ्चाशद्योजनान्यवगाह्याद्ये वने भवनानि वाच्यानि । अथात्र वने वापीस्वरूपमाह—" जंबूए णं उत्तर " इत्यादि । जम्ब्वा उत्तरपौरस्त्यदिग्भागे प्रथमे वनखण्डे पञ्चाशद्योजनान्यवगाह्यात्रान्तरे चतस्रः पुष्करिण्यः प्रज्ञप्ताः । एताश्च न सूत्रश्रेण्या व्यवस्थिताः, किं तु स्वविदिग्गतप्रासादं परिक्षिप्य स्थिताः, तेन प्रादक्षिण्येन तन्नामान्येवम्-पद्मा पूर्वस्यां, पद्मप्रभा दक्षिणस्यां, कुमुदा पश्चिमायां, कुमुदप्रभा उत्तरस्याम् । एवं दक्षिणपूर्वादिविदिग्गतवापीष्वपि वाच्यं, ताश्च क्रोशमायामेन, अर्द्धक्रोशं विष्कम्भेन, पञ्चधनुःशतान्युद्वेधेनेति । अथात्र वापीमध्यगतप्रासादस्वरूपमाह—" तासि णं " इत्यादि । तासां वापीनां चतसृणां मध्ये प्रासादावतंसकाः प्रज्ञप्ताः, बहुवचनं च उक्तवदमीषां वापीनां प्रासादापेक्षया ऽऽह्यं, तेन प्रतिवापीचतुष्कमेकैकप्रासादभावेन चत्वारः प्रासादाः । एवं निर्देशो

लाघवार्थं, क्रोशमायामेनार्द्धक्रोशं विष्कम्भेन, देशोनं क्रोशमुच्चत्वेन, वर्णको मूलजम्बूदक्षिणशाखागतप्रासादवज्ज्ञेयः। एषु चानाहतदेवस्य क्रीडार्थं सिंहासनानि सपरिवाराणि वाच्यानि, जीवाभिगमे त्वपरिवाराणि, एवं शेषासु दक्षिणपूर्वादिषु दिक्षु वाच्यः प्रासादस्य वक्तव्यः । एतासां नामदर्शनाय गाथाद्वयम्-पद्मादयः प्रागुक्ताः, पुनः पद्मबन्धुत्वेन संगृहीता इति न पुनरुक्तिः। एताश्च सर्वा अपि त्रिसोपानचतुर्द्वारा पद्मवरवेदिकावनखण्डयुक्ताश्च बोध्याः । अथ दक्षिणपूर्वस्यामुत्पलगुल्मा, पूर्वस्यां नलिना, दक्षिणस्यामुत्पलोज्ज्वला, पश्चिमायामुत्पला, उत्तरस्यां तथा अपरदक्षिणस्यां भृङ्गा, भृङ्गप्रभा, अञ्जना, कज्जलप्रभा । तथा अपरोत्तरस्यां श्रीकान्ता, श्रीमहिता, श्रीचन्द्रा, श्रीनिलया । चैवशब्दः प्राग्वत् । अथास्य वनस्य मध्यवर्तीनि स्वरूपतो लक्षयति-" जंबूए णं " इत्यादि । जम्बूवा अस्मिन्नेव प्रथमे वनखण्डे पौरस्त्यस्य भवनस्य उत्तरस्याम् , उत्तरपौरस्त्यस्य ईशानकोणसत्कस्य प्रासादावतंसकस्य दक्षिणस्याम्, अत्रान्तरे कूटं प्रज्ञप्तम् । अष्ट योजनान्यूद्धोंच्चत्वेन द्वे योजने उद्वेधेन वृत्तत्वेन य एव आयामः स एव विष्कम्भ इति मूलेऽष्टयोजनान्यायामविष्कम्भाभ्यां बहुमध्यदेशभागे , भूमितश्चतुर्षु योजनेषु गतेष्वित्यर्थः । षट्योजनान्यायामविष्कम्भाभ्याम्-उपरि शिखरभागे चत्वारि योजनान्यायामविष्कम्भाभ्याम् । अथामीषां परिधिकथनाय पद्यमाह—" पणवीस " इत्यादिकं सर्वं प्रथमपाठगतऋषभकूटाभिलापानुसारेण वाच्यम्। नवरं पञ्चविंशतियोजनानि विशेषाणि किञ्चिदधिकानि मूले परित इत्यादि यथासंख्यं योज्यम्। जिनभद्रगणिक्षमाश्रमणैस्तु"अट्ठसहकूडसरिसा,सव्वे जम्बूणया मया भणिया।" इत्यस्यां गाथायामृषभकूटसमत्वेन भणितत्वात् द्वादश योजनानि अष्टौ मध्ये चेत्यूचुः; तत्त्वं तु बहुश्रुतगम्यम् । एषु च प्रत्येकं जिनगृहम् एकैकं विदिग्भागतजिनगृहतुल्यमिति। अथ शेषकूटवक्तव्यमतिदेशाह-"एवं सेसा वि कूडा" इति। एवमुक्तरीत्या वर्णप्रमाणपरिध्याद्यपेक्षया शेषाण्यपि सप्त कूटानि बोध्यानि, स्थानविभागस्त्वेषः। तथाहि-पूर्वदिग्भाविनो भवनस्य दक्षिणतो दक्षिणपूर्वदिग्भाविनः प्रासादावतंसकस्योत्तरतो द्वितीयं कूटं,तथा दक्षिणदिग्भाविनो भवनस्य पूर्वतो दक्षिणपूर्वदिग्भाविनः प्रासादावतंसकस्य पश्चिमायां तृतीयं, तथा दक्षिणदिग्भाविनो भवनस्य पश्चिमायां दक्षिणापरदिग्भाविनः प्रासादावतंसकपूर्वतश्चतुर्थं,तथा पश्चिमदिग्भाविनः प्रासादावतंसकपूर्वतश्चतुर्थं,तथा पश्चिमदिग्भाविनो भवनस्य दक्षिणाऽपरदिग्भाविनः प्रासादावतंसकस्योत्तरतः पञ्चमम्, तथा पश्चिमदिग्भाविन उत्तरत उत्तरपश्चिमदिग्भाविनः प्रासादावतंसकस्य दक्षिणतः षष्ठं, तथा उत्तरदिग्भाविनो भवनस्य पश्चिमायाम् उत्तरपश्चिमदिग्भाविनः प्रासादावतंसकस्य पूर्वतः सप्तमं, तथा उत्तरदिग्भाविनो भवनस्य पूर्वत उत्तरपूर्वदिग्भाविनः प्रासादावतंसकस्य अपरतोऽष्टममिति । अत्र स्थापना । अथ जम्बवा नामोत्कीर्तनमाह—"जंबूए णं" इत्यादि । जम्बवाः सुदर्शनायाः द्वादश नामधेयानि प्रज्ञप्तानि । तद्यथा-सुष्ठु शोभनं नयनमनसोरानन्दकत्वेन दर्शनं यस्याः सा तथा,अमोघा सफला, इयं हि स्वस्वामिभावेन प्रतिपन्ना सती जम्बूद्वीपाधिपत्यं जनयति । तदन्तरेण तद्विषयस्य स्वामिभावस्यैवायोगात्, सुष्ठु अतिशयेन प्रबुद्धा सत्फुल्लयोगादियमप्युत्फुल्ला, सकलभुवनव्यापकं यशो धरतीति यशोधरा, लिहादित्वादच्, जम्बूद्वीपो ह्यनया जम्बवा भुवनत्रयेऽपि विदितमहिमः, ततः संपन्न यथोक्तयशोधारित्वमस्याः, विदेहेषु जम्बूर्विदेहजम्बूः , विदेहान्तर्गतोत्तरकुरुकृतनिवासत्वात् सौमनस्यहेतुत्वात् सौमनस्या, निहितां पश्यतः कस्याऽपि मनो दुष्टं न भवति केवलं तां दृष्ट्वा प्रीतमनास्तां तदधिष्ठातारं च प्रशंसतीति,नियता सर्वकालमवस्थिता शाश्वतत्वात्, नित्यं मण्डिता सदा भूषणभूषितत्वात्, सुष्ठ शोभनकल्याणभाजिनी, न ह्यस्याः कदाचिदुपद्रवसंभवो,महर्द्धिकेनाश्रितत्वात्; चः समुच्चये, विशाला विस्तीर्णा, चः पूर्ववत्, आयामविष्कम्भाभ्यामुच्चत्वेन चाष्टयोजनप्रमाणत्वात् शोभनं यातं जन्म यस्याः सा सुजाता , विशुद्धमणिकनकरत्नमुख्यद्रव्यजनिततया जन्मदोषरहितेति भावः; शोभनं मनो यस्याः सकाशाद्भवति सा सुमनाः , अपि चेति समुच्चये । अत्र जीवाभिगमादिषु चेदं जम्बवादीनां सुभद्रादीनां च नाम्नां व्यत्यासेन पाठो दृश्यते , तत्रापि न कश्चिद्विरोध इति। " जंबूए णं अट्ठट्ठमंगलाए " इति व्यक्तम् । उपलक्षणात् ध्वजछत्रादिसूत्राणि वाच्यानि इति । संप्रति सुदर्शनाशब्दप्रवृत्तिनिमित्तं पिपृच्छिषुरिदमाह—" से केणट्ठेणं " इत्यादि प्रश्नः प्रतीतः । उत्तरसूत्रे-गौतम ! जम्बवां सुदर्शनायामनाहतो नाम जम्बूद्वीपाधिपतिर्न आहता आदरविषयीकृता शेषजम्बूद्वीपगता देवा येनात्मनोऽनन्यसदृशं महर्द्धिकत्वमीक्षमाणेन सोऽनाहत इति यथार्थनामा परिवसति; महर्द्धिक इत्यादि प्राग्वत् । स च तत्र चतुर्णां सामानिकसहस्राणां यावदात्मरक्षकसहस्राणां जम्बूद्वीपस्य जम्बवाः सुदर्शनाया अनाहतनाम्न्या राजधान्या अन्येषां च बहूनां देवानां देवीनां चानाहतराजधानीवास्तव्यानामाधिपत्यं पालयन् यावद्विहरति। तदेतेनार्थेन एवमुच्यते-जम्बूः सुदर्शनेति, कोऽर्थः ?, अनाहतदेवस्य इदमात्मनि महर्द्धिकत्वदर्शनमत्र कृतावासस्येति सुष्ठु शोभनमिति यावत् , अनाहतदेवस्य यस्याः सकाशात् सा सुदर्शना इति । यद्यप्यनाहतराजधानीप्रश्नोत्तरसूत्रे सुदर्शनाशब्दप्रवृत्तिनिमित्तप्रश्नोत्तरसूत्रनिगमनसूत्रान्तर्गते बहुष्वादर्शेषु दृष्टे, तथाऽपि " से तेणट्ठेणं " इत्यादिनिगमनसूत्रम् उत्तरसूत्रानन्तरमेव वाचयितॄणामव्यामोहार्थं सूत्रपाठोऽस्माभिर्लिखितं , व्याख्यातं च उत्तरसूत्रानन्तरं, निगमनसूत्रस्यैव यौक्तिकत्वादिति । अथापरं गौतम ! यावच्छब्दाज्जम्बवाः सुदर्शनाया एतच्छाश्वतं नामधेयं प्रज्ञप्तं , यन्न कदाचिन्न स्यादित्यादिकं ग्राह्यं,नाम्नः शाश्वतत्वं दर्शितम्। अथ प्रस्तुतवस्तुनः शाश्वतत्वमस्ति न वेत्याशङ्कां परिहरन्नाह-" जंबू सुदंसणा " इत्यादि । व्याख्याऽस्य प्राग्वत् । अथ प्रस्तावादस्य राजधानीं विवक्षुराह-" कहि णं भंते ! अणाढियस्स " इत्यादि गतार्थम, नवरं यदेव प्राग्वर्णितं यमिकाराजधानीप्रमाणं तदेव नेतव्यं , यावदनाहतदेवस्योपपातोऽभिषेकश्च निरवशेषो , वक्तव्य इति शेषः । जं० ४ वक्ष० । जी० । स्था० । सुधर्मगणधरशिष्ये , पुं० । प्रश्न० १ आश्र० द्वार । विपा० । अन्त० । अणु० । कल्प० । " थेरस्स णं अज्जसुहम्मस्स अग्गिवेसायणगुत्तस्स अज्जजंबूनामेणं थेरे अंतेवासी कासवगोत्ते " कल्प० ८ क्षण । "जम्बूनाम्ने च काश्यपः " सं० । अवसर्पिण्यां जम्बू चरमशरीरिणां नियमतस्तृतीय-

चतुर्थारकयोः, सिद्धिगमनं तु केषाञ्चित् पञ्चमेऽप्यरके, यथा जम्बूस्वामिनः । सं० ।

श्रीजम्बूस्वामिस्वरूपं चेदम्-

राजगृहे ऋषभधारिण्योः पुत्रः पञ्चमस्वर्गाच्च्युतो जम्बूनामा श्रीसुधर्मस्वामिसमीपे धर्मश्रवणपुरस्सरं प्रतिपन्नश्रद्धिसम्यक्त्वोऽपि पित्रोरेदाग्रहवशादष्टौ कन्याः परिणीतः, परं तासां सस्नेहाभिर्वाग्भिर्न श्यामीकृतः । यतः-" सम्यक्त्वशीलतुम्बाभ्यां, भवाब्धिस्तीर्यते सुखम् । ते दधानो मुनिर्जम्बूः, स्त्रीनदीषु कथं बुड्येत् ? ॥ १ ॥ " ततो रात्रौ ताः प्रतिबोधयन् चौर्यार्थमागतं चतुःशतनवनवतिचौरपरिकरितं प्रभवमपि प्रावीबुधयत्, ततः प्रातः पञ्चशतचौरप्रियाष्टकतज्जनकजननीस्वजनकजननीभिः सह स्वयं पञ्चशतसप्तविंशतितमो नवनवतिकनककोटीः परित्यज्य प्रव्रजितः, क्रमात् केवलीभूत्वा षोडश वर्षाणि गृहस्थत्वे विंशतिः छद्मस्थ्ये चतुश्चत्वारिंशत्केवलित्वे अशीतिवर्षाणि सर्वायुः परिपाल्य श्रीप्रभवं स्वपदे संस्थाप्य सिद्धिं गतः ।

अत्रः कविः-

" जम्बूसमस्तचौरेभ्यो, न भूतो न भविष्यति ।
शिवास्त्ववाहकान् साधून्, चौरानपि चकार यः ॥ १ ॥
प्रभवोऽपि प्रभुर्जीयात्, चौर्येण हरता धनम् ।
तेनेऽनर्घ्यां चौर्यहरं, रत्नत्रितयमद्भुतम् ॥ २ ॥ "

तत्र-

" बारसवरिसेहिं गोअमु, सिद्धो वीराउ वीसहि सुहम्मो ।
चउसट्ठीए जंबू, बुच्छिन्ना तत्थ दस नाणा ॥ ३ ॥
मण १ परमोहि २ पुलाए ३, आहार ४ खवग ५ उवसमे ६ कप्पे७ संजमतिअ ८ केवल ९ सि-ज्झणा य १० जंबुम्मि वुच्छिन्ना" ॥४॥

(मण त्ति) मनःपर्यायज्ञानम्, (परमोहि त्ति) परमावधिर्येष्वित्युत्पन्नेऽन्तर्मुहूर्तान्तः केवलोत्पत्तिः, (पुलाए त्ति) पुलाकलब्धिर्यया चक्रवर्तिसैन्यमपि चूर्णीकर्तुं प्रभुः स्यात्, (आहारग त्ति) आहारकशरीरलब्धिः (खवग त्ति) क्षपकश्रेणिः (उवसम त्ति) उपशमश्रेणिः (कप्प त्ति) जिनकल्पः (संजमतिअ त्ति) संयमत्रिकं-परिहारविशुद्धिकसूक्ष्मसंपरायथाख्यातचारित्रलक्षणम् । अत्रापि कविः-" लोकोत्तरं हि सौभाग्यं, जम्बूस्वामिमहामुनेः । अद्यापि यं पतिं प्राप्य, शिवश्रीर्नान्यमिच्छति ॥ १ ॥ " कल्प० ८ क्षण । विशे० । संभूतविजयाचार्यस्य द्वादशानां शिष्याणां मध्ये दशमे शिष्ये गौतमगोत्रीये स्थविरे, " थेरं च अज्जजंबुं, गोयमगुत्तं नमंसामि ॥ ६ ॥ " कल्प०७ क्षण । श्रीजम्बू-प्रभव-स्वामिभ्यां सार्द्धं तपस्या गृहीता, श्रीजम्बूस्वामिनश्च सर्वायुरशीतिर्वर्षाणि श्रीप्रभवस्वामिनः स्वर्गप्राप्तत्वं संपनीपद्यत, तेनैव तत्पट्टावलीगतं लेख्यकं कथं मिलतीति प्रश्ने,उत्तरम्-श्रीजम्बूस्वामिदीक्षाऽनन्तरं कियद्भिर्वर्षैः श्रीप्रभवस्वामिनो दीक्षा संभाव्यते, तथा च सति न कोऽपि विरोधः । यदुक्तं परिशिष्टपर्वणि—

"पञ्चमः श्रीगणधरोऽ-प्येवमभ्यर्थितस्तदा ।
तस्मै सपरिवाराय, ददौ दीक्षां यथाविधि ॥ १ ॥
पितृनापृच्छ्य चान्येद्युः, प्रभवोऽपि समागतः ।
जम्बूकुमारमनुयान्, परिव्रज्यामुपाददे " ॥ २ ॥ २७८ प्र० । सेन० ३ उल्ला० ।

जंबूणय-जाम्बूनद—न० । जम्बूनद्यां भवम्, अण् । सुवर्णविशेषे, आ० म० प्र० । जी० । जं० । " जंबूणयरत्तमउय-सुकुमालपवालपल्लवंकुरग्गसिहरा । " वृत्तिर्यथा-जाम्बूनदजाम्बूनदनामकसुवर्णविशेषमया रक्ता रक्तवर्णा मृदवो मनोज्ञाः सुकुमाराः सुकुमारस्पर्शा ये प्रवाला ईषदुन्मीलितपत्राभावाः पल्लवाः संजातपरिपूर्णप्रथमपत्राभावरूपा अङ्कुराः प्रथममुद्भिद्यमाना अग्रकुरास्तान् धरन्तीति जाम्बूनदरक्तमृदुसुकुमारप्रवालपल्लवाङ्कुरधराः । क्वचित्पाठः-" जंबूणयरत्तमउय " इत्यादि । तत्र जाम्बूनदानि रक्तानि मृदूनि अकठिनानि सुकुमाराणि अकर्कशस्पर्शानि कोमलानि मनोज्ञानि प्रवालपल्लवाङ्कुरा यथोदितस्वरूपा अग्रशिखराणि च येषां ते तथा । जी० ३ प्रति० । अन्ये तु जाम्बूनदमया अग्रप्रवाला अङ्कुरापरपर्याया राजता इत्याहुः । जी० ३ प्रति० । " जंबूणयमयकलावजोत्तपइविसिट्ठो " जाम्बूनदमयौ कलापौ ग्रीवाभरणविशेषौ योक्त्रे च करभबन्धनरज्जू प्रतिविशिष्टे शोभने यस्य स तथा । उत्त० ४ अ० । " जंबूणयमयाइं गत्ताइं " जाम्बूनदमयानि गात्राणि । रा० ।

जंबूदाडिम-जम्बूदाडिम—पुं० । लक्ष्मणार्यायाः पितरि स्वनामके राजविशेषे, महा० ६ अ० ।

जंबूदीव—जम्बूद्वीप—पुं० । न० । जम्ब्वा सुदर्शनापरनाम्न्याऽनादृतदेवाधिवासभूतया उपलक्षितो द्वीपः तत्प्रधानो वा द्वीपो जम्बूद्वीपः । आव० १ अ० । सर्वद्वीपसमुद्राणामभ्यन्तरीभूते स्वनामके द्वीपे, जी० ३ प्रति० । ल० । द्वी० । स० । अनु० ।

जम्बूद्वीपवक्तव्यताविषये गौतमो वीरं प्रश्नयति-

कहि णं भंते ! जम्बुद्दीवे दीवे, के महालए णं भंते ! जंबुद्दीवे दीवे, किंसंठिए णं भंते ! जंबुद्दीवे दीवे, किमाभारजावफोयारे णं भंते ! जंबुद्दीवे दीवे पण्णत्ते ? । गोयमा ! अयं णं जंबुद्दीवे दीवे सव्वदीवसमुद्दाणं सव्वब्भंतरए सव्वखुड्डाए वट्टे तेल्लापूयसंठाणसंठिए वट्टे रहचक्कवालसंठाणसंठिए वट्टे पुक्खरकण्णियासंठाणसंठिए वट्टे पडिपुण्णचंदसंठाणसंठिए एगं जोयणसयसहस्सं आयामविक्खंभेणं तिण्णि जोयणसयसहस्साइं सोलससयसहस्साइं दोण्णि य सत्तावीसे जोयणसए तिण्णि य कोसे अट्ठावीसं धणुसयं तेरस अंगुलाइं अद्धंगुलं च किंचि विसेसाहियं परिक्खेवेणं पण्णत्ते ।

क्व कस्मिन् देशे 'भंते त्ति' गुरोरामन्त्रणम् । जम्बूद्वीपो, वर्तते इति शेषः । अनेन जम्बूद्वीपस्य स्थानं पृष्टम् । तथा भदन्त ! किंप्रमाणो महानालय आभ्यो व्याप्यक्षेत्ररूपो यस्य स तथा, कियत्प्रमाणमस्य महत्त्वमित्यर्थः । एतेन प्रमाणं पृष्टम् । अथ भदन्त ! किं संस्थानं यस्य स तथा । एतेन संस्थानं पृष्टम् । तथा भदन्त ! आकारभावः स्वरूपविशेषः कस्याकारभावस्य प्रत्यवतारो यस्य सः किमाकारभावप्रत्यवतारः, बहुलग्रहणाद्वैयधिकरण्येऽपि समासः । यद्वा-आकारस्य स्वरूपं नाभाश्च जगतीवर्षधराद्यास्तद्गतपदार्था आकारनाभाः, तेषां प्रत्यवतारोऽवतरणम्,आविर्भाव इति यावत्,आकारभावप्रत्यवतारः कः कीदृग्, आकारभावप्रत्यवतारो यस्मिन् स तथा । अनेन जम्बूद्वीपस्वरूपं, तद्गतपदार्थाश्च पृष्टाः, इति इन्द्रभूतिना प्रश्नचतुष्टये कृते प्रतिवचःश्रवणाय सोत्साहताकरणार्थं जगत्प्रसिद्धगोत्राभिधान-

न तमामन्त्र्य निर्वचनचतुष्टयी भगवानाह-गौतमेत्यत्र दीर्घत्वमामन्त्रणप्रभवम्, तेन हे गौतम ! अथ, यत्र यथं वसामः । अनेन समयक्षेत्रबहिर्वर्तिनामसंख्येयानां जम्बूद्वीपानां व्यवच्छेदः। जम्बूद्वीपो नाम द्वीपः। कथंभूत इत्याह-सर्वद्वीपानां धातकीखण्डादीनां सर्वसमुद्राणां लवणोदादीनां सर्वात्मना सामस्त्येन अभ्यन्तरः सकलतिर्यग्लोकमध्यवर्ती, सर्वाभ्यन्तर एव सर्वाभ्यन्तरकः, स्वार्थे कः प्रत्ययः । अभ्यन्तरमात्रं धातकीखण्डोऽपि पुष्करवरद्वीपापेक्षयाऽस्ति,अतः सर्वशब्दोपादानमिति । अनेन जम्बूद्वीपस्यावस्थानमुक्तम् । तथा-सर्वेभ्योऽपि शेषद्वीपसमुद्रेभ्यः क्षुल्लको लघुः । तथाहि-सर्वलवणादयः समुद्रा धातकीखण्डादयश्च द्वीपा जम्बूद्वीपादारभ्य द्विगुणद्विगुणविष्कम्भायामपरिक्षेपाः, ततः शेषद्वीपसमुद्रापेक्षयाऽयं लघुरिति। दीर्घत्वं प्राकृतत्वात् । अनेन सामान्यतः प्रमाणमभिहितं, विशेषस्त्वायामादिगतं प्रमाणमग्रे वक्ष्यति २। अत्र विशेषतः प्रमाणमवसरप्राप्तमपि यन्नोक्तं तत्सूत्रकाराणां विचित्रा प्रवृत्तिरिति। तथा वृत्तः,स च शुषिरवृत्तोऽपि स्यादत आह-तैलापूपसंस्थानसंस्थितः-तैलेन पक्वोऽपूपस्तैलापूपः,तैलेन हि पक्वोऽपूपः प्रायः परिपूर्णवृत्तो भवति, न घृतपक्व इति तैलविशेषणं, तस्यैव यत्संस्थानं तेन संस्थितः। अत्र तैलादित्वाल्लुप्तकारस्य द्वित्वम्। तथा वृत्तो रथचक्रवालसंस्थानसंस्थितः , रथस्यावयवे समुदायोपचारात् रथाङ्गस्य चक्रवालं मण्डलं तस्येव संस्थानेन संस्थितः। अथवा-चक्रवालं मण्डलं मण्डलत्वधर्मयोगाच्च रथचक्रमपि रथचक्रवालं, शेषं प्राग्वत् । एवं वृत्तः पुष्करकर्णिकासंस्थानसंस्थितः, पुष्करकर्णिका पद्मबीजकोशः,कमलमध्यभाग इति यावत् । वृत्तः परिपूर्णचन्द्रसंस्थानसंस्थितः, प्राग्वत् पदद्वयं भावनीयम् । एकेनैव चरितार्थकत्वेऽपि नानादेशजविनेयानां क्षयोपशमवैचित्र्यात्कस्यचित् किञ्चित् बोधकमित्युपमापदनानात्वम् । अत एव प्रत्युपमापदं योज्यमानत्वात् वृत्तपदस्य न पौनरुक्त्यशङ्कापि। एतेन संस्थानमुक्तम् । अथ सामान्यतः प्रागुक्तं प्रमाणं विशेषतो निर्वक्तुमाह-एकं योजनशतसहस्रप्रमाणाङ्कनिष्पन्नं, योजनलक्षमित्यर्थः । आयामविष्कम्भेन, अत्र च समाहारद्वन्द्वः,तेन क्लीबे एकवद्भावः,आयामविष्कम्भाभ्यामित्यर्थः ॥ अत्राह परः-जम्बूद्वीपस्य योजनलक्षं प्रमाणमुक्तं,तच्च पूर्वपश्चिमयोर्जगतीमूलविष्कम्भसत्कद्वादशद्वादशयोजनक्षेपे चतुर्विंशत्यधिकं भवति, तथा यथोक्तं मानं विरुध्यत इति न जम्बूद्वीपजगतीविष्कम्भेन सहैव लक्षं पूरणीयं,लवणसमुद्रजगतीविष्कम्भेन च लवणसमुद्रलक्षद्वयम् । एवमन्येष्वपि द्वीपसमुद्रेषु, अन्यथा समुद्रमानात् जगतीमानपृथग्भूतं मनुष्यक्षेत्रपरिधिरतिरिक्तः स्यात्। स हि पञ्चचत्वारिंशल्लक्षप्रमाणक्षेत्रापेक्षयाऽभिधीयते। अयमेवाशयः श्रीअभयदेवसूरिभिः चतुर्थाङ्गवृत्तौ पञ्चपञ्चाशत्तमे समवाये प्रादुष्कृतोऽस्तीति,तथा त्रीणि योजनशतसहस्राणि षोडशशतसहस्राणि द्वे योजनशते सप्तविंशत्यधिके त्रयः क्रोशा अष्टाविंशत्यधिकं धनुःशतं त्रयोदशाङ्गुलानि अर्द्धाङ्गुलं च किञ्चिद्विशेषाधिकमित्येतावान् परिक्षेपेण परिधिना प्रज्ञप्तः । अत्र सप्तविंशमष्टाविंशमित्यादिकाः शब्दाः "अधिकं तत्संख्यमस्मिन् शतसहस्रे शतिशद्दशान्तायाः डः" ॥ ७।१।१५४॥ इति (हैम) सूत्रेण डप्रत्यये, सप्तविंशत्यधिकमष्टाविंशत्यधिकमित्यर्थः ।

परिक्षेपानयनोपायस्त्वयं चूर्णिकारोक्तः-

" विक्खंभवग्गदहगुण-करणी वट्टस्स परिरओ होइ।
विक्खंभपायगुणिओ, परिरओ तस्स गणितपदं ॥ १ ॥"

अत्र व्याख्या-वृत्तस्य वृत्तक्षेत्रस्य च यो विष्कम्भो विष्कम्भपरिमाणं तस्य वर्गो विधीयते, वर्गो नाम-तेनैव राशिना तस्य गुणनं, तथा चतुष्कस्य चतुष्केण गुणने षोडश चतुष्कस्य वर्गः। ततः (दहगुण त्ति) दशभिर्गुणनात्, ततः करणीरीतिर्वर्गमूलानयनं,ततो वृत्तस्य परिरयः परिमाणं भवति, तथा तस्य वृत्तस्य परिरयो,विष्कम्भस्य पादेन चतुर्थांशेन गुणितः सन् गणितपदं भवति। जम्बूद्वीपस्य विष्कम्भो न्यासः,स्थापना यथा-१००००० तद्वर्गः तद्गुणो वर्ग इति वचनाल्लक्षं लक्षेण गुण्यते, जातम्-१०००००००००, स च दशगुणः क्रियते, शून्यानि ११, तदनु करणीति वर्गमूलमानीयते ।

तथाहि-

" विषमात्पदतस्त्वकृतिः, वर्गस्थानमुच्यते न मूलेन।
द्विगुणेन भजेच्छेषं, लब्धं विनिवेशयेद् व्यक्तम् ॥ १ ॥
तद्वर्गं संशोध्य, द्विगुणीकुर्वीत पूर्ववल्लब्धम् ।
उत्सार्य ततो विभजे-च्छेषं द्विगुणीकृतं च नयेत् "॥ २ ॥

इत्यनेन करणेनानीते वर्गमूले जातोऽधस्तनः छेदराशिः-६३२४५७ । अत्र सप्तकरूपोऽन्त्योऽङ्केन द्विगुणीकृत इति तद्भजेशेषं सर्वमप्यर्द्धं क्रियते, लब्धं योजनानि ३१६ २५७, छेदराशिश्च सप्तकेऽपि द्विगुणीकृते जातः ६३२-४५४, उपरि शेषांशाः ४०४४७१, एते च योजनस्थानीया इति क्रोशानयनार्थं चतुर्गुणा जाताः ११३७००४, छेदराशिना भागे लब्धं क्रोशाः ३, शेषम् ४०५१२ धनुरानयनाय द्विसहस्रगुणं जातम् ८१०४४०००, छेदराशिना भागे लब्धानि धनूंषि १२८, शेषम् ८१००० षण्णवत्यङ्गुलमानधनुषोऽङ्गुलानयनार्थं षण्णवतिगुणं जातम् ८६२६२४८, छेदेन भागे लब्धमङ्गुलानि १३,शेषम् ४०७३४६,अयं राशिः अर्द्धाङ्गुलानयनाय द्विगुणीक्रियते, जाता अष्टौ लक्षाः चतुर्दशसहस्राणि षट्शतानि द्विनवत्यधिकानि ८१४६१२ छेदराशिः, स एकलब्धमेकमर्धाङ्गुलम्। अत्र व्याख्यातो विशेषप्रतिपत्तिरिति न्यायात् यवादिकमप्यानीयते। तथाहि-ते अर्द्धाङ्गुलांशा अष्टभिर्यवैरङ्गुलमिति अष्टभिर्गुण्यन्ते जाताः ३२५८७६८ छेदः स एव, लब्धाः यवाः ४, ततोऽप्यष्टगुणने यूकादयः स्युः,तत्र यूका १, एतत् सर्वमप्यर्द्धाङ्गुलस्य किञ्चिद्विशेषाधिकत्वकथनेन सूत्रकारेणापि सामान्यतः संगृहीतमिति बोध्यम् । गणितपदं तत्करणं च सोदाहरणमग्रे भावयिष्यते इति । जं० १ वक्ष० । जी० ।

अथाकारभावप्रत्यवतारविषयकप्रश्नं निर्वक्तुमाह-

से णं एगाए वइरामईए जगईए सव्वओ समंता संपरिक्खित्ते ।

(से णं एगाए त्ति) सोऽनन्तरोदितायामविष्कम्भपरिक्षेपपरिमाणो जम्बूद्वीपः,णमिति पूर्ववत्, एकया एकसङ्ख्यया अद्वितीयया, वज्रमय्या वज्ररत्नात्मिकया,जगत्या जम्बूद्वीपप्रकाररूपया द्वीपसमुद्रसीमाकारिण्या महानगरप्राकारकल्पया, सर्वतो दिक्षु समन्ताद्दिक्षु संपरिक्षिप्तः सम्यग् वेष्टितः। प्राकृतत्वाद्दीर्घत्वं वज्रशब्दस्य । जं० १ वक्ष० । जी० । भ० । (जगतीप्रतिबद्धविशेषवक्तव्यता तु 'जगई' शब्देऽत्रैव भागेऽग्रे दर्शयिष्यते)

संप्रति जम्बूद्वीपस्य द्वारप्ररूपणार्थमाह-

जंबूदीवस्स णं भंते ! दीवस्स कइ दारा पण्णत्ता ?। गो-

यमा ! चत्तारि दारा पण्णत्ता । तं जहा-विजये, वेजयंते, जयंते, अपराजिए ।

"जंबुद्दीवस्स णं भंते !" इत्यादि । जम्बूद्वीपस्य, णमिति प्राग्वत् । भदन्त ! द्वीपस्य कति द्वाराणि प्रज्ञप्तानि ?। भगवानाह-गौतम ! चत्वारि द्वाराणि प्रज्ञप्तानि । तद्यथा-विजयम् , वैजयन्तम्, जयन्तम्, अपराजितं वा । जी० ३ प्रति० । (द्वारप्रतिरूपविशेषवक्तव्यताऽपि 'दार' शब्दे विलोकनीया)

संप्रति जम्बूद्वीपमध्यवर्तिपदार्थानां संग्रहगाथामाह-

खंभा१ जोयण२ वासा३, पव्वय४ कूडा५ य तित्थ६ सेढीओ७ ।
विजय८ दह९ णइ१० सलिलाओ, ११ अप्पिकए होइ संगहणी ॥ १ ॥

संग्रहवाक्यस्य संक्षिप्तत्वेन दुर्बोधत्वात् सूत्रकृदेव प्रश्नोत्तररीत्या विवृणोति-

जंबूदीवे णं भंते ! दीवे भरहप्पमाणमेत्तेहिं खंडेहिं केवइयं खंडगणियाए पण्णत्ते ?। गोयमा ! णउअखंडसयगणियाए पण्णत्ते ।

जम्बूद्वीपो भदन्त ! द्वीपो भरतप्रमाणं षट्कलाधिकषड्विंशतियोजनाधिकपञ्चशतयोजनानि तदेव मात्रा परिमाणं येषां तानि तथा एवंविधैः खण्डैः शकलैरित्येवंरूपेण खण्डगणितेन खण्डसंख्यया कियान् प्रज्ञप्तः ?। भगवानाह-गौतम ! नवत्यधिकं खण्डशतं खण्डगणितेन प्रज्ञप्तः । को ऽर्थः ?, भरतप्रमाणैः खण्डैः नवत्यधिकशतसंख्यकैर्मिलितैर्जम्बूद्वीपः संपूर्णः लक्षप्रमाणो भवति ।

अथ योजनेति द्वारसूत्रम्-

जंबूदीवे णं भंते ! दीवे केवइयं जोअणगणियाए पण्णत्ते ?। गोयमा ! " सत्तेव य कोडिसया, णउआ छप्पण्णसयसहस्साइं । चउणउइं च सहस्सा, सयं दिवड्ढं च गणियपयं " ॥ १ ॥

जम्बूद्वीपो भदन्त ! द्वीपः कियान् योजनगणितेन समचतुरस्रयोजनप्रमाणखण्डैः सर्वसंख्यया प्रज्ञप्तः ?। भगवानाह-गौतम ! सप्तकोटिशतानि, एवोऽवधारणे । च समुच्चयार्थः । नवतीति नवतिकोट्यधिकानि इति व्याख्येयं, प्रस्तावात् । अन्यथा कोटिशततो द्वितीयस्थानेषु सत्सु लक्षादिस्थानेषु नवदशकरूपा नवतिर्न युज्यते, गणितशास्त्राविरोधात्, तथा षट्पञ्चाशच्छतसहस्राणि, लक्षाणीत्यर्थः । चतुर्नवतिं च सहस्राणि शतं च छ्यर्धं सार्द्धं पञ्चाशदधिकं योजनमित्येतावत्प्रमाणः जम्बूद्वीपस्य गणितपदं क्षेत्रमित्यर्थः । सूत्रे च योजनसंख्यायाः प्रक्रान्तत्वात् योजनाधिकैव संख्या निर्दिष्टा, अन्यत्र तु भगवतीवृत्त्यादौ साधिकत्वं विवक्षितम । तच्चेदम-" गाउअमेगं पणरस, धणुस्सया तह य धणूणि पण्णरस । सत्तेव य अंगुलाई, जंबुद्दीवस्स गणियपया ॥ १ ॥ " इति । इयं च व्यक्तैव, करणं चाव-" विक्खंभपायगुणिओ, अपरिरओ तस्स गणिअपयं " । इति वचनात् जम्बूद्वीपपरिधिस्त्रिलक्षषोडशसहस्रद्विशतसप्तविंशतियोजनादिको जम्बूद्वीपस्य विष्कम्भस्य लक्षरूपस्य पादेन चतुर्थांशेन पञ्चविंशतिसहस्ररूपेण गुणितो जम्बूद्वीपगणितपदमिति । तथाहि—जम्बूद्वीपपरिधिस्तिस्रो लक्षाः, षोडश सहस्राणि, द्वे शते सप्तविंशत्यधिके योजनानां, तथा गव्यूतत्रयम्, अष्टाविंशत्यधिकं शतं धनुषां त्रयोदशाङ्गुलानि एकं चार्द्धाङ्गुलं, यदादयस्तु श्रीजिनभद्रगणिक्षमाश्रमणप्रणीतक्षेत्रविचारसूत्रवृत्त्यादौ न विवक्षिता, अतो न तद्विवक्षा क्रियते । तत्र योजनराशौ पञ्चविंशतिसहस्रैर्गुणिते सप्तकोटिशतानि नवतिकोट्यः षट्पञ्चाशल्लक्षाः पञ्चसप्ततिसहस्राणि भवन्ति, तथा क्रोशत्रये पञ्चविंशतिसहस्रगुणिते जातं पञ्चसप्ततिसहस्राणि गव्यूतानाम्, एषां च योजनानयनार्थं चतुर्भिर्भागे हृते लब्धान्यष्टादश सहस्राणि सप्तशतानि पञ्चाशदधिकानि योजनानाम्, अस्मिंश्च सहस्रादिके पूर्वराशौ प्रक्षिप्ते जातानि एक सहस्राणि ७ शतानि ५० अधिकानि, कोट्यादिका संख्या तु सर्वत्र तथैव, तथा धनुषामष्टाविंशं शतं पञ्चविंशतिसहस्रैर्गुण्यते जाता द्वात्रिंशल्लक्षा धनुषाम ३२०००००, अष्टाभिश्च धनुःसहस्रैर्योजनं भवति, ततो योजनानयनार्थमष्टाभिः सहस्रैर्भागलब्धानि चत्वारि योजनशतानि,अस्मिंश्च पूर्वराशौ प्रक्षिप्ते जातानि ९४ सहस्राणि, शतं पञ्चाशदधिकम, अङ्गुलान्यपि त्रयोदशपञ्चविंशतिसहस्रैर्गुण्यन्ते, जातानि त्रीणि लक्षाणि पञ्चविंशतिसहस्राधिकानि अर्धाङ्गुलमपि पञ्चविंशतिसहस्रैरभ्यस्यते, जातान्यर्धाङ्गुलानां पञ्चविंशतिसहस्राणि, तेषामर्धे लब्धान्यङ्गुलानां द्वादश सहस्राणि पञ्चशताधिकानि, तेषु पूर्वोक्ताङ्गुलराशौ प्रक्षिप्तेषु जातोऽङ्गुलराशिस्त्रीणि लक्षाणि सप्तत्रिंशत्सहस्राणि पञ्चाशदधिकानि एषां धनुरानयनाय षण्णवत्या भागे हृते लब्धानि धनुषां पञ्चत्रिंशच्छतानि पञ्चदशाधिकानि, शेषं षष्टिरङ्गुलानि, अस्य धनूराशेर्गव्यूतानयनाय सहस्रद्वयेन भागे हृते लब्धमेकं गव्यूतं, शेषं धनुषां पञ्चदश शतानि पञ्चदशाधिकानि, सर्वाग्रेण जातमिदं योजनानां सप्तकोटिशतानि नवतिकोट्यधिकानि षट्पञ्चाशल्लक्षाः चतुर्नवतिसहस्राणि शतमेकं पञ्चाशदधिकं, तथा गव्यूतमेकं धनुषां पञ्चदश शतानि पञ्चदशाधिकानि अङ्गुलानां षष्टिरिति । गतं योजनद्वारम । जं० ६ वक्ष० ।

अथ वर्षाणि-

जम्बूदीवे णं भंते ! कति वासा पण्णत्ता ?। गोयमा ! सत्त वासा । तं जहा-भरहे, एरवए, हेमवए, हेरण्णवए, हरिवासे, रम्मगवासे, महाविदेहे ।

भरतमैरावतं हैमवतं हिरण्यवतं हरिवर्षरम्यकवर्षं महाविदेहः। जं० ६ वक्ष० । ज्यो० । स्था० । (महाविदेहक्षेत्रविभागीकरणे तु दश वर्षाणि)

अथ पर्वतद्वारम-

जंबूदीवे णं भंते ! दीवे केवइया वासहरा पव्वया पण्णत्ता ?। केवइआ मंदरा पव्वया, केवइया चित्तकूडा, केवइया विचित्तकूडा, केवइया जमगपव्वया, केवइया कंचणगपव्वया, केवइया वक्खारा, केवइया दीहवेयड्ढा, केवइया वट्टवेयड्ढा पण्णत्ता ?। गोयमा ! जंबुद्दीवे दीवे छ वासहरपव्वया, एगे मंदरपव्वए, एगे चित्तकूडे, एगे विचित्तकूडे, दो जमगपव्वया, दो कंचणगपव्वयसया, वीसं वक्खारपव्वया, चोत्तीसं दीहवेयड्ढा, चत्तारि वट्टवेअड्ढा, एवामेव सपुव्वावरेणं जंबुद्दीवे दीवे तेणिआ उणत्तरा पव्वयसया भवंतीति मक्खायं ति ।

प्रश्नसूत्रं व्यक्तम् । उत्तरसूत्रे संख्यामीलनाय किञ्चिदुच्यते-षट् वर्षधराः क्षुल्लहिमवदादयः एको मन्दरो मेरुः एकश्चित्रकूटः एकश्च विचित्रकूटः, एतौ च यमकजातकाविव द्वौ गिरिदेवकुरुवर्तिनौ द्वौ यमकपर्वतौ तथैवोत्तरकुरुवर्तिनौ द्वे काञ्चनकपर्वतशते देवकुरूत्तरकुरुवर्तिह्रदयदशकोत्तरकुलयोः प्रत्येकं दशदशकाञ्चनकसद्भावात्, तथा विंशतिर्वक्षस्कारपर्वताः तत्र गजदन्ताकाराः गन्धमादनादयश्चत्वारः, तथा चतुष्प्रकारे महाविदेहे प्रत्येकं चतुष्कचतुष्कसद्भावात् षोडश चित्रकूटादयः सरलाः द्वयेऽपि मिलिताः यथोक्तसंख्याः । तथा चतुस्त्रिंशद्दीर्घवैताढ्याः द्वात्रिंशद्विजयेषु भरतैरावतयोश्च प्रत्येकमेकैकसद्भावात् चत्वारो वृत्तवैताढ्यहैमवतादिषु चतुर्षु वर्षेषु एकैकसद्भावात् 'एवामेव सपुव्वावरेणं ति' प्राग्वत् । जम्बूद्वीपे द्वीपे एकोनसप्तत्यधिके पर्वतशते भवत इत्याख्यातं मया, अन्यैश्च तीर्थकृद्भिः । जं० ६ वक्ष० ।

अथ क्षेत्राणि-

जंबुदीवे दीवे दस खेत्ता पण्णत्ता । तं जहा-भरहे, एरवए, हेमवए, हेरन्नवए, हरिवासे, रम्मगवासे, पुव्वविदेहे, अवरविदेहे, देवकुरा, उत्तरकुरा । स्था० १० ठा० ।

अथ कूटानि-

जंबूदीवे णं भंते ! दीवे केवइया वासहरकूडा, केवइया वक्खारकूडा, केवइया वेअड्ढकूडा केवइया मंदरकूडा पण्णत्ता ?। गोयमा ! छप्पण्णं वासहरकूडा, छण्णउइं वक्खारकूडा, तिन्नि उत्तरा वेअड्ढकूडसया, नव मंदरकूडा पण्णत्ता । एवामेव सपुव्वावरेणं जंबुदीवे दीवे चत्तारि सत्तट्ठा कूडसया भवंतीति मक्खायं ॥

जम्बूद्वीपे कियन्ति वर्षधरकूटानि इत्यादि प्रश्नसूत्रं व्यक्तम् । उत्तरसूत्रे-षट्पञ्चाशद्वर्षधरकूटानि । तथाहि-क्षुद्रहिमवच्छिखरिणोः प्रत्येकमेकादश, महाहिमवद्रुक्मिणोः प्रत्येकमष्टौ, निषधनीलवतोः प्रत्येकं नव, सर्वसंख्यया ५६ । वक्षस्कारकूटानि षण्णवतिः तथथा-सरलचक्षस्कारेषु षोडशसु १६ प्रत्येकं चतुष्टयभावात् ६४ गजदन्ताकृतिवक्षस्कारेषु गन्धमादनसौमनसयोः सप्त २ माल्यवद्विद्युत्प्रभयोः नव इति, उभयमीलने यथोक्तसंख्या, त्रीणि षडुत्तराणि वैताढ्यकूटशतानि, तत्र भरतैरावतयोर्विजयानां च वैताढ्येषु चतुस्त्रिंशति प्रत्येकं नव संज्ञावाङ्कसंख्यानयनं वृत्तवैताढ्येषु च कूटाभावः । अत एव वैताढ्यसूत्रे न दीर्घपदोपादानं, विशेषणस्य व्यवच्छेदकत्वात्, अत्र च व्यवच्छेद्यस्याभावादिति । मेरौ नव, तानि चन्दनवनगतानि ग्राह्याणि, न भद्रशालवनगतानि दिग्गजकूटानि, तेषां भूमिप्रतिष्ठितत्वेन स्वतन्त्रकूटत्वादिति । संग्रहणिगाथायाम्-" पव्वयकूमा य " इत्यत्र चोऽनुक्तसमुये । तेन चतुस्त्रिंशदृषभकूटानि, तथा-अष्टौ जम्बूवनगतानि, तावन्त्येव शाल्मलीवनगतानि भद्रशालवनगतानि च सर्वसंख्ययाऽष्टपञ्चाशत्संख्याकानि अग्राणि । ननु तर्हि एतद्गाथाविवरणसूत्रे-"चत्तारि सत्त सट्ठा कूडसया" इत्येवंरूपे संख्याविरोधः उच्यते-एषां नियताधारकत्वेन स्वतन्त्रगिरित्वान्न कूटेषु गणना । अयमेवाशयः ऋषभकूटसंख्यासूत्रपृथक्करणेन सूत्रकृता स्वयमेव दर्शयिष्यते, यच्च प्राक् ऋषभकूटाधिकारे-" कहि णं भंते ! जंबुद्दीवे दीवे उसभकूडे णामं पव्वए पण्णत्ते । " इति सूत्रम्, तच्छिखरोच्चयमात्रतापरं व्याख्येयमिति सर्वं सम्यक् । जं० ६ वक्ष० । स्था० ।

अथ तीर्थानि-

जम्बुद्दीवे णं भंते ! दीवे भरहे वासे कति तित्था पण्णत्ता ?। गोयमा ! तओ तित्था पण्णत्ता । तं जहा-मागहे, वरदामे, पभासे । जंबुद्दीवे णं दीवे एरवए वासे कति तित्था पण्णत्ता ?। गोयमा ! तओ तित्था पण्णत्ता । तं जहा-मागहे, वरदामे, पभासे । जंबुद्दीवे णं दीवे महाविदेहे वासे एगमेगे चक्कवट्टिविजए कति तित्था पण्णत्ता ?। गोयमा ! तओ तित्था पण्णत्ता । तं जहा-मागहे, वरदामे, पभासे । एवामेव सपुव्वावरेणं जंबुद्दीवे दीवे एगं वि उत्तरे तित्थसए भवतीति मक्खायं ति ॥

प्रश्नसूत्रे तीर्थानि चक्रिणां स्वस्वक्षेत्रसीमासु साधनार्थं महाजलावतरणस्थानानि । उत्तरसूत्रे भरते त्रीणि तीर्थानि प्रज्ञप्तानि । तद्यथा-मागधं पूर्वस्यां गङ्गासङ्गमे समुद्रस्य, वरदामं दक्षिणस्यां प्रभासं, पश्चिमायां सिन्धुसङ्गमे समुद्रस्य । एवमैरावतसूत्रमपि भावनीयम् । नवरं नद्यौ चात्र रक्तारक्तवत्यौ, तयोः समुद्रसङ्गमे मागधप्रभासे वरदामाख्ये च तत्रत्यापेक्षया तथैव, विजयसूत्रे चायं विशेषः-विजयसत्का गङ्गादि ४ महानदीनां यथार्हं शीताशीतोदयोः संगमे मागधप्रभासाख्यानि भावनीयानि, वरदामाख्यानि तेषां मध्यगतानि भाव्यानि, एवमेव पूर्वापरमीलनेन एकं द्व्युत्तरं तीर्थशतं भवतीत्याख्यातमिति । जं० ६ वक्ष० । स्था० ।

अथ श्रेणयः—

जंबुद्दीवे णं भंते ! दीवे केवइयाओ विज्जाहरसेढीओ, केवइयाओ आभिओगसेढीओ पण्णत्ताओ ? । गोयमा ! जंबुद्दीवे दीवे अट्ठसट्ठी विज्जाहरसेढीओ, अट्ठसट्ठी आभिओगसेढीओ पण्णत्ताओ । एवामेव सपुव्वावरेणं जंबुद्दीवे दीवे छत्तीससेढीसए भवतीति मक्खायं ॥

प्रश्नसूत्रं व्यक्तम् । उत्तरसूत्रे गौतम ! जम्बूद्वीपे द्वीपे अष्टषष्टिर्विद्याधरश्रेणयः विद्याधरावासभूता वैताढ्यानां पूर्वापरोदध्यादिपरिच्छिन्ना आयतमेखला भवन्ति चतुस्त्रिंशत्यपि वैताढ्येषु दक्षिणत उत्तरतश्च एकैकश्रेणिभावात् तथैवाष्टषष्टिराभियोग्यश्रेणयः, एवमेव पूर्वापरमीलनेन जम्बूद्वीपे द्वीपे षट्त्रिंशदधिकं श्रेणिशतं भवतीत्याख्यातम् ।

अथ विजयाः-

जंबुद्दीवे णं भंते ! दीवे केवइया चक्कवट्टिविजया, केवइआओ रायहाणीओ, केवइआओ तिमिसगुहाओ, केवइआओ खंडप्पवायगुहाओ, केवइया कयमालया देवा, केवइया णट्टमालया देवा, केवइया उसभकूडा पव्वया पण्णत्ता ?। गोयमा ! जंबुद्दीवे दीवे चोत्तीसं चक्कवट्टिविजया, चोत्तीसं रायहाणीओ, चोत्तीसं तिमिसगुहाओ, चोत्तीसं खंडप्पवायगुहाओ, चोत्तीसं कयमालगा देवा, चोत्तीसं णट्टमालगा देवा, चोत्तीसं उसभकूडा पव्वया पण्णत्ता ।

प्रश्नसूत्रं व्यक्तम् । उत्तरसूत्रे जम्बूद्वीपे द्वीपे चतुस्त्रिंशच्चक्रवर्त्तिविजयाश्चत्वार द्वात्रिंशन्महाविदेहविजयाः द्वे च भरतैरावते, अनयोरपि चक्रवर्त्तिविजेतव्यैकखण्डरूपस्य चक्रवर्त्तिविजयशब्दवाच्यस्य सत्त्वात्, एवं चतुस्त्रिंशत् राजधान्यश्चतुस्त्रिंशत्तमिस्रागुहाः, प्रतिवैताढ्यमेकैकसद्भावात्, एवं चतुस्त्रिंशत् खण्डप्रपातगुहाः, चतुस्त्रिंशत् कृतमालदेवाः, चतुस्त्रिंशन्नृत्तमालका देवाश्चतुस्त्रिंशत् ऋषभकूटनामकाः पर्वताः प्रज्ञप्ताः, प्रतिक्षेत्रं सद्भावतः चक्रवर्त्तिनो दिग्विजयसूचकनामन्यासार्थमेकैकसद्भावात्, यस्मात्र विजयद्वारे प्रक्रान्ते राजधान्यादिप्रश्नोत्तरसूत्रे तद्विजयान्तर्गतत्वेनेति ।

अथ ह्रदाः-

जंबुदीवे दीवे केवइआ महद्दहा पण्णत्ता ? । गोयमा ! सोलस महद्दहा पण्णत्ता ।

प्रश्नसूत्रं व्यक्तम् । उत्तरसूत्रे षोडश महाह्रदाः, षड्वर्षधराणां शीताशीतोदयोश्च प्रत्येकं पञ्च । जं० ६ वक्ष० । स्था० ।

अथ सलिलाः-

जंबुदीवे णं भंते ! दीवे केवइआओ महाणईओ वासहरपवहाओ, केवइआओ महाणईओ कुंडप्पवहाओ पण्णत्ताओ ? । गोअमा ! जंबुद्दीवे दीवे चोद्दस महाणईओ वासहरपवहाओ, चउत्तरिमहाणईओ कुंडप्पवहाओ, एवामेव सपुव्वावरेणं जंबुदीवे दीवे णउतिं महाणईणो भवंतीति मक्खायं ।

जम्बूद्वीपे द्वीपे कियत्यो महानद्यो वर्षधरेभ्यः " तात्स्थ्यात् तच्छ्रुपदेशः" इति । वर्षधरह्रदेभ्यः प्रवहन्ति निर्गच्छन्तीति वर्षधरप्रवहाः । अन्यथा कुण्डप्रभवानामपि वर्षधरनितम्बस्थकुण्डप्रभवत्वेन वर्षधरप्रभवा इति वाच्यं स्यात् । कियत्यः कुण्डप्रभवा वर्षधरनितम्बवर्त्तिकुण्डनिर्गताः प्रज्ञप्ताः ? । गौतम ! जम्बूद्वीपे चतुर्दशमहानद्यो वर्षधरह्रदप्रभवाः भरतगङ्गादयः प्रतिक्षेत्रं द्विद्विभावात् कुण्डभवाः षट्सप्ततिर्महानद्यः, तत्र शीतायाः उदीच्येष्वष्टसु विजयेषु शीतोदायाः याम्येष्वष्टासु विजयेषु च एकैकभावेन षोडश गङ्गाः षोडश सिन्धवश्च । तथा शीतायाः याम्येष्वष्टसु विजयेषु शीतोदायाः उदीच्येष्वष्टसु विजयेष्वष्टसु चैकैकभावेन षोडश रक्ता रक्तवत्यश्च, एवं चतुःषष्टिः द्वादश च प्रागुक्ता अन्तर्नद्यः सर्वमीलने षट्सप्ततिरिति कुण्डप्रभवानां तु शीताशीतोदापरिवारभूतत्वेनाऽसंभवदपि महानदीत्वं स्वस्वविजयगतचतुर्दशसहस्रनदीपरिवारं संपदुपेतत्वेन भाव्यम् । एवमेव पूर्वापरेण चतुर्दशषट्सप्ततिरूपसंख्यामीलनेन जम्बूद्वीपे नवतिर्महानद्यो भवन्तीत्याख्यातमिति । जं० ६ वक्ष० । स्था० । स० । (तासां चतुर्दशमहानदीनां नदीपरिवारसंख्या समुद्रप्रवेशादिश्च ' महाणई ' शब्दे वक्ष्यते)

जंबुदीवे दीवे हेमवयहेरण्णवएसु वासेसु बारसुत्तरे सलिलासयसहस्से भवंतीति मक्खायं ॥

जम्बूद्वीपे हैमवतहैरण्यवतयोः क्षेत्रयोर्द्वादशसहस्रोत्तरं नदीशतसहस्रं भवतीत्येवमाख्यातम् । अत्र शतसहस्रशब्दसाहचर्यादप्रसंख्यायां सहस्राणि प्रतीयन्ते । अन्यथा षट्पञ्चाशत्सहस्राणां चतुर्गुणने संख्याशास्त्रबोधः स्यात्, दृश्यते च शब्दसाहचर्यादर्थप्रतिपत्तिः यथा-रामलक्ष्मणावित्यत्र रामशब्देन दाशरथिर्लक्ष्मणशब्दसाहचर्यात् प्रतीयते, न तु रेणुकासुत इति । जं० ६ वक्ष० ।

जंबूदीवे दीवे हरिवासरम्मगवासेसु दो चउवीसा सलिलासयसहस्सा भवंतीति मक्खायं ॥

तथा " जंबुदीवे " इत्यादि सुबोधं, द्वयोर्वर्षयोः सहोक्तौ हेतुः प्राग्वदेव, (हरी ति) हरिसलिला पूर्वार्णवगा, हरिवर्षहरिकान्ता चापरार्णवगा, रम्यके नरकान्ता पूर्वार्णवगा, नारीकान्ता चापरार्णवगा सर्वसंख्यया जम्बूद्वीपे द्वीपे हरिवर्षरम्यकवर्षयोर्द्वे चतुर्विंशतिसहस्राधिके सलिलाशतसहस्रे भवत इति षट्पञ्चाशत्सहस्राणां चतुर्गुणने एकभावत एव लाभात् । अत्रापि सहस्रपरतया व्याख्यानं प्राग्वत् । जं० ६ वक्ष० ।

जंबुदीवे णं भंते ! दीवे मंदरपव्वयस्स दक्खिणेणं केवइया सलिलासयसहस्सा पुरच्छिमपच्चच्छिमाणिमुहा लवणसमुद्दं समप्पेंति ? । गोयमा ! एगे छण्णउए सलिलासयसहस्से पुरच्छिमपच्चच्छिमाणिमुहे लवणसमुद्दं समप्पेंति त्ति । जंबुदीवे णं भंते ! दीवे मंदरस्स पव्वयस्स उत्तरेणं केवइआ सलिलासयसहस्सा पुरच्छिमाणिमुहा लवणसमुद्दं समप्पेंति ? । गोयमा ! एगे छण्णउए सलिलासयसहस्से पुरच्छिमपच्चच्छिमाणिमुहे० जाव समप्पेइ । जंबुदीवे णं भंते ! केवइआ सलिलासयसहस्सा पुरत्थाभिमुहा लवणसमुद्दं समप्पेंति ? । गोअमा ! सत्त सलिलासयसहस्सा अट्ठावीसं च सहस्सा० जाव समप्पेंति । जंबुदीवे णं भंते ! केवइआ सलिलासयसहस्सा पच्चच्छिमाणिमुहा लवणसमुद्दं समप्पेंति ? । गोयमा ! सत्त सलिलासयसहस्सा अट्ठावीसं च सहस्सा० जाव समप्पेंति, एवामेव सपुव्वावरेणं जंबुदीवे दीवे चोद्दस सलिलासयसहस्सा छप्पण्णं च सहस्सा भवंतीति मक्खायं ॥

अथ मेरुतो दक्षिणस्यां कियत्यो नद्य इत्याह-"जंबुद्दीवे दीवे मंदरपव्वय" इत्यादि व्यक्तम् । नवरम् उत्तरसूत्रे एकं षण्णवतिसहस्राधिकं सलिलाशतसहस्रम् । तथाहि-भरते गङ्गायाः सिन्धोश्च चतुर्दशचतुर्दशसहस्राणि, हैमवते रोहितायाः रोहितांशायाश्चाष्टाविंशतिरष्टाविंशतिसहस्राणि, हरिवर्षे हरिसलिलायाः हरिकान्तायाश्च षट्पञ्चाशत् २ सहस्राणि, सर्वमीलने यथोक्तसंख्या । अथ मेरोरुत्तरवर्त्तिनीनां संख्यां प्रश्नयितुमाह-"जंबुद्दीवे" इत्यादि व्यक्तम् । नवरम् उत्तरसूत्रे सर्वसंख्या दक्षिणसूत्रवद्भावनीया, वर्षाणां नदीनां च विशेषः स्वयं बोध्यः । ननु मेरुतो दक्षिणोत्तरनदीसंख्यामीलने सपरिवारे उत्तरदक्षिणप्रवहे शीताशीतोदे कथं न मिलिते ? उच्यते-प्रश्नसूत्रं हि मेरुतो दक्षिणोत्तरदिग्भागवर्त्तिपूर्वापरसमुद्रप्रवेशरूपविशिष्टार्थविषयकं, तेन मेरुतः शुद्धपूर्वापरसमुद्रप्रवेशिन्योरनयोर्निर्वचनसूत्रमन्तर्नीतं, यथाप्रश्नं निर्वचनदानस्य शिष्टव्यवहारात् । अथ पूर्वाऽभिमुखाः कियत्यो लवणोदं प्रविशन्तीत्याह-"जंबुद्दीवे दीवे" इत्यादि । जम्बूद्वीपे द्वीपे कियत्यो नद्यः पूर्वाऽभिमुखाः लवणोदं प्रविशन्ति, कियत्यः पूर्वसमुद्रप्रवेशिन्य इत्यर्थः । इदं च प्रश्नसूत्रं केवलं नदीनां पूर्वदिग्गामित्वरूपप्रश्नविषयकं, तेन पूर्वस्मात्

प्रश्नसूत्राद्विज्ञायते, उत्तरसूत्रे सप्त नदीलक्षाणि, अष्टाविंशतिश्च सहस्राणि यावत् समुपसर्पन्ति । तद्यथा-पूर्वसूत्रे मेरुतो दक्षिणदिग्वर्तिनीनामेकं षण्णवतिसहस्राधिकं लक्षमुक्तं, तदर्द्धं पूर्वं पूर्वाब्धिगामीत्यागतान्यष्टानवतिः सहस्राणि, एवमुदीच्यनदीनामप्यष्टानवतिः सहस्राणि शीतापरिकरनद्यश्च लक्षाणि द्वात्रिंशत्सहस्राणि च, सर्वपिण्डे यथोक्तं मानम् । अथ पश्चिमाब्धिगामिनीनां संख्याप्रश्नार्थमाह-" जंबुदीवे दीवे " इत्यादि । इदं चानन्तरसूत्रवत् वाच्यं, संख्या याजनीया, परस्परं निर्विशेषत्वात् । संप्रति सर्वसरित्संकलनामाह-" एयामेव सपुव्वावरेणं " इत्यादि व्यक्तं, नवरम् जम्बूद्वीपे द्वीपे पूर्वाब्धिगामिनीनामपराब्धिगामिनीनां च नदीनां संयोजने चतुर्दशलक्षाणि षट्पञ्चाशत् सहस्राणि भवन्ति इत्याख्यातम् । ननु इयं सर्वसरित्संख्या केवलपरिकरनदीनां, महानदीसहितानां वा तासाम् ?। उच्यते--महानदीसहितानामिति संभाव्यते, संज्ञावनावेजं तु कच्छविजयगतसिन्धुनदीवर्णनाधिकारे प्रवेशे च सर्वसंख्यया आत्मना सह चतुर्दशभिर्नदीसहस्रैः समन्विता भवतीति श्रीमलयगिरिकृतबृहत्क्षेत्रविचारवृत्यादिवचनमिति । श्रीरत्नशेखरसूरयस्तु स्वक्षेत्रसमासे-" अडसयरि महाणइओ, चारस अंतरणईउ सेसा उ । परिआरणईव चउदस, एवं छप्पण्णसहस्सा य ॥१॥" इति महानदीनां पृथग्गणनं चकुरिति । तत्त्वं तु बहुश्रुतगम्यम् । नन्वत्र प्रत्येकमष्टाविंशतिसहस्रनदीपरिवारा द्वादशान्तर्नद्यः सर्वनदीसंकलनायां कथं न गणिताः?। उच्यते-इयं सर्वसरित्संख्या चतुर्दशलक्षादिलक्षणं श्रीरत्नशेखरसूरिभिः स्वोपज्ञक्षेत्रसमासवृत्तौ, तथा प्रतिमहानदीपरिवारमीलने स्वस्वक्षेत्रविचारसूत्रे श्रीजिनभद्रगणिक्षमाश्रमणादिसूत्रकारैः श्रीमलयगिर्यादिभिर्वृत्तिकारैश्चान्तर्नदीपरिवाराः संग्रहेण नोक्ताः। श्रीहरिभद्रसूरिभिस्तु-"संखा जोअण " इत्यादि गाथायाः संग्रहण्यां चतुरशीतिप्रमाणा कुरुनदीरनन्तर्भाव्य तत्स्थाने इमा एव द्वादश नदीः चतुर्दशभिः२ नदीसहस्रैः सह निक्षिप्य यथोक्तसंख्याऽपूरि । तद्यथा-" चउदस सहस्सगुणिआ, अडतीसणईउ विजयमज्झिल्ला । सीआणइणिवमंती, सीओआए वि एमेव ॥ १ ॥ " कैश्चित्तु जयविजयगतयोः गङ्गासिन्ध्वोः रक्तारक्तवत्योर्वा अष्टाविंशतिसहस्रनदीलक्षणः परिवारः, स एकादशशतयोपचारेणान्तर्नदीनां परिवारतयोक्त इत्यतोऽत्रसीयते, यदन्तर्नदीपरिवारमाश्रित्य मतवैचित्र्यदर्शनादिना केनाऽपि हेतुना प्रस्तुतसूत्रकारेणाऽपि सर्वनदीसंकलनायां गणिता इति । अत्रापि तत्त्वं बहुश्रुतगम्यमेव । यदि चान्तर्नदीपरिवारनदीसंकलनाऽपि क्रियते, तदा जम्बूद्वीपे त्रिनवतिसहस्राधिकाः सप्तदश लक्षाः नदीनां भवन्ति । यदुक्तम्-" सुत्ते चउदस लक्खा, छप्पण्णसहस्सजंबुदीवम्मि । हुंति उ सत्तरस लक्खा, बाणउई सहस्ससलिला उ ॥ १ ॥ " इति । एतेषां जम्बूद्वीपप्रज्ञप्त्युक्तार्थानां पिण्डके मीलके विषयजूते इयं संग्रहगाथा भवतीति । अथ जम्बूद्वीपव्यासस्य लक्षप्रमाणतापतीत्यर्थं दक्षिणोत्तराज्यां क्षेत्रयोजनसंख्याप्रमीलनं जिज्ञासूनामुपकाराय दर्श्यते । तथा-१००००, अत्र सर्वाग्रं लक्षयोजनप्रमाणम् । अत्रापि जगतीसत्कमूलविष्कम्भः स्वस्वदिग्गतमुखवनेऽन्तर्भावनीय इति । जं० ६ वक्ष० ।

अथ जम्बूद्वीपे चन्द्रादिसंख्यां पृच्छति-

जंबुदीवे णं भंते ! दीवे कइ चंदा पभासिंसु, पभासिंति, पभासिस्संति ; कइ सूरिया तवइंसु, तवंति, तविस्संति ; केवइआ णक्खत्ता जोगं जोइंसु, जोअंति, जोइस्संति; केवइआ महग्गहा चारं चरिंसु, चरंति, चरिस्संति; केवइआओ तारागणकोडाकोडीओ सोभिंसु, सोभिंति, सोभिस्संति य ?। गोयमा ! दो चंदा पभासिंसु० ३, दो सूरिआ तवइंसु० ३, छप्पण्णं णक्खत्ता जोगं जोइंसु० ३, छावत्तरं महग्गहसयं चारं चरिंसु० ३ । " एगं च सयसहस्सं, तेत्तीसं खलु भवे सहस्साइं । णव य सया पण्णासा, तारागणकोडिकोडीणं ॥ १ ॥ "

जम्बूद्वीपे भगवन् ! द्वीपे कति चन्द्राः प्रभासितवन्तः-प्रकाशनीयं वस्तु सदुद्योतितवन्तः, प्रभासयन्ति सदुद्योतयन्ति,प्रभासयिष्यन्ति सदुद्योतयिष्यन्ति,उद्द्योतनामकर्मोदयाच्चन्द्रमण्डलानामनुष्णप्रकाशो हि जने उद्द्योत इति व्यवह्रियते,तेन तथा प्रश्ने अनादिनिधनेयं जगत्स्थितिरिति जानतः शिष्यस्य कालत्रयनिर्देशेन प्रश्नः, प्रष्टव्यं तु चन्द्रादिसंख्या । तथा कति सूर्यास्तापितवन्तः आत्मव्यतिरिक्तवस्तूनि तापं जनितवन्तः, एवं तापयन्ति, तापयिष्यन्ति । आतपनामकर्मोदयाद् रविमण्डलानामुष्णः प्रकाशस्ताप इति लोके व्यवह्रियते, तेन तथा प्रश्नोक्तिः, तथा कियन्ति नक्षत्राणि योगं स्वयं नियतमण्डलचारित्वेऽप्यनियताऽनेकमण्डलचारिभिर्निजमण्डलक्षेत्रमार्गतैर्ग्रहैः सह संबन्धं युक्तवन्ति प्राप्तवन्ति, युञ्जन्ति प्राप्नुवन्ति, योक्ष्यन्ति प्राप्स्यन्ति । तथा कियन्तो महाग्रहा अङ्गारकादयश्चारं मण्डलक्षेत्रपरिभ्रमिं चरितवन्तो अनुभूतवन्तः, चरन्ति अनुभवन्ति,चरिष्यन्ति अनुभविष्यन्ति ?। यद्यपि समयक्षेत्रवर्तिनां सर्वेषामपि ज्योतिष्काणां गतिश्चार इत्यभिधीयते, तथाऽप्यन्यव्यपदेशविशेषाभावेन चक्रातिचारादिभिर्गतिविशेषैर्गतिमत्त्वेन चैषां सामान्यगतिशब्देन प्रश्नः । तथा कियत्यस्तारागणकोट्यः शोभितवत्यः शोभां धृतवत्यः, शोभन्ते, शोभिष्यन्ति ?। एषां च चन्द्रादिसूत्रोक्तकारणाभावेन बहुलपक्षादौ भास्वरत्वमात्रेण शोभमानत्वादित्थं प्रश्नाभिलापः । अत्र सूत्रेऽनुक्तोऽपि वाशब्दो विकल्पद्योतनार्थं प्रतिपत्तव्यं बोध्यः । भगवानाह--गौतम ! द्वौ चन्द्रौ प्रभासितवन्तौ, प्रभासेते, प्रभासिष्येते च । जम्बूद्वीपे क्षेत्रे सूर्याक्रान्ताभ्यां दिग्व्यामन्यत्र शेषयोर्दिशोश्चन्द्राभ्यां प्रकाश्यमानत्वात्, प्रश्नसूत्रे च प्रभासितवन्त इत्यादौ यो बहुवचनेन निर्देशः स प्रश्नरीतिर्बहुवचनेनैव भवतीति ज्ञापनार्थः । एकाद्यन्यतरनिर्णयस्य तु सिद्धान्तोत्तरकाले संभवः, एवं सूर्यसूत्रेऽपि भावनीयम् । तथा द्वौ सूर्यौ तापितवन्तौ, जम्बूद्वीपक्षेत्रमिति शेषः; अस्मिन्नेव क्षेत्रे चन्द्राक्रान्ताभ्यां दिग्व्यामन्यत्राशेषयोर्दिशोः सूर्याभ्यां ताप्यमानत्वात् तथा षट्पञ्चाशच्छतानेकैकस्य चन्द्रस्य प्रत्येकमष्टाविंशतिनक्षत्रपरिवारान् योगं युक्तवन्तीत्यादि प्राग्वत् । तथा षट्सप्ततिं षट्सप्तत्युत्तरं महाग्रहशतम्, एकैकस्य चन्द्रस्य प्रत्येकमष्टाशीतेर्ग्रहाणां परिवारत्वात् चारं चरितवदित्यादि । तथा पद्येन तारामानमाह-" तारागणकोडिकोटीनामेकलक्षं त्रयस्त्रिंशच्च सहस्राणि, नव च शतानि, पञ्चाशानि पञ्चाशदधिकानि भवन्ति । प्रतिचन्द्रं तारागणकोटाकोटीनां षट्षष्टिसहस्रनवशताधिकपञ्चसप्ततेर्लभ्यमानत्वादिति । जं० ६ वक्ष० ।

जम्बूद्वीपे निधिसंख्यां प्रश्नयन्नाह-

जंबुदीवे दीवे केवइया णिहिरयणा सव्वग्गेणं पण्णत्ता ?। गोयमा ! तिण्णि उत्तुत्तरा णिहिरयणसया सव्वग्गेणं पण्णत्ता। जंबुदीवे दीवे केवइआ णिहिरयणसया परिभोगत्ताए हव्वमागच्छंति ?। गोयमा ! जहण्णपए छत्तीसं, उक्कोसपए दोण्णि सत्तरा णिहिरयणसया परिभोगत्ताए हव्वमागच्छंति। जंबुदीवे दीवे केवइआ पंचिंदियरयणसया सव्वग्गेणं पण्णत्ता ?। गोयमा ! दो दसुत्तरा पंचिंदियरयणसया सव्वग्गेणं पण्णत्ता। जम्बुदीवे दीवे जहण्णपदे वा उक्कोसपदे वा केवइआ पंचिंदियरयणसया परिभोगत्ताए हव्वमागच्छंति ?। गोयमा ! जहण्णपए अट्ठावीसं उक्कोसपए दोण्णि दसुत्तरा पंचिंदियरयणसया परिभोगत्ताए हव्वमागच्छंति। जंबुदीवे णं भंते ! दीवे केवइआ एगिंदियरयणसया सव्वग्गेणं पण्णत्ता ?। गोयमा ! दो दो दसुत्तरा एगिंदियरयणसया सव्वग्गेणं पण्णत्ता। जंबुदीवे णं भंते ! दीवे केवइया एगिंदियरयणसया परिभोगत्ताए हव्वमागच्छंति ?। गोयमा ! जहण्णपए अट्ठावीसं,उक्कोसेणं दोण्णि दसुत्तरा एगिंदियरयणसया परिभोगत्ताए हव्वमागच्छंति। जंबुदीवे णं भंते ! दीवे केवइअं आयामविक्खंभेणं, केवइअं परिक्खेवेणं, केवइअं उव्वेहेणं, केवइअं उड्ढं उच्चत्तेणं, केवइअं सव्वग्गेणं पण्णत्ता ?। गोयमा ! जंबुदीवे दीवे एगं जोअणसयसहस्सं आयामविक्खंभेणं, तिण्णि जोअणसयसहस्साइं सोलस य सहस्साइं दोण्णि अ सत्तावीसे जोअणसए तिण्णि अ कोसे अट्ठावीसं च धणुसयं तेरस य अंगुलाइं अद्धंगुलं च किंचि विसेसाहिअं परिक्खेवेणं,एगं जोअणसहस्सं उव्वेहेणं,णवणउतिजोअणसहस्साइं साइरेगाइं उड्ढं उच्चत्तेणं, साइरेगं जोअणसयसहस्सं सव्वग्गेणं पण्णत्ते।

"जंबुदीवे" इत्यादि। जम्बूद्वीपे द्वीपे कियन्ति निधिरत्नानि उत्कृष्टनिधानानि, यानि गङ्गादिनदीमुखस्थानि चक्रवर्ती हस्तगतपरिपूर्णषट्खण्डकादिदिग्विजयव्यावृत्तोऽष्टमतपःकरणानन्तरं स्वसात्करोति, तानि सर्वाग्रेण सर्वसंख्यया प्रश्नयन्नाह-गौतम ! त्रीणि षडुत्तराणि निधिरत्नशतानि सर्वाग्रेण प्रज्ञप्तानि। तद्यथा-नवसंख्याकानि निधानानि चतुस्त्रिंशता गुण्यन्त इति यथोक्ता संख्येति। इयं च सत्तामाश्रित्य प्ररूपणा कृता। अथ निधिपतीनां कति निधानानि विवक्षितकाले भोग्यानि भवन्तीति प्रश्नयन्नाह-"जंबुदीवे दीवे" इत्यादि। जम्बूद्वीपे कियन्ति निधिरत्नशतानि परिभोग्यतया उत्पन्ने प्रयोजने चक्रवर्तिभिर्व्यापार्यमाणत्वेन "हव्वं इति" शीघ्रं चक्राभिव्याप्तेरनन्तरं, निर्विलम्बमित्यर्थः, आगच्छन्ति ?। भगवानाह-गौतम ! जघन्यपदे षट्त्रिंशत् जघन्यपदभाविनां चक्रवर्तिनां नव निधानानि चतुर्गुणितानि यथोक्तसंख्याप्रदानीति, उत्कृष्टपदे तु द्वे सप्तत्यधिके निधिरत्नशते परिभोग्यतया शीघ्रमागच्छतः, उत्कृष्टपदभाविनां चक्रिणां त्रिंशता नव नव निधानानि भवन्तीति नव त्रिंशता गुण्यन्ते, इत्युपपद्यते यथोक्तसंख्येति। अथ जम्बूद्वीपवर्तिचक्रवर्तिरत्नसंख्यां पिपृच्छिषुराह-(जम्बुदीवे त्ति) जम्बूद्वीपे द्वीपे भदन्त ! कियन्ति पञ्चेन्द्रियरत्नानि सेनापत्यादीनि, तेषां शतानि सर्वाग्रेण प्रज्ञप्तानि ?। भगवानाह-गौतम ! द्वे दशोत्तरे पञ्चेन्द्रियरत्नशते सर्वाग्रेण प्रज्ञप्ते। तद्यथा-उत्कृष्टपदभाविनां त्रिंशतां चक्रिणां प्रत्येकं सप्त पञ्चेन्द्रियरत्नसद्भावेन सप्तसंख्या त्रिंशता गुण्यते, भवति यथोक्तं मानम्। ननु निधिसर्वाग्रपृच्छायां चतुस्त्रिंशता गुणनं,पञ्चेन्द्रियरत्नसर्वाग्रपृच्छायां तु किमिति त्रिंशता गुणनम् ?। उच्यते-चतुर्षु वासुदेवविजयेषु तदा तेषामनुपलम्भात् निधीनां तु नियतभाव्यत्वेन सर्वदाऽप्युपलब्धेः,तेन रत्नसर्वाग्रसूत्रे रत्नपरिभोगसूत्रे च न कश्चित्संख्याकृतो विशेष इति। अथ रत्नपरिभोगप्रश्नसूत्रमाह-"जम्बुदीवे" इत्यादि प्रायो व्याख्यातत्वाद्व्यक्तम्। अथैकेन्द्रियरत्नानि प्रश्नयितुमाह-"जंबुदीवे" इति व्यक्तम्। नवरम् एकेन्द्रियरत्नानि चक्रिणां चक्रादीनि तेषां शतानि इति। अथैकेन्द्रियरत्नपरिभोगसूत्रं पृच्छन्नाह-"जंबुदीवे त्ति" व्यक्तम्। अथ जम्बूद्वीपस्य विष्कम्भादीनि पृच्छन्नाह-(जंबुदीवे त्ति) अत्र सूत्रे विष्कम्भायामपरिक्षेपाः प्राग् व्याख्याताः, पुनः प्रश्नविषयीकरणं तु उद्वेधादिकेऽधर्मप्रश्नकरणस्य प्रस्तावाद्विस्मरणशीलविनेयजनस्मरणरूपोपकारायेति। तेनोद्वेधादिसूत्रे जम्बूद्वीपं द्वीपम्, अत्र द्वीपशब्दस्य क्लीबत्वनिर्देशः, क्लीबेऽपि वर्तमानत्वात्, कियदुद्वेधत्वेन,भूमिप्रविष्टत्वेनेत्यर्थः। कियदूर्ध्वोच्चत्वेन, भूमिगतत्वोच्चत्वेनेत्यर्थः। किंयच्च सर्वाग्रेण तुण्डत्वोच्चत्वमीलनेन प्रज्ञप्तम् ?। भगवानाह-गौतम ! विष्कम्भायामपरिक्षेपविषयं निर्वचनसूत्रं प्राग्वत्,उद्वेधादिनिर्वचनसूत्रे तु एकं योजनसहस्रमुद्वेधेन सातिरेकाणि नवनवतियोजनसहस्राणि ऊर्ध्वोच्चत्वेन सातिरेकं योजनशतसहस्रं सर्वाग्रेण प्रज्ञप्तम्। ननु तुङ्गत्वव्यवहारो जलाशयादौ,उच्चत्वव्यवहारस्तु पर्वतविमानादौ प्रसिद्धः, द्वीपे तु स किं,व्यवहारविषयत्वादिति ?। उच्यते-समभूतलादारभ्य रत्नप्रभायामधः सहस्रायोजनानि यावद्गमनेऽधोग्रामविजयादिषु जम्बूद्वीपव्यवहारस्योपलभ्यमानत्वेनोच्चत्वव्यवहारः सुप्रसिद्ध एव। तथा जम्बूद्वीपोत्पन्नानां तीर्थकृतां जम्बूद्वीपमेरोः पण्डकवनाभिषेकशीलायामभिषिच्यमानत्वात् जम्बूद्वीपव्यपदेशपूर्वकमभिषेकस्य जायमानत्वेनौच्चत्वव्यवहारोऽप्यागमे सुप्रसिद्ध एवेति। जं०७वक्ष०।

अथास्यैव शाश्वतभावादिकं प्रश्नयन्नाह-

जम्बुदीवे णं भंते ! दीवे किं सासए, किं असासए ?। गोअमा ! सिअ सासए, सिअ असासए। से केणट्ठेणं भंते ! एवं वुच्चइ-सिअ सासए,सिअ असासए ?। गोअमा ! दव्वट्ठयाए सासए, वण्णपज्जवेहिं गंधरसफासपज्जवेहिं असासए, से तेणट्ठेणं गोअमा ! एवं वुच्चइ-सिअ सासए, सिअ असासए। जम्बुदीवे णं भंते ! दीवे कालओ केवच्चिरं होइ ?। गोयमा ! ण कया वि णासि,ण कया वि णत्थि,ण कया वि ण भविस्सइ,ण भविंसु अ, भवइ अ,भविस्सइ अ,धुवे णिअए सासए अक्खए अव्वए अवट्ठिए णिच्चे जंबुदीवे दीवे पण्णत्ते।

"जंबुदीवे णं" इत्यादि। इदं च यथा प्राक् पद्मवरवेदिकाधिकारे व्याख्यातम्, तथाऽत्र जम्बूद्वीपव्यपदेशेन बोध्यमिति।

एवं च शाश्वताऽशाश्वतो घटो निरन्वयविनश्वरो दृष्टः, किमत्रापि तद्वत्, उत नेत्याह-"जंबुद्दीवे णं" इत्यादि । इदमपि प्राक् पञ्चवरवेदिकाऽधिकारे व्याख्यातमिति । जं० ।

अथ किं परिणामोऽसौ द्वीप इति पिपृच्छिषुराह-

जंबुद्दीवे णं भंते ! दीवे किं पुढविपरिणामे, आउपरिणामे, जीवपरिणामे, पुग्गलपरिणामे ? । गोयमा ! पुढविपरिणामे वि, आउपरिणामे वि, जीवपरिणामे वि, पुग्गलपरिणामे वि ।

जम्बूद्वीपे भदन्त ! द्वीपः किं पृथ्वीपरिणामः पृथिवीपिण्डमयः, किं जलपरिणामः जलपिण्डमयः एतादृशौ च स्कन्धावच्छिन्नरजःस्कन्धादिवदजीवपरिणामावपि भवत इत्याशङ्क्याह-किं जीवपरिणामः जीवमयः घटादिरजीवपरिणामोऽपि भवतीत्याशङ्क्याह—किं पुद्गलपरिणामः पुद्गलस्कन्धनिष्पन्नः केवलपुद्गलपिण्डमय इत्यर्थः । तेजसस्त्वेकान्तसुषमादावुत्पन्नत्वेन एकान्तदुःषमादौ तु विध्वस्ततत्वेन जम्बूद्वीपस्य तत्परिणामेऽङ्गीक्रियमाणे कादाचित्कत्वप्रसङ्गः,वायोस्त्वतिचलत्वेन तत्परिणामे द्वीपस्यापि चञ्चलत्वापत्तिरिति तयोः स्वत एव संदेहाविषयत्वेन न प्रश्नसूत्रे उपन्यासः। भगवानाह-गौतम! पृथिवीपरिणामोऽपि, पर्वतादिमत्त्वात् । अप्परिणामोऽपि, नदीह्रदादिमत्त्वात् । जीवपरिणामोऽपि मुखवनादिषु वनस्पत्यादिमत्त्वात् । यद्यपि स्वसमये पृथिव्यप्कायपरिणामत्वग्रहणेनैव जीवपरिणामत्वं सिद्धम्, तथाऽपि लोके तयोर्जीवत्वस्याव्यवहारात् पृथग्ग्रहणम्; वनस्पत्यादीनां तु जीवत्वव्यवहारः स्वपरसंमत इति पुद्गलपरिणामोऽपि मूर्तत्वस्य प्रत्यक्षसिद्धत्वात्, कोऽर्थः?, जम्बूद्वीपो हि स्कन्धरूपः पदार्थः, स चावयवैः समुदितैरेव भवति, समुदायरूपत्वात् समुदायिन इति ।

अथ यदि चायं जीवपरिणामरूपस्तर्हि सर्वे जीवा अत्रोत्पन्नपूर्वाः, उत नेत्याशङ्क्याह-

जंबूदीवे णं भंते ! दीवे सव्वपाणा सव्वजीवा सव्वभूआ सव्वसत्ता पुढविकाइयत्ताए आउकाइअत्ताए तेउकाइयत्ताए वाउकाइअत्ताए वणस्सइकाइअत्ताए उववण्णपुव्वा ? । हंता गोयमा ! असइं अदुवा अणंतखुत्तो ॥

जम्बूद्वीपे भदन्त ! द्वीपे सर्वे प्राणाः द्वित्रिचतुरिन्द्रियाः, सर्वे जीवाः पञ्चेन्द्रियाः, सर्वे भूतास्तरवः, सर्वे सत्त्वाः पृथिव्यप्तेजोवायुकायिकाः । अनेन च सांव्यवहारिकराशिविषयक एवायं प्रश्नः , अनादिनिगोदनिर्गतानामेव प्राणजीवादिरूपविशेषपर्यायप्रतिपत्तेः। पृथिवीकायिकतया अप्कायिकतया तेजस्कायिकतया वायुकायिकतया वनस्पतिकायिकतया उपपन्नपूर्वा उत्पन्नपूर्वाः ?। भगवानाह-'हंता गोयमा ! एवं गौतम ! यथैव प्रश्नसूत्रं तथैव प्रत्युच्चारणीयम्—पृथिवीकायिकतया यावद्वनस्पतिकायिकतया उपपन्नपूर्वाः, कालक्रमेण संसारस्यानादित्वात्, न पुनः सर्वे प्राणादयो जीवविशेषा युगपदुत्पन्नाः सकलजीवानामेककाले जम्बूद्वीपे पृथिव्यादिभावेनोत्पादे सकलदेवनारकादिनेदाभावप्रसक्तेः । न चैतदस्ति, तथा जगत्स्वभावादिति । कियन्तो वाऽनुत्पन्ना इत्याह-असकृदेवैकशः, अथवा-अनन्तकृत्वः-अनन्तवारान्, संसारस्यानादित्वादिति ।

अथ जम्बूद्वीपेतिनाम्नो व्युत्पत्तिनिमित्तं जिज्ञासिषुः पृच्छति-

से केणट्ठेणं भंते ! एवं वुच्चइ-जंबुद्दीवे दीवे ?। गोयमा ! जंबूद्दीवे णं दीवे तत्थ तत्थ देसेहिं देसेहिं बहवे जंबूरुक्खा जंबूवणा जंबूवणसंडा णिच्चं कुसुमिआ० जाव पिंडिमंजरिविडिंसगधरा सिरीए अईव उवसोभेमाणा चिट्ठंति । जंबूए सुदंसणाए अणाढिए णामं देवे महिड्ढिए० जाव पलिओवमट्ठिईए परिवसइ, से तेणट्ठेणं गोअमा ! एवं वुच्चइ-जंबूदीवे दीवे ।

अथ केनार्थेन भदन्त ! एवमुच्यते-जम्बूद्वीपो द्वीपः ?। भगवानाह-गौतम ! जम्बूद्वीपे द्वीपे तत्र तत्र देशे तत्र देशस्य तत्र तत्र प्रदेशे बहवो जम्बूवृक्षा एकैकरूपा विरञ्जस्थितत्वात्, तथा बहूनि जम्बूवनानि जम्बूवृक्षा एव समूहनावेनावस्थिताः, अविरलस्थितत्वात् । "एकजातीयतरुसमूहो वनम्" इति वचनात् । तथा बहवो जम्बूवनखण्डाः जम्बूवृक्षसमूहा एव विजातीयतरुमिश्रिताः "अनेकजातीयतरुसमूहो वनखण्डः" इति वचनात् । तत्राऽपि जम्बूवृक्षाणामेव प्राधान्यमिति प्रस्तुते वर्णकसाफल्यम् । अन्यथा अपरवृक्षाणां वनखण्डैर्निमित्तभूतैर्जम्बूद्वीपपदप्रवृत्तिनिमित्तस्यैऽसङ्गत्यात् । ते च कथंभूता इत्याह-नित्यं सर्वकालं कुसुमिताः, यावत्पदात् "णिच्चं माइया णिच्चं जुवइआ णिच्चं थवइआ०जाव णिच्चं कुसुमिअ-माइअ-लवइअ-थवइअ-गुलुइअ-गोच्छइअ-जमलिअ-जुवलिअ-विणमिअ-पणमिअ-सुविभत्ता" इति ग्राह्यम् । एतदुव्याख्यानं प्राग्वनखण्डवर्णके कृतमिति ततो ज्ञेयम् । उक्तवर्णकोपेताश्च वृक्षाः श्रिया अतीव उपशोभमानास्तिष्ठन्ति । इदं च नित्यकुसुमितत्वादिकं जम्बूवृक्षाणामुत्तरकुरुक्षेत्रापेक्षया बोध्यम् । अन्यथैषां प्रावृट्कालभाविपुष्पफलादित्यवत्त्वेन प्रत्यक्षबाधात्, एतेन जम्बूवृक्षबहुलो द्वीपो जम्बूद्वीप इत्यादेर्दितं भवति । अथवा-जम्ब्वां सुदर्शनाऽभिधानायामनाहतनामा, पूर्वजम्बूवृक्षाधिकारे व्याख्यातनामा देवो महर्द्धिको, यावत्करणात् "महज्जुइए" इत्यादि ग्राह्यम् । पल्योपमस्थितिकः परिवसति; अथ तेनार्थेन भदन्त ! एवमुच्यते-स्वाधिपत्यनाहतनामदेवाश्रयतया जम्ब्वोपलक्षितो द्वीपो जम्बूद्वीप इति, सूत्रैकदेशो ह्यपरं सूत्रैकदेशं स्मारयति इति । "अदुत्तरं च णं जंबुद्दीवस्स सासए णामधेज्जे पण्णत्ते, जं ण कयाइ ण आसी, ण कयाइ णत्थि, ण कयाइ ण भविस्सइ० जाव णिच्चे " इति ज्ञेयं, जीवाजिगमादौ तथा दर्शनात् । एतेन किमाकारभावप्रत्यवतारो जम्बूद्वीप इति चतुर्थः प्रश्नो निर्व्यूढ इति । जं० ७ वक्ष० । जी० ।

जम्बूद्वीपस्य मध्ये च मेरुनामा पर्वतोऽस्ति । तथाहि-

महीइ मज्झम्मि ठिते णगिंदे, पन्नायते सूरियसुद्धलेसे ।
एवं सिरीए उ स जूरिवन्ने,मणोरमे जोअइ अच्चिमाली ।१३।

मह्यां रत्नप्रभापृथिव्यां, मध्यदेशे जम्बूद्वीपः, तस्यापि बहुमध्यदेशे सौमनसविद्युत्प्रभगन्धमादनमाल्यवन्तदंष्ट्रापर्वतचतुष्टयोपशोभितः समभूभागे दशसहस्रविस्तीर्णः शिरसि सहस्रमेकमधस्तादपि दशसहस्राणि नवतियोजनानि योजनैकादशभागैर्दशभिरधिकानि विस्तीर्णश्चत्वारिंशद्योजनोद्विद्धचूलोपशोभितो नगेन्द्रः पर्वतप्रधानो मेरुः प्रकर्षेण लोके ज्ञायते

सूर्यवच्छुद्धलेश्य आदित्यसमानतेजाः, एवमनन्तरोक्तप्रकारया श्रिया,तुशब्दात् विशिष्टतरया, स मेरुर्नीरिवर्णोऽनेकवर्णोऽनेकवर्णरत्नोपशोभितत्वात् मनोऽन्तःकरणं रमयतीति मनोरमोऽर्चिर्मालीव आदित्य इव स्वतेजसा द्योतयति दशदिशः प्रकाशयतीति । सूत्र० १ श्रु० ६ अ० । स० । स्था० ।

जम्बूद्वीपनाम्नाऽन्येऽपि द्वीपा वर्तन्ते । तथाहि-

केवतिया णं भंते ! जंबूदीवे नामधेज्जेहिं पण्णत्ते ? । गोयमा ! असंखेज्जा जंबूदीवा दीवा नामधेज्जेहिं पण्णत्ता ।

कियन्तो भदन्त ! जम्बूद्वीपाः प्रज्ञप्ताः, जम्बूद्वीप इति नाम्ना कियन्तो द्वीपाः प्रज्ञप्ता इत्यर्थः ? । एवमुक्ते भगवानाह-गौतम ! असंख्येया जम्बूद्वीपा द्वीपाः प्रज्ञप्ताः, जम्बूद्वीप इतिनाम्ना असंख्येया द्वीपा इति भावः । जी० ३ प्रति० । स्था० ।

जंबुदीवे दीवे मंदरस्स पव्वयस्स पुरच्छिमपच्चच्छिमेणं दो खित्ता पण्णत्ता । तं जहा-बहुसमउल्ला अविसेसा० जाव पुव्वविदेहे चेव, अवरविदेहे चेव ।

(पुरच्छिमपच्चच्छिमेणं) पुरस्तात् पूर्वस्यां दिशि, पश्चात् पश्चिमायामित्यर्थः । यथाक्रमं पूर्वश्चासौ विदेहश्चेति पूर्वविदेहः, एवमपरविदेह इति । एतेषां चाऽऽयामादिर्ग्रन्थान्तरादवसेय इति । स्था० २ ठा० ३ उ० ।

अथ जम्बूद्वीपवेदिका-

जंबूदीवस्स णं दीवस्स वेदिया दो गाउयाइं उड्ढं उच्चत्तेणं पण्णत्ता ।

" जंबू " इत्यादि कण्ठ्यम्, नवरं वज्रमय्या अष्टयोजनोच्छ्रायायाः चतुर्द्वादशोपर्यधो विस्तृताया जम्बूद्वीपनगरप्राकारकल्पाया जगत्या द्विगव्यूतोच्छ्रयेण पञ्चधनुःशतविस्तृतेन नानारत्नमयेन जालकटकेन परिक्षिप्ताया उपरि वेदिकेति, पद्मवरवेदिकेत्यर्थः । पञ्चधनुःशतविस्तीर्णगवाक्षहेमकिङ्किणीघण्टायुक्ता देवानामासनशयनमोहनविविधक्रीडास्थानमुभयतो वनखण्डमण्डितेति । स्था० २ ठा० ३ उ० ।

जंबूदीवग-जम्बूद्वीपक (ग)-त्रि० । जम्बूद्वीपस्येदं जम्बूद्वीपकम् । तं वा गच्छतीति जम्बूद्वीपगम् । जम्बूद्वीपसत्के, स्था० ४ ठा० २ उ० । जम्बूद्वीपोत्पन्नमनुष्ये, पुं० । स्था० ६ ठा० ।

जंबूदीवपण्णत्ति-जम्बूद्वीपप्रज्ञप्ति-स्त्री० । जम्बूद्वीपस्य प्रकर्षेण निःशेषकुतीर्थिकसमयागम्ययथावस्थितस्वरूपनिरूपणलक्षणेन प्रज्ञप्तिर्ज्ञापनं यस्यां ग्रन्थपद्धतौ, प्रज्ञप्तिर्ज्ञानं वा यस्याः सकाशात् सा जम्बूद्वीपप्रज्ञप्तिः । अथवा-जम्बूद्वीपं प्राप्नुवन्ति पूरयन्ति स्वस्थितयेति जम्बूद्वीपप्राः जगतिवर्षवर्षधराद्यास्तेषां प्रज्ञप्तिर्यस्याः सकाशात् सा जम्बूद्वीपप्रज्ञप्तिः । जं० १ वक्ष० । स्वनाम्ना प्रसिद्धे पञ्चमोपाङ्गे, इदं च ज्ञाताधर्मकथाख्यषष्ठाङ्गस्योपाङ्गम् । जं० १ वक्ष० । पा० ।

अथ प्रस्तुततीर्थद्वादशाङ्गीसूत्रसंसूचनाविश्वकर्मा श्रीसुधर्मस्वामी स्वस्मिन् गुरुत्वाभिनानं परिजिहीर्षुः प्रस्तुतग्रन्थनामोपदर्शनपूर्वकं निगमनवाक्यमाह-

इह णं समणे भगवं महावीरे मिहिलाए णयरीए माणिभद्दे चेइए बहूणं समणाणं बहूणं समणीणं बहूणं सावयाणं बहूणं सावियाणं बहूणं देवाणं बहूणं देवीणं मज्झगए एवमाइक्खइ, एवं भासइ, एवं पण्णवेइ, एवं परूवेइ-' जंबूदीवपण्णत्ती णाम ' अज्झो ! अज्झयणे अट्ठं च हेउं च पसिणं च कारणं च वागरणं च भुज्जो भुज्जो उवदंसेइ त्ति बेमि ॥

" तए णं " इत्यादि । शाश्वतत्वात् शाश्वतनामकत्वाच्च सद्रूपोऽयं जम्बूद्वीपरूपो भावः, सन्तं हि भावं नापलपन्ति वीतरागाः । ततः श्रमणो भगवान् महावीरो मिथिलायां नगर्यां माणिभद्रे चैत्ये बहूनां श्रमणानां बहूनां श्रमणीनां बहूनां श्रावकाणां बहूनां श्राविकाणां बहूनां देवानां बहूनां देवीनां मध्ये गतो, न पुनरेकान्ते एकतरस्य कस्यचित् पुरतः, एवं यथोक्तमुक्तानुसारेण इत्यर्थः, आख्याति प्रथमतो वाक्यमात्रकथनेन, एवं भाषते विशेषवचनकथनतः, एवं प्रज्ञापयति व्यक्तपर्यायवचनतः, एवं प्ररूपयत्युपपत्तितः । आख्येयस्याऽभिधानमाह-जम्बूद्वीपप्रज्ञप्तिरिति नाम षष्ठोपाङ्गमिति शेषः । जं० ७ वक्ष० । (प्रमेयरत्नमञ्जूषानाम्नी अस्य टीकेति 'पमेयरयणमंजूसा' शब्दे टीकाकरणप्रस्तावः)

जंबूदीवाहिवइ-जम्बूद्वीपाधिपति-पुं० । अनादृताख्ये देवे, द्वी० ।

जंबूपल्लवपविभत्ति-जम्बूपल्लवप्रविभक्ति-स्त्री० । द्वात्रिंशद्विधदिव्यनाट्यस्य विंशतितमविधौ, रा० ।

जंबूपेढ-जम्बूपीठ-न० । यन्नाम्ना इदं जम्बूद्वीपं ख्यातं तस्याः सुदर्शनानाम्न्या जम्बुवा अधिष्ठाने, जं० ४ वक्ष० । (तत्कन्यता च ' जम्बू ' शब्दे १३६७ पृष्ठेऽनुपदमेव प्रदर्शिता)

जंबूफल-जम्बूफल-न० । जाम्बवे, रा० ।

जंबूफलअसणकुसुमबंधणनीलुप्पलपुप्फपत्तनिकरमरगयआसासगनयणकीयाऽसिवन्ने ॥

जम्बूफलानि प्रतीतानि, असनकुसुमबन्धनम् असनपुष्पवृन्तं, नीलोत्पलपुष्पपत्रनिकरो मरकतमणिः प्रतीतः । आसासको द्वीपकाग्निधानो वृक्षो, नयनकीका नेत्रमध्यतारा, असिः खड्गं, तेषामिव वर्णो यस्य स तथा । रा० । औ० । " जंबूफलपुट्ठवण्णा " जी० ३ प्रति० ।

जंबूफलकालिया-जम्बूफलकालिका-स्त्री० । जम्बूफलवत्कृष्णवर्णायाम्, जी० ३ प्रति० । जम्बूफलसत्ककाल्यर्थे, जी० ३ प्रति० ।

जंबूलय-जम्बूलक-पुं० । लोकरूढ्यवसेये चञ्चुनामके जलाधारे पात्रे, उपा० ७ अ० ।

जंबूसंड-जम्बूखण्ड-पुं० । स्वनामके ग्रामे, आ० म० द्वि० । आ० चू० । यत्र विहारक्रमेणागत्य वीरजिनः गोशालश्च क्षीरसंमिश्रकूरं लब्धवान् । आ० म० द्वि० ।

जंबूसामि-जम्बूस्वामिन्-पुं० । सुधर्मगणधरशिष्ये, आ० म० द्वि० । स्था० । (तच्चरितं ' जंबू ' शब्दे १३७१ पृष्ठे प्रदर्शितम्)

जंबूसाला-जम्बूशाला-स्त्री० । जम्बूवृक्षशाखायाम्, "एगो परिवायगो पोट्टं लोहपट्टेण बंधित्ता जंबूसालं च गहाय हिंडइ, पुच्छितो भणइ-नाणेण पोट्टं फुट्टइ, तो लोहपट्टेण बद्धं जंबूसालं, जहा एत्थ जंबूदीवे नत्थि मम पडिवाई " । आ० म० द्वि० ।

जंभग-जृम्भक-पुं० । जृम्भन्ते विजृम्भन्ते स्वच्छन्दचारितया चेष्टन्ते ये ते जृम्भकाः । तिर्यग्लोकवासिव्यन्तरविशेषदेवेषु, भ० १४ श० ८ उ० । आ० म० । ज्ञा० । आ० क० ।

एतेषां स्वरूपं त्वेवम—

अत्थि णं भंते ! जंभया देवा, जंभया देवा ? । हंता अत्थि । से केणट्ठेणं भंते ! एवं वुच्चइ-जंभया देवा, जंभया देवा ? । गोयमा ! जंभगा णं देवा णिच्चं पमुइय-पक्कीलिया कंदप्परतिमोहणसीला, जे णं ते देवे कुद्धे पासेज्जा, से णं महंतं अजसं पाउणेज्जा, जे णं ते देवे तुट्ठे पासेज्जा, से णं महंतं जसं पाउणेज्जा, से तेणट्ठेणं गोयमा ! जंभगा देवा, जंभया देवा । कइविहा णं भंते ! जंभगा देवा पण्णत्ता ? । गोयमा ! दसविहा पण्णत्ता । तं जहा-अन्न-जंभगा पाणजंभगा वत्थजंभगा लेणजंभगा सयणजंभगा पुप्फजंभगा फलजंभगा पुप्फफलजंभगा विज्जाजंभगा अ-वियत्तजंभगा । जंभगा णं भंते ! देवा कहिं वसहिं उवेंति ? । गोयमा ! सव्वेसु चेव दीहवेयड्ढेसु चित्तविचित्तजमगपव्वएसु कंचणपव्वएसु य, एत्थ णं जंभगा देवा वसहिं उवेंति । जंभगाणं भंते ! देवाणं केवइयं कालं ठिई पण्णत्ता ? । गोयमा ! एगपलिओवमं ठिई पण्णत्ता ।

(जंभग त्ति) जृम्भन्ते विजृम्भन्ते स्वच्छन्दचारितया चेष्टन्ते ये ते जृम्भकास्तिर्यग्लोकवासिनो व्यन्तरदेवाः (पमुइयपक्की-लिय त्ति) प्रमुदिताश्च ते तोषवन्तः, प्रक्रीडिताश्च प्रकृष्टक्रीडाः प्रमुदितप्रक्रीडिताः (कंदप्परइ त्ति) अत्यर्थं केलिरतिकाः (मोहणसील त्ति) निधुवनशीलाः (अजसं ति) उ-पलक्षणत्वादस्यानर्थं प्राप्नुयात् (जसं ति) उपल-क्षणत्वादस्यार्थं वैक्रियलब्ध्यादिकं प्राप्नुयाद्वैरस्वामिवत् शापानुग्रहकरणसमर्थत्वात् तच्छीलत्वाच्च तेषामिति । " अण्णजंभया " इत्यादि । अन्ने भोजनविषये तदभावसद्भावा-ल्पत्वबहुत्वसरसत्वनीरसत्वादिकरणतो जृम्भन्ते विजृम्भन्ते ये ते तथा, एवं पानादिष्वपि वाच्यं, नवरम् (लेणं ति) लयनं गृहम् (पुप्फफलजंभग त्ति) उभयजृम्भकाः, एतस्य च स्थाने ' मंतजंभग त्ति ' वाचनान्तरे दृश्यते । (अवियत्तजंभग-त्ति) अव्यक्तया अज्ञाद्यविभागेन जृम्भका ये ते तथा । क्वचि-त्तु-"अहिवइजंभग त्ति " दृश्यते, तत्र चाधिपतौ राजादिनाय-कविषये जृम्भका ये ते तथा (सव्वेसु चेव दीहवेयड्ढेसु त्ति) सर्वेषु प्रतिक्षेत्रं तेषां भावात् सप्तत्यधिकशतसङ्ख्येषु दीर्घ-विजयार्द्धेषु पर्वतविशेषेषु, दीर्घग्रहणं च वर्तुलविजयार्द्ध-व्यवच्छेदार्थम् । (चित्तविचित्तजमगपव्वएसु त्ति) देवकुरुषु शीतोदानद्या उभयपार्श्वतश्चित्रकूटश्च पर्वतः, तथा उत्तरकुरु-षु शीताऽभिधाननद्या उभयतो यमकाभिधानौ पर्वतौ स्तः, ते-षु (कंचणपव्वएसु त्ति) उत्तरकुरुषु शीतानदीसंबन्धिनां पञ्चानां नीलवदादिह्रदानां क्रमव्यवस्थितानां प्रत्येकं पूर्वापर-तटयोर्दशदशकाञ्चनकाऽभिधाना गिरयः सन्ति, ते च शतं भवन्त्येवं देवकुरुष्वपि शीतोदानद्याः संबन्धिनां निषधह्रदादी-नां पञ्चानां ह्रदानामिति । तदेवं द्वे शते, एवं धातकीखण्डपू-र्वार्द्धादिष्वप्यतस्तेष्विति । भ० १४ श० ८ उ० । जृम्भाकारके, रुद्रगणभेदे, वाच० ।

जंभगामर-जृम्भकामर-पुं० । जृम्भकनाम्ना ख्याते देवे, " अ-च्युच्चविभोजीवः, प्राग्भवे जृम्भकामरः " । आ० क० ।

जंभणओ-देशी-यथेष्टवक्तरि, दे० ना० ३ वर्ग ।

जंभणी-जृम्भणी-स्त्री० । तन्त्रप्रसिद्धे विद्याविशेषे, सम्र० २ शु० २ अ० ।

जंभा-जृम्भा-स्त्री० भावे अः । आलस्यश्रमगर्भादिजनितजृ-म्भणे, वाच० ।

जृम्भ-धा० । विजृम्भणे, " अथेर्जृम्भो जंभा " ॥८ । ४ । १५७ । इति सूत्रेण " जंभा " आदेशे " स्वरादनतो वा " । ८ । ४ । २४० । इति सूत्रेण विकल्पादकारागमे च जृम्भते, ' जंभाइ-जंभाअइ ' इति रूपे सिध्यतः । वि उपसर्गे तु " केलिपसरो विजंभइ " प्रा० ४ पाद ।

जंभाइय-जृम्भित-न० । विवृतवदनस्य प्रबलपवननिर्गमे, आव० ५ अ० । आ० चू० । ध० ।

जंभायंत-जृम्भमाण-त्रि० । विजृम्भमाणे, शरीरचेष्टाविशेषं वि-दधाने, क्रा० १ श्रु० १ अ० ।

जंभायमाण-जृम्भमाण-त्रि० । ' जंभायंत ' शब्दार्थे, क्रा० १ श्रु० १ अ० ।

जंभियग्गाम-जृम्भिकग्राम-पुं० । स्वनामके मगधदेशान्तर्गते ग्रामे, आचा० २ चू० । अत्र हि देवेन्द्रेण भगवतो महावी-रस्यामुकेषु दिवसेषु गतेषु ज्ञानं समुत्पत्स्यते इति कथितं, तदुग्रामस्य बहिस्ताच्च ऋजुपालिकाया नद्यास्तीरे शालवृ-क्षस्याधो भगवतः केवलज्ञानमुत्पन्नम् । आ० म० द्वि० । आ० चू० । कल्प० ।

जंभियग्गाम-जृम्भिकग्राम-पुं० । ' जंभियगाम ' शब्दार्थे, आचा० २ चू० ।

जंभो-देशी-तुषे, दे० ना० ३ वर्ग ।

जक्ख-यक्ष-पुं० । 'यक्ष पूजायाम्, यक्ष्यते । यक्ष-कर्मणि-घञ् । वाच० । व्यन्तरविशेषे, रा० । सू० प्र० । जी० । औ० । स० । ज्ञा० । उत्त० । अनु० । अष्टस्वेदव्यन्तराणां मध्ये तृतीयभेदे य-क्षाः । प्रज्ञा० १६४ द्वार । ते च त्रयोदशविधाः तद्यथा-पूर्णभद्राः, माणिभद्राः, श्वेतभद्राः, हरितभद्राः, सुमनोभद्राः, व्यतिपातिक-भद्राः, सुभद्राः, सर्वतोभद्राः, मनुष्ययक्षाः, वनाधिपतयः, वनाहा-राः, रूपयक्षाः, यक्षोत्तमाः । प्रज्ञा० १ पद । जिनानां यक्षाः सन्ति । प्रव० १७ द्वार । (तन्नामानि तु 'जिनजक्ख' शब्देऽभिधास्यामः) वृत्तवासिसुरे, उत्त० १६ अ० । देवे च । यथा यक्षेण देवेन आविष्टो यक्षाविष्ट इति । स्था० ५ ठा० १ उ० । स्वनामख्याते वणिजि च । "पुव्वं किर सिरिकन्नउज्जेनगरे जक्खो नाम नेगमो हुत्था " ती० २६ कल्प । कौशाम्ब्यां धनयक्षाभिधानौ श्रेष्ठि-नौ । हा० २३ अष्ट० । इति द्वौ यक्षनामानौ वणिजौ । स्वनाम-ख्याते द्वीपे, समुद्रे च । चं० प्र० २० पाहु० ।

जक्खकद्दम-यक्षकर्दम-पुं० । यक्षप्रियः कर्दम इव इति द्वौ यक्ष-नामानौ वणिजौ । स्वनामख्याते द्वीपे, समुद्रे च । चं० प्र० २० पाहु० । यक्षे द्वीपे यक्षनद्यक्षमहानद्यौ, यक्षे समुद्रे यक्षवर-यक्षमहावरौ । चं० प्र० २० पाहु० ।

जक्खगुहा–यक्षगुहा–स्त्री० । यक्षनिवासभूतायां गुहायाम्, " अथार्यरक्षिताचार्याः, मथुरानगरीं गताः । तत्र यक्षगुहायां च, व्यन्तरायतने स्थिताः ॥१॥ " आ० क० ।

जक्खग्गह–यक्षग्रह–पुं० । यक्षावेशे, जी० ३ प्रति० । उन्मत्तताहेतौ यक्षकृतोपद्रवे, जं० २ वक्ष० ।

जक्खणायग–यक्षनायक–पुं० । वैश्रमणे, अनु० ।

जक्खदित्त–यक्षदीप्त–न० । एकस्यां दिशि अन्तराऽन्तरा दृश्यमाने विद्युत्सदृशप्रकाशे, प्रज्ञा० ३६ द्वार ।

जक्खदिन्ना–यक्षदत्ता–स्त्री० । स्थूलभद्रस्य सप्तानां भगिनीनां मध्ये द्वितीयायां भगिन्याम्, आ० क० । आ० चू० । आव० । कल्प० । ति० ।

जक्खपडिमा–यक्षप्रतिमा–स्त्री० । यक्षप्रतिकृतौ, "दो जक्खपडिमाओ " । जी० ३ प्रति० ।

जक्खजद–यक्षजद–पुं० । यक्षद्वीपाधिपतौ देवे, सू० प्र० २० पाहु० । चं० प्र० ।

जक्खणंदणवणसंडसंति–यक्षनन्दनवनखण्डशान्ति–स्त्री० । द्वात्रिंशद्विधनाट्यस्य दशमभेदान्तर्गते नाट्ये, रा० ।

जक्खमह–यक्षमह–पुं० । यक्षार्थविहितमहोत्सवे, आचा० २ श्रु० १ अ० २ उ० ।

जक्खमहाभद्द–यक्षमहाभद्र–पुं० । यक्षद्वीपाधिपतौ देवे, सू० प्र० २० पाहु० । चं० प्र० ।

जक्खरत्ती–देशी–दीपालिकायाम्, द० ना० ३ वर्ग ।

जक्खवर–यक्षवर–पुं० । यक्षसमुद्राधिपतौ देवे, सू० प्र० १६ पाहु० ।

जक्खा–यक्षा–स्त्री० । स्थूलभद्रस्य सप्तानां भगिनीनां मध्ये प्रथमायां भगिन्याम्, आ० क० । ति० । आ० चू० । आव० । (तत्कथानकं तु ' थूलभद्द ' शब्दे तच्चरित्रवर्णने द्रष्टव्यम्)

जक्खाइट्ठ–यक्षाविष्ट–त्रि० । देवाधिष्ठिते, स्था० ५ ठा० २ उ० । ओघ० । " जक्खाइट्ठो पीयमज्जो वा जातो कायविक्खेवकिरियाओ दंसेइ । " आ० म० प्र० ।

जक्खाइट्ठं भिक्खुं गिलायमाणं नो कप्पइ तस्स गणावच्छेदियस्स निज्जूहित्तए० जाव रोगातंकातो विप्पमुक्के, तओ पच्छा तस्स अहालहुस्सगे नामं ववहारे पट्ठवियव्वे सिया ॥

यक्षाविष्टं भिक्षुं ग्लायन्तं यस्य सकाशमागतं तस्य गणावच्छेदिनो न कल्पते निर्यूहितुमपाकर्तुं वैयावृत्यकरणादिना, किं त्वग्लान्या तस्य करणीयं वैयावृत्यं तावत् यावत् स रोगातङ्कादिप्रमुक्तो भवति, ततः पश्चात् तस्य प्रगुणीभूतस्य सतो यथालघुस्वको यथोचितस्वरूपो व्यवहारः प्रायश्चित्तः प्रस्थापयितव्यो दातव्यः स्यात् । व्य० उ० २ उ० ।

संप्रति यतो यक्षाविष्टो भवति तत्प्रतिपादनार्थमाह–

पुव्वभवियवेरेणं, अहवा रागेण रामितो संतो ।
एएहिं जक्खविट्ठो, सेट्ठी सज्झिल्लग वेसादी ॥६८॥

पौर्वभविकेन पूर्वभवभाविना वैरेण, अथवा रागेण रञ्जितः सन् यक्षैराविश्यते । एताभ्यां द्वेषरागाभ्यां यक्षाविष्टो भवति । तथा श्रेष्ठी द्वेष्यभार्यया भूतिकया, (सज्झिल्ल त्ति) लघुभ्राता ज्येष्ठभार्यया, द्वेष्यादिभिरित्यत्रादिशब्दात् प्रभृतिकाष्ठेषु भार्यया परिग्रहः ॥ ६७ ॥

तत्र श्रेष्ठ्याद्युदाहरणमाह–

सेट्ठिस्स दोण्णि महिला, पिया य वेस्सा य वंतरी जाया ।
सामण्णम्मि पमत्तं, छलेति तं पुव्ववेरेण ॥६९॥

" एगो सेट्ठी, तस्स दो महिला, एगा पिया, एगा वेस्सा य, तत्थ सा वेस्सा अकामनिज्जराए मरिऊणं वंतरी जाया, सेट्ठी वि तहारूवाणं थेराणं अंतिए धम्मं सोच्चा पव्वइतो, सा य वंतरी पुव्वभववेरेण छिद्दाणि मग्गइ, अन्नया पमत्तं दट्ठूण छलिया तो । " अक्षरार्थस्वयम्–श्रेष्ठिनो द्वे महिले, तद्यथा–एका प्रिया, अपरा द्वेष्या । तत्रैका मृता व्यन्तरी जाता, सा श्रामण्ये स्थितं श्रेष्ठिनं प्रमत्तं दृष्ट्वा पूर्ववैरेण छलितवती । गाथायामतीतकालेऽपि वर्तमानता प्राकृतत्वात् ॥६९॥

संप्रति लघुभ्रातृदृष्टान्तमाह–

जेट्ठगभाउगमहिला, अज्झोववण्णा उ होइ खुड्डलए ।
धरमाण-मारियम्मी, पडिसेहे वंतरी जाया ॥७०॥

" एगम्मि गामे दो भायरो, तस्स भारिया खुड्डलगे अज्झोववण्णा, सा तं पत्थेइ, खुड्डलगो नेच्छइ, भणइ–तुमं मम जेट्ठभाउयं धरमाणं न पाससि, तीए चिंतियं–जावज्जीवाए ताव मे नत्थि एसो देवरो त्ति, तओ छिद्दं लहिऊण विससंचारेण मारितो नियत्ता, ततो ज्झियं–अस्स पयं कासी सो मओ, इयाणिं पूरेहि मे मणोरहं, तेण चिंतियं–तूणमेतीए मारितो जेट्ठभाउगो, धिरत्थु कामभोगाणमिति संवेगतो पव्वइतो, इयरी वि खुड्डसंतत्ता अकामनिज्जराए मरिऊण वंतरी जाया, ओहिणा पुव्वभावं पासइ, दिट्ठो देवरो सामण्णे ठितो, ततो गाढमणेण इच्छिय त्ति पुव्वभववेरेण सरंतीए पमत्तो छलितो ।" अक्षरयोजना स्वियम्–ज्येष्ठमातृमहेला क्षुल्लके लघौ भ्रातरि अभ्युपपन्ना जातानुरागा, सा च तेन ज्येष्ठो भ्राता धरन्तं जीवन्तं न पश्यतीति प्रतिषिद्धा, मारिते प्रव्रज्यादिप्रतिपन्नितः प्रतिषिद्धा व्यन्तरी जाता । अत्र पूर्वं रागः पश्चाद् द्वेषः ॥७०॥

भूतिकादृष्टान्तमाह–

भतिया कुडुंबिएणं, पडिसिद्धा वाणमंतरी जाया ।
सामण्णम्मि पवन्नं, छलेति तं पुव्ववेरेण ॥७१॥

एगो कुडुंबितो उरालसरीरो एगाए भइगाए उरालसरीराए पत्थितो, सा तेण नेच्छिया, तओ सा गाढमज्झुववण्णा, तेण सह संपओगमलभमाणी दुक्खसागरमोगाढा अकामनिज्जराए मरिऊणं वंतरी जाया, सो य कुडुंबिओ तहारूवाणं थेराणं अंतिए पव्वइओ, सो तीए अभोगितो अन्नया पमत्तं दट्ठूण छलिया तो ।" अक्षरार्थस्वयम्–भूतिका कर्मकरी, कौटुम्बिकप्रतिषिद्धा व्यन्तरी जाता, ततस्तं कौटुम्बिकं श्रामण्याभितं प्रमत्तं सन्तं पूर्ववैरेण (छलेति त्ति) छलितवती ॥ ७१ ॥

संप्रत्येवं छलितस्य यतनामाह–

तस्स उ जूयतिगिच्छा, जूयरवावेसेण सयं वा वि ।
नीयुत्तमं तु नावं, नाउं किरिया जहा पुव्वि ॥७२॥

तस्य रागेण द्वेषेण वा व्यन्तरादिना छलितस्य, पुनः क्रिया कर्तव्येति योगः । कथमित्याह-तस्य भूतस्य नीचमुत्तमं तु भावं ज्ञात्वा, कथं ज्ञात्वेत्यत आह-यथाऽनिहितं पूर्वम्, किमुक्तं भवति ?-कायोत्सर्गेण देवतामाकम्प्य तद्वचनतः, का क्रिया कर्तव्येत्यत आह-भूतचिकित्सा भूतोच्चाटिनी चिकित्सा भूतचिकित्सा ॥ ७२ ॥ व्य० २ उ०।

एवमेव निर्ग्रन्थीं विपर्ययीकृत्य सूत्रं यथा-

जक्खाइट्ठं निग्गंथिं निग्गंथो गिण्हमाणे नाइक्कमइ ।

यतश्च सा यक्षाविष्टा भवति, तत्प्रतिपादनं सूपरितनग्रन्थवदेव, केवलं स्त्रीलिङ्गाभिलापेन वाच्यम । बृ० ६ उ०।

जक्खादित्तय-यक्षादीप्तक-न० । एकस्यां दिशि अन्तराऽन्तरा दृश्यमाने विद्युत्सदृशे प्रकाशे, व्य० ७ उ० । आकाशे व्यन्तरकृतज्वलने, भ० ३ श० ६ उ० । नभसि दृश्यमानेऽभिनसहिते पिशाचे च, जी० ३ प्रति० । अनु० । " जक्खालित्तं जक्खादित्तं आगासे भवइ " आ० चू० ४ अ० । स्था० ।

जक्खालित्तय-यक्षादीप्तक-न० । ' जक्खादित्तय ' शब्दार्थे, जी० ३ प्रति० ।

जक्खावेस-यक्षावेश-पुं० । देवाधिष्ठितत्वरूपे उन्मादे, स्था० २ ठा० १ उ० । बृ० । (केवलिनश्च यक्षावेशो न भवतीति 'अष्टशतिय' शब्दे प्रथमभागे ४५७ पृष्ठे गतम्)

जक्खसिरी-यक्षश्री-स्त्री० । सोमभूतिब्राह्मणस्य स्वनाम्न्यां स्त्रियाम्, ज्ञा० १ श्रु० १५ अ० ।

जक्खिंद-यक्षेन्द्र-पुं० । यक्षाणामिन्द्रे, स्था० ४ ठा० १ उ० । अष्टादशजिनयक्षे , प्रव० । श्रीअरजिनस्य यक्षेन्द्रो यक्षः षण्मुखस्त्रिनेत्रः श्यामवर्णः शङ्खशिखिवाहनो द्वादशभुजो बीजपूरकबाणशङ्खमुद्गरपाशकाभययुक्तदक्षिणकरषट्को नकुलधनुःफलकशूलाङ्कुशाकसूत्रयुक्तवामपाणिषट्कश्च । प्रव० ३६ द्वार । भ० ।

जक्खिणी-यक्षिणी-स्त्री० । यक्षयोनिकायां व्यन्तरदेव्याम्, " सा मया जक्खिणी जाया । " आ० म० द्वि० । अरिष्टनेमेः प्रथमप्रवर्तिन्याम् , आ० म० प्र० । स० । आ० चू० । अन्त० ।

जक्खुत्तम-यक्षोत्तम-पुं० । यक्षाणां त्रयोदशभेदेष्वन्तिमे भेदे, प्रज्ञा० १ पद ।

जग-जग-पुं० । जन्तुषु , सूत्र० १ श्रु० ७ अ० ।

जगत्-न० । गच्छन्ति तांस्तान् नारकादिभावानिति जगत् । भ० १२ श० ६ उ० । अष्ट० । पञ्चास्तिकायरूपे चराचरे, नं० । लोके, संथा० । लोकालोके, नं० । संसारे, सूत्र० १ श्रु० ६ अ० । चराचरभूतग्रामे , सूत्र० १ श्रु० १५ अ० । सकलसत्त्वे, नं० । दश० । प्राणिसमूहे, सूत्र० १ श्रु० १० अ० । संज्ञिपञ्चेन्द्रियसमूहे , नं० । पृथिव्याम्, सूत्र० १ श्रु० २ अ० १ उ० । " भुवणं जगं च लोओ । " को० । गम-क्विप्-नि०-ह्रस्वम-तुक् च । वायौ, जङ्गमे, त्रि० । वाच० ।

जगई-जगती-स्त्री० । गम-क्विप् । "वर्तमाने पृषद्बृहन्महज्जगच्छतृवच्च " इति कात्यायनिवचनात् शतृतुल्यत्वात् ङीप् । भुवनं, पृथिव्याम्, आर्यजम्बूमते भूमेरचलत्वाद् गतिमत्त्वेन तथात्वम । अन्यमते जगदाधारत्वात् तस्यास्तथात्वमिति नेदः । द्वादशाक्षरपादके छन्दोभेदे . वाच० । " भूयाणं जगई जहा । " जगती पृथ्वी । उत्त० १ अ० । द्वीपसमुद्रसीमाकारिणि महानगरप्राकारकल्पे वज्रमये जम्बूद्वीपप्राकारे, जं० १ वक्ष० । जी० ।

तद्वक्तव्यता यथा-

से णं एगाए वइरामईए जगईए सव्वओ समंता संपरिक्खित्ते । सा णं जगई अट्ठ जोयणाइं उड्ढं उच्चत्तेणं, मूले बारस जोअणाइं विक्खंभेणं , मज्झे अट्ठ जोयणाइं विक्खंभेणं, उप्पिं चत्तारि जोयणाइं विक्खंभेणं, मूले विच्छिण्णा, मज्झे संखित्ता, उप्पिं तणुया गोपुच्छसंठाणसंठिया सव्ववइरामई अच्छा सण्हा लण्हा घट्ठा मट्ठा णीरया णिम्मला णिप्पंका णिक्कंकडच्छाया सप्पभा सस्सिरीया सउज्जोया पासादीया दंसणिज्जा अभिरूवा पडिरूवा ॥

"से णं" इत्यादि । सोऽनन्तरोक्तायामविष्कम्भपरिक्षेपपरिमाणो जम्बूद्वीपः; णमिति वाक्यालङ्कारे, एकया जगत्या क्षुनगरप्राकारकल्पया, सर्वतः सर्वासु दिक्षु, समन्ततः सामस्त्येन संपरिक्षिप्तः सम्यग् वेष्टितः । "सा णं जगई" इत्यादि । सा च जगती ऊर्द्धमुच्चैस्त्वेन अष्टौ योजनानि, मूले द्वादश योजनानि विष्कम्भेन, मध्ये अष्टौ, उपरि चत्वारि, अत एव मूले विष्कम्भमधिकृत्य विस्तीर्णा, मध्ये संक्षिप्ता, त्रिभागोनत्वात्; उपरि तनुका, मूलापेक्षया त्रिभागमात्रविस्तारभावात् । एतदेवोपमया प्रकटयति-(गोपुच्छसंठाणसंठिया) गोपुच्छस्येव संस्थानं गोपुच्छसंस्थानं, तेन संस्थिता, ऊर्द्धीकृतगोपुच्छाकारेति भावः। (सव्ववइरामई) सर्वात्मना सामस्त्येन वज्रमयी वज्ररत्नात्मिका, अच्छा आकाशस्फटिकवदतिस्वच्छा (सण्हा) श्लक्ष्णपुद्गलस्कन्धनिष्पन्ना श्लक्ष्णदलनिष्पन्नपटवत्, (लण्हा) मसृणा घृष्टिटपटवत्, (घट्ठा) घृष्टा इव घृष्टा खरशाणया पाषाणप्रतिमावत्, तथा मृष्टा इव मृष्टा सुकुमारशाणया पाषाणप्रतिमावत्, नीरजाः स्वाभाविकरजोरहितत्वात्, निर्मला आगन्तुकमलाभावात्, निष्पङ्का कलङ्कविकला कर्दमरहिता वा (निक्कंकडच्छाया इति) निष्कङ्कटा निष्कवचा निरावरणा, निरुपघातेति भावार्थः। छाया दीप्तिर्यस्याः सा निष्कङ्कटकच्छाया सप्रभा स्वरूपतः प्रभावती समरीचा बहिर्विनिर्गतकिरणजाला , अत एव सोद्योता बहिर्व्यवस्थितवस्तुस्तोमप्रकाशकरी, प्रसादाय मनःप्रसत्तये हिता तत्कारित्वात् प्रासादीया , मनः प्रह्लादकारिणीति भावः । दर्शनीया दर्शनयोग्या, यां पश्यतश्चक्षुषी श्रमं न गच्छत इति । (अभिरूवा इति) अभि सर्वेषां द्रष्टॄणां मनःप्रसादानुकूलतया अभिमुखं रूपं यस्याः सा अभिरूपा , अत्यन्तकमनीया इति भावः अत एव प्रतिरूपा प्रतिविशिष्टमसाधारणं रूपं यस्याः सा प्रतिरूपा । अथवा-प्रतिक्षणं नवं नवमिव रूपं यस्याः सा प्रतिरूपा । जी० ३ प्रति० । अथात्र सूत्रेऽनुक्तोऽपि वाचयितॄणामधिकारार्थजिज्ञापयिषया जगत्या इष्टस्थाने विस्तारानयनोपायः प्रदर्श्यते-तत्र मूले मध्ये उपरि च विष्कम्भपरिमाणं साक्षादेव सूत्रे लक्ष्यते , अपान्तराले उपरिष्टादधोगमनेऽयमुपायः-जगतीशिखरादधो यावदुत्तीर्णं तस्मिन्नेकेन भक्ते सति यल्लब्धं तच्चतुर्भिर्युतमिष्टस्थाने विस्तारः । तथाहि-उपरितनभागाद्योजनमेकं गव्यूताधिकमव-

तीर्णि, ततो राशेरेकेन भागे हृते लब्धमेकं योजनं गव्यूताधिकं, तच्च योजनचतुष्कयुतं क्रियते, जातानि पञ्चयोजनानि गव्यूताधिकानि, एतावाँस्तत्र प्रदेशे विष्कम्भः, एवं सर्वत्र भाव्यम्। संप्रति मूलादूर्द्धं गमने विस्तारानयनोपायः मूलादूर्द्धं गमने यावदूर्द्धं गतं, तस्यैकेन भागे हृते यल्लब्धं तस्मिन्मूलविस्तराच्छोधिते यच्छेषं स तत्र योजनादावतिक्रान्ते विस्तारः। तद्यथा-मूलादुत्पत्य योजनमेकं गव्यूतत्रयाधिकं गतः, ततो योजनस्य गव्यूतत्रयाधिकस्यैकेन भागे हृते लब्धं योजनं गव्यूतत्रयाधिकम्, एतन्मूलसंबन्धिनो द्वादशयोजनप्रमाणविस्तारादपनीयते. स्थितानि दश योजनानि गव्यूतत्रयाधिकानि, एतावत्प्रमाणः सार्द्धयोजनातिक्रमे विस्तारः, एवं सर्वत्राऽपि भाव्यम्। एवमृषभकूटजम्बूशाल्मलीवृक्षवनगतकूटानामिष्टस्थाने विस्तारानयनार्थमिदमेव करणं ज्ञाप्यम्। जं० १ वक्ष०।

अथास्यां गवाक्षकटकवर्णनायाऽऽह-

सा णं जगई एगेणं महंतगवक्खकडएणं सव्वओ समंता संपरिक्खित्ता, से णं गवक्खकडए अद्धजोअणं लहुं उच्चत्तेणं पंचधणुसयाइं विक्खंभेणं सव्वरयणामए अच्छे० जाव पडिरूवे ॥

साऽनन्तरोदितस्वरूपा जगती, 'णं' इति प्राग्वत्। जगती एकेन महता गवाक्षकटकेन वृहज्जालकसमूहेन, सर्वतः सर्वासु दिक्षु, समन्तात् सामस्त्येन, संपरिक्षिप्ता व्याप्तेत्यर्थः। स गवाक्षकटक ऊर्द्धोच्चत्वेनार्द्धयोजनं द्वे गव्यूते, विष्कम्भेन पञ्चधनुःशतानि, सर्वात्मना रत्नमयः। तथा अच्छः, अत्र यावत्करणात् प्राग् व्याख्यातं विशेषणपदवृन्दं ग्राह्यम्। इयं च गवाक्षश्रेणिश्लेषणोदयाच्च जगतीभित्तिबहुमध्यभागपताऽवगन्तव्या, रिरंसुदेवविद्याधरवृन्दरमणस्थानम्।

अथ जगत्युपरिभागवर्णनायाऽऽह-

तीसे णं जगईए उप्पिं बहुमज्झदेसभाए, एत्थ णं महई एगा पउमवरवेइया पण्णत्ता। अद्धजोअणं उड्ढं उच्चत्तेणं पंच धणुसयाइं विक्खंभेणं जगईसमिया परिक्खेवेणं सव्वरयणामई अच्छा० जाव पडिरूवे ॥

तस्या यथोक्तस्वरूपाया जगत्या उपरितनतलतो यो बहुमध्यदेशभागः, भागश्च प्रदेशलक्षणोऽपि स्यात्तत्र च पद्मवरवेदिकाया अवस्थानासंभवः, अतो देशग्रहणेन महान् भाग इत्यर्थः। स च चतुर्योजनात्मकजगत्युपरितनतलस्य मध्ये पञ्चधनुःशतात्मक इति। सूत्रे एकारो मागधभाषालक्षण्यात्। अत्र पतस्मिन् बहुमध्यदेशभागे, 'णं' इति प्राग्वत्। महती एका पद्मवरवेदिका देवनोगभूमिः प्रज्ञप्ता, मया शेषैश्च तीर्थकरैः। सा च क्रोशोच्चत्वेन अर्द्धयोजनं, पञ्चधनुःशतानि विष्कम्भेन, जगत्याः समा समाना जगतीसमा, सा च जगतीसमिका, परिक्षेपेण परिरयेण, किमुक्तं भवति?, जम्बूद्वीपस्य सर्वतो वलयाकारेण व्यवस्थितायाः जगत्याः यावदुपरितनं तलं चतुर्योजनविस्तारात्मकं तस्माद्बहुमध्यदेशभागे देशोनयोजनोच्चायाः पद्मवरवेदिकाया ग्राह्यः जगतीपरिरयस्तावानस्यापीति, सर्वरत्नमयी सामस्त्येन रत्नसंचिता, "अच्छा सण्हा" इत्यादि विशेषणकदम्बकं पाठसोऽत्रैतस्य प्राग्वत्। जं० १ वक्ष०। (पद्मवरवेदिकावक्तव्यता तु "पउमवरवेइया" शब्दे वक्ष्यते)

जगती-"जगई" शब्दार्थे, जं० १ वक्ष०। जगतीव्याख्यें मल्लिकापद्मप्रमाणं जलं कथितमस्ति, तत्र सर्वदा मल्लिकापद्मप्रमाणं, किं वा वेलाया आगमने न्यूनाधिक्यं वा भवतीति प्रश्ने, उत्तरम्-मल्लिकापद्मप्रमाणं यत्र जलमस्ति तत्र सर्वदा सदृशं भवति, परं वेलाप्रयोगेण न्यूनाधिक्यङ्कानं नास्तीति। ५२ प्र०। सेम० ४ उल्ला०।

जगईपव्वयग-जगतीपर्वतक-पुं०। सूर्याजविमानपरिसरवर्तिवनखण्डगतक्षुद्रपर्वतापीप्रदेशवर्तिषु पर्वतविशेषेषु, रा०।

जगगुरु-जगद्गुरु-पुं०। जगतः सचराचरभुवनस्य गुणैर्गुरुत्वात् जगतां वा जङ्गमानां यथावदस्तुतत्त्वोपदेशनात् तेषामेव वा गौरवादैश्वर्याद् गुरुर्जगद्गुरुः। पञ्चा० ४ विव०। त्रिभुवननाथे जिने, पञ्चा० ४ विव०। हा०।

जगचंदसूरि-जगच्चन्द्रसूरि-पुं०। स्वनामके तपागच्छाचार्ये, कर्म० ६ कर्म०।

तत्कृतान्तस्तवयम्-

"शिष्या मणिरत्नगुरो-स्ततो जगच्चन्द्रसूरयोऽभूवन्।
भूतलविदिता नूतन-वैराग्यावेगजाजस्रे ॥ २७ ॥
श्रीचैत्रगणाऽम्भोधौ, विधूपमाद्देवभद्रगणिमिश्रात्।
उपसंपदमाश्चरणं, विधिना संवेगवेगयुताः ॥ २८ ॥
आचाम्लाक्षयतपोभि-रहवन्तो व्यधुर्धिधूतमलाः।
शरकरटितरणि (१२८५) वर्षे, ख्यातस्तत इति तपागच्छः।
॥ २९ ॥" ग० ४ अधि०।

"क्रमात्प्राप्ततपाचार्ये-स्यजिरथ्यां भिक्षुनायकाः।
समभूवन् कुले चान्द्रे, श्रीजगच्चन्द्रसूरयः ॥१॥"
कर्म० ५ कर्म०। ध० २०।

जगचंदसूरि-जगच्चन्द्रसूरि-पुं०। 'जगच्चंदसूरि' शब्दार्थे, कर्म० ६ कर्म०।

जगजीवजोणिवियाणय-जगज्जीवयोनिविज्ञायक-पुं०। जगद् "धर्माधर्माकाशपुद्गलास्तिकायरूपं जगत् सचराचरम्" इति वचनात् जीवा इति जीवन्ति प्राणान् धारयन्तीति जीवा योनय इति (सं०) युक्त 'मिश्रणे, युज्यन्ति तैजसकार्मणशरीरवन्तः सन्त औदारिकशरीरेण वैक्रियशरीरेण वाऽऽश्रित्य योनयो जीवानामेकोत्पत्तिस्थानानि, तानि सचित्तादिभेदभिन्नान्यनेकप्रकाराः। उक्तं च-सचित्तशीतसंवृतेतरमिश्रास्तद्योनय इति। जगच्च जीवाश्च योनयश्च जगज्जीवयोनयः, तासां विविधमनेकप्रकारमुत्पादानन्तधर्मात्मकतया जानातीति विज्ञायको जगज्जीवयोनिविज्ञायकः। केवलज्ञानिनि, सं०।

जगजीवण-जगज्जीवन-पुं०। जगन्ति जङ्गमानि अहिंसकत्वेन जीवयतीति जगज्जीवनः। जिनेश्वरे, स० ३० समo। दशा०।

जगजीवियाणय-जगज्जीवविज्ञायक-पुं०। सर्वज्ञे, व्य० ३ उ०।

जगट्ठभासि (ण्)-जगदर्थभाषिन्-पुं०। जगत्यर्था जगदर्था ये यथा व्यवस्थिताः पदार्थाः, तान्याथितुं शीलमस्य जगदर्थभाषी। तद्यथा-ब्राह्मण मोदकमिति ब्रूयात्, तथा घृणिजं किराटमिति, शूद्रमानीरमिति, श्वपाकं चाण्डालमित्यादि। तथा

काणं काणमिति, तथा खञ्जं कुब्जं वडभमित्यादि, तथा कुष्ठिनं क्षयिणमित्यादि, यो यस्य दोषस्तं तेन खरं परुषं ब्रूयात् यः स जगदर्थभाषी । अप्रियसत्यभाषिणि, सूत्र० १ श्रु० १३ अ० ।

जयार्थभाषिन्–पु० । जयार्थभाषी यथैवात्मनो जयो भवति तथैवाविद्यमानमप्यर्थं भाषते तच्छीलश्च, येन केनचित्प्रकारेणासदर्थभाषणेनाप्यात्मनो जयमिच्छतीत्यर्थः । असदर्थभाषणेनापि आत्मनो जयमिच्छति, सूत्र० १ श्रु० १३ अ० ।

जगाभिओ–देशी–विज्ञापिते, दे० ना० ३ वर्ग ।

जगाभिज्जंत–जागर्य्यमाण–उत्थाप्यमाने, " धम्माणं तु कसाया, जगडिज्जंता वि परकसाएहिं । निक्कुंति समुचिया; सुनिविट्ठो पंगुलो चेव ॥१॥ " द० प० ४ प० ।

जगमू–जगमू–पुं० । स्वनामके अन्नदानलब्धकीर्तौ महर्धिके श्रेष्ठिनि, उपदेशतरङ्गिणी । यथा–पञ्चालदेशमण्डने नरेसरग्रामे श्रीमालीयज्ञातिः सासोमाऽभिधो व्यवहारिमुख्यः, तस्याङ्गजो जगडूनामा आद्यः, एकदा पौषधागारे प्रतिक्रान्ते विधाय मौनेन नमस्कारान् गुणयन्नस्ति, रात्रिप्रहरानन्तरं यतिनिचन्द्रेण रोहिणीशकटं भिद्यमानं दृष्ट्वा गुरुपार्श्वे पृष्टम्–भगवन् ! एवंविधो भवन्नस्ति । गुरुभिरपि विलोक्योक्तम्–अत्र कोऽप्यस्ति न ?। साधुभिरुक्तम्–न कोऽपि । ततो गुरुभिरुक्तम्–संवत् १३१५ मिते रौरवं दुर्भिक्षं भविष्यति । साधुभिः पृष्टम्–भगवन् ! कोऽपि जगदुद्धर्ताऽस्ति, न वेति । गुरुणोक्तम्–अस्माकं मन्त्राधिष्ठायकदेवेन पूर्वमेवादिष्टमस्ति–अनेन प्रकारेण जगमूर्जगदुद्धर्ता भविष्यति । तैरुक्तम्–अस्यैतद्धनं कास्ति ?। गुरुः प्राह–"अस्य गृहवाटकेऽर्कस्याधः कोटित्रयप्रमाणं धनमस्ति " इत्यादि गुरुवचः श्रुत्वा जगमूश्चिन्तयति–अहो मम महद्भाग्यं, यद् गुरुमुखादेवं श्रूयते । ततो रात्रौ मौनेन स्थितः शालायां, ततः प्रभाते विलोकितं तदृष्टकथितं रात्रौ तद्वचनं, तेन धान्यग्रहणचिकीर्षुरभूत् । इतश्च साधुजगमूकस्य वणिक्पुत्राः चत्वारिंस्थाः मलवारे सन्ति, तत्र बहूनां व्यवहारिणां चत्वारिरस्ति । तत्र जगमूचत्वारिंरपरव्यवहारिचत्वारिंच्यान्तराले एका पाषाणशिलाऽस्ति । तत्र द्वयोर्वस्त्रारिधनिकयोः प्रातर्दन्तधावनकरणस्थानम् । एकदा समकालमेव तौ दन्तधावनायागतौ, एक एव तत्रोपवेष्टुं शक्नोति, न द्वावपि । तेनैकः कथयति–अहं प्रथममुपविश्य दन्तधावनं करिष्ये । द्वितीयस्तु वक्ति–अहं प्रथमं करिष्ये इत्यादि विवादे जायमाने अहङ्कृतितोऽत्यन्तं हठो जातः, राजवर्गीयनरैः पर्यवसायितावपि न मन्येते । ततस्तैरुक्तम्–यो राज्ञः षट्शतस्पर्द्धकानि दास्यति सोऽत्र दन्तधावनं करिष्यति । एवं बहुधनं वार्द्धितं, मम श्रेष्ठी लज्जते यदि पश्चाद्ददामि । यतः–" क्रव्याः शस्त्रैर्बुधाः शास्त्रैः रिक्त्याः स्वैः पामराः करैः । गाम्भीरिङ्गनाः तृक्वैः, पशवः कस्त्रिकारिणः ॥ २० ॥ " एवं युद्धे यावदेकोऽपि न निवर्तते तावत् द्वोडकोमस्य विलोक्यते । अतो मम श्रेष्ठी नामितो मा भूत ततो जगमूवणिक्पुत्रेण पञ्चविंशतिशतस्पर्द्धकैः गृहीतः स पाषाणः "चारचलावइ पानबोलावइ हाथइलावइ धनडुंफावइ " इति लोकोक्तिः सत्या, तेन श्रेष्ठिना कृपितो वृत्तान्तः । जगमूः प्राह–वर्य्यं कृतं यन्मम महत्त्वं प्रदेशे रक्षितम् । ततः स पाषाणः स्वस्थाने आनायितः । जगमूरपि तत्रोपविश्य दन्तधावनं करोति । एकदा मध्याह्ने जगडूर्भोजनार्थमुपविष्टः,तस्मिन्नवसरे कोऽपि योगी गृहद्वारे प्राप्तः। पत्नीं प्राह श्रेष्ठी–सघ्न्यां रसवतीं परिपूर्णपुरुषाहारप्रमाणां अस्य देहि, सा तथा करोति, योगी न लाति, तया स्वपतेः प्रोक्तम् । पुनस्तेनोक्तम्–रुप्यस्थालं वर्तुलिकासहितं देहीति,तथा कृते तुष्टो योगी ब्रूते–भोः दातृशिरोमणे ! तव परीक्षायै आगतोऽहं ध्रुवं भिक्षार्थं भ्रमन्, यतो मम दातृपुरुषावलोकयतुः षण्मासा गताः परं न कोऽपि दृष्टः, त्वं त्वद्य दृष्टः जगदुद्धरणक्षमः । साधुराह–ममेदृग्धनं क ? । योगी प्राह–एष पाषाणः सद्रव्योऽस्ति इत्युक्त्वा स्थितो योगी । साधुरपि तत्पूजायै यावद्वर्यङ्कुकूलाद्यानयति तावत्स गतः, सर्वत्र विलोकितोऽपि न लब्धः । साधुना चिन्तितमसौ योगी न हि, किं तु मम पूर्वसंबन्धी कोऽपि देवः पुण्यकीर्तिदाता, विलोकितः पाषाणः, एकत्र कारी दत्ता,दृषदो दूरीकृताः, दृष्टानि तत्र पञ्चस्पर्शपाषाणखण्डानि, स्पर्शपाषाणयोगेन लोहं स्वर्णीभवेत् । ततो गुरूक्तं सत्यं मन्यमानो जगमूर्जगदुद्धरणाय मनोऽकरोत् । सर्वदेशेषु धान्यसंग्रहमकार्षीत् । दुर्भिक्षे पतिते दिल्लीस्तम्भनपुरधवलक्कणाहिल्लपत्तनादिषु द्वादशोत्तरशतसत्रागारानमण्डयत् । तेषु लोकानां सारभोजनं घृतं दीयते यथेच्छम् । यतः–"नवकरवाली मणिअमा, ते अगीला चारि । दानसाल जगडूतणी, दीसइ पुहविमझारि ॥२१॥" दुष्टनृपग्रहणभीत्या रङ्कयोग्या एते इति सकलकोष्ठेषु नाम दत्तम् । "अठय मूरुसहस्सा, वीसलदेवस्स वार हम्मीरे । इगवीस य सुरताणे, दुब्भिक्खे जगडुसाहुणा दिन्ना " ॥ २२ ॥ एवंविधां जगमूकीर्तिं श्रुत्वा स्पर्धया वीसलदेवराजेन वीसलनगरे सत्रागारो मण्डितः । संपत्स्यन्नाघाटैलं परिवेषयति, कियद्दिनैस्तैलमपि निवारितम्, एकदा राज्ञा कार्यविशेषेण जगमूसाधुराकारितः, स नृपं नत्वोपविष्टः, राजाऽऽदेशं ' जी जी ' इति भणति । तदा चारणेनोक्तम्–" वीसलदेव रुक करइ, जगमू कहावइ जी । तई परिसइ फालिसिउ, ए परीसावइ घी " ॥ २३ ॥ तदनु मत्सरं मुक्त्वा जगडूपार्श्वाल्लिजप्रणामकरणं निषिद्धम्, प्रभाते तथोपविश्य दानमण्डपिकायां द्रव्यदानं ददाति जगमूः, तत्र यवनिकां बन्धयति, यतः लज्जया कुलीनाः प्रकटं न गृह्णन्ति, तेषां दानार्थं, सलज्जया च यवनिकान्तरितः स्वकरं जगमूश्चतुरश्रे विस्तारयन्ति, तदनु यथाभाग्यानुसारेण हाटकटङ्ककप्यटङ्कपर्यन्तकरुक्मशतादि ददाति । अन्यावसरे वीसलदेवभूपः स्वन्नाम्यपरीक्षार्थं वस्त्रादिवेषं परावर्त्य एकाकी निजकरं यवनिकान्तस्थ उदयामास । जगमूनाप्रकारलक्षणताम्रताकलिनताधनभाग्यसंपद्यशःसौख्यविद्यादिबहुरेखाङ्कितं तं करं दृष्ट्वा जगज्जनमान्यस्य कस्यापि नरेन्द्रस्य संप्रतीदृशीमवस्थां प्राप्तस्य तथा करोमि यथा यावज्जीवं सुखी स्यात् इति विचिन्त्य स्वकराङ्गुलीतो मणिमण्डितमुद्रिका उत्तार्य प्रदत्ता । सकौतुकेन भूपेन कृणं स्थित्वा वामः करः उद्धृतः । तत्रापि द्वितीया मुद्रिका मुक्ता । मुद्राद्वयं गृहीत्वा नृपः स्वावासे गतः । द्वितीयदिने जगडूसाधुमाकार्य किमेतदिति दर्शितवान् मुद्राद्वयम् । साधुनोक्तम्–" जत्थ गओ तत्थ गओ, सामलसीहो न मुच्चए अहलं । जत्थ गओ तत्थ गओ, एत्थ रओ पाणियं वहइ " ॥२४॥ इदात् मुद्राद्वयं परिधाप्य हस्तिस्कन्धमारोप्य गृहे प्रेषित इति जगडूसाधुप्रबन्धः । उपदेशतरङ्गिणी ।

जगणंदण–जगन्नन्दन- पुं० । जिनेश्वरे, स्वनामकचारणमुनौ

च । तथाहि-"सयंपभा कया अजिणंदणजगणंदणचारणसमीवे सुअधम्मसंमत्तं पडिवन्ना" । सङ्घा० ।

जगणाह-जगन्नाथ-पुं० । जगतः सकलचराचररूपस्य यथावस्थितस्वरूपप्ररूपणद्वारेण वितथप्ररूपणापायेभ्यः पालनाच्च नाथ इव नाथो जगन्नाथः । जिनेश्वरे, नं० ।

जगणिस्सिय-जगन्निश्रित-त्रि० । जगल्लोकस्तत्र निश्रित आश्रितः । लोकस्थिते वस्तुनि, "जगणिस्सिपाहिं भूएहिं" उत्त० ८ अ० ।

जगदुच्चरिय-जगदुच्चरित-न० । जगतां प्राणिनां दुश्चरितं हिंसादिनिबन्धनं कर्म । प्राणिनां दुराचारे, हा० २६ अष्ट० ।

जगपागड-जगत्प्रकट-त्रि० । जङ्गमजन्तूनां प्रत्यक्षप्रमाणसिद्धतया प्रकटे, प्रश्न० १ आश्र० द्वार ।

जगपियामह-जगत्पितामह-पुं० । जगतां सकलसत्त्वानां नारकादिकुगतिविनिपातभयापायरक्षणात् पितेव पिता सम्यग्दर्शनमूलोत्तरगुणसंहतिस्वरूपो धर्मस्तस्यापि च पिता जगवान्,अर्थतस्तत्प्रणीतत्वात् । नं० । जिनेश्वरे, ब्रह्मणि च । "ब्रह्मा जगत्पितामहः" सूत्र० १ श्रु० १ अ० ३ उ० ।

जगबंधु-जगद्बन्धु-पुं० जगतः सकलप्राणिसमुदायरूपस्याभ्युपादनोपदेशप्रणयनेन सुखस्थापकत्वात् बन्धुरिव बन्धुः । जिनेश्वरे, नं० ।

जगय-यकृत्-न० । यं संयमं करोति, कृ-क्विप्-तुक् च । कुक्षौ दक्षिणभागस्थे मांसपिण्डके, तद्वर्द्धके रोगभेदे च । अस्य शसादौ त्वे च यकन्नादेशः । बाच० । "आसस्स णं धावमाणस्स हियवस्स य जगयस्स य अंतराले ।" भ० १० श० ३ उ० ।

जगल्ल-देशी-पङ्किलायाम्, सुरायाम्, दे० ना० ३ वर्ग ।

जगसव्वदंसि [ण्] -जगत्सर्वदर्शिन्-पुं० । जगतः सर्वभावदर्शिनि ज्ञातपुत्रे महावीरे, सूत्र० १ श्रु० २ अ० २ उ० ।

जगसहाव-जगत्स्वभाव-पुं० । जगतः चराचरस्य स्वो भावः । "जन्म मरणं च नियतं, बन्धुर्दुःखाय धनमनिर्वृतये । तस्मिंस्तथा विपदे, तथाऽपि लोको निरालोकः ॥१॥" इत्यादिलक्षणे विश्वस्वभावे, आव० ४ अ० ।

जगहित-जगद्धित-त्रि० । पुरुषार्थोपयोगितया विश्वहितावहे, स० ३२ सम० ।

जगहिय-जगद्धित-त्रि० । 'जगहित' शब्दार्थे, स० ३२ सम० ।

जगाणंद-जगदानन्द-पुं० । जगतां संज्ञिपञ्चेन्द्रियाणाममृतस्यन्दिमूर्तिदर्शनमात्रतो निःश्रेयसाभ्युदयसाधकधर्मोपदेशद्वारेण चानन्दहेतुत्वात् ऐहिकामुष्मिकप्रमोदकारणत्वात् जगदानन्दः । जिनेश्वरे, नं० ।

जगार-ज(य)कार-पुं० । जवर्णे,यवर्णे,यज्ञब्दे च । "जगारुहिट्ठाणं तगारेणं निद्देसो कीरति ।" नि० चू० १ उ० ।

जगारी-जगारी-स्त्री० । (राजगरो) इतिनाम्नि प्रसिद्धे क्षुद्रधान्ये, "अलसं मोयण-सतुग-मुग्ग-जगारीइ" । इह 'जगारी' शब्दः समयसिद्धः, आदिशब्दात् कैरवीकरम्बकादिग्रहः । पञ्चा० ५ विव० ।

जगर-जागृ-घा० । निद्राक्षये, " आग्रेर्जगः " ॥ ८ । ४ । ८० ॥ 'जगह' पक्षे 'जागरइ' जागर्ति । प्रा० ४ पाद ।

जग्गण-जागरण-न० । अनिद्रागमने, प्रश्न० १ आश्र० द्वार ।

जग्गह-यद्ग्रह-पुं० । यत् प्राप्यते तद् गृह्यतामित्याकारिकायां राजाज्ञायाम्, "रण्णा जग्गहो घोसितो ।" आ० म० प्र० । " यद्ग्रहो घोषितस्तत्र, शतानीकमहीभुजा । तदनीकमटाश्चक्रुः, स्वेच्छया मुमुषुस्ततः " ॥ आ० क० ।

जग्गाह-यद्ग्राह-पुं० । 'जग्गह' शब्दार्थे, आ० क० ।

जघण-जघन-न० । वर्कं हन्ति । हन-यङ्-अच्-पृषो० । बाच० । स्त्रियाः अग्रेतनकट्यधोभागे, कल्प० २ क्षण । " सुंदरथणजघनवयणकरचरणनयणलावण्णविलासकलिया " । औ० । जघनरूपे स्त्रीकटेरग्रभागे च । तं० ।

जच्च-जात्य-त्रि० । जातौ भवः यत् । कुलीने, श्रेष्ठे, कान्ते, सुन्दरे, " किं वा जात्याः स्वामिनो ह्वेषयन्ति । " " जात्यस्तेनाऽभिजातेन, शूरः शौर्यवता कुशः " । " सर्ववर्णेषु तुल्यासु, पत्नीष्वक्षतयोनिषु । आनुलोम्येन संभूताः, जात्या जात्यास्तयैव ते ॥१॥" बाच० । स्वाभाविके, तं० । प्र० । प्रश्न० । सजातीये अविजातिमति, जी० ३ प्रति० । नाशुद्धमपि जात्यरत्नं समानमजात्यरत्नेन । ल० । " जह जच्चवाहलाणं, अस्साणं जणवएसु जायाणं । " आ० क० ।

जच्चंजण-जात्याञ्जन-न० । मर्दितेऽञ्जने, कल्प० २ क्षण । प्रधाने, सौवीरके च । ज्ञा० १ श्रु० १ अ० ।

जच्चंजणभमरजलयपयरिट्ठज्जुयसमसंहियतणुअइसुइलण्हसुकुमालमणभरमणिज्जरोमराइं ।

जात्याञ्जनं मर्दितं तैलादिनाऽञ्जनम् (भमरजलयपयरि त्ति)भ्रमराणां प्रसिद्धानां जलदानां च मेघानां यः प्रकरः समूहस्तत्सदृशी तत्समानवर्णतया जात्याञ्जनभ्रमरजलदप्रकरी इव (उज्जुअ त्ति) ऋजुका प्रवरा, अत एव (समत्ति) समा अविषमा संहिता निरन्तरा (तणुअ त्ति) तनुका सूक्ष्मा (आइसुइ त्ति) आदेया सुभगा (लण्ह त्ति) लष्टभा विलासमनोहरा (सुकुमालमउअ त्ति) सुकुमालेभ्यः शिरीषपुष्पादिवस्तुभ्योऽपि मृदुका, तत एव (रमणिज्ज त्ति) रमणीया (रोमराइ त्ति) रोमराजिर्यस्याः सा तथा ताम् । कल्प० २ क्षण ।

जच्चंजणजिंगभेयरिट्ठगभमरावलिगवलगुलियकज्जलसमप्पभेसु ॥

जात्यं प्रधानं यदञ्जनं सौवीरकं भृङ्गभेदः भृङ्गाभिधानकीटविशेषः विदलिताङ्गारो वा, रिष्टकं रत्नविशेषः । भ्रमरावली प्रतीता, गवलगुटिका महिषशृङ्गगुटिका, कज्जलं मषी,एतत्समप्रभेषु कृष्णेष्वित्यर्थः । ज्ञा० १ श्रु० १ अ० ।

जच्चंदण-देशी-अगरौ, कुङ्कुमे, दे० ना० ३ वर्ग ।

जच्चकंचणज्जलंतरूव-जात्यकाञ्चनोज्ज्वलद्रूप-त्रि० । जात्यकाञ्चनवत् उत्तमसुवर्णवत् उत्प्राबल्येन दीप्यमानं रूपं यस्य । उत्तमसुवर्णवद् दीप्यमानरूपे, कल्प० ३ क्षण ।

जच्चकणग-जात्यकनक-न० । उत्तमसुवर्णे, " जच्चकणगं व जायरूवं । " कल्प० ६ क्षण । प्रश्न० ।

जच्चकमलकोमल–जात्यकमलकोमल–त्रि० । उत्तमजातिसंभवकमलवत् कोमले, कल्प० २ क्षण ।

जच्चजिय–जात्यान्वित–त्रि० । विशिष्टजातिसंभूते, बृ० ३ उ० । सुकुलोत्पन्ने, सूत्र० १ श्रु० १० अ० ।

जच्चजिय–जात्यान्वित–त्रि० । विशिष्टजातिसंभूते, बृ० ३ उ० ।

जच्चमणि–जात्यमणि–पुं० । पद्मरागादिप्रधानमणौ, पं० व० १ द्वार ।

जच्चसुवण्ण–जात्यसुवर्ण–पारमार्थिके सुवर्णे, दश० १० अ० ।

जच्चसुवण्ण–जात्यसुवर्ण– 'जच्चसुवण्ण' शब्दार्थे, दश० १ अ० ।

जच्चिर–यच्चिर–अ० । यावत्काले, व्य० ७ उ० ।

जच्चो–देशी–पुरुषे, दे० ना० ३ वर्ग ।

जच्छ–यम्–धा० । उपरमे, " गमिष्यमाऽऽसां जः " । ८ । ४ । २१५ । इत्यन्तस्य छः । ' जच्छइ ' यच्छति । प्रा० ४ पाद ।

जच्छंत–यच्छत्–त्रि० ददति, अष्ट० ३ अष्ट० ।

जच्छंदओ–देशी–स्वच्छन्दे, दे० ना० ३ वर्ग ।

जजुव्वेय–यजुर्वेद–पुं० । द्वितीयवेदे, भ० २ श० १ उ० । औ० । यजुर्वेदाहिते निर्णये, व्यापारे च । स्था० ३ ठा० ३ उ० ।

जज्ज–जय्य–त्रि० । जेतुं शक्यः । जि–यत् । " कृत्यल्युटो बहुलं " । ६ । १ । ८१ । (पाणि०) जेतुं शक्ये, वाच० । " ऋय्यौ जः " । ८ । २ । २४ । इति य्यस्य जः । प्रा० २ पाद ।

जज्जरिय–जर्जरित–त्रि० । जर्जरं करोति, जर्ज–णिच् कर्मणि क्तः । जीर्णीकृते, शकलीकृते, 'अराजर्जरितं पतिम्' वाच० । " कुंतग्गनिज्जज्जरियसव्वदेहा " प्रश्न० १ आश्र० द्वार । राजीयुक्ते, स्था० ४ ठा० ४ उ० ।

जज्जरियसद्द–जर्जरित (झर्झरित)-शब्द–पुं० । तन्त्रीकरटिकादिवाद्यशब्दवद् झर्झर(जर्जर)ध्वनियुक्ते शब्दे, स्था० १० ठा० ।

जट्ट–जर्त–पुं० । वाह्लीकदेशे,सोऽभिजनोऽस्य अण् । बहुषु जनपदे लुप् । तद्देशवासिषु, ब० व० । वाच० । " तैस्याधूर्तादौ " । ८ । ३ । ३० ॥ इति सूत्रेण तस्य टः । प्रा० ३ पाद ।

जट्ठ–इष्ट–न० । कृतयजने, "महो जक्खिएण जट्ठं" आ० म० प्र० । यज्ञे च । उत्त० २५ अ० ।

जट्ठि–यष्टि–स्त्री० । यज्–क्तिन् नि० न संप्रसारणम् । ध्वजादिदण्डे, भुजाबलम्बने दण्डे च । क्तिच् । तन्त्रौ, हारलतायां, भार्यायां, मधूकवृक्षे च, वाच० । " जट्ठिमुट्ठिकोप्परप्पहारेहिं हणामि त्ति । " नि० चू० १ उ० ।

जड–जड–त्रि० । जलति जनीभवति । जल अच्, डस्य लः । "दर्शनादिष्टं वा,न वेत्ति किञ्चित्पुरो मोहात् । परवशगामः स भवेद्दिङ्मात्रो जडसंज्ञकः पुरुषः " ॥ उक्तलक्षणे मन्दबुद्धौ,मूर्खे,वेदप्रहणासमर्थे, "अनंशौ क्लीबपतितौ, जात्यन्धबधिरौ तथा । उन्मत्तजडमूकाश्च,ये च केचिन्निरिन्द्रियाः ॥" वेदग्रहणासमर्थौ जड इति दायभागः । हिमग्रस्ते, हिमेन मन्दक्रिये, मूके, अल्पके, जले, न० । सीसके, न० । चेतनारहिते अज्ञानादिसमूहे, वेदान्तमते हि पदार्थौ द्विधा-जडोऽजडश्च । तत्र जडोऽज्ञानतत्कार्यसङ्घः । अजडश्चेतन इति भेदः । " नापृष्टः कस्यचिद्ब्रूयात्,न चान्यायेन पृच्छतः । जानन्नपि हि मेधावी, जडवल्लोक आचरेत् " ॥१॥ वाच० । अपगतकर्तव्याकर्तव्यविवेके, आचा० १ श्रु० २ अ० २ उ० । स्याद्वादस्वरूपोपलब्धरहिते,अष्ट० ७ अष्ट० । तत्त्वावबोधविधुरबुद्धौ,स्या० । "जमा खलु ना जडं पज्जुवासंति " । जडमूढापण्डितनिर्विज्ञानशब्दा एकार्थकाः । रा० ।

जडाभार–जटाजाल–पुं० । जटासमूहे, "जडाभारेण सव्वं सरीरं पाणिएण उल्लेत्ता सामिस्स कबरीं ठाउं धुणइ" । आ० म० द्वि० ।

जडाल्ल–जटाल्ल–पुं० । जटा अस्त्यर्थे सिध्मा० लच् । वटवृक्षे, कच्छुरे, मुष्कके, गुग्गुले च । जटायुक्ते, त्रि० । चोरिणः शिखिनश्चास्य, जटालोर्द्ध्वशिरोरुहाः । " जटामास्याम्, स्त्री० । वाच० । स्वनामख्याते ग्रहविशेषे, कल्प० ६ क्षण । चं० प्र० ।

जटावत्–त्रि० । जटा अस्त्यर्थे मतुप्, मस्य वः । वाच० । प्राकृते च " आदिल्लोल्लालवन्तमन्तेसुरमणामतोः " ॥ ८।२।१५६ ॥ इति सूत्रेण आलादेशः । ' जमालो ' जटावान् । प्रा० २ पाद । जटायुक्ते, वाच० ।

जडि [ण्]-जटिन्–पुं० । जटा अस्त्यस्य इति । प्लक्षे, अश्वत्थतुल्यपत्रयुक्ते वृक्षभेदे, वाच० । त्रि० । जटाधरे, ज० ए० शा० १३ ह० । जं० । औ० ।

जडियाइलग–जटाल्ल–पुं० । अष्टाशीतिग्रहाणां त्रिपञ्चाशत्तमे स्वनामख्याते ग्रहे, चं० प्र० २० पाहु० । " दो जडियाइलगा " स्था० २ ठा० ३ उ० ।

जडियाइलय–जटाल–पुं० । ' जडियाइलग ' शब्दार्थे, चं० प्र० २० पाहु० ।

जडिअं–देशी–खचिते, दे० ना० ३ वर्ग ।

जडिल–जटिल–पुं० । जटा अस्त्यर्थे पिच्छा-इलच् । सिंहे, जटायुक्ते, त्रि० । " विवेश कश्चिज्जटिलस्तपोवनम् । " वाच० । " उक्कडफुडकुडिलजडिलकक्कडविकडफडाडोवकरणदच्छा " वृत्तिः-जटिलः स्कन्धदेशे केसरिणामिवाहीनां केसरसन्निभत्वात् । ज० १५ श० १ उ० । ज्ञा० । उत्त० । जटाधारिवनवासिपाखण्डिनि, प्रव० ९४ द्वार । वलितोल्लालिते च । " एगं महं कोसं व गंडियं सुक्कं जडिलं गंठिलं " ज० १६ श० ३ उ० ।

जडिलय–जटिलक–पुं० । राहौ, सू० प्र० २० पाहु० । चं० प्र० ।

जड्ड–जड्ड–पुं० । भाषया शरीरेण क्रियया वा जडे, स्थूले,दीक्षाऽनर्हे, प्रव० १०७ द्वार ।

तिविहो य होइ जड्डो, भासे सरीरे य करणे जड्डो य ।
भासाजड्डो चउहा, जल्ल एलग मम्मण दुमेहो ॥
जल जल्लमुद्दो भासइ, जल्लमूओ एव भासति अवत्तं ।
जह एलगो व्व एवं, एलगमूगो बलवलेति ॥
मम्मणमूओ बोव्वरो,खल्लेइ वाया हु अवि सदा जस्स ।
दुम्मेहस्स ण किंची, घोसंतस्सावि ठाय इहा ॥
दंसणणाणचरित्ते, तवे य समितीसु करणजोगे य ।
उवइट्ठं पि न गेण्हइ, जलमूगो एलमूगो य ॥
नाणा दट्ठा दिक्खा, भासाजड्डो अपच्चलो तस्स ।

सोयबहिरो य नियमा, गहणे जड्डाहो अहिगरणं ॥
तिविहो सरीरजड्डो, पत्थे भिक्खे तहेव वंदणए ।
एतेहिं कारणेहिं, सरीरजड्डं न दिक्खेज्जा ॥
अइणे वा पक्खिमंथो, निक्खायरियाएँ अपरिहत्थो य ।
जड्डस्सासपरिक्कम-अहिअग्गीउदगमादीसु ॥
आगाढगिलाणस्स य, असमाही वा वि होज्ज मरणं वा ।
जड्डे पासे वि ठिए, अन्ने य चवे इमे दोसा ॥
देसेण कक्खमादी, कुच्चणववणुप्पलावणे दोसा ।
णऽत्थि गलओ य चोरो, णिंदिपमुहो य जणवादो ॥
णेगे सरीरजड्डो, एमादीया हवंति दोसा तु ।
तम्हा तं न वि दिक्खे, गच्छेँ महल्ले अणुन्नाओ ॥
इरियासमिए भासे-सणासु आदाणसमिइगुत्तीसु ।
ण वि जाति चरणकरणे, कम्मुदएणं करणजड्डो ॥
जलमूग एलमूगो, अतिथूलसरीरकरणजड्डो य ।
दिक्खंतस्सेते खलु, चतुगुरु सेसेसु मासलहु ॥
भासाजड्डं मम्मण, सरीरजड्डं च णातिथूरं च ।
जावज्जिय परियट्टे, करणे जड्डं तु छम्मासे ॥
मोत्तुं गिलाणकज्जं, दुम्मेहं वा वि पाढेँ छम्मासो ।
तो हेतुं दुम्मेहं, जो वि य करणम्मि सो जड्डो ॥
छण्हुवरिं तो दोण्ह वि, आयरिओ अहेँ गाहेँ छम्मासा ।
पच्छा अन्नो ततिओ, सो वि य छम्मासपरिअट्टे ॥
जो चिय तं गाहेती, सिस्सो तस्सेव सो हवति ताहे ।
तह वि न गिण्हइ जदि हु, कुलगणसंघे विगिंचणता ॥
पं० भा० ।

जड्डत्रिधा-भाषया, शरीरेण, करणेन च । भाषाजड्डः पुनस्त्रिधा-जलमूको, मन्मनमूकः, एलकमूकश्च । तत्र जलमग्न इव बुरबुरायमानो यो वक्ति स जलमूकः । यस्य तु वदतः अव्यक्तमिव वचनं स्खलति स मन्मनमूकः । यश्चैलक इवाव्यक्तं मूकतया शब्दमात्रमेव करोति स एलकमूकः । तथा यः पथि भिक्षाऽटने वन्दनादिषु चातीव स्थूलतयाऽशक्तो भवति स शरीरजड्डः । करणं क्रिया, तस्यां जड्डः करणजड्डः समितिगुप्तिप्रत्यवेक्षणादिक्रियां पुनः पुनरुपदिश्यमानामप्यतीव जडतया यो ग्रहीतुं न शक्नोति सः, करणजड्ड इत्यर्थः । तत्र भाषाजड्डत्रिविधोऽपि ज्ञानग्रहणेऽसमर्थत्वाद् दीक्ष्यः । शरीरजड्डस्तु मार्गगमनभक्तपानानयनादिष्वशक्तो भवति, तथाऽतिजड्डस्य प्रस्वेदेन कक्षादिषु कुथितत्वं भवति, तेषां जलेन क्षालनेषु क्रियमाणेषु कीटिकादिप्लावना संभवति, ततः संयमविराधना, तथा लोकोऽतिनिन्दां करोति बहुभक्षीति, तथोच्छ्वासो भवति ततोऽसौ न दीक्षणीयः । ध० ३ अधि० । प्रव० । पं० चू० । नि० चू० । व्यट । आव० । गo । हस्तिनि, पुं० । बृ० १ उ० । नि० चू० । जीत० । ऊषजाड्यमूर्खे, त्रि० । तं० । " जड्डाणं बहुराणं, निग्विन्नाणं च निद्धिसेसाणं । संसारसुयराणं, कहियं पि निरत्थयं होइ" ॥१॥ तं० ।

जाड्य-न० । जडस्य भावः ष्यञ् । जडतायाम्, सौख्ये च । " आलस्यश्रमगर्भाद्य-जाड्यं जृम्भासितादिकृत् " । " इदं जाड्यमिदं मौढ्य-मिदमत्यद्भुतं वचः । " वाच० ।

जढ-त्यक्त-त्रि० । " क्तेनाफुल्लक्षीबाद्यः " । ८ । ४ । २४८ । इति सूत्रेण 'जढ' आदेशः । परित्यक्ते, दश० ६ अ० । बृ० । पं० व० । आचा० । नि० चू० । संथा० ।

जण-जन-पुं० । जायते इति जनः । आ० म० प्र० । नं० । आचा० । विशे० । सूत्र० । जन-अच् । वाच० । लोके, उत्त० ५ अ० । सूत्र० । आव० । आचा० । स० । नगरीदास्तदन्यलोके, " पमुइअजणजाणवया । " रा० । भ० । औ० । नि० । ज्ञा० । प्राकृतपुरुषे, सूत्र० १ श्रु० १ अ० २ उ० । आ० म० । स० । प्राणिनिवहे, पं० व० ४ द्वार । आचा० । मातापितृपुत्रकलत्रादौ, कौटुम्बिकजने च । आचा० १ श्रु० ६ अ० ४ उ० ।

जणइआ-जनयितृ-पुं० । जन-णिच्-तृच् । पितरि, आचा० १ श्रु० ६ अ० ४ उ० । उत्पादके, त्रि० । मातरि, स्त्री० । ङीप् । वाच० । " जणइत्ता णाममेगे । " जनयिता मेघो यो वृष्ट्या धान्यमुद्भवयति । स्था० ६ ठा० ९ उ० ।

जणइत्ता-पुं० । ' जणइआ ' शब्दार्थे, स्था० ६ ठा० ६ उ० ।

जणक्खय-जनक्षय-पुं० । लोकमरणेषु, प्र० ३ श० ६ द्व० ।

जणक्खयकर-जनक्षयकर-त्रि० । लोकविघातकारके, " बहुजणक्खयकरा संगामा । " प्रश्न० ४ आश्र० द्वार ।

जणकलकल-जनकलकल-पुं० । जनानामुपलभ्यमानवर्णविभागे ध्वनौ, रा० ।

जणग-जनक-पुं० । जन-णिच्-ण्वुल् । वाच० । पितरि, प्रव० १ द्वार । सूत्र० । ज्ञा० । उत्पादके, त्रि० । वाच० । मातापित्रादौ, " माता पिआ अ जंदकारो जणगा उदंति " आचा० १ श्रु० ८ अ० ८ उ० । मातापित्रोः, आचा० २ श्रु० ४ अ० १ उ० । जना लोकास्त एव जनकाः । जने, " जणगा तं सुणेह मे । " सूत्र० १ श्रु० ६ अ० । सीतायाः पितरि, विदेहनृपभेदे, वाच० । चरमजिनसमयवर्तिनि तत्पूजके मिथिलानृपे च । " मिहिलाजणओ य धरणो य । " मिथिलायां जनको राजा धरणश्च नागकुमारेन्द्रः भगवतः पूजां कृतवान् । आ० म० प्र० ।

जणजत्ता-जनयात्रा-स्त्री० । अत्यन्तलोकतातिसंभावणे, " जणजत्तारहियाणं, होइ जहत्तं जईण सया । " दर्श० ४ तत्त्व ।

जणट्ठाण-जनस्थान-न० । दण्डकाऽरण्ये, वाच० । नासिकपुरे च (स्त्री०) " अहया देवजाणी नाम सुक्कस्स महग्गहस्स धूआ जणट्ठाणपुरे कीरंती दंडयरण्णे दिट्ठा, कयवइ त्ति वत्ता मोहिआ, भग्गं च तीसे सीलव्वयं, तस्स सरूवं उवलब्भ सुक्कमहग्गहेणं रोसवसेणं सावो दिन्नो-एयं नयरं दंडयरायसहियं सत्तदिवसब्भंतरे डाहरासी भविस्सइ त्ति, तं च नायं नारयरिसिणा, दंडयरायस्स कहियं, तं च सोऊण भीओ दंडयराया सयलं जणं सह आगंडं चंदप्पहसामिणं सरणं पवन्नो, वुड्ढो अ, तप्पभिइ जणट्ठाणं ति तस्स नरवरस्स पसिद्धं नामधिज्जं, एवं परातेत्थिया वि जस्स तित्थस्स

माहप्पं उवदंसिति, तस्स आरद्धतल्लोगा कहं नो वण्णिहिंति ?। ती० २८ कल्प।

जणणिकुच्छिमज्झ–जननीकुक्षिमध्य–न०। मातृजठरान्तरे, तं०।

जणणिवह–जननिवह–पुं० । महति नगरभोजिकादिवृन्दे, बृ० ४ उ० ।

जणणी–जननी–स्त्री० । जनयति प्रादुर्भावयत्यपत्यमिति जननी । उत्त० २ अ० । जन–णिच् अनि० जन अपादाने, अनि० वा–ङीप् । वाच० । मातरि, प्रव० १ द्वार । पञ्चा० । कल्प० । आव० । सूत्र० । " आ स्तन्यपानाज्जननी पशूना–मा दारलाभाच्च नराधमानाम् । आ गेहकृत्यावधि मध्यमाना–मा जीवितार्थीयमिवोत्तमानाम् ॥१॥ " कल्प० ४ क्षण । उत्पादकस्त्रीमात्रे च । वाच० ।

जणद्दण–जनार्दन–पुं० । जनैरर्द्यते याच्यते ' अर्द्द ' याचने, कर्मणि ल्युट् । जनमर्दयति हिनस्ति तापयति जनान् समुरुवासिनोऽसुरभेदान् अर्दयति वा कर्तरि ल्युट् । विष्णौ, वाच० । " काले प्रसुप्तस्य जनार्दनस्य, मेघान्धकारासु च शर्वरीषु " जगत्पीडके, त्रि० । आव० १ अ० ।

जणपरिच्चुय–जनपरित्यूत–त्रि० । लोकगर्हिते, पं० व० १ द्वार ।

जणपिच्छणिज्जरूव–जनप्रेक्षणीयरूप–त्रि० । जनानां प्रेक्षणीयं द्रष्टुं योग्यं रूपं स्वरूपं यस्य तत् तथा । दर्शनीयस्वरूपकलिते, कल्प० ३ क्षण ।

जणपुज्ज–जनपूज्य–त्रि० । लोकमान्येषु, जीवा० १३ अधि० ।

जणपूयणिज्ज–जनपूजनीय–त्रि० । राजामात्यगुरुश्रेष्ठिप्रभृतिषु लोकमान्येषु, पञ्चा० २ विव० ।

जणप्पमद्द–जनप्रमर्द्द–पुं० । लोकचूर्णने, प्र० ७ श० ६ उ० ।

जणप्पियत्त–जनप्रियत्व–न० । लोकप्रियत्वे, " युक्तं जनप्रियत्वं, शुक्लं तरुर्मसिक्फलदमलम् । धर्मप्रशंसनादे–र्बीजाधानादिभावेन ॥१॥" षो० ४ विव० ।

जणवह–जणवध–पुं । लोकघाते, प्र० ७ श० ६ उ० ।

जणवोल्ल–जनवोल्ल–पुं० । जनानामव्यक्तवर्णे ध्वनौ, विपा० १ श्रु० १ अ० । भ० ।

जणमणोहर–जनमनोहर–त्रि० । लोकचेतोहारिणि, पञ्चा० ६ विव० ।

जणमेजय–जनमेजय–पुं० । जनमेजयति । एज–णिच्–अश् । पारीक्षितनृपतेः पुत्रे, कुरुनामभूपपुत्रभेदे, पुरञ्जयनृपपुत्रे च । वाच० । क्रोधाज्जनमेजयो विननाश । ध० १ अधि० ।

जणय–जनक–पुं० । ' जणग ' शब्दार्थे, प्रव० १ द्वार ।

जणयंत–जनयत्–त्रि० । उत्पादयति, पञ्चा० ११ विव० ।

जणवय–जनपद–पुं० । जनाः पद्यन्ते गच्छन्ति यत्र । पद आधारे घः । वाच० । देशे, प्रश्न० ५ आश्र० द्वार । तं० । स्था० । कल्प० । आचा० । उत्त० । बृ० । आ० म० । जनानां लोकानां पदान्यवस्थानानि येषु ते जनपदाः । साधुविहरणयोग्येषु अवन्त्यादिषु अर्द्धषड्विंशतिदेशेषु, आचा० १ श्रु० ६ अ० ४ उ० । राष्ट्रे, रा० । मनुष्यलोके, प्र० ७ श० ६ उ० । तन्निवासिलोकेषु च । " हरंति धणधण्णदव्वजायाणि जणवयकुलाणं " जनपदकुलानां लोकगृहाणाम् । प्रश्न० ३ आश्र० द्वार । " जणवयपरिधावाए " जनपदानां लोकानां परिवादाय । आचा० १ श्रु० ३ अ० २ उ० । ' जानपद ' इत्यनुवादे तु तत्र भवे, " जणवयवहाए " जनपदे भवाः जानपदाः कालरुद्रादयो राजादयो वा तद्धाय । आचा० १ श्रु० ३ अ० २ उ० ।

जणवयकहा–जनपदकथा–स्त्री० । मालवकादिदेशप्रशंसानिन्दात्मिकायां देशकथायाम्, उत्त० १२ अ० । औ० ।

जणवयपाल–जनपदपाल–पुं० । जनपदं पालयति इति जनपदपालः । जनपदरक्षके, औ० ।

जणवयपिया–जनपदपितृ–पुं० । जनपदानां हितत्वात् (औ०) पितेव । लोकपितरि, स्था० ६ ठा० । सूत्र० ।

जणवयपुरोहिय–जनपदपुरोहित–पुं० । जनपदस्य शान्तिकारितया पुरोहित इव जनपदपुरोहितः । जनपदशान्तिकरे, रा० । औ० । सूत्र० ।

जणवयप्पहाण–जनपदप्रधान–त्रि० । लोकोत्कृष्टे, " जच्चाइं य जणवयप्पहाणाइं लालियंता " प्रश्न० ४ आश्र० द्वार ।

जणवयवग्ग–जनपदवर्ग–पुं० । देशसमूहे, भ० ३ श० ६ उ० ।

जणवयसच्च–जनपदसत्य–न० । जनपदेषु देशेषु यद् यदर्थवाचकतया रूढं देशान्तरेऽपि तत् तदर्थवाचकतया प्रयुज्यमानं सत्यमवितथमिति जनपदसत्यम् । यथा कोङ्कणादिषु पयः पत्तं नीरमुदकमित्यादि । सत्यत्वं चास्याऽदुष्टं, विवक्षाहेतुत्वात् । नानाजनपदेष्विष्टार्थप्रतिपत्तिजनकतया व्यवहारप्रवृत्तेः । दशविधसत्यस्य प्रथमे भेदे, स्था० १० ठा० । ध० ।

जणवयसच्चा–जनपदसत्या–स्त्री० । जनपदमधिकृत्येष्टार्थप्रतिपत्तिजनकतया व्यवहारहेतुत्वात् सत्या जनपदसत्या । दशविधायाः सत्यभाषायाः प्रथमे भेदे, प्रज्ञा० १२ पद ।

जणवहा–जनव्यथा–स्त्री० । लोकपीडायाम्, प्र० ७ श० ६ उ० ।

जणवाय–जनवाद–पुं० । जनानां परस्परेण वस्तुविचारणे, औ० । स्वनामख्याते कलाभेदे, जं० २ वक्ष० । स्त० । लोकापवादे च । वाच० । " जणवायभएणं " आव० ६ अ० ।

जणवूह–जनव्यूह–पुं० । जनसमुदाये, भ० ६ श० ३४ उ० । चक्राद्याकारजनसमूहे, जनव्यूहस्य शब्दोऽपि तद्भेदाज्जनव्यूह एवोच्यते । विपा० १ श्रु० १ अ० ।

जणव्वूह–जनव्यूह–' जणवूह ' शब्दार्थे, विपा० १ श्रु० १ अ० ।

जणसद्द–जनशब्द–पुं० । जनानां परस्परालापरूपे ध्वनौ, औ० । रा० । दशा० ।

जणसम्मद्द–जनसंमर्द्द–पुं० । जनानां परस्परं संघर्षणे, स्था० ४ ठा० १ उ० ।

जणसंवट्टकप्प–जनसंवर्तकल्प–त्रि० । जनसंवर्त इव लोकसंहारसदृशे, भ० ७ श० ६ उ० ।

जणाउत्तो–देशी–ग्रामप्रधानपुरुषे, विटे च । दे० ना० ३ वर्ग ।

जणाउल–जनाकुल–त्रि० । भोजिकादिभिरिति प्रचुरैर्जनैराकीर्णे, व्य० ४ उ० ।

जणाकुल–जनाकुल–त्रि० । ' जणाउल ' शब्दार्थे, व्य० ४ उ० ।

जणावायजीरुत्त–जनापवादजीरुत्व–न० । जनापवादाद् मरणादिनिर्दिश्यमाणाद् भीरुत्वं भीतिभावः । लोकापवादभीतौ, ब्रा० १२ ब्रा० ।

जणि–इव–अव्य० । " इवार्थे नं-नउ-नाइ-नावइ-जणि-जणवः " । ८ । ४ । ४४५ । इति सूत्रेणापभ्रंशे इवार्थे जणिप्रयोगः । प्रा० ४ पाद । इवेत्यर्थे, " चंपयकुसुमहो मज्झि सहि भसलु पयट्टउ । सोहइ इंदनीलुमणि जणि कणइ वइट्ठउ ॥ " प्रा० ४ पाद ।

जणिअ–जानित–त्रि० । उत्पादिते, नि० चू० १ उ० । आव० ।

जणिय–जनित–त्रि० । ' जणिअ ' शब्दार्थे, नि० चू० १ उ० ।

जणु–इव–अव्य० । " इवार्थे नं-नउ-नाइ-नावइ-जणि-जणवः " । ८ । ४ । ४४५ । इति सूत्रेणापभ्रंशे इवशब्दस्य ' जणु ' इत्यादेशः । इवेत्यर्थे, "निरुवमरसुप्पिपँ पिए जि जणु ।" प्रा० ४ पाद ।

जणुम्मि–जनोर्मि–स्त्री० । जनसंबाधे, रा० ।

जणुल्लाव–जनोल्लाप–पुं० । जनानां काक्वा वर्णने, औ० ।

जणेमाण–जनयत्–त्रि० । उत्पादयति, तं० ।

जणोह–जनौघ–पुं० । जनसमुदाये, बृ० ३ उ० ।

जणोवयार–जनोपचार–पुं० । स्वजनादिलोकपूजाधाम, पञ्चा० २ विव० ।

जण्ण–यज्ञ–पुं० । यज–भावे नः । यागे, वाच० ।

स त्रिविधः—

" अफलाकाङ्क्षिभिर्यज्ञो, विधिदृष्टो य इज्यते ।
यष्टव्यमेवेति मनः, समाधाय स सात्त्विकः ॥
अभिसंधाय तु फलं, दम्भार्थमपि चैव यत् ।
इज्यते भरतश्रेष्ठ !, तं यज्ञं विद्धि राजसम् ॥
विधिहीनमसृष्टान्नं, मन्त्रहीनमदक्षिणम् ।
श्रद्धाविरहितं यज्ञं, तामसं परिचक्षते ॥ "

स च नानाविधः—

" द्रव्ययज्ञास्तपोयज्ञाः, योगयज्ञास्तथा परे ।
स्वाध्यायज्ञानयज्ञाश्च, यतयः संशितव्रताः ॥ "

पञ्च गृहस्थकर्तव्या यज्ञा यथा—

" अध्यापनं ब्रह्मयज्ञः, पितृयज्ञस्तु तर्पणम् ।
होमो दैवो बलिर्भौतो, नृयज्ञोऽतिथिपूजनम् ॥ "

विष्णौ च । वाच० । नागादीनां पूजायाम्, आ० म० प्र० । ज्ञा० । प्रश्न० । सूत्र० । प्रतिदिवसं स्वस्वेष्टदेवतापूजाधाम, जी० ३ प्रति० । आरे च । जी० ३ प्रति० । जं० । सयूपो यज्ञ एव हि क्रतुरुच्यते, यूपरहितस्तु दानादिक्रियायुक्तो यज्ञ इति । विशे० ।

जण्णःज्ज–यज्ञीय–न० । यज्ञाय हितं तस्येदं वा । वाच० । स्वनामख्याते (जयघोषविजयघोषमुनिवक्तव्यताप्रतिबद्धे) उत्तराध्ययनसूत्रस्य पञ्चविंशतितमेऽध्ययने, स० ३३ सम० । उत्त० ।

जण्णग्गि–यज्ञाग्नि–पुं० । अग्निष्टोमानले, दश० १ चू० ।

जण्णजस–यज्ञयशस्–पुं० । स्वनामख्याते नारदपितामहे तापसे,

" आसीद्दा सौर्यपुरे, समुद्रविजयो नृपः ।
तदा यज्ञयशास्तत्र, तापसस्तस्य वल्लभः ॥

सोममित्रासुतो यज्ञ-दत्तस्सोमयशा स्नुषा ।
तत्पुत्रो नारदस्तेषा-मुच्चकृत्या च भोजनम् ॥ " आ० क० । आ० चू० ।

जण्णजाइ (ण्)–यज्ञयाजिन्–पुं० । यजनशीले, नि० चू० १ उ० । औ० । भ० ।

जण्णट्ठ–यज्ञार्थ–पुं० । यज्ञैकप्रयोजने द्विजे, यज्ञनिमित्ते, उत्त० २५ अ० ।

जण्णट्ठाण–यज्ञस्थान–न० । नासिक्यपुरे, ती० २८ कल्प । "एवं नासिक्यपुरे कालंतरे पुष्पभूमिं नाउं आगओ मिहिलाहितो, तत्थ जणवराओ तेण य तत्थ दस जण्णा कारिया" ततः "जण्णट्ठाणं ति तन्नयरं रूढं । " ती० २८ कल्प । यज्ञवाटे च । वाच० ।

जण्णदत्त–यज्ञदत्त–पुं० । स्वनामख्याते नारदपितरि, आ० क० । आव० । आ० चू० । स्वनामख्याते कौशाम्बीवास्तव्ये सोमदत्ते, सोमदेवपितरि च । उत्त० १ अ० । ऋषभस्वामितृतीयशिष्ये, कल्प० ८ क्षण० ।

जण्णदेव–यज्ञदेव–पुं० । क्षितिप्रतिष्ठितनगरीये त्रिशलातपुत्रपूर्वभविकजीवे स्वनामख्याते द्विजे, आव० १ अ० ।

जण्णमुह–यज्ञमुख–न० । यज्ञोपाये, उत्त० २५ अ० ।

जण्णवक्क–याज्ञवल्क्य–पुं० । शुक्लयजुःप्रवर्तके मुनिभेदे, वाच० । (वेदाः) मनार्वाक्तु पश्चात् सुबसाचाज्ञवल्क्यादिभिः कृताः " आ० म० प्र० । तन्नामकधर्मसंहिताकर्तरि ऋषौ च । वाच० । याज्ञवल्क्यप्रभृतिऋषिप्रणीतधर्मसंहिताभिधिन्तवन्ति ते धर्मचिन्तकाः । अनु० ।

जण्णवाड–यज्ञवा (पा) ट–पुं० । यज्ञस्थाने, वाच० । आ० म० । उत्त० । आव० ।

जण्णसेट्ठ–यज्ञश्रेष्ठ–पुं० । यज्ञेषु श्रेष्ठो यज्ञश्रेष्ठः । अथ वा–श्रेष्ठो यज्ञः श्रेष्ठयज्ञः । प्राकृतत्वात् यज्ञश्रेष्ठः । (उत्त०) उत्तमयज्ञे, " घोसट्ठकाया सुरुचत्तदेहा, महाजयं जयइ जण्णसेट्ठं " उत्त० १२ अ० ।

जाण्णिय–याज्ञिक–पुं० । यज्ञेन जयति लोकान् इति याज्ञिकः । आ० म० प्र० । आचा० । यज्ञाय हितः यज्ञः प्रयोजनमस्य वा ठक् । याजके ऋत्विगादौ, यजमाने च । वाच० ।

जण्णोवईय–यज्ञोपवीत–न० । यज्ञेन संस्कृतमुपवीतम् । वाच० । ब्राह्मणकण्ठसूत्रे, उत्त० २ अ० ।

तत्प्रसिद्धिस्त्वित्थम्—

भरतश्च आत्मकानादूयोक्तवान्-भवद्भिः प्रतिदिनं मदीयं भोक्तव्यं, कुत्यादि च न कार्यम्, स्वाध्यायपरैरासितव्यं, सूक्ते च मदीयगृहद्वारासन्नबद्धास्थितैर्वक्तव्यम्—जितो भवान्, वर्धते भयं, तस्मान्मा हन मा हनेति । ते तथैव कृतवन्तः । भरतश्चरति आगरावगाढत्वात् प्रमत्तत्वात् तच्छब्दाकर्णनोत्तरकालमेव केनाहं जित इति ?, आः ज्ञातं-कषायैः, तेभ्यः एव वर्धते भयमित्यालोचनापूर्वकं संवेगं वातवानिति । अत्रान्तरे लोकबाहुल्यात् सूपकाराः पाकं कर्तुमशक्नुवन्तो भरताय निवेदितवन्तः, नेह ज्ञायते कः श्रावकः, को वा नेतीति लोकस्य प्रचुरत्वात् । आह भरतः-पृच्छापूर्वकं

देयमिति । ततस्तान् पृष्टवन्तस्ते—को भवान्, श्रावकाणां कति व्रतानि ? । स आह-श्रावकाणां न सन्ति व्रतानि, किं तु अस्माकं पञ्चाऽणुव्रतानि । कति शिक्षाव्रतानि ? । ते उक्तवन्तः-सप्त शिक्षाव्रतानि । य एवं भूतास्ते राज्ञो निवेदिताः । स च काकणीरत्नेन तान् लाञ्छितवान्, पुनः षण्मासेन योग्या प्रयन्ति, तानपि लाञ्छितवान् । षण्मासकालादनुयोगं कृतवानेवं ब्राह्मणाः संजाता इति । ते च स्वसुतान् साधुभ्यो दत्तवन्तः, ते च प्रव्रज्यां चक्रुः । परीषहभीरवस्तु श्रावका एवावसन्निति । इयं च भरतराज्यस्थितिः । आदित्ययशसस्तु काकणीरत्नं नासीत्, सुवर्णमयानि यज्ञोपवीतानि कृतवान्, महायशःप्रभृतयस्तु केचन रूप्यमयानि, केचन विचित्रपट्टसूत्रमयानि, इत्येवं यज्ञोपवीतप्रसिद्धिः । आ० म० प्र० ।

जण्णोवईय-यज्ञोपवीत-न० । 'जण्णोवईय' शब्दार्थे, आ०म०प्र० ।

जण्होहणो-देशी-राक्षसे, दे० ना० ३ वर्ग ।

जण्हुली-देशी-नद्याम्, दे० ना० ३ वर्ग ।

जण्हु-जह्नु-पुं० । "सूक्ष्मरुणजह्नुहरिणां णहः" ॥८।२।७५॥ इति प्राकृतसूत्रेण ह्नोः णहुः । प्रा० २ पाद । भरतवंश्ये आजबीढनृपपुत्रे नृपभेदे, वाच० । को० ।

जण्हुसुया-जह्नुसुता-स्त्री० । गङ्गानद्याम्, "गंगा भागीरही य जण्हुसुया ।" को० ।

जइ-यदि-अव्य० । यद्-णिच्-इन्, णिलोपः । पक्षान्तरे, संभावनायाम्, गर्हायां, विकल्पे च । वाच० । "जति ण चोरं लभसि ततो ते जीवियं नऽत्थि" । नि० चू० १ उ० ।

जतमाण-यतमान-त्रि० । प्राणिविषये यत्नवति, आचा० १ श्रु० ६ अ० २ उ० । यत्नवति च । आचा० १ श्रु० ४ अ० १ उ० ।

जति-यदि-अव्य० । 'जइ' शब्दार्थे, नि० चू० १ उ० ।

जतिय-यावत्-त्रि० । यत्परिमाणे, वाच० । "अणं पि जतियं जाणंति" नि० चू० १७ उ० ।

जतुकुंभ-जतुकुम्भ-पुं० । जातुषे घटे, सूत्र० १ श्रु० ४ अ० १ उ० ।

जतुगोलसमाण-जतुगोलसमान-त्रि० । किम्भरूपकीडनकजतुगोलकप्रमाणे अनति महति, भ० १६ श० ३ उ० ।

जतुगोलासमाण-जतुगोलसमान-पुं० । 'जतुगोलसमाण' शब्दार्थे, भ० १७ श० ३ उ० ।

जतो-यतस्-अव्य० । यस्मात् कारणादित्यर्थे, पञ्चा० ६ विव० ।

जत्त-यत्न-पुं० । वेलाविधानाद्याराधनोद्यमे, पञ्चा० ३ विव० ।

जत्तातिग-यात्रातिक-न० । जिनयात्राभिके, ध० २ अधि० । "अष्टाह्निकाऽभिधानेका, रथयात्रामथापराम् । तृतीयां तीर्थयात्रां च-त्वार्हुर्यात्रां त्रिधा बुधाः ॥ १ ॥" ध० २ अधि० ।

जत्ता-यात्रा-स्त्री० । या-ष्ट्रन् । वाच० । यानं यात्रा । तपोनियमसंयोगादिषु प्रवृत्तौ, भ० १८ श० १० उ० । आव० । यात्रा द्विधाऽऽख्यता, भावतश्च । ऽऽख्यतस्तापसादीनां स्वक्रियोत्सर्पमाना, भावतः साधूनामिति । आव० ३ अ० ।

किं ते भंते ! जत्ता ? । सोमिला ! जं मे तवणियमसंजमसज्झायझाणआवस्सयमादिएसु जोगेसु जयणा, से त्तं जत्ता । (जयण त्ति) प्रवृत्तिः । भ० १८ श० १० उ० ।

अत्र प्रासङ्गिके शङ्कासमाधाने यथा-

"नो यात्रा प्रतिमानतिव्रतभृतां साक्षादनावेशनात्,
तत्प्रश्नोत्तरवाक्य इत्यपि वचो मोहज्वरावेशजम् ।
मुख्यार्थैः प्रथिता यतो व्यवहृतिः शेषान् गुणान् लक्षयेत्,
सामर्थ्येन हि यावतास्ति यतना यात्रा स्मृता तावता ॥४७॥"

प्रति० । एतद्व्याख्यानं 'चेइय' शब्देऽस्मिन्नेव भागे १२२० पृष्ठे द्रष्टव्यम्) क्षायिकमिश्रौपशमिकलक्षणे भावे, आव० ३ अ० । देवोद्देशेनोत्सवभेदे रथयात्रादौ, वाच० । महोत्सव एव यात्रा, न तु देशान्तरगमनम् । ध० २ अधि० । पञ्चा० । सा च यात्रा त्रिविधा—अष्टाह्निका, रथयात्रा, तीर्थयात्रा च । ध० २ अधि० । (तत्राष्टाह्निकास्वरूपं रथयात्रास्वरूपं च 'अणुजाण' शब्दे प्रथमभागे ३६७ पृष्ठे दर्शितम) स च सविस्तरं सर्वचैत्यपरिपाटीकरणादिमहोत्सवोऽष्टाह्निकायात्रा, इयं चैत्ययात्राऽप्युच्यते । ध० २ अधि० । (तीर्थयात्रास्वरूपं च 'तित्थजत्ता' शब्दे द्रष्टव्यम्) देशान्तरगमने, स्था० ४ ठा० १ उ० । ज्ञा० । औ० । विजिगीषया राज्ञां गमने, गमनमात्रे, यापने, उपाये च । वाच० ।

जत्ताभयग-यात्राभृतक-पुं० । यात्रा देशान्तरगमनं, तस्यां सहाय इति श्रियते यः स यात्राभृतकः । देशाटनसमयोपयोगिन्यनुचरे, स्था० ४ ठा० १ उ० ।

जत्ता ति होति गमणं, उभयं वा एत्तिय धणेण । पं० भा० ।

"जत्ताभयगो नाम तुमे अम्हं इमा जत्ता कायव्वा" । स्वयं यात्रां गन्तुमशक्नुवता यात्रासिद्ध्यै वेतनेन व्यापारितेऽनुचरे च । पं० चू० ।

जत्ताभिमुह-यात्राऽभिमुख-त्रि० । गमनाभिमुखे, औ० ।

जत्ताविहाण-यात्राविधान-न० । जिनोत्सवविधौ, तत्प्रतिपादके यात्राविधिप्रकरणाख्ये हारिभद्रे नवमे पञ्चाशके च । पञ्चा० १७ विव० । (तद्वक्तव्यता 'अणुजाण' शब्दे प्रथमभागे ३६७ पृष्ठे विलोक्या)

जत्तासिद्ध-यात्रासिद्ध-पुं० । कृतसमुद्रयात्रे, यो लवणवारं समुद्रमवगाह्य कृतकार्यः क्षेमेणाऽऽयाति स यात्रासिद्धः । अन्येऽपि पोतेन गन्तुकामा यात्रासिद्धाः प्रेष्यन्ते ।

यात्रासिद्धकथा चेयम्-

"वेलाकूलेऽभवत् कोऽपि, वणिक् तुणिलकनामकः ।
तस्याभूवन् सप्तशो भग्नं, वोहित्थं स तु नाभनक् ॥ १ ॥
जले नष्टं जले एव, लभ्यते प्रोक्तवानिति ।
नाग्रहीद्वस्तमप्यन्यैः, जगाम पुनरम्बुधौ ॥ २ ॥
स्वयं समुद्रस्तुष्टोऽथ, तस्य प्राज्यं धनं ददौ ।
भणितश्चान्यदपि ते, किं ददामीति सोऽवदत् ॥ ३ ॥
मम नाम गृहीत्वा यः, समुद्रमवगाहते ।
सोऽविघ्नः समरत्येतु, समुद्रस्तत्प्रपन्नवान्॥४॥" आ०क०।रा०।

जत्ति जगारपविभत्ति-ज इति जकारप्रविभक्ति-न० । द्वात्रिंशद्भिनाट्यभेदे, रा० ।

जत्तिय-यावत्-त्रि० । यत्परिमाणे, वाच० । "जत्तियं गहियं तत्तियं दियं ।" आ० म० प्र० ।

जत्तो-यतस्-अव्य०।"सो दो तसो वा" ।८।२।१६०। इति प्राकृतसूत्रेण तसः 'सो' इत्यादेशः। प्रा० २ पाद। यस्मात्कारणादित्यर्थे, पञ्चा० १० विव०।

जत्थकामोसाइत्त-यत्रकामावसायित्व-न०। स्वाभिलाषितस्य समाप्तिपर्यन्तनयने योगसिद्धिभेदे, द्वा० २६ द्वा०।

जत्थ जत्थ-यत्र यत्र-अव्य०। यद्-त्रल्। यस्मिन् यस्मिन्नित्यर्थे, वाच०। "उवहाणं जत्थ जत्थ जं सुत्ते, पसा सुत्तबीप्सा, जत्थ उद्देसगे, जत्थ अज्झयणे, जत्थ सुयक्खंधे, जत्थ अंगे कालुक्कालियअंगाणंगेसु जेया।" नि० चू० १ उ०।

जदि-यदि-अव्य०। अभ्युपगमे, नि० चू० २ उ०।

जदिच्छा-यदृच्छा-स्त्री०। अभिसंधिरहितत्वे, उ० ३ उ०।

जदुणंदण-यदुनन्दन-पुं०। श्रीकृष्णे, स्था० ८ ठा०।

जप-जप-धा०। उच्चारणे, वाचि च। भ्वा०-पर०-सक०-सेट्। अभि-आभिमुख्येन जपे, सम्यक् कथने च। उप-भेदे, न०। वाच०। भावे अप्। पुं०। मन्त्रान्त्यासे, अनु०। तत्प्रकारो यथा-

" मनः संहृत्य विषया-न्मन्त्रार्थगतमानसः।
न द्रुतं न विलम्बं च, जपेन्मौक्तिकपङ्क्तिवत्॥
जपः स्यादक्षरावृत्ति-र्मानसोपांशुवाचिकैः।
क्रिया यद्वक्रभेणौ, वर्णस्वरपदात्मिकाम्॥
मन्त्रैरेवार्थमुद्दिश्य, मानसः स जपः स्मृतः।
जिह्वोष्ठौ चालयेत् किञ्चित्, देवतागतमानसः॥
किञ्चिच्छ्रवणयोग्यः स्या-दुपांशुः स जपः स्मृतः।
मन्त्रमुच्चारयेद्वाचा, वाचिकः स जपः स्मृतः॥
शतैर्जपाद्विशिष्टः स्या-दुपांशुर्दशभिर्गुणैः।
जिह्वाजपः शतगुणः, सहस्रो मानसः स्मृतः॥
जिह्वाजपः स विज्ञेयः, केवलं जिह्वया बुधैः"। वाच०।

जप्प-जल्प-पुं०। कुलजातिनिग्रहस्थानसाधनोपालम्भपरे भाषणे, स्था० ९ ठा०। नि० चू०। स०।

जप्पभिइ-यतः प्रभृति-अव्य०। यस्मात्कालादारभ्येत्यर्थे, " जप्पभिइं च णं अम्हं एस दारए कुच्छिंसि गब्भत्ताए वक्कंते तप्पभिइं च णं अम्हे हिरण्णेणं जाव पीइसक्कारेणं अईव अईव वड्ढामो"। कल्प० ४ क्षण।

जम-यम-धा०। उपरमौ, भ्वा०-पर०-सक०-अनिट्। उदित्वत्कर्त्वा वेट्। आ-दीर्घीकरणे, उप-विवाहे, 'यम' परिवेषणे, चुरा०-उभ०-सक०-सेट्-घा-घटा०। वाच०। यम-घा०-घञ्। प्राणातिपातविरत्यादिरूपेषु पञ्चसु महाव्रतेषु, पुं०। उत्त० २५ अ०। "दो यमा" स्था० २ ठा०३ उ०। ज्ञा०। ध० २०। तत्र महाव्रतपदेनैते जिनैरभिधीयन्ते, व्रतपदेन भागवतैः, धर्मपदेन पाशुपतैः, सांख्यैर्यमसमतानुसारिभिश्च यमपदेनाभिधीयन्ते, कुशलधर्मपदेन च बौद्धैरभिधीयन्ते, वैदिकादिभिश्च ब्रह्मादिपदेनाभिधीयन्ते। द्वा० ७ द्वा०। हा०।

तत्स्वरूपं त्वेवम्-

अहिंसासूनृताऽस्तेय-ब्रह्माकिञ्चनता यमाः।
दिक्कालाद्यनवच्छिन्नाः, सार्वभौमा महाव्रतम्॥ २॥

प्राणवियोगप्रयोजनो व्यापारो हिंसा, तदभावोऽहिंसा। वाङ्मनसोर्यथार्थत्वं सूनृतम्। परस्वापहरणं स्तेयं, तदभावोऽस्तेयम्। उपस्थसंयमो ब्रह्म। भोगसाधनानामस्वीकारोऽकिञ्चनता, एते यमाः। तदुक्तम्-" अहिंसासत्यास्तेय-ब्रह्मचर्यापरिग्रहाः यमाः" इति। दिग्देशस्तीर्थादिः, कालश्चतुर्दश्यादिः, आदिना आत्मन्यादिरूपाया जातेर्ब्राह्मणादिप्रयोजनरूपस्य समयस्य च ग्रहः। ततो दिक्कालादिना अनवच्छिन्नाः " तीर्थे कञ्चन न हनिष्यामि " " चतुर्दश्यां न हनिष्यामि " " ब्राह्मणान् न हनिष्यामि " " देवब्राह्मणार्थव्यतिरेकेण न कमपि हनिष्यामि" इत्येवंविधावच्छेदव्यतिरेकेण सर्वविषया अहिंसादयो यमाः, सार्वभौमाः सर्वासु क्षितिप्राप्तासु चित्तभूमिषु संभवन्तो महाव्रतमित्युच्यन्ते। तदुक्तम्-" एते तु जातिदेशकालसमयानवच्छिन्नाः सार्वभौमा महाव्रतम्"॥ २॥ द्वा० २१ द्वा०।

इच्छायमादिचतुर्भेदेषु, तथाहि-

यमाश्चतुर्विधा इच्छा-प्रवृत्तिस्थैर्यसिद्धयः। (२५)

(यमा इति) यमाश्चतुर्विधाः-इच्छायमाः प्रवृत्तियमाः, स्थिरयमाः, सिद्धियमाश्च। (२५) द्वा० १९ द्वा०।

इच्छायमो यमेष्विच्छा, युता तद्वत्कथामुदा।
स प्रवृत्तियमो यत्तत्, पालनं शमसंयुतम्॥ २६॥

तद्वतां यमवतां कथातो या मुत्प्रीतिः, तया युता सहिता यमेष्विच्छा इच्छायम उच्यते। यत्तेषां यमानां पालनं शमसंयुतमुपशमान्वितं स प्रवृत्तियमः। तत्पालनं चात्राविकलमभिप्रेतम्, तेन न काणादिविकलतत्पालनरूपे इच्छायमेऽतिव्याप्तिः॥ न च सोऽपि प्रवृत्तियम एव, केवलं तथाविधसाधुवेषतया प्रधान इच्छायम एव तात्त्विकपक्षपातस्यापि द्रव्यक्रियातिशायित्वात्। तदुक्तम्-" तात्त्विकः पक्षपातश्च, भावशून्या च या क्रिया। अनयोरन्तरं ज्ञेयं, भानुखद्योतयोरिव"॥ १॥ संविग्नपाक्षिकस्य प्रवृत्तचक्रत्वानुरोधे तु प्रवृत्तियम एवायं, तस्य शास्त्रयोगानियतत्वादिति नयभेदेन भावनीयम॥ २६॥

सत्क्रियोपशमोत्कर्ष-दतिचारादिचिन्तया।
रहिता यमसेवा तु, तृतीयो यम उच्यते॥ २७॥

सतो विशिष्टस्य क्रियोपशमस्य उत्कर्षादुरूकादतिचारादीनां चिन्तया रहिता, तदभावस्यैव विनिश्चयात्। यमसेवा तु तृतीयो यमः स्थिरयम उच्यते॥ २७॥

परार्थसाधिका त्वेषा, सिद्धिः क्षुद्रान्तरात्मनः।
अचिन्त्यशक्तियोगेन, चतुर्थो यम उच्यते॥ २८॥

(परार्थेति) परार्थसाधिका स्वसन्निधौ परस्य वैरत्यागादिकारिणी तु एषा यमसेवा सिद्धिः क्षुद्रः क्षीणमलतया निर्मलोऽन्तरात्मा यस्य अचिन्त्याया अनिर्वचनीयायाः शक्तेः स्वबीजोद्भासरूपायाः योगेन चतुर्थो यम उच्यते॥ २८॥ द्वा० १६ द्वा०।

यमयति-अच्। वाच०। दक्षिणदिक्पालनिकायाश्रिते लोकपाले, प्रश्न० १ आश्र० द्वार। भरणीनक्षत्राधिपतौ, सू० प्र० १० पाहु०। जं०। ज्यो०। स्था०। यमदग्निगुरौ तापसविशेषे, आ० म० प्र०। आ० चू०। आ० क०।

" यमाश्रयस्तापसस्तत्र, स तत्पार्श्वेऽग्निकोऽगमत्।
प्रपन्नस्तस्य शिष्यत्वं, स घोरं तप्यते तपः॥
यमशिष्योऽग्निक इति, यमदग्निरिति श्रुतः।" आ० क०।

"जमो नाम से तावसो" आ०म०द्वि०। आ०चू०। संयमने, आ०

म० प्र०। मृत्यौ, मृत्युहेतुत्वात्। आव० ४ अ०। एकगर्भजाते यमजे, त्रि०। वाच०। द्वित्वसंख्यायां च। वाच०।

जमईय-यमतीत-न०। यमतीतेत्याद्यक्षरे, आदाननाम्नि सूत्रकृताङ्गस्य पञ्चमदशेऽध्ययने, सूत्र० १ श्रु० १५ अ०। स०। प्रश्न०। आव०।

जमकाइय-यमकायिक-पुं०। दक्षिणदिक्पालदेवनिकायाश्रितेष्वम्बाद्यसुरविशेषेषु, प्रज्ञा० १ आभ० द्वार।

जमग-यमक-पुं०। शकुनिविशेषे, स्त्री० ३ प्रति०। स्वनामख्याते पर्वतविशेषे, (जी०)

संप्रति उत्तरकुरुभाविचमकपर्वतवक्तव्यतामाह-

कहि णं भंते! उत्तरकुराए कुराए जमगा नामं दुवे पव्वता पण्णत्ता?। गोयमा! नीलवंतस्स वासहरपव्वयस्स दाहिणेणं अट्ठ चोत्तीसं जोयणसते चत्तारि य सत्तभागे जोयणसहस्सं आबाधाए सीताए महाणईए उत्तरओ कूले, एत्थ णं उत्तरकुराए कुराए जमगा णाम दुवे पव्वता पण्णत्ता। एगमेगेणं जोयणसहस्सं उद्धं उच्चत्तेणं अट्ठाइज्जाइं जोयणसयाइं उव्वेहेणं मूले एकमेकं जोयणसहस्सं आयामविक्खंभेणं मज्झे अच्छुग्गाइं जोयणसताइं आयामविक्खंभेणं उवरिं पंचजोयणसयाइं आयामविक्खंभेणं मूले तिण्णि जोयणसहस्साइं एकं च बावट्ठं जोयणसयं किंचिविसेसाहियं परिक्खेवेणं दो जोयणसहस्साइं तिण्णि य बावत्तरे जोयणसते किंचिविसेसूणपरिक्खेवेणं उवरिं पण्णरस एक्कासीते जोयणसते किंचिविसेसाहिया परिक्खेवेणं पण्णत्ता, मूल विच्छिण्णा मज्झे संखित्ता उप्पिं तणुया गोपुच्छसंठाणसंठिया सव्वकणगामया अच्छा सण्हा० जाव पडिरूवा पत्तेयं पत्तेयं पउमवरवेतिया परिक्खित्ता, पत्तेयं पत्तेयं वणसंडपरिक्खित्ता, वण्णओ, दोण्ण वि तेसि णं जमगपव्वयाणं उप्पिं बहुसमरमणिज्जभूमिभागे पण्णत्ते, वण्णओ० जाव आसयंति। तेसि णं बहुसमरमणिज्जाणं भूमिभागाणं बहुमज्झदेसभाए पत्तेयं पत्तेयं पासायवडेंसका पण्णत्ता। ते णं पासायवडेंसका बावट्ठिं जोयणाइं अद्धजोयणं च उद्धं उच्चत्तेणं एकतीसं जोयणाइं कोसं च विक्खंभेणं अब्भुग्गतमूसितपहसिता इव भूमिभागओ उल्लोता, दो जोयणाइं मणिपेढियाओ उवरि सीहासणा सपरिवारा० जाव जमगा चिट्ठंति। से केणट्ठेणं भंते! एवं वुच्चंति-जमगा पव्वया, जमगा पव्वया?। गोयमा! जमगेसु णं पव्वतेसु तत्थ तत्थ देसे देसे तहिं तहिं बहूओ खुड्डियाओ वावीओ० जाव बिलपंतियाओ तासु णं खुड्डा खुड्डियाओ० जाव बिलपंतियासु बहूइं उप्पलाइं० जाव सतसहस्सपत्ताइं जमगप्पभाइं जमगवण्णाइं जमगा, एत्थ णं दो देवा महिड्ढिया० जाव पलिओवमट्ठितीया परिवसंति। ते णं तत्थ पत्तेयं पत्तेयं चउण्हं सामाणियसाहस्सीणं० जाव जमगाणं पव्वयाणं जमिगाण य रायहाणीणं अण्णेसिं च बहूणं वाणमंतराणं देवाण य देवीण य आहेवच्चं० जाव पालेमाणा विहरंति। से तेणट्ठेणं गोयमा! एवं वुच्चइ-जमगपव्वया जमगपव्वया, अदुत्तरं च णं गोयमा!० जाव णिच्चा। कहि णं भंते! जमगाणं देवाणं जमगाओ णाम रायहाणीओ पण्णत्ताओ?। गोयमा! जमगाणं पव्वयाणं उत्तराणं ति तिरियमसंखेज्जदीवसमुद्दे वीतीवतित्ता अण्णम्मि जंबुद्दीवे दीवे बारस जोयणसयसहस्साइं ओगाहित्ता, एत्थ णं जमगाणं देवाणं जमिगाओ णाम रायहाणीओ पण्णत्ताओ बारसजोयणसहस्साइं जहा विजयस्स० जाव महिड्ढिया जमगा देवा॥

"कहि णं भंते!" इत्यादि। क्व भदन्त! उत्तरकुरुषु कुरुषु यमको नाम द्वौ पर्वतौ प्रज्ञप्तौ?। भगवानाह-गौतम! नीलवतो वर्षधरपर्वतस्य दक्षिणान्त्याच्चरमान्तात् चरमकूपात् पर्यन्तादष्टौ योजनशतानि चतुस्त्रिंशानि चतुस्त्रिंशदधिकानि चतुरश्च योजनस्य सप्त भागान् अबाधया कृत्वा अपान्तराले मुक्त्वेति भावः। अत्रान्तरे शीतायां महानद्याः पूर्वपश्चिमयोर्दिशोरुत्तरयोः कूलयोः, अत्र एतस्मिन् प्रदेशे यमको नाम द्वौ पर्वतौ प्रज्ञप्तौ। तद्यथा-एकः पूर्वकूले, एकः पश्चिमकूले, प्रत्येकं योजनसहस्रमुच्चैस्त्वेन, अर्द्धतृतीयानि योजनशतानि उद्वेधेन, अवगाहेन मेरुव्यतिरेकेण शेषशाश्वतपर्वतानां सर्वेषामपि विशेषेणोच्चैस्त्वापेक्षया चतुर्भागस्यावगाहभावात्, मूले एकं योजनसहस्रं विष्कम्भः १०००, मध्ये अर्द्धाष्टमानि योजनशतानि ७५०, उपरि पञ्चयोजनशतानि ५००, मूले त्रीणि योजनशतानि एकं च द्वाषष्टं द्वात्रिंशदधिकं योजनशतं किञ्चिद् विशेषाधिकं परिक्षेपेण प्रज्ञप्तौ ३१६२, मध्ये द्वे योजनसहस्रे त्रीणि योजनशतानि द्वासप्ततानि द्वासप्तत्यधिकानि २३७२, किञ्चिद्विशेषाधिकानि परिक्षेपेण प्रज्ञप्तौ, उपरि एकं योजनसहस्रं पञ्च शतानि एकाशीतानि एकाशीत्यधिकानि योजनशतानि किञ्चिद्विशेषाधिकानि १५८१ परिक्षेपेण, एवं च तौ मूले विस्तीर्णौ मध्ये संक्षिप्तौ उपरि तनुकावत एव गोपुच्छसंस्थानसंस्थितौ (सव्वकणगामया इति) सर्वात्मना कनकमयौ "अच्छा० जाव पडिरूवा" इति प्राग्वत्। तौ च प्रत्येकं प्रत्येकं पद्मवरवेदिकया परिक्षिप्तौ, प्रत्येकं प्रत्येकं वनखण्डपरिक्षिप्तौ, पद्मवरवेदिकावर्णको, वनखण्डवर्णकश्च जगत्युपरि पद्मवरवेदिकावनखण्डवर्णकवत् वक्तव्यः। "जमगपव्वयाणं" इत्यादि। यमकपर्वतयोरुपरि प्रत्येकं बहुसमरमणीयो भूमिभागः प्रज्ञप्तः। भूमिभागवर्णनं च-"से जहानामए आलिंगपुक्खरेइ वा" इत्यादि प्राग्वत् तावद्वक्तव्यं यावत् "वाणमंतरा देवा देवीओ य आसयंति सयंति० जाव पभुणभवमाणा विहरंति।" "तेसि णं" इत्यादि। तयोर्बहुसमरमणीययोर्भूमिभागयोर्बहुमध्यदेशभागे प्रत्येकं २ प्रासादावतंसकौ प्रज्ञप्तौ। तौ च प्रासादावतंसकौ द्वाषष्टियोजनानि अर्द्धयोजनं चोर्ध्वमुच्चैस्त्वेन, एकत्रिंशद्योजनानि क्रोशं चैकं विष्कम्भेन, "अब्भुग्गयमूसियपहसिया इव" इत्यादि यावत् "पडिरूवा" इति प्रासादावतंसकवर्णनम्, उल्लोचवर्णनम्, भूमिभागवर्णनम्, मणिपीठिकावर्णनम्, सिंहासनवर्ण-

मम्, विजयदूष्यवर्णनम्, अङ्कुशवर्णनम्, दामवर्णनं च निरवशेषं प्राग्वद्वक्तव्यम्। नवरमत्र मणिपीठिकायाः प्रमाणमायामविष्कम्भाभ्यां द्वे योजने, बाहल्येन एकं योजनम्, शेषं तथैव। "तेसि णं सीहासणाणं" इत्यादि। तयोः सिंहासनयोः प्रत्येकम् "अवरुत्तरेणं" अपरोत्तरस्यां, वायव्यामित्यर्थः। उत्तरपूर्वस्यां च दिशि, अत्र एतासु तिसृषु दिक्षु यमकयोर्यमकनाम्नोर्यमकपर्वतस्वामिनोर्देवयोः प्रत्येकं प्रत्येकं चतुर्णां सामानिकसहस्राणां योग्यानि चत्वारि भद्रासनसहस्राणि प्रज्ञप्तानि। एवमेतेन क्रमेण सिंहासनपरिवारो वक्तव्यः, यथा प्राग् विजयदेवस्य। "तेसि णं" इत्यादि। तयोः प्रासादावतंसकयोः प्रत्येकमुपरि अष्टावष्टौ मङ्गलकानि प्रज्ञप्तानि, इत्यादापि प्राग्वत् तावद्वक्तव्यं यावत् "सयसहस्सपत्तगा" इति पदम्। संप्रति नामनिबन्धनं पिपृच्छिषुरिदमाह-"से केणट्ठेणं" इत्यादि। अथ केनार्थेन केन कारणेन एवमुच्यते-यमकपर्वतौ, यमकपर्वताविति?। भगवानाह-गौतम! यमकपर्वतयोः, यमिति वाक्यालङ्कारे, क्षुल्लिकासु वापीषु पुष्करिणीषु यावद्बिलपङ्क्तिषु, बहूनि उत्पलानि यावत्सहस्रपत्राणि यमकप्रमाणि, यमका नाम शकुनिविशेषाः, तत्प्रज्ञानि तदाकाराणि। एतदेव व्याचष्टे-यमकवर्णाभानि, यमकसदृशवर्णानीत्यर्थः। यमकौ च यमकनामानौ च, तत्र तयोर्यमकपर्वतयोः स्वामित्वेन द्वौ देवौ महर्द्धिकौ यावद् महाभागौ पल्योपमस्थितिकौ परिवसतः। तौ च तत्र प्रत्येकं प्रत्येकं चतुर्णां सामानिकसहस्राणां चतसृणामग्रमहिषीणां सपरिवाराणां तिसृणामभ्यन्तरमध्यबाह्यकपर्षदां यथासंख्यमष्टाद्वादशदेवसहस्रसंख्याकानां सप्तानामनीकाधिपतीनां षोडशानामात्मरक्षकदेवसहस्राणाम् "जमगाणं पव्वयाणं जमिगाण य रायहाणीणं" इति। स्वस्य स्वस्य यमकपर्वतस्य स्वस्याः यमिकाऽभिधायाः राजधान्याः, अन्येषां च बहूनां षाणमन्तराणां देवानां देवीनां च स्वस्वपर्यायकाऽभिधराजधानीवास्तव्यानामाधिपत्यं यावद्विहरतः। यावत्करणात्-"पारेक्खच्च सामित्तं भट्टित्तं" इत्यादिपरिग्रहः। ततो यमकाकारयमकवर्णोत्पलादियोगात् यमकाभिधदेवस्वामिकत्वाच्च तौ यमकपर्वताविति युज्येते। यथा चाह-"से तेणट्ठेणं" इत्यादि। संप्रति यमिकाभिधराजधानीस्थानम्-"कहि णं भंते!" इत्यादि। क्व भदन्त! यमकयोर्देवयोः संबन्धिन्यौ यमिके नाम राजधान्यौ प्रज्ञप्ते?। भगवानाह-गौतम! यमकपर्वतयोरुत्तरतोऽन्यस्मिन् असंख्येयतमे जम्बूद्वीपे द्वीपे द्वादशयोजनसहस्राण्यवगाह्य, अत्रान्तरे यमकदेवयोः संबन्धिन्यौ यमिकराजधान्यौ प्रज्ञप्ते, ते चाविशेषेण विजयराजधानीसदृश्यौ वक्तव्ये। जी० ३ प्रति०। शब्दालङ्कारभेदे, वाच०।

पुनर्यमकपर्वतप्ररूपणा—

कहि णं भंते! उत्तरकुराए जमगा णामं दुवे पव्वया पण्णत्ता?। गोयमा! णीलवंतस्स वासहरपव्वयस्स दक्खिणिल्लाओ चरिमंताओ अट्ठ चउत्तीसे जोअणसए चत्तारि अ सत्तभाए जोअणस्स अबाहाए सीआए महाणईए लभओ कूले, एत्थ णं जमगा णामं दुवे पव्वया पण्णत्ता, जोअणसहस्सं उद्धं उच्चत्तेणं अहाइज्जाइं जोअणसयाइं लव्वेहेणं मूले एगं जोअणसहस्सं आयामविक्खंभेणं मज्झे अद्धट्ठमाणि जोअणसयाइं आयामविक्खंभेणं उवरिं पंच जोअणसयाइं आयामविक्खंभेणं मूले तिण्णि जोअणसहस्साइं एगं च बावट्ठं जोअणसयं किंचि विसेसाहिअं परिक्खेवेणं मज्झे दो जोअणसहस्साइं तिण्णि य बावत्तरे जोअणसए किंचि विसेसाहिअं परिक्खेवेणं उवरि एगं जोअणसहस्सं पंच य एकासीए जोअणसए किंचि विसेसाहिए परिक्खेवेणं मूले वित्थिण्णा मज्झे संखित्ता उप्पिं तणुआए जमगसंठाणसंठिआ सव्वकणगामया अच्छा सण्हा पत्तेअं पत्तेअं पउमवरवेइआ परिक्खित्ता पत्तेअं पत्तेअं वणसंडा परिक्खित्ता, ताओ णं पउमवरवेइआओ दो गाउआइं उद्धं उच्चत्तेणं पंच धणुसयाइं विक्खंभेणं वेइआवणसंडवण्णओ जाणिअव्वो। तेसि णं जमगपव्वयाणं उप्पिं बहुसमरमणिज्जे भूमिभागे पण्णत्ते० जाव तेसि णं बहुसमरमणिज्जस्स भूमिभागस्स बहुमज्झदेसभाए, एत्थ णं दुवे पासायवडेंसगा पण्णत्ता। ते णं पासायवडेंसगा बावट्ठिं जोअणाइं अद्धजोअणं च उद्धं उच्चत्तेणं एकतीसं जोअणाइं कोसं च आयामविक्खंभेणं पासायवण्णओ जाणिअव्वो, सीहासणा सपरिवारा० जाव एत्थ णं जमगाणं देवाणं सोलसण्हमायरक्खदेवसाहस्सीणं सोलस जहासणसाहस्सीओ पण्णत्ताओ। से केणट्ठेणं भंते! एवं वुच्चइ-जमगा य पव्वया, जमगा य पव्वया?। गोअमा! जमगपव्वएसु णं तत्थ तत्थ देसे तहिं तहिं बहवे खुड्डा खुड्डियासु वावीसु० जाव बिलपंतियासु बहवे उप्पलाइं० जाव जमगप्पभाइं जमगवण्णाभाइं जमगा य, एत्थ दुवे देवा महिड्ढिया, तेणं तत्थ चउण्हं सामाणिअसाहस्सीणं० जाव भुंजमाणा विहरंति। से तेणट्ठेणं गोयमा! एवं वुच्चइ-जमगपव्वया जमगपव्वया, अदुत्तरं च णं सासए णामधिज्जे० जाव जमगपव्वया जमगपव्वया। कहि णं भंते! जमगाणं देवाणं जमगाओ रायहाणीओ पण्णत्ताओ?। गोयमा! जंबुद्दीवे दीवे मंदरस्स पव्वयस्स उत्तरेणं अण्णम्मि जंबुद्दीवे दीवे बारस जोअणसहस्साइं ओगाहित्ता, एत्थ णं जमगाणं देवाणं जमिगाओ रायहाणीओ पण्णत्ताओ, बारस जोअणसहस्साइं आयामविक्खंभेणं सत्ततीसं जोअणसहस्साइं णव य अभयाले जोअणसए किंचि विसेसाहिए परिक्खेवेणं पत्तेअं पत्तेअं पायारपरिक्खित्ता, ते णं पागारा सत्त तीसं जोअणाइं अद्धजोअणं च उद्धं उच्चत्तेणं मूले अट्ठतेरसजोअणाइं विक्खंभेणं मज्झे छस्सक्कोसाइं जोअणाइं विक्खंभेणं उवरिं तिण्णि सअट्ठकोसाइं जोअणाइं विक्खंभेणं मूले वित्थिण्णा मज्झे संखित्ता उप्पिं तणुआ बाहिं वट्टा अंते चउरंसा सव्वरयणामया अच्छा, ते णं पागारा

णाणामणिपंचवण्णेहिं कविसीसएहिं उवसोहिआ। तं जहा-किएहेहिं० जाव सुक्किल्लेहिं, ते णं कविसीसगा अद्धकोसं आयामेणं देसूणं अद्धकोसं उद्धं उच्चत्तेणं पंच धणुसयाइं बाहल्लेणं सव्वमणिमया अच्छा, जमिगाणं रायहाणीणं एगमेगाए बाहाए पणवीसं पणवीसं दारसए पण्णत्ते । ते णं दारा बावट्ठिं जोअणाइं अद्धजोअणं च उद्धं उच्चत्तेणं एक-तीसं जोअणाइं कोसं च विक्खंभेणं तावइअं चेव पवेसेणं सेआ वरकणगथूभिए, एवं रायप्पसेणइज्जविमाणवत्तव्व-याए दारवण्णओ० जाव अट्ठट्ठमंगलगाइं ति, जमियाणं रायहाणीणं चउद्दिसिं पंच पंच जोअणसए आबाहाए चत्तारि वणसंडा पण्णत्ता । तं जहा-असोगवणे, सत्ति-वण्णवणे, चंपगवणे, चूअवणे । ते णं वणसंडा साइरे-गाइं बारस जोअणसहस्साइं आयामेणं पंच जोअणस-या विक्खंभेणं पत्तेअं २ पागारपरिक्खित्ता किएहा वण-संडवण्णओ भूमिओ पासायवडेंसगा य भाणिअव्वा, ज-मिगाणं रायहाणी अंतो बहुसमरमणिज्जे भूमिभागे पण्-त्ते, वण्णओ त्ति । तेसि णं बहुसमरमणिज्जाणं भूमिभागाणं बहुमज्झदेसभाए एत्थ णं दुवे जवयारिया भेणा पण्णत्ता। बारस जोअणसयाइं आयामविक्खंभेणं तिण्णि जोअण-सहस्साइं सत्त य पंचाणउए जोअणसए परिक्खेवेणं अ-द्धकोसं च बाहल्लेणं सव्वजंबूणयामया अच्छा पत्तेअं प-त्तेअं पउमवरवेइआ परिक्खित्ता, पत्तेअं २ वणसंडवण्णओ भाणिअव्वो, तिसोवाणपडिरूवगा तोरणा चउद्दिसिं भू-मिभागो अ भाणिअव्वो। तस्स णं बहुमज्झदेसभाए एत्थ णं एगे पासायवडेंसए पण्णत्ते, बावट्ठिं जोअणाइं अद्ध-जोअणं च उद्धं उच्चत्तेणं इक्कतीसं जोअणाइं कोसं च आयामविक्खंभेणं वण्णओ, लट्ठोआ भूमिभागा सीहास-णा सपरिवारा, एवं पासायपंतीओ वि । तत्थ पढमा पंती-ते णं पासायवडेंसगा एकतीसं जोअणाइं कोसं च उद्धं उ-च्चत्तेणं साइरेगाइं अद्धसोलस जोअणाइं आयामविक्खंभेणं। बिइअपासायपंती-ते णं पासायवडेंसया साइरेगाइं अद्ध-सोलसजोअणाइं उद्धं उच्चत्तेणं साइरेगाइं अट्ठभाइं जो-अणाइं आयामविक्खंभेणं। तइअपासायपंती-ते णं पासाय-वडेंसया साइरेगाइं अट्ठभाइं जोअणाइं उद्धं उच्चत्तेणं, साइरेगाइं अट्ठजोअणाइं आयामविक्खंभेणं, वण्णओ-सीहासणा सपरिवारा । तेसि णं मूलपासायवडेंसयाणं उ-त्तरपुरच्छिमे दिसीभाए, एत्थ णं जमगाणं देवाणं सभा-ओ सुहम्माओ पण्णत्ताओ, अद्धतेरस जोअणाइं आयामे-णं छस्सकोसाइं जोअणाइं विक्खंभेणं एव जोअणाइं उद्धं उच्चत्तेणं अणेगखंभसयसण्णिविट्ठा सभावण्णओ। ता-सि णं सभाणं सुहम्माणं तिदिसिं तओ दारा पण्णत्ता । ते णं दारा दो जोअणाइं उद्धं उच्चत्तेणं जोअणं विक्खंभेणं तावइअं चेव पवेसेणं सेआ वण्णओ० जाव वणमाला। तेसि णं दाराणं पुरओ पत्तेअं पत्तेअं तओ मुहमंडवा पण्णत्ता, ते णं मुहमंडवा अद्धतेरस जोअणाइं आयामेणं छस्सकोसाइं जोअणाइं विक्खंभेणं साइरेगाइं दो जोअ-णाइं उद्धं उच्चत्तेणं० जाव दारा भूमिभागा य, पेच्छा-घरमंडवाणं तं चेव पमाणं भूमिभागो मणिपेढिआओ, ताओ णं मणिपेढियाओ जोअणं आयामविक्खंभेणं अद्धजोअणं बाहल्लेणं सव्वमणिमईओ सीहासणा णाणिअव्वा । तेसि णं पेच्छाघरमंडवाणं पुरओ मणिपेढिआओ पण्णत्ता। ताओ णं मणिपेढिआओ दो जोअणाइं आयामविक्खंभेणं जोअणं बाहल्लेणं सव्वमणि-मईओ। तासि णं उप्पिं पत्तेअं पत्तेअं तओ थूभा, ते णं थूभा दो जोअणाइं उद्धं उच्चत्तेणं दो जोअणाइं आयामवि-क्खंभेणं सेआ य संखदल० जाव अट्ठट्ठमंगलया । तेसि णं थूभाणं चउद्दिसिं चत्तारि मणिपेढियाओ पण्णत्ताओ। ताओ णं मणिपेढिआओ जोअणं आयामविक्खंभेणं अद्धजोअणं बाहल्लेणं जिणपडिमाओ वत्तव्वाओ । चेइअरुक्खाणं मणिपेढिआओ दो जोअणाइं आयामविक्खंभेणं जोअणं बाहल्लेणं चेइअरुक्खवण्णओ, तेसि णं चेइअरुक्खाणं पुरओ तओ मणिपेढिआओ पण्णत्ताओ। ताओ णं मणिपेढि-आओ जोअणं आयामविक्खंभेणं अद्धजोअणं बाहल्लेणं, तासि णं उप्पिं पत्तेअं पत्तेअं महिंदज्झया पण्णत्ता, ते णं अट्ठ महिंदज्झया अद्धट्ठमाइं जोअणाइं उद्धं उच्चत्तेणं अ-द्धकोसं उव्वेहेणं अद्धकोसं बाहल्लेणं वइरामयवट्टवण्णओ, चेइआ वणसंडा तिसोवाणतोरणा य भाणिअव्वा, तासि णं सभाणं सुहम्माणं उभओ मणोगुलिआसाहस्सीओ पण्णत्ता-ओ। तं जहा-पुरच्छिमेणं दो साहस्सीओ पण्णत्ताओ, पच्चच्छिमेणं दो साहस्सीओ, दक्खिणेणं एगा साहस्सी, उत्तरेणं एगा० जाव दामा चिट्ठंति । एवं गोवाणसिआओ णवरं, धूवघडिआओ, तासि णं सुहम्माणं सभाणं अंते बहुसमरमणिज्जे भूमिभागे पण्णत्ते। मणिपेढिआ दो जो-अणाइं आयामविक्खंभेणं, जोअणं बाहल्लेणं, तासि णं मणिपेढिआणं उप्पिं माणवए चेइअखंभे महिंदज्झयप्प-माणे उवरिं छक्कोसे उग्गाहित्ता हिट्ठा छक्कोसे वज्जित्ता जिण-सकहाओ पण्णत्ताओ । माणवगस्स पुव्वेणं सीहासणा सपरिवारा, पच्चच्छिमेणं सयणिज्जावण्णओ, सयणिज्जा णं उत्तरपुरच्छिमे दिसीभाए खुड्डगमहिंदज्झया मणिपे-ढिआविहूणा महिंदज्झयप्पमाणा, तेसिं अवरेणं चोप्फाला

पहरणकोसा, तत्थ णं बहवे फलिहरयणपामुक्खा० जाव चिट्ठंति । सुहम्माणं णं पि अट्ठजोअणगइगा,तासि णं उत्तरपुरच्छिमेणं, णवरं इमं णाणत्तं,एतेसि णं बहुमज्झदेसभाए पत्तेअं पत्तेअं मणिपेढिआओ दो जोअणाइं आयामविक्खंभेणं जोअणं बाहल्लेणं,तासिं णं पि पत्तेअं पत्तेअं देवच्छंदया पण्णत्ता । दो जोअणाइं आयामविक्खंभेणं साइरेगाइं दो जोअणाइं उड्ढं उच्चत्तेणं सव्वरयणामया जिणपडिमावण्णओ० जाव धूवकडुच्छुगा, एवं अवसेसाण वि सज्जाणं० जाव उववायसभाए सयणिज्जं दहओ अ अभिसेअसभाए बहुआभिसिक्के भंमे अलंकारिअसभाएसु बहुअलंकारिअभंडे चिट्ठइ ववसायसभासु पुत्थयरयणा णंदापुक्खरिणीओ बलिपेढा दो जोअणाइं आयामविक्खंभेणं जोअणं बाहल्लेणं० जाव चि ।

"उववाओ संकप्पो, अभिसेअं विहूसणा य ववसाओ ।
अच्चणिअ सुधम्मगमो, जहा य परिचारणा इहीं ॥ १ ॥
जावइयम्मि पमाणे, वि हुंति जमगाओ णीलवंताओ ।
तावइअमंतरं खलु, जमगदहाणं दहाणं च ॥ २ ॥ "

"कहि णं" इत्यादि । क्व भदन्त ! उत्तरकुरुषु यमको नाम द्वौ पर्वतौ प्रज्ञप्तौ ? । गौतम ! नीलवतो वर्षधरपर्वतस्य दाक्षिणात्याच्चरमान्तात्, इत्यत्र दाक्षिणात्यं चरमान्तम् आरभ्येति शेषं, दृश्यलोपे पञ्चमी । दाक्षिणात्याच्चरमान्तादारभ्यार्वाक्, दक्षिणाभिमुखमित्यर्थः । अष्टौ योजनशतानि तु त्रिंशदधिकानि चतुरश्च सप्तभागान् योजनस्यावाधया, अपान्तराले कृत्वेति शेषः । शीताया महानद्या उत्तरयोः कूलयोः, एकः पूर्वकूले, एकः पश्चिमकूले इत्यर्थः । अत्रान्तरे यमको नाम द्वौ पर्वतौ प्रज्ञप्तौ, एकं योजनसहस्रमूर्ध्वमुच्चत्वेन, अर्कतृतीयानि योजनशतान्युद्वेधेन, उच्छ्रयचतुर्थांशस्य भूम्यवगाहात्, मूले योजनसहस्रमायामविष्कम्भाभ्यां वृत्ताकारत्वात्,मध्ये भूतलतः पञ्चयोजनशतातिक्रमेऽर्कोष्टमानि योजनशतानि आयामविष्कम्भाभ्याम्, उपरि सहस्रयोजनातिक्रमे पञ्चयोजनशतान्यायामविष्कम्भाभ्यां, मूले त्रीणि योजनसहस्राणि, एकं च योजनशतं द्वापञ्चाधिकं किञ्चिद्विशेषाधिकं, किं कियत्कलामित्यर्थः । परिक्षेपेण, एवं मध्यपरिधिरुपरितनपरिधिश्च स्वयमभ्यूह्यो, मूले विस्तीर्णो मध्ये संक्षिप्तावुपरितनौ यमकौ यमलजातौ भ्रातरौ तयोर्यत् संस्थानं तेन संस्थितौ, परस्परं सदृशसंस्थानावित्यर्थः । अथवा-यमकाद् नाम शकुनिविशेषात् संस्थानसंस्थितौ संस्थानं चानयोर्मूलतः प्रारभ्य संक्षिप्तसंक्षिप्तप्रमाणत्वेन गोपुच्छस्येव बोध्यं,सर्वात्मना कनकमयौ,शेषं तथैव,अष्टादशशताधिकोत्पत्तिरेषम-नीलवद्वर्षधरस्य यमकयोश्चान्तरमेकं यमकं, तयोः प्रथमह्रदस्य च द्वितीयं, प्रथमह्रदस्य द्वितीयह्रदस्य च तृतीयं, द्वितीयह्रदस्य तृतीयह्रदस्य चतुर्थं, तृतीयह्रदस्य चतुर्थह्रदस्य पञ्चमं, चतुर्थह्रदस्य पञ्चमह्रदस्य च षष्ठं, पञ्चमह्रदस्य च वप्रकारगिरिपर्यन्तस्य च सप्तमम् । एतानि च सप्तापि अन्तराणि समप्रमाणानि, ततश्च कुरुविष्कम्भात् योजन ११८४२ कला २, इत्येवरूपात् योजनसहस्रायामयोर्यमकयोः योजनसहस्रायामकं तावत्प्रमाणायामानां पञ्चानां ह्रदानां च योजनसहस्रमेकम्, उभयोर्मीलने योजनसहस्रषट्कं, शोध्यते च जातं योजन५८४२कला२,ततः सप्तभिर्भागे हृते८३४। ४, यच्चावशिष्टं कुरुसत्कं कलाद्वयं तदल्पत्वान्न विवक्षितमिति । अथैवानन्तरोक्तवेदिकावनखण्डप्रमाणाद्याह-"ताओ णं" इत्यादि व्यक्तम् । संप्रत्येतयोर्यदस्ति तदाह-"तेसि णं" इत्यादि । तयोर्यमकपर्वततयोरुपरि बहुसमरमणीयो भूमिभागः प्रज्ञप्तः । अत्र पूर्वोक्तः सर्वो भूभागवर्णक उक्तेतव्यः । कियत्पर्यन्तमित्याह-यावत्तयोर्बहुसमरमणीयस्य भूमिभागस्य बहुमध्यदेशभागे द्वौ प्रासादावतंसकौ प्रज्ञप्तौ । अथ तयोरुच्चत्वाद्याह-"ते णं" इत्यादि निरवशेषं विजयदेवप्रासादसिंहासनादिभवदिस्थितिसूत्रवक्तव्यं, नवरं यमकदेवाभिलापेनेति । अथानयोर्नामार्थं प्रश्नयन्नाह-"से केणं" इत्यादि प्रश्नसूत्रं व्यक्तम् । उत्तरसूत्रे यमकपर्वतयोस्तत्र देशे तत्र प्रदेशे क्षुल्लकक्षिकासु यावद्विलपङ्क्तिषु बहून्युत्पलानि । अत्र यावत्पदात् कुमुदादीनि वाच्यानि, तथा यमकप्रभाणीति दृश्यम्,तत्र यमको यमकपर्वतस्तत्प्रभाणि, तदाकाराणीत्यर्थः । यमकवर्णाभानि, यमकवर्णसदृशवर्णानीत्यर्थः । यदि वा यमकाभिधानौ द्वौ देवौ महर्द्धिकौ, अत्र परिवसतः, तेन यमकाविति, शेषं प्राग्वत् । अथानयो राजधानीप्रश्नावसरः-"कहि णं" इत्यादि । क्व भदन्त ! यमकयोर्देवयोर्यमिकानामराजधान्यो प्रज्ञप्ते ? । गौतम ! जम्बूद्वीपे द्वीपे मन्दरस्य पर्वतस्योत्तरेणाऽन्यस्मिन् जम्बूद्वीपे द्वीपे द्वादशयोजनसहस्राण्यवगाह्यात्रान्तरे यमकयोर्देवयोर्यमिके नाम राजधान्यौ प्रज्ञप्ते, द्वादशयोजनसहस्रायतायामविष्कम्भाभ्यां सप्तत्रिंशद्योजनसहस्राणि नव च योजनशतानि अष्टचत्वारिंशदधिकानि किञ्चिद्विशेषाधिकानि परिक्षेपेण प्रत्येकं प्रत्येकं द्वे अपि प्राकारपरिक्षिप्ते । कीदृशौ तौ प्राकाराविति ?, तत्स्वरूपमाह-"ते णं पागारा" इत्यादि । तौ प्राकारौ सप्तत्रिंशद्योजनानि योजनार्द्धसहितानि क्रोशोच्चत्वेन मूले अर्द्धे त्रयोदश योजनं येषु तान्यर्द्धत्रयोदशानि योजनानि विष्कम्भेन मध्ये षट् सक्रोशानि योजनानि विष्कम्भेन च मूलविष्कम्भतोऽर्द्धमानत्वात् , उपरि त्रीणि सार्द्धानि क्रोशानि योजनानि विष्कम्भेन, अस्याऽपि मध्यविष्कम्भतोऽर्द्धमानत्वात् । अत एव मूले विस्तीर्णावित्यादिपदत्रयं विवृतप्रायम्, बहिर्वृत्तौ कोणावनुपलक्ष्यमाणत्वात्, अन्तश्चतुरस्रौ, उपलक्ष्यमाणकोणत्वात् । अथानयोः कपिशीर्षकवर्णकमाह-"ते णं पागारा णाणामणि" इत्यादि । तौ प्राकारौ नानामणीनां पद्मरागस्फटिकमरकताञ्जनादीनां पञ्च प्रकारा वर्णा येषु तानि यैः तथा तैः कपिशीर्षकैः प्राकाराग्रैरुपशोभितौ । एतदेव विवृणोति-तद्यथा-कृष्णैर्यावच्छुक्लैरिति । अथैतेषां कपिशीर्षकाणामुच्चत्वादिमानमाह—" ते णं " इत्यादि निगदसिद्धम् । अथानयोः कियन्ति द्वाराणीत्याह-" जमिगाणं " इत्यादि । यमिकयोः राजधान्योरेकैकस्यां बाह्यायां पार्श्वे पञ्चविंशत्यधिकं २ द्वारशतं प्रज्ञप्तम् । तानि द्वाराणि द्वाषष्टियोजनानि अर्द्धयोजनं चोर्द्धोच्चत्वेन एकत्रिंशद्योजनानि क्रोशं च विष्कम्भेन तावदेव प्रवेशेन श्वेतानि वरकनकस्तूपिकानि; लाघवार्थमतिदेशमाह--एवं राजप्रश्नीये यद्विमानं सूर्याभनामकं, तस्य वक्तव्यतायां यो द्वारवर्णकः, स इहापि प्राह्यः । कियत्पर्यन्तमित्याह-यावदष्टमङ्गलकानि, अत्रातिदिष्टमपि सूत्रेन लिखितं, विजयद्वारप्रकरणे सूत्रतोऽर्थतश्च लिखितत्वात्, अतिदिष्टस्यैवोपयोगात्रापि साम्प्रतमिति । अथानयोर्बहिर्भागे वनखण्डवक्तव्यमाह—" जमियाणं " इत्यादि । यमिकयो राजधा-

न्योश्चतुर्दिशि, चतसृणां दिशां समाहारश्चतुर्दिक्, तस्मिंस्तथा, पूर्वादिदिक्ष्वित्यर्थः। पञ्च पञ्च योजनशतान्यबाधयाऽपान्तराले कृत्वेति गम्यते। चत्वारि वनखण्डानि प्रज्ञप्तानि। तथथा-अशोकवनं, सप्तपर्णवनं, चम्पकवनम्, आम्रवनमिति। अथैतेषामायामाद्याह-"ते णं वणसंडा" इत्यादि। ते च वनखण्डाः सातिरेकाणि द्वादश योजनसहस्राणि आयामेन पञ्चयोजनशतानि विष्कम्भेण प्रत्येकं प्रत्येकं प्राकारैः परिक्षिप्ताः, कृष्णा इति उपलक्षितो जम्बूद्वीपपद्मवरवेदिकाप्रकरणलिखितः. पूर्णो वनखण्डवर्णको, भूमयः, प्रासादावतंसकाश्च भणितव्याः। भूमयश्चैवम्-"तेसि णं वनसंडाणं अंतो बहुसमरमणिज्जा भूमिभागा पण्णत्ता। से जहाणामए आलिंगपुक्खरेइ वा० जाव णाणाविहपंचवण्णेहिं मणीहिं अईव उवसोभिआ" इति। प्रासादसूत्रमप्येवम्-"तेसि णं वणसंडाणं बहुमज्झदेसभागे पत्तेअं पत्तेअं पासायवडेंसए पण्णत्ते। ते णं पासायवडेंसया बावट्ठिं जोअणाइं अद्धजोअणं च उड्ढं उच्चत्तेणं एक्कतीसं जोअणाइं कोसं च विक्खंभेणं अब्भुग्गयमूसिअपहसिआइव तहा बहुसमरमणिज्जे भूमिभाए वण्णओ सीहासणा सपरिवारा, तत्थ णं चत्तारि देवा महिड्ढिआ० जाव पलिओवमट्ठिईआ परिवसंति। तं जहा-असोए, सत्तिवण्णे, चंपए, चूअवणे" इति। अत्राशोकवनप्रासादेऽशोकवननामा देवः, एवं त्रिष्वपि तन्नामा देवः परिवसतीत्यर्थः। अथानयोरन्तर्नागवर्णकमाह-"जंबूणाणं" इत्यादि। यमिकयो राजधान्योरन्तर्मध्यभागे बहुसमरमणीयो भूमिभागः प्रज्ञप्तः। वर्णक इति सूत्रगतपदेन-"आलिंगपुक्खरेइ वा० जाव पंचवण्णेहिं मणीहिं उवसोभिए वण्णओ विभासिए० जाव बहवे देवा य देवीओ य आसयंति० जाव विहरंति" इत्यन्तो ग्राह्यः। अत्र च उपकारिकालयनसूत्रमादर्शेष्वदृश्यमानमपि राजप्रश्नीयसूर्याभविमानवर्णके च दृश्यमानत्वात् "तिण्णि जोअणसहस्साइं सत्तय पंचाणउए जोअणसए परिक्खेवेणं" इत्यादिसूत्रस्यान्यथानुपपत्तेश्च जीवाभिगमतो लिख्यते, आदर्शेष्वदृश्यमानत्वं च लेखकवैगुण्यादेवेति। तथथा-"तेसि णं" इत्यादि। तेषां बहुसमरमणीयानां भूमिभागानां बहुमध्यदेशभागे, अत्रान्तरे द्वे उपकारिकालयने प्रज्ञप्ते, उपकरोत्युपष्टम्नाति प्रासादावतंसकादीनित्युपकारिका राजधानी प्रभुसत्कप्रासादावतंसकादीनां पीठिका, अन्यत्र स्त्रियमुपकार्योपकारिकेति प्रसिद्धा। उक्तं च-"गृहस्थानां स्मृता राज्ञामुपकार्योपकारिका।" इति। सालपनीमिव गृहमिव ते च प्रतिराजधानीभव इति द्वे उक्ते, द्वादश योजनशतानि आयामविष्कम्भाभ्यां त्रीणि योजनसहस्राणि सप्त च योजनशतानि पञ्चनवत्यधिकानि परिक्षेपेण अर्द्धक्रोश धनुःसहस्रपरिमाणं बाहल्येन सर्वात्मना जाम्बूनदमये अच्छे प्रत्येकं २ प्रत्युपकारिकालयने पद्मवरवेदिके परिक्षिप्ते, प्रत्येकं प्रत्येकं वनखण्डवर्णको भणितव्यः। स च जगतीगतपद्मवरवेदिकास्थवनखण्डानुसारेणेति, त्रिसोपानप्रतिरूपकाणि आरोहावरोहमार्गस्थानि चतुर्दिशि पूर्वादिदिक्षु ज्ञेयानि, तोरणानि चतुर्दिशि भूमिभागश्च कारिकालयनमध्यगतो भणितव्यः। तत्सूत्राणि जीवाभिगमोपाङ्गगतानि क्रमेणैवम्-"से णं वणसंडे देसूणाइं जोअणाइं चक्कवालविक्खंभेणं उवयारिआलयणसमए परिक्खेवेणं, तेसि णं उवयारिआलयणाणं चउद्दिसिं चत्तारि तिसोवाणपडिरूवगा पण्णत्ता। वण्णओ, तेसि णं तिसोवाणपडिरूवगाणं पुरओ पत्तेअं पत्तेअं तोरणा पण्णत्ता। वण्णओ, तेसि णं उवयारियालयणाणं उप्पिं बहुसमरमणिज्जे भूमिभागे पण्णत्ते० जाव मणीहिं उवसोभिए" इति। अत्र व्याख्या सुगमा। अथ यमकदेवयोर्मूलप्रासादस्वरूपमाह-"तस्स णं" इत्यादि। तस्योपकारिकालयनस्य बहुमध्यदेशभागे, अत्रान्तरे एकः प्रासादावतंसकः प्रज्ञप्तः। द्वाषष्टियोजनान्यर्द्धयोजनं चोर्द्धोच्चत्वेन, एकत्रिंशद्योजनानि क्रोशं चायामविष्कम्भाभ्यां वर्णको विजयप्रासादस्येव वाच्यः। उल्लोचाद्युपरि भागे भूमिभागावधोज्ञागौ सिंहासने सपरिवारौ सामानिकादिपरिवारभद्रासनव्यवस्थासहिते, यद्यत्र उपकारिकालयनस्य प्रासादावतंसकस्य चैकवचनेन विवक्षा तावद् द्विवचनेन विवक्षा, तत्सूत्रकाराणां विचित्रप्रवृत्तित्वादिति। अथास्य परिवारप्रासादप्ररूपणमाह-"एवं पासायपंतीओ वि" इत्यादि। एवं मूलप्रासादावतंसकानुसारेण परिवारप्रासादपङ्क्तयो ज्ञातव्याः जीवाभिगमतः, पङ्क्तयश्चात्र मूलप्रासादतश्चतुर्दिक्षु पञ्चानामिव परिक्षेपरूपा अवगन्तव्याः, न पुनः सूचिश्रेणिरूपाः। तत्र प्रथमप्रासादपङ्क्तिपाठ एवम्-"से णं पासायवडेंसए अट्ठहिं चउहिं तदुभयप्पमाणमेत्तेहिं पासायवडेंसएहिं सव्वओ समंता संपरिक्खित्ते" स प्रासादावतंसकोऽन्यैश्चतुर्भिः प्रासादावतंसकैस्तदर्द्धोच्चत्वप्रमाणमात्रैः, अत्रोच्चत्वशब्देनोत्सेधो गृह्यते, प्रमाणशब्देन च विष्कम्भायामैः, तेन मूलप्रासादापेक्षया अर्द्धोच्चत्वविष्कम्भायामैरित्यर्थः। सर्वतः समन्तात् संपरिक्षिप्तः। एषामुच्चत्वादिकं तु साक्षात् सूत्रकृदेवाह-एकत्रिंशद्योजनानि क्रोशं चोच्चत्वेन, सार्द्धद्वाषष्टियोजनानामर्द्धे एतावत एव लाभात्। सातिरेकाण्यर्द्धक्रोशाधिकानि, अर्द्धषोडशानि सार्द्धपञ्चदशयोजनानि विष्कम्भायामाभ्यामिति। अथ द्वितीयप्रासादपङ्क्तिः। तत्पाठश्चैवम्-"ते णं पासायवडेंसया अट्ठहिं चउहिं तदुभयप्पमाणमेत्तेहिं पासायवडेंसएहिं सएहिं सव्वओ समंता संपरिक्खित्ता" इति। ते प्रथमपङ्क्तिगताश्चत्वारः प्रासादाः प्रत्येकमन्यैश्चतुर्भिस्तदर्द्धोच्चत्वविष्कम्भायामैर्मूलप्रासादापेक्षया चतुर्नागप्रमाणैः प्रासादैः परिक्षिप्ताः, अत एवैते षोडश प्रासादाः सर्वसङ्ख्यया स्युः। एषामुच्चत्वादिकं तु साक्षादेव सूत्रकृदाह-ते प्रासादाः सातिरेकाणि अर्द्धक्रोशाधिकानि सार्द्धपञ्चदशयोजनान्युच्चत्वेन सातिरेकाणि क्रोशक्रोशचतुर्थांशाधिकानि, अर्द्धाष्टमयोजनान्यायामविष्कम्भाभ्यामिति। अथ तृतीया पङ्क्तिः। तत्सूत्रमेवम्-"ते णं पासायवडेंसया अट्ठहिं चउहिं तदुभयप्पमाणमेत्तेहिं पासायवडेंसएहिं सव्वओ समंता संपरिक्खित्ता" ते द्वितीयपरिधिस्थाः षोडश प्रासादाः प्रत्येकमन्यैश्चतुर्भिस्तदर्द्धोच्चत्वविष्कम्भायामैर्मूलप्रासादापेक्षयाऽष्टांशप्रमाणोच्चत्वविष्कम्भायामैः सर्वतः समन्तात् संपरिक्षिप्ताः। अत एवैते तृतीयपङ्क्तिगताश्चतुष्षष्टिप्रासादाः। एतेषामुच्चत्वादिप्रमाणं सूत्रकृदाह-ते चतुःषष्टिरपि प्रासादाः सातिरेकाण्यर्द्धाष्टमयोजनान्युच्चत्वेन, सातिरेकत्वं च प्राग्वत्। अर्द्धाष्टानि अर्द्धतृतीयानि सातिरेकाणि सार्द्धक्रोशाष्टांशाधिकानि विष्कम्भायामाभ्याम्। एषां सर्वेषां वर्णकः-सिंहासनानि च सपरिवाराणि प्राग्वत्। अत्र च पङ्क्तिप्रासादेषु सिंहासनं प्रत्येकमेकं, मूलप्रासादे तु मूलसिंहासनपरिवारोपेतमित्यादिना क्षेत्रसमासवृत्तौ श्रीमलयगिरिपादाः। तथा प्रथमतृतीयपङ्क्त्योर्मूलप्रासादे सपरिवारे भद्रासनानि, द्वितीयपङ्क्तौ च परिवारे पद्मासनानि जीवाभिगमोपाङ्गे इत्यादि विसंवादसमाधानं बहुश्रुतगम्यम्। यद्यपि जीवाभिगमे विजयदेवप्रकरणे, तथा श्रीभगवत्यङ्गवृत्तौ चरमप्रकरणे, प्रासादपङ्क्तिचतुष्कं, तथाऽप्यत्र यमकाधिकारे

पङ्क्तित्रयं बोध्यम् । पङ्क्तित्रयप्रासादसंग्रहश्चैवम्—

४
१६
६४
मूलप्रा० १
सर्वसं०८५

मूलप्रासादेन सह सर्वसंख्यया पञ्चाशीतिः प्रासादाः ८५। अथात्र सभापञ्चकं प्रपञ्चयितुकामः सुधर्मसभास्वरूपं निरूपयति-"तेसि णं" इत्यादि। तयोर्मूलप्रासादावतंसकयोरुत्तरपूर्वस्यामीशानकोणेऽत्रैतस्मिन् भागे यमकयोर्देवयोर्योग्ये सुधर्मनामे सभे प्रज्ञप्ते। सुधर्मशब्दार्थस्तु-सुष्ठु शोभनो धर्मो देवानां मानवकस्तम्भवर्तिजिनसक्थ्याशातनाभीरुकत्वेन देवाङ्गनाजोगविरतिपरिणामरूपो यस्यां सा तथा। वस्तुतस्तु-सुष्ठु शोभनो धर्मो राजधर्मः, समन्तुर्निर्मन्तुर्निग्रहानुग्रहस्वरूपो यस्यां सा तथा। ते चार्द्धत्रयोदशयोजनान्यायामेन सक्रोशानि षट् योजनानि विष्कम्भेण नव योजनान्यूर्द्धोच्चत्वेन। अत्र ग्रन्थार्थे सन्नावर्णकसूत्रमतिदिशति—अनेकस्तम्भशतसन्निविष्टेत्यादिपदसूचितः सभावर्णको जीवाभिगमोक्तो ज्ञेयः स चैवम्-" अणेगखंभसयसन्निविट्ठाओ अब्भुग्गयसुकयवइरवेइआतोरणवररइअसालभंजिआसुसिलिट्ठविसिट्ठसंठिअपसत्थवेरुलिअमणिकणगरयणखचिअउज्जलबहुसमसुविभत्तभूमिभागाओ ईहामिगउसभतुरगणरमगरविहगवालगकिन्नररुरुसरभचमरकुंजरवणलयपउमलयभत्तिचित्ताओ खंभुग्गयवइरवेइआपरिगयाभिरामाओ विज्जाहरजमलजुअलजंतजुत्ताओ विव अच्चीसहस्समालणीआओ रूवगसहस्सकलिआओ भिसमाणीओ भिब्भिसमाणीओ चक्खुल्लोअणलेसाओ सुहफासाओ सस्सिरीअरूवाओ कंचणमणिरयणथूभिआगाओ णाणाविहपंचवण्णघंटापडागपरिमंडिअग्गसिहराओ धवलाओ मरीइकवयविणिम्मुअंतीओ लाउल्लोइअमहिआओ गोसीससरसरत्तचंदणदद्दरदिण्णपंचंगुलितलाओ उवचिअचंदणकलसाओ चंदणघडसुकयतोरणपडिदुवारदेसभागाओ आसत्तोसत्तविउलवट्टवग्घारिअमल्लदामकलावाओ पंचवण्णसरससुरहिमुक्कपुप्फपुंजोवयारकलिआओ कालागुरुपवरकुंदुरुक्कतुरुक्कधूवडज्झंतमघमघंतगंधुद्धुआभिरामाओ सुगंधवरगंधिआओ गंधवट्टिभूआओ अच्छरगणसंघविकिण्णाओ दिव्वतुडिअसद्दसंपणदिआओ सव्वरयणामईओ अच्छाओ० जाव पडिरूवाओ" इति। अत्र व्याख्या तु सिद्धायतनतोरणादिवर्णकेषु उष्ट्रवृत्तिन्यायेन सुलभेति न पुनरुच्यते, नवरम्-अप्सरोगणानाम् अप्सरःपरिवाराणां यः संघः समुदायस्तेन सम्यक् रमणीयतया विकीर्णा आकीर्णा दिव्यानां भुटितानामातोद्यानां ये शब्दास्तैः सम्यक्श्रोत्रमनोहारितया प्रकर्षेण नन्दिता शब्दवती, शेषं प्राग्वत्। अथास्यां कति द्वाराणीत्याह—" तासि णं सभाणं" इत्यादि। तयोः सभयोः सुधर्मयोस्त्रिदिशि त्रीणि द्वाराणि प्रज्ञप्तानि, पश्चिमायां द्वाराभावात्। तानि द्वाराणि प्रत्येकं द्वे योजने ऊर्द्धोच्चत्वेन योजनमेकं प्रवेशेन, श्वेता इत्यादिपदेन सूचितः परिपूर्णो द्वारवर्णको वाच्यो यावद्वनमाला। अथ मुखमण्डपपरिपाटीनिरूपणायाह-" तेसि णं दाराणं " इत्यादि। तेषां द्वाराणां पुरतः प्रत्येकं प्रत्येकं त्रयो मुखमण्डपाः प्रज्ञप्ताः, सभाद्वाराग्रवर्तिनो मण्डपा इत्यर्थः। ते च मण्डपा अर्द्धत्रयोदशयोजनान्यायामेन षट् सक्रोशानि योजनानि विष्कम्भेण सातिरेके द्वे योजने ऊर्द्धोच्चत्वेन। एतेषामपि "अणेगखंभसयसन्निविट्ठा" इत्यादिवर्णनं सुधर्मासभा इव निरवशेषं वक्तव्यं, यावद्द्वाराणां भूमिभागानां च वर्णने, यद्यप्यत्र द्वारान्तमेव सन्नावर्णनं, तदतिदेशेन मुखमण्डपसूत्रेऽपि तावन्मात्रमेवायाति, तथापि जीवाभिगमादिषु मुखमण्डपवर्णके भूमिभागवर्णकस्य दृष्टत्वात् अत्रातिदेशः। अथ प्रेक्षामण्डपवर्णकं लाघवादाह-"पेच्छाघरमंडवाणं" इत्यादि। प्रेक्षागृहमण्डपानां रङ्गमण्डपानां तथैव मुखमण्डपोक्तमेव प्रमाणं भूमिभाग इति पदेन सर्वं द्वारादिकं भूमिभागपर्यन्तं वाच्यम्। एषु च मणिपीठिका वाच्या। एतावदर्थसूचकमिदं सूत्रम्-"तेसि णं मुहमंडवाणं पुरओ पत्तेअं पत्तेअं पेच्छाघरमंडवा पण्णत्ता, ते णं पेच्छाघरमंडवा अद्धतेरसं जोअणाइं आयामेणं० जाव दो जोअणाइं उड्ढं उच्चत्तेणं० जाव मणिफासा, तेसि णं बहुमज्झदेसभाए पत्तेअं पत्तेअं वइरामया अक्खाडया पण्णत्ता, तेसि णं बहुमज्झदेसभाए पत्तेअं पत्तेअं मणिपेढिआओ पण्णत्ताओ सि" उक्तप्रायं, नवरमक्षपाटः चतुरस्राकारो मणिपीठिकाधारविशेषः। अस्याः प्रमाणार्थमाह-" ताओ णं मणिपेढिआओ जोअणं आयामविक्खंभेणं अद्धजोअणं बाहल्लेणं सव्वमणिमईओ सीहासणा भाणिअव्वा " इति। अत्र सिंहासनानि भणितव्यानि, सपरिवाराणीत्यर्थः। शेषं व्यक्तम्। अथ स्तूपावसरः-" तेसि णं " इत्यादि। तेषां प्रेक्षागृहमण्डपानां पुरतो मणिपीठिकाः, अत्र बहुवचनं न प्राकृतशैलीप्रभवं, यथा द्विवचनस्थाने बहुवचनं " हत्था पाया " इत्यादिषु; किं तु बहुत्वविवक्षार्थं, तेनात्र तिसृषु प्रेक्षागृहमण्डपप्रासादादिषु एकैकसद्भावात् तिस्रो ग्राह्याः, अन्यत्र जीवाभिगमादिषु तथादर्शनात्। अथैतासां मानमाह-" ताओ णं " इत्यादि कण्ठ्यम्, यद्यप्येतासु-त्तरादर्शेषु " जोअणं आयामविक्खंभेणं अद्धजोअणं बाहल्लेणं " इति पाठो दृश्यते, तथापि जीवाभिगमपाठदर्शनेन राजप्रश्नीयादिषु प्रेक्षामण्डपमणिपीठिकातः स्तूपमणिपीठिकाया द्विगुणमानत्वेन दृष्टत्वाच्चायं सम्यक् पाठः संभाव्यते। आदर्शेषु लिपिप्रमादस्तु सुप्रसिद्ध एव। अथ स्तूपवर्णनायाह-"तासि णं" इत्यादि। तासां मणिपीठिकानामुपरि प्रत्येकं प्रत्येकं त्रयः स्तूपाः प्रज्ञप्ताः। जीवाभिगमादौ तु चैत्यस्तूपा इति योजने ऊर्द्धोच्चत्वेन द्वे योजने आयामविष्कम्भाभ्यां, व्याख्यातो विशेषप्रतिपत्तिरिति देशोने द्वे योजने आयामविष्कम्भाभ्यां ग्राह्याः, अन्यथा मणिपीठिकास्तूपयोरभेद एव स्यात्। जीवाभिगमादौ तु सातिरेके द्वे योजने उच्चत्वमित्यर्थः। ते च श्वेताः, श्वेतत्वमेवोपमया दर्शयति-(संखदल त्ति) यावत्करणात्-" संखदलविमलनिम्मलदधिघणगोखीरफेणरययनिअरप्पगासा सव्वरयणामया अच्छा० जाव पडिरूवा " इति प्राग्वत्। किंयद् दूरं ग्राह्यमित्याह-यावद्दाढिमङ्कुरकानीति। अथ तच्चतुर्दिशि यदस्ति तदाह-" तेसि णं थूभाणं " इत्यादि। तेषां स्तूपानां प्रत्येकं चतुर्दिक्षु चतस्रो मणिपीठिकाः प्रज्ञप्ताः। ताश्च मणिपीठिका योजनमायामविष्कम्भेण अर्द्धयोजनं बाहल्येन अत्र जिनप्रतिमावक्तव्याः, तत्सूत्रं चेदम्-" तासि णं मणिपीढिआणं उप्पिं पत्तेअं पत्तेअं चत्तारि जिणपडिमाओ जिणुस्सेहप्पमाणमेत्ताओ पलिअंकणिसण्णाओ थूभाभिमुहीओ सन्निक्खित्ताओ चिट्ठंति। तं जहा-तत्थ माओ चत्तारि वंदणा चारिसेणा " इति। एतद्वर्णनादिकं चैतावत्यं सिद्धायतनाधिकारे प्रागुक्तम्। गताः स्तूपाः। " चेइअरुक्खाण" इत्यादि व्यक्तम्। अत्र चैत्यवृक्षवर्णको जीवाभिगमोक्तो वाच्यः। स चायम्- "तेसि णं चेइअरुक्खाणं अयमेआरूवे वण्णावासे पण्णत्ते। तं जहा—वइरमूलरययसुपइट्ठविडिमारिट्ठामय—

कंदा वेरुलियरुइलक्खंधा सुजायवरजायरूवपढमविसालसाला णाणामणिरयणविविहसाहप्पसाहवेरुलियरत्ततवणिज्जपत्तवेंटा जंबूणयरत्तमउअसुकुमालपवालपल्लवंकुरगधरा विचित्तमणिरयणसुरभिकुसुमफलभरणमिअसाला सच्छाया सप्पभा सस्सिरीआ सउज्जोआ अमयरससमरसफला अहिअनयणमणणिव्वुइकरा पासादीआ०जाव पडिरूवा ४" इति। अस्य व्याख्या-तेषां चैत्यवृक्षाणामयमेतद्रूपो वर्णावासः प्रज्ञप्तः। तद्यथा-'वज्ररजतमयानि मूलानि येषां ते वज्रमूलाः, तथा रजता रजतमया सुप्रतिष्ठिता विटिमा बहुमध्यदेशभागे ऊर्द्धविनिर्गता शाखा येषां ते तथा। ततः पूर्वपदेन कर्मधारयः। रिष्टरत्नमयः कन्दो येषां ते, तथा वैडूर्यरत्नमयो रुचिरः स्कन्धो येषां ते तथा, ततः पूर्वपदेन कर्मधारयः, सुजातं मूलरूप्यशुद्धं वरं प्रधानं यज्जातरूपं रूप्यं तदात्मिकाः प्रथमिका मूलभूता विशाला शाखाः शाखा येषां ते तथा, नानामणिरत्नात्मिका विविधाः शाखामूलशाखा विनिर्गतशाखाः प्रशाखा येषां ते तथा। तथा वैडूर्याणि वैडूर्यमयानि पत्राणि येषां ते तथा। तथा तपनीयानि तपनीयमयानि पत्रवृन्तानि येषां ते तथा। ततः पूर्ववत् पदद्वयमीलनेन कर्मधारयः। जाम्बूनदा जाम्बूनदनामकसुवर्णविशेषमया रक्तवर्णा मृदुसुकुमारा अत्यन्तकोमलाः प्रवाला ईषदुन्मीलितपत्रभावाः पल्लवजातपूर्णप्रथमपत्रभावरूपा वराङ्कुराः प्रथमसूच्यिमानास्तदग्रान् धरन्ति ते तथा। विचित्रमणिरत्नमयानि सुरभीणि कुसुमानि फलानि च तेषां भरेण नमिता नामग्राहिताः शाखा येषां ते तथा, सती शोभना छाया येषां ते सच्छायाः, एवं सत्प्रभाः। अत एव सच्छ्रीकाः। तथा सोद्द्योताः मणिरत्नानामुद्द्योतनाद्यात्। अमृतरससमरसानि फलानि येषां ते तथा। अधिकं नयनमनोनिर्वृतिकराः, शेषं प्राग्वत्। "ते णं वेइअरुक्खा अन्नेहिं बहूहिं तिलयलवयकुत्तोवगासिरीससत्तिवण्णदहिवण्णलोद्धवंदणनीवकुडयकयंवपणसतालतमालपिआलपियंगुपारावयरायरुक्खनंदिरुक्खेहिं सव्वओ समंता संपरिक्खित्ता" इति। ते चैत्यवृक्षा अन्यैर्बहुभिस्तिलकलवगजोपगशिरीषसप्तपर्णदधिपर्णलोध्रवञ्चनन्दीपकुटजकदम्बपनसतालतमालप्रियालप्रियङ्गुपारापतराजवृक्षनन्दिवृक्षैः सर्वतः समन्तात् संपरिक्षिप्ताः। एते च वृक्षाः केचिद्देशाम कोशतः केचिच्छ्लोकतश्चावगन्तव्याः। "तेणं तिलया० जाव नंदिरुक्खा मूलवंतो कंदवंतो० जाव सुरम्मा" ते च तिलकादयो वृक्षा मूलवन्तः कन्दवन्त इत्यादि वृक्षवर्णनं प्रथमोपाङ्गतोऽवसेयं, यावत् सुरम्या इति। "ते णं तिलया० जाव नंदिरुक्खा अन्नाहिं बहूहिं पउमलयाहिं० जाव सामलयाहिं सव्वओ समंता संपरिक्खित्ता।" ते च तिलकादयो वृक्षा अन्याभिर्बहुभिः पद्मलताभिर्यावच्छ्यामलताभिः सर्वतः समन्तात् संपरिक्षिप्ताः। यावच्छब्दाद्य नागलताकुन्दकलताद्या ग्राह्याः। "ताओ णं पउमलयाओ० जाव सामलयाओ निच्चं कुसुमिआओ० जाव पडिरूवाओ।" ताश्च पद्मलताद्या नित्यं कुसुमिता इत्यादि लतावर्णनं यावत्प्रतिरूपाः "तेसि णं वेइअरुक्खाणं तप्पिं अट्ठट्ठमंगलया बहवे झया छत्ताइच्छत्ता" तेषां चैत्यवृक्षाणामुपरि अष्टाष्टौ मङ्गलकानि बहवः कृष्णचामरध्वजाः छत्रातिछत्राणि इत्यादि चैत्यस्तूपकवक्तव्यमतिदेशाच्चैत्यवृक्षाः। अथ महेन्द्रध्वजावसरः-"तेसि णं वेइअरुक्खाणं" इत्यादि। तेषां चैत्यवृक्षाणां पुरतस्तिस्रो मणिपीठिकाः प्रज्ञप्ताः। ताश्च मणिपीठिका योजनमायामविष्कम्भाभ्याम् अर्द्धयोजनं बाहल्येन, "तासि णं उप्पिं पत्तेअं" इत्यादि। तासां मणिपीठिकानामुपरि प्रत्येकं प्रत्येकं महेन्द्रध्वजाः प्रज्ञप्ताः। ते चार्द्धाष्टमानि सार्द्धसप्तयोजनानि ऊर्द्धोच्चत्वेन अर्द्धक्रोशं धनुःसहस्रमुद्वेधेनोच्चत्वेन तदेव बाहल्येन "वइरामयवट्ट" इति पाठोपलक्षितः परिपूर्णो जीवाभिगमाभ्युक्तवर्णको ग्राह्यः। स चायम्-"वइरामयवट्टसंठिअसुसिलिट्ठपरिघट्ठमट्ठसुपइट्ठिआ अणेगवरपंचवण्णकुंकुलीसहस्सपरिमंडिआभिरामा वाउद्धूअविजयवेजयंतीपडागा छत्ताइच्छत्तकलिआ तुंगा गगणतलमभिलंघमाणसिहरा पासादीआ० जाव पडिरूवा" इति। अस्य व्याख्या-वज्रमयाः तथा वृत्तं वर्तुलं लष्टं मनोज्ञं संस्थितं संस्थानं येषां ते तथा, तथा सुश्लिष्टा यथा भवन्ति एवं परिघृष्टाः खरशाणपाषाणप्रतिमेव सुश्लिष्टपरिघृष्टाः, तथा मृष्टाः सुकुमारशाणया पाषाणप्रतिमेव तथा सुप्रतिष्ठिता मनागप्यचलनात् तथा अनेकैर्वरैः प्रधानैः पञ्चवर्णैः कुंकुमलीनां लघुपताकानां सहस्रैः परिमण्डिताः सन्तोऽभिरामाः, शेषं प्राग्वत्। "तेसि णं महिंदज्झयाणं उप्पिं अट्ठट्ठमंगलया झया छत्ताइच्छत्ता" इत्यादि सर्वं तोरणवर्णक इव वाच्यं जीवाभिगमत इति। उक्ता महेन्द्रध्वजाः। अथ पुष्करिण्यः। ताश्च-"वेइआवणसंड" इत्यादिपर्यन्तसूत्रेण संगृह्यते। तथाहि-"तेसि णं महिंदज्झयाणं पुरओ तिदिसिं तओ णंदापुक्खरिणीओ पण्णत्ताओ। अद्धतेरसजोअणाइं आयामेणं छस्सक्कोसाइं जोअणाइं विक्खंभेणं दस जोअणाइं उव्वेहेणं अच्छाओ सण्हाओ पुक्खरिणीवण्णओ, पत्तेअं पत्तेअं पउमवरवेइआपरिक्खित्ताओ पत्तेअं पत्तेअं वणसंडपरिक्खित्ताओ वण्णओ"। तथा "तासि णं णंदापुक्खरिणीणं पत्तेअं पत्तेअं तिदिसिं तओ तिसोवाणपडिरूवगा पण्णत्ता। तेसि णं तिसोवाणपडिरूवगाणं वण्णओ, तोरणवण्णओ अ भाणिअव्वो० जाव छत्ताइच्छत्ता" इति। अत्र जगतीगतपुष्करिणीवत् सर्वं वाच्यम्। अथ सुधर्मसभायां यदस्ति तदाह-"तासि णं" इत्यादि। तयोः सभयोः सुधर्मयोः बद्ध मनोगुलिकानां पीठिकानां सहस्राणि प्रज्ञप्तानि। तथाहि-पूर्वस्यां दे सहस्रे, पश्चिमायां दे सहस्रे, दक्षिणस्यामेकं सहस्रम्, उत्तरस्यामेकं सहस्रम्, "०जाव दामा" इत्यत्र यावत्पदादिदं ग्राह्यम्-"तासु णं मणोगुलिआसु बहवे सुवण्णरुप्पमया फलगा पण्णत्ता। तेसि णं सुवण्णरुप्पमएसु फलगेसु बहवे वइरामया णागदंतगा पण्णत्ता। तेसु णं वइरामएसु नागदंतएसु बहवे किण्हसुत्तवग्घारिअमल्लदामकलावा० जाव सुक्किलसुत्तवग्घारिअमल्लदामकलावा तेणं दामा तवणिज्जलंबूसगा चिट्ठंति" इति सर्वं विजयद्वारवद् वाच्यम्। अनन्तरोक्तं गोमानसिकसूत्रेऽतिदिशति-"एवं गोमाणसिआओ" इत्यादि। एवं मनोगुलिकान्यायेन गोमानस्यः शय्यारूपाः स्थानविशेषा वाच्याः, नवरं दामस्थाने धूपवर्णको वाच्यः। अथास्या एव भूभागवर्णकमाह-" तासि णं " इत्यादि। तयोः सुधर्मयोः सभयोः अन्तर्बहुसमरमणीयो भूमिभागः प्रज्ञप्तः। अत्र मणिवर्णादयो वाच्याः, यावत्पद्मलतादयोऽपि च चित्ररूपाः। अथ विशेषतो यद्वक्तव्यं तदाह-"मणिपेढिआ" इत्यादि। अत्र सुधर्मयोर्मध्यभागे प्रत्येकं मणिपीठिका वाच्या, द्वे योजने आयामविष्कम्भाभ्यां, योजनं बाहल्येन। "तासि णं" इत्यादि। तयोर्मणिपीठिकयोरुपरि प्रत्येकं माणवकनाम्नि चैत्यस्तम्भमहेन्द्रध्वजसमाने प्रमाणतोऽर्द्धाष्टमयोजनप्रमाणतोऽर्द्धाष्टमयोजनप्रमाण इत्यर्थः। वर्णकतोऽपि महेन्द्रध्वजवत् उपरि

षट् क्रोशानवगाह्य, उपरितनषट्क्रोशान् वर्जयित्वेत्यर्थः । अधस्तादपि षट् क्रोशान् वर्जयित्वा मध्येऽर्धपञ्चमेषु योजनेषु इति गम्यम् (जिणसकहाउ त्ति) जिनसक्थीनि जिनास्थीनीत्यन्तर्जातीयानां जिनदंष्ट्राग्रहणेऽनधिकृतत्वात् सौधर्मेशानचरमवर्तीन्द्राणामेव तद्ग्रहणात् प्रज्ञप्तानीति, शेषो वर्णकश्चात्र जीवाभिगमोक्तो ज्ञेयः । स चायम्-" तस्स णं माणवगचेइयस्स खंभस्स उवरिं छक्कोसे ओगाहित्ता हेट्ठा वि छक्कोसे वज्जित्ता मज्झे अद्धपंचमेसु जोअणेसु, एत्थ णं बहवे सुवण्णरुप्पमया फलगा पण्णत्ता । तेसु णं बहवे वइरामया नागदंतया पण्णत्ता । तेसु णं बहवे रययमया सिक्कगा पण्णत्ता । तेसु णं बहवे वइरामया गोलवट्टसमुग्गया पण्णत्ता, तेसु णं बहवे जिणसकहाओ संणिक्खित्ताओ चिट्ठंति । जाओ णं अम्हाणं देवाणं अन्नेसिं च बहूणं देवाण य देवीण य अच्चणिज्जाओ वंदणिज्जाओ पूअणिज्जाओ सक्कारणिज्जाओ सम्माणणिज्जाओ कल्लाणं मंगलं दैवयं चेइअं पज्जुवासणिज्जाओ " इति । अत्र व्याख्या-" तस्स णं " इत्याद्यारभ्य " वज्जित्ता " इति पर्यन्तं प्रायः प्रस्तुतसूत्रे साक्षाद् दृष्टत्वादनन्तरमेव व्याख्यातम्, मध्येऽर्द्धे पञ्चमेषु योजनेषु, अवशिष्टयोजनेष्वित्यर्थः । अत्रान्तरे बहूनि सुवर्णरूप्यमयानि फलकानि प्रज्ञप्तानि, तेषु फलकेषु बहवो वज्रमया नागदन्तकाः प्रज्ञप्ताः, तेषु नागदन्तकेषु बहूनि रजतमयानि शिक्यकानि प्रज्ञप्तानि, तेषु शिक्यकेषु बहवो वज्रमयाः गोलको वृत्तोपन्यस्तद्वद् वृत्ताः समुद्गकाः प्रज्ञप्ताः,तेषु समुद्गकेषु बहूनि जिनसक्थीनि संनिक्षिप्तानि तिष्ठन्ति, यानि यमकयोर्देवयोरन्येषां च बहूनां यमकराजधानीवास्तव्यानां वाणमन्तराणां देवानां देवीनां च अर्चनीयानि वन्दनीयानि स्तुत्यादिना, पूजनीयानि पुष्पादिना, सत्कारणीयानि वस्त्रादिना, संमाननीयानि बहुमानकरणतः कल्याणं मङ्गलं दैवतं चैत्यमिति पर्युपासनीयानीति । एतदाशातनाभीरुतयैव तस्मात्ते देवा देवयुवतिभिर्न संभोगादिकमाद्रियन्ते, नापि मित्रदेवादिभिर्हास्यक्रीडादिपराः स्युरिति । ननु जिनगृहादिषु जिनप्रतिमानां देवानामर्चनीयत्वादिकमाशातनात्यागश्च युक्तः, तासां सद्भावस्थापनारूपत्वेनाराध्यतासंकल्पप्रादुर्भावसंभवात् ; न तथा जिनदंष्ट्रादिषु, तेन कथं तौ घटेते ?, पूज्यानामङ्गानि पूज्या एव पूज्यानीति संकल्पस्यात्रापि प्रादुर्भावात् । पूज्यत्वं महावैरोपशमकगुणत्वेन च । अस्मिन्नर्थे पूज्यश्रीरत्नशेखरसूरीन्द्रोपङ्क्तश्रावकविधिवृत्तिसंमतिः । तथाहि-परीक्षाप्राप्तनिर्लोभतागुणं रत्नसारकुमारं प्रति चन्द्रशेखरसुरेणोचे-

" हरिषेणाणीहरिणे-गमेष्यनिमिषाग्रणीः ॥
युक्तमेव हि स्वतश्लाघां, कुरुते सुरसाङ्किकम ॥ १ ॥
बभूव स्म विस्मयस्मेरः, कुमारः स सुराग्रणीम् ।
मामश्लाघ्यं श्लाघते किं, सोऽप्युवाच शृणु ब्रुवे ॥ २ ॥
नवोत्पन्नतयाऽन्यर्द्धि, सौधर्मेशानशक्रयोः ।
विवादोऽभूद्विमानार्थं, इर्म्यार्थमिव हर्मिणोः ॥ ३ ॥
विमानसंख्या द्वात्रिंशत्, तथाऽष्टाविंशतिः क्रमात् ।
सन्त्येतयोस्तथाऽप्येतौ, विवदेते स्म धिग् भवम् ॥ ४ ॥
तयोरिवोर्वीश्वरयो-र्विमानर्द्धिप्रबुद्धयोः ।
नियुद्धादिमहायुद्धाः, अप्यभूवन्ननेकशः ॥ ५ ॥
निवार्यते हि कलह-स्तिरश्चां तरसा नरैः ।
नराणां च नराधीशै-र्नराधीशां सुरैः क्वचित् ॥ ६ ॥
सुराणां च सुराधीशां, कलहो वा पुनः कथम् ।
केन वा स निवार्येत, वज्राग्निरिव दुःशमः ? ॥ ७ ॥
माणवकाख्यस्तम्भस्था-ऽर्हद्दंष्ट्राशान्तिवारिणा ।
साधिव्याधिमहादोष-महावैरनिवारिणा ॥ ८ ॥
कियत्कालव्यतिक्रान्ते, सिक्तौ महत्तरैः सुरैः ।
बभूवतुः प्रशान्तौ तौ, किं वा सिद्धेर्न नञ्जयात् ?॥९॥ युग्मम्
ततस्तयोर्मिथस्त्यक्त-वैरयोः सचिवैर्द्वयोः ।
प्रोचे पूर्वव्यवस्थैवं, सुधियां समये हि गीः ॥ १० ॥

सा चैवम्-

दक्षिणस्यां विमाना ये, सौधर्मेशस्य ते ऽखिलाः ।
उत्तरस्यां तु ते सर्वेऽ-पीशानेन्द्रस्य सत्तया ॥ ११ ॥
पूर्वस्यामपरस्यां च, वृत्ताः सर्वे विमानकाः ।
त्रयोदशापीन्द्रकाश्च, स्युः सौधर्मसुरेशितुः ॥ १२ ॥
पूर्वापरदिशोः श्रेण्या-श्चतुरस्राश्च ते पुनः ।
सौधर्माधिपतेरर्द्धा, ईशानचक्रिणः पुनः ॥ १३ ॥
सनत्कुमारमाहेन्द्रे-ऽप्येष एव भवेत्क्रमः ।
वृत्ता एव हि सर्वत्र, स्युर्विमानेन्द्रकाः पुनः ॥ १४ ॥
इत्थं व्यवस्थया चेतः-स्वाध्यमास्थाय सुस्थिरौ ।
विमत्सरौ गतक्रोधौ, जह्नाते तौ सुरेश्वरौ ॥ १५ ॥ "

हन्त ! यद्यपि प्रतिसमयमन्यान्यरूपाः कार्यकोट्यः तत्रोत्पद्यन्ते, तथाऽपि तासिरपेक्षत्वम्-निष्प्रयोजनत्वेनाविवक्षितत्वादुत्पद्यमानाः अपि तासत्त्वं न गणयसीत्यर्थः। कुतः ?, यस्माद् घटगताऽभिलाषोऽसि,सप्रयोजनत्वेन तस्यैव प्रधानतया विवक्षितत्वात् । 'घट इहोत्पत्स्यते' इत्येवं तत्रैव तवाभिलाषः, अतः प्रतिसमयकार्यकोटीनामदर्शकत्वेन स्थूलमते ! प्रतिसमयकार्यसंबन्धिनमपि कालं सर्वमपि घटे लगयसि-'सर्वोऽप्ययं घटोत्पत्तिकालः' इत्येवमध्यवस्यसि,त्वमित्यर्थः,अतो मिथ्यानुभवोऽयं तवेत्यभिप्रायः, एकसामयिक एव घटोत्पत्तिकाले बहुसामयिकत्वग्रहेण प्रवृत्तेः । अत्राह-ननु प्रतिसमयं कार्यकोट्य उत्पद्यमानास्तत्र न काश्चन संवेद्यन्ते, किं त्वपान्तराले शिवकस्थासकोशादीनि कानिचिदेव कार्याणि संवेद्यन्ते । सत्यम्, किं तु स्थूलान्येव शिवकादिकार्याणि, यानि तु प्रतिसमयभावीनि सूक्ष्मकार्याणि तानि अव्यक्त्या नावधारयितुं शक्नोति, परं प्रतिसमयकार्याणां प्राहकाण्यनन्तसिद्धकेवलिनां ज्ञानान्युत्पद्यन्ते,तान्यपि तत्रापान्तराले कार्याण्येव, इति घटन्त एव प्रतिसमयं कार्यकोट्य इति ॥ २३१८ ॥

अत्र प्रेरकः प्राह-

को चरमसमयनियमो, पढमे चिय तो न कीरए कज्जं ।
नाकारणं ति कज्जं, तं चेवं ताम्मि से समए ॥२३१९॥

ननु यदि कार्यस्य दीर्घः क्रियाकालो नेष्यते, किं त्वेकसामयिक एव, तर्हि कोऽयं चरमसमयनियमो, येन तत्रैवोत्पद्यते घटादिकार्यम्-न घटत एवायं नियम इत्यर्थः । तत एतन्नियमाभावात् किं प्रथमसमय एव कार्यं न क्रियते ?-अपि तु क्रियत एवेति काङ्क्षा नीयते । अत्रोत्तरमाह-अकारणं कार्यं न भवति, तच्चान्त्यसमये,एव (से) तस्य घटस्य कारणमस्ति, न तत्प्रथमसमये,अतः कथं तत्रोत्पद्यते ?, अन्वयव्यतिरेकसमधिगम्यो हि कार्यकारणभावः, अन्वयव्यतिरेकाभ्यां चान्त्यसमय एव घटादेः कारणं लक्ष्यत इति तत्रैव तदुत्पद्यत इति युक्त एव चरमसमयनियम इति ॥ २३१९ ॥

अथोपसंहरँस्तात्पर्यमाह-

तेणेह कज्जमाणं, नियमेणं कयं कयं तु नयणिज्जं।
किंचिदिह कज्जमाणं, उवरयकिरियं च होज्जाहि ॥२३२०॥

तेन उक्तप्रकारेण क्रियमाणं वर्तमानक्रियाक्षणभावि कार्यं नियमेन कृतमेवोच्यते, यत्तु कृतं तद्भजनीयं विकल्पनीयम्। कथम्? इत्याह-किंचिदिह कृतं क्रियाप्रवृत्तिकालभावि क्रियमाणमुच्यते, अन्यत्तूपरतक्रियं चक्रापाकाद्युत्तीर्णं कृतं घटादिकार्यं न क्रियमाणमुच्यते, उपरतक्रियत्वादिति ॥ २३२० ॥

तदेवं सामान्येन प्रतिपाद्य प्रस्तुते जमालिसंस्तारकेऽमुं सकलमपि स्थविरोक्तं युक्तिकलापमायोजयन्नाह—

जं जत्थ नभोदेसे, अत्थुव्वइ जत्थ जत्थ समयम्मि।
तं तत्थ तत्थ मत्थुय, मत्थुव्वंतं पि तं चेव ॥२३२१॥

आस्तीर्यमाणसंस्तारकस्य यावन्मात्रं नभोदेशं यत्र यत्र समये (अत्थुव्वइ) आस्तीर्यते तत् तावन्मात्रं तस्मिन्नभोदेशे तत्र तत्र समये आस्तीर्णमेव भवति, आस्तीर्यमाणमपि च तदेवोच्यते। इदमुक्तं भवति-सर्वोऽपि संस्तारक आस्तीर्यमाणो नास्तीर्ण इति ' क्रियमाणं कृतम् ' इत्यादि महावीरवचनं व्यलीकमेव जमालिर्मन्यते। एतच्चायुक्तम्, भगवद्वचनानभिप्रायापरिज्ञानात्। सर्वनयात्मकं हि भगवद्वचनम्। ततश्च 'क्रियमाणमकृतम ' इत्यपि भगवान् कथंचिद् व्यवहारनयमतेन मन्यत एव, परम् " चलमाणे चलिए, उईरिज्जमाणे उईरिए " इत्यादिसूत्राणि निश्चयनयमतेनैव प्रवृत्तानि। तन्मतेन च क्रियमाणं संस्तृतम्, इत्यादि सर्वमुपपद्यत एव। निश्चयो हि मन्यते-प्रथमसमयादेव घटः कर्तुं नारब्धः, किं तु मृदानयनमर्दनादीनि प्रतिसमयं परापरकार्याण्यारभ्यन्ते, तेषां च मध्ये यद्यत्र समये प्रारभ्यते तत्तत्रैव निष्पद्यते, कार्यकाल-निष्ठाकालयोरैक्यात्, अन्यथा पूर्वोक्तदोषप्रसंगात्। ततः क्रियमाणं कृतमेव भवति। एवं प्रस्तुतः संस्तारकोऽपि नाद्यसमयात्सर्वोऽपि संस्तरीतुमारभ्यते, किं त्वपरापरे तदवयवाः प्रतिसमयमास्तीर्यन्ते, तेषां च मध्ये यो यत्र समयेऽवयवः संस्तरीतुमारभ्यते स तत्रैवास्तीर्यते, परिपूर्णस्तु संस्तारकश्चरमसमय एव संस्तरीतुमारभ्यते तत्रैव च निष्पद्यत इति। संस्तीर्यमाणं संस्तीर्णमेव भवतीति ॥ २३२१ ॥

" दीसइ दीहो य अओ " (२३११) इत्यत्राह—

बहुवत्थत्तरणविचित्त-देसकिरियाइकज्जकोडीणं।
मन्नसि दीहं कालं, जइ संथारस्स किं तस्स ॥२३२२॥

यदि नाम बहुवस्त्रास्तरणविचित्रदेशक्रियादिकार्यकोटीनां संबन्धिनं दीर्घकालं मन्यसे जानासि त्वं, ततः संस्तारकस्य तस्य किमायातम्?। इत्यक्षरघटना। विभिन्नो देशो यासां ता विभिन्नदेशाः, ताश्च ताः क्रियाश्च विचित्रदेशक्रियाः, वस्त्रस्योपलक्षणत्वात् कम्बलानां चास्तरणं वस्त्रकम्बलास्तरणं, तस्य विचित्रदेशक्रिया वस्त्रकम्बलास्तरणविभिन्नदेशक्रियाः, तदादयश्च ताः कार्यकोटयश्च तास्तथा, बहुधश्च ता वस्त्रकम्बलास्तरणविभिन्नदेशक्रियादिकार्यकोटयश्च बहुवस्त्रकम्बलास्तरणविभिन्नदेशक्रियादिकार्यकोटय इति समासः, तासामिति। आदिशब्दः स्वगतानेकभेदस्यापकः, कार्यणां च कोटिसंस्त्यत्वमिहापि पूर्ववद्भावनीयमिति ॥ २३२२ ॥

ननु यदि पूर्वमपरापराणि कार्याणि निष्पद्यन्ते, संस्तारकस्तु पर्यन्तसमय एवारभ्यते, निष्पद्यते च कार्यक्रियाकालनिष्ठाकालयोरनेदात् तर्हि कथं संस्तारकस्यैष स दीर्घः क्रियाकालो मयाऽनुभूयते?, इत्याह—

पइसमयकज्जकोडी-विमुहो संथारयाहिकयकज्जो।
पइसमयकज्जकालं, कहं संथारम्मि लाएसि?॥२३२३॥

गतार्था, नवरं संस्तारकेणाधिकृतं प्रस्तुतं कार्यं यस्यासौ संस्तारकाधिकृतकार्य इति समासः ॥२३२३॥

तदेवं स्थविरैर्युक्तिभिः संबोध्यमाने तस्मिन् किं संजातमित्याह-

सो उज्जुसुयनयमयं, अमुणंतो न पडिवज्जए जाहे।
ताहे समणा केई, उवसंपज्जा जिणं चेव ॥ २३२४ ॥
पियदंसणा वि पइणो-ऽणुरागओ तम्मयं चिअ पवज्जा।
ढंकोवहियागणिद-ड्ढत्थदेसा तयं जणइ ॥ २३२५ ॥
सावय! संघाडी मे, तुमए दड्ढ त्ति सो वि अ तमाह।
नणु तुज्झ कज्जमाणं, दड्ढंति अओ न सिज्झंतो ॥२३२६॥
दड्ढं न डज्झमाणं, जइ विगए ऽणागए व का संका?।
काले तयभावाओ, संघामी कम्मि ते दड्ढा? ॥२३२७॥

चतस्रोऽपि गाथा गतार्थाः, नवरम् ऋजुसूत्रो निश्चयनयविशेषः। (पियदंसणा वि त्ति) आह-ननु पूर्वं 'सुदर्शना' इति तस्या नाम प्रोक्तं, कथमिदानीं प्रियदर्शनेत्युच्यते?। सत्यं, किं त्विदमपि तस्या नाम द्रष्टव्यम्। तथा चोक्तम्-" तेयसिरिं च सुरूवं, जणइ य पियदंसणं धूयं " इति। " ढंकोवहिय " इत्यादि। स्वाध्यायपौरुषीं कुर्वत्यास्तस्या आपाकाद् गृहीत्वा ढङ्केनोपहितः क्षिप्तो योऽग्निस्तेन दग्धो वस्त्रादेशो यस्याः सा ढङ्कोपहितानिदग्धवस्त्रादेशा सती तं ढङ्कं भणति, सोऽपि तां प्रियदर्शनामाह-" दड्ढं " इत्यादि चतुर्थगाथाया अयं भावार्थः। ननु यदि दह्यमानं दाहक्रियाक्षणे वर्तमाने वस्त्रं न दग्धमिति भवद्भिरुच्यते, ततो विगते उपरते, अनागते वा भविष्यति दाहक्रियाकाले का शङ्का वस्त्रदाहविषया?, तदभावाद् दाहक्रियाया विनष्टानुत्पन्नत्वेन सर्वथा अभावादित्यर्थः। अतो वर्तमानातीतानागतलक्षणे कालत्रयेऽप्युक्तयुक्तितोऽदग्धत्वात् कस्मिन् काले आर्ये! ते तव सङ्घाटी मया दग्धेत्युच्यताम्? इति ॥ २३२४ ॥ २३२५ ॥ २३२६ ॥ २३२७ ॥

अथ आर्ये! त्वमेवं मन्यसे, किम्? इत्याह—

अहवा न कज्जमाणं, दड्ढं दाहकिरियासमत्तीए।
किरियाऽभावे दड्ढं, जइ दड्ढं किं न तेसुक्कं? ॥२३२८॥

अथ चैवं ब्रूषे-दह्यमानं न दग्धं, किं तु दाहक्रियासमाप्तौ दग्धम्। नन्वेवं सति दाहक्रियाऽभावे दग्धमित्युक्तं भवति। एतच्चायुक्तम्, यतो यदि दाहक्रियाऽभावे दग्धं, तर्हि त्रैलोक्यमपि किं न 'दग्धम्' इत्यत्रापि संबध्यते, यथा वस्त्रे तथा त्रैलोक्येऽपि दाहक्रियाऽभावस्य तुल्यत्वादिति ॥ २३२८ ॥

ततः किमिह स्थितमित्याह—

उज्जुसुयनयमयाओ, वीरजिणिंदवयणावलंबीणं।
जुज्जेज्ज कज्जमाणं, दड्ढं वोत्तुं न तुज्झ चि ॥ २३२९ ॥

उत्तानार्था ॥ २३२९ ॥

ननु दह्यमानदग्धवादिनोऽप्यञ्जलमात्रदेशे दह्यमाने सङ्घाटी कथं दग्धेति व्यपदिश्यते ?, इत्याह-

समए समए जो जो, देसो ऽगणिभावमेइ दज्झमाणस्स ।
तं तम्मि दज्झमाणं, दड्ढं पि तमेव तत्थेव ॥ २३३० ॥

यो यो दाह्यस्य पटादेर्देशस्तन्तवादिः समये समयेऽग्निभावमेति-दह्यत इत्यर्थः । तत्तद्देशरूपं वस्तु तस्मिन् समये दह्यमानं भण्यते, तथा दग्धमपि तदेव वस्तु तस्मिन्नेव समये भण्यते, अतो 'दह्यमानमेव दग्धम्' । यत्तु देशमात्रेऽपि दग्धे सङ्घाटी मे दग्धेति त्वं वदसि, तत्सङ्घाट्येकदेशेऽपि संघाटीशब्दोपचारादिति मन्तव्यमिति ॥ २३३० ॥

ततः किमिह स्थितम ? इत्याह—

नियमेण दज्झमाणं, दड्ढं दड्ढं तु होइ नयणिज्जं ।
किंचिदिह दज्झमाणं, उवरयदाहं च होज्जाहि ॥२३३१॥

व्याख्या प्रागुक्तानुसारेण कार्येति ॥ २३३१ ॥

इत्यादिदृष्टोक्तयुक्तिभिः संबुद्धा प्रियदर्शना, शेषसाधवश्च 'आर्य ! इच्छामः सदृशमिदं स्वदीयसंबोधनम्' इत्येवं दृष्ट्वा-जिमुखमभिधाय एकाकिनं जमालिनं मुक्त्वा सर्वाण्यपि गतानि जिनसमीपमिति एतदेवाह-

इच्छामो संबोहण-मज्जो ! पियदंसणादओ दंकं ।
वोत्तुं जमालिमेक्कं, मोत्तूण गया जिणसगासं ॥ २३३२ ॥

उक्तार्थैव । इति पञ्चविंशतिगाथार्थः ॥ २३३२ ॥ विशे० । आ० म० । आ० चू० । "तए णं जमालिस्स एवमाइक्खमाणस्स अत्थेगइया निग्गंथा एयमट्ठं सद्दहंति, अत्थेगइया णो सद्दहंति" (सूत्र०) इत्यस्योपरि उत्तराध्ययनवृत्तिगतं विवरणं प्रदर्श्यते-तत्र ये न श्रद्दधति, ते एवमाहुः—भगवन् ! भवतोऽयमाशयः-" यथा घटः पटो नैव, पटो वा न घटो यथा । क्रियमाणं कृतं नैव, कृतं न क्रियमाणकम्" ॥१॥ प्रयोगश्च-यौ निश्चितभेदौ, न तयोरैक्यं, यथा घटपटयोर्निश्चितभेदे च कृतक्रियमाणके, अत्र चासिद्धो हेतुः, तथाहि-कृतक्रियमाणे किमेकान्तेन निश्चितभेदे, अथ कथञ्चित् यद्येकान्तेन तर्हि तदैक्ये सतोऽपि करणप्रसङ्गतः, उत क्रियाऽनुपरमप्राप्तेरहोस्वित्प्रथमादिसमयेष्वपि कार्योपलम्भप्रसक्तेः, अथ क्रियावैफल्यापत्तितो दीर्घक्रियाकालदर्शनानुपपत्तेर्वा तत्र न तावत्सतोऽपि करणप्रसङ्ग इति युक्तमसत्करणे हि खपुष्पादेरेव करणमापद्यत इति कथञ्चित्सत एव करणमस्माभिरभ्युपगतम्, न चाभ्युपगतार्थस्य प्रसञ्जनं प्रयुज्यते । नाऽपि क्रियानुपरमप्राप्तेः, यत इह क्रिया किमेकविषया, भिन्नविषया वा ?। यद्येकविषया न दोषः । तथाहि-यदि कृतं क्रियमाणमुच्यते, तदा तन्मतेन निष्पन्नमेव कृतमिति, तस्यापि क्रियमाणतायां क्रियाऽनुपरमप्राप्तिलक्षणो दोषः स्यात् न तु क्रियमाणं कृतमिति उक्तौ तत्र क्रियावेशसमय एव कृतत्वाऽभिधानात् । उक्तं हि-क्रियाकालनिष्ठाकालयोरैक्यमिति । अथैवमपि कृतक्रियमाणयोरैक्ये कृतस्य सत्त्वात्ततोऽपि करणे तदवस्थः प्रसङ्गः। तदसत् । पूर्वं हि क्रियासत्ताकस्य क्रियायामयं प्रसङ्गः स्यात् न तु क्रियासमकालसत्तावतो अथ भिन्नविषया क्रिया तदा सिद्धसाधनं, प्रतिसमयमन्यान्यकारणतया वस्तुनोऽभ्युपगमेन भिन्नविषयक्रियानुपरमस्यास्माकं सिद्धत्वात् । अथ प्रथमादिसमयेष्वपि कार्योपलम्भप्रसक्तेरिति पक्षे क्रियमाणस्य हि कृतत्वप्रथमादिसमयेष्वपि सत्त्वादुपलम्भः प्रसज्यत इति, तदपि न, तदा हि शिवकादीनामेव क्रियमाणता, ते चोपलभ्यन्त एव । उक्तं च विशेषावश्यके-"अज्जारभे अज्ज, कह दीसउ जह घडो पयारेंते । सिवगाइओ न कुंभो, किह दीसउ सो तदद्धाए " ॥ २३१६ ॥ घटगतोऽग्निप्रतापतया च मूढः शिवकादिकरणेऽपि घटमहं करोमीति मन्यते । तथा चाह-"पढसमयकज्जकालो, निरवेक्खं घडगयाभिलासो सि । पढसमयकज्जकालं, थूलमई घडम्मि ढापसि " ॥ २३१७ ॥ (विशे०) नापि क्रियावैफल्यापत्तितः, यतः प्रागवाप्तसत्ताकस्य करणे क्रियावैफल्यं स्यात्, न तु क्रियमाणकृतत्वे, तत्र हि क्रियमाणं क्रियापेक्षमिति तस्याः साफल्यमेव अनेकान्तवादिनां च केनचिद्रूपेण प्राग्सत्त्वेऽपि रूपान्तरेण करणं न दोषाय, दीर्घक्रियाकालदर्शनानुपपत्तिरित्यपि न युक्तम् । यतः शिवकाद्युत्तरोत्तरपरिणामविशेषविषय एव दीर्घक्रियाकालोपलम्भो, न तु घटक्रियाविषयः । उक्तं हि-" पतिसमयउप्पण्णाणं, परोप्परविलक्खणाण सुबहूणं । दीहो किरियाकालो, जइ दीसइ किं च कुंभस्स ॥ २३१५ ॥ " (विशे०) अथ कथञ्चिन्निश्चितभेदे कृतक्रियमाणे तत्तीर्थकृदुक्तमेव निश्चयव्यवहारानुगतत्वात् तद्वचसः, तत्र च निश्चयनयाश्रयेण कृतक्रियमाणयोरभेदः। यदुक्तम्-"क्रियमाणं कृतं दग्धं, दह्यमानं स्थितं गतम् । तिष्ठच्च गम्यमानं च, निष्ठितत्वात् प्रतिक्षणम् ॥१॥" व्यवहारनयमतेन तु नानात्वमनयोः, तथा च क्रियमाणं कृतमेव, कृतं तु क्रियमाणमेव स्यात्, क्रियमाणं क्रियावेशसमये क्रियोपरमे पुनरकृतमिति । उक्तं च-" तेणेह कज्जमाणं, नियमेण कयं कयं तु भयणिज्जं । किंचिदिह कज्जमाणं, उवरयकिरियं च होज्जाहि " ॥२३२०॥ (विशे०) किं च-भवतो मतिः क्रियाऽन्त्यसमय एवाऽभिमतकार्योत्पत्तये, तत्राऽपि प्रथमसमयादारभ्य कार्यस्य कियत्यपि निष्पत्तिरेष्टव्या, अन्यथा कथमकस्मादन्त्यसमये सा प्रवेक्ष्यति । उक्तम्-

" आद्यतन्तुप्रवेशे च, नो तं किञ्चिद्यदा पटे ।
अन्त्यतन्तुप्रवेशे च, नो तं स्याच्च पटोदयः " ॥१॥
तस्माद्यदि द्वितीयादि-तन्तुयोगात्प्रतिक्षणम् ।
किञ्चित्किञ्चिदुतं तस्य, यदुतं तदुतं हि तत् ॥२॥

इह प्रयोगः, यद्यस्याः क्रियायाः आद्यसमये न प्रवर्तते तत्तस्या अन्त्यसमयेऽपि न भावि, यथा घटक्रियादिसमये अभवन् पटो न भवति च कृतक्रियमाणयोर्नैक्ये क्रियादिसमये कार्यम्, अन्यथा घटान्तसमयेऽपि पटोत्पत्तिः स्यात् । एवं च-" यथा 'वृक्षो धवश्चेति', न विरुद्धं मिथो द्वयम् । 'क्रियमाणं कृतं चेति', न विरुद्धं तथोभयम् " ॥१॥ प्रयोगश्च-यद् येनाविनाभूतं न तत् एकान्तेन भिद्यते, यथा-वृक्षत्वाद् धवत्वं, कृतत्वाविनाभूतं च क्रियमाणत्वमिति सकललोकप्रसिद्धत्वाच्च घटपटयोस्तदाश्रयेणैवमुक्तं संस्तारकादावपि योज्यम् । तत्प्रतिपद्यस्व भगवन् ! " चलमाणे चलिए " इत्यादि तीर्थकृता चात्यन्तमवितथ्यमिति, स चैवमुच्यमानोऽपि न प्रतिपद्यते । तत्त्व० ३ अ० । जमालेः कियन्तो भवा इति प्रश्नस्योत्तरम्-यथा भगवतीमूलकर्णिकावृत्तिवीरचरित्राद्यनुसारेण जमालेः पञ्चदश भवा ज्ञायन्ते । ही० ३ प्रका० ।

जमालिन्-पुं० । महावीरजिनप्रथमनिह्नवे, विशे० ।

जमालिअज्झयण—जमाल्यध्ययन—न० । वाचनान्तरापेक्षया अन्तकृद्दशाध्ययनानां षष्ठेऽध्ययने, इदानींतनम् अन्तकृद्दशासु तदनुपलम्भैः । स्था० १० ठा० ।

जमालिपभव–जमालिप्रभव–पुं० । जमालेः प्रभव एतत्तीर्थापेक्षया प्रथमा उपलब्धिरेषां न पुनः सर्वथोत्पत्तिरेव, प्रागप्येवंविधाभिप्रायसम्भवात् तेऽमी जमालिप्रभवाः । जमालिमतानुयुपगन्तृबहुरतनिह्नवेषु, उत्त० ३ अ० ।

जमावण–जन्मापन–न० । विषमाणां समीकरणे, नि० चू० १ उ० ।

जम्म–पुं० । जन्मन्–न० । जन–जावे–मनिन् । "ग्मो मः" ॥ ८ । २ । ६१ ॥ इति अधोलोपापवादः । "अन्त्यव्यञ्जनस्य" ॥ ८ । १ । ११ ॥ इत्यन्त्यनकारलोपः । "स्नमऽदामशिरोनमः" ॥ ८ । १ । ३२ ॥ इति सूत्रेण–चास्य पुंसि प्रयोगः । " जम्मो जम्म " उत्पत्तौ, स्था० ६ ठा० । अने० । गर्भवासतो योनिद्वारान्निस्सरणे, वाच० । कर्मकृतप्रसूतौ, औ० । न्यायायुक्ते अपूर्वदेहग्रहणे, वाच० । तत्र जन्म चतुर्विधम्–अण्डज, पोतज, जरायुजम् । औपपातिकं च । अण्डजाः हंसादयः, पोतजा हस्त्यादयः, जरायुजा मनुष्याः, औपपातिकाः देवनारकाः । विशे० । आ० चू० । आ० म० । विवक्षाभेदे स्वष्टविधमपि जन्म । तथाहि–अण्डाज्जाता अण्डजाः पक्षिगृहकोकिलादयः। पोता एव जायन्ते पोतजाः "अन्येष्वपि दृश्यन्ते" इति जातेर्डः प्रत्ययः, ते च हस्तिवल्गुलीचर्मजलूकादयो, जरायुवेष्टिता जायन्त इति जरायुजाः पूर्ववत् मप्रत्ययः, गोमहिष्यजाविकमनुष्यादयः । रसाज्जाता रसजास्तक्रारनालदधितीमनादिषु पायुकृम्याकृतयोऽतिसूक्ष्मा भवन्ति, संस्वेदाज्जाताः संस्वेदजाः मत्कुणयूकाशतपदिकादयः, संमूर्च्छनाज्जाताः संमूर्च्छनजाः शालनपिपीलिकामक्षिकाशालिकादयः, उद्भेदनमुद्भिद् ततो जाता उद्भिज्जाः, पृषोदरादित्वात्तलोपः । एवं ऋश्वरीटपारिप्लवादयः, उपपाताज्जाता उपपातजाः । अथवा–उपपाते भवा औपपातिकाः देवा नारकाश्च । एवमष्टविधजन्म यथासंभवं संसारिणो नातिवर्तन्ते, एतदेव शास्त्रान्तरे त्रिविधमुपन्यस्तं, संमूर्च्छनगर्भोपपातजन्मरसस्वेदजोद्भिज्जानां संमूर्च्छनजान्तःपातित्वात् अण्डजपोतजजरायुजानां गर्भजान्तःपातित्वात् देवनारकाणामौपपातिकान्तःपातित्वात् इति त्रिविधं जन्मेति । इह चाष्टविधं, सोत्तरभेदत्वादिति । आचा० १ श्रु० १ अ० ६ उ० ।

अथ जन्म केन प्रकारेण जायते इत्यादिस्वरूपं प्रदर्श्यते–

आर्याणामनार्याणां च कर्मभूमिजाऽकर्मभूमिजादीनां मनुष्याणां नानाविधयोनिकानां स्वरूपं वक्ष्यमाणनीत्या समाख्यातम् । तेषां च स्त्रीनपुंसकनेदभिन्नानां यथा बीजेनेति । यद्यस्य बीजं तत्र स्त्रियाः संबन्धि शोणितं पुरुषस्य शुक्रम् , एतदुभयमप्यविध्वस्तं शुक्राधिकं सन्मनुष्यस्य, शोणिताधिकं स्त्रियाः तत्समता नपुंसकस्य कारणतां प्रतिपद्यते । तथा यथावकाशेनेति । यो यस्यावकाशो मातुरुदरकुक्ष्यादिकस्तत्रापि किल वामा कुक्षिः, स्त्रियो, दक्षिणा कुक्षिः पुरुषस्य, उभयाश्रितः षण्ढ इति । अत्र चाविध्वस्ता योनिरविध्वस्तं बीजमिति चत्वारो भङ्गाः, तत्राप्याद्य एव भङ्गक उत्पत्तेरवकाशो, न शेषेषु त्रिष्विति । अत्र च स्त्रीपुंसयोर्वेदोदये सति पूर्वकर्मनियन्त्रितायां योनौ मैथुनप्रत्ययिको रताऽभिलाषोदयजनितोऽग्निकारणयोररणिकाष्ठयोरिव संयोगः समुत्पद्यते, तत्संयोगे च तच्छुक्रशोणिते समुपादाय तत्रोत्पित्सवो जन्तवस्तैजसकार्मणाभ्यां शरीराभ्यां कर्मरज्जुसंदानितास्तत्रोत्पद्यन्ते, ते च प्रथममुभयोरपि स्नेहमाचिन्वन्त्यविध्वस्तायां योनौ सत्यामिति । विध्वस्यते तु योनिः । "पञ्चपञ्चाशिका नारी सप्तसप्ततिः पुरुषः " इति । तथा द्वादश मुहूर्तानि यावच्छुक्रशोणिते अविध्वस्तयोनिके भवतस्तत ऊर्ध्वं ध्वंसमुपगच्छत इति । तत्र जीवा उभयोरपि स्नेहमाहार्यस्वकर्मविपाकेन यथास्वं स्त्रीपुंनपुंसकनावेन (विउट्टंति टि) वर्तन्ते समुत्पद्यन्ते इति यावत्, तदुत्तरकालं च स्त्रीकुक्षौ प्रक्षिप्ताः सन्तः स्त्रियाऽऽहारितस्याहारस्य निर्यासं स्नेहमाददति, तत्स्नेहेन च तेषां जन्तूनां क्रमोपचयादानेन क्रमेण निष्पत्तिरुपजायते । "सत्ताहं कललं होइ, सत्ताहं होइ बुब्बुयं " इत्यादि । तदेवमनेन क्रमेण तदेकदेशेन वा मातुराहारमोजसा मिश्रेण वा लोमभिर्धाऽऽनुपूर्व्येणाहारयन्ति यथाक्रममानुपूर्व्येण वृद्धिमुपागताः सन्तो गर्भपरिपाकं गर्भनिष्पत्तिमनुपपन्नाः । ततो मातुः कायादभिनिर्वर्तमानाः पृथग्भवन्तः सन्तस्तद्योनेर्निर्गच्छन्ति, ते च तथा विधकर्मोदयादात्मनः स्त्रीभावमप्येकदा जनयन्त्युत्पादयन्ति । अपरे केचन पुंभावम् नपुंसकभावं च । इदमुक्तं भवति–स्त्रीपुंनपुंसकभावः प्राणिनां स्वकृतकर्मनिर्वर्तितो भवति, न पुनर्यादृगिह भवे सोऽमुष्मिन्नेव तादृगेवेति,ते च तदहर्जातबालकाः सन्तः पूर्वभवाभ्यासादाहाराभिलाषिणो भवन्ति । मातुः स्तन्यमाहारयन्ति । तदाहारेण चानुपूर्व्येण च वृद्धास्तदुत्तरकालं नवनीतदध्योदनादिकं यावत्कुल्माषान् भुञ्जन्ते, तथाहारत्वेनोपगतास्त्रसान् स्थावरांश्च प्राणिनस्ते जीवा आहारयन्ति, तथा नानाविधं पृथिवीशरीरं द्रवणादिकं सचेतनं वा आहारयन्ति, तच्चाहारितयात्मसात्कृतं सारूप्यमापादितं सत् 'रसासृङ्मांसमेदोऽस्थिमज्जाशुक्राणि धातवः' इति सप्तधा व्यवस्थापयन्त्यपराण्यपि तेषां नानाविधमनुष्याणां शरीराणि नानावर्णान्याविर्भवन्ति,ते च तद्योनिकत्वात्तदाधारभूतानि नानावर्णानि शरीराण्याहारयन्तीत्येवमाख्यातमिति । सूत्र० २ श्रु० ३ अ० ।

जम्मंकुर–जन्माङ्कुर–न० । पुनरुत्पत्तिरूपे अङ्कुरे, । " अज्ञानपांशुपिहितं, पुरातनं कर्मबीजमविनाशि । तृष्णाजलाभिषिक्तं मुञ्चति जन्माङ्कुरं जन्तोः ॥१॥ " आ० म० द्वि० ।

जम्मंतर–जन्मान्तर–न० । अन्यान्यजन्मनि, पुनर्जन्मनि च । आ० म० द्वि० (जन्मान्तरोपपत्तियुक्तयस्तु ' परलोग ' शब्दे विलोकयाः)

जम्मकहा–जन्मकथा–स्त्री० । जातो मृतो वेत्येवं रूपायां वार्तायां, जन्मचरित्रे च । सूत्र० १ श्रु० १ अ० २ उ० ।

जम्मजरामरण–जन्मजरामरण–न० । जन्म च जरा च मरणं चेति जन्मजरामरणानि । स्वस्वशब्दप्रदर्शितावस्थात्रये, "जम्मजरामरणकरणगंभीरदुक्खपक्खुभिअपउरसलिलं" वृत्तिः–जन्मजरामरणान्येव करणानि साधनानि यस्य तत्तथा, तच्च गंभीरदुःखं तदेव प्रक्षुभितं संचलितं प्रचुरं सलिलं यत्र स तथा । प्रश्न० ३ आश्र० द्वार ।

जम्मजीवियफल–जन्मजीवितफल–न० । जन्मनो जीवितस्य च फले, ज्ञा० १५ श० १ उ० ।

जम्मण–जन्मन्–न० । उत्पादे, ज्ञा० १५ श० ६ उ० । प्रश्न० । "जम्मणजरामरणवाहिपरियट्टणारहट्टं " । वृत्तिः–जन्मजरामरणव्याधीनां याः परिवर्तनाः पुनःपुनर्भवनानि ताभिररघट्टो यासाम । प्रश्न० १ आश्र० द्वार ।

जम्मणगर–जन्मनगर–न० । 'जम्मणयर' शब्दार्थे, ज्ञा० १ वर्ग० ।

जम्मणचरियणिबद्ध–जन्मचरितनिबद्ध–त्रि० । तीर्थकरजन्माऽभिषेकनिबद्धे नाट्यविधौ, रा० ।

जम्मणमहिमा–जन्ममहिमन्–पुं० । जन्मोत्सवे, भ०१४श०२उ०।

जम्मणयर–जन्मनगर–न० । यस्मिन् नगरे यस्य जन्म भवति तत्तस्य जन्मनगरम् । उत्पत्तिपुरे, जं० ५ वक्ष० ।

जम्मदंसि (ण्)–जन्मदर्शिन्–त्रि० । जन्मनः स्वरूपतो वेत्तरि, परिहरति, आचरति च । " जे गब्भदंसी से जम्मदंसी, जे जम्मदंसी से मारदंसी" आचा० २ श्रु० ३ अ० ४ उ० ।

जम्मदोस–जन्मदोष–पुं० । जन्मदोषनिमित्तके तज्जातदोषविशेषे, स च–"कच्छोल्लुयाएँ घोडोएँ जाओ जो गहहेण छड्डेण। तस्स महायणमज्झे, आयारा पायडा हुंति॥१॥" इत्याद्यनेकविधः । जन्मसहजाविदोषे च । स्था० १० ठा० ।

जम्मपक्क–जन्मपक्व–त्रि० । स्वयमेव पक्वीभूते, विपा०१ श्रु०७ अ०।

जम्मपवाह–जन्मप्रवाह–पुं० । भवपरंपरायाम्, आव० ३ अ० ।

जम्मप्पवाह–जन्मप्रवाह–पुं० । 'जम्मपवाह' शब्दार्थे, आव०३अ०।

जम्मप्पभिइ–जन्मप्रभृति–अव्य० । जन्मन आरभ्येत्यर्थे, द–शै० १ तत्व ।

जम्मफल–जन्मफल–न० । जन्मसाध्ये, पञ्चा० ८ विव० ।

जम्मभूमि–जन्मभूमि–स्त्री० । जन्मस्थाने, " जननी जन्मभूमिश्च, स्वर्गादपि गरीयसी " । वाच० । " अवसेसा तित्थयरा, निक्खंता जम्मभूमीसु " । स० ।

जम्ममह–जन्ममह–पुं० । जन्ममहोत्सवे, श्रीमदर्हतां जन्ममहोत्सवकरणे देवानां देहानि कियन्मात्रैस्तैस्तैराणीति प्रश्ने, उत्तरम्-महोत्सवावसरे देवानां देहान्यभिषिच्यमानजिनसमानकालीनमनुजशरीरोचितानि संजायन्त इति ५५ प्र० । सेन० २ उल्ला० ।

जम्मा–याम्या–स्त्री० । दक्षिणस्यां दिशि, आ० म० प्र० । विशे० ।

जम्मादिदोसविरह–जन्मादिदोषविरह–पुं० । जातिजरामरणप्रभृतिदूषणवियोगे, पञ्चा० ८ विव० ।

जम्माभाव–जन्माभाव–पुं० । अनुत्पत्तौ, दश० ४ अ० ।

जम्मावट्ट–जन्मावर्त–पुं० । भवचक्रे, " रागद्वेषरसाविद्धं, मिथ्यादर्शनदुस्तरम् । जन्मावर्तं जगत् क्लिश्नं, प्रमादाद् भ्राम्यते भृशम् ॥ १ ॥ " आचा० १ श्रु० ३ अ० १ उ० ।

जम्मुप्पत्ति–जन्मोत्पत्ति–स्त्री० । जन्मना कर्मकृतप्रसूत्या उत्पत्तिर्यस्या सा तथा । औ० । प्रसवेनोत्पत्तौ, " सिद्धाणं कम्मवीरा वच्चे पुणरवि जम्मुप्पत्ती न भवति " औ० ।

जय–जय–पुं० । 'जि' जये, भावे अच् । परैरनभिभूयमानतायाम्, प्रतापवृद्धौ, रा० । ज्ञा० । वशीकरणे, ज्ञा० २६ ज्ञा० । परापेक्षया उत्कर्षलाभे, शत्रुपराङ्मुखीकरणे, संग्रामादिजये, वाच० । "जएण विजएण यद्धावेति ।" रा० । विपा० । औ० । कल्प० । नि० । तत्र जयः परैरनभिभूयमानता, प्रतापवृद्धिश्च । विजयस्तु परेषामसद्भूतानामभिभवोत्पादः । रा० । जयः सामान्यो विघ्नादिविषयः । विजयः स एव विशिष्टतरः प्रचण्डप्रतिपन्थादिविषयः । औ० । जयः स्वदेशे । विजयः परदेशे कल्प० १ क्षण । "जयविजयमंगलसएहिं" । औ० । जयविजयेत्यादिभिर्मङ्गलाभिधायकवचनशतैरित्यर्थः । औ० । जि–कर्तरि अच् । वाच० । स्वनामख्याते एकादशे चक्रवर्तिनि, प्रव० २०७ द्वार । त्रि० । स० । विमलजिनप्रथमनिक्षादातरि, स० । आ० म० । लीलावतीगुणधरयोः पितरि श्रेष्ठिविशेषे, दर्श० १ तत्व । तिथिशब्दस्य पुंसि निर्दिष्टतया तद्विशेषवाचकानां नन्दादिशब्दानामपि पुंसि प्रयोगे तु जय इति तृतीयाष्टमीत्रयोदशीषु तिथिषु, जं० १ वक्ष० ।

जगत्–न० । अतिशयगमनात् जगत् । भ० २० श० २ उ० । जीवे, पञ्चास्तिकायात्मके लोके, नं० । (अधिकार्थस्तु ' जग ' शब्दे अस्मिन्नेव भागे १३७२ पृष्ठे द्रष्टव्यः)

यत–पुं० । 'यम' उपरमे, यमनं यतं तद्विद्यते यस्य स यतः । "अस्मादिभ्यः" ॥ ७ । २ । ४६ ॥ इत्यप्रत्ययः । प्रमत्तगुणस्थानकवर्तिनि साधौ, कर्म० ४ कर्म० । यतमाने, त्रि० । उत्त० १ । सूत्र० । उपयुक्ते, आव० ४ अ० ।

जयं चरे जयं चिट्ठे, जयमासे जयं सए ।
जयं भुंजंतो भासंतो, पावं कम्मं न बंधइ ॥८॥

एतद्वृत्तिर्यथा-यतं चरेत् सूत्रोपदेशेन ईर्यासमितः, यतं तिष्ठेत् समाहितः । हस्तपादाद्यविक्षेपेण । यतमासीत उपयुक्त आकुञ्चनाद्यकरणेन । यतं स्वपेत् समाहितो रात्रौ प्रकामशय्यादिपरिहारेण । यतं भुञ्जानः सप्रयोजनमप्रणीतं प्रतरसिंहभक्षितादिना । एवं यतं भाषमाणः साधुजनाचया मृदुकालप्राप्तम् (८) दश० ४ अ० । " गच्छस्स अणुकंपणट्ठाए जयं चिट्ठति, जयं आसयति, जयं सुवित " यतनया यथा गर्भबाधा न भवति तथा तिष्ठति ऊर्द्धस्थानेन आस्ते आश्रयति चासने, स्वपिति चेति ज्ञा० १ श्रु० १ अ० ।

जयइ–जयति–जि–धा० । धातूनामनेकार्थकत्वाद् । बध्नाति इत्यर्थे, प्रा० ।

जयंत–जयन्त–न० । द्वीपसमुद्राणां चतुर्षु द्वारेषु स्वनामख्याते पश्चिमदिग्वर्तिनि द्वारे, (जी०) (एतद्विशेषवर्णकस्तु 'विजय' शब्दे विजयद्वारवद् ज्ञेयः)

तत्र तावज्जम्बूद्वीपसत्कजयन्तद्वारवक्तव्यता यथा–

कहि णं भंते ! जंबूदीवस्स जयंते णामं दारे पण्णत्ते ? । गोयमा ! जंबुद्दीवे दीवे मंदरस्स पव्वयस्स पच्चिमेणं पणयालीसं जोयणसहस्साइं जंबुद्दीवे पच्चिमावरंते लवणसमुद्दे पच्चत्थिमद्धस्स पुरत्थिमेणं सीतोदाए महानदीए उप्पिं एत्थ णं जंबुद्दीवस्स जयंते णामं दारे पण्णत्ते । तं चेव सोपमाणं जयंते देवे पच्चत्थिमेणं से रायहाणीए० जाव महिड्ढीए ।

अथ लवणसमुद्रसत्कजयन्तद्वारप्रतिपादनार्थमाह–

" कहि णं भंते ! " इत्यादि । क्व भदन्त ! लवणसमुद्रस्य जयन्तं द्वारं प्रज्ञप्तम् । भगवानाह-गौतम ! लवणसमुद्रस्य पश्चिमपर्यन्ते धातकीखण्डपश्चिमार्द्धस्य पूर्वतः सीताया महानद्या उपरि लवणसमुद्रस्य जयन्तं नाम द्वारं प्रज्ञप्तम् । एतद्वक्तव्यताऽपि विजयद्वारवद्वक्तव्या, नवरं राजधानीजयन्तद्वारस्य पश्चिमभागेन वक्तव्या । जी० ३ प्रति० । एवं शेषद्वीपसमुद्राणामपि जयन्तद्वारमवगन्तव्यम्, पञ्चानुत्तरविमानेषु स्वनामख्याते तृतीये विमाने, " सकुलोगेणं पंच अणुत्तरा महइमहा-

ख्या महाविमाणा पण्णत्ता तं जहा-विजये वेजयंते जयंते अपराजिए सव्वट्ठसिद्धे" । स्था० ५ ठा० ३ उ० । तात्स्थ्यात्-दृव्यपदेशो,यथा-पञ्चालदेशनिवासिनः पञ्चालाः इति,तद्वासिषु अनुत्तरदेवेषु, प्रज्ञा० १ पद । मेरोरुत्तरस्यां दिशि रुचकवर-पर्वतस्याष्टसु कूटेषु स्वनामख्याते सप्तमे कूटे, स्था० ४ ठा० । जि०-डः । वाच० । पञ्चविधानुत्तरोपपातिकानां देवानां तृतीये जयन्तविमानोद्भवे देवभेदे, पुं० । प्रज्ञा० १ पद । स० । आगामि-कालजाविनि प्रथमे वसुदेवे, ती० २१ कल्प । वज्रसेनसूरिणां चतुर्थे शिष्येषु मध्ये स्वनामख्याते तृतीये शिष्ये, यतः किल त-स्माच्चन्द्र शाखा निर्गता । कल्प० ८ क्षण । इन्द्रपुत्रे, "यथा जयन्तेन शचीपुरंदरौ" "त्रिविष्टपस्येव पतिं जयन्तः" इति । वाच० ।

जयंती-जयन्ती-स्त्री० । जि-डः । गौरा०-ङीष् । वाच० । स्वना-मख्यातायां वीरजिनपरमश्राविकायाम्, भ० १ श० ।

तत्प्रबन्धो यथा-

तेणं कालेणं तेणं समएणं कोसंबी णामं णयरी होत्था, वण्ण०-चंदोत्तरायणे चेइए, वण्ण०-तत्थ णं कोसंबीए णयरीए सहस्साणीयस्स रण्णो पोत्ते सयाणीयस्स रण्णो पुत्ते चेडगस्स रण्णो नत्तुए मिगावतीए देवीए अत्तए जयंतीए स-मणोवासियाए भत्तिज्जए उदायणे णामं राया होत्था । व-ण्ण०-तत्थ णं कोसंबीए णयरीए सहस्साणीयस्स रण्णो सुण्हा सयाणीयस्स रण्णो भज्जा चेडगस्स रण्णो धूया उदायणस्स रण्णो माया जयंतीए समणोवा-सियाए भाउज्जा मियावती णामं देवी होत्था । व-ण्ण०-तं जहा-०जाव सुरूवा ! समणोवासिया० जाव वि-हरइ । तत्थ णं कोसंबीए णयरीए सहस्साणीयस्स रण्णो धूया सयाणीयस्स रण्णो भगिणी उदायणस्स रण्णो पिउस्सा, मिगावतीए देवीए णणंदा वेसालीसावयाणं अरहंताणं पुव्वसिज्जातरी जयंती समणोवासिया होत्था, सुकुमाल० जाव सुरूवा । अभिगय० जाव विहरइ । तेणं कालेणं तेणं समएणं सामी समोसढे० जाव परिसा पज्जुवासइ । तए णं से उदायणे राया इमीसे कहाए लद्धट्ठे समाणे हट्ठतुट्ठे कोडुंबियपुरिसे सद्दावेइ, सद्दावेइत्ता एवं वयासी-खिप्पा-मेव भो देवाणुप्पिया ! कोसंबिं णयरिं सब्भिंतरबाहिरियं एवं जहा कूणिओ तहेव सव्वं० जाव पज्जुवासइ । तए णं सा जयंती समणोवासिया इमीसे कहाए लद्धट्ठा समाणी हट्ठतुट्ठा जेणेव मिगावती देवी तेणेव उवागच्छइ, उवाग-च्छइत्ता एवं वयासी-एवं जहा णवमसए उसभदत्तो० जाव जविस्सइ । तए णं सा मियावई देवी जयंतीए समणोवा-सियाए जहा देवाणंदा० जाव पडिसुणेइ । तए णं सा मि-यावई देवी कोडुंबियपुरिसे सद्दावेइ, सद्दावेइत्ता एवं वयासी-खिप्पामेव भो देवाणुप्पिया ! लहुकरणजुत्ता रोहिया० जाव धम्मियं जाणप्पवरं जुत्तामेव उवट्ठावेह० जाव उवट्ठवेंति० जाव पच्चप्पिणंति । तए णं सा मियावई देवी जयंतीए समणोवासियाए सद्धिं एहाया कयबलिकम्मा० जाव सरीरा बहूहिं खुज्जाहिं० जाव अंतेउराओ णिग्गच्छंति णिग्गच्छंतित्ता जेणेव बाहिरिया उवट्ठाणसाला जेणेव धम्मिए जाणप्पवरे तेणेव उवागच्छइ, उवागच्छइत्ता० जाव दुरूढा । तए णं सा मिगावती देवी जयंतीए समणो-वासियाए सद्धिं धम्मियं जाणप्पवरं दुरूढा समाणी णियगपरियाल जहा उसभदत्तो० जाव धम्मियाओ जाण प्पवराओ पच्चोरुहइ । तएणं सा मियावई देवी जयंतीए समणोवासियाए सद्धिं बहूहिं खुज्जाहिं जहा देवाणंदा० जाव वंदइ णमंसइ उदायणं रायं पुरओ कट्टु ठिइया चेव पज्जुवासइ । तए णं समणे भगवं महावीरे उदायणस्स रण्णो मियावईए देवीए जयंतीए समणोवासियाए तीसे य महइ० जाव धम्मं परिकहेइ० जाव परिसा पडिगया उदायणे पडिगए मिगावई वि पडिगया । तए णं सा ज-यंती समणोवासिया समणस्स भगवओ महावीरस्स अंतिए धम्मं सोच्चा णिसम्म हट्ठतुट्ठा समणं भगवं महावीरं वंदइ, णमंसइ,वंदित्ता णमंसित्ता एवं वयासी-कहण्णं भंते ! जीवा गुरुयत्तं हव्वमागच्छंति?।जयंती!पाणाइवाएणं०जाव मिच्छादं-सणसल्लेणं एवं खलु जीवा गुरुयत्तं हव्वमागच्छंति । एवं जहा पढमसए० जाव वीईवयंति । भवसिद्धियत्तं णं भंते ! जीवा णं किं सभावओ य परिणामओ य ?। जयंती ! सब्भावओ य णो परिणामओ य । सव्वे वि णं भंते ! भवसिद्धिया जीवा सिज्झिस्संति ? हंता जयंती ! सव्वे वि णं भवसिद्धिया जीवा सिज्झिस्संति । जइ णं भंते ! सव्वे वि भवसिद्धिया जीवा सिज्झिस्संति तम्हा णं भवसिद्धियविरहिए लोए भविस्सइ ? णो इणट्ठे समट्ठे । से केणं खाइणं अट्ठेणं भंते ! एवं वुच्चइ सव्वे वि णं भवसिद्धिया जीवा सिज्झि-स्संति । णो चेव णं भवसिद्धियविरहिए लोए भविस्सइ ?। जयंती ! से जहाणामए सव्वागाससेढी सिया अणादिया अणवदग्गा परित्ता परिवुडा सा णं परमाणुपोग्गलमेत्तेहिं खंडेहिं समए समए अवहीरमाणी अवहीरमाणी अणंताहिं उस्सप्पिणी ओसप्पिणीहिं अवहीरइ णो चेव णं अवहिरिया सिया, से तेणट्ठेणं जयंती ! एवं वुच्चइ सव्वे वि णं० जाव भविस्सइ । सु-त्तत्तं भंते ! साहू जागरियत्तं साहू ?। जयंती ! अत्थे-गइयाणं जीवाणं सुत्तत्तं साहू अत्थेगइयाणं जीवाणं जा-गरियत्तं साहू । से केणट्ठेणं भंते ! एवंवुच्चइ अत्थेगइया-णं० जाव साहू ?। जयंती ! जे इमे जीवा अहम्मिया अहम्मा-णुया अहम्मिट्ठा अहम्मक्खाई अहम्मपलोई अहम्मपल-

ज्जणा अहम्मसमुदायारा अहम्मेणं चेव वित्तिं कप्पेमाणा विहरंति, एएसि णं सुत्तत्तं साहू, एएणं जीवा सुत्ता। समाणा णो बहूणं पाणजूयाणं जीवाणं सत्ताणं दुक्खणयाए सोयणयाए० जाव परियावणयाए वट्टंति एएणं जीवा सुत्ता समाणा अप्पाणं वा परं वा तदुभयं वा णो बहूहिं अहम्मियाहिं संजोयणाहिं संजोएत्तारो भवंति एएणं जीवाणं सुत्तत्तं साहू। जयंती! जे इमे जीवा धम्मत्थिया धम्माणुगा० जाव धम्मेणं चेव वित्तिं कप्पेमाणा विहरंति, एएसि णं जीवाणं जागरियत्तं साहू एएणं जीवा जागरमाणा बहूणं पाणाणं अदुक्खणयाए० जाव अपरियावणयाए वट्टंति, तेणं जीवा जागरा समाणा अप्पाणं वा परं वा तदुभयं वा बहूहिं धम्मियाहिं संजोयणाहिं संजोएत्तारो भवंति, एएणं जीवा जागरमाणा धम्मजागरियाए अप्पाणं जागरइत्तारो भवंति, एएसि णं जीवाणं जागरियत्तं साहू, से तेणट्ठेणं जयंती! एवं वुच्चइ अत्थेगइयाणं जीवाणं सुत्तत्तं साहू, अत्थेगइयाणं जीवाणं जागरियत्तं साहू। बलियत्तं भंते! साहू दुब्बलियत्तं साहू? जयंती! अत्थेगइयाणं जीवाणं बलियत्तं साहू अत्थेगइयाणं जीवाणं दुब्बलियत्तं साहू। से केणट्ठेणं भंते! एवं वुच्चइ० जाव साहू? जयंती! जे इमे जीवा अहम्मिया० जाव विहरंति, एएसि णं जीवाणं दुब्बलियत्तं साहू एएणं जीवा, एवं जहा सुत्तस्स तहा दुब्बलियत्तस्स वत्तव्वया जाणियव्वा, बलियत्तस्स जहा जागरस्स तहा भाणियव्वं० जाव संजोएत्तारो भवंति, एएसि णं जीवाणं बलियत्तं साहू से तेणट्ठेणं जयंती! एवं वुच्चइ तं चेव० जाव साहू। दक्खत्तं भंते! साहू आलसियत्तं साहू? जयंती! अत्थेगइयाणं जीवाणं दक्खत्तं साहू अत्थेगइयाणं जीवाणं आलसियत्तं साहू। से केणट्ठेणं भंते! एवं वुच्चइ तं चेव० जाव साहू? जयंती! जे इमे जीवा अहम्मिया० जाव विहरंति। एएसि णं जीवाणं आलसियत्तं साहू एएसि णं जीवा अलसाउमाणा णो बहूणं जहा सुत्ता तहा अलसा भाणियव्वा जहा जागरा तहा दक्खा जाणियव्वा० जाव संजोएत्तारो भवंति। एएणं जीवा दक्खा समाणा बहूहिं आयरियवेयावच्चेहिं उवज्झायवेयावच्चेहिं थेरवेयावच्चेहिं तवस्सीवेयावच्चेहिं गिलाणवेयावच्चेहिं सेहवेयावच्चेहिं कुलवेयावच्चेहिं गणवेयावच्चेहिं संघवेयावच्चेहिं साहम्मियवेयावच्चेहिं अत्ताणं संजोएत्तारो भवंति, एएसि णं जीवाणं दक्खत्तं साहू से तेणट्ठेणं तं चेव० जाव साहू। सोईंदियवसट्टेणं भंते! जीवे किं बंधइ एवं जहा कोहवसट्टे तहेव० जाव अणुपरियट्टइ। एवं चक्खिंदियवसट्टे वि,० जाव फासिंदियवसट्टे वि,० जाव अणुपरियट्टइ। तए णं सा जयंती समणोवासिया समणस्स भगवओ महावीरस्स अंतियं एयमट्ठं सोच्चा णिसम्म हट्ठतुट्ठा सेसं जहा देवाणंदा तहेव पव्वइए० जाव सव्वदुक्खपहीणा सेवं भंते! भंतेत्ति॥

"तेणं कालेणं" इत्यादि। (पोत्ते त्ति) पौत्रः पुत्रस्यापत्यम् (चेडगस्स त्ति) वैशालीराजस्य (नत्तुए त्ति) नप्ता दौहित्रः (भाउज्ज त्ति) भ्रातृजाया (वेसालीसावगाणं अरहंताणं पुव्वसिज्जायरी त्ति) वैशालिको भगवान् महावीरस्तस्य वचनं शृण्वन्ति श्रावयन्ति वा तच्छ्रुतिकत्वादिति, वैशालिकश्रावकास्तेषाम् आर्हतानां अर्हद्देवतानां, साधूनामिति गम्यम् पूर्वशय्यातरा प्रथमस्थानदात्री साधवो ह्यपूर्वे समायातास्तद्गृह एव प्रथमं वसति याचन्ते, तस्याः स्थानदातृत्वेन प्रसिद्धत्वादिति, सा पूर्वशय्यातरा (सभावओ त्ति) स्वभावतः पुद्गलानां मूर्तत्ववत् (परिणामओ त्ति) परिणामो नाजूतस्य भवनेन पुरुषस्य तारुण्यवत्। (सव्वे वि णं भंते! भवसिद्धिया जीवा सिज्झिस्संति त्ति) भवा भाविनी सिद्धिर्येषां ते भवसिद्धिकास्ते सर्वेऽपि भदन्त! जीवाः सेत्स्यन्तीति प्रश्नः। हन्तेत्यादि तूत्तरम् अयं चास्यार्थः-समस्ता अपि भवसिद्धिका जीवाः सेत्स्यन्ति अन्यथा भवसिद्धिकत्वमेव न स्यादिति। अथ सर्वभवसिद्धिकानां सेत्स्यमानतोऽभ्युपगमे भवसिद्धिकं शून्यता लोकस्य स्यात्। नैवं समयज्ञता। तथाहि-सर्व एवानागतकालसमया वर्तमानतां लप्स्यन्ते। "भवति स नामातीतः, प्राप्तो यो नाम वर्तमानत्वम्। पश्यँश्च नाम स भवति, यः प्राप्स्यति वर्त्तमानत्वम्॥१॥" इत्यभ्युपगमान्न चानागतकालसमयविरहितो लोको भविष्यतीति। अथैतामेवाशङ्कां जयन्ती प्रश्नद्वारेणाऽस्मदुक्तसमयज्ञतापेक्षया ज्ञातान्तरेण परिहर्तुमाह-"जह णं" इत्यादि। इत्येके व्याख्यान्ति। अन्ये तु व्याचक्षते-सर्वेऽपि भदन्त! भवसिद्धिका जीवाः सेत्स्यन्ति, ये केचन सेत्स्यन्ति ते सर्वेऽपि भवसिद्धिका एव, नाभवसिद्धिका एकोऽप्यन्यथा भवसिद्धिकत्वमेव न स्यादित्यभिप्रायः,'हन्ता' इत्युत्तरम्। अथ यदि ये केचन सेत्स्यन्ति ते सर्वेऽपि भवसिद्धिका एव, नाभवसिद्धिक एकोऽपीत्यभ्युपगम्यते, तदा कालेन सर्वेऽपि भवसिद्धिकानां सिद्धिगमनात् भव्यशून्यतो जगतः स्यादिति जयन्त्याः शङ्कां तत्परिहारं च दर्शयितुमाह-"जइ णं" इत्यादि। (सव्वागाससेढि त्ति) सर्वाकाशस्य बुद्ध्या चतुरस्रप्रतरीकृतस्य श्रेणिः प्रदेशपङ्क्तिः सर्वाकाशश्रेणिः (परित्त त्ति) एकप्रदेशिकत्वेन विष्कम्भाभावेन परिमिता (परिवुड त्ति) श्रेण्यन्तरैः परिकरिता स्वरूपमेतत्तस्याः। अत्रार्थे वृद्धोक्ता भावनागाथा भवन्ति—

"तो भणइ किं ण सिज्झंति, अहव किमनंत सावसेसत्ती।
निल्लेवणं न जुज्जइ, तेसिं तो कारणं अन्नं॥१॥"

अयमर्थः-यदि भवसिद्धिकाः सेत्स्यन्तीत्यपगम्यते, ततो भणति शिष्यः कस्मान्न ते सर्वेऽपि सिध्यन्ति, अन्यथा भवसिद्धिकत्वस्यैवाभावात्। अथवा-अपरं दूषणं कस्मादभव्यसावशेषत्वाद्भव्याव्यशेषत्वेन अनन्तान् विमुच्येत्यर्थः। तेषां अनन्तानां निर्लेपनं न युज्यते युज्यत एवेति भावः। यस्मादेवं ततः कारणं सिद्धेर्हेतुरन्यद्द्रव्यत्वातिरिक्तं वाच्यं, तत्र सति सर्वजन्तुनिर्लेपनप्रसङ्गादिति।

" जएणइ तेसिमभव्वे, विगइ अनिट्ठेवण न उ विरोहो ।
ननु सव्वभव्वसिद्धी, सिद्धा सिद्धंतसिद्धीओ ॥ २ ॥"

अयमर्थो भण्यते-अत्रोत्तरं नव्यत्वमेव सिद्धिगमनकारणं न त्वन्यत्किञ्चित्तच्च सत्यपि भव्यत्वे सिद्धिगमनकारणे तेषां भव्यानामभव्यानामपि प्रति भव्यानप्याश्रित्य अनिर्लेपनमव्यवच्छेदः, अभव्यानवशिष्य यद्भव्यानां निर्लेपनमुक्तम तदपि नेत्यर्थः। न तु न पुनरिहार्थे विरोधो बाधाऽस्ति सिद्धान्तसिद्धत्वादेतदेवाह-ननु इत्यादि न हि सर्वभव्यसिद्धिः सिद्धा सिद्धान्तसिद्धेरिति ।

" किंह पुण भव्व बहुत्ता, सव्वागासप्पएसविद्रुंता ।
न वि सिज्झिहिंति तो भण-इ किं तु भव्वत्तणं तेसिं ॥ ३ ॥
जह दोऊणं भव्वा, वि केइ सिद्धिं न चेव गच्छंति ।
एवं ते वि अभव्वा, को वि विसेसो भवे तेसिं ॥ ४ ॥
भण्णइ जव्वो जोगो, दारुदलियंति वा वि पज्जाया ।
जोगो वि पुण न सिज्झइ, कोइ रुक्खाइदिट्ठंता ॥ ५ ॥
परिभाविएण न जोग्गा, बहवो गोसीसचंदणदुमाइ ।
संति अ जोगा वि इहं, अण्णे परंपरभेडाई ॥ ६ ॥
न य पुण पडिमुप्पायण-संपत्ती होइ सव्वजोग्गाणं ।
जेसिं पि असंपत्ती, न य तेसिं जोग्गया होइ ॥ ७ ॥
किं पुण जा संपत्ती, सा नियमा होइ जोग्गरुक्खाणं ।
न य होई अजोग्गाणं, एमेव य नव्वसिज्झणया ॥ ८ ॥
सिज्झिस्संति य नव्वा, सव्वे विहि नाणिय च जं पहुणा ।
तं पि य एयाद्द चिय, दिट्ठीए जयंति पुच्छाए ॥ ९ ॥
नव्वानामेव सिद्धिरित्येतया दृष्ट्या मतेनेति ।
अहवा-पडुच्च कालं, न सव्वभव्वाण होइ वोच्छित्ती ॥ १० ॥
जं तीतणागयाओ, अद्धाओ दो वि तुल्लाओ ।
तत्थातीतद्धाए, सिद्धी एक्को अणंतनागो सि ।
कामं तावइओ चिय, सिज्झिहिइ अणागयद्धाए ॥ ११ ॥
ते दो वणंतनागा, होउं सो चिय अणंतनागो सि ।
एवं पि सव्वनव्वा-ण सिद्धिगमणं च सिद्दिट्ठं ॥ १२ ॥"

तौ द्वावप्यनन्तभागौ, मीलितौ सर्वेऽजीवानामनन्त एव भाग इति । यत्पुनरिदमुच्यते-अतीताद्धातोऽनागताद्धाऽनन्तगुणेति । तन्मतान्तरं, तस्य चेदं बीजं, यदि द्वे अपि ते समाने स्यातां, तदा मुहूर्तादावतिक्रान्ते अतीताद्धा समधिका, अनागताद्धा च हीनेति इतं समत्वम, एवं च मुहूर्तादिभिः प्रतिक्षणं क्षीयमाणाऽप्यनागताद्धा, यतो न क्षीयते ततोऽवसितं ततः साऽनन्तगुणेति, यस्तूभयोः समत्वं तदेवं यथाऽनागताद्धाया अन्तो नास्ति एवमतीताद्धाया आदिरिति समनेति जीवाश्च न सुप्ताः सिध्यन्ति, किं तर्हि जागरा एवेति सुप्तजागरसूत्रं, तत्र च (सुत्त त्ति) निद्रावशत्वम (जागरियत्ति) जागरणं जागरः सोऽस्यास्तीति जागारिकस्तद्भावो जागरिकत्वम् (अहम्मिय त्ति) धर्मेण श्रुतचारित्ररूपेण चरन्तीति धार्मिकास्तच्छिषेधाद्धार्मिकाः । कुत एतदेवमित्यत आह-(अहम्माणुया) धर्मं श्रुतरूपमनुगच्छन्तीति धर्मानुगास्तच्छिषेधाद्धर्मानुगाः । कुत एतदेवमित्यत आह-(अहम्मिट्ठा) धर्मः श्रुतरूप एवेष्टो वल्लभः पूजितो वा येषां ते धर्मेष्टाः, धर्मिणां वेष्टा धर्मेष्टाः, अतिशयेन वा धर्मिणो धर्मिष्ठास्तच्छिषेधाद्धर्मिष्ठाः। अधर्मेष्टाः। अधर्मिष्ठा वा, अत एव (अहम्मक्खाइ) न धर्ममाख्यान्तीत्येवंशीला अधर्माख्यायिनः । अथवा-न धर्मात् ख्यातिर्येषां ते ऽधर्मख्यातयः । (अहम्मपलोइ त्ति) न धर्ममुपादेयतया प्रलोकयन्ति ये तेऽधर्मप्रलोकिनः । (अहम्मपलज्जण त्ति) न धर्मे प्रवर्त्तयन्ते आसज्जन्ति ये ते अधर्मप्रवर्जनाः । एवं च-(अहम्मसमुदायार त्ति) न धर्मरूपश्चारित्रात्मकः समुदाचारस्समाचारः स प्रमोदो यऽऽचारो येषां ते तथा, अत एव " अहम्मण ेत्त" इत्यादि । अधर्मेण चारित्रश्रुतविरुद्धरूपेण वृत्तिं जीविकां कल्पयन्तः कुर्वाणा इति, अनन्तरं सुप्तजागरता साधुत्वं प्ररूपितम । अथ दुर्बलादीनां तथैव तदेव प्ररूपयन् सूत्रद्वयमाह-"बलियत्तं ते !" इत्यादि । (बलियत्तं ति) बलमस्यास्तीति बलिकस्तद्भावो बलिकत्वम् (दुब्बलियत्तं ति) दुष्टं बलमस्यास्तीति दुर्बलिकस्तद्भावो दुर्बलिकत्वं, दक्षत्वं च तेषां साधु येनेन्द्रियवशानां यद्भवति तदाह-"सोइंदिय" इत्यादि । (सोइंदियवसट्ठे त्ति) श्रोत्रेन्द्रियवशेन तत्परतन्त्र्येण श्रुतः पीमितः श्रोत्रेन्द्रियवशार्तः, श्रोत्रेन्द्रियवशं वा, ऋतौ गतः श्रोत्रेन्द्रियवशार्तः। भ० १२ श० २ उ०। सप्तमवसुदेवस्य मातरि, स० । आव० । अकम्पिताऽभिधानष्टमगणधरस्य मातरि, आ० म० प्र० । पार्श्वशिष्यायां पश्चात् परिव्राजिकीभूतायामुत्पलभगिन्याम्, सा हि स्वभगिनीं सोमासहिता चोरैरुत्सङ्गिते अवटे क्षिप्यमाणं भगवन्तं राजपुरुषानुपशमय्य मुमोच । आ० म० प्र० । पूर्वरुचकवास्तव्यायां सप्तम्यां दिक्कुमार्यास्, स्त्री० । जं० । आ० म० । ति० । आ० चू० । स्था० । सर्वेषां ग्रहाणां चतसृष्वग्रमहिषीषु तृतीयायामग्रमहिष्याम्, जं० ७ वक्ष० । जी० । ज० । पश्चिमविदेहस्थ सीताया उत्तरदिग्भूतिमहावप्रविजयराजधान्याम्, जं०४ वक्ष० । स्था० रतिकरपर्वतराजधानीविशेषे, स्त्री० २४ कल्प । जी० । स्था० । नवम्यां तिथौ, जं० ७ वक्ष० । कल्प० । चं० प्र० । पुरीविशेषे, यत्र किल गुणचन्द्रेण सुरदत्तगृहपतिभार्या वसुन्धरा मालाहृतमिक्षां दातुमुद्यता विनिवारिता । पिं० । अष्टमजिनशिबिकायाम्, स० । महौषधिविशेषे, स्त्री० ७ कल्प । तथा हि ।

" जयन्ती मदगन्धाख्या, तिक्ता चैव कटूष्णिका ।
कृमिमूत्रामजित् ख्याता, कण्ठशोषणकृन्मता ॥ १ ॥
कृष्णा रसायनी तत्र, सैव सर्वत्र पूज्यते ।
तच्छाकं विषदोषघ्नं, चक्षुष्यं मधुरं हिमम् " ।

पताकायाम्, वाच० । " दो जयंतीओ " । स्था० २ ठा० ३ उ० । " पुव्वसिज्जायरी जयंती " इत्यत्र पूर्वशय्यातरीशब्दस्यार्थः । प्रस्याख्य इति प्रश्ने, उत्तरम्-अपूर्वसाध्वादिः समायातस्तद्गृह एव प्रथमं वसति याचते तस्याश्च स्थानदातृत्वेन प्रसिद्धत्वात्पूर्वशय्यातरीति । भगवतीसूत्रवृत्त्यनुसारेण पूर्वशय्यातरीशब्दार्थो ज्ञेय इति । १२७ प्र० सेन० १ उल्ला० ।

जयकित्ति–जयकीर्ति–पुं० । अञ्चलगच्छीये मेरुतुङ्गसूरिशिष्ये जयकेशरिसूरिशीलरत्नसूरिणो गुरौ, विक्रमसंवत् १४३३ वर्षे अयं जातः, १४४४ वर्षे प्रव्रजितः, १४६७ वर्षे सूरिपदं प्राप्तः, १४७३ वर्षे गच्छेशपदं प्राप्तः, १५०० वर्षे स्वर्गमगमत्। एतन्नामा द्वितीयो विजयसिंहसूरेः शिष्य आसीत, येन शीलोपदेशमाला नाम ग्रन्थो विरचितः । जै० इ० ।

जयकेसरसूरि–जयकेशरसूरि–पुं० । अञ्चलगच्छीये जयकीर्तिसूरिशिष्ये सिद्धान्तसागरगुरौ, विक्रमसंवत् १४६१ वर्षे जातः, १४७५ दीक्षितः, १४९४ आचार्यो जातः, १५०१ गच्छनायकः, १५४२ स्वर्गतश्चायमभवत् । जै० इ० ।

जयघोस–जयघोष–पुं० । स्वनामख्याते मुनौ, (उत्त०)

वाराणस्यां किल द्विजौ यमलौ भ्रातरौ जयघोषविजयघोषौ अभूतां तयोरेको जयघोषनामा गङ्गायां स्नातुं गतः, कुररसर्पमण्डूकग्रासं दृष्ट्वा प्रव्रजितः । तद्वार्त्ता चैवम—

माहणकुलसंभूओ, आसि विप्पो महाजसो ।
जायाई जमजण्णम्मि, जयघोसे त्ति नामओ ॥ १ ॥

ब्राह्मणकुले संभूतः विप्रकुले समुत्पन्नः, 'जयघोष' इति नामतो विप्र आसीत् । अत्र हि यत् ब्राह्मणकुलसंभूतः विप्र आसीत् इत्युक्तं तत् ब्राह्मणजनकादुत्पन्नोऽपि जननीजातिहीनत्वेऽब्राह्मणः स्यात् अतो विप्र इत्युक्तम् । कीदृशो जयघोषः ? (जमजण्णम्मि) यमं यज्ञे यायाजी यायजीत्येवंशीलो यायाजी यमाः अहिंसासत्याऽस्तेयब्रह्मनिर्लोभाः पञ्च, ते एव यज्ञो यमयज्ञस्तस्मिन् यमयज्ञे अतिशयेन यज्ञकरणशीलः अर्थात्पञ्चमहाव्रतरूपे यज्ञे याज्ञिको जातः, यतिर्जात इत्यर्थः ॥ १ ॥

इंदियग्गामनिग्गाही, मग्गगामी महामुणी ।
गामाणुगामं रीयंतो, पत्तो वाणारसिं पुरिं ॥ २ ॥

स महामुनिः एकाकी साधुर्ग्रामानुग्रामम्(रीयंतो इति) विचरन् वाराणसीं पुरीं प्राप्तः। कीदृशः स महामुनिः?। इन्द्रियग्रामनिग्राही इन्द्रियाणां ग्रामं समूहम् इन्द्रियपञ्चकं निगृह्णाति मनोज्ञेन वशीकरोतीति इन्द्रियग्रामनिग्राही, पुनः कीदृशः?। स मार्गगामी मार्गं मोक्षं गच्छति स्वयम्, अन्यान् गमयति इति मार्गगामी ।

वाणारसीए बहिया, उज्जाणम्मि मणोरमे ।
फासुए सिज्जसंथारे, तत्थ वासमुवागए ॥ ३ ॥

स साधुर्वाराणस्यां बाह्ये, मनोरमे मनोहरे, उद्याने प्रासुके जीवरहिते शय्यासंस्तारके दर्भतृणादिरचिते शयनोपवेशनान्विते तत्र (वासं इति) वसतिं कर्तुमुपागतः ॥ ३ ॥

अह तेणेव कालेणं, पुरीए तत्थ माहणे ।
विजयघोसे त्ति नामेणं, जन्नं जयइ वेयवी ॥ ४ ॥

अथ अनन्तरं तस्मिन्नेव काले यस्मिन् काले साधुर्वने समागतः तस्मिन्नेव काले तस्यां वाराणस्यां पुर्यां 'विजयघोष' इति नाम्ना ब्राह्मणो यज्ञं यजति यज्ञं करोति। कीदृशो विजयघोषः?। वेदवित् वेदज्ञः ॥ ४ ॥

अह से तत्थ अणगारे, मासक्खमणपारणे ।
विजयघोसस्स जन्नम्मि, भिक्खट्ठा उवट्ठिए ॥ ५ ॥

अथ अनन्तरं तत्र विजयघोषस्य यज्ञे स पूर्वोक्तो जयघोषोऽनगारो मासक्षमणस्य पारणे भिक्षाया अर्थं भिक्षायै उपस्थितः ॥ ५ ॥

समुवट्ठियं तहिं संतं, जायगो पडिसेहए ।
न हु दाहामि ते भिक्खं, भिक्खू जायाहि अन्नओ ॥६॥

तदा याजको यजमानो विजयघोषो ब्राह्मणस्तत्र भिक्षार्थं समुपस्थितं सन्तं तं साधुं प्रतिषिध्यति निवारयति, कथं निवारयतीत्याह–हे भिक्षो ! त्वम् अन्यतोऽन्यत्र यादि (ते) तुभ्यं भिक्षां न ददामि ॥ ६ ॥

जे य वेयविओ विप्पा, जण्णट्ठा य जिइंदिया ।
जोइसंगविओ जे य, जे य धम्मस्स पारगा ॥ ७ ॥

जे समत्था समुद्धत्तुं, परं अप्पाणमेव य ।
तेसिं अन्नमिणं देयं, भो भिक्खू सव्वकामियं ॥८॥ युग्मम्

विजयघोषो वदति–हे भिक्षो ! अस्मिन् यज्ञे इदं प्रत्यक्षं दृश्यमानम् अन्नं सर्वकामिकं षड्रससिद्धं तेषां पात्राणां देयं वर्तते तेभ्यो देयमस्ति । न तु तुभ्यं देयं वर्तते । तेषां केषाम् ?। ये आत्मानं स्वकं यमात्मानम् च पुनः, परं परस्यात्मानं समुद्धर्तुं समर्थाः । ये संसारसमुद्रात् आत्मानं तारयितुं समर्थाः परमपि तारयितुं समर्थाः । तेषां प्रदेयमस्ति इति भावः ॥७॥ पुनः केषां प्रदेयमन्नं वर्तते ? ये विप्रा वेदविदो वेदज्ञाः तेषाम् । पुनर्ये यज्ञार्थाः यज्ञ एव अर्थः प्रयोजनं येषां ते यज्ञार्थास्तेषाम् । पुनर्ये जितेन्द्रिया इन्द्रियाणां जेतारस्तेषाम् । पुनर्ये ज्योतिषाङ्गविदः ज्योतिःशास्त्रस्याङ्गवेत्तारः । यद्यपि ज्योतिःशास्त्रं वेदस्याङ्गमेवास्ति वेदविद इत्युक्ते आगतम् तथापि अत्र ज्योतिःशास्त्रस्य पृथगुपादानं प्राधान्यख्यापनार्थे तस्मात् एतद्गुणविशिष्टा ये ब्राह्मणास्तेषां देयमस्ति, पुनर्ये धर्मशास्त्राणां पारगास्तेषां देयम् अत्र अन्नं वर्तते, इत्यर्थः ॥८॥

सो तत्थेवं पडिसिद्धो, जायगेण महामुणी ।
न वि रुट्ठो न वि तुट्ठो, उत्तमट्ठगवेसओ ॥ ९ ॥

स महामुनिर्जयघोषः तत्र यज्ञे (एवं) अमुना प्रकारेण विजयघोषेण याजकेन यज्ञकारकेण प्रतिषिद्धः सन् निवारितः सन् नापि रुष्टो नापि तुष्टः समभावयुक्तोऽभूत् । कीदृशः स महामुनिः ?। उत्तमार्थगवेषको मोक्षाभिलाषी ॥ ९ ॥

नऽन्नट्ठं पाणहेउं वा, न वि निव्वाहणाय वा ।
तेसिं विमोक्खणट्ठाए, इमं वयणमब्बवी ॥ १० ॥

स महामुनिस्तेषां विजयघोषादिब्राह्मणानां विमोक्षणार्थं कर्मबन्धनात् मुक्तिकरणार्थम् इदं वचनम् अब्रवीत्–परम् अन्नपानलाभार्थं न अब्रवीत्। एवं ज्ञात्वा न अब्रवीत्–येन अहं एतस्य उपदेशं ददामि एते प्रसन्ना मह्यं सम्यग् अन्नपानं ददति इति बुद्ध्या न अब्रवीत् । किं तु तेषां संसारनिस्तारार्थमब्रवीत् । वा अथवा निर्वाहणाय अपि न वस्त्रपात्रादिकानां निर्वाहः पश्चाद् मम भविष्यति तेन हेतुना न अब्रवीदिति भावः ॥ १० ॥

न विजाणासि वेयमुहं, न वि जन्नाण जं मुहं ।
नक्खत्ताण मुहं जं च, जं च धम्माण वा मुहं ॥११॥

किम् अब्रवीत् ? इति आह–भो ब्राह्मण ! विजयघोष ! त्वं वेदमुखं न विजानासि । पुनर्यत् यज्ञानां मुखं वर्तते तदपि त्वं न जानासि । पुनर्यत् नक्षत्राणां मुखं तदपि त्वं न जानासि । च पुनर्यद्धर्माणां मुखं वर्तते तदपि त्वं न जानासि ॥ ११ ॥

पुनः स साधुर्विजयघोषं ब्राह्मणं प्रति पृच्छति–

जे समत्था समुद्धत्तुं, परं अप्पाणमेव य ।
ण ते तुमं विजाणासि, अह जाणासि तो भण ? ॥१२॥

हे विजयघोष ! ये परं च पुनः आत्मानम् । एवं समुद्धर्तुं संसारात् निस्तारयितुं समर्थास्तान् स्वपरनिस्तारकान् त्वं न जानासि । अथ चेत् त्वं जानासि तदा (भण) कथय ? ॥ १२ ॥

तस्स खेवपमोक्खं च, अचयंतो तहिं दिओ ।
सपरिसो पंजलिउडो, पुच्छई तं महामुणिं ॥१३॥

(तर्हि इति) तत्र यज्ञे द्विजो विजयघोषः प्राञ्जलिपुटो बद्धाञ्जलिः सन्, तं महामुनिं पृच्छति-कीदृशो द्विजः ? सपरिषत् बहुभिर्मनुष्यैः सहितः। पुनः स द्विजः कीदृशः सन् ?। तस्य सामोराक्षेपं श्रवनस्तस्य प्रमोक्षं प्रतिवचनमुत्तरम् (अयंतो इति) दातुम् अशक्नुवन् श्रवनस्योत्तरं दातुमसमर्थः सन् दातुमित्यध्याहारः ॥ १३ ॥

वेयाणं च मुहं बूहि, बूहि जन्नाणजं मुहं ।
नक्खत्ताण मुहं बूहि, जं च धम्माण वा मुहं ॥ १४ ॥

हे महामुने ! त्वमेव वेदानां मुखं ब्रूहि ?। पुनर्यत् यज्ञानां मुखं तन्मे ब्रूहि?। पुनर्नक्षत्राणां मुखं ब्रूहि ?। पुनर्यत् धर्माणां मुखं तन्मे ब्रूहि ॥ १४ ॥

जे समत्था समुद्धत्तुं, परं अप्पाणमेव य ।
एयं मे संसयं सव्वं, साहू कहसु पुच्छिओ ॥ १५ ॥

पुनर्ये पुरुषाः परं, च पुनरात्मानमपि संसारात् उद्धर्तुं समर्थाः सन्ति एतन्मे मम शंसयविषयं वेदमुखादिकम् अस्ति। हे साधो! त्वं मया पृष्टः सन् सर्वं कथयस्व ॥ १५ ॥

इत्युक्ते पुनराह-

अग्गिहोत्तमुहा वेया, जन्नट्ठी वेयसा मुहं ।
नक्खत्ताण मुहं चंदो, धम्माणं कासवो मुहं ॥१६॥

हे विजयघोष ! वेदा अग्निहोत्रमुखाः, अग्निहोत्रं मुखं येषां ते अग्निहोत्रमुखाः वेदानां मुखमग्निहोत्रम् । अग्निहोत्रं हि अग्निकारिका, सा च इयम्-"कर्मेन्धनं समाश्रित्य,दृढा सद्भावनाहुतिः। धर्मध्यानाग्निना कार्या, दीक्षितेनाग्निकारिका ॥१॥" इत्यादि यज्ञविधिविधायिका कारिका गृह्यते। वेदानां यज्ञानां एषा एव कारिका मुखं प्रधानम । अस्याः कारिकायाः अर्थः-कर्माणि इन्धनानि कृत्वा उत्तमा भावना आहुतिर्विधेया धर्मध्यानाग्नौ दीक्षितेन इयम् अग्निकारिका विधेया पुनर्हे ब्राह्मण ! विजयघोष ! यज्ञार्थी पुरुषो वेदसां यज्ञानां मुखं वर्तते, यज्ञो दशप्रकारधर्मः। " सत्यं तपश्च सन्तोषः, क्षमा चारित्रमार्जवम । ब्रह्मा धृतिरहिंसा च, सम्वरश्च तथा परः ॥ १ ॥ " इति दशप्रकारः। स चात्र प्रस्तावाद्भावयज्ञस्तं यज्ञम् अर्थयति अभिलषतीति यज्ञार्थी स एव यज्ञानां मुखं वर्तते। नक्षत्राणां अष्टाविंशतीनां मुखं चन्द्रो वर्तते, धर्माणां श्रुतधर्माणां चारित्रधर्माणां काश्यपः आदीश्वरो मुखं वर्तते। धर्माः सर्वेऽपि तेनैव प्रकाशिता इत्यर्थः ॥ १६ ॥

जहा चंदं गहाईया, चिट्ठंति पंजलीउडा ।
वंदमाणा णमंसंति, उत्तमं मणहारिणो ॥ १७ ॥

यथा ग्रहादिका अष्टाशीतिग्रहाः नक्षत्राणि अष्टाविंशतिप्रमितानि एवं सर्वे ज्योतिष्का देवाश्चन्द्रं प्राञ्जलिपुटाः बद्धाञ्जलयस्तिष्ठन्ति सेवन्ते। एवं श्रीऋषभदेवम् उत्तमं प्रधानं यथा स्यात्तथा मनोहारिणस्त्रिभुवनवर्तिनो भव्याः वन्दमानाः स्तवनां कुर्वन्तो नमस्कुर्वन्ति विनये प्रवर्तन्ते इति भावः ॥ १७ ॥

अजाणगा जन्नवाई, विज्जामाहणसंपया ।
मूढा सज्झायतवसा, भासच्छन्ना इवऽग्गिणो ॥१८॥

हे विजयघोष ! विद्याब्राह्मणसंपदमजानानाः पुनर्यज्ञवादिनस्ते स्वया पात्रत्वेन मन्यन्ते। विद्या आरण्यकब्राह्मणपुराणादिकास्तां एव ब्राह्मणसंपदो विद्याब्राह्मणसंपदस्तासाम् अज्ञा अजानन्तो यज्ञवादिनो वर्तन्ते। चेत् बृहदारण्यकाद्युक्तं यज्ञम् एते जानन्ते, तदा कथं एतादृशं यज्ञं कुर्युः। तस्माद् वृथैव वयं याज्ञिकाः इत्यभिमानं कुर्वन्ति। पुनः कथंभूताः ?। स्वाध्यायतपसा वेदाध्ययनोपवासादिना मूढाः बहिः संवृतिमन्तः आच्छादितस्वज्ञानाः। एते के इव ? भस्मच्छन्नाः अग्नय इव। रक्षाच्छादितबह्नय इव। इत्यनेन बाह्ये शीतत्वे प्राप्ताः परं कषायाग्निना मध्ये सन्तप्ता एवेति भावः ॥ १८ ॥

पुनस्साधुर्वदति—

जो लोए बम्भणो वुत्तो, अग्गीव महिओ जहा ।
सया कुसलसंदिट्ठं, तं वयं बूम माहणं ॥ १९ ॥

हे विजयघोष ! वयं तं ब्राह्मणं ब्रूमः। तं कम् ?। यो मुनिर्ब्राह्मण उक्तः। यदा कैश्चित् अहैः अब्राह्मणोऽपि ब्राह्मणोऽयमित्युक्तस्तं ब्राह्मणं न ब्रूमः इति भावः। कथं भूतः सः?। लोकैर्महितः पूजितः सन् दीप्यते। क इव ?। अग्निरिव। यथाऽग्निः पूजितो घृतादिसिक्तो दीप्यते। कीदृशं तं ब्राह्मणम ?। सदा कुशलसन्दिष्टं कुशलैस्तत्त्वाभिज्ञैः संदिष्टं कथितम् ॥ १९ ॥

अथ कुशलसंदिष्टस्वरूपमाह—

जो न सज्जइ आगंतुं, पव्वयंतो न सोयइ ।
रमई अज्जवयणम्मि, तं वयं बूम माहणं ॥२०॥

हे विजयघोष ! तं वयं ब्राह्मणं ब्रूमः। तम् इति कम ?। यः (आगंतु इति) बहुभ्यो दिनेभ्यः प्राप्तं स्वजनादिकं बहुभं जनं न स्वजति नालिङ्गति। अथवा-(आगंतु इति) स्वजनादिस्थानमागत्य स्वजनादिकं न स्वजति न अभिष्वङ्गं करोति, पुनर्यः प्रव्रजन् स्थानात् अन्यत् स्थानं स्थानान्तरं गच्छन् अर्थात् विच्युटन् न शोचते न शोकं कुरुते। पुनर्यः आर्यवचने तीर्थंकरवाक्ये रमते तं वयं ब्राह्मणं वदामः ॥ २० ॥

जायरूवं जहाऽऽमिट्ठं, निद्धंतमलपावगं ।
रागदोसभयातीतं, तं वयं बूम माहणं ॥ २१ ॥

हे विजयघोष ! वयं तं ब्राह्मणं ब्रूमः। कीदृशम् ?। जातरूपं स्वर्णं इव आमृष्टं तेजो वृद्ध्यै मनःशिलादिना परामृष्टं कृतवर्णिकाघर्षणमर्दनेन वाह्यगुण उक्तः। यथाशब्द इवार्थे। पुनः कीदृशं तम ?। (निद्धंतमलपावगं) नितरामतिशयेन ध्मातं मलं किट्टं तद्रूपं पातकं यस्य तन्निर्धमातमलपातकम् अनेन च अन्तरो गुण उक्तः। पुनः कथंभूतः?। रागद्वेषभयातीतं रागः प्रेमरूपः द्वेषोऽप्रीतिरूप स्ताभ्यामतीतो दूरीभूतस्तं वयं विप्रं वदामः ॥ २१ ॥

तवस्सियं किसं दंतं, अवचियमंससोणियं ।
सुव्वयं पत्तनिव्वाणं, तं वयं बूम माहणं ॥ २२ ॥

हे विजयघोष ! वयं तं ब्राह्मणं ब्रूमः। तं कं तपस्विनम्। अतएव कृशं दुर्बलम्। पुनः कीदृशम ?। दान्तं जितेन्द्रियम। पुनः कीदृशम् ?। अपचितमांसशोणितं शोषितमांसरुधिरम्। पुनः कीदृशम् ?। सुव्रतं सम्यक् व्रतानां धर्तारम। पुनः कीदृशम् ?। प्राप्तनिर्वाणं प्राप्तं कषायाग्निशमनेन निर्वाणं शीतिभावं येन स प्राप्तनिर्वाणस्तम् ॥ २२ ॥

तसपाणे वियाणित्ता, संगहेण य थावरे ।

जो न हिंसइ तिविहेणं, तं वयं बूम माहणं ॥ २३ ॥

हे ब्राह्मण ! तं वयं ब्राह्मणं ब्रूमः। तम् इति कम् ?। यस्मात् प्राणात् पुनः स्थावरात् संग्रहेण समासेन संक्षेपेण त्रिहाय त्रिविधेन मनोवाक्कायेन करणकारणानुमतिभेदेन नवविधेन न हन्ति, तं ब्राह्मणं ब्रूम इति भावः ॥ २३ ॥

कोहा वा जइ वा हासा, लोहा वा जइ वा भया ।
मुसं न वयई जो उ, तं वयं बूम माहणं ॥ २४ ॥

हे विजयघोष ! यः क्रोधात्, यदि वा अथवा हास्यात्, वा अथ वा लोभात्, अथ भयात् मृषाम् असत्यवाणीं न वदति, तं वयं ब्राह्मणं ब्रूमः ॥ २४ ॥

चित्तमंतमचित्तं वा, अप्पं वा जदि वा बहुं ।
न गिण्हइ अदत्तं जे, तं वयं बूम माहणं ॥ २५ ॥

हे ब्राह्मण ! यश्चित्तमन्तं सचित्तम् । अथवा-अचित्तं प्रासुकम् अल्पं स्तोकम्, यदि वा बहुं प्रचुरम् अदत्तं दायकेन अनर्पितं स्वयमेव न गृह्णाति तं वयं ब्राह्मणं वदामः ॥ २५ ॥

दिव्वमाणुस्सतेरिच्छं, जो ण सेवइ मेहुणं ।
मनसा कायवक्केणं, तं वयं बूम माहणं ॥ २६ ॥

पुनर्यो दिव्यमानुष्यतिरश्चीनं मैथुनं मनसा कायेन वचसा कृत्वा न सेवते । वयं तं ब्राह्मणं वदामः ॥ २६ ॥

जहा पोमं जले जायं, नोवलिप्पइ वारिणा ।
एवं अलित्तं कामेहिं, तं वयं बूम माहणं ॥ २७ ॥

हे ब्राह्मण ! पुनस्तं वयं ब्राह्मणं वदामः। तं कीदृशम् ?। (एवं) अमुना प्रकारेण अनेन दृष्टान्तेन कामैः अलिप्तं भोगैः असंलग्नं येन दृष्टान्तेन यथा पद्मं जले जातं परं तत् पद्मं वारिणा न उपलिप्यते जलं स्वकस्योपरि तिष्ठति तथा भोगैरुत्पन्नोऽपि भोगैरलिप्तो यस्तिष्ठति स ब्राह्मणो ज्ञेयः ॥ २७ ॥

अलोलुयं मुहाजीवी, अणगारं अकिंचणं ।
असंसत्तं गिहत्थेसु, तं वयं बूम माहणं ॥ २८ ॥

मूलगुणमुक्त्वा उत्तरगुणमाह-पुनर्वयं तं ब्राह्मणं ब्रूमः। कीदृशं तं ब्राह्मणम् ?। अलोलुपम् आहारादिषु लाम्पट्यरहितम् । पुनः कीदृशम् ?। मुधाजीविनम् अज्ञातगृहेषु आहारादि गृहीत्वा आजीविकां कुर्वाणं संयमजीवितव्यधारकम् इत्यर्थः । पुनः कीदृशम् ?। गृहस्थेषु असंसक्तं गृहस्थे प्रतिबन्धरहितम् ॥ २८ ॥

जहित्ता पुव्वसंजोगं, नातिसंगे य बंधवे ।
जो न सज्जइ भोगेसु, तं वयं बूम माहणं ॥ २९ ॥

पुनस्तं वयं ब्राह्मणं वदामः। तमिति कम् ?। यो ज्ञातौ स्वकीयगोत्रे च पुनः सङ्गे स्वसुरादिसंबन्धे पुनर्बान्धवे पूर्वसंयोगं मातापित्रादिस्नेहं त्यक्त्वा पुनरेतेषु पूर्वोक्तेषु न स्वजति रागासक्तो न भवति । तं वयं ब्राह्मणं वदामः ॥ २९ ॥

पसुबंधा सव्ववेया, जट्ठं च पावकम्मुणा ।
न तं तायंति दुस्सीलं, कम्माणि बलवंतिह ॥ ३० ॥

नो विजयघोष ! सर्ववेदाः पशुबन्धाः वर्तन्ते पशूनां बन्धो विनाशाय नियन्त्रणं यैस्ते पशुबन्धाः केवलं वेदाः पशुहननहेतवो वर्तन्ते । न तु मोक्षहेतवः । हिंसायाः प्ररूपकत्वात् यतो हि वेदवाक्यमिदं श्रूयताम् " भूतिकामो वायव्यां दिशि श्वेतं छागमालभेत " इत्यादि पशुबन्धे हेतुभूतं वेदवाक्यं च पुनः (जट्ठं इति) इष्टं यज्ञनं यज्ञः पापकर्मणाभ्युत्पद्यते तत इष्टं पापकर्मणा पापकारणपशुबन्धाद्यनुष्ठानेन तं वेदानाम् अध्येतारं यज्ञकर्तारं वा न त्रायन्ते यज्ञकर्तारं वा दुःशीलं दुराचारं पापशास्त्राणां पठनेन पापकर्मकरणेन दुष्टाचारम् इह कर्माणि बलवन्ति वर्तन्ते दुष्टकर्माणि बलेन पापकर्मकर्तारं नरकं नयन्ति । अतः कारणात् एतस्मात् कारणात् ब्राह्मणः पात्रभूतोऽस्ति । किं तु अनन्तरोक्तगुणवान् एव ब्राह्मण इति भावः ॥ ३० ॥

न वि मुंडिएण समणो, न ओंकारेण बंभणो ।
न मुणी रण्णवासेणं, कुसचीरेण न तावसो ॥ ३१ ॥

हे विजयघोष ! मुण्डितेन श्रमणो निर्ग्रन्थो न स्यात् । ओङ्कारेण ॐ भूर्भुवः स्वस्तीत्यादिना ब्राह्मणो न स्यात् । तथा-अरण्यवासेन मुनिर्नोच्यते । कुशो दर्भस्तन्मयं चीरं उपलक्षणत्वाद् वल्कलं कुशचीरं तेन कुशचीरेण कुशोपलक्षितवल्कलवस्त्रेण तापसो न भवेत् ॥ ३१ ॥

समयाए समणो होइ, बम्भचेरेण बम्भणो ।
नाणेण य मुणी होइ, तवेण होइ तावसो ॥ ३२ ॥

(समया) समयस्वेन शत्रुमित्रयोरुपरि समानभावेन श्रमणो भवति। ब्रह्मचर्येण ब्राह्मणो भवति, ब्रह्म पूर्वोक्तम् 'अहिंसासत्यचौर्याभावामैथुनलिसौभकर्षं' तस्य ब्राह्मणश्चरणमङ्गीकरणं ब्रह्मचर्यं तेन ब्राह्मण उच्यते, ब्रह्मत्वयुक्तो ब्राह्मण इत्यर्थः । ज्ञानेन मुनिर्भवति मन्यते जानाति हेयोपादेयविधी इति मुनिः । स च ज्ञानेनैव स्यात् । तथा तपसा द्वादशविधेन तापसो भवति ॥३२॥

कम्मुणा बम्भणो होइ, कम्मुणा होइ खत्तियो ।
वइसो कम्मुणा होइ, सुद्दो हवइ कम्मुणा ॥ ३३ ॥

कर्मणा क्रियया ब्राह्मणो भवति, " क्षमा दानं दमो ध्यानं, सत्यं शौचं धृतिर्घृणा । ज्ञानविज्ञानमास्तिक्य-मेतत् ब्राह्मणलक्षणम् ॥ १ ॥ " अनया क्रियया लक्षणभूतया ब्राह्मणः स्यात् । क्षत्रियः शरणागतत्राणलक्षणक्रियया क्षत्रिय उच्यते, न तु केवलं क्षत्रियकुले जात्रिसमुत्पन्ने सति शस्त्रबन्धनत्वेनैव क्षत्रिय उच्यते । एवं वैश्योऽपि कर्मणा क्रियया एव स्यात् कृषिपशुपाल्यादिक्रियया वैश्य उच्यते । कर्मणा एव शूद्रो भवति शौचनादिहेतुप्रेषणभारोद्वहनजलाद्याहरणचरणमर्दनादिक्रियया शूद्र उच्यते । अत्र ब्राह्मणलक्षणावसरे अन्येषां वर्णत्रयाणां लक्षणविधानं व्याप्तिदर्शनार्थम् ॥ ३३ ॥

एए पाउकरे बुद्धे, जेहिं होइ सिणायओ ।
सव्वकम्मविणिम्मुक्कं, तं वयं बूम माहणं ॥ ३४ ॥

बुद्धो ज्ञाततत्त्वः श्रीमहावीरः एतान् अहिंसासत्यार्यान् प्राकुरकार्षीत् प्रकटी चकार । यैर्गुणैः कृत्वा सर्वकर्मविनिर्मुक्तो भूत्वा स्नातको भवति केवली भवति । प्राकृतत्वात् प्रथमाख्याने द्वितीया । तम् एतादृशगुणयुक्तं स्नातकं वा वयं ब्राह्मणं वदामः ॥३४॥

एवं गुणसमाउत्ता, जे भवंति दिउत्तमा ।
ते समत्था वि उद्धत्तुं, परं अप्पाणमेव य ॥ ३५ ॥

एवंगुणसमायुक्ताः ये द्विजोत्तमाः ब्राह्मणश्रेष्ठाः भवन्ति । ते ब्राह्मणोत्तमाः परमात्मानम् अपि रक्षितुं समर्था भवन्ति ॥३५॥

एवं तु संसए छिन्ने, विजयघोसे य माहणे ।
समुदाय तयं तं तु, जयघोसं महामुणिं ॥ ३६ ॥

ततस्तदनन्तरं विजयघोषो ब्राह्मणः जयघोषं महामुनिं श्रुत्वा च इदं वचनम्-उदाह कथयति इति संबन्धः किं कृत्वा ?। तं मुनिं जयघोषं समादाय सम्यक् उपलभ्य ज्ञात्वा, क सति (एवं) पूर्वोक्तप्रकारेण विजयघोषस्य संशये छिन्ने सति ॥ ३६ ॥

तुट्ठो य विजयघोसे, इणमुदाहु कयं जली ।
माहणत्तं जहाभूयं, सुट्ठु मे उवदंसियं ॥ ३७ ॥

विजयघोषस्तुष्ट इदं वचनं जयघोषमुनये आह-कीदृशो विजयघोषः?। कृताञ्जलिः, हे मुने! मे मम ब्राह्मणत्वं यथाभूतं यथास्वरूपं सुष्ठु सम्यगुपदर्शितम् ॥ ३७ ॥

तुब्भे जइया जन्नाणं, तुब्भं वेयविओ विऊ।
जोइसंगविओ तुब्भे, तुब्भे धम्माण पारगा॥ ३८ ॥

किं वचनम् ? आह-हे महामुने ! (तुब्भे इति) यूयं यज्ञानां यष्टारः, यूयं वेदविदः वेदवित्सु विदो ज्ञातारो वेदविदाम्वराः यूयम् एव । पुनर्यूयम् एव ज्योतिषाङ्गविदः । यूयम् एव धर्माणां पारगाः धर्माचारपारगाः॥ ३८ ॥

तुब्भे समत्था उद्धत्तुं, परं अप्पाणमेव य ।
तमणुग्गहं करे अम्हं, भिक्खेणं भिक्खुउत्तमा! ॥३९॥

जसविजय–यशोविजय–पुं०। द्वात्रिंशिकाविवरणद्रव्यगुणपर्यायरासविवरणद्वात्रिंशद्द्वात्रिंशिकाप्रतिमाशतकनयोपदेशविवरणादिकारके आचार्ये, ऐन्या० १४ अन्या०।

द्वात्रिंशिकावृत्तौ नयविजयवर्णकमधिकृत्य—

" यशोविजयनाम्ना त–चरणाम्भोजसेविना।
द्वात्रिंशिकानां विवृतिः–श्रेयसे तत्त्वार्थदीपिका(६)। द्वा०३२द्वा०।
द्वात्रिंशत्तममष्टक—मुवाच श्रीमद्यशोविजयः ॥१॥" अष्ट० ३२ अष्ट०।

प्रतिमाशतके नयविजयमधिकृत्य—

" तदीयचरणाम्बुजभ्रमणविस्फुरद्भारती–
प्रसादसुपरीक्षितप्रवरशास्त्ररत्नोच्चयैः।
जिनागमविवेचने शिवसुखार्थिनां श्रेयसे,
यशोविजयवाचकैरयमकारि तत्त्वभ्रमः ॥ १६ ॥
पूर्वं न्यायविशारदत्वविरुदं काश्यां प्रदत्तं बुधै—
र्न्यायाचार्यपदं ततः कृतशतग्रन्थस्य यस्यार्पितम्।
भव्यप्रार्थनयाऽनयादिविजयप्राक्तोत्तमानां शिशुः,
सोऽयं तत्त्वमिदं यशोविजय इत्याख्याभृदाख्यातवान् ॥१७॥"
प्रति०।

नयोपदेशवृत्तौ–

" गच्छे श्रीविजयादिदेवसुगुरोः खड्गैर्गुणानां गणैः,
प्रौढिं प्रौढिमधाम्नि जीतविजयप्राज्ञाः परामैयदः।
तत्सातीर्थ्यभृतां नयादिविजयप्राक्तोत्तमानां शिशु–
स्तत्त्वं किंचिदिदं यशोविजय इत्याख्याभृदाख्यातवान् ॥१॥"
नया०।

"तर्कप्रमाणनयमुख्यविवेचनेन,
प्रोद्भाविताद्भिमुनिभुतकेवलित्वाः।
चक्रुर्यशोविजयवाचकराजमुख्याः,
ग्रन्थेऽत्र मय्युपकृतिं परिशोधनाद्यैः ॥" ष० ४ अधि०। अवमाचार्यः विक्रमसंवत्सराणां सप्तदशके शतके आसीत्। जै० इ०

जसहर–यशोधर–पुं०। भारतवर्षभावेऽतीतेऽष्टादशमे जिने, प्रव० ८ द्वार। भारतवर्षजन्ये भविष्यत्येकोनविंशे जिने, प्रव० ७ द्वार। द्वीपायनस्य जीवं यशोधरनामानं जिनमेकोनविंशं वन्दे, प्रव० ४६ द्वार। भगवत ऋषभस्य द्वादशे पुत्रे, कल्प० ७ क्षण। धरणस्य नागकुमारेन्द्रस्य पौद्गलीकाधिपतौ. "असोधरे आसराया पोंडागीयाहिवई" स्था० ५ ठा० १ उ०। पक्षस्य पञ्चदशसु दिवसेषु पञ्चमे दिवसे, जं० ७ वक्ष०। चं० प्र०। कल्प०। ग्रैवेयकविमानप्रस्तटे च। स्था० ९ ठा०। साकेतनगरस्थस्य विनयधरनृपस्यात्मजे स्वनामख्याते कुमारे, ध० र०। दश०। (यशोधरचरितं तु धर्मरत्नप्रकरणादवसेयम) दक्षिणरुचकवास्तव्यास्वष्टसु दिशाकुमारीषु चतुर्थदिशाकुमार्याम्, स्त्री०। स्था० ८ ठा०। द्वी०। आ०चू०। ती०। आ० क०। आव०। आ० म०। जं०। पक्षस्य पञ्चदशसु रात्रिषु चतुर्थरात्रौ, ज्यो० ४ पाहु०। जं०। कल्प०। सकलभुवनव्यापियशो धरतीति यशोधरा। लिहादित्वादच्। जम्बूसुदर्शनायाम्, जम्बूद्वीपो हि त्रिदिवतमहिमा त्रुवनत्रयेऽप्यनया जम्ब्वोपलक्षितस्ततो भवति यथोक्तम। यशोधारित्यमस्या इति। स्त्री० ३ प्रति०। जं०।

जसा–यशा–स्त्री०। कौशाम्बीवास्तव्यस्य काश्यपस्य भार्यायां, कपिलमातरि, उत्त० ८ अ०। ती०।

जसोकामि (न्)–यशस्कामिन्–पुं०। कीर्तिकामिनि, " धिगस्तु ते जसोकामी" दश० २ अ०।

जसोकित्ति–यशःकीर्ति–स्त्री। 'जसकित्ति' शब्दार्थे, आ० चू० १ अ०।

जसोकित्तिणाम–यशःकीर्तिनामन्–न०। 'जसकित्तिणाम' शब्दार्थे, कर्म० १ कर्म०।

जसोचंद–यशश्चन्द्र–पुं० । 'जसचंद' शब्दार्थे, भ० ४२ श० १ उ०।

जसोजीविय–यशोजीवित–न० । 'जसजीविय' शब्दार्थे, आ० म० द्वि०।

जसोद–जस(श)द–पुं० । 'जसद' शब्दार्थे, औ०।

जसोदपाय–जसदपात्र–न० । 'जसदपाय' शब्दार्थे, औ०।

जसोदेव–यशोदेव–पुं० । 'जसदेव' शब्दार्थे, ग० ४ अधि०।

जसोधण–यशोधन–न० । 'जसधण' शब्दार्थे, तं०।

जसोभद्द–यशोभद्र–पुं० । 'जसभद्द' शब्दार्थे, ग० ४ अधि०।

जसोमंत–यशस्वत्–त्रि० । 'जसमंत' शब्दार्थे, स्था० ७ ठा०।

जसोमित्त–यशोमित्र–पुं० । 'जसमित्त' शब्दार्थे, ती० १ कल्प।

जसोय–यशोद–पुं० । यशो ददाति दा–क । पारदे, यशोदातरि, त्रि० । नन्दगोपपत्न्याम्, स्त्री० । वाच० । श्रमणस्य भगवतो महावीरस्य प्रार्यायां च । आ० चू० ३ अ० । "समणस्स णं भगवओ महावीरस्स अज्जा जसोया गोत्तेण कासवी" आचा० २ चू० । "कारेति पाणिग्गहणं जसोयवररायकण्णाए" ती० २१ कल्प । आ० म० ।

जसोवई–यशोमती–स्त्री० । 'जसवई' शब्दार्थे, स० ।

जसोवंस–यशोवंश–पुं० । 'जसवंश' शब्दार्थे, नं० ।

जसोवाय–यशोवाद–पुं० । 'जसवाय' शब्दार्थे, कल्प० ४ क्षण।

जसोविजय–यशोविजय–पुं० । 'जसविजय' शब्दार्थे, ऋषभ० १४ अष्टा० ।

जसोहर–यशोधर–पुं० । 'जसहर' शब्दार्थे, प्रश्न० ७ द्वार।

जह–यथा–अव्य० । यत्प्रकारे, धातू "वाऽव्ययोत्खातादावदातः" ८ । १ । ६७ । इति प्राकृतसूत्रेणाव्ययेषूत्खातादिषु च शब्देषु आदेराकारस्याद्वा । प्रा० १ पाद । येन प्रकारेणेत्यर्थे, आचा० १ श्रु० ६ अ० ३ उ० । "जह सुत्तं तह अत्थो"(२६) यथा येन प्रकारेण यथासूत्रतया सूत्रं व्यवस्थितं तथा तेनैव प्रकारेणाऽर्थो व्याख्येयः । सूत्र० १ श्रु० १३ अ० । अनु० । आचा० । उपप्रदर्शने, पञ्चा० १४ विव० । सूत्र० । अनु० । आ० म० । उदाहरणोपन्यासे, दर्श० ४ तत्त्व । पिण्ड० । आव० । सूत्र० । उत्त० । आ० म० । "जह मंगलाणिहाणं" विशे० । यथेत्युदाहरणोपन्यासार्थः । यथैतत्तथान्यदप्यनया दिशा द्रष्टव्यम् । आचा० १ श्रु० ८ अ० १ उ० । दृष्टान्तोपदर्शने, जी० ३ प्रति० । सं० । सूत्र० । ज्ञा० । स्था० । जं० । वाक्योपन्यासे, सादृश्ये, योग्यतायाम्, आनुरूप्ये, पदार्थानतिवृत्तौ च । वाच० ।

यत्र–अव्य० । "अपो हि-ह-त्थाः" ॥ ८ । २ । १६१ ॥ इति प्राकृतसूत्रेण अपः हः 'जह' इति प्रा० २ पाद । यस्मिन्नित्यर्थे, वाच०।

जहंत–जहत्–त्रि० । त्यजति, "जिणवयणं भावतो जहंतस्स" स्था० ३ उ० ।

जहक्कम–यथाक्रम–अव्य० । क्रमस्यानुरूप्यं तस्यातिक्रमो वा। अव्ययी० । क्रमानुरूप्ये, क्रमातिक्रमे च । वाच० । यथाक्रमं परिपाट्येति । दश० ५ अ० । "अहु कम्माइं बोच्छामि, आणुपुव्वि जहक्कमं" उत्त० ३३ अ० । विहरामि यथाक्रमं स्वाध्यायानुक्रमेण । उत्त० २३ अ० । "जहक्कमं कामगुणेसु चेव" यथाक्रमं यथावसरमिति । उत्त० १४ अ० । "जहक्कमंते" यथाक्रमं क्रमेणैव । पञ्चा० ७ विव० ।

जहक्खाय–यथाख्यात–न० । अथाख्यातापरनामभेदे चारित्रभेदे, (आ० म० प्र०)

अथ यथाख्यातचारित्रं त्रिभुवनवन्द्यमाह–

अहसद्दो जाहत्थे, आकोऽभिविहिं खिं कहियमक्खायं ।
चरणमकसायमुदितं,तमहक्खायं "जहक्खायं" ॥१२७६॥

यथाख्यातमिति द्वितीयं नाम । तस्यायमर्थः–यथा सर्वस्मिन् जीवलोके ख्यातं प्रसिद्धमकषायं भवति चारित्रमिति । तथैव यत् तत् यथाख्यातं प्रसिद्धं सर्वस्मिन् जीवलोके । आ० म० प्र० । विशे० । (अथाख्यातविहरणम् 'अहक्खाय' शब्दे प्रथमभागे ८६१ पृष्ठे विस्तरेणोक्तमस्ति)

जहग–जडक–पुं० । सेवडके, विशे० ।

जहट्ठियवत्थुवाइ(ण्)–यथास्थितवस्तुवादिन्–पुं० । यथास्थितमभिलाप्यानभिलाप्यत्वादिना प्रकारेण स्थितं वस्तु वदितुं शीलाः यथावस्थितवस्तुवादिनः । येन प्रकारेण वस्तुनो वादिनि, पं० सू० १ सूत्र ।

जहण–जघन–न० । वर्कं हन्ति । हन्–वह–अच्–पृ० । स्त्रीणां श्रोणिपुरोभागे, श्रोणौ च । वाच० । जघनं पूर्वः कटिभाग इति । विपा० १ श्रु० २ अ० ।

जहणरोही–देशी–करौ, दे० ना० ३ वर्ग ।

जहणवर–वरजघन–न० । श्रेष्ठजघने, वरशब्दस्य विशेषणस्याऽपि सतः परनिपातः प्राकृतत्वात् । जी० ३ प्रति० ।

जहणिज्ज–हेय–त्रि० । त्याज्ये, ज्ञा० १ श्रु० १ अ० ।

जहणुसवं–देशी–अर्धोदके, दे० ना० ३ वर्ग ।

जहण्ण–जघन्य–त्रि० । हन्–यङ्–अच्–पृ० । जघनमिव इवार्थे यत् वा । अधमे, वाच० । आव० । निकृष्टे, भ० २ श० १ उ० । सर्वहीने, स्था० ४ ठा० २ उ० । सर्वोत्तमे, स्था० १ ठा० १ उ० । चरमे गर्हिते च । शूद्रे, पुं० । जघनमनुशीलितम् यस्य । पुंसां लिङ्गे । वाच० ।

जहण्णगुणकालग–जघन्यगुणकालक–पुं० । जघन्येन अन्यसंख्याविशेषेणैकेनेत्यर्थः गुणो गुणनं नाम यस्य स तथाविधः कालो वर्णो येषां ते जघन्यगुणकालकाः । तेषु । स्था० १ ठा० १ उ० ।

जहण्णट्ठिय–जघन्यस्थितिक–त्रि० । जघन्या जघन्यसंख्या समयापेक्षया स्थितिर्येषां ते जघन्यस्थितिकाः एकसमयस्थितिके, स्था० १ ठा० १ उ० ।

जहण्णपएसिय–जघन्यप्रदेशिक–पुं० । जघन्याः सर्वोत्याः प्रदेशाः परमाणवस्ते सन्ति येषां ते जघन्यप्रदेशिकाः । द्व्यणुकादिके, स्था० १ ठा० १ उ० ।

जहण्णपय–जघन्यपद–न० । पद्यते गम्यते इति पदं पदसंख्यास्थानं तच्चानेकधेति जघन्यं सर्वहीनं पदं जघन्यपदम् । सर्वहीने संख्यास्थाने, स्था० ४ ठा० २ उ० ।

जहण्णपुरिस–जघन्यपुरुष–पुं० । पुरुषविशेषे, स्था० ३ ठा० १ उ० । (जहन्नपुरिसा तिविहा ' पुरिस ' शब्दे वक्ष्यन्ते)

जहण्णुक्कोसग–जघन्योत्कर्षक–त्रि० । जघन्यो निकृष्टः कांश्चिद् व्यक्तिमाश्रित्य स एव च व्यक्त्यन्तरापेक्षयोत्कर्षं प्राप्तो जघन्योत्कर्षः। कांश्चिद् व्यक्तिमाश्रित्य निकृष्टे,व्यक्त्यन्तरापेक्षयोत्कृष्टे च । प्रज्ञ० २५ पद० १ उ० ।

जहण्णोगाहणग–जघन्यावगाहनक–त्रि० । अवगाहन्ते आसते यस्यां साऽवगाहना क्षेत्रप्रदेशरूपा सा जघन्या येषां ते । स्वार्थिककप्रत्ययाऽजघन्यावगाहनकाः । एकप्रदेशावगाढे, स्था० १ ठा० १ उ० ।

जहत्थ–यथार्थ–अव्य० । अर्थमनतिक्रम्य, अव्ययी० । अर्थस्यानतिक्रमे, पं० सं० १ द्वार । अन्वर्थयुक्ते, त्रि० । पञ्चा० १५ विव० । यथार्थे प्रदीपादि । स्था० १ ठा० १ उ० । षोडशके पंचसंग्रह-मेवमहत्थं जहत्थं वा " । यथार्थे यथावस्थितः प्रवचनाविरोधी अर्थो यस्मिन् तत् । यद्वा-अर्थस्य प्रवचनोक्तस्यानतिक्रमेण न स्वमनीषिकया यथार्थम् । पं० सं० १ द्वार । "सव्वं दव्वाइ आवइ जहत्थं" यथार्थं यथावद् यथासर्वज्ञेनोक्तमेवेति । विशे० ।

जहत्थणिययं–यथार्थनियत–न० । व्यञ्जनाक्षरभेदे, " तत्थ-जहत्थ णियथं, तं जहा-दहतीति दहणो तवतीति तवणो पवमादि " । आ० चू० १ अ० ।

जहत्थाम–यथास्थाम–अव्य० । यथाबलं शक्त्यनतिक्रमेणेत्यर्थे, " भुंजइ य जहत्थामं " पञ्चा० १५ विव० ।

जहत्थ्य–याथास्थ्य–न० । यथातत्त्वे, स्था० ५ ठा० १ उ० ।

जहवा–यथावा–अव्य० । प्रकारान्तरदर्शने, दश० १ अ० ।

जहवाय–यथावाद–अव्य० । आप्तवचनानतिक्रमेणेत्यर्थे, पञ्चा० १२ विव० ।

जहा–यथा–अव्य० । ' जह ' शब्दार्थे, आ० १ पाद ।

जहाइत्ता–हित्वा–अव्य० । त्यक्त्वेत्यर्थे, सूत्र० १ श्रु० २ अ० १ उ० । "तयसं व जहाइ से रयं" सूत्र० १ श्रु० २ अ० २ उ० ।

जहाकाल–यथाकाल–अव्य० । यथावसरमित्यर्थे,, आचा० १ श्रु० २ अ० १ उ० । "वोसिरइ सुणी जहाकालं " । यथाकालं यथावसरम् । स्था० ।

जहागम–यथागम–अव्य० । यथासूत्रमित्यर्थे, " आराहिता जहागमं " पं० व० १ द्वार ।

जहाच्छन्द–यथाच्छन्द–पुं० । स्वच्छन्दे, स्था० ३ ठा० ३ उ० ।

जहाजाय–यथाजात–त्रि० । जातं समवधिशेषमनतिक्रम्य यथाजातं, तदस्यास्ति अर्श । मूर्धे, नीचे च । आचा० " जहाजायपडिभूया । " यथाजातप्रतिभूताः शिक्षाभरणादिवर्जितत्वेन बालादिसदृशाः निर्विज्ञानत्वादिसाधर्म्यात् । प्रज्ञा० ३ आभा० द्वार । यथाजातं भ्रमणत्वभवनलक्षणं जन्माश्रित्य, योनिनिष्क्रमणलक्षणं च । तत्र दृष्टान्तमुखवस्त्रिकारजोहरणमात्रया भ्रमणो जातो,रचितकरपुटस्तु योग्या निर्गत एवंभूत एवं वन्दते । तदव्यतिरेकाद् वा यथाजातम् । कृतिकर्मणि, न० । सं० १२ समo ।

जहाजेट्ठ–यथाज्येष्ठ–अव्य० । ज्येष्ठस्यानतिक्रमेणेत्यर्थे, मनु० ।

जहाणामय–यथानामक–पुं० । अनिर्दिष्टनामके , कस्मिंश्चित्, जी० ३ प्रति० । "जहानामको कोइ मिच्छो " । यथानामकः कश्चित् म्लेच्छः । आ० म० प्र० । "से जहाणामए केइ पुरिसे" स यथानामको यत्प्रकारनामा देवदत्तादिनामेत्यर्थः । अथवा-(से) इति सः यथेति दृष्टान्तार्थः नामेति संज्ञावचनार्थम् । ' ए ' इति वाक्यालङ्कारे । सं० । अनु० । जी० । ज्ञा० । स्था० ।

जहातच्च–यथातथ्य–अव्य० । यथासत्यमित्यर्थे, "जहातच्चमिणं ति बेमि" यथासत्यं यथातथ्यमित्यर्थे, । आचा० १ श्रु० ४ अ० २ उ० । "अंजु धम्मं जहातच्चं" । यथातथ्यं यथान्यवस्थितम् । सूत्र० १ श्रु० ६ अ० । "तं मे एक्कमणा सुह जहातच्चेणं" यथातथ्येनाविपरीतं प्रतिपादयामीति । सूत्र० १ श्रु० ५ अ० १ उ० । यथातथ्येन यथान्यवस्थितं तथैव कथयामीति । सूत्र० १ श्रु० ५ अ० २ उ० ।

जहातह–यथातथ–अव्य० । तथाऽनतिक्रम्य अनतिवृत्तौ, अव्ययी० । याथार्थ्ये, वस्तु वस्तुनो यद्रूपमुचितं तथारूपभावे, यथायथमव्ययार्थे, वाच० ।

याथातथ्य–अव्य० । सूत्रकृताङ्गस्य त्रयोदशेऽध्ययने,धर्मसमाधिमार्गसम्यक्त्वाख्येषु यदुचितं याथातथ्येन व्यवस्थितम्, यच्च विपरीतं चितथं तदपि लेशतोऽत्र, प्रतिपादयिष्यत इति । नामनिष्पन्ने तु निक्षेपे याथातथ्यमिति नाम । (सूत्र०) अस्याध्ययनस्य याथातथ्यमिति नाम । सूत्र० १ श्रु० १३ अ० । "जाणासि णं भिक्खु, जहातहेणं" याथातथ्येन त्वं जानासि सम्यगवगच्छसीति । सूत्र० १ श्रु० ६ अ० ।

जहातहज्झयण–याथातथ्याध्ययन–न० । सूत्रकृताङ्गस्य त्रयोदशेऽध्ययने, (सूत्र०)

अस्यार्थाऽधिकारो यथा—

जह सुत्तं तह अत्थो, चरणं चारो तह त्ति नायव्वं ।
संतंमि य पसंसाए, असतीपगयं च दुगुंछाए ॥ २६ ॥

"जह सुत्तं" इत्यादि । यथा येन प्रकारेण यथापदतया सूत्रं व्यवस्थितं तथा तेनैव प्रकारेणार्थो व्याख्येयोऽनुष्ठेयश्च । एतदर्शयति-चरणमाचरणमनुष्ठातव्यम् । यदि वा-संक्रान्तसूत्रस्य चारित्रमेवाचरणमतो यथा सूत्रं तथा चारित्रमेतदेव चानुष्ठेयम् एतच्च याथातथ्यमिति ज्ञातव्यम्, पूर्वार्द्धस्यैव भावार्थं गाथापश्चार्द्धेन दर्शयितुमाह-यद्वस्तुजातं प्रकृतं प्रस्तुतं यथाधर्ममधिकृत्य सूत्रमकारि तस्मिन्नर्थे सति विद्यमाने यथावद् व्याक्रियमाणे संसारोत्तारणकारणत्वेन प्रशस्यमाने वा याथातथ्यमिति भवति. विवक्षिते त्वर्थे सत्यविद्यमाने संसारकारणत्वेन वा जुगुप्सायां सत्यां सम्यगनुष्ठीयमाने वा याथातथ्यं न भवति । इदमुक्तं भवति-यदि यथासूत्रं येन प्रकारेण व्यवस्थितम् । तथैवार्थो यदि भवति व्याक्रियतेऽनुष्ठीयते च संसारनिस्तरणसमर्थश्च भवति, ततो याथातथ्यमिति भवति । असति त्वर्थे क्रियमाणे संसारकारणत्वेन जुगुप्सिते वा भवति । याथातथ्यमिति याथातात्पर्यार्थः । सूत्र० १ श्रु० १३ अ० ।

जहापवत्तकरण–यथाप्रवृत्तकरण–न० । करणभेदे, आचा० १ श्रु० ५ अ० १ उ० ।

जहाजूय–यथाजूत–त्रि० । यथाद्यूते, "जहाजूयमिवतहसमंदिठं" । यथाद्यूतं यथाद्यूतम् । ज्ञा० १ श्रु० १ अ० नि० चू० ।

जहामालिय–यथामाल्यित–अव्य० । यथाधारितमित्यर्थे, "जहामालियं ओमोयं दलइ" । यथामाल्यितं यथाधारितं, यथापरिहितमित्यर्थः । प्र० ११ श० ११ उ० ।

जहारिह–यथार्ह–अव्य० । अर्हो योग्यतामनतिक्रम्य, अव्ययी० । यथायोग्ये, ततः । "अर्श आदिभ्योऽच्" ॥५।२।१२७॥ सत्यजुते पदार्थे, त्रि० । आव० । " जहारिहं दोह कायव्वं " पञ्चा० १७ विव० । यथार्हं यथायोग्यम् । दश० ७ अ० । पं० सं० । यथार्हं यथोचितम् । ज्ञा० १ श्रु० १ अ० । "जहारिहं जस्स जं जुग्गं" यथायोग्यम् । आव० ६ अ० ।

जहारूव–यथारूप–अव्य० । रूपानतिक्रमे, " यथा नेयं तथा शीलं, यथा नासा तथाऽऽर्जवम् । यथा रूपं तथा विद्या, यथा शीलं तथा गुणाः ॥ १ ॥ " आव० ४ अ० ।

जहाल–जहाल–पुं० । देशभेदे, कल्प० ७ क्षण ।

जहालाह–यथालाभ–अव्य० । यथासंपत्तीत्यर्थे, पञ्चा० ४ विव० ।

जहालंदीगण–यथालन्दिगण–पुं० । लन्दिकानां पञ्चको गणः परं तेषां कल्पस्य कालमानं कियत् परिहारविशुद्धिकानामिवाष्टादशमासकालमानं नोनाधिकं वेति, प्रश्ने, उत्तरम्–यथालन्दिकानां कालमानं तु परिहारविशुद्धिकसाध्वतिदेशाकथं पञ्चकल्पव्यूर्व्यादावुपलभ्यमानत्वेनाष्टादश मासाः संभाव्यन्त इति । ४२ प्र० । सेन० २ उल्ला० ।

जहावाइ (णु)–यथावादिन्–पुं० । येन प्रकारेण वादिनि, (स्था०) " जो जहावाई तहाकारी याऽवि भवइ " सामान्यतो नो यथा वादी तथा कारी । स्था० ७ ठा० ।

जहाविभव–यथाविभव–अव्य० । विभवानुरूपमित्यर्थे, " ततो अ जहाविभवं । " विभवानुरूपमित्यर्थः । पं० व० १ द्वार । " दानं च यथाविभवं, दातव्यं सर्वसत्त्वेभ्यः । " यथाविभवं विभवानुसारेणेत्यर्थः । षो० ९ विव० ।

जहाविहि–यथाविधि–अव्य० । सम्यगित्यर्थे, पं० व० ४ द्वार ।

जहासंख–यथासङ्ख्य–अव्य० । संख्यानतिक्रमे, "यथासंख्यमनुदेशः समानाम्" ॥१।३।१०॥ इति (पाणि०) न्यायात् । आ० म० प्र० ।

जहासत्ति–यथाशक्ति–अव्य० । शक्तेरानुरूप्यम् । आनुरूप्येऽव्ययी० । शक्तेरानुरूप्ये, शक्त्यनुसारे च । आव० । "सेसा उ जहासत्ति, आपुच्छित्ता ठवंति सट्ठाणे " यथाशक्ति शक्त्यनुरूपम् । आव० ५ अ० । सामर्थ्यानतिक्रमेणेति । पञ्चा० ६ विव० । " दाणमह जहासत्ती " यथाशक्ति शक्तेरनतिक्रमेण वित्तविभवानुरूपमित्यर्थः । पञ्चा० ३ विव० । " सेसगा जहासत्ति " यथाशक्ति, शक्त्यतिगूहनेन । पञ्चा० ११ विव० ।

जहासमाहि–यथासमाधि–अव्य० । समाधानानतिक्रमे, पञ्चा० । १ विव० ।

जहासुय–यथाश्रुत–अव्य० । श्रुतानतिक्रमे, " अहसुयं वदिस्सामि " यथाश्रुतं यथासूत्रं वा वदिष्यामि । आचा० १ श्रु० ६ अ० १ उ० ।

यथासुत्र–अव्य० । सूत्रानतिक्रमे, आचा० १ श्रु० ६ अ० १ उ० ।

जहि–यत्र–अव्य० । " अपो हि-ह-त्थाः " ॥ ८ । २ । १६१ ॥ इतिप्राकृतसूत्रेण प्रत्ययस्य एते आदेशाः । जहि-जह-जत्थ । अ० ४ पाद । यस्मिन्नित्यर्थे, वाच० ।

जहिच्छिय–यथेप्सित–अव्य० । ईप्सितस्यानतिक्रमे, अव्ययी० स्वार्थिकप्रत्ये, "अर्श आदिभ्योऽच्" ॥ ५ । २ । १२७ ॥ यथाभीष्टे, त्रि० । यथेष्टमत्यन्त । वाच० । "साहेह जहिच्छियं कज्जं" साधयति यथेप्सितं कार्यम् । पञ्चा० १ विव० ।

जहिच्छियकामकामिन्–यथेप्सितकामकामिन्–पुं० । यथेप्सितान् मनोवाञ्छितान् कामान् शब्दादीन् कामयन्त इत्येवंशीला यथेप्सितकामकामिनः । जी० ३ प्रति० । मनोवाञ्छितकामभोजिनि, " जहिच्छियकामकामिणो " यथेप्सितान् कामान् शब्दादीन् कामयन्ते अर्थाद् भुञ्जन्ते इत्येवं शीला ये ते तथेति । जं० २ वक्ष० ।

जहिट्ठिल–युधिष्ठिर–पुं० । युधि युद्धे स्थिरः " गवियुधिभ्यां स्थिरः" ॥८।३।९५॥ इति (पाणि०) षत्वम् । " उतो मुकुलादिभ्यः"॥८।१।१०७॥ इतिप्राकृतसूत्रेणादेरुतोऽत्वम् । प्रा० १ पाद । पाण्डवज्येष्ठे, वाच० ।

जहिमा–देशी–विदग्धरचितायां गाथायाम्, दे० ना० ३ वर्ग ।

जहुट्ठिल–युधिष्ठिर–पुं० । ' जहिट्ठिल ' शब्दार्थे, प्रा० १ पाद ।

जहुत्त–यथोक्त–त्रि० । येन प्रकारेणोक्ते, "परक्कमतो जहुत्तमाउत्ते" यथा उक्तं यथोक्तमिति । नि० चू० १ उ० ।

जहुत्तकारिन्–यथोक्तकारिन्–पुं० । यथोक्तं क्रियाकलापं कर्तुं शीलमस्येति यथोक्तकारी । आव० ३ अ० । भगवदाज्ञाराधके, द्व० १ उ० ।

जहुत्तर–यथोत्तर–अव्य० । उत्तरस्यानतिक्रमे, सूत्र० १ श्रु० ३ अ० ३ उ० ।

जहोइय–यथोदित–त्रि० । येन प्रकारेण प्रतिपादिते, वचनाद् विरुद्धाचनुष्ठानं यथोदितम् । यथा येनप्रकारेण कालाद्याराधनानुसारूपेणोदितं प्रतिपादितम् यथोदितम् । ध० ३ अधि० ।

जहोवइट्ठ–यथोपदिष्ट–अव्य० । यथोक्तमित्यर्थे, "जहोवइट्ठं अभिकंखमाणे" । यथोपदिष्टं यथोक्तमेव । दश० ६ अ० २ उ० ।

जहोवएसकारि(न्)–यथोपदेशकारिन्–पुं० । उपदेशः सदसत्कर्तव्यादेशः तस्यानतिक्रमेण कारिणि, आचा० १ श्रु० २ अ० ३ उ० ।

जा–जा–स्त्री० । जायायाम्, जनन्याम्, शय्यायाम्, एका० । देवताविशेष्याम्, योनौ, समुरूवेशायाम्, एका० ।

यावत्–त्रि० । परिमाणमस्य । "यावत्तावज्जीवितावर्तमानावट्प्रावारक-देवकुली-यमेषु वः"॥८।१।२७१॥ इति सूत्रेण वकारस्य वा लुक् । प्रा० १ पाद । यत्परिमाणे, यावति, साकल्ये, व्याप्तौ, सीमायां च । अव्य० । वाच० । " एवं जा छम्मासा " । ' जा ' इति यावत्यर्थमासामिति । पञ्चा० १० विव० ।

ज्या–स्त्री० । जरायां, कथा० । पर० अक० अनिट् । जिनाति अज्यासीत् । अद् । धनुषे, गुणे, मौर्व्याम्, मातरि; चूम्नौ, वा । वाच० ।

या–गतौ, अदादि–पर० सक० अनिट् । याति, अयासीत् । वाच० । अनुसूयायाम्, शोभायाम्, लक्ष्म्याम्, निर्मितौ, स्त्री० । एका० । रामायाम्, मातरि, पार्श्वे, युक्तौ, यात्रायाम्, एका० ।

जाइ-जाति-स्त्री० । जननं जातिः। उत्त०३ अ०। आचा०। जन्मनि, " जाईजरामरणबंधणविप्पमुक्का " प्रज्ञा० २ पद । ल० । आचा० । आव० । सूत्र० । स्था० । "जाइं च मरणं च जणोववायं ।" जातिमुत्पत्तिं नारकतिर्यङ्मनुष्यामरजन्मलक्षणां च । सूत्र० १ श्रु० १३ अ० । जातिर्वारकादिषु प्रसूतिरिति । विशे० । जायन्ते जन्तवोऽस्यामिति जातिः। उत्त० ३ अ०। अनुगतैकाकारबुद्धिजननसमर्थे अवयवव्यङ्गये सकृदुपदेशगम्ये च धर्मभेदे, यथा गोत्वमनुष्यत्वादि ब्राह्मणत्वशूद्रत्वादि च । वाच० । एकेन्द्रियादीनामेकेन्द्रियत्वादिरूपसमानपरिणतिलक्षणमेकेन्द्रियादिशब्दव्यपदेशनिबन्धनं यत्सामान्यं सा जातिः। उक्तं च-अव्यभिचारिणा सादृश्येनैकीकृतोऽर्थात्मा जातिरिति । कर्म०१ कर्म०। प्रज्ञा०। पं०सं०। "जाइकुलरूवलक्खण" (४५) जातिः पुरुषत्वादिकेति । सम्म०१ काण्ड । जातिरेकेन्द्रियादिः । स्था० ६ ठा० । आचा० । एकेन्द्रियद्वीन्द्रियत्वादिका जातिरिति । आचा० १ श्रु० ४ अ० २ उ० । जातिर्गुणवन्मातृकत्वम् । स्था०४ ठा० २ उ० । मातृसमुत्था जातिरिति । सूत्र० १ श्रु० १३ अ० । उत्त० । पं०चू० । कल्प० । औ० । आचा० । स्था० । जातिर्मातृकी पित्रादिका वा । प्रव० १६५ द्वार। जातिर्मातृपक्षः ब्राह्मणादिका वा । तं० । जातयः क्षत्रियाद्याः इति । उत्त० ३ अ० ।

सत्ता सामण्णं पि य, सामण्णविसेसया विसेसो य (२५६३)

सामान्यं त्रिविधम । तद्यथा-सत्ता १, सामान्यं २, सामान्यविशेषश्च इति । तत्र द्रव्यगुणकर्मलक्षणेषु त्रिषु पदार्थेषु सद्बुद्धिहेतुः सत्ता १। सामान्यं द्रव्यत्वगुणत्वादि २। सामान्यविशेषस्तु पृथ्वीत्वजलत्वकृष्णत्वनीलत्वाद्यवान्तरसामान्यरूप इत्यादि ३। अन्ये त्वित्थं सामान्यस्य त्रैविध्यमुपवर्णयन्ति-अविकल्पं महासामान्यम १। त्रिपदार्थसद्बुद्धिहेतुभूता सत्ता २। सामान्यविशेषो द्रव्यत्वादि ३। महासामान्यसत्तयोर्विशेषणमन्यत्यय इत्यन्ये । द्रव्यगुणकर्मपदार्थत्रयसद्बुद्धिहेतुः सामान्यम । अविकल्पा सत्तेत्यर्थः । सामान्यविशेषस्तु-द्रव्यत्वादिरूप एव इत्यलं प्रसङ्गेन इति । विशेषश्चान्त्यः । विशे० ।

सामान्यं विशेषाँश्चायमभ्युपगच्छति, अतः कथंभूतस्तानिच्छति ? इत्याह—

सामण्णमणदेव हि, इच्छ सामण्णबुद्धिवयणाणं ।
तस्स विसेसो अण्णो, विसेसमइवयणहेउ त्ति ॥२१८९॥

सामान्यं विशेषेभ्योऽन्यदेव हेतुश्च तत्सदिति सामान्यबुद्धेः सामान्यवचनस्य च । तस्मादपि सामान्यादन्योऽनित्य एव नित्यद्रव्यवर्ती मन्त्यो विशेषः । स च हेतुर्विशेषो विशेष इति मतेर्वचनस्य च । प्रयोगो-भिन्नौ परस्परं सामान्याविशेषौ, भिन्नकार्यत्वात्, घटपटादिवदिति ॥ २१८९ ॥

न केवलं सामान्यविशेषौ नैगमः परस्परं भिन्नौ मन्यते, किंतु स्वाश्रयादपि गोपरमाणवादेस्तयोर्भेदमेवायमिच्छतीति दर्शयन्नाह—

सदिति जणिए ऽनिमग्गइ,दव्वादत्थंतरं ति सामण्णं ।
अविसेसओ मई ए सव्वत्थाणुप्पवित्तीए ॥ २१९० ॥

सदिति यतो "द्रव्यगुणकर्मसु सा सत्ता" इति वचनात्। सत्तासमवायादेव परस्परविलक्षणेषु द्रव्यगुणकर्मसु सदित्येकाकारा बुद्धिः प्रवर्तते, अतः सदिति जनिते द्रव्यादिभ्योऽर्थान्तरमेव सामान्यं मन्यते नैगमः । कुतः ? इत्याह-सदित्यविशेषित-मतेर्वचनस्य च सर्वत्र द्रव्यगुणकर्मस्वन्योऽन्यमतिविलक्षणेष्वपि अविशेषेण प्रवृत्तेः । इदमुक्तं भवति-यदि सत्तासामान्यं द्रव्यादिभ्योऽभिन्नं स्यात् तदा द्रव्यादिवत्तस्यापि भिन्नत्वात्ततः सर्वत्र सदित्यभिन्ना बुद्धिर्न स्यात् । न हि भिन्नादभिन्नबुद्धिप्रसवो युज्यते,घटस्तम्भादिभ्योऽपि तत्प्रसङ्गात् । तस्माद् भिन्नेष्वभिन्नबुद्धिजन्यथानुपपत्तेर्द्रव्यादिभ्योऽर्थान्तरमेव सामान्यमिति ॥ २१९० ॥

गोत्वादिसामान्यं तर्हि कथंभूतम् ? इत्याह—

गोत्ताइओ गवाइसु, नियया धाराणुविद्धिबुद्धीओ ।
परओ य निवित्तीओ, सामण्णविसेसनामाणो ॥२१९१॥

गोत्वगजत्वादयस्तु गोगजाद्याश्रयवृत्तयः सामान्यविशेषनामानो मन्तव्याः । कुतः ? इत्याह-निजकाधारेषु गोगजादिष्वनुवृत्तिबुद्धितः—अनुगताकारबुद्धिहेतुत्वात्सामान्यनामानः, परतस्तु तुरगमहिषादेर्निवृत्तितो निवर्तनाद्विशेषनामानः। तेऽपि च गोत्वादयो भिन्नेष्वभिन्नबुद्धिहेतुत्वात् स्वाश्रयाद्भिन्ना एवास्य मतेन मन्तव्या इति । तदेवं निरूपितं सामान्यम ॥ २१९१ ॥

अथ विशेषस्वरूपनिरूपणार्थमाह—

तुल्लागइगुणकिरिए-गदेसतीयागए ऽणुदव्वम्मि ।
अण्णत्तबुद्धिकारण-मंतविसेसो त्ति से बुद्धी ॥२१९२॥

आकृतिश्च गुणाश्च क्रिया च आकृतिगुणक्रियाः, तुल्या आकृतिगुणक्रिया यस्य तत् तुल्याकृतिगुणक्रियम, अतीतमतिक्रान्तमपगतम , आगतं तु प्रतीतम , अतीतं च तदागतं च अतीतागतम, एकदेशादतीतागतमेकदेशातीतागतम, तुल्याकृतिगुणक्रियं च तदेकदेशातीतागतं च तथा तस्मिँस्तुल्याकृतिगुणक्रियैकदेशातीतागते परमाणुद्रव्ये अयमस्मादन्यः परमाणुरित्येवंभूतायाः योगिनामन्यत्वबुद्धेर्यः कारणं हेतुर्भवति सोऽन्त्यो विशेष इति । (से) तस्य नैगमस्य बुद्धिरभिप्रायः । इदमुक्तं भवति-परिमण्डलसंस्थानाः सर्वेऽपि परमाणव इति वैशेषिकाः। ततस्तेषु तुल्याकृतिष्वपि सर्वेषु परमाणुषु भिन्नाः, एतेन स्वजिन्ना इत्येव येयं परस्परमन्यत्वग्राहिका योगिनां बुद्धिरुपजायते तद्धेतुभूतः परमाणूद्रव्यवर्ती अन्यो विशेष उच्यते । यथाभूता हि प्रथमेऽणौ विशेषा न तथाभूता एव द्वितीये, यथाभूताश्च द्वितीये न तथाभूता एव प्रथमे,अन्यथैकत्वप्रसङ्गात् इतीह भावार्थः । तथा-पार्थिवा अणवः सर्वेऽपि परस्परं तुल्यगुणाः । तथा-अणुमनसोरायं कर्मादृष्टकारितम, यथा अग्नेरूर्ध्वज्वलनम,वायोस्तिर्यग्गमनमिति। सर्वेऽप्यणवस्तुल्यक्रियाः, तथा-एकस्मादाकाशदेशादाकाशप्रदेशाद् यदैवैकः परमाणुः स्थितिक्षयाद्गच्छति । अन्यत्र गच्छति-तदैव यदाऽन्यः परमाणुस्तस्थित्युद्भवात्तत्रैवाकाशप्रदेशे समागत्य तिष्ठति, तदा एकदेशातीतोऽऽगतत्वम । अत एवं वैशेषिकप्रक्रियया तुल्याकृतिषु, तुल्यगुणेषु, तुल्यक्रियेषु, एकप्रदेशनिर्गतागतेषु च, परमाणुद्रव्येषु यदन्यत्वबुद्धेः कारणं सोऽन्त्यो विशेष इति (से) तस्य नैगमस्य बुद्धिः । स चाकृत्यादिना तुल्येष्वतुल्यबुद्धिहेतुत्वादणुद्रव्यो भिन्न एवेति ॥ २१९२ ॥

एवं सामान्यविशेषेषु प्ररूपितेषु परः प्राह—

नणु दव्वपज्जवट्ठिय-नयावलंबि त्ति नेगमो चेव ।
सम्मद्दिट्ठी साहु,व्व कीसमिच्छत्तनेओऽयं ? ॥२१९३॥

आह-नन्वेवं सति यत्सामान्यं तद्द्रव्यम्,विशेषास्तु पर्यायाः,ततो द्रव्यपर्यायास्तिकनयद्वयमतावलम्बित्वात् सम्यग्दृष्टिरेवायं नै-

गमनयः, जैनसाधुवत् । न हि जैनसाधवोऽपि द्रव्यपर्यायोभयरूपाद् वस्तुनोऽन्यत् किञ्चिदिच्छन्ति । तत्किमित्यसौ मिथ्यात्वभेदः ? इति ॥ २१९३ ॥

अत्रोत्तरमाह—

जं सामन्नविसेसे, परोप्परं वत्थुओ य सो भिन्ने ।
मन्नइ अत्थंतरओ,मिच्छादिट्ठी कणादो व्व ॥२१९४॥
दोहिं वि नएहिं नीयं, सत्थमुलूएण तह वि मिच्छत्तं ।
जं सविसयप्पहाण–त्तणेण अन्नोन्ननिरवेक्खा ॥२१९५॥

यद् यस्मात् सामान्यविशेषौ नैगमनयः परस्परमत्यन्तभिन्नौ मन्यते, वस्तुनोऽप्याधारभूतात् द्रव्यगुणकर्मपरमाणुरूपादत्यन्तभिन्नौ स ताविच्छति;जैनसाधवस्तु परस्परं स्वाधाराच्च कथंचिदेव तौ भिन्नाविच्छन्ति,अतो मिथ्यादृष्टिरेषोऽयं,कणादवदिति ॥ २१९४ ॥ तथाहि-द्वाभ्यामपि द्रव्यपर्यायास्तिकनयाभ्यां सर्वमपि निजं शास्त्रं नीतं समर्थितमुलूकेन तथाऽपि तन्मिथ्यात्वमेव यद्यस्मात्स्वस्वविषयप्राधान्याद्व्युपगमनोलूकाऽभिमतौ द्रव्यपर्यायास्तिकनयावन्योऽन्यनिरपेक्षौ। जैनाभ्युपगतौ पुनस्तौ परस्परसापेक्षौ, स्याद्धवलाङ्कितत्वादिति ॥ २१९५ ॥

अथ सिद्धान्तवादी स्थितपक्षदर्शनार्थमेकान्तवादिनं नैगमं दूषयितुमाह-

जइ सामन्नं साम–न्नबुद्धिहेउत्ति तो विसेसो वि ।
सामन्नमकसाम–न्नबुद्धिहेउ त्ति को भेओ ? ॥२१९६॥

यदि गौः गौः इत्यादिसामान्यबुद्धिवचनहेतुरितिकृत्वा सामान्यं त्वयेष्यते,हन्त ! तर्हि परमाणुगतोऽन्यो विशेषोऽपि सामान्यं प्राप्नोति, विशेषो विशेष इत्यन्यसामान्यबुद्धिवचनहेतुत्वात् । न च विशेषेष्वपि सामान्यमस्ति, द्रव्यगुणकर्मस्वेव तद्व्यपव्युपगमाद् । अथवा-गोत्वगजत्वादिको विशेषोऽपि सामान्यं प्राप्नोति-गोत्वगजत्वादिसामान्येष्वपि सामान्यं प्राप्नोतीत्यर्थः । सामान्यं सामान्यमिति बुद्धिवचनयोस्तत्रापि प्रवृत्तेः । न च सामान्येष्वपि सामान्यमस्ति "निःसामान्यानि सामान्यानि" इति वचनात् । ततश्चोक्तयुक्तेर्विशेषस्यापि सामान्यत्वात् को भेदः सामान्यविशेषयोः ? न कश्चिदित्यर्थः इति ॥२१९६॥

सामान्यस्यापि च विशेषरूपता प्राप्नोतीति दर्शयन्नाह-

जइ जे ण विसेसिज्जइ, सविसेसो तेण जं पि सामन्नं ।
तं पि विसेसोऽवस्सं, सत्ताइविसेससत्ताओ ॥२१९७॥

यदि येन वस्तुना बुद्धिर्वचनं च विशेष्यते स विशेष उच्यते, तेन ततो यदपि परमपरं च सत्ता गोत्वादिकं सामान्यं तदपि विशेषः प्राप्नोति, कुतः ? सत्तादीनामपि विशेषकत्वात्,तथाहि-सत्ता सामान्यमपि गोत्वादिभ्यो बुद्धिवचने विशेषयति, गोत्वादयोऽपि च सत्तादिभ्यस्ते विशेषयन्त्येव,प्रयोगः-सामान्यमपि विशेष एव,बुद्धिवचनविशेषकत्वात्,अन्यविशेषवदिति । तदेवं 'विशेषोऽपि सामान्यम्, सामान्यमपि विशेषः' प्राप्नोतीत्युक्तम् ॥ २१९७ ॥

किं च-"त्रिपदार्थसंकरी सत्ता" इति वचनात्सत्तासमवायात्सत्त्वं भवताऽभ्युपगम्यते तच्चायुक्तम् ।

कुतः ? इत्याह-

सत्ताजोगाहसओ, सओ व सत्तं इवेज्ज दव्वस्स ।
असओ न खपुप्फस्स,व सओ व किं सत्तया कज्जं ?॥२१९८॥

यत्सत्तायोगाद्वस्तुनः सत्त्वमिष्यते तत्स्वरूपेण किं सतोऽसतो वा भवेत् ? इति वक्तव्यम् । न तावदसतः खपुष्पस्येव सत्त्वं युज्यते । यदि तु स्वरूपेणैव सच्चस्तु, तर्हि सत्तया किं कार्यम् ?,तामन्तरेणापि स्वरूपेणैव वस्तुनः सत्त्वादिति ॥२१९८॥

अपि च-

पइवयुं सामन्नं, जइ तोऽणेगं न यावि सामन्नं ।
अह दव्वेसु तदेगं, तह वि सदेसं न सामन्नं ॥ २१९९ ॥

यदि तत्सामान्यं प्रतिवस्तु वर्तते तर्हि नैकम्, प्रतिवस्तुवृत्तित्वाद्, प्रतिवस्तुस्वात्मवत् । यदि वा-न तत्सामान्यं प्रतिवस्तुवृत्तित्वात्, प्रतिवस्तुस्वात्मवत् । अथ बहुषु द्रव्येषु वृत्तमपि तदेकं तथाऽपि सदेशं प्राप्नोति, अदेशस्य परमाणोरिव बहुषु वृत्तियोगात् । सदेशत्वे च सति न सामान्यं, देशाभेदे देशिनोऽपि तदव्यतिरिक्तस्य भेदादिति ॥ २१९९ ॥

अथ प्रतिवस्तु वर्तमानमपि तदेकमिष्यते तथापि दोष इति दर्शयन्नाह-

अह पइवत्थुमिहेगं, च तह वि तं नत्थि खरविसाणं व ।
न य तदुवलक्खणं ते, सव्वगयत्तओ खं व ॥ २२०० ॥

अथ प्रतिवस्तु वर्तते तत्, एकं चेष्यते, तथापि तन्नास्ति, अनुपलभ्यमानत्वात्, खरविषाणवत् । न च तस्य खाभ्रयभूतस्य गवादेरुपलक्षणमुपलक्षकं तद् युज्यते, सर्वगतत्वात्, गवादिव्यक्तिभ्योऽन्यत्वाच्च, आकाशवदिति ॥ २२०० ॥

किं च-

सामन्नविसेसकयं, जइ नाणं तेसु किं निमित्तं तो ।
अह तत्तो चिय तम्हा, तं परहेउ त्ति ऽणेगंतो ॥२२०१॥

यदि गौर्गौरित्यादि सामान्यज्ञानं वचनं च सामान्यहेतुकं प्रवर्तते, तथा परमाणुष्वयमस्माद्विशिष्ट इति विशेषज्ञानं वचनं च यदि विशेषकृतम्, ततस्तेषु गोत्वतुरगत्वादिसामान्येषु सर्वत्र सामान्यं सामान्यमिति ज्ञानं वचनं च तथा तेषु विशेषेषु सर्वत्र विशेषो विशेषः इति विशेषबुद्धिर्वचनं च किं निमित्तमिति वक्तव्यम् ? । न च सामान्येष्वपि सामान्यमस्ति, नापि विशेषेष्वन्ये विशेषाः सन्ति, येन तेषु तन्निमित्ते ते स्याताम् । अथ तत एव तेभ्य एव गोत्वादिसामान्येभ्योऽपरसामान्यमन्तरेणापि सामान्यज्ञानवचनेऽभ्युपगम्येते, विशेषेभ्य एव चान्यविशेषनिरपेक्षेभ्यो विशेषज्ञानवचने इष्येते, तस्मात् तर्हि तत्सामान्यविशेषज्ञानं वचनं च परहेतुकं सामान्यविशेषनिमित्तमेवेति नायमेकान्तः, सामान्यविशेषविषयाभ्यामेव सामान्यविशेषज्ञानवचनाभ्यां व्यभिचारादिति ॥ २२०१ ॥

अथ सिद्धान्तवादी स्थितपक्षमुपदर्शयन्नाह-

तम्हा वत्थूणं चिय, जो सरिसो पज्जवो समामन्नं ।
जो वि सरिसो विसेसो, समओ ऽणत्थंतरं तत्तो ॥२२०२॥

तस्माद्वस्तूनामेव गवादीनां खुरककुदसास्नालाङ्गूलविषाणमात्रादिसदृशलक्षणो यः सदृशः पर्यायः स एव सामान्यं,न पुनरेकनित्यनिरवयवाक्रियसर्वगतत्वादिधर्मोपेतं परैरभ्युपगतम् । यस्तु तेषामेव गवादीनां शाबलेयधावलेयत्वादिको विसदृशोऽन्योऽ

स्यं विलक्षणः पर्यायः स विशेषः स च सामान्यरूपो विशेषरूपश्च पर्यायस्ततो वस्तुनोऽनर्थान्तरमभिन्नः,कथञ्चित्तु परस्परतादिभिर्भिन्नोऽपि न स्वैकान्तेनाभिन्नो भिन्नो वेति द्रष्टव्यमिति । तदेवमुक्तो नैगमनयः ॥ २२०२ ॥

अथ संग्रहनयं व्याचिख्यासुराह-

संगहणं संगिण्हइ, संगिज्झंते व तेण जं नेया ।
तो संगहोत्ति संगहि—य पिंडियत्थं वओ जस्स॥२२०३॥

संग्रहणं सामान्यरूपतया सर्ववस्तूनामाक्रोडनं संग्रहः । अथवा-सामान्यरूपतया सर्वं संगृह्णातीति संग्रहः । अथवा-यस्मात्सर्वेऽपि भेदाः सामान्यरूपतया संगृह्यन्तेऽनेनेति संग्रहः संग्रहीतं च तत्पिण्डितं च संगृहीतपिण्डितं, तदेवार्थोऽभिधेयं वस्य तत्संग्रहीतपिण्डितार्थम् । एवंभूतं वचो वचनं यस्य संग्रहस्येति ॥ २२०३ ॥

तत्र संगृहीतपिण्डितार्थं, किमुच्यते ? इत्याह-

संगहियमागहीयं, संपिंडियमेगजाइमाणीयं ।
संगहियमणुगमो वा, वइरेगो पिंडियं भणियं ॥२२०४॥
अहव महासामन्नं, संगहियं पिंडियत्थमियरंति ।
सव्वविसेसाणन्नं, सामन्नं सव्वहा भणियं ॥ २२०५ ॥

सामान्याऽभिमुखेनाऽऽग्रहणमाग्रहीतुं संग्रहीतमुच्यते,पिण्डितं स्वैकजातिमानीतमभिधीयते,तदेवंभूतं वस्तु अर्थोऽभिधेयं यस्य तत्संगृहीतपिण्डितार्थं वचनं संग्रहनयस्येति स्वयमेव द्रष्टव्यम् । अथवा-संगृहीतमनुगमोऽभिधीयते, सर्वव्यक्तिष्वनुगतस्य सामान्यस्य प्रतिपादनमित्यर्थः। व्यतिरेकस्तु पिण्डितमुच्यते। विशेषप्रतिपादकपरमतनिराकरणमित्यर्थः। ततश्च संगृहीतपिण्डितार्थमनुगमव्यतिरेकार्थं संग्रहवचनमिति द्रष्टव्यम् ॥२२०४॥ अथवा-सत्ताद्वयं महासामान्यं संगृहीतमुच्यते, इतरत्तु गोत्वाश्वत्वादिकमवान्तरसामान्यं पिण्डितार्थमभिधीयते । ततः संगृहीतपिण्डितार्थं परापरसामान्यार्थं संग्रहवचनः किं बहुनोक्तेन? । सर्वे विशेषा अनन्या अभिन्ना यस्य तत्सर्वविशेषानन्यम् । अतः कोटीकृतसर्वविशेषं सामान्यमेव सर्वैः प्रकारैः संग्रहवचनव्यापारविषयतया भणितमिति ॥ २२०५ ॥

कथंचूतं पुनः सामान्यं संग्रहो मन्यते ? विशेषांस्तु कुतोऽसौ नाभ्युपगच्छति ? इति दर्शनार्थमाह—

एकं निच्चं निरवयव—मक्रियं सव्वगं च सामन्नं ।
निस्सामन्नत्ताओ, नऽत्थि विसेसो खपुप्फं व ॥२२०६॥

एकं सामान्यम्,सर्वत्र तस्यैव भावात्,विशेषाणां चाभावात्;तथा-नित्यं सामान्यम्,अविनाशात्;तथा-निरवयवम्,अदेशत्वात्;अक्रियं,देशान्तरगमनाभावात्; सर्वगतं च सामान्यम्, अक्रियत्वादिति । विशेषास्तु न सन्ति, निःसामान्यत्वात्;सामान्यव्यतिरेकिणां तेषामभावात् । इह यत्सामान्यातिरिक्तं तच्चास्ति, यथा खपुष्पमिति ॥ २२०६ ॥

एतदेव समर्थयति—

सदिति भणियम्मि जम्हा, सव्वत्थाणुप्पवत्तए बुद्धी ।
तो सव्वं सम्मत्तं, नऽत्थि तदत्थंतरं किंचि ॥२२०७॥

यस्मात् सदित्येवंभणिते सर्वत्र भुवनत्रयान्तर्वर्ते वस्तुनि बुद्धिरनुप्रवर्तते प्रधावति। न हि तत्किमपि वस्त्वस्ति । यत्सत् इत्युक्ते झगिति बुद्धौ न प्रतिभासते । ततस्तस्मात्सर्वं तन्मात्रमेव सत्तामात्रमेव, न तदर्थान्तरं किञ्चिदस्ति यद्विशेषतया कल्पेत इति ॥ २२०७ ॥

सत्तामात्रत्वमेव सर्वभावानां भावयन्नाह—

कुंभो भावाणन्नो, जइ तो भावो अहव्वहाऽभावो ।
एवं पडाइओ वि हु, भावाणन्न त्ति तम्मत्तं ॥२२०८॥

कुम्भो घटः स भावात् सत्तातोऽन्यः,अनन्यो वा ? । यद्यनन्योऽभिन्नः, तर्हि भावः सत्तामात्रमेवाऽसौ (अहव्वह त्ति) अथान्यथा-भावाद्भिन्नोऽभ्युपगम्यत इत्यर्थः , तर्ह्यभावोऽसत्तावासौ, भावादन्यत्वात्,खरविषाणवदिति। एवं पटादयोऽपि प्रत्येकं वाच्याः। ततस्तेऽपि द्वितीयपक्षेऽसत्त्वप्रसंगाद् भावादनन्येऽभ्युपगन्तव्याः, इति सर्वमेव घटपटादिकं वस्तु तन्मात्रं सत्तामात्रमेवेति ॥ २२०८ ॥

अथवा-सत्त्वमेवार्थोऽभ्यर्थ्याऽभिधीयते । कथम् ? । इत्याह-

तम्मत्तमिह विसेसो,सामन्नं पि व पमेयभावाओ ।
सव्वत्थ सम्मईओ, वत्तिचाराभावओ वा वि ॥२२०९॥

तन्मात्रमिह विशेषा इति प्रतिज्ञा, प्रमेयत्वात्, सामान्यवत् । अथवा-अन्यो हेतुः-सर्वत्र सम्मतेर्व्यभिचाराभावात् । सर्वत्र सम्मतिप्रवृत्तेरित्यर्थः । इति ॥ २२०९ ॥

प्रकारान्तरेणापि विशेषाणां सामान्यरूपतां-साधयितुमाह-

चूओ वणस्सइ चिय, मूलाइगुणो त्ति तस्समूहो व्व ।
गुम्मादओ वि एवं, सव्वे ण वणस्सइविसिट्ठा ॥२२१०॥

चूतो वनस्पतिः सामान्यरूप एव, मूलादिगुणत्वात्, तत्समूहवत्-चूतादिवृक्षसमूहवत्। गुल्मो लतासमूहः, तदादयोऽपि सर्वे वृक्षविशेषा वनस्पतेरविविशिष्टा एव, इति सामान्यमेवास्ति, न विशेषा इति ॥ २२१० ॥

किं च-

सामन्नाउ विसेसो, ऽन्नोऽणन्नो व नत्थि जइ अन्नो ।
निस्सामन्नत्ताओ, ऽणन्नो सामन्नमेवं सो ॥२२११॥

सामान्याद्विशेषोऽन्यः, अनन्यो वा ? । यद्यन्यः, तर्हि नास्त्यसौ, सामान्यबहिर्भूतत्वात्,खरविषाणवत्। अथ अनन्यः तर्हि सामान्यमात्रमेवासौ, तत्स्वरूपवदिति । तदेवमुक्तः संग्रहः ॥२२११॥ विशे० एके तीर्थिकाः सामान्यरूपमेव वाच्यतया अभ्युपगच्छन्ति । ते च द्रव्यास्तिकनयानुपातिनो मीमांसकभेदाः अद्वैतवादिनः सांख्याश्च । केचित्तु विशेषरूपमेवं वाच्यं निर्वर्णयन्ति । ते च पर्यायास्तिकनयानुसारिणः सौगताः । अपरे च-परस्परनिरपेक्षपदार्थपृथग्भूतसामान्यविशेषयुक्तं वस्तु वाच्यत्वेन निश्चिन्वते । ते च नैगमनयानुरोधिनः काणादाः, अक्षपादाश्च । एतच्च पक्षत्रयमपि किञ्चिदुच्यते । तथाहि-संग्रहनयावलम्बिनो वादिनः प्रतिपादयन्ति-सामान्यमेव तत्त्वं, ततः पृथग्भूतानां विशेषाणामदर्शनात्। तथा सर्वमेकमविशेषेण सदिति ज्ञानाऽभिधानानुवृत्तिलिङ्गानुमितसत्ताकत्वात्। तथा द्रव्यत्वमेव तत्त्वं,ततोऽर्थान्तरभूतानां धर्माऽधर्माऽऽकाशकालपुद्गलजीवद्रव्याणामनुपलब्धेः । किं च-ये सामान्यात् पृथग्भूता अन्योऽन्यव्यावृत्तात्मका विशेषाः कल्प्यन्ते, तेषु विशेषत्वं विद्यते न

वा ?। नो चेन्निःस्वभावताप्रसंगः, स्वरूपस्यैवाऽभावात्। अस्ति चेत्तर्हि तदेव सामान्यम्। यतः समानानां भावः सामान्यम्। विशेषरूपतया च सर्वेषां तेषामविशेषेण प्रतीतिः सिद्धैव। अपि च-विशेषाणां व्यावृत्तिप्रत्ययहेतुत्वं लक्षणम्। व्यावृत्तिप्रत्यय एव च विचार्यमाणो न घटते। व्यावृत्तिर्हि विवक्षितपदार्थे इतरपदार्थप्रतिषेधः। विवक्षितपदार्थश्च स्वस्वरूपव्यवस्थापनमात्रपर्यवसायी कथं पदार्थान्तरप्रतिषेधे प्रगल्भते ?। न च स्वरूपसत्त्वादन्यत्तत्र किमपि, येन तन्निषेधः प्रवर्त्तेत। तत्र च व्यावृत्तौ क्रियमाणायां स्वात्मव्यतिरिक्ता विश्वत्रयवर्तिनोऽतीतवर्तमानाऽनागताः पदार्थाः,तस्माद् व्यावर्तनीयाः। ते च नाकृतस्वरूपा व्यावर्तयितुं शक्याः। ततश्चैकस्यापि विशेषस्य परिज्ञाने प्रमातुः सर्वज्ञत्वं स्यात्। न चैतत्प्रातीतिकं,यौक्तिकं वा। व्यावृत्तिस्तु निषेधः। स चाभावाकारवाचकशब्दः कथं प्रतीतिगोचरमञ्चति शशशृङ्गवत्। तथा येभ्यो व्यावृत्तिस्ते सद्रूपा असद्रूपा वा ?। असद्रूपाश्चेत्तर्हि खरविषाणात् किं न,व्यावृत्तिः?। सद्रूपाश्चेत्सामान्यमेव। या चेयं व्यावृत्तिर्विशेषैः क्रियते सा सर्वासु विशेषव्यक्तिष्वेकाऽनेका वा ?। अनेका चेत्तस्या अपि विशेषत्वापत्तिरनेकरूपत्वैकजीवितत्वाद्विशेषाणाम्। ततश्च तस्या अपि विशेषत्वान्यथानुपपत्तेर्व्यावृत्त्या भाव्यम्। व्यावृत्तेरपि च व्यावृत्तौ विशेषाणामभाव एव स्यात्; तत्स्वरूपच्युतायां व्यावृत्तेः प्रतिषिद्धत्वात्, अनवस्थापाताच्च। एका चेत्सामान्यमेव संक्रान्तरेण प्रतिपत्तं स्यादनुवृत्तिप्रत्ययलक्षणाऽव्यभिचारात्। किं चाऽमी विशेषाः सामान्याद् भिन्नाः अभिन्ना वा ?। भिन्नाश्चेत् मण्डूकजटाभारानुकाराः। अभिन्नाश्चेत्तदेव तत्स्वरूपवत्। इति सामान्यैकान्तवादः। पर्यायनयवादिनस्तु भाषन्ते-विविक्ताः क्षणक्षयिणो विशेषा एव परमार्थः,ततो विश्वभूतस्य सामान्यस्याप्रतीयमानत्वात्। न हि गवादिव्यक्तयोऽनुगतकाले वर्णसंस्थानात्मकं व्यक्तिरूपमपहायाऽन्यत् किंचिदेकमनुयायि प्रत्यक्षे प्रतिभासते; तादृशस्यानुगताभावात्। तथा च पठन्ति-

" एतासु पञ्चस्वयमासिनीषु, प्रत्यक्षबोधे स्फुटमुल्लसीषु।
साधारणं रूपमवेक्षते यः, शृङ्गे शिरस्यात्मन ईक्षते सः ॥१॥"

एकाकारपरामर्शप्रत्ययस्तु स्वहेतुदत्तशक्तिक्यो व्यक्तिभ्य एवोत्पद्यते। इति न तेन सामान्यसाधनं न्याय्यम्। किं च-यदिदं सामान्यं परिकल्प्यते, तदेकमनेकं वा ?। एकमपि सर्वगतमसर्वगतं वा ?। सर्वगतं चेत् किं न व्यक्तयन्तरालेषूपलभ्यते ?। सर्वगतैकत्वाभ्युपगमे च तस्य यथा गोत्वसामान्यं गोव्यक्तीः क्रोडीकरोति। एवं किं न घटपटादिव्यक्तीरपि; अविशेषात् ?। असर्वगतं चेत् विशेषरूपापत्तिरभ्युपगमबाधश्च। अथाऽनेकं गोत्वाश्वत्वघटत्वपटत्वादिभेदभिन्नत्वात्ते तर्हि विशेषा एव स्वीकृताः, अन्योऽन्यं व्यावृत्तिहेतुत्वात्। न हि यद्गोत्वं तदश्वत्वात्मकमिति। अर्थक्रियाकारित्वं च वस्तुनो लक्षणम्। तच्च विशेषेष्वेव स्फुटं प्रतीयते। न हि सामान्येन काचिदर्थक्रिया क्रियते, तस्य निष्क्रियत्वात्, बाहदोहादिकास्त्वर्थक्रियासु विशेषाणामेवोपयोगात्। तथेदं सामान्यं विशेषेभ्यो भिन्नमभिन्नं वा ?। भिन्नं चेदवस्तु, विशेषविश्लेषेणार्थक्रियाकारित्वाऽभावात्। अभिन्नं चेत् विशेषा एव तत्स्वरूपवत्। इति विशेषैकान्तवादः। नैगमनयानुगामिनस्त्वाहुः-स्वतन्त्रौ सामान्यविशेषौ, तथैव प्रमाणेन प्रतीतत्वात्। तथाहि-सामान्यविशेषावत्यन्तभिन्नौ, विरुद्धधर्माध्यासितत्वात्। यावेवं तावेवं यथा पाथः पावकौ। तथा चैतौ। तस्मात्तथा। सामान्यं हि गोत्वादिसर्वगतम्। तद्विपरीताश्च शबलशाबलेयादयो विशेषास्ततः कथमेषामैक्यं युक्तम् ? न सामान्यात् पृथक् विशेषस्योपलम्भ इति चेत् कथं तर्हि तस्योपलम्भ इति वाच्यम् ?। सामान्यव्याप्तस्येति चेत् न तर्हि स विशेषोपलम्भः, सामान्यस्यापि तेन ग्रहणात्। ततश्च तेन बोधेन विविक्तविशेष ग्रहणाभावात् तद्विशेषवाचकध्वनिं तत्साध्यं च व्यवहारं न प्रवर्तयेत् प्रमाता। न चैतदस्ति ; विशेषाभिधानव्यवहारयोः प्रवृत्तिदर्शनात्। तस्माद् विशेषमभिलषता तत्र च व्यवहारं प्रवर्तयता तद्ग्राहको बोधो विविक्तोऽभ्युपगन्तव्यः। एवं सामान्यस्थाने विशेषशब्दं विशेषस्थाने च सामान्यशब्दं प्रयुञ्जानेन सामान्येऽपि तद्ग्राहको बोधो विविक्तोऽङ्गीकर्तव्यः। तस्मात् स्वस्वग्राहिणि ज्ञाने पृथक् प्रतिभासमानत्वाद् ज्ञानयोरेतरविशकलितौ। ततो न सामान्यविशेषात्मकत्वं वस्तुनो घटते इति स्वतन्त्रसामान्यविशेषवादः। तदेतत्पक्षत्रयमपि न क्षमते क्षोदं, प्रमाणबाधितत्वात्। सामान्यविशेषोभयात्मकस्यैव च वस्तुनो निर्विघ्नानमनुभूयमानत्वात्। वस्तुनो हि लक्षणमर्थक्रियाकारित्वम। तच्चानेकान्तवादे एवाविकलं कलयन्ति परीक्षकाः। तथाहि-यथा गौरित्युक्ते खुरककुदसास्नालाङ्गूलविषाणाद्यवयवसंपन्नं वस्तु स्वरूपं सर्वव्यक्तयनुयायि प्रतीयते तथा महिष्यादिव्यावृत्तिरपि प्रतीयते। यद्यपि च शबला गौरित्युच्यते तत्रापि यथा विशेषप्रतिभासस्तथा गोत्वप्रतिभासोऽपि स्फुट एव। शबलेति केवलविशेषणोच्चारणेऽपि अर्थात्,प्रकरणात् वा गोत्वमनुवर्तते। अपि च शबलत्वमपि नानारूपं, तथा दर्शनात्। ततो वक्ता शबलेत्युक्ते क्रोडीकृतसकलशबलसामान्यं विवक्षितगोव्यक्तिगतमेव शबलत्वं व्यवस्थाप्यते। तदेवमाबालगोपालं प्रतीतिसिद्धेऽपि वस्तुनः सामान्यविशेषात्मकत्वे तदुभयैकान्तवादः प्रलापमात्रम्। न हि कश्चित्कदाचित्केनचित्सामान्यं विशेषं विना कृतमनुभूयते। विशेषा वा तद्विना कृताः केवलं दुर्णयप्रभावितमतिव्यामोहवशादेकमपलप्यान्यतरद् व्यवस्थापयन्ति बालिशाः। सोऽयम्-अन्धगजन्यायः। येऽपि च तदेकान्तपक्षोपनिपातिनः प्रागुक्ता दोषास्तेऽपि अनेकान्तवादप्रचण्डमुद्गरप्रहारजर्जरितत्वान्नोच्छ्वसितुमपि क्षमाः। स्वतन्त्रसामान्यविशेषवादिनस्त्वेवं प्रतिक्षेप्याः-सामान्यं प्रतिव्यक्ति कथञ्चिद्भिन्नं,कथंचित्तदात्मकत्वाच्चित्रपरिणामवत्। यथैव हि काचिद् व्यक्तिरुपलभ्यमाना व्यक्त्यन्तराद्विशिष्टा विशदृशपरिणामदर्शनादवतिष्ठते तथा सदृशपरिणामात्मकसामान्यदर्शनात् समानेति, तेन समानो गौरयं सोऽनेन समानः इति प्रतीतेः। न चास्य व्यक्तिस्वरूपादभिन्नत्वात् सामान्यरूपताव्याघातः। यतो रूपादीनामपि व्यक्तिस्वरूपादभिन्नत्वमस्ति, न च तेषां गुणरूपताव्याघातः। कथंचिद् व्यतिरेकस्तु रूपादीनामिव सदृशपरिणामस्याप्यस्त्येव। पृथक् व्यपदेशादिनाकत्वात्। विशेषा अपि नैकान्तेन सामान्यात् पृथग् भवितुमर्हन्ति। यतो यदि सामान्यं सर्वगतं सिद्धं भवेत्तदा तेषामसर्वगतत्वेन ततो विरुद्धधर्माध्यासः स्यात्। न च तत्तथाविधं, प्रागुक्तयुक्त्या निराकृतत्वात्, सामान्यस्य विशेषाणां च कथंचित्परस्परव्यतिरेकेणानेकरूपतया व्यवस्थितत्वात्। विशेषेभ्योऽव्यतिरिक्तत्वाच्चि सामान्यमप्यनेकमिष्यते। सामान्याच्च विशेषाणामव्यतिरेकेण तेषामप्येकरूपता इति। एकत्वं च सामान्यस्य संग्रहनयार्पणात् सर्वत्र विज्ञेयम्,प्रमाणार्पणात्तस्य सदृशपरिणामरूपस्य विसदृशपरि-

णामवत्कथञ्चित्प्रतिव्यक्तिभेदात् । एवं चासिद्धं सामान्यविशेषयोः सर्वथा विरुद्धधर्माध्यासितत्वम् । कथञ्चिद्विरुद्धधर्माध्यासितत्वं चेद्विवक्षितं तदास्मत्पक्षप्रवेशः, कथञ्चिद्विरुद्धधर्माध्यासस्य कथञ्चिद्भेदाविनाभूतत्वात् । यथाः पावकदृष्टान्तोऽपि साध्यसाधनविकलः, तयोरपि कथंचिद्भेद विरुद्धधर्माध्यासितत्वेन निश्चत्वेन च स्वीकरणात् । पचस्वपावकवादिना हि तयोर्विरुद्धधर्माध्यासो भेदश्च, द्रव्यत्वादिना पुनस्तद्विपरीतमिति । तथा च-कथं न सामान्यविशेषात्मकत्वं वस्तुनो घटत? इति । स्या० १४ श्लोक । तथा च सूत्रकृताङ्गवृत्तौ-सर्वमपि यदस्ति तत्सामान्यविशेषात्मकं नरसिंहाकारमुभयस्वभावमिति । तथा चोक्तम्—

" नान्वयः सह भेदत्वा-च्च भेदोऽन्वयवृत्तितः ।
मृद्भेदद्रव्यसंसर्ग-वृत्तिजात्यन्तरं घटः ॥ १ ॥ "

तथा—

" नरस्य सिंहरूपत्वा-च्च सिंहो नररूपतः ।
शब्दविज्ञानकार्याणां, भेदाज्जात्यन्तरं हि सः ॥ २ ॥ "

इत्यादि । सूत्र० १ श्रु० १२ अ० ।

" व्यक्तेरभेदस्तुल्यत्वं, शङ्करोऽथानवस्थितिः ।
रूपहानिरसंबन्धो, जातिबाधकसंग्रहः ॥१॥ " इति ।

अस्य व्याख्या-आकाशत्वं न जातिः । व्यक्तैक्यात् । १ । घटत्वकलशत्वे न जाती । व्यक्तितुल्यत्वात् । २ । भूतत्वमूर्तत्वे न जाती । आकाशे भूतत्वस्यैव मनसि च. मूर्तत्वस्यैव सद्भावेऽपि पृथिव्यादिचतुष्टये उभयोः सद्भावात् सङ्करप्रसङ्गः ।३। जातेरपि जात्यन्तराङ्गीकारे ऽनवस्थाप्रसङ्गः । ४। अत्यन्तविशेषता न जातिः । तदङ्गीकारे तत्स्वरूपव्याघातसिद्धानिः स्यात् । ५ । समवायतो न जातिः संबन्धाऽभावात् । ६ । इत्येते जातिबाधकाः । स्या०८ श्लोक । कर्मवशाद्भ्रमतां विचित्रजातिगर्भनाजातेरशाश्वतत्वम् । अतो न जातिमदो विधेय इति । यद्यपि केचिदुच्चते-यथा ब्राह्मणा ब्रह्मणो मुखाद्विनिर्गताः, बाहुभ्यां क्षत्रियाः, ऊरुभ्यां वैश्याः, पद्भ्यां शूद्राः इति । एतदप्यप्रमाणत्वादतिफल्गुप्रायं, तदभ्युपगमे च न विशेषो वर्णानां स्यादेकस्मात् प्रसूतेर्बुध्नशाखाप्रतिशाखाप्रभूतपनसोदुम्बरादिफलवद्ब्रह्मणो वा मुखादेरवयवानां चातुर्वर्ण्यावाप्तिः स्यात् न चैतदिष्यते भवद्भिस्तथा यदि ब्राह्मणादीनां ब्रह्मणो मुखादेरुद्भवः । सांप्रतं किं न जायते ?। अथ युगादावेतदित्थं सति दृष्टहानिरदृष्टकल्पना स्यादिति । तथा यदि कैश्चिदभ्युपायि सर्वकृतिक्षेपावसरे तथाभूतसर्वकृरहितोऽतीतः कालः कालत्वाद्वर्त्तमानकालवदेव च सत्यतदपि शक्यते वक्तुं यथा नाऽतीतः कालो ब्रह्ममुखादिविनिर्गतचातुर्वर्ण्यसमन्वितः । कालत्वाद्वर्तमानकालवद्भवति च विशेषे पक्षीकृते सामान्यहेतुरित्यतः प्रतिज्ञार्थैकदेशासिद्धता नाशङ्कनीयेति । जातेश्चानित्यत्वं युष्मास्विद्धान्त एवाऽभिहितम् । तथाहि—शृगालो वा एष जायते यः स पुरीषो दह्यते इत्यादिना । तथा-" सद्यः पतति मांसेन, लाक्षया लवणेन च । त्र्यहेण शूद्रीभवति, ब्राह्मणः क्षीरविक्रयी ॥ १ ॥ " इत्यादि लोके चावश्यं नाम्नी जातिपातः । यत उक्तम्-"काविकैः कर्मणां यांति-र्याति स्थावरतां नरः । वाचिकैः पक्षिमृगतां, मानसैरन्त्यजातिताम् ॥१॥" इत्यादिगुणैरप्येवंविधैर्न ब्राह्मणत्वं शुध्यते । सूत्र० २ श्रु० ६ अ० । ब्राह्मणत्वादिजातिश्च न कस्यचित् कारणम् । स्मृतावप्युक्तम्-

" कैवर्तीगर्भसंभूतो, व्यासो नाम महामुनिः ।
तपसा ब्राह्मणो जातः, तस्माज्जातिरकारणम् ॥
हरिणीगर्भसंभूतो, हैरण्योऽपि महामुनिः ।
तपसा ब्राह्मणो जातस्तस्माज्जातिरकारणम् ॥ " दश०२ तत्त्व ।

क्रियाकर्मविभागेन हि चातुर्वर्ण्यव्यवस्था वत उक्तम्—

" एकवर्णमिदं सर्वं, पूर्वमासीद् युधिष्ठिर ! ।
क्रियाकर्मविभागेन, चातुर्वर्ण्यं व्यवस्थितम् ॥१॥
ब्राह्मणो ब्रह्मचर्येण, यथा शिल्पेन शिल्पकः ।
अन्यथा नाम मात्रं स्या-दिन्द्रगोपकसंज्ञवत् ।२। उत्त०२६अ०।

(समानां वर्णानां नवानां च वर्णान्तराणामुत्पत्तिः ' बंभ ' शब्दे वक्ष्यते) व्याकरणोक्ते पौत्राद्यपत्यात्मके गोत्रे, वेदशाखाभेदे च । न्यायोक्ते साधर्म्यवैधर्म्याभ्यां व्याप्तिनिरपेक्षाभ्यां वादिवाक्येषु दूषणदानरूपे वाक्ये, वाच० । तथा सम्यग्धेतौ हेत्वाभासे वा वादिना प्रयुक्ते झटिति तद्दोषतत्त्वाप्रतिभाने हेतुप्रतिबिम्बनप्रायं किमपि प्रत्यवस्थानं जातिर्दूषणाभास इत्यर्थः । सा च चतुर्विंशतिभेदा साधर्म्यादिप्रत्यवस्थानभेदेन । यथा साधर्म्यवैधर्म्योत्कर्षापकर्षवर्ण्याऽवर्ण्याविकल्पसाध्यप्राप्त्यप्राप्तिप्रसङ्गप्रतिदृष्टान्तानुत्पत्तिसंशयप्रकरणाहेत्वर्थापत्त्यविशेषोपपत्त्युपलब्ध्यनुपलब्धिनित्यानित्यकार्यसमाः । तत्र साधर्म्येण प्रत्यवस्थानं साधर्म्यसमा जातिर्भवति । 'अनित्यः शब्दः' कृतकत्वाद् घटवदिति प्रयोगे कृते साधर्म्यप्रयोगेणैव प्रत्यवस्थानम् । 'नित्यः शब्दो' निरवयवत्वात् आकाशवत् । न चास्ति विशेषहेतुर्घटसाधर्म्यात् कृतकत्वात् अनित्यः शब्दो, न पुनराकाशसाधर्म्यान्निरवयवत्वात् नित्य इति । वैधर्म्येण प्रत्यवस्थानं वैधर्म्यसमा जातिर्भवति । 'अनित्यः शब्दः' कृतकत्वाद् घटवदिति । अत्रैव प्रयोगे स एव प्रतिहेतुर्वैधर्म्येण प्रयुज्यते (घटस्य हि निरवयवित्वं वैधर्म्यं स्वयं सावयवत्वाद्वैधर्म्यम्) 'नित्यः शब्दो' निरवयवत्वात् । अनित्यं हि सावयवं दृष्टं घटादीति न चास्ति विशेषहेतुर्घटसाधर्म्यात् कृतकत्वादनित्यः शब्दो न पुनस्तद्वैधर्म्यात् निरवयवत्वान्नित्य इति । उत्कर्षापकर्षाभ्यां प्रत्यवस्थानमुत्कर्षापकर्षसमे जाती भवतः । तत्रैव प्रयोगे दृष्टान्तधर्मं कांश्चित्साध्यधर्मिण्यापादयन्नुत्कर्षसमां जातिं प्रयुङ्क्ते । यदि घटवत् कृतकत्वात् अनित्यः शब्दो घटवदेव मूर्तोऽपि भवतु । न चेन्मूर्तो घटवदनित्योऽपि मा भूदितिशब्दं धर्मान्तरात्कर्षमापादयति । अपकर्षस्तु घटः कृतकः सन्-अश्रावणो दृष्टः । एवं शब्दोऽप्यस्तु । नो चेद् घटवदनित्योऽपि मा भूदिति । शब्दे श्रावणत्वधर्ममपकर्षतीति । इत्येताश्चतस्रो दिङ्मात्रदर्शनार्थं जातय उक्ताः । एवं शेषा अपि विंशतिरुत्पादशास्त्रादवसेयाः । स्या० १० श्लोक । दूषणाभासास्तु जातयस्तत्र सम्यक् दूषणस्याऽपि न तत्त्वव्यवस्थितिरनियतत्वात् । अनियतत्वं च यदेवैकस्मिन् सम्यग् दूषणं तदेवान्यत्र दूषणाभासं पुरुषशक्त्यपेक्षत्वाच्च दूषणाभासव्यवस्थितेरनियतत्वमिति । कुतः पुनर्दूषणाभासरूपाणां जातीनामवास्तवत्वाच्चासामिति । सूत्र० १ श्रु० १२ अ० । षड्जातिषु, समासु स्वरेषु, अलङ्कारभेदे, चुल्लयाम्, आमलक्याम्, काश्यपेये, छन्दसि, जातिफले, मालत्याम्, पुष्पप्रधाने वृक्षभेदे च । आचा० रा० । प्रज्ञा० । कल्प० । आचा० । ज्ञा० । जातिकुसुमवर्णे, मद्यभेदे, " मेट्ठं च मेरगं च जाइं च " जातिश्च जातिकुसुमवर्णं मद्यमेव। विपा० १ श्रु० २ अ० । जातिनपुंसकगर्भजतिर्यग्मनुष्यमध्ये सम्यक्त्वं प्राप्यते न वेति । प्रश्ने, उत्तरम्-जातिनपुंसकमध्ये

सम्यक्त्वं देशविरतिञ्च प्राप्यत इति आवश्यकादावस्तीति । १२९ प्र० । सेन० २ उल्ला० ।

जाइअंतर–जात्यन्तर–न० । नरसिंहत्वादिके विलक्षणजातौ, " नरस्य सिंहरूपत्वा-न्न सिंहो नररूपतः । शब्दविज्ञानकार्याणां, भेदाज्जात्यन्तरं हि सः ॥१॥ " सूत्र० १ श्रु० १२ अ० ।

जाइअंध–जात्यन्ध–पुं० । जन्मकालादारभ्यान्धे, (विपा०) " केइ पुरिसे जाइअंधे जाइअंधारूवे " जातेरारभ्यान्धो जात्यन्धः । विपा० १ श्रु० १ अ० ।

जाइआजीवणा–जात्याजीवना–स्त्री० । आजीवनाभेदे, पिं० ।

जाइआजीवय–जात्याजीवक–पुं० । जातिं ब्राह्मणादिकामाजीवति उपजीवति तज्जातीयमात्मानं सूत्रादिनोपदर्श्य ततो भक्तादिकं गृह्णातीति जात्याजीवकः । आजीवकभेदे, स्था० ५ ठा० १ उ० । यथा कश्चन भिक्षुर्मालादिजातीयमीश्वरं दृष्ट्वा प्राहाऽहमपि भिक्षुर्मालादिजातीयः स चैकजातिसंबन्धात् तस्य भिक्षादानादिकां प्रतिपत्तिं करोति । इति जात्युपजीवी । प्रव० २ द्वार ।

जाइआरिय–जात्यार्य–पुं० । जातिर्मातृकः पक्षः तया आर्या अपापा निर्दोषा जात्यार्याः । विशुद्धमातृके, (स्था०)

छव्विहा जाइआरिया मणुस्सा पन्नत्ता । तं जहा–
" अंबट्ठा य कलंदा य, विदेहा वेदिगाइया ।
हरिया चुंचुणा चेव, छप्पेया इब्भजाइओ " ॥ १ ॥

अम्बष्ठेत्यादि अनुष्टुप्प्रतिकृतिः बभण्येता इभ्यजातय इति । इभमर्हन्तीति इभ्याः यद् " द्रव्यस्तूपान्तरित ' दन्तिकुतकदन्तिकीदृशो हस्ती न दृश्यते ते इभ्याः " इति श्रुतिः तेषां जातय इभ्यजातयस्ता एता इति । स्था० ६ ठा० ।

जाइआसीविस–जात्याशीविष–पुं० । आशयो दंष्ट्राः तासु विषं येषां ते आशीविषाः । जातित आशीविषा जात्याशीविषाः । वृश्चिकादिके, स्था० ४ ठा० ४ उ० । (' आसीविस ' शब्दे द्वितीयभागे ४८६ पृष्ठे विशेषवक्तव्यता)

जाइकहा–जातिकथा–स्त्री० । विकथाभेदे, नि० चू० १ उ० ।

जाइकुल–जातिकुल–न० । जातिसंबन्धिनि कुले, " तेसि णं भंते ! जीवाणं कइ जाइकुलकोडीजोणिप्पमुहसयसहस्सा पन्नत्ता " । जातिरिति किल तिर्यग्जातिस्तस्याः कुलानि कृमिकीटवृश्चिकादीनि । जी० ३ प्रति० ।

जाइचउक्क–जातिचतुष्क–न० । एकेन्द्रियद्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियजातिस्वरूपे, कर्म० २ कर्म० ।

जाइच्छ–याद्दृक्–त्रि० । यस्येव दर्शनमस्य यद्–दृश–क्विप् वा । यत्सदृशे, यथाविधे, तान्तात् स्त्रियां ङीप् । वाच० ।

जातेरुक्–त्रि० । लब्धचिकीर्षापरिणामे, ध० १ अधि० ।

जाइच्छिय–याद्दृच्छिक–त्रि० । यदृच्छया आगतः उक्ष । यथेच्छया प्राप्ते, वाच० । अतर्कितोपस्थिते काकतालीयादिकल्पे वस्तुनि, तथा च यदृच्छावादिनः आचा० १ श्रु० १ अ० १ उ० । अनर्थके किंत्यादिनाम्नि, न० । स्था० २ ठा० ४ उ० ।

तल्लक्षणं चेदम्–

" यदृस्तुनोऽभिधानं, स्थितमन्यार्थे तदर्थनिरपेक्षम् ।
पर्यायानभिधेयं, च नाम याद्दृच्छिकं च तथा ॥ १ ॥ "

किमेवास्तुप्रदार्थमेतद्व्याख्या–यदृस्तुन इन्द्रादिरभिधानमिन्द्र इत्यादि वर्णावलीमात्रमिदमेव आवश्यकलक्षणवर्णचतुष्टयावलीमात्रं यत्तदोर्नित्याभिसंबन्धात् तन्नामेति संटङ्कः । अथ प्रकारान्तरेण नाम्नो लक्षणमाह–(स्थितमन्यार्थे तदर्थनिरपेक्षं पर्यायानभिधेयं चेति) तदपि नाम यत्कथंभूतमित्याह–अन्यश्चासावर्थश्चान्यार्थो गोपालदारकादिलक्षणः । तत्र स्थितम् अन्यवेन्द्रादार्थे यथार्थत्वेन प्रसिद्धं तदन्यत्र गोपालदारकादौ यदारोपितमित्यर्थः । अत एवाह–(तदर्थनिरपेक्षम् इति) तस्येन्द्रादिनाम्नोऽर्थः परमैश्वर्यादिरूपस्तदर्थः स चासावर्थश्चेति वा तदर्थस्तस्य निरपेक्षं गोपालदारकादौ तथा तदर्थस्याभावात् । पुनः किंभूतं तत् ? इत्याह–पर्यायानभिधेयमिति । पर्यायाणां शक्रपुरन्दरादीनामनभिधेयमवाच्यं गोपालदारकादयो ह्यिन्द्रादिशब्दैरुच्यमाना अपि शचीपत्यादिरिव शक्रपुरन्दरादिशब्दैर्नाभिधीयन्ते अतस्तन्नामाऽपि, नाम–तद्वतोरभेदोपचारात् पर्यायानभिधेयमित्युच्यते । चशब्दान्नाम्न एव लक्षणान्तरसूचकं शचीपत्यादौ प्रसिद्धं तन्नामवाच्यार्थशून्ये अन्यत्र गोपालदारकादौ यदारोपितं तदपि नामेति तात्पर्यम् । तृतीयप्रकारेणापि लक्षणमाह–(याद्दृच्छिकं च तथेति) तथाविधव्युत्पत्तिशून्यं मित्थकपित्थादिरूपं याद्दृच्छिकं स्वेच्छया नाम क्रियते तदपि नामेत्यर्थः ॥ १ ॥ अनु० ।

जाइजरामरणसोगप्पणासण–जातिजरामरणशोकप्रणाशन–त्रि० । जातिर्जन्म, जरा विस्रसा, मरणं प्राणनाशः, शोको मानसो दुःखविशेषः, तान् प्रणाशयत्यपनयति इति जरामरणशोकप्रणाशनः । जातिजरामरणापनयनसमर्थे, ध० २ अधि० । द्व० ।

जाइजुत्त–जातियुक्त–त्रि० । मातृपक्षयुते, जातिर्मातृकी तया युतो विनयादिगुणवान् भवतीति । प्रव० ६४ द्वार ।

जाइजंत–यात्यमान–त्रि० । कदर्थ्यमाने, प्रश्न० १ आश्र० द्वार ।

जाइट्ठि–जातेष्टि–स्त्री० । यज्ञ–क्तिन् जातस्य संस्कारार्थे कर्तव्या इष्टिः । यागभेदः । जातकर्मांदये संस्कारभेदे, पाच० स० ।

जाइट्ठिअ–यदृष्ट–त्रि० । यदृष्टं तत्तदित्यस्मिन्नर्थे, यदृष्टं तत्तदित्यस्य जाइट्ठिअ । जइ रक्खसि, जाइट्ठिअपइट्ठिअमासुरुसहाव । लोहे फुट्टणएण जिम्बणसहेसइ ताव " । प्रा० ४ पाद ।

जाइणाम–जातिनामन्–न० । नामकर्मभेदे, (कर्म०) एकेन्द्रियादीनामेकेन्द्रियत्वादिरूपसमानपरिणतिलक्षणम् एकेन्द्रियादिशब्दव्यपदेशभाक् यत्सामान्यं सा जातिः, तद्विपाकवेद्यं कर्मप्रकृतिरपि जातिः । इदमत्र तात्पर्यम्–रूढ्यरूपमिन्द्रियमङ्गोपाङ्गेन्द्रियपर्याप्तिनामकर्मसामर्थ्यात् सिद्धं, ज्ञायकरूपं तु स्पर्शनादीन्द्रियावरणक्षयोपशमसामर्थ्यात् " क्षायोपशमिकानि इन्द्रियाणि " इति वचनात् । यत्पुनरेकेन्द्रियादिशब्दप्रवृत्तिनिबन्धनं तथा रूपसमानपरिणतिलक्षणं सामान्यं तदव्यभिचारसाध्यत्वाज्जातिनामसाध्यम् । उक्तं च–अव्यभिचारिणा सादृश्येन एकीकृतोऽर्थात्मा जातिः तन्निमित्तं जातिनाम । कर्म० ६ कर्म० प्रक्षा० । पं० सं० ।

तच्च पञ्चधा–

जातिनामेणं भंते ! कम्मे पुच्छा ?। गोयमा ! पंचविहे पन्नत्ते । तं जहा–एगिंदियजातिनामे बेइंदियजातिनामे तेइंदियजातिनामे चउरिंदियजातिनामे पंचिंदियजातिनामे ॥

प्रज्ञा० २३ पद । एकेन्द्रियजातिनाम, द्वीन्द्रियजातीनाम, त्रीन्द्रियजातिनाम, चतुरिन्द्रियजातिनाम, पञ्चेन्द्रियजातिनाम । कर्म० ६ कर्म० । आ० । प्रव० ।

जाइणामगोयनिउत्त–जातिनामगोत्रनियुक्त–त्रि० । जातिनाम गोत्रं च नियुक्तं यैस्ते तथा । नियुक्तजातिनामगोत्रे नारकादौ, भ० ६ श०८ उ० ।

जाइणामगोयनिउत्ताउय–जातिनामगोत्रनियुक्तायुष्–त्रि० । जातिनाम्ना गोत्रेण च सह नियुक्तमायुर्यैस्ते तथा । जातिनाम्ना गोत्रेण च सह नियुक्तायुषि, भ०६ श०८ उ० ।

जाइणामगोयनिहत्त–जातिनामगोत्रनिधत्त–त्रि० । जातिनाम गोत्रं च निधत्तं यैस्ते तथा । निधत्तजातिनामगोत्रे, भ० ६ श० ८ उ० ।

जाइणामगोयनिहत्ताउय–जातिनामगोत्रनिधत्तायुष्–त्रि० । जातिनाम्ना गोत्रेण च सह निधत्तमायुर्यैस्ते तथा । जातिनाम्ना गोत्रेण च सह निधत्तायुषि, भ० ६ श० ८ उ० ।

जाइणामनिउत्त–जातिनामनियुक्त–त्रि० । जातिनाम नियुक्तं नितरां युक्तं संबद्धं निकाचितं वेदने वा नियुक्तं यैस्ते तथा । नियुक्तजातिनामकर्मणि जीवे, भ० ६ श० ८ उ० ।

जाइणामनिउत्ताउय–जातिनामनियुक्तायुष्–त्रि० । जातिनाम्ना सह नियुक्तं निकाचितं वेदयितुमारब्धं यदायुस्तज्जातिनामनियुक्तायुः । जातिनाम्ना सह नियुक्तायुषि, भ० ६ श० ८ उ० ।

जाइणामनिहत्ताउय–जातिनामनिधत्तायुष्–न० । जातिरेकेन्द्रियजात्यादिः पञ्चधा सैव नाम इति नामकर्मण उत्तरप्रकृतिविशेषा जीवपरिणामो वा तेन सह निधत्तं निषिक्तं यदायुस्तज्जातिनामनिधत्तायुः । जातिनाम्ना निधत्ते आयुषि, भ० ६ श० ८ उ० । जातिनाम्ना सह निधत्तमायुर्यैस्ते तथा । जातिनाम्ना सह निधत्तायुषि जीवे, भ० ६ श० ८ उ० । स्था० ।

जाइणिबद्ध–जातिनिबद्ध–न० । भावसूत्रस्य श्रुतस्य भेदे, (सूत्र०)

जातिनिबद्धं तु चतुर्धा । तद्यथा–

कथनीयं कथ्यम् उत्तराध्ययनज्ञाताधर्मकथादि । पूर्वर्षिचरितकथा नकप्रायत्वात्तस्य । तथा गद्यम्–ब्रह्मचर्याध्ययनादि । तथा पद्यम्–छन्दोनिबद्धम् । तथा गेयम्–यत् स्वरसंचारेण गीतिप्रायं निबद्धम् । तद्यथा–कापिलीयमध्ययनम्–" अधुवे असासयम्मि संसारम्मि दुक्खपउराए" इत्यादि । सूत्र०१ श्रु०१ अ० १ उ० ।

जाइ(य)णिहुया–जातिनिर्हु(ई)ता–स्त्री० । जातान्यपत्यानि निर्हुतानि निर्यातानीत्यर्थो यस्याः सा । जातनिर्हुता वा । विहुतापत्यायाम्, "विजयमित्तस्स सत्थवाहस्स सुभद्दा नारिया जाइ (व) णिहुया वि होत्था" । विपा० १ श्रु० २ अ० ।

जाइतिग–जातित्रिक–न० । जातिशब्देनोपलक्षितं त्रिकम् । " जाइजरा " इति गाथावयवोक्ते जातित्रये, तत्र जातयः एकेन्द्रियद्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियपञ्चेन्द्रियाख्याः पञ्च । गतयः सुरनरतिर्यङ्नरकरूपाः चतस्रः । खगतिः प्रशस्ताऽप्रशस्तविहायोगतिभेदेन द्विधा । इत्येवं जातित्रिकशब्देन एकादश प्रकृतयो गृह्यन्ते । कर्म० ५ कर्म० ।

जाइथेर–जातिस्थविर–पुं० । जातिर्जन्म तया स्थविरः जातिस्थविरः । स्थविरभेदे, " सट्ठिवासजाए समणे णिग्गंथे जाइथेरे " स्था० ३ ठा०२ उ० ।

जाइदोस–जातिदोष–पुं० । जातिनिष्ठे दोषे, " स्त्रीजातौ दाम्भिकता, म्लेच्छजातौ भूयसी वणिग्जातौ । रोषः क्षत्रियजातौ, द्विजातिजातौ पुनर्लोभः ॥१॥ " तं० ।

जाइधम्मय–जातिधर्मक–त्रि० । उत्पत्तिधर्मके, "इमं पि जाइधम्मं" जननं जातिरुत्पत्तिस्तद्धर्मकम् । आचा०१श्रु०१ अ०५ उ० ।

जाइपह–जातिपथ–पुं० । जातीनामेकेन्द्रियादीनां पन्थाः जातिपथः । जातिमार्गे, " जाईपहं अणुपरिवइमाणे " सूत्र० १ श्रु० ७ अ० । " पासजाईपहे बहू " । पाशा अत्यन्तपारवश्यहेतवः । कलत्रादिसंबन्धास्त एव तीव्रमोहोदयादिहेतुतया जातीनां पन्थानस्तत्प्रापकत्वान्मार्गाः । उत्त० ६ अ० । संसारे, । "अरक्खिओ जाइपहं उवेइ" जातिपन्थानं जन्ममार्गं संसारमुपैति । दश० २ चू० ।

जाइपुड–जातिपुट–न० । जातिः पुष्पजातिविशेषः पुटं पत्रादिमयं तद्भाजनं जातिपुटम् । जातिपुष्पस्य पत्रादिमये भाजने, ज्ञा० १ श्रु० १७ अ० । " जाइपुडाण वा " रा० ।

जाइप्पसण्णा–जातिप्रसन्ना–स्त्री० । जातिपुष्पवासिता प्रसन्ना जातिप्रसन्ना । सुरामेदे, "जाइप्पसण्णा वा" जी०३ प्रति० ।

जाइप्पाय–जातिप्राय–पुं० । दूषणाभासकल्पे, " जातिप्रायश्च बाध्योऽयं, प्रकृतान्यविकल्पनात् " । जातिप्रायश्च दूषणाभासकल्पश्च बाध्यः प्रतीतिकल्पाभ्यामयं कुतर्क इति । ज्ञा० २३ ज्ञा० ।

जाइबंझा–जातिबन्ध्या–स्त्री० । जातेर्जन्मत आरभ्य बन्ध्या निर्बीजा जातिबन्ध्या । जन्मत आरभ्य निर्बीजायाम्, स्था० ५ ठा० २ उ० ।

जाइभेय–जातिभेद–पुं० । सामान्यलक्षणायां घटत्वादिजातौ,

तस्मात् यतो यतोऽर्थानां, व्यावृत्तिस्तन्निबन्धनाः ।
जातिभेदाः प्रकल्प्यन्ते, तद्विशेषावगाहिनः ॥

तस्मात् स्वपरव्यावृत्तिकरणात् हेतोः यतः यतः सजातीयात् विजातीयाच्च अर्थात् अर्थानां घटादीनां व्यावृत्तिभिन्नरूपता तन्निबन्धना व्यावृत्तिहेतुका जातिभेदाः परपरिकल्पितसामान्यलक्षणाः प्रकल्प्यन्ते । कीदृशाः ? इत्याह–(तद्विशेषावगाहिन इति) तस्य स्वपरव्यावृत्तिभाजः स्वलक्षणस्य विशेषाणामतीतस्वपटलीपुत्रकत्ववासन्तकत्वरक्तत्वादिलक्षणानाम् विकल्पबलाभासनावगाहन्ते अवसम्बन्ते इत्येवं शीलाः ये ते तथा । अने० २ अधि० ।

जाइमंडवग–जातिमण्डपक–पुं० । जातिर्मालती तन्मयो मण्डपको जातीमण्डपकः । जातीमये मण्डपके जं० १ वक्ष० । जी० ।

जाइमंत–जातिमत्–त्रि० । सुजातौ, " जाइमंता ति वा " आचा० २ श्रु० ४ अ० २ उ० ।

जाइमय–जातिमद–पुं० । जात्या मदो जातिमदः । मदस्थानभेदे,

म० ७ सम०।" जाइमएण वा " स्था० १० ठा० । प्रश्न० । जात्या ब्राह्मणब्राह्मणयुद्धत्वेन मदोऽहंकारो जातिमदः । जात्यहंकारे, उत्त० ३ अ०। जातिमदं विदधानो जन्तुरन्यजन्मनि तामेव जातिहीनतां लभते विकटां च भवाटवीं पर्यटतीति। प्रव० १६६ द्वार ।

सर्वेषां मदस्थानानामुपलेरारभ्य जातिमदो बाह्यनिमित्तनिरपेक्षो यतो भवत्यतस्तमधिकृत्याह-

जे माहणो खत्तियजायए वा,तहुग्गपुत्ते तह लेच्छई वा।
जे पव्वइए परदत्तभोई,गोत्तेण जे थब्भति माणवच्छे॥१०॥

यो हि जात्या ब्राह्मणो भवति,क्षत्रियो वा इक्ष्वाकुवंश्यादिकः। तद्वदेवमेव दर्शयति-उग्रपुत्रः क्षत्रियविशेषजातीयः । तथा (लेच्छइ त्ति) क्षत्रियविशेष एव। तदेवमादिविशिष्टकुलोद्भूतो यथावस्थितसंसारस्वभावबोधितया यः प्रव्रजितः त्यक्तराज्यादिगृहपाशबन्धनः परैर्दत्तं लोकः शीलमस्य परदत्तभोजी सम्यक् संयमानुष्ठायी गोत्रे खलुगोत्रे हरिवंशस्थानीये समुत्पन्नोऽपि नैव स्तब्धं गर्वमुपयायादिति । किंभूते गोत्रे ?। अभिमानवर्द्धके अभिमानास्पदे इति । एतदुक्तं भवति-विशिष्टजातीयतया सर्वलोकाऽभिमान्योऽपि प्रव्रजितः सन् कृतशिरस्तुण्डमुण्डनो भिक्षार्थं परगृहाण्यटन् कथं ह्यात्मास्पदं गर्वं कुर्यात् नैवासौ मानं कुर्यादिति तात्पर्यार्थः ॥ १० ॥ सूत्र० १ श्रु० १३ अ०।

जाइमयपडिबद्ध–जातिमदप्रतिबद्ध–पुं० । जात्यहंकारेणान्ने, " जाइमयपडिबद्धा हिंसगा अजिइंदिया " जात्या ब्राह्मणब्राह्मणयुद्धत्वेन यो मदोऽहंकारस्तेन प्रतिस्तब्धाः अनम्राः जातिमदप्रतिस्तब्धाः । उत्त० १२ अ० ।

जाइय–याचित–न० । याच् + क्त । याचनयुक्तौ, याच्ञायां च । कर्मणि क्त । प्रार्थिते, त्रि० । याच० । उत्त० । " सव्वं से जाइयं होइ, नत्थि किंचि वि अजाइयं " आ० म० द्वि० ।

जाइयगमणकरण–याचितकमानयन–न० । मार्गितानयने, पूर्णतायाम्, । परोपाधेः सा याचितकमानयनम् । अनु० १ अनु० ।

जाइलिंग–जातिलिङ्ग–न० । शिरःपाण्यादिके प्राण्यवयवे, जातिलिङ्गानि प्राण्यवयवाः शिरःपाण्यादयस्तैर्हि गोत्वादिलक्षणा जातिर्लिङ्ग्यते इति। सम्म० ३ काण्ड ।

जाइवर–जातिवर–पुं० । जात्युत्तमे, " जाइवरसारइकिसयं " प्रश्न० ४ सम्व० द्वार ।

जाइसंपण्ण–जातिसंपन्न–पुं० । उत्तममातृकपक्षयुते, त्रि० । स्था० । दा० । नि० । झा० । यदाह-" जाइकुलसंपन्नो पावमकिच्चं न सेवइ किंचि आसेविउं च पच्छा तग्गुणओ सम्ममालोए " त्ति । गुणवन्मातृत्वे, स्था० ८ ठा० ।

जाइसर–जातिस्मर–त्रि० । जातिं पूर्वजन्म स्मरति । स्मृ-अच् । अतीतजन्मवृत्तान्तस्मृतियुक्ते, याच० । " जाईसरो व्व पवरं " जातिं स्मरतीति जातिस्मरो भगवान् । "ऋहादिभ्यः"५।१।७० इत्यणपवादोऽच् । आ० म० प्र० । " भवेज्जातिस्मरः पुमान् " जातिस्मरोऽनुभूतभवस्मर्ता । वी० वि० ।

जाइसरण–जातिस्मरण–न० । आभिनिबोधिकज्ञानविशेषे, आचा० १ श्रु० १ अ० १ उ० । आभिनिबोधं ज्ञानमति, " जाईसरणं समुप्पण्णं " जातिस्मरणम् । उत्त० ९ अ० । इह० तं० । जातिस्मरणं द्विविधम्-सनिमित्तकम्,अनिमित्तकं च । तत्र यद्बाह्यं निमित्तमुद्दिश्य जातिस्मरणमुपजायते तत्सनिमित्तकम् । यथा बलकलचीरप्रभृतीनाम् । यत्पुनरेव तदावारककर्मणां क्षयोपशमेनोत्पद्यते तदनिमित्तकं यथा स्वयं बुद्धकपिलादीनाम् । वृ० १ उ० । जातिस्मरणं च संज्ञिजातिविषयकमेव " सन्निपुव्वे जाईसरणे समुप्पज्जित्था " संज्ञिनः पूर्वजातिः प्राक्तनं जन्म तस्या यत्स्मरणं तत्संज्ञिपूर्वजातिस्मरणम् । स्वसंनिर्देशे तु संज्ञी पूर्वो भवो यत्र तत्संज्ञिपूर्वी संज्ञीति च विशेषणं स्वरूपज्ञापनार्थं न ह्यसंज्ञिजातिविषयं स्मरणमुत्पद्यत इति । आ० १ श्रु० १ अ० ।

तथा चोत्तराध्ययने—

देवलोगचुओ संतो, माणुस्सं भवमागओ ।
सन्निनाणसमुप्पन्ने, जाईसरणं पुराणयं ॥ ८ ॥

देवलोकात् च्युतः सन् मानुष्यं भवमागतः इति संज्ञिज्ञाने समुत्पन्ने सति पुराणकं प्राचीनं जातिस्मरणमुत्पन्नमिति शेषः । संज्ञिनो गर्भजपञ्चेन्द्रियस्य ज्ञानं संज्ञिज्ञानं तस्मिन् संज्ञिज्ञाने । उत्त० १० अ० ।

जातिस्मरणं कस्मात्तदाह—

संस्कारे पूर्वजातीनाम्, ... (६)

संस्कारे स्मृतिमात्रफले जात्यायुर्भोगलक्षणे च " एवं मया सोऽर्थोऽनुभूतः, एवं मया सा क्रिया कृता " इति भावनया संयमात् पूर्वजातीनां प्रागनुभूतजातीनां धीरनुस्मृतिरवबोधकमन्तरेणैव भवति। तदुक्तम्-"संस्कारस्य साक्षात्करणात् पूर्वजातिज्ञानम्" (६) द्वा० २६ द्वा० ।

जातिस्मरणकारणानि योगबिन्दौ यथा-

ब्रह्मचर्येण तपसा, सद्वेदाध्ययनेन च ।
विद्यामन्त्रविशेषेण, सत्तीर्थासेवनेन च ॥ ५७ ॥

ब्रह्मचर्येण भावतो वस्तिनिरोधरूपेण, तपसा उपवासादिना, सद्वेदाध्ययनेन च सता सुन्दरेणात्मानुग्रहादिपरिणामयुक्ततया वेदस्य सद्भूतार्थागमस्याध्ययनेन वाचनापृच्छनादिस्वभावेन । चः समुच्चये । विद्यामन्त्रविशेषेण ससाधना स्त्रीस्वामिका वा विद्या, मन्त्रश्च तदितररूपः । ततो मन्त्रश्चाक्षरप्रसिद्धेर्विद्यामन्त्रयोर्विशेषेण भेदेन सत्तीर्थासेवनेन च सतः सातिशयस्य व्यसनसलिलनिधिनिस्तारणोपायस्य स्थावरजङ्गमभेदभिन्नस्य तीर्थस्य आसेवनेन पर्युपासनेन । चः प्राग्वत् ॥ ५७ ॥

तथा-

पित्रोः सम्यगुपस्थानात्, ग्लानभैषज्यदानतः ।
देवादिशोधनाच्चैव, भवेज्जातिस्मरः पुमान् ॥ ५८ ॥

पित्रोः जननीजनकयोः सम्यक् यथावत् उपस्थानात् त्रिसंध्यप्रणामादिविनयरूपात्, " पूजनं चास्य विज्ञेयं, त्रिसंध्यं नमनक्रिया " इत्यादि वक्ष्यमाणत्। ग्लानभैषज्यदानतः ग्लानानां ज्वरादिरोगोपहतशरीरशक्तीनां प्रेषज्यस्यौषधस्य दानतो वितरणात्, " देवादिशोधनाच्चैव " देवदेवस्थानपुस्तकसाधूपाश्रयादेर्धर्मकार्योपयोगिनः । " शोधनात् " तथाविधमला-

पनयनेन निर्मलीकरणाद्भवेज्जायेत जातिस्मरोऽनुभूतभवस्मर्ता पुमान् प्राणी ब्रह्मचर्यादीनां योगविशेषाणां ज्ञानावरणह्रासान्तरङ्गकरणत्वात् ।

अत्रैव प्रसङ्गसिद्धिमाह-

अत एव न सर्वेषा-मेतदागमनेऽपि हि ।
परलोकात् यथैकस्मात्, स्थानात् तनुभृतामिति ॥६६॥

" अत एव " इत्यादि । अत एव ब्रह्मचर्यादेर्जातिस्मरणहेतुत्वादेव (न) नैव सर्वेषां देहिनाम् । एतत् जातिस्मरणम्, आगमनेऽपि ह्यागतावपि किं पुनर्लोकायतमतेन तद्भव इत्यपिहिशब्दार्थः । परलोकात् परभवात् । " यथा " इतिदृष्टान्तार्थे एकस्मात् स्थानात् पाटलिपुत्रकादेरागमनेऽपि तनुभृताम् तन्नानुभूतार्थस्मरणम् । ' इतिः ' वाक्यपरिसमाप्तौ । इदमुक्तं भवति—यथैकस्मात् पाटलिपुत्रकादेः स्थानादागतानामपि सुबहूनां पथिकानां कश्चिद्विवक्षिते स्थाने न सर्वेषां प्रागनुभूतार्थस्मृतिरुपजायते, किं तु कस्यांचिदेव, एवं भवान्तरस्मृतावपि योजना स्यादिति न चाल्पबहुत्वेन स्मर्तृणां दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यमुद्भावनीयं, स्मर्तृसंभवमात्रस्य प्रतिपादयितुमिष्टत्वात् दृष्टान्तदार्ष्टान्तिकयोः सर्वदा, साधर्म्याभावाच्च ॥६६॥

एतदेव भावयन्नाह—

न चैतेषामपि ह्येत-दुन्मादग्रहयोगतः ।
सर्वेषामनुभूतार्थ-स्मरणं स्याद्विशेषतः ॥ ६० ॥

(न च) नैव । एतेषामप्येकस्थानादागतानां किं पुनर्भवान्तरादागतानामपि इत्यपिशब्दार्थः । हिः यस्मात् एतादृशम् । उन्मादग्रहयोगतः उन्मादो मोहावेशो ग्रहश्च भूतावेशस्तत उन्मादग्रहयोर्योगः संबन्धस्तस्मात् । सर्वेषां समस्तानाम् । किमित्याह-अनुभूतार्थस्मरणं (स्याद्) भवेद् विशेषतः सर्वान् विशेषान् प्रतीत्य किं तु सामान्येनैव ॥ ६० ॥

अथ दार्ष्टान्तिके सर्वेषां सामान्येन स्मृतिर्यथा स्यात्तथाह-

सामान्येन तु सर्वेषां, स्तनवृत्त्यादिचिह्नितम् ।
अभ्यासातिशयात् स्वप्न-वृत्तितुल्यं व्यवस्थितम् ॥६१॥

सामान्येन साधारणतया । तुः विशेषणार्थः । सर्वेषां समस्तानां प्राणिनाम् । स्तनवृत्त्यादिचिह्नितं स्तनवृत्तिस्तदहर्जातानां स्तनपानरूपा । आदिशब्दात् रमणीयरूपकन्दुकाद्यवलोकनकुतूहलादिका विविधा चेष्टा गृह्यते । तया चिह्नितं व्यक्तिभावमानीतम् ' जातिस्मरणम् ' इति गम्यते । कीदृशमित्याह-(अभ्यासातिशयात्) पुनः पुनरासेवनमभ्यासस्तस्यातिशय उत्कर्षस्तस्मात् । (स्वप्नवृत्तितुल्यम्) । स्वप्नकालोपलभ्यमानविचित्रानुभूतनवदेवकुलादिविहारादिव्यवहारसमम् । (व्यवस्थितम्) प्रतिष्ठितम् । यथाभ्यासातिशयात् स्वप्ने दिनानुभूतोऽर्थ उपलभ्यते, एवं स्तनवृत्त्यादिको व्यवहारः प्राग्भवानुभूतोभवान्तर इति ॥ ६१ ॥

ननु स्वप्नवृत्तिः पश्चादपि स्मर्यते न त्वेवं स्तनादिवृत्तिर्भवान्तरसंबन्धिनी। इह स्मर्यत इति कथम् अनयोर्दृष्टान्तदार्ष्टान्तिकभाव इत्याशङ्क्याह—

स्वप्ने वृत्तिस्तथाभ्यासा-द्विशिष्टस्मृतिवर्जिता ।
जाग्रतोऽपि क्वचित्सिद्धा, सूक्ष्मबुद्ध्या निरूप्यताम् ॥६२॥

स्वप्ने प्रवृत्तिरुक्तरूपा (तथाभ्यासात्) तत्प्रकारादभ्यासात्; मन्दाभ्यासादित्यर्थः (विशिष्टस्मृतिवर्जिता) स्फुटप्रतिभासरूपस्मरणरहिता । " क्वचित् सिद्धा " इत्युत्तरेण योगः । तथा-(जाग्रतोऽपि) क्षीणनिद्रस्य कस्यचित् किं पुनरन्यस्येति क्वचित् क्षेत्रे काले वा (सिद्धा) सर्वलोकसंमत्या प्रतिष्ठिता वृत्तिर्गच्छतृणस्पर्शादिका तथाऽभ्यासादेव स्मृतिवर्जिता । एतदर्थप्रतीतावुपदेशमाह-(सूक्ष्मबुद्ध्या) निपुणाभोगेन (निरूप्यताम्) परिभाव्यतामेतदन्यथा उक्तस्यार्थस्य सम्यगवगमाभावात् ॥६२॥

अथ प्रकारान्तरत एव जातिस्मरणादात्मसिद्धिमभिधित्सुराह—

श्रूयन्ते च महात्मानः, एते दृश्यन्त इत्यपि ।
क्वचित्संवादिनस्तस्मा-दात्मादेर्हन्त निश्चयः ॥ ६३ ॥

(श्रूयन्ते) समाकर्ण्यन्ते कथानकेषु भरुकच्छादौ शकुनिकाजीवराजपुत्रीसुदर्शनादयः। चकारो हेत्वन्तरसमुच्चये । (महात्मानः) प्रशस्तस्वभावाः । (एते) जातिस्मरकाः । (दृश्यन्त इत्यपि) दृश्यन्ते साक्षादेव क्वचित् इदानीमप्युपलभ्यन्ते । कीदृशाः ? इत्याह-(संवादिनः) विसंवादविकलवचनाः । ततः किमित्याह-(तस्मात्) जातिस्मरकादिसंवादात् (आत्मादेः) जीवकर्मादेरतीन्द्रियस्यापि कथंचिद् । " हंत " इति कोमलामन्त्रणे । निश्चयः संपद्यते इति ॥ ६३ ॥

अथ निगमयन्नाह-

एवं च तत्त्वसंसिद्धे-र्योग एव निबन्धनम् (६४)

(एवम्) चोक्तन्यायेनैव (तत्त्वसंसिद्धेः) आत्मादृष्टादिप्रतीतेः योग एव नापरं किञ्चित (निबन्धनं) हेतुर्वर्तते । (६४) यो० वि० ।

ननु नवमासमन्तरितमपि प्राक्तनं भवं सामान्यजीवः कथं स्मरतीत्याह-

जायमाणस्स जं दुक्खं, मरमाणस्स वा पुणो।
तेण दुक्खेण संमूढो, जाइं सरइ न अप्पणो ॥ १ ॥

जायमानस्य गर्भान्निस्सरमाणस्य उत्पद्यमानस्य वा यत् दुःखं भवति (वा) अथवा पुनर्म्रियमाणस्य पञ्चत्वं कुर्वाणस्य च यत् दुःखं जयति । तेन दारुणदुःखेन संमूढो महामोहभावं प्राप्तः जातिं प्राक्तनभवसम्बन्धिनीं स्वकीयं मूढात्मा प्राणी न स्मरति । कोऽहं पूर्वभवे देवादिकोऽभवमिति न जानातीति ॥१॥ तं० । (न जानाति 'दिसा' शब्दे दृष्टान्तः) । जातिस्मरणं संख्यातभवनिर्णायकं न वेति प्रश्ने, उत्तरम्-जातिस्मरणमपि समतिक्रान्तं संख्यातभवावगमस्वरूपं मतिज्ञानमेव इति कर्मग्रन्थवृत्त्याचाराङ्गवृत्त्यनुसारेण संख्यातभवनिर्णायकं जातिस्मरणं ज्ञायत इति । १३० प्र० । सेन० १ उल्ला० । कर्मग्रन्थवृत्तौ-जातिस्मरणमपि अतीतासंख्यातभवावगमस्वरूपं मतिज्ञानमेवेत्युक्तमस्ति "पुव्वभवा सो पिच्छइ, इक्क दो तिन्नि जाव नवगं वा । उवरिं तस्स अविसओ, सहावओ जाइसरणस्स ॥ १ ॥" इति गाथायां तु नवैव भवाः जातिस्मरणस्य विषयास्तत्कथमिति प्रश्ने,उत्तरम्-जातिस्मरणवान् आचाराङ्गवृत्त्याद्यभिप्रायेणातीतासंख्यातान् भवान् पश्यतीति ज्ञायते कर्मग्रन्थवृत्तावपि स एवाभिप्रायोऽस्ति " पुव्वभवा सो पिच्छइ" इयं गाथा तु बुद्धिपत्रस्था न तु तथाविधग्रन्थस्था तेन निर्णायिका न भवतीति । २४१ प्र० । सेन० २ उल्ला० । इदानीं भ-

रते मनुजानां,तिरश्चां च जातिस्मरणमस्ति न वा ?। यदि नास्ति तदा कुतो व्यवच्छिन्नं तथाऽवधिज्ञानमपीदानीमस्ति न वा ? इत्यपि च प्रष्टव्यमिति प्रश्ने, उत्तरम्-वर्त्तमानकाले जातिस्मरणावधिज्ञानस्य व्यवच्छेदः शास्त्रे प्रतिपादितो नास्तीति। १६८ प्र०। सेन० ३ उल्ला०।

जाइसरणावरणिज्ज–जातिस्मरणावरणीय–न०। मतिज्ञानावरणीयकर्मभेदे,। जातिस्मरणावरणीयानि च कर्माणि मतिज्ञानावरणभेदाः । क्षयोपशम कंदितानां क्रयोऽनुदितानां विपाकेभितोदयस्वमिति। ज्ञा० १ श्रु० १ अ०।

जातिसुमिण–जातिस्मरण– 'जाइसरण' शब्दार्थे, सेन० ३ उल्ला०।

जाइहिंगुलुय–जातिहिङ्गुलुक–पुं० । रक्तवर्णे वर्णकद्रव्यभेदे, "जाहिंगुलुए वा"। जातिहिङ्गुलुकेन वर्णकद्रव्येण स कृत्रिमोऽपि भवतीति जात्याविशेषितः। ज्ञा० १ श्रु० २। अ०। जात्यः प्रधानो हिङ्गुलुको जात्यहिङ्गुलुकः। प्रज्ञा० १ पद।

जाई–जाती–स्त्री०। जन-क्विप्-ङीप्। मालत्याम्, तत्पुष्पे लतामेदे च। वाच०। जं०। सुरायाम्, दे० ना० ३ वर्ग।

जाईफल–जातीफल–न०। गन्धप्रधाने वस्तुनि, आचा० १ श्रु० १ अ० १ उ०। (जायफल) इतिख्याते फले च। वाच०।

जाईमंडवग–जातीमण्डपक–पुं०। 'जाइमंडवग' शब्दार्थे, जं० १ वक्ष०।

जाईय–जातीय–त्रि०। जातौ भवः छ। समानजातियुक्ते सजातीये, वाच०। आ० म०। "एकग्रहणे, तज्जातीयग्रहणम्" इति न्यायः। आ० म०। किंविच्छब्दात् जातीयप्रत्ययः। प्रकारार्थे। "गुणाओ पंचजातीयं" पञ्चप्रकारम्। विशे०। यथा तार्किकजातीयः तार्किकप्रकारः। वाच०।

जाईसर–जातिस्मर–त्रि०। 'जाइसर' शब्दार्थ,आ० म० प्र०।

जाईसरण–जातिस्मरण–नं०। 'जाइसरण' शब्दार्थे, आचा० १ श्रु० १ अ० १ उ०।

जाईसरणावरणिज्ज–जातिस्मरणावरणीय नं०। 'जाईसरणवरणिज्ज' शब्दार्थे, ज्ञा०१ श्रु०१ अ०।

जाईहिंगुलुय–जातिहिङ्गुलुक–पुं०। 'जाइहिंगुलुय' शब्दार्थे, ज्ञा० १ श्रु० १ अ०।

जाउं–यावत्–त्रि०। यत् परिमाणमस्य मतुप्। "यावत्तावतोर्वाऽऽदेर्मे-उं-महिं"। ८।४।४०६। यावत्तावदित्यतयोरव्ययोर्वकारादेरवयवस्य 'म-उं-महिं' इत्येते त्रय आदेशाः भवन्ति। प्रा० ४ पाद। यत्परिमाणे, साकल्ये, अवधौ, व्याप्तौ, माने, अवधारणे च। वाच०।

जाउया–यातृ–स्त्री०। या-तृच्। देवरपत्न्याम्, यातरौ तृन्। गन्तरि, त्रि०। यातारौ। वाच०। "जाउयाओ जाणिस्संति"। "जाउयाओ त्ति" देवराणां जायाः। ज्ञा० १ श्रु० १६ अ०। "जाउग त्ति" यातरो ज्येष्ठदेवरजायाः। बृ० १ उ०।

जाउस–जातुस–पुं०। गुच्छात्मके वनस्पतिभेदे, प्रज्ञा० १ पद।

जाऊकण्णं–जातूकर्ण–पुं०। मुनिभेदे, वाच०। गोत्रभेदे, न० अं० ७ वक्ष०।

जाऊकण्णीय–जातूकर्णीय–न०। गोत्रभेदे, सू० प्र० १० पाहु०। चं० प्र०।

जाऊरो–देशी–कपित्थे, दे० ना० ३ वर्ग।

जाओमण–यादोगण–पुं०। जलजन्तुगणे, वाच०। "सारक्खमाणे से चिट्ठति"। नानाविधाँस्तु यादसां गणान् संरक्षन् सह वा यादोगणैरात्मानमारक्षन्। आचा० १ श्रु० ५ अ०५ उ०।

जांबवई–जाम्बवती–स्त्री०। जाम्बवतोऽपत्यं स्त्री। कृष्णवासुदेवस्य स्वनामख्यातायां पत्न्याम्, कल्प० ७ क्षण। नागदमन्यां च। वाच०।

जांबूणय–जाम्बूनद–न०। जम्बूनदे भवः-अण्। स्वर्णे, तीरभूत तद्रसं प्राप्य सुखवायुविशोषिता जाम्बूनदाख्यं भवति सुवर्णं सिद्धभूषणम् इत्युक्ते सुवर्णभेदे, तद्रसे जम्बूरसस्य। धुस्तूरे च। वाच०। जं०।

जाग–याग–पुं०। यज-घञ्। मन्त्रकरणके बहुद्रव्याधिकरणे हविष्प्रक्षेपरूपे यज्ञे, वाच०। यजनं यागः। पूजने, "अखिलगुणाधिकसयोगसारसद्भक्तियागपरः" यागो यजनं पूजनं तत्परः तत्प्रधानः। षो० ९ विव०। आचा०। ज्ञा०। देवपूजायाम्, ज्ञा० १ श्रु० १ अ०। श्रीसिद्धार्थनृपस्य यागकरणप्रौढिर्दशाहोत्सवे, सिद्धार्थराजव्यतिकरे यागशब्देन देवपूजा कृतेति समर्थितम्। प्रति०। देवतापूजावसरज्ञाविनि ब्राह्मणप्रसिद्धे पूजाविशेषे, अनु०। जं०। ज्ञा०। अश्वमेधादिके च। पिं०।

जागजागदायसहस्सपडिच्छय–यागजागदायसहस्रप्रतीच्छक–त्रि०। यागा पूजाविशेषाः भागा विंशतिजागादयो दायाः सामान्यदानान्येतेषां सहस्राणि प्रतीच्छतीति। तथाभूते,औ०।

जागर–जागर–पुं०। जागृ-अप्। निद्राभावे, जागरणे, कवचे च। वाच०। जागर्तीति जागरः। अपगतनिद्रे, "जागरवेरोवरए" असंयमनिद्रापगमाज्जागर्तीति जागरः। आचा० १ श्रु० ३ अ० १ उ०। "सुत्ता अमुणी उ सया, मुणी उ सुत्ता वि जागरा होंति" आचा०नि० १ श्रु० ३ अ० १ उ०। द्रव्यजागरो निद्रारहितः। भावजागरः सम्यग्दृष्टिः। आ० म० द्वि०। विशे०।

अथ विरत्यपेक्षया जीवादीनां पञ्चविंशतेः पदानां सुप्तत्वजागरत्वे प्ररूपयन्नाह—

जीवा णं भंते! सुत्ता, जागरा, सुत्तजागरा?। गोयमा! जीवा सुत्ता वि, जागरा वि, सुत्तजागरा वि। नेरइयाणं भंते! किं सुत्ता पुच्छा?। गोयमा! णेरइया सुत्ता। णो जागरा, णो सुत्तजागरा। एवं जाव चउरिंदिया। पंचिंदियतिरिक्खजोणिया णं भंते! किं सुत्ता पुच्छा?। गोयमा! सुत्ता। णो जागरा। सुत्तजागरा वि। मणुस्सा। जहा जीवा वाणमंतरजोइसियवेमाणिया जहा णेरइया।

(सुत्त त्ति) सर्वविरतिरूपनैश्चयिकप्रबोधाभावात्। (जागर

त्ति) सर्वविरतिरूपप्रवरजागरणसद्भावात् । (सुत्तजागर त्ति) अविरतिविरतिरूपसुप्तिप्रबुद्धतासद्भावादिति । भ० १६ श० ६ उ० । स्था० ।

संजयमणुस्साणं सुत्ताणं पंच जागरा पण्णत्ता । तं जहा-सद्दा० जाव फासा ।

" संजय " इत्यादि । व्यक्तम् । नवरं संयतमनुष्याणां साधूनां सुप्तानां निद्रावतां जाग्रतीति जागरा असुप्ता जागरा इव जागरा इयमत्र भावना-शब्दादयो हि सुप्तानां संयतानां आग्रहिवदप्रतिहतशक्तयो भवन्ति कर्मबन्धाभावकारणस्वाप्रमादस्य तदानीं तेषामभावात् कर्मबन्धकारणं भवतीत्यर्थः ।

संजयमणुस्साणं जागराणं पंच सुत्ता पण्णत्ता । तं जहा-सद्दा० जाव फासा ।

द्वितीयसूत्रभावना तु-जागराणां शब्दादयः सुप्ता इव सुप्ता असमुद्घातिनवत् प्रतिहतशक्तयो भवन्ति । कर्मबन्धकारणस्य प्रमादस्य तदानीं तेषामभावात् कर्मबन्धकारणं भवतीत्यर्थः।

संयतविपरीता ह्यसंयता इति । तानधिकृत्याह-

असंजयमणुस्साणं सुत्ताणं वा जागराणं वा पंच जागरा पण्णत्ता । तं जहा-सद्दा० जाव फासा ।

"असंजय" इत्यादि । व्यक्तम् । नवरम् । असंयतानां प्रमादिनया अवस्थाद्वयेऽपि कर्मबन्धकारणतयाऽप्रतिहतशक्तित्वात् शब्दादयो जागरा इव, जागरा भवन्तीति भावना । स्था० ५ ठा० २ उ० ।

जागरण-जागरण-न० । निद्राक्षये, ज्ञा० १ श्रु० २ अ० । अवबोधे, ध० ३ अधि० ।

जागरणे गुणाः-

" जागरह णरा णिच्चं, जागरमाणस्स वड्ढए बुद्धी ।
जो सुवइ ण सो धण्णो, जो जग्गइ सो सया धण्णो ॥१॥
सुवइ सुअंतस्स सुअं, संकियखलियं भवे पमत्तस्स ।
जागरमाणस्स सुअं, थिरपरिचियमप्पमत्तस्स ॥२॥
बालत्तेणं समं सोक्खं, ण विज्जा सह निद्दया ।
य वेरग्गं पमादेणं, आरंभेण दयालुआ ॥३॥
जागरिया धम्मीणं, अहम्मीणं तु सुत्तिया सेया ।
बच्चाहिवभगिणीए, अकहिंसु जिणो जयंतीए ॥४॥
सुवइ य अयगरभूओ, सुयं पि से णस्सती अमयभूयं ।
होही गोणब्भूओ, णट्ठम्मि सुए अमयभूए " ॥ ५ ॥
आचा० १ श्रु० ३ अ० १ उ० ।

निशान्त्ययामे जागर्या, गुरोश्चावश्यकक्षणे ।
उत्सर्गो देवगुर्वादि-नतिः स्वाध्यायतिष्ठना ॥ २० ॥

निशाया रात्रेरन्त्ययामे चतुर्थयामे जागर्या जागरणं निद्रात्यागः इत्यर्थः । सापेक्षयतिधर्मो भवतीति योजना । अग्रेऽपि सर्वत्रा वसेया जागरणविधिश्च-" जामिणिपच्छिमजामे, सव्वे जग्गंति बालवुड्ढाई । परमिट्ठिपरमसंते, भणंति सत्तट्ठवाराओ ॥ १ ॥ " इत्यादि । विशेषगृहस्थधर्माधिकारे प्रदर्शित एव निशान्त्ययामे जागरणम् । किमविशेषेण सर्वेषामेव उत केषांचिदेवेति जिज्ञासायामाह-(गुरोः) प्रव्राजकस्य दिगाचार्यादेर्वा चकारात् । प्रातर्देवसिकावश्यककरणावसरे, जागर्यां तत्र गुरोः तृतीयप्रहरेऽस्वापस्य वक्ष्यमाणत्वात् । ग्लानादेस्तु शरीरमान्द्यात् प्रतिक्रमणवेलायामुचितमेव जागरणम् । उक्तमेव प्रवचनसारोद्धारे-

" सव्वे वि पढमयामे, चउसु अ वसहाण आइमा जामा ।
तइओ होइ गुरूणं, चउत्थे सव्वे गुरु सुअइ ॥ ६० ॥ "

सर्वेऽपि साधवः प्रथमे यामे रात्रिप्रथमप्रहरं यावत् । स्वाध्यायाध्ययनादिकुर्वाणाः जाग्रति द्वौ च आद्यौ यामौ वृषभाणां वृषना इव वृषभा गीतार्थाः साधवः तेषामयमर्थो द्वितीये यामे ये सुप्तवन्तः साधवस्ते स्वपन्ति । वृषनास्तु जाग्रति ते च जाग्रतः प्रश्नापनादिसूत्रार्थं परावर्तयन्ति । तृतीयप्रहरो भवति गुरूणां कोऽर्थः—प्रहरद्वयानन्तरं वृषभाः स्वपन्ति । गुरवस्तूत्थिताः प्रश्नापनादि गुणयन्ति चतुर्थप्रहरं यावत् । चतुर्थे च प्रहरे। सर्वे साधवः समुत्थाय वैरात्रिककालं गृहीत्वा कालिकश्रुतं परावर्तयन्ति । गुरवः पुनः स्वपन्ति । अन्यथा प्रातर्निद्राघूर्णमानलोचनास्तद्वशादेव भज्यमानपृष्ठका व्याख्यानभञ्जनोपदेशादिकं कर्तुं ते सीदन्तः सन्तो न शक्नुवन्तीति । (प्रव० १२८ द्वार) प्रतिक्रमणवेला च तत्परिसमाप्तिदशोपकरणप्रत्युपेक्षणासमनन्तरभाविसूर्योदयपरिमेया । यतः-"आवस्सयस्स समए, णिहामुहं चयंति आयरिया । तह तं कुणंति जह दस,पमिलेहाऽणंतरं सुरो" ॥१॥ त्ति । जागरणानन्तरकर्तव्यमाह-(उत्सर्ग इति) कायोत्सर्गः स चर्यापथिकीप्रतिक्रमणपूर्वकः कुस्वप्नदुःस्वप्ननिवारणनिमित्तः प्राणिवधादिकुस्वप्नभावे शताच्छ्वासमानो मैथुनकुस्वप्नभावे तु चतुरुद्योतकरोपर्यैकनमस्कारचिन्तनादष्टशतोच्छ्वासमानोऽवसेयः । यतो यतिदिनचर्यायाम्-

" इरियं पडिक्कमंतो, कुसुमिण दुसुमिण निवारणुस्सग्गं ।
सम्मं कुणंति निद्दिअ-पमायणिद्दा महामुणिणो ॥ १ ॥
पाणिवहप्पमुहाणं, कुसुमिणभावे भवंति सउ्ससया ।
चत्तारि चिंतणिज्जा, सयमुक्कारा चउत्थस्स ॥ २ ॥ " त्ति ।

ततश्च (देवगुर्वादिनतिरिति) देवनतिश्चैत्यवन्दनम् । गुर्वादिनतिश्चतुर्भिः क्रमाश्रमणैर्गुर्वादिनमस्क्रिया ततोऽनन्तरं च (स्वाध्यायतिष्ठतेति) स्वाध्यायो वाचनादिः तस्मिन् यथासंभवं तिष्ठता एकाग्रता उपलक्षणत्वात् । पूर्वगृहीततपोनियमानिग्रहचिन्तनधर्मजागरिकाकरणादि । यतः-

" जिणनमणमुणिनमंसण-पुव्वं तवो कुणंति सउ्झायं ।
चिंतंति पुव्वगहियं, तवनियमाऽभिग्गहप्पमुहं ॥१॥
किं तक्खणिअकज्जं, न करेमि अभिग्गहाय को उचिओ ।
किं मह खलिअं जायं, कहदिअहा मज्झ वच्चंति ॥२॥
कह न हु पमायपंके, खुप्पिस्सं किं परो व अप्पो वा ।
मह पिच्छइ अइयारं, इअ कुज्जा धम्मजागरिअं ॥ ३ ॥ "

ब्राह्मे च मुहूर्ते निर्मलबुद्धयुदयाद्भवति धर्मैकमौपायचिन्तनं सफलमिति । धर्ममनोरथान् चिन्तयेति भावार्थः । यतस्तत्रैव-

" जामिणिविरामसमए, सरए सलिलं व निम्मलं नाणं । इअ तत्थ धम्मकम्मं, आयमुवायं विचिंतेज्जा ॥१॥ " ध० २ अधि० ।

जागरमाण-जाग्रत्-न० । जागृ-शतृ-ङीङ्यादिनिर्विषयज्ञानयोग्यावस्थायाम् । तद्वति, त्रि० । स्त्रियां ङीप् । वाच० । निद्राक्रियायुक्ते च । पा० । " जागरमाणी जागरइ " जागरणं कुर्वन्ती जागर्ति निद्राभावं कुरुत इति । तं० । "निद्दाए भावतो वि य जागरमाणा चउपहमसुयरं" । निद्रारहिते. आ० म० द्वि० ।

जागरिता-जागरितृ-त्रि० । जागृ-तृ । जागरके, स्था० ४ ठा० २ उ० ।

जागरिय–जागरिक–पुं० । आगरणं जागरः । सोऽस्यास्तीति जागरिकः । ज० १२ श० २ उ० । निद्रारहिते, आ० म० द्वि० ।

जागरित-त्रि० । जागृ-क्त । इन्द्रियैर्विषयोपलब्ध्ययोग्यावस्थायाम्, जीवो हि स्वप्नादिहेतुकर्मनाशे इन्द्रियविषयान्, अनुमेयाँश्च स्थूलविषयान्, व्यवहारिकाँश्च पदार्थान्, यस्यामवस्थायामनुभवति तत् जागरितम् । कर्तरि-क्त । जागरणयुक्ते, त्रि० । वाच० ।

जागरिया–जागरिका–स्त्री० । जागरणे, ज्ञा० १ श्रु० १ अ० । "पुव्वरत्तावरत्तकालसमयंसि णो धम्मजागरियं जागरित्ता भवइ ।" जागरिका निद्राक्षयेण बोधः । स्था० ४ ठा० २ उ० ।

कइविहा णं भंते ! जागरिया पण्णत्ता ? । गोयमा ! तिविहा जागरिया पण्णत्ता । तं जहा–बुद्धजागरिया, अबुद्धजागरिया, सुदक्खुजागरिया । से केणट्ठेणं भंते ! एवं वुच्चइ तिविहा जागरिया पण्णत्ता ?। तं जहा–बुद्धजागरिया, अबुद्धजागरिया, सुदक्खुजागरिया । गोयमा ! जे इमे अरहंता भगवंतो उप्पन्ननाणदंसणधरा जहा खंदए० जाव सव्वण्णू सव्वदरिसी एएणं बुद्धा बुद्धजागरियं जागरंति । जे इमे अणगारा भगवंतो इरियासमिया भासासमिया० जाव गुत्तबंभयारि एएणं अबुद्धा अबुद्धजागरियं जागरंति । जे इमे समणोवासगा अभिगयजीवाजीवा० जाव विहरंति एएणं सुदक्खुजागरियं जागरंति । से तेणट्ठेणं गोयमा ! एवं वुच्चइ तिविहा जागरिया जाव० सुदक्खुजागरिया ।

(बुद्धा बुद्धजागरियं जागरंति त्ति) बुद्धाः केवलावबोधेन ते च बुद्धानां व्यपोढा ज्ञाननिद्राणां जागरिकाप्रबोधो बुद्धजागरिका, तां जाग्रति कुर्वन्ति (अबुद्धा अबुद्धजागरियं जागरंति त्ति) अबुद्धाः केवलज्ञानाभावेन यथासंभवं शेषज्ञानसद्भावाद्वा बुद्धसदृशास्ते च अबुद्धानां छद्मस्थज्ञानवतां वा जागरिका सा तथा तां जाग्रति । ज० १२ श० १ उ० ।

जागरिता धम्मीणं, अधम्मियाणं च सुत्तिया सेया ।
वच्छाहिवभगिणीए, अकहिंसु जिणो जयंतीए ॥३०६॥

वच्छजणवए कोसंबी णयरी, तस्स अधिवो सतानिओ राया, तस्स भगिणी जयंती, तीए भगवओ वद्धमाणो पुच्छितो–धम्मियाणं किं सुत्तिया सेया, जागरिया वा सेया ?। भगवया वागरियं धम्मीणं जागरिया सेया, णो सुत्तिया, अधम्मियाणं सुत्तिया सेया, णो जागरिया । (अकहिंसु त्ति) अकथयत् एवं कथितवान् । निं० चू० १६ उ० ।

जीवाश्च न सुप्ताः सिद्ध्यन्ति । किं तर्हि जागरा एव इत्याह–

सुत्तत्तं भंते ! साहू, जागरियत्तं साहू ?। जयंती ! अत्थेगइयाणं जीवाणं सुत्तत्तं साहू, अत्थेगइयाणं जीवाणं जागरियत्तं साहू । से केणट्ठेणं भंते ! एवं वुच्चइ–अत्थेगइयाणं० जाव साहू ?। जयंती ! जे इमे जीवा अहम्मिया अहम्माणुया अहम्मिट्ठा अहम्मक्खाई अहम्मपलोई अहम्मपलज्जमाणा अहम्मसमुदायारा अहम्मेणं चेव वित्तिं कप्पेमाणा विहरंति । एएसि णं सुत्तत्तं साहू, एएणं जीवा सुत्ता समाणा णो बहूणं पाणजूयाणं जीवाणं सुत्ताणं दुक्खणयाए सोयणयाए० जाव परियावणयाए वट्टंति । एएणं जीवा सुत्ता समाणा अप्पाणं वा परं वा तदुभयं वा णो बहूहिं अहम्मियाहिं संजोयणाहिं संजोएत्तारो भवंति । एएणं जीवाणं सुत्तत्तं साहू । जयंती ! जे इमे जीवा धम्मत्थिया धम्माणुगा० जाव धम्मेणं चेव वित्तिं कप्पेमाणा विहरंति । एएसि णं जीवाणं जागरियत्तं साहू एएणं जीवा जागरमाणा बहूणं पाणाणं अदुक्खणयाए० जाव अपरियावणयाए वट्टंति, ते णं जीवा जागरा समाणा अप्पाणं वा परं वा तदुभयं वा बहूहिं धम्मियाहिं संजोयणाहिं संजोएत्तारो भवंति । एए णं जीवा जागरमाणा धम्मजागरियाए अप्पाणं जागरइत्तारो भवंति, एएसि णं जीवाणं जागरियत्तं साहू से तेणट्ठेणं जयंती ! एवं वुच्चइ अत्थेगइयाणं जीवाणं सुत्तत्तं साहू, अत्थेगइयाणं जीवाणं जागरियत्तं साहू ।

(सुत्तत्तं ति) निद्रावशत्वम् । (जागरियत्तं ति) जागरणं जागरः सोऽस्यास्तीति जागरिकस्तद्भावो जागरिकत्वम् । (अहम्मिय त्ति) धर्मेण श्रुतचारित्ररूपेण चरन्तीति धार्मिकास्तद्विपर्ययादधार्मिकाः । कुत एतदेवमित्यत आह–(अहम्माणुया) धर्मं श्रुतरूपमनुगच्छन्तीति धर्मानुगास्तद्विपर्यादधर्मानुगाः । कुत एतदेवमित्यत आह–(अहम्मिट्ठा) धर्मः श्रुतरूप एवेष्टो वल्लभः पूजितो वा, येषां ते धर्मेष्टाः । धर्मिणां वा इष्टाः धर्मिष्टाः अतिशयेन वा धर्मिणो धर्मिष्टाः तद्विपर्यादधर्मिष्टाः, अधर्मेष्टाः अधर्मीष्टा वा अत एव । (अहम्मक्खाई) न धर्ममाख्यान्ति इत्येवंशीला अधर्माख्यायिनः, अथवा–न धर्मात् ख्यातिर्येषां ते अधर्मख्यातयः (अहम्मपलोइ त्ति) न धर्ममुपादेयतया प्रलोकयन्ति ये ते अधर्मप्रलोकिनः । (अहम्मपलज्जण त्ति) न धर्मे प्रलज्जन्ते आसजन्ति ये ते अधर्मप्रलज्जना एवं च–(अहम्मसमुदायार त्ति) न धर्मरूपश्चारित्रात्मकः समुदाचारः समाचारः सम्प्रमोदो वा आचारो येषां ते तथा अत एव—"अहम्मेणं चेव" इत्यादि । अधर्मेण चारित्रश्रुतविरुद्धरूपेण वृत्तिं जीविकां कल्पयन्तः कुर्वाणा इति । ज० १२ श० २ उ० । जन्मतः षष्ठ्यां रात्रौ भवे रात्रिजागरणरूपे उत्सवविशेषे च । विपा० १ श्रु० २ अ० । रा० । "छट्ठे दिवसे जागरियं करेंति" रात्रिजागरणरूपमुत्सवविशेषम् । भ० ११ श० ११ उ० ।

जागर्या–स्त्री० । जागृ-श । जागरणे, अ-जागराप्यत्र । वाच० । "निशान्त्ययामे जागर्या गुरोश्चावश्यकक्रिये" जागर्या जागरणं निद्रात्याग इत्यर्थः । ध० ३ अधि० ।

जागसहस्सभागपडिच्छय–यागसहस्रभागप्रतीच्छक–त्रि० यागाः पूजाविशेषाः ब्राह्मणप्रसिद्धाः तत्सहस्राणां भागमंशं प्रतीच्छति अभव्यत्वात् यत् । तथाभूते, औ० ।

जागिणिपुर–जाकिनीपुर–न० । स्वनामख्याते पुरे, "इओ असिरिजागिणिपुरे सिरिमहम्मदसाहिसंताहिराओ" ती० ४६ कल्प ।

जाणिणी–जाकिणी–स्त्री० । हरिभद्रसूरेः प्रतिबोधिकायां निर्ग्रन्थ्याम्, "महत्तराया जाकिन्या, धर्मपुत्रेण चिन्तिता । आचार्यहरिभद्रेण, टीकेयं शिष्यबोधिनी ॥१॥" दश० २ चू० ।

जाही–देशी–गुल्मे, दे० ना० ३ वर्ग ।

जाण–यान–न० । या–भावे ल्युट् । गमने, वाच० । स्था० । स० । सूत्र० । उपचितशक्तेः राज्ञः मूलराष्ट्रादिरक्षां कृत्वा रिपोरात्मोत्कर्षनाय गमने च । वाच० । यायतेऽनेनेति यानम् । स० १ सम० । करणे–ल्युट् । गमनसाधने रथादौ, वाच० । यानानि सामान्यतः । शेषाणि वाहनानीति । रा० । जी० । यानानि नौकादीनि । वाहनानि त्वेसरादीनि । दश० ६ अ० । "दिट्ठी जाणं सुउत्तमं" यानं यानमात्रं सूत्रममतिप्रधानमित्यर्थः । ग० १ अधि० । यानं वाहनमिति । रा० । यानं रथादिकमिति । प्रश्न० ५ सम्व० द्वार । रा० । जी० । स्था० । यानानि शकटादीनि । रा० । जी० । ज्ञा० । स्था० । उत्त० । यानं गन्त्र्यादि । अनु० । जी० । यानं गन्त्रीविशेष इति । प्रश्न० ५ सम्व० द्वार । यानं लघुगन्त्रीति । भ०८ श० ६ उ० । यानं शिबिकादीति । स्था० १० ठा० । आचा० । यानं हस्त्यादीति । आ० क० । आ० म० । उत्त० । "जाणं तु आसमाई" यानानि पुनरश्वादीनि, आदिशब्दात् गजवृषभरथशिबिकादीनि । बृ० १ उ० । "चत्तारि जाणा पण्णत्ता । तं जहा–जुत्ते णाममेगे जुत्ते, जुत्ते णाममेगे अजुत्ते, अजुत्ते णाममेगे जुत्ते, अजुत्ते णाममेगे अजुत्ते । (स्था०) चत्तारि जाणा पण्णत्ता । तं जहा—जुत्ते णाममेगे जुत्तपरिणए जुत्ते णाममेगे अजुत्तपरिणए ४ (स्था०) चत्तारि जाणा पण्णत्ता । तं जहा—जुत्ते णाममेगे जुत्तरूवे जुत्ते णाममेगे अजुत्तरूवे ४ (स्था०) चत्तारि जाणा पण्णत्ता । तं जहा–जुत्ते णाममेगे जुत्तसोभे ४ " स्था० ४ ठा० ३ उ० । "अंति वीरा महाजाणं" यान्त्यनेन मोक्षमिति यानम् । चारित्रे, आचा० १ श्रु० ३ अ० ६ उ० । यात्येतदिति यानम् । "कृत्यल्युटो बहुलम् " ॥३।३।११३॥ इति (पाणि०) वचनात्कर्मणि ल्युट् । गन्तव्ये च । त्रि० । आव० ६ अ० । ज्ञा० ।

ज्ञा–अवबोधने, क्रयादि० पर० सक० अनिट् । " ज्ञो जाणमुणौ " ॥ ८ । ४ । ७ ॥ इति प्राकृतसूत्रेण 'जाण' आदेशः । 'जाणइ मुणइ' जानाति-जानीते । प्रा० ४ पाद । तुमं किं जाणयंसि कूवमंडुक्को " नि० चू० १ उ० । 'ज्ञा' कृपधान्ये । चुरा० उभ० सक० सेट् । कृपयति । अजिज्ञपत् । 'ज्ञा' प्रेरणे, चुरा० उभ० सक० सेट् । वाच० ।

जाणं–जानत्–त्रि० । अवगच्छति " अजाणओ मे मुणि बूहि–जाणं । "जानन्नवगच्छन् । सूत्र० १ श्रु० ५ अ० १ उ० । स्था० । बृ० । "अजाणंता विउस्सिसा " सूत्र० १ श्रु० १ अ० १ उ० । " जाणं कारण णाउट्टी " सूत्र० १ श्रु० १ अ० २ उ० । जानन्नवबुध्यमानः । विशे० । उत्त० । "आसुपण्णेण जाणया" । जानता ज्ञानोपयुक्तेन । आचा० १ श्रु० ८ अ० १ उ० ।

जाणंत–जानत्–त्रि० । 'जाणं' शब्दार्थे, सूत्र० १ श्रु० ५ अ० १ उ० ।

जानान–त्रि० । 'जाणंत' शब्दार्थे, सूत्र० १ श्रु० ५ अ० १ उ० ।

जाणग–ज्ञ–पुं० । ज्ञा–क । अज्ञाणि, परिजते, सोमपुत्रे, बुधे च । वाच० । अनु० । उत्त० ।

ज्ञक–त्रि० । ज्ञानिनि, सूत्र० १ श्रु० ६ अ० १ उ० ।

ज्ञायक–त्रि० । ज्ञातरि, विज्ञे, पं० चू० । नं० 'जाणयाते' ज्ञायको ज्ञातेति । औ० ।

जाणगय–यानगत–त्रि० । यानानि शकटादीनि । तत्र गते, औ० ।

जाणगसरीर–ज्ञशरीर–न० । " जाणगसरीर " ज्ञायको, ज्ञो वा तस्य शरीरं ज्ञशरीरम् । जीवरहिते ज्ञानतः शरीरे, उत्त० १ अ० । नि० चू० । ज्ञातवान् इति ज्ञः । प्रतिक्षणं शीर्यते ' इति शरीरम् । ज्ञस्य शरीरम् ज्ञशरीरम् । अनु० ।

जाणगसेवा–ज्ञसेवा–स्त्री० । ज्ञातुः सेवायाम्, "जिज्ञासा तत्संज्ञे वा, सदनुष्ठानलक्षणम् " । ज्ञा० २३ ज्ञा० ।

जाणगिह–यानगृह–न० । यत्र यानानि तिष्ठन्ति । तस्मिन् गृहे, " जाणगिहाणि वा " । आचा० २ श्रु० २ अ० २ उ० ।

जाणण–ज्ञान–न० । अवगमने, आव० ६ अ० । प्रा० ।

जाणणा–ज्ञा–स्त्री० । ज्ञानं ज्ञा । संविदौ, आ० म० द्वि० । अनु० ।

जाणणाणय–ज्ञाननय–पुं० । नयभेदे, "जाणणाणयो " ज्ञानोपलब्धिमात्रः। अविशेषितं रूढ्यास्तिक इत्यर्थः । आ० चू० ३ अ० ।

जाणणासंखा–ज्ञानसंख्या–स्त्री० । "जाणणा" ज्ञानं संख्यायते निश्चीयते वस्त्वनयेति संख्या, ज्ञानरूपा संख्या ज्ञानसंख्या । संख्याभेदे, अनु० ।

से किं तं जाणणासंखा ? । जाणणासंखा जो जं जाणइ । तं जहा–सद्दं सद्दिओ, गणियं गणिओ, निमित्तं नेमित्तिओ, कालं कालणाणी, वेज्जयं वेज्जो । सेत्तं जाणणासंखा । "से किं तं जाणणासंखा" इत्यादि । "जाणणा" ज्ञानं संख्यायते निश्चीयते वस्त्वनयेति संख्या, ज्ञानरूपा संख्या ज्ञानसंख्या । का पुनरियमुच्यते-यो येनशब्दादिकं जानाति स तज्ज्ञानाति तच्च ज्ञानमसावभेदोपचारात् ज्ञानसंख्येत्युपस्कारः । शेषं पाठसिद्धम् । अनु० ।

जाणणासुद्ध–ज्ञानशुद्ध–न० । " पच्चक्खाणं जाणइ, कप्पे जं जम्मि होइ कायव्वं । मूलगुणउत्तरगुणे तं जाणसु जाणणासुद्धं" इत्युक्तलक्षणे प्रत्याख्यानभेदे, आव० ६ अ० । आ० चू० ।

जाणय–ज्ञ–पुं० । ' जाणग ' शब्दार्थे, अनु० ।

जाणयसरीर–ज्ञशरीर–न० । 'जाणगसरीर' शब्दार्थे, उत्त० १ अ० ।

जाणयसेवा–ज्ञसेवा–स्त्री० । 'जाणगसेवा' शब्दार्थे, ज्ञा० २३ ज्ञा० ।

जाणरह–यानरथ–पुं० । रथविशेषे, रथा द्विविधाः-यानरथाः, संग्रामरथाश्च । तत्र संग्रामरथस्य प्राकारानुकारिणी फलकमयी वेदिका, अपरस्य तु न भवतीति विशेषः । जी० ३ प्रति० ।

जाणरूव–यानरूप–त्रि० । शिबिकाद्याकारवति, " समोहय—जाणरूवेणं " यानप्रकारेण शिबिकाद्याकारवतेति । भ० ३ श० ४ उ० ।

जाणवय–जानपद–त्रि० । जनपदे भवः, तत आगतो वा अण् । देशस्थे, देशादागते च । जनपदानां वृत्तौ, स्त्री० ङीप् । वाच० । रा० । औ० । आचा० । सू० प्र० । "पमुइयजणजाणवया" जनपदे भवाः जानपदा विशिष्टार्यदेशोत्पन्नाः । सूत्र० २ श्रु० १ अ० । " बहवे जाणवया लुसिंसु " आचा० १ श्रु० ६ अ० ३ उ० ।

जाणविमाण–यानविमान–त्रि० । यानञ्च तद्विमानं च । यानाय वा गमनाय विमानं यानविमानम् । स्था० ४ ठा० ३ उ० । या-

मं गमनं तदर्थं विमानम्। यायतेऽनेनेति यानम् तदेव विमानं यानविमानम्। स्था० १ ठा० १ उ०। यानरूपं वाहनरूपं विमानं यानविमानम्। रा०। देवानां गमनसाधने नगराकारे वाहने, "दसपहं इंदाणं दस परियाणिया जाणविमाणा पण्णत्ता। तं जहा-पालए पुप्फए जाव विमलवरे सव्वओभद्दे" यानं शिविकादि तदाकाराणि विमानानि देवाश्रयाणि यानविमानानि न तु शाश्वतानि नगराकाराणीत्यर्थः। स्था० १० ठा०। "दिव्वं जाणविमाणं विउव्वेइ" रा०।

जाणसाला-यानशाला-स्त्री०। यत्र यानानि निष्पाद्यन्ते तस्यां शालायाम्,। "जाणसालाओ वा"। आचा० २ श्रु० २ अ० २ उ०। आ० म०। दशा०।

जाणाविय-ज्ञापित-त्रि०। बोधिते, "अभयकुमारेण जाणावितो" आ० म० द्वि०।

जाणिअ-ज्ञात-त्रि०। अवगते, प्रा० ४ पाद। "बलाबलं जाणिय अप्पणो य" आत्मनो बलाबलं ज्ञात्वा परीषहादिसहनसामर्थ्यं विचार्य। उत्त० २१ अ०। "निरओवमं जाणिय दुक्खमुत्तमं" ज्ञात्वा विज्ञायेति। दश० १ चू०। "महयं पलिगोव्व जाणिया"। ज्ञात्वा स्वरूपतस्तद्विपाकतो वा परिच्छिद्य। सूत्र० १ श्रु० २ अ० २ उ०।

जाणिऊण-ज्ञात्वा-अव्य०। विज्ञायेत्यर्थे, प्रा०४ पाद। आचा०।

जाणित्तु-ज्ञात्वा-अव्य०। विज्ञायेत्यर्थे "जाणित्तु धम्मं अहा तहा"। आचा० १ श्रु० ६ अ० १ उ०। प्रा०।

जाणियव्वगसामत्थजुत्त-ज्ञातव्यसामर्थ्ययुक्त-त्रि०। विज्ञसिकरणे, "जाणितव्वगसामत्थजुत्तंति वा विन्नत्तिहेउजुत्तंति वा एगट्ठा" आ० चू० १ अ०।

जाणिया-ज्ञि(ज्ञ)का-स्त्री०। 'ज्ञा' अवबोधने। जानातीति,ज्ञा। "इगुपधज्ञाप्रीकिरः" ॥ ३।१।१३५ ॥ इति क प्रत्ययः। अतो लोपः ॥६॥ ४।४८ ॥ इति च (पाणि०) अकारलोपः। ततः। "अजाद्यतष्टाप्" ॥४।१।४॥ इति स्त्रियामाप्। ज्ञैव ज्ञिका। स्वार्थिकः कः प्रत्ययः। ततः "स्वङ्गाऽजभक्ताऽधातुत्वयकात्" ॥ २। ४। १०८ ॥ इत्यापः स्थाने वा इकारादेशः। कप्रत्ययाच्च परतः स्त्रियामाप् ततः सिद्धं ज्ञिकेति। परिज्ञानवत्याम्, "क्षीरमिव जहा हंसा जे घुट्टंति इह गुरुगुणसमिधा दोसे य विवज्जंती तं आणसु जाणियं परिसं" इत्युक्ते परिषद्भेदे च। नं०।

ज्ञात्वा-अव्य०। विज्ञायेत्यर्थे, प्रा० ४ पाद।

जाणु-जानु-न०। जन-जुण्। ऊरुजङ्घयोर्मध्यभागे, स्वार्थे कञ् अज्ञेयार्थे, वाच०। प्रज्ञा०। उत्त०। "समुग्गनिमग्गगूढजाणू" तं०। "जाणुस्सेहपमाणमित्ते" सू० ३४ सम०।

जाणुकोप्परमाया-जानुकूर्परमात्रा (ता)-स्त्री०। जानुकूर्पराणामेव माता जननी जानुकूर्परमाता एतान्येव शरीरांशभूतानि तस्यास्तनौ स्पृशन्ति नापत्यम्। अथवा—जानुकूर्पराण्येव मात्रा परमाणादः साहाय्यसमर्थः उत्संगनिवेशनीयो वा परिकरो यस्याः, न पुत्रलक्षणः सा जानुकूर्परमात्रा। अपत्यरहितायाम्, "जाणुकोप्परमाया वि होत्था" नि० ३ वर्ग। ज्ञा०।

जाणुय-ज्ञापक-त्रि०। वेदिनि, "जाणुयाय जाणुयपुत्ताय" ज्ञा० १ श्रु० १३ अ०। विपा०।

जाणु-ज्ञा-स्त्री०। व्यावृत्तिभेदे, यज्ञस्य हिंसादेर्हेतुस्वरूपफलविदुषो ज्ञानपूर्विका व्यावृत्तिः सा तद्भेदात् "जाणुत्ति गदिता" स्था० ३ ठा० ४ उ०।

जाणुई-जान्हवी-स्त्री०। गङ्गायाम्, "जाणुहवीइ मुहे" जान्हव्या गङ्गाया मुखे, स्था० ६ ठा०। विशे०।

जावग-यापक-पुं०। यापयतीति यापकः। जी० ३ प्रति०। उपदेशदानादिना भव्यसत्त्वैरागादियापके जिने, कल्प० २ क्षण। "जिणाणं जावयाणं" रा०। रागादीनेव सदुपदेशादिना यापयन्तीति यापकाः। ध० २ अधि०। ल०।

जावगहेउ-यापकहेतु-पुं०। यापयतीति यापकः। यापकश्चासौ हेतुश्च यापकहेतुः। हेतुभेदे, (दश०)

"जावग" (८६ निर्यु०) भेदव्याचिख्यासयाह-

उव्वामिगा य महिला, जावगहेउम्मि उंटलिमाई ॥

गाथादलम्। अस्य व्याख्या-(उव्वामिग त्ति) असती महिला। किं यापयतीति यापकः। यापकश्चासौ हेतुश्च यापकहेतुः। तस्मिन् उदाहरणमिति शेषः। उट्टलिएमाणीति कथानकसंसूचकमेतत् इत्यक्षरार्थः। भावार्थः कथानकादवसेयः तच्चेदं कथानकम्-एगो वाणिअओ भज्जं गिण्हेऊण पच्चंतं गओ। पावेण खीणदव्वो धणियपरद्धो कयावराहो य पच्चंतं संवत्ती पुरिसा दुरहीयविज्जा य सा य महिला उव्वामिया एगम्मि पुरिसे लग्गा तं वाणियगं सागारियंति किंतिकण भणति-वच्च वाणिज्जेण। तेण भणिया किं घेत्तूण वच्चामि। सा जणइ-उट्टलिमियाओ घेत्तूण वच्च उज्जेणिं। सगडं भरेत्ता उज्जेणिं गतो। ताए भणिओ य जहा एक्केक्कयं दीणारेण दिज्जह त्ति। सा चिंतेति। वरं खु चिरं खिप्पं तो भत्थइ। तेण ताओ वीहीए उट्ठियाओ को इ ण पुच्छई। मूलदेवेण दिट्ठो पुच्छिओ य। सिट्ठेण मूलदेवेण चिंतियं। जहा एस वराओ महिलाए ठाविओ। ताहे मूलदेवेण भणति अहमेया उ तव विक्किणामि जति मम वि मुल्लस्स अद्धं देहि। तेण भणियं देमि त्ति। अच्छुवगते पच्छा मूलदेवेणं सो हंसो जाएऊण आगासे उप्पइओ णगरस्स मज्झे ठाइऊण भणति-जस्स गलए चेडरूवस्स उट्टलिमिया न वच्चा तं मारेमि। अहं देवो पच्चा सव्वेण लोएण भीएण दीणारिक्काओ उट्टलिमिआओ गहियाओ। विक्किकयाओ य। ताहे तेण मूलदेवस्स अद्धं दिन्नं। मूलदेवेण य सो जणणितमंदजग्ग! तव महिलाधुत्ते लग्गा। ताहे तव एयं कयं ण पत्तियंति। मूलदेवेण भणति-पहि वच्चामो जा ते दरिसेमि। जदि ण पत्तियसि ताहे गया अन्नाए वेसाए वियाले ववासो मग्गिओ। ताहे दिन्नो तत्थ एगम्मि पएसे ठिया। सो धुत्तो आगतो इयरी वि धुत्तेण सह पिवेउमाढत्ता इमं च गायइ-"इरि मंदिर पल्हारओ, महुकं तु गतो वणिजारओ। वरिसाण सयं न जीवउ, मा जीवंतु घरं कयाइ एउ॥१॥" मूलदेवो भणति-कयलीवणपत्तवेढिया, पच्छभणामि। देव अ महलएणं गज्जती मुणउ तमुहुत्तमेव पच्छा। मूलदेवेण जणणति। किं धुत्ते ततो पभाए निग्गतूणं पुणरवि आगतो तीए पुरतो ठिओ सा सहसा संभंता अच्छुहिया। तओ खामणिपवणे वट्टेते तेण वाणियएणं मज्झं तीए गीयपउत्तयं संभारियं। एसो लोइओ देतू। लोउत्तरे वि चरणकरणानुयोगे एवं सी-

जो वि केइ पयत्थे असद्दहंतो कालेण विज्जादीहिं देवतं आयं पश्चा सद्दहावेयव्वो । तहा दव्वाणुओगे वि परिवाडिं नाऊण तहा विसेसणबहुलो हेतू कायव्वो जहा कालजावणा हवइ तओ सो णावगच्छइ एगयं कुविंयावण चक्करी वा कज्जइ जहा खिरिगुल्लेण छुलुए कया । उको यापकहेतुः । दश०१ अ०।

जावण–यापन–न० । या–णिच्–ल्युट् । कालादेः क्षेपणे, निरसने च । वाच० । वर्तने, " मज्झेण मुणिजावए " । यापयेदात्मानं वर्तयेत् । सूत्र०१श्रु०१अ०३उ० । अट्ठमासे अजावए " । अजा-पयद्वर्तितवान् । आचा०१श्रु०६अ०४उ० । देहप्रतिपालने च । "अह जावइ तथ लूहेणं" धर्माधारं देहं यापयतिस्म । आचा०१ श्रु०६अ०४ उ० । स्त्रियां युच् यापना तत्रैवार्थे यापना द्विविधा-द्रव्यतो, भावतश्च । द्रव्यत औषधादिना कायस्य । भावतस्तु इन्द्रियनोइन्द्रियोपशमेन शरीरस्य क्षामणा । आव० ३ अ० ।

जावणिज्ज–यापनीय–त्रि० । यापयतीति यापनीयः ' या ' प्रा-पणे । अस्य ण्यन्तस्य कर्तर्यनीयः । आव०३अ० । शक्तिसम-न्विते, " जावणिज्जाए णिसीहियाए " अत्र नैषेधिक्येति विशेष्यम्, यापनीयेति विशेषणम् । ' या ' प्रापणे । अस्य णि-जन्तस्य युगागमे यापयतीति यापनीया प्रवचनीयादित्वात् कर्तर्यनीयः तया शक्तिसमन्वितयेत्यर्थः । ध०३अधि० आ०चू० ।

जावणिज्जतंत–यापनीयतन्त्र–न० । ग्रन्थभेदे, ध०२ अधि० ।

जावय–यापक–पुं० । ' जावग ' शब्दार्थे, जी०३ प्रति० ।

जावयहेउ–यापकहेतु–पुं० । ' जावगहेउ ' शब्दार्थे, दश०१अ० ।

जावलिपुर–जाबलिपुर–न० । पुरभेदे, तथा च हरिभद्रसूरि-वृत्तौ, "श्रीजावलिपुरे रम्ये, वृत्तिरेषा समापिता" हा०३२ अष्ट० ।

जावि(जंपि)य–यापित–त्रि० । कालान्तरं प्रापिते, " जंपिय तिल-कीकगाय सि" यापिताः कालान्तरं प्रापिताः । ज्ञा०१ श्रु०१७अ० ।

जाम–याम–पुं० । यम–घञ् । समये, प्रहरे च । " यामो जात-स्तथापि नायातः " वाच० । ध० । स च रात्रेर्दिनस्य च चतु-र्थभागः । स्था० ३ ठा० २ उ० ।

तओ जामा पन्नत्ता । तं जहा–पढमे जामे मज्झिमे जामे पच्छिमे जामे । तिहिं जामेहिं आया केवलिपन्नत्तं धम्मं लभेज्ज-सवणयाए तं जहा–पढमे जामे मज्झिमे जामे पच्छिमे जामे एवं० जाव केवलनाणं उप्पाडेज्जा पढमे जामे मज्झिमे जामे पच्छिमे जामे ।

"तओ जामा" इत्यादि । स्पष्टम् । केवलं यामो रात्रेर्दिनस्य च चतुर्थभागो यद्यपि प्रसिद्धस्तथापीह त्रिभाग एव विवक्षितः पूर्वरात्रमध्यरात्रापररात्रलक्षणो यमाश्रित्य रात्रिः त्रियामा इत्यु-च्यते । एवं दिनस्यापि । अथवा-चतुर्भाग एव सः । किं-त्विह चतुर्थो न विवक्षितः त्रिस्थानकानुरोधादित्येवमपि त्रयो यामा इत्यभिहितमेव । " जाव त्ति " करणादिदं दृश्यम्-" केवलं बोहिं बुज्झेज्जा मुंडे भवित्ता आगाराओ अणगारियं पव्वएज्जा केवलं बंभचेरवासमावसेज्जा । एवं संजमेणं संजमेज्जा संवरेणं संवरिज्जा आभिणिबोहियणाणं उप्पाडेज्जा " इत्यादि । स्था० ३ ठा० २ उ० । प्राणातिपा-तविरमणादिके व्रतविशेषे, आचा० १ श्रु० ८ अ० १ उ० । "आगमिस्साए उस्सप्पिणीए चाउज्जामं धम्मं पन्नविस्सा" यामा महाव्रतानीति । स्था० ६ ठा० । वयोविशेषे, ज्ञानदर्शनचारित्रेषु च । "माहणेणं मइमया जामा तिन्नि उदाहिया" "जामा" इ-त्यादि । यामा व्रतविशेषाः त्रयः उदाहृताः । तद्यथा-प्राणाति-पातो, मृषावादः, परिग्रहश्च इति । अदत्तादानमैथुनयोः परिग्रह एवान्तर्भावात्त्रयग्रहणम् । यदि वा-यामा वयोविशेषाः । तद्यथा-अष्टवर्षाद् द्वात्रिंशतः प्रथमः, तत ऊर्द्धं षोडशद्वितीयः, तत ऊर्द्धं तृतीय इति । अतिबालवृद्धयोर्व्युदासः । यदि वा-यस्य ते उप-रम्यते संसारभ्रमणादेभिरिति यामा ज्ञानदर्शनचारित्राणीति ते उदाहृता व्याख्याताः । आचा० १ श्रु० ८ अ० १ उ० ।

जामइल्ल–यामवत्–त्रि० । "आल्विल्लोल्लालवंतमंतेरमणामतोः' ॥ ८ । २ । १५९ ॥ इति प्राकृतसूत्रेण मतोः स्थाने 'इल्ल' आदेशः । प्रा० २ पाद । विद्यमानयामके, वाच० ।

जामदग्ग–जामदग्न्य–पुं० । जमदग्नेरपत्यं यञ् । यमदग्निपुत्रे परशुरामे, वाच० । विशे० ।

जामद्ध–यामार्द्ध–न० । यामं प्रहरं तस्यार्द्धम् यामार्द्धम् । चतु-र्घटिके समयविशेषे, ग० १ अधि० ।

जामहिं–यावत्–त्रि० । "यावत्तावतोर्वा ऽऽदेर्मं-डं-महिं" ॥ ८ । ४ । ४०६ ॥ इति प्राकृतसूत्रेण वकारादेर्महिं इत्यादेशो वा । प्रा० ४ पाद । यत्परिमाणमस्य मतुप् । यत्परिमाणे, साकल्ये, अवधौ व्याप्तौ, माने, अवधारणे च । अव्य० । वाच० । " जाम न निवसइ कुंभयड, सीहचपेरुअवज्ज । तामसमत्तहं मय-गलहं, परपइवज्जइ ढक्क । " प्रा० ४ पाद ।

जामाउ–जामातृ–पुं० । "उदित्वादौ" ॥ ८ । १ । १३१ ॥ इति प्राकृत सूत्रेण ऋकारस्योकारः । प्रा० १ पाद । जायां माति मिनोति मिमीते वा । तॄच् । दुहितृपतौ, वक्तव्ये स्वामिनि च । वाच० ।

जामाउय–जा (या) मातृक–पुं० । दुहितृभर्तरि, विपा० १ श्रु० ३ अ० ।

जामि–जा (या) मि–स्त्री० । जन–मिण्–वृद्धिः । अथवा-यम–इन् । भगिन्याम्, दुहितरि, स्नुषायाम्, कुलस्त्रियाम्, सन्नि-हितस्त्रियाम्, " यामयो यानि गेहानि " । वाच० । तीo "आ-मी एगे " गत्वेत्यर्थे, स्था० १ ठा० ।

जामिणी–यामिनी–स्त्री० । यामान्निसंक्षयाताः सन्त्यस्य बाहु-ल्ये इनि । रात्रौ, हरिद्रायां च " निसा जामिणी राई " को० ।

जामिय–यामिज–पुं० । भगिनीपुत्रे, " अक्कूजो द्विजो दत्तः, कालिकाचार्यजामिजः " । आ० क० ।

जामुणकुसुम–जपाकुसुम–न० । रक्तपुष्पस्य वृक्षभेदस्य पुष्पे, " जामुणकुसुमेई वा " रा० ।

जामेय–जामेय–पुं० । भगिनीपुत्रे, " राज्ये निवेश्य जामेयं, प्रव्र-ज्यां स्वयमग्रहीत् " आ० क० ।

जाय–जात–न० । जन–क्त । समूहे, व्यक्ते, जन्मनि । वाच० । जातौ, प्रकारे च । स्था०१० ठा० । जातमुत्पत्तिधर्मकम् । तच्च व्यक्ति वस्तु । अतो भाषायाः जातानि व्यक्तिवस्तूनि भेदाः प्रकाराः । (स्था०) जातं प्रकारः । स्था० ४ ठा० १ उ० । " अट्ठजाए वि दट्ठव्वं" जातशब्दो भेदवाचकः । नि० चू०१ उ० ।

'जाय' सद्दो प्रकारवाची। नि० चू० १६ उ०। आ० म०। वृ०। उत्पन्ने, त्रि०। स्था०६ ठा०। सूत्र०। उत्त०। वृ०। "कारणजाए" जाते समुत्पन्ने, दश० ४ तत्त्व। "एत्थ पाणा अणुप्पसूया एत्थ पाणा जाया" नानादेशजविनेयानुग्रहार्थमेकार्थिकान्येवैतानि। आचा०२ श्रु०१ अ०८ उ०। प्रवृत्ते, रा०। औ०। विद्यमाने च। विशे०। पुत्रे,पुं०। "सरपायं च जायाए" सूत्र० १ श्रु०४ अ०२ उ०। "जाए फले समुप्पन्ने" सूत्र०१ श्रु०४ अ०२ उ०। "धन्नो सि णं तुमं जाया"(जायेति)हे पुत्र!। भ० ६ श० ३३ उ०। वृ०।

जातस्य निक्षेपः षड्विधः तथा चाचाराङ्गनिर्युक्तौ-

....., जाए छक्कं च होई णायव्वं।

ज्ञातशब्दस्य तु षड्निक्षेपोऽयं ज्ञातव्यो नामस्थापनाद्रव्यक्षेत्रकालभावरूपः तत्र नामस्थापने क्षुण्णे, द्रव्यजातं तु नो आगमतो व्यतिरिक्तम्। निर्युक्तिगाथाकारो गाथापश्चार्द्धेन दर्शयति-

उप्पत्तीए तह पज्ज-वंतरे जाय गहणे वि ॥१॥

तच्चतुर्विधम्-उत्पत्तिजातम्, पर्यवजातम्, अन्तरजातम्, ग्रहणजातम्। तत्रोत्पत्तिजातं नाम-यानि द्रव्याणि भाषावर्गणान्तःपातीनि काययोगगृहीतानि वाग्योगेन निसृष्टानि भाषात्वेनोत्पद्यन्ते तदुत्पत्तिजातम्; यद् द्रव्यं भाषात्वेनोत्पन्नमित्यर्थः। पर्यवजातं तैरेव वाग्निसृष्टभाषाद्रव्यैः यानि विश्रेणिस्थानि भाषावर्गणान्तर्गतानिसृष्टद्रव्यपरघातेन भाषापर्यायत्वेनोत्पद्यन्ते तानि द्रव्याणि पर्यवजातमित्युच्यते। यानि त्वन्तराले समश्रेण्यामेव निसृष्टद्रव्यमिति तानि भाषापरिणामं भजन्ते तान्यन्तरजातमित्युच्यते। यानि पुनर्द्रव्याणि समश्रेणिविश्रेणिस्थानि भाषात्वेन परिणतानि कर्णशष्कुलीविवरप्रविष्टानि गृह्यन्ते तानि चानन्तप्रदेशिकानि द्रव्यतः। क्षेत्रतोऽसंख्येयप्रदेशावगाढानि कालत एकसमयादि यावदसंख्येयसमयस्थितिकानि भावतो वर्णगन्धरसस्पर्शवन्ति तानि चैवंभूतानि ग्रहणजातमित्युच्यते। उक्तं द्रव्यजातम्। क्षेत्रादिजातं तु स्पष्टत्वान्निर्युक्तिकारेण नोक्तम्। तच्चैवंभूतं यस्मिन् क्षेत्रे भाषाजातं व्याक्रियते यावन्मात्रं वा क्षेत्रं स्पृशति तत् क्षेत्रजातम्। एवं कालजातमपि। भावजातं तु तान्येवोत्पत्तिपर्यवान्तरग्रहणद्रव्याणि श्रोतरि यदाशब्दोऽयमिति बुद्धिमुत्पादयन्तीति। आचा० २ श्रु० ४ अ० १ उ०। गमनक्रियायाम्,आचा० १ श्रु०५ अ०४ उ०। गते,त्रि०। सूत्र०१ श्रु०३ अ० १ उ०। प्राप्ते च। "असुद्धे सिया जाए न कूसएज्जा" सूत्र० १ श्रु० १० अ०।

जायंत–याचमान–त्रि०। याचनं कुर्वति, "जायंता पाणियं" याचमानाः पानीयम्। प्रश्न० ३ आश्र० द्वार।

जायअंधारूवग–जातान्धरूपक–पुं०। जातमुत्पन्नमन्धकनयनयोरादित एवानिष्पत्तेः कुत्सितमङ्गरूपं यस्यासौ। जातान्धरूपके. विपा० १ श्रु० १ अ०।

जायकप्प–जातकल्प–पुं०। कल्पभेदे, जाता निष्पन्नाः श्रुतसंपदुपेततया लब्धात्मलाभाः साधवस्तदन्यतिरेकात्कल्पोऽपि जात उच्यते। ध० ३ अधि०। पञ्चा०।

जायकम्म–जातकर्मन्–न०। जातस्य कर्म। मन्त्रवत्सर्पिष्प्राशनादि। संस्कारभेदे, वाच०। नाभ्यच्छेदादिके प्रसवकर्मणि च। "पढमे दिवसे जायकम्मं करेंति" जातकर्म प्रसवकर्म नाभ्यच्छेदननिखननादिकम्। ज्ञा० १ श्रु० १ अ०। "णिव्वत्ते अट्ठमे जायकम्मकरणे" जातकर्मणां प्रसवव्यापाराणां करणं विधानम्। तस्मिन्, स्था० ६ ठा०। औ०।

जायकोऊहल्ल–जातकुतूहल–त्रि०। जातं कुतूहलं यस्य स जातकुतूहलः। जातौत्सुक्ये, रा०। सू० प्र०।

जायग–जातक–न०। जातस्य हितम्-कन्। जातस्य शुभाशुभनिर्णायके बृहज्जातकादौ ग्रन्थे, जातकर्मरूपे संस्कारभेदे च। वाच०।

जायक–न०। जयति गन्धान्तरं जि-एवुल्। पीतवर्णे सुगन्धिकाष्ठे, वाच०।

याचक–त्रि०। याच-एवुल्। याञ्चाकारके,वाच०। देवैर्भगवत्सकाशाद्दौ(सकाशाज्जानुः)गृहीते सति भावका देवानतिशयज्ञतया याचितवन्तः देवा अपि तेषां प्रचुरत्वान्महता यत्नेन याचनाऽभिहता आहुः-"अहो याचकाः" इति। तत एव याचका रूढाः। आ०म० प्र०। "ते य सदा अग्गिसकदधादीणि जायंति ताहे देवेहिं भणितं-इमे केरिसगा, "जायगा" ततो जायगसद्दो जातो। ताहे अग्गिं घेत्तुं ते सपसु सपसु गेहेसु उवेंति"। आ० चू० १ अ०।

याजक–पुं०। याजयति-यज्-णिच्-एवुल्। धनादिलाभाय परार्थे यज्ञकर्तरि, ऋत्विगादौ, वाच०। "सो तत्थ एव पक्किसिओ,जायगेण महामुणी"याजकेन यज्ञकारकेण। उत्त०२६अ०।

जायण–याचन–न०। याच्-ल्युट्। याञ्चायाम्,वाच०। पञ्चा०। प्रार्थने, प्रव० ८६ द्वार। मार्गणे च। आव० ४ अ०।

यायन–न०। कदर्थने, प्रश्न० २ आश्र० द्वार।

जायणजीवण–याचनजीवन–त्रि०। याचनेन जीवनं प्राणधारणमस्येति याचनजीविनः। आर्षत्वादिकारः। उत्त० १२ अ०।

याचनजीविन्–त्रि०। याचनेन जीवनशीले च। "जाणाहि मे जायणजीविणोति" उत्त० १२ अ०।

जायणा–याञ्चा–स्त्री०। याच्-नङ्। प्रार्थनायाम्, वाच०। ज्ञा०। उत्त०। मार्गणे च। आव० ४ अ०।

यातना–स्त्री०। चुरा० यत-युच्। तीव्रवेदनायाम्,वाच०। कदर्थनायाम्, प्रश्न० १ आश्र० द्वार। दण्डो निग्रहो यातना विनाश इति पर्यायाः। आव० ६ अ०। "जायणा करणसयाणि" कदर्थनहेतुशतानि। प्रश्न० ३ आश्र० द्वार।

जायणापरीसह–याञ्चापरीषह–पुं०। याचनं याञ्चा प्रार्थनेत्यर्थः। सैव परीषहो याञ्चापरीषहः। प्रव० ६ द्वार। उत्त०। परीषहभेदे, (आव०) निर्दोषं वस्त्रपात्राशनपानप्रतिश्रयादिपरतो लब्धव्यं सर्वमेव शालीनतया च न याञ्चा प्रत्याख्यते। साधुना तु प्रागलब्धव्याजा सा जाते कार्ये स्वधर्मकाय परिपालनाय याचनमवश्यं कार्यमित्येवमनुनिष्ठता याञ्चापरीषहविजयः कृतो भवति। आव० ४ अ०। प्रव०। पं० सं०। आ० चू०।

याञ्चापरीषहमाह-

दुक्करं खलु भो निच्चं, अणगारस्स भिक्खुणो।
सव्वं से जाइअं होइ, नत्थि किंचि अजाइतं ॥ २८ ॥
गोयरग्गपविट्ठस्स, पाणी णो सुप्पसारए।
सेओ अगारवासो त्ति, इइ भिक्खू न चिंतए ॥२९॥

दुष्करसूत्रम्-दुःखेन क्रियते इति दुष्करम् दुरनुष्ठानं अशुचिबीभत्सणे। निरुपकारिण इति विशेषं द्योतयति । भो इत्यामन्त्रणे। नित्यं सर्वकालं यावज्जीवमित्यर्थः। अनगारस्य निष्क्रोरिति। चः प्राग्वत्। किं तत् दुष्करमित्याह-यत्सर्वमाहारोपकरणादि (से) तस्य याचितं भवति । नास्ति किञ्चिद् दन्तशोधनाद्यप्ययाचितं ततः सर्वस्यापि वस्तुनो याचनमिति गम्यमानेन विशेषेण दुष्करमित्यस्य सम्बन्ध इति सूत्रार्थः ॥२८॥ ततश्च गोचरसूत्रम्-गौरिव चरणं गोचरो, यथाऽसौ परिचिताऽपरिचितविशेषमपहायैव प्रवर्तते । तथा साधुरपि भिक्षार्थं तस्यां प्रधानं यतोऽसौ एषणायुक्तो गृह्णाति । न पुनर्गौरिव । यथाकथंचित्तस्मिन् प्रविष्टो गोचराग्रप्रविष्टः तस्य पाणिर्हस्तो (सो) नैव सुखेन प्रसार्यते पिण्डादिग्रहणार्थं प्रवर्तते इति सुप्रसारः स एव सुप्रसारकः कथं हि निरुपकारिणा परः प्रतिदिनं प्रणयितुं शक्य उत्तरत्र,इतिशब्दस्य निष्क्रमत्वादित्यस्माद्धेतोः श्रेयानतिशयप्रशस्योऽगारवासं गार्हस्थ्यं तत्र हि न कश्चिद् याच्यते, स्वभुजार्जितं च दीनादिभ्यः संविभज्य भुज्यते इत्येतद्भिक्षुर्न चिन्तयेत् । यतो गृहवासो बहुसावद्यो निरवद्यकृत्यर्थं च तत्परित्यागस्ततः स्वयं पचनादिप्रवृत्तेभ्यो गृहिभ्यः पिण्डादिग्रहणं श्रेयस्यमिति भावः। इतिसूत्रार्थः ॥ २९ ॥

सांप्रतं प्रस्तुतं तत्र "दुक्करं खलु भो निच्चं" इत्यादि । सूत्रम्। अर्थतः स्पृशन्नुदाहरणमाह-जायण गाहद्धं-

जायणपरीसहम्मि य बलदेवो इत्थ आहरणम् ॥

याञ्चापरीषहे बलदेवोऽत्र भवति (आहरणम) उदाहरणम्। अत्र संप्रदायः-"जया सो वासुदेवो सव्वं वहंतो सिद्धत्थेणं पडिवाहिओ कण्हस्स सरीरं सक्कारेउं कयसमाइओ निम्मण्डियज्जिओ तु गोसिद्धरे तवं तप्पमाणो, ण कहं भिच्चाण भिक्खट्ठं अलीइस्सं तणकट्ठाहाराई ण भिक्खं गेण्हति । न गामं न नगरं अल्लियति। तेण सो णाभियासिओ जायणपरीसहो एवं न कायव्वं। अण्णे भणंति-बलदेवस्स भिक्खं भमंतस्स बहुओ जणो तस्स रूवेण अतो ण किंचि अण्णं जाणति तम्हितो चेव चेट्ठति तेण न सो हिंडति गामनगरादि जहा पभियाहितो चेव भिक्खं जायइ त्ति। एस जायणापरीसहो एसत्थो" एवं शेषसाधुभिरपि याञ्चापरीषहः सोढव्य इति। उत्त० २ अ०। "परदत्तोपजीवित्वात्, यतीनां नास्ति जीवितम्। यतोऽतो याचता दुःखं, क्लाम्ये नेच्छेदगारिताम् ॥१॥" आ० म०-द्वि०। योगशास्त्रवृत्तौ-न्याय्याचितं यतीनां यत्, परदत्तोपजीविनाम्। याच्ञादुःखं प्रतीच्छेत्तु-नेच्छेत्पुनरगारिताम् ॥१४॥ ध०३ अधि०।

सांप्रतं याञ्चापरीषहमधिकृत्याह—

सदा दत्तेसणा दुक्खा, जायणा दुप्पणोल्लिया (६)

यतीनां सदा सर्वदा दन्तशोधनाद्यपि परेण दत्तमेषणीयमुत्पादैषणादोषरहितमुपभोक्तव्यमित्यतः क्षुधादिवेदनातानां यावज्जीवं परदत्तैषणादुःखं भवति । अपि चेयं याञ्चापरीषहोऽत्यन्तदुर्दैवदुःखेन प्रणीयते त्यज्यते । तथा चोक्तम्-

"डिज्झाइ मुहलावण्णं, वाया घोलेइ कंठमज्झम्मि।
कह कह कहेइ हिययं, देहि त्ति परं भणंतस्स ॥१॥
गति भंशो मुखे दैन्यं, गात्रस्वेदो विवर्णता।
मरणे यानि चिह्नानि, तानि चिह्नानि याचके ॥ २ ॥"

इत्यादि । एवं दुस्त्यजं याञ्चापरीषहं परित्यज्य गताऽभिमाना महासत्त्वा ज्ञानाद्यभिवृद्धये महापुरुषसेवितं पन्थानमनुव्रजन्तीति। सूत्र० १ श्रु० ३ अ० १ उ०।

जायणी-याचनी-स्त्री० । याच्यतेऽनयेति याचनी। भाषाभेदे, स्था० ४ ठा० १ उ०। याचनी कस्यापि वस्तुविशेषस्य देहीति मार्गणरूपे भाषाभेद, प्रज्ञा० ११ पद । भ० । दश०। संथा०।

जायतेय-जाततेजस्-पुं०। अग्नौ,"जायतेयं न इच्छंति" दश० ६ अ०। "जायतेयं समारब्भ, बहुओ हंभिया जणा। अतो धूमेण मारेइ, महामोहं पकुव्वइ" सं० ३० सम०।

जायथाम-जातस्थामन्-त्रि०। उत्पन्नबले, "वसभो इव जायथामे" गौरिवोत्पन्नबलः। स्था० ६ ठा०।

जायपक्ख-जातपक्ष-पुं०। जाततन्तुरुहे, " जायपक्खा जहा हंसा " उत्त० २३ अ०।

जायपुंखाइ-जातपुंख्याति-पुं०। उत्पन्नगुणपुरुषविवेकप्रख्यातौ, नत्परं जातपुंख्याते, ष्ठा० ११ ष्ठा०।

जायफल-जातफल-न०। पुत्ररूपे फले, " जायफले समुप्पन्ने " जातः पुत्रः स एव फलं गृहस्थानां तथाहि पुरुषार्थानां कामभोगः फलम् तेषामपि प्रधानकार्यं पुत्रजन्मेति। सूत्र० १ श्रु० ४ अ० २ उ०।

जायमजायकप्प-जाताऽजातकल्प-पुं०। कल्पभेदे, (पं० भा०)

जातमजाओ अहुणा, दोण्हं वि एते समं तु वच्चंति।
जातं णिप्पज्जंति य, एगट्ठं होंति णायव्वं।
जातमजातं करणं, जाते करणे गती तिहा सिद्धा।
अजाए करणम्मि तु अ-ज्झवसिरिं तं गती जाइ।
जातं खलु णिप्पन्नं, सुत्तेण ऽत्थेण तदुभयेणं च।
चरणेण य संजुत्तं, वतिरित्तं होति य अजातं।
जातकरणेण सिद्धा, नरगतिरिक्खा गती उ दोण्णि भवे।
अहवा वि तिहा सिद्धा, नरगतिरिक्खा मणुस्सगती।
दो वेसु वि तिण्णि गती, सिद्धा वेमाणिएसु उववण्णो।
चउसु वि गतीसु गच्छति, अज्झवसिरिं अजातकरणेणं।
एसो जातमजाते, कप्पो अभिहितो इयाणिं तु। पं० भा०।

इयाणिं जायमजायकप्पं समं च वर्णयति । जातो निष्पन्न इत्यर्थः । अहवा-जायकप्पो संविग्गगीयत्थाणं, इयरेसिं संविग्गासंविग्गाणं, अगीयत्थाणं अजायकप्पो। जइ जायकरणं जायकप्पो असदूतमजातमित्यनर्थान्तरम् अजातकरणमजातकल्पः जायकरणे वि दो नरगतिरिक्खजोणी य गईओ सिद्धाओ, अजायकरणे चउसु वि गईसु अज्झवसिरिं गइं गच्छइ। जायमजायकरणा। पं० चू०।

जायमजायपारिट्ठावणिया-जाताजातपारिष्ठापनिका-स्त्री० । द्वि० ब० । जाताजातपारिष्ठापनिकयोः, (ग०)

जाताजातस्वरूपं यथा-

" आहारम्मि उ जाया, सा दुविहा होइ आणुपुव्वीए।
जाया चेव सुविहिया, नायव्वा तह अजाया य ॥ १ ॥
आहाकम्मे य तहा, लोउत्तिअआभिओगिए गहिए।

एएण दोइ जायं, वोच्छं से विहीइ वोसिरणं ॥ २ ॥ "

आधाकर्मणि च तथा लोभाद् गृहीते, विषकृते गृहीते, मक्षिकादिविषया जाते, आभियोगिके वशीकरणादिमन्त्राऽभिसंस्कृते, ततोऽन्यथात्वादभिकृतो ज्ञाते सति एतेनाधाकर्मादिदोषेण जाता स्यात् । (से) तस्य विधिना व्युत्सर्जनं वक्ष्ये ॥ २ ॥

" एगंतमणावाए, अचित्ते थंडिले गुरुवइट्ठे ।
वारेण अक्कमित्ता, तिण्हं सावणं कुज्जा ॥ ३ ॥ "

त्रीन् वारान् श्रावणं कुर्यात्, अमुकदोषादिदं त्यज्यते इति त्रिरुच्चरेत् ॥ ३ ॥

" आयरिए य गिलाणे, पाहुणए दुल्लभे सहस लाभे ।
एसा उ खलु अजाया, वोच्छंसि विहीइ वोसिरणं ॥ ४ ॥ "

आचार्यार्थे तथा दुर्लभे विशिष्टे द्रव्ये सति सहसा च तल्लाभे जाते सति इत्यादि । हेतोरधिकग्रहणं स्यात् । एषा अजातपारिष्ठापनिका ॥ ३ ॥

" एगंतमणावाए, अचित्ते थंडिले गुरुवइट्ठे ।
आलोए तिरिएण पुंजा, तिण्हं सावणं कुज्जा ॥ ५ ॥ "

आलोके प्रकाशे शुद्धाहारस्य त्रीन् पुञ्जान् कुर्यात्, आधाकर्मादिमूलगुणदुष्टे एकः उत्तरगुणदुष्टे तु द्वौ, इति विशेषः। पूर्ववत् त्रिः श्रावणं न कुर्यात्, एवमुपकरणविषयेऽपि जाताजाते पारिष्ठापनिके ज्ञेये ज्ञाते । ग० २ अधि० ।

जायमजायाहार–जाताऽजाताधार–पुं० । आवश्यकपारिष्ठापनिकानिर्युक्त्युक्तजाताऽजातपारिष्ठापनिकाविधिज्ञे, (ग०) " जायमजायाहारे " (जायमजायाहारे त्ति) मकारस्यालाक्षणिकत्वात् जाताधारः । आवश्यकपारिष्ठापनिकानिर्युक्त्युक्तजाताऽजातपारिष्ठापनिकाविधिज्ञ इत्यर्थः । ग० २ अधि० ।

जाताजाताहार–पुं० "कृताकृताहारे,(ग०) "जायमजायाहारे" (जायमजायाहारे त्ति) मकारस्यालाक्षणिकत्वात् । जातः संपन्नोऽजातश्चासंपन्न आहारो यस्यासौ जाताहारः । कदाचित् कृताहारः कदाचिदकृताहार इत्यर्थः । तत्र शुद्धे लब्धे जाताहारः अलब्धे, अशुद्धे वा लब्धे, अजाताहारः। उक्तं च-"अलब्धतपसो बुद्धि-र्लब्धे देहस्य धारणे " ग २ अधि० ।

यात्रामात्राहार–पुं० । यात्रायै मात्रयाऽऽहारो यस्या—सौ यात्राहारः । संयमस्वाध्यायादिनिर्वाहाय मात्रयाऽऽहारं कुर्वति, " जायमजायाहारे " अथवा-यात्रायै मात्रयाऽऽहारो यस्यासौ यात्राहारः । आर्षत्वात् चेत्थं सिद्धिः । तत्र यात्रा संयमस्वाध्यायरूपा, मात्रा तु तदर्थमेव पुरुषस्त्रीपशदानां क्रमेण द्वात्रिंशदष्टाविंशतिचतुर्विंशतिकवलप्रमाणाहारमध्यादेकद्वित्र्यादिकवलेनाहारग्रहणमिति । ग० २ अधि० ।

जायमूक–जातमूक–पुं० । जन्मतो मूके, विपा० १ श्रु० १ अ० ।

जायरूव–जातरूप–न० । जातं रूपमस्य प्रशस्तवर्णे, वाच० । सुवर्णे, रा० । प्रश्न० । ज्ञा० । स्था० । जातं लब्धं रूपं स्वरूपं रागादिकुरूपविरहाद् येन स तथा । स्था० ६ ठा० । सुवर्णविशेषे, रा० । जं० । "जायरूवमईओ ओहाडणीओ" जातरूपं सुवर्णविशेषः । जी० ३ प्रति० । " अहवा-जायरूवे जं च पवालगवत् जातनं जायरूवं भण्णति " नि० चू० १ उ० । रूप्ये च, " हिरण्णं जायरूवं च, मणसा वि ण पत्थए " जातरूपं रूप्यम् । उत्त० ३५ अ० ।

जायरूवकंड–जातरूपकाण्ड–न० । रत्नप्रभायाः पृथिव्याः षोडशसु काण्डेषु त्रयोदशे काण्डे, स्था० १० ठा० ।

जायव–यादव–पुं० । यदोरपत्यम् । यदु-अण् । यदुवंशजे, "पज्जुण्णपईवसंबअणिरुद्धणिसढउसुयसारणगयसुमुहदुम्मुहाईणं जायवाणं " । प्रद्युम्नप्रतीपशाम्बानिरुद्धनिषधोल्मुकसारणगजसुमुखदुर्मुखादीनां यदोरपत्यानाम् । प्रश्न० ४ आश्र० द्वार ।

जायवेय–जातवेदस्–पुं० । जातान् प्राणिनः विन्दते जठरानलत्वेन । 'विद' लाभे । असुन् । वह्नौ, " जायवेयं पावहि हणाह जे भिक्खुं अवमण्णह " जातवेदसमग्निम् । उत्त० २२ अ० । चित्रकवृक्षे च । वाच० ।

जायसंसय–जातसंशय–त्रि० । जातः संशयो यस्य स जातसंशयः । उत्पन्नसंशये, सू० प्र० १ पाहु० । औ० । ज्ञा० । चं० प्र० । जं० । रा० ।

जायसड्ढ–जातश्राद्ध–त्रि० । जाता प्रवृत्ता श्रद्धा इच्छाविशेषो यस्यासौ जातश्राद्धः । प्रवृत्तेच्छाविशेषे, ज्ञा० १ श्रु० १ अ० । चं० प्र० । सू० प्र० । रा० । जं० । नि० । औ० ।

जाया–यात्रा–स्त्री० । या-ष्ट्रन् । जिगमिषया राज्ञां गमने, गमनमात्रे, देवोद्देशेनोत्सवभेदे, रथयात्रादौ च । वाच० । निर्वाहे च । "जारस्स जाता मुणि भुंजएज्जा" । यात्रार्थं पञ्चमहाव्रतभारनिर्वाहणार्थम् । सूत्र० १ श्रु० ७ अ० । भ० ।

जाया–स्त्री० । जन-यक् । भार्यायाम्, (भ०) । स्त्रीत्वेन जायास्वयोः । कान्ताजनन्योः, प्रति० । भ० ।

समणोवासगस्स णं भंते ! सामाइयकडस्स समणोवासए अत्थमाणस्स केइ जायं चरेज्जा । स णं भंते ! किं जायं चरइ, अजायं चरइ ?। गोयमा ! जायं चरइ, नो अजायं चरइ । तस्स णं भंते ! तेहिं सीलव्वयगुणवेरमणपच्चक्खाणपोसहोववासेहिं सा जाया अजाया भवइ ? । हंता भवइ । से केणं खाइयं अट्ठेणं भंते ! एवं वुच्चइ–जायं चरइ, नो अजायं चरइ ?। गोयमा ! तस्स णं एवं भवइ–नो मे माया, णो मे पिया, नो मे जाया, णो मे भइणी, नो मे भज्जा, नो मे पुत्ता, नो मे धूया, नो मे सुण्हा, पेज्जबंधणे पुण से अव्वोच्छिण्णे भवइ, से तेणट्ठेणं गोयमा ! जाव नो अजायं चरइ ।

(केइ जायं चरेज्ज त्ति) कश्चिदुपपत्तिरित्यर्थः । जायां भार्यां चरेत् सेवेत (सुण्हं त्ति) स्नुषां पुत्रजायां (पेज्जबंधणे त्ति) प्रेमैव प्रीतिरेव बन्धनं तत्पुनः ' से ' तस्य श्रावकस्य अव्यवच्छिन्नं भवति। अनुमतेरप्रत्याख्यातत्वात् प्रेमानुबन्धस्य चानुमतिरूपत्वादिति । भ० ७ श० ५ उ० । चमरस्यासुरेन्द्रस्य स्वनामख्यातायां बाह्यायां पर्षदि, स्था० ३ ठा० २ उ० । " बाहिं जाया " जी० ३ प्रति० ।

जाया–स्त्री० । प्रकृतिमहस्ववर्जितत्वेनास्थानकोपादीनां जातत्वाज्जाता । चमरादिदेवेन्द्राणां बाह्यपर्षदि, भ० २ श० १ उ० ।

जायाइ [न्]–यायाजिन्–पुं० यायजतीत्येवंशीलो यायाजी। यजनशीले, "जायाई जम जन्नम्मि" यमयज्ञे यायाजी । उत्त० २५ अ०।

जायामाया–जात्रामात्रा–स्त्री० । यात्रा संयमयात्रा तस्यां मात्रा यात्रामात्रा "जायामुत्ते जयाधीरे जायामायाए" । आचा० १ श्रु० ३ अ० ३ उ० । संयमार्थे परिमिताहारग्रहणे, नं०।

जायामायावित्ति–जात्रामात्रावृत्ति–स्त्री० । संयमयात्राप्रमाणायां जीविकायाम्, "जायामायावित्ती होत्था" संयमयात्राप्रमाणा जीविकाऽभवत् । सूत्र० २ श्रु० २ अ० "जायामायावित्ती" ओ" यात्रा संयमयात्रा मात्रा तदर्थमेव परिमिताहारग्रहणम्, वृत्तिर्विविधैरभिग्रहविशेषैर्वर्तनम् । भ० २५ श० ३ उ० । नं०।

जार–जार–पुं० जीर्यतेऽनेन 'जॄ' करणे घञ्। उपपत्तौ, वाच०। मणिलक्षणविशेषे च। जारमारेति लक्षणविशेषौ सम्यग्मणिलक्षणवेदिनौ लोकाद्देदितव्यौ। जी० ३ प्रति० । रा० । जं० । आ० म० ।

जारिश–यादृश–त्रि० । यस्येव दर्शनमस्य । यद्–दृश टः। 'दृशः क्विप् टक्सकः" ॥ ८ । १ । १४२ ॥ एतदन्तस्य दृशेर्ऋतोरिः । प्रा० १ पाद । यत्सदृशे, यथाविधे, स्त्रियां ङीप्। वाच० । आ० म० प्र० । "जारिसओ जं नामा, जह य कओ जारिसं फलं देंति" यादृशको यत्स्वरूपकः यादृशं यद्रूपम । प्रश्न० १ आश्र० द्वार । "जं जारिसं पुव्वमकारि कम्मं, तमेव आगच्छति संपराए"। यत्कर्म यादृशं यदनुभावं यादृक्स्थितिकं वा। सूत्र० १ श्रु० ५ अ० २ उ० ।

जारुकण्ह–जारुकृष्ण–पुं० । वशिष्ठगोत्रान्तर्गते गोत्रभेदे, स्था० ७ ठा० ।

जाल–जाल–पुं० । चुरा० 'जल' संवरणे । घञ् । घाते, 'जल घातने णिच्—अच् । कदम्बवृक्षे, गवाक्षे, वाच० । रा० । जं० । सच्छिद्रे, गवाक्षविशेषे च । जालं सच्छिद्रो गवाक्षविशेषः । ज्ञा० १ श्रु० १ अ० । जालकं छिद्रान्वितो गृहावयवविशेषः । प्रश्न० १ आश्र० द्वार । औ० । "जालानि जालका भवनभित्तिषु लोके प्रतीतानि । रा० । जी० । सू० प्र० । चं० प्र० । स० । जी० । "जालंतरपइवोव्वप्पहोवमो कइगावही होइ" अपवरकजालकान्तरस्थप्रदीपप्रभोपमः । विशे० । गवाक्षछिद्रे, "गवाक्षजालैरभिनिष्पतन्त्यः" इति भट्टिः । मत्स्यधारणार्थे शणसूत्रनिर्मिते स्वनामख्याते आनाये, वाच० । "जालुच्छुप्पणाणि" । जालेन वाऽऽनायेनोत्क्षेपणानि । प्रश्न० १ आश्र० द्वार । मत्स्यबन्धनविशेष, प्रश्न० ४ आश्र० द्वार । विपा० । "तहेव कोंचा समइक्कमंता, तयाणि जालाणि दलित्तु हंसा" । जालानि बन्धनविशेषरूपाणि उत्त० १४ अ० "विदंसएहिं जालेहिं" उत्त० १ अ० । "छिद्दिहिं जालं अवलंबरोहिया" उत्त० १४ अ० । अस्फुटकलिकायाम, कुष्मण्डे, मृणपट्टयादिधारणार्थे पाशे, शाखे, द्रुमे, समूहे च, वाच० । जं० । आ० म० । द्रव्या० । सन्ताने, आव० ४ अ० । इन्द्रजाले, वाच० । चरणाभरणविशेषे च । न० । औ० ।

जालंतररयण–जालान्तररत्न–त्रि० । जालान्तरेषु जालकमध्यभागेषु रत्नानि यस्य । तस्मिन्, जालकानि च भवनभित्तिषु लोके प्रतीतान्येव तदन्तरेषु च शोभार्थं रत्नानि संन्यस्यन्त्येव । स० । रा० । चं० प्र० । जी० । सू० प्र० ।

जालंधर–जालन्धर–पुं० । विगर्ताख्ये देशे, तद्देशस्थे जने च । ब० ब० । स्वनामख्याते योगिराजे, वाच० । गोत्रभेदे च । "देवाणंदाए माहणीए जालंधरसगुत्ताए" । कल्प० १ क्षण । आ० चू० ।

जालंधरायण–जालन्धरायण–पुं० । गोत्रभेदे, "देवाणंदाए माहणीए जालंधरायणसगुत्ताए" । आचा० २ चू० ।

जालकडग–जालकटक–पुं० । जालानि जालकानि भवनभित्तिषु लोकेऽपि प्रसिद्धानि तेषां कटकः समूहो जालकटकः । जी० ३ प्रति० । जालकटकाकीर्णे रम्यसंस्थाने प्रदेशविशेषे, जी० ३ प्रति० । "विजयस्स णं दारस्स उभओ पासिं दुहओ णिसिहियाए दो दो जालकडगा पण्णत्ता" । जालकटको जालकटकाकीर्णो प्रदेशविशेषौ । जं० १ वक्ष० । "सा णं जगतीए केणं जालकडएणं सव्वतो समंता संपरिक्खित्ता" जी० ३ प्रति० । जालकटकाकीर्णो रम्यसंस्थानप्रदेशविशेषपङ्क्तिरिति भावः । जी० ३ प्रति० ।

जालग–जालक–पुं० । स्वार्थे–कन् । गवाक्षछिद्रे, पुं० । मोचकफले, नवकलिकासमूहे, क्वारके च । न० । वाच० । छिद्रान्विते गृहावयवविशेषे, प्रश्न० १ आश्र० द्वार । जालकं विच्छित्तिछिद्रवत् गृहावयवविशेषः । ज्ञा० १ श्रु० १ अ० । जालकानि भवनभित्तिषु लोके प्रतीतानि । रा० । जी० । स० । सू० प्र० । चं० प्र० । जी० । चरणाभरणविशेषे च । औ० । "सद्दविखिणीजालपरिक्खित्ताणं" सह किङ्किणिकाभिः क्षुद्रघण्टिकाभिः यज्जालं जालकं तदाभरणविशेषस्तेन परिक्षिप्ताः परिकरिताः ये ते तथा तेषाम् । औ० ।

जालगंठिया–जालग्रन्थिका–स्त्री० । जाले मत्स्यबन्धने, तस्येव ग्रन्थयो यस्यां सा जालग्रन्थिका । जालवद् ग्रन्थियुतायाम्, किं स्वरूपा सा? इत्याह–

जालगंठियाइ वा, आणुपुव्विगंठिया वा अणंतरगंठिया परंपरगंठिया अन्नमन्नगंठिया अन्नमन्नगुरुयत्ताए अन्नमन्नभारियत्ताए अन्नमन्नगुरुयसंभारियत्ताए अन्नमन्नघडत्ताए चिट्ठंति ।

(जालगंठिय त्ति) जालं मत्स्यबन्धनं तस्येव ग्रन्थयो यस्यां सा जालग्रन्थिका । किंस्वरूपा सा? इत्याह–(आणुपुव्विगंठिय त्ति) आनुपूर्व्या परिपाट्या ग्रथिता गुम्फिता आनुपूर्व्यग्रन्थीनामादौ विधानादन्तोचितानां च क्रमेणान्त एव करणात्, एतदेव प्रपञ्चयन्नाह–(अणंतरगंठिय त्ति) प्रथमग्रन्थीनामनन्तरस्यव्यवस्थापितैर्ग्रन्थिभिः सह ग्रथिता अनन्तरग्रथिता एवं परम्परैर्व्यवहितैः सह ग्रथिता परम्परग्रथिता किमुक्तं भवति–(अन्नमन्नगंठिय त्ति) अन्योऽन्यं परस्परेण एकेन ग्रन्थिना सहान्यो ग्रन्थिरन्येन सहान्य इत्येवं ग्रथिता अन्योऽन्यं ग्रथिता एवं च–(अन्नमन्नगुरुयत्ताए त्ति) अन्योन्येन ग्रन्थनात् गुरुकता विस्तीर्णता अन्योऽन्यगुरुकता तया (अन्नमन्नभारियत्ताए त्ति) अन्योऽन्यस्य यो भारः स विद्यते यत्र तदन्योऽन्यभारिकं तद्भावस्तत्ता तया एतस्यैव प्रत्येको-

कार्यद्रव्यस्य संयोजनेन तयोरेव प्रकर्षमभिधातुमाह-(अन्नमन्नगुरुयसंभारियत्ताए त्ति) अन्योऽन्येन गुरुकं यत्संभारिकं च तत्तथा तद्भावस्तत्ता तया-(अन्नमन्नघडत्ताए त्ति) अन्योऽन्यं घटा समुदायरचना यत्र तदन्योऽन्यघटं तद्भावस्तत्ता तया-(चिट्ठइ त्ति) आस्ते, इति । प्र० ५ श० ३ उ० ।

जालघरग-जालगृहक-न० । जालकान्विते गृहे, ज्ञा० १ श्रु० ३ अ० । जालगृहकाणि गवाक्षयुतानि गृहकाणि । रा० । जी० । दार्वादिमयजालकप्रायकुड्यं यत्र मध्यव्यवस्थितं वस्तु बहिःस्थितैर्न दृश्यते । ज्ञा० १ श्रु० २ अ० । औ० ।

जालपंजर-जालपञ्जर-न० । गवाक्षे, जालपञ्जराणि गवाक्षापरपर्यायाणि । जी० ३ प्रति० । रा० । जं० ।

जालपगट-जालप्रकट-पुं० । ज्वालासमूहे, कल्प० ३ क्षण ।

जालविंद-जालवृन्द-न० । गवाक्षसमूहे, जी० ३ प्रति० ।

जाला-ज्वाला-स्त्री० । बादरतेजस्कायभेदे, प्रज्ञा० १ पद । " जालाए त्ति वा " ज्वाला अनलसंबद्धेति । जी० ३ प्रति० । " जाला तु रंधनशिखा " । ज्ञा० १ श्रु० १६ अ० । ज्वाला अनलसंबद्धा दीपशिखेत्यन्ये । जी० १ प्रति० । ज्वालानाम अनलसंबन्धस्वरूपाणाम् । भ० १४ श० ७ उ० । ज्वालाग्निशिखा छिन्नमूला । स्था० ५ ठा० ३ उ० । ज्वालाछिन्नमूलानङ्गारप्रतिबद्धेति । आचा० १ श्रु० १ अ० ४ उ० । ज्वाला छिन्नमूला ज्वलनशिखेव । उत्त० २६ अ० । हस्तिनापुरवास्तव्यस्य पद्मोत्तरनृपतेर्जायायाम्, " हत्थिणाउरे तत्थ य पउमुत्तरो राया जाला तस्स देवी " ती० २१ कल्प । महापद्मचक्रवर्तिनो मातरि, स० । आव० । चन्द्रप्रभजिनस्य शासनदेवतायाम्, " अच्चुयसंता जाला " (३३७) तस्याः वर्णको यथा-श्रीचन्द्रप्रभस्य ज्वाला । मतान्तरेण भृकुटिर्देवी पीतवर्णा वराहका—ऋजुविशेषवाहना चतुर्भुजा खड्गमुद्गरभूषितदक्षिणकरद्वया फलकपरशुयुतवामपाणिद्वया च । प्रव० २७ द्वार ।

जालाउ-जालायुष्-पुं० । द्वीन्द्रियजीवभेदे, प्रज्ञा० १ पद । जी० ।

जालाउय-जालायुष्क-पुं० । 'जालाउ' शब्दार्थे, प्रज्ञा० १ पद ।

जालामालिणी-ज्वालामालिनी-स्त्री० । प्रभासस्थायां देवतायाम्, ती० ४५ कल्प ।

जालावंत-ज्वालावत्-त्रि० । दीप्यति, महा० ७ अ० ।

जालि-जालि-पुं० । अनुत्तरोपपातिकदशाप्रथमवर्गाध्ययनप्रतिबद्धवक्तव्यताकेऽनगारे, (अणु०)

तद्वक्तव्यता-

पदमस्स णं भंते ! अज्झयणस्स अणुत्तरोववाइयस्स समणेणं० जाव संपत्तेणं के अट्ठे पण्णत्ते ? । एवं खलु जम्बू ! तेणं कालेणं तेणं समएणं रायगिहे नयरे रिद्धत्थिमियसमिद्धिगुणसीले चेइए सेणिए राया धारिणी देवी सीहो सुमिणे 'जालिकुमारे' जहा मेहो अट्ठट्ठ तु दातो० जाव जप्पं पासाए फुडति० जाव विहरति । सामी समोसढे सेणिओ णिग्गओ जालि मद्दा मेहे तहा जालिनिम्मलो तहेव निक्खंतो जहा मेहो एक्कारस अंगाइं अहिज्जति अहिज्जतित्ता गुणरयणतवोकम्मं जहा खंदयस्स एवं० जाव खंदयस्स वत्तव्वया सो चेव वायणा आपुच्छणा थेरेहिं सद्धिं विपुले तहेव दुरूहति, नवरं सोलस वासाइं सामिण्णपरियागं पाउणित्ता काले मासे कालं किच्चा उड्ढं चंदिमसोहम्मीसाण० जाव अरणअच्चुए कप्पे नवयगेविज्जयविमाणे पत्थडे उड्ढं दुरुत्तरे ति चउवत्ता विजए विमाणे देवत्ताए उववण्णे तेणं थेरे भगवओ जालिं अणगारं कालगयं जाणित्ता परिनिव्वाणवत्तियं काउस्सग्गं करेंति करेंतित्ता पत्तचीवराइं गिण्हंति । तहेव उत्तरंति० जाव इमीसे आयरे नंरूए भंते ! भगवं गोयमे ! जाव एवं खलु देवाणुप्पियाणं अंतेवासी जालिनामं अणगारं पगतिजदए मेणीओ जालिअणगारे कालगए कहिं उववण्णे एवं खलु गोयमा ! मम अंतेवासी तहेव० जाव खंदयस्स कालगए उड्ढं चंदिम० जाव विजयविमाणे देवत्ताए उववण्णे जालिसमणं भंते ! देवस्स केवइयं कालं ठिती पण्णत्ता ? । गोयमा ! बत्तीसं सागरोवमा य ठिती पण्णत्ता । से णं भंते ! ततो देवलोगातो आउक्खएणं कहिं गच्छहिति गच्छहित्ता ? । गोयमा ! महाविदेहे वासे सिज्झिहिति । एवं खलु जंबू ! समणेणं० जाव संपत्तेणं अणुत्तरोववाइयदसाणं पढमस्स वग्गस्स पढमस्स अज्झयणस्स अयमट्ठे पण्णत्ते । अणु० १ वर्ग ।

अन्तकृद्दशाप्रथमवर्गाद्याध्ययनप्रतिबद्धवक्तव्यताकेऽनगारे च । तद्वक्तव्यता-

पढमस्स णं भंते ! अज्झयणस्स के अट्ठे पण्णत्ते ? । एवं खलु जंबू ! तेणं कालेणं तेणं समएणं बारवती नयरी तीसे जहा पढमे० जाव कण्हे वासुदेवे आहेवच्चं० जाव विहरति । तत्थ णं बारवतीए णयरीए वासुदेवो राया, धारणी देवी, वण्णओ जहा गोयमो णवरं जालिकुमारे पणासतो दातो बारसंगी सोलसवासपरियाओ सेसं जहा गोयमस० जाव सेत्तुंजे सिद्धो । अन्त० ४ वर्ग ।

जालिय-ज्वालित-त्रि० । दीपिते, आ० म० द्वि० । जी० ।

जालिया-जालिका-स्त्री० । वृन्ते, एकार्थिकानधिकृत्य (अन्त० ४ वर्ग०) जालकं, जालिका, वृन्तम्, इति । विशे० । लोहकञ्चुके च । प्रश्न० ३ आश्र० द्वार ।

जालुज्जल-ज्वालोज्ज्वल-त्रि० । प्रभोज्ज्वले, औ० ।

जालुज्जलपहसियाभिराम-ज्वालोज्ज्वलप्रहसिताभिराम-त्रि० ज्वाला एव यत् उज्ज्वलं प्रहसितमिव प्रहसितं तेनाऽभिरामो ज्वालोज्ज्वलप्रहसिताऽभिरामः । ज्वालात्मकोज्ज्वलप्रहसितेनाऽभिरमणीये, जी० ३ प्रति० ।

जाव-यावत्-त्रि० । यत्परिमाणस्य मतुप् । "अन्त्यव्यञ्जनस्य" ८।१।११। इति प्राकृतसूत्रेण तलोपः । प्रा० १ पाद । यत्परिमाणे-

साकल्ये, व्याप्तौ, वाच० । परिमाणे, मर्यादायाम्, अवधारणे च । अव्य० । आ० चू० । उत्त० । (अत्र विशेषो ' आवज्जीवा ' शब्दे द्रष्टव्यः)

जावइय–यावत्क–त्रि० । यत्परिमाणे, षो० ७ विव० । "अदधा जो अस्स आवइओ" । (आवइओ त्ति) यत्परिमाणो यावान् स एव यावत्को मुहूर्तादिपरिमाणः स तस्य तावत्कः पूजाकालो भवति । पञ्चा० ४ विव० ।

जावई–यावती–स्त्री० । गुच्छात्मके वनस्पतिभेदे, प्रज्ञा० १ पद ।

जावं च णं–यावच्च णम्–अव्य० । यावति काले, " जावं च णं ति " यावन्तं कालमित्यर्थः । भ० १ श० ७ उ० ।

जावंत–यावत्–पुं० । भगवत्याः प्रथमशतकस्य षष्ठे उद्देशे, "जावंते त्ति " यावच्छब्दोपलक्षितः षष्ठः, यावतो भदन्तावकाशान्तरात्सूर्य इत्यादिसूत्रसूचकासौ । भ० १ श० १ उ० ।

जावग–यापक–पुं० । हेतुभेदे,(स्था०)यापयति वादिनः कालयापनां करोति । यथा कश्चिदसती पक्केकरूपकेणैकैकमुद्धूलिष्यं दातव्यमिति दत्तशिक्षस्य पत्युस्तद्विक्रयार्थमुज्जयिनीप्रेषणोपायेन विद्वेषायां कालयापनां कृतवतीति यापकः । उक्तं च–" जम्मामिया य महिला जावगहेउम्मि उद्धलिआइं " ति । इह वृद्धैर्व्याख्यातम्–प्रतिवादिनं ज्ञात्वा तथा विशेषणबहुलो हेतुः कर्तव्यो यथा कालयापना भवति । ततोऽसौ नावगच्छति प्रकृतमिति स चेदृशः संभान्यते,सचेतना यावोऽपरप्रेरणे सति तिर्यग्गतियतस्वाभ्यां गतिमत्त्वात् गोशरीरवदिति । अयं हि हेतुर्विशेषणबहुलतया परस्य दुरधिगमत्वात् वादिनः कालयापनां करोति । स्वरूपमस्यानवबुध्यमानो हि परो न झटित्येवानैकान्तिकत्वादिदूषणोद्भावनाय प्रवर्तितुं शक्नोत्यतो भवत्यस्माद्वादिनः कालयापनेति । अथ वा–योऽप्रतीतिव्याप्तिकतया व्याप्तिसाधकप्रमाणान्तरसव्यपेक्षत्वान्न झटित्येव साध्ये प्रतीतिं करोति, अपि तु कालक्षेपेणेत्यसौ साध्यप्रतीतिं प्रति कालयापनाकारित्वात् यापकः, यथा क्षणिकं वस्त्विति पक्षे बौद्धस्य सत्त्वादिति हेतुर्न हि सत्त्वश्रवणादेव क्षणिकत्वं प्रत्येति परः, इत्यतो बौद्धाः सत्त्वं क्षणिकत्वेन व्याप्तमिति प्रसाधयितुमुपक्रमन्ते । तथाहि–सत्त्वं नाम अर्थक्रियाकारित्वमेव, अन्यथा–वन्ध्यासुतस्यापि सत्त्वप्रसङ्गः,अर्थक्रिया तु नित्यस्यैकरूपत्वात्, न क्रमेण नापि यौगपद्येन क्षणान्तरे अकर्तृत्वप्रसङ्गात् । इत्यतोऽर्थक्रियालक्षणं सत्त्वमक्षणिकान्निवर्तमानं क्षणिक एवावतिष्ठत इत्येवं क्रमेण साध्यसाधने कालयापनाकारित्वाद् यापकः सत्त्वलक्षणो हेतुरिति । स्था० ४ ठा० ३ उ० ।

जावंताव–यावत्तावत्–अव्य० । यावच्च तावच्च, द्वं० । बीजगणितप्रसिद्धे अव्यक्तमानानयनाय कल्प्ये प्रथमे राशौ, वाच० । स्था० । "जावंताव त्ति वा गुणकारो त्ति वा एगट्ठं" इति वचनात् । गुणकारस्तेन यत्संख्यानं तत्तथैवोच्यते-तच्च प्रत्युत्पन्नमिति लोककदम् । अथवा–यावतः कुतोऽपि तावत एव गुणकारादाद्यिकादित्यर्थः । यत्र विवक्षितं संकलनादिकमानीयते तत् यावत्तावत्संख्यानमिति । संख्यानभेदे, स्था० १० ठा० । गणितभेदे, सूत्र० २ श्रु० १ अ० ।

तत्रोदाहरणम्—

" गच्छो वाञ्छाभ्यस्तो, वाञ्छयुतो गच्छसंगुणः कार्यः ।
द्विगुणीकृतवाञ्छहृते, यदन्ति संकलितमाचार्याः ॥ १ ॥"

अत्र किल गच्छो दश १० ते च वाञ्छया यावद्विकगुणकारेणाष्टकेनाभ्यस्ता जाताऽशीतिः ८० ततो वाञ्छायुतास्ते अष्टाशीतिः ८८ पुनर्गच्छेन दशभिः संगुणिता अष्टौ शतान्यशीत्यधिकानि जातानि,८८० ततो द्विगुणीकृतेन यावद्विकगुणकारेण षोडशभिर्भागे हृते यल्लभ्यते तद्दशानां संकलितमिति ५५ । इदं च पाटीगणितं श्रूयते । स्था० १० ठा० ।

जावजीव–यावज्जीव–अव्य० । यावदिति अयं शब्दोऽवधारणे वर्तते । (आ०म०) जीवनं जीवः, इति क्रियाशब्दः । आ०म०द्वि० । यावज्जीवो जीवनं प्राणधारणं यावज्जीवम् । "यावदवधारणे"॥५॥ १।३।। इति(पाणि०)अव्ययीभावसमासः। आ०म०द्वि० । पा० । यावत् प्राणधारणमित्यर्थे, स्था०३ ठा०१ उ० । दश० । पं०सू० । "जावज्जीवं परिसहा उवसग्गा य संखया" । "यावज्जीवं" यावत्प्राणधारणम् । आचा०१ श्रु० ७ अ०८ उ० आजन्मेत्यर्थे च । "जावज्जीवदुद्धराइं" । आजन्माप्यनुद्धारणीयानि । प्रश्न० २ आश्र० द्वार । "जावज्जीवं पि इमं, वज्जइ एयम्मि लोयम्मि (२२)" यावज्जीवम् आजन्म । पञ्चा० १० विव० । " जावज्जीवं बंभव्वयाय कारिंति " । प्रश्न० ३ आश्र० द्वार ।

जावजीवा–स्त्री०यावज्जीव–अव्य० । (जावज्जीवाए त्ति) प्राकृतत्वात् । जीवनं जीवः प्राणधारणं यावज्जीवो यावज्जीवनं यावदित्यनेनाऽव्ययीभावसमासः। ततश्च यावज्जीवम् प्राणधारणं यावत् इत्यर्थे, पा० । "जावज्जीवाए अणिस्सिओ" यावज्जीवं प्राणधारणं यावत् । पा० । आ० म० । " करेमि भंते ! सामाइयं सव्वं सावज्जं जोगं पच्चक्खामि जावज्जीवाए " यावच्छब्दः परिमाणमर्यादावधारणवचनः । तत्र परिमाणे–यावन्मम जीवनपरिमाणं तावत्प्रत्याख्यामीति । मर्यादायाम्–यावज्जीवनमिति प्राणधारणं मर्यादीकृत्य, अवधारणे–यावज्जीवनमेव प्रत्याख्यामि; न तस्मात् परत इत्यर्थः । जीवनं जीवित्वयं क्रियाशब्दः परिगृह्यते तया । अथवा-प्रत्याख्यानक्रिया परिगृह्यते यावज्जीवो यस्यां सा यावज्जीवा । आ० म० द्वि० ।

यावच्छब्दार्थमाह–

जावदयं परिमाणे, मज्जायाए ऽवधारणे चेइ ।
तावज्जीवं जीवण–परिमाणं जत्तियम्मि त्ति ॥३५१६॥
जावज्जीवमिहाऽऽरेण, मरणमज्जायओ न तं कालं ।
अवधारणे वि जाव–ज्जीवणमेवेह न उ परओ ॥३५१७॥

इह 'यावत्' अयं शब्दश्चतुर्ष्वर्थेषु वर्तते, तद्यथा–परिमाणे,मर्यादायाम्,अवधारणे च इति । तत्र परिमाणार्थं तावदाह–(जावज्जीवमिति) किमुक्तं भवति ?–यावन्मे जीवनपरिमाणमिहभवागुणकस्य परिमाणं तावन्तं कालं प्रत्याचष्टे इति । मर्यादार्थमाह–"जावज्जीवं" इत्यादि । अत्र यावज्जीवमिति । किमुक्तं भवति ?–आरेण मरणमर्यादायाः अर्वाक् प्रत्याचष्टे, न पुनस्तत्कालं प्रत्याख्यानग्रहणकाल एव, किं तु मरणसीमा यावत्प्रत्याख्यामीति । अवधारणेऽपि–यावद् इहजन्मनि जीवनं तावदेव प्रत्याचष्टे, न तु परतो, देवाद्यवस्थायामविरतत्वे प्रत्याख्यानभङ्गप्रसङ्गात् । परतो मुक्तलमिति । विधिरपि न कर्तव्यो, भोगाशंसादोषानुषङ्गादिति स्वयमेव द्रष्टव्यमिति।३५१६। ३५१७।

अत्राक्षेपपरिहारावाह–

जावज्जीवं पत्ते, जावज्जीवाए लिंगवच्चासो ।
भावप्पच्चयओ वा, जा जावज्जीवया ताए ॥३५१८॥

नन्वुक्तन्यायेन यावज्जीवमिति निर्देशे प्राप्ते यावज्जीवया इति निर्देशः किमर्थं भगवता सूत्रकृता विहित ?, इति शेषः। अत्र परिहारमाह-(लिंगवयणाओ त्ति) लिङ्गव्यत्ययोऽत्र भगवतोऽभिमतः, तेनेत्थं निर्देशः कृत इत्यर्थः । अथवा-यावज्जीवशब्दात् भावप्रत्ययः उत्पाद्यते, ततश्चित्थं भावप्रत्यये उत्पादिते या यावज्जीवता इति निष्पद्यते, तया यावज्जीवतया प्रत्याख्यामीति संबध्यत इति ॥३५१७॥

नन्वित्थमपि "यावज्जीवतया" इति प्राप्ते यावज्जीवया इति कथं भवतीत्याह—

जावज्जीवतया इति, जावज्जीवाए वण्णलोवाओ ।
जीवज्जीवो जीसे, जावज्जीवाहवा सा उ ॥३५१९॥

यावज्जीवतयेति निर्देशो प्राप्ते यत् यावज्जीवया इत्युक्तं तत् तकारलक्षणवर्णलोपादिति द्रष्टव्यम् । तृतीयं परिहारमाह-अथवा-जीवनं जीवो यावज्जीवो यस्यां सा यावज्जीवा इति बहुव्रीहिस्तया 'यावज्जीवया' इत्येवं द्रष्टव्यमिति ॥ ३५१९ ॥

अत्र विनेयपृच्छाम उत्तरं चाह-

का पुण सा संवज्झइ, पच्चक्खाणकिरिया तया सव्वं ।
जावज्जीवाए ऽहं, पच्चक्खामीति सावज्जं ॥३५२०॥

का पुनः पूर्वोक्तबहुव्रीहावन्यपदार्थे संबध्यत ? इत्याह-प्रत्याख्यानक्रियेयात, तया यावज्जीवया प्रत्याख्यानक्रियया सर्वं सावद्ययोगमहं 'प्रत्याख्यामि' इति संबन्ध इति ॥३५२०॥

परिहारान्तरमाह-

जीवणमहवा जीवा, जावज्जीवा पुरा व सा नेया ।
तीए पायववयणे, जावज्जीवाइ तइयं ॥३५२१॥

अथवा-जीवनं जीवा इति स्त्रीलिङ्गाऽभिधायक एवायं शब्दः साध्यते, न तु जीव इति पुँल्लिङ्गाऽभिधायकः। ततश्चैवं-यथा पुरा पूर्वं तथा अव्ययार्थाश्रयवृत्तिना यावच्छब्देन सह समासे सा यावज्जीवा ज्ञेया; तद्यथा-यावत्परिमाणा जीवा यावज्जीवा एवं मर्यादावधारणयोरपि समासः कार्यः; तया यावज्जीवया प्रत्याख्यामि; प्राकृतवचने च पर्यन्ते एकारनिर्देशेन तृतीययमवसेयेति ॥ ३५२१ ॥ विशे० ।

यावज्जीवता—स्त्री० । यावज्जीवो जीवनं प्राणधारणं यावज्जीवम् "यावदवधारणे" ॥२।१।८॥ इत्यव्ययीभावसमासः । यावज्जीवं भावो यावज्जीवता प्राकृतेऽन्त्यतकारस्यालाक्षणिको लोप इति "जावज्जीवाए" इति सिद्धम् । आ० म० द्वि० । अलाक्षणिकवर्णलोपात् ।यावज्जीवं जीवो यावज्जीवता । आप्राणोपरमादित्यर्थे, पा० ।

यावज्जीवा—स्त्री० । यावज्जीवो यस्यां सा यावज्जीवा, जीवितपरिमाणवत्यां प्रत्याख्यानादिक्रियायाम्, (आ० म०)

अधुना यावज्जीवयेति व्याख्यायते तत्रादौ भावार्थमभिधित्सुराह-

जावदवधारणम्मी, जीवणमवि पाणधारणे भणियं ।
आपाणधारणाओ, पावनिवित्ती इहं अत्थे ॥

यावदित्यस्य शब्दोऽवधारणे वर्तते । जीवनमपि प्राणधारणं भणितम्। 'जीव' प्राणधारणे इति वचनात् । ततो यावज्जीवया प्रत्याख्यामीति कोऽर्थः आप्राणधारणं यावत् पापनिवृत्तिरिति, परस्तु न विधिर्नापि प्रतिषेधः विधावाशंसादोषप्रसक्तेः प्रतिषेधे तु सुरादिदुष्टपक्षस्य ग्रहणप्रसङ्गात् । इह जीवनं जीव इति क्रियाशब्दो न जीवतीति जीव आत्मपदार्थः। जीवनं च प्राणधारणम् । आ०म०प्र० "जावज्जीवाए जाव से अट्ठो" । यावज्जीवया यावज्जीवतया वा, आजन्ममित्यर्थः । प्रश्न० ४ सम्व० द्वार । जीवनं जीवा यावत्परिमाणा जीवा जावज्जीवा । परिमाणवति मर्यादावति अवधारणवति च जीविते, विशे० ।

जावज्जीवा—यावज्जीवा—स्त्री० । 'जावज्जीवा' शब्दार्थे, विशे० ।

जावडि—जावडि—पुं० । मधुमतीनगरवास्तव्ये धनाभिख्याते श्रेष्ठिनि, (ती०)

" मधुमत्यां पुरि श्रेष्ठी, वास्तव्यो जावडिः पुरा ।
अष्टोत्तरे वर्षशते-ऽतीते श्रीविक्रमादहो ॥१॥
बहुरूप्यव्ययाद्विम्बं, जावडिः स न्यवीविशत् । ती० १ कल्प ।
(तत्कथा 'सत्तुंजय' शब्दे)

जावसिय—जावसिक—पुं० । जवसं मुद्गमाषादिरूप्यं, तेन चरन्तीति जावसिकाः । बृ० १ उ० । यासवाहिके, ओघ० ।

जास—जाष—पुं० । पिशाचभेद, प्रज्ञा० १ पद ।

यास—पुं० । यस-कर्तरि संज्ञायां घञ् । दुरालभायाम्, प्रयासे, वाच० ।

जासुमण—जपासुमनस्—पुं० । न० । जपा वनस्पतिविशेषः । तस्याः सुमनसः पुष्पाणि । जपापुष्पे, अन्त० ४ वर्ग । "जासुमणकुसुमइ वा" प्रज्ञा० १७ पद । (जासुमणकुसुमरासि त्ति) जपाकुसुमपुष्पस्य जा इति लोकप्रसिद्धस्य यो राशिः । कल्प० ३ क्षण । वृक्षविशेषे च । जपासुमनसश्च वृक्षविशेषः । ज्ञा० १ श्रु० १ अ० ।

जाहग—जाहक—पुं० । सेहके, आ० म० प्र० । तिर्यग्विशेषे, आ० म० प्र० । नं० । " स्तोकं स्तोकं पयः पीत्वा, जाहको लंडि पार्श्वतः " । आ० क० ।

जाहत्थ—याथार्थ्य—न० । यथार्थस्य भावः । सत्यत्वे, वास्तविकत्वे, वाच० । आ० म० ।

जाहे—यदा—अव्य० । यद्-दाच् । यस्मिन्काले इत्यर्थे, "जाहे णं सक्के देविंदे देवे राया" (जाहेणं ति) यदा । ज०१ श०९ व०।

जि—एव—अव्य० । " पइचादेवमेवेवदार्नी प्रत्युतेतसः पच्चइ एम्वइ जि एम्वहिं पच्चक्खिउ पत्तहे" ॥८।४।४२०॥ इति प्राकृतसूत्रेणापभ्रंशे एवस्य जिः । प्रा० ४ पाद । इण्-वन् । स्मारणार्थे, अनियोगे, अवधारणे, चानियोगे, विनिग्रहे, परिभवे, ईषदर्थे च । विशेष्यसंगतः अन्ययोगव्यवच्छेदे, विशेषणसंगतः अयोगव्यवच्छेदे, वाच० ।

जि—धा० । अभिभवे, स्वादि-अनिट् । जयति । अजैषीत् । वाच० ।

जिइंदिय—जितेन्द्रिय—पुं० । इन्द्रियविकाराजनात् । भ० २ श० १ उ० । जितानि स्वविषयप्रवृत्तिनिषेधेन इन्द्रियाणि येन स जितेन्द्रियः । सूत्र० २ श्रु० ६ अ० । जितानि वशीकृतानि इन्द्रियाणि स्पर्शनादीन्यनेनेति जितेन्द्रियः । उत्त० १२ अ० । जिताः स्वरूपोपयोगीकृताः पौद्गलिकवर्णादिष्वगमनात् इन्द्रिया येन स जितेन्द्रियः । अष्ट० ३० अष्ट० । वशेन्द्रिये, सूत्र० १ श्रु० ११ अ० । " जिइंदिओ सज्जू " आ० म० प्र० । वक्रो-

कृतस्पर्शनादीन्द्रियकषायः । दश० २ चू० । विषयेषु रागादिनिरोधे । ज्ञा० १ श्रु० १३ अ० । "आयगुत्ता जिइंदिया" जितानि वशीकृतानि इन्द्रियाणि श्रोत्रादीनि यैस्ते तथा । एवंभूताः पापकर्म नाऽनुजानन्ति इति । सूत्र० १ श्रु० ७ अ० । " जितिमंता जिइंदिया " । जितानि वशीकृतानि स्वविषयरागद्वेषविजयनेनेन्द्रियाणि यैस्ते जितेन्द्रियाः । सूत्र० १ श्रु० ७ अ० । जितेन्द्रियाः शब्दादिषु रागद्वेषरहिताः । दश० ३ अ० । औ० ।

जिइंदियकसाय–जितेन्द्रियकषाय–त्रि० । त्यक्तकरणकोपादिभावे, " विगयदुहधम्मा जिइंदियकसाया " पञ्चा० १४ विव० ।

जिघ्र (जिंघ)–जिघ्र–धा० । घ्रा–गन्धग्रहणे, भ्वा० पर० अक० । प्रदर्शमाने, सक० अनिट् । जिघ्रति । अघ्रात् । अघ्रासीत् । वाच० । " जिघ्रह " नि० चू० १ उ० ।

घ्राण–न० । घ्रायतेऽनेनेति । घ्रा–ल्युट् । नासिकायाम्, गन्धग्रहणे, वाच० । नि० चू० । (' गंध ' शब्देऽत्रैव भागे ७७५ पृष्ठे विशेषः)

जिणहगेड्डिआहरण–जिनगृहगेण्डिकादिदृष्टान्त–न० । कन्दुकगेण्डिकादिभिः क्रीडने, प्रव० ३८ द्वार । " जिणहगेड्डिआहरणं " जिनभवनस्य चतुरशीत्याशातनासु त्रिषष्टितम आशातनाभेदे, ध० २ अधि० ।

जिणीसु–जिगीषु–पुं० । जि–सन् । जयेच्छावति, रत्ना० ८ परि० ।

जिट्ठ–ज्येष्ठ–त्रि० । वृद्ध–इष्ठन्–ज्यादेशः । अतिवृद्धे, श्रेष्ठे च । अग्रजे, पुं० । (ध०)

" उचियं एयं पि सहो-अरम्मि जं निअइ अप्पसममेयं ।
जिट्ठं व कणिट्ठं पि हु, बहु मन्नइ सव्वकज्जेसु ॥ ८ ॥ "

(निअइ त्ति) पश्यति (जिट्ठं व त्ति) ज्येष्ठो भ्राता पितृतुल्य इतमिव तथा । ध० २ अधि० ।

जत्थ य जिट्ठकणिट्ठो, जाणिज्जइ जिट्ठवयणबहुमाणो ।
दिवसेण वि सो जिट्ठो, न य हीलिज्जइ स गोयमा! गच्छो ॥ ६० ॥

यत्र च गणे ज्येष्ठः, कनिष्ठश्च ज्ञायते । तत्र ज्येष्ठः पर्यायेण वृद्धः, कनिष्ठः पर्यायेण लघुः, तथा–यत्र ज्येष्ठस्य वचनमादेशाज्ज्येष्ठवचनं तस्य बहुमानः सन्मानः ज्ञायते । "जिट्ठविणयबहुमाणे त्ति" पाठे तु ज्येष्ठस्य विनयबहुमानौ ज्ञायेते । तथा–यत्र च दिवसेनापि यो ज्येष्ठः स न हील्यते चकारात् तत्र पर्यायेण लघुरपि गुणवृद्धो न हील्यते सिंहगिरिदिग्वैवज्रादिशुरिव । हे गौतम ! स गच्छो ज्ञेय इति । गौतमसूत्रः । ६० । ग० २ अधि० ।

जैष्ठ–पुं० । ज्येष्ठानक्षत्रेण युक्ता पौर्णमासी ज्येष्ठी साऽस्मिन् मासे अण् । स्वनामख्याते चान्द्रे मासे, वाच० ।

जिट्ठकप्प–ज्येष्ठकल्प–पुं० । ज्येष्ठो रत्नाधिकः स एव कल्पो वृद्धव्यवहारो ज्येष्ठकल्पः । कल्पभेदे, (कप्प०) तत्र आद्यान्तिमजिनयतीनामुपस्थापनातः प्रारभ्य दीक्षापर्यायगणना, मध्यमजिनयतीनां च निरतिचारचारित्रत्वात् दीक्षादिनात् एष, अथ पितापुत्रमातादुहितृराजामात्यश्रेष्ठवणिक्पुत्रादीनां साधूं गृहीतदीक्षाणामुपस्थापने का विधिः? उच्यते–यदि पित्रादयः पुत्रादयश्च समकमेव षड्जीवनिकाध्ययनयोगोद्वहनादिभिर्योग्यतां प्राप्तास्तदा अनुक्रमेणैवोपस्थापना, अथ स्तोकमन्तरं तदा कियद्विलम्बेनापि पित्रादीनामेव प्रथममुपस्थापना, अन्यथा पुत्रादीनां बृहत्त्वेन पित्रादीनामप्रीतिः स्यात् । अथ पुत्रादीनां सप्रहत्वेन अन्येषां निष्प्रहत्वेन महदन्तरं तदा पित्रादिरेवं प्रतिबोध्यः । भो महाभाग ! सप्रहोऽपि तव पुत्रः अन्येभ्यो बहुभ्यो ह्रस्वपर्यायेभ्यस्तव पुत्रे च ज्येष्ठे तवैव गौरवम्, एवं प्रज्ञापितः । स यदि अनुमन्यते, तदा पुत्रादिः प्रथमम् उपस्थापनीयः, नान्यथा, इति कल्प० १ क्षण ।

जिट्ठजुइ–ज्येष्ठद्युति–पुं० । काश्यपगोत्रोत्पन्ने स्वनामख्याते श्रमणे, "अउहसवरिससतेहिं, वोक्कंतेहिं जिट्ठभूइसमणस्स । कासवगोत्तस्स गणी, कप्पव्ववहारसुत्तस्स ॥१॥ " तो० १७ कल्प ।

जिट्ठयर–ज्येष्ठतर–त्रि० । अतिशयेन ज्येष्ठे, प्रा० २ पाद ।

जिट्ठा–ज्येष्ठा–स्त्री० । ज्येष्ठजनिन्याम्, वयोज्येष्ठायाम्, ज्येष्ठस्य पत्न्याम्, गङ्गायाम्, अलक्ष्म्याम्, अहिर्बुध्न्यवधिके अष्टादशे नक्षत्रे च । वाच० । जं० ।

जिण–जिन–पुं० । जयति निराकरोति रागद्वेषादिरूपानरातीनिति जिनः । स० १ सम० । औणादिको नक्प्रत्ययः । वं० । जयति रागद्वेषमोहरूपानन्तरङ्गान् रिपूनिति जिनः । ध० २ अधि० । रागद्वेषकषायेन्द्रियपरीषहोपसर्गाष्टप्रकारकर्मजेतृत्वात् जिनः । आ० म० प्र० । दश० । औ० । स्था० । पं० सं० । कर्म० । दर्श० । केवलिनि, विशे० । जिनाः सामान्यकेवलिनः प्रज्ञा० १ पद । रागद्वेषादिशत्रुजेतारो जिना भवस्थकेवलिनः पा० । चतुर्दशपूर्विणि, जिनाश्च केवलिनः चतुर्दशपूर्विणश्च । दश० ५ अ० । गच्छनिर्गतसाधुविशेषे च । आ० ३ ठा० । ऋषभादिके चतुर्विंशतिसंख्यके तीर्थकरे च । सूत्र० १ श्रु० ६ अ० । जिनकल्पिके च । "अक्खोन्नो होइ जिणचिण्णो" जिनाः श्रुतार्थमनःपर्यायकेवलज्ञानवन्तो जिनकल्पिकाश्च, तैश्चीर्णः आचरितो जिनचीर्णः । पञ्चा० ४ विव० । " जिनवरवसहस्स वरूमाणस्स " । रागादिजयाज्जिनाः अवधिमनःपर्यवोपशान्तमोहाः क्षीणमोहाः तेषां मध्ये वराः प्रधानाः सामान्यकेवलिनः संघा० । " जिणाणं जावयाणं " रागद्वेषकषायेन्द्रियपरिषहोपसर्गघातिकर्मशत्रून् जितवन्तो जिनाः । जी० ३ प्रति० । कल्प० । "अरिहा जिणे केवली" जिनो रागादिजेतृत्वात् । उवा० ७ अ० । अर्हन्, जिनः, केवली, इत्येकार्थं शब्दत्रयं चतुर्थज्ञातकभेदार्थाऽभिधायकम् । भ० २५ श० ६ उ० । आव० । "अणुत्तरं धम्ममिणं जिणाणं " (७)जिनानामृषभादितीर्थंकृताम् । सूत्र० १ श्रु० ६ अ० । " जिणदिट्ठाणं । " तीर्थंकराज्ञिमतेन । अनु० । " लोगस्सुज्जोयगरे, धम्मतित्थयरे जिणे । अरहंते कित्तइस्सं, चउवीसं पि केवली ॥१॥" रागद्वेषकषायेन्द्रियपरीषहोपसर्गाष्टप्रकारकर्मजेतृत्वाज्जिनास्तान् । आ० म० द्वि० । " बावीसइं च जिणिय-परीसहकसायचिग्घसंघाया । अजियाईया भविआ-रविंदरविणो जियंति जिणा ॥ २ ॥ " ति० । " उवसमेण हणे कोहं , माणं महवया जिणे ! " सूत्र० २ श्रु० ३ अ० । " जियकोहमाणमाया, जियलोहा ते जिणा होंति । " जितक्रोधमानमाया जितलोभा येन कारणेन जगवन्तस्तेन कारणेन ते जिनाः भवन्तीति । आ० म० द्वि० । न च रागादीनामसत्त्वं, प्रतिप्राणि अनुभवसिद्धत्वात् । न चानुभवोऽपि भ्रान्तः, सुखदुःखाद्यनुभवेष्वपि भ्रान्तिप्रसङ्गात् । एवं च जेयसंज्ञवज्जिनत्वमविरुद्धम् । ध० २ अधि० । " जिणाणं जावयाणं " जिनेभ्यो जापकेभ्यः । तत्र रागद्वेषकषायेन्द्रियपरीषहोपसर्गघातिकर्मजेतृत्वाज्जिनाः, न

ऽत्वेषामसतां क्षयः, असत्त्वादेव हि सकलव्यवहारगोचरातीतत्वेन क्षयविषयतायोग्यत्वात् । भ्रान्तिमात्रकल्पनाऽप्येषामसङ्गतैव निमित्तमन्तरेण भ्रान्तेरयोगात्, चासदेव निमित्तमतिप्रसङ्गात्, चित्तिमात्रादेव तु तदभ्युपगमेऽनुपरम इत्यनिर्मोक्षप्रसङ्गः । तथापि तदसत्त्वे अनुभवबाधा, न हि मृगतृष्णिकादावपि जलाद्यनुभवः, आत्मनोऽप्यसत्त्वमेव अविच्छेदकत्वादिसिद्धमेतत् । न चायं पुरुषमात्रनिमित्तः सर्वत्र सदाभावेऽनुपपत्तेः, नेह मृगतृष्णिकादावपि जलाद्यनुभवो चित्तिमात्रनिबन्धना रागादय इति भावनीयम् । एवं च तथा-भ्रमत्वादिसामग्रीसमुद्भूतचरणपरिणामतो रागादिजेतृत्वादिना तात्त्विकजिनादिसिद्धिः । ल० । "भद्दं जिणस्स वीरस्स" व्याख्या-भद्रं जिनस्य वीरस्य । जयति रागादिशत्रुगणमिति जिनः । औणादिको नक्प्रत्ययः । तस्य भद्रं भवतु । अनेनापातिशयमाह—'अपायो विश्लेषः' तस्यातिशयः प्रकर्षभावोऽपायातिशयो रागादिभिस्सहात्यन्तिको वियोग इत्यर्थः । ननु रागादिभिः सहात्यन्तिको वियोगोऽसंभवी प्रमाणबाधनात्, तच्च प्रमाणमिदम्-'यदनादिमत् तद्विनाशमाविशति' यथा-आकाशम्, अनादिमन्तश्च रागादय इति । किञ्च-रागादयो धर्मास्ते च धर्मिणो भिन्नाः, अभिन्ना वा ? । यदि भिन्नाः तर्हि सर्वेषामविशेषेण वीतरागत्वप्रसङ्गः, रागेभ्यो भिन्नत्वात् विवक्षितपुरुषवत् । अथ अभिन्नास्तर्हि तत्क्षये धर्मिणोऽप्यात्मनः क्षयः । तदभिन्नत्वात् तत्स्वरूपवत् । कुतस्तस्य वीतरागत्वम्, तस्यैवाभावादिति । अत्रोच्यते-इह यद्यपि रागादयो दोषा अनादिमन्तस्तथापि कस्यचित् स्त्रीशरीरादिषु यथावस्थितवस्तुतत्त्वावगमेन तेषां रागादीनां प्रतिपक्षभावनातः प्रतिक्षणमपचयो दृश्यते, ततः संभाव्यते विशिष्टकालादिसामग्रीसद्भावे भावनाप्रकर्षविशेषभावतो निर्मूलमपि क्षयः । अथ यद्यपि प्रतिपक्षभावनातः प्रतिक्षणमपचयो दृष्टः तथापि तेषामात्यन्तिकोऽपि क्षयः संभवतीति कथमवसेयम् ? । उच्यते-अन्यत्र तथा प्रतिबन्धग्रहणात् । तथाहि-शीतस्पर्शसंपाद्या रोमहर्षादयः शीतप्रतिपक्षस्य वह्निमन्दतायां मन्दा उपलब्धाः, उत्कर्षे च निरन्वयविनाशधर्माणः । ततोऽन्यापि बाधकस्य मन्दतायां बाध्यस्य मन्दतादर्शनाद्बाधकोत्कर्षः । अवश्यं बाध्यस्य निरन्वयो विनाशो वेदितव्यः । अन्यथा-बाधकमन्दतायां मन्दतापि न स्यात् । अथास्ति ज्ञानस्य ज्ञानावरणीयं कर्म बाधकं ज्ञानावरणीयकर्ममन्दतायां च ज्ञानस्यापि मनाक् मन्दता । अथ च-प्रबलज्ञानावरणीयकर्मोदयेऽपि ज्ञानस्य निरन्वयो विनाशः । एवं प्रतिपक्षभावनोत्कर्षेऽपि न रागादीनामत्यन्तोच्छेदो भविष्यतीति । तदयुक्तम्-द्विविधं हि बाध्यम्-सहभूतस्वभावभूतम्, सहकारिसंपाद्यस्वभावभूतं च । तत्र यत्सहभूतस्वभावभूतं तच्च कदाचिदपि निरन्वयविनाशमाविशति । ज्ञानं चात्मनः सहभूतस्वभावभूतम् आत्मा च परिणामी नित्यः, ततोऽत्यन्तप्रकर्षेऽपि ज्ञानावरणीयकर्मोदयेन निरन्वयविनाशो ज्ञानस्य, रागादयस्तु लोभादिकर्मविपाकोदयसंपादितसत्ताकाः ततः कर्मणो निर्मूलमपगमेऽपि निर्मूलमपगच्छन्ति, नन्वासतां कर्मसंपाद्या रागादयः । तथापि कर्मनिवृत्तौ ते निवर्तन्त इति नावश्यं नियमो, न हि दहननिवृत्तौ तत्कृता काष्ठेऽङ्गारता निवर्तते । तदसत् । यत इह किञ्चित् क्वचित् निवर्त्य विकारमापादयति । यथाऽग्निः सुवर्णे द्रवताम्, तथा हि-अग्निनिवृत्तौ तत्कृता सुवर्णे द्रवता निवर्तते । किञ्चित् पुनः क्वचिदनिवर्त्य विकारारम्भकम् । यथा-स एवाग्निः काष्ठेन सह श्यामतामात्रमपि काष्ठे दहनकृतं नाग्निवृत्तौ निवर्तते । कर्म चात्मनि निवर्त्य विकारारम्भकम्, यदि पुनरनिवर्त्य विकारारम्भकं भवेत्तर्हि यदपि तदपि कर्मणा कृतं न कर्मनिवृत्तौ निवर्तेत । यथाऽग्निना श्यामतामात्रमपि काष्ठे कृतम् अग्निनिवृत्तौ, ततश्च यदेकदा कर्मणापादितं मनुष्यत्वममरत्वं कृमिकीटत्वमभव्यत्वं शिरोवेदनादि तत्सर्वकालं तथैवावतिष्ठेत । न चैतत् दृश्यते । तस्मान्निवर्त्य विकारारम्भकं कर्म, ततः कर्मनिवृत्तौ रागादीनामपि निवृत्तिः । अथाहुर्बौद्धास्त्याः-नैते रागादयो लोभादिकर्मविपाकोदयनिबन्धनाः, किं तु कफादिप्रकृतिहेतुकाः । तथाहि-कफहेतुको रागः, पित्तहेतुको द्वेषः, वातहेतुकश्च मोहः। कफादयश्च सदैव संनिहिताः शरीरस्य तदात्मकत्वात् ततो न वीतरागत्वसंभवः। तदयुक्तम् । रागादीनां कफादिहेतुकत्वायोगात् । तथाहि-स तद्धेतुको योऽयं न व्यभिचरति, यथाधूमोऽग्निम् । अन्यथा-प्रतिनियतकार्यकरणाभावव्यवस्थानुपपत्तेः। न च रागादयः कफादीन् व्यभिचरन्ति, व्यभिचारदर्शनात् । तथाहि-वातप्रकृतेरपि दृश्यते रागद्वेषौ, कफप्रकृतेरपि द्वेषमोहौ, पित्तप्रकृतेरपि मोहरागौ । ततः कथं रागादयः कफादिहेतुकाः । अथ मन्येथाः-एकैकाऽपि प्रकृतिः सर्वेषामपि दोषाणां पृथक् पृथक् जनिका तेनायमदोष इति । तदयुक्तम्-एवं सति सर्वेषामपि जन्तूनां समरागादिदोषप्रसक्तेः अवश्यं हि प्राणिनामेकतमया कदाचित् प्रकृत्या भवितव्यम् । सा चाविशेषेण रागादिदोषेण रागादिदोषाणामुत्पादिकेति, सर्वेषामपि समानरागादितापत्तिः । अथास्ति प्रतिप्राणि पृथक् पृथगवान्तरः कफादीनां परिणतिविशेषः, तेन न सर्वेषां समरागादितापत्तिप्रसङ्गः । तदपि न साधीयः । विकल्पयुगलानतिक्रमात् । तथाहि-सोऽप्यवान्तरः कफादीनां परिणतिविशेषः, सर्वेषामपि रागादीनामुत्पादकः, आहोस्विदेकतमस्यैव कस्यचित् । तत्र यद्याद्यः पक्षस्तर्हि-यावत् स परिणतिविशेषस्तावदेककालं सर्वेषामपि रागादीनामुत्पादप्रसङ्गः । न चैककालमुत्पाद्यमाना रागादयः सेव्यन्ते क्रमेण तेषां वेदनाच्च खलु रागाध्यवसायकाले द्वेषाध्यवसायो मोहाध्यवसायो वा संवेद्यते । अथ द्वितीयः पक्षः-तत्रापि यावत्स कफादिपरिणतिविशेषस्तावदेक एव कश्चिद्रागादिदोषः प्राप्नोति । अथ च-तदवस्थ एव कफादिपरिणतिविशेषे सर्वेऽपि दोषाः क्रमेण परावृत्त्योपजायमाना उपलभ्यन्ते । अथादृश्यमान एव केवलकार्यविशेषदर्शनोत्तीयमानसत्ताकस्तदा तदा तत्तद्रागादिदोषहेतुः कफादिपरिणतिविशेषो जायते । तेन पूर्वोक्तदोषावकाशः । ननु यदि स परिणतिविशेषः सर्वथाऽननुभूयमानस्वरूपोऽपि परिकल्प्यते, तर्हि कर्मैव किं नाभ्युपगम्यते । एवं हि लोकशास्त्रमार्गोऽप्याराधितो भवति । अपि च-स कफादिपरिणतिविशेषः कुतः तदा तदा अन्यान्यरूपेणोपजायते इति वक्तव्यं देहादिति चेत्, ननु तदवस्थेऽपि देहे भवद्भिः कार्यविशेषदर्शनतः तस्यान्यथाभवनमिष्यते । तत्कथम् ? तद्धेतुनिमित्तं न हि यदविशेषेऽपि तद्भिक्रियते स विकारस्तद्धेतुक इति वक्तुं शक्यम् । नान्यन्यो हेतुरुपलभ्यते, तस्मात्तदप्यन्यथानवनं कर्महेतुकमेवेष्टव्यम् । तथा च सति-कर्मैवैकमभ्युपगम्यताम् किमन्तर्गडुना ?, तद्धेतुतया कफादिपरिणतिविशेषाभ्युपगमेन, किं चाभ्यासजनितप्रसरा प्राया रागादयः । तथाहि-यथा यथा रागादयः सेव्यन्ते, तथा तथा प्रवृद्धिरेव तेषामुपजायते । न प्रहाणिः । तेन समानेऽपि कफा-

दिपरिणतिविशेषे तद्वस्थेऽपि च देहे यस्येह जन्मनि परत्र वा यस्मिन् दोषोऽभ्यासः स तस्य प्राचुर्येण प्रवर्तते । शेषस्तु मन्दतया, ततोऽभ्याससंपाद्यकर्मोपचयहेतुका एव रागादयः, न कफादिहेतुकाः, इति प्रतिपत्तव्यम् । अन्यच्च-यदि कफहेतुको रागः स्यात् ततः कफवृद्धौ रागवृद्धिर्भवेत्, पित्तप्रकर्षे तापप्रकर्षवत् । न च भवति, तदुत्कर्षेऽपीमाधाधितत्वेन द्वेषस्यैव दर्शनात् । अथ पक्षान्तरं गृह्णीथाः, यदुत न कफहेतुको रागः, किं तु कफादिदोषसाम्यहेतुकः । तथाहि—कफादिदोषसाम्ये विरुद्धव्याप्त्यभावतो रागोद्भवो दृश्यते इति। तदपि न समीचीनं व्यभिचारदर्शनात्, न हि यावत्कफादिदोषसाम्यं तावत्सर्वदैव रागोद्भवोऽनुभूयते, द्वेषाद्युद्भवस्यानुभवात् । न च यद्भावेऽपि यन्न भवति तत्तद्धेतुकं स चेतसा वक्तुं शक्यम् । अपि च-एवमभ्युपगमे ये विषमदोषाः ते रागिणो न प्राप्नुवन्ति । अथ च-तेऽपि रागिणो दृश्यन्ते। स्यादेतत् अल्पं वैस्तर्यात्। तत्त्वं निर्वक्ष्मि-शुक्रोपचयहेतुको रागो नान्यहेतुक इति । तदपि न युक्तमेवं ह्यत्यन्तस्त्रीसेवापरतया शुक्रक्षयतः क्रूरकृतज्ञानां रागिता न स्यात् । अथवैतेऽपि तस्यामवस्थायां निकामं रागिणो दृश्यन्ते । किं च-यदि शुक्रस्य रागहेतुता, तर्हि तस्य सर्वेष्वपि साधारणत्वात् । नैकस्यैवनियतो रागः कस्यापि भवेत्, दृश्यते च कस्याप्येकस्यांनियतो रागः । अथोच्येत-रूपस्यापि कारणगतत्वेनोपातिशयलुब्धः तस्यामेव रूपवत्यामभिरज्यते । न योषिदन्तरे । उक्तं च-" रूपातिशयपाशेन, विवशीकृतमानसाः । त्यक्त्वा योषितं परित्यज्य, रमन्ते योषिदन्तरे ॥ १ ॥ " तदपि न मनोरमम् । रूपरहितायामपि क्वापि रागदर्शनात् । अथ तत्रोपचारविशेषः समीक्षितो भविष्यति, तेन तत्राभिरज्यते उपचारोऽपि च रागहेतुर्न रूपमेव केवलम् । तेनायमदोष इति । तदपि व्यभिचारित्वेनापि विमुक्तायां कस्मिंश्चिद्रागदर्शनात् तस्मादभ्यासजनितोपचयपरिपाकं कर्मैव विचित्रस्वभावतया तदा तदा तत्तत्कारणापेक्षं तत्र तत्र रागादिहेतुरिति । कर्महेतुका रागादयः । एतेन यदपि कश्चिदाह-पृथिव्यादिभूतानां धर्मा एते रागादयः । तथाहि-पृथिव्यम्बुभूयस्त्वे रागः, तेजोवायुभूयस्त्वे द्वेषो, जलवायुभूयस्त्वे मोह इति । तदपि निराकृतमवसेयम्, व्यभिचारात् । तथाहि-यस्यामेवावस्थायां द्वेषो मोहोऽपि दृश्यते तत एतदपि यत्किंचित् । तस्मात्कर्महेतुका रागादयः । ततः कर्मनिवृत्तौ निवर्तन्ते । प्रयोगश्चात्र-ये सहकारिसंपाद्या यदुपधानादपकर्षिणः ते तदभ्यन्तवृद्धौ निरन्वयविनाशधर्माणः यथा रोमहर्षादयो वन्हिवृद्धौ भावनोपधानादपकर्षिणश्च । सहकारिकर्मसंपाद्या रागादय इति । अत्र सहकारिसंपाद्या इति विशेषणं सहजूतस्वभावबोधादिव्यवच्छेदार्थम् । यदपि प्रागुपन्यस्तं प्रमाणं 'यदनादिमत् न तद्विनाशमाविशति' । यथाकाशमिति । तदप्यप्रमाणम् । हेतोरनैकान्तिकत्वात् । प्रागभावेन व्यभिचारात् । तथाहि-प्रागभावोऽनादिमानपि विनाशमाविशति । अन्यथा कार्योत्पत्तेः भावनाधिकारो च सम्यग्दर्शनादिरत्नत्रयसम्पत्समन्वितो वेदितव्यः इतरस्य तदनुरूपानुष्ठानप्रवृत्त्यभावेन तस्य मिथ्यारूपत्वात् । आह च-" नाणी तवम्मि निरओ, चारित्ती भावणाइजोगो त्ति " सा च रागादिदोषनिदानस्वरूपाविपाकफलशोचरा यथागममेवमवसेया ।

" जं कुक्किअणुओगो, पयडविसुद्धस्स होइ जीवस्स ।
एएसि भो ! निआणं, वुहाण न य सुंदरं एयं ॥ १ ॥
रूवं पि संकिलेसो-ऽभिस्संगा पीडमाइलिंगो य ।
परमसुहपच्चणीओ, एअं पि असोहणं चेव ॥ २ ॥
विसओ य भंगुरो खलु, गुणरहिओ तह तहा रूवो ।
संपत्तिनिप्फलो के-वलं तु मूलं अणत्थाणं ॥ ३ ॥
जम्मजरामरणाई-विचित्तरूवो फलं तु संसारो ।
बहुजणनिव्वेयकरो, एसो वि तहाविहो चेव ॥ ४ ॥

अपि च-सूत्रानुसारेण ज्ञानादिषु यो नैरन्तर्येणाभ्यासस्तद्रूपाऽपि भावना वेदितव्या । तस्या अपि रागादिप्रतिपक्षत्वात् । न हि तत्त्ववृत्त्या सम्यग्ज्ञानाद्यभ्यासे व्यापृतमनस्कस्य स्त्रीशरीररामणीयकादिविषये चेतःप्रवृत्तिमातनोति । तथानुपलम्भात् । नं० । ते च जिनाः त्रिविधाः तथा च-" तओ जिणा पण्णत्ता । तं जहा-ओहिनाणजिणे, मणपज्जवनाणजिणे, केवलनाणजिणे " " तओ जिणे " इत्यादि । सुगमा, नवरं रागद्वेषमोहान् जयन्तीति जिनाः सर्वज्ञाः । उक्तं च-" रागद्वेषस्तथा मोहो, जितो येन जिनो ह्यसौ । अक्षीणज्ञानदर्शनमालत्या-दर्हन्नवानुमीयते ॥१॥" इति । तथा जिना इव ये वर्तन्ते निश्चयप्रत्यक्षज्ञानतया तेऽपि जिनाः,तत्रावधिप्रधानो जिनोऽवधिज्ञानाजिन एवमितरावपि, नवरमाद्योपचरितावितरौ निरुपचार उपचारकारणं तु प्रत्यक्षज्ञानित्वमिति । स्था० ३ ठा० ४ उ० । " वंदामि जिणवरिंदं " जयन्ति रागादिशत्रूनभिभवन्ति जिनाः । ते चतुर्विधाः । तद्यथा-श्रुतजिनाः । अवधिजिनाः । मनःपर्यायजिनाः । केवलिजिनाः । प्रज्ञा० १ पद ।

जिननिक्षेपश्चतुर्धा-

" चउह जिणा नामठव-णदव्वभावजिणभेएहिं ॥३१॥
नामजिणा जिणनामा, ठवणजिणा पुण जिणिंदपडिमाओ ।
दव्वजिणा जिणजीवा,भावजिणा समवसरणत्था ३२" ध०२०।

जिनाश्चतुर्धा-नामजिनाः, स्थापनाजिनाः, द्रव्यजिनाः, भावजिनाश्चेति । तत्र जिनानां तीर्थकृतां नामानि ऋषभाजितसंभवादीनि । नाम जिनाः । तथा-अष्टमहाप्रातिहार्यादिसमृद्धिसाक्षादनुभवन्तः । केवलिनः समुत्पन्नकेवलज्ञानाः । शिवगताश्च परमपदं प्राप्ताः । भावतः सद्भावतो जिनाः,भावजिनाः । गाथानुक्रम्याच्च अनागतपूर्त्या भावजिनाः व्याख्याताः।स्थापनाजिनाः प्रतिमाः,काञ्चनमुक्ताशैलमरकतादिभिर्निर्मिताः,द्रव्यजिनाये जिनत्वेन भाविनो भविष्यन्ति जीवाः भेणिकादय इति । प्रव०४२द्वार।

जिनानां सर्वथास्तित्वम्-

अभू जिणा अत्थि जिणा, अदुवा वि भविस्सइ ।
मुसं ते एवमाहंसु, इइ भिक्खू न चिंतए ॥ ४५ ॥

अभूवन् आसन् जिना रागादिजेतारः 'अस्ति' इति विभक्तिप्रतिरूपको निपातः । ततश्च विद्यन्ते जिनाः अस्य कर्मप्रवादपूर्वसप्तदशप्राभृतोक्ततया वस्तुतः सुधर्मस्वामिनैव जम्बूस्वामिनं प्रति प्रणीतत्वात् तत्काले च जिनसंभवात् इत्यमुक्तं विदेहादिक्षेत्रान्तराप्रेक्षया वा इति भावनीयम् । (अदुवेति) अथवा-अपिर्भिन्नक्रमः (भविस्सइ त्ति) वचनव्यत्ययाद्भविष्यन्ति जिना इत्यपि मृषा अलीकं ते जिना अस्तित्ववादिन एवमनन्तरोक्तन्यायेन (आहंसु त्ति) आहुः ब्रुवत इति भिक्षुर्न चिन्तयेत् । जिनस्य सर्वज्ञाधिक्षेपप्रतिक्षेपादिषु प्रमाणोपपन्नतया प्रतिपादनात्तद्रूपदेशमूलत्वाच्च सकलैहिकामुष्मिकव्यवहाराणामिति सूत्रार्थः । उत्त० २ अ० ।

"जिनेस्तकुर्कं जीवो वा, धर्माधर्मौ नवान्तरम् । परोक्षत्वा-स्मृता नैवं, चिन्तयेत् महतो ग्रहात् ॥१॥" आव० म० द्वि० ।

अणुवकयपराणुग्गह-परायणा जं जिणा जगप्पवरा ।
निम्मरागदोसमोहा, य ण ऽण्णहावाइणो तेणं ॥ ५० ॥

अनुपकृते परैरवर्तिते सति परानुग्रहपरायणाः धर्मोपदेशादि-ना परानुग्रहैकाः इति समासः । यत् यस्मात् कारणात् के जिनाः प्राक्निरूपितशब्दार्थाः । ते एव विशेष्यन्ते । जगत्प्रवराः चराचरश्रेष्ठा इत्यर्थः । एवंविधा अपि कदाचिद्रागादिभावात् वितथवादिनो भवन्ति ?। अत आह-जिना निरस्ता रागद्वेषमोहा यैस्ते तथाविधाः तत्राऽभिष्वङ्गलक्षणो रागः, अप्रीतिलक्षणो द्वेषः, अज्ञानलक्षणश्च मोहः । चशब्दः एतद्भावगुणसमुच्चया-र्थः । नान्यथावादिनः तेनेति, तेन कारणेन ते नान्यथावादिनः इति । उक्तं च-"रागाद्वा द्वेषाद्वा, मोहाद्वा वाक्यमुच्यते ह्यनृतम् । यस्य तु नैते दोषा-स्तस्यानृतकारणं किं स्यात् ॥ १ ॥" इति गाथार्थः । आव० ४ अ० ।

" जिनभवनं जिनबिम्बं,
जिनपूजां जिनमतं च यः कुर्यात् ।
तस्य नरामरशिवसुख-
फलानि करपल्लवस्थानि ॥ १ ॥ " प्रति० ।

जिनवर्णको यथा-

" श्रियं निवासं निखिलार्थवेदकं,
सुरेन्द्रसंसेवितमन्तरारिघम् ।
प्रमाणयुक्न्यायनयप्रदर्शकं,
नमामि जैनं जगदीश्वरं महः ॥१॥" द्रव्या० १ अध्या० ।

" पुहवु नमिसु जिणं, वंदारुजणे गयम्मि सुहाणे ।
विहिणा वंदिय देवे, नंदो इय पुणइ जिणनाहं ॥ २६ ॥
जय जय सामिय जिणवर !, केवलाकलियवस्तुपरमत्थ !
मत्थयमणिकरजासुर, ! सुरवरसयनमियकमकमल ! ॥ ३० ॥
मल्लरोगमुक्कसिग्घाह, ! गहवइदिप्पंतकंतभावलय ! ।
जयपत्तजऊणसोहिय, ! हियकर ! नी-सेससत्ताणं ॥ ३१ ॥
धन्नो हं जेण मए, अणोरपारम्मि भवसमुद्दम्मि ।
भवसयसहस्सदुल्लं, जं पहु तुह दंसणं लद्धं ।३२।"(ध०र०)

" सद्भक्तानन्दनविलोकितसर्वभावं,
निःसीमनीमभवकाननदाहदावम् ।
विद्वद्वार्चितं प्रवरचारुसुधर्मरत्न-
रत्नाकरं जिनवरं प्रयतः प्रणौमि ॥ २ ॥ " भ० र० ।

" यथास्थिताशेषपदार्थसार्थ-
प्रकाशसंधामविधिप्रवीणम् ।
जिनं जनानन्दकरं कृपाब्धिं,
नमामि नन्दासुजबोधसूरम् ॥१॥ " दशा० १ अ० ।

जिनानां स्वरूपवर्णको यथा-

" पुरवरकवाडवत्था, फलिहभुआ पुंडुदित्थणिअघोसा ।
सिरिवच्छंकियवत्था, सव्वे वि जिणा चउव्वीसं ॥१॥" अनु० ।

जयति संसारं, जि-नक् । बुद्धे, विष्णौ च । जिन्वरे, त्रि० वाचः ।

जि–जये, स्वादि-पर०सक०अनिट् " चि-जि-शु-हु-स्तु-सु-पू-धू-गां णो हुस्वश्च " । ८ । ४ । २४१ । इति प्राकृतसूत्रेणैषा-मन्ते णकारागमः हुस्वश्च । जिणइ जयइ । प्रा० ४ पाद ।

जिणंत–जयत्–त्रि० । अभिनवति, दश० ४ अ० ।

जिणंतर–जिनान्तर–न० । जिनयोरन्तर्यवधाने, " एयासि णं भं-ते ! चउव्वीसाए तित्थगराणं कइ जिणंतरा पण्णत्ता ?। गोयमा ! तेवीसं जिणंतरा पण्णत्ता । भ० ३ श० २ उ० । (विशेषतः जिनान्तराणि ' अंतर ' शब्दे प्रथमभागे ६५ पृष्ठे द्रष्टव्यानि)

जिणकप्प–जिनकल्प–पुं । जिनाः गच्छनिर्गतसाधुविशेषाः तेषां कल्पः समाचारः । प्रव० ५३ द्वार । जिनानां कल्पो जिन-कल्पः । कल्पो नीतिर्मर्यादा सामाचारी । पं० चू० । जिनाना-मिव कल्पो जिनकल्पः । उग्रविहारविशेषे, ध० ३ अधि० । अभ्युद्यतविहारे, । बृ० १ उ० ।

विषय सूची–

(१) जिनकल्पिकानाश्रित्य द्वारसंग्रहः ।
(२) प्रव्रज्याद्वारम् ' पव्वज्जा ' शब्दे ।
(३) शिक्षाद्वारम् 'सिक्खा' शब्दे । अस्य प्रकृतयोजनार्थमेव ।
(४) अनन्तरोक्तेनानियतवासेन वक्ष्यमाणविहारद्वारेण च सह निष्पत्तिद्वारम् ।
(५) निष्पत्तिद्वारे प्रतिद्वारद्वयमुपसंपदादिद्वारचतुष्टयम् ।
(६) तत्र प्रथममुपसंपद्द्वारम् । तच्च अन्योक्तिदृष्टान्तेन त्रिभिः प्रकारैश्च सह तदर्शितम् ।
(७) तत्र द्वितीयमस्थिरत्वद्वारम् । तच्चात्मपरोभयतुल-नया त्रिविधम् । ते च तुलने प्रत्येकं चतुर्विधे ।
(८) तत्र तृतीयं प्रतीच्छनाद्वारम् । तच्च सोपनयेन स्तुषा दृष्टान्तेन समन्वितम् ।
(९) तत्र चतुर्थं वाचनाद्वारम् । तच्चोपदेशस्मारणाप्रति-स्मरणानिः त्रिविधम् । वहनादिदृष्टान्तत्रयेण, नि-ष्काशनादिविधिना स्थिरीकरणाय राजदृष्टान्तेन चो-पदर्शितम् ।
(१०) विहारद्वारम् । तत्र जिनकल्पिकमाश्रित्य प्रतिद्वारक-पाणि । अन्यत्रच्छित्तिमन आदीनि षट् द्वाराणि ।
(११) तत्र द्वितीयमाचार्यादिरूपपञ्चतुलनात्मकम् ।
(१२) तत्र चतुर्थं परिकर्मद्वारम् । अस्य द्विविधत्वमस्यै-वाधिकारस्य (१६) अङ्के दृश्यम् ।
(१३) तत्र पञ्चमं तपआदिपञ्चकानां पञ्चतुलनाद्वारोप-मम् । अत्रैव प्रथमा । द्वितीया सत्त्वभावना 'सत्तभाव-णा' शब्दे । तृतीया सूत्रभावना 'सुत्तभावणा' शब्दे ।
(१४) तुलनाभावनापञ्चके चतुर्थैकत्वभावना सदृष्टान्ता ।
(१५) तुलनाभावनापञ्चके दिव्याद्युपसर्गसहनरूपा पञ्च-मी बलभावना भावबलेन शारीरबलेन च द्विविधा ।
(१६) पूर्वोक्तं परिकर्म पाणिप्रतिग्रहपरिकर्मभ्यां सबलाऽ-बलपरिकर्मभ्यामाहारोपधिभेदाभ्यां च द्विविधम्, पुनः केनाऽऽसनेन कथं भूतेषु संस्तारकेषु चोपवि-शति जिनकल्पिक इति ।
(१७) विहारद्वारगतषष्ठं वसतिद्वारम् । ऊर्ध्वाधोऽनुकूल्ये, कस्य पार्श्वे, कस्य तरोरधस्तनप्रदेशे वा जिनकल्पि-कत्वं स्वीकरणीयम् । तच्च केन विधिना । ततः द्वा-रमणम् । शेषाः किं कुर्वन्ति । क्रामणायां के गुणाः । जिनपदस्थापितसूरेरनुशिष्टिं साधूनामनुशिष्टिं प्र-दाय किं करोतीत्यादि प्रतिपादितम् ।
(१८) सामाचारीद्वारम् । आवश्यकयादिपञ्चसामाचार्यो जि-नकल्पिकः प्रत्युक्ते अन्याः न । आदेशान्तरमप्यत्रैवोक्तम् ।

(१९) श्रुतादिकानां वक्ष्यमाणसामाचारीणां सप्तविंशति-द्वारसंग्रहगाथा ।
(२०) श्रुतादिसप्तविंशतिद्वारेषु सप्तविंशं मासकल्पद्वारम् ।
(२१) जिनकल्पो यद्यूर्वाह्णे भ्रमतीति विस्तरः ।
(२२) दंष्ट्राद्वारादयोग्यतायां भाविकविचारः ।
(२३) कल्पशब्दार्थः, वीथ्यां भ्रमतस्तद्रूकं पुतिकं भवति ।
(२४) त्रिषु दिवसेषु पुतिकं न कल्पते । किंतु सप्तमे दिवसे कल्पत इति, सप्तमदिवसे पर्यटतः भाविकापृच्छा ।
(२५) द्वितीयाऽऽदेश यादेशान्तरम् ।
(२६) जिनकल्पिकाः कल्पकाले मारणान्तिके च चिकित्सां न कारयन्ति । अग्निमप्यपि नापनयन्ति । के तत्र प्रविशन्ति । के च निर्गच्छन्ति । प्रत्येकमेकैकपात्रद्वंद्वधारिणः सप्रावरणाश्च भवन्तीत्यादि ।
(२७) जिनकल्पिकयोर्मध्ये कतरो महर्द्धिकः स चक्रवर्त्यादि-दृष्टान्तेन अर्थोपनयेन च समन्वितः ।
(२८) सोपनयेन महिलाद्वयदृष्टान्तेन गोवर्मद्वयदृष्टान्तेन च जिनकल्पिकत्व एवावश्यं स्थातव्यमित्युक्तम् । गच्छः जिनकल्पिकादिरत्नानामुत्पत्तिस्थानमिति गच्छस्य रत्नाकरोपमा ।
(२९) छिद्रपाण्यच्छिद्रपाणिभेदाभ्यां जिनकल्पिकस्य द्वैविध्यम् ।
(३०) जिनकल्पिका एकरूपाः पृथक्रूपा वा भवन्तीति शङ्का । एतेषामेव द्वैविध्यम् ।
(३१) जिनकल्पिकी चतुर्दशविधोपधिः स सर्वोपधिकविधो वा नेत्यादौ विकल्पाः ।
(३२) केन विधिना केन च जिनकल्पोऽभिहितः । जिनकल्पिकास्तित्वमागमे प्रतीतम् । व्यवच्छेदस्तु केन वचनेन तीर्थकरैरुक्तमिति च सोत्तरम् ।

(१) प्रथमं जिनकल्पिकानाश्रित्य द्वारसंग्रहगाथामाह-

पव्वज्जा सिक्खा-पयमत्थग्गहणं च अनियओ वासो ।
निप्फत्ती य विहारो, सामायारी ठिई एव ॥

प्रथमं प्रव्रज्या वक्तव्या, कथमसौ जिनकल्पिकः प्रव्रजित इति । ततः शिक्षापदं, ग्रहणासेवनाविषयम् । ततो ग्रहणशिक्षयाऽधीतं, सूत्रतोऽर्थग्रहणम् । ततो नानादेशदर्शनं कुर्वतो यथाऽनियतो वासो भवति । ततः शिष्याणां निष्पत्तिः । तदनन्तरं विहारः । ततो जिनकल्पं प्रतिपन्नस्य सामाचारी । ततस्तस्यैव स्थितिः, क्षेत्रकालादिकाऽभिधातव्येति गाथासमुदायार्थः । एषां द्वाराणां क्रमशो व्याख्या । बृ० १ उ० ।

(२) (प्रव्रज्या द्वारम् ' पव्वज्जा ' शब्दे)

(३) (शिक्षाद्वारं 'सिक्खा' शब्दे) अथ तत्प्रकृतयोजनां कुर्वन्नाह-

जिणकप्पिएण पगयं, जिणकाले हेउ केवलीणं वा ।
सो जणइ एव भणितो, कत्थ अहीयं भयंतेहिं ॥

अत्र जिनकल्पिकेन प्रकृतं स तु जिनकल्पिको नियमाज्जिनस्य तीर्थकरस्य काले वा स्यात्, अपरेषां वा गणधरादीनां केवलिनां काले ? ततः स शिष्यः एवं हेतुदृष्टान्तैर्भणितः प्रज्ञापितो जानाति । भगवन् ! यद्येवं ततः पठाम्यहं, परमाचक्ष्वनां पूज्याः कुत्र प्रदत्तैर्भवद्भिरधीतं, यस्मादसौ शिष्यो जिनकल्पिको भविष्यति । स च जिनकाले वा भवेत् केवलिकाले वा ?

अतः स आचार्यः प्रतिब्रूयात्-

अंतरमणंतरे वा, इति उदिए धूलिनायमाहंसु ।
चिक्खल्लेण य नायं, तम्हा दुवयामि जिणमूलं ॥

अन्तरं परकेण मया अधीतम् । अनन्तरं वा । तत्र यदि स आचार्यो गणधरशिष्यस्तत्स्याद्यारादा । ततः परंपरकेणाधीतमित्यभिदध्यात् । अथासौ गणधर एव । ततोऽनन्तरं जिनसकाश एव मयाधीतमिति ब्रूयात्, इत्येवमुदिते आचार्येणाऽभिहिते स शिष्यो धूलिज्ञातं चिक्खल्लज्ञातं चाख्यातवान् । यथा-धूलिरकस्य स्थापयित्वा तत उद्धृत्यान्यत्र यत्रास्तीर्यते तत्रावश्यं किंचित्परिशटति । ततोऽन्यत्र प्रस्तीर्यमाणा भूयस्त्वरा परिशटति । यथा वा प्रासादे लिप्यमाने मनुष्यपरम्परया चिक्खल्लप्रत्यर्पणमाणो बहुपरिशटितः स्तोकमात्रावशेष एव सर्वान्तिममनुष्यस्य हस्तं प्राप्नोति ।

कैः पुनस्तत्परिशटनीत्याह—

पयपायमक्खरेहिं, मत्ताघोसेहिं वा वि परिहीणं ।
अवि य रवि-राय-हत्थी, पगास सेवा पया चेव ॥

पदैः पादैरक्षरैर्मात्रया घोषैर्वा अपिशब्दात् बिन्दुना वा परिहीनं भवति । परम्परया अधीयमानं श्रुतमिति प्रक्रमः, अपिचेत्यभ्युच्चये । भगवतः समीपे अधीयानानां कारणान्तरमप्यस्तीति । किममात्यादीनां सेवां संपादयति । यादृशानि वा महार्थानि इदंतनः पादानि, ईदृशानि किं कुत्थूनां संभवन्ति ? एवं यादृशानि महार्थानि भगवतस्तीर्थकृतो वचनानि ईदृशान्यपरेषां किं कदाचिद्भवन्ति इत्यतस्तीर्थकरोपकरणमेव ब्रजामि ।

इत्थं शिष्येणोक्ते सूरिराह--

कोट्ठाइवुच्चिणो अ-त्थि संपयं एरिसाणि मा जंप ।
अवि य तहिं वाउज्जणा, विरयाण वि कोउयाईहिं ॥

यथा कोष्ठके धान्यं प्रक्षिप्तं, तदवस्थमेव चिरमप्यवतिष्ठते । न किमपि कालान्तरेऽपि गलति, एवं येषु सूत्रार्थो निक्षिप्तः, तदवस्थमेव चिरमप्यवतिष्ठते, ते कोष्ठबुद्धयः । आदिशब्दात्पदानुसारिबुद्धयो बीजबुद्धयश्च गृह्यन्ते । तत्र ये गुरुमुखादेकसूत्रपदमनुसृत्य शेषमपि भूयस्तरपदनिकुरम्बमवगाहन्ते ते पदानुसारिबुद्धयः । ये त्वेकं बीजभूतमर्थपदमनुसृत्य शेषमित्थमेव प्रभूततरमर्थपदनिवहमवगाहन्ते ते बीजबुद्धयः । एवंविधाः कोष्ठादिबुद्धयः सांप्रतमपि सन्ति येषु सूत्रार्थो न परिशटति इति भावः । तत ईदृशानि धूलिज्ञातादीनि मा जल्प मा ब्रूहि । अपि च-तत्र भगवतः समीपे अधीयानानां चिरतानामपि साधूनामपि कौतुकादिभिर्व्याकुलना व्याकुलीकरणं भवति । सकलस्याऽपि लोकस्य कौतुकहेतुत्वात् । कौतुकं समवसरणम् । आदिग्रहणेन भगवतो धर्मदेशनाभ्रमणादिपरिग्रहः । बृ० १ उ० ।

(शिक्षाद्वारविशेषः 'सिक्खा' शब्दे) पुनः प्रकृतयोजनां कुर्वन्नाह-

तित्थयरस्स समीवे, वक्खेवो तत्थ एवमाईहिं ।
सुत्तग्गहणं ताहे, करेइ सो वारसण्हमाओ ॥

तीर्थकरस्य समीपे तत्र समवसरणे एवमादिभिः प्रकारैर्व्यवहारस्य व्याक्षेपो भवति. इत्युक्ते सति शिष्यः पाह-भगवन् !

सत्यमेवैतत् यदादिशत यूयम् । अत इहैव पठामीत्युक्त्वा सूत्रग्रहणं द्वादश वर्षाणि करोति । द्वादशभिर्वर्षैः सकलस्याऽपि सूत्रस्याध्ययनं त्वदधातीत्यर्थः । गतं शिक्षाद्वारम् । बृ० १ उ०।

(४) अनन्तरोक्तनियतवासेन वक्ष्यमाणविहारद्वारेण च सह निष्पत्तिद्वारम् ।

तत्रानन्तरोक्तेऽनियतवासद्वारे वक्ष्यमाणविहारद्वारे च संभवति । तत्रानियतवासद्वारं तावदृश्यते इत्थं तेन देशदर्शनं कुर्वता शिष्याः प्रतीच्छकाश्च सामाचार्यां सूत्रार्थग्रहणायां च निष्पादयितव्या, इत्यभ्यन्तरे यदुक्तं प्रतिद्वारगाथायाम्-" काउं सुयं दायव्वं, अविणीयाणं विवेगो य " ॥

(५) निष्पत्तिद्वारे प्रतिद्वारजूनमुपसंपदाविद्वारचतुष्टयसंग्रहगाथामाह-

उवसंपज्ज थिरत्तं, पडिच्छणा वायणोल्लउगणे य ।
घट्टणरुंचणपत्ते, वुड्ढा य तहिं गए राया ॥

प्रथमं प्रतीच्छकाः यथा तमुपसंपद्यन्ते तथा वक्तव्यम् । ततः आत्मनः प्रतीच्छकानां च यथा स्थिरत्वं तुलनया करोति । ततस्तेषां प्रतीच्छतां वाचना च यथा भवति ततः प्रसाध्यताम् । आर्द्रेक्षुगण्डदृष्टान्तो घट्टनारुञ्चनापत्रदृष्टान्ताश्च यथाभिधायन्ते वृद्धाश्च विषयं दृष्टान्तं यथा साधव आचार्यानुद्दिश्य दर्शयन्ति । (तहिं गए त्ति) यत्राचार्याः स्थितिष्ठन्ति, तत्र गतानां यथा राजदृष्टान्तः सूरिभिरुदाह्रियते, तदेतत्सर्वं वक्तव्यमिति द्वारगाथासमासार्थः ।

(६) तत्रोपसंपद्द्वारमन्योक्तिदृष्टान्तेन त्रिभिः प्रकारैश्च सह विनष्टिपुर्गाथामाह-

काहिइ अवोच्छित्तिं, सुत्तत्थाणं ति सो तदट्ठाए ।
अभिगम्मइ ऽणेगेहिं, पडिच्छएहिं विहरमाणो ॥

एष महाभागः सूत्रार्थयोरव्यवच्छित्तिं करिष्यतीति बुद्ध्या स तस्याचार्यस्तदर्थं सूत्रार्थग्रहणनिमित्तमभिगम्यते अनेकैः प्रतीच्छकैर्विहरमाणो देशदर्शनं कुर्वन्निति । आह-किमसौ द्विरिक्तमाडम्बरेण घोषयति, यथा, अहं बहुश्रुतोऽहं बहुश्रुत इति, यदेवमनेकैः प्रतीच्छकैरभिगम्यते । नैवं खलु शुद्धविवेकसुधाधाराधौतचेतसः सन्तः कदाचनापि स्वगुणविकत्थने प्रवृत्तिमातन्वते । मिथ्याभिगम्यताकृष्टबहुतमतमस्तिरस्कृतसंज्ञानलोचनप्रसराणाम् इतरजन्तूनामेव तत्र प्रवृत्तिसंभवात् । उक्तं च-"मोहस्य तदपि विलसित-मनिमानो यः परप्रणीतायाः । तत्तममोऽपि तस्मिन्, याऽऽत्मस्तुतिरात्मना क्रियते ॥१॥" यद्येवं ततः कथमिव सोऽत्र तमेव प्रसिद्धिमारोहतीत्युच्यते-

वासावज्जविहारी, जइ वि न य विकत्थए गुणे नियए ।
अत्तगुणंतो वि मुणिज्जइ, पगइ च्चिय सा गुणगणाणं ॥

वर्षावर्ज्यविहारी वर्षासु चतुरो मासानेकत्र स्थायी अन्यदा पुनरनियतविहारी इत्युक्तं भवति । स एवंविधो यद्यपि न विकत्थते निजकानात्मीयान् गुणान् । तथाप्यगुणज्ञापि स्वगुणान् कीर्तयत्यज्ञापि ज्ञाप्यते । कुत इत्याह-प्रकृतिरेव सा गुणगणानां ज्ञानादिगुणसमूहानाम् । तदुक्तम्-" अत्तगुणंतो वि हु नज्जंति, सप्पुरिसा गुणगणेहिं नियएहिं । बोद्धव्वो य मणीओ, आओ लक्खेहिं विप्पंति " ॥ १ ॥

एतदेवान्योक्तिदृष्टान्तेन दर्शयति-

जमणेहिं महुयरीहिं, सूइज्जइ अप्पणो य गंधेणं ।
पाउसकालकयंबो, जइ वि निगूढो वणनिगुंजे ॥

इह किल कदम्बवृक्षाः प्रावृषि जलधरधाराभिहताः पुष्यन्ति । ततः प्रावृट्काले यः कदम्बः स यद्यपि वननिकुञ्जे निगूढो गुप्तस्तिष्ठति । तथापि भ्रमरैर्मधुकरीभिश्च आत्मनः संबन्धिना गन्धेन च प्रसरता सूच्यते ज्ञाप्यते,यथा-अत्र कदम्बवृक्षस्तिष्ठति । एवमयमपि भ्रमरमधुरीकल्पाभिः साधुसाध्वीभिः परिमलकल्पेन च निजगुणनिकुरुम्बेन प्रसर्पता कदम्बवद्भवानाद्यावत्यन्तनिगूढोऽपि तिष्ठन् सूच्यते ।

यदि वा-

कत्थ व न जलइ अग्गी, कत्थ व चंदो न पायडो होइ ।
कत्थ वरलक्खणधरा, न पायडा होंति सप्पुरिसा ॥

कुत्र वा न ज्वलति न दीप्यतेऽग्निः कुत्र वा चन्द्रः उदयं प्राप्तः प्रकटो न भवति । कुत्र वा वराण्युत्तमानि लक्षणान्यभ्यन्तरतो ज्ञानादीनि, बाह्यतः शरीरसौन्दर्यादीनि शङ्खचक्रादीनि, वा धारयन्तीति, वरलक्षणधराः सत्पुरुषाः प्रकटा न भवन्ति ।

अत्र परोऽनुपपत्तिमुद्भावयन्नाह-

उदए न जलइ अग्गी, अब्भच्छन्नो न दीसई चंदो ।
मुक्खेसु महाभागा, विज्जा पुरिसा न जायंति ॥

उदके न ज्वलत्यग्निः । किं तु विध्यायति । अभ्रच्छन्नश्चन्द्रो न दृश्यते । मूर्खेषु मूर्खाणां पुरतो महाभागा विद्याप्रधानाः पुरुषाः विद्यापुरुषास्तेऽपि न भान्ति न शोभन्ते । ततः-" कत्थ व न जलइ अग्गी " इत्यादि नोपपद्यते । तदयुक्तम् । अभिप्रायापरिज्ञानात् । इह हि स्वविषय एवाग्निचन्द्रसत्पुरुषाणां ज्वलनादिसामर्थ्यं चिन्त्यते न त्वन्यविषये ।

कः पुनरमीषां स्वविषय इत्याह-

सुक्कंधणम्मि दिप्पइ, अग्गी मेहरहिओ सरी जाइ ।
तव्विहजाणे य निउणे, विज्जापुरिसा वि जायंति ॥

शुष्केन्धने शुष्ककाष्ठादौ दीप्यतेऽग्निः । मेघरहितः शरदादिकाले अत्रैरच्छुभ्रः शशी भाति प्रकाशते । तद्विधज्ञानं च तादृशे सद्धृदयलोके निपुणे व्याकरणप्रमाणादिशास्त्रकुशले विद्यापुरुषा अपि भान्ति शोभां लभन्ते । एष प्रयोगोऽप्यमीषां स्वविषयोऽत्र सर्वत्राप्यमी दीप्यन्ते न किञ्चिदनुपपन्नम् ।

तत्रैवापरं दृष्टान्तमाह-

कुमुअवयररसमुद्धा, किं न विबोहिंति पुंडरीयाइं ।
सूरकिरणा ससिस्स व, कुमुयाणि अपंकयरसन्ना ॥
न य अप्पगासगत्तं, चंदाइच्चाण संविसए होइ ।
इय दिप्पंति गुणड्ढा, मुक्खेसु हसिज्जमाणा वि ॥

कुमुदानामुदराणि कुमुदोदराणि तेषु रसो मकरन्दस्तस्मिन् मुग्धा अनभिज्ञास्तदानीं तेषामप्रबुद्धत्वात् । ईदृशोऽमीषां मकरन्द इति न विदन्तीत्यर्थः । एवंविधाः सूर्यकिरणा यदि अविषयत्वात् कुमुदानि न विबोधयन्ति । ततः किं स्वविषयभूतानि पुण्डरीकाणि न बोधयन्ति ? बोधयन्त्येव । शशिनो वा किरणा यद्यपङ्कजरसज्ञाः पङ्कजरसास्वादमुग्धास्ततः किं स्वविषयभूतानि कुमुदानि न बोधयन्ति । ततश्च न च नैव प्रकाशकत्वं चन्द्रादित्ययोः स्वविषये भवति । किं तु प्रकाशकत्वमेव इत्यमु-

नैव प्रकारेण गुणैर्ज्ञानादिभिराढ्याः समृद्धाः मूर्खेषु पशुप्रायेषु हस्यमाना अपि दीप्यन्ते, सदयहृदयेषु प्रकाशन्ते। उक्तमानुषङ्गिकम्।

प्रकृतमनुसन्धीयते-

सो चरणसुट्ठिअप्पा, नाणपरो सूइओ अ साहूहिं।
तवसंपया य तेसिं, पडिच्छणे चेव साहूणं॥

स इति भविष्यदाचार्यः चरणसुस्थितात्मा, तथा ज्ञानपरः सूत्रार्थपौरुषीकरणं प्रति उद्युक्तः, परां निष्ठां प्राप्तो वा दर्शनाविनाभावित्वाम् ज्ञानस्य दर्शनपर इत्यपि द्रष्टव्यम्। स च साधुभिः स्वपरिवारवर्तिभिरपरेषां साधूनां पुरतः सूचितः स्यात्, तत्तस्तेषां साधूनां तस्यान्तिके उपसत्तिर्भवति। तेन च तेषां यथाविधि प्रतीच्छना कर्तव्या, इति एष उपसंपदः प्रकार उक्तः।

अथ द्वितीयप्रकारमाह—

एहाणाइममोसरणं, परियट्टिउं सुणिंतु मो साहूं।
अट्ठेत्ति य पडिचोयण-उवसंपय-दीवणा अत्थो॥

स्नानादौ, आदिशब्दात् रथयात्रादौ समवसरणे साधुमीलनके (अट्ठेत्ति इति) व्यञ्जनतदूषितं सूत्रं परिवर्तयन्तं, साधुं कमपि श्रुत्वा सम्भ्रान्त नोदनां करोति। (अट्ठेत्ति इति) पाठे स प्राह-किमिति गीतार्थो भूत्वे-(अट्ठे इति) अर्थो न मिश्रति। इतरः प्राह-किमस्यार्थोऽप्यस्ति, यद्वा नमस्कारमादिं कृत्वा सर्वस्यापि श्रुतस्यार्थो विद्यते। स आह-यद्येवं तर्हि "अट्ठेत्ति" पदस्य कोऽर्थः। उच्यते-आर्षत्वात्, तुद्धो-नामस्थापनाद्रव्यभावभेदात्। नामस्थापने सुगमे। द्रव्यतः सचित्तादिद्रव्यैरात्मीयैः प्रात्मीयैर्वा य आत्तः स द्रव्यार्तः। क्रोधादिभिरनिभूतो भावार्तः। एवं प्रकारद्वयेनायं लोक आर्तो वर्त्तते, इत्याकूतं प्रमुदितः। स साधुश्चिन्तयति-अहो अस्य सूत्रलवस्य एतादृग्हृदयङ्गमोऽर्थः, ततो यदि सर्वस्यार्थीतस्यार्थमवबुद्धे ततः सुन्दरं भवति। इत्यभिसंधायार्थग्रहणार्थं तस्यैव पार्श्वे उपसंपदं प्रतिपद्यते। ततोऽसौ विधिना तस्यार्थदीपनं करोति, अर्थं कथयतीत्यर्थः। एष द्वितीयः प्रकारः।

अथ तृतीयमपि प्रकारमाह-

अहवा वि गुरुसमीवं, उवागए देसदंसणम्मि कए।
उवसंपय साहूणं, होअइ कयम्मि दिसाबंधे॥

अथवा-देशदर्शने कृते सति यदाऽसौ गुरूणां समीपमुपागतो भवति। तदा गुरुभिराचार्यपदे प्रतिष्ठाप्य दिग्बन्धे कृतेऽनुज्ञाते सति, विहारं कुर्वतोऽस्य पार्श्वे प्रतीच्छकसाधूनामुपसंपद्भवतीति व्याख्यातं त्रिभिः प्रकारैरुपसंपद्द्वारम्।

(७) तत्र द्वितीयमस्थिरत्वद्वारम्। तच्चात्मपरोभयतुलनया द्विविधम्। ते च तुलने प्रत्येकं चतुर्विधे-

आयपरोभयतुलणा, चउव्विहा सुत्तमाणिओ तिविया।
तिण्हट्ठा संविग्गे, इयरे चरणे-इरा नेच्छे॥

तत्रासावात्मपरोभयविषयां तुलनां करोति। सा च प्रत्येकं चतुर्विधा वक्तव्या। तथा-ये केचिद्गुणवर्जिता अगारिणः प्रव्रजन्ति। तेषामुपसम्पन्नानां चासौ सूत्रसारणां करोति, सूत्रं पाठयतीत्यर्थः। उपलक्षणं चैतत्। तेनासेवनां शिष्यमपि ग्राहयति। तथा तेषामुपरोधाद्यप्यसौ इतरां दिशं वजति। यथा यावदाचार्याणां सकाशं व्रजामः, तावद् द्रष्टाऽयमाचार्योऽमेव क्षोणध्यायस्तत्र गतानामाचार्यो ज्ञापको भवति (तिण्हट्ठा संविग्गे त्ति) ये संविग्नाः साधवस्ते त्रयाणां ज्ञानदर्शनचारित्राणामर्थायोपसंपद्यमानाः प्रत्येष्टव्याः (इयरे चरणे त्ति) इतरे पार्श्वस्थादयो यदि चरणार्थमुपसंपद्यन्ते, ततस्तेऽपि संग्राह्याः (इरा नेच्छे त्ति) इतरथा ज्ञानदर्शननिमित्तं सूत्रार्थग्रहणदर्शनप्रभावकशास्त्राध्ययनार्थमिति भावः। यदि उपसंपद्यन्ते, ततो नेच्छेत्, नोपसंपदं ग्राहयेदित्यर्थः।

अथ यदुक्तमात्मपरोभयतुलना चतुर्विधेति। तत्रात्मतुलनां तावद्भाषयति-

आहाराई दव्वे, उप्पाएउं सयं जइ समत्थो।
खेत्तउ विहारजोग्गा, खेत्ता विहरारणाईया॥
कालम्मि ओमाई, भावे अतरंतमाइपाउग्गं।
कोहाइनिग्गहं वा, जं कारणसारणा वा वि॥

इहात्मतुलना चतुर्विधा-द्रव्यतः, क्षेत्रतः, कालतो, भावतश्च। तत्र द्रव्यत एषामुपसंपन्नानां यद्यदेषणीयमाहारादीनि। स्वयमुत्पादयितुं समर्थः। आदिग्रहणाद्धुपधिशय्यापरिग्रहः। क्षेत्रतः ऋतुबद्धविहारयोग्यानि वर्षावासयोग्यानि वा क्षेत्राणि उत्पादयितुं शक्नोमि। न वा विहरिष्यन्वा तस्मात्तारणं पारनयनम्, आदिशब्दात् राजद्विष्टादितारणानि कर्तुमहं समर्थो न वेति। काले अयमदुर्भिक्षम् तत्रादिग्रहणादशिवनयादौ निर्वाहयितुं शक्नोऽस्मि न वेति?। भावे-(अतरंत त्ति) ग्लानीभूतानामादिशब्दाद्बालवृद्धादीनां वा एषां प्रायोग्यमुत्पादयितुं समर्थोऽहं नवेति?। अथवा-शकनोमि क्रोधनिग्रहं कर्तुं नवेति?। आदिग्रहणान्मानमायालोभनिग्रहपरिग्रहः। यद्वा-यत्कारणं ज्ञानादिकं निमित्तमुद्दिश्यैते, उपसंपद्यन्ते, तत्याहं सारणां कर्तुमीशो नवेति?। गतमात्मतुलनाद्वारम्।

आहारद्वारमाह—

आहाराइ-अनियओ, लंभो मो विरसमाइ-निच्चूढो।
लुक्खागम! खलु खेत्तं, अरिउद्दियाओ अवमहाओ॥
ऊणाइरित्तवासो, अकालभिक्खपुरिमड्ढओमाई।
भावे कसायनिग्गह, चोयणनयपोरुसी नियया॥

ते प्रतीच्छकाः प्रथममेवोच्यन्ते। द्रव्यत आहारादीनां लाभोऽनियतः कदाचिद्भवति, कदाचिन्नेति। योऽपि भवति सोऽपि विरसः। पुराणौदनादिरादिशब्दाद्रसस्य हिङ्गधाणसंस्कृतस्य शुष्कस्य च वल्लचणकादेर्ग्रहणं सोऽपि निगूढ लज्जिततायः। क्षेत्रत उद्ध्वामका निष्क्रान्तार्यायां गन्तव्यं, बहिर्ग्रामेषु निष्क्रान्तं यत्पर्यटनं, सा उद्ध्वामकनिष्क्रान्तार्या। तथा खलु क्षेत्राणि नाम यत्रालपो लोकः प्रदाता, सोऽपि च स्तोकमेव ददाति। तत्र विदत्तव्यम्, अनुत्तुदिताश्च प्रायो वसतयः प्राप्यन्ते। यो यदा ऋतुर्वर्त्तते तस्य तदाऽननुकूला इत्यर्थः। कालतः कदाचिन्मासकल्पस्थाने वर्षावासस्थाने वा ऊनम् अतिरिक्तं वा कालकरणे वामोऽवस्थानं भवेत्। काऽपि क्षेत्रे अकाले सूत्रपौरुष्या अर्थपौरुष्या वा वेलायां निष्क्रामाप्ये ततः सूत्रार्थहानिरपि भाविनी, कुत्रापि पूर्वाह्णेऽपि पूर्णोदरं स्वादरपूरकाहारमात्राया न्यूनं लभ्येत, आदिग्रहणात्पानकमपि न सम्पद्यते। भावे-भावतः कषायनिग्रहस्वरपुरुषनोदनायामपि कर्त्तव्यः। न

च नियतावश्यंभाविनो सूत्रार्थयोः पौरुषी, कदाचिदसाकं धर्मकथादिव्यग्रतया सूत्रार्थयोर्व्याघातोऽपि भवन्तं भवेदित्यर्थः। तदेतत्सर्वमपि बधबद्धीकर्तुमुत्साहः ततः प्रतिपद्यध्वमुपसंपदमिति।

अत्तणियपरे चेव, तुलणा उभयथिरकारणे वुत्ता।

आत्मविषया परविषया च तुलना उभयोरपि स्थिरताकारणं स्थिरीकरणार्थमेवमुक्ता। गतं स्थिरत्वद्वारम्।

(७) तत्र सप्तमं प्रतीच्छनाद्वारं तच्च सोपनयेन स्तुवाहरान्तेन सहोपवर्णितम्—

पडिवज्जंते चेव, करिंति सुण्हाए दिट्ठंतं।

"पडिवज्जंते" इत्युत्तरार्द्धे सर्वमनन्तरोक्तमर्थं यदि प्रतीच्छकाः प्रतिपद्यन्ते। तदा स्नुषया बधबद्धया दृष्टान्तमाचार्याः कुर्वन्ति। तमेवाह—

आसरहाई ओलो-यणाइभीयाऽऽउले अ पेहंती।
सकुलघरपरिचएणं, वारिज्जइ सासुरमाईहिं॥
खिसिज्जइ हम्मइ वा, नोणिज्जइ वा घरा अणायंति।
नोया पुण से दोसे, दायंति न निच्छुभंते य॥

यथा-काचिद्वधूः स्वकुलगृहस्य स्वकीयपितृगृहस्य संबन्धी यः परिचयो रमणीयवस्तुदर्शनहेवाकस्तेनाश्वरथान्। आदिग्रहणेन हस्त्यादीन्, अवलोकनं गवाक्षस्तेन आदिशब्दादपरेण वा जालकादिना भीतानाकुलांश्च जनान् प्रेक्षमाणा सती वार्यते। पुत्रि! मा भवलोकिष्ठा, इति प्रतिषिध्यते। स्वपुरादिभिः मा भूदस्याः प्रसङ्गतः परपुरुषविषयोऽप्यवलोकनहेवाक इति। यदि वारिता सती नोपरमते ततः (खिसिज्जइ त्ति) निन्द्यते-आः कुलपांसुले! किमेवं करोषीत्यादि। तथापि यदि न निवर्त्तते ततो हन्यते। केशादिनिस्ताड्यते एवमपि यदि न, ततोऽतिष्ठन्ती गृहात् निष्काश्यते। मा भूदपरासामपि गृहमहेलानामस्याः प्रसङ्गजनित एवंविध एव कुहेवाक इति कृत्वा ये तु तस्या निजकाः पितृगृहसंबन्धाः स्वजनाः (से) तस्याः दोषान् छादयन्ति कथंचिद्भुपालम्भप्रदानादिना दापयन्ति। अपि न गृहान्निष्काशयन्ति। गौरवार्हत्वात्तत्र तस्याः। एष स्नुषादृष्टान्तः।

अथार्थोपनयमाह-

परिसिज्जइ अप्पो वा, सगणे दंडो न या वि निच्छुभणं।
अम्हे पुण न सहामो, सुसुरकुलं चेव सुण्हाए॥

ते आचार्याः भणन्ति-आर्याः पितृगृहस्थानीयो युष्माकं स्वगणः, स्वसुरस्थानीया वयम्, अश्वरथावलोकनस्थानीयं प्रमादासेवनं, गवाक्षादिस्थानीयान्यपुष्टालम्बनानि, ततो युष्माकं स्वगणे स्वगच्छे प्रमादासेवनं कृतमपि सह्यते क्षम्यते। अल्पो वा दण्डः प्रायश्चित्तलक्षणः प्रमादप्रत्ययो भवतां तत्र दीयते, न च महत्यपि अपराधे गच्छात् निष्काशनं, गौरवार्हतया भवतां भवति। वयं पुनः स्वल्पमप्यपराधं भवतां न सहामः। श्वसुरकुलमिव स्नुषाया बधबद्धाः संबन्धिनमपराधमिमुक्तेः। यदि ते प्रतीच्छका भणेयुः। एवमेतद्यदादिशन्ति भगवन्तः, ततस्ते प्रतीच्छन्ति। एते च द्विधा, पार्श्वस्थादयो वा भवेयुः, संविग्ना वा। तत्र ये पार्श्वस्थादयस्ते पार्श्वस्थादिमुक्तिता वाऽपि समनोज्ञा वा अमनोज्ञा वा।

सर्वेषामप्येषां विधिमाह-

पासत्थाइमुक्किए, आलोयण होइ दिक्खपज्जाओ।
संविग्गपुराणे पुण, जप्पभिई चेव ओसन्नो॥
समणुन्नमसमणुन्ने, जप्पभिई चेव निग्गओ गच्छा।
सोहिं पडिच्छिऊणं, सामायारिं पयंती य॥

यः पार्श्वस्थादिनिरेव मुक्तितस्तस्य दीक्षाप्रभृति दीक्षादिनादारभ्य आलोचना भवति। यस्तु संविग्नमुक्तितत्वात् पूर्वं संविग्नः पश्चादवसन्नीभूतः स पुराणसंविग्न उच्यते। गाथायां प्राकृतत्वात् व्यत्यासेन पूर्वपरनिपातः। स यत्प्रभृति यद्दिनादारभ्यावसन्नः संजातस्तत्प्रभृत्येवालोचना दाप्यते॥ यस्तु संविग्नः स द्विधा—समनोज्ञः सम्भोगिकोऽसमनोज्ञः सांभोगिकः। स द्विविधोऽपि यत्प्रभृति स्वगच्छान्निर्गतस्तत एव दिनादारभ्य आलोचनां दापयितव्यः। ततः शोधिमालोचनां प्रतीच्छनीयो यद्यपच्छेदं मूलं वा प्रायश्चित्तमापन्नस्तस्य तद्दत्त्वा स्वकीयां सामाचारीमाचार्यः दर्शयन्ति।

किं कारणमिति चेदित्याह-

अवि गीयसुयहराणं, वाइज्जंताण मा हु अचियत्तं।
मेरासु य पत्तेयं-मा संखडं पुव्वकरणेणं॥

ये गीतार्थाः श्रुतधरा बहुश्रुता गणिवाचकादिशब्दाभिधेया इत्यर्थः। तेषामपि किं पुनरितरेषामित्यपिशब्दार्थः। विपरीतसामाचारीकरणेनोद्यच्छमानानां मैवं सामाचारीमन्यथाकारं कार्षीरित्यादिवचनैर्मा भूत् (अचियत्तं) अप्रीतिकं यतोऽन्योऽन्यं गच्छानां काश्चिदनीदृश्यः सामाचार्यस्ततः प्रत्येकं पृथग् पृथङ् मर्यादासु सामाचारीषु वर्त्तमानासु प्रवादतः पूर्वन्यस्तायां एव सामाचार्याः करणेन प्रतिनोदितानां मा (असंखडं) कलहो भवेदित्यस्मात्सा चक्रवालसामाचारी कथयितव्या।

आह कथं पुनरभिधीयमानेऽप्रीतिकं भवेदुच्यते-

गच्छइ वियारभूमा-इ वायओ देइ कप्पियारं से।
तम्हा उ चक्कवालं, कहिंति अणहिंडिय निसिं वा॥

अयं वाचको विचारभूम्याम्। आदिशब्दात् जलपानग्रहणादौ गच्छति, अतो ददत, कल्पितारं कमपि कल्पकं साधु (से) तस्य वाचकस्य येन सामाचारीं दर्शयति। एवमभिधीयमाने तस्य वाचकस्य महदप्रीतिकं भवति। यथाऽहो स्वगणं विमुच्य परमणमुपसंपन्ना वयमप्येवं परिचुयामहे इति, यत एवं तस्माच्चक्रवालसामाचारीं प्रतिदिनक्रियाकलापरूपां तेषां पुरत आचार्याः कथयन्ति। यथा ते कल्पिका भवन्ति, यावच्च सा तेषां प्ररूप्यते। तावत् (अणहिंडिय त्ति) ते निष्क्रामन्ति न हिण्डमाप्यन्ते, मा भूत्तेषां सामाचारीशिक्षणव्याघातः। अथ न संस्तरन्ति, ततो निशि रात्रौ ते सामाचारीं ग्राहयितव्या इति। गतं प्रतीच्छनाद्वारम्।

(८) तत्र चतुर्थं वाचनाद्वारं तच्चोपदेश-स्मारणा-प्रतिस्मारणाभिः त्रिविधम्। यष्टयादिदृष्टान्तत्रयेण, निष्काशनादित्रिधा स्थिरीकरणाय राजदृष्टान्तेन सह दर्शितम * गृहीतसामाचारीकाणां सूत्रार्थवाचनादातव्या, वाच्यमानानां च तेषां सामाचारीकरणे प्रमाद्यतां यो विधिस्तमभिधित्सुर्गाथाश्लोकमाह-

उवएसो सारणे चेव, तइया पडिसारणा।
उंदे अवट्टमाणं जं, अप्पच्चंदेण वज्जेज्जा॥

उपदेशः, स्मारणे चैव, तृतीया प्रतिस्मारणा चैव । ततः छन्दं उपदेशेऽवर्त्तमानं विनेयं गुरुरपि आत्मच्छन्देनात्माभिप्रायेण वर्त्तयेत्, परित्यजेदिति विपूर्वकस्त्यजेरकर्मकस्यार्थः । अथ विस्तरार्थस्तत्र गुरुभिस्तान्प्रति वक्तव्यमस्माकमेषा सामाचारी, यत्किञ्चिदल्पादयः प्रमादाः परिहर्त्तव्या एष उपदेशः ।

अथ स्मारणामाह-

निद्दापमायाइसुं, सइं तु खलियस्स सारणा होइ ।
नणु कहिय ते पमाया, मा सीयसु तेसु जाणंतो ॥

निद्रैव प्रमादो निद्राप्रमादः आदिशब्दादप्रत्युपेक्षितदुष्प्रत्युपेक्षितादिपरिग्रहः । तेषु सकृदेकवारं स्खलितस्य स्मारणा कर्त्तव्या भवति । यथा-भो महाभाग! नन्वेते पूर्वमेवास्माभिस्तव प्रमादाः कथिताः, ततो जानन्नपि तेषु मा सीदेस्येषा स्मारणा ।

अथ प्रतिस्मारणामाह-

फुड रुक्खं अचियत्तं, गोणो तुदिओ वमा हु पेलेज्जा ।
सज्जं अओ न जग्गह, धुव सारण तं वयं जाणिमो ॥

स्फुटं नाम, यस्तेन प्रमादः कृतः परिस्फुटं नाभिधीयते, किन्त्वन्यव्यपदेशेन भणितव्यम् । रूक्षं नाम,निर्घृण! निरङ्कार! निःस्नेह! इत्यादि,तदपि न वक्तव्यं,यतः स्फुटं रूक्षोऽभिधीयमानमप्रीतिकं भवति । अत्र च गोदृष्टान्तो यथा-गौर्बलीवर्दो महता प्रयत्नेन लक्षितो, दृढं वा वहमानः, प्रतोदेनातितोदितः सन्,दुर्दमित्वा भारं पातयति। दृढं वा भनक्ति। एवमयमपि स्फुटाक्षरं रूक्षभणित्या वा प्रेषितः, कषायितत्वादसंबद्धं कृत्वा गच्छात् निर्गच्छेत् । अत एवाह-गौरिव वाशब्दस्योपमार्थस्य च सम्बन्धादसाधुरपि तुदितः,खरपुरुषभणनप्रतोदेन व्यथितः सन्, मा हु निक्षिप्तं प्रेरयेत् । संयमभारं बलादपहस्यात्यजेत् । अत एव च सत्यस्तत्काले यदा प्रमादः कृतस्तदैव भण्यते (धुव सारणं ति) स वक्तव्यो वत्स! ध्रुवमवश्यं कर्त्तव्यं, संयमयोगेषु सीदतां सारणा । तथा च मौनीन्द्रवचनम्-"रूक्षो वा परो मा वा, विसं वा परियत्तओ । नासियव्वा हिया भासा, सपक्खगुणकारिया" तत्तस्मात् जिनाज्ञाराधनाय वयं भवन्तमेवं भणामो, न पुनर्मत्सरप्रद्वेषादिना ।

अथ "सज्जं अओ न जग्गइत्ति" पदव्याख्यानार्थमाह-

तद्दिवसं विइए वा, सीयंतो वुच्चए पुणो तइयं ।
एगो वराहो सोढो, बीयं पुण ते न विसहामो ॥

सीदन् सामाचार्यां प्रमाद्यन्, तस्मिन्नेव दिवसेऽन्यस्यां वेलायां द्वितीये वा दिवसे पुनर्भूयोऽप्युच्यते, तृतीया प्रतिस्मारणा । एक उपदेशः, द्वितीया स्मारणा , तृतीया प्रतिस्मारणेति कृत्वा कथमित्याह-एकस्तव महानपराधः सोढस्तितिक्षितोऽस्माभिर्यदि पुनर्द्वितीयं स्वल्पमप्यपराधं करिष्यसि ततो वयं ते न विषहामो, न सहिष्यामः ॥

तथा चारूढगणदृष्टान्तः क्रियते-

गोणाइ-हरणगहिओ, मुक्को य पुणो सहोढगहिओ ल ।
लद्धोलद्धगण-हारी, न मुच्चए जायमाणो वि ॥

यथा कश्चिच्चौरो गवादिहरणं कुर्वन्नारक्कैर्गृहीतस्ततो मुक्तः, मामेकवारं नाहं भूयः स्वल्पमपि चौर्यं करिष्यामीत्युक्ते, दयालुत्वादपरापराधात्तैर्मुक्तः। पुनर्द्वितीयवेलायां पूर्वोन्न्यासवशात् यदि आदेहगणहारी भवति, स्वल्पचौर्यकारीति भावः । तथापि सहोढः सलोष्ट्रो गृहीतः सन्, याचमानोऽपि मोक्षं न मुच्यते । एवं भवतोऽप्येकवारं महदपि प्रमादपदं तितिक्षितमस्माभिः। इत ऊर्द्धं तु स्तोकमपि न तितिक्षामहे। इत्यमुक्तोऽपि यदि प्रमाद्यति,तदा स लघु दाक्षं दत्वा,द्वितीयं बहुनाडहान्तं कुर्वन्ति ।

तमेवाह-

बद्दिज्जंतं वुच्चइ, इति उदिए दंसणा पुणो विइयं ।

यथा द्रुमादू रहितं सत् वध्यद्यमानं बाध्यमानमपि "बुच्चंति" देशीपदत्वादबद्धं विनष्टमिति । यावदेवं भवानप्यस्मान्निरिस्यं स्मारणादिना बहुमानोऽपि प्रमादमेव सेवितवानित्येवमुदिते कथिते सति यदि भूयः प्रमाद्यति, तदा पुनरपि दर्शना मासलघुप्रायश्चित्तरूपा कर्त्तव्या (विइयंति) एतद् द्वितीयमुदाहरणम् ।

इत्थं दक्षिणोऽपि यदि प्रमादाद्योपरमते, तदा रूक्षनादृष्टान्तो वक्तव्यः-

पासाणो संवुत्तो, अइरुचियं कुकुमं तइए ॥

"पासाणो" इत्यादि । अति अतीव रुचितं प्रियं कुङ्कुमं किं पाषाणः संवृत्तः। एवं भवानपि महता प्रयासेन प्रतिबोध्यमानः किं प्रमत्तः संवृत्त, इत्येवं तृतीयमुदाहरणं कृत्वा, तथैव मासलघु दीयते । अथ यदुक्तं प्राक् (अविणीयाण विवेगो य त्ति) तदिदानीं भाव्यते । अविनीता नाम, ये बहुशोऽपि प्रतिबोध्यमानाः प्रमाद्यन्ति । ते च छन्दे अवर्त्तमाना भण्यन्ते । तांश्च सूरय आत्मच्छन्देन वर्जयेयुः ।

कः पुनरात्मच्छन्दो येन ते परिहियन्ते । प्राग्द्वारगाथासूचितपत्रदृष्टान्तश्च उच्यते-

तेण परं निच्छुभणा, आउट्टो पुण सयं परेहिं वा ।
तंबोलपत्तनायं, नासेहिसि मज्झ अन्ने वि ॥

ततः परं वारत्रयादूर्ध्वं यदि न निवर्त्तते, तदा निष्काशना कर्त्तव्या, निर्गच्छ मदीयगच्छादिति । अथासौ स्वयं परेण वा प्रज्ञापितः सन्नावृत्तः प्रमादात्प्रतिनिवृत्तः प्रतिज्ञपति, भगवन्! क्षमस्व, मदीयमपराधनिकुरम्बं न पुनरेवं करिष्यामीति । ततो यद् द्वारगाथायां पत्रज्ञातं, सूचितं तदुपवर्ण्यते (तंबोलपत्तनायं ति) यथा तम्बोलपत्रं कुथितं सत् यदि न परित्यज्यते, ततः शेषाण्यपि पत्राणि कोथयति । एवं त्वमपि स्वयं विनष्टो, मम अन्यानपि साधून् विनाशयिष्यसीति कृत्वा निष्कासितोऽस्माभिः संप्रत्यप्रमत्तेन भवितव्यं,मासगुरु च ते प्रायश्चित्तम् ।

अथ निष्काशनस्यैव विधिमाह-

सुहमेगो निच्छुभई, एगा जणिया वि जइ न वच्चंति ।
अन्नावएस उवहिं, जग्गावण सारि कह गमणं ॥

ते पुनः प्रमाद्यन्ते,एको वा द्वावनेके वा । यद्येकस्ततः सुखेनैव निर्गच्छ मद्गच्छादित्यभिधाय निष्काश्यते । अथानेके बहवस्तत्तस्ते यदि निर्गच्छतेति भणिताः अपि, वयं बहवस्तिष्ठाम, इत्यवष्टम्भं कृत्वा न व्रजन्ति,ततः शेषसाधून् रहस्यं ज्ञापयित्वाऽन्येन केनाप्यव्यपदेशेन भिक्षेण यथा न तेषां शङ्का भवति, तथापि विहारयोग्यं कारयित्वा अन्यव्यपदेशेनैव रात्रौ चिरं जागरणं कारापणीया । यथा न प्रातः शीघ्रमुत्तिष्ठन्ति (सारिक त्ति) सारिकः शय्यातरस्तस्याग्रतो रहसि कथनीयं, यथा वयं प्रभात एवामुकं ग्रामं व्रजिष्यामि। यदि कोऽपि महता निर्बन्धेन

युष्मान् प्रभवेत्, यथा आचार्याः क्व गता इति । ततो ग्लानस्य यथावस्थिवेदनीयम् (गमणं ति) ततो गमनं कर्त्तव्यम् ।

गतेषु च यदि ते ब्रूयुः-

मुक्का मो दंडरइणो, जणंति इह तेन तेसु अहिगारो ।
सेज्जायरनिब्बंधे, कहए गया न विणयहाणी ॥

अहो सुंदरं समजनि । यद्गणव्यसनिन आचार्यात् मुक्ता वयम् । इति ये भणन्ति, न तेष्वधिकारः । ये पुनः परित्यक्ताः सन्तो गाढं परितप्यन्ते । आः कष्टम् । वञ्चिकता वयं च कारायां । निःसम्बन्धा बन्धुभिस्तैर्भगवद्भिः अतः कथमिव भविष्यामः । इति ते शय्यातर महता सम्बन्धेन पृच्छन्ति-कथय, कुत्रास्माद् विमुच्य, गताः क्रमाश्रमणाः । स प्राह—अनुकं ग्रामम् । ततस्तेन कथिते त्वरितमागतानां तेषां न विनयहानिः कर्त्तव्या । किं तु-प्राघूर्णकाभ्युत्थानं वन्दनकादिग्रहणं च कर्त्तव्यम् । ततस्ते बद्धाञ्जलिपुटाः पादपतिताश्चक्षुमुक्ता, वस्त्रप्रकाशान्यभूणि विमुञ्चन्तो विकूपयन्ति । भगवन् ! क्षमस्व स्खलितमपराधं, विलोकयतास्मान् प्रसाद मन्यरक्षा कृपा, प्रतिपद्यस्व चूयः स्वयतीच्छकतया, कुरुतानुग्रहं स्मारणादिना । 'प्रणिपातपर्यवसितप्रकोपा हि भवन्ति महात्मानः' इत ऊर्द्धं वयं प्रमादं प्रयत्नतः परिहरिष्याम इति । ततो गच्छस्थकाः साधवः सूरीन् कृताञ्जलयः प्रसादयन्ति । गुरवो ब्रुवते, आर्या अद्य मम क्षुण्णाश्च सारथिकरूपकल्पेनामून् प्रत्याचार्यकरणेन ।

एवमुक्ते साधवो भणन्ति-

को नाम सारहीणं, स होइ जो जइवाइणो दमए ।
दुट्ठे वि ह जो आसे, दमेइ तं आसियं विंति ॥

को नाम सारथिनां मध्ये स भवति, यो यतिवाजिनो विनीतानश्वान् दमयेत् न । कश्चिदसौ; असारथिरेवत्यर्थः । दुष्टानविनीतानपि योऽश्वान् दमयति, शिक्षां ग्राहयति । तमाश्चि कमश्वदमं ब्रुवते लौकिकाः ।

अपि च-

होंति हु पमायखलिया, पुव्वब्भासा य दुच्चया भंते! ।
न चिरं वञ्जंतणा य, हिया य अच्चंतियं अंते ॥

भदन्त ! परमकल्याणयोगिन्! पूर्वाभ्यासादनादिभवाभ्यासतया, दुस्त्यजानि प्रमादस्खलितानि भवन्ति । प्रायो जन्तूनां प्रमादा निद्राविकथादयः स्खलितान्यनुपयुक्तागमनभाषणादीनि । न चेयं स्मारणादिरूपा यत्नणा चिरं चिरकालं भाविनी स्वात्मीनाश्वमुपगते, ह्यमीषामप्रमादं को नाम स्मारणादिकं करिष्यतीति भावः । न चेयमापातवत् परिणामेऽपि दुस्सहा, किं तु हिता च पथ्या । आत्यन्तिकमतिशयेन अन्ते अवसाने; परिणामे इत्यर्थः ।

अथ परिणामसुन्दरं तथापातकमुपन्यस्यति, अत्रान्तरे सूरयस्तेषां प्रमादिसाधूनां नीचैरं संवेगमवगम्य तेनैव स्थिरीकर्तुं राजदृष्टान्तं कुर्वन्ति-

अच्छिरुयातुनरिंदो, आगंतुअविज्जगुलियसंसणया ।
विसहावि त्त य जणिएं-ऽजणं वेयण मुहं पच्छा ॥

" एगो राया तस्स अच्छिरुया जाया, यत्थवविज्जेहिं न सक्किं तिगिच्छिउं । अन्नो अ आगंतुओ विज्जो, आगंतुं भणइ । मम अच्छिगुलिया उ. अच्छिमूलपममणी उ. ताहि अंजिएसु अच्छीसु तिव्वयरा दुरहियासा वेयणा भवति । मुहुत्तं जइ न वि मे मारणाए संदिसाहि,तो अंजामि अच्छीणि । 'न मारेमि त्ति' अब्भुवगए । अंजिएसु अच्छीसु तिव्वतरा वेयणा जाया ताहे रन्ना जणियं, अच्छीणि मे पाडयाणि, मारेहं ते वेज्जं । तेहिं अब्भुवगंतुं न मारिओ । मुहुत्तंतरेण उवसंता वेयणा । पोराणाणि अच्छीणि जायाणि । विज्जो पूइओ" अथ गाथाक्षरार्थः-अक्षणअकुशेयो रुग् रोगस्तद्वान् कश्चित् नरेन्द्रः तस्य चागन्तुकवैद्येन गुटिकानां शलाकया स्वरूपकथना । ततो राज्ञा विषह्यमेतद् वेदनामिति भणिते,वैद्येन चक्षुषोर्गुटिकाभिरञ्जनम् । ततो वेदना । पश्चात्क्रमेण सुखं संजातम् । प्रगुणीभूते अक्षिणी । एष दृष्टान्तः अयमर्थोपनयः-यथा तस्य राज्ञस्तत्काञ्जनस्यसहमपि गुटिकाञ्जनं,क्रमेण चक्षुषोः प्रगुणीकरणात् परिणामसुन्दरं समजनि । एवं भवतामपि स्मारणादिकं, खरपुरुषत्वात् यद्यप्यापातकदुःखं, तथाऽपि परिणामसुन्दरमेव द्रष्टव्यम् । इह परत्र च सकलकल्याणपरम्पराकारणत्वादिति । (उक्तो निष्कासनविधिः)

अथ संग्रहमाह-

इय अविणीओ य विगिं-चियाणं च संगहो पुणब्भूओ ।
जे उ निसग्गविणीया, सारणया केवलं तेसिं ॥

(इय) एवमविनीतानामविवेकः परित्यागो (विगिंचियाणं च त्ति) परित्यक्तानां पुनरावृत्तानां चूयः संग्रहो विधयः । ये तु निसर्गेण स्वभावेन विनीतास्तेषां स्मारणैव केवलं कर्त्तव्या । यथेदमित्थं कर्त्तव्यमिति ।

उपसंहरन्नाह-

एवं पडिच्छगाणं, निप्फत्तिं कुणइ बारस समा उ ।

एवं देशदर्शनं कुर्वन् शिष्यः । प्रतीच्छकान् प्रतीत्य, निष्पत्तिं सूत्रार्थग्रहणादिना द्वादश समाः संवत्सराणि करोति । गता निष्पत्तिद्वारम् ।

अथ विहारद्वारं व्याख्यायते-

एसो चेव विहारो, सोसनिप्फायगंतस्स ॥

" एसो चेव " इत्यादि । एष एव विहारः शिष्यान् निष्पादयतो वेदितव्यः । इयमत्र भावना तस्य दर्शनं कृत्वा गुरुपादमूलमागतस्य गुरुभिराचार्यपदमध्यारोप्य, दिग्बन्धानुज्ञायां विहितायां नवकल्पविधिना विहरतो, यः शिष्यनिष्पादनविधिः, स एवमेव द्वादश वर्षाणि यावत् विशेषः, तुल्यवक्तव्यत्वादिति ।

(१०) विहारद्वारम् । तत्र जिनकल्पिकमाश्रित्य प्रतिद्वारकृत्यानि अव्यवच्छित्तिमनआदीनि षट् द्वाराणि ।

व्याचिख्यासुर्द्वारगाथामाह-

अव्वोच्छित्तिमणपंच-तुलण उवगरणमेव परिकम्मे ।
तवमत्तसुएगत्ते, उवसग्गमहे य बहुरुक्खे ॥

अव्यवच्छित्तिविषयं मनः प्रयुङ्क्ते । पञ्चानामाचार्याणां तुलना, स्वयोग्यताविषया भवति । उपकरणं, जिनकल्पोचितमेव गृह्णाति । परिकर्म, इन्द्रियादिजयरूपं करोति । तपःसत्त्वसूत्रैकत्वानि, उपसर्गसहश्चेति, पञ्च भावना भवन्ति । बहुरुक्ष इति, जिनकल्पं तीर्थकरादीनामभावे बहुरुक्षस्याधस्तात् प्रतिपद्यते इति द्वारगाथासमासार्थः ।

अथैनामेव विवरीषुराह-

अणुपालिओ य दीहो, परियाओ वायणा वि मे दिन्ना।
निप्फाइया य मीसा, भेओ दियप्पणो काउं ॥

तेनाचार्येण सूत्रार्थयोरव्यवच्छित्तिं कृत्वा, पर्यन्ते पूर्वापररात्रकालसमये धर्मजागरिकां जाग्रतेत्थं चिन्तनीयम्। यथा-अनुपालितो मया दीर्घः पर्यायः प्रव्रज्यारूपो, वाचनापि मया दत्ता, सुचिरेभ्यः। निष्पादिताश्च सूर्यांसः शिष्याः। तदेवं कृता तीर्थस्याव्यवच्छित्तिः। तत्करणेन विहितमात्मन ऋणमोचनम्। अतः सर्वं मेयः प्रशस्यतरं ममात्मना हितं कर्तुम्।

किं नाम हितमिति चेदुच्यते-

किं तु विहारेण ऽब्भु-ज्जएण विहरामि ऽणुत्तरगुणेणं।
आउ अब्भुज्जयमास-णेणं विहिणा अणु मरामि ॥

किंतुरिति वितर्के। अभ्युद्यतविहारेण जिनकल्पादिना, अनुत्तरगुणनानुत्तरा अनन्यसामान्या गुणा निर्मलत्वादयो यस्मिन् स तथा, तेनाहं विहरामि। (आउ त्ति) अथाहो (अब्भुज्जयमासणेणं ति) सूत्रत्वात् सूत्रस्य अभ्युद्यतमरणविशेषेण शासनोक्तेन विधिना क्षिये। अनु पश्चात् संलेखनायुत्तरकालं मरणं प्रतिपद्येऽहमिति। (वृ०)

इह चायं विधिः। यदि स्तोकमेवायुरवशिष्यते, ततः पादपोपगमनादीनामेकतरमभ्युद्यतमरणं प्रतिपद्यते। अथ प्रचुरमायुः परं जङ्घाबलपरिक्षीणः, ततो वृद्धावासमध्यास्ते, अथायुर्दीर्घं च न जङ्घाबलक्षीणस्तदाभ्युद्यतविहारं प्रतिपद्यत इति, गतमभ्युपगमद्वारम्।

(११) तत्र द्वितीयमाचार्यादिरूप-पञ्चतुलनात्मकम्।

पञ्चानामाचार्योपाध्यायप्रवर्तकस्थविरगणावच्छेदकानां तुलना भवति। यथा त्रयाणां अभ्युद्यतविहाराणां कतरं प्रतिपद्यामहे। चेत एव प्रायोऽभ्युद्यतविहारस्याधिकारिण इति कृत्वा पञ्चेति सङ्ख्यानियमः कृतः। इत्थमात्मानं तोलयित्वा यदि जिनकल्पं प्रतिपित्सुस्तदा इत्थं विधिं करोति-

गणनिक्खेवं चरिओ, गणिस्स जो व ठविओ जहिं ठाणे।

गणिन आचार्यस्य गणनिक्षेपः। इत्वरः परिमितकालापेक्षो भवति। यो वा उपाध्यायादिर्यत्र स्थाने पदे स्थापितः, स तत्पदमेकतुल्यगुणे साधावित्वरनिक्षेपेण निक्षिपति। आह-किमर्थमसावित्वरं गणादिनिक्षेपं विदधाति, न यावज्जीविकम्? उच्यते-इह च काकुकचिवरगामिता शिलीमुखेन वामलोचने पुत्रिकाया वेधनमिव दुष्करं गणाद्यनुपालनम्। अतः पश्यामस्तावदेनं [illegible] किमस्य गणादेरनुपालनं कर्तुं यथावदीशते, वा न वा। यदि नेशते। ततो मया न प्रतिपत्तव्यो जिनकल्पः। यतो जिनकल्पानुपालनादपि अश्रुतरमितरस्य यथाविधस्यानाभवे सूत्रोक्तनीत्या गणाद्यनुपालनं। बहुतरनिर्जराला भकारणत्वात्। न च बहुगुणपरित्यागेन स्वल्पगुणोपादानं विदुषां कर्तुमुचितं। सुप्रतिष्ठितकार्यारम्भकत्वात्तेषामित्यभिसंधाय, स भगवानित्वरं गणादिनिक्षेपं विदधातीति। उक्तं च पञ्चवस्तुशास्त्रे इदैव प्रक्रमे श्रीहरिभद्रपूज्यैः—

" पिच्छासु ताव एए, करिसगा होंति अस्स 'छाणस्स।
जोगाण वि पायणं, निव्वहणं दुक्करं होइ ॥
न य बहुगुणचायणं, अप्पगुणपसाहणं जह सुहाणं।
इह कार्डं कज्जकु-सलाण सुपइट्ठियारंभा " ॥ (गतं पञ्चतुलनाद्वारं)

उवहिं च अहागडयं, गेण्हइ जाव ऽन्नमुप्पाए ॥

अथोपकरणद्वारमाह-" उवहिं च " इत्यादि। यावदन्यं जिनकल्पप्रायोग्यं शुद्धैषणायुक्तं प्रमाणोपेतं चोपधिं वस्त्रादि,नोत्पादयति, तावद्यथाकृतमेव गृह्णाति। ततः स्वकल्पप्रायोग्ये उपकरणे लब्धे सति प्राक्तनमुपकरणं व्युत्सृजतीति। गतमुपकरणद्वारम्।

(१२) तत्र चतुर्थं परिकर्मद्वारम्। अस्य द्विविधत्वमस्यैवाधिकारस्य (१६) अङ्के दृष्टव्यम्।

परिकर्मेति वा भावनेति वा एकार्थे। तत आत्मानं भावनाभिः सम्यक् भावयति। आह-सर्वेऽपि साधवस्तावद्भावितान्तरात्मानो भवन्ति। अतः किं पुनर्भावयितव्यम्? उच्यते—

इंदियकसायजोगा, विनियमिया जइ वि सव्वमाहूहिं।
तह वि नयो कायव्वो, तज्जयसिद्धिं गणंतेणं ॥

यद्यपि सर्वसाधुनिरिन्द्रियकषाययोगान्, विविधैः प्रकारैर्नियमिता जितास्तथाऽपि जिनकल्पं प्रतिपत्तुकामेन पुनरेतेषां जयः कर्तव्यः। तथैहिकाऽमुष्मिकापायपरिभावनादिना इन्द्रियाणां जयस्तथा कर्तव्यो, यथेष्टानिष्टविषयेषु गोचरमुपागतेषु रागद्वेषयोरुत्पत्तिरेव न भवति। कषायाणामपि जयस्तथा कर्तव्यो, यथा-आक्रोशा दुर्वचनश्रवणादि बाह्यं कारणमवाप्यान्वितेषु तेषामुपचय एव नाविर्भवति। योगानामपि मनःप्रभृतीनां जयस्तथा यतितव्यं, यथा-तेषामार्त्तध्यानादिकं दुष्प्राणिनामिव नोदयमासादयति। अथ किमर्थमित्थमिन्द्रियकषाययोगानां जयः कर्तव्य इत्याह-तेषामिन्द्रियादीनां जयस्तज्जयेन सिद्धिर्जिनकल्पपरप्राप्तिस्तां गणयता मन्यमानेनेन्द्रियादीनां जयः करणीयः। बृ० १ उ०। (इतोऽग्रे ' भावणा ' शब्दे)

(१३) तत्र पञ्चमं तपआदिपञ्चकानां पञ्चतुलनाभावनारूपम। द्वितीया सत्वभावना ' सत्तभावणा ' शब्दे। तृतीया सूत्रभावना ' सुत्तभावणा ' शब्दे।

तावत् प्रथमां तपोभावनामाह-

तवेण सत्तेण सुत्तेण, एगत्तेण बलेण य।
तुलणा पंचहा वुत्ता, जिणकप्पं पडिवज्जओ ॥

तपसा, सत्वेन, सूत्रेण, एकत्वेन, बलेन च, एवं तुलना भावना पञ्चधा प्रोक्ता। जिनकल्पं प्रतिपद्यमानस्येति निर्युक्तिगाथासमासार्थः।

अथ विस्तरार्थमभिधित्सुराह-

जो जेण अणब्भत्थो, पोरिसिमाई तवो उ तं तिगुणं।
कुणइ छुहाविजयट्ठे, गिरिणइसमीहो य दिट्ठंतो ॥

यत्तेन पौरुष्यादिकं तपोऽनभ्यस्तं सात्मीभावसमानानीतं तत् त्रिगुणं,त्रीन् वारान् करोति। यथा-प्रथमं पौरुषीं वारत्रयाऽऽसेवनेन सात्मीभावमानीय ततः पूर्वार्द्धं तथैवाभ्यस्य सात्मीभावमानयति। एवमेकासनानिर्विकृतिकादिष्वपि द्रष्टव्यम्। किमर्थमित्याह-क्षुद्विजयार्थं यथा क्षुत्परीषहसहने सात्म्यं भवतीत्यर्थः। अथ गिरिनदीसिद्धेन दृष्टान्तः यथा-असौ गिरिनदी तरन् परतटे चिह्नं करोति। यथा शुष्कप्रदेशे वृक्षाद्युपलक्षिते मया गन्तव्यमिति संचरन् तीक्ष्णेनोदकवेगेनाक्षिप्यते। ततो व्यावृत्य भूयः प्रगुणमेवोत्तरति। यदि क्षिप्यते। ततो भूयः तथैवोत्तरति। एवं यावत् सकलामपि गिरिनदीं प्रगुणमेवोत्तरीतुं न शक्नोति, ता-

वस्तदुत्तरप्रत्याख्यानं न मुञ्चति । एवं सोऽपि यावद्वर्द्धितं तपः स्वात्मीभावं न याति, तावत्तदभ्यासं न मुञ्चति ।

एतदेवाह-

एक्केकं ताव तवं, करेइ जह तेण कीरमाणेणं ।
हाणी न होइ जइया, वि होज्ज छम्मासउवसग्गो ॥

एकैकं तपस्तावत्करोति । यथा तेन तपसा क्रियमाणेनापि विहितानुष्ठानस्य हानिर्न भवति । यद्यपि कथंचित् भवेत्षण्मासान् यावदुपसर्गो देवादिकृतोऽनेषणीयकरणादिकः, तदापि षण्मासान् यावदुपविष्ट आस्ते । न पुनरनेषणीयमाहारं गृह्णाति ।

तपस एव गुणान्तरमाह-

अप्पाहारस्स न इं-दियाइं विसएसु संपवत्तंति ।
नेव किलिस्सइ तवसा, रसेसु न सज्जए वा वि ॥

तपसा क्रियमाणेनाल्पाहारस्य सतो नेन्द्रियाणि विषयेषु स्वस्वेषु संवर्तन्ते, न च क्लाम्यति, बाधामनुभवति । तपसा नैव च रसिकेषु मधुरेषु अशनादिषु सज्जति, सङ्गं करोति । सुपरिज्ञानाभावनादरामावात् ।

अपिच-

तवभावणाइ पंचिं-दियाणि दंताणि जस्स वसमिंति ।
इंदियजोगायरिओ, समाहिकरणाइं कारणए ॥

तपोभावनया हेतुभूतया पञ्चेति संख्याकानीन्द्रियाणि दान्तानि सन्ति । यस्य वशमायत्ततामागच्छन्ति । स इन्द्रिययोग्याचार्यः, इन्द्रियगुणक्रियागुरुः समाधिकरणानि समाधिव्यापाराणि कारयतीन्द्रियाणि । यथा यथा ज्ञानादिषु समाधिरुपपद्यते, तथा तथा तानि कारयतीत्यर्थः । उक्ता तपोभावना । बृ० १ उ० ।

(१४) तुलनाभावनापञ्चके चतुर्थैकत्वभावनामाह-

जइ वि य पुव्वममत्तं, छिन्नं सानूहिं दारमाईसु ।
आयरियाइममत्तं, तहा वि संजायए पच्छा ॥

यद्यपि च-पूर्वं गृहवासकालेऽपि ममत्वं साधुभिर्दारापत्यं तेन्द्रादिप्रहरणापुत्रादिषु छिन्नमेव । तथाऽप्याचार्यादिविषयं ममत्वं पश्चात् प्रव्रज्यापर्यायकाले संजायते । तच्च कथं परिहापयितव्यम् ।

उच्यते-

दिट्ठिनिवायालावे, अ परोप्परकारियं स पडिपुच्छं ।
परिहासमिहो य कहा, पुव्वपवित्ता परिहावेइ ॥

गुर्वादिषु ये पूर्वं दृष्टिनिपाताः सस्निग्धावलोकनानि ये च तैः सहालापास्तान् । तथा परस्परोपकारितां मिथो भक्तपानदानग्रहणाद्युपकारं प्रति पृच्छन् सूत्रार्थादिप्रतिपृच्छया सहितं, परिहासं हास्यं, मिथः कथाश्च परस्परवार्ताः, पूर्वप्रवृत्ताः सर्वा अपि परिहापयति ।

तत्तश्च-

तणुईकयम्मि पुव्वं, बाहिरपेम्मे सहायमाईसु ।
आहारे उवहिम्मि य, देहे य न सज्जए पच्छा ॥

सहायः साङ्घाटिकसाधुस्तद्विषये, आदिशब्दादाचार्यादिविषये च, बाह्यप्रेम्णि पूर्वं तनुकीकृते परिहापिते सति, ततः पश्चादाहारे उपधौ, देहे च, न सज्जति, न ममत्वं करोति ।

ततः किं भवतीत्याह-

पुव्वं छिन्नममत्तो, उत्तरकालं वविज्जमाणे वि ।
सानाविएऽमरे वा, कुसइ दट्ठुं न संगइए ॥

पूर्वं छिन्नममत्वः सर्वेऽपि जीवा असकृदनन्तशो वा सर्वजन्तूनां स्वजनत्वेन शत्रुभावेन च संजाताः । अतः कोऽत्र नः स्वः को वा परः, इति भावनया त्रुटितप्रेमबन्धः, स तूत्तरकालं जिनकल्पप्रतिपत्त्यनन्तरं, व्याघ्रादिभ्यमानानपि संगतिकान् स्वजनान् स्वभाविकानितरान् वा वैक्रियशक्त्या देवादिनिर्मितान् दृष्ट्वा, न क्षुभ्यति, ध्यानात् न चलति ।

अत्र दृष्टान्तमाह-

पुप्फपुरपुप्फकेऊ, पुप्फवई देवी जुअलयं पसुवे ।
पुत्तं च पुप्फचूलं, धूअं च सनामियं तस्स ॥
सहवड्ढियाणुरागो, रायत्तं चेव पुप्फचूलस्स ।
घरजामाए दाणं, मिलए निसि केवलं तेणं ॥
पव्वज्जा य नरिंदे, अणुपव्वयणं च णेगत्ते ।
वीमंसा उवसग्गे, विगेहिँ समुहिं च कंदणया ॥

पुप्फपुरं नगरं । तत्र पुप्फकेऊ राजा । पुप्फवई देवी । सा अन्यदा, जुगलं प्रसूता । पुप्फचूलो दारको । पुप्फचूला दारिका । तावि द्वौ वि सहवड्ढियाणि । परोप्परं अईव अणुरत्ताणि । अन्यदा पुप्फचूलो राजा पव्वइओ । अणुरागेणं पुप्फचूला वि प्रव्रजिणी पव्वइया । सो य पुप्फचूलो । अन्यदा जिणकप्पं परिघाउज्जुकामो । एगत्तभावणाए अप्पाणं भावेइ । इओ य एगेणं देवेणं वीमंसणनिमित्तं पुप्फचूलाए अज्जाए कूरं विउव्वियं । तं घुट्ठा घरिसिसं पव्वत्ता । पुप्फचूलो य अणगारो तेणं ओगासेणं वोलेइ । ताहे सा पुप्फचूला अज्जा अन्नत्थ सरणं भवाहि त्ति । ताहे, सो य प्रगयं बुद्धिसंपेमबंधणो " एगोहं णत्थि मे को वि, नाहमन्नस्स कस्स वि " । इच्चाइ एगत्तभावणं भाविंतो गओ सट्ठाणं । एवं एगत्तभावणाए अप्पाणं भावेयव्वो त्ति । गाथाक्षरयोजना त्वेवम्-पुष्पपुरे,पुष्पकेतु राजा । पुष्पवती देवी,युगलं प्रसूते । वर्तमाननिर्देशस्तत्कालविवक्षया पुत्रं च पुष्पचूलं दुहितां च तस्य सनामिकां समानाभिधानां तयोश्च सह वर्द्धितयोरनुरागो । राज्यं चैव । पुष्पचूलस्य पुष्पचूलायाश्च गृहजामात्रे दानं । सा च तेन भर्त्रा समं केवलं निशि रात्रौ मिलति । प्रव्रज्या च नरेन्द्रपुष्पस्य । तदनुरागेणानुप्रव्राजनं च पुष्पचूलायाः । ततो जिनकल्पं प्रतिपित्सुरेकत्वभावनां भावयितुं प्रक्रान्तः विमर्शपरीक्षा । तदर्थं देवेनोपसर्गे क्रियमाणे विद्वैः सम्मुखीं पुष्पचूलां कृत्वा धर्षणं कर्तुमारब्धं, ततः क्रन्दनम् । आर्य ! शरणं शरणमिति ।

अत्रोपसंहारमाह-

एगत्तभावणाए, पक्कामभोगे गणे सरीरे णो ।
सज्जइ वेरग्गगओ, फासेइ अणुत्तरं करणं ॥

एकत्वभावनया भाव्यमानप्रकामभोगेषु शब्दादिषु गंधे ग-

क्वे शरीरे वा न सज्जति, न सङ्गं करोति । किं तु वैराग्यं गतः सन् स्पृशति, आराधयति । अनुत्तरं करणं प्रधानयोगसाधनं जिनकल्पपरिकर्मेति । गता एकत्वभावना ।

(१५) अथ बलभावना । तत्र बलं द्विधा-भावबलं शारीरबलं च । तत्र भावबलमाह-

भावो उ अभिस्संगो, सो उ पसत्थो व अप्पसत्थो वा ।
नेहगुणओ उ रागो, अपसत्थप्पसत्थओ चेव ॥

भावो नाम अभिष्वङ्गः । स तु द्विधा—अप्रशस्तः प्रशस्तश्च । तत्रापत्यकलत्रादिषु स्नेहजनितो रागः, सोऽप्रशस्तः । यः पुनराचार्योपाध्यायादिषु गुणबहुमानप्रत्ययो रागः प्रशस्तः । तस्य द्विविधस्यापि भावस्य येन मानसावष्टम्भेनासौ व्युत्सर्गं करोति, तद्भावबलं मन्तव्यम् । शारीरमपि बलम्-शैलघनापेक्षया जिनकल्पादेस्यातिशायिकमिष्यत इत्याह-तपोकर्मप्रभृतिभिः भावनाभिर्भावयतः कृशतरं शरीरं भवति । ततः कुतोऽस्य शारीरबलं भवतीत्युच्यते "कामं तु शारीरबलम्" ।

हायइ परमाणु तवो-गुज्जावणजुअस्स देहोवचए वि ।
सत्तो जह होइ थिई, थिरा तहा ऽसो जयइ कामं ॥

अनुत्यधारणे । अनुमतमेवास्माकं यत्तपोज्ञानभावनायुक्तस्य शारीरबलं हीयते । परं देहोपचयेऽपि सति यथा धृतिमान्सात्वभूमालक्षणा निश्चला भवति । तथासौ यतते धृतिबलेन सम्यगात्मानं भावयतीत्यर्थः ।

आह-इत्थं धृतिबलेन भावयतः को नाम गुणः स्यादुच्यते-

कसिणा परिसहचमू, जइ ओतिज्जा हि भीवसग्गा वि ।
दुक्करपहकरवेगा, भयजणणी अप्पसत्ताणं ॥
धिइधणियबद्धकच्छो, जो होइ अणाउलो तमब्भहिओ ।
बलभावणाए धीरो, संपुण्णमणोरहो होइ ॥

कृत्स्ना संपूर्णा परीषहचमूर्भीगाऽभ्यधायते, निर्जरार्थं परिषोढव्याः परीषहाः क्षुदादयः । त एव तेषां वा चमूः सेना सा यदुच्छेत्, सम्मुखीभूय परिभावनाय प्रगुणा भवेत् । सोपसर्गाऽपि दिव्यादुपसर्गैः कृतसहायकापि । तथा-दुष्करं दुर्वहं पन्थानं सम्यग्दर्शनादिरूपं मोक्षमार्गं करोति, इति दुष्करपथकरः, तथाविधो वेगः प्रसरो यस्याः सा दुष्करपथकरवेगा । भयजननी त्रासकारिणी अल्पसत्त्वानां कापुरुषाणां तामेवंविधामपि स जिनकल्पप्रतिपत्तुकामो योधयति । कथंभूतो धृतिरेव "धणियं" अत्यर्थम्, बद्धा कक्षा येन स तथा । अनाकुलः औत्सुक्यरहितः । अव्यथितो निष्प्रकम्पमानः स बलभावनया तां योधयित्वा, धीरः सत्त्वसंपन्नः सन् संपूर्णमनोरथो भवति । परीषहोपसर्गान् पराजित्य, स्वप्रतिज्ञां पूरयतीत्यर्थः ।

अपि च—

धिइबलपुरस्सराओ, हवंति सव्वा वि भावणा एता ।
तं तु न विज्जइ सज्झं, जं धिइमंतो न साहेइ ॥

सर्वा अप्येताः तपःप्रभृतयो भावनाः धृतिबलपुरस्सरा भवन्ति । न हि धृतिबलमन्तरेण षाण्मासिकतपःकरणादयो गुणास्तस्तथा भावयितुं शक्यन्ते । किं वा(तं तु) तत्पुनः साध्यं कार्यं जगति न विद्यते, यद् धृतिमान् सात्त्विकः पुरुषो न साधयति "सर्वं सत्त्वे प्रतिष्ठितम्" इति वचनादेवेन "अव्वोच्छित्तीमूलं" इत्यादिद्वारगाथायाः 'उपसर्गसहे' इति यत्पदं, तद्भावितं बलभावनया, उपसर्गसहत्वभावादिति । गता बलभावना ।

अथ (उवसग्गसहे य जि) इत्यत्र यः चशब्दः सोऽनुक्तसमुच्चये वर्तते । अनुक्तसमुच्चयं विधिशेषमाह-

जिणकप्पियपडिरूवी, गच्छे वसमाण दुविहपरिकम्मं ।
ततिए भिक्खायरिया, पंतं लूहं अभिग्गहिया ॥

एवमसौ पञ्चभिर्भावनाभिर्भावितान्तरात्मा जिनकल्पिकस्य प्रतिरूपी तदनुरूपो भूत्वा, गच्छ एव वसन्, द्विविधं परिकर्म वक्ष्यमाणनीत्या करोति । तथा तृतीयस्यां पौरुष्यां निक्षाचर्यां, तथापि प्रान्तं रूक्षमाहारं गृह्णाति । प्रकृत्या चाभिगृहीताभिग्रहयुक्तः ।

तथा—

परिणामजोगसोही, उवहिविवेगो य गणविवेगो य ।
सिज्जासंथारविसो-हणं च विगईविवेगो य ॥
तो पच्छिमम्मि काले, सप्पुरिसनिसेवियं परमघोरं ।
पच्चा णिच्चयमज्झं, लहइ जिणकप्पियविहारं ॥

परिणामस्य गुर्वादिममत्वविच्छेदेन योगानां आवश्यकव्यापाराणां यथाकालमेव करणेन शुद्धिः । तथा प्राकृतस्योपधेर्विवेको गणविवेकश्च । शय्यासंस्तारकस्य विशोधनं च । विकृतिविवेकश्च । तदा तेन कर्तव्यः । ततः पश्चिमे काले तीर्थव्यवच्छित्तिकरणानन्तरं सत्पुरुषनिषेवितं धीरपुरुषाराधितं परमघोरमत्यन्तदुरनुचरं पश्चादायतौ निश्चयमध्यमेकान्तहितं जिनकल्पिकविहारमुपैति ।

(१६) पूर्वोक्तं परिकर्म, पाणि-प्रतिग्रह-परिकर्मभ्यां सचेलाऽचेलपरिकर्मभ्यामाहारोपधिभेदाभ्यां च द्विविधम्, पुनः केनाऽऽसनेन कथंभूतेषु संस्तारकेषु चोपविशति जिनकल्पिक इति ।

अथ द्विविधं परिकर्म व्याचिख्यासयति—

पाणिपडिग्गहेण य, सचेलं अचेलओ जहा जविया ।
सो तेण पगारेणं, लहइ अणागयं चेव ॥

द्विविधं परिकर्म । तद्यथा-पाणिपरिकर्म, प्रतिग्रहपरिकर्म च । अथवा-सचेलपरिकर्म, अचेलपरिकर्म च । तत्र यो यथा पाणिपात्रधारकः, प्रतिग्रहधारको वा । सचेलकोऽचेलको वा जविता, स तेनैव प्रकारेण पाणिपात्रभोजित्वादिना अनागतमेवात्मानं भावयति ।

प्रकारान्तरमाह-

आहारे उवहिम्मि य, अहवा दुविहं तु होइ परिकम्मं ।
अग्गहो दोसु पंचसु, अभिग्गहो अन्नतरियाए ॥

अथवा द्विविधं परिकर्म । आहारे, उपधौ च । तत्राहारं तावदसौ तृतीयपौरुष्यामवगाढायां गृह्णाति । तं चाऽलेपकृतमेव तत्राप्यसंसृष्टादीनां सप्तानां पिण्डैषणानां मध्यादुभयोरायरेषणयोरग्रहः सर्वथैवास्वीकारः । उपरितनासु पञ्चसु उद्धृतालेपावगृहीतापगृहीतोज्झितधर्मिकासु ग्रहणं तत्राप्यन्तिमग्रहोऽन्यतरस्यामेषणायामेकया नक्तं अपरया पानकमिति नियतश्चेषाभिस्तसृभिस्तद्दिवसमग्रहणमित्यर्थः । उपधौ तु वस्त्रपात्र-

योः प्रतिमाचतुष्टयं यत्पीठिकायामुक्तं तत्राद्यद्वयवर्जमुत्तरयोरेव ग्रहणं तत्राप्यन्यतरस्यामभिग्रहः ।

अथ "पंतं लूहं ति" व्याचष्टे-

निप्फावचणकुम्माई, अंतं पंतं तु होइ वावन्नं ।
नेहरहियं तु लूहं, जं वुवलच्छं सन्नावेण ॥

निष्पावाः वल्लाः, चणकाः प्रतीताः, आदिशब्दात् कूष्माण्डादिकं च 'अन्नम्' इत्युच्यते । 'प्रान्तं' पुनस्तदेव व्यापन्नं, विनष्टं, यत्पुनः स्नेहरहितं तद् रूक्षं, यद्वा-स्वभावेनोपलब्धादिकं तदपि रूक्षं मन्तव्यम् ।

अत्रैव विधिविशेषमाह—

उक्कुडुयासणसमुई, करेइ पुढवीसिलाइमूवविगे ।
पडिवन्नो पुण नियमा, उक्कुडुओ केई उ जयंति ॥
तं तु न जुज्जइ जम्हा, अणंतरो खडत्थि भूमिपरिभोगो ।
तम्मि य हु तस्स काले, ओवग्गहिओवहं। नत्थि ॥

(उक्कुडुयासणसमुइं ति) देशीवचनत्वादुत्पन्नं करोति । पृथिवीशिलादिषु वा पृथिवीशिलापट्टके, आदिशब्दादपरेष्वपि तथाविधेषु यथासंस्तृतेषु उपविशेद्वा जिनकल्पं प्रतिपद्यते । पुनर्नियमादुत्कुटुकः केचिदिच्छन्ति । विकल्पं कुर्वन्ति । उत्कुटुको वा तिष्ठेत्, उपविशेद्वा, तत्तु न युज्यते, यस्मादनन्तरोऽव्यवहितो नास्ति साधूनां प्रवेद्भूमिपरिभोगः "सुरूपुढवीए न सिएत्ति" वचनात् । तस्मिंश्च जिनकल्पकाले औपग्रहिकोपधिर्नास्ति । तदभावाच्च निश्चयापि नास्ति, इति गम्यते । ततश्चार्थादापन्नं तूत्कुटुक एव तिष्ठति । उक्तशब्दसूचितो विधिशेषः ।

(१७) विहारद्वारगतं षष्ठं वटवृक्षद्वारम् । कस्यां दिशि, कस्य पार्श्वे, कस्य तरोरधस्तनप्रदेशे वा, जिनकल्पं स्वीकरणीयम् । तच्च केन विधिना । ततः क्रामणम् । शेषाः किं कुर्वन्ति । क्रामणायां के गुणाः । जिनपदस्थापितसूरेरनुशिष्टिः । साधूनामनुशिष्टिं च प्रदाय किंकरोतीत्यादिप्रतिपादितम् ।

दव्वाई अणुकूले, मंथं सम्मेल्ल य तो गणं असइ ।
जिण-गणहरे य चउदस-अभिन्ने य असइ दसमाई ॥

इत्थमात्मानं परिकर्म्य । द्रव्ये, आदिशब्दात् क्षेत्रे, काले, भावे च, अनुकूले प्रशस्ते सङ्घं मीलयित्वा, सङ्घस्यासत्यभावे गणं स्वकीयमपरमेव समाहूय, ततः प्रथमं जिनः, तीर्थंकरस्तस्यान्तिके । तदभावे गणधरः, तन्निधाने । तदलाभे, चतुर्दशपूर्वधरान्तिके । तदसंभवे, अभिन्नदशपूर्वधरपार्श्वे । तस्याप्यसति, वटवृक्षस्याधः । आदिग्रहणात्तदप्राप्तावशोकवृक्षादीनामधस्ताज्जिनकल्पं प्रतिपद्यते ।

केन विधिनेत्याह-

गणि-गणहरं ठवेत्ता, खामे अगणी उ केवलं खामे ।
सव्वं च बालवुड्ढं, पुव्वविरुद्धे विसेसेणं ॥

गणी, गच्छाधिपाचार्यः स्व पूर्वमित्वरनिक्षिप्तगणं स्वशिष्यगणधरं स्थापयित्वा श्रमणसङ्घं क्षमयति । (अगणि त्ति) यस्तु गणी न भवति, किं तु सामान्यसाधुः स केवलं क्षमयति । न तु किमपि स्थापयति । किं पुनः क्षमयतीत्याह-सर्वं सकलमपि सङ्घं, च शब्दात्तदभावे स्वगच्छं बालवृद्धाकुलं, ये च पूर्वं विरुद्धाः प्राणिवराधितास्तान् विशेषेण क्षमयति ।

कथं पुनरित्याह-

जइ किं चि पमाएणं, न सुट्ठु जे वट्टियं मए पुव्वं ।
तं जे खामेमि अहं, निस्सल्लो निक्कसाओ अ ॥

यदि-किञ्चित्प्रमादेनानाभोगादिना न सुष्ठु (भे) भवतां मया वर्तितं पूर्वं, तद् (भे) युष्मान् क्षमयाम्यहं निःशल्यो निष्कषायश्च ।

इत्थं तेन क्षमिते सति शेषसाधवः किं कुर्वन्तीत्याह-

आणंदअंसुपायं, कुणमाणा ते वि भूमिगयसीसा ।
खामिति जहारिहं खलु, जहारिहं खामिता तेणं ॥

तेऽपि साधवः आनन्दाश्रुपातं कुर्वाणा भूमिगतशीर्षाः क्षितिन्यस्तोत्तमाङ्गाः सन्तः क्षमयन्ति । यथार्हं यो यो रत्नाधिकः स सः प्रथममित्यर्थः । तेनाचार्येण यथार्हं यथापर्यायज्येष्ठं क्षामिताः सन्तः इति ।

अथैतं क्षामणायां के गुणा इत्याह-

खामितस्स गुणा खलु, निस्सल्लयविणयदीवणामग्गे ।
लाघवियं एगत्तं, अप्पडिबंधो अ जिणकप्पे ॥

जिनकल्पे प्रतिपद्यमाने साधून् क्षमयन्तः खलु एते गुणाः । तद्यथा-निःशल्यता, मायादिशल्याभावो भवति । विनयश्च प्रयुक्तो भवति । मार्गस्य दीपना कृता भवति । इत्थमन्यैरपि क्षामणकरणस्सर्वं कर्तव्यमिति । लाघवमपराधनारापगमतो लघुभाव उपजायते । एकत्वं क्षामिता मया मा सीदच्च । इतः क्षमणकपश्चात्कालीयमुद्यानं भवति । अप्रतिबन्धश्च, ममत्वस्य क्लिष्टत्वाद् भूयः शिष्येषु प्रतिबन्धो न भवति ।

अथ जिनपदस्थापितस्य सूरेरनुशिष्टिमाह-

अह ते सव्वालवुड्ढो, गच्छो साइज्ज णं अपरितंते ।
ण य साहु परंपरओ, तुमं पि अंते कुणसु एवं ॥
पुव्वपविट्ठं विणयं, मा हु पमाए हि विणयजोगेसु ।
जो जेण पगारेणं, उवउज्जइ तं च जाणाहि ॥

अथैव (ते) तव सबालवृद्धो गच्छो निसृष्ट इति शेषः । अतोऽपरितान्तोऽनिर्विण्णो (ण) एनं गच्छं सान्तेवासं संगोपयेः, स्मारणावारणादिना सम्यक् पालयेरित्यर्थः । न च परित्यक्तोऽहमनीभिरित्यादिपरिभावयेः । यतः एष एव परंपरकः शिष्याचार्यक्रमो यदन्यच्चित्तिकारकं शिष्यं निष्पाद्य, शक्तौ सत्यामनुद्युक्तविहारः प्रतिपत्तव्यः । स्वमप्यन्ते शिष्यनिष्पादनादिकार्यपर्यवसाने एवमेव कुर्याः । ये च बहुश्रुतपर्यायज्येष्ठादयो विनयं योग्या गौरवार्हास्तेषु पूर्वप्रवृत्तं यथोचितं विनयं मा प्रमादयेः, प्रमादेन परिहापयेः । यच्च साधुर्येन तपःस्वाध्यायवैयावृत्त्यादिना प्रकारेणोपयुज्यते, निर्जरामन्युपयोगमुपयाति तं च जानीहि, तं तथैव प्रवर्तयेत्यर्थः ।

अथ साधूनामनुशिष्टिं प्रयच्छति-

ओमो अहराइणिओ, अप्पतरसुओ उज्ज वा अओ तुब्भे ।
परिनवइ तुम्ह एसो, विसेसओ संपयं पुज्जो ॥

अवमोऽयम् अथ रात्निकोऽयम् अल्पतरश्रुतो वा अयमस्मदपेक्षया, अतः किमर्थमस्याज्ञानिर्देशं वयं कुर्महे, इति मा उज्झत यूयमस्मिं परिभवत । यत एष युष्माकं सांप्रतमस्मत्कालावस्थागुरुतरगुणाधिकरत्वाच्च विशेषतः पूज्यो न पुनरवज्ञातुमुचित इति भावः ।

इत्यमुभयेषामप्यनुशिष्टिं प्रदाय किं करोतीत्याह-

पक्खिव्व पत्तसहिओ, सज्जंघगो वि विजहिज्ज निरवेक्खो ।
जा तइया ता विहरो, से चउत्थी उ नो सासु ॥

यथा पक्षी पत्राभ्यां पक्षाभ्यां सहितः, प्राक्तनस्थाननिरपेक्षः स्थानान्तरं व्रजति । एवमपि भगवान् सज्जाएकः पात्रसहितो, निरपेक्षो गच्छसत्कापेक्षारहितः, एकान्तं मासकल्पप्रायोग्यं क्षेत्रं व्रजति । अयं च यावत्तृतीयपौरुषी, तावद् गच्छति । यतस्तस्यामेव (से) तस्य विहारो, नान्यासु पौरुषीषु । यत्र तु चतुर्थी पौरुषी भवति, तत्र नियमात् तिष्ठति इति ।

तस्मिन्निर्गते शेषसाधवः किं कुर्वन्तीत्याह-

सीहमिव मंदरकंद-रातो नीअम्मिए तओ तम्मि ।
चक्खुविसयं अइगए, अइंति आणंदिया साहू ॥

सिंह इव मन्दरकन्दरायास्तस्मिन्नगारे सिंहे गच्छति(नीअम्मिए) निर्गते सति, कियन्तमपि भूभागमनुगमनं विधाय, ततश्चक्षुर्विषयमतिक्रान्ते अदर्शनीभूते, आयान्ति स्ववसतिं आनन्दिताः, अहो अयं भगवान् सुखसेवनीयस्थविरकल्पविहारं विहायातिदुष्करमभ्युद्यतविहारमभ्युपैति, इति परिभावनया हृष्टाः सन्तः साधवः । इति ।

इदमेव विशेषमाह-

निच्चेलसचेले वा, गच्छारामा विणिग्गए तम्मि ।
चक्खुविसयं अईए, अइंति आणंदिया साहू ॥

निश्चेलो वा सचेलो वा । गच्छारामात् सुखसेवनीयाद्विनिर्गते, तस्मिन् चक्षुर्विषयमतीते, आयान्ति । आनन्दिताः साधवः ।

अथासौ विवक्षितं क्षेत्रं गत्वा-किं करोतीत्याह-

आभोएइ खेत्तं, निव्वाघाएण मासनिव्वाहं ।
गंतूण तत्थ विहरइ, एस विहारो समासेणं ॥

आभोगयति विज्ञाय क्षेत्रं, निर्व्याघातेन विघ्नाभावेन मासनिर्वाहं मासनिर्वहणसमर्थं गत्वा-तत्र क्षेत्रे विहरति । स्वनीतिं परिपालयति । एष विहारो विशेषानुष्ठानरूपोऽस्य भगवतः समासेन प्रतिपादितः । इत्युक्तं विहारद्वारम् । कृ० १ उ० ।

(१८) सामाचारीद्वारम् । आवश्यक्यादिपञ्चसामाचारी-जिनकल्पिकः प्रयुङ्क्ते, अन्याः न । आदेशान्तरमप्यत्रैवोक्तम् ।

अथैतासां मध्याज्जिनकल्पिकाः सामाचार्यो भवन्तीत्युच्यते-

आवासिइनिसीहिमि-च्छाअपुच्छुवसंपदं च गिहिएसु ।
अन्ना सामायारी, न होंति सेसे सिया पंच ॥

आवश्यकीं, नैषेधिकीं, मिथ्याकारं, आपृच्छाम्, उपसंपदं च, गृहिषु गृहस्थविषयाम् । एताः पञ्च सामाचारीजिनकल्पिकः प्रयुङ्क्ते । अन्याः सामाचार्यो न भवन्ति, तस्य (सेसे) शेषाः पञ्च मिथ्याकाराद्याः प्रयोजनाभावात् ।

आदेशान्तरमाह-

आवासिइं निसिहिइं, मोत्तुं उवसंपयं च गिहिएसु ।
सेसा सामायारी, न होंति जिणकप्पिए सत्ता ॥

आवश्यकीं नैषेधिकीं मुक्त्वा, उपसंपदं च गृहिषु गृहस्थविषयां, जिनकल्पिकस्य शेषाः सामाचार्यो मिथ्याकाराद्याः सप्त न भवन्ति । तद्विषयस्य स्खलितादेरभावात् ।

अहवा वि चक्कवाले, सामायारी उ जस्स जा जोग्गा ।
सा सव्वा वत्तव्वा, सुआइआ वा इमा मेरा ॥

अथवाऽपि, चक्रवाले प्रत्युपेक्षणादौ नित्यकर्मणि, यस्य जिनकल्पिकादेर्या सामाचारी योग्या, सा सर्वा अत्र सामाचारीद्वारे वक्तव्या । श्रुतादिका वा इयं वक्ष्यमाणा मेरा मर्यादा सामाचारी ।

(१९) श्रुतादिकानां वक्ष्यमाणसामाचारीणां सप्तविंशतिद्वाराणि—

तामेवाभिधित्सुर्द्वारगाथात्रयमाह—

सुयसंघयणुवसग्गा, आयंको वेयणा कइ जणा य ।
थंडिल्लवसहिकेच्चिर-मोच्चारो चेव पासवणो ।
आवासो तणफलयं, सारक्खणया य संठवणया य ।
पाहुडिओऽग्गी दीवा, ओहाण-वसे कइ जणा उ ।
भिक्खायरियापाणग-लेवालेवा तहा अलेवा य ।
आयंबिलपडिमाओ, जिणकप्पे मासकप्पो य ।

श्रुतं १ संहननं २ उपसर्गः ३ आतङ्कः ४ वेदना ५ कति जनाश्च ६ स्थण्डिलं ७ वसतिः ८ कियच्चिरं ९ उच्चारश्चैव १० प्रश्रवणं ११ अवकाशः १२ तृणफलकं १३ संरक्षणता च १४ संस्थापनता च १५ प्राभृतिका १६ अग्निः १७ प्रदीपः १८ अवधानं १९ वस्त्रथ कति जनाश्च २० भिक्षाचर्या २१ पानकं २२ लेपालेपः २३ तथा अलेपश्च २४ आचाम्लं २५ प्रतिमा २६ मासकल्पश्च २७ (जिणकप्पेत्ति) एतानि सप्तविंशतिद्वाराणि जिनकल्पविषयाणि वक्तव्यानि इति गाथात्रयसमुदायार्थः ।

अथावयवार्थं प्रतिद्वारं प्रतिपिपादयिषुर्यथोद्देशं निर्देश इति न्यायतः प्रथमं श्रुतद्वारमाह—

आयारवत्थु तइयं, जहन्नयं होइ नवमपुव्वस्स ।
अहिए कालम्मि णं, दस पुण उक्कोसनिएणाइं ॥

जिनकल्पिकस्य जघन्यकश्रुतं, नवमपूर्वस्य प्रत्याख्याननामकस्याऽऽचारवस्तु तृतीयं वस्तु । तस्मिन्नधीते सति, कालक्रमं जघन्योत्पत्तिकालदर्शकं श्रुतपर्याये वर्तमानस्य न जिनकल्पिकस्य प्रतिपत्तिः । उत्कर्षतो दशपूर्वाणि निक्षानि । श्रुतपर्यायः संपूर्णदशपूर्वधरः । पुनरसौ घवत्तमतया प्रवचनप्रभावनापरोपकारादिद्वारेण च, बहुतरं निर्जरालाभमासादयति । अतो नासौ जिनकल्पं प्रतिपद्यते । उक्तं श्रुतद्वारम् ।

अथ संहननद्वारमाह-

पढमिल्लुगसंघयणा, धिइए पुण वज्जकुड्डसामाणा ।

जिनकल्पाः प्रथमिल्लुकसंहननाः वज्रऋषभनाराचसंहननोपेताः । धृत्या अक्लीबतानिर्वाहसमर्थप्रणिधानरूपया वज्रकुड्यसमानाः ।

* अथोपसर्गद्वारमाह *

उप्पज्जंति न वा सि उ-वसग्गा एस त्ति पुच्छा उ ॥

अथोपसर्गद्वारम्-उत्पद्यन्ते न वा अमीषामुपसर्गा दिव्यादयः इत्येषा पृच्छा । अत्रोत्तरमाह-

जइ वि य उप्पज्जंते, सम्मं वि सहंति ते उ उवसग्गे ।

नायमेकान्तो यदवश्यमेतेषामुपसर्गा उत्पद्यन्ते, परं यद्यप्युत्पद्यन्ते, तथाऽपि सम्यगदीनमनसो विषहन्ते तानुपसर्गान् ।

अथाऽऽतङ्कद्वारमाह-

रोगातंका चेवं, जइआ जइ होंति विसहंति ॥

आतङ्कद्वारमतिदिशति-रोगाश्च कालसदृशाः। आतङ्काश्च सद्यो घातिनः। एवमेव भाव्या उत्पद्यन्ते, वा न वा। यदि भवन्त्युत्पद्यन्ते, ततो नियमाद्विषहन्ते।

वेदनाद्वारमाह-

अब्भुवगमा ओवक्क-मा य तेसिं वेयणा भवे दुविहा।
धुवलोआइपढमा ज-रातिवागाइ बिई एक्को॥

आभ्युपगमिकी, औपक्रमिकी च। तेषां जिनकल्पिकानां द्विविधा वेदना भवति। तत्र प्रथमा-ध्रुवलोचाद्या ध्रुवः प्रतिदिनभावी लोचः, आदिशब्दादातापनातपःप्रभृतिपरिग्रहः। द्वितीयौपक्रमिकी ज्वरातिपक्कादिः, ज्वरः प्रतीतः। विपाकः कर्मणामुदयस्तत्समुत्था।

अथ "कियन्तोऽजना" इति द्वारम्-(एको त्ति) एक एवायं भगवान् भवति। यदि वेद द्वारमुपरिष्टात् व्याख्यास्यते।

अथ स्थण्डिलद्वारमाह-

उच्चारे पासवणे, उस्सग्गं थंडिल्ले कुणइ पढमे।
तत्थेव य परिजुण्णे, कयकिच्चो लज्जए वत्थे॥

उच्चारस्य प्रश्रवणस्य चोत्सर्गं परित्यागं प्रथमे अनापाते असंलोके स्थण्डिले करोति। तत्रैव प्रथमस्थण्डिले कृतकार्यो विहितगोत्रत्राणादिवस्त्रकार्यः, उज्झति वस्त्राणि।

अयं च संज्ञां व्युत्सृज्य न निर्लेपयति।

कुत इति चेत्? उच्यते-

अप्पमभिन्नं वच्चं, अप्पं लूहं च भोअणं भणियं।
दीहे वि अ उवसग्गे, उभयमवि अ थंडिले न करे॥

अल्पमभिन्नं च वर्चः पुरीषमस्य भवति। कुत इत्याह-यतोऽल्पं रूक्षं च भोजनमस्य जगवद्भिः। अल्पाभिन्नवर्चस्कतया तथाकल्पत्वाच्चासौ न निर्लेपयति। न चासौ दीर्घेऽपि बहुदैवसिके उपसर्गे उभयेऽपि संज्ञां कायिकीं वा स्थण्डिले आपातादिदोषयुक्ते भागे करोति।

वसतिद्वारमाह-

अममत्ता-ऽपरिकम्मा, नियमा जिणकप्पियाण वसहीओ।
एमेव य थेराणं, मुत्तूण पमज्जणं एक्कं॥

अममत्वाममेयमित्यभिष्वङ्गरहिताः। अपरिकर्मा साधर्म्यमुपलेपनादिपरिकर्मवर्जिता, नियमात् जिनकल्पिकानां वसतिः। स्थविरकल्पिकानामप्येवं वसतिरममत्वा, अपरिकर्मा च, द्रष्टव्या। मुक्त्वा प्रमार्जनामेकामन्यत्परिकर्मेति न कुर्वन्ति, इत्यर्थः।

एतदेव स्पष्टयति—

बिले न ढक्कंति न खज्जमाणिं,
गोणो य वारिंति न जज्जमाणिं।
दारे न ढक्किंति, न वल्लगिंति,
दप्पेण थेरा जइया न कज्जे॥

एते भगवन्तो बिलानि धूल्यादिना न स्थगयन्ति। न वा गवादिभिः खाद्यमानां भज्यमानां वा वसतिं निवारयन्ति। द्वारे न ढक्किति कपाटाभ्यां न संयोजयन्ति। स्थविरकल्पिका अपि दर्पेण कार्याभावे एवमेव वसतेः परिकर्म न कुर्वन्ति। कार्ये तु पुष्टावलम्बने जाड्याः परिकर्म कुर्वन्त्यपि, इतिभावः।

कियच्चिरो-द्वार-प्रश्रवण-अवकाश-तृणफलक-संरक्षण-संस्थापना-द्वाराणि गाथाद्वयेन भावयति-

किंचिरकालं वसिहि, इत्थ य उच्चारमाइए कुणसु।
इह अत्थसु मा इह य, इह तणफलए गिण्हह मा य॥

यस्यां वसतौ याच्यमानायां तदीयस्वामिन इत्थं भणन्ति, कियत् चिरंकालं वत्स्यथ यूयं। यदा अत्र प्रदेशे उच्चारादीनि पुरीषप्रश्रवणादीनि कुरु। अत्र तु मा कुरु। इहास्मिन्नवकाशे आसीथ, इह मेति। एतानि वा हस्तसंज्ञया निर्दिश्यमानानि तृणफलकानि गृह्णीयाः, मा एतानीति॥

सारक्खह गोणाई, मा य पविसंतु उविक्खह उ भंते!।
अग्गं वा अन्नियोगं, नेच्छंति अचियत्तपरिहारी॥

संरक्षत वा गवादीन् बहिर्निर्गच्छतो यूयमस्माकं क्षेत्रादौ गतानां व्याकुलानां वा, मा च पतन्तीं वसतिमुपेक्ष्ध्वे। किं सुसंस्थापना पुनः संस्कारूपा विधेया (संजवणया य त्ति) द्वारगाथायां यच्छब्दः तेन सूचितम्-अग्र्यं वा स्वाध्यायनिषेधादिकं यत्र वसतिस्वामी अभियोगं नियन्त्रणां करोति, तं मनसापि नेच्छन्ति। सूक्ष्मस्याप्यप्रीतिकस्य परिहारिणो अमी भगवन्त इति।

प्राभृतिकाग्निदीपावधानद्वाराणि व्याचष्टे-

पाहुडियदीवओ वा, अग्गिपगासो व जत्थ न वसंति।
जत्थ य भणंति भंते!, ओहाणं देहि गेहे वि॥

यस्यां वसतौ प्राभृतिका बलिः क्रियते, दीपको वा यस्यां विधीयते। अग्निरङ्गारज्वालादिकस्तस्य प्रकाशो वा यत्र न वसन्ति। यत्र च तिष्ठत्सु साधुषु अगारिणो जणन्ति, अस्माकमपि गेहे अवधानमुपयोगं ददत इति। तत्रापि नावतिष्ठन्ते।

वत्स्यथ कति जना इति द्वारमाह-

वसतिं अणुन्नवितो, जइ भणइ कइ जणा वि न तत्थ वसे।
सुहुमं पि न सो इच्छइ, परस्स अप्पित्तियं जगवं॥

वसतिमनुज्ञामनुज्ञापयन् यदसौ भणति, कति जना यूयं वत्स्यथेति तत्रापि न वसति। कुत इत्याह-सूक्ष्ममपि नासाविच्छति परस्याप्रीतिकं भगवान्। (कइ जणा उ त्ति) अत्र यत्शब्दस्तेनान्यामपीषदप्रीतिकजननीं वसतिमसौ परिहरति, इति गम्यते। उक्तं च-पञ्चवस्तुके-"सुहुमं पि हु अचियत्तं, परिहरए सो परस्स नियमेणं। जं तेण तुसहाओ, वज्जइ अग्गं पि तज्जणणिं"॥

भिक्षाचर्यापानकलेपालेपद्वाराणि विवृणोति-

तइयाइ निक्खचरिया, पग्गहिया एसणा य पुव्वुत्ता।
एमेव पाणगस्स वि, गिण्हइ अ अलेवमे दो वि॥

तृतीयस्यां पौरुष्यां, भिक्षाचर्या एषणा च, प्रगृहीता अभिग्रहयुक्ता, सा च (पंचसुग्गहवोसग्गहु) इत्यादिना पूर्वमेवोक्ता। एवमेव पानकस्यापि तृतीयपौरुष्यां प्रगृहीतया वैषणया ग्रहणं करोति। तत्र शिष्यः पृच्छति-(अलेवालेवे त्ति) किमसौ विकल्पिको लेपकृतं गृह्णाति उतालेपकृतम्। अत्र सूरिः "अलेव त्ति" पदं विवृण्वन्नुत्तरमाह-द्वेऽपि भक्तपाने अलेपकृते बह्वचणकसौवीरादिरूपे गृह्णाति, न लेपकृते।

आचामाम्लप्रतिमाद्वारद्वयमाह-

आयंबिलं न गेण्हइ, जं च अणायंबिलं वि लेवाडं ।
न य पडिमा पडिवज्जइ, मासाई जा य सेसा उ ॥

आयामाम्लमसौ न गृह्णाति । पुरीषाभेदा विदोषसंभवात् । अनायामाम्लमपि, यल्लेपकृतं तन्न गृह्णाति । न च प्रतिमा मासिकयादिका, असौ प्रतिपद्यते । याश्च शेषा जडमहाजडादिकाः प्रतिमा स्ता अपि न प्रतिपद्यते । स्वकल्पस्थितिप्रतिपालनमेव, तस्य विशेषाभिग्रह इति भावः । बृ० १ उ० ।

(२०) क्षुतादिसप्तविंशतिद्वारान्तर्गतं,सप्तविंशं मासकल्पद्वारम् ।

अथ मासकल्प इति द्वारमभिधित्सुराह-

कप्पे सुत्तत्थविसा-रयस्स संहणणवीरियजुत्तस्स ।
जिणकप्पियस्स कप्पइ, अभिग्गहिया एसणा निच्चं ॥

कल्पे जिनकल्पविषयौ यौ सूत्रार्थौ, तत्र विशारदस्य निपुणस्य, संहनने शारीरबले, वीर्ये धृतिस्ताभ्यां युक्तस्य, जिनकल्पिकस्य कल्पते । अभिग्रहीता साऽभिग्रहा एषणा ।

(२१) जिनकल्पी षट्वीथ्यां भ्रमतीति विस्तरः ।

सा च मासकल्पस्थितिमनुपालयतो भवतीति ।

अतस्तस्यैव विधिमाह-

छव्वीहीओ गामं, काउं एक्किक्कियं तु सो अडइ ।
वज्जेतुं होइ सुहं, अनिययवित्तिस्स कम्माई ॥

यत्रासौ मासकल्पं करोति, तं ग्रामं षट्वीथीगृहपङ्क्तिरूपाः कृत्वा,ततः प्रतिदिनमेकैकां वीथीमटति । यावत्सप्तमे दिवसे षष्ठीं । कुत इत्याह-अनियतवृत्तेरपरापरवीथीषु पर्यटतः, कर्मादि आधाकर्मपूतिकर्मादिकं सुखं वर्जयितुं शक्यत इति भावः ।

कथं पुनराधाकर्मादिसंभवो भवतीत्याशङ्क्य,

तत्संभवादिदर्शयिषुराह-

अभिगहे दट्ठु करणं, नत्तोगाहिमं तिन्नि पूईयं ।
तुदगो एगमणेगे, कप्पोत्ति य सत्तमे सत्त ॥

तस्य भगवतः प्रथमवीथीमटतः, कयाचिद्गार्या श्रद्धातिरेकात्, घृतमधुसंयुक्तं नैक्षमुपनीतं । तेन च न कल्पते मे, लेपकृता भिक्षेति न गृहीतं । तत एवमादीनभिग्रहान् दृष्ट्वा, कर्मणः करणं भवति । तच्च भक्तभवगाहिमं वा भवेत्, त्रीणि च दिवसानि तत्पूतिकं । नोदकः प्रश्नयति । एकं ग्रामं किमनेकान् षट्वीथीरूपान् करोति । सूरिराह-कल्प एषोऽमीषां, यत् षट् कल्पवीथीः कृत्वा, सप्तमे दिवसे पर्यटन्ति । सप्त च जना, एकस्यां वसतौ च, संभवन्तीति समासार्थः ।

(२२) देयाऽऽहाराऽयोग्यतायां श्राविका—विचारः ।

अथ विस्तरार्थमाह-

दट्ठूण य अणगारं, सड्ढा संवेगमागया काइ ।
नत्थि मह तारिसयं, अन्नं जमलज्जिया दाहं ॥

तमनगारं तपःशोषितं मलपटलजटिलं च पुरुषं दृष्ट्वा, हा कांचित्का, परसंवेगमागता सती चिन्तयति । किं मे जीवितेन, यदीदृशस्य महात्मनो भिक्षा न दीयते । नास्ति मम तादृशं शोभनं, यदहमलज्जिता सती दास्यामि ।

ततः-

सव्वपयत्तेण अहं, कल्ले काऊण ओअणं विउलं ।
दाहामि तुट्ठमणसा, होहिइ मे पुण्णलाभो त्ति ॥

सर्वप्रयत्नेन अहं, कल्पे द्वितीये अहनि, भोजनं विपुलं कृत्वा दास्यामि, तुष्टमनसा प्रहृष्टेन चेतसा । ततो भविष्यति मे महान् पुण्यलाभः । इत्थं विचिन्त्य, द्वितीये दिवसे, विपुलमशनादिभक्तभवगाहिमं चोपस्कृत्य, तं भगवन्तं, प्रतीक्षमाणा तिष्ठति ।

ततः किमभूदित्याह-

फेडियवीहीएहिं, अणंतवरनाणदंसणधरेहिं ।
अदीणअपरितंता, विइयं च फिडिंडिया तत्थ ॥

स्फेटिता परिहृता वीथी यैस्तैर्जिनकल्पिकैः कथंभूतैरनन्तवरज्ञानदर्शनधरैः, इहानन्तज्ञानमयत्वादनन्तास्तीर्थकरास्तैरुपदिष्टे, वरे उत्तमे जिनकल्पिकानां ये ज्ञानदर्शने, उपलक्षणत्वाच्चारित्रं च, तानि धारयन्तीत्यनन्तवरज्ञानदर्शनधरास्तैः । आह चूर्णिकृत्-" अणंतं नाणं जेसिं ते अणंता तित्थकरा तेहिं जिणकप्पियाणं वरं नाणं दंसणं चरित्तं च जं भणियं तद्धरेहिं ति " ततस्ते अदीनमनसः अविषण्णाः, अपरितान्ताः कायेनानिर्विण्णाः, द्वितीयां वीथीं क्रमागतां पर्यटितास्तत्र क्षेत्रे, एकवचनप्रक्रमेऽपि बहुवचनाभिधानमन्येषामपि, जिनकल्पिकानामेवंविधवृत्तान्तसंभवख्यापनार्थम् ।

(२३) कल्पशब्दार्थः । वीथ्यां भ्रमतस्तदुक्तं पूतिकं भवति ।

अत्र चेयं व्यवस्था—

पढमदिवसोवक्खयं, तिन्नि दिवसाइं पूइयं होइ ।
पूतिसु तिसु न कप्पइ, कप्पइ तईउ जया कप्पो ॥

प्रथमे दिवसे तद्भक्तमुपस्कृतमाधाकर्म, त्रीणि दिवसानि यावत् तद् गृहं प्रति भवति । तेषु च त्रिषु पूतिदिनेषु, तस्मिन् गृहे अन्यदपि किञ्चिन्न कल्पते । यदा तु तृतीयः कल्पो गतो भवति, तदा कल्पते । कल्पशब्देनेह दिवस उच्यते । उक्तं च पञ्चवस्तुटीकायाम्, कल्पते तृतीये कल्पे दिवसे गते अपरस्मिन् अहनीति ।

(२४) त्रिषु दिवसेषु पूतिकं न कल्पते, किन्तु षष्ठे सप्तमे च दिवसे कल्पत इति । सप्तमदिवसे पर्यटतः श्राविका पृच्छा च ।

इदमेव स्पष्टयन्नाह-

विइयदिवसम्मि कम्मं, तिन्नि उ दिवसाइं पूइयं होइ ।
तिसु कप्पेसु न कप्पइ, कप्पइ तं छट्ठदिवसम्मि ॥

यस्मिन् दिवसे स जिनकल्पिकः प्रथमवीथ्यामटन् तया दृष्टः, तदपेक्ष्य द्वितीये दिवसे तद्भक्तमाधाकर्म, तदनन्तरं त्रीणि दिवसानि पूतिकं भवति । तेषु त्रिषु, कल्पेषु दिवसेषु, न कल्पते, किं तु कल्पते तत् षष्ठे दिवसे ।

अथावगाहिमविषयं विधिमाह-

कल्ले से दाहामि, ओगाहिमगं णागतो अज्ज ।
तइए दिवसे तं हो-इ पूइयं कप्पए छट्ठे ॥

(अवगाहिमं) दिनद्वयमपि क्रमत इति कृत्वा, सा श्राद्धाविनयवती । यदर्थमयमवगाहिमपाको मया कृतः, स मुनिरद्यमद्गृहाङ्गणं नागतः । अतः कल्ये (श्वे) तस्याहं दास्यामि । इदमवगाहिममिति विचिन्त्य, तदानार्थं यदि स्यापयति, तदा तृतीयदिवसे कर्मैव भवति । यत्पुनस्तस्मिन्नेव दिवसेऽव्यवच्छिन्नभावा सा, आत्मार्थितं करोति, तदवगाहिममपि भक्तवत् मौलदिवसापेक्षया द्वितीयदिवसे कर्म, तृतीयादिषु तद्गृहं पूतिकं, षष्ठे तु दिवसे कल्पते ।

एतदेव स्पष्टयति—

एमेवोगाहिमगं, नवरं तइयम्मि जग्गवि दिवसे तं ।
कम्मं तिसु पूइअं न, कप्पइ तं सत्तमे दिवसे ॥

एवमेव भक्तवदवगाहिममपि, यस्मिन्दिवसे एवात्मार्थीकृतं, तद्दिवसे तृतीये दिवसे कर्म, तृतीयादिषु त्रिषु पूति, षष्ठे तु कल्पते । नवरं, यस्मिन्दिवसे नात्मार्थीयते, तत्तृतीयेऽपि दिवसे कर्म । ततः त्रिषु दिवसेषु तत्पूतिकमिति कृत्वा, न कल्पते । किं तु कल्पते तद् पूइं सप्तमे दिवसे, अत एव, चासौ भूयः सप्तमे दिने तस्यां वीथ्यां पर्यटति ।

आह-यद्येवं तर्हि, यदि तस्मिन्नेव दिवसे तं प्रथमवीथीमटन्तं दृष्ट्वा, कश्चिद्दाधाकर्मादि कुर्यात् मोदकादकं वा, तदर्थं कृत्वा सप्तमदिवसं यावदव्यवच्छिन्नभावं स्थापयेत् । तदा नासौ कथं जानाति ? कथं वा परिहरति इति ? उच्यते-

चोयग ! तं चेव दिणं, जइ वि करिज्जाहि कोइ कम्माइं ।
न हु सो तं न विजाणइ, एसो पुण सिं अहाकप्पो ॥

हे नोदक ! तस्मिन्नेव दिवसे यद्यपि कुर्यात् कश्चित्, किञ्चिदाधाकर्मादि, (न हु) नैव स तत्र विजानाति " हो नमो प्रकृत्यर्थं गमयत " इति वचनात्, जानात्येवासौ श्रुतोपयोगलक्षणेन । आह-यद्यसौ श्रुतोपयोगप्रामाण्यादेव जानीते, ततः किमर्थमेकं ग्राममनेकशोगात् परिकल्प्य पर्यटति ? उच्यते-कल्प एषः (स्थि) अमीषां भगवतां । यत् सप्तमे दिवसे भूयः प्रथमवीथ्यां पर्यटन्ति ।

ततश्च, तं सप्तमे दिवसे प्रथमवीथीं पर्यटन्तं दृष्ट्वा,
सा श्राविका ब्रूयात्-

किं नाग या थ तइया, असव्वओ मे क-
ओ तुह निमित्तं । इह पुट्ठो सो जगवं,

तदानीं यूयं किं नागताः । 'थेति' निपातः पूरणार्थः । मया हि स्वनिमित्तं विपुलं भक्तादिकमुपस्कुर्वत्या युष्मदनुपयोगात् असद्व्ययः कृतः, इति पृष्टोऽसौ भगवान् तूष्णीक आस्ते, इति शेषः ।

(२५) द्वितीयादेश-यादेशान्तरम्-

बिइयाएसे इमं भणइ ॥

द्वितीयादेशे आदेशान्तरे पुनरिदं भणति । किं तत् ? इत्याह-

अनियता उ वसईओ, जमरकुलाणं च गोकुलाणं च ।
समणाणं सउणाणं, सारइआणं च मेहाणं ॥

अनियता वसतयः स्थानानि, उपलक्षणत्वात् परिभ्रमणानि च । केषामित्याह-भ्रमरकुलानां च, गोकुलानां च, श्रमणानां, शकुनानां, शारदानां, च मेघानाम्, इत्थं न नियतवसतयो जिनाज्ञाने अज्ञानतामपि प्राणिनां, नाधाकर्मादिकरणे भूयः प्रवृत्तिरुपजायत इति ।

अथ "सत्त त्ति" पदं विवृणोति-

एकाए वसहीए, उक्कोसेणं वसंति सत्त जणा ।
अवरोप्परसंभासं, चयन्ति अन्नोन्नवीहिं च ॥

एकस्यां वसताबुत्कर्षतः, सप्त जनाः, जिनकल्पिका वसन्ति । ते चैकत्र वसन्तोऽपि परस्परं भाषणं त्यजन्ति । न कुर्वन्तीत्यर्थः । अन्योऽन्यवीथिं च त्यजन्ति । यस्मिन् दिने, यस्यां वीथ्यामेकः पर्यटति । न तस्मिन्नेव, तस्यामपर इत्यर्थः । गतं सामाचारीद्वारम् ।

अथ स्यात्द्वारमभिधित्सुराह-

खेत्ते काल-चरित्ते, तित्थे परियाय-आगमे वेए ।
कप्पे लिंगे लेस-उझाणे जगणाऽभिग्गहा य ॥
पव्वावण मुण्डवणे, मणमावन्ने वि से अणुग्घाया ।
कारण-निप्पडिकम्मं, भत्ते पंथो य तइयाए ॥

एकस्मिन् क्षेत्रेऽमी भगवन्तो भवन्ति १ एवं काले २ चरित्रे ३ तीर्थे ४ पर्याये ५ आगमे ६ वेदे ७ कल्पे ८ लिङ्गे ९ लेश्यायां १० ध्याने ११ गणनायां १२ अभिग्रहाश्चामीषां भवन्ति न वा ?, १३ प्रव्राजनायां १४ मुण्डापनायां च कीदृशी स्थितिः १५ मनसाऽऽपन्नेऽपराधे (से) तस्यानुद्घाताश्चतुर्गुरवः प्रायश्चित्तम् १६ कारणं १७ निःप्रतिकर्म १८ भक्तं, पन्थाश्च, तृतीयस्यां पौरुष्याम् १९-२० इति द्वारगाथाद्वयसमासार्थः ।

व्यासार्थं प्रतिद्वारमभिधित्सुः प्रथमतः क्षेत्रद्वारमङ्गीकृत्याह-

जम्मणसंतीभावे, स होज्ज सव्वासु कम्मभूमीसु ।
साहरणे पुण भइयं, कम्मे व अकम्मजूमे वा ॥

क्षेत्रविषया द्विविधा मार्गणा । जन्मतः, सद्भावतश्च । जन्मतो यत्र क्षेत्रे अयं प्रथम उत्पद्यते । सद्भावतस्तु यत्र जिनकल्पं प्रतिपद्यमानोऽस्ति । तत्र जन्मसद्भावयोरुभयोरपि, अयं सर्वासु कर्मभूमिषु, भरतपञ्चकैरावतपञ्चकविदेहपञ्चकलक्षणासु भवेत् । संहरणे देवादिना अन्यत्र नयने, पुनर्नाऽयं नजनीये, कर्मभूमौ वा भवेदकर्मभूमौ वा । एतच्च सद्भावमाश्रित्योक्तं । जन्मतस्तु, कर्मभूमावेवायं भवतीत्युक्तं क्षेत्रद्वारम् ।

अथ कालद्वारमाह--

ओसप्पिणीइ दोसुं, जम्मणतो तिसु संतीभावेणं ।
उस्सप्पिणिविवरीया, जम्मणतो संतिभावे य ॥

अवसर्पिण्यां जन्मतो द्वयोः सुषमदुष्षमदुष्षमसुषमयोः तृतीयचतुर्थारकयोर्भवेत् । सद्भावतस्तु त्रिषु तृतीयचतुर्थपञ्चमारकेषु, (सुषमदुष्षम—दुष्षमसुषम—दुष्षमरूपेषु) दुष्षमसुषमाया अन्ते जातो दुष्षमायां जिनकल्पं प्रतिपद्यते । इति कृत्वा उत्सर्पिणीविपरीता । जन्मतः सद्भावतश्च । इदमुक्तं भवति-उत्सर्पिण्यां दुष्षमदुष्षमसुषमसुषमदुष्षमासु तिसृषु समासु जन्मक्षेत्रे दुष्षमसुषमसुषमदुष्षमासु द्वयोरसुं कल्पं प्रतिपद्यते । दुष्षमायां तीर्थं नास्तीति कृत्वा तस्यां जातस्यापि दुष्षमसुषमायामेव कल्पप्रतिपत्तिरिति ।

ओसप्पिणुस्सप्पिणी-भवंति पलिजागतो चउत्थम्मि ।
काले पलिजागेसु अ, साहरणे होंति सव्वेसु ॥

नोऽवसर्पिण्युत्सर्पिणीरूपे अवस्थितकाले, चत्वारः प्रतिभागास्तद्यथा-सुषमसुषमाप्रतिभागः सुषमाप्रतिभागः सुषमदुष्षमाप्रतिभागः दुष्षमसुषमाप्रतिभागश्चेति । तत्राद्यो देवकुरूत्तरकुर्वोस्तृतीयो रम्यकहरिवर्षयोस्तृतीयो हैमवतैरण्यवतयोश्चतुर्थस्तु महाविदेहेषु । तत्र चतुर्थे प्रतिभागे जन्मतः सद्भावतश्चामी भवन्ति । नाद्येषु त्रिषु प्रतिभागेषु (काले-स्ति) यो महाविदेहे जिनकल्पिकः स सुषमादिषु षट्स्वपि कालेषु संहरणतो भवेत् (पलिभागेसु अत्ति) भरतैरावतमहाविदेहेषु संजृतः संहरणतः सर्वेष्वपि प्रतिभागेषु देवकुर्वादिसंबन्धिषु भवन्तीति ।

चारित्रद्वारमाह--

पढमे वा बिइए वा, पडिवज्जइ संजमम्मि जिणकप्पं ।
पुव्वपडिवण्णओ पुण, अन्नयरे संजमे होज्जा ॥

प्रथमे वा सामायिकाख्ये, द्वितीये वा छेदोपस्थापनीयनाम्नि संयमे वर्तमानो, जिनकल्पं प्रतिपद्यते । तत्र मध्यमतीर्थंकरविदेहतीर्थंकृत्तीर्थवर्त्ती, प्रथमे संयमे । पूर्वपश्चिमतीर्थवर्त्ती तु द्वितीये,इति मन्तव्यं । पूर्वप्रतिपन्नः,पुनरसौ जिनकल्पिकोऽन्यतरस्मिन् सूक्ष्मसंपरायादावपि संयमे भवेत् ।

तीर्थ-पर्याय-द्वारद्वयमाह-

नियमा होइ स तित्थे, गिहिपरियाए जहन्नगुणतीसा ।
जइपरियाए वीसा, दोन्नु वि उक्कोसदेसूणा ॥

स जिनकल्पिको नियमात्तीर्थे भवति । न पुनर्व्यवच्छिन्ने, उत्पन्ने वा तीर्थे * पर्यायो द्विधा * गृहिपर्यायो यतिपर्यायश्च-तत्र गृहिपर्यायो जन्मपर्याय इत्येकोऽर्थः । तत्र जघन्यतः, एकोनत्रिंशतवर्षाणि । यतिपर्याये तु, जघन्यतो विंशतिवर्षाणि । तत्कर्षतस्तु, द्वयोरपि गृहिपर्याययतिपर्याययोर्देशोनां पूर्वकोटीं यदा यातो भवति तदा जिनकल्पं प्रतिपद्यते ।

तथा-ऽऽगम-वेद-द्वारे आह-

न करिंति आगमं ते, थीवज्जेउं वेदो इक्कतरो ।
पुव्वपडिवन्नओ पुण, होज्ज सवेओ अवेओ वा ॥

न कुर्वन्ति ते जिनकल्पिकाः आगमम् । पूर्वश्रुताध्ययनं, तच्छ्रुतं । विभोतसिकाक्षयहेतोरेकाग्रमनाः, सम्यगनुस्मरन्ति ।

वेदमंगीकृत्य प्राप्तिकाले स्त्रीवर्जे,एकतरः पुरुषवेदो,नपुंसकवेदो वा, असंक्लिष्टस्तस्य भवेत् । पूर्वप्रतिपन्नः पुनः, सवेदोऽवेदो वा भवेत् । तत्र जिनकल्पिकस्य तद्भवे केवलोत्पत्तिप्रतिषेधाद्वपशमश्रेण्यां वेदे उपशमिते सत्यवेदत्वम् । तदुक्तम्-"उवसमसेढीए वा, वेदे उवसमियम्मि व अवेदो य । न उ खविए तं जम्मे, केवलपडिसेहनाणाओ ॥" शेषकालं तु सवेद इति ।

अथ कल्प-लिङ्ग-लेश्या-द्वाराण्याह-

ठियमठियम्मि कप्पे, लिंगे भयणा उ दव्वलिंगेणं ।
तेऊहि सुक्काहिं पढ-मया अपढमया होज्ज सव्वासु ॥

स्थितकल्पे,अस्थितकल्पे च, मध्यमजिनमहाविदेहजिनभक्तोऽमी भवेयुः * लिङ्गे चिन्त्यमाने * तत्र ना तु,द्रव्यलिङ्गेन कार्यो । तुशब्दो विशेषणे । किं विशिनष्टि-प्रथमतः प्रतिपद्यमानो, द्रव्यलिङ्गयुक्त एव भवति । ऊर्ध्वमपि भावलिङ्गं नियमादुद्वहति । द्रव्यलिङ्गं तु, जीर्णत्वाद्धौरादिभिरुपहृतत्वाद्वा, कदाचित्तमभवत्यपि, उक्तं च-" इयरं तु जिणभावा, पहिं सययं न होइ वि कयाइ । न य तेण विणा वि तहा, जायइ से नावपरिहाणी " न इतरदिति द्रव्यलिङ्गम् ** लेश्यासु तेजसादिकासु, प्रथमकाः, प्रतिपद्यमाना भवन्ति । अप्रथमकास्तु पूर्वप्रतिपन्नाः, सर्वास्वपि शुक्लासु लेश्यासु भवेयुः। केवलमशुक्लासु वर्तमानो नात्यन्तं संक्लिष्टासु वर्तते, न च भूयांसं कालमिति ।

ध्यान-गणना-द्वारद्वयमाह-

धम्मेण उ परिवज्जइ, इयरेसु वि होज्ज अट्टझाणेसु ।
परिवत्तिसयपुहत्तं, सहसपुहत्तं च परिवज्जे ॥

धर्मेण ध्यानेन, तुशब्दस्य विशेषणार्थत्वात् । प्रवर्द्धमानेन सता, कल्पं प्रतिपद्यते । पूर्वप्रतिपन्नस्तु, इतरेष्वप्यार्तादिषु ध्यानेषु कर्मवैचित्र्यबलाद्भवेदपि,केवलं कुशलपरिणामस्यैवाहात्म्यात्तीव्रकर्मपरिणतिजनितः सोऽपि रौद्रार्तजनितोऽस्य प्रायो निरनुबन्धो भवति । तदुक्तम् "एवंच कुसलजोगो उ-द्दा मे तिण्ह धम्मपरिणामा । रुद्दट्टेसु विभासो, इमस्स पायं निरणुबंधो "॥ गणनाद्वारे प्रतिपत्तिः,प्रतिपद्यमानतामंगीकृत्योत्कर्षतः, शतपृथक्त्वमेकस्मिन् समये अमीषां भगवतां प्राप्यते । पूर्वप्रतिपन्नकानां पुनरुत्कर्षतः सहस्रपृथक्त्वं । कर्मभूमिषञ्चदशमप्येतावत्येवोत्कर्षतः प्राप्यमानत्वात् । जघन्यतस्तु प्रतिपद्यमानका एको,द्वौ, त्रयो,वेत्यादि । पूर्वप्रतिपन्नास्तु जघन्यतोऽपि सहस्रपृथक्त्वमेव। महाविदेहपञ्चके, सर्वदैवैतावतामवाप्यमानत्वात् । नवरमुत्कृष्टपदाज्जघन्यपदं लघुतरमिति ।

अभिग्रह-प्रव्राजना-मुण्डापना-द्वाराणि व्याचष्टे ।

भिक्खायरियाईया, अभिग्गहा नेव सो उ पव्वावे ।
उवदेसं पुण कुणती, धुव पव्वेएंति जाणित्ता ॥

भिक्षाचर्यां ऋजुत्वा गत्या प्रत्यागतिकादयो गोचरचर्याविशेषास्तदाद्योऽभिग्रहाः, इत्वरत्वादस्य न भवन्ति । जिनकल्पस्य पुनः हि यावत्कथिकस्तस्याऽभिग्रहस्तत्र च प्रतिनियता निरपवादाश्च गोचराद्ययस्तत्तत्पालनमेवास्य परमं विशुद्धिस्थानं। यदाह-" एयम्मि गोयराति, नियया नियमेण निरववाया य । तप्पालनं चिय परं, पगस्स विसुद्धिट्ठाणं तु " तथा नैवासौ साधून्यं प्रव्राजयति । उपलक्षणत्वात् न च मुण्डापयति । कल्पस्थितिरियमिति कृत्वा-ऽपदेशं पुनः करोति । प्रयच्छन्ति ध्रुवं प्रव्राजिनमवश्यप्रव्राजनशीलं विज्ञाय । कञ्चन तं च संविग्नगीतार्थसाधूनां समीपे प्रहिणोति ।

अथ मणसावत्ते वि से अणुग्घाय त्ति द्वारं ।

मनसापि सूक्ष्ममतिचारमात्रापन्नस्यास्य सर्वजघन्यं चतुर्गुरुकं प्रायश्चित्तम् ।

अथकारण-निष्प्रतिकर्म-द्वारे आह-

निप्पडिकम्मसरीरा, न कारणं अत्थि किंचि नाणाई ।
जंघाबलम्मि खीणे, अविहरमाणो वि नावज्जे ॥

निष्प्रतिकर्मशरीरा, अमी जगवन्तो, नास्तिमलादिकमप्यपनयन्ति । न वा चिकित्सादि कारयन्ति * न च तेषां कारणम्, * आलम्बनं ज्ञानादि किञ्चिद्विद्यते, यद्बलात्ते द्वितीयपदासेवनं विदध्युः ।

प्रकः * पन्थाम * तृतीयस्यामिति द्वारम् ।

तृतीयस्यां पौरुष्यां भिक्षाकालो, विहारकालोऽस्य भवति । शेषासु तु पौरुषीषु प्रायः कायोत्सर्गेणास्ते * जङ्घाबले परिक्षीणे पुनरविहरन्नपि विहारमकुर्वन्नपि नापद्यते, कमपि दोषं, किंतेऽत्रैव क्षेत्रे स्वकल्पस्थितिं स तु पालयतीति व्याख्यातं स्थितिद्वारं, तद्व्याख्याने चाभिहितः कल्पविहारः । बृ० १ उ० ।

व्यासार्थस्यस्वस्याः प्रस्तुतं द्वारमेव-

सयमे आउकालं, नाउं पुच्छित्तु वा बहूसेसं ।
सुबहुगुणलाभकंखी, विहारमन्नुज्जयं जयई ॥ ३७७ ॥

स्वयमेवायुष्कालं ज्ञात्वा, बहुशेषं श्रुतातिशयेन पृष्ट्वा च श्रुतातिशययुक्तमन्यं बहुशेषं ज्ञात्वा, सुबहुगुणलाभकाङ्क्षी सन्, साधुविहारं क्रियारूपमन्युद्यतं जनं प्रधानमिति गाथार्थः ।

प्रसङ्गमभिधाय पञ्चतुलनेति द्वारं व्याचिख्यासुराह-

गणि-उवज्झाय-पवित्ति+थेर-गणावच्छइआ इमे पंच ।
पायमहिगारिणो इह,तेसिमिमा होइ तुलणाओ ॥३७८॥

गणी गच्छाधिपः, आचार्यः, उपाध्यायः सूत्रप्रदः, प्रवृत्तिकरचितो प्रवर्तकः, स्थविरः, स्थिरीकरणात्, गणावच्छेदको गणादेशपालनक्षमः, एते पञ्चपुरुषाः, प्रायोऽधिकारिण इहाऽन्युद्यतविहारे । एतेषामियं वक्ष्यमाणा भवति, तुलनेति गाथार्थः ।

गणणिक्खेवित्तरिओ, गणिस्स जो वा ठिओ जहिं ठाणे ।
सो तं अप्पसमस्से-वं णिक्खिवइ इत्तरं चेव ॥३७९॥

गणनिक्षेप इत्वरः परिमितकालो, गणिनो भवति । यो वा स्थितो यत्र स्थाने उपाध्यायादौ, स तत्पदमात्मसमस्यैव निक्षिपतीत्वरमेवापरस्य साधारिति गाथार्थः ।

पिच्छामु ताव एए, केरिसया होंतिमस्स ठाणस्स ।
जोगाण वि पाएणं, णिव्वहणं दुक्करं होइ ॥ ३८० ॥

पश्यामस्तावदेते अभिनवाचार्यादयः, कीदृशा अवन्त्यस्य स्थानस्य प्रस्तुतस्येति तानवेति । अयोग्यानामनारोपणमेवेत्याशङ्क्याह-योग्यानामपि सामान्येन प्रायो निर्वहणं, प्रस्तुतस्य दुष्करं भवति, लोकसिद्धमेतदिति गाथार्थः ।

युक्त्या तुलनाप्रयोजनमाह-

ण य बहुगुणचाएणं, थोवगुणपसाहणं बुहजणाणं ।
इट्ठं कयाइ कज्जं, कुसला सुपइट्ठियारंभा ॥ ३८१ ॥

न च बहुगुणत्यागेन प्रामाणिकेन, स्तोकगुणप्रसाधनं, बुधजनानां विदुषामिष्टं, कदाचित्कार्यं, नैवेत्यर्थः । किमित्यत आह-कुशलाः सुप्रतिष्ठितारंभा भवन्तीति गाथार्थः ।

उपकरणद्वारमाश्रित्याह-

उवगरणं सुद्देसण, माणजुअं जमुचिअं सकप्पस्स ।
तं गेण्हइ तयन्ने, अहागडं जाव उचिअं तु ॥ ३८२ ॥

उपकरणं वस्त्रविशुद्धैषणामानयुक्तं, यदुचितं स्वकल्पस्य समर्थनीया, तत्तात्युत्सर्गेणादित एव, तदभावे सति, यथाकृतं गृह्णाति । यावदुचितमन्यद्भवति, तावदेवेति गाथार्थः ।

जाए उचिए अ तयं, वोसिरइ अहागडं विहाणेण ।
इय आणाविरयस्सिह, विण्णेअं तं पि तेण समं ॥३८३॥

जाते सत्युचितोपकरणे, तत् प्राक्तनं व्युत्सृजति । यथाकृतमुपकरणं, विधानेन सौत्रेण, इत्यस्यागो निस्पृहतया आज्ञाविरतस्येह लोकेऽपि विज्ञेयं । तदपि मौलमुपकरणं तेन समं पात्रास्येनेति गाथार्थः ।

किमित्यत आह-

आणा इत्थ पमाणं, विण्णेआ सव्वहेव परलोए ।
आराहणाअ तीए, धम्मो वज्झं पुण निमित्तं ॥३८४॥

आज्ञाऽत्र प्रमाणं विज्ञेया । सर्वथैव परलोके, न त्वन्यत् किञ्चित् आराधनेन तस्या धर्मः । आज्ञाबाह्यं पुनर्निमित्तमिति गाथार्थः ।

उवगरणं जवगारे, तीए आराहणस्सऽवट्टंतं ।
पावइ जहत्थनामं, इहरा अहिगरणयो नणिअं ॥३८५॥

उपकरणमप्युपकारे तस्याऽऽज्ञाया आराधनस्यावर्तमानं सत् प्राप्नोति, यथार्थनामोपकरणमिति । इतरथा तदाराधनोपकाराभावे सत्यधिकरणमेव ननितं तदुपकरणमिति गाथार्थः

परिकर्मद्वारमभिधातुमाह-

परिकम्मं पुण इहिंदि-आइं विणिअमणभावणा नेआ ।
तमवायादालोअण-विहिणा सम्मंतओ कुणइ ॥३८६॥

परिकर्म, पुनरिह प्रक्रमे इन्द्रियादिविनियमनभावना ज्ञेया भावनाभ्यासः । तत्परिकर्म अपायाद्यालोचनविधीनेन्द्रियादीनां सम्यक्त्वतः करोतीति गाथार्थः ।

इंदिअकसायजोगा, विणम्मिआ तेण पुव्वमेव णणु ।
सच्चं तहा वि जयए, तज्जयसिद्धिं गणंतो सो ॥ ३८७ ॥

इन्द्रियकषाययोगाः सर्वे एव विनियमितास्तेन साधुना पूर्वमेव ननु ? अत्रोत्तरं-सत्यमेतत्, तथापि यतते, स तज्जयादिन्द्रियादिजयात्सिद्धिं गणयन् प्रस्तुतस्येति गाथार्थः ।

इंदिअजोगेहिं तहा, णेहऽहिगारो जहा कसाएहिं ।
एएहिं विणा णेए, दुहवुड्ढीबीअजूआ ॥३८८॥

इन्द्रियैर्योगैस्तथा नेहाधिकारः प्रक्रमे । यथा कषायैः किमित्याह-एभिर्विना नैते इन्द्रियैर्योगा दुःखवृद्धिबीजभूताः । इति गाथार्थः ।

जेण उ ते वि कसाया, णो इंदिअजोगविरहिआ हुंति ।
तव्विणियमणं पि तओ, तयत्थमेवेत्थ कायव्वं ॥ ८९ ॥

येन पुनः कारणेन, तेऽपि कषायाः नेन्द्रियैर्योगविरहिता भवन्ति । तद्विनियमनमपि ततः कारणात् । तदर्थमेव कषायविनियमनार्थमत्र कर्तव्यमिति गाथार्थः ।

तपोभावनादिप्रतिपादनायाह-

इअ परिकम्मिअभावो-ऽणब्भत्थं पोरिसाइतिगुणत्तं ।
कुणइ बुहाविजयट्ठा, गिरिणइसीहेण दिट्ठंतो ॥३९०॥

(इय त्ति)एवं परिकर्मितभावः सन्नेन्द्रियादिविनियमनेनानभ्यस्तमसात्मीभूतं पूर्वं पौरुष्याद्यभ्युपलक्षणमेतत् त्रिगुणं तपः, करोति । त्रिवारासेवनेन इन्द्रियजयाय सात्मीभावेन बुद्धिजयार्थम् । गिरिनदीसिंहेनाऽत्र दृष्टान्तः । यथाऽसौ गिरिनदीं वेगवतीमसकृदुत्तरणेनापि, प्रगुणमुत्तरत्येवमसावबाधकं तपः करोतीति गाथार्थः ।

एतदेवाह-

इक्किक्कं ताव तवं, करेइ जह तेण कीरमाणेणं ।
हाणी ण होइ जइआ, वि होइ छम्मासुवस्सग्गो ॥३९१॥

एकैकं पौरुष्यादि तावत्तपः करोति सात्मीभावेन ।

यथा तेन तपसाह-

अप्पाहारस्स ण इं-दिआइं विसएसु संपयट्टंति ।
नेअ किलम्मइ तवसा, रसिएसु न सज्जई आवि ॥३९२॥

अल्पाहारस्य तपसा, नेन्द्रियाणि स्पर्शनादीनि, विषयेषु स्पर्शनादिषु, संप्रवर्तन्ते । धातूद्रेकाभावाच्च क्लाम्यति । तपसा-रसिकेष्वशनादिषु, न सज्जते, चापि । अपरिजोगेनानादरादिति गाथार्थः ।

तवभावणाए पंचिं-दिआणि दंताणि जस्स वसमिंति ।
इंदियजोग्गाइरिओ, समाहिकरणाइं कारेइ ॥ ३९३ ॥

तपोभावनया हेतुभूतया, पञ्चेन्द्रियाणि दान्तानि सन्ति यस्य वशमागच्छन्ति प्राणिनः, स इन्द्रिययोग्याचार्यः इन्द्रियप्रयु-

खनक्रियागुरुः । समाधिकरणानि, समाधिव्यापारान् कारयतीन्द्रियाणि, इति गाथार्थः ।

द्वारान्तरसंबन्धाभिधित्सयाह-

इअ तवणिम्माओ खलु, पच्छा सो सत्तभावणं कुणइ ।
निद्दाजयविजयट्ठं, तस्य उ पडिमा इमा पंच ॥३९४॥

(इअ) एवं तपोनिर्मातः खलु, पश्चादसौ मुनिः,सत्त्वभावनां करोति । सत्त्वाभ्यासमित्यर्थः । निद्राभयविजयार्थमेतत्करोति । तत्र तु प्रतिमाः सत्त्वभावनाभामेताः पञ्चेति गाथार्थः ।

पढमा उवस्सयम्मि, बीया बहिं तइया चउक्कम्मि ।
सुण्णघरम्मि चउत्थी, तह पंचमिआ मसाणम्मि ॥३९५॥

प्रथमोपाश्रये प्रतिमा, द्वितीया बहिरुपाश्रयस्य, तृतीया चतुर्थे स्थाने संबन्धिनि, शून्यगृहे चतुर्थी स्थानसंबन्धिन्येव, तथा पञ्चमी श्मशाने प्रतिमा । इति गाथार्थः ।

एयासु चेव थोवं, पुव्वपवत्तं जिणइ निद्दमसो ।
मूसगनिक्काओ तह, भयं च सहसुब्भवं अजिअं ॥३९६॥

एतासु प्रतिमासु स्तोकस्तोकं, यथा समाधिना पूर्वप्रवृत्तां जयति निद्रामसौ मूषिकपृष्ठादौ । तथा आदिशब्दान्मार्जारादिपरिग्रहः । भयं च सहसोद्भवमजितं जयतीति गाथार्थः ।

एएण सो कमेणं, भिन्नगतक्करसुराइकयभेअं ।
जिणिऊण महासत्तो, वहइ जयं निब्भओ सयलं ॥३९७॥

अनेनासौ क्रमेण यथोपन्यस्तेन, भिन्नकतस्करसुरादिकृतभेतद्भयं जित्वा-महासत्त्वः सर्वासु प्रतिमासु वहति भयं प्रस्तुतं निर्नेयः सकलमिति गाथार्थः ।

श्रुतभावनामाह-

अह सुत्तभावणं सो, एगग्गमणोऽणाउलो उ भयवं ।
कालपरिमाणहेऊ, सव्वत्थं सव्वहा कुणइ ॥ ३९८ ॥

अथ सूत्रभावनामसौ श्रुधिरेकाग्रमना अन्तःकरणेन अनाकुलो बहिर्वृत्त्या भगवानसौ, कालपरिमाणहेतोस्तदभ्यासादेव तद्धेतोः स्वप्नस्यां सर्वथा करोत्युच्छ्वासादिमानेनेति गाथार्थः ।

एतदेवाह-

उस्सासाओ पाणा, तओ-अ थोवो तओ वि अ मुहुत्तो ।
एएहिं पोरिसीओ, ताहिं वि णिसाइ नाणेइ ॥३९९॥

उच्छ्वासात् प्राणादिनोच्छ्वासनिःश्वासः । ततश्च प्राणात्, स्तोकः, सप्तप्राणमानः । ततोऽपि च स्तोकान्मुहूर्तो, द्विघटिकाकालः । एभिर्मुहूर्तैः पौरुष्यः । ताभिरपि पौरुषीभिः, निशादिवसादि जानाति, सूत्राभ्यासतः । इति गाथार्थः ।

एसो उवओगाउ, सदेव सो मूढलक्खयाए उ ।
दोसं अपावमाणो, करेइ किच्चं अविवरीअं ॥ ४०० ॥

अत उपयोगात् सूत्राभ्यासकरणात्, सदैवासौऽमूढलक्षतया कारणेन दोषमप्राप्नुवन्, निरतिचारः सन् करोति कृत्यं, विहितानुष्ठानविपरीतमिति गाथार्थः ।

मेहाइच्छएसुं उ-जओ कालमहावा उवस्सग्गे ।
पेहाइजिक्खपंथे, जाणइ कालं विणा ठाइ ॥४०१॥

मेघादिच्छेदेषु विभागेषूभयकालं प्रारम्भसमाप्तिरूपम् । अथवोपसर्गे दिव्यादौ । प्रेक्षादावुपकरणस्य भिक्षापथे औचित्येन जानाति, कालं योग्यं विना स्थास्यतीति गाथार्थः ।

एकत्वभावनामभिधातुमाह-

एगत्तभावणं तह, गुरुमाइसु दिट्ठिमाइपरिहारा ।
भावइ छिण्णममत्तो, तत्तं हिअयम्मि काऊणं ॥४०२॥

एकत्वभावनां, तथाऽसौ, यतिगुर्वादिषु दृष्ट्यादिपरिहाराद्-क्षेत्रालापपरिहारेण भावयत्यवश्यस्यति । छिन्नममत्वः संस्तत्त्वं हृदये कृत्वा-वक्ष्यमाणमिति गाथार्थः ।

एगो आया संजो-गिअं तुऽसेसं इमस्स पाएणं ।
दुक्खनिमित्तं सव्वं, मोत्तुं मज्झत्थभावं तु ॥ ४०३ ॥

एक आत्मा तत्त्वतः संयोगिकं । त्वशेषमस्य देहादि, प्रायेण दुःखनिमित्तं सर्वमेतत् । हितस्तु मध्यस्थभावो यस्य सर्वत्रेति गाथार्थः ।

इय जारियपरमत्थो, समसुहदुक्खोवहीअरो होइ ।
तत्तो अ सो कमेणं, साहेइ जहिच्छिअं कज्जं ॥४०४॥

टीका तु—(मूलप्रतावप्रास्तत्वाच्चलिखिता) ।

एगत्तभावणाए, ण कामभोगे गणे सरीरे वा ।
सज्जइ वेरग्गगओ, फासेइ अणुत्तरं करणं ॥ ४०५ ॥

एकत्वभावनया ज्ञाप्यमानया, न कामभोगयोस्तथा, गणे, शरीरे वा, सज्जते, सङ्गं गच्छति । एवं वैराग्यगतः सन्, स्पृशत्यनुत्तरं करणं, प्रधानयोगनिमित्तमितिगाथार्थः ।

बलभावनामाह-

इअ एगत्तसमेओ, सारीरं माणसं च दुविहं पि ।
भावइ बलं महप्पा, उस्सग्गधिईसरूवं तु ॥ ४०६ ॥

एवमेकत्वभावनासमेतः सन्,शारीरं, मानसं च,द्विविधमप्येतद् भावयति बलम्, महात्माऽसौ, कायोत्सर्गधृतिस्वरूपं यथा संख्यमिति गाथार्थः ।

पायं उस्सग्गेणं, तस्स निईभावणावन्ना एसो ।
संघयणे वि हु जायइ, एरिहं भाराइबलतुल्लो ॥ ४०७ ॥

प्रायः कायोत्सर्गेण,तस्य यतेः स्थितिभावनाबलाच्चैव कायोत्सर्गः, संहननेऽपि सति जायते । इदानीं भारादिबलतुल्यः, शक्तौ सत्यामप्यभ्यासतो भारवहनिदर्शनादिति गाथार्थः ।

सइ सुहजोगेण तहा, जं तं सुहभावठिज्जरूवाओ ।
एत्तो चिय कायव्वा, धिई णिहाणाइलाभो व्व ॥४०८॥

सदा शुभयोगेन, तथा तस्य स्थितिरिति वर्तते । यद्यस्मादेवं तच्छुभभावस्थैर्यरूपा । अत एव स्थितिसंपादनार्थं कर्तव्या धृतिस्तेन निधानादिलाभ इवेष्टसिद्धेरिति गाथार्थः ।

धिइबलए बद्धकच्छो, कम्म जयट्ठाअ ओज्जओ महसो ।
सव्वत्था अविसाई, उवसग्गसहो दढं होइ ॥ ४०९ ॥

धृतिबलनिबद्धकक्षः, सत्कर्मजयार्थमुद्यतो, मतिमानेव सर्वत्राविषादिभावेनोपसर्गसहो, दृढमत्यर्थं भवतीति गाथार्थः ।

चरमभावनामभिधाय विशेषमाह-

सव्वासु भावणासुं, एसो विही न होज्ज ओहेणं ।
एत्थं चसद्दगहिओ, तयणंतरं चेव केइ त्ति ॥ ४१० ॥

सर्वासु भावनासु अनन्तरोदितासु, एष विधिस्तु वक्ष्यमाणो भवत्योघेन । अत्र चशब्दगृहीतो द्वारगाथायां, तदनन्तरं विध्यन्तरमेव केचनेति गाथार्थः ।

जिणकप्पिअपडिरूवी, गच्छे चिअ कुणइ दुविहपरिकम्मं ।
आहारोवहिमाई-सु ताहे पडिवज्जए कप्पं ॥ ४११ ॥

जिनकल्पिकप्रतिरूपी तत्सदृशो. गच्छ एव स्थितः सन्, करोति, द्विविधं परिकर्म, बाह्यमान्तरं च, आहारोपध्यादिषु विषयेषु, ततस्तत्कृत्वा प्रतिपद्यते कल्पमिति गाथार्थः ।

एतदेवाह—

तइआए उ सेवाइं, पंचऽण्णयराअ जयइ आहारं ।
दोण्हऽण्णयराअ पुणो, उवहिं च अहागडं चेव ॥४१२॥

तृतीयायां पौरुष्यामलेपकृतं वस्त्रादि, पञ्चान्यतरया एषणया, भजते सेवते आहारं, द्वयोरन्यतरया पुनरेषणयोपधिं च भजते। यथाकृतं चैवोपधिं, नाम्यं, तत्रैकया एकैषणा आहारस्य सप्त । यथोक्तम्-" संसट्ठासंसट्ठा, उद्धडा तह होइ अप्पलेवा य । उग्गहिया पग्गहिया, उज्झियधम्मा य सत्तमिया " ॥ १ ॥ "तत्थ पंचसुग्गहो, एक्काए अभिग्गहो असणस्स । एक्काए चेव पाणस्स," ॥ वस्त्रस्य त्वेषणाद्विकतस्त्रो । यथोक्तम्-" उद्दिट्ठपेहअंतर-मोसिक्खमकम्मा चउव्विहा जाणिया । वत्थेसणा जईणं, जिणेहि जिअरागदोसेहिं" ॥ 'वत्थं पि दोसु गिण्हइ' इति गाथानावार्थः ।

पाणिपडिग्गहपत्तो, सचेलनेएण वा वि दुविहं तु ।
जो जहरूवो होहिइ, तह परिकम्मए अप्पं ॥ ४१३ ॥

पाणिप्रतिग्रहपात्रयद्भेदेन सचेलाचेलनेदेन चापि, द्विविधं तु प्रस्तुतं परिकर्म । यो यथारूपो भविष्यति जिनकल्पिकः । स तथा तेनैव प्रकारेण, परिकर्मयत्यात्मानमिति गाथार्थः ।

चरमद्वाराभिधित्सयाह-

निम्मामो अ तहिं सो, गच्छाई सव्वहाऽणुजाणित्ता ।
पुव्वोइआण सम्मं, पच्छा उवसंपइ विहिणा ॥४१४॥

निर्ममत्वश्च, तत्र परिकर्मणयसौ, गच्छादिमं सर्वथाऽनुज्ञाप्य प्रागुक्तं पदं, पूर्वोदितानां, सम्यगित्वरस्थापितानां, पश्चादुपसंपद्यते विधिना तेनैवेति गाथार्थः ।

खामेइ तओ संघं, सबालवुड्ढं जहोचिअं एवं ।
अच्चंतं संविग्गो, पुव्वविरुद्धे विसेसेणं ॥४१५॥

क्षामयति ततः सङ्घं, सामान्येन सबालवृद्धं, यथोचितमेव । वक्ष्यमाणनीत्या अत्यन्तं संवेगवान् सन्, पूर्वविरुद्धान् विशेषेण कांश्चनेति गाथार्थः ।

जं किंचि पमाएणं, ण सुट्ठु जे वट्टिअं मए पुव्विं ।
तं भे खामेमि अहं, णिस्सल्लो णिक्कसाओ त्ति ॥४१६॥

यत्किंचित् प्रमादेन हेतुना न सुष्ठु (भे) भवतां वर्तितं मया पूर्वं, तद् (मे) युष्मान् क्षमयाम्यहं । निःशल्यो, निःकषायोऽस्मि संवृत्त इति गाथार्थः ।

दव्वाई अणुकूले, महाविभूईए अह जिणाईणं ।
अज्जासे पडिवज्जइ, जिणकप्पं असइ वड्ढरुक्खे ॥४१७॥

द्रव्यादावनुकूले सति महाविभूत्या दानादिकया, अथ जिनादीनामतिशायिनामभ्यासे, प्रतिपद्यते जिनकल्पमुत्सर्गेण । असति च वटवृक्षेऽपवादं । इति गाथार्थः ।

दाराणुन्नाओ इह, सो पुण तइयाअ भावणासारं ।
काऊण तं विहाणं, णिरविक्खो सव्वहा वसइ ॥४१८॥

द्वारानुज्ञातो द्रष्टव्यः । स पुनर्भुक्तिस्तृतीयायां पौरुष्यां, भावनासारं सत्कृत्वा, तन्नमस्कारादिप्रतिपत्तिविधानं, निरपेक्षः सन्, सर्वथा व्रजति ततः । इति गाथार्थः ।

पक्खीपत्तुवगरणे, गच्छारामाउ विणिग्गए तम्मि ।
चक्खुविसयं अईए, अहंति आणंदिया साहू ॥ ४१९ ॥

पक्षिपत्रोपकरणे अमुकस्मिन्काकपक्षौ, गच्छरामात्सुखसंख्यातिक्रान्ते तस्मिन् जिनकल्पिके, चक्षुर्विषयमतीते अदर्शनीभूते, आगच्छन्ति स्वबसतिमानन्दिताः, साधवः तत्प्रतिपत्तयेति गाथार्थः ।

आभोएउं खेत्तं, णिव्वाघाएण मासणिव्वाहं ।
गंतुण तत्थ विहरइ, एस विहारो समासेणं ॥ ४२० ॥

(आभुग्र) विज्ञाय क्षेत्रं निर्व्याघातेन हेतुभूतेन, (मासणिव्वाहं) मासनिर्वहणसमर्थं गत्वा-तत्र क्षेत्रे विहरति । स्वनीतिं पालयति एष विहारः, समासेनास्य भगवतः, इति गाथार्थः ।

एत्थ य सामायारी, इमस्स जा होइ तं पवक्खामि ।
जयणाअ दसविहाए, गुरूवएसाणुसारेणं ॥४२१॥

अत्र च क्षेत्रे सामाचारी स्थितिरस्य या एवं जिनकल्पिकस्य । तां प्रवक्ष्यामि । भजनया विकल्पेन दशविधायां सामाचार्यां वक्ष्यमाणायां गुरूपदेशानुसारेण, न स्वमनीषिकयेति गाथार्थः ।

दशविधामेवादेशाहाह-

इच्छा मिच्छा तहका-रो आवस्सिए निसीहिए ऽऽपुच्छा ।
पडिपुच्छ-छंदण-निमं-तणा य उवसंपया चेव ॥४२२॥

इच्छा, मिथ्या, तथाकार, इति । कारशब्दः प्रत्येकमभिसंबध्यते इच्छाकारो, मिथ्याकारः, तथाकार, इति । तथा परजनने सर्वत्रेच्छाकारः। दोष नोदने मिथ्याकारः। तथा आवश्यकी नैषेधिकी च आपृच्छा, वसतिनिर्गमे आवश्यकी, प्रवेशे नैषेधिकी, च स्वकार्यप्रवृत्तौ वा, पृच्छा तथा प्रतिपृच्छा, छन्दना निमन्त्रणा, च तदाविधकरणकाले, प्रतिपृच्छापूर्वगृहीतेनाशनादिना छन्दना निमन्त्रणा भवत्यगृहीतेन उपसंपच्चैव, श्रुताद्यर्थमिति गाथार्थः ।

अत्र जिनकल्पिकसामाचारीमाह-

आवस्सिणिसीहिमिच्छा-ऽऽपुच्छणमुवसंपयम्मि ति गिहेसु ।
अन्ना सामायारी, ण होइ सेसे सिआ पंच ॥ ४२३ ॥

आवश्यकी नैषेधिकी मिथ्येति । मिथ्याकारपृच्छामुपसंपदं

गृहिस्वौचित्येन सर्वं करोति । अन्याः सामाचार्यं इच्छाकार्याद्या न भवन्ति (से) तस्य शेषाः पञ्च प्रयोजनाभावादिति गाथार्थः ।

आदेशान्तरमाह-

आवस्सिअं निसीहिअं, मोत्तुं उवसंपयं च गिहिएसु ।
सेसा सामायारी, ण होइ जिणकप्पिए सत्ता ॥४२४॥

आवश्यकीं नैषेधिकीं मुक्त्वा उपसंपदं च, गृहिष्वाराभादिष्वाश्रितः शेषाः सामाचार्यः पृच्छाद्या अपि न भवन्ति, जिनकल्पिके सन्ति । प्रयोजनाभावादेवेति गाथार्थः ।

अहवा वि चक्कवाले, सामायारी उ जस्स जा जोग्गा ।
सा सव्वा वत्तव्वा, सुअमाईआ इमा मेरा ॥ ४२५ ॥

अथवाऽपि चक्रवाले नित्यकर्मणि, सामाचारी तु यस्य या योग्या जिनकल्पिकादेः । सा सर्वा वक्तव्या । अन्तरे श्रुतादिका ज्ञेया मर्यादा वक्ष्यमाणा । इति गाथार्थः ।

सुअ-संघयणु-वसग्गो, आयंको वेअणा कइजणा य ।
थंडिल्ल-वसहि-केच्चिर-मोच्चारे चेव पासवणे ॥४२६॥

श्रुतसंहननोपसर्गा इत्येतद्विषयोऽस्य विधिर्वक्तव्यः । तथा-आतङ्कः, वेदना, कियन्तो जनाश्चेति, द्वारत्रयमाश्रित्य-तथा-स्थाण्डिल्य-वसति-कियच्चिर-उच्चाराद्याश्रित्य--तथा-उच्चारे चैव प्रश्रवणे चेत्येतद्विषये । इति गाथार्थः ।

ओआसे तणफलए, सारक्खणया य संठवणया य ।
पाहुडिओऽगणीदीवे,ओहाण वसे कइ जणा उ ॥४२७॥

तथा अवकाशे तृणफलके एतद्विषय इत्यर्थः । तथा संरक्षणता च संस्थापना चेति द्वारद्वयमाश्रित्य-तथा-प्राभृतिकाग्निदीपेचेतद्विषयस्तयावधानं वस्त्यन्ति कति जनाश्चेत्येतद् द्वारद्वयमाश्रित्येति च गाथासमुदायार्थः ।

निक्खायरिआ-पाणय-लेवालेवे अ तह अलेवे अ ।
आयंबिल-पडिमाअ, जिणकप्पे मासकप्पे य ॥ ४२८ ॥

निक्षाचर्या-पानक इत्येतद्विषयो, लेपालेपे वस्तुनि, तथा-अलेपे चैतद्विषयश्चेत्यर्थः । तथा-आम्ल-प्रतिमे, समाश्रित्य-जिनकल्पे, मासकल्पं चैतद्द्वारमधिकृत्य-विधिर्वक्तव्यः इति गाथासमुदायार्थः । एतास्तिस्रोऽपि द्वारगाथाः । आसामयवार्थः प्रतिद्वारे स्पष्ट उच्यते ।

तत्र श्रुत-द्वारमधिकृत्याह-

आयारवत्थु तइयं, जहण्णयं होइ नवमपुव्वस्स ।
तहियं कालण्णाणं, दस उक्कोसेण निण्णाइं ॥४२९॥

आचारवस्तु तृतीयं, संख्यया जघन्यकं भवति । नवमपूर्वस्य संबन्धिश्रुतपर्यायस्तत्र कालज्ञानं भवतीति कृत्वा—दशपूर्वाण्युत्कृष्टतस्तु भिन्नानि श्रुतपर्यायतः । इति गाथार्थः ।

संहनन-द्वारमाश्रित्याह-

पढमिल्लुगसंघयणा, थिइए पुण वज्जकुड्डसामाणा ।
पडिवज्जंति इमं खलु, कप्पं सेसाण तु कयाइ ॥४३०॥

प्रथमिल्लुकसंहननात् वज्रऋषभनाराचसंहनना इत्यर्थः । धृ (वृ) त्या पुनर्वज्रकुड्यसमानाः प्रधानवृत्तय इति भावः । प्रतिपद्यन्त एनं खलु कल्पमधिकृतं जिनकल्पं । शेषाणां तु कदाचित्तदन्यसंहनिनः । इति गाथार्थः ।

उपसर्ग-द्वारविधिमाह-

दिव्वाई उवसग्गा, भइआ एअस्स जइ पुण हुवंति ।
तो अव्वहिओ विसहइ,णिच्चलचित्तो महासत्तो ॥४३१॥

दिव्यादय उपसर्गा ज्ञाव्याः । अस्य जिनकल्पिकस्य भवन्ति, वा नवा ? । यदि पुनर्भवन्ति कथञ्चित, ततोऽव्यथितः सन्विसहते सानुपसर्गान् । निश्चलचित्तो महासत्त्वः स्वरूपस्वभावेन—इति गाथार्थः ।

आतङ्क-द्वारविधिमाह-

आतंको जरमाई, से वि हु जइओ इमस्स जइ होइ ।
णिप्पडिकम्मसरीरो, अहियासइ तं पि एमेव ॥४३२॥

आतङ्को ज्वरादिः, सद्योघाती रोगोऽसावपि भाज्योऽस्य भवति । स वा यदि भवति कथंचित्ततः निष्प्रतिकर्मशरीरः सम्यधिसहते, तमप्यातङ्कमेवमेव । निश्चलचित्ततयेति गाथार्थः ।

वेदना-द्वारविधिमाह-

अब्भुवगमिआ उवक्कमाय तस्स वेअणा भवे दुविहा ।
धुवलोआई पढमा, जरविवागाइआ बिइआ ॥ ४३३ ॥

आभ्युपगमिकी, औपक्रमिकी च । तस्य जिनकल्पिकस्य वेदना भवति द्विविधा । ध्रुवलोचाद्या प्रथमा वेदना । ज्वरविपाकादिका द्वितीया वेदनेति गाथार्थः ।

कियन्तो जना इति द्वारविधिमाह-

एगो अ एस भयवं, णिक्किक्खाअ सव्वहेव सव्वत्थ ।
भावेण होइ निअमा, वसहिम्मि दुवण्हं जइआं ॥४३४॥

एक एवैष भगवान् जिनकल्पिकः, निरपेक्षया सर्वथैव सर्वत्र वस्तुनि, भावेनानिश्रत्वेन भवति नियमात् । वसत्यादौ द्रव्यतो ज्ञाव्यः । एकान्तोऽनेको वेति गाथार्थः ।

स्थाण्डिल्य-द्वारमाह-

उच्चारे पासवणे, उस्सग्गं कुणइ थंडिले पढमे ।
तत्थेव य पडिनिग्गे, कयकिच्चो उज्जुए वत्थे ॥ ४३५ ॥

उच्चारे प्रश्रवणे एतद्विषयमित्यर्थः । व्युत्सर्गं करोति । स्थण्डिले प्रथमेऽनवपातादिगुणवति । तत्रैव च परिजीर्णानि सन्ति । कृतकृत्यः स तूज्जुकति, वस्त्राणीति गाथार्थः ।

वसति-द्वारविधिमाह-

अममत्ताऽपरिकम्मा, दारविवज्जभग्गजोगपरिहीणा ।
जिणवसहीयेराण वि, मोत्तूण पमज्जणमकज्जे ॥४३६॥

अममत्वाऽममेयमित्यनिश्रद्वाररहिता । अपरिकर्मा, साधुनिमित्तमाच्छेद्यादिपरिकर्मवर्जिता । द्वारविवज्र-जन्मयोग-परिहीणा, द्वारविवज्रयोगः, स्थगनं पूरणरूपं । भग्नयोगः, पुनः संस्करणमेतच्छून्या जिनवसतिः । अस्यानपवादानुष्ठानपरत्वात् । स्थविराणामप्येवंभूतैव वसतिः । मुक्त्वा प्रमार्जनं वसतेरेवाकार्यं मिति पुष्टमालम्बनं विहायैवंभूतेति गाथार्थः ।

कियच्चिर-द्वारविधिमाह-

केच्चिरकालं वसाहिहि, एवं पुच्छंति जायणा समए ।
जत्थ गिही सा वसही,ण होइ एअस्स णिअमेण ॥४३७॥

कियचिरं कालं वस्तव्यं यूयमेवं पृच्छन्ति. याचनासमये काले, यत्र गृहिणस्तत्स्वामिनः, सा वसतिरेवंभूता न भवत्येव, तस्य जिनकल्पिकस्य नियमेन सूक्ष्ममप्यमत्वयोगादिति गाथार्थः ।

उच्चार-द्वारविधिमाह-

नो उच्चारो एत्थं, आयरिअव्वो कयाइवि जत्थ ।
एवं भणंति ते सा, वि हु पडिकुट्ठ त्ति अ एअस्स ॥४३७॥

नोच्चारोऽत्र प्रदेशे आचरितव्यः कदाचिदपि । यत्र वसतावेवं भणन्ति दातारः, साऽपि प्रतिकुष्टैव, जगवत एतस्य वसतिरिति गाथार्थः ।

प्रश्रवण-द्वारविधिमाह-

पासवणं पि अ एत्थ, इमम्मि देसम्मि ण उण अन्नत्थ ।
कायव्वं ति भणंति हु, जीए एसा वि णो जोग्गा ॥४३८॥

प्रश्रवणमपि चाऽत्र वसतौ, अस्मिन् देशे विवक्षित एव । न पुनरन्यत्र देशे कर्तव्यमिति भणन्ति, यस्यां वसतौ । एषा पि न योग्याऽस्येति गाथार्थः । व्याख्याता प्रथमा द्वारगाथा ।

द्वितीया व्याख्यायते । तत्रावकाश-द्वारविधिमाह-

ओवासो वि अ एत्थं, एसो तुज्झं ति न पुण एसो वि ।
एव वि भणंति जहिअं, सा वि ण सुद्धा इमस्स भवे ॥४४०॥

अवकाशोऽपि चात्र वसतौ, एष युष्माकं नियतः । न पुनरेषोऽपि, एवमपि भणन्ति, यस्यां वसतौ दातारः । सापि न शुद्धाऽस्य भवेद्वसतिरिति गाथार्थः ।

तृणफलक-द्वारविधिमाह-

एवं तणफलगेसु वि, जत्थ विआरो उ होइ निअमेणं ।
एसा वि हु दुल्लवा, इमस्स एवंविहा चेव ॥ ४४१ ॥

एवं तृणफलकेष्वपि, यत्र विचारस्तु भवति, तत्कृतनियमेनैषापि वसतिर्दुर्लभ्या, पुरुषे एवंविधा चैवाशुद्धेति गाथार्थः ।

संरक्षण-द्वारविधिमाह-

सारक्खसु त्ति तत्थेव, किंचि वत्थुं अहिगिच्च गोणाई ।
जीए तस्सारक्खण-माह, गिही सा वि हु अजोग्गा ॥४४२॥

सारक्षणेति तत्रैव वसतौ, किञ्चिद्वस्तु अधिकृत्य, गवादि वस्यां तत्संरक्षणमाह गृही । गवाद्यपि रक्षणीयमिति । साऽपि वसतिरयोग्येति गाथार्थः ।

संस्थापना-द्वारविधिमाह--

संठवणा सक्कारो, पमाणिएऽणुवेहमो भंते ! ।
कायव्वं ति अ जीए, वि भणइ गिही ऽसो विऽजोग त्ति ॥४४३॥

संस्थापना संस्कारोऽभिधीयते । पतन्त्याः सत्या अनुत्प्रेक्षा भदन्त! कर्तव्येति च नोपेक्षितव्येत्यर्थः । यस्यामपि जणति गृही, ततोऽसावप्ययोग्या वसतिरिति गाथार्थः ।

मूलगाथाचशब्दार्थमाह--

अन्नं वा अभिओगं, चसद्दसंसूइअं जहिं कुणइ ।
दाया चित्तसरूवं, जोगा णेसा वि एअस्स ॥४४४॥

अन्यं चाभियोगं चशब्दसंसूचितं, यत्र करोति वसतौ दाता चित्रस्वरूपं । योग्यानैवाऽप्येतस्य वसतिरिति गाथार्थः ।

प्राभृतिका-द्वारविधिमाह--

पाहुडिआ जीएँ वत्ती, कज्जइ ओसप्पणाइअं तत्थ ।
विक्खित्तठाणसज्झा-इ अग्गहणे अंतरायं च ॥४४५॥

प्राभृतिका यस्यां वसतौ, बलिः क्रियतेऽवसर्पणादि तत्र तद्भक्त्या भवति । विक्षिप्तस्य बलेः स्थानात्कायोत्सर्गतः शकुनाद्यग्रहणे सत्यन्तरायं च भवतीति गाथार्थः ।

अग्नि-द्वारविधिमाह-

अग्गित्ति साऽग्गिणी जा, पमज्जणे रेणुमाइवाघाओ ।
अपमज्जणे अकिरिआ, जोईफुसणम्मि य विभासा ॥४४६॥

अग्निरिति, साऽग्निर्या वसतिप्रमार्जने तत्र रेणुकादिना व्याघातोऽग्नेः । अप्रमार्जने सत्यक्रिया आकाशभङ्गो, ज्योतिःस्पर्शने च, विनाशोज्ज्वालन चाङ्गारादाविति गाथार्थः ।

दीप-द्वारविधिमाह-

दीविते सदीवा जा, तीए विसेसो उ होइ जोइम्मि ।
एत्तो चिअ इह भेओ, सेसा पुव्वाइआ दोसा ॥४४७॥

दीपिते सदीपा या वसतिः, तस्यां विशेषस्तु सदीपायां भवति ज्योतिषि । तद्भावेन स्पर्शसंभवादत एव कारणादिहाग्नेर्भेदो द्वारस्य । द्वारान्तराच्छेषाः पूर्वोक्ता दोषाः प्रमार्जनादयः । इति गाथार्थः ।

अवधान-द्वारविधिमाह-

ओहाणं अम्हाण वि गेहेसु-वओगदायगो त्तंसि ।
होहिसि भणंति हुंति, जीए एसा वि से ण भवे ॥४४८॥

अवधानं नामास्माकमपि गृहस्योपयोगदाता त्वमसि जगवन्न भविष्यसि ? जणन्ति, तिष्ठति सति यस्यां वसतौ, एषापि (से) तस्य जिनकल्पिकस्य न भवेदिति गाथार्थः ।

कियज्जन-द्वारविधिमाह-

तह कइ जणा त्ति तुम्हे, वसहिं एत्थं ति एवमवि जीए ।
भणइ गिही ऽणुन्नाए, परिहरए णवरमेअं पि ॥४४९॥

तथा कियन्तो जना इति यूयं वत्स्यथाऽत्र वसताविति ? एवमपि यस्यां वसतौ जणति, गृही दाता ऽनुज्ञायां प्रस्तुतायां । परिहरत्यसौ महामुनिर्नवरमेतामपि वसतिमिति गाथार्थः ।

परिहारप्रयोजनमाह-

सुहुममवि हु अचिअत्तं, परिहरए सो परस्स निअमेणं ।
जं तेण तुमहाओ, वज्जइ अन्नं पि तज्जणणिं ॥४५०॥

सूक्ष्ममप्यचियत्तमप्रीतिलक्षणं परिहरत्यसौ भगवान् परस्य नियमेन । यद् यस्माद् तेन कारणेन तुशब्दात् मूलगाथोपात्ताद् वर्जयत्यन्यामपि वसतिं तज्जननीमेवंविधप्रीतिजननीं न च ममत्वमन्तरेण तथा तथा विचारः क्रियत इति गाथार्थः । व्याख्याता द्वितीया मूलगाथा ।

अधुना तृतीया व्याख्यायते । तत्र भिक्षाचर्याद्वारविधिमाह-

निक्खायरिआणिअमा, तइआए एसणा अभिग्गहिआ ।
एअस्स पुव्वभणिआ, एक्का चिअ होइ नत्तस्स ॥४५१॥

निक्षाचर्यानियमानि,योगेन तृतीयायां पौरुष्यामेषणा च अहणैषणाऽभिगृहीता भवत्यस्य पूर्वभणिता जिनकल्पिकस्य । एकैव भवति नक्तस्य न द्वितीयेति गाथार्थः ।

पानक-द्वारविधिमाह-

पाणगगहणे एवं, ण सेसकालं पओअणाजावो ।

जाणइ सुआइसयउ, सरूवमरूवं च सो सव्वं ॥४५२॥
पानकग्रहणेऽप्येवमस्य न शेषकाले, प्रयोजनाभावकारणात् । संसक्तग्रहणदोषपरिहारमाह-जानाति, श्रुतातिशयेनैव शुरूपशुद्धं च, स सर्वं पानकमिति गाथार्थः ।

लेपालेप-द्वारविधिमाह-

लेवालेवं ति इह, लेवामेणं अलेवमं जं तु ।
असणं सेसं मिस्सं, दुगं पि इह होइ विसेअं ॥४५३॥

लेपालेपमित्यधिकारलेपवता व्यञ्जनादिना, लेपवत् यदोदनादि । किमुक्तं भवति-अन्येन संमिश्रं वस्त्वन्तरेण, द्वितीयमप्यत्र भवतीति विज्ञेयं । भक्तं पानं चेति गाथार्थः ।

अलेप-द्वारविधिमाह-

अलेवं पयईए, केवलगं पि हु न तस्सरूवं तु ।
अण्णे ऽऽलेवकारी, अलेवमिति सूरओ विंति ॥४५४॥

अलेपं, प्रकृत्या स्वरूपेण, केवलमपि सत्, न तत्स्वरूपं । तुलनेलेपस्वरूपमेव जगार्यायामवत् । अन्ये त्वलेपकारिणमलेपामित्येवं, सूरय आचार्या ब्रुवत इति गाथार्थः ।

आचामाम्ल-द्वारविधिमाह-

णायंबिलमेअं पि हु, अइसेसपुरिसभेअओ भावओ ।
उस्सग्गियं तु किं पुण, पायइए अणुगुणं जं से॥४५५॥

नायामाम्लमेतदप्यलेपकारि । अतिशेषपुरुषभेददोषाद् व्याप्या विधानुभावेन । औत्सर्गिकमेवैदनरूपं किं पुनः प्रकृतेर्देहरूपाया अनुगुणं यद्भवति (से) तस्येति गाथार्थः ।

प्रतिमा-द्वारविधिमाह-

पडिमंति अ मासाइ-सहाय अभिग्गहा सेसा ।
णो खलु एस पवज्जइ, जं तत्थ जिओ विसेसेण॥४५६॥

प्रतिमा मासाद्या, आदिशब्दान्मूलगुणाद्यभिग्रहाः, शेषा अकण्डूयनादयो, न खल्वेष प्रतिपद्यते । जिनकल्पिको यत्तत्राभिग्रहे स्थितो विशेषेणेति गाथार्थः ।

'जिणकप्पे' इति मूलद्वारगाथावयवं व्याचिख्यासुराह-

जिणकप्पे त्ति अ दारं, अणेगदाराण विणयमो एस ।
एअंमि एस मेरा, अवयायविवज्जिआ णियमा ॥४५७॥

जिनकल्प इति च द्वारं । मूलगाथागतशेषद्वाराणां श्रुतसंहननादीनां विषय एष भवति । इति एतस्मिन् जिनकल्पे, एषा मर्यादा श्रुतादियोक्तापवादविवर्जिता नियमादेकान्तेनेति गाथार्थः ।

'मासकप्पो' इति द्वारावयवार्थमाह-

मासं निवसइ खित्ते, उव्वीहीओ अ कुणइ तत्थ वि अ ।
एगगमऽइक्कमा-इ वज्जणत्थं पइदिणं तु ॥ ४५८ ॥

मासं निवसति क्षेत्रे । एवं यत्नवानेव करोति गृहपङ्क्तिरूपाः परिकल्प्य, तत्रापि च वीथीकदम्बके पैकैकामटति वीथीकर्मादिवर्जनार्थमनिबद्धतया प्रतिदिनमिति गाथार्थः । व्याख्याता तृतीया द्वारगाथा ।

सांप्रतमत्र प्रासङ्गिकमाह-

कहं पुण होज्जा कम्मं, एत्थ पसंगेण सेसयं किं पि ।
वोच्छामि समासेणं, सोसजणाविवोहणट्ठाए ॥ ४५९ ॥

कथं पुनर्भवत्कर्मास्य भवतः । अत्र प्रसङ्गेन शेषं किमप्येतद्रूढ्यागतमत्र वक्ष्यामि समासेन । किमर्थमित्याह-शिष्यजनविबोधनार्थमिति गाथार्थः ।

आजिग्गहिए तत्थ, जत्तोगाहिमग वीइ तिअ पूई ।
चुअगो णिव्वयणति अ, उक्कोसेणं च सत्त जणा ॥४६०॥

आजिग्रहिके जिनकल्पिक उपलब्धे श्रद्धोपजायते अगार्यादः । तत्र जत्तोद्ग्राहिमं कोति,सा एतदुभयं करोति । द्वितीयेऽहनि श्रीमद्दिवसाद् पूर्वं । तद्भवतां वक्ष्यामः । अत्रान्तरे खोदको निर्वचनमिति भवति । उत्कृष्टोत्सर्गपदेन सप्त जना,एते एकवस्तौ भवन्तीति गाथासमुदायार्थः ।

सरच्छोडगादातोऽवयवार्थमाह-

जिणकप्पाजिग्गहिअं, दट्ठुं तवसोसिअं महासत्तं ।
संवेगागयसद्धा, काई सद्धा भणिज्जाहि ॥ ४६१ ॥

जिनकल्पाऽभिग्रहिकमृषिं दृष्ट्वा तपःशोषितं महासत्त्वं, संवेगागतश्रद्धा सती, काचित् श्राद्धी योषिद्भणेत् ब्रूयादिति गाथार्थः ।

किं काहामि अहण्णा, एसो साहू न गिण्हए एअं ।
णत्थि महं तारिसयं, असुं जमलज्जिआ दाहं ॥४६२॥

किं करिष्यामि । अधन्याहम् । एष साधुर्न गृह्णाति, एतत्तत्र नूनं नास्ति । मम तादृशमन्यच्छोभनं । यदलज्जिता दास्यामीति गाथार्थः ।

सव्वपयत्तेण अहं, कल्ले काऊण जोअणं विउलं ।
दाहामि पयत्तेणं, ताहे जणअ असो भयवं ॥ ४६३ ॥

सर्वप्रयत्नेनाहं कल्ये कृत्वा-भोजनं साधु विपुलं दास्यामि प्रयत्नेन । तदा भणति चासौ भगवाँस्तच्छ्रुत्वोक्त्या निवारणायेति गाथार्थः ।

अणिआओ वसहीओ, जमरकुलाणं च गोकुलाणं च ।
समणाणं सउणाणं, आरइआणं च मेहाणं ॥ ४६४ ॥

अनियता वसतयः, कथमित्याह-भ्रमरकुलानां च, गोकुलानां च, तथा श्रमणानां, शकुनानां, सारदानां च, मेघानामित्यर्थः ।

ताए व जवक्खडिअं, मुक्का बाहो अ तेण धीरेण ।
अद्दीणमपरिभंतो, विइअं च पहिंमि ओ वीहिं ॥४६५॥

तया चाऽगार्योपस्कृतमनाभोगात् मुक्ता बाधी च तेन धीरेण द्वितीयेऽहनि अदीनचेतसाऽपरिश्रान्तकायेन, द्वितीयां च, क्रमागतां प्रपर्यटितो वीथिमभावितीति गाथार्थः ।

तत्रेयं व्यवस्था-

पढमदिवसम्मि कम्मं, तिण्णि अ दिवसाणि पूइअं होइ ।
पूइसु तिसु णो कप्पइ, कप्पइ तइए गए कप्पे ॥४६६॥

प्रथमदिवसे कर्म,तदुपस्कृतं त्रीन् दिवसान् पूति भवति । तद्गृहमेव पूतिषु त्रिषु न कल्पते । तत्रान्यदपि किञ्चित् न कल्पते । तृतीये गते कल्पे दिवसे अपरस्मिन्नहनीति गाथार्थः ।

ओगाहिमए अज्जं, न आगओ कल्ले तस्स दाहामि ।
दोण्णि दिवसाणि कम्मं, तइआइसु पूइअं होइ ॥४६७॥

उद्ग्राहिमके हृते, सति अद्य नाऽऽयातः स ऋषिः । कल्ये तस्य दास्यामि । इति दिवसे सदाऽभिसंधत्ते । अत्र द्वौ दिवसौ

कर्म, तद्भावविच्छेदात्तृतीयादिषु दिवसेषु पूर्ते, तद्भवतीति गाथार्थः ।

तिहिँ कप्पेहिं न कप्पइ, कप्पइ तं छट्ठसत्तमदिणम्मि ।
अकरणदिअहो पढमो,मेसा जं एक्क दोण्णि दिणा ॥४६८॥

तत्र त्रिषु कल्पेषु दिवसेषु न कल्पते।कल्पते तद् गृहं,षष्ठसप्तम दिवसे ग्रहणदिवसात् । एतदेवाह अकरणदिवसः प्रथमोऽटनगतः। शेषौ यदेको,द्वौ वा दिवसावाधाकर्मगताविति गाथार्थः।

अह सत्तमम्मि दिअहे, पढमं बीहिं पुणो वि हिंडंतं ।
दट्ठूण सा य सड्ढी, तं मुणिवसभं जणिज्जाहि ॥४६९॥

अथ सप्तमे दिवसे, अटनगतादारभ्य। प्रथमां वीथीं, पुनरपि हिण्डन्तमद्राक्षीत्। सा श्राद्धी। अगारी, मुनिवृषभं प्रस्तुतं, भवेद् भूयादिति गाथार्थः ।

किं णागयत्थ तइआ, असव्वओ मे कओ तुह निमित्तं ।
इति पुट्ठो सो भयवं. विइआएसे इमं भणइ ॥ ४७० ॥

किं नागताश्च यूयं तदा । असद्व्ययो मया कृतस्तन्निमित्तं । तदभ्रहणादसद्व्ययत्वमिति पृष्टः स भगवान् जिनकल्पिकः। द्वितीयादेशे पूर्वादेशापेक्षया, इदं भणति वक्ष्यमाणमिति गाथार्थः ।

अणिआओ वसहीओ,इच्चाइ जमेव वन्निअं पुव्विं ।
आणाए कम्माइं, परिहरमाणो विसुद्धमणो ॥ ४७१ ॥

अनियता वसतय इत्यादि । यदेव वर्णितं, पूर्वगाथासूत्रमिति । आज्ञया कर्मादि परिहरन् विशुद्धमनाः सन्, भवति । इति गाथार्थः ।

चोएइ पढमदिअहे, जइ कोइ करिज्ज तस्स कम्माई ।
तत्थ ठिअं णाऊणं, अजंपिउं चेव तत्थ कहं ॥४७२॥

चोदयति शिष्यः । प्रथमदिवस अटनगत एव यदि कश्चित्कुर्यात्, किञ्चित् कर्मादिकल्प्यं, तत्र स्थितं ज्ञात्वा, केनैऽसंजल्पयैव किंचित्तत्र कथमिति गाथार्थः ।

चोअग! एवं पि इहं, जइ ओ करिज्जाहि कोइ कम्माइ ।
ण हि सो तेण विअणाइ, सुआइसयजोगओ नियतं ।४७३।

चोदक ! एवमप्यत्र यदि कुर्यात् कश्चित्कर्मादि प्रच्छन्नमेव । न ह्यसौ तत्र विजानाति ? विजानात्येव श्रुतातिशययोगतः कारणात्सद्भावमिति गाथार्थः ।

एसो जण से कप्पो, जं सत्तमगम्मि चेव दिवसम्मि ।
एगत्थ अकइ एवं, आरंजविवज्जणणिमित्तं ॥ ४७४ ॥

एष पुनः (से) तस्य कल्पः । यत्सप्तम एव दिवस एकत्र वीथ्यामटति । एवमुक्तवदारम्भविवर्जननिमित्तमिति गाथार्थः ।

इअ अणिअयवित्तिं तं, दट्ठुं सड्ढाण वि तदारंभे ।
अणियमओ ण पवित्ती, होइ तहा वारणाओ अ ॥४७५॥

एवमनियतवृत्तिं तं वीथिविहारेण दृष्ट्वा, श्राद्धानामपि प्राणिनां तदारम्भेऽनियमात् कारणात् न प्रवृत्तिर्भवति । तथा वारणाच्चानियतत्वादिभावेनेति गाथार्थः ।

गच्छवासिनामेवमकुर्वतामदोषमाह—

इअरे आणाओ वि अ, गुरुमाइनिमित्तओ पइदिणं पि ।
दोसं अपस्समाणा, अहंति मज्झत्थभावेण ॥ ४७६ ॥

इतरेऽपि गच्छवासिन आज्ञात एव निमित्तत्वाद्, गुर्वादिनिमित्तञ्च हेतोः । प्रतिदिवसमपि दोषमपश्यन्तः सन्तोऽनैषणाकरूपमटन्ति मध्यस्थभावेन समनयेन गाथार्थः ।

प्रासङ्गिकमेतत् । प्रस्तुतमेवाह—

एवं तु ते अमंता, वसहीऽएक्काए कइ वसिज्जाहिं ।
वीहीए अ अहंता, एगाए कइ अभिज्जाहि ॥४७७॥

एवं तु ते अटन्तो जिनकल्पिकाः।वसनावेकस्यां कति वसयुः? तथा वीथ्यां वा अटन्तः सन्त एकस्यां कत्यटेयुरिति गाथार्थः ।

एगाए वसहीए, उक्कोसेणं वसंति सत्त जणा ।
अन्नोन्नपरंजामं, वज्जिंता कह वि जोएणं ॥ ४७८ ॥

एकस्यां वसतौ वसन्तो, बाह्यादागन्तुकृतो वसन्ति सप्त जनाः। कथमित्याह-परस्परं संजल्पनं वर्जयन्तः सन्तः, कथमपि योगेनेति गाथार्थः ।

वीहीए एक्काए, एक्को खलु पइदिणं अडइ एसो ।
अन्ने भणंति जयणं,सा य ण जुत्तिक्खमा णेआ ॥४७९॥

वीथ्यां त्वेकस्यामेक एव प्रतिदिनमटत्येष जिनकल्पिकः। अन्ये भणन्ति यतनां, सा च न युक्तिक्षमा ज्ञेयाऽत्र वस्तुनीति गाथार्थः ।

कुत इत्याह-

एएसिं सत्त वीही, एत्तो चिअ पायमो जओ भणिआ ।
कह नाम अणोमाणं, हाविज्ज गुणकारगं णिअमा ॥४८०॥

एतेषां सप्त वीथ्यः । अत एव कारणान्मा भूदेकस्यामुभयाटनमिति प्रायसो यतो भणिताः, क्वचित्प्रदेशान्तरे कथं नाम,अनयमानं भवेत्। अन्योऽन्यसंवर्तभावेन गुणकारकं नियमात्प्रवचनस्थिति गाथार्थः ।

वीथीज्ञानोपायमाह-

अइसयेण अ जमेए, वीहिविभागं अतो विजाणंति ।
ठाणाएहिं धीरा, समयपसिद्धेहिँ लिंगेहिं ॥ ४८१ ॥

अतिशयेन च यदेते श्रुततः वीथीविभागमतो विजानन्त्येवैते। स्थानादिभिर्धीरा वसतिगतैः, समयप्रसिद्धैः, लिङ्गैः,श्रुतादेवेति गाथार्थः ।

उपसंहरन्नाह-

एसा सामायारी, एएसिं समासओ समक्खाया ।
एत्तो खित्तादीअं, ठिइमेएसिं उ वक्खामि ॥ ४८२ ॥

एषा सामाचारी, एतेषां जिनकल्पिकानां समासतः समाख्याता । अतः क्षेत्राद्यां स्थितिं तावद्व्यवस्थामेतेषामेव वक्ष्यामीति गाथार्थः ।

खित्ते कालचरित्ते, तित्थे परिआय-आगमे वेए ।
कप्पे लिंगे लेसा-झाणे गणणाऽभिग्गहे सिं च ॥४८३॥

क्षेत्रे एकस्मिन् स्थितिरमीषाम् । एवं काले, चारित्रे, तीर्थे, पर्याये, आगमे, वेदे, कल्पे, लिङ्गे, लेश्यायां, ध्याने, तथा गणनाऽभिग्रहश्चैतेषां वक्तव्या । इति गाथासमासार्थः ।

पव्वावण मुण्डावण, मणसावन्ने वि से अणुग्घाया ।
कारण-णिप्पडिकम्मे, जत्तं पंथो अ तइआए ॥ ४८४ ॥

प्रव्राजनमुण्डनेत्यत्र स्थितिर्वाच्या, मनसाऽऽपन्नेऽपि दोषे (से) तस्य, अनुद्घाताश्चतुर्गुरवः प्रायश्चित्तम्। तथा कारणनिष्प्रतिकर्म-स्थितिर्वाच्या, तथा भक्तं, पन्थाश्च तृतीयायां पौरुष्यामस्येति गाथासमासार्थः।

व्यासार्थं तु गाथाद्वयस्याऽपि ग्रन्थकार एव प्रतिपादयति। तत्राऽऽदौ क्षेत्र-द्वारमधिकृत्याऽऽह-

खित्ते दुहेह मग्गण, जम्मणओ चेव संतिभावे अ।
जम्मणओ जहि जाओ,संतीभावे अ जहि कप्पो ॥४७५॥

क्षेत्रे द्विविधा मार्गणा जिनकल्पिकस्थितौ-जन्मतश्चैव, सद्भावतश्च। तत्र जन्मतो-यत्र जातः क्षेत्रे, एवं जन्माऽऽश्रित्य। सद्भावतश्च-यत्र कल्पः क्षेत्रे,एवं सद्भावमाश्रित्य,मार्गणेति गाथार्थः।

जम्मणसंतीभावे-सु होज्ज सव्वासु कम्मभूमीसु।
साहरणे पुण भइओ, कम्मे व अकम्मभूमे वा ॥४८६॥

जन्मसद्भावयोरयं भवेत् सर्वासु कर्मभूमिषु भरताद्यासु। संहरणे पुनर्भाज्योऽयं, कर्मभूमिको वा सद्भावमाश्रित्य, अकर्मभूमिको वाऽसद्भावमाश्रित्येति गाथार्थः।

काल-द्वारमधिकृत्याऽऽह-

ओसप्पिणिए दोसुं, जम्मणओ तिसु अ संतिभावेणं।
उस्सप्पिणिविवरीओ, जम्मणओ संतिभावेणं ॥४८७॥

अवसर्पिण्यां काले, द्वयोः सुषमदुष्षम-दुष्षमसुषमयोर्जन्मतो जन्माऽऽश्रित्यास्य स्थितिः। तिसृषु सुषमदुष्षम-दुष्षमसुषम-दुष्षमासु सद्भावेनेति स्वरूपतयाऽस्य स्थितिः उत्सर्पिण्यां विपरीतोऽस्य कल्पः-जन्मतः,सद्भावतश्च। एतदुक्तं भवति-दुष्षम-दुष्षमसुषम-सुषमदुष्षमासु तिसृषु जन्मतः, दुष्षमसुषम-सुषमदुष्षमयोः द्वयोः सद्भावत एवेति गाथार्थः।

णोस्सप्पिणि उस्सप्पिणि,होइ उ पलिभागओ चउत्थम्मि।
काले पलिभागेसु अ, साहरणे होइ सव्वेसिं ॥ ४८८ ॥

नावसर्पिण्युत्सर्पिणीत्युभयशून्ये स्थिते काले भवति त्वयं जन्मतः, सद्भावतश्च; प्रतिभागे चतुर्थ एव। काले दुष्षमसुषमरूपे, विदेहेषु प्रतिभागेषु च केवलेषु,संहरणे सति, सद्भावमाश्रित्य भवति सर्वेष्वुत्तरकुर्वादिगतेष्विति गाथार्थः।

चारित्र-द्वारमधिकृत्याऽऽह-

पढमे वा बीए वा, पडिवज्जइ संजमम्मि जिणकप्पं।
पुव्वपडिवन्नओ पुण, अन्नअरे संजमे हुज्जा ॥४८९॥

प्रथमे वा सामायिक एव, द्वितीये वा छेदोपस्थाप्ये, प्रतिपद्यते, संयमे चारित्रे सति जिनकल्पं, नान्यस्मिन्। पूर्वप्रतिपन्नः पुनरन्यतरस्मिन् संयमस्थाने सूक्ष्मसंपरायादौ भवेदुपशमश्रेणिमधिकृत्येति गाथार्थः।

मज्झिमतित्थअराणं,पढमे पुरिमंतिमाण बीअम्मि।
पच्छा विसुद्धजोगा, अन्नअरं पावइ तयं तु ॥४९०॥

मध्यमतीर्थकराणां तीर्थे,प्रथमे भवेत्, द्वितीयस्य तेषामभावात्। पुरिमचरमयोस्तु तीर्थकरयोः तीर्थे द्वितीये भवेत्, छेदोपस्थाप्य एव। पश्चाद्विशुद्धयोगात् कारणादन्यतरं प्राप्नोति तं संयमं सूक्ष्मसंपरायादिं तूपशमापेक्षयेति गाथार्थः।

तीर्थ-द्वारमधिकृत्याऽऽह-

तित्थे त्ति नियमओ च्चिय,
होइ स तित्थम्मि न पुण तदभावे।
विगएऽणुप्पन्ने वा,
जाईसरणाइएहिं तु ॥४९१॥

तीर्थ इति नियमत एव भवति स जिनकल्पिकः, तीर्थे सति सति, न पुनस्तदभावे विगतेऽनुत्पन्ने वा तीर्थे, जातिस्मरणादिभिरेव कारणैरिति गाथार्थः।

अहिगयरं गुणठाणं, होइ अतित्थम्मि एस किं ण भवे।
एसा एअस्स ठिई, पण्णत्ता वीअरागेहिं ॥ ४९२ ॥

अधिकतरं तद्गुणस्थानं श्रेण्यादि भवत्यतीर्थे, मरुदेव्यादीनां तथाश्रवणादिति,एष किं न भवति जिनकल्पिकः?, इत्याशङ्क्याऽऽह-एषा एतस्य स्थितिर्जिनकल्पिकस्य प्रज्ञप्ता, वीतरागैः, न पुनरत्र काचिद्युक्तिरिति गाथार्थः।

पर्याय-द्वारमधिकृत्याऽऽह-

परिआओ अ दुभेओ, गिहि-जइ-भेएहि होइ णायव्वो।
एक्केको उ दुभेओ, जहण्ण उक्कोसओ चेव ॥ ४९३ ॥

पर्यायश्च द्विभेदोऽत्र गृहियतिभेदाभ्यां भवति ज्ञातव्यः। एकैकश्च द्विभेदोऽसौ जघन्य उत्कृष्टश्चेवेति गाथार्थः।

एअस्स एस णाओ, गिहिपरिआओ जहण्ण गुणतीसा।
जइपरिआए वीसा, दोसु वि उक्कोस देसूणं ॥ ४९४ ॥

एतस्यैष ज्ञेयो गृहिपर्यायो जन्मत आरभ्य जघन्य एकोनत्रिंशद्वर्षाणि। यतिपर्यायो विंशतिवर्षाणि जघन्यः, एवं द्वयोरपि गृहियतिभेदयोरुत्कृष्टपर्यायो देशोना पूर्वकोटीति गाथार्थः।

आगम-द्वारमधिकृत्याऽऽह-

अप्पुव्वं णाहिज्जइ, आगममेसो अइच्च तं जम्मं।
जमुचिअपगिट्ठजोगा-ऽऽराहणओ चेव कयकिच्चो ॥४९५॥

अपूर्वं नाधीत आगममेषः। कुतः?, इत्याह-अतीत्य तज्जन्म वर्तमानं, यद् यस्मादुचितप्रकृष्टयोगाराधनादेव कारणात्, कृतकृत्यो वर्तते। इति गाथार्थः।

पुव्वाहीयं तु तयं, पायं अणुसरइ निच्चमेवेस।
एगग्गमणो सम्मं, विस्सोअसिगाइ खयहेउं ॥ ४९६ ॥

पूर्वाधीतं तु तच्छ्रुतं प्रायोऽनुस्मरति नित्यमेवैष जिनकल्पिक एकाग्रमनाः सम्यग् यथोक्तं, विश्रोतसिकायाः क्षयहेतुं श्रुतं स्मरतीति गाथार्थः।

वेद-द्वारमधिकृत्याऽऽह-

वेअप्पवित्तिकाले, इत्थीवज्जो उ होइ एगयरो।
पुव्वपडिवन्नओ पुण, होज्ज सवेओ अवेओ वा ॥४९७॥

वेदप्रवृत्तिकाले तस्य स्त्रीवर्ज एव भवत्येकतरः पुंवेदो नपुंसकवेदो वा शुद्धः। पूर्वप्रतिपन्नः पुनरध्यवसायभेदोद्भावात्सवेदोऽवेदो वैष भवेत् इति गाथार्थः।

जत्तसमसेढीए खलु, वेए उवसामिअम्मि उ अवेओ।
न उ खविए तज्जम्मे, केवलपक्खिसेढ्ठनावाओ ॥४९८॥

उपशमश्रेण्यामेव वेद उपशमिते सति अवेदो भवति, न तु क्षपिते। कुतः ?, इत्याह-तज्जन्मन्यस्य केवलप्रतिषेधभावादिति गाथार्थः ।

कल्प-द्वारमधिकृत्याऽऽह-

ठिअमट्ठिए अ कप्पे, आचेलक्काइएसु ठाणेसु ।
सव्वेसु ठिआ पढमो,चउ-ठिय छसु अ ट्ठिया बिइओ॥४९६।

स्थिते, अस्थिते च कल्प एष भवति, न कश्चिद्विरोधः । अनयोः स्वरूपमाह-आचेलक्यादिषु स्थानेषु वक्ष्यमाणव्रतक्षणेषु सर्वेषु दशस्वपि स्थिताः, इति प्रथमः स्थितकल्पः । चतुर्षु स्थिता इति-शय्यातरराजपिण्डकृतिकर्मज्येष्ठपदेषु स्थिताः, मध्यवर्तीर्थकरसाधवोऽपि षट्सु स्थिता आचेलक्यादिष्वनियमवन्तः, इति द्वितीयः स्थितकल्पः, इति गाथार्थः ।

स्थानान्याह-

आचेलक्कुद्देसिय-सिज्जायररायपिंडकम्मे वा ।
वयजिट्ठपडिक्कमणे, मासं पज्जोसणाकप्पे ॥ ५०० ॥

आचेलक्यौद्देशिकशय्यातरराजपिण्डकृतिकर्माणि पञ्च स्थानानि, तथा व्रतज्येष्ठप्रतिक्रमणादीनि त्रीणि, मासपर्युषणाकल्पो द्वे स्थाने; इति गाथार्थः ।

लिङ्ग-द्वारमधिकृत्याऽऽह-

लिंगम्मि होइ भयणा, पडिवज्जइ छभयलिंगसंपन्नो ।
उवरि तु भावलिंगं, पुव्वपवन्नस्स णिअमेणं ॥ ५०१ ॥

लिङ्गे इति भवति भजना,वक्ष्यमाणस्य प्रतिपद्यते कल्पम्,उभयलिङ्गसंपन्नो,द्रव्यभावलिङ्गयुक्त इत्यर्थः । उपरि तु उपरितात्, भावलिङ्गं चारित्रपरिणामरूपं पूर्वप्रतिपन्नस्य कल्पं नियमेन भवतीति गाथार्थः ।

इयरं तु जिणभावाइ-एहि सअअं न होइ वि कयाइ ।
ण य तेण विणाऽवि तहा,जायइ से भावपरिहाणी ।५०२।

इतरत्तु द्रव्यलिङ्गं, जीर्णभावादिभिर्जीर्णहतादिभिः कारणैः सततं न जायत्यपि,कदाचित्संभवत्यपि कदाचिन्न संभवत्येतत् । न च तेन विनाऽपि, तथा तेन प्रकारेण, जायते (से) तस्य भावपरिहाणिरप्रमादान्न्यासादिति गाथार्थः ।

लेश्या-द्वारमधिकृत्याऽऽह-

लेसासु विसुद्धासुं, पडिवज्जइ तीसु न पुण सेसासु ।
पुव्वपडिवन्नओ पुण, होज्जा सव्वासु वि कहंचि ।५०३।

लेश्यासु विशुद्धासु तैजस्यादिषु प्रतिपद्यते तिसृषु कल्पम्, न पुनः शेषास्वाद्यासु । पूर्वप्रतिपन्नः पुनः कल्पस्थो भवेत् सर्वास्वपि शुद्धासु, कथञ्चित् कर्मवैचित्र्यादिति गाथार्थः ।

णऽच्चंतसंकिलिट्ठा-सु थोवकालं च हंदि इअरासु ।
चिंता कम्माण गई, तहा वि विरियं फलं देइ ॥ ५०४ ॥

नात्यन्तसंक्लिष्टासु वर्तते भगवान्, स्तोककालं च हन्दीतरासु अशुद्धासु, चित्रा कर्मणां गतिः,येन तास्वपि वर्तते, तथापि वीर्यं फलं ददाति, येन तद्भावेऽपि ध्रुवश्चारित्रशुद्धिरिति गाथार्थः ।

ध्यान-द्वारमधिकृत्याऽऽह-

झाणम्मि वि धम्मेणं, पडिवज्जइ सो पवड्ढमाणेणं ।
इअरेसु वि झाणेसुं, पुव्वपवण्णे ण पडिसिद्धो ॥५०५॥

ध्यानेऽपि प्रस्तुते, धर्मेण ध्यानेन, प्रतिपद्यतेऽसौ कल्पं, प्रवर्द्धमानेन सता । इतरेष्वपि ध्यानेष्वार्तादिषु, पूर्वप्रतिपन्नोऽयं न प्रतिषिद्धो भवतीत्यपीति गाथार्थः ।

एवं च कुसलजोगे, उदामे तिव्वकम्मपरिणामा ।
रोद्दट्टेसु वि भावो, इमस्स पायं निरणुबंधो ॥ ५०६ ॥

एवं कुशलयोगे जिनकल्पप्रतिपत्त्योद्दामे सति, तीव्रकर्मपरिणामौदयिकाद् रौद्रार्तयोरपि भावोऽस्य ज्ञेयः, स च प्रायो निरनुबन्धः, स्वल्पत्वादिति गाथार्थः ।

गणना-द्वारमधिकृत्याऽऽह-

गणण त्ति सयपुहुत्तं, एएसिं एगदेव उक्कोसा ।
होइ पडिवज्जमाणे, पडुच्च इअरा उ एगाई ॥ ५०७ ॥

गणनेति शतपृथक्त्वमेतेषां जिनकल्पिकानामेकदैवोत्कृष्टा भवति प्रतिपद्यमानकान् प्रतीत्य, इतरा तु जघन्या गणनैकाद्येति गाथार्थः ।

पुव्वपडिवण्णगाण उ, एसा उक्कोसिआ भवे चित्र खित्ते ।
होइ सहस्सपुहुत्तं, इयरा एवंविहा चेव ॥ ५०८ ॥

पूर्वप्रतिपन्नानां त्वमीषामेषा गणना उत्कृष्टोचिता क्षेत्रे यस्येषां भावो भवति-यदुत सहस्रपृथक्त्वमिति, इतराऽपि जघन्यैवंविधैव सहस्रपृथक्त्वमेव लघुतरमिति गाथार्थः ।

अभिग्रह-द्वारमधिकृत्याऽऽह-

दव्वाईआऽभिग्गह, विचित्तरूवा ण होंति इत्तरिआ ।
एअस्स आवकहिओ, कप्पो चियऽभिग्गहो जेण ।५०९।

द्रव्याद्या अभिग्रहाः सामान्या विचित्ररूपा न भवन्तीत्वराः। कुतः ?, इत्याह-अस्य यावत्कथिकः कल्प एव प्रक्रान्तोऽभिग्रहो येनेति गाथार्थः ।

एयम्मि गोअराई, णिअया णिअमेण णिरववाया य ।
तप्पालणं चिअ परं, एअस्स विसुद्धिठाणं तु ॥५१०॥

एतस्मिन् गोचरादयः सर्वे एव नियता नियमेन, निरपवादाश्च वर्तन्ते । यत एवमतस्तत्पालनमेव परं प्रधानमेतस्य विशुद्धिस्थानम्, किं शेषाऽभिग्रहैरिति गाथार्थः । व्याख्याता प्रथमा द्वारगाथा ।

अधुना द्वितीया व्याख्यायते, तत्र प्रव्राजनाद्वारमधिकृत्याऽऽह-

पव्वावेइ ण एसो, अण्णं कप्पट्ठिउ त्ति काऊणं ।
आणाउ तह पयट्टो,चरमाणसणि व्व णिरविक्खो ॥५११॥

प्रव्राजयति नैषोऽन्यं प्राणिनं कल्पस्थित इति कृत्वा, जीतमेतत्, आज्ञातस्तथा प्रवृत्तोऽयं महात्मा चरमानशनिवन्निरपेक्षो यावत्कारणेनेति गाथार्थः ।

उवएसं पुण विअरइ, धुवं पवित्तं विआणिउं किंचि ।
तं पि जहासत्तीए, गुणओ ण दिसादविक्खाए ॥५१२॥

उपदेशं पुनर्वितरति ददाति ध्रुवं प्रव्रजनशीलं विज्ञाय किञ्चित्सत्त्वम्। तमपि यथाशक्त्या वितरति गुणान् , न दिगाद्यपेक्षया कारणेनेति गाथार्थः ।

मुण्डन-द्वारमधिकृत्याऽऽह-

मुंडावणा वि एवं, विण्णेआ एत्थ चोअगो आह ।

पव्वज्जऽणंतरम्मी, णिअमा एमत्ति किमेस पुढो ? ।५१३।

मुण्डनाऽप्येवं विज्ञेया प्रव्राजनावदत्र। चोदक आह-किमाह?-प्रव्रज्याऽनन्तरमेव नियमादेव मुण्डनेति कृत्वा किमिति पृथगुपात्तेति गाथार्थः।

अत्र "पुढो" द्वारम्-

गुरुराहेह ण णिअमो, पव्वइअस्स वि इमस्स पडिसेहो।
अज्जोग्गस्साऽइसई, पडिसिज्झग्गादी विहेइ जओ ॥५१४॥

गुरुराह-इह न नियमो यदुत प्रव्रज्याऽनन्तरमेवेयम्, कुतः?, प्रव्रजितस्याप्यस्याः प्रतिषेधो मुण्डनाया अयोग्यस्य, प्रकृत्येहातिशयैः पुनः प्रतिभज्ञादिभिर्विधत्ते, यतो मुण्डना न स्वतः पृथगिति गाथार्थः।

मनसाऽऽपन्नस्यापीत्यादि-द्वारमधिकृत्याऽऽह-

आवन्नस्स मणेण वि, अइआरं निअमओ अ सुहुमं पि।
पच्छित्तं चउ गुरुगा, सव्वजहण्णं तु णेअव्वं ॥ ५१५ ॥

आपन्नस्य प्राप्तस्य मनसाऽप्यतिचारं नियमत एव सूक्ष्ममपि प्रायश्चित्तमस्य भगवतश्चतुर्गुरवः सर्वजघन्यं मन्तव्यमिति गाथार्थः।

जम्हा उत्तरकप्पो, एसोऽनत्तट्ठमाइसरिसो उ।
एगग्गयापहाणो, तब्भंगे गुरुअरो दोसो ॥ ५१६ ॥

यस्मादुत्तरकल्प एष जिनकल्पोऽभक्तार्थादिसदृशो वर्तते एकाग्रताप्राधान्योऽप्रमादी, यतस्तद्भङ्गे गुरुतरो दोषो, विषयगुरुत्वादिति गाथार्थः।

कारण-द्वारमधिकृत्याऽऽह-

कारणमालंबणमो, तं पुण णाणाइअं सुपरिसुद्धं।
एअस्स तं न विज्जइ, उचिअंतप्पसाहणा पायं ॥५१७॥

कारणमालम्बनमुच्यते, तत्पुनर्ज्ञानादि सुपरिशुद्धं सर्वत्र ज्ञेयम्। एतस्य तन्न विद्यते जिनकल्पिकस्य, उचितान्तःप्रसाधनात् प्रायः जन्मोत्तरकालसिद्धेरिति गाथार्थः।

सव्वत्थ निरवइक्खो, आढत्तं चिअ दढं समाणिंतो।
वट्टइ एस महप्पा, किलिट्ठकम्मक्खयणिमित्तं ॥५१८॥

सर्वत्र निरपेक्षः सन् प्रारब्धमेव दृढं समापयन् वर्तते, एष महात्मा जिनकल्पिकः क्लिष्टकर्मक्षयनिमित्तमिति गाथार्थः।

निष्प्रतिकर्म-द्वारमधिकृत्याऽऽह—

निप्पडिकम्मसरीरो, अच्छिमलाई वि णावणेइ स य।
पाणंतिए वि अ तहा, वसणम्मि ण वट्टई बीए ॥५१९॥

निष्प्रतिकर्मशरीर एकान्तेन अक्ष्यादिमलाद्यपि नापनयति। स च प्राणान्तिकेऽपि च तथा अत्यन्तरौद्रे व्यसने न वर्तते द्वितीय इति गाथार्थः।

अप्पबहुत्तालोअण-विसयाईओ उ होइ एसो त्ति।
अहवा सुभभावाओ, बहुअंपेअं चिअ इमस्स ॥ ५२० ॥

अल्पबहुत्वालोचनविषयातीतस्तु भवत्येष जिनकल्पिक इति। अथवा शुभभावात्कारणात्, बहुकर्मप्येतदेवास्य तत्त्वत इति गाथार्थः।

चरम-द्वारमधिकृत्याऽऽह-

तइआए पोरिसीए, भिक्खाकालो विहारकालो अ।
सेसासु उ उस्सग्गो, पायं अप्पाय णिद्दत्ति ॥५२१॥

तृतीयायां पौरुष्यां भिक्षाकालो, विहारकालश्चास्य नियोगतः, शेषासुतु कायोत्सर्गः प्रायोऽल्पा च निद्रा पौरुषीष्विति गाथार्थः।

जंघाबलम्मि खीणे, अविहरमाणो वि णवर णावज्जे।
तत्थेव अहाकप्पं, कुणइ अ जोगं महाभागो ॥ ५२२ ॥

जङ्घाबले क्षीणे सत्यविहरन्नपि नवरं नापद्यते दोषमिति। तत्रैव यथाकल्पं क्षेत्रे करोति योग्यं महाभागः स्वकल्पस्थः, इति गाथार्थः।

एसेव गमो णियमा, सुद्धे परिहारिए अहाछंदे।
णाणत्तं उ जिणेहिं, पडिवज्जइ गच्छ गच्छे वा ॥५२३॥

एष एव गमोऽनन्तरोदितो भावनादिनियमाच्छुद्धे परिहारिके यथाछन्दे च, नानात्वं तु जिनैर्भ्यः शुद्धपरिहारिकाणामिदं प्रतिपद्यते गच्छस्तत्प्रथमतया भवकलमुदायः, गच्छे वा एकनिर्गमादपर इति गाथार्थः।

तवभावणणाणत्तं, करिंति आयंबिलेण परिकम्मं।
इत्तरिअ थेरकप्पे, जिणकप्पे आवकहिआ उ ॥५२४॥

तपोभावनानानात्वं चैषामिदं कुर्वन्त्याचामाम्लेन परिकर्म सर्वमेव। एते च इत्वराः, यावत्कथिकाश्च भवन्ति। ये कल्पसमाप्तौ गच्छमागच्छन्ति ते इत्वराः। ये तु जिनकल्पं प्रतिपद्यन्ते ते यावत्कथिका इति। एतदाह-इत्वराः स्थविरकल्पा इति भूयः स्थविरकल्पे भवन्ति। जिनकल्पे यावत्कथिकास्तु भवन्तीति गाथार्थः।

एतत्संभवमाह—

पुणे जिणकप्पं वा, अइंति तं चेव वा पुणो कप्पं।
गच्छं वा इंति पुणो, तिण्णि वि ठाणा समविरुद्धा ॥५२५॥

पूर्णे शुद्धपरिहारे, जिनकल्पं यातीतिगच्छन्ति, तमेव वा पुनः कल्पं शुद्धपरिहारं गच्छं वा गच्छन्ति। पुनरनेन प्रकारेण त्रीण्यपि स्थानान्यमीषां शुद्धपरिहारिकाणामविरुद्धानीति गाथार्थः।

इत्तिरआणुवसग्गा, आयंका वेयणा य ण भवंति।
आवकहिआण जइआ, तहेव उग्गामभागा उ ॥५२६॥

इत्वराणां शुद्धपरिहारिकाणामुपसर्गा आतङ्का वेदनाश्च न भवन्ति, तत्कल्पप्रभावाज्जीतमेतत्। यावत्कथिकानां भाज्या उपसर्गादयः, जिनकल्पसिद्धानां संभवात्। तथैव षड्भागभागास्त्वमीषां यथा जिनकल्पिकानामिति गाथार्थः।

एतेषामेव स्थितिमभिधातुमाह-

खित्ते काले चरित्ते, तित्थे परियाए आगमे वेए।
कप्पे लिंगे लेसा-झाणे गणणा अभिग्गहा य ॥५२७॥
पव्वावण-मुंडावण-मणसावण्णे वि से अणुण्णाया।
कारण-णिप्पडिकम्मा, भत्ते पंथो अ तइआए ॥५२८॥

अस्य गाथाद्वयस्यापि समुदायार्थः पूर्वं (गाथा ४८३-४८४)वत्

अवयवार्थं त्वाह-

खित्ते भरहेरवए, होंती साहरणवज्जिआ णिअमा।
पत्तो चिअ विण्णेअं, जमित्थ काले वि णाणत्तं ॥५२९॥

क्षेत्रे भरतैरवतयोर्भवन्ति क्षुद्रपरिहारिकाः संहरणवर्जिता नियमादियमेषां स्थितिः । अत एव भरतैरवतभावाद्विक्षेयमयदत्र कालेऽपि नानात्वं, प्रतिभागाद्यनाबाधिति गाथार्थः ।

चारित्रस्थितिमभिधातुमाह-

तुल्ला जहण्णठाणा, संजमठाणाण पढमबिइआणं ।
तत्तो असंखलोगा-णं तू परिहारिअट्ठाणा ॥ ५३० ॥

तुल्यानि जघन्यस्थानानि स्वसंख्यया संयमस्थानयोः प्रथमद्वितीययोः सामायिकच्छेदोपस्थाप्याऽभिधानयोः । ततो जघन्येभ्यः संयमस्थानेभ्यः, असंख्यानां लोकानां स्वाकाशप्रदेशस्थान वृद्ध्या परिहारिकस्थानानि भवन्ति, संयममधिकृत्येति गाथार्थः ।

ताणवि असंखलोगा, अविरुद्धा चेव पढमबीआणं ।
उवरिं पि तओ-ऽसंखा, संजमठाणा उ दोण्हं पि ॥५३१॥

तान्यपि परिहारिकसंयमस्थानानि असंख्येया लोका इति प्रदेशस्थानवृद्धौ तावन्तीत्यर्थः । तानि चाविरुद्धान्येव प्रथमद्वितीययोरिति, बुद्धिविशेषात् सामायिकच्छेदोपस्थाप्यसंयमस्थानानीति भावः । उपर्यपि ततः परिहारिकसंयमस्थानेभ्यः, असंख्येयानि शुद्धिविशेषतः संयमस्थानानि, द्वयोरपि सामायिकच्छेदोपस्थाप्ययोरिति गाथार्थः ।

सट्ठाणे पडिवत्ती, अण्णेसु वि होज्ज पुव्वपडिवन्नो ।
तेसु वि वट्टंतो सो-ऽतिअणयं पप्प वुच्चइ उ ॥ ५३२ ॥

स्वस्थान इति निवेशनः स्वस्थानेषु प्रतिपत्तिः कल्पस्य । अन्येष्वपि संयमस्थानेष्वधिकतरेषु भवेत् पूर्वप्रतिपन्नो व्यवसायविशेषात् तेष्वपि वर्तमानः संयमस्थानान्तरेऽपि स परिहारविशुद्धिक इत्यतीतनयं प्राप्योच्यते एव । निश्चयतस्तु न, संयमस्थानान्तराध्यासनादिति गाथार्थः ।

तते णं से सेलए जक्खे जिणपालिएणं सद्धिं लवणसमुद्दं मज्झं मज्झेणं वीइवयइ, जेणेव चंपा णयरी तेणेव उवागच्छति । उवागच्छइत्ता चंपाए णयरीए अग्गुज्जाणंसि जिणपालियं पिट्ठातो उत्तारेति । उत्तारेतित्ता एवं वयासी—एस णं देवाणुप्पिया ! चंपा णयरी दीसइ त्ति कट्टु जिणपालियं आपुच्छति, आपुच्छतित्ता जामेव दिसिं पाउब्भूया तामेव दिसिं पडिगया । तते णं जिणपालिए चंपं अणुपविसंति, जेणेव सए गिहे जेणेव अम्मापियरो, तेणेव उवागच्छइ । उवागच्छइत्ता अम्मापिऊणं रोयमाणे० जाव विलवमाणे जिणरक्खियवावत्तिं निवेदेति । तते णं जिणपालिए अम्मापियरो मित्तणाति० जाव परिजणेणं सद्धिं रोयमाणाति बहुइं लोइयाइं मयकिच्चाइं करेंति । करेइत्ता कालेणं विगयसोया जाता । तते णं जिणपालियं अन्नया कयाइं सुहासणवरगयं अम्मापियरो एवं वयासी—कहं णं पुत्ता ! जिणरक्खिए कालगए ? । तते णं से जिणपालिए अम्मापिऊणं लवणसमुद्दोत्तारं च कालियवायसमुत्थणं च पोयवहणविवत्तिं च फलहखंडआसातणं च रयणदीवुत्तारणं च रयणदीवदेवयागिण्हणं च जोगपरिजूयं च सूलाइयपुरिसदरिसणं च सेलगजक्खआरुहणं च रयणदीवदेवयाउवसग्गं च जिणरक्खियस्स विवत्तिं च लवणसमुद्दउत्तरणं च चंपाऽऽगमणं च सेलगजक्खआपुच्छणं च जहाभूयमवितहमसंदिद्धं परिकहेति । तते णं से जिणपालिए० जाव विपुलाइं भोगभोगाइं भुंजमाणा विहरइ ।

तेणं कालेणं तेणं समएणं समणे भगवं महावीरे० जाव जेणेव चंपा णयरी जेणेव पुण्णभद्दे चेइए तेणेव समोसढे, परिसा णिग्गया, कूणिओ वि राया णिग्गओ, जिणपालिए धम्मं सोच्चा पव्वइए इक्कारसंगविऊ मासिएणं भत्तेणं० जाव सोहम्मे कप्पे देवत्ताए उववन्ने, दो सागरोवमाइं ठिई पन्नत्ता । ताओ णं० जाव महाविदेहे वासे सिज्झिहिंति । एवामेव समणाउसो !० जाव माणुस्सए कामभोगे नो पुणरवि आसाएति, से णं० जाव वीतिवइस्सति, जहा से जिणपालिए, एवं खलु जंबू ! समणेणं भगवया महावीरेणं० जाव संपत्तेणं एक्कारसमस्स नायज्झयणस्स अयमट्ठे पण्णत्ते त्ति बेमि ॥

" जह रयणदीवदेवी, तह इत्थं अविरई महापावा ॥
जह लाभत्थी वणिया, तह सुहकामा इहं जीवा ॥ १ ॥
जह तेहिं जीएहिं, दिट्ठो आघायमंडले पुरिसो ॥
संसारदुक्खजीया, पावंति तहेव धम्मकहिं ॥ २ ॥
जह तेण तेसि कहिया, देवी दुक्खाण कारणं घोरं ।
तत्तो चिय णित्थारो, सेलगजक्खाउ णण्णत्तो ॥ ३ ॥
इय धम्मकहा भव्वा—णं साहए ऽदिट्ठअविरइमहाओ ॥
सयलुहहेउजूया, विसयाविरइ त्ति जीवाणं ॥ ४ ॥
सत्ताण दुहत्ताणं, धम्मं सरणं जिणिंदपण्णत्तं ॥
आणंदरूवणिव्वा—णसाहणं तह य देसेइ ॥ ५ ॥
जह तेसिं तरियव्वो, रुद्दसमुद्दो तहेव संसारो ॥
जह तेसिं संगिहगमणं, निव्वाणगमो तहा इत्थ ॥ ६ ॥
जह सेलगस्स पिट्ठं, तेसिं भव्वाणं तह इहं चरणं ॥
जह देवीवामोहो, तओ चुओ पावितो निहणं ॥ ७ ॥
तह अविरइए पडिओ, चरणचुओ दुक्खमावयाइण्णो ॥
णिवडइ अपारसंसा—रसायरे दारुणसरूवे ॥ ८ ॥
जह देवीए अखोहो, पत्तो सद्धाणजीवियसुहाइं ॥
तह चरणठिओ साहू, अक्खोहो जाइ णिव्वाणं " ॥ ९ ॥

ज्ञा० १ श्रु० ९ अ० ।

जिणपिया–जिनपिता–पुं० । नाभेयाऽऽदीनां पितरि, प्रव० । तन्नामानि यथा–

" नाभी जियसत्तुरिया, जियारी तह संवरो ।
मेहे धरे पइट्ठे अ, महसेण अ खत्तिए ॥ ३२४ ॥
सुग्गीवे दढरहे विण्हू, वसुपुज्जे य खत्तिए ।
कयवम्म सिंहसेणे य, भाणू य विससेणओ ॥ ३२५ ॥
सूरे सुदंसणे कुंभे, सुमित्ते विजए समुद्दविजए अ ।
राया य अस्ससेणे, सिद्धत्थे वि य खत्तिए ॥ ३२६ ॥ " प्रव० ११ द्वार ।

जिणपुत्त–जिनपुत्र–पुं० । जिनशिष्ये, क्षणिकाः सर्वसंस्कारा विज्ञानमात्रमेवेदं भो जिनपुत्राः ! इति । सम्म० १ काण्ड ।

जिणपूइट्ठि[ण]–जिनपूजार्थित्–पुं० । जिनस्यैव पूजामर्थयते यः स जिनपूजार्थी । गोशालकादौ, जिनपूजार्थिता च त्रिंशत्तमं मोहनीयस्थानमिति । सम० ३० सम० ।

जिणपूया–जिनपूजा–स्त्री० । अर्हदर्चने, पञ्चा० ४ विव० । " कुसुम-ऽक्खय-धूवेहिं, दीवय-वासेहि सुंदरफलेहिं । पूया भय-सालिसेहिं, अट्ठविहा तस्स कायव्वा ॥ २४ ॥ " दर्श० १ तत्त्व । प्रति० । पं० व० । ध० । द्वा० । जीवा० । (अस्य व्याख्या ' चेइय ' शब्देऽत्रैव भागे १२८४ पृष्ठे गता । तथाऽत्रत्या सर्वा वक्तव्यता ' चेइय ' शब्दे तृतीयभागे १२७७ पृष्ठे निर्दिष्टा)

जिणपूयाविग्घकर–जिनपूजाविघ्नकर–पुं० । जिनपूजानिषेधके सावद्यदोषोपेतत्वाद् गृहिणामप्येषा अविधेयेत्यादि कुदेशनादिभिः समयान्तस्तत्त्वदूरीकृते, कर्म० १ कर्म० ।

जिणप्पणीय–जिनप्रणीत–त्रि० । जिनोक्ते, " जिणमयं जिणप्पणीयं " जिनेन भगवता वर्द्धमानस्वामिना प्रणीतं समस्तार्थसंग्रहात्मकमातृकापदत्रयप्रणयनाद् जिनप्रणीतम् । भगवान् हि वर्द्धमानस्वामी केवलज्ञानावाप्तावादौ बीजबुद्धिपरमगुणकलितान् गौतमादीन् गणधारिणः प्रत्येतद् मातृकापदत्रयमुक्तवान् । " उप्पन्नेइ वा, विगमेइ वा, धुवेइ वा " इति । यतश्च पदत्रयमुपजीव्य गौतमादयो द्वादशाङ्गं विरचितवन्तः, ततो भवत्येतद् जिनमतं जिनप्रणीतमिति । जी० १ प्रति० । दर्श० ।

जिणप्पबोध–जिनप्रबोध–पुं० । खरतरगच्छीये जिनेश्वरसूरिशिष्ये, वैक्रमीये १२८५ वर्षे जातः, १२९६ वर्षे दीक्षितः, १३३१ वर्षे सूरिपदे स्थापितः, १३४१ वर्षे स्वर्गमतः । कातन्त्रव्याकरणापर्यन्तेन टीका कृता, प्रबोधमूर्तिरित्यपरस्य नाम ऽऽसीत् । जै० इ० ।

जिणप्पभसूरि–जिनप्रभसूरि–पुं० । लघुखरतरगच्छस्थे जिनसिंहसूरिशिष्ये स्वनामख्याते आचार्ये, ती० ४८ कल्प । अनेनाऽऽचार्येण वैक्रमीये १३६५ वर्षेऽयोध्यायामुषित्वा अयहरस्तोत्राऽजितशान्तिस्तोत्रयोरुपरि टीका रचिता । सूरिमन्त्रप्रदेशविवरणं, तीर्थकल्पः, पञ्चपरमेष्ठिस्तवः, सिद्धान्तागमस्तवः, द्व्याश्रयमहाकाव्यं चेत्यादयो बहवो ग्रन्था निर्मिताः । नित्यमयमभिनवकाव्यं कृत्वैव आहारमकरोद्, न्यायकन्दलीपञ्जिकानाम्नीटीकाकृत रत्नशेखरसूरिगुरुश्च स आसीदिति तत्तद्ग्रन्थानामुपक्रमोपसंहाराभ्यामवगम्यते । जै० इ० । तथाहि–"इत्थं पृथक्त्वविषयार्कमिते शकाब्दे, वैशाखमासि सितपक्षगषष्ठितिथ्याम् । यात्रोत्सवोपनतसङ्घयुतो यतीन्द्रः, स्तोत्रं व्यधाद् गजपुरस्थ जिनप्रभाख्यः ॥ २० ॥ " ती० ४८ कल्प । गौडदेशावतंसस्य, श्रीजिनप्रभसूरयः । कल्पं पाटलिपुत्रस्थ, रचयांचक्रुरागमात् ॥ १ ॥ " ती० ३५ कल्प । तस्य समयो जिनप्रभसूरिकृते शत्रुञ्जयकल्पे–"श्रीविक्रमाब्दे वाणाष्ट-वि-इषदेवमिते सिते । सप्तम्यां तपसः काव्य-दिवसेऽयं समर्थितः" ॥१॥ ती० १ कल्प । "श्रीजिनप्रभसूरीणां,साहाय्योद्यभिक्षसौरभा । श्रुताबुत्सवतु सतां, वृत्तिः स्याद्दादमञ्जरी " ॥ ८ ॥ स्या० ३२ श्लोक ।

" नन्दानेकपशक्तिशीतगुमिते १३०६ श्रीविक्रमार्कोपते-
र्वर्षे भाद्रपदस्य माल्यवरजे सौम्ये दशम्यां तिथौ ।
श्रीहर्म्मीरमहम्मदे प्रतिपतिद्दामागमकलाखण्डले,
ग्रन्थोऽयं परिपूर्णतामजनत श्रीयोगिनीपत्तने ॥ ३ ॥ "
" तीर्थानां तीर्थभक्तानां, कीर्तनेन पवित्रितः ।
कल्पः प्रदीपनामाऽयं, ग्रन्थो विजयतां चिरम् ॥ १ ॥ "
ती० ४८ कल्प । (जिनप्रभसूरिणो महम्मदसाहिदिशकाधिराजेन समागमो ' वीरकल्प ' शब्दे वक्ष्यते)

जिणप्परूविय–जिनप्ररूपित–त्रि० । जिनेन भगवता वर्द्धमानस्वामिना यथा श्रीकृष्णाभिगमो भवति तथा सम्यक् प्रणयनक्रियाप्रवर्तनेन प्ररूपितं जिनप्ररूपितम् । " जिनेन सम्यक्प्रणीते, जी० १ प्रति० ।

जिणप्पलावि (ण)–जिनप्रलापिन्–पुं० । जिनमात्मानं प्रकर्षेण लपतीत्येवंशीलो जिनप्रलापी । आत्मानं जिनं मन्यमाने गोशालकादौ, भगवत्यां गोशालकमतमधिकृत्य—" अजिणे जिणप्पलावी " प्र० १५ श० १ उ० । " एवं सो अजिणो जिणप्पलावी विहरइ " आ० म० द्वि० ।

जिणप्पवयण–जिनप्रवचन–न० । जिनाऽऽगमे, जीत० ।

" जिनप्रवचनं नौमि, नवतेजस्त्विमण्डलम् ।
यतो ज्योतींषि धावन्ति, हर्तुमन्तर्मतं तमः ॥ २ ॥
निष्पत्त्यूहं प्रणिदधे, नवानीतनयानदम् ।
सर्वानपि गणाध्यक्षा-नक्षामोदरसङ्गतान् ॥ ३ ॥ " जीत० ।

जिणवल्लह–जिनवल्लभ–पुं० । अभयदेवसूरिशिष्ये स्वनामख्याते आचार्ये, अष्ट० ३२ अष्ट० । अयं वैक्रमीये ११६० वर्षे आसीत्, अयं षट्कल्याणकवादी पिण्डविशुद्धिप्रकरण-गणधरसार्धशतक-आगमिकवस्तुविचारसार-कर्मादिविचारसार-वर्द्धमानस्तवाऽऽद्यनेकग्रन्थकृदासीत् । चित्रकूटेऽस्य बहूनि चित्रकाव्यानि शिलायां लिखितानि सन्ति । जै० इ० ।

जिणबिंब–जिनबिम्ब–न० । जिनप्रतिमायाम्, षो० ६ विव० । (जिनबिम्बकारणविधिवक्तव्यता ' चेइय ' शब्दे तृतीयभागे १२६६ पृष्ठे गता)

जिणबिंबपइट्ठावणा–जिनबिम्बप्रतिष्ठापना–स्त्री० । अर्हत्प्रतिमास्थापने, पञ्चा० ७ विव० । (जिनबिम्बप्रतिष्ठाविधिः ' चेइय ' शब्दे तृतीयभागे १२७० पृष्ठे द्रष्टव्यः)

जिणभद्द–जिनभद्र–पुं० । मथुरानगरवास्तव्ये स्वनामख्याते श्रावके, आ० म० द्वि० । (तत्कथा ' णमोक्कार ' शब्दे वक्ष्यते)

जिणभत्ति–जिनभक्ति–स्त्री० । जिनसेवायाम्, " भत्तीइ जिनवराणं " । आव० २ अ० ।

जिणभत्तिदंसणाणुराग–जिनभक्तिदर्शनानुराग–पुं० । जिनं प्रति भक्त्या कृत्वा यो दर्शनानुरागो दर्शनेच्छा स तथा । जिनं

प्रति प्रकट्य कृतायां दर्शनेच्छायाम्, " जिणभत्तिदंसणाणुरागेणं हरिसियाओ । " औ० ।

जिणभत्तिराग–जिनभक्तिराग–पुं० । जिनविषयके भक्तिपूर्वकेऽनुरागे, " अप्पेगइया जिणभत्तिरागेणं " जिने भगवति वर्द्धमानस्वामिनि भक्तिरागो भक्तिपूर्वकोऽनुरागस्तेनेति । रा० ।

जिणभत्तिसूरि [ण्]–जिनभक्तिसूरिन्–पुं० । खरतरगच्छीये जिनसौभाग्यसूरिशिष्ये जिनलाभसूरिगुरौ, सोऽयं वैक्रमीये १७७० वर्षे जातः, १७७६ वर्षे दीक्षितः, १७६० वर्षे सूरिपदं प्राप्तवान्, १८०४ वर्षे स्वर्गमत् । जै० इ० ।

जिणभद्दगणिक्खमासमण–जिनभद्रगणिक्षमाश्रमण–पुं० । भद्रबाहुस्वामिविरचितसामायिकनिर्युक्तिभाष्यऽऽदिकारके आचार्ये, अयमाचार्यो वैक्रमीयाद् ५८५ वर्षाद् ६४५ वर्षं यावद् विद्यमान आसीत् । संक्षिप्तजीतकल्पः, क्षेत्रसमासो, ध्यानशतकं, बृहत्संग्रहणी, विशेषाऽऽवश्यकभाष्यं चेत्यादयो ग्रन्था अनेनैव महानुभावेन रचिता इति तद्ग्रन्थेभ्यः प्रतीयते । जै० इ० ।

तथा च विशेषाऽऽवश्यकवृत्तौ–

" आवश्यकप्रतिनिबद्धगभीरभाष्य-
पीयूषजन्मजलधिर्गुणरत्नराशिः ।
ख्यातः क्षमाश्रमणतागुणतः क्षितौ यः,
सोऽयं गणिर्विजयते जिनभद्रनामा " ॥ १ ॥ विशे० ।

ननु श्रीमद्भद्रबाहुप्रणीता सामायिकनिर्युक्तिरिह भाष्ये व्याख्यायते, तत्कथमिदमावश्यकानुयोगोऽभिधीयते ? नैतदेवम्, अभिप्रायापरिज्ञानात् । तथाहि–सामायिकस्य षड्विधाऽऽवश्यकैकदेशत्वादावश्यकरूपता तावन्न विरुध्यते । विशे० । नं० । तथा चाऽऽवश्यकं ध्यानशतकमधिकृत्य–"पंचुत्तरेण गाहा-सएण झाणस्सयं समुद्दिट्ठं । जिणभद्दखमासमणे-हिं कम्मसोहीकरं जइणा ॥१॥" आव० ४ अ० । "जिनभद्रगणिं स्तौमि, क्षमाश्रमणमुत्तमम् । यः श्रुताज्जीतमुद्धे, सौरिः सिन्धोः सुधामिव " ॥ ४ ॥ जीत० ।

जिणभद्दसूरि [ण्]–जिनभद्रसूरिन्–पुं० । स्वनामख्याते आचार्ये, तत्रैको जिनेश्वरसूरिशिष्यः खरतरगच्छीयः, येन सुरसुन्दरीकथा नाम ग्रन्थो रचितः । द्वितीयः शालिभद्रशिष्य एतन्नामा, स वैक्रमीये १२०४ वर्षे विद्यमान आसीत् । तेन गजसुकुमारकथा नाम ग्रन्थो विरचितः । तृतीयः खरतरगच्छे जिनदत्तसूरिशिष्यः । जै० इ० ।

जिणभवण–जिनभवन–न० । जिनाऽऽयतने, पं० व० ४ द्वार । हरि० । आ० । द्वा० । पो० । (जिनभवनकारणविधिः 'चेइय' शब्दे तृतीयभागे १२७८ पृष्ठे उक्तः)

जिणभासिय–जिनभाषित–त्रि० । जिनोक्ते, "सुणेह जिणभासियं" जिनभाषितं जिनोक्तम् । उत्त० २७ अ० । "विहिणा जिणभासिएणेव । " जिनभाषितेनैव सर्वज्ञोक्तेनैव, न स्वमतिविचारितेन । पञ्चा० १ विव० ।

जिणमई–जिनमती–स्त्री० । हेमपुरनगरस्थस्य सुरदत्तश्रेष्ठिनः स्वनामख्याताया दुहितरि, हरि० १ तत्त्व । (तत्कथा 'दीवपूया' शब्दे वक्ष्यते)

जिणमंडण–जिनमण्डन–पुं० । तपागच्छीये सोमसुन्दरसूरिशिष्ये, येन वैक्रमीये १४९२ वर्षे कुमारपालप्रबन्धो नाम ग्रन्थो विरचितः । जै० इ० ।

जिणमय–जिनमत–न० । रागाऽऽदिशत्रून् जयति स्म जिनः । स च यद्यपि छद्मस्थवीतरागोऽपि भवति, तथापि तस्य तीर्थप्रवर्तकत्वायोगात् उत्पन्नकेवलज्ञानस्तीर्थकृदादिर्गृह्यते । सोऽपि च वर्द्धमानस्वामी, तस्य वर्तमानतीर्थाधिपतित्वात् । तस्य जिनस्य वर्द्धमानस्वामिनो मतम्, अर्थतस्तेनैव प्रणीतत्वात् । आचाराऽऽदिद्वादशपर्यन्ते द्वादशाङ्गे गणिपिटके, जी० १ प्रति० । आ० चू० । उप० । "तित्थयरसमो सूरी, सम्मं जो जिणमयं पयासेइ । " जिनमतं जगत्प्रसिद्धदर्शनम् । ग० १ अधि० । "जिणमयमणविक्खंतो, बहुइ अट्ठम्मि झाणम्मि । " जिनाश्च तीर्थकराः, तेषां मतमागमरूपं प्रवचनम् । आव० ४ अ० । " भावेण जिणमयम्मि उ, आरंभपरिग्गहच्चाओ । " रागाऽऽदिजेतृत्वाज्जिनः, तन्मत एव, वीतरागशासन एवेत्यर्थः । पं० व० १ द्वार । अर्हत्सिद्धान्ते, " इंदि पसिद्धं जिणमयम्मि । " पञ्चा० ४ विव० । तीर्थंकराभिप्राये च । " सोऊण जिणवरमयं " जिनवराणां तीर्थकराणां मतमभिप्रायम् । सूत्र० १ श्रु० १ अ० १ उ० ।

जिणमयट्ठिय–जिनमतस्थित–त्रि० । सर्वज्ञाऽऽगमास्थिते, "विसेसओ जिणमयट्ठियाणं । " जीवा० ८ अधि० ।

जिणमयनिउण–जिनमतनिपुण–त्रि० । आगमप्रवीणे, दशा० ६ अ० ३ उ० ।

जिणमहिम [ण्]–जिनमहिमन्–पुं० । जिनमहत्त्वे, "कंचणसयबला व जिणमहिमं । " आ० क० ।

जिणमाणिक्कसूरि–जिनमाणिक्यसूरि–पुं० । प्राकृतगाथाबद्धकूर्मापुत्रचरित्रकारके आचार्ये, जै० इ० ।

जिणमाया–जिनमातृ–स्त्री० । मरुदेव्यादिकायां जिननन्यास, स० ।

तन्नामानि त्वित्थम–

" मरुदेवि विजय सेणा, सिद्धत्था मंगला सुसीमा य ।
पुहवी लक्खण रामा, नंदा विण्हू जया सामा ॥३२२॥
सुजसा सुव्वय अइरा, सिरि देवी य पभावई चेव ।
पउमावई य अप्पा, सिव वामा तिसलाई य ॥ ३२३ ॥ "
प्रव० ११ द्वार ।

जिणमुणिचेइयसंघाइपाडिणीय–जिनमुनिचैत्यसङ्घाऽऽदिप्रत्यनीक–पुं० । तीर्थंकरसाधुचतुर्वर्णसङ्घसिद्धगुरुश्रुताऽऽदिकानामवर्णवादाऽऽशातनाद्यनिह्नवनिर्वर्तके, कर्म० १ कर्म० ।

जिणमुद्दा–जिनमुद्रा–स्त्री० । जिनानामर्हतां कृतकायोत्सर्गाणां सत्का, जिना वा विघ्नजेत्री मुद्राऽङ्गन्यासविशेषो जिनमुद्रा । मुद्राभेदे, पञ्चा० ।

अथ जिनमुद्रामाह—

चत्तारि अंगुलाइं, पुरओ कप्पाइ जत्थ पच्छिमओ ।
पायाणं उस्सग्गो, एसा पुण होइ जिणमुद्दा ॥ २० ॥

चत्वारीति संख्या, अङ्गुलानि प्रतीतानि । तानि च स्वकीयान्येव, पुरतोऽग्रतः, तथा ऊनानि किञ्चिदूनानि अङ्गुलान्येव, यत्र चस्यां मुद्रायां, पश्चिमतः पश्चिमभागे, पादयोश्चरणयोरुत्सर्गः परस्परपरित्यागः, संसर्गाभावोऽन्तरमित्यर्थः । एषाऽसौ, पुनःशब्दो योगमुद्रापेक्षया जिनमुद्राया वैलक्षण्यप्रतिपादनार्थः । भवति संपद्यते, जिनानामर्हतां कृतकायोत्सर्गाणां सत्का,

जिना वा विघ्नजेत्री मुद्राऽङ्गन्यासविशेषो जिनमुद्रेति गाथार्थः । ॥ २० ॥ पञ्चा० ३ विव० । ल० । सङ्घा० । प्रव० ।

जिणरक्खिय-जिनरक्षित-पुं० । चम्पानगरीवास्तव्यस्य माकन्दिसार्थवाहस्य पुत्रे स्वनामख्याते सार्थवाहे, ज्ञा०। "जोगे अवयक्खंता, पमंति संसारसागरे घोरे।" चारित्रं प्रतिपद्यापि जोगाभिकाङ्क्षन्तः पतन्ति संसारसागरे घोरे, जिनरक्षितवत् । ज्ञा० १ श्रु० ९ अ०। (तत्कथाऽनुपदमेव 'जिणपालिय' शब्देऽस्मिन्नेव भागे १४९४ पृष्ठे उक्ता)

जिणरयणसूरि [ण्]-जिनरत्नसूरिन्-पुं० । खरतरगच्छीये जिनराजसूरिशिष्ये जिनचन्द्रसूरिगुरौ, तेन वैक्रमीये १६९९ वर्षे सूरिपदं प्राप्तः, तथा १७११ वर्षे आगरानगरे स्वर्गतिर्लेभे । संसारित्वेऽस्य "रूपचन्द्र" इत्यभिधानमासीत् । पत्नीमाताऽप्येतेन सह प्रव्रजिता । जै० इ० ।

जिणरायसूरि (ण्)-जिनराजसूरिन्-पुं० । खरतरगच्छीये जिनसिंहसूरिशिष्ये, वैक्रमीये १६४७ वर्षेऽयं जातः, १६५६ वर्षे दीक्षितः, १६७४ वर्षे सूरिपदं प्राप्तः, १६९९ वर्षे पट्टने स्वर्गमगत। श्रीशत्रुञ्जये श्रीऋषभदेवाऽऽदितीर्थङ्कराणामेकोत्तरपञ्चशतप्रतिमानामनेनैव प्रतिष्ठा कारिता, नैषधीयकाव्येऽनेन जिनराजनाम्नी टीका रचिता । जै० इ० ।

जिणरूव-जिनरूप-न० । परमाऽऽत्मरूपे, " जिनरूपं ध्यातव्यं, योगविधावन्यथा दोषः ।" जिनरूपं परमाऽऽत्मरूपमिति । षो० १४ विव० ।

जिणलाभसूरि [ण्]-जिनलाभसूरिन्-पुं० । खरतरगच्छीये जिनभक्तिसूरिशिष्ये, अयं वैक्रमीये १७८४ वर्षे 'बीकानेर' नगरे जातः, १७९६ वर्षे दीक्षितः, १८०४ वर्षे माण्डवीबन्दरे सूरिर्जातः, १८३४ वर्षे स्वर्गमत् । आत्मप्रबोधनाम्ना ग्रन्थोऽनेन रचितः । जै० इ० ।

जिणवई-जिनवाक्-स्त्री० । जिनवचने, " जे कोविज्जा जिणवइं पि।" ये जिनवाचमपि कोपयेयुरन्यथा कुर्युः। बृ० १ उ० ।

जिणवंस-जिनवंश-पुं० । जिनान्वये, "वंसाणं जिणवंसो"। वंशानामन्वयानां मध्ये यथा जिनवंशः प्रधानम् । संथा० ।

जिणवयण-जिनवचन-न० । जिनास्तीर्थंकराः, तेषां वचनमागमो जिनवचनम् । दश० १ अ० । जिनानां सर्वज्ञानां वचनं जिनवचनम् । द्वादशाङ्गे, व्य० १ उ० । जिनवचनमर्हद्वचनम् । पञ्चा० १३ विव० । जिनवचनमाचारादि । स० । " कूरा वि सद्दाविणं, विसयविसवसाणुगा वि होऊण । भाविंयजिणवयणमणा, तेक्कोक्कसुहावहा होंति" ॥१॥ श्रूयन्ते हि एवंविधाश्चिलातीसुतादय इति । तथाऽनर्घ्यामिति (जिनाङ्गं प्राणयेदिति सर्वत्र संबन्धः) यथावस्थितार्थप्रकाशकत्वेन सकलपरप्रणेतृशास्त्रोक्तार्थादविद्यमानमूल्यामिति भावः । उक्तं च-" सव्वे वि य सिद्धंता, सद्दव्वयणाओ सव्वसोक्खा । जिणवयणस्स भगवओ, न तुल्लमिय तं अणग्घेयं ॥१॥ " तथा स्तुतिकारेणाप्युक्तम्-"कल्पद्रुमः कल्पितमात्रदायी, चिन्तामणिश्चिन्तितमेव धत्ते । जिनेन्द्रधर्मोऽतिशयं विचिन्त्य, द्वयेऽपि लोके लघुतामुपैति ॥१॥ " अथवा ऋणघ्नामिति। तत्र ऋणं पूर्वभवपरम्परोपात्ताष्टप्रकारं कर्म, तद्धन्ति या सा ऋणघ्ना, ताम् । यत उक्तम्-"जं अन्नाणी कम्मं,खवेइ बहुयाहि वासकोडीहिं । तं नाणी तिहि गुत्तो,खवेइ ऊसासमित्तेणं " ॥१॥ तथा-अमिताममित्यपरमिताम् । यत उक्तम्-" सव्वनईणं जा वा-लुया वि सव्वोदहीण जं तोयं । तत्तोऽणंतगुणो खलु, अत्थो एगस्स सुत्तस्स" ॥१॥ अमृतां वा परमाऽऽमोषधां, पथ्यां वा। तथा चोक्तम्-"जिणवयणमोयगस्स य, रत्तिं व दिया य खज्जमाणस्स । तित्तिं वुहो न गच्छइ, हेउसहस्सोवगूढस्स ॥ १ ॥ " " नरनरगतिरियसुरगण-संसारियसव्वदुक्खरोगाणं । जिणवयणमेगमोसह-मपवग्गसुहक्खयं फलयं " ॥ १ ॥ अमृतां वा सजीवाम्, उपपत्तिक्षमत्वेन सार्थकामिति भावः । न तु यथा-" तेषां कटतटभ्रष्टै—गंजानां मदबिन्दुभिः । प्रावर्तत नदी घोरा, हस्त्यश्वरथवाहिनी ॥१॥ " इत्यादिवाक्यनिर्युक्तिकम् मृतामिति । तथा-अजितामशेषपरप्रवादिप्रवचनाऽऽक्षाभिरपराजितामिति भावः। तदुक्तम्-"जीवाइवत्थुचिंतण-कोसल्लगुणेण जत्तसरिसेण। सेसवयणेहिँ अजियं,जिणिंदवयणं महातिसयं ॥१॥" तथा-महार्थामिति । महानपरमितोऽर्थो यस्याः सा तथाविधा,ताम्। तत्र पूर्वापरविधित्वादनुयोगद्वारात्मकत्वाच्चयगर्भत्वाच्च महार्था,तां,महत्स्थां वा । तत्र महामतयः सम्यग्दृष्टय एवेहोच्यन्ते । ततश्च महत्सु स्थिता महत्स्था,तां च,प्रधानसत्त्वस्थितामिति भावः। महत्स्थां वा,अतिशयपूज्यामित्यर्थः। यत उक्तम्-"सयलसुरासुरमाणुस-जोइसवंतरसुपूइयं नाणं । जेणेह गहणराणं, बुहंति वुत्तं सुरिंदा वि" ॥१॥ महानुभावः सामर्थ्यादिलक्षणो यस्याः सा तथाविधा,तां. प्राधान्यं चास्याश्चतुर्दशपूर्वविदः सर्वलब्धिमन्तो जायन्ते, ततश्च सकलस्यास्य त्रिभुवनस्य प्रभवन्ति। यत उक्तम्-"पहू णं भंते! चउद्दसपुव्वी घडाओ घडसहस्सं,पडाओ पडसहस्सं वि उ करित्तए?। गोयमा! हंता पहू"इत्यादि। परलोके पुनरनुत्तरविमानादिषूपपातः। उक्तं च-"उववाओ लंतगम्मी,चउदसपुव्विस्स होइ उ जहण्णो। उक्कोसो सव्वट्ठे,सिद्धिगमो वा अकम्मस्स ॥१॥ " तथा महाविषयामिति । महद्विषयताऽस्याः सकलद्रव्याऽऽदिविषयावभासकत्वात्। उक्तं च-"दव्वाओ सुयनाणी सव्वदव्वाइं जाणइ,नो पासइ" इत्यादि कृतं प्रसङ्गेनेति गाथार्थः । दर्श० ४ तत्त्व । आव० । (विस्तरतो गाथाव्याख्या ' आणा ' शब्दे द्वितीयभागे ११५ पृष्ठे दृश्या)

जिणवयणे अणुरत्ता, जिणवयणं जे करेंति भावेण ।
अमला असंकिलिट्ठा, ते हुंति परित्तसंसारी ॥ २६४ ॥

इति छिन्नसंसारिणः स्युरित्यर्थः । ते इति के ?, ये जीवा जिनवचने अर्हद्वाक्ये अनुरक्ताः सन्तो भावेन जिनवचनं कुर्वन्ति, इत्यनेन मनोवाक्कायैः जिनधर्ममाराधयन्ति । पुनः कीदृशास्ते ?, अमलामिथ्यामलरहिताः पुनः कीदृशाः?, असंक्लिष्टाः मोहमत्सराऽऽदिक्लेशरहिताः । एतद्दृशा जीवाः संसारपारं कृत्वा मोक्षं व्रजन्तीत्यर्थः । उत्त० ३६ अ० । जिनवचनस्य प्रामाण्यमुक्तं च स्तुतिकारेण-"सुनिश्चितं नः परतन्त्रयुक्तिषु, स्फुरन्ति याः काश्चन सूक्तिसंपदः । तवैव ताः पूर्वमहार्णवोत्थिताः, जगत्प्रमाणं जिनवाक्यविप्रुषः ॥ १ ॥ " नं० । जिनवचनप्रशंसा यथा-"जयति जगदेकमङ्गल-मपहतनिःशेषदुरितघनतिमिरम् । रविबिम्बमिव यथास्थित-वस्तुविकाशं जिनशवचः ॥ १ ॥ " नं० । जिनवचनस्य हितकारित्वं यथा—

" एगंतेणं हियं वयणं, गोयम! दिस्सति केवलिणो ।
बलवोमीह कारेंति, इच्छे घत्तूण अंतुणो ॥
तित्थयरभासिए वयणे, जे तह त्ति अणुवालिया ।
सिद्धा देवगणा तस्स, पायहि य णमंति हरिसेया " ॥ महा०

६ अ० । जिनवचनमादृत्यत्र न शरणम् । उक्तञ्च- " जन्मजरामरणभयैरभिद्रुते व्याधिवेदनाग्रस्ते । जिनवरवचनादन्यत्र नास्ति शरणं क्वचिल्लोके ॥१॥ " आचा० १ श्रु० ३ अ० १ उ० ।

जिनवचनस्य सम्यक्त्वं यथा-

भद्दं मिच्छादंसण-समूहमइयस्स अमयसारस्स ।
जिणवयणस्स भगवओ, संविग्गसुहाहिगम्मस्स ॥१६७॥

भद्रं कल्याणं, जिनवचनस्यास्तिवति संबन्धः। मिथ्यादर्शनसमूहमयस्य । ननु यन्मिथ्यादर्शनसमूहमयं तत् कथं सम्यग्रूपतामात्मसादयति ?, न हि विषकणिकासमूहमयस्यामृतरूपताऽऽपत्तिः प्रसिद्धा । न। परस्परनिरपेक्षसंग्रहाऽऽदिनयरूपाऽऽपन्नसांख्यादिमिथ्यादर्शनानां परस्परं सव्यपेक्षतासमासादितानेकान्तरूपाणां विषकणिकासमूहविशेषमयस्यामृतसंदोहस्यैव सम्यक्त्वाऽऽपत्तेः । दृश्यन्ते हि विषाऽऽदयोऽपि भावाः परस्परसंयोगविशेषमवाप्ताः समासादितपरिणत्यन्तरा अगदरूपतामात्मसात्कुर्वाणाः। मध्वाज्यप्रभृतयस्तु विशिष्टसंयोगावाप्तद्रव्यान्तरस्वभावा मृतिप्राप्तिनिमित्तविषयरूपतामासादयन्तः । न चाध्यक्षप्रसिद्धार्थस्य पर्यनुयोगविषयता, अन्यथाऽग्न्यादेरपि दाह्यदहनशक्त्यादिपर्यनुयोगाऽऽपत्तेः। अत एव निरपेक्षा नैगमाऽऽदयो दुर्णयाः,सापेक्षास्तु सुनया उच्यन्ते। अभिहितार्थसंवादि चेदं वादिवृषभस्तुतिकृतसिद्धसेनाऽऽचार्यवचनम्-"नयास्तव स्यात्पदलाञ्छना इमे, रसोपविद्धा इव लोहधातवः । भवन्त्यनिष्प्रेतफला यतस्ततो, भवन्तमार्याः प्रणता हितैषिणः" ॥१॥ इति । अथवा सांख्यादेरेकान्तवादिदर्शनसमूहमयस्य चूर्णनस्वभावस्य,मिथ्यादृष्टिपुरुषसमूहविघटनसमर्थस्य वा,यद्वा-मिथ्यादर्शनसमूहा नैगमाऽऽदयः,एकैकनैगमाऽऽदेर्नयस्य शतविधत्वात् । "एक्केको वि सयविहो" इत्याद्यागमप्रामाण्यादवयवा अस्य तन्मिथ्यादर्शनसमूहमयम्, जिनवचनस्य नैगमाऽऽदयः सापेक्षाः सप्तावयवाः,तेषामप्येकैकः शतधा व्यवस्थित इत्यभिप्रायः। समूहरूपसप्तनयावयवोदाहरणापेक्षया च सप्तभङ्गीप्रदर्शनमार्गमङ्गा विदधति । सामान्यविशेषाऽऽत्मकत्वाद्वस्तुतत्त्वस्य, सामान्यस्यैकत्वात्, तद्विवक्षायां यदेव घटादि द्रव्यं स्यादेकमिति प्रथमभङ्गीविषयः, तदेव देशकालप्रयोजनभेदाद्भानात्मं प्रतिपद्यमानं तद्विवक्षया स्यादनेकमिति द्वितीयभङ्गविषयः, तदेवोभयाऽऽत्मकमेकैकशब्देन यदाऽभिधातुं न शक्यते तदा स्यादवक्तव्यमिति तृतीयभङ्गविषयः तदेवावकाशदातृत्वेनासाधारणेनैकमाकाशं, तदेवावगाह्यावगाहकावगाहनक्रियाभेदादनेकं भवति, तद्भेदिनो तस्यावस्तुत्वाऽऽपत्तेः । प्रदेशभेदापेक्षयाऽपि च तदनेकम् । अन्यथा हिमवद्विन्ध्ययोरप्येकदेशताप्राप्तेः । तस्य च तथाविवक्षायां स्यादेकं चानेकं चेति चतुर्भङ्गविषयता । यदेकमाकाशं भवतः प्रसिद्धं तदेकस्मिन्नवयवे विवक्षिते एकमवयवस्यावयवान्तराद्भिन्नाभिन्नानां वाचकस्य शब्दस्याभावादवक्तव्यं चेति । तथाविवक्षायां स्यादेकमवक्तव्यं चेति पञ्चमभङ्गविषयः। तत् यदेवैकमाकाशं प्रसिद्धं भवतः तदवगाह्यावगाहनक्रियाभेदादनेकम् । एकानेकत्वप्रतिपादकशब्दाभावादवक्तव्यं चातः स्यादनेकमवक्तव्यं चेति षष्ठभङ्गविषयः । यदेवैकमाकाशात्मकतयाऽऽकाशं भवतः प्रसिद्धं, तदेव तथैकमवगाह्यावगाहनक्रियापेक्षयाऽनेकं, युगपत्प्रतिपादनापेक्षयाऽवक्तव्यं चेति स्यादेकमनेकमवक्तव्यं चेति सप्तमभङ्गविषयः। एवं स्यात्सर्वगतः स्यादसर्वगतो घटादिरित्यादिकाऽपि सप्तभङ्गी वक्तव्या,यतो य एव पार्थिवाः परमाणवो घटस्य एव विस्रसाऽऽदिपरिणतिवशाद्भास्वरानिलानलाद्यात्मकतामात्मसात्कुर्वाणाः स्यात् सर्वगतो घट इत्यादिसप्तभङ्गविषयतां यथोक्तन्यायात् कथं नासादयन्ति ?। न च घटपरमाणूनां पुद्गलरूपतापरित्यागे पूर्वपर्यायापरित्यागे च घटपर्यायाऽऽपत्तिः, क्षणिकाक्षणिकैकान्तयोरर्थक्रियानुपपत्तेरसत्त्वापत्तेः,परिणामिन एव सुवर्णात्मनाऽवस्थितस्य केयूराऽऽद्यात्मकविनाशमनुभवतः कटकाद्यात्मनोत्पद्यमानस्य वस्तुनः सत्त्वात्,अन्यथा कदाचित्कस्यचित्कदाचिदनुपलब्धेः । न चाध्यक्षादन्यत्किञ्चिद् प्रमाणान्तरमस्ति, यतस्तद्विपरीतभावाश्रयणमः क्रियते । अन्तर्बहिश्च हर्षविषादाऽऽद्यनेकाऽऽकारवितर्काऽऽत्मकचैतन्यस्य स्वयमेकाकुशूलाऽऽद्यनेकाऽऽकारस्वीकृतैकमृत्पिण्डादेः स्वसंवेदनाऽक्षजाध्यक्षतः प्रतिपत्तेः। सर्वथोपलभ्यमध्यक्षरूपं पूर्वापरकोटीरस्थितिं वदतः सर्वप्रमाणविरोधात् कुशूलकादाऽऽदिषु पर्यायेषु तादृग्भूतसुवर्णद्रव्योपलब्धेः कार्योत्पत्तौ कारणस्य सर्वथा निवृत्त्यनुपलब्धेन च साहश्यविप्रलम्भात्तद्द्रव्यस्वभावकल्पनेति वक्तुं तदेकान्तभेदसाधकप्रमाणस्यापास्तत्वात् । न च कथञ्चित्स्वभावभेदेऽपि तादात्म्यक्षतिः, ग्राह्यग्राहकाऽऽकारसंविद्वद्विविक्तपरमाणुषु स्थूलैकघटाऽऽदिप्रतिभासवद्भा ग्राह्यग्राहकाऽऽकारविविक्तसंवित्प्रकल्पनेऽध्यक्षधियोऽपि विषयीकृताऽऽकारविवेकाविवेकानुपलब्धेः । अध्यक्षेतरस्वभावत्वाच्च विरोधस्वरूपासिद्धत्वमत्रापि कः प्रद्वेषः ?। तथाहि-शक्यमन्यत्रापि एवमभिधातुम-एकमेव पार्थिवद्रव्यं लोचनाऽऽदिसामग्रीविशेषात् चूर्णादिप्रतिपत्तिभेदेऽपि भिन्नमिव प्रतिभाति, प्रत्यासन्नेतररूपताव्यवस्थितैकविषयत्वात्। न हि स्पष्टास्पष्टनिर्भासभेदेऽपि तदेकत्वक्षतिः, तद्वदिहापि रूपाऽऽदिप्रतिभासाभेदेऽप्येकत्वं किं न स्यात् ?,प्रतीतेरविशेषात्। एवं च स्याद्वादिनोऽग्नेरप्यनुष्णत्वप्रशक्तिरित्यसङ्गतमभिधानम्। यतस्तत्रापि स्यादुष्णोऽग्निरिति स्पर्शविशेषणोष्णस्य भास्वराऽऽकारेण पुनरनुष्णस्य तस्यैकस्य नानास्वभावशक्तेरबाधितप्रमाणविषयस्यैवं नो दोषाऽऽसङ्गसंभवात्,तस्मादेकस्यैव सामग्रीभेदवशात्तथाप्रतिभासाविरोधः। कारणस्य च कार्याऽऽत्मनोत्पत्तौ न किञ्चिदपेक्षणीयमस्ति, यत्तथोत्पित्सुस्वभावतां न भवेत्। अत एव मृदादिभावो घटस्वभावेन नश्वरः, कपालस्वरूपेण चोत्पत्तौ तिष्ठतीति स्वभावत एव नश्वरः,उत्पित्सुः स्थास्नुश्चान्यतमापाये पदार्थस्यैवासंभवात्, स्थितेश्च स्वभावं प्रत्यनपेक्षत्वाच्च। न ह्युत्पन्नः पदार्थः किञ्चित् स्थितिं प्रत्यपेक्षते, स्थित्यात्मकत्वादुत्पादस्य, न चावस्थित उत्पत्तौ किञ्चिदपेक्षते, उत्पत्तिस्वभावत्वात् स्थितेः। न च विनष्ट उत्पत्तिं प्रति हेत्वन्तरापेक्षो, विनाशस्योत्पत्त्यात्मकत्वात्, ततः पूर्वापरस्वभावपरित्यागावाप्तिलक्षणं परिणाममासादयन् भावो व्यवतिष्ठते। इति प्रत्यक्षादिप्रमाणगोचरमतेदं च । शब्दविद्युत्प्रदीपादेरपि निरन्वयविनाशकल्पनाऽसङ्गतैव, तेषामादौ स्थितिदर्शनादन्तेऽपि तत्स्वभावानतिक्रमात्। न हि भावः स्वस्वभावं त्यजति, प्रागपि तत्स्वभावपरित्यागप्रशक्तेः, अन्ते च क्षयदर्शनात् प्रागपि नश्वरस्वभावाद्भावादाकुत्पत्तिसमये स्थितिदर्शनादन्ते स्थितिः किं नाभ्युपेयते ?। न च विद्युत्प्रदीपादेस्तेजसरूपपरित्यागात्तामसरूपस्वीकरणे किञ्चिदनिष्टं भवेत्। न च स्वभावभेदस्तदेकत्वविघातकृत्, ग्राह्यग्राहकाऽऽकारसंवेदनवद् वेद्यवेदकाऽऽकारविवेकपरोक्षापरोक्षसंवित्ति-

अङ्गा,यथा च ध्वंसहेतोस्तदतदकरणविरोधादकिञ्चित्करत्वं,तथा स्थित्युत्पादहेत्वोर्विशरारुधर्मणः स्थास्नुताकरणे विनश्वरस्वभावः किं न विनश्येत् ?,अथासौ स्थास्नुस्तथापि हि स्थितिहेतोरानर्थक्यं, स्वत एव तस्य स्थितेः। तथोत्पत्तिहेतुरपि यदि भावं करोति,तदा न स्यात्किञ्चित्करत्वमेव भावस्य,स्वयमेव भावाभावरूपत्वात्। अथाभावं भावरूपतां नयति,तर्हि नाशहेतुरपि भावमभावीकरोतीति कथमकिञ्चित्करः स्यात्?। न ह्यभावस्य भावीकरणे भावस्य वाऽभावीकरणे कश्चिद्विशेषः संभवी। अत एव च तेषामन्यतमस्य सहेतुकत्वमहेतुकत्वं चाभ्युपगच्छन् सर्वेषां तदभ्युपगन्तुमर्हति,अविशेषात्। न च भिन्नयोगक्षेमत्वात् कार्यकारणयोरेकत्वमनुपपन्नं, स्वभावभेदेऽप्येकत्वप्रतिपत्तेः। सर्वसंविदक्षणानामेकदोत्पत्तिविनाशवतामभिन्नयोगक्षेमत्वात् कार्यकारणयोरेकत्वमनुपपन्नम, स्वभावभेदेऽप्येकत्वेऽपि च परस्परतः पृथग्भावसिद्धेः। यथाभिन्नयोगक्षेमेऽपि प्रतिभासभेदाद्भेदः, तर्हि यत्र प्रतिभासाभेदस्तत्र भिन्नयोगक्षेमत्वेऽप्यभेदः,प्रतिभासभेदाभेदयोर्वस्तुभेदाभेदव्यवस्थापकत्वात्। समुदायस्य च देशकालभेदाभावात् सकृदेव संविदात्मनोत्पत्तेरेकत्वं प्रसज्येत। यदि च स्वभावभेदो वस्तुभेदलक्षणं, तदा सन्तानान्तरयोरिव विषयरूपायाः संवित्तेरेकत्वेऽपि प्रत्यक्षेतरयोर्योऽसौ विद्यत इति नानात्वं भवेत्। यदि पुनः स्वभावभेदाविशेषेऽपि विवक्षितक्षणाऽऽकारयोरेव तादात्म्यं,न पुनः सन्तानान्तरसंवित्तीनामिति प्रत्यासत्तेः कुतश्चिद्व्यवस्थाप्यते, तर्हि परस्यापि विवक्षितैकार्थोपादानोपादेयभूतयोरेवावस्थयोस्तादात्म्यं कथञ्चिद् वदतो न कश्चिद्दोषः प्रशक्तिमान्। निराकृतप्रायानेकशः एकान्तवादः, तत्प्रसाधकहेतूनां सर्वेषामनेकान्तव्याप्ततया विरुद्धतादर्शनात्। तत्प्रदर्शनं चैकान्तवादिनिग्रहस्थानमनेकान्तवादिविजयस्येवेतरपराजयाधिकरणप्राप्तिलक्षणत्वात् " विरुद्धहेतुमुद्भाव्य, वादिनं जयतीतरः । " इत्यस्य वचसो न्यायानुगतत्वात्। यदि पुनरसाधनाङ्गवचनं वादिनः पराजयाधिकरणमभ्युपगम्येत, तदा वादाभ्युपगमं विधाय तूष्णींभावमात्रेणासाधनाङ्गस्यावचनाद्वादिनो विजयः किं न स्यात् ?; प्रतिवादिनोऽपि स्वपक्षसिद्धिमकुर्वतः कथं न विजयस्तत एव भवेत् ?। अथ साधनाङ्गवचनमपि निग्रहस्थानं, तर्हि वादिप्रतिवादिनोर्योगपद्येन निग्रहादिकरणता भवेत्,तूष्णींभावाविशेषात्। तूष्णींभावोपलम्भेन इतरो विजयवानिति चेत्?, नन्वेवमितरजयस्यान्यतरपराजयाधिकरणतैव प्राप्ता, न च स्वपक्षसिद्धिमकुर्वतः न विजयप्राप्तिः, तदप्राप्तौ च कथं तदेतरस्य पराजयः। यदपीष्टस्यार्थस्य सिद्धसाधनं तस्याङ्गं स्वभावकार्यानुपलम्भलक्षणं हेतुत्रयं पक्षधर्मत्वादि वा त्रैरूप्यं तत्स्वाक्यवचनं निग्रहस्थानं वादिन इत्युक्तम्। तदप्यचारु। प्रतिवादिनोऽपि पक्षधर्मत्वाऽन्यतमस्यानुक्तावसमर्थने वा विजयाप्राप्तेः; तदप्राप्तौ च वादिनो निग्रहस्थानानुपपत्तेरितरजयनान्तरीयकत्वादितरपराजयस्य; एवं हेत्वाभासादेरसाधनाङ्गस्य वचनं वादिनो निग्रहस्थानमिति प्रतिक्षिप्तमुक्तन्यायानुसृत्य। अथ ततः साध्यसिद्धेरभावात्तस्य निग्रहस्थानं प्रतिक्षिप्तम्। उक्तन्यायेन च तदनुविद्धोपादेरसाधनाङ्गकरणस्य तत एव तत्प्राप्तेः,ततो वादिनमसाधनाङ्गमभिदधानं कुर्वाणं वा स्वपक्षसिद्धिं विदधदेव प्रतिवादी तत्पक्षप्रतिक्षेपेण निगृह्णातीत्येवदेव न्याय्यं पश्यामः। एवं प्रतिवादिनो दोषमनुद्भावयतो न निग्रहस्थानं, तावता स्वपक्षसिद्धिमकुर्वाणस्य वादिनो विजयप्राप्त्ययोगात्, तत्साधनस्य सदोषत्वसंभवात्। तस्य सदोषत्वेऽपि तदुद्भावनासामर्थ्यात्प्रतिवादिनो निग्रहस्थानं स्यादिति चेत्। न। दोषवत्साधनाभिधानाद्वादिनोऽपि पराजयाद्यधिकरणत्वाद् द्वयोरपि युगपत्पराजयप्राप्तेः। अत एव प्रतिवादिनो दोषस्यानुद्भावनमपि न निग्रहस्थानम्। यच्च वादिपक्षसिद्धेरप्रतिबन्धकं पक्षाऽऽदिवचनाधिक्योद्भावनं प्रतिवादिपक्षसिद्धावसाधकतमं, तत्सर्वं न वादिनः पराजयाधिकरणम्। अन्यथा तत्पादप्रसारिकाद्युद्भावनमपि तस्य पराजयाधिकरणं स्यात्। अथ पक्षाऽऽदिदूषणस्यासाधनाङ्गत्वात्तदुद्भावने वादिनस्तदपरिज्ञाननिबन्धनपराजयाधिकरणता, तर्हि यत्सत्तत्सर्वं क्षणिकमिति व्याप्तिवचनादेव शब्दस्यापि क्षणिकत्वसिद्धौ 'संश्च शब्दः' इत्यनित्यानं, तत एव तस्य पराजयाधिकरणं भवेत्। न च शब्दे शब्दविप्रतिपत्तिः,येन तन्निरासाय सन्नित्यनित्यानं तत्रापुनरुक्तं भवेत्। तद्विप्रतिपत्तौ वा तत्साधकहेतोरसिद्धत्वादिदोषत्रयानतिवृत्तेर्भवतैवाभ्युपगमात्तत्साध्यत्वानुपपत्तिः। यदि च संक्षिप्तवचनात् साध्यसिद्धौ तद्विस्तराभिधानं निग्रहस्थानं, तर्हि सत्त्वात् क्षणक्षयसिद्धौ कृतकत्वप्रयत्नानन्तरीयकत्वाद्यभिधानं कथं न निग्रहस्थानं स्यात् ?, कथं वा कृतकप्रयत्नानन्तरीयकादिषु स्वार्थिकस्य तस्योपादानं तत्र स्यात् ?। यत् सत् तत्सर्वं क्षणिकमित्यादि साधनवाक्यमभिधाय पक्षादिवचनवत्तत्समर्थनमपि निग्रहस्थानं प्रसक्तम्। असमर्थितमपि खलु एव तत्रैवोक्तमेव स्वसाध्याविनाभूतस्य हेतोः प्रदर्शनम्,आसाध्यसिद्धेः सद्भावात्। स्वभावकार्यानुपलम्भप्रकल्पनया तद्वचनं निग्रहस्थानं परस्य प्रसक्तम्। अनुपलब्ध्यनुपलब्धिलक्षणं प्राप्तस्येति विशेषणोपादानं निग्रहस्थानम्। अदृश्यानामपि व्याधिभूतग्रहादीनां कुतश्चिद्व्यावृत्तिसिद्धेः। यदि पुनरुपलब्ध्यनुपलब्धेरेवाभावसिद्धिः, तदा नेदं निरात्मकं जीवच्छरीरं,प्राणादिमत्त्वादित्यत्र घटादेरात्मनोऽक्षणिकस्याद्दश्यानुपलम्भादेवात्तसिद्धेः, यत्सत्तत्सर्वं क्षणिकमिति सामस्त्येन व्याप्त्यसिद्धितः क्षणक्षयानुमानं नानवद्यं स्यात्। किं च देशकालस्वभावविप्रकृष्टभावानुपलब्धेरभावसिद्धौ सर्वत्र सदा सर्वोत्तमोऽग्निमन्तरेणानुपपत्तिमानितिव्याप्तेरसिद्धेर्न ततस्तत्सिद्धिः स्यात्। न चाभ्यक्षानुपलम्भौ तत्कार्यकारणभावप्रबाधकावभ्युपगम्यमानौ सन्निहितविषयबलोत्पत्तेरविचारकत्वाच्च यतो व्यापारान् विधातुं क्षमौ, तत्पृष्ठभाविविकल्पस्य तन्निवर्तनसामर्थ्याभ्युपगमे सविकल्पकस्यानिष्टे प्रामाण्ये प्रसज्येत। अनधिगतार्थाधिगन्तृत्वादविसंवादित्वाच्च तस्याऽविकल्पकस्य तु हिंसाविरतिदानचतसां स्वर्गाऽऽदिफलनिवर्तनसामर्थ्यस्वभावसंवेदनस्यैव सर्वात्मना वस्तुसंवेदनेऽपि निर्णयबलादेव प्रामाण्योपपत्तेः। अन्यथाऽनुमानस्वाप्रामाण्यप्रसक्तेस्तदगृहीतग्राहितयेत्युक्तं प्रागदृश्यानामनुपलम्भादेवासिद्धावधिकिया सत्ताऽभावानां व्याप्त्येत्यदपि परस्य निग्रहस्थानमेव, ततः स्वपक्षसिद्धिरितरस्य पराजयाधिकरणं,सच्च परोपन्यस्तहेतोर्विरुद्धतादर्शनेन स्वतन्त्रनिर्दोषहेतुसमर्थनेन वा परोपन्यस्तहेत्वसिद्धताऽऽदिदोषप्रतिपादनपुरःसरा कर्तव्या। अन्यथा परपराजयनिबन्धनस्य विजयायोगात्। यदा च विजिगीषुणा स्वपक्षस्थापनेन परपक्षनिराकरणेन च सन्नाप्रत्यायनं विधेयम्,अन्यथा जयपराजयानुपपत्तेस्तदाऽसिद्धानैकान्तिकत्वसाधनदोषोद्भावनेऽपि न वादिप्रतिवादिनोर्जयपराजयौ,प्रकृतार्थापरिसमाप्तेः। अथ स्वपक्षसिद्धेरभावाद्धेत्वाभासादेरसाधनाङ्गवचनं वादिनो निग्रह-

स्थानम्। न। इतरत्रापि तत्प्रसङ्गात्। अथ वादिनः साधनत्वेनाभिमतस्यासाधनत्वप्रदर्शनेन प्रतिवादिकृतेन पराजयः, प्रतिवादिनस्तु समुद्भूतदोषोद्भावनाज्जयः। न। यदि स्वपक्षसिद्धिमकुर्वता प्रतिवादिना स्वपरोत्कर्षापकर्षप्रत्यायनमात्रेण वादी निगृह्यते इत्यभ्युपगमः, तर्ह्यसद्भूतदोषोद्भावनेनापि निरुत्तरीकरणात् आत्मोत्कर्षसंजनयात्प्रतिवादिनो विजयप्राप्तिः; वादिनो निर्दोषसाधनाभिधायिनोऽपि पराजयप्रसक्तिः। अथ समर्थयन्त्यपि साधनस्यासमर्थनेन स्वपक्षसिद्धेरभावाद् वादिनः पराजयो न्यायप्राप्त एव। न। उभयत्र पराजयप्रसक्तेः। न ह्यभूतदोषोपनयनिगमनाद्युद्भावनमात्रेण प्रतिवादिना प्रकृतं वस्तुतत्त्वं प्रसाधयन् स्वपक्षसाधनसामर्थ्यविकलेन वादी निगृह्यते इति न्यायोपपन्नम्। अथ प्रतिवाद्यसाधनाङ्गस्य साधनाङ्गत्वेनोपादानात् स्वपक्षसिद्धिमकुर्वन् मिथ्याभिनिवेशी निगृह्यत इति चेत्। न। उत्तरवार्तिनिग्रहप्राप्तेरित्युक्तत्वात्। तस्मात्-"असाधनाङ्गवचन-मदोषोद्भावनं द्वयोः। निग्रहस्थानमन्यत्किं, न युक्तमिति नेष्यते ॥१॥" इत्यादि वादन्यायलक्षणमेकान्तवादिनां सर्वमसङ्गतम्। तत्कन्यायात् सर्वस्य चैकान्तसाधनाङ्गत्वात्, तस्यासत्त्वेन साधयितुमशक्यत्वात्, अनेकान्तस्य च निर्दोषत्वेन तत्र दोषोद्भावनरूपत्वात्, दोषानुद्भावनस्य वा निर्दोषे पराजयाधिकरणत्वात्, तदुद्भावनस्यैव तत्र निग्रहार्हत्वादित्यलं पिष्टपेषणेनेति व्यवस्थितं मिथ्यादर्शनसमूहमयत्वं, मयिकत्वं वा। न विद्यते मृतं मरणं यस्मिन्नसावमृतो मोक्षः, तं सारयति प्रापयतीति वा, तस्यावन्ध्यमोक्षकारणत्वाद् मोक्षप्रतिपादकत्वाच्च "अमयसारयस्स" चेति पाठेऽमृतवत्स्वाद्यते इत्यमृतस्वादम्, अमृततुल्यमिति यावत्। तथा-रागाऽऽद्यशेषशत्रुजेतृपुरुषविशेषैरुच्यत इति जिनवचनम्, तस्य, अनेन विशिष्टपुरुषप्रणीततत्त्वनिबन्धनं प्रमाणं निगमयति। क्षीराऽऽश्रवाऽऽद्यनेकलब्ध्यैश्वर्याऽऽदिमतो भगवत इति, अनेनापि विशेषणेन तस्यैहिकसंपद्विशेषजनकत्वमाह। संविग्नैः संसारभयोद्वेगाविर्भूतमोक्षाभिलाषैरपकृष्यमाणरागद्वेषाहङ्कारकालुष्यैरिदमेव जिनवचनं तत्त्वमिति। एवं सुखेनाभिगम्यते यत्तत्संविग्नसुखाभिगम्यं, तेनापि विशिष्टकुरुक्षेत्रातिशयसंवित्समन्वितयतिवृषभनिषेव्यत्वमस्य प्रतिपादयति। एवंविधगुणाध्यासितस्य जिनवचनस्य सामायिकाऽऽदिबिन्दुसारपर्यन्तश्रुतस्कन्धोपः कल्याणमस्त्विति प्रकरणसमाप्तावन्त्यमङ्गलसंपादनार्थं विशिष्टां स्तुतिमाहेति। सम्म० ३ काण्ड।

जिनवदन—न०। जिनमुखे, औ०।

जिणवयणकप्परुक्ख—जिनवचनकल्पतरु—पुं०। जिनाऽऽगमरूपे कल्पतरौ, "जिणवयणकप्परुक्खो, अणेगसुत्तत्थसालविच्छिण्णो। तवनियमकुसुमगुच्छो, सुग्गइफलबंधणो जयइ ॥ १ ॥" आचा० १ श्रु० १ अ० १ उ०।

जिणवयणधम्माणुरागरत्तमण—जिनवचन [वदन] धर्मानुरागरक्तमनस्—त्रि०। जिनवचने जिनवदने वा धर्मानुरागेण रक्तं मनो यस्य स तथा। तस्मिन्, औ०।

जिणवयणपट्ठुट्ठ—जिनवचनप्रदिष्ट—त्रि०। जिनाऽऽगमप्रदिष्टे, "जिणवयणपट्ठुट्ठ" जिनास्तीर्थंकराः, तेषां वचनमागमलक्षणं तस्मिन् प्रतिष्ठा अमीता इति। दश० १ अ०।

जिणवयणबाहिरमइ—जिनवचनबाह्यमति—त्रि०। सर्वज्ञशासनबहिर्मुखबुद्धिके, द्व० १ उ०।

जिणवयणभणुगयसुभासिय—जिनवचनानुगतिसुभाषित—त्रि०। जिनवचनमनुगत्याऽऽनुकूल्येन सुष्ठु भाषितं येन स तथा। तस्मिन्, स०।

जिणवयणभणुगयमहियभासिय—जिनवचनानुगतमहित[जिनवचनानुगताधिक]भाषित—त्रि०। जिनवचनमाचारादि, अनुगतं संबद्धं, नार्दर्शितदर्शमित्यर्थः। महितं पूजितमधिकं वा भाषितं येनाध्यापनाऽऽदिना स तथा। तस्मिन्, स०।

जिणवयणविहि—जिनवचनविधि—पुं०। प्रवचनोक्ते प्रकारे, "जिणवयणविहीइ दो वि सरूवा।" जिनवचनविधिना प्रवचनोक्तेन प्रकारेण। आ०।

जिणवयणरुइ—जिनवचनरुचि—त्रि०। जिनाऽऽगमरुचिके, ध०२०।

अयं च गुणवतः पञ्चमो भेदः।
संप्रति जिनवचनरुचिरूपं पञ्चमं भेदं व्याख्यानयन्नाह-

सवणकरणेसु इच्छा, होइ रुई सद्दहाणसंजुत्ता।
एईइ विणा कत्तो, सुद्धी सम्मत्तरयणस्स ? ॥ ४६ ॥

श्रवणमाकर्णनं, करणमनुष्ठानं, तयोरिच्छा तीव्राभिलाषो, भवति, रुचिः, श्रद्धानसंयुक्ता प्रतीतिसंगता, जायते आविर्भवति। अस्या एव प्राधान्यख्यापनायाऽऽह-एतया हि स्वरूपया रुच्या, विनाऽभावेन, कुतः शुद्धिः ?, न कुतोऽपीत्याकूतम्। सम्यक्त्वरत्नस्य शुश्रूषा धर्मरागरूपत्वात्तस्य, तयोश्च सम्यक्त्वसहभावित्वेनैक्यतया प्रसिद्धत्वात्। उक्तं च-"सुस्सूसधम्मरागो, गुरुदेवाणं जहासमाहीए। वेयावच्चे नियमो, सम्मद्दिट्ठिस्स लिंगाइं"।१। इति पञ्चमगुणभावना। अन्ये तु पञ्चगुणानित्थमभिदधति-

"सुत्तरुई अत्थरुई, करणरुई चेव उवसमाभिनिवेसरुई।
गुणवंते पंचमिया, अणिट्ठियच्छाहिया होइ ॥ १ ॥"

अत्रापि सूत्ररुचिः पठनाऽऽदिस्वाध्यायप्रवृत्तिः, अर्थरुचिरुत्थानाऽऽदिविनयं गुणिनां प्रयुङ्क्ते। करणाभिनिवेशौ तुल्यावेव। अनिष्ठितोत्साहता पुनरिच्छावृद्धिरेवेति न विरोधाशङ्कनीय इति। ध० २०। (जिनवचनरुचिविषये जयन्तीश्राविकाकथा ' जयंती ' शब्देऽस्मिन्नेव भागे १४१६ पृष्ठे गता)

जिणवयणसुइ—जिनवचनश्रुति—स्त्री०। जिनाऽऽगमश्रवणे, "सुलहा सुरलोयसिरी, रयणायरमेहला मही सुलहा। निव्वुइसुहजणियरुई, जिणवयणसुई जए दुलहा" ॥१॥ सि। उप०६७० ।

जिणवयणाकण्णण—जिनवचनाऽऽकर्णन—न०। तीर्थंकरभाषितश्रवणे, "तत्ताहिगमो हि तहा, जिणवयणाऽऽयण्णणस्स गुणा।" जिनवचनाऽऽकर्णनस्य तीर्थंकरभाषितश्रवणस्य एते गुणाः। आ०।

जिणवर—जिनवर—पुं०। जिनाः छद्मस्थवीतरागाः, तेषां वराः। पञ्चा० ४ विव०। प्रज्ञा०। रागाऽऽदिजयाज्जिनाः, अवधिमनःपर्यायोपशान्तमोहक्षीणमोहाः, तेषां मध्ये वराः सामान्यकेवलिनो जिनवराः। संथा०। जिनानां वरा उत्तमाः, भूतभवद्भाविनाप्रावस्त्रनावाबाधासिद्धकेवलज्ञानकलितत्वात्। प्रज्ञा० १ पद। श्रुताऽऽदिजिनप्रधाने केवलिनि, आव० २ अ०। "चउवीसं पि जिणवरा, तित्थयरा मे पसीयंतु।" जिनवराः श्रुताऽऽदिजिनेभ्यः प्रकृष्टाः। ध०२ अधि०। उत्त०। जिना रागद्वेषाऽऽदिजयनशीलाः सामान्यकेवलिनः, तेषु तेभ्यो वा वरः प्रधानोऽतिशयापेक्षया श्रेष्ठो जिनवरः। तं०। तीर्थंकरे, आव० २ अ०। "तित्थयरे

जिणवरे" रागद्वेषमोहजितो जिनाः, एवंभूताश्च सामान्यकेवलिनोऽपि भवन्तीति तद्व्यवच्छेदार्थमाह-वराः प्रधानाः चतुस्त्रिंशदतिशयसमन्वितत्वेन। सूत्र०१ श्रु०१ अ०१ उ०। "सोऊण जिणवरमयं," जिनवराणां तीर्थकराणां मतमभिप्रायम्। सूत्र० १ श्रु० १ अ० १ उ०। द० प०। "जगमत्थयवट्टियाणं,विअसिअवरनाणदंसणधराणं। नाणुज्जोयगराणं,लोगम्मि नमो जिणवराणं ॥१॥" द० प० ४ प०।

जिणवरिंद-जिनवरेन्द्र-पुं०। जिनाश्चद्मस्थवीतरागाः, तेषां वराः प्रधानाः केवलिनः,तेषामिन्द्रास्तीर्थंकरनामकर्मोदयवर्तित्वाद् नानाविधातिशयसमेतत्वाच्च तीर्थंकराः। अतस्तेषां, जिनवरेन्द्राणामित्यर्थः। "पूजाए जिणवरिंदाणं।" पञ्चा०४ वि० व०। "वंदामि जिणवरिंदं"। प्रक्रा० १ पद। (जिनवरेन्द्रमिति) अयन्ति रागाऽऽदिशत्रूनभिभवन्ति ये ते जिनाः, ते च चतुर्विधाः। तद्यथा-श्रुतजिनाः,अवधिजिनाः,मनःपर्यायजिनाः, केवलिजिनाः। तत्र केवलिजिनत्वप्रतिपत्तये वरग्रहणं, जिनानां वरा उत्तमाः-भूतभवद्भाविज्ञानस्वभावावज्ञासिकेवलज्ञानकलितत्वाद् जिनवराः,ते चातीर्थकरा अपि सन्तः सामान्यकेवलिनो भवन्ति, ततस्तीर्थंकरत्वप्रतिपत्त्यर्थमिन्द्रग्रहणम्, जिनवराणामिन्द्रो जिनवरेन्द्रः, प्रकृष्टपुण्यस्कन्धरूपतीर्थंकरनामकर्मोदयात्तीर्थंकर इत्यर्थः। प्रक्रा० १ पद।

जिणवसह-जिनवृषभ-पुं०। जिनश्रेष्ठे, "अस्संजमं जिणवसहं।" असंज्वलं जिनवृषभम्। स०।

जिणवाणी-जिनवाणी-स्त्री०। अर्हच्चचने, "विलसतु मनसि सदा मे, जिनवाणी परमकल्पलतिकेव। कल्पितसकलजनामर-शिवसुखफलदा न दुर्ललिता" ॥१॥ चं० प्र० १ पाहु०। "देवा देवीं नरा नारीं, शबराश्चापि शाबरीम्। तिर्यञ्चोऽपि हि तैरश्चीं, मेनिरे भगवद्गिरम्" ॥ १॥ दश० १ अ०।

जिणविज्ज-जिनवैद्य-पुं०। जिनभिषग्वरे, आव०।

जह सव्वसरीरगयं, मंतेण विसं णिरुंभए डंके।
तत्तो पुणोऽवणिज्जइ, पहाणतरएण जोगेण ॥ १७३ ॥

यथेत्युदाहरणोपन्यासार्थः, सर्वशरीरगतं सर्वदेहव्यापकं,मन्त्रेण विशिष्टवर्णानुपूर्वीलक्षणेन, विषं मारणाऽऽत्मकद्रव्यं, निरुध्यते निश्चयेन म्रियते,क्व?,डङ्के तक्षितदेशे, ततो डङ्कात् पुनरपनीयते। केन?, इति,अत आह-प्रधानतरमन्त्रयोगेन, श्रेष्ठतरमन्त्रयोगेनेत्यर्थः। "मंतजोगेहिं" इति च पाठान्तरम्। तत्र मन्त्रयोगाभ्यामित्यर्थः। अत्र पुनर्योगशब्देनागदं परिगृह्यते। इति गाथार्थः ॥१७३॥

एष दृष्टान्तः, अयमर्थोपनयः-

तह तिहुअणतणुविसयं, मणोविसं मंतजोगबलजुत्तो।
परमाणुम्मि णिरुंभइ,अवणेइ तओ वि जिणविज्जो।१७४॥

"तह" इत्यादि। तथा त्रिभुवनतनुविषयं, त्रिभुवनशरीराऽऽलम्बनमित्यर्थः। मन एव भवमरणानिबन्धनत्वाद् विषं मनोविषं, मन्त्रयोगबलयुक्तो जिनवचनध्यानसामर्थ्यसंपन्नः, परमाणौ निरुणद्धि, तथाऽचिन्त्यप्रयत्नाच्च अपनयति, ततोऽपि तस्मादपि परमाणोः, कः?, जिनवैद्यो जिनभिषग्वर इति गाथार्थः ॥ १७४ ॥ आव० ४ अ०।

जिणवीरणाह-जिनवीरनाथ-पुं०। महावीरस्वामिजिने, "बन्धोदयोदीरणसत्पदस्थं,निःशेषकर्मारिबलं निहत्य। यः सिद्धिसाम्राज्यमलंचकार, श्रेयं स वः श्रीजिनवीरनाथः"॥ १॥ कर्म० २ कर्म०।

जिणसंकास-जिनसङ्काश-पुं०। सर्वैकसदृशे, कल्प० ६ क्षण० अकलसंशयच्छेदकत्वे, स्था० ३ ठा० २ उ०। "अजिणाणं जिणसंकासाणं"। अजिनानामसर्वैकत्वाद् जिनसंकाशानामविसंवादिवचनत्वाद् यथापृष्टनिर्वचनत्वाच्च। स्था० ४ ठा० ४ उ०।

जिणसंथव-जिनसंस्तव-पुं०। "लोगस्सुज्जोयगरे" इत्यादिरूपायां जिनस्तुतौ, दश० ५ अ० १ उ०।

जिणसकहा-स्त्री०-जिनसक्थि-न०। जिनास्थिनि, भ०।

चमरस्स णं असुरिंदस्स असुरकुमाररण्णो चमरचंचाए रायहाणीए सभाए सुहम्माए माणवए चेइए खंभे वइरामएसु गोलवट्टसमुग्गएसु बहुओ जिणसकहाओ सन्निक्खित्ताओ चिट्ठंति ॥

(जिणसकहाओ त्ति) जिनसक्थीनि जिनास्थीनि। भ० १० श० ५ उ०। सूत्रे स्त्रीत्वनिर्देशः प्राकृतत्वात्। सू० प्र० १८ पाहु०। (सभास्थितजिनसक्थ्यनुरोधादिन्द्राः सभायां मैथुनं कर्तुं न शक्नुवन्तीति 'अग्गमहिषी' शब्दे प्रथमभागे १७२ पृष्ठे उक्तम)

जिणसासण-जिनशासन-न०। रागद्वेषमोहलक्षणान् शत्रून् जितवन्त इति जिनाः, तेषां शासनं जिनशासनम्। सम्म० १ काण्ड। जिनप्रवचने, दश० १ अ०। वीतरागवचने, "सुद्धाणं जिणसासणं।"(२५ गाथा) दश० ८ अ०। जिनाऽऽज्ञायां च, "णिक्खंता जिणसासणे।" जिनशासने जिनाऽऽज्ञायाम्। उत्त० १८ अ०। सूत्र०।

"समस्तवस्तुविस्तारे, व्यासपंक्तैलवज्रले।
जीयाच्छ्रीशासनं जैनं, धीदीपोद्दीप्तिवर्द्धनम् ॥ २ ॥
यत्प्रभावादवाप्यन्ते, पदार्थाः कल्पनां विना।
सा देवी संविदे नः स्ता-दस्तकल्पलतोपमा ॥३॥" उत्त०१अ०।

जं च मे पुच्छसी काले, सम्मं सुद्धेण चेयसा।
ताइं पाउकरे बुद्धे, तं नाणं जिणसासणे ॥ ३२ ॥

यच्च (मे इति) मां पृच्छसि प्रश्नयसि, काले प्रस्तावे, सम्यक् शुद्धेन अविपरीतबोधवता, चेतसा चित्तेन 'लक्षणे तृतीया' "ताइं" इति सूत्रत्वात् तत् (पाउकरे त्ति) प्रादुष्करोमि प्रकटीकरोमि, प्रतिपादयामीति यावत्। बुद्धोऽवगतसकलवस्तुतत्त्वः। कुतः पुनर्बुद्धोऽसि?,अत आह-तदिति यत्किञ्चिदिह जगति प्रचरति ज्ञानं यथाविधवस्तुतत्त्वबोधरूपं,तज्जिनशासने,अस्तीति गम्यते। ततोऽहं तत्र स्थित इति तत्प्रसादाद्बुद्धोऽस्मीत्यभिप्रायः। इह च यतस्त्वं सम्यक् शुद्धेन चेतसा पृच्छस्यतः प्रतिक्रान्तप्रश्नादिरप्यहं यत्पृच्छसि तत् प्रादुष्करोमीत्यतः पृच्छ यथेच्छमित्यैदम्पर्यार्थः। अथ वा-अत एव लक्ष्यते यथा "अप्पणो परेसिं च" इत्यादिना तस्यायुर्विकल्पनामवगम्य संजयमुनिनाऽसौ पृष्टः-कियन्ममायुरिति?। ततोऽसौ प्राह-यच्च त्वं मां कालविषयं पृच्छसि तत्प्रागुक्तवान् बुद्धः सर्वज्ञोऽत एव तज्ज्ञानं जिनशासने, व्यवच्छेदफलत्वाद् जिनशासन एव, न त्वन्यस्मिन् सुगताऽऽदिशासने,अतो जिनशासन एव यद्यो विद्यः, येन यथाऽहं जानामि तथा त्वमपि जानीष, शेषं प्राग्वदिति सूत्रार्थः ॥ ३२ ॥ उत्त० १८ अ०।

जह जिणसासणनिरया, धम्मं पालेंति साहवो सुद्धं ।
न कुतित्थिएसु एवं, दीसइ परिपालणोवाओ ॥ ९३ ॥

यथा येन प्रकारेण, जिनशासननिरता निश्चयेन रताः, धर्मं प्राग्निरूपितशब्दार्थं, पालयन्ति रक्षन्ति, साधवः प्रव्रजिताः, षड्जीवनिकायपरिरक्षानेन कृतकारितोऽऽदिपरिवर्जनेन च शुद्धमकलङ्कं,नैवं तन्त्रान्तरीयाः,तस्माच्च कुतीर्थिकेष्वेवं,यथा साधुषु दृश्यते परिपालनोपायः, षड्जीवनिकायपरिरक्षानाऽऽद्यभावात्। उपायग्रहणं च साभिप्रायकम्। शास्त्रोक्तः खलूपायोऽत्र चिन्त्यते, न पुरुषानुष्ठानं, कापुरुषा हि वितथकारिणोऽपि भवन्त्येवेति गाथार्थः ॥ ९३ ॥ दश० नि० १ अ० ।

जिणसासणपरंमुह–जिनशासनपराङ्मुख–त्रि० । जैनमार्गविद्वेषिणि,सूत्र० ।"इत्थी व संगया बाला,जिणसासणपरम्मुहा।" रागद्वेषजितो जिनाः, तेषां शासनमाज्ञा कषायमोहोपशमहेतुभूता, तत्पराङ्मुखाः संसाराभिष्वङ्गिणो जैनमार्गविद्वेषिणः । सूत्र० १ श्रु० ३ अ० ४ उ० ।

जिणसिंहसूरि(ण्)–जिनसिंहसूरिन्–पुं० । खरतरगच्छस्थे जिनचन्द्रसूरिशिष्ये स्वनामख्यात आचार्ये, वी० २१ कल्प । पञ्चा० । अयं वैक्रमीये १६१५ वर्षे जातः, १६२३ वर्षे दीक्षितः, १६७० वर्षे सूरिपदं प्राप्तः, १६७४ वर्षे स्वर्गतः । द्वितीयोऽप्येतन्नामा पूनमियागच्छे मुनिरत्नसूरिशिष्यः, येनाममस्वामिचरित्रनामा ग्रन्थो रचितः । जै० इ० ।

जिणसीस–जिनशिष्य–पुं० । गणधराऽऽदिके, स० ।

जिणसीसाणं चेव समणगणपवरगंधहत्थीणं थिरजसाणं परिसहसेण्णरिउबलपमद्दणाणं द (त) वदित्तचारित्तणाणसंमत्तसारविविहप्पगारप्पसत्थगुणसंजुयाणं अणगारमहरिसीणं अणगारगुणाण वण्णओ ।

जिनशिष्याणां चैव गणधरादीनाम्,किंभूतानाम् ?, अत आह-श्रमणगणप्रवरगन्धहस्तिनां, श्रमणोत्तमानामित्यर्थः। तथा-स्थिरयशसां, तथा-परीषहसैन्यमेव परीषहबृन्दमेव, रिपुबलं परबलं, तत्प्रमर्दनानां, तथा दवदहनाग्निरिव दोषान्युज्ज्वलानि, पाठान्तरेण-' तपोदीप्तानि ' यानि चारित्रज्ञानसम्यक्त्वानि, तैः सारा: सफलाः विविधप्रकारविस्तारा:, अनेकविधप्रपञ्चाः,प्रशस्ताश्च ये क्षमाऽऽदयो गुणास्तैः संयुतानां, क्वचिद् गुणध्वजानामिति पाठः। तथा अनगाराश्च ते महर्षयश्चेत्यनगारमहर्षयः, तेषामनगारगुणानां वर्णकः श्लाघा, आख्यायत इति योगः। स० ।

जिणसुंदर–जिनसुन्दर–पुं० । सोमसुन्दरसूरिशिष्ये स्वनामख्याते तपागच्छीय आचार्ये, ग० ४ अधि० । येन दीपाऽऽवलीकल्पो नाम ग्रन्थो विरचितः । वैक्रमीये १४९६ वर्षेऽयं विद्यमान आसीत् । जै० इ० ।

जिणसेहरसूरि[ण्]–जिनशेखरसूरिन्–पुं० । खरतरगच्छीये जिनवल्लभसूरिशिष्ये, अनेन १२०४ वर्षे रुद्रपल्लीयगच्छः स्थापितः, सम्यक्त्वसप्ततिका-श्रीजिनरात्रिणी-प्रश्नोत्तररत्नमालावृत्तिश्चेति ग्रन्था विरचिताः । जै० इ० ।

जिणसोक्खसूरि[ण्]–जिनसौख्यसूरिन्–पुं० । खरतरगच्छीये जिनचन्द्रसूरिगुरौ, वैक्रमीये १७३९ वर्षेऽयं जातः, १७५१ वर्षे दीक्षितः, १७६३ वर्षे सूरिजातः, १८०० वर्षे स्वर्गतः । जै० इ० ।

जिणहरिसगणि[ण्]–जिनहर्षगणिन्–पुं० । तपागच्छीये जिनचन्द्रसूरिशिष्ये,येन १५०२ वर्षे वीरमग्रामसुस्थित्वा विचारामृतसंग्रहो, रत्नशेखरनरपतिकथा चेति द्वौ ग्रन्थौ रचितौ । जै० इ० ।

जिणहंससूरि[ण्]–जिनहंससूरिन्–पुं० । बृहत्खरतरगच्छीये जिनसमुद्रसूरिशिष्ये आचाराङ्गोपरि दीपिकाकारके आचार्ये, जै० इ० ।

जिणाइन्नत्त–जिनाऽऽदिभक्त–पुं० । तीर्थनाथानां सिद्धाऽऽचार्योपाध्यायसाधुचैत्यानामन्येषां च गुणगरिष्ठानां बहुमानकरे, कर्म० १ कर्म० ।

जिणाएस–जिनाऽऽदेश–पुं० । अर्हद्वचने, "पव्वज्जाजावओ जिणाएसो । " पं० व० १ द्वार ।

जिणाणा–जिनाऽऽज्ञा–स्त्री० । वीतरागोक्तवचनपद्धतौ, "सानुबन्धा जिनाऽऽज्ञा च, तत्तपः शुद्धमिष्यते । " अष्ट० १ अष्ट० ।

जिणाणुचिण्ण–जिनानुचीर्ण–त्रि० । जिनैर्हिताऽऽप्त्यनिवर्तकयोगसिद्धैर्गणधारिभिरनुचीर्णे जिनानुचीर्णम । गणधरैः सम्यक्तदर्थावगमाऽऽसङ्गशक्तिगर्भानिवर्तकसमन्नाप्त्याप्त्या धर्ममेघनामकसमाधिरूपेण परिणमिते, जी० । " जिणाणुचिण्णं जिणपण्णत्तं । " जिना इह हिताऽऽप्त्यनिवर्तकयोगसिद्धा गणधारिणः परिगृह्यन्ते, विचित्रार्थत्वात् सूत्राणाम् । जी० १ प्रति० ।

जिणाणुमय–जिनानुमत–त्रि० । जिनानामतीतानागतवर्तमानानामृषभपद्मप्रभनाजसीमन्धरस्वामिप्रभृतीनामनुमतं जिनानुमतम । जिनानामानुकूल्येन सम्मते, " जिणमयं जिणाणुमयं " वस्तुतत्त्वमपवर्गमार्गं प्रति मनागपि विसंवादाभावादिति जिनानुमतम । जी० १ प्रति० ।

जिणाणुलोम–जिनानुलोम–त्रि० । जिनानामवस्थादिजिनामानुलोममनुगुणं जिनानुलोमम । जिनानामनुगुणे, " जिणमयं जिणाणुमयं जिणाणुलोमं " एतद्वशादवस्थादिजिनत्वप्राप्तेः। तथाहि-यथोक्तमिदं जिनमतमासेवमानाः साधवोऽवधिमनःपर्यायकेवललाभमासादयन्त्येवेति । जी० १ प्रति० ।

जिणायण–जिनाऽऽयतन–न० । जिनभवने, पं० व० ४ द्वार । पञ्चा० ।

जिणालय–जिनाऽऽलय–न० । जिनभवने, सेन० । जिनाऽऽलये यद् धौतिढौकनं करोति तत्कस्मिन् सूत्रे, प्रकरणे वाऽस्ति ?। तथा कुमतिनस्त्थं कथयन्ति-धौतिढौकनं देवनिर्माल्यं जायते, तस्य पुष्पादि लात्वा कथं चटापयन्ति?,इति प्रश्ने,उत्तरम्-धौतिढौकनमिति परम्परया ज्ञायते, तथा तन्निर्माल्यं न कथ्यते । यतः-"भोगविणट्ठं दव्वं, निम्मल्लं विंति गीअत्था । " इति श्राद्धवृत्तावुक्तत्वादिति । १२५ प्र० । सेन० २ उल्ला० । ज्ञानद्रव्यममारिद्रव्यं च जिनगृहकार्ये आयाति, न वा ?, इति प्रश्ने,उत्तरम्-ज्ञानद्रव्यं जिनाऽऽलयकार्ये आयातीत्यत्तराण्युपदेशचिन्तामणौ सन्ति,अमारिद्रव्यं तु महत्कारणं विना न समायातीति ज्ञायते । ४९३ प्र० । सेन० ३ उल्ला० । जिनाऽऽलयकार्यकर्तुरात्मीयं कार्यं दीयते,न वा?, इति प्रश्ने, उत्तरम्-जिनाऽऽलयस्थापकेन स्वकीयकार्ये न कार्यत इति । ४९२ प्र० । सेन० ३ उल्ला० । जिनाऽऽलये रात्रौ गीतगानाऽऽदि क्रियते, तत्करणे देवद्रव्यमुत्पद्यते, नान्यथा, तदा तत्कर्त्तव्यं, न वा ?, इति प्रश्ने, उत्तरम्-शास्त्रानुसारेण

मूलविंधना गीतगानाऽऽदि न शुष्यति,परं देवद्रव्योत्पत्तिकारणेन रात्रावपि गीतगानाऽऽदिभावनाकरणे लाभो जायते इति । ७७ प्र० । सेन० ४ उल्ला० ।

जिणावधिणाण–जिनावधिज्ञान–न० । ज्ञाननेदे,श्रीजिनानामवधिज्ञानं सदृशं, किंवा विशेषः ?, इति प्रश्ने, उत्तरम्–यो जिनो यतः समेति तस्य तत्स्थानसंबन्धि प्रवर्द्धमानं चावधिज्ञानं प्रवर्तीति, न सर्वेषां जिनानामवधिज्ञानसादृश्यमिति । १२८ प्र० । सेन० १ उल्ला० ।

जिणाहिय–जिनाऽऽहित–त्रि० । जिनैराहितः,जिनानां वा संबन्धी आहितो जिनाहितः जिनप्रतिपादिते, जिनानुष्ठिते च । सूत्र० "चरे भिक्खू जिणाहियं ।" जिनैराहितः प्रतिपादितोऽनुष्ठितो वो मार्गो जिनानां वा संबन्धी योऽभिहितो मार्गस्तं चरेदनुतिष्ठेत् । सूत्र० १ श्रु० ६ अ० ।

जिणिऊण–जित्वा–अव्य० । जयं कृत्वेत्यर्थे, प्रा०४ पाद । अङ्क० "एप्येप्पिणवेऽयेविणवः" ।८।४।४४०। इति प्राकृतसूत्रेणाषष्ठ्यर्थो क्त्वाप्रत्ययस्य एप्पि, एप्पिणु,एवि,एविणु इत्यादेशाः । प्रा०४ पाद । "संग गमिप्पिणु जो मुअइ,जो सिवतित्थ गमेप्पि । कीलदि तिदसाऽऽवासगउ, सो जमलोउ जिणेप्पि ॥१॥" प्रा० ४ पाद ।

जिणित्ता–जित्वा–अव्य० । जयं कृत्वेत्यर्थे, प्रा० ४ पाद ।

जिणिंद–जिनेन्द्र–पुं० । जिननायके तीर्थंकरे, " एत्थ इमं वण्णअं जिणिंदेहिं । " जिनेन्द्रैः जिननायकैः । पञ्चा०५ विव० औ० । पं० व० । रा० ।

जिणिंदपण्णत्त–जिनेन्द्रप्रज्ञप्त–त्रि० । तीर्थंकरप्रणीते, पं० व० १ द्वार ।

जिणिंदवयण–जिनेन्द्रवचन–न० । जिनेश्वराऽऽगमे, पञ्चा० ।

चित्तं चित्तपयजुअं, जिणिंदवयणं असेसमत्तहिअं ।
परिसुद्धमेत्थ किं तं, जं जीवाणं हिअं णऽत्थि ? ॥३१॥

चित्रम्—अद्भुतमनेकार्तिशयाभिधानत्वादक्षानक्षरविन्यासत्वाद्वा चित्रमनेकविधं, तथा चित्रपदयुतम्–नानाविधार्थप्रतिपादकाभिधानयुक्तम्, जिनेन्द्रवचनं–जिनेश्वराऽऽगमः, अशेषसत्त्वहितं समस्तप्राण्युपकारकं भव्यानुसारेण मार्गप्रतिपत्त्युपायप्रतिपादनपरत्वात्,परिशुद्धं कषच्छेदतापविशुद्धं सुवर्णमिव निर्दोषम् । एवं च अत्रास्मिन् जिनवचने,किं तद्?, यज्जीवानां हितं नास्ति?, सर्वमपि जीवानां हितमस्तीत्यतः इदं तपःपरिदृश्यमानाऽऽगमेऽनुपलभ्यमानमप्युपलब्धमिवावगन्तव्यं, तथाविधजनहितत्वादिति गाथार्थः ॥ ३१ ॥ पञ्चा० १६ विव० ।

जिणिस्सर–जिनेश्वर–पुं० । जिनेन्द्रे तीर्थंकरे, पञ्चा०१६विव० ।

जिणिस्सरसूरि [ण्]–जिनेश्वरसूरिन्–पुं० । श्रीवर्द्धमानसूरिशिष्य अभयदेवसूरिगुरौ स्वनामख्यात आचार्ये, स्था०१० ठा० । एतस्मादेवाऽऽचार्यात् खरतरगच्छः प्रवृत्तः,अयमाचार्यो वैक्रमीये१०८०वर्षे विद्यमान आसीत् । एतेन जावालपुरमुषित्वा हारिभद्रीयाष्टकटीका, पञ्चलिङ्गीप्रकरणं, वीरचरित्रं,लीलावतीकथा,रत्नकोशप्रभृत्यादिका अनेके ग्रन्था रचिताः। जै०इ० । तथा च स्थानाङ्गवृत्तौ-श्रीमदभयदेवसूरिनवाङ्गीप्रबन्धप्रणायिनः प्रवचनप्रतिबन्धकप्रबकुप्रवीणाप्रतिहतप्रवचनार्थप्रधानवाक्प्रसरस्य सुविहितमुनिजनमुख्यस्य श्रीजिनेश्वराऽऽचार्यस्य । स्था० १० ठा० ।

" यो जैनागमितं प्रमाणमनघं व्युत्पादयामासिवान्,
प्रज्ञानैर्विविधैर्निरस्य निखिलं बौद्धाऽऽदिसंबन्धि तत् ।
नानावृत्तिकथाः कथापथमतिक्रान्तं च चक्रे तपः,
निःसंबन्धविहारमप्रतिहतं शास्त्रानुसारात्तथा ॥ ७ ॥
तस्याऽऽचार्यजिनेश्वरस्य मदवद्वादिप्रतिस्पर्धिनः,
तद्भ्रातापि बुद्धिसागर इति ख्यातस्य सूरेर्लघुः ।
छन्दोबन्धनिबद्धबन्धुरवचःशब्दादिसद्व्याकरणः,
श्रीसंविग्नविहारिणः श्रुतनिधेश्चारित्रचूडामणेः" ॥८॥ इति० २ श्रु० ५ वर्ग १ अ० ।

तथा च पञ्चाशकवृत्तौ वर्द्धमानवर्णनमुपक्रम्य–

" शिष्योऽभवत्तस्य जिनेश्वराऽऽख्यः,
सूरिः कृतानिन्द्यविचित्रशास्त्रः ।
सदा निरालम्बविहारवर्ती,
चन्द्रोपमश्चन्द्रकुलाम्बरस्य " ॥ २ ॥ पञ्चा० १६ विव० ।

अष्टके वीरजिनमारभ्य वर्द्धमानमुनिपर्यन्तमुपवर्ण्य–

"संवेगरङ्गशालाऽभ्यर्थितकथनसूत्रधरतुल्यः ।
सूरिर्जिनेश्वराऽऽख्यः, सिद्धिविधेः साधने धीरः " ॥३॥ अष्ट० ३२ अष्ट० । अन्योऽप्येतन्नामा राजगच्छीयो वज्रशाखायां कोटिकगणमध्यगोऽभयदेवसूरिशिष्योऽजितसेनगुरुः, तेन जैनेन्द्रधीयकाव्यं रचितं, स च वैक्रमीये १०५० वर्षे विद्यमान आसीत् । अपरश्च वैक्रमीये १२६२ वर्षे आसीत्, स च सूरिप्रभसूरिशिष्यः । चतुर्थश्च खरतरगच्छे जिनप्रबोधसूरिशिष्यः चन्द्रप्रभचरित्रग्रन्थरचयिता आसीत् । तस्य जन्म १२-४५ वर्षे, दीक्षा १२५५ वर्षे, सूरित्वं १२५८ वर्षे, स्वर्गतिः १३३१ वर्षे समभवत् । जै० इ० ।

जिणुज्जाण–जिनोद्यान–न० । अवन्तीजनपदस्थोज्जयिनीनगरोत्तरपार्श्ववर्तिनि स्वनामख्याते उद्याने, ग०५ अधि० नि०चू० ।

जिणुत्तम–जिनोत्तम–पुं० । तीर्थंकरे, " मग्गं विराहित्तु जिणुत्तमाणं । " जिनोत्तमानां तीर्थंकराणाम् । उत्त०२० अ० ।

जिणेप्पि–जित्वा–अव्य० । जयं कृत्वेत्यर्थे, प्रा० ४ पाद ।

जिणेस–जिनेश–पुं० । अर्हति, "जिनेशगीर्विस्तरमाप तर्कैः । " जिनेशगीरर्हद्वाणी । रूप्या० ६ अध्या० ।

जिणेसर–जिनेश्वर–पुं० । जिनेन्द्रे, तीर्थंकरे, पञ्चा० १६ विव० ।

जिणेसरसूरि [ण्]–जिनेश्वरसूरिन्–पुं० । " जिणिस्सरसूरि " शब्दार्थे, जै० इ० ।

जिणोवइट्ठ–जिनोपदिष्ट–त्रि० । तीर्थंकराभिमते, " जिणोवइट्ठेण भावेणं । " ग० २ अधि० ।

जिणोवएस–जिनोपदेश–पुं० । द्वादशाङ्गे प्रवचने, " ण वि तच्चाओ जिणोवएसम्मि । " सम्म० ३ काण्ड ।

जिण्ण–जीर्ण–त्रि० । "उज्जीर्णे" । ८ । १ । १०२ । इति प्राकृतसूत्रेण जीर्णशब्दे इत उत्वे-'जुण्णो' उत्वाभावपक्षे-'जिण्णो' । प्रा०१ पाद । हानियुक्ते, भ०१ श० १ उ० । "जुण्णे जराजज्जरियदेहे" । जीर्णो हानिगतदेहः । भ० १६ श० ४ उ० । उत्त० । अनु० । निःसारे, "जहा जुण्णाइं कट्ठाइं, हव्ववाहो पमत्थति" । यथा जीर्णानि निःसाराणि काष्ठानि हव्यवाहो हुतभुक् प्रमथ्नाति शीघ्रं भस्मसात् करोति । आचा० १ श्रु० ४ अ० ३ उ० । "अप्पेगइ-

या दावद्दवरुक्खा जुण्णा । " जीर्णा इव जीर्णाः । ज्ञा० १ श्रु० १० अ० । प्राकृते क्वचिद्धस्वं न भवति । " जिण्णे भोयणमत्तओ । " प्रा० १ पाद । आ० चू० । जरायुक्ते, जीरके, पुं० । शैलजे, न० । स्थूलजीरके, स्त्री० । वाच० । परिणतवयसि, त्रि० १ उ० ।

जिण्णकुमरी-जीर्णकुमारी-स्त्री० । वृद्धायामपरिणीतायां स्त्रियाम्, " जिण्णा जुण्णकुमरी । " जीर्णा जीर्णशरीरा, जरणाद् वृद्धेत्यर्थः । सैव जीर्णत्वापरिणीतत्वाभ्यां जीर्णकुमारी । ज्ञा० २ श्रु० १ वर्ग १ अ० । नि० ।

जिण्णगुल-जीर्णगुड-पुं० । निस्सारगुडे, जीर्णगुडस्य पिण्डीभवनलक्षणो बन्ध इति । प्र० ८ श० ६ उ० । अनु० ।

जिण्णघय-जीर्णघृत-न० । निस्सारघृते, अनु० ।

जिण्णतंदुल-जीर्णतण्डुल-पुं० । निस्सारतण्डुलस्य पिण्डीभवनलक्षणो बन्धः । भ० ८ श० ६ उ० । अनु० ।

जिण्णतया-जीर्णत्वक्-स्त्री० । सर्पकञ्चुके, " भुजंगमे जुण्णतयं जहा जहे, विमुच्चती से दुहसेज्ज माहणे । " यथा सर्पः कञ्चुकं त्यक्त्वा निर्मलो भवत्येवं मुनिरपि दुःखशय्यातो नरकाऽऽदिभवाद्विमुच्यत इति । आचा० २ श्रु० ४ चू० ।

जिण्णदुग्ग-जीर्णदुर्ग-न० । गूर्जरधराऽधिपस्य तेजःपालमन्त्रिणा कारितपुराद्दूरे गिरिनारतलस्थे उग्रसेनगढापरनामके दुर्गे, स्त्री० । "अणहिल्लवाडयपट्टणे य पोरवालकुलमंडणा आसरायकुमरदेवतणया गुज्जरधराऽहिवइसिरीवीरधवलरज्जधुरंधरा वत्थुपालतेजपालनामविज्जा दो भायरा मंतिवरा हुत्था । तत्थ तेजपालमंतिणा गिरिनारतले निअनामंकिअं तेजपालपुरं ठाविअं, जस्स उ पुव्वदिसाए उग्गसेणगढं नाम दुग्गं जुगाइनाहप्पमुहजिणमंदिररहिअं विज्जइ; तस्स य तिण्णि नाम पसिद्धाइं । तं जहा-उग्गसेणगढे ति वा, खंगारगढे ति वा, जुण्णदुग्गं ति वा । गढस्स बाहिं दाहिणदिसाए चउरिआदेइलहुअवरियाएसु बाडयाइं ठाणाइं चिट्ठंति, उत्तरदिसाए बिसालयंजसालासोहिओ दसदुआरमंडवो, गिरिदुवारे य पंचमो हरी दामोअरो सुवण्णरेहानईपारे वट्टइ । " ती० ४ कल्प ।

जिण्णसुरा-जीर्णसुरा-स्त्री० । निःसारसुरायाम्, जीर्णसुरायाः स्थानीभवनलक्षणो बन्धः । प्र० ८ श० ६ उ० । अनु० ।

जिण्णसेट्ठि [ण्]-जीर्णश्रेष्ठिन्-पुं० । श्रेष्ठिपदाच्च्युते श्रेष्ठिनि, ध० २ ० ।

" पुरी समस्ति वैशाली, शालीनजनशालिनी ।
तत्राऽऽसीत्परमश्राद्धो, जिनदत्ताभिधः सुधीः ॥ १ ॥
सदा जिनपदाम्भोज-सेवनैकसितच्छदः ।
क्रमतः श्रेष्ठिपदाज्जीर्ण-श्रेष्ठित्वेन स विश्रुतः " ॥ २ ॥
ध० २ ० । " वाणारसीए रुद्दसेणो जुण्णसेट्ठी । " आव० ४ अ० । कल्प० ।

जिण्णाजिण्ण-जीर्णाजीर्ण-त्रि० । अरूजीर्णे, तच्चायुःक्षयनिमित्तम् । " जिण्णाजिण्णे य भोयणे बहुसो । " आ० म० प्र० । आ० क० ।

जिण्णासा-जिज्ञासा-स्त्री० । बुभुत्सायाम्, पञ्चा० ४ विव० ।

जिण्णुज्जाण-जीर्णोद्यान-न० । राजगृहनगरस्योत्तरपश्चिमदिशि स्थिते स्वनामख्याते उद्याने, ज्ञा० १ श्रु० १ अ० ।

जिण्णुद्धार-जीर्णोद्धार-पुं० । जीर्णस्य भग्नमन्दिरादेरुद्धारो यत्र । संस्कारभेदे, वाच० । ध० ।

" नवीनजिनगेहस्य, विधाने यत्फलं भवेत् ।
तस्मादष्टगुणं पुण्यं, जीर्णोद्धारेण जायते ॥ १ ॥
जीर्णे समुद्धृते याव-त्तावत्पुण्यं न नूतने ।
उपमर्दो महाँस्तत्र, स्वचैत्यख्यातिधीरपि ॥ २ ॥

तथा—

राया अमच्च सिट्ठी, कोडंबीए वि देसणं काउं ।
जिणे पुव्वाऽऽययणे, जिणकप्पी वा वि कारवइ ॥३॥
जिणभवणाइं जे उ-द्धरंति जसीइ सड्ढिअपमिआइं ।
ते उद्धरंति अप्पं, भीमाओ भवसमुद्दाओ ॥ ४ ॥ "

जीर्णचैत्योद्धारकारणपूर्वकमेव च नव्यचैत्यकारणमुचितम्; तत एव संप्रतिनृपतिना एकोननवतिसहस्रा जीर्णोद्धाराः कारिताः, नवचैत्यानि तु षट्त्रिंशत्सहस्राण्येव । एवं कुमारपालवस्तुपालाऽऽद्यैरपि नव्यचैत्येभ्यो जीर्णोद्धारा एव बहवो व्यधाप्यन्तेति । ध० २ अधि० ।

जिण्हाण्हवा-स्त्री० । देशी-दूर्वायाम्, दे० ना० ३ वर्ग ।

जित्तिअ-यावत्-त्रि० । यत्परिमाणे, " यत्तदेतदोऽतोरित्तिअ एतल्लुक् च " ॥ ८ । २ । १५६ ॥ एभ्यः परस्य डावाऽऽदेरसोः परिमाणार्थस्य ' इत्तिअ ' इत्यादेशो भवति, एतदो लुक् च । यावत्, ' जित्तिअं ' । प्रा० २ पाद ।

जिध-यथा-अव्य० । सादृश्ये, येन प्रकारेणेत्यर्थे च । "कथंयथातथां धांदेरेमेमेहेधा क्वितः " ॥८ । ४ । ४०१ ॥ इति प्राकृतसूत्रेण था इत्यस्य 'धध' 'हह' इत्यादेशौ भवतः । प्रा० ४ पाद ।

जिब्भगार-जिह्वाकार-पुं० । जिह्वाकारके शिल्पिभेदे, प्रज्ञा० १ पद ।

जिब्भा-जिह्वा-स्त्री० । लेढि अनया लिह्-व-निं० जः । "ह्वो भो वा" ॥८।२।५७॥ इति प्राकृतसूत्रेण वा भः । प्रा० २ पाद । "ईर्जिह्वासिंहत्रिंशद्दिशतौ त्या" ॥८।१।६२॥ इति प्राकृतसूत्रेण ईकारविकल्पः । प्रा० १ पाद । रसज्ञानेन्द्रिये, रसनायां च । वाच० । प्रश्न० । जं० । औ० । प्रज्ञा० । "सत्तंगुलिया जीहा ।" जिह्वा मुखाभ्यन्तरवर्तिमांसखण्डरूपा दैर्घ्येणाऽऽम्राङ्गुलतः सप्ताङ्गुला । तं० । "जिब्भे विणिक्कस्स विहत्थिमित्तं ।" मद्यमांसरसाभिलिप्सोर्मृषाभाषिणो जिह्वां वितस्तिमात्रामात्तिक्ष्य तीक्ष्णाभिः शूलाभिरभितापयन्ति । सूत्र० १ श्रु० ५ अ० १ उ० । उत्त० । उपा० ।

जिब्भादुट्ठ-जिह्वादुष्ट-पुं० । जिह्वया दुष्टे, आव० ४ अ० । उत्त० ।

जिब्भादोस-जिह्वादोष-पुं० । जिह्वाविकारे, आव० ४ अ० ।

जिब्भामय-जिह्वामय-पुं० । जिह्वेन्द्रियहानौ, स्था० ६ ठा० ।

जिब्भामयदुक्ख-जिह्वामयदुःख-न० । जिह्वेन्द्रियहानिरूपे दुःखे, " जिब्भामएणं दुक्खेणं संजोएत्ता भवइ ।" जिह्वामयं जिह्वेन्द्रियहानिरूपं यद् दुःखं, तेन संयोजयिता भवति । स्था० ४ ठा० ४ उ० ।

जिब्भामयसोक्ख-जिह्वामयसौख्य-न० । जिह्वाया विकारो जिह्वामयं, सौख्यं रसोपलम्भाऽऽनन्दरूपं जिह्वामयसौख्यम् । रसोपलम्भाऽऽनन्दरूपे जिह्वेन्द्रियसुखे, " जिब्भामयाओ सोक्खाओ ववरोवित्ता भवइ । " स्था० ४ ठा० ४ उ० ।

जिब्भिन्दिय-जिह्वेन्द्रिय-न० । रसनेन्द्रिये, प्रश्न० १ आश्र० द्वार । जिह्वेन्द्रियं च दुःखाय भवति ।

यथा दुःखाय भवति तथोदाहरणम्-

" भूप्रतिष्ठपुरे राजा, सोदासो मांसलोलुपः ।
अमारिघोषिताऽन्येषु-मांसं पर्युषितं पुनः ॥ १ ॥
मार्जारो जगृहेऽन्यत्तु, न सूनास्थ्यभूत्तदा ।
राज्ञो भीतेन सूदेन, शिशुर्व्यापाद्य संस्कृतः ॥ २ ॥
भुञ्जानः पृष्टवान् राजा, मांसं स्वादिष्ठमद्य किम् ? ।
तेनाऽऽख्याते ऽभयं दत्त्वा, हत्वैकैकं पचेः सदा ॥ ३ ॥
तच्च ज्ञातं जनैः सर्वैः, ततो राक्षस इत्यसौ ।
पाययित्वा महामद्य-मटव्यां क्षुर्दितो नृपः ॥ ४ ॥
तत्राप्येकाकिनं व्यापा-दयाति स च मानुषम् ।
स्वार्थस्तत्राध्वनाऽगच्छत्, ज्ञातः सुप्तेन तेन न ॥ ५ ॥
आवश्यकं प्रकुर्वाणाः, दृष्ट्वाश्च मुनयः स्थिताः ।
शक्नोत्याक्रमितुं तान्न, ततश्चन्तां प्रपन्नवान् ॥ ६ ॥
आचार्यैः कथितो धर्मः, प्रबुद्धः प्राव्रजत् ततः ।
आचार्यो ज्ञानिनोऽभूवन्, अभ्युद्यते स तैस्ततः ॥ ७ ॥
भाषिणः कति तादृक्षाः, तद्भक्षाऽतिदुःखदा ।
जेतव्याऽसौ प्रयत्नेन, दुर्जया मोहनीयवत् ॥ ८ ॥ " आ० क० । आ० म० । आ० चू० ।

जिब्भिंदियनिग्गह-जिह्वेन्द्रियनिग्रह-पुं० ६ त० । जिह्वेन्द्रियस्य निग्रहे, जिह्वेन्द्रियस्य स्वविषयाभिमुखमनुधावतो नियमने, उत्त० ।

जिब्भिंदियनिग्गहेणं भंते ! जीवे किं जणयइ ? । जिब्भिंदियनिग्गहेणं मणुन्नामणुन्नेसु रसेसु रागदोसनिग्गहं जणयइ, तप्पच्चइयं कम्मं न बंधेइ, पुव्वबद्धं च निज्जरेइ ॥६५॥

हे भदन्त ! जिह्वेन्द्रियनिग्रहेण जीवः किं जनयति ? । गुरुराह-हे शिष्य ! जिह्वेन्द्रियनिग्रहेण जीवो मनोज्ञामनोज्ञेषु रसेषु रागद्वेषनिग्रहं जनयति, तत्प्रत्ययिकं रागद्वेषनिमित्तकं कर्म न बध्नाति, पूर्वबद्धं रागद्वेषोपार्जितं कर्म निर्जरयति-क्षपयति । ॥ ६५ ॥ उत्त० २९ अ० ।

जिब्भिंदियपडिसंलीणया-जिह्वेन्द्रियप्रतिसंलीनता-स्त्री० । मनोज्ञामनोज्ञेष्वाहारेषु रागद्वेषपरिहाराऽऽत्मक आजीविकानां तपोभेदे, स्था० ४ ठा० २ उ० ।

जिब्भिंदियबल-जिह्वेन्द्रियबल-न० । बलभेदे, स्था० १० ठा० ।

जिब्भिंदियमुंड-जिह्वेन्द्रियमुण्ड-पुं० मुण्डभेदे, स्था० १० ठा० ।

जिब्भिंदियसंवर-जिह्वेन्द्रियसंवर-पुं० रसनेन्द्रियसंवरणे, स्था०

तथैवम्-

चउत्थं जिब्भिंदिएणं सातियरसाणि उ मणुन्नभद्दकाइं, किं ते ?, ओग्गाहिमविविहपाणभोयणगुलकयखंडकयतेल्लघयकयभक्खेसु बहुविहेसु लवणरससंजुत्तेसु महुमंसबहुप्पकारमज्जियनिट्ठाणगदालियंबसेहंबदुद्धदहिसरयमज्जवरवारुणीसीहुकापिसायणसायऽट्ठारसबहुप्पगारेसु भोयणेसु य मणुण्णवण्णगंधरसफासबहुदव्वसंभिएसु अन्नेसु य एवमाइएसु रसेसु मणुन्नभद्दएसु, न तेसु समणेणं सज्जियव्वं० जाव न सतिं च मतिं च तत्थ कुज्जा, पुणरवि जिब्भिंदिएण सातियरसाणि अमणुन्नपावकाइं, किं ते ?, अरसविरससीयलुक्खणिज्जप्पपाणभोयणाइं दोसमुव्वावण्णकुहियपूइय-अमणुन्नविलुद्धदुब्भिगंधियाइं तित्तकटुयकसायअंबिलरसलिंदनीरसाइं अन्नेसु य एवमाइएसु रसेसु अमणुन्नपावएसु न तेसु समणेण रुसियव्वं० जाव चरेज्ज धम्मं ॥ प्रश्न० ५ सम्व० द्वार ॥ (टीकाऽस्य 'रसगिद्ध' शब्दे)

जिब्भिया-जिह्विका-स्त्री० । जिह्वा-कन्, टाप् । कृत्रिमजिह्वायाम्, स० । शीतोदाया महानद्याः प्रपातमधिकृत्य-"वइरामयाए जिब्भियाए" । वज्रमय्या जिह्विकया प्रणालस्थमकरमुखजिह्विकया । स० । " रोहियंसा णामं महाणई जओ पवडइ, एत्थ णं महं एगा जिब्भिया पण्णत्ता । " जं० ४ वक्ष० ।

जिम-भुज-धा० । भक्षणे, आत्म० । पालने, पर० सक० सधादि० अनिट् । " भुजो भुंजजिमजेमकम्माण्हसमाणचमढचड्डाः " । ८ । ४ । ११० । इति प्राकृतसूत्रेण भुजेर्जिमाऽऽदेशः । "जिमइ-जेमइ" प्रा० ४ पाद । भुङ्क्ते अन्नम्, अभौक्षीत्, भूमिं भुनक्ति पालयति । वाच० । ' जिमइ-जिम्मइ ' । प्रा० ४ पाद ।

जिम-धा० । भक्षणे, जेमति, अजेमीत् । वाच० ।

जिमिय-जिमित-त्रि० । कृतभोजने, विपा० २ श्रु० । "जिमिए भुत्तुत्तरागए" । जिमितो भुक्तवान् । भ० ३ श० २ उ० । ज्ञा० ।

जिम्म-जिह्म-त्रि० । हा-मन्-द्वित्वादि० नि० । " पद्मसद्मपद्मस्मह्मा० " ॥ ८ । २ । ७४ ॥ इत्यादिसूत्रेण ह्मः क्वचिन्न भवति । प्रा० २ पाद । कुटिले, मन्दे, तगरवृक्षे च । वाच० । "अजिम्मकंतणयणा" अजिह्मा अमन्दे ऋजुत्वावतया निर्विकारत्वपले कान्ते नयने यासां तास्तथा । जं० २ वक्ष० । स० । कौटिल्ये, न० । तदात्मके मायाकषायान्तर्गते मोहनीयकर्मभेदे च । स० ३४ सम० ।

जिम्मजड-जिह्मजड-त्रि० । मायारहिते, "जिम्मजडाइं ति विस्संभे । " जिह्मजडानि जिह्मेन मायया रहितानि । व्य० ३ उ० ।

जिम्मय-जिह्मक-पुं० । मेघभेदे, स्था० ५ ठा० । " जिम्हेणं महामेहे बहुवासेहिं एगं वासं भावेइ वा, ण वा भावेइ । " जिह्मस्तु बहुभिर्वर्षैरेकमेव वर्षमल्पं यावद् भुवं नावयति, नैव वा नावयति, रूक्षत्वात्तज्जलस्येति । स्था० ४ ठा० ४ उ० ।

जिम्म-जिह्म-त्रि० । ' जिम्म ' शब्दार्थे, प्रा० २ पाद ।

जिम्मजड-जिह्मजड-त्रि० । 'जिम्मजड' शब्दार्थे, व्य० ३ उ० ।

जिम्मय-जिह्मक-पुं० । ' जिम्मय ' शब्दार्थे, स्था० ५ ठा० ।

जिम्ह-जिह्म-त्रि० । 'जिम्म' शब्दार्थे, प्रा० २ पाद ।

जिम्हजड-जिह्मजड-त्रि० । 'जिम्मजड' शब्दार्थे, व्य० ३ उ० ।

जिम्हय-जिह्मक-पुं० । 'जिम्मय' शब्दार्थे, स्था० ४ ठा० ४ उ० ।

जिय-जित-न० । जि-भावे क्तः । जये, कर्मणि क्तः । अभिभूते, सूत्र० १ श्रु० १ अ० ४ उ० । पराजिते, ग० २ अधि० । जयलब्धे, वशीकृते, आयत्तीकृते च । त्रि० । वाच० । वृ० । सूत्र० । उत्त० । परावर्तनकाले, प्रश्नोत्तरकाले, शीघ्रमागच्छति, अनु० ।

सूत्राऽऽदौ परावर्तनं कुर्वतः परेण वा क्वचित्पृष्टस्य सतः यत् शीघ्रमाजगाम तज्जितम् । अनु० । विशे० । ग० । " जियं नाम-जत्थ पुच्छिओ तत्थ झगिति जगइ ! " पं० चू० ।

जियंतय–जीवत्–न० । हरितवनस्पतिकायभेदे, प्रज्ञा० १ पद ।

जियंती–जीवन्ती–स्त्री० । वल्लीभेदे, प्रज्ञा० १ पद ।

जियकरण–जितकरण–पुं० । करणदक्षे, " जियकरणविणीए एगत्थे । " जितकरणो विनीत इति द्वावप्येकार्थौ तात्पर्यविभाग्त्या; शब्दार्थस्तु परस्परं भिन्नौ;जितकरणो नाम-करणदक्ष उच्यते, विनीत इति विनयकरणशीलः । स्था० ३ ठा० ।

जियकसाय–जितकषाय–त्रि० । निगृहीतक्रोधाऽऽदिभावे, पञ्चा० १७ विव० । " तिलोगपुज्जे जिणे जियकसाए । " जितकषायान् निराकृतक्रोधाऽऽदिभावान् । पञ्चा० १० विव० ।

जियकोह–जितक्रोध–त्रि० । अभिभूतकोपे, द्वा० १२ द्वा० । विफलीकृतोदितक्रोधे, औ० । "जितेन्द्रिया जितक्रोधाः, दुर्गाण्यतितरन्ति ते । " द्वा० १२ द्वा० ।

जियक्ख–जिताक्ष–त्रि० । जितेन्द्रिये, " विणयकुसलो जियक्खगम्भीरो । " दर्श० ५ तत्त्व । पञ्चा० ।

जियणिद्द–जितनिद्र–त्रि० । जिता निद्रा आलस्यं येन स जितनिद्रः । स्त्यकाऽऽलस्ये, जं० ३ वक्ष० । औ० । अल्पनिद्रे,ग० १ अधि० । स हि रात्रौ सूत्रमर्थं वा परिभावयन् न निद्रया बाध्यते । प्रव० ६४ द्वार । अप्रमत्ते, आचा० १ श्रु० १ अ० ६ उ० ।

जियणिद्दिंदिय–जितनिद्रेन्द्रिय–त्रि० । जितानि वशीकृतानि निद्रा इन्द्रियाणि यैस्ते जितनिद्रेन्द्रियाः । वशीकृतनिद्रेन्द्रिये, वृ० १ उ० ।

जियपरिसा–जितपरिषत्–त्रि० । महत्यामपि परिषदि क्षोभमनुपयाते, प्रव० ६४ द्वार । ग० । आचा० । स० ।

जियपरीसम–जितपरिश्रम–त्रि० । परिश्रमरहिते, कल्प० १ क्षण ।

जियपरीसह–जितपरिषह–त्रि० । जिताः पराजिताः परिषहाः शीतोष्णरूपा येन स जितपरिषहः । ग० ३ अधि० । औ० । शीताऽऽतपाऽऽद्यातुरत्वेऽप्यक्षिप्ते, जं० ३ वक्ष० ।

जियप्पा–जिताऽऽत्मन्–पुं० । आत्मनो जेतरि, सूत्र० ।

तथा चोक्तम्–

" कोहं माणं च मायं च, लोभं पंचिंदियाणि य ।
दुज्जयं चेव अप्पाणं, सव्वमप्पे जिए जियं ॥ १ ॥
जो सहस्सं सहस्साणं, संगामे दुज्जये जिणे ।
एक्कं जिणेज्ज अप्पाणं, एस से परमो जओ " ॥ २ ॥
सूत्र० १ श्रु० २ अ० ।

जियभय–जितभय–त्रि० । अभये, ज्ञ० ।

जियमाण–जितमान–त्रि० । विफलीकृतमाने, औ० ।

जियरागदोस–जितरागद्वेष–त्रि० । रागद्वेषरहिते, "जिणेहिं जियरागदोसेहिं ।" जितरागद्वेषैर्विगतासत्यवादकारणैः । पञ्चा० ६ विव० ।

जियलोह–जितलोभ–त्रि० । विफलीकृतलोभे, औ० ।

जियवं–जितवत्–त्रि० । प्राप्तजये, प्रश्न० १ आश्र० द्वार ।

जियसत्तु–जितशत्रु–पुं० । पराजितशत्रौ, " जितसत्तू पवररायसीहा । " प्रश्न० ४ संव० द्वार । अजितजिनस्य पितरि,प्रव० १२ द्वार । आव० । स० । "विजया जियसत्तुपुत्तस्स ।" ति० । वाणिज्यग्रामवास्तव्ये नृपे, "तत्थ णं वाणियग्गामे जियसत्तू राया ।" उपा० १ अ० । चम्पानगरीवास्तव्ये नृपे,"चंपा नामं नयरी होत्था, पुण्णभद्दे चेइए, जियसत्तू राया ।" उपा० १ अ० । क्षुत्रानगरीवास्तव्ये नृपे,आ० म० प्र० । वसन्तपुरस्थे नृपे, "वसंतपुरे नयरे जियसत्तू राया । " आ० म० द्वि० । वीतशोकानगरीवास्तव्ये नृपे,आ०चू० । "वीयसोगा नगरी, जियसत्तू नाम राया । " आ० चू० २ अ० । आ० म० । उज्जयिनीनगरीवास्तव्ये नृपे, उत्त० २ अ० । सर्वतोभद्रनगरस्थे नृपे, " सव्वओभद्दे णयरे जियसत्तू णामं राया होत्था । " विपा० १ श्रु० ५ अ० । मथुरानगरीवास्तव्ये स्वनामख्याते नृपे, आ० म० द्वि० । मिथिलानगरीवास्तव्ये स्वनामख्याते नृपे, जं० १ वक्ष० । मिथिलायां नगर्यां जितशत्रुर्नाम राजा । सु० प्र० १ पाहु० । मल्लिजिनेन सह प्रव्रजिते पाञ्चालदेशस्थे काम्पिल्यनगरनायके राजनि,स्था० । "जियसत्तू पञ्चालराया " । जितशत्रुर्नाम पाञ्चालजनपदराजः काम्पिल्यनगरनायकः । स्था० ६ ठा० । ज्ञा० । भविष्यति स्वनामख्याते दत्तस्य राज्ञः सुते च । ती० । " दत्तो य राया वावत्तरिवासाओ पहदेणं जिणचेइयमहिअं महिं काही, लोगं च सुहिअं काही ति, दत्तस्स पुत्तो जियसत्तू, तस्स वि य मेघघोसो कक्की ,अणंतरं महानिसीहं न वाइस्सइ । " ती० २० कल्प ।

जियसेण–जितसेन–पुं० । आवस्तीवास्तव्ये स्वनामख्याते आचार्ये, आव० ४ अ० । सुमतिजिनसमकालिके स्वनामख्याते चक्रवर्तिनि, ति० । कौशाम्बीवास्तव्ये स्वनामख्याते नृपे, आ० क० । " कौशाम्बीत्यस्ति पूस्तत्र, जितसेनो महीपतिः । " आ० क० । भरतवर्षस्थे अतीतायामुत्सर्पिण्यां स्वनामख्याते कुलकरे, स० ।

जियसेलेस–जितशैलेश–पुं० । मेरोरपि निष्प्रकम्पतरे, आव० १ अ० ।

जियारि–जितारि–पुं० । संभवजिनस्य पितरि, आव० १ अ० । प्रव० । स० । " सेनाए जियारितणयस्स ।" ति० । उज्जयिनीनगरवास्तव्ये स्वनामख्याते नृपे, " उज्जयिन्यस्ति पूः सर्वपुरामुज्जयिनी श्रिया । तस्यां षड्यान्तरङ्गारि-र्जितारिः पृथिवीपतिः ॥ १ ॥ " आ० क० ।

जिह–यथा–अव्य० । सादृश्ये, येनप्रकारेणेत्यर्थे च । "कथंयथातथां थादेरेमेहेधा ङितः " ॥ ८ । ४ । ४०१ ॥ प्रा० ४ पाद ।

जी–जीर्–स्त्री० । जरायां,दुर्गतौ च । ऋवर्णान्तो जरायां दुर्गतावपि । जी रेफान्तस्तदर्थः । स्त्री० । एका० ।

जीमूय–जीमूत–पुं० । ज्या–क्विप् जीः । तया जरया मूतो बद्धः । ' मु ' बन्धने क्तः । जयति नभः, जीयते वायुना वा जि–क्त–मुट् दीर्घश्च वा । मेघे, वाच० । प्रा० । रा० । जं० । स्था० । जी० । मेघविशेषे च । " जीमूएणं महामेहे एगेणं वासेणं दसवासाइं भावेइ । " स्था० ४ ठा० ४ उ० । मुस्तके, पर्वते, धृतकरे,देवताभेदे, इन्द्रे, कोशातकीलतायाम्, वाच० ।

जीय-जीत-न० । आचरिते, "जीयमिणं आणाओ ।" पञ्चा०१५ विव० स्था० जीत० आ० म० । आचारे, कल्प०७ क्षण । "अप्पेगइया जीयमेयं ति" । जीतमेतत् कल्प एष इति कृत्वा । रा० "कुच्छिंसि गब्भत्ताए वक्कंते तं जीयमेयं तीअपच्चुप्पण्णमणागयाणं" । जीतमेतत् आचार एष इत्यर्थः । कल्प०२ क्षण । सर्वानुचीर्णे, विशे० । अथ जीतमिति कोऽर्थ इत्यत आह-"बहुजणमाइण्णं पुण, जीयं उचियं ति एगट्ठं ।" बहुभिर्जनैर्गीतार्थैराचीर्णं बहुजनाऽऽचीर्णमिति वा, उचितमिति वा एकार्थम् । किमुक्तं भवति?, बहुजनाऽऽचीर्णं नाम जीतमिति । व्य० १ उ० । प्रभूतानेकगीतार्थकृतायां मर्यादायाम्, उपचारात्तत्प्रतिपादके ग्रन्थे च । जीतं नाम-प्रभूतानेकगीतार्थकृता मर्यादा, तत्प्रतिपादको ग्रन्थोऽप्युपचाराज्जीतम् । व्य० १ उ० । मर्यादाकारणे सूत्रे च । जीतमिति सूत्रमुच्यते, जीतं स्थितिः, कल्पो मर्यादा, व्यवस्थेति हि पर्यायाः । मर्यादाकारणं च सूत्रमुच्यते । नं० ।

जीव-पुं० । प्राणधारणे, प्राणिनि च । जी० । "जीयस्स विसोहणं परमं ।" 'जीव' प्राणधारणे, जीवति, जिजीव, जीविष्यतीत्यपयोगलक्षणत्वेन त्रिकालमपि जीवनाज्जीवस्तस्य विशेषेण शोधनम् । जी० १ प्रति० ।

जीवित-न० । "यावत्तावज्जीविताऽऽवर्तमानाघटप्रावारकदेवकुलैवमेवेवः" ॥ ८ । १ । २७१ ॥ इति प्राकृतसूत्रेण सस्वरस्य वकारस्यान्तर्वर्तमानस्य लुग् वा । प्रा० १ पाद । जीविते, "जीयकामत्थधम्महेउं ।" जीवश्च जीवितं जीतं वा । प्रश्न० १ आश्र० द्वार । जीवितमिव जीवितम् । श्रुते, मर्यादायां च । विशे० ।

एएहिं कारणेहिं, जीयं ति कयं गणहरेहिं ॥१११३॥

(जीयं ति) जीवितं श्रुतं द्वादशाङ्गम् । अयमत्रानिप्रायः-यथा जीवस्य जीवितमात्रं न कदाचिद् व्यवच्छिद्यते, तथा अव्यवच्छित्तिनयाभिप्रायतः श्रुतमपि न कदाचिद् व्यवच्छिद्यते, ततो जीवितमिव जीवितं श्रुतमुच्यते, तरुणधैर्यः सुखग्रहणाऽऽदिकारणेभ्यः कृतम् । अथवा-न सुखाऽऽदिकारणेभ्य एव, किं तर्हि?, (जीयं ति) जीवितं मर्यादा, ततश्च गणधराणां जीवितं धर्मो मर्यादैवेयं यदुत तन्नामकर्मोदयतस्तत्स्वाज्ञाव्यात् कर्तव्यमेव तैः श्रुतविरचनम् । अथवा-(जीयं ति) जीवितमाचरितम् । कल्पश्चायं सर्वगणधराणां यस्तैः संदर्भणीयमेव श्रुतम् । विशे० ।

होइ सुइं जीयं पि य, कायव्वमिदं जओऽवस्सं ।१११६।
सव्वेहिं गणहरेहिं, जीयं ति सुयं जओ न वोच्छिन्नं ।
गणहरमज्जाया वा, जीयं सव्वाणुचिन्नं वा ॥१११७॥

(जीयं पि य त्ति) जीवितं श्रुतम्; अथवा-जीवितं मर्यादा, यदि वा-जीतं सर्वानुचीर्णम् । कोऽर्थः?, इति । आह-"कायव्वं" इत्यादि । कर्तव्यमिदं, यतोऽवश्यं सर्वैर्गणधरैरित्युत्तरगाथायां संबन्धः । ततो जीवितं द्वादशाङ्गश्रुतं, मर्यादा, सर्वगणधराऽऽचीर्णं षेदमिति कृत्वा कृतं ग्रथितं गणधरैरिति, तदेवं 'जीयं' इति शब्दार्थत्रयं भवतीति तॉस्त्रीनप्यर्थान् तस्य दर्शयति-"जीयं ति सुयं" इत्यादि । विशे० । आ० म० ।

जीयकप्प-जीतकल्प-पुं० । जीतेनावश्यंभावेन कल्प आचारो जीतकल्पः । कल्प०५ क्षण । पूर्वपुरुषाचरितलक्षणे आचारे, पञ्चा० ६ विव० । तदात्मके कल्पभेदे, पं० भा० । स चानुज्ञाकल्पस्य गौणं नामान्तरं, तथा च पञ्चकल्पभाष्येऽनुज्ञाकल्पस्य विंशतिनामधेयान्यधिकृत्य-"तित्थकरेहिं कयमिणं, गणधरायं तु तेहिं सीसाणं । तत्तो परंपरेणं, आइण्णं तेण जीयं तु ॥ १ ॥" पं० भा० । जीतकल्प आचरितकल्पो जिनप्रतिबोधनलक्षणः । स्था० १० ठा० । जीतमाचरितं, तस्य कल्पो वर्णना प्ररूपणा, जीतकल्पः । आचारवर्णने, तत्प्रतिपादके जिनभद्रगणिक्षमाश्रमणरचिते छेदश्रुतविशेषे च । जीत० ।

इय एस जीयकप्पो, समासओ सुविहियाणुकंपाए ।
कहिओ देयमयं पुण, पत्ते सुपरिच्छियगुणम्मि ॥१७३॥

इत्यमुना प्रकारेणाऽऽर्यगाथापञ्चकेन शास्त्रप्रस्तावनाभिधायचतसृभिर्गाथाभिराद्यस्य, चतसृभिर्द्वितीयस्य, तिसृभिस्तृतीयस्य, द्वाभ्यां चतुर्थस्य, पञ्चभिः पञ्चमस्य, "उद्देसऽज्झयणेसुं, खंधंगेसु कमसो पमायस्स ।" इति गाथातः प्रारभ्य "झोसिऊइ सुबहुं पि हु ।" इति गाथापर्यन्तैकत्रयस्त्रिंशद्गाथाभिर्नानाऽऽचाराऽऽदिपञ्चकातिचारगोचरस्य षष्ठस्य तिसृभिः सप्तमस्य चतसृभिरष्टमस्य सप्तभिर्नवमस्य नवभिर्दशमस्य प्रायश्चित्तस्य व्याख्यानेन एष सर्वसमुदायाऽऽत्मको जीतकल्पः, जीतमाचरितं, तस्य कल्पो वर्णना प्ररूपणा, समासतः संक्षेपतः सुविहितानुकम्पया, शोभनं विहितमनुष्ठानं येषां ते सुविहितास्तेषामनुकम्पया कथितः प्ररूपितः, देयः पुनरयं पात्रे सुपरीक्षितगुणे जात्यकाञ्चनवत्तापच्छेदनिकषसदृशे संविज्ञे गीतार्थे, न पुनरन्यस्मिन्, येन जीतकल्पदायकग्राहकौ द्वावपि कर्मनिर्जरया शुद्ध्यतः सिद्ध्यतश्चेति । जीत० । तथा च जीतकल्पचूर्ण्यो तिलकाऽऽचार्यः-"इति नुतिकृत्यकृतः श्रुत-रहस्यकल्पस्य जीतकल्पस्य । विवरणलवं करिष्ये, स्वस्मृतिबीजप्रबोधाय ॥६॥" इह निशीथकल्पव्यवहाराऽऽदीनि भूयांसि छेदश्रुतानि, तेषु चातिविस्तरेण प्रायश्चित्तान्यभिधीयन्ते, प्रतिदिनं च कल्पं तदवगाहसामर्थ्यं प्रतिग्रन्थं नानाऽतिचारानाश्रित्य पुरुषाद्यौचित्ये न काऽपि क्वाप्युपपत्तिरुच्यते । ततः किं कुत्र दानं दीयते?, कथमात्मनः परस्य वा शुद्धिर्भवति?, इति व्यामुह्यन्त्यन्तेवासिनोऽतस्तेषां सुखेन प्रायश्चित्तविधिप्रतिपत्तये पूज्यश्रीजिनभद्रगणिक्षमाश्रमणः समस्तच्छेदग्रन्थानामुपनिषत्कल्पं तदपेक्षयाऽत्यल्पं जीतकल्पं कृतवान् । परं द्विधा विनेयाः-योग्याः, अयोग्याश्च । तत्र योग्याः ये रक्तसंवेगतरङ्गिणीतरङ्गप्रक्षालितान्तरमलाः परिमलितकुदृष्टयः समस्तसिद्धान्तमहार्णवपारीणाः परिणतवयसः सार्वपथीनप्रतिभाप्राग्भारसारचेतसः सततमुत्सर्गापवादगोचराऽऽचारचतुराश्चिरप्रव्रजिताः । ये त्वेतद्विपरीतास्तिन्तिणिकाऽऽदयश्च ते अयोग्याः । यदुक्तम्-"तिंतिणिए चलचित्ते, गाणंगणिए य दुब्बलचरित्ते । आयरियपारिभासी, वामावट्टे य पिसुणे य" ॥१॥ इति । तिन्तिणिका मुहुर्मन्दमन्दस्वरजाषणशीलाः, गाणङ्गणिका ये षण्मासादन्तर्गणाद् गणं संक्रामन्ति, एतेषामयं न दातव्यः । यतः-"आमे घडे निहत्तं, जहा जलं तं घडं विणासेइ । इय सिद्धंतरहस्सं, अपाहारं विणासेइ ॥१॥" अतो योग्यानामेव दातव्यः । जीत० ।

जीयकप्पिय-जीतकल्पिक-पुं० । जीतेनावश्यंभावेन कल्प आचारो जीतकल्पः, सोऽस्ति यस्य स जीतकल्पिकः । कल्प०५ क्षण । जीतकल्प आचरितकल्पो जिनप्रतिबोधनलक्षणो विद्यते यस्य स जीतकल्पिकः । जीतकल्पवति, स्था० १० ठा० ।

जीयधर–जीतधर–त्रि० । सूत्रधरे, आर्यगोत्रोत्पन्ने शाण्डिल्यशिष्ये स्वनामख्याते आचार्ये च । जी० । "संखित्तं अज्जजीयधरं ।" आरात्सर्वेदेयधर्मेभ्योऽर्वाग् यातमार्यम । जीतमिति सूत्रमुच्यते । जीतं,स्थितिः,कल्पो,मर्यादा, व्यवस्था इति हि पर्यायाः। मर्यादाकारणं च सूत्रमुच्यते। तथा 'धृञ्' धारणे । ध्रियते,धारयतीति धरः । "लिहाऽऽदिभ्यः"॥५ । १ । ५०॥ इत्यच्प्रत्ययः । आर्यजीतस्य धर आर्यजीतधरः,तम् । अन्ये तु व्याचक्षते-शाण्डिल्यस्यापि शिष्य आर्यगोत्रो जीतधरनामा सूरिरासीत् ,तं वन्दे इति । नं० ।

जीयलक्खण-जीवलक्षण-न० । जीवस्याऽऽत्मनो,लक्षणं-लक्ष्यते ज्ञायते यदन्यव्यवच्छेदेनेति तल्लक्षणम्,असाधारणं स्वरूपं,जीवलक्षणम। जीवस्यासाधारणे स्वरूपे,कर्म० । तच्च ज्ञानाऽऽदिक मुपयोगः, अत एवोक्तमन्यत्र-"उपयोगलक्षणो जीवः"इति। कर्म० ४ कर्म० ।

जीयवं–जीवितवत्–त्रि० । प्राणिनि, " वप्प ! ताय ! जीयवं " जीवितवन् !, प्रश्न० १ आश्र० द्वार ।

जीयववहार–जीतव्यवहार–पुं० । द्रव्यक्षेत्रकालभावपुरुषप्रतिसेवाऽनुवृत्त्या संहननवृत्त्यादिपरिहाणिमवेक्ष्य यत्प्रायश्चित्तदानं, यो वा यत्र गच्छे सूत्रातिरिक्तकारणतः प्रायश्चित्तव्यवहारप्रवर्तितो बहुभिरन्यैश्चानुवर्तितं तज्जीतम । स्था० ५ ठा० २ उ० । प्र० । जीतं श्रुतोक्तादपि हीनमधिकं वा परम्परयाऽऽचीर्णं, तेन व्यवहारो जीतव्यवहारः । ध० २ अधि० । व्यवहारभेदे, " जीए य पंचमए । " जीतं गीतार्थसंविग्नप्रवर्तितशुद्धव्यवहारः । पञ्चा० १६ विव० ।

तथा च-

कयपवयणप्पणामो, वुच्छं पच्छित्तदाणसंखेवं ।
जीयव्ववहारगयं, जीयस्स विसोहणं परमं ॥ १ ॥

प्रकर्षेण परसमयाद् यथावस्थितचुरिभेदप्रभेदैरुच्यन्ते जीवाजीवाऽऽदयः पदार्था अनेनास्मिन्निति वा प्रवचनम्-सामायिकाऽऽदिबिन्दुसारपर्यन्तं मुख्यतः श्रुतज्ञानम; उपचारात् तत्रोपयुक्तश्चतुर्विधः सङ्घोऽपि; कृतः प्रवचनस्य प्रणामो येन स कृतप्रवचनप्रणामोऽहं,वक्ष्ये प्रायश्चित्तदानसंक्षेपम्, पापं छिनत्तीति पापच्छित् । अथवा-प्रायश्चित्तम्-जीवं,मनो,वाऽतीचारमलमलिनितं शोधयतीति प्रायश्चित्तम् । आर्षत्वात् प्राकृतेन 'पच्छित्तं'। उक्तं च-"पावं छिंदइ जम्हा, पायच्छित्तं ति भन्नए तम्हा। पाएण वा वि चित्तं, सोहेई तेण पच्छित्तं" ॥१॥ तस्य दानं,तस्य संक्षेपः सङ्ग्रहस्तं,जीतव्यवहारकृतम्,जीतव्यवहारः-" वत्थसणुवत्तपवत्तो," इत्यग्रेतनगाथयैव वक्ष्यमाणलक्षणः, तेन कृतमुपदिष्टं,जीतव्यवहारगतं वा जीतव्यवहारात् प्रविष्टम्;जीवस्य, " जीव प्राणधारणे " जीवति, जिजीव, जीविष्यतीत्युपयोगलक्षणत्वेन त्रिकालमपि जीवनाज्जीवः, तस्य, विशेषेण शोधनम् । विशेषश्चायम्-द्विजाऽऽदयोऽपि स्थूलबुद्धयः क्वापि प्राणिवधादौ सामान्येन प्रायश्चित्तं ददति,न पुनः संघट्टनपरितापनोपद्रवाऽऽदिभेदैः सर्वेषामेकेन्द्रियाऽऽदित्रसपर्यन्तानां विषयभेदेन प्रायश्चित्तं दातुं जानन्ति । न ह्ययमुपदेशस्तदीयशास्त्रेष्वस्ति । इह पुनः प्रवचने सर्वमस्ति । अत एव यथोपलसक्षारारिष्टकोदकाऽऽदिर्निर्वस्त्रमलस्य शोधनं, तथाऽत्रापि कर्ममलमलिनस्य जीवस्य जीतव्यवहारोपदिष्टं विशोधनम्; परम-प्रकृष्टम्, अनन्यसदृशम्, नान्यत्रैवंविशिष्टः प्रायश्चित्तविधिरस्तीत्यर्थः ।

इह शिष्यः प्राह—विशेषणं हि व्यवच्छेदकं भवति, यथा नीलोत्पलमित्यत्र नीलविशेषणं , उत्पलशब्दस्य रक्तोत्पलाऽऽदिभिरपि सामानाधिकरण्ये संभवति तद्व्यवच्छेदाय, तत किमत्राप्यन्येऽपि व्यवहाराः सन्ति, येन जीतव्यवहारगतमिति विशेष्यते ? । गुरुराह-सन्त्यन्येऽप्यागमश्रुताऽऽज्ञाधारणाव्यवहाराख्याश्चत्वारो व्यवहाराः, तद्व्यवच्छेदायेह जीतपदम् । जीत० । येष्वपराधेषु पूर्वमहर्षयो बहुना तपःप्रकारेण शुद्धिं कृतवन्तः, तेष्वपराधेषु सांप्रतं रूक्षत्वेनैककालभावाद् विचिन्त्य संहननाऽऽदीनां च हानिमासाद्य तदुचितेन केनचित्तपःप्रकारेण यां गीतार्थाः शुद्धिं निर्दिशन्ति, तत् समयपरिभाषया जीतमुच्यते । अथवा यत् गच्छे सूत्रातिरिक्तं न्यूनं वा कारणतः प्रायश्चित्तं प्रवर्तितं तद् जीतं, तस्य व्यवहारो जीतव्यवहारः ।

स चायम्—

" वत्थऽणुवत्तपवत्तो, बहुसो आसेवितो महज्जणेणं ।
एसो हु जीयकप्पो, पंचमओ होइ नायव्वो ॥ १ ॥ "

वृत्तं पात्रबन्धग्रन्थिदानाऽऽदिकं एकदा एकेन वा जातः,ततोऽनुवृत्तं पुरुषान्तरं यावत्,ततः प्रवृत्तं पुरुषप्रवाहेण अतर एव बहुशः आसेवितो महाजनेन । बहुश्रुतनिर्वहणे भाष्यकृताऽप्युक्तम्-

" वत्थो नाम एक्कसि, अणुवत्तो जो पुणो वितियवारं ।
तइयव्वारे पवत्तो, सुपरिग्गहिओ महजणेणं ॥१॥
बहुसो बहुस्सुएहिं, जो वत्तो न य निवारिओ होइ ।
वत्थऽणुवत्तपमाणं, जीएण कयं हवइ एयं ॥६८२॥ "

एष जीतकल्पः पञ्चमो व्यवहारो भवति ज्ञातव्यः । जीत० । प्रव० । व्य० ।

व्यवहारकल्पे जीतव्यवहारं दर्शयति-

दद्दुरमादिसु कल्ला-णयं तु विगलिंदिएसुऽन्नत्तट्ठो ।
परियावणे एतेसिं, चउत्थमायंबिला हुंति ॥१०॥

दर्दुरो मण्डूकः, तदादिषु तत्प्रभृतिषु. मकारोऽलाक्षणिकः, प्राकृतत्वात् । तिर्यक्पञ्चेन्द्रियेषु, जीविताद् व्यपरोपितेष्विति शेषः । कल्याणकं त्विति । तुशब्दो विशेषणार्थः । स चैतद्विशिष्ट-पञ्चकल्याणप्रायश्चित्तं (विगलिंदिएसुऽभत्तट्ठो इति) विकलान्यसंपूर्णानि इन्द्रियाणि येषां ते विकलेन्द्रियाः-एकद्वित्रिचतुरिन्द्रियाः,तत्र-" व्याख्यानतो विशेषप्रतिपत्तिः " इत्येकेन्द्रिया अनन्तवनस्पतिकायिका द्रष्टव्याः। तेषु अभक्तार्थ एव-चपवासः प्रायश्चित्तम । (परियावणे एतेसिं इत्यादि)एतेषां दर्दुरादीनां परितापनायां यथासंख्यं चतुर्थाऽऽचामाम्ले प्रायश्चित्ते भवतः। इयमत्र भावना-यदि दर्दुराऽऽदीन् तिर्यक्पञ्चेन्द्रियान् गाढं परितापयति,ततोऽभक्तार्थः प्रायश्चित्तम । अथ विकलेन्द्रियान् अनन्तवनस्पतिकायप्रभृतीन् गाढं परितापयति,तत आचामाम्लम। उपलक्षणमेतत्; तेनैतदपि जीतव्यवहारानुगतमवसेयम-यदि दर्दुरप्रभृतीन् तिर्यक्पञ्चेन्द्रियान् मनाक् संघट्टयति,तत एकाशनकम, अथाऽऽगाढं परितापयति,तत आचामाम्लम्;तथा अनन्तवनस्पतिकायिकचतुरिन्द्रियाणां संघट्टने पूर्वार्द्धम्,एतेषामेवानागाढपरितापने एकाशनं,तथा पृथिव्यप्तेजोवायुप्रत्येकवनस्पतीनां संघट्टने निर्विकृतिकम्,अनागाढपरितापने पुरिमार्द्धम्,आगाढपरितापने एकाशनं, जीविताद् व्यपरोपणे आचामाम्लम ॥

इत इदमपि जीतमेवेति दर्शयति-

अपरिग्गा कालाऽसु, अ पडिकंतस्स निव्विगइयं तु ।
निव्वीतिय पुरिमड्ढो, अंबिल खवणा य आवासे ॥११॥

अपरिज्ञा प्रत्याख्यानपरिज्ञाया अग्रहणं, गृहीताया वा भङ्गः । सूत्रे विभक्तिलोपः, आर्षत्वात् । तथा कालाऽऽदिषु प्रतिक्रामतो व्यावर्तमानस्य प्रायश्चित्तं निर्विकृतिकम् । किमुक्तं भवति ?, यदि नमस्कारपौरुष्यादि दिवसप्रत्याख्यानं न गृह्णाति, गृहीत्वा वा विराधयति,तथा स्वाध्यायं प्रस्थाप्य यदि कालस्य न प्रतिक्रामति, न कालप्रतिक्रमणनिमित्तं कायोत्सर्गं करोति । आदिशब्दात् तु येषु स्थानेषु ईर्यापथिकया प्रतिक्रमितव्यं,तेषु चेत्तथा न प्रतिक्रामति, तर्हि प्रायश्चित्तं निर्विकृतिकमिति । तथा (निव्वीतिय इत्यादि) 'आवासे' आवश्यके एकाऽऽदिकायोत्सर्गाकरणे, सर्वाऽऽवश्यकाकरणे च यथासंख्यं निर्विकृतिकपूर्वार्द्धाऽऽचाम्लकपणानि । इयमत्र भावना-आवश्यके यद्येकं कायोत्सर्गं न करोति ततः प्रायश्चित्तं निर्विकृतिकं, कायोत्सर्गद्व्याकरणे पूर्वार्द्धम्, त्रयाणामपि कायोत्सर्गकरणानामकरणे आचाम्लम्, सर्वस्यापि चाऽऽवश्यकस्याकरणेऽभक्तार्थमिति ॥११॥

जं जस्स व पच्छित्तं, आयरियपरंपराएँ अविरुद्धं ।
जोगा य बहुविगप्पा, एसो खलु जीयकप्पो उ ॥१२॥

यत्प्रायश्चित्तं यस्याऽऽचार्यस्य गच्छे आचार्यपरम्पराऽऽगतत्वेनाविरुद्धं,न पूर्वपुरुषमर्यादाऽतिक्रमेण विरोधभाक् । यथाऽन्येषामाचार्याणां नमस्कारपौरुष्यादिप्रत्याख्यानस्याकरणे, कृतस्य वा भङ्गे प्रायश्चित्तमाचाम्लम्, तथाऽऽवश्यकगतैककायोत्सर्गाकरणे पूर्वार्द्धं, कायोत्सर्गद्व्याकरणे एकाशनकमित्यादि । तथा ये योगा उपधानानि बहुविकल्पा गच्छभेदेन बहुभेदाः, आचार्यपरम्पराऽऽगतत्वेन चाविरुद्धाः, यथा नागिलकुलवंशवर्तिनां साधूनामाचाराद्यारभ्य यावदनुत्तरोपपातिकदशाः, तावन्तोऽस्ति आचाम्लं,केवलं निर्विकृतिकेन ते पठन्ति,आचार्यानुज्ञाताश्च विधिना कायोत्सर्गं कृत्वा विकृतीः परिभुञ्जते ; तथा कल्पव्यवहारयोः, चन्द्रप्रज्ञप्तिसूर्यप्रज्ञप्त्योश्च केचिदागाढं योगं प्रतिपन्नाः, अपरे त्वनागाढमिति । (एसो खलु जीयकप्पो उ इति) एष सर्वोऽपि खलु गच्छभेदेन प्रायश्चित्तभेदो, योगभेदश्चाऽऽचार्यपरम्पराऽऽगतो जीतव्यवहारो वेदितव्यः । व्य० १ उ० १ द्वार ।

अथ कोऽसौ जीतव्यवहारं प्रयुञ्जीतेत्यत आह-

जो आगमे य सुत्ते, य सुमतो आण-धारणाए य ।
सो ववहारं जीए-ण कुणइ वत्ताणुवत्तेण ॥६७३॥

य आगमेन,सूत्रेण च,गाथायां सप्तमी प्राकृतत्वात् तृतीयाऽर्थे । तथा आज्ञया, धारणया च शून्यो रहितः, स जीतेन वृत्तानुवृत्तेन । अस्य व्याख्यानं प्राग्वत् । व्यवहारं करोति ।

वृत्तानुवृत्तत्वमेव भावयति-

अमुतो अमुतस्य कतो,जह अमुतस्स अमुतेण ववहारो ।
अमुतस्स वि य तध कतो,अमुतो अमुतेण ववहारो ।६७४।
तं चेवऽणुमज्जंतो, ववहारविहिं पउंजति जहुत्तं ।
जीएण एस भणितो, ववहारो धीरपुरिसेहिं ॥६७५॥

अमुको व्यवहारोऽमुके कारणे समुत्पन्नेऽमुकस्य पुरुषस्यामुकेनाऽऽचार्येण यथा कृतः; एतेन वृत्तत्वं भावितं; तथैवामुकस्य तादृशे एव कारणेऽमुकेनाऽऽचार्येणामुको व्यवहारः कृतः;एतेनानुवृत्तत्वमुपदर्शितं; तमेव वृत्तानुवृत्तं जीतमनुमज्जन् आश्रयन् यथोक्तं व्यवहारविधिं यत्प्रयुङ्क्ते, एष जीतेन व्यवहारो धीरपुरुषैर्भणितः ।

धीरपुरिसपण्णत्तो, पंचमतो आगमो वि हु पसत्थो ।
पियधम्मऽवज्जभीरू-पुरिसज्जायाणुचिण्णो य ॥६७६॥

एष पञ्चमको जीतव्यवहारो धीरपुरुषप्रज्ञप्तः तीर्थकरगणधरैः प्ररूपित आगमः पञ्चविधः, व्यवहारसूत्राऽऽत्मकतया श्रुतज्ञानविदश्चतुर्दशपूर्विणः, तैः कालं प्रतीत्य प्रशस्तः प्रशंसितः, तथा प्रियधर्मभिरवद्यभीरुभिः पुरुषजातैः, अनुचीर्णः,तस्मात्सत्यतया प्रत्येतव्यः,अर्थतः सूत्रतश्च यथाक्रमं तीर्थकरगणधरैरनिहतत्वात् । तथाहि-" पंचविहे ववहारे पण्णत्ते । " इत्यस्य सूत्रस्यार्थस्तीर्थकरैर्भाषितो,गणधरैश्च सूत्रीकृतः,अत एवोत्तमैः पुरुषजातैराचीर्णः, ततः कथमत्र न प्रत्ययः ?, इति ।

अधुना जीतव्यवहारनिदर्शनमाह-

सो जध कालाऽऽदीणं, अपडिक्कंतस्स णिव्विगइयं तु ।
मुहणंतफिमिय-पाणग-ऽसंवरणे एवमादीसु ॥६७७॥

स जीतव्यवहारो, यथेत्युदाहरणमात्रोपदर्शने, कालादिभ्यः, आदिशब्दात् स्वाध्यायाऽऽदिपरिग्रहः । अप्रतिक्रान्तस्य । गाथायां षष्ठी पञ्चम्यर्थे । मुखानन्तिके मुखपोत्तिकायां,स्फिटितायां, मुखपोत्तिकामन्तरेण इत्यर्थः । तथा पानकस्यासंवरणे पानाऽऽहारप्रत्याख्यानकरणे निर्विकृतिकं प्रायश्चित्तम ।

एगिंदिऽणंतवज्जे, घट्टणतावेऽणगाढऽऽगाढे य ।
णिव्वीतिगमादीयं, जा आयामंत उद्दवणे ॥६७८॥

एकेन्द्रियस्यानन्तकायिकवर्जस्य, पृथिव्यप्तेजोवायुप्रत्येकवनस्पतीनामित्यर्थः । घट्टने अनागाढे,तापने आगाढे च,निर्विकृतिकाऽऽदिकं, यावदाचाम्लमपद्रावणे जीविताद् व्यपरोपणे । इयमत्र भावना-पृथिवीकायिकाप्कायिकतेजस्कायिकवायुवनस्पतीनां घट्टने निर्विकृतिकम, अनागाढपरितापने पुरिमार्द्धम्, आगाढपरितापने एकाशनम,अपद्रावणे आचामाम्लमिति ।

विगलिंदियघट्टणता-वऽणगाढऽऽगाढे तहेव उद्दवणे ।
पुरिमड्ढातिकमेणं, नेयव्वं जाव खवणं तु ॥६७९॥
पंचिंदियघट्टणता-वऽणगाढऽऽगाढे तहेव उद्दवणे ।
एक्कासण आयामं, खवणं तह पंचकल्लाणं ॥६८०॥

विकलेन्द्रियाणां द्वीन्द्रियप्रभृतीनां घट्टने,तापने अनागाढे,आगाढे च,तथा अपद्रावणे,क्रमेण पूर्वार्द्धाऽऽदिक्रमेण ज्ञातव्यं यावत्क्षपणम । किमुक्तं भवति ?, घट्टने पूर्वार्द्धम्, अनागाढपरितापने आचामाम्लम्, आगाढपरितापने निर्विकृतिकम्, अपद्रावणे क्षपणमिति ॥६७९॥ तथा पञ्चेन्द्रियाणां घट्टने एकाशनकम्,अनागाढपरितापने आचामाम्लम, आगाढपरितापने क्षपणमनस्कार्थम्, अपद्रावणे पञ्चकल्याणं-निर्विकृतिकपूर्वार्द्धैकाशनकाचामाम्लक्षपणरूपम ।

एमाइओ एसो, नातव्वो होइ जीयववहारो ।
आयरियपरंपरए-ण आगतो जो व जस्स भवे ॥६८१॥

एवमादिक एष जीतव्यवहारो भवति ज्ञातव्यः, यो वा यस्य आचार्यपरम्परकेणाऽऽगतः स तस्य जीतव्यवहारो ज्ञातव्यः ।

बहुसो बहुस्सुतेहिं, जो वत्तो न य निवारितो होति ।
वत्तऽणुवत्तपमाणं, जीएण कयं हवति एयं ॥६८२॥

यो व्यवहारो बहुश्रुतैर्बहुशोऽनेकवारं वृत्तः प्रवर्तितो,न चान्यैर्बहुश्रुतैर्भवति विद्यते निवारितः, एतेन वृत्तानुवृत्तं जी-

तेन प्रमाणं कृतं भवति । एष जीतव्यवहारः प्रमाणीकर्तव्यः, इति भावः ।

एतदेव च सविस्तरं भावयति—

जं जीतं सावज्जं, न तेण जीतेण होइ ववहारो ।
जं जीतमसावज्जं, तेण तु जीतेण ववहारो ॥६०३॥

यद् जीतं सावद्यं, न तेन जीतेन भवति व्यवहारः, यद् जीतमसावद्यं, तेन तु जीतेन व्यवहारः ।

अथ व्यवहारः अथ किं सावद्यमसावद्यं वा जीतमित्यत आह-

छारहडिहडमाला-पेट्टेण य रिंगणं तु सावज्जं ।
दसविहपायच्छित्तं, होइ असावज्जजीयं तु ॥६०४॥

यत्तु प्रवचने, लोके चापराधविशुद्धये समाचरितम्-क्षारावमुष्टमनं, हरौ-गुप्तिगृहे प्रवेशनं,हडमालाऽऽरोपणं, पेट्टेन-उदरेण रिङ्गणं, तुशब्दात् खराऽऽरूढं कृत्वा ग्रामे सर्वतः पर्यटनमित्येवमादि,तत् सावद्यं जीतम् । यत्तु दशविधमालोचनाऽऽदिकं प्रायश्चित्तं तदसावद्यं जीतम् ।

अत्र चोदकः-कदाचित्सावद्यमपि जीतं दद्यात् ।

तथा चाह—

उस्सन्ने बहुदोसे, निरूंधसे पवयणे य निरवेक्खे ।
एयारिसम्मि पुरिसे, दिज्जइ सावज्जजीयं पि ॥६०५॥

उत्सन्नेन प्रायेण बहुदोषे, " निरूंधसे " सर्वथा निर्दये, तथा प्रवचने प्रवचनविषये निरपेक्षे, एतादृशे पुरुषेऽनवस्थाप्रसङ्गनिवारणाय सावद्यमपि जीतं दीयते ।

संविग्गे पियधम्मे, अपमत्ते वा अवज्जभीरुम्मि ।
कम्हि इ पमायखलिए, देयमसावज्जजीयं तु ॥ ६०६ ॥

संविग्ने, प्रियधर्मणि, अप्रमत्ते वा, अवद्यभीरौ कस्मिँश्चिदप्रमादवशतः स्खलिते देयमसावद्यं जीतम् ।

जं जीतमसोहिकरं, ण तेण जीतेण होइ ववहारो ।
जं जीतं सोहिकरं,तेण उ जीतेण ववहारो ॥६०७॥

यद् जीतमशोधिकरं, न तेन जीतेन भवति व्यवहारः कर्तव्यः, यत्पुनर्जीतं शोधिकरं, तेन जीतेन व्यवहारो विधेयः ।

शोधकराऽशोधिकरजीतप्रतिपादनार्थमाह—

जं जीतमसोहिकरं, पासत्थमपत्तसंजयाऽऽइण्णं ।
जइ वि महज्जणाऽऽचिन्नं,न तेण जीतेण ववहारो ।६०८।
जं जीतं सोहिकरं, संविग्गपरायणेण दंतेण ।
एगेण वि आइन्नं, तेण उ जीतेण ववहारो ॥६०९॥

यद् जीतं पार्श्वस्थप्रमत्तसंयताऽऽचीर्णमत एवाशोधिकरं, तद् यद्यपि महाजनाऽऽचीर्णं, तथापि न तेन जीतेन व्यवहारः कर्त्तव्यः, तस्याशोधिकरत्वात् । यत्पुनर्जीतं संवेगपरायणेन दान्तेन एकेनाप्याचीर्णं, तत् शोधिकरं कर्तव्यम् । व्य० १० उ० ।

संप्रति सूत्रकारः स्वयमेव सूत्रेणैव प्रस्तावयन्नाह-

जं जं न जाणियमिहयं, तस्सावत्तीऐं दाणमंखेवं ।
भिन्नाइया य वुच्छं, छम्मासंता य जीएणं ॥ ६० ॥

इह जीतव्यवहारेऽपराधमुद्दिश्य यद्यत् प्रायश्चित्तं न भणितं, तस्याप्यापत्तिविशेषेण दानसङ्क्षेपं वक्ष्ये । आपत्तिश्चामुकातिचारेऽमुकस्य तपसः प्राप्तिरिति । सा च निशीथ-कल्प-व्यवहाराऽऽदिषु विस्तरेणाभिहिता । तपसश्च पञ्चकादेः षण्मासान्तस्य महीयान् दानविरचनाप्रपञ्चः प्रोच्यते ॥ अत्राऽऽपत्तिदानं च संक्षेपेणैव निरूप्यते-तच्चात्र दानं भिन्नमासादारभ्य षण्मासान्तं यावद्भवति । भिन्नेत्यादि । भिन्नमासादिकाँश्च षण्मासान्तान् वक्ष्ये । अयं भावः-जीतेन जीतव्यवहारेण,भिन्नमासाऽऽदिशब्दैः किं किं तपोऽभिधीयते ?, इत्यभिधास्यामीत्यर्थः । ६० ।

भिन्नाऽऽदींस्तावदाह-

भिन्नो अविसिट्ठ चिय, मासो चउरो य उच्च लहुगुरुगा ।
णिव्विगयाई अट्ठम-जत्तंत दाणमेएसिं ॥६१॥

इह समयपरिभाषया दिनपञ्चविंशतिरूपो भिन्न इति भिन्नमासोऽभिधीयते । स चाविशिष्ट एव लघुपञ्चकगुरुपञ्चकाऽऽदिभेदाविवक्षया एवात्र गृह्यते । (मासो चउरो य उच्च लहुगुरुगा) अत्र चकारौ मासे समुच्चायकौ । ततो मासांश्चत्वारो मासाः, षण्मासाः । लघुगुरुका इति च सर्वेषु योज्यम् । यथा लघुमासो, गुरुमासो, लघुचतुर्मासं, गुरुचतुर्मासं, लघुषण्मासं, गुरुषण्मासं चेति । एतेषां भिन्नमासलघुमासगुरुमासलघुचतुर्मासगुरुचतुर्मासलघुषण्मासगुरुषण्मासाऽऽख्यानां सप्तानामापत्तौ सत्यां निर्विकृताऽऽद्यष्टमभक्तान्तमनिर्विकृतिकपुरिमार्द्धैकाशनाऽऽचामाम्लचतुर्थषष्ठाष्टमाऽऽख्यं दानं यथासंख्यं ज्ञेयमित्यर्थः । ६१ ।

एतानि च लघुपञ्चकाऽऽदिभेदाऽऽत्मकभिन्नमासाऽऽदीनि गुरुषण्मासान्तानि पूर्वम्, "अद्धेण छिन्नसेसं" इति गाथाव्याख्यायां सप्रपञ्चमाख्यातानीत्यन्यत्र प्रपञ्चितानि । सामान्येन तपस उपसंहारमाह—

इय सव्वाऽऽवत्तीओ, तवसो नाउं जहक्कमं समए ।
जीएण दिज्ज निव्वी-यगाइ दाणं जहाऽऽनिहियं ॥६२॥

इत्यमुना प्रकारेण,सर्वा आपत्तीः,तपसः संबन्धिनीः, यथाक्रममतीचारानुसारेण, समये सिद्धान्ते, ज्ञात्वा, जीतेन,निर्विकृतिकाऽऽदि दानं,यथा येन प्रकारेणाभिहितं,तथा दद्यादित्यर्थः ।६२।

विशेषाभिधानाय प्रस्तावनामाह-

एयं पुण सव्वं चिय, पायं सामन्नओ विनिद्दिट्ठं ।
दाणं विभागओ पुण, दव्वाइविसेसियं नेयं ॥ ६३ ॥

एतत्पुनरालोचनाऽर्हाऽऽदिप्रायश्चित्तदानं, सर्वमेव, प्रायो बाहुल्येन, सामान्यतो द्रव्याऽऽद्यविभागतो, विनिर्दिष्टम्; विभागतः पुनः द्रव्याऽऽदीनि द्रव्यक्षेत्रकालभावपुरुषप्रतिसेवनाऽऽदीनि,तदपेक्षं विशोधितं हीनमधिकं वा, यथोक्तमेव वा, जीतं दानं दातव्यमिति ज्ञेयम् । ६३ ।

शेषमेव सुव्यक्तमाह-

दव्वं खेत्तं कालं, भावं पुरिसं पडिसेवणाओ य ।
नाउ मियं चिय दिज्जा, तम्मत्तं हीणमहियं वा ॥६४॥

अत्र बन्धाऽऽनुलोम्येन प्राकृतत्वात्पुरुषशब्दो लुप्तविभक्तिको निर्दिष्टः । ततश्च द्रव्यं क्षेत्रं कालं भावं पुरुषं प्रतिसेवनाश्च ज्ञात्वा,मितमेव द्रव्यक्षेत्राऽऽदिप्रमाणेनैव,को ऽर्थः ?,द्रव्याऽऽदिषु हीनेषु हीनम्, अधिकेष्वधिकम्, अहीनोत्कृष्टेषु तन्मात्रं-जीतोक्तसममेव, दद्यात् । ६४ ।

तत्र द्रव्याऽऽद्यभिधित्सयाऽऽह-

आहाराऽऽई दव्वं, वल्लियं सुलहं च नाउमहियं पि ।
दिज्जाहि दुब्बलं दु-ल्लहं च नाऊण हीणं पि ॥६५॥

आहाराऽऽदिकं द्रव्यं-यत्र देशे वल्लिकं,सुलभं च; यथा-अनूपदेशे शालिकूरो वल्लिकः,स्वभावेनैव सुलभश्च; तं ज्ञात्वाऽधिकमपि जीतोक्तादू बहुतरमपि दद्यात् । यत्र पुनर्वल्लचणककाञ्जिकाऽऽदिको रूक्षाऽऽहारो दुर्बलो, दुर्लभश्च; तं ज्ञात्वा हीनं जीतोक्तादल्पमपि दद्यादित्यर्थः । ६५ ।

अथ क्षेत्रकालाभिधानार्थमाह-

लुक्खं सीयल साहा-रणं च खित्तम्हियं पि सीयम्मि ।
लुक्खम्मि य हीणतरं, एवं काले वि तिविहम्मि ।६६।

रूक्षं क्षेत्रं-स्नेहरहितं, वातुलं वा; शीतलं पुनः-स्निग्धम्, अनूपं वा; साधारणं-मध्यस्थम्,अस्निग्धरूक्षम् । इह शीते स्निग्धक्षेत्रे जीतोक्तादधिकमपि दद्यात्;रूक्षे च हीनतरं जीतोक्तादल्पतरम् । अत्र चकारोऽनुक्तसमुच्चये । तेन साधारणक्षेत्रे साधारणं जीतोक्तमात्रमेव, अहीनाधिकं दद्यादिति ज्ञेयम् । कालेऽपि त्रिविधे-वर्षाशिशिरग्रीष्मरूपे,एवममुनैवोक्तप्रकारेण,जीतोक्ताधिकसमहीनानि तपांसि यथासंख्यं दद्यादिति सामान्यातिदेशः ।।६६।।

विशेषतः कालं प्रपञ्चयन्नाह-

गिम्हासिसिरवासासुं, दिज्जऽट्ठमदसमबारसंताइं ।
नाउं विहिणा णवविह-सुयववहारोवएसेणं ॥ ६७ ॥

अत्र कालस्त्रिधा-ग्रीष्मशिशिरवर्षाभेदतः स च सामान्यतो द्विधा-स्निग्धो, रूक्षश्च । स च द्विरूपोऽप्युत्कृष्टमध्यमजघन्यभेदात् त्रिधा । तत्रोत्कृष्टस्निग्धोऽतिशीतः,मध्यमस्निग्धो नातिशीतः, जघन्यस्निग्धः स्तोकशीतः । उत्कृष्टरूक्षोऽत्युष्णः,मध्यमरूक्षो नात्युष्णः, जघन्यरूक्षः कवोष्णः । एवंरूपे ग्रीष्मशिशिरवर्षाऽऽख्ये कालत्रये नवविधश्रुतव्यवहारोपदेशेन नवविधो-नवविधतपोदानलक्षणः, स चासौ श्रुतव्यवहारोपदेशश्च, तेन नवविधश्रुतव्यवहारोपदेशेन, विधिना वैपरीत्याभावेन, ज्ञात्वाऽष्टमदशमद्वादशान्तानि तपांसि दद्यात् । अयं भावार्थः—ग्रीष्मशिशिरवर्षासु यथाक्रमं चतुर्थषष्ठाष्टमानि जघन्यानि, षष्ठाष्टमदशमानि मध्यमानि, अष्टमदशमद्वादशान्युत्कृष्टानि ।

उक्तं च-

" गिम्हासु चउत्थं दिज्जा, छट्ठं च हिमाऽऽगमे ।
वासासु अट्ठमं दिज्जा, तवो एस जहण्णगो ॥ १ ॥
गिम्हासु छट्ठगं दिज्जा, अट्ठमं च हिमाऽऽगमे ।
वासासु दसमं दिज्जा, एस मज्झिमगो तवो ॥ २ ॥
गिम्हासु अट्ठमं दिज्जा, दसमं च हिमाऽऽगमे ।
वासासु दुवालसमं, एस उक्कोसओ तवो ॥ ३ ॥ "

एष नवविधतपोदानलक्षणः श्रुतव्यवहारोपदेशः । अथवा-नवविधश्रुतव्यवहारोपदेशो द्विधा-ओघतो, विभागतश्च । तत्रौघतो गुरुः १, गुरुतरो २, गुरुतमश्च ३। लघुः १, लघुतरो २,लघुतमश्च ३ । लघुको १, लघुकतरो २, लघुकतमश्चेति ३ । एवं नवविधः ।

उक्तं च-

" गुरुओ गुरुअतराओ, अहागुरू चेव होइ ववहारो ।
लहुओ लहुअतराओ अहालहू चेव ववहारो ॥ १ ॥
लहुसो लहुसतराओ, अहलहुसो चेव होइ ववहारो ॥"

अहागुरु-अहालहु-अहालहुसशब्दैर्गुरुतमलघुतमलघुकतमा उच्यन्ते । एष च नवविधोऽपि आपत्तिदानतपोऽर्ज्यां, कालेन च योजनीयः ।

तत्रेदमापत्तितपः—

गुरुमासो १, गुरुलघुचतुर्मासो २, गुरुलघुषण्मासश्च ३ । लघुमासो १,त्रिभमासो २,विंशतिकं च ३ । पञ्चदशकं १,दशकं २,पञ्चकं चेति ३। उक्तं च-"गुरुगो य होइ मासो, गुरुयतरो चेव होइ चउमासो। अहगुरुओ छम्मासो,गुरुपक्खे होइ पडिवत्ती" ॥१॥ अत्र सामान्येनाभिधानात् चतुर्मासकशब्देन गुरुचतुर्मास-लघुचतुर्मासाऽऽख्योभयमपि ग्राह्यम्; षण्मासशब्देन च गुरुषण्मास-लघुषण्मासाऽऽख्यद्वयमपि ग्राह्यम् । "तीसाय पन्नवीसा, वीसा विय होइ लहुयपक्खम्मि ॥" अत्र 'तीसा' चेतत् स्थूलतयैवोक्तम्; अन्यथा लघुमासे सार्धसप्तविंशतिरेव दिनानि भवन्ति । "पनरस दस पंचेव य, लहुसयपक्खम्मि पडिवत्ती" ॥ १ ॥ प्रतिपत्तिरापत्तिरित्यर्थः ।

अथेदानीमेषु गुरुकादिषु दानतपः-

अष्टमम् १, दशमम् २, द्वादशं च ३ । षष्ठम् १, चतुर्थम् २, आचाम्लं च ३ । एकाशनम् १, पुरिमार्द्धम् २,निर्विकृतिकं च ३ इति वर्षाशिशिरग्रीष्मेषु दीयते ।

उक्तं च-

" गुरुगं च अट्ठमं खलु, गुरुयतरायं च होइ दसमं तु ।
अहगुरुयं बारसमं, गुरुपक्खे होइ दाणं तु ॥ १ ॥
छट्ठं चउत्थयंबिल, लहुपक्खे होइ तद्दाणं ।
एगासण पुरिमड्ढं, निव्वीयं लहुस सुद्धो वा ॥ २ ॥ "

(सुद्धो व त्ति) यस्तु निर्विकृतिकमात्रमपि तपः कर्तुमशक्तः स मिथ्यादुष्कृतेनैव शुद्ध्यतीत्यर्थः । एवमोघेनोक्तो नवविधः श्रुतव्यवहारोपदेशः ।

साम्प्रतं विभागतः कथ्यते-

"ओहेण एस भणिओ, इत्तो वुच्छं विभागेणं ।
तिगनवसत्तावीसा-एक्कासीहिं नेएहिं ॥ १ ॥"

अत्रैष नवविधव्यवहारस्त्रिभिर्नवभिः सप्तविंशतिभिरेकाशीतिभिश्च त्रैर्भवति । तत्र संक्षेपतस्तावदयं त्रिभेदः-उत्कृष्टो, मध्यमो, जघन्यश्च । तत्र गुरु-गुरुतर-गुरुतमाऽऽख्यो गुरुपक्ष उत्कृष्टः । लघु-लघुतर-लघुतमाऽऽख्यो लघुपक्षो मध्यमः । लघुक-लघुकतर-लघुकतमाऽऽख्यो लघुकपक्षो जघन्य इति ।

यदाह-

" नवविह ववहारेसो, संखेवेणं तिहा मुणेयव्वो ।
उक्कोसो मज्झिमगो, जहण्णगो चेव तिविहेसः ॥ १ ॥
उक्कोसो गुरुपक्खो, लहुपक्खो मज्झिमो मुणेयव्वो ।
लहुसपक्खो जहन्नो, तिविगप्पो एस नायव्वो " ॥ २ ॥

नवभेदस्त्वेवम्—गुरुपक्ष एकोऽप्युत्कृष्टमध्यमजघन्यभेदात् त्रिधा । एवं लघुपक्षोऽपि त्रिधा । लघुकपक्षोऽपि चैवं त्रिधेति । तत्र गुरुपक्षे त्रैविध्यमिदम्-गुरुपक्षः षाण्मासिक-पाञ्चमासिकाऽऽख्य उत्कृष्टः,चातुर्मासिक-त्रैमासिकाऽऽख्यो मध्यमः,द्वैमासिकगुरुमासिकाऽऽख्यो जघन्यः । लघुपक्षे लघुमास उत्कृष्टः, भिन्नमासो मध्यमः,विंशतिकं जघन्यम् । लघुकपक्षे पञ्चदशकमुत्कृष्टम, दशकं मध्यमम्,पञ्चमं जघन्यमित्येष नवविधाऽऽपत्तितः स्वरूपश्रुतव्यवहारो दर्शितः ।

भणितं च-

"गुरुपक्खे उक्कोसो, मज्झ जहन्नो त एव लघुए वि ।
एमेव य लहुसे वी, इय एसो नवविहो होइ ॥ १ ॥
गुरुपक्खे छम्मासा, पणमासो चेव होइ उक्कोसो ।
मज्झो चउ-तेमासो, दुमास-गुरुमासग जहन्नो ॥ २ ॥
लहुभिन्नमासवीसा, लहुपक्खुक्कोसमज्झिमजहन्ना ।
पनरसगं दस पणगं, लहुसुक्कोसाइतिविहेसो ॥ ३ ॥
आवत्तितवो एसो, नवभेओ वण्णिओ समासेण ।
अट्ठण्ह व सत्तवीसो, दाणतवो तस्सिमो होइ" ॥ ४ ॥

तस्याऽऽपत्तितपस इदं सप्तविंशतिभेदं दानतपो भवति । तत्र गुरुपक्ष एकोऽपि नवधा । तद्यथा-उत्कृष्टोत्कृष्टः १, उत्कृष्टमध्यमः २, उत्कृष्टजघन्यः ३, मध्यमोत्कृष्टः ४, मध्यममध्यमः ५, मध्यमजघन्यः ६, जघन्योत्कृष्टः ७, जघन्यमध्यमः ८, जघन्यजघन्यश्चेति ९ । एवं लघुपक्षोऽपि नवधा ९ । एवं लघुकपक्षोऽपि चैवमेव नवधा ९ । सर्वमीलने सप्तविंशतिभेदा भवन्ति ।

भणितं च—

"गुरु-लघु-लघुसगपक्खो, इक्किक्को नवविहो मुणेयव्वो ।
उक्कोसुक्कोसो वा १, उक्कोसगमज्झिम २ जहन्नो ३ य ॥१॥
मज्झुक्कोसो मज्झिम-मज्झो २ तह होइ मज्झिमजहन्नो ३ ।
इय णेय जहन्नो वी, गुरुपक्खे होंति नवभेआ ॥२॥
पुव्वुत्ता नव भेया, नेया सव्वे तहेव लहुपक्खे ।
नव चेव लहुसपक्खे, सत्तावीसं नवंतए" ॥ ३ ॥

तत्रेदमेव सप्तविंशतिविधं दानतपो व्यक्तीकुर्वन्निह गुरुपक्षे षण्मासिकपञ्चमासिकाऽऽख्योत्कृष्टाऽऽपत्तौ सत्याम्-उत्कृष्टोत्कृष्टं द्वादशं तपः, उत्कृष्टमध्यमं दशमम्, उत्कृष्टजघन्यमष्टमम् । चतुर्मासिकत्रिमासिकाऽऽख्यमध्यमाऽऽपत्तौ-मध्यमोत्कृष्टं दशमम्, मध्यममध्यममष्टमम्, मध्यमजघन्यं षष्ठम् । द्विमासिकगुरुमासाऽऽख्यजघन्याऽऽपत्तौ-जघन्योत्कृष्टमष्टमम्, जघन्यमध्यमं षष्ठम्, जघन्यजघन्यं चतुर्थम् ॥ लघुपक्षे लघुमासाऽऽख्योत्कृष्टाऽऽपत्तौ-उत्कृष्टोत्कृष्टं दशमम्, उत्कृष्टमध्यममष्टमम्, उत्कृष्टजघन्यं षष्ठम् । भिन्नमासाऽऽख्यमध्यमाऽऽपत्तौ-मध्यमोत्कृष्टमष्टमम्, मध्यममध्यमं षष्ठम्, मध्यमजघन्यं चतुर्थम् । विंशाऽऽख्यजघन्याऽऽपत्तौ-जघन्योत्कृष्टं षष्ठम्, जघन्यमध्यमं चतुर्थम्, जघन्यजघन्यमाचामाम्लम् ॥ लघुकपक्षे पञ्चदशाख्योत्कृष्टाऽऽपत्तौ-उत्कृष्टोत्कृष्टमष्टमम्, उत्कृष्टमध्यमं षष्ठम्, उत्कृष्टजघन्यं चतुर्थम् । दशकाऽऽख्यमध्यमाऽऽपत्तौ-मध्यमोत्कृष्टं षष्ठम्, मध्यममध्यमं चतुर्थम्, मध्यमजघन्यमाचामाम्लम् । पञ्चकाऽऽख्यजघन्याऽऽपत्तौ-जघन्योत्कृष्टं चतुर्थम्, जघन्यमध्यममाचामाम्लम्, जघन्यजघन्यमेकाशनमिति । एवं वर्षासु सप्तविंशतिविधं दानतपः ।

यदाह-

"बारसग दसम अट्ठम, छप्पणमासेसु तिविहदाणेणं ।
चउ-तेमासे दस अ-ट्ठ छ उक्कोसगाइ तिहा ॥ १ ॥
एमेवुक्कोसाइ, दुमासगुरुमासिए तिहा दाणं ।
अट्ठम छट्ठ चउत्थं, नवविहमेयं तु गुरुपक्खे ॥ २ ॥
दसमं अट्ठम छट्ठं, लहुमासुक्कोसगाइ तिह दाणं ।
अट्ठम छट्ठ चउत्थं, उक्कोसाइ य तिहा भिन्ने ॥ ३ ॥
छट्ठचउत्थायामं, उक्कोसाई य दाण वीसाए ।
लहुपक्खम्मि नवविहो, एसो बीओ भवे नवगो ॥ ४ ॥
अट्ठम छट्ठ चउत्थं, एसुक्कोसाइ दाण पन्नरसे ।
छट्ठ चउत्थायामं, दससु तिविहे य दाण नवे ॥ ५ ॥
खमणाऽऽयामेगासण, तिविहुक्कोसाइ दाण पणगम्मि ।
लहुसे वी तइएसुं, सत्तावीसे य मासासु" ॥ ६ ॥

एवं यथा वर्षासूत्कृष्टाऽऽपत्तिनवके सति दानतपसो द्वादशमादौ कृत्वा एकाशनान्ताः सप्तविंशतिभेदा आरणिकया कृताः; तथा शिशिरेऽपि; केवलं दशममादौ कृत्वा पुरिमार्द्धान्ताः । ग्रीष्मे पुनरष्टममादौ कृत्वा निर्विकृत्यन्ताः सप्तविंशतिभेदाः कार्याः, यन्त्रस्थापनातश्च ज्ञेयाः । वर्षाशिशिरग्रीष्माणां सप्तविंशतित्रयमीलने चैकाशीतिर्दानतपसो भेदा भवन्ति । अर्कस्य समविन्नागरूपस्य एकदेशस्य एकादिपदाऽऽत्मकस्यापक्रमणं निवर्त्तनं, शेषस्य तु बुद्ध्यादिपदसङ्घाताऽऽत्मकस्यैकदेशस्यानुवर्त्तनं यस्यां रचनायां सा समयपरिभाषयाऽर्द्धापक्रान्तिरुच्यते । यथा वर्षासु गुरुतमे उत्कृष्टतो द्वादशं, मध्यमतो दशमं, जघन्यतोऽष्टमम् । एषां मध्यादेकदेशो द्वादशलक्षणोऽपक्रामति. द्वादशमाष्टमे गुरुतरं गच्छतोऽग्रेतनं च षष्ठं मील्यते. ततश्च गुरुतर उत्कृष्टतो दशमं, मध्यमतोऽष्टमं, जघन्यतः षष्ठम् । एषां मध्यादेकदेशो दशमलक्षणो निवर्त्तते, अष्टमषष्ठे गुरुकं गच्छतोऽग्रेतनं चतुर्थं मील्यते, ततश्च गुरुके उत्कृष्टतोऽष्टमं, मध्यमतः षष्ठं, जघन्यतश्चतुर्थमिति । यथा चेयमेकाशीतिकदानतपोयन्त्रके वर्षाऽऽश्रयनवकेऽर्द्धापक्रान्तिर्दर्शिता, तथैव सर्वेष्वपि नवकेषु विलोकनीया ।

यदाह—

" सिसिरे दसमाईणं, चारणभेएण सत्तवीसेणं ।
वायइ पुरिमड्ढम्मी, अक्कुक्कंती तह चेव ॥ १ ॥
अट्ठममाई गिम्हे, चारणभेएण सत्तवीसेणं ।
तह चेव अधुक्कंती, वायइ निव्वीयए नवरं" ॥ २ ॥

एतैर्दानैरापत्तयः स्वका नियमात्सर्वा बोद्धव्याः । एकविधाऽऽपत्तिषु च द्वादशाऽऽद्यं तपः कर्तुमसहिष्णोर्ह्रासस्तावत्कार्यो यावच्चतुर्थानामपि षष्ठीनां स्थितमेकपर्यन्तकोष्ठकगतं चतुर्थाऽऽदि निर्विकृतिकान्तं तपः, ततस्तस्य दीयते । तत्करणेऽप्यशक्तस्य पुनस्तथैव ह्रासयेत् । स्वस्थानतपो दातुं वर्षासु वर्षाकाले उक्तं, शिशिरोक्तं शिशिरे, ग्रीष्मोक्तं ग्रीष्मे । तदपि कर्तुमक्षमस्य परस्थानं-वर्षास्वपि शिशिरोक्तं, ग्रीष्मोक्तं वा ह्रासयद्भिर्दीयते । एवं स्थाने स्थाने वर्षाशिशिरग्रीष्मरूपे ह्रासयद्भिस्तावन्नेयं यावन्निर्विकृतिकमाचाम्लमेव देयतया स्थितम । कैश्चिदेवं व्याख्यातम्-आधाकर्मिकाऽऽपत्तौ या षड्जीवनिकायविराधना, तज्जनितं प्रायश्चित्तं स्वस्थानम, आधाकर्माऽऽद्यासेवाभणितं च चतुर्थादिकं परस्थानं, तद्दाने कथमेव ह्रासविधिर्ज्ञेय इति ? ।

उक्तं च-

" एएहिं दाणेहिं, आवत्तीओ सया सया नियमा ।
सव्वा बोद्धव्वाओ, असहिस्सिक्किक्कहासणया ॥ १ ॥
जावइयं इक्किक्कं, तं पी हासिज्ज असहणो ताव ।
दाउं सट्ठाणनयं, परट्ठाणं दिज्ज एमेव ॥ २ ॥
एवं ठाणे ठाणे, हिट्ठा उत्तं कमेण हासित्ता ।
नेयव्वं जावइयं, नियमा निव्वीयए इक्कं" ॥ ३ ॥

एष नवविधो व्यवहारः । एकाशीतिकस्य नवविधव्यवहारयन्त्रकस्य स्थापना (२५१८ पृष्ठेऽग्रे) अथ च उत्कृष्टाऽऽदीनि जघन्यान्तानि तपांसि स्थाप्यन्ते, एवं सुखेन ह्रासः कर्तुं शक्यते, सूत्रे तु जघन्याऽऽदीन्युत्कृष्टान्तान्युक्तानि, तद्विचित्रत्वात् सूत्ररचनाया इति । उक्तं कालविषयं सप्रपञ्चं प्रायश्चित्तम ॥ ६७ ॥ (भाषाऽऽद्विषयं प्रायश्चित्तं तु 'तवोरिह' शब्दे वक्ष्यते)

एकाशीतिकस्य नवविधव्यवहारयन्त्रकस्य स्थापना चेयम्—

वर्षासु २७

उत्कृष्टापत्तौ				मध्यमापत्तौ				जघन्यापत्तौ			
६।५	गुरुतमम्	ज०	उ०	१२	४।३	गुरुतरम्	म०	उ०	१०	२।१	गुरु	ज०	ज०	८
	गुरुतमम्	उ०	म०	१०		गुरुतरम्	म०	म०	८		गुरु	ज०	म०	६
	गुरुतमम्	उ०	ज०	८		गुरुतरम्	म०	ज०	६		गुरु	ज०	ज०	४
२७॥	लघु	उ०	उ०	१०	२५	लघुतरम्	म०	उ०	८	२०	लघुतमम्	ज०	ज०	६
	लघु	उ०	म०	८		लघुतरम्	म०	म०	६		लघुतमम्	ज०	म०	४
	लघु	उ०	ज०	६		लघुतरम्	म०	ज०	४		लघुतमम्	ज०	ज०	आ०
१५	लघुकम	उ०	ज०	८	१०	लघुकतरम्	म०	उ०	६	५	लघुकतमम्	ज०	उ०	४
	लघुकम	उ०	म०	६		लघुकतरम्	म०	म०	४		लघुकतमम्	ज०	म०	आ०
	लघुकम	ज०	ज०	४		लघुकतरम्	म०	ज०	आचाम्लम		लघुकतमम्	ज०	ज०	एकाशनकम्

शिशिरे २७

उत्कृष्टापत्तौ				मध्यमापत्तौ				जघन्यापत्तौ			
६।५	गुरुतमम्	उ०	उ०	१०	४।३	गुरुतरम्	म०	ज०	८	२।१	गुरु	ज०	उ०	६
	गुरुतमम्	उ०	म०	८		गुरुतरम्	म०	म०	६		गुरु	ज०	म०	४
	गुरुतमम्	ज०	ज०	६		गुरुतरम्	म०	ज०	४		गुरु	ज०	ज०	आ०
२७॥	लघु	ज०	उ०	८	२५	लघुतरम्	म०	ज०	६	२०	लघुतमम्	ज०	ज०	४
	लघु	ज०	म०	६		लघुतरम्	म०	म०	४		लघुतमम्	ज०	म०	आ०
	लघु	उ०	ज०	४		लघुतरम्	म०	ज०	आ०		लघुतमम्	ज०	ज०	ए०
१५	लघुकम्	उ०	उ०	६	१०	लघुकतरम्	म०	उ०	४	५	लघुकतमम्	ज०	उ०	आ०
	लघुकम्	उ०	म०	४		लघुकतरम्	म०	म०	आ०		लघुकतमम्	ज०	म०	ए०
	लघुकम्	उ०	ज०	आ०		लघुकतरम्	म०	ज०	ए०		लघुकतमम्	ज०	ज०	पुरिमार्द्धम

ग्रीष्मे २७

उत्कृष्टापत्तौ				मध्यमापत्तौ				जघन्यापत्तौ			
६।५	गुरुतमम्	ज०	उ०	८	४।३	गुरुतरम्	म०	उ०	६	२।१	गुरु	ज०	ज०	४
	गुरुतमम्	ज०	म०	६		गुरुतरम्	म०	म०	४		गुरु	ज०	म०	आ०
	गुरुतमम्	ज०	ज०	४		गुरुतरम्	म०	ज०	आ०		गुरु	ज०	ज०	ए०
२७॥	लघु	ज०	उ०	६	२५	लघुतरम्	म०	उ०	४	२०	लघुतमम्	ज०	उ०	आ०
	लघु	ज०	म०	४		लघुतरम्	म०	म०	आ०		लघुतमम्	ज०	म०	ए०
	लघु	उ०	ज०	आ०		लघुतरम्	म०	ज०	ए०		लघुतमम्	ज०	ज०	पु०
१५	लघुकम्	ज०	उ०	४	१०	लघुकतरम्	म०	उ०	आ०	५	लघुकतमम्	ज०	ज०	ए०
	लघुकम्	उ०	म०	आ०		लघुकतरम्	म०	म०	ए०		लघुकतमम्	ज०	म०	पु०
	लघुकम्	उ०	ज०	ए०		लघुकतरम्	म०	ज०	पुरिमार्द्धम		लघुकतमम्	ज०	ज०	निर्विकृतिकम्

जीयविजय–जीतविजय–पुं० । यशोविजयगणिगुरोर्नयविजयगणेः सतीर्थ्ये ज्ञानविजयगणिशिष्ये आचार्ये, प्रति० । प्रतिमाशतके कल्याणविजयवर्णनमधिकृत्य–" तच्छिष्याः प्रतिगुणधाम हेमसूरेः,श्रीलाभोत्तरविजया बुधा बभूवुः श्रीजीतोत्तरविजयाऽभिधानजीत-कृश्रीमन्नयविजयौ तदीयशिष्यौ " ॥१५॥ द्वात्रिंशिकायां लाभविजयवर्णनमधिकृत्य–" यदीया दृग्लीलाऽभ्युदयजननी मादृशि जने, जगत्स्थानेऽप्यकंद्युतिरिव जगत् पङ्कजवने । स्तुमस्तच्छिष्याणां बलमविकलं जीतविजयाभिधानां विज्ञानां कनकनिकषस्निग्धवपुषाम् ॥४॥ " द्वा० ३२ द्वा० । नयो० । अष्ट० ।

जीया–ज्या–स्त्री० । ज्या-अङ्क । " ज्यायामीत् " ॥ ८ । २ । ११५ ॥ इति प्राकृतसूत्रेण व्यञ्जनात्पूर्वमीद् भवति । प्रा० २ पाद । धनुषो गुणे, मौर्व्यां, मातरि, भूमौ च । वाच० ।

जीर–जॄ–जरायाम्, दिवादि-पर० अक० सेट् घटादिः । " इक्तृज्ञामीरः " ॥ ८ । ४ । २५० ॥ इति प्राकृतसूत्रेणैषामन्त्यस्य ईर इत्यादेशः । प्रा० ४ पाद । जीर्यति, अजरत्, अजारीत्, जीर्णः, जरा, जरयति । वाच० ।

जीव–जीव–पुं० । जीवनं जीवः । जीव-भावे घञ् । प्राणधारणे, आ० म० । विशे० । पा० । " इहसंति गया दविया, णावकंखंति जीवितुं । " जीवितुं प्राणान् धारयितुम् । आचा० १ श्रु० १ अ० ७ उ० । " जीवो त्ति जीवणं पा-णधारणं जीवियं ति पउजायां ॥" (३५०८ गाथा) विशे० । जीवितवान्, जीवति, जीविष्यतीति जीवः । आचा० १ श्रु० ८ अ० २ उ० । दर्श० । आव० । उपयोगलक्षणे जीवद्रव्ये, सूत्र० २ श्रु० १ अ० । " न य पत्तो सव्वगओ, निक्किरिओ लक्खणाइनेआओ । " (१७५७ गाथा) उपयोगलक्षणो हि जीवः । स चोपयोगो रागद्वेषकषायविषयाध्यवसायाऽऽदिभिर्भिद्यमान उपाधिभेदादानन्त्यं प्रतिपद्यत इत्यनन्ता जीवाः, लक्षणभेदाद्, घटाऽऽदिवदिति । विशे० ।

जीवनिक्षेपश्चतुर्धा । तथा च निर्युक्तिः–

निक्खेवो जीवम्मी, चउव्विह दुविहो उ होइ दव्वम्मि ।
आगम-णोआगमतो, नोआगमतो य सो तिविहो ॥१॥
जाणगसरीरभविए, तव्वइरित्तं च जीवदव्वं तु ।
भावम्मि दसविहो खलु,परिणामो जीवदव्वस्स ॥२॥

तद्व्यतिरिक्तं च जीवद्रव्यम्; द्रव्यजीव उच्यते इति प्रक्रमः । तुर्विशेषद्योतकः । स चायं विशेषः–न यथा कदाचित् तत्पर्यायवियुतं द्रव्यं, तथाऽपि च यदा वियुक्ततया विवक्ष्यते, तदा तद्द्रव्यप्राधान्यतो द्रव्यजीवः । भावे तु दशविधः, क्षयोपशमोदयापेक्षपरिणतिरूपो, जीवद्रव्यस्य संबन्धी, जीवादनन्यत्वेन जीवतया विवक्षितो जीव इति प्रक्रमः । तत्र च क्षायोपशमिकाः पञ्चेन्द्रियाणि, षष्ठं मनः, औदयिकाः क्रोधाऽऽद्यश्चत्वारो मीलिता दश भवन्ति । उत्त० ३६ अ० दश० (विस्तरेण निक्षेप 'आता' शब्दे द्वितीयभागे १६७ पृष्ठे उक्तः) इन्द्रियपञ्चकमनोवाक्कायबलत्रयोच्छ्वासनिःश्वासायुर्बलनाद् दश प्राणान् यथायोगं धारयतीति जीवः । कर्म० १ कर्म० । नं० । आ० म० । भ० । प्राणधारणधर्मके आत्मनि, स्था० १ ठा० १ उ० । आचा० । दर्श० । देहादिनिमानिनि आत्मनि, मनुष्यावधिकीटपर्यन्ते चेतने, वाच० । क इत्थंभूत इति चेत् ? उच्यते–यो मिथ्यात्वाऽऽदिकलुषितरूपतया सातास्ऽऽदिवेदनीयाऽऽदिकर्मणामभिनिवर्तकः, तत्फलस्य च विशिष्टसातास्ऽऽदेरुपजोक्ता, नरकाऽऽदिभवेषु च यथाकर्मविपाकोदयं संसर्ता, सम्यग्दर्शनज्ञानचारित्रोपसंपन्नरत्नत्रयाभ्यासप्रकर्षवशाच्च निःशेषकर्मक्षयापगमतः परिनिर्वाता, स जीवः सत्त्वः प्राणी आत्मेत्यादिपर्यायाः । उक्तं च–" यः कर्ता कर्मभेदानां, भोक्ता कर्मफलस्य च । संसर्ता परिनिर्वाता, स ह्यात्मा नान्यलक्षणः " ॥ १ ॥ इति । कर्म० १ कर्म० । नं० ।

जीवलक्षणम्–

उवओगलक्खणमणा–इनिहणमत्थंतरं सरीराओ ।
जीवमरूवं कारिं, भोइं च सयस्स कम्मस्स ॥ ५६ ॥

उपयुज्यते अनेनेत्युपयोगः साऽऽकारानाकारा[illegible] उक्तश्च स द्विधा अष्टचतुर्भेदः, स एव लक्षणं यस्य स [illegible] गलक्षणस्तं, जीवमिति वक्ष्यते । तथा अनाद्यनिधनम्–अनाद्यपर्यवसितं, भवापवर्गप्रवाहापेक्षया नित्यमित्यर्थः । आव० ४ अ० । दर्श० ।

जीवो अणाइनिहणो,णाणाऽऽवरणाइकम्मसंजुत्तो । (६)

जीवतीति जीवः,असौ अनादिनिधनः–अनाद्यपर्यवसित इत्यर्थः स च ज्ञानाऽऽवरणाऽऽदिकर्मणा समेकीभावेनान्योन्यव्याप्त्या, युक्तः संवलो ज्ञानाऽऽवरणाऽऽदिकर्मसंयुक्तः । आ० । " ज्ञानाऽऽत्मकः सर्वशुभा-शुभकर्ता स कर्मणा । नाना संसारिमुक्ताऽऽख्यो, जीवः प्रोक्तो जिनाऽऽगमे " ॥ १ ॥ दर्श० ४ तत्त्व ।

निसर्गचेतनायुक्तो, जीवोऽरूपी ह्यवेदकः ॥ [६०]

निसर्गो सहजा या चेतना, तया युक्तः निसर्गचेतनायुक्तः, सर्वेभ्योऽचेतनेभ्यो भिन्नो, जीवः, व्यवहारनयेन रूपवेदसहितोऽपि निश्चयनयेन रूपरहितो–रूपात्यन्ताभावयुक्तः, वेदरहितो–वेदात्यन्ताभावयुक्तः, सत्तामात्रम्, निर्गुणो, निर्विकारो जीवः । उक्तं च–" अरसमरूवमगंधं, अव्वत्तं चेयणागुणमसद्दं । जाण अलिंगग्गहणं, जीवमणिद्दिट्ठसंठाणं ॥ १ ॥ " ऊत्त्या० १० अध्या० । " जीवमजीवे,रूवमरूवी य सप्पएसे य ।" सुखदुःखज्ञानोपयोगलक्षणो जीवः,तद्भिन्नोऽजीवः। एतौ द्वौ भेदौ प्रत्येकं रूप्यरूपिभेदौ। तथा चाह–रूप्यरूपिण इति । तत्रानादिकर्मसन्तानपरिगता रूपिणः, अरूपिणस्तु कर्मरहिताः सिद्धा इति । आ० म० । आ०चू० । (जीवस्यास्तित्वनित्यत्वाऽऽदि 'आता' शब्दे द्वितीयभागे १७२ पृष्ठे प्रतिपादितम्)

जीवस्य कथञ्चिद् नित्यत्वं कथञ्चिदनित्यत्वम्—

सासए जीवे जमाली !, जं ण कदाइ णासि० जाव णिच्चे ।
असासए जीवे जमाली !,जं णं णेरइए भवित्ता तिरिक्खजोणिए भवइ, तिरिक्खजोणिए भवित्ता मणुस्से भवइ, मणुस्से भवित्ता देवे भवइ ॥ भ० ९ श० ३३ उ० ।

जीवानां कथञ्चित्साहश्यं, कथञ्चिद् न–

" सव्वे पाणा अणेलिसा । " [४ गाथा]

सर्वेऽपि प्राणिनो विचित्रकर्मसङ्गवाद् नानागतिजातिशरीराङ्गोपाङ्गाऽऽदिसमन्वितत्वादनीदृशा विसदृशाः। सूत्र० २ श्रु० १ अ० । (हस्तिकुन्थ्वोः समानजीवत्वं, जीवस्य संकोचविकाशशीलत्वं च ' पएसिण् ' शब्दे वक्ष्यते)

जीवचैतन्ययोर्भेदाभेदौ–

जीवे णं भंते ! जीवे जीवे ? गोयमा ! जीवे ताव नियमा

जीवे,जीवे वि नियमा जीवे । जीवे णं भंते ! नेरइए नेरइए जीवे ?। गोयमा ! नेरइए ताव नियमा जीवे, जीवे पुण सिय नेरइए, सिय अनेरइए । जीवे णं भंते ! असुरकुमारे असुरकुमारे जीवे ? । गोयमा ! असुरकुमारे ताव नियमा जीवे, जीवे पुण सिय असुरकुमारे, सिय णो असुरकुमारे । एवं दण्डओ नाणियव्वो० जाव वेमाणियाणं । जीवइ भंते ! जीवे जीवे जीवइ ? । गोयमा ! जीवइ ताव नियमा जीवे, जीवे पुण सिय जीवइ, सिय नो जीवइ । जीवइ भंते ! नेरइए नेरइए जीवइ ? । गोयमा ! नेरइए ताव नियमा जीवइ, जीवइ पुण सिय नेरइए, सिय अनेरइए, एवं दंडओ नेयव्वो० जाव वेमाणियाणं ।

इह एकेन जीवशब्देन जीवो गृह्यते, द्वितीयेन च चैतन्यमित्यतः प्रश्नः । उत्तरं पुनर्जीवचैतन्ययोः परस्परेणाविनाभूतत्वाद् जीवः चैतन्यमेव, चैतन्यमपि जीव एवेत्येवमर्थमवगन्तव्यम् । नारकाऽऽदिषु पदेषु पुनर्जीवत्वमव्यभिचारि,जीवेषु च नारकादित्वं व्यभिचारीत्यत आह-"जीवे णं भंते ! नेरइए" इत्यादि । जीवाधिकारादेवाह-(जीवइ भंते ! जीवे जीवे जीवइ त्ति) जीवति प्राणान् धारयति यः स जीवः, इत यो जीवः स जीवतीति प्रश्नः । उत्तरं तु यो जीवति स तावन्नियमाज्जीवः, अजीवस्य आयुःकर्माभावेन जीवनाभावात् । जीवस्तु स्याज्जीवति, स्यान्न जीवति,सिद्धस्य जीवनाभावादिति । नारकादिस्तु नियमाज्जीवति, संसारिणः सर्वस्य प्राणधारणधर्मकत्वात्, जीवतीति पुनः स्यान्नारकादिः स्यादनारकादिरिति । भ० ६ श०१० उ० । "प्राणान् क्षयकरूपेण, धारयन् जीव उच्यते ।" इत्युक्ते प्राणिनि, वाच० । भातु० ध० । सूत्र० । द्वी० । जं० । नं० । जीवो जन्तुरसुमान् प्राणी सत्त्वो जूत इत्यादयो जीवपर्यायाः । विशे० । ध० । प्रज्ञा० । कर्म० । उत्त० । अनु० । आव० । बृ० ।

तथा च-

जम्हा आणमंति वा पाणमंति वा उस्ससंति वा नीससंति वा तम्हा पाणे त्ति वत्तव्वं सिया । जम्हा जूए जवइ भविस्सइ तम्हा जए त्ति वत्तव्वं सिया । जम्हा जीवे जीवइ जीवत्तं आउयं च कम्मं उवजीवइ, तम्हा जीवे त्ति वत्तव्वं सिया । जम्हा सत्ते सुहासुहेहिं कम्मेहिं, तम्हा सत्ते वि वत्तव्वं सिया ।

तत्र प्राण इति, एतत्तं प्रति वक्तव्यं स्यात्, यदोच्छ्वासाऽऽदिमत्त्वमाश्रित्य तस्य निर्देशः क्रियते, एवं भवनाऽऽदिधर्मविवक्षया भूताऽऽदिशब्दपञ्चकव्याख्यता तस्य कालभेदेन व्याख्येया, यदा तूच्छ्वासाऽऽदिधर्मैर्युगपदसौ विवक्ष्यते, तदा प्राणी जूतो जीवः सत्त्वो विज्ञो वेदयिता इति, एतत्तं प्रति वाक्यं स्यात् । अथवा-निगमनवाक्यमेवेदमतो न युगपत्पक्षत्रयाख्या कार्येति । "जम्हा जीवे" इत्यादि । यस्माज्जीव आत्माऽसौ, जीवति प्राणान् धारयति; तथा जीवत्वमुपयोगलक्षणम् आयुष्कं च कर्म उपजीवति अनुभवति, तस्माज्जीव इति वक्तव्यं स्यादिति । (जम्हा सत्ते सुहासुहेहिं कम्मेहिं ति) सक्त आसक्तः,शक्तो वा समर्थः सुन्दरासुन्दरासु चेष्टासु । अथवा-सक्तः संबद्धः शुभाशुभैः कर्मभिरिति । भ० २ श० १ उ० ।

सव्वेसिं पाणाणं सव्वेसिं भूयाणं सव्वेसिं जीवाणं सव्वेसिं सत्ताणं ।

सर्वेषां प्राणिनां द्वित्रिचतुरिन्द्रियाणां, तथा सर्वेषां भूतानां प्रत्येकसाधारणसूक्ष्मबादरपर्याप्तकापर्याप्तकरूपाणामिति । तथा सर्वेषां जीवानां गर्भव्युत्क्रान्तिकसंमूर्छनजौपपातिकपञ्चेन्द्रियाणाम् । तथा-सर्वेषां सत्त्वानां पृथिव्याद्येकेन्द्रियाणामिति । इह च प्राणाऽऽदिशब्दानां यद्यपि परमार्थतो भेदस्तथाऽपि उक्तन्यायेन भेदो द्रष्टव्यः । उक्तं च-"प्राणा द्वित्रिचतुःप्रोक्ताः, भूतास्तु तरवः स्मृताः । जीवाः पञ्चेन्द्रियाः प्रोक्ताः, शेषाः सत्त्वा उदीरिताः ॥ १ ॥" इति । यदि वा-शब्दव्युत्पत्तिद्वारेण समभिरूढनयमतेन भेदो द्रष्टव्यः। तथाहि-सततं प्राणधारणात्प्राणाः, कालत्रयभवनाद् भूताः, त्रिकालजीवनाद् जीवाः, सदाऽस्तित्वात् सत्त्वा इति। आचा० १ श्रु० १ अ०६ उ०। सर्वेषां प्राणिनां (दशविधाः प्राणा विद्यन्ते येषां ते प्राणिनस्तेषाम्) सामान्यतः संज्ञिपञ्चेन्द्रियाणाम् । तथा सर्वेषां भूतानां मुक्तिगमनयोग्येन भव्यत्वेन व्यवस्थितानां,तथा सर्वेषां जीवानां जिजीविषूणां च, तथा सर्वेषां सत्त्वानां तिर्यङ्नरामराणां संसारे क्लिश्यमानतया करुणाऽऽस्पदानाम् । एकार्थिकानि चैतानि प्राणाऽऽदीनि वचनानि । आचा० १ श्रु० ६ अ० ५ उ० । स्था० । आव० । प० । ज्ञा० । सूत्र० ।

सव्वे पाणा सव्वे भूया सव्वे जीया सव्वे सत्ता ।

सर्वे प्राणाः सर्व एव पृथिव्यप्तेजोवायुवनस्पतयः द्वित्रिचतुःपञ्चेन्द्रियाश्चेन्द्रियबलोच्छ्वासनिःश्वासाऽऽयुष्कलक्षणप्राणधारणात् प्राणाः । तथा-सर्वाणि भवन्ति भविष्यन्त्यभूवन्निति चतुर्दशभूतग्रामान्तर्वर्तीति । एवं सर्व एव जीवन्ति जीविष्यन्ति अजीविषुरिति जीवाः नारकतिर्यङ्नरामरलक्षणाश्चतुर्गतिकाः । तथा-सर्व एव स्वकृतसातासातोदयसुखदुःखभाजः सत्त्वाः, एकार्थाश्चैते शब्दाः । आचा० १ श्रु० ४ अ० १ उ० ।

तथा चैवंभूतनयमधिकृत्य-

एवं जीवं जीवो, संसारी पाणधारणाणुभवो ।
सिद्धो पुणरजीवो, जीवणपरिणामरहिओ त्ति ।।२२५६।

जीवति "पञ्चेन्द्रियाणि त्रिविधं बलं च, उच्छ्वासनिःश्वासमथान्यदायुः । प्राणा दशैते भगवद्भिरिष्टा-स्तेषां वियोगीकरणं च हिंसा ॥ १ ॥" इत्यादिवचनप्रसिद्धान् दशविधप्राणाद् धरतीति शब्दार्थवशाज्जीवन्नेव दशविधप्राणधारणं कुर्वन्नस्य नयस्य मतेन जीव उच्यते । स च सामर्थ्याद् दशविधप्राणधारणमनुभवतीति दशविधप्राणानुभवो नारकादिः संसार्येव भवति । सिद्धस्त्वेतन्नयमतेन जीवोऽसुमान् प्राणीत्यादिशब्दैर्न व्यपदिश्यते । जीवनाऽऽदिपरिणामरहित इतिकृत्वा शब्दार्थाभावात्, किं तर्हि सत्तायोगात्सत्त्वः,अतति तांस्तान् ज्ञानदर्शनसुखाऽऽदिपर्यायान् गच्छतीत्यात्मेत्यादिभिरेव शब्दैर्निर्दिश्यत इति ॥ ॥२२५६॥ विशे० । आ० म० ।

तथा च नयोपदेशे—

सिद्धो न तन्मते जीवः, प्रोक्तः सत्त्वाऽऽदिसंज्ञयपि ।
महाजाड्ये च तत्त्वार्थ-जाड्ये धात्वर्थबाधतः ॥ ४० ॥

(सिद्ध इति) तन्मते एवंभूतनयमते,सत्त्वाऽऽदिसंज्ञयपि सत्तायोगात् सत्त्वः, अतति स्वान् २ पर्यायानात्मेत्यादिसंज्ञाधार्यापि,

सिद्धो, महाभाष्ये विशेषाऽऽवश्यके, तत्त्वार्थभाष्ये च धात्वर्थबाधतो 'जीव' प्राणधारणे इति धात्वर्थानन्वयाद् जीवो न प्रोक्तः। तथा च विशेषाऽऽवश्यकवचनम्-" एवं जीवं जीवो, संसारी पाणधारणाणुभवो । सिद्धो पुणरज्जीवो, जीवणपरिणामरहिओ त्ति ॥ २५५६ ॥" ॥ ४० ॥

एतदेव तत्त्वार्थभाष्यवचनमनूद्य व्यवस्थापयति-

जीवोऽजीवश्च नो जीवो, नो अजीव इतीहिते ।
जीवः पञ्चस्वपि गति-ष्विष्टो ज्ञात्वेति पञ्चभिः ॥४५॥

(जीव इत्यादि) जीवोऽजीवो नो जीवो नो अजीवश्चेति चतुर्भिः पदैः कोऽर्थः प्रतिपाद्यः?, इतीहिते प्रश्नवाक्यविचारविषयीकृते, सिद्धान्तिना गतिमार्गणायां पञ्चस्वपि गतिषु नारकतिर्यङ्नरामरसिद्धगतिलक्षणासु, हि निश्चितं, पञ्चभिर्भावैरौदयिकक्षायिकक्षायोपशमिकौपशमिकपारिणामिकलक्षणैः, जीव इष्टः, व्युत्पत्तिनिमित्तं जीवनलक्षणौदयिकभावोपलक्षिताऽऽत्मस्वरूपपारिणामिकभावविशिष्टस्य जीवस्य भावपञ्चकाऽऽत्मनो जीवपदार्थत्वात्। न चाऽऽत्मत्वप्रवृत्तिनिमित्तोपादानेनैवातिप्रसङ्गे किं व्युत्पत्तिनिमित्तोपलक्षणग्रहणेनेति वाच्यम्, अंशवति तदुपलक्षकभावे तस्यागस्यान्याय्यत्वात्। अन्यथा मणकपाइवकर्णाऽऽदिपदतुल्यताप्रसङ्गादिति दिक् ॥ ४१ ॥

नञि सर्वनिषेधार्थे, पर्युदासे च संश्रिते ।
पुद्गलप्रभृति द्रव्य-मजीव इति संज्ञितम् ॥ ४२ ॥

नञ्जाति सर्वनिषेधार्थे जीवत्वावच्छिन्नान्योन्याभावबद्धर्थे नञि विवक्षिते, पर्युदासे सादृश्ये च तत्र संश्रिते तात्पर्यविषयीकृते, पुद्गलप्रभृति पुद्गलाऽऽदिकं द्रव्यम् अजीव इतिपदेन संज्ञितम; पर्युदासानाश्रयणे तु जीवस्य गुणपर्याययोरपि भेदतया श्रवणेनाजीवपदप्रयोगप्रसङ्ग इति भावः ॥ ४२ ॥

नो जीव इति नोशब्दे-ऽजीवः सर्वनिषेधके ।
देशप्रदेशौ जीवस्य, तस्मिन् देशनिषेधके ॥ ४३ ॥

(नो इति)नो जीव इति शब्दवाच्ये नोशब्दे सर्वनिषेधके विवक्षितेऽजीव एव; देशनिषेधके तु नोशब्दे आश्रीयमाणे देशनिषेधस्य देशान्यनुकानान्तरीयकत्वाज्जीवस्य देशप्रदेशावेव नोजीवशब्दव्यपदेश्यावभ्युपगन्तव्यौ ॥ ४३ ॥

जीवो वाऽजीवदेशो वा, प्रदेशो वाऽप्यजीवगः ॥
अनयैव दिशा ज्ञेयो, नोअजीवपदादपि ॥ ४४ ॥

(जीवो वेति) अनयैवोक्तयैव दिशा, नोअजीवपदादपि, नोशब्दस्य सर्वनिषेधकत्वे जीवो जीवपदार्थो वा वाच्यः, तस्य देशनिषेधकत्वे वाऽजीवदेशो वाऽजीवगः अजीवाऽऽश्रितः प्रदेशो वा "समानेनाः प्रतिषेधे" इत्यनुशासननौत्येऽपि संसर्गाभावोऽन्योन्याभावश्च नञोऽर्थः, नोशब्दस्य त्वभाव एकदेशो वा;तत्र चान्वयिताऽवच्छेदकावच्छिन्नप्रतियोगिताकत्वसंबंधेऽवयवाऽऽदिव्युत्पत्तिबललभ्यमिति सिद्धान्तपरिभाषेति निगर्वः ॥ ४४ ॥

उक्तं मतं कियतां नयानाम् ?, इत्याह-

नैगमो देशसंग्राह-, व्यवहारर्जुसूत्रकौ ॥
शब्दः समभिरूढश्चे-त्येवमेते प्रचक्षते ॥ ४५ ॥

(नैगम इति) नैगमो नैगमनयः,देशसंग्राही अवान्तरसंग्राही, सर्वसंग्रहस्य सन्मात्रार्थत्वात्तत्यागः । व्यवहारर्जुसूत्रकौ व्यवहारनय ऋजुसूत्रनयश्च, शब्दः,समभिरूढश्चेत्येते नया एवं प्रचक्षते ॥ ४५ ॥

भावमौदयिकं गृह्ण-न्नेवंभूतो भवस्थितम् ।
जीवं प्रवक्त्यजावं तु, सिद्धं वा पुद्गलाऽऽदिकम् ॥४६॥

(भावमिति) एवंभूतनयस्तु औदयिकं भावं व्युत्पत्तिनिमित्तमेव प्रवृत्तिनिमित्ततया गृह्णन् भवस्थितं संसारिणं जीवं प्रवक्ति-जीवशब्देन व्यपदिशति, अजीवम् अजीवपदार्थं तु सिद्धं वा, पुद्गलाऽऽदिं द्रव्यं वेच्छत्यसौ ॥ ४६ ॥

नो अजीवश्च नो जीवो, न जीवाजीवयोः पृथक् ।
देशप्रदेशौ नास्येष्टा-विति विस्तृतमाकरे ॥ ४७ ॥

(नो इति) नो जीवो नो अजीवश्चैतत्पदे जीवाजीवपदार्थवैलक्षण्यात् सतोः पृथग् न-पार्थक्यं नापद्यते, यतोऽस्य नयस्य देशप्रदेशा नेष्टाविति, नोशब्दः सर्वनिषेधार्थ एव घटते इत्येतदाकरेऽनुयोगद्वाराऽऽदौ विस्तृतम् ॥ ४७ ॥

इत्थं स्वसमयसिद्धामेवंभूतनयार्थप्रक्रियामुपपाद्य,तया दिगम्बरोक्तप्रक्रियां दूषयति—

सिद्धो निश्चयतो जीवः, इत्युक्तं यद्दिगम्बरैः ।
निराकृतं तदेतेन, यन्नयेऽन्त्येऽन्यथा प्रथा ॥ ४८ ॥

(सिद्ध इति) एतेन पूर्वोक्तेन सिद्धो निश्चयतो जीव इति यद्दिगम्बरैरुक्तम्-"निक्खेवे च दुपाणा, इंदियबलमाउ आणपाणो य । ववहारा सो जीवो, णिच्छयदो दुचेदणा जस्स॥१॥" इत्यादिना; तन्निराकृतम् । यद् यस्मादन्त्ये एवंभूतनये अन्यथा प्रथा 'आसन्नो जीवः' इत्येव प्रसिद्धिः; शुद्धनिश्चयश्च स एवेति कथं निश्चयतः सिद्धो जीव इति वक्तुं शक्यमिति ॥ ४८ ॥

नन्वेवंभूतः पर्यायार्थिकस्यैव शुद्धनिश्चयः, तेनास्मदुक्तानुपपत्तावपि द्रव्यार्थिकप्रभेदेन सर्वसंग्रहनयेन शुद्धनिश्चयेन तदुपपादयिष्याम इत्याकाङ्क्षायामाह--

आत्मत्वमेव जीवत्व-मित्ययं सर्वसंग्रहः ।
जीवत्वप्रतिजूः सिद्ध-साधारण्यं निरस्य न ॥ ४९ ॥

(आत्मत्वमिति) आत्मत्वमेव जीवत्वं जीवपदप्रवृत्तिनिमित्तं, पारिणामिकभावस्य कालत्रयानुगतत्वेन सत्यत्वात्,औदयिकभावस्य चौपाधिकत्वेन कालत्रयानुगतत्वेन च तुच्छत्वादित्ययं सर्वसंग्रहनयस्तु-सिद्धसाधारण्यं जीवस्यौपचारिकं निरस्य, जीवत्वसाधने न प्रतिजूः, सर्वत्र तुल्यजीवत्वादेवैको व्यवहारतो जीवोऽन्यश्च निश्चयत इति विभागकरणमसमीक्षताभिधानमेवापद्येत। सर्वसंग्रह एव हि कर्मोपाधिनिरपेक्षशुद्धद्रव्यार्थिकः, तेन च संसारिचैतन्यमपि निरुपरागं शुद्धमिति परिणंस्यत एव। तदुक्तं द्रव्यसंग्रहे-" मग्गणगुणठाणेहि अ, चउदस य हवंति तह असुद्धणया । विण्णेया संसारी, सव्वे सुद्धा उ सुद्धणया " ॥ १ ॥ इति । न च संसारिचैतन्यस्य संग्रहनयेन शक्त्या शुद्धचैतन्यं, निश्चयेऽपि व्यक्त्या शुद्धचैतन्यस्य सिद्ध एव निश्चयाच्च साधारण्यमिति शङ्कनीयम, संग्रहस्य शक्तिग्राहकत्वेन व्यक्तिग्राहकतया व्यवहार एव विश्रान्तेः, निश्चयतो द्विचैतन्याशाकी सिद्ध एव जीव इत्यस्य व्याघातात् ॥ ४९ ॥

नन्वेवं निश्चयतः सिद्धस्याऽजीवत्वे भवद्भिरिष्यमाणे भवतामेव ग्रन्थे संसारिसिद्धसाधारणजीवपदार्थाभिधानं कथम् ?, इत्याशङ्कायामाह-

यज्जीवत्वं क्वचिद् द्रव्य-भावप्राणान्वयात् स्मृतम् ।
विचित्रनैगमाऽऽकूतात्, तद् ज्ञेयं न तु निश्चयात् ॥५०॥

(यदिति) यद् जीवत्वं क्वचिद् ग्रन्थे द्रव्यप्राणानां, भावप्राणानां चान्वयादेव कारणात् स्मृतं, संसारिसिद्धसाधारण्यमिति विशेषः। तद् विचित्रो विविधाध्यवसायो यो नैगमस्तस्याऽऽकूतादभिप्रायाद् ज्ञेयम्, न तु निश्चयात् एवंभूतनयात्। तथा चैवंभूतनयेनैव सिद्धमजीवं वयं प्रतिजानीमहे, न तु नयान्तरानिमतेन जीवत्वेऽपि विप्रतिपद्यामहे, इति शुद्धाशुद्धेन नैगमनयेन साधारणजीवत्वाभ्युपगमेऽपि न क्षतिः। इयांस्तु विशेषः-प्रसिद्धनैगमौदयिकभावोपलक्षितमात्मत्वाऽऽश्रयं पारिणामिकभावमेव जीवपदप्रवृत्तिनिमित्तमभ्युपैति। तद्विशेषश्च कश्चिदुपचारोपजीवी द्रव्यभावप्राणान्यतरत्वेनानुगतमौदयिकक्षायिकभावद्वयमिति नेदं सिद्धान्तार्णवे नयविकल्पकल्लोलवैचित्र्यं तत्संक्षुब्धस्वसनिनां विक्षोभाऽऽवहम् ॥ ५० ॥

ननु 'जीव' प्राणधारणे इत्यत्र भावप्राणधारणमेव धात्वर्थे, विवक्षितत्वात्, निश्चयतः सिद्धस्य जीवत्वं समर्थयिष्यामः इत्याकाङ्क्षायामाह-

धात्वर्थे भावनिक्षेपात्, परोक्तं न च युक्तिमत् ।
प्रसिद्धार्थोपरोधेन, यन्नयान्तरमार्गणा ॥ ५१ ॥

(धात्वर्थ इति) धात्वर्थे जीवत्यर्थे, भावनिक्षेपाद् भावसङ्ग्रहात्, परोक्तं निश्चयतः सिद्ध एव जीव इति दिगम्बरोक्तं, न च नैव, युक्तिमत्, यद् यस्मात् प्रसिद्धोऽनादिधातुपाठाऽऽदिप्रतीयमानो योऽर्थः, तदनुरोधेन, नयान्तरस्य मार्गणा विचारणा भवति। तथा च यादृशधात्वर्थमुपलक्षणीकृतेतरनयार्थप्रतिसन्धानं तादृशधात्वर्थप्रकारकजिज्ञासयैवंभूतादिनिक्षेपस्य सांप्रदायिकत्वात् तत्र भावनिक्षेपाऽऽश्रयणं युक्तमित्यर्थः। अन्यथा तत्रापि निक्षेपान्तराश्रयणेऽनवस्थानात् प्रकृतमात्रार्थपर्यवसानाऽभावतो ज्ञानाऽऽद्यैक्ये शून्यतायां वा पर्यवसानात्। किञ्च-पतनादनुपपत्तितश्चैवंभूतस्य प्राक्तनैवंभूतनिक्षेपपूर्वमेवाभिधानं युक्तम्, अन्यथाऽप्राक्कालत्वप्रसङ्गात्। तस्माद् व्यवहाराऽऽश्रयाभिमतव्युत्पत्त्यनुरोधेनौदयिकभावग्राहकत्वमेवास्य सूरिनिरुक्तं युक्तमिति समर्थनीयम्। न चेन्द्रियरूपप्राणानां क्षायोपशमिकत्वात् कथमेवंभूतस्यौदयिकभावमात्रग्राहकत्वमित्याशङ्कनीयम्, प्राधान्येनायुष्कर्मोदयलक्षणस्यैव जीवनार्थस्य ग्रहणात्। उपहतेन्द्रियेऽप्यायुरुदयेनैव जीवननिश्चयादिति दिक् ॥ ५१ ॥

शङ्काशेषमुपन्यस्य परिहरति-

शैलेश्यन्त्यक्षणे धर्मो, यथा सिद्धस्तथाऽसुमान् ।
वाच्यं नेत्यपि यत्तत्र, फले चिन्तेह धातुगा ॥ ५२ ॥

(शैलेश्यन्त्यक्षण इति) शैलेश्या अयोगिगुणस्थानस्यान्त्यक्षणे चरमक्षणे, यथा निश्चयनो धर्मः, तद्व्यक्तिकालभावी तु व्यवहारत एव। तदुक्तं धर्मसंग्रहण्यां हरिभद्राऽऽचार्यैः- "सो उजयक्खयहेऊ, सेलेसीचरमसमयभावी जो। मंसो पुण णिच्छयओ, तस्सेह पसाहगा भणिओ ॥ १ ॥" त्ति। तथाऽसुमान् जीवोऽपि निश्चयतः सिद्ध एव भविष्यतीत्यपि न वाच्यम्, यतस्तत्र " सो उजयक्खण " इत्यादिगाथायां 'धारयति सिद्धगतायात्मानमिति धर्मः' इति फले फलरूपे धात्वर्थे चिन्ता। सा च-कुर्वद्रूपत्वेन कारणत्वं वदत एवंभूतनयस्य मते शैलेश्यन्त्यक्षण एव धर्मपदार्थसिद्धिसाक्षिणी; तदनन्तरं सिद्धसाधारणरूपसाफल्यव्यवधानात्। इह तु धातुगा-धात्वर्थावच्छिन्नस्वरूपविषयिणी चिन्ता। सा च तेन सहाऽऽख्यानं गवेषयेत्, स्वरूपं तु प्रसिद्धानुरोधेन संसारिण्येव पर्यवसाययेत्, न तु सिद्ध इति महान् विशेषः। स्यादेतत्, धर्मपदेऽपि धात्वर्थो धारणसामान्यमेव, तच्च यतो विशेषतात्पर्यवशात् सिद्धसाधारणरूपविशेषे पर्यवस्यति, तथा जीवपदार्थोऽपि विशेषे पर्यवस्यतीति सिद्ध एव इत्तपदो भविष्यतीति। मैवम्। 'जीव' प्राणधारणे इत्यत्र प्राणपदं समभिव्याहृते साधारणस्य भूरिप्रयोगवशादौदयिकप्राणधारणे एव पर्यवसानात्। अत एव गोपदस्य नानाऽर्थत्वेऽपि ततो भूरिप्रयोगवशात्सास्नाऽऽदिमत एवोपस्थितेः, अश्वाऽऽदेस्तु पदान्तरसमभिव्याहाराऽऽदिनेति तान्त्रिकाः। तदेवमेवंभूतनयाभिप्रायेण सिद्धो न जीव इति व्यवस्थापितम्। यदि पुनः प्रस्थकन्यायाद् विशुद्धतरनैगमभेदमाश्रित्य प्रागुक्तस्वग्रन्थगाथा व्याचक्षाय परैः, तदा न किञ्चिदस्माकं दुष्यतीति किमधीरधिरटनरटनेन॥ "ऐन्द्री नतिः प्रणयिपुरुषमिवाङ्कुशाग्रैः-र्यः स्पादपद्मकिरणैः कलयत्युदीतम्। स्नात्राम्भसा दलितयादवदुष्टकृष्टं, शङ्खेश्वरप्रभुमिमं शरणीकरोमि " ॥ ५२ ॥ नया०। स च द्विविधः संसारी, सिद्धश्च। जी० ३ प्रति०। विशे०। सूत्र०। संसारिणो दशविधप्राणधारणाज्जीवाः, सिद्धाश्च ज्ञानाऽऽदिभावप्राणधारणात्। स्या०। प्राणाश्च द्विधा-द्रव्यप्राणाः, भावप्राणाश्च। तत्र द्रव्यप्राणा इन्द्रियाऽऽदयो, भावप्राणा ज्ञानाऽऽदीनि। द्रव्यप्राणैरपि प्राणिनः संसारसमापन्ना नारकाऽऽदयः, केवलभावप्राणैः प्राणिनो व्यपगतसमस्तकर्मसङ्गाः सिद्धाः। प्रज्ञा० १ पद। जी०।

जीवानां द्वैविध्यम्—

दुविहा सव्वजीवा पण्णत्ता। तं जहा-सिद्धा चेव, असिद्धा चेव। दुविहा सव्वजीवा पण्णत्ता। तं जहा-सइंदिया चेव, अणिंदिया चेव। [स्था० २ ठा० ४ उ०] दुविहा सव्वजीवा पण्णत्ता। तं जहा-सकाइया चेव, अकाइया चेव। दुविहा सव्वजीवा पण्णत्ता। तं जहा-सजोगा चेव, अजोगा चेव। दुविहा सव्वजीवा पण्णत्ता। तं जहा-सवेदगा चेव, अवेदगा चेव। [जी० १ प्रति०] दुविहा सव्वजीवा पण्णत्ता। तं जहा-सकसाया चेव, अकसाया चेव। [स्था० २ ठा० ४ उ०] दुविहा सव्वजीवा पण्णत्ता। तं जहा-सलेसा य, अलेसा य। (जी०) दुविहा सव्वजीवा पण्णत्ता। तं जहा-णाणी चेव, अणाणी चेव। [जी०] दुविहा सव्वजीवा पण्णत्ता। तं जहा-सागारोवउत्ता चेव, अणागारोवउत्ता चेव। [जी०] दुविहा सव्वजीवा पण्णत्ता। तं जहा-आहारगा चेव, अणाहारगा चेव। जी० १ प्रति०।

"दुविहा" इत्यादि कण्ठ्यम्। (स्था०) "सइंदिया" इत्यादि। सेन्द्रि-

वाः संसारिणः,अनिन्द्रियाः सिद्धाः। (जी०१ प्रति०) सेन्द्रियाः संसारिणः, अनिन्द्रिया अपर्याप्तककेवलसिद्धाः। (स्था०) " सकाइया चेव " इत्यादि। सकायाः पृथिव्यादिषड्विधकायविशिष्टाः संसारिणः, अकायाः तद्विलक्षणाः सिद्धाः। (स्था०) "सजोगा चेव" इत्यादि। सयोगाः संसारिणः; अयोगा अयोगिनः, सिद्धाश्च। (स्था०) "सवेदगा चेव" इत्यादि। सवेदाः संसारिणः, अवेदा अनिवृत्तबादरसंपरायविशेषाऽऽदयः षट् सिद्धाश्च। (स्था०) "सकसाया चेव" इत्यादि। सकषायाः सूक्ष्मसंपरायान्ताः, अकषाया उपशान्तमोहाऽऽदयः चत्वारः सिद्धाश्च। (स्था०) " सलेसा य " इत्यादि। सलेश्याः सयोग्यन्ताः संसारिणः, अलेश्या अयोगिनः सिद्धाश्च। (स्था०) " नाणी चेव " इत्यादि। ज्ञानिनः सम्यग्दृष्टयः,अज्ञानिनो मिथ्यादृष्टयः। (स्था०) " सागारोवउत्ता चेव " इत्यादि। सहाऽऽकारेण विशेषांशग्रहणशक्तिलक्षणेन वर्तते य उपयोगः स साकारो, ज्ञानोपयोग इत्यर्थः। तेनोपयुक्ताः साकारोपयुक्ताः। अनाकारस्तु तद्विलक्षणो, दर्शनोपयोग इत्यर्थः। अभिधीयते च-"जं सामन्नग्गहणं, नावाणं नेय कट्टु आगारं। अविसेसिऊण अत्थे, दंसणमिति बुच्चए समए" ॥१॥ इति। तेनोपयुक्ता अनाकारोपयुक्ता इति। (स्था०)। ("आहारगा चेव" इत्याविसूत्रस्य व्याख्या 'आहार' शब्दे द्वितीयभागे ५१० पृष्ठे गता)

दुविहा सव्वजीवा पण्णत्ता। तं जहा-जासगा य, अजासगा य। [जी०] दुविहा सव्वजीवा पण्णत्ता। तं जहा-चरिमा चेव, अचरिमा चेव। [जी०] दुविहा सव्वजीवा पण्णत्ता। तं जहा-ससरीरी य, असरीरी य। [जी० १ प्रति०]

" जासगा य " इत्यादि। भाषकाः भाषापर्याप्तिपर्याप्तकाः, तद्विपर्ययादभाषकाः-अपर्याप्तिसिद्धाः, एकेन्द्रियाश्च। (स्था०) (" चरिमा चेव " इत्यादिसूत्रस्य विस्तरः 'चरम' शब्दे तृतीयभागे ११३८ पृष्ठे उक्तः) " ससरीरी य " इत्यादि। सशरीरिणः संसारिणः, अशरीरिणस्तु शरीरमेषामस्तीति शरीरिणः, तद्विपर्ययादशरीरिणः सिद्धाः। स्था० २ ठा० ४ उ०।

संग्रहणीगाथा चेयम्-

"सिद्धसइंदियकाए, जोगे वेए कसायलेसा य।
णाणुवओगाहारे, भासगचरिमे य ससरीरी "॥ १ ॥
स्था० २ ठा० ४ उ० ॥

साम्प्रति संसारसमापन्नजीवाभिगममभिधित्सुस्तत्प्रश्नसूत्रमाह-

संसारसमावण्णएसु णं जीवेसु इमाओ णव पडिवत्तीओ एवमाहिज्जंति। तं जहा-एगे एवमाहंसु-दुविहा संसारसमावण्णगा जीवा पण्णत्ता। एगे एवमाहंसु-तिविहा संसारसमावण्णगा जीवा पण्णत्ता। एगे एवमाहंसु-चउव्विहा संसारसमावण्णगा जीवा पण्णत्ता। एगे एवमाहंसु-पंचविहा संसारसमावण्णगा जीवा पण्णत्ता। ते एएणं अभिलावेणं० जाव दसविहा संसारसमावण्णगा जीवा पण्णत्ता।

संसारसमापन्नेषु. णमिति वाक्यालङ्कारे। जीवेषु,इमा वक्ष्यमाणलक्षणा नव प्रतिपत्तयो, द्विप्रत्यवतारमादौ कृत्वा दशप्रत्यवतारं यावद् ये नव प्रत्यवतारास्तद्रूपाणि प्रतिपादनानि, संक्षेपत इति यावत्। एवं वक्ष्यमाणया रीत्या आख्यायन्ते पूर्वसूरिभिः। इह प्रतिपत्त्याख्यानेन प्रणालिकयाऽर्थाख्यानं द्रष्टव्यं, प्रतिपत्तिभावेऽपि शब्दादर्थे प्रवृत्तिकरणात्। तेन यदुच्यते शब्दाद्वैतवादिभिः-शब्दमात्रं विश्वमिति। तदपास्तं द्रष्टव्यम्। तदपासने चेयमुपपत्तिः-एकान्तैकस्वरूपे वस्तुन्यभिधानद्वयासंभवात्, भिन्नप्रवृत्तिनिमित्ताभावात्, ततश्च शब्दमात्रमिश्येव स्यात्, न विश्वमिति प्रणालिकयाऽर्थाभिधानमेवोपदर्शयति। तद्यथा-एके आचार्या एवमाख्यातवन्तः-द्विविधाः संसारसमापन्ना जीवाः प्रज्ञप्ताः। एके एवमाख्यातवन्तः-त्रिविधाः संसारसमापन्ना जीवाः प्रज्ञप्ताः। एवं यावद् दशविधा इति। इह एके इति न पृथग् मतावलम्बिनो दर्शनान्तरीया इव केचिदन्ये आचार्याः, किं तु य एव पूर्वं द्विप्रत्यवतारविवक्षायां वर्तमाना एवमुक्तवन्तः। यथा-द्विविधाः संसारसमापन्ना जीवा इति, एवं त्रिप्रत्यवतारविवक्षायां वर्तमानाः। द्विप्रत्यवतारविवक्षामपेक्ष्य त्रिप्रत्यवतारविवक्षाया अन्यत्वात्, विवक्षा विवक्षावतां च कथञ्चिद्भेदादन्ये इति वेदितव्याः। अत एव प्रतिपत्तय इति परमार्थतोऽनुयोगद्वाराणीति प्रतिपत्तव्यम्। इह य एव द्विविधास्त एव त्रिविधास्त एव चतुर्विधा इति; तेषामनेकस्वभावतायां तत्तद्धर्मनयेन तथातथाऽभिधानता युज्यते, नान्यथा; एकान्तैकस्वभावतायां तेषां वैचित्र्यायोगतस्तथातथाऽभिधानप्रवृत्तेरसंभवात्। एवं सति अष्टावकल्पम् दैवं, तिर्यग्योनिं च पञ्चधा भवति, मानुष्यं चैकविधं, समासतो भौतिकः सर्ग इति वाङ्मात्रमेव, अधिष्ठातृजीवानामेकरूपत्वाभ्युपगमनेन तथारूपवैचित्र्यासंभवादिति। एवमन्येऽपि प्रवादास्तथा वस्तुवैचित्र्यप्रतिपादनपरा निरस्ता द्रष्टव्याः, सर्वथैकस्वभावत्वाऽभ्युपगतौ वैचित्र्यायोगात्।

संग्रहैता एव प्रतिपत्तीः क्रमेण व्याचिख्यासुः प्रथमतो मायां प्रतिपत्तिं विज्ञापयिषुरिदमाह-

तत्थ जे ते एवमाहंसु-दुविहा संसारसमावण्णगा जीवा पण्णत्ता। तं जहा-तसा चेव, थावरा चेव ॥

(तत्थ जे ते इत्यादि) तत्र तासु नवसु प्रतिपत्तिषु मध्ये ये तद्विप्रत्यवतारविवक्षायां वर्तमाना एवमाख्यातवन्तः-द्विविधाः संसारसमापन्नका जीवाः प्रज्ञप्ता इति। ते, णमिति वाक्यालङ्कारे। एवं वक्ष्यमाणरीत्या द्विविधत्वभावनाऽर्थमाख्यातवन्तः। तद्यथेत्युपन्यस्तद्वैविध्योपदर्शनार्थमाह—त्रसाश्चैव, तत्र त्रसन्ति उष्णाद्यभितप्ताः सन्तो विवक्षितस्थानादुद्विजन्ते गच्छन्ति च छायाऽऽसेवनाऽर्थं स्थानान्तरमिति त्रसाः। अनया च व्युत्पत्त्या त्रसाख्यनामकर्मोदयवर्तिन एव परिगृह्यन्ते, न शेषाः। अथ च-शैवैरप्याह प्रयोजनं, तेषामग्रे वक्ष्यमाणत्वात्। तत एवं व्युत्पत्तिः-त्रसन्ति अभिसन्धिपूर्वकमनभिसन्धिपूर्वकं वा ऊर्ध्वमधस्तिर्यक्षु चलन्तीति त्रसाः। तैजसा वायवो द्वीन्द्रियादयश्च। उष्णाऽऽद्यभितापेऽपि तत्स्थानपरिहारासमर्थाः सन्तस्तिष्ठन्तीति एवंशीलाः स्थावराः पृथिव्यादयः। चशब्दौ स्वगतानेकभेदसमुच्चयार्थौ। एवकारावधारणार्थौ। एते एव संसारसमापन्नका जीवाः, एतद्व्यतिरेकेण संसारिणामभावात्। जी० १ प्रति०। स्था०।

जीवानां त्रैविध्यम्-

तिविहा सव्वजीवा पण्णत्ता। तं जहा-तसा य, थावरा य,

णो तसा णो थावरा। [जी० ३ प्रति०] तिविहा सव्वजीवा पण्णत्ता । तं जहा–परित्ता, अपरित्ता, नो परित्ता नो अपरित्ता। [जी० ३ प्रति०] तिविहा संसारसमावण्णगा जीवा पण्णत्ता। तं जहा–इत्थी, पुरिसा, णपुंसगा । तिविहा सव्वजीवा पण्णत्ता । तं जहा–सम्मद्दिट्ठी, मिच्छद्दिट्ठी, सम्मामिच्छद्दिट्ठी। तिविहा सव्वजीवा पण्णत्ता । तं जहा–पज्जत्तगा, अपज्जत्तगा, नो पज्जत्तगा नो अपज्जत्तगा । [स्था० ३ ठा० ३ उ०] तिविहा सव्वजीवा पण्णत्ता । तं जहा–सुहुमा, बायरा, नो सुहुमा नो बायरा । [जी० ३ प्रति०] तिविहा सव्वजीवा पण्णत्ता । तं जहा–सण्णी असण्णी, णो सण्णी णो असण्णी । [जी०] तिविहा सव्वजीवा पण्णत्ता । तं जहा–भवसिद्धिआ, अभवसिद्धिआ,नो भवसिद्धिआ नो अभवसिद्धिआ ॥ जी० ३ प्रति० ।

उक्तानुक्तसंग्रहार्थं गाथाऽर्द्धम-

"सम्मद्दिट्ठि-परित्ता-पज्जत्तग-सुहुम-सन्नि-भविका य ।"

स्था० ३ ठा० ३ उ० ।

"परित्ता" इत्यादि । परीत्ताः प्रत्येकशरीराः, अपरीत्ताः साधारणशरीराः। परीत्तशब्दस्य छन्दोऽर्थं व्यत्यय इति । (स्था० ३ ठा० २ उ०) "पज्जत्ता" इत्यादि । (नो पज्जत्त त्ति) नो पर्याप्तकाः, नो अपर्याप्तकाः सिद्धाः। (स्था० ३ ठा० २ उ०) "सण्णी" इत्यादि । संज्ञिनः समनस्काः, असंज्ञिनोऽमनस्काः, उभयप्रतिषेधवर्तिनः सिद्धाः । (जी० ३ प्रति०) " भवसिद्धिया " इत्यादि । सर्वत्र तृतीयपदे सिद्धा वाच्याः । स्था० ३ ठा० २ उ० ।

जीवानां चातुर्विध्यम-

चउव्विहा संसारसमावण्णगा जीवा पण्णत्ता । तं जहा–णेरइया, तिरिक्खजोणिया, मणुस्सा, देवा । चउव्विहा सव्वजीवा पण्णत्ता । तं जहा–मणजोगी, वयजोगी, कायजोगी, अजोगी । अहवा–चउव्विहा सव्वजीवा पण्णत्ता । तं जहा–इत्थिवेयगा, पुरिसवेयगा, णपुंसगवेयगा, अवेयगा । अहवा–चउव्विहा सव्वजीवा पण्णत्ता । तं जहा–चक्खुदंसणी, अचक्खुदंसणी, ओहिदंसणी, केवलदंसणी । अहवा–चउव्विहा सव्वजीवा पण्णत्ता । तं जहा–संजया १, असंजया २, संजयासंजया ३, णो संजयासंजया ४॥

व्यक्तानि चैतानि, नवरं मनोयोगिनः समनस्काः, योगत्रयसद्भावेऽपि तस्य प्राधान्यात्। एवं वाग्योगिनो द्वीन्द्रियाऽऽदयः,काययोगिन एकेन्द्रियाः,अयोगिनो निरुद्धयोगाः सिद्धाश्चेति। अवेदकाः सिद्धादयश्चक्षुषः सामान्यार्थग्रहणमवग्रहेहारूपं दर्शनं चक्षुर्दर्शनं तद्वन्तश्चतुरिन्द्रियादयः,अचक्षुःस्पर्शनादेतद्दर्शनवन्त एकेन्द्रियादय इति। संयताः सर्वविरताः, असंयता अविरताः, संयतासंयता देशविरत्याख्याः, तत्प्रतिषेधवन्तः सिद्धा इति । स्था० ४ ठा० ४ उ० ।

जीवानां पञ्चविधत्वम-

पंचविहा संसारसमावण्णगा जीवा पण्णत्ता । तं जहा–एगिंदिया० जाव पंचेंदिया । [स्था० ५ ठा० ३ उ०] पंचविहा सव्वजीवा पण्णत्ता । तं जहा–नेरइया, तिरिक्खजोणिया, मणुस्सा, देवा, सिद्धा । पंचविहा सव्वजीवा पण्णत्ता । तं जहा–कोहकसाई, माणकसाई, मायाकसाई,लोभकसाई, अकसाई । जी० ३ प्रति० ॥

" पंचविहेत्यादि । " संसारसमापन्ना भववर्तिनः, सर्वजीवाः संसारिसिद्धाः, अकषायेण उपशान्तमोहाऽऽदयः । स्था० ५ ठा० ३ उ० ।

संसारिणो य मुत्ता, संसारी छव्विहा समासेण ।
पुढवीकाइयमादी, तसकायंता पुढो भेया ॥ ६४ ॥

चशब्दस्य व्यवहित उपन्यासः । संसारिणो, मुक्ताश्चेति । तत्र संसारिणः षड्विधाः षट्प्रकाराः, समासेन जातिसंक्षेपणेति भावः। षड्विधत्वमेवाऽऽह-पृथिवीकायिकाऽऽदयस्त्रसकायान्ताः। यथोक्तम्-"पुढवीकाइया, आउकाइया, तेउकाइया, वाउकाइया, वणस्सइकाइया, तसकाइया ।" पृथग्भेदाः प्रति स्वातन्त्र्येण पृथग्भिन्नस्वरूपाः, न तु परमपुरुषविकारा इति ॥ ६४ ॥ आ० ।

जीवानां षड्विधत्वम्-

छव्विहा संसारसमावण्णगा जीवा पण्णत्ता । तं जहा–पुढवीकाइया० जाव तसकाइया। छव्विहा सव्वजीवा पण्णत्ता । तं जहा–आभिणिबोहियणाणी,० जाव केवलणाणी, अन्नाणी । अहवा–छव्विहा सव्वजीवा पण्णत्ता । तं जहा–एगिंदिया० जाव पंचिंदिया, अणिंदिया । अहवा–छव्विहा सव्वजीवा पण्णत्ता । तं जहा–ओरालियसरीरी, वेउव्वियसरीरी, आहारगसरीरी, तेयगसरीरी, कम्मगसरीरी, असरीरी ॥

संसारसमापन्नकजीवसूत्रे-पृथिवीकायिकाऽऽदयो जीवनयोक्ताः, पूर्वसूत्रे तु निकायत्वेनेति विशेषाद् न पुनरुक्तमिति । ज्ञानिसूत्रे-अज्ञानिनस्त्रिविधाः-मिथ्यात्वाद्यहेतुकाः। इन्द्रियसूत्रे-अनिन्द्रियाः,अपर्याप्ताः, केवलिनः, सिद्धाश्चेति। शरीरसूत्रे-यद्यप्यन्तरगतौ कार्मणशरीरसंभवः, तद्व्यतिरिक्तस्य तैजसशरीरिणोऽसम्भवः, तथाऽप्येकतराविवक्षया भेदो व्याख्यातव्यः,तथा अशरीरी सिद्ध इति । स्था० ६ ठा० ।

जीवानां सप्तविधत्वम्-

सत्तविहा संसारसमावण्णगा जीवा पण्णत्ता । तं जहा–नेरइया, तिरिक्खजोणिया, तिरिक्खजोणिणीओ, मणुस्सा, मणुस्सीओ, देवा, देवीओ । सत्तविहा सव्वजीवा पण्णत्ता । तं जहा–पुढवीकाइया, आउकाइया, तेउकाइया, वाउकाइया, वणस्सइकाइया, तसकाइया, अकाइया । [जी०] सत्तविहा सव्वजीवा पण्णत्ता । तं जहा–कण्हलेसा, नीललेसा, काउलेसा, तेउलेसा, पम्हलेसा, सुक्कलेसा, अलेसा । जी० ।

सूत्रद्वयं कण्ठ्यं, नवरं सर्वे च ते जीवाश्चेति सर्वजीवाः, संसारिमुक्ता इत्यर्थः। तथा (अकाइय त्ति) सिद्धाः, षड्विधकायाव्यपदेश्यत्वादिति। अलेश्याः-सिद्धा अयोगिनो वेति । [जी०]

अट्ठविहा संसारसमावण्णगा जीवा पण्णत्ता । तं जहा-पढमसमयनेरइया, अपढमसमयनेरइया, पढमसमयतिरिक्खजोणिया, अपढमसमयतिरिक्खजोणिया, पढमसमयमणुस्सा, अपढमसमयमणुस्सा, पढमसमयदेवा, अपढमसमयदेवा । जी० ८ प्रति० । स्था० ।

तत्र प्रथमसमयनारकाः नारकायुःप्रथमसमयसंवेदिनो अप्रथमसमयनारका नारकायुष्यादिसमयवर्तिनः, एवं तिर्यग्योनिकादयोऽपि भावनीयाः । जी० ८ प्रति० ।

अट्ठविहा सव्वजीवा पण्णत्ता । तं जहा-नेरइया, तिरिक्खजोणिया, तिरिक्खजोणिणीओ, मणुस्सा, मणुस्सीओ य, देवा, देवीओ य, सिद्धा । अहवा-अट्ठविहा सव्वजीवा पण्णत्ता । तं जहा-आभिणिबोहियणाणी० जाव केवलणाणी, मइअण्णाणी, सुयअण्णाणी, विभंगनाणी । स्था० ८ ठा० ॥

नवविधत्वमाह-

नवविहा सव्वजीवा पण्णत्ता । तं जहा-पुढवीकाइया, आउकाइया, तेउकाइया, वाउकाइया, वणस्सइकाइया, बेइंदिया, तेइंदिया, चउरिंदिया, पंचिंदिया । जी० ९ प्रति० ॥

जीवाणं नवहिं ठाणेहिं संसारे वत्तिंसु वा, वत्तंति वा, वत्तिस्संति वा । तं जहा-पुढवीकाइयत्ताए० जाव पंचिंदियकाइयत्ताए ॥

संसरणं निर्वर्तितवन्त अनुभूतवन्तः, एवमन्यदपि । स्था० ९ ठा० ।

नवविहा सव्वजीवा पण्णत्ता । तं जहा-एगिंदिया, बेइंदिया, तेइंदिया, चउरिंदिया, णेरतिया, पंचिंदियतिरिक्खजोणिया, मणुसा, देवा, सिद्धा । जी० ९ प्रति० ।

नवविहा सव्वजीवा पण्णत्ता । तं जहा-पढमसमयणेरतिया, अपढमसमयणेरतिया, पढमसमयतिरिक्खजोणिया, अपढमसमयतिरिक्खजोणिया, पढमसमयमणुस्सा, अपढमसमयमणुस्सा, पढमसमयदेवा, अपढमसमयदेवा, सिद्धा । जी० ९ प्रति० ।

दशविधत्वम्-

दसविहा संसारसमावण्णगा जीवा पण्णत्ता । तं जहा-पढमसमयएगिंदिया, अपढमसमयएगिंदिया, पढमसमयबेइंदिया, अपढमसमयबेइंदिया० जाव पढमसमयपंचिंदिया, अपढमसमयपंचिंदिया । जी० १० प्रति० ॥

तच्च सुगमं, नवरं प्रथमः समयो येषामेकेन्द्रियत्वस्य ते प्रथमसमयास्ते च ते एकेन्द्रियाश्चेति विग्रहः । विपरीतास्त्वितर एवं द्वित्रिचतुःपञ्चेन्द्रिया वाच्याः । स्था० १० ठा० ।

दसविहा सव्वजीवा पण्णत्ता । तं जहा-पुढवीकाइया, आउकाइया, तेउकाइया, वाउकाइया, वणप्फतिकाइया, बेइंदिया, तेइंदिया, चउरिंदिया, पंचिंदिया, अणिंदिया । जी० १० प्रति० ।

अनिन्द्रियाः सिद्धा अपर्याप्तका उपयोगतः केवलिनश्चेति । स्था० १० ठा० ।

दसविहा सव्वजीवा पण्णत्ता । तं जहा-पढमसमयणेरइया, अपढम-समयनेरइया, पढमसमयतिरिक्खजोणिया, अपढमसमयतिरिक्खजोणिया, पढमसमयमणुस्सा, अपढमसमयमणुस्सा, पढमसमयदेवा, अपढमसमयदेवा, पढमसमयसिद्धा, अपढमसमयसिद्धा । जी० १० प्रति० । स्था० ॥

जीवानां चतुर्दशविधत्वम्-

कइविहा णं भंते ! संसारसमावण्णगा जीवा पण्णत्ता ? गोयमा ! चउद्दसविहा संसारसमावण्णगा जीवा पण्णत्ता । तं जहा-सुहुमअपज्जत्तगा १, सुहुमपज्जत्तगा २, बादरअपज्जत्तगा ३, बादरपज्जत्तगा ४, बेइंदिया अपज्जत्तगा ५, बेइंदिया पज्जत्तगा ६, एवं तेइंदिया ७-८, एवं चउरिंदिया ९-१०, असण्णिपंचिंदिया अपज्जत्तगा ११, असण्णिपंचिंदिया पज्जत्तगा १२, सण्णिपंचिंदिया अपज्जत्तगा १३, सण्णिपंचिंदिया पज्जत्तगा १४ । भ० ३५ श० १ उ० ।

तत्राह-

चउद्दसविहा वि जीवा, विबंधगा तेसिमंतिमो भेओ ।
चोद्दसहा सव्वे वि हु, किमाइमंताऽपयनेया ॥ १ ॥

चतुर्दशविधा अपि चतुर्दशप्रकारा अपि, जीवाः प्रागुक्तस्वरूपा अपर्याप्तसूक्ष्मैकेन्द्रियाऽऽदयो, विबन्धका ज्ञेयाः, विशेषेण बन्धका विबन्धकाः, अष्टप्रकारस्य कर्मण इति शेषः । तेषां चतुर्दशविधानां जीवानाम्, अन्तिमो भेदः-पर्याप्तसंज्ञिपञ्चेन्द्रियाख्यः चतुर्दशधा चतुर्दशप्रकारो मिथ्यादृष्ट्यादिभेदादवसेयः, सर्वेऽपि चैतेऽनन्तरोक्ता अपर्याप्तसूक्ष्मैकेन्द्रियाऽऽदयो मिथ्यादृष्ट्यादयश्च, किमादिकैः पदैः सत्पदाऽऽदिकैश्च प्ररूप्यमाणा यथावज्ज्ञातव्याः ॥ १ ॥

तत्र " यथोद्देशं निर्देशः " इति न्यायात् प्रथमतः किमादिपदैः प्ररूपणां चिकीर्षुराह-

किं जीवा उवसमगा-इएहिं जावेहिं संजुयं दव्वं ।
कस्स सरूवस्स पहू, केणं ति न केणइ कयाओ ॥ २ ॥

किं जीवाः ?-किं नाम जीवा इत्यभिधीयते ?, एवं परेण प्रश्ने कृते सति सूरिरुत्तरमाह-उपशमाऽऽदिभिरुपशमौदयिकक्षायिकक्षायोपशमिकपारिणामिकैर्भावैः संयुतं संमिश्रं द्रव्यम् । आह-औदयिकाऽऽदीन् भावान् परित्यज्य किमिति हौपशमिकस्य भावस्य साक्षादुपादानम् ? । उच्यते-इह जीवस्य स्वरूपं पृष्टेन सता तदेव वक्तव्यं यदसाधारणं स्वरूपम्, एवं हि पदार्थान्तरस्वरूपेभ्यो वैवक्षितेन तत्प्रतिपादितं भवति, नान्यथा, औदयिकपारिणामिकौ च भावावजीवानामपि भवतः, अतस्तौ साक्षाच्छ्रोतारौ, क्षायिकोऽपि च भाव औपशमिकनामपूर्वकः, न खल्वौपशमिकभावमनासाद्य कश्चिदपि क्षायिकं भावमासादयति, क्षायोपशमिकोऽपि च भावो औपशमिकाऽनन्तरादेव, अतस्तमेव साक्षादुपादानम् ।

नेदं, तत इह साक्षादौपशमिकस्य भावस्योपादानमिति । ततः " कस्य प्रभवः स्वामिनो जीवाः ? " इति प्रश्ने कृते सति उत्तरम्-स्वरूपस्य आत्मीयस्य रूपस्य, निश्चयनयमतमेतत् । तथाहि-कर्मविनिर्मुक्तस्वरूपा आत्मानो न केषामपि प्रभवः, किं तु स्वरूपस्यैव, तथास्वाभाव्यात् । यस्तु स्वस्वामिभावः संसारे, स कर्मोपाधिजनितत्वादौपाधिकः, न पारमार्थिक इति । तथा केन कृता जीवा ? इति प्रश्ने कृते सति समाधिः-न केनचित्कृताः, किन्तु नभस्वदकृत्रिमा एव, यथा चाकृत्रिमता जीवानां, तथा धर्मसंग्रहणीटीकायां सप्रपञ्चमभिहितमिति नेह भूयोऽभिधीयते, अन्यगौरवभयात् ॥ ३ ॥

कत्थ सरीरे लोए, व होंति केवचिरं सव्वकालं तु ।
कइ जावजुआ जीवा, विगतिगचउपंचमासेहिं ॥ ३॥

कुत्र जीवा अवतिष्ठन्ते?, इति प्रश्ने कृते सति उत्तरमाचार्य आह-शरीरे, लोके वा, तत्र सामान्यचिन्तायां लोके,नाऽलोके, अलोके स्वभावत एव धर्माधर्मास्तिकायजीवपुद्गलानामसंभवात् । विशेषचिन्तायां शरीरे, नान्यत्र, शरीरपरमाणुभिरेव सह आत्मप्रदेशानां क्षीरनीरवदन्योन्यानुगमभावात् । उक्तञ्च-"अन्नोन्नमणुगयाइं,इमं च तं चत्ति विभयणमजुत्तं । जह खीरपाणियाइं," ति । तथा-(केवचिरं त्ति)कियच्चिरं कियत्कालं जीवा भवन्ति?,इति प्रश्ने कृते सति उत्तरम्-सर्वकालमेव,तुरेवकारार्थः। इह "केणं ति नं केणइ कया व (२)" इत्यनेन ग्रन्थेन पूर्वं जीवानामनादित्वमावेदितम, इदानीं त्वनिधनत्वम, ततश्चानादिनिधना जीवा इति द्रष्टव्यम । तथा च सति मुक्तत्वव्यवस्थामधिगता अपि जीवा न विनश्यन्ति,किन्तु ज्ञानाऽऽदिके स्वस्वरूपेऽवतिष्ठन्त इति श्रद्धेयम । तेन यत्कैश्चिदुच्यते-

" दीपो यथा निर्वृतिमभ्युपेतो,
नैवावनिं गच्छति नान्तरिक्षम् ।
दिशं न काञ्चिद्विदिशं न काञ्चित्,
स्नेहक्षयात्केवलमेति शान्तिम् ॥ १ ॥
जीवस्तथा निर्वृतिमभ्युपेतो,
नैवावनिं गच्छति नान्तरिक्षम् ।
दिशं न काञ्चिद्विदिशं न काञ्चित्,
क्लेशक्षयात्केवलमेति शान्तिम् ॥ २ ॥

तथा-

अहेन्मरणचित्तस्य, प्रतिसन्धिर्न विद्यते ।
प्रदीपस्येव निर्वाणं, विमोक्षस्तस्य चेप्सितः " ॥ ३ ॥ इति ।

तदपास्तमवसेयम । सतः सर्वथा विनाशायोगात्, तथादर्शनादिति कृतं प्रसङ्गेन, मा भूद् ग्रन्थगौरवमिति कृत्वा । तथा कतिभिरुपशमाऽऽदिभिर्भावैर्युताः संयुक्ता जीवाः ?, इति प्रश्ने कृते सति, उत्तरमाह-द्विकत्रिकचतुःपञ्चभिश्च । पं० सं० । (जीवस्थानेषु भावस्थितिः ' गुणट्ठाण ' शब्दे तृतीयभागे ९२३ पृष्ठे कर्मग्रन्थेन गतार्था)

तत्र ये जीवा यावत्सु शरीरेषु संभवन्ति, तान् तावत्सु प्रतिपादयन्नाह-

सुरनेरइया तिसु तिसु, वाउपणिंदीतिरिक्ख चउ चउसु ।
मणुया पंचसु सेसा, तिसु तणुसु अविग्गहा सिद्धा ॥५॥

सुरा नैरयिकाश्च प्रत्येकं तिसृषु तनुषु शरीरेषु वर्त्तन्ते । तद्यथा-तैजसे,कार्मणे, वैक्रिये च । तथा वायवो वातकायाः, तथा पञ्चेन्द्रियतिर्यञ्चः प्रत्येकं चतसृषु तनुषु संभवन्ति । तत्र त्रीणि शरीराणि पूर्वोक्तान्येव, चतुर्थं त्वौदारिकमवगन्तव्यम, वैक्रियं च वायुकायिकानां पञ्चेन्द्रियतिरश्चां वैक्रियलब्धिमतामवसेयम, सर्वेषामविशेषेण, तथा मनुजा मनुष्याः पञ्चस्वपि तनुषु संभवन्ति । तद्यथा, औदारिके वैक्रिये आहारके तैजसे कार्मणे च । तत्र वैक्रियं वैक्रियलब्धिमताम,आहारकं चतुर्दशपूर्ववेदिनाम,औदारिकतैजसकार्मणानि सुप्रतीतानि, शेषास्त्वेकद्वित्रिचतुरसंज्ञिपञ्चेन्द्रियतिर्यञ्चः प्रत्येकं तिसृषु तिसृषु औदारिकतैजसकार्मणरूपासु तनुषु वेदितव्याः, सिद्धा व्यपगतसकलकर्ममलकलङ्काः, पुनरविग्रहा विग्रहरहिताः, अशरीरा इत्यर्थः ॥ ४ ॥

तदेवं किमादिपदैः प्ररूपणा कृता । संप्रति सत्पदाऽऽदिपदैः प्ररूपणा कर्त्तव्या, सत्पदाऽऽदीनि च पदान्यमूनि-"संतपयपरूवणया, दव्वपमाणं च खित्तफुसणा य । कालो य अंतरं भा-गभाव अप्पाबहुं चेव ॥ " तत्र प्रथमतः सत्पदप्ररूपणां विदधाति-

पुढवाई चउ चउहा, साहारणवणं पि संतयं सययं ।
पत्तेयपज्जऽपज्जा, दुविहा सेसा उ उववन्ना ॥ ५ ॥

इह ये पृथिव्यादयश्चत्वारः पृथिव्यप्तेजोवायुरूपाः प्रत्येकं सूक्ष्मबादरपर्याप्ताऽपर्याप्तभेदाच्चतुर्धा चतुःप्रकाराः, सर्वभेदसंख्यया षोडशसंख्याः, ततो भूयः सर्वेऽपि प्रत्येकं द्विधा द्विप्रकाराः । तद्यथा-प्रागुत्पन्ना उत्पद्यमानाश्च, प्रागुत्पन्नोत्पद्यमानता च प्रज्ञापकापेक्षया वेदितव्या । ते सर्वेऽपि सततमनवरतम; (संतयं ति) यथायोगं सर्वत्र वचनलिङ्गपरिणामेन संबद्ध्यन्ते, सन्तो विद्यमानाः सर्वकालं सन्तः प्राप्यन्ते इत्यर्थः । तथा साधारणवनमपि साधारणवनस्पतयोऽपि पर्याप्तसूक्ष्मबादरभेदभिन्नाः प्रत्येकं द्विधा, प्रागुत्पन्ना उत्पद्यमानाश्च, सततं सन्तो विद्यमानाः सर्वेऽपि सर्वदैव सन्त इत्यर्थम । तथा-(पत्तेय इत्यादि) प्रत्येकबादरवनस्पतयः पर्याप्ताऽपर्याप्ताश्च । प्रत्येकं द्विधा-प्रागुत्पन्नाः, उत्पद्यमानाश्च । सततं सन्तः सर्वकालं सतः प्राप्यन्ते इति यावत् । शेषास्तु द्वित्रिचतुरिन्द्रियासंज्ञिपञ्चेन्द्रियाः प्रत्येकं पर्याप्ताऽपर्याप्ताश्च,संज्ञिपञ्चेन्द्रियाः पुनः पर्याप्ताः प्रागुत्पन्नाः सततं सन्तः,उत्पद्यमानकास्तु भाज्याः; तुशब्दस्यानेकार्थत्वात् संज्ञिनो लब्ध्यपर्याप्तकाः प्रागुत्पन्ना उत्पद्यमानाश्च भाज्याः । कथमेतदवसीयते ? इति चेत् । उच्यते-इह संज्ञिनां लब्ध्यपर्याप्तकानामवस्थानमन्तर्मुहूर्त्तमात्रं, तेषामायुरप्यन्तर्मुहूर्त्तमात्रत्वात् । अन्तरं चैतेषामुत्पत्तिमधिकृत्योत्कर्षतो द्वादशमुहूर्त्ताः, ततस्ते प्रागुत्पन्ना अपि सत्तायां भाज्याः । ननु द्वित्रिचतुरसंज्ञिपञ्चेन्द्रियाः अपि लब्ध्यपर्याप्तका अन्तर्मुहूर्त्तायुषः, अन्तरमपि च तेषामन्तर्मुहूर्त्तमात्रमन्यत्रोद्घुष्यते, ततः कथं तेऽपि प्रागुत्पन्ना भाज्या न भवन्ति ?। नैष दोषः । तेषामवस्थानस्य बृहत्तरान्तर्मुहूर्त्तप्रमाणत्वात् तदायुस्तावन्मात्रत्वात् । कथमिदमवसितमिति चेत् ?। उच्यते-ग्रन्थान्तरे नित्यराश्यधिकारे नित्यराशिभिः सह तेषां यौगपद्येनाभिधानात् ॥ ५ ॥

तदेवं चतुर्दशविधान् सत्पदप्ररूपणया प्ररूप्य साम्प्रतमेतेषामेवान्तिमो भेदश्चतुर्दशप्रकारः सत्पदप्ररूपणया प्ररूपयितव्यः; स च चतुर्दशधा गुणस्थानकभेदाद्भवति, ततो गुणस्थानकान्येव सत्पदप्ररूपणया प्ररूपयति-

मिच्छा अविरयदेसा, पमत्तअपमत्तया सजोगी य ।

सव्वद्धं इयरगुणा, नाणाजीवेसु वि न होंति ॥ ६ ॥

मिथ्यादृष्ट्यविरतदेशविरतप्रमत्ताप्रमत्तसयोगिकेवलिलक्षणानि गुणस्थानकानि सर्वाद्धं सर्वकालं विद्यन्ते, इतराणि शेषाणि (गुण त्ति) गुणस्थानकानि सास्वादनसम्यग्मिथ्यादृष्ट्यपूर्वकरणानिवृत्तिबादरसूक्ष्मसंपरायोपशान्तमोहक्षीणमोहायोगिकेवलिलक्षणान्यष्टसंख्याकानि नानाजीवेष्वपि, आस्तामेकस्मिन् जीवे इत्यपिशब्दार्थः । न सर्वकालं भवन्ति, न सर्वकालं विद्यमानानि प्राप्यन्ते इत्यर्थः, किन्तु कदाचिदेव । यदाऽपि च सास्वादनाऽऽदयः प्राप्यन्ते, तदाऽपि कदाचिदेककाः, कदाचिद् बहवः, बहुत्वं च प्रतिनियतं प्रत्येकमग्रे वक्ष्यति ॥ ६ ॥

एतेषां च सास्वादनाऽऽदीनामष्टसंख्याकानां यावन्तो भेदा एकद्विकाऽऽदिसंयोगतः सर्वसंख्यया भवन्ति, तावन्तः प्रतिपिपादयिषुः सामान्यतः करणगाथामाह-

इगदुगजोगाईणं, ठवियमहो एगछेगं इइ जुयलं ।
इति जोगा ज दुदुगुणा,गुणियविमिस्सा भवे भंगा ॥७॥

एकद्विकयोगाऽऽदीनाम् एककद्विकत्रिकसंयोगाऽऽदीनां प्रत्येकमधस्तादेकानेकरूपं युगलं द्विकमवस्थाप्यते, तत एककयोगादारभ्य (दुदुगुण त्ति) द्विगुणा द्वाभ्यां सहिता ये द्विद्विगुणाः । तथाहि-पाश्चात्या भङ्गा द्विगुणाः क्रियन्ते, ततो द्विकसहिता विधेयाः । ततः पुनरपि गुणितविमिश्रा ये भङ्गाः प्राचीना द्वाभ्यां गुणितास्तैः केवलैः सहिताः क्रियन्ते, तत इप्सितपदे इष्टसंख्याका भङ्गा भवन्ति । इयमत्र भावना-यावन्तः पदार्था विकल्पेन भवन्तो भेदसंख्यया ज्ञातुमिष्टास्तावन्तोऽसत्कल्पनया बिन्दवः स्थाप्यन्ते । इह च प्रकृता अष्टौ सास्वादनाऽऽदयः ततोऽष्टौ बिन्दवः स्थाप्यन्ते, तेषां चाधस्तात् प्रत्येकं द्विकः स्थाप्यः । स्थापना चेयम्- २ २ २ २ २ २ २ २ तत्रैकपदे द्वौ भङ्गौ । तद्यथा-एको बहवो वेति पदद्वये भङ्गा अष्टौ । तद्यथा-पाश्चात्यौ द्वौ भङ्गौ द्वाभ्यां गुणितौ जाताश्चत्वारः, ते द्वितीयबिन्दुस्थाने स्थाप्यन्ते; ततोऽधस्तनो द्विकः प्रक्षिप्यते, जाताः षट्, ततो "गुणियविमिस्सा" इति वचनात् यौ पाश्चात्यौ द्वौ भङ्गौ द्वाभ्यां गुणितौ तौ षट्सु मध्ये प्रक्षिप्येते,ततो जाता अष्टौ, एतावन्तः पदद्वये भङ्गाः । ननु पदद्वये भङ्गाश्चत्वार एव प्राप्यन्ते । तथाहि-किल एकः सास्वादन एको मिश्र इत्येको भङ्गः, एकः सास्वादनो बहवो मिश्रा इति द्वितीयः, बहवः सास्वादना एको मिश्र इति तृतीयः, बहवः सास्वादना बहवो मिश्रा इति चतुर्थः । अतः परमेकोऽपि भङ्गो न संभवति, तत्कथमुच्यते-पदद्वये भङ्गा अष्टौ भवन्तीति ? । तदयुक्तम् । अभिप्रायापरिज्ञानात् । इह हि यदि सास्वादनमिश्रौ सदैवावस्थितौ भवेताम्, अजना तु तयोरेकानेकत्वमात्रकृतैव केवला भवेत्, तदोक्तप्रकारेण द्वयोः पदयोर्भङ्गाश्चत्वार एव भवन्ति । यावता सास्वादनमिश्रौ स्वरूपेणापि विकल्पनीयौ । तथाहि-कदाचित् सास्वादनो भवति, कदाचिन्मिश्रः, कदाचिदुभौ । यत्र सास्वादनः केवलो जायमानः कदाचिदेकः कदाचिदनेक इति द्वौ भङ्गौ । एवं मिश्रेऽपि द्वाविति चत्वारः । उभौ च युगपज्जायमानौ भवदुक्तप्रकारेण चतुर्भङ्गिकतया जायते, ततः पदद्वये भङ्गा अष्टौ भवन्ति । एवमुत्तरत्रापि भङ्गार्थभावना भावनीया । सम्प्रति पदत्रयभङ्गा दर्श्यन्ते-तत्र पाश्चात्याः पदद्वये भङ्गा अष्टौ (द्वाभ्यां) गुण्यन्ते, जाताः षोडश । ते तृतीयबिन्दुस्थाने स्थाप्यन्ते, ततोऽधस्तनो द्विकः प्रक्षिप्यते, जाता अष्टादश । ततो भूयः पाश्चात्या अष्टौ प्रक्षिप्यन्ते, जाताः षड्विंशतिः। एतावन्तः पदत्रये भङ्गाः । ततः सैव षड्विंशतिर्द्वाभ्यां गुण्यते, जाता द्विपञ्चाशत् । सा चतुर्थबिन्दुस्थाने स्थाप्यते, ततोऽधस्तनो द्विकः प्रक्षिप्यते, ततो जाताश्चतुःपञ्चाशत् । ततः पुनरपि पाश्चात्या षड्विंशतिः प्रक्षिप्यते,जाता अशीतिः। एतावन्तः पदचतुष्टये भङ्गाः । ततः सा अशीतिर्द्वाभ्यां गुण्यते, जातं षष्ट्यधिकं शतम्,तत्पञ्चमबिन्दुस्थाने स्थाप्यते,ततोऽधस्तनो द्विकः प्रक्षिप्यते,जातं द्विषष्ट्यधिकं शतम्, ततः पुनरपि प्राक्तनी अशीतिः प्रक्षिप्यते, ततो जाते द्वे शते द्विचत्वारिंशे । एतावन्तः पदपञ्चके भङ्गाः । ततस्ते द्वे शते द्विचत्वारिंशे द्वाभ्यां गुण्येते; जातानि चत्वारि शतानि चतुरशीत्यधिकानि । तानि षष्ठबिन्दुस्थाने स्थाप्यन्ते, ततोऽधस्तनो द्विकः प्रक्षिप्यते, जातानि चत्वारि शतानि षडशीत्यधिकानि। ततो भूयः प्राक्तने द्वे शते द्विचत्वारिंशदधिके प्रक्षिप्येते,जातानि सप्तशतान्यष्टाविंशत्यधिकानि । एतावन्तः षट्सु पदेषु भङ्गाः । ततः सप्तशतान्यष्टाविंशत्यधिकानि द्वाभ्यां गुण्यन्ते, जातानि चतुर्दश शतानि षट्पञ्चाशदधिकानि । तानि सप्तमबिन्दुस्थाने स्थाप्यन्ते, ततोऽधस्तनो द्विकः प्रक्षिप्यते, जातानि चतुर्दशशतानि अष्टपञ्चाशदधिकानि। ततः पुनरपि प्राक्तनानि सप्तशतानि अष्टाविंशत्यधिकानि प्रक्षिप्यन्ते, ततो भवत्येकविंशतिशतानि षडशीत्यधिकानि । एतावन्तः सप्तपदभङ्गाः । अमूनि चैकविंशतिशतानि षडशीत्यधिकानि द्वाभ्यां गुण्यन्ते, जातानि त्रिचत्वारिंशच्छतानि द्विसप्तत्यधिकानि । तान्यष्टमबिन्दुस्थाने स्थाप्यन्ते, ततोऽधस्तनो द्विकः प्रक्षिप्यते, ततो जातानि त्रिचत्वारिंशच्छतानि चतुःसप्तत्यधिकानि । ततो भूयोऽपि प्राक्तनान्येकविंशतिशतानि षडशीत्यधिकानि प्रक्षिप्यन्ते, जातानि षष्ट्यधिकानि पञ्चषष्टिशतानि । एतावन्तोऽष्टपदभङ्गाः ॥ ७ ॥

संप्रत्येषामेव भङ्गकानां प्रकारान्तरेण प्ररूपणामाह-

अहवा एक्कपईया, दो भंगा इगिबहुत्तसन्ना जे ।
ते चिय पयवुड्ढीए, तिगुणा दुगसंजुया भंगा ॥ ८ ॥

अथवेति प्रकारान्तरोपदर्शने, एकपदिकौ एकपदभवौ द्वौ भङ्गौ भवतः, कौ तौ ?, इत्याह—यौ एकबहुत्वसंज्ञौ-कदाचिदनेक इत्येवंरूपौ, ततस्तावेव द्वौ भङ्गावादौ कृत्वा पदवृद्धौ द्विकाऽऽदिपदवृद्धौ प्राक्तनाः प्राक्तनास्त्रिगुणाः क्रियन्ते, ततो द्विकेन संयुक्ता विधेयाः, ततस्तत्तत्पदभङ्गा भवन्ति । इयमत्र भावना-तावेवैकपदिकौ भङ्गौ पदद्वये त्रिगुणीक्रियेते, ततो जाताः षट् । ते द्विकेन संयुज्यन्ते, ततो जायन्तेऽष्टौ । एतावन्तः पदद्वये भङ्गाः । ततस्तेऽष्टौ त्रिगुणाः क्रियन्ते, जाता चतुर्विंशतिः । सा द्विकेन संयुक्ता जाता षड्विंशतिः । एतावन्तः पदत्रये भङ्गाः । ततः साऽपि षड्विंशतिस्त्रिगुणीक्रियते, जाता अष्टसप्ततिः। ततो द्विकप्रक्षेपः, ततो नवत्यशीतिः एतावन्तः पदचतुष्टये भङ्गाः । एवं तावद् वाच्यं, यावत्सप्तपदभङ्गाः षडशीत्यधिकान्येकविंशतिशतानि । तानि भूयस्त्रिगुणीक्रियन्ते, ततो द्विकः प्रक्षिप्यते, जातानि षष्ट्यधिकानि पञ्चषष्टिशतानि । एतावन्तोऽष्टसु सास्वादनाऽऽदिपदेषु भङ्गाः ॥ ७ ॥ तदेवं कृता सत्पदप्ररूपणा ।

सम्प्रति द्रव्यप्रमाणमाह-

साहारणाण भेया, चउरो अणंताऽसंखया सेसा ।
मिच्छाऽणंता चउरो, पलियासंखं समेससंखेज्जा ॥८॥

साधारणानां साधारणवनस्पतिकायिकानां चत्वारो भेदाः, पर्याप्तापर्याप्तसूक्ष्मबादररूपाः, प्रत्येकमनन्ता अनन्तसंख्याः, अनन्तलोकाऽऽकाशप्रदेशप्रमाणत्वात्तेषाम् । तथा शेषाः पृथिव्यम्बुतेजोवायवः प्रत्येकं पर्याप्तापर्याप्तसूक्ष्मबादरभेदाच्चतुर्भेदाः, तथा पर्याप्तापर्याप्तभेदभिन्नाः प्रत्येकबादरवनस्पतिकायिकाः पर्याप्तापर्याप्तद्वित्रिचतुरसंज्ञिसंज्ञिनोऽसंख्याता असंख्यातसंख्याः । अथापर्याप्तासंज्ञिनः कथमसंख्याता गीयन्ते ?, न हि ते सदैव प्राप्यन्ते, किं तु कदाचिदेव, ततः कथमसंख्याता घटन्ते ?। नैष दोषः । यतो यद्यपि ते सदैव न लभ्यन्ते,तथापि यदा भवन्ति तदा जघन्येनैको द्वौ वा उत्कर्षतोऽसंख्येयाः। उक्तं च- " एगो व दो व तिन्नि व, संखमसंखा व एगसमएणं । " इति। तथा मिथ्यादृष्टयोऽनन्ताः-अनन्तलोकाऽऽकाशप्रमाणाः, तथा चत्वारः सास्वादनसम्यग्मिथ्यादृष्टयविरतसम्यग्दृष्टिदेशविरतरूपाः प्रत्येकं पल्योपमासंख्येयभागवर्तिप्रदेशराशिप्रमाणा इत्यर्थः । इह सास्वादनाः सम्यग्मिथ्यादृष्टयश्चाध्रुवत्वात्कदाचिल्लोके प्राप्यन्ते, कदाचिन्न; यदा प्राप्यन्ते तदा जघन्येनैको द्वौ वा, उत्कर्षतः क्षेत्रपल्योपमासंख्येयभागतुल्याः, अविरतसम्यग्दृष्टिदेशविरताः पुनः सदैव प्राप्यन्ते, ध्रुवत्वात्तेषां,केवलं कदाचित्स्तोकाः कदाचिद् बहवः,तत्र जघन्यपदेऽपि ते द्वयेऽपि प्रत्येकं क्षेत्रपल्योपमासंख्येयभागवर्त्तिप्रदेशराशितुल्याः,उत्कर्षतोऽप्येतावन्त एव,नवरमसंख्यातस्य तस्यासंख्यातभेदभिन्नत्वाज्जघन्याद्युत्कृष्टमसंख्यातमसंख्यातगुणं द्रष्टव्यम् । देशविरतेभ्योऽविरतसम्यग्दृष्टयो जघन्यपदे उत्कृष्टपदे च प्रभूततरा अवसेयाः; शेषाः प्रमत्ताऽऽदिगुणस्थानवर्त्तिनो जीवाः प्रत्येकं संख्येयाः प्रतिनियतसंख्याकाः, सा च प्रतिनियता संख्या स्वयमेव वक्ष्यते ॥ ७ ॥

तदेवमभिहितं सामान्यतो द्रव्यप्रमाणम्;
साम्प्रतमेतदेव विशेषतोऽभिधित्सुराह-

पत्तेयपज्जवणका-इया उ पयरं हरंति लोगस्स ।
अंगुलअसंखभागे-ण जाइयं भूदगतणू य ॥ ९ ॥

पर्याप्तप्रत्येकबादरवनस्पतिकायिका भूकायिका उदककायिकाश्च पर्याप्तबादराः प्रत्येकं लोकस्य घनीकृतस्य सप्तरज्जुप्रमाणस्य चपरितनाधस्तनप्रदेशरहितैकैकप्रदेशप्रस्तराऽऽत्मकं माणकाऽऽकारं प्रतरमङ्गुलमात्रक्षेत्रासंख्येयभागैर्भाजितं खण्डितं सकलमपि हरन्ति । इयमत्र भावना-सर्वेऽपि प्रत्येकबादरपर्याप्तवनस्पतिकायिका जन्तवः प्रतरमेककालमपहर्तुमुद्यता विवक्षिताः सन्तो यदि युगपदेकैकमङ्गुलासंख्येयभागमात्रं खण्डमपसार्यन्ति,तत एकेनैव समयेन ते सकलमपि प्रतरमपहरन्ति । तत इदमायातम-घनीकृतलोकस्यैकस्मिन् प्रतरे यावन्त्यङ्गुलासंख्येयभागमात्राणि खण्डानि भवन्ति तावत्प्रमाणाः पर्याप्तप्रत्येकबादरवनस्पतयः । एवं पर्याप्तबादरसूक्ष्मकायिकोदककायिकानामपि प्रत्येकं भावना कार्या । यद्यपि चामीषां त्रयाणामपीत्थं समानप्रमाणत्वमभिहितं,तथाऽप्यङ्गुलासंख्येयभागस्यासंख्यातभेदभिन्नत्वात्परस्परमिदमल्पबहुत्वमवसेयम्; स्तोकाः प्रत्येकबादरपर्याप्तवनस्पतयः, तेभ्यः पर्याप्तबादरसूक्ष्मकायिका असंख्येयगुणाः, तेभ्योऽपि बादरपर्याप्ताप्कायिका असंख्येयगुणाः ॥ ६ ॥

आवलिवग्गो ऊणा-वलिए गुणिओ हु बायरा तेऊ ।
वाऊ य लोगसंखं, सेसातिगमसंखिया लोगा ॥ १० ॥

आवलिका असंख्येयसमयाऽऽत्मिकाऽभ्यसत्कल्पनया दशसमयाऽऽत्मिका कल्प्यते,ततस्तस्या दशसमयाऽऽत्मिकाया आवलिकावर्गः, स च किल कल्पनया शतसमयप्रमाणः, तत आवलिकावर्ग ऊनावलिकया कतिपयसमयन्यूनया आवलिकया कतिपयसमयन्यूनैरावलिकासमयैरपहरन्तीत्यर्थः,गुण्यते । गुणने च कृते सति यावन्तो वर्गा भवन्ति, तेषु च वर्गेषु यावन्तः समयास्तावत्प्रमाणा बादरपर्याप्ततेजस्कायिकाः । तथा (वाऊ य लोगसंखं ति) वायवो बादरपर्याप्तवायवो लोकसंख्येयभागतुल्याः, घनीकृतस्य लोकस्यासंख्येयेषु प्रतरेषु संख्याततमभागवर्त्तिषु यावन्त आकाशप्रदेशास्तावत्प्रमाणा इत्यर्थः । अमीषां पृथिव्यम्बुतेजोवायुप्रत्येकवनस्पतीनां बादरपर्याप्तानां परस्परमल्पबहुत्वमिदम्-सर्वस्तोकाः पर्याप्तबादरतेजस्कायिकाः,तेभ्यः पर्याप्तप्रत्येकबादरवनस्पतिकायिका असंख्येयगुणाः, तेभ्योऽपि पर्याप्तबादरभूकायिका असंख्येयगुणाः,तेभ्योऽपि पर्याप्तबादराप्कायिका असंख्येयगुणाः, तेभ्योऽपि पर्याप्तबादरवायुकायिका असंख्येयगुणाः। (सेसातिगमसंखिया लोगा इति) शेषत्रिकं पृथिव्यम्बुतेजोवायुकायिकानामपर्याप्तबादरपर्याप्तापर्याप्तसूक्ष्मलक्षणमसंख्येया लोकाः, असंख्येयेषु लोकेषु यावन्त आकाशप्रदेशास्तावत्प्रमाणाः। किमुक्तं भवति ?, असंख्येयलोकाऽऽकाशप्रदेशप्रमाणाः पृथिव्यम्बुतेजोवायूनां प्रत्येकमपर्याप्ता बादराः, पर्याप्ता अपर्याप्ताश्च सूक्ष्मा भवन्तीति । इदं सामान्येनोक्तं, विशेषचिन्तायां पुनः पृथिव्यम्बुतेजोवायूनां स्वस्थाने प्रत्येकं त्रयाणामपि राशीनामिदमल्पबहुत्वम्-सर्वस्तोका अपर्याप्तबादराः, तेभ्योऽपर्याप्तसूक्ष्मा असंख्येयगुणाः, तेभ्योऽपि पर्याप्तसूक्ष्माः संख्येयगुणाः, शेषत्रिकग्रहणं चौपलक्षणं,तेनापर्याप्तबादरप्रत्येकवनस्पतयोऽसंख्येयलोकाकाशप्रमाणा अवगन्तव्याः । साधारणवनस्पतीनां च प्रागेव पर्याप्तापर्याप्तसूक्ष्मबादररूपाश्चत्वारोऽपि भेदाः सामान्यतोऽनन्तलोकाकाशप्रदेशप्रमाणा उक्ताः। यदि पुनस्तेषामपि विशेषचिन्ता क्रियते, तदेदमल्पबहुत्वमवसेयम्-बादरपर्याप्तसाधारणाः सर्वस्तोकाः,तेभ्यो बादरापर्याप्तसाधारणा असंख्येयगुणाः,तेभ्योऽपि सूक्ष्मपर्याप्तसाधारणा असंख्येयगुणाः,तेभ्योऽपि सूक्ष्मपर्याप्तसाधारणाः संख्येयगुणाः ॥१०॥

पज्जत्तापज्जत्ता, बितिचउअस्सण्णिणो अवहरंति ।
अंगुलसंखासंख-प्पएसजइयं पुढो पयरं ॥ ११ ॥

द्वित्रिचतुरसंज्ञिनो द्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियासंज्ञिपञ्चेन्द्रियाः पृथक्प्रत्येकं पर्याप्ता अपर्याप्ताश्च यथासंख्यमङ्गुलसंख्येयासंख्येयभागप्रदेशैर्भाजितं खण्डितं प्रतरमपहरन्ति । इयमत्र भावना-सर्वेऽपि पर्याप्ता द्वीन्द्रिया यदि युगपदेकैकमङ्गुलमात्रक्षेत्रासंख्येयभागमात्रं खण्डं प्रतरस्यापहरन्ति, तत एकेनैव समयेन ते सकलमपि प्रतरमपहरन्ति । इदमुक्तं भवति घनीकृतस्य लोकस्य सप्तरज्जुप्रमाणस्यैकस्मिन् प्रतरे यावन्त्यङ्गुलासंख्येयभागमात्राणि खण्डानि तावन्तः पर्याप्ता द्वीन्द्रियाः । एवं पर्याप्तत्रीन्द्रियचतुरिन्द्रियासंज्ञिपञ्चेन्द्रिया अपि प्रत्येकमवगन्तव्याः। यावन्ति पुनरेकस्मिन् प्रतरेऽङ्गुलमात्रक्षेत्रासंख्येयभागप्रमाणानि खण्डानि,तावन्तोऽपर्याप्ता द्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियासंज्ञिपञ्चेन्द्रियाः प्रत्येकमवसेयाः । यद्यपि च सर्वे

पर्याप्ताः सर्वेऽपि चापर्याप्ता द्वीन्द्रियाऽऽदयः सामान्यतः समानप्रमाणा उक्ताः,तथाऽपि विशेषचिन्तायामिदमल्पबहुत्वमवसेयम्-सर्वस्तोकाः पर्याप्ताश्चतुरिन्द्रियाः,पर्याप्ता असंज्ञिपञ्चेन्द्रिया विशेषाधिकाः, पर्याप्ता द्वीन्द्रिया विशेषाधिकाः, पर्याप्तास्त्रीन्द्रिया विशेषाधिकाः, अपर्याप्ता असंज्ञिपञ्चेन्द्रिया असंख्यातगुणाः; तेभ्योऽपर्याप्ताश्चतुरिन्द्रिया विशेषाधिकाः, तेभ्योऽप्यपर्याप्तास्त्रीन्द्रिया विशेषाधिकाः, तेभ्योऽप्यपर्याप्ता द्वीन्द्रिया विशेषाधिकाः । तदेवमसंज्ञिपञ्चेन्द्रियपर्यन्ताः सर्वेऽपि जीवाः संख्यया प्ररूपिताः ॥ ११ ॥

सम्प्रति संज्ञिप्ररूपणार्थमाह-

सन्नी चउसु गईसुं, पढमाएँ असंखसेढिनेरइया ।
सेढिअसंखेज्जंसो, सेसासु जहुत्तरं तह य ॥ १२ ॥

संज्ञिनश्चतसृष्वपि गतिषु वर्तन्ते, ततो गतीरधिकृत्य तत्प्ररूपणा कर्तव्या । तत्र प्रथमतो नरकगतिमधिकृत्याऽऽह -प्रथमायां नरकपृथिव्यां रत्नप्रभाऽभिधानायां घनीकृतस्य लोकस्य सप्तरज्जुप्रमाणस्य असंख्येया एकप्रादेशिक्यः श्रेणयः, एतावत्प्रमाणा नारकाः ; असंख्यातासु एकप्रादेशिकीषु श्रेणिषु यावन्त आकाशप्रदेशास्तावत्प्रमाणा नारका इत्यर्थः । गाथाऽन्ते चशब्दस्यानुक्तार्थसंसूचनाद् भवनपतयोऽप्येतावत्प्रमाणा वेदितव्याः । शेषासु द्वितीयाऽऽदिषु नरकपृथिवीषु प्रत्येकम् (सेढिअसंखेज्जंस त्ति) घनीकृतस्य लोकस्यैकस्या अप्येकप्रादेशिक्याः श्रेणेरसंख्येयतमो भागो नारकाः ; असंख्येयतमे भागे यावन्तः प्रदेशास्तावत्प्रमाणा नारका इत्यर्थः । (जहुत्तरं तह य त्ति) तथा चेति समुच्चये । यथोत्तरं च यथा यथा उत्तरा पृथ्वी तथा तथा पूर्वपृथ्वीगतनारकापेक्षया असंख्यातमा असंख्यातमभागमात्रा द्रष्टव्याः । तद्यथा-द्वितीयपृथ्वीगतनारकापेक्षया तृतीयपृथिव्यां नारका असंख्यातमभागमात्राः, तृतीयपृथ्वीगतनारकापेक्षया चतुर्थपृथिव्यां नारका असंख्यातभागमात्राः । एवं सप्तस्वपि पृथ्वीषु द्रष्टव्यम् । कथमेतदवसेयमिति चेत् ? । उच्यते-युक्तिवशात् । तथाहि-सर्वस्तोकाः सप्तमपृथिव्यां नारकाः पूर्वोत्तरपश्चिमदिग्विभागभाविनः, तेभ्योऽपि तस्यामेव सप्तमपृथिव्यां दक्षिणदिग्भागभाविनोऽसंख्येयगुणाः । कथमिति चेत् ? । उच्यते-इह द्विधा जन्तवः-शुक्लपाक्षिकाः, कृष्णपाक्षिकाश्च । तेषां चेदं लक्षणम्-इह येषां किञ्चिदूनपुद्गलपरावर्तोर्द्धमात्रः संसारस्ते शुक्लपाक्षिकाः ; अधिकतरसंसारभाजिनस्तु कृष्णपाक्षिकाः । उक्तं च-" जेसिमवड्ढो पोग्गल-परियट्टो सेसओ य संसारो । ते सुक्कपक्खिया खलु, अहिए पुण कण्हपक्खीओ ॥ १ ॥ " अत एव स्तोकाः शुक्लपाक्षिकाः, बहवः कृष्णपाक्षिकाश्च । कृष्णपाक्षिकास्तु प्राचुर्येण दक्षिणस्यां दिशि समुत्पद्यन्ते, न शेषासु दिक्षु, तथास्वाभाव्यात् । तच्च तथास्वाभाव्यं पूर्वाचार्यैरेवं युक्तिभिरुपबृंह्यते-तथा कृष्णपाक्षिका दीर्घतरसंसारभाजिन उच्यन्ते, दीर्घतरसंसारभाजिनश्च बहुपापोदया भवन्ति । बहुपापोदयाश्च क्रूरकर्माणः । क्रूरकर्माणश्च प्रायस्तथास्वाभाव्यात् तद्भवसिद्धिका अपि दक्षिणस्यां दिशि समुत्पद्यन्ते,न शेषासु । यत उक्तम-" पायमिह क्रूरकम्मा, भवसिद्धीया वि दाहिणिल्लेसु । नेरइयतिरियमणुया, सुराइनागेसु गच्छंति ॥ १ ॥ " ततो दक्षिणस्यां दिशि बहूनां कृष्णपाक्षिकाणामुत्पादसंभवात् सन्तवन्ति पूर्वोत्तरपश्चिमेभ्यो दाक्षिणात्या असंख्येयगुणा इति । तेभ्योऽपि षष्ठपृथिव्यां तमःप्रभाऽभिधानायां पूर्वोत्तरपश्चिमदिग्भाविनोऽसंख्येयगुणाः । कथमिति चेत् ? । उच्यते-इह सर्वोत्कृष्टपापकर्मकारिणः संज्ञिपञ्चेन्द्रियतिर्यग्मनुष्याः सप्तमनरकपृथिव्यामुत्पद्यन्ते, किञ्चिद्धीनहीननरकापेक्षया पापकर्मकारिणश्च षष्ठ्यादिषु पृथिवीषु, सर्वोत्कृष्टपापकर्मकारिणश्च सर्वस्तोकाः, बहवश्च यथोत्तरं किञ्चिद्धीनहीननरकाऽऽदिपापकर्मकारिणः, ततो युक्तमसंख्येयगुणत्वम् । सप्तमपृथिवीदाक्षिणात्यनारकापेक्षया षष्ठपृथिव्यां पूर्वोत्तरपश्चिमनारकाणाम्;एवमुत्तरोत्तरपृथिवीरप्यधिकृत्य भावितव्यम् । तेभ्योऽपि तस्यामेव षष्ठपृथिव्यां दक्षिणदिग्भाविनो नारका असंख्येयगुणाः । युक्तिरत्रापि प्रागुक्ताऽनुसर्तव्या । तेभ्योऽपि पञ्चमपृथिव्यां धूमप्रभाऽभिधानायां पूर्वोत्तरपश्चिमदिग्भाविनोऽसंख्येयगुणाः,तेभ्योऽपि तस्यामेव पञ्चमपृथिव्यां दक्षिणदिग्भाविनोऽसंख्येयगुणाः, तेभ्योऽपि चतुर्थपृथिव्यां पङ्कप्रभाऽभिधानायां पूर्वोत्तरपश्चिमदिग्भागभाविनोऽसंख्येयगुणाः, तेभ्योऽपि तस्यामेव चतुर्थपृथिव्यां दक्षिणस्यां दिशि असंख्येयगुणाः, तेभ्योऽपि तृतीयपृथिव्यां वालुकाऽभिधानायां पूर्वोत्तरपश्चिमदिग्भाविनोऽसंख्येयगुणाः,तेभ्योऽपि तस्यामेव तृतीयपृथिव्यां दाक्षिणात्या असंख्येयगुणाः, तेभ्योऽपि द्वितीयपृथिव्यां शर्कराप्रभाऽभिधानायां पूर्वोत्तरपश्चिमदिग्भाविनोऽसंख्येयगुणाः, तेभ्योऽपि तस्यामेव द्वितीयपृथिव्यां दाक्षिणात्या असंख्येयगुणाः, तेभ्योऽपि रत्नप्रभापृथिव्यां पूर्वोत्तरपश्चिमदिग्भाविनोऽसंख्येयगुणाः, तेभ्योऽपि तस्यामेव रत्नप्रभायां पृथिव्यां दक्षिणस्यां दिशि नारका असंख्येयगुणाः । पं० सं० । (अत्रत्यः संवादी प्रज्ञापनाग्रन्थः ' अप्पाबहुय ' शब्दे प्रथमभागे ६५२ पृष्ठे गतः)

ये च येभ्योऽसंख्येयगुणास्तेषां ते असंख्येयतमे भागे वर्त्तन्ते, ततो रत्नप्रभापृथिव्यां पूर्वोत्तरपश्चिमनारकेभ्योऽपि शर्कराप्रभानारका असंख्येयतमे भागे वर्त्तन्ते, किं पुनः सकलनारकेभ्यः ? , एवमधोऽधःपृथिवीष्वपि भावनीयम् । ततो युक्तमुक्तम्-(जहुत्तरं तह य त्ति) ॥ १२ ॥

सम्प्रति व्यन्तराणां प्रमाणमाह-

संखेज्जजोयणाणं, सूइपएसेहिँ भाइओ पयरो ।
वंतरसुरेहिँ हीरइ, एवं एक्केकभेएणं ॥ १३ ॥

संख्येयानां योजनानां या सूचिरेकप्रादेशिकी श्रेणिः। किमुक्तं भवति ?-संख्येययोजनप्रमाणा या एकप्रादेशिकी पङ्क्तिः,तत्प्रदेशैर्भक्तः प्रतरो व्यन्तरसुररहियते । अयमत्र तात्पर्यार्थः-यावन्ति संख्येययोजनप्रमाणैकप्रादेशिकश्रेणिमात्राण्याकाशखण्डान्येकस्मिन् प्रतरे भवन्ति, तावत्प्रमाणा व्यन्तरसुराः। अथ वेयं कल्पना-संख्येययोजनप्रमाणैकप्रादेशिकश्रेणिमात्रं खण्डमेकैकं युगपद् यदि सर्वेऽपि व्यन्तरसुरा अपहरन्ति, तर्हि सकलमपि प्रतरमेकस्मिन्नेव समये ते अपहरन्ति,अत्रापि स एवार्थः । एवमेकैकस्मिन् भेदे व्यन्तरनिकाये द्रष्टव्यम् । किमुक्तं भवति ?-यथा सकलव्यन्तरसुराणां परिमाणमुक्तमेवमेकैकस्मिन् व्यन्तरनिकाये परिमाणमवसेयम् । न चैवं सर्वसमुदायपरिमाणव्याघातप्रसङ्गः, श्रेणिप्रमाणहेतुयोजनसंख्येयत्वस्य वैचित्र्यात् ॥ १३ ॥

छप्पन्नदोसयंगुल-सूइपएसेहिँ जाइओ पयरो ।
जोइसिएहिं हीरइ, सङ्काणे तथी य संखगुणा ॥१४॥

षट्पञ्चाशदधिकशतद्वयसंख्याऽङ्गुलप्रमाणसूचिप्रदेशैर्जगतः

खण्डितः प्रतर उत्कृष्टरूपो ज्योतिष्कदेवैरपह्रियते । इयमत्र भावना-षट्पञ्चाशदधिकशतत्रयसंख्याऽङ्गुलप्रमाणैकप्रादेशिकश्रेणिमात्राणि यावन्त्येकस्मिन् प्रतरे भवन्ति तावत्प्रमाणा ज्योतिष्कदेवाः । अथवेयं कल्पना-षट्पञ्चाशदधिकशतत्रयसंख्याङ्गुलप्रमाणैकप्रादेशिकश्रेणिमात्रं खण्डमेकैकं यदि युगपत्सर्वेऽपि ज्योतिष्कदेवा अपहरन्ति,तर्हि ते सकलमपि प्रतरमेकस्मिन्नेव समये अपहरन्ति, तथा स्वस्थाने चतुर्ष्वपि देवनिकायेषु स्वस्वनिकायगतदेवापेक्षया देव्यः संख्येयगुणा द्रष्टव्याः, प्रज्ञापनायां महादण्डके तथा पाठात्।

असंखसेढिखपए-सतुल्लया पढमदुइयकप्पेसु ।
सेढिअसंखंससमा, उवरिं तु जहुत्तरं तह य ॥१५॥

घनीकृतस्य लोकस्य या ऊर्द्ध्वमायता एकप्रादेशिक्यः श्रेणयोऽसंख्यातास्तासां यावान् प्रदेशराशिस्तुल्यास्तावत्प्रमाणाः प्रथमे कल्पे सौधर्म्माऽऽख्ये, द्वितीये च कल्पे ईशानाऽऽख्ये प्रत्येकं देवा भवन्ति । केवलं सौधर्म्मकल्पगतदेवापेक्षया ईशानकल्पगता देवाः संख्येयभागमात्रा द्रष्टव्याः, प्रज्ञापनायामीशानदेवापेक्षया सौधर्म्मकल्पदेवानां संख्येयगुणतयाऽभिधानात्। (सेढिअसंखंससमा उवरिं तु त्ति) तुर्वाक्यभेदे, उपरि पुनः सौधर्मेशानकल्पयोरुपरिष्टात्पुनः सनत्कुमारमाहेन्द्रब्रह्मलोकलान्तकमहाशुक्रसहस्रारकल्पेषु कल्पेषु प्रत्येकं देवा घनीकृतस्य लोकस्य एकप्रादेशिक्या एकस्याः श्रेणेरसंख्येयांशसमाः, असंख्येयतमे भागे यावन्तो नभःप्रदेशास्तावत्प्रमाणाः (जहुत्तरं तह य त्ति) तथाचेति समुच्चये,यथा उत्तरे उत्तरे देवाः-उत्तरोत्तरकल्पगता देवास्तथा तथा पूर्वपूर्वकल्पगतदेवापेक्षया असंख्येयभागमात्रा द्रष्टव्याः इदमुक्तं भवति-यावन्तः सनत्कुमारकल्पगता देवास्तदपेक्षया माहेन्द्रकल्पे असंख्येयनागमात्राः, माहेन्द्रकल्पगतदेवापेक्षया सनत्कुमारकल्पगता देवा असंख्येयगुणा इत्यर्थः । एवं माहेन्द्रकल्पगतदेवापेक्षया ब्रह्मलोककल्पगतदेवा असंख्येयभागमात्राः । एवं लान्तकमहाशुक्रसहस्रारकल्पेष्वपि भावनीयम । " तह य " इत्यत्र चशब्दस्यानुक्तार्थसमुच्चायकत्वादानतप्राणताऽऽरणाच्युतकल्पेषु अधस्तनमध्यमोपरितनग्रैवेयकेषु अनुत्तरविमानेषु च प्रत्येकं क्षेत्रपल्योपमस्यासंख्येयतमे भागे यावन्तो नभःप्रदेशास्तावत्प्रमाणा देवा अवगन्तव्याः। पूर्वपूर्वदेवापेक्षया चोत्तरोत्तरदेवाः संख्येयगुणहीनाः, तथा प्रज्ञापनायां महादण्डके पठितत्वात्। (महादण्डकपाठस्तु-' अप्पाबहुय ' शब्दे प्रथमभागे ६५२ पृष्ठे द्रष्टव्यः)

इह पूर्वं रत्नप्रभानारकाणां भवनपतिदेवानां सौधर्मकल्पगतदेवानां च परिमाणमसंख्येयश्रेणिगताऽऽकाशप्रदेशराशिप्रमाणं सामान्येनोक्तं, तत्र न ज्ञायते के बहवः, के स्तोका इति?। तत परस्परं विशेषमाह-

सेढी एक्केक्कपए-सरइयमूईणमंगुलप्पमियं ।
घम्माएँ भवणसोह-म्मयाण माणं इमं होइ ॥ १६ ॥

घर्मायां घर्माभिधानायां प्रथमपृथिव्यां नारकाः, तेषामिति शेषः, तथा भवनपतीनां सौधर्मजानां च सौधर्मकल्पगतानां च देवानां परिमाणावधारणाय या असंख्येयाः श्रेणयः पूर्वमुक्तास्ताः प्रति प्रत्येकमेकैकं प्रदेशं श्रेणिव्यतिरिक्तं गृहीत्वा या रचिताः सूचय एकप्रादेशिक्यः श्रेणयः । किमुक्तं भवति?-रत्नप्रभानारकाऽऽदिपरिमाणेषु प्रत्येकं यावत्यः श्रेणयस्तावतः प्रदेशान् श्रेणिव्यतिरिक्तान् गृहीत्वा एकप्रादेशिक्यः सूचयः क्रियन्ते, तासां च सूचीनामङ्गुलप्रमितमङ्गुलनागमितमिदं वक्ष्यमाणं मानं प्रमाणम् ॥ १६ ॥

तदेव दर्शयति-

उप्पन्नदोसयंगुल-भूओ भूओ विगिज्झ मूलतिगं ।
गुणिया जहुत्तरत्था, रासीओ कमेण सूईओ ॥१७॥

षट्पञ्चाशदधिकशतत्रयप्रमाणस्याङ्गुलमात्रस्याङ्गुलक्षेत्रगतप्रदेशराशेर्भूयो भूयो वारं वारं विगृह्य । किमुक्तं भवति?-वर्गमूलाऽऽनयनकरणेन एकं वारं विगृह्य वर्गमूलमानीय भूयो विगृह्यते, ततो द्वितीयं वर्गमूलमागच्छति, ततो भूयोऽपि विगृह्यते, ततस्तृतीयं वर्गमूलमागच्छति। एवं भूयो भूयो विगृह्य मूलत्रिकं वर्गमूलत्रयमानीय यथोत्तरस्था राशयो गुण्यन्ते। ततो गुणिताः सन्तस्ते क्रमेण यथाक्रमं सूचयो भवन्ति । एतावत्प्रदेशराशिप्रमाणा यथाक्रमं रत्नप्रभानारकाऽऽदिषु श्रेणिपरिमाणहेतवः सूचयो भवन्तीत्यर्थः। इयमत्र भावना-अङ्गुलमात्रे क्षेत्रे एकप्रादेशिकश्रेणिरूपे असंख्याता अपि प्रदेशाः किलास्मत्कल्पनया षट् पञ्चाशदधिकशतत्रयप्रमाणाः कल्प्यन्ते, तेषां प्रथमं वर्गमूलं षोडश, द्वितीयं चत्वारि, तृतीयं च द्वे। एते च राशय उपर्यधोभावेन क्रमेण व्यवस्थाप्यन्ते। तत्र प्रथमवर्गमूलेन षोडशकलक्षणेन उपरितनः षट्पञ्चाशदधिकशतत्रयप्रमाणो राशिर्गुण्यते। गुणिते च सति तस्मिन् जातानि षण्णवत्यधिकानि चत्वारि सहस्राणि। एतावत्यः किल श्रेणयो रत्नप्रभानारकाणां परिमाणाय द्रष्टव्याः, एतावत्प्रमाणश्रेणिगताऽऽकाशप्रदेशराशिप्रमाणाः प्रथमपृथिवीनारका भवन्तीत्यर्थः। तथा द्वितीयेन वर्गमूलेन चतुष्कलक्षणेनोपरितनः षोडशकलक्षणो राशिर्गुण्यते। गुणिते च सति जाता चतुःषष्टिः। एतावत्यः श्रेणयो भवनपतीनां परिमाणावधारणाय द्रष्टव्याः। तथा तृतीयेन वर्गमूलेन द्विकलक्षणेनोपरितनश्चतुष्कलक्षणो राशिर्गुण्यते। ततो जाता अष्टौ। एतावत्यः श्रेणयः सौधर्मदेवानां परिमाणाय ज्ञातव्याः ॥ १७ ॥

रत्नप्रभानारकाऽऽदीनामेव विषये प्रकारान्तरेण भूयः श्रेणिपरिमाणमाह-

अह वंगुलप्पएसा, समूलगुणिया उ नेरइयमूई ।
पढमदुइयापयाइं, समूलगुणियाइं इयराणं ॥ १८ ॥

अथवेति प्रकारान्तरसूचने, प्रकारान्तरं चेदम्-पूर्वमङ्गुलमात्रक्षेत्रप्रदेशराशिरसत्कल्पनया षट्पञ्चाशदधिकशतत्रयप्रदेशप्रमाणकल्पितः, इह तु न तथा कल्प्यते, किं तु यथाऽवस्थित एव विवक्ष्यते इति। अङ्गुले एकप्रादेशिकश्रेणिरूपे अङ्गुलमात्रे ये प्रदेशास्ते स्वकीयेन वर्गमूलेन गुणिताः सन्तो यावन्तः संभवन्ति, एतावत्प्रमाणा नैरयिकसूचिः-नैरयिकपरिमाणहेतूनां श्रेणीनां विस्तरः। किमुक्तं भवति?-एतावत्प्रमाणाः प्रथमपृथिवीनारकाणां परिमाणावधारणाय श्रेणयोऽवगन्तव्याः । तथा अङ्गुलमात्रक्षेत्रप्रदेशराशेर्यत् प्रथमं पदं वर्गमूलं, तत् स्वकीयेन मूलेन वर्गमूलेनाङ्गुलमात्रक्षेत्रप्रदेशराश्यपेक्षया द्वितीयेन वर्गमूलेन गुण्यते। गुणिते च सति यावान् प्रदेशराशिर्भवति, एतावत्प्रमाणा भवनपतीनां परिमाणावधारणाय श्रेणयो द्रष्टव्याः। तथा अङ्गुलमात्रक्षेत्रप्रदेशराशेरेव यद् द्वितीयं पदं वर्ग-

मूलं, तत् स्वमूलेन स्वकीयेन वर्गमूलेन अङ्गुलमात्रक्षेत्रप्रदेशराश्यपेक्षया तृतीयेन च वर्गमूलेन गुण्यते। गुणिते च सति यावान् प्रदेशराशिर्भवति तावत्प्रमाणाः सौधर्मदेवानां परिमाणावधारणाय श्रेणयो ज्ञेयाः, एतावत्प्रमाणश्रेणिगताऽऽकाशप्रदेशराशितुल्याः सौधर्मदेवा भवन्तीति भावना। एवं पूर्वत्रापि भावना कर्तव्या ॥ १८ ॥

संप्रत्युत्तरवैक्रियसंज्ञितिर्यक्पञ्चेन्द्रियपरिमाणावधारणार्थमाह-

अंगुलमूलासंखिय-भागप्पमिया उ होंति सेढीओ ।
उत्तरविउव्वियाणं, तिरियाण य सन्निपज्जाणं ॥ १९ ॥

अङ्गुलस्याङ्गुलप्रमाणस्य क्षेत्रस्य प्रदेशराशेर्यन्मूलं वर्गमूलं प्रथमं, तस्य योऽसंख्येयो भागस्तेन प्रमितास्तत्प्रमाणास्तिरश्चां संज्ञिपञ्चेन्द्रियाणामुत्तरवैक्रियाणां परिमाणावधारणाय श्रेणयोऽवगन्तव्याः। इयमत्र भावना-एकप्रादेशिके अङ्गुलमात्रे क्षेत्रे यः प्रदेशराशिः, तस्य यत् प्रथमं वर्गमूलं, तस्यासंख्येयभागे यावन्तो नभःप्रदेशाः, तावत्प्रमाणासु श्रेणिषु यावान् प्रदेशराशिस्तावत्प्रमाणा उत्तरवैक्रियशरीरलब्धिसम्पन्नाः पर्याप्तसंज्ञिपञ्चेन्द्रियतिर्यञ्चो वेदितव्याः। उक्तं च-"पंचेंदियतिरिक्खजोणियाणं केवइया वेउव्वियसरीरा पन्नत्ता ?। गोयमा ! असंखेज्जा, कालओ असंखेज्जाहिं उस्सप्पिणीओसप्पिणीहिं अवहीरंति, खेत्तओ पयरस्स असंखेज्जइभागे असंखेज्जाओ सेढीओ, तासिं णं सेढीणं विक्खंभसूई अंगुलपढममूलबग्गस्स असंखेज्जइभागो" इति। उत्तरवैक्रियशरीरलब्धिसंपन्नाः पर्याप्तसंज्ञितिर्यक्पञ्चेन्द्रिया असंख्येयेषु द्वीपसमुद्रेषु गजमत्स्यहंसाऽऽद्या द्रष्टव्याः ॥ १९ ॥

सम्प्रति मनुष्यपरिमाणप्रतिपादनार्थमाह-

छक्कोसपए मणुया, सेढी रूवाहिया अवहरंति ।
तइयमूलाइएहिं, अंगुलमूलप्पएसेहिं ॥ २० ॥

इह द्वये मनुष्याः-गर्भव्युत्क्रान्ताः, संमूर्च्छिमाश्च। तत्र गर्भव्युत्क्रान्ताः-पर्याप्ताः, अपर्याप्ताश्च भवन्ति। संमूर्च्छिमास्तु अन्तर्मुहूर्तायुषोऽपर्याप्ता एव म्रियन्ते। एतच्च प्रागेव प्रपञ्चाधिकारेऽभिहितम्। ततस्ते पर्याप्ता न भवन्ति। तत्र ये गर्भव्युत्क्रान्ताः पर्याप्ता मनुष्यास्ते सदैव लभ्यन्ते, ध्रुवत्वात्तेषाम्। ते च संख्येयाः, संख्या च तेषां जघन्यतोऽपि पञ्चमवर्गगुणितषष्ठवर्गप्रमाणा द्रष्टव्या। अथ वर्गः किमुच्यते ?, किंस्वरूपश्च पञ्चमो वर्गः ?, किंभूतः षष्ठः ?, कीदृग्वा पञ्चमवर्गगुणितः स षष्ठो वर्गो भवतीति ?। उच्यते-इह विवक्षितो राशिस्तेनैव राशिना गुणितो वर्ग इत्यभिधीयते। तत्रैकस्य वर्ग एक एव भवति, ततो वृद्धिरहितत्वादेष वर्ग एव न गण्यते, द्वयोश्च वर्गश्चत्वारो भवन्ति; इत्येष प्रथमो वर्गः ४। चतुर्णां वर्गः षोडशेति द्वितीयो वर्गः १६। षोडशानां वर्गो द्वे शते षट्पञ्चाशदधिके; इति तृतीयो वर्गः २५६। द्वयोः शतयोः षट्पञ्चाशदधिकयोर्वर्गः पञ्चषष्टिसहस्राणि पञ्च शतानि षत्रिंशदधिकानि, एष चतुर्थो वर्गः ६५५३६।

अस्य च राशेर्वर्गः सार्द्धगाथया प्रोच्यते-

" चत्तारि य कोडिसया, अउणत्तीसं च होंति कोडीओ ।
अउणावन्नं लक्खा, सत्तछी चेव य सहस्सा ॥ १ ॥
दो य सया छन्नउया, पंचमवग्गो इमो विनिद्दिट्ठो । "

अङ्कतोऽपि स्थापना— ४२९४९६७२९६।

अस्यापि राशेर्वर्गो गाथात्रयेण प्रतिपाद्यते। तद्यथा-

" लक्खं कोडाकोडिण, चउरासीइं भवे सहस्साइं ।
चत्तारि य सत्तट्ठा, होंति सया कोडिकोडीणं ॥ १ ॥
चोयाला लक्खाइं, कोडीणं सत्त चेव य सहस्सा ।
तिन्नि य सया य सयरा, कोडीणं होंति नायव्वा ॥ २ ॥
पंचाणउई लक्खा, एगावन्नं भवे सहस्साइं ।
अस्सीयसुत्तरसया, एसो वग्गो य हवइ बग्गो ॥ ३ ॥ "

अङ्कतः स्थापना- १८४४६७४४०७३७०९५१६१६।

एष षष्ठो वर्गः पूर्वोक्तेन पञ्चमवर्गेण गुण्यते। गुणिते च सति यावान् राशिर्भवति तावत्प्रमाणा जघन्यतोऽपि पर्याप्तगर्भजमनुष्याः। स च राशिरेतावान् भवति-
७९२२८१६२५१८२६४३३७५९३५४३९५०३३६।

अयं च राशिरेकोनत्रिंशदङ्कस्थानेन कोटाकोट्यादिप्रकारेणाभिधातुं कथमपि शक्यते, ततः पर्यन्तवर्तिनोऽङ्कस्थानादारभ्याङ्कस्थानसंग्रहमात्रं पूर्वपुरुषप्रणीतेन गाथाद्वयेनाभिधीयते-

" छ य तिन्नि तिन्नि सुन्नं, पंचेव य नव य तिन्नि चत्तारि ।
पंचेव तिन्नि नव पं-च सत्त तिन्नेव तिन्नेव ॥ १ ॥
चउ छच्च छ चत्त पन्नो, पण दो छक्केक्कगो य अट्ठेव ।
दो दो नव सत्तेव य, अंकठाणा इगुणतीसं ॥ २ ॥ "

एष च राशिः पूर्वसूरिभिश्चतुर्यमलपदादूर्ध्वं चतुर्यमलपदस्याधस्तादित्युपवर्ण्यते; तत्र द्वौ द्वौ वर्गौ यमलपदम्। तथा चोक्तमनुयोगद्वारचूर्णौ-"दो विन्नि वग्गा जमलपयं ति भणइ" इति। ततः षष्ठो वर्गः सप्तदशभिर्यमलपदैः, त्रियमलपदसमाहारस्तस्मादूर्ध्वमेव राशिः, षष्ठवर्गस्य पञ्चमवर्गेण गुणितत्वात्। अष्टवर्गसमुदायश्चतुर्यमलपदम्, चतुर्णां यमलकपदानां समाहार इत्यर्थः। तस्याधस्तात् सप्तमवर्गस्याप्यपरिपूर्णत्वात्, एष च राशिः षष्ठवर्गच्छेदनकदायी। तथाहि-प्रथमो वर्गो द्वे छेदनके ददाति। तद्यथा-प्रथमं छेदनकं द्वौ, द्वितीयमेकं; द्वितीयो वर्गश्चत्वारि छेदनकानि। तत्र प्रथममष्टौ, द्वितीयं चत्वारि, तृतीयं द्वे, चतुर्थमेकम्। एवं तृतीयवर्गोऽष्टौ छेदनकानि। चतुर्थः षोडश। पञ्चमो द्वात्रिंशतम्। षष्ठश्चतुष्षष्टिम्, स एव पञ्चमवर्गेण गुणितः षष्ठवर्गः। कथमेतदवसेयमिति चेत् ?। उच्यते—इह यो यो वर्गो येन येन वर्गेण गुण्यते, तत्र तत्र द्वयोर्द्वयोरपि छेदनकानि प्राप्यन्ते। तथा प्रथमवर्गेण द्वितीये वर्गे गुणिते षट्। तथाहि—द्वितीयो वर्गः षोडशलक्षणः प्रथमवर्गेण चतुष्करूपेण गुण्यते। गुणिते च सति जाता चतुःषष्टिः। तस्याः प्रथमछेदनकं द्वात्रिंशत्, द्वितीयं षोडश, तृतीयमष्टौ, चतुर्थं चत्वारि, पञ्चमं द्वे, षष्ठमेकमिति। एवमन्यत्रापि भावनीयम्। तत्र पञ्चमवर्गे द्वात्रिंशच्छेदनकानि, षष्ठे चतुष्षष्टिः, ततः पञ्चमवर्गेण षष्ठे वर्गे गुणिते षष्णवतिच्छेदनकानि प्राप्यन्ते। एवमेकराशिर्विनेयजनमतिप्रकर्षाऽऽधानाय त्रिप्रकार आगमे परमगुरुभिरुपदर्शितः। तथा चानुयोगद्वारसूत्रम्-

" जहण्णपदे मणुस्सा, संखेज्जासंखेज्जा कोडीओ ।
तिन्नमलपयस्स उवरिं, तउ जमलपयस्स हेट्ठा य ॥१॥
अहव ण छट्ठो वग्गो, पंचमवग्गं पडुप्पन्नो ।
अहव ण अणउइं, छेयणगदाई य रासीइ " ॥२॥

ये तु गर्भव्युत्क्रान्ताः संमूर्च्छिमाश्चापर्याप्ताः, ते उभयेऽपि

कदाचित् प्राप्यन्ते, कदाचिन्न । यतो गर्भव्युत्क्रान्तानामपर्याप्तानां जघन्यतः समयमात्रम्, उत्कर्षतः द्वादश मुहूर्त्ता अन्तरं, संमूर्छिमानां त्वपर्याप्तानां जघन्यतः समयमात्रम्, उत्कर्षतश्चतुर्विंशतिरन्तर्मुहूर्त्तानां, अपर्याप्ताश्चान्तर्मुहूर्त्तायुषः, अतोऽन्तर्मुहूर्त्तानन्तरे सर्वेऽपि निर्लेपमपगच्छन्ति । तस्मादमी द्वयेऽप्यपर्याप्ताः कदाचिद्भवन्ति, कदाचिन्न । यदा पुनरमी द्वयेऽपि अपर्याप्ता गर्भव्युत्क्रान्ताश्च पर्याप्ताः समुदिताः सर्वोत्कर्षेण भवन्ति, तदा तेषामिदं परिमाणम्—" उक्कोसपए " इत्यादि । उत्कृष्टपदे सर्वोत्कृष्टसंमूर्छिमगर्भव्युत्क्रान्तसमुदायग्रहणरूपे, मनुजा मनुष्या रूपाधिका एकेन रूपेण परमार्थतोऽसताऽपि कल्पितेनाधिकाः सन्त एकप्रादेशिकश्रेणिरूपे अङ्गुलमात्रे क्षेत्रे यः प्रदेशराशिरसत्कल्पनया षट्पञ्चाशदधिकशतद्वयप्रमाणस्तत्प्रथमं वर्गमूलं षोडशलक्षणे तृतीयेन वर्गमूलेन द्विकलक्षणेन गुण्यते । ततो जाता द्वात्रिंशत् । ततस्तैरङ्गुलप्रथमवर्गमूलप्रदेशैस्तृतीयवर्गमूलप्रदेशैराहतैर्गुणितैरसत्कल्पनया द्वात्रिंशत्संख्यैः प्रतरस्यैकां श्रेणिं सकलामप्यपहरन्ति । इयमत्र भावना—एकप्रादेशिके श्रेणिरूपे अङ्गुलमात्रे क्षेत्रे यः प्रदेशराशिस्तस्य यत्प्रथमवर्गमूलं तत्तृतीयवर्गमूलगुणितं सत् यावद्भवति, तावन्मात्रं खण्डं प्रत्येकं यदि सर्वेऽपि पर्याप्तापर्याप्तसंमूर्छिमगर्भजमनुष्या गृह्णन्ति, ततः सकलामपि श्रेणिमेकस्मिन्नेव समये ते अपहरन्ति, परमेकं मनुष्यरूपं न प्राप्यते ; सर्वोत्कर्षेऽपि तेषामेतावतामेव केवलवेदनोपलब्धत्वात् । तथा चोक्तमनुयोगद्वारचूर्णौ—" उक्कोसपए जे मणुस्सा हवंति, ते इक्कम्मि मणुस्सरूवे परिकहे समाणे तेहिं मणुस्सेहिं सेढी अवहीरइ, तीसे य सेढीए कालखेत्तेहिं अवहारो मग्गिज्जइ । कालओ ताव असंखेज्जाहिं ओसप्पिणीहिं उस्सप्पिणीहिं । खेत्तओ अंगुलपढमवग्गमूलं तइयवग्गमूलपडुप्पन्नं । किं भणियं होइ?, तीसे सेढीए अंगुलायए खेत्ते जो य पएसरासी, तस्स जं पढमं वग्गमूलं पएसरासिमाणं, तं तइयवग्गमूलपएसरासिणा पडुप्पाइज्जइ, पडुप्पाइए समाणे जो पएसरासी भवइ, एवइयाहिं खंडेहिं अवहीरमाणी अवहीरमाणी जाव निट्ठाइ ताव मणुस्सा वि अवहीरमाणा निट्ठंति । आह—कहमेगसेढीए दहमेत्तेहिं खंडेहिं अवहीरमाणी अवहीरमाणी असंखेज्जा उस्सप्पिणीओसप्पिणीहिं अवहीरइ? आयरिओ आह—खेत्तस्स सुहुमत्तणओ । सुत्ते विमं भणियं—" सुहुमो य होइ कालो, तत्तो सुहुमयरं हवइ खेत्तं । अंगुलसेढीमेत्ते, उस्सप्पिणिओ असंखेज्जा ॥१॥" इति । ततश्चेदमायातम्—कालतोऽसंख्येयोत्सर्पिण्यवसर्पिणीसमयसमानाः, क्षेत्रतः पुनरेकस्यामेकप्रादेशिक्यां श्रेण्यामङ्गुलमात्रक्षेत्रप्रदेशराशेः प्रथमवर्गमूलं तृतीयवर्गमूलगुणितं सत् यावत्प्रदेशपरिमाणं भवति, तावन्मात्राणि खण्डानि यावन्ति नवस्येकखण्डहीनानि, तावन्तः सर्वोत्कृष्टपदे मनुष्याः, तदेवमपर्याप्तसूक्ष्मैकेन्द्रियाऽऽदिभेदेन चतुर्दशविधानामपि जीवानां परिमाणमुक्तम् ॥ २० ॥

संप्रति गुणस्थानकभेदेन चतुर्दशविधानां परिमाणमाह—

सासायणाइ चउरो, होंति असंखा अणंतया मिच्छा ।
कोडिसहस्सपुहुत्तं, पमत्त इयरे उ थोवयरा ॥ २१ ॥

सास्वादनाऽऽदयः सास्वादनसम्यग्दृष्टिसम्यग्मिथ्यादृष्ट्यविरतदेशविरतरूपाश्चत्वारः प्रत्येकमसंख्याताः; सास्वादनाऽऽदीनां चतुर्णामपि प्रत्येकमुत्कर्षपदे क्षेत्रपल्योपमासंख्येयभागवर्तिप्रदेशराशिप्रमाणत्वात् । तथा अनन्ता अनन्तसंख्या मिथ्यादृष्टयः, तेषामनन्तलोकाऽऽकाशप्रदेशराशिप्रमाणत्वात् । तथा प्रमत्ताऽप्रमत्तसंयता जघन्यतोऽपि कोटिसहस्रपृथक्त्वपरिमाणाः प्राप्यन्ते, उत्कर्षतोऽपि कोटिसहस्रपृथक्त्वमानाः । इह पृथक्त्वं द्विप्रभृत्या नवकोटिसहस्राणीति । तथा इतरे अप्रमत्तसंयताः स्तोकतराः प्रमत्तसंयतेभ्यः स्वल्पतराः ॥ २१ ॥

एगाई चउपएणा—समगं उवसामगा य उवसंता ।
अद्धं पडुच्च सेढी—ए होंति सव्वे वि संखेज्जा ॥ २२ ॥

इहोपशमका उपशान्ताश्च कदाचिद्भवन्ति, कदाचिन्न, उपशमश्रेणेरन्तरस्य भावात् । ततश्च यदा उपशमका अपूर्वकरणानिवृत्तिबादरसूक्ष्मसंपरायाः उपशान्ता उपशान्तमोहा भवन्ति, तदा जघन्यत एको द्वौ त्रयो वा, उत्कर्षतश्चतुःपञ्चाशत् । इदं प्रमाणं प्रवेशनकमधिकृत्योक्तम्, एतावन्त एकस्मिन् समयेऽपूर्वकरणाऽऽदिषु गुणस्थानकेषु प्रत्येकमुपशमश्रेणिमधिकृत्य प्रविशन्तः प्राप्यन्ते इत्यर्थः । श्रेणेरुपशमश्रेणेश्च कालं प्रतीत्य पुनर्भवन्ति सर्वेऽपि संख्येयाः । इदमुक्तं भवति—सकलेऽप्यन्तर्मुहूर्त्तलक्षणे उपशमश्रेणिकालेऽन्येऽन्ये प्रविशन्तः सर्वेऽपि संख्येयाः प्राप्यन्ते । आह—नन्वन्तर्मुहूर्त्तप्रमाणेऽप्युपशमश्रेणिकाले असंख्येयाः समयाः प्राप्यन्ते, तत्र यदि प्रतिसमयमेकैकः प्रविशति, तथाऽपि सकलं श्रेणिकालमधिकृत्यासंख्येयाः प्राप्नुवन्ति, किं पुनर्द्वित्रादेरारभ्योत्कर्षतश्चतुष्पञ्चाशतः प्रवेशने ? । अत्रोच्यते—स्यादियं कल्पना यदि सकलेष्वपि श्रेणिसमयेषु प्रवेशो भवेत्, यावता स एव न भवति, किं तु केषुचिदेव समयेषु । अथैतदपि कथमवसीयते इति चेत्? उच्यते—इहोपशमश्रेणिं प्रतिपद्यन्ते पर्याप्तगर्भजमनुष्या एव, न शेषजीवाः, तेऽपि चारित्रिणः, न ये केचन, चारित्रिणश्चोत्कर्षतोऽपि कोटिसहस्रपृथक्त्वमानाः, तेऽपि च न सर्वेऽपि श्रेणिं प्रतिपद्यन्ते, किं तु कतिपया एव, ततो ज्ञायते—न सर्वेष्वपि उपशमश्रेणिसमयेषु प्रवेशो भवति, किं तु केषुचिदेव, तत्रापि कदाचित् कुत्रचित् समये पञ्चदशापि कर्मभूमीरधिकृत्योत्कर्षतश्चतुःपञ्चाशत् प्रविशन्तः प्राप्यन्ते, नाधिकाः, ततः सकलेऽपि श्रेणिकाले संख्येया एव भवन्ति । तेऽपि च शतानि द्रष्टव्याः, न सहस्राणि, तथा पूर्वसूरिभिरावेदितत्वात् ॥ २२ ॥

खवगा खीणजोगी, एगाई जाव होंति अद्धसयं ।
अद्धाए सयपुहुत्तं, कोडिपुहुत्तं सजोगीओ ॥ २३ ॥

इहापि क्षपकाः क्षीणमोहा अयोगिनश्च कदाचिद्भवन्ति, कदाचिन्न, क्षपकश्रेणेरयोगिकालस्य चान्तरसंभवात् । ततो यदा क्षपका अपूर्वकरणानिवृत्तिबादरसंपरायसूक्ष्मसंपरायाः, क्षीणाः क्षीणमोहा अयोगिनोऽयोगिकेवलिनश्च भवन्ति, तदा जघन्यत एको द्वौ वा, उत्कर्षतोऽष्टशतम् अष्टाधिकशतप्रमाणाः । इदमपि प्रमाणं प्रवेशनमधिकृत्योक्तमवसेयम् । एतावन्त एकस्मिन्समये क्षपकत्वे, क्षीणमोहत्वे, अयोगित्वे चोत्कर्षतः प्रविशन्तीत्यर्थः । (अद्धाए सयपुहुत्तं त्ति) अद्धा क्षपकश्रेणिकालोऽयोगिकालश्च । तस्यामद्धायां सकलायामपि प्रत्येकमन्येऽन्ये प्रविशन्तः सर्वसंख्यया शतसंख्याः प्राप्यन्ते । इयमत्र भावना—सकलेऽपि क्षपकश्रेणिकालेऽन्तर्मुहूर्त्तप्रमाणे पञ्चदशस्वपि कर्मभूमिष्वन्येऽन्ये प्रविशन्तो यदि सर्वेऽपि संख्यायन्ते, तथाऽप्युत्कर्षतोऽपि शतपृथक्त्वसंख्या एव लभ्यन्ते, नाधिकाः । एवमयोगिकेवलिनोऽपि भावनीयाः । (कोडिपुहुत्तं सजोगीओ

त्ति) सयोगिनः सयोगिकेवलिनः पुनः कोटिपृथक्त्वं कोटिपृथक्त्वसंख्याः । इह सयोगिकेवलिनः सदैव भवन्ति. ध्रुवत्वात्तेषाम; ते च जघन्यपदेऽपि कोटिपृथक्त्वमानाः, उत्कर्षतोऽपि कोटिपृथक्त्वमाना एव । केवलमुत्कर्षपदे कोटिपृथक्त्वं बृहत्तरमवसेयम् ॥ २३ ॥ तदेवमुक्तं द्रव्यप्रमाणम् ।

साम्प्रतं क्षेत्रप्रमाणमाह-

अपज्जत्ता दोन्नि वि, सुहुमा एगिंदिया जए सव्वे ।
सेसा य असंखेज्जा, बायरपवणा असंखेसु ॥ २४ ॥

द्वयेऽप्यपर्याप्ताः-लब्ध्यपर्याप्ताः, करणापर्याप्तकाश्च । अपिशब्दस्यानुक्तार्थसमुच्चायकत्वात् पर्याप्ताश्च । सूक्ष्मा एकेन्द्रियाः पृथिव्यम्बुतेजोवायुवनस्पतयः प्रत्येकं सर्वेऽपि सर्वस्मिन्नपि जगति भवन्ति, "सुहुमा उ सव्वलोए" इति वचनप्रामाण्यात् । आह-सूक्ष्माः सर्वेऽपि पृथिव्यादयः पर्याप्ताऽऽदिभेदभिन्नाः प्रत्येकं सर्वलोकव्यापिन इत्यज्ञैरेवानीष्टार्थसिद्धेः, ततः किमर्थमिह मुख्यया वृत्त्या अपर्याप्तग्रहणं कृतमपिशब्दात्तु पर्याप्तग्रहणमिति ? उच्यते-पर्याप्तापेक्षया श्लोकानामप्यपर्याप्तानां स्वरूपतोऽनिबाहुल्यख्यापनार्थम् । तथाहि-यद्यपि अपर्याप्तेभ्यः संख्येयगुणहीनाः पर्याप्तास्तथाऽपि ते सर्वस्मिन्नपि जगति वर्त्तन्ते, इत्युच्यमाने निःसंशयमतिबाहुल्यं तेषां ख्यापितं भवति । अथ कथं पर्याप्ता अपर्याप्तापेक्षया संख्येयगुणहीनाः ? उच्यते-प्रज्ञापनायामपर्याप्तापेक्षया पर्याप्तानां संख्येयगुणतयाऽभिधानात् । तथा च तद्ग्रन्थः-"सव्वत्थोवा सुहुमा अपज्जत्ता पज्जत्ता संखेज्जगुण त्ति ।" अन्यत्राप्युक्तम्-"जीवाणमपज्जत्ता,बहुतरगा बायराण विन्नेया । सुद्दमाण अपज्जत्ता, ओहेण उ केवलं विंति ॥ १ ॥" शेषास्तु शेषाः पुनः पर्याप्तापर्याप्तभेदभिन्ना बादरैकेन्द्रियाः पृथिव्यम्बुतेजोवनस्पतयश्च प्रत्येकं लोकस्यासंख्येयतमे भागेऽवतिष्ठन्ते । (बायरपवणा असंखेसु त्ति) बादरपवना बादरवायुकायिकाः पर्याप्ता अपर्याप्ताश्च प्रत्येकं लोकस्यासंख्येयेषु भागेषु वर्तन्ते । लोकस्य हि यत्किमपि सुषिरं, तत्र सर्वत्रापि वायवः प्रसर्पन्ति, यत्पुनरतिनिबिडनिचितावयवतया शुषिरहीनकनकगिरिमध्यभागादि, तत्र न. तच्च सकलमपि लोकस्यासंख्येयभागमात्रं. तत एकमसंख्येयभागं मुक्त्वा शेषेषु सर्वेष्वप्यसंख्येयेषु भागेषु वायवो वर्तन्त इति ॥ २४ ॥

सासायणाइ सव्वे, लोयस्स असंखयम्मि भागम्मि ।
मिच्छा उ सव्वलोए, होइ सजोगे वि समुग्घाए ॥२५॥

सास्वादनाऽऽदयः सास्वादनसम्यग्दृष्टिसम्यग्मिथ्यादृष्ट्यादयो मिथ्यादृष्टिसयोगिकेवलिवर्जाः प्रत्येकं सर्वेऽपि लोकस्यासंख्येयतमे भागेऽवतिष्ठन्ते,सम्यग्मिथ्यादृष्ट्यादयो हि संज्ञिपञ्चेन्द्रियेष्वेव प्राप्यन्ते । सास्वादनास्तु केचित्स्वरूपाः करणापर्याप्तबादरैकेन्द्रियद्वित्रिचतुरिन्द्रियासंज्ञिपञ्चेन्द्रियेष्वपि,ते च संज्ञिपञ्चेन्द्रियाऽऽदयः स्वरूपत्वाल्लोकस्यासंख्येयभागे वर्तन्त इति । सास्वादनाऽऽदयो लोकासंख्येयभागवर्तिन उक्ताः । तथा मिथ्यादृष्टयः सर्वलोके सर्वस्मिन्नपि लोके भवन्ति । सूक्ष्मैकेन्द्रिया हि सकललोकव्यापिनः, ते च मिथ्यादृष्टय इति । तथा सयोग्यपि सयोगिकेवल्यपि. आस्तां मिथ्यादृष्टय इत्यपिशब्दार्थः । समुद्घाते समुद्घातगतः सन् सर्वलोके भवति सकललोकव्यापी भवति । तथाहि-समुद्घातं कुर्वन् प्रथमे दण्डसमये, द्वितीये च कपाटसमये लोकस्यासंख्येयतमे भागे ततीये मन्थनसमये पुनरसंख्येयभागेषु, चतुर्थे सर्वलोके । तथा चोक्तम्- चतुर्थे लोकपूरणमथेमं संहार इति । "होइ सजोगि वि समुग्घाए" इत्युक्तम् ॥ २५ ॥

ततः समुद्घातप्रस्तावादशेषान् समुद्घातान्प्ररूपयति-

वेयणकसायमारण-वेउव्वियतेउहारकेवलिया ।
सग पण चउ तिन्नि कमा,मणुसुरनेरइयतिरियाणं ॥२६॥

समुद्घातशब्दः पाश्चात्योऽग्रेतनगाथागतो वा प्रत्येकमभिसंबध्यते । तद्यथा-वेदनासमुद्घातः, कषायसमुद्घातः, मारणसमुद्घातः, वैक्रियसमुद्घातः,तैजससमुद्घातः, आहारकसमुद्घातः, केवलिसमुद्घातश्च । तत्र वेदनया समुद्घातो वेदनासमुद्घातः, स चासातवेदनीयकर्माऽऽश्रयः । कषायेण कषायोदयेन समुद्घातः कषायसमुद्घातः,स च कषायचारित्रमोहनीयकर्माऽऽश्रयः। तथा मरणे मरणकाले भवो मारणः, मारणश्चासौ समुद्घातश्च मारणसमुद्घातः, सोऽन्तर्मुहूर्तावशेषायुःकर्मविषयः । तथा वैक्रिये प्रारभ्यमाणे समुद्घातो वैक्रियसमुद्घातः, स च वैक्रियशरीरनामकर्मविषयः तथा तेजसि विषये भवस्तैजसः, स चासौ समुद्घातश्च तैजससमुद्घातः,स च तेजोलेश्याविनिर्गमकाले भावी तैजसशरीरनामकर्माऽऽश्रयः । आहारके प्रारभ्यमाणे समुद्घात आहारकसमुद्घातः, स चाऽऽहारकशरीरनामकर्मविषयः । केवलिन्यन्तर्मुहूर्तभाविपरमपदे भवः समुद्घातः केवलिसमुद्घातः । अथ समुद्घात इति कः शब्दार्थः ? । उच्यते-सम्मिलितैकीभावः, तत्प्राबल्ये, एकीभावेन प्राबल्येन घातः समुद्घातः। केन सह एकीभावगमनम् ?, इति चेत् । उच्यते-अर्थोदनाऽऽदिभिः तथाहि-यदा आत्मा वेदनाऽऽदिसमुद्घातगतो भवति,तदा वेदनाऽऽद्यनुभवज्ञानपरिणत एव भवति,नान्यज्ञानपरिणतः प्राबल्येन घातः कथम् ?, इति चेत् । उच्यते-इह वेदनाऽऽदिसमुद्घातपरिणतो बहून् वेदनीयाऽऽदिकर्मप्रदेशान् कालान्तरानुभवनयोग्यान् उदीरणाकरणनाकृष्योदयावलिकायां प्रक्षिप्यानुभूय च निर्जरयति, आत्मप्रदेशैः सह संश्लिष्टान् शातयतीत्यर्थः । तत्र वेदनासमुद्घातगत आत्मा वेदनीयपुद्गलपशातं करोति । तथाहि-वेदनाकरालितो जीवः स्वप्रदेशानन्तानन्तकर्मस्कन्धवेष्टितान् शरीराद्बहिरपि विक्षिपति । तैश्च प्रदेशैर्वदनजठराऽऽदिरन्ध्राणि कर्णस्कन्धाऽऽद्यन्तरालानि चापूर्याऽऽयामतो विस्ततरतश्च शरीरमात्रं क्षेत्रमभिव्याप्यान्तर्मुहूर्तं यावदवतिष्ठते । तस्मिंश्चान्तर्मुहूर्ते प्रभूतासातवेदनीयकर्मपुद्गलपरिशातं करोति । कषायसमुद्घातसमुद्गतः कषायाख्यचारित्रमोहनीयकर्मपुद्गलपरिशातं करोति । तथाहि-कषायोदयसमाकुलो जीवः स्वप्रदेशान् बहिर्विक्षिप्य तैः प्रदेशैर्वदनोदराऽऽदिरन्ध्राणि कर्णस्कन्धाऽऽद्यन्तरालानि चापूर्याऽऽयामविस्तराभ्यां देहमात्रं क्षेत्रमभिव्याप्य वर्त्तते, तथाभूतश्च प्रभूतकषायकर्मपुद्गलपरिशातं करोति । एवं मारणसमुद्घातगत आयुःपुद्गलशातं, वैक्रियसमुद्घातगतः पुनर्जीवः स्वप्रदेशान् शरीराद्बहिर्निष्काश्य शरीरविष्कम्भबाहल्यमानमायामतः संख्येययोजनप्रमाणं दण्डं निसृजति,निसृज्य च यथास्थूलान् वैक्रियशरीरनामकर्मपुद्गलान् प्राग्वत् शातयति । तथा चोक्तम्-"वेउव्वियसमुग्घाएण समोहण्इ । समोहणित्ता संखेज्जाइं जोयणाइं दंडं निसिरइ । निसरित्ता अहावायरे पुग्गले परिसाडेइ" इति । तैजसाऽऽहारकसमुद्घातौ वैक्रियसमुद्घातवदवगन्तव्यौ । केवलं तैजससमुद्घातगतस्तैजसशरीरनामकर्मपुद्गलपरि-

शातम. आहारकसमुद्घातगतस्त्वाहारकशरीरनामपुद्गलपरिशातं करोति, आहारकसमुद्घातश्चाऽऽहारकशरीरप्रारम्भकाले वेदितव्यः । केवलिसमुद्घातसमुद्घतस्तु केवली सदसद्वेद्यशुभाशुभनामोच्चनीचैर्गोत्रकर्मपुद्गलपरिशातं करोति, केवलिसमुद्घातवर्जाः शेषाः षडपि समुद्घाताः प्रत्येकमान्तर्मौहूर्तिकाः, केवलिसमुद्घातः पुनरष्टसामयिकः । उक्तं च प्रज्ञापनायाम्—" वेयणासमुग्घाएणं भंते ! कइ समएणं पन्नत्ते ?। गोयमा ! असंखेज्जसमइए अंतोमुहुत्तिए पण्णत्ते । एवं जाव आहारसमुग्घाए। केवलिसमुग्घाएणं भंते ! कइ समइए पन्नत्ते ?। गोयमा ! अट्ठसमइए पण्णत्ते ।" इति । एतानेव समुद्घातान् गतिषु चिन्तयति-"सग" इत्यादि । मनुष्यगतौ समापि समुद्घाता भवन्ति, मनुष्येषु सर्वभावसंभवात् । सुरगतावाद्याः पञ्च समुद्घाताः, आहारकसमुद्घातकेवलिसमुद्घातयोस्तत्रासंभवात् । पुनरेषु चतुर्दशपूर्वाधिगमज्ञायिकज्ञानदर्शनचारित्रलब्ध्यसंभवात् । निरयगतावाद्याश्चत्वारः समुद्घाताः, तत्र तैजससमुद्घातस्याप्यसंभवात्. तदसंभवश्च नैरयिकाणां तेजोलेश्यालब्धेरभावात् । तिर्यग्गतौ वैक्रियलब्धिमत्संज्ञिपञ्चेन्द्रियपवनवर्जानां शेषजीवानामाद्यास्त्रयः समुद्घाताः, तेषां वैक्रियलब्धेरप्यसंभवात् ॥ २५ ॥

वैक्रियलब्धिमत्संज्ञिपञ्चेन्द्रियपवनयोर्विशेषमाह-

पंचिंदियतिरियाणं, देवाण व होंति पंच सएणीणं ।
वेउव्वियवाऊणं, पढमा चउरो समुग्घाया ॥ २६ ॥

पञ्चेन्द्रियतिरश्चां संज्ञिनां देवानामिव प्रथमाः पञ्च समुद्घाता भवन्ति । पञ्चेन्द्रियतिर्यञ्चेष्वपि संज्ञिषु केषुचिद्वैक्रियतेजोलेश्यालब्धिसंभवात् । वैक्रियलब्धिमतां पुनर्वायूनां वायुकायानां प्रथमा वेदनाकषायमारणवैक्रियरूपाश्चत्वारः समुद्घाताः ॥ २६ ॥ गतं क्षेत्रद्वारम् ।

अधुना स्पर्शनाद्वारमाह-

चउदसविहा वि जीवा, समुग्घाएणं फुसंति सव्वजगं ।
रिउसेढीए व केई, एवं मिच्छा सजोगीया ॥ २७ ॥

चतुर्दशविधा अपि अपर्याप्तपर्याप्तसूक्ष्मैकेन्द्रियाऽऽदिभेदाच्चतुर्दशप्रकारा अपि,जीवाः सर्वं जगत् स्पृशन्ति । कथम् ?,इत्याह-समुद्घातेन मरणसमुद्घातेन । इयमत्र भावना-इह सूक्ष्मैकेन्द्रियाः पर्याप्ता अपर्याप्ताश्च प्रत्येकं सकललोकवर्त्तिनः, ततस्ते स्वस्थानतोऽपि सकललोकस्पर्शिन उपपद्यन्ते,किं पुनर्मारणान्तकसमुद्घाततोगतः ?। बादरापर्याप्तैकेन्द्रियाऽऽदयः स्वस्थानमधिकृत्य प्रत्येकं लोकासंख्येयभागवर्त्तिन एव समुद्घातमधिकृत्य पुनः सकललोकस्पर्शिनोऽपि भवन्ति । तथाहि-समुद्घात इह मरणसमुद्घात उच्यते, मरणसमुद्घातसमुद्गतस्तु जीवः स्वशरीरविष्कम्भबाहल्यं जघन्यतो देर्घ्येणाङ्गुलासंख्येयभागमात्रम्, उत्कर्षेण संख्येयानि योजनानि स्वप्रदेशदण्डं निसृजति । निसृज्य च यत्र स्थानेऽग्रेतनभवे समुत्पत्स्यते, तत्र स्थाने तं स्वप्रदेशदण्डं प्रक्षिपति । तच्चोत्पत्तिस्थानं ऋजुगत्या एकेन समयेन स्वप्रदेशदण्डः प्राप्नोति । विग्रहगत्या तूत्कर्षतश्चतुर्थे समये, यतो मरणसमुद्घातमधिकृत्य नानाजीवापेक्षया बादरापर्याप्तैकेन्द्रियाऽऽदयो द्वादशापि ते प्रत्येकं सर्वेऽपि सर्वं जगत् स्पृशन्तः प्राप्यन्ते इति । (रिउसेढीए व केई इति) केचित्पुनर्जीवाः सूक्ष्मैकेन्द्रियलक्षणा ऋजुश्रेण्या ऋजुगत्या । वाशब्दः पक्षान्तरसूचने । न केवलं समुद्घातेन ऋजुश्रेण्या वा इत्यर्थः सर्वं जगत् स्पृशन्ति । तथाहि-अधोलोकान्तादूर्ध्वलोकान्ते उत्पद्यमानाश्चतुर्दशापि रज्जूः स्पृशन्ति । एवं सर्वास्वपि दिक्षु भावनीयम । ततो नानाजीवापेक्षया ऋजुश्रेण्याऽपि सूक्ष्मैकेन्द्रियाः सकललोकस्पर्शिनः । संप्रति गुणस्थानके स्पर्शनां चिन्तयति-(एवं मिच्छा सजोगीय त्ति) एवं सर्वजगत्स्पर्शितया मिथ्यादृष्टयः सयोगिनश्चावगन्तव्याः तत्र मिथ्यादृशः सूक्ष्मैकेन्द्रियाऽऽदयः, सूक्ष्मैकेन्द्रियाश्च सकललोकस्पर्शिनः, सयोगिकेवलिनः पुनः केवलिसमुद्घातगताश्चतुर्थसमये सर्वलोकस्पर्शिनः प्रागेवोपदर्शिताः ॥ २७ ॥

शेषगुणस्थानकेषु स्पर्शनामाह-

मीसा अजया अट्ठ अरु, बारस सासायणा उ देसजई ।
सग सेसा उ फुसंती, रज्जू खीणा असंखंसं ॥ २८ ॥

मिश्राः सम्यग्मिथ्यादृष्टयः, अयता अविरतसम्यग्दृष्टयः, प्रत्येकमष्टावष्टौ रज्जूः स्पृशन्ति, द्वादश पुनः सास्वादनाः, देशयतयो देशविरताः षट् । शेषा उक्तव्यतिरिक्ताः क्षीणमोहवर्जाः प्रमत्ताऽऽद्याः प्रत्येकं सप्त सप्त रज्जूः स्पृशन्ति । क्षीणाः क्षीणमोहाः पुनरसंख्येयांशं रज्जोरसंख्येयं भागम् ॥ २८ ॥

एनामेव गाथां स्वयमेव भावयति—

सहसारंतियदेवा, नारयणेहेण जंति तइयजुवं ।
निज्जंति अच्चुयं जा, अच्चुयदेवेण इयरसुरा ॥२९॥

इह सहस्रारान्तकाः सहस्रारपर्यवसाना देवा नारकस्नेहेन पूर्वसाङ्गतिकनारकस्नेहेन,तस्य वेदनोपशमनार्थम्, उपलक्षणमेतत्, पूर्ववैरिकस्य नारकस्य वेदनोदीरणार्थं वा, तृतीयां भुवं नरकपृथिवीं, गच्छन्ति । आनताऽऽद्या देवाः पुनरल्पस्नेहाऽऽदिभावाः स्नेहाऽऽदिप्रयोजनेनापि नरकं न गच्छन्तीति सहस्रारान्तग्रहणम् । तथाऽच्युतदेवेन जन्मान्तरस्नेहतस्तद्भवस्नेहतो वा, इतरे सुराः शेषसुरा अच्युतदेवलोकं यावन्नीयन्ते । ततः सम्यग्मिथ्यादृष्टीनामविरतसम्यग्दृष्टीनां च प्रत्येकमष्टौ रज्जुस्पर्शना घटते । इयमत्र भावना-इह यदा सम्यग्मिथ्यादृष्टिर्भवनपत्यादिर्वा, पूर्वसाङ्गतिकेनाच्युतदेवलोकवासिना देवेनाच्युतदेवलोकं स्नेहाय्यते, तदा तस्य षड्रज्जुस्पर्शना भवति,"आ अच्चुय" इति वचनात् । तथा कश्चिदमरः सहस्रारकल्पवासी सम्यग्मिथ्यादृष्टिः पूर्वसाङ्गतिकस्य वेदनोपशमनाय, पूर्ववैरिकस्य वेदनोदीरणाय वा वालुकाप्रभाऽभिधानामपि नरकपृथिवीमुपगच्छति, तदा भवनपतिनिवासस्याधस्तादन्यदपि रज्जूद्वयमधिकं प्राप्यते, इति पूर्वोक्ताः षड् रज्जवो रज्जुद्वयेन सहिता अष्टौ भवन्ति । एवं नानाजीवापेक्षया सम्यग्मिथ्यादृष्टयो अष्टरज्जुस्पर्शकाः प्राप्यन्ते । अथवा-कोऽपि सहस्रारकल्पनिवासी देवः सम्यग्मिथ्यादृष्टिः पूर्वोक्तकारणवशात् तृतीयां नरकभुवं गच्छन् सप्त रज्जूः स्पृशति, स एव सहस्रारदेवो यदा अच्युतदेवेन स्नेहादच्युते देवलोके नीयते, तदा अन्यामप्येकामधिकां रज्जुं स्पृशतीत्यष्टरज्जुस्पर्शना । एवमविरतसम्यग्दृष्टीनामप्यष्टरज्जुस्पर्शना भावनीया । नन्वविरतसम्यग्दृष्टयस्तद्भवे वर्त्तमानाः कालमपि कुर्वन्ति, ततस्तेषामन्यथाऽपि कथं न भावना ।क्रियते ? । उच्यते-अन्यथा तेषामष्टरज्जुस्पर्शनाया असंभवात् । तथाहि-तिर्यङ्मनुष्यो वा

ससम्यक्त्वो द्वितीयाऽऽदिषु नरकपृथिवीषु न गच्छति, नाऽपि ततआगच्छति, ततोऽनुत्तरसुरभवं गच्छतः, ततो वा च्युत्वा मनुष्यभवमागच्छतः सर्वोत्कृष्टा सप्तरज्जुस्पर्शना प्राप्यते, नाधिका क्वाप्यन्यत्र, ततोऽविरतसम्यग्दृष्टयोऽपि मिथ्यादृष्टिवदविशेषेणाष्टरज्जुस्पर्शकाः प्रतिपत्तव्याः, न प्रकारान्तरेण। अपरे पुनराहुः-अविरतसम्यग्दृष्टीनामुत्कर्षतो नवरज्जुस्पर्शना कथमिति चेत् ?। उच्यते-इह तन्मतेन क्षायिकसम्यग्दृष्टयः तृतीयस्यामपि नरकपृथिव्यां गच्छन्ति, ततोऽनुत्तरसुरभवं गच्छतां ततो वा च्युत्वा मनुष्यभवमागच्छतां सप्तरज्जुस्पर्शना। तृतीयस्यां पृथिव्यामुत्पद्यमानानां, ततो वा उद्वृत्य मनुष्यभवमागच्छतां द्विरज्जुस्पर्शनेति सामान्यतोऽविरतसम्यग्दृष्टीनां नवरज्जुस्पर्शना। व्याख्याप्रज्ञप्त्याद्यभिप्रायेण पुनरमीषां द्वादशरज्जुस्पर्शनाऽपि प्राप्यते। तथा हि-अनुत्तरसुरभवं गच्छतां, ततो वा च्युत्वा मनुष्यभवमागच्छतां सप्तरज्जुस्पर्शना। तथा नरतिरश्चामन्यतरोऽविरतसम्यग्दृष्टिः पूर्वबद्धायुः क्षायोपशमिकसम्यक्त्वेन गृहीतेन व्याख्याप्रज्ञप्त्याद्यभिप्रायतः षष्ठनरकपृथिव्यामपि नारकत्वेनोत्पद्यते। ततो वा उद्वृत्य क्षायोपशमिकसम्यक्त्ववानत्र मनुष्येषु मध्ये समुत्पद्यते। ततोऽविरतसम्यग्दृष्टिः षष्ठनरकपृथिवीं गच्छन् पञ्चरज्जूः स्पृशति। ततः सामान्यतोऽविरतसम्यग्दृष्टीनां सर्वसंख्यया द्वादशरज्जुस्पर्शना। सप्तमपृथिव्यां पुनः सम्यक्त्वसहितस्य गमनमागमनं वा प्रक्ष्यामपि निषिद्धं, ततः षष्ठनरकपृथिवीग्रहणम् ॥ २९ ॥

सम्प्रति सास्वादनानां द्वादशरज्जुस्पर्शनां भावयति-

छट्ठाए नेरइओ, सासणभावेण एइ तिरिमणुए ।
लोगंतनिक्खुडेसुं, जे तसनासायणगुणत्था ॥ ३० ॥

षष्ठनरकपृथिव्यां वर्तमानः कश्चिन्नारकः स्वभवान्ते औपशमिकसम्यक्त्वमवाप्य सास्वादनभावं गतः सन् कालं करोति, कालं च कृत्वा तिर्यक्षु मनुष्येषु वा मध्ये समुत्पद्यते, ततस्तस्य पञ्चरज्जुस्पर्शना भवति। इह सप्तमपृथिवीनारकः सास्वादनभावं परित्यज्यैव तिर्यक्षूत्पद्यते, इति षष्ठपृथिवीग्रहणम्। तथा तिर्यग्लोकादपि केचित्तिर्यञ्चो मनुष्या वा सास्वादनगुणस्थाः सास्वादनसम्यग्दृष्टिगुणस्थानवर्तिनः सन्त उपरि लोकान्तनिष्कुटेषु असनाडीपर्यन्तवर्तिलोकान्तप्रदेशेषूत्पद्यन्ते, ततस्तेषां सप्तरज्जुस्पर्शना। ततः सामान्यतः सास्वादनगुणस्थानस्थानां सर्वसंख्यया द्वादशरज्जुस्पर्शना समुत्पद्यते। न ह्येकं जीवमधिकृत्येयं स्पर्शना चिन्त्यते, किं त्वेकं गुणस्थानं, ततो न कश्चिद्दोषः। इह प्रायः सास्वादनभावमापन्नानामधोगतिर्नोपजायते, ततो द्वादशरज्जुस्पर्शना प्रतिपादिता। यदि पुनरधोगतिः सास्वादनानां भवेत् ततोऽधोलोककण्डुकादिष्वपि तेषामुत्पादसंभवाच्चतुर्दशरज्जुस्पर्शनाऽभिधीयते ॥ ३० ॥

सम्प्रत्यपूर्वकरणाऽऽदीनां स्पर्शनामभिधित्सुराह-

उवसामग उवसंता, सव्वत्थे अप्पमत्तविरया य ।
गच्छंति सिद्धगईए, पुंवेसजया उ वारसमे ॥ ३१ ॥

उपशमका उपशमश्रेण्याऽऽरूढा अपूर्वकरणानिवृत्तिबादरसूक्ष्मसंपरायाः, उपशान्ता उपशान्तमोहाः, तथा अप्रमत्तविरता अप्रमत्तसंयताः, चशब्दात्प्रमत्तसंयताश्च, सर्वार्थे सर्वार्थसिद्धे महाविमाने, ऋजुगत्या, गच्छन्ति उत्पद्यन्ते। ततस्ते सप्तरज्जुस्पर्शिनः, इह क्षपकश्रेण्याऽऽरूढा अपूर्वकरणाऽऽदयो न म्रियन्ते, न च मारणसमुद्घातमारभन्ते, ततस्तेषामसंख्येयभागमात्रैव स्पर्शना घटते, नाधिका। अत एव क्षीणमोहस्यासंख्येयभागमात्रस्पर्शना प्रागभ्यधायि, ततोऽपूर्वकरणाऽऽदीनामुपशमश्रेणिमधिकृत्य सप्तरज्जुस्पर्शना प्रत्यवादि। पर आह-ननु मनुष्यभवायुषः क्षये, परभवायुष उदये परलोकगमनं, तदानीं चाऽविरतता, नोपशमकत्वादि, तत्कथमपूर्वकरणाऽऽदीनां सप्तरज्जुस्पर्शनेति ?। नैष दोषः। इह द्विविधा गतिः-कन्दुकगतिः, इलिकागतिश्च। तत्र कन्दुकस्येव गतिः कन्दुकगतिः। किमुक्तं भवति ?-यथा कन्दुकः स्वप्रदेशसंपिण्डितः ऊर्द्धं गच्छति, तथा जीवोऽपि कश्चित्परभवायुष्कमुदये परलोकं गच्छन् स्वप्रदेशानेकत्र संपिण्ड्य गच्छति। तथा इलिकाया इव गतिरिलिकागतिः, यथा इलिका पुच्छदेशमपरित्यजन्ती मुखेनाग्रेतनं स्थानं शरीरप्रसारणेन संस्पृश्य ततः पुच्छं संहरति, एवं जीवोऽपि कश्चित्स्वभवान्तकाले स्वप्रदेशैरुत्पत्तिस्थानं संस्पृश्य परभवायुःप्रथमसमये शरीरं परित्यजति। तत्र इलिकागतिमधिकृत्यापूर्वकरणाऽऽदीनां सप्तरज्जुस्पर्शना न विहन्यते। तथा ऋजुगत्यैव (पुंवेसजया इति) अत्र पुंग्रहणेन मनुष्यग्रहणम्। ततोऽयमर्थः-मनुष्यरूपा देशयता देशविरता द्वादशेऽच्युतनिधाने देवलोके गच्छन्ति उत्पद्यन्ते, ततस्तेषां षट् रज्जुस्पर्शना, तिर्यग्लोकमध्यादच्युतदेवलोकस्य षट्रज्जुमानत्वात्। तदेवमुक्तं स्पर्शनाद्वारम् ॥ ३१ ॥ पं० सं० २ द्वार। (एषां भवस्थितिकालः 'भवट्ठिइकाल' शब्दे वक्ष्यते। गुणस्थानविभागेन कालमानं 'गुणट्ठाण' शब्दे तृतीयभागे ए१५ पृष्ठे गतम्)

पुढवी य आऊ अगणी य वाऊ,
तणरुक्खबीया य तसा य पाणा ।
जे अंडजा जे य जराउपाणा,
संसेयजा जे रसजाणिहाणा ॥ १ ॥

पृथिवीकायिकाः सत्त्वाः, चकारः स्वगतभेदसंसूचनार्थः। सचायं भेदः-पृथिवीकायिकाः सूक्ष्मा बादराश्च, ते च प्रत्येकं पर्याप्तकापर्याप्तकभेदेन द्विधा, एवमप्कायिका अपि। तथाऽग्निकायिका वायुकायिकाश्च ज्ञातव्याः। वनस्पतिकायिकान् भेदेन दर्शयति-तृणानि कुशाऽऽदीनि, वृक्षाश्चाश्वत्थाऽऽदयो, बीजानि शाल्यादीनि। एवं वल्लीगुल्माऽऽदयोऽपि वनस्पतिभेदा ज्ञातव्याः। अश्नन्तीति त्रसाः, द्वीन्द्रियाऽऽदयः प्राणाः प्राणिनः। ये चाण्डाज्जाता अण्डजाः-शकुनिसरीसृपाऽऽदयः, ये च जरायुजा जम्बालवेष्टिताः समुत्पद्यन्ते, ते च गोमहिष्यजाऽविकमनुष्याऽऽदयः। तथा संस्वेदाज्जाताः संस्वेदजाः-यूकामत्कुणकृम्यादयः। ये च रसजानिधानाः दधिसौवीरकाऽऽदिषु कृतपद्मसन्निभा इति ॥ १ ॥ सूत्र० १ श्रु० ७ अ०।

द्वात्रिंशद्भेदा जीवा यथा-

एगविह-दुविह-तिविहा-चउहापंचविहछव्विहा जीवा।
चेयण तस इयरेहिं, वेयगकरणेकएहिं ॥ २ ॥

एकविधद्विविधत्रिविधचतुर्विधपञ्चविधषड्विधा इति। एकाविधा विधानं येषां ते एकविधाः, एवं सर्वत्र। एकविधाश्च द्विविधाश्च त्रिविधाश्च चतुर्धा च पञ्चविधाश्च षड्विधाः-एकविध-

द्विविधत्रिविधचतुर्धापञ्चविधषड्विधाः । दीर्घता पुनः प्राकृतप्रभवा । जीवाः प्राणिनः सर्वेऽपि संसारिकसत्त्वाः "यथोद्देशं तथा निर्देशः" इति न्यायात्पुनर्निर्देशमाह-चेतना असेतरैः, वेदाश्च, गतयश्च, करणानि च, कायाश्च वेदगतिकरणकायास्तैः वेदगतिकरणकायैः करणभूतैरेते एकविधाऽऽदयो जीवास्तदादयो भवन्तीति गम्यते । तत्रैकविधाश्चेतनामाश्रित्य यतः सर्वेऽपि संसारिणो, मुक्ताश्च न व्यभिचरन्ति, एकेन्द्रियवनस्पत्यादीनां तथैवोपलब्धेः । तथा हि-

" कालफलदाणआहा-रगहणदोहलयरोगपडियारे ।
नाऊण जाण सव्वे, नारि व्व सचेयणा तरुणो ॥१॥ "

फलस्य दानं फलदानं,काले फलदानं कालफलदानम् । आहारस्य ग्रहणमाहारग्रहणम्,कालफलदानं च आहारग्रहणं च दोहदकश्च रोगश्च प्रतीकारश्च कालफलदानाहारग्रहणदोहदकरोगप्रतीकारास्तान्, किं ?, ज्ञात्वा अवबुद्ध्य, जानीहि सर्वेऽपि नारीवत्सचेतनास्तरवो वृक्षाः । यथाहि नारी कालफलदानाऽऽहारग्रहणप्रवणा दोहदाऽऽदिधर्मयुक्ता सती सचेतना, एवं वृक्षा अपि तद्धर्मयुक्तत्वेन सचेतना इति गाथार्थः ॥ १ ॥

द्वीन्द्रियाऽऽदीनां पुनः स्पष्टैव सा, गत्यादिविशिष्टचेष्टावत्त्वात्तेषाम् । । द्विविधाः पुनस्त्रसस्थावरभेदाभ्याम् । ते त्रसा द्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियपञ्चेन्द्रियाः, स्थावराः पृथिव्युदकतेजोवायुवनस्पतिभेदात्पञ्चधा । त्रैविध्यं स्त्रीपुंनपुंसकत्वादागतम् । चतुर्धा चातुर्विध्यं नारकतिर्यङ्नरामरापेक्षया । पञ्चविधाः पुनरिन्द्रियाश्रिताः । षड्विधा पृथिव्यप्तेजोवायुवनस्पतित्रसकायभेदादिति गाथार्थः । एकस्मादारभ्य यावता द्विधास्तावत्प्रतिपादितम् ॥ २ ॥

इदानीं तेषामेव नवविधत्वमाह-

पुढवी आऊ तेऊ, वाउ वणस्सइ तहेव बेइंदी ।
तेइंदिय-चउरिंदिय-पंचिंदियभेयओ नवहा ॥ ३ ॥

सुगमा चेयम् ।

पुनश्चतुर्दशविधत्वमाह-

एगिंदिय सुहुमियरा, सन्नियर पणिंदिया य मवितिचऊ ।
पज्जत्तापज्जत्तग-भेएणं चउदस गामा ॥ ४ ॥

एकेन्द्रियाः पृथिव्यप्तेजोवायुवनस्पतयः, ते च सूक्ष्मेतराः । तत्र सूक्ष्माः सूक्ष्मनामकर्मोदयाः, सर्वलोकव्यापिनः सर्वथा निरतिशयिनामदृश्याः, बादराः पुनर्व्यवहारानुगाः प्रायशस्त्वनाश्रयन्तवर्त्तिनः । तथा संज्ञीतराः पञ्चेन्द्रियाः । तत्र संज्ञिनो मनोविज्ञानयुक्ता देवनारकगर्भजतिर्यङ्नराः । इतरा पुनरसंज्ञिनो मनोलब्धिविकलाः समूर्च्छजाः पञ्चेन्द्रियाः, इत्येते चत्वारोऽपि सह द्वित्रिचतुर्भिर्वर्त्तन्त इति सद्वित्रिचत्वारः,ततः सप्तापि पर्याप्तकापर्याप्तकभेदाच्चतुर्दश भेदा जायन्त इति गाथार्थः ॥४॥

पुनर्द्वात्रिंशद्विधत्वमाह-

पुढविदगअगणिमारुय-वणसयणंता पणिंदिया चउहा ।
वणपत्तेया विगला, दुविहा सव्वे वि बत्तीसं ॥५॥

पृथिव्युदकाग्निमारुतवनस्पत्यनन्ताः । समासः पुनरत्र सुकर एव। पञ्चेन्द्रियाश्च चतुर्धा चतुर्भेदाः षट्चतुष्कमीलनाच्चतुर्विंशतिर्भवन्ति । तत्र पृथिवीकायः सूक्ष्मबादरभेदतो द्विधा,पुनरेकैकपर्याप्तकभेदतश्चतुर्धा भवति । एवमुदकाऽऽदिष्वप्यायोज्यम् । पञ्चेन्द्रियाः पुनः संज्ञ्यसंज्ञिभेदतो द्विधा । पुनरेकैकाः पर्याप्तकभेदतो नियमानाश्चतुर्धा भवति । वनस्पतिप्रत्येकाः पदावयवे पदसमुदायोपचारात्, पूर्वापरनिपातात्च प्रत्येकवनस्पतयः, विकला विकलेन्द्रियाः, तत्र विकलान्यपरिपूर्णानि इन्द्रियाणि येषां ते विकलेन्द्रियाः-द्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियाः, किंविधाः?, द्विविधाः पर्याप्तकापर्याप्तकभेदाः,तथा चतुर्द्वित्रिकमीलनादष्टौ भवन्ति, पुनश्चतुर्विंशतिमीलनाच्च सर्वेऽपि द्वात्रिंशद्विधा भवन्ति, इति गम्यत इति गाथार्थः ॥५॥ दर्श० ४ तत्त्व ।

त्रिषष्ट्यधिकपञ्चशतभेदा जीवानाम्-

अम्मापिउणो सरिसा, सव्वे वि खमंतु मे जीवा । (६०)

(अम्मापिउणो सरिस त्ति) मातापितृसमानाः, यथा मातापित्रोरुपरि निष्कृत्रिमस्नेहो भवति, तद्वद् मम सर्वेऽपि जीवाः पृथिव्यप्तेजोवायुसाधारणवनस्पतयः सूक्ष्मबादरपर्याप्तापर्याप्तभेदेन चतुर्विधाः, सर्वमीलने विंशतिधाः, प्रत्येकवनस्पतिद्वित्रिचतुरिन्द्रियाः पर्याप्तापर्याप्तभेदेनाष्टधाः, तिर्यक्पञ्चेन्द्रिया जलचरस्थलचरखेचरपरिसर्पभुजपरिसर्पाः पञ्चापि संज्ञ्यसंज्ञिपर्याप्तापर्याप्ताऽऽदीनां विंशतिसंख्याः,नारकाः पृथिवीभेदेन सप्त, पर्याप्तापर्याप्तभेदेन चतुर्दशधाः तथा कर्म्माकर्म्मभूमिजान्तरद्वीपमनुजाः पञ्चदशत्रिंशत्पञ्चाशत्संख्याः, पर्याप्तापर्याप्तभेदतो द्विरुत्तरशतत्रयमानाः असंङ्क्यमनुजा एतद्द्वीपान्तरादिभवा अपर्याप्ता एकोत्तरशतमानाः । भवनपतयो दशधाः पर्याप्तापर्याप्तरूपतो विंशतिमानाः व्यन्तराः षोडशधाः पर्याप्तापर्याप्तत्वेन द्वात्रिंशद् भेदाः। ज्योतिष्का अपि दश पर्याप्ताऽऽदिना विंशतिधाः। ज्योतिष्काः पञ्च गतिस्थितिभेदतो दश पर्याप्तापर्याप्तत्वादिना विंशतिधाः वैमानिका द्वादश, नव ग्रैवेयकाः पञ्चानुत्तरा अपि पर्याप्तापर्याप्तयोगतः पञ्चाशन्मानाः किल्बिषिकास्त्रिविधाः पर्याप्ताऽऽदिना षोढाः। लोकान्तिका नव पूर्ववदष्टादशधाः । तदेवं सर्वजीवाख्यिषष्ट्यधिकपञ्चशतमानाः, क्षमन्तु क्षमां कुर्वन्तु मे मम एते समस्ता अपि जीवा इत्यर्थः । संथा० ।

नारकाऽऽदिजीवानाश्रित्य स्थित्यादि-

ठिइउस्सासाऽऽहारे, किं वाऽऽहारेइ सव्वओ वा वि ।
कइ भागं सव्वाणि य, कीस व भुज्जो परिणमंति ? ॥१॥

(' आहार ' शब्दे द्वितीयभागे ५०१ पृष्ठे आहारवक्तव्यता)

णेरइयाणं भंते ! पुव्वाहारिया पोग्गला परिणया ? १, आहारिया आहारिज्जमाणा पोग्गला परिणया ? २, अणाहारिया आहारिज्जेस्समाणा पोग्गला परिणया ? ३, अणाहारिया अणाहारिज्जस्समाणा पोग्गला परिणया ? ४ । गोयमा ! णेरइयाणं पुव्वाहारिया पोग्गला परिणया १, आहारिया आहारिज्जस्समाणा पोग्गला परिणया, परिणमंति य २, अणाहारिया आहारिज्जस्समाणा पोग्गला णो परिणया, परिणमिस्संति ३, अणाहारिया अणाहारिज्जस्समाणा पोग्गला णो परिणया, णो परिणमिस्संति ४ । णेरइयाणं भंते ! पुव्वाहारिया पोग्गला चिया, पुच्छा ? । जहा परिणया,तहा चिया वि, एवं चिया, उवचिया, उदीरिया, वेइया, णिज्जिण्णा ॥

गाहा-

"परिणत चिया उवचिया, उदीरिता वेइया य णिज्जिण्णा ।
एक्किक्कम्मि पदम्मी, चउव्विहा पोग्गला होंति" ॥१॥

(पुव्वाहारिय त्ति) ये पूर्वमाहृताः पूर्वकाले एकीकृताः, सङ्गृहीता इति यावत् । अन्यवहृता वा; (पोग्गल त्ति) स्कन्धाः । (परिणय त्ति) ते परिणताः, पूर्वकाले शरीरेण सह संपृक्ताः, परिणतिं गता इत्यर्थः । इति प्रथमः प्रश्नः १ । इह च सर्वत्र प्रश्नत्वं काकुपाठादवगम्यते । तथा-(आहारिय त्ति) पूर्वकाले आहृताः संगृहीताः, अन्यवहृता वा; (आहारिज्जमाण त्ति) ये च वर्त्तमानकाले आह्रियमाणाः संगृह्यमाणाः, अन्यवह्रियमाणा वा पुद्गलाः (परिणय त्ति) ते परिणताः । इति द्वितीयः २ । तथा-(अणाहारिय त्ति) येऽतीतकालेऽनाहृताः । (आहारिज्जस्समाण त्ति) ये चानागते काले आहरिष्यमाणाः पुद्गलास्ते परिणताः । इति तृतीयः ३ । तथा-" अणाहारिआ अणाहारिज्जस्समाण " इत्यादि । अतीतानागताऽऽहरणक्रियानिषेधाच्चतुर्थः ४ । इह च यद्यपि चत्वार एव प्रश्ना उक्ताः, तथाऽन्येते त्रिषष्टिः समभवन्ति । यतः पूर्वाहृता आह्रियमाणा आहरिष्यमाणाः, अनाहृता अनाह्रियमाणा अनाहरिष्यमाणाश्चेति षट् पदानीह सूचितानि । तेषु च एकैकपदाऽऽश्रयेण षण्मिकयोगे पञ्चदश, त्रिकयोगे विंशतिः, चतुष्कयोगे पञ्चदश, पञ्चकयोगे षट्, षण्मयोगे एक इति । अत्रोत्तरमाह-"गोयम" इत्यादि व्यक्तम् । नवरं ये पूर्वमाहृतास्ते पूर्वकाल एव परिणताः, ग्रहणानन्तरमेव परिणामभावात् १ । ये पुनराहृता आह्रियमाणाश्च ते परिणताः, आहृतानां परिणामभावादेव परिणमन्ति च, आह्रियमाणानां परिणामभावस्य वर्तमानत्वादिति २ । वृत्तिकृता तु द्वितीयः प्रश्नोत्तरविकल्प एवंविधो दृष्टः, यदुत-आहृता आहरिष्यमाणाः पुद्गलाः परिणताः परिणंस्यन्ते च, यतोऽयं तेनैव व्याख्यातः-यदुत ये पुनराहृता आहरिष्यन्ते, पुनस्तेषां केचित्परिणताः, अपरिणताश्च ते सम्पृक्ताः शरीरेण सह । ये तु न तावत् संपृच्यन्ते, कालान्तरे तु संपृच्यन्ते, ते परिणंस्यन्त इति । ये पुनरनाहृता आहरिष्यन्ते, पुनस्ते नो परिणताः, अनाहृतानां संपर्कभावेन परिणामाभावात् । यस्मात्ते आहरिष्यन्ते, ततः परिणंस्यन्ते, आहृतस्यावश्यं परिणामभावादिति ३ । चतुर्थस्त्वतीतभविष्यदाहरणक्रियाया अभावेन परिणामाभावादवसेय इति । एतदनुसारेणैव प्राग्दर्शितविकल्पानामुत्तरसूत्राणि वाच्यानीति । अथ शरीरसंपर्कलक्षणपरिणामात् पुद्गलानां चयाऽऽदयो भवन्तीति तद्दर्शनार्थं प्रश्नयन्नाह-"नेरइयाणं"इत्यादि । चयाऽऽदिसूत्राणि परिणामसूत्रसमानीतिकृत्वा अतिदेशतोऽधीतानीति । तथाहि-"जहा परिणया तहा चिया वि" इत्यादि । इह च पुस्तकेषु वाचनाभेदो दृश्यते, तत्र न संमोहः कार्यः, सर्वत्राभिधेयस्य तुल्यत्वात् । केवलं परिणतसूत्रानुसारेण प्रश्नसूत्राणि व्याकरणानि च मतिमताऽध्येयानीति । तत्र चिताः शरीरे चयं गताः । उपचिताः पुनर्बहुशः प्रदेशसामीप्येन शरीरे चिता एवेति । उदीरितास्तु स्वभावतोऽनुदितान् पुद्गलान् उदयप्राप्ते कर्मदलिके करणविशेषेण प्रक्षिप्य यान् वेदयते । उदीरणालक्षणं चेदम-"जं करणेणाकड्ढिय, उदए दिज्जइ उदीरणा एसा ।" तथा वेदिताः स्वेन रसविपाकेन प्रक्षिप्तसमयमनुभूयमाना अपरिसमाप्ताः शेषानुभावा इति । तथा निर्जीर्णाः कालान्तरेणानुसमयमशेषतद्विपाकदानियुक्ता इति । " गाह त्ति " परिणताऽऽदिसूत्राणां संग्रहणाय गाथा भवति । सा चेयम्- " परिणय " इत्यादि । व्याख्यातार्था । नवरम् एकैकस्मिन् पदे परिणतचितोपचिताऽऽदौ चतुर्विधाः-आहृताः १, आहृता आह्रियमाणाश्च २, अनाहृता आहरिष्यमाणाश्च ३, अनाहृता अनाहरिष्यमाणाश्च ४ । इत्येवं चतूरूपाः पुद्गला भवन्ति, प्रश्ननिर्वचनविषयाः स्युरिति ।

पुद्गला निरूप्यन्ते-

णेरइयाणं भंते ! कतिविहा पोग्गला णिज्जंति ?। गोयमा ! कम्मदव्ववग्गणमहिकिच्च दुविहा पोग्गला णिज्जंति । तं जहा-अणू चेव, बायरा चेव १ । णेरइयाणं भंते ! कतिविहा पोग्गला चिज्जंति ?। गोयमा ! आहारदव्ववग्गणमहिकिच्च दुविहा पोग्गला चिज्जंति । तं जहा-अणू चेव, बायरा चेव २ । एवं उवचिज्जंति ३ । णेरइयाणं भंते ! कतिविहा पोग्गला उदीरंति ?। गोयमा ! कम्मदव्ववग्गणमहिकिच्च दुविहा पोग्गला उदीरंति । तं जहा-अणू चेव, बायरा चेव ४ । सेसा वि एवं चेव भाणियव्वा । वेदंति ५, णिज्जरंति ६, उयट्टिंसु ७, उयट्टंति ८, उयट्टिस्संति ९, संकमिंसु १०, संकामंति ११, संकामिस्संति १२, निहात्तसु १३, निहत्तति १४, निहत्तिस्संति १५, निकाइंसु १६, निकायंति १७, निकाइस्संति १८ ।

सव्वसु वि कम्मदव्वमग्गणमहिकिच्च गाहा-

"णेदिय चिता उवचिता, उदीरिता वेदिया य णिज्जिण्णा ।
उव्वट्टणसंकमण-णिहत्तणिकायणे तिविहकाले" ॥१॥

"णेरइयाणं भंते ! कइविहा पोग्गला भिज्जंति" इत्यादि व्यक्तम्, नवरम् (भिज्जंति त्ति) तीव्रमन्दमध्यमतयाऽनुभागभेदेन भेदवन्तो भवन्ति, उद्वर्त्तनकरणापवर्त्तनकरणाभ्यां मन्दरसास्तीव्ररसाः, तीव्ररसास्तु मन्दरसा जायन्तीत्यर्थः । उत्तरम्-(कम्मदव्ववग्गणमहिकिच्च त्ति) समानजातीयद्रव्याणां राशिर्द्रव्यवर्गणा, सा चौदारिकाऽऽदिद्रव्याणामप्यस्तीत्यत आह-कर्मरूपा द्रव्यवर्गणा, कर्मद्रव्याणां वा वर्गणा कर्मद्रव्यवर्गणा,तामधिकृत्य तामाश्रित्य, कर्मद्रव्यवर्गणास्तका इत्यर्थः । कर्मद्रव्याणामेव च मन्देतरानुभावचिन्ताऽस्ति, न द्रव्यान्तराणामितिकृत्वा कर्मद्रव्यवर्गणामधिकृत्येत्युक्तम् । (अणू चेव बायरा चेव त्ति) चैवशब्दः समुच्चयार्थः । ततश्च अणवश्च बादराश्च, सूक्ष्माश्च स्थूलाश्चेत्यर्थः । सूक्ष्मत्वं स्थूलत्वं चैषां कर्मद्रव्यापेक्षयैवावगन्तव्यं, नान्यापेक्षया, यत औदारिकाऽऽदिद्रव्याणां मध्ये कर्मद्रव्याण्येव सूक्ष्माणीति । एवं चयोपचयोदीरणावेदनानिर्जराः शब्दार्थभेदेन वाच्याः, किं तु चयसूत्रे उपचयसूत्रे च "आहारदव्ववग्गणमहिकिच्च"इति यदुक्तं,तत्रायमभिप्रायः-शरीरमाश्रित्य चयोपचयौ प्राग्व्याख्यातौ, तौ चाऽऽहारणाऽऽद्येभ्य एव भवतो नान्यतोऽत आहारद्रव्यवर्गणामधिकृत्येत्युक्तमिति । उदीरणाऽऽदयस्तु कर्मद्रव्याणामेव भवन्त्यतस्तत्सूत्रेषूक्तं कर्मद्रव्यवर्गणमधिकृत्येति । (उयट्टिंसु त्ति) अपवर्त्तितवन्तः, ह्रस्वापवर्तनं कर्मणां स्थित्यादेरध्यवसायविशेषेण हीनताकरणम्, अपवर्त्त-

नस्य चोपलक्षणत्वादुद्वर्त्तनमपीह द्रष्टव्यम्, तच्च स्थित्यादेर्वृद्धिकरणस्वरूपम्। (संकमिंसु त्ति) संक्रमितवन्तः, तत्र संक्रमणं मूलप्रकृत्यभिन्नानामुत्तरप्रकृतीनामध्यवसायविशेषेण परस्परं संचारणम्।

तथा चाह—

" मूलप्रकृत्यभिन्नाः, संक्रमयति गुण उत्तराः प्रकृतीः।
न त्वात्माऽऽमूर्त्तत्वा-दध्यवसायप्रयोगेण ॥ १ ॥ "

अपरस्त्वाह-

"मोत्तूण आउयं खलु, दंसणमोहं चरित्तमोहं च।
सेसाणं पगईणं, उत्तरविहिसंकमो भणिओ ॥ १ ॥ "

एतदेव निर्दिश्यते-यथा कस्यचित्सद्वेद्यमनुभवतोऽशुभकर्मपरिणतिरेवंविधा जाता, येन तदेव सद्वेद्यमसद्वेद्यतया संक्रामतीति। एवमन्यत्रापि योज्यम्। (निहत्तिंसु त्ति) निधत्तान् कृतवन्तः, इह च विश्लिष्टानां परस्परतः पुद्गलानां निचयं कृत्वा धारणं रूढिशब्दत्वेन निधत्तमुच्यते। उद्वर्त्तनापवर्त्तनव्यतिरिक्तकरणानामविषयत्वेन कर्मणोऽवस्थानमिति। (निकाइंसु त्ति) निकाचितवन्तो, नितरां बद्धवन्त इत्यर्थः। निकाचनं च तेषामेव पुद्गलानां परस्परविश्लिष्टानामेकीकरणमन्योन्यावगाहिता अग्निप्रतप्तप्रतिहन्यमानसूचीकलापस्येव सकलकरणानामविषयतया कर्मणो व्यवस्थापनमिति यावत्। " भिज्जंति " इत्यादिपदानां संग्रहणी यथा-" भेदिय " इत्यादिगाथा गतार्था। नवरम् अपवर्त्तनसंक्रमनिधत्तनिकाचनपदेषु त्रिविधः कालो निर्देष्टव्यः, अतीतवर्त्तमानानागतकालनिर्देशेन तानि वाच्यानीत्यर्थः। इह चापवर्त्तनाऽऽदीनामिव नेदाऽऽदीनामपि त्रिकालता युक्ता, न्यायस्य समानत्वात्। केवलमविवक्षणान्न तन्निर्देशः सूत्रे कृत इति।

णेरइयाणं भंते ! जे पोग्गला तेयाकम्मत्ताए गिएहंति, ते किं तीतकालसमए गिएहंति, पडुप्पन्नकालसमए गिएहंति, अणागयकालसमए गिएहंति ? । गोयमा ! णोऽतीतकालसमए गिएहंति, पडुप्पन्नकालसमए गिएहंति, णो अणागयकालसमए गिएहंति ? । णेरइयाणं भंते ! जे पोग्गला तेयाकम्मत्ताए गहिए उदीरेंति, ते किं तीतकालसमयगहिए पोग्गले उदीरेंति, पडुप्पन्नकालसमयविप्पमाणे पोग्गले उदीरेंति, गहणसमयपुरक्खडे पोग्गले उदीरेंति ? । गोयमा ! तीतकालसमयगहिए पोग्गले उदीरेंति, णो पडुप्पन्नकालसमयविप्पमाणे पोग्गले उदीरेंति, णो गहणसमयपुरक्खडे पोग्गले उदीरेंति २। एवं वेदेंति ३, णिज्जरेंति ४।

" नेरइयाणं " इत्यादि व्यक्तम्। नवरं (तेयाकम्मत्ताए त्ति) तैजसकार्म्मणशरीरतया, तद्रूपतयेत्यर्थः। (अतीतकालसमए त्ति) कालरूपः समयो, न तु समाचाररूपः कालोऽपि समयरूपः, न तु वर्णाऽऽदिस्वरूप इति परस्परेण विशेषणात्कालसमयः, अतीतः कालसमयः-अतीतकालस्य चोत्सर्पिण्यादेः समयः परमनिकृष्टोंऽशोऽतीतकालसमयः, तत्र। (पडुप्पन्न त्ति) प्रत्युत्पन्नो वर्त्तमानो, नोऽतीतकालेत्यादौ अतीतानागतकालविषयग्रहणप्रतिषेधः, विषयातीतत्वं च तयोर्विनष्टानुत्पन्नत्वेनासत्त्वादिति, प्रत्युत्पन्नत्वेऽप्यभिमुखान् गृह्णाति, नान्यान्। (गहणसमयपुरक्खडे त्ति) ग्रहणसमयः पुरस्कृतो वर्त्तमानसमयस्य पुरोवर्त्ती येषां ते ग्रहणसमयपुरस्कृताः। प्राकृतत्वादेवं निर्देशः। अन्यथा पुरस्कृतग्रहणसमया इति स्यात्, ग्रहीष्यमाणा इत्यर्थः। उदीरणा च पूर्वकालगृहीतानामेव भवति, ग्रहणपूर्वकत्वादुदीरणायाः। अत एवोक्तम्-अतीतकालसमयगृहीतानुदीरयन्तीति गृह्यमाणानां ग्रहीष्यमाणानां चागृहीतत्वादुदीरणाभावः। तत उक्तम्-" नो पडुप्पन्न " इत्यादि। वेदनानिर्जरासूत्रयोरप्येवमेवोपपत्तिरिति।

णेरइयाणं भंते ! जीवाओ किं चलियं कम्मं बंधंति, अचलियं कम्मं बंधंति ? । गोयमा ! णो चलियं कम्मं बंधंति, अचलियं कम्मं बंधंति ? । णेरइयाणं भंते ! जीवाओ किं चलियं कम्मं उदीरेंति, अचलियं कम्मं उदीरेंति ? । गोयमा ! णो चलियं कम्मं उदीरेंति, अचलियं कम्मं उदीरेंति २। एवं वेदेंति ३। उवट्टेंति ४। संकामेंति ५। निहत्तेंति ६। णिकाएंति ७। सव्वेसु अचलियं णो चलियं। णेरइयाणं भंते ! जीवाओ किं चलियं कम्मं णिज्जरेंति, अचलियं कम्मं णिज्जरेंति ? । गोयमा ! चलियं कम्मं णिज्जरेंति, णो अचलियं कम्मं णिज्जरेंति ।८।

गाहा-

बंधोदयवेदोय-ट्टसंकमणणिहत्तणिकाएसुं।
अचलियं कम्मं तु भवे, चलियं जीवाउ णिज्जरए ॥१॥

" नेरइयाणं " इत्यादि व्यक्ता च। नवरम् (जीवाओ किं चलियं ति) जीवप्रदेशेभ्यश्चलितं, तेष्वनवस्थानशीलं, तदितरत्वचलितं, तदेव बध्नाति। यदाह-" कृत्स्नैर्देशैः स्वकदेशस्थं रागाऽऽदिपरिणतो योग्यम्। बध्नाति योगहेतोः, कर्मस्नेहाक्त इव च मलम् ॥ १ ॥ " एवमुदीरणावेदनापवर्त्तनासंक्रमणनिधत्तनिकाचनानि भाव्यानि। निर्जरा तु पुद्गलानां निरनुभावीकृतानामात्मप्रदेशेभ्यः शातनम्, सा च नियमाच्चलितस्य कर्मणो, नाचलितस्येति। इह संग्रहणी गाथा-" बंधोदय " इत्यादि भावितार्था, केवलमुदयशब्देनोदीरणा गृहीतेति। उक्ता नारकवक्तव्यता। भ० १ श० १ उ०।

अथ असुरकुमारवक्तव्यतामाह-

असुरकुमाराणं भंते ! पुव्वाहारिया पोग्गला परिणया ?, असुरकुमारजीवलावेणं जहा णेरइयाणं० जाव चलियं कम्मं णिज्जरेंति। भ० १ श० १ उ०॥

एवं यावत्स्तनितकुमाराणां, पृथिवीकायिकानां यावद् वनस्पतिकायिकानां यथा नैरयिकाणां यावदचलितं कर्म निर्जरयन्ति। (द्वीन्द्रियाणां स्थित्याहारौ ' ठिई ' शब्दे; तथा ' आहार ' शब्दे द्वितीयभागे ७०५ पृष्ठे द्रष्टव्यौ)

एएसि णं भंते ! पोग्गलाणं अणासाइज्जमाणाणं अफासाइज्जमाणाण य कयरे, कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ? । गोयमा ! सव्वत्थोवा पोग्गला अणासाइज्जमाणा, आसाइज्जमाणा अणंतगुणा। बेइंदियाणं भंते ! पोग्गला आसाइज्जमाणा [illegible]हंति, तेणं तेसिं पोग्गला कीसत्ताए भुज्जो भुज्जो परिणमंति ? । गोय-

मा ! जिब्भिंदियफासिंदियवेमायाए नुज्जो नुज्जो परिणमंति । वेइंदियाणं भंते ! पुव्वाहारिया पोग्गला परिणया ?। तहेव० जाव चलियं कम्मं णिज्जरेंति ॥

(अणासाइज्जमाणाणं ति) रसनेन्द्रियतः । (अफासाइज्जमाणाणं ति) स्पर्शनेन्द्रियतः । ' कयरे ' इत्यादि यत्पदं तदेव दृश्यम्-(कयर कयरेहिंतो अप्पा वा, बहुया वा, तुल्ला वा, विसेसाहिया व त्ति) व्यक्तं च । " सव्वत्थोवा पोग्गला अणासापज्जमाणा " इत्यादि । ये अनास्वाद्यमानाः केवलं रसनेन्द्रियविषयास्ते स्तोकाः, अस्पृश्यमानानामनन्तनागवर्त्तिन इत्यर्थः । ये त्वस्पृश्यमानाः केवलं स्पर्शनविषयास्तेऽनन्तगुणाः रसनेन्द्रियविषयेभ्यः सकाशादिति ।

तेइंदियचउरिंदियाणं णाणत्तं ठिईए०जाव अणेगाइं च णं भागसहस्साइं अणाघाइज्जमाणाइं, अणासाइज्जमाणाइं, अफासाइज्जमाणाइं विद्धंसमावज्जंति । एएसि णं भंते ! पोग्गलाणं अणाघाइज्जमाणाणं,अणासाइज्जमाणाणं, अफासाइज्जमाणाण य पुच्छा । गोयमा ! सव्वत्थोवा पोग्गला अणाघाइज्जमाणा,अणासाइज्जमाणा अणंतगुणा, अफासाइज्जमाणा अणंतगुणा । तेइंदियाणं घाणेंदियजिब्भिंदियफासिंदियवेमायत्ताए नुज्जो नुज्जो परिणमंति । चउरिंदियाणं चक्खिंदियघाणिंदियजिब्भिंदियफासिंदियत्ताए भुज्जो भुज्जो परिणमंति ।

(तेइंदियचउरिंदियाणं नाणत्तं ठिईए त्ति) तच्चेदम्-" जहन्नेणं अंतोमुहुत्तं, उक्कोसेणं तेइंदियाणं एगूणं पन्नासं राइंदियाइं, चउरिंदियाणं छम्मासा । " तथा आहारेऽपि नानात्वम् । तत्र च " तेइंदियाणं भंते ! जे पोग्गले आहारत्ताए गेण्हंति " इत्यत आरभ्य तावत् सूत्रं वाच्यं यावत् " अणेगाइं च णं भागसहस्साइं अणाघाइज्जमाणाइं" इत्यादि । इह च द्वीन्द्रियसूत्रापेक्षयाऽनाघ्रायमाणानीति, अतिरिक्तमतो नानात्वम् । एवमल्पबहुत्वसूत्रे परिणामसूत्रे च । चतुरिन्द्रियसूत्रेषु तु परिणामसूत्रे "चक्खिंदियत्ताए घाणिंदियत्ताए " इत्यधिकमिति नानात्वमिति ।

पंचिंदियतिरिक्खजोणियाणं ठिई जहन्निया अंतोमुहुत्तं उक्कोसिया तिन्नि पलिओवमाइं ऊसासो वेमायाए आहारो अणाभोगनिव्वत्तिए अणुसमइयं आवरहिओ आभोगनिव्वत्तिओ जहन्नेणं अंतोमुहुत्तं, उक्कोसेणं छट्ठभत्तस्स, सेसं जहा चउरिंदियाणं० जाव चलियं कम्मं णिज्जरेंति । एवं मणुस्साण वि । णवरं आभोगणिव्वत्तिए जहन्नेणं अंतोमुहुत्तं, उक्कोसेणं अट्ठमभत्तस्स, सोइंदिय० ५ वेमायाए नुज्जो नुज्जो परिणमंति । सेसं तहेव० जाव चलियं कम्मं णिज्जरेंति ॥

पञ्चेन्द्रियतिर्यक्सूत्रे—(ठिइं भणिऊण त्ति) " जहन्नेणं अंतोमुहुत्तं उक्कोसेणं तिन्नि पलिओवमाइं " इत्येतद्रूपां स्थितिं भणित्वा (ऊसासो त्ति) उच्छ्वासो विमात्रया वाच्य इति । तथा तिर्यक्पञ्चेन्द्रियाणामाहारार्थं प्रति यदुक्तम्-" उक्कोसेणं छट्ठभत्तस्स त्ति, " तदेवकुरूत्तरकुरुतिर्यक्षु लभ्यते । मनुष्यसूत्रे यदुक्तमष्टमभक्तस्येति, तदेवकुर्वादिमिथुनकनरानाश्रित्य समवसेयमिति ॥

वाणमंतराणं ठिईए नाणत्तं, अवसेसं जहा नागकुमाराणं, एवं जोइसियाण वि, णवरं उस्सासो जहन्नेणं मुहुत्तपुहुत्तस्स, उक्कोसेण वि मुहुत्तपुहुत्तस्स, आहारो जहन्नेणं दिवसपुहुत्तस्स, उक्कोसेणं वि दिवसपुहुत्तस्स, सेसं तं चेव ॥

" वाणमंतराणं " इत्यादि । वाणमन्तराणां स्थितौ नानात्वं (अवसेसं ति) स्थितेरवशेषमायुष्कवर्जमित्यर्थः । प्रागुक्ताहाराऽऽदि वस्तु,यथा नागकुमाराऽऽदीनां तथा दृश्यम् । व्यन्तराणां, नागकुमाराणां च प्रायः समानधर्मत्वात् । तत्र व्यन्तराणां स्थितिर्जघन्येन दशवर्षसहस्राणि, उत्कर्षेण तु पल्योपममिति । " जोइसियाण वि " इत्यादि । ज्योतिष्काणामपि स्थितेरवशेषं तथैव,यथा नागकुमाराणाम् । तत्र ज्योतिष्काणां स्थितिर्जघन्येन पल्योपमाष्टभागः, उत्कर्षेण पल्योपमं वर्षलक्षाधिकमिति । नवरं (उस्सास त्ति) केवलमुच्छ्वासस्तेषां न नागकुमारसमानः, किं तु वक्ष्यमाणः । तथा चाह-" जहन्नेणं मुहुत्तपुहुत्तस्स " इत्यादि । पृथक्त्वं द्विप्रभृतिरानवभ्यः, तत्र यज्जघन्यं मुहूर्त्तपृथक्त्वं तद् द्विधा मुहूर्त्तानां, यदुत्कृष्टं तदष्टौ नव वेति । आहारोऽपि विशेषित एव । तथा चाह-" आहारो " इत्यादि । भ० १ श० १ उ० ।

पृथ्वीकायिकाऽऽश्वासेषु नैरयिकाऽऽदीनां स्थितिस्थानाऽऽदिप्रतिपादनाय संग्रहगाथामाह-

पुढवी ठिइ ओगाहण-सरीरसंघयणमेव संठाणे ।
लेस्सादिट्ठीणाणे, जोगुवओगे य दस ठाणा ॥ ४ ॥

" पुढवी " इत्यादि । तत्र पुढवीति लुप्तविभक्तिकत्वाच्चास्यैदेशस्य पृथिवीषु, उपलक्षणत्वाच्चास्य पृथिव्यादिषु जीवाऽऽश्वासेष्विति दृष्टव्यमिति । (ठिइ त्ति) " सूचनात्सूत्रम् " इतिन्यायात् स्थितिस्थानानि वाच्यानीति शेषः (एवं ओगाहण त्ति) अवगाहनास्थानानि । शरीराऽऽदिपदानि तु व्यक्तान्येव,एकारान्तं च पदं प्रथमैकवचनान्तं दृश्यम् । इत्येवमेतानि स्थितिस्थानाऽऽदीनि दश वस्तूनि इहोद्देशके विचारयितव्यानीति गाथासमासार्थः । विस्तरार्थं तु सूत्रकारः स्वयमेव वक्ष्यतीति ।

तत्र रत्नप्रभापृथिव्यां स्थितिस्थानानि तावत्प्ररूपयन्नाह-

इमीसे णं भंते ! रयणप्पभाए पुढवीए तीसाए निरयावाससयसहस्सेसु एगमेगंसि निरयावासंसि नेरइयाणं केवइया ठिइट्ठाणा पन्नत्ता ?। गोयमा ! असंखेज्जा ठिइट्ठाणा पन्नत्ता । तं जहा—जहन्निया ठिई समयाहिया, जहन्निया ठिई दुसमयाहिया,० जाव असंखिज्जसमयाहिया,जहन्निया ठिई तप्पाउग्गुक्कोसिया ठिई ॥

" इमीसे णं " इत्यादि व्यक्तम् । नवरम्-(एगमेगंसि निरयावासंसि त्ति) प्रतिनरकाऽऽवासमित्यर्थः । (ठिइट्ठाण त्ति) आयुषो विभागाः (असंखेज्ज त्ति) लक्ष्याऽतीतानि,कथम् ?. प्रथमपृथिव्यपेक्षया जघन्या स्थितिर्दशवर्षसहस्राणि, उत्कृष्टा तु सागरोपमम्, एतस्यां चैकैकसमयवृद्ध्याऽसङ्ख्येयानि स्थितिस्थानानि भवन्ति । असङ्ख्येयत्वात् सागरोपमसमयानामित्येवं न-

रकाऽऽवासापेक्षयाऽप्यसङ्ख्येयान्येव तानि,केवलं तेषु जघन्योत्कृष्टविभागो ग्रन्थान्तरादवसेयः । यथा-प्रथमप्रस्तटनरकेषु जघन्या स्थितिर्दशवर्षसहस्राणि, उत्कृष्टा तु नवतिरिति । एतदेव दर्शयन्नाह-" जहन्निया ठिई" इत्यादि । जघन्या स्थितिर्दशवर्षसहस्राधिका, इत्येकं स्थितिस्थानम, तच्च प्रतिनरकं भिन्नरूपम,सैव समयाधिकेति द्वितीयम, इदमपि विचित्रम,एवं यावद सङ्ख्येयसमयाधिका सा। सर्वोत्तमस्थितिस्थानदर्शनायाऽऽह-(तप्पाउग्गुक्कोसिय त्ति) तत्कृष्टाऽऽवासनेकविधेति विशेष्यते, तस्य विवक्षितनरकाऽऽवासस्य प्रायोग्योचिता उत्कर्षिका तत्प्रायोग्योत्कर्षिका इत्यपरं स्थितिस्थानम,इदमपि विचित्रं, विचित्रत्वादुत्कर्षस्थितेरिति ।

एवं स्थितिस्थानानि प्ररूप्य तेष्वेव क्रोधाऽऽद्युपयुक्तत्वं नारकाणां विभागेन दर्शयन्निदमाह-

इमीसे णं भंते ! रयणप्पभाए पुढवीए तीसाए निरयावाससयसहस्सेसु एगमेगंसि निरयावासंसि जहन्नियाए ठिईए वट्टमाणा नेरइया किं कोहोवउत्ता माणोवउत्ता मायोवउत्ता लोभोवउत्ता ?। गोयमा ! सव्वे वि ताव होज्ज कोहोवउत्ता १, अहवा-कोहोवउत्ता माणोवउत्ते य २, अहवा-कोहोवउत्ता य माणोवउत्ता य ३, अहवा-कोहोवउत्ता य मायोवउत्ते य ४, अहवा-कोहोवउत्ता य मायोवउत्ता य ५, अहवा-कोहोवउत्ता य लोभोवउत्ते य ६, अहवा--कोहोवउत्ता य लोभोवउत्ता य ७। अहवा-कोहोवउत्ता य माणोवउत्ते य, मायोवउत्त य १, कोहोवउत्ता य माणोवउत्ते य मायोवउत्ता २, कोहोवउत्ता माणोवउत्ता मायोवउत्ते य ३, कोहोवउत्ता माणोवउत्ता मायोवउत्ता ४। एवं कोहेणं माणेणं लोभेणं चत्तारि भंगा १२। अहवा-कोहोवउत्ता माणोवउत्ते मायोवउत्ते लोभोवउत्ते १, अहवा-कोहोवउत्ता माणोवउत्ते मायोवउत्ते लोभोवउत्ता २, अहवा-कोहोवउत्ता माणोवउत्ते मायोवउत्ता लोभोवउत्ते ३, अहवा-कोहोवउत्ता माणोवउत्ते मायोवउत्ता लोभोवउत्ता ४, अहवा-कोहोवउत्ता माणोवउत्ता मायोवउत्ते लोभोवउत्ते ५, अहवा-कोहोवउत्ता माणोवउत्ता मायोवउत्ते लोभोवउत्ता ६, अहवा-कोहोवउत्ता माणोवउत्ता मायोवउत्ते लोभोवउत्ते ७, अहवा-कोहोवउत्ता माणोवउत्ता मायोवउत्ता लोभोवउत्ता ८। एवं सत्तावीसं भंगा नेयव्वा ॥

" इमीसे णं " इत्यादि । (जहन्नियाए ठिईए वट्टमाण त्ति) या यत्र नरकाऽऽवासे जघन्या,तस्यां वर्त्तमानाः "किं कोहोवउत्ते" इत्यादिप्रश्ने "सव्वे वि" इत्याद्युत्तरम् । तत्र च प्रतिनरकं जघन्यस्थितिकानां सदैव भावात्तेषु च क्रोधोपयुक्तानां बहुत्वात्सप्तविंशतिभङ्गकाः। एकाऽऽदिसंख्यातसमयाधिकजघन्यस्थितिकानां तु कादाचित्कत्वात्तेषु च क्रोधाऽऽद्युपयुक्तानामेकत्वानेकत्वसंभवादशीतिभङ्गकाः। एकेन्द्रियेषु तु सर्वकषायोपयुक्तानां प्रत्येकं बहूनां भावादभङ्गकम् । आह च-"संभवइ जाहिं विरहो,असीतिभंगा तहिं करेज्जाहि । जहियं न होइ विरहो, अभंगयं सत्तवीसा य ॥१॥" अयं च तत्सत्ताऽपेक्षो विरहो द्रष्टव्यो, न तूत्पादापेक्षः, यतो रत्नप्रभायां चतुर्विंशतिर्मुहूर्ता उत्पादविरहकाल उक्तः,ततश्च यत्र सप्तविंशतिर्भङ्गका लभ्यन्ते,तत्रापि विरहसंभवादशीतिः प्राप्नोति, सप्तविंशतेरभाव एवेति । तत्र (सव्वे वि ताव होज्ज कोहोवउत्त त्ति) प्रतिनरकं स्वकीयस्वकीयस्थित्यपेक्षया जघन्यस्थितिकानां नारकाणां सदैव बहूनां सद्भावान्नारकभवस्य च क्रोधोदयप्रचुरत्वात् सर्व एव क्रोधोपयुक्ता भवेयुरित्येको भङ्गः "अहवा" इत्यादिना द्विकत्रिकचतुःसंयोगभङ्गा दर्शिताः,तत्र द्विकसंयोगे बहुवचनान्तं क्रोधमभ्युपगम्य षड् भङ्गकाः कार्याः। तथाहि-क्रोधोपयुक्ताश्च,मानोपयुक्तश्च १, तथा क्रोधोपयुक्ताश्च, मानोपयुक्ताश्च २ । एवं मायायैकत्वबहुत्वाभ्यां द्वौ, लोभेन च द्वौ । एवमेते द्विकयोगे षट्,त्रिकयोगे तु द्वादश भवन्ति। तथाहि-क्रोधे नित्यं बहुवचनम, मानमाययोरेकत्वबहुत्वाभ्यामित्येकः, मानैकत्वे मायाबहुत्वे च द्वितीयः । माने च बहुवचनं, मायायामेकत्वमिति तृतीयः । मानबहुत्वे मायाबहुत्वे च चतुर्थः, पुनः क्रोधमानाभ्यामित्थमेव चत्वारः, पुनः क्रोधमायालोभैरित्थमेव चत्वारः,एवमेते द्वादश । चतुष्कसंयोगे त्वष्टौ। तथाहि-क्रोधे बहुवचनेन मानमायालोभेषु चैकवचनेनैकः । इत्थमेव लोभे बहुवचनेन द्वितीयः । एवमेतावेकवचनान्तमायया जातौ, एवं बहुवचनान्तमायया ऽन्यौ द्वौ, एवमेते चत्वार एकवचनान्तमानेन जाताः। एवमेव बहुवचनान्तमानेन चत्वार इत्येवमष्टौ । एवमेते जघन्यस्थितिषु नारकेषु सप्तविंशतिर्भवन्ति । जघन्यस्थितौ हि बहवो नारका भवन्तश्च क्रोधे बहुवचनमेव ।

इमीसे णं भंते ! रयणप्पभाए पुढवीए तीसाए निरयावाससयसहस्सेसु एगमेगंसि निरयावासंसि समयाहियाए जहन्नट्ठिईए वट्टमाणा नेरइया किं कोहोवउत्ता माणोवउत्ता मायोवउत्ता लोभोवउत्ता ?। गोयमा ! कोहोवउत्ते य माणोवउत्ते य मायोवउत्ते य लोभोवउत्ते य,कोहोवउत्ता य माणोवउत्ता य मायोवउत्ता य लोभोवउत्ता य, अहवा-कोहोवउत्ते य माणोवउत्ता य,अहवा-कोहोवउत्ते य माणोवउत्ता य, एवं असीइभंगा नेयव्वा । एवं० जाव संखेज्जसमयाहिया ठिई, असंखेज्जसमयाहियट्ठिईए तप्पाउग्गुक्कोसियाए ठिईए सत्तावीसं भंगा भाणियव्वा ।

" समयाहियाए जहन्नट्ठिईए वट्टमाणा नेरइया किं कोहोवउत्ता " इत्यादि प्रश्नः । इहोत्तरम्-"कोहोवउत्ते य" इत्यादयोऽशीतिभङ्गाः । इह समयाधिकायां यावत् संख्येयसमयाधिकायां जघन्यस्थितौ नारका न नवन्त्यपि भवन्ति चैवैको वा;अनेके वेति । ततः क्रोधाऽऽदिष्वेकत्वेन चत्वारो विकल्पाः,बहुत्वेन चान्ये चत्वार एव ४, द्विकसंयोगे चतुर्विंशतिः। तथाहि-क्रोधमानयोरेकत्वबहुत्वाभ्यां चत्वारः ४, एवं क्रोधमाययोः ४, एवं क्रोधलोभयोः ४, एवं मानमाययोः ४, एवं मानलोभयोः ४, एवं मायालोभयोरिति ४ । द्विकयोगे चतुर्विंशतिः, त्रिकयोगे द्वात्रिंशत् । तथाहि-क्रोधमानमायानामेकत्वेनैकः,एष्वेव मायाबहुत्वेन द्वितीयः, एवमेतौ मानैकत्वेन, द्वावेवान्यौ तद्बहुत्वेन, एवमेते चत्वारः, क्रोधैत्वेन चत्वार एव, अन्ये क्रोधबहुत्वेनेत्येवमष्टौ,

क्रोधमानमायात्रिके जाताः । तथैवान्येऽष्टौ क्रोधमानलोभेषु, तथैवान्येऽष्टौ क्रोधमायालोभेषु,तथैवान्येऽष्टौ मानमायालोभेष्वित्येते सप्तविंशत्, चतुष्कयोगे षोडश । तथाहि-क्रोधाऽऽदित्रयेकत्वेनैको, लोभस्य बहुत्वेन द्वितीयः, एवमेतौ मायैकत्वेन, तथान्यौ मायाबहुत्वेन । एवमेते चत्वारो मानैकत्वेन, तथाऽन्ये चत्वार एव मानबहुत्वेन । एवमेते अष्टौ क्रोधैकत्वेन, एवमन्येऽष्टौ क्रोधबहुत्वेनेति षोडश । एवमेते सर्वे एवाशीतिरिति । एते च जघन्यावस्थानावेकाऽऽदिसङ्ख्यातान्तसमयाधिकायां भवन्ति, असङ्ख्यातसमयाधिकायास्तु जघन्यस्थितेरारभ्योत्कृष्टस्थितिं यावत्सप्तविंशतिभङ्गास्त एव , तत्र नारकाणां बहुत्वादिति ।

अथावगाहनाद्वारे-

इमीसे णं भंते ! रयणप्पभाए पुढवीए तीसाए निरयावाससयसहस्सेसु एगमेगंसि निरयावासंसि नेरइयाणं केवइया ओगाहणट्ठाणा पण्णत्ता ? । गोयमा ! असंखेज्जा ओगाहणट्ठाणा पण्णत्ता । तं जहा-जहण्णिया ओगाहणा अंगुलस्स असंखेज्जइभागं, जहण्णिया ओगाहणा एगपदेसाहिया, जहण्णिया ओगाहणा दुपदेसाहिया, जहण्णिया ओगाहणा० जाव असंखेज्जपदेसाहिया, जहण्णिया ओगाहणा तप्पाउग्गुक्कोसिया ओगाहणा ॥

तत्र (ओगाहणट्ठाण त्ति) अवगाहन्ते आसते यस्यां साऽवगाहना तनुः,तदाधारभूतं वा क्षेत्रं, तस्याः स्थानानि। प्रदेशवृद्ध्या विभागा अवगाहनास्थानानि, तत्र (जहण्णिय त्ति) जघन्याऽङ्गुलासंख्येयभागमात्रा सर्वनरकेषु, (तप्पाउग्गुक्कोसिय त्ति) तस्य विवक्षितनरकस्य प्रायोग्या या उत्कर्षिका सा तत्प्रायोग्योत्कर्षिका। यथा-त्रयोदशप्रस्तटे धनुःसप्तकं रत्नित्रयमङ्गुलषट्कं चेति ।

इमीसे णं भंते ! रयणप्पभाए पुढवीए तीसाए निरयावाससयसहस्सेसु एगमेगंसि निरयावासंसि जहण्णियाए ओगाहणाए वट्टमाणा नेरइया किं कोहोवउत्ता असीइं भंगा जाणियव्वा० जाव संखेज्जपदेसाहिया जहण्णिया ओगाहणा, असंखेज्जपएसाहियाए जहण्णियाए ओगाहणाए वट्टमाणाणं तप्पाउग्गुक्कोसियाए ओगाहणाए वट्टमाणाणं नेरइयाणं दोसु वि सत्तावीसं भंगा ।

" जहण्णियाए " इत्यादि । जघन्यायां तस्यामेव चैकाऽऽदिसङ्ख्यातान्तप्रदेशाधिकायामवगाहनायां वर्तमानानां नारकाणामल्पत्वात्क्रोधाऽऽद्युपयुक्त एकोऽपि लभ्यते,अतोऽशीतिर्भङ्गाः। "असंखेज्जपएस" इत्यादि। असङ्ख्यातप्रदेशाधिकायां तत्प्रायोग्योत्कृष्टायां च नारकाणां बहुत्वात्तेषु च बहूनां क्रोधोपयुक्तत्वेन क्रोधे बहुवचनस्य भावान्मानादिषु त्वेकत्वबहुत्वसम्भवात्सप्तविंशतिभङ्गा भवन्तीति । ननु ये जघन्यस्थितयो जघन्यावगाहनाश्च भवन्ति, तेषां जघन्यस्थितिकत्वेन सप्तविंशतिभङ्गकाः प्राप्नुवन्ति, जघन्यावगाहकत्वेन चाशीतिरिति विरोधः ? । अत्रोच्यते-जघन्यस्थितिकानामपि जघन्यावगाहनाकालेऽशीतिरेव, उत्पत्तिकालनानात्वेन जघन्यावगाहमानाल्पत्वादिति, या च जघन्यस्थितिकानां सप्तविंशतिः सा जघन्यावगाहनत्वमतिक्रान्तानामिति भावनीयम् ।

शरीरद्वारे-

इमीसे णं भंते ! रयणप्पभाए जाव० एगमेगंसि निरयावासंसि नेरइयाणं कइ सरीरया पण्णत्ता ?। गोयमा ! तिन्नि सरीरया पण्णत्ता । तं जहा-वेउव्विए, तेयए,कम्मए । इमीसे णं भंते !० जाव वेउव्वियसरीरे वट्टमाणा नेरइ० । किं कोहोवउत्ता, सत्तावीसं भंगा । एएणं गमेणं तिन्नि सरीरया जाणियव्वा ॥

(सत्तावीसं भंग त्ति) अनेन यद्यपि वैक्रियशरीरे सप्तविंशतिर्भङ्गका उक्ताः, तथापि या स्थित्याश्रयाऽवगाहनाश्रया च भङ्गकप्ररूपणा, सा तथैव दृश्या, निरवकाशत्वात्तस्याः, शरीराश्रयायाश्च सावकाशत्वात् । एवम-यत्रापि विमर्शनीयमिति । (एएणं गमेणं तिन्नि सरीरया जाणियव्व त्ति) वैक्रियशरीरसूत्रपाठेन त्रीणि शरीरकाणि वैक्रियतैजसकार्मणानि भणितव्यानि, त्रिष्वपि भङ्गकसप्तविंशतिर्वाच्येत्यर्थः । ननु विग्रहगतौ केवले ये तैजसकार्मणशरीरे स्यातां तयोरल्पत्वेनाशीतिरपि भङ्गकानां सम्भवतीति कथमुच्यते तयोः सप्तविंशतिरेवेति ?। अत्रोच्यते-सत्यमेतत्, केवलं वैक्रियशरीरानुगतयोस्तयोरिहाऽऽश्रयणं केवलयोश्चानाश्रयणमिति सप्तविंशतिरेवेति । यच्च द्वयोरेवातिदेश्यत्वे त्रीणीत्युक्तं, तत्त्रयाणामपि गमस्यात्यन्तसाम्योपदर्शनार्थमिति ॥

संहननद्वारे-

इमीसे णं भंते ! रयणप्पभाए० जाव नेरइयाणं सरीरया किं संघयणा पण्णत्ता ?। गोयमा ! छण्हं संघयणाणं असंघयणी,नेवऽट्ठी नेव च्छिरा नेव ण्हारूणि, जे पोग्गला अणिट्ठा अकंता अप्पिया असुहा अमणुन्ना अमणामा, एएसिं सरीरसंघायत्ताए परिणमंति । इमीसे णं भंते ! ० जाव छण्हं संघयणाणं असंघयणे वट्टमाणाणं नेरइया किं कोहोवउत्ता ?० सत्तावीसं भंगा ।

(छण्हं संघयणाणं असंघयणि त्ति) षण्णां संहननानां वज्रऋषभनाराचाऽऽदीनां मध्यादेकतरेणापि संहननेनासंहननानीतः । कस्मादेवमित्यत आह-"नेवट्ठी" इत्यादि। नैवास्थ्यादीनि तेषां सन्ति, अस्थिसञ्चयरूपं च संहननमुच्यत इति । (अणिट्ठ त्ति) इष्यन्ते स्मेतीष्टाः,तन्निषेधादनिष्टाः, अनिष्टमपि किञ्चित्कमनीयं भवतीत्यत उच्यते-अकान्ताः, अकान्तमपि किञ्चित्कारणवशात्प्रीतये भवतीत्यत आह-अप्रियाः,अप्रीतिहेतवः, अप्रियत्वं तेषां कुतः?,यतः (असुभ त्ति) अशुभस्वभावाः, ते च सामान्या अपि भवन्तीत्यतो विशेष्यन्ते-(अमणुन्न त्ति) न मनसाऽन्तःसंवेदनेन शुभतया ज्ञायन्त इत्यमनोज्ञाः । अमनोज्ञता चैकदाऽपि स्यादत आह-(अमणाम त्ति) न मनसा अभ्यन्ते गम्यन्ते पुनः पुनः स्मरणतो ये तेऽमनोमाः। एकार्थिकाश्चैते शब्दा अनिष्टत्वप्रकर्षप्रतिपादनार्था इति । (संघायत्ताए त्ति) सङ्घातनया, शरीररूपसञ्चयतयेत्यर्थः ।

संस्थानद्वारे—

इमीसे णं भंते ! ०जाव सरीरया किंसंठिया पण्णत्ता ?।

गोयमा ! दुविहा पण्णत्ता । तं जहा–भवधारणिज्जा य, उत्तरवेउव्विया य । तत्थ णं जे ते भवधारणिज्जा ते हुंडसंठिया पण्णत्ता, तत्थ णं जे ते उत्तरवेउव्विया ते वि हुंडसंठिया पण्णत्ता । इमीसे णं० जाव हुंडसंठाणे वट्टमाणा नेरइया किं कोहोवउत्ता ?, सत्तावीसं भंगा ।

(किंसंठिय त्ति) किं संस्थिते संस्थाने येषां तानि किंसंस्थितानि ?। (भवधारणिज्ज त्ति) भवधारणं निजजन्मातिवाहनं प्रयोजनं येषां तानि भवधारणीयान्यात्मजन्मधारणीयानीत्यर्थः । (उत्तरवेउव्विय त्ति) पूर्ववैक्रियापेक्षया उत्तराणि उत्तरकालभावीनि वैक्रियाणि उत्तरवैक्रियाणि । (हुंडसंठिय त्ति) सर्वाशुभसंस्थितानि ।

लेश्याद्वारे-

इमीसे णं भंते ! रयणप्पभाए पुढवीए नेरइयाणं कइ लेस्साओ पण्णत्ताओ ?। गोयमा ! एगा काउलेस्सा पण्णत्ता । इमीसे णं भंते ! रयणप्पभाए० जाव काउलेस्साए वट्टमाणा सत्तावीसं भंगा ।

दृष्टिद्वारे-

इमीसे णं भंते० ! जाव किं सम्मदिट्ठी, मिच्छदिट्ठी, सम्मामिच्छदिट्ठी ?। गोयमा ! तिण्णि वि; इमीसे णं० जाव सम्मद्दंसणे वट्टमाणा नेरइया सत्तावीसं भंगा । एवं मिच्छद्दंसणे वि; सम्मामिच्छद्दंसणे असीइभंगा ।

(सम्मामिच्छद्दंसणे असीइभंग त्ति) मिश्रदृष्टीनामल्पत्वात् तद्भावस्यापि च कालतोऽल्पत्वादेकोऽपि लभ्यत इत्यशीतिभङ्गाः ।

ज्ञानद्वारे-

इमीसे णं० जाव किं नाणी, अन्नाणी ?। गोयमा ! नाणी वि, अन्नाणी वि, तिण्णि नाणाइं नियमा, तिण्णि अन्नाणाइं भयणाए । इमीसे णं भंते० ! जाव आभिणिबोहियणाणे वट्टमाणे ?। गोयमा ! सत्तावीसं भंगा, एवं तिण्णि नाणाइं तिण्णि अन्नाणाइं भाणियव्वाइं ।

(तिण्णि नाणाइं नियम त्ति) ये सप्तसम्यक्त्वा नरकेषूत्पद्यन्ते तेषां प्रथमसमयादारभ्य भवप्रत्ययस्यावधिज्ञानस्य भावात्त्रिज्ञानिन एव ते, ये तु मिथ्यादृष्टयस्ते संज्ञिभ्योऽसंज्ञिभ्यश्चोत्पद्यन्ते, तत्र ये संज्ञिभ्यस्ते भवप्रत्ययादेव विभङ्गस्य भावादज्ञानिनः, ये त्वसंज्ञिभ्यस्तेषामाद्यादन्तर्मुहूर्त्तात्परतो विभङ्गस्योत्पत्तिरिति तेषां पूर्वमज्ञानत्रयं, पश्चादपि भङ्गोत्पत्तावज्ञानत्रयमिति भण्यते लभ्यते-(तिण्णि अन्नाणाइं भयणाए त्ति) भजनया विकल्पनया कदाचिद्द्वे, कदाचित्त्रीणीत्यर्थः ।

अत्रार्थे गाथे स्याताम्-

" सन्नी नेरइएसुं, उवज्जए परिणयंतरे समए ।
विब्भंगं ओहिं वा, अविगाहे विगाहे लहइ ॥ १ ॥
असन्नी नरएसुं, पज्जत्तो जेण लहइ विब्भंगं ।
नाणा तिन्नेव तओ, अन्नाणा दोन्नि तिन्नेव ॥ २ ॥"

एवम् " तिण्णि नाणाइं " इत्यादि । आभिनिबोधिकज्ञानवत् सप्तविंशतिभङ्गकोपेतानि आद्यानि त्रीणि ज्ञानानि, अज्ञानानि वेति । इह च त्रीणि ज्ञानानीति यदुक्तं, तदाभिनिबोधिकस्य पुनर्गणनेन । अन्यथा द्वे एव ते वाच्ये स्याताम्इति । "तिण्णि अन्नाणाइं" इत्यत्र यदि मत्यज्ञानश्रुताज्ञाने विभङ्गात् पूर्वकालभाविनी विवक्ष्येते, तदा अशीतिभङ्गा लभ्यन्ते, अल्पत्वात्तेषाम् । किं तु जघन्यावगाहनाश्रयेणैवाशीतिभङ्गकास्तेषामवसेया इति ।

योगद्वारे-

इमीसे णं० जाव किं मणजोगी, वयजोगी, कायजोगी ?। गोयमा ! तिण्णि वि । इमीसे णं० जाव मणजोए वट्टमाणा सत्तावीसं भंगा; एवं कायजोए ।

(एवं कायजोए त्ति) इह यद्यपि केवलकार्मणकाययोगे अशीतिभङ्गा संजायन्ते, तथापि तस्याविवक्षणात् सामान्यकाययोगाऽऽश्रयणाच्च सप्तविंशतिरुक्तेति ।

उपयोगद्वारे-

इमीसे णं० जाव नेरइया किं साकारोवउत्ता, अणागारोवउत्ता ?। गोयमा ! साकारोवउत्ता वि, अणागारोवउत्ता वि । इमीसे णं० जाव साकारोवउत्ते वट्टमाणा सत्तावीसं भंगा, एवं अणागारोवउत्ते वि सत्तावीसं भंगा, एवं सत्त वि पुढवीओ नेयव्वाओ, णाणत्तं लेसासु ।

(साकारोवउत्त त्ति) आकारो विशेषांशग्रहणशक्तिः, तेन सह इति साकारः, तद्विकलोऽनाकारः । सामान्यग्राहीत्यर्थः । (णाणत्तं लेसासु त्ति) रत्नप्रभापृथिवीप्रकरणवक्तव्यपृथिवीप्रकरणान्यध्येयानि । केवलं लेश्यासु विशेषः,तासां भिन्नत्वात् । अत एव तद्दर्शनाय गाथा-

गाहा-

काओय दोसु तइया-ऍ मीसिया नीलिया चउत्थीए ।
पंचमियाए मीसा, कण्हा तत्तो परमकण्हा ॥ १ ॥

(काओय इत्यादि) तत्र (तइयाए मीसिय त्ति) वालुकप्रभाप्रकरणे उपरितननरकेषु कापोती, अधस्तनेषु नीली भवतीति ते यथासम्भवं प्रश्नसूत्रे उत्तरसूत्रे चाध्येतव्ये इत्यर्थः । यच्च सूत्राभिलापेषु नरकाऽऽयुःसप्तसङ्ख्यानानात्वं,तत् "तीसा य पन्नवीसा" इत्यादिना पूर्वप्रदर्शितेन समवसेयमिति । एवं च सूत्राभिलापः कार्यः-"सक्करप्पभाए णं भंते ! पुढवीए पणवीसाए नरयावाससयसहस्सेसु एगमेगंमि नरयावासंसि कइ लेस्साओ पण्णत्ताओ ?। गोयमा ! एगा काउलेस्सा पण्णत्ता । सक्करप्पभाए णं भंते !० जाव काउलेसाए वट्टमाणा नेरइया किं कोहोवउत्ता ?, इत्यादि० जाव सत्तावीसं भंगा" । एवं सर्वपृथिवीषु गाथाऽनुसारेण वाच्यम ।

चमरचंचाए णं भंते ! असुरकुमारावाससयसहस्सेसु एगमेगंमि असुरकुमारावासंसि असुरकुमाराणं केवइया ठिइट्ठाणा पण्णत्ता ?। गोयमा ! असंखेज्जा ठिइट्ठाणा पण्णत्ता । तं जहा–जहन्निया ठिई जहा नेरइया तहा, नवरं पढिलोमा भंगा जाणियव्वा, सव्वे वि ताव होज्जा लोभोवउत्ता य माणोवउत्ते य, एएणं गमेणं नेयव्वं० जाव थणियकुमारा, नवरं नाणत्तं जाणियव्वं ।

असुरकुमारप्रकरणे (पडिलोमा भंग त्ति) नारकप्रकरणे हि क्रोधमानाऽऽदिना क्रमेण नङ्ककनिर्देशः कृतोऽसुरकुमाराऽऽदिप्रकरणेषु लोभमायाऽऽदिनाऽसौ कार्य इत्यर्थः। अत एवाह-(सव्वे वि ताव होज्जा लोहोवउत्त त्ति) देवा हि प्रायो लोभवन्तो भवन्ति, तेन सर्वेऽप्यसुरकुमारा लोभोपयुक्ताः स्युः। द्विकसंयोगे तु लोभोपयुक्तत्वे बहुवचनमेव, मायोपयोगे त्वेकत्वबहुत्वाभ्यां द्वौ नङ्कौ, एवं सप्तविंशतिर्नङ्काः कार्याः। (णवरं णाणत्तं जाणियव्वं ति) नारकाणामसुरकुमाराऽऽदीनां च परस्परं नानात्वं ज्ञात्वा प्रश्नसूत्राण्युत्तरसूत्राणि चाध्येयानीति हृदयम्। तच्च नारकाणामसुराऽऽदीनां च संहननसंस्थानलेश्यासूत्रेषु भवति। तच्चैवम्-" चउसट्ठीए णं भंते ! असुरकुमारावाससयसहस्सेसु एगमेगंसि असुरकुमारावासंसि असुरकुमाराणं सरीरगा किं संघयणी ?। गोयमा ! असंघयणी, जे पोग्गला इट्ठा कंता, ते तेसिं संघायत्ताए परिणमंति, एवं संठाणे वि, णवरं भवधारणिज्जा समचउरंससंठिया, उत्तरवेउव्विया अण्णयरसंठिया, एवं लेसासु वि, णवरं कइ लेसाओ पण्णत्ताओ ?। गोयमा ! चत्तारि। तं जहा-कण्हा नीला काऊ तेऊलेसा। चउसट्ठीए णं०जाव कण्हलेसाए वट्टमाणा किं कोहोवउत्ता ?० ४। गोयमा ! सव्वे वि ताव होज्ज लोहोवउत्ता " इत्यादि। एवं " नीलकाऊतेऊ वि "। नागकुमाराऽऽदिप्रकरणेषु तु-"चुलसीए नागकुमारावाससयसहस्सेसु " इत्येवं " चउसट्ठी असुराणं, नागकुमाराण होइ चुलसीई। " इत्यादिवचनात्प्रश्नसूत्रेषु भवनसङ्ख्यानानात्वमवगम्य सूत्राभिलापः कार्य इति।

असंखेज्जेसु णं भंते ! पुढविकाइयावाससयसहस्सेसु एगमेगंसि पुढविकाइयावासंसि पुढविकाइयाणं केवइया ठिइट्ठाणा पण्णत्ता ?। गोयमा ! असंखेज्जा ठिइट्ठाणा पण्णत्ता। तं जहा-जहण्णिया ठिई० जाव तप्पाउग्गुक्कोसिया ठिई। असंखेज्जेसु णं भंते ! पुढविकाइयावाससयसहस्सेसु एगमेगंसि पुढविकाइयावासंसि जहण्णट्ठिईए वट्टमाणा पुढविकाइया किं कोहोवउत्ता माणोवउत्ता मायोवउत्ता लोभोवउत्ता ?। गोयमा ! कोहोवउत्ता वि, माणोवउत्ता वि, मायोवउत्ता वि, लोहोवउत्ता वि। एवं पुढविकाइयाण सव्वेसु वि ठाणेसु अभंगयं, णवरं तेउलेस्साए असीइभंगा, एवं आउकाइया वि, तेउकाइयवाउकाइयाणं सव्वेसु वि ठाणेसु अभंगयं, वणप्फइकाइया जहा पुढविकाइया।

(एवं पुढविकाइयाणं सव्वेसु ठाणेसु अभंगय त्ति) पृथिवीकायिका एकैकस्मिन् कषाये उपयुक्ता बहवो लभ्यन्त इत्यभङ्कं दशस्वपि स्थानेषु। (णवरं तेउलेस्साए असीइभंग त्ति) पृथिवीकायिकेषु लेश्याद्वारे तेजोलेश्या वाच्या। सा च यदा देवलोकाच्च्युतो देव एकोऽनेको वा पृथिवीकायिकेषूत्पद्यते तदा भवति, ततश्च तदेकत्वाऽऽदिलक्षणादशीतिभङ्का भवन्तीति। इह पृथिवीकायिकप्रकरणे स्थितिस्थानद्वारं साक्षाल्लिखितमेवास्ति, शेषाणि तु नारकवद्वाच्यानि। तत्र च " णवरं नाणत्तं जाणियव्वं " इत्येतस्यानुवृत्तेर्नानात्वमिह प्रश्नत उत्तरतश्चावसेयम्। तच्च शरीराऽऽदिषु सप्तसु द्वारेष्विदम्-"असंखेज्जेसु णं भंते ! पुढविकाइयावाससयसहस्सेसु० जाव पुढविकाइयाणं कइ सरीरा पण्णत्ता ?। गोयमा ! तिन्नि। तं जहा-ओरालिए, तेयए, कम्मए।" एतेषु च "कोहोवउत्ता वि, माणोवउत्ता वि" इत्यादि वाच्यम्। तथा-"असंखेज्जेसु णं० जाव पुढविकाइयाणं सरीरगा किं संघयणी " इत्यादि तथैव। "णवरं पोग्गला मणुण्णा अमणुण्णा सरीरसंघायत्ताए परिणमंति।" एवं संस्थानद्वारेऽपि, किं तूत्तरे-" हुंडसंठियाए " तावदेव वाच्यम्,न तु "दुविहा सरीरगा पण्णत्ता। तं जहा-भवधारणिज्जा य, उत्तरवेउव्विया य " इत्यादि ; पृथिवीकायिकानां तदभावादिति। लेश्याद्वारे पुनरेवं वाच्यम्-" पुढवीकाइयाणं भंते ! कइ लेसाओ पण्णत्ताओ ?। गोयमा ! चत्तारि। तं जहा-कण्हलेस्सा० जाव तेउलेस्सा।" एतासु च तिसृष्वभङ्कमेव, तेजोलेश्यायां त्वशीतिर्नङ्काः, एतच्च प्रागेवोक्तमिति। दृष्टिद्वारे इदं वाच्यम्-" असंखेज्जेसु० जाव पुढविकाइया किं सम्मद्दिट्ठी, मिच्छद्दिट्ठी, सम्मामिच्छद्दिट्ठी ?। गोयमा ! मिच्छद्दिट्ठी " शेषं तथैव। ज्ञानद्वारेऽपि तथैव। " णवरं पुढविकाइयाणं भंते ! किं नाणी, अन्नाणी ?। गोयमा ! नो नाणी, अन्नाणी नियमा दुअन्नाणी।" योगद्वारेऽपि तथैव। नवरम्-"पुढविकाइयाणं भंते ! किं मणजोगी, वइजोगी, कायजोगी ?। गोयमा ! नो मणजोगी, नो वइजोगी, कायजोगी " (एवं आउकाइया वि त्ति) पृथिवीकायिकवदप्कायिका अपि वाच्याः, ते हि दशस्वपि स्थानकेष्वभङ्काः, तेजोलेश्यायां चाऽशीतिभङ्कका भवन्ति, यतस्तेष्वपि देव उत्पद्यत इति। " तेउकाइय " इत्यादौ (सव्वेसु वि ठाणेसु त्ति) स्थितिस्थानाऽऽदिषु दशस्वप्यभङ्कं, क्रोधाऽऽद्युपयुक्तानामेकदैव तेषु बहूनां लाभात्, इह देवा नोत्पद्यन्त इति तेजोलेश्या तेषु नास्ति। ततस्तत्सम्भवाच्चाशीतिरपीत्यभङ्कमेवेति। एतेषु च सूत्राणि पृथिवीकायिकसमानि,केवलं वायुकायसूत्रेषु शरीरद्वारे एवमध्येयम्-"असंखेज्जेसु णं भंते !० जाव वाउकाइयाणं कइ सरीरा पण्णत्ता ?। गोयमा ! चत्तारि। तं जहा-ओरालिए,वेउव्विए,तेयए,कम्मए त्ति"। 'वणप्फइकाइया' इत्यादि। वनस्पतयः पृथिवीकायिकसमाना वक्तव्याः, दशस्वपि स्थानकेषु भङ्ककाभावात्तेजोलेश्यायां च तथैवाशीतिभङ्ककसङ्गतादिति। ननु पृथिव्यम्बुवनस्पतीनां दृष्टिद्वारे सास्वादनभावेन सम्यक्त्वं कर्मग्रन्थेष्वभ्युपगम्यते, तत एव ज्ञानद्वारे मतिज्ञानं श्रुतज्ञानं चाध्याप्येतत्सूत्रमशीतिर्नङ्काः सम्यग्दर्शनाभिनिबोधिकश्रुतज्ञानेषु भवन्तु ?। नैवम्। पृथिव्यादिषु सास्वादनस्यात्यन्तविरलत्वेनाविवक्षितत्वात्। तत एवोच्यते-"उभयाभावो पुढवा-इएसु विगलेसु होज्ज उववण्णो।" इति। उभयं प्रतिपद्यमानपूर्वप्रतिपन्नरूपमिति।

बेइंदियतेइंदियचउरिंदियाणं जेहिं ठाणेहिं नेरइयाणं असीइभंगा, तेहिं ठाणेहिं असीई चेव, नवरं अब्भहिया सम्मत्ते आभिणिबोहियनाणे सुयनाणे, एएहिं असीइभंगा। जेहिं ठाणेहिं नेरइयाणं सत्तावीसं भंगा,तेसु ठाणेसु सव्वेसु अभंगयं।

"बेइंदिय" इत्यादावेवमक्षरघटना-" जेहिं ठाणेहिं नेरइयाणं असीइभंगा, तेहिं ठाणेहिं बेइंदियतेइंदियचउरिंदियाणं असीई चेव त्ति "। तत्र एकाऽऽदिसंख्यातान्तसमयाधिकायां जघन्यस्थितौ, तथा जघन्यायामवगाहनायां च, तत्रैव च संख्येयान्तप्रदेशवृद्धायां ३, मिश्रदृष्टौ ४ च, नारकाणामशीतिर्भङ्का उक्ताः, विकलेन्द्रियाणामप्येतेषु स्थानेषु मिश्रदृष्टिवर्जेष्वशीति-

रेव, अल्पत्वात्तेषामेकैकस्यापि क्रोधाऽऽद्युपयुक्तस्य संभवात्, मिश्रदृष्टिस्तु विकलेन्द्रियेषु न भवतीति न विकलेन्द्रियाणां तत्राशीतिभङ्गकसंभव इति । वृद्धैस्त्विह सूत्रे कुतोऽपि वाचनाविशेषाद् यत्राशीतिस्तत्राप्यभङ्गकमिति व्याख्यातम् । इहैव विशेषाभिधानायाऽऽह-"नवरं" इत्यादि । अयमर्थः-दृष्टिद्वारे, ज्ञानद्वारे च नारकाणां सप्तविंशतिरुक्ता । विकलेन्द्रियाणां तु (अब्भहिय त्ति) अष्टाधिकान्यशीतिर्भङ्गकानां भवति । केत्याह-सम्यक्त्वेऽल्पीयसां हि विकलेन्द्रियाणां सास्वादनभावेन सम्यक्त्वं भवति, अल्पत्वाच्च तेषामेकत्वस्यापि संभवेनाशीतिर्भङ्गकानां भवति, एवमाभिनिबोधिके श्रुते चेति । तथा-"जहिं" इत्यादि । येषु स्थानेषु नैरयिकाणां सप्तविंशतिर्भङ्गाः, तेषु स्थानेषु द्वित्रिचतुरिन्द्रियाणां भङ्गकाभावः, तानि च प्रागुक्ताशीतिभङ्गकस्थानावशिष्टानि मन्तव्यानि, भङ्गकाभावश्च क्रोधाऽऽद्युपयुक्तानामेकदैव बहूनां भावादिति । विकलेन्द्रियसूत्राणि च पृथिवीकायिकसूत्राणीवाध्येयानि । नवरमिह लेश्याद्वारे तेजोलेश्या नाध्येतव्या । दृष्टिद्वारे च-" बेइंदियाणं भंते ! किं सम्मद्दिट्ठी, मिच्छद्दिट्ठी, सम्मामिच्छद्दिट्ठी ? । गोयमा ! सम्मद्दिट्ठी वि, मिच्छद्दिट्ठी वि, नो सम्मामिच्छद्दिट्ठी । सम्मद्दंसणे वट्टमाणा बेइंदिया किं कोहोवउत्ता ?," इत्यादि प्रश्ने उत्तरम्-अशीतिर्भङ्गाः । तथा ज्ञानद्वारे-" बेइंदियाणं भंते ! किं नाणी, अन्नाणी ? । गोयमा ! नाणी वि, अन्नाणी वि । जइ नाणी दुन्नाणी-मइनाणी, सुयनाणी य । शेषं तथैव अशीतिश्च भङ्गा इति । योगद्वारे-"बेइंदियाणं भंते ! किं मणजोगी, वइजोगी, कायजोगी ? । गोयमा ! नो मणजोगी, वइजोगी, कायजोगी य " । शेषं तथैव । एवं त्रीन्द्रियचतुरिन्द्रियसूत्राण्यपि ।

पंचिंदियतिरिक्खजोणिया जहा नेरइया तहा नाणियव्वा, नवरं जहिं सत्तावीसं भंगा तहिं अभंगयं कायव्वं । जत्थ असीई तत्थ असीइं मणुस्सा वि । जेहिं ठाणेहिं नेरइयाणं असीइभंगा तेहिं ठाणेहिं मणुस्सा वि असीइभंगा नाणियव्वा । जेसु सत्तावीसा तेसु अभंगयं । नवरं मणुस्साणं अब्भहियं जहन्नियट्ठिईए आहारए य असीइभंगा, वाणमंतरजोइसवेमाणिया जहा भवणवासी । नवरं नाणत्तं नाणियव्वं । जं जस्स० जाव अणुत्तरा ।

" पंचिंदिय " इत्यादि । (जहिं सत्तावीसं भंगा त्ति) यत्र नारकाणां सप्तविंशतिर्भङ्गास्तत्र पञ्चेन्द्रियतिरश्चामभङ्गकम्, तत्र जघन्यस्थित्यादिकं पूर्वं दर्शितमेव, भङ्गकाभावश्च क्रोधाऽऽद्युपयुक्तानां बहूनामेकदैव तेषु भावादिति । सूत्राणि चेह नारकसूत्रवदध्येयानि । नवरं शरीरद्वारेऽयं विशेषः-" असंखेज्जेसु णं भंते ! पंचिंदियतिरिक्खजोणियावासेसु पंचिंदियतिरिक्खजोणियाणं केवइया सरीरा पण्णत्ता ? । गोयमा ! चत्तारि । तं जहा-ओरालिए, वेउव्विए, तेयए, कम्मए" । सर्वत्र चाभङ्गकमिति । तथा संहननद्वारे-" पंचिंदियतिरिक्खजोणियाणं केवइया संघयणा पण्णत्ता ? । गोयमा ! छ संघयणा । तं जहा-वइरोसहनारायं० जाव छेवट्ठं त्ति " । एवं संस्थानद्वारेऽपि-" छट्ठाणा पण्णत्ता । तं जहा-समचउरंसे०" ६ । एवं लेश्याद्वारे-"कइ लेसाओ पण्णत्ताओ ? । गोयमा ! छल्लेसा पण्णत्ता । तं जहा-कण्हलेस्सा०" ६ । (मणुस्सा वि त्ति) यथा नैरयिका दशसु द्वारेष्वभिहितास्तथा मनुष्या अपि भणितव्या इति प्रक्रमः । एतदेवाह-" जहिं " इत्यादि । तत्र नारकाणां जघन्यस्थितावेकाऽऽदिसंख्यातान्तसमयाधिकायाम् १, तथा जघन्यावगाहनायाम् २, तस्यामेव संख्यातान्तप्रदेशाधिकायाम् ३, मिश्रे च ४ अशीतिर्भङ्गका उक्ताः । मनुष्याणामप्येतेष्वशीतिरेव । तत्कारणं च तदल्पत्वमेवेति । नारकाणां, मनुष्याणां च सर्वथा साम्यपरिहारायाऽऽह-"जेसु सत्तावीसं" इत्यादि । सप्तविंशतिर्भङ्गकस्थानानि च नारकाणां जघन्यस्थित्यसंख्यातसमयाधिकजघन्यस्थितिप्रभृतीनि, तेषु च जघन्यस्थितौ विशेषस्य वक्ष्यमाणत्वेन तद्वर्जेषु मनुष्याणामभङ्गकं, यतो नारकाणां बाहुल्येन क्रोधोदय एव भवति । तेन तेषां सप्तविंशतिर्भङ्गका उक्तस्थानेषु युज्यन्ते । मनुष्याणां तु प्रत्येकं क्रोधाऽऽद्युपयोगवतां बहूनां भावाच्च कषायोदये विशेषोऽस्ति । तेन तेषां तेषु स्थानेषु भङ्गकाभाव इति । इहैव विशेषाभिधानायाऽऽह-"नवरम्" इत्यादि । येषु स्थानेषु नारकाणामशीतिस्तेषु मनुष्याणामप्यशीतिः, तथा " जेसु सत्तावीसा तेसु अभंगयं" इत्युक्तम्, केवलं मनुष्याणामिदमभ्यधिकम्-यदुत जघन्यकस्थितौ तेषामशीतिर्न तु नारकाणाम् । तत्र सप्तविंशतिरुक्तेत्यभङ्गकम् । तथा आहारकशरीरे अशीतिः, आहारकशरीरवतां मनुष्याणामल्पत्वात् । नारकाणां तु तदास्त्येवेत्येतदभ्यधिकं मनुष्याणामिति । इह च नारकसूत्राणां मनुष्यसूत्राणां च प्रायः शरीराऽऽदिषु चतुर्षु ज्ञानद्वारपदे च विशेषः । तथाहि-"असंखेज्जेसु णं भंते ! मणुस्सावासेसु मणुस्साणं कइ सरीरा पण्णत्ता ? । गोयमा ! पंच । तं जहा-ओरालिए, वेउव्विए, आहारए, तेयए, कम्मए । असंखेज्जेसु णं०जाव ओरालियसरीरे वट्टमाणा मणुस्सा किं कोहोवउत्ता वि० ४ । " एवं सर्वशरीरेषु, नवरमाहारकेऽशीतिर्भङ्गकानां वाच्या, एवं संहननद्वारेऽपि, नवरं "मणुस्साणं भंते ! कइ संघयणा पण्णत्ता ? । गोयमा ! छ संघयणा पण्णत्ता । तं जहा-वइरोसहनारायं० जाव छेवट्ठं । " संस्थानद्वारे "छ संठाणा पण्णत्ता । तं जहा-समचउरंसे० जाव हुंडे" । लेश्याद्वारे-"छ लेसाओ पण्णत्ताओ । तं जहा-कण्हलेसा० जाव सुक्कलेसा" । ज्ञानद्वारे-"मणुस्साणं भंते ! कइ नाणाणि ? । गोयमा ! पंच । तं जहा-आभिणिबोहियनाणं०४ । " एषु च केवलवर्जेष्वभङ्गकम्, केवले तु कषायोदय एव नास्तीति । " वाणमंतर" इत्यादि । व्यन्तराऽऽदयो दशस्वपि स्थानेषु यथा भवनवासिनस्तथा वाच्याः । यत्रासुराऽऽदीनामशीतिर्भङ्गकाः, यत्र च सप्तविंशतिः, तत्र च व्यन्तराऽऽदीनामपि ते तथैव वाच्याः । भङ्गकास्तु लोभमादौ विधायाध्येतव्याः, तत्र भवनवासिभिः सह व्यन्तराणां साम्यमेव । ज्योतिष्काऽऽदीनां तु न तथेति । तेषामेषां सर्वथा साम्यपरिहारसूचनायाऽऽह-(णवरं नाणत्तं भाणियव्वं जं जस्स त्ति) यल्लेश्याऽऽदिगतं यस्य ज्योतिष्काऽऽदेर्नानात्वमितरापेक्षया भेदस्तदुज्ञातव्यमिहेति, परस्परतो विशेषं ज्ञात्वा पतेषां सूत्राण्यध्येयानीति भावः । तत्र लेश्याद्वारे-ज्योतिष्काणामेकैव तेजोलेश्या वाच्या । ज्ञानद्वारे-त्रीणि ज्ञानानि, अज्ञानान्यपि त्रीण्येव, असंज्ञिनां तत्रोपपाताज्जायेन त्रिभङ्गस्यापर्याप्तकावस्थायामपि भावात् । तथा वैमानिकानां लेश्याद्वारे-तेजोलेश्याऽऽदयस्तिस्रो लेश्या वाच्याः । ज्ञानद्वारे च त्रीणि ज्ञानान्यज्ञानानि चेति । वैमानिकसूत्राणि चैवमध्येयानि-" संखेज्जेसु णं भंते ! वेमाणियावाससयसहस्सेसु एगमेगंसि वेमाणियावासंसि केवइया ठिइट्ठाणा पन्नत्ता ?," इत्येवमादीनि॥ भ०१श०५उ०।

जीवानां सर्वलोकव्यापित्वम्-

एयंसि णं भंते! महालयंसि लोगंसि अत्थि केइ परमाणुपोग्गलमेत्ते वि पएसे, जत्थ णं अयं जीवे न जाए वा, न मए वा वि?। गोयमा! णो इणट्ठे समट्ठे। से केणट्ठेणं भंते! एवं वुच्चइ-एयंसि णं महालयंसि लोगंसि णत्थि केइ परमाणुपोग्गलमेत्ते वि पदेसे, जत्थ णं अयं जीवे ण जाए वा, ण मए वा वि?। गोयमा! से जहाणामए केइ पुरिसे अयासयस्स एगं महं अयावयं करेज्जा, से णं तत्थ जहण्णेणं एगं वा दो वा तिन्नि वा, उक्कोसेणं अयासहस्सं पक्खिवेज्जा, ताओ णं तत्थ पउरगोयराओ पउरपाणीयाओ जहण्णेणं एगाहं वा दुयाहं वा तियाहं वा, उक्कोसेणं छम्मासे परिवसेज्जा, अत्थि णं गोयमा! तस्स अयावयस्स केइ परमाणुपोग्गलमेत्ते वि पएसे, जेणं तासिं अयाणं उच्चारेण वा पासवणेण वा खेलेण वा सिंघाणेण वा वंतेण वा पित्तेण वा पूएण वा सुक्केण वा सोणिएण वा चम्मेहिं वा रोमेहिं वा सिंगेहिं वा खुरेहिं वा णहेहिं वा अणिक्कंतपुव्वे भवइ?। णो इणट्ठे समट्ठे, हंता जाइ णं गोयमा! तस्स अयावयस्स केइ परमाणुपोग्गलमेत्ते वि पएसे, जेणं तासिं अयाणं उच्चारेण वा० जाव णहेण वा अणिक्कंतपुव्वे, णो चेव णं एयंसि महालयंसि लोगस्स सासयं जावं, संसारस्स अणादिजावं, जीवस्स य णिच्चजावं, कम्मबहुत्तं जम्मणमरणबाहुल्लं च पडुच्च णत्थि केइ परमाणुपोग्गलमेत्ते वि पएसे, जत्थ णं अयं जीवे ण जाए वा, ण मए वा वि, से तेणट्ठेणं तं चेव० जाव ण मए वा वि॥

(परमाणुपोग्गलमेत्ते वि त्ति) अत्रापिः संभावनायाम। (अयासयस्स त्ति) षष्ठ्याश्चतुर्थ्यर्थत्वादजाशतायेत्यर्थः। (अयावयं ति) अजावृजम्, अजावाटकमित्यर्थः। (उक्कोसेणं अयासहस्सं पक्खिवेज्ज त्ति) यदिहाजाशतप्रायोग्ये वाटके उत्कर्षेणाजासहस्रप्रक्षेपणमभिहितं तत्तासामतिसङ्कीर्णतया उवस्थानस्थापनार्थमिति। (पउरगोयराओ पउरपाणीयाओ त्ति) प्रचुरचरणभूमयः, प्रचुरपानीयाश्च। अनेन चासां प्रचुरमूत्रपुरीषसंभवो बहुक्षारपयसाविरहेण स्वस्थतया चिरजीवित्वं ख्यापितम। (नहेहिं व त्ति) नखाः खुराग्रजागास्तैः "णो चेव णं एयंसि महालयंसि लोगंसि" इत्यस्य "अत्थि केइ परमाणुपोग्गलमेत्ते वि पएसे" इत्यादिना पूर्वोक्तानिह्नापेन संबन्धः, महत्त्वाल्लोकस्य। कथमिदमिति चेत?। अत आह-"लोगस्स" इत्यादि। क्वचिद्धेवं न संभवतीत्यत उक्तम-लोकस्य शाश्वतभावं, प्रतीत्येति योगः। शाश्वतत्वेऽपि लोकस्य संसारस्य सादित्वे नैवं स्यादित्यनादित्वं तस्योक्तं,नानाजीवापेक्षया संसारस्यानादित्वेऽपि विवक्षितजीवस्यानित्यत्वे नोक्तोऽर्थः स्यादतो जीवस्य नित्यत्वमुक्तं, नित्यत्वेऽपि जीवस्य कर्मोपत्वे तथाविधसंसरणाभावान्नोक्तं वेत्तु स्यादतः कर्मबाहुल्यमुक्तम,कर्मबाहुल्येऽपि जन्मादेरहपत्वे नोक्तोऽर्थः स्यादिति जन्मादिबाहुल्यमुक्तमिति।

एतदेव प्रपञ्चयन्नाह-

कइ णं भंते! पुढवीओ पण्णत्ताओ?। गोयमा! जहा पढमसए पंचमुद्देसए तहेव आवासा भावेयव्वा० जाव अणुत्तरविमाणे त्ति० जाव अपराजिए सव्वट्ठसिद्धे। अयं णं भंते! जीवे इमीसे रयणप्पभाए पुढवीए तीसाए णिरयावाससयसहस्सेसु एगमेगंसि णिरयावासंसि पुढवीकाइयत्ताए० जाव वणस्सइकाइयत्ताए णेरइयत्ताए उववण्णपुव्वे?। हंता गोयमा! असई अदुवा अणंतखुत्तो। "कइ णं" इत्यादि। (नरगत्ताए त्ति) नरकाऽऽवासपृथवीकायिकतयेत्यर्थः। (असइं ति) असकृदनेकशः (अदुव त्ति) अथवा (अणंतखुत्तो त्ति) अनन्तकृत्वोऽनन्तभावान्।

सव्वजीवा वि णं भंते! इमीसे रयणप्पभाए पुढवीए तीसाए णिरया०तं चेव० जाव अणंतखुत्तो। अयं णं भंते! जीवे सक्करप्पभाए पुढवीए,पणवीसाए एवं जहा रयणप्पभाए तहेव दो आलावगा जाणियव्वा,एवं० जाव धूमप्पभाए। अयं णं भंते! जीवे तमाए पुढवीए पंचूणे णिरयावाससयसहस्से एगमेगंसि, सेसं तं चेव। अयं णं भंते! जीवे अहेसत्तमाए पुढवीए पंचसु अणुत्तरेसु महइमहालएसु महाणिरएसु एगमेगंसि णिरयावासंसि, सेसं जहा रयणप्पभाए। अयं णं भंते! जीवे चउसट्ठीए असुरकुमारावाससयसहस्सेसु एगमेगंसि असुरकुमारावासंसि पुढवीकाइयत्ताए० जाव वणस्सइकाइयत्ताए देवत्ताए देवित्ताए आसणसयणभंडमत्तोवगरणत्ताए उववण्णपुव्वे?। हंता गोयमा०! जाव कत्तुो। सव्वजीवा वि णं भंते! एवं चेव, एवं० जाव थणियकुमारेसु णाणत्तं आवासेसु आवासा पुव्वभणिया। अयं णं भंते! जीवे असंखेज्जेसु पुढविकाइयावाससयसहस्सेसु एगमेगंसि पुढवीकाइयत्ताए० जाव वणस्सइकाइयत्ताए उववण्णपुव्वे?। हंता गोयमा!० जाव अणंतखुत्तो। एवं सव्वजीवा वि। एवं० जाव वणस्सइकाइएसु।

(असंखेज्जेसु पुढविकाइयावाससयसहस्सेसु त्ति) इहासंख्यातेषु पृथिवीकायिकाऽऽवासेष्वेतावानेव स्थानकसंख्यातसहस्रप्रदर्शनतस्तेषामतिबहुत्वख्यापनार्थम्। नवरम्-

अयं णं भंते! जीवे असंखेज्जेसु बेइंदियावाससयसहस्सेसु एगमेगंसि बेइंदियावासंसि पुढवीकाइयत्ताए० जाव वणस्सइकाइयत्ताए बेइंदियत्ताए उववण्णपुव्वे?। हंता गोयमा!० जाव अणंतखुत्तो। सव्वजीवा वि णं एवं चेव, एवं० जाव मणुस्सेसु, णवरं तेइंदिएसु० जाव वणस्सइकाइयत्ताए तेइंदियत्ताए चउरिंदिएसु चउरिंदियत्ताए, एवं पंचिंदियतिरिक्खजोणिएसु पंचिंदियतिरिक्खजोणियत्ताए मणुस्सेसु मणुस्सत्ताए, सेसं जहा बेइंदियाणं, वाणमंतरजोइसियसोहम्मीसाणाण य जहा असुरकुमाराणं।

"तेइंदिएसु" इत्यादि । त्रीन्द्रियाऽऽदिसूत्रेषु द्वीन्द्रियाऽऽदिसूत्रात् त्रीन्द्रियचतुरिन्द्रियेत्यादिनैव विशेष इत्यर्थः ।

अयं णं भंते ! जीवे सणंकुमारकप्पे बारससु विमाणावाससयसहस्सेसु एगमेगंसि वेमाणियावासंसि पुढविकाइया, समं जहा असुरकुमाराणं० जाव अणंतखुत्तो । णो चेव णं देवित्ताए, एवं सव्वजीवा वि, एवं० जाव आणयपाणएसु, एवं आरणच्चुएसु वि ।

(णो चेव णं देवित्ताए त्ति) ईशानान्तेष्वेव देवस्थानेषु देव्य उत्पद्यन्ते, सनत्कुमाराऽऽदिषु पुनर्नेति कृत्वा "नो चेव णं देवित्ताए" इत्युक्तम् ।

अयं णं भंते ! जीवे तिसु वि अट्ठारसुत्तरेसु गेविज्जगविमाणावाससएसु एवं चेव । अयं णं भंते ! जीवे पंचसु अणुत्तरविमाणेसु एगमेगंसि अणुत्तरविमाणंसि पुढवि० तहेव ०जाव अणंतखुत्तो । णो चेव णं देवत्ताए देवित्ताए, एवं सव्वजीवा वि ।

(णो चेव णं देवत्ताए देवित्ताए य त्ति) अनुत्तरविमानेष्वनन्तरभवे देवा नोत्पद्यन्ते, देव्यश्च सर्वथैवेति "णो चेव णं" इत्युक्तमिति ।

अयं णं भंते ! जीवे सव्वजीवाणं भाइत्ताए पिइत्ताए भाइत्ताए भगिणित्ताए भज्जत्ताए पुत्तत्ताए धूयत्ताए सुण्हत्ताए उववन्नपुव्वे ? । हंता गोयमा !० जाव अणंतखुत्तो । अयं णं भंते ! जीवे सव्वजीवाणं अरित्ताए वेरियत्ताए घायगत्ताए वहगत्ताए पडिणीयत्ताए पच्चामित्तत्ताए उववन्नपुव्वे ? । हंता गोयमा !० जाव अणंतखुत्तो । सव्वजीवा वि णं भंते ! एवं चेव । अयं णं भंते ! जीवे सव्वजीवाणं रायत्ताए जुवरायत्ताए० जाव सत्थवाहत्ताए उववन्नपुव्वे ? । हंता गोयमा ! असतिं० जाव अणंतखुत्तो । सव्वजीवाणं एवं चेव ।

(अरित्ताए त्ति) सामान्यतः शत्रुभावेन (वेरियत्ताए त्ति) वैरिकः शत्रुतायानुबन्धयुक्तस्तत्तया-(घायगत्ताए त्ति) मारकतया (वहत्ताए त्ति) व्यथकतया, ताडकतयेत्यर्थः । (पडिणीयत्ताए त्ति) प्रत्यनीकतया कार्योपघातकतया (पच्चामित्तत्ताए त्ति) अमित्रसहायतया ।

अयं णं भंते ! जीवे सव्वजीवाणं दासत्ताए पेसत्ताए भुयगत्ताए जाइल्लगत्ताए भोगपुरिसत्ताए सीसत्ताए वेसत्ताए उववन्नपुव्वे ? । हंता गोयमा !० जाव अणंतखुत्तो, एवं सव्वजीवा वि० जाव अणंतखुत्तो ॥

(दासत्ताए त्ति) गृहदासीपुत्रतया (पेसत्ताए त्ति) प्रेष्यतया आदेश्यतया (भुयगत्ताए त्ति) भृतकतया दुष्कालादौ पोषिततया (जाइल्लगत्ताए त्ति) कृष्यादिनागस्य नागग्राहकत्वेन (भोगपुरिसत्ताए त्ति) अन्यैरुपार्जितार्थानां भोगकारिनरतया (सीसत्ताए त्ति) शिष्यतया (वेसत्ताए त्ति) द्वेष्यतयेति । भ० १२ श० ७ उ० । स्था० । (जीवः सदा समितमेजते तत्र किं बन्धक इति 'इरियावहिया' शब्दे द्वितीयभागे ६२७ पृष्ठे दर्शितम्) (जीवानां कर्मप्रतिष्ठितत्वं, कर्मसंगृहीतत्वं, जीवपुद्गलयोरन्योन्यबद्धत्वं च 'लोगट्ठिइ' शब्दे वक्ष्यते) करणे क्यप् । जीवनोपाये, 'जीव' णिच् अच् । बृहस्पतौ, नक्षत्रताके पुष्यनक्षत्रे च । स्था० २ ठा० १ उ० । यदा मनुष्ययोनौ द्वीन्द्रियाऽऽदिजीवोत्पत्तिस्तथैव तिर्यग्योनौ, कश्चिद्विशेषो वा ? इति प्रश्ने, उत्तरम्—तिर्यगाश्रितः कोऽपि विशेषः शास्त्रे दृष्टो नास्तीति । १४५ प्र० । सेन० १ उल्ला० । अनुत्तरविमानेषु जीवः कति भवान् करोतीति प्रश्ने, उत्तरम्-विजयाऽऽदिषु उत्कर्षतो वारद्वयं, सर्वार्थसिद्धविमाने एकवारमिति । जीवाभिगमवृत्तौ विजयाऽऽदिषु द्विश्चरमाः, इति तत्त्वार्थसूत्रचतुर्थाध्याये सर्वार्थसिद्धविमानादागतोऽनन्तरभवे सिद्ध्यत्येव, विजयाऽऽदिचतुष्के गतो मनुष्येषु चाऽऽयाति । तत्रापि जघन्येन एकं द्वौ वा भवौ, उत्कर्षतश्चतुर्विंशतिभवान्, तत्र नरभवेऽष्टौ, देवभवेऽष्टौ, भूयो नरभवेऽष्टौ, ततः सिद्ध्यते च, विजयाऽऽदिषु द्विरुत्पन्नस्य नियमात्सिद्धिरनन्तरजन्म एवेति प्रघोषः, प्रज्ञापनायां संख्यातजन्मानीति । ७७ प्र० । सेन० ३ उल्ला० । आउत्तिसामा वनस्पतिविशेषः किं संख्यातजीवोऽसंख्यातजीवः, अनन्तजीवो वा ?, कुत्र प्रोक्तमस्तीति प्रश्ने, उत्तरम्-आउत्तिसन्कमूल ऽऽदौ असंख्याता जीवाः, पत्राऽऽदौ तु एकैको जीव इति प्रज्ञापनाऽऽदौ प्रोक्तमस्तीति । २६७ प्र० । सेन० ३ उल्ला० । जीवेनानादिकालभवं क्षय्यं देयं च भवति, तदनर्पणे क्षुध्यते, न वेति प्रश्ने, उत्तरम्-एकान्तो नास्ति; यदि तपःस्वाध्यायाऽऽदिना कर्म निर्जरयति, तदा तदनर्पणे क्षुध्यते । कर्मनिर्जरणमन्तरा तदनर्पणे न क्षुध्यते इति । ६७ प्र० । सेन० ४ उल्ला० । व्यवहारराशिं प्राप्तो जीवः पुनः सूक्ष्मनिगोदमध्ये याति, न वेति प्रश्ने, उत्तरम्-गृहमनुष्यान् पृष्ट्वा दद्मानीत्यक्षराणि सन्तीति । ११६ प्र० । सेन० ४ उल्ला० । विकसितपुष्पनक्षत्रमध्ये जीवाः संख्याताः, असंख्याता वेति प्रश्ने, उत्तरम् केषु चित्पुष्पेषु संख्याताः, केषुचिदसंख्याताः, केषुचिदनन्ताश्च प्रज्ञापनाऽऽदिषु कथिताः सन्ति । ज्ञातिपुष्पमध्ये तु संख्याता एव कथिताः सन्ति । १३८ प्र० । सेन० ४ उल्ला० ।

जीवआरंभिया–जीवारम्भिका–स्त्री० । यज्जीवानारभमाणस्योपमृद्नतः कर्मबन्धनं सा जीवारम्भिका । क्रियाभेदे, " आरंभिया किरिया दुविहा पण्णत्ता । तं जहा-जीवारंभिया चेव, अजीवारंभिया चेव " । स्था० २ ठा० १ उ० ।

जीवंजीव–जीवञ्जीव–पुं० । जीवयुक्ते, " से णूणं जीवंजीवेणं गच्छइ, जीवंजीवेणं चिट्ठइ । " अनुस्वारस्यागमिकत्वाज्जीवञ्जीवेन जीवयुक्तेन गच्छति, न शरीरबलेन । भ० २ श० १ उ० । ज्ञा० । अन्त० । जीवान् जीवयति दर्शनेन तृप्तिकरत्वात् । चकोरपक्षिणि, वाच० ।

जीवंजीवग–जीवञ्जीवक–पुं० । जीवान् जीवयति ण्वुल् । चकोरे, चर्मपक्षिभेदे, वाच० । प्रज्ञा० । जी० । औ० । प्रश्न० ।

जीवंत–जीवत्–त्रि० । प्राणान् धारयति; " मच्छा व जीवंत व जोतिपत्ता " । (१३ गाथा) सूत्र० १ श्रु० ५ अ० १ उ० ।

जीवकप्प–जीवकल्प–पुं० । द्रव्यकल्पभेदे, " तिविहो य जीवकप्पो, दुपयचउप्पयअपयभेएहिं । " पं० भा० । पं० चू० ।

जीवकाय–जीवकाय–पुं० । जीवनं जीवो ज्ञानाऽऽद्युपयोगस्तत्प्रधानः कायो जीवकायः । भ० ७ श० १ उ० । जीवराशौ, सूत्र० ।

जीवकायस्वरूपनिरूपणार्थमाह-

पुढवीजीवा पुढो सत्ता, आउजीवा तहाऽगणी।
वाउजीवा पुढो सत्ता, तणरुक्खा सबीयगा। ७॥

(पुढवीजीवा इत्यादि) पृथिव्येव पृथिव्याश्रिता वा जीवाः, ते च प्रत्येकशरीरत्वात्पृथक् प्रत्येकं सत्त्वा अभ्युपगन्तव्याः। तथा आपश्च जीवाः। एवमग्निकायाश्च, तथाऽपरे वायुजीवाः। तदेवं चतुर्महाभूतसमाश्रिताः सत्त्वाः प्रत्येकशरीरिणोऽवगन्तव्याः। एत एव पृथिव्यप्तेजोवायुसमाश्रिताः सत्त्वाः प्रत्येकशरीरिणो, वक्ष्यमाणवनस्पतेस्तु साधारणासाधारणशरीरत्वेनापृथक्त्वमप्यस्तीत्यस्यार्थस्य दर्शनाय पुनः पृथक् सत्त्वग्रहणमिति। वनस्पतिकायस्तु यः सूक्ष्मः स सर्वोऽपि निगोदरूपः। साधारणबादरस्तु साधारणोऽसाधारणश्चेति। तत्र प्रत्येकशरीरिणोऽसाधारणस्य कतिचिद्भेदप्रतिपिपादयिषुराह-तत्र तृणानि दर्भवीरणाऽऽदीनि, वृक्षाश्चूताशोकाऽऽदयः, सह बीजैः शालिगोधूमाऽऽदिभिर्यैस्ते सबीजकाः। एते सर्वेऽपि वनस्पतिकायाः सत्त्वा अवगन्तव्याः। अनेन च बौद्धाऽऽदिमतनिरासः कृतोऽवगन्तव्य इति। एतेषां च पृथिव्यादीनां जीवानां जीवत्वेन प्रसिद्धिस्वरूपनिरूपणमाचारे प्रथमाध्ययने शास्त्रपरिज्ञाऽऽख्ये स्वयमेव प्रतिपादितमिति नेह प्रतन्यते।

षष्ठजीवनिकायप्रतिपादनायाऽऽह-

अहावरा तसा पाणा, एवं छक्कायआहिया।
एतावए जीवकाए, णावरे कोइ विज्जई॥ ८॥

(अहावरेत्यादि) तत्र पृथिव्यप्तेजोवायुवनस्पतय एकेन्द्रियाः सूक्ष्मबादरपर्याप्तापर्याप्तकभेदेन प्रत्येकं चतुर्विधाः। अथानन्तरमपरेऽन्ये त्रसन्तीति त्रसाः, द्वित्रिचतुःपञ्चेन्द्रियाः कृमिपिपीलिकाभ्रमरमनुष्याऽऽदयः। तत्र द्वित्रिचतुरिन्द्रियाः प्रत्येकं पर्याप्तकापर्याप्तकभेदात्षड्विधाः। पञ्चेन्द्रियास्तु संज्ञ्यसंज्ञिपर्याप्तकापर्याप्तकभेदाच्चतुर्विधाः। तदेवमनन्तरोक्तया नीत्या चतुर्दशभूतग्रामाऽऽत्मकतया व्याख्यातास्तीर्थकरगणधराऽऽदिभिरित्यनेन तद्भेदाऽऽत्मक एव, संक्षेपतो जीवनिकायो जीवराशिर्भवत्यण्डजोद्भिज्जसंस्वेदजाऽऽदेरेवैवान्तर्भावान्नापरो जीवराशिर्विद्यते कश्चिदिति। सूत्र० १ श्रु० ११ अ०।

जीवकिरिया-जीवक्रिया-स्त्री०। जीवस्य क्रिया व्यापारो जीवक्रिया। सामान्यक्रियायाम्, स्था०। "जीवकिरिया दुविहा पण्णत्ता। तं जहा-सम्मत्तकिरिया चेव, मिच्छत्तकिरिया चेव।" स्था० २ ठा० २ उ०।

जीवगराय-जीवकराज-पुं०। नेमिजिनसमकालिके स्वनामख्याते राजनि, त्रि०।

जीवग्गाह-जीवग्राह-अव्य०। जीवतो ग्रहणे, "जीवग्गाहं गिण्हंति।" जीवतीति जीवस्तं जीवं जीवन्तं गृह्णाति। ज्ञा० १ श्रु० २ अ०।

जीवघण-जीवघन-पुं०। जीवाश्च ते घनाश्च शुषिराऽऽपूरणाद् जीवघनाः। आ०म०द्वि०। अन्तररहितत्वेन जीवप्रदेशमयेषु, सिद्धस्वरूपमधिकृत्य-"अरूविणो जीवघणा" जीवाश्च ते घना अन्तररहितत्वेन जीवप्रदेशमयाः। उत्त० ३६ अ०। जीव एव घनो मूर्त्तिः सैन्धवशिलाशकल इव यस्य। हिरण्यगर्भे, वाच०।

जीवघाय-जीवघात-पुं०। प्राणातिपाते, आव० ६ अ०।

जीवजड-जीवजड-त्रि०। जीवबद्धजिह्वे, नि० चू० १ उ०।

जीवट्ठाण-जीवस्थान-न०। ६ त०। मर्मणि, वाच०। जीवन्ति यथायोगं प्राणान् धारयन्तीति जीवाः प्राणिनः शरीरभृत इति पर्यायाः। तेषां जीवानां स्थानानि सूक्ष्मापर्याप्तैकेन्द्रियत्वाऽऽदयोऽवान्तरविशेषास्तिष्ठन्ति जीवा एषु इति कृत्वा जीवस्थानानि। जीवानां सूक्ष्मापर्याप्तैकेन्द्रियत्वाऽऽदिकेऽवान्तरविशेषे, कर्म०।

अथ जीवस्थानप्रतिपादिकां गाथामाह-

नमिय जिणं जियमग्गण-गुणठाणुवओगजोगलेसाओ।
बंधऽप्पबहुभावे, संखिज्जाई किमवि वुच्छं॥१॥

जिनं नत्वा जीवस्थानाऽऽदि वक्ष्य इति संबन्धः। (कर्म०) जीवमार्गणागुणस्थानाऽऽदि वक्ष्ये, इह स्थानशब्दस्य प्रत्येकं योगाद् जीवस्थानानि मार्गणास्थानानि गुणस्थानानि उपयोगश्च योगश्च लेश्याश्चेति द्वन्द्वे द्वितीयाशस्। (कर्म०) यद्वा-बन्ध इति पदैकदेशेऽपि 'नामा' सत्यभामेतिन्यायेन पदप्रयोगदर्शनाद्बन्धहेतवो मिथ्यात्वाविरतिकषाययोगरूपा वक्ष्यमाणा गृह्यन्ते (अप्पबहु त्ति) भावप्रधानत्वान्निर्देशस्य अल्पबहुत्वे, गत्यादिरूपमार्गणास्थानाऽऽदीनां परस्परं स्तोकभूयस्त्वम्। (भाव त्ति) जीवाजीवानां तेन तेन रूपेण भवनानि परिणमनानि, भावा औपशमिकाऽऽदयः, ततो बन्धश्चाल्पबहुत्वं च भावाश्चेति द्वन्द्वे द्वितीयाबहुवचनं शस्। सूत्रे च-"अप्पबहू" इत्यत्र दीर्घत्वं "दीर्घह्रस्वौ मिथो वृत्तौ"। ८। १। ४। इति प्राकृतसूत्रेण। (संखिज्जाइ त्ति) संख्यायते चतुःपञ्चाद्यिरूपणया परिमीयत इति संख्येयम्। आदिशब्दात्संख्येयाऽसंख्येयाऽनन्तकपरिग्रहः। तत एवं जीवस्थानाऽऽदिकमनन्तकपर्यवसानं द्वारकलापम। अत्र वक्ष्ये इत्यनेनाभिधेयमाह। कथं वक्ष्य इत्याह (किमवि त्ति) किमपि किञ्चित् स्वल्पं न विस्तरवत्। दुष्षमानुभावेनापद्यमानमेधाऽऽयुर्बलाऽऽदिगुणानामेतद्युगीनजनानां विस्तराभिधाने सत्युपकारासंभवात्तदुपकारार्थं चैष शास्त्रारम्भप्रयासः। एतेन संक्षिप्तरुचिसत्त्वानाश्रित्य प्रयोजनमाचष्टे। संबन्धस्त्वर्थाऽऽपत्तिगम्यः, स चोपायोपेयलक्षणः, साध्यसाधनलक्षणो, गुरुपर्वक्रमलक्षणो वा स्वयमभ्यूह्यः। इह च मार्गणास्थानगुणस्थानाऽऽदयः सर्वे पदार्था न जीवपदार्थमन्तरेण विचारयितुं शक्यन्त इति प्रथमं जीवस्थानग्रहणम् १। जीवाश्च प्रपञ्चतो निरूप्यमाणा गत्यादिमार्गणास्थानैरेव निरूपयितुं शक्यन्त इति तदनन्तरं मार्गणास्थानग्रहणम् २। तेषु च मार्गणास्थानेषु वर्तमाना जीवा न कदाचिदपि मिथ्यादृष्ट्याद्यन्यतमगुणस्थानकविकला भवन्तीति ज्ञापनाय मार्गणास्थानकानन्तरं गुणस्थानग्रहणम् ३। अमूनि च गुणस्थानकानि परिणामशुद्ध्यशुद्धिप्रकर्षापकर्षरूपाण्युपयोगवतामेवोपपद्यन्ते, नान्येषामाकाशाऽऽदीनां, तेषां ज्ञानाऽऽदिरूपपरिणामरहितत्वादिति प्रतिपत्त्यर्थं गुणस्थानकग्रहणानन्तरमुपयोगग्रहणम् ४। उपयोगवन्तश्च मनोवाक्कायवेषासु वर्तमाना नियमतः कर्मसबन्धभाजो भवन्ति। तथा चाऽऽगमः-"जावं णं एस जीवे एयइ वेयइ चलइ फंदइ घट्टइ खुब्भइ तं तं भावं परिणमइ, तावं णं अट्ठविहबंधए वा सत्तविहबंधए वा छव्विहबंधए वा एकविहबंधए वा नो णं अबंधए" इति ज्ञापनार्थमुपयोगग्रहणानन्तरं योग-

ग्रहणम् ५। योगवशाच्चोपात्तस्यापि कर्मणो यावन्न कृष्णाऽऽद्यन्यतमलेश्यापरिणामो जायते, तावन्न तस्य स्थितिपाकाद्यशेषो भवति, "स्थितिपाकविशेषस्तस्य भवति लेश्याविशेषेण" इति वचनप्रामाण्यात् । ततो योगवशादुपात्तस्य कर्मणो लेश्याविशेषतः स्थितिपाकविशेषो भवतीति प्रतिपत्तये योगानन्तरं लेश्याग्रहणम् ६ । लेश्याश्चान्तश्च यथायोगं बन्धहेतुभिः कर्मबन्धोदयोदीरणासक्ताः प्रकुर्वन्तीति ज्ञापनाय लेश्यानन्तरं बन्धग्रहणम् ७ । बन्धोदयाऽऽश्रियुक्ताश्च जीवा मार्गणास्थानाऽऽश्रित्य नियमतः परस्परमल्पे वा भवेयुर्बहवो वेति निर्देशार्थं बन्धानन्तरमल्पबहुत्वग्रहणम् ८ । ते च जीवा मार्गणास्थानाऽऽदिष्वल्पे वा बहवो वा भवन्तोऽवश्यं षण्णामौपशमिकाऽऽदिभावानां केषुचिद्भावेषु वर्त्तन्त इति प्रकटनार्थमल्पबहुत्वानन्तरं भावग्रहणम् ९। औपशमिकाऽऽदिभावयुक्तं च जीवानामल्पबहुत्वं नियमतः संख्येयकेनासंख्येयकेनानन्तकेन वा निरूपणीयमिति भावग्रहणानन्तरं संख्येयकाऽऽदिग्रहणमिति १०। यद्यपि चेह सामान्येनोक्तं जीवस्थानाऽऽदि वक्ष्यं तथाप्येवं विशेषतो द्रष्टव्यम् । जीवस्थानकेषु गुणस्थानकयोगोपयोगलेश्याकर्मबन्धोदयोदीरणासत्ता वक्ष्यं । कर्म० ।

मार्गणास्थानकेषु जीवस्थानाऽऽदीनि-

" चउदसजियठाणेसु, चउदस गुणठाणगाणि जोगाय ।
उवओगलेसबंधग-ओदीरणासंतअट्ठपए " ॥ कर्म० ।

तत्र यथोद्देशं निर्देश इति न्यायात् प्रथमं तावज्जीवस्थानानि निरूपयन्नाह--

इह सुहुमबायरेगिं-दि-वि-ति-चउ-असन्निसन्निपंचिंदी ।
अपजत्तापजत्ता, कमेण चउदस जियट्ठाणा ॥ ९ ॥

इहास्मिन् जगति अनेन क्रमेण चतुर्दश जीवस्थानानि प्राणिकृपणशब्दार्थानि भवन्ति । केन क्रमेणेति चेदुच्यते-सूक्ष्मबादरैकेन्द्रियद्वित्रिचतुरसंज्ञिसंज्ञिपञ्चेन्द्रियाः, एते च सर्वेऽपि प्रत्येकं पर्याप्तका अपर्याप्तकाश्चेति । तत्रैकं स्पर्शनलक्षणमिन्द्रियं येषां ते एकेन्द्रियाः पृथिव्यप्तेजोवायुवनस्पतयः । ते च प्रत्येकं द्वेधा-सूक्ष्माः, बादराश्च । सूक्ष्मनामकर्मोदयात्सूक्ष्माः सकललोकव्यापिनो, बादरनामकर्मोदयाद्बादराः, ते च लोकप्रतिनियतदेशवर्तिनः । द्वित्रिचतुरसंज्ञिसंज्ञिपञ्चेन्द्रिया इति । इन्द्रियशब्दस्य प्रत्येकं योगाद्वीन्द्रियाद्यास्त्रीन्द्रियाः चतुरिन्द्रिया असंज्ञिसंज्ञिनेदनिक्षाच्च पञ्चेन्द्रियाः । तत्र द्वे स्पर्शनरसनलक्षणे इन्द्रिये येषां ते द्वीन्द्रियाः, कृमिनृतरकचन्दनकशङ्खकपर्दजलौकाप्रभृतयः । त्रीणि स्पर्शनरसनघ्राणरूपाणीन्द्रियाणि येषां ते त्रीन्द्रियाः, कुन्थुमत्कुणयूकागर्दभेन्द्रगोपकमत्कोटकाऽऽदयः । चत्वारि स्पर्शनरसनघ्राणचक्षूरूपाणीन्द्रियाणि येषां ते चतुरिन्द्रियाः, भ्रमरमक्षिकामशकवृश्चिकाऽऽदयः । पञ्च स्पर्शनरसनघ्राणचक्षुःश्रोत्ररूपाणीन्द्रियाणि येषां ते पञ्चेन्द्रियाः, मत्स्यमकरनक्रकच्छपसारसहंसनरसुरनारकाऽऽदयः । ते च द्विधा-संज्ञिनोऽसंज्ञिनश्च । तत्र संज्ञानं संज्ञा, भूतभवद्भाविभावस्वभावपर्यालोचनम् । " उपसर्गादातः " । ५ । ३ । ११० । इत्यङ् प्रत्ययः । सा विद्यते येषां ते संज्ञिनः, विशिष्टस्मरणाऽऽदिरूपमनोविज्ञानमाज इति यावत् । तद्विपरीता असंज्ञिनो विशिष्टस्मरणाऽऽदिरूपमनोविज्ञानविकला इत्यर्थः । एते च सूक्ष्मैकेन्द्रियाऽऽदयः प्रत्येकं द्विधा-पर्याप्तकाः, अपर्याप्तकाश्च । पर्याप्तिर्नाम-पुद्गलोपचयजः पुद्गलग्रहणपरिणामहेतुः शक्तिविशेषः । सा च विषयभेदात् षोढा-आहारपर्याप्तिः, शरीरपर्याप्तिः, इन्द्रियपर्याप्तिः, उच्छ्वासपर्याप्तिः, भाषापर्याप्तिः, मनःपर्याप्तिश्चेति । तत्र यया बाह्यमाहारमादाय खलरसरूपतया परिणमयति सा आहारपर्याप्तिः, यया रसीभूतमाहारं रसासृङ्मांसमेदोऽस्थिमज्जशुक्रलक्षणसप्तधातुरूपतया परिणमयति सा शरीरपर्याप्तिः, यया धातुरूपतया परिणामितमाहारमिन्द्रियरूपतया परिणमयति सा इन्द्रियपर्याप्तिः, यया पुनरुच्छ्वासप्रायोग्यवर्गणादलिकमादायोच्छ्वासरूपतया परिणमय्याऽऽलम्ब्य च मुञ्चति सा उच्छ्वासपर्याप्तिः, यया तु भाषाप्रायोग्यवर्गणाद्रव्यं गृहीत्वा भाषारूपेण परिणमय्याऽऽलम्ब्य च मुञ्चति सा भाषापर्याप्तिः, यया पुनर्मनोयोग्यवर्गणादलिकं गृहीत्वा मनस्त्वेन परिणमय्याऽऽलम्ब्य च मुञ्चति सा मनःपर्याप्तिः । एताश्च यथाक्रममेकेन्द्रियाणां द्वीन्द्रियाऽऽदीनां संज्ञिनां च चतुःपञ्चषट्संख्या भवन्ति । यदभाणि-

" आहारसरीरिंदिय-पज्जत्ती आणपाणभासमणे ।
चत्तारि पंच छप्पि य, एगिंदियविगलसन्नीणं " ॥ १ ॥

पर्याप्तयो विद्यन्ते येषां ते पर्याप्ताः "अम्राऽऽदित्वः" । ७ । २ । ४६ । इति मत्वर्थीयोऽप्रत्ययः, स्वार्थिककप्रत्ययोपादानात्पर्याप्तकाः । ये पुनः स्वयोग्यपर्याप्तिपरिसमाप्तिविकलास्तेऽपर्याप्तकाः । ते च द्विधा-लब्ध्या, करणैश्च । तत्र येऽपर्याप्तका एव सन्तो म्रियन्ते, न पुनः स्वयोग्यपर्याप्ताः सर्वा अपि समर्थयन्ते ते लब्ध्यपर्याप्तकाः । ये पुनः करणानि शरीरेन्द्रियाऽऽदीनि नतावन्निर्वर्तयन्ति, अथवा अवश्यं पुरस्तान्निर्वर्तयिष्यन्ति ते करणापर्याप्तकाः । इह चैवमागमः-"लब्ध्यपर्याप्तका अपि नियमादाहारशरीरेन्द्रियपर्याप्तिपरिसमाप्तावेव म्रियन्ते, नान्यथा, यस्मादागामिभवायुर्बध्वा म्रियन्ते सर्वे एव देहिनः, तच्चाऽऽहारशरीरेन्द्रियपर्याप्तिपर्याप्तानामेव बध्यत इति " ॥ तदेवं निरूपितानि जीवस्थानानि । कर्म० ४ कर्म० । पं० सं० । (जीवस्थानेषु १४ गुणस्थानानि ' गुणठाण ' शब्दे तृतीयभागे ए७ पृष्ठे उक्तानि) साम्प्रतं योगा वक्तुमवसरप्राप्तास्ते च पञ्चदश । तद्यथा--सत्यवाग्योगः, असत्यवाग्योगः, सत्यमृषावाग्योगः, असत्यामृषावाग्योगः ।

तत्स्वरूपं चेदम्-

" सरुवा हिंसा सत्तामह, संतो मुणयो गुणा पयत्था वा ।
ताव्वयरीया मोसा, मीसा जा तदुभयसहावा ॥ १ ॥
अणहिगया जा तीसु वि, सद्दुच्चिय केवलो असच्चमुसा" ।

एवं मनोयोगोऽपि चतुर्धा द्रष्टव्यः । काययोगः सप्तधा-औदारिकम्, औदारिकमिश्रं, वैक्रियं, वैक्रियमिश्रम्, आहारकम्, आहारकमिश्रं, कार्मणं च । तत्रौदारिककाययोगस्तिर्यङ्मनुष्ययोः, तयोरेवापर्याप्तयोरौदारिकमिश्रकाययोगः, वैक्रियकाययोगो देवनारकयोः तिर्यङ्मनुष्ययोर्वा, वैक्रियलब्धिमतां वैक्रियमिश्रकाययोगोऽपर्याप्तयोर्देवनारकयोस्तिर्यङ्मनुष्ययोर्वा, वैक्रियस्यारम्भकाले परित्यागकाले च आहारकं चतुर्दशपूर्वविदः, आहारकमिश्रकाययोगः, आहारकस्य प्रारम्भसमये परित्यागकाले च कार्मणकाययोगोऽष्टप्रकारकर्मविकाररूपशरीरचयस्वरूपोऽन्तरालगतावुत्पत्तिप्रथमसमये केवलिसमुद्घातावस्थायां च ।

तानेतान् योगान् जीवस्थानकेषु व्याचिख्यासुराह-

अपजत्तछक्कि कम्मुर-लमीसजोगा अपजसन्नीसु ।

ते सावरुत्तरमीस एसुं, तणुपज्जेसु उरलमन्ने ॥ ४ ॥

अपर्याप्तानां सूक्ष्मबादरद्वित्रिचतुरसंज्ञिपञ्चेन्द्रियाणां षट्सपर्याप्तषट्कं, तस्मिन् अपर्याप्तषट्के, संज्ञिपञ्चेन्द्रियापर्याप्तवर्जितेषु षट्सु अपर्याप्तेषु योगौ भवतः। द्विवचनस्य बहुवचनं प्राकृतत्वात्। यथा-"हत्था पाया" इत्यादौ। कौ योगौ?,इति। आह-कार्मणौदारिकामश्रौ; तत्र कार्मणकाययोगोऽपान्तराळगतावुत्पत्तिप्रथमसमये च,शेषकाळं त्वौदारिकमिश्रकाययोगः। (अपज्जत्तसंखीसु। ते द्वावि उत्तरमीस त्ति) अपर्याप्तसंज्ञिषु संज्ञ्यपर्याप्तजीवेषु तौ पूर्वोक्तौ कार्मणौदारिकमिश्रकाययोगौ भवतः। किं केवलौ?,नेत्याह-सह वैक्रियमिश्रेण वर्त्तत इति सवैक्रियमिश्रौ। तथा चापर्याप्तसंज्ञिनि त्रयो योगा भवन्ति कार्मणकाययोगः, औदारिकमिश्रकाययोगः, वैक्रियमिश्रकाययोगश्च। तत्र कार्मणकाययोगोऽपान्तरालगतावुत्पत्तिप्रथमसमये च,शेषकाले तु तिर्यङ्मनुष्ययोरौदारिकमिश्रकाययोगः। संज्ञिनोऽपर्याप्तस्य देवनारकेषु पुनरुत्पद्यमानस्य वैक्रियमिश्रकाययोगो द्रष्टव्यः,न शेषस्य,असंभवात्। मिश्रता चात्र कार्मणेन सह द्रष्टव्या। अत्रैव मतान्तरमुपदर्शयन्नाह-पसु पूर्वनिर्दिष्टेषु शेषपर्याप्त्यपेक्षया पर्याप्तेषु,तनुपर्याप्तेषु, शरीरपर्याप्तिष्वित्यर्थः। औदारिकमौदारिककाययोगम्, अन्ये केचिदाचार्याः शीलाङ्काऽऽदयः; प्रतिपादयन्तीति शेषः। शरीरपर्याप्त्या हि परिसमाप्तिवत्या किल तेषां शरीरं परिपूर्णं निष्पन्नमिति कृत्वा। तथा च तद्ग्रन्थः-औदारिककाययोगास्तिर्यङ्मनुष्ययोः शरीरपर्याप्तेरूर्ध्वं, तदारतस्तु मिश्र इति। नन्वनया युक्त्या संज्ञिनोऽपर्याप्तस्य देवनारकेषूत्पद्यमानस्य तनुपर्याप्त्या पर्याप्तस्य वैक्रियमपि शरीरमुपयुक्त एव, किमिह तन्नोक्तमिति?। उच्यते-उपलक्षणत्वात् एतदपि द्रष्टव्यमित्यदोषः। यद्वा-इहापर्याप्ता लब्ध्यपर्याप्तका एवान्तर्मुहूर्त्तायुषो द्रष्टव्याः। ते च तिर्यङ्मनुष्या एव घटन्ते,तेषामेवान्तर्मुहूर्तायुष्कत्वसंजनत्वात्,न देवनारकाः,तेषां जघन्यतोऽपि दशवर्षसहस्रायुष्कत्वात्। लब्ध्यपर्याप्तका अपि न जघन्यतोऽपीन्द्रियपर्याप्तौ परिसमाप्तायामेव म्रियन्ते, नार्वागित्युक्तमागमाभिप्रायेण। ततस्तेषां लब्ध्यपर्याप्तकानां शरीरपर्याप्त्या पर्याप्तानामौदारिकमेव शरीरमुपपद्यते, न वैक्रियमित्यदोषः। किं चान्यमतकथनेनायमभिप्रायः सूच्यते-यद्यपि तेषां शरीरपर्याप्तिः समजनिष्ट,तथापि इन्द्रियोच्छ्वासाऽऽदीनामद्याप्यनिष्पन्नत्वेन शरीरस्यासंपूर्णत्वात्। अत एव कार्मणस्याप्यद्यापि व्यापियमाणत्वाद्औदारिकमिश्रमेव तेषां युक्त्या घटमानमिति ॥ ४ ॥

सव्वे सन्निपत्ते, हरलं सुहुमे सन्नास तं चउसु ।
बायरि सविउव्विदुगं, पज्जसन्निसु वार छवओगा ॥५॥

सर्वे पञ्चदशापि योगा भवन्ति। तथाहि-चतुर्भ्यो मनोयोगेभ्यः,चतुर्भ्यो वाग्योगेभ्यः,सप्तधा काययोगेभ्यः क्रमेण,इति। आह-संज्ञिपर्याप्ते संज्ञी चासौ पर्याप्तः संज्ञिपर्याप्तस्तस्मिन् संज्ञिपर्याप्ते। नन्वौदारिकमिश्रवैक्रियमिश्रकार्मणकाययोगाः कथं संज्ञिपर्याप्तस्य घटन्ते,तेषामपर्याप्तावस्थाभावित्वात्?। उच्यते-वैक्रियमिश्रं संयतादेर्वैक्रियं प्रारभमाणस्य प्राप्यते, औदारिकमिश्रकार्मणकाययोगौ तु केवलिनः समुद्घातावस्थायाम्।

यदाह भगवानुमास्वातिवाचकवरः-

" औदारिकप्रयोक्ता, प्रथमाष्टमसमययोरसाविष्टः।
मिश्रौदारिकयोक्ता, सप्तमषष्ठद्वितीयेषु ॥ १ ॥
कार्मणशरीरयोगी, चतुर्थके पञ्चमे तृतीये च ॥ " इति।

पर्याप्तसूक्ष्मैकेन्द्रिये औदारिककाययोगो भवति, पर्याप्तशब्दश्च "सव्वे सन्निपत्ते" इतिपदाद् क्रमसकर्मणिन्यायेन सर्वत्र योज्यः। (चउसु त्ति) चतुर्षु द्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियासंज्ञिपञ्चेन्द्रियेषु पर्याप्तेषु तदेवौदारिकं भवति। किं केवलम्?, नेत्याह-सभाषं सह भाषया असत्यामृषास्वरूपया, " विगलेसु असच्चमोस त्ति" वचनात् वर्त्तते इति सभाषम। को ऽर्थः?-विकलत्रिकासंज्ञिपञ्चेन्द्रियेषु पर्याप्तेषु औदारिककाययोग सत्यामृषाभाषालक्षणौ द्वौ योगौ इत्यर्थः। तादृत्यनुवर्त्तते, तदौदारिकं सह वैक्रियद्विकेन वैक्रियवैक्रियमिश्रलक्षणेन वर्त्तत इति सवैक्रियद्विकं बादरैकेन्द्रियपर्याप्ते भवति। अयमर्थः-बादरैकेन्द्रिये पर्याप्ते औदारिककाययोग-वैक्रियकाययोग-वैक्रियमिश्रकाययोगलक्षणास्त्रयो योगा भवन्ति। तत्रौदारिककाययोगः पृथिव्यप्तेजोवायुवनस्पतीनां, वैक्रियद्विकं तु वायुकायस्येति प्ररूपिता जीवस्थानेषु योगाः। कर्म० ४ कर्म०।

एतेषु पुनर्जीवस्थानेषु योगानभिधित्सुराह-

विगलासन्नीपज्ज-त्तएसु लब्भंति कायवइजोगा।
सव्वे वि सन्निपज्ज-त्तएसु सेसेसु कायोगो ॥ ६ ॥

इह पदैकदेशे पदसमुदायोपचाराद् विकला इत्युक्ते विकलेन्द्रियग्रहणम्। एवमन्यत्रापि यथायोगं परिज्ञावनीयम्। तत्र विकलेन्द्रियेषुद्वित्रिचतुरिन्द्रियरूपेषु,असंज्ञिकेषु च पञ्चेन्द्रियेषु, पर्याप्तेषु कायवाग्योगौ लभ्येते। तत्र काययोग औदारिकशरीरलक्षणो द्रष्टव्यः, वाग्योगश्चासत्यामृषारूपः, " विगलेसु असच्चमोसे च।" इति वचनात्। सर्वेऽपि च संज्ञिपञ्चेन्द्रियेषु पर्याप्तेषु सप्रभेदाः कायवाङ्मनोयोगाः पञ्चदशापि योगा लब्धेषु भवन्तीत्यर्थः। तत्र कार्मणौदारिकमिश्रौ केवलिसमुद्घातावस्थायाम्। उक्तं च-" मिश्रौदारिकयोगी, सप्तमषष्ठद्वितीयेषु। कार्मणशरीरयोगी, चतुर्थके पञ्चमे तृतीये च " ॥ १ ॥ इति। आहारकाहारकमिश्रावाहारकलब्धीकियवैक्रियमिश्रौ च तत्कर्तुः शेषास्त्वौदारिकाऽऽदयः सुप्रतीताः,तथा शेषेषु पर्याप्तापर्याप्तसूक्ष्मबादरैकेन्द्रियेषु, अपर्याप्तेषु च द्वित्रिचतुरिन्द्रियासंज्ञिसंज्ञिषु कायोयोग एवैको भवति ॥ ६ ॥

तमेव स्पष्टयन्नाह—

लब्धीए करणेहि य, ओरालिय मीसगो अपज्जत्ते।
पज्जत्ते ओरालो, वेउव्विय मीसगो वा वि ॥ ७ ॥

लब्ध्या, करणैश्चापर्याप्ते औदारिकमिश्रः काययोगो भवति। इदं च तिर्यङ्मनुष्यानधिकृत्योक्तमवसेयम्। तेषामेव हि लब्ध्या, करणैश्चेति विशेषणद्वयसंभवः, न देवनारकाणां. ते हि करणापर्याप्ता एव संभवन्ति,न लब्ध्यपर्याप्तकाः, ततस्तेषामपर्याप्तावस्थायां वैक्रियमिश्रः काययोगो वेदितव्यः। सप्तानामपि चापर्याप्तानामपान्तरालगतावुत्पत्तिप्रथमसमये च कार्मणकाययोगः। तथा पर्याप्ते औदारिको, वैक्रियो, वैक्रियमिश्रश्च। तत्रौदारिकस्तिर्यङ्मनुष्याणां, वैक्रियो देवनारकाणां, वैक्रियवैक्रियमिश्रौ पर्याप्तबादरवायुकायिकपञ्चेन्द्रियतिर्यङ्मनुष्याणां वैक्रियलब्धिमताम्। अपिशब्दाद्याहारकाहारकमिश्रौ चतुर्दशपूर्वविदः, इह केचन शरीरपर्याप्तेरर्वाक् नरतिरश्चामौदारिकमिश्रं, देवनारकाणां वैक्रियमिश्रं,शरीरपर्याप्तेरूर्ध्वं पुनः शेषपर्याप्तिभिरपर्याप्तानामप्यौदारिकं वैक्रियं चेच्छन्ति, तन्मतेनेयमन्यकर्तृका गाथा-

कम्मुरलदुगमपज्जे, वेउव्विदुगं च सन्निलद्धिट्ठे।

पज्जेसुं उरलो त्रिय, वाउ वेउव्वियदुग च ॥ ८ ॥

अपर्याप्ते सूक्ष्मऽऽदौ कार्मणमौदारिकद्विकं च औदारिकौदारिकमिश्रत्वेन, नाधना पातनिकाऽनुसारेण वेदितव्या। संज्ञिनि पुनः "लद्धिल्ले" इति वैक्रियलब्धिमति देवादावपर्याप्ते वैक्रियद्विकमवैक्रियवैक्रियमिश्रलक्षणं, चशब्दात् कार्मणं च द्रष्टव्यम्। तथा पर्याप्तेषु सूक्ष्माऽऽदेशब्दादौदारिक एव काययोगः, उपलक्षणमेतत्-तेन देवनारकेषु वैक्रिय एव। तथा वातं वायुकायिके पर्याप्ते वैक्रियद्विकम्-वैक्रियवैक्रियमिश्रलक्षणं, चशब्दस्यानुक्तसमुच्चायकत्वादौदारिकं च वैक्रियद्विकमपि च वायुकायस्य कस्य चिदेव द्रष्टव्यम्, न तु सर्वस्य। यत उक्तं प्रज्ञापनाचूर्णौ-" तिण्हं ताव रासीणं वेउव्वियलद्धी चेव नत्थि, वायरपज्जत्ताणं पि संखेज्जइभागस्स त्ति "। अत्र (तिण्हं रासीणं ति) त्रयाणां पर्याप्तापर्याप्तसूक्ष्मापर्याप्तबादररूपाणां राशीनाम्। पं० सं० १ द्वार। कर्म० ४ कर्म०। साम्प्रतमुपयोगः प्ररूपणावसरप्राप्तः, ते च द्वादश। तद्यथा-मतिज्ञानश्रुतज्ञानाऽवधिज्ञानमनःपर्यवज्ञानकेवलज्ञानलक्षणानि पञ्च ज्ञानानि। मत्यज्ञानश्रुताज्ञानविभङ्गरूपाणि त्रीण्यज्ञानानि। चक्षुर्दर्शनाऽचक्षुर्दर्शनाऽवधिदर्शनकेवलदर्शनरूपाणि चत्वारि दर्शनानीत्येतानुपयोगान् जीवस्थानकेषु विदर्शयिषुराह-(पज्जत्तसन्निसु चार उवओग त्ति) पञ्चशब्देन पर्याप्त उच्यते। ततः पर्याप्ताश्च ते संज्ञिनश्च पर्याप्तसंज्ञिनः, तेषु पर्याप्तसंज्ञिषु द्वादश द्वादशसंख्या उपयोगा भवन्ति। ते च कथमित्याह, न तु पुनरुपयोगानां तथा जीवस्वभावतो योगः सम्भवात्। उक्तं च-" सव्वे दाणुवओगा। "

श्रीमद्वाचकपिण्डादा अप्याहुः-

"नाणम्मि दंसणम्मि य, एत्तो एगयरम्मि उवउत्ता।
सव्वस्स केवलिस्स वि, जुगवं दो नत्थि उवओगा' (१) इति ॥५॥

पज्जत्तचउरिंदियसन्निसु, दुदंस दुअनाण दससु चक्खु विणा।
सन्नि अपज्जे मणना-णचक्खुकेवलदुगविहूणा ॥ ९ ॥

चतुरिन्द्रियाश्च असंज्ञिनश्च चतुरिन्द्रियासंज्ञिनः, पर्याप्ताश्च ते चतुरिन्द्रियासंज्ञिनश्च, तेषु पर्याप्तचतुरिन्द्रियासंज्ञिषु, चत्वार उपयोगा भवन्ति। के ते ?, इत्याह-(दुदंस दुअनाण ति) दर्शो दर्शने, द्वयोर्दर्शयोः समाहारो द्विदर्शम्-चक्षुर्दर्शनाचक्षुर्दर्शनलक्षणम्, द्वयोरज्ञानयोः समाहारो द्व्यज्ञानम्-मत्यज्ञानश्रुताज्ञानरूपम्। अयमर्थः-पर्याप्तचतुरिन्द्रियेषु पर्याप्तासंज्ञिपञ्चेन्द्रियेषु च मत्यज्ञानश्रुताज्ञानचक्षुर्दर्शनाचक्षुर्दर्शनलक्षणाश्चत्वार उपयोगा भवन्ति। दशसु जीवस्थानकेषु पर्याप्तापर्याप्तसूक्ष्मबादरैकेन्द्रियद्वीन्द्रियत्रीन्द्रियाऽपर्याप्तापर्याप्तचतुरिन्द्रियासंज्ञिपञ्चेन्द्रियलक्षणेषु पूर्वोक्तश्चत्वार उपयोगाश्चक्षुर्दर्शनं विना भवन्ति। पूर्वोक्तदशजीवस्थानकेषु चक्षुर्दर्शनवर्जा अचक्षुर्दर्शनमत्यज्ञानश्रुताज्ञानलक्षणास्त्रय उपयोगा भवन्ति। ननु स्पर्शनेन्द्रियावरणक्षयोपशमसंभवाद्बहवो मतिरेकेन्द्रियाणां, यत्तु श्रुतं तत्कथं तेषां सम्भवति। भावेन्द्रियश्रोत्रेन्द्रियलब्धिमतो हि तदुपपद्यते, नान्यस्य।

तदुक्तम्-

" नाणं सुयं भासासो-यलद्धिणो जुज्जए न इयरस्स।
भासानिसुद्दस्स सुयं, से कण्ण व जं हविज्जा हि" ॥१॥ इति ?। उच्यते-इह तावदेकेन्द्रियाणामाहारऽऽदिसंज्ञा विद्यन्ते, तथा सूत्रेऽभिधानात्, संज्ञा चाभिलाष उच्यते। यद्वादि परोपक रज्जरिनिः श्रीहरिभद्रसूरिभिर्मूलाऽऽवश्यकटीकायाम्-आहारसंज्ञा आहाराभिलाषः क्षुद्वेदनीयप्रभवः खल्वात्मपरिणामविशेष इति। अभिलाषश्च-मनोरूपं वस्तु पुष्टिकारि, तद्यदीदमवाप्यते ततः समीचीनं नयतीत्येवं शब्दार्थोल्लेखानुवद्धः स्वपुष्टिनिमित्तभूतप्रतिनियतवस्तुप्राप्त्यध्यवसायरूपः स च श्रुतमेव शब्दार्थाऽऽलोचनानुसारित्वात्, श्रुतस्यैवैतल्लक्षणत्वात्।

यदवादिषुर्दशितप्रवादिकुवादिश्रीजिनभद्रगणिक्षमाश्रमणपादाः-

" इंदियमणोनिमित्तं, विन्नाणं जं सुयानुसारेणं।
निययत्थुत्तिसमत्थं, तं भावसुयं मईसेसं " ॥ १ ॥

(सुयानुसारेणं ति) शब्दार्थाऽऽलोचनानुसारेण केवलमेकेन्द्रियाणामव्यक्त एव कञ्चनाप्यनिर्वचनीयः शब्दार्थोल्लेखो द्रष्टव्यः। अन्यथाऽऽहाराऽऽदिसंज्ञाऽनुपपत्तेः। यदप्युक्तम्-भाषालब्धीन्द्रियलब्धिकलत्वाद्वेन्द्रियाणां श्रुतमनुपपन्नमिति। तदप्यसमीक्षिताभिधानम्। तथाहि-बकुलाऽऽदेः स्पर्शनेन्द्रियातिरिक्तद्रव्येन्द्रियलब्धिकलत्वेऽपि किमपि सूक्ष्मं भावेन्द्रियपञ्चकविज्ञानमभ्युपगम्यते। " पंचिंदिय व्व बउलो,नरु व्व सव्वविसओवलंभाओ। " इत्यादिवचनप्रामाण्यात्। तथा जात्यादीन्द्रियलब्धिकलत्वेऽपि तेषां किमपि सूक्ष्मं श्रुतमपि भविष्यति, अन्यथाऽऽहाराऽऽदिसंज्ञाऽनुपपत्तेः। यदाहुः प्रशस्यभाष्यस्य कारकाः पीकलभ. श्रीजिनभद्रगणिक्षमाश्रमणाः-"जह सुहुमं भावेंदिय-नाणं दव्विंदियाण विरहे वि। दव्वसुया भावम्मि व,नावसुयं पंच्चयाईणं ॥१॥" इति। संज्ञी चासौ अपर्याप्तः संज्ञ्यपर्याप्तस्तस्मिन् संज्ञ्यपर्याप्ते मनःपर्यवज्ञानचक्षुर्दर्शनकेवलज्ञानकेवलदर्शनलक्षणद्विकविहीनाः शेषा मतिज्ञानश्रुतज्ञानावधिज्ञानमत्यज्ञानश्रुताज्ञानविभङ्गज्ञानाचक्षुर्दर्शनावधिदर्शनरूपा अष्टावुपयोगा भवन्ति। कर्म० ४ कर्म०।

जीवस्थानेषूपयोगानभिधाति-

मइसुयअन्नाण.ऽऽ-चक्खुदंसणेकारसेसु ठाणेसु।
पज्जत्तचउपणिंदिसु, सचक्खुसन्नीसु बारस वि ॥७॥

एकादशसु पर्याप्तापर्याप्तसूक्ष्मबादरैकेन्द्रियद्वीन्द्रियत्रीन्द्रियाऽपर्याप्तचतुरिन्द्रियासंज्ञिपञ्चेन्द्रियेषु मत्यज्ञानश्रुताज्ञानाचक्षुर्दर्शनाख्यास्त्रय उपयोगा भवन्ति। अपर्याप्तकाश्चेह लब्ध्यपर्याप्तका वेदितव्याः। अन्यथा करणापर्याप्तकेषु चतुरिन्द्रियाऽऽदिष्विन्द्रियपर्याप्तौ सत्यां चक्षुर्दर्शनमपि प्राप्यते, मूलटीकायामाचार्यपादैस्त्वेवमुक्तत्वात्। [illegible] करणापर्याप्ते मतिश्रुताविज्ञानविभङ्गज्ञानावधिदर्शनान्यपि तथा। (पज्जत्तचउपणिंदिसु त्ति) पर्याप्तेषु चतुरिन्द्रियेषु असंज्ञिपञ्चेन्द्रियेषु च सचक्षुर्दर्शनाः पूर्वोक्तास्त्रय उपयोगा भवन्ति। संज्ञिषु च पर्याप्तेषु द्वादशापि। पं० सं० १ द्वार।

साम्प्रतं जीवस्थानेष्वेव लेश्याः प्रतिपिपादयिषुराह—

सन्निदुगि छ अस्सि अप-त्तबायरे पढम चउ त्ति सेसेसु।

संज्ञिनो द्विकमपर्याप्तपर्याप्तलक्षणं संज्ञिद्विकं, तस्मिन् संज्ञ्यपर्याप्ते, संज्ञिनि पर्याप्ते चेत्यर्थः। षट् लेश्याः कृष्णनीलकापोततेजःपद्मशुक्ललक्षणा भवन्ति। अपर्याप्तबादरे प्रथमाश्चतस्रः कृष्णनीलकापोततेजोरूपा भवन्ति। तेजोलेश्या कथमस्मिन्नवाप्यत इति चेत् ?। उच्यते-यदा "पुढवीआउवणस्सइगब्भे पज्जत्तसंखजीवेसु। सग्गचुयाणं वासो, सेसा पंचिंदियतिरिएसु ठाणा" ॥१॥ इति वचनात् कश्चनापि देवः स्वर्गलोकाच्युतः सन् बादरैकेन्द्रियतया पृथ्वीकायेषु मध्ये समुत्पद्यते, तदा तस्य घण्टालालान्यायेन सा प्राप्यत इत्यदोषः। (ति से-

सत्तु त्ति । प्रथमा इत्यनुवर्त्तते-प्रथमास्तिस्रः कृष्णनीलकापोतलक्षणाः, शेषेषु प्रागुक्तपर्याप्तापर्याप्तसंज्ञिपञ्चेन्द्रियापर्याप्तबादरैकेन्द्रियवर्जितेषु अपर्याप्तापर्याप्तसूक्ष्मैकेन्द्रियद्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियाऽसंज्ञिपञ्चेन्द्रियपर्याप्तबादरैकेन्द्रियलक्षणषोडशसु जीवस्थानेषु भवन्ति ताः तास्याः, तेषां सदा-शुभपरिणामत्वात्, शुभपरिणामरूपाश्च तेजोलेश्याऽऽदयः।

तदेवं जीवस्थानकेषु लेश्या अभिधाय साम्प्रतमेतेष्वेव बन्धोदयोदीरणासत्ताऽऽख्यं स्थानचतुष्टयमभिधित्सुराह —

सत्तऽट्ठबंधुदीरणे, संतुदया अट्ठ तेरससु ॥७॥

"सत्तऽट्ठ बंधु" इत्यादि। सप्त वा अष्टौ वा सप्ताष्टानां "सुज्वार्थे संख्या संख्येय संख्यया बहुव्रीहिः" ।३। १ ।२६। इति (सप्तऽष्ट) सूत्रेण बहुव्रीहिसमासः यथा-द्वित्रा इत्यादौ। बन्धश्चोदीरणा च बन्धोदीरणं, सप्ताष्टानां बन्धोदीरणं सप्ताष्टबन्धोदीरणं, त्रयोदशसु जीवस्थानेषु सांज्ञिपर्याप्तबर्जितेषु शेषेषु भवतः। एतदुक्तं भवति-अपर्याप्तसूक्ष्मैकेन्द्रिय-पर्याप्तसूक्ष्मैकेन्द्रिय-अपर्याप्तबादरैकेन्द्रिय-पर्याप्तबादरैकेन्द्रिय-अपर्याप्तद्वीन्द्रिय-पर्याप्तद्वीन्द्रिय-अपर्याप्तत्रीन्द्रिय-पर्याप्तत्रीन्द्रिय-अपर्याप्तचतुरिन्द्रिय-पर्याप्तचतुरिन्द्रिय-अपर्याप्तासंज्ञिपञ्चेन्द्रिय-पर्याप्तासंज्ञिपञ्चेन्द्रिय-अपर्याप्तसंज्ञिपञ्चेन्द्रियेषु त्रयोदशसु जीवस्थानेषु सप्तानामष्टानां वा बन्धः, सप्तानामष्टानां वा उदीरणा। तथाहि-यदाऽनुभूयमानभवायुरुक्तिभागतृतीयभागाऽऽदिरूपे शेषे सति परभवायुर्बध्यते, तदाऽष्टानामपि कर्मणां बन्धः, शेषकालं त्वायुषो बन्धाभावात्सप्तानामेव बन्धः। तथा यदाऽनुभूयमानभवायुरुदयाऽऽवलिकाशेषं भवति, तदा सप्तानामुदीरणा। अनुभूयमानभवायुषोऽनुदीरणात् आवलिकाशेषस्योदीरणाऽनर्हत्वात्। उदीरणा हि उदयाऽऽवलिकाया बहिर्वर्तिनीनां स्थितिद्रव्याणां सकाशात्कषायसहितेनासहितेन वा योगकरणेन दलिकमाकृष्योदयसमयप्राप्तदलिकेन सहानुभवनम्। तथा चाह कर्मप्रकृतिचूर्णौ— 'उदयावलियाबाहिल्लिठितिहिंतो कसायसहितासहितेण जोगकरणेणं दलियमाकड्ढिय उदयपत्तदलिएण समं अणुभवणमुदीरणा"। ततः कथमावलिकाशेषस्योदीरणा भवति? न च परभवायुरुदयाऽऽवलिकायामुदीरणानियमः, तस्योदयाभावात्, अनुदितस्य च उदीरणाऽनर्हत्वात्। शेषकालं त्वष्टानामुदीरणा। सत्ताप्युदयश्च प्राकृतत्वात् 'सन्तोदयाः,' अष्टानामेव कर्मणां त्रयोदशसु जीवस्थानकेषु पूर्वेषु भवतः। तथाहि-एतेषु त्रयोदशसु जीवस्थानकेषु सर्वकालमष्टानामपि सत्ता, यतोऽष्टानामपि कर्मणां सत्ता उपशान्तमोहगुणस्थानकं यावदनुवर्त्तते। एते च जीवा उत्कर्षतो यथासंभवमविरतसम्यग्दृष्टिगुणस्थानकवर्तिन एवेति। एवमुदयोऽप्येतेषु जीवस्थानेष्वष्टानामेव कर्मणां द्रष्टव्यः। तथाहि-सूक्ष्मसंपरायगुणस्थानकं यावदष्टानामपि कर्मणामुदयोऽवाप्यते ॥७॥

एतेषु जीवस्थानकेषूत्कर्षतोऽपि यथासंभवमविरतसम्यग्दृष्टिगुणस्थानकसंभव इति-

सत्तऽट्ठेगबंधा, संतुदया सत्त अट्ठ चत्तारि।
सत्तऽट्ठ छ पंच दुगं, उदीरणा सन्निपज्जत्ते ॥८॥

संज्ञी चासौ पर्याप्तश्च संज्ञिपर्याप्तः, तस्मिन् संज्ञिपर्याप्ते, चत्वारो बन्धा भवन्ति। तद्यथा-सप्तानां प्रकृतीनां बन्ध एकः, अष्टानां प्रकृतीनां बन्धो द्वितीयः, षण्णां प्रकृतीनां बन्धस्तृतीयः, एकस्याः प्रकृतेर्बन्धश्चतुर्थो बन्धः तथाऽऽयुर्वर्जानां सप्तानां कर्मप्रकृतीनां बन्धो जघन्येनान्तर्मुहूर्तं यावदुत्कर्षेण च त्रयस्त्रिंशत्सागरोपमाणि षण्मासेन त्र्यन्तर्मुहूर्तोनपूर्वकोटित्रिभागाभ्यधिकानि। तथा-आयुर्बन्धकाले तासामष्टानां बन्धो जघन्योत्कर्षाभ्यामन्तर्मुहूर्तप्रमाणः। आयुषि बध्यमानेऽष्टानां प्रकृतीनां बन्धः प्राप्यते। आयुषश्च बन्धोऽन्तर्मुहूर्तमेव काले भवति, न ततोऽप्यधिकम्। तथैता एवाष्टावायुर्मोहनीयवर्जाः षट्। एतासां च जघन्येनैकं समयं बन्धः। तथाहि-ज्ञानाऽऽवरणदर्शनाऽऽवरणवेदनीयनामगोत्रान्तरायरूपाणां षण्णां प्रकृतीनां बन्धः सूक्ष्मसंपरायगुणस्थाने, तत्र चापशमश्रेण्यां कश्चिदेकं समयं स्थित्वा, द्वितीयसमये भवक्षयेण दिवं गतः सञ्जायतो भवति। अविरतत्वे चावश्यं सप्तप्रकृतीनां बन्ध इति षण्णां बन्धो जघन्येनैकं समयं यावदुत्कर्षेण त्वन्तर्मुहूर्तं, सूक्ष्मसंपरायगुणस्थानस्यान्तर्मुहूर्तत्वात्। तथा सप्तानां प्रकृतीनां बन्धश्चरमच्छेदे सर्वकस्याः सातवेदनीयरूपायाः प्रकृतेर्बन्धः। स च जघन्येनैकं समयम्। एकसमयता चोपशमश्रेण्यामुपशान्तमोहगुणस्थाने प्राप्यद्धाक्षयेण; उत्कर्षेण पुनर्देशोनां पूर्वकोटिं यावत्। स चोत्कर्षतः कस्य वेदितव्य इति चेत्? उच्यते-यो गर्भवासे मासपृथक्त्वमुषित्वाऽनन्तरं शीघ्रमेव योनिनिष्क्रमेण जन्मना जातो वर्षाष्टकस्योर्द्धं संयमं प्रतिपन्नः, प्रतिपत्यनन्तरं च क्षपकश्रेण्यामारूढो घातिकर्मक्षयानन्तरं केवलज्ञानदर्शनः, तस्य सयोगिकेवलिनो वेदितव्यः। अयं चात्र तात्पर्यार्थः-मिथ्यादृष्ट्याद्यप्रमत्तान्तेषु सप्तानामष्टानां वा बन्धः, अपूर्वकरणानिवृत्तिबादरयोश्च सप्तानां बन्धः, सूक्ष्मसंपराये षण्णां बन्धः, उपशान्तमोहाऽऽदिचतुष्कस्याः प्रकृतेर्बन्धः। तथा सप्तोदयश्च प्राकृतत्वात् सन्तोदयाः, ततः संज्ञिपर्याप्ते सत्तामाश्रित्य त्रीणि स्थानानि। तद्यथा-सप्त, अष्ट, चत्वारि। एवमुदयमप्याश्रित्य त्रीणि स्थानानि। तद्यथा-सप्त, अष्ट, चत्वारि। तत्र सर्वप्रकृतिसमुदयोऽष्टौ, एतासां चाष्टानां सप्ताऽभव्यानधिकृत्यानादिरपर्यवसाना, भव्यानधिकृत्यानादिसपर्यवसाना। तथा-मोहे क्षीणे सप्तानां सत्ता। सा च जघन्योत्कर्षेणान्तर्मुहूर्तप्रमाणा। सा हि क्षीणमोहगुणस्थानो तस्य च कालमानमन्तर्मुहूर्तमिति घातिकर्मचतुष्टयक्षयेण चतसृणां सत्ता। सा च जघन्येनान्तर्मुहूर्तप्रमाणा, उत्कर्षेण पुनर्देशोनपूर्वकोटिमाना। तथा-सर्वप्रकृतिसमुदयोऽष्टौ, तासां चाष्टौऽभव्यानाश्रित्यानादिरपर्यवसानाः, भव्यानाश्रित्यानादिसपर्यवसानाः। उपशान्तमोहगुणस्थानकात्प्रतिपतितानाश्रित्य पुनः सादिसपर्यवसानाः। स च जघन्येनान्तर्मुहूर्तप्रमाणः, उपशमश्रेणीतः पतितस्य पुनरप्यन्तर्मुहूर्तेन कस्याप्युपशमश्रेणिप्रतिपत्तेः। उत्कर्षेण तु देशोनापार्द्धपुद्गलपरावर्तः। तथा-ता एवाष्टौ मोहनीयवर्जाः सप्त, तासामुदयो जघन्येनैकं समयम्। तथाहि-मोहवर्जसप्तानां प्रकृतीनामुदय उपशान्तमोहे, क्षीणमोहे वा प्राप्यते। तत्र कश्चिदुपशान्तगुणस्थानके एकं समयं स्थित्वा द्वितीये समये च भवक्षयेण दिवं गच्छन्नविरतो भवति। अविरतत्वे चावश्यं सप्तानां प्रकृतीनामुदयः, ततः सप्तानामुदयो जघन्येनैकं समयं यावदवाप्यते, उत्कर्षेण त्वन्तर्मुहूर्तम्, उपशान्तमोह-क्षीणमोहगुणस्थानयोरान्तर्मौहूर्तिकत्वात्। तथा-घातिकर्मवर्जाश्चतस्रः कर्मप्रकृतयः तासां च जघन्यत उदय आन्तर्मौहूर्तिकः, उत्कर्षेण देशोनपूर्वकोटिप्रमाण इति। विशेषार्थश्चायम्-मिथ्यादृष्टिगुणस्थानकमारभ्य यावदुपशान्तमोहगुणस्थानकं यावदष्टानामपि सत्ता, क्षीणमोहगुणस्थाने सप्तानां सत्ता, सयोग्ययोगिगुणस्थानकयोश्चतस्रः

णां सत्ता । तथा-मिथ्यादृष्टेः प्रभृति सूक्ष्मसंपरायं यावद्दशानामुदयः, उपशान्तमोहगुणस्थाने क्षीणमोहगुणस्थाने च सप्तानां प्रकृतीनामुदयः । सयोग्ययोगिगुणस्थानयोश्चतसृणामुदय इति ॥ तथा-संक्षिपर्याप्ते उदीरणास्थानानि पञ्च । तद्यथा-सप्त, अष्ट, षट्, पञ्च, द्वे इति । तत्र यदा अनुभूयमानभवायुरावलिकाऽवशेषं भवति, तदा तथास्वभावत्वेन तस्यानुदीर्यमाणस्यात्तसप्तानामुदीरणा । यदा त्वनुभूयमानभवायुरावलिकाऽवशेषं न भवति, तदाऽष्टानां प्रकृतीनामुदीरणा । तत्र मिथ्यादृष्टिगुणस्थानकात्प्रभृति यावत्प्रमत्तसंयतगुणस्थानकं तावत्सप्तानामष्टानां वोदीरणा । सम्यक्त्वमिथ्यादृष्टिगुणस्थानके तु सदैवाष्टानामेवोदीरणा, आयुष आवलिकाऽवशेषमिश्रगुणस्थानस्यैवाभावात् । तथा-अप्रमत्तगुणस्थानकात्प्रभृति यावत्सूक्ष्मसंपरायगुणस्थानकस्याऽऽवलिकाऽवशेषो न भवति, तावद्वेदनीयाऽऽयुर्वर्जानां षण्णां प्रकृतीनामुदीरणा, तदानीमतिविशुद्धत्वेन वेदनीयाऽऽयुरुदीरणायोग्याध्यवसायस्थानानाभावात् । आवलिकाऽवशेषे तु मोहनीयस्याप्यावलिकाप्रविष्टत्वेनोदीरणाया असंभवाद् ज्ञानाऽऽवरणदर्शनाऽऽवरणनामगोत्रान्तरायाणामेवोदीरणा एतेषामेव चोपशान्तमोहगुणस्थानकेऽप्युदीरणा । क्षीणमोहगुणस्थानकेऽप्येतेषामेव यावदावलिकामात्रमवशेषो न भवति । आवलिकाऽवशेषे तु ज्ञानाऽऽवरणदर्शनाऽऽवरणान्तरायाणामप्यावलिकाप्रविष्टत्वादनुदीरणेति द्वयोरेव नामगोत्रयोरुदीरणा । एवं सयोगिकेवलिगुणस्थानकेऽपि । अयोगिकेवलिगुणस्थानके तु वर्तमानो जीवः सर्वथाऽनुदीरक एव । ननु तदानीमप्येष सयोगिकेवलिगुणस्थानक इव भवोपग्राहिकर्मचतुष्टयोदयवान् वर्तते, ततः कथं तदाऽपि तयोर्नामगोत्रयोरुदीरको न भवति ? । नैष दोषः । उदये सत्यपि योगसद्भावेऽसत्याऽनुदीरणायाः, तदानीं च तस्य योगासंभवादिति । कर्म० ४ कर्म० ।

इदानीं गुणस्थानकेषु जीवस्थानानि चिन्तयन्नाह-

सव्वजियठाण मिच्छे, सग सासणि पंच अपज्ज सन्निदुगं।
सम्मे सन्नी दुविहो, सेसेसु सन्निपज्जत्तो ॥ ४५ ॥

सर्वाणि जीवस्थानानि चतुर्दशापि मिथ्यादृष्टिगुणस्थानकेषु भवन्ति, मिथ्यात्वस्य सर्वेषु जीवस्थानकेषु संभवात् । तथा-(सग त्ति) सप्त जीवस्थानानि सास्वादने भवन्ति । तद्यथा-पञ्चापर्याप्ताः-बादरैकेन्द्रियोऽपर्याप्तः १, द्वीन्द्रियोऽपर्याप्तः २, त्रीन्द्रियोऽपर्याप्तः ३, चतुरिन्द्रियोऽपर्याप्तः ४, असंज्ञिपञ्चेन्द्रियोऽपर्याप्तः ५। संज्ञिद्विकम्-संज्ञ्यपर्याप्तः १, संज्ञिपर्याप्तः २ । अपर्याप्तकाश्चेह करणापर्याप्तका द्रष्टव्याः, न तु लब्ध्यपर्याप्तकाः; तेषु मध्ये सास्वादनसम्यक्त्वसहितस्योत्पादाऽभावात् । (सम्मे सन्नी दुविहो त्ति) अविरतसम्यग्दृष्टिगुणस्थानके संज्ञी द्विविधोऽपर्याप्तपर्याप्तरूपो द्रष्टव्यः । इहापर्याप्तकः करणापेक्षया ज्ञेयः, न तु लब्ध्यपेक्षया, लब्ध्यपर्याप्तमध्येऽविरतसम्यग्दृष्टेरभावात् । शेषेषु मिश्रदेशविरत्यादिगुणस्थानकेषु संज्ञी पर्याप्त इत्येकमेव जीवस्थानकं, न शेषाणि; तेषां मिश्रनाऽदेशविरतिप्रतिपद्यमानाभावात् । न च पूर्वप्रतिपन्नमिश्रनाशोऽन्येषु जीवस्थानकेषु संक्रामँल्लभ्यते, "न सम्ममिच्छो कुणइ कालं" इति वचनात् । तदेवं गुणस्थानकेषु व्याख्यातानि जीवस्थानकानि । कर्म० ४ कर्म० ।

जीवस्थानकेषु भावाः-

जीवस्थानेष्वपि भावाः स्वयमेव चिन्तनीयास्तत्राऽऽद्येषु द्वादशसु जीवस्थानेष्वौदयिक-क्षायोपशमिक-पारिणामिकरूपं भावत्रयम्, तच्च मिथ्यादृष्ट्यादिगुणस्थानकोक्तमेव भावनीयम् । एतदेव च भावत्रयं संज्ञिन्यपि लब्ध्यपर्याप्ते । करणापर्याप्ते तु तस्मिन् क्षीणसप्तकानां क्षायिकसम्यक्त्वस्य केषाञ्चिद् देवानां चौपशमिकत्वस्यापि संभवाद्औदयिक-क्षायिक-क्षायोपशमिक-पारिणामिकरूपमौपशमिकौदयिक-क्षायोपशमिक-पारिणामिकरूपं वा भावचतुष्टयमवसेयम् । पर्याप्ते तु संज्ञिनि प्राग्उक्तेन गुणस्थानकक्रमेण सर्वे भावा भावनीयाः । पं० सं० २ द्वार । (जीवस्थानेषु बन्धोदयसत्तास्थानानि 'बंध' शब्दे वक्ष्यन्ते)(बन्धोदयसत्तास्थानान्यधिकृत्य स्वामिता 'कम्म' शब्दे तृतीयभागे २७७ पृष्ठे निरूपिता)

जीवण-जीवन-न० । जीव-ल्युट् । प्राणधारणे, "जीवणमवि पाणधारणे भणियं ।" जीवनमपि प्राणधारणे भणितम्, 'जीव-प्राणधारणे' इति वचनात् । आ० म० द्वि० । विशे० । "जीविज्ज य आदिमोक्खं" जीव्यात्प्राणधारणं कुर्यात् । सूत्र० १ श्रु० ७ अ० । आ० चू० । जीव्यतेऽनेन। वृत्तौ, जले, मज्जने, हैयङ्गवीने च। वाच० । जीवयतीति जीवनः। जीवनकारके, त्रि० । स० २० सम० । पुत्रे, जीवनौषधे, वायौ, क्षुरफलके, वृत्ते, पुं० । वाच० ।

जीवणहेउ-जीवनहेतु-पुं० । ६ त० । "विद्या शिल्पं भृतिः सेवा, गोरक्षा विपणिः कृषिः । वृत्तिर्भैक्ष्यं कुशीदं च, दश जीवनहेतवः ॥१॥" इत्युक्तेषु विद्याऽऽदिषु जीवनोपायेषु दशसु, वाच० ।

जीवणास-जीवनाश-पुं० । जीवितनाशे, मृत्यौ, "आसीविसो वा वि परं सुरुट्ठो, किं जीवनासाउ परं नु कुज्जा" । किं जीवितनाशान्मृत्योः परं कुर्यात्, न किञ्चिदपीत्यर्थः । दश० ६ अ० १ उ० ।

जीवणिकाय-जीवनिकाय-पुं० । जीवानां निकायो राशिर्जीवनिकायः । जीवराशौ, स्था० ६ ठा० । जीवनिकायाश्च पृथिव्यादयः षट् । प्रज्ञा० १ सम्यं० द्वार । आव० ।

ङ जीवनिकाया पन्नत्ता । तं जहा-पुढविकाइया० जाव तसकाइया ॥

जीवानां निकाया राशयो जीवनिकायाः । इह च जीवनिकायानाभद्याय यत्पृथिवीकायिकाऽऽदिशब्दैर्निकायवन्त उक्तास्तेषामभेदोपदर्शनार्थम् । न ह्येकान्तेन समुदायात् समुदायिनो व्यतिरिच्यन्ते, व्यतिरेकेणाप्रतीयमानत्वादिति । स्था० ६ ठा० ।

जीवणिज्ज-जीवनीय-त्रि० । उपजीव्ये, " देवसिणाए खलु अयं पुरिसे देवजीवणिज्जे । " सूत्र० १ श्रु० ७ अ० ।

जीवणिव्वत्ति-जीवनिर्वृत्ति-स्त्री० । निर्वर्त्तनं निर्वृत्तिः निष्पत्तिः, जीवस्यैकेन्द्रियाऽऽदितया निर्वृत्तिर्जीवनिर्वृत्तिः जीवस्यैकेन्द्रियाऽऽदितया निष्पादने, भ० ।

जीवनिर्वृत्तिभेदाः—

कइविहा णं भंते ! जीवणिव्वत्ती पन्नत्ता ? । गोयमा ! पंचविहा जीवणिव्वत्ती पन्नत्ता । तं जहा-एगिंदियजीवणिव्वत्ती० जाव पंचिंदियजीवणिव्वत्ती । एगिंदियजीवणिव्वत्ती णं भंते ! कइविहा पन्नत्ता ? । गोयमा ! पंचविहा पन्नत्ता । तं जहा-पुढवीकाइयएगिंदियजीवणिव्वत्ती० जाव वणस्सइकाइयएगिंदियजीवणिव्वत्ती । पुढवीकाइयएगिंदियजीवणिव्वत्ती णं भंते ! कइविहा पन्नत्ता ? । गोयमा ! दुविहा पन्नत्ता । तं जहा-सुहुमपुढवी-

काइयएगिंदियजीवणिव्वत्ती य, बादरपुढवीकाइयएगिंदियजीवणिव्वत्ती य । एवं एएणं अभिलावेणं भेदो जहा बहुगबंधे तेयगसरीरस्स० जाव सव्वट्ठसिद्धअणुत्तरोववाइयकप्पातीतवेमाणियदेव । पंचिंदियजीवणिव्वत्ती णं भंते ! कइविहा पण्णत्ता ? । गोयमा ! दुविहा पण्णत्ता । तं जहा–पज्जत्तगसव्वट्ठसिद्धअणुत्तरोववाइय० जाव देवपंचिंदिय–जीवणिव्वत्ती य अपज्जत्तगसव्वट्ठसिद्धअणुत्तरोववाइय० जाव देवपंचिंदियजीवणिव्वत्ती य ।

(जहा बहुगबंधे तेयगसरीरस्स त्ति) यथा–महाबन्धाधिकारेऽष्टमशतनवमोद्देशकाभिहिते तेजःशरीरस्य बन्ध उक्तः, एवमिह निर्वृत्तिर्वाच्या, सा च तत्र एव दृश्येति ॥ भ० १९ श० ८ उ० ।

जीवणिज्जाणमग्ग–जीवनिर्याणमार्ग–पुं० । जीवस्य निर्याणं मरणकाले शरीरिणः शरीरान्निर्गमः, तस्य मार्गो जीवनिर्याणमार्गः । जीवनिर्गममार्गे, स्था० ।

पंचविहे जीवस्स णिज्जाणमग्गे पण्णत्ते । तं जहा–पाएहिं, उरूहिं, उरेणं, सिरेणं, सव्वंगेहिं । पाएहिं णिज्जाणमाणे निरयगामी भवइ । उरूहिं णिज्जाणमाणे तिरियगामी भवइ । उरेणं णिज्जाणमाणे मणुयगामी भवइ । सिरेणं णिज्जाणमाणे देवगामी भवइ । सव्वंगेहिं णिज्जाणमाणे सिद्धिगतिपज्जवसाणे पण्णत्ते ॥

निर्याणं मरणकाले शरीरिणः शरीरान्निर्गमः, तस्य मार्गो निर्याणमार्गः पादाऽऽदिकः, तत्र (पाएहिं) पादाभ्यां मार्गच्युताभ्यां कारणताऽऽपन्नाभ्यां, जीवः शरीरान्निर्यातीति शेषः । एवमूरुभ्यामित्यादावपि । अथ क्रमेणास्य निर्याणमार्गस्य फलमाह–पादाभ्यां शरीरान्निर्यान् जीवो निरयगामीति । प्राकृतत्वादनुस्वार इति । निरयगामी भवति । एवमन्यत्रापि । सर्वाणि च तान्यङ्गानि च सर्वाङ्गानि, तैर्निर्यान् सिद्धिगतिः पर्यवसानं संसरणपर्यन्तो यस्य स सिद्धिगतिपर्यवसानः प्रज्ञप्त इति । स्था० ५ ठा० ३ उ० ।

जीवणिस्सिय–जीवनिश्रित–त्रि० । जीवाऽऽश्रिते, स्था० ७ ठा० ।

जीवनिःसृत–त्रि० । जीवेभ्यो निःसृतो निर्गतो जीवनिःसृतः । जीवनिर्गते, स्था० ७ ठा० । (जीवनिःसृताः स्वराः 'सर' शब्दे वक्ष्यन्ते)

जीवत्थिकाय–जीवास्तिकाय–पुं० । जीवन्ति, जीविष्यन्ति, जीवितवन्त इति जीवाः, ते च तेऽस्तिकायाश्चेति समासः । प्रत्येकासंख्येयप्रदेशाऽऽत्मकसकललोकभाविनानाजीवद्रव्यसमूहाऽऽत्मकेऽस्तिकायभेदे, अनु० । आव० । सं० । घटाऽऽदिज्ञानगुणस्य प्रतिप्राणि स्वसंवेदनसिद्धत्वाज्जीवस्यास्तित्वमवगन्तव्यम् । न च गुणिनमन्तरेण गुणसत्ता युक्ता, अतिप्रसङ्गात् । नन्वेवं देह एवास्य गुणी युज्यते । यतो ज्ञानममूर्ते चिद्रूपं सदैवेन्द्रियगोचरातीतत्वाऽऽदिधर्मोपेतमतस्तस्यानुरूप एव कश्चिद् गुणी समन्वेषणीयः । स च जीव एव, न तु देहो, विपरीतत्वात् । यदि पुनरननुरूपोऽपि गुणानां गुणी कल्प्यते, तर्ह्याकाशाऽऽदेर्गुणित्वकल्पना प्रसङ्गादिति । अनु० ।

जीवास्तिकायेन जीवानां प्रवृत्तिमाह–

जीवत्थिकाएणं भंते ! जीवाणं किं पवत्तइ ? । गोयमा ! जीवत्थिकाएणं जीवे अणंताणं आभिणिबोहियणाणपज्जवाणं अणंताणं सुअणाणपज्जवाणं जहा वितियसए अत्थिकायउद्देसए० जाव उवओगं गच्छंति, उवओगलक्खणेणं जीवे ॥

जीवानां किं प्रवर्तत इति प्रश्नः । उत्तरं तु प्रतीतार्थमेवेति । भ० १३ श० ४ उ० ।

जीवास्तिकायस्याभिवचनान्याह–

जीवत्थिकायस्स णं भंते ! केवइआ अभिवयणा पण्णत्ता ? । गोयमा ! अणेगा अभिवयणा पण्णत्ता । तं जहा–जीवे ति वा, जीवत्थिकाए ति वा, पाणे ति वा, भूए ति वा, सत्ते ति वा, विण्णू ति वा, चेया ति वा, जेया ति वा, आया ति वा, रंगणे ति वा, हिंडुए ति वा, पोग्गले ति वा, माणवे ति वा, कत्ता ति वा, विकत्ता ति वा, जए ति वा, जंतू ति वा, जोणि ए ति वा, सयंभू ति वा, ससरीरी ति वा, नायए ति वा, अंतरप्पा ति वा, जे यावण्णे तहप्पगारा, सव्वे ते जीवअभिवयणा पण्णत्ता ॥

(चेय त्ति) चेता–पुद्गलानां चयकारी, चेतयिता वा । (जये त्ति) जेता कर्मरिपूणाम् । (आय त्ति) आत्मा नानागतिसततगामित्वात् । (रंगणे ति) रङ्गणं रागस्तद्योगाद्रङ्गणः । (हिंडुए त्ति) हिण्डकत्वेन हिण्डुकः । (पोग्गले त्ति) पूरणगलनाभ्यां शरीराऽऽदीनां पुद्गलः । (माणव त्ति) मा निषेधे, नवः प्रत्यग्रो मानवः, अनादित्वात्पुराण इत्यर्थः । (कत्त त्ति) कर्ता कारकः कर्मणाम् । (विकत्त त्ति) विविधतया कर्ता, विकर्तयिता वा छेदकः कर्मणामेव । (जए त्ति) अतिशयगमनाद् जगत् । (जंतु त्ति) जननाज्जन्तुः । (जोणि त्ति) योनिरन्येषामुत्पादकत्वात् । (सयंभु त्ति) स्वयं भवनात् स्वयंभूः । (ससरीरि त्ति) सह शरीरेणेति सशरीरी । (नायए त्ति) नायकः कर्मणां नेता । (अंतरप्प त्ति) अन्तर्मध्यरूप आत्मा न शरीररूप इत्यन्तरात्मेति । भ० २० श० २ उ० ।

जीवदय–जीवदय–पुं० । जीवनं जीवः–भावप्राणधारणममरणधर्मत्वमित्यर्थः, तं दयत इति जीवदयः । जीवेषु वा दया यस्य स जीवदयः । जीवदयोपेते, स० १ समo । औ० । कल्प० ।

जीवदया–जीवदया–स्त्री० । जीवाश्चेतनाऽऽदिलक्षणद्रव्यरूपा एकेन्द्रियाऽऽदयः, तेषां दया रक्षणं जीवदया । जीवरक्षणे, दश० १ तत्त्व ।

जीवदयास्वरूपमाह–

अंधाणं विगलाणं अयंगमाणं अणाहाणं बहुवाहिवेयणापरिगयसरीराणं सव्वलोयपरिभूयाणं दारिद्दुक्खदोहग्गकलंकियाणं जम्मदारिद्दाणं समणाणं विहलियाणं च संबंधिबंधवाणं जं जस्स इट्ठं जत्तं वा पाणं वा० जाव णं धणधण्णसुवन्नहिरण्णं वा कुणसु य सयलसोक्खदायगं संपुण्णं जीवदयं ति । महा० २ चू० ।

जीवद्रव्यप्रकल्प–जीवद्रव्यप्रकल्प–पुं० । " जीवस्स दव्वस्स जहा देवदत्तस्स अग्गकेसहत्थाणं कप्पणं" जीवद्रव्यप्रकल्पः । द्रव्यप्रकल्पभेदे, नि० चू० १ उ० ।

जीवदिट्ठिया–जीवदृष्टिका–स्त्री० । या अश्वाऽऽदिदर्शनार्थं गच्छति तस्याम्, स्था० २ ठा० १ उ० ।

जीवदेवसूरि–जीवदेवसूरि–पुं० । " रासिल्लसूरिशिष्ये, जै० इ० । वायटग्रामे महीधरमहीपालवामानौ द्वौ ब्राह्मणकुमारावास्ताम् । तयोर्महीधरो जिनदत्तसूरिणा दीक्षितो रासिल्लसूरिरभवत् । महीपालो देशान्तरे दिगम्बरप्रव्रज्यां गृहीत्वा सुवर्णकीर्तिनामाऽभवत् । तत्र स आधाकर्मिकाऽऽदिदोषदूषितमवेद्य रासिल्लसूरिसमीपे श्वेताम्बरदीक्षामग्रहीत् , ततो जीवदेवसूरिनामाऽभवत् । एतेनैव वायटग्रामे जैनानां ब्राह्मणैः सह विरोधस्त्याजितः । जै० इ० ।

जीवधम्म–जीवधर्म–पुं० । जीवानां जन्मजरामरणव्याधिरोगशोकसुखदुःखजीवनाऽऽदिके धर्मे, सूत्र० २ श्रु० १ अ० ।

जीवपइट्ठिय–जीवप्रतिष्ठित–त्रि० । जीवेषु स्थिते, " अजीवा जीवपइट्ठिआ " अजीवाः शरीराऽऽदिपुद्गलरूपा जीवप्रतिष्ठिताः, जीवेषु तेषां स्थितत्वात् । भ० १ श० ६ उ० । स्था० ।

जीवपएस–जीवप्रदेश–पुं० । जीवानामवयवे, भ० ।

भिन्नजीवखण्डानां जीवप्रदेशैः स्पर्शो यथा–

अह भंते ! कुम्मे कुम्मावलिया गोहा गोहावलिया गोणा गोणावलिया मणुस्से मणुस्सावलिआ महिसे महिसावलिया, एएसि णं भंते ! दुहा वा तिहा वा संखेज्जहा वा छिण्णाणं जे अंतरा ते वि णं तेहिं जीवपएसेहिं फुडा ?। हंता फुडा । पुरिसेणं भंते ! अंतरा हत्थेण वा पाएण वा अंगुलियाए वा सलागाए वा कट्ठेण वा कलिंचेण वा आमुसमाणे वा संमुसमाणे वा आलिहमाणे वा विलिहमाणे वा अण्णयरेण वा तिक्खेणं सत्थजाएणं आच्छिंदमाणे वा विच्छिंदमाणे वा अगणिकाएणं समोडहमाणे तेसिं जीवपएसाणं किंचि आबाहं वा वाबाहं वा उप्पाएइ, छविच्छेदं वा करेइ ? । णो इणट्ठे समट्ठे । नो खलु तत्थ सत्थं कमइ ॥

" अह " इत्यादि । (कुम्मे त्ति) कूर्मः कच्छपः । (कुम्मावलि. य त्ति) कूर्मावलिका कच्छपपङ्क्तिः, (गोह त्ति) गोधा सरीसृपविशेषः । (जे अंतर त्ति) यान्यन्तरालानि (ते वि त्ति) तान्यन्तरालान्यपि (कलिंचेण व त्ति) क्षुद्रकाष्ठरूपेण (आमुसमाणे व त्ति) आमृशन्, ईषत्स्पृशन्नित्यर्थः (संमुसमाणे व त्ति) सामस्त्येन स्पृशन्नित्यर्थः । (आलिहमाणे व त्ति) आलिखन् ईषत्सकृद्वा कर्षन्, (विलिहमाणे व त्ति) विलिखन् नितरामनेकशो वा कर्षन्, (आच्छिंदमाणे व त्ति) ईषत्सकृद्वा छिन्दन्, (विच्छिंदमाणे व त्ति) नितरामसकृद्वा छिन्दन् (समोडहमाणे त्ति) समुपदहन्, (आबाहं व त्ति) ईषद्बाधां (वाबाहं व त्ति) व्याबाधां प्रकृष्टपीडाम् । भ० ७ श० ३ उ० । एक एव चरमप्रदेशो जीव इत्यभ्युपगमाज्जीवः प्रदेशो येषां ते जीवप्रदेशाः । चरमप्रदेशजीवप्ररूपणि द्वितीयनिह्नवे, विशे० । " जीवपएसा य तिसगुत्ताओ " । जीवप्रदेशाः पुनस्तिष्यगुप्तादुत्पन्नाः । विशे० ।

प्रदेशजीव–पुं० । प्रदेश इत्यन्त्यप्रदेशः जीवो येषां ते प्रदेशजीवाः । प्राकृतत्वाच्च व्यत्ययः । अन्त्यप्रदेश एव जीव इत्यभ्युपगतेऽन्त्यप्रदेशजीववादिनि द्वितीयनिह्नवे, उत्त० २ अ० ।

जीवपएसिय–जीवप्रादेशिक–पुं० । जीवप्रदेशा एव जीवप्रादेशिकाः । अथवा जीवप्रदेशो जीवाभ्युपगमतो विद्यते येषां ते तथा । चरमप्रदेशजीवप्ररूपिणः (स्था० ७ ठा०) एकेनाऽपि प्रदेशेन न्यूनो जीवो न भवत्यतो येनैकेन प्रदेशेन पूर्णः स जीवो भवति । स एवैकः प्रदेशो जीवो भवतीत्येवंविधवादिनि तिष्यगुप्ताऽऽचार्यमताविसंवादिनि द्वितीयनिह्नवे, औ० ।

अथ द्वितीयनिह्नववक्तव्यतामाह निर्युक्तिकारः–

सोलस वासाइं तया, जिणेण उप्पाडियस्स नाणस्स।
जीवपएसियदिट्ठी, तो उसभपुरे समुप्पन्ना ॥ २३३३ ॥
रायगिहे गुणसिलए, वसु चउदसपुव्वि तीसगुत्ते य ।
आमलकप्पा नयरी, मित्तसिरी कूरपिंडाई ॥२३३४॥

श्रीमन्महावीरजिनेन तदा षोडश वर्षाणि केवलज्ञानस्योत्पादितस्याभूवन् । ततश्च राजगृहापरनाम्नि ऋषभपुरे नगरे जीवप्रदेशिकदृष्टिः समुत्पन्नेति । कथमुत्पन्ना ?, इत्याह–राजगृहे नगरे गुणशिलके चैत्ये चतुर्दशपूर्विणो वसुनामान आचार्याः समागताः, तेषां च तिष्यगुप्तो नाम शिष्यः । स च तत्र पूर्वगतमालापकं वक्ष्यमाणस्वरूपमधीयानो वक्ष्यमाणयुक्तिनिर्धिप्रतिपन्नोऽसंबुद्धः परिहृतो गुरुभिर्विहरन् आमलकल्पायां नगर्यां गतः,तत्र च मित्रश्रीनाम्ना श्रावकेण "कूरपिण्डा-" ऽऽदिना कूरसिक्थाऽऽदिदानेन प्रतिबोधित इत्यर्थः ॥ २३३३ । २३३४ ॥

अथास्य निर्युक्तिगाथाद्वयस्य भाष्यमाह-

आयप्पवायपुव्वं, अहिज्जमाणस्स तीसगुत्तस्स ।
नयमयमयाणमाण–स्स दिट्ठिमोहो समुप्पन्नो ॥२३३५॥

आत्मप्रवादनामकं पूर्वमधीयानस्य तिष्यगुप्तस्य अयं सूत्रालापकः समायातः । तद्यथा–"एगे भंते ! जीवपएसे जीवे त्ति वत्तव्वं सिया ? । नो इणट्ठे समट्ठे । एवं दो तिण्णि० जाव दस संखेज्जा । असंखेज्जा भंते ! जीवपएसा जीव त्ति वत्तव्वं सिया ?। नो इणट्ठे समट्ठे । एगपएसूणे वि णं जीवे नो जीवे त्ति वत्तव्वं सिया । से केणं अट्ठेणं ? । जम्हा णं कसिणे पडिपुन्ने लोगागासपएसतुल्ले जीवे जीवे त्ति वत्तव्वं सिया, से तेणं अट्ठेणं " इति । अमुं चाऽऽलापकमधीयानस्य कस्यापि नयस्येदमपि मतम्, न तु सर्वनयानामित्येवमजानतस्तिष्यगुप्तस्य मिथ्यात्वोदयाद् दृष्टेः दर्शनस्य मोहो विपर्यासः संजात इति । ॥ २३३५ ॥

कथमित्याह—

एगादओ पएसा, नो जीवो नो पएसहीणो वि ।
जं तो स जेण पुन्नो, स एव जीवो पएसो त्ति ॥२३३६॥

यस्मादेकाऽऽदयः प्रदेशास्तावज्जीवो न भवति, " एगे भंते ! जीवपएसे ।" इत्याद्यालापके निषिद्धत्वात् । एवं यावदेकेनापि प्रदेशेन हीनो जीवो न भवति, अत्रैवाऽऽलापके निवारितत्वात् । ततस्तस्माद् येन केनापि चरमप्रदेशेन स जीवः परिपूर्णः क्रियते, स एव प्रदेशो जीवो, न शेषप्रदेशाः । एतत्सूत्राऽऽलापकप्रामाण्यादित्येवं विप्रतिपन्नोऽसाविति ॥ २३३६ ॥

ततः किमित्याह–

गुरुणाऽऽनिट्ठिओ जइ ते, पडमपएसो न सम्मओ जीवो।

तो तप्परिमाणो चिय, जीवो कहमंतिमपएसो? ।२३३७।

एकोऽन्त्यप्रदेशो जीवस्तद्भावभावित्वाज्जीवत्वस्येत्यादि ब्रुवाणस्तिष्यगुप्तो गुरुणा वसुसूरिणा अभिहितः-हन्त! यदि ते तव प्रथमो जीवप्रदेशो जीवो न संमतः, ततस्तर्ह्यन्तिमो जीवप्रदेशः कथं केन प्रकारेण जीवः?। न घटत एव सोऽपि जीव इत्यर्थः। कुतः?, तत्परिणाम इति कृत्वा। इदमुक्तं भवति-भवदभिमतोऽन्त्यप्रदेशोऽपि न जीवः, अन्यप्रदेशैस्तुल्यपरिणामत्वात्, प्रथमाऽऽद्यन्यप्रदेशवदिति ॥ २३३७ ॥

अथवा व्यत्ययेन प्रयोग इति दर्शयति-

अहव स जीवो कह ना-इमो त्ति को वा विसेसहेऊ ते ?।
अह पूरणो त्ति बुच्ची, एक्केको पूरणो तस्स ॥२३३८॥

अथवा-सोऽन्तिमप्रदेशः कथं जीवस्त्वयाऽभ्युपगम्यते?, कथं च न-नैवाऽऽदिमः प्रथमस्तद्रूपतया इष्यते?। नन्वाद्योऽपि प्रदेशो जीव एवेष्यतां, शेषप्रदेशतुल्यपरिणामत्वात्, अन्त्यप्रदेशवदिति। को वाऽत्र विशेषहेतुस्तव, येन प्रदेशत्वे तुल्येऽप्यन्तिमो जीवो न प्रथमः?, इति। अथ विवक्षितासंख्येयप्रदेशराशेरन्त्यः प्रदेशः पूरण इति विशेषसद्भावतः स जीवो न प्रथम इति तव बुद्धिः। तदयुक्तम्। यतो यथाऽन्त्यः प्रदेशः पूरणस्तथा एकैकः प्रथमाऽऽदिप्रदेशः, तस्य विवक्षितजीवप्रदेशराशेः पूरण एव, एकमपि प्रदेशमन्तरेण तस्यापरिपूर्त्तेरिति ॥२३३८॥

एवं च सर्वप्रदेशानां पूरणत्वे इदमनिष्टमापतति।
किम?, इत्याह-

एवं जीवबहुत्तं, पइजीवं सव्वहा व तदभावो ।
इच्छा विवज्जओ वा, विसमत्तं सव्वसिद्धी वा ॥२३३९॥

एवं सर्वजीवप्रदेशानां विवक्षितप्रदेशमानपूरणत्वेऽन्त्यप्रदेशस्यात्यन्तं जीवत्वात्प्रतिजीवं जीवबहुत्वमसंख्येयजीवाऽऽत्मकं प्राप्नोति। अथवा-प्रथमाऽऽदिप्रदेशवदन्त्यप्रदेशस्याप्यजीवत्वे सर्वथा तदभावो जीवाभावः प्रसजति। अथ पूरणत्वे समानेऽप्यन्त्यप्रदेश एव जीवः, शेषास्तु प्रदेशा अजीवा इत्याग्रहो न मुच्यते, तर्हि राजाऽऽदेरिवेच्छा भवतः, यत्प्रतिभासते तदेव हि जल्प्यत इति। तथा च सति विपर्ययोऽपि कस्माच्च भवति-आद्यो जीवोऽन्त्यस्तु प्रदेशो जीव इति?, विषमत्वं वा कुतो न भवति-केचनाऽपि प्रदेशा जीवाः, केचित्त्वजीवा इति?। अनियमेन सर्वविकल्पासङ्किर्वा कस्माच्च न भवति, स्वेच्छया सर्वपक्षाणामपि वक्तुं शक्यत्वादिति?॥२३३९॥

किञ्च-

जं सव्वहा न वीसुं, सव्वेसु वि तं न रेणुतेल्लं व ।
सेसेसु असन्नूओ, जीवो कहमंतिमपएसे ॥२३४०॥

यद् विश्वगेकैकस्मिन्नवयवे सर्वथा नास्ति तत्सर्वेष्वपि अवयवेषु समुदितेषु न भवति, यथा रेणुकणेषु प्रत्येकमसत्तत्समुदाये तैलं, नास्ति च प्रथमाऽऽद्येकैकस्मिन् प्रदेशे जीवत्वं, ततः शेषेषु प्रथमाऽऽदिप्रदेशेष्वसज्जीवत्वं परिणामाऽऽदिना तुल्ये कथमकस्मादेकस्मिन्नेवान्त्यप्रदेशे समायातमिति?।२३४०।

पुनः परमतमाशङ्क्य परिहरन्नाह-

अह देसओऽवसेसे-सु तो वि किह सव्वहंतिमे जुत्ते ।
अह तम्मि व जो हेऊ, स एव सेसेसु वि समाणो ॥२३४१॥

अथान्त्यादवशेषेषु प्रथमाऽऽदिप्रदेशेषु, देशतो जीवः समस्त्येव, अन्त्यप्रदेशे तु सर्वाऽऽत्मनाऽसौ समस्तीति विशेषः। ततो "जं सव्वहा न वीसुं" इत्येतदसिद्धमिति भावः। अत्रोत्तरमाह-तथापि कथमन्त्यप्रदेशे सर्वाऽऽत्मना जीवो युक्तः?। ननु तत्रापि देशत एवाऽसौ युज्यते, तस्यापि प्रदेशत्वात्, प्रथमाऽऽदिप्रदेशवत्। अथान्त्यप्रदेशे संपूर्णो जीव इष्यते, तर्हि तत्र तद्भावे यो हेतुः स शेषेष्वपि प्रथमाऽऽदिप्रदेशेषु समान एव, तुल्यधर्मकत्वात्। अतस्तेष्वपि प्रतिप्रदेशं संपूर्णजीवत्वमन्त्यप्रदेशवत्किं नेष्यते?, इति ॥२३४१॥

अथ प्रथमाऽऽदिप्रदेशेषु जीवत्वं नेष्यते, तर्ह्यन्त्यप्रदेशेऽपि तन्नेष्टव्यम। कुतः?; इत्याह-

नेह पएसत्तणओ, अंतो जीवो जहाऽऽमपएसो ।
आह सुयम्मि निसिद्धं, सेसा न उणोतिमपएसो ॥२३४२॥

इहान्त्यप्रदेशोऽपि न जीवः, प्रदेशत्वात्, यथा प्रथमाऽऽदिप्रदेश इति। आह-नन्वागमबाधितेयं प्रतिज्ञा, यतः पूर्वोक्ताऽऽलापकरूपे श्रुते शेषाः प्रथमाऽऽदिप्रदेशा जीवत्वेन निषिद्धाः, न पुनरन्त्यप्रदेशः, तस्य तत्र जीवत्वानुज्ञानात्। अतः कथं प्रथमाऽऽदिप्रदेशवदन्त्यस्य जीवत्वनिषेधं मन्यामहे?, इति ॥२३४२॥

अत्रोत्तरमाह-

नणु एगो त्ति निसिद्धो, सो वि सुए जइ सुयं पमाणं ते ।
सुत्ते सव्वपएसा, भणिया जीवो न चरिमो त्ति ।२३४३।

ननु सोऽपि-अन्त्यप्रदेशः श्रुते जीवत्वेन निषिद्धः। कुतः?; इत्याह-एक इति कृत्वा। तथाहि-तत्रेत्थमुक्तम्-"एगे णंते! जीवपएसे जीवे त्ति वत्तव्वं सिया?। णो इणट्ठे समट्ठे" इति। ततो यदि श्रुतं तव प्रमाणं, ततोऽन्त्यप्रदेशस्यापि जीवत्वं नेष्टव्यम्, एकत्वात्, प्रथमाऽऽद्यन्यतरप्रदेशवत्। किञ्च-यदि श्रुतं हन्त! प्रमाणीकरोषि, तदा सर्वेऽपि जीवप्रदेशाः परिपूर्णा जीवत्वेन श्रुते भणिताः, न त्वेक एव चरमप्रदेशः। तथा च तत्रैवाभिहितम्-"जम्हा णं कसिणे पडिपुण्णे लोगागासपएसतुल्ले जीवे त्ति वत्तव्वं सिया"। अतः श्रुतप्रामाण्यमिच्छता भवता नैक एवान्त्यप्रदेशो जीवत्वेनेष्टव्य इति ॥ २३४३ ॥

अमुमेवार्थं दृष्टान्तेन साध्वयन्नाह-

तंतू पडोवयारी, न समत्तपडो य समुदिया ते उ ।
सव्वे समत्तपडओ, सव्वपएसा तहा जीवो ॥२३४४॥

एकस्तन्तुर्भवति समस्तपटोपकारी, तमप्यन्तरेण समस्तपटस्याभावात्। परं स एकस्तन्तुः समस्तपटो न भवति, किन्तु ते तन्तवः सर्वेऽपि समुदिताः समस्तपटव्यपदेशं लभन्त इति प्रतीतमेव। तथा जीवप्रदेशोऽप्येको जीवो न भवति किन्तु सर्वेऽपि जीवप्रदेशाः समुदिता जीव इति ॥२३४४॥

ननु प्राग् यदुक्तम्-"नयमयमयाणमाण-स्स दिट्ठिमोहो समुप्पन्नो त्ति" तत् कस्य नयस्यैवं मतम्?, इत्येतदभ्युपकरणपूर्वकमुपदेशमाह-

एवंभूयनयमयं, देस-पएसा न वत्थुणो भिण्णा ।
तेणावत्थु त्ति मया, कसिणं चिय वत्थुपिंडं से ।२३४५।

जइ तं पमाणमेवं, कसिणो जीवो अहोवयाराओ ।
देसे वि.सव्वबुद्धी, पवज्जसेसे वि तो जीवे ॥२३४६॥

एवंभूतनयस्येदं मतं यदुत-देशप्रदेशौ न वस्तुनो भिन्नौ, तेन तौ अवस्तुरूपौ मतौ । अतो देशप्रदेशकल्पनारहितं कृत्स्नं परिपूर्णमेव वस्तु 'से' तस्यैवंभूतनयस्येष्टम् । ततो यदि तदेवंभूतनयमतं प्रमाणं जानासि त्वम्, एवं तर्हि कृत्स्नः परिपूर्णो जीवो, न त्वन्त्यप्रदेशमात्रमपि प्रतिपद्यस्व । अथ ग्रामो दग्धः, पटो दग्धः, इत्यादिन्यायादेकदेशेऽपि समस्तवस्तूपचारादन्त्यप्रदेशलक्षणे देशेऽपि समस्तजीवबुद्धिस्तथ प्रवर्त्तते, तर्हि शेषेऽपि प्रथमाऽऽदिप्रदेशे ऽपचारतो जीवं प्रतिपद्यस्व,न्यायस्य समानत्वादिति ॥ २३४५ । २३४६ ॥

अथवा-अन्युपगम्येदमुक्तं, न चैकप्रदेशमात्रे सर्वजीवोपचारो युज्यत इति दर्शयन्नाह-

जुत्तो व तणुवयारो, देसूणे न उ पएसमेत्तम्मि ।
जह तंतूणम्मि पडे, पडोवयारो न तंतुम्मि ॥ २३४७ ॥

अथवा-उपचारादप्येक एवान्त्यप्रदेशो जीवो न भवति, किंतु देशोने एव जीवे जीवोपचारो युज्यते, यथा तन्तुभिः कतिपयैरूने पटे पटोपचारो दृश्यते, न त्वेकस्मिंस्तन्तुमात्रे इति ॥ २३४७॥

एवं गुरुणाऽभिहिते ततः किम् ?, इत्याह—

इय पन्नविओ जाहे, न पवज्जइ सो कओ तओ बज्झो ।
तउ आमन्नकप्पाए,मित्तसिरिणा सुहोवाय ॥२३४८॥
जक्खण-पाण-व्वंजण-वत्थंतावयवलाजिओ जणइ ।
सावय! विधम्मिया मे,कोसित्ति तओ भणइ सड्ढो।२३४९।
नणु तुज्झं सिद्धंतो, पज्जंतावयवमेत्तओऽवयवी।
जइ सच्चमिणं तो का,विहम्मणा मिच्छमिहरा ते ।२३५०।

गतार्था एव, नवरम्, इति पूर्वोक्तप्रकारेण गुरुभिः प्रज्ञापितस्त्यक्तुमशक्तो यावच्च किञ्चित्प्रतिपद्यते, तत उद्घाट्य बाह्यः कृतो विहरन्नामलकल्पां नगरीं गत्वा आम्रशालवने स्थितः । तत्र मित्रश्रीश्रावकेण निह्नवोऽयमिति ज्ञात्वा तत्प्रतिबोधनार्थं गत्वा निमन्त्रितः-' यन्मदीयगृहे प्रकरणमद्य तत्र भवद्भिः स्वयमागन्तव्यम् ' । ततो गतास्ते तद्गृहे । तेन च तत्र निह्नवगुप्तमुपवेश्य महान्तं संभ्रममुपदर्शयता तत्पुरतो भक्ष्यभोज्यान्नपानव्यञ्जनवस्त्राऽऽदिवस्तुनिचया विस्तारिताः । ततस्तेषां मध्यात्सर्वान्यावयवान् गृहीत्वा प्रतिलाभितोऽसौ,क्रूरसित्थाऽऽदिना प्रतिलाभित इत्यर्थः । ततो भणत्यभिधत्ते-"हे श्रावक ! विधर्मिताः किमिति त्वया वयमित्थम् ? । ततः श्राद्धो भणति-(नणु तुज्झमित्यादि) (मिच्छमिहरा ते त्ति) अन्यथा यदि नेदं सत्यम्, तदा सर्वमपि मिथ्या भवतां भाषितमिति ।२३५०।

अपि च-

अंतोऽवयवो न कुणइ, समत्तकज्जं ति जइ न सोऽन्निमओ ।
संववहाराईए,तो तम्मि कओऽवयविगाहो ? ॥२३५१॥

यदि नामाऽन्त्यावयवः समस्तस्याप्यवयविनो यत्साध्यं कार्यं तन्न करोतीत्यतोऽसौ नाभिमतो भवताम्-कूरपक्वान्नवस्त्राऽऽदीन्नव कतिपयतिलकयवकुमारिकाऽऽदयुद्दिश्यमखण्डतन्त्वादिरूपोऽन्त्यावयवो यदि न परिपोषकरो, भवतामित्यर्थः, तर्हि संव्यवहारातीते तस्मिन्नन्त्यावयवे कुतः किल समस्तावयविग्रहो भवतामिति ? ॥२३५१॥

प्रमाणयन्नाह-

भंतिमतंतं न पडो, तक्कज्जाकरणओ जहा कुंभो ।
अह तयभावे वि पडो,सो किं न घडो खपुप्फं व ?॥२३५२॥

अन्यतन्तुमात्रं न पटः, तस्य पटस्य कार्यं शीतत्राणाऽऽदिकं तत्कार्यं,तस्याकरणं तत्कार्याकरणं,तस्मादिति । यथा कुम्भो घटः। अथ तदभावेऽपि पटकार्याभावेऽपि तन्तुः पट इष्यते, तर्हि किमित्यसौ पटो घटः खपुष्पं वा न भवति, पटकार्यार्थकर्तृत्वस्याविशेषादिति ? ॥२३५२॥

तथाहि-

उवलंभव्ववहारा-नावाओ नत्थि ते खपुप्फं व ।
भंतावयवेऽवयवी, दिट्ठंताजावओ वा वि ॥ २३५३ ॥

तवाभिमतोऽवयवी अन्त्यावयवे नास्ति, उपलब्धिलक्षणप्राप्तस्यानुपलब्धेः, व्यवहाराभावाच्च, खपुष्पवदिति । अथवा-' अन्त्यावयवमात्रमवयवी, अवयविसंपूर्णहेतुत्वात्, ' इत्यत्र तावद् दृष्टान्ताभावाद् न साध्यसिद्धिरिति ॥ २३५३ ॥

यदि नाम नोपलभ्यते, नापि व्यवह्रियते, दृष्टान्ताभावाच्च नानुमीयते, ततः किम् ?, इत्याह—

पच्चक्खओऽणुमाणा-दागमओ वा य सिद्धि अत्थाणं ।
सव्वप्पमाणविसया-ईयं मिच्छत्तमेवं ते ॥ २३५४ ॥

प्रत्यक्षाऽऽदिप्रमाणैरर्थानां सिद्धिः, नानि च त्वत्पक्षसाधकत्वेन न प्रवर्त्तन्ते । अतः सर्वप्रमाणविषयातीतं ' ते ' भवतामभिहितं मिथ्यात्वमेवेति ॥ २३५४ ॥

तदेवं मित्रश्रीश्रावकेणोक्ते स किं कृतवान् ?, इत्याह-

इय चोइयसंबुद्धो,खामिय पव्विज्जाओ पुणो विहिणा ।
गंतु गुरुपायमूलं, ससीसपरिसो पमिक्कंतो ॥ २३५५ ॥

इति प्रेरितः संबुद्धोऽसौ विहितक्रमेतज्ञामित्रेण मित्रश्रीश्रावकेण संपूर्णान्नप्रदानाऽऽदिविधिना पुनरपि प्रतिलाभितो गुरुपादमूलं गत्वा शिष्यपरिषत्समेतो विधिना प्रतिक्रान्तः सम्यग्मार्गं प्रपन्नो गुर्वन्तिके विजहारेति गाथार्थः ॥ २३५५ ॥ जीवप्रदेशा आकाशप्रदेशसमतुल्यो वाऽधिको वा हीनो वेति ? प्रश्ने, उत्तरम्-जीवप्रदेशाऽऽकाशप्रदेशयोर्निर्विभागभागरूपत्वेन तुल्यत्वमेवेति मन्तव्यम् । १०२ प्र० । सेन० ३ उल्ला० । तथाऽष्टौ गोस्तनाकारा जीवप्रदेशाः सन्ति, तेषां कर्मवर्गणा लगन्ति, न वेति ? प्रश्ने,उत्तरम्-जीवानां मध्याष्टप्रदेशानां कर्मवर्गणा न लगतीति ज्ञानदीपिकायां प्रोक्तमस्ति । यथा-"स्पृश्यन्ते कर्मणा तेऽपि, प्रदेशा आत्मनो यदि । तदा जीवो जगत्यस्मिन्-अजीवत्वमवाप्नुयात्' ॥१॥ १५ प्र० सेन० ४ उल्ला० ।

जीवपएसवग्ग-जीवप्रज्ञापना-स्त्री० । प्रज्ञाप्यन्ते जीवाऽऽदयो भावा अनया शब्दसंहत्येति प्रज्ञापना । प्रज्ञा० १ पद । जीवानां प्रज्ञापना जीवप्रज्ञापना । प्रज्ञापनोपाङ्गस्य जीवप्रज्ञापिकायां शब्दसंहतौ, प्रज्ञा० १ पद ।

साम्प्रतं जीवप्रज्ञापनाभिधित्सुस्तद्विषयं प्रश्नसूत्रं चाह-

से किं तं जीवपन्नवणा ?। जीवपण्णवणा दुविहा पन्नत्ता। तं जहा-संसारसमावण्णजीवपण्णवणा य, असंसारसमावण्णजीवपण्णवणा य। से किं तं असंसारसमावण्णजीवपन्नवणा ?। असंसारसमावन्नजीवपन्नवणा दुविहा पन्नत्ता। तं जहा-अणंतरसिद्धअसंसारसमावण्णजीवपण्णवणा, परंपरसिद्धअसंसारसमावण्णजीवपण्णवणा॥

"से किं तं" इत्यादि। अथ का सा जीवप्रज्ञापना ?। सूरिराह-जीवप्रज्ञापना द्विविधा प्रज्ञप्ता। तद्यथा-संसारसमापन्नजीवप्रज्ञापना च, असंसारसमापन्नजीवप्रज्ञापना च। तत्र संसरणं संसारो नारकतिर्यङ्नरामरभवानुभवलक्षणः, तं समस्तमेकीभावेनाऽऽपन्नाः, संसारवर्त्तिन इत्यर्थः। ते च ते जीवाश्च, तेषां प्रज्ञापना संसारसमापन्नजीवप्रज्ञापना। न संसारोऽसंसारो मोक्षस्तं समापन्ना असंसारसमापन्नाः, मुक्ता इत्यर्थः। ते च ते जीवाश्च, तेषां प्रज्ञापना असंसारसमापन्नजीवप्रज्ञापना। चशब्दौ प्राग्वद् भावनीयौ। तत्रोपक्रम्यत्वात्प्रथमतोऽसंसारसमापन्नजीवप्रज्ञापनामभिधित्सुस्तद्विषयं प्रश्नसूत्रमाह-"से किं तं" इत्यादि। अथ का सा असंसारसमापन्नजीवप्रज्ञापना ?। सूरिराह-असंसारसमापन्नजीवप्रज्ञापना द्विविधा प्रज्ञप्ता। तद्यथा-अनन्तरसिद्धासंसारसमापन्नजीवप्रज्ञापना च, परम्परसिद्धासंसारसमापन्नजीवप्रज्ञापना च। तत्र न विद्यतेऽन्तरं व्यवधानम्, अर्थात्समयेन येषां तेऽनन्तराः, ते च ते सिद्धाश्चानन्तरसिद्धाः, सिद्धत्वप्रथमसमये वर्त्तमाना इत्यर्थः। ते च तेऽसंसारसमापन्नजीवाश्च अनन्तरसिद्धासंसारसमापन्नजीवाः, तेषां प्रज्ञापना अनन्तरसिद्धासंसारसमापन्नजीवप्रज्ञापना। चशब्दः स्वगतानेकभेदसूचकः। तथा-विवक्षिते प्रथमे समये यः सिद्धस्तस्य यो द्वितीयसमयसिद्धः स परः, तस्यापि यस्तृतीयसमयसिद्धः स परः। एवमन्येऽपि वाच्याः। परे च परे चेति वीप्सायां "पृथोदराऽऽदयः" ॥३।२।१५५॥ इति (सि० हे०) सूत्रेण परम्परशब्दनिष्पत्तिः। परम्पराश्च ते सिद्धाश्च परम्परसिद्धाः, विवक्षितसिद्धस्य प्रथमसमयात्प्राग् द्वितीयाऽऽदिसमयेष्वतीताद्धां यावद्वर्त्तमाना इति भावः। ते च ते असंसारसमापन्नाश्च परम्परसिद्धासंसारसमापन्नाः, ते च ते जीवाश्च, तेषां प्रज्ञापना परम्परसिद्धासंसारसमापन्नजीवप्रज्ञापना। अत्रापि चशब्दः स्वगतानेकभेदसंसूचकः। प्रज्ञा० १ पद।

जीवपरिणाम-जीवपरिणाम-पुं०। परिणमनं परिणामः, तत्तद्भावगमनमित्यर्थः। यदाह-"परिणामो ह्यर्थान्तरगमनं न च सर्वथा व्यवस्थानम्। न च सर्वथा विनाशः, परिणामस्तद्विदामिष्टः॥ १॥" द्रव्यार्थनयस्येति सत्पर्ययेण नाशः प्रादुर्भावोऽसता च पर्यवतो द्रव्याणां परिणामः प्रोक्तः। खलु पर्यायनयस्येति जीवस्य परिणाम इति विग्रहः। जीवस्य तत्तद्भावगमने, स्था०।

दसविहे जीवपरिणामे पण्णत्ते। तं जहा-गइपरिणामे, इंदियपरिणामे, कसायपरिणामे, लेस्सापरिणामे, जोगपरिणामे, उवओगपरिणामे, नाणपरिणामे, दंसणपरिणामे, चरित्तपरिणामे, वेदपरिणामे।

स च प्रायोगिकः, तत्र गतिरेव परिणामो गतिपरिणामः। एवं सर्वत्र। गतिश्चेह गतिनामकर्मोदयाज्जीवस्य पर्यायविशेषो गन्तुः, तत्परिणामश्च जवक्रियादिति। स च नरकगत्यादिभेदात्पञ्चधेति, गतिपरिणामे च सत्येवेन्द्रियपरिणामो भवति। तमाह-(इंदियपरिणामे त्ति) स च श्रोत्राऽऽदिभेदात्पञ्चधेति। इन्द्रियपरिणतौ चेष्टानिष्टविषयसंबन्धाद्रागद्वेषपरिणतिरिति तदनन्तरं कषायपरिणाम उक्तः। स च क्रोधाऽऽदिभेदाच्चतुर्विधः। कषायपरिणामे च सति लेश्यापरिणतिः, न तु लेश्यापरिणतौ कषायपरिणतिः, येन क्षीणकषायस्यापि शुक्ललेश्यापरिणतिर्देशोनपूर्वकोटिं यावद्भवति। यत उक्तम्-"मुहुत्तद्धं तु जहण्णा, उक्कोसा होइ पुव्वकोडीओ। नवहि वरिसेहि ऊणा, नायव्वा सुक्कलेस्साए" ॥१॥ त्ति। अतो लेश्यापरिणाम उक्तः। स च कृष्णाऽऽदिभेदात्षोढेति। अयं च योगपरिणामे सति भवति, यस्मान्निरुद्धयोगस्य लेश्यापरिणामोऽपैति, यतः समुच्छिन्नक्रियं ध्यानमलेश्यस्य भवतीति लेश्यापरिणामानन्तरं योगपरिणाम उक्तः। स च मनोवाक्कायभेदात्त्रिधेति। संसारिणां च योगपरिणतावुपयोगपरिणतिर्भवतीति तदनन्तरमुपयोगपरिणाम उक्तः। स च साकारानाकारभेदाद्द्विधा। सति चोपयोगपरिणामे ज्ञानपरिणामः, अतस्तदनन्तरमसावुक्तः। स चाऽऽभिनिबोधिकाऽऽदिभेदात्पञ्चधा। तथा-मिथ्यादृष्टेर्ज्ञानमप्यज्ञानपरिणामो मत्यज्ञानश्रुताज्ञानविभङ्गज्ञानलक्षणस्त्रिविधोऽपि विशेषग्रहणसाधर्म्याद् ज्ञानपरिणामग्रहणेन गृहीतो द्रष्टव्य इति ज्ञानाज्ञानपरिणामे च सति सम्यक्त्वाऽऽदिपरिणतिरिति, ततो दर्शनपरिणाम उक्तः। स च त्रिधा, सम्यक्त्वमिथ्यात्वमिश्रभेदात्। सम्यक्त्वे सति चारित्रमिति, ततस्तत्परिणाम उक्तः। स च सामायिकाऽऽदिभेदात्पञ्चधेति रुयादिवेदपरिणामे चारित्रपरिणामो, न तु परिणामे वेदपरिणतिर्यस्मादवेदकस्यापि यथाख्यातचारित्रपरिणतिर्दृष्टेति चारित्रपरिणामानन्तरं वेदपरिणाम उक्तः, स च रुयादिभेदात्त्रिधेति। स्था० १० ठा०।

जीवपच्चक्खाणकिरिया-जीवप्रत्याख्यानक्रिया-स्त्री०। जीवविषये प्रत्याख्यानाभावेन बन्धाऽऽदिव्यापारे, स्था०२ ठा०१ उ०।

जीवपाओसिया-जीवप्राद्वेषिकी-स्त्री०। जीवस्याऽऽत्मपरतदुभयरूपस्योपरि प्रद्वेषाऽऽदा क्रिया प्रद्वेषकारणमेव वा जीवप्राद्वेषिकी। प्राद्वेषिक्याः क्रियाया भेदे, भ०३ श० ३ उ०। स्था०।

जीवपाडुच्चिया-जीवप्रातीतिका-स्त्री०। जीवं प्रतीत्य यः कर्मबन्धः सा तथा। क्रियाभेदे, स्था० २ ठा० १ उ०।

जीवभाव-जीवभाव-पुं०। जीवत्वे, भ०।

अथ तद्देशभूतो जीव इत्थानाऽऽदिगुण इति दर्शयन्नाह-

जीवेणं भंते! सजट्ठाणे सकम्मे सबले सवीरिए सपुरिसक्कारपरक्कमे आयजीवेणं जीवभावं उवदंसेइ त्ति वत्तव्वं सिया?। हंता गोयमा! जीवेणं सजट्ठाणे० जाव उवदंसेइ त्ति वत्तव्वं सिया। से केणट्ठेणं० जाव वत्तव्वं सिया?। गोयमा! जीवेणं आणंताणमाभिणिबोहियनाणपज्जवाणं, एवं सुयनाणपज्जवाणं ओहिनाणपज्जवाणं मणपज्जवनाणपज्जवाणं केवलनाणपज्जवाणं मइअन्नाणपज्जवाणं सुयअन्नाणपज्जवाणं विभंगनाणपज्जवाणं चक्खुदंसणपज्जवाणं अचक्खुदंसणपज्जवाणं ओहिदंसणपज्जवाणं केवलदंसणपज्जवा-

णं उवओगं गच्छइ उवओगलक्खणेणं जीवे, से एएणट्ठेणं एवं वुच्चइ–गोयमा ! जीवे सउट्ठाणे० जाव वत्तव्वं सिया । "जीवेणं" इत्यादि । इह च ' सउट्ठाणे ' इत्यादीनि विशेषणानि मुक्तजीवव्युदासार्थानि । (आयभावेणं ति) आत्मभावेन तत्थानशयनगमनभोजनाऽऽदिरूपेणाऽऽत्मपरिणामविशेषेण (जीवभावं ति) जीवत्वं चैतन्यमुपदर्शयति प्रकाशयति इति वक्तव्यं स्यात्,विशिष्टस्योत्थानाऽऽदेर्विशिष्टचेतनापूर्वकत्वादिति । "अणंताणमाभिणिबोहिय" इत्यादि । पर्यवाः प्रज्ञाकृता अविभागाः परिच्छेदाः, ते चानन्ता आभिनिबोधिकज्ञानस्यातोऽनन्तानामाभिनिबोधिकज्ञानपर्यवाणां संबन्धिनमनन्ताभिनिबोधिकज्ञानपर्यवाऽऽत्मकमित्यर्थः। उपयोगं चेतनाविशेषं गच्छतीति योगः। उत्थानाऽऽदावात्मभावे वर्त्तमान इति हृदयम्। अथ यदुत्थानाऽऽद्यात्मभावे वर्त्तमानो जीव आभिनिबोधिकज्ञानाऽऽद्युपयोगं गच्छति, तत्किमेतावतैव जीवभावमुपदर्शयतीति वक्तव्यं स्यात् ?,इत्याशङ्क्याऽऽह–"उवओगं" इत्यादि । अत उपयोगलक्षणं जीवभावमुत्थानाऽऽद्यात्मभावेनोपदर्शयतीति वक्तव्यं स्यादेवेति । भ० २ श० १० उ० ।

जीवमजीव–जीवाजीव–पुं० । जीवद्रव्याजीवद्रव्ययोः, आ० म० २ अ० ।

जीवमिस्सिया-जीवमिश्रिता–स्त्री० । प्रभूतानां जीवानां स्तोकानां च मृतानां च शङ्खशफलकाऽऽदीनामेकत्र राशौ दृष्टं यदा कश्चिदेवं प्रपति-अहो ! महान् जीवराशिरयमिति, तदा सा जीवमिश्रिता । सत्यामृषाभाषाभेदे, सत्यामृषात्वं चास्या जीवसत्त्वात्, मृतेषु मृषात्वात् । प्रज्ञा० ११ पद ।

जीवयामई–देशी–व्याधमृगयाम्, दे० मा० ३ वर्ग ।

जीवरक्खा–जीवरक्षा–स्त्री० । गोप्रभृतिजीवमोचनाय रूप्यक्षिप्तिनां द्रव्यं ग्रहीतुं कल्पते,न वा ?, इति प्रश्ने,उत्तरम–यदि क्षानाऽऽदि संबन्धि द्रव्यं न भवति, तदा गृह्यते,निषेधो ज्ञातो नास्तीति । ४७० प्र० । सेन०३ उल्ला० ।

जीवरासि–जीवराशि–पुं० । राशिभेदे, जीवराशिर्द्विविधः–संसारसमापन्नोऽसंसारसमापन्नश्च । स० ।

जीवरुय–जीवरुत–न० । मयूरमार्जारशुकसारिकाऽऽदिजल्पिते, जीत० ।

जीवलिंग–जीवलिङ्ग–न० चलनस्पन्दनाकुरोद्भवस्वेदम्लानाऽऽदिके, "विज्जाय लिंगं तमथावरणं ।" सूत्र० २ श्रु० ६ अ० ।

जीवलोय–जीवलोक–पुं० । जीवद्रव्ये, ज्ञा० १ श्रु० १ अ० ।

जीववियम–जीववियय–पुं० । असंख्येयप्रदेशाऽऽत्मकसाकारानाकारोपयोगलक्षणानादिस्वकृतकर्मफलोपयोगित्वाऽऽदिजीवस्वरूपानुचिन्तने, सम्म० ३ काण्ड ।

जीववित्तिविसिट्ठ–जीववृत्तिविशिष्ट–त्रि० । क्षेत्रक्षवृत्तित्वविशिष्टे, " जीववृत्तिविशिष्टाश्च–भावाभावग्रहोऽप्यसन् । उत्कर्षाऽपकर्षाऽऽदयस्तथा यदपेक्षया " ॥ २५ ॥ जीववृत्तिविशिष्टः क्षेत्रक्षवृत्तित्वविशिष्टः । ज्ञा० १५ ज्ञा० ।

जीवविप्पजढ–जीवविप्रजह–त्रि० । प्रस्तुके, भ० ७ श० १ उ० । " देवदिण्णस्स दारगस्स सरीरं णिप्पाणं णिच्चिट्ठं जीवविप्पजढं कट्ठकलेवरं पडिचोदेति ।" (जीवविप्पजढं ति) आत्मना विप्रमुक्तः । ज्ञा० १ श्रु० २ अ० ।

जीवविभत्ति–जीवविभक्ति–स्त्री० । द्रव्यविभक्तिभेदे, सूत्र० १ श्रु० ५ अ० १ उ० । जीवविभक्तिः सांसारिकेतरभेदाद् द्वेधा । तत्राप्यसांसारिकजीवविभक्तिर्द्रव्यकालभेदाद् द्वेधा । तत्र द्रव्यतस्तीर्थतीर्थसिद्धाऽऽदिभेदादष्टधा । कालतस्तु तत्प्रथमसमयसिद्धाऽऽदिभेदादनेकधा । सांसारिकजीवविभक्तिरिन्द्रियजातिभवभेदात्त्रिधा । तत्रेन्द्रियविभक्तिरेकेन्द्रियविकलेन्द्रियपञ्चेन्द्रियभेदात्पञ्चधा । जीवानां विभागेनाधस्तात्पने, उत्त० । " इतो जीवविभत्तिं तु, वोच्छामि अणुपुव्वसो " ॥ ४७ ॥ उत्त० ३६ अ० ।

जीववियार–जीवविचार–पुं० । जीवविचारणायाम्,सेन० । "अड्ढाऽऽइज्जेसु दीवसमुद्देसु, पुढवीकाय ट्ठवंति जे जीवा। ते पारेवयमित्ता, जंबूदीवे न माइंति ॥१॥ पगमिम दगबिंदुम्मि, जे जीवा जिणवरेहिं पण्णत्ता । ते जइ सरिसवमित्ता, जंबूदीवे न माइंति ॥२॥" एतद्गाथाद्वयं प्रतिक्रमणसूत्रवृत्तिप्रवचनसारोद्धारसूत्रवृत्त्यादौ यथा दृश्यते, तथा तेजस्कायप्रभृत्येकेन्द्रियाणां जीवमानप्रतिपादिका गाथाः प्रायो ग्रन्थे न दृश्यन्ते, तत्कथम् ? । किञ्च–वरट्टिकातण्डुलप्रमाणमात्रे तेजस्काये ये जीवास्ते यदि मस्तकलिक्षाप्रमाणदेहधारिणो भवेयुः, तदा ते जम्बूद्वीपे न मान्ति । निम्बपत्रस्पृष्टमात्रे वायौ ये जीवाः सन्ति, ते यदि खसखसप्रमाणदेहधारिणो भवेयुः, तदा जम्बूद्वीपे न मान्ति । अयमर्थः प्रमाणम्, अप्रमाणं वा ?। किञ्च–एतदर्थप्रतिपादिके याऽदृश्यौ द्वुटितपत्रे गाथेऽपि स्तः । तद्यथा–"वरट्टितंदुलमित्ता, तेऊजीवा जिणेहिं पण्णत्ता । मत्थयलिक्खपमाणा, जंबूदीवे न माइंति ॥१॥ जे लिंबपत्तफरिसा,वाऊजीवा जिणेहिं पण्णत्ता। ते जइ खसखसमित्ता, जंबूदीवे न माइंति ॥२॥ " किञ्च–पृथिवीकायाऽऽदिजीवप्रमाणप्रतिपादिकायां गाथायां पारापताऽऽदयः प्रोक्ताः, ते च तत्तत्तीर्थकृत्काले भिन्नभिन्नप्रमाणदेहधारिणो भवन्ति,तेन पारापताऽऽदयः किंकालीना ग्राह्याः? इति प्रश्ने,उत्तरम–तेजस्कायिकप्रभृतिशरीरमानप्रतिपादकं गाथाद्वयं यद्यपि महाग्रन्थे न दृश्यते, तथापि सूत्रेण सह सम्मतमेव, तदर्थस्य सूत्रानुयायित्वात्। तथा–जीवमानप्रतिपादकपारापताऽऽदिप्रमाणमवस्थितकालत्वेन मनाविदेहगतं ज्ञायत इति मुग्धबोधनार्थमयमुपदेश इति न काऽप्यनुपपत्तिः ॥ २६६ प्र० । सेन० ३ उल्ला० । एतन्नामके प्रकरणग्रन्थे च ।

जीवविरिय–जीववीर्य–न० । आत्मसामर्थ्ये, " जड्ढसियं जीववीरियं कहं वि । " पं० व० ३ द्वार ।

जीवविवागा–जीवविपाका–स्त्री० । जीव एव विपाकः स्वशक्तिदर्शनलक्षणो विद्यते यासां ता जीवविपाकाः । कर्म० ५ कर्म० । जीवे जीवगते ज्ञानाऽऽदिलक्षणे स्वरूपविपाकस्तदुपघाताऽऽदिसंपादनाभिमुखतालक्षणो यासां ता जीवविपाकाः । कर्मप्रकृतिभेदे, पं० सं० ३ द्वार ।

जीवविपाकित्वमधिकृत्य परप्रश्नमपनुदन्नाह–

संपप्प जीयकालं, उदयं कासो न जंति पगईओ ।
एवमिणमोहहेउं, आमज्ज विसेसयं नत्थि ॥ ४७ ॥

ननु कास्ताः कर्मप्रकृतयो, या जीवं कालं वाऽऽश्रित्य नोदयमधिगच्छन्ति ? सर्वा अपि जीवकालावधिकृतोदयमधिगच्छन्तीति भावः । जीवकालावन्तरेणोदयासंभवात् । ततः सर्वा अपि जीवविपाका एवेति प्रष्टुरभिप्रायः । अत्राऽऽचार्य आह–"एवमिणं" इत्यादि । ओघतः सामान्येन हेतुं हेतुत्वमात्रमाश्रित्य, एवमे-

तद् यथा त्वयोक्तं तथैव, विशेषितं त्वसाधारणं तु. हेतुमाश्रित्य एतन्न भवति. जीवः कार्त्स्न्ये वा सर्वासामपि विकृतीनामुदयं प्रति साधारणः, ततस्तदपेक्षया चतु प्रकृतीनां चिन्ता क्रियते, तर्हि सर्वा अपि जीवविपाका एव, कार्त्स्न्यविपाका एव वा, नास्यत्र संदेहः, परं कासां चित्प्रकृतीनां क्षेत्राऽऽदिकमप्यसाधारणमुदयं प्रति हेतुरस्ति, ततस्तदपेक्षया क्षेत्रविपाकत्वाऽऽदिश्यपदेश इत्यदोषः ॥ ४७ ॥ पं० सं० ३ द्वार । कर्म० ।

जीवबुद्धिय–जीववृद्धिक–न० । अनुकायाम्, एतच्चानुकाया गौणं नाम । नं० ।

जीवसंखेव-जीवसंक्षेप-पुं० । संक्षिप्यन्ते संगृह्यन्ते जीवा एभिरिति संक्षेपा अपर्याप्तैकेन्द्रियत्वाऽऽदयोऽवान्तरजातिभेदाः । जीवानां संक्षेपा जीवसंक्षेपाः । अपर्याप्तैकेन्द्रियत्वाऽऽदिके जीवस्थाने, कर्म० ६ कर्म० ।

जीवसंगहिय–जीवसंगृहीत–त्रि० । जीवैः संगृहीतः स्वीकृतो जीवसंगृहीतः । जीवैः स्वीकृते, स्था० । "अजीवा जीवसंगहिया ।" अजीवाः पुद्गलाऽऽकाशाऽऽदयो जीवैः संगृहीताः स्वीकृताः । अजीवान्वितानामजीवानां सर्वव्यवहाराभावात् । स्था० २ ठा० १ उ० । प्र० ।

जीवसंजम–जीवसंयम–पुं० । जीवेषु संयमो जीवसंयमः । जीवेषु हिंसाऽऽदिपरिहारे, आचा० १ श्रु० १ अ० १ उ० ।

जीवसाहत्थिया-जीवस्वाहस्तिका-स्त्री० । यत्स्वहस्तेन गृहीतेन जीवं मारयति सा जीवस्वाहस्तिका । क्रियाभेदे, स्था० २ ठा० १ उ० ।

जीवा–जीवा–स्त्री० । जीवनं जीवा । प्राणधारणे, आ० चू० १ अ० । जीवनं जीवा इति स्त्रीलिङ्गाभिधायक एवायं शब्दः साध्यते, न तु जीव इति पुँल्लिङ्गाभिधायकः शब्दः । विशे० । जीव-अच्, जीवयतेरच् वा टाप् । प्रत्यञ्चायाम्, सू० प्र० १२ पाहु० । धनुषो गुणे, वाच० । " तेणेहिं सजीवेहिं धणुपरिहिं " सजीवैः कोट्यारोपितप्रत्यञ्चैः । ज्ञा० १ श्रु० ८ अ० । जीवेव जीवा, जम्बूद्वीपलक्षणवृत्तक्षेत्रस्य हैमवतैरण्यवताभ्यां द्वितीयषष्ठवर्षाभ्यामवच्छिन्नस्याऽऽरोपितज्याधनुःपृष्ठाकारयोः परिधिखण्डयोः धनुःपृष्ठसंज्ञकयोः पर्यन्तभूतसरलप्रदेशपङ्क्तौ, स० ।

हैमवताऽऽदिजीवानां प्रमाणमाह–

हेमवयएरन्नवयाओ णं जीवाओ सत्ततीसं जोयणसहस्साइं छच्च चउसत्तरे जोयणसए सोलसए एगूणवीसइभाए जोयणस्स किंचि विसेसूणाओ आयामेणं पण्णत्ता ॥

हैमवताऽऽदिजीवयोरुक्तप्रमाणसंवादनगाथा—"सत्ततीससहस्सा, छच्च सया जोयणाण चउसयरा । हेमवयवासजीवा, किंचूणा सोलस कला य" ॥ १ ॥ क्षि । कला एकोनविंशतिभागो योजनस्येति । स० ३७ सम० ।

हैमवतैरण्यवताऽऽदिजीवानां परिधिखण्डप्रमाणमाह–

हेमवएरण्णवइयाणं जीवाणं धणुपिट्ठे अट्ठतीसं जोयणसहस्साइं सत्त य चत्ताले जोयणसए दस एगूणवीसइभागे जोयणस्स किंचि विसेसूणा परिक्खेवेणं पण्णत्ता ।

जम्बूद्वीपलक्षणवृत्तक्षेत्रस्य हैमवतैरण्यवताभ्यां द्वितीयषष्ठवर्षाभ्यामवच्छिन्नस्याऽऽरोपितज्याधनुःपृष्ठाऽऽकारे परिधिखण्डे धनुःपृष्ठे उच्येते, तत्पर्यन्तभूते सरलप्रदेशपङ्क्ती तु जीवे इति । एतत्सूत्रसंवादिगाथा च–"चत्तारि सत्तसया, सगतीससहस्स दस कला य धणु ।" इति । स० ३८ सम० । "जंबूदीवस्स पाईणपडीणदाहिणाए जीवाए " जीवया प्रत्यञ्चया, दवरिकयेत्यर्थः । सू० प्र० १२ पाहु० ।

जीवाइनाववाय–जीवाऽऽदिभाववाद–पुं० । जीवाऽऽदिपदार्थवादे, "जीवाइभाववाओ, बंधाइयसाहगो इहं नत्थ" । पं० व० ४ द्वार ।

जीवाजीव–जीवाजीव–पुं० । जीवद्रव्याजीवद्रव्ययोः, स्था० ।

समयाइ वा आवलियाइ वा जीवाइ वा अजीवाइ वा वुच्चइ । आणापाणूइ वा थोवाइ वा जीवाइ वा अजीवाइ वा पवुच्चइ । खणाइ वा लवाइ वा जीवाइ वा अजीवाइ वा पवुच्चइ । एवं मुहुत्ताइ वा अहोरत्ताइ वा पक्खाइ वा मासाइ वा उऊइ वा अयणाइ वा संवच्छराइ वा जुगाइ वा वाससयाइ वा वाससहस्साइ वा वाससयसहस्साइ वा वासकोडीइ वा पुव्वंगाइ वा पुव्वाइ वा तुडियंगाइ वा तुडियाइ वा अडडंगाइ वा अडडाइ वा अववंगाइ वा अववाइ वा हूहूअंगाइ वा हूहूयाइ वा उप्पलंगाइ वा उप्पलाइ वा पउमंगाइ वा पउमाइ वा णलिणंगाइ वा णलिणाइ वा अत्थणिउरंगाइ वा अत्थणिउराइ वा अउअंगाइ वा अउआइ वा णउअंगाइ वा णउआइ वा पउअंगाइ वा पउआइ वा चूलिअंगाइ वा चूलियाइ वा सीसपहेलियंगाइ वा सीसपहेलियाइ वा पलिओवमाइ वा सागरोवमाइ वा उस्सप्पिणीइ वा ओसप्पिणीइ वा जीवाइ वा अजीवाइ वा पवुच्चइ । गामाइ वा णगराइ वा निगमाइ वा रायहाणीइ वा खेडाइ वा कव्वडाइ वा मडंबाइ वा दोणमुहाइ वा पट्टणाइ वा आगराइ वा आसमाइ वा संवाहाइ वा सन्निवेसाइ वा घोसाइ वा आरामाइ वा उज्जाणाइ वा वणाइ वा वणसंडाइ वा वावीइ वा पुक्खरणीइ वा सराइ वा सरपंतियाइ वा अगडाइ वा तलागाइ वा दहाइ वा णदीइ वा पुढवीइ वा उदहीइ वा वातखंधाइ वा ओगासंतराइ वा वलयाइ वा विगाहाइ वा दीवाइ वा समुद्दाइ वा वेलाइ वा वेइयाइ वा दाराइ वा तोरणाइ वा णेरइयाइ वा णेरइयावासाइ वा० जाव वेमाणियावासाइ वा कप्पाइ वा कप्पविमाणावासाइ वा वासाइ वा वासहरपव्वयाइ वा कूडाइ वा कूमागाराइ वा विजयाइ वा रायहाणीइ वा जीवाइ वा अजीवाइ वा पवुच्चइ । छायाइ वा आतवाइ वा दोसिणाइ वा अंधकाराइ वा ओमाणाइ वा पमाणाइ वा उम्माणाइ वा अतियाणगिहाइ वा उज्जाणगिहाइ वा अवलिंबाइ वा सणिप्पवायाइ वा जीवाइ वा अजीवाइ वा पवुच्चइ । स्था० ॥

पूर्वत्र जीवविशेषाणामुच्चत्वलक्षणो धर्मोऽभिहितः, इह तु धर्माधिकारादेव समयाऽऽदिस्थितिलक्षणो धर्मो जीवाजीवसंबन्धी जीवाजीवतयैव धर्मधर्मिणोरभेदेनोच्यत इति । तत्र सर्वेषां कालप्रमाणानामाद्यः परमसूक्ष्मोऽनेद्यो निरवयव उत्पलपत्रशत-

ज्यातभदाऽऽद्युदाहरणोपलक्षितः समयः, तस्य चातीताऽऽदिविकल्पैर्बहुत्वाद् बहुवचनमित्याह-"समयाइ वा" इत्यादि । इतिशब्द उपदर्शने । वाशब्दो विकल्पे । तथाऽसंख्यातसमयसमुदयाऽऽत्मिका आवलिका क्षुल्लकभवग्रहणकालस्य षट्पञ्चाशदुत्तरद्विशततमभागभूता इति; तत्र समया इति वा आवलिका इति वा यत् कालवस्तु तद्विभागेन जीवा इति च जीवपर्यायत्वात् पर्यायपर्यायिणोश्च कथञ्चिदभेदात् । तथा अजीवानां पुद्गलाऽऽदीनां पर्यायत्वादजीवा इति । वकारौ समुच्चयार्थौ, दीर्घता च प्राकृतत्वात् । प्रोच्यते अभिधीयत इति न जीवाऽऽदिव्यतिरेकिणः समयाऽऽदयः । तथाहि-जीवाजीवानां सादिसपर्यवसानाऽऽदिभेदा या स्थितिस्तद्भेदाः समयाऽऽदयः सा च तद्धर्मः, धर्मश्च धर्मिणो नात्यन्तभेदवान्, अत्यन्तभेदे हि विप्रकृष्टधर्ममात्रोपलब्धौ प्रतिनियतधर्मधर्मिविषय एव संशयो न स्यात्, तद्भेदेभ्योऽपि तस्य भेदविशेषात् । दृश्यते च यदा कश्चिद्धवलितलकतरुणशाखाविसरविवरान्तरतः किमपि शुक्लं पश्यति, तदा 'किमियं पताका, किंवा बलाका?' इत्येवं प्रतिनियतधर्मिविषयसंशय इति । अभेदे हि सर्वथा संशयानुत्पत्तिरेव, गुणग्रहणत एव तस्यापि गृहीतत्वादिति । इह त्वभेदनयाऽऽश्रयणाज्जीवा इति वेत्याद्युक्तम् । इह च-समयाऽऽवलिकालक्षणार्थद्वयस्याजीवाऽऽदिद्वयाऽऽत्मकतया भणनाद् द्विस्थानकावतारो दृश्यः, एवमुत्तरसूत्राण्यपि नेयानि, विशेषं तु वक्ष्याम इति । (आणापाणु इत्यादि) । आनप्राणाविनिश्वासनिःश्वासकालः संख्याताऽऽवलिकाप्रमाणः ।

आह च-

" हट्ठस्स अणवगल्ल-स्स निरुवकिट्ठस्स जंतुणो ।
एगे ऊसासनिस्सासे, एस पाणु त्ति वुच्चइ " ॥ १ ॥

तथा स्तोकाः सप्तोच्छ्वासनिःश्वासप्रमाणाः, क्षणाः संख्यातसमयलक्षणाः, सप्तस्तोकप्रमाणा लवाः । एवमिति यथा प्राक्तने सूत्रत्रये जीवा इति यच्चा अजीवा इति च प्रोच्यन्ते इत्यधीतम्, एवं सर्वेष्वुत्तरसूत्रेष्वित्यर्थः । मुहूर्ताः सप्तसप्ततिलवप्राणाः ।

उक्तञ्च-

" सत्त पाणूणि से थोवे, सत्त थोवाणि से लवे ।
लवाणं सत्तहत्तरिए, एस मुहुत्ते वियाहिए ॥ १ ॥
तिन्नि सहस्सा सत्त य, सयाइ तेहत्तरिं च ऊसासा ।
एस मुहुत्तो भणिओ, सव्वेहिं अणंतनाणीहिं " ॥ २ ॥

अहोरात्रादिशब्दा मुहूर्तप्रमाणाः, पक्षाः पञ्चदशाहोरात्रप्रमाणाः, मासा द्विपक्षाः, ऋतवो द्विमासमाना वसन्ताऽऽद्याः, अयनानि ऋतुत्रयमानानि, सम्वत्सरा अयनद्वयमानाः, युगानि पञ्चसम्वत्सराणि, वर्षशताऽऽदीनि प्रतीतानि, पूर्वाङ्गानि चतुरशीतिवर्षलक्षप्रमाणानि, पूर्वाणि पूर्वाङ्गान्येव चतुरशीतिवर्षलक्षगुणितानि ।

इदञ्चैषां मानम्-

" पुव्वस्स उ परिमाणं, सयरिं खलु होंति कोडिलक्खाओ ।
छप्पन्नं च सहस्सा, बोधव्वा वासकोडीणं " ॥ १ ॥

७०५६०००००००००० पूर्वाणि चतुरशीतिलक्षगुणितानि त्रुटिताङ्गानि भवन्ति । एवं पूर्वस्य पूर्वस्य चतुरशीतिलक्षगुणनेनोत्तरमुत्तरं संख्यानं भवति, यावच्छीर्षप्रहेलिकेति । तस्यां चतुर्नवत्यधिकमङ्कस्थानशतं भवति ।

अत्र करणगाथा-

" इक्किक्कयट्ठाणेणं गुणं, पण सुन्नं चउरसीइगुणियं च ।
काऊण तइयवारे, पुव्वंगाईण मुणं संखं " ॥ १ ॥

शीर्षप्रहेलिकान्तः सांव्यवहारिकः संख्यातः कालः, तेन च प्रथमपृथिवीनारकाणां भवनपतिव्यन्तराणां नरतैरश्चेषु सुखमदुःषमायाः पश्चिमे भागे नरतिरश्चां चाऽऽयुर्मीयत इति । किं चशीर्षप्रहेलिकायाः परतोऽप्यस्ति संख्यातः कालः । स चातिशायिनां न व्यवहारविषय इति कृत्वौपम्ये प्रक्रिमः, अत एव शीर्षप्रहेलिकायाः परतः पल्योपमाऽऽद्युपन्यासः । तत्र पल्यैनोपमा येषु तानि पल्योपमानि असंख्यातवर्षकोटीकोटीप्रमाणानि वक्ष्यमाणलक्षणानि; सागरेणोपमा येषु तानि सागरोपमाणि पल्योपमकोटीकोटीदशकमानानीति, दशसागरोपमकोटीकोट्य उत्सर्पिणी, एवमेवावसर्पिणीति, कालविशेषवद् ग्रामाऽऽदिवस्तुविशेषा अपि जीवाजीवा एवेति । द्विपदैः सप्तचत्वारिंशता सूत्रैराह-(गामेत्यादि) इह च प्रत्येकं जीवा एवेत्याद्यालापोऽध्येतव्यः, ग्रामाऽऽदीनां च जीवाजीवता प्रतीतैव । तत्र कराऽऽदिगम्या ग्रामाः, नैतेषु करोऽस्तीति नकराणि, निगमा वणिक्निवासाः, राजधान्यो यासु राजानोऽभिषिच्यन्ते, खेटानि धूलीप्राकारोपेते, कर्वटानि कुनगराणि, मडम्बानि सर्वतोऽर्द्धयोजनात्परतोऽवस्थितग्रामाणि, द्रोणमुखानि येषां जलस्थलपथावुभावपि स्तः, पत्तनानि येषु जलस्थलपथयोरन्यतरेण पर्यायप्रवेशः, आकरा लोहाऽऽद्युत्पत्तिभूमयः, आश्रमास्तीर्थस्थानानि, संवाहाः समभूमौ कृषिं कृत्वा येषु दुर्गभूमिभूतेषु धान्यानि कृषीबलाः संवहन्ति रक्षार्थमिति, सन्निवेशाः सार्थकटकाऽऽदेः, घोषाः गोष्ठानि, आरामा विविधवृक्षलतोपशोभिताः कदल्यादिप्रच्छन्नगृहेषु स्त्रीसहितानां पुंसां रमणस्थानभूता इति । उद्यानानि पत्रपुष्पफलच्छायोपशोभितानि बहुजनस्य विविधवेषस्योन्नतमानस्य भोजनार्थं यानं गमनं येष्विति । वनानीत्येकजातीयवृक्षाणि, वनखण्डा अनेकजातीयोत्तमवृक्षाः । वापी चतुरस्रा, पुष्करिणी वृत्ता पुष्करवती चेति । सरांसि जलाऽऽशयविशेषाः, सरःपङ्क्तयः सरसां पङ्क्तयः । (अगड त्ति) अवटाः । तडागाऽऽदीनि प्रतीतानि । पृथिवी रत्नप्रभाऽऽदिका, उदधिस्तद्वलयो घनोदधिः । वातस्कन्धा घनवाततनुवाताः, इतरे वा, अवकाशान्तराणि वातस्कन्धानामधस्तादाकाशानि, जीवता चैषां सूक्ष्मपृथिवीकायिकाऽऽदिजीवव्याप्तत्वात् । वलयानि पृथिवीनां वेष्टनानि घनोदधिघनवाततनुवातलक्षणानीति । विग्रहाः-लोकनाभिकाण्डानि, जीवता चैषां पूर्ववत् । द्वीपाः समुद्राश्च प्रतीताः । वेला समुद्रजलवृद्धिः, वेदिकाः प्रतीताः, द्वाराणि विजयाऽऽदीनि, तोरणानि तेष्वेवेति । नैरयिकाः क्लिष्टसत्त्वविशेषाः, तेषां च जीवता कर्मपुद्गलाऽऽद्यपेक्षया । तदुत्पत्तिभूमयो नैरयिकाऽऽवासाः, तेषां च जीवता पृथिवीकायिकाऽऽद्यपेक्षया इति । एवं चतुर्विंशतिदण्डकोऽभिधेयः । अत एवाऽऽह-यावदित्यादि । कल्पा देवलोकाः, तद्देशाः कल्पविमानाऽऽवासाः, वर्षाणि नरताऽऽदिक्षेत्राणि, वर्षधरपर्वता हिमवदादयः, कूटानि हैमवतकूटानि, कूटाऽऽगाराणि तेष्वेव देवभवनानि, विजयाश्चक्रवर्त्तिविजेतव्यानि कच्छाऽऽदीनि क्षेत्रखण्डानि, राजधान्यः क्षेमाऽऽदिकाः । जीवेत्यादीहाकं सर्वत्र सम्बन्धनीयमिति । येऽपि पुद्गलधर्मास्तेऽपि तथेत्याह-छायेत्यादि सूत्रपञ्चकं गतार्थम्, नवरं छाया वृक्षाऽऽदीनाम्, आतप आदित्यस्य । (जोण्हा इ व त्ति) ज्योत्स्ना, अन्धकाराणि तमांसि, अवमानानि क्षेत्राऽऽदीनि, उन्मानानि तुलाकर्षाऽऽदीनि, अतियानगृहाणि नगराऽऽदिप्रवेशे यानि गृहाणि प्रतीतानि । (अवलिंबाइ वा सणिप्पवायाइ व त्ति) रूढिरीतिरेवेयं इति । किं-

मेतत्सर्वमित्याह-जीवा इति च जीवव्यासत्वात्, तदाश्रितत्वाद्वा । अजीवा इति च पुद्गलाऽऽद्यजीवरूपत्वात्, तदाश्रितत्वाद्वेति । प्रोच्यते-जिनैः प्ररूप्यत इति । इह च-" जीवाइ वा " इत्यादिसूत्रपञ्चकेऽपि प्रत्येकमध्येतव्यमिति । स्था० २ ठा० ४ उ० ।

अथ समयाऽऽदिवस्तु जीवाजीवरूपमेव कस्मादभिधीयते ?, उच्यते-तद्विलक्षणराश्यन्तराभावात् । अत एवाऽऽह—

दो रासी पण्णत्ता । तं जहा-जीवरासी चेव, अजीवरासी चेव । स्था० २ ठा० ४ उ० ।

(जीवाजीवयोरस्तित्वप्रतिपादनं ' अत्थिवाय ' शब्दे प्रथमभागे ५१९ पृष्ठे कृतम्)

जीवाजीवपरिज्ञाने फलम-

जो जीवे वि न जाणेइ, अजीवे वि न जाणइ ।
जीवाजीवे अजाणंतो, कहं सो नाहीइ संजमं ? ॥१२॥

यो जीवानपि पृथिवीकायिकाऽऽदिभेदभिन्नान् जानाति, अजीवानपि संयमोपघातिनो मद्यहिरण्याऽऽदीन् जानाति वा, जीवाजीवाऽऽदीनजानन् कथमसौ ज्ञास्यति संयमं तद्विषयम् ?, तद्विषयाज्ञानादिति भावः ॥ १२ ॥

जो जीवे वि वियाणेइ, अजीवे वि वियाणइ ।
जीवाजीवे वियाणंतो, सो हु नाहीइ संजमं ॥ १३ ॥

ततश्च यो जीवानपि जानात्यजीवानपि जानाति, जीवाजीवान् विजानन् स एव ज्ञास्यति संयममिति प्रतिपादितः पञ्चम उपदेशार्थाधिकारः ॥ १३ ॥

जया जीवमजीवे य, दो वि एए वियाणइ ।
तया गइं बहुविहं, सव्वजीवाण जाणइ ॥ १४ ॥

यदा यस्मिन् काले जीवानजीवांश्च द्वावप्येतौ विजानाति-विविधं जानाति, तदा तस्मिन् काले गतिं नरकगत्यादिरूपां, बहुविधां स्वपरगतभेदेनानेकप्रकारां, सर्वजीवानां जानाति, यथावस्थितजीवाजीवपरिज्ञानमन्तरेण गतिपरिज्ञानाभावात् ॥ १४ ॥

उत्तरोत्तरं फलवृद्धिमाह--

जया गइं बहुविहं, सव्वजीवाण जाणइ ।
तया पुण्णं च पावं च, बंधं मोक्खं च जाणइ ॥१५॥

यदा यस्मिन् काले गतिं बहुविधां सर्वजीवानां जानाति, तदा पुण्यं च पापं च बहुविधगतिनिबन्धनं, तथा-बन्धं जीवकर्मयोगदुःखलक्षणं, मोक्षं च तद्वियोगसुखलक्षणं जानाति । दश० ४ अ० । जीवतां स्तोकानां च भूयसां मृतानां च शङ्खशफनखाऽऽदीनामेकत्र राशीकृतानाम् । प्रज्ञा० ११ पद । प्रभूतेषु मृतेषु स्तोकेषु जीवत्सु एकत्र राशीकृतेषु शङ्खाऽऽदिषु, प्रज्ञा० ११ पद । एतावन्तोऽत्र जीवन्त एतावन्तोऽत्र मृता इति नियमेनावधारयतो विसंवादे जीवाजीवमिश्रिताः । सत्यामृषाभाषाभेदे, प्रज्ञा० ११ पद ।

जीवाजीवविभत्ति–जीवाजीवविभक्ति–स्त्री० । जीवानामजीवानां च विभक्तिर्विभागेनावस्थापना जीवाजीवविभक्तिः । जीवानामजीवानां च विभागेनावस्थापनायाम्, उत्त० ।

तथा च निर्युक्तिकारः-

जीवाणमजीवाण य, जीवविभत्ती तहिं दुविहा ॥३६
सिद्धाणमसिद्धाण य, अजीवाणं तु दोइ दुविहा उ ।
तो रूविमरूवीण य, विभासियव्वा जहासुत्तं ॥३७

जीवानामजीवानां च योऽर्थो जीवविभक्तिर्जीवानां विभागेनावस्थापनमेव जीवविभक्तिः, उत्तरत्राप्येवमेव संबन्धिनेदाद् व्याख्येयः। (तहिं ति) वचनव्यत्ययात्तयोर्जीवाजीवविभक्त्योर्मध्ये द्विविधा सिद्धानाम्, असिद्धानां च । (अजीवाणं तु त्ति) तुरपिशब्दार्थः,ततोऽजीवानामपि भवति (दुविहा उ त्ति) तुरवधारणे, ततो द्विविधैव रूपिणामरूपिणां च विभावितव्या विशेषेण व्यक्तं वक्तव्या। उत्त० नि० पा० ३६ अ० । जीवाजीवविभक्तिप्रतिपादके उत्तराध्ययनस्य षट्त्रिंशेऽध्ययने, न० । स० ।

जीवाजीवविभक्त्याख्यं षट्त्रिंशमध्ययनं व्याख्यायते-

जीवाजीवविभत्तिं, सुणेह मे एगमणा इओ ।
जं जाणिऊण भिक्खू, सम्मं जयइ संजमे ॥ १ ॥

भो शिष्याः ! एकाग्रमनसः सन्तः स्थिरचित्ताः सन्तो यूयं तां जीवाजीवविभक्तिं जीवाजीवाऽऽदीनां लक्षणं,मे मम कथयतः सतः शृणुत । जीवाश्च अजीवाश्च जीवाऽजीवाः,तेषां विभक्तिर्लक्षणज्ञानेन पृथक् पृथक् करणं जीवाजीवविभक्तिः, ताम्, उपयोगवान् जीव एकेन्द्रियाऽऽदिः । उपयोगरहितोऽजीवः काष्ठाऽऽदिः । इत्यादिजैनमतोक्तलक्षणेन लक्ष्यज्ञानम्, तामिति काम् ?, यां जीवाजीवविभक्तिं ज्ञात्वा भिक्षुः संयमे संयममार्गे सम्यक् यतते यत्नं कुरुते ॥१॥

जीवा चेव अजीवा य, एस लोए वियाहिए ।
अजीवदेसमागासे, अलोए से वियाहिए ॥ २ ॥

जीवाश्चेतनालक्षणाऽऽत्मकाः,च पुनरजीवा अचेतनाऽऽत्मकाः। चकार एवकारश्च पादपूरणे। एष लोको व्याख्यातस्तीर्थकरैरुक्तः । अजीवदेश आकाशम्, अलोको व्याख्यातः। अजीवस्य धर्मास्तिकायाऽऽदिकस्य देशोऽशोऽजीवदेशो धर्मास्तिकायाऽऽदिवृत्तिरहितस्य आकाशस्यैव देशः स अलोको व्याख्यातः। जीवाजीवानामाधेयभूतानां लोकाऽऽकाशमाधारभूतमतो लोकालोकलक्षणमुक्तम् ॥ २ ॥

जीवाजीवविभक्तिर्यथा स्यात्तथाऽऽह-

दव्वओ खित्तओ चेव, कालओ भावओ तहा ।
परूवणा तेसि भवे, जीवाणमजीवाण य ॥ ३ ॥

द्रव्यतो द्रव्यमाश्रित्य इदं द्रव्यम् इयद्भेदं, क्षेत्रतः इदं द्रव्यम् एतावति क्षेत्रे स्थितं, कालत इदं द्रव्यमियत्कालस्थितिमद्वर्तते, भावतोऽस्य द्रव्यस्य इयन्तः पर्यायाः । एवं तेषां जीवद्रव्याणामजीवद्रव्याणां च द्रव्यक्षेत्रकालभावेन चतुर्धा प्ररूपणा भवेत् ॥ ३ ॥ उत्त० ३६ अ० ।

जीवाजीवसमाउत्त–जीवाजीवसमायुक्त–त्रि० । जीवैरुपयोगलक्षणैस्तथाऽजीवैर्धर्माधर्माऽऽकाशपुद्गलाऽऽदिकैः समन्वितो जीवाजीवसमायुक्तः। जीवाजीवसमन्विते, तथा च लोकमधिकृत्य-" जीवाजीवसमाउत्ते, सुहदुक्खसमण्णिए " । सूत्र० १ श्रु० १ अ० ३ उ० ।

जीवाजीवाहिगम–जीवाजीवाभिगम–पुं० । जीवानामेकेन्द्रियाऽऽदीनामजीवानां धर्मास्तिकायाऽऽदीनामभिगमः परिच्छेदो जीवाजीवाभिगमः । जीवाजीवपरिच्छेदे, जी० ।

से किं तं जीवाजीवाहिगमे ? । जीवाजीवाहिगमे दुविहे पण्णत्ते । तं जहा—जीवाहिगमे य, अजीवाहिगमे य ।

अथ किं तज्जीवाजीवाभिगम इति ? । अथवा-प्राकृतशैल्याऽनिर्देशपदसङ्ग्रहवचनानि भवन्तीति न्यायात् किं तदिति कोऽसावित्यस्मिन्नर्थे द्रष्टव्यम् । ततोऽयमर्थः-कोऽसौ जीवाजीवाभिगमः ?, इति । एवं सामान्येन केनचित्प्रश्ने कृते सति भगवान् गुरुः शिष्यवचनानुरोधनाऽऽदराऽऽधानार्थं किञ्चित्प्रत्युच्चार्याऽऽह-जीवाजीवाभिगमोऽनन्तरोदितशब्दार्थो द्विविधो द्विप्रकारः प्रज्ञप्तस्तीर्थकरगणधरैः। अनेन चागृहीतशिष्यानिधानेन निर्वचनसूत्रेणैतदाह । न सर्वमेव सूत्रं गणधरप्रश्न-तीर्थकरनिर्वचनरूपं, किन्तु किञ्चिदन्यथाऽपि, केवलं सूत्रं बाहुल्येन गणधरैः ग्रन्थं, स्तोकं शब्दैः। यत उक्तम्-"अत्थं भासइ, अरहा" इत्यादि। तथेति वक्ष्यमाणभेदकथनोपन्यासार्थः, स जीवाजीवाभिगमो यथा द्विविधो भवति तथोपन्यस्यत इति भावः । जीवाभिगमश्च, अजीवाभिगमश्च । अशब्दौ वस्तुतत्त्वमङ्गीकृत्य द्वयोरपि तुल्यकक्षतोद्भावनार्थौ । आह-जीवाजीवाभिगमप्रश्नसूत्रे संक्षिप्त उपन्यस्तः, तं तथैवोच्चार्यासंक्षिप्तनिर्वचनाभिधानमयुक्तम्, असंक्षिप्ते संक्षिप्तविधानायोगात् । नैष दोषः । प्रश्नसूत्रेऽप्यसंक्षिप्तस्यैवोपन्यासात्, भिन्नजातीययोरेकत्वायोगात् । जी० १ प्रति० । जीवानामेकेन्द्रियाऽऽदीनामजीवानां धर्मास्तिकायाऽऽदीनामभिगमः परिच्छेदो यस्मिन् तद् जीवाजीवाभिगमम् । जीवाजीवपरिच्छेदप्रतिपादके जीवाजीवाभिगमाख्येऽध्ययनविशेषे, जी० ।

तस्येदमादिमं सूत्रम्-

इह खलु जिणमयं जिणाणुमयं जिणाणुलोमं जिणप्पणीतं जिणपरूवियं जिणक्खायं जिणाणुचिण्णं जिणपसत्थं जिणदेसियं जिणप्पसत्थं अणुचिंतिय तं सद्दहमाणा तं पत्तियमाणा तं रोएमाणा थेरा भगवंते जीवाजीवाभिगमं नामऽज्झयणं पण्णवइंसु ।

जिनप्रशस्तं जिनानां गोत्रविशुद्धोपायाभिमुखापायविमुखाहितप्रवृत्ताऽऽदिभेदानां प्रशस्तं निरुपमपथ्यान्नवत् उचितसेवनया हितम्, एवंभूतं जिनमतमनुचिन्त्य औत्पत्तिक्यादिभेदभिन्नया पर्यालोच्य तद् जिनमतं श्रद्दधाना यद्यपि नाम कालदौर्गुण्यतो मेधाऽऽदिगुणहीनाः प्राणिनस्तथाऽप्यतः स्वरूपमप्यधिगतं भवच्छेदायेत्यार्द्रचित्ततया मन्यमानास्तथा तद् जिनमतमेव प्रीयमाणा असङ्गशक्तिप्रीत्या पश्यन्तः, तथा तज्जिनमतमेव रोचयन्तः स्वात्मीभावेनानुभवन्तः, क एते ? इत्याह-स्थविरा भगवन्तः, तत्र धर्मपरिणत्यनिकृत्या संयमक्रियामतयः स्थविराः परिणतसाधुभावाः, आचार्या इति गर्भः । भगवन्तः श्रुतैश्वर्याऽऽदियोगात् । भग्रवन्तो वा कथायादीनिति भगवन्तः । पृषोदरादित्वाद्भकारलोपः । जीवाजीवाभिगमनं नाम, नामनशब्दस्याप्राग्यपदत्वात्ततः परस्य सुनीयैकवचनस्य लोपः । जीवानामेकेन्द्रियाऽऽदीनामजीवानां धर्मास्तिकायाऽऽदीनामभिगमः परिच्छेदो यस्मिन् तद् जीवाजीवाभिगमः । इदं चान्वर्थप्रधानं नाम । यथा ज्वलतीति ज्वलन इत्यादि । किं तदित्याह-अध्ययत इत्यध्ययनम्, विशिष्टार्थध्वनिसंदर्भरूपं, प्रज्ञापितवन्तः प्ररूपितवन्तः । अनेन गुरुपर्वक्रमलक्षणः संबन्धः साक्षादुपदर्शित एतदुपदर्शनाच्चानिधेयाऽऽदिकमपि सिद्धम् । यथाक्रमनन्तरमिति कृते प्रसङ्गेन । जी० १ प्रति० । जीवाजीवविषयकरूपम् अभिगम्यतेऽस्मिन्निति जीवाजीवाभिगमः। दशवैकालिकस्य षड्जीवनिकायाध्ययने, दश० ४ अ० । दशवैकालिकस्य षड्जीवनिकायाध्ययनपर्यायशब्दप्रतिपादनायाऽऽह निर्युक्तिकारः-" जीवाजीवाभिगमो "-जीवाजीवाभिगमः, सम्यग् जीवाजीवाभिगमहेतुत्वात् । दश० नि० ४ अ० ।

जीवाणंद-जीवानन्द-पुं० । स्वनामख्याते सुविधिवैद्यस्य सुते, " जम्बूद्वीपे विदेहेषु, पुरे क्षितिप्रतिष्ठिते । वैद्यस्य सुविधेः सूनु-र्जीवानन्दाभिधोऽभवत् ॥ १ ॥ " आ० क० ।

जीवाणुसासण-जीवानुशासन-न० । जीवस्याऽऽत्मनो जातिनिर्देशाद्वा जीवस्य भव्यप्राणिगणस्यानुशासनं शिक्षा । जीवस्य शिक्षायाम्, तत्प्रतिपादके श्रीदेवसूरिविरचिते स्वनामख्याते प्रकरणग्रन्थे च । जीवा० ।

तस्येयमादिमा गाथा-

णिम्महियरायरोसं, वीरं नमिऊण भुवणतियबंधुं ।
भज्झत्थभावणाए, जीवस्सऽणुसासणं वोच्छं ॥१॥

वीरं नत्वा जीवानुशासनं वक्ष्य इति संटङ्कः। अवयवार्थस्वयम्-निर्मथितरागरोषं निराकृतप्रीतिद्वेषं, वीरं वर्तमानतीर्थाधिपतिं, नत्वा प्रणम्य, किं विशिष्टम्?, भुवनत्रिकबन्धुं जगत्त्रयबान्धवं माध्यस्थ्यभावनया रागद्वेषाभावेन जीवस्याऽऽत्मनो जातिनिर्देशाद् वा जीवस्य भव्यप्राणिगणस्य । एवमग्रेऽपि ज्ञातव्यम । अनुशासनं शिक्षाम् । अत्र च "स्वराणां स्वरे प्रकृतिलोपसंधयः" इति प्राकृतलक्षणेन सकाराकारलोपेऽनुशब्दाकारस्य सस्वरत्वे च रूपमिदम् । एवमन्त्रापि यथासंभवं ज्ञेयमिति वक्ष्येऽनिधास्ये । शब्दव्युत्पत्त्यादिचर्चास्तु सर्वत्र सुकर एवेति न प्रतन्यते । जीवा० १ अधि० ।

अन्ते च—

इय सिरिसिद्धंतमहो-यहीण सिरिनेमिचंदसूरीणं ।
भवपसाओ मज्झ-त्थया य सिरिदेवसूरीहिं ॥ १ ॥
सिरिवीरचंदसूरी-ण सीसमत्तेहिं विरइयं एयं ।
सिद्धंतजुत्तिजुत्तं, जीवस्सऽणुसासणं विमलं ॥ २ ॥
तह सयलागमपरम-त्थकणयकसवट्टसद्दृजणएहिं ।
सयलगुणरयणरोहण-गिरीहिं जिणदत्तसूरीहिं ॥३॥
सोहियमेयं अम्हे-सि सूरिपवराण सम्मयं किं च ।
जं एत्थ अणागमियं, तं गीयत्था वि सोहेंतु ॥ ४ ॥

इतिः प्रकरणसमाप्तौ, श्रीसिद्धान्तमहोदधीनां शोभनाऽऽगमवृहत्समुद्राणां श्रीनेमिचन्द्रसूरीणामेतन्नाम्नां श्रीमदुत्तराध्ययनलघुवृत्तिवीरचरितरत्नचूडाऽऽदिशास्त्रकर्तृणां बृहद्गच्छशिरोमणीनां निष्कलङ्कसिद्धान्तव्याख्यानशिक्षातो मध्यस्थतया रागाऽऽद्यनावत्वतः श्रीदेवसूरिभिः श्रीवीरचन्द्रसूरीणां निजदेशनावशाल्लब्धनिर्मलकीर्तीनां शिष्यमुख्यैर्विनेयगणपदगुणैर्विरचितं दृब्धमेतदिदं सिद्धान्तयुक्तं राद्धान्तयुक्तिसहितं, जीवस्याऽऽत्मनो भव्यस्य वा अनुशासनं बोधकं, विमलं निर्मलम् । तथेति । किं च-सकलाऽऽगमपरमार्थकनककषपट्टलब्धोपमैः निःशेषसिद्धान्ततत्त्वचामीकरतत्परीक्षादक्षोपलप्राप्तोपमानैः सकलगुणरत्नरोहणगिरिभिर्निखिलगुणमणिकवरोहणशैलैर्जि-नदत्तसूरिभिरेतन्नामकैः सप्तगूर्जनवासिभिरिति यावत् ।

शोधितं निर्दोषीकृतमेतद् जीवानुशासनम् । अन्येषां मदेन्द्रसूरिप्रमुखाणां सूरिप्रवराणामाचार्यवर्याणां सम्मतमभिप्रेतं, किं च-अपरं यदत्र प्रकरणे अनागमिकमुत्सूत्रं, तत्तीर्थाः सिद्धान्तविदः, शोधयन्तु निर्मलीकुर्वन्तु । इति गाथाचतुष्टयार्थः ।

प्रकारान्तरेण निजनाम कथयन् प्रकरणसंख्यामाह-

देसवसुसूररीसा-हिंसाईवन्नकहियनामाहिं ।
पयरणमिणमो रइयं, तेवीसा-तिन्नि-सयगाहं ॥

देशवसुसूररीसाहिंसालक्षणा ये शब्दाः, तेषु ये आदिवर्णाः प्रथमाक्षराणि, तैः कथितं प्रतिपादितं, नामाभिधेयं येषां ते तथा, तैः, प्राकृतभाषया 'देवसूरीहिं' इत्यर्थः । प्रकरणं ग्रन्थसंदर्भः, इदं प्रत्यक्षम्, ओ इति निपातः पूरणार्थे । रचितमिति ।

आह-

अणहिल्लवाडनयरे, जयसीहनरेसरम्मि विज्जंते ।
दोहट्टिवसट्ठिठिएहिं, वासट्ठीसूरनवमीए ॥

अणहिल्लपट्टनगरे श्रीगूर्जरराजधान्यां जयसिंहनरेश्वरे श्रीकर्णकर्णिदेवराजसूनौ विद्यमाने सति दोहट्टिनामभावकवसतिस्थितैर्द्वाषष्टे संवत्सरे एकादशशत उपरिष्टादिति शेषः ११६२। सूरेणाऽऽदित्यवारेण नवमी तिथिस्तत्रेण तस्यां रचितमिति पूर्वगाथोक्तक्रियासंबन्धादिति गाथार्थः ।

" एतस्य वृत्तिकरणे, पुण्यं यदुपार्जितं मया तेन ।
सुखितोऽस्तु भव्यलोकः, कुग्राहवियोगतो नित्यम् ॥ १ ॥
प्रासेनैकेनेयं, सरस्वतीतोषतः कृता वृत्तिः ।
अणहिलपाटकनगरे, विजयिनि जयसिंहदेवनृपे ॥ २ ॥
दोहट्टिवसतिवासैः, श्रेष्ठिश्रीआसकस्य दानरुचेः ।
तदुपग्रहादपरं, च श्राविकाया वसुन्धर्याः ॥ ३ ॥
वीराऽऽदिपुत्रमातु-र्नित्यं जिनसाधुपूजनरतायाः ।
श्रीदेवसूरिभिरसौ, भव्यजने ज्ञातविस्तरदयैः ॥ ४ ॥
श्रीमद्भिर्नेमिचन्द्राख्य-सूरिभिः शोधिताऽऽदरैः ।
वृत्तिरेषाऽतिगम्भीर-सिद्धसिद्धान्तपारगैः" ॥ ५ ॥

साम्प्रतमस्य प्रकरणस्याऽऽशीर्वादमाह-

जाव जिणसासणमिणं, एयं जीवाणुसासणं ताव ।
नंदउ लोए सिद्धं-तजुत्तिसारं कुमयहरणं ॥

प्रतीतार्था ।

येनाभिप्रायेणेदं प्रकरणं कर्त्रा कृतं तमाविष्कुर्वन्नाह-

पंचिंदियाइनिमाणे-ण विरइयं नेय किं तु इय बोहो ।
धम्मरयपुव्वसूरी-ण चेट्ठिए जंति जइ जीवा ॥ १ ॥

इदमपि तथैव ।

अधुना यावन्तोऽत्र मुख्यतः प्रकरणेऽर्थाधिकाराः यन्नामदृष्टास्तान् संग्रहगाथापञ्चकेन स्मृत्यर्थमाह-

विंबपइट्ठा १ पास-
त्थनमण २ पडिकमण ३ वंदणं ४ नंदी ५ ।
दाणनिसेहो ६ महमा-
ल ७ पमिम ८ अविही ९ अणुट्ठाणं ॥ १ ॥
सिद्धबलि १० पदयं पासा-
ड ११ चेइविहि १२ सूरिसंघनिंदं च १३-१४ ।
पासत्थसेच १५ नाण-
ट्ठ निंद १६ गुरुगरुछुवागं च १७-१८ ॥ २ ॥
वंजणाइपूय १९ उस्स-
ग्ग पढण २० बलहीण २१ अविहिगमणं च २२ ।
मलनिंद २३ महिवक्खा-
ण २४ सहनमणं च २५ ओलग्गं २६ ॥ ३ ॥
संजइकहणं २७ जिणकुसु-
मपूय २८ सुच्चगहं च २९ तवनिंदा ३० ।
मिच्छइचेइ ३१ मिच्च ३२ अप-
माणवेस ३३ असंजया ३४ पाणे ३५ ॥ ४ ॥
चारित्तसत्त ३६ आयर-
ण ३७ गुणथुई ३८ एएँ होंति अडतीसा ।
अहिगारा ल इम-मी,
जीवस्सऽणुसासणे विमले ॥ ५ ॥

एतदर्थश्च पूर्वोक्ताधिकारवशतो ज्ञेयः । जीवा० ३६ अधि० ।

जीवाभिगम-जीवाभिगमे-पुं० । जीवानां ज्ञेयानामवबध्यादिनैर्वाभिगमो जीवाभिगमः । गुणप्रत्ययावबध्यादिप्रत्यक्षतः सम्यगभिगमे, स्था० ३ ठा० २ उ० ।

से किं तं जीवाभिगमे ?। जीवाभिगमे दुविहे पण्णत्ते । तं जहा-संसारसमावण्णगजीवाभिगमे य, असंसारसमावण्णगजीवाभिगमे य ॥

संसरणं संसारो नारकतिर्यङ्नरामरभवग्रहणलक्षणस्तं सम्यक् एकीभावेनाऽऽपन्नाः प्राप्ताः संसारसमापन्नाः संसारवर्तिनः,ते च ते जीवाश्च, तेषामभिगमः संसारसमापन्नजीवाभिगमः । तथा-न संसारोऽसंसारः संसारप्रतिपक्षभूतो मोक्ष इत्यर्थः । तं समापन्ना असंसारसमापन्नाः, ते च ते जीवाश्च, तेषामभिगमोऽसंसारसमापन्नजीवाभिगमः । चशब्दाद्बुभयेषामपि जीवानां जीवत्वं प्रति तुल्यकक्षतासूचकौ । तेन ये विध्यातप्रदीपकल्पं निर्वाणमभ्युपगतवन्तः, ये च नवानामात्मगुणानामत्यन्तोच्छेदेन, ते निरस्ता द्रष्टव्याः, तथाभूतमोक्षाभ्युपगमे तदर्थं प्रेक्षावतां प्रवृत्त्यनुपपत्तेः । न खलु सचेतनः स्वबुद्धया कण्ठे कुठारं व्यापारयति, दुःखितोऽपि हि जीवन् कदाचिन्नूनमाप्नुयात्, सुतेन तु निर्मूलमपहस्तिताः संपद इति । इह केवलान् अजीवान् जीवांश्चानुच्चार्य अभिगमशब्दसंबन्धितः प्रश्नोऽभिगमव्यतिरेकेण प्रतिपत्तेरसंभवः, ततस्तेषामभिगम्यते धर्मस्यापनार्थः, तेन सदेवेदमित्यादिसद्द्वैताऽऽद्युपनिषद उक्तो वेदितव्यः । सद्द्वैताऽऽद्यभ्युपगमेऽभिगमः गम्यतेऽनेनेति धर्मानुयोगतः प्रतिपत्तेरेवासंभवात् । जी०१ प्रति० । "तिविहे दिसाहि जीवाणं जीवाभिगमे पण्णत्ते । तं जहा-उड्ढाए, अहोदिसाए, तिरियाए । एवं पंचिंदियतिरिक्खजोणियाणं,एवं मणुस्साण वि" ॥ स्था० ३ ठा० । " तिहिं दिसाहिं जीवाणं जीवाभिगमे पण्णत्ते । पाईणाए० जाव उदीणाए, एवं पंचिंदियतिरिक्खजोणियाण वि,मणुस्साण वि" ॥ स्था० ६ ठा० । जीवानामुपलक्षणत्वादजीवानां चाभिगमो ज्ञानं यत्र स जीवाभिगमः । स्थानाङ्गस्योपाङ्गभूतेऽङ्गबाह्ये उत्कालिकश्रुतविशेषे च । पा० । नं० ।

जीवि [णु]–जीविन्–पुं० प्राणधारके,"जे एते पव जीविणो।" य एते यतय एवं जीवन्ति परगृहाणयतस्तोऽन्तप्रान्तभोजिनो दत्ताऽऽदाना मुञ्चितशिरसः सर्वभोगवञ्चिता दुःखितं जीवन्तीति । सूत्र० १ श्रु० ३ अ० १ उ० ।

जीविउकाम–जीवितुकाम–त्रि० । दीर्घकालमायुष्कानिलाषिणि, " अप्पियवहा पियजीविणो जीविउकामा । " यत एव प्रियजीविनोऽत एव दीर्घकालं जीवितुकामाः–दीर्घकालमायुष्कानिलाषिणः (आचा०) " जीविउकामे लालप्पमाणे " । जीवितुकाम आयुष्कानुभवनमभिलषमाणः । आचा० १ श्रु० २ अ० ३ उ० ।

जीविओसविय–जीवितोत्सविक–त्रि० । जीवितस्योत्सव इव जीवितोत्सवः, स एव जीवितोत्सविकः । रा० । ज्ञा० । जीवितविषये वा उत्सवो महः, स इव यः स जीवितोत्सविकः । भ० । "जीविओसविए" । प्र० ७ श० ३३ उ० । ज्ञा० । रा० ।

जीविओसासिय–जीवितोच्छ्वासिक–त्रि० । जीवितमुच्छ्वासयति वर्द्धयतीति जीवितोच्छ्वासः, स एव जीवितोच्छ्वासिकः । जीवितवर्द्धके, भ० ६ श० ३३ उ० । ज्ञा० ।

जीविय–जीवित–न० । प्राणधारणे, रा० । प्रश्न० । विशे० । ज्ञा० । आव० । आनु० । नि० । " जीवियं णाभिकंखेज्जा । " जीवितं प्राणधारणलक्षणं नाभिकाङ्क्षेत । आचा० १ श्रु० ८ अ० ८ उ० । " ते वीरा बंधणोमुक्का, नावकंखंति जीवियं । " जीवितमसंयमजीवितं प्राणधारणं वा । सूत्र० १ श्रु० ६ अ० । " जीवियं दुविहं-संजमजीवियं, असंजमजीवियं च " । नि० चू० १ उ० ।

कुसियमिव कुसग्गे पणुन्नं सन्निवइयं वातेरियं एवं बालस्स जीवियं ।

कुशाग्रोदकबिन्दुमिव बालस्य जीवितमिति संबन्धः । तदिदंभूतमित्याह-" पणुन्नं " इत्यादि । प्रणुन्नमनवरताऽपराऽपरोदकपरमाणूपचयात् प्रणुन्नं प्रेरितं, वातेनेरितं संनिपतितं-भाविनि भूतवदुपचाराग्निपतदेव निपतितं, दार्ष्टान्तिकं दर्शयत्यवमिति-यथा-कुशाग्रमित्येवमिति । यथा-कुशाग्रे बिन्दुः क्षणसंभावितस्थितिकः, एवं बालस्यापि जीवितम्, अवगततत्त्वो हि स्वयमेवावगच्छति । आचा० १ श्रु० ५ अ० १ उ० ।

जीवितं दशधा। तथा चाऽऽह–

नामं ठवणा दविए, ओहे भव तब्भवे य भोगे य ।
संजम जस कित्ती जी–वियं च तं भन्नए दसहा ॥

तद् जीवितं दशधा भण्यते । तद्यथा-नामजीवितं,स्थापनाजीवितं,द्रव्यजीवितम्, ओघजीवितं,भवजीवितं,तद्भवजीवितं,भोगजीवितं, संयमजीवितं, यशोजीवितं, कीर्त्तिजीवितं च । एष गाथासमासार्थः । व्यासार्थं तु भाष्यकारः स्वयमेव वक्ष्यति । तत्र नामस्थापने श्रुतत्वादनादृत्य शेषजीवद्रव्याख्यानार्थमाह-

दव्वे सचित्ताई, आउयजीवदव्वयाभवे ओहे ।
नेरइयाइण्ण भवे, तब्भव तत्थेव उववत्ती ॥

द्रव्ये द्रव्यविषयं जीवितं,द्रव्यजीवितमित्यर्थः । सचित्ताऽऽदि सचित्तमचित्तं,मिश्रं च । इह कारणे कार्योपचाराद् येन द्रव्येण सचित्ताचित्तमिश्रभेदेन पुद्गलद्रव्यरूपेण यस्य यथा जीवितमायत्तं तस्य तथा तत्र द्रव्यजीवितमुच्यते । उक्तं द्रव्यजीवितम् । (आउयजीवदव्वयाभवे ओहे) ओघजीवितं सामान्यजीवितमायुःसद्द्रव्यता आयुःप्रदेशकर्म, तस्य द्रव्यैः सह भावता आयुःसद्द्रव्यता, आयुःकर्मद्रव्यसहचारिता, जीव स्येत्यर्थः । इदं च सामान्यजीवितं सकलसंसारिणामविशेषेण सर्वदा भावि, तत इदमङ्गीकृत्य यदि परं सिद्धा एव मृताः,न पुनरन्ये केचन । उक्तमोघजीवितम् । नैरयिकाऽऽदीनां नैरयिकतिर्यङ्नरामराणां भवे स्वस्वभवे स्थितिर्भवजीवितम् । उक्तं भवजीवितम् । (तब्भव तत्थेव उववत्ती) तस्मिन् भवे भूयो भूयो जीवितं तद्भवजीवितम् । किं तदित्याह–तत्रैवोत्पत्तिः तत्र तस्मिन्नधिकृते तिर्यग्भवे, मनुष्यभवे वा स्वकायस्थित्यनुसारेण भूयो भूय उत्पत्तिः । इदं चौदारिकशरीरिणामेवावसातव्यम्, अन्यत्र निरन्तरं भूयोभूयस्तत्रैवोत्पत्त्यभावात् । उक्तं तद्भवजीवितम् ।

भोगम्मि चक्किमाई, संजमजीयं तु संजयजणस्स ।
जसकित्ती य जयवतो, संजम नरजीव आहिगारो ॥

भोगे भोगजीवितं चक्रवर्त्यादीनाम्, आदिशब्दाद् बलदेववासुदेवाऽऽदिपरिग्रहः । उक्तं भोगजीवितम् । संयमजीवितं संयतजनस्य साधुलोकस्य । उक्तं संयमजीवितम् । यशःकीर्त्ती भगवतो वर्द्धमानस्वामिनः । ततो यशोजीवितं कीर्त्तिजीवितं च भगवतः प्रतिपत्तव्यम् । यशःकीर्त्योश्चायं विशेषः–" दानपुण्यफला कीर्त्तिः, पराक्रमकृतं यशः । " अन्ये त्विदमेकमेवाभिदधति, केवलं संयमप्रतिपक्षभावतो दशममसंयमजीवितमविरतगतं प्रतिगृह्णन्ति । आ० म० १ अ० २ खण्ड । विशे० । आ०चू० । जीवन्त्यनेनाऽऽयुष्कर्मणेति जीवितम् । प्राणधारणाऽऽत्मके आयुषि,आचा० १ श्रु० १ अ० १ उ० । "जीवियं दुप्पडिवूहणं"जीवितमायुष्कं तत् क्षीणं सत् दुष्प्रतिवृंहणीयं,दुरभावार्थो,नैव वृद्धिं नीयते इति यावत् । आचा० १ श्रु० २ अ० ५ उ० । अथवा जीवितमायुष्कमसंयमजीवितं वेति । आचा० १ श्रु० २ अ० ३ उ० । " णो जीवियं णो मरणाहिकंखी । " जीवितमसंयमजीवितं, दीर्घायुष्कं वा । सूत्र० १ श्रु० १३ अ० । " ण य संखयमाहु जीवियं, तह वि य बालजणो पगब्भइ । " न च नैव जीवितमायुष्कं कालपर्यायेण त्रुटितं सत् पुनः (संखयमिति) संस्कर्त्तुं तन्तुवत्संधातुं शक्यते, इत्येवमाहुस्तत्त्वविदः, तथाऽप्येवमपि व्यवस्थिते, बालोऽज्ञो जनः प्रगल्भते पापं कुर्वन् धृष्टो भवति, असदनुष्ठानरतोऽपि न लज्जत इति । सूत्र० १ श्रु० ३ अ० २ उ० । न च नैव त्रुटितं जीवितमायुः संस्कर्त्तुं संधातुं शक्यते,एवमाहुः सर्वज्ञाः। तथाहि–"दंभकलियं करित्ता, वञ्चंति हु राइओ य दिवसा य । आऊसं चेलंता,गया य पुण नाणियंति ॥१॥" तथाऽप्येवमपि व्यवस्थिते जीवानामायुषि बालजनोऽन्यो लोको निर्विवेकतया असदनुष्ठाने प्रवृत्तिं कुर्वन् प्रगल्भते धृष्टतां याति, असदनुष्ठानेनापि न लज्जत इत्यर्थः । सूत्र० १ श्रु० २ अ० ३ उ० ।

कुसग्गे जह ओसबिंदुए, थोवं चिट्ठइ लंबमाणए ।
एवं मणुयाण जीवियं, समयं गोयम! मा पमायए ॥२॥

हे गौतम! समयमात्रमपि मा प्रमादीः । तद्धेतुमाह–यथा कुशस्याग्रे अवश्यायबिन्दुर्लम्बमानः सन् स्तोकं स्तोककालं तिष्ठति वाताऽऽदिना प्रेर्यमाणः सन् पतति, तथा मनुष्याणां जीवितम् आयुरस्थिरं ज्ञेयम् । एवमायुषोऽनित्यत्वं ज्ञात्वा धर्मे प्रमादो न विधेय इत्यर्थः ॥ २ ॥

इइ इत्तरियम्मि आउए, जीवियए बहुपच्चवायए ।
विहुणाहि रयं पुरा कडं,समयं गोयम! मा पमायए ॥३॥

इत्युक्तदृष्टान्तेन, इत्वरे स्वल्पकालपरिमाणे, मनुष्यस्याऽऽयुषि हो गौतम! पुरा कृतं रजः प्राचीनकृतं पातकं दुष्कर्म, विशेषेण धुनीहि जीवात् पृथक् कुरु । हे गौतम ! पुनर्जीवितिके अर्थात् सोपक्रमे आयुषि, बहवः प्रत्यवाया उपघातहेतवोऽध्यवसायाऽऽदयो वर्तन्ते यस्मिन् तद् बहुप्रत्यवायकं, तस्मिन् बहुप्रत्यवायके, समयमपि मा प्रमादं कुर्याः। अत्राऽऽयुःशब्देन निरुपक्रमं आयुर्नेष्यते, जीवितशब्देन सोपक्रमं भण्यते । एति प्राप्नोति उपक्रमहेतुनिरपवर्त्यतया यथास्थित्या एव अनुभवन्निति आयुः । तस्मिन्नायुषि निरुपक्रमे आयुषि स्वल्पपरिमाणेऽपि दुष्कृतं दूरीकुरु । यद्यपि पूर्वकोटिप्रमाणमायुर्नवति, तथापि देवापेक्षया स्वल्पमेव ज्ञेयम्, अतृप्तत्वात् । यदुक्तम्-" धनेषु जीवितव्येषु, रतिकामेषु भारत ! । अतृप्ताः प्राणिनः सर्वे, यातां यास्यन्ति यान्ति च ॥ १ ॥ " अत्र सोपक्रमनिरुपक्रमायुर्ज्ञानं केवलिन एव भवेत् । उत्त० १० अ० ।

ता किमत्थं आउसो ! नो एवं चिंतेयव्वं भवइ । अंतरायबहुले खलु अयं जीविए, इमे बहवे वाइयपित्तियसिंभियसंनिवाइया विविहा रोगाऽऽयंका फुसंति जीवियं ॥

तावदादौ किमर्थं नैवं चिन्तयितव्यम्, हे आयुष्मन् ! त्वं शृणु, यतो भवति अन्तरायबहुलं विघ्नप्रचुरमिदं, खलु निश्चये, जीवितमायुर्जीवानाम् । तथा-इमे प्रत्यक्षा बहवो वातिका वातरोगोद्भवाः, पैत्तिकाः पित्तरोगजाः (सिंभिय त्ति) श्लेष्मभवाः, सान्निपातिकाः सन्निपातजन्याः, विविधा अनेकप्रकारा रोगा व्याधयः, ते च ते आतङ्काश्च कृच्छ्रजीवितकारिण इति रोगाऽऽतङ्का जीवितं स्पृशन्तीति । तं० । शरीरे, उत्त०१० अ०।

भगवान् श्रीमहावीरदेवो गौतमस्वामिनमुद्दिश्यान्यानपि भव्यजीवानुपदिशति-

दुमपत्तए पंडुए जहा, निवडइ राइगणाण अच्चए ।
एवं मणुयाण जीवियं, समयं गोयम ! मा पमायए ॥१॥

हे गौतम ! एवमनेन दृष्टान्तेन, मनुजानां मनुष्याणां, जीवितं जानीहि, त्वं समयं समयमात्रमपि, मा प्रमादीः प्रमादं मा कुर्याः। अत्र समयमात्रग्रहणमत्यन्तप्रमादनिवारणार्थं, अनेन केन दृष्टान्तेन ?, तद् दृष्टान्तमाह-यथा रात्रिगणानामत्यये गमने, रात्रीणां गणा रात्रिगणाः कालपरिणामाः रात्रिदिवससमूहाः, तेषामत्ययेऽतिक्रमे पाण्डुरं द्रुमपत्रकं पक्वं वृन्तात् शिथिलप्रायं पर्णं निपतति, तथैव दिनानामत्यये आयुर्लक्षणे वृन्ते शिथिले जाते सति जीवितं शरीरं पतति । जीवो जातो यस्मिन् तज्जीवितं, शरीरमित्यर्थः । जीवितस्य कालस्य विनाशाभावाद् जीवितशब्देन शरीरमुच्यते । उत्त० १० अ० । जीवितमिव जीवितम् । द्वादशाङ्गे श्रुते, मर्यादायां च । विशे० । आ० म० ।

जीवियंतकरण-जीवितान्तकरण-पुं० । प्राणवधे, प्राणवधस्य चैतद् गौणं नाम । प्रश्न०१ आश्र० द्वार ।

जीवियट्ठि[ण्]-जीवितार्थिन्-पुं० । जीवितुकामे, " जो वा विसं खायइ जीवियट्ठी । " दश० ९ अ० १ उ० । आचा० । सूत्र० । " आयं न कुज्जा इह जीवियट्ठी । " इहासंयमजीवितार्थी प्रभूतकालं सुखेन जीविष्यामीत्येवंदध्यवसायी आयं कर्माऽऽश्रवलक्षणं न कुर्यात् । सूत्र० १ श्रु० १० अ० ।

जीवियणाम[ण्]-जीवितनामन्-न० । जीविकाहेतौ नामनि, अनु० । " से किं तं जीवियणामे ? । जीवियणामे अवकरए उक्कुरुडिए उंभिमए कज्जवए सुप्पए । सेत्तं जीवियणामे । " "से किं तं जीवियणामे" इत्यादि । इह यस्या जातमात्रमपत्यं म्रियते सा लोकस्थितिवैचित्र्याज्जातमात्रमपि किञ्चिदपत्यं जीवननिमित्तमवकराऽऽदिष्वक्षिपति तस्य चावकरक इत्युत्कुरुटक इत्यादि यन्नाम क्रियते तज्जीविकाहेतोः स्थापनानामाऽऽख्यायते । (सुप्पए त्ति) सूर्पे कृत्वा त्यज्यते, तस्य सूर्पक एव नाम स्थाप्यते, शेषं प्रतीतम् । अनु० ।

जीवियभावणा-जीवितभावना-स्त्री० । जीवसमाधानकारिण्यां भावनायाम्, सूत्र० ।

यथा भूतेषु मैत्री संपूर्णभावमनुभवति तथा दर्शयितुमाह-

जूएहिं न विरुज्झेज्जा, एस धम्मे वुसीमओ ।
साहू जगं परिन्नाय, अस्सिं जीवितभावणा ॥ ४ ॥

" जूएहिं " इत्यादि । जूतैः स्थावरजङ्गमैः सह विरोधं न कुर्यात्, तदुपघातकारिणमारम्भं तद्विरोधकारणं दूरतः परिवर्जयेदित्यर्थः । स एषोऽनन्तरोक्तो भूताविरोधकारी, धर्मः स्वभावः, पुण्याऽऽख्यो वा, (वुसीमओ त्ति) तीर्थकृतोऽयं सत्संयमवतो वेति । तथा सत्संयमवान् साधुस्तीर्थकृज्जगच्चराचरभूतग्रामाऽऽख्यं केवलाऽऽलोकेन सर्वैकप्रतीताऽऽगमपरिज्ञानेन वा परिज्ञाय सम्यगवबुध्यास्मिन् जगति मौनीन्द्रे वा धर्मे भावनाः पञ्चविंशतिरूपा द्वादशप्रकारा वा या अभिमतास्ता जीवितभावना जीवसमाधानकारिणीः सत्संयमाङ्गतया मोक्षकारिणीर्भावयेदिति । सूत्र० १ श्रु० १५ अ० ।

जीवियमरणनिरवकंख-जीवितमरणनिरवकाङ्क्ष-त्रि० । जीवितमरणयोर्विषये निरवकाङ्क्षो जीवितमरणनिरवकाङ्क्षः । जीवितमरणयोर्विषये वाञ्छारहिते, कल्प० ६ क्षण ।

जीवियरसज्ज-जीविकरसभ-पुं० । साधारणशरीरबादरवनस्पतिकायिकभेदे, प्रज्ञा० १ पद ।

जीवियरेहा-जीवितरेखा-स्त्री० । मणिबन्धादुत्थाय तर्जन्यङ्गुष्ठकान्तर्गतायां रेखायाम्, कल्प० ।

" मणिबन्धात्पितुर्लेखा, करभाद्भिभवायुषोः ।
लेखे द्वे यान्ति तिस्रोऽपि, तर्जन्यङ्गुष्ठकान्तरम् ॥ ११ ॥
येषां रेखा इमास्तिस्रः, संपूर्णा दोषवर्जिताः ।
तेषां गोत्रधनायूंषि, संपूर्णान्यन्यथा न तु ॥ १२ ॥
लक्ष्यन्ते च यावत्यो-ऽङ्गुल्यो जीवितरेखया ।
पञ्चविंशतयो ज्ञेया-स्तावत्यः शरदां बुधैः " ॥ १३ ॥ कल्प० १ क्षण ।

जीविया-जीविका-स्त्री० । ' जीव ' आकन्-इत्वम् । जीवनोपाये, आजीवने च । वाच० । वृत्तौ, स्था० ४ ठा० ३ उ० । आजन्मनिर्वाहे, ज्ञा० १ श्रु० १ अ० । कल्प० । " सा जीविया पढविया चिरेण । " सूत्र० २ श्रु० ६ अ० ।

जीवियारिह-जीविकार्ह-त्रि० । जीविकोचिते, भ० ११ श० ११ उ० । आजन्मनिर्वाहयोग्ये, " विउलं जीवियारिहं पीइदाणं दलइ । " ज्ञा० १ श्रु० १ अ० । कल्प० । औ० ।

जीवियासंसप्पओग-जीविताऽऽशंसाप्रयोग-पुं० । जीवितं प्रत्याशंसा-चिरं मे जीवितं भवत्विति जीविताऽऽशंसाप्रयोगः आशंसा-

प्रयोगभेदे, स्था० १० ठा० । जीवितं प्राणधारणं, तदाशंसायास्तन्निमित्तस्य प्रयोगः, यदि बहुकालमहं जीवेयमिति । संलेखनायास्तृतीयेऽतिचारे, उपा० १ अ० । तथा कश्चित्कृतानशनः प्रभूतपौरजनव्रातविहितमहामहः सततावलोकनात्प्रभुरयमन्दारवृन्दवन्दनसंमर्ददर्शनात् अस्तोकविवेकिलोकसत्कृतश्लोकसमाकर्णनात् पुरतः संभूय भूयो भूयः सधार्मिकजनविधीयमानोपबृंहणश्रवणात् अनवसमस्तसङ्गजनमध्यसमारब्धपुस्तकवाचनकथमाख्याऽऽदिसत्कारनिरीक्षणाच्चैवं मन्यते-प्रतिपन्नानशनस्यापि मम जीवितमेव सुचिरं श्रेयः, यत एवंविधा महद्देशेन विभूतिर्वर्तत इति जीविताऽऽशंसाप्रयोगः । ध० २ अधि० । आ० चू० । आ० ।

जीवियासंसा–जीविताऽऽशंसा–स्त्री० । प्राणधारणाभिलाषायाम्, उपा० १ अ० । जीवितं प्राणधारणं, तत्र पूजाविशेषदर्शनात् प्रभूतपरिवाराऽऽदिविलोकनात् सर्वलोकश्लाघाश्रवणाच्च एवं मन्यते-जीवितमेव श्रेयः, प्रत्याख्यातचतुर्विधाऽऽहारस्यापि यत एवंविधा महद्देशेनेयं विभूतिर्वर्तत इत्याशंसेति तृतीयः । जीविताऽऽशंसासंलेखनायास्तृतीयेऽतिचारे, ध० ३ अधि० ।

जीवियासा–जीविताऽऽशा–स्त्री० । जीवितप्राप्तिसंभावनायाम्, भ० १२ श० ५ उ० । जीवितस्य प्राणधारणस्याऽऽशा वाञ्छा जीविताऽऽशा । प्राणधारणवाञ्छायाम्, रा० । नि० । ज्ञा० । लोभकषायभेदे, स० ५२ ।

जीवियासामरणभयविप्पमुक्क–जीविताऽऽशामरणभयविप्रमुक्त–त्रि० । जीवितस्य प्राणधारणस्याऽऽशा वाञ्छा मरणभयं च द्वयं, ताभ्यां विप्रमुक्तो जीविताऽऽशामरणभयविप्रमुक्तः । जीविताऽऽशामरणभयोपेक्षके, नि० १ वर्ग १ अ० । ज्ञा० । रा० ।

जीवुप्पत्ति–जीवोत्पत्ति–स्त्री० । त्रसस्थावरान्यतरप्राणिप्रादुर्भावे, सेन० ।

अथ बृहद्पं० कनकविजयगणिकृतप्रश्नः, तदुत्तराणि च-अचित्ताशनाऽऽदिचतुष्कमध्ये रात्रौ त्रसजीवानां स्थावरजीवानां चोत्पत्तिर्भवति, न वा ?, इति प्रश्ने, उत्तरम्-रात्रावचित्ताशनाऽऽदिचतुष्कमध्ये "तज्जोणिआण जीवाणं,तहा संपाइमाण य। निसि भत्ते बहो दिट्ठो,सव्वदंसीहिं सव्वहा"॥१॥ इतिप्रकटिनकृत्यसूत्रवचनात्, तथा-"अक्खइ तिहुअणणाहो, दोसो संसत्ति होइ रयणं। भत्ते तगंधरसा, रसेसु रसिअ, जिआ हुंति" ॥१॥ इति बृहत्कगाथानुसारेण च स्थावरजीवोत्पत्तिः संजाय्यते, न तत्र त्रसजीवानाम्, रात्रियोगादिति । ४८ प्र० । सेन २ उल्ला० ।

जीवोक्करण–जीवोत्करण–न० । मन्त्रशास्त्रभेदे, स्था० ६ ठा० ।

जीह–लज्ज–धा० । व्रीडायाम्, भ्वादि०-आत्म०-अक०-सेट् । "लस्जेर्जीहः"॥४।४।१०३॥ इति प्राकृतसूत्रेण लस्जेर्जीहाऽऽदेशः । जीहइ, लज्जइ । प्रा०४ पाद । लज्जते, अलज्जिष्ट । निष्ठायामनिट्, तस्य नः । लग्नः । वाच० ।

जीहगार–जिह्वाकार–पुं० । ' जिभ्भगार ' शब्दार्थे, प्रज्ञा० १ पद ।

जीहा–जिह्वा–स्त्री० । ' जिब्भा ' शब्दार्थे, प्रा० २ पाद । रसनेन्द्रिये, वृ० १ उ० ।

जीहाछुट्ठ–जिह्वाक्षुष्ट–पुं० । 'जिब्भाछुट्ठ' शब्दार्थे,आव० ४ अ० ।

जीहादोस–जिह्वादोष–पुं० । 'जिब्भादोस' शब्दार्थे,आव०४अ० ।

जीहादोसणिवुत्त–जिह्वादोषनिवृत्त–त्रि० । रसगृद्धिरहिते, वृ० १ उ० ।

जीहामयदुक्ख–जिह्वामयदुःख–न० । ' जिब्भामयदुक्ख ' शब्दार्थे, स्था० ५ ठा० २ उ० ।

जीहामयसोक्ख–जिह्वामयसौख्य–न० । 'जिब्भामयसोक्ख' शब्दार्थे, स्था० ५ ठा० २ उ० ।

जीहिंदिय–जिह्वेन्द्रिय–न० । ' जिब्भिंदिय ' शब्दार्थे, प्रज्ञा० १५ आभ० द्वार ।

जीहिंदियनिग्गह–जिह्वेन्द्रियनिग्रह–पुं० । ' जिब्भिंदियनिग्गह ' शब्दार्थे, उत्त० ३१ अ० ।

जीहिंदियसंवर–जिह्वेन्द्रियसंवर–पुं० । ' जिब्भिंदियसंवर ' शब्दार्थे, प्रश्न० ५ संव० द्वार ।

जु–जु–पुं० । वेगे, नभसि, स्वके, गतौ, स्त्री० । एका० ।

जु–त्रि० । यौति पृथग् भवतीति युः,विचि डाम्बसत्वाद्गुणाभावः पृथग्भूते, जै० गा० । अपृथग्भूते च । 'यु' मिश्रणेऽमिश्रणे चेति वचनात् । जै० गा० ।

जुअल्ल–देशी-तरुणे, दे० ना० ३ वर्ग ।

जुआलिअ–देशी-द्विगुणिते, दे० ना० ३ वर्ग ।

जुइ–द्युति–[ती]–स्त्री० द्युत इन् वा ङीप् । "द्यय्यौ जः" ८ । २ । २४ । इति प्राकृतसूत्रेण जः । प्रा० २ पाद । स्फुरणे, क्रा० १ मु० ६ अ० । शरीराऽऽभरणाऽऽदिदीप्तौ, स० ३० सम० । औ० । सूत्र० । द्युतिवक्तव्यताप्रतिबद्धे निरयाऽऽवलिकोपाङ्गस्य वृष्णिदशानामकपञ्चमवर्गस्य षष्ठेऽध्ययने, नि० १ वर्ग० । (तद्वक्तव्यता निशठवत्, सा च ' निसढ ' शब्दे वक्ष्यते) आन्तरे तेजसि, ज्ञा० १ श्रु० ८ अ० । तपोदीप्तौ, तेजोलेश्यायाम्, उत्त० १ अ० । माहात्म्ये च, द्युतिः प्रेमा माहात्म्यमित्यर्थः । स्था० ६ ठा० । कान्तौ, शोभायाम्, प्रकाशे च । वाच० । ' जु ' क्तिन् । इष्टार्थसम्प्रयोगे च, ' जु ' अभिगमने इति वचनात् । जी० ३ प्रति० । प्रज्ञा० ।

युति–स्त्री० पुं० । क्तिन् । मिश्रीकरणे,प्रव० ६ द्वार । युक्तौ,इष्टपरिवाराऽऽदिसंयोगे,स्था० (जुइ त्ति)द्युतिर्दीप्तिः शरीराऽऽभरणाऽऽदिसंभवा, युतिर्वा युक्तिरिष्टपरिवाराऽऽदिसंयोगलक्षणेति । स्था० ३ ठा० ३ उ० । वस्तुघटनायां च, (सव्वज्जुईए) सर्वद्युत्याऽऽभरणाऽऽदिसंबन्धिन्या सर्वयुक्त्या वा उचितेषु वस्तुघटनाद्वक्षणयेति । ज्ञा० १ श्रु० १ अ० । स्था० । द्युत्या यथाशक्ति विस्फारितेन शरीराऽऽभरणतेजसेति । आ० म० १ अ० १ खण्ड ।

जुइमं–द्युतिमत्–त्रि० । द्युतिर्दीप्तिरतिशायिनी विद्यते यस्य सः । उत्त० ५ अ० । दीप्तिमति, सूत्र० १ श्रु० ६ अ० । तेजस्विनि, उत्त० १८ अ० । आचा० ।

जुई–द्युति–स्त्री० । द्युत इन् ङीप् । ' जुइ ' शब्दार्थे,प्रा० २ पाद ।

जुउंछ–जुगुप्स–स्त्री० । ' गुप् ' निन्दायां स्वार्थे सन् । " जुगु-

क्सेक्षेण-दुगुप्छ-दुगुंछाः " ॥ ८ । ४ । ४ ॥ इति प्राकृतसूत्रेण जुगुप्सेरेते अय आदेशाः । जुगुप्सइ, दुगुप्छइ, दुगुंछइ । पक्षे-जुगुप्छइ । लोपे-दुगुप्छइ, दुगुंछइ । पक्षे-जुगुप्सइ, जुगुंछइ । प्रा० ४ पाद । वाच० ।

जुगुंछिय-जुगुप्सित-त्रि० । निन्दिते, नि० चू० ४ उ० ।

जुंगिय-जुङ्गित-पुं० । जातिकर्मशरीराऽऽदिभिर्दूषिते, ग० । जातिकर्मशरीराऽऽदिभिर्दूषितो जुङ्गितः । तत्र मातङ्गकौलिकचक्रटसूचिकाछिम्पकाऽऽदयोऽस्पृश्या जातिजुङ्गिताः स्पृश्या अपि, स्त्रीमयूरकुक्कुटाऽऽदिपोषकाः वंशवरणाऽऽरोहणा नापितलोकरिकवागुरिकत्वाऽऽदिनिन्दितकर्मकारिणः कर्मजुङ्गिताः, करचरणकर्णाऽऽदिवर्जिताः पङ्गुकुब्जवामनकत्वाद्यपभूतयः शरीरजुङ्गिताः । ग० १ अधि० । ध० । व्य० । नि० चू० । (जुङ्गितस्य दीक्षाऽनर्हत्वं 'आयरिय' शब्दे द्वितीयभागे ३२१ पृष्ठे उक्तम्)

विंशतिपदे दिक्कजेज्ञा-

जाहे य माहणेहिं, परिजुत्ता कम्मसिप्पपविरता ।
अट्ठारण विदेसे, दिक्खा से होंतिमट्ठे य ॥ ४१६ ॥

जाहे जुंगितो महायणमाहणेहिं परिजुत्तो ताहे दिक्खिज्जति, कम्मसिप्पविरता माहणादिभुत्ता तथा दिक्खिज्जंति, सरीरजुंगितो अ दिक्खितो उत्तिमट्ठे वा । नि० चू० ११ उ० । पं० भा० । पं० चू० ।

जुङ्गित-पुं० । जातिकर्मशरीराऽऽदिनिर्दूषिते, ग० १ अधि० । लज्जीकृते, व्य० ३ उ० । पिं० ।

जुंगियंग-जुङ्गिताङ्ग-त्रि० । व्यङ्गिते, स्था० ५ ठा० ३ उ० । कुत्सितहस्तपादाऽऽद्यवयवे, पिं० ।

जुंज-युज्-धा० । बन्धने, युतौ च । सुरा०-जन० । पक्षे-स्वादि०-पर०-सक०-सेट् । " युजो जुंजजुज्जजुप्पाः " ॥ ८ । ४ । १०६ । इति प्राकृतसूत्रेण युजेरेते अय आदेशाः । जुंजइ, जुज्जइ, जुप्पइ । योजयति, योजयते । प्रा०४ पाद । योगे, समाधौ, दिवा०-अक०-अनिट् । युज्यते, अयुक्त । वाच० । ' जुंजइ य जहत्थामं । ' ' युजिर् ' योगे, योजयति च । नि० चू० १ उ० ।

जुंजण-योजन-न० । 'युज्' भावादौ ल्युट् । संयोगे, णिच् ल्युट् । संयोगकरणे, वाच० । व्यापारणे, " इंदियाण य जुंजणे " श्रोत्रनेत्ररसनानासात्वगादीनामिन्द्रियाणां शब्दरूपरसगन्धस्पर्शाऽऽदिविषयेषु व्यापारणे, उत्त० २४ अ० । " सव्विंदियजोगजुंजणया । " स्था० ७ ठा० ।

जुंजणा-योजना-स्त्री० । व्यापारणे, आ० म० १ अ० २ खण्ड ।

जुंजणाकरण-योजनाकरण-न० । मनःप्रभृतीनां व्यापारणकरणे, नोश्रुतकरणभेदे च । नोश्रुतकरणभेदमधिकृत्य-"तह य जुंजणाकरणं । " योजनाकरणं च मनःप्रभृतीनां व्यापारणम् । (आ० म०)

साम्प्रतं योजनाकरणं व्याचिख्यासुराह-

जुंजणकरणं तिविहं, मणवयकाए मणंसि सच्चाई ।
सट्ठाणे तन्नेदो, चउ चउहा सत्तहा चेव ॥

योजनाकरणं त्रिविधम् । तद्यथा-मनोवाक्काये मनोवाक्कायविषयं-मनोविषयं, वाग्विषयं, कायविषयं चेत्यर्थः । तत्र मनसि सत्याऽऽदिकं यद् योजनाकरणम् । तद्यथा-सत्यमनोयोजनाकरणम्, असत्यमनोयोजनाकरणम्, सत्यामृषामनोयोजनाकरणम्, असत्यामृषामनोयोजनाकरणमिति । स्वस्थाने प्रत्येकं मनोवाक्कायलक्षणे, तेषां योजनाकरणानां, नेदो विभागो वक्तव्यः । तद्यथा-चतुर्धा, चतुर्धा, सप्तधा चैवेति । अयमत्र भावार्थः-चतुर्भेदं सत्यमनोयोजनाकरणाऽऽदि दर्शितम्, एवं वाग्योजनाकरणमपि सत्यवाग्योजनाकरणमिति । आ० म० १ अ० २ खण्ड । आ० चू० ।

जुंजुरुको-देशी-अपरिग्रहे, दे० ना० ३ वर्ग ।

जुगुंछ-जुगुप्स-' जुगुंछ ' शब्दार्थे, प्रा०४ पाद ।

जुग-जुग-धा० । त्यागे, स्वादि०-पर०-सक०-सेट्, इदित् । युङ्क्ते, अयुङ्क्त । वाच० ।

युग-धा० । वर्जने, स्वादि०-पर०-सक०-सेट्, इदित् । वाच० । युगि-अच्, पृषो०-नलोपः । युग्मे, द्वित्वसंख्याऽन्विते, वृक्षनामौषधे, हस्तचतुष्कपरिमाणे च । न० । वाच० । चतुर्हस्तप्रमाणे यूपे, प्रव० १०४ द्वार । प्रश्न० । स्था० । भ० । तं० । जी० । शकटाङ्गविशेषे, जं० ३ वक्ष० । " युङ्क्ते भंजए जुगं । " युगं जूसरम् । उत्त० २ अ० । " उसु चोइया तत्तजुगेसु जुत्ता । " सूत्र० १ श्रु० ५ अ० २ उ० । " सुजायजुगजुत्तउज्जुगपसत्थसुविरइयनिम्मियं । " उपा० २ अ० । ज्ञा० । शकटाङ्गविशेषाऽऽत्मके करचरणाक्षे पुरुषलक्षणाविशेषे, जं० ३ वक्ष० । चतुर्विंशत्यङ्गुलमानेनैतुर्भिर्हस्तैर्निष्पन्नेऽवमानप्रमाणसाधनेऽवमानविशेषे, अनु० । यदवमीयते ज्ञाताऽऽदि तदवमानम् । केनावमीयते ?, इत्याह-"दंडेण वा दंडेण वा धणुक्कंडेण वा जुगेण वा नालिआए वा अक्खेण वा मूसलेण वा । " चतुर्भिर्हस्तैर्निष्पन्ना अवमानविशेषा दण्डधनुर्युगनालिकाक्षमुशलरूपाः षट् संज्ञाः लभन्ते । अतएवाऽऽह-"दंडं धणुं जुगनालियं च अक्खं मुसलं च चउहत्थं ।" अनु० । जं० । ज्यो० । स० । लोकप्रसिद्धे कृतयुगाऽऽदिके सत्यत्रेताद्वापरकलिरूपे कालविशेषे, स्था० । पञ्चवर्षाऽऽत्मके सुषमदुष्षमाऽऽदिके कालमानविशेषे च । स्था० ३ ठा० ४ उ० । "पंचसंवच्छरिए जुगे" जं० २ वक्ष० । कर्म० । विशे० । स्था० । अनु० । आ० म० । तं० । भ० । कल्प० । ज्ञा० । (तानि पञ्च संवत्सराणि ' पञ्च ' शब्दे वक्ष्यामः)

तथा-

चंदो चंदो अभिव-द्धिओ य चंदमभिवद्धिओ चेव ।
पंचसाहियं जुगमिणं, दिट्ठं तेलोक्कदंसीहिं ॥

चान्द्रश्चान्द्रस्तदनन्तरमभिवर्द्धितभूतो नूयश्चान्द्रः । अत्र मकारोऽलाक्षणिकः । ततोऽभिवर्द्धितः । एतैः पञ्चभिर्वर्षैः सहितम् । किमुक्तं भवति ?, एतत् पञ्चवर्षात्मकं युगम् । इत्थम्भूतं युगमिदं दृष्टं त्रैलोक्यदर्शिभिः सर्वज्ञैस्तीर्थकृद्भिः, ततोऽवश्यमिदं तथेति श्रद्धेयम् ।

एतदेव व्याख्यानयति-

पढमविइयाउ चंदा, तइअं अभिवद्धियं वियाणाहि ।
चंदे चेव चउत्थं, पंचममभिवद्धियं जाण ॥

युगे पञ्चसंवत्सराऽऽत्मकेऽनन्तरमुद्दिष्टे प्रथमद्वितीयौ संवत्सरौ चान्द्रौ ज्ञातव्यौ, तृतीयसंवत्सरमभिवर्धितं जानीहि । चतुर्थ-

संवत्सरं भूयश्चान्द्रमेव जानीहि, पञ्चममभिवर्द्धितम् । अत्र ये चान्द्राः संवत्सराः,ते द्वादशमासिकाः,यौ तु द्वावभिवर्द्धिताऽऽख्यौ संवत्सरौ, तौ त्रयोदशमासिकौ चान्द्रमासप्रमाणेन । अत्र द्वितीयस्य चान्द्रसंवत्सरस्य य आदिसमयस्तदनन्तरं पश्चाद्भावी समयः प्रथमचान्द्रसंवत्सरस्य पर्यवसानं च । तदानीं च चन्द्रमसो योग उत्तराषाढानिः,उत्तराषाढानां च तदानीं शेषीभूताः षड्विंशतिमुहूर्त्ताः,षड्विंशतिश्च द्वाषष्टिभागा मुहूर्तस्य,एकस्य च द्वाषष्टिभागस्य सप्तषष्टिधा छिन्नस्य सत्काश्चतुःपञ्चाशद् भागाः। उक्तं च-"जे णं देवचंदसंवच्छरस्स आई से णं पढमस्स चंदसंवच्छरस्स पज्जवसाणे अणंतरं पच्छाकडे समए तं समयं च णं चंदे केणं नक्खत्तेणं जोएइ ?। ता उत्तराहिं आसाढाहिं,उत्तराणं आसाढाणं छव्वीसमुहुत्ता, छव्वीसं च बावट्ठिभागा मुहुत्तस्स,बावट्ठिभागं च सत्तट्ठिहा छेत्ता चउपण्णासं चुण्णिया सेसा" इति । तदानीं च सूर्यस्य योगः पुनर्वसुनक्षत्रेण, पुनर्वसुनक्षत्रस्य च तदा शेषीभूताः षोडश मुहूर्त्ताः, अष्टौ द्वाषष्टिभागा मुहूर्तस्य,एकस्य च द्वाषष्टिभागस्य सप्तषष्टिधा छिन्नस्य सत्का विंशतिर्भागाः । उक्तं च—"तं समयं च णं सूरे केणं नक्खत्तेणं जोएइ ?। ता पुणव्वसुणा, पुणव्वसुस्स सोलस मुहुत्ता, अट्ठ य बावट्ठिभागा मुहुत्तस्स, बावट्ठिभागं च सत्तट्ठिहा छित्ता वीसं चुण्णिया भागा सेसा" इति । तृतीयस्याभिवर्द्धिताऽऽख्यस्य संवत्सरस्य य आदिसमयस्तदनन्तरं पश्चाद्भावी समयो द्वितीयस्य चान्द्रसंवत्सरस्य पर्यवसानं,तदानीं च चन्द्रमसो योगः पूर्वाषाढानिः, तासां च पूर्वाषाढानां शेषीभूताः सप्त मुहूर्त्ताश्चिपञ्चाशच्च द्वाषष्टिभागा मुहूर्तस्य, एकस्य च द्वाषष्टिभागस्य सप्तषष्टिधा छिन्नस्य सत्का एकोनचत्वारिंशद्भागाः । उक्तं च-"जे णं तच्चस्स अभिवड्ढियसंवच्छरस्स आई से णं दोच्चस्स चंदसंवच्छरस्स पज्जवसाणे अणंतरं पच्छाकडे समए तं समयं च णं चंदे केणं नक्खत्तेणं जोएइ ?। ता पुव्वाहिं आसाढाहिं, पुव्वाणं आसाढाणं सत्त मुहुत्ता, तिपण्णासं च बावट्ठिभागा मुहुत्तस्स, बावट्ठिं च सत्तट्ठिहा छित्ता उणयालीसं चुण्णिया भागा सेसा" इति । तदानीं च सूर्यस्य योगः पुनर्वसुनक्षत्रेण, तस्य च पुनर्वसुनक्षत्रस्य तदा शेषीभूता द्विचत्वारिंशन्मुहूर्त्ताः,पञ्चत्रिंशच्च द्वाषष्टिभागा मुहूर्तस्य, एकस्य च द्वाषष्टिभागस्य सप्तषष्टिधा छिन्नस्य सत्काः सप्त भागाः । उक्तं च-"तं समयं च णं सूरे केणं नक्खत्तेणं जोएइ ?। ता पुणव्वसुणा, पुणव्वसुस्स बायालीसं मुहुत्ता,पणतीसं च बावट्ठिभागा मुहुत्तस्स, बावट्ठिभागं च सत्तट्ठिहा छित्ता सत्त चुण्णिया भागा सेसा" इति । चतुर्थस्य संवत्सरस्य य आदिसमयस्तदनन्तरं पश्चाद्भावी समयस्तदनन्तरमभिवर्द्धिताऽऽख्यस्य संवत्सरस्य पर्यवसानं,तदानीं चन्द्रमसो योग उत्तराषाढानिः, तासामुत्तराषाढानां शेषीभूतानां तदानीं त्रयोदश मुहूर्त्ताश्चयोदश च द्वाषष्टिभागा मुहूर्तस्य, एकस्य च द्वाषष्टिभागस्य सप्तषष्टिधा छिन्नस्य सत्काः सप्तार्धा. शतिर्भागाः । उक्तं च-" जे णं चउत्थस्स संवच्छरस्स आई से णं तच्चस्स अभिवड्ढियसंवच्छरस्स पज्जवसाणे अणंतरं पच्छे कडे समए तं समयं च णं चंदे केणं नक्खत्तेणं जोएइ ?। ता उत्तराहिं आसाढाहिं, उत्तराणं आसाढाणं तेरस मुहुत्ता, तेरस य बावट्ठिभागा मुहुत्तस्स, बावट्ठिभागं च सत्तट्ठिहा छेत्ता सत्तावीसं चुण्णिया भागा सेसा" इति । तदानीं च सूर्यस्य योगः पुनर्वसुनक्षत्रेण, पुनर्वसुनक्षत्रस्य च तदा द्वौ मुहूर्त्तौ षट्पञ्चाशद् द्वाषष्टिभागा मुहूर्तस्य, एकस्य च द्वाषष्टिभागस्य सप्तषष्टिधा छिन्नस्य सत्काः षष्टिभागाः शेषाः । उक्तं च-" तं समयं च णं सूरे केणं नक्खत्तेणं जोएइ?। ता पुणव्वसुणा,पुणव्वसुस्स दो मुहुत्तभागा उप्पण्णं बावट्ठिभागा मुहुत्तस्स,बावट्ठिं च सत्तट्ठिहा छित्ता सट्ठी चुण्णिया भागा सेसा" इति । पञ्चमस्य त्वभिवर्द्धितस्य संवत्सरस्य य आदिसमयस्तदनन्तरं पश्चाद्भावी समयश्चतुर्थस्य चान्द्रस्य संवत्सरस्य पर्यवसानं, तदा च चन्द्रमसो योग उत्तराषाढानक्षत्रेण,तस्य चोत्तराषाढानक्षत्रस्य तदानीं शेषीभूता एकोनचत्वारिंशन्मुहूर्त्ताश्चत्वारिंशद् द्वाषष्टिभागा मुहूर्तस्य, द्वाषष्टिभागस्य सप्तषष्टिधा छिन्नस्य सप्तचत्वारिंशद् भागाः । उक्तं च-" जे णं पंचमस्स अभिवड्ढियसंवच्छरस्स आई से णं चउत्थस्स चंदसंवच्छरस्स पज्जवसाणे अणंतरं पच्छाकडे समए तं समयं च णं चंदे केणं नक्खत्तेणं जोएइ ?। ता उत्तराहिं आसाढाहिं, उत्तराणं आसाढाणं गुणतालीसं मुहुत्ता, चत्तालीसं च बावट्ठिभागा मुहुत्तस्स, बावट्ठिभागं च सत्तट्ठिहा छित्ता छीयालीसं (?) चुण्णिया भागा सेसा " इति । तदानीं च योगः सूर्यस्य पुनर्वसुनक्षत्रेण, तस्य च पुनर्वसुनक्षत्रस्य तदा शेषीभूता एकोनत्रिंशन्मुहूर्त्ताः,एकविंशतिर्द्वाषष्टिभागा मुहूर्तस्य, एकस्य च द्वाषष्टिभागस्य सप्तषष्टिधा छिन्नस्य सत्काः सप्तचत्वारिंशद् भागाः। उक्तं च-"तं समयं च णं सूरे केणं नक्खत्तेणं जोएइ?। ता पुणव्वसुणा, पुणव्वसुस्स अट्ठणातीसं मुहुत्ता एगवीसं च बावट्ठिभागा, बावट्ठिभागं च सत्तट्ठिहा छित्ता छीयालीसं(?)चुण्णिया भागा सेसा" इति। यश्च द्वितीयस्य युगस्याऽऽदिभूतस्य चान्द्रसंवत्सरस्य प्रथमसमयस्तदनन्तरं पश्चाद्भावी समयः पञ्चमस्याभिवर्द्धितसंवत्सरस्य पर्यवसानं तदानीं चन्द्रमसो योग उत्तराषाढानक्षत्रेण, सोऽपि चरमसमयवर्ती सूर्यस्याऽपि च पुष्यनक्षत्रेण, पुष्यस्याऽपि च तदानीं शेषीभूता एकविंशतिमुहूर्त्ताश्चयश्चत्वारिंशत् द्वाषष्टिभागा मुहूर्त्तस्य, एकस्य च द्वाषष्टिभागस्य सप्तषष्टिधा छिन्नस्य त्रयस्त्रिंशद् भागाः । उक्तं च-"ता जे णं पढमस्स चंदसंवच्छरस्स आई से णं पढमस्स अभिवड्ढियसंवच्छरस्स पज्जवसाणे अणंतरं पच्छाकडे समए तं समयं च णं चंदे केणं नक्खत्तेणं जोएइ?। ता उत्तराहिं आसाढाहिं,उत्तराणं आसाढाणं चरमसमए। तं समयं च णं सूरे केणं नक्खत्तेणं जोएइ?। ता पुस्सेणं, एक्कवीसं मुहुत्ता तेयालीसं च, बावट्ठिभागं च सत्तट्ठिहा छित्ता तेत्तीसं चुण्णिया भागा सेसा" इति । सर्वत्र च सूर्यनक्षत्रयोगचिन्तायां मुहूर्त्ताः सूर्यमुहूर्ता वेदितव्याः, न तु व्यावहारिकाः ।

संप्रति युगेऽपि तौल्यरूपतया मेयरूपतया च परिमाणमतिदेशेन प्रतिपादयन्नाह-

चंदमभिवड्ढियाणं, वासाणं पुव्ववण्णियाणं च ।
तिविहं पि तं पमाणं, जुगम्मि सव्वं निरवसेसं ॥

चन्द्राभिधानानां त्रयाणां संवत्सराणां, द्वयोश्चाभिवर्द्धितसंवत्सरयोरित्यर्थः । कथंभूतानामित्याह-पूर्ववर्णितानां पूर्वं प्राक् अहोरात्राऽऽदिप्रमाणेन तौल्यरूपतया वाऽभिहितानां,समुदायरूपे युगे त्रिविधमप्यहोरात्राऽऽदिरूपतया तत्प्रमाणं सर्वं निरवशेषमवगन्तव्यम। तत्राहोरात्रप्रमाणं युगेऽष्टादशशतानि त्रिंशदधिकानि । १८३० । तथाहि—युगे चान्द्रसंवत्सराश्चत्वारः, द्वौ चाभिवर्द्धितसंवत्सरौ, चान्द्रसंवत्सरे चैकाशीनहोरात्राणां त्रीणि शतानि चतुष्पञ्चाशदधिकानि । द्वादश च द्वाषष्टिभाग

अहोरात्रस्य ३५४ । ३३ । तदेतत् त्रिभिर्गुण्यते, जातान्यहोरात्राणां दश शतानि द्वाषष्ट्यधिकानि षट्त्रिंशच्च द्वाषष्टिभागा अहोरात्रस्य १०६२ । ३६ । अभिवर्द्धितसंवत्सरे चैकस्मिन्नहोरात्राणां त्रीणि शतानि त्र्यशीत्यधिकानि, चतुश्चत्वारिंशच्च द्वाषष्टिभागा अहोरात्रस्य ३८३ । ४४ । एतद् द्वाभ्यां गुण्यते, जातानि सप्त शतानि षट्षष्ट्यधिकानि, अहोरात्रस्य प्रक्षिप्तानां षट्त्रिंशद् द्वाषष्टिभागा अशीतौ प्रक्षिप्यन्ते, जातं चतुर्विंशत्यधिकं शतम् १२४ । तस्य द्वाषष्ट्या भागे हृते लब्धौ द्वावहोरात्रौ, तौ पूर्वेष्वहोरात्रेषु मध्ये प्रक्षिप्येते, ततः सर्वसंकलनया जाता अहोरात्रा अष्टादशशतानि त्रिंशदधिकानि १८३० । एतावन्तो युगेऽहोरात्राः। यदा तु मुहूर्तपरिमाणं चिन्त्यते,तदा एकैकस्मिन्नहोरात्रे त्रिंशन्मुहूर्ता इत्यष्टादश शतानि त्रिंशदधिकानि अहोरात्राणां त्रिंशता गुण्यन्ते, जातानि चतुष्पञ्चाशत्सहस्राणि नवशतानि ५४९०० । एतावन्तो युगे मुहूर्ताः। तथा चोक्तं जम्बूद्वीपप्रज्ञप्तौ-'पंचसंवच्छरिए णं भंते ! जुगे केवइआ मुहुत्ता पन्नत्ता ?। गोयमा ! पंचसंवच्छरिए णं जुगे दस अयणा, तीसं उऊ, सट्ठी मासा, एगे बावीसुत्तरे पक्खसए, अट्ठारस तीसा अहोरत्तसया, चउपण्णं मुहुत्तसहस्सा णव सया पन्नत्ता" इति । (जं० ७ वक्ष०) अत्र षष्टिर्मासा विंशत्युत्तरं च पक्षशतं सूर्यसंवत्सरापेक्षया ऊनाधिकम्, ततो न कश्चिद् वक्ष्यमाणदोषः मास्यादिसंख्यानेन । एकस्मिन्मुहूर्तोपरि चत्वार आढकाः, ततो यन्मुहूर्तपरिमाणं चतुष्पञ्चाशत्सहस्राणि नवशतानि तत् चतुर्भिर्गुण्यते ततो यथोक्तमाढकपरिमाणं भवति । तथा-एकैकस्मिन्नहोरात्रे मेयरूपतया परिमाणं त्रयो भाराः, अहोरात्राणां च युगे अष्टादश शतानि त्रिंशदधिकानि, ततस्तानि त्रिभिर्गुण्यन्ते, जातानि चतुष्पञ्चाशत्सहस्राणि नवत्यधिकानि ५४९०। एतावन्तो भागा युगे । ज्यो० २ पाहु० ।

युगेऽयनाऽऽदिप्रमाणं पृच्छन्नाह—

पंचसंवच्छरिए णं भंते ! जुगे केवइआ अयणा, केवइआ उऊ, एवं मासा, पक्खा, अहोरत्ता, केवइआ मुहुत्ता पण्णत्ता ?। गोयमा ! पंचसंवच्छरिए णं जुगे दस अयणा, तीसं उऊ, सट्ठी मासा, एगे बावीसुत्तरे पक्खसए, अट्ठारस तीसा अहोरत्तसया, चउपण्णं मुहुत्तसहस्सा णव सया पन्नत्ता ॥

" पंचसंवच्छरिए णं भंते ! जुगे " इत्यादि । पञ्च संवत्सराः सौरा मानमस्येति पञ्चसांवत्सरिकं युगम्, अनेन नोत्तरसूत्रेण " दस अयणा " इत्यादिकेन विरोधः, चान्द्रसंवत्सरोपयोगिनां चान्द्रायणानां तु चतुस्त्रिंशदधिकशतस्य संभवात् । जं० ७ वक्ष० ।

संप्रति युगे सर्वसंख्यया तिथिपरिमाणमहोरात्रपरिमाणं च प्रतिपादयति-

अट्ठारस सट्ठिसया, तिण्हीण नियमा जुगम्मि नायव्वा ।
तत्तेव अहोरत्ता, तीसा अट्ठारससया उ ॥

इह तिथयः शशिसंभवाः, अहोरात्रास्तु सूर्यसंभवाः, तत्र युगे तिथीनां नियमाद्भवत्यष्टादश शतानि षष्ट्यधिकानि ज्ञातव्यानि। कथमिति चेत् ?। उच्यते-इह सूर्यैकषष्टिभागकलमेकेनाहोरात्रेण परिमिति मापयति, तस्य चाहोरात्रस्य षष्टिभागो वर्द्धते, युगे चाहोरात्राणामष्टादशशतानि त्रिंशदधिकानि । तत एकषष्टिभागा अपि प्रवर्द्धमाना एतावन्तो लभ्यन्ते । तत एतेषां तिथिकरणार्थमेकषष्ट्या भागे हृते लब्धास्त्रिंशत्तिथयः, ता अहोरात्रस्येापर्यधिकत्वेन प्रक्षिप्यन्ते । तत आगतं यथोक्ततिथिपरिमाणमिति । तथा तत्रैवैकस्मिन् युगे अहोरात्रा अष्टादश शतानि त्रिंशानि-त्रिंशदधिकानि भवन्ति । तथाहि-एकस्मिन् युगेऽन्यूनातिरिक्तानि पञ्च सूर्यवर्षाणि भवन्ति, एकैकस्मिंश्च सूर्यवर्षे त्रीणि शतानि षष्ट्यधिकानि अहोरात्राणां, तानि पञ्चभिर्गुण्यन्ते,ततो यथोक्तमहोरात्रपरिमाणं भवति ॥

तत्थ पढिमिज्जमाणे, पंचहिं माणेहिं पुव्वगणिएहिं ।
मासेहिं विभज्जित्ता, जइ मासा होंति ते वोच्छं ॥

तत्रानन्तरोक्तस्वरूपे युगे पञ्चभिर्मानैर्मानसंवत्सरैः,आदित्यसंवत्सराऽऽदिभिरित्यर्थः । पूर्वगणितैः प्राक्प्रतिसंख्यातस्वरूपैः, प्रतिमीयमाने परिगण्यमाने , मासैः सूर्याऽऽदिमासैः, विभज्यमाना मासा यावन्तो भवन्ति तान् वक्ष्ये ।

प्रतिज्ञातमेव निर्वाहयति--

आइच्चेण उ सट्ठी, मासा लउणा उ होंति एगट्ठी ।
चंदेण य बावट्ठी, सत्तट्ठी होंति नक्खत्ती ॥

आदित्येन आदित्यमासेन विभज्यमाना मासा युगे भवन्ति षष्टिः षष्टिसंख्याः । तथाहि-सूर्यमासे साऽर्द्धत्रिंशदहोरात्राः, युगे चाहोरात्राणामष्टादशशतानि त्रिंशदधिकानि, तत एतेषां साऽर्द्धत्रिंशदहोरात्रैर्भागे ह्रियमाणे षष्टिर्मासा लभ्यन्ते । तथा ऋतुना ऋतुसंवत्सरस्य सत्कैर्मासैर्विभज्यमाने युगे एकषष्टिर्मासा भवन्ति । ऋतुमासो हि त्रिंशदहोरात्रप्रमाणः, ततोऽष्टादशशतानां त्रिंशदधिकानां त्रिंशता भागे हृते एकषष्टिरेव लभ्यत इति । तथा चान्द्रेण चान्द्रसंवत्सरसत्केन मासेन च विभज्यमाना मासा युगे सर्वसंख्यया द्वाषष्टिर्भवन्ति । तथाहि-चान्द्रमासपरिमाणमेकोनत्रिंशदहानि द्वात्रिंशच्च द्वाषष्टिभागा दिनस्य, तत एकोनत्रिंशदहानि द्वाषष्टिभागकरणार्थं द्वाषष्ट्या गुण्यन्ते, जातानि सप्तदशशतान्यष्टनवत्यधिकानि १७९८ । ततो द्वात्रिंशदुपरितना द्वाषष्टिभागास्तत्र प्रक्षिप्यन्ते, जातान्यष्टादशशतानि त्रिंशदधिकानि १८३० । येऽपि च युगाहोरात्रा अष्टादशशतानि त्रिंशदधिकानि, तेऽपि द्वाषष्ट्या गुण्यन्ते, जात एको लक्षत्रयोदशसहस्राणि चत्वारि शतानि षष्ट्यधिकानि । ११३४६० । एतेषामष्टादशशतैस्त्रिंशदधिकैश्चान्द्रमाससत्कद्वाषष्टिभागरूपैर्भागो ह्रियते, लब्धाश्चान्द्रमासा द्वाषष्टिः । तथा नक्षत्रेण नक्षत्रमासे परिगण्यमाने सर्वसंख्यया युगे नक्षत्रमासा सप्तषष्टिर्भवन्ति । तथाहि—नक्षत्रमासः सप्तविंशतिरहोरात्रा एकविंशतिः सप्तषष्टिभागाः, सप्तषष्टिभागकरणार्थं सप्तषष्ट्या गुण्यन्ते, जातान्यष्टादशशतानि नवोत्तराणि १८०९ । तत उपरितना एकविंशतिः सप्तषष्टिभागास्तत्र प्रक्षिप्यन्ते, जातान्यष्टादशशतानि त्रिंशदधिकानि १८३० । युगस्यापि च संबन्धिनस्त्रिंशदधिकाष्टादशशतप्रमाणा अहोरात्राः सप्तषष्ट्या गुण्यन्ते, जात एको लक्षः विंशतिसहस्राणि षट्शतानि दशोत्तराणि १२०६१० । एतेषामष्टादशशतैस्त्रिंशदधिकैश्चान्द्रमाससत्कैर्द्वाषष्टिभागरूपैर्भागो ह्रियते,लब्धाः सप्तषष्टिमासाः

मासा सयपण्णासं, सत्त य राइंदियाइं अजिणेहिं ।
एक्कारस य मुहुत्ता, विसट्ठिभागा य तेवीसं ॥

अभिवर्द्धितसंवत्सरसत्के मासे परिगण्यमाने सर्वसंख्यया युगे अभिवर्द्धितमासाः सप्तपञ्चाशद्भवन्ति, सप्त रात्रिंदिवानि, एकादश मुहूर्त्ताः, एकस्य च मुहूर्त्तस्य द्वाषष्टिभागाश्चयोविंशतिः । तथाहि—अभिवर्द्धितो मास एकत्रिंशद्दोरात्रः, एकविंशत्युत्तरं शतं चतुर्विंशत्युत्तरशतभागानामहोरात्रस्य, तत एकत्रिंशदहोरात्राश्चतुर्विंशत्युत्तरशतभागकरणार्थं चतुर्विंशत्युत्तरेण शतेन गुण्यन्ते, जातान्यष्टात्रिंशच्छतानि चतुश्चत्वारिंशदधिकानि ३८४४ । तत उपरितनमेकविंशत्युत्तरं शतं भागानां तत्र प्रक्षिप्यते, जातान्येकोनचत्वारिंशच्छतानि पञ्चषष्टयधिकानि ३९६५ । यानि च युगे अहोरात्राणामष्टादशशतानि त्रिंशदधिकानि १८३०, तानि चतुर्विंशत्युत्तरेण शतेन गुण्यन्ते, जाते द्वे लक्षे षट्त्रिंशत्सहस्राणि नव शतानि त्रिंशत्यधिकानि २२६९२० । तत एतेषामेकोनचत्वारिंशच्छतैः पञ्चषष्टयधिकैरभिवर्द्धितमाससत्कचतुर्विंशत्युत्तरशतभागकरणार्थं भागो ह्रियते, लब्धाः सप्तपञ्चाशन्मासाः, शेषास्तिष्ठन्ति नवशतानि पञ्चदशोत्तराणि ९१५ । तेषामहोरात्राऽऽनयनाय चतुर्विंशत्यधिकेन शतेन भागो ह्रियते, लब्धानि सप्त रात्रिंदिवानि, शेषास्तिष्ठन्ति चतुर्विंशतिर्भागाः सप्तचत्वारिंशत् । तत्र चतुर्भिर्भागैरेकस्य च भागस्य सत्कैश्चतुर्विंशद्भागैरेकः सप्तमो रात्रिंदिवस्य एकादश मुहूर्त्ता लब्धाः, शेषास्तिष्ठन्ति एको भागः, एकस्य च भागस्य सत्काः षोडश त्रिंशद्भागाः । किमुक्तं भवति?—षट्चत्वारिंशत्त्रिंशद्भागा एकस्य च भागस्य सत्काः शेषास्तिष्ठन्ति, ते च किल मुहूर्त्ते चतुर्विंशत्युत्तरशतभागाः । ततः षट्चत्वारिंशतः चतुर्विंशत्युत्तरशतस्य च द्विकेनापवर्त्तनेन क्रियते, लब्धा मुहूर्त्तस्य द्वाषष्टिभागाश्चयोविंशतिः । एवं संख्यकैश्च मासैर्यदा अष्टादशशतानां त्रिंशदधिकानामहोरात्राणां भागो ह्रियते, तदा यथोक्तमासगतदिवसपरिमाणमागच्छति । तद्यथा—युगे किल सूर्यमासापेक्षया षष्टिर्मासाः, ततोऽष्टादशशतानां त्रिंशदधिकानां षष्टया भागो ह्रियते, लब्धास्त्रिंशद्दिवसाः, अर्द्धदिवसश्च । एतावन्तो दिवसाः सूर्यमासे । तथा एकषष्टिः कर्ममासा युगे, ततोऽष्टादशशतानां त्रिंशदधिकानामेकषष्टया भागो ह्रियते, लब्धास्त्रिंशद्दोरात्राः एतावत् कर्ममासे अहोरात्रपरिमाणम् । ते च मासा युगे द्वाषष्टिः, ततस्त्रिंशदधिकानामष्टादशशतानां द्वाषष्टया भागहरणं, लब्धा एकोनत्रिंशद्दोरात्रा द्वात्रिंशच्च द्वाषष्टिभागा अहोरात्रस्य, एतावच्चन्द्रमासपरिमाणम् । तथा नक्षत्रमासा युगे सप्तषष्टिः । ततः सप्तषष्टया अष्टादशशतानां त्रिंशदधिकानां भागो ह्रियते, लब्धाः सप्तविंशतिरहोरात्राश्चैकविंशतिश्च सप्तषष्टिभागाः । इदं नक्षत्रमासपरिमाणम् । तथा-अभिवर्द्धितमासा युगे सप्तपञ्चाशत्, ततोऽष्टादशशतानां त्रिंशदधिकानां सप्तपञ्चाशता भागो ह्रियते, लब्धा द्वात्रिंशदहोरात्राः, शेषास्तिष्ठन्ति षट् सप्त । तत्र पञ्चाशन्मासानामुपरि सप्त अहोरात्रा एकादश मुहूर्त्ताः, एकस्य च मुहूर्त्तस्य त्रयोविंशतिर्द्वाषष्टिभागा वर्त्तन्ते । तत्र सप्तस्यः षट् पातिताः, शेष एक अहोरात्रस्तिष्ठति, स च चतुर्विंशत्युत्तरशतभागः क्रियते, लब्धा एकादश मुहूर्त्ताः, एकस्य च मुहूर्त्तस्य त्रयोविंशत्युत्तरशतं मध्ये प्रक्षिप्यते, जातमेकसप्तत्यधिकं शतम् । तस्य सप्तपञ्चाशता भागे हृते लब्धास्त्रयश्चतुर्विंशत्युत्तरशतभागा इति । एतावत्परिमाणमभिवर्द्धितमासस्य । संप्रति सूर्याऽऽदिमासेषु मुहूर्त्ताऽऽहिपरिमाणं चिन्त्यते-तत्र सूर्यमासे त्रिंशदहोरात्राः, एकं चाहोरात्रस्यार्द्धम्, अहोरात्रे च त्रिंशन्मुहूर्त्ताः, ततस्त्रिंशत् त्रिंशता गुण्यन्ते, जातानि नवशतानि, अहोरात्रार्द्धे च पञ्चदश मुहूर्त्ताः, ततः सर्वसंख्यया सूर्यमासे नवशतानि पञ्चदशोत्तराणि मुहूर्त्तानां भवन्ति ९१५ । एकैकस्मिंश्च मुहूर्त्ते द्वे द्वे घटिके, इति नवशतानि पञ्चदशोत्तराणि द्वाभ्यां गुण्यन्ते, जातान्यष्टादशशतानि त्रिंशदधिकानि १८३० । एतावत्सूर्यमासे घटिकानां परिमाणम् । मेयरूपतया तु चिन्तायामेकैको मुहूर्त्तश्चतुराढकप्रमाण इति मुहूर्त्तानां नवशतानि पञ्चदशोत्तराणि चतुर्भिर्गुण्यन्ते, जातानि षट्त्रिंशच्छतानि षष्टयधिकानि ३६६० । एतावता सर्वसंख्यया सूर्यमासे आढकाः । तौल्यत्वचिन्तायामेकैकस्मिन्नहोरात्रे त्रयो भाराः, ततस्त्रिंशत् त्रिभिर्गुण्यन्ते, जाता नवतिः ९०, अहोरात्रार्द्धे च सार्द्धो भार इति सर्वसंकलनया सूर्यमासे सार्द्धा एकनवतिर्भाराः । तथा कर्ममासे त्रिंशदहोरात्राः, ततो मुहूर्त्ताऽऽनयनार्थं त्रिंशता गुण्यन्ते, जातानि नवशतानि, एतावन्तः कर्ममासे मुहूर्त्ताः, एत एव मुहूर्त्ता घटिकानयनाय द्वाभ्यां गुण्यन्ते, प्रतिमुहूर्त्तं घटिकाद्वयस्य लाभात्, जातान्यष्टादशशतानि १८०० । एतावत्कर्ममासे घटिकानां परिमाणम् । तथा मुहूर्त्ते चत्वार आढका इति । तदेवं मुहूर्त्तपरिमाणं नवशताऽऽत्मकमाढकाऽऽनयनाय चतुर्भिर्गुण्यते, जातानि षट्त्रिंशच्छतानि ३६०० । एतावन्तो मेयत्वचिन्तायामाढकाः। कर्ममासे तौल्यत्वचिन्तायां प्रत्यहोरात्रं त्रयो भारा इति त्रिंशदहोरात्रास्त्रिभिर्गुण्यन्ते, जाता नवतिः ९० । इयत्संख्याकाः कर्ममासे तौल्यत्वकर्मभाराः । तथा-चन्द्रमासे एकोनत्रिंशदहोरात्राः, द्वात्रिंशच्च द्वाषष्टिभागा अहोरात्रस्य, तत एकोनत्रिंशद्द्वाषष्टिभागाः, तेऽपि मुहूर्त्तगतलाभकरणार्थं त्रिंशता गुण्यन्ते, जातानि नवशतानि षष्ट्यधिकानि ९६० । एतेषां द्वाषष्ट्या भागो ह्रियते, लब्धाः पञ्चदश मुहूर्त्ताः, शेषास्तिष्ठन्ति अष्टाशीतिसदृक्षाणि पञ्चशतोत्तराणि, त्रिंशच्च द्वाषष्टिभागा मुहूर्त्तस्य ८८५०० । $\frac{३०}{६२}$ । एतदेव मुहूर्त्तपरिमाणं घटिकाऽऽनयनाय द्वाभ्यां गुण्यते, जातानि सप्तदशशतानि सप्तत्यधिकानि, षष्टिश्च द्वाषष्टिभागा घटिकायाः १७७० । $\frac{६०}{६२}$ । एतच्चन्द्रमासे घटिकापरिमाणम् । तथा प्रागतमेव मुहूर्त्तपरिमाणं सकलमप्याढकाऽऽनयनाय चतुर्भिर्गुण्यते, जातानि पञ्चत्रिंशच्छतानि एकचत्वारिंशदधिकानि, अष्टापञ्चाशच्च द्वाषष्टिभागा आढकस्य ३५४१ । $\frac{५८}{६२}$ । तत एतावन्मेयत्वचिन्तायां चन्द्रमासे आढकपरिमाणम् । तथा तौल्यत्वचिन्तायामहोरात्रपरिमाणं प्राक्तनमेकोनत्रिंशद्रूपं भाराऽऽनयनाय त्रिभिर्गुण्यते, जाताः सप्ताशीतिः ८७ । येऽपि च द्वात्रिंशद् द्वाषष्टिभागाः, तेऽपि त्रिभिर्गुण्यन्ते, जाता षण्णवतिः ९६ । तस्या द्वाषष्ट्या भागो ह्रियते, लब्ध एको भारः, शेषास्तिष्ठन्ति चतुस्त्रिंशत् ३४। ततः सर्वसंख्यया चन्द्रमसा तौल्यत्वचिन्तायामष्टाशीतिर्भाराः, चतुस्त्रिंशच्च द्वाषष्टिभागा भारस्य ८८ । $\frac{३४}{६२}$ । नक्षत्रमासः सप्तविंशतिरहोरात्रा एकविंशतिः सप्तषष्टिभागा उपरितनाः, ततः सप्तविंशतिस्त्रिंशता गुण्यन्ते, जातान्यष्टौ शतानि दशाधिकानि सप्तषष्ट्युत्तराणि द्वाषष्टिभागा अहोरात्रस्य ८१० । $\frac{६७}{६२}$ । येऽपि चैकविंशतिः सप्तषष्टिभागा

उपरितनाः, तेऽपि त्रिंशता गुण्यन्ते, जातानि षट्शतानि त्रिंशदधिकानि । एतेषां सप्तषष्ट्या भागो ह्रियते, लब्धा नव मुहूर्त्ताः, शेषास्तिष्ठन्ति सप्तविंशतिः । मुहूर्त्ताश्च मुहूर्त्तराशौ प्रक्षिप्यन्ते, जातानि संख्यया मुहूर्त्तानामष्टौ शतान्येकोनविंशत्यधिकानि सप्तविंशतिश्च ८१९।२७। एकस्य च तस्य सप्तषष्टिभागाः। एतावन्नक्षत्रमासे मुहूर्त्तपरिमाणम्। ततो घटिकापरिमाणाऽऽनयनार्थमेतदेव द्वाभ्यां गुण्यते, जातानि षोडश शतान्यष्टात्रिंशदधिकानि, चतुष्पञ्चाशच्च सप्तषष्टिभागा घटिकायाः १६३८ । ५४ । एतावद् घटिकापरिमाणम्। नक्षत्रमासे तौल्यत्वचिन्तायामेकस्मिन्नहोरात्रे त्रयो भागा इति सप्तविंशतिरहोरात्रास्त्रिभिर्गुण्यन्ते, जातान्येकाशीतिः, एतस्य रिमाणं नक्षत्रमासे एकाशीतिभारास्त्रिषष्टिश्च सप्तषष्टिभागा भारस्य, तथा एकविंशतिरपि त्रिभिर्गुण्यते, जाता त्रिषष्टिः, ततो जातं तौल्यत्वपरिमाणं नक्षत्रमासे एकाशीतिर्भारास्त्रिषष्टिश्च सप्तषष्टिभागा भारस्य । तथा-एकैकस्मिन्मुहूर्त्ते चत्वार आढका इति मुहूर्त्तपरिमाणमनन्तरोक्तं सर्वमपि चतुर्भिर्गुण्यते, तत आगतानि नक्षत्रमासे मेयपरिमाणचिन्तायामाढकानां द्वात्रिंशच्छतानि सप्तसप्तत्यधिकान्येकचत्वारिंशच्च सप्तषष्टिभागा आढकस्य ३२७७ । ४१ । अभिवर्द्धितमासे एकत्रिंशदहोरात्राः, एकविंशत्युत्तरं च शतं चतुर्विंशत्युत्तरशतभागानामहोरात्रस्य, तत्र मुहूर्त्ताऽऽनयनार्थमेकत्रिंशता गुण्यन्ते, जातानि नवशतानि त्रिंशदधिकानि ९३०। तदपि चैकविंशत्युत्तरं शतं भागानां, तदपि त्रिंशता गुण्यते, जातानि षट्त्रिंशच्छतानि त्रिंशदधिकानि ३६३० । एतेषां च चतुर्विंशत्युत्तरेण शतेन भागो ह्रियते, लब्धा एकोनत्रिंशन्मुहूर्त्ताः, शेषमुद्धरति चतुर्विंशत्युत्तरशतभागानां चतुस्त्रिंशच्च चतुर्विंशत्युत्तरशतभागा मुहूर्त्ता मुहूर्त्तराशौ प्रक्षिप्यन्ते, ततो जातमभिवर्द्धिते मासे सर्वसंकलनतया मुहूर्त्तपरिमाणं नवशतान्येकोनषष्ट्यधिकानि चतुस्त्रिंशच्च चतुर्विंशत्युत्तरशतभागाः ९५९ । ५३४ । मुहूर्त्ते च घटिकाद्वयमित्येतदेव मुहूर्त्तपरिमाणं घटिकाऽऽनयनाय द्वाभ्यां गुण्यते, जातान्येकोनविंशतिशतान्यष्टादशाधिकानि घटिकानामष्टषष्टिश्चतुर्विंशत्युत्तरं शतं भागानाम् १९१८ । ६८४ । एकैकस्यां च घटिकायां द्वौ द्वावाढकाविति घटिकापरिमाणमिदम् । मेयरूपतया चिन्तायामाढकाऽऽनयनाय द्वाभ्यां गुण्यते, जातान्याढकानामष्टात्रिंशच्छतानि सप्तत्रिंशदधिकानि, द्वादश च चतुर्विंशत्युत्तरशतभागानामाढकस्य ३८३७ । ६४ । तथाहि-एकैकस्मिन्नहोरात्रे त्रारभ्रयमित्येकत्रिंशदहोरात्रास्त्रिभिर्गुण्यन्ते, जातास्त्रिनवतिर्भाराः । यद्यपि चैकविंशत्युत्तरं शतमपि त्रिभिर्गुण्यते, जातानि त्रीणि शतानि त्रिषष्ट्यधिकानि ३६३ । तेषां च चतुर्विंशत्युत्तरेण शतेन भागो ह्रियते, लब्धौ द्वौ भारौ, तौ च पूर्वराशौ प्रक्षिप्येते, शेषं पञ्चदशोत्तरं शतम्, तत आगतं तौल्यत्वचिन्तायामभिवर्द्धितमासे परिमाणं पञ्चनवतिर्भाराः शतमेकं पञ्चदशोत्तरं चतुर्विंशत्युत्तरशतभागानाम् । ९५ । ११५ । यदा तु मासस्य त्रिंशत्तमो भागो दिवस इति दिवसलक्षणमनु सूर्यमासाऽऽदिदिवसपरिमाणं चिन्त्यते, तदा यदेव तस्य मासस्य दिवसापेक्षया परिमाणं, तदेव तस्य दिवसस्य मुहूर्त्तापेक्षया, परिमाणमवसेयम् । यथा सूर्यदिवसस्य त्रिंशन्मुहूर्त्तपरिमाणं, कर्मदिवसस्य त्रिंशन्मुहूर्त्ता एकत्रिंशतिश्च सप्तषष्टिभागा मुहूर्त्तस्य, अभिवर्द्धितदिवसस्यैकत्रिंशन्मुहूर्त्ता एकत्रिंशत्युत्तरं च शतं चतुर्विंशत्युत्तरशतभागानां मुहूर्त्तस्य । तथा-सूर्यदिवसस्य एकषष्टिघटिका परिमाणम्, कर्मदिवसस्य षष्टिघटिकाः, चन्द्रदिवसस्य एकोनषष्टिघटिका द्वौ च द्वात्रिंशद्भागौ घटिकायाः, नक्षत्रदिवसस्य चतुष्पञ्चाशद्घटिका द्विचत्वारिंशत्सप्तषष्टिभागा घटिकायाः, अभिवर्द्धितदिवसस्य षष्टिघटिका अष्टादशोत्तरं शतं चतुर्विंशत्युत्तरशतभागानां घटिकायाः। ११८। १२४। एकैकस्यां च घटिकायां द्वौ द्वावाढकाविति दिवसस्य मेयत्वचिन्तायां सूर्यदिवसस्य द्वात्रिंशतं चत्वारश्च द्वाषष्टिभागा आढकस्य २२४ । नक्षत्रदिवसस्य दशोत्तरं शतमाढकानां, पञ्चनवतिराढकाः, सप्तविंशतिः सप्तषष्टिभागा आढकस्य ११० । ९५ । ६८ । अभिवर्द्धितदिवसस्य सप्तविंशत्युत्तरमाढकशतं द्वादशोत्तरं शतं च चतुर्विंशत्युत्तरशतभागानामाढकस्य १२७ । ११३ । एकैकस्यां नवनाडिकायाः पञ्चशतमिति तौल्यत्वचिन्तायामिदं दिवसस्य परिमाणम्। सूर्यदिवसस्यैकषष्टिपलशतानि परिमाणम् ६१००। कर्मदिवसस्य चतुःपञ्चाशत्पलशतानि ५४००। चन्द्रदिवसस्यैकोनषष्टिपलशतानि, द्वौ च द्वाषष्टिभागौ पलशतस्य ५९००। ६२ । नक्षत्रदिवसस्य चतुष्पञ्चाशत्पलशतानि द्विचत्वारिंशच्च सप्तषष्टिभागाः पलशतस्य ५४००। ४२ । अभिवर्द्धितदिवसस्य त्रिषष्टिः पलशतान्यष्टादशोत्तरं च चतुर्विंशत्युत्तरं पलशतस्य ६३००। ११८ । तदेवमुक्तं सप्तपञ्चं पञ्चानामपि संवत्सराणां स्वरूपं, युगप्रमाणं च । ज्यो० २ पाहु० । सू० प्र० ।

पंचसंवच्छरियस्स णं जुगस्स नक्खत्तमासेणं मिज्जमाणस्स सत्तसट्ठिं नक्खत्तमासा पण्णत्ता ।

"पंच संवच्छर" इत्यादि । नक्षत्रमासो येन कालेन चन्द्रो नक्षत्रमण्डलं भुङ्क्ते, स च सप्तविंशतिरहोरात्राणि, एकविंशतिश्चाहोरात्रस्य सप्तषष्टिभागाः २७ । २१ । युगप्रमाणं चाष्टादशशतानि त्रिंशदधिकानीति प्राग्दर्शितम् १८३० । तदेवं नक्षत्रमासस्योक्तप्रमाणराशिना दिनसप्तषष्टिभागतया व्यवस्थापितेन त्रिंशदुत्तराष्टादशशतप्रमाणेन युगदिनप्रमाणराशेः सप्तषष्टिभागतया व्यवस्थापितः, एकं लक्षं, द्वात्रिंशतिः सहस्राणि, षट् शतानि, दश चेत्येवंरूपो १२२६१० । विभज्यमानः सप्तषष्टिनक्षत्रमासप्रमाणो भवतीति । स० ६७ सम० ।

पंचसंवच्छरियस्स णं जुगस्स रिउमासेणं मिज्जमाणस्स इगसट्ठिं उउमासा पण्णत्ता ।

"पंच" इत्यादि । पञ्चभिः संवत्सरैर्निर्वृत्तमिति पञ्चसांवत्सरिकं, तस्य, णमित्यलङ्कारे, युगस्य कालमानविशेषस्य ऋतुमासेन चन्द्राऽऽदिमासेन मीयमानस्य एकषष्टेः-ऋतुमासाः प्रज्ञप्ताः । इह चायं भावार्थः-युगं हि पञ्च संवत्सरा निष्पादयन्ति । तद्यथा—चन्द्रश्चन्द्रोऽभिवर्द्धितश्चन्द्रोऽभिवर्द्धितश्चेति । तत्र एकोनत्रिंशदहोरात्राणि द्वात्रिंशच्च द्विषष्टिभागा अहोरात्रस्येत्येवं प्रमाणेन २९ । ३२ । कृष्णप्रतिपदमारभ्य पौर्णमासीनिष्ठितेन चन्द्रमासेन द्वादशमासपरिमाणश्चन्द्रसंवत्सरः । तस्य च प्रमाणमिदम्-त्रीणि शतान्यहां चतुष्पञ्चाशदुत्तराणि, द्वादश च द्विषष्टिभागा दिवसस्य ३५४ । ३२ । तथा—एकत्रिंशदहोरात्रमेकविंशत्युत्तरं च शतं चतुर्विंशत्युत्तरशतभागानां दिवसस्येत्येवं प्रमाणोऽभिवर्द्धितमास इति । ३१ । ११३ । एतेन च मासेन द्वादशमासप्रमाणोऽभिवर्द्धितसंवत्सरो भवति । स च प्रमाणे-

न त्रीणि शतान्यष्टौ, त्र्यशीत्यधिकानि, चतुश्चत्वारिंशच्च द्विषष्टिभागा दिवसस्य ३८३ । ४४/६२ । तदेवं त्रयाणां चन्द्रसंवत्सराणां द्वयोश्चाभिवर्द्धितसंवत्सरयोरेकीकरणे जातानि दिनानां त्रिंशदुत्तराण्यष्टादशशतान्यहोरात्राणाम् १८३० । ऋतुमासश्च त्रिंशताऽहोरात्रैर्भवतीति त्रिंशता भागहारे लब्धा एकषष्टिः-ऋतुमासा इति । सं० ६१ सम० ।

एकमासेन चन्द्रा दक्षिणोत्तरचारिणः, सूर्याः पुनः संवत्सरेण दक्षिणोत्तरचारिणो भवन्ति । अत्र चन्द्रस्य नक्षत्रमासो ग्राह्यः, स च सप्तविंशतिदिनान्येकविंशतिः सप्तषष्टिभागश्चेति प्रमाणः २७ । ²¹/₆₇ । तदर्द्धेन १३ ॥ ¹⁰/₆₇ ॥ चन्द्रस्य दक्षिणाऽऽयनम्, अर्द्धेन चोत्तरायणम् । यतश्चन्द्रश्चन्द्राऽभिवर्द्धितचन्द्राभिवर्द्धितनामानः संवत्सराः ५ । ते च त्रिंशदधिकाष्टादशशतदिनसंख्ये युगे पञ्च भवन्ति । तत्रैकोनत्रिंशद्दिनमानाः सद्वात्रिंशदुद्वाषष्टिभागाश्चन्द्रमासा द्वाषष्टिः, सार्द्धत्रिंशद्दिनमानाः सूर्यमासाः षष्टिः, सप्तविंशतिदिनमानैकविंशतिः सप्तषष्टिभागा नक्षत्रमासाः सप्तषष्टिर्युगे, तेन युगे चन्द्रस्य दक्षिणायनानि सप्तषष्टिः, उत्तरायणान्यपि सप्तषष्टिः, सर्वाणि युगे चन्द्रायणानि १३४, तथा सूर्यस्य पञ्चाऽब्दैन योगो येषां तानि पञ्चाब्दयोगानि, चन्द्रोऽतिक्रम्य यानि भुङ्क्ते, पृथु दत्त इत्यर्थः, इत्यादि द्रष्टव्यम् ॥ ७६ ॥

चन्द्रसूर्ययोर्मण्डलाऽऽदिस्वरूपं प्रकाश्याथ नक्षत्रतारकास्वरूपमाह-

अट्ठेव मंडलाइं, णक्खत्ताणं जिणेहिं भणिआइं ।
दो मंडलाइं दोवे, मंडलछक्कं च लवणम्मि ॥ ८० ॥

अष्टावेव मण्डलानि नक्षत्राणां जिनैर्भणितानि, तत्र द्वे मण्डले जम्बूद्वीपे, मण्डलषट्कं च लवणोदे, यच्चन्द्रमसः सर्वाभ्यन्तरमण्डलं तन्नक्षत्राणामपि सर्वाभ्यन्तरमण्डलं, यच्चन्द्रमसः सर्वबाह्यं मण्डलं तन्नक्षत्राणामपि सर्वबाह्यं मण्डलम् । यदुक्तं जम्बूद्वीपप्रज्ञप्त्याम्-"जंबूदीवे णं भंते ! केवइअं ओगाहित्ता नक्खत्तमंडला पन्नत्ता ?। गोयमा ! जंबूदीवे दीवे असीइयं ओगाहित्ता, एत्थ णं दो नक्खत्तमंडला, लवणसमुद्दे वि तिन्नि, तीसे जोअणसए ओगाहित्ता, एत्थ णं छ नक्खत्तमंडला पन्नत्ता । सव्वब्भंतराओ णं णक्खत्तमंडलाओ केवइए अबाहाए सव्वबाहिरए णक्खत्तमंडले पन्नत्ते ?। गोयमा ! पंचदसुत्तरजोअणसए अबाहाए णक्खत्तमंडले पन्नत्ते" इति ॥ ८० ॥

अथ केषु केषु चन्द्रमण्डलेषु नक्षत्राणि सन्ति ?, इत्याह-

अभिई १ सवण २ धणिट्ठा ३,
मयभिस ४ पुव्वुत्तरा य ५ जहवया ६ ।
रेवइ ७ असिणी ८ भरणी ९,
पुव्वुत्तर १० फग्गुणीओ ११ अ ॥ ८१ ॥

अभिजिच्छ्रवणधनिष्ठाशतभिषापूर्वोत्तराभाद्रपदा युगे दशायनानि । तत्र पञ्च दक्षिणायनानि, पञ्चैव—उत्तरायणानि, त्र्यशीत्यधिकशतदिनानामेकैकमयनम् १८३ । तद्दशगुणं युगं १८३० दिनप्रमाणम् । तथा सूर्यः सर्वाभ्यन्तरमण्डले दिनमेकं चरति, सर्वबाह्येऽपि दिनमेकं, शेषेषु मण्डलेषु प्रदेशनिर्गमाभ्यां दिनद्वयम्, अतः प्रथमचरमदिनन्यूनत्वे सूर्यसंवत्सरे ३६६ दिनानि । स च पञ्चगुणितोऽष्टादशशतानि त्रिंशदधिकानि । सं० ।

संप्रति कति मण्डलानि चन्द्राः, सूर्या वा युगमध्ये चरन्तीत्येतन्निरूपयति-

सत्तरससए पुणे, अट्ठट्ठे चेव मंडलं चरइ ।
चंदो जुगेण णियमा, सूरो अट्ठारस उ तीसं ॥

चन्द्रो युगेन चन्द्रचन्द्राभिवर्द्धितचन्द्राभिवर्द्धितसंवत्सरपञ्चकाऽऽत्मकेन नियमान्मण्डलं चरति भ्रम्या पूरयति सप्तदशशतान्यष्टषष्ट्यधिकानि १७६८ । सूर्यः पुनर्युगेन मण्डलानि चरति अष्टादशशतानि त्रिंशदधिकानि १८३० ।

संप्रति चन्द्रः स्वकीयेनायनेन कियन्ति मण्डलानि चरतीति ?, एतन्निरूपयति-

तेरस य मंडलाइं, तेरस सत्तट्ठि चेव भागा य ।
अयणेण चरइ सोमो, नक्खत्तेणऽद्धमासेण ॥

इह नक्षत्रार्द्धमासप्रमाणं चन्द्रस्यायनं, ततो नक्षत्रेण नक्षत्रसत्केनार्द्धमासेन यच्चन्द्रस्यायनं, तेन स्वकीयेनायनेन चन्द्रस्त्रयोदश मण्डलानि, एकस्य च मण्डलस्य सप्तषष्टिभागीकृतस्य त्रयोदश भागान् चरति । कथमेतस्योपपत्तिरिति चेत् ? । उच्यते-चतुस्त्रिंशदधिकेनायनशतेन सप्तदशशतान्यष्टषष्टिसहितानि मण्डलानां लभ्यन्ते, तत एकेनायनेन किं लभामहे ?। राशित्रयस्थापना-१३४ । १७६८ । १ । अन्त्येन राशिनैककलक्षणेन मध्यराशिर्गुण्यते, स च तावानेव जातः । तत आद्येन राशिना चतुस्त्रिंशदधिकेन शतरूपेण भागो ह्रियते, लब्धास्त्रयोदश, शेषास्तिष्ठन्ति षड्विंशतिः । तत्र छेद्यच्छेदकराश्योर्द्विकेनापवर्त्तना, लब्धास्त्रयोदश सप्तषष्टिभागाः ।

अधुना यावन्ति मण्डलान्येकेन पर्वणा चन्द्रश्चरति, तावन्निर्दिदिक्षुराह-

चोद्दस य मंडलाइं, विसट्ठिभागा य सोलस हवेज्जा ।
मासद्धेण उडुवई, एत्तियमित्तं चरइ खेत्तं ॥

मासार्द्धेनैकेन पर्वणा उडुपतिश्चन्द्रमाः, एतावन्मात्रमेतावत्प्रमाणं क्षेत्रं चरति । यदुत-चतुर्दश मण्डलानि, एकस्य च मण्डलस्य षोडश द्वाषष्टिभागाः । तथाहि-यदि चतुर्विंशत्यधिकेन पर्वशतेन सप्तदशशतान्यष्टषष्ट्यधिकानि मण्डलानां लभ्यन्ते, तत एकेन पर्वणा किं लभ्यते ? । राशित्रयस्थापना-१२४ । १७६८ । १ । अन्त्येन राशिना मध्यराशिर्गुण्यते, ते च तावानेव जाताः, तताऽऽद्येन राशिना भागहरणं, लब्धाश्चतुर्दश, शेषास्तिष्ठन्ति द्वात्रिंशत् । तत्र छेद्यच्छेदकराश्योर्द्विकेनापवर्त्तना, लब्धाः षोडश द्वाषष्टिभागाः ।

संप्रति पर्वगतमण्डलेभ्योऽयनगतमण्डलापगमे यच्छेषमवतिष्ठते तन्निरूपयति—

एगं च मंडलं मं-डलस्स सत्तट्ठिणाग चत्तारि ।
नव चेव चुण्णियाओ, इगतीसकएण छेएण ॥

एकं मण्डलमेकस्य च मण्डलस्य सप्तषष्टिभागाश्चत्वारः, एकस्य च सप्तषष्टिभागस्यैकत्रिंशत्कृतेन च्छेदेन नव चूर्णिका भागाः, एतावत्पर्वगतक्षेत्रापगमे शेषः एतस्यैवमुपपत्तिः-यदि चतुर्विंशत्यधिकेन पर्वशतेन सप्तदशशतान्यष्टषष्ट्यधिकानि मण्डलानां लभ्यन्ते, तत एकेन पर्वणा किं लभामहे ?। अत्र राशित्रयस्थापना-१२४ । १७६८ । १ । अन्त्येन राशिना मध्यरा-

शिर्गुण्यते, स च तावानेव जातः, तत आद्येन चतुर्विंशत्यधिकेन शतरूपेण राशिना भागहरणं, ज्ञेयच्छेदकराश्योश्चतुर्भिरपवर्तना, लब्धानि चतुर्दश मण्डलान्यष्टौ च एकत्रिंशद् भागाः। एतस्मादयनक्षेत्रं शोध्यते, तत्र चतुर्दशस्य त्रयोदश मण्डलानि शुद्धानि, एकमवशिष्टम्। संप्रत्यष्टानां एकत्रिंशद्भागेष्वस्त्रयोदश सप्तषष्टिभागाः शोध्याः; तत्र सप्तषष्टिरष्टाभिर्गुणिता, जातानि पञ्चशतानि षट्त्रिंशदधिकानि ५३६। एकत्रिंशता त्रयोदश गुणिताः, जातानि चत्वारि शतानि त्र्युत्तराणि ४०३। एतानि पञ्चभ्यः षट्त्रिंशदधिकेभ्यः शोध्यन्ते, स्थितं शेषं त्रयस्त्रिंशदधिकं शतम् १३३। तत एतत्सप्तषष्टिभागाऽऽनयनार्थं सप्तषष्ट्या गुण्यते, जातानि नवाशीतिशतान्येकादशाधिकानि ८९११। ज्ञेयराशिर्भौल एकत्रिंशत्, स च सप्तषष्ट्या गुण्यते, जाते द्वे सहस्रे सप्तसप्तत्यधिके २०७७। ताभ्यां भागो ह्रियते, लब्धाश्चत्वारः सप्तषष्टिभागाः, शेषास्तिष्ठन्ति षट्शतानि त्र्युत्तराणि ६०३। ततश्चेद्यच्छेदकराश्योः सप्तषष्ट्याऽपवर्तना, जाता उपरि नवाधस्तादेकत्रिंशत्, लब्धा एकस्य सप्तषष्टिभागस्य नवैकत्रिंशच्छेदकृता भागा इति। ज्यो० १६ पाहु०। जं०। चं० प्र०। (युगे किमादिकाः संवत्सरा इत्यनुपदमेव ' जुगाइ ' शब्दे १५७५ पृष्ठे वक्ष्यन्ते)

युगेऽमावास्याः पूर्णिमाश्च यथा-

पंचसंवच्छरिए णं जुगे बावट्ठिं पुण्णिमाओ, बावट्ठिं अमावासाओ पण्णत्ताओ।

"पंच" इत्यादि। तत्र युगे त्रयश्चन्द्रसंवत्सरा भवन्ति, तेषु षट्त्रिंशत्पौर्णमास्यो भवन्ति, द्वौ चाभिवर्द्धितसंवत्सरौ भवतः, तत्र चाभिवर्द्धितसंवत्सरः त्रयोदशभिश्चन्द्रमासैर्भवतीति तयोः षड्विंशतिः पौर्णमास्य इत्येवं द्विषष्टिस्ता भवन्तीति, एवममावास्या अपीति। स० ६२ सम०।

जुगंतकडभूमि-युगान्तकृद्[कर]भूमि-स्त्री०। युगानि कालमानविशेषाः, तानि च क्रमवर्त्तीनि, तत्साधर्म्यायद्ये क्रमवर्त्तिनो गुरुशिष्यप्रशिष्याऽऽदिरूपाः पुरुषास्तेऽपि युगानि, तैः प्रमितान्तकरभूमिर्युगान्तकरभूमिः। ज्ञा० १ श्रु० ८ अ०। कल्प०। पुरुषलक्षणयुगापेक्षयाऽन्तकराणां भवक्षयकारिणां भूमिः कालो युगान्तकरभूमिः स्था० ८ ठा०। अन्तकर (कृद्) भूमिभेदे, (सा च कस्यान्तकृतः कियतीति तत्तच्छब्दे निरूपिता) पुरुषौ युगमिव पुरुषयुगं, तदपेक्षयाऽन्तकराणां भवान्तकराणां, निर्वाणगामिनामित्यर्थः। भूमिः कालो युगान्तकरभूमिः। इदमुक्तं भवति-भगवतो वर्द्धमानस्वामिनस्तीर्थे तस्मादेवावधेः तृतीयं पुरुषं जम्बूस्वामिनं यावन्निर्वाणमभूत्, तत उत्तरं तद्व्यवच्छेद इति। स्था० ३ ठा० ४ उ०।

जुगंतकरभूमि-युगान्तकृद्[कर]भूमि-स्त्री०। "जुगंतकरभूमि" शब्दार्थे, ज्ञा० १ श्रु० ८ अ०।

जुगंतरपलोयणा-युगान्तरप्रलोकना-स्त्री०। युगं यूपः, तत्प्रमाणमन्तरं व्यवधानं प्रलोकयति या सा तथा। (ज०) युगं यूपः, तत्प्रमाणो भूभागोऽपि युगः, तस्यान्तरे मध्ये प्रलोकनं यस्याः सा तथा। युगप्रमाणभूभागव्यवधानेन प्रलोकयन्त्याम्, भ०। " जुगमंतरपलोयणाए दिट्ठीए " (जुगंतरपलोयणाए त्ति) युगं यूपः, तत्प्रमाणमन्तरं स्वदेहदेशस्य दृष्टिपातदेशस्य च व्यवधानं, प्रलोकयति या सा युगान्तरप्रलोकना, तया, दृष्ट्येति। ज्ञ० २ श० १ उ०।

जुगंधर-युगन्धर-पु०। युगं रथस्य युगकाष्ठं धरति धृ-खच्। रथस्य युगकाष्ठासञ्जने कूबराख्ये काष्ठभेदे, जं० १ वक्ष०। पर्वतभेदे, वाच०। अम्बरतिलकपर्वतस्थे स्वनामख्याते आचार्ये, आ० म०। "जुगंधरा नाम आयरिया विविहनियमधरचउहसपुव्विचउणाणोवगया।" आ० म० १ अ० १ खण्ड। अम्बरतिलकपर्वतमधिकृत्य-" युगन्धरमुनिस्तत्र, तदा केवलमासदत्।" आ० क०। अपरविदेहस्थे महाबाहुवासुदेवस्य समकालिके तीर्थंकरे, आ० चू० १ अ०। आव०।

जुगच्छिद्द-युगच्छिद्र-न०। युगरन्ध्रे, आ० क०।

" पुव्वंते होइ जुगं, अवरंते तस्स होइ समिलाओ।
जुगछिद्दम्मि पवेसो, इअ संसइओ मणुअलंभो॥ १॥ "

पूर्वान्ते समुद्रस्य युगम, अपरान्ते तु समिला, ततो यथा युगस्य छिद्रे तस्याः प्रवेशः संशयित इत्येवं मनुष्यजन्मलाभः।

तथा-

" जह समिला पब्भट्ठा, सागरसलिले अणोरपारम्मि।
पविसिज्ज जुगच्छिद्दं, कह वि भमंती भमंतम्मि॥ १॥ "
नवरम्-' अणोरपारम्मि ' देश्यत्वादपारे इत्यर्थः।
" सा चंमवायवीई-पणुल्लिआ अ वि लभिज्ज जुगछिद्दं।
न य माणुसाउ नट्ठो, जीवो पुण माणुसं लहइ॥ १॥ "
आ० क०। उत्त०।

जुगणद्ध-युगनद्ध-पुं०। युगमिव नद्धो युगनद्धः। यथा युगं वृषभस्कन्धयोरारोपितं वर्त्तते तद्वद् योगोऽपि यः प्रतिभाति स युगनद्ध इत्युच्यते। एतदाकार योगभेदे, सू० प्र० १२ पाहु०।

जुगप्पहाण-युगप्रधान-पुं०। युगश्रेष्ठे, नि० चू० १ उ०। "तत्थ अज्जवइरा सुव्वंति जुगप्पहाणा।" आ० म० १ अ० २ खण्ड।

जो दुप्पसहो सूरी, होहिंति जुगप्पहाण आयरिया।
अज्जसुहम्मप्पभिई, चउरट्ठिया छन्नि य सहस्सा॥४९१॥

इहावसर्पिण्यां दुःषमावसानसमये छिद्रस्तोच्छ्वसच्चतुर्विंशतिवर्षायुष्कः पुष्कलतपःक्षपितकर्मतया समासन्नः सिद्धिसौधं शुद्धान्तरात्मा दशवैकालिकमात्रसूत्रधरोऽपि चतुर्दशपूर्वधर इव शक्रपूज्यो दुष्पसहनामा सर्वान्तिमः सूरिर्भविष्यति, ततः तं दुष्पसहं यावत्, तमभिव्याप्यैवेत्यर्थः। आर्यसुधर्मप्रभृतयः, आरात् सर्वहेयधर्मेभ्योऽर्वाक् जात आर्यः, स चासौ सुधर्मः, तत्प्रभृतयः, प्रभृतिग्रहणाच्च जम्बूस्वामिप्रभवशय्यंभवाऽऽद्या गणधरपरम्परा गृह्यते, युगप्रधानास्तत्तत्कालप्रवरपरमेश्वरप्रवचनोपनिषद्वेदित्वेन विशिष्टतरमूलगुणोत्तरगुणसंपन्नत्वेन च तत्कालापेक्षया भरतक्षेत्रमध्ये प्रधाना आचार्याः सूरयश्चतुरधिकसहस्रद्वयप्रमाणा भविष्यन्ति। अन्ये तु चतुरुत्तरसहस्रद्वयप्रमाणा इत्याहुः। तत्त्वं तु सर्वविदो विदन्ति।

यच्च महानिशीथग्रन्थे जग्रन्थ ग्रन्थकारः-

" इत्थं चायरिआणं, पणपन्ना हुंति कोडिलक्खाओ।
कोडिसहस्से कोडी, सए य तह एत्तए चेव त्ति " ॥ १॥

तत्सामान्यमुनिप्रत्यपेक्षया ऽवसेयम्। तथा च तत्रैवोक्तम्-

" एएसिं मज्झाओ, एगे निव्विकइ गुणगणाइण्णे।
सव्वुत्तमभंगेणं, तित्थयरस्साणुसरिसगुरू॥ १॥ " प्रव० २६४ द्वार।

चतुरधिकद्विसहस्रमिता युगप्रधानाः सिद्धान्ते प्रोक्ताः, ते साम्प्रतं क सन्ति?, इति प्रश्ने, उत्तरम्-साम्प्रतं युगप्रधानाः सन्तीति

ज्ञातं नास्ति, दृश्यन्तेऽपि च न, तेन तूर्ण क्षेदयित्वाप्रारभ्य ते भविष्यन्तीति ज्ञायते । ५१ प्र० । सेन० १ उल्ला० ।

जुगमच्छ–युगमत्स्य–पुं० । मत्स्यभेदे, विपा० १ श्रु० ८ अ० । जी० । प्रज्ञा० ।

जुगमत्त–युगमात्र–त्रि० । युगं यूपं चतुर्हस्तं, तत्प्रमाणं युगमात्रम् । चतुर्हस्तप्रमाणे, प्रव० १०३ द्वार० । "पुरओ जुगमत्ताए, पेहमाणो महिं चरे ।" (३ गाथा) पुरताऽग्रतो युगमात्रया शरीरप्रमाणया शकटोद्धिसंस्थितया दृष्ट्येति । दश० ५ अ० १ उ० ।

जुगमाय–युगमात्र–त्रि० । 'जुगमत्त' शब्दार्थे, प्रव० १०३ द्वार० । "पुरओ जुगमायं पेहमाणे ।" युगमात्रं चतुर्हस्तप्रमाणं शकटोद्धिसंस्थितं भूभागं पश्यन् । आचा० २ श्रु० ३ अ० १ उ० ।

जुगल–युगल–न० । युगं द्वित्वं विद्यतेऽस्यस्य लच् । युग्मे, द्वित्वसंख्याऽन्विते च । त्रि० । वाच० । युगलं द्वयमिति । अनु० । तं० । उत्त० । ज्ञा० । रा० । ज्ञ० । स० । औ० । सजातीयविजातीययोर्द्वन्द्वे, रा० । जी० । जं० । " आमेलगजमलजुगलबट्टियअन्नुप्पयपोणरइयसंठियपभोहरा । " युगलौ युगलरूपौ, द्वावित्यर्थः । ज्ञा० १ श्रु० १ अ० ।

जुगलधम्म–युगलधर्म–पुं० । स्त्रीपुरुषद्वन्द्वधर्मे, आ० म० १ अ० १ खण्ड । तं० । ज्यो० ।

जुगलधम्मिय–युगलधर्मिक–पुं० । स्त्रीपुरुषद्वन्द्वधर्मवति, तं० ।

जुगलयमणुय–युगलकमनुज–पुं० । युगलधर्मिणि मनुष्ये, ज्यो० १ पाहु० ।

जुगलि[ण]–युगलिन्–त्रि० । सजातीयविजातीयद्वन्द्वोपेते, उत्त. रकुरौ भगवान् युगलिकोऽहं युगलिनीति (श्रेयांसवचः)कल्प० ७ क्षण० । यस्मिन् काले कालान्तरे वा यावन्तो युगलिनस्तस्मिन् तावन्त एव, न्यूनाः, अधिका वा ?, इति प्रश्ने, उत्तरम्–यस्मिन् काले यावन्तो युगलिनस्तस्मिन्काले तु तावन्त एव भवन्तीति । कालान्तरे भरतैरावतयोर्युगलिनां न्यूनाधिकत्वं, देवकुर्वादिषु तु जातु तत्संहरणसंभवे कुतश्चित्तदानयनमपि भवतीति न तत्र न्यूनाऽधिक्यमिति । १३ प्र० । सेन० ३ उल्ला० ।

जुगलिय–युगलिक–त्रि० । स्त्रीपुरुषद्वन्द्वोपेते, कल्प० ७ क्षण० । पं० वि० एवंविधप्रश्ने-श्रीआदिनाथस्य बारके तालफलेन युगलिकदारको मृतो, युगलिनां चाकालमरणं न भवतीति कथं घटते ?, इति प्रश्ने, उत्तरम्-पूर्वकोट्यधिकायुषो युगलिनो न्यूनायुषि न म्रियन्ते, ततः श्रीआदिनाथस्य बारके तालफलेन मृतस्य युगलिनः पूर्वकोट्यधिकमायुर्नानुदिति संगच्छत इति । ३ प्र० । ही० ३ प्रका० । युगलिकशरीराणि सुराः समुद्रं क्षिपन्ति, अथवा स्वयं विनश्वरीभवन्ति ?, इति प्रश्ने, उत्तरम्-" पुरा हि मृतमिथुनशरीराणि महाकायाः । नीडकाष्ठमिवोत्पाट्य, सत्वहित्वक्षिपुरम्बुधौ " ॥ १ ॥ इति त्रिषष्टीयऋषभदेवचरित्रवचनात् समुद्रे युगलिकशरीराणि क्षिप्यन्ते, अन्ययुगलिकक्षेत्रेऽप्येवं संभाव्यते, आरण्यकपशूनां निसर्गतो मृतानां यथा किमप्यवयवाऽदिकं नोपलभ्यते, तथा तेषामपीत्येवाऽपि संभावना संजायत इति । ३० प्र० । सेन० ३ उल्ला० । सर्वेषु युगलिकक्षेत्रेषु युगलिनां गर्भजगर्भव्युत्क्रान्तनेदभिन्नानां जघन्यमध्यमोत्कृष्टभेदभिन्नमायुरस्ति, किं वोत्कृष्टमेव ?, इति प्रश्ने, उत्तरम्-युगलिनामुत्कृष्टमायुर्यथास्थानं त्रिपल्योपमादि प्रतीतं, जघन्यं तु क्षुल्लकभवरूपं क्षेयम्, अतस्त्रिपल्योपमप्रमितमप्यायुरपवर्त्य क्षुल्लकभवरूपं कश्चिज्जन्तुः करोतीत्यर्थकाङ्कारण्यचाराङ्कवृत्त्यादौ सन्ति, परं तद्, भिन्नमपर्याप्तावस्थायामेव भवति, तदुद्वर्तनं तु न भवति, तेषां निरुपक्रमायुष्कत्वात् । मध्यमं तु युगलिनीगर्भेऽपि नवब्रह्ममितिगर्भजा उत्पद्यन्ते, निष्पद्यन्ते च द्वयमेव । शेषास्तु स्वस्वमायुरपवर्त्य गर्भस्था एव म्रियन्ते; तथा क्षुल्लकभवाधिकसमयाऽऽदिभवने संभवतीति । १६८ प्र० । सेन० २ उल्ला० ।

युगलिन–त्रि० । युगलं सजातीयविजातीययोर्द्वन्द्वं, तत्संजातमस्यस्य युगलिनः । सजातीयविजातीयद्वन्द्वोपेते, जी० ३ प्रति० । जं० । जी० । " निच्चं जुगलिया " युगलतया स्थिताः । ज्ञा० १ श्रु० १ अ० ।

जुगलियखेत्तकप्परुक्ख–युगलिकक्षेत्रकल्पवृक्ष–पुं० । युगलिकक्षेत्रे कल्पवृक्षा वनस्पतिरूपाः, पृथ्वीकायरूपा वा ?, इति प्रश्ने, उत्तरम्–ते वनस्पतिरूपा इति । ४९६ प्र० । सेन० ३ उल्ला० ।

जुगवं–युगवत्–त्रि० । युगं सुषमदुष्षमाऽऽदिः कालः, सोऽस्त्यस्मिन् निरुपद्रवो विशिष्टबलहेतुर्यस्यास्त्यसौ युगवान् । कालोपद्रवरहिते, अनु० । कालोपद्रवोऽपि सामर्थ्यविघ्नहेतुः, स चास्य नास्तीति । अनु० । भ० । रा० । आ० म० ।

युगपत्–अव्य० । युगमिव पद्यते, पद–क्विप् । एकस्मिन् काले इत्यर्थे, नं० । " चत्तारि कम्मं से जुगवं खवेइ " । यौगपद्येन निर्जरयति । औ० । आ० म० । उत्त० । विशे० । (युगपत्क्रियाद्वयवक्तव्यता ' दोकिरिय ' शब्दे वक्ष्यते)

जुगबाहु–युगबाहु–पुं० । युगो यूपस्तदाकारौ वृत्तत्वाद्दीर्घत्वाच्च बाहवो यस्य सः । युगवद्दीर्घबाहौ, स्था० ६ ठा० । सुविधिजिने, सुविधिजिनस्य चैतत्पूर्वभवनामधेयम् । स० । पूर्वविदेहस्थे सीमन्धरतीर्थकरसमकालिके वासुदेवे, आ० चू० ४ अ० । आव० । मालवदेशस्थस्य सुदर्शनपुरनृपतेर्मणिरथस्य स्वनामख्याते भ्रातरि, उत्त० ९ अ० । मिथिलास्थे नमिराजर्षितरि, " इत्थं जुगबाहुमयणरेहाए पुत्तो नमी नाम महाराया । " ति० ।

जुगसंवच्छर–युगसंवत्सर–पुं० । युगं पञ्चवर्षाऽऽत्मकं तत् पूरकः संवत्सरो युगसंवत्सरः । सू० प्र० १० पाहु० । चं० प्र० । पञ्चसंवत्सराऽऽत्मके युगे, तदेकदेशभूतो वक्ष्यमाणलक्षणश्चन्द्राऽऽदिर्युगपूरकत्वाद्युगसंवत्सरः । जं० ७ वक्ष० । स्था० । संवत्सरविशेषे, (तद्वक्तव्यता ' जुग ' शब्देऽत्रैव भागे १५६७ पृष्ठे ऽऽक्ष्यते)

जुगसंनिभ–युगसन्निभ–त्रि० । वृत्ततया आयततया च यूपतुल्ये, ' जुगसन्निभपीणरइयपीवरपउहसंठियसुसिलिट्ठविसिट्ठघणथिरसुबद्धसंधीपुरवरफलिहवट्टियभुया । " जी० ३ प्रति० । तं० । प्रश्न० ।

जुगाइ–युगाऽऽदि–पुं० । युगाऽऽरम्भे, युगाऽऽरम्भकाले प्रथमतः प्रवृत्ते मासतिथिमुहूर्तादौ च । जं० ।

संप्रति युगसंवत्सरमासदिनानामादिं प्ररूपयति-

आदी जुगस्स संव-च्छरो उ मासस्स अहमासो उ ।

दिवसा भरहेरवए, राईया सह विदेहेसु ॥

युगस्य चन्द्रचन्द्राभिवर्द्धितचन्द्राभिवर्द्धितरूपसंवत्सरपञ्चकाऽऽत्मकस्याऽऽदिः संवत्सरः, स च चान्द्रः, तमसावन्ययुगस्य प्रवर्त्तनात् । चान्द्रस्य संवत्सरस्याऽऽदिर्मासः । स च श्रावणत आषाढपौर्णमासीचरमसमयः पाश्चात्ययुगस्य पर्यवसानं, ततोऽभिनवयुगस्याऽऽदिर्मासः प्रवर्त्तमानः श्रावण एव भवति, तस्यापि च मासस्य श्रावणस्याऽऽदिरर्द्धमासः पक्षः, पक्षद्वयमीलनेन मासस्य संभवात् । सोऽपि च पक्षो बहुलो वेदितव्यः, पौर्णमास्यनन्तरं बहुलपक्षस्यैव भावात् । तस्यापि च बहुलस्यार्द्धमासस्यापि भरतक्षेत्रे युगस्यादिः प्रवर्त्तते, ततो दिवस एव मासाऽऽदिरूप उत्पद्यते, यदा च भरतक्षेत्रे दिवसस्तदैरवतेऽपि दिवसः, तदा च पूर्वविदेहेष्वपरविदेहेषु च रात्रिः,अत ऐरवतेऽपि अर्द्धमासस्याऽऽदिर्दिवसो, महाविदेहेषु रात्रिरिति ।

संप्रति भरतैरवतेऽधिकृत्याऽऽदिप्ररूपणार्थमाह-

दिवसाइ अहोरत्ता, बहुलाईयाणि होंति पव्वाणि ।
अभिई नक्खत्ताई, रुद्दो आई मुहुत्ताणं ॥

भरते, ऐरवते च दिवसाऽऽदयो दिवसमूला अहोरात्राः, युगस्याऽऽदौ दिवसस्यैवेह प्रवर्त्तमानत्वात् । पर्वाणि पक्षरूपाणि बहुलाऽऽदीनि कृष्णानि भवन्ति,कृष्णपक्षस्यैव युगाऽऽदौ भावात् । तथा नक्षत्राणामादिरभिजित्, तत एवाऽऽरभ्य नक्षत्राणां क्रमेण युगे प्रवर्त्तमानत्वात् । तथाहि-उत्तराषाढानक्षत्रचरमसमये पाश्चात्ययुगस्य पर्यवसानम् । ततोऽभिनवयुगस्याऽऽदिनक्षत्रमभिजिदेव भवति । तथा मुहूर्त्तानामादिर्मुहूर्त्तो रुद्रः। इह दिवसाऽऽदिरहोरात्र इत्युक्तं,दिवसाऽऽदिके चाहोरात्रे क्रमेणामी पञ्चाऽऽनमुहूर्त्ताः। तद्यथा-प्रथमो मुहूर्त्तो रुद्रः, द्वितीयः श्रेयान्, तृतीयो मित्रः,चतुर्थो वायुः, पञ्चमः सुपीतः,षष्ठोऽभिचन्द्रः, सप्तमो माहेन्द्रः,अष्टमो बलवान्, नवमः पद्मः, दशमो बहुसत्यः,एकादश ईशानः,द्वादशस्तत्स्थः,त्रयोदशो भाविताऽऽत्मा,चतुर्दशो वैश्रवणः, पञ्चदशो वारुणः, षोडश आनन्दः, सप्तदशो विजयः, अष्टादशो विश्वकसेनः, एकोनविंशतितमः प्राजापत्यः, विंशतितम उपशमः, एकविंशतितमो गन्धर्वः, द्वाविंशतितमोऽग्निवेशः, त्रयोविंशतितमः शतवृषभः, चतुर्विंशतितम आतपवान्, पञ्चविंशतितमोऽममः, षड्विंशतितमोऽरुणवान्, सप्तविंशतितमो भौमः, अष्टाविंशतितमो वृषभः, एकोनत्रिंशत्तमः सर्वार्थः, त्रिंशत्तमो राक्षसः ।

उक्तं च जम्बूद्वीपप्रज्ञप्तौ-

" रुद्दो सेए मित्ते, वाऊ पीए तहेव अभिचंदे ।
माहिंद बलव पभे, बहुसच्चे चेव ईसाणे ॥ १ ॥
तत्तेव भाविअप्पा, वेसमणो वारुणे य आणंदे ।
विजए य वीससेणे, पायावच्चे तह य उवसमए ॥ २ ॥
गंधव्व अग्गिवेसो, सयरिसह आयवं च अममं च ।
रुणवं भोमे रिसहे, सव्वट्ठे रक्खसाईया ॥ ३ ॥"
ततो युगे मुहूर्त्तानामादिको रुद्र एव भवति । ज्यो० २ पाहु० ।

तथा च जम्बूद्वीपप्रज्ञप्तावेवोक्तम-

"किमाइआ णं भंते ! संवच्छरा, किमाइआ अयणा, किमाइआ उऊ, किमाइआ मासा, किमाइआ पक्खा, किमाइआ अहोरत्ता, किमाइआ मुहुत्ता, किमाइआ करणा, किमाइआ णक्खत्ता पण्णत्ता ?। गोयमा ! चंदाइआ संवच्छरा, दक्खिणाइआ अयणा, पाउसाइआ उऊ, सावणाइआ मासा, बहुलाइआ पक्खा, दिवसाइआ अहोरत्ता, रोद्दाइआ मुहुत्ता, बालवाइया करणा, अभिजिआइया णक्खत्ता समणाउसो !" [जं० ७ वक्ष०]

तदेवं 'राईया सह विदेहेसु' इत्यनेन (पूर्वोक्तगाथा) अवयवेन महाविदेहेष्वनया गाथया भरतैरवतयोर्युगस्याऽऽदिः प्ररूपितः ।

संप्रति भरतैरवतविदेहेषु साधारणं युगस्याऽऽदिं प्ररूपयति-

सावणबहुलपडिवए, बालवकरणे अभीइनक्खत्ते ।
सव्वत्थ पढमसमए, जुगस्स आई वियाणाहि ॥

सर्वत्र-भरते, ऐरवते, महाविदेहेषु च श्रावणमासे बहुलपक्षे कृष्णपक्षे प्रतिपदि तिथौ बालवकरणे अभिजिन्नक्षत्रे प्रथमसमये युगस्याऽऽदिं विजानीहि । ज्यो० २ पाहु० ।

सर्वत्रेति भरतैरावतविदेहेषु ज्ञाप्यम् । अवसर्पिण्यां पञ्चाऽरकाणामप्यादिः रात्रिरेव, विदेहेषु यद्यप्यारकाणामभावः, तथापि पञ्चसंवत्सराऽऽत्मकस्य युगस्य सद्भावः । मं० ।

जुग्ग–युग्य–न० । युज्-यत-कुत्वम् । " युग्यं च पत्रे " ॥ ३ । ६ । १२६ ॥ इति (पाणिनि) सूत्रेण निपातनम् । अश्वाऽऽदिके वाहने, स्था० ४ ठा० ३ उ० । प्रश्न० । युग्यमिव युग्यम् । संयमभारवोढरि साधौ, स्था० ।

युग्यभेदा यथा-

चत्तारि जुग्गा पण्णत्ता । तं जहा-जुत्ते,णाममेगे जुत्ते, जुत्ते णाममेगे अजुत्ते, अजुत्ते णाममेगे जुत्ते, अजुत्ते णाममेगे अजुत्ते ॥

युग्यं वाहनमश्वाऽऽदि । अथवा-गोल्लविषये जम्पानं द्विहस्तप्रमाणं चतुरस्रं सवेदिकमुपशोभितं युग्यकमुच्यते, तत्र युक्तमारोहणसामग्र्या पर्याणाऽऽदिकया पुनर्युक्तं वेगाऽऽदिभिरित्येवं यानवद् व्याख्येयम् । स्था० ४ ठा० ३ उ० । युगमर्हति युगं वा वहति यत् । युगवाहकेऽश्वाऽऽदौ, त्रि० । वाच० । गल्ल्यादिके, आचा० १ श्रु० १ अ० ५ उ० । गोल्लदेशप्रसिद्धे जम्पानविशेषे, प्रश्न० ५ आश्र० द्वार । युग्यानि गोल्लविषयप्रसिद्धानि द्विहस्तप्रमाणानि वेदिकोपशोभितानि जम्पानान्येवेति । आचा० १ श्रु० १ अ० । अनु० । जं० । जी० । भ० । औ० । प्रश्न० । पुरुषोत्क्षिप्ते आकाशयाने, सूत्र० २ श्रु० २ अ० । युग्यं पुरुषोत्क्षिप्तमाकाशयानं, जम्पानमित्यर्थः । जं० २ वक्ष० ।

जुग्गगय–युग्यगत–त्रि० । वाहनोपरि स्थिते, औ० ।

जुग्गय–युग्यक–'जुग्ग' शब्दार्थे, स्था० ४ ठा० ३ उ० ।

जुग्गायरिया–युग्याचर्या–स्त्री० । युग्यस्याऽऽचर्या वहनं गमनं युग्याचर्या । युग्यस्य गमने, स्था० ४ ठा० ३ उ० ।

युग्याचर्याभेदाः—

चत्तारि जुग्गायरिया पण्णत्ता । तं जहा-पंथजाई णाम-

मेगे,णो उप्पहजाई । उप्पहजाई णाममेगे, णो पंथजाई । एगे पंथजाई वि, उप्पहजाई वि । एगे णो पंथजाई, णो उप्पहजाई ॥

(जुग्गायरिय त्ति) युग्यस्य चर्या वहनं, गमनमित्यर्थः। क्वचित्तु "जुग्गारिय त्ति" पाठः, तत्रापि युग्याचर्येति, पथयायी एकं युग्यं भवति, नोत्पथयायीत्यादि चतुर्भङ्गी। इह च युग्यस्य चर्याद्वारेणैव निर्देशे चतुर्विधत्वेनोक्तत्वात् तच्चर्याया एवेहौकं चातुर्विध्यमवसेयमिति भावः । युग्यपक्षे तु युग्यमिव युग्यं, संयमयोगभारवोढा साधुरेव, स च पथियाय्यप्रमत्त उत्पथयायी लिङ्गावशेषः, उभययायी प्रमत्तश्चतुर्थः सिद्धक्रमेण सदसद्भयानुभयानुष्ठानरूपत्वात् । अथवा-पथ्युत्पथयोः स्वपरसमयरूपत्वाद् यायित्वस्य च गत्यर्थत्वेन बोधपर्यायत्वात् स्वपरसमयबोधापेक्षयेयं चतुर्भङ्गी नेयेति । स्था० ४ ठा० ३ उ०।

जुग्गारिया–युग्याचर्या–स्त्री०। 'जुग्गायरिया' शब्दार्थे, स्था० ४ ठा० ३ उ०।

जुज्जइत्ता–युक्त्वा–अव्य०। योगं कृत्वेत्यर्थे, आ० २ पाद।

जुज्झ–युध–धा०। युद्धे, दिवा०-आत्म०-अक०-अनिट्। युध्यते, अयुद्ध। वाच०। "संपलग्गो व जुज्झिउं"। आ० म० १ अ० १ खण्ड। युद्धे, न०। युध्-क्तः। शस्त्रादिके-पणव्यापारे योधने, वाच०। मुष्टयाऽऽदिना परस्परताडने, तं०। "जुज्झाइं बाहुजुज्झाइयाइं वट्टाइयाणं च" युद्धानि नाम-बाहुयुद्धाऽऽदीनि, यदि वा वर्त्तकाऽऽदीनां च। आ० म० १ अ०१ खण्ड। युद्धं कुक्कुटाऽऽदीनामिव मुष्टामुष्टि, शृङ्गिणामिव शृङ्गाशृङ्गि युयुत्सया योधयोर्बलानम । जं० २ वक्ष०। आयुधयुद्धे, ज्ञा० १ श्रु० १ अ०। वैरिणां परप्राणव्यपरोपणाध्यवसाये, आतु०। संग्रामे, "अप्पाणमेव जुज्झाहि, किं ते जुज्झेण बज्झओ।" उत्त० ९ अ०। नि०। प्रश्न०। द्रव्यतः संग्रामयुद्धं, भावतः परीषहाऽऽदियुद्धं, तद् द्विविधम्, आर्यानार्यभेदात्। तत्रानार्यं संग्रामयुद्धं, परीषहाऽऽदिरिपुयुद्धं त्वार्यम्। आचा० १ श्रु० ५ अ० ३ उ०। तदात्मके द्वासप्ततिकलाऽन्तर्गते कलाभेदे, ज्ञा० १ श्रु० १ अ०। औ०। जं०।

युद्धदर्शननिषेधो यथा—

जे निक्खू आसजुज्झाणि वा० जाव सूकरजुज्झाणि वा चक्खुदंसणवडियाए अभिसंधारेइ, अभिसंधारेंतं वा साइज्जइ ॥ ९७ ॥

"हयजुज्झ" गाहा ! हयोऽश्वस्तेषां परस्परतो युद्धं, एवमन्येषामपि, गजाऽऽदयः प्रसिद्धाः, शरीरेण विमध्यमः करटः, रक्तपादपक्षवट्टकः शिखी, धूम्रवर्णो लावकः, आदिग्रहणात् प्रसिद्धा. अस्थिपच्छूडियादिकरणेहिं जुद्धं, सव्वसंधिविक्खोभणं शिजुद्धं, पुव्वं जुद्धेण जुद्धितं पच्छा संधी विक्खोभिज्जति जत्थ तं जुद्धं। नि० चू० १२ उ०।

जुज्झंग–युद्धाङ्ग–न०। संग्रामाङ्गे, उत्त०।

साम्प्रतं युद्धाङ्गमाह-

जाणाऽऽवरणपहरणे, जुज्झे कुसलत्तणं च णीतीए ।
दक्खत्तं ववसातो, सरीरमारोग्गयं चेव ॥१४॥ उत्त०नि०।

(जाणावरणपहरणे त्ति) यानं च इत्यादि, तत्र सत्यपि न शक्तेरप्यभिनीवितुं शत्रुमत आवरणम्, आवरणं च कवचाऽऽदि; सत्यप्यावरणे प्रहरणं विना किं करोतीति, प्रहरणं प्रहरणं च खड्गाऽऽदि, यानाऽऽवरणप्रहरणानि, यदि युद्धे कुशलत्वं नास्ति, तदा किं यानाऽऽदिनेति युद्धे संग्रामे कुशलत्वम्, कुशलत्वं च प्रावीण्यरूपं, सत्यप्यस्मिन्नीति विना न शत्रुजयनमतो नीतिः, नीतिश्चापक्रमाऽऽदिलक्षणा, सत्यामपि चास्यां दक्षत्वाधीनो जयः, ततो दक्षत्वम्, दक्षत्वमाशुकारित्वं, सत्यप्यस्मिन्नित्यवसायस्य कुतो जय इति व्यवसायः, व्यवसायो व्यापारः, तत्रापि यदि न शरीरमदनीरुं, ततो न जय इति शरीरम्, अर्थात्परिपूर्णाङ्गम्। तत्राप्यारोग्यमेव जयायेति (आरोग्गयं ति) आरोग्यता, चः समुच्चये, एवोऽवधारणे। ततः समुदितानामेवैषां युद्धाङ्गत्वमिति सूत्रार्थः। उत्त० पाई० ३ अ०।

जुज्झंझाण–युद्धध्यान–न०। युद्धं वैरिणां परप्राणव्यपरोपणाध्यवसायः, तस्य ध्यानं युद्धध्यानम्। ध्यानभेदे, आर्तानां विनाशे, चेटकेन सह कोणिकनृपस्येव, अङ्गारवत्यादिग्रहणे चण्डप्रद्योतस्येव वा। आतु०।

जुज्झंत–युध्यत्–त्रि०। युद्धं कुर्वति, नि० चू० १ उ०। "महया रिउबलेण जुज्झंतो दिट्ठो।" आ० म० १ अ० १ खण्ड।

युध्यमान–त्रि०। शस्त्राणि व्यापारयति, "जुज्झंतं दढधम्माणं"। सूत्र० १ श्रु० ३ अ० १ उ०।

जुज्झकित्तिपुरिस–युद्धकीर्तिपुरुष–पुं०। युद्धजनिता या कीर्त्तिः, तत्प्रधानः पुरुषो युद्धकीर्तिपुरुषः। युद्धजनितकीर्तिमति पुरुषे, स०।

जुज्झकुसल–युद्धकुशल–पुं०। युद्धप्रवीणे, उत्त० ३ अ०। युद्धक्रियाज्ञानवति, आ० क०।

जुज्झणइ–युद्धनीति–स्त्री०। व्यूहरचनाऽऽदिके, स्था० ६ ठा०। संग्रामनिर्गमप्रवेशे च। आ० क०। उत्त०।

जुज्झदक्ख–युद्धदक्ष–पुं०। युद्धे आशुकारिणि, उत्त० ३ अ०।

जुज्झववसाय–युद्धव्यवसाय–पुं०। युद्धव्यापारे, उत्त० ३ अ०।

जुज्झवीरिय–युद्धवीर्य–पुं०। पुष्पदन्ताजिनसमकालिके नृपे, "जुज्झवीरियथुयस्स।" ति०।

जुज्झसज्ज–युद्धसज्ज–पं०। युद्धनिमित्तं सज्जः प्रगुणीभूतो युद्धसज्जः। रा०। युद्धप्रगुणे, भ० ७ श० ६ उ०। युद्धसज्जो रणप्रङ्ग इति। औ०।

जुज्झसद्ध–युद्धश्रद्ध–त्रि०। युद्धं संग्रामस्तत्र संजाता श्रद्धा यस्य सः। युद्धश्रद्धावति, प्रश्न० ३ आश्र० द्वार।

जुज्झसूर–युद्धशूर–पुं०। युद्धे शूरः सुभटः। रणदीक्षाबद्धकक्षे, स्था०। शूरविशेषे, "जुज्झसूरे वासुदेवे" युद्धशूरो वासुदेवः। कृष्णवत्तस्य षष्ट्यधिकेषु त्रिषु संग्रामशतेषु लब्धजयत्वात्। स्था० ४ ठा० ३ उ०।

जुज्झाइजुज्झ–युद्धातियुद्ध–न०। यत्र प्रतिद्वन्द्विहतानां पुरुषाणां पातः स्यादित्येवम्भूते खड्गाऽऽदिप्रक्षेपपूर्वके महायुद्धे, तदात्मके द्वासप्ततिकलाऽन्तर्गते कलाभेदे च। जं० २ वक्ष०। स०। औ०। ज्ञा०।

जुज्झारिय–युद्धार्य–न०। युद्धभेदे, युद्धं द्विविधम्, आर्याऽनार्यभेदात्। अनार्यं संग्रामयुद्धम्, परिषहाऽऽदिरिपुयुद्धं त्वार्यम्। आचा० १ श्रु० ५ अ० ३ उ०।

जुज्झारिह-युद्धार्ह-त्रि० । युद्धोचिते, "इमेण चेव जुज्झाहि किं ते जुज्झेण बज्झओ । जुद्धारिहं तु खलु दुल्लहं जहेत्थ कुसलेहिं ॥ १ ॥" आचा० १ श्रु० ५ अ० ३ उ० ।

जुज्झित्ता-युद्ध्वा-अव्य० युद्धं कृत्वेत्यर्थे, स्था० ३ ठा० २ उ० ।

जुण्ण-जूर्ण-जीर्ण-त्रि० । तृणभेदे, वाच० । 'जिण्ण' शब्दार्थे च । प्रा० १ पाद ।

जुण्णकुमारी-जीर्णकुमारी-स्त्री० । 'जिण्णकुमारी' शब्दार्थे, ज्ञा० २ श्रु० १ वर्ग १ अ० ।

जुण्णगुल्ल-जीर्णगुड-पुं० 'जिण्णगुल' शब्दार्थे, भ०८ श०६ उ० ।

जुण्णघय-जीर्णघृत-न० । 'जिण्णघय' शब्दार्थे, अनु० ।

जुण्णतंदुल-जीर्णतण्डुल-पुं० । 'जिण्णतंदुल' शब्दार्थे, ज्ञ० ८ श्रु० १ उ० ।

जुण्णतया-जीर्णत्वक्-स्त्री० । 'जिण्णतया' शब्दार्थे, आचा० २ श्रु० ४ चू० ।

जुण्णदुग्ग-जीर्णदुर्ग-न० । 'जिण्णदुग्ग' शब्दार्थे, ती०४ कल्प ।

जुण्णसुरा-जीर्णसुरा-स्त्री० 'जिण्णसुरा' शब्दार्थे, भ०८श०६ उ० ।

जुण्णसेट्ठि[ण्]-जीर्णश्रेष्ठिन्-पुं० । 'जिण्णसेट्ठि (ण)' शब्दार्थे, भ० २० ।

जुण्णाजुण्ण-जीर्णाजीर्ण-त्रि० । 'जिण्णाजिण्ण' शब्दार्थे, आ० म० १ अ० १ खण्ड ।

जुण्णुज्जाण-जीर्णोद्यान-न० । 'जिण्णुज्जाण' शब्दार्थे, ज्ञा० १ श्रु० १ अ० ।

जुण्णुद्धार-जीर्णोद्धार-पुं० 'जिण्णुद्धार' शब्दार्थे, ध०२अधि० ।

जुण्हा-ज्योत्स्ना-स्त्री० । 'जोण्हसिणा' शब्दार्थे, प्रा० २ पाद ।

जुति-द्युति-स्त्री० । द्यौ, 'सव्वजुईए' सर्वद्युत्याऽऽभरणादि संबन्धिन्या । ज्ञा० १ श्रु० ७ अ० ।

जुत्त-युक्त-त्रि० युज्-क्तः । युते, "जुत्ताणि बद्धीवद्दाऽऽदियुत्ताणि । औ० "गुत्ते जुत्ते तदा जए।" युक्तो ज्ञानाऽऽदिभिः । सूत्र०१ श्रु० २ अ०३ उ० । संयुते, पञ्चा०१२ विव० । मिलिते, अष्ट० १ अष्ट० । उपेते, षो०११ विव० । श्लिष्टे, आ०चू० । युक्तं श्लिष्टमित्यनर्थान्तरम् । आ०चू०१ अ० । समन्विते, आचा०१ श्रु०५ अ०१ उ० । परस्परसंबद्धे, सूत्र०१ श्रु०१ अ०१ उ० । विशे० । ज्ञा० । रा० । उचिते, अनु० । स्था० । जं० । रा० । जी० । योग्ये, नि०चू० १० उ० । युक्तं योग्यं घटमानमिति । नि० चू० १ उ० । "जुत्तो" युज्यते, घटत इत्यर्थः । नि० चू० १ उ० । उपपन्ने, चं० प्र० २० पाहु० । सूत्र० । सू० प्र० । संगते, ज्ञा० १ श्रु० १६ अ० । स्था० । विपा० । जं० । उपा० । पञ्चा० । युक्तियुक्ते, सूत्र० १ श्रु० ५ अ० २ उ० । संमते, दश० ४ तत्त्व । उद्युक्ते, प्रव० ६४ द्वार । अभ्यस्तयोगे योगिनि, पुं० । एलानीवृत्तभेदे च, न्यायाऽऽगतद्रव्याऽऽदौ, न० । वाच० ।

जुत्तगइ-युक्तगति-स्त्री० । मृदुगतौ, "जुत्तगती णाम मिदुगती।" न शीघ्रं गच्छतीत्यर्थः नि० चू० १६ उ० ।

जुत्तजोग-युक्तयोग-पुं० । संयुतकायाऽऽदिचेष्टे, "सव्वेहिं जुत्तजोगस्स ।" पञ्चा० १२ विव० ।

जुत्तपरिणय-युक्तपरिणत-त्रि० । सत्सामग्र्या युक्ततया परिणते यानाऽऽदौ, स्था० ४ ठा० ३ उ० ।

जुत्तपालिय-युक्तपालिक-त्रि० । युक्ताः परस्परं संबद्धा न तु छिद्रान्तराला पालिः सेतुर्यस्य स युक्तपालिकः । परस्परसंबद्धसेतुके, रा० । जी० ।

जुत्तफुलिय-युक्तस्पृष्ट-न० । उचितविन्दुनिपाते, "जुत्तफुलियनिहयरेणुयं ।" सं० ३४ सम० ।

जुत्तरूव-युक्तरूप-त्रि० । संगतस्वभावे, प्रशस्तस्वभावे, उचितवेषे, सुविहितनेपथ्ये च । स्था० ४ ठा० ३ उ० ।

जुत्तसोह-युक्तशोभ-त्रि० । युक्तं शोभते युक्तस्य वा शोभा यस्य तद्युक्तशोभम् । गवाऽऽदिसत्सामग्रीयुक्ततया शोभमाने याना-ऽऽदौ, स्था० ४ ठा० ३ उ० । युक्ता उचिता शोभा यस्य सः। युक्तशोभोपेते, स्था० ४ ठा० ३ उ० ।

जुत्ति-युक्ति-स्त्री० । योजने युक्तिः, युज्-क्तिन् । विशे० । योगे, "दिव्वाए जुत्तीए" युक्त्या विवक्षितार्थयोगेन । औ० । भक्तौ, ज्ञा० ८ ज्ञा० । द्रव्याऽऽदिसंयोगे, स० ५ अङ्ग । आचा० । ज्ञा० । युक्त्याऽन्यान्यभक्तिमिस्तथाविधद्रव्ययोजनेनेति । स्था० ८ ठा० । लोकन्याये, षो० ६ विव० । विशे० । हेतौ, स० ५ अङ्ग । उपपत्तौ, अष्ट० १६ अष्ट० । आ० । पञ्चा० । "एसा खलु तंतजुत्ति त्ति ।" तन्त्रयुक्तिः शास्त्रीयोपपत्तिः । पञ्चा० १८ विव० । अवितथभणितौ, "तत्थिमा जुत्ति वत्तव्वा ।" जीवा० ८ अधि० । युक्तयः सर्वप्रमाणनयगर्भा इति । षो० ५ विव० । अनुमाने, षो० वि० । अनुमानसाधने लिङ्गज्ञानाऽऽदौ, वाच० । "सव्वाहिं अणुजुत्तीहिं ।" सर्वैरेव हेतुदृष्टान्तैः प्रमाणानुसारैः सूत्र०१ श्रु० ११ अ० । युक्तयः साधनानि, असिद्धविरुद्धानैकान्तिकपरिहारेण पक्षधर्मत्वसपक्षत्वविपक्षव्यावृत्तिरूपतया युक्तिसङ्गता युक्तयः । सूत्र० १ श्रु० ३ अ० ३ उ० । योजनं युक्तिः । अर्थघटनायाम्, स० ५ अङ्ग । सूत्र० "तत्थ जुत्ती वि पयडा ।" जी० १ प्रति० । "सव्वजुईए" सर्वद्युक्त्या उचितेषु वस्तुघटनालक्षणयेति । ज्ञा० १ श्रु० ७ अ० । विधौ, कृ० १ उ० । युक्तिरर्थावधारणमित्युक्ते नाटकाङ्गविशेषे च । वाच० ।

जूर्ति-स्त्री० । ज्वर-क्तिन्, संप्रसारणम् । ज्वरे, वाच० ।

जुत्तिक्खम-युक्तिक्षम-त्रि० । उपपत्तिसहे, पञ्चा० १२ विव० । आ० म० । "नागमजुत्तिक्खमं होइ" । (३६५ गाथा) विशे० ।

जुत्तिगई-युक्तिगवी-स्त्री० । यथार्थवस्तुस्वरूपविभजनोपपत्तिर्युक्तिः । सैव गौर्युक्तिगवी । युक्तिरूपायां गवि, "मनोवत्सो युक्तिगवीं, मध्यस्थस्यानुधावति" । (२ श्लो०) अष्ट०१६ अष्ट० ।

जुत्तिज्ञ-युक्तिज्ञ-त्रि० युक्तिज्ञानवति, "गंधारे गीयजुत्तिण्णा ।" स्था० ७ ठा० ।

जुत्तिबाहिय-युक्तिबाधित-त्रि० । उपपत्तिनिराकृते, "जम्हा ण जुत्तिबाहिय-विसओ वि सदागमो होइ ।" (४४ गाथा) पञ्चा० १८ विव० ।

जुत्तिसुवण्ण-युक्तिसुवर्ण-पुं० । कृत्रिमसुवर्णे, दश० १० अ० ।

युक्तिसुवर्णस्य का वार्ता ?, इत्याह-

जुत्तीसुवण्णगं पुण, सुवण्णवण्णं तु यदि वि कीरेजा ।
ण हु होंति ते सुवण्णं, मेसेहिं गुणेहिऽमेतेहिं ॥३६॥

युक्त्या द्रव्यसंयोगेन, यत्सुवर्णं सत्सुवर्णाकारं स्यात् तद् युक्तिसुवर्णं, तत्पुनः सुवर्णवर्णं पीतच्छायमेव, यद्यपीत्यभ्युपगमेऽक्षि-

वेत विधीयेत, कथञ्चिन्नथापि ' न हु ' नैव भवति स्यात्, तदुक्तिसुवर्णम्, सुवर्णं हेम, शेषैर्वर्णव्यतिरिक्तैर्गुणैर्विषघाताऽऽदिभिरसंङ्किरिति गाथार्थः ॥ ३६ ॥ पञ्चा० १४ विव० ।

जुत्तकित्तिपुरिस–युक्तकीर्तिपुरुष–पुं० । ' जुत्तकित्तिपुरिस ' शब्दार्थे, स० ।

जुत्तकुसल–युक्तकुशल–पुं० । 'जुत्तकुसल' शब्दार्थे,आ०क० ।

जुत्तणीइ–युक्तनीति–स्त्री० । ' जुत्तणीइ ' शब्दार्थे,आ० क० ।

जुत्तदक्ख–युक्तदक्ष–पुं० । 'जुत्तदक्ख'शब्दार्थे, उत्त० ३ अ० ।

जुत्तववसाय–युक्तव्यवसाय–पुं० । ' जुत्तववसाय ' शब्दार्थे, उत्त० ३ अ० ।

जुत्तविरिय–युक्तवीर्य–पुं० । ' जुत्तविरिय ' शब्दार्थे, ति० ।

जुत्तसज्ज–युक्तसज्ज–पुं० । ' जुत्तसज्ज ' शब्दार्थे, रा० ।

जुत्तसङ्घ-युक्तश्रद्ध-त्रि० । 'जुत्तसङ्घ' शब्दार्थे,प्रश्न० ३आश्र०द्वार ।

जुत्तप्पइत्ता–युक्त्वा–अव्य० । युज्-क्त्वा । योगं कृत्वेत्यर्थे, प्रा० ४ पाद ।

जुम्म–युग्म–न० । युज्-मक् । पृषोदराऽऽदित्वाज्जस्य गः । "श्मा वा" । ८ । २ । ६३ । इतिप्राकृतसूत्रेण ग्मस्य म्मो वा० । प्रा० २ पाद । द्वित्वसंख्याऽन्विते पदार्थैक्यसंघाते, पिं० । ओघ० । युगले, "युग्मान्निकृतभूतानि, षण्मुन्योर्यमुरन्ध्रयोः रुद्रेण द्वादशी युक्ता, चतुर्दश्यथ पूर्णिमा । प्रतिपदाऽप्यमावस्या, तिथ्योर्युग्मं महाफलम् ॥" इत्युक्ते तिथियोगविशेषे, वाच० । गणपरिभाषया समराश्यात्मके राशिविशेषे च । स्था० ४ ठा० ३ उ० ।

युग्मभेदाः-

कइ णं भंते ! जुम्मा पण्णत्ता ? । गोयमा ! चत्तारि जुम्मा पण्णत्ता । तं जहा–कडजुम्मे, तेओए, दावरजुम्मे, कलिओए । से केणट्ठेणं भंते! एवं वुच्चइ० जाव कलिओए ? । गोयमा ! जे णं रासीचउक्कएणं अवहारेणं अवहीरेमाणे अवहीरेमाणे चउपज्जवसिए, से तं कडजुम्मे १ । जे णं रासीचउक्कएणं अवहारेणं अवहीरेमाणे अवहीरेमाणे तिपज्जवसिए, से तं तेओए २ । जे णं रासीचउक्कएणं अवहारेणं अवहीरेमाणे अवहीरेमाणे दुपज्जवसिए, से तं दावरजुम्मे ३ । जे णं रासीचउक्कएणं अवहारेणं अवहीरेमाणे अवहीरेमाणे एगपज्जवसिए, से तं कलिओए ४ । से तेणट्ठेणं गोयमा ! एवं वुच्चइ० जाव कलिओए ॥

" कइ णं " इत्यादि । (चत्तारि जुम्म त्ति) इह गणितपरिभाषया समो राशिर्युग्ममुच्यते, विषमस्तु ओज इति । तत्र च यद्यपीह द्वौ राशी युग्मशब्दवाच्यौ, द्वौ च ओजःशब्दवाच्यौ ततः,तथापीह युग्मशब्देन राशयो विवक्षिताः,अतश्चत्वारि युग्मानि, राशय इत्यर्थः । तत्र (कडजुम्मे त्ति) कृतं सिद्धं पूर्णं, ततः परस्य राशिसंङ्क्रान्तरस्याभावेन, न त्र्योजःप्रभृतिवद्, पूर्णं यद्युग्मं समराशिविशेषः, तत्कृतयुग्मम् । (तेओए त्ति) त्रिभिरादित एव, कृतयुग्माद्वोपरिवर्त्तिभिरोजो विषमराशिविशेषस्त्र्योजः । (दावरजुम्मे त्ति) द्वाभ्यामादित एव, कृतयुग्माद्वोपरिवर्त्तिभ्यां यत्परं युग्मं कृतयुग्मादन्यत्तन्निपातनविशेषात्परयुग्मम् । (कलिओए त्ति) कलिना एकेन आदित एव,कृतयुग्माद्वोपरिवर्त्तिना ओजो विषमराशिविशेषः कल्योज इति । "जे णं रासी" इत्यादि । यो राशिश्चतुष्केणापहारेणापह्रियमाणश्चतुष्पर्यवसितो भवति स कृतयुग्ममभिधीयते । यद्यपि राशौ चतूरूपत्वेन चतुष्कापहारो नास्ति, सोऽपि चतुष्पर्यवसितत्वसद्भावात्कृतयुग्ममेव,एवमुत्तरपदेष्वपि । भ० १८ श० ४ उ० । आचा० । स्था० । यस्तु त्रिपर्यवसितः स त्र्योजो, द्विपर्यवसितो द्वापरयुग्मं, एकपर्यवसितः कल्योज इति । इह गणितपरिभाषायां समराशिर्युग्म इत्युच्यते, विषमस्तु ओज इति । इयं च समयस्थितिः, लोके तु कृतयुगाऽऽदीनि एवमुच्यन्ते-"द्वात्रिंशच्च सहस्राणि, कलौ लक्षचतुष्टयम् । वर्षाणां द्वापराऽऽदौ स्या-देतद् द्विस्त्रिचतुर्गुणम्" ॥१॥इति । स्था० ४ ठा० ३ उ० ।

उक्तराशीनारकाऽऽदिषु निरूपयन्नाह-

णेरइयाणं चत्तारि जुम्मा पण्णत्ता । तं जहा–कडजुम्मे, तेओए, दावरजुम्मे, कलिओए । एवममुरकुमाराणं० जाव थणियकुमाराणं, एवं पुढविकाइयाणं आउतेउवाउवणस्सइबेइंदियाणं तेइंदियाणं चउरिंदियाणं पंचिंदियतिरिक्खजोणियाणं मणुस्साणं वाणमंतरजोइसियाणं वेमाणियाणं सव्वेसिं जहा णेरइयाणं ॥

"नेरइयाणं" इत्यादि सुगमम् । नवरम्, नारकाऽऽदयश्चतुर्भोऽपि स्युः, जन्ममरणाभ्यां हीनाधिकत्वसंभवादिति । स्था० ४ ठा० ३ उ० ।

अनन्तरं कृतयुग्माऽऽदिराशयः प्ररूपिताः । अथ तैरेव नारकाऽऽदीन् प्ररूपयन्नाह-

णेरइयाणं भंते ! किं कडजुम्मा,तेओआ,दावरजुम्मा,कलिओआ ?। गोयमा ! जहण्णपदे कडजुम्मा, उक्कोसपदे तेओआ, अजहण्णमणुक्कोसपदे सिय कडजुम्मा० जाव सिय कलिओआ० जाव थणियकुमारा ॥

" णेरइयाणं " इत्यादि । (जहण्णपदे कडजुम्म त्ति) अत्यन्तस्तोकत्वेन कृतयुग्माः कृतयुग्मसंङ्किताः, (उक्कोसपए त्ति) सर्वोत्कृष्टतायां त्र्योजःसंङ्किताः, मध्यमपदे चतुर्विधा अप्येतत्तच्चैवमाङ्गाप्रामाण्यादवगन्तव्यम् ।

वणस्सइकाइयाणं पुच्छा ?। गोयमा ! जहण्णपदे उक्कोसपदे अपदा , अजहण्णमणुक्कोसपदे सिय कडजुम्मा० जाव सिय कलिओआ । बेइंदियाणं पुच्छा ?। गोयमा ! जहण्णपदे कडजुम्मा, उक्कोसपदे दावरजुम्मा, अजहण्णमणुक्कोसपदे सिय कडजुम्मा० जाव सिय कलिओआ । एवं० जाव चउरिंदिया । सेसा एगिंदिया, जहा बेइंदिया, पंचिंदियतिरिक्खजोणिया० जाव वेमाणिया जहा णेरइया, सिद्धा जहा वणस्सइकाइया ॥

" वणस्सइकाइयाणं " इत्यादि । वनस्पतिकायिका जघन्यपदे, उत्कृष्टपदे चापदाः,जघन्यपदस्योत्कृष्टपदस्य च तेषामभावात् । तथाहि-जघन्यपदमुत्कृष्टपदं च तदुच्यते यन्नियतरूपं, तच्च यथा नारकाऽऽदीनां कालान्तरेणापि लभ्यते, न तथा वनस्पतीनां,तेषां परम्परया सिद्धिगमनेन तद्राशेरनन्तत्वापरित्यागेऽप्यनियतरूपत्वादिति । (सिद्धा जहा वणस्सइकाइय त्ति) जघन्यपदे, उत्कृष्टपदे चापदाः,अजघन्योत्कृष्टपदे च स्यात्कृतयुग्मा-

ऽऽदय इत्यर्थः । तत्र जघन्योत्कृष्टपदापेक्षया अपदत्वं वर्त्तमानतया तेषामनियतपरिमाणत्वाद्भावनीयमिति ॥

इत्थीओ णं भंते ! किं कडजुम्माओ पुच्छा ?। गोयमा ! जहण्णपदे कडजुम्माओ, उक्कोसपदे कडजुम्माओ, अजहण्णमणुक्कोसपदे सिय कडजुम्माओ० जाव सिय कलिओगाओ। एवं असुरकुमारइत्थीओ वि०जाव थणियकुमारइत्थीओ वि, एवं तिरिक्खजोणियइत्थीओ वि, एवं मणुस्सइत्थीओ वि, एवं वाणमंतरजोइसियवेमाणियदेवइत्थीओ वि ॥ जं० १८ श० ४ उ० ।

णेरइयाणं भंते ! कइ जुम्मा पण्णत्ता ?। गोयमा ! चत्तारि जुम्मा पण्णत्ता । तं जहा-कडजुम्मे० जाव कलिओए । से केणट्ठेणं भंते ! एवं वुच्चइ—णेरइयाणं चत्तारि जुम्मा पण्णत्ता । तं जहा-कडजुम्मे, अट्ठो तहेव । एवं० जाव वाउकाइयाणं। वणस्सइकाइयाणं पुच्छा ?। गोयमा ! वणस्सइकाइया सिय कडजुम्मा, सिय तेओगा, सिय दावरजुम्मा, सिय कलिओगा । से केणट्ठेणं भंते ! एवं वुच्चइ-वणस्सइकाइया०जाव कलिओगा ?। गोयमा ! उववायं पडुच्च से तेणट्ठेणं तं चेव । बेइंदियाणं जहा णेरइयाणं । एवं० जाव वेमाणियाणं । सिद्धाणं जहा वणस्सइकाइयाणं ॥

" नेरइयाणं भंते ! कति जुम्मा " इत्यादौ (अट्ठो तहेव त्ति) स चार्थः । " जे णं णेरइयाणं चउक्कएणं अवहारेणं अवहीरेमाणा अवहीरेमाणा चउपज्जवसिया ते णं नेरइया कडजुम्मे " इत्यादिरिति । वनस्पतिकायिकसूत्रे-(उववायं पडुच्च त्ति) यद्यपि वनस्पतिकायिका अनन्तत्वेन स्वभावात्कृतयुग्मा एव प्राप्नुवन्ति, तथापि गत्यन्तरेभ्य एकाऽऽदिजीवानां तत्रोत्पादमङ्गीकृत्य तेषां चतूरूपत्वमयौगपद्येन भवतीत्युच्यते उद्वर्त्तनामप्यङ्गीकृत्य,स्यादेतत्, केवलं सेह न विवक्षितेति ॥

अथ कृतयुग्माऽऽदिनिरेव राशिभिर्द्रव्याणां प्ररूपणायेदमाह-

धम्मत्थिकाए णं भंते ! दव्वट्ठयाए किं कडजुम्मे० जाव कलिओए ?। गोयमा ! णो कडजुम्मे, णो तेओए, णो दावरजुम्मे, कलिओए । एवं अधम्मत्थिकाए वि । एवं आगासत्थिकाए वि । जीवत्थिकाए णं पुच्छा ?। गोयमा ! कडजुम्मे, णो तेओए, णो दावरजुम्मे, णो कलिओए । पोग्गलत्थिकाए णं पुच्छा ?। गोयमा ! सिय कडजुम्मे० जाव सिय कलिओए, अद्धासमए जहा जीवत्थिकाए । धम्मत्थिकाएणं भंते ! पदेसट्ठयाए किं कडजुम्मे पुच्छा ?। गोयमा ! कडजुम्मे, णो तेओए, णो दावरजुम्मे, णो कलिओए । एवं० जाव अद्धासमए ॥

" धम्मत्थिकाए णं भंते ! " इत्यादौ (कलिओए त्ति) एकत्वाद्धर्मास्तिकायस्य चतुष्कापहारासंभवेनैकरूपैवावस्थानात्कलयोज एवासाविति । " जीवत्थि " इत्यादि । जीवद्रव्याणामवस्थितानन्तत्वात्कृतयुग्मतैव । " पोग्गलत्थिकाए " इत्यादि । पुद्गलास्तिकायस्यानन्तभेदत्वेऽपि संघातभेदभाजनत्वाच्चातुर्विध्यमध्येयम, अद्धासमयानां त्वतीतानागतानामवस्थितानन्तत्वेन कृतयुग्मत्वम् । अत एवाह-(अद्धासमए जहा जीवत्थिकाए त्ति) उक्तो द्रव्यार्थता । अथ प्रदेशार्थता तेषामेवोच्यते-" धम्मत्थि " इत्यादि । सर्वाण्यपि द्रव्याणि कृतयुग्मानि प्रदेशार्थतयाऽवस्थितासंख्यातप्रदेशत्वादवस्थितानन्तप्रदेशत्वाच्चेति ।

अथ द्रव्याण्येव क्षेत्रापेक्षया कृतयुग्माऽऽदिभिः प्ररूपयन्नाह-

धम्मत्थिकाए णं भंते ! किं ओगाढे, अणोगाढे ?। गोयमा ! ओगाढे, णो अणोगाढे । जइ ओगाढे, किं संखेज्जपएसोगाढे, असंखेज्जपएसोगाढे, अणंतपएसोगाढे ?। गोयमा ! णो संखेज्जपएसोगाढे, असंखेज्जपएसोगाढे, णो अणंतपएसोगाढे । जइ असंखेज्जपएसोगाढे, किं कडजुम्मपएसोगाढे पुच्छा ?। गोयमा ! कडजुम्मपएसोगाढे,णो तेओए, णो दावरजुम्मे, णो कलिओयपएसोगाढे । एवं अहम्मत्थिकाए वि, एवं आगासत्थिकाए, जीवत्थिकाए, पोग्गलत्थिकाए, अद्धासमए एवं चेव ।

"धम्मत्थिकाए" इत्यादि । (असंखेज्जपएसोगाढे त्ति) असंख्यातेषु लोकाऽऽकाशप्रदेशेष्ववगाढोऽसौ, लोकाऽऽकाशप्रमाणत्वात्तस्येति । (कडजुम्मपएसोगाढे त्ति) लोकव्यवस्थितासंख्येयप्रदेशत्वेन कृतयुग्मप्रदेशता, लोकाऽऽकाशप्रमाणत्वेन च धर्मास्तिकायस्यापि कृतयुग्मतैव । एवं सर्वास्तिकायानां,लोकावगाहित्वात्तेषाम् । नवरम्,आकाशास्तिकायस्यावस्थितानन्तप्रदेशत्वादात्मावगाहित्वाच्च कृतयुग्मप्रदेशावगाढताऽद्धासमयस्य चावस्थितासंख्येयप्रदेशाऽऽत्मकमनुष्यक्षेत्रावगाहित्वादिति ।

अथ कृतयुग्माऽऽदिभिरेव जीवाऽऽदीनि षड्विंशतिपदान्येकस्वपृथक्त्वाभ्यां निरूपयन्नाह--

जीवे णं भंते ! दव्वट्ठयाए किं कडजुम्मे पुच्छा ?। गोयमा ! णो कडजुम्मे, णो तेओए, णो दावरजुम्मे, कलिओए । एवं णेरइए वि, एवं० जाव सिद्धे ॥

" जीवेणं " इत्यादि । द्रव्यार्थतया एको जीव एकमेव द्रव्यं, तस्मात्कलयोजो, न शेषाः ।

जीवाणं भंते ! दव्वट्ठयाए किं कडजुम्मा ?। गोयमा ! ओघादेसेणं कडजुम्मा, णो तेओआ, णो दावरजुम्मा, णो कलिओआ । विहाणादेसेणं णो कडजुम्मा, णो तेओआ, णो दावरजुम्मा, कलिओआ । णेरइयाणं भंते ! दव्वट्ठयाए पुच्छा ?। गोयमा ! ओघादेसेणं सिय कडजुम्मा०जाव सिय कलिओआ । विहाणादेसेणं णो कडजुम्मा, णो तेओआ, णो दावरजुम्मा, कलिओआ, एवं० जाव सिद्धा।

"जीवाणं" इत्यादि । जीवा अवस्थितानन्तत्वादोघाऽऽदेशेन सामान्यतः कृतयुग्माः, (विहाणादेसेणं ति) भेदप्रकारेण एकैकश इत्यर्थः । कल्योजा एकत्वात्तत्स्वरूपस्य । "नेरइयाणं" इत्यादौ (ओघादेसेणं ति) सर्व एव परिगण्यमानाः (सिय कडजुम्मे त्ति) कदाचिच्चतुष्कापहारेण चतुरग्रा भवन्ति । "एवं सिय तेओआ" इत्याद्यप्यवगन्तव्यमिति । उक्ता द्रव्यार्थतया जीवाऽऽदयः ।

अथ तथैव प्रदेशार्थतयोच्यन्ते-

जीवेणं भंते ! पदेसट्ठयाए किं कडजुम्मा पुच्छा ?। गोयमा ! जीवपदेसे पडुच्च कडजुम्मे, णो तेओए, णो दावरजुम्मे णो कलिओए । सरीरपदेसे पडुच्च सिय कडजुम्मे० जाव सिय कलिओए,एवं० जाव वेमाणिए। सिद्धेणं भंते! पदेसट्ठयाए किं कडजुम्मे पुच्छा ?। गोयमा ! कडजुम्मे, णो तेओए, णो दावरजुम्मे, णो कलिओए ।

"जीवेणं" इत्यादि । (जीवपएसे पडुच्च कडजुम्मे त्ति) असंख्यातत्वादवस्थितत्वाच्च जीवप्रदेशानां चतुरग्र एव जीवप्रदेशतः । "सरीरपएसे पडुच्च" इत्यादि औदारिकाऽऽदिशरीरप्रदेशानामनन्तत्वेऽपि संयोगवियोगधर्मत्वादयुग्मपञ्चतुर्विधता स्यात् ।

जीवाणं भंते ! पदेसट्ठयाए किं कडजुम्मा पुच्छा ?। गोयमा ! जीवपदेसे पडुच्च ओघादेसेण वि विहाणादेसेण वि कडजुम्मा,णो तेओआ,णो दावरजुम्मा,णो कलिओआ । सरीरपदेसे पडुच्च ओघादेसेणं सिय कडजुम्मा०जाव सिय कलिओआ । विहाणादेसेणं कडजुम्मा वि०जाव कलिओआ वि । एवं णेरइया वि,एवं० जाव वेमाणिया । सिद्धाणं भंते ! पुच्छा ?। गोयमा ! ओघादेसेण वि विहाणादेसेण वि कडजुम्मा, णो तेओआ,णो दावरजुम्मा, णो कलिओआ ।

"जीवाणं" इत्यादि । (ओघादेसेण वि विहाणादेसेण वि कडजुम्म त्ति) समस्तजीवानां प्रदेशा अनन्तत्वादवस्थितत्वाच्च एकैकस्य प्रदेशा असंख्यातत्वादवस्थितत्वाच्च चतुरग्रा एव,शरीरप्रदेशापेक्षया त्वोघाऽऽदेशेन सर्वजीवशरीरप्रदेशानामयुग्मपञ्चातुर्विध्यम्, अनन्तत्वेऽपि तेषां संख्यातभेदभावेनानवस्थितत्वात् । "विहाणादेसेणं कडजुम्मा वि" इत्यादि । विधानाऽऽदेशेनैकैकजीवशरीरस्य प्रदेशगणनायां युगपच्चातुर्विध्यं प्रवर्तते, यतः कस्यापि जीवशरीरस्य कृतयुग्मप्रदेशता, कस्यापि त्र्योजःप्रदेशतेत्येवमादीति ।

अथ क्षेत्रतो जीवाऽऽदि तथैवाऽऽह-

जीवे णं भंते ! किं कडजुम्मपदेसोगाढे पुच्छा ?। गोयमा ! सिय कडजुम्मपदेसोगाढे० जाव सिय कलिओयपदेसोगाढे, एवं० जाव सिद्धे ।

"जीवे णं" इत्यादि । औदारिकाऽऽदिशरीराणां विचित्रावगाहनत्वाच्चतुरग्राऽऽदित्वमस्तीत्यत एवाऽऽह-"सिय कडजुम्मे" इत्यादि ।

जीवाणं भंते ! किं कडजम्मपदेसोगाढे पुच्छा ?। गोयमा ! ओघादेसेणं कडजुम्मपदेसोगाढा, णो तेओआ,णो दावरजुम्मा,णो कलिओआ । विहाणादेसेणं कडजुम्मपदेसोगाढा वि० जाव कलिओअपदेसोगाढा वि । णेरइयाणं पुच्छा ?। गोयमा ! ओघादेसेणं सिय कडजुम्मपदेसोगाढा वि० जाव सिय कलिओअपदेसोगाढा वि । विहाणादेसेणं कडजुम्मपदेसोगाढा वि० जाव सिय कलिओअपदेसोगाढा वि, एवं एगिंदियवज्जा० जाव वेमाणिया सिद्धा । एगिंदिया य जहा जीवा ।

"जीवाणं भंते !" इत्यादि । समस्तजीवैरवगाढानां प्रदेशानामसंख्यातत्वादवस्थितत्वाच्चतुरग्रतैवेत्योघाऽऽदेशेन कृतयुग्मप्रदेशावगाढाः; विधानाऽऽदेशतस्तु विचित्रत्वाद् यदवगाहनाया युगपच्चतुर्विधाः,ते नारकाः पुनरोघतो विचित्रपरिणामत्वेन विचित्रशरीरप्रमाणत्वेन विचित्रावगाहनाप्रदेशपरिमाणत्वादयौगपद्येन चतुर्विधा अपि, विधानतस्तु विचित्रावगाहनत्वादेकदाऽपि चतुर्विधास्ते भवन्ति । (एवं एगिंदियसिद्धवज्जा सव्वे वि त्ति) असुराऽऽदयो नारकवदुक्ताव्या इत्यर्थः। तत्रौघतस्ते कृतयुग्माऽऽदयः-अयौगपद्येन,विधानतस्तु युगपद्भवैते ; (सिद्धा एगिंदिया य जहाजीव त्ति) सिद्धा एकेन्द्रियाश्च यथा जीवास्तथा वाच्याः, ते चौघतः कृतयुग्मा एव, विधानतस्तु युगपच्चतुर्विधा अपि । युक्तिस्तूभयत्रापि प्राग्वत् ।

अथ स्थितिमाश्रित्य जीवाऽऽदि तथैव प्ररूप्यते-

जीवे णं भंते ! किं कडजुम्मसमयट्ठितीए पुच्छा ?। गोयमा ! कडजुम्मसमयट्ठितीए, णो तेओए, णो दावरजुम्मे, णो कलिओयसमयट्ठितीए । णेरइए णं पुच्छा ?। गोयमा ! सिय कडजुम्मसमयट्ठितीए० जाव सिय कलिओयसमयट्ठितीए । एवं० जाव वेमाणिए सिद्धे जहा जीवे ॥

"जीवेणं" इत्यादि । तत्रातीतानागतवर्तमानकालेषु जीवोऽस्तीति, सर्वोद्धया अनन्तसमयाऽऽत्मकत्वादवस्थितत्वाच्चासौ कृतयुग्मसमयस्थितिक एव । नारकाऽऽदिस्तु विचित्रसमयस्थितिकत्वात्कदाचिच्चतुरग्रः, कदाचिदन्यत्रितयवर्तीति ।

जीवाणं भंते ! पुच्छा ?। गोयमा ! ओघादेसेण वि,विहाणादेसेण वि कडजुम्मसमयट्ठितीया,णो तेओआ,णो दावरजुम्मसमयट्ठितीया, णो कलिओआ । णेरइयाणं पुच्छा ?। गोयमा ! ओघादेसेणं सिय कडजुम्मसमयट्ठितीया वि० जाव सिय कलिओअसमयट्ठितीया वि । विहाणादेसेणं कडजुम्मसमयट्ठितीया वि जाव० कलिओअसमयट्ठितीया वि, एवं० जाव वेमाणिया सिद्धा जहा जीवा ॥

"जीवाणं" इत्यादि । बहुत्वे जीवा ओघतो विधानतश्च चतुरग्रसमयस्थितिका एव, अनाद्यनन्तत्वेनाऽनन्तसमयस्थितिकत्वात्तेषाम् । नारकाऽऽदयः पुनर्विचित्रसमयस्थितिकाः,तेषां च सर्वेषां स्थितिसमयमीलने चतुष्कापहारे चौघाऽऽदेशेन स्यात्कृतयुग्मसमयस्थितिका इत्यादि, विधानतस्तु युगपच्चतुर्विधा अपि ।

अथ भावतो जीवाऽऽदि तथैव प्ररूप्यते-

जीवे णं भंते ! काइयसंजमजोगेहिं किं कडजुम्मे पुच्छा ?।

गोयमा ! जीवपदेसे पडुच्च णो कडजुम्मे० जाव णो कलिओए। सरीरपदेसे सिय कडजुम्मे० जाव सिय कलिओए। एवं० जाव वेमाणिए। सिद्धो चेव ण पुच्छिज्जइ ॥

"जीवेणं" इत्यादि (जीवपएसे पडुच्च णो कडजुम्म त्ति) अमूर्तत्वाज्जीवप्रदेशानां न कालाऽऽदिवर्णपर्यवानाश्रित्य कृतयुग्माऽऽदिव्यपदेशोऽस्ति; शरीरवर्णापेक्षया तु क्रमेण चतुर्विधोऽपि स्यात्। अत एवाऽऽह-" सरीर " इत्यादि। (सिद्धो न चेव पुच्छिज्जइ त्ति) अमूर्तत्वेन तस्य वर्णाऽऽद्यभावात्।

जीवा णं भंते ! किं कालवण्णपज्जवेहिं पुच्छा ?। गोयमा ! जीवपदेसे पडुच्च ओघादेसेण वि विहाणादेसेण वि, णो कडजुम्मा० जाव णो कलिओआ। सरीरपदेसे पडुच्च ओघादेसेणं सिय कडजुम्मा० जाव सिय कलिओआ। विहाणादेसेणं कडजुम्मा० वि जाव कलिओआ वि। एवं० जाव वेमाणिया, एवं थीलवण्णपज्जवेहिं वि दंडओ भाणियव्वो एगत्तपुहुत्तेणं, एवं० जाव फुक्खफासपज्जवेहिं। जीवे णं भंते ! आभिणिबोहियणाणपज्जवेहिं किं कडजुम्मे पुच्छा ?। गोयमा ! सिय कडजुम्मे० जाव सिय कलिओए, एवं एगिंदियवज्जं० जाव वेमाणिए। जीवा णं भंते ! आभिणिबोहियणाणपज्जवेहिं पुच्छा ?। गोयमा ! ओघादेसेणं सिय कडजुम्मा० जाव सिय कलिओआ। विहाणादेसेणं कडजुम्मा वि० जाव कलिओआ वि। एवं एगिंदियवज्जं० जाव वेमाणिया। एवं सुयणाणपज्जवेहिं वि, ओहिणाणपज्जवेहिं वि एवं चेव, णवरं विगलिंदियाणं णत्थि ओहिणाणं, मणपज्जवणाणं वि एवं चेव, णवरं जीवाणं मणुस्साण य सेसाणं णत्थि।

(आभिणिबोहियणाणपज्जवेहिं ति) आभिनिबोधिकज्ञानस्याऽऽवरणक्षयोपशमभेदेन ये विशेषास्तस्यैव च ये निर्विभागपरिच्छेदास्ते आभिनिबोधिकज्ञानपर्यवास्तैः, तेषां चानन्तत्वेऽपि क्षयोपशमस्य विचित्रत्वेनानवस्थितपरिणामत्वाद्यौगपद्येन जीवश्चतुरग्राऽऽदिः स्यात् (एवं एगिंदियवज्जं ति) एकेन्द्रियाणां सम्यक्त्वाभावान्नास्याभिनिबोधिकमिति न तदपेक्षया तेषां कृतयुग्माऽऽदिव्यपदेश इति। "जीवाणं" इत्यादि। बहुत्वे समस्तानामाभिनिबोधिकज्ञानपर्यवाणां मीलने चतुष्कापहारे वा युगपच्चतुरग्राऽऽदित्वमोघतः स्याद्, विचित्रत्वेन क्षयोपशमस्य तत्पर्यायाणामनवस्थितत्वात्। विधानतस्त्वेकदैव चत्वारोऽपि तद्भेदाः स्युरिति।

जीवे णं भंते ! केवलणाणपज्जवेहिं किं कडजुम्मे पुच्छा ?। गोयमा ! कडजुम्मे, णो तेओए, णो दावरजुम्मे, णो कलिओए। एवं मणुस्से वि, एवं सिद्धे वि। जीवा णं भंते ! केवलणाण पुच्छा ?। गोयमा ! ओघादेसेण वि विहाणादेसेण वि कडजुम्मा, णो तेओआ, णो दावरजुम्मा, णो कलिओआ। एवं मणुस्सा वि। जीवे णं भंते ! मइअण्णाणपज्जवेहिं किं कडजुम्मे ?; जहा आभिणिबोहियणाणपज्जवेहिं तहेव दो दंडगा, एवं सुयणाणपज्जवेहिं वि, एवं विभंगणाणपज्जवेहिं वि, चक्खुदंसणअचक्खुदंसणओहिदंसणपज्जवेहिं।

केवलज्ञानपर्यवपक्षे च सर्वत्र चतुरग्रत्वमेव वाच्यं, तस्यानन्तपर्यायत्वादवस्थितत्वाच्च, एतस्य च पर्याया अविभागपरिच्छेदरूपा एवावसेयाः, न तु तद्विशेषाः, एकविधत्वात्तस्येति। (दो दंडगा त्ति) एकत्वबहुत्वकृतौ द्वौ दण्डकावित्यर्थः। भ० २५ श० ४ उ०।

पुद्गलानेव कृतयुग्माऽऽदिभिर्निरूपयन्नाह-

परमाणुपोग्गला णं भंते ! दव्वट्ठयाए किं कडजुम्मे, तेओए, दावरजुम्मे कलिओए ?। गोयमा ! णो कडजुम्मे, णो तेओए, णो दावरजुम्मे, कलिओए। एवं० जाव अणंतपएसिए खंधे।

"परमाणु" इत्यादि। परमाणुपुद्गला ओघाऽऽदेशतः कृतयुग्माऽऽदयो भजनया भवन्ति, अनन्तत्वेऽपि तेषां स्वभावभेदतोऽनवस्थितस्वरूपत्वाद्, विधानतस्तु एकैकशः कल्योजा एवेति।

परमाणुपोग्गला णं भंते ! दव्वट्ठयाए किं कडजुम्मा पुच्छा ?। गोयमा ! ओघादेसेण सिय कडजुम्मा० जाव सिय कलिओआ, विहाणादेसेणं णो कडजुम्मा, णो तेओया, णो दावरजुम्मा, कलिओआ, एवं० जाव अणंतपएसिया खंधा। परमाणुपोग्गला णं भंते ! पदेसट्ठयाए किं कडजुम्मा पुच्छा ?। गोयमा ! णो कडजुम्मे, णो तेओए, णो दावरजुम्मे, कलिओए ?। दुपएसिए पुच्छा ?। गोयमा ! कडजुम्मे, णो तेओए, दावरजुम्मे, णो कलिओए। तिपएसिए पुच्छा ?। गोयमा ! णो कडजुम्मे, णो दावरजुम्मे, तेओए, णो कलिओए। चउप्पएसिए पुच्छा ?। गोयमा ! कडजुम्मे, णो तेओए, णो दावरजुम्मे, णो कलिओए। पंचपएसिए जहा परमाणुपोग्गले। छप्पएसिए जहा दुपएसिए। सत्तपएसिए जहा तिपएसिए। अट्ठपएसिए जहा चउप्पएसिए। णवपएसिए जहा परमाणुपोग्गले। दसपएसिए जहा दुपएसिए। संखेज्जपएसिए णं भंते ! पोग्गले। पुच्छा ?। गोयमा ! सिय कडजुम्मे० जाव सिय कलिओए। एवं असंखेज्जपएसिए वि। एवं अणंतपएसिए वि। परमाणुपोग्गले णं भंते ! पएसट्ठयाए किं कडजुम्मा पुच्छा ?। गोयमा ! ओघादेसेणं सिय कडजुम्मा० जाव सिय कलिओआ। विहाणादेसेणं णो कडजुम्मा, णो तेओआ, णो दावरजुम्मा, णो कलिओआ।

(पंचपएसिए जहा परमाणुपोग्गले त्ति) एकाग्रत्वात्कल्योज इत्यर्थः। (छप्पएसिए जहा दुपएसिए त्ति) द्व्यग्रत्वाद् द्वापरयुग्म इत्यर्थः। एवमन्यदपि। " संखेज्जपएसिए णं " इत्यादि। संख्यातप्रदेशिकस्य विचित्रसंस्थानाद्भजनया चातुर्विध्यमिति।

दुपएसिया णं पुच्छा ?। गोयमा ! ओघादेसेणं सिय कडजुम्मा, णो तेओआ, सिय दावरजुम्मा, णो कलिओआ। विहाणादेसेणं णो कडजुम्मा, णो तेओआ, दावरजुम्मा, णो कलिओआ।

" दुपएसिया णं " इत्यादि। द्विप्रदेशिका यदा समसंख्या भवन्ति तदा प्रदेशतः कृतयुग्माः, यदा तु विषमसंख्यास्तदा द्वापरयुग्माः। " विहाणादेसेणं " इत्यादि। ये द्विप्रदेशिक,स्ते

प्रदेशार्थतयैकैकशश्चिन्त्यमाना द्विप्रदेशत्वादेव द्वापरयुग्मा भवन्ति ।

तिपएसिया णं पुच्छा ?। गोयमा ! ओघादेसेणं सिय कडजुम्मा० जाव सिय कलिओआ । विहाणादेसेणं णो कडजुम्मा, तेओआ, णो दावरजुम्मा, णो कलिओआ ॥

"तिपएसिया णं" इत्यादि । समस्तत्रिप्रदेशिकमीलने तत्प्रदेशानां च चतुष्कापहारे चतुरग्रत्वं भजनया स्यात्, अनवस्थितसंख्यात्वात्तेषाम् । यथा चतुर्णां तेषां मीलने द्वादश प्रदेशाः, ते च चतुरग्राः पञ्चानां त्र्योजाः, षण्णां द्वापरयुग्माः, सप्तानां कल्योजा इति । विधानतस्त्रयाणुकत्वात् स्कन्धानामिति ।

चउप्पएसिया णं पुच्छा ?। गोयमा ! ओघादेसेण वि विहाणादेसेण वि कडजुम्मा, णो तेओआ, णो दावरजुम्मा, णो कलिओआ । पंचपएसिया जहा परमाणुपोग्गला । छप्पदेसिया जहा दुपदेसिया । सत्तपएसिया जहा तिपदेसिया । अट्ठपदेसिया जहा चउप्पदेसिया । णवपएसिया जहा परमाणुपोग्गला । दसपएसिया जहा दुपदेसिया । संखेज्जपएसिया णं पुच्छा ?। गोयमा ! ओघादेसेणं सिय कडजुम्मा० जाव सिय कलिओआ । विहाणादेसेणं कडजुम्मा वि० जाव कलिओआ वि । एवं असंखेज्जपएसिया वि, अणंतपएसिया वि ॥

" चउप्पएसिया णं " इत्यादि । चतुष्प्रदेशिकानामोघतो विधानतश्च प्रदेशाश्चतुरग्रा एव । (पंचपएसिया जहा परमाणुपोग्गल त्ति) सामान्यतः स्यात्कृतयुग्माऽऽदयः प्रत्येकं चैकाग्रा एवेत्यर्थः । (छप्पएसिया जहा दुपएसिय त्ति) ओघतः स्यात्कृतयुग्मद्वापरयुग्माः, विधानतस्तु द्वापरयुग्मा इत्यर्थः । एवमुत्तरत्रापि ।

अथ क्षेत्रतः पुद्गलाँश्चिन्तयन्नाह—

परमाणुपोग्गले णं भंते ! किं कडजुम्मपएसोगाढे पुच्छा ?। गोयमा ! णो कडजुम्मपएसोगाढे, णो तेओए, णो दावरजुम्मे, कलिओअपदेसोगाढे । दुपएसिए णं पुच्छा ?। गोयमा ! णो कडजुम्मपएसोगाढे, णो तेओए, सिय दावरजुम्मपएसोगाढे, सिय कलिओअपएसोगाढे । तिपएसिए णं पुच्छा ?। गोयमा ! णो कडजुम्मपएसोगाढे, सिय तेओअपएसोगाढे, सिय दावरजुम्मपएसोगाढे, सिय कलिओअपएसोगाढे । चउप्पएसिए णं पुच्छा ?। गोयमा ! सिय कडजुम्मपएसोगाढे० जाव सिय कलिओअपएसोगाढे, एवं० जाव अणंतपएसिए ।

परमाणुः कल्योजप्रदेशावगाढ एव, एकत्वात् । द्विप्रदेशिकस्तु द्वापरयुग्मप्रदेशावगाढो वा, कल्योजप्रदेशावगाढो वा स्यात्, परिणामविशेषात् । एवमन्यदपि सूत्रं नेयम् ।

परमाणुपोग्गला णं भंते ! किं कडजुम्मा पुच्छा ?। गोयमा ! ओघादेसेणं कडजुम्मपएसोगाढा, णो तेओआ, णो दावरजुम्मा, णो कलिओआ । विहाणादेसेणं णो कडजुम्मपएसोगाढा, णो तेओआ, णो दावरजुम्मा, कलिओअपएसोगाढा ।

" परमाणुपोग्गला णं " इत्यादि । तत्रौघतः परमाणवः कृतयुग्मप्रदेशावगाढा एव भवन्ति, सकललोकव्यापकत्वात्तेषाम् । सकललोकप्रदेशानां चासंख्यातत्वादवस्थितत्वाच्च चतुरग्रतेति । विधानतस्तु कल्योजप्रदेशावगाढाः, सर्वेषामेकैकप्रदेशावगाढत्वादिति ।

दुपदेसिया णं पुच्छा ?। गोयमा ! ओघादेसेणं कडजुम्मपएसोगाढा, णो तेओआ, णो दावरजुम्मा, णो कलिओआ । विहाणादेसेणं णो कडजुम्मपएसोगाढा, णो तेओअपएसोगाढा, दावरजुम्मपएसोगाढा वि, कलिओअपएसोगाढा वि । तिपएसिया णं पुच्छा ?। गोयमा ! ओघादेसेणं कडजुम्मपएसोगाढा, णो तेओआ, णो दावरजुम्मा, णो कलिओआ । विहाणादेसेणं णो कडजुम्मपएसोगाढा, तेओअपएसोगाढा वि, दावरजुम्मपएसोगाढा वि, कलिओअपएसोगाढा वि । चउप्पएसिया णं पुच्छा ?। गोयमा ! ओघादेसेणं कडजुम्मपएसोगाढा, णो तेओआ, णो दावरजुम्मा, णो कलिओआ । विहाणादेसेणं कडजुम्मपएसोगाढा वि० जाव कलिओअपएसोगाढा वि । एवं० जाव अणंतपएसिया ।

द्विप्रदेशावगाढास्तु सामान्यतश्चतुरग्रा एव, उक्तयुक्तेः । विधानतस्तु द्विप्रदेशिका ये द्विप्रदेशावगाढास्ते द्वापरयुग्माः, ये त्वेकप्रदेशावगाढास्ते कल्योजाः । एवमन्यदप्यूह्यम ।

परमाणुपोग्गले णं भंते ! किं कडजुम्मसमयट्ठिईए पुच्छा ?। गोयमा ! सिय कडजुम्मसमयट्ठिईए० जाव कलिओअसमयट्ठिईए । एवं० जाव अणंतपएसिए । परमाणुपोग्गलाणं किं कडजुम्मा पुच्छा ?। गोयमा ! ओघादेसेणं सिय कडजुम्मसमयट्ठिईया० जाव सिय कलिओअसमयट्ठिईया । विहाणादेसेणं कडजुम्मसमयट्ठिईया वि० जाव कलिओअसमयट्ठिईया वि । एवं० जाव अणंतपएसिया । परमाणुपोग्गला णं भंते ! कालवण्णपज्जवेहिं किं कडजुम्मे तेओए ?। जहाठिईए वत्तव्वया । एवं वण्णेसु वि सव्वेसु, गंधेसु वि एवं चेव, रसेसु वि० जाव महुररसो त्ति । अणंतपएसिए णं भंते ! खंधे कक्खडफासपज्जवेहिं किं कडजुम्मे पुच्छा ?। गोयमा ! सिय कडजुम्मे० जाव सिय कलिओए । अणंतपएसिया णं भंते ! खंधा कक्खडफासपज्जवेहिं किं कडजुम्मा पुच्छा ?। गोयमा ! ओघादेसेणं सिय कडजुम्मा० जाव सिय कलिओआ । विहाणादेसेणं कडजुम्मा वि० जाव कलिओआ वि । एवं मउय-गुरुयलहुया वि जाणियव्वा, सीओसिणणिद्धलुक्खा जहा वण्णा ।

(अणंतपएसिए णं भंते ! खंधे त्ति) इह कर्कशाऽऽदिस्पर्शाधिकारे यदनन्तप्रदेशिकस्यैव स्कन्धस्य ग्रहणं, तत्तस्यैव बादरस्य

कर्कशाऽऽदिस्पर्शचतुष्टयं नयति, न तु परमाणवादेरित्यभिप्रायेणेति । अत एवाऽऽह-(सोओसिणणिद्धलुक्खा जहा वज्ज त्ति) एतत्पर्यवाधिकारे परमाणवादयोऽपि वाच्या इति भावः । भ० २५ श० ४ उ० ।

जुम्मपएसिय-युग्मप्रादेशिक-त्रि० । समसंख्यप्रदेशनिष्पन्ने, तदात्मके प्रतरवृत्तभेदे च । भ० २५ श० ४ उ० ।

जुम्मद्ध-युष्मद्-त्रि० । युष्-मदिक् । संबोध्यचेतने त्रयवच्छब्दार्थे, तस्य चोक्तार्थे त्रिषु लिङ्गेषु सर्वनामता । वाच० । "युष्मदर्थपरे तः" । ८ । १ । २४६ । इति प्राकृतसूत्रेण युष्मच्छब्दे ऽर्थपरे यस्य तः । 'तुम्हारिसो, तुम्हकेरो' प्रा० १ पाद । (युष्मच्छब्दरूपसिद्धिस्तु एतत्कोशप्रथमभागस्य प्रथमपरिशिष्टे २८ पृष्ठे प्रदर्शिता, रूपाणि तु तृतीयपरिशिष्टे १७ पृष्ठे विवेचितानीति तत एवावगन्तव्यानि)

जुयल-युगल-न० । 'जुगल' शब्दार्थे, अनु० ।

जुयलधम्म-युगलधर्म-न० । 'जुगलधम्म' शब्दार्थे, आ० म० १ अ० १ खण्ड ।

जुयलधम्मिय-युगलधर्मिक-पुं० । 'जुगलधम्मिय' शब्दार्थे, तं० ।

जुयलयमणुय-युगलकमनुज-पुं० । 'जुगलयमणुय' शब्दार्थे, ज्यो० १ पाहु० ।

जुरुल्लिच्च-न० । देशी-गहने, दे० ना० ३ वर्ग ।

जुव[ण्]-युवन्-त्रि० । यु-कनिन् । श्रेष्ठे, निसर्गबलवति, वाच० । यौवनस्थे, जी० ३ प्रति० । रा० । युवा यौवनगामीति । ज्ञा० २२ ज्ञा० । युवा वयःप्राप्त इति । उपा० ७ अ० । भ० । "आषोडशाद्भवेद् बालः, तरुणस्तत उच्यते । " इत्युक्तवयस्के तरुणे, वाच० । ज्ञा० । आचा० । ज्ञा० । आव० ।

जुवइ-युवति [ती]-स्त्री० । युवन् तिः । युवत्-ङीप् वा । यौवनस्थायां स्त्रियाम्, वाच० । तरुण्याम्, ज्ञा० १ श्रु० १ अ० । आव० । औ० । प्रा० । रा० । "जुवई समणं बूया ।" युवतिरभिनवयौवना स्त्री । सूत्र० १ श्रु० ४ अ० १ उ० ।

जुवइजण-युवति [ती] जन-पुं० । तरुणीजने, प्रा० १ पाद ।

जुवंगव-युवगव-पुं० । युवाऽयं गौः युवगवः । यूनि गवि, "जुवंगवे त्ति वा ।" आचा० २ श्रु० ४ अ० २ उ० ।

जुवरज्ज-यौवराज्य-न० । प्राचीननृपतिभा यो यौवराज्याभिषिक्त आसीत्तेनाधिष्ठितं राज्यं परमनेन यावन्नाद्यापि द्वितीयो युवराजोऽभिषिक्तस्तावद्यौवराज्यमुच्यते । इत्युक्तलक्षणे राज्ये, बृ० १ उ० । नि०चू० यत्र नाद्यापि राजाभिषेको भवति । इत्युक्तलक्षणे यौवराज्ये, आचा० २ श्रु० ३ अ० १ उ० । बृ० ।

जुवराय-युवराज-पुं० । युवा चाऽसौ राजा च युवराजः । पितरि जीवति सति राजयोग्यः कुमारो युवराज उच्यते । इत्युक्तलक्षणे कुमारपदधारके, उत्त० १६ अ० । राज्ञो द्वितीयस्थानवर्त्तिनि, व्य० १ उ० । राजयोग्यकियत्कार्यकरे राजपुत्रे, वाच० । युवराज उत्थितोऽसन इति । जी० ३ प्रति० । आव० । आ० म० । व्य० । औ० । आचा० । बृ० ।

युवराजस्वरूपमाह-

आवस्सगाइं काउं, सो सुद्धाइं तु णिरवसेसाइं ।
अत्थाणीमज्झगओ, पेच्छइ कज्जाइं जुवराया ॥३१०॥

यो नाम प्रातरुत्थाय शौचपूर्वाणि आवश्यकानि शरीरचिन्तादेर्यतोऽवैनाऽऽदीनि निरवशेषाणि कृत्वा आस्थानिकामध्यगतः सन् कार्याणि प्रेक्षते चिन्तयति स युवराजः । व्य० १ उ० । युवा राजा यत्र । ष० स० । युवराजनि, आचा० २ श्रु० ३ अ० १ उ० ।

जुवाण-युवाण-युवन्-पुं० । "पुंस्यन आणो राजवच्च" ॥ ८ । ३ । ५६ ॥ इति प्राकृतसूत्रेण पुंल्लिङ्गे वर्तमानस्याऽन्तस्य स्थाने 'आण' इत्यादेशो वा भवति । प्रा० ३ पाद । युवा यौवनस्थस्तु प्राप्तवया एव इत्येवमणति व्यपदिशति लोको यमसौ निरुक्तिवशाद् युवाणः । वाच्याऽऽदिकालेऽपि दारकेऽभिधीयतेऽतो विशिष्टवयोऽवस्थापरिग्रहार्थमेतद्विशेषणम् । यौवनस्थ इत्येवं लोकेन व्यपदिश्यमाने प्राप्तविशिष्टवयोऽवस्थे, अनु० ।

जुव्वणत्थी-यौवनस्त्री-स्त्री० । तरुण्याम्, "पिच्छसि मुहं सतिलयं, सविसेसं सराएण अहरेणं । सकमक्कं सवियारं, तरलच्छि जुव्वणत्थीए ॥१२॥" ते० ।

जुसिय-जुष्ट-त्रि० । जुष्-क्तः । उच्छिष्टे, सेविते च । वाच० । प्रीते, "पाएण देइ लोगो, उवगारिसु परिचिए व जुसिए वा ।" स्था० ४ ठा० ४ उ० ।

जुहिट्ठिल-युधिष्ठिर-पुं० । युधि युद्धे स्थिरः । "गविषुधिभ्यां स्थिरः" ॥८।३।९५॥ इति (पाणि०) सूत्रेण षत्वम् । वाच० । हस्तिनापुरस्थे पाण्डुराजस्य ज्येष्ठपुत्रे, ज्ञा० १ श्रु० १६ अ० । "जुहिट्ठिलपामोक्खाणं पंचण्हं पंडवाणं । " अन्त० १ श्रु० ५ वर्ग १ अ० ।

जुहुट्ठिल-युधिष्ठिर-पुं० । "युधिष्ठिरे वा" ॥ ८ । १ । १६ ॥ इति प्राकृतसूत्रेण युधिष्ठिरशब्दे आदेरित उत्वं वा । प्रा० १ पाद । 'जुहिट्ठिल' शब्दार्थे, प्रा० १ पाद । ज्ञा० ।

जू-जू-पुं० । जवे, व्योम्नि, पिशाचे, गणके, जने, सचिवे, प्राङ्भावे, नवे च । सरस्वत्याम्, स्त्री० । " जूः पुंल्लिङ्गे जवे व्योम्नि, पिशाचगणके जने । जूः स्त्रियां तु सरस्वत्यां, जातिः स्यात्सचिवे पुमान् ॥१॥ " इति । एका० । "जूजुवौ जुच इत्यपि, प्राङ्भावे भवे इति । " एका० ।

जूअअ-पुं० । देशी-चातके, दे० ना० ३ वर्ग ।

जूय-यूप-पुं० । न० । यु-पक्-पृषो० दीर्घः । युगे, " जूयसहस्सं" यूपा युगास्तेषां सहस्रम् । कल्प० ५ क्षण । प्रश्न० । स्तम्भविशेषे, जं० २ वक्ष० । यज्ञस्तम्भे, जं० ३ वक्ष० । उत्त० । यज्ञीयपशुबन्धकाष्ठभेदे, यागसमाप्तिचिह्नार्थे स्तम्भे च, वाच० । जयस्तम्भे, पुं० । वाच० । तदात्मके सामुद्रिकशास्त्रोक्ते पुरुषस्य करचरणस्थे प्रशस्तलक्षणभेदे, जं० २ वक्ष० । स्त्रीनामकर्मणि पश्चिमस्यां दिशि स्थिते पातालकलशे च । प्रव० २७२ द्वार । यूत-न० । दिव-क्तः । क्रीडाविशेषे, औ० । प्रव० । स्था० । उत्त० । " अणुक्कसं सो जूयं खेलइ । " आ० म० १ अ० १२ खण्ड । उत्त० । ('मणुस्सत्त' शब्देऽस्य दृष्टान्तः) पाशकक्रीडायाम्, अप्राणिकरणकक्रीडायां, कैतवे च । वाच० । तदात्मके द्वासप्ततिकलाऽन्तर्गते कलाभेदे, ज्ञा० १ श्रु० १ अ० । जं० । स० ।

जूयखलय-यूतखलक-न० । यूतस्थगिरौ, ज्ञा० १ श्रु० २ अ० ।

जूयग-यूपक-पुं० । सन्ध्याप्रभा अब्भ्रप्रभा च यत्रैकत्र भवतस्तद् "जूयगो त्ति" भणितम् । सन्ध्याप्रभाऽब्भ्रप्रभयोर्मिश्रत्वे, तदात्मके आन्तरिक्षेऽस्वाध्यायभेदे च । "दसविहे अंतलिक्खए असज्झाइए पण्णत्ते । तं जहा-उक्कावाए, दिसिदाहे, गज्जिए, विज्जुए, निग्घाए, जूयए, जक्खालित्तए, धूमिए, महिए, रयउग्घाए ।" स्था० १० ठा० । शुक्लपक्षप्रतिपदाऽऽदिदिनत्रयं यावद्यैः सन्ध्याकल्पेरा आक्रियन्ते ते यूपका इति । भ० ७ श० ३ उ० । आव० ।

पश्चिमस्यां दिशि स्थिते स्वनामख्याते महापाताले, स्था० ४ ठा० २ उ० । (यूपकस्य विशेषवक्तव्यता तु ' असज्झाइय ' शब्दे प्रथमभागे ८२६ पृष्ठे निरूपिता)

संझालेओवरणो, उ जूयगो सुक्कदिण तिण्णि ॥ १७ ॥

(जूयगो त्ति) " संझुप्पहा, वंदप्पहा य, जेणं जुगवं भवंति तेण जूयगो, सा संझुप्पहा वंदप्पभा वारिया फिट्टं ति, न नज्जइ, सुक्कपक्खपाडिवगादिसु दिणेसु संझाभाओ देव य अणुज्जमाणे कालवेलं न मुणंति, अओ ते तिन्नि दिणा पाओसियकालं न गेण्हंति, तेसु तिसु दिणेसु पाओसियसुत्तपोरिसिं न करेंति " इति गाथार्थः ॥ आव० ४ अ० । जलमध्यवर्त्तितटे, क्षेत्रे, वृ० १ उ० । (तत्र न वस्तव्यं न वाऽऽतापनाऽऽदिक्रिया कर्त्तव्येति ' दगतीर ' शब्दे वक्ष्यते)

जूयगर–द्यूतकर–त्रि० । द्यूतं करोति कृ-अच् । पाशकाऽऽदिक्रीडाकारके, वाच० । प्रश्न० ।

जूयगार–द्यूतकार–त्रि० । द्यूतं करोति । कृ-एवुल् । पाशकाऽऽदिक्रीडाकारके, वाच० । प्रश्न० ।

जूयचिइ–यूपचिति–स्त्री० । यज्ञेषु यूपचयने, औ० ।

द्यूतचिति–स्त्री० । द्यूतानि क्रीडाविशेषास्तेषां चितिः । द्यूतचयने, औ० ।

जूयप्पमाय–द्यूतप्रमाद–पुं० । द्यूतं प्रतीतं, तदपि प्रमाद एव द्यूतप्रमादः । प्रमादभेदे, (स्था०) " द्यूताऽऽसक्तस्य सच्चित्तं, धनं कामाः सुचेष्टितम् । नश्यन्त्येव परं शीर्षं, नामापि च विनश्यति " ॥ १ ॥ स्था० ६ ठा० ।

जूयप्पसंगि[ण्]–द्यूतप्रसङ्गिन्–त्रि० । द्यूताऽऽसक्ते, ज्ञा० १ श्रु० २ अ० । आ० म० ।

जूया–यूका–स्त्री० । संस्वेदजे श्रीन्द्रियजीवविशेषे, आचा० १ श्रु० १ अ० ६ उ० । प्रज्ञा० । " लिक्खं वा जूयं वा " । आचा० २ श्रु० २ चू० । अष्टलिक्षाऽऽत्मके प्रमाणभेदे, स्था० ६ ठा० । अनु० । " अट्ठलिक्खाओ सा एगा जूया।" भ० ६ श० ७ उ० । जं० । उत्त० । प्रव० । ज्यो० । नं० ।

जूयासेज्जायरय–यूकाशय्यातरक–पुं० । यूकानां स्थानदातरि, न० १५ श० १ उ० ।

जूर–जूर–धा० । वयोहानौ, अक० । वधे, सक० - दिवा० - आत्म० - सेट् । जूर्यते, अजूरिष्ट, जूर्णः । वाच० । पश्चात्तापे, " अयहारि व्व जूरह । " यथा वाऽयसो लोहस्याऽऽहर्त्ता अपान्तराले रूप्यादिलाभे सत्यपि दूरमानीतमिति कृत्वा नोज्झितवान्, पश्चात्स्वावस्थानाऽवाप्तावल्पलाभे सति जूरितवान्, पश्चात्तापं कृतवान्, एवं भवन्ताऽपि जूरयिष्यन्तीति । सूत्र० १ श्रु० ३ अ० ४ उ० ।

कुध्–धा० । कोपे, दिवा० - पर० - अक० । सोपसर्गसक० - अनिट् । " कुधेर्जुरः " । ८ । ४ । १३५ । इति प्राकृतसूत्रेण कुधेर्जूर इत्यादेशो वा भवति । 'जूरइ' ' कुज्झइ ' । प्रा० ४ पाद । कुध्यति, भृत्यमभिकुध्यति । अक्रुधत । वाच० ।

खिद्–धा० । दैन्ये, दिवा० - रुधा० च - आत्म० - अक० - अनिट् । " खिदेर्जूरविसूरौ " ॥ ८ । ४ । १३२ ॥ इति प्राकृतसूत्रेण खिदेरेतावादेशौ वा भवतः । 'जूरइ' 'विसूरइ' 'खिज्जइ' । प्रा० ४ पाद । खिद्यते, खिन्ते । वाच० । परिघाते, तुदा० - पर० - अक० - अनिट् मुचादिः । खिन्दति, खिन्दतः, अखैत्सीत्, खिन्नः । वाच० ।

जूरण–जूरण–न० । वयोहानौ, सूत्र० २ श्रु० ४ अ० । गर्हणे, सूत्र० १ श्रु० १६ अ० । पश्चात्तापे, सूत्र० १ श्रु० ३ अ० ४ उ० ।

जूरव–वञ्च–धा० । प्रतारणे, " वञ्चेर्वेहवसवजूरवोमच्छाः " ॥ ८ । ४ । १९ ॥ इति प्राकृतसूत्रेण वञ्चेरेते आदेशा वा भवन्ति । ' जूरवइ, वंचइ ' । प्रा० ४ पाद ।

जूरावण–जूरण–न० । शोकातिरेकाच्छरीरजीर्णतापापणायाम्, भ० ३ श० २ उ० ।

जूरुमिल्लय–पुं० । देशी-गोपाले, दे० ना० ३ वर्ग ।

जवग–यूपक–पुं० । ' जूयग ' शब्दार्थे, स्था० १० ठा० ।

जूवचिइ–यूपचिति–स्त्री० । ' जूयचिइ ' शब्दार्थे, औ० ।

जूस–जूष–पुं० न० । जूष् घञ्, अच् वा । मुद्गाऽऽदीनां क्वाथे, वाच० । सुव्रतएकुलजीरककटुभाण्डाऽऽदिरसाऽऽत्मके व्यञ्जनभेदे, स्था० ३ ठा० १ उ० । सू० प्र० । चं० प्र० । प्र० । प्रश्न० ।

जूसणा–जूषणा–स्त्री० । सेवायाम्, औ० ।

जोषणा–स्त्री० । सेवनायाम्, स्था० ४ ठा० ३ उ० । सूत्र० ।

जूसिय–जुष्ट–त्रि० । सेविते, स्था० ४ ठा० ३ उ० ।

जोषित–त्रि० । सेविते, सूत्र० २ श्रु० ७ अ० ।

जूह–यूथ–न० । यु-थक्, पृषो० - दीर्घः । सजातीयसमुदाये, वाच० । यूथं समूह इति । स्था० १० ठा० । उत्त० ।

जूहमल्लवाइ[ण्]–यूथमल्लवादिन्–पुं० । वादिविशेषे, कल्प० ६ क्षण ।

जूहवइ–यूथपति–पुं० । यूथस्वामिनि, ज्ञा० १ श्रु० १ अ० । " भावी यूथपतिः स्वयम् । " आ० क० । " सो वानरजूहवई । " आ० क० ।

जूहाहिव–यूथाधिप–पुं० । यूथस्वामिनि, आ० म० १ अ० १ खण्ड ।

जूहाहिवइ–यूथाधिपति–पुं० । यूथस्य चतुर्विधसंघस्याधिपतिः । यूथस्वामिनि, उत्त० ११ अ० ।

जूहिय–यूथिक–त्रि० । " यूथभवे, " पुव्वजूहियट्ठाणाणि वा अवरजूहियट्ठाणाणि वा गयजूहियट्ठाणाणि वा " । आचा० २ श्रु० २ चू० ।

जूहिया–यूथिका–स्त्री० । यु - थक्, पृषो० - दीर्घः, स्वार्थे कन्, अत इत्वम् - टाप् । अम्लानके पाठान्तरे, यूथ्यां च । वाच० । पुष्पप्रधाने गुल्माऽऽत्मके वनस्पतिविशेषे, आचा० १ श्रु० १ अ० ५ उ० । प्रज्ञा० । रा० । जं० । " जूहियाकुसुमेइ वा । " आ० म० १ अ० १ खण्ड ।

जूहियापुड–यूथिकापुट–न० । यूथिकायाः पुटः पत्राऽऽदिमयं तद्भाजनं यूथिकापुटम् । यूथिकापुष्पस्य पत्राऽऽदिमये भाजने, ज्ञा० १ श्रु० १७ अ० । आ० म० ।

जूहियामंडवग–यूथिकामण्डपक–पुं० । यूथिका वनस्पतिविशेषः, तन्मयो मण्डपकः यूथिकामण्डपकः । यूथिकामये मण्डपे, औ० ३ प्रति० । जं० ।

जे–जे–अव्य० । पादपूरणे, वृ० १ उ० । व्य० । तं० । " जे " इति निपातः पादपूरणार्थः । तथा चाह वररुचिः स्वप्राकृतलक्षणे—" इजेराः पादपूरणे " ॥ ८ । २ । २१७ ॥ एते पादपूरणे प्रयोक्तव्या इति वृत्तिः । आ० म० १ अ० १ खण्ड प्रश्न० । पश्चा० । ज्ञा० । वाक्यालङ्कारे, जे इति निपातो वाक्यालङ्कारार्थ इति । विशे० । " जे त्ति खलु णिद्देसे " जे इति । नि० चू० १ उ० । य इत्यस्य स्थानेऽपि ' जे ' इति । कल्प० १ क्षण ।

जेऊण–जित्वा–अव्य० । जयं कृत्वेत्यर्थे, प्रा० ४ पाद ।

जेट्ठ–ज्येष्ठ–त्रि० । वृद्ध-इष्ठनि ज्यादेशः। भ० १ श० १ उ० । जं० । सू० प्र० । उत्त० । चं० प्र० । अनु० । यो यस्याऽऽदौ स तस्य ज्येष्ठः । यथा–द्विकस्यैको ज्येष्ठः, त्रिकस्य त्वेककोऽनुज्येष्ठः, चतुष्काऽऽदीनां तु स एव ज्येष्ठानुज्येष्ठः । एवं त्रिकस्य द्विको ज्येष्ठः, स एव चतुष्कस्यानुज्येष्ठः, पञ्चकाऽऽदीनां तु स एव ज्येष्ठाऽनुज्येष्ठ इति । अनु० । विशे० । भ० म० । अतिवृद्धे, " कणिट्ठमज्झिमजट्ठा धिइसंघयणेण उवसढा । " ज्येष्ठमतिशयवृद्धम्, उत्कृष्टमित्यर्थः । उत्त० पाई ४ अ० । श्रेष्ठे, " गिहत्थधम्मा परमं ति नच्चा ।" गृहस्थधर्मात्परमं प्रधानं ज्येष्ठमित्येवं ज्ञात्वा । विशे० । रत्नाधिके, पञ्चा० १६ विव० । कल्प० ।

यत्र च गच्छे ज्येष्ठकनिष्ठौ न ज्ञायेते, न तद्गच्छम् । तथा च–

जत्थ य जेट्ठ-कणिट्ठो, जाणिज्जइ जेट्ठवयणबहुमाणो ।
दिवसेण वि जो जेट्ठो,न य हीलिज्जइ स गोयमा! गच्छो॥४६॥

यत्र च गणे ज्येष्ठः कनिष्ठश्च ज्ञायते, तत्र ज्येष्ठः पर्यायेण वृद्धः, कनिष्ठः पर्यायेण लघुः। तथा यत्र ज्येष्ठस्य वचनमादेशो ज्येष्ठवचनं, तस्य बहुमानः संमानो ज्ञायते । ' जेट्ठविणयबहुमाणो त्ति ' पाठे तु ज्येष्ठस्य विनयबहुमानो ज्ञायेते, तथा यत्र च दिवसेनापि यो ज्येष्ठः स न हील्यते, चकारात्र पर्यायेण लघुरपि गुणवृद्धो न हील्यते, सिंहगिरिशिष्यैर्वज्रशिशुरिव । हे गौतम ! स गच्छो ज्ञेय इति । ग० २ अधि० । अग्रजे, पुं० । वाच० ।

" उच्चिअं एअं पि सहो-अरम्मि जं निअइ अप्पसममेव ।
जेट्ठं व कणिट्ठं पि हु, बहु मन्नइ सव्वकज्जेसु ॥ ८ ॥ "

(निअइ त्ति) पश्यति (जेट्ठं व त्ति) ज्येष्ठो भ्राता पितृतुल्यः, तमिव तथा । ध० २ अधि० ।

ज्यैष्ठ–त्रि० । वृद्ध-इष्ठनि ज्याऽऽदेशः । ततः स्वार्थिक अण् अतिवृद्धे, श्रेष्ठे च । अग्रजे, पुं० । वाच० ।

जेट्ठकप्प–ज्येष्ठकल्प–कल्पभेदे, ज्येष्ठो रत्नाधिकः, स एव कल्पो वृद्धलघुव्यवहारो यत्र स ज्येष्ठकल्पः। कल्पभेदे, कल्प० १ क्षण।

पुव्वतरं सामइयं, जस्स कयं जो व तेणुवट्ठविओ ।
एस किइकम्मजेट्ठो, ण जातिमुत्तो व्व पुव्वखे व ॥

यस्य सामायिकं पूर्वतरं प्रथमतरं कृतमारोपितम्, यो वा तेषु प्रथममुपस्थापितः, स एव कृतिकर्मज्येष्ठो भण्यते, न पुनर्द्विपक्केऽपि संयतपक्षे संयतोपक्के च जातितो बृहत्तरं जन्मपर्यायमङ्गीकृत्य, श्रुततः प्रभूतं श्रुतमाश्रित्य ज्येष्ठ इहाधिक्रियते, इह च मध्यमसाधूनां यस्य सामायिकं पूर्वतरं स्थापितं स ज्येष्ठः, पूर्वपश्चिमानां तु यस्य प्रथममुपस्थापना कृता स ज्येष्ठ इति । वृ० ६ उ० । व्य० । पं० भा० । पं० चू० ।

ज्येष्ठस्वरूपं गाथात्रयेणाऽऽह—

उवठावणाएँ जेट्ठो, विसेसओ पुरिमपच्छिमाणाणं ।
पव्वज्जाए उ तहा, मज्झिमगाणं णिरतियारो ॥ २९ ॥

उपस्थापनया महाव्रताऽऽरोपणेन, ज्येष्ठो रत्नाधिको विज्ञेयः, पूर्वपश्चिमतीर्थजानानामित्यत्र साधूनामिति शेषः। प्रव्रज्यया तु प्रव्राजनेन पुनस्तत्रेति ज्येष्ठा ज्ञेय इत्येतत्सम्बन्धनार्थः । मध्यमकानां द्वाविंशतितीर्थजसाधूनां,निरतिचारोऽतिचाररहितः । सातिचारस्तु नोपस्थापनया प्रव्रज्यया वा ज्येष्ठः,प्राक्तन्योरुत्तरोरप्रमाणत्वात्, पुनरुपस्थापनायाः सामायिकाऽऽरोपणस्यैव च प्रमाणत्वादिति ॥ २९ ॥

उपस्थापनया ज्येष्ठ इत्युक्तम् , अथ तद्विधिमुपदर्शयन्नाह–

पढिएँ य कहिएँ अहिगए,परिहर उवठावणाएँ कप्पो त्ति ।
एक्कं तं हि विसुद्धं, सम्मं णवएण भेएण ॥ ३० ॥

पठितेऽधीते सूत्रतः शस्त्रपरिज्ञाऽध्ययने । चशब्दो जिनक्रमः । कथिते व्याख्याते ऽर्थतः । अधिगते च ज्ञाते, पर्तास्मन्नेव सति । (१) एकारस्य तु ह्रस्वपाठः प्राकृतत्वात् । परिहरन् वर्जयन् सन् परिहार्यम् उपस्थापनाया महाव्रताऽऽरोपणस्य कल्पो योग इत्येवंभूतः प्राणी । किं परिहरन्नित्याह-षट्कं जीवनिकायषट्कम्,अथवा षट्कं वा, त्रिभिर्मनोवाक्कायैः, विशुद्धं निर्दोषं यथा भवति तथा, सम्यग्ज्ञानवतः, नवकेन नवपरिमाणेन, भेदेन विकल्पेन, नवभिर्भेदैरित्यर्थः मनसा कृतकारितानुमतिभिः,एवं वाचा कायेन चेति ॥ ३० ॥

अथ द्वयोर्युगपदुपस्थाप्यमानयोः को ज्येष्ठः?, इत्याऽऽह–

पितिपुत्तमाइयाणं, समगं पत्ताण जेट्ठ पितिपज्जिं ।
थोवंतरे विभिण्णे, पव्वज्जाए उवट्ठवणा ॥ ३१ ॥

पितापुत्राऽऽदीनां जनकसुतप्रभृतीनाम्,आदिशब्दाद्राजामात्यमातादुहितृराज्ञ्यमात्याऽऽदिग्रहः। समकं युगपत्,प्राप्तानां विवक्षितावस्थानाधिगमनोपस्थापनायोग्यतामवाप्तानां यौगपद्येनैवोपस्थाप्यमानानां, ज्येष्ठा रत्नाधिकाः पितृप्रभृतयः पित्राद्यः स्युः, आदिशब्दाद्राजामात्यराज्ञ्यादिग्रहः । अथ पुत्राऽऽदिः प्राप्तो न पित्राद्यः,तदा को विधिः?, इत्याह-स्तोकेऽल्पेऽन्तरे विशेषे दिनद्वयाऽऽदितः पित्राद्यरपि प्राप्स्यतीत्येवंरूपे, विभिन्नस्य प्रतीक्षणं कार्यम्। पित्राद्यौ प्राप्ते सति युगपदेव पित्रा पुत्राऽऽदिरुपस्थापनीयो माभूत्पुत्राऽऽद्यपेक्षया लघुनाकरणेन पित्राऽऽदेरसमाधुक्रियमाणाऽऽदिरिति । अथ बहुन्तरं,तदा को विधिः?,इत्याह-प्रज्ञापनया पित्राद्देः सम्बोधनया–"तव पुत्रो यदि विवक्षितां महाव्रतश्रियं प्राप्नोत्यनेषां च ज्येष्ठतरो भवति तवैवाभ्युदयः, ततो न त्वयाऽस्य विघ्नो विधेयः" इत्यादिलक्षणया,उपस्थापना व्रताऽऽरोपणा कार्या । अथ प्रज्ञाप्यमानोऽपि यदि न प्रतिपद्यते, तदा प्रतीक्षणीयं यावदसौ प्राप्तः,द्वये राजाऽऽदयो युगपद्यदा नूपस्थाप्यन्ते तदा यथाऽऽसन्नं ज्येष्ठतेति ।तदेवं प्रकारद्वयेनापि ज्येष्ठत्वे सर्वेऽप्यवस्थिता इति गाथात्रयार्थः ॥३१॥ पञ्चा० १७ विव० ।

जेट्ठज्ज–ज्येष्ठार्य–पुं० । प्रथमे आर्ये, नि० चू० १ उ० ।

जेट्ठजूइ–ज्येष्ठद्यूति–पुं० । ' जिठभूइ ' शब्दार्थे, ति० ।

जेट्ठमहाजण–ज्येष्ठमहाजन–पुं० ज्येष्ठार्यसाधुसमुदाये,बृ०१उ०।

जेट्ठयर–ज्येष्ठतर–त्रि० । ' जिठयर ' शब्दार्थे, प्रा० २ पाद ।

जेट्ठा–ज्येष्ठा–स्त्री० । ज्येष्ठनक्षत्रयुक्तायाम्, वयोज्येष्ठायाम्, ज्येष्ठस्य पत्न्याम्, गङ्गायाम्, मलह्यम्, अश्वन्यवधिकेऽष्टादशे इन्द्रदेवताके नक्षत्रे, वाच० । चं० प्र० । ज्यो० । स्था० । अनु० । आव० । " जेट्ठाणक्खत्ते तितारे पण्णत्ते " । स० १ सम० । स्था० । भगवतो महावीरस्य स्वनामख्यातायां दुहितरि, तस्याश्च ज्येष्ठेति वा सुदर्शनेति वाऽभिधानमिति वा नामेति । विशे० । वैशालीनगरनृपतेश्चेटकस्य

(१) "एदोतौ पदान्ते प्राकृते ह्रस्वौ वा" इति हैमे छन्दोऽनुशासने ।

स्वनामख्यातायां दुहितरि, सा च " जेट्ठा कुंडग्गामे वद्धमाणसामिणो नंदिवद्धणस्स दिण्ण त्ति"। आ० चू० ४ अ०।

जेट्ठाणुजेट्ठ-ज्येष्ठानुज्येष्ठ-त्रि०। चतुष्काद्यपेक्षया प्रथमे, आ० म० १ अ० १ खण्ड। अनु०। विशे०। (अस्य यथा तत्त्वं तथा 'जेट्ठ' शब्दे १५८५ पृष्ठे व्याख्यातम्)

जेट्ठामूल-ज्येष्ठामूल-पुं०। ज्येष्ठा, मूलं वा पौर्णमास्यां यत्र स्यात्स ज्येष्ठामूलो मासः। ज्येष्ठमासे, "गिम्हकालसमयंमि जेट्ठामूलम्मि मासम्मि।" औ०। ओघ०।

जेट्ठामूली-ज्येष्ठामूली-स्त्री०। ज्येष्ठपूर्णमास्याम्, सू० प्र० १० पाहु०। जं०। चं० प्र०।

जेट्ठोवग्गह-ज्येष्ठावग्रह-पुं०। पर्युषणायाम्, नि० चू० १० उ०।

जेण-जैन-पुं०। जिनो देवताऽस्य अण्। जैनधर्मावलम्बिनि अर्हदुपासके, वाच०।

यत्र-अव्य०। यस्मिन्नित्यर्थे, " जेणेव कामदेवे समणोवासए तेणेव उवागच्छइ, उवागच्छइत्ता।" यत्र कामदेवः श्रमणोपासकस्तत्रोपागच्छति स्म। उपा० २ अ०।

जेणधम्म-जैनधर्म-पुं०। आर्हतधर्मे, "आमगोरससंपृक्त-द्विदलं च विवर्जयेत्। द्वाविंशतिरनन्तानि,जैनधर्माधिवासितः॥१॥" जैनधर्मेणाऽऽर्हतधर्मेणाधिवासितो भावितोऽऽत्मा। ध०१ अधि०।

जेणवत्त [ण्]-जैनवर्त्मन्-न०। जिनोदितमार्गे, 'अरूया जैनवर्त्मना।' द्वा० १३ द्वा०।

जेणसासण-जैनशासन-न०। जिनोदिते शास्त्रे,"समस्तवस्तुविस्तारे, विसर्पत्तैलवज्जले। जीयाच्छ्रीशासनं जैनं, धीदीपोद्दीप्तिवर्द्धनम॥१॥" उत्त० १ अ०।

जेणसिद्धंत-जैनसिद्धान्त-पुं०। जैनाऽऽगमे, "निरस्तकुमतिध्वान्त-सत्पदार्थप्रकाशकम्। नित्योदयं नमस्कुर्मो, जैनसिद्धान्तभास्करम्" ॥ १ ॥ क० प्र०।

जेणिंदवागरण-जैनेन्द्रव्याकरण-न०। व्याकरणभेदे, कल्प० १ क्षण।

जेणेसर-जैनेश्वर-त्रि०। जिनेश्वराणामयम्। जिनेश्वरसंबन्धिनि, प्रति०।

जेत्तिअ-यावत्-त्रि०। " इदंकिमश्च डेत्तिअ-केत्तिल्ल-मेत्तहाः" । ८। २। १५७। इति प्राकृतसूत्रेणेदंकिमभ्यां यत्तदेतद्भ्यश्च परस्यातोडेत्तिअडेत्तिलडमेत्तहा इत्यादेशा भवन्ति, पक्षे लुक् च। प्रा० २ पाद। यत्परिमाणे, वाच०।

जेत्तिल्ल-यावत्-त्रि०। यत्परिमाणे, प्रा० २ पाद।

जेत्तुल्ल-यावत्-त्रि०। "अतेर्डेत्तुल्लः"। ८। ४। ४३५। इति प्राकृतसूत्रेणापभ्रंशे यच्छब्दात्परस्यातोर्डेत्तुल्ल इत्यादेशः। यत्परिमाणे, प्रा० ४ पाद।

जेत्थु-यत्र-अव्य०। " यत्रतत्रयोस्त्थ डिदेत्थ्वतु" ॥ ८। ४। ४०४। इति प्राकृतसूत्रेणापभ्रंशे यत्रशब्दावयवस्य त्रस्य डित् एत्थु इत्यादेशः। प्रा० ४ पाद। यस्मिन्नित्यर्थे, वाच०।

जेत्तह-यावत्-त्रि०। यत्परिमाणे, प्रा० २ पाद।

जेत्तिप्प-जित्वा-अव्य०। "एप्पिण्वेप्पिणवेव्वयिणवः" ८। ४। ४४०। इति प्राकृतसूत्रेणापभ्रंशे क्त्वाप्रत्ययस्य एप्पि एप्पिणु एपि एविणु इत्यादेशाः। प्रा० ४ पाद। जित्वेत्यर्थे, वाच०।

जेप्पिणु-जेतुम्-अव्य०। "तुम एवमणाणहमणहिं च" ८। ४। ४४१। इति प्राकृतसूत्रेणापभ्रंशे तुमः प्रत्ययस्य एवं, अण, अणहं अणहिं एते चत्वार आदेशा वा पक्षे-एप्पि एप्पिणु एपि एविणु एते चत्वार आदेशाः। प्रा० ४ पाद।

जित्वा-अव्य०। जयं कृत्वेत्यर्थे, प्रा० ४ पाद।

जेम-भुज-धा०। भक्षणे, " भुजो भुञ्जजिमजेमकम्माणहसमाणचमढचड्डाः"। ८। ४। ११०। इति प्राकृतसूत्रेण भुजेर्जेमाऽऽदेशः। 'जेमइ'। प्रा० ४ पाद। " पुव्वण्हे सालो चुप्पइ, अवरण्हे जेम्मइ।" आ० म० १ अ० १ खण्ड।

जेमण-जेमन-त्रि०। वटकपूरणाऽऽदिके, "जेमणविहिपरिमाणं करेइ।" जेमनानि वटकपूरणाऽऽदीनि। उपा०१ अ०। उद्दाहाऽऽदिजेमनवारगृहे यथा यतीनां विहर्तुं न कल्पते, तथैकपौषधिकसत्कजेमनवारगृहे, अन्यथा वा?, इति प्रश्ने, उत्तरम्-विवाहजेमनवारवत्पौषधिकसत्कजेमनवारगृहेऽपि मुनीनां विहर्तुं न कल्पत इति। २०४ प्र०। सेन० २ उल्ला०।

जेमणय-देशी-न०। दक्षिणाङ्गे, दे० ना० ३ वर्ग।

जेमावण-जेमापन-न०। भोजनकारणे, भ० ११ श० ११ उ०।

जेमिणि-जैमिनि-पुं०। अन्यतीर्थिके मुनिभेदे, विशे०। सूत्र०। जैमिनिश्चिरतरकालभावी पटुप्रज्ञः सम्यग्वेदार्थस्य परिज्ञाताऽऽसीत्। नं०।

जेय-जेय-त्रि०। जेतव्ये, " कहं णु जिच्चमेलिक्खं, जिच्चमाणा न संविदे। (२२ गाथा)" [जिच्चं ति] आर्षत्वाद् जीयते हार्यते अतिरौद्रैरिन्द्रियाऽऽदिभिरात्मा तदिति जेयं, तच्चेह प्रक्रमान्मानुष्यगतिलक्षणम्। उत्त० ७ अ०।

जेया-जेतृ-त्रि०। जयकर्तरि,"जेया ति वा" जेता कर्मरिपूणाम्। भ० २० श० २ उ०। " जेएण परिचित्तए।" (सूत्र०) " सूरं मण्णइ अप्पाणं, जाव जेयं न पस्सइ।" सूत्र०१ श्रु० ३ अ०१ उ०।

जेवडु-यावत्-त्रि०। " वा यत्तदोर्डेवडुः " ॥८। ४। ४०७॥ इति प्राकृतसूत्रेणापभ्रंशे यत्तदित्येतयोरन्तयोर्यावत्तावतोर्वकाराऽऽदेरवयवस्य डित्प्रत्ययस्य डित्प्रत्ययवत् इत्यादेशः। प्रा० ४ पाद। यत्परिमाणे, वाच०।

जेवि-जित्वा-अव्य०। 'जेप्पि' शब्दार्थे, प्रा० ४ पाद।

जेविणु-जित्वा-अव्य०। 'जेप्पि' शब्दार्थे, प्रा० ४ पाद।

जेसलमेरु-जयशल्यमेरु-पुं०। स्वनामख्याते नगरभेदे,ही०३प्रका०।

जेहिल्ल-जेहिल्ल-पुं०। वसिष्ठगोत्रोत्पन्ने आर्यनागस्य शिष्ये स्वनामख्याते स्थविरे, "जेहिलं च वासिट्ठं।" कल्प० ८ क्षण। "थेरस्स णं अज्जनागस्स गोयमसगुत्तस्स अज्जजेहिले थेरे अंतेवासी वासिट्ठसगुत्ते।" कल्प० ८ क्षण।

जेह्-यादृक्-त्रि०। " यादृक्तादृक्कीदृगीदृशां दादेर्डेदः"। ८। ४। ४०२। इति प्राकृतसूत्रेणापभ्रंशे यादृग् इत्यादेरादेरवयवस्य डित् एह इत्यादेशः। प्रा० ४ पाद। यत्सदृशे, वाच०।

जो-द्यो-स्त्री०। द्युत-क्विप्। " द्यस्यर्यो जः " । ८ । २ । २४। इति प्राकृतसूत्रेण द्यस्य जः। प्रा० २ पाद। स्वर्गे,आकाशे च। वाच०। ज्यो-धा०। नियमे, उपनये, क्षेपोपदेशे च। क्र्यादि०-आत्म०-सक०-अनिट्। ज्यवते, अज्यास्त। वाच०।

ज्योक्-अव्य० । ज्यो-को-किः । संप्रत्यर्थे, कालभूयस्त्वे, शीघ्रतायाम्, प्रश्ने च । वाच० ।

जोअण-न० । देशी-लोचने, दे० ना० ३ वर्ग ।

जोइंगण-पुं० । देशी-इन्द्रगोपे, दे० ना० ३ वर्ग ।

जोइ-ज्योतिस्-पुं० । द्योतते द्युत्यतेऽनेन वा द्युत्-इसन् । आदेर्दस्य जः । सूर्ये, अग्नौ, वाच० । "रुप्पमलं व जोइणा ।" ज्योतिषाऽग्निना । आचा० २ श्रु० १६ अ० । दश० । स्था० । भ० । सूअ० । " सप्पी जहा पडियं जोइमज्झे ।" सूअ० १ श्रु० १३ अ० । स्था० । " किं भाहणा. जोइसमारभंता । " उत्त० १६ अ० "के ते जोई, के य ते जोइट्ठाणा ।" किं ज्योतिः कोऽग्निः । उत्त० १६ अ० । विपा० । ज्वलदग्नौ, ज्योतिष एवाऽऽधारे ज्वलदग्निः । आह च चूर्णिकृत्-" जोइ त्ति मल्लगाइहिओ अग्गी जलंतो त्ति ।" नं० । प्रकाशस्वभावे प्रदीपाऽऽदिके, षो० १५ विव० "जहा हि अंधे सह जोइणा वि । " ज्योतिषा प्रदीपाऽऽदिनाऽपि सह वर्तमानो न पश्यति । सूअ० १ श्रु० १२ अ० । " सव्वराइएण जोइणा किंयायमाणाणं । " सूअ०२ श्रु०२ अ० । "दुविहो य होइ जोई, असव्वराई य सव्वराई य ।" नि० चू० १६ उ० । ज्योतिरग्निकयोर्दृष्टान्तं,तद् द्विविधम्-असार्वरात्रिकम्-कियतामपि रात्रिं यत् प्रज्वलति । तद्विपरीतं सार्वरात्रिकम् । उभयोरपि तिष्ठतां (गीतार्थानां) चतुर्लघुकाः । बृ० १ उ० । स्वर्गे, विशे० । आ० म० । ज्योतिरग्निः, तत्कार्यकारिणि कल्पवृक्षभेदे, स० १० समo । मेथिकावृक्षे, वाच० । ज्योतिरिव ज्योतिः । सम्यग्ज्ञाने, आदित्याऽऽदिप्रकाशे, स्था० ४ ठा० ३ उ० । सूत्र० । नेत्रकनीनिकामध्यस्थे दर्शनसाधने पदार्थे, नक्षत्रे, स्वयं प्रकाशे, सर्वावभासके चैतन्ये, वाच० । ग्रहनक्षत्रतारकाऽऽदिके, चं० प्र० । ज्योतींषि ग्रहनक्षत्रतारका इति । चं० प्र० १ पाहु० । आव० । प्रश्न० । ग्रहचन्द्रसूर्यनक्षत्रतारकाणां ज्योतिषां ज्योतिष्कलक्षणे विमानविशेषे, स० । तत्प्रतिपादके ज्योतिषामयने शास्त्रभेदे, नि० ३ वर्ग ३ अ० । तद्रूपे द्वासप्ततिकलाऽन्तर्गते कलाभेदे च । न० । कल्प० ७ क्षण । ज्योतिरेव ज्योतिः । उपार्जितज्ञाने, प्रसिद्धि प्राप्ते, स्था० ४ ठा० ३ उ० । सत्कर्मकारितयोज्ज्वलस्वभावे च । त्रि० । स्था० ४ ठा० ३ उ० ।

योगिन्-पुं० । योगोऽस्य विद्यते इति योगी । नं० । योगवत्सम्पन्ने, षो० १५ विव० । योगिनो योगभाज इति । द्वा० २६ द्वा० । योगाभ्यासपरे, षो० वि० । दिव्यदृष्टौ, षो० वि० । मनोवाक्कायरोधके, अष्ट० २ अष्ट० । योगो धर्मः शुक्लध्यानलक्षणः स येषां विद्यते इति योगिनः । साधौ, आव० ४ अ० । " सम्यक्त्वज्ञानचारित्रयोगः सद्योग उच्यते । एतद्योगाद्धि योगी स्यात् परमब्रह्मसाधकः" ॥ १ ॥ एतदाकारे साधकभेदे, पं० सू० ४ सूत्र ट्ठी० । रत्नत्रयरूपमोक्षोपायिनि, अष्ट० २ अष्ट० ।

तत्रोपाय च नवधा, योगिनेदप्रदर्शनात् । [३१]

तत्र मुक्तिरागे उपाये च, नवधा नवभिः प्रकारैर्योगिनेदस्य प्रदर्शनाऽनुपबृंहणात् । तथाहि-मृदूपायो मृदुसंवेगो, मध्योपायो मृदुसंवेगः, अधुपायो मृदुसंवेगा,मृदूपायो मध्यसंवेगो, मध्योपाया मध्यसंवेगः, अधुपायो मध्यसंवेगः, मृदूपायोऽधिसंवेगः, मध्योपायोऽधिसंवेगः, अधुपायोऽधिसंवेगश्चेति नवधा योगिन इति योगाचार्याः । द्वा० १२ द्वा० । तीर्थंकरे, गीतार्थे च । बृ० ।

गीतार्थमधिकृत्य-

कत्ता इव सो कत्ता, एवं जोगी वि नायव्वो ।

कर्ता इव तीर्थंकर इवाकोपनीयत्वात् कर्ता द्रष्टव्यः । एवं योग्यपि ज्ञातव्यः । किमुक्तं भवति ?-यथा तीर्थंकरः प्रशस्तमनोवाक्काययोगं प्रयुञ्जानो योगी भण्यते, एवं गीतार्थोऽप्युत्सर्गापवादबलवेत्ताऽपवादक्रियां कुर्वाणोऽपि प्रशस्तमनोवाक्काययोगं प्रयुञ्जानो योगीव ज्ञातव्यः । बृ० १ उ० । अध्यात्मशास्त्रानुष्ठायिनि अन्यतीर्थिके परिव्राजकभेदे, औ० । युज-घिनुण् । संयोगवति, त्रि० । वाच० ।

जोइअ-पुं० । देशी-अश्वे, दे० ना० ३ वर्ग ।

जोइअंग-ज्योतिरङ्ग-पुं० । ज्योतिरग्निः, तत्र च सुषमसुषमायामग्नेरभावाद् ज्योतिरवयवस्तु सौम्यप्रकाशमिति भावः। तत्कारणत्वाज्ज्योतिरङ्गः । सुषमसुषमाभवे ज्योतिषिके कल्पवृक्षभेदे, स्था० १० ठा० । ति० । ज्योतिषिकाः सूर्यमण्डलमिव स्वतेजसा सर्वमप्यवभासयन्तः सन्तीति । तं० ।

जोइउवगूढ-ज्योतिरुपगूढ-त्रि० । ज्योतिषाऽग्निनोपगूढः समालिङ्गितः । अग्निनोपगूढे जतुकुम्भे, " जोइउवगूढे । " सूअ० १ श्रु० ४ अ० १ उ० ।

जोइक्ख-पुं० । देशी-दीपे, ' जोइक्ख ' शब्दश्च देश्यो दीपे वर्त्तते । प्रव० ४ द्वार । दे० ना० । ' जोइक्खो ' नाम दीपः । " जोइक्खं तह चन्नाहलयं च दीवं मुणेज्जाहि । " व्य० ७ उ० ।

जोइजसा-ज्योतिर्यशस-स्त्री० । कौशाम्बीनगरस्थायां स्वनामख्यातायां वत्सपालिकायाम्, आव० ४ अ० ।

जोइट्ठाण-ज्योतिःस्थान-न० । अग्निस्थाने, नं० । "के ते जोई के य ते जोइट्ठाणा ।" उत्त० । ज्योतिःस्थानं यत्र ज्योतिर्निधीयते । उत्त० १२ अ० ।

जोइणाण-योगिज्ञान-न० । सकलातीतानागतापहार्थसाक्षात्कारिणि, सम्म० २ काण्ड । समाधिविशेषवन्नरावबोधे, पञ्चा० १६ विव० । योगिज्ञानस्य सकलातीतानागतापहार्थसाक्षात्कारिणोऽतीतानागततत्तत्पदार्थज्ञानेऽपि भवान्युपगमात् । सम्म० २ काण्ड ।

जोइणाह-योगिनाथ-पुं० । तीर्थंकरे, द्वा० १४ द्वा० ।

जोइणीपट्टण-योगिनीपत्तन-न० । पुरभेदे, अष्टापदकल्पमधिकृत्य-" ग्रन्थोऽयं परिपूर्णतामनजत श्रीयोगिनीपत्तने । " ती० ४७ कल्प ।

जोइबल-ज्योतिर्बल-त्रि० । ज्योतिर्ज्ञानं बलं यस्य, आदित्याऽऽदिप्रकाशो वा ज्योतिः, तदेव तत्र वा बलं यस्य स तथा । सदाचारवति ज्ञानवति, दिनचारिणि च । स्था० ४ ठा० ३ उ० ।

जोइबलपज्जलण-ज्योतिर्बलप्रज्वलन-त्रि० । ज्योतिर्बलेन ज्ञानबलेन प्रकाशबलेन वा प्रज्वलति दर्पितो भवत्यवष्टम्भं करोति यः स तथा । ज्ञानवति,प्रकाशचारिणि च । स्था० ४ ठा० ३ उ० ।

जोइबलपरजण ज्योतिर्बलप्ररजन-त्रि० । ज्योतिः सम्यग् ज्ञानम्, आदित्याऽऽदिप्रकाशो वा ज्योतिः,तदेव तत्र वा बलं यस्य स तथा । सदाचारवति, दिनचारिणि च । स्था० ४ ठा० ३ उ० ।

जोइबलपलज्जण-ज्योतिर्बलप्रलज्जन-त्रि० । ज्योतिर्बलेन ज्ञानबलेन प्रकाशबलेन वा संचरन् प्रलज्जते इति ज्योतिर्बलप्रलज्जनः । मिथ्याज्ञानिनि, अन्धकारचारिणि च । स्था० ४ ठा० ३ उ० ।

जोइबुद्धि–योगिबुद्धि–स्त्री० । समाधिविशेषवन्तरागबोधे, " निउणाए जोगिबुद्धीए।" योगिबुद्ध्या समाधिविशेषवन्तरागबोधेन योगिन एव अध्यात्मिकार्थविवेचनचतुरचेतसो प्रवर्त्तन्ति । पञ्चा० १७ विव० ।

जोइसंग–ज्योतिर्नाएड–न० । अग्निभाजने, " जोइसंगोवरागो विव मुहरागविरागाओ । " तं० ।

जोइब्भूय–ज्योतिर्भूत–त्रि० । ज्योतिर्मये जाते, " तत्तं समजोइब्भूयं " समा तुल्या ज्योतिषा वह्निना भूता जाता या सा तथा। विपा० १ श्रु० ४ अ० । स्था० । " तं जोइब्भूयं च सया वसेज्जा । " ज्योतिर्भूतं यदर्थप्रकाशकतया चन्द्रादित्यप्रदीपकल्पम् । सूत्र० १ श्रु० १२ अ० ।

जोइमंत–ज्योतिष्मत्–पुं० । ज्योतिरस्त्यस्य मतुप् । सूर्ये, प्लक्षद्वीपस्थे पर्वतभेदे च । लताभेदे, रात्रौ, योगशास्त्रोक्ते चित्तवृत्तिभेदे च । स्त्री० । ङीप् । वाच० । तैलविधानं तिलादतसीसर्षपेङ्गुदीज्योतिष्मतीकरञ्जादिनिरिति । आचा० १ श्रु० १ अ० ५ उ० । ज्योतिर्युक्ते, त्रि० । वाच० ।

जोइमय–ज्योतिर्मय–त्रि० । ज्ञानमये, आ० म० १ अ० २ खण्ड । प्रकाशमये, "ज्योतिर्मयीव दीपस्य, क्रिया सर्वाऽपि चिन्मयी ।" अष्ट० १३ अष्ट० ।

जोइय–यौगिक–त्रि० । शब्दभेदे, प्रश्न० । यौगिकं यदेतेषामेव नामाऽऽख्यातोपसर्गनिपातसमाससन्धिपदानामेव धात्वादिसंयोगवद् यथोपकरोति सेनयाऽभियात्यभिषेणयतीति । प्रश्न० २ सम्व० द्वार ।

योजित–त्रि० । उपनीते, पञ्चा० १५ विव० । संबन्धिते, औ० । उप० ।

जोइर–न० । देशी–स्खलिते, दे० ना० ३ वर्ग ।

जोइस–ज्योतिष–त्रि० । ज्योतिरधिकृत्य कृतो ग्रन्थः नि०-न०-वृद्धिः । ज्योतिषमध्यये । वाच० । ज्योतिःशास्त्राऽऽत्मके वेदाङ्गभेदे, आव० ३ अ० । भा० म० । उत्त० । ज्योतिश्चक्रे, कल्प० १ क्षण । " जे गहा जोइसम्मि चारं चरंति । " प्रज्ञा० ३ पद । ज्योतिष्कलक्षणे विमानविशेषे, स० । नक्षत्रे, दे० ना० ३ वर्ग ।

ज्यौतिष–पुं० । ज्योतिश्चक्रे भवा ज्यौतिषाः । ज्योतिश्चक्रस्थिते सूर्याऽऽदिके देवभेदे, पुं० । पञ्चा० २ विव० । ज्ञा० ।

जोइसंगविउ–ज्योतिषाङ्गविद्–त्रि० । ज्योतिषं ज्योतिष्कं ज्योतिःशास्त्रमङ्गानि च विदन्ति ये ते ज्योतिषाङ्गविदः । ज्योतिःशास्त्रस्य, शिक्षाऽऽद्यङ्गानां च वेत्तरि, उत्त० २ अ० ।

जोइसंचाल–ज्योतिःसंचाल–पुं० । ज्योतिषः तारकरूपस्य संचाराः । "तारकाणं तिहिं ठाणेहिं तारारूवे चरेज्जा ।" इत्यादिना सूत्रेण प्रतिपादिते संचालने, स० ३ अङ्ग ।

जोइसंत–ज्योतिषान्त–पुं० । ज्योतिश्चक्रस्य पर्यन्ते, स० ।

तत्प्रमाणं यथा-

लोगंताओ णं इक्कारसएहिं इक्कारेहिं जोयणसएहिं अबाहाए जोइसंते पण्णत्ते ।

'लोकान्तात्' णमित्यलङ्कारे, एकादश शतानि (एक्कारे त्ति) एकादशयोजनाधिकानि अबाधया बाधारहितया, क्षेत्रेति शेषः । (जोतिसंते त्ति) ज्योतिश्चक्रपर्यन्तः प्रज्ञप्त इति । स० ११ सम० ।

जोइसकरंडय–ज्योतिष्करण्डक–न० । सूर्यप्रज्ञप्तित उद्धृते ज्योतिषां प्रतिपादके प्रकरणग्रन्थभेदे, ज्यो० ।

तथा च ज्योतिष्करण्डकं विवृण्वन्नाह मलयगिरिः-

" सम्यग् गुरुपदाम्भोज-पर्युपास्तिप्रसादतः ।
ज्योतिष्करण्डकं व्यक्तं, विवृणोमि यथागमम् " ॥ १ ॥
ज्यो० १ पाहु० ।

ज्योतिष्करण्डकेऽर्थाधिकाराञ्-

कालपमाणं मासं निप्फत्ती, अहिगमासगस्स चिय ।
वोच्छामि ओमरत्तं, पव्वतिहीणं समत्तिं च ॥
णक्खत्तयपरिमाणं, परिमाणं वा वि चंदसूराणं ।
नक्खत्तचंदसूरा-ण गइं नक्खत्तजोगं च ॥
मंडलविभागमयणं, आउट्टी मंडले मुहुत्तगई ॥
उउ विसुव वड्ढीवाए, तावं वट्ठी च दिवसाणं ॥
अवमासपुण्णमासी, पणट्ठपव्वं च पोरिसिं वा वि ।
ववहारनयमएणं, तं पुण सुण मे अणुक्कमेणं ॥

इह सूर्यप्रज्ञप्तिसत्का अधिकारा एकविंशतिरूपप्राभृतनिबद्धाः, तत्र प्रथमेऽधिकारे कालस्य समयाऽऽदेर्यावत्कापर्यन्तस्य प्रमाणं वक्तव्यं, द्वितीये मानं प्रमाणं संवत्सराणाम्, तृतीये अधिकमासस्य निष्पत्तिम्, तदनन्तरं चाल्पवक्तव्यत्वाद् गाथोक्तं क्रममुल्लङ्घ्य चतुर्थे पर्वतिथिसमाप्तिं वक्ष्ये, पञ्चमे अवमरात्रम्, गाथायां चान्यथा निर्देशः छन्दोवशात् । ततः षष्ठे नक्षत्राणां संस्थानाऽऽदिपरिमाणं, वक्ष्यामि, सप्तमे चन्द्रसूर्यपरिमाणं, अष्टमे चन्द्रसूर्यनक्षत्राणां गतिम्, नवमे नक्षत्रयोगम्, दशमे जम्बूद्वीपे चन्द्रसूर्याणां मण्डलविभागम्, एकादशे अयनम्, द्वादशे आवृत्तिम्, त्रयोदशे चन्द्रसूर्यनक्षत्राणां मण्डले मण्डले मुहूर्त्तगतिपरिमाणम्, चतुर्दशे ऋतुपरिमाणम्, पञ्चदशे विषुवाणि, षोडशे व्यतीपातान्, सप्तदशे तापक्षेत्रम्, अष्टादशे दिवसानां वृद्ध्यपवृद्धी, एकोनविंशतितमे अमावास्यापौर्णमासीवक्तव्यताम्, विंशतितमे प्रनष्टं पर्व, एकविंशतितमे पौरुषीम् । एतांश्च एकविंशतिसंख्यानप्यर्थाधिकारान् वक्ष्ये व्यवहारनयमतेन,निश्चयनयमतेन हि कलाकलांशप्रतिकलांशगणनया परमार्थतः परमश्रुतविदो बुध्यन्ते,न शेषाः। न च तथा कथ्यमानानां श्रोतृणाम् अञ्जसाऽवगमपथमृच्छति। ततो व्यवहारनयमतेन योजनगव्यूतं कतिपयकलाकलांशप्रविभागरूपेण वक्ष्ये, तच्च तथा मे कथयतो भवानवहितमनस्को भूत्वा शृणु, तदेव निर्दिष्टा अथाधिकाराः । ज्यो० १ पाहु० ।

जोइसगणराय–ज्योतिर्गणराज–पुं० । ज्योतींषि ग्रहनक्षत्रतारकाणि तेषां गणः समूहस्तस्य राजाऽधिपतिर्ज्योतिर्गणराजः । चन्द्रे, सूर्ये च । चं० प्र० १ पाहु० ।

जोइसचक्क–ज्योतिश्चक्र–न० । चन्द्रसूर्यग्रहनक्षत्राऽऽत्मके ज्योतिषां चक्रे, ज्यो० १ पाहु० । " एक्कार एक्कवीसा, सयएक्कारा हिया य एक्कारा । मेरु अलोगबाहे, जोइसचक्कं चरइ ठाइ " ॥ १ ॥ स० ११ सम० ।

तत्स्वरूपं यथा—

लोगाणुभावजणियं, जोइसचक्कं जणंति अरिहंता ।
सव्वे कालविसेसा, जस्स गइविसेसनिप्फन्ना ॥

यस्य ज्योतिश्चक्रस्य चन्द्रसूर्यनक्षत्राऽऽदिरूपस्य संबन्धिना,गतिविशेषेण निष्पन्नाः, सर्वे कालविशेषाश्चन्द्रमाससूर्यमासनक्षत्रमासाऽऽदिकाः, तद् ज्योतिश्चक्रं लोकानुभावजनितमनादिकालसन्ततिपतिततया शाश्वतं वेदितव्यम्, नेश्वराऽऽदिकृतमिति जगदुः प्रतिपादयन्ति, भगवन्तोऽर्हन्तः । तीर्थकृतां च वचनमवश्यं प्रमाणयितव्यं,क्षीणसकलदोषतया तद्वचनस्य वितथार्थत्वाभावात् । उक्तं च-" रागाद् वा द्वेषाद् वा, मोहाद् वा वाक्यमुच्यते ह्यनृतम् । यस्य तु नैते दोषा-स्तस्यानृतकारणं किं स्यात् ?" ॥१॥ अपि च-युक्त्याऽपि विचार्यमाणो नेश्वराऽऽदिर्घटां प्राञ्चति, ततस्तदभावादपि ज्योतिश्चक्रं लोकानुभावजनितमवसेयम् । यथा च युक्त्या विचार्यमाणो नेश्वराऽऽदिर्घटते, तथा तत्त्वार्थटीकाऽऽदौ विजृम्भितमिति तत एवावधार्यम । ज्यो० १ पाहु० । (ज्योतिश्चक्रं मेरुतः कियत्या अबाधया चरतीति ' अबाहा ' शब्दे प्रथमभागे ६८२ पृष्ठे दृश्यम्)

द्वीपचन्द्रिरसङ्कलनप्रश्नेषु-जम्बूद्वीपगतमेरोः परितो यथैकविंशत्यधिकैकादशशतयोजनान्यबाधां कृत्वा ज्योतिश्चक्रं भ्रास्यति, तथाऽन्यद्वीपगतमेरुभ्योऽपि कियतीमबाधां कृत्वा भ्रमन्ति?, इति प्रश्ने, उत्तरम्-अत्र जम्बूद्वीपगतमेरोः परितो यथैकविंशत्यधिकैकादशशतयोजनान्यबाधां कृत्वा ज्योतिश्चक्रं भ्रास्यति, तथैवान्यद्वीपगतमेरुभ्योऽपीति संभाव्यते, शास्त्राकराणि तु व्यक्तया दृष्टानि न स्मर्यन्ते,इति । चं० प्र० । ही०४ प्रका० ।

जोइसपह-ज्योतिष्पथ-पुं० । ग्रहचन्द्रसूरनक्षत्ररूपाणां ज्योतिषां ज्योतिष्कलक्षणविमानविशेषाणां,ज्योतिषो वा द्वीपाऽऽश्रयेः पन्था ज्योतिष्पथः । ज्योतिष्कदेवानां मार्गे, अभ्रेमार्गे च । स० ।

ज्योतिष्प्रभ-त्रि० । ग्रहचन्द्रसूरनक्षत्ररूपाणां ज्योतिषां ज्योतिष्कलक्षणविमानविशेषाणां, ज्योतिषो वा द्वीपाऽऽश्रयेः प्रभा प्रकाशो यस्मिन् । ज्योतिष्कदेवसदृशप्रभे,अग्निसदृशप्रभे च । स० ।

जोइसमुहमंडग-ज्योतिषमुखमण्डक-पुं० । सूर्ये, कल्प० १क्षण ।

जोइसराय-ज्योतिष्कराज-पुं० । ज्योतींषि ग्रहनक्षत्रतारकाणि तेषां राजाऽधिपतिर्ज्योतिष्कराजः । चन्द्रे, सूर्ये च । चं० प्र० । " जोइसरायस्स पन्नत्ति । " (५ गाथा) ज्योतिष्कराजस्य चन्द्रमसः । चं० प्र० १ पाहु० । स्था० । सू० प्र० ।

जोइसायण-ज्योतिषामयन-न० । ज्योतिःशास्त्राऽऽत्मके वेदाङ्गभेदे, औ० । आ० चू० । कल्प० । अनु० ।

जोइसालय-ज्योतिरालय-पुं० । ज्योतिरालयो गृहं येषां ते ज्योतिरालयाः। ज्योतिष्कदेवेषु, " पंचहा जोइसालया ।" उत्त० ३६ अ० ।

जोइसिंद-ज्योतिष्केन्द्र-पुं० । सूर्ये, चन्द्रे च । स्था० ६ ठा० । " चंदिमसूरिया य एए दुवे जोइसिंदा जोइसियरायाणो परिवसंति । " चं० प्र० १ पाहु० ।

जोइसिण-ज्यें [ज्यौ] त्स्न-पुं० । ज्योत्स्नाऽन्विते शुक्ले पक्षे, ज्यो० ४ पाहु० ।

जोइसिणा-ज्योत्स्ना-स्त्री० । ज्योतिरस्त्यस्यां नः, उपधालोपश्च । "सूदम-श्र-ष्ण-स्न-ह्न-ह्ण-ष्णां ण्हः"। ८ । २ । ७५ । इति प्राकृतसूत्रेण स्नस्य ण्हो वा । प्रा० २ पाद । कौमुद्यां,चन्द्रकिरणे च । वाच० । ' जोइसिणाइ " स्था० २ ठा० ४ उ० ।

जोइसिणापक्ख-ज्योत्स्नापक्ष-पुं० । ज्योत्स्नाप्रधानः पक्षो ज्योत्स्नापक्षः । शुक्लपक्षे, चं० प्र० १५ पाहु० । सू० प्र० ।

जोइसिणाभा-ज्योत्स्नाभा-स्त्री० । चन्द्रस्य स्वनामख्यातायामग्रमहिष्याम, भ० १० श० ५ उ० । ज्यो० । स्था० । सू० प्र० । चं० प्र० ।

जोइसिय-ज्योतिषिक-पुं० । सूर्याऽऽदिके ज्योतिश्चक्रस्थिते देवभेदे,प्रज्ञा० २ पद । पञ्चा० । उत्तरकुरुषु प्रभे स्वनामख्याते द्रुमगणे, तत्र प्रदेशे बहवो ज्योतिषिका नाम द्रुमगणाः । जी० ३ प्रति० ।

विषयसूची-

(१) 'जोइसिय' शब्दस्यानुवादान्तरव्युत्पत्तिवाक्यार्थान्तरप्रदर्शनम ।
(२) ज्यौतिष्काणां पञ्चविधत्वप्ररूपणम् ।
(३) मनुष्यक्षेत्रवर्तिनां मानुषोत्तरपर्वतात् स्वयंभूरमणसमुद्राबहिश्चानां च ज्यौतिष्काणां चलत्वस्थिरत्वविचारः।
(४) प्रसङ्गतो मनुष्यक्षेत्रं निरूप्य स्फुटं ज्यौतिष्काणां चलत्वस्थिरत्वनिदर्शनम ।
(५) सर्वलोके प्रतिद्वीपं प्रतिसमुद्रं चन्द्राऽऽदीनां परिमाणप्रतिपादनार्थमन्यतीर्थिकानां द्वादशप्रतिपत्तीरुद्भाव्य भगवत्सिद्धान्तनिरूपणम् ।
(६) जम्बूद्वीपगतचन्द्राऽऽदिसंख्यासग्राहिके गाथे ।
(७) मनुष्यक्षेत्रगतचन्द्रसूर्याऽऽदीनां संख्यापरिमाणकथनम।
(८) चन्द्रसूर्यनक्षत्रताराग्रहाणां पिटकवक्तव्यतायां पिटकप्रमाणनिरुक्तिः ।
(९) मनुष्यक्षेत्रगतचन्द्रसूर्यपङ्क्तयो यावत्यो यथा च स्थितास्तन्निर्वचनम् ।
(१०) " नक्षत्राणां पङ्क्तिप्ररूपणा ।
(११) " ग्रहाणां पङ्क्तिनिर्देशः ।
(१२) चन्द्राऽऽदयो यत्र यथा भ्रमन्ति तन्निरूपणम् ।
(१३) चन्द्राऽऽदित्यग्रहगणऋक्षाणाम्-अयमेकमण्डलसंचारिक्षेत्रनक्षत्रस्थितत्वं, नक्षत्रतारामण्डलानां तु मेरुमभितः संचारित्वादवस्थितत्वम ।
(१४) चन्द्रसूर्ययोर्मण्डलक्षेत्रादूर्ध्वमधश्च संक्रमणवक्तव्यता ।
(१५) चन्द्रसूर्यनक्षत्रमहाग्रहाणां चारविशेषेण मनुष्याणां सुखदुःखाधिधिं प्रतिपाद्य, दीक्षाऽऽदिशुभकार्याणि शुभातिथ्यादयश्लोकैर्यैर्विधेयानीति जिनाऽऽज्ञानिर्वचनम्।
(१६) चन्द्रसूर्याणां तापक्षेत्रं यथा वर्धते ह्रीयते वा तदुपपादनम् ।
(१७) तेषामेव तापक्षेत्रसंस्थानस्य वर्णनम ।
(१८) मनुष्यक्षेत्रमध्ये चन्द्रसूर्यग्रहनक्षत्रतारागां चारोपगतत्वं विविच्य तेषामेव मनुष्यक्षेत्राद् बहिर्गत्यनाधोवृधाटनम ।
(१९) प्रतिद्वीपं चन्द्राऽऽदिसङ्ख्याविवेचनम ।
(२०) प्रतिद्वीपं प्रतिसमुद्रं च ग्रहनक्षत्रतारापरिमाणपरिज्ञानोपायः ।

(२१) मानुषोत्तरपर्वतस्य बहिः चन्द्रसूर्याणां तेजांस्यवस्थितान्येव, तथाऽभिजिता चन्द्राः पुष्येण च सर्वदैव युक्ताः सूर्या भवन्तीति प्रतिपादनम् ।
(२२) मनुष्यक्षेत्रबहिर्गतचन्द्रसूर्याणां पङ्क्त्यवस्थानोपपत्तिः ।
(२३) मनुष्यक्षेत्रस्यान्तर्बहिश्च चन्द्राऽऽदीनां देवानामूर्ध्वोपपन्नत्वकल्पोपपन्नत्वविमानोपपन्नत्वाऽऽदिविचारः ।
(२४) चन्द्रसूर्ययोश्च्यवनोपपातवक्तव्यतायां परतीर्थिकप्रतिपत्तिनिराकरणपूर्वकं भगवन्मतप्रदर्शनम् ।
(२५) पुष्करोदाऽऽदिषु द्वीपसमुद्रेषु चन्द्राऽऽदिसंख्याव्याहारः।
(२६) चन्द्रसूर्ययोः परिवारकथनम् ।
(२७) चन्द्राऽऽदीनां यादृशोऽनुभावस्तत्प्रतिपाद्य तद्विषयेऽन्यतीर्थिकानां प्रतिपत्तीरुदस्य भगवत्सिद्धान्तवर्णनम् ।
(२८) चन्द्रसूर्ययोः संस्थितिविषये परतीर्थिकानां धोरुशप्रतिपत्तिप्रदर्शनानन्तरं भगवन्मतोपन्यासः ।
(२९) चन्द्राऽऽदित्यचारवचनम् ।
(३०) चन्द्रसूर्याऽऽदीनां भूमेरूर्ध्वमुच्चत्वप्रमाणप्रतिपादने परेषां पञ्चविंशतिप्रतिपत्तीरुद्भाव्य भगवदभिप्रायप्रकटनम् ।
(३१) चन्द्रसूर्याणां क्षेत्रापेक्षयाऽधस्तनाः, समश्रेणिव्यवस्थिता वा ताराकविमानाधिष्ठातारो देवा द्युतिविभवाऽऽदिकमपेक्ष्य चन्द्रसूर्येभ्यां केचिदूनाः केचिदुल्या इति प्रपञ्चः ।
(३२) नक्षत्रमण्डलिकामपेक्ष्य सर्वाभ्यन्तरचारित्वमभिजिन्नक्षत्रस्य मूलाऽऽदीनां सर्वबाह्यचारित्वं स्वातिनक्षत्रस्य सर्वोपरिचारित्वं भरणीनक्षत्रस्य सर्वाधश्चारित्वमिति प्रतिपादनविस्तरः ।
(३३) चन्द्रः सूर्यो वा कियत् क्षेत्रं प्रकाशयतीति विचारे द्वादश प्रतिपत्तीरितरेषां व्युदस्य भगवत्सिद्धान्तोक्तिः ।
(३४) चन्द्राऽऽदीनां जम्बूद्वीपे चारक्षेत्रविष्कम्भमानम् ।
(३५) ज्यौतिष्काणामल्पबहुत्वम् ।
(३६) चन्द्रसूर्यग्रहनक्षत्रतारकाणां मध्ये यो यस्मात् शीघ्रगतिस्तन्निरूपणम् ।
(३७) ज्यौतिष्काणामेकमुहूर्ते यावती गतिस्तन्निरुक्तिः ।
(३८) चन्द्रसूर्यनक्षत्राणां परस्परं मण्डलभागविषयविशेषनिर्धारणम् ।
(३९) ग्रहमधिकृत्य योगचिन्ता ।
(४०) सूर्येण सह नक्षत्रस्य योगचिन्तनम् ।
(४१) सूर्येण सह ग्रहस्य योगविचारः ।
(४२) चन्द्राऽऽदयो नक्षत्रेण (समासेन) यावन्ति मण्डलानि चरन्ति तदुपपत्तिः ।
(४३) चान्द्रमासे यावन्ति मण्डलानि चन्द्राऽऽदयश्चरन्ति तत्स्यात्कीर्तनम् ।
(४४) ऋतुमासमधिकृत्य चन्द्राऽऽदीनां मण्डलचारवर्णनम् ।
(४५) सूर्यमासमधिकृत्य चन्द्राऽऽदीनां मण्डलचारविवेकः ।
(४६) अभिवर्धितमासमधिकृत्य चन्द्राऽऽदीनां मण्डलचारोपपादनम् ।
(४७) एकेनाहोरात्रेण चन्द्राऽऽदयः प्रत्येकं यावन्ति मण्डलानि चरन्ति तत्समर्थनम् ।
(४८) एकैकं परिपूर्णमण्डलं चन्द्राऽऽदयः प्रत्येकं यावद्भिरहोरात्रैश्चरन्ति तदुपवर्णनम् ।
(४९) युगे चन्द्राऽऽदयः प्रत्येकं यावन्ति मण्डलानि चरन्ति तत्परामर्शः ।
(५०) ज्यौतिष्कदेवानां गतिविशेषविषये द्वे संग्रहगाथे ।
(५१) चन्द्रसूर्यनक्षत्रतारकाणामल्पर्द्धिकत्वमहर्द्धिकत्वप्रतिपादनम् ।

(१) ज्योतिषिज-पुं० । "हृदन्तात् सप्तम्याः संज्ञायाम्" ॥ ६ । ३ । ६ ॥ इति (पाणि०) सूत्रेण सप्तम्या अलुक् । वाच० । ज्योतिश्चक्रे जातो ज्योतिषिजः । ज्योतिश्चक्रजाते देवभेदे, पञ्चा० २ विव० ।

ज्योतिष्क-पुं० । ज्योतिरेव, इवार्थे कन् । चित्रकवृक्षे, मेषिकाबीजे, गणिकारीवृक्षे च । स्वार्थे कन् । वाच० । द्योतन्ते इति ज्योतींषि विमानानि, तत्रिवासिनो ज्योतिष्काः । जम्ब० २ वक्ष० । ग्रहनक्षत्राऽऽदिषु, ब० व० वाच० । ज्योतिष्षु नक्षत्रेषु भवा ज्योतिष्काः, शब्दव्युत्पत्तिरेवेयं, प्रवृत्तिनिमित्ताऽऽश्रयणात्तु चन्द्राऽऽदयो ज्योतिष्का इति । स्था० २ ठा० ३ उ० । सूत्र० । ज्ञा० । चं० प्र० ज्योतिष्मतीलतायाम्, स्त्री० । मेरोः शृङ्गान्तरे, वाच० । गणितप्रतिपादके ज्योतिःशास्त्रे च । न० । सूत्र० १ श्रु० १ अ० ४ उ० ।

ज्यौतिषिक-पुं० । ज्योतिषं शास्त्रं वेत्त्यधीते वा ठक् । दैवज्ञे, वाच० । ज्योतिश्चक्रे भवो ज्यौतिषिकः, स एव ज्यौतिषिकः । ज्योतिश्चक्रजनिते देवभेदे, पञ्चा० १ विव० ।

ज्यौतिष्क पुं० । ज्योतिष्कदेवानां निवासभूते देवलोकभेदे, भ० ५ श० १० उ० । ज्योतींषि विमानविशेषाः, तेषु भवा ज्यौतिष्काः । ज्योतिश्चक्रभवे देवभेदे, स्था० ५ ठा० १ उ० ।

(२) ते च पञ्च-" पंचविहा जोइसिया पण्णत्ता । तं जहा-चंदा सूरा गहा णक्खत्ता तारारूवा । " स्था० ५ ठा० १ उ० ।

(३) चंदा १ सूरा य २ गहा ३, नक्खत्ता ४ तारया य ५ पंच इमे।
एगे चल जोइसिया, घंटायारा थिरा अवरे ॥ १४७ ॥

चन्द्राः, सूर्याः, ग्रहाः, नक्षत्राणि, तारकाश्चेत्येवं पञ्च ज्योतिष्कभेदा भवन्ति । तत्र चैके मनुष्यक्षेत्रवर्त्तिनो ज्योतिष्काश्चला मेरोः प्रादक्षिण्येन सर्वकालं भ्रमणशीलाः, अपरे पुनर्ये मानुषोत्तरपर्वतात् परेण स्वयंभूरमणसमुद्रं यावद्वर्त्तन्ते ते सर्वेऽपि स्थिराः सदाऽवस्थानस्वभावाः, अत एव घण्टाकारा अचलधर्मकत्वेन घण्टावत् स्वस्थानस्था एव तिष्ठन्तीत्यर्थः । प्रज्ञा० १८४ द्वार । चं० प्र० । उत्त० । दश० ।

(४) प्रथमतो मनुष्यक्षेत्रं प्ररूपयति-

जंबूदीवो लवणो-दही य दीवो य धायईसंडे ।
कालोदहिपुक्खरवर-दीवड्ढो माणुसं खेत्तं ॥

प्रत्यक्षतः उपलभ्यमानः प्रथमो जम्बूद्वीपः, ततः सर्वतस्तत्परिक्षेपी लवणोदधिः, ततोऽपि परतः सामस्त्येन लवणोदधिपरिक्षेपी धातकीखण्डो द्वीपः, तस्यापि सर्वतः परिक्षेपी कालोदधिसमुद्रः, ततोऽपि परतः सर्वतस्तत्परिक्षेपि पुष्करवरद्वीपस्यार्द्धम् । एते जम्बूद्वीपधातकीखण्डपुष्करवरद्वीपार्द्धरूपा द्वीपाः, द्वौ च लवणोदधिकालोदधिरूपौ समुद्रौ, मानुषं क्षेत्रं-मनुष्याणामुत्पत्तेर्मरणस्य च भावात् । अस्मिंश्च मानुषे क्षेत्रे समा विभागाः कालविभागाः

सुषमसुषमाऽऽदयो भवन्ति, ततो मनुष्यक्षेत्रात्परतः सर्वमपि देवारण्यं देवानां क्रीडास्थानं, तत्र जन्मतो मनुष्याः, नापि तत्र कोऽपि कालविभाग इत्यर्थः ।

एतदेव स्पष्टयन्नाह-

एतं माणुसखित्तं, एत्थ विचारीणि जोइसगणाणि ।
परतो दीवसमुद्दे, अवट्ठियं जोइसं जाण ॥

एतत् अनन्तरोदितस्वरूपं मानुषं क्षेत्रम्, अस्मिंश्च मनुष्यक्षेत्रे, विचारिणो विचरणशीला ज्योतिष्कगणाश्चन्द्रसूर्यग्रहनक्षत्रतारागणाः। सूत्रे च नपुंसकता प्राकृतत्वात् । परतो मनुष्यक्षेत्रस्य बहिः, शेषेषु द्वीपसमुद्रेष्वव्यवस्थितमवस्थानशीलं ज्योतिश्चक्रं जानीहि । ज्यो० ६ पाहु० ।

(५) संप्रति प्रतिद्वीपं प्रतिसमुद्रं चन्द्रादित्यानां परिमाणप्रतिपादनाय कति चन्द्रसूर्याः सर्वलोके आख्याताः ?

इति, ततस्तद्विषयं प्रश्नसूत्रमाह-

ता कति णं चंदिमसूरिया सव्वलोयं ओभासेंति, उज्जोएंति, तवेंति, पभासेंति आहिता ति वदेज्जा ॥

(ता कति णमित्यादि) 'ता' इति पूर्ववत् । कति किंप्रमाणाः, 'णं' इति वाक्यालङ्कारे, चन्द्रसूर्याः सर्वलोके अवभासन्ते अवभासमानाः, उद्द्योतयन्तः प्रकाशयन्त आख्याता इति वदेत् ।

एवमुक्ते भगवानेतद्विषये यावत्यः प्रतिपत्तयस्तावतीरुपदर्शयति-

तत्थ खलु इमाओ दुवालसपडिवत्तीओ पण्णत्ताओ । तत्थेगे एवमाहंसु-ता एगे चंदे एगे सूरे सव्वलोयं ओभासेति, उज्जोएति, तवेति, पभासेति, एगे एवमाहंसु १। एगे पुण एवमाहंसु-ता तिण्णि चंदा तिण्णि सूरा सव्वलोयं ओभासेंति, उज्जोएंति, तवेंति, पभासेंति, एगे एवमाहंसु २। एगे पुण एवमाहंसु-ता आउद्धिं चंदा आउद्धिं सूरा सव्वलोअं ओभासेंति, उज्जोएंति, तवेंति, पभासेंति, एगे एवमाहंसु ३। एगे पुण एवमाहंसु-एवं एतेणं अभिलावेणं णेतव्वं-सत्त चंदा सत्त सूरा ४। दस चंदा दस सूरा ५। बारस चंदा बारस सूरा ६। बायालीसं चंदा बायालीसं सूरा ७ । बावत्तरी चंदा बावत्तरीसूरा ८। बायालीसं चंदसयं बायालीसं सूरासयं ९ । बावत्तरं चंदसयं बावत्तरं सूरसयं १० । बायालीसं चंदसहस्सं, बायालीसं सूरसहस्सं ११। बावत्तरी चंदसहस्सं, बावत्तरी सूरसहस्सं सव्वलोयं ओभासेंति, उज्जोवेंति, तवेंति, पभासेंति, एगे एवमाहंसु १२॥

(तत्थेत्यादि) तत्र सर्वलोकविषयचन्द्रसूर्यास्तित्वविषये अस्मिन् वक्ष्यमाणस्वरूपा द्वादश प्रतिपत्तयः परतीर्थिकैरभ्युपगमरूपाः प्रज्ञप्ताः । तत्र तेषां द्वादशानां परतीर्थिकानां मध्ये एके परतीर्थिका एवमाहुः—(ता इति) तेषां परतीर्थिकानां प्रथमं स्वशिष्यं प्रत्यनेकवक्तव्यतोपक्रमे क्रमोपदर्शनार्थः । एकश्चन्द्र एकः सूर्यः सर्वलोकमवभासयति, अवभासयन् उद्द्योतयन् तापयन् प्रभासयन् आख्यात इति वदेत् । अत्रैवोपसंहारमाह—(एगे एवमाहंसु) १। एके पुनरेवमाहुः-त्रयश्चन्द्रास्त्रयः सूर्याः सर्वलोकमवभासयन्त आख्याता इति वदेत् । उपसंहारवाक्यम्-(एगे एवमाहंसु)२। एके पुनरेवमाहुः-अष्टौ चतुर्थाश्चन्द्रा अष्टौ चतुर्थाः सूर्याः सर्वलोकमवभासयन्त आख्याता इति वदेत् । अत्राप्युपसंहारः-(एगे एवमाहंसु) ३। (एवमित्यादि) एवमुक्तेन प्रकारेण एतेनानन्तरोदितेनाभिलापेन तृतीयप्राभृतोक्तप्रकारेण द्वादशप्रतिपत्तिविषयं सकलमपि सूत्र नेतव्यम् । तच्चैवम-"(सत्त चंदा सत्त सूरा इति) एगे पुण एवमाहंसु-ता सत्त चंदा सत्त सूरा सव्वलोयं ओभासेंति, उज्जोएंति, तवेंति, पभासेंति, आहिय त्ति वएज्जा, एगे एवमाहंसु ४।एगे पुण एवमाहंसु-ता दस चंदा दस सूरा सव्वलोयं ओभासेंति,उज्जोएंति,तवेंति,पभासेंति, आहिय त्ति वएज्जा, एगे एवमाहंसु ५। एगे पुण एवमाहंसु-ता बारस चंदा बारस सूरा सव्वलोयं ओभासेंति, उज्जोएंति, तवेंति, पभासेंति,आहिय त्ति वएज्जा, एगे एवमाहंसु ६। एगे पुण एवमाहंसु-ता बायालीसं चंदा बायालीसं सूरा सव्वलोयं ओभासेंति, उज्जोएंति, तवेंति, पभासेंति, आहिय त्ति वएज्जा, एगे एवमाहंसु ७। एगे पुण एवमाहंसु-ता बावत्तरिं चंदा बावत्तरिं सूरा सव्वलोयं ओभासेंति, उज्जोएंति,तवेंति, पभासेंति, आहिय त्ति वएज्जा, एगे एवमाहंसु ८। एगे पुण एवमाहंसु-ता बायालीसं चंदसयं बायालीसं सूरसयं सव्वलोए ओभासेइ, उज्जोएइ,तवेइ, पभासेइ, आहिय त्ति वएज्जा, एगे एवमाहंसु ९। एगे पुण एवमाहंसु-ता बावत्तरं चंदसयं बावत्तरं सूरसयं सव्वलोयं ओभासेइ, उज्जोएइ, तवेइ, पभासेइ, आहिय त्ति वएज्जा, एगे एवमाहंसु १०। एगे पुण एवमाहंसु-ता बायालीसं चंदसहस्सं बायालीसं सूरसहस्स सव्वलोयं ओभासेइ, उज्जोएइ, तवेइ, पभासेइ, आहिय त्ति वएज्जा, एगे एवमाहंसु ११ । एगे पुण एवमाहंसु-ता बावत्तरं चंदसहस्स बावत्तरं सूरसहस्सं सव्वलोयं ओभासेइ, उज्जोएइ, तवेइ, पभासेइ, आहिय त्ति वएज्जा, एगे एवमाहंसु १२ । "

एताश्च सर्वा अपि प्रतिपत्तयो मिथ्यारूपाः,तथा भगवान् स्वमतमेताभ्यः पृथग्भूतमाह-

वयं पुण एवं वदामो-ता अयं णं जंबुद्दीवे दीवे जाव परिक्खेवेणं ताव जंबुद्दीवे दीवे केवतिया चंदा पभासेंसु वा, पभासिंसेति वा, पभासिस्संति वा?, केवतिया सूरा तविंसु वा, तवेंति वा, तविस्संति वा ?, केवतिया नक्खत्ता जोइंसु वा, जोएंति वा, जोइस्संति वा ?, केवतिया गहा चारं चरिंसु वा, चरंति वा, चरिस्संति वा ?,केवतिया तारागणकोडिकोडीओ सोभेंसु वा, सोभंति वा, सोभिस्संति वा ?। ता जंबुद्दीवे णं दीवे दो चंदा पभासेंसु वा, पभासिंसेति वा,पभासिस्संति वा,दो सूरिया तविंसु वा, तवंति वा, तविस्संति वा, छप्पण्णं णक्खत्ता जोयं जोएंसु वा, जोएंति वा, जोइस्संति वा, बावत्तरिगहसतं चारं चरिंसु वा, चरंति वा, चरिस्संति वा, एगं सयसहस्सं तेत्तीसं च सहस्सं णवसया पण्णसा तारागणकोडाकोडीणं सोभेंसु वा, सोभिंसु वा, सोभिस्संति वा ।

(वयं पुण इत्यादि) वयं पुनरुपक्रवुलज्ञानाः, एवं वक्ष्यमाणप्रकारेण वदामः । तमेव प्रकारमाह-(ता अयं णमित्यादि) इदं जम्बूद्वीपवाक्यं पूर्ववत् परिपूर्णं पठनीयं, व्याख्यानीयं

च (ता जंबुद्दीवे णं दीवे दो चंदा इत्यादि) जंबूद्वीपे द्वौ चन्द्रौ प्रतिभासितवन्तौ, प्रतिभास्येते, प्रतिभासिष्येते, ऊर्ध्वास्तिकनयमतेन सकलकालमेवंविधाया एव जगत्स्थितेः सद्भावात् । तथा द्वौ सूर्यौ तापितवन्तौ, तापयतस्तापयिष्यतः। तथैकैकस्य शशिनोऽष्टाविंशतिर्नक्षत्राणि परिवारो, जम्बूद्वीपे च द्वौ शशिनौ, ततः षट्पञ्चाशन्नक्षत्राणि, जम्बूद्वीपे चन्द्रसूर्याभ्यां सह योगं युक्तवन्तः, युक्तवन्ति, योक्ष्यन्ति वा। तथा एकैकस्य शशिनोऽष्टाशीतिर्ग्रहाः परिवारतः, ततः शशिद्वयसत्कग्रहमीलने सर्वसंख्यया षट्सप्तत्यधिकं ग्रहशतं भवति, ततो जम्बूद्वीपे चारं चरितवान्, चरति, चरिष्यति च। तथा एकैकस्य शशिनस्तारापरिवारः कोटाकोटीनां षट्षष्टिः सहस्राणि, नवशतानि पञ्चसप्तत्यधिकानि, जम्बूद्वीपे च द्वौ शशिनौ, तदेतत् तारामानं द्वाभ्यां गुण्यते, तत एकं शतसहस्रं त्रयस्त्रिंशत्सहस्राणि नवशतानि पञ्चाशदधिकानि तारागणकोटीनां भवन्ति। एतावत्प्रमाणास्तारा जम्बूद्वीपे शोभितवत्यः, शोभन्ते, शोभिष्यन्ते । सू० प्र० १६ पाहु० । जी० । जं० । ज० ।

(६) संप्रति विनेयजनानुग्रहाय यथोक्तजम्बूद्वीपगतचन्द्रादिसंख्यासंग्राहिके द्वे गाथे आह-

दो चंदा दो सूरा, णक्खत्ता खलु हवंति छप्पण्णा ।
बावत्तरं गहसतं, जंबुद्दीवे वियारी णं ॥१॥
एगं च सयसहस्सं, तित्तीसं खलु भवे सहस्साइं ।
णव य सता पण्णासा, तारागणकोडिकोडीणं ॥२॥

एते च द्वे अपि सुगमे, नवरं (जंबुद्दीवे वियारी णं) णमिति वाक्यालङ्कारे, ततो 'वियारीति' विभक्तिपरिणामेन चन्द्रादिभिः सह सामानाधिकरण्येन योजनीयमिति ॥ सू० प्र० १६ पाहु० । (लवणसमुद्रगतचन्द्रादिसंख्यापरिमाणम् 'लवणसमुद्द' शब्दे वक्ष्यते) (धातकीखण्डद्वीपचन्द्रादिसंख्या 'धायईसंडदीव' शब्दे प्रतिपादयिष्यते)(कालोदसमुद्रचन्द्रादिसंख्या 'कालोद' शब्दे तृतीयभागे ५०४ पृष्ठे गता) (पुष्करवरद्वीपचन्द्रादिसंख्या, आभ्यन्तरपुष्करार्द्धगतचन्द्रादिवक्तव्यता च 'पुक्खरवरदीव' शब्दे वक्ष्यते) इह सर्वत्र तारापरिमाणचिन्तायां कोटीकोट्यः-कोटीकोट्य एव द्रष्टव्याः, तथा पूर्वसूरिव्याख्यानात्। अपर उच्छ्रयाङ्गुलप्रमाणमनुश्रित्य कोटीकोटीरेव समर्थयन्ते। उक्तं च-"कोडाकोडीसत्तं, तरंतु मन्नंति केइ थोवतया। अन्ने उस्सेहंगुल-माणं काऊण तारायं ॥१॥" इति। जी० ३ प्रति०।

(७) संप्रति मनुष्यक्षेत्रगतसमस्तचन्द्रादिसंख्यापरिमाणमाह--

मणुस्सखेत्ते णं भंते ! कइ चंदा पभासिंसु वा, पभासिंति वा, पभासिस्संति वा, कइ सूरा तवइंसु वा, तवेंति वा, तविस्संति वा ? । गोयमा !-

"बत्तीसं चंदसयं, बत्तीसं चेव सूरियाण सयं ।
सयलं मणुस्सलोयं, चरंति एए पगासेंता ॥१॥
एक्कार सय सहस्सा, छप्पि य सोला महग्गहाणं तु ।
छच्च सया छण्णउया, णक्खत्ता तिण्णि य सहस्सा ॥२॥
अट्ठासीइ सतसहस्सा, बायालीसं सहस्स मणुयलोगम्मि।
सत्त य सया अणूणा, तारागणकोडिकोडीणं" ॥ ३ ॥
सोभंसु वा, सोभंति वा, सोभिस्संति वा ॥

"मणुस्सखेत्ते णं" इत्यादि पाठसिद्धम् । उक्तं चैवरूपं परिमाणमन्यत्रापि । ([illegible]सीमित्यादि गाथात्रयम्) तत्र द्वात्रिंशं चन्द्रशतम्, एवं द्वौ चन्द्रौ जम्बूद्वीपे, चत्वारो लवणोदे, द्वादश धातकीखण्डे, द्वाचत्वारिंशत्कालोदे, द्वासप्ततिरभ्यन्तरपुष्करार्द्धे, सर्वसंख्यया द्वात्रिंशं शतम् । एवं सूर्याणामपि द्वात्रिंशं शतं परिभावनीयम्। नक्षत्राऽऽदिपरिमाणम् अष्टाविंशत्यादिसंख्यानि नक्षत्राऽऽदीनि द्वात्रिंशेन शतेन गुणयित्वा परिभावनीयम् । जी० ३ प्रति० ।

मतभेदेनाह-

अट्ठासीतिं चत्ता-रि सतसहस्साइं मणुयलोयम्मि ।
सत्त य सता अणूणा, तारागणकोडिकोडीणं ॥३॥

(अट्ठासीइं चत्ताइ त्ति) अष्टाशीतिः सहस्राणि चत्वारिंशदुत्तराधिकानि, शेषं गतार्थम् । सू० प्र० १६ पाहु० । चं० प्र० । भ० । इ० प० ।

संप्रति सकलमनुष्यलोकगततारागणस्योपसंहारमाह-

एसो तारापिंडो, सव्वसमासेण मणुयलोयम्मि ।
बहियं पुण ना तारा, जिणेहिं जणिआ असंखेज्जा ॥१॥
एवतियं तारगणं, जं भणियं माणुसम्मि लोगम्मि ।
चारं कलंबुयापु-प्फसंठितं जोतिसं चरति ॥ २ ॥

एषोऽनन्तरोक्तगाथोक्तस्तारापिण्डः सर्वसंख्यया मनुष्यलोके, आख्यात इति गम्यते। बहिः पुनर्मनुष्यलोकाद् यास्तारास्ता जिनैः सर्वैस्तीर्थकृद्भिर्गणिता असंख्याताः, द्वीपसमुद्राणामसंख्यातत्वात् । प्रतिद्वीपं प्रतिसमुद्रं च यथायोगं सङ्ख्येयानामसंख्येयानां च ताराणां सद्भावात् ॥१॥ "एवइयं" इत्यादि । एतावत्संख्यकं तारापरिमाणं यदनन्तरं भणितं मानुषे लोके, तज्ज्योतिष्कं ज्योतिष्कदेवविमानरूपं कदम्बपुष्पसंस्थितं कदम्बपुष्पवत् अधःसंकुचितं उपरि विस्तीर्णमुत्तानीकृतार्द्धकपित्थसंस्थानसंस्थितमित्यर्थः । चारं चरति चारं प्रतिपद्यते, तथा जगत्स्वाभाव्यात् । तारामहणं चोपलक्षणं, तेन सूर्यादयोऽपि यथोक्तसंख्याका मनुष्यलोके तथा जगत्स्वभावाद् चारं प्रतिपद्यन्ते इति द्रष्टव्यम् ॥ २ ॥

संप्रत्येतद्गतमेवोपसंहारमाह-

रविससिगहणक्खत्ता, एवतिया आहिता मणुयलोए ।
जेसिं णामागोत्तं, न पागता पण्णवेहिंति ॥ ३ ॥

रविशशिग्रहनक्षत्राणि, उपलक्षणमेतत्, तारकाणि च यावत्संख्यानि आख्यातानि सर्वैर्मनुष्यलोके, येषां किमित्याह-येषां सूर्याऽऽदीनां यथोक्तसंख्याकानां सकलमनुष्यलोकभाविनानां प्रत्येकनामगोत्राणि, इहान्वर्थयुक्तं नाम सिद्धान्तपरिभाषया नामगोत्रमित्युच्यते। ततोऽयमर्थः-नामगोत्राणि अन्वर्थयुक्तानि, यदि वा नामानि च गोत्राणि नामगोत्राणि, प्राकृता अनतिशायिनः पुरुषाः न कदाचनापि प्रज्ञापयिष्यन्ति, केवलं यदा तदा वा सर्वज्ञा एव, तत इदमपि सूर्याऽऽदिसंस्थानं प्राकृतपुरुषाप्रमेयं सर्वज्ञोपादृष्टमिति सम्यक् श्रद्धेयमिति ॥३॥

(८) बावट्ठिं पिडगाइं, चंदादिच्चाण मणुयलोयम्मि ।

दो चंदा दो सूरा, य हुंति एक्केकए पिडए ॥३॥

इह द्वौ चन्द्रौ द्वौ सूर्यावेकं पिटकमुच्यते । इत्थंभूतानि चन्द्राऽऽदित्यानां पिटकानि सर्वसंख्यया मनुष्यलोके भवन्ति षट्षष्टिसंख्याकानि । अथ किंप्रमाणं पिटकम् ?, इति पिटकप्रमाणमाह-एकैकस्मिन् पिटके द्वौ चन्द्रौ, द्वौ सूर्यौ च भवतः किमुक्तं भवति ?-द्वौ चन्द्रौ द्वौ सूर्यावित्येतावत्प्रमाणमेकैकं चन्द्राऽऽदित्यानां पिटकमिति । एवंप्रमाणं च पिटकं जम्बूद्वीपे एकम्, जम्बूद्वीपे द्वयोरेव चन्द्रमसोर्द्वयोरेव सूर्ययोर्भावात् । द्वे पिटके लवणसमुद्रे, तत्र चतुर्णां चन्द्रमसां चतुर्णां च सूर्याणां भावात् । एवं षट् पिटकानि धातकीखण्डे, एकविंशतिः कालोदे, षट्त्रिंशदभ्यन्तरपुष्करार्द्धे, इति भवन्ति सर्वमीलने चन्द्राऽऽदित्यानां षट्षष्टिः पिटकानि ॥ ३ ॥

छावट्ठिं पिडगाइं, णक्खत्ताणं तु मणुयलोयम्मि ।
छप्पण्णं णक्खत्ता, हुंती एक्केकए पिडए ॥ ४ ॥

(छावट्ठीत्यादि) सर्वस्मिन्नपि मनुष्यलोके सर्वसंख्यया नक्षत्राणां पिटकानि भवन्ति षट्षष्टिः । नक्षत्रपिटकप्रमाणं च शशिद्वयसंबन्धिनक्षत्रसंख्यापरिमाणम् । तथा चाह-एकैकस्मिन् पिटके नक्षत्राणि भवन्ति षट्पञ्चाशत्संख्याकानि । किमुक्तं भवति ?—षट्पञ्चाशन्नक्षत्रसंख्याकमेकैकं नक्षत्रपिटकं भवति । अत्रापि षट्षष्टिसंख्याभावना, एवमेकं नक्षत्रपिटकं जम्बूद्वीपे, द्वे लवणसमुद्रे, षट् धातकीखण्डे, एकविंशतिः कालोदे, षट्त्रिंशदभ्यन्तरपुष्करार्द्धे इति ।४।

छावट्ठिं पिडगाइं, महग्गहाणं तु मणुयलोयम्मि ।
छावत्तरं गहसतं, होई एक्केकए पिडए ॥ ५ ॥

महाग्रहाणामपि सर्वस्मिन्मनुष्यलोके सर्वसंख्यया पिटकानि भवन्ति षट्षष्टिः । ग्रहपिटकप्रमाणं च शशिद्वयसंबन्धिग्रहसंख्यापरिमाणम् । तथा चाऽऽह-एकैकस्मिन् पिटके ग्रहपिटके भवति षट्सप्ततिशतं षट्सप्तत्यधिकं ग्रहशतं, सप्तत्यधिकग्रहशतपरिमाणमेकैकं ग्रहपिटकमिति । ततः षट्षष्टिसंख्याभावना च प्राग्वत्कर्तव्या ॥ ५ ॥

(६) अथ चन्द्रसूर्याणां कियत्यः पङ्क्तयः, कथं च स्थिताः ?, इत्याह-

चत्तारि य पंतीओ, चंदाइच्चाण मणुअलोयम्मि ।
छावट्ठिं छावट्ठिं, च होइ एक्किक्किया पंती ॥ ६ ॥

(चत्तारि य इत्यादि) इह मनुष्यलोके चन्द्राऽऽदित्यानां पङ्क्तयश्चतस्रो भवन्ति । तद्यथा—द्वे पङ्क्ती चन्द्राणां, द्वे सूर्याणाम्, एकैका च पङ्क्तिर्भवति षट्षष्टिः २। सूर्याऽऽदिसंख्या तद्भावना चैवम्—एकः किल सूर्यो जम्बूद्वीपे मेरोर्दक्षिणभागे चारं चरन् वर्तते, एक उत्तरभागे, एकश्चन्द्रमा मेरोः पूर्वभागे, एकोऽपरभागे । तत्र यो मेरोर्दक्षिणभागे सूर्यश्चारं चरन् वर्तते तत्समश्रेणिव्यवस्थितौ द्वौ दक्षिणभागे सूर्यौ, लवणसमुद्रे, षट् धातकीखण्डे, एकविंशतिः कालोदे, षट्त्रिंशत् अभ्यन्तरपुष्करार्द्धे; अस्यां सूर्यपङ्क्तौ षट्षष्टिः सूर्याः। योऽपि च मेरोरुत्तरभागे व्यवस्थितः सूर्यश्चारं चरन् वर्तते तस्यापि समश्रेण्या व्यवस्थितौ द्वावुत्तरभागे सूर्यौ लवणसमुद्रे, धातकीखण्डे षट्, एकविंशतिः कालोदे, षट्त्रिंशदभ्यन्तरपुष्करार्द्धे इति । अस्यामपि पङ्क्तौ सर्वसंख्यया षट्षष्टिः सूर्याः। तथा यो मेरोः किल पूर्वभागे चारं चरन् वर्तते चन्द्रमास्तत्समश्रेणिव्यवस्थितौ द्वौ पूर्वभाग एव चन्द्रमसौ लवणसमुद्रे, षट् धातकीखण्डे, एकविंशतिः कालोदे, षट्त्रिंशदभ्यन्तरपुष्करार्द्धे इति । अस्यां चन्द्रपङ्क्तौ सर्वसंख्यया षट्षष्टिश्चन्द्रमसः । एवं यो मेरोरपरभागे चन्द्रमास्तन्मूलायामपि पङ्क्तौ षट्षष्टिश्चन्द्रमसो वेदितव्याः ॥ ६ ॥

(७) अथ नक्षत्राणां पङ्क्तिस्वरूपमाह-

छप्पण्णं पंतीओ, णक्खत्ताणं मणुयलोयम्मि ।
छावट्ठिं छावट्ठिं, हवई इक्किक्किया पंती ॥ ७ ॥

नक्षत्राणां मनुष्यलोके सर्वसंख्यया पङ्क्तयो भवन्ति षट्पञ्चाशत्। एकैका च पङ्क्तिर्भवति षट्षष्टिषट्षष्टिनक्षत्रप्रमाणा इत्यर्थः । तथाहि-अस्मिन् किल जम्बूद्वीपे दक्षिणतोऽर्द्धभागे एकस्य शशिनः परिवारभूतानि अभिजिदादीन्यष्टाविंशतिर्नक्षत्राणि क्रमेण व्यवस्थितानि चारं चरन्ति, उत्तरतोऽर्द्धभागे द्वितीयस्य शशिनः परिवारभूतानि अष्टाविंशतिसंख्याकान्यभिजिदादीन्येव नक्षत्राणि क्रमेण व्यवस्थितानि, तत्र दक्षिणतोऽर्द्धभागे यदभिजिन्नक्षत्रं तत्समश्रेणिव्यवस्थिते द्वे अभिजिन्नक्षत्रे लवणसमुद्रे, षट् धातकीखण्डे, एकविंशतिः कालोदे, षट्त्रिंशदभ्यन्तरपुष्करार्द्धे इति सर्वसंख्यया षट्षष्टिरभिजिन्नक्षत्राणि पङ्क्त्या व्यवस्थितानि, अथवाऽऽदीन्यपि दक्षिणतोऽर्द्धभागे पङ्क्त्या व्यवस्थितानि षट्षष्टिसंख्याकानि भावनीयानि । उत्तरतोऽप्यर्द्धभागे यदभिजिन्नक्षत्रं तत्समश्रेणिव्यवस्थिते उत्तरभाग एव द्वे अभिजिन्नक्षत्रे लवणसमुद्रे, षट् धातकीखण्डे, एकविंशतिः कालोदे, षट्त्रिंशत् पुष्करार्द्धे, एवं श्रवणाऽऽदिपङ्क्तयोऽपि प्रत्येकं षट्षष्टिसंख्याकाः वक्तिव्याः, इति भवन्ति सर्वसंख्यया षट्पञ्चाशन्नक्षत्राणां पङ्क्तयः, एकैका च पङ्क्तिः षट्षष्टिसंख्येति ॥७॥

(८) अथ ग्रहाणां पङ्क्तिस्वरूपमाह-

छावत्तरं गहाणं, पंतिसयं हवति मणुयलोयम्मि ।
छावट्ठिं छावट्ठिं, च हवइ इक्किक्किया पंती ॥ ८ ॥

ग्रहाणामङ्गारकप्रभृतीनां सर्वसंख्यया मनुष्यलोके षट्सप्तत्यधिकं शतं भवति, एकैका च पङ्क्तिर्भवति षट्षष्टिषट्षष्टिग्रहसंख्या । अत्रापीयं भावना-इह जम्बूद्वीपे दक्षिणतोऽर्द्धभागे एकस्य शशिनः परिवारभूता अङ्गारकप्रभृतयोऽष्टाशीतिर्ग्रहाः, उत्तरतोऽर्द्धभागे द्वितीयस्य शशिनः परिवारभूता अङ्गारकप्रभृतय एवाष्टाशीतिः। तत्र दक्षिणतोऽर्द्धभागे योऽङ्गारकनामा ग्रहस्तत्समश्रेणिव्यवस्थितौ दक्षिणभाग एव द्वावङ्गारकौ लवणसमुद्रे, षट् धातकीखण्डे, एकविंशतिः कालोदे, षट्त्रिंशद् अभ्यन्तरपुष्करार्द्धे, इति षट्षष्टिः । एवं शेषा अपि सप्ताशीतिग्रहाः पङ्क्तया व्यवस्थिताः प्रत्येकं षट्षष्टिर्वेदितव्याः । एवमुत्तरतोऽप्यर्द्धभागे अङ्गारकप्रभृतीनामष्टाशीतिग्रहाणां पङ्क्तयः प्रत्येकं षट्षष्टिसंख्याका भावनीयाः, इति भवति सर्वसंख्यया ग्रहाणां षट्सप्तत्यधिकं पङ्क्तिशतम्, एकैका च पङ्क्तिः षट्षष्टिसंख्याकेति ॥ ८ ॥

(९) अथैतेषां चन्द्राऽऽदीनां भ्रमणस्वरूपमाह-

ते मेरुमणुं चरंती, पयाहिणाऽऽवत्तमंडला सव्वे ।
अणवट्ठियजोगेहिं, चंदा सूरा गहगणा य ॥ ९ ॥

" ते मेरुमणुं चरंति " इत्यादि । ते मनुष्यलोकवर्तिनः सर्वे चन्द्राः, सर्वे सूर्याः, सर्वे च ग्रहगणाः, अनवस्थितैर्यथायोगमात्मैरात्मैरेकत्रेण सह योगैरुपलक्षिताः (पयाहिणाऽऽवत्तमंडला इति)

प्रकर्षेण सर्वासु दिक्षु विदिक्षु च परि समन्ताच्चन्द्रादित्यादीनां दक्षिण एव मेरुर्भवति यस्मिन्नावर्त्ते मण्डलपरिभ्रमणरूपे स प्रदक्षिणः,प्रदक्षिण आवर्तमण्डलो येषां ते तथा, मेरुमनु लक्षीकृत्य चरन्ति । एतेनेतदुक्तं भवति-सूर्यादित्यः समस्ता अपि मनुष्यलोकवर्तिनः प्रदक्षिणावर्त्तमण्डलगत्या परिभ्रमन्तीति ॥९॥

(१३) इह चन्द्रादित्यग्रहाणां मण्डलानि अनवस्थितानि,यथायोगमन्यस्मिन्नन्यस्मिन् मण्डले तेषां संचारित्वात्, नक्षत्रतारकाणां तु मण्डलान्यवस्थितान्येव । तथा चाऽऽह-

णक्खत्ततारगाणं, अवट्ठिता मंडला मुणेयव्वा ।
ते वि य पदाहिणाऽऽवत्तमेव मेरुं अणु चरंति ॥१०॥

"णक्खत्त" इत्यादि । नक्षत्राणां तारकाणां च मण्डलान्यवस्थितानि ज्ञातव्यानि। किमुक्तं भवति ?-आकालं प्रतिनियतमेकैकं नक्षत्राणां तारकाणां च प्रत्येकं मण्डलमिति । न चैत्थमनवस्थितमण्डलसंस्थानकत्वेनमाशङ्कनीयम्-यथैतेषां गतिरेव न भवतीति । यत आह-"ते वि य" इत्यादि । तान्यपि-नक्षत्राणि, तारकाणि च । सूत्रे पुंस्त्वनिर्देशः प्राकृतत्वात् । प्रदक्षिणाऽऽवर्तमेव, इत्थं क्रियाविशेषणं, मेरुमनु लक्षीकृत्य चरन्ति । एतच्च मेरुं लक्षीकृत्य प्रदक्षिणाऽऽवर्त्तं, तेषां चरणं प्रत्यक्षत एवोपलक्ष्यत इति समवादि ॥१०॥

(१४) अथ चन्द्रसूर्ययोर्मण्डलस्थानादूर्द्ध्वमधश्च संक्रमणपरिनिषेधमाह—

रयणिकरदिणकराणं, उड्ढं च अहेव संकमो नऽत्थि ।
मंडलसंकमणं पुण, सब्भंतरबाहिरं तिरिए ॥ ११ ॥

" रयणिकर " इत्यादि । रजनीकरदिनकराणां चन्द्रादित्यानामूर्द्ध्वमधश्च संक्रमो न भवति, तथा जगत्स्वाभाव्यात् । तिर्यङ् पुनर्मण्डलेषु संक्रमणं भवति । किंविशिष्टम् ?, इत्याह-साभ्यन्तरबाह्यम्, अभ्यन्तरं च बाह्यमभ्यन्तरबाह्यं, सहाभ्यन्तरं बाह्येन वर्त्तत इति साभ्यन्तरबाह्यम् । एतदुक्तं भवति-सर्वाभ्यन्तरान्मण्डलात्परतस्तावन्मण्डलेषु संक्रमणं यावत्सर्वबाह्यं मण्डलं, सर्वबाह्याच्च मण्डलादर्वाक् तावन्मण्डलेषु संक्रमणं यावत्सर्वाऽऽभ्यन्तरमिति ॥११॥

(१५) रयणिकरदिणकराणं, णक्खत्ताणं महागहाणं च ।
चारविसेसेण भवे, सुहदुक्खविधी मणुस्साणं ॥ १२ ॥

' रयणिकर ' इत्यादि । रजनीकरदिनकराणां चन्द्रादित्यानां, नक्षत्राणां च, महाग्रहाणां च चारविशेषेण तेन तेन चारेण सुखदुःखविधयो मनुष्याणां भवन्ति । तथाहि—द्विविधानि सन्ति सदा मनुष्याणां कर्माणि । तद्यथा—शुभवेद्यानि, अशुभवेद्यानि च । कर्मणां सामान्यतो विपाकहेतवः पञ्च । तद्यथा-द्रव्यं, क्षेत्रं, कालो, भवो, भावश्च । उक्तं च-" उदयक्खयखओवसमो-वसमा जं च कम्मणो भणिया । दव्वं खेत्तं कालं, भवं च भावं च संपप्प " ॥ १ ॥ शुभकर्मणां प्रायः शुभवेद्यानां कर्मणां शुभद्रव्यक्षेत्राऽऽदिसामग्री विपाकहेतुः,अशुभवेद्यानामशुभद्रव्यक्षेत्राऽऽदिसामग्री,ततो यदा येषां जन्मनक्षत्राऽऽदिविरोधी चन्द्रसूर्याऽऽदीनां चारो भवति, तदा तेषां प्रायो यान्यशुभवेद्यानि कर्माणि तानि तां तथाविधविपाकसामग्रीमवाप्य विपाकमायान्ति, विपाकमागतानि शरीररोगोत्पादनेन, धनहानिकरणतो वा, प्रियविप्रयोगजनेन वा, कलहसंपादनतो वा दुःखमुत्पादयन्ति । यदा च एषां जन्मनक्षत्राऽऽद्यनुकूलचन्द्राऽऽदीनां चारस्तदा तेषां प्रायो यानि शुभवेद्यानि कर्माणि तानि तां तथाविधां विपाकसामग्रीमधिगम्य विपाकं प्रतिपद्यन्ते, प्रतिपन्नविपाकानि च तानि शरीरनीरोगतासंपादनतो,धनवृद्धिकरणेन वा, वैरोपशमनतः, प्रियसंप्रयोगसंपादनतो वा प्रारब्धाभीष्टप्रयोजननिष्पत्तिकरणतः सुखमनुजनयन्ति । अत एव महीयांसः परमविवेकिनोऽल्पमपि प्रयोजनं शुभतिथिनक्षत्रमुहूर्त्ताऽऽदावारभन्ते, न तु यथाकथञ्चन ।

अत एव जिनानामप्याज्ञा प्रव्राजनाऽऽदिकमधिकृत्येत्थमवतिष्ठते-यथा शुभक्षेत्रे शुभाऽऽदिदिशमभिमुखीकृत्य शुभे तिथिनक्षत्रमुहूर्ताऽऽदौ प्रव्राजनव्रताऽऽरोपणाऽऽदि कर्त्तव्यं, नान्यथा।

तथा चोक्तं पञ्चवस्तुके-

" एसा जिणाणमाणा, खित्ताईयं य कम्मुणो जणिया ।
तदयाइकारणं जं, तम्हा सव्वत्थ जइयव्वं " ॥ १ ॥

अस्या अक्षरगमनिका-एषा जिनानामाज्ञा-यथा शुभक्षेत्रे शुभदिशमभिमुखीकृत्य शुभे तिथिनक्षत्रमुहूर्त्ताऽऽदौ प्रव्राजनव्रताऽऽरोपणाऽऽदि कर्त्तव्यं, नान्यथा। अपि च-क्षेत्राऽऽदयोऽपि कर्मणामुदयाऽऽदिकारणं भगवद्भिरुक्ताः,ततोऽशुभद्रव्यक्षेत्राऽऽदिसामग्रीं प्राप्य कदाचिदशुभवेद्यानि कर्माणि विपाकं गत्वादवमासादयेयुः,तदुदये च गृहीतव्रतभङ्गाऽऽदिदोषप्रसङ्गः। शुभद्रव्यक्षेत्राऽऽदिसामग्र्यां तु प्रायो नाशुभकर्मविपाकसंभव इति निर्विघ्नं सामायिकपरिपालनाऽऽदि। तस्मादवश्यं क्षुण्णेन सर्वत्र शुभक्षेत्राऽऽदौ यतितव्यम्। ये तु भगवन्तोऽतिशयिनस्तेऽतिशयबलादेव निर्विघ्नं साधितं वा सम्यगधिगच्छन्ति, ततो न शुभतिथिमुहूर्त्ताऽऽदिकमपेक्षन्ते इति न तन्मार्गानुसरणं ज्ञानिनां न्याय्यम्। तेन ये परममुनिपर्युपासितप्रवचनविदम्भका अपरिमितजिनशासनोपनिषदद्भूतशास्त्रगुरुपरम्परापोतनिरवद्यविशदकालोचितसामाचारीप्रतिपन्थिनः स्वमतिकल्पितसामाचारीका अभिदधति-यथा न प्रव्राजनाऽऽदिषु शुभतिथिनक्षत्राऽऽदिनिरीक्षणं कर्त्तव्यं, न खलु भगवान् जगत्स्वामी प्रव्राजनायोपस्थितेषु शुभतिथ्यादिनिरीक्षणं कृतवानिति । ते अपास्ता द्रष्टव्याः ॥१२॥

(१६) अथ चन्द्रसूर्याणां केन प्रकारेण प्रकाशक्षेत्रं वर्द्धते, कथं च हीयते ?, तदाह—

तेसिं पविसंताणं, तावक्खेत्तं तु वड्ढते णियगं ।
तेण य कम्मेण पुणो, परिहायति निक्खमंताणं ॥१३॥

'तेसिं' इत्यादि। तेषां सूर्याचन्द्रमसां सर्वबाह्यान्मण्डलादभ्यन्तरं प्रविशतां तापक्षेत्रं प्रतिदिवसं क्रमेण नियमादायामतो वर्द्धते, येन क्रमेण परिवर्द्धते तेनैव क्रमेण सर्वाभ्यन्तरान्मण्डलाद् बहिर्निष्क्रामतां परिहीयते । तथाहि-सर्वबाह्ये मण्डले चारं चरतां सूर्याचन्द्रमसां प्रत्येकं जम्बूद्वीपचक्रवालस्य दशधा विभक्तस्य द्वौ द्वौ भागौ तापक्षेत्रं, ततः सूर्यस्याभ्यन्तरं प्रविशतः प्रतिमण्डलं षष्ट्यधिकषट्त्रिंशच्छतविभक्तस्य द्वौ द्वौ भागौ तापक्षेत्रस्य वर्द्धते, चन्द्रमसस्तु मण्डलेषु प्रत्येकं पौर्णमासीसंभवे क्रमेण प्रतिमण्डलं षट्त्रिंशतिर्भागाः,सप्तविंशतितमस्य च एकः सप्तभाग इति वर्द्धते। एवं च क्रमेण प्रतिमण्डलमभिवृद्धौ यदा सर्वाभ्यन्तरे मण्डले चारं चरतः,तदा प्रत्येकं जम्बूद्वीपचक्रवालस्य त्रयः परिपूर्णा दश भागास्तापक्षेत्रं, ततः पुनरपि सर्वाभ्यन्तरमण्डलाद् बहिर्निष्क्रमणे सूर्यस्य प्रतिमण्डलं षष्ट्यधिकषट्त्रिंशच्छतविभक्तस्य जम्बूद्वीपचक्रवालस्य द्वौ द्वौ भागौ परिहीयेते, चन्द्रमसस्तु मण्डलेषु प्रत्येकं पौर्णमासीसंभवक्रमेण प्रतिमण्डलं षट्त्रिंशतिर्भागाः, सप्तविंशतितमस्य च भागस्य एकः सप्तभाग इति ।

[१७] तेसिं कलंबुयापु-प्फसंठिता हुंति तावखेत्तमुहा ।
अंतो अ संकुआ बा-हिंवित्थडा चंदसूराणं ॥ १४ ॥

(तेसिमित्यादि) तेषां चन्द्रसूर्याणां तापक्षेत्रमुखाः कदम्बुकापुष्पसंस्थिता नालिकापुष्पाऽऽकारा भवन्ति । एतदेव व्याचष्टे-अन्तर्मेरुदिशि संकुचिताः, बहिर्लवणादिशि विस्तृताः । एतच्च प्रागेव चतुर्थे प्राभृते भावितमिति न पुनः प्रन्थ्यते । सू० प्र०१६ पाहु० । जी० मं० द० प० । (' तावक्खेत्त ' शब्दे चैतद् द्रष्टव्यम्)

[१८] अंतो मणुस्सखेत्ते, हवंति चारोवगा तु ववगया ।
पंचविहा जोतिसिया, चंदा सूरा गहगणा य ॥ २० ॥

अन्तर्मध्ये मनुष्यक्षेत्रे मनुष्यक्षेत्रस्य, पञ्चविधा ज्योतिष्काः । तद्यथा-चन्द्राः, सूर्याः, ग्रहगणाः, चशब्दान्नक्षत्राणि, तारकाश्च, भवन्ति चारोपगाश्चारयुक्ताः ॥२०॥

तेण परं जे सेसा, चंदाइच्चगहतारणक्खत्ता ।
णत्थि गती ण वि चारो, अवट्ठिता ते मुणेयव्वा ॥२१॥

तेनेति प्राकृतत्वात् पञ्चम्यर्थे तृतीया । ततो मनुष्यक्षेत्रात्परं यानि शेषाणि चन्द्राऽऽदित्यग्रहतारानक्षत्राणि चन्द्राऽऽदित्यग्रहतारानक्षत्रविमानानि । सूत्रे पुंस्त्वनिर्देशः प्राकृतत्वात् । तेषां नास्ति गतिर्न तस्मात् स्थानाच्चलनं, नापि चारो मण्डलगत्या परिभ्रमणं, किं त्ववस्थितान्येव तानि ज्ञातव्यानि ॥२१॥

(१९) एवं जंबुद्दीवे, तिगुणा लवणे चउग्गुणा हुंति ।
लावणगा य तिगुणिता, ससिसूरा धायईसंडे ॥ २२ ॥

(एवं जंबुद्दीवे इत्यादि) एवं सति एकैकचन्द्रसूर्यो जम्बूद्वीपे त्रिगुणो भवति । किमुक्तं भवति ?-द्वौ चन्द्रमसौ द्वौ सूर्यौ च जम्बूद्वीपे, लवणसमुद्रे तावेकैकौ सूर्याचन्द्रमसौ चतुर्गुणौ भवतः, चत्वारश्चन्द्राः, चत्वारश्च सूर्या लवणसमुद्रे भवन्तीति भावः । लावणिकाः लवणसमुद्रभवाः शशिसूरास्त्रिगुणिता धातकीखण्डे भवन्ति; द्वादश चन्द्राः, द्वादश सूर्या धातकीखण्डे भवन्तीत्यर्थः ॥२२॥

दो चंदा इह दीवे, चत्तारि य सायरे लवणतोए ।
धातइसंडे दीवे, बारस चंदा य सूरा य ॥ २३ ॥
धातइसंडप्पभिती-उद्दिट्ठा तिगुणिता भवे चंदा ।
आदिल्लचंदसहिता, अणंतराऽणंतरक्खेत्ते ॥ २४ ॥

" दो चंदा " इत्यादि सुगमम् । " धायइसंड " इत्यादि । धातकीखण्डः प्रभृतिरादिर्येषां ते धातकीखण्डप्रभृतयः, तेषु धातकीखण्डप्रभृतिषु द्वीपेषु समुद्रेषु च ये उद्दिष्टाश्चन्द्रा द्वादशाऽऽदयः । उपलक्षणमेतत्-सूर्या वा, ते त्रिगुणितास्त्रिगुणीकृताः सन्तः (आदिल्लचंदसहिता त्ति) उद्दिष्टचन्द्रयुक्ताः तद्द्वीपात् समुद्राद्वा प्राक् जम्बूद्वीपमादिं कृत्वा ये प्राक्तनाश्चन्द्राः ते आदिमचन्द्राः, तैरादिमचन्द्रैः, उपलक्षणमेतत्-आदिमसूर्यैश्च सहिता यावन्तो भवन्ति । एतावत्प्रमाणा अनन्तरं कालोदाऽऽदौ भवन्ति । तत्र धातकीखण्डे द्वीपे उद्दिष्टाः चन्द्रा द्वादश, ते त्रिगुणाः क्रियन्ते, जाताः षट्त्रिंशत् । आदिमचन्द्राः षट् । तद्यथा-द्वौ चन्द्रौ जम्बूद्वीपे, चत्वारो लवणसमुद्रे । एतैरादिमचन्द्रैः सहिता द्वाचत्वारिंशद्भवन्ति । एतावन्तः कालोदे समुद्रे चन्द्राः एव एव करणविधिः सूर्याणामपि । तेन सूर्या अपि तथैतावन्तो वेदितव्याः । तथा कालोदे समुद्रे द्विचत्वारिंशच्चन्द्रमस उद्दिष्टाः, ते त्रिगुणाः क्रियन्ते, जातं षट्त्रिंशं शतम् । आदिमचन्द्रा अष्टादश । तद्यथा-द्वौ जम्बूद्वीपे, चत्वारो लवणसमुद्रे, द्वादश धातकीखण्डे । एतैरादिमचन्द्रैः सहितं षट्त्रिंशत्, जातं चतुश्चत्वारिंशं शतम् । एतावन्तः पुष्करवरद्वीपे चन्द्राः, एतावन्त एव सूर्याः । एवं सर्वेष्वपि द्वीपसमुद्रेष्वेतत्करणवशाच्चन्द्रसंख्या प्रतिपत्तव्या ।

(२०) संप्रति प्रतिद्वीपं प्रतिसमुद्रं च ग्रहनक्षत्रतारापरिमाणपरिज्ञानोपायमाह—

रिक्खग्गहतारग्गं, दीवसमुद्दे जत्थिच्छसि णाउं ।
तस्स ससिहिं तु गुणितं, रिक्खग्गहतारग्गं तु ॥२५॥

अत्र अग्रशब्दः परिमाणवाची, यत्र द्वीपे समुद्रे वा नक्षत्रपरिमाणं ग्रहपरिमाणं तारापरिमाणं वा ज्ञातुमिच्छसि तस्य द्वीपस्य समुद्रस्य वा संबन्धिभिः शशिभिः, एकस्य शशिनः परिवारभूतं नक्षत्रपरिमाणं ग्रहपरिमाणं तारापरिमाणं च गुणितं सत् यावद्भवति, तावत्प्रमाणं तत्र द्वीपे समुद्रे वा नक्षत्रपरिमाणं ग्रहपरिमाणं तारापरिमाणमिति । यथा लवणसमुद्रे किल नक्षत्राणां परिमाणं ज्ञातुमिष्टं, लवणसमुद्रे च शशिनश्चत्वारः, तत एकस्य शशिनः परिवारभूतानि यान्यष्टाविंशतिनक्षत्राणि तानि चतुर्भिर्गुण्यन्ते, जातं द्वादशोत्तरं शतं, तावन्ति लवणसमुद्रे नक्षत्राणि । तथा अष्टाशीतिर्ग्रहा एकस्य शशिनः परिवारभूताः, ते चतुर्भिर्गुण्यन्ते, जातानि त्रीणि शतानि द्विपञ्चाशदधिकानि ३५२ । एतावन्तो लवणसमुद्रे ग्रहाः । तथा एकस्य शशिनः परिवारभूतानि तारागणकोटीकोटीनां षट्षष्टिः सहस्राणि नवशतानि पञ्चसप्तत्यधिकानि, तानि चतुर्भिर्गुण्यन्ते, जातानि कोटाकोटीनां द्वे लक्षे सप्तषष्टिसहस्राणि नव शतानि २६७९००००००००००००००० । एतावत्यो लवणसमुद्रे तारागणकोटाकोट्यः एवंरूपा च नक्षत्राऽऽदीनां संख्या प्रागेवोक्ता । एवं सर्वेष्वपि द्वीपसमुद्रेषु नक्षत्राऽऽदिसंख्यापरिमाणं परिभावनीयम् ।

तत्तद्द्वीपसमुद्रवर्तिग्रहाऽऽदिसंख्या यन्त्रकादवधार्या-

नाम	चन्द्र	सूर्य	ग्रह	नक्षत्र	तारा
जम्बूद्वीप	२	२	१७६	५६	१३३९५००००००००००००००
लवणसमुद्र	४	४	३५२	११२	२६७९००००००००००००००००
धातकीखण्ड	१२	१२	१०५६	३३६	८०३७०००००००००००००००००
कालोदसमुद्र	४२	४२	३६९६	११७६	२८१२९५००००००००००००००
पुष्करवरद्वीप	१४४	१४४	१२६७२	४०३२	९६४४४००००००००००००००००
सर्वसंख्या	२०४	२०४	१७९५२	५७१२	९७५६९१८०००००००००००००००००

(२१) बहिता तु माणुसनग-स्स चंदसूराणऽवट्ठिता तेआ ।
चंदा अभिया जुत्ता, सूरा पुण हुंति पुस्सेहिं ॥ २६ ॥

"बहिता" इत्यादि । मानुषनगस्य मानुषोत्तरपर्वतस्य बहिश्चन्द्रसूर्याणां तेजांसि अवस्थितानि भवन्ति । किमुक्तं भवति ?-सूर्याः सदैवानत्युष्णं तेजसा, न तु जातुचिदपि मनुष्यलोके ग्रीष्मकाल इवात्युष्णतेजसः । चन्द्रमसोऽपि सर्वदैवानतिशीतलेश्याकाः, न तु कदाचनाप्यन्तर्मनुष्यक्षेत्रस्य शिशिरकाल इवातिशीततेजसः । तथा मनुष्यक्षेत्राद् बहिः सर्वेऽपि चन्द्राः सर्वदैवाभिजिता नक्षत्रेण युक्ताः, सूर्याः पुनर्भवन्ति पुष्येण युक्ता इति ॥२६॥ सू० प्र० १६ पाहु० । (चन्द्रसूर्याणां चन्द्रचन्द्राणां तथा सूर्यसूर्याणां च परस्परमन्तरपरिमाणप्रतिपादनम् 'अंतर' शब्दे प्रथमभागे ६६ पृष्ठे गतम्)

(२२) संप्रति बहिश्चन्द्रसूर्याणां पङ्क्त्यवस्थानमाह-

सूरंतरिया चंदा, चंदंतरिया य दिणयरा दित्ता ।
चित्तंतरलेसागा, सुहलेसा मंदलेसा य ॥ २७ ॥

(सूरंतरिय त्ति) नृलोकाद् बहिः पङ्क्त्या स्थिताः सूर्यान्तरिताश्चन्द्राश्चन्द्रान्तरिता दिनकराः दीप्ताः दीप्यन्ते स्म, दीप्ता भास्वरा इत्यर्थः । कथंभूतास्ते चन्द्रसूर्याः ?, इत्याह-चित्रान्तरलेश्याकाः चित्रमन्तरं लेश्या सप्रकाशरूपा येषां ते तथा, तत्र चित्रमन्तरं चन्द्राणां सूर्यान्तरितत्वात्, सूर्याणां चन्द्रान्तरितत्वात्, चित्रलेश्या चन्द्रमसां शीतरश्मित्वात्, सूर्याणामुष्णरश्मित्वात् । लेश्याविशेषप्रदर्शनार्थमाह-(सुहलेसा मंदलेसा य त्ति) सुखं लेश्याश्चन्द्रमसो, न शीतकाले मनुष्यलोक इवात्यन्तशीतरश्मय इत्यर्थः । मन्दलेश्याः सूर्याः, न तु मनुष्यलोके निदाघसमये इव एकान्तत उष्णरश्मय इत्यर्थः । आह च तत्त्वार्थटीकाकारो हरिभद्रसूरिः-नात्यन्तशीताश्चन्द्रमसो, नात्यन्तोष्णाः सूर्याः, किं तु साधारणं रूपमेषामिति ॥२६॥

(२३) इहेदमुक्तं यत्र द्वीपे समुद्रे वा नक्षत्राऽऽदिपरिमाणं ज्ञातुमिष्यते तत्र एकशशिपरिवारभूतनक्षत्राऽऽदिपरिमाणं तावद्भिः शशिभिर्गुणयितव्यमिति । तत एकशशिपरिवारभूतानां ग्रहाऽऽदीनां संख्यामाह-

अट्ठासीतिं च गहा, अट्ठावीसं च हुंति नक्खत्ता ।
एगससीपरिवारो, इत्तो ताराण वोच्छामि ॥ ३० ॥
छावट्ठि सहस्साइं, णव चेव सताइं पंचसयराइं ।
एगससीपरिवारो, तारागणकोडिकोडीणं ॥ ३१ ॥

ता अंतोमणुस्सक्खेत्ते जे चंदिमसूरियगहगणणक्खत्ततारारूवा, ते णं देवा किं उड्ढोववन्नगा, कप्पोववन्नगा, विमाणोववन्नगा, चारोववन्नगा, चारट्ठितिया, गतिरतिया, गतिसमावन्नगा ? । ता ते णं देवा णो उड्ढोववन्नगा, णो कप्पोववन्नगा, विमाणोववन्नगा, चारोववन्नगा, चारट्ठितीया, गइरइया, गतिसमावन्नगा उड्ढीमुहकलंबुआपुप्फसंठाणसंठितेहिं जोअणसहस्सोएहिं तावक्खेत्तेहिं साहस्सिआहिं बाहिराहिं वेउव्वियाहिं परिसाहिं महताऽहतनट्टगीयवाइय० जावरवेणं दिव्वाइं भोगभोगाइं भुंजमाणे विहरंति, सुहलेस्सा मंदलेस्सा [मंदातवलेसा] चित्तंतरलेसा अन्नोण्णसमोगाढाहिं लेस्साहिं कूडा इव ठाणट्ठिता ते पदेसे सव्वतो समंता ओभासंति, उज्जोवेंति, तवेंति, पभासेंति, ता तेसिं णं देवाणं जाइं इंदा चयंति

इक्किट्ठमीहणादबोलकलकलरवेणं अच्छं पव्वतरायं पदाहिणावत्तं मंडलचारं मेरुं अणुपरियट्टंति ।

"अट्ठासीतिं च गहा" इत्यादि गाथाद्वयं निगदसिद्धम् । "ता अंतो मणुस्सखेत्ते" इत्यादि । अन्तर्मनुष्यक्षेत्रस्य ये चन्द्रसूर्यग्रहगणनक्षत्रतारारूपा देवास्ते किमूर्द्धोपपन्नाः सौधर्माऽऽदिदेवेभ्यो द्वादशभ्यः कल्पेभ्य ऊर्द्धमुपपन्नाः ?, कल्पेषु सौधर्माऽऽदिषु उपपन्नाः कल्पोपपन्नाः ?, विमानेषु सामान्येषूपपन्ना विमानोपपन्नाः ?, चारो मण्डलगत्या परिभ्रमणं, तमुपपन्ना आश्रिताश्चारोपपन्नाः ?, चारस्य यथोक्तरूपस्य स्थितिरभावो येषां ते चारस्थितिकाः ?, अपगतचारा इत्यर्थः । गतौ रतिरासक्तिः प्रीतिर्येषां ते गतिरतिकाः ?। एतेन गतौ रतिमात्रमुक्तम् । संप्रति साक्षाद्गतिं प्रश्नयति-गतिसमापन्ना गतियुक्ताः ?। एवं प्रश्ने कृते भगवानाह-"ता ते णं देवा" इत्यादि । 'ता' इति पूर्ववत् । ते चन्द्राऽऽदयो देवा नोर्द्धोपपन्नाः, नाऽपि कल्पोपपन्नाः, किं तु विमानोपपन्नाः, चारोपपन्नाश्चारसहिताः, नो चारस्थितिकाः, तथा स्वभावतोऽपि गतिरतिकाः, साक्षाद्गतियुक्ताश्च, ऊर्द्धमुखीकृतकदम्बुकापुष्पसंस्थानसंस्थितयोजनसाहस्रिकैरनेकयोजनसहस्रप्रमाणैस्तापक्षेत्रैः साहस्रिकाभिरनेकसहस्रसंख्याभिर्बाह्याभिः पर्षद्भिः । अत्र बहुवचनमनेकापेक्षया, वैक्रियिकाभिर्विकुर्वितनानारूपधारिणीभिः, महता रवेणेति योगः । अहतानि अक्षतानि, अनघातानित्यर्थः । यानि नाट्यानि गीतानि वादित्राणि च, यच्च तन्त्र्यो वीणाः, ये च तलतालाः हस्ततालाः, यानि च त्रुटितानि शेषाणि तूर्याणि, ये च घनाघनाकारा ध्वनिसाधर्म्यात् पटुप्रवादिता निपुणपुरुषप्रवादिता मृदङ्गाः, तेषां रवेण, तथा स्वभावतो गतिरतिकैर्बहुपर्षदन्तर्गतैर्देवैर्वेगेन गच्छत्सु विमानेषु उत्कृष्ट उत्कर्षवशेन यो मुख्यते सिंहनादो, यच्च क्रियते बोलो नाम मुखहस्तं दत्त्वा महता शब्देन फूत्करणं, यच्च कलकलो व्याकुलशब्दसमूहस्तद्रवेण, मेरुमिति योगः किंविशिष्टम् ?, इत्याह-अच्छमतश्च स्वच्छमतिनिर्मलजाम्बूनदरत्नबहुलत्वात्, पर्वतराजं पर्वतेन्द्रं, प्रदक्षिणावर्त्तं मण्डलचारं यथा भवति तथा मेरुमनु लक्षीकृत्य 'परियट्टंति' पर्यटन्ति । सू० प्र० १६ पाहु० । चं० प्र० । जी० ।

(बाह्यज्योतिष्कदेवेन्द्रस्थानम् 'इंदट्ठाण' शब्दे द्वितीयभागे ५३५ पृष्ठे गतम्)

ता बहिया णं मणुस्सखेत्तस्स जे चंदिमसूरियगह० जाव तारारूवा ते णं देवा किं उड्ढोववन्नगा, कप्पोववन्नगा, विमाणोववन्नगा, चारोववन्नगा, चारट्ठितिया, गतिरतिया, गतिसमावन्नगा ? । ता ते णं देवा णो उड्ढोववन्नगा, णो कप्पोववन्नगा, विमाणोववन्नगा, णो चारोववन्नगा, चारट्ठितिया, णो गइरइया, णो गतिसमावन्नगा पक्किट्ठसंठाणसंठितेहिं जोयणसतसाहस्सीएहिं तावक्खेत्तेहिं सतसाहस्सियाहिं बाहिराहिं वेउव्वियाहिं परिसाहिं महताऽहतनट्टगीयवाइय० जावरवेणं दिव्वाइं भोगभोगाइं भुंजमाणे विहरंति, सुहलेस्सा मंदलेस्सा [मंदातवलेसा] चित्तंतरलेसा अन्नोण्णसमोगाढाहिं लेस्साहिं कूडा इव ठाणट्ठिता ते पदेसे सव्वतो समंता ओभासंति, उज्जोवेंति, तवेंति, पभासेंति, ता तेसिं णं देवाणं जाइं इंदा चयंति

से कहमिदाणिं पकरेंति, ता० जाव चत्तारि पंच सामाणिया देवा तं ठाणं तहेव० जाव छम्मासे ।

" ता वहिया णं " इत्यादि प्रश्नसूत्रमिदं प्राग्वद् व्याख्येयम। भगवानाह-"ता ते णं"इत्यादि। 'ता' इति पूर्ववत्। ते मनुष्यक्षेत्राद् बहिर्वर्तिनश्चन्द्रादित्यादयो देवा नोर्द्धोपपन्नाः,नापि कल्पोपपन्नाः, किं तु विमानोपपन्नाः। तथा नो चारोपपन्नाश्चारमुक्ताः, किं तु चारस्थितिकाः। अत एव नो गतिरतयो,नापि गतिसमापन्नकाः, एकैकस्यां संस्थानसंस्थितिभियोजनशतसाहस्रिकैरातपक्षेत्रैर्यथा पञ्चदशका आयामतो दीर्घा प्रज्ञप्ति,विस्तारतस्तु स्तोका,चतुरस्राश्च, तथा तेषामपि मनुष्यक्षेत्राद्बहिर्व्यवस्थितानां चन्द्रसूर्याणामातपक्षेत्राण्यायामतोऽनेकयोजनशतसहस्रप्रमाणानि,विस्तरत एकयोजनशतसहस्राणि,चतुरस्राणि चेति। तैरित्थंभूतैरातपक्षेत्रैः शतसाहस्रिकाभिरनेकसहस्रसंख्याभिर्बाह्याभिः पर्वद्भिः,अपि बहुवचनं व्यक्त्यपेक्षया। महतेत्यादि पूर्ववत्। दिविे भवान् दिव्यान्,भोगभोगान् भोगार्हान् शब्दादीन् भोगान्,भुञ्जाना विहरन्ति। कथंभूताः?,इत्याह-शुभलेश्याः। एतच्च विशेषणं चन्द्रमसः प्रति,तेन नतिशीततेजसः, किं तु सुखोत्पादपरमलेश्याका इत्यर्थः। मन्दा लेश्या रश्मिसंघातो येषां ते तथा। कथंभूताश्चन्द्रादित्याः?, इत्याह-चित्रान्तरलेश्याः-चित्रमन्तरं लेश्या च येषां ते तथा। भावार्थश्चास्य पदस्य प्रागेवोपदर्शितः। तत इत्थंभूताश्चन्द्रादित्याः परस्परमवगाढाभिर्लेश्याभिः। तथाहि—चन्द्रमसां सूर्याणां च प्रत्येकं लेश्या योजनशतसहस्रप्रमाणं, विस्तारश्चन्द्रसूर्याणां च सूचीपङ्क्त्या व्यवस्थितानां परस्परमन्तरं पञ्चाशद्योजनसहस्राणि। ततश्चन्द्रप्रभासंमिश्राः सूर्यप्रज्ञाः, सूर्यप्रभासंमिश्राश्चन्द्रप्रज्ञाः, इत्थं परस्परमवगाढसंमिश्राभिः कूटानि च पर्वतोपरि व्यवस्थितशिखराणीव स्थानस्थिता सदैव एकत्र स्थाने स्थिताः,तान् प्रदेशान् स्वस्वप्रत्यासन्नान् अवभासयन्ति,उद्द्योतयन्ति,तापयन्ति,प्रकाशयन्ति। "ता तेसि णं जाहे इंदे चयंति" इत्यादि प्राग्वद् व्याख्येयम। सू० प्र० १७ पाहु०। जी०। चं०प्र०।

(२४) संप्रति चन्द्रसूर्ययोश्च्यवनोपपातौ वक्तव्याविति ततस्तद्विषयं प्रश्नसूत्रमाह-

ता कहं ते चवणोववाते आहिए ति वदेज्जा?। तत्थ खलु इमाओ पणवीसं पडिवत्तीओ पण्णत्ताओ। तत्थ एगे एवमाहंसु-ता अणुसमयमेव चंदिमसूरिया अण्णे चयंति, अण्णे उववज्जंति, आहिय त्ति वएज्जा, एगे एवमाहंसु । एगे पुण एवमाहंसु-ता अणुमुहुत्तमेव चंदिमसूरिया अण्णे चयंति, अण्णे उववज्जंति, आहिय त्ति वएज्जा, एगे एवमाहंसु जहेव हेट्ठा तहेव० जाव ता एगे पुण एवमाहंसु-ता अणु ओसप्पिणीउस्सप्पिणीमेव चंदिमसूरिया अण्णे चयंति, अण्णे उववज्जंति, एगे एवमाहंसु । वयं पुण एवं वदामो-ता चंदिमसूरिया णं देवा महिड्ढिया महाजुईया महाबला महाजसा महासोक्खा महाणुभावा वरवत्थमल्लधरा वरगंधधरा वराभरणधारी अव्वोच्छित्तिणयट्ठयाए अण्णे चयंति, अण्णे उववज्जंति, आहिय त्ति वएज्जा।

"ता कहं ते" इत्यादि। 'ता' इति पूर्ववत्। कथं केन प्रकारेण भगवन् ! त्वया चन्द्रादीनां च्यवनोपपातौ व्याख्यातावित्युच्यते ?। सूत्रे च द्विरप्यत्र बहुवचनं प्राकृतत्वात्। उक्तं च-"बहुवयणेण दुवयणं" इति। एवं प्रश्ने कृते भगवानेतद्विषये यावन्तः प्रतिपत्तयः सन्ति तावतीरुपदर्शयति-" तत्थ " इत्यादि। तत्र च्यवनोपपातविषये खल्विमा वक्ष्यमाणस्वरूपाः पञ्चविंशतिः प्रतिपत्तयः परतीर्थिकाभ्युपगमरूपाः प्रज्ञप्ताः। तथथा-"तत्थेगे " इत्यादि। तेषां पञ्चविंशतिपरतीर्थिकानां मध्ये एके परतीर्थिका एवमाहुः-'ता' इति। तेषां प्रथमं स्वशिष्यं प्रत्यनेकवक्तव्यतोपक्रमे क्रमोपदर्शनार्थम, अनुसमयमेव चन्द्रसूर्या अन्ये पूर्वोत्पन्नाश्च्यवन्ते च्यवमानाः, अन्ये अपूर्व उत्पद्यन्ते उत्पद्यमाना आख्याता इति वदेत्। अत्रोपसंहारमाह-' ता ' एके एवमाहुः। एके पुनरेवमाहुः-अनुमुहूर्तमेव चन्द्रसूर्या अन्ये पूर्वोत्पन्नाश्च्यवन्ते च्यवमानाः, अन्येऽपूर्वा उत्पद्यन्ते उत्पद्यमाना आख्याता इति वदेत्। उपसंहारमाह-" एगे एवमाहंसु जहा हिट्ठा तहेव० जाव " इत्यादि। एवमुक्तेन प्रकारेण यथा अधस्तात् षष्ठे प्राभृते ओजःसंस्थितौ चिन्त्यमानायां पञ्चविंशतिप्रतिपत्तय उक्तास्तथैवात्रापि वक्तव्याः। ता अणुओसप्पिणिउस्सप्पिणीमेव " इत्यादि चरमसूत्रम्। तात्रैवं भणितव्याः-" एगे पुण एवमाहंसु-ता अणुरादिंदियमेव चंदिमसूरिया अण्णे चयंति, अण्णे उववज्जंति,आहिया इति वएज्जा,एगे एवमाहंसु ३। एगे पुण एवमाहंसु-साणुपक्खमेव चंदिमसूरिया अण्णे चयंति, अण्णे उववज्जंति, आहिया इति वएज्जा, एगे एवमाहंसु ४। एगे पुण एवमाहंसु-ता अणुसमयमेव चंदिमसूरिया अण्णे चयंति,अण्णे उववज्जंति,आहिय त्ति वएज्जा,एगे एवमाहंसु ५। एगे पुण एवमाहंसु-ता अणु उडमेव चंदिमसूरिया अण्णे चयंति,अण्णे उववज्जंति, आहिय त्ति वएज्जा,एगे एवमाहंसु ६। एवं ता अणुसमयमेव ७। ता अणुसंवच्छरमेव ८। ता अणुजुगमेव ९। ता अणुवाससयमेव १०। ता अणुवाससहस्समेव ११। ता अणुवाससयसहस्समेव १२। ता अणुपुव्वमेव १३। ता अणुपुव्वसयमेव १४। ता अणुपुव्वसहस्समेव १५। ता अणुपुव्वसयसहस्समेव १६। ता अणुपलिओवममेव १७। ता अणुपलिओवमसयमेव १८। ता अणुपलिओवमसहस्समेव १९। ता अणुपलिओवमसयसहस्समेव २०। ता अणुसागरोवममेव २१। ता अणुसागरोवमसयमेव २२। ता अणुसागरोवमसहस्समेव २३। ता अणुसागरोवमसयसहस्समेव २४।" पञ्चविंशतितमप्रतिपत्तिसूत्रं तु साक्षादेव सूत्रकृता दर्शितम। तदेवमुक्ताः परतीर्थिकप्रतिपत्तयः। एताश्च सर्वा अपि मिथ्यारूपाः। तत एताभ्यः पृथग्भूतं स्वमतं भगवानुपदर्शयति-" वयं पुण " इत्यादि। वयं पुनरुत्पन्नकेवलज्ञाना एवं वक्ष्यमाणेन प्रकारेण वदामः। तमेव प्रकारमाह-"ता चंदिम" इत्यादि। 'ता' इति पूर्ववत्। चन्द्रसूर्याः,अमिताभिधानाग्रमहिष्यः। देवा महर्द्धिकाः,महती ऋद्धिर्विमानपरिवाराऽऽदिका येषां ते तथा। तथा महती द्युतिः शरीराऽऽभरणाऽऽभिता येषां ते महाद्युतयः,तथा महद् बलं शारीरप्रमाणं येषां ते महाबलाः, तथा महद् विस्तीर्णं सर्वस्मिन्नपि जगति विस्मृतत्वाद् यशः श्लाघा येषां ते महायशसः। तथा महान् भवनपतिव्यन्तरेभ्योऽतिप्रभूतः, तदपेक्षया तेषां प्रशान्तत्वात्, सौख्यं येषां ते महासौख्याः, तथा महान् अनुभावो वैक्रियकरणाऽऽदिविषयोऽचिन्त्यः शक्तिविशेषो येषां ते महानुभावाः। वरवस्त्रमाल्यधरा वरगन्धधरा वराऽऽभरणधरा अव्यवच्छित्तिनयार्थतया कथञ्चित्कनयमतेन कालं वक्ष्यमाणप्रमाणं स्वस्वा-

दुर्व्यवच्छेदे, अन्ये पूर्वोत्पन्नाश्च्यवन्ते च्यवमानाः, अन्ये तथा जगत्स्वाभाव्यात् प्रवाहादारतो नियमत उत्पद्यन्ते उत्पद्यमाना आख्याता इति वदेत् स्वशिष्येभ्यः । सू० प्र० १७ पाहु० ।

[२५] ता पुक्खरवरोदे णं समुद्दे केवतिया चंदा पभासेंसु वा,पभासंति वा,पभासिस्संति वा पुच्छा तहेव ?। ता पुक्खरवरोदे णं समुद्दे णं संखेज्जा चंदा पभासेंसु वा, पभासंति वा,पभासिस्संति वा० जाव संखेज्जाओ तारागणकोडिकोडीओ सोभिंसु वा,सोभंति वा, सोभिस्संति वा। एतेणं अभिलावेणं वरुणवरे दीवे वरुणोदे समुद्दे ४, खीरवरे दीवे खीरोदे समुद्दे ५, घतवरे दीवे घतोदे समुद्दे ६, खोतवरे दीवे खोतोदे समुद्दे ७, णंदिस्सरवरे दीवे णंदिस्सरवरे समुद्दे ८,अरुणे दीवे अरुणोदे समुद्दे ९, अरुणवरे दीवे अरुणवरे समुद्दे १०, अरुणवरोवभासे दीवे अरुणवरोवभासे समुद्दे ११, कुंडले दीवे कुंडलोदे समुद्दे १२,कुंडलवरे दीवे कुंडलवरोदे समुद्दे १३,कुंडलवरोवभासे दीवे कुंडलवरोवभासे समुद्दे १४, सव्वेसिं विक्खंभपरिक्खेवजोतिसाइं पुक्खरोदसागरसरिसाइं ।

"सव्वेसिं" इत्यादि । सर्वेषामुक्तस्वरूपाणां द्वीपसमुद्राणामन्यत् कुण्डलवरावभाससमुद्रपर्यन्तानां विष्कम्भपरिक्षेपज्योतिषाणि पुष्करोदसागरसदृशानि च वक्तव्यानि, सङ्ख्येययोजनप्रमाणो विष्कम्भः, सङ्ख्येययोजनप्रमाणः परिक्षेपः, सङ्ख्येयाश्चन्द्राऽऽदयो वक्तव्या इत्यर्थः। सू० प्र० १६ पाहु० । चं०प्र० ।

ता रुयगे णं दीवे केवतिया चंदा पभासेंसु वा, पभासंति वा, पभासिस्संति वा पुच्छा ?। ता रुयगे णं असंखेज्जाइं चंदा पभासेंसु वा, पभासंति वा, पभासिस्संति वा० जाव असंखेज्जाओ तारागणकोडिकोडीओ सोभं सोभिंसु वा,सोभंति वा, सोभिस्संति वा, एवं रुयगे समुद्दे, रुयगवरे दीवे, रुयगवरोदे समुद्दे,रुयगवरोवभासे दीवे,रुयगवरोवभासे समुद्दे, एवं तिपडोयारा णेतव्वा० जाव सूरे दीवे, सूरोदे समुद्दे, सूरवरे दीवे, सूरवरे समुद्दे, सूरवरोवभासे दीवे, सूरवरोवभासे समुद्दे, सव्वेसिं विक्खंभपरिक्खेवजोतिसाइं रुयगवरदीवसरिसाइं ॥

"सव्वेसिं" इत्यादि । सर्वेषां रुचकसमुद्राऽऽदीनां सूर्यवरावभाससमुद्रपर्यन्तानां विष्कम्भपरिक्षेपज्योतिषाणि रुचकद्वीपसदृशानि वक्तव्यानि, असंख्येययोजनप्रमाणो विष्कम्भोऽसंख्येययोजनप्रमाणः परिक्षेपोऽसंख्येयाः प्रत्येकं चन्द्रसूर्यग्रहनक्षत्रतारका वक्तव्या इति भावः । सू० प्र० १७ पाहु० । चं०प्र० ।

ता देवे णं दीवे केवतिया चंदा पभासेंसु वा, पभासंति वा, पभासिस्संति वा पुच्छा तहेव ?। ता देवे णं दीवे असंखेज्जा चंदा पभासेंसु वा, पभासंति वा, पभासिस्संति वा० जाव असंखेज्जाओ तारागणकोडिकोडीओ सोभं सोभेंसु वा, सोभंति वा, सोभिस्संति वा । एवं देवोदे समुद्दे, णागे दीवे, णागोदे समुद्दे,जक्खे दीवे,जक्खोदे समुद्दे, भूते दीवे,भूतोदे समुद्दे,सयंभूरमणे दीवे,सयंभूरमणे समुद्दे सव्वे दीवसरिसा। सू०प्र० १६ पा० । चं०प्र० । जी० ।

(२६) चन्द्रसूर्ययोः परिवारो यथा-

एगमेगस्स णं भंते ! चंदिमसूरियस्स केवतिओ णक्खत्तपरिवारो पण्णत्तो ?, केवतिओ महग्गहपरिवारो पण्णत्तो ?, केवतिओ तारागणकोडाकोडीओ परिवारो पण्णत्तो ?। गोयमा ! एगमेगस्स णं चंदिमसूरियस्स-

"अट्ठासीइं च गहा, अट्ठावीसं च होइ णक्खत्ता ।
एगससीपरिवारो, एत्तो तारागणं वोच्छं ॥१॥
छावट्ठिसहस्साइं, णव चेव सयाइं पंचसयराइं ।
एगससीपरिवारो, तारागणकोडिकोडीणं" ॥२॥

"एगमेगस्स णं भंते ! चंदिमसूरियस्स" इत्यादि । एकैकस्य भदन्त ! चन्द्रसूर्यस्य, अनेन च पदेन यथा नक्षत्राऽऽदीनां चन्द्रः स्वामी, तथा सूर्योऽपि, तस्याऽपीन्द्रत्वादिति ख्यापयन्ति । कियन्ति नक्षत्राणि परिवारः प्रज्ञप्तः ?,कियन्तो महाग्रहा अङ्गारकाऽऽदयः परिवारः प्रज्ञप्तः ?, कियत्यस्तारागणकोटीकोट्यः परिवारः प्रज्ञप्तः ?। इह यूयादृ पुस्तकेषु वाचनाभेदो,गलितानि च सूत्राणि बहुषु पुस्तकेषु, ततो यथाऽवस्थितवाचनाभेदप्रतिपत्त्यर्थं गलितसूत्रोद्धरणार्थं चैवं सूत्रमान्वपि विधियन्ते । भगवानाह-गौतम ! एकैकस्य चन्द्रसूर्यस्य अष्टाविंशतिर्नक्षत्राणि परिवारः प्रज्ञप्तः, अष्टाशीतिर्महाग्रहाः परिवारः प्रज्ञप्तः । "छावट्ठिसहस्साइं" इति गाथा । षट्षष्टिः सहस्राणि नव चैव शतानि पञ्चसप्तति एकस्याशेः परिवारः तारागणकोटीकोटीनाम्, कोटीकोटीति कोट्य एवं संज्ञा, ततस्तारागणकोटीनामिति द्रष्टव्यम । जी० ३ प्रति० १ उ० । एते च यद्यपि चन्द्रस्यैव परिवारोऽन्यत्र श्रूयन्ते,तथापि सूर्यस्यापीन्द्रत्वादेत एव परिवारतयाऽवसेया इति । स० ८८ सम० । सं० । सू० प्र० ।

(२७) कीदृशाश्चन्द्राऽऽदीनामनुभाव इति, ततस्तद्विषयं प्रश्नसूत्रमाह-

ता कहं ते अणुभावे आहिते ति वदेज्जा ?। तत्थ खलु इमाओ दो पडिवत्तीओ पण्णत्ताओ। तत्थ एगे एवमाहंसु-ता चंदिमसूरिया णं णो जीवा, अजीवा, णो घणा, झुसिरा, बादरबोंदिधरा, कलेवरा नत्थि णं तेसिं उट्ठाणे ति वा कमे ति वा बले ति वा विरिए ति वा पुरिसक्कारपरक्कमे ति वा,ते णो विज्जुं लवंति,णो असणिं लवंति,णो थणितं लवंति,अहे य णं बादरे वाउकाए समुच्छाति,अहे य णं बादरे वाउकाए समुच्छित्ता विज्जुं पि लवंति, असणिं पि लवंति, थणितं पि लवंति, एगे एवमाहंसु । एगे पुण एवमाहंसु-ता चंदिमसूरिया णं जीवा, णो अजीवा, घणा, णो सुसिरा बादरबोंदिधरा, नो कलेवरा अत्थि णं तेसिं उट्ठाणे ति वा कमे ति वा बले ति वा विरिए ति वा पुरिसक्कारपरक्कमे ति वा, ते पि विज्जुं पि लवंति, असणिं पि लवंति, थणियं पि लवंति, एगे एवमाहंसु । वयं पुण एवं वदामो-ता चंदिमसूरिया णं देवा महिड्ढिया० जाव महाणुभावा वरवत्थधरा वरमल्लधरा वराभरणधारी अन्नोन्नचिरचिरणयट्ठताए अन्ने चयंति, अन्ने उववज्जंति।

"ता कहं ते" इत्यादि । 'ता' इति पूर्ववत् । कथं केन प्रकारेण चन्द्राऽऽदीनामनुभावः स्वरूपविशेष आख्यात इति वदेत् ?। एवमुक्ते भगवानाह-एतद्विषये द्वे प्रतिपत्ती । ते उपदर्शयति-" तत्थ खलु " इत्यादि । तत्र चन्द्राऽऽदीनामनुभावविषये खल्वियमे द्वे प्रतिपत्ती परतीर्थिकाभ्युपगमरूपे प्रज्ञप्ते । तद्यथा-" तत्थेगे " इत्यादि । तत्र तेषां द्वयानां परतीर्थिकानां मध्ये एके परतीर्थिका एवमाहुः-(ता इति) तेषां परतीर्थिकानां प्रथमं स्वाशयं प्रत्येकवक्तव्यतोपक्रमे क्रमोपदर्शनार्थं चन्द्रसूर्याः, णमितिवाक्यालङ्कारे, नो जीवा जीवरूपाः, किं त्वजीवाः। तथा नो घनानि निबिडप्रदेशोपचयाः, किं तु शुषिराः। तथा बादरवोन्दिधराः प्रधानसुजीवमुक्तावयवशरीरोपेताः, किं तु कलेवराः कलेवरमात्रास्तथा नास्ति, णमिति वाक्यालङ्कारे,तेषां चन्द्राऽऽदीनाम्, अत्थानमुद्धीनवनम, इतिरुपदर्शने, वाशब्दो विकल्पे, समुच्चये वा। कर्म कृतक्रेपणावक्षेपणादि, बलं शारीरप्रमाणं, वीर्यमात्मरोस्साहः,(पुरिसक्कारपरक्कमे इति) पुरुषकारः पौरुषाभिमानः,पराक्रमः स एवासाधितार्थाभिमतप्रयोजनः । पुरुषकारश्च पराक्रमश्च पुरुषकारपराक्रमम्। वाशब्दः सर्वत्रापि पूर्ववत्। तथा ते चन्द्राऽऽदित्याः (नो विज्जुयं लवंति ति) न विद्युतं प्रवर्त्तयन्ति, नाप्यशनिं विद्युद्विशेषरूपं, नापि गर्जितं मेघध्वनिं, किं तु "अहे णं" इत्यादि। चन्द्राऽऽदित्याऽऽदीनामधो,णमिति पूर्ववत्। बादरो वायुकायिकः संमूर्च्छति,अधश्च बादरो वायुकायिकः संमूर्च्छति, (विज्जुं पि लवइ त्ति) विद्युतमपि प्रवर्तयन्ति,अशनिमपि प्रवर्तयन्ति, गर्जितमपि प्रवर्त्तयन्ति, विद्युदादिरूपेण परिणमन्ति इति भावः । अत्रोपसंहारमाह -(एगे एवमाहंसु) १। एके पुनरेवमाहुः-'ता' इति प्राग्वत्। चन्द्रसूर्याः,णमिति वाक्यालङ्कारे,जीवा जीवरूपाः, न पुनरजीवाः, यथाऽऽहुः परतीर्थिकाः, तथा घनाः, न शुषिराः, तथा बादरबोन्दिधराः,न कलेवरमात्राः,तथा अस्ति तेषाम् "अट्ठाणे इति वा" इत्यादि पूर्ववत् व्याख्येयम्। (ते वि विज्जुं पि लवंति) विद्युतमपि प्रवर्त्तयन्ति, अशनिमपि प्रवर्त्तयन्ति, गर्जितमपि प्रवर्तयन्ति। किमुक्तं भवति?,विद्युदादिकं सर्वचन्द्राऽऽदित्याः प्रवर्तन्त इति । अत्रोपसंहारमाह-(एगे एवमाहंसु) २। एवं परतीर्थिकप्रतिपत्तिद्वयमुपदर्श्य संप्रति भगवान् स्वमतं कथयति-" वयं पुण " इत्यादि । वयं पुनरेवं वदामः। कथं वदथ?, इत्याह-'ता' इति पूर्ववत्, चन्द्रसूर्याः,णमिति वाक्यालङ्कारे, देवा देवस्वरूपाः,न सामान्यतो जीवमात्राः। कथंभूतास्ते देवाः?, इत्याह-महिड्ढिकाः महती ऋद्धिर्विमानपरिवाराऽऽदिका येषां ते तथा (०जाव महाणुभावा इति) यावत्करणात्-"महज्जुइया महाबला महाजसा महेसक्खा " इति द्रष्टव्यम । तत्र महती द्युतिः शरीराऽऽभरणविषया येषां ते महाद्युतयः। तथा महद् बलं शारीरप्रमाणं येषां ते महाबलाः, तथा महद् यशः ख्यातिर्येषां ते महायशसः, तथा महेश इति महान् इश ईश्वर इत्याख्या येषां ते महेशाख्याः। क्वचित्,"महासोक्खा" इति पाठः। तत्र महत्सौख्यं येषां ते महासौख्याः। तथा महानुभावो वैशिष्ट्यैकिवकरणाऽऽदिविषया अचिन्त्या शक्तिर्येषां ते महानुभावाः, वरवस्त्रधराः वरमाल्यधरा वरालङ्करणधारिणः, अन्यत्रविक्रुत्तिनवार्थतया रूढ्यास्तकनयमतेन, अन्ये पूर्वोत्पन्ना स्वायुःक्षयेणवयन्ते, अन्ये तूत्पद्यन्ते । सू० प्र० २० पाहु० । (ज्योतिष्काणां कामभोगौ ' कामभोग ' शब्दे तृतीयभागे ४४२ पृष्ठे द्रष्टव्यौ)

(२८) संप्रति चन्द्रसूर्ययोः संस्थानमभिधित्सुः प्रथमं श्वेततायाः संस्थितेराख्यातेति ततस्तद्विषयं प्रश्नसूत्रमाह-

ता कहं ते सेअभाए संठिती आहिता ति वदेज्जा ?। तत्थ खलु इमा दुविहा संठिती पण्णत्ता । तं जहा-चंदिमसूरियसंठिती य, तावक्खेत्तसंठिती य। ता कहं ते चंदिमसूरियासंठिती आहिता ति वदेज्जा ?। तत्थ खलु इमातो सोलस पडिवत्तीओ पण्णत्ताओ। तत्थेगे च एवमाहंसु-ता समचउरंससंठिता चंदिमसूरियसंठिती पण्णत्ता, एगे एवमाहंसु १। एगे पुण एवमाहंसु-ता विसमचउरंससंठिता चंदिमसूरियसंठिती पण्णत्ता २। एवं समचउक्कोणसंठिता३ विसमचउक्कोणसंठिया ४ समचक्कवालसंठिता ५ विसमचक्कवालसंठिता ६ चक्कऊचक्कवालसंठिता,एगे एवमाहंसु ७। एगे पुण एवमाहंसु-अछत्तागारसंठिता चंदिमसूरियसंठिती पण्णत्ता ८,गेहसंठिताह, गेहावणसंठिता १०, पासादसंठिता ११ गोपुरसंठिया १२ पेच्छाघरसंठिता १३ वलभीसंठिता १४ हम्मियतलसंठिता १५ वालग्गपोहियासंठिता चंदिमसूरियसंठिती पण्णत्ता १६। तत्थ जे ते एवमाहंसु-ता समचउरंससंठिता चंदिमसूरियसंठिती पण्णत्ता, एतेणं णएणं णेतव्वा,णो चेव णं इतरेहिं।

"ता कहं ते सेअभाए संठिई आहिया ति वदेज्जा ?"। 'ता' इति पूर्ववत्। कथं भगवन्! त्वया श्वेततायाः संस्थितिराख्याता इति भगवान् वदेत् ?। एवं भगवता गौतमेनोक्ते वर्द्धमानस्वामी भगवानाह-" तत्थ " इत्यादि । तत्र श्वेततायाविषये खल्वियं वक्ष्यमाणस्वरूपा द्विविधा संस्थितिः प्रज्ञप्ता। तामेव तद्यथेत्यादिनोपदर्शयति । तद्यथेत्यत्र तत्क्रमोऽव्ययम। ततोऽयमर्थः-सा श्वेतता यथा येन प्रकारेण द्विविधा भवति तथोपदर्श्यते-चन्द्रसूर्यसंस्थितिस्तापक्षेत्रसंस्थितिश्च। इह श्वेतता चन्द्रसूर्यविमानानामपि विद्यते, तत्कृततापक्षेत्रस्य च, ततः श्वेततायोगाद्द्वयमपि श्वेतताशब्देनोच्यते । तेनोक्तप्रकारेण श्वेतता द्विविधा भवति। तत्र चन्द्रसूर्यसंस्थितिविषयं प्रश्नयति-" ता कहं ते " इत्यादि। 'ता' इति प्राग्वत्। कथं ते त्वया भगवन्! चन्द्रसूर्यसंस्थितिराख्याता इति वदेत्?। इह चन्द्रसूर्यविमानानां संस्थानरूपा संस्थितिः प्रागेवाभिहिता, तत इह चन्द्रसूर्याणां संस्थितिश्चतुर्णामपि अवस्थानरूपा द्रष्टव्या । एवमुक्ते भगवानेतद्विषये यावन्तः परतीर्थिकानां प्रतिपत्तयस्तावतीरुपदर्शयति—" तत्थ " इत्यादि । तत्र चन्द्रसूर्यसंस्थितौ विचार्यमाणायां खल्वियमाः षोडश प्रतिपत्तयः प्रज्ञप्ताः। तद्यथा-एके वादिन एवमाहुः-समचतुरस्रसंस्थिता चन्द्रसूर्यसंस्थितिः प्रज्ञप्ता। समचतुरस्रं संस्थितं संस्थानं यस्याश्चन्द्रसूर्यसंस्थितेः सा तथा। अत्रैवोपसंहारवाक्यमाह-"एगे एवमाहंसु १"। एवं सर्वत्रापि प्रत्येकमुपसंहारवाक्यं द्रष्टव्यम । एके पुनरेवमाहुः-विषमचतुरस्रसंस्थिता चन्द्रसूर्यसंस्थितिराख्याता। अत्रापि विषमचतुरस्रं संस्थितं संस्थानं यस्याः सा तथेति विग्रहः २। (एवं समचउक्कोणसंठिय त्ति) एवमुक्तेन प्रकारेणापरेषामभिप्रायेण समचतुष्कोणसंस्थिता चन्द्रसूर्यसंस्थितिर्वक्तव्या। सा चैवम् " एग पुण एवमाहंसु-समचउक्कोणसंठिया चंदिमसूरियसंठिई पण्णत्ता, एगे एवमाहंसु । "

अत्र (समचउक्कोणसंठिय त्ति) समाश्चत्वारः कोणा यत्र तत् समचतुष्कोणं,समचतुष्कोणं संस्थितं संस्थानं यस्याः सा तथेति विग्रहः ३ । (विसमचउक्कोणसंठिय त्ति) विषमाश्चत्वारः कोणा यत्र तद्विषमचतुष्कोणं, तत्संस्थितं संस्थानं यस्याः चन्द्रसूर्यसंस्थितेः सा तथा, अन्येषामभिप्रायेण वक्तव्या । सा चैवम्-" एगे पुण एवमाहंसु-विसमचउक्कोणसंठिया चंदिमसूरियसंठिई पन्नत्ता, एगे एवमाहंसु"४। (समचक्कवालसंठिय त्ति)समचक्रवालं समचक्रवालरूपं संस्थितं संस्थानं यस्याः सा तथा । अपरेषामभिप्रायेण चन्द्रसूर्यसंस्थितिर्वक्तव्या । सा चैवम्-" एगे पुण एवमाहंसु-समचक्कवालसंठिया चंदिमसूरियसंठिई पन्नत्ता, एगे एवमाहंसु" ५। (विसमचक्कवालसंठिय त्ति) विषमचक्रवालं विषमचक्रवालरूपं संस्थितं संस्थानं यस्याः सा तथा । अन्येषां मतेन चन्द्रसूर्यसंस्थितिर्वक्तव्या । सा चैवम्-" एगे पुण एवमाहंसु-विसमचक्कवालसंठिया चंदिमसूरियसंठिई पन्नत्ता,एगे एवमाहंसु"६। (चक्कद्धचक्कवालसंठिय त्ति) चक्रस्य रथाङ्गस्य यदर्द्धचक्रवालं चक्रवालस्यार्द्धं तद्रूपं संस्थितं संस्थानं यस्याः सा तथा, अन्येषामभिप्रायेण वक्तव्या। सा चैवम्-"एगे पुण एवमाहंसु-चक्कद्धचक्कवालसंठिया चंदिमसूरियसंठिई पन्नत्ता, एगे एवमाहंसु " ७। "एगे पुण" इत्यादि । एके पुनराहुः-छत्राऽऽकारसंस्थिता चन्द्रसूर्यसंस्थितिः प्रज्ञप्ता । अत्रैवोपसंहारः-"एगे एवमाहंसु" ८। (गेहसंठिय त्ति) गेहस्येव वास्तुविद्योपनिबद्धस्येव संस्थितं संस्थानं यस्याः सा तथा । अपरेषां मतेन चन्द्रसूर्यसंस्थितिर्वक्तव्या । सा चैवम्-"एगे पुण एवमाहंसु-गेहसंठिया चंदिमसूरियसंठिई पन्नत्ता,एगे एवमाहंसु" ९। (गेहावणसंठिय त्ति) गृहयुक्त आपणो गृहाऽऽपणो वास्तुविद्याप्रसिद्धः,तस्येव संस्थितं संस्थानं यस्याः सा तथा। अन्येषामभिप्रायेण वक्तव्या । सा चैवम्-"एगे पुण एवमाहंसु-गेहावणसंठिया चंदिमसूरियसंठिई पन्नत्ता, एगे एवमाहंसु" १०। (पासायसंठिय त्ति) प्रासादस्येव संस्थितं संस्थानं यस्याः सा तथा, अन्येषामभिप्रायेण वक्तव्या । सा चैवम्-"एगे पुण एवमाहंसु-पासायसंठिया चंदिमसूरियसंठिई पन्नत्ता,एगे एवमाहंसु " ११। (गोपुरसंठिय त्ति) गोपुरस्येव संस्थितं संस्थानं यस्याः सा तथा, अन्येषां मतेनाभिधातव्या। सा चैवम्-" एगे पुण एवमाहंसु-गोपुरसंठिया चंदिमसूरियसंठिई पन्नत्ता, एगे एवमाहंसु " १२ । (पेच्छाघरसंठिय त्ति) प्रेक्षागृहस्येव वास्तुविद्याप्रसिद्धस्य संस्थितं संस्थानं यस्याः सा तथा, अपरेषां मतेनाभिधातव्या । तद्यथा-"एगे पुण एवमाहंसु-पिच्छाघरसंठिया चंदिमसूरियसंठिई पन्नत्ता, एगे एवमाहंसु " १३। (वलभीसंठिय त्ति) वलभ्या इव प्रहाणामाच्छादनस्येव संस्थितं संस्थानं यस्याः सा तथा । अन्येषां मतेनाभिधातव्या । सा चैवम्-" एगे पुण एवमाहंसु-वलभीसंठिया चंदिमसूरियसंठिई पन्नत्ता, एगे एवमाहंसु " १४ । (हम्मियतलसंठिय त्ति) हर्म्यं धनवतां गृहं, तस्य तलमुपरितनो भागस्तस्येव संस्थितं संस्थानं यस्याः सा तथा, अपरेषामभिप्रायेण वक्तव्या । सा चैवम्-" एगे पुण एवमाहंसु-हम्मियतलसंठिया चंदिमसूरियसंठिई पन्नत्ता, एगे एवमाहंसु " १५ । (वालग्गपोत्तियासंठिय त्ति) वालाग्रपोतिकाशब्दो देशीशब्दत्वादाकाशे तन्मागमध्ये व्यवस्थितक्रीडास्थानलघुप्रासादमाह, तस्या इव संस्थितं संस्थानं यस्याः सा तथा, अपरेषां मतेन अभिधातव्या । तद्यथा-"एगे पुण एवमाहंसु-वालग्गपोत्तियासंठिया चंदिमसूरियसंठिई पन्नत्ता,एगे एवमाहंसु" १६ । तदेवमुक्ताः परतीर्थिकानां प्रतिपत्तयः, एतासां च मध्ये या प्रतिपत्तिः समीचीना तामुपदर्शयति-" तत्थ " इत्यादि । तत्र तेषां षोडशानां परतीर्थिकानां मध्ये ये ते वादिन एवमाहुः-समचतुरस्रसंस्थिता चन्द्रसूर्यसंस्थितिः प्रज्ञप्ता इति, एतेन नयेन नेतव्यम्-एतेनाभिप्रायेणास्मन्मतेऽपि चन्द्रसूर्यसंस्थितिरवधार्येति भावः। तथाहि-इह सर्वेऽपि कालविशेषाः सुषमाऽऽदयो युगमूला युगस्य चाऽऽदौ श्रावणे मासि बहुलपक्षप्रतिपदि प्रातरुदयसमये एकः सूर्यो दक्षिणपूर्वस्यां दिशि वर्त्तते, तदुत्तीयस्त्वपरोत्तरस्याम्, चन्द्रमा अपि तत्समये एको दक्षिणापरस्यां दिशि वर्त्तते,द्वितीय उत्तरपूर्वस्याम्,अत एते युगस्याऽऽदौ चन्द्रसूर्यौ समचतुरस्रसंस्थिता वर्त्तन्ते, यच्च मण्डलकृतं वैषम्यं, यथा-सूर्यौ सर्वाभ्यन्तरे मण्डले वर्त्तेते,चन्द्रमसौ सर्वबाह्ये इति तदल्पमिति कृत्वा न विवक्ष्यते । तदेवं यतः सकलकालविशेषाणां सुषमसुषमाऽऽदिरूपाणामादिचुतस्य युगस्याऽऽदौ समचतुरस्रसंस्थिताः सूर्याचन्द्रमसौ भवन्ति, ततस्तेषां संस्थितिः समचतुरस्रसंस्थानोपवर्णिता, अन्यथा वा संप्रदायं समचतुरस्रसंस्थितिः परिज्ञातव्येति । (नो चेव णं इयरेहिं ति) नो चैव-नैव, इतरैः शेषैर्नयैश्चन्द्रसूर्यसंस्थितिर्ज्ञातव्या, तेषां मिथ्यारूपत्वात् । तदेवमुक्ता चन्द्रसूर्यसंस्थितिः । सू० प्र० ४ पाहु० । चं० प्र० । जं० । जी० । (चन्द्रविमानाऽऽदीनां संस्थानाऽऽदि ' जोइसियविमाण ' शब्देऽग्रे वक्ष्यते)

(२९) संप्रति चन्द्राऽऽदिप्रचारो वक्तव्य इति, ततस्तद्विषयं प्रश्नसूत्रमाह—

ता कहं ते चारा आहिता ति वदेज्जा ?। तत्थ खलु इमा दुविहा चारा पण्णत्ता । तं जहा-आदिच्चचारा य, चंदचारा य ॥

" ता कहं ते " इत्यादि । 'ता' इति पूर्ववत्, कथं केन प्रकारेण किंप्रमाणया संख्यया ?, इत्यर्थः । चारा आख्याता इति वदेत् ?। भगवानाह-"तत्थ" इत्यादि । तत्र चारविचारविषये आद्विमे वक्ष्यमाणस्वरूपा द्विविधा द्विप्रकाराश्चाराः प्रज्ञप्ताः । द्वैविध्यमेवाह-तद्यथा-आदित्यचाराश्चन्द्रचाराश्च । चशब्दौ परस्परसमुच्चये ।

तत्र प्रथमतश्चन्द्रचारपरिज्ञानार्थं तद्विषयं प्रश्नसूत्रमाह-

ता कहं ते चंदचारा आहिते ति वदेज्जा ?। ता पंचसंवच्छरिए णं जुगे अभिइणक्खत्ते सत्तसट्ठिचारे चंदेण सद्धिं जोयं जोएंति ॥

"ता कहं ते" इत्यादि । 'ता' इति प्राग्वत्, कथं केन प्रकारेण, कया संख्यया ?, इत्यर्थः । त्वया भगवन् ! चन्द्रचारा आख्याता इति वदेत् ?। भगवानाह-"ता पंच" इत्यादि । 'ता' इति पूर्ववत्, पञ्चसांवत्सरिके चन्द्रचन्द्राभिवर्द्धितचन्द्राभिवर्द्धितरूपपञ्चसंवत्सरप्रमाणे,णमिति वाक्यालङ्कारे,युगेऽभिजिन्नक्षत्रं सप्तषष्टिचारान् यावत् चन्द्रेण सार्द्धं योगं युनक्ति योगमुपपद्यते । किमुक्तं भवति?-चन्द्रोऽभिजिन्नक्षत्रेण सह संयुक्तो युगमध्ये सप्तषष्टिसंख्यान् चारान् चरतीति । कथमेतदवसीयते इति चेत् ?। उच्यते-इह योगमधिकृत्य सकलनक्षत्रमण्डलीपरिसमाप्तिरेकेन नक्षत्रमासेन भवति,नक्षत्रमासाश्च युगमध्ये सप्तषष्टिः, एतच्चाग्रे भाव-

यिष्यते। ततः प्रतिनक्षत्रपर्यायमेकैकं चारमभिजिता नक्षत्रेण सह चन्द्रस्य योगसंभवाद्युपपद्यते चन्द्रोऽभिजिता नक्षत्रेण सह संयुक्तो युगमध्ये सप्तषष्टिसंख्यान् चारान् चरतीति। एवं प्रतिनक्षत्रं भावनीयम्।

संप्रत्यादित्यचारविषयं प्रश्नसूत्रमाह-

ता कहं ते आइच्चचारा आहिते ति वदेज्जा ?। ता पंचसंवच्छरिए णं जुगे अभिईणक्खत्ते पंच चारे सूरेण सद्धिं जोयं जोएति, एवं० जाव उत्तरासाढाणक्खत्ते पंच चारे सूरेण सद्धिं जोयं जोएति ॥

"ता कहं ते" इत्यादि। 'ता' इति प्राग्वत्। कथं किंप्रमाणया संख्यया भगवन्! त्वया आदित्यचारा आख्याता इति वदेत् ?। भगवानाह-"ता पंचसंवच्छरिए णं" इत्यादि। 'ता' इति पूर्ववत्। पञ्चसांवत्सरिके चन्द्रार्कादिपञ्चसंवत्सरप्रमाणे, युगे युगमध्ये, अभिजिन्नक्षत्रं पञ्च चारान् यावत् सूर्येण सह योगं युनक्ति। अत्रायं भावार्थः-अभिजिता नक्षत्रेण सह संयुक्तः सूर्यो युगमध्ये पञ्चसंख्यान् चारान् चरति। कथमेतदवगम्यते इति चेत्?। उच्यते-इह योगमधिकृत्य सूर्यस्य सकलनक्षत्रमण्डलीपरिसमाप्तिरेकेन सूर्यसंवत्सरेण। सूर्यसंवत्सराश्च युगे भवन्ति पञ्च। ततः प्रतिनक्षत्रपर्यायमेकैकचारमभिजिता नक्षत्रेण सह योगस्य संभवाद् घटते अभिजिता नक्षत्रेण सह संयुक्तः सूर्यो युगे पञ्च चारान् चरतीति। एवं शेषनक्षत्रेष्वपि भावना भावनीया। सू० प्र० १८ पाहु०।

(३०) संप्रति चन्द्रसूर्यादीनां भूमेरुर्ध्वमुच्चत्वप्रमाणं वक्तव्यमिति ततस्तद्विषयं प्रश्नसूत्रमाह-

ता कहं ते उच्चत्ते आहिते ति वदेज्जा ?। तत्थ खलु इमाओ बत्तीसं पडिवत्तीओ पन्नत्ताओ। तत्थेगे एवमाहंसु-ता एगं जोयणसहस्सं सूरे उड्ढं उच्चत्तेणं दिवड्ढं चंदे, एगे एवमाहंसु १। एगे पुण एवमाहंसु-ता दो जोयणसहस्साइं सूरे उड्ढं उच्चत्तेणं अड्ढाइज्जाइं चंदे, एगे एवमाहंसु २। एगे पुण एवमाहंसु-ता तिन्नि जोयणसहस्साइं सूरे उड्ढं उच्चत्तेणं अड्ढुाइं चंदे, एगे एवमाहंसु ३। एगे पुण एवमाहंसु-ता चत्तारि जोयणसहस्साइं सूरे उड्ढं उच्चत्तेणं अद्धपंचमाइं चंदे, एगे एवमाहंसु ४। एगे पुण एवमाहंसु-ता पंचजोयणसहस्साइं सूरे उड्ढं उच्चत्तेणं अद्धछट्ठाइं चंदे, एगे एवमाहंसु ५। एगे पुण एवमाहंसु-ता छजोयणसहस्साइं सूरे उड्ढं उच्चत्तेणं अद्धसत्तमाइं चंदे, एगे एवमाहंसु ६। एगे पुण एवमाहंसु-ता सत्तजोयणसहस्साइं सूरे उड्ढं उच्चत्तेणं अद्धट्ठमाइं चंदे, एगे एवमाहंसु ७। एगे पुण एवमाहंसु-ता अट्ठजोयणसहस्साइं सूरे उड्ढं उच्चत्तेणं अद्धनवमाइं चंदे, एगे एवमाहंसु ८। एगे पुण एवमाहंसु-ता नवजोयणसहस्साइं सूरे उड्ढं उच्चत्तेणं अद्धदसमाइं चंदे, एगे एवमाहंसु ९। एगे पुण एवमाहंसु-ता दसजोयणसहस्साइं सूरे उड्ढं उच्चत्तेणं अद्धएक्कारस चंदे, एगे एवमाहंसु १०। एगे पुण एवमाहंसु-एक्कारसजोयणसहस्साइं सूरे उड्ढं उच्चत्तेणं अद्धबारस चंदे, एगे एवमाहंसु ११। एतेणं अभिलावेणं णेतव्वं बारस सूरे अद्धतेरस चंदे १२। तेरस सूरे अद्धचोद्दस चंदे १३। चोद्दस सूरे अद्धपन्नरस चंदे १४। पन्नरस सूरे अद्धसोलस चंदे १५। सोलस सूरे अद्धसत्तरस चंदे १६। सत्तरस सूरे अद्धअट्ठारस चंदे १७। अट्ठारस सूरे अद्धएगूणवीसं चंदे १८। एगूणवीसं सूरे अद्धवीसं चंदे १९। वीसं सूरे अद्धएगवीसं चंदे २०। एगवीसं सूरे अद्धबावीसं चंदे २१। बावीसं सूरे अद्धतेवीसं चंदे २२। तेवीसं सूरे अद्धचउवीसं चंदे २३। चउवीसं सूरे अद्धपणवीसं चंदे, एगे एवमाहंसु २४। एगे पुण एवमाहंसु-पणवीसं जोयणसहस्साइं सूरे उड्ढं उच्चत्तेणं अद्धछव्वीसं चंदे, एगे एवमाहंसु २५। वयं पुण एवं वदामो-ता इमीसे रयणप्पभाए पुढवीए बहुसमरमणिज्जाओ भूमिभागाओ सत्तणउए जोयणसए उड्ढं उप्पतित्ता हेट्ठिल्ले तारविमाणे चारं चरति, अट्ठजोयणसए उड्ढं उप्पतित्ता सूरविमाणे चारं चरति, अट्ठअसीए जोयणसए उड्ढं उप्पतित्ता चंदविमाणे चारं चरति, णवजोयणसताइं उड्ढं उप्पतित्ता उवरिं तारविमाणे चारं चरति, हेट्ठिल्लाओ तारविमाणाओ दस जोयणाइं उड्ढं उप्पतित्ता सूरविमाणे चारं चरति, नवनउतिजोयणाइं उड्ढं उप्पतित्ता चंदविमाणे चारं चरति, दसुत्तरं जोयणसतं उड्ढं उप्पतित्ता उवरिल्ले तारारूवे चारं चरति, ता सूरविमाणातो असीतिजोयणाइं उड्ढं उप्पतित्ता चंदविमाणे चारं चरति, जोयणसतं उड्ढं उप्पतित्ता उवरिल्ले तारारूवे चारं चरति, ता चंदविमाणाओ णं वीसं जोयणाइं उड्ढं उप्पतित्ता उवरिल्ले तारारूवे चारं चरति। एवामेव सपुव्वावरेणं दसुत्तरजोयणसतं बाहल्ले तिरियमसंखेज्जे जोतिसविसए जोतिसं चारं चरति आहिते ति वदेज्जा।

"ता कहं ते" इत्यादि। 'ता' इति पूर्ववत्। कथं केन प्रकारेण भगवन्! त्वया भूमेरुर्ध्वं चन्द्रार्कादीनामुच्चत्वमाख्यातमिति वदेत् ?। एवं प्रश्ने कृते भगवानेतद्विषये यावन्त्यः प्रतिपत्तयस्तावतीरुपदर्शयति-"ता तत्थ" इत्यादि। तत्र उच्चत्वविषये खल्विमा वक्ष्यमाणस्वरूपाः पञ्चविंशतिप्रतिपत्तयः परतीर्थिकाभ्युपगमरूपाः प्रज्ञप्ताः। ता एव "तत्थेगे" इत्यादिना दर्शयति। तत्रैतासां पञ्चविंशतिपरतीर्थिकानां मध्ये एके परतीर्थिका एवमाहुः-'ता' इति पूर्ववत्। एकयोजनसहस्रं सूर्यो भूमेरूर्ध्वमुच्चत्वेन व्यवस्थितो, द्वे सार्धयोजनसहस्रे भूमेरूर्ध्वं चन्द्रः किमुक्तं भवति ?-भूमेरूर्ध्वं योजनसहस्रे गतेऽव्यन्तरे सूर्यो व्यवस्थितः, सार्धे च योजनसहस्रगते चन्द्रः। सूत्रे च योजनसंख्यापदस्य सूर्यादिपदस्य च तुल्याधिकरण्यनिर्देशोऽतदोषोपचारात्। यथा पाटलिपुत्राद् राजगृहं नवयोजनानीत्यादौ। एवमुत्तरेष्वपि सूत्रेषु भावनीयम्। अत्रोपसंहारमाह-"एगे एवमाहंसु १"। एके पुनरेवमाहुः-'ता' इति

पूर्ववत्। द्वे योजनसहस्रे भूमेरूर्द्धं सूर्यो व्यवस्थितः, अर्द्धतृतीयानि योजनसहस्राणि चन्द्रः। अत्रोपसंहारः-" एगे एवमाहंसु २ "। एवं शेषाण्यपि सूत्राणि भावनीयानि। " एएणं " इत्यादि । एतेनानन्तरोदितेनाभिलापेन शेषप्रतिपत्तिगतमपि सूत्रजातं नेतव्यम्। तत्रैवम्-"तिण्णि" इत्यादि। "एगे पुण एवमाहंसु-तिण्णि जोअणसहस्साइं सूरे उड्ढं उच्चत्तेणं अद्धट्ठाइं चंदे, एगे एवमाहंसु ३ "। " ता चत्तारि " इत्यादि। " एगे पुण एवमाहंसु-ता चत्तारि जोयणसहस्साइं सूरे उड्ढं उच्चत्तेणं अद्धपंचमाइं चंदे, एगे एवमाहंसु ४ "। " ता पंच " इत्यादि। " एगे पुण एवमाहंसु-ता पंच जोयणसहस्साइं सूरे उड्ढं उच्चत्तेणं अद्धछट्ठाइं चंदे, एगे एवमाहंसु ५। एवं छ सूरे अद्धसत्तमाइं चंदे। एगे पुण एवमाहंसु-ता छजोयणसहस्साइं सूरे उड्ढं उच्चत्तेणं अद्धसत्तमाइं चंदे, एगे एवमाहंसु ६। सत्त सूरे अद्धट्ठमाइं चंदे इति। एगे पुण एवमाहंसु-ता सत्तजोयणसहस्साइं सूरे उड्ढं उच्चत्तेणं अद्धट्ठमाइं चंदे, एगे एवमाहंसु ७। अट्ठ सूरे अद्धनवमाइं चंदे इति। एगे पुण एवमाहंसु-ता अट्ठजोयणसहस्साइं सूरे उड्ढं उच्चत्तेणं अद्धनवमाइं चंदे, एगे एवमाहंसु ८। नव सूरे अद्धदसमाइं चंदे इति। एगे पुण एवमाहंसु-ता नवजोयणसहस्साइं सूरे उड्ढं उच्चत्तेणं अद्धदसमाइं चंदे, एगे एवमाहंसु ९। दस सूरे अद्धएक्कारसाइं चंदे इति। एगे पुण एवमाहंसु-ता दसजोयणसहस्साइं सूरे उड्ढं उच्चत्तेणं अद्धएक्कारसाइं चंदे, एगे एवमाहंसु १०। एक्कारस सूरे अद्धबारसचंदे इति। एगे पुण एवमाहंसु-ता इक्कारसजोयणसहस्साइं सूरे उड्ढं उच्चत्तेणं अद्धबारस चंदे, एगे एवमाहंसु ११। बारस सूरे अद्धतेरसमाइं चंदे इति। एगे पुण एवमाहंसु-ता बारसजोयणसहस्साइं सूरे उड्ढं उच्चत्तेणं अद्धतेरसमाइं चंदे, एगे एवमाहंसु १२। तेरस सूरे अद्धचउद्दसमाइं चंदे इति। एगे पुण एवमाहंसु-ता तेरसजोयणसहस्साइं सूरे उड्ढं उच्चत्तेणं अद्धचोद्दसमाइं चंदे, एगे एवमाहंसु १३। चोद्दस सूरे अद्धपंचदसमाइं चंदे इति। एगे पुण एवमाहंसु-ता चोद्दसजोयणसहस्साइं सूरे उड्ढं उच्चत्तेणं अद्धपंचदसमाइं चंदे, एगे एवमाहंसु १४। पन्नरस सूरे अद्धसोलसमाइं चंदे इति। एगे पुण एवमाहंसु-ता पन्नरसजोयणसहस्साइं सूरे उड्ढं उच्चत्तेणं अद्धसोलसमाइं चंदे, एगे एवमाहंसु १५। सोलस सूरे अद्धसत्तरसमाइं चंदे इति। एगे पुण एवमाहंसु-ता सोलसजोयणसहस्साइं सूरे उड्ढं उच्चत्तेणं अद्धसत्तरसमाइं चंदे, एगे एवमाहंसु १६। सत्तरसमाइं सूरे अद्धट्ठारसमाइं चंदे इति। एगे पुण एवमाहंसु-ता सत्तरसजोयणसहस्साइं सूरे उड्ढं उच्चत्तेणं अद्धट्ठारसमाइं चंदे, एगे एवमाहंसु १७। अट्ठारस सूरे अद्धएगूणवीसमाइं चंदे इति। एगे पुण एवमाहंसु-ता अट्ठारसजोयणसहस्साइं सूरे उड्ढं उच्चत्तेणं अद्धएगूणवीसमाइं चंदे, एगे एवमाहंसु १८। एगूणवीसं सूरे अद्धवीसमाइं चंदे इति। एगे पुण एवमाहंसु-ता एगूणवीसं जोयणसहस्साइं सूरे उड्ढं उच्चत्तेणं अद्धवीसमाइं चंदे, एगे एवमाहंसु १९। वीसं सूरे अद्धएगवीसमाइं चंदे इति। एगे पुण एवमाहंसु-ता वीसं जोयणसहस्साइं सूरे उड्ढं उच्चत्तेणं अद्धएगवीसमाइं चंदे, एगे एवमाहंसु २०। एगवीसं सूरे अद्धबावीसाइं चंदे इति। एगे पुण एवमाहंसु—ता इक्कवीसं जोयणसहस्साइं सूरे उड्ढं उच्चत्तेणं अद्धबावीसमाइं चंदे, एगे एवमाहंसु २१। बावीसं सूरे अद्धतेवीसमाइं चंदे इति। एगे पुण एवमाहंसु-ता बावीसं जोयणसहस्साइं सूरे उड्ढं उच्चत्तेणं अद्धतेवीसमाइं चंदे, एगे एवमाहंसु २२। तेवीसं सूरे अद्धचउवीसमाइं चंदे इति। एगे पुण एवमाहंसु-ता तेवीसं जोयणसहस्साइं सूरे उड्ढं उच्चत्तेणं अद्धचउवीसमाइं चंदे, एगे एवमाहंसु २३। चउवीसं सूरे अद्धपंचवीसमाइं चंदे इति। एगे पुण एवमाहंसु-ता चउव्वीसं जोयणसहस्साइं सूरे उड्ढं उच्चत्तेणं अद्धपंचवीसमाइं चंदे, एगे एवमाहंसु २४। पंचविंशतितमप्रतिपत्तिसूत्रं तु साक्षादृश्यते-" एगे पुण एवमाहंसु-ता पणवीसं " इत्यादि। एतानि च सूत्राणि सुगमत्वात्स्वयं भावनीयानि। तदेवमुक्ताः परप्रतिपत्तयः। संप्रति स्वमतं भगवानुपदर्शयति-वयं पुनरुत्पन्नकेवलविदस्तु एवं वक्ष्यमाणेन प्रकारेण वदामः। तमेव प्रकारमाह-" ता इमीसे " इत्यादि । 'ता' इति पूर्ववत्। अस्यां रत्नप्रभायाः पृथिव्या बहुसमरमणीयाद् भूमिभागादूर्द्धं सप्तयोजनशतानि नवत्यधिकानि उत्प्लुत्य गत्वा, अत्रान्तरेऽधस्तनं ताराविमानं चारं चरति-मण्डलगत्या परिभ्रमणं प्रतिपद्यते, तथा अस्या एव रत्नप्रभायाः पृथिव्या बहुसमरमणीयाद् भूमिभागादूर्द्धमष्टौ योजनशतान्युत्प्लुत्यान्तरे सूर्यविमानं चारं चरति। तथा अस्या एव रत्नप्रभायाः पृथिव्या बहुसमरमणीयाद् भूमिभागादूर्द्धमष्टौ योजनशतान्यशीत्यधिकानि उत्प्लुत्यान्तरे चन्द्रविमानं चारं चरति,तथा अस्या एव रत्नप्रभायाः पृथिव्या बहुसमरमणीयाद् भूमिभागादूर्द्धं परिपूर्णानि नवयोजनशतान्युत्प्लुत्यान्तरे सर्वोपरितनं ताराविमानं चारं चरति, अधस्तनात्ताराविमानादूर्द्धं दशयोजनान्युत्प्लुत्यान्तरे सूर्यविमानं चारं चरति। तत एवाधस्तनात् ताराविमानान्नवतियोजनान्यूर्द्धमुत्प्लुत्यान्तरे चन्द्रविमानं चारं चरति। तत एव सर्वाधस्तनात्ताराविमानाद्दशोत्तरं योजनशतमूर्द्धमुत्प्लुत्यान्तरे सर्वोपरितनं ताराविमानं चारं चरति। "ता सूरविमाणाओ" इत्यादि। 'ता' इति पूर्ववत्। सूर्यविमानादूर्द्धमशीतियोजनशतान्युत्प्लुत्यान्तरे चन्द्रविमानं चारं चरति, तस्मादेव सूर्यविमानादूर्ध्वं योजनशतमुत्प्लुत्यान्तरे सर्वोपरितनं तारारूपं ज्योतिश्चक्रं चारं चरति। "ता चंदविमाणाओ" इत्यादि। ' ता ' इति पूर्ववत्। चन्द्रविमानादूर्ध्वं विंशतियोजनशतानि उत्प्लुत्यान्तरे सर्वोपरितनं ताराविमानं ज्योतिश्चक्रं चारं चरति (एवमेवेत्यादि) एवमेव उक्तेनैव प्रकारेण (सपुव्वावरणं ति) सह पूर्वापरेण वर्त्तत इति सपूर्वं, सपूर्वं च तत् अपरं च सपूर्वापरं, तेन पूर्वापरमीलनेनेत्यर्थः। दशोत्तरयोजनशतबाहल्येन। तथाहि-सर्वाधस्तनात्ताराद्रूपाद् ज्योतिश्चक्रादूर्द्धं दशभिर्योजनैः सूर्यविमानं,ततोऽप्यशीत्या योजनैश्चन्द्रविमानं,ततो विंशत्या सर्वोपरितनं ताराद्रूपं ज्योतिश्चक्रमिति विषयस्य दशोत्तरं योजनशतं बाहल्यं, तस्मिन् दशोत्तरे योजनशतबाहल्ये। पुनः कथंभूते ? इत्याह-तिर्यग्लोकक्षेत्रे ये योजनकोटाकोटीप्रमाणे ज्योतिर्विषये मनुष्यक्षेत्रविषयं ज्योतिश्चक्रं चारं चरति, चारं चरन्मनुष्यक्षेत्राद् बहिः पुनरवस्थितमाख्यात इति वदेत्। सू० प्र० १८ पाहु०। चं० प्र०। जं०। जी०।

धरणियलाउ समाओ, सत्त उ नउएहिँ जोयणसएहिं।
हिट्ठिल्लो होइ तलो, सूरो पुण अट्ठहिँ सएहिं ॥ ७५ ॥
अट्ठसए आसीए, चंदो तह चेव होइ उवरितले।
एगं दसुत्तरसयं, बाहल्लं जोइसस्स भवे ॥ ७६ ॥
इ० प०।

(३१) देवतामधर्म्यप्रत्यासत्तयैव ज्योतिष्कानधिकृत्याऽऽह-

ता अत्थि णं चंदिमसूरियाणं देवाणं हिट्ठं पि तारारूवा अणुं पि तुल्ला वि, समं पि तारारूवा अणुं पि तुल्ला वि, उप्पिं पि तारारूवा अणुं पि तुल्ला वि ? ता अत्थि । ता कहं ते चंदिमसूरियाणं देवाणं हिट्ठं पि तारारूवा अणुं पि तुल्ला वि, समं पि तारारूवा अणुं पि तुल्ला वि, उप्पिं पि तारारूवा अणुं पि तुल्ला वि ? । ता जहा जहा णं तेसिं णं देवाणं तवणियमबंभचेराइं उस्सियाइं भवंति, तहा तहा णं तेसिं देवाणं एवं भवति, तं अणुते वा तुल्लते वा, ता एवं खलु चंदिमसूरियाणं देवाणं हिट्ठं पि तारारूवा अणुं पि तुल्ला वि ॥

" ता अत्थि णं " इत्यादि । 'ता' इति पूर्ववत् । अस्त्येतद् भगवन्! यदुत चन्द्रसूर्याणां देवानां (हिट्ठं पि त्ति) क्षेत्रापेक्षया अधस्तना अपि तारारूपविमानाधिष्ठातारो देवा द्युतिविभवक्षेत्रयाऽऽदिकमपेक्ष्य केचिदणवोऽपि लघवोऽपि, भवन्तीत्यर्थः । केचित्तुल्या अपि भवन्ति । तथा समभूमि चन्द्रविमानैः सूर्यविमानैश्च क्षेत्रापेक्षया समश्रेण्याऽपि ये व्यवस्थितास्तारारूपास्ताराविमानाधिष्ठातारो देवाः, तेऽपि चन्द्रसूर्याणां देवानां द्युतिविभवाऽऽदिकमपेक्ष्य केचिदणवोऽपि भवन्ति, केचित्तुल्या अपि, इति गौतमेन प्रश्ने कृते भगवानाह-(ता अत्थि त्ति) यदेतत् त्वया पृष्टं तत्सर्वं तथैवास्ति । एवमुक्ते पुनः प्रश्नयति-"ता कहं ते " इत्यादि सुगमम् । भगवानाह-" ता जह जहा " इत्यादि । ' ता ' इति पूर्ववत् । यथा यथा । णमिति वाक्यालङ्कारे । तेषां देवानां तारारूपविमानाधिष्ठातृणां प्राग्भवे तपोनियमब्रह्मचर्याणि उच्छ्रितानि उत्कटानि भवन्ति, तथा तथा तेषां देवानां तस्मिन् तारारूपविमानाधिष्ठातृभावे एवं भवति, यथा-अणुत्वं वा, तुल्यत्वं वा । किमुक्तं भवति?-यैः प्राग्भवे तपोनियमब्रह्मचर्याणि मन्दानि कृतानि ते तारारूपविमानाधिष्ठातृदेवभवमनुप्राप्ताश्चन्द्रसूर्येभ्यो देवेभ्यो द्युतिविभवाऽऽदिकमपेक्ष्य हीना भवन्ति, यैस्तु भवान्तरे तपोनियमब्रह्मचर्याणि अत्युत्कटान्यासेवितानि ते तारारूपविमानाधिष्ठातृरूपं देवत्वमनुप्राप्ता द्युतिविभवाऽऽदिकमपेक्ष्य चन्द्रसूर्यैर्देवैः सह समाना भवन्ति । न चैतदनुपपन्नम् । दृश्यन्ते हि मनुष्यलोकेऽपि केचिज्जन्मान्तरोपचिततथाविधपुण्यप्राग्भारा राजत्वमप्राप्ता अपि राज्ञा सह तुल्यद्युतिविभवा इति । " ता एवं खलु " इत्यादि निगमनवाक्यं सुगमम् । सू० प्र० १७ पाहु० । चं० प्र० । जी० । जं० । (मन्दराद्यपेक्षया ज्योतिष्काणां चारः ' अवाहा ' शब्दे प्रथमभागे ६८२ पृष्ठे प्रकटितः)

[३२] ता जंबुद्दीवे णं दीवे कतरे णक्खत्ते सव्वब्भंतरिल्लं चारं चरति, कतरे णक्खत्ते सव्वबाहिरिल्लं चारं चरति, कयरे णक्खत्ते सव्वुवरिल्लं चारं चरति, कयरे णक्खत्ते सव्वहेट्ठिल्लं चारं चरति ? । अभिई णक्खत्ते सव्वब्भंतरिल्लं चारं चरति, मूले णक्खत्ते सव्वबाहिरिल्लं चारं चरति, सातीणक्खत्ते सव्वुवरिल्लं चारं चरति, भरणीणक्खत्ते सव्वहेट्ठिल्लं चारं चरति ।

"ता जंबुद्दीवे णं दीवे कयरे नक्खत्ते" इत्यादि सुगमम् । नवरम्, अभिजिन्नक्षत्रं सर्वाभ्यन्तरं नक्षत्रमण्डलिकामपेक्ष्य, एवं मूलाऽऽदीनि सर्वबाह्याऽऽदीनि वेदितव्यानि । सू० प्र० १८ पाहु० । उक्तं च-" सव्वब्भंतरभिइई, मूलो पुण सव्वबाहिरो भणइ । सव्वोवरिं च साई, भरणी पुण सव्वहेट्ठिमया " ॥ ६६ ॥ ४० प० । चं० प्र० । जी० ।

(३३) चन्द्रः सूर्यो वा कियत्क्षेत्रं प्रकाशयतीति ततस्तद्विषयं प्रश्नसूत्रमाह-

ता केवतियं खेत्तं चंदिमसूरिया ओभासंति, उज्जोवेंति, तवेंति, पगासेंति, आहिता ति वदेज्जा ? तत्थ खलु इमाओ बारस पडिवत्तीओ पण्णत्ताओ । तत्थेगे एवमाहंसु-ता एगं दीवं एगं समुद्दं चंदिमसूरिया ओभासंति, उज्जोवेंति, तवेंति, पगासेंति, एगे एवमाहंसु १ । एगे पुण एवमाहंसु-ता तिण्णि दीवे तिण्णि समुद्दे चंदिमसूरिया ओभासंति, उज्जोवेंति, तवेंति, पगासेंति, एगे एवमाहंसु २ । एगे पुण एवमाहंसु-ता अद्धट्ठे दीवे अद्धट्ठे समुद्दे चंदिमसूरिया ओभासंति, उज्जोवेंति, तवेंति, पगासेंति, एगे एवमाहंसु ३ । एगे पुण एवमाहंसु-ता सत्त दीवे सत्त समुद्दे चंदिमसूरिया ओभासंति, उज्जोवेंति, तवेंति, पगासेंति एके, एगे एवमाहंसु ४ । एगे पुण एवमाहंसु-दस दीवे दस समुद्दे चंदिमसूरिया ओभासंति, उज्जोवेंति, तवेंति, पगासेंति एके, एगे एवमाहंसु ५ । एगे पुण एवमाहंसु-ता बारस दीवे बारस समुद्दे चंदिमसूरिया ओभासंति, उज्जोवेंति, तवेंति, पगासेंति एके, एगे एवमाहंसु ६ । एगे पुण एवमाहंसु-ता बायालीसं दीवे बायालीसं समुद्दे चंदिमसूरिया ओभासंति, उज्जोवेंति, तवेंति, पगासेंति एके, एगे एवमाहंसु ७ । एगे पुण एवमाहंसु-बावत्तरिं दीवे बावत्तरिं समुद्दे चंदिमसूरिया ओभासंति, उज्जोवेंति, तवेंति, पगासेंति एके, एगे एवमाहंसु ८ । एगे पुण एवमाहंसु-ता बातालीसं दीवसतं बातालीसं समुद्दसतं चंदिमसूरिया ओभासंति, उज्जोवेंति, तवेंति, पगासेंति एके, एगे एवमाहंसु ९ । एगे पुण एवमाहंसु-ता बावत्तरिं दीवसतं बावत्तरिं समुद्दसतं चंदिमसूरिया ओभासंति, उज्जोवेंति, तवेंति, पगासेंति एके, एगे एवमाहंसु १० । एगे पुण एवमाहंसु-ता बायालीसं दीवसहस्सं बायालीसं समुद्दसहस्सं चंदिमसूरिया ओभासंति, उज्जोवेंति, तवेंति, पगासेंति एके, एगे एवमाहंसु ११ । एगे पुण एवमाहंसु-ता बावत्तरिं दीवसहस्सं बावत्तरिं समुद्दसहस्सं चंदिमसूरिया ओभासंति, उज्जोवेंति, तवेंति, पगासेंति एके, एगे एवमाहंसु १२ ।

" ता केवतियं " इत्यादि । 'ता' इति पूर्ववत् । कियत्क्षेत्रं, चन्द्रसूर्यबहुवचनं जम्बूद्वीपे चन्द्रद्वयस्य सूर्यद्वयस्य च भावात् । अवभासयन्ति, तत्रावभासो ज्ञानस्यापि प्रतिभासो व्यवहियते, अतस्तद्व्यवच्छेदार्थमाह-उद्द्योतयन्ति, स चोद्द्योतो यद्यपि लो-

के भेदेन प्रसिद्धो, यथा-सूर्यगत आतप इति, चन्द्रगतः प्रकाश इति, तथाप्यातपशब्दश्चन्द्रप्रभायामपि वर्त्तते । यदुक्तम्—" चन्द्रिका कौमुदी ज्योत्स्ना, तथा चन्द्रातपः स्मृतः।" इति। प्रकाशशब्दः सूर्यप्रभायामपि, एतच्च प्रायो बहूनां सुप्रतीतं, तत एतदर्थप्रतिपत्त्यर्थमुभयसाधारणं त्रयोऽप्येकार्थिकद्वयमाह-तापयन्ति प्रकाशयन्ति आख्यातो इति । इहाऽऽर्षत्वात्तिङाद्यन्तपदेनापि सह नामपदस्य समन्वयो भवति । तत एवमर्थयोजना द्रष्टव्या-कियत्क्षेत्रं चन्द्रसूर्यौ अवभासयन्त उद्द्योतयन्तस्तापयन्तः प्रकाशयन्त आख्याता भगवतेति भगवान् वदेत् ? । एवं गौतमेनोक्ते भगवानेतद्विषये परतीर्थिकप्रतिपत्तीनां मिथ्याभावोपदर्शनाय प्रथममेतत्ता एवोन्यस्यति-"तत्थ" इत्यादि । तत्र चन्द्रसूर्याणां क्षेत्रावभासनविषये इमाः खलु द्वादश प्रतिपत्तयः परतीर्थिकाभ्युपगमरूपाः प्रज्ञप्ताः । तद्यथा-" तत्थ" इत्यादि । तत्र तस्यां द्वादशानां परतीर्थिकानां मध्ये एके प्रथमास्तीर्थान्तरीया एवमाहुः-एकं द्वीपमेकं समुद्रं चन्द्रसूर्यौ अवभासयन्तौ, उद्द्योतयन्तौ, तापयन्तौ, प्रकाशयन्तौ । सूत्रे द्वित्वेऽपि बहुवचनं प्राकृतत्वात् । उक्तं च-" बहुवयणे दुवयणं" इत्यादि । द्विवचनं चात्र तात्त्विकमवसेयम्, परतीर्थिकैरेकस्य चन्द्रमस एकस्य च सूर्यस्याभ्युपगमात् । संप्रति अस्यैव प्रथममतस्योपसंहारमाह-(एगे एवमाहंसु) एवं सर्वोपयुपसंहारवाक्यानि भावनीयानि । १ । एके द्वितीयाः पुनरेवमाहुः-त्रीन् द्वीपान् त्रीन् समुद्रान् चन्द्रसूर्यौ, अवभासयत उद्द्योतयतस्तापयतः प्रकाशयत इति । एवमुत्तरत्रापि द्रष्टव्यम् २। तथा-एके पुनस्तृतीया एवमाहुः-(अड्ढे इति) अर्द्धं चतुर्थं येषां ते अर्द्धचतुर्थाः, त्रयः परिपूर्णाश्चतुर्थस्य चार्द्धमित्यर्थः । अर्द्धचतुर्थान् द्वीपान्, अर्द्धचतुर्थान् समुद्रान् चन्द्रसूर्यावभासयत इत्यादि प्राग्वत् ।३। एके चतुर्थाः पुनरेवमाहुः-सप्त द्वीपान् सप्त समुद्रान् चन्द्रसूर्यावभासयतः । ४ । एके पुनः पञ्चमा एवमाचक्षते-दश द्वीपान् दश समुद्रान् चन्द्रसूर्यावभासयतः । ५ । एके पुनः षष्ठा एवमभिदधति-द्वादश द्वीपान् द्वादश समुद्रान् चन्द्रसूर्यावभासयतः । ६ । एके पुनः सप्तमा एवं भाषन्ते-द्विचत्वारिंशतं द्वीपान् द्विचत्वारिंशतं समुद्रान् चन्द्रसूर्यावभासयतः ।७। एके पुनरष्टमा एवमाहुः-द्वासप्ततिं द्वीपान् द्वासप्ततिं समुद्रान् चन्द्रसूर्यावभासयतः । ८ । एके पुनर्नवमा एवमाहुः-द्विचत्वारिंशदधिकं द्वीपशतं द्विचत्वारिंशदधिकं समुद्रशतं चन्द्रसूर्यावभासयतः । ९ । एके पुनर्दशमा एवं जल्पन्ति-द्वासप्तत्यधिकं द्वीपशतं द्वासप्तत्यधिकं समुद्रशतं चन्द्रसूर्यावभासयतः ।१०। एके एकादशाः पुनरेवमाहुः-द्वाचत्वारिंशद्द्वाचत्वारिंशत्यधिकं द्वीपसहस्रं द्वाचत्वारिंशत्यधिकं समुद्रसहस्रं चन्द्रसूर्यावभासयतः । ११ । एके द्वादशाः पुनरेवमाहुः-द्वासप्ततिं द्वासप्तत्यधिकं द्वीपसहस्रं द्वासप्तत्यधिकं समुद्रसहस्रं चन्द्रसूर्यावभासयतः १२ ।

एताश्च सर्वा अपि प्रतिपत्तयो मिथ्यारूपाः, तथा च भगवानेता व्युदस्य स्वमतं भिन्नमेव कथयति-

वयं पुण एवं वदामो-ता अयं णं जंबुद्दीवे दीवे सव्वदीवसमुद्दाणं० जाव परिक्खेवेणं पन्नत्ते । मे णं एगाए जगतीए सव्वतो समंता संपरिक्खित्ते सा णं जगती तहेव जहा जंबुद्दीवपन्नत्तीए० जाव एवामेव सपुव्वावरेणं जंबुद्दीवे दीवे चोद्दससलिलासयसहस्साइं छप्पन्नं च सलिलासहस्सा भवंतीति मक्खाता, जंबुद्दीवे णं दीवे पंच चक्कभागं संठिता आहिता ति वदेज्जा । ता कहं जंबुद्दीवे दीवे पंचचक्कभागसंठिते आहिता ति वदेज्जा ? । ता जता णं एते दुवे सूरिया सव्वब्भंतरं मंडलं उवसंकमित्ता चारं चरंति, तदा णं जंबुद्दीवस्स दीवस्स तिण्णि पंचचक्कभागे ओभासंति, उज्जोवेंति, तवेंति, पभासेंति तं एगे वि एगं दिवड्ढं पंचचक्कभागं ओभासेति एक्के, एगे वि एगं दीवड्ढं पंचचक्कभागं ओजासेति एक्कं । तता णं उत्तमकट्ठपत्ते उक्कोसए अट्ठारसमुहुत्ते दिवसे भवति, जहण्णिया दुवालसमुहुत्ता राई भवइ, ता जता णं एते दुवे सूरिया सव्वबाहिरमंडलं उवसंकमित्ता चारं चरति, तदा णं जंबुद्दीवस्स दीवस्स दोण्णि पंचचक्कभागे ओभासंति, उज्जोवेंति, तवेंति, पभासेंति । तं एगे वि एगं पंचचक्कभागं ओभासति, उज्जोवेइ, तवेइ, पभासेइ, एगे वि एकं पंचचक्कभागं ओजासेइ एकं, तता णं उत्तमकट्ठपत्ता उक्कोसिया अट्ठारस मुहुत्ता राई भवति, जहण्णए दुवालसमुहुत्ते दिवसे भवति ।

" वयं पुण " इत्यादि । वयं पुनरुत्पन्नकेवलचक्षुषः केवलचक्षुषा यथाऽवस्थितं जगदुपलभ्य,एवं वक्ष्यमाणप्रकारेण वदामः। तमेव प्रकारमाह-"ता अयं णं" इत्यादि । अत्र (जहा जंबुद्दीवपन्नत्तीए त्ति) यथा जम्बूद्वीपप्रज्ञप्तौ-" अयं णं जंबुद्दीवे दीवे " इत्यारभ्य यावत् " एवामेव सपुव्वावरेणं जंबुद्दीवे दीवे चोद्दससलिलासयसहस्साइं छप्पन्नं च सलिलासहस्सा भवंतीति मक्खायं" इत्युक्तम्, तथा एतावद्ग्रन्थसहस्रवक्तव्यतापमाणमपि वक्तव्यं, परं ग्रन्थगौरवभयान्न लिख्यते,केवलं जम्बूद्वीपप्रज्ञप्तिपुस्तकमेव निरीक्षणीयमिति । अयमेवंरूपो जम्बूद्वीपः पञ्चसंख्योपेतैश्चक्रभागैश्चक्रवालभागैः संस्थित आख्यातो मया इति वदेत्स्वशिष्याणां पुरतः । एवमुक्ते भगवान् गौतमः स्वशिष्याणां स्पष्टावबोधार्थं भूयः पृच्छति-"ता कहं" इत्यादि । 'ता' इति पूर्ववत् । कथं भगवन् ! त्वया जम्बूद्वीपो द्वीपः पञ्चचक्रभागसंस्थित आख्यात इति वदेत् ? । भगवानाह-"ता जया णं" इत्यादि । 'ता' इति पूर्ववत् । यदा णमिति वाक्यालङ्कारे, एतौ प्रवक्ष्यमाणवेदितारौ प्रसिद्धौ द्वौ सूर्यौ सर्वाभ्यन्तरमण्डलमुपसंक्रम्य चारं चरतः, तदा तौ समुदितौ द्वावपि सूर्यौ जम्बूद्वीपस्य त्रीन् पञ्चचक्रवालभागान् अवभासयतः,उद्द्योतयतः,तापयतः,प्रकाशयतः। कथं प्रकाशयतः ?, इति परप्रत्यवकाशमाशङ्क्य एतदेव विभागत आह-"एगे वि" इत्यादि । एकोऽपि सूर्यो जम्बूद्वीपस्य द्वीपस्य एकं पञ्चमं चक्रवालभागं द्व्यर्द्धमिति द्वितीयमर्द्धं यस्य स द्व्यर्द्धः पूर्णार्धो वृत्तावन्तर्भूतो, यथा-तृतीयो भागस्त्रिभाग इत्यत्र, तम् । अयं च भावार्थः-एकपञ्चमं चक्रवालभागं द्वितीयस्य पञ्चमस्य चक्रवालभागस्यार्द्धेन सहितं प्रकाशयति । तथा एकोऽपि अपरोऽपि, द्वितीयोऽप्यर्थः एकं पञ्चमं चक्रवालभागं द्व्यर्द्धं प्रकाशयतीति,उभयप्रकाशितभागमीलने परिपूर्णे भागत्रयं प्रकाशयं भवति । इयमत्र भावना-जम्बूद्वीपगतं प्रकाश्यं चक्रवालं षष्ट्यधिकषट्त्रिंशच्छतभागं कल्प्यते ३६६० । तस्य पञ्चमो भागो द्वात्रिंशदधिकसप्तशतप्रमाणः ७३२, सार्द्धः सन्

अष्टानवत्यधिकसहस्रनागमानः १०६८। ततः सर्वाभ्यन्तरे मण्डले वर्त्तमान एकोऽपि सूर्यः षट्त्रिंशच्छतसंख्यानां नागानामष्टानवत्यधिकं सहस्रं प्रकाशयति, द्वितीयोऽप्यष्टानवत्यधिकं सहस्रम्, उभयमीलने एकविंशतिशतानि षण्णवत्यधिकानि २१९६ प्रकाश्यमानानि लभ्यन्ते, तदा च द्वौ पञ्चचक्रवालनागौ रात्रिः। तथा-एकतोऽपि पञ्चमो भागो द्वात्रिंशदधिकसप्तशतभागसंख्या रात्रिः, परतोऽपि एकः पञ्चमो भागो द्वात्रिंशदधिकसप्तशतभागसंख्यो रात्रिः, उभयमीलने चतुर्दशशतानि चतुःषष्ट्यधिकानि भवन्ति। १४६४। षष्ट्यधिकषट्त्रिंशच्छतभागानां रात्रिः, सर्वभागमीलने षट्त्रिंशच्छतानि षष्ट्यधिकानि भवन्ति। संप्रति तत्र दिवसरात्रिप्रमाणमाह-" तया णं " इत्यादि। तदाऽऽभ्यन्तरमण्डलचारकाले उत्तमकाष्ठां प्राप्तः परमप्रकर्षप्राप्त उत्कृष्टोऽष्टादशमुहूर्त्तो दिवसो भवति। जघन्या द्वादश मुहूर्त्ता रात्रिः। ततो द्वितीये अहोरात्रे द्वितीयमण्डले वर्त्तमान एकोऽपि सूर्यो जम्बूद्वीपस्यैकं पञ्चमं चक्रवालभागं सार्द्धषष्ट्यधिकषट्त्रिंशच्छतभागसत्कभागद्वयहीनं प्रकाशयति। अपरोऽपि सूर्य एकं पञ्चमं चक्रवालभागं सार्द्धषष्ट्यधिकषट्त्रिंशच्छतभागद्वयहीनं प्रकाशयति। तृतीये अहोरात्रे तृतीये मण्डले वर्त्तमान एकोऽपि सूर्य एकं पञ्चमं चक्रवालभागं सार्द्धं षष्ट्यधिकषट्त्रिंशच्छतभागसत्कभागचतुष्टयन्यूनं प्रकाशयति। अपरोऽप्येकं पञ्चमं चक्रवालभागं सार्द्धषष्ट्यधिकषट्त्रिंशच्छतभागसत्कभागचतुष्टयन्यूनं प्रकाशयति। एवं प्रत्यहोरात्रमेकैकः सूर्यः षष्ट्यधिकषट्त्रिंशच्छतभागसत्कभागद्वयमोचनेन प्रकाशयन् तावदवसेयो यावत्सर्वबाह्यं मण्डलं सर्वाभ्यन्तरान्मण्डलात्परतस्त्र्यशीत्यधिकशततमं, ततः प्रतिमण्डलं भागद्वयमोचनेन यदा सर्वबाह्यं मण्डलं चरति, तदा त्रीणि शतानि षट्षष्ट्यधिकानि भागानां भुञ्जन्ति, त्र्यशीत्यधिकस्य शतस्य द्वाभ्यां गुणने एतावत्याः संख्याया भावात्। त्रीणि शतानि षट्षष्ट्यधिकानि पञ्चमचक्रवालभागस्य द्वात्रिंशदधिकसप्तशतभागप्रमाणस्यार्द्धं परिपूर्णं तत्र मण्डले भुञ्जतीति एक एव परिपूर्णः पञ्चमचक्रवालभागस्तत्र प्रकाश्यः। तथा चाह-" ता जया णं " इत्यादि। तत्र यदा, णमिति पूर्ववत्। एतौ प्रवचनप्रसिद्धौ द्वावपि सूर्यौ सर्वबाह्यमण्डलमुपसंक्रम्य चारं चरतः, तदा तौ समुदितौ जम्बूद्वीपस्यं द्वौ चक्रवालपञ्चमभागौ अवभासयत उद्द्योतयतस्तापयतः प्रकाशयतः। तद्यथा-एकोऽपि सूर्य एकं पञ्चमं चक्रवालभागं प्रकाशयति। एकोऽपि अपरोऽपि, द्वितीयोऽपीत्यर्थः। एकं पञ्चमं चक्रवालभागं प्रकाशयति। " तया णं " इत्यादि। तदा सर्वबाह्यमण्डलचारकाले उत्तमकाष्ठाप्राप्ता उत्कर्षिका अष्टादशमुहूर्त्ता रात्रिः, जघन्यतो द्वादशमुहूर्त्तप्रमाणो दिवसः। इह यथा निष्क्रामतोः सूर्ययोर्जम्बूद्वीपविषयप्रकाशविधिः क्रमेण हीयमान उक्तः, तथा सर्वबाह्याद् मण्डलादभ्यन्तरं प्रविशतोः क्रमेण वर्द्धमानो वेदितव्यः। तद्यथा-द्वितीयस्य षण्मासस्य द्वितीये अहोरात्रे सर्वबाह्यान्मण्डलादर्वाक्तनेऽनन्तरे द्वितीये मण्डले वर्त्तमान एकोऽपि सूर्य एकं जम्बूद्वीपस्य पञ्चमं चक्रवालभागं षष्ट्यधिकषट्त्रिंशच्छतसंख्यनागसत्कभागद्व्याधिकं प्रकाशयति। अपरोऽपि सूर्य एकं पञ्चमं चक्रवालभागं षष्ट्यधिकषट्त्रिंशच्छतसंख्यनागसत्कनागद्वयाधिकं प्रकाशयति। द्वितीयस्य षण्मासस्य द्वितीयेऽहोरात्रे सर्वबाह्यान् मण्डलादर्वाक्तने तृतीये मण्डले वर्त्तमान एकं पञ्चमं चक्रवालभागं षष्ट्यधिकषट्त्रिंशच्छतसंख्यभागसत्कभागचतुष्टयाधिकं प्रकाशयति। अपरोऽपि सूर्यः परत एकं पञ्चमं चक्रवालभागं यथोक्तभागचतुष्टयाधिकं प्रकाशयति। एवं प्रतिमण्डलमेकैकः सूर्यः षष्ट्यधिकषट्त्रिंशच्छतभागसत्कनागद्वयवर्द्धनेन प्रकाशयन् तावदवसेयो यावत्सर्वाभ्यन्तरं मण्डलम्। तस्मिंश्च सर्वाभ्यन्तरे मण्डले द्वितीयस्य पञ्चमचक्रवालनागस्यार्द्धं परिपूर्णं भवति। तत एकोऽपि सूर्यस्तत्र मण्डले एकं पञ्चमं चक्रवालभागं सार्द्धं जम्बूद्वीपस्य प्रकाशयत्यपरोऽप्येकं पञ्चमं चक्रवालनागं सार्द्धम्।

तथा जम्बूद्वीपस्य दश भागान् परिकल्प्यान्यत्राप्युक्तम्-

" छच्चेव चउद्दसभागे, जम्बूदीवस्स दो वि दिवसयरा।
तावेति दिवसलेसा, अभिंतरमंडले संता ॥ १ ॥
चत्तारि य दसभागे, जम्बूदीवस्स दो वि दिवसयरा।
तावेति संतलेसा, बाहिरए मंडले संता ॥ २ ॥
छत्तीसे भागसए, सट्ठिं काऊण जंबुदीवस्स।
तिरियं तत्तो दो ना-गे वहइ व हायइ वा ॥ ३ ॥ "

सू० प्र० ३ पाहु० चं० प्र०। (चन्द्रसूर्ययोर्दक्षिणोत्तरचाराः ' अयण ' शब्दे प्रथमभागे ७५० पृष्ठे द्रष्टव्याः)

(१४) अथ जम्बूद्वीपे चन्द्राऽऽदीनां चारक्षेत्रविष्कम्भमानमाह-

दीवे आसिइसयं जो-अणाण तीसऽहिअ तिन्नि सय लवणे।
खित्तं पणसय दसऽहिअ,नागा अडयाल इगसट्ठी ॥ ८ ॥

द्वीपे जम्बूद्वीपे चन्द्रयोः सूर्ययोश्च क्षेत्रं चारक्षेत्रं विष्कम्भतोऽशीत्यधिकं शतं योजनानां १८०, लवणे च त्रिंशदधिकानि त्रीणि शतानि योजनानाम् ३३०। उभयोर्मीलने दशाधिकानि पञ्चशतानि योजनानामष्टचत्वारिंशच्चैकषष्टिभागा योजनस्य ५१०। ४८/६१। नक्षत्राणामपि चारक्षेत्रमेतदेव, सर्वाभ्यन्तरसर्वबाह्यमण्डलयोः परस्परं दशाधिकपञ्चशतयोजनप्रमाणान्तरालस्योक्तत्वात्। ग्रहाणां तारकाणां च चारक्षेत्रविष्कम्भमानं व्यक्तया शास्त्रेषु नोपलभ्यत इति। मं०।

(३५) (ज्योतिष्काणामल्पबहुत्वं 'अप्पाबहुय' शब्दे प्रथमभागे ६४१ पृष्ठे जम्बूद्वीपप्रज्ञप्तिपाठतो गतार्थम्, न तत इह ग्रन्थान्तरपाठो वितन्यतेऽतस्तत एवावधार्यम्)

(३६) संप्रति चन्द्रसूर्यग्रहनक्षत्रतारकाणां कः शीघ्रगतिर्भगवन्नाख्यात इति, तत्तस्तद्विषयं प्रश्नसूत्रमाह-

ता कहं ते सिग्घगती वत्थु आहिते ति वदेज्जा ?। ता एतेसि णं चंदिमसूरियग्गहगणनक्खत्ततारारूवाणं चंदेहिंतो सूरा सिग्घगती, सूरेहिंतो गहा सिग्घगती, गहेहिंतो णक्खत्ता सिग्घगती, णक्खत्तेहिंतो तारा सिग्घगती, सव्वऽप्पगती चंदा, सव्वसिग्घगती तारा।

"ता कहं ते" इत्यादि। 'ता' इति पूर्ववत्। कथं भगवन्! त्वया चन्द्रसूर्याऽऽदिकं वस्तु शीघ्रगत्यात्मकं शीघ्रगतिं आख्यातं इति वदेत्?। भगवानाह-" ता एएसि णं " इत्यादि। एतेषां चन्द्रसूर्यग्रहनक्षत्रतारकाणां पञ्चानां मध्ये चन्द्रेभ्यः सूर्याः शीघ्रगतयः, सूर्येभ्योऽपि ग्रहाः शीघ्रगतयः, ग्रहेभ्योऽपि नक्षत्राणि शीघ्रगतीनि, नक्षत्रेभ्योऽपि ताराः शीघ्रगतयः। अत एवैतेषां पञ्चानां मध्ये सर्वाल्पगतयश्चन्द्राः, सर्वशीघ्रगतयस्ताराः।

(३७) एतस्यैवार्थस्य सविशेषपरिज्ञानाय प्रश्नं करोति-

ता एगमेगे णं मुहुत्तेणं चंदे केवतियाइं जोयणसताइं ग-

च्छति ? । ता जं जं मंडलं उवसंकमित्ता चारं चरति तस्स तस्स मंडलपरिक्खेवस्स सत्तरस अट्ठट्ठे भागा सते गच्छति, मंडलं सतसहस्सेणं अट्ठाणउतीए सतेहिं छेत्ता । ता एगमेगेणं मुहुत्तेणं सूरिए केवतियाइं जागसताइं गच्छति । ता जं जं मंडलं उवसंकमित्ता चारं चरति तस्स तस्स मंडलपरिक्खेवस्स अट्ठारस तीसे जागसते गच्छति, मंडलसतसहस्सेणं अट्ठाणउतिसतेहिं छेत्ता । ता एगमेगेणं मुहुत्तेणं णक्खत्ते केवतियाइं जागसताइं गच्छति ? । ता जं जं मंडलं उवसंकमित्ता चारं चरति तस्स तस्स मंडलस्स परिक्खेवस्स अट्ठारसपणतीसे भागसते गच्छति, मंडलं सतसहस्सेणं अट्ठाणवतिसतेहिं छेत्ता ।

"ता एगमेगेणं" इत्यादि । 'ता' इति पूर्ववत् । एकैकेन मुहूर्तेन चन्द्रः कियन्ति मण्डलस्य भागशतानि गच्छति ? भगवानाह-"ता जं जं" इत्यादि । यद्यद् मण्डलमुपसंक्रम्य चन्द्रश्चारं चरति, तस्य तस्य मण्डलस्य संबन्धिनः परिक्षेपस्य परिधेः सप्तदशशतान्यष्टषष्ट्यधिकानि भागानां गच्छति, मण्डलं मण्डलपरिक्षेपमेकेन शतसहस्रेणाष्टानवत्या च शतैश्छित्त्वा विभज्य । इयमत्र भावना-इह प्रथममध्यन्दिनसमये मण्डलकालो निरूपणीयः, तदनन्तरं तदनुसारेण मुहूर्तगतपरिमाणं भावनीयम् । तत्र प्रथममण्डलकालनिरूपणार्थमिदं त्रैराशिकं यदि सप्तदशभिः शतैरष्टषष्ट्यधिकैः सकलयुगवर्तिभिरर्द्धमण्डलैरष्टादश शतानि त्रिंशदधिकानि रात्रिन्दिवानि लभ्यन्ते, तर्हि द्वाभ्यामर्द्धमण्डलाभ्यामेकेन (मण्डलेनेति भाव.) कति रात्रिन्दिवानि लभ्यन्ते ? । राशित्रयस्थापना-१७६८ । १८३० । २ । अन्त्येन राशिना द्विकलक्षणेन मध्यस्य राशेर्गुणनं, जातानि षट्त्रिंशच्छतानि षष्ट्यधिकानि । ३६६० । एतस्यादिमेन राशिना भागहरणं, लब्धे द्वे रात्रिन्दिवे, शेषं तिष्ठति चतुर्विंशत्यधिकं शतम् । १२४ । तत्रैकैकस्मिन् रात्रिन्दिवे त्रिंशन्मुहूर्ता इति,तस्य त्रिंशता गुणने जातानि सप्तत्रिंशच्छतानि विंशत्यधिकानि । ३७२० । तेषां सप्तदशभिः शतैरष्टषष्ट्यधिकैर्लाभे हृते लब्धौ द्वौ मुहूर्तौ, ततः शेषस्यछेद्यच्छेदकराश्योरष्टकेनापवर्तना, जातश्छेद्यो राशिस्त्रयोविंशतिः, छेदकराशिर्द्वे शते एकविंशत्यधिके, आगता मुहूर्तस्यैकविंशत्यधिकशतद्वयभागास्त्रयोविंशतिः । $\left[\frac{३}{२२१}\right]$ एतावता कालेन द्वेऽर्द्धमण्डले परिपूर्णे चरति । किमुक्तं भवति ?-एतावता कालेन परिपूर्णमेकं मण्डलं चन्द्रश्चरति । तदेवं मण्डलकालपरिज्ञानं कृतम् । साम्प्रतमेतदनुसारेण मुहूर्तगतिपरिमाणं चिन्त्यते-तत्र ये द्वे रात्रिन्दिवे ते मुहूर्तकरणार्थं त्रिंशता गुण्यते, जाताः षष्टिर्मुहूर्ताः । ६० । तत उपरितनौ द्वौ मुहूर्तौ प्रक्षिप्तौ, जाता द्वाषष्टिः । ६२ । एषा सवर्णनार्थं द्वाभ्यां शताभ्यामेकविंशत्यधिकाभ्यां गुण्यते, गुणयित्वा चोपरितना त्रयोविंशतिः क्षिप्यते, जातानि त्रयोदशसहस्राणि सप्तशतानि पञ्चविंशत्यधिकानि । १३७२५ । एतदेकमण्डलकालगतमुहूर्तसत्कैकविंशत्यधिकशतद्वयभागानां परिमाणं, ततश्चैराशिककर्मावतारः-यदि त्रयोदशभिः सहस्रैः सप्तभिः शतैः पञ्चविंशत्यधिकैरेकविंशत्यधिकशतद्वयभागानां मण्डलभागा एकं शतसहस्रमष्टानवतिशतानि लभ्यन्ते, तत एकेन मुहूर्तेन किं लप्स्यामहे ? । राशित्रयस्थापना-१३७२५ । १०६८०० । १ । इहाऽऽद्यो राशिर्मुहूर्तगतैकविंशत्यधिकशतद्वयभागरूपस्ततः सवर्णनार्थमन्त्यो राशिरेकलक्षणो द्वाभ्यां शताभ्यामेकविंशत्यधिकाभ्यां गुण्यते, जाते द्वे शते एकविंशत्यधिके । २२१ । ताभ्यां मध्यराशिर्गुण्यते, जाते द्वे कोटी त्रिचत्वारिंशल्लक्षाः पञ्चषष्टिः सहस्राण्यष्टौ शतानि । २४२६५८०० । तेषां त्रयोदशभिः सहस्रैः सप्तभिः शतैः पञ्चविंशत्यधिकैर्भागो ह्रियते, लब्धानि सप्तदशशतान्यष्टषष्ट्यधिकानि । १७६८ । एतावतो भागान् यत्र तत्र एकमण्डले चन्द्रो मुहूर्तेन गच्छति । "ता एगमेगेणं" इत्यादि 'ता' इति पूर्ववत् । एकैकेन मुहूर्तेन सूर्यः कियन्ति भागशतानि गच्छति ? । भगवानाह-"ता जं जं" इत्यादि । यद्यन्मण्डलमुपसंक्रम्य सूर्यश्चारं चरति तस्य तस्य मण्डलसंबन्धिनः परिक्षेपस्य परिधेरष्टादशभागशतानि त्रिंशदधिकानि गच्छति, मण्डलं शतसहस्रेणाष्टानवत्या च शतैश्छित्त्वा । कथमेतदवसीयत इति चेत् ? । उच्यते-त्रैराशिकबलात्, तथाहि-यदि षष्ट्या मुहूर्तैरेकं शतसहस्रमष्टानवतिः शतानि मण्डलभागानां लभ्यन्ते, तत एकेन मुहूर्तेन कति भागान् लप्स्यामहे ? । राशित्रयस्थापना-६० । १०९८०० । १ । अन्त्येन राशिना एकलक्षणेन मध्यस्य राशेर्गुणनं, जातः स एवानेव । "एकेन गुणितं तदेव भवति" इति वचनात् । ततस्तस्याऽऽद्येन राशिना षष्टिलक्षणेन भागो ह्रियते, लब्धान्यष्टादशशतानि त्रिंशदधिकानि । १८३० । एतावतो भागान् मण्डलस्य सूर्य एकैकेन मुहूर्तेन गच्छति । "ता एगमेगेणं" इत्यादि । 'ता' इति पूर्ववत् । एकैकेन मुहूर्तेन कियतो भागान्मण्डलस्य नक्षत्रं गच्छति । भगवानाह-" ता जं जं " इत्यादि । यद्यदात्मीयमाकालप्रतिनियतमण्डलमुपसंक्रम्य चारं चरति तस्य तस्याऽऽत्मीयस्य मण्डलसंबन्धिनः परिक्षेपस्य परिधेरष्टादशभागशतानि पञ्चत्रिंशदधिकानि गच्छति, मण्डलं शतसहस्रेणाष्टानवत्या च शतैश्छित्त्वा । इहापि प्रथमतो मण्डलकालो निरूपणीय ततस्तदनुसारेणैव मुहूर्तगतपरिमाणभावना । तत्र मण्डलकालप्रमाणचिन्तायामिदं त्रैराशिकम्,यद्यष्टादशभिः शतैः पञ्चत्रिंशदधिकैः सकलयुगजाविभिरर्द्धमण्डलैरष्टादशशतानि त्रिंशदधिकानि रात्रिन्दिवानां लभ्यन्ते, ततो द्वाभ्यामर्द्धमण्डलाभ्यामेकेन परिपूर्णेन (मण्डलेनेति भावः) किं लप्स्यामहे ? । राशित्रयस्थापना-१८३५ । १८३० । २ । अन्त्येन राशिना मध्यराशेर्गुणनं, जातानि षट्त्रिंशच्छतानि षष्ट्यधिकानि । ३६६० । तत आद्येन राशिना भागहरणम् । १८३५ । लब्धमेकं रात्रिन्दिवम् । १ । शेषाणि तिष्ठन्त्यष्टादशशतानि पञ्चत्रिंशदधिकानि । १८३५ । ततो मुहूर्ताऽऽनयनार्थमेतानि त्रिंशता गुण्यन्ते, जातानि चतुष्पञ्चाशत्सहस्राणि सप्तशतानि पञ्चाशदधिकानि । ५४७५० । तेषामष्टादशभिः शतैः पञ्चत्रिंशदधिकैर्लाभे हृते लब्धा एकोनत्रिंशन्मुहूर्ताः । २९ । ततः शेषच्छेद्यच्छेदकराश्योः पञ्चकेनापवर्तना, जात उपरितनो राशिः, त्रीणि शतानि सप्तोत्तराणि । ३०७ । छेदकराशिः त्रीणि शतानि सप्तषष्ट्यधिकानि । ३६७ । तत आगतमेकं रात्रिन्दिवम्, एकस्य च रात्रिन्दिवस्यैकोनत्रिंशन्मुहूर्ताः, एकस्य च मुहूर्तस्य सप्तषष्ट्यधिकत्रिंशद्भागानां त्रीणि शतानि सप्तोत्तराणि । २९ । ३०७ । इदानीमेतदनुसारेण मुहूर्तगतिपरिमाणं चिन्त्यते-तत्र रात्रिन्दिवे त्रिंशन्मुहूर्ताः । ३० । तेषूपरितना एकोनत्रिंशन्मुहूर्ताः प्रक्षिप्यन्ते, जातानि एकोनषष्टिर्मुहूर्तानां, ततः सा सवर्णनार्थं त्रिभिः शतैः सप्तषष्ट्यधिकैर्गुण्यते, गुणयित्वा चोपरितनानि त्रीणि शतानि सप्तोत्तराणि प्रक्षिप्यन्ते, जातान्ये-

कविंशतिसहस्राणि नवशतानि षष्ट्यधिकानि । २१९६० । तत्रैकराशिकं यदि मुहूर्त्तगतसप्तषष्ट्यधिकत्रिंशद्भागानामेकविंशत्या सहस्रैर्नवभिः शतैः षष्ट्यधिकैरेकं शतसहस्रमष्टानवतिशतानि मण्डलभागानां लभ्यन्ते, तत एकेन मुहूर्त्तेन किं लभामहे ?। राशित्रयस्थापना-२१९६० । १०९८०० । १ । अत्रान्त्यो राशिर्मुहूर्त्तगतसप्तषष्ट्यधिकत्रिंशद्भागरूपः, ततोऽन्त्योऽपि राशिस्त्रिभिः शतैः सप्तषष्ट्यधिकैर्गुण्यते, जातानि त्रीण्येव शतानि सप्तषष्ट्यधिकानि ३६७ । तैर्मध्ये राशिर्गुण्यते, जाताश्चत्वारः कोट्यो द्वे लक्षे षण्णवतिसहस्राणि षट्शतानि । ४०२९६-६०० । तेषामाद्येन राशिनैकविंशतिः सहस्राणि नवशतानि षष्ट्यधिकानीत्येवंरूपेण भागो ह्रियते, लब्धान्यष्टादशशतानि पञ्चत्रिंशदधिकानि । १८३५ । एतावतो भागाञ्चक्रत्वं प्रतिमुहूर्त्तं गच्छति, तदेवं यतश्चन्द्रो यत्र तत्र वा मण्डले एकैकेन मुहूर्त्तेन मण्डलपरिक्षेपस्य सप्तदशशतान्यष्टषष्ट्यधिकानि भागानां गच्छति, सूर्योऽष्टादशशतानि त्रिंशदधिकानि नक्षत्रम्, अष्टादशशतानि पञ्चत्रिंशदधिकानि । ततश्चन्द्रेभ्यः शीघ्रगतयः सूर्याः, सूर्येभ्यः शीघ्रगतीनि नक्षत्राणि, ग्रहास्तु वक्रानुवक्राऽतिगतिभावतोऽनियतगतिप्रस्थानाः, ततो न तेषामुक्तप्रकारेण गतिप्रमाणप्ररूपणा कृता।

उक्तं च-

" चंदेहिं सिग्घयरा, सूरा सूरेहिं होंति नक्खत्ता ।
अणिययगइपत्थाणा, हवंति सेसा गहा सव्वे ॥ १ ॥
अट्ठारस एगतीसे, भागसए गच्छइ मुहुत्तेणं ।
नक्खत्तं चंदो पुण, सत्तरस सए उ अहऽट्ठ ॥ २ ॥
अट्ठारसभागसए, तीसे गच्छइ रवी मुहुत्तस्स ।
नक्खत्तसीमछेदो, सो चेव इह पि नायव्वो ॥ ३ ॥ "

इदं गाथात्रयमपि सुगमम् । नवरं नक्षत्रसीमाच्छेदः स एवात्रापि ज्ञातव्य इति । किमुक्तं भवति ?-अत्रापि मण्डलमेकेन शतसहस्रेणाष्टानवत्या च शतैः प्रविभक्तव्यमिति ।

(३८) संप्रत्युक्तस्वरूपमेव चन्द्रसूर्यनक्षत्राणां परस्परं मण्डलभागविषयविशेषं निर्द्धारयति—

ता जया णं चंदं गतिसमावण्णे भवति से णं गतिमाताए केवतियं विसेसेति ? वावट्ठिभागे विसेसेति । ता जता णं चंदं गतिसमावण्णणक्खत्ते गतिसमावण्णे भवइ से णं गतिमाताए केवतियं विसेसेति ? सत्तट्ठिं भागे विसेसेति । ता जता णं सूरं गतिसमावण्णणक्खत्ते गतिसमावण्णे भवति से णं गतिमाताए केवतियं विसेसेति ? ता पंचभागे विसेसेति । ता जता णं चंदगतिसमावण्णे अभिईणक्खत्ते णं गतिसमावण्णे पुरच्छिमाते जामाते समासादेंति णवमुहुत्ते सत्तावीसे च सत्तट्ठिभागे मुहुत्तस्स चंदेणं सद्धिं जोएति, जोअं जोएत्ता जोअं अणुपरियट्टंति, जोअं जोएत्ता विजेति, विजहति, विप्पजहति, विगतजोई यावि भवति । ता जता णं चंदगतिसमावण्णे सवणे णक्खत्ते गतिसमावण्णे पुरच्छिमाते तिभागे समासादेंति, पुरच्छिमाते भागाते समासादेत्ता तीसं मुहुत्ते चंदेणं सद्धिं जोअं जोएति, जोअं जोएत्ता जोअं अणुपरियट्टति, जोअं जोएत्ता विजेति, विजहति, विप्पजहति, विगतजोई यावि भवति । एवं एएणं अभिलावेणं णेतव्वं पण्णरस मुहुत्ता राई, तिमतीमुहुत्ताइं भाणियव्वाइं० जाव उत्तरासाढा ।

" ता जया णं" इत्यादि । 'ता' इति पूर्ववत् । यदा णमिति वाक्यालङ्कारे, चन्द्रगतिसमापन्नमपेक्ष्य सूर्यो गतिसमापन्नो विवक्षितो भवति । किमुक्तं भवति ?-प्रतिमुहूर्त्तचन्द्रगतिमपेक्ष्य सूर्यगतिर्विचिन्त्यते, तदा सूर्यो गतिमात्रया एकमुहूर्त्तगतगतिपरिमाणेन कियतो भागान्मुहूर्तान् विशेषयति ?, एकेन मुहूर्त्तेन चन्द्रोक्तभितेभ्यो भागेभ्यः कियतोऽधिकतरान् भागान् सूर्य आक्रामतीति भावः । भगवानाह-द्वाषष्टिभागान् विशेषयति । तथाहि-चन्द्र एकेन मुहूर्त्तेन सप्तदशशतान्यष्टषष्ट्यधिकानि गच्छति । १७६८ । सूर्योऽष्टादशशतानि त्रिंशदधिकानि । १८३० । ततो भवति द्वाषष्टिभागकृतः परस्परविशेषः । " ता जया णं " इत्यादि । 'ता' इति प्राग्वत् । यदा चन्द्रगतिसमापन्नमपेक्ष्य नक्षत्रं गतिसमापन्नं विवक्षितं भवति, तदा नक्षत्रं गतिमात्रया एकमुहूर्त्तगतगतिपरिमाणेन कियन्तं विशेषयति ?, चन्द्राक्रमितेभ्यो भागेभ्यः कियतो भागानधिकानाक्रामतीति भावः । भगवानाह-सप्तषष्टिभागान्नक्षत्रं ह्येकेन मुहूर्त्तेन अष्टादशभागशतानि पञ्चत्रिंशदधिकानि गच्छति । चन्द्रस्तु सप्तदशभागशतान्यष्टषष्ट्यधिकानि; तत उपपद्यते सप्तषष्टिभागकृतो विशेषः । " ता जया णं " इत्यादि प्रश्नसूत्रं प्राग्वद् भावनीयम् । भगवानाह-" ता पंच " इत्यादि । पञ्च भागान् विशेषयति, सूर्याऽऽक्रान्तभागेभ्यो नक्षत्राऽऽक्रान्तभागानां पञ्चभिरधिकत्वात् । तथाहि-सूर्य एकेन मुहूर्त्तेनाष्टादशभागशतानि त्रिंशदधिकानि गच्छति । नक्षत्रमष्टादशभागशतानि पञ्चत्रिंशदधिकानि । ततो भवति परस्परं पञ्चभागकृतो विशेषः । " ता जया णं " इत्यादि । 'ता' इति पूर्ववत् । यदा णमिति वाक्यालङ्कारे, चन्द्रगतिसमापन्नमपेक्ष्याभिजिन्नक्षत्रं गतिसमापन्नं भवति, तदा पौरस्त्याद्भागात्प्रथमतोऽभिजिन्नक्षत्रं चन्द्रमसं समासादयति । एतच्च प्रागेव भावितम् । समासाद्य च नव मुहूर्तान्, दशमस्य च मुहूर्तस्य सप्तविंशतेः सप्तषष्टिभागान् चन्द्रेण सार्द्धं योगं युनक्ति, करोति, एतदपि प्रागेव भावितम् । एवंप्रमाणं च कालं योगं युक्त्वा पर्यन्तसमये योगमनु परिवर्तयति । श्रवणनक्षत्रस्य योगं समर्पयतीति भावः । योगं च परावर्त्य तेन सह योगं विजहाति । किं बहुना ?, विगतयोगी चापि भवति । " ता जया णं " इत्यादि । ' ता ' इति प्राग्वत् । यदा चन्द्रं गतिसमापन्नमपेक्ष्य श्रवणनक्षत्रं समापन्नं भवति, तदा तच्छ्रवणनक्षत्रं प्रथमतः पौरस्त्याद्भागात्पूर्वेण भागेन चन्द्रमसं समासादयति, समासाद्य चन्द्रेण सार्द्धं त्रिंशन्मुहूर्तान् यावद्योगं युनक्ति, एवंप्रमाणं च कालं यावद्योगं युक्त्वा पर्यन्तसमये योगमनु परिवर्तयति । धनिष्ठानक्षत्रस्य योगं समर्पयितुमारभते इत्यर्थः । योगमनुपरिवर्त्य च तेन सह योगं विप्रजहाति । किं बहुना ?, विगतयोगी चाऽपि भवति । "एवं" इत्यादि । एवमुक्तेन प्रकारेणैतेनानन्तरोपदर्शितेनाभिलापेन यानि पञ्चदश मुहूर्तानि शतभिषक्प्रभृतीनि नक्षत्राणि, यानि त्रिंशन्मुहूर्तानि धनिष्ठाप्रभृतीनि, यानि च पञ्चचत्वारिंशन्मुहूर्तान्युत्तरभद्रपदाऽऽदीनि, सर्वाण्यपि क्रमेण तावद्भणितव्यानि यावदुत्तराषाढा । तत्राभिलापः सुगमत्वान्स्वयं भावनीयः, ग्रन्थगौरवभयान्न लिख्यत इति ।

(३९) संप्रति ग्रहमधिकृत्य योगचिन्तां करोति-

ता जया णं चंदगतिसमावण्णं गहगतिसमावण्णे पुरच्छि-

माते जागाते समासादेति, पुरच्छिमाते जागाते समासादेत्ता चंदेणं सद्धिं अद्धा जोगं जुंजति, अद्धा जोगं जुंजतित्ता अद्धा जोगं अणुपरियट्टति, अद्धा जोगं अणुपरियट्टतित्ता विजेति, विजहति, विप्पजहति, विगतजोई यावि भवति।

"ता जया णं" इत्यादि। 'ता' इति पूर्ववत्। यदा जमिति वाक्यालङ्कारे, चन्द्रं गतिसमापन्नमपेक्ष्य ग्रहो गतिसमापन्नो भवति, तदा स ग्रहः पौरस्त्याद्भागात्पूर्वेण भागेन प्रथमतश्चन्द्रमसं समासादयति, समासाद्य च यथासंभवं योगं युनक्ति, यथासंभवं योगं युक्त्वा पर्यन्तसमये यथासंभवं योगमनुपरिवर्त्तयति, यथासंभवमन्यस्य ग्रहस्य योगं समर्पयितुमारभते इति। प्राक्तनयोगमनुवर्त्त्य च तेन सह योगं विजहाति, विप्रजहाति। किं बहुना?, विगतयोगी चापि भवति।

(४०) अधुना सूर्येण सह नक्षत्रस्य योगचिन्तां करोति-

ता जया णं सूरं गतिसमावण्णं अभिई णक्खत्ते गतिसमावण्णे पुरच्छिमाते भागाते समासादेति, पुरच्छिमाते भागाते समासादेत्ता चत्तारि अहोरत्ते छ मुहुत्ते सूरेणं सद्धिं जोयं जोएति, जोयं जोएत्ता जोयं अणुपरियट्टति, अणुपरियट्टित्ता विजेति, विजहति, विप्पजहति, विगतजोई यावि भवति। एवं अहोरत्ता छ एक्कवीसं मुहुत्ता य, तेरस अहोरत्ता बारस मुहुत्ता य, वीसं अहोरत्ता तिण्णि मुहुत्ता य, ताव सव्वे भाणितव्वा जाव उत्तरासाढाणक्खत्ता।

"ता जया णं" इत्यादि। 'ता' इति प्राग्वत्। यदा सूर्यं गतिसमापन्नमपेक्ष्याभिजिन्नक्षत्रं गतिसमापन्नं भवति, तदा अभिजिन्नक्षत्रं प्रथमतः पौरस्त्याद्भागात्सूर्यं समासादयति, समासाद्य चतुरः परिपूर्णानहोरात्रान्, पञ्चमस्य चाहोरात्रस्य षट्मुहूर्त्तान् यावत्सूर्येण सह योगं युनक्ति। एवंप्रमाणं च कालं यावद्योगं युक्त्वा पर्यन्तसमये योगमनुपरिवर्त्तयति। श्रवणनक्षत्रस्य योगं समर्पयितुमारभत इति भावः। अनुपरिवर्त्त्य च तेन सह योगं विजहाति, विप्रजहाति, किं बहुना?, विगतयोगी चापि भवति। 'एवं' इत्यादि। एवमुक्तेन प्रकारेण पञ्चदशमुहूर्त्तानां शतभिषक्प्रभृतीनां षडहोरात्राः, सप्तमस्याहोरात्रस्यैकविंशतिमुहूर्त्ताः त्रिंशन्मुहूर्त्तानां श्रवणाऽऽदीनां त्रयोदश अहोरात्राश्चतुर्दशस्याहोरात्रस्य द्वादश मुहूर्त्ताः, पञ्चचत्वारिंशन्मुहूर्त्तानामुत्तरभद्रपदाऽऽदीनां विंशतिरहोरात्राः, एकविंशतितमस्य चाहोरात्रस्य त्रयो मुहूर्त्ताः, क्रमेण सर्वे तावद्भणितव्या यावदुत्तराषाढानक्षत्रम्।

तत्रोत्तराषाढानक्षत्रगतमभिलापं साक्षादर्शयति-

ता जता णं सूरं गतिसमावण्णं उत्तरासाढाणक्खत्ते गतिसमावण्णे पुरच्छिमाते भागाते समासादेति, पुरच्छिमाते भागाते समासादेत्ता वीसं अहोरत्ते तिण्णि य मुहुत्ते सूरेण सद्धिं जोयं जोएति, जोयं जोएत्ता जोयं अणुपरियट्टति, जोयं अणुपरियट्टित्ता विजेति, विजहति, विप्पजहति, विगतजोई यावि भवति।

'ता जया' इत्यादि सुगमम्। एतदनुसारेण शेषा अप्यालापाः स्वयं वक्तव्याः, सुगमत्वात्तु नात्र दर्श्यन्ते।

(४१) संप्रति सूर्येण सह ग्रहस्य योगचिन्तां करोति-

ता जता णं सूरं गतिसमावण्णं गहगतिसमावण्णे पुरच्छिमाते जागाते समासादेति, पुरच्छिमाते जागाते समासादेत्ता सूरेण सद्धिं अद्धा जोयं जुंजति, अद्धा जोयं जुंजित्ता अद्धा जोयं अणुपरियट्टति, अद्धा जोयं अणुपरियट्टित्ता विजेति०जाव विगतजोई यावि भवति।

"ता जया णं" इत्यादि सुगमम्।

(४२) अधुना चन्द्राऽऽदयो नक्षत्रेण मासेन कति मण्डलानि चरन्तीत्येतन्निरूपयितुकाम आह-

ता णक्खत्तेणं मासेणं चंदे कति मंडलाइं चरति?। ता तेरस मंडलाइं चरति, तेरस य सत्तट्ठिभागे मंडलस्स। ता णक्खत्तेणं मासेणं सूरे कति मंडलाइं चरति?। ता तेरस मंडलाइं चरति, चोयालीसं च सत्तट्ठिभागे मंडलस्स। ता णक्खत्ते कति मंडलाइं चरति?। ता तेरस मंडलाइं चरति, अट्ठसीतालीसं च सत्तट्ठिभागे मंडलस्स।

"ता णक्खत्तेणं" इत्यादि। 'ता' इति पूर्ववत्। नक्षत्रेण मासेन चन्द्रः कति मण्डलानि चरति?। एवं गौतमेन प्रश्ने कृते भगवानाह-"ता तेरस" इत्यादि। त्रयोदश मण्डलानि, चतुर्दशस्य मण्डलस्य त्रयोदश सप्तषष्टिभागान्। कथमेतदवसीयते? इति चेत्। उच्यते-त्रैराशिकलब्धात्। तथाहि-यदि सप्तषष्ट्या नक्षत्रमासैरष्टौ शतानि चतुरशीत्यधिकानि मण्डलानां लभ्यन्ते, तत एकेन नक्षत्रमासेन किं लभामहे?। राशित्रयस्थापना-६७। ८८४। १। अन्त्येन राशिना मध्यराशेर्गुणनं, आदेः स तावानेव, तस्य सप्तषष्ट्या भागहरणं, लब्धानि त्रयोदश मण्डलानि, चतुर्दशस्य च मण्डलस्य त्रयोदश सप्तषष्टिभागाः। १३। १३/६७। "ता णक्खत्ते णं" इत्यादि सूर्यविषयं प्रश्नसूत्रं सुगमम्। भगवानाह-"ता तेरस" इत्यादि। त्रयोदश मण्डलानि, चतुर्दशस्य च मण्डलस्य चतुश्चत्वारिंशतं सप्तषष्टिभागान्। तथाहि-यदि सप्तषष्ट्या नक्षत्रैर्मासैरेव शतानि पञ्चदशोत्तराणि मण्डलानां सूर्यस्य लभ्यन्ते, तत एकेन नक्षत्रेण मासेन कति मण्डलानि लभामहे?। राशित्रयस्थापना-६७। ६१५। १। अन्त्येन राशिना मध्यराशेर्गुणनं, तत आद्येन राशिना भागहारः, लब्धानि त्रयोदश मण्डलानि, चतुर्दशस्य च मण्डलस्य चतुश्चत्वारिंशतं सप्तषष्टिभागाः।१३। ४४/६७। "ता णक्खत्ते" इत्यादि नक्षत्रविषयं प्रश्नसूत्रं सुगमम्। भगवानाह-"ता तेरस" इत्यादि। त्रयोदश मण्डलानि, चतुर्दशस्य च मण्डलस्य अर्द्धसप्तचत्वारिंशतं सार्धषट्चत्वारिंशतं सप्तषष्टिभागान् चरति। तथाहि-यदि सप्तषष्ट्या नक्षत्रैर्मासैरष्टादशशतानि पञ्चत्रिंशदधिकानि अर्द्धमण्डलानि नक्षत्रस्य लभ्यन्ते, तत एकेन नक्षत्रेण मासेन किं लभामहे?। राशित्रयस्थापना-६७। १८३५। १। अन्त्येन राशिना मध्यराशेर्गुणनं, तत आद्येन राशिना भागहारः, लब्धानि सप्तविंशतिरर्द्धमण्डलानि, अष्टाविंशतितमस्य चार्द्धमण्डलस्य षष्टिर्भागाः सप्तषष्टिभागाः २७। २७/६७। ततो द्वाभ्यामर्द्धमण्डलाभ्यामेकं मण्डलमित्यस्य राशेरर्द्धकरणेन लब्धानि त्रयोदश मण्डलानि, चतुर्दशस्य मण्डलस्य सार्द्धषट्चत्वारिंशत्सप्तषष्टिभागाः। १३। ४३/६७।

(४३) संप्रति चन्द्रमासमधिकृत्य चन्द्राऽऽदीनां मण्डलसंख्यां करोति-

ता चंदेणं मासेणं चंदे कति मंडलाइं चरति?। चोद्दस

चउन्नागाइं मंडलाइं चरति, एगं च चउवीससयभागं मंडलस्स। ता चंदेणं मासेणं सूरे कति मंडलाइं चरति ?। ता पण्णरस चउन्नागूणाइं मंडलाइं चरति, एगं च चउवीससयभागं मंडलस्स । ता चंदेणं मासेणं एक्खत्ते कति मंडलाइं चरति ?। ता पण्णरस चउभागूणाइं मंडलाइं चरति, अट्ठ चउवीससतभागे मंडलस्स ॥

" ता चंदेणं " इत्यादि । 'ता' इति पूर्ववत् । चन्द्रेण मासेन प्रागुक्तस्वरूपेण, चन्द्रः कति मण्डलानि चरति ?। भगवानाह-" ता चउद्दस " इत्यादि । चतुर्दशस्य चतुर्भागमण्डलानि चतुर्भागसहितानि मण्डलानि चरति, एकं च चतुर्विंशतितमं मण्डलस्य । किमुक्तं भवति ?-परिपूर्णानि चतुर्दश मण्डलानि, पञ्चदशस्य च मण्डलस्य चतुर्भागं चतुर्विंशत्यधिकशतसत्कैकत्रिंशद्भागप्रमाणम्, एकं च चतुर्विंशत्यधिकशतस्य भागं द्वात्रिंशतं, पञ्चदशस्य मण्डलस्य चतुर्विंशत्यधिकशतभागान् चरति । तथाहि-यदि चतुर्विंशत्यधिकेन पर्वशतेनाष्टौ शतानि चतुरशीत्यधिकानि मण्डलानां लभ्यन्ते, ततो द्वाभ्यां पर्वाभ्यां किं लभामहे ?। राशित्रयस्थापना-१२४।८८४।२।अन्त्येन राशिना द्विकलक्षणेन मध्यराशेर्गुणनं, जातानि सप्तदशशतान्यष्टषष्ट्यधिकानि १७६८। तेषां चतुर्विंशत्यधिकेन शतेन भागहरणं,लब्धानि चतुर्दश मण्डलानि, पञ्चदशस्य च मण्डलस्य द्वात्रिंशच्चतुर्विंशत्यधिकशतभागाः। १४$\frac{३२}{१२४}$। " ता चंदेणं " इत्यादि सूर्यविषयं प्रश्नसूत्रं सुगमम् । " ता पण्णरस" इत्यादि । पञ्चदश चतुर्भागन्यूनानि मण्डलानि चरति, एकं च चतुर्विंशत्यधिकशतभागं मण्डलस्य । किमुक्तं भवति?-चतुर्दश परिपूर्णानि मण्डलानि, पञ्चदशस्य च मण्डलस्य चतुर्नवतिचतुर्विंशत्यधिकशतभागान् चरति । तथाहि-यदि चतुर्विंशत्यधिकेन पर्वशतेन नव शतानि षट्चदशोत्तराणि मण्डलानां लभ्यन्ते, ततो द्वाभ्यां किं लभामहे ?। राशित्रयस्थापना-१२४ । ९१६ । २ । अन्त्येन राशिना मध्यराशेर्गुणनं, जातान्यष्टादश शतानि त्रिंशदधिकानि । १८३० । एतेषामाद्येन राशिना चतुर्विंशत्यधिकेन शतेन भागहरणं, लब्धानि चतुर्दश मण्डलानि, पञ्चदशस्य च मण्डलस्य चतुर्नवतिचतुर्विंशत्यधिकशतभागाः । १४$\frac{९४}{१२४}$ । इति । "ता चंदेणं" इत्यादि नक्षत्रविषयं प्रश्नसूत्रं सुगमम् । भगवानाह-" ता पण्णरस " इत्यादि । पञ्चदश मण्डलानि चतुर्भागन्यूनानि चरति, षट्चतुर्विंशत्यधिकशतभागान्मण्डलस्य । किमुक्तं भवति ?—परिपूर्णानि चतुर्दशमण्डलानि चरति, पञ्चदशस्य च मण्डलस्य नवनवतिचतुर्विंशत्यधिकशतभागान् । तथाहि-यदि चतुर्विंशत्यधिकेन पर्वशतेनाष्टादश शतानि पञ्चत्रिंशदधिकानि अर्द्धमण्डलानां लभ्यन्ते,ततो द्वाभ्यां पर्वभ्यां किं लभामहे?। राशित्रयस्थापना-१२४ । १८३५ । २ । अन्त्येन राशिना द्विकलक्षणेन मध्यराशेर्गुणनं, जातानि षट्त्रिंशच्छतानि सप्तत्यधिकानि । ३६७० । एतेषामाद्येन राशिना चतुर्विंशत्यधिकशतरूपेण भागहरणं, लब्धा एकोनत्रिंशत्, शेषास्तिष्ठन्ति चतुःसप्ततिः । इदं चार्द्धमण्डलगतं परिमाणम् । द्वाभ्यां चार्द्धमण्डलाभ्यामेकं परिपूर्णं मण्डलं,ततोऽस्य राशेर्द्विकेन भागहारः, लब्धानि चतुर्दश मण्डलानि, पञ्चदशस्य च मण्डलस्य नवनवतिश्चतुर्विंशत्यधिकशतभागाः । १४$\frac{९४}{१२४}$ ।

(४४) साम्प्रतमृतुमासमधिकृत्य चन्द्राऽऽदीनां मण्डलनिरूपणां करोति-

ता उउणा मासेणं चंदे कति मंडलाइं चरति?। ता चोद्दसमंडलाइं चरति, तीसं च एगट्ठिभागे मंडलस्स । ता उउणा मासेणं सूरे कति मंडलाइं चरति ?। ता पण्णरस मंडलाइं चरति। ता उउणा मासेणं एक्खत्ते कति मंडलाइं चरति ?। ता पण्णरस मंडलाइं चरति,पंच य बावीससतभागे मंडलस्स ।

"ता उउमासेणं चंदे " इत्यादि । ऋतुमासेन कर्ममासेन चन्द्रः कति मण्डलानि चरति ?। भगवानाह-" ता चोद्दस " इत्यादि । चतुर्दश मण्डलानि चरति। पञ्चदशस्य च मण्डलस्य त्रिंशतमेकषष्टिभागान् । तथाहि-यदि एकषष्ट्या कर्ममासैरष्टौ शतानि चतुरशीत्यधिकानि मण्डलानां लभ्यन्ते,तत एकेन कर्ममासेन किं लभामहे ?। राशित्रयस्थापना-६१ । ८८४ । १ । अन्त्येन राशिना एकलक्षणेन मध्यराशेर्गुणनं, जातः स तावानेव । तस्य एकषष्ट्या भागहरणं, लब्धानि परिपूर्णानि चतुर्दश मण्डलानि, पञ्चदशस्य च मण्डलस्य त्रिंशदेकषष्टिभागाः । १४ $\frac{३०}{६१}$ । " ता उउणा मासेणं " इत्यादि सूर्यविषयं प्रश्नसूत्रं सुगमम् । भगवानाह-" ता पण्णरस " इत्यादि । पञ्चदश परिपूर्णानि मण्डलानि चरति । तथाहि-यदेकषष्ट्या कर्ममासैर्नव शतानि पञ्चदशोत्तराणि सूर्यमण्डलानां लभ्यन्ते, तत एकेन कर्ममासेन किं लभामहे ?। राशित्रयस्थापना-६१ । ९१५ । १ । अन्त्येन राशिना मध्यराशिर्गुण्यते,जातः स तावानेव,तस्यैकषष्ट्या भागहरणं, लब्धानि परिपूर्णानि पञ्चदश मण्डलानि। १५ ।"ता उउणा मासेणं"इत्यादि नक्षत्रविषयं प्रश्नसूत्रं सुगमम् । भगवानाह-"ता पण्णरस" इत्यादि । पञ्चदश मण्डलानि चरति,षोडशस्य च मण्डलस्य पञ्चद्वात्रिंशतिशतभागान् । तथाहि-यदि द्वात्रिंशेन कर्ममासशतेनाष्टादश शतानि पञ्चत्रिंशदधिकानि मण्डलानि नक्षत्रस्य लभ्यन्ते,तत एकेन कर्ममासेन किं लभामहे ?। राशित्रयस्थापना-१२३ । १८३५ । १ । अन्त्येन राशिना मध्यराशेर्गुणनं,जातः स तावानेव,तस्याऽऽद्येन राशिना द्वात्रिंशत्यधिकशतरूपेण भागहरणं,लब्धानि पञ्चदश मण्डलानि, षोडशस्य च पञ्चद्वात्रिंशशतभागाः । १५। ९३२ ।

(४५) सांप्रति सूर्यमासमधिकृत्य चन्द्राऽऽदीनां मण्डलानि निरूपयति-

ता आइच्चेणं मासेणं चंदे कति मंडलाइं चरति ?। ता चोद्दसमंडलाइं चरति, एक्कारस य पण्णरसभागे मंडलस्स। ता आइच्चेणं मासेणं सूरे कति मंडलाइं चरति ?। ता पण्णरस चउभागाइं मंडलाइं चरति । ता आइच्चेणं मासेणं एक्खत्ते कति मंडलाइं चरति ?। ता पण्णरस चउन्नागाइं मंडलाइं चरति, पंचतीसं च बीससतभागे मंडलस्स ॥

" ता आइच्चेणं " इत्यादि । 'ता' इति पूर्ववत् । आदित्येन मासेन चन्द्रः कति मण्डलानि चरति ?। भगवानाह-चतुर्दश मण्डलानि चरति, पञ्चदशस्य च मण्डलस्य एकादश पञ्चदश भागान् । तथाहि-यदि षष्ट्या सूर्यमासैरष्टौ शतानि चतुरशीत्यधिकानि मण्डलानां चन्द्रस्य लभ्यन्ते, तत एकेन सूर्यमासेन किं लभामहे ?। राशित्रयस्थापना-६० । ८८४ । १ । अन्त्येन राशिना मध्यराशेर्गुणनं, जातः स

तावानेव, तस्य षष्ट्या भागहरणं, लब्धानि चतुर्दश मण्डलानि, शेषास्तिष्ठन्ति चतुश्चत्वारिंशत्। ४४। ततश्छेद्यच्छेदकराश्योश्चतुष्केणापवर्तना, जात उपरितनो राशिरेकादशरूपोऽधस्तनः पञ्चदशरूपः, लब्धाः पञ्चदशमण्डलस्यैकादशभागाः। १४। ११/१५। "ता आइच्चेणं" इत्यादि सूर्यविषयं प्रश्नसूत्रं सुगमम्। भगवानाह-पञ्चदश चतुर्भागाधिकानि मण्डलानि चरति। तथाहि-यदि षष्ट्या सूर्यमासैरेकशतानि पञ्चदशोत्तराणि मण्डलानां सूर्यस्य लभ्यन्ते, तत एकेन मासेन किं लभामहे?। राशित्रयस्थापना-६०। ९१५। १। अत्रान्त्येन राशिना एकत्रकरणेन मध्यराशेर्गुणनं, जातः स तावानेव, तस्य षष्ट्या भागहरणं, लब्धानि पञ्चदश मण्डलानि, षोडशस्य च षष्टिभागविभक्तस्य पञ्चदशभागात्मकाश्चतुर्भागाः। १५। १/४। "ता आइच्चेणं" इत्यादि नक्षत्रविषयं प्रश्नसूत्रं सुगमम्। भगवानाह-"ता एगरस" इत्यादि। पञ्चदश मण्डलानि चतुर्भागाधिकानि पञ्चत्रिंशतं विंशत्यधिकशतभागान् मण्डलस्य चरति। किमुक्तं भवति?-षोडशस्य च मण्डलस्य पञ्चत्रिंशतं विंशत्यधिकशतभागान् चरति। तथाहि-यदि विंशेन सूर्यमासशतेनाष्टादश शतानि पञ्चत्रिंशदधिकानि मण्डलानां नक्षत्रस्य लभ्यन्ते, तत एकेन सूर्यमासेन किं लभ्यते?। राशित्रयस्थापना-१२०। १८३५। १। अत्रान्त्येन राशिना मध्यराशिर्गुणितः, जातस्तावानेव, तस्य विंशत्यधिकेन शतेन भागहरणं, लब्धानि पञ्चदश मण्डलानि, पञ्चत्रिंशच्च विंशत्यधिकाः शतभागाः षोडशस्य। १५। ३५/१२०।

(४६) अधुनाऽभिवर्द्धितमासमधिकृत्य चन्द्रादीनां मण्डलानि निरूपयन्नाह—

ता अभिवड्ढितेणं मासेणं चंदे कति मंडलाइं चरति?। ता पण्णरस मंडलाइं चरति, तेसीति-छलुलसीतिसतभागे मंडलस्स। ता अभिवड्ढितेणं मासेणं सूरे कति मंडलाइं चरति?। ता सोलस मंडलाइं चरति तेहिं भागेहिं ऊणगाइं, दोहिं अडयालेहिं सएहिं मंडलं छेत्ता। ता अभिवड्ढितेणं मासेणं णक्खत्ते कति मंडलाइं चरति?। ता सोलस मंडलाइं चरति, सत्तालीसाएहिं भागेहिं अहियाहिं चोद्दसहिं अट्ठासीएहिं सएहिं मंडलं छेत्ता॥

"ता अभिवड्ढितेणं" इत्यादि। 'ता' इति पूर्ववत्। अभिवर्द्धितेन मासेन चन्द्रः कति मण्डलानि चरति?। भगवानाह-"ता पण्णरस" इत्यादि। पञ्चदश मण्डलानि चरति, षोडशस्य च मण्डलस्य त्र्यशीतिषट्शत्यधिकशतभागान्। तथाहि-अत्रैव त्रैराशिकम्-इह युगेऽभिवर्द्धितमासाः सप्तपञ्चाशत्, सप्त चाहोरात्राः, एकादश मुहूर्त्ताश्चयोविंशतिश्च द्वाषष्टिभागा मुहूर्त्तस्य। एषां च राशिः सांऽश इति तत्त्रैराशिककर्मविषयः। ततः परिपूर्णमासप्रतिपत्त्यर्थमयं राशिः षट्पञ्चाशदधिकेन शतेन गुण्यते, जातानि परिपूर्णानि नवाशीतिशतान्यष्टाविंशत्यधिकान्यभिवर्द्धितमासानाम्। किमुक्तं भवति?-षट्पञ्चाशदधिकशतसंख्येषु युगेष्वेतावन्तः परिपूर्णा अभिवर्द्धितमासा लभ्यन्ते। एतच्च द्वाविंशतिप्राभृते सूत्रकृतैव साक्षादभिहितम्। ततस्त्रैराशिककर्मभावनाः। यद्यष्टाविंशत्यधिकैरभिवर्द्धितमासैरेवाशीतिशतैः षट्पञ्चाशदधिकशतसंख्यया युगभाविभिश्चान्द्रमण्डलानामेकलक्षं सप्तत्रिंशत्सहस्राणि नवशतानि चतुरुत्तराणि लभ्यन्ते, तत एकेनाभिवर्द्धितमासेन किं लभामहे?। राशित्रयस्थापना-८९२८। १३७०४। १। अत्रान्त्येन राशिनैकलक्षणेन मध्यराशेस्तावता, जातः स तावानेव, तस्याऽऽद्येन ८९२८ राशिना भागहरणं, लब्धानि पञ्चदश मण्डलानि। १५। शेषमुद्धरति एकोनचत्वारिंशच्छतानि चतुरशीत्यधिकानि। ३९८४। ततश्छेद्यच्छेदकराश्योरष्टाचत्वारिंशताऽपवर्त्तना, जात उपरितनो राशिस्त्र्यशीतिरधस्तनः षडशीत्यधिकं शतम्। ८३/१८६। आगतं षोडशमण्डलस्य त्र्यशीति षण्मशीत्यधिकशतभागाः। "ता अभिवड्ढितेणं" इत्यादि सूर्यविषयं प्रश्नसूत्रं सुगमम्। भगवानाह-"ता सोलस" इत्यादि। षोडश मण्डलानि त्रिभिर्भागैर्न्यूनानि चरति। मण्डलं द्वाभ्यामष्टाचत्वारिंशदधिकाभ्यां शताभ्यां छित्त्वा। तथाहि-यदि षट्पञ्चाशदधिकशतसंख्ययुगभाविभिरष्टाविंशदधिकैरभिवर्द्धितमासैरशीतिशतैः सूर्यमण्डलानामेकं लक्षं, त्रिचत्वारिंशत्सहस्राणि, सप्त शतानि चत्वारिंशदधिकानि लभ्यन्ते, तत एकेनाभिवर्द्धितमासेन किं लभामहे?। राशित्रयस्थापना—८९२८। १४२७४०। १। अत्रान्त्येन राशिनैकलक्षणेन मध्यराशिर्गुण्यते, जातः स तावानेव, तस्याऽऽद्येन ८९२८ राशिना भागो ह्रियते, लब्धानि पञ्चदश मण्डलानि। १५। शेषमुद्धरन्ति अष्टाशीतिशतानि विंशत्यधिकानि। ८८२०। ततश्छेद्यच्छेदकराश्योः षट्त्रिंशताऽपवर्त्तना, जात उपरितनो राशिर्द्वे शते पञ्चचत्वारिंशदधिके। २४५। अधस्तनो द्विशतेऽष्टचत्वारिंशदधिके। २४८। आगतं षोडशमण्डलं त्रिभिर्भागैर्न्यूनं द्वाभ्यामष्टाचत्वारिंशदधिकाभ्यां शताभ्यां प्रविभक्तम्। २४८। "ता अभिवड्ढितेणं" इत्यादि नक्षत्रविषयं प्रश्नसूत्रं सुगमम्। भगवानाह-"ता सोलस" इत्यादि। षोडश मण्डलानि सप्तचत्वारिंशता भागैरधिकानि चतुर्दशभिः शतैरष्टाशीत्यधिकैर्मण्डलं छित्त्वा। तथाहि-यदि षट्पञ्चाशदधिकशतसंख्ययुगभाविभिरभिवर्द्धितमासानामशीतिशतैरष्टाविंशत्यधिकैर्नक्षत्रमण्डलानामेकलक्षं त्रिचत्वारिंशत्सहस्राणि शतमेकं त्रिंशदधिकं लभ्यते, तत एकेनाभिवर्द्धितमासेन किं लभामहे?। राशित्रयस्थापना-८९२८। १४३१३०। १। अत्रान्त्येन राशिना एकलक्षकरणेन मध्यराशेर्गुणनं, जातः स तावानेव, तस्याऽऽद्येन ८९२८ राशिना भागो ह्रियते, लब्धानि षोडश मण्डलानि, शेषमुद्धरति द्वे शते द्व्यशीत्यधिके। २८२। ततश्छेद्यच्छेदकराश्योः षट्केनापवर्तना, जाता उपरि सप्तचत्वारिंशत्, अधस्तु चतुर्दश शतान्यष्टाशीत्यधिकानि। ४७/१४८८। आगताः सप्तचत्वारिंशद् अष्टाशीत्यधिकचतुर्दशशतभागाः।

(४७) संप्रत्येकैकेनाहोरात्रेण चन्द्रादयः प्रत्येकं कति मण्डलानि चरन्तीत्येतन्निरूपणार्थमाह-

ता एगमेगेणं अहोरत्तेणं चंदे कति मंडलाइं चरति?। ता एगं अद्धमंडलं चरति, एक्कतीसाए भागेहिं ऊणं णवहिं पण्णरसेहिं सतेहिं अद्धमंडलं छेत्ता। ता एगमेगेणं अहोरत्तेणं सूरिए कति मंडलाइं चरति?। ता एगं अद्धमंडलं चरति। ता एगमेगेणं अहोरत्तेणं णक्खत्ते कति मंडलाइं चरति?। ता एगं अद्धमंडलं चरति, दोहिं भागेहिं अधियं सत्तहिं छुतीसेहिं सएहिं अद्धमंडलं छेत्ता।

"ता एगमेगेणं" इत्यादि। 'ता' इति पूर्ववत्। एकैकेनाहोरात्रेण चन्द्रः कति मण्डलानि चरति?। भगवानाह-"ता एगं"

इत्यादि । एकमर्क्षमण्डलं चरति, एकत्रिंशता भागैर्न्यूनं नवभिः पञ्चदशोत्तरैः शतैरर्क्षमण्डलं छित्त्वा । तथाहि-रात्रिन्दिवानामष्टादशभिः शतैस्त्रिंशदधिकैः सप्तदश शतान्यष्टषष्टयधिकान्यर्क्षमण्डलानां चन्द्रस्य लभ्यन्ते, तत एकेन रात्रिन्दिवेन किं लभ्यते ?। राशित्रयस्थापना-१८३०।१७६८।१। अन्त्यफलेन राशिनैककलक्षणेन मध्यराशिर्गुण्यते, जातः स तावानेव, तस्याऽऽद्येन १८३० राशिना भागहरणं, स चोपरितनस्य राशेः स्तोकत्वाद्भागं न लभते । ततश्छेद्यच्छेदकराश्योर्दृष्टिकेनापवर्तना, जात उपरितनो राशिरष्टौ शतानि चतुरशीत्यधिकानि,अधस्तनो नव शतानि पञ्चदशोत्तराणि । ६१५ । तत आगतमेकत्रिंशता भागैर्न्यूनमेकमर्क्षमण्डलं नवभिः शतैः पञ्चदशोत्तरैः प्रविशतीति । " ता एगमेगेणं " इत्यादि सूर्यविषयं प्रश्नसूत्रं सुगमम् । भगवानाह-" ता एगमेगेणं " इत्यादि । एकमर्क्षमण्डलं चरति । एतच्च सुप्रतीतमेव । " ता एगमेगेणं " इत्यादि नक्षत्रविषयं प्रश्नसूत्रं सुगमम् । भगवानाह-" ता एगमेगेणं " इत्यादि । एकमर्क्षमण्डलं द्वाभ्यां भागाभ्यामधिकं चरति, द्वात्रिंशदधिकैः सप्तभिः शतैरर्क्षमण्डलं छित्त्वा । तथाहि-यद्यहोरात्राणामष्टादशभिः शतैस्त्रिंशदधिकैरष्टादशशतानि पञ्चत्रिंशदधिकानि नक्षत्राणामर्क्षमण्डलानि लभ्यन्ते, तत एकेनाहोरात्रेण किं लभ्यते ?। राशित्रयस्थापना-१८३० । १७३५ ।१। अन्त्यफलेन राशिनैककरूपेण मध्यराशेर्गुणना; जातः स तावानेव, तस्याऽऽद्येन १७३० राशिना भागहरणं, लब्धमेकमर्क्षमण्डलं, शेषास्तिष्ठन्ति पञ्च । ततश्छेद्यच्छेदकराश्योरर्द्धतृतीयैरपवर्तना, जातावुपरि द्वौ अधस्तात्सप्त शतानि द्वात्रिंशदधिकानि, ७३२ । लब्धौ द्वौ द्वात्रिंशदधिकसप्तशतभागौ ।

(४७) अधुना एकैकं परिपूर्णं मण्डलं चन्द्राऽऽदित्यः प्रत्येकं कतिभिरहोरात्रैश्चरन्तीत्येतन्निरूपणार्थमाह-

ता एगमेगं मंडलं चंदे कतिहिं अहोरत्तेहिं चरति ?। ता दोहिं अहोरत्तेहिं चरति, एक्कतीसाए भागेहिं अहिगेहिं चउहिं चोतालेहिं सतेहिं राईदिएहिं छेत्ता। ता एगमेगं मंडलं सूरे कतिहिं अहोरत्तेहिं चरति ?। ता दोहिं अहोरत्तेहिं चरति । ता एगमेगं मंडलं णक्खत्ते कतिहिं अहोरत्तेहिं चरति ?। ता दोहिं अहोरत्तेहिं चरति, दोहिं भागेहिं छणेहिं तिहिं सत्तट्ठिहिं सतेहिं राईदियं छेत्ता ।

" ता एगं " इत्यादि । 'ता' इति पूर्ववत् । एकैकं मण्डलं चन्द्रः कतिभिरहोरात्रैश्चरति ?। भगवानाह-" ता दोहिं " इत्यादि । द्वाभ्यामहोरात्राभ्यां चरति, एकत्रिंशता भागैरधिकाभ्यां चतुर्भिश्चत्वारिंशदधिकैः शतै रात्रिन्दिवं छित्त्वा । तथाहि-यदि चन्द्रस्य मण्डलानामष्टभिः शतैश्चतुरशीत्यधिकैरहोरात्राणामष्टादश शतानि त्रिंशदधिकानि लभ्यन्ते, तत एकेन मण्डलेन कति रात्रिन्दिवानि लभामहे ?। राशित्रयस्थापना-८८४। १८३०। १ । अन्त्यफलेन राशिना मध्यराशेर्गुणनं, जातः स तावानेव, तस्याऽऽद्येन राशिना चतुरशीत्यधिकाष्टशतप्रमाणेन भागहरणं, लब्धौ द्वावहोरात्रौ, शेषास्तिष्ठन्ति द्वाषष्टिः । ६२ । ततश्छेद्यच्छेदकराश्योर्दृष्टिकेनापवर्तना, जात उपरितनो राशिरेकत्रिंशदूर्ध्वोऽधस्तनश्चत्वारि शतानि द्वाचत्वारिंशदधिकानि । ३१/४४२ । तत आगतमेकत्रिंशद् द्विचत्वारिंशदधिकचतुःशतनामकः । "ता एगमेगं " इत्यादि । 'ता' इति पूर्ववत् । एकैकं मण्डलं सूर्यः कतिभिरहोरात्रैश्चरति ?। भगवानाह-"ता दोहिं" इत्यादि । द्वाभ्यामहोरात्राभ्यां चरति । तथाहि-यदि सूर्यस्य मण्डलानां नवभिः शतैः पञ्चदशोत्तरैरष्टादश शतानि त्रिंशदधिकान्यहोरात्राणां लभ्यन्ते, तत एकेन मण्डलेन कत्यहोरात्रान् लभामहे ?। राशित्रयस्थापना-९१५ । १८३० । १ । अन्त्यफलेन राशिना मध्यराशेर्गुणनं,जातः स तावानेव,तस्याऽऽद्येन ९१५ राशिना भागहरणं, लब्धौ द्वावहोरात्राविति । " ता एगमेगं " इत्यादि । 'ता' इति पूर्ववत् । एकैकमात्मीयं मण्डलं नक्षत्रं कतिभिरहोरात्रैश्चरति ?। भगवानाह-"ता दोहिं " इत्यादि । द्वाभ्यामहोरात्राभ्यां चरति, द्वाभ्यां भागाभ्यां हीनाभ्यां त्रिंशैः सप्तषष्टैः सप्तषष्टयधिकैः शतै रात्रिन्दिवं छित्त्वा । तथाहि-यदि नक्षत्रस्य मण्डलानामष्टादशभिः शतैः पञ्चत्रिंशदधिकैः षट्त्रिंशच्छतानि षष्टयधिकानि रात्रिन्दिवानां लभामहे, तदैकेन मण्डलेन किं लभामहे ?। राशित्रयस्थापना-१८३५। ३६६०। १ । अन्त्यफलेन राशिना मध्यराशेस्ताडना, जातः स तावानेव, तस्याऽऽद्येन १८३५ राशिना भागहरणं, लब्धमेकं रात्रिन्दिवं, शेषाणि तिष्ठन्त्यष्टादश शतानि पञ्चविंशत्यधिकानि । १८२५ । ततश्छेद्यच्छेदकराश्योः पञ्चकेनापवर्तना । जात उपरितनो राशिस्त्रीणि शतानि पञ्चषष्टयधिकानि ३६५ । छेदकराशिस्त्रीणि शतानि सप्तषष्टयधिकानि, ३६७ तत आगतं द्वाभ्यां सप्तषष्टयधिकशतभागाभ्यां हीनं द्वितीयं रात्रिन्दिवमिति ।

(४८) संप्रति चन्द्राऽऽदित्यः प्रत्येकं कति मण्डलानि युगे चरन्तीत्येतन्निरूपणार्थमाह-

ता जुगेणं चंदे कति मंडलाइं चरति ?। ता अट्ठचुत्तसीते मंडलसते चरति । ता जुगेहिं सूरे कति मंडलाइं चरति ?। ता णव पणरसे मंडलसते चरति । ता जुगेणं णक्खत्ते कति मंडलाइं चरति ?। ता अट्ठारस पणतीसे दुभागमंडलसते चरति ॥

" ता जुगेणं " इत्यादि । 'ता' इति पूर्ववत् । युगेन कति मण्डलानि चरति ?। भगवानाह-"ता अट्ठ" इत्यादि । 'ता' इति पूर्ववत् । अष्टौ मण्डलशतानि चतुरशीत्यधिकानि चरति । तथाहि-चन्द्र एकेन शतसहस्रेणाष्टानवत्या शते प्रविभक्तस्य मण्डलस्याष्टषष्टयधिकसप्तदशशतसंख्यान् भागान् एकेन मुहूर्त्तेन गच्छति । युगे च मुहूर्त्ताः सर्वसंख्यया चतुःपञ्चाशत्सहस्राणि, नव शतानि, ततः सप्तदश शतानि अष्टषष्टयधिकानि चतुःपञ्चाशता सहस्रैर्नवभिश्च शतैर्गुण्यन्ते,जाता नव कोट्यः, सप्तत्रिंशत्लक्षाण्यष्टिः सहस्राणि, द्वे शते ६७७६३२०० । ततोऽस्य राशेरेकेन शतसहस्रेणाष्टानवत्या च शतैः १०९८०० मण्डलाऽऽनयनाय भागो ह्रियते, लब्धानि अष्टौ शतानि चतुरशीत्यधिकानि मण्डलानामिति । "ता जुगेणं" इत्यादि सूर्यविषयं प्रश्नसूत्रं सुगमम् । भगवानाह-"ता नव पणरस" इत्यादि । 'ता' इति पूर्ववत् । नव मण्डलशतानि पञ्चदशाधिकानि चरति । तथाहि-यदि द्वाभ्यामहोरात्राभ्यामेकं सूर्यमण्डलं लभ्यते, ततः सकलयुगभाविनिरष्टादशशतैरहोरात्रशतैस्त्रिंशदधिकैः कति मण्डलानि लभ्यन्ते ?। राशित्रयस्थापना-२।१।१८३० । अन्त्यफलेन राशिना मध्यराशेर्गुणनं, जातान्यष्टादश शतानि त्रिंशदधिकानि १८३० । तेषामाद्येन राशिना द्विकरूपेण भागहरणं,

लब्धानि नव शतानि पञ्चदशोत्तराणि ६१५। "ता जुगणं" इत्यादि नक्षत्रविषयं प्रश्नसूत्रं सुगमम् । भगवानाह-"ता अट्ठारस" इत्यादि। अष्टादशद्विभागमण्डलशतानि अर्द्धमण्डलशतानि पञ्चत्रिंशानि पञ्चत्रिंशदधिकानि चरति । तथाहि-नक्षत्रमेकेन शतसहस्रेणाष्टानवत्या च शतैः प्रविभक्तस्य मण्डलस्यैतान् पञ्चत्रिंशदधिकाष्टादशशतसंख्यान् भागान् एकेन मुहूर्तेन गच्छति, युगे च मुहूर्त्ताः सर्वसंख्यया चतुःपञ्चाशत्सहस्राणि, नव शतानि । ततस्तैः चतुष्पञ्चाशता सहस्रैर्नवभिः शतैरष्टादश शतानि पञ्चत्रिंशदधिकानि गुण्यन्ते, जाता दश कोट्यः, सप्त लक्षाः, एकचत्वारिंशत् सहस्राणि, पञ्चशतानि १००७४१५००। अर्द्धमण्डलानि चेह ज्ञातुमिष्टानि, तत एकस्य शतसहस्रस्याष्टानवतेश्च शतानामर्द्धे यानि चतुःपञ्चाशत्सहस्राणि नव शतानि, तैर्भागो ह्रियते, लब्धानि अष्टादश शतानि पञ्चत्रिंशदधिकानि अर्द्धमण्डलानामिति । सू० प्र० १५ पाहु० । चं० प्र० । ज्यो० । द० प०।

(५०) "चंदेहि उ सिग्घयरा, सूरा सूरेहिं तह गहा सिग्घा ।
नक्खत्ता ग गहेहि य, नक्खत्तेहिं तु ताराओ ॥ ६४ ॥
सव्वऽप्पगई चंदा, तारा पुण हुंति सव्वसिग्घगई ।
एसो गहविसेसो, जोइसियाणं तु देवाणं ॥६५॥" द० प०।

(५१) अथ चन्द्रसूर्यनक्षत्रतारागणामल्पर्द्धिकत्वं महर्द्धिकत्वं च विवक्षुराह-

एतेसि णं भंते ! चंदिमसूरिअगहणक्खत्ततारारूवाणं कयरे सव्वमहिड्ढिआ,कयरे सव्वप्पिड्ढिआ ?। गोयमा ! तारारूवेहिंतो णक्खत्ता महिड्ढिआ, णक्खत्तेहिंतो गहा महिड्ढिआ, गहेहिंतो सूरिआ महिड्ढिआ,सूरेहिंतो चंदा महिड्ढिआ,सव्वप्पिड्ढिआ तारारूवा, सव्वमहिड्ढिआ चंदा ।

"एतेसि णं" इत्यादि । एतेषां भदन्त ! चन्द्रसूर्यग्रहनक्षत्रतारारूपाणां मध्ये कतरे सर्वमहर्द्धिकाः,कतरे च,चकारोऽत्र गम्यः। सर्वाल्पर्द्धिकाः ? । भगवानाह-गौतम ! तारारूपेभ्यो नक्षत्राणि महर्द्धिकानि, नक्षत्रेभ्यो ग्रहा महर्द्धिकाः, ग्रहेभ्यः सूर्या महर्द्धिकाः,सूर्येभ्यश्चन्द्रा महर्द्धिकाः अत एव सर्वाल्पर्द्धिकास्तारारूपाः, सर्वमहर्द्धिकाश्चन्द्राः । इयमत्र भावना-गतिविचारणायां येभ्यः शीघ्रा उक्तास्ते तेभ्य ऋद्धिविचारणायामुत्क्रमतो महर्द्धिका ज्ञेया इति । जं० ७ वक्ष० । जी० । सू० प्र० । चं० प्र० । (चन्द्रसूर्ययोरुदयास्तमयने, तत्र बहूनां विप्रतिपत्तयस्तन्निराकरणं च 'सूरमंडल' शब्दे वक्ष्यते) गणितप्रतिपादके ज्योतिःशास्त्रे, न० । सूत्र० १ श्रु० ३ अ० ३ उ०।

जोइसियदेवित्थी–ज्योतिष्कदेवस्त्री–स्त्री० । चन्द्रादित्यज्योतिष्कदेवानामग्रमहिष्याम्, जी०।

से किं तं जोइसियदेवित्थियाओ ?। जोइसियदेवित्थियाओ पंचविहाओ पण्णत्ताओ । तं जहा–चंदविमाणजोइसियदेवित्थियाओ, सूरविमाणजोइसियदेवित्थियाओ, गहविमाणजोइसियदेवित्थियाओ, णक्खत्तविमाणजोइसियदेवित्थियाओ, ताराविमाणजोइसियदेवित्थियाओ । सेत्तं जोइसियदेवित्थियाओ । स्त्री० ? प्रति० ।

जोइसियमंडल–ज्योतिष्कमण्डल–न० । चन्द्रसूर्यग्रहनक्षत्रताराणां मण्डले, जं० ७ वक्ष० । (ज्योतिष्कमण्डलनिष्पत्तिलक्षणं 'मंडल' शब्दे वक्ष्यते) (अथ सूर्यमण्डलानां मिथश्चन्द्रमण्डलानां चान्तराणि 'अंतर' शब्दे प्रथमभागे ६६ पृष्ठे दृष्टव्यानि)

अथ कति मण्डलानि द्वीपे, कति च निषधवर्षे चन्द्रसूर्ययोर्भवन्तीत्याह-

संततमंतरमेयं, रवीण पणसट्ठि मंडला दीवे ।
तत्थ विसट्ठि निसहे, तिन्नि अवाहाए तस्सेव ॥११॥

सन्ततं निरन्तरम्, एतत्पूर्वोक्तं सूर्याचन्द्रयोश्च मध्ये प्रविशतोर्वैदिगंगच्छतोश्च मण्डलानां परस्परमन्तरं ज्ञेयं, तत्र रव्योः पञ्चषष्टिमण्डलानि द्वीपे, तत्रापि द्वाषष्टि निषधपर्वते,त्रीणि च तस्य बाहायाम् । इदं तु श्रीमुनिचन्द्रसूरिनिरुक्तं समवायाङ्गवृत्तौ। त्रिषष्टिस्थाने जम्बूद्वीपस्य पर्यन्तिमेऽशीत्युत्तरे योजनशते पञ्चषष्टिर्लभन्ते । तत्र निषधपर्वते नीलवन्तपर्वते च त्रिषष्टिः सूर्योदयाः, सूर्यमण्डलानि इत्यर्थः । तदन्ये तु द्वे जगत्यां, शेषाणि तु लवणे इत्युक्तमस्ति । संग्रहणीवृत्त्यादावपि त्रिषष्टिः २ मण्डलानि निषधनीलवतोः, द्वे द्वे हरिवर्षकाट्यादौ ॥ ११ ॥

चंदाणं निसढे वि अ, मंडल पण गुरुवएसि दीसंति ।
सेसाइं मंडलाइं, दोण्ह वि जलहिस्स मज्झम्मि ॥१२॥

तथा चन्द्रयोर्निषधनीलवत्पर्वते एव पञ्च मण्डलानि गुरूपदेशे दृश्यन्ते । शेषाणि द्वयोरपि जलधौ रवेर्देश, पञ्च शशिनश्च भवन्ति । तत्राप्ययं विशेषः—१ । २ । ३ । ४ । ५ । ११ । १२ । १३ । १४ । १५ । एतानि चन्द्रस्य सूर्यस्याऽपि साधारणानि । ६ । ७ । ८ । ९ । १० रूपाणि पुनश्चन्द्रस्यैव भवन्ति, न जातुचिदपि तेषु सूर्यः समायाति । चन्द्रस्य मण्डलान्तराणि चतुर्दश सन्ति । तत्र चतुर्षु सर्वाभ्यन्तरेषु सर्वबाह्यमण्डलान्तरेषु च सूर्यस्य प्रत्येकं द्वादश मण्डलानि स्युः, मध्यवर्तिषु षट्सु चन्द्रमण्डलान्तरेषु सूर्यमण्डलानि त्रयोदश भवन्ति ॥ १२ ॥ सं०।

चन्द्रमण्डलाऽऽदिविष्कम्भो यथा-

एगट्ठिभागे लेत्तू-ण जोयणं तस्स होंति जे भागा ।
ते चंदा छप्पन्ने, अयालीसं नवे सूरा ॥

एकषष्ट्या योजनप्रमाणाङ्गुलनिष्पन्नं छित्त्वा तस्य भवन्ति ये भागा एकषष्टिसंख्याः,ते च चन्द्राश्चन्द्रमण्डलानि षट्पञ्चाशद् भवन्ति । सूर्यमण्डलं नि भवन्त्यष्टाचत्वारिंशद्भागाः । किमुक्तं भवति ?-योजनस्यैकषष्टिभागाः षट्पञ्चाशच्चन्द्रमण्डलस्य विष्कम्भपरिमाणं सूर्यमण्डलस्याष्टाचत्वारिंशत् । एतदेव गव्यूतपरिमाणेन चिन्त्यते-तत्र चतुर्गव्यूतं योजनमिति षट्पञ्चाशच्चतुर्भिर्गुण्यते, जाते द्वे शते चतुर्विंशत्यधिके । २२४ । तयोरेकषष्ट्या भागे हृते लब्धाश्चत्वारः क्रोशाः, एकस्य च क्रोशस्य एकचत्वारिंशदेकषष्टिभागाः । विष्कम्भार्द्धे चोत्सेधे, ततोऽष्टाविंशतिरेकषष्टिभागा योजनस्योत्सेधपरिमाणं चन्द्रमण्डलस्य सार्द्धगव्यूतमेकचत्वारिंशद्विसप्तत्यधिकभागा गव्यूतस्य, तथा सूर्यमण्डलस्याष्टाचत्वारिंशद्दशभागा योजनस्य चतुर्भिर्गुण्यन्ते, जातं द्विनवत्यधिकं शतम् १९२। तस्यैकषष्ट्या भागो ह्रियते, लब्धाश्चत्वारः क्रोशाः,क्रोशस्य च नवैकषष्टिभागा विष्कम्भार्द्धमुत्से-

ष इत्युत्सेधपरिमाणं चतुर्विंशत्येकषष्टिभागा योजनस्य । यदि वा अर्द्धं गव्यूतं, नव च द्वाविंशत्यधिकशतनागान् गव्यूतस्य। तथा चन्द्रस्य चन्द्रमण्डलस्य परिधेः परिमाणं द्वे योजने, त्रयः क्रोशाः, एकस्य क्रोशस्य सप्तत्रिंशदेकषष्टिभागा विंशत्यधिकाः । सूर्यमण्डलस्य द्वे योजने, एकः क्रोशः, अष्टापञ्चाशच्च सप्तषष्टिभागाः क्रोशस्य विंशत्यधिकाः। नक्षत्राऽऽदिमण्डलानां तु विष्कम्भाऽऽदिपरिमाणं संग्रहणीटीकायां तत्त्वार्थटीकायां चाभिहितमस्माभिरिति ततोऽवधार्यम् । ज्यो० ७ पाहु० । (चन्द्रसूर्यनक्षत्रग्रहतारागां मुहूर्त्तगतिप्रमाणं 'जोइसिय' शब्दे १६०५ पृष्ठे गतम)

जोइसियराय–ज्योतिष्कराज–पुं० । चन्द्रे, सूर्ये च । " चंदसूरिया य एत्थ दुवे जोइंसिंदा जोइसियराया परिवसंति । " प्रज्ञा० २ पद । स्था० । सू० प्र० ।

जोइसियविमाण–ज्योतिष्कविमान–न० । चन्द्रसूर्यग्रहनक्षत्रतारागां विमाने, "एत्थ णं जोइसियाणं देवाणं तिरियमसंखेज्जा जोइसियविमाणावाससयसहस्सा हवंति । " प्रज्ञा० २ पद । (सर्वं विमानवक्तव्यता 'विमाण' शब्दे वक्ष्यते)

जोइस्सर–योगीश्वर–पुं० । योगो धर्मः शुक्लध्यानलक्षणः, स येषां विद्यते इति योगिनः साधवः, तेषामीश्वरः सदुपदेशेन तेषां प्रवृत्तेस्तत्संबन्धाऽऽदिति, तेषां वा ईश्वरो योगीश्वरः । प्रभुरित्यनर्थान्तरम् । योगिनां प्रभौ, आव० ४ अ० ।

यदुक्तम्-

"चाण्डालः किमयं द्विजातिरथवा, शुद्धोऽथ वा तापसः,
किं वा तत्त्वनिवेशपेशलमतिर्योगीश्वरः कोऽपि वा ? ।
इत्यस्वल्पविकल्पजल्पमुखरैः संभाव्यमानो जनैर्-
नो रुष्टो न हि चैव हृष्टहृदयो योगीश्वरो गच्छति ॥१॥" उत्त० ३ अ० । याज्ञवल्क्यनुनौ, योगिनां श्रेष्ठे च । दुर्गायाम्, स्त्री० । ङीष् । वाच० ।

योगेश्वर–पुं० । युज्यन्त इति योगा मनोवाक्कायव्यापारलक्षणाः, तेषामीश्वरः प्रधानो योगेश्वरः । योगप्रधाने, आव० ४ अ० । श्रीकृष्णे, दुर्गायां, वन्ध्याकर्कोटक्यां च, स्त्री० । ङीष् । वाच० ।

योगेश्वर्य–त्रि० । योगिनां चिन्तनीये, आव० ४ अ० ।

जोईरम्हिचारण–ज्योतीरश्मिचारण–पुं० । चारणभेदे, चन्द्रार्कग्रहनक्षत्राऽऽद्यन्यतमज्योतीरश्मिसंबन्धेन शुचीव चरणचङ्क्रमणप्रवणा ज्योतीरश्मिचारणाः । प्रव० ६७ द्वार ।

जोईरस–ज्योतीरस–न० । रत्नभेदे, रा० । ज्ञा० । आ० म० । स्था० । ज्योतीरसं नाम रत्नम् । जी० ३ प्रति० ।

जोईरसमय–ज्योतीरसमय–त्रि० । ज्योतीरसाऽऽख्यरत्नाऽऽत्मके, " जोईरसमया उत्तरंगा । " " जोईरसमया वंसा । " ज्योतीरसं नाम रत्नं तन्मया वंशाः । रा० ।

जोक्कारकरण–जोत्कारकरण–न० । पित्रादीनां जोत्कारकरणाऽऽत्मके जिनभवनस्थितानामाशातनाभेदे, ध० २ अधि० ।

जोग–योग–पुं० । योजनं योगः । युज्–घञ् । बन्धे, योगो बन्ध इत्यनर्थान्तरमिति । पं० सू० ४ सूत्र । संबन्धे, बृ० ६ उ० । आयु० । स्था० । द्वा० । प्रश्न० । विशे० । संभवे, ज्ञा० १० ज्ञा० । अप्राप्तज्ञानाऽऽदिप्रापणे, कल्प० १ क्षण ।

(१) " जोगक्खेमं वट्टमाणा पमिवहंति । " अलब्धस्येप्सितस्य वस्तुनो लाभो योगो, लब्धस्य परिपालनं क्षेम इति । ज्ञा० १ श्रु० ५ अ० । योगो बीजाऽऽधानोद्भेदपोषणकरणम्, क्षेमं तत्तदुपद्रवाऽऽपादनम् । रा० । संयोग, मेलने, वर्माऽऽदिधारणे, युक्तौ, शब्दाऽऽदीनां प्रयोगे, समुदायशब्दस्यावयवार्थसंबन्धे, 'योगबलं समाश्रया' इति मीमांसकाः । " योगः कर्मसु कौशलम् " इत्युक्ते यथास्थितवस्तुनोऽन्यथारूपप्रतिपादने, वाच० । विधिकर्त्रनुकूलपरिवारसंपत्तौ, प्रति० । ऊह्यतो वाह्यो मनोवाक्कायव्यापारे, तं० । आ० म० । आ० चू० । नं० । अनु० । नि० चू० । पं० व० । ज्ञ० । स्था० । प्रश्न० । आव० । उत्त० । सूत्र० । विशे० । योगो, व्यापारः, कर्म, क्रियेत्यनर्थान्तरमिति । विशे० । आतु० । व्य० । जीत० । "जोगा मणमाईआ ।" योगा मनोव्यापाराऽऽदयः प्रति० । आचा० । स्था० । सूत्र० । "मणवयसकाइए जोगे वट्टमाणाणं" स्था० ६ ठा० ।

(२) स च द्विधा । द्रव्ययोगो, भावयोगश्च-

दव्वे मणवइकाए–जोगा दव्वा हुहा उ जावम्मि ।
जोगो सम्मत्ताई, पसत्थ इयरो य विवरीओ ॥

ऊह्य इति द्वारपरामर्शः । (मणवइकाए-जोगा दव्वा इति) मनोवाक्काययोग्यानि ऊह्यानि ऊह्ययोगाः इयमत्र भावना-जीवेनागृहीतानि गृहीतानि वा स्वव्यापाराप्रवृत्तानि ऊह्ययोगाः । (दुहा उ भावम्मि त्ति) द्विधैव,तुशब्दस्यैवकारार्थत्वाद् द्विप्रकार एव,भावे भावविषयो योगः । तद्यथा-प्रशस्तोऽप्रशस्तश्च । तत्र प्रशस्तः सम्यक्त्वाऽऽदिः। आदिशब्दाद् ज्ञानाऽऽवरणपरिग्रहः। प्रशस्तता चास्य प्रशस्यते युज्यते अनेनाऽऽत्माऽपवर्गेणेत्यन्वर्थबलात् । इतरो मिथ्यात्वाऽऽदियोगो विपरीतोऽप्रशस्तः, युज्यतेऽनेनाऽऽत्मा अष्टविधेन कर्मणेति व्युत्पत्तिभावात् । आ० म० १ अ० २ खण्ड । " दव्वजोगो-तिण्हं चउण्हं वा जोगाणं जोगो । अहवा—मणवइकायपाओग्गाणि दव्वाणि । भावजोगो-" जोगो विरियं थामो, उच्छाह परक्कमो तहा चेट्ठा । सत्ती सामत्थं ति य, जोगस्स हवंति पज्जाया " ॥१॥ सो य सम्मत्तादिअणुगतो पसत्थो, मिच्छत्तअण्णाणअविरतिगतो अपसत्थो " । आ० चू० ४ अ० ।

(३) मनोवाक्कायाऽऽत्मको योग एकस्मिन्समये शुभोऽशुभो वा भवेन्न तूभयरूप इति प्रेरकः प्राह-

ननु मणवइकाओगा, सुभाऽसुभा वि समयम्मि दीसंति ।
दव्वम्मि मीसजोगो, भवेज्ज न उ जावकरणम्मि ॥१०३६॥

ननु मनोवाक्काययोगाः शुभा अशुभाश्च, मिश्रा इत्यर्थः । एकस्मिन् समये दृश्यन्ते। तत्कथम्? उच्यते-"सुभोऽसुभो वा स एगसमयम्मि त्ति(१६३५गाथा)"तथाहि-किञ्चिद्दानविधिना दानाऽऽदिवितरणं चिन्तयतः शुभाशुभो मनोयोगः। तथा-किमप्यविधिनैव दानाऽऽदिधर्ममुपदिशतः शुभाशुभो वाग्योगः। तथा-किमप्यविधिनैव जिनपूजावन्दनाऽऽदिकायचेष्टां कुर्वतः शुभाशुभः काययोग इति। तदेतदयुक्तम्। कुत इत्याह-"दव्वम्मि" इत्यादि। इदमुक्तं भवति-इह द्विविधो योगः-ऊह्यतो, भावतश्च। तत्र मनोवाक्काययोगप्रवर्त्तकानि ऊह्याणि, मनोवाक्कायपरिस्पन्दाऽऽत्मको योगश्च द्रव्ययोगः। यस्त्वेतदुभयरूपयोगहेतुरध्यवसायः

स भावयोगः । तत्र शुभाशुभरूपाणां यथोक्तचिन्तादेशनाकायचेष्टानां प्रवर्त्तके त्रिविधेऽपि द्रव्ययोगे व्यवहारनयदर्शनविवक्षावशेन सत्यपि शुभाशुभत्वलक्षणे मिश्रभावे, न तु मनोवाक्कायोगनिबन्धनाध्यवसायरूपे भावकरणे भावाऽऽत्मके योगे । अयमभिप्रायः-द्रव्ययोगो व्यवहारनयदर्शनेन शुभाशुभरूपोऽप्यिष्यते । निश्चयनयेन तु सोऽपि शुभोऽशुभो वा केवलः समस्ति, यथोक्तचिन्तादेशनाऽऽदिप्रवर्त्तकद्रव्ययोगानामपि शुभाशुभरूपमिश्राणां तन्मतेनाभावात् । मनोवाक्कायद्रव्ययोगनिबन्धनाध्यवसायरूपे तु भावकरणे भावयोगे शुभाशुभरूपो मिश्रभावो नास्ति, निश्चयनयदर्शनस्यैवाऽऽगमेऽत्र विवक्षितत्वात् । न हि शुभान्यशुभानि वाऽध्यवसायस्थानानि मुक्त्वा शुभाशुभाध्यवसायस्थानरूपस्तृतीयो राशिरागमे कचिदपीष्यते, येनाध्यवसायरूपे भावयोगे शुभाशुभत्वं स्यादिति भावः । तस्माद्भावयोग एकस्मिन्समये शुभोऽशुभो वा भवति, न तु मिश्रः । विशे० । प्रति० ।

(४) योगाश्च दोषाय गुणाय च भवन्ति, तदेतत्प्रतिपादयति-

पणो य वाय काओ य, तिविहो जोगसंगहो ।
ते अजुत्तस्स दोसाय, जुत्तस्स य गुणावहा ॥

मनोयोगो, वाग्योगः, काययोगश्चेति त्रिविधो योगसंग्रहो भवति, संक्षेपतस्त्रिधा योगो भवतीत्यर्थः । ते मनोवाक्काययोगा अयुक्तस्यानुपयुक्तस्य दोषाय कर्मबन्धाय भवन्ति, युक्तस्य तु त एव गुणाऽऽवहाः कर्मनिर्जराकारिणः संपद्यन्ते । बृ० ३ उ० । तदात्मके आश्रवद्वारभेदे, स० ५ सम० । योजनं योगो, जीवस्य वीर्यपरिस्पन्द इति यावत् । यदि वा-युज्यते धावनचलनाऽऽदिक्रियासु व्यापार्यते इति योगः । कर्मणि घञ् । यद्वा-युज्यते संबध्यते धावनचलनाऽऽदिक्रियासु जीवोऽनेनेति "पुंनाम्नि"-॥५। ३।१२०॥ इति करणे घञ्प्रत्ययः। कर्म० ३ कर्म० । स० । पं०सं० । आव० । अनु० । भावतः कायाऽऽदिकरणयुक्तस्याऽऽत्मनो वीर्यपरिणतिविशेषे, स्था० १ ठा० । अष्ट० ।

(५) स च मनोवाक्काययलक्षणसहकारिकारणभेदात्त्रिविधः-

" परिणामालंबणगह-णसाहणं तेण लद्धनामंति ॥" क०प्र० ।

अस्याक्षरगमनिका-परिणमनं परिणामः । अन्तर्भूतणिजर्थात् (व्यञ्जनात्—) ॥ ५ । ३ । १३२ ॥ इति घञ् प्रत्ययः । परिणामाऽऽपादानमित्यर्थः । आलम्ब्यत इत्यालम्बनम्, ' अनट् ' । ५ । ३ । १२४ । इति भावेऽनट्प्रत्ययः । गृह्णातिर्ग्रहणं, तेषां साधनं, साध्यतेऽनेनेति साधनं, योगसंज्ञिकं वीर्यं " करणाऽऽधारे " । ५ । ३ । १२६ । इत्यनट्प्रत्ययः । तथाहि-तेन वीर्यविशेषेण योगसंज्ञितेनौदारिकाऽऽदिशरीरप्रायोग्यान् पुद्गलान् प्रथमतो गृह्णाति, गृहीत्वा च प्राणाऽपानाऽऽदिरूपतया परिणमयति, परिणमय्य च तन्निसर्गहेतुसामर्थ्यविशेषसिद्धये तानेव पुद्गलानवलम्बते । यथा मन्दशक्तिः कश्चिदगदे परिस्रमणाय यष्टिमवलम्बते, ततस्तदवष्टम्भतो जातसामर्थ्यविशेषः सन् तान् प्राणापानाऽऽदिपुद्गलान् विसृजतीति । परिणामाऽऽलम्बनग्रहणसाधनं वीर्यं,तेन च वीर्येण योगसंज्ञितेन मनोवाक्कायावष्टम्भतो जायमानेन (लद्धनामंति ति) लब्धं नामत्रिकं-मनोयोगः, वाग्योगः, काययोग इति । तत्र मनसा करणभूतेन योगो मनोयोगः, वाचा योगो वाग्योगः, कायेन योगः काययोगः । कर्म० ५ कर्म० ।

(६) योगप्ररूपणायाऽऽह—

तिविहे जोगे पण्णत्ते । तं जहा-मणजोगे, वयजोगे, कायजोगे ॥

" तिविहे जोगे " इत्यादि । इह च वीर्यान्तरायकर्मक्षयोपशमसमुत्थलब्धिविशेषप्रत्ययमभिसन्धनमभिसन्धिपूर्वकमात्मनो वीर्ययोगः । आह च-"जोगो विरियं थामो, उच्छाह परक्कमो तहा चिट्ठा । सत्ती सामत्थं ति य, जोगस्स हवंति पज्जाया" ॥१॥ इति । स च द्विधा-सकरणोऽकरणश्च । तत्रालेश्यस्य केवलिनः कृत्स्नयोर्ज्ञेयदृश्ययोरर्थयोः केवलज्ञानं, दर्शनं चोपयुञ्जानस्य योऽसावपरिस्पन्दः प्रतिघो वीर्यविशेषः सोऽकरणः । स च नेहाधिक्रियते, सकरणस्यैव त्रिस्थानकावतारित्वात् । अतस्तस्यैव व्युत्पत्तिः, तमेव चाऽऽश्रित्य सूत्रव्याख्या युज्यते । जीवः कर्मभिर्येन " कम्मं जोगनिमित्तं वज्झइ " इति वचनाद् युङ्क्ते वा प्रयुङ्क्ते यं पर्यायं स योगो, वीर्यान्तरायक्षयोपशमजनितो जीवपरिणामविशेष इति ।

आह च-

" मणसा वयसा काए-ण वा वि जुत्तस्स विरियपरिणामो ।
जीवस्स अप्पणिज्जो,स जोगसन्नो जिणक्खाओ ॥ १ ॥
तेणाजोगेण जहा, रत्तत्ताई घडस्स परिणामो ।
जीवकरणप्पओगे, विरियमवि अप्पपरिणामो " ॥ २ ॥ इति ।

स्था० ३ ठा० १ उ० । औदारिकाऽऽदिशरीरस्याऽऽत्मनो वीर्यपरिणतिविशेषः काययोगः, औदारिकवैक्रियाऽऽहारकशरीरव्यापाराऽऽकृतवाग्द्रव्यसमूहसाचिव्याज्जीवव्यापारो वाग्योगः । नं० । पं० सं० । स्था० । सूत्र० । मनसा करणेन युक्तस्य जीवस्य योगो वीर्यपर्यायो दुर्बलस्य यष्टिकाऽवष्टम्भकरो मनोयोग इति । स चतुर्विधः-सत्यमनोयोगः, मृषामनोयोगः, सत्यमृषामनोयोगः,असत्यमृषामनोयोगश्चेति । मनसो वा योगः करणकारणानुमतिरूपो व्यापारो मनोयोगः । एवं वाग्योगोऽपि । एवं काययोगोऽपि । नवरं, स सप्तविधः, औदारिकौदारिकमिश्रवैक्रियवैक्रियमिश्राऽऽहारकाऽऽहारकमिश्रकार्मणकाययोगभेदादिति । तत्रौदारिकाऽऽदयः शुक्राः सुबोधाः । औदारिकमिश्रस्तु औदारिक एवापरिपूर्णो मिश्र उच्यते । यथा-गुडमिश्रं दधि न गुडतया नापि दधितया व्यपदिश्यते, तत्तद्भ्यामपरिपूर्णत्वादेतु, एवमौदारिकमिश्रं कार्मणेन नौदारिकतया, नापि कार्मणतया व्यपदेष्टुं शक्यमपरिपूर्णत्वादिति तस्य मिश्रव्यपदेशः। एवं वैक्रियाऽऽहारकमिश्रावपीति शतकटीकाकारेशः। प्रज्ञापनाव्याख्यानांशस्त्वेवम्-औदारिकाऽऽद्याः शुक्रास्तत्पर्याप्तकस्य, मिश्रास्त्वपर्याप्तकस्येति । तत्रोत्पत्तावौदारिककायः कार्मणेन, औदारिकशरीरिणश्च वैक्रियाऽऽहारककरणकाले वैक्रियाऽऽहारकाभ्यां मिश्रो भवतीति, एवमौदारिकमिश्रः । तथा वैक्रियमिश्रो देवाऽऽद्युत्पत्तौ कार्मणेन कृतवैक्रियस्य वौदारिकप्रवेशाद्धायामौदारिकेण । आहारकमिश्रस्तु साधिताऽऽहारककायप्रयोजनः पुनरौदारिकप्रवेशे औदारिकेणेति का—र्मणस्तु विग्रहे केवलिसमुद्घातेनेति सर्वे पवायं योगः पञ्चदशधेति । सङ्ग्रहोऽस्य—" सच्चं मोसं मीसं, असच्चमोसं मणो वए चेव । काओ चराल विक्किय, आहारग मीस कम्म जोगो त्ति " ॥ १ ॥ स्था० ३ ठा० २ उ० ।

(७) कायव्यापारविशेषादेव मनोवाग्योगा उच्यते यतस्मात्तेऽयमदोषः,न हि कायिको योगः कस्यांश्चिदप्यवस्थायां शरीरि-

णां जन्तूनां न वर्त्तते, अशरीरिणां सिद्धानामेव तन्निवृत्तेरित्यतो वाङ्निसर्गोऽऽदिकालेऽपि सोऽस्त्येवेति भावः ।

तर्हि समुच्चीयतां मनोवाग्योगकथा । नेत्याह-

किं पुण तणुसंरंभे-ण जेण मुंचइ स वाइओ जोगो ।
भणइ य स माणसिओ, तणुजोगो चेव य विभत्तो ।३५९।

'किं पुण त्ति' तथाऽपीत्यस्यार्थे । तत्रभेदमुक्तं भवति-यद्यपि काययोगः सर्वत्रानुगतोऽस्ति, तथाऽपि येन मनोवाग्द्रव्याणामुपादानं करोति, स कायिको योगः येन तु संरम्भेण तान्येव मुञ्चति, स वाचिकः येन तु मनोद्रव्याणि चिन्तायां व्यापारयति, स मानसिकः । इत्येवं तनुयोग एवैक रूपाधिभेदात्त्रिधा विभक्त इति । एतावन्मात्रभेदेन त्रयोऽप्यमी योगा व्यवह्रियन्ते । परमार्थतस्त्वेक एव सर्वत्र कायिको योग इति ।३५९।

तथा च प्रमाणयन्ति-

तणुजोगो च्चिअ भणइ-जोगा कारण दव्वगहणाओ ।
आणापाण व्व न चे, तओ वि जोगंतरं होज्जा ॥३६०॥

तनुयोग एव मनोवाग्योगौ, तदन्तर्गतावेवैतावित्यर्थः । इयं प्रतिज्ञा, कायेनैव तद्द्रव्यग्रहणादिति हेतुः, प्राणापानवदिति दृष्टान्तः । यथा-कायेन द्रव्यग्रहणात् प्राणापानव्यापारः कायिकयोगान्न भिद्यते, एवं मनोवाग्योगावपीति भावः । न चैवं-न चेत् त्वया प्राणापानव्यापारस्तनुयोगतयाऽभ्युपगम्यते, तर्हि तकोऽपि सोऽपि प्राणापानव्यापारो योगान्तरं स्यात्, ततो योगचतुष्टयप्रसङ्गः, अनिष्टं चैतत्, तस्मात्कायिकयोग एवायमिति ॥३६०॥

अत्र परः प्राह-

तुल्ले तणुजोगत्ते, कीस व जोगंतरं तओ न कओ ?।
भणवइजोगा व कया, भणइ ववहारसिद्धत्थं ॥३६१॥

ननु स्वकृतयुक्त्यैव सर्वेषां तुल्ये तनुयोगत्वे मनोवाग्योगवत्किमिति तकोऽसौ प्राणापानव्यापारः कायिकयोगाद् योगान्तरं न कृतः, किमिति चतुर्थो योगो न कृत इत्यर्थः?। अथ नैवं क्रियते, तर्हि तुल्येऽपि तनुयोगत्वे मनोवाग्योगौ काययोगात्किमिति पृथक् कृतौ ?, तस्मात्तनुयोगत्वस्य सर्वत्र तुल्यत्वादेक एव काययोगः क्रियताम्। उपाधिभेदेन तु चत्वारो वा योगाः क्रियन्ताम् । अन्यथा पक्षपातमात्रमेव स्याद्, न तु युक्तिरिति भावः। अत्रोत्तरमाह-"भणइ" इत्यादि। भण्यतेऽत्रोत्तरं,किं तत्?, इत्याह-व्यवहारस्य लोकलोकोत्तररूढस्य सिद्ध्यर्थं प्रसिद्धिनिमित्तं, मनोवाग्योगावेव पृथक्कृतौ, न प्राणापानयोग इति ॥३६१॥

व्यवहारोऽपि किमितीत्थं प्रवृत्त इत्याह-

कायकिरियाऽऽइरित्तं, नाऽऽणापाणयफलं जह वइए ।
दीसइ मणुसो य फुडं, तणुजोगऽब्भंतरो तो सो ॥३६२॥

कायक्रिया कायव्यापारः, तदतिरिक्तं तदन्यधिकं प्राणापानफलं न किमपि दृश्यते । यथा वाचो मनसश्च स्फुटं तदू दृश्यते। इदमुक्तं भवति-यथा वाचः स्वाध्यायविधानपरप्रत्यायनाऽऽदिकं,मनसश्च धर्मध्यानाऽऽदिकं,विशिष्टं स्फुटं कायक्रियाऽतिरिक्तं फलमुपलभ्यते,नैवं प्राणापानयोः,इति तनुयोगाऽभ्यन्तरवर्त्यसौ प्राणापानव्यापारो व्यवह्रियते, न पृथक्। न च वक्तव्यं-जीवत्वसाधर्म्यादिति प्रतीतिजननाऽऽदिकं प्राणापानफलमप्युपलभ्यत एवेति; एवंभूतस्य प्रयोजनमात्रस्य सर्वत्र विद्यमानत्वाद् धावनवल्गनाऽऽदिव्यापारस्यापि पृथक् योगत्वप्रसङ्गात्,तस्माद्विशिष्टव्यवहाराङ्गभूतपरप्रत्यायनाऽऽदिफलत्वाद्वाङ्मनोयोगावेव पृथक् कृतौ,न प्राणापानयोग इति । तदेवं तनुयोगो वाङ्निसर्गविषये व्याप्रियमाणो वाग्योगः, मनसे तु व्याप्रियमाणो मनोयोगः; वाग्विषयो योगो वाग्योगः, मनोविषयो योगो मनोयोग इति कृत्वा । इत्येवं तनुयोगविशेषावेव वाङ्मनोयोगौ इत्येतदर्शितम् ॥३६२॥

अथवा स्वतन्त्रावेवैतौ इति दर्शयन्नाह-

अहवा तणुजोगादिअ-वइदव्वसमूहजीववावारो ।
सो वइजोगो भण्णइ, वाया निसिरिज्जए तेणं ॥ ३६३॥
तह तणुवावारादिअ-मणदव्वसमूहजीववावारो ।
सो मणजोगो भण्णइ, मण्णइ नेयं जओ तेणं ॥ ३६४ ॥

अथवा-तनुयोगेन कायव्यापारेणाऽऽहतो गृहीतो योऽसौ वाग्द्रव्यसमूहः, तेन सहकारिकारणभूतेन तन्निसर्गार्थं योऽसौ जीवस्य व्यापारः, स वाग्योगो भण्यते; वाचा सहकारिकारणभूतया जीवस्य योगो वाग्योग इति कृत्वा । किं पुनस्तेन क्रियते?, इत्याह-सैव वाक् तेन जीवव्यापारेण निसृज्यते-परप्रत्यायनार्थमुच्यत इति । तथा तनुव्यापारेणाऽऽहतो योऽसौ मनोद्रव्यसमूहः, तेन सहकारिकारणभूतेन वस्तुचिन्तनाय योऽसौ जीवस्य व्यापारः, स मनोयोगो भण्यते, मनसा सहकारिकारणभूतेन जीवस्य योगो मनोयोग इति व्युत्पत्तेः । कुतः पुनरयं मनोयोगः?, इत्याह-यतस्तेन ज्ञेयं जिनमूर्त्यादिकं मन्यते चिन्त्यते, ऽतस्तस्य मनोयोगत्वमिति। तदेवमत्र पक्षे वाग्द्रव्यनिसर्गाऽऽदिकाले तनोर्व्यापारः सन्नपि न विवक्षितः, किं तु वाङ्मनोद्रव्यसचिवस्य जीवस्यैवेति स्वतन्त्रावेव वाङ्मनोयोगौ, न तु तनुयोगविशेषभूताविति भावः । आनापानद्रव्यसाचिव्यात्, तन्मोचने जन्तोस्तद्योगोऽपि स्वतन्त्रः पृथक् प्राप्नोतीति चेत् । न । "भण्णइ ववहारसिद्धत्थं । (३६१ गाथा)" इत्यादिना प्रतिषिद्धितत्वादिति ॥ विशे० ॥

(८) सामान्येन योगं प्ररूप्य विशेषतो नारकाऽऽदिषु चतुर्विंशतौ पदेषु तमतिदिशन्नाह-

एवं णेरइयाणं विगलिंदियवज्जाणं० जाव वेमाणियाणं ।

"एवं" इत्यादि कण्ठ्यं, नवरमतिप्रसङ्गपरिहारायेदमुक्तम । (विगलिंदियवज्जाणं ति) तत्र विकलेन्द्रिया अपर्याप्तेन्द्रियास्तेषां ह्येकेन्द्रियाणां काययोग एव, द्वित्रिचतुरिन्द्रियाणां तु काययोगवाग्योगावितीति । स्था० ३ ठा० १ उ० । जी० । (योगानाश्रित्य दण्डकः ' पओग ' शब्दे वक्ष्यते)

उत्पलजीवानधिकृत्य-

ते णं भंते ! जीवा किं मणजोगी,वइजोगी,कायजोगी ?। गोयमा ! णो मणजोगी, णो वयजोगी, कायजोगी वा, कायजोगिणो वा ॥ भ० ११ श० १ उ० । जी० ।

मनुष्याणां योगो यथा-

ते णं भंते ! जीवा किं मणजोगी, वइजोगी, कायजोगी, अजोगी ?। गोयमा ! मणजोगी वि,वइजोगी वि,कायजोगी वि, अजोगी वि ॥

योगद्वारे मनोयोगिनो, वाग्योगिनः, काययोगिनोऽयोगिनश्च। तत्रायोगिनः शैलेश्यवस्थां प्रतिपन्नाः । जी० १ प्रति० । (पुद्गलाकाऽऽदीनां योगो ' णिग्गंथ ' शब्दे । संयताऽऽदीनां योगः ' संजय ' शब्दे वक्ष्यते)

(१) नैरयिकाऽऽदिदण्डकेषु समविषमयोगावधिकृत्य योगाधिकारादेवेदमाह-

दो भंते ! णेरइया पढमसमयउववण्णगा किं समजोगी, विसमजोगी ?। गोयमा ! सिय समजोगी, सिय विसमजोगी । से केणट्ठेणं भंते ! एवं वुच्चइ-सिय समजोगी, सिय विसमजोगी ?। गोयमा ! आहारयाओ वा से अणाहारए, अणाहारयाओ वा से आहारए, सिय हीणे, सिय तुल्ले, सिय अब्भहिए, जइ हीणे असंखेज्जइभागहीणे वा, संखेज्जइभागहीणे वा, संखेज्जगुणहीणे वा, असंखेज्जगुणहीणे वा, अह अब्भहिए असंखेज्जइभागमब्भहिए वा, संखेज्जइभागमब्भहिए वा, संखेज्जगुणमब्भहिए वा, असंखेज्जगुणमब्भहिए वा, से तेणट्ठेणं० जाव सिय समजोगी, सिय विसमजोगी, एवं० जाव वेमाणिया ।

" दो भंते ! " इत्यादि । प्रथमः समय उपपन्नयोर्ययोस्तौ प्रथमसमयोपपन्नौ, उत्पत्तिश्चेह नरकक्षेत्रप्राप्तिः, सा च द्वयोरपि विग्रहेण, ऋजुगत्या वा, एकस्य वा विग्रहेण, अन्यस्य चर्जुगत्येति । (समजोगि त्ति) समो योगो विद्यते ययोस्तौ समयोगिनौ, एवं विषमयोगिनौ । " आहारयाओ वा " इत्यादि । आहारकाद्वा, आहारकं नारकमाश्रित्य (से त्ति) स नारकोऽनाहारकः अनाहारकाद्वा, अनाहारकं नारकमाश्रित्याहारकः किमित्याह ?-(सिय हीण त्ति) यो नारको विग्रहानावेनागत्याऽऽहारकत्वोत्पन्नोऽसौ निरन्तराऽऽहारकत्वादुपचित एव, तदपेक्षया च यो विग्रहगत्याऽनाहारको भूत्वोत्पन्नोऽसौ हीनः पूर्वमनाहारकत्वेनानुपचितत्वात्तीनयोगत्वेन च विषमयोगी स्यादिति भावः । (सिय तुल्ले त्ति) यौ समानसमयया विग्रहगत्याऽनाहारकौ भूत्वोत्पन्नौ, ऋजुगत्या वा गत्वोत्पन्नौ, तावेकेन इतरापेक्षया तुल्यः, समयोगी भवतीति भावः । (अब्भहिए त्ति) यो विग्रहानावेनाहारक एवाऽऽगतोऽसौ विग्रहगत्यनाहारकापेक्षयोपचिततरत्वेनाभ्यधिको विषमयोगीति भावः । इह च- "आहारयाओ वा से अणाहारए " इत्यनेन हीनतायाः, " अणाहारयाओ वा आहारए" इत्यनेन चाभ्यधिकतायाः निबन्धनमुक्तम् । तुल्यतानिबन्धनं तु समानधर्मतालक्षणं प्रसिद्धत्वान्नोक्तमिति । भ० ६५ श० १ उ० । (सयोगिमनोयोगिवाग्योगिकाययोग्ययोगिकानामल्पबहुत्वं, संसारसमापन्नजीवानां योगाल्पबहुत्वं च 'अप्पाबहुय' शब्दे प्रथमभागे ६५६पृष्ठे द्रष्टव्यम् । एकेन्द्रियाऽऽदीनां योगसंभवो, अनन्तानुबन्ध्युदयरहिते मिथ्यादृष्टौ यावन्तो योगास्ते ऽपर्याप्तानां योगवक्तव्यतायां स्थितिबन्धप्रस्तावे ' बंध ' शब्दे द्रष्टव्याः) श्रुतोपदिष्टे संयमहेतौ सम्यक्मनोवाक्कायव्यापारे च । योगाः श्रुतोपदिष्टाः संयमहेतवः स्थ० १ उ० । योगाः सम्यक्मनोवाक्कायव्यापारा इति । अने० ३ अधि० । योगो विशिष्टमनोवाक्कायव्यापर इति च । सूत्र० १ श्रु० ८ अ० । समाधौ, धर्म० १ अ० । ध्यानविशेषे, षो० २ विव० । आत्माभ्यन्तरपरिणामे, द्वा० १६ द्वा० ।

(१०) कतिविधो योग इत्याह-

साऽऽलम्बनो निरालम्बनश्च योगः परो द्विधा ज्ञेयः ।
जिनरूपध्यानं स्व-र्व्याद्यस्तत्त्वगस्त्वपरः ॥ १ ॥

सह आलम्बनेन चक्षुरादिज्ञानविषयेण प्रतिमाऽऽदिना वर्त्तते इति साऽऽलम्बनः, निरालम्बनश्चाऽऽलम्बनाद्विषयभावापत्तिरूपान्निष्क्रान्तो निरालम्बनः, यो हि छद्मस्थेन ध्यायते, न च स्वरूपेण दृश्यते, तद्विषयो निरालम्बन इति यावत् । योगो ध्यानविशेषः, परः प्रधानो, द्विधा ज्ञेयो द्विविधो वेदितव्यः । जिनरूपस्य समवसरणस्थितस्य, ध्यानं चिन्तनं, खलुशब्दो वाक्यालङ्कारे, आद्यः प्रथमः, सालम्बनो योगः । तस्यैव जिनस्य तत्त्वं केवलजीवप्रदेशसङ्घातरूपं केवलज्ञानाऽऽदिस्वभावं, तस्मिन् गच्छतीति तत्त्वगः । तुरेवकारार्थः, अपरोऽनालम्बनः, मुक्तपरमात्मस्वरूपध्यानमित्यर्थः ॥ १ ॥

कथं पुनर्जिनरूपं ध्यातव्यमित्याह-

अष्टपृथग्जनचित्त-त्यागाद्योगिकुलचित्तयोगेन ।
जिनरूपं ध्यातव्यं, योगविधावन्यथा दोषः ॥ २ ॥

अष्ट च तानि पृथग्जनचित्तानि च, तेषां त्यागात्परिहारात्, योगिकुलस्य चित्तं मनः, तद्योगेन तत्संबन्धि, जिनरूपं परमाऽऽत्मरूपं, ध्यातव्यं ध्येयं, योगविधौ योगविधाने, अन्यथा दोषोऽपराधः ॥ २ ॥

तान्येव चाष्टौ चित्तान्याह-

खेदोद्वेगक्षेपो-त्थानभ्रान्त्यन्यमुद्गुगाऽऽसङ्गैः ।
युक्तानि हि चित्तानि, प्रबन्धतो वर्जयेद् मतिमान् ॥ ३ ॥

खेदः श्रान्तता, क्रियास्वप्रवृत्तिहेतुः पथि परिश्रान्तवत् । खेदाभावेऽप्युद्वेगः, स्थानस्थितस्यैव उद्विग्नता, कुर्वाणोऽप्युद्विग्नः करोति न सुखं लभते । क्षेपः क्वचिच्चित्तता, अन्तराऽन्तराऽन्यत्र न्यस्तचित्तवत् । उत्थानं चित्तस्याप्रशान्तवाहिता, मनःप्रभृतीनामुद्रेकाद् मदावष्टब्धपुरुषवत् । भ्रान्तिरतस्मिंस्तद्ग्रहरूपा, शुक्तिकायां रजताध्यारोपवत् । अन्यमुद् अन्यहर्षः । रुग् रोगः, पीडाभङ्गो वा । आसङ्गोऽभिष्वङ्गः । खेदश्चोद्वेगश्च, क्षेपश्चोत्थानं च, भ्रान्तिश्चान्यमुच्च, रुक् चाऽऽसङ्गश्च, तैर्युक्तानि हि संबद्धानि हि, चित्तानि प्रस्तुतान्यष्ट, प्रबन्धतः प्रबन्धेन, वर्जयेत्परिहरेत्, मतिमान् बुद्धिमान् ॥ ३ ॥

खेदाऽऽदीश्चित्तदोषान् फलद्वारेणोपदर्शयन्नाह—

खेदे दार्ढ्याभावा-न्न प्रणिधानमिह सुन्दरं भवति ।
एतच्चेह प्रवरं, कृषिकर्मणि सिञ्चवद् ज्ञेयम् ॥ ४ ॥

खेदे चित्तदोषे सति, दार्ढ्याभावाद् दृढत्वाभावाद्, न प्रणिधानमैकाग्र्यम्, इह प्रस्तुते योगे, सुन्दरं भवति । एतच्च प्रणिधानम्, इह योगे, प्रवरं प्रधानं, कृषिकर्मणि धान्यनिष्पत्तिफले, सिञ्चवज्जलवज्ज्ञेयम् ॥ ४ ॥

उद्वेगे विद्वेषा-द्विधिसमं करणमस्य पापेन ।
योगिकुलजन्मबाधक-मल्पमेतत्तद्विदामिष्टम् ॥ ५ ॥

उद्वेगे चित्तदोषे, विद्वेषाद्योगविषयतो, विधिसमं राजविधिरूपं, करणमस्य योगस्य, पापेन हेतुभूतेन, एतत्तथाविधं करणम्,

योगिनां कुले यज्जन्म, तस्य बाधकम् । अनेन योगिकुलजन्मापि जन्मान्तरे न लभ्यते इति कृत्वा योगिकुलजन्मबाधकम्, अलमत्यर्थम्, एतच्चिद्दामिष्टं योगविदामभिमतम् ॥ ५ ॥

क्षेपेऽपि चाप्रबन्धा-दिष्टफलसमृद्धये न जात्वेतत् ।
नासकृदुत्पाटनतः, शालिरपि फलाऽऽवहः पुंसः ॥६॥

क्षेपेऽपि च चित्तदोषे, अप्रबन्धात्प्रबन्धत्वाभावात्, चित्तस्य इष्टफलसमृद्धये विधिकृतफलसमृद्ध्यर्थं योगनिष्पत्तये, न, जातु कदाचित्, एतत्करणं, चित्तं वा भवति । किमित्यन्यत्रान्यत्र चित्तप्रक्षेपे फलसमृद्धिर्न भवतीति ? आह-नासकृदनेकशः, उत्पाटनत उत्खननात्, शालिरपि धान्यविशेषः, फलाऽऽवहः फलसंयुक्तः, पुंसः पुरुषस्य यतो भवति ॥ ६ ॥

उत्थाने निर्वेदात्, करणमकरणोदयं सदैवास्य ।
अत्यागत्यागोचित-मेतत्तु स्वसमयेऽपि मतम् ॥ ७ ॥

उत्थाने चित्तदोषे सत्यप्रशान्तवाहितायां, निर्वेदाऽऽदेः, करणं निष्पादनम्. अकरणोदयं भाविकालमाश्रित्याकरणस्यैवोदयो यस्मिन्निति तत्तथा, सदैवास्य योगस्य, न विद्यते त्यागो यस्य कथञ्चिदुपादेयत्वात्तदत्यागं, त्यागायोचितं योग्यम्, अप्रशान्तवाहितादोषात् । अत्यागं च तस्यागोचितं च अत्यागत्यागोचितम्, एतत्तु एतत्पुनः, करणमभिसंबध्यते । स्वसमयेऽपि स्वसिद्धान्तेऽपि, मतमिष्टम् ॥ ७ ॥

भ्रान्तौ विभ्रमयोगद्, न हि संस्कारः कृतेतराऽऽदिगतः ।
तदभावे तत्करणं, प्रक्रान्तविरोध्यनिष्टफलम् ॥ ८ ॥

भ्रान्तौ चित्तदोषे सति, विभ्रमयोगान्मनोविभ्रमसंबन्धात्, न हि संस्कारो नैव वासनाविशेषः, कृतेतराऽऽदिगतः-इदं मया कृतमिदमकृतम् । आदिशब्दादिदं मयोच्चरितमिदमनुच्चरितम् । एतच्च एतद्विषयः । न हि मनोविभ्रमे कृतेतराऽऽदिसंस्कारो भवति । तदभावे संस्काराभावे,तत्करणं-तस्य प्रस्तुतस्य योगस्य करणं, प्रक्रान्तविरोधि प्रस्तुतयोगविरोधि, अनिष्टफलमिष्टफलरहितम् ॥ ८ ॥

अन्यमुदि तत्र रागात्, तदनादरताऽर्थतो महापाया ।
सर्वानर्थनिमित्तं, मुद्विषयाङ्गारवृष्ट्याभा ॥ ९ ॥

अनुष्ठीयमानादन्यत्र मुत्प्रमोदः,तस्यां सत्यां चित्तदोषरूपायां, तत्रान्यस्मिन् वा, रागादभिलाषातिरेकात्, तदनादरता अनुष्ठीयमानानादरभावो,अर्थतः सामर्थ्यात्, महापाया महानपायो यस्याः सकाशात्सा तथा, सर्वानर्थनिमित्तं सर्वेषामनर्थानां हेतुः, तदनादरताऽभिसंबध्यते । मुद्विषयाङ्गारवृष्ट्याभा-मुदा हर्षस्य विषयो यस्तस्मिन्नङ्गारवृष्ट्याऽङ्गारवृष्टिप्रतिच्छायाऽङ्गारवृष्टिसदृशी, प्रमोदविषयार्थोपघातकारिणीत्यर्थः । इयं चान्यमुत्सुन्दरेष्वपि शास्त्रोक्तेषु चैत्यवन्दनास्वाध्यायकरणाऽऽदिषु श्रुतानुरागाच्चैत्यवन्दनाऽऽद्यनाद्रियमाणस्य तत्करणवेलायामपि तदुपयोगाभावेनेतराऽऽसक्तचित्तवृत्तेः सदोषा, न हि शास्त्रोक्तयोरनुष्ठानयोरयं विशेषः समस्ति-यदुतैकमादरविषयो, अन्यदनादरविषय इति ॥ ९ ॥

रुजि निजजात्युच्छेदात्,करणमपि हि नेष्टसिद्धये नियमात् ।
अस्येत्यननुष्ठानं, तेनैतद् बन्ध्यफलमेव ॥ १० ॥

रुजि रोगे चित्तदोषे सति,निजजात्युच्छेदादिति । कोऽर्थः?, करणमपि हि नेष्टसिद्धये नाभिमतफलनिष्पत्तये, नियमान्नियमेन, अस्य प्रस्तुतस्यार्थस्य, इत्यननुष्ठानम्-इतिहेतोरननुष्ठानमकरणं, तेन कारणेन, एतत्करणं, बन्ध्यफलमेवेष्टफलाभावात् । इयं हि रुग्भङ्गरूपा पीडारूपा वाऽननुष्ठानजातरुच्छेदकरणद्वारेण सर्वानुष्ठानानां बन्ध्यफलत्वाऽऽपादनाय प्रभवति, तेन सदोषा विवेकिनः परिहर्तव्येति दर्शिता ॥ १० ॥

आसङ्गेऽप्यविधाना-दसङ्गसक्त्युचितमित्यफलमेतत् ।
भवतीष्टफलमुच्चै-स्तदप्यसङ्गं यतः परमम् ॥ ११ ॥

आसङ्गेऽपि चित्तदोषे सति विधीयमानानुष्ठाने इदमेव सुन्दरमित्येवं रूपे, अविधानाच्छास्त्रोक्तविधेरभावात्, सक्तिरनवरतप्रवृत्तिर्न विद्यते सङ्गो यस्यां सेयमसङ्गाऽभिष्वङ्गाभाववती, असङ्गा चासौ सक्तिश्च,तस्या उचितं योग्यमिति कृत्वा,अफलमेतदिष्टफलरहितमेतदनुष्ठानम्,भवति जायते,इष्टफलमिष्टफलसंपादकम्, उच्चैरत्यर्थं, तदपि शास्त्रोक्तमनुष्ठानम्, असङ्गमभिष्वङ्गरहितम्, यतो यस्मात्, परमं प्रधानम् । असङ्गयुक्तं ह्यनुष्ठानं तन्मात्रगुणस्थानकस्थितिकार्येव, न मोहोन्मूलनद्वारेण केवलज्ञानोत्पत्तये प्रभवति, तस्मात्तदर्थिना आसङ्गस्य दोषरूपता विज्ञेयेति ॥ ११ ॥

एवमष्टपृथग्जनचित्तदोषान् प्रतिपाद्य, तस्यागद्वारेण योगिचित्तमुपदर्शयन्नाह-

एतद्दोषविमुक्तं, शान्तोदात्ताऽऽदिभावसंयुक्तम् ।
सततं परार्थनियतं, सङ्क्लेशविवर्जितं चैव ॥ १२ ॥

एतद्दोषविमुक्तमष्टचित्तदोषविमुक्तम्,शान्तोदात्ताऽऽदिभावसंयुक्तम्-शान्त उपशमवान् । यथोक्तम्-" न यत्र दुःखं न सुखं न रागो, न द्वेषमोहौ न च काचिदिच्छा । रसः स शान्तो विहितो मुनीनां, सर्वेषु भावेषु समः प्रदिष्टः ॥ १ ॥ " उदात्त उदारः । यत उक्तम्-" अयं निजः परो वेति, गणना लघुचेतसाम् । उदारचरितानां तु, वसुधैव कुटुम्बकम् ॥१॥ " आदिशब्दाद्धीरधीराऽऽदिभावपरिग्रहः । तैः संयुक्तं समन्वितम्, सततमनवरतम्, परार्थनियतं परोपकारनियतवृत्ति, सङ्क्लेशविवर्जितं चैव-सङ्क्लेशो विशुद्धिप्रतिपक्षः कालुष्यं, तेन विरहितं चैव ॥ १२ ॥

सुस्वप्नदर्शनपरं, समुल्लसद्गुणगणौघमत्यन्तम् ।
कल्पतरुबीजकल्पं, शुभोदयं योगिनां चित्तम् ॥१३॥

सुस्वप्नदर्शनपरं-शोभनाः स्वप्नाःसुस्वप्नाः-श्वेतसुरभिपुष्पवस्त्राऽऽतपत्रचामराऽऽदयः,तद्दर्शनप्रवृत्तम्,समुल्लसन् गुणगणौघो गुणनिकरप्रवाहो यस्मिंस्तत्समुल्लसद्गुणगणौघम्, अत्यन्तमतिशयेन,कल्पतरुबीजकल्पं,कल्पतरोर्बीजं स्वजनकं कारणं तेन तुल्यम्,शुभोदयं योगिनां चित्तं,शुभ उदयोऽस्येति शुभोदयम् ॥१३॥

कस्य पुनरेवंविधं विशेषेण योगिनश्चित्तं भवतीत्याह-

एवंविधमिह चित्तं, भवति प्रायः प्रवृत्तिचक्रस्य ।
ध्यानमपि शस्तमस्य, त्वधिकृतमित्याहुराचार्याः ॥१४॥

एवंविधमवंस्वरूपम्, इह प्रक्रमे, चित्तं मनः, भवति सम्भवति, प्रायो बाहुल्येन, प्रवृत्तचक्रस्य प्रवृत्तराद्धिन्द्रियानुष्ठानसमूहस्य योगिनः, ध्यानमपि पूर्वोक्तस्वरूपम्, शस्तं प्रशस्तम्, अस्य त्वस्यैव, अधिकृतं प्रस्तुतम्, इत्याहुराचार्याः सूरयो ब्रुवते ॥१४॥

कथं पुनस्तत्स्थानं देशाऽऽद्यपेक्षया भवतीत्याह-

शुद्धे विविक्तदेशे, सम्यक्संयमितकाययोगस्य ।
कायोत्सर्गेण दृढं, यद्वा पर्यङ्कबन्धेन ॥ १५ ॥

शुद्धे शुचौ, विविक्तदेशे जनाऽऽकीर्णाऽऽदिरहिते, सम्यगविपरीतस्थानेन, संयमितकाययोगस्य नियमितसर्वकायचेष्टस्य, कायोत्सर्गेण ऊर्ध्वस्थानरूपेण, दृढमत्यर्थम्, यद्वा-पर्यङ्कबन्धेनाऽऽसनविशेषरूपेण ॥ १५ ॥

साध्वागमानुसारात्, चेतो विन्यस्य जगवति विशुद्धम् ।
स्पर्शाऽऽदेधात्तत्ति-ब्धयोगिसंस्मरणयोगेन ॥ १६ ॥

साधु यथा भवत्येवमागमानुसारात् सिद्धान्तानुसारेण, चेतश्चित्तम्, विन्यस्य निक्षिप्य, भगवति जिने, विशुद्धं विशुद्धिमत्, स्पर्शस्तत्स्वरूपज्ञानम्, तस्याऽऽदेर्धात् संस्कारात्, तत्सिद्ध्यर्थम्, सिद्धैः प्रतिष्ठितैः लब्धाऽऽत्मलाभा ये योगिनस्तेषां संस्मरणयोगः स्मरणव्यापारः, तेन । यो हि यत्र कर्मणि सिद्धस्तदनुस्मरणं तत्रेष्टफलसिद्धये भवति ॥ १६ ॥ षो० १४ विव० ।

'योगश्चित्तवृत्तिनिरोधः' इति पातञ्जलोक्ते सर्वविषयेऽप्योऽन्तःकरणवृत्तेर्निरोधे, वाच० । योगो मनोवाक्कायनिरोध इति । संथा० । योगश्चाऽन्त्ययोधनमिति । उत्त० १२ अ० । " मोक्खेण जोयणाओ, जोगो सव्व निरुच्चए । लक्खणं तेण तन्मुख्य-हेतुव्यापारताऽऽस्य तु ॥ १ ॥ " इत्युक्तलक्षणे मोक्षमुख्यहेतौ व्यापारे, द्वा० ।

(११) योगस्य मोक्षहेतुत्वमेव भावयन्नाह-

मोक्षहेतुर्यतो योगो, भिद्यते न ततः क्वचित् ।
साङ्ख्याभेदात्, तथाभावे, मुक्तिभेदो न कारणम् ॥ ३ ॥

मोक्षहेतुर्निवृत्तिनिमित्तं, यतो यस्मात् कारणात्, योगः, सर्वैर्योगशास्त्रकारैः संगीयते । भिद्यते भेदमनुभवति, न नैव, ततो मोक्षहेतुत्वाद्धेतोः, क्वचिद्योगशास्त्रे । एतदपि कुतः?, इत्याह-साङ्ख्याभेदात्-साध्यस्य योगाभ्यासनिष्पाद्यस्य मोक्षस्याभेदादेकरूपत्वात् । सकलकर्मक्षयलक्षणो हि मोक्षः, न तत्र कश्चिद्भेद इति । एवंसति यत्स्यात् तदाह-तथाभावे तु मोक्षाभेदभावे पुनः सति, भक्तिभेदो योगशास्त्रे स्वात्माऽऽदीनां योगाङ्गानां यो भणितः सः, न कारणं हेतुर्योगभेदस्य । न हि नाममात्रभेदेन भावा भिद्यन्ते, एकस्यापि शक्राऽऽदेरनेकेन नाम्ना व्यवहियमाणत्वात् ॥ ३ ॥

अथात्रैव विशेषमाह-

मोक्षहेतुत्वमेवास्य, किं तु यत्नेन धीधनैः ।
सद्गोचराऽऽदिसंशुद्धं, मृग्यं स्वहितकाङ्क्षिभिः ॥ ४ ॥

मोक्षहेतुत्वमेव मोक्षनिमित्तभावमेव, नापरं किञ्चित्, अस्य योगस्य, किं तु केवलं, यत्नेनाऽऽदरेण, धीधनैर्बुद्धिमद्भिः, मृग्यमिच्छुभिरेव योगः । कीदृशम्?, इति । आह-सताऽनुपचरितेन, गोचराऽऽदिनाऽनन्तरमेव दर्शयिष्यमाणेन संशुद्धमनवद्यं, मृग्यम् । कीदृशैरात्माऽऽदौ मोक्षहेतुर्योगो युज्यते इत्येवंरूपेण निपुणोहापोहयोगेन गवेषणीयम्?, स्वहितकाङ्क्षिभिरात्मकल्याणचिन्तकैरेव योगवञ्चनायां हि सर्वपुरुषार्थवञ्चना नियमात्संपद्यते । यदवाचि-"एसो य उत्तमो जं, पुरिसत्थो एत्थ वंचिओ नियमा । वंचिज्जइ सव्वेसुं, कल्लाणेसुं न संदेहो ॥ १ ॥" ॥ ४ ॥

अथ कस्मादस्य गोचराऽऽदिशुद्धिर्मृग्यते?, इत्याशङ्क्याऽऽह-

गोचरश्च स्वरूपं च, फलं च यदि युज्यते ।
अस्य योगस्ततोऽयं यद् मुख्यशब्दार्थयोगतः ॥ ५ ॥

गोचरो विषयः परिणामिजीवलक्षणः, स्वरूपं सर्वार्थेषूचितप्रवृत्तिलक्षणम्, फलं मोक्षाऽऽत्मकम्, चकारा उक्तसमुच्चये । यदि इत्यभ्युपगमे । युज्यते घटते, अस्य योगस्य, योगः । ततो गोचराऽऽदियोगाद्, अयं प्रस्तुतो, यद्यस्मात्स्यात् । एतदपि कुतः?, इत्याह-मुख्यस्यामुपचरितस्य शब्दार्थस्य मोक्षेण योजनाद्योग इत्येवंलक्षणस्य योगतो घटनात् ॥ ५ ॥ यो० विं० ।

(१२) योगस्य लक्षणं निरूपयन्नाह-

मोक्षेण योजनादेव, योगो ह्यत्र निरुच्यते ।
लक्षणं तेन तन्मुख्य-हेतुव्यापारताऽस्य तु ॥ १ ॥

योगो हि योगशब्दो हि, अत्र लोके, प्रवचने वा; मोक्षेण योजनादेव, निरुच्यते व्युत्पाद्यते, तेनास्य योगस्य तु, तन्मुख्यहेतुव्यापारता, लक्षणं, निरुक्तार्थस्याप्यनतिप्रसक्तस्य लक्षणत्वानपायात् ॥ १ ॥

मुख्यत्वं चान्तरङ्गत्वात्, फलाऽऽक्षेपाच्च दर्शितम् ।
चरमे पुद्गलाऽऽवर्त्ते, यत एतस्य संभवः ॥ २ ॥
न सन्मार्गाभिमुख्यं स्या-दावर्त्तेषु परेषु तु ।
मिथ्यात्वच्छन्नबुद्धीनां, दिङ्मूढानामिवाङ्गिनाम् ॥ ३ ॥

मुख्यत्वं चान्तरङ्गत्वान्मोक्षं प्रत्युपादानत्वात्, फलाऽऽक्षेपात्फलजनकं प्रत्यविलम्बत्वाच्च; दर्शितं प्रवचने, यतो यस्माद्, चरमे पुद्गलाऽऽवर्त्ते, एतस्य योगस्य संभवः इत्थं ह्यभव्यदुरभव्यक्रियाव्यवच्छेदः कृतो भवति, एकस्य मोक्षानुपादानत्वादन्यस्य च फलविलम्बादिति ध्येयम् ॥ २ ॥ नेति स्पष्टः ॥ ३ ॥

तदा ज्ञवाभिनन्दी स्यात्, संज्ञाविष्कम्भणं विना ।
धर्मकृत् कश्चिदेवाङ्गी, लोकपङ्क्तिकृताऽऽदरः ॥ ४ ॥

तदाऽन्तरमेषावर्त्तेषु, अङ्गी प्राणी, संज्ञाविष्कम्भणम् आहाराऽऽदिसंज्ञोदयवञ्चनलक्षणं विना, कश्चिदेव धर्मकृल्लौकिकलोकोत्तरप्रवृत्त्याऽऽदिधर्मकारी, लोकपङ्क्तौ लोकसदृशभावसंपादनरूपायां, कृताऽऽदरः कृतयत्नः स्यात् ॥ ४ ॥

क्षुद्रो लोभरतिर्दीनो, मत्सरी जयवान् शठः ।
अज्ञो ज्ञवाभिनन्दी स्याद्, निष्फलाऽऽरम्भसङ्गतः ॥ ५ ॥

क्षुद्रः कृपणः, लोभरतिर्याच्ञाशीलः, दीनः सदैवादृष्टकल्याणः, मत्सरी परकल्याणदुःस्थितः, जयवान्निन्द्यजीवितः, शठो मायावी, अज्ञो मूर्खः, ज्ञवाभिनन्दी-"असारोऽप्येष संसारः सारवानिव लक्ष्यते । बधिदुग्धाम्बुतास्तूल-पण्यपण्याङ्गनाऽऽदिभिः" ॥ १ ॥ इत्यादिवचनैः संसाराभिनन्दनशीलः, स्याद्भवेद्, निष्फलाऽऽरम्भसङ्गतः सर्वदातत्त्वाभिनिवेशाद् वन्ध्यक्रियासंपन्नः ॥ ५ ॥

लोकाऽऽराधनहेतोर्या, मलिनेनान्तराऽऽत्मना ।
क्रियते सत्क्रिया सा च, लोकपङ्क्तिरुदाहृता ॥ ६ ॥

लोकाऽऽराधनहेतोर्लोकचित्ताऽऽवर्जननिमित्तं, या मलिनेन कीर्तिस्पृहाऽऽदिमालिन्यवताऽन्तरात्मना चित्तरूपेण, क्रियते सत्क्रिया शिष्टसमाचररूपा, सा च योगनिरूपणायां लोकपङ्क्तिरुदाहृता, लोकशास्त्रज्ञैः ॥ ६ ॥

महत्यल्पत्ववोधेन, विपरीतफलाऽऽवहा ।
भवाभिनन्दिनो लोक-पङ्क्त्या धर्मक्रिया मता ॥ ७ ॥

महति अधरीकृतकल्पद्रुचिन्तामणिकामधेनौ धर्मे, अल्पत्ववोधेनातितुच्छकीर्त्यादिमात्रहेतुत्वज्ञानेन, विपरीतफलाऽऽवहा दुरन्तसंसारानुबन्धिनी, भवाभिनन्दिनो जीवस्य, लोकपङ्क्त्या धर्मक्रिया मता, नात्र केवलमफलत्वमेव, किं तु विपरीतफलत्वमिति भावः ॥ ७ ॥

धर्मार्थं सा शुभायापि, धर्मस्तु न तदर्थिनः ।
क्लेशोऽपीष्टो धनार्थं हि, क्लेशार्थं जातु नो धनम् ॥८॥

धर्मार्थं सम्यग्दर्शनाऽऽदिमोक्षबीजाऽऽधाननिमित्तम्, सा लोकपङ्क्तिः, दानसंमानोचितसंज्ञापणाऽऽदिनिश्चित्रैरुपायैः शुभाय कुशलानुबन्धायापि। धर्मस्तु तदर्थिनो लोकपङ्क्त्यर्थिनो न शुभाय, हि यतो, धनार्थं क्लेशोऽपीष्टो-धनार्थिनां राजसेवाऽऽदौ प्रवृत्तिदर्शनात्। क्लेशार्थं जातु कदाचिद्, धनं नेष्टम्, न हि 'धनाद् मे क्लेशो भवतु' इति कोपीच्छति प्रेक्षावान्।

तदिदमुक्तं योगबिन्दौ-

" धर्मार्थं लोकपङ्क्तिः स्यात्, कल्याणाङ्गं महामतेः ।
तदर्थं तु पुनर्धर्मः, पापायाल्पधियामलम् ॥ ६० ॥ "

तथा—

" जनप्रियत्वं शुद्धं, सद्धर्मसिद्धिफलदमुत्तमम् ।
धर्मप्रशंसनाऽऽदे-र्बीजाऽऽधानाऽऽदिभावेन ॥१॥ " ॥८॥ इति ।

अनाभोगवतः साऽपि, धर्महानिकृतो वरम् ।
शुभा तत्त्वेन नैकाऽपि, प्रणिधानाऽऽद्यभावतः ॥ ९ ॥

अनाभोगवतः संमूर्छनजप्रायस्य स्वभावत एव वैनयिकप्रकृतेः, साऽपि लोकपङ्क्त्या धर्मक्रियाऽपि, धर्महानिकृतो धर्मे महत्त्वस्यैव यथास्थितस्याज्ञानाद्भवोत्कटेच्छाया अनाभोगेन महत्त्वस्वरूपाप्रतिपत्तेर्धर्महान्यकारिणो, वरमन्यापेक्षया मनाक् सुन्दरा, तत्त्वेन तत्त्वतः, पुनर्नैकाऽपि प्रणिधानाऽऽद्यभावतो नैकाऽपि वरं, प्रणिधानाऽऽदीनां क्रियाशुद्धिहेतुत्वात् ॥ ९ ॥

तानेवाऽऽह-

प्रणिधानं प्रवृत्तिश्च, तथा विघ्नजयस्त्रिधा ।
सिद्धिश्च विनियोगश्च, एते कर्मशुभाऽऽशयाः ॥ १० ॥

कर्मणि क्रियायां, शुभाऽऽशयाः स्वपुष्टिशुद्धचनुबन्धहेतवः-शुभपरिणामाः; पुष्टिरुपचयः, शुद्धिश्च ज्ञानाऽऽदिगुणविघातिघातिकर्मह्रासोत्थनिर्मलता, इत्यवधेयम् ॥ १० ॥

प्रणिधानं क्रियानिष्ठ-मधोवृत्तिकृपाऽनुगम् ।
परोपकारसारं च, चित्तं पापविवर्जितम् ॥ ११ ॥

प्रणिधानं क्रियानिष्ठमधिकृतधर्मस्थानादविच्चलितस्वभावम्, अधोवृत्तिषु स्वप्रतिपन्नधर्मस्थानादधस्ताद्वर्त्तमानेषु, प्राणिषु कृपाऽनुगं करुणाऽन्वितं, न तु हीनगुणत्वेन तेषु द्वेषसमन्वितं, परोपकारसारं च परार्थनिष्पत्तिप्रधानं च, चित्तं पापविवर्जितं सावद्यपरिहारेण निरवद्यवस्तुविषयम् ॥ ११ ॥

प्रवृत्तिः प्रकृतस्थाने, यत्नातिशयसंभवा ।
अन्याभिलाषरहिता, चेतःपरिणतिः स्थिरा ॥ १२ ॥

प्रवृत्तिः प्रकृतस्थानेऽधिकृतधर्मविषये, यत्नातिशयसंभवा पूर्वप्रयत्नाधिकोत्तरप्रयत्नजनिता, अन्याभिलाषेणाधिकृतेतरकार्योन्निलाषेण रहिता, चेतसोऽन्तरात्मनः, परिणतिः स्थिरा एकाग्रा, स्वविषय एव यत्नातिशयाज्ज्ञाता तत्रैव च तज्जननीत्यर्थः ॥१२॥

बाह्यान्तर्व्याधिमिथ्यात्व-जयश्चङ्क्म्याऽऽशयाऽऽत्मकः ।
कण्टकज्वरमोहानां, जयैर्विघ्नजयः समः ॥ १३ ॥

बाह्यव्याधयः शीतोष्णाऽऽदयः, अन्तर्व्याधयश्च ज्वराऽऽदयः, मिथ्यात्वं भगवद्वचनाश्रद्धानं, तेषां जयस्तत्कृतवैकृत्यनिराकरणं तच्चङ्क्म्याऽऽशयाऽऽत्मकः कण्टकज्वरमोहानां जयैः समो विघ्नजयः। इत्थं च हीनमध्यमोत्कृष्टत्वेनास्य त्रिविधत्वं प्रागुक्तं व्यक्तीकृतम्। तथाहि-कस्यचित् पुंसः कण्टकाऽऽकीर्णमार्गावतीर्णस्य कण्टकाच्छन्नो विशिष्टगमनविघातहेतुः, तद्रहिते तु पथि प्रवृत्तस्य निराकुलं गमनं संजायते, एवं कण्टकविघ्नजयसमः प्रथमो विघ्नजयः। तथा-तस्यैव ज्वरवेदनाऽभिभूतशरीरस्य विह्वलपादन्यासस्य निराकुलं गमनं चिकीर्षोरपि तत्कर्तुमशक्नुवतः कण्टकविघ्नादप्यधिको ज्वरविघ्नः, तज्जयस्तु निराकुलप्रवृत्तिहेतुः एवं ज्वरविघ्नसमो द्वितीयो विघ्नजयः। तस्यैव चाध्वनि जिगमिषोर्दिङ्मोहकल्पो मोहविघ्नः, तेनाभिभूतस्य प्रेर्यमाणस्याप्यध्वनीनैर्न गमनोत्साहः कथञ्चित्प्रादुर्भवति, तज्जयस्तु स्वरसतो मार्गगमनप्रवृत्तिहेतुः। एवमिह मोहविघ्नजयसमस्तृतीयो विघ्नजयः। इति फलैकोद्देशेन खल्वेते ॥ १३ ॥

सिद्धिस्ताद्विकधर्माऽऽप्तिः, साक्षादनुभवाऽऽत्मिका ।
कृपोपकारविनया-न्विता हीनाऽऽदिषु क्रमात् ॥ १४ ॥

सिद्धिः तात्त्विकस्याऽध्यात्मशुद्धस्य, न स्वाध्यात्मिकमात्रस्य, धर्मस्य अहिंसाऽऽदेः, आप्तिरुपलब्धिः, साक्षादनुपचारेण, अनुभवाऽऽत्मिका आत्मन आत्मना आत्मनि संवित्तिरूपा ज्ञानदर्शनचारित्रैकमूर्तिका, हीनाऽऽदिषु क्रमात् कृपोपकारविनयान्विता, हीने कृपाऽन्विता, मध्यमे उपकारान्विता, अधिके च विनययुता ॥ १४ ॥

अन्यस्य योजनं धर्मे, विनियोगस्तदुत्तरम् ।
कार्यमन्वयसंपत्त्या, तदबन्ध्यफलं मतम् ॥ १५ ॥

अन्यस्य स्वव्यतिरिक्तस्य, योजनं धर्मेऽहिंसाऽऽदौ विनियोगः, तदुत्तरं सिद्ध्युत्तरं कार्यम्। तदन्वयसंपत्त्याऽविच्छेदसिद्ध्या, अबन्ध्यफलमव्यभिचारिफलं मतम्। स्वपरोपकारबुद्धिलक्षणस्यानेकजन्मान्तरसन्ततोद्बोधेन प्रकृष्टधर्मस्थानावाप्तिहेतुत्वात् ॥ १५ ॥

एतैराशययोगैस्तु, विना धर्माय न क्रिया ।
प्रत्युत प्रत्यपायाय, क्षोभकोधक्रिया यथा ॥ १६ ॥

एतैः प्रणिधानाऽऽदिभिः, आशययोगैस्तु विना धर्माय न क्रिया बाह्यकायव्यापाररूपा, प्रत्युतान्तर्मालिन्यमद्भावात् प्रत्यपायायेष्यमाणप्रतिपक्षविघ्नाय, यथा क्षोभकोधक्रिया कूटतुलाऽऽदिसङ्क्रामाऽऽदिलक्षणा। तदुक्तम्-"तत्त्वेन तु पुनर्नैकाऽप्यत्र धर्मक्रिया मता। तत्प्रवृत्त्वादिवैगुण्या-क्षोभकोधक्रिया यथा॥" ॥ ६२ ॥ (योऽ विं०) ॥ १६ ॥

तस्मादचरमाऽऽवर्त्ते-ष्वयोगो योगवर्त्मनः ।
योग्यत्वेऽपि तृणाऽऽदीनां, घृतत्वाऽऽदेस्तदा यथा ॥१७॥

तस्मात्प्रणिधानाऽऽद्यभावात्, अचरमाऽऽवर्त्तेषु योगवर्त्मनो योगमार्गस्य, अयोगोऽसंभवः। योग्यत्वेऽपि योगस्वरूपयोग्यत्वेऽपि, तृणाऽऽदीनां, तदा तृणाऽऽदिकाले, यथा घृतत्वाऽऽदेरयोगः-तृणाऽऽदिपरिणामकाले तृणाऽऽदेर्घृताऽऽदिपरि-

त्मस्वरूपयोग्यत्वेऽपि घृताऽऽदिपरिणामसहकारियोग्यताऽभावाद् यथा न घृताऽऽदिपरिणामः, तथा प्रकृतेऽपि भावनीयम्। अत एव सहकारियोग्यताऽभावयति तत्र काले कार्यानुपधानम्।

तद् योग्यताऽभावयत्वेनैव साधयितुमभिप्रेत्याऽऽह (योगबिन्दौ) हरिभद्रसूरिः-

"तस्मादचरमाऽऽवर्त्ते-ऽवश्यात्मं नैव युज्यते।
कार्यस्थितितरोयद्व-त्तज्जन्मस्वामरं सुखम् ॥ ९३ ॥
तेजसानां च जीवानां, भव्यानामपि नो तदा।
यथा चारित्रमित्येवं, नान्यथा योगसंभवः ॥९४॥" इति ।१७।

नवनीताऽऽदिकल्पस्त-चरमाऽऽवर्त इष्यते।
अत्रैव विमलो भावो, गोपेन्द्रोऽपि यदभ्यधात् ॥ १८ ॥

नवनीताऽऽदिकल्पो घृतपरिणामनिबन्धननवनीतदधिदुग्धाऽऽदितुल्यः, तत्तस्मात्, चरमाऽऽवर्त इष्यते योगपरिणामनिबन्धनम्। अत्रैव चरमाऽऽवर्त एव, विमलो भावो मयाभिष्वङ्गाभावाद्भवति। यत्कोपेन्द्रोऽपि अन्यथाद् अक्षरन्यासेन ॥ १८ ॥

अनिवृत्ताधिकारायां, प्रकृतौ सर्वथैव हि।
न पुंसस्तत्त्वमार्गेऽस्मिन्, जिज्ञासाऽपि प्रवर्तते ॥ १९ ॥

अनिवृत्तः प्रतिलोमशक्त्याऽन्तरङ्गोऽधिकारः पुरुषाभिभवनरूपो यस्यास्तस्यां प्रकृतौ, सर्वथैव हि सर्वैरेव प्रकारैः, अपुनर्बन्धस्थानस्याप्यप्राप्तावित्यर्थः। न नैव, पुंसस्तत्त्वमार्गेऽस्मिन् वक्तुमुपक्रान्ते, जिज्ञासाऽपि ज्ञातुमिच्छाऽपि, किं पुनस्तदभ्यासः ?, इत्यपिशब्दार्थः। प्रवर्तते संजायते ॥ १९ ॥

साधिकारप्रकृतिम-त्यावर्त्ते हि नियोगतः।
पथ्येच्छैव न जिज्ञासा, क्षेत्ररोगोदये जन्तोः ॥ २० ॥

साधिकारा पुरुषाभिभवप्रवृत्ता या प्रकृतिः, तदत्यावर्त्ते हि, नियोगतो निश्चयतः, जिज्ञासा तत्त्वमार्गपरिज्ञानेच्छा, न भवेत्। क्षेत्ररोगोदये इव पथ्येच्छा। क्षेत्ररोगो नाम-रोगाम्नराऽऽधारभूतः कुष्ठाऽऽदिरोगः, ततो यथा पथ्याऽपथ्यधीविपर्यासः, तथा प्रकृतेऽपि ॥ २० ॥

पुरुषाभिभवः कश्चित्, तस्यामपि हि हीयते।
युक्तं तेनैतदधिक-मुपरिष्टाद् भणिष्यते ॥ २१ ॥

तस्यामपि हि जिज्ञासायामपि हि सत्यां, कश्चित्पुरुषाभिभवः, प्रकृतेर्हीयते निवर्तते, न ह्येकान्तेनाक्षीणपापस्य विमलो भावः क्षमयति, तेनैतत्कोपेन्द्रोक्तं युक्तम्। अधिकमपरिणाम्यात्मपक्षे तदभिभवतत्क्षेत्रकृत्याद्यनुपपत्तिलक्षणम्, उपरिष्टादग्रिमद्वात्रिंशिकायां, भणिष्यते ॥ २१ ॥

भावस्य मोक्षहेतुत्वं, तेन मोक्षे व्यवस्थितम्।
तस्यैव चरमाऽऽवर्त्ते, क्रियाया अपि योगतः ॥ २२ ॥

तेन भावस्यान्त्य परिणामस्य, मोक्षे मुख्यहेतुत्वं व्यवस्थितं, तेन स एव योग इत्युक्तं भवति। तस्यैव योगतश्चरमाऽऽवर्ते क्रियाया अपि मोक्षे मुख्यहेतुत्वम्, अतस्तस्या अपि योगत्वमिति भावः ॥ २२ ॥

रसानुवेधात्साध्यस्य, हेमत्वं जायते यथा।
क्रियाया अपि सम्यक्त्वं, तथा भावानुवेधतः ॥ २३ ॥

साध्यस्य रसानुवेधात्सिद्धरससंपर्कात्, यथा हेमत्वं जायते, तथा क्रियाया अपि भावानुवेधतः सम्यक्त्वं मोक्षसंपादनशक्तिरूपम् ॥ २३ ॥

भावसाम्ये त एवास्याः, भङ्गेऽपि व्यक्तमन्वयः।
सुवर्णघटतुल्यां तां, श्रुते सौगता अपि ॥ २४ ॥

अत एवास्याः क्रियाया भावसाम्ये स्वजननशक्त्या भावव्याप्तिलक्षणे सति, भङ्गेऽपि तथाविधकषायोदयाद्याशेऽपि, व्यक्तं प्रकटम्, अन्वयो भावानुवृत्तिलक्षणः, तदुव्यक्त्यभावेऽपि तच्छक्त्यन्वयमात्रात्। अत एव तां भावयुक्तां क्रियां, सौगता अपि सुवर्णघटतुल्यां श्रुते। यथा हि सुवर्णघटो भिद्यमानोऽपि न सुवर्णानुबन्धं मुञ्चति, एवं शुभक्रिया तथाविधकषायोदयाद्भङ्गेऽपि शुभफलैवेति। तदिदमुक्तम्-"भावशुद्धिरतोऽवश्यं, सानुबन्धं शुभोदयम्। गीयतेऽन्यैरपि ह्येतत्, सुवर्णघटसन्निभम् ॥ ३५१ ॥" (यो० बिं०) इति ।२४।

शिरोदकसमो भावः, क्रिया च खननोपमा।
भावपूर्वादनुष्ठानाद्, भाववृद्धिरतो ध्रुवा ॥२५॥

शिरोदकसमस्तथाविधकूपे सहजप्रवृत्तशिराजलतुल्यो भावः, क्रिया च खननोपमा शिराऽऽश्रयकूपाऽऽदिखननरूपेति, अतो भावपूर्वादनुष्ठानाद्भाववृद्धिर्ध्रुवा, जलवृद्धौ कूपखननस्येव भाववृद्धौ क्रियाया हेतुत्वाद्भावस्य दलत्वेऽपि बहुदलमेलनरूपाया वृद्धेस्तदन्वयव्यतिरेकानुविधानात् ॥ २५ ॥

मण्डूकचूर्णसदृशः, क्लेशध्वंसः क्रियाकृतः।
तद्भस्मसदृशस्तु स्याद्, भावपूर्वक्रियाकृतः ॥ २६ ॥

क्रियाकृतः केवलक्रियाजनितः, क्लेशध्वंसो रागाऽऽदिपरिक्षयः, मण्डूकचूर्णसदृशः, पुनरुत्पत्तिशक्त्यन्वितत्वात्। भावपूर्वक्रियाकृतस्तु तद्भस्मसदृशो मण्डूकभस्मसदृशः स्यात्, पुनरुत्पत्तिशक्त्यनावात्। एवं च क्लेशध्वंसविशेषजनकः शक्तिविशेष एव क्रियायां भावशुद्ध्यनुकूल इति फलितम् ॥ २६ ॥

तथा च-

विचित्रभावद्वारा तत्, क्रिया हेतुः शिवं प्रति।
अस्या व्यञ्जकताऽप्येषा, परा ज्ञाननयोचिता ॥२७॥

विचित्रो भावोऽध्यात्माऽऽदिरूपः, तद्द्वारा क्रिया, शिवं प्रति हेतुः, दण्ड इव चक्रभ्रमिद्वारा घटे। करणता च तस्याः शक्तिविशेषेण, न तु भावपूर्वकत्वेनैव, भावस्यान्यथासिद्धिप्रसङ्गात्। अस्याः क्रियायाः, व्यञ्जकताऽप्येषा हेतुना विशेषरूपा परा। अत एव ज्ञानस्य ज्ञापकत्वरूपाऽप्यस्य व्यञ्जकता ज्ञाननयोचिता ज्ञाननयप्राधान्योपयुक्ता, न तु व्यवहारतो वास्तवी, अन्यथा सत्कार्यवादप्रसङ्गादिति भावः ॥ २७ ॥

व्यापारश्चिद्विवर्तत्वाद्, वीर्योल्लासाच्च स स्मृतः।
विविच्यमाना नित्यन्ते, परिणामा हि वस्तुनः ॥२८॥

स योगः, चिद्विवर्तत्वाद् ज्ञानपरिणामाद्, वीर्योल्लासादात्मशक्तिस्फोरणाच्च, व्यापारः स्मृतः, क्रमवतः प्रवृत्तिविषयस्य व्यापारत्वात्। एतेन ऊर्ध्वाऽऽदेर्व्यवच्छेदः। हि यतो, विविच्यमाना भेदनयेन गृह्यमाणा, वस्तुनः परिणामा भिद्यन्ते। तथा च-न व्यापाराऽऽश्रयस्यापि व्यापारत्वमिति भावः ॥ २८ ॥

एतदेवाऽऽह-

जीवस्थानानि सर्वाणि, गुणस्थानानि मार्गणाः।
परिणामा विवर्तन्ते, जीवस्तु न कदाचन ॥ २९ ॥

सर्वाण्यपि चतुर्दशापि जीवस्थानानि गुणस्थानानि तावन्त्येव, मार्गणा गतीन्द्रियाऽऽद्याः परिणामा विवर्तन्ते-दशाविशेषं भजन्ते, जीवस्तु कदाचन न विवर्तते, तस्य शुद्धायकभावस्यैकस्वभावत्वात् ॥ २९ ॥

उपाधिः कर्मणैव स्या-दाचाराऽऽद्यो श्रुतं ह्यदः ।
विज्ञानादिनित्यज्ञानेऽपि, ततो नित्यः स्वभाववान् ॥ ३० ॥

आचाराऽऽद्यो ह्यदः श्रुतम्-यदुत उपाधिः कर्मणैव स्यात्, "कम्मुणा उवाही जायति त्ति" वचनात्। ततो विभावानां मिथ्यात्वगुणस्थानादारभ्ययोगिगुणस्थानं यावत् प्रवर्तमानानामौपाधिकभावानाम्, अनित्यभावेऽपि स्वज्ञानवानात्मा नित्यः, तस्योपाध्यजनितत्वात्. उपाधिनिमित्तका अप्यात्मनो भावास्तद्रूपा एव युज्यन्ते इति चेत्। सत्यम्। शुद्धनयदृष्ट्याऽऽत्मपुद्गलयोः स्वस्वशुद्धभावजननचरितार्थत्वे संयोगजभावस्य भित्तौ खटिकाश्वेतिम इव विविच्यमानस्यैकत्राप्यनन्तभावेन मिथ्यात्वात् ॥ ३० ॥

द्रव्याऽऽदेः स्यादनेदेऽपि, शुद्धनेदनयाऽऽदिना ।
इत्थं व्युत्पादनं युक्तं, नयसारा हि देशना ॥ ३१ ॥

द्रव्याऽऽदेः परिणामेभ्यः स्यात् कथञ्चिदभेदेऽपि शुद्धः केवलो यो नेदनयस्तदादिना, इत्थमुक्तरीत्या,व्युत्पादनं युक्तम्। नयसारा नयप्रधाना हि देशना शास्त्रे प्रवर्तते, अन्यथाऽनुयोगपरिणत आत्माऽपि योग इतीष्यत एव, चरणाऽऽत्मनोऽपि जगवत्यां प्रतिपादनादिति भावः ॥ ३१ ॥

योगलक्षणमित्येवं, जानानो जिनशासने ।
परोक्तानि परीक्षेत, परमाऽऽनन्दवृद्धीः ॥ ३२ ॥

योगलक्षणमिति स्पष्टम् ॥ ३२ ॥ द्वा० १० द्वा० ।

(१३) स्वकीयं योगलक्षणमन्यदीययोगलक्षणे विचारिते सति स्थिरीनवर्तीति तदर्थमयमारम्भः-

चित्तवृत्तिनिरोधं तु, योगमाह पतञ्जलिः ।
द्रष्टुः स्वरूपावस्थानं, यत्र स्यादविकारिणि ॥ १ ॥

पतञ्जलिस्तु चित्तवृत्तिनिरोधं योगमाह। तथा च सूत्रम्-"योगश्चित्तवृत्तिनिरोधः।" (१-२) इति। तत्र चित्तपदार्थं व्याचष्टे-द्रष्टुः पुरुषस्य, स्वरूपे चिन्मात्ररूपतायाम्, अवस्थानं यत्र यस्मिन् स्यात्, अविकारिणि व्युत्पन्नविवेकख्यातेश्चित्संक्रमाभावात् कर्तृत्वाभिमाननिवृत्तौ प्रोन्मुक्तपरिणामेन। तथा च सूत्रम्-"तदा द्रष्टुः स्वरूपेऽवस्थानमिति।" (१-३) ॥ १ ॥

आपन्ने विषयाऽऽकारं, यत्र चेन्द्रियवृत्तितः ।
पुमान् भाति तया चन्द्र-श्चलनीरे चलन् यथा ॥ २ ॥

यत्र चेन्द्रियवृत्तित इन्द्रियवृत्तिद्वारा, विषयाऽऽकारमापन्ने विषयाऽऽकारपरिणते सति, पुमान् पुरुषस्तथा भाति यथा चलनीरे चलन् चन्द्रः, स्वगतधर्माध्यारोपाधिष्ठानत्वेन प्रतीयत इत्यर्थः। तथा च सूत्रम्-"वृत्तिसारूप्यमितरत्रेति।" (१-४) ॥ २ ॥

तच्चित्तं वृत्तयस्तस्य, पञ्चतयः प्रकीर्तिताः ।
मानं भ्रमो विकल्पश्च, निद्रा च स्मृतिरेव च ॥ ३ ॥

तच्चित्तं तस्य वृत्तिसमुदायस्वरूपस्यावयविनोऽवयवभूताः पञ्चतय्यो वृत्तयः प्रकीर्तिताः। तदुक्तम्-" वृत्तयः पञ्चतय्यः क्लिष्टाक्लिष्टाः।" (सांख्य० १-३२) ('आक्षिप्तः' योग० १-५) क्लिष्टाः क्लेशाऽऽक्रान्ताः, तद्विपरीता अपि तावत्य एव। ता एवोद्दिशति-मानं प्रमाणम्, भ्रमो, विकल्पो, निद्रा च, स्मृतिरेव च। तदाह-" प्रमाणविपर्ययविकल्पनिद्राः स्मृतयः।" (१-६) ॥ ३ ॥

आत्मां क्रमेण लक्षणमाह-

मानं ज्ञानं यथार्थं स्या-दतस्मिंस्तत् मतिर्भ्रमः ।
पुंसश्चैतन्यमित्यादौ, विकल्पोऽवस्तुशाब्दधीः ॥ ४ ॥
निद्रा च वासनाऽऽलम्ब-प्रत्ययाऽऽलम्बना स्मृता ।
सुखाऽऽदिविषया वृत्ति-र्जागरे स्मृतिदर्शनात् ॥ ५ ॥
तथाऽनुभूतविषया-संप्रमोषः स्मृतिः स्मृता ।
आसां निरोधः शक्त्याऽन्तः-स्थितिर्हेतौ बहिर्हृतिः ॥६॥

मानं यथार्थं तद्भवति तदाह-"अविसंवादि ज्ञानं प्रमाणमिति।" भ्रमोऽतस्मिंस्तद्भावबति तन्मतिः। यदाह-" विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठम्। " (१-७) संशयोऽपि स्थाणुर्वा पुरुषो वेत्यतद्रूपप्रतिष्ठत्वादत्रैवान्तर्भवति । पुंसश्चैतन्यमित्यादौ अवस्तुविषया शाब्दधीर्विकल्पः। अत्र हि देवदत्तस्य कम्बल इतिवत् शब्दजनिते ज्ञाने षष्ठ्यर्थो भेदोऽध्यवसीयते, तमिहाविद्यमानमपि समारोप्य प्रवर्तनेऽध्यवसायः। चस्तुतस्तु चैतन्यमेव पुरुष इति। तदाह-" शब्दज्ञानानुपाती वस्तुशून्यो (असदर्थव्यवहारविषयो) विकल्पः।" (१-९) इति। भ्रमविशेष एवायमस्त्विति चेत्। न। तथाविधशब्दजन्यज्ञानकतावेनास्य विलक्षणत्वात्.विषयाजावज्ञानेऽपि प्रवृत्तेश्च। यद्भोजः "वस्तुनस्तथात्वमनपेक्षमाणो योऽध्यवसायः स विकल्प इत्युच्यते" इति ॥४॥ अभावप्रत्ययाऽऽलम्बना भावप्रत्ययाऽऽलम्बनविरहिता वासना च निद्रा स्मृता, सन्ततमुद्भिक्तत्वात्तमसः। समस्तविषयपरित्यागेन या प्रवर्तत इत्यर्थः। तदाह-"अभावप्रत्ययाऽऽलम्बना वृत्तिर्निद्रा।" (१-१०) इयं च जागरे जाग्रदवस्थायां स्मृतिदर्शनात् सुखमहमस्वाप्समिति स्मृत्यालोचनात्सुखाऽऽदिविषया वृत्तिः,स्वापकाले सुखाननुभवे तदा तत्स्मृत्यनुपपत्तेः ॥५॥ तथाऽनुभूतविषयस्य प्रमाणविपर्ययविकल्पनिद्राऽनुभूतार्थस्यासंप्रमोषः संस्कारद्वारेण बुद्धावुपारोहः स्मृतिः स्मृता। तदाह-"अनुभूतविषयासंप्रमोषः स्मृतिरिति।" (१-११) आसामुक्तानां पञ्चानामपि वृत्तीनाम्,हेतौ स्वकारणे,शक्त्या शक्तिरूपतया, अन्तर्बाह्याभिनिवेशनिवृत्त्याऽन्तर्मुखतया स्थितिरवस्थानं, बहिर्हृतिः प्रकाशप्रवृत्तिनियमरूपविघातः। एतदुभयं निरोध उच्यते ॥ ६ ॥

स चाभ्यासाच्च वैराग्या-च्चाभ्यासः स्थितौ श्रमः ।
दृढभूमिः स च चिरं, नैरन्तर्याऽऽदराऽऽश्रितः ॥ ७ ॥

स चोक्तलक्षणो निरोधश्च अभ्यासाद्वैराग्याच्च भवति। तदुक्तम्-" अभ्यासवैराग्याभ्यां तन्निरोध इति।" (१-१२) तत्राभ्यासः स्थितौ वृत्तिरहितस्य चित्तस्य स्वरूपनिष्ठे परिणामे श्रमो यत्नः पुनःपुनस्तथात्वेन चेतसि निवेशनरूपः। तदाह-" तत्र स्थितौ यत्नोऽभ्यास इति।" (१-१३) स च चिरं चिरकालं नैरन्तर्येणाऽऽदरेण चाऽऽसेवितो दृढभूमिः स्थिरो भवति। तदाह-"स तु दीर्घकालनैरन्तर्यसत्कारसेवितो दृढभूमिरिति।" (१-१४) ॥ ७ ॥

या वशीकारसंज्ञा स्याद्, दृष्टाऽऽनुश्रविकार्थयोः ।
वितृष्णस्यापरं तत् स्या-द्वैराग्यमनधीनता ॥ ८ ॥

इह दृष्टैर्वोपलभ्यमानः शब्दाऽऽदिः,आनुश्रविकश्चार्थो देवलोकाऽऽ-

दिः। अनुश्रूयते गुरुमुखादित्यनुश्रवो वेदः,ततः प्रतीयमान आनुश्रविक इति व्युत्पत्तेः। तयोः परिणामविरसत्वदर्शनाद्, वितृष्णस्य विगतगर्धस्य, या वशीकारसंज्ञा 'ममैवैते वश्या नाहमेतेषां वश्यः' इत्येवं विमर्शाऽऽत्मिका। तदपरं वक्ष्यमाणपरवैराग्यात्पाश्चात्यं वैराग्यं स्यात् अनधीनता फलतः पराधीनताऽभावरूपम्। तदाह-"दृष्टाऽऽनुश्रविकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्यमिति।" (१-१५) ॥ ८ ॥

तत्परं जातपुंख्याते-र्गुणवैतृष्ण्यसंज्ञकम्।
बहिर्वैमुख्यमुत्पाद्य, वैराग्यमुपयुज्यते ॥ ९ ॥

जातपुंख्यातेरुत्पन्नगुणपुरुषविवेकख्यातेः,गुणवैतृष्ण्यसंज्ञकं गुणेष्वपि तृष्णाऽभावलक्षणम्,यथार्थाभिधानं,परं प्रकृष्टं, तद्वैराग्यम्। तदाह-"तत्परं पुरुषख्यातेर्गुणवैतृष्ण्यमिति।"(१-१६) प्रथमं हि विषयविषयं, द्वितीयं च गुणविषयमिति भेदः। बहिर्वाह्यविषये वैमुख्यं दोषदर्शनजन्यत्वात्प्रवृत्त्यभावलक्षणमुत्पाद्य वैराग्यमुपयुज्यते उपकाराऽऽधायकं भवति ॥ ९ ॥

निरोधे पुनरभ्यासो, जनयन स्थिरतां दृढाम्।
परमाऽऽनन्दनिष्यन्द-शान्तस्रोतःप्रदर्शनात् ॥ १० ॥

निरोधे चित्तवृत्तिनिरोधे, अभ्यासः पुनर्दृढामतिशयितां स्थिरतामवस्थितिलक्षणां जनयन्,परमाऽऽनन्दनिष्यन्दस्यातिशयितसुखार्णवनिर्झरभूतस्य शान्तस्रोतसः शान्तरसप्रवाहस्य प्रदर्शनात्, उपयुज्यते इत्यन्वयः। तत्रैव सुखमग्नस्य मनसोऽन्यत्र गमनायोगात्। इत्थं च 'चित्तवृत्तिनिरोधः' इति योगलक्षणं सोपपत्तिकं व्याख्यातम् ॥ १० ॥

(१४) अथ तदुपयन्नाह-

न चैतद्युज्यते किञ्चि-दात्मन्यपरिणामिनि।
कूटस्थे स्यादसंसारो-ऽमोक्षो वा तत्र हि ध्रुवम् ॥११॥

न चैतत् पूर्वोक्तं किञ्चिदपरिणामिनि आत्मनि युज्यते, तस्मिन्नाऽऽत्मनि हि कूटस्थे एकान्तिकस्वभावे सति असंसारः संसाराभाव एव स्यात्,पुष्करपत्रवन्निर्लेपस्य तस्याविचलितस्थभावत्वात्। प्रकृतिविकारोपहितस्वभावे च तस्मिन् संसारदशाऽऽमभ्युपगम्यमाने, ध्रुवं निश्चितममोक्षो मोक्षाभावो वा स्यात्, मुक्तिदशायां पूर्वस्वभावस्य त्यागे कौटस्थ्यहानिप्रसङ्गात् ॥११॥

प्रकृतेरपि चैकत्वे, मुक्तिः सर्वस्य नैव वा।
जगायाश्च पुमर्थस्य, कर्तव्यत्वमयुक्तिमत् ॥ १२ ॥

प्रकृतेरपि चैकत्वेऽभ्युपगम्यमाने सर्वस्य मुक्तिः स्यात्, नैव वा कस्यचित्स्यात्। एकं प्रति विलीनोपधानायास्तस्याः सर्वान् प्रति तथात्वात्, एकं प्रत्यतादृश्याश्च सर्वान् प्रत्यतथात्वात्। अन्यथा स्वभावभेदे प्रकृतिभेदप्रसङ्गात्। किं च-आत्मनोऽव्याप्रियमाणस्य भोगसंपादनार्थमेव प्रकृतिः प्रवर्त्तत इति नवतामभ्युपगमः। तदुक्तम्-"द्रष्टा दृशिमात्रः शुद्धोऽपि प्रत्ययानुपश्यः।" (२-२०) "तदर्थ एव दृश्यस्याऽऽत्मेति।" (२-२१) जगायाश्च तस्याः पुमर्थस्य कर्त्तव्यत्वमयुक्तिमत्। पुरुषार्थो मया कर्त्तव्य इत्येवं विधाध्यवसायो हि पुरुषार्थकर्त्तव्यता, तत्स्वभावे च प्रकृतेर्जैमत्वव्याघात इति ॥ १२ ॥

अत्र स्वसिद्धान्ताऽऽशयं प्रकटयन् पूर्वपक्षी शङ्कते-

ननु चित्तस्य वृत्तीनां, सदा ज्ञानानिबन्धनात्।
चिच्छायासंक्रमाद्धेतो-रात्मनोऽपरिणामिता ॥ १३ ॥

ननु चित्तस्य वृत्तीनां प्रमाणाऽऽदिरूपाणाम्,सदा सर्वकालमेव, ज्ञानानिबन्धनात्परिच्छेददृढेतोः। चिच्छायासंक्रमाद्धेतोर्बुद्धिज्ञादात्मनोऽपरिणामिताऽनुमीयते। इदमुक्तं भवति-पुरुषस्य चिद्रूपस्य सदैवाधिष्ठातृत्वेन सिद्धस्य यदन्तरङ्गं निर्मलं श्लेयं सत्त्वं, तस्यापि सदैव व्यवस्थितत्वात्तेनार्थेनोपरक्तं भवति तथाविधस्य दृश्यस्य चिच्छायासंक्रान्तिसद्भावात् सदा ज्ञातृत्वं सिद्धं भवति। परिणामित्वे त्वात्मनश्चिच्छायासंक्रमस्यासार्वदिकत्वात् सदा ज्ञातृत्वं न स्यादिति। तदिदमुक्तम्-"सदा ज्ञाताश्चित्तवृत्तयः तत्प्रभोः पुरुषस्यापरिणामित्वादिति"। (४-१८) ॥ १३ ॥

ननु चित्तमेव सत्त्वोत्कर्षाद्यदि प्रकाशकं तदा तस्य स्वप्रकाशरूपत्वादर्थस्येवाऽऽत्मनोऽपि प्रकाशकत्वेन व्यवहारोपपत्तौ किं प्रधानान्तरेण ?, इत्यत आह-

स्वाऽऽभासं खलु नो चित्तं, दृश्यत्वेन घटाऽऽदिवत्।
तदन्यदृश्यतायां चा-नवस्थास्मृतिसङ्करौ ॥ १४ ॥

चित्तं खलु,नो नैव,स्वाऽऽभासं स्वप्रकाशं,किं तु द्रष्टृवेद्यं,दृश्यत्वेन दृग्विषयत्वेन,घटाऽऽदिवत्। यद् यद् दृश्यं तत्तद् द्रष्टृवेद्यमिति व्याप्तेः। तदिदमुक्तम्-"न तत् स्वाभासं दृश्यत्वात्।" (४-१९) अन्तर्बहिर्मुखव्यापारद्वयविरोधात्, तच्चिष्पाद्यफलद्वयस्यासंवेदनाच्च बहिर्मुखतयैवार्थनिष्ठत्वेन चित्तस्य संवेदनार्थनिष्ठमेव तत्फलं, न स्वनिष्ठमिति राजमार्त्तण्डः। तथापि चित्तान्तरदृश्यं चित्तमस्त्वित्यत आह-तदन्यदृश्यतायां च चित्तान्तरदृश्यतायां च, चित्तस्याभ्युपगम्यमानायामनवस्थास्मृतिसङ्करौ स्याताम्। तथाहि-यदि बुद्धिर्बुद्ध्यन्तरेण वेद्येत तदा साऽपि बुद्धिः स्वयं बुद्ध्या बुद्ध्यन्तरं प्रकाशयितुमसमर्थेति, तस्या ग्राहकं बुद्ध्यन्तरं कल्पनीयम्, तस्याप्यन्यदित्यनवस्थानात्पुरुषायुषः सहस्रेणाप्यर्थप्रतीतिर्न स्यात्। न हि प्रतीतावप्रतीतायामर्थः प्रतीतो भवति। तथा स्मृतिसङ्करोऽपि स्यात्। एकस्मिन् रूपे, रसे वा समुत्पन्नायां बुद्धौ तद्ग्राहिकाणामनन्तानां बुद्धीनामुत्पत्तेस्तज्जनितसंस्कारैर्युगपद् बहीषु स्मृतिपूत्पन्नासु कस्मिन्नर्थे स्मृतिरियमुत्पन्नेति ज्ञातुमशक्यत्वात्। तदाह-"एकसमये चोभयानवधारणम्।" (४-२०) "चित्तान्तरादृश्ये बुद्धिबुद्धेरतिप्रसङ्गः स्मृतिसङ्करश्चेति" (४-२१) ॥ १४ ॥

नन्वेवं कथं विषयव्यवहार इत्यत्राऽऽह-

अङ्गाङ्गिभावचाराभ्यां, चितिरप्रतिसंक्रमा।
द्रष्टृदृश्योपरक्तं तत्, चित्तं सर्वार्थगोचरम् ॥ १५ ॥

चितिः पुरुषरूपा चिच्छक्तिः,अङ्गाङ्गिभावचाराभ्यां परिणामपरिणामिभावगमनाभ्याम्, अप्रतिसंक्रमाऽन्येनासंकीर्णा। यथा हि गुणाः स्वबुद्धिगमनलक्षणे परिणामेऽङ्गिनमुपसंक्रामन्ति तद्रूपतामिवाऽऽपद्यन्ते,यथा चाऽऽलोकपरमाणवः प्रसरन्तो विषयं व्याप्नुवन्ति, नैवं चितिशक्तिः,तस्याः सर्वदैकरूपतया स्वप्रतिष्ठितत्वेन व्यवस्थितत्वादित्यर्थः। तत्सान्निध्यप्रधाने बुद्धेस्तदाकारताऽऽपत्तौ चेतनायामिवोपजायमानायां, बुद्धिवृत्तिप्रतिसंक्रान्तायाश्च चिच्छक्तेर्बुद्धिविशिष्टतया संपत्तौ स्वसंबुध्युपपत्तेरित्यर्थः। द्रष्टृदृश्याभ्यामुपरक्तं द्रष्टृरूपतामिवाऽऽपन्नं, गृहीतविषयाऽऽकारपरिणामं च चित्तं, सर्वार्थगोचरं सर्वविषयग्रहणसमर्थं भवति। तदुक्तम्-"चितेरप्रतिसंक्रमायास्तदाऽऽकाराऽऽपत्तौ स्वबु

किंसंवेदनम्।"(४-२२)"द्रष्टृदृश्योपरक्तं चित्तं सर्वार्थम्।"(४-२३) यथा हि निर्मलं स्फटिकदर्पणाऽऽद्येव प्रतिबिम्बग्रहणसमर्थम्,एवं रजस्तमोऽभ्यामनभिभूतं सत्त्वं शुद्धत्वाच्चिच्छायाग्रहणसमर्थं, न पुनरशुद्धत्वाद्रजस्तमसी। ततो व्यक्तभूतरजस्तमोरूपमलिनतया सत्त्वं निश्चलप्रदीपशिखाऽऽकारं सदैवैकरूपतया परिणममानं चिच्छायाग्रहणसामर्थ्यादामोक्षप्राप्तेरवतिष्ठते, यथाऽयस्कान्तसन्निधाने लोहस्य चलनमाविर्भवति, एवं चिद्रूपपुरुषसन्निधाने सत्त्वस्याभिव्यङ्ग्यमभिव्यज्यते चैतन्यमिति ॥ १५ ॥

इत्थं च द्विविधा चिच्छक्तिरित्याह-

नित्योदिता त्वनिव्यङ्ग्या, चिच्छक्तिर्द्विविधा हि नः ।
आद्या पुमान् द्वितीया तु, सत्त्वे तत्सन्निधानतः ॥ १६ ॥

नित्योदिता, तु पुनः,अनिव्यङ्ग्या, द्विविधा हि नः-अस्माकं चिच्छक्तिः-आद्या नित्योदिता पुमान् पुरुष एव, द्वितीयाऽनिव्यङ्ग्या तु,तत्सन्निधानतः पुंसः सामीप्यात्,सत्त्वे सत्त्वनिष्ठा। यङ्भोजः- " अत एवास्मिन् दर्शने द्वे चिच्छक्ती-नित्योदिता, अभिव्यङ्ग्या च। नित्योदिता चिच्छक्तिः पुरुषः तत्सन्निधानाभिव्यक्तयाऽभिव्यङ्ग्यं चैतन्यं सत्त्वमभिव्यङ्ग्या चिच्छक्तिरिति ॥ १६ ॥

इत्थं च भोगोपपत्तिमप्याह-

सत्त्वे पुंस्थितचिच्छाया-समाऽन्या तदुपस्थितिः ।
प्रतिबिम्बाऽऽत्मको भोगः, पुंभि भेदाऽऽग्रहादयम् ॥१७॥

सत्त्वे बुद्धेः सात्त्विकपरिणामे, पुंस्थिता या चिच्छाया, तत्समा याऽन्या, सा स्वकीयचिच्छाया, तस्या उपस्थितिरभिव्यक्तिः, प्रतिबिम्बाऽऽत्मको भोगः। अन्यत्रापि हि प्रतिबिम्बे प्रतिबिम्ब्यमानच्छायासदृशच्छायान्तरोद्भव एव प्रतिबिम्बशब्देनोच्यते। पुंसि पुनरयं भोगो भेदाऽऽग्रहादत्यन्तसान्निध्येन विवेकाग्रहणाद् व्यपदिश्यते । यत्तु व्यापकस्यातिनिर्मलस्य चाऽऽत्मनः कथं सत्त्वे प्रतिबिम्बनमिति ?। तत्र । व्यापकस्याप्याकाशस्य दर्पणाऽऽद्यवप्रकृष्टनैर्मल्यवति च जलाऽऽदावादित्याऽऽदीनां प्रतिबिम्बदर्शनात् स्वस्थितचिच्छायासदृशचिच्छायाऽभिव्यक्तिरूपस्य प्रतिबिम्बस्य प्रतिबिम्बान्तरवैलक्षण्याच्चेति भोजः ॥ १७ ॥

इत्थं प्रत्यात्मनियतं, बुद्धितत्त्वं हि शक्तिमत् ।
निर्वाहे लोकयात्रायाः, ततः क्लृप्तिप्रसञ्जनम् ? ॥ १८ ॥

इत्थमुक्तप्रकारेण, प्रत्यात्मनियतम् आत्मानमात्मानं प्रति नियतफलसंपादकम् । बुद्धितत्त्वं हि लोकयात्रायाः लोकव्यवहारस्य निर्वाहे व्यवस्थापने,शक्तिमत्समर्थम्,ततः क्लृप्तिप्रसञ्जनं, योगादेकस्य मुक्तावन्यस्यापि मुक्त्यापत्तिरूपं, प्रकृतेः सर्वत्रैकत्वेऽपि बुद्धिव्यापारभेदेन भेदोपपत्तेः। तथा च सूत्रम्-" कृतार्थं प्रति नष्टमप्यनष्टं तदन्यसाधारणत्वादिति । " (४-२२) ॥ १८ ॥

यदुक्तम्-"जडायाश्च पुमर्थस्य" इत्यादि, तत्राऽऽह-

कर्तव्यत्वं पुमर्थस्या-नुलोम्यप्रातिलोम्यतः ।
प्रकृतौ परिणामानां, शक्ती स्वाभाविके उभे ॥ १९ ॥

पुमर्थस्य कर्तव्यत्वं प्रकृतौ परिणामानां महदादीनाम, आनुलोम्यप्रातिलोम्यतः, उभे शक्ती स्वाभाविके स्वभावसिद्धे, पुमर्थे सतीति शेषः । न त्वन्यद्, महदादिमहाभूतपर्यन्तः खल्वस्या बहिर्मुखतयाऽनुलोमः परिणामः, पुनः स्वकारणानुप्रवेशद्वारेणास्मितान्तःप्रतिलोमः परिणामः । इत्थं च पुरुषस्य भोगपरिसमाप्तेः सहजशक्तित्वचक्रयात् कृतार्था प्रकृतिः, न पुनः परिणाममारभते । एवंविधायां च पुरुषार्थकर्तव्यतायां प्रकृतेर्जडत्वेन कर्तव्याध्यवसायाभावेऽपि न काचिदनुपपत्तिरिति ॥ १९ ॥

ननु यदि प्रतिलोमशक्तिरपि सहजैव प्रधानस्यास्ति, तत् किमर्थं योगिभिर्मोक्षार्थं यत्नः क्रियते ? । मोक्षस्य चानर्थनीयत्वे तदुपदेशकशास्त्रस्याप्यानर्थक्यमित्यत आह-

न चैवं मोक्षशास्त्रस्य, वैयर्थ्यं प्रकृतेर्यतः ।
ततो दुःखनिवृत्यर्थं, कर्तृत्वस्मयवर्जनम् ॥ २० ॥

न चैवं मुक्तौ प्रकृतेरेव सामर्थ्ये,मोक्षशास्त्रस्य वैयर्थ्यमानर्थक्यं, यतो यस्मात्,ततो मोक्षशास्त्राद्,दुःखनिवृत्यर्थं दुःखनाशाय,प्रकृतेः प्रधानस्य,कर्तृत्वस्मयस्य कर्तृत्वाभिमानस्य, वर्जनं निवृत्तिर्भवति । अनादिरेव हि प्रकृतिपुरुषयोर्जोक्तृभोग्यभावलक्षणः संबन्धः, तस्मिन् सति, व्यक्तमचेतनायाः प्रकृतेः कर्तृत्वाभिमानाद् दुःखानुभवे सति 'कथमियं दुःखनिवृत्तिरात्यन्तिकी मम स्यात्' इति जन्तोरध्यवसायः, अतो दुःखनिवृत्युपायोपदेशकशास्त्रोपदेशापेक्षाऽप्यस्य युक्तिमतीति ॥ २० ॥

व्यक्तं कैवल्यपादेऽदः, सर्वं साध्विति चेन्न तत् ।
एवं हि प्रकृतेर्मोक्षो, न पुंसस्तददो वृथा ॥ २१ ॥

कैवल्यपादे योगानुशासनचतुर्थपादे, अदः एतत्, व्यक्तं प्रकटं, सर्वमखिलं, साधु निर्दोषमिति। समाधत्ते-इति चेन्न तत्, यत्प्राक् प्रपञ्चितं, हि यतः, एवमुक्तरीत्या, प्रकृतेर्मोक्षः स्यात्,तस्या एव कर्तृत्वाभिमाननिवृत्त्या दुःखनिवृत्युपपत्तेः,न पुंसः,तस्याबन्धत्वेन मुक्त्ययोगाद्, मुचेर्बन्धनविश्लेषार्थत्वात् । तत्तस्माददो वक्ष्यमाणं भवदभ्युपेतं, वृथा कण्ठशोषमात्रफलम् ॥ २१ ॥

पञ्चविंशतितत्त्वज्ञो, यत्र तत्राऽऽश्रमे रतः ।
जटी मुण्डी शिखी वाऽपि, मुच्यते नात्र संशयः ॥२२॥

अत्र हि पञ्चविंशतितत्त्वज्ञानात् पुरुषस्यैव मुक्तिरुक्ता, सा च न संभवतीति । न च भोगव्यपदेशवन्मुक्तिव्यपदेशोऽप्युपचारादेव पुंसि संभवतीति वाच्यम्; एवं हि तत्र चैतन्यस्याप्युपचारेण सुखत्वाऽऽपत्तेः। बाधकाभावात्र तत्र तस्योपचार इति चेत्, तत्र कुत्याऽऽदिसामानाधिकरण्यस्याप्यनुभूयमानस्य किं बाधकम् ?,येन तेषां भिन्नाऽऽश्रयत्वं कल्प्यते। आत्मनः परिणामित्वाऽऽपत्तिर्बाधिकेति चेद्, न । तत्परिणामित्वेऽप्यन्वयानपायात्,अन्यथा चित्तस्यापि तदनापत्तेः,प्रतिक्षणं चित्तस्य नश्वरत्वोपलब्धेः। "अतीतानागतं स्वरूपतोऽस्त्यध्वभेदो धर्माणाम्।" (४-१२) "ते व्यक्तसूक्ष्मगुणाऽऽत्मानः।" (४-१३) "परिणामैकत्वाद् वस्तुतत्त्वम्।" (४-१४) सूत्रपर्यालोचनाद्धर्मभेदेऽपि तेषामङ्गाङ्गिभावपरिणामैकत्वाद् न चित्तान्वय इति चेत्, तदेतदात्मन्येव पर्यालोच्यमानं शोभते, कूटस्थत्वश्रुतेः शरीराऽऽदिभेदपरत्वेनाप्युपपत्तेरिति सम्यग् विभावनीयम् ॥ २२ ॥

किञ्च-

बुद्ध्या सर्वोपपत्तौ च, मानमात्मनि मृग्यते ।
संहत्यकारिता मानं, पारार्थ्यनियता च न ॥ २३ ॥

बुद्धया महत्तत्त्वेन, सर्वोपपत्तौ सकलव्यवहारनिर्वाहे च सति, आत्मनि मानं प्रमाणं मृग्यते । कृत्याऽऽद्याश्रयव्यतिरिक्ते आत्मनि प्रमाणमन्वेषणीयमित्यर्थः । न च पारार्थ्यनियता परा-

थैकत्वव्याप्या, संहत्यकारिता संभूयमिलितार्थाकेवाकारिता, आत्मतिरिक्ताऽऽत्मानि प्रमाणं,यत्संहत्यार्थक्रियाकारि तत्परार्थं दृष्टम्, यथा शय्याशयनाऽऽसनाऽऽद्यर्थाः । सत्त्वरजस्तमांसि च त्रिलक्षणपरिणामभाञ्जि संहत्यकारीणि,अतः परार्थानि, यश्च परः स पुरुष इति । तदुक्तम्-" तदसंख्येयवासनाभिश्चित्रमपि परार्थं, संहत्यकारित्वादिति । " (४ २४) ॥ २३ ॥

कुतः ?, इत्याह-

सत्त्वाऽऽदीनामपि स्वाङ्गि-न्युपकारोपपत्तितः ।
बुद्धिर्नामैव पुंस्तत्, स्याच्च तत्त्वान्तरव्ययः ॥ २४ ॥

सत्त्वाऽऽदीनां धर्माणां, स्वाङ्गिन्यपि स्वाऽऽश्रयेऽपि, उपकारोपपत्तितः फलाऽऽधानसंजनयानुकूलनियमे मानाभावात् सत्त्वाऽऽदौ संहत्यकारित्वस्य विलक्षणत्वात् । अन्यथा-असंहतकपरार्थसिद्धेर्धर्माणां साश्रयत्वव्याप्तेश्च बुद्धेरेव सफलत्वाद् नैवमात्मा कश्चिदतिरिक्तः सिद्धेदिति भावः । ततस्माद् बुद्धिः पुंसः पुरुषस्यैव नाम स्यात् । च पुनः, तत्त्वान्तरव्ययोऽहङ्कारऽऽदितत्त्वोच्छेदः स्यात् ॥ २४ ॥

तथाहि-

व्यापारभेदादेकस्य, वायोः पञ्चविधत्ववत् ।
अहङ्काराऽऽदिसंज्ञानो-पपत्तिसुकरत्वतः ॥ २५ ॥

एकस्य वायोः, व्यापारभेदादूर्द्धगमनाऽऽदिव्यापारभेदात्, पञ्चविधत्ववत्-पञ्च वायवः प्राणापानाऽऽदिभेदादिति व्यपदेशवत् । अहङ्काराऽऽदिसंज्ञानामुपपत्तेः सुकरत्वतः सौकर्यात् । तथाहि-बुद्धिरेवाहङ्कारव्यापारं जनयन्ती अहङ्कार इत्युच्यताम्, सैव च प्रसृतसत्त्वभावा साधिकारा प्रकृतिरिति व्यपदिश्यताम्, किमन्तर्गडु तत्त्वान्तरपरिकल्पनयेति ॥ २५ ॥

पुंसश्च व्यञ्जकत्वेऽपि, कूटस्थत्वमयुक्तिमत् ।
अधिष्ठातृत्वमेतच्चेत्, तदेत्यादिनिरर्थकम् ॥ २६ ॥

पुंसः पुरुषस्य च, व्यञ्जकत्वेऽभ्युपगम्यमाने, कूटस्थत्वमयुक्तिमदसङ्गतम् । अभिव्यञ्जकत्वं ह्यभिव्यक्तिजनकत्वम् । तथा च-" अकारणमकार्यं च पुरुषः " इति वचनं व्याहन्येतेति भावः । अधिष्ठातृत्वमभिव्यक्तिदेशाऽऽश्रयत्वम्, एतद् व्यञ्जकत्वं, पुरुषस्तु सदैकरूप इति चेत्, तर्हि तदेत्यादि-"तदा द्रष्टुः स्वरूपावस्थानम् ।"(१-३)इति सूत्रं निरर्थकम्,तदेत्यस्य व्यवच्छेद्याभावात् । काल्पनिकत्वे चैतद्विषयस्य घटाऽऽदिव्यवहारविषयस्यापि तथात्वाऽऽपत्तौ शून्यवादिमतप्रवेश इति भावः ॥ २६ ॥

निमित्तत्वेऽपि कौटस्थ्य-मथास्यापरिणामतः ।
स्याद्भेदो धर्मभेदेन, तथापि भवमोक्षयोः ॥ २७ ॥

अथास्याऽऽत्मनो,निमित्तत्वेऽपि,सत्त्वनिष्ठामभिव्यक्तिं चिच्छक्तिं प्रति,अपरिणामतः परिणामाभावात् । कौटस्थ्यमकारणमित्यस्योपादानकारणमित्यर्थात् उपादानकारणस्यैव परिणामित्वात् परिणामस्य चावस्थान्तरगमनलक्षणत्वादिति भावः । तथापि भवमोक्षयोः संसारापवर्गयोः,धर्मभेदेन भोगनिमित्तानिमित्तत्वधर्मभेदेन,स्यात्कथञ्चित्,भेद आवश्यकः । मोक्षेऽपि पूर्वस्वभावत्वस्य कारणान्तराभावाच्च भोग इति को भेद इति चेत्?। सौम्य ! कथं तर्हि न भवमोक्षोभयस्वभावे विरोधः ?। उभयैकस्वभावत्वाद् नायमिति चेद् भङ्ग्यन्तरेणायमेव स्याद्वाद इति किं वृथा खिद्यसे ?॥ २७ ॥

प्रसृतादवस्थ्यं च, बुद्धेर्नैदेऽपि तत्त्वतः ।
प्रकृत्यन्ते लये मुक्ते-र्न चेदव्याप्यवृत्तिता ॥ २८ ॥

बुद्धेर्भेदेऽपि प्रत्यात्मनियतत्वेऽभ्युपगम्यमाने, तत्त्वतः परमार्थतः, प्रकृत्यन्ते प्रकृतिविश्रान्ते, लये दुःखध्वंसे सति, प्रसृतादवस्थ्यम्, एकस्य मुक्तावन्यस्यापि तदापत्तिरित्यस्यापरिहार एव, प्रकृतेरेव मुक्तेरभ्युपगम्यमानत्वात्, तस्याश्च मुक्तत्वामुक्तत्वोभयविरोधात् । एकत्र बुद्धे संयोगतदभावयोरिव प्रकृतौ विभिन्नबुद्ध्यवच्छेदेन न मुक्तत्वामुक्तत्वयोर्विरोध इत्यत आह-चेद् यदि,मुक्तेरव्याप्यवृत्तिता, न,अभ्युपगम्यत इति शेषः । तदभ्युपगमे च मुक्तेऽप्यमुक्तत्वव्यवहाराऽऽपत्तिरेव दुर्वारम् । किं चैवं मुक्तस्याप्यात्मनो नवसूक्ष्मशरीरावच्छेदेन भोगाऽऽपत्तिरिति तत्प्रकृतिनिवृत्तिरवश्यमभ्युपेयेति ऊह्यम् ॥ २८ ॥

प्रधानभेदे चैतत् स्यात्, कर्मबुद्धिगुणः पुमान् ।
स्याद् ध्रुवश्चाध्रुवश्चेति, जयताद् जैनदर्शनम् ॥ २९ ॥

उक्तदोषतया प्रधानभेदे चाभ्युपगम्यमाने, आत्मभोगापवर्गनिर्वाहकमेतत् कर्म स्यात्,पुमान् पुरुषः बुद्धिगुणः स्यात् । बुद्धिलब्धिज्ञानानामनर्थान्तरत्वात् । स्यात्कथञ्चिद्,ध्रुवश्च द्रव्यतोऽध्रुवश्च पर्यायत इत्येवं जैनदर्शनं जयताद्,दोषलवव्याप्यत्वात् । ननु च पुंसो विषयग्रहणसमर्थत्वेनैव चिद्रूपत्वं व्यवतिष्ठत इति विकल्पाऽऽत्मकबुद्धिगुणत्वं न युक्तम्, अन्तर्बहिर्मुखव्यापारद्वयविरोधादिति चेत् । न । अनुभूयमानक्रमिकैकोपयोगस्वभावत्वेन तदविरोधादिति ॥ २९ ॥

तथा च कायरोधाऽऽदा-वव्याप्तं प्रोक्तलक्षणम् ।
एकाग्रताऽवधौ रोधे, वाच्ये च प्राचि चेतसि ॥ ३० ॥

तथा च जैनदर्शनजयसिद्धौ च, प्रोक्तलक्षणं पतञ्जल्युक्तयोगलक्षणम्, कायरोधाऽऽदावव्याप्तम्, आदिना वाक्निरोधाऽऽदिग्रहः । एकाग्रताऽवधावेकाग्रतानिरोधमात्रसाधारणे च रोधे वाच्ये, प्राचि एकाग्रतायाः पृष्ठभाविनि, चेतस्यध्यात्माऽऽदिशुद्धे, व्याप्तम् ॥ ३० ॥

योगाऽऽरम्भोऽथ विक्षिप्ते, व्युत्थानं क्षिप्तमूढयोः ।
एकाग्रे च निरुद्धे च, समाधिरिति चेन्न तत् ॥ ३१ ॥

अथ विक्षिप्ते चित्ते योगाऽऽरम्भः क्षिप्तमूढयोश्चित्तयोर्व्युत्थानम्, एकाग्रे च निरुद्धे च चित्ते समाधिरिति एकाग्रतापृष्ठभाविनिश्चित्तस्यालक्ष्यत्वादेव न तत्राव्याप्तिः । क्षिप्तं हि रजस उद्रेकादस्थिरं बहिर्मुखतया सुखदुःखाऽऽदिविषयेषुत्क्षिप्यतेषु सन्निहितेषुवा रजसा प्रेरितम्,तच्च सदैव दैत्यदानवाऽऽदीनाम्,मूढं तमस उद्रेकात् कृत्याकृत्यावभासासंगतं क्रोधाऽऽदिभिर्विरुद्धकृत्येष्वेव नियमितम्, तच्च सदैव रक्षःपिशाचाऽऽदीनाम्, विक्षिप्तं तु सत्त्वोद्रेकात्परिदृष्टदुःखसाधनेष्वेव शब्दाऽऽदिषु प्रवृत्तम्, तच्च सदैव देवानाम् । एतास्तिस्रश्चित्तावस्था न समाध्युपयोगिन्यः । एकाग्रतानिरुद्धरूपे द्वे एव सत्त्वोत्कर्षाद् यथोत्तरमवस्थितत्वाच्च समाध्युपयोगं भजेते इति चेद्, न तत् ॥ ३१ ॥

योगाऽऽरम्भेऽपि योगस्य, निश्चयेनोपपादनात् ।
यदुक्तं लक्षणं तस्मात्, परमाऽऽनन्दकृत् सताम् ॥३२॥

योगाऽऽरम्भेऽपि योगप्रारम्भकालेऽपि,निश्चयेन निश्चयनयेन,यो-

गस्योपपादनात् व्यवस्थापनात्, क्रियमाणं कृतमिति तदभ्युपगमाद् आद्यसमये तदनुत्पत्तावग्रिमसमयेष्वपि तदनुत्पत्त्यापत्तेः। वस्तुतो योगविशेषप्रारम्भकालेऽपि कर्मक्षयरूपफलान्यथानुपपत्त्या व्यवहारेणापि योगसामान्यसद्भावोऽवश्यान्युपेय इति प्रागुक्तातिव्याप्तिर्दुर्वज्रलेपायितैव । तस्मान्मुक्तं लक्षणं 'मोक्षमुख्यहेतुव्यापारः,' इत्येवंरूपं, सतां व्युत्पन्नानाम्, अदुष्टत्वप्रतिपत्तिद्वारा परमाऽऽनन्दकृत् ॥ २१ ॥ द्वा० ११ द्वा० ।

(१५) योगभेदाः-अत्र मिथ्यात्वाऽऽदिहेतुगतं मनोवाक्कायव्यापारत्रयम्, तच्च कर्मवृद्धिहेतुत्वाद् न ग्राह्यम्, किं तु मोक्षसाधनहेतुभूतं शुद्धाध्यात्मभावनाभावितचेतनाद्वीर्यपरिणामसाधनकारकप्रयत्नरूपं ग्राह्यं द्रव्यभावभेदं बाह्याऽऽचारविशोधिपूर्वकाभ्यन्तराऽऽचारशुद्धिरूपम्-

मोक्षेण योजनाद् योगः, सर्वोऽप्याचार इष्यते ।
विशिष्य स्थानवर्णार्था-ऽऽलम्बनैकाग्र्यगोचरः ॥ १ ॥

सकलकर्मक्षयो मोक्षः, तेन योजनाद् योग उच्यते । स च सर्वोऽप्याचारो जिनशासनोक्तः चरणसप्ततिकरणसप्ततिरूपो मोक्षोपायत्वाद् योग इष्यते । तत्र विशेषेण स्थानम् १, वर्णः २, अर्थः ३, आलम्बनम् ४, एकाग्रता ५, इति पञ्चप्रकारयोगो मोक्षोपायहेतुर्भवतः, इत्येतेनानादिपरभावाऽऽसक्तभवभ्रमणग्रहात् पुद्गलभोगमग्नानां न भवत्ययमभिप्रायः-यतोऽस्माकं मोक्षः साध्योऽस्ति । स च गुरुवचनस्मरणतत्त्वजिज्ञासाऽऽदियोगेन स्वरूपं निर्मलं निःसङ्गं परमाऽऽनन्दमयं स्मृत्यं तत्कथाश्रवणप्रीत्यादिकं करोति, स परम्परया सिद्धियोगी भवति । न हि मरुदेवेवत् सर्वेषामल्पप्रयासा सिद्धिः, तस्या हि अनल्पाऽऽशातनादोषकारकत्वेन निष्प्रयासा सिद्धिः । अन्यजीवानां चिराऽऽशातनाबद्धगाढकर्मणां तु स्थानाऽऽदिक्रमेणैव भवति ॥ १ ॥

अथ योगपञ्चके बाह्याभ्यन्तरङ्गसाधकत्वमुपदिशति-

कर्मयोगद्वयं तत्र, ज्ञानयोगत्रयं विदुः ।
विरतेष्वेष नियमाद्, बीजमात्रं परेष्वपि ॥ २ ॥

तत्र मोक्षसाधने, कर्मयोगद्वयं, क्रियाऽऽचरणायोगरूपम्, त्रयम् अर्थप्रमुखं, ज्ञानयोगं विदुः प्राहुर्बुधाः। तत्र विंशतिकाऽनुसारेण लक्षणाऽऽदिकं निरूप्यते-तत्र स्थानरूपं कायोत्सर्गाऽऽदिर्जेनाऽऽगमोक्तक्रियाकरणे करचरणाऽऽसनमुद्रारूपम् । उक्तं च विंशतिकायाम्-"ठाणवण्णत्थालंबण--रहिओ तंतम्मि पंचहा एसो । दुगमित्थ कम्मजोगो, तहा नियं नाणजोगो उ" ॥१॥ एष पञ्चप्रकारो योगः, विरतेषु देशविरतसर्वविरतेषु, नियमाद् भवति । योगपञ्चकं हि चारित्रस्यैवाङ्गम्, तेन योगवता भवितव्यम् । परेषु मार्गानुसारिप्रमुखेषु बीजमात्रं भवति किञ्चिन्मात्रं भवति । उक्तं च विंशतिकायाम्-"देसे सव्वे य तहा, नियमेण सो चरित्तिणो होइ । इयरस्स बीयमित्तं, इति चेअ केइ इच्छंति ।१।"

(१६) अत्र योगोत्पत्तिहेतवः प्रोच्यन्ते—

कृपानिर्वेदसंवेग-प्रशमोत्पत्तिकारिणः ।
भेदाः प्रत्येकमत्रेच्छा-प्रवृत्तिस्थिरसिद्धयः ॥ ३ ॥

कृपा अनुकम्पा-दुःखितेषु दुःखमोचनलक्षणा आर्द्रतापरिणामः । निर्वेदः भवोद्वेगः-चतुर्गतिषु चारकवद्वासनम् । संवेगः मोक्षाभिलाषः, प्रशमः कषायाभावः । एते परिणामाः-यो योगो मोक्षोपायः, तस्योत्पत्तिकारिणः करणशीलाः, एतादृक्परिणामपरिणतस्य संसारोद्विग्नस्य शुद्धाऽऽत्मस्वादेच्छुकस्य योगसाधना भवन्ति । अत्र योगपञ्चके, प्रत्येकं पञ्चैकैकस्य चत्वारो भेदाः। ते च इमे-इच्छा १, प्रवृत्तिः २, स्थिरता ३, सिद्धिः ४ इत्येवं भेदा ज्ञेयाः । उक्तं च विंशतिकायाम्-" इक्किक्को य चउद्धा, इत्थं पुण तत्तओ मुणेयव्वो । इच्छापविहिथिरसिद्धिभेयओ समयनीईए" ॥१॥ इत्यादि ॥ ३ ॥

इच्छा तद्वत्कथाप्रीतिः, प्रवृत्तिः पालनं परम् ।
स्थैर्यं बाधकभीहानिः, सिद्धिरन्यार्थसाधनम् ॥ ४ ॥

इच्छा साधकभावाभिलाषः, तद्वद् योगपञ्चकं येषु विद्यते तद्वन्तः श्रमणाः, तेषां कथासु गुणकथनाऽऽदिषु प्रीतिः-इष्टता । उक्तं च हरिभद्रपूज्यैः-"तज्जुत्तकहापीई, समयाइविपरिणामणी इच्छा ।" इति । तस्य सम्यग्दर्शनाऽऽदिगुणवृद्धिहेतुभूतं क्रियाश्रुताभ्यासपालनं परं परा उत्कृष्टा सा प्रवृत्तिः। उक्तं च-"सव्वत्थुत्तसम---रं,तप्पालणगा पवित्तीओ।" इति । इत्येवं योगद्वयं बाह्यरूपत्वात् क्रियामुख्यत्वात् साध्यावलम्बिनां कारणरूपम्। शेषाणां तु शुभबन्धनिबन्धनं स्थैर्यं-बाधका अशुद्धाध्यवसाया अतीचाराः, तेषां भीर्भयं, तस्य हानिरभावः, निरतिचारगुणपालनारूपं यत्र तत् स्थैर्यम् । क्वयोपशमोऽपि अतिगुणसाधनापरिणमनेन सदृजभावत्वात् निर्दोषगुणसाधनो भवति । उक्तं च-"तह चेव एयबाहग-चिंतारहियं थिरत्तणं नेयं ।" शुद्धानामर्थानां परमात्मरूपाणां साधनं स्वरूपालम्बनं शुद्धतत्त्वसाधनं सिद्धिः । उक्तं च-" सव्वं परमत्थसाहग-रूवं पुण होइ सिद्धि त्ति ।" एवं सप्तभेदं ज्ञेयम् ॥ ४ ॥

यावद् ध्यानैकत्वं न भवति तावद् न्यासमुद्रावर्णशुद्धिपूर्वकमावश्यकचैत्यवन्दनप्रत्युपेक्षणाऽऽदिकमुपयोगमयोगचापल्यनिवारणार्थमवश्यं करणीयं, महद् हितकरं सर्वजीवानां, तेन स्थानवर्णक्रमेण तत्त्वप्राप्तिरिति-

अर्थाऽऽलम्बनयोश्चैत्य-वन्दनाऽऽदौ विभावनम् ।
श्रेयसे योगिनः स्थान-वर्णयोरिह एव च ॥ ५ ॥

अर्थोवाक्यस्य भावार्थः, आलम्बनं वाच्ये पदार्थे अर्हत्स्वरूपे उपयोगस्यैकत्वम्, अर्थश्च आलम्बनं च अर्थालम्बने, तयोश्चैत्यवन्दनाऽऽदौ अर्हद्वन्दनाधिकारे, विभावनं स्मरणं करणीयं, श्रेयसे कल्याणार्थं, च पुनः, स्थानं वन्दनके कायोत्सर्गशरीरावस्थानम्, आसनमुद्राऽऽदिके, वर्णा अक्षराणि, तयोरेव शुद्धिः श्रेयसे कल्याणाय भवति । उक्तं चाऽऽवश्यके-"जे वाइक्कं, वामोमेलियं,हीणक्खरं,अच्चक्खरं,पयहीणं, विणयहीणं, घोसहीणं, जोगहीणं,सुट्ठु दिन्नं, दुट्ठु पडिच्छियं, अकाले कओ सज्झाओ, काले न कओ सज्झाओ,असज्झाए सज्झाइयं, सज्झाय न सज्झाइयं,तस्स मिच्छा मि दुक्कडं ।" इत्यनेन द्रव्यक्षेत्रकालविशुद्धौ भावसाधनसिद्धिः, तेन द्रव्यक्रिया हिता ॥५॥

आलम्बनमिह ज्ञेयं, द्विविधं रूप्यरूपि च ।
अरूपि गुणमायुज्यं, योगानालम्बनं परम् ॥ ६ ॥

इह जैनमार्गे, आलम्बनं द्विविधं ज्ञेयम् । एकं-रूपि, अपरम्-अरूपि । तत्र रूप्यालम्बनं जिनमुद्राऽऽदिकपिण्डस्थपदस्थरूपस्थपर्यन्तं यावत् अर्हदवस्थाऽऽलम्बनं, तावत् कारणावलम्बनं शरीरातिशयो येन रूप्यवलम्बनं,तच्च अनादिपरभावशरीरबन्धनस्वजनालम्बी परत्र परिणतचेतनः विषयाऽऽस्वादाऽऽसक्तं तीर्थङ्कराऽऽद्यवलम्बनमपि भवहेतुः। तथैव यः स्वरूपाऽऽनन्दविलासितः स्वरूपसाधनार्थं प्रथमं कारणरूपं जिनेश्वरं वीतरागाऽऽदिगुणस-

मूर्तैरवलम्बते यावद् मुक्ताऽऽद्यालम्बनी,तावत् रूप्यावलम्बनी,स एव अर्हत्सिद्धरूपं ज्ञानदर्शनचारित्राऽऽद्यनन्तपर्यायविशुद्धं शुद्धाध्यात्मधर्ममवलम्बते इति। अरूप्यालम्बनी तत्र ज्ञाप्यते-अनादितो जीवो मूर्तपुद्गलस्कन्धावलम्बनपरिणतः कथं प्रथमत एवामूर्ताऽऽनन्दरूपं स्वरूपमवलम्बते?,यत अतिशयोपेतवीतरागमुद्राऽऽदिकं परं मूर्तं चालम्ब्य विषयकषायवृद्धिकरं स्त्रीधनाऽऽद्यवलम्बनं त्यज्यते इत्येका परावृत्तिः। पुनः स एव अतिशयाऽऽदिरूपं मूर्तं नावलम्बतेऽयम्, अहं तु अमूर्तः,मूर्तभावरसिकत्वं नोपयुज्यते। यद्यपि अर्हतः संबद्धं तथापि औदयिकं नालम्बनम्, अनन्तगुणाऽऽलम्बनमुत्तममिति गुणावलम्बनी मूर्तान् भावान् न रसिकत्वेन गृह्णाति,सापेक्षपरत्वेन पश्यतीति द्वितीया परावृत्तिः। एवममूर्ताऽऽमगुणरसिको भवति, तेन परमेष्ठिस्वरूपं कारणेनावधार्य स्वीयासंख्येयप्रदेशव्याप्यव्यापकभावावच्छिन्नद्रव्यास्तिकपर्यायास्तिकानन्तस्वभावममूर्ताऽऽनन्दमयं ध्येयत्वेनावलम्बते इति तृतीया परावृत्तिरिति। साधनपद्धतिः सर्वेषां तत्स्वरूपसाधनम्, अरूपिगुणाः सिद्धगुणा, तेषां भावनं सायुज्यं तदात्मता, तथा योग आत्मोपयोगयोजनं यद्यपि ईषदवलम्बनं श्रुताऽऽदीनां, तथापि अनालम्बनमेव परं उत्कृष्टो योगः। उक्तं च पाठकैः-"तत्राप्रतिष्ठितं खलु,यतः प्रवृत्तश्चक्षत्यतस्तत्र। सर्वोत्तमो हि मनुजः,तेनानालम्बनो गीतः॥१॥"निरालम्बनयोगेन धारावाहिप्रशान्तवाहिता नाम चिन्तितस्य स्वरसत एव मनः सहजधारायां वर्तते, न प्रयासो भवति। उक्तं च विंशतिकायाम्-"आलंबणं पि एयं, रूविमरूवी य इत्थ परमो त्ति। तग्गुणपरिणइसिद्धो, सुहमो आलंबणो नाम " ॥ १ ॥ एकाग्रयोगस्यैवापरनाम अनालम्बनयोग इति । एवं स्थानाऽऽद्याः पञ्च इच्छाऽऽदिगुणिता विंशतिर्भवन्ति । ते च प्रत्येकमनुष्ठानचतुष्कयोजिता अशीतिप्रकारा भवन्ति ॥ ६ ॥

तत्स्वरूपनिरूपणायोपदिशति-

प्रीतिभक्तिवचोऽसङ्गैः, स्थानाऽऽद्यपि चतुर्विधम्।
तस्मादयोगियोगाऽऽप्ते-र्मोक्षयोगः क्रमाद् भवेत् ॥ ७ ॥

एते स्थानाऽऽदयः, प्रीतिभक्तिवचनमसङ्ग इति भेदचतुष्टयैरशीतिभेदाः भवन्ति। तस्माद् योगात्क्रमेण अयोगिनामा योगः,तस्याऽऽप्तिः प्राप्तिर्भवति,अयोगी योगशैलेशीकरणं सकलयोगव्यापल्यरहितो योगस्तं प्राप्नोति,तेन पुनः क्रमाद् मोक्षः। "सर्वकर्माभावलक्षण आत्मनस्तादात्म्यावस्थानं मोक्षः।"एवं योगः संयोगः,क्रमात् अनुक्रमेण भवति। (अथ प्रीत्या-नुष्ठानस्वरूपं तु षोडशकपाठेन 'अणुट्ठाण' शब्दे प्रथमभागे ३७१ पृष्ठे गतार्थम्) एवं क्रमेण योगसाधनारतः सर्वयोगरोधं कृत्वा अयोगी भवति ॥ ७ ॥

स्थानाऽऽद्ययोगिनस्तीर्थो-च्छेदाऽऽद्यालम्बनादपि।
सूत्रदाने महादोषः, इत्याचार्याः प्रचक्षते ॥ ८ ॥

इति स्थानाऽऽदिप्रवृत्तियोगरहितस्य सूत्रदानं महादोष इति आचार्या हरिभद्राऽऽदयः, प्रचक्षते कथयन्ति,कस्मात् ?,तीर्थोच्छेदाऽऽद्यालम्बनात्, निरास्तिकस्य सूत्रदाने कदाचित् कुप्रकरणाकरणेन तीर्थोच्छेदो भवति।

उक्तं च विंशतिकायाम्-

" तित्थस्सुच्छेया इति, णालंबणजं स एय एमेव।
सुत्तकिरियाइनासो, एसो असमंजसविहाणो ॥ १ ॥
सो एस वंकओ चिअ, नऊससमयमादियाणमविसेसा।
एयं पि भावियव्वं, इह तित्थुच्छेदभीरूहिं ॥ २ ॥
मुणेण लोगसन्नं, नाऊण य साहुसमयसब्भावं।
सम्मं परियट्टिव्वं, बुहेण मइनिउणबुद्धीए " ॥ ३ ॥

एवं प्रथमं स्थानाऽऽदिविशुद्धिं कृत्वा इच्छाऽऽदिपरिणतः क्रमेण स्वस्वरूपाऽऽलम्बनाऽऽदि गृहीत्वा प्रीत्याद्यनुष्ठानेन असङ्गानुष्ठानयोगतः सर्वज्ञो भूत्वा अयोगीभूय सिद्धो भवति,अतः क्रमसाधना श्रेयस्करी । इति व्याख्यातं योगाष्टकम ॥ अष्ट० २७ अष्ट० ।

अध्यात्मं भावना ध्यानं, समता वृत्तिसंक्षयः।
योगः पञ्चविधः प्रोक्तो, योगमार्गविशारदैः ॥ १ ॥

द्वा० १८ द्वा० । अष्ट० । (सर्वे भेदाः 'भावणा' शब्दे विवेचनासहिता वक्ष्यन्ते)

(१७) वृत्तिरोधोऽपि योगश्चेद्, भिद्यते पञ्चधाऽप्ययम्।
मनोवाक्कायवृत्तीनां,रोधे व्यापारभेदतः ॥ २७ ॥

मोक्षहेतुलक्षणो योगः पञ्चधा भिन्न इति प्रदर्शितं, वृत्तिरोधोऽपि चेद्योग उच्यते, अयमपि पञ्चधा भिद्यते, मनोवाक्काय वृत्तीनां रोधे व्यापारभेदतोऽनुभवसिद्धानां भेदानां दुरपह्नवत्वात् ; अन्यथा द्रव्यमात्रपरिशेषप्रसङ्गादिति भावः ॥ २७ ॥

प्रवृत्तिस्थिरताज्यां हि, मनोगुप्तिद्वये किल।
भेदाश्चत्वार इष्यन्ते, तत्रान्त्यायां तथाऽन्तिमः ॥२८॥

प्रवृत्तिः प्रथमाभ्यासः,स्थिरता तत्कर्षकाष्ठाप्राप्तिः,ताभ्यां मनोगुप्तिद्वये किल आद्याश्चत्वारो भेदाः-अध्यात्मभावनाध्यानसमतालक्षणा इष्यन्ते,व्यापारभेदादेकत्र क्रमेणोभयोः समावेशाद् यथोत्तरं विशुद्धत्वात्। तथाऽन्त्यायां चरमायां,तत्र मनोगुप्तौ, अन्तिमो वृत्तिसंक्षय इष्यते। इत्थं हि पञ्चापि प्रकारा निरपाया एव ॥ २८ ॥

विमुक्तकल्पनाजालं, समत्वे सुप्रतिष्ठितम्।
आत्माऽऽरामं मनश्चेति, मनोगुप्तिस्त्रिधोदिता ॥ २९ ॥

विमुक्तं परित्यक्तं,कल्पनाजालं संकल्पविकल्पचक्रं,येन तत्;तथा समत्वे सुप्रतिष्ठितं सम्यग् व्यवस्थितम्,आत्माऽऽरामं स्वभावप्रतिबद्धं, मनः, तद्भेदैस्तद्भेदिभिः, मनोगुप्तिस्त्रिधा त्रिभिः प्रकारैः, उदिता कथिता ॥ २९ ॥

अन्यासामवतारोऽपि, यथायोगं विभाव्यताम्।
यतः समितिगुप्तीनां, प्रपञ्चो योग उत्तमः ॥ ३० ॥

अन्यासां वाक्कायगुप्तीर्यासमित्यादीनाम्,अवतारोऽप्यन्तर्भावोऽपि, यथायोगं यथास्थानं, विभाव्यतां विचार्यतां, यतो यस्मात्, समितिगुप्तीनां प्रपञ्चो यथापर्यायं विस्तारो, योग उच्यते तस्मात् उत्कृष्टः, न तु समितिगुप्तिविभिन्नस्वभावो योगपदार्थोऽतिरिक्तः कोऽपि विद्यत इति ॥ ३० ॥

उपायत्वेऽत्र पूर्वेषा-मन्त्य एवावशिष्यते।
तत्पञ्चमगुणस्थाना-दुपायोऽर्वागिति स्थितिः ॥ ३१ ॥

अत्राध्यात्माऽऽदिभेदेषु योगेषु,पूर्वेषामध्यात्माऽऽदीनाम्, उपायत्वे योगोपायत्वमात्रे वक्तव्ये,अन्त्य एव वृत्तिक्षय एव योगोऽवशिष्यते। तत्तस्मात्,पञ्चमगुणस्थानादर्वाक् पूर्वसेवारूप उपायः, तत आरभ्य तु सानुबन्धयोगप्रवृत्तिरेवेति स्थितिः सत्तन्त्रमर्यादा ॥ ३१ ॥

जगवद्वचनास्थित्या, योगः पञ्चविधोऽप्ययम् ।
सर्वोत्तमं फलं दत्ते, परमाऽऽनन्दमञ्जसा ॥ ३२ ॥

निगदासिद्धोऽयम् ॥ ३२ ॥ द्वा० १८ द्वा० ।

(१८) अध्यात्माऽऽदीन् योगभेदानुपदर्श्य तदवान्तरनानाभेदप्रदर्शनेन तद्विवेकमेवाऽऽह-

इच्छां शास्त्रं च सामर्थ्य-माश्रित्य त्रिविधोऽप्ययम् ।
गीयते योगशास्त्रज्ञै-र्निर्व्याजं यो विधीयते ॥ १ ॥

इच्छां,शास्त्रं,सामर्थ्यं चाऽऽश्रित्य त्रिविधोऽप्ययं योगो योगशास्त्रज्ञैर्गीयते, इच्छायोगः, शास्त्रयोगः, सामर्थ्ययोगश्चेति यो निर्व्याजं निष्कपटं विधीयते। सव्याजस्तु योगाऽऽभासो गणनायामेव नावतरतीति ॥ १ ॥

इच्छायोगमाह-

चिकीर्षोस्तु श्रुतार्थस्य, ज्ञानिनोऽपि प्रमादिनः ।
कालाऽऽदिविकलो योगः, इच्छायोग उदाहृतः ॥ २ ॥

चिकीर्षोः-तथाविधक्षयोपशमाजावेऽपि निर्व्याजमेव कर्तुमिच्छोः, श्रुतार्थस्य श्रुताऽऽगमस्य. अर्थतेऽनेन तत्त्वमिति, तत्त्वार्थशब्दस्याऽऽगमवचनत्वात् । ज्ञानिनोऽपि अवगतानुष्ठेयतत्त्वार्थस्यापि,प्रमादिनो विकथाऽऽदिप्रमादवतः,कालाऽऽदिना विकलोऽसंपूर्णो,योगश्चैत्यवन्दनाऽऽदिव्यापारः, इच्छायोग उदाहृतः प्रतिपादितः ॥ २ ॥

प्रधानस्येच्छायोगत्वे तदङ्गस्यापि तथात्वमिति दर्शयन्नाह-

साङ्गमप्येककं कर्म, प्रतिपन्ने प्रमादिनः ।
न त्वेच्छायोगत इति, श्रवणादत्र मज्जति ॥ ३ ॥

साङ्गमपि अङ्गसाकल्येनाधिकलमपि, एककं स्वल्पं किञ्चित्कर्म, प्रतिपन्ने बहुकालव्यापिनि प्रधाने कर्मण्याहते, प्रमादिनः प्रमादवतः, न त्वेच्छायोगत इति श्रवणात्,अत्र इच्छायोगे, मज्जति मग्नं भवति। अन्यथा हि इच्छायोगाधिकारी जगवान् हरिभद्रसूरिर्योगदृष्टिसमुच्चयप्रकरणप्रारम्भे मृषावादपरिहारेण सर्वौचित्याऽऽरम्भप्रदर्शनार्थं न त्वेच्छायोगतोऽयोगमित्यादि नावक्ष्यत; बाह्यनमस्कारमात्रस्याल्पस्य विधिशुद्धस्यापि संभवात् । प्रतिपन्नस्वपर्यायान्तर्भूतत्वेन च प्रकृतनमस्कारस्यापि इच्छायोगप्रभवत्वमदुष्टमिति विभावनीयम् ॥ ३ ॥

यथाशक्त्यप्रमत्तस्य,तीव्रश्रद्धाऽवबोधतः ।
शास्त्रयोगस्त्वखण्डार्था-ऽऽराधनादुपदिश्यते ॥ ४ ॥

यथाशक्ति स्वशक्त्यनतिक्रमेण, अप्रमत्तस्य विकथाऽऽदिप्रमादरहितस्य,तीव्रौ तथाविधमोहापगमात्पटुतरौ,यौ श्रद्धाऽवबोधौ जिनप्रवचनाऽस्तिकथतत्त्वपरिच्छेदौ, ततः अखण्डार्थाऽऽराधनात् काला5ऽद्यविकलत्वेनानुष्ठानात् तु शास्त्रयोग उपदिश्यते ॥४॥

शास्त्रेण दर्शितोपायः, फलपर्यवसायिना ।
तदतिक्रान्तविषयः, सामर्थ्याऽऽख्योऽतिशक्तितः ॥ ५ ॥

फलपर्यवसायिना मोक्षपर्यन्तोपदेशेन शास्त्रेण दर्शितः सामान्यतो ज्ञापित उपायो यस्य, सामान्यतः फलपर्यवसानत्वाच्छास्त्रस्य द्वारमात्रबोधनेन विशेषहेतुदिक्प्रदर्शकत्वात् अतिशक्तितः शक्तिप्राबल्यात् , तदतिक्रान्तविषयः शास्त्रातिक्रान्तगोचरः सामर्थ्याऽऽख्यो योग उच्यते ॥ ५ ॥

शास्त्रातिक्रान्तविषयत्वमस्य समर्थयन्नाह-

शास्त्रादेव न बुध्यन्ते, सर्वथा सिद्धिहेतवः ।
अन्यथा श्रवणादेव, सर्वज्ञत्वं प्रसज्ज्यते ॥ ६ ॥

सिद्धिहेतवः सर्वे,सर्वथा सर्वैः प्रकारैः, शास्त्रादेव न बुध्यन्ते, अन्यथा शास्त्रादेव सर्वसिद्धिहेतूनां बोधे, सर्वज्ञत्वं प्रसज्ज्यते श्रवणादेव, सर्वसिद्धिहेतुज्ञाने सार्वज्ञसिद्धुपधायकोत्कृष्टहेतुज्ञानस्याप्यावश्यकत्वात्तदुपलम्भाऽऽख्यस्वरूपाऽऽवरणरूपचारित्रस्यापि विलम्बाजावात् सर्वसिद्धुपायज्ञानस्य सार्वज्ञ्याप्यत्वाच्च ।

तदिदमुक्तम्-

" सिद्ध्याख्यपदसंप्राप्ते-र्हेतुजेदा न तत्त्वतः ।
शास्त्रादेवावगम्यन्ते, सर्वथैवेह योगिभिः ॥ १ ॥
सर्वथा तत्परिच्छेदात्, साक्षात्कारित्वयोगतः ।
तत्सर्वज्ञत्वसंसिद्धेः, तदा सिद्धिपदाऽऽप्तितः ॥२॥" ॥ ६ ॥

प्रातिभज्ञानगम्यस्तत्, सामर्थ्याऽऽख्योऽयमिष्यते ।
अरुणोदयकल्पं हि, प्राच्यं तत्केवलार्कतः ॥ ७ ॥

तत्तस्मात्,प्रातिभज्ञानगम्योऽयं सामर्थ्याऽऽख्यो योग उच्यते, सर्वज्ञहेतुः खलूयं मार्गानुसारिप्रकृष्टोहस्यैव विषयो, न तु वाचाम्,क्षपकश्रेणिगतस्य धर्मव्यापारस्य स्वानुभवमात्रवेद्यत्वादिति भावः । ननु प्रातिभमपि श्रुतज्ञानमेव, अन्यथा षष्ठज्ञानप्रसङ्गात्,तथा च कथं शास्त्रातिक्रान्तविषयत्वमस्येत्यत आह-तत् प्रातिभं हि, केवलार्कतः केवलज्ञानभानुमालिनः, प्राच्यं पूर्वकालीनम्, अरुणोदयकल्पम ॥ ७ ॥

एतदेव भावयति-

रात्रेर्दिनादपि पृथग्, यथा नो वाऽरुणोदयः ।
श्रुताच्च केवलज्ञानात्, तथेदमपि भाव्यताम् ॥८॥

यथाऽरुणोदयो रात्रेर्दिनादपि पृथग्, नो वा, अपृथगित्यर्थः। न पुनरत्रैकरूप्यं विवेचयितुं शक्यते, पूर्वापरत्वाविशेषेणोभयभागसंजवात् । श्रुतात् केवलज्ञानाच्च, तथेदमपि प्रातिभं ज्ञानं ज्ञात्यताम्, ततःकाल एव तथाविधक्षयोपशमजावितस्तस्य श्रुतत्वेन तत्त्वतोऽसंख्यव्यवहार्यतया श्रुतादशेषद्रव्यपर्यायाविषयत्वेन, क्षायोपशमिकत्वेन च केवलज्ञानाद्भिन्नत्वात् केवलश्रुतपूर्वापरकोटिव्यवस्थितत्वेन, तद्धेतुकार्यतया च तात्त्यामभिन्नत्वात ॥ ८ ॥

श्रुतम्भराऽऽदिभिः शब्दैः, वाच्यमेतत्परैरपि ।
इष्यते गमकत्वं चा-मुष्य व्यासोऽपि यज्जगौ ॥ ९ ॥

एतत् प्रकृतं प्रातिभज्ञानं,परैरपि पातञ्जलाऽऽदिभिः, श्रुतम्भराऽऽदिभिः शब्दैर्वाच्यमिष्यते, आदिना तारकाऽऽदिशब्दग्रहः। गमकत्वं सामर्थ्ययोगज्ञापकत्वं च, अमुष्य प्रातिभस्य परैरिष्यते, यद् यस्माद्व्यासोऽपि जगौ ॥ ९ ॥

आगमेनानुमानेन, ध्यानाभ्यासरसेन च ।
त्रिधा प्रकल्पयन् प्रज्ञां, लभते योगमुत्तमम् ॥ १० ॥

आगमेन शास्त्रेण, अनुमानेन लिङ्गाल्लिङ्गिज्ञानरूपेण, ध्यानाभ्यासस्य रसः श्रुतानुमानप्रज्ञाविलक्षणः ऋतम्भराऽऽख्यो विशेषविषयः, तेन च; त्रिधा प्रज्ञां प्रकल्पयन्, उत्तमं सर्वोत्कृष्टं, योगं लभते ॥ १० ॥

द्विधाऽयं धर्मसंन्यास-योगसंन्यासलक्षितः ।

क्षायोपशमिका धर्माः, योगाः कायाऽऽदिकर्म तु ॥११॥

द्विधा द्विप्रकारोऽयं सामर्थ्ययोगः धर्मसंन्यास-योगसंन्यास-संज्ञे जाते यस्य स तथा। संज्ञा चेह तथा संज्ञायत इति कृत्वा, तत्स्वरूपमेव गृह्यते। क्षायोपशमिकाः-क्षयोपशमनिर्वृत्ताः क्षान्त्यादयो धर्माः, योगास्तु-कायाऽऽदिकर्म कायोत्सर्गकरणाऽऽदयः कायाऽऽदिव्यापाराः ॥ ११ ॥

द्वितीयापूर्वकरणे, प्रथमस्तात्त्विको भवेत्।
आयोज्यकरणादूर्ध्वं, द्वितीय इति तद्विदः ॥ १२ ॥

द्वितीयापूर्वकरण इति। ग्रन्थिभेदनिबन्धनप्रथमापूर्वकरणव्यवच्छेदार्थं द्वितीयग्रहणं, प्रथमेऽधिकृतसामर्थ्ययोगासिद्धेः। अपूर्वकरणस्य तु तत्रासंज्ञानपूर्वग्रन्थिभेदाऽऽदिफलेनाभिधानाद् यथाप्राधान्यमयमुपन्यासः। चारुश्च पश्चानुपूर्व्येति समयविदः। ततो द्वितीयेऽस्मिँस्तथाविधकर्मस्थितेस्तथाविधसंख्येयसागरोपमातिक्रमभाविनि प्रथमो धर्मसंन्याससंज्ञितः सामर्थ्ययोगः तात्त्विकः पारमार्थिको भवेत्, क्षपकश्रेणियोगिनः क्षायोपशमिकक्षान्त्यादिधर्मनिवृत्तेः। अतात्त्विकस्तु प्रव्रज्याकालेऽपि भवति, प्रवृत्तिलक्षणधर्मसंन्यासायाः प्रव्रज्याया ज्ञानयोगप्रतिपत्तिरूपत्वात्। अत एवास्या भवविरक्तयाधिकार्युक्तः। यथोक्तम्-"अथ प्रव्रज्याऽर्हः, आर्यदेशोत्पन्नः, विशिष्टजातिकुलान्वितः, क्षीणप्रायकर्ममलबुद्धिः, दुर्लभं मानुष्यं, जन्म मरणनिमित्तं, संपदश्चलाः, विषया दुःखहेतवः, संयोगा वियोगान्ताः, प्रतिक्षणं मरणं, दारुणो विपाकः, इत्यवगतसंसारनैर्गुण्यः, तत एव तद्विरक्तः, प्रतनुकषायोऽल्पहास्याऽऽदिः, कृतज्ञो, विनीतः, प्रागपि राजामात्यपौरजनबहुमतोऽद्रोहकारी, कल्याणाङ्गः, आढ्यः, समुपसंपन्नश्चेति"। न ह्यनीदृशो ज्ञानयोगमाराधयति, न चेदृशो नाराधयतीति भावनीयम्। सर्वेहवचनमागमः, तत्रायमनिरूतार्थ इति, आयोज्यकरणं केवलाऽऽभोगेनाचिन्त्यवीर्यतया भवोपग्राहिकर्माणि तथा व्यवस्थाप्य तत्क्षपणव्यापारणं शैलेश्यवस्थाफलं, तत ऊर्ध्वं द्वितीयो योगसंन्याससंज्ञित इति, तद्विदोऽभिदधति, शैलेश्यवस्थायां कायाऽऽदियोगानां संन्यासेनायोगाऽऽख्यस्य सर्वसंन्याससलक्षणस्य सर्वोत्तमस्य योगस्य प्राप्तेरिति ॥१२॥

तात्त्विकोऽतात्त्विकश्चेति, सामान्येन द्विधाऽप्ययम्।
तात्त्विको वास्तवोऽन्यस्तु, तदाभासः प्रकीर्तितः ॥१३॥

सामान्येन विशेषभेदानुपग्रहेण, तात्त्विकोऽतात्त्विकश्चेति द्विधाऽप्ययं योग इष्यते। तात्त्विको वास्तवः, केनापि नयेन मोक्षयोजनफल इत्यर्थः। अन्योऽतात्त्विकस्तु तदाभास एव क्षक्षलक्षणविरहितोऽपि, योगोचितवेषाऽऽदिना योगवदाभासमानः प्रकीर्तितः ॥ १३ ॥

अपुनर्बन्धकस्यायं, व्यवहारेण तात्त्विकः।
अध्यात्मभावनारूपो, निश्चयेनोत्तरस्य तु ॥ १४ ॥

अपुनर्बन्धकस्योपलक्षणत्वात् सम्यग्दृष्टेश्च, अयं योगो, व्यवहारेण कारणस्यापि कार्योपचाररूपेण, तात्त्विकोऽध्यात्मरूपो, भावनारूपश्च, निश्चयेन निश्चयनयेनोपचारपरिहाररूपेणोत्तरस्य तु चारित्रिण एव ॥ १४ ॥

सकृदावर्तनाऽऽदीना-मतात्त्विक उदाहृतः।
प्रत्यपायफलप्रायः, तथावेषाऽऽदिमात्रतः ॥ १५ ॥

सकृदेकवारम्, आवर्तन्ते उत्कृष्यन्ति वध्नन्तीति सकृदावर्तनाः, आदिशब्दाद् द्विरावर्तनाऽऽदिग्रहः। तेषामतात्त्विको व्यवहारतो, निश्चयतश्चात्मस्वरूपोऽशुद्धपरिणामबाहुल्यादुनोऽध्यात्मभावनारूपो योगः प्रत्यपायोऽनर्थः फलं, प्रायो बाहुल्येन, यस्य स तथा। तथा तत्प्रकारज्ञानमाराध्याऽऽत्मभावनायुक्तयोगियोग्यं यद्वेषाऽऽदिमात्रं नेपथ्यचेष्टानापालक्षणं श्रद्धानशून्यं वस्तु तस्मात्, तत्र हि वेषाऽऽदिमात्रमेव स्याद्, न पुनस्तेषां कांचिच्छुद्धालुतेति ॥१५॥

शुद्ध्यपेक्षो यथायोगं, चारित्रवत एव च।
हन्त! ध्यानाऽऽदिको योग-स्तात्त्विकः प्रविजृम्भते ॥१६॥

यथायोगं यथास्थानं, शुद्ध्यपेक्षं उत्तरोत्तरं शुद्धिमपेक्ष्य प्रवर्तमानचारित्रवत एव च, हन्त! तात्त्विकः पारमार्थिकैकस्वरूपो, ध्यानाऽऽदिको योगः, प्रविजृम्भते प्रोल्लसति ॥ १६ ॥

अपायजनाभावाभ्यां, सानुबन्धोऽपरश्च सः।
निरुपक्रमकर्मैवा-पायो योगस्य बाधकम् ॥ १७ ॥

अपायस्य जनाभावाभ्यां सद्भावासद्भावाभ्यां, सानुबन्धः, अपरो निरनुबन्धश्च, स योगः अपायरहितः सानुबन्धः, तत्सहितश्च निरनुबन्ध इति। योगस्य बाधकं निरुपक्रमं विशिष्टानुष्ठानचेष्टयाऽप्यनुच्छेद्यमनार्यं, स्वविपाकसामर्थ्यं वा, कर्मैव चारित्रमोहनीयाऽऽख्यमपायः ॥ १७ ॥

बहुजन्मान्तरकरः, सापायस्यैव साऽऽश्रवः।
अनाश्रवस्त्वेकजन्मा, तत्त्वाङ्गव्यवहारतः ॥ १८ ॥

बहुजन्मान्तरकरो देवमनुष्याऽऽद्यनेकजन्मविशेषहेतुः, निरुपक्रमकर्मणोऽवश्यवेद्यनीयत्वात्, सापायस्यैवापायवत एव, साऽऽश्रवो योगः, एकमेव वर्तमानं जन्म यत्र स एकजन्माश्रवः। ननु कथमेतत्?, अयोगिकेवलिगुणस्थानादर्वाक् सर्वसंवराभावेनाश्रवत्वासंभवादित्यत आह-तत्त्वाङ्गनिश्चयप्रापको यो व्यवहारः, ततस्तेन साम्परायिककर्मबन्धनलक्षणस्य याऽऽश्रवस्याभ्युपगमात्तदभावे इत्वराऽऽश्रवभावेऽपि नानाश्रवयोगत्वतिरिति भावः।

तदुक्तम्-

"आश्रवो बन्धहेतुत्वाद्, बन्ध एवेह यन्मतः।
स साम्परायिको मुख्यः, तदभावोऽर्थोऽस्य सङ्गतः ॥ ३७५ ॥
एवं चरमदेहस्य, संपरायवियोगतः।
इत्वराऽऽश्रवभावेऽपि, स तथाऽनाश्रवो मतः ॥ ३७६ ॥
निश्चयेनात्र शब्दार्थः, सर्वत्र व्यवहारतः।
निश्चयव्यवहारौ बहु, द्रावप्यभिमतावहौ ॥३७७॥" (यो०वि०)

निश्चयेनेत्युपन्यस्ते तृतीया, ततो निश्चयेनोपन्यस्तात् तत्त्वाङ्गव्यवहरत इत्यन्वयः ॥ १८ ॥

इत्थं साऽऽश्रवानाश्रवत्वाभ्यां योगद्वैविध्यमुक्त्वा, शास्त्रसापेक्षस्वाधिकारिकत्वतद्विपर्ययाभ्यां तद्द्वैविध्याभिधानाभिप्रायवानाह-

शास्त्रेणाधीयते चायं, नासिद्धेर्गोत्रयोगिनाम्।
सिद्धेर्निष्पन्नयोगस्य, नोद्देशः पश्यकस्य यत् ॥१९॥

अयं च योगो गोत्रयोगिनां गोत्रमात्रेण योगिनाम्, असिद्धेर्मध्यान्तराऽऽत्मतया योगसाध्यफलाभावात् शास्त्रेण योगतन्त्रेण नाधीयते, तथा सिद्धेः सामर्थ्ययोगत एव कार्यनिष्पत्तेः, निष्पन्नयोगस्यासङ्गानुष्ठानप्रवाहप्रदर्शनेन सिद्धयोगस्यायं शास्त्रेण नाधीयते, यद् यस्मात्, पश्यकस्य स्वत एव विदितवेद्यस्य, उ-

दिश्यत इत्युद्देशः, सदसत्कर्तव्याकर्तव्याऽऽदेशो नास्ति । यतोऽभिहितमाचारे-" उद्देसो पासगस्स नत्थि त्ति " ॥ १६ ॥

कुलप्रवृत्तचक्राणां, शास्त्रात् तत्पक्रियया ।
योगाऽऽचार्यैर्विनिर्दिष्टं, तल्लक्षणमिदं पुनः ॥ २० ॥

कुलयोगिनां,प्रवृत्तचक्रयोगिनां च,शास्त्राद् योगतन्त्रात्,सा विधिप्रत्वेन प्रसिद्धा,तत्पक्रिया योगसिद्धिकृपा भवति। तदुक्तं योगदृष्टिसमुच्चये-"कुलप्रवृत्तचक्रा ये, त एवास्याधिकारिणः । योगिनो न तु सर्वेऽपि, तथा सिद्धयादिभावतः"॥१॥ तेषां कुलप्रवृत्तचक्रयोगिनां, लक्षणं पुनरिदं वक्ष्यमाणं, योगाऽऽचार्यैर्योगप्रतिपादकैः सूरिभिर्विनिर्दिष्टम् ॥२०॥ द्वार०१६द्वा०। (कुलयोगिलक्षणं 'कुलजोगि' (ए) शब्दे तृतीयभागे ५९८ पृष्ठे द्रष्टव्यम । प्रवृत्तचक्रयोगिलक्षणं च ' पवत्तचक्क ' शब्दे वक्ष्यामः)

आद्यावञ्चकयोगाऽऽप्त्या, तदन्यद्वयलाभिनः ।
एतेऽधिकारिणो योग-प्रयोगस्येति तद्विदः ॥ २१ ॥

आद्यावञ्चकयोगस्य योगावञ्चकयोगस्य, आप्त्या प्राप्त्या हेतुभूतया, तदन्यद्वयलाभिनः क्रियावञ्चकफलावञ्चकयोगलाभवन्तः, तदवन्ध्यभव्यतया तत्त्वतस्तेषां तल्लाभवत्त्वात । एतेऽधिकारिणो, योगप्रयोगस्याधिकृतयोगव्यापारस्य, इत्येवं, तद्विदो योगविदोऽभिदधति ॥ २१ ॥ द्वा० १६ द्वा० ।

सद्भिः कल्याणसंपन्नै-र्दर्शनादपि पावनैः ।
तथा दर्शनतो योग, आद्यावञ्चक उच्यते ॥ २२ ॥

सद्भिरुत्तमैः,कल्याणसंपन्नैर्विशिष्टपुण्यवद्भिः, दर्शनादप्यवलोकनादपि, पावनैः पवित्रैः, तथा तेन प्रकारेण, गुणवत्तयेत्यर्थः । दर्शनतो योगः संबन्धः, आद्यावञ्चकः सद्योगावञ्चकः, उच्यते इष्यते ॥ २२ ॥

तेषामेव प्रणामाऽऽदि-क्रियानियम इत्यलम् ।
क्रियाऽवञ्चकयोगः स्याद्, महापापक्षयोदयः ॥३०॥

तेषामेव सतामेव, प्रणामाऽऽदिक्रियानियमः, इत्यलं, क्रियाऽवञ्चकयोगः स्यात्, महापापक्षयस्य नीचैर्गोत्रकर्मक्षयस्य, उदय उत्पत्तिर्यस्मात् स तथा ॥ ३० ॥

फलावञ्चकयोगस्तु, सङ्गत्य एव नियोगतः ।
सानुबन्धफलाऽऽप्ति-र्धर्मसिद्धौ सतां मता ॥ ३१ ॥

फलावञ्चकयोगस्तु, सद्भ्य एवानन्तरोदितेभ्यः, नियोगतोऽवश्यंभावेन सानुबन्धस्योत्तरोत्तरवृद्धिमतः, फलस्यावाऽऽप्तिः, तथा सदुपदेशाऽऽदिना धर्मसिद्धौ विषये सतां मता ॥ ३१ ॥

इत्थं योगविवेकस्य, विज्ञानाद्धीनकल्मषः ।
यतमाना यथाशक्ति, परमाऽऽनन्दमश्नुते ॥३२॥

इत्थमिति स्पष्टम् ॥ ३२ ॥ द्वा० १६ द्वा० ।

अनन्तरोक्तो योगविवेकः स्वाभिमतयोगभेदे परोक्तयोगानामवतारे सति व्यवतिष्ठते, इत्यतोऽयं निरूप्यते-

संप्रज्ञातोऽपरश्चेति, द्विधाऽन्यैरयमिष्यते ।
सम्यक् प्रज्ञायते येन, संप्रज्ञातः स उच्यते ॥ १ ॥

संप्रज्ञातः, अपरोऽसंप्रज्ञातश्चेति, अन्यैः पातञ्जलैः, अयं योगो, द्विधेष्यते, सम्यक्-संशयविपर्ययानध्यवसायरहितत्वेन, प्रज्ञायते प्रकर्षेण ज्ञायते, ज्ञाप्यस्य स्वरूपं येन स संप्रज्ञात उच्यते ॥ १ ॥

वितर्केण विचारेण-ाऽऽनन्देनास्मितयाऽन्वितः ।
ज्ञाप्यस्य ज्ञावनाभेदात्, संप्रज्ञातश्चतुर्विधः ॥ २ ॥

वितर्केण विचारेण,आनन्देनास्मितयाऽन्वितः क्रमेण युक्तः, ज्ञाप्यस्य, ज्ञावनायाः विषयान्तरपरिहारेण चेतसि पुनः पुनर्निवेशनस्वरूपायाः, भेदात, संप्रज्ञातश्चतुर्विधो भवति । तदुक्तम्-" वितर्कविचाराऽऽनन्दास्मितारूपानुगमात् संप्रज्ञात इति । " (१-१७) ॥ २ ॥

पूर्वापरानुसन्धानात्, शब्दोल्लेखाच्च भावना ।
महाभूतेन्द्रियार्थेषु, सविकल्पोऽन्यथाऽपरः ॥ ३ ॥

पूर्वापरयोरर्थयोः,अनुसन्धानात्,शब्दोल्लेखाच्छब्दार्थोपरागाच्च; यदा भावना प्रवर्तते महाभूतेन्द्रियस्वरूपेष्वर्थेषु स्थूलविषयेषु, तदा सविकल्पः-सवितर्कः समाधिः। अन्यथाऽस्मिन्नेवाऽऽलम्बने, पूर्वापरानुसन्धानशब्दार्थोल्लेखशून्यत्वेन ज्ञावनायामपरो निर्विकल्पः-निर्वितर्कः ॥ ३ ॥

तन्मात्रान्तःकरणयोः, सूक्ष्मयोर्भाव्ययोः,दिक्कालधर्मावच्छेदात्-देशकालधर्मावच्छेदेन,भावना पुनः सविचारः समाधिः। अन्यथा तस्मिन्नेवाऽऽलम्बने, देशकालधर्मावच्छेदं विना धर्मिमात्रावभासित्वेन भावनायाम, अपरो निर्विचारः समाधिः ॥ ४ ॥

यदा रजस्तमोलेशा-नुविद्धं भाव्यते मनः ।
तदा ज्ञाप्यप्लवोऽल्पत्वात्, चिच्छक्तेर्गुणभावतः ॥ ५ ॥

यदा रजस्तमसोर्लेशेनानुविद्धं मनोऽन्तःकरणतत्त्वं ज्ञाप्यते, तदा ज्ञाप्यस्य भावनाविषयस्य, सुखस्य सुखप्रकाशमयस्य सत्त्वस्य, बहैकादाधिक्यात्, चिच्छक्तेर्गुणभावतोऽनुद्रेकात् ॥५॥

साऽऽनन्दोऽत्रैव ज्ञाप्यन्ते, विदेहा बद्धवृत्तयः ।
देहाहङ्कारविगमात्, प्रधानपुरुषदर्शिनः ॥ ६ ॥

साऽऽनन्दः समाधिर्नेयत्युक्तहेतुतः, अत्रैव समाधौ, बद्धवृत्तयो विदेहा भण्यन्ते, देहाहङ्कारविगमाद् बहिर्विषयाऽऽवेशनिवृत्तेः, प्रधानपुरुषदर्शिनः प्रधानपुरुषतत्त्वाऽऽविर्भावकाः ॥ ६ ॥

सर्वं रजस्तमोलेशा-नाक्रान्तं यत्र ज्ञाप्यते ।
स सास्मितोऽत्र चिच्छक्ति-सत्त्वयोर्मुख्यगौणता ॥७॥

यत्र रजस्तमोलेशेनानाक्रान्तं सत्त्वं भाव्यते, स सास्मितः समाधिः अत्र चिच्छक्तिसत्त्वयोर्मुख्यगौणता, ज्ञाप्यस्य शुद्धसत्त्वस्य, न्यूनभावाच्चिच्छक्तेश्चोद्रेकात् सत्तामात्रावशेषत्वाच्चात्र साऽस्मितत्वोपपत्तिः । न चाहङ्कारास्मितयोरभेदः शङ्कनीयः, यतो यत्रान्तःकरणमहमित्युल्लेखेन विषयं वेदयते सोऽहङ्कारः, यत्रान्तर्मुखतया प्रतिलोमपरिणामेन प्रकृतिलीने चेतसि सत्तामात्रमेव भाति, साऽस्मितेति ॥ ७ ॥

अत्रैव कृततोषा ये, परमाऽऽत्मानवेक्षिणः ।
चित्ते गते ते प्रकृति-लया हि प्रकृतौ लयम् ॥ ८ ॥

अत्रैव सास्मितसमाधावेव, ये कृततोषाः परमाऽऽत्मानवेक्षिणः परमपुरुषदर्शिनः,ते हि चित्ते प्रकृतौ लयं गते सति प्रकृतिलया उच्यन्ते ॥ ८ ॥

ग्रहीतृग्रहणग्राह्य-समापत्तिरयं किल ।

अत्र सास्मितसाऽऽनन्द-निर्विचारान्तविश्रमम् ॥ ९ ॥

सास्मितसमाधिपर्यन्ते परं पुरुषं ज्ञात्वा भावनायां विवेकख्यातौ ग्रहीतृसमापत्तिः, साऽऽनन्दसमाधिपर्यन्ते ग्रहणसमापत्तिः, निर्विचारसमाधिपर्यन्ते च ग्राह्यसमापत्तिर्विश्रान्तेत्येतदर्थः॥९॥

मणेरिवाभिजातस्य, क्षीणवृत्तेरसंशयम् ।
तात्स्थ्यात्तदञ्जनत्वाच्च, समापत्तिः प्रकीर्तिता ॥ १० ॥

मणेरिव स्फटिकाऽऽदिरत्नस्येव, अभिजातस्य जात्यस्य, क्षीणवृत्तेः क्षीणमलस्य, असंशयं निश्चितं, तात्स्थ्यात्तत्रैकाग्र्यात्, तदञ्जनत्वाच्च तन्मयत्वात्, त्र्यञ्जने चित्ते विषयस्य ज्ञाप्यमानस्यैकत्वोत्कर्षात्, समापत्तिः प्रकीर्तिता। तदुक्तम्-"क्षीणवृत्तेरभिजातस्येव मणेर्ग्रहीतृग्रहणग्राह्येषु तत्स्थतदञ्जनता समापत्तिः।" (१-४१) यथा हि निर्मलस्फटिकमणेस्तद्रूपाऽऽश्रयवशात्तद्रूपताऽऽपत्तिः,एवं निर्मलचित्तसत्त्वस्य तत्तद्भावनीयवस्तूपरागात्तद्रूपताऽऽपत्तिः। यद्यपि ग्रहीतृग्रहणग्राह्येत्युक्तं,तथाऽपि भूमिकाक्रमवशेन व्यत्ययो बोध्यः। ततः-प्रथमं ग्राह्यनिष्ठः समाधिः,ततो ग्रहणनिष्ठः,ततोऽस्मितोपरागेण ग्रहीतृनिष्ठः, केवलस्य पुरुषस्य ग्रहीतुर्भाव्यत्वासंभवादिति बोध्यम् ॥ १० ॥

संकीर्णा सा च शब्दार्थ-ज्ञानैरपि विकल्पतः ।
सवितर्का परैर्नैदै-र्भवतीत्थं चतुर्विधा ॥ ११ ॥

सा च समापत्तिः,शब्दार्थज्ञानैर्विकल्पतोऽपि संकीर्णा सवितर्का । यदाह-" तत्र शब्दार्थज्ञानविकल्पैः संकीर्णा सवितर्का।" (१-४२)तत्र श्रोत्रेन्द्रियग्राह्यः,स्फोटरूपो वा शब्दः,अर्थो जात्यादिः, ज्ञानं सत्त्वप्रधाना बुद्धिवृत्तिः, विकल्पः-शब्दज्ञानानुपाती वस्तुशून्योऽर्थः,एतैः संकीर्णाः-यत्रैते शब्दाऽऽदयः परस्पराध्यासेन प्रतिभासन्ते-गौरिति शब्दो,गोरित्यर्थो, गौरिति ज्ञानमित्याकारेण, इत्थं परैर्नैदैश्चतुर्विधेयं भवति । तथाहि-" महास्मृतिपरिशुद्धौ स्वरूपशून्येवार्थमात्रनिर्भासा निर्वितर्का।" (१-४३) यदाह-'उक्तलक्षणविपरीता निर्वितर्केति' । यथा च स्थूलभूताऽऽदिविषया सवितर्का,तथा सूक्ष्मतन्मात्रेन्द्रियाऽऽदिकमर्थं शब्दार्थविकल्पसहितत्वेन,देशकालधर्मावच्छेदेन च गृह्णन्ती सविचारा भण्यते, धर्मिमात्रतया च तं गृह्णन्ती निर्विचारेति । यत उक्तम्-"एतयैव सविचारा, निर्विचारा च सूक्ष्मविषया व्याख्याता । " (१-४४) " सूक्ष्मविषयत्वं चालिङ्गपर्यवसानम । " (१-४५) न क्वचिद्विश्राम्यते,न वा किञ्चिल्लिङ्गयति गमयतीत्यलिङ्गं प्रधानं,तत्पर्यन्तमित्यर्थः। गुणानां हि परिणामे चत्वारि पर्वाणि-विशिष्टलिङ्गम, अविशिष्टलिङ्गं, लिङ्गमात्रम,अलिङ्गं चेति। विशिष्टलिङ्गं भूतानि, अविशिष्टलिङ्गं तन्मात्रेन्द्रियाणि, लिङ्गमात्रं बुद्धिः, अलिङ्गं च प्रधानमिति । एताश्च समापत्तयः संप्रज्ञातरूपा एव । यदाह-" ता एव सबीजः समाधिरिति । " (१-४६) सह बीजेनाऽऽलम्बनेन वर्त्तत इति सबीजः, संप्रज्ञात इत्यर्थः ॥ ११ ॥

इतरासां समापत्तीनां निर्विचारफलत्वान्निर्विचारायाः फलमाह—

अध्यात्मं निर्विचारत्व-वैशारद्ये प्रसीदति ।
ऋतम्भरा ततः प्रज्ञा, श्रुतानुमितितोऽधिका ॥ १२ ॥

निर्विचारत्वस्य चरमसमापत्तिलक्षणस्य, वैशारद्ये प्रकृष्टाभ्यासवशेन नैर्मल्ये,अध्यात्मं शुद्धसत्त्वं, प्रसीदति क्लेशवासनारहितस्थितिप्रवाहयोग्यं भवति । यदुक्तम्-" निर्विचारत्ववैशारद्येऽध्यात्मप्रसादः।" (१-४७) ततोऽध्यात्मप्रसादात् , ऋतम्भरा प्रज्ञा भवति। ऋतं सत्यमेव बिभर्ति,न कदाचिदपि विपर्ययेणाऽऽच्छाद्यते या सा ऋतम्भरा। तदुक्तम्-" ऋतम्भरा तत्र प्रज्ञा । " (१-४७) सा च श्रुतानुमितित आगमानुमानाभ्यां सामान्यविषयाभ्यां विशेषविषयत्वेनाधिका । यदाह-" श्रुतानुमानप्रज्ञाभ्यामन्यविषयाविशेषार्थत्वादिति।" (१-४९)॥१२॥

तज्जन्मा तत्त्वसंस्कारः, संस्कारान्तरबाधकः ।
असंप्रज्ञातनामा स्यात् , समाधिस्तन्निरोधतः ॥ १३ ॥

तत ऋतम्भरप्रज्ञायाः,जन्मोत्पत्तिर्यस्य स तथा,तत्त्वसंस्कारः परमार्थविषयः संस्कारः, संस्कारान्तरस्य स्वेतरस्य-व्युत्थानजस्य, समाधिजस्य वा संस्कारस्य बाधकस्तन्निष्ठकार्यकरणशक्तिभङ्गकृदिति यावत् । तदुक्तम्-" तज्जः संस्कारोऽन्यसंस्कारप्रतिबन्धी । " (१—५०) तस्य निरोधतः सर्वासां चित्तवृत्तीनां स्वकारणे प्रविलयात्, संस्कारमात्रोदितवृत्तिलक्षणोऽसंप्रज्ञातनामा समाधिः स्यात् । तदुक्तम्-" तस्यापि निरोधे सर्वनिरोधी निर्बीजः समाधिरिति । " (१-५१) ॥ १३ ॥

विरामप्रत्ययाभ्यासाद्, नेति नेति निरन्तरात् ।
ततः संस्कारशेषाच्च, कैवल्यमुपतिष्ठते ॥ १४ ॥

विरामो वितर्काऽऽदिचिन्तात्यागः,स एव प्रत्ययो विरामप्रत्ययः, तस्याभ्यासः पौनःपुन्येन चेतसि निवेशनं, ततः, नेति नेति निरन्तरादन्तररहितात् , संस्कारशेषादुत्पन्नः, ततोऽसंप्रज्ञातसमाधेः । यत उक्तम्-" विरामप्रत्ययाभ्यासपूर्वः संस्कारशेषोऽन्य इति । " (१-१८) कैवल्यमात्मनः स्वप्रतिष्ठत्वलक्षणम, उपतिष्ठत आविर्भवति ॥ १४ ॥

(१६) तदेवमुक्तौ परानिमतौ सबीजौ सोत्पत्तिकौ च संप्रज्ञातासंप्रज्ञाताऽऽख्यौ योगभेदौ; अथानयोर्यथासंभवमयतारमाह-

संप्रज्ञातोऽवतरति, ध्यानभेदेऽत्र तत्त्वतः ।
तात्त्विकी च समापत्ति-र्नाऽऽत्मनो भाव्यतां विना ॥ १५ ॥

अत्र संप्रज्ञातासंप्रज्ञातयोर्योगभेदयोर्मध्ये, संप्रज्ञातस्तत्त्वतो ध्यानभेदेऽवतरति,स्थिराध्यवसानरूपत्वात्; अध्यात्माऽऽदिकमारभ्य ध्यानपर्यन्तं यथाप्रकर्षं संप्रज्ञातो विश्राम्यतीत्यर्थः । यदाह योगबिन्दुकृत्-" समाधिरेष एवान्यैः, संप्रज्ञातोऽभिधीयते । सम्यक् प्रकर्षरूपेण, वृत्त्यर्थज्ञानतस्तथा " ॥४१८॥ इति । एष एवाध्यात्माऽऽदियोगः तात्त्विकी निरुपचरिता च समापत्तिरात्मनो भाव्यतां भावनाविषयतां विना न घटते,शुद्धस्याभाव्यत्वे विशिष्टस्यापि तस्यायोगाद् विशेषणसंबन्धं विना वैशिष्ट्यस्यापि दुर्वचत्वाच्चेति । तथा च ग्रहीतृसमापत्तिर्बाह्यमात्रमेवेति भावः ॥ १५ ॥

परमाऽऽत्मसमापत्ति-र्जीवाऽऽत्मनि हि युज्यते ।
अभेदेन तथा ध्याना-दन्तरङ्गस्वशक्तितः ॥ १६ ॥

जीवाऽऽत्मनि हि परमाऽऽत्मसमापत्तिः,तथापरिणामलक्षणा युज्यते,अभेदेन तथा परमात्मत्वेन ध्यानाद् जीवाऽऽत्मनोरन्तरङ्गाया उपादानभूतायाः स्वशक्तितस्तथापरिणमनादात्मशक्तेः शक्तयन्तर एव व्यक्त्या परिणमनस्य तथा सामग्रीतः संभवादिति भावः ॥ १६ ॥

(२०) जीवाऽऽत्मनि परमाऽऽत्मनः सत्त्वोपपत्यर्थमात्मत्रयं सन्निहितमुपदर्शयति-

बाह्याऽऽत्मा चाऽऽन्तराऽऽत्मा च, परमाऽऽत्मेति च त्रयः।
कायाधिष्ठायकध्येयाः, प्रसिद्धा योगवाङ्मये ॥ १७ ॥

कायः स्वाऽऽत्माधिया प्रतीयमानः,-'अहं स्थूलोऽहं कृशः,' इत्याद्यनुल्लेखेनाधिष्ठायकः कायचेष्टाजनकप्रयत्नवान्, ध्येयश्च ध्यानभाव्यः, एते त्रयो-बाह्याऽऽत्मा च अन्तराऽऽत्मा च, परमाऽऽत्मा चेति योगवाङ्मये योगशास्त्रे प्रसिद्धाः। एतेषां च स्वेतरभेदप्रतियोगित्वध्यातृत्वध्येयत्वैर्ध्यानोपयोगस्तात्त्विकात्तात्त्विकैकत्वपरिणामतश्च सन्निधानमतात्त्विकपरिणामनिवृत्तौ तात्त्विकपरिणामोपबृंहणश्च समापत्तिरिति ध्येयम् ॥ १७ ॥

अन्ये मिथ्यात्वसम्यक्त्व-केवलज्ञानन्नागिनः।
मिश्रे च क्षीणमोहे च, विश्रान्तास्ते त्वयोगिनि ॥ १८ ॥

अन्ये पुनराहुः-मिथ्यात्वसम्यक्त्वकेवलज्ञानन्नागिनो बाह्याऽऽत्मान्तराऽऽत्मपरमाऽऽत्मानः। ते तु-मिश्रे च क्षीणमोहे चायोगिनि च गुणस्थाने क्रमेण विश्रान्ताः तत्र च बाह्याऽऽत्मतादशायामन्तराऽऽत्मपरमाऽऽत्मनोः शक्तिः, तदेकद्रव्यत्वात्, अन्तराऽऽत्मतादशायां च परमाऽऽत्मनः शक्तिः, बाह्याऽऽत्मनस्तु पूर्वनयेन योगः। परमाऽऽत्मतादशायां च बाह्याऽऽत्मान्तराऽऽत्मनोर्द्वयोरपि भूतपूर्वनयेनैव योग इति वदन्ति । तत्त्वमत्रत्यमध्यात्ममतपरीक्षायां व्यवस्थापितमस्माभिः ॥ १८ ॥

विषयस्य समापत्ति-रुत्पत्तिर्भावसंज्ञिनः।
आत्मनस्तु समापत्ति-र्भावो द्रव्यस्य तात्त्विकः ॥१९॥

विषयस्याऽऽत्मातिरिक्तस्य ज्ञाप्यस्य, समापत्तिर्भावसंज्ञिनो भावान्निधानस्योत्पत्तिरुच्यते। वदन्ति हि नयदक्षाः-'अन्युपयुक्तो ज्ञानवकोऽप्यग्निरेवेति' शब्दार्थप्रत्ययानां तुल्यान्निधानत्वात् न वस्त्वर्थज्ञानयोः कश्चनैकवृत्त्यारूढतया एकत्वपरिणामः संभवति, चेतनत्वाच्चेतनत्वयोर्विरोधादिति भावः। आत्मनस्तु समापत्तिर्द्रव्यस्य परमाऽऽत्मद्रव्यस्य, तात्त्विकः सहजशुद्धो भावः परिणामः ॥ १९ ॥

अत एव च योऽर्हन्तं, स्वद्रव्यगुणपर्ययैः।
वेदाऽऽत्मानं स एव स्वं, वेदेत्युक्तं महर्षिभिः ॥ २० ॥

यत एव द्रव्यतया परमाऽऽत्मैव जीवाऽऽत्मा, अत एव च, योऽर्हन्तं तीर्थंकरं, स्वद्रव्यगुणपर्यायैर्निजशुद्धाऽऽत्मकेवलज्ञानस्वभावपरिणमनलक्षणैः, वेद जानाति, स एव स्वमात्मानं वेद तत्त्वतो जानाति, तथाज्ञानस्य तथाध्यानद्वारा तथासमापत्तिजनकत्वादिति महर्षिभिरुक्तम् । यतः पठ्यते-"जो जाणइ अरहंते, दव्वत्तगुणत्तपज्जयत्तेहिं। सो जाणइ अप्पाणं, मोहो खलु जाइ तस्स लयं ॥१॥" न चैतद्गाथाकर्तुर्दिगम्बरत्वेन महर्षित्वाभिधानं न निरवद्यमिति मूढधिया शङ्कनीयम्, सत्यार्थकथनगुणेन व्यासाऽऽदीनामपि हरिभद्राऽऽचार्यैस्तथाऽभिधानादिति द्रष्टव्यम् ॥ २० ॥

(२१) असंप्रज्ञातनामा तु, संमतो वृत्तिसंक्षयः।
सर्वतोऽस्मादकरण-नियमः पापगोचरः ॥ २१ ॥

असंप्रज्ञातनामा तु समाधिर्वृत्तिसंक्षयः संमतः, सयोग्ययोगिकेवलित्वकाले मनोविकल्पपरिस्पन्दरूपवृत्तिक्षयेण तदुपगमात्। तदुक्तम्-" असंप्रज्ञात एषोऽपि, समाधिर्गीयते परैः। निरुद्धाशेषवृत्त्यादि, तत्स्वरूपानुवेधतः ॥४२०॥" (यो० बिं०) इति। धर्ममेघ इत्यप्यस्यैव नाम। यावत्तत्त्वज्ञानावनेन फलमवाप्तोः सर्वथा विवेकख्यातौ धर्ममेघमुक्तलक्षणं मेहति सिञ्चतीति व्युत्पत्तेः। तदुक्तम्-"प्रसंख्याने कुशीदस्य सर्वथा विवेकख्यातौ धर्ममेघः समाधिरिति।" (४-२९) एवमन्येषामपि तत्तत्तन्त्रसिद्धानां शब्दानामर्थोऽत्र यथायोगं भावनीयः । तदाह-" धर्ममेघोऽमृताऽऽत्मा च, सर्वाश्रवशिवोदयः। सत्त्वाऽऽनन्दपरश्चेति, ऽयोज्योऽत्रैवार्थयोगतः" ॥४२१॥ (यो० बिं०) अस्माद् वृत्तिसंक्षयात् फलीभूतात्, सर्वतः सर्वैः प्रकारैः,पापगोचरः पापविषयः,अकरणनियमः, अनुमीयत इति शेषः।नरकगमनाऽऽदिवृत्तिनिवृत्तेर्महारम्भपरिग्रहाऽऽदिहेत्वकरणनियमनैवोपपत्तेः॥२१॥

ग्रन्थिभेदे यथाऽयं स्याद्, बन्धहेतुं परं प्रति।
नरकाऽऽदिगतिष्वेवं, ज्ञेयस्तद्धेतुगोचरः ॥ २२ ॥

यथाऽयमकरणनियमो, बन्धहेतुं मिथ्यात्वं परमुत्कृष्टं सप्ततिकोटिकोट्यादिस्थितिनिमित्तं, प्रत्याश्रित्य ग्रन्थिभेदे निरूप्यते। एवं नरकाऽऽदिगतिषु निवर्तनीयासु,तद्धेतुगोचरो नरकाऽऽदिहेतुविषयोऽकरणनियमो ज्ञेयः ॥ २२ ॥

दुःखात्यन्तविमुक्त्यादि, नान्यथा स्यात् श्रुतोदितम्।
हेतुः सिद्धश्च भावोऽस्मि-न्निति वृत्तिक्षयौचिती ॥ २३ ॥

अन्यथा दुःखात्यन्तविमुक्त्यादि, श्रुतोदितं सिद्धान्तप्रतिपादितं,न स्यात्। तदाह-"अन्यथाऽऽत्यन्तिको मृत्युर्जूयस्तत्राऽऽगतिस्तथा। न युज्यतेहि सन्न्याया-दित्यादि समयोदितम्।" ॥४१६॥ (यो० बिं०) न च तत्त्वज्ञानेनैव दुःखात्यन्तविमुक्तयुपपत्तौ किमकरणनियमेनेति वाच्यम् ?, तस्याऽऽत्यन्तिकमिथ्याज्ञाननाशद्वारा हेतुत्वोपगमे तद्धेत्वकरणनियमस्यावश्याऽऽश्रयणीयत्वादिति भावः। अस्मिँस्तत्तत्पापस्थानाकरणनियमे च, सिद्धः परापराधनिवृत्तिहेतुतत्त्वज्ञानानुगततया प्रतिष्ठितो भावोऽन्तःकरणपरिणामो हेतुः तदुक्तम्-" हेतुमस्य परं भावं, सत्त्वाद्यागो निवर्तनम्। प्रधानं करुणारूपं, ब्रुवते सूक्ष्मदर्शिनः" ॥ ४१७ ॥ (यो० बिं०) इति एवमकरणनियमोपपत्तौ, वृत्तिक्षयौचिती वृत्तिक्षयस्य न्याय्यता,हेत्वकरणनियमेन फलानुत्पत्तिपर्यायोपपत्तेस्तत्प्राग्भावापगमस्यापि योग्यताविगमाऽऽख्यस्य हेत्वकरणनियमेनैव फलवत्त्वात्तद्विरहितस्य तस्य फलनियतत्वात् । तदुक्तम्-"मषकूकनस्मन्यायेन, वृत्तिबीजं महामुनिः। योग्यताऽपगमाद्ध्वा, ततः कल्याणमश्नुते" ॥ ४२२ ॥ (यो० बिं०) इति ॥ २३ ॥

(२२) ननु यद्येक एव योगस्तदा कथं भेदः?, भेदे च प्रकृते किं तदन्तर्भावप्रयासेन ?, इत्यत आह-

योगे जिनोक्तेऽप्येकस्मिन , दृष्टिभेदः प्रवर्तते।
क्वयोपशमवैचित्र्यात्, समेघाऽऽद्योघदृष्टिवत् ॥ २४ ॥

जिनोक्ते सर्वज्ञप्रोक्ते, तत्त्वत एकस्मिन्नपि योगे, क्वयोपशमवैचित्र्याद् दृष्टिभेदो दर्शनविशेषः प्रवर्तते,समेघाऽऽद्यौ मेघसहितरात्र्यादौ,ओघदृष्टिवत्-सामान्यदर्शनमिव। यथा हि एकस्मिन्नपि दृश्ये समेघायां रात्रौ दृष्टिः किञ्चिन्मात्रग्राहिणी,अमेघायां तु मनागधिकतरग्राहिणी । एवं समेघाऽमेघयोर्दिवसयोरप्यस्ति विशेषः । तथा सग्रहाग्रहयोश्चित्तविभ्रमतद्भावाभ्यामभिनिवेशकयोरपि मुग्धत्वविवेकाभ्याम् उपहतानुपहतलोचनयोश्च

दोषक्षुद्रान्यां ग्राहकयोरपि, तथा प्रकृतेऽपि योगदृष्टिभेद इति भावनीयम् । एतच्चिन्त्यमेवं दर्शनभेद इति योगाऽऽचार्याः। न चाद्यत्वं स्थिराऽऽदिदृष्टिमतां भिन्नग्रन्थीनां योगिनां यथाविधं भवनैर्गुण्यबोधात्प्रवृत्तिरप्यमीषां परार्थं शुद्धबोधजनकेन विनिवृत्ताऽऽग्रहतया मैत्र्यादिपरतन्त्रेण गम्भीरोदाराऽऽशयत्वाच्चारित्रकल्पऽऽत्मीविन्यचरकचारणनीत्येत्यादुः ॥२४॥ द्वा० ३० द्वा०।

योगस्य कारणानि विघ्नक्षुर्योगस्य प्रथमोपायभूतां पूर्वसेवामाह-

पूर्वसेवा तु योगस्य, गुरुदेवाऽऽदिपूजनम् ।
सदाचारस्तपो मुक्त्य-द्वेषश्चेति प्रकीर्तिताः।१।द्वा०१३द्वा०।

(विघ्नाऽऽदीनां योगाङ्गत्वं योगबीजानि यमाऽऽदियोगाङ्गयुक्तानां मित्रादयो दृष्टयश्च 'जोगदिट्ठि' शब्दे वक्ष्यन्ते)

(२३) योगमार्गाधिकारिणस्तु-

योजनाद् योग इत्युक्तो, मोक्षेण मुनिसत्तमैः ।
स निवृत्ताधिकारायां, प्रकृतौ क्षेशतो ध्रुवः ॥ १४ ॥

योजनाद् घटनाद्, मोक्षेण, हेत्यस्माद्धेतोः, मुनिसत्तमैः ऋषिपुङ्गवैः, योग उक्तः, स निवृत्ताधिकारायां व्यावृत्तपुरुषाभिलाषायां, प्रकृतौ सत्यां, क्षेशतः किञ्चिद्वृत्त्या, ध्रुवो निश्चितः ॥ १४ ॥

गोपेन्द्रवचनादस्मा-देवंलक्षणशालिनः ।
परैरस्येष्यते योगः, प्रतिश्रोतोऽनुगत्वतः ॥ १५ ॥

अस्माद् गोपेन्द्रवचनात्,एवंलक्षणशालिनः शान्तोदात्तत्वाऽऽदिगुणयुक्त्यापुनर्बन्धकस्य, परैस्तीर्थान्तरीयैः, योग इष्यते-उच्यते, प्रतिश्रोतोऽनुगच्छति यः स प्रतिश्रोतोऽनुगः, तद्भावस्तत्त्वं, तत इन्द्रियकषायाणामनुकूला ।६ वृत्तिरनुश्रोतः, तत्प्रतिकूला तु प्रतिश्रोत इति । इत्थं हि प्रत्यहं शुभपरिणामवृद्धिः, सा च योगफलमित्यस्य योगौचित्यम् । तदाह-" वेलावलनवज्ज्ञा-स्तदापूरोपसंहृतेः । प्रतिश्रोतोऽनुगत्वेन, प्रत्यहं वृद्धिसंयुतः " ॥ २०२ ॥ (यो० विं०) इति ॥ १५ ॥

तत्क्रियायोगहेतुत्वाद्, योग इत्युचितं वचः ।
मोक्षेऽतिदृढचित्तस्य, भिन्नग्रन्थेस्तु भावतः ॥१६॥

तद्वचः, क्रियायोगस्य सदाचारस्वरूपस्य, हेतुत्वाद् योग इत्येवमुचितम्, अस्य द्रव्ययोगत्वाद्, मोक्षे निर्गोऽतिदृढ. चित्तस्यैकधारासमहृदयस्य, भिन्नग्रन्थेर्विदारितप्रतीव्ररागद्वेषपरिणामस्य तु, भावतो योगः संभवति । सम्यग्दृष्टेर्हि मोक्षाऽऽकाङ्क्षाऽकृत्रिमचित्तस्य, या या चेष्टा, सा सा मोक्षप्राप्तिपर्यवसानफलिकेति तस्यैव भावतोऽयम्, अपुनर्बन्धकस्य तु सार्वदिकस्तथा परिणाम इति द्रव्यत एवेति। तदुक्तम्-"भिन्नग्रन्थेस्तु यत् प्रायो, मोक्षे चित्तं भवे तनु । तस्य तत्सर्व एवेह, योगो योगो हि भावतः ।२०३। (यो० विं०) इति ॥१६॥

अन्यसक्तस्त्रियो भर्तृ-योगोऽप्यश्रेयसे यथा ।
तथाऽमुष्य कुटुम्बाऽऽदि-व्यापारोऽपि न बन्धकृत् ॥१७॥

अन्यस्मिन् स्वभर्तृव्यतिरिक्ते पुंसि, सक्ताया अनुपरतरिरंसायाः, स्त्रियो योषितः, भर्तृयोगोऽपि पतिशुश्रूषाऽऽदिव्यापारोऽपि, यथाऽश्रेयसे पापकर्मबन्धाय, तथाऽमुष्य भिन्नग्रन्थेः, कुटुम्बाऽऽदिव्यापारोऽपि, न बन्धकृत्, पुण्ययोगेऽपि पापपरिणामेन पापस्येव बन्धवदशुभकुटुम्बचिन्तवाऽऽदियोगेऽपि क्षुद्रपरिणामेन सदनुबन्धस्यैवोपपत्तेः ।

तदुक्तम्-

" भार्या यथाऽन्यसक्ताया-स्तत्र भावे सदा स्थितेः ।
तद्योगः पापबन्धश्च, तथा मोक्षेऽस्य दृश्यताम् ॥ २०४ ॥
न चेह ग्रन्थिभेदेन, पश्यतो भावमुत्तमम् ।
इतरेषाऽऽकुलस्यापि, तत्र चित्तं न जायते " ॥ २०५ ॥
(यो० विं०) १७ ॥

निजाऽऽशयविशुद्धौ हि, बाह्यो हेतुरकारणम् ।
शुश्रूषाऽऽदिक्रियाऽप्यस्य,शुद्धश्रद्धाऽनुसारिणी ॥१८॥

निजाऽऽशयविशुद्धौ हि सत्यां, बाह्यो हेतुः कुटुम्बचिन्तनाऽऽदिव्यापारोऽकारणं, कर्मबन्धं प्रति भवहेतूनामेव परिणामविशेषेण मोक्षहेतुत्वेन परिणमनात्-"जे आसिया य हेऊ,भवस्स ते तत्तिआ य मुक्कस्स । " इति वचनप्रामाण्यात् । ननु किमेकेन शुभपरिणामेन?, क्रियाया अपि मोक्षकारणत्वात्, तदभावे तस्याकिञ्चित्करत्वात्; इत्यत आह-शुश्रूषाऽऽदिक्रियाऽप्यस्य सम्यग्दृष्टेः, शुद्धश्रद्धाऽनुसारिणी जिनवचनप्रामाण्यप्रतिपत्त्यनुगामिनी, परिशुद्धोहापोहयोगस्य हि प्रकृतेरप्रवृत्तिविरोधिप्रकृतियोगाङ्गयां सम्यगनुष्ठानावन्ध्यकारणत्वात्तेनैव तदाक्षिप्यत इति भावः ।

तदुक्तम्-

" चारु चैतद् यतो ह्यस्य, तथोहः संप्रवर्त्तते ।
एतद्विषयोगविषयः, श्रद्धाऽनुष्ठानभाक् स यत् ॥२०६॥
प्रकृतेरा यतश्चैव, नाप्रवृत्त्यादिधर्मताम् ।
तथा विहाय घटते, ऊहोऽस्य विमलं मनः ॥२०७॥
सति चास्मिन् स्फुरद्रत्न-कल्पे सत्योल्वणत्वतः ।
भावस्तैमित्यतः शुद्ध-मनुष्ठानं सदैव हि" ॥२०८॥ (यो० विं०)

ननु सम्यग्दृष्टिपर्यन्तमन्यत्र द्रव्ययोग एवोच्यते इति कथमत्र भावतोऽयमुक्त इति चेत् ?; चारित्रप्रतिपन्थिनामनन्तानुबन्धिनामपगमे तद्भूयःप्रादुर्भावनियम इति निश्चयाऽऽश्रयणादल्पभेदविवक्षापरेण व्यवहारेण त्वत्रायं नेष्यत एव । " एतच्च योगहेतुत्वाद्,योग इत्युचितं वचः। मुख्यायां पूर्वसेवाया-मवतारोऽस्य केवलम् " ॥ २०६ ॥ (यो० विं०) इत्यनेनापुनर्बन्धकातिशयाभिधानं तु सम्यग्दृशो नैगमनयशुद्धिप्रकर्षकाष्ठापेक्षमिति न कश्चिद्विरोध इति विभावनीयं सुधीभिः ॥ १८ ॥

एतन्निश्चयवृत्त्यैव, यद् योगः शास्त्रसंज्ञितः ।
त्रिधा शुद्धादनुष्ठानात्, सम्यक्प्रत्ययवृत्तितः ॥ १९ ॥

एतद् यदुक्तम्-भिन्नग्रन्थेरेव भावतो योग इति, निश्चयवृत्त्यैव परमार्थवृत्त्यैव, न तु कल्पनया, यद् यस्माद्, शास्त्रेणैव संज्ञी, तद्विना त्वसंज्ञिवत् काप्यर्थे प्रवर्त्तमानो यः, तस्य, त्रिधा वक्ष्यमाणैस्त्रिभिः प्रकारैः, शुद्धाच्चिरवद्यात्, अनुष्ठानाद्याचारात्, सम्यक्प्रत्ययेनाऽऽत्मगुरुलिङ्गशुद्ध्या स्वकृतिसाध्यतयाऽऽद्यभ्रान्तविश्वासेन, वृत्तिः प्रवृत्तिः, ततो भवतीति ॥ १९ ॥

शास्त्रमासन्नभव्यस्य, मानमामुष्मिके विधौ ।
सेव्यं यद्विचिकित्सायाः, समाधेः प्रतिकूलता ॥२०॥

आसन्नभव्यस्यादूरवर्त्तिमोक्षलाभस्य प्राणिनः, आमुष्मिके विधौ पारलौकिके कर्मणि, शास्त्रं मानं, धर्माधर्मयोरतीन्द्रियत्वेन तदुपायत्वबोधने प्रमाणान्तरासामर्थ्यात्। अतः सेव्यं सर्वत्र

प्रवृत्तौ पुरस्करणीयं, न तु क्वचिदप्यंशेऽनादरणीयम् । यद् यस्माद्, विचिकित्सायाः-युक्त्या समुपपन्नेऽपि मतिव्यामोहोत्पन्नचित्तविप्लुतिरूपायाः, समाधेः चित्तस्वास्थ्यरूपस्य, ज्ञानदर्शनचारित्राऽऽत्मकस्य वा, प्रतिकूलता विरोधिताऽस्ति । अर्थो हि त्रिविधः-सुखाधिगमो, दुरधिगमोऽनधिगमश्चेति श्रोतारं प्रति भिद्यते । आद्यो यथा-चक्षुष्मतश्चित्रकर्मनिपुणस्य रूपसिद्धिः, द्वितीयः सैद्धान्तिपुरुषस्य, तृतीयस्तन्धस्येति । तत्र प्रथमचरमयोर्नास्त्येव विचिकित्सा, निश्चयादसिद्धेश्च । द्वितीये तु देशकालस्वभावविप्रकृष्टे धर्माधर्माऽऽदौ भवन्ती सा महानर्थकारिणी । यदागमः-" वितिगिंछं समावन्नेणं अप्पाणेणं णो लहति समाहिं । " अतश्चित्तशुद्धयर्थं शास्त्रमेवाऽऽदरणीयमिति भावः । यत उक्तम्-" मलिनस्य यथाऽत्यन्तं, जलं वस्त्रस्य शोधनम् । अन्तःकरणरत्नस्य, तथा शास्त्रं विदुर्बुधाः " ॥ २२८ ॥ (यो० वि०) ॥ २० ॥ द्वा० १४ द्वा० ।

(२४) आत्माऽऽदिप्रत्ययं विना न सिद्धिरित्युपक्रम्य-

सदयोगाऽऽरम्भकस्त्वेनं, शास्त्रसिद्धमपेक्षते ।
सदा भेदः परेभ्यो हि, तस्य जात्यमयूरवत् ॥ २९ ॥

सदयोगाऽऽरम्भकस्तु सानुबन्धयोगाऽऽरम्भक एव, एनमात्माऽऽदिप्रत्ययं, शास्त्रसिद्धमतीन्द्रियार्थेष्वर्थसमर्थनसमर्थाऽऽगमप्रतिष्ठितम्, अपेक्षतेऽवलम्बते । परेभ्यो हि असदयोगाऽऽरम्भकेभ्यो हि, तस्य सद्योगाऽऽरम्भकस्य, सदा भेदो वैलक्षण्यं, जात्यमयूरवत् सर्वोपाधिविशुद्धमयूरवत् । यथाहि-जात्यमयूरोऽजात्यमयूरात् सदैव भिन्नः, तथा सद्योगाऽऽरम्भकोऽप्यन्यस्मादिति भावना । तदुक्तम्-" न च सदयोगभव्यस्य, वृत्तिरेवंविधाऽपि हि । न जात्यजात्यधर्मान् यज्जात्यः सन् भजते शिखी " ।२४१। (यो० वि०) ॥ २९ ॥

यद्वा शक्तिस्तदेकाऽऽदौ, विचित्रा तद्वदस्य हि ।
गर्भयोगेऽपि मातॄणां, श्रूयतेऽत्युचिता क्रिया ॥ ३० ॥

यद्वा तदेकाऽऽदौ जात्यमयूराण्डकचञ्चुचरणाऽऽद्यवयवेषु, शक्तिः विचित्राऽजात्यमयूरावयवशक्तिविलक्षणा, तद्वदस्य हि सदयोगाऽऽरम्भकस्याऽऽदित एवाऽऽरम्भ्येतरेभ्यो विलक्षणा शक्तिरित्यर्थः । यत उक्तम्-"यश्चात्र शिक्षिदृष्टान्तः, शास्त्रे प्रोक्तो महात्मभिः । स तदण्डरसाऽऽदीनां, सच्चकत्यादिप्रसाधनः " ॥ २४५ ॥ इति (यो० वि०) अत एव सदयोगाऽऽरम्भकस्येति गम्यम् । मातॄणां जननीनां, गर्भयोगोऽपि किं पुनरुत्तरकालः!, इत्यपिशब्दार्थः । श्रूयते निशम्यते, शास्त्रेषु अन्युचिता लोकानामतिश्लाघनीया, क्रिया प्रशस्तमाहात्म्यलाभलक्षणा । यत एवं पठ्यते-"जणणी सव्वत्थ वि णि-च्चुएसु सुमइ त्ति तेण सुमइ जिणो।" (४२ गाथा) तथा-"गब्भगए जं जणणी, जायसुधम्म त्ति तेण धम्मजिणो।" (४७ गाथा) तथा-"जाया जणणी जं सु-व्वय त्ति मुणिसुव्वओ तम्हा।" (५० गाथा) (आव०२ अ०) इत्यादि । इदं गर्भावस्थायामुक्तम् । उत्तरकालेऽप्यत्युचितैव तेषां क्रिया । यत उक्तम्-" औचित्याऽऽरम्भणोऽकुद्राः, प्रेक्षावन्तः शुभाऽऽशयाः । अवन्ध्यचेष्टाः कालज्ञाः, योगधर्माधिकारिणः " ॥ २४४ ॥ (यो० वि०) इति । तदेवं सिद्धः सदयोगाऽऽरम्भक इतरेभ्यो विलक्षणः, स चाऽऽत्माऽऽदिप्रत्ययमपेक्षत एवेति ॥ ३० ॥ द्वा० १४ द्वा० ।

(२५) योगस्य फलं कर्मक्षयः, तथा च कर्मक्षयहेतुत्व-

क्लेशाः पापानि कर्माणि, बहुभेदानि नो मते ।
योगादेव क्षयस्तेषां, न भोगादनवस्थितेः ॥३१॥
ततो निरुपमं स्थान-मनन्तमुपलभ्यते ।
जन्मप्रपञ्चरहितं, परमाऽऽनन्दमेदुरम् ॥ ३२ ॥

नोऽस्माकं, मते, पापान्यशुभविपाकानि, बहुभेदानि विचित्राणि, कर्माणि ज्ञानाऽऽवरणीयानि, क्लेशा उच्यन्ते । अतः कर्मक्षय एव क्लेशहानिरिति भावः । ननु-" नाभुक्तं क्षीयते कर्म, कल्पकोटिशतैरपि । अवश्यमेव भोक्तव्यं, कृतं कर्म शुभाशुभम् ३१॥ " इति वचनाद्भोगादेव कर्मणां क्षये तस्याप्यपुरुषार्थत्वमविचारितमेवेत्यत आह-योगादेव ज्ञानक्रियासमुच्चयबलकलात् क्षयः, तेषां नानाभवार्जितानां प्रचितानां, न भोगादनवस्थितेर्भोगजनितकर्मान्तरस्यापि भोगनाश्यत्वादनवस्थानात् । ननु निरभिष्वङ्गभोगस्य न कर्मान्तरजनकत्वं, प्रचितानामपि च तेषां क्षयो योगप्रारब्धाधीनकायव्यूहबलादुत्पत्स्यत इति चेत् । न । प्रायश्चित्ताऽऽदिनाऽपि कर्मणामशोपपत्तेः कर्मणां भोगेतरनाश्यत्वस्यापि व्यवस्थितौ योगेनापि तथाशसंभवे कायव्यूहाऽऽदिकल्पने प्रमाणाभावात् । कर्मणां ज्ञानयोगनाश्यतायाः-"ज्ञानाग्निः सर्वकर्माणि, भस्मसात् कुरुतेऽर्जुन ।" इति भवद्गमेनापि सिद्धत्वात् । नराऽऽदिशरीरसत्त्वे शुक्राऽऽदिशरीरानुपपत्तेः कायव्यूहानुपपत्तेर्भोगेनोऽन्तरप्रवेशाऽऽदिकल्पने गौरवाच्च । ये त्वाहुः पातञ्जलाः-अग्नेः स्फुलिङ्गानामिव कायव्यूहदशायामेकस्मादेव चित्तात्प्रयोजकाज्ञानाच्चित्तानां परिणामोऽस्मितामात्रादिति । तदुक्तम् "निर्माणचित्तान्यस्मितामात्रात् ।" (४-४) "प्रवृत्तिभेदे प्रयोजकं चित्तमेकमनेकेषामिति ।" (४-५) तेषामप्यनन्तकालप्रचितानां कर्मणां नानाशरीरोपभोगनाश्यत्वकल्पनं मोहमूलम् । तावदृष्टानां युगपद् वृत्तिलाभस्याप्यनुपपत्तेरिति निरुपक्रमकर्मणामेव भोगैकनाश्यत्वमाश्रयणीयमिति सर्वमवदातम् । ॥ ३१ ॥ तत इति व्यक्तम् ॥ ३२ ॥ द्वा० २५ द्वा० ।

(२६) योगस्य प्रेक्षावत्प्रवृत्त्यौपयिकं माहात्म्यमुपदर्शयन्नाह-

शास्त्रस्योपनिषद् योगो, योगो मोक्षस्य वर्तिनी ।
अपायशमनो योगो, योगः कल्याणकारणम् ॥ १ ॥
संसारवृद्धिर्धनिनां, पुत्रदाराऽऽदिना यथा ।
शास्त्रेणापि तथा योगं, विना हन्त ! विपश्चिताम् ॥२॥
इहापि लब्धयश्चित्राः, परत्र च महोदयः ।
पराऽऽत्माऽऽयत्तता चैव, योगकल्पतरोः फलम् ॥ ३ ॥
योगसिद्धैः श्रुतेष्वस्य, बहुधा दर्शितं फलम् ।
दर्श्यते श्लेशतश्चैतद्, यदन्यैरपि दर्शितम् ॥ ४ ॥

इयं चतुष्टोकी सुगमा । द्वा० २६ द्वा० ।

प्रायश्चित्तं पुनर्योगः, प्राग्जन्मकृतपाप्मनाम् ।
अब्धीनां निश्चयादन्तः-कोटाकोटिस्थितेः किल ॥ ३३ ॥

प्राग्जन्मकृतपाप्मनां पुनः प्रायश्चित्तं योगः, तन्नाशकत्वात्तस्य । तथा किलेति सत्ये, अब्धीनां सागरोपमाणाम्, अन्तःकोटाकोटिस्थितेर्निश्चयादपूर्वकरणाऽऽरम्भेऽपि तावत्स्थितिककर्मसद्भावाऽऽवश्यकत्वस्य महानाश्याऽऽदिप्रसिद्धत्वात्, तस्य च धर्मसंन्यासैकनाश्यत्वादिति ॥ ३३ ॥

निकाचितानामपि यः, कर्मणां तपसा क्षयः ।
सोऽभिप्रेतोत्तमं योग-मपूर्वकरणोदयम् ॥ २४ ॥

निकाचितानामपि उपशमनाऽऽदिकरणान्तसंयोज्यत्वेन व्यवस्थापितानामपि, कर्मणां यस्तपसा क्षयो, भणित इति शेषः । "तवसा उ निकाइआणं पि," इति वचनात् । सोऽपूर्वकरणोदयम्, उक्तमं योगं धर्मसंन्यासलक्षणमभिप्रेत्य, न तु यत्किञ्चित्तप इति द्रष्टव्यम् । तत्त्वमत्रत्यमध्यात्मपरीक्षाऽऽदौ विपश्चितम् ॥ २४ ॥

अपि क्रूराणि कर्माणि, क्षणाद् योगः क्षिणोति हि ।
ज्वलनो ज्वालयत्येव, कुटिज्ञानपि पादपान् ॥ २५ ॥
दृढप्रहारिशरणं, चिलातीपुत्ररक्षकः ।
अपि पापकृतां योगः, पक्षपातान्न शङ्कते ॥ २६ ॥
अहर्निशमपि ध्यातं, योग इत्यक्षरद्वयम् ।
अनवेक्षाय पापानां, क्षुण्णे वज्राग्निज्ञायते ॥ २७ ॥
आजीविकाऽऽदिनाऽर्थेन, योगस्य च विडम्बना ।
पवनाग्निमुखस्थस्य, ज्वलनज्वालनोपमा ॥ २८ ॥
योगस्पृहाऽपि संसार-तापक्षयतपात्ययः ।
महोदयसरस्तीर-सप्तीरलहरीज्ञवः ॥ २९ ॥
योगानुग्राहको योऽन्यैः, परमेश्वर इष्यते ।
अचिन्त्यपुण्यमाग्भार-योगानुग्राह्य एव सः ॥ ३० ॥
जरतो भरतक्षोणीं, भुञ्जानोऽपि महामतिः ।
तत्कालं योगमाहात्म्याद्, बुबुजे केवलश्रियम् ॥ ३१ ॥
पूर्वमप्राप्तधर्माऽपि परमाऽऽनन्दनन्दिता ।
योगप्रभावतः प्राप, मरुदेवा परं पदम् ॥ ३२ ॥

अष्टश्लोकी सुगमा । द्वा० २६ द्वा० ।

योगमाहात्म्यमेवाऽऽह-

योगः कल्पतरुः श्रेष्ठो, योगश्चिन्तामणिः परः ।
योगः प्रधानं धर्माणां, योगः सिद्धेः स्वयं ग्रहः ॥ ३३ ॥

योग उक्तो निरुक्तः, कल्पतरुः कल्पद्रुमः, श्रेष्ठोऽन्यकल्पद्रुमेभ्योऽतिशायी । तथा योगश्चिन्तामणिश्चिन्तारत्नं, परः प्रकृष्टः, योगः प्रधानं वस्तु, धर्माणां शेषधर्मस्थानानाम् । तथा योगः सिद्धेर्निर्वृत्तिलक्षणायाः, स्वयंग्रहहेतुत्वात्स्वयंग्रहः । यदत्र पुनः पुनर्योगशब्दोपादानं तदस्यात्यन्तमादरणीयतारूख्यापनार्थमिति ॥ ३३ ॥

तथा च जन्मबीजाग्नि-र्जरसोऽपि जरा परः ।
दुःखानां राजयक्ष्माऽयं, मृत्योर्मृत्युरुदाहृतः ॥ ३४ ॥

तथा चेति समुच्चये, जन्मबीजाग्निः पुनःपुनर्जन्मकारणकर्मशक्तिदाहकारी, तथा जरसोऽपि जराया अपि, जरा, वयोहानिकारणत्वात्, परा प्रकृष्टा । तथा दुःखानां शारीरमानसाऽऽबाधारूपाणां, राजयक्ष्मा राजमान्यमिव, अयं योगः, तथा मृत्योरन्तकस्य मृत्युरुदाहृतः शास्त्रकारैर्निरूपितः ॥ ३४ ॥

किञ्च-

कुण्ठीभवन्ति तीक्ष्णानि, मन्मथास्त्राणि सर्वथा ।
योगवर्माऽऽवृते चित्ते, तपश्छिद्रकराण्यपि ॥ ३५ ॥

कुण्ठीभवन्ति मन्दानि जायन्ते, तीक्ष्णानि निशितानि, मन्मथास्त्राणि कामशस्त्राणि-शब्दाऽऽदिविषयरूपाणि, सर्वथा सर्वप्रकारैः । क ?, इत्याह-योगवर्माऽऽवृते योगसंग्राहवति, चित्ते मनसि । कीदृशानि ? इत्याह-तपश्छिद्रकराण्यपि मासक्षपणाऽऽदितपोभ्रंशकारीण्यपि, तथाविधयोगविकलानां तपस्विनामिति ॥ ३५ ॥

अक्षरद्वयमप्येतत्, श्रूयमाणं विधानतः ।
गीतं पापक्षयायोच्चै-र्योगसिद्धैर्महात्मभिः ॥४०॥

अक्षरद्वयमपि, किं पुनः पञ्चनमस्काराऽऽदीन्यनेकाक्षराणीत्यपिशब्दार्थः ?। एतद् योग इति शब्दलक्षणं, श्रूयमाणमाकर्ण्यमानं, तथाविधार्थानवबोधेऽपि विधानतो विधानेन, अरूढसंवेगाऽऽदिशुद्धभावोल्लासकरकुशलयोजनाऽऽदिलक्षणेन, गीतमुक्तं, पापक्षयाय मिथ्यात्वमोहाऽऽद्यकुशलकर्मनिर्मूलनाय उच्चैरत्यर्थम् । कैर्गीतम् ?, इत्याह-योगसिद्धैर्योगः सिद्धो निष्पन्नो येषां ते तथा, तैर्जिनगणधराऽऽदिभिः, महात्मभिः प्रशस्तस्वभावैरिति ॥४०॥

तथा-

मालिन्यस्य यथा हेम्नो, वह्नेः शुद्धिर्नियोगतः ।
योगाग्नेश्चेतसस्तद्व-दविद्यामलिनाऽऽत्मनः ॥ ४१ ॥

मलिनस्य तात्राऽऽदिमलबहुलस्य, यथेति दृष्टान्तार्थः । हेम्नः सुवर्णस्य, वह्नेर्वैश्वानरात्, शुद्धिर्निर्मलता, नियोगतो नियमेन, शुद्धकारणानां स्वकार्याव्यभिचारात् । योगाग्नेर्योगवह्नेः, चेतसो मनसः, शुद्धितः, तद्वदेवमवत् । कीदृशो मनसः ?, इत्याह-अविद्यामलिनाऽऽत्मनः सद्भूतवस्तुविषयभ्रान्तिवशाशुद्धिभूतस्वरूपस्येति ॥ ४१ ॥

तथा-

अमुत्र संशयाऽऽपन्न-चेतसोऽपि हतो ध्रुवम् ।
सत्स्वप्नप्रत्ययाऽऽदिभ्यः, संशयो विनिवर्तते ॥ ४२ ॥

अमुत्र परलोकविषये, संशयाऽऽपन्नचेतसो भवान्तरं समस्ति, न वेति भ्रान्तमनसः, किं पुनरन्यस्येत्यपि हीतिशब्दार्थः । अतो योगाद्, ध्रुवमसंशयं, सत्स्वप्नप्रत्ययाऽऽदिभ्यः सत्स्वप्नाभिधायमाणावस्थायां स्वर्गाऽऽदिभवान्तरदर्शनलक्षणाऽऽख्यः प्रत्ययः प्रतीतिर्भवान्तरस्य, आदिशब्दान्निजोहापोहतथाविधाऽऽगमाभ्यासजन्यप्रत्ययग्रहः, तेभ्यः सकाशात्, संशयः संदेहो, विनिवर्त्तते उपरमति ॥ ४२ ॥

शुद्धसमाचारा हि साधवः सत्स्वप्नभावेन निजोहापोहयोगेन, सदागमाभ्यासेन च, प्राक् संशयितमनसोऽपि व्यावर्तितविपर्यासहेतुमिथ्यात्वाऽऽदिमोहोदया अभ्रकगृहान्तर्ज्वलितप्रदीपप्रभोदाहरणेन भवान्तरं निर्णयन्त्येवेति । न च वक्तव्यं स्वप्नोऽपि कथं लक्ष्यते इति ?।

यतः-

अरूढेशान्नियोगेन, बाह्ययोगवतोऽपि हि ।
शुक्लस्वप्ना भवन्तीष्ट-देवतादर्शनाऽऽदयः ॥ ४३ ॥

अरूढेशाद् बहुमानाद्रूढ, नियोगेन नियमेन, बाह्ययोगवतोऽपि हि तथाविधोपयोगशून्यतया भावयोगानुरूपक्रियामात्रयुक्तस्य, किं पुनरबाह्ययोगवत इत्यपि हीतिशब्दार्थः । किम् ?, इत्याह-शुक्लस्वप्ना अमङ्गीभूताः स्वप्नाः, भवन्ति जायन्ते, इष्टदेवतादर्शनाऽऽदयः-दिवसाऽऽरब्धाऽऽराधनजिनगुरुधार्मिकदर्शनाऽऽदिलक्षणाः ॥ ४३ ॥

तथा-

देवान् गुरून् द्विजान् साधून्, सत्कर्मस्था हि योगिनः ।
प्रायः स्वप्ने प्रपश्यन्ति, हृष्टान् सन्नोदनापरान् ॥ ४४ ॥

देवान्-आराध्यतमान् जिनाऽऽदीन्,गुरून् धर्माऽऽचार्याऽऽदीन्,मातापित्रादीन् वा;द्विजान् ब्रह्मदीक्षानामकद्वितीयजन्मनो मुनीन्, साधून् शेषशिष्टलोकान्,सत्कर्मस्थाः स्वसिद्धान्ताविरुद्धक्रियास्थिताः,हिः प्राग्वत्,योगिनो योगाभ्यासपराः प्राणिनः; किम्?,इत्याह-प्रायो बाहुल्येन, स्वप्ने प्रतीतरूपे पद्म, प्रपश्यन्ति प्रेक्षन्ते, हृष्टान् हर्षवतः, तथा सन्नोदनापरान् शुद्धार्थविषयप्रेरणपरायणान् ॥४४॥

न चासौ भ्रान्तेति भावयन्नाह—

नोदनाऽपि च सा यतो, यथार्थैवोपजायते ।
तथाकालाऽऽदिभेदेन, हन्त ! नोपप्लुवस्ततः ॥ ४५ ॥

नोदनाऽपि च न केवलं देवतादर्शनाऽऽदि,सा देवाऽऽदिकृता,यतो यस्मात्कारणात्,यथार्थैव सूचितप्रयोजनफलैवोपजायते । कथम्?,इत्याह-तथाकालाऽऽदिभेदेन तत्प्रकारकालक्षेत्रभावविशेषेण,हन्त ! इति प्राग्वत्। न नैव,उपप्लुवः वाताऽऽदिधातुविकारजनितश्चित्तसंक्षोभो वर्तते प्रेरणा; ततो यथार्थत्वाद् हेतोः, न हि यथार्थफलभाजः प्रतिभासा अविसंवादिरूपत्वाल्लोके उपप्लुवरूपतां लभन्ते, किं तु सत्यरूपतामेवेति ॥ ४५ ॥

तथा—

स्वप्नमन्त्रप्रयोगाच्च, सत्यः स्वप्नोऽभिजायते ।
विद्वज्जनेऽविगानेन, सुप्रसिद्धमिदं तथा ॥ ४६ ॥

स्वप्नमन्त्रप्रयोगाच्च-स्वप्नलाभफलो मन्त्रविषयः, तत्प्रयोगात्, चकाराच्चुद्धयोगाच्च, सत्यः स्वप्नो यथार्थः स्वप्नः, अभिजायते आविर्भवति,एतदेव दृढीकुर्वन्नाह-विद्वज्जने मतिमल्लोके,अविगानेनाविप्रतिपत्त्या, सुप्रसिद्धमतीव ख्यातिमागतम्, इदं स्वप्नमन्त्रप्रयोगात्सत्यः स्वप्नो जायत इत्येतत्,तथा तेन प्रकारेण ॥ ४६ ॥

नैवंभूतहेतुकोऽयं व्यवहार इति दर्शयति-

न ह्येतद्भूतमात्रत्व-निमित्तं संगतं वचः ।
अयोगिनः समध्यक्षं, यत्तैवंविधगोचरम् ॥ ४७ ॥

न हि नैव,एतदुक्तरूपे देवतादर्शनाऽऽदि,भूतमात्रत्वनिमित्तं भूतमात्रत्वं केवलभूतभाव एव, निमित्तं हेतुर्यस्य तत्तथा, इत्येवं परेण प्रवर्तमानं, सङ्गतं घटमानकं,वचो वचनम्, एतत्स्वप्नदर्शनाऽऽदि,यत्कैश्चिद् भूतमात्रमित्युच्यते, तदसङ्गतं वच इत्यर्थः। कुतः?,इत्याह--अयोगिनोऽर्वाग्दर्शिनः प्रमातुः,समध्यक्षं प्रत्यक्षं चाक्षुषाऽऽदि,यत् यस्माद्,नैव, एवंविधगोचरम्-एवंविधाः स्वप्नदर्शनाऽऽदिरतीन्द्रियोऽर्थो भूतमात्रनिमित्तो,न तु देवताऽनुग्रहमन्त्रप्रयोगाऽऽदिनिमित्तक इत्यादिकोऽर्थो गोचरो विषयो यस्य तत्तथा। इदमुक्तं भवति-ब्रह्मस्थस्य पृथिव्यादिरूपभूतमात्रपरिहारेणातीन्द्रिये देवताऽऽद्यावर्थे विधिप्रतिषेधयोः प्रत्यक्रमक्रममेव, तस्य तद्विषयत्वादिति ॥ ४७ ॥

एतदेव भावयति-

प्रलापमात्रं च वचो, यदमत्यक्षपूर्वकम् ।
यथेहाप्सरसः स्वर्गे, मोक्षे चाऽऽनन्द उत्तमः ॥ ४८ ॥

प्रलापमात्रमनर्थकमेव,चः समुच्चये; वचो वचनम् । कीदृशम्?,इत्याह-यदमत्यक्षपूर्वकं प्रत्यक्षेणानुपलभ्य यद्भाषितम् । दृष्टान्तमाह-यथा इह मर्त्यलोके,कश्चिद् वक्ति असर्वज्ञवादी मीमांसकाऽऽदिः,अप्सरसो मेनकारम्भाऽऽद्याः स्वर्गे सन्ति,मोक्षे च मुक्तौ पुनरानन्द आह्लादः, उत्तमः सर्वातिशायी; सोऽतीन्द्रियदृष्टे हि वाक्ये अप्सरःप्रमुखे ब्रुवाणो मीमांसकाऽऽदिः प्रलापमात्रकार्येव स्यात्; एवं नास्तिकोऽप्यतीन्द्रियं देवताऽऽदिकं निह्नुवान इति । अथैवमनवकाशीकृतः कदाचित्परलोकसंशयवादी, मीमांसको वा भूयात् ? ॥४८॥

यथा—

योगिनो यत्समध्यक्षं, ततश्चेदुक्तनिश्चयः ।
आत्माऽऽदेरपि युक्तोऽयं, तत एवेति चिन्त्यताम् ॥४९॥

योगिनो दिव्यदृशः प्रमातुः,यत्समध्यक्षं प्रत्यक्षज्ञानं,ततस्तत्समध्यक्षाद्,चेद् यदि,उक्तनिश्चयः-अप्सरसः स्वर्गे,मोक्षे चाऽऽनन्द इति प्रागुक्तार्थनिर्णयो जायते, एवं तर्हि आत्माऽऽदेरप्यतीन्द्रियार्थस्य । किं पुनः प्रस्तुतस्य?, इत्यपिशब्दार्थः । युक्तो घटमानोऽयं निश्चयः, तत एव योगिसमध्यक्षादेव, इत्येतच्चिन्त्यतां विमृश्यतामिति ॥४९॥

एतदेव भावयति—

अयोगिनो हि प्रत्यक्ष-गोचरातीतमप्यक्षम् ।
विजानात्येतदेवं च, बाधाऽत्रापि न विद्यते ॥ ५० ॥

अयोगिनोऽर्वाग्दृशः प्रमातुः,हिर्यस्मात् प्रत्यक्षगोचरातीतमपि ऐन्द्रियकाध्यक्षविषयभावातिक्रान्तमपि आत्माऽऽदि वस्तु, किं पुनरितरत्कृपम्?,इत्यपिशब्दार्थः। अलमत्यर्थम्,हस्ततलन्यस्तनिस्तलस्थूलमुक्ताफलावलोकनोदाहरणेन,विजानाति प्रेक्षते । एतद्योगिसमध्यक्षं, दिव्यदर्शनत्वात्तस्य । यदि नामैवं ततः किं सिद्धम्?,इत्याह-एवं च अस्मिंश्च प्रकारे सति,बाधा अघटनालक्षणा, अत्रापि आत्माऽऽदिनिश्चये, न केवलमप्सरःप्रभृतावर्थे,इत्यपिशब्दार्थः । न विद्यते नास्ति ॥५०॥

(२७) इत्यमागमगम्यत्वमभिधायाधुनाऽनुमानविषयत्वमाह-

आत्माऽऽद्यतीन्द्रियं वस्तु, योगिप्रत्यक्षभावतः ।
परोक्षमपि चान्येषां, न हि युक्त्या न युज्यते ॥ ५१ ॥

आत्माऽऽदि आत्मकर्मसर्वज्ञाऽऽदि,अतीन्द्रियमिन्द्रियविषयभावातीतं वस्तु,न हि न, युज्यते इत्युत्तरेण योगः । कीदृशम्?,इत्याह-योगिप्रत्यक्षभावतः सर्वज्ञज्ञानविषयभावेन, परोक्षमपि च इन्द्रियज्ञानागोचरमपि,किं पुनरपरोक्षम्?,इत्यपिशब्दार्थः। अन्येषामस्मादृशाम् अयोगिदृशां, न हि नैव, युक्त्या शुद्धहेतुप्रयोगरूपया, न युज्यते, किं तु युज्यत एव ।

तत्र युक्तिः-

" अचेतनानि भूतानि, न तद्धर्मो न तत्फलम् ।
चेतनाऽस्ति च यस्येह, स एवाऽऽत्मेति बुध्यताम् ॥ १ ॥
यदीयं भूतधर्मः स्यात्, प्रत्येकं तेषु सर्वदा ।
उपलभ्येत सत्त्वाऽऽदि, कठिनत्वाऽऽदयो यथा ॥ २ ॥
कार्किन्यादिसमावानि, भूतान्यभ्याससिद्धितः ।
चेतना तु न तद्रूपा, सा कथं तत्फलं भवेत्? ॥३॥" इत्यादि ।

" तुल्यप्रतापोद्यमसाहसानां,
केचिद्वलभन्ते निजकार्यसिद्धिम् ।
परे न तामत्र निगद्यतां मे
कर्माऽस्ति हित्वा यदि कोऽपि हेतुः ॥ १ ॥
विचित्रदेहाऽऽकृतिवर्णगन्ध-

प्रभावजातिप्रभवस्वभावाः ।
केन क्रियन्ते चुबनेङ्गितज्ञा-
श्चिरन्तनं कर्म निरस्य चित्राः ? ॥ २ ॥
विवर्ध्य मासाश्रवगर्भमध्ये,
बहुप्रकारैः कलबाऽऽदिभावैः ।
बद्धस्य निष्काश्यते सविद्याः,
को गर्भतः कर्म विहाय पूर्वम् ? " ॥ ३ ॥ इत्यादि ।
"वीतरागोऽस्ति, सर्वज्ञः प्रमाणाबाधितत्वतः ।
सर्वदा विदितः सद्भिः, सुखाऽऽदिकमिव ध्रुवम् ॥ १ ॥
क्षीयते सर्वथा रागः, क्वापि कारणहानितः ।
ज्वलनो ह्रीयते किं न, काष्ठाऽऽदीनां वियोगतः ॥ २ ॥
प्रकर्षस्य प्रतिष्ठानं, ज्ञानं क्वापि प्रपद्यते ।
परिमाणमिवाऽऽकाशो, तारतम्योपलब्धितः" ॥३॥ इत्यादि ।

अत्रैवान्युच्चयमाह—

किं चान्यद् योगतः स्थैर्यं, धैर्यं श्रद्धा च जायते ।
मैत्री जनप्रियत्वं च, प्रातिभं तत्त्वभासनम् ॥ ५२ ॥

किं च इत्यभ्युच्चये, अन्यत्प्रागुक्ताद्विलक्षणं योगफलमस्ति । तदेव दर्शयति-योगतो योगात्, स्थैर्यं स्थिरत्वभावः प्रतिपन्ननिर्वाहणो, धैर्यं व्यसनाशनिसन्निपातेऽपि अविचलितप्रकृतिभावः, श्रद्धा च रुचिस्तत्त्वमार्गानुगा, जायते आविर्भवति, मैत्री सर्वसत्त्वेषु मित्रभावः, जनप्रियत्वं च शिष्टलोकवल्लभभावः, प्रातिभं सहजप्रतिभाप्रभवं, तत्त्वभासनं जीवादितत्त्वावलोकनं भवतीति ॥ ५२ ॥

तथा—

विनिवृत्ताऽऽग्रहत्वं च, तथा द्वन्द्वसहिष्णुता ।
तदभावश्च ज्ञानश्च, बाह्यानां कालसङ्गतः ॥ ५३ ॥

विनिवृत्ताऽऽग्रहत्वं च निर्मुक्तानुचितार्थाभिनिवेशित्वं च, तथा द्वन्द्वसहिष्णुता निरुपक्रमक्लिष्टकर्मोदयाऽऽपादितानामिष्टवियोगानिष्टसंप्रयोगाऽऽदीनां व्यसनानां सम्यक् सहनभावः । तदभावश्च द्वन्द्वविनाशश्च प्रायः परिशुद्धयोगोपहतशक्तिकत्वाद् द्वन्द्वसंपादकोपायानाम्, लाभश्च प्राप्तिश्च बाह्यानां निर्वाहाऽऽदीनां समाधिहेतूनां, कालसङ्गतो यो यत्र काले योग्य इति ।५३।

तथा-

धृतिः क्षमा सदाचारो, योगवृद्धिः शुभोदया ।
आदेयता गुरुत्वं च, शमसौख्यमनुत्तरम् ॥ ५४ ॥

धृतिर्येन केनचिद् व्यसनभोजनाऽऽदिना निर्वाहमात्रनिमित्तेन सन्तोषः क्षमा सत्येतरदोषश्रवणेन कार्यतत्त्वमविचार्यान्तर्बहिश्च कोपोदयाद् विक्रियामापाद्यमानस्याऽऽत्मनो निरोधनम्। सदाचारः सर्वोपकारप्रियवचनाकृत्रिमोचितस्नेहाऽऽदिका सज्जनचेष्टा। योगवृद्धिः सम्यग्दर्शनाऽऽदिमुक्तिबीजोत्कर्षरूपा । शुभोदया प्रशस्तशुभोदयहेतुः । धृत्यादेः प्रत्येकविशेषणमेतत् । आदेयता परैरादरणीयवचनचेष्टनरूपता । गुरुत्वं च सर्वत्र गौरवस्थानलक्षणम् । तथा शमसौख्यमतिमन्दीभूतकषायविषदोषतया प्रशमशर्म । अनुत्तरं विषयसेवाजनिताऽऽनन्दातिशायि । यतः पठ्यते-" निर्जितमदमदनानां, वाक्कायमनोविकाररहितानाम् । विनिवृत्तपराशानां-मिहैव मोक्षः सुविहितानाम" ॥१॥ इति । अत्र च श्लोकत्रये चकारास्तथाशब्दश्च समुच्चयार्थाः ॥५४॥

आ विद्वद्जनासिद्ध—मिदानीमपि दृश्यते ।
एतत्प्रायस्तदन्यत्तु, सुबहागमभाषितम् ॥ ५५ ॥

आ विद्वद्जनासिद्धम्-आ-विद्वद्भ्यः आ-अङ्कनाच्च यो लोकः,तस्येत्यर्थः । सिद्धं प्रतीतम्, इदानीमपि दुःषमायां, किं पुनः सुषमदुःषमाऽऽदावित्यपिशब्दार्थः । दृश्यते अवलोक्यते, एतत् प्रागुक्तं योगफलं, प्रायो बाहुल्येन, तदन्यत्तूक्तादन्यत् पुनर्योगफलं, सुबहु अतिभूरि,आगमोपन्यासादिकं हि प्रासिद्धम्, आगमभाषितम्-आवश्यकनिर्युक्त्यादिनिरूपितम् ।

यदुक्तं तत्र-

" आमोसहि विप्पोसहि-खेलोसहि जल्लमोसही चेव ।
संभिन्नसोय उजुमइ, सव्वोसहि चेव बोधव्वो ॥६८॥
चारण आसीविस के-वली य मणणाणिणो य पुव्वधरा ।
अरहंत चक्कवट्टी, बलदेवा वासुदेवा य" ॥ ६९ ॥ इति ।

"अलौल्यमारोग्यमनिष्ठुरत्वं,
गन्धः शुभो मूत्रपुरीषमल्पम् ।
कान्तिः प्रसादः स्वरसौम्यता च,
योगप्रवृत्तेः प्रथमं हि लिङ्गम् ॥ १ ॥
मैत्र्यादियुक्तं विषयेषु चेतः,
प्रज्ञाधवद्धैर्यसमन्वितं च ।
द्वन्द्वैरधृष्यत्वमजीष्टलाभो,
जनप्रियत्वं च तथा परं स्यात् ॥ २ ॥
दोषक्षयाप्तः परमा च तृप्ति-
रौचित्ययोगः समता च गुर्वी ॥
वैराऽऽदिनाशोऽथ कृतंभरा धीः,
निष्पन्नयोगस्य तु चिह्नमेतत् " ॥ ३ ॥

अथोक्तादेव योगफलात्तत्त्वान्तरप्रसिद्ध्यर्थमाह-

न चैतद्भूतसङ्घात—मात्रादेवोपपद्यते ।
तदन्यद्भेदकाभावे, तद्वैचित्र्याप्रसिद्धितः ॥ ५६ ॥

न च नैव, एतद्योगमाहात्म्यं भावयोगिभूयोपलभ्यमानं, भूतसङ्घातमात्रादेव पृथिव्यादिमहाभूतसङ्घातात् केवलादात्माऽऽदिरूपतत्त्वान्तरशून्यात्, उपपद्यते घटते । कुतः ?, इत्याह-तदन्यभेदकाभावे-तस्माद् भूतसङ्घातात् यदन्यत्तत्त्वान्तरमात्मकाऽऽदिलक्षणं,भेदकं विशेषकारि,तस्याभावे तद्वैचित्र्याप्रसिद्धितः, तेषां भूतसङ्घातानां कायाऽऽकारपरिणतानामपि, वैचित्र्यस्य नानात्वस्य, योगमाहात्म्ययुक्तत्वेतरलक्षणस्य,अप्रसिद्धेरघटनात्। अतो बलात् अनुमिमीमहे भूतसङ्घातातिरिक्तं विचित्रशक्तिसङ्गतं तत्त्वान्तरं समस्ति, यद्वशादयं योगमाहात्म्यभावाभावलक्षणो भेदः संपद्यते ॥५६॥ योगबिं० ।

अथ निगमयन्नाह--

एवं च तत्त्वसंसिद्धे—र्योग एव निबन्धनम् ।
अतो यन्निश्चितैवेयं, नान्यतस्त्वीदृशी क्वचित् ॥ ६४ ॥

एवं चोक्तन्यायेनैव,तत्त्वसंसिद्धेः-आत्मादृष्टाऽऽदिप्रतीतेः,योग एव नापरं किञ्चिद्, निबन्धनं हेतुर्वर्तते । एतदपि कुतः?, इत्याह-अतः योगात्,यत् यस्मात्,निश्चितैव अविपर्यासवत्येव,इयं तत्त्वसिद्धिः स्याद्,न नैव,अन्यतोऽन्यस्माद्दादप्रतिवादाऽऽदेः,तुः पुनरर्थे,ईदृशी निश्चितरूपा तत्त्वसंसिद्धिः,क्वचित् क्षेत्राऽऽदौ ।६४।

(२८) अतोऽत्रैव महान् यत्न—स्तत्तत्त्वप्रसिद्धये ।
प्रेक्षावता सदा कार्यो, वादग्रन्थास्त्वकारणम् ॥ ६५ ॥

अतः-अस्मात्कारणात्, अत्रैव योगे, महान् अन्योपायातशायी, यत्नः आदरः, तस्य तस्य तत्त्वस्य स्वर्गनरकाऽऽदेः, प्रसिद्ध्ये अवितथ्यं, प्रेक्षावता बुद्धिमता, सदा सर्वकालं, कार्यो विधेयः। उपायान्तरप्रतिषेधमाह-वादग्रन्थाः परपक्षनिराकरणेन स्वपक्षप्रतिष्ठापनानि तर्कप्रकरणानि, तुः प्राग्वद्, अकारणं तत्त्वप्रतीतेरहेतवः ॥६५॥

एतदेव समर्थयमान आह—

उक्तं च योगमार्गज्ञै-स्तपोनिर्धूतकल्मषैः।
भावियोगिहितायोच्चै-र्मोहदीपसमं वचः ॥ ६६ ॥

उक्तं च निरूपितं पुनः, योगमार्गज्ञैः-अध्यात्मविद्भिः पतञ्जलिप्रभृतिभिः, तपोनिर्धूतकल्मषैः प्रशमप्रधानेन तपसा क्षीणमार्गानुसारिबोधबाधकमोहमलैः, भावियोगिहिताय-भावयद्भिर्वाऽवहद्भिः कलिकालयोगिहितार्थम्, उच्चैरत्यर्थं, मोहदीपसमम्-मोहान्धकारप्रदीपस्थानीयम्, वचो वचनम् ॥६६॥

एतदेव दर्शयति—

वादाँश्च प्रतिवादाँश्च, वदन्तो निश्चितांस्तथा।
तत्त्वान्तं नैव गच्छन्ति, तिलपीलकवद्गतौ ॥६७॥

वादाँश्च पूर्वपक्षरूपान्, प्रतिवादाँश्च परोपन्यस्तपक्षप्रतिवचनरूपान्, चौ समुच्चये, वदन्तो ब्रुवाणाः, निश्चितान्-असिद्धानैकान्तिकाऽऽदिहेतुदोषपरिहारेण, तथा तेन प्रकारेण तत्तच्छास्त्रप्रसिद्धेन, सर्वेऽपि दर्शनिनो मुमुक्षवोऽपि, किम् ?, इत्याह-तत्त्वान्तम् आत्माऽऽदितत्त्वप्रसिद्धिरूपं, नैव गच्छन्ति न प्रतिपद्यन्ते। तिलपीलकवद् निरुद्धाक्षसंचारतिर्यग्वाहननियुक्तैकगोमहिषाऽऽदिवत्. गतौ वहनरूपायां सत्यामपि; यथा असौ तिलपीलको गवादिनिरुद्धाक्षतया नित्यं भ्राम्यन्नपि न तत्परिमाणमवबुध्यते, एवमेतेऽपि वादिनः स्वपक्षाभिनिवेशान्धा विचित्रं वदन्तोऽपि नोच्यमानतत्त्वं प्रतिपद्यन्त इति ॥ ६७ ॥ यो० विं० । चन्द्रसूर्यनक्षत्राणां वृषभानुजाताऽऽदिके योगे च । सू० प्र० ।

(२६) ते च दश-

तत्थ खलु इमे दसविधे जोए पण्णत्ते । तं जहा-वसभाणुजाते १, वेणुयाणुजाते २, मंचे ३, मंचाइमंचे ४, छत्ते ५, छत्ताइछत्ते ६, जुअणद्धे ७, घणे ८, पीणिते ९, मंकरुपुत्ते णामं दसमेत्ता १० ॥

"तत्थ खलु" इत्यादि। तत्र युगे, खल्वयं वक्ष्यमाणो, दशविधो योगः प्रज्ञप्तः । तद्यथा-वृषभानुजातः । अत्र अनुजातशब्दः सदृशवचनः, वृषभस्यानुजातः सदृशो वृषभानुजातः, वृषभाऽऽकारेण चन्द्रसूर्यनक्षत्राणि यस्मिन् योगे एवं तिष्ठन्ति स वृषभानुजात इति भावना। एवं सर्वत्रापि भावयितव्यम् । वेणुर्वंशः, तदनुजातस्तत्सदृशो वेणुकानुजातः। मञ्चो मञ्चसदृशः मञ्चान्यव्यवहारप्रसिद्धान् द्वित्रादिभूमिकाभावतोऽतिशायी मञ्चो मञ्चातिमञ्चः, तत्सदृशो योगोऽपि मञ्चातिमञ्चः । छत्रं प्रसिद्धम्, तदाकारो योगोऽपि छत्रम् । उत्त्रात् सामान्यरूपात् उपर्यन्यान्यच्छत्रभावतोऽतिशायि छत्रं छत्रातिछत्रम्,तदाकारो योगोऽपि छत्रातिछत्रम्,युगमिव नद्धो युगनद्धः,यथा युगं वृषभस्कन्धोरारोपितं वर्तते तद्वद् योगोऽपि यः प्रतिभाति, स युगनद्ध इत्युच्यते । घनः संमर्दरूपः, यत्र चन्द्रः सूर्यो वा ग्रहस्य नक्षत्रस्य वा मध्ये गच्छति, प्रोक्षित उपचयं नीतः यः प्रथमश्चन्द्रमसः सूर्यस्य वा एकतरस्य ग्रहेण नक्षत्रेण वा एकतरेण जातः, तदनन्तरं द्वितीयेन सूर्याऽऽदिना सहोपचयं गतः स प्रीणित इति भावः। मण्डूकप्लुतो नाम दशमः। तत्र मण्डूकप्लुत्या यो जातो योगः स मण्डूकप्लुतः, स च ग्रहेण सह वेदितव्यः. अन्यस्य मण्डूकप्लुतिगमनासंभवात् । उक्तं च-चन्द्रसूर्यनक्षत्राणि प्रतिनियतगतानि, ग्रहास्त्वनियतगतय इति । यदित्थं यथावबोधं दर्शनामपि योगानां स्वरूपमात्रभावना कृता यथासंप्रदायमन्यथा वाच्या, तत्र युगे छत्रातिच्छत्रवर्जाः शेषा नवापि योगाः प्रायो बहुशो बहुषु च देशेषु भवन्ति। छत्रातिच्छत्रयोगस्तु कदाचित्कस्मिंश्चिदेव देशे । सू० प्र० १२ पाहु० ।

(३०)योगाङ्गत्वाद् योगाः। यमाऽऽदिकेषु योगाङ्गेषु,(ते च 'जोगंग' शब्देऽनुपदमेव १३३८ पृष्ठे वक्ष्यन्ते) दृश्याहे,यो० ३ विव० । आकाशगमनाऽऽदिफले पादलेपाऽऽदिके द्रव्यसंघाते,योग आकाशगमनाऽऽदिफलो द्रव्यसंघातः । पिं० । योगा वशीकरणाऽऽदिप्रयोजनाद् द्रव्यसंयोगा इति। प्रश्न० २ संव० द्वार । "जोगो पुण होइ पायलेवाई।" नि० चू० १३ उ० । "वसिकरणपायलेवाऽऽदिया तु जोगा मुणेयव्वा।" पं०भा० । पं०चू० । पादप्रलेपाऽऽदयः सौभाग्यदौर्भाग्यकरा योगाः । ध०२ अधि० । योगसौभाग्याऽऽदिकृद् द्रव्यनिचय इति । ग० १ अधि० । (अन्ययूथिकानां, गृहस्थानां वा योगकरणे प्रायश्चित्ताऽऽदिसूत्राणि 'अण्णउत्थिय' शब्दे प्रथमभागे ४७२ पृष्ठे द्रष्टव्यानि । तेषां सूत्राणां व्याख्यारूपा गाथाः 'पसिणापसिण' शब्दे दृश्याः) तद्रूपके पञ्चदशे उत्पादनादोषे च । पिं० । (तद्भक्तव्यता ' जोगपिंड ' शब्दे दृश्या) श्रुतोपधाने, " जोगा य बहुविकप्पा । " योगा उपधानानि,बहुविकल्पाः सङ्ख्याभेदेन बहुभेदाः । व्य०१ उ० । "आगाढमणागाढे, दुविधे जोगे समासतो होइ " । जोगो दुविधो-आगाढो य, अणागाढो य । जम्मि जोगे जंतणा सो आगाढो । यथा भगवतीत्यादि । इतरो अणागाढो, यथोत्तराध्ययनाऽऽदि । नि० चू० ४ उ० । आगाढमुत्तराध्ययनभगवत्याद्यिकम्, अनागाढं दशवैकालिकाऽऽदिकमिति । जीत० । स्था० । वाक्ये, वाक्यस्यैकार्थिकानाधिकृत्य-"वइजोगजोगे य।" दश० ७ अ० । ज्योतिषोक्तेषु रविचन्द्रयोगाधीनेषु विष्कम्भाऽऽदिषु तिथिवारनक्षत्राऽऽदीनामन्यतरान्यतमानाममृतयोगाऽर्द्धोदययोग इत्यादिके योगविशेषे,वाच० । षाण्मासिकयोगाऽऽदौ दत्तिप्रत्याख्यानं कार्यते, तत् किं " सपाणभोअणं पंचदत्तिअं आयंबिलं पच्चक्खाइ।" इत्याचाम्लाऽऽदिस्थाने पठ्यते?, अथवा-"सपाणभोअणं पंचदत्तिअं एगासणं पच्चक्खाइ । " इत्येकाशनकाऽऽदिस्थाने पठ्यते?, इति प्रश्ने, उत्तरम-"सपाणभोअणं पंचदत्तिअं आयंबिलं पच्चक्खाइ " इत्येवंरूपं प्रत्याख्यानं गुरुपरम्परया पठ्यमानमुपलभ्यते, न त्वन्यथेति । ७६ प्र० । सेन० १ उल्ला० । योगमध्ये रात्रावनाहारग्रहणं भवति, न वा ?, इति प्रश्ने, उत्तरम-रात्रौ योगिनां संघट्टकाभावात् किमपि ग्रहीतुं न कल्पते, संघट्टकं तु सायं मुक्तमिति प्रातः प्रवचनप्रवेदनानन्तरमेव तद्ग्रहणं कल्पत इति । १०३ प्र० । सेन० २ उल्ल० । आवश्यकोत्तराध्ययनाऽऽदियोगेषु पत्नीयमुद्गधूममोदकान केचन गृह्णन्ति, केचन न?, इति प्रश्ने,उत्तरम्-न गृह्णन्तीति वृद्धपरम्पराऽस्तीति । १३५ प्र० । सेन० २ उल्ला० । आवश्यकयोगसंबद्धदशवैकालिकयोगप्रवेशः शुद्ध्यति ?, न वा ?, इति प्रश्ने, उत्तरम-शुद्ध्यतीति । ९३ प्र० । सेन० ३ उल्ला० । येन साधुना ये योगा न व्यूढाः, तेन तद्योगानां प्रवेशोत्तारणं कार्यते, न

वा ?, इति प्रश्ने, उत्तरम्-मुख्यवृत्त्या येन ये योगा व्यूढाः, तेन तेषामेव प्रवेशोत्तारणाऽऽदिकं विधीयते, तदभावे तु नन्वनुयोगद्वारयोगाऽऽदिना सर्वेष्वप्यूढयोगेषु प्रवेशः, तेभ्यो निर्गमनं च कार्यते, तयोः क्रियाया असंबद्धत्वादिति परम्पराऽप्यस्ति, परं सर्वथैव तत्क्रियाकारिता न शुद्ध्यतीति । ३६ प्र० । सेन० ३ उल्ला० । चक्षुर्विकलस्य साधोः पार्श्वे कालिकोत्कालिकयोगस्य क्रिया कृता शुद्ध्यति, न वा ?, इति प्रश्ने, उत्तरम्-कालिकोत्कालिकयोगक्रिया चक्षुर्विकलस्य साधोः पार्श्वे प्रायो न शुद्ध्यतीति ज्ञातमस्ति । ६५ प्र० । सेन० ३ उल्ला० ।

विषयसूची-

(१) अलब्धेप्सितवस्तुलाभ-बीजाऽऽधानोद्भेदपोषणकरण-संयोग-मेलन-वर्माऽऽदिधारण-युक्ति-शब्दाऽऽदिप्रयोगसमुदायशब्दनिष्ठार्थयथार्थसंबन्ध यथादिष्टतत्स्वस्वरूपप्रतिपादन-विधिकर्मानुकूलपरिवारसंपत्तिमनोवाक्कायव्यापाराऽऽदयो योगशब्दार्थाः ।

(२) द्रव्यभावभेदेन योगस्य द्वैविध्यप्ररूपणे प्रशस्ताप्रशस्तत्वं निरूप्य द्रव्ययोगभावयोगयोर्निर्वचनम् ।

(३) योगस्य मनोवाक्कायाऽऽत्मकस्य एकस्मिन् काले युगपत् शुभाशुभत्वनिरसनम् ।

(४) मनोवाक्कायतया योगस्य द्वैविध्यमुपपाद्य, योगानामयुक्तस्य कर्मबन्धकारकत्वं युक्तस्य कर्मनिर्जराकारित्वं च भवतीति प्रतिपादनम् ।

(५) परिणामालम्बनग्रहणसाधनत्वेन मनोवाक्कायलक्षण—सहकारिकारणभेदाद् योगस्य त्रैविध्यम् ।

(६) आत्मनो वीर्यान्तरायक्षयक्षयोपशमसमुत्थलब्धिविशेषप्रत्ययमभिसन्ध्यनभिसन्धिपूर्वकत्वं योगस्य प्रतिपादनम् ।

(७) मनोवाक्काययोगयोः कायव्यापारविशेषत्वेन विचारः ।

(८) सामान्ययोगप्ररूपणानन्तरं विशेषतो नारकाऽऽदिषु योगविचारः ।

(९) नैरयिकाऽऽदिदण्डकेषु समविषमयोगापेक्षया प्ररूपणा ।

(१०) ध्यानतत्स्वरूपसालम्बनिरालम्बनत्वेन योगस्य द्वैविध्यं प्ररूप्य, ध्याननिरूपण-भेदाऽऽर्तादिविधचित्तपरिहारप्ररूपण-तत्फलाफलत्वप्रदर्शन-शान्तोदात्ताऽऽदियुक्तचित्तव्यावर्णनाऽऽदिविस्तरः ।

(११) योगस्य मोक्षहेतुत्वेन प्रदर्शनम् ।

(१२) योगस्य लक्षणं निरूप्य, दुरभव्याभव्यलक्षणनिरूपणाऽऽद्यनेकविषयोपपत्तिः ।

(१३) स्वकीयं लक्षणं परकीयलक्षणे विचारिते सति स्थिरीभवतीति पतञ्जलिप्रणीतयोगशास्त्रानुसारियोगस्य लक्षणाऽऽदिनिरूपणम् ।

(१४) विस्तरतो हि पुनस्तस्य परकीयप्रकटितयोगस्य खण्डनम् ।

(१५) स्थानवर्णार्थालम्बनैकाग्र्यरूपेण योगस्य पञ्चविधत्वं प्ररूप्य, विरतेषु तस्य नियतभावित्वं, परेषु तु बीजमात्रमेवेति विवेचनम् ।

(१६) क्षेमोत्पत्तिहेतून् निरूप्य स्थानाऽऽदीनां प्रीतिभक्तिवचोऽसङ्गैरशीतिभेदस्याऽऽविर्भावनं, स्थानाऽऽद्ययोगिनः सूत्रदाने दोषोद्भावनं च ।

(१७) वृत्तिनिरोधस्यापि योगत्वे तस्यापि पञ्चविधत्वाऽऽश्रनेकविषयविवेचनम् ।

(१८) योगस्थैर्यहेत्वाशास्त्रसामर्थ्याऽऽद्यवान्तरभेदप्रदर्शनेन तद्विवेकः ।

(१९) संप्रज्ञातासंप्रज्ञाततयैर्यथासंभवमवतारः ।

(२०) जीवाऽऽत्मनि परमाऽऽत्मनः सत्त्वोपपत्त्यर्थमात्मत्रयस्य निरूपणानन्तरं विषयाऽऽत्मनोः समापत्त्यादिनिरूपणम् ।

(२१) असंप्रज्ञातनामः समाधेर्निर्वचनम् ।

(२२) एकस्मिन्नपि योगेऽन्येषां समावेशाऽऽदिविचारः ।

(२३) योगमार्गाधिकारिणः ।

(२४) आत्माऽऽदिप्रत्ययं विना न योगसिद्धिः ।

(२५) योगादेव कर्मक्षयो भवतीति प्रतिपादनम् ।

(२६) योगस्य माहात्म्यम् ।

(२७) योगस्याऽऽगमगम्यत्वप्रदर्शनानन्तरमनुमानगम्यत्वप्रदर्शनम् ।

(२८) योगे एव महान् यत्नो विधेय इत्युपदेशः ।

(२९) युगे योगस्य दशविधत्वप्रदर्शनम् ।

(३०) प्रकीर्णकविषयाः ।

जोगंग—योगाङ्ग—न० । यमाऽऽदिके, "जोगाङ्गं च यमो भवेत् ।" द्वा० २१ द्वा० । अहिंसाऽऽदियमानधिकृत्य-"योगसौकर्यतोऽमीषां, योगाङ्गत्वमुदाहृतम् ।" यथोक्तम्-"यमनियमाऽऽसनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावङ्गानि योगस्येति ।" द्वा० २२ द्वा० । षो० । पुरुषसप्ततिकलाऽन्तर्गते कलाभेदे, कल्प० ७ क्षण ।

जोगंत—योगान्त—पुं० । शैलेश्यवस्थायाम्, द्वा० २५ द्वा० ।

जोगंतरग—योगान्तरक—न० । अन्यो योगो व्यापारो योगान्तरम्, तदेव योगान्तरकम् । अन्यस्मिन् योगे, पञ्चा० ५ विव० ।

जोगंधरायण—यौगन्धरायण—पुं० । उदायननृपतेः स्वनामख्यातेऽमात्ये, "न हरामि नृपस्यार्थं, नाहं यौगन्धरायणः ।" आव० ४ अ० । आ० चू० ।

जोगक्खेम—योगक्षेम—न० । योगश्च क्षेमं च समाहारद्वन्द्वः । अलब्धलाभचिन्तासहिते लब्धपरिरक्षणे, "योगक्षेमं वहाम्यहम्" वाच० । "जोगक्खेमं वहमाणा पमिच्छंति ।" ज्ञा० १ श्रु० ५ अ० । रा० ।

जोगक्खेमपय—योगक्षेमपद—न० । योगक्षेमाय पद्यते गम्यते वेनार्थस्तत् पदं योगक्षेमपदम् । योगक्षेमार्थके पदे, "अणुत्तरं जोगक्खेमपयं लंभिए समाणे ।" सूत्र० २ श्रु० ७ अ० ।

जोगचलणा—योगचलना—स्त्री० । चलनाभेदे, भ० १७श० ३उ० । (अस्याः स्त्रीलिङ्गत्वं 'चलणा' शब्दे तृतीयभागे ११६५ पृष्ठे दृश्यम्)

जोगचित्त—योगचित्त—त्रि० । योगबीजोपादानप्रणिधानचित्ते, द्वा० २१ द्वा० ।

जोगजुत्त- योगयुक्त—त्रि० । दशविधचक्रवालसामाचार्याऽऽद्याचरणप्रगुणे, कर्म० १ कर्म० ।

जोगजुत्तया—योगयुक्तता—स्त्री० । अनगारगुणभेदे, "जोगम्मि जुत्तता ।" आच० ४ अ० । प्रश्न० ।

जोगट्ठाण—योगस्थान—न० । योगो वीर्यं, तस्य स्थानं योग-

स्थानम् । वीर्याऽऽदिविभागांशसंघाते, कर्म० ५ कर्म० । (तद्वक्तव्यता 'अप्पाबहुय' शब्दे प्रथमभागे ६५६ पृष्ठे गता)

जोगणिओग–योगनियोग–पुं० । ष० स० । कार्मणवशीकरणाऽऽदिप्रकारे, योगानियोगैः कार्मणवशीकरणाऽऽदिप्रकारैरिति । त० ।

जोगणिग्गह–योगनिग्रह–पुं० । कायोत्सर्गे, "उस्सग्गो सि वा जोगणिग्गहो सि वा ।" आ० चू० ५ अ० ।

जोगणिरोह–योगनिरोध–पुं० । योगाख्यौदारिकाऽऽदिशरीरसंयोगसमुत्था आत्मपरिणामविशेषव्यापारा एव, तेषां निरोधनं निरोधः प्रलयकरणम्, योगनिरोधः । मनोवाक्कायव्यापारप्रलयकरणे, स एव च जिनानां ध्यानम् । "जोगणिरोहो जिणाणं तु ।" आव० ४ अ० । आ० म० ।

जोगणिव्वत्ति–योगनिर्वृत्ति–स्त्री० । योगनिष्पत्तौ, भ० १ श० १ उ० । "कइविहा णं भंते ! जोगणिव्वत्ती पण्णत्ता । गोयमा ! तिविहा पण्णत्ता । तं जहा–मणजोगणिव्वत्ती, वइजोगणिव्वत्ती, कायजोगणिव्वत्ती, एवं० जाव वेमाणिया जस्स जइविहो जोगो ।" प्र० १६ प० ७ उ० ।

जोगत्तिय–योगत्रिक–न० । कृतकारितानुमतिरूपे व्यापारत्रिके, दश० १० अ० ।

जोगदिट्ठि–योगदृष्टि–स्त्री० । योगजप्रातिभज्ञाने, द्वा० १६ द्वा० । मिथ्याऽऽदिकार्यां योगदृष्टौ च । ध० १ अधि० ।

सच्छ्रद्धासंगतो बोधो, दृष्टिः सा चाष्टधोदिता ।
मित्रा तारा बला दीप्रा, स्थिरा कान्ता प्रभा परा ॥२५॥

सच्छ्रद्धया शास्त्रवाह्याभिप्रायिकव्यसद्ग्रहत्यागरूपया, संगतो, बोधो, दृष्टिः, तस्या उत्तरोत्तरगुणाऽऽधानद्वारा सत्प्रवृत्तिपदाऽऽवहत्वात् । तदुक्तम्–"सच्छ्रद्धा संगतो बोधो, दृष्टिरित्यभिधीयते । असत्प्रवृत्तिव्याघात–सत्प्रवृत्तिपदाऽऽवहः" ॥ १ ॥ इति । सा चाष्टधोदिता–मित्रा, तारा, बला, दीप्रा, स्थिरा, कान्ता, प्रभा, परा चेति ॥ २५ ॥

तृणगोमयकाष्ठाग्नि–कणदीप्रप्रभोपमा ।
रत्नताराऽर्कचन्द्राऽऽभा, क्रमेणेत्वादिसन्निभा ॥२६॥

मित्रा दृष्टिस्तृणाग्निकणोपमा, न तत्त्वतोऽभीष्टकार्यक्षमा, सम्यक्प्रयोगकाले यावदनवस्थानात् । अलाघीर्यतयातः पटुस्मृतिर्वीजसंस्काराऽऽधानानुपपत्तेः, विकलप्रयोगभावाद्भावतो यत्नाऽऽदिकार्यायोगादिति । तारा दृष्टिर्गोमयाग्निकणसदृशी । इयमप्युक्तकल्पैव, तत्त्वतो विशिष्टस्थैर्यादिवीर्यविकलत्वात्, अतोऽपि प्रयोगकाले स्मृतिपाटवासिद्धेः, तद्भावे प्रयोगवैकल्यात्, ततस्तथा तत्कार्याभावादिति । बला दृष्टिः काष्ठाग्निकणतुल्या । ईषच्छिशोरूबोधद्वयात् । तद्भावेनात्र मनाक् स्थितिवीर्यं, अतः पटुप्राया स्मृतिः, इह प्रयोगसमये, तद्भावे चार्थप्रयोगमात्रप्रीत्या बलात्रेशभावादिति । दीप्रा दृष्टिर्दीपप्रभासदृशी । विशिष्टतरोबोधत्वात् । अतोऽत्रोद्रे स्थितिवीर्ये, ततस्तृष्वपि प्रयोगसमये स्मृतिः, एवं जावतोऽप्यत्र द्रव्यप्रयोगो वन्दनाऽऽदौ, तथा भक्तितो यत्नेदप्रवृत्तेरिति प्रथमगुणस्थानकप्रकर्ष एतावानिति समयविदः । स्थिरा च निम्नग्रन्थेरेव, सा च रत्नाभा, तद्वबोधो हि रत्नवास्तमानः, तद्भावोऽप्रतिपाती प्रवर्द्धमानो निरपायो नापरपरितापकृत् परितोषहेतुः प्रायेण प्रणिधानाऽऽदियोनिरिति । कान्ता ताराऽऽभा, तद्वबोधस्तारावास्तमानः । अतः स्थित एव प्रकृत्या निरतिचारमत्रानुष्ठानं शुश्रूषयोगानुसारि विशिष्टाप्रमादसचिवं विनियोगप्रधानं गम्भीरोदाराऽऽशयमिति । प्रभा अर्कोभा । तद्वबोधस्तरणिवास्तमानः, सद्ध्यानहेतुरेव सर्वदा, नेह प्रायो विकल्पावसरः । प्रशमसारं सुखमिह, अकिञ्चित्कराण्यन्यशास्त्राणि, समाधिनिष्ठमनुष्ठानं, तत्सञ्चिधौ वैराऽऽदिनाशः, परानुग्रहकर्तृता, औचित्ययोगो विनयेषु, तथाऽबन्ध्या सत्क्रियेति । परा तु दृष्टिश्चन्द्राऽऽभा । तद्वबोधश्चन्द्रकाभास्वमानः, सद्ध्यानरूप एव सर्वदा, विकल्परहितं मनः, तदा भावेनोत्तमं सुखम्, आरूढाऽऽरोहणभावतोऽनुष्ठानं प्रतिक्रमणाऽऽदि, परोपकारित्वं, यथा भव्यमबन्ध्या क्रियेति, तथा क्रमेण मित्राऽऽद्यनुक्रमेणेत्वादिसन्निभा दृष्टिरिक्षुरसकक्कवगुडकल्पाः खल्वाद्याश्चतस्रः खण्डशर्करामत्स्यण्डमधूपलकसमाश्चाग्रिमा इत्याचार्याः । इत्वादिकल्पानामेव रुच्यादिगोचराणां संवेगमाधुर्यभेदोपपत्तेः, नलाऽऽदिकल्पानामभव्यानां संवेगमाधुर्यशून्यत्वादिति ॥ २६ ॥

यमाऽऽदियोगयुक्तानां, खेदाऽऽदिपरिहारतः ।
अद्वेषाऽऽदिगुणस्थानं, क्रमेणैषा सतां मता ॥ २७ ॥

यमाऽऽद्या योगाङ्गत्वाद् योगाः । यथोक्तम्–"यमनियमाऽऽसनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावङ्गानि योगस्येति ।" (२-२९) तैर्युक्तानां खेदाऽऽदीनां ध्यानाभिधानस्थले प्रोक्तानां योगप्रत्यनीकाऽऽशयलक्षणानां परिहारतोऽद्वेषाऽऽद्या येऽष्टौ गुणाः । तदुक्तम्–"अद्वेषो जिज्ञासा, शुश्रूषा श्रवणबोधमीमांसाः । परिशुद्धा प्रतिपत्तिः, प्रवृत्तिरष्टाङ्गिकी तत्त्व ॥१॥" इति । तद्गुणस्थानं तत्प्रतिबद्धवृत्तीनां क्रमेणैषा दृष्टिः सतां जगत्पतञ्जलिभदन्तभास्कराऽऽदीनां योगिनां मतेष्टा ॥ २७ ॥

आद्याश्चतस्रः सापाय–पाता मिथ्यादृशामिह ।
तत्त्वतो निरपायाश्च, भिन्नग्रन्थेस्तथोत्तराः ॥ २८ ॥

आद्याश्चतस्रो मित्राऽऽद्या दृष्टयः, इह जगति, मिथ्यादृशां भवन्ति । सापायपाता दुर्गतिहेतुकर्मबन्धेन तन्निमित्तमात्रादपायसहिताः कर्मवैचित्र्याद् भूयोयोगेन, सपाताश्च, न तु सपाता एव, तास्वतदुत्तरजन्मादिति । तथोत्तराश्चतस्रः स्थिराऽऽद्या दृष्टयो भिन्नग्रन्थेस्तत्त्वतः परमार्थेनाश्च निरपायाः, श्रेणिकाऽऽदीनामेतद्भावोपात्तकर्मसामर्थ्ये हि तस्यापि सद्दृष्ट्यविघातेन तत्त्वतोऽनपायित्वाद् वज्रतन्दुलवत्पाकेन तदाशयस्य कायदुःखनावेऽपि विक्रियाऽनुपपत्तेः, योगाऽऽचार्या एवात्र प्रमाणम् । तदुक्तम्–"प्रतिपातयुताद्याद्या अतस्रो नोत्तरास्तथा । सापाया अपि चैतास्तत्, प्रतिपातेन नेतराः ॥१॥" इति ॥ २८ ॥

प्रयाणजङ्घाभावेन, निशि स्वापसमः पुनः ।
विघातो दिव्यभवत–श्चरणस्योपजायते ॥ २९ ॥

प्रयाणस्य कान्यकुब्जाऽऽद्यावनवरतगमनश्रमस्य, भङ्गाभावेन निशि रात्रौ, स्वापसमः पुनर्विघातः प्रतिबन्धः, पुनर्दिव्यभवतः स्वर्गजन्मनः सकाशात्, चरणस्य चारित्रस्योपजायते ॥ २९ ॥

तादृश्यौदयिके भावे, विलीने योगिनां पुनः ।
जाग्रभिरन्तरगति–प्राया योगप्रवृत्तयः ॥ ३० ॥

तादृशि स्वर्गगतिनिबन्धने सरागचारित्रदशावति, औदयिके भावे प्रशस्तरागाऽऽदिरूपे, विलीने पुनर्योगिनां जाग्रतो या निरन्तरा मतयः, तत्प्राया योगिनां प्रवृत्तयो भवन्ति, अक्लेपेणैव

मोक्षपुरप्राप्त्युपपत्तेः तथाविधकर्मरूपभ्रमाभावेन, तदपनयनार्थं चापलमस्वजनावेनाविलम्बादिति भावः ॥ ३० ॥

मिथ्यात्वे मन्दतां प्राप्ते, मित्राऽऽद्या अपि दृष्टयः ।
मार्गाभिमुखभावेन, कुर्वते मोक्षयोजनम् ॥ ३१ ॥

मिथ्यात्वे मिथ्यात्वमोहनीये कर्मणि, मन्दतां प्राप्तेऽपुनर्बन्धकत्वाऽऽदिभावेन मित्राऽऽद्या अपि दृष्टयश्चतस्रः, किं पुनः स्थिराऽऽद्या इत्यर्थः ?, मार्गाभिमुखभावेन मार्गसांमुख्येन ऊर्ध्वयोक्तया मोक्षयोजनं कुर्वते, चरमाऽऽवर्तभावित्वेन समुचितयोग्यतासिद्धेः ॥ ३१ ॥

प्रकृत्या भद्रकः शान्तो, विनीतो मृदुरुत्तमः ।
सूत्रे मिथ्यादृगप्युक्तः, परमाऽऽनन्दभागतः ॥ ३२ ॥

अत उक्तहेतोः, सूत्रे जिनप्रवचने, प्रकृत्या निसर्गेण, भद्रको निरुपमकल्याणमूर्तिः, शान्तः क्रोधविकाररहितः, विनीतोऽनुद्धतप्रकृतिः, मृदुर्निर्दम्भः, उत्तमः सन्तोषसुखप्रधानः, मिथ्यादृगपि, परमाऽऽनन्दभाक् निरतिशययोगसुखभाजनयुक्तः, शिवराजर्षिवदिति ॥३२॥ द्वा० २० द्वा० । (शिवराजर्षिचरित्रं 'सिव' शब्दे वक्ष्यते) (मित्रा-तारा-बला-दीप्रा-स्थिरा-कान्ता-प्रभा-परानां योगदृष्टीनां व्याख्यानं स्वस्वशब्दे द्रष्टव्यम्)

जोगदुप्पणिहाण–योगदुष्प्रणिधान–न० । सावद्यप्रवर्तनालक्षणे कायवाङ्मनसां प्रणिधाने, ध० १ अधि० ।

योगदुष्प्रणिधानानि, स्मृतेरनवतारणम् ।
अनादरश्चेति जिनैः, प्रोक्ताः सामायिके व्रते ॥७८॥

योगदुष्प्रणिधानात् ते प्रक्रमात्पञ्चातिचाराः सामायिकव्रते जिनैः प्रोक्ता इत्यन्वयः । तत्र योगाः कायवाङ्मनांसि, तेषां दुष्टानि प्रणिधानानि प्रणिधयो दुष्प्रणिधानानि, सावद्ये प्रवर्तनालक्षणानीत्यर्थः । तत्रापि शरीरावयवानां पाणिपादाऽऽदीनामानिभृतताऽवस्थापनं कायदुष्प्रणिधानम् । वर्णसंस्काराभावोऽर्थानवगमश्चापत्स्यं च वाग्दुष्प्रणिधानम् । क्रोधलोभद्वेषाभिमानेर्ष्याऽऽद्यः कार्यव्यासङ्गः संभ्रमश्च मनोदुष्प्रणिधानम् । ध० २ अधि० । (एतेषां सामायिकव्रतस्यातिचारत्वं 'सामाइय' शब्दे वक्ष्यते)

जोगपच्चक्खाण–योगप्रत्याख्यान–न० । मनोवाक्कायानां व्यापारो योगः, तस्य प्रत्याख्यानं परिहारो योगप्रत्याख्यानम् । उत्त० २९ अ० । प्राणातिपाताऽऽदिषु कृतकारितानुमतिलक्षणानां मनःप्रभृतिव्यापाराणां निरोधप्रतिज्ञाने, प्र० १५ श० १ द्व० ।

योगप्रत्याख्यानफलं प्रश्नपूर्वकमाह—

जोगपच्चक्खाणेणं भंते ! जीवे किं जणयइ ?। जोगपच्चक्खाणेणं अजोगित्तं जणयइ । अजोगी णं जीवे नवं कम्मं न बन्धइ, पुव्ववद्धं निज्जरेइ ॥ ३७ ॥

हे भगवन् ! योगप्रत्याख्यानेन जीवः किं जनयति ?। योगप्रत्याख्यानेन अयोगित्वं जनयति-शैलेशीभावं भजति । अयोगी हि जीवः चतुर्दशगुणस्थाने प्रवर्तमानो जीवो नवं कर्म न बध्नाति, पूर्वबद्धं कर्म निर्जरयति, क्षपयतीति भावः । उत्त० २९ अ० ।

जोगपट्ट–योगपट्ट–न० । योगाभ्यासार्थं पट्टम् । योगिधार्ये पट्टसूत्रभेदे, वाच० । गुरूणां धार्ये विशिष्टे उत्तरपट्टे च । पुं० । " चम्मछेयणपट्टे य, विहिमिही धारए गुरू । " पट्टो योगपट्ट इति । ध० ३ अधि० ।

जोगपडिक्कमण–योगप्रतिक्रमण–न० । मनोवचनकायव्यापाराणामशोभनानां व्यावर्तनरूपे प्रतिक्रमणभेदे, स्था० ४ ठा० २ उ० ।

जोगपर–योगपर–त्रि० । उत्साहपरे, पो० ४ विव० ।

जोगपरिणाम–योगपरिणाम–पुं० । योग एव परिणामो योगपरिणामः । जीवपरिणामभेदे, स च मनोवाक्कायभेदात्त्रिधेति । स्था० ८ ठा० ।

जोगपिंड–योगपिण्ड–पुं० । योगो वशीकरणाऽऽदिफलो द्रव्यसंयोगः । पञ्चा० १३ विव० । योगादञ्जनाऽऽदेर्व्यासः पिण्डो योगपिण्डः । आचा० २ श्रु० १ अ० ६ उ० । योगः पादप्रलेपनाऽऽदि तत्प्रयोगेण लब्धः पिण्डो योगपिण्डः । जीत० । यदा मुग्धलोकान् सौभाग्याऽऽदिविक्षेपनराजवशीकरणाऽऽदितिलकेन जलखड्गमार्गोल्लङ्घनसुनगदुर्भगविधिमुपदिश्याऽऽहारं गृह्णाति, तदा योगपिण्डदोषः । इत्युक्तव्रक्षणे पञ्चदशे उत्पादनादोषे, उत्त० २६ अ० । पिं० । ग० । ध० । स्था० ।

उत्पादनादोषाधिकारे योगप्रकारमधिकृत्य–"पायलेवणे जोगे " इति व्याख्यानयन्नाह–

सोभग्गदोभग्गकरा, जोगा आहारिया य इयरे य ।
अप्पत्थधूववासा, पायपलेवाइणो इयरे ॥

योगाः सौभाग्यदौर्भाग्यकरा जनप्रियत्वाप्रियत्वकराः । ते च द्विधा-आहार्याः, इतरे च । तत्राऽऽहार्या ये पानीयाऽऽदिना सहाऽऽहार्यत्वमुह्यन्ते । तद्विपरीता इतरे । तत्राद्याः-आप्यर्थाः, धूपावासाश्च । ये पानीयाऽऽदिना सह घर्षयित्वा पीयन्ते ते आप्यर्थाः धूपावासाः प्रतीताः । अथ चूर्णस्य वासानां च परस्परं कः प्रतिविशेषः, द्वयोरपि क्षोदरूपत्वाविशेषात् ? । उच्यते-सामान्यरूपनिष्पन्नः शुष्क आर्द्रो वा क्षोदः चूर्णः, सुगन्धद्रव्यनिष्पन्नश्च शुष्कएव पिष्टो वासः, इतरे वाऽऽहार्या योगाः पादप्रलेपनाऽऽद्यः । पिं० ।

जे भिक्खू जोगपिंडं भुंजइ, भुंजंतं वा साइज्जइ ॥७१॥
जो भिक्खु जोगपिंडं, भुंजेज्ज सयं तु अट्ठ सातिज्जे ।
सो आणा अणवत्थं, मिच्छत्तविराहणं पावे ॥ ७०५ ॥

पादलेपाऽऽदिजोगेहिं आउट्टेउं जो पिंडं उप्पादेति, तस्स आणादी दोसा । नि० चू० १३ उ० । "असिवादिकारणेसु वा जोगपिंडं उप्पाएज्जा ण दोसो त्ति । " नि० चू० १३ उ० ।

अत्र दृष्टान्तं गाथात्रयेण भावयति-

नइकन्द–विन्न–दीवे, पंचसया तावसाण निवसंति ।
पव्वदिवसेसु कुलवइ, पाएवुत्तारें सक्काओ ॥
जणें सावगाण खिंसण, सपिय खमाइ ठाण झेवेणं ।
सावयपयत्तकरणं, अविणय लोए चलणधोए ॥
पडिलाभिय वच्चंता, निव्वुय नइकूल मिलण समिपाओ ।
विम्हियपंचसया ता–वसाण पव्वज्ज साहा य ॥

" पृथ्व्यां प्रतिष्ठं नगरं, सुप्रतिष्ठः क्षितीश्वरः ।
कृष्णा वेणा च वाहिन्यौ, तिष्ठतस्तत्पुरान्तिके ॥ १ ॥
ब्रह्मद्वीपस्तयोरन्त-स्तत्राऽऽसन् केऽपि तापसाः ।
दुर्वीव पादलेपेन, ते जलोपरिचारिणः ॥ २ ॥

ऊचुः पृष्टास्तपःशक्ति-रस्माकमियमीदृशी ।
तेष्वाहतस्ततो लोकः, क्षुत्रिताः श्रावका अपि ॥ ३ ॥
आसतामपरे धर्माः, जिनधर्मोऽपि हील्यते ।
तदाऽऽर्यसमिताऽऽचार्याः, तत्रेयुर्वज्रमातुलाः ॥ ४ ॥
आद्यः सुधीर्गुरोराख्यद्, भौतोदन्तं गुरुस्ततः ।
भ्रमितानां प्रबोधाय, शिक्षां तस्य ददौ रहः ॥ ५ ॥
सोऽथ गत्वा प्रणते तान्, भौतान् सर्वानमन्त्रयत् ।
दृष्टास्तेऽसच्चरित्रेण, क्षुत्रिताः श्रावका अपि ॥ ६ ॥
अथाऽऽनीय गृहे सर्वान्, पादशौचे कृतोद्यमः ।
स तैर्निषिध्यमानोऽपि, भक्त्यैवाक्षालयत् क्रमान् ॥ ७ ॥
धौताश्च पादुकास्तेषां, यथेष्टं भोजितास्ततः ।
अथानुव्रजनं श्राद्धाः, अकालेव इव व्यधुः ॥ ८ ॥
नद्यां प्राग्वत्प्रविष्टास्ते, मज्जन्तस्तारकैर्धृताः ।
तदेत्युच्चैर्जैना ऊचुः सुप्ताः स्मश्चक्षतापसैः ॥ ९ ॥
तत्राऽऽचार्यास्तदाऽऽयाताः, योगं क्षिप्त्वा नदीं जगुः ।
एहि पुत्रि ! यथा यामो, वयं परतटं तव ॥ १० ॥
मिलितो द्वावपि तटौ, तत्रैवार्यापि पश्यताम् ।
गुरवः परतो जग्मु-र्लोकः सर्वोऽपि विस्मितः ॥ ११ ॥
तापसाः प्रतिबुद्धास्ते, तेषां पार्श्वे प्रवव्रजुः ।
ते ब्रह्मद्वीपवासित्वात्, तदाह्वाः साधवोऽभवन् " ॥ १२ ॥
आ० क०।

जोगबुद्धि–योगबुद्धि–स्त्री० । सम्यग्दर्शनाऽऽदिमुक्तिबीजोत्कर्षे, योο विं० ।

जोगब्भास–योगाभ्यास–पुं० । योगो ध्यानं, तस्याभ्यासः परिचयो योगाभ्यासः । ध्यानपरिचये, षो० ।

योगाभ्यासमाह–

स्थानोर्णार्थाऽऽलम्बन–तदन्ययोगपरिभावनं सम्यक् ।
परतत्त्वयोजनमलं, योगाभ्यास इति तत्त्वविदः ॥ ४ ॥

स्थीयतेऽनेनेति स्थानमासनविशेषरूपम्–कायोत्सर्गपर्यङ्कबन्धपद्माऽऽसनाऽऽदिसकलशास्त्रसिद्धम् । ऊर्णः शब्दः, स च वर्णाऽऽत्मकः अर्थः शब्दस्याभिधेयम् । आलम्बनं बाह्यो विषयः प्रतिमाऽऽदिः । तस्मादालम्बनादन्यः, तद्विरहितस्वरूपोऽनालम्बन इति यावत् । स्थानं चोर्णश्चार्थश्चाऽऽलम्बनं च तदन्यश्चैत एव योगाः, तेषां परिभावनं सर्वतोऽभ्यसनं, सम्यक् समीचीनं, परं तत्त्वं योजयतीति परतत्त्वयोजनं, मोक्षेण योजनात्, अलमत्यर्थम्, योगस्य योगाङ्गरूपस्य ध्यानस्य वाऽभ्यासः परिचयो योगाभ्यासः, 'इति'रित्थं, तत्त्वविदोऽभिवदन्ति । कथं पुनः स्थानाऽऽदीनां योगरूपत्वं, येन तत्परिभावनं योगाभ्यासो भवेत् ? उच्यते–योगाङ्गत्वेन, योगाङ्गस्य च शास्त्रेषु योगरूपताप्रसिद्धेर्हेतुफलभावेनोपचारात् । योगाङ्गत्वं तु स्थानाऽऽदीनां प्रतिपादितमेव योगशास्त्रेषु । यथोक्तम्–" यमनियमाऽऽसनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावङ्गानि । " (२ । २९ पातञ्जलयोग०) ॥ ४ ॥ षो० २ विव० ।

जोगभंग–योगभङ्ग–पुं० । श्रुतोपधानभङ्गे, स च द्विविधः–सर्वभङ्गो, देशभङ्गश्च । व्य० ४ उ० । हा० । नि० । (योगभङ्गे प्रायश्चित्तम् 'चरियापविट्ठ' शब्दे तृतीयभागे ११६२ पृष्ठे दृष्टव्यम्)

जोगभावियमइ–योगभावितमति–त्रि० । धर्मव्यापारविशेषवासितबुद्धौ, " पायं तह जोगभावियमईणं । " योगभावितमतीनां धर्मव्यापारविशेषवासितधियामिति । पञ्चा० ४ विव० ।

जोगमग्ग–योगमार्ग–पुं० । योगपथमेति, " आमूलमिदं परमं, सर्वस्य हि योगमार्गस्य । " षो० १५ विव० । अध्यात्मशास्त्रपथे च । पञ्चा० १६ विव० ।

जोगमुद्दा–योगमुद्रा–स्त्री० । हस्तविन्यासविशेषाऽऽत्मके मुद्राभेदे, संघा० १ प्रस्ता० ।

योगमुद्रायाः स्वरूपमाह–

अन्नोन्नंतरिअंगुलि–कोसाकारेहिँ दोहिँ हत्थेहिं ।
पिट्ठोवरि कोप्परसं–ठिएहिँ तह जोगमुद्द त्ति ॥ १९ ॥

अन्योन्येन परस्परेण, अन्तरिता व्यवहिताः, अङ्गुलयः करशाखा ययोस्तौ, तथा तौ, कोशाऽऽकारौ च कमलकोरकाऽऽकृती, उन्नयजोटनेनान्योऽन्यान्तरिताङ्गुलिकोशाऽऽकारौ, ताभ्याम् । द्वाभ्यां, हस्ताभ्यां कराभ्यां, करणभूताभ्याम् । पुनः किंभूताभ्यां ?–पेट्टस्य उदरस्य, उपरि ऊर्ध्वभागे, कूर्परास्थ्यां कुहणिकाभ्यां, संस्थितौ व्यवस्थितौ यौ तौ तथा ताभ्यां–पेट्टोपरिकूर्परसंस्थिताभ्याम् । तथा तेन प्रकारेणाऽऽचरणमभ्येन, अथवा–पञ्चाङ्गप्रणिपातापेक्षया समुच्चयार्थस्तथाशब्दः । योगो हस्तयोर्योजनाविशेषः, समाधिर्वा, तत्प्रधाना मुद्राऽङ्गन्यासविशेषो विघ्नविशेषव्यपोहनसमर्थो योगमुद्रा, भवतीति गम्यते । इतिशब्दो योगमुद्रालक्षणसमाप्तिसूचकः, उपप्रदर्शनार्थो वा–'इत्येवंलक्षणा योगमुद्रेत्यर्थः' । इति गाथार्थः ॥१९॥ पञ्चा० ३ विव० । दर्श० ।

योगमुद्रया किं कर्तव्यम् ?, इत्याह–

थयपाठो होइ जोगमुद्दाए । (१७)

स्तवपाठः शक्रस्तवाऽऽदिपठनम्, भवति, कर्तव्य इति शेषः । कया ?, इत्याह—योगमुद्रया प्रदर्शितलक्षणया । ननु च–तुर्विंशतिस्तवाऽऽदेरेव पाठो योगमुद्रया विधेयो, न तु शक्रस्तवस्य, तर्हि किमर्थं समाकुञ्चितवामजानुर्भूमिविन्यस्तदक्षिणजानुर्ललाटपट्टघटितकरकुड्मलः पठतीति जीवाभिगमाऽऽदिष्वभिधीयत इति ? । सत्यम् । केवलं नानन्तरोक्तविशेषणयुक्त एव तं पठतीति नियमोऽस्ति, पर्यङ्काऽऽसनस्थः शिरोऽधिनिवेशितकरकोरकस्तं पठतीत्यस्यापि ज्ञाताधर्मकथासु दर्शनात् । तथा हरिभद्राऽऽचार्येणापि चैत्यवन्दनवृत्तौ–"क्षितिनिहितजानुकरतलो भुवनगुरौ विनिवेशितनयनमानसः प्रणिपातदण्डकं पठति " इत्यस्य विध्यन्तरस्याभिधानात् । ततोऽस्य पाठे विविधविधिदर्शनात्सर्वेषां च तेषां प्रमाणग्रन्थोक्तत्वेन, विनयविशेषभूतत्वेन च निषेद्धुमशक्यत्वाद् योगमुद्रयाऽपि शक्रस्तवपाठो न विरुध्यते, विचित्रत्वान्मुनिमतानाम् । न चैतानि परस्परमतिविरुद्धानि, सर्वैरपि विनयस्य दर्शितत्वादिति । पञ्चा० ३ विव० । प्रव० । दर्श० । सङ्घा० ।

जोगरहिय–योगरहित–त्रि० । सम्यगकृतयोगोद्वहने, तदात्मके सूत्रदोषभेदे च । न० । ध० ३ अधि० ।

जोगलोयण–योगलोचन–त्रि० । योग एव लोचनमक्षि यस्य । योगबलेन यथावस्थितवस्तुपरिज्ञानवति, षो० १ विं० ।

जोगवं–योगवत्–त्रि० । योजनं योगो व्यापारः तद्वान्, अतिशायने मतुप् । व्यापारवति, योगः समाधिः, सोऽस्यास्तीति योगवान् । प्रशंसायां मतुप् । समाधिमति, उत्त० ११ अ० । संयमाऽऽदियोगवति च । सूत्र० १ श्रु० २ अ० १ उ० ।

जोगवहण–योगवहन–न० । योगोद्वहने, सेन० । प्राग् योगोद्वहनं कृत्वा साधवो द्वादशाङ्गीं पठेयुः, किं वाऽन्यथा वा ?, इति प्रश्ने, उत्तरम्–प्राग् योगमुद्वाह्य द्वादशाङ्गीं पठेयुः । कदाचित्केनचिदयोगोद्वहनं विनाऽपि द्वादशाङ्गी पठिता शास्त्रे दृश्यते, तदपि कर्तव्यम्, आगमव्यवहारिकृतत्वात् । यत आगमव्यवहारी यथा लाभं जानाति, तथा करोतीति । ११६ प्र० । सेन० ४ उल्ला० ।

जोगवाहि(ण्)–योगवाहिन्–पुं० । योगेन वहति, वह–णिनिः । पारदे क्षारभेदे च । वाच० । श्रुतोपधानकारिणि, स्था० १० ठा० । भ० । हो० (एतद्वक्तव्यता ' जोगविहि ' शब्दे १६४५ पृष्ठे वक्ष्यते) योगेन समाधिना सर्वत्रानुत्सुकत्वलक्षणेन वहतीत्येवंशीलो योगवाही । समाधिस्थायितरि, स्था० १० ठा० ।

जोगविंदु–योगबिन्दु–पुं० । योगस्य मोक्षहेतोरनुष्ठानस्य बिन्दुरवयवो योगबिन्दुः । योगावयवे, योगावयवानां प्रतिपादके आचार्यहरिभद्रसूरिविरचिते स्वनामख्याते प्रकरणग्रन्थभेदे च । यो० बिं० ।

तस्य चेदमादिसूत्रम्–

नत्वाऽऽद्यन्तविनिर्मुक्तं, शिवं योगीन्द्रवन्दितम् ।
योगबिन्दुं प्रवक्ष्यामि, तत्त्वसिद्ध्यै महोदयम् ॥ १ ॥

नत्वाऽभिवन्द्य, आदिः प्रथमभावः, अन्तः पर्यवसानं, ताभ्यां विनिर्मुक्तं विरहितं, किम् ?, इत्याह–शिवं सकलोपद्रवकलाविकलं देवताविशेषम् । कीदृशम् ?, इत्याह–योगीन्द्रवन्दितं गणधराऽऽदिमहामुनिनमस्कृतम् । किम् ?, इत्याह–योगबिन्दुम्–योगस्य मोक्षहेतोरनुष्ठानस्य, बिन्दुरवयवो योगबिन्दुः, तत्प्रतिपादकतया प्रकरणमपि योगबिन्दुरुच्यते; ततो योगबिन्दुनामकं प्रकरणं, प्रवक्ष्यामि अभिधास्ये । किमर्थम् ?, इत्याह–तत्त्वसिद्ध्यै आत्माऽऽदितत्त्वप्रतीतिनिमित्तम् । पुनरपि कीदृशं योगबिन्दुम् ?, इत्याह–महोदयं महान् प्रशस्य उदयो निःश्रेयसाभ्युदयसंसिद्धिरूपो यस्मात् स तथा तम् ॥ १ ॥

पुनरपि कीदृशं योगबिन्दुम् ?, इत्याह–

सर्वेषां योगशास्त्राणा–मविरोधेन तत्त्वतः ।
सन्नीत्या स्थापकं चैव, मध्यस्थाँस्तद्विदः प्रति ॥२॥

सर्वेषां कपिञ्जलगताऽऽदिप्रणीतयोगशास्त्राणामध्यात्मग्रन्थानाम्, अविरोधेन अविघटनेनोपन्यसितं, तत्त्वत पेदमर्थपर्यालोचनेन, न पुनः शाब्दन्यायेनापि तस्य प्रतिदर्शनम्, अन्यथाऽन्यथाप्रवृत्तत्वात् । पठ्यते च–"प्रशान्तवाहितासंज्ञं, विषयामपरिक्षयम् । शिवधर्मं ध्रुवादेति, योगिभिर्गीयते ह्यदः" ॥१॥ इति । तथा सन्नीत्या अन्वयव्यतिरेकयुक्तिरूपया, स्थापकमविसंवादाऽऽपादनेन प्रतिष्ठाकारि सर्वयोगशास्त्राणामेव । चैव इति समुच्चये । ननु योगशास्त्रकाराणां निजनिजमतात्यन्ताभिनिवेशेन विप्रतिपन्नत्वात्कथं सर्वयोगशास्त्राणां संस्थापकमिदं प्रकरणं स्यात् ?, इत्याशङ्क्याऽऽह–मध्यस्थान् स्वदर्शनरागपरदर्शनद्वेषयोर्मध्यनामवर्तिनः, तद्विदो योगशास्त्रविदः, श्रोतॄन् प्रति इति स्वदर्शनं प्रतीत्य, अमध्यस्थेषु श्रोतृषु वस्तुस्थापनाऽयोगात् । तथा चोक्तम्–"आग्रही बत निनीषति युक्तिं, तत्र यत्र मतिरस्य निविष्टा । पक्षपातरहितस्य तु युक्तिः–यत्र तत्र मतिरेति निवेशम्" ॥ १ ॥ इति । आद्यन्तविनिर्मुक्तमिति च विशेषणं शिवसन्तानापेक्षम् । न पुनरेकः कश्चिदनादिमुक्तः शिवः समस्ति, तस्य शास्त्रान्तरे महता प्रबन्धेन प्रतिषिद्धत्वात् । अत्र च नत्वा शिवमित्यनेन विघ्नापोहहेतुः शास्त्रमूलं मङ्गलमुक्तम् । योगबिन्दुमित्यनेन प्रेक्षावत्प्रवृत्त्यर्थमभिधेयम् । तत्त्वसिद्ध्य इत्यनेनानन्तरप्रयोजनम् । महोदयमित्यनेन तु परम्पराप्रयोजनमभिहितम् । अभिधानाभिधेयलक्षणश्च संबन्धः स्वयमेव वाच्य इति सर्वेषां योगशास्त्राणामविरोधेन इत्युक्तम् ॥२॥ यो० बिं० ।

अथास्य योगशास्त्रविरचनस्य प्रयोजनमुच्चारस्थानं स्वनाम च सूचयन् शास्त्रकार इदमाह–

स्वल्पमत्यनुकम्पायै, योगशास्त्रमहार्णवात् ।
आचार्यहरिभद्रेण, योगबिन्दुः समुद्धृतः ॥ ५२५ ॥

स्वल्पमत्यनुकम्पायै तुच्छमतिजनानुग्रहाय, योगशास्त्रार्णवेभ्य तत्तत्तन्त्रान्तरप्रसिद्धानि महार्णवो महासमुद्रः, तस्मात् । आचार्यहरिभद्रेणेति शास्त्रकृतो नाम । किम् ?, इत्याह–योगबिन्दुः समुद्धृतः पृथक्कृत इति ॥ ५२५ ॥

अथ शास्त्रकृद्देवप्रणिधानमाह–

समुद्धृत्यार्जितं पुण्यं, यदेनं शुभयोगतः ।
भवाऽऽन्ध्यविरहात् तेन, जनः स्ताद्योगलोचनः ॥५२६॥

समुद्धृत्य–उच्चारस्थानाविसंवादेन पृथक्कृत्य, अर्जितमुपात्तं, पुण्यं शुभकर्म, यद्विशिष्टस्वरूपम्, एनं योगबिन्दुम्, शुभयोगतः परोपकाररूपशुभव्यापारात्, भवाऽऽन्ध्यविरहात् रागद्वेषमोहलक्षणसंसारान्धभावस्य परिहारेण, तेन शुभकर्मणा, जनो भवलोकः, स्ताद्भवत्वीकीदृशः ?, इति आह–योगलोचनः–यथावस्थितवस्तुपरिज्ञानावन्ध्यकारणत्वाद् योग एव लोचनमाक्षि यस्य स तथा । विरह इति च भगवतः श्रीहरिभद्रसूरेः स्वप्रकरणाङ्गप्रद्योतक इति । यो० बिं० ।

जोगविसुद्ध–योगविशुद्ध–पुं० । निरवद्यव्यापारे, " उनओ जोगविसुद्धा । " पञ्चा० १८ विव० ।

जोगविहि–योगविधि–पुं० । योगविधाने, पो० १३ विव० । उपधानवहनं विना श्राद्धस्य, योगोद्वहनं च विना साधोः स्वखोचितश्रुताध्ययनवाचनाऽऽदिकमधर्म इति स्थितम् । योगाङ्गकरणि चैतानि–" तिहिं ठाणेहिं संपन्ने अणगारे अणाइअं अणवदग्गं दीहमद्धं चाउरंतसंसारकंतारं वीतीवएज्जा । तं जहा–अणिदाणयाए, दिट्ठिसंपन्नयाए, जोगवाहित्ताए । " इति स्थानाङ्गतृतीयस्थाने । तथा–" दसहिं ठाणेहिं जीवा आगमेसिं भद्दगत्ताए कम्मं पकरेंति । तं जहा–अणिदाणयाए, दिट्ठिसंपन्नयाए, जोगवाहित्ताए, खंतिखमणयाए, जिइंदियत्ताए, अमाइल्लयाए, अपासत्थयाए, सुसामन्नत्ताए, पवयणवच्चल्लयाए, पवयणउब्भावणयाए । " इति स्थानाङ्गदशमस्थाने । तथा–" णीयावित्ती अचवले, अमाई अकुऊहले । विणीअविणए दंते, जोगवं उवहाणवं ॥" (२७ गाथा) तथा–"पयणुकोहमाणे अ, मायालोभपयणुए । पसंतचित्ते दंतप्पा, जोगवं उवहाणवं ॥ " (२६गाथा) इति चतुस्त्रिंशोत्तराध्ययने । तथा–"अणिस्सिओवहाणं सि " समवायाङ्गे द्वात्रिंशद्योगसंग्रहाधिकारे । तथा–"नाणं पंचविहं पन्नत्तं । तं जहा–आभिणिबोहिअनाणं० जाव केवलनाणं । तत्थ चत्तारि नाणाइं ठप्पाइं उवदिसिज्जाइं णो उद्दिसंति, णो समुद्दिसंति, णो अणुन्नविज्जंति; सुअनाणस्स उद्देसो १, समुद्देसो २, अणुन्ना ३, अणुओगो ४, पवत्तइ । " इत्यनुयोगद्वारे उद्देशाऽऽदिकरणं च योगस्यैवेतिकर्तव्यता ।

एवं कालग्रहणाऽऽदिविधिरप्युत्तराध्ययनाऽऽदिगतो द्रष्टव्यः। उपधानं च यद्यस्मिन्नङ्गाऽऽदौ भणितं,तत्तद्विधिश्च योगविधिप्रतिपादकग्रन्थतो ज्ञेयः। कालक्रमश्च आचाराङ्गाऽऽदेस्त्रिवर्षाऽऽदिपर्यायः सूत्रोक्तः,तदुल्लङ्घनेन ददतस्तु आज्ञाभङ्गाऽऽदयो दोषा एव।

स च कालो यथा—

" तिवरिसपरिआगस्स उ, आयारपकप्पणाममज्झयणं ।
चउवरिसस्स य सम्मं, सूअगडं नाम अंगं ति ॥ १ ॥
दसकप्पववहारा, संवच्छरपणगदिक्खिअस्सेव ।
ठाणं समवाओ त्ति अ, अंगाइं अट्ठवासस्स ॥ २ ॥
दसवासस्स विवाहा, एक्कारसवासयस्स य इमाओ ।
खुड्डिअविमाणमाई, अज्झयणा पंच णायव्वा ॥ ३ ॥
बारसवासस्स तहा, अरुणुववायाइ पंच अज्झयणा ।
तेरसवासस्स तहा, उट्ठाणसुआइआ चउरो ॥ ४ ॥
चउदसवासस्स तहा, आसीविसभावणं जिणा बिंति ।
पण्णरसवासगस्स य, दिट्ठीविसभावणं तह य ॥ ५ ॥
सोलसवासाईसु य, एक्कुत्तरवड्ढिएसु जहसंखं ।
चारणभावणमहसुवि-णभावणा तेअगनिसग्गा ॥ ६ ॥
एगूणवासगस्स उ, दिट्ठीवाओ दुवालसममंगं ।
तेसु पुण वीसवरिसो, अणुवाई सव्वसुत्तस्स " ॥७॥ इति ।
आवश्यकाऽऽदेस्तु योगोद्वहनोत्तरकाल एव काल इत्यवसेयम।
ध० २ अधि० ।

अहुणा सेससाहूणं जोगविही वियाहिज्जइ । तत्थ पढमं कालग्गहणविहिं। जहा—"दिण १ वसहि २ कालवेला ३, दिसि ४ सोही ५ कालविहि ६ समक्खाया।
सज्झायप्पट्ठवणं ७,वुच्छामि जहागमं सुगमं"॥१॥ दारं । तत्थ चित्तस्स आसोयस्स य सुक्कपंचमीए, आसाढस्स कत्तियस्स य सुक्कचउद्दसीए य मज्झण्हाओ आरब्भ पडिवयंतेसु दिणेसु लाभेसु पुण सावणपुण्णिमाए महाअसज्झायं ति काउं कालग्गहणं–अज्झयणउद्देसाइयं ण करेइ, जगवईवज्जं जोगा य ण णिक्खिप्पंति । चित्तसुद्धएगारसीओ आरब्भ पुन्निमंतेसु दिवसेसु अचित्तरज–ओहरावणत्थं पडिक्कमणाणंतरं चउज्जोअगरं चिंतयमाणो काउस्सग्गो करेइ । अह न सुमरियं तो संवच्छरं जाव भूमीए पमंतीए असज्झाओ। सूरग्गहणे मुक्के तं चेव अहोरत्तमसज्झाइयं, अमुक्के तं चेव, अन्नं च । एवं चंदग्गहणे मुक्के सा चेव राई; अमुक्के सा राई. अन्नं च अहोरत्तं ॥

यतः—

"सग्गह निव्वुड एवं, सूराई जेण हुंतिऽहोरत्ता ।
आइन्नं दिणमुक्के, सो चिय दिवसो य राई य" ॥१॥

गंधव्वनगरादिसिदाहउक्कावि्जूहिं इक्किक्का पोरिसी असज्झाओ । गज्जिए दो पोरिसी । रविजुयअद्दानक्खत्ताओ जाव साइयंता दस नक्खत्ता, ताव विज्जुगज्जिएहिं न असज्झाओ । धूमहमे भूमिकंपे य अट्ठपहरा । मंसरुधिरपित्तिवुट्ठिमए सत्तघरअंतरगए य अहोरत्तं । महियाए रओवुट्ठीए महाकलहे आसन्ने पुरिसाणं इत्थीणं वा जुज्झधूलिमाइमहे गाढपलीवणे जच्चिरं दंमिए कालगए उवियंते जाव असमंजसं, ताव असज्झाओ । निरंतरं वुव्वुयवुट्ठीए तिन्हं, सामन्नधाराए पंचण्हं, फुसियमित्ताए सत्तण्हं दिणाणं परेण आउकायभावियं ति जिन्नमासं असज्झाओ।

वसही पुण गीयत्थेण जत्तयकालं दव्वाइएहिं सोहियव्वा–तत्थ तेरिच्छं सोणियमंसचम्मअट्ठिरूवं अणुद्धियं सत्तट्ठहत्थऽब्भंतरे पमाणकालाओ पोरिसितिगमसज्झाओ । सोणियं पुण भूमिपमियं उट्ठिउं न कप्पइ । मंसे पुण वहि धोए अंतो पक्के कप्पइ । अंडए जिन्ने गवाइपसूयाए तहा जराए पमिए तहेव पोरिसितिगमसज्झाओ । विराल्लाइणा महाकायमूसगाइगहिए अंतो सट्ठिहत्थस्स अहोरत्तमसज्झाओ । दगवाहेण वूढे अग्गिणा दड्ढे परियावन्ने विवन्ने गिलिओग्गिलिए उभयनिग्गमसगरूवाहिए हंतरिए य न असज्झाओ, माणुस्सए वि नवरं हत्थसए तिसु अहोरत्तं । अट्ठिए पुण बारस वरिसाणि । दंते नट्ठे पयत्तेण गविट्ठे अदिट्ठे तस्सोहडावणट्ठं अट्ठुस्सासो उस्सग्गो कीरइ । इत्थीए मासाविए महाउपत्ताए तिन्नि दिणाणि असज्झाओ; परओ तहा पावासुयाए वसवेहिं पन्नवियाए अणत्थंताए तहेव काउसग्गो । पसूयाए कवडए जाव सत्तदिणे, कव्वियाए पुण अट्ठदिणं, जगंदलाइएसु वाहिं धोइयचूइखयगाढबंधिए न असज्झाइयं । तह विगलंतेहिं तिन्नि बंधा कायव्वा । अणाहमडए वाहिं नीणियमित्ते विसुज्झइ।

"रुहाइगिहसुसाणे, असिवोमाऽऽयाणे बार वरिसाणि।
असझाइयं च रुहिरे, पच्चियपाओ जहिं खुप्पे ॥१॥
असझाइएँ आलोए, काझाईए अणुस्सरण कुज्जा।
घाणामुत्तपुरीसे, चिक्खिमिलि अन्नत्थ गम्मइ वा ॥२॥"

एवं सुद्धे दिवसे पच्चिमपोरिसीए सोहित्तु गुरुपुरओ वसहीए पवेइयाए आवस्सए कए फिडियाए कालवेलाए जहाकाले उस्सग्गेसु तिसु चउसु वा कएसु कालो सज्झायस्स घेप्पइ,न हि वायाइओ कालो चित्तव्वो। अहरत्ते पुण फिडणे अहरत्तिओ, तइयपहरंतसमयए वेरत्तिओ, तओ वेरत्तियसज्झायपट्ठवणं । तस्सज्झायकरणकालं विलंबिय, जहा खलियाइणा अट्ठवेलाइए कालग्गहणवेला, पडिक्कमणवेलाय पहुच्चइ, तहा पाउाइओ घेत्तव्वो । तहा तिसु तिन्नि तारगाओ त्ति पाउाइए अदिट्ठे वि वासासु अ तारगा चउरो उग्गमिए चिट्ठो वि कालग्गहणवेलाए आयरियस्स सद्धाइकहणविक्खेवाइणा वायणायरियअभावे य काउस्सग्गाहिणो अवयराए हिंसाए निरावाहट्ठाणे ठवणायरि-

यं उवित्तु पढमकालकालस्सग्गं एयदिसाभिमुहो चेव करिंति। तं जहा–"पाउसिअ अहोरत्ते, उत्तरदिसि पुव्व पेहए कालं। वेरत्तियम्मि जवणा, पुव्वदिसा पच्छिमे काले" ॥ १ ॥ कालग्गाही पुण पुरिसगुणजुत्तो कालं गिण्हइ। "पियधम्मो दढधम्मो, संविग्गो चेवऽवज्जभीरू य। खेयन्ने य अभीरू, काले पडिलेहए साहू" ॥१॥ सामन्नेण ताव कालग्गहणविही जण्इ– "कणगाहणं ति कालं, ति पंच सत्तेव सिभिरवासेसु। उक्का उ सरेहा जा, रेहारहिओ जवे कणगो" ॥ २ ॥ कणगो सत्तरेहो, पगासविरहिओ य। उक्का महंतरेहा, पगासकारिणी य। अहवा–रेहाविरहिओ विप्फुलिंगो पगासकरो उक्का चेव। काले गिण्हमाणे कालग्गाहिणो दंडधरस्स वा वच्चंतस्स णियत्तंतस्स कालवियावणिया, कालस्सग्गो वा वंदणाणंतरं संदिसावणपवेयणसमए वा पावासुयाइं रुयंतेहिं अच्चायासेण रुयंति अजंपिरडिंजगेण जंपिऊण अप्पेणावि वीसरसद्दरुयंतेण डोंगाछित्तयविहंसियनिठुरपहरणरोसाविच्छस्स डहिं सिद्धिमारिहच्चाइ अणिट्ठविसएण चउचउविहम्मंति सव्वत्थ जोइवुड्ढिखलियाइएहिं च जएहिओ पाभाइओ पुण उवहओ इक्किक्कमंकले तिन्नि वारे घित्तुं कप्पइ। अभावे पुण तहिं चेव नवबेला घिप्पइ। इमिणा विहिणा जइ संदिसावणपुव्वं भज्जइ, तो मूलाओ घिप्पइ। अह संदिसावणाणंतरं वच्चंतस्स कालमंकलस्स पडिलेहणाणंतरं पुव्वं वा भज्जइ, तो एमेव नियत्तियकालगिण्हवो उवणायरियसमीवे खमासमणपुव्वं संदिसावणविहिणा कालमंकलं आगच्छइ। अह कालमंकले पडिलेहणाणंतरं कालकाउस्सग्गेण काउस्सग्गाणंतरं कालमंकले ठियस्स तो तत्थेव ठिओ उवणायरियसंमुहं ठाऊण पंचंगखमासमणपुव्वं संदिसाविय पुणो मूलाओ काउस्सग्गं करेइ। अह कालकाउस्सग्गाणंतरं गच्चंतस्स पवेयणसमए भज्जइ, तो मूलाओ घिप्पइ।

विसेसेण कालग्गहणविही जण्इ–तत्थ पाउसिए पढमं कालभूमिं पमज्जिय दक्खिणदिसाए उवणायरियं ठवित्तु कालग्गाही दंडियाहत्थवामपासट्ठियदंडधरसमीवे खमासमणपुव्वं जण्इ–इच्छाकारेण संदिस्सह वाघाइअकालपडियरउं, इत्थं मत्थएण वंदामि। आवसी इत्थं आसज्ज ३, निसीही ? आसज्ज ३, निसीही ? आसज्ज ३, निसीही नमो खमासमणाणं भणिय कालसगासे दो वि चिट्ठंति। तओ दंडधरो दिसाऽऽलोयं करिय हत्थट्ठियदंडियासंमुहं मत्थएण वंदामि। आवसी इत्थं इच्चाइ नमो खमासमणाणं जणिय उवणायरियसमीवे खमासमणं दाउं एवं भणइ–इच्छाकारेण संदिसह वाघाइयं च कालं वावट्टइ, इत्थं मत्थएण वंदामि। आवसी इत्थं आसज्जइ ३, इत्यादि नमो खमासमणाणमित्थं जणिय कालग्गाहिसमीवे दक्खिणाभिमुहो चिट्ठइ। इत्थ गंमकमरुएहिं दिट्ठंतो नायव्वो। जइ दंडधरेण महंतसरेण घुट्टं, तो जेण न सुयं, तस्स काओ न दिज्जइ, अहव एहिं न सुयं, तो दंडधरस्स न दिज्जइ। तओ कालग्गाही दंडियासंमुहं मत्थएण वंदामि, आवसी इत्थं आसज्जइ ३, इच्चाइ नमो खमासमणाणमित्यन्तम्। तओ उवणायरियसमीवे खमासमणपुव्वं इरियं पडिक्कमइ, नमोक्कारं चिंतेइ, पारित्ता नमुक्कारं भणइ खमासमणाणं पुव्विं पुत्तिं पेहिय बारसावत्तं वंदणं दाउं–इच्छाकारेण संदिसह वाघाइअकालालिआवणियं इत्थं मत्थएण वंदामि। आवसी इत्थं आसज्ज ३, नमो खमासमणाणमिच्चाइणा कालमंकले जाइ दंडधरो, तस्संमुहं दंडियं धरेइ, तओ कालग्गाही तयग्गे ओहमिउं मत्थएण वंदामि, इरियावहियं पडिक्कमिउं इत्थं इच्छामि पडिक्कमिउं इरियावहियाए भणिअ काउस्सग्गे नमुक्कारं चिंतइ। पारित्ता नमुक्कारं भणिय संमासए पडिलेहिय दो वि उवविसंति। तओ कालग्गाही दाहिणचलणोवरि संवरूं कालमंकले रयहरणं ठविय मुहपुत्तिं उवरि कायं च पेहिय वासहत्थेण कालमंकलं संघट्टिय दाहिणहत्थगहियरयहरणेण पाए पमज्जिय मुहपुत्तिं संगोविय दाहिणजंघमूले रयहरणं वामहत्थेण निवेसिय रयहरणदसियाहिं दाहिणहत्थं तिखुत्तो हिट्ठोवरि संघट्टिय कालमंकलमंकियकयसंपुडहत्थकुगंगुट्ठएहिं नासाए दाहिणकन्ने वा तिन्नि वारे उवओगं करिय हिट्ठोवरि दोहिं हत्थेहिं एगंतरियं तिन्नि वारे आवत्तेण चुमिं परामुसिय दाहिणहत्थगहियरयहरणेण कालमंकलट्ठियवामकरंगुट्ठअंगुलीणं अंतरे तिन्नि वारे पमज्जिय वामजाणुणा कालमंकलं संघट्टिय दंडधरहत्थाओ दंडियं गहिय पेहिय कक्खीए निवेसेइ। एवं तिन्नि वारे पुत्तिपेहणपुव्वं मंडलं पडिलेहिय दंडियं नमोक्कारपुव्वं दंडधरकरे समप्पेइ। तओ दोहिं हत्थेहिं कालमंकलं संघट्टिय हत्थेसु पाएसु समग्गझाइंतो निसीही नमो खमासमणाणं ति जणंतो कालमंडले पविसइ, चोलपट्टं पडिलेहेइ, सागारियस्स जावे जच्चो होऊण रयहरणेणं तं पमज्जिय जण्इ–वाघाइकालालियावणियं करेमि काउस्सग्गं, अन्नत्थूससिएणं० जाव वोसिरामि। कालग्गाहे उट्ठिए दंडधरो वि उच्चो होऊण भणइ–इच्छकारि साहवो ! उवउत्ता होह। वाघाइयकालं वावट्टइ, दंडियं तस्स रज्जे धरइ, अभिक्खणं कालग्गाहिस्स पाए पमज्जइ य, इरियं काउस्सग्गे नमुक्कारं चिंतिय साणियं बाहाओ संपाहडु रयहरणसणाहं मुहपुत्तियं मुहे दाउं सचाविमुस्सासं चउवीसं थयं चिंतेइ। तओ कुसुमुप्पिकयं

सामन्नपुव्विय अज्झयणे, तइयज्झयणस्स सिलोगं च। एवमुत्तराए चिंतिय पुव्वाए दाहिणाए पच्छिमाए चिंतेइ, पुणो उत्तराए बाहाओ अवलंबिय नमुक्कारं चिंतेइ, पारित्ता नमुक्कारं कड्ढित्ता सत्थएण वंदामि आवस्सी इच्छं इच्चाइविहिणा ठवणायरियसमीवे पवेसिय खमासमणपुव्वं इरियं पडिक्कमइ; काउस्सग्गे नमुक्कारं चिंतिय नवित्ता य खमासमणपुव्वं पुत्ति पेहिय वंदणं दाउं इच्छाकारेण संदिसह बाघाइअकालं पवेसिउं, इच्छं खमासमण इच्छकारि साहवो बाघाइयकालो सुज्झइ । भगवन् ! सुद्धो बाघाइओ कालो सुच्चो। तओ मंगलाइसज्झायं करंति। दंसभद्दो खमासमणपुव्वं भणइ-साहवो! दिट्ठं सुयं किंचि पुच्छिउ,सुच्चो कालो। एवं अच्चरत्तियपाभाइया वि विप्पंति । केवलं तयभावे पाभाइए इच्छाकारेण संदिसह पाभाइओ कालिओ० जाव सुच्च त्ति भन्नइ । एवं सुद्धे काले पाभाइए य ठवणायरियसमीवे गुरूहिं समं खमासमणपुव्वं पुत्ति पेहिय वंदणे दिन्ने साहवो भणंति-इच्छाकारेण संदिसह सज्झायं संदिसाविउं। गुरू भणइ-संदिसावेह। साहवो इच्छं ति भणिय खमासमणं दाऊण भणंति-इच्छाकारेण संदिसह सज्झायं पट्ठविउं। गुरू भणइ-पट्ठवेह। साहवो इच्छं ति भणंति। तओ गुरूहिं एवं चेव पट्ठाविए सव्वे भणंति-सज्झायस्स पट्ठावणियं करेमि काउस्सग्गमिच्चाइ० जाव वोसिरामि। तओ नमुक्कारं चिंतिय भणियं भणियं बाहाओ साहटु सत्तावीसुस्सासं चउवीसत्थयं चुमपुप्फियं सामन्नपुव्वियं तइयज्झयणसिलोगं च चिंतिय बाहाओ अवलंबिय नमुक्कारं चिंतिय पारित्ता नमुक्कारं भणिय वंदणं दाउं गुरुं भणइ-इच्छाकारेण संदिसह सज्झायं पवेइउं इच्छं पुणो खमासमणपुव्वं भणइ-इच्छकारि साहवो सज्झाओ सुज्झइ। भगवन्! सुच्चो सज्झाओ सुच्चो। एवं साहूहिं वि गुरुपुरओ सज्झाए पवेइए सव्वे समगं सज्झायं करिंति। तओ वंदणगं सज्झायं करिंति। तओ वंदणगं दाउं गुरूहिं वइसणगे संदिसाविए खमासमणपुव्वं वइसणगे ठामि त्ति भणिए इयरे वि तहेव करिंति। पाभाइयसज्झायं पुण तओ०जाव सुच्च त्ति भन्नइ। अत्रापि श्रुतस्खलिताऽऽदिनिः कालव्याघातः। एवं सुद्धे सज्झाए पोरिसिं०जाव सज्झाइत्ता ठवणायरियसमीवे खमासमणपुव्वं इच्छाकारेण संदिसह सज्झायं पडिक्कमिउं इच्छं सज्झायपडिक्कमावणियं करेमि काउस्सग्गमिच्चाइ नमुक्कारचिंतणं, भणणं च। एवं कालपडिक्कमणं पि पाभाइए पुण पच्छिमपोरिसीए पुणो वि सज्झायं पट्ठविय करिय पडिक्कमियं कालो पडिक्कमेयव्वो। असुद्धे पुण पाभाइए अन्नो वि कालो सुपडिलेहिओ पाभाइयठाणे ठाएयव्वो ॥ दारं ॥ ए ॥

"जोगिगुणा१ जोगुक्खिवर२, सुयअंगुद्देसऽणुन्न नंदी य ३।
जोगाणुट्ठाणविही ४, कप्पु ५ स्संघट्ट ६ निक्खेवो ७।१।

तत्थ-

गुरुजत्तो अपमत्तो, खंतो य निरुयगत्तो।
धीरचित्तो दढसत्तो, विणयजुतो जियविरत्तो ॥२॥
जियलोहो जियनिद्दो, हियपियमियभासिरो मिउ असत्थो।
अप्पाहारो अप्पो-वही य दक्खो सुदक्खिन्नो ॥३॥
पंचसमिओ तिगुत्तो, उज्जुत्तो संजमे तवे चरणे।
परिसहसह होइ मुणी, विसेसओ जोगवाहि त्ति ॥४॥
कयसोहिओयकम्मे, तिवासपरियाइएण कालेण।
आयारपकप्पाई, उद्दिसिउं कप्पई जुग्गो" ॥ ५ ॥

तत्थ जोगा दुविहा-गणिजोगा, बाहिरजोगा य। गणिजोगा दिवाहपन्नत्ती, बाहिरजोगा उक्कालिया। उक्कालिया आवस्सगाई। ते पुण संघट्टयं, कालिए असंघट्टयं। ते दुविहा-आगाढा, अणागाढा य। आगाढा-उत्तरज्झयणासचिकयादिवाहपन्नत्तीपन्हवागरणमहानिसीहाणि। आगाढा नाम-सव्वसम्मत्तीए उत्तरिज्जइ त्ति काउं आगाढेसु उत्तरज्झयणवज्जेसु आउवाणयं च इच्छइ। सेसा सव्वे अणागाढा। असम्मत्तीए वि कारणे दिणतिगाणंतरं उत्तरेज्जइ त्ति गोसे पडिक्कमणाणंतरं चूलियाए पवेइयाए पमिलेहणाणंतरं वसहीए पवेइआए साहू उवओगं करिय गंधे आणिय गओ पुरओ पुत्ति पेहिय खमासमणपुव्वं भणइ-इच्छकारि तुम्हे अम्हे जोगुक्खेवावणियं देवे वंदावेह। तओ सकत्थयं भणिय खमासमणपुव्वं जोगुक्खेवावणियं सत्तावीसुस्सासं काउस्सग्गं रज्जं करिय चउवीसत्थयं भणइ। कालिएसु पुण गुरूहिं जोगवाहिए सज्झायपट्ठविए जोगुक्खेवे कए सुयक्खंधस्स अंगस्स उद्देसे अणुन्ना य नंदी भवइ। तत्थ खमासमणपुव्वं अमुगसुयक्खंधं अंगउद्देसावणियं वा नंदिकड्ढावणियं वा सनिक्खेवं करेह। एवं देवे वंदावेह। तओ वड्ढंतियाहिं थुईहिं देवे वंदिय बारसावत्तं वंदणं देइ। तओ दो वि नंदिकड्ढावणियं सत्तावीसुस्सासं काउस्सग्गं करिंति, चउवीसत्थयं भणंति। तओ गुरू नमुक्कारपुव्वं नंदिं कड्ढइ। सा चेयं-नाणं पंचविहं पन्नत्तं। तं जहा-आभिणिबोहियनाणं, सुयनाणं, ओहिनाणं, मणपज्जवनाणं, केवलनाणं। तत्थ चत्तारि नाणाइं ठप्पाइं ठवणिज्जाइं नो उद्दिसिज्जंति, नो समुद्दिसिज्जंति, नो अणुन्नविज्जंति, सुयनाणस्स उद्देसो समुद्देसो अणुन्नाणुओगो य पवत्तइ। जइ सुयनाणस्स उद्देसो समुद्देसो अणुन्नाणुओगो य पवत्तइ, किं अंगपविट्ठस्स उद्देसो समुद्देसो अणुन्नाणुओगो य पवत्तइ ?। अंगपविट्ठस्स जइ उद्देसो समुद्देसो अणुन्नाणुओगो पवत्तइ, अंगबाहिरस्स वि

उद्देसो समुद्देसो अणुन्नाणुओगो पवत्तइ । जइ अंगबाहिरस्स उद्देसो समुद्देसो अणुन्नाणुओगो पवत्तइ,किं आवस्सगस्स उद्देसो समुद्देसो अणुन्नाणुओगो पवत्तइ,आवस्सगवइरित्तस्स उद्देसो समुद्देसो अणुन्नाणुओगो पवत्तइ ?॥४॥ जइ आवस्सगवइरित्तस्स उद्देसो समुद्देसो अणुन्नाणुओगो पवत्तइ, कालियस्स वि उद्देसो समुद्देसो अणुन्नाणुओगो पवत्तइ । उक्कालियस्स उद्देसो समुद्देसो अणुन्नाणुओगो पवत्तइ, दसवेयालियस्स रायपसेणियस्स जीवाजिगमस्स पन्नवणाए महापन्नवणाए नंदीए अणुओगदाराणं देविंदत्थयस्स तंदुलवेयालियस्स चंदाविज्जयस्स पोरिसिमंडलस्स मंडलिपवेसस्स गणिविज्जाए विज्जाचरणविणिच्छियस्स झाणविभत्तीए मरणविभत्तीए आयविसोहीए संलेहणासुयस्स वीयरागसुयस्स विहारकप्पस्स चरणविहीए आउरपच्चक्खाणस्स सव्वेसिं पि एएसिं उद्देसो समुद्देसो अणुन्नाणुओगो पवत्तइ । जइ कालियस्स उद्देसो समुद्देसो अणुन्नाणुओगो पवत्तइ, उक्कालियस्स वि उद्देसो समुद्देसो अणुन्नाणुओगो पवत्तइ । जइ आवस्सगवइरित्तस्स उद्देसो समुद्देसो अणुन्नाणुओगो पवत्तइ, कालियस्स वि उद्देसो समुद्देसो अणुन्नाणुओगो पवत्तइ, उक्कालियस्स वि उद्देसो समुद्देसो अणुन्नाणुओगो पवत्तइ ॥५॥ जइ उक्कालियस्स उद्देसो समुद्देसो अणुन्नाणुओगो पवत्तइ,दसवेयालियस्स रायपसेणियस्स जीवाजिगमस्स पन्नवणाए महापन्नवणाए नंदीए अणुओगदाराणं देविंदत्थयस्स तंदुलवेयालियस्स चंदाविज्जयस्स पोरिसिमंडलस्स मंडलिपवेसस्स गणिविज्जाए विज्जाचरणविणिच्छियस्स झाणविभत्तीए मरणविभत्तीए आयविसोहीए संलेहणासुयस्स वीयरागसुयस्स विहारकप्पस्स चरणविहीए आउरपच्चक्खाणस्स सव्वेसिं पि एएसिं उद्देसो समुद्देसो अणुन्नाणुओगो पवत्तइ ॥६॥ जइ कालियस्स उद्देसो समुद्देसो अणुन्नाणुओगो पवत्तइ,किं उत्तरज्झयणाणं कप्पस्स ववहारस्स इसिभासियाणं निसीहस्स महानिसीहस्स सूरपन्नत्तीए जंबूदीवपन्नत्तीए चंदपन्नत्तीए दीवसागरपन्नत्तीए खुड्डियाविमाणपविभत्तीए महल्लियाविमाणपविभत्तीए अंगचूलियाए वंगचूलियाए विवाहचूलियाए अरुणोववाए देविंदत्थयस्स [वरुणोववायस्स] तंदुलवेयालियस्स चंदाविज्जयस्स पोरिसिमंडलस्स मंडलिपवेसस्स गणिविज्जाए विज्जाचरणविणिच्छियस्स झाणविभत्तीए मरणविभत्तीए आयविसोहियस्स गरुलोववायस्स धरणोववायस्स वेसमणोववायस्स वेलंधरोववायस्स [देविंदोववायस्स] उट्ठाणसुयस्स समुट्ठाणसुयस्स नागपरियावलियाणं निरयावलियाणं कप्पियाणं कप्पवडिंसियाणं पुप्फियाणं पुप्फियावलियाणं वन्हियाणं वन्हिदसाणं आसीविसभावणाणं दिट्ठीविसभावणाणं चारणभावणाणं महासुमिणभावणाणं तेयग्गनिसग्गाणं सव्वेसिं वि एएसिं उद्देसो समुद्देसो अणुन्नाणुओगो पवत्तइ ॥ ७ ॥ जइ अंगपविट्ठस्स उद्देसो समुद्देसो अणुन्नाणुओगो पवत्तइ, किं आयारस्स सूयगडस्स ठाणस्स समवायस्स विवाहपन्नत्तीए नायाधम्मकहाणं उवासगदसाणं अंतगडदसाणं अणुत्तरोववाइयदसाणं पण्हावागरणाणं विवागसुयस्स दिट्ठिवायस्स सव्वेसिं पि एएसिं उद्देसो समुद्देसो अणुण्णाणुओगो पवत्तइ ॥८॥ इमं पुण पट्ठवणं पडुच्च इमस्स साहुस्स साहुणीए वा अमुयसुयक्खंधस्स अंगस्स च उद्देसो नंदी अणुन्ना णंदी वा पवत्तइ, तओ उवविसिय मंताणं सेज्जं वासदाणं ; तओ जोगवाही खमासमणं दाउं भणइ-इच्छकारि तुम्हे अमुगसुयक्खंधं अंगं वा उद्दिसह । गुरू भणइ-उद्दिसामि । बीयखमासमणेणं संदिसह-किं भणामि ?। तइए अमुगसुयक्खंधं अंगं वा उद्दिट्ठं। इच्छामि अणुसट्ठिं। गुरू भणइ-उद्दिट्ठं उद्दिट्ठं । खमासमणाणं हत्थेणं सुत्तेणं अत्थेणं तदुभएणं जोगं करिज्जाहि । चउत्थे तुम्हाणं पवेइयं साहूणं पवेइयम्मि । पंचमे नमुक्कारेणं पयक्खिणाइं, एवं तिन्नि वारा । छट्ठे तुम्हाणं पवेइयं साहूणं साहूणीणं पवेइयं संदिसह-काउस्सग्गं करेमि । सत्तमए अमुगसुयक्खंधअंगउद्दिसावणियं करेमि काउस्सग्गं इत्यादि सत्तावीसुस्सासचिंतणं चउवीसत्थयभणनं। एवमणुन्नाए वि; नवरं सम्मं धारिज्जा, अन्नेसिं च पविज्जाहि । समुद्देसे पुण थिरपरिचियं करिज्जाहि । सुयक्खंधे उद्दिट्ठे तस्स अज्झयणाइं उद्दिसिय अज्झयणंतं उद्दिस्सिज्जइ । तं तिविहं-एगसरं, समुद्देसं, विसमुद्देसं च । एगसरं नाम-उद्देसगरहियं । समुद्देसं दुविहं-दुउद्देसं, चउक्कउद्देसगं । विसमुद्देसं-तिगपणगउद्देसं । तत्थ एगसरं अज्झयणं उद्दिसिय समुद्दिसिय तिविहेण संदिसाविय खमासमणपुव्वं गिण्हामि त्ति भणिय खमासमणदुगेण कालसंभलं संदिसावेमि, पमिलेहिस्सामि,० खमासमणदुगेण वइसणए ठामि, तओ वंदणं दाउं अज्झयणमणुन्नविय खमासमणदुगेण कालसंभलं संदिसावेमि, पडिलेहियस्सामि, खमासमणदुगेण सज्झायं पडिक्कमिस्सामि,तिविहेण वि वइसणं संदिसावेमि, पमिलेहिस्सामि, [खमासमणदुगेण सज्झायं पमिक्कमिस्सामि,तिविहेण वि वइसणं संदिसावेमि,पमिलेहिस्सामि, खमासमणदुगेणं सज्झायं पडिक्कमिस्सामि,] तिविहेण वि वइसणं संदिसाविय खमासमणदुगेण वइसणए ठामि तओ वंदणं दाउं अज्झयणमणुन्नाविय खमासमणदुगेण कालसंभल० खमासमण० सज्झायं पडिक्कमामि, खमा-

समणदुगेण काइं पडिक्कमामि, तओ वइसणावंदणं । एवं एगसरे तिन्नि काउस्सग्गए एगं दिणं दुउद्देसज्झयणा वंदणं दाउं अज्झयणमुद्दिसिय पढमुद्देसए बीयउद्देसो उद्दिसिज्जइ, तं पढमुद्देसे समुद्दिसिय बीयउद्देसो उद्दिसिज्जइ । तं पढमुद्देसो समुद्देसिज्जइ, तओ बीओ, तओ अज्झयणे, तओ वायणाइयं, तओ वंदणं दाउं पढमुद्देसो अणुन्नविज्जइ, तओ बीओ, तओ अज्झयणं, तओ कालसंमलाइयं । एवं तवउवसग्गा दिणमेगं; एवं सए वि जत्थ एगो काओ नवगं आइल्ला अंतिल्ला उद्देसा इति वत्तव्वं । वग्गे वि एवं । नवरं अज्झयणं ति वत्तव्वं, चउराइयमुद्देसे वंदणं दाउं अज्झयणुद्देसपुव्वं पढमं पढमे बीओ बीए उद्देसो उद्दिसिज्जइ । तओ दो वि उद्देससमुद्देसयवायणाइयं काउं वंदणयपुव्वं दो वि अणुन्नविज्जंति । एवं उस्सग्गा सत्तदिणमेगं । एवं सेसा दो दो उद्देसा छहिं उस्सग्गेहिं एक्किकदिणेण वच्चंति, अंतिल्ला पुण दो उद्देसा उद्दिसिय समुद्दिसिय तओ अज्झयणं समुद्दिसिय वायणाइयं काउं उद्देसउगमज्झयणं च अणुन्नविज्जइ । एवं अट्ठ उस्सग्गा दिणमेगं । एवं बिसमुद्देसेसु वि । नवरं उद्देसमुद्दिसिय अज्झयणं समुद्दिसिज्जइ, तओ उद्देसमणुन्नविज्जइ, एवं उस्सग्गा पंच,दिणमेगं,तहा सुयखंधो । तत्थ दो दिणा–एगेण समुद्देसो,एगेण अणुन्ना । जत्थेगे दो सुयखंधे तत्थेगदिणेण सुयखंधस्स समुद्देसो, एगेण अणुन्ना । जत्थेगे दो सुयखंधा तत्थेगदिणेण सुयखंधस्स समुद्देसो, अंगसुयखंधो, उद्देससमुद्देसो, एगेण अणुन्ना । जत्थेगदिणेण सुयखंधस्स समुद्देसो, अणुन्ना य, अंगसुयखंधो उद्देसो अणुन्ना वि ण य पडिनिरुद्धं करियं पारणगं वा निद्दिसंति आयामाइपारणगं, निव्विइयं, तओ खमासमणपुव्वं पच्चक्खाणं करेइ, तओ वइसणावंदणगं । इत्थं वइसणाणंतरं पवेइयव्वं, तो पढमं वइसणयं संदिसावणयं न किज्जइ, पच्चक्खाणाणंतरं वइसणयं वंदणेण वेसरइ,तओ खए संघट्टय मुहपत्ती खए संघट्टय संदिसाविय खए संघट्टलेओ० जाव सरीरखए संघट्टाविया वाणियं काउस्सग्गे नमुक्कारचिंतणं, भणणं च । एवं आउत्तवाणयं पि,नवरं तइए खमासमणाणंतरं तंबा तउआ सीसा काँसा सोना रूपा हाडचामरुधिर वालमूत्री मांसाऽऽदि; इत्येवमादि ओहडावणिय करेमि काउस्सग्गमित्यादि कायोत्सर्गं पूर्ववत् । भगवईए पच्चूढाए आउत्तवाणए पुत्तीओ न पेहिज्जंति, इक्किके काले दो दो सज्झाया, दो दो कालसंमलाणि, एवं सव्वं पि पढमपोरिसिमज्झे न पट्ठविज्जा, तो काइं पइ इक्किकं सज्झायं पट्ठविचा अणुट्ठाणं करेइ, दो सज्झाया कालसंमलाणि य पच्छिमपोरिसाणंतरं वि करिज्जा, अह न पट्ठविज्जा, नो कयं पि अणुट्ठाणं मूलाओ लुच्चिज्जा, वाघाइयकाले सुद्धे अज्झयणे दिवसाइयं राईए वि करिज्जा, तहा पच्छिमपोरिसीए कालियजोगेसु वइसणावंदणं संघट्टा आउत्तवाणयं पि उट्ठावणिकाउस्सग्गं च कीरइ, संघट्टेण पुण आरंभदिणा पारइ उम्मासाणंतरं आरओ चेव पूरिज्जति ।

"आवस्सगे य एगो, सुयखंधो छच्च हुंति अज्झयणा ।
चुल्लि दिणा सुयखंधे, सव्वे वि य हुंति अट्ठ दिणा ॥१॥
दसयालियम्मि एगो, सुयखंधो बारसेव अज्झयणा ।
पंचम नवमे दो चउ, उद्देसा दिवस पन्नरसा ॥ २ ॥
छत्तीसं अज्झयणा, एगेगदिणेण तुरियमस्संखा ।
दो दिण दो सुयखंधे, गुणचत्ता उत्तरज्झयणे ॥ ३ ॥
अट्ठेगसरा चउदस, एगेगदिणेण दुन्नि तइय दिणा ।
सत्तावीसं वासी.....मो इं पज्जिइकप्पे" ॥ ४ ॥

असंखं पुण जइ पढमपोरिसीए उद्दिसइ, तो आयंबिलेण अणुन्नविज्जइ, जइ बीयदिणे पोरिसिमज्झे, तो निव्वीएण; अह ततो बीयदिणे वि आयंबिलं । एवं छणचत्ता अट्ठावीस दिणा उम्मट्ठज्झयणुद्देसा ॥

"सत्त य उद्दचउ४ चउरो, उ६पंच५ अट्ठेव सत्त चउरो य ।
इक्कारस११ति३ति३ दो२दो२, दो दो सत्तेक्क एक्को य" ॥१॥

सुयखंधयदिणसमं आयरे सव्वदिणा पन्नत्ता । सत्थपरिण्णाए उद्देसा ७ दिण ४ लोगविजए उद्देसा ६ दिण ३ सीओसणिज्जे उद्देसा ४ दिण २ सम्मत्ते उद्देसा ४ दिण २ आवईए उद्देसा ६ दिण ३ धुयज्झयणे उद्देसा ५ दिण ३ विमोहे उद्देसा ७ दिण ४ महापरिण्णे उद्देसा ४ दिण २ महपरिण्णयज्झयणं वुच्छिन्नं, दिणमेगं सुयखंधं । णंदीए ण, एवं दिन २४। पिंडेसणाए उद्देसा ११ दिण ६ सिज्जाए उद्देसा ३ दिण २ भासज्जायाए उद्देसा २ दिण १ पाएसणीए उद्देसा २ दिण १ उग्गहपडिमाए उद्देसा २ दिण १ सत्तसत्तिक्कया आउत्तवाणए दिण ७ जावणज्झयणे दिण १ विमुत्तिज्झयणे दिण १ बीओ सुयक्खंधो । दिण १ अग्गे दिण २ एवं आचारांगे दिण ८०। एयम्मि चूढे य कप्पजोगी हवइ, दिणसमं सव्वेसिं जोगवाहीणं कप्पइ भत्तपाणं पडिगाहित्तए ।

"पढमज्झयणुद्देसा, चउ तिय चउ दो दु गार इक्कसरा १६ ।
बीए सत्तिक्कसरा २३, सूयगडे सव्वदिण तीसं" ॥१॥

तीसज्झयणेसु छव्वीस दिणा दो सुयक्खंधेसु इक्कं दिणं, अग्गे दो दिणा, एवं तीसं दिणा ।

"इक्कसरं १ चउ २ चउ ४ तिय,उद्देसा तउ पणेगसरा १०।
ठाणा अट्ठारस दिणा, उ सगइगदुनंदि तिन्नि दिणा"॥१॥
इयाणिं नगवई। सा य उमसेहिं छहिं दिणेहिं ओउत्तवाणए एवं वच्चइ । इत्थ नत्थि सुयक्खंधो। सयाणि पुण इक्कतालीसं, मत्तरिं काला। इत्थ विवाहपन्नत्तिअंगं नंदीए जहिंसिय पढमसयं उद्दिसिज्जइ । तत्थ य उद्देसा दस इक्किक्कदिणेण दो दो जंति, एवं दिणा ५। बीयसए वि दस उद्देसगा, नवरं पढमो खंदगुद्देसओ आयंबिलदुगेण सपाणभोयणाहिं पंचहिं दत्तीहिं दोहिं दिणेहिं वच्चइ, सेसा नवुद्देसा पंचहिं दिणेहिं, एवं दिणा सत्त । तइयसए देसुद्देसो पढमउद्देसओ एगदिणेण वच्चइ, बीओ चमरुद्देसओ खंदओ अ दोहिं दिणेहिं वच्चइ। एवं पन्नरसेहिं कालेहिं चमरेहिं अणुन्नाए ओगाहिमविगइविगइजुत्तं अट्ठुस्सासो काउस्सग्गो कीरइ,उट्ठजोगो वि लग्गइ। पंच निव्विइया,उट्ठं आयंबिलं। तहा मोइयवघारियतीमणाइ कप्पइ। सेसा अट्ठुद्देसा चउहिं दिणेहिं वच्चंति। चउत्थसए दस उद्देसा। तत्थ पढमा अट्ठ आइल्लअंतिल्ल त्ति काउस्सग्गेहिं एगदिणेण जंति। सेसा दो उद्देसगा अट्ठुस्सग्गेहिं एगेहिं दिणेण जंति। सव्वदिणं वीसं । नवमदसममएसु चउतीस उद्देसा, नव नव वग्गा, इक्किकं दिणं । इक्कारसमे सए उद्देसा १२ दिन १। बारसमे तेरसमे चउद्दसमे य उद्देसा १०दिन २। इक्किक्कदिणे पन्नरसमे गासालए आयामदुगं, सपाणजोयणाओ तिन्नि दत्तीओ, दो दिणे, एवं एगेण चत्ताए काहोहिं गोसाले अणुन्नाए अट्ठमं जोगो लग्गइ, सत्त निव्विइया, अट्ठमं आइल्लं पुण अट्ठमचउद्दसीसु आयामं । सेसाणि छव्वीसं सयाणि नव नव उस्सग्गेहिं इक्किक्कदिणेण जंति। तत्थ सोलसमे सए उद्देसा १४। सत्तरसमे उद्देसा १७। अट्ठारसमे उद्देसा १०। एगुणवीसइमे उद्देसा १०। वीसइमे उद्देसा १०। इक्कवीसइमे उद्देसा८७। बावीसइमे उद्देसा ६०। तेवीसइमे उद्देसा५०। कडिंसुगसए२७ उद्देसा११। कम्मसंजोगाणसए २८ उद्देसा ११। उच्चट्ठाणसए ३२ उद्देसा २०। एगिंदियजुम्मसयाणि बारस ३२। तेसु चउवीसगसयं दुहा काउं ६२। सेढीसयाणि बारस ३४ उद्देसा १२४। एगिंदियमहाकम्मसयाणि बारस ३५ उद्देसा १३२। बेइंदियमहाजुम्मसयाणि बारस ३७ उद्देसा १३२। चउरिंदियमहाजुम्मसयाणि बारस ३८ उद्देसा १३२। सन्निपंचिंदियमहाजुम्मसयाणि बारस ४० उद्देसा १३२। रासीजुम्मसए ४१ उद्देसा १०६ । एवं काला ७५ अंगसुद्देसे अणुन्नाए य इक्किक्कं दिणं। एवं सव्वे सत्तहत्तरिं काला अणुन्नाए नंदीए नामं ठविज्जइ ।

"नायसुए गुणवीसं, एगारसऽज्झयण पढमसुयखंधे।
बीए पुण दस वग्गा, पण नंदी दिवस तित्तीसं ॥१॥
दुसु दुसु वग्गेसु कमा, अज्झयणा हुंति दस य चउपन्ना।
बत्तीसा चउ अट्ठं, धम्मकहा बीयसुयखंधे ॥२॥
सत्तमए पुण अंगे, दस अज्झयणाणि एगमरयाणि।
चउद्दस दिण नंदितियं, एगो य तहा सुयक्खंधो ॥३॥
बारस दिण अट्ठमए, अंगे वग्गदएसु अज्झयणा।
दस अट्ठ तेर दस दस, सोलस तेरस दस कमेण ॥४॥
नवमंगे सत्त दिणा, वग्गतिए तेसु अज्झयणसंखा।
दसगं तेरस दसगं, नंदितियं एगसुयखंधो ॥५॥
दसमंगे एगसरा, दस अज्झयणाणि चउदस दिणा य।
बूढाइ भगवईए, कप्पइ इह छट्ठजोगि व्व ॥६॥
पढमम्मी सुयखंधे, एगसरा दस हवंति अज्झयणा।
बीए वि दसेगसरा, चउवीस दिणा विवागसुए" ॥७॥

इयाणिं उवंगा—आयारे इयाइयं १,सूयगडे रायपसेणइयं २, ठाणे जीवाजिगमो ३, समवाए पन्नवणा ४, एए उक्कालिया। भगवईए सूरपन्नत्ती ५, नायाणं जंबुद्दीवपन्नत्ती ६, उवासगदसाणं चंदपन्नत्ती ७। एए कालिया। सव्वे वि उद्देससमुद्देसअणुन्नत्थं आयंबिलतिगेण वच्चंति। अन्नेसिं पुण पन्नवणजुते जोगमज्झे आयंबिलतिगपूरणत्थं वि वच्चंति। अंतगडदसाइपंचन्हमंगाणं निरयावलियसुयक्खंधो उवंगं। तम्मि पंच वग्गा-कप्पियाओ,कप्पवडिंसियाओ,पुप्फियाओ, पुप्फचूलियाओ। एएसु चउसु दस दस अज्झयणा। वन्हिदसासु बारस। एवं दिणा ५,सुयक्खंधे दिणा २,सव्वे दिणा७।

अहुणा उ अग्गंथा—निसीहज्झयणा एगसरा दिन १०, सुयखंधे दिन २, एवं बीसं दिणा ।

"पढमेगसरं नव सो—ल सोल बारस,चउक्क उग बीसा।
सत्तऽज्झयणेसु निवियं, पइन्नगं तत्थ नंदीए" ॥१॥

अणुओगदाराणं तिन्नि निव्विइया । देविंदत्थया तंदुलवेयालियं चंदाविज्जया आउरपच्चक्खाणं गणिविज्जा। एवमाइसु इक्किक्कं निव्वीइयं ॥ एवं आवश्यके दिन ७, दशवैकालिके दिन १५,[मंडलिके ७] उत्तराध्ययने ३९,आचारांगे ५०, सूत्रे ३०, ठाणांगे १०, समवायांगे ३,भगवती १०६,ज्ञाताधर्मकथा ३३, उपासकदशांग १४, अंतगडदशा १२,अणुत्तरोववाई ७,पण्हवागरण १४,विपाक २४,उवाई ३,रायपसेणी ३,जीवाजिगम ३, पन्नवणा ३, सूर्यप्रज्ञप्ति ३, जंबूद्वीपप्रज्ञप्ति ३, चन्द्रप्रज्ञप्ति ३, निरयावली ७, निशीथ १०, कल्पव्यव्य २०, महानिशीथ ४५, पंचकल्प १, जीतकल्प १, नंदी ३, अनुयोगद्वार १, ग० १ । सर्वसंख्या इगुवीस मास, दिन ६,संपयं आउत्तवाणए कप्पाकप्पविही। तत्थ समत्तसंवामयच्छित्ताणं जोगवाहिसन्नी असज्झायं

च न उवहणइ । उल्लासन्नासणुपसाणमज्झाराईणं आमिसासीणं पक्खीणं अंतिणभक्खिणोत्तनयरस्स गयइवस्सगणं च्छिका समाणी छड्डं दुई चम्मं च उवहणइ। घणावंतीए वंतीए वंते अदिस्समाणे न उवहम्मइ । संखियमणुयतिरियपंचिंदियसंघट्टे उवहम्मइ । कप्पइ निव्विइगइयतिल्लेहिं कारणोपायगायगायाइ अब्भंगित्तणं सीवणतुन्नणलेवणाइयं न कप्पइ काउं। आ छट्ठजोगाओ सव्वविगईहिं बारसहत्थाए छट्ठजोगलग्गे पुण ओगाहिमवज्जाहिं जत्तपाणं उवहम्मइ । पलरणसंसट्ठमाइसरावाइठियं च न उवहणइ । तद्दिणनवणीयमिस्सकज्जलनयणंजियाए तद्दिणतिल्लमिस्सकुंकुमपिंजरियाए अब्भंगिएण य उवहम्मइ। कदाइ थिरं विगइसंसट्ठं जत्तिविभंवियमकप्पभायणं दुयंतरियं च न उवहणइ । एवं तिरिच्छावीएसु परोप्परं संबच्छेसु दायगेसु वि एसो उवहयाणुवहयविही जत्तपाणणिमित्तं काउस्सग्गे कए दट्ठव्वो। तहा कक्कइक्खुरसगुलवाँणीखंमसक्करक्खीरफुल्लसाडियाककरियगुलहाणी वीसदणवाटनंदिहलनालियरतिलयरतिट्ठीइ तहा वासीमोइमंखियमंमल्लामोइयसत्तुयकुल्लुरिघोलसिहरणितिल्लवट्टिकरंबाइ छट्ठजोगा आउरं कप्पंति । छट्ठे जोगे पुण लग्गे न तत्तदिणमोइवग्घारियतीमणाइयं कप्पइ । अववाएण असुहस्स तिन्हं घाणोत्तिखियं विइंजणं न कप्पइ । गिहिभायणसइसजायणेणावि अप्पणा कप्पइ चंदपरिगाहित्तए। तहा जं जत्थ जोगे कप्पइ,तं चेव आवस्सगाइसु कप्पइ । भत्तपाणपमिलेहणकाले वीहिणुच्छंगे रयहरणं च विअणुत्तरं परागयवीहीए पत्तबंधा पत्तत्तारिं कप्पइ पणवीसं उवही पेहिय उवसंतो जत्तपाणअगहिए पुत्तिरयहरणे वेइयाबहिरा पच्छितो य पुणो वि काउस्सग्गे संघट्टं वहइ। रओहरणपुत्तिवज्जो जा सरीरसंबंधी हवइ, सो पुणो वि पमिलेहियव्वो । वेइयाबाहिरगयं छुद्धजोयणोवरिगयं च भत्तं पाणं च मज्झपविट्ठं अंगुलिचलकोग्गहियं तिपणाइयं मज्झपविट्ठं अंगुट्ठाहियं पत्ताइयं च उस्संघट्टिज्जइ। जत्तं पाणं वा उगुडिउचूपीए रयहरणं पुत्तिं वा भूमीए पमिए ठिओ निस्संनिसन्ने ठियस्स च अप्पेइ उगुमिउभूमीए ठियं संघट्टेइ। विगइाउ असंखडं वा करेमाणो तुयट्टो वा संघट्टे वा पेयलाईइ पायचारिमणुयतिरियच्छिन्ने य उस्सेवट्टं २ भुंजइ, अकालसज्झं उट्ठं वा करेइ,कालमंमल्लाणि थंमिल्लाणि य न पडिलेहइ, दिणबुट्ठी जोगनिक्खेवो वि एक्खेवसरिसो, नवरं पुत्तिं पेहिय वंदणं दाउं पच्चक्खाणं काउं विगइविसज्जावणियं अट्ठुस्सासं काउस्सग्गं करिंति, पारिए नमुक्कारं जणंति ।

"इय वुत्तो जोगविही, संखेवेणं सुयाणुसारेणं ।
जं च न इत्थ उ जणियं, गीयायरणाउ तं नेयं ॥१॥
जम्मायं गुरुरोगा-ऽभम्मन्नरियं तु सव्वसंसारं ।
जोगविहीएँऽपमत्तो, वायंतो कुज्ज जहजणियं ॥२॥"

एसा जोगविही जंबू ! समणेणं जगवया महावीरेणं पवेइया सुअक्खाया सुपण्णत्ता सुज्जो सुज्जो णिग्गंथाणं निग्गंथीणं जाणियव्वा पासियव्वा फासियव्वा पालियव्वा तीरइयव्वा किट्टइयव्वा, एसा णो अतिक्कमिअव्वा । एसाए विहीए वहिया सुत्तपमिणीया अत्थपमिणीया तदुभयपमिणीया जिणाणाए विराहगा णिण्हगा चेव अणंतसंसारिया,तेसिं पासे जोगविहीए विणा कडकिरियाकलावे एगंतसो मिच्छादिट्ठिया चेव, पुण जंबू ! एयारिसाए जोगविहीए वाहिया ते साहू कल्लाणं मंगलं देवयं चेइअमिव पज्जुवासणिज्जा मोक्खफलदायगा णेयव्वा, पुण जे जंबू ! अणुवाअणुओगकिरियावहिया साहुवेसे विहरंता वि किरियाए फलामोवं दंसइत्ता वि ते असाहू, दिट्ठीए वि ण दट्ठव्वा; सेवं जंते जंते त्ति । " तमेव सच्चं णिस्संकं, जं जिणेहिं पवेइअं ॥ " अंग० ।

(आगाढानागाढयोगविधौ स्वाध्यायभूमेर्विधित्वम् ' चरियापविट्ठ ' शब्दे तृतीयभागे ११५१ पृष्ठे द्रष्टव्यम) अत्र महोपाध्यायश्रीविमलहर्षगणिकृतप्रश्नो यथा-षण्मासिकयोगोद्वाहकानां षण्मदिवसाधिकैर्वा षण्मासैर्वा, षण्मदिवसहीनैर्वा, षण्मास्यालोचना दीयते। यदि वाऽधिकैस्तदानीमस्वाध्यायसंबन्धिद्वादशदिनक्षेपपञ्चातुर्मासिकास्वाध्यायदिनचतुष्टयमपि कथं न क्षिप्यते ?। तथा च दशदिनाधिकाः षण्मासा भवन्तीति कथमालोचनाविधिरिति प्रसाद्यम् ?,इति प्रश्ने, उत्तरम्-षण्मासिकयोगवाहिनां षण्मदिवसाधिकैः षण्मासैरस्वाध्यायदिनगणनानिरपेक्षमेव आलोचना दातव्येति वृद्धसंप्रदाय इति । १८ प्र० । ही० १ प्रका० । स्व० । (योगवाहकस्य कारणे विकृतिः कल्पत इति ' विगइ ' शब्दे वक्ष्यते)

जोगविरिय–योगवीर्य–न० । भाववीर्यभेदे, स च त्रिधा, मनोवाक्कायभेदात् । सूत्र० १ श्रु० ८ अ० ।

जोगवीय–योगबीज–न० । मोक्षयोजकानुष्ठानकारणे, द्वा० २१ द्वा० । (तानि च ' जोगदिट्ठि ' शब्दे अस्मिन्नेव भागे १६४६ पृष्ठे गतानि)

जोगसंगह–योगसंग्रह–पुं० । युज्यन्ते इति योगा मनोवाक्कायव्यापाराः,ते चेह प्रशस्ता एव विवक्षिताः, तेषां शिष्याऽऽचार्यगतानामालोचनानिरपलापाऽऽदिना प्रकारेण संग्रहणानि संग्रहाः, प्रशस्तयोगसंग्रहाः, प्रशस्तयोगसंग्रहनिमित्तत्वादालोचनाऽऽदयोऽपि योगसंग्रहाः । प्रशस्तयोगसंग्रहनिमित्तेषु आलोचनाऽऽदिषु, स० ।

ते च त्रिंशद् भवन्ति । तदुपदर्शकं श्लोकपञ्चकमाह-

आलोयण निरवलावे, आवईसु दढधम्मया ।
अणिस्सिओवहाणे य, सिक्खा णिप्पडिकम्मया ॥७३॥

(आलोयण त्ति) प्रशस्तमोक्षसाधनयोगसंग्रहाय शिष्येणाऽऽचार्याय सम्यगालोचना दातव्या १ । (निरवलावे त्ति) आचार्योऽपि प्रशस्तमोक्षसाधको योगसंग्रहायैव प्रदत्तायामालोचनायां निरपलापः स्याद्, नान्यस्मै कथयेदित्यर्थः २ । एकारान्तश्च प्राकृते प्रथमान्तो भवतीत्यसकृदावेदितम् । यथा-" कतरे मागच्छइ दित्तरूवे " इत्यादि । (आवईसु दढधम्मय त्ति) तथा योगसंग्रहायैव सर्वेण साधना आपत्सु द्रव्याऽऽदिभेदासु दृढधर्मता कार्या, आपत्सु सतीषु, सुतरां दृढधर्मेण भवितव्यमित्यर्थः ३ । (अणिस्सिओवहाण त्ति) योगसंग्रहायैवानिश्रितोपधानेन भवितव्यम् । अथवा-अनिश्रितोपधाने च यत्नः कार्यः, उपदधातीत्युपधानं तपः । तदनिश्रितम्, निश्रितं च । तच्च तदुपधानं चेति समासः ४ । (सिक्ख त्ति) प्रशस्तयोगसंग्रहायैव शिक्षा आसेवितव्या । सा च द्विप्रकारा भवति-ग्रहणशिक्षा, आसेवनशिक्षा च ५ । (निप्पडिकम्मय त्ति) प्रशस्तयोगसंग्रहायैव निष्प्रतिकर्मशरीरेणासेवनीया, न पुनर्नागदत्तवदन्यथा वर्तितव्यमिति प्रथमगाथासमासार्थः ॥ ६ ॥ (नागदत्तदृष्टान्तः ' णिप्पडिकम्मया ' शब्दे वक्ष्यते)

अन्नायया अलोभे य, तितिक्खा अज्जवे सुई ।
सम्मदिट्ठी समाही य, आयारे विणओ वए ॥ ७४ ॥

(अन्नायय त्ति) तपसि अज्ञानता कार्या, यथाऽन्यो न जानाति तथा तपः कार्यम् । प्रशस्तयोगसंग्रहायेत्येतत्सर्वत्र योज्यम । ७। (अलोभे य त्ति) अलोभश्च कार्यः । अथवा-अलोभेन यत्नः कार्यः ८ । (तितिक्ख त्ति) तितिक्षा कार्या, परीषहाऽऽदिजय इत्यर्थः ९ । (अज्जवे त्ति) ऋजोर्भाव आर्जवं, तच्च कर्तव्यम् १० । (सुइ त्ति) शुचिना भवितव्यं,संयमवतेत्यर्थः ११। (सम्मदिट्ठि त्ति) सम्यगविपरीता दृष्टिः कार्या, सम्यग्दर्शनशुद्धिरित्यर्थः १२ । (समाही य त्ति) समाधिश्च कार्यः, समाधानं समाधिश्चेतसः स्वास्थ्यम् १३ । (आयारे विणओ त्ति) द्वारद्वयम । आचारोपगमः स्यात्, न मायां कुर्यादित्यर्थः १४। तथा विनयोपगमः स्यात्,न मानं कुर्यादित्यर्थः १५। इति द्वितीयगाथासमासार्थः ॥ ७४ ॥

धिई मई य संवेगे, पणिही सुविहि संवरे ।
अत्तदोसोवसंहारे, सव्वकामविरत्तया ॥ ७५ ॥

(धिई मई य त्ति) धृतिर्मतिश्च कार्या, धृतिप्रधाना मतिरित्यर्थः १६ । (संवेगे त्ति) संवेगः संसाराद्भयं, मोक्षाभिलाषो वा कार्यः १७ । (पणिहि त्ति) प्रणिधिरत्याज्यो, माया न कार्येत्यर्थः १८ । (सुविहि त्ति) सुविधिः कार्यः १९ । (संवरो त्ति) संवरः कार्यः, न तु न कार्य इति व्यतिरेकोदाहरणमत्र ज्ञापि २० । (अत्तदोसोवसंहारे त्ति) आत्मदोषोपसंहारः कार्यः २१ । (सव्वकामविरत्तय त्ति) सर्वकामविरक्तता भावनीया २२ । इति तृतीयगाथासमासार्थः ॥ ७५ ॥

पच्चक्खाणे विउस्सग्गे, अप्पमाए लवालवे ।
झाणसंवरजोगे य, उदए मारणंतिए ॥ ७६ ॥

(पच्चक्खाणे त्ति) मूलगुणोत्तरगुणविषयं प्रत्याख्यानं कार्यमिति द्वारद्वयम् २३-२४ । (विउस्सग्गे त्ति) विविध उत्सर्गो व्युत्सर्गः, स च कार्य इति द्रव्यभावभेदान्निघ्नः २५ । (अप्पमाए त्ति) न प्रमादोऽप्रमादः, अप्रमादः कार्यः २६ । (लवालवे त्ति) कालोपलक्षणं क्षणे क्षणे सामाचार्यनुष्ठानं कार्यम् २७ । (झाणसंवरजोगे य त्ति) ध्यानसंवरयोगश्च कार्यः, ध्यानमेव संवरयोगः २८ । (उदए मारणंतिए त्ति) वेदनोदये मारणान्तिकेऽपि न क्षोभः कार्यः २९ । इति चतुर्थगाथासमासार्थः ॥ ७६ ॥

संगाणं य परिण्णा य, पच्छित्तकरणे वि य ।
आराहणा य मरणंते, बत्तीसं जोगसंगहा ॥ ७७ ॥

(संगाणं च परिण्णा य त्ति) सङ्गानां च परिज्ञा, प्रत्याख्यानपरिज्ञाभेदेन परिज्ञा कार्या ३० । (पच्छित्तकरणे वि य त्ति) प्रायश्चित्तकरणं कार्यम् ३१। (आराहणा य मरणंते त्ति) आराधना च मरणान्ते कार्या, मरणान्तकाल इत्यर्थः ३२ । एते द्वात्रिंशद्योगसंग्रहाः। इति पञ्चमगाथासमासार्थः ॥७७॥ आव०४ अ० । स० । ध० । " ते य इमे बत्तीसं जोगसंगहा-धम्मं सोक्खविधं,एवं सुक्कं पि । एते बत्तीसं जोगसंगह त्ति ।" आ०चू० ४ अ० । (आलोचनाऽऽदीनां योगसंग्रहाणामुदाहरणाऽऽदि तत्तच्छब्दे द्रश्यम्) योगविधिप्रान्ते लिखितमस्ति यत्प्राभातिककालो वैरात्रिककालस्थाने स्थाप्यत इत्यत्राकसंध्यादिकारणायैतत्स्थापनमन्यथा वेति प्रश्ने ?, उत्तरम्-प्राभातिककालो वैरात्रिककालस्थाने स्थाप्यतामाकसन्ध्यादिकारणे सति,तथा वैरात्रिकप्राभातिककालभेदाकसन्ध्यादिसद्भावे समुद्देशानुज्ञयोर्मध्ये कारणतो यद्यन्तरं जायते, तदा अग्रे दिनमेकं वृद्ध्या दीयते, आगाढयोगे तु आकसन्धिपूरणाभवनाद् यावत् आचाम्लमेव कार्य, गुर्वाज्ञया शुद्ध्यति, योगविध्यादौ तथैव प्रतिपादनादिति । ३८ प्र० । सेन० १ उल्ला० ।

जोगसच्च-योगसत्य-न० । मनोवाक्काययोगेषु सत्यं योगसत्यम् । उत्त० २९ अ० । योगा मनोवाक्कायाः, तेषां सत्यमवितथत्वं योगसत्यम् । भ० १७ श० ३ उ० । मनःप्रभृतीनामवितथत्वरूपे सत्यभेदे, प्रश्न० ५ संव० द्वार । योगतः संबन्धतः सत्यं योगसत्यम् । तथा दण्डयोगाद् दण्डः, छत्रयोगाच्छत्र एव उच्यते, इत्येवंरूपे सत्यभेदे च । स्था० १० ठा० ।

योगसत्यस्य फलं प्रश्नपूर्वकमाह-

जोगसच्चेणं भंते ! जीवे किं जणयइ ?। जोगसच्चेणं जोगे विसोहेइ ॥ ५२ ॥

हे भदन्त ! योगसत्येन मनोवाक्काययोगानां सत्यं योगसत्यं, तेन योगसत्येन मनोवाक्कायसाफल्येन जीवः किं जनयति ?। तदा गुरुराह-हे शिष्य ! योगसत्येन योगान् विशोधयति मनोवाक्काययोगान् विशदीकरोतीति कर्मबन्धाभावान्निर्दोषान् करोतीति भावः ॥५२॥ उत्त० २९ अ० । योगः संबन्धः, तस्मात्सत्या योगसत्या। छत्रयोगाद् विवक्षितशब्दप्रयोगकाले छत्राभावेऽपि छत्रयोगस्य संजनवात् छत्री। एवं दण्डयोगाद्दण्डीत्येवंरूपे पर्यायभावाभेदे, स्त्री—टाप् । प्रज्ञा० ११ पद ।

जोगसन्नास-योगसंन्यास-पुं० । सामर्थ्ययोगमधिकृत्य-" द्विधाऽयं धर्मसंन्यास-योगसंन्यासलक्षितः ।" द्वा० १९ द्वा० (तद्वक्तव्यता ' जोग ' शब्दे अस्मिन्नेव भागे १६२७ पृष्ठे गता)

जोगसत्य-जोगशास्त्र-न० । पातञ्जलाऽऽदिप्रत्यध्यात्मचिन्ताशास्त्रेषु, द्वा०२३द्वा० । यो०वि० । "पडिहिया जोगसत्थेसु ।" "योगशास्त्रेष्वध्या-

त्मग्रन्थेषु पातञ्जलाऽऽदिष्विति। पञ्चा० १ विव०। हेमचन्द्राऽऽचार्यविरचिते योगशास्त्रनामके प्रकरणग्रन्थे च।

जोगसद्द-योगशब्द-पुं०। योगप्रतिपादके शब्दे, अत्र पश्चिमतश्रीजगमालगणिकृतप्रश्नो यथा-" भावस्सियाए अस्स जोगो सिज्झातर०" इत्यत्र योगशब्देन किमुच्यते?, इति प्रश्ने, उत्तरम्-'यस्य योगो' भिक्षार्थं गच्छन्निदं वक्ति, यस्य योगोयेन वस्तुना सह संबन्धो भविष्यति, तद् ग्रहीष्यामीत्यर्थः। इति ओघनिर्युक्तिवृत्तौ। १० प्र०। ही० १ प्रका०।

जोगसिद्ध-योगसिद्ध-पुं०। योगेषु योगे वा सिद्धो योगसिद्धः। योगातिशयवति सिद्धभेदे, आ० म०।

साम्प्रतं योगसिद्धं प्रतिपादयन्नाह-

सव्वे वि दव्वजोगा, परमच्छेरयफलाऽहवेगो वि।
जस्सेस होज्ज सिद्धो, स जोगसिद्धो जहा समितो॥

सर्वेऽपि कात्स्न्येन द्रव्ययोगाः परमाऽऽश्चर्यफलाः परमाद्भुतकार्याः। अथवा-एकोऽपि योगः परमाऽऽश्चर्यफलो यस्य भवेत् सिद्धः स योगेषु योगे वा सिद्धो योगसिद्धोऽतिशयवान्। यथा समित आचार्य इति गाथाक्षरार्थः। आ० म० १ अ० २ खण्ड। (कथानकं 'जोगपिंड' शब्दे अस्मिन्नेव भागे १६४० पृष्ठे द्रष्टव्यम्)

जोगसिद्धि-योगसिद्धि-स्त्री०। योगनिष्पत्तौ, यो० विं०।

जोगसुद्धि-योगशुद्धि-स्त्री०। योगाः कायवाङ्मनोव्यापारलक्षणाः, तेषां शुद्धिः। सोपयोगान्तरगमननिरवद्यनाषणशुभचिन्ताऽऽदिरूपायां शुद्धौ, ध० २ अधि०।

जोगसुद्धितव-योगशुद्धितपस्-न०। मनोवाक्कायव्यापाराऽनवद्यतासंपादके तपोविशेषे, पञ्चा० १७ विव०। यत्र निर्विकृतायामोपवासा एकैकयोगमाश्रित्य विधीयन्तेऽसौ योगशुद्धिः, इह च परिपाट्यत्रयेण नव तपोदिनानि स्युरिति। पञ्चा० १६ विव०।

जोगसुद्धिसचित्त-योगशुद्धिसचित्त-त्रि०। मनोवाक्कायविशुद्धिसहिते, यो० १३ विव०।

जोगहाणि-योगहानि-स्त्री०। योगानां संयमव्यापाररूपाणां हानिः। संयमव्यापारहानौ, " संवच्छरेणावि न तोसि आसी, जोगाण हाणी दुविहे बलम्मि।" व्य० १ उ०।

जोगहीण-योगहीन-न०। असम्यक्कृतपञ्चपचारे श्रुतदोषभेदे, आव० ४ अ०।

जोगाइसय-योगातिशय-पुं०। आत्माभ्यन्तरपरिणामोत्कर्षे, द्वा० १६ द्वा०।

जोगायरिय-योगाचार्य-पुं०। पतञ्जल्यादिके, " योगाऽऽचार्यैर्यथोदितम्।" योगाऽऽचार्यैः पतञ्जल्यादिभिरिति। द्वा० २१ द्वा०। योगप्रतिपादके सूरौ च। " योगाऽऽचार्यैर्विनिर्दिष्टं, तल्लक्षणमिदं पुनः।" योगाऽऽचार्यैः योगप्रतिपादकैः सूरिभिरिति। द्वा० १७ द्वा०।

जोगायार-योगाऽऽचार-पुं०। योगेनाऽऽचरति। आ-चर्-घञ्। बाह्यार्थप्रतिक्षेपेण विज्ञानमात्रवादिनि बौद्धभेदे, बाह्यार्थप्रतिक्षेपेण विज्ञानमात्रसमभिरूढो योगाऽऽचार इति। सम्म १ काण्ड। वाच०।

जोगारूढ-योगाऽऽरूढ-पुं०। योगमारूढः। आ-रुह्-क्तः। "यदा तु नेन्द्रियार्थेषु,न कर्मस्वनुषज्जते। सर्वसंकल्पसंन्यासी, योगाऽऽरूढस्तदोच्यते॥१॥" इत्युक्ते योगिनेदे, "योगाऽऽरूढस्य तस्यैव, समः कारणमुच्यते।" इति। वाच०। योगे सम्यग्दर्शनचारित्रे आत्मीयसाधनरत्नत्रयीलक्षणे आरूढो योगाऽऽरूढः। सम्यग्दर्शनचारित्रेषूक्ते, " योगाऽऽरूढः शमादेव, क्षुध्यत्यन्तर्गतक्रियः।" अष्ट० ६ अष्ट०।

जोगि (ण्)-योगिन्-पुं०। 'जोइ (ण्)' शब्दार्थे, यो० १५ विव०।

जोगिणाण-योगिज्ञान-न०। 'जोइणाण' शब्दार्थे, सम्म० २ काण्ड।

जोगिणाह-योगिनाथ-पुं०। 'जोइणाह' शब्दार्थे, द्वा० १५ द्वा०।

जोगिणीपट्टण-योगिनीपट्टन-न०। 'जोइणीपट्टण' शब्दार्थे, ती० ४७ कल्प।

जोगिय-यौगिक-त्रि०। 'जोइय' शब्दार्थे, प्रश्न० २ संव० द्वार।

जोगिवुद्धि-योगिबुद्धि-स्त्री०। 'जोइबुद्धि' शब्दार्थे, तं०।

जोग्ग-योग्य-त्रि०। योगमर्हति। युज्-यत्, ण्यत् वा। योगार्हे, वाच०। अर्हे, " अरिहो त्ति वा, जोग्गो त्ति वा एगट्ठं।" आ० चू० १ अ०। योग्यमर्हमित्यनर्थान्तरम्। विशे०। आ० म०। उचिते, दश० १ अ०। प्रभौ, " पभु त्ति वा जोग्गो त्ति वा एगट्ठं।" नि० चू० २० उ०। घटमानके, " अजोग्गरूवं इह संजयाणं।" अयोग्यरूपमघटमानकम्। सूत्र० २ श्रु० ६ अ०। निपुणे, शक्ते, पुष्यनक्षत्रे च। पुं०। औषधिनामौषधे, न०। वाच०। चाटौ, दे० ना० ३ वर्ग।

जोग्गा-योग्या-स्त्री०। योगमर्हति, युज्-यत्-कुत्वम्। ण्यत् वा। गुणनिकायाम्, भ० ११ श० ११ उ०। औ०। अभ्यासे, जं० ३ वक्ष०। " खुरली तु अभो योग्याऽभ्यासः" इति वचनात्। कल्प० ३० क्षण। शास्त्राभ्यासे, सूर्यस्त्रियां च। वाच०। गर्भधारणसमर्थायां योनौ, तं०।

कोसायारिं जोणिं, संपत्ता सुक्कमीसिया जइया।
तइया जीवुव्वाए, जोग्गा भणिया जिणिंदेहिं॥११॥

ते रुधिरबिन्दवः कोशाऽऽकारां योनिं संप्राप्ताः सन्तः शुक्रमिश्रिता ऋतुदिनत्रयान्ते पुरुषसंयोगेन असंयोगेन वा पुरुषधोयेंण मिलिताः (तइय त्ति) तदा जीवोत्पादे गर्भसंभूतिलक्षणे, योग्या भणिताः कथिताः, जिनेन्द्रैः सर्वज्ञैः॥ ११॥ तं०।

जोग्गोवयरिया-योग्योपचर्या-स्त्री०। योग्यानां देवगुरुसाधर्मिकस्वजनदीनानाथाऽऽदीनामुचितोपचर्या योग्योपचर्या। धूपपुष्पवस्त्रविलेपनाऽऽसनदानाऽऽदिगौरवाऽऽत्मिकायां देवगुरुसाधर्मिकस्वजनदीनानाथाऽऽदीनामुचितोपचर्यायाम्, ध० २ अधि०।

जोड-यौट्-सम्बन्धे, भ्वादि०-पर०-सक०-सेट्। यौटति, अयौटीत्। चङि न ह्रस्वः। वाच०। नक्षत्रे, दे० ना० ३ वर्ग।

जोडिअ-पुं०। देशी-व्याधे, दे० ना० ३ वर्ग।

जो[ण्]-योन्-पुं०। योनिं सचित्ताऽऽदिकां चतुरशीतिलक्षसंख्यावच्छिन्नां करोतीति णयन्तात् क्विपि णिलुकि। संसारे, त्रै० गा०।

जोण–योन–पुं० । अनार्यप्राये देशभेदे, प्रा० ।

जोणयपह्लवियइसिणियथोरुणियलासियल्लउसियदाविड–
सिंहलिआरबिपुलिंदिपक्कणिबन्हिमुरुण्डिसबारिपारसीहिं ।

योनिकाभिः, पह्लविकाभिः, इसिनिकाभिः, थोरुनिकाभिः, लासिकाभिः, लकुसिकाभिः, द्राविडीभिः, सिंहलीभिः, आरबीभिः, पुलिन्दीभिः, पक्कणीभिः, बहलिकाभिः, मुरुण्डीभिः, शबरीभिः, पारसीभिः, नानादेशीभिरनार्यप्रायदेशोत्पन्नाभिरित्यर्थः । प्रा० १ श्रु० १ अ० ।

जोणि–योनि–पुं० स्त्री० । उत्पत्तिस्थाने, सूत्र० ३ अ० । सूत्र० । मनुष्यादीनामुत्पत्तिस्थाने आकरे, आचा० । कारणे, पञ्चा० ४ विव० । उत्पत्तिहेतौ, प्रश्न० १ आश्र० द्वार । उपाये, स्था० ३ ठा० ३ उ० । (अर्थयोनयः 'अत्थजोणि' शब्दे प्रथमभागे ५०६ पृष्ठे भाविताः) 'यु' मिश्रणे इति वचनाद् युवन्ति तैजसकार्मणशरीरवन्तः सन्त औदारिकाऽऽदिशरीरयोग्यस्कन्धसमुदायेन मिश्रीभवन्ति जीवा यस्यां सा योनिः । प्र० १० श्रु० २ उ० । औणाऽऽदिको निप्रत्ययः । जीवानामुत्पत्तिस्थानविशेषे, स्था० ७ ठा० । प्रव० । आचा० । प्रज्ञा० । नं० । स० । प्रश्न० । असुमतामुत्पत्तिस्थानं योनिर्भणनीयेति । सूत्र० १ श्रु० १२ अ० । योषिदवाच्यदेशे, मनु० । सा च स्मरकूपिका ।

तल्लक्षणम्–

इत्थीए नाभिहिट्ठा, सिरादुगं पुप्फनालियागारं ।
तस्स य हिट्ठा जोणी, अहोमुहा संठिया कोसा ॥ ९ ॥

स्त्रिया नार्याः, नाभेरधोऽधोभागे, पुष्पनालिकाऽऽकारं सुमनोवृन्तसदृशं, शिराद्विकं धमनियुग्मं वर्तते, च पुनः, तस्य शिराद्विकस्याधो योनिः स्मरकूपिका संस्थिताऽस्ति । किंभूता ?, अधोमुखा । पुनः किंभूता ?,–(कोस त्ति) कोशा खड्गपिधानकाऽऽकारेत्यर्थः ॥ ६ ॥ तं० ।

योनिसंख्या यथा–

चोरासीइजोणिप्पमुहसयसहस्सा पण्णत्ता ।

चतुरशीतियोनयो जीवोत्पत्तिस्थानानि. त एव प्रमुखानि द्वाराणि योनिप्रमुखानि, तेषां शतसहस्राणि लक्षाणि योनिप्रमुखशतसहस्राणि प्रज्ञप्तानि । स० ८४ सम० ।

पुढवि दग अगणि मारुअ, इक्किके सत्तजोणिलक्खाओ ।
वण पत्तेअ अणंते, दस चउदस जोणिलक्खाओ ॥९७॥
विगलिंदिएसु दो दो, चउरो चउरो अ नारयसुरेसु ।
तिरिएसु हुंति चउरो, चउदसलक्खाउ मणुएसुं ॥९८॥

'यु' मिश्रणे, इत्यस्य धातोः, युवन्ति भवान्तरसंक्रमणकाले तैजसकार्मणशरीरवन्तः सन्तो जीवा औदारिकाऽऽदिशरीरप्रायोग्यपुद्गलस्कन्धैर्मिश्रीभवन्त्यस्यामित्यौणादिके 'नि' प्रत्यये योनिः ; जीवानामुत्पत्तिस्थानमित्यर्थः । तत्र पृथिव्युदकाग्निमरुतां संबन्धिन्येकैकस्मिन् समूहे सप्त सप्त योनिलक्षा भवन्ति । तद्यथा–सप्त पृथिवीनिकाये, सप्तोदकनिकाये, सप्ताग्निनिकाये, सप्त वायुनिकाये । वनस्पतिनिकायो द्विविधः । तद्यथा–प्रत्येकोऽनन्तकायश्च । तत्र प्रत्येकवनस्पतिनिकाये दश योनिलक्षाः, अनन्तवनस्पतिनिकाये चतुर्दश । विकलेन्द्रियेषु द्वीन्द्रियाऽऽदिषु द्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियरूपेषु प्रत्येकं द्वे द्वे योनिलक्षाः । तद्यथा–द्वे योनिलक्षे द्वीन्द्रियेषु, द्वे योनिलक्षे त्रीन्द्रियेषु, द्वे चतुरिन्द्रियेषु । तथा चतस्रो योनिलक्षा नारकाणां, चतस्रो देवानां, तथा तिर्यक्षु पञ्चेन्द्रियेषु चतस्रो योनिलक्षाः । तथा चतुर्दश योनिलक्षा मनुष्येषु । सर्वसंख्यायाश्च मीलने चतुरशीतिर्योनिलक्षा भवन्ति इति । न च वक्तव्यम्, अनन्तानां जीवानामुत्पत्तिस्थानान्यप्यनन्तानि प्राप्नुवन्ति, यतो जीवानां सामान्याऽऽधारभूतो लोकोऽप्यसंख्येयप्रदेशात्मक एव, विशेषाऽऽधारकुपाद्यपि नरकनिष्कुटेष्वेव च, येन प्रत्येकसाधारणजन्तुशरीराद्यसंख्येयान्येव, ततो जीवानामानन्त्येऽपि कथमुत्पत्तिस्थानानन्त्यम् । भवतु तर्ह्यसंख्येयानीति चेत् ?। नैवम् । यतो बहून्यपि तानि केवलिदृष्टेन केनचिद्रूपाऽऽदिना धर्मेण सदृशान्येकैव योनिरिष्यते, ततोऽनन्तानामपि जन्तूनां केवलिविकल्पितवर्णाऽऽदिसादृश्यतः परस्परान्तर्भावचिन्तया चतुरशीतिलक्षसंख्या एव योनयो भवन्ति, न हीनाधिकाः ॥६८२।६८३॥

एतदेवाऽऽह–

समवण्णाइसमेआ, बहवो वि हु जोणिलक्खभेआओ ।
सामन्ना घेप्पंति हु, एक्कगजोणीए गहणेणं ॥९७॥

समैः सदृशैः, वर्णाऽऽदिभिर्वर्णगन्धरसस्पर्शैः, समेता युक्ताः, समानवर्णगन्धरसस्पर्शा इत्यर्थः । बहवोऽपि प्रभूता अपि, योनिभेदलक्षाः, दुर्निश्चितम्, इह एका योनिर्जातिग्रहणेन गृह्यते । कुतः ?, सामान्याद्, व्यक्तिभेदतः प्राचुर्येऽपि समानवर्णगन्धरसस्पर्शसद्भावेन सादृश्यादिति । ननु योनिकुलयोः कः प्रतिविशेषः ?। उच्यते–योनिः जीवानामुत्पत्तिस्थानं, यथा–वृश्चिकाऽऽदेर्गोमयाऽऽदि । कुलानि तु–योनिप्रभवाणि । तथाहि–एकस्यामेव योनावनेकानि कुलानि भवन्ति, यथा छगणयोनौ कृमिकुलं, कीटकुलं, वृश्चिककुलमित्यादि । यदि वा तस्यैव वृश्चिकाऽऽदेर्गोमयाऽऽद्येकयोनित्वेनोत्पन्नस्यापि कपिलरक्ताऽऽदिवर्णभेदादनेकविधानि कुलानीति । प्रव० १५१ द्वार । सम० । आचा० ।

योनिभेदाः—

तिविहा तिविहा जोणी, अहवा पोया जराउया चेव ।
वेइंदिय तेइंदिय, चउरो पंचिंदिया चेव ॥ १५४ ॥

" तिविहा " इत्यादि । अत्र हि शीतोष्णमिश्रभेदात्तथा सचित्ताचित्तमिश्रभेदात्तथा संवृतविवृततदुभयभेदात्तथा स्त्रीपुंनपुंसकभेदाच्च इत्यादीनि बहूनि योनीनां त्रिकाणि संभवन्ति । तेषां सर्वेषां संग्रहार्थं त्रिविधा त्रिविधेति वीप्सानिर्देशः । तत्र नारकाणामाद्यासु तिसृषु भूमिषु शीतैव योनिः, चतुर्णामुपरितननरकेषु शीता, अधस्तननरकेषूष्णा, पञ्चमीषष्ठीसप्तमीष्वुष्णैव, नेतरे, गर्भव्युत्क्रान्तिकतिर्यङ्मनुष्याणामशेषदेवानां च शीतोष्णा योनिर्नेतरे, द्वित्रिचतुःपञ्चेन्द्रियसंमूर्छनजतिर्यङ्मनुष्याणां त्रिविधाऽपि योनिः–शीता, उष्णा, शीतोष्णा चेति । तथा नारकदेवानामचित्ता, नेतरे, द्वीन्द्रियाऽऽदिसंमूर्छनजपञ्चेन्द्रियतिर्यङ्मनुष्याणां त्रिविधाऽपि योनिः सचित्ताचित्तमिश्रयोनिर्नेतरे । तथा देवनारकाणां संवृता योनिर्नेतरे, द्वित्रिचतुरिन्द्रियसंमूर्छनजपञ्चेन्द्रियतिर्यङ्मनुष्याणां विवृता योनिर्नेतरे, गर्भव्युत्क्रान्तिकतिर्यङ्मनुष्याणां संवृतविवृता योनिर्नेतरे, तथा नारकानपुंसकजपञ्चेन्द्रियतिर्यङ्मनुष्याणां विवृता योनिर्नेतरे, गर्भयोनय एव । तिर्यञ्चस्त्रिविधाः–स्त्रीपुंनपुंसकयोनयोऽपि मनुष्या अप्येवं त्रैविध्यभाजः । देवाः स्त्रीपुंयोनय एव । तथा परं मनुष्ययोनेस्त्रैविध्यम् । तद्यथा–कूर्मोन्नता, तस्यां चार्हच्चक्रवर्त्यादिसत्पुरुषाणामुत्पत्तिः । तथा संखाऽऽवर्ता, सा

च स्त्रीरत्नस्यैव, तस्यां च प्राणिनां संभवो नास्ति, न निष्पत्तिः । तथा वंशीपत्रा, सा च प्राकृतजनस्येति । तथा परं त्रैविध्यं निर्युक्तिकृदर्शयति । तद्यथा-अण्डजा, पोतजा, जरायुजा चेति । तत्राण्डजाः पक्ष्यादयः, पोतजा वल्गुली-गजकलभाऽऽदयः, जरायुजा गोमहिषीमनुष्याऽऽदयः, तथा द्वित्रिचतुःपञ्चेन्द्रियभेदाश्च निद्यन्ते । आचा० १ श्रु० १ अ० ६ उ० ।

सत्त्वानां योनयः प्रतिपाद्यन्ते-

कतिविहा णं भंते ! जोणी पण्णत्ता ?। गोयमा ! तिविहा जोणी पण्णत्ता । तं जहा-सीता जोणी, उसिणा जोणी, सीतोसिणा जोणी ।

"कतिविहा णं भंते ! जोणी" इत्यादि । कतिविधा कतिप्रकारा, णमिति पूर्ववत्, भदन्त ! योनिः प्रज्ञप्ता ?। अथ योनिरिति कः शब्दार्थः ?। उच्यते-"यु" मिश्रणे, युवन्ति तैजसकार्मणशरीरवन्तः सन्त औदारिकाऽऽदिशरीरप्रायोग्यपुद्गलस्कन्धसमुदयेन मिश्रीभवन्त्यस्यामिति योनिरुत्पत्तिस्थानम् । औणादिको निप्रत्ययः । भगवानाह-गौतम ! त्रिविधा योनिः प्रज्ञप्ता । तद्यथा-शीता, उष्णा, शीतोष्णा । तत्र शीतस्पर्शपरिणामा शीता, उष्णस्पर्शपरिणामा उष्णा, शीतोष्णरूपोभयस्पर्शपरिणामा शीतोष्णा ।

योनिविशेषप्रतिपादनायाऽऽह-

नेरइयाणं भंते ! किं सीता जोणी, उसिणा जोणी, सीतोसिणा जोणी ?। गोयमा ! सीता वि जोणी, उसिणा वि जोणी, नो सीतोसिणा जोणी । असुरकुमाराणं भंते ! किं सीता जोणी, उसिणा जोणी, सीतोसिणा जोणी ?। गोयमा ! नो सीता जोणी, नो उसिणा जोणी, सीतोसिणा जोणी, एवं० जाव थणियकुमाराणं । पुढवीकाइयाणं भंते ! किं सीता जोणी, उसिणा जोणी, सीतोसिणा जोणी ?। गोयमा ! सीता वि जोणी, उसिणा वि जोणी, सीतोसिणा वि जोणी । एवं आउवाउवणस्सइबेइंदियतेइंदियचउरिंदियाण वि पत्तेयं भाणियव्वं । तेउकाइयाणं नो सीता, उसिणा, नो सीतोसिणा । पंचिंदियतिरिक्खजोणियाणं भंते ! किं सीता जोणी, उसिणा जोणी, सीतोसिणा जोणी ?। गोयमा ! सीता वि जोणी, उसिणा वि जोणी, सीतोसिणा वि जोणी । संमुच्छिमपंचिंदियतिरिक्खजोणियाण वि एवं चेव । गब्भवक्कंतियमणुस्साणं भंते ! किं सीता जोणी, उसिणा जोणी, सीतोसिणा जोणी ?। गोयमा ! नो सीता जोणी, नो उसिणा जोणी, सीतोसिणा जोणी । मणुस्साणं भन्ते ! किं सीता जोणी, उसिणा जोणी, सीतोसिणा जोणी ?। गोयमा ! सीता वि, उसिणा वि, सीतोसिणा वि जोणी । संमुच्छिममणुस्साणं भंते ! किं सीता जोणी, उसिणा जोणी, सीतोसिणा जोणी ?। गोयमा ! तिविहा वि जोणी । वाणमंतरदेवाणं किं सीता जोणी, उसिणा जोणी, सीतोसिणा जोणी ?। गोयमा ! नो सीता, नो उसिणा, सीतोसिणा जोणी । जोइसियाणं वेमाणियाण वि एवं चेव ॥

तत्र नैरयिकाणां द्विविधा योनिः-शीता, उष्णा च । न तृतीया शीतोष्णा । कस्यां पृथिव्यां का योनिरिति चेत् ?, उच्यते-रत्नप्रभायां शर्कराप्रभायां वालुकाप्रभायां च यानि नैरयिकाणामुपपातक्षेत्राणि तानि सर्वाण्यपि शीतस्पर्शपरिणामपरिणतानि उपपातक्षेत्रव्यतिरेकेण चान्यत् सर्वमपि तिसृष्वपि पृथिवीषूष्णस्पर्शपरिणामपरिणतं, तेन तत्रत्या नैरयिकाः शीतयोनिका उष्णां वेदनां वेदयन्ते । पङ्कप्रभायां बहून्युपपातक्षेत्राणि शीतस्पर्शपरिणामपरिणतानि, स्तोकान्युष्णस्पर्शपरिणामपरिणतानि, येषु च प्रस्तटेषु नरकाऽऽवासेषु शीतस्पर्शपरिणामान्युपपातक्षेत्राणि, तेषु तद्व्यतिरेकेण चान्यत्सर्वमुष्णस्पर्शपरिणामं, तेषु प्रस्तटेषु नरकाऽऽवासेषु चोपपातक्षेत्राण्युष्णस्पर्शपरिणामानि, तेषु तद्व्यतिरेकेण चान्यत्सर्वं शीतस्पर्शपरिणामं, तेन तत्रत्या बहवो नैरयिकाः शीतयोनिका उष्णां वेदनां वेदयन्ते, स्तोका उष्णयोनिकाः शीतवेदनामिति । धूमप्रभायां बहून्युपपातक्षेत्राणि उष्णस्पर्शपरिणामपरिणतानि, स्तोकानि शीतस्पर्शपरिणामानि, येषु च प्रस्तटेषु येषु च नरकाऽऽवासेषु चोष्णस्पर्शपरिणामपरिणतान्युपपातक्षेत्राणि, तेषु तद्व्यतिरेकेणान्यत्सर्वं शीतपरिणामं, येषु च शीतस्पर्शपरिणामान्युपपातक्षेत्राणि, तेष्वन्यत्सर्वमुष्णस्पर्शपरिणामं, तेन च तत्रत्या बहव उष्णयोनिकाः शीतवेदनां वेदयन्ते, स्तोकाः शीतयोनिका उष्णवेदनामिति । तमःप्रभायां तमस्तमःप्रभायां चोपपातक्षेत्राणि सर्वाण्यप्युष्णस्पर्शपरिणामपरिणतानि, तद्व्यतिरेकेण चान्यत्सर्वं तत्र शीतस्पर्शपरिणामं, तेन तत्रत्या नारका उष्णयोनिकाः शीतवेदनां वेदयितार इति । भवनवासिनां गर्भव्युत्क्रान्तिकतिर्यक्पञ्चेन्द्रियगर्भव्युत्क्रान्तिकमनुष्याणां व्यन्तरज्योतिष्कवैमानिकानां चोपपातक्षेत्राणि शीतोष्णरूपोभयस्पर्शपरिणामपरिणतानि, तेन तेषां योनिरुभयस्वभावा-न शीता, नाप्युष्णा । एकेन्द्रियाणामग्निकायिकवर्जानां द्वित्रिचतुरिन्द्रियसंमूर्च्छिमतिर्यक्पञ्चेन्द्रियसंमूर्च्छिममनुष्याणां चोपपातस्थानानि शीतस्पर्शान्युष्णस्पर्शान्युभयस्पर्शान्यपि भवन्तीति, तेषां त्रिविधा योनिः-तैजसकायिका उष्णयोनिकाः, तथा प्रत्यक्षत उपलब्धेः । प्रज्ञा० ८ पद । (एतेषामल्पबहुत्वम् 'अप्पाबहुय' शब्दे प्रथमभागे ६५७ पृष्ठे गतम्) शीताऽऽदियोनिप्रकरणार्थसंग्रहस्तु प्रायेणैवम्-" सीओसिणजोणीया, सव्वे देवा य गब्भवक्कंती । उसिणा य तेउकाए, दुह निरए तिविह सेसेसु ॥ १ ॥ " (गब्भवक्कंति त्ति) गर्भोत्पत्तिकाः । भ० १० श० २ उ० । स्था० ।

भूयोऽपि प्रकारान्तरेण योनीनां त्रैविध्यं प्रतिपिपादयिषुराह-

कतिविहा णं भंते ! जोणी पण्णत्ता ?। गोयमा ! तिविहा जोणी पण्णत्ता । तं जहा-सचित्ता, अचित्ता, मीसिया ॥

" कइविहा णं भंते ! जोणी पण्णत्ता ?। " इत्यादि । सचित्ता जीवप्रदेशसंबद्धा, अचित्ता सर्वथा जीवविप्रमुक्ता, मिश्रा जीवविप्रमुक्ताविप्रमुक्तस्वरूपा ।

नेरइयाणं भंते ! किं सचित्ता जोणी, अचित्ता जोणी, मीसिया जोणी ?। गोयमा ! नो सचित्ता जोणी, अचित्ता, नो मीसिया जोणी । असुरकुमाराणं भंते ! किं सचित्ता जोणी, अचित्ता जोणी, मीसिया जोणी ?। गोयमा !

नो सचित्ता जोणी, अचित्ता जोणी, नो मीसिया । एवं० जाव थणियकुमाराणं । पुढवीकाइयाणं भंते ! किं सचित्ता जोणी, अचित्ता जोणी, मीसिया जोणी ?। गोयमा ! सचित्ता वि जोणी, अचित्ता वि जोणी, मीसया वि जोणी । एवं० जाव चउरिंदियाणं । सम्मुच्छिमपंचिंदियतिरिक्खजोणियाणं, सम्मुच्छिममणुस्साण य एवं चेव; गब्भवक्कंतियपंचिंदियतिरिक्खजोणियाणं गब्भवक्कंतियमणुस्साण य नो सचित्ता, नो अचित्ता, मीसिया जोणी । वाणमंतरजोइसियवेमाणियाणं जहा असुरकुमाराणं ॥

तत्र नैरयिकाणां यदुपपातक्षेत्रं तत्र न केनचिज्जीवेन परिगृहीतमिति तेषामचित्ता योनिः । यद्यपि सूक्ष्मैकेन्द्रियाः सकललोकव्यापिनः, तथाऽपि न तत्प्रदेशैरुपपातस्थानपुद्गला अन्योन्यानुगमसंबद्धा इति अचित्तैव तेषां योनिः । एवमसुरकुमाराऽऽदीनां भवनपतीनां व्यन्तरज्योतिष्कवैमानिकानां वा अचित्ता योनिर्भावनीया । पृथिवीकायिकाऽऽदीनां संमूर्च्छिममनुष्यपर्यन्तानामुपपातक्षेत्रं जीवैः परिगृहीतमपरिगृहीतमुभयस्वभावं च संजायतीति त्रिविधा योनिः, गर्भव्युत्क्रान्तिकतिर्यक्पञ्चेन्द्रियाणां गर्भव्युत्क्रान्तिकमनुष्याणां च यत्रोत्पत्तिस्तत्र सचित्ताचित्ता अपि शुक्रशोणिताऽऽदिपुद्गलाः सन्तीति मिश्रा तेषां योनिः । प्रज्ञा० ९ पद । (अल्पबहुत्वम् ' अप्पाबहुय ' शब्दे प्रथमभागे ६५८ पृष्ठे ऊहयम्)

सचित्ताऽऽदियोनिप्रकरणार्थसंग्रहस्तु प्रायेणैवम्-

" अचित्ता खलु जोणी, नेरइयाणं तहेव देवाणं ।
मीसा य गब्भवासे, तिविहा पुण होइ सेसेसु " ॥ १ ॥

सत्स्वप्येकेन्द्रियसूक्ष्मजीवनिकायसंभवे नारकदेवानां यदुपपातक्षेत्रं तत्र केनचिज्जीवेन परिगृहीतमित्यचित्ता तेषां योनिः । गर्भवासयोनिस्तु मिश्रा, शुक्रशोणितपुद्गलानामचित्तानां गर्भाशयस्थ च सचेतनस्य जन्तोरिति । शेषाणां पृथिव्यादीनां संमूर्च्छजानां च मनुष्याऽऽदीनामुपपातक्षेत्रे जीवेन परिगृहीतेऽपरिगृहीते उभयरूपे योत्पत्तिरिति त्रिविधाऽपि योनिरिति । भ० १० श० २ उ० । स्था० । प्रज्ञ० ।

भूयोऽपि प्रकारान्तरेण योनीः प्रतिपादयितुकाम आह-

कतिविहा णं भंते ! जोणी पण्णत्ता ?। गोयमा ! तिविहा जोणी पण्णत्ता । तं जहा-संवुडा जोणी, वियडा जोणी, संवुडवियडा जोणी । नेरइयाणं भंते ! किं संवुडा जोणी, वियडा जोणी, संवुडवियडा जोणी ?। गोयमा ! संवुडा जोणी, नो वियडा जोणी, नो संवुडवियडा जोणी । एवं० जाव वणस्सइकाइयाणं । बेइंदियाणं पुच्छा ?। गोयमा ! नो संवुडजोणी, वियडजोणी, नो संवुडवियडजोणी । एवं० जाव चउरिंदियाणं । संमुच्छिमपंचिंदियतिरिक्खजोणियाणं संमुच्छिममणुस्साण य एवं चेव । गब्भवक्कंतियपंचिंदियतिरिक्खजोणियगब्भवक्कंतियमणुस्साण य नो संवुडा जोणी, नो वियडा जोणी, संवुडवियडा जोणी । वाणमंतरजोइसियवेमाणियाणं जहा नेरइयाणं ॥

तत्र नारकाणां संवृता योनिः, नरकनिष्कुटानां नारकोत्पत्तिस्थानानां संवृतगवाक्षकल्पत्वात् । तत्र च जाताः सन्तो नैरयिकाः प्रवर्द्धमानमूर्तयस्तेभ्यः पतन्ति शीतेभ्य उष्णेषु, उष्णेभ्यः शीतेष्विति । भवनपतिव्यन्तरज्योतिष्कवैमानिकानामपि संवृता योनिः, तेषां देवशयनीयदेवदूष्यान्तरिते उत्पादात्, "देवसयणिज्जंसि देवदूसंतरिए अंगुलासंखेज्जइभागमेत्ताए सरीरोगाहणाए उववज्जइ " इति वचनात् । एकेन्द्रिया अपि संवृतयोनिकाः, तेषामपि योनेः स्पष्टमनुपलक्ष्यमाणत्वात् । द्वीन्द्रियाऽऽदीनां चतुरिन्द्रियपर्यन्तानां सम्मूर्च्छिमतिर्यक्पञ्चेन्द्रियसम्मूर्च्छिममनुष्याणां च विवृता योनिः, तेषामुत्पत्तिस्थानस्य जलाऽऽशयाऽऽदेः स्पष्टमुपलभ्यमानत्वात् । गर्भव्युत्क्रान्तिकतिर्यक्पञ्चेन्द्रियगर्भव्युत्क्रान्तिकमनुष्याणां च संवृतविवृता योनिः, गर्भस्य संवृतविवृतकल्पत्वात् । गर्भो ह्यन्तःस्वरूपतो नोपलभ्यते, बहिस्तूदरवृद्ध्यादिनोपलक्ष्यते इति । प्रज्ञा० ९ पद । (अल्पबहुत्वम् ' अप्पाबहुय ' शब्दे प्रथमभागे ६५८ पृष्ठे गतम्)

संवृताऽऽदियोनिप्रकरणार्थसंग्रहस्तु प्राय एवम्-

" एगिंदियनेरइया, संवुडजोणी तहेव देवा य ।
विगलिंदिएसु वियडा, संवुडवियडा य गब्भंमि ॥ १ ॥ "

एकेन्द्रियाणां संवृता योनिः, तथास्वभावत्वात् । नारकाणामपि संवृतैव । यतो नरकनिष्कुटाः संवृतगवाक्षकल्पाः, तेषु च जातास्ते वर्द्धमानमूर्तयः, तेभ्यः पतन्ति शीतेभ्यो निष्कुटेभ्य उष्णेषु नरकेषु, उष्णेभ्यस्तु शीतेष्विति । देवानामपि संवृतैव । यतो देवशयनीये देवदूष्यान्तरितोऽङ्गुलासङ्ख्यातभागमात्रावगाहनो देव उत्पद्यत इति । भ० १० श० २ उ० । स्था० । सू० । नं० ।

सम्प्रति मनुष्ययोनिविशेषप्रतिपादनार्थमाह-

कतिविहा णं भंते ! जोणी पण्णत्ता ?। गोयमा ! तिविहा जोणी पण्णत्ता । तं जहा-कुम्मुन्नया, संखावत्ता, वंसीपत्ता । कुम्मुन्नया णं जोणी उत्तमपुरिसमायाणं कुम्मुन्नयाए णं जोणीए उत्तमपुरिसा गब्भं वक्कमंति । तं जहा-अरहंतचक्कवट्टीणं बलदेवा वासुदेवा । संखावत्ता णं जोणी इत्थीरयणस्स, संखावत्ताए णं जोणीए बहवे जीवा य पोग्गला य वक्कमंति, विउक्कमंति, चयंति, उवचयंति, नो चेव णं निप्पज्जंति । वंसीपत्ता णं जोणी पिहुणस्स, वंसीपत्तियाए णं जोणीए पिहुजणे गब्भं वक्कमंति ॥

"कइविहा णं भंते ! जोणी पन्नत्ता ?।" इत्यादि । कूर्मपृष्ठमिवोन्नता कूर्मोन्नता । शङ्खस्येवाऽऽवर्ता यस्याः सा शङ्खावर्ता । संयुक्तवंशीपत्रद्वयाऽऽकारत्वाद् वंशीपत्रा । शेषं सुगमं, नवरं शङ्खावर्तायां योनौ बहवो जीवा जीवसंबद्धाः पुद्गलाश्चावक्रमन्ते, आगच्छन्ति, व्युत्क्रामन्ति गर्भतयोत्पद्यन्ते, तथा चीयन्ते सामान्यतश्चयमागच्छन्ति, उपचीयन्ते विशेषत उपचयमायान्ति, परं न निष्पद्यन्ते, कतिप्रबलकामाग्निपरितापतो ध्वंसगमनादिति वृद्धप्रवादः । प्रज्ञा० ९ पद ।

एतद्वक्तव्यतासंग्रहस्त्वेवम्-

" संखाऽऽवत्ता जोणी, इत्थीरयणस्स होइ विन्नेया ।
तीए पुण उप्पन्नो, नियमा खलु चक्कवट्टिजीवो ॥ १ ॥
कुम्मुन्नयजोणीए, तित्थयरा चक्कि-वासुदेवा य ।

रामा वि य जायंते, सेसाए सेसगजणाओ ॥ २ ॥" इति। भ० १० श० २ उ०। स्था०। प्रव०।

तथा शुभाशुभभेदेन योनीनामनेकत्वं गाथाभिः प्रदर्श्यते-

" सीयाऽऽदी जोणीओ, चउरासी-तीयसय-सहस्साइं।
असुभाओ य सुभाइं, तत्थ सुभाओ इमा जाण ॥१॥
असंखा उ मणुस्सा, राईसरसंखमाइआईणं।
तित्थगरनामगोत्तं, सव्वसुहं होइ नायव्वं ॥२॥
तत्थ वि य आइसंघ-यणादि सेसा उ हुंति असुभाओ।
दोसु वि किंविसमादी, सेसाओ हुंति असुभाओ ॥३॥
पंचिंदियतिरिएसुं, इयगयरयणे हवंति उ सुभाओ।
सेसाओ असुभाओ, सुभवन्नेगिंदियादीया ॥४॥
देविंदचक्कवट्टि-त्तणाइं मोत्तुं च तित्थगरभावं।
अणगारभाविता वि य, सेसा उ अणंतसो पत्ता "॥५॥
आचा० १ श्रु० १ अ० १ उ०।

अथ स्त्रीणां कियद्भ्यो वर्षेभ्यः पुनरूर्ध्वं योनिविध्वंसो भवतीत्याह-

पणपन्ना य परेणं, जोणी पमिलायए महिलियाणं।
पणुत्तरीइ परओ, पाएण पुमं नवेऽवीओ ॥१२॥

महिलानां स्त्रीणां प्रायः प्रवाहेण (पणपन्ना य त्ति) पञ्चपञ्चाशद्वर्षेभ्यः (परेणं ति) ऊर्ध्वं योनिः प्रम्लायति, गर्भधारणाऽसमर्था भवतीत्यर्थः। तं०। (एतद्गता बहुवक्तव्यता 'गब्भ' शब्दे तृतीयभागे ८३१ पृष्ठे द्रष्टव्या)

सम्प्रति जीवविशेषयोनिवक्तव्यतादिदर्शं उच्यते। तत्रचेदं सूत्रम्-

अह भंते! सालीणं वीहीणं गोधूमाणं जवाणं जवजवाणं एएसि णं धण्णाणं कोट्ठाउत्ताणं पल्लाउत्ताणं मंचाउत्ताणं मालाउत्ताणं ओलित्ताणं लित्ताणं पिहियाणं मुद्दियाणं लंछियाणं केवइयं कालं जोणी संचिट्ठइ?। गोयमा! जहन्नं अंतो मुहुत्तं, उक्कोसं तिण्णि संवच्छराइं, तेण परं जोणी पमिलायइ, तेण परं जोणी विद्धंसइ, तेण परं बीए अबीए भवइ, तेण परं जोणीवोच्छेदे पण्णत्ते, समणाउसो! भ० ६ श० ७ उ०।

" अंते त्ति " पदं साधनीयमिति, अतो भंते त्ति महावीरमामन्त्रयन्नुक्तवान् गौतमाऽऽदिः। शालीनां, कलमाऽऽदिकानामिति विशेषः। शेषाणां व्रीहीणामिति सामान्यम्। यवयवा यवविशेषा एव। एतेषामभिहितत्वेन प्रत्यक्षाणां कोष्ठे कुशूले आगुप्तानि प्रक्षेपणेन संरक्षितानि कोष्ठागुप्तानि, तेषाम्। एवं सर्वत्र, नवरं पल्ये वंशकटकाऽऽदिकृतो धान्याऽऽधारविशेषः, मञ्चाः स्थूणानामुपरिस्थापितवंशकटकाऽऽदिमयो जनप्रतीतः, माला कोगृहस्योपरितनभागः। अभिहितं च-"अक्खुडो होइ मंचो, मालो य घरोवरिं होइ" इति। (ओलित्ताणं ति) द्वारदेशे पिधानेन सह गोमयाऽऽदिना अवलिप्तानाम्। (लित्ताणं ति) सर्वतः (पिहियाणं ति) स्थगितानाम् (मुद्दियाणं ति) मृत्तिकाऽऽदिमुद्रावताम् (लंछियाणं ति) रेखाऽऽदिभिः कृतलाञ्छनानाम्। (केवइयं ति) कियन्तं कालं योनिर्यस्यामङ्कुर उत्पद्यते, ततः परं योनिः प्रम्लायति, वर्षाऽऽदिना हीयते, प्रतिध्वस्यते विध्वंसाभिमुखीभवति। विध्वस्यते, क्रीयते। एवं च तद् बीजमबीजं भवति उप्तमपि नाङ्कुरमुत्पादयति। किमुक्तं भवति?-ततः परं योनिव्यवच्छेदः प्रज्ञप्तो मया, अन्यैश्च केवलिभिरिति शेषं स्पष्टम्। स्था० ३ ठा० १ उ०।

अह भंते! कलावमसूरतिलमुग्गमासनिप्फावकुलत्थआलिसंदगसतीणं पलिमंथगमाईणं एएसि णं धण्णाणं?। जहा सालीणं तहा एयाणि वि, णवरं पंचसंवच्छराइं, सेसं तं चेव। भ० ६ श० ७ उ०।

अहेत्यादि सूत्रसिद्धम्। नवरम्, अथेति परप्रश्नार्थः। प्रश्नन्तेति गुर्वामन्त्रणम्। (अयसीति) अतसी कुसुम्भो रट्टा राजकः कलम्बूविशेषः सणसत्वकुप्रधानो धान्यविशेषः, सर्षपाः सिद्धार्थकाः, मूलकः शाकविशेषः, तस्य बीजानि ककारलोपसन्धिरूपम् "मूलाबीय त्ति" प्रतिपादितमिति। शेषाणां पर्यायाः शोकवर्द्धितो ज्ञेया इति। यावद्ग्रहणात्-" मंचाउत्ताणं मालाउत्ताणं ओलित्ताणं लित्ताणं मुद्दियाणं। " इति द्रष्टव्यम्। व्याख्याऽस्य प्रागिवेति। पुनर्यावत्करणात्-"पविद्धंसइ विद्धंसइ से बीए अबीए भवइ तेण परं।" इति द्रष्टव्यम्। स्था० ७ ठा०।

कोष्ठाऽऽदिषु निक्षिप्तानाम्, उपलक्षणमेतत्-पिहितानामवलिप्तानां लाञ्छितानां मुद्रितानां चोत्कृष्टानां स्थितौ सप्तवर्षाणि भवन्ति, जघन्येन पुनः सर्वेषामपि पूर्वोक्तानां धान्यानामन्तर्मुहूर्तं स्थितिर्भवेत्, अन्तर्मुहूर्तात् परतः स्वायुःक्षयादेवाचित्तं जायते। सा च परमार्थतोऽतिशयज्ञानेनैव सम्यक् परिज्ञायते, न छाद्मस्थिकज्ञानेनेति न व्यवहारपथमवतरति। अत एव च पिपासापीडितानामपि साधूनां स्वनावतः स्थानुःक्षयेणाचित्तीभूतमपि तदा गोदकपानाय वर्द्धमानस्वामी भगवान् नानुज्ञातवान्। इत्थंभूतस्याचित्तीभवनस्य ज्ञानस्थानां कुलंकुत्वेन मा भूत्सर्वत्रापि तदा गोदके सचित्तेऽपि पानात्यसाधूनां प्रवृत्तिप्रसङ्ग इति कृत्वा। प्रव० १५४ द्वार। तं० ल० ५० सू० ३०। (कियद्गमनेन धान्यानामचित्तत्वमिति 'अचित्त' शब्दे प्रथमभागे १८५ पृष्ठे द्रष्टव्यम्) अन्येषामुत्पादकत्वाद् जीवे जीवस्याभिवचनान्यधिकृत्य-"जोणीए त्ति वा" योनिरन्येषामुत्पादकत्वात्। भ० २० श० २ उ०। भगनामके देवे, तद्देवताके पूर्वाफल्गुनीनक्षत्रे च। स्था० २ ठा० ३ उ०। वाच०।

योनिविचारे-यत्र मनुष्योत्पत्तिस्तत्रैव द्वीन्द्रियाऽऽदीनामुत्पत्तिर्दृश्यते, तथा च योनिसङ्करः स्यात्?, इति प्रश्ने, उत्तरम्-मनुष्यद्वीन्द्रियाऽऽदीनां योन्येकत्वेऽपि स्वस्वजातावेव योन्येकत्वव्यवहारो, न तु भिन्नजातौ। अत एव छाणाऽऽदिषु अप्युत्पन्नानां भूयसां कुलानां द्वीन्द्रियाऽऽदीनां स्वजात्यपेक्षया योन्येकत्वं, भिन्नजातीयानामपि तत्रोत्पन्नानां स्वजात्यपेक्षयैकयोनिकत्वं, तेन न योनिसङ्करः संभाव्यत इति। १०२। प्र०। सेन० २ उल्ला०।

जोणिघात-योनिघात-पुं०। योनिविध्वंसे, नि० चू० ४ उ०। (अस्य विस्तरः 'गब्भ' शब्दे ८३१ पृष्ठे द्रष्टव्यः)

जोणिजम्मणणिक्खमण-योनिजन्मनिष्क्रमण-न०। योन्या जन्मार्थंनिष्क्रमणे, कल्प० २ क्षण।

जोणिपाहुड-योनिप्राभृत-न०। जीवयोनिभेदस्वरूपप्रतिपादके पूर्वगताऽधिकारविशेषे, कृ० १ उ०।

जोणिप्पमुह–योनिप्रमुख–त्रि० । योनिद्वारके, विपा० १ श्रु० १ अ० । " चउरासीइजोणिप्पमुहसयसहस्सा । " स० ८४ सम० । योनिप्रमुखानि योनिप्रधानानि एकस्यामेव योनावनेकजातिकुलसंभवादिति । जी० ३ प्रति० । प्रव० ।

जोणिभूय–योनिभूत–त्रि० । योन्यवस्थे बीजाऽऽदौ, " जोणिभूए बीए, जीवोऽवक्कमइ सो व अणो वा । " आचा० नि० १ श्रु० १ अ० ५ उ० । अत्र भूतशब्दोऽवस्थावचनः, योन्यवस्थे बीजे योनिपरिणाममजहतीत्यर्थः । आचा० १ श्रु० १ अ० ५ उ० । बीजे योनिभूते योन्यवस्थां प्राप्ते योनिपरिणाममजहतीति भावः । बीजस्य हि द्विविधाऽवस्था । तद्यथा–योन्यवस्था, अयोन्यवस्था च । तत्र यदा बीजं योन्यवस्थां न जहाति, अथ चोज्झितं जन्तुना, तदा तद् योनिभूतमित्यभिधीयते । प्रज्ञा० १ पद । नि० चू० ।

जोणिमुहणिप्फिडिय–योनिमुखनिस्फटित–त्रि० । स्मरमन्दिरतुल्यमनिर्गते, त० ।

जोणिय–योनिक–त्रि० । योनदेशोद्भवे, ज्ञा० १ श्रु० १ अ० ।

योनिज–त्रि० । योनिस्थानाद् जायते । जन–डः । देहभेदे, जरायुजेऽण्डजे च देहे, वाच० ।

जोणिलक्खचुलसी–योनिलक्षचतुरशीति–स्त्री० । चतुरशीतियोनिलक्षसमूहे, प्रव० १५१ द्वार । (तद्वक्तव्यता ' जोणि ' शब्दे १६५२ पृष्ठे गता)

जोणिविहाण–योनिविधान–न० । योनिभेदे, विपा० १ श्रु० १ अ० ।

जोणिसंगह–योनिसंग्रह–पुं० । योनिरुत्पत्तिहेतुर्जीवस्य तया संग्रहोऽनेकेषामेकशब्दाभिलाप्यत्वं योनिसंग्रहः । भ० ७ श० ५ उ० । योनिभिरुत्पत्तिस्थानविशेषैर्जीवानां संग्रहो योनिसंग्रहः । योनिप्रतिपादनद्वाराऽनेकेषां जीवानामेकशब्देन प्रतिपादने, स्था० ।

योनिसंग्रहतो जीवानाह–

सत्तविहे जोणिसंगहे पण्णत्ते । तं जहा–अंडजा, पोतजा, जराउया, रसया, संसेयया, संमुच्छिमा, उब्भिया ॥

" सत्तविहे " इत्यादि । योनिभिरुत्पत्तिस्थानविशेषैर्जीवानां संग्रहो योनिसंग्रहः । स च सप्तधा, योनिभेदात्सप्तधा जीवा इत्यर्थः । अण्डजाः पक्षिमत्स्यसर्पाऽऽदयः । पोतं वस्त्रं, तज्जाताः पोतादिव वा योद्दित्याज्जाताः,अङ्गावयवेषेत्रा इत्यर्थः । पोतजा हस्तिवल्गुलीप्रभृतयो जरायौ गर्भवेष्टने जातास्तद्वेष्टिता इत्यर्थः। जरायुजा मनुष्याः,गवादयश्च । रसे तीमनकाद्यिजकाऽऽदौ जाता रसजाः । संस्वेदाज्जाताः संस्वेदजाः–यूकाऽऽदयः । संमूर्च्छनेन निर्वृत्ताः संमूर्च्छिमाः कृम्यादयः, उद्भिदो भूभिभेदाज्जाता उद्भिज्जाः खञ्जनकाऽऽदयः । स्था० ७ ठा० ।

अट्ठविहे जोणिसंगहे पण्णत्ते । तं जहा–अंडया, पोयया, ०जाव उब्भिया उववाइया ॥

" अट्ठविहे " इत्यादि सुगमं, नवरमौपपातिका देवनारकाः । स्था० ८ ठा० ।

संप्रति पक्षिणां प्रकारान्तरेण भेदप्रतिपादनार्थमाह–

पक्खीणं भंते ! कइविहे जोणिसंगहे पण्णत्ते ?। गोयमा ! तिविहे जोणिसंगहे पण्णत्ते । तं जहा–अंडया, पोयया, संमुच्छिमा ॥

" पक्खीणं भंते ! " इत्यादि । पक्षिणां भदन्त ! कतिविधः कतिप्रकारो योनिसंग्रहो, योन्युपलक्षितं संग्रहणमित्यर्थः ? । भगवानाह–गौतम ! त्रिविधो योनिसंग्रहः प्रज्ञप्तः । तद्यथा–अण्डजाः–मयूराऽऽदयः, पोतजाः–वल्गुल्यादयः, संमूर्च्छिमाः–खञ्जरीटाऽऽदयः । जी० ३ प्रति० ।

भुयगाणं भंते ! कइविहे जोणिसंगहे पण्णत्ते ?। गोयमा ! तिविहे जोणिसंगहे पण्णत्ते । तं जहा–अंडया, पोयया, संमुच्छिमा, एवं जहा खहयराणं ॥

" भुयगाणं भंते ! " इत्यादि । भुजगानां भदन्त ! कतिविधो योनिसंग्रहः प्रज्ञप्तः ?। इत्यादि पक्षिवत् सर्वं निरवशेषं वक्तव्यम् । जी० ३ प्रति० ।

चउप्पयथलयरपंचिंदियतिरिक्खजोणियाणं पुच्छा ?। गोयमा ! दुविहा पण्णत्ता । तं जहा–जराउया संमुच्छिमया । जराउया तिविहा पण्णत्ता । तं जहा–इत्थी, पुरिसा, नपुंसगा । तत्थ णं जे ते संमुच्छिमा ते सव्वे णपुंसगा ॥

" चउप्पयाणं " इत्यादि । चतुष्पदानां भदन्त ! कतिविधो योनिसंग्रहः प्रज्ञप्तः ? । भगवानाह–गौतम ! द्विविधो योनिसंग्रहः प्रज्ञप्तः । तद्यथा–पोतजाः, संमूर्च्छिमाश्च । इह ये अण्डजव्यतिरिक्तगर्भव्युत्क्रान्तास्ते सर्वे जरायुजाः, अजरायुजा वा पोतजा इति विवक्षितमतोऽत्र द्विविधो यथोक्तरूपो योनिसंग्रह उक्तः । अन्यथा गवादीनां जरायुजत्वात् तृतीयोऽपि जरायुजलक्षणो योनिसंग्रहो वक्तव्यः स्यादिति । तत्र ये पोतजाः ते त्रिविधाः प्रज्ञप्ताः । तद्यथा–स्त्रियः, पुरुषाः, नपुंसकाश्च । तत्र ये ते संमूर्च्छिमास्ते सर्वे नपुंसकाः । जी० ३ प्रति० ।

जलयरपंचिंदियतिरिक्खजोणियाणं भंते ! पुच्छा ?। गोयमा ! तिविहा पण्णत्ता । तं जहा–अंडया, पोयया, संमुच्छिमा, एवं जहा भुयगपरिसप्पाणं ॥

" जलचराणं " इत्यादि । जलचराणां भदन्त ! कतिविधो योनिसंग्रहः प्रज्ञप्तः ? । भगवानाह–गौतम ! त्रिविधो योनिसंग्रहः प्रज्ञप्तः । तद्यथा–अण्डजाः, पोतजाः, संमूर्च्छिमाश्च । जी० ३ प्रति० ।

जोणिसमुच्छेय–योनिसमुच्छेद–पुं० । योनिविध्वंसे, " पस जोणी अगाणं दिट्ठा न कप्पइ जोणिसमुच्छेओ । " प्रश्न० ५ सम्व० द्वार ।

जोण्ह–ज्योत्स्न–पुं० । ज्योत्स्नाऽस्यास्ति शुक्लपक्षे, ज्यो०४ पाहु० ।

जोण्हा–ज्योत्स्ना–स्त्री० । ' जोइसिणा ' शब्दार्थे, प्रा०१ पाद ।

जोत्त–योक्त्र–न० । युज्यतेऽनेन । युज–ष्ट्रन् । ईषादण्डाऽऽदौ, युगबन्धनार्थे दामनि, वाच० । " सुकिरणतवणिज्जजोत्तकलियं " जं० २ वक्ष० । " जोत्तलयकसप्पहारपाइपहिजाणं । " योक्त्रं यूपे वृषभसंयमनमिति । प्रश्न० ५ संव० द्वार । ज्ञा० ।

योत्र–न० । यु–ष्ट्रन् । योक्त्रे, वाच० । सूत्र० ।

जोय–योक्त्र–न० । ' जोत्त ' शब्दार्थे, जं० २ वक्ष० ।

जोयण–योजन–न० । युज-भावाऽऽदौ ल्युट् । संयोगे, णिच् ल्युट् । संयोगकरणे, वाच० । संबन्धने, प्रश्न० १ आश्र० द्वार । उत्त० । चतुर्गव्यूताऽऽत्मके अध्वमानविशेषे, जं० ७ वक्ष० स्था० । " चउगाउए जोयणे पण्णत्ते । " स० १ सम० । भ० । आ० म० प्रज्ञा० । " चत्तहत्थं पणधणुहं, दुन्नि सहस्साइ गाउअं तेसिं । चत्तारि गाउआ पुण, जोअणमेगं मुणेयव्वं " ॥ १ ॥ प्रव० २५६ द्वार । " अट्ठेव धणुसहस्सा, जोयणमाणं पमाणेणं । " ज्यो० २ पाहु० ।

संप्रति मागधयोजनमाह—

मागहस्स णं जोयणस्स अट्ठधणुसहस्साइं नीहारे पण्णत्ते ।

" मागह " इत्यादि । मगधेषु भवं मागधं मगधदेशव्यवहृतं, तस्य योजनस्याध्वमानविशेषस्याष्टधनुःसहस्राणि नीहारो निर्गमः, प्रमाणमिति यावत् । (निहत्ते त्ति) क्वचित्पाठः । तत्र निधत्ते निकाचितं निश्चितं, प्रमाणमिति गम्यते । इदं च प्रमाणं परमाणवादिना क्रमेणावसेयम् ।

तथाहि-

" परमाणू तसरेणू, रहरेणू अग्गयं च बालस्स ।
लिक्खा जूया य जवो, अट्ठगुणविवड्ढिया कमसो ॥ १ ॥ "

तत्र परमाणुरनन्तानां निश्चयपरमाणूनां समुदयरूप ऊर्द्ध्वरेण्वादिभेदा अनुयोगद्वाराभिहिता अनेनैव संगृहीता द्रष्टव्याः, तथा पौरस्त्यादिवायुप्रेरितखस्थिति गच्छतीति त्रसरेणुः, रथगमनोत्खातो रथरेणुरिति । एवं चाष्टौ यवमध्यान्यङ्गुलं, चतुर्विंशतिरङ्गुलानि हस्तः, चत्वारो हस्ता धनुः, द्वे सहस्रे धनुषां गव्यूतं, चत्वारि गव्यूतानि योजनमिति । मागधग्रहणात् क्वचिदन्यदपि योजनं स्यादिति प्रतिपादितम् । तत्र यस्मिन् देशे षोमशभिर्धनुःशतैर्गव्यूतं स्यात्तत्र षष्टिभिः सद्भिश्चतुर्भिः शतैर्धनुषां योजनं भवतीति । स्था० ७ ठा० । आव० । " भरहो वि भगवओ पुव्वं काऊण चक्करयणस्स अट्ठाहियामहिमं करियाइ, इओ निवत्ताए अट्ठाहियाए तं चक्करयणं पुव्वमुहं पहावियं, भरहो सव्वबलेण तमणुगच्छिआइ, उड्ढं जोयणं गंतूण ठियं, ततो सा जोयणसंखा जाया " । आव० १ अ० ।

जोयणनीहारि [णि]–योजननीहारिन्–त्रि० । योजनातिक्रामिणि, " जोयणनीहारिणा सरेणं । " योजनातिक्रामिणा शब्देन । उपा० २ अ० । "जोयणनीहारी सरो ।" तीर्थकृतामेकविंशतितम अतिशयः । स० ३४ सम० ।

जोयणपरिमंडल–योजनपरिमण्डल–त्रि० । योजनं योजनप्रमाणं परिमण्डलं, गुणप्रधानोऽयं निर्देशः, परिमाणरूपं यस्य स योजनपरिमण्डलः । योजनप्रमाणपरिमाणरूप्योपेते, "जोयणपरिमंडलं सुस्सरं घंटं तिक्खुत्तो उल्लालेमाणे ।" रा० ।

जोयणा–योजना–स्त्री० । युज-णिच्-युच् । संयोगकरणे, नि० चू० २ उ० । "उत्तमं प्रणिपातेन, शूरं भेदेन योजयेत् । नीचमल्पप्रदानेन, समं च पराक्रमैः " ॥१॥ दश० ३ अ० ।

जोयणिज्ज–योजनीय–त्रि० । संबन्धनीये, नि० चू० १ उ० ।

जोयत्तिय–जोगत्रिक–न० । 'जोगत्तिय' शब्दार्थे, दश० १० अ० ।

जोव–न० । देशी-बिन्दौ, स्तोके च । दे० ना० ३ वर्ग ।

जोवारी–स्त्री० । देशी-धान्ये, दे० ना० ३ वर्ग ।

जोव्वण–यौवन–न० । यूनो भावः-अण् । "औत ओत्" ॥८।१। १५९ ॥ इति प्राकृतसूत्रेणाऽऽदेरौत ओकारः । प्रा० १ पाद । " तैलाऽऽदौ " ॥८।२। ६८ ॥ इति प्राकृतसूत्रेणानादौ वर्त्तमानस्यान्त्यस्यानन्त्यस्य च व्यञ्जनस्य द्वित्वम् । प्रा० २ पाद । तारुण्ये, प्रश्न० ४ सम्ब० द्वार । ज्ञा० । पं० व० । नि० चू० । " निरुवहयसरसजोव्वणकक्कसतरुणवयभावमुवगए ओ । " निरुपहतं रोगाऽऽदिना अबाधितं सरसं च शृङ्गाररसोपेतं निरुपहतो वा स्वो रसो यत्र तत्तथाविधं यौवनं, तथा कर्कशोऽरूक्षतया यस्तरुणवयोभावस्तारुण्यं, तं चोपगता यास्तास्तथा । इह च यौवनतरुणभावयोरेकार्थता, तथापि सरसत्वारूक्षत्वलक्षणयोर्मनःशरीराश्रितयोः प्रधानतया विवक्षितयोर्धर्मयोराधारतया भेदेन विवक्षणाद् न पौनरुक्त्यमिति । औ० । "जोव्वणेण य संपण्णे ।" उत्त० २१ अ० । यौवनं परमस्तरुणिमेति । प्रज्ञा० ३५ पद । "आषोडशाद् भवेद् बालस्ततस्तरुण उच्यते । वृद्धः स्यात्सप्ततेरूर्द्ध्वम्," इत्युक्तलक्षणेऽवस्थाभेदे, " अह जोव्वणं समणुपत्तो । " यौवनं वयोविशेषबललक्षणमिति । आ० म० १ अ० २ खण्ड । वाच० । सूत्र० । "यौवनमुदप्रकाले, विदधाति विरूपकेऽपि लावण्यम् । दर्शयति पाकसमये, निम्बफलस्यापि माधुर्यम्" ॥१॥ इति । दश० ३ अ० । "वयो अवेइ जोव्वणं च ।" वयोग्रहणेनैव यौवन्यगतत्वात्तदुपादानं प्राधान्यख्यापनार्थं, धर्मार्थकामानां तन्निबन्धनत्वात्सर्ववयसां यौवनं साधीयस्तदपि त्वरितं यातीति । उक्तं च-"नइवेगसमं चंचलं च जीवियं जोव्वणं च कुसुमसमं । सोक्खं च जं अणिच्चं, तिण्णि वि तुरमाणभोज्जाइं ॥१॥ " आचा० १ श्रु० २ अ० १ उ० ।

जोव्वणकरण–यौवनकरण–न० । कालकृतवयोऽवस्थाविशेषाऽऽत्मके रसायनाऽऽद्यापादितवयोऽवस्थाविशेषाऽऽत्मके च करणभेदे, सूत्र० १ श्रु० १ अ० १ उ० ।

जोव्वणकिड्डग–यौवनक्रीडक–त्रि० । तारुण्यावस्थायां क्रीडाकर्तरि, तथा चोक्तम्-" पियपुत्तभाइकिड्डगा, णत्तू किड्डगा य सयणकिड्डगा य । एते जोव्वणकिड्डगा, पच्छन्नपई महिलियाणं ॥१॥ " सूत्र० १ श्रु० ४ अ० १ उ० ।

जोव्वणग–यौवनक–न० । यौवनमेव यौवनकम् । दशा० १० अ० । यौवने, "जोव्वणगमणुप्पत्ते ।" आ० म० १ अ० २ खण्ड ।

जोव्वणगुण–यौवनगुण–पुं० । युवतीनां प्रियभावित्वाऽऽदिके गुणे, ज्ञा० १ श्रु० १ अ० ।

जोव्वणमद–यौवनमद–पुं० । तारुण्यगर्वे, " विहवावलेवजणिए–हिँ जाइँ कीरंति जोव्वणमएण । वयपरिणामे सरिया–इँ ताइँ हिअए खडुक्कंति ॥१॥" सूत्र० १ श्रु० ३ अ० ४ उ० ।

जोव्वणिया–यौवनिका–स्त्री० । यौवने, रा० ।

जोसंत–जुषत्–त्रि० । सेवमाने, आचा० १ श्रु० ६ अ० ४ उ० ।

जोसण–जोषण–न० । सेवने, आचा० १ श्रु० ६ अ० ४ उ० । आव० ।

जोसणा–जोषणा–स्त्री० । प्रीतौ, सेवायां च । ' जुषी ' प्रीतिसेवनयोरिति वचनात् । औ० । स० ।

जोसिय–जुष्ट–त्रि० । सेविते, सूत्र० १ श्रु० २ अ० ३ उ० ।

जोसियंग–योषिदङ्ग–न० । स्त्रीणामङ्गे, तथा चोक्तम्–" कार्य्येऽपीषन्मतिमान्निरीक्षते योषिदङ्गमस्थिरया । अस्निग्धया हृशाऽव–क्रया ह्यकुपितोऽपि कुपित इव ॥ १ ॥ " सूत्र० १ श्रु० ४ अ० १ उ० ।

जोसियाण–जोषित्वा–अव्य० । प्रीतयित्वेत्यर्थे, व्य०७ उ० ।

जोह–योध–पुं० । युध्यति शत्रून् प्रतिसंहरतीति योधः । युद्धं कृत्वा शत्रूणां जेतरि, उत्त० १४ अ० । शूरपुरुषे, " जोहाण य उप्पत्ती । " योधानां शूरपुरुषाणाम् । स्था० १० ठा० । सुभटे, "यथा योधैः कृतं युद्धम् । " अष्ट०१५ अष्ट० । ते च भटेभ्यो विशिष्टतराः सहस्रयोधाऽऽदयः । औ० । भ० । रा० । ज्ञा० । सूत्र० । " सावरणो वि हु उल्लिज्जइ जोहो । " वृ० १ उ० । सहस्रयोधित्वाभावेऽपि योधित्वमिदानीम् ।

तथा च–

साहस्सीमल्ला खलु, महपाणा पुव्व आसि जोहा उ ।
तत्तुल्ल नत्थि एण्हिं, किं ते जोहा न होंती तो ? ॥

पूर्वं योधा महाप्राणाः सहस्रमल्ला आसीरन्, इदानीं तेषां तुल्या न सन्ति, किन्त्वनन्तभागहीनाः,ततः किं ते योधा न भवन्ति ?, भवन्त्येव, कालौचित्येन तेषामपि युद्धकार्यकरणादिति भावः । व्य०३ उ० । युध्यत इति योधः सुभटः, बोध इव योधः । कर्मवैरिपराभवकारके बहुश्रुताऽऽदौ, " अप्पमिहयबले जोहे, एवं हवइ बहुस्सुए । " उत्त०११ अ० । भावे घञ् । युद्धे, वाच० ।

योदृधृ–पुं० । युध–तृच् । युद्धकर्तरि, वाच० ।

जोहजुज्झसज्ज–योधयुद्धसज्ज–त्रि० । योधानां युद्धं तन्निमित्तं सज्जः प्रगुणीभूतो यः स योधसज्जः । योधानां युद्धार्थं प्रगुणीभूते, जी० ३ प्रति० ।

जोहट्ठाण–योधस्थान–न० । आलीढाऽऽदिके युद्धकाले भवे योधानामङ्गविन्यासविशेषे, स्था० १ ठा० । तानि च–" लोयप्पवाए पंच ठाणाणि । तं जहा–आलीढं,पच्चालीढं,वइसाढं,मंडलं, समपादं । " आ० म० १ अ० २ खण्ड० । " एयाणि पंच ठाणाणि लोयप्पवायप्पे सयणकरणकुट्टाणि त्ति । " आ०म०१ अ० २ खण्ड० । आ० चू० । उत्त० ।

तथा च योधाऽऽदिस्थानप्रतिपादनार्थमाह–

आलीढे पच्चलीढे, वेसाहे मंडले य समपाए ।

योधानां स्थानं पञ्चविधम् । तथथा–आलीढं, प्रत्यालीढं,वैशाखं, मण्डलं, समपादं च । एतैर्हि पञ्चभिरपि स्थानैर्योधा यथायोगं युध्यन्ते, तत एतानि योधस्थानानीति । व्य०१ उ० । "अग्गे जणंति–जं एतेसिं चेव ठाणाणं जहासंभवं चलिय ठितो पासतो पिट्ठतो वा जुज्झति, तं उट्ठं चलियणामट्ठाणं ति । " नि० चू० २० उ० । (आलीढाऽऽदीनां स्वरूपं तत्तच्छब्दे)

जोहिया–योधिका–स्त्री० । भुजपरिसर्प्पिणीभेदे, जी०१ प्रति० ।

झक्ख–शद्–धा० । शातने, भ्वा०–पर०–सक०–अनिट् । " शदो झक्ख–पक्खौ वा " ॥ ८ । ४ । १३० ॥ इति प्राकृतसूत्रेण शीयतेर्झक्खादेशः । 'झक्खइ' । प्रा०४ पाद । शीयते, अशदत् । वाच० ।

झर–क्षर्–धा० । सञ्चलने, भ्वादि०–पर०–अक०–सेट् । "क्षरः खिर-झर-पज्झर-पच्चड-णिच्चल-णिट्टुआः" ॥८ ।४। १७३॥ इति प्राकृतसूत्रेण क्षरतेर्झरादेशः । प्रा० ४ पाद । क्षरति, अक्षारीत् । वाच० ।

इति श्रीसौधर्मबृहत्तपागच्छीय—कलिकालसर्वज्ञकल्प–भट्टारक–
जैनश्वेताम्बराऽऽचार्यश्री १००८ श्रीमद्विजयराजेन्द्रसूरीश्वर–
विरचिते "अभिधानराजेन्द्रे" जकाराऽऽदिशब्द–
सङ्कलनं समाप्तम् ।



झ–झ–पुं० । 'झग' संहतौ, ग्रहे, पिधाने वा कः । सुरगुरौ० इन्द्रे, ध्वनौ, वाच० । स्वप्ने, शून्ये, ऊर्ध्वक्षेपणे, विनष्टे, विवरे, भृङ्गे, एका० । को० । शब्दान्तरे, सरसीरुहसंभवे झञ्झानिले, प्रतापे, भ्रमरे, हंसके, मदे, जपाये, धर्घरध्वाने, एका० । 'झ त्ति य ऊणस्स होइ निद्देसे ।' ध्यानस्य निर्देशे, आ० म० १ अ० २ खण्ड । नष्टऊने, त्रि० । वाच० ।

झअ–ध्वज–पुं० । "ध्वजे वा" । ८।२ । २७ । ध्वजशब्दे संयुक्तस्य झो वा भवति । 'झओ' धओ । प्रा० २ पाद । चतुष्कोणेऽष्टकारे वंशदण्डोपरिस्थिते वस्त्रखण्डे, वाच० ।

झंकारिअ–न० । देशी-अवचयने, दे० ना० ३ वर्ग ।

झंख–उप+आ+लभ–धा० । निन्दापूर्वकदुष्टवचने, परस्परदूषणे च । वाच० । "धातवोऽर्थान्तरेऽपि" । ८ । ४ । २५८ । उक्तादर्थादर्थान्तरेऽपि धातवो वर्तन्ते इति उपालम्भनेऽर्थेझङ्खादेशः । 'झंखइ' उपालम्भते, भाषते वा । प्रा० ४ पाद । "उपालम्भेऽर्थेझंखपच्चारवेलवाः" ।८।४।२५६॥ इत्यनेन वा उपालम्भनेऽर्थेझंखादेशः । 'झंखइ' 'उवालम्भइ ।' प्रा० ४ पाद । तुष्टे, दे० ना० ३ वर्ग ।

वि+झप–धा० । परिदेवनोक्तौ, वाच० । "धातवोऽर्थान्तरेऽपि" ॥ ८।४।२५८ ॥ इति विलपेऽर्थेझंखादेशः । "विलपेऽर्थेझंख-वमवकौ" ॥८।४।१४८॥ इत्यनेन वा झंखादेशः । प्रा० ४ पाद ।

निर्+श्वस–धा० । मुखनासाभ्यन्तर्गते वायौ, वाच० । "निःश्वसेऽर्थेझंखः" । ८ । ४ । २०१ । निःश्वसेऽर्थेझंख इत्यादेशो भवति । 'झंखइ ।' 'नीससइ ।' प्रा० ४ पाद ।

झंखर–पुं० । देशी-शुष्कतरौ, दे० ना० ३ वर्ग ।

झंखरिअ–न० । देशी-अवचयने, दे० ना० ३ वर्ग ।

झंझ–झञ्झ–पुं० । कलहविशेषे, औ० ।

झंझकर–झञ्झकर–पुं० । येन येन गणस्य भेदो भवति तत्कारिणि, येन गणस्य मनोदुःखमुत्पद्यते तद्भावेऽपि च । प्रश्न० ३ संव० द्वार । आ० चू० ।

झंझकारीय–झञ्झकारीय–पुं० । झञ्झकरे, "जेण गणस्स भेदो भवति, सव्वो वा गणो झंझविओ अत्थति, तारिसं भासइ, करेइ वा ।" आव० ४ अ० ।

झंझपत्त–झञ्झप्राप्त–पुं० । द्वि० त० । कलहं क्रोधं मायां वा प्राप्ते, सूत्र० १ श्रु० १३ अ० ।

झंझा–झञ्झा–स्त्री० । झमिति कृत्वा झड्यते यत्र नः । ध्वनिभेदे, तथाध्वनियुक्ते प्रचण्डानिले च । वाच० । कलहे, पृ० ३ उ० । तृष्णायाम्, सूत्र० २ श्रु० २ अ० २ उ० । क्रोधे, मायायाम्, सूत्र० १ श्रु० १३ उ० । लोभेच्छायाम्, आचा० १ श्रु० ५ अ० ३ उ० । विप्रकीर्णवचने, स्था० ८ ठा० । व्याकुलतायां च । इष्टविषयावाप्तौ रागझञ्झा । अनिष्टावाप्तौ च द्वेषझञ्झा । आचा० १ श्रु० ३ अ० ३ उ० ।

झंझाउर–झञ्झाऽऽतुर–त्रि० । तृष्णाऽऽतुरे, सूत्र० २ श्रु० २ अ० ।

झंझावाय–झञ्झावात–पुं० । अशुभे निष्ठुरे सवृष्टिके च वायौ, प्रश्न० १ पद । भ० ।

झंझिय–झञ्झित–त्रि० । बुभुक्षिते, ज्ञा० १ श्रु० १ अ० ।

झंट–भ्रम–धा० । चलने, दिवा०-पर०-सक०-सेट् । वाच० । "भ्रमेष्टिरिटिल्ल-दुण्टुल्ल-ढण्ढल्ल-चक्कम-भम्मड-भमड-भमाड-तलअण्ट-भण्ट-भम्प-भुम-गुम-फुम-फुस-दुम-दुस-पर्योपराः" ॥८।४।१६१॥ इति झंटादेशः । 'झंटइ ।' प्रा० ४ पाद । स्त्रियां ङीप् । लघूर्ध्वकेशेषु, दे० ना० ३ वर्ग ।

झंटलिअ–स्त्री० । देशी-चङ्क्रमणे, दे० ना० ३ वर्ग ।

झंडअ–पुं० । देशी-पीलुषृक्षे, दे० ना० ३ वर्ग ।

झंडल–स्त्री० । देशी-असत्यां, क्रीडायां च । दे० ना० ३ वर्ग ।

झंतर–ध्यन्तर–न० । धियो बुद्धेरन्तरं विशेषो ध्यन्तरम् । विशिष्टबुद्धौ, अने० ४ अधि० ।

झंतरजोग–ध्यन्तरयोग–पुं० । ध्यन्तरेणोपलक्षिते सम्यक्मनोवाक्कायव्यापाररूपे असम्यक्मनोवाक्कायनिषेधरूपे योगे, अने० ४ अधि० ।

झंप–भ्रम–धा० । चलने, ज्वा०-पर०-सक०-सेट् । वाच० । "भ्रमेष्टिरिटिल्ल०-" ॥ ८ । ४ । १६१ ॥ इत्यादिना झंपादेशः । 'झंपइ' प्रा० ४ पाद ।

झंपणी–स्त्री० । देशी-पद्मणि, दे० ना० ३ वर्ग ।

झंपिअ–न० । देशी-त्रुटिते, घट्टिते च । दे० ना० ३ वर्ग ।

झंसइ–क्रिया । देशी-संतप्यते, विलपति, उपालभते, निःश्वसिति च । दे० ना० ३ वर्ग ।

झक्किअ–न० । देशी-वचनीये, दे० ना० ३ वर्ग ।

झज्झर–झर्झर–पुं० । झर्झ-अरच् । वाच० । "नादियुज्योरन्येषाम्" । ८ । ४ । ३२७ । चूलिकापैशाचिकेऽप्यन्येषामाचार्याणां मतेन तृतीयतुर्ययोरादौ वर्त्तमानयोः युजि धातौ चाद्यद्वितीयौ न भवतः । झज्झरो, झक्कुरो । प्रा० ४ पाद । 'झांझ' इति ख्याते वाद्यभेदे, पटहे, कलियुगे, नदभेदे, वाच० ।

झज्झरिय–झर्झरित–[र्जरित]–त्रि० । सतन्त्रीककरटिकाऽऽदिवाद्यशब्दवति, स्था० १० ठा० ।

झज्झरी–स्त्री० । देशी-स्पर्शपरिहारार्थे, चण्डालाऽऽदीनां दस्तयष्टौ, दे० ना० ३ वर्ग ।

झडप्पर–झटिति–न० । वेगे, दुं० ४ पाद । दिअहा जन्ति झडप्पडहिँ, पडहिँ मणोरह पच्छि ।" प्रा० ४ पाद ३८८ सूत्र ।

झडिज्जंत–क्षीर्यमाण–त्रि० । हीयमाने, "वासासु सीतवातेहिं झडिज्जंतो ।" आव० १ अ० ।

झम्मिल–जटिल–त्रि० । "जटिले जो झो वा" ॥८।१।१९४॥ जटिले जस्य झो वा भवति । 'झम्मिलो'–'जम्मिलो' निविडे, प्रा० १ पाद ।

झम्मी–स्त्री० । देशी–निरन्तरवृष्टौ, दे० ना० ३ वर्ग ।

झत्थ–न० । देशी–गते, नष्टे च । दे० ना० ३ वर्ग ।

झमाल–न० । देशी–इन्द्रजाले, दे० ना० ३ वर्ग ।

झय–ध्वज–पुं० । ध्वज–अच् । शौण्डिके, सर्पे च । वाच० । चक्रसिंहाऽऽदिलाञ्छनोपेते, भ० ए श० ३३ उ० । चतुष्कोणाऽऽकारे वंशदण्डोपरिस्थिते वस्त्रखण्डे, वाच० । औ० । चतुर्दशानामष्टमे स्वप्नभेदे, कल्प० ।

तओ पुणो जच्चकणगलट्ठिपइट्ठिअं समूहनीलरत्तपीअसुकिल्लसुकुमालुल्लसियमोरपिच्छकयमुज्जयं झयं अहियसस्सिरीयं फालिअसंखंककुंददगरयरययकलसपंडुरेणं मत्थयत्थेण सीहेण रायमाणेण रायमाणं निच्चुं गगणतलमंडलं चेव ववसिएणं पिच्छइ सिवमउयमारुयल्लयाहयकंपमाणं अइप्पमाणं जणपिच्छणिज्जरूवं ॥

" तओ पुणो जच्च " इत्यादितः "जणपिच्छणिज्जरूवं" इतिपर्यन्तम् । ततः सा त्रिशला पुनरष्टमे स्वप्ने (झयं ति) ध्वजं पश्यति । किं विशिष्टं ध्वजम् ?–"जच्चकणग" इत्यादि । जात्यश्रेष्ठजातीयं यत् (कणगं ति) कनकं सुवर्णं तस्य (लट्ठि त्ति) यष्टिः, तत्र (पइट्ठिअं ति) प्रतिष्ठितं, सुवर्णमयदण्डशिखरे स्थितमित्यर्थः । पुनः किं विशिष्टम् ?–(समूह त्ति) समूहीभूतानि, बहूनि इत्यर्थः । (नीलरत्तपीअसुकिल्ल त्ति) नीलरक्तपीतशुक्लवर्णमनोहरा इत्यर्थः । (सुकुमाल त्ति) सुकुमालानि (उल्लसिय त्ति) उल्लसन्ति, वातेन लहलहायमानानि इत्यर्थः । एवंविधानि यानि (मोरपिच्छ त्ति) मयूरपिच्छानि, तैः कृता मूर्द्धजा इव केशा इव यस्य स तथा तम् । अयमर्थः–यथा मनुष्यशिरसि वेणिर्भवति, तथा तस्य ध्वजस्य वर्णस्थाने मयूरपिच्छसमूहः स्थापितोऽस्तीति । पुनः किं विशिष्टम् ?–(अहियसस्सिरीयं ति) अधिकसश्रीकम्, अतिशोभितम् इत्यर्थः । पुनः किं विशिष्टम् ?–एवंविधेन सिंहेन राजमानम् इति विशेषणयोजना । अथ कीदृशेन सिंहेन ?–"फालिय" इत्यादि । स्फटिकं रत्नविशेषः, शङ्खः प्रसिद्धः, अङ्कोऽपि रत्नविशेषः, (कुंद त्ति) कुन्दस्य धवलपुष्पविशेषस्य माल्यम्, (दगरय त्ति) दकरजांसि जलकणाः, (रययकलस त्ति) रजतकलशो रूप्यघटः, (पंडुरेण त्ति) उत्कर्षवच्वस्तुवत् उज्ज्वलवर्णेन, (मत्थयत्थेण त्ति) मस्तकस्थितेन, चित्रतया ध्वजशिरसि आलेखितेनेत्यर्थः । पुनः कीदृशेन सिंहेन ?–(रायमाणेण त्ति) राजमानेन, सुन्दरत्वात् शोभमानेनेत्यर्थः । (रायमाणं ति) राजमानम् इति तु योजितम् । पुनः कीदृशेन सिंहेन ?–(निच्चुं) नेतुं क्षिप्तुं, किम् ?–(गगणतलमंडलं ति) आकाशतलमण्डलम् । (चेव त्ति) उत्प्रेक्षायाम् (ववसिएण त्ति) सोद्यमेनेव । अयमर्थः–ध्वजस्तावद्वायुतरङ्गेण कम्पते । कम्पमाने च ध्वजे सिंहोऽपि गगनं प्रति उच्छलति । तथा च उत्प्रेक्षते–अयं सिंहः किं गगनतलं नेतुम् उद्यमं करोतीति ?। (पिच्छइ त्ति) प्रेक्षते इति प्राग्वत् । अथ पुनः किं विशिष्टं ध्वजम् ?–"सिव" इत्यादि । शिवः सौख्यः सुखकारी, अत एव (मउय त्ति) मृदुको, मन्दमन्द इति यावत् । एवंविधो यो (मारुअ त्ति) मारुतो वायुः, तस्य (लय त्ति) लय आश्लेषो, मिलनमिति यावत् । तेन (आहय त्ति) आहत आन्दोलितो यः । तत एव (कंपमाण त्ति) चलनस्वभावो यः स तथा तम् । पुनः किंविशिष्टम् ?–(अइप्पमाणं ति) अतिप्रमाणम्, महान्तम् इत्यर्थः । पुनः किंविशिष्टम् ?–(जणपिच्छणिज्जरूवं ति) जनानां प्रेक्षणीयं द्रष्टुं योग्यं रूपं स्वरूपं यस्य स तथा तम् । कल्प० ३ क्षण । आ० म० । खड्गाऽऽदौ, मेढ्रे च । पुं० । न० । वाच० । स्त्रियां टाप् । औ० । ज्ञा० । नि० । स्था० । विपा० ।

झर–स्मर–धा० । स्मरणे, भ्वा०-पर०-सक०-अनिट् । "स्मरे-झर-झूर-झर-झल-लढ-विम्हर-स्मर-पयर-पम्हुहाः" । ८ । ४ । ७४ । इति झरादेशः । झरइ । प्रा० ४ पाद ।

झरअ–पुं० । देशी–सुवर्णकारे, दे० ना० ३ वर्ग ।

झरंक–पुं० । देशी–तृणमयपुरुषे, दे० ना० ३ वर्ग ।

झरग–ध्यातृ–पुं० । ध्यायतीति ध्याता । ध्यानकर्त्तरि, " झलगं करगं झरगं, पभावगं णाणदंसणगुणाणं । " तं० ।

झरण–झरण–स्त्री० । क्षरणे, व्य० १ उ० ।

झरणा–झरणा–स्त्री० । क्षरणे, आ० म० १ अ० २ खण्ड ।

झरुअ–पुं० । देशी–मशके, दे० ना० ३ वर्ग ।

झरेयव्व–स्मर्त्तव्य–त्रि० । परिचेतव्ये, कृ० ५ उ० ।

झलक्किअ–दग्ध–त्रि० । भस्मीभूते, "तदयादीनां छोल्लाऽऽदयः" । ८ । ४ । ३६५ । इति दहस्य झलक्कादेशः, क्तप्रत्यये "स्वराणां०-" । ८ । ४ । २३८ । क-क्किः, " कगच०- " । ८ । १ । १७७ । तलुक् । स्वार्थे कः । स्–१–१ । "कगच०" । ८ । १ । १७७ । झलुक् । "स्यमोरस्योत्" । ८ । ४ । ३३१ । ' अत्र ' झलक्किअत्र । द्वि० ४ पाद । " सासानलझलक्किअत्र, वाहसलिलसंसित्तत्र । " प्रा० ४ पाद ३०५ सूत्र ।

झलक्किय–त्रि० । भस्मीभूते, प्रा० ४ पाद ।

झलझलिआ–स्त्री० । देशी–कोलिकायाम्, दे० ना० ३ वर्ग ।

झला–स्त्री० । देशी–मृगतृष्णायाम्, दे० ना० ३ वर्ग ।

झलुसिय–न० । देशी–दग्धार्थे, दे० ना० ३ वर्ग ।

झलुंकिअ–न० । देशी–दग्धार्थे, दे० ना० ३ वर्ग ।

झल्लरी–झल्लरी–स्त्री० । झर्झति झर्झ–अरन्–पृ० । वाच० । उभयतो विस्तीर्णे चर्मावनद्धमुखे मध्ये सङ्क्षिप्ते ढक्काकारे वाद्यभेदे, आ० म० १ अ० १ खण्ड । प्रज्ञा० । जी० । अल्पोच्छ्राये महामुखे. (भ० ए श० ३३ उ०) चतुरङ्गुलनाभिके करटिसदृशे वलयाकारे आतोद्यविशेषे च । आचा० १ श्रु० १ अ० ५ उ० । आ० म० । कल्प० । रा० । औ० । ज्ञा० । विशे० । " संखो णदइ गंधारं, मज्झिमं पुण झल्लरी । " स्था० ७ ठा० । अनु० ।

झल्लरीसंठिय–झल्लरीसंस्थित–त्रि० । झल्लरीसंस्थानवति, अल्पोच्छ्रायत्वान्महाविस्तारत्वाच्च तिर्यग्लोकक्षेत्रलोको झल्लरीसंस्थितः । भ० ११ श० १० उ० । स्था० ।

झवण–ध्यापन–न० । उपशमश्रेण्यां कर्मानुदयलक्षणे विध्यापने, आचा० १ श्रु० ६ अ० १ उ० ।

झवणा–क्षपणा–स्त्री० । क्षपणाऽपचयो निर्जरा पापकर्मणामस्मादिति क्षपणा । विशे० (३६१ गाथा) । " पावाण खवणखि " पापकर्मक्षपणहेतुत्वात्क्षपणा । भावाध्ययने सामायिकाऽऽदिश्रुतविशेषे, अनु० । स्था० । (अस्या निक्षेपस्तु ' खवणा ' शब्दे तृतीयभागे ७२३ पृष्ठे गतः)

झस–झष–पुं० । झष्यते कर्मणि घः । मत्स्ये, जी० ३ प्रति० । वाच० । तं० । जं० । प्रज्ञ० । विशे० । ज्ञा० । मीनराशौ च । भावे घः । तापे, अच् । खिन्ने वने च । न० । नागवल्ल्याम्, स्त्री० । वाच० । " झसविहगसुजायपीणकुच्छी । " जी० ३ प्रति० । जं० । दक्षिणे, अयशसि, तटे, तटस्थे, दीर्घगम्भीरे च । दे० ना० ३ वर्ग ।

झसिअ–न० । देशी–पर्यस्ते, आकृष्टे च । दे० ना० ३ वर्ग ।

झसुर–न० । देशी–ताम्बूले, अर्थे च । दे० ना० ३ वर्ग ।

झाअइ–ध्याति–स्त्री० । "स्वरादनतो वा" । ८ । ४ । २४० । अकारान्तवर्जितात्स्वरान्ताद्धातोरन्तेऽकाराऽऽगमो वा भवति । 'झाइ' । 'झाअइ ।' प्रा० ४ पाद । ध्याने, स्था० ६ ठा० । आव० ।

झाइ–ध्याति–स्त्री० । ' झाअइ ' शब्दार्थे, प्रा० ४ पाद ।

झाइय–ध्यात–त्रि० । अनुप्रेक्षिते, स्था० ३ ठा० ४ उ० ।

झाइयव्व–ध्यातव्य–त्रि० । ध्येये, आव० ४ अ० ।

झाउल्ल–न० । देशी–कार्पासफले, दे० ना० ३ वर्ग ।

झाड–झाट–पुं० । झट्–णिच् अच् । निकुञ्जे कान्तारे, व्रणाऽऽदीनां च मार्जने, वाच० । लतागहने, दे० ना० ३ वर्ग ।

झाडन–झाटन–न० । क्षोभे, स्था० ५ ठा० २ उ० । प्रस्फोटने, स्था० ५ ठा० २ उ० ।

झाण–ध्यान–न० । 'ध्यै' चिन्तायाम् । आ० चू० ४ अ० । ध्यायते चिन्त्यते वस्त्वनेन, ध्यातिर्वा ध्यानम् । प्रव० ६ द्वार । " साध्वसध्यह्यां भः " ॥ ८ । २ । २६ ॥ इति ध्यस्य झः । प्रा० २ पाद । चिन्तायाम्, आ० चू० ४ अ० । परिणामस्थिरतायाम्, अष्ट० ६ अष्ट० । एकाऽऽलम्बनसंस्थस्य सदृशप्रत्ययस्य च प्रत्ययान्तरनिरुपप्रवाहे, षो० १२ विव० । आन्तर्मुहूर्त्तमात्रकालमेकाग्रचिन्तताऽध्यवसाने, प्रव० ६ द्वार । एकावलम्बनेन मनःस्थैर्ये, विशे० । सूत्र० । योगनिरोधे, स० १ सम० । प्रश्न० । पञ्चा० । स्था० । ध० । सूत्र० ।

विषयसूची–

(१) ध्यानस्वरूपम् ।
(२) ध्यानस्य चातुर्विध्यम् ।
(३) ध्यानाध्ययोर्विवेचनम् ।
(४) ध्यानस्यैव भेदनिरूपणम् ।
(५) प्रशस्ताप्रशस्तानि ध्यानानि ।
(६) शुभाशुभध्यानस्य विशेषतो वर्णनम् ।
(७) धर्मध्यानस्य वर्णनम् ।
(८) तत्र प्रसङ्गतो ज्ञानदर्शनचारित्रवैराग्यभावनानां स्वरूपप्रदर्शनम् ।
(९) देशद्वारे परिणतापरिणतयोगानां स्थाननिर्दर्शनम् ।
(१०) कालाऽऽसनाऽऽलम्बनक्रमद्वाराणि ।
(११) ध्यातव्यद्वारे ध्यातव्यभेदप्रतिपादनम् ।
(१२) ध्यातुः स्वरूपस्य निरूपणम् ।
(१३) तत्रानुप्रेक्षालेश्यालिङ्गद्वाराणि ।
(१४) फलद्वारे आलम्बनाऽऽदिविस्तरः ।
(१५) ध्यातव्यद्वारस्य विशेषतो विवरणम् ।
(१६) संसारप्रतिपक्षतया मोक्षहेतुर्ध्यानमिति निरूपणम् ।
(१७) ध्यानाष्टकेन ध्यानस्य फलाऽऽदिनिरूपणम् ।

(१) ध्यानस्वरूपम्—

उपयोगे विजातीय–प्रत्ययाव्यवधानजाक् ।
शुभैकप्रत्ययो ध्यानं, सूक्ष्माऽऽभोगसमन्वितम् ॥ ११ ॥

(उपयोग इति) उपयोगे स्थिरप्रदीपसदृशे भावज्ञाने, विजातीयप्रत्ययेन तद्भिन्नभेदकारिणा विषयान्तरसंचारेणालक्ष्यकालेनापि, अव्यवधानजागनन्तरितः, शुभैकप्रत्ययः प्रशस्तैकार्थबोधो, ध्यानमुच्यते; सूक्ष्माऽऽभोगेनोत्पाताऽऽदिविषयसूक्ष्माऽऽलोचनेन, समन्वितं सहितम् । द्वा० १८ द्वा० ।

ध्यानं च विमले बोधे, सदैव हि महात्मनाम् ।
सदा प्रसूमरोऽनभ्रे, प्रकाशो गगने विधोः ॥ २० ॥

(ध्यानं चेति) विमले बोधे च सति, महात्मनां सदैव हि ध्यानं भवति, तस्य तन्मयत्वात् । दृष्टान्तमाह–अनभ्रेऽभ्ररहिते गगने, विधोरुदितस्य प्रकाशः सदा प्रसूमरो भवति, तथाऽवस्थास्वाभाव्यादिति । द्वा० २४ द्वा० ।

(२) तच्चतुर्विधम—

चत्तारि झाणा पण्णत्ता । तं जहा–अट्टे झाणे, रोद्दे झाणे, धम्मे झाणे, सुक्के झाणे ।

सुगमं चैतद्–नवरं–ध्यातयो ध्यानानि, अन्तर्मुहूर्त्तमात्रं कालं चित्तस्थिरतालक्षणानि । उक्तं च–"अंतो मुहुत्तमित्तं, चित्ता ऽवत्थाणमेगवत्थुम्मि । छउमत्थाणं झाणं, जोगनिरोहो जिणाणं तु" ॥१॥ तत्र ऋतं दुःखं, तस्य निमित्तं, तत्र वा भवम्, ऋते वा पीडिते भवमार्त्तध्यानं, दुष्टोऽध्यवसायो हिंसाऽऽदिक्रौर्यानुगतं रौद्रं, श्रुतचरणधर्मादनपेतं धर्म्यं, शोधयत्यष्टप्रकारं कर्ममलं, शुचं वा क्लमयतीति शुक्लम् । स्था० ४ ठा० १ उ० । विशे० । ध० । ज्ञा० । ग० । औ० । आ० चू० । तत्र ध्यातिर्ध्यानमिति भावसाधनः, तत्पुनः कालतोऽन्तर्मुहूर्त्तमात्रं, भेदतस्तु चतुःप्रकारमार्त्ताऽऽदिभेदेन, ध्येयप्रकारास्त्वमनोज्ञविषयसम्प्रयोगाऽऽदयः । तत्र शोकाऽऽक्रन्दनविलपनाऽऽदिलक्षणमार्त्तं, तेन उत्सन्नबहुधाऽऽदिलक्षणं रौद्रं, तेन जिनप्रणीतभावप्ररूपणाऽऽदिलक्षणं धर्म्यं, तेन असंमोहाऽऽदिलक्षणं शुक्लम् । तेन फलं पुनरेषां तिर्यक्नरकदेवगत्या विमोक्षाऽऽख्यमिति क्रमेण अयं ध्यानसमासार्थः व्यासार्थस्तु–ध्यानशतकादवसेयः । तच्चेदं ध्यानशतकम्–अस्य च महार्थत्वाद्भूतगुणत्वात् शास्त्रान्तरत्वात् प्रारम्भ एव विघ्नविनायकोपशान्तये मङ्गलार्थमिष्टदेवतानमस्कारमाह–

वीरं सुक्कज्झाण–ऽग्गिदड्ढकम्मिंधणं पणमिऊणं ।
जोईसरं सरणं, झाणज्झयणं पवक्खामि ॥ १ ॥

वीरं शुक्लध्यानाग्निदग्धकर्मेन्धनं, प्रणम्य, ध्यानाध्ययनं प्रवक्ष्यामीति योगः । तत्र 'ईर' गतिप्रेरणयोरित्यस्य विपूर्वस्याऽन्तस्य विशेषेण ईरयति कर्म गमयति, याति वेद शिवमिति वीरः; तं वीरं, किंविशिष्टम् ?, इत्यत आह–शुचं क्लामयतीति शु-

क्षं, शोकं क्षपयतीत्यर्थः । 'ध्यै'-ध्यायते चिन्त्यतेऽनेन तत्त्वमिति ध्यानम्, एकाग्रचित्तनिरोध इत्यर्थः। शुक्लं च तद् ध्यानं च, तदेव कर्मेन्धनदहनाद्, अग्निः शुक्लध्यानाग्निः,तथा मिथ्यादर्शनाविरतिप्रमादकषाययोगैः क्रियत इति कर्म-ज्ञानाऽऽवरणीयाऽऽदि, तदेवातितीव्रदुःखानलनिबन्धनत्वादिन्धनं कर्मेन्धनं, ततश्च शुक्लध्यानाग्निना दग्धं स्वस्वभावापनयनेन भस्मीकृतं कर्मेन्धनं येन स तथाविधः,तं प्रणम्य,प्रकर्षेण मनोवाक्काययोगैर्नत्वेत्यर्थः। किम ?, समानकर्तृकयोः पूर्वकाले क्त्वा-प्रत्ययविधानाद् ध्यानाध्ययनं प्रवक्ष्यामीति योगः । तत्राधीयत इत्यध्ययनं, कर्मणि ल्युट्, पठ्यत इत्यर्थः । ध्यानप्रतिपादकमध्ययनं ध्यानाध्ययनम् । तद्याथात्म्यमङ्गीकृत्य प्रकर्षेण वक्ष्येऽभिधास्ये, किंविशिष्टं वीरं प्रणम्य ?, इत्यत आह-योगेश्वरं, योगीश्वरं वा। तत्र युज्यन्त इति योगा मनोवाक्कायव्यापारलक्षणाः, तैरीश्वरः प्रधानः, तम् । तथाहि-अनुत्तरा एव भगवतो मनोवाक्कायव्यापारा इति ।

यथोक्तम्-

" दव्वमणोजोएणं, मणनाणिं अणुत्तरा उ ।
संसयवोच्छित्ति के-वलेण नाऊण सति कुणइ ॥ १ ॥
निमिषपयक्खरसरिसा मिच्छित्तरतिरिच्छसागरपरिणामा ।
मणणेऽवाणी वाणी, जोयणनीहारिणी चेव ॥ २ ॥
एक्का य अणेगेसिं, संसयवोच्छेयणम्मि अपमिहया ।
न य निव्विज्जइ सोआ, तिप्पइ सव्वाइएण पि ॥ ३ ॥
सव्वसुरेहिंतो वि हु, अहिगो कंतो य कायजोगो से ।
तह वि य पसंतरूवे,कुणइ सया पाणिसंघाए" ॥४॥ इत्यादि ।

युज्यते वाऽनेन केवलज्ञानाऽऽदिनाऽऽत्मेति योगो धर्मशुक्लध्यानलक्षणः । स येषां विद्यते इति योगिनः साधवः, तैरीश्वरः, तदुपदेशेन तेषां प्रवृत्तेः, तत्संबन्धादिति । तेषां वा ईश्वरो योगीश्वरः प्रभुः स्वामीत्यनर्थान्तरम् । तं योगीश्वरम् । अथवा योगिभ्यार्थं-योगिनां चिन्त्यं, ध्येयमित्यर्थः । पुनरपि स एव विशेष्यते-शरण्यं-तत्र शरणे साधुः शरण्यः,तं रागाऽऽदिपरिभूताऽऽश्रितसत्त्ववत्सलं,रक्षकमित्यर्थः। ध्यानाध्ययनं प्रवक्ष्यामीत्येतद् व्याख्यातमेव ।

अत्राऽऽह-यः शुक्लध्यानाग्निदग्धकर्मेन्धनः स योगीश्वर एव, यश्च योगीश्वरः स शरण्य एवेति गतार्थं विशेषणे । न । अभिप्रायापरिज्ञानात् । इह शुक्लध्यानाग्निदग्धकर्मेन्धनः सामान्यकेवल्यपि भवति, न त्वसौ योगेश्वरः, वाक्कायातिशयाभावात्;न एव च तत्त्वतः शरण्य इति ज्ञापनार्थमेवाऽऽदृष्टमेतदपि। तथा चोभयपदव्यभिचारे एकपदव्यभिचारे अज्ञातज्ञापनार्थं च शास्त्रे विशेषणाभिधानमनुज्ञातमेव पूर्वमुनिभिरित्यलं विस्तरेणेति गाथार्थः ॥ १ ॥

(२) साम्प्रतं ध्यानाध्यानलक्षणं प्रतिपादयन्नाह-

जं थिरमज्झवसाणं, तं झाणं जं चलं तयं चित्तं ।
तं होज्ज भावणा वा, अणुपेहा वा अहव चिंता ॥ २ ॥

यदित्युद्देशः, स्थिरं निश्चलम्,अध्यवसानं, मन एकाग्रताऽऽलम्बनमित्यर्थः। तदिति निर्देशे, ध्यानं-प्राङ्निरूपितशब्दार्थम्। ततश्चैतदुक्तं भवति-यत्स्थिरमध्यवसानं तद्ध्यानमभिधीयते, यच्चलमिति यत्पुनरनवस्थितं तच्चित्तम् । तच्चौघतस्त्रिधा भवतीति दर्शयति । तद्भवेद्भावना वेति-तच्चित्तं भवेत्। का ?, भावना-भाव्यत इति भावना, ध्यानाभ्यासक्रियेत्यर्थः । वा विभाषायां, अनुप्रेक्षा वेति-अनु पश्चाद्भावे,प्रेक्षणं प्रेक्षा, सा च स्मृतिः, ध्यानाद्भ्रष्टस्य चित्तचेष्टेत्यर्थः । वा पूर्ववत् । अथवा (चिंते त्ति) अथवाशब्दः प्रकारान्तरप्रदर्शनार्थः । चिन्तेति-धा बालुत्प्रकारद्वयरहिता मनश्चेष्टा, सा चिन्तेति गाथार्थः ॥ २ ॥

इत्थं ध्यानाऽध्यानलक्षणमोघतोऽभिधायाधुनाऽध्यानमेव कालस्वामिभ्यां निरूपयन्नाह-

अंतोमुहुत्तमित्तं, चित्तावत्थाणमेगवत्थुम्मि ।
छउमत्थाणं झाणं, जोगनिरोहो जिणाणं तु ॥ ३ ॥

इह मुहूर्त्तः सप्तसप्ततिलवप्रमाणः कालविशेषो भण्यते । (आव०) अन्तर्मध्यकरणे,ततश्च अन्तर्मुहूर्त्तमात्रं, कालमिति गम्यते । मात्रशब्दस्तदधिककालव्यवच्छेदार्थः । ततश्च निश्चमुहूर्त्तमेव कालम्,किम ?, चित्तावस्थानमिति-चित्तस्य मनसः,अवस्थानं चित्तावस्थानम्, अवस्थितिरवस्थानं,निष्प्रकम्पतया वृत्तिरित्यर्थः । क्व ?, एकवस्तुनि-एकमद्वितीयं, वस्त्यस्मिन् गुणपर्याया इति वस्तु-चेतनाऽऽदि;एकं च तद्वस्तु च एकवस्तु,तस्मिन् । छद्मस्थानां ध्यानमिति-तत्र छादयतीति छद्म-पिधानं,तच्च ज्ञानाऽऽदीनां गुणानामाचारकत्वाद् ज्ञानाऽऽवरणाऽऽदिकरणं घातिकर्म, छद्मनि स्थिताः छद्मस्थाः, अकेवलिन इत्यर्थः । तेषां छद्मस्थानां, ध्यानं प्राग्वत् । ततश्चायं समुदायार्थः-अन्तर्मुहूर्त्तकालं यच्चित्तावस्थानम् एकस्मिन् वस्तुनि तत् छद्मस्थानां ध्यानमिति। योगनिरोधो जिनानां त्विति । तत्र योगास्तत्रत औदारिकाऽऽदिशरीरसंयोगसमुत्था आत्मपरिणामविशेषव्यापारा एव । यथोक्तम्-" औदारिकाऽऽदिशरीरयुक्तस्याऽऽत्मनो वीर्यपरिणतिविशेषः काययोगः; तथौदारिकवैक्रियाऽऽहारकशरीरव्यापाराऽऽहृतबाह्यद्रव्यसमूहसाचिव्याज्जीवव्यापारो वाग्योगः; तथौदारिकवैक्रियाऽऽहारकशरीरव्यापाराऽऽहृतमनोऽद्रव्यसमूहसाचिव्याज्जीवव्यापारो मनोयोग इति । अमीषां निरोधो योगनिरोधः, निरोधनं निरोधः, प्रलयकरणमित्यर्थः । केषां ?, जिनानां केवलिनां, तुशब्द एवकारार्थः । स चावधारणे, योगनिरोध एव, न तु चित्तावस्थानं, चित्तस्यैवाभावात् । अथवा योगनिरोधो जिनानामेव ध्यानं, नान्येषाम्,अशक्यत्वादित्यलं विस्तरेण । यथा चायं योगनिरोधो जिनानां ध्यानं यावन्तं च कालं तद्भवत्येतदुपरिष्टाद्वक्ष्याम इति गाथार्थः ॥३॥

साम्प्रतं छद्मस्थानामन्तर्मुहूर्त्तात्परतो यद्भवति,
तदुपदर्शयन्नाह—

अंतोमुहुत्तपरओ, चिंता झाणंतरं व होज्जाहि ।
सुचिरं पि होज्ज बहुवत्थुसंकमे झाणसंताणो ॥ ४ ॥

अन्तर्मुहूर्त्तात्परत इति-भिन्नमुहूर्त्तादूर्द्धं, चिन्ता प्रागुक्तस्वरूपा, तथा ध्यानान्तरं वा भवेत् । तत्रेह न ध्यानादन्यद् ध्यानं ध्यानान्तरं परिगृह्यते, किं तर्हि ?, भावनाऽनुप्रेक्षाऽऽत्मकं चेत इति । इदं च ध्यानान्तरं तदुत्तरकालभाविनि ध्याने सति भवति, तत्राप्ययमेव न्याय इति कृत्वा ध्यानसन्तानप्राप्तिर्भवति, अतस्तमेव कालमानं वस्तुसंक्रमप्रकारेण निरूपयन्नाह—सुचिरमपि प्रभूतमपि, कालमिति गम्यते । भवेत्, बहुवस्तुसंक्रमे सति, ध्यानसन्तानो ध्यानप्रवाह इति । तत्र बहूनि च तानि वस्तूनि बहुवस्तूनि, आत्मगतपरगतानि गृह्यन्ते । तत्राऽऽत्मगतानि मनःप्रभृतीनि, परगतानि द्रव्याऽऽदीनीति,तेषु संक्रमः संचरणमिति गाथार्थः ॥४॥

(४) अथ ध्यानस्यैव भेदानाह-

काया5Sदिविहिक्किं, तिव्वं मउयं च मज्झं च।
जह सीहस्स गतीओ, मंदा य पुता दुया चेव ॥

पुनर्दृढाध्यवसायाऽऽत्मकं चित्तं त्रिधा-कायिकं, वाचिकं, मानसिकं च। कायिकं नाम-यत्कायव्यापारेणोपयुक्तो प्रक्रकचारणिकां करोति, कूर्मवद्वा संकोचानोपाङ्गस्तिष्ठति । वाचिकं तु-मयेदृशी निरवद्या भाषा भाषितव्या, नेदृशी सावद्येति विमर्शपुरस्सरं यद्भाषते। यद्वा-विकथाऽऽदिव्युदासेन श्रुतपरावर्त्तनाऽऽदिकमुपयुक्तः करोति तद्वाचिकम्। मानसं तु-एकस्मिन् वस्तुनि चित्तस्यैकाग्रता। पुनरेकैकं त्रिविधं—तीव्रं, मृदुकं च, मध्यं च। तत्र तीव्रमुत्कटम्, मृदुकं च मन्दम्, मध्यं च-नातितीव्रं नातिमृदुकमित्यर्थः। यथा सिंहस्य गतयस्तिस्रो भवन्ति। तद्यथा-मन्दा च, प्लुता, द्रुता च । तत्र मन्दा—विलम्बिता, प्लुता-नातिमन्दा नाति त्वरिता, द्रुता-अतिशीघ्रवेगा । बृ० १ उ० । दर्श० ।

इत्थं तावत् सप्रसङ्गं ध्यानस्य सामान्येन लक्षणमुक्तम्;अधुना विशेषलक्षणाभिधित्सया ध्यानोद्देशं विशिष्टफलहेतुभावं च सङ्क्षेपतः प्रदर्शयन्नाह-

(५) प्रशस्ताप्रशस्तानि ध्यानानि-

अट्टं १ रुद्दं २ धम्मं ३, सुक्कं ४ झाणाइँ तत्थ अंताइं ।
निव्वाणसाहणाइं, भवकारणमट्टरुद्दाइं ॥ ५ ॥

आर्त्तं,रौद्रं,धर्म्मं, शुक्लम्। तत्र ऋतं दुःखं,तन्निमित्तो दृढोऽध्यवसायः,ऋते भवमार्त्तं,क्लिष्टमित्यर्थः। हिंसाऽऽद्यतिक्रौर्यानुगतं रौद्रम्। चरणश्रुतधर्मानुगतं धर्मम्। शोधयत्यष्टप्रकारं कर्ममलं,शुचं वा क्लामयतीति शुक्लम्। अमूनि ध्यानानि वर्त्तन्ते। अधुना फलहेतुत्वमुपदर्शयति-तत्र ध्यानचतुष्टये, अन्ते चरमे-सूत्रक्रमप्रामाण्याद् धर्मशुक्ले इत्यर्थः। किम्?, निर्वाणसाधने । इह निर्वृतिर्निर्वाणं,सामान्येन सुखमभिधीयते। तस्य साधने,कारणे इत्यर्थः। ततश्च-" अट्टेण तिरिक्खगतिं, रोद्दज्झाणेण गम्मती नरयं। धम्मेण देवलोयं, सिद्धिगतिं सुक्कझाणेणं ॥ १ ॥ " इति यदुक्तं, तदपि न विरुध्यते। देवगतिसिद्धिगत्योः सामान्येन सुखसाधकेरिति। अथापि निर्वाणं मोक्षः,तथाऽपि परम्परयेण धर्मध्यानस्यापि तत्साधनत्वादविरोध इति। तथा भवकारणमार्त्तरौद्रे इति। तत्र भवन्त्यस्मिन् कर्मवशवर्त्तिनः प्राणिन इति भवः-संसार एव, तथाऽप्यत्र व्याख्यानतो विशेषप्रतिपत्तेस्तिर्यक्नारकभवग्रह इति गाथार्थः ॥ ५ ॥ आव० ४ अ० । सम्म० ।

(६) अथ शुभाशुभध्यानज्ञापनार्थमिदमाह-

वण्णरसगंधफासा, इट्ठाणिट्ठा विभासिया सुत्ते ।
अहिकिच्च दव्वलेसा, ताहि उ साहिज्जई भावो ॥

सूत्रे प्रज्ञापनाऽऽदौ, कृष्णाऽऽदीनां लेश्यानां यद्वर्णगन्धरसस्पर्शाः, इष्टा अनिष्टाश्च, विभाषिता विविधमनेकैरुपमानैर्वर्णिताः। (लेश्यावर्णनं 'लेस्सा' शब्दे वक्ष्यते) तदेतत् सर्वमपि द्रव्यलेश्या अधिकृत्य प्रतिपत्तव्यम्। ताभिश्च द्रव्यलेश्याभिः शुभाशुभाध्यवसायरूपः साध्यते भावः । बृ० १ उ० । आव० । दर्श० । (आर्त्तध्यानवक्तव्यता ' अट्टज्झाण ' शब्दे प्रथमभागे २३५ पृष्ठे निरूपिता । रौद्रध्यानवक्तव्यता तु 'रोद्दज्झाण' शब्दे वक्ष्यते) धर्मशुक्लध्यानयोस्तु परमार्थतो ध्यानत्वादिहैव व्याख्या ।

(७) साम्प्रतं धर्म्मध्यानावसरः, तत्र तदभिधित्सयेदाऽऽदावेव द्वारगाथाद्वयमाह-

झाणस्स भावणाओ, देसं कालं तहाऽऽसणविसेसं ।
आलंबणं कमं झा-इअव्वयं जे य झायारो ॥ २८ ॥
तत्तोऽणुप्पेहाओ, लेस्सा लिंगं फलं च नाऊण ।
धम्मं झाइज्ज मुणी, तक्कयजोगो तओ सुक्कं ॥ २९ ॥

ध्यानस्य प्राक्निरूपितशब्दार्थस्य,किम्? भावनाः-ज्ञानाऽऽद्याः, ज्ञात्वेति योगः। किं च-देशं तदुचितं, कालं, तथाऽऽसनविशेषं तदुचितमिति; आलम्बनं वाचनाऽऽदि,क्रमं मनोनिरोधाऽऽदि, तथा ध्यातव्यं ध्येयमाश्रयाऽऽदि,तथा ये च ध्यातारः-अप्रमादाऽऽदियुक्ताः,ततोऽनुप्रेक्षाः-ध्यानोपरमकालभाविन्योऽनित्यत्वाऽऽद्यालोचनारूपाः, तथा लेश्याः-अद्धा एव,तथा लिङ्गं-अज्ञानाऽऽदि, तथा फलं-सुरलोकाऽऽदि । चशब्दः स्वगतानेकभेदप्रदर्शनपरः। एतद् ज्ञात्वा, किम्?, धर्म्ममिति-धर्मध्यानं, ध्यायेन्मुनिरिति। तत्कृतयोगः-धर्मध्यानकृताभ्यासः, ततः पश्चात्, शुक्लध्यानमिति गाथाद्वयसमासार्थः। व्यासार्थं तु प्रतिद्वारं ग्रन्थकारः स्वयमेव वक्ष्यति । २८ । २९ ।

तत्राऽऽद्यद्वारावयवार्थप्रतिपादनायाऽऽह—

पुव्वकयब्भासो भा-वणाहिँ झाणस्स जोग्गयमुवेइ ।
ताओ अ नाणदंसण-चरित्तवेरग्गनिअयाओ ॥३०॥
"वेरग्गजणिआओ" इति पाठान्तरम् ।

पूर्वं ध्यानात्प्रथमं, कृतो निर्वर्त्तितः, अभ्यास आसेवनालक्षणो येन स तथाविधः, काभिः पूर्वकृताभ्यासः?-भावनाभिः करणभूताभिः,भावनासु वा भावनाविषये पश्चाद्, ध्यानस्याधिकृतस्य, योग्यताम्-अनुरूपताम्,उपैति यातीत्यर्थः। ताश्च भावना ज्ञानदर्शनचारित्रवैराग्यनियता वर्त्तन्ते, नियता इति परिच्छिन्नाः। पाठान्तरे वा जनिता इति गाथार्थः ॥ ३० ॥

(८) साम्प्रतं ज्ञानभावनास्वरूपं गुणदर्शनायेदमाह—

नाणे निच्चब्भासो, कुणइ मणोधारणं विसुद्धिं च ।
नाणगुणमुणिअसारो, तो झाइ सुनिच्चलमईओ ॥ ३१ ॥

ज्ञाने श्रुतज्ञाने, नित्यं सदा, अभ्यास आसेवनालक्षणः, करोति निर्वर्त्तयति, किम्?, मनसोऽन्तःकरणस्य, चेतस इत्यर्थः। धारणमशुभव्यापारनिरोधेनावस्थानमिति भावना। तथा विशुद्धिं च, तत्र विशोधनं विशुद्धिः,सूत्रार्थयोरिति गम्यते। ताम्,चशब्दाद् भवनिर्वेदं च। एवं ज्ञानगुणज्ञातसार इति-ज्ञानेन गुणानां जीवाऽजीवाऽऽश्रितानां, 'गुणपर्यायं च द्रव्यम्' इति वचनात्, पर्यायाणां च तदविनाभाविनां (मुणितो) ज्ञातः सारः परमार्थो येन स तथोच्यते, ज्ञानगुणेन वा ज्ञानमात्मन्येनेति भावः। ज्ञातः सारो येन, विश्वस्येति गम्यते। स तथाविधः। ततश्च पश्चाद्, ध्यायति चिन्तयति; किंविशिष्टः सन्?, निश्चला निष्प्रकम्पा, सम्यग्ज्ञानतोऽन्यथाप्रवृत्तिकम्परहितेति भावः। मतिर्बुद्धिर्यस्य स तथाविध इति गाथार्थः ॥ ३१ ॥ उक्ता ज्ञानभावना ।

साम्प्रतं दर्शनभावनास्वरूपं गुणदर्शनार्थमिदमाह-

संकाइदोसरहिओ, पसमत्थिज्जाइगुणगणोवेओ ।
होइ असंमूढमणो, दंसणसुद्धीइ झाणम्मि ॥३२॥

(संकादिदोसरहित त्ति) शङ्कनं शङ्का,आदिशब्दात्काङ्क्षाऽऽदि-

परिग्रहः । उक्तञ्च-"शङ्काकाङ्क्षाविचिकित्साऽन्यदृष्टिप्रशंसापरपाषण्डसंस्तवाः सम्यग्दृष्टेरतीचाराः" इति । (एतेषां च स्वरूपं प्रत्याख्यानाध्ययने व्यक्तेन वक्ष्यामः) तत्र शङ्काऽऽदय एव सम्यक्त्वाऽऽख्यप्रथमगुणातिचारत्वाद्दोषाः शङ्काऽऽदिदोषाः, तैः रहितः त्यक्तः; उक्तदोषरहितत्वादेव । किम् ?-प्रशमस्थैर्याऽऽदिगुणगणोपेतः । तत्र प्रकर्षेण शमः प्रशमः खेदः । स च स्वपरसमयतत्त्वाधिगमरूपः, स्थैर्यं तु जिनशासने निष्कम्पता । आदिशब्दात् प्रभावनाऽऽदिपरिग्रहः । उक्तञ्च-"सपरसमयं कोसल्लं, थिरिया जिणसासणे पभावणया । आययणसेवणत्ती, इंसणदीवा गुणा पंच" ॥१॥ प्रशमस्थैर्याऽऽदय एव गुणाः, तेषां गणः समूहः, तेनोपेतो युक्तो यः स तथाविधः । अथवा-प्रशमाऽऽदिना स्थैर्याऽऽदिना च गुणगणेनोपेतः । तत्र प्रशमाऽऽदिगुणगणः प्रशमसंवेगनिर्वेदानुकम्पाऽऽस्तिक्याभिव्यक्तिलक्षणः; स्थैर्याऽऽदिस्तु दर्शित एव । य इत्थम्भूतः, असौ भवत्यसंमूढमनाः, तत्त्वान्तरेऽभ्रान्तचित्त इत्यर्थः । दर्शनशुद्ध्योल्लक्षणया हेतुभूतया, किं ?, ध्याने इति गाथार्थः ॥ ३२ ॥ उक्ता दर्शनभावना ।

साम्प्रतं चारित्रभावनास्वरूपं गुणदर्शनार्थमाह-

नवकम्माणायाणं, पोराणविणिज्जरं सुभादाणं ।
चारित्तभावणाए, झायपयत्तेण य समेइ ॥ ३३ ॥

नवकर्मणामनादानमिति-नवान्युपचीयमानानि प्रत्यग्राणि नव्यन्ते, क्रियन्ते इति कर्माणि-ज्ञानाऽऽवरणीयाऽऽदीनि, तेषामनादानमग्रहणम्; चारित्रभावनया समेति गच्छतीति योगः । तथा पुराणविनिर्जरां- चिरन्तनक्षपणमित्यर्थः । तथा शुभाऽऽदानमिति-शुभं पुण्यं सम्यक्त्वहास्यरतिपुरुषवेदशुभायुर्नामगोत्रात्मकं, तस्याऽऽदानं ग्रहणम् । किम् ?-चारित्रभावनया हेतुभूतया ध्यानं, चशब्दाच्चनवकर्मानादानाऽऽदि वा; प्रयत्नेनाक्लेशेन, समेति गच्छति, प्राप्नोतीत्यर्थः ।

तत्र चारित्रभावनयेति कोऽर्थः ? , 'चर' गतिभक्षणयोरित्यस्य " अस्तिलूधूसूखनिसहचर इत्रः " ॥३।२।१८४॥ इति (पाणि०) इत्रप्रत्ययान्तस्य चरित्रमिति भवति । चरन्त्यनिन्दितमनेनेति चरित्रं—क्रियोपशमरूपं, तस्य भावश्चारित्रम् । एतदुक्तं भवति-इहान्यजन्मोपात्ताष्टविधकर्मसंचयापचयाय चरणभावः चारित्रमिति, सर्वसावद्ययोगविनिवृत्तिरूपा क्रियेत्यर्थः । तस्य भावना ऽभ्यासश्चारित्रभावनेति गाथार्थः । उक्ता चारित्रभावना ॥ ३३ ॥

साम्प्रतं वैराग्यभावनास्वरूपं गुणदर्शनार्थमाह-

सुविइअजगस्सहाओ, निस्संगो निब्भओ निरासो अ ।
वेरग्गजाविअमणो, झाणम्मि सुनिच्चलो होइ ॥ ३४ ॥

सुष्ठुवीव विदितो ज्ञातः जगतश्चराचरस्य । यथोक्तम्-
" जगन्ति जङ्गमान्याहु-र्जगद् ज्ञेयं चराचरम् ॥ "
स्वो भावः स्वभावः ।
" जन्म मरणाय नियते, बन्धुर्दुःखाय धनमनिर्वृतये ।
तन्नास्ति यन्न विपदे, तथापि लोको निरालोकः " ॥१॥
इत्यादिज्ञकृतो येन स तथाविधः । कदाचिदेवंभूतोऽपि कर्मपरिणतिवशात् ससङ्गो भवत्यत आह—निःसङ्गो विषयस्नेहसङ्गरहितः एवम्भूतोऽपि कदाचित् सभयो भवत्यत आह-निर्भयः-इहलोकाऽऽदिसप्तभयविप्रमुक्तः कदाचिदेवम्भूतोऽपि विशिष्टपरिणत्यभावात् परलोकनधिकृत्य साऽऽशंसो भवत्यत आह-निराशश्च-इहपरलोकाऽऽशंसाविप्रमुक्तः, चशब्दात्तथाविधक्रोधाऽऽदिरहितश्च । य एवंविधो वैराग्यभावितमना भवति स खलूज्ञानाऽऽद्युपरूढरहितत्वाद् ध्याने सुनिश्चलो भवतीति गाथार्थः ॥ ३४ ॥ उक्ता वैराग्यभावना, मूलद्वारगाथाऽन्त्ये ध्यानस्य भावना इति व्याख्यातम् ।

(६) अधुना देशद्वारव्याचिख्यासयाऽऽह-

निच्चं चिअ जुवइपसू-नपुंसगकुसीलपरिवज्जिअं जइणो ।
ठाणं विजणं भणिअं, विसेसओ झाणकालम्मि ॥ ३५ ॥

नित्यमेव सर्वकालमेव, न केवलं ध्यानकाल इति । किम् ?, युवतिपशुनपुंसककुशीलपरिवर्जितं, यतेः स्थानं विजनं भणितमिति । तत्र युवतिशब्देन मनुष्यस्त्री, दैवी च परिगृह्यते । पशुशब्देन तु तिर्यक्स्त्रीति । नपुंसकं प्रतीतं, कुत्सितं निन्दितं शीलं वृत्तं येषां ते कुशीलाः, ते च तथाविधा द्यूतकाराऽऽदयः ।

उक्तञ्च-

"जूयरसोलमेसा, वहा बम्भागाइणो जे य ।
एते इंति कुसीला, वज्जेयव्वा पयत्तेणं" ॥ १ ॥

युवतिश्च पशुश्चेत्यादिद्वन्द्वः । युवत्यादिभिः, परि समन्तात्, वर्जितं रहितमिति विग्रहः । यतेस्तपस्विनः साधोः, एकग्रहणे तज्जातीयग्रहणमिति साध्वाश्च । किं ?, स्थानमवकाशवत्तनम् । तदेव विशेष्यते-युवत्यादिव्यतिरिक्तशेषजनापेक्षया विगतं जनं विजनं, भणितमुक्तं, तीर्थकरैर्गणधरैश्चैवमेवंभूतं नित्यमेव, अन्यत्र प्रवचनोक्तदोषसंभवाद्, विशेषतो ध्यानकाल इति । अपरिणतयोगाऽऽदिनाऽन्यत्र ध्यानस्याऽऽराधयितुमशक्यत्वादिति गाथार्थः ॥ ३५ ॥

इत्थं तावदपरिणतयोगाऽऽदीनां स्थानमुक्तम्, अधुना परिणतयोगाऽऽदीनाधिकृत्य विशेषमाह-

थिरकयजोगाणं पुण, मुणीण झाणे सुनिच्चलमणाणं ।
गामम्मि जणाइण्णे, सुन्नेऽरण्णे व न विसेसो ॥३६॥

तत्र स्थिराः संहननधृतिभ्यां बलवन्त उच्यन्ते, कृता निर्वर्तिताः, अन्यस्ता इति भावः । के ?-युज्यन्त इति योगाः-ज्ञानाऽऽदिभावनाऽऽदिव्यापाराः, सत्सूत्रनयप्रभृतयो वा यैस्ते कृतयोगाः, स्थिराश्च ते कृतयोगाश्चेति विग्रहः । तेषाम् । अत्र च स्थिरकृतयोगयोश्चतुर्भङ्गी भवति । तद्यथा-'थिरे खामेगे णो कयजोगे" इत्यादि । स्थिरा वा पौनःपुन्यकरणेन परिचिताः कृता योगा यैस्ते तथाविधाः, तेषाम् । पुनःशब्दो विशेषणार्थः । किं विशिनष्टि ?-तृतीयभङ्गवर्तां, न शेषाणां, स्वभ्यस्तयोगानां वा । मुनीनामिति-मन्यन्ते जीवाऽऽदीन् पदार्थानिति मुनयो विपश्चितः साधवः, तेषाम्, तथा ध्याने अधिकृते एव धर्मध्याने, सुष्ठुतिशयेन निश्चलं निष्प्रकम्पं मनो येषां ते तथाविधाः, तेषाम् । एवंविधानां स्थानं प्रतिग्रामे जनाऽऽकीर्णे, शून्येऽरण्ये वा, न विशेष इति । तत्र ग्रसति बुद्ध्यादीन् गुणान् इति ग्रामः, गम्यो वा कराऽऽदीनामिति ग्रामः, सन्निवेशविशेषः । इह चैकग्रहणेन तज्जातीयग्रहणान्नगरखेट-कर्वटाऽऽदिपरिग्रह इति । जनाऽऽकीर्णे जनाऽऽकुले ग्रामे एवोद्यानाऽऽदौ, तथा शून्ये तस्मिन्नेव, अरण्ये वा कान्तारे वेति, वा विकल्पेन विशेषान्न भेदः, सर्वत्र तुल्यभावत्वात् परिणतत्वात्तेषामिति गाथार्थः ॥ ३६ ॥

तो जत्थ समाहाणं, होइ मणोवयणकायजोगाणं ।
भूओवरोहरहिओ, सो देसो झायमाणस्स ॥ ३७ ॥

यत एतदुक्तमतस्तस्मात् कारणाद्, यत्र ग्रामाऽऽदौ स्थाने, स-

माधानं स्वास्थ्यं, भवति आयते । केषाम् ?, इत्यत आह-मनोवाक्काययोगानां प्राक्निरूपितस्वरूपाणामिति । आह-मनोयोगसमाधानमस्तु, वाक्काययोगसमाधानं त्वत्र क्रोपयुज्यते, न हि तन्मयं ध्यानं भवति ?। अत्रोच्यते तत्समाधानम्-तावन्मनोयोगोपकारकं ध्यानमपि च तदात्मकं भवत्येव ।

यथोक्तम्-

"एवंविधा गिरा मे, वत्तव्वा परिसी न वत्तव्वा ।
इय वेयालिय वक्क-स्स भासओ वाइयं झाणं ॥ १ ॥"

तथा—

" सुसमाहियकरपाय-स्स अ कज्जे कारणम्मि अयणाए ।
किरियाकरणं जं तं, काइयझाणं भवे अइणो ॥१॥"

न चात्र समाधानमात्रकारित्वमेव गृह्यते, किं तु जूतोपरोधरहितः, तत्र भूतानि पृथिव्यादीनि, उपरोधस्तत्संघट्टनाऽऽदिलक्षणः, तेन रहितः परित्यक्तो यः । एकग्रहणे तज्जातीयग्रहणात् अनृतादत्ताऽऽदानमैथुनपरिग्रहाऽऽद्युपरोधरहितश्च, स देशो, ध्यायतः-चिन्तयतः, उचित इति शेषः । अयं गाथार्थः ॥३७॥ गतं देशद्वारम् ।

(१०) अधुना कालाऽऽसनाऽऽलम्बनक्रमद्वारेषु क्रमप्राप्तं कालद्वारमभिधित्सुराह-

कालो वि सो चिय जहिं, जोगसमाहाणमुत्तमं लहइ ।
न उ दिवसनिसावेला-इनियमणं झाइणो भणियं ।३८।

कलनं कालः, कलासमूहो वा, स चार्कृतीयेषु द्वीपसमुद्रेषु चन्द्रसूर्यगतिक्रियोपलक्षितो दिवसाऽऽदिरवसेयः । अपिशब्दो देशानियमेन तुल्यत्वसंज्ञावनार्थः। तथा चाह-कालोऽपि स एव, ध्यानोचित इति गम्यते । यत्र काले, योगसमाधानं मनोयोगाऽऽदिस्वास्थ्यम्, उत्तमं प्रधानं, लभते प्राप्नोति, न तु पुनर्नैव, तुशब्दस्य पुनःशब्दार्थत्वादेवकारार्थत्वाद्वा । किम् ?, दिवसनिशावेलाऽऽदिनियमनं ध्यायिनो ज्ञातिमिति । दिवसनिशो प्रतीते। वेला सामान्यत एव तदेकदेशो मुहूर्ताऽऽदिः । आदिशब्दात्पूर्वाह्णापराह्णाऽऽदिसूचा । एतन्नियमनं दिवैवेत्यादिलक्षणं, ध्यानिनः सत्त्वस्य, भणितमुक्तं, तीर्थकरगणधरैर्नैवेति गाथार्थः । गतं कालद्वारम् ॥३७॥

आसनविशेषद्वारं व्याचिख्यासयाऽऽह-

जच्चिय देहावत्था, जिआ ण झाणोवरोहिणी होइ ।
झाइज्जा तयवत्थो, ठिओ निसण्णोऽनिसण्णो वा ॥३९॥

इह यैव काचित्,देहावस्था शरीरावस्था निषण्णताऽऽदिरूपा, किम?,जितेत्यभ्यस्ता,उचिता वा,तथाऽनुष्ठीयमाना,न,ध्यानोपरोधिनी भवति-नाधिकृतधर्मध्यानपीडाकरी भवतीत्यर्थः। ध्यायेत, तदवस्थ इति-सैवावस्था यस्य स तदवस्थः, तमेव विशेषतः प्राऽऽह-स्थितः कायोत्सर्गेण,इषन्नताऽऽदिना निषण्ण उपविष्टो, वीरासनाऽऽदिनाऽनिषण्णः शायितो दण्डाऽऽयताऽऽदिना,वा विभाषायामिति गाथार्थः ॥३९॥

आह-किं पुनरयं देशकालाऽऽसनानामनियम इति ?,अत्रोच्यते-

सव्वासु वट्टमाणा, मुणओ जं देसकालचिट्ठासु ।
वरकेवलाइभावं, पत्ता बहुसो समियपावा ॥ ४० ॥

सर्वास्वित्यशेषासु,देशकालचेष्टास्विति योगः। चेष्टा देहावस्था, किम् ?, वर्त्तमाना अवस्थिताः, के ?,मुनयः प्राक्निरूपितशब्दार्थाः, यद्यस्मात्कारणात्; किम् ?,वरः प्रधानश्चासौ केवलाऽऽदिभावश्च,तं,प्राप्ता इति । आदिशब्दान्मनःपर्यायज्ञानाऽऽदिपरिग्रहः किं सकृदेव प्राप्ताः ?, न । केवलवर्जं बहुशोऽनेकशः, किंविशिष्टाः ?, शान्तपापाः, तत्र पातयति नरकाऽऽदिष्विति पापम्, शान्तमुपशमं नीतं पापं यैस्ते तथाविधा इति गाथार्थः ॥४०॥

तो देसकालचिट्ठा-नियमो झाणस्स नत्थि समयम्मि ।
जोगाण समाहाणं, जह होइ तह पयइयव्वं ॥ ४१ ॥

यस्मादिति पूर्वगाथायामुक्तं,तेन सहास्याभिसंबन्धः,तस्माद्,देशकालचेष्टानियमो,ध्यानस्य,नास्ति न विद्यते । क्व?,समये आगमे,किं तु योगानां मनःप्रभृतीनां, समाधानं पूर्वोक्तं, यथा भवति तथा यतितव्यं यत्नः कार्यं इत्यत्र नियम एवेति गाथार्थः ॥४१॥ गतमाश्रवद्वारम् ।

अधुना आलम्बनद्वारावयवार्थप्रतिपादनायाऽऽह-

आलंबणाऽऽइवायण-पुच्छणपरिअट्टणाणुचिंताओ ।
सामाइआइ एया-इ सद्धमाऽऽवस्सयाइं च ॥ ४२ ॥

इह धर्मध्यानाऽऽरोहणार्थमालम्ब्यन्त इत्यालम्बनानि, वाचना पृच्छना परावर्त्तनाऽनुचिन्ता इति । तत्र वाचनं वाचना,विनेयाय निर्जरार्थाय सूत्राऽऽदिदानमित्यर्थः। शङ्किते सूत्राऽऽदौ संशयापनोदाय गुरुपृच्छनं प्रच्छा इति । परिवर्त्तनं तु पूर्वाधीतस्यैव सूत्राऽऽदेरविस्मरणनिर्जरानिमित्तमभ्यासकरणमिति । अनुचिन्तनमनुचिन्ता, मनसैवाविस्मरणनिमित्तं सूत्रानुस्मरणमित्यर्थः। वाचना च, प्रच्छेत्यादि द्वन्द्वः । एतानि च श्रुतधर्मानुगतानि वर्त्तन्ते । तथा सामायिकाऽऽदीनि सद्धर्मावश्यकानि चेति । अमूनि तु चरणधर्मानुगतानि वर्त्तन्ते । सामायिकमादौ येषां तानि सामायिकाऽऽदीनि । सामायिकं प्रतीतम्, आदिशब्दान्मुखवस्त्रिकाप्रत्युपेक्षणाऽऽदिलक्षणसकलचक्रवालसामाचारीपरिग्रहः । यावत्पुनरपि सामायिकमिति । एतान्येव विधिवदासेव्यमानानि,सन्ति शोभनानि, सन्ति च तानि चारित्रधर्मावश्यकानि चेति विग्रहः। आवश्यकानि नियमतः करणीयानि । चः समुच्चये । इति गाथार्थः ॥४२॥

साम्प्रतममीषामेवाऽऽलम्बनत्वे निबन्धनमाह-

विसमम्मि समारोहइ, दढदव्वाऽऽलंबणो जहा पुरिसो ।
सुत्ताऽऽइकयाऽऽलंबो, तह झाणवरं समारुहइ ॥ ४३ ॥

विषमे निम्ने दुःसंचारे, समारोहति सम्यगपरिक्लेशेनोर्ध्वं याति । कः?, दृढं बलवत्,रज्ज्वाद्यालम्बनं यस्य स तथाविधः । यथा पुरुषः पुमान्कश्चित्सूत्राऽऽदिकृताऽऽलम्बनः,वाचनाऽऽदिकृताऽऽलम्बन इत्यर्थः । तथा तेनैव प्रकारेण,ध्यानवरं धर्मध्यानमित्यर्थः। समारोहतीति गाथार्थः। गतमालम्बनद्वारम् ।

अधुना क्रमद्वारावसरः । तत्र लाघवार्थं क्रमं धर्मस्य शुक्लस्य च प्रतिपादयन्नाह-

झाणपडिवत्तिकम्मो, होइ मणोजोगनिग्गहाईओ ।
भवकालो केवलिणो, सेसस्स जहा समाहीए ॥ ४४ ॥

ध्यानं प्राक्निरूपितशब्दार्थं,तस्य प्रतिपत्तिक्रम इति समासः। प्रतिपत्तिक्रमः प्रतिपत्तिपरिपाट्यभिधीयते । स च भवति मनोयोगनिग्रहाऽऽदिः। तत्र प्रथमं मनोयोगनिग्रहः,ततो वाग्योगनिग्रहः,ततः काययोगनिग्रह इति । किमयं सामान्येन सर्वस्यैवेत्थंभूतः क्रमः?, न, किं तु भवकाले केवलिनः । अत्र भवकालशब्देन मोक्षगमनप्रत्यासन्नः अन्तर्मुहूर्त्तप्रमाण एव शैलेश्यवस्थान्तर्गतः परिगृह्यते । केवलमस्यास्तीति केवली, तस्य शुक्लध्यान एवायं क्रमः प्रतिपत्तिक्रमः। शेषस्यान्यस्य धर्मध्यानप्रतिपत्तुः, योगक्रम-

लावाश्रित्य, किम् ?, यथा समाधिनेति-यथैव स्वास्थ्ये भवति, तथैव प्रतिपत्तिरिति गाथार्थः ॥४४॥ गतं क्रमद्वारम् ।

(११) इदानीं ध्यातव्यमुच्यते-

आणा विजएँ अवाए,विवागे॑ संठाणओ अ नायव्वा ।
एए चत्तारि पया, झायव्वा धम्मझाणस्स ॥ ४५ ॥

तच्चतुर्भेदमाह-आज्ञाऽपायविपाकसंस्थानविचयाय धर्म्यमित्यादि । (तत्राद्यभेदम् 'आणा' शब्दे द्वितीयभागे ११५ पृष्ठे गतम्)

अधुना द्वितीय उच्यते-

रागद्दोसकसाया-ऽऽसवाइकिरियासु वट्टमाणाणं ।
इहपरलोगावाए, झाइज्जा वज्जपरिवज्जी ॥ ४१ ॥

रागद्वेषकषायाऽऽश्रवाऽऽदिक्रियासु वर्त्तमानानां इहपरलोकापायान् ध्यायेत् । यथा-रागाऽऽदिक्रियैहिकाऽऽमुष्मिकविरोधिनी ।

उक्तं च-

" रागः सम्पद्यमानोऽपि, दुःखदो दुष्टगोचरः ।
महाव्याध्यभिभूतस्य, अपथ्यान्नाभिलाषवत् " ॥ १ ॥

तथा-

" द्वेषः सम्पद्यमानोऽपि, तापयत्येव देहिनम् ।
कोटरस्थो ज्वलत्काष्ठ, दावानल इव द्रुमम् " ॥ २ ॥

तथा-

" इत्यादिभेदभिन्नस्य, रागस्याऽऽमुष्मिकं फलम् ।
दीर्घः संसार एवोक्तः, सर्वज्ञैः सर्वदर्शिभिः " ॥३॥ इत्यादि ।

तथा-

"दोसानलसंतत्तो, इह लोगे चेव दुक्खिओ जीवो ।
परलोगम्मि य पावो, पावइ निरयानलं तत्तो" ॥४॥ इत्यादि ।

तथा-

कषायाः क्रोधाऽऽदयः, तदपायाः पुनः-

"कोहो पीइं पणासेइ, माणो विणयनासणो ।
माया मित्ताणि नासेइ, लोभो सव्वविणासणो" ॥ ५ ॥

"कोहो य माणो य अणिग्गहीया य,
माया य लोभो य पवड्ढमाणा ।
चत्तारि एए कसिणा कसाया,
सिंचंति मूलाइँ पुणब्भवस्स" ॥६॥

तथा आश्रवाः कर्मबन्धहेतवो मिथ्यात्वाऽऽदयः, तदपायाः पुनः-

"मिच्छत्तमोहियमई, जीवो इहलोग एव दुक्खाइं ।
निरओवमाइ पावो, पावति पसमाऽऽइगुणहीणो" ॥७॥

तथा-

"अज्ञानं खलु कष्टं, क्रोधाऽऽदिभ्योऽपि सर्वदोषेभ्यः ।
अर्थं हितमहितं वा, न वेत्ति येनाऽऽवृतो लोकः" ॥८॥

तथा-

" जीवा पावंति इहं, पाणवधादाविरतीए पावाए ।
नियसुयघायणमादी, दोसे जणगरहिए पावे ॥ ९ ॥
परलोगम्मि वि एवं, आसवकिरियाहि अज्जिए कम्मे ।
जीवाण चिरमवाया, णिरयादिगतिं भमंताणं" ॥१०॥ इत्यादि ।

आदिशब्दः स्वगतानेकभेदख्यापकः; प्रकृतिस्थित्यनुभावप्रदेशबन्धभेदग्राहक इत्यन्ये । क्रियास्तु कायिक्याऽऽदिभेदाः पञ्च । एताः पुनरुत्तरत्र व्यक्तेन वक्ष्यामः ।

विपाकः पुनः-

" किरियासु वट्टमाणा, काहमाईसु दुक्खिया जीवा ।
इह चेव य परलोगे, संसारपवड्ढगा भणिया ॥१॥"

ततश्चैवं रागाऽऽदिक्रियासु वर्त्तमानानामपायान् ध्यायेत् । किंविशिष्टः सन्निति ?, आह-वर्ज्यपरिवर्जी-तत्र वर्जनीयं वर्ज्यमकुशलं परिगृह्यते, तत्परिवर्जी, अप्रमत्त इति गाथार्थः ॥ ४१ ॥ उक्तः खलु द्वितीयो ध्यातव्यभेदः ।

अधुना तृतीय उच्यते-

पयइट्ठिइप्पएसा-णुभावभिन्नं सुहासुहविभत्तं ।
जोगाणुभावजणियं, कम्मविवागं विचिंतेज्जा ॥ ४२ ॥

तत्र प्रकृतिस्थितिप्रदेशानुभावभिन्नं शुभाशुभविभक्तमित्यत्र प्रकृतिशब्देनाष्टौ कर्मप्रकृतयोऽभिधीयन्ते, ज्ञानाऽऽवरणीयाऽऽदिभेदा इति । प्रकृतिरंशो नेद इति पर्यायाः। स्थितिः-तासामेवावस्थानं जघन्याऽऽदिभेदभिन्नम् । प्रदेशशब्देन जीवप्रदेशकर्मपुद्गलसंबन्धोऽभिधीयते, अनुभावशब्देन तु विपाकः । एते च प्रकृत्यादयः शुभाशुभभेदभिन्ना भवन्ति । ततश्चैतदुक्तं भवति-प्रकृत्यादिभेदभिन्नं शुभाशुभविभक्तं योगानुभावजनितं मनोयोगाऽऽदिगुणप्रभवं, कर्मविपाकं विचिन्तयेदिति गाथाक्षरार्थः ॥

भावार्थः पुनर्वृद्धविवरणादवसेयः। तच्चेदम्-" इह पयतिभिन्नं शुभाशुभविभक्तं कम्मविपागं विचिंतेज्जा । तत्थ पयतीओ त्ति कम्मणो भेदा,अंसा नाणावरणिज्जाइणो अट्ठा,तेहिं भिन्नं पि इतं च, सुभं पुन्नं-साताऽऽदियं, असुभं पावं,तेहिं विभिन्नं विभिन्नविपागं, जहा कम्मपगतीए तहा विसेसेण चिंतेज्जा विचिंतेज्जा । किञ्च ठितिभिन्नं च सुभासुभविभिन्नं कम्मविपाकं विचिंतेज्जा । ठिती त्ति तासिं चेव अट्ठण्हं पगतीणं जहन्नमज्झिमुक्कोसकालावत्था, जहा कम्मपगतीए । किं च पएसभिन्नं शुभाशुभं० जाव कृत्वा पूर्वविधानं पदयोस्तावेव पूर्ववद्वर्गौ वर्गघनौ कुर्यात् । तां तृतीयराशेः, ततः प्राग्वत् कृत्वा पूर्वविधानमिति २५६। अमीषां घने कृते राशिरयमागच्छति । अथवा चतुर्भिरष्टौ वारा गुणिते अस्य राशेः पूर्वपदस्य घनाऽऽदि कृत्वा, तस्य वर्गाऽऽदि । ततः द्वितीयपदस्य इदमेव विपरीतं क्रियते । तत एतावेव वर्ग्येते । ततस्तृतीयपदस्य वर्गघनौ क्रियेते । एवमनेन क्रमेणायं राशिः १६७७७२१६ चिंतेज्जा । पदेसो त्ति जीवपदेसाणं कम्मपदेसेहिं सुहुमेहिं एक्कक्खेत्तावगाढेहिं पुट्ठोगाढअणंतअणुबादरउट्ठेहि भेदेहिं बद्धाणं वित्थरओ य कम्मपगडीए भणियाणं कम्मविपाकं चिंतेज्जा । किं च-अणुभावभिन्नं सुभासुभविभत्तं कम्मविवागं विचिंतेज्जा । तत्थ अणुभावो त्ति, तासिं चेवऽट्ठण्हं पगतीणं पुढबद्धनिकाइयाणं उदयाओ अणुभावणं, तं च कम्मविपाकं जोगाणुभावजणियं विचिंतेज्जा । तत्थ जोगा मणवयकाया, अणुभावो जीवगुण एव । स च मिथ्यादर्शनाविरतिप्रमादकषायाः, तेहिं अणुभावेण य जणियमुप्पाइयं जीवस्स कम्मं जं, तस्स विपाकं उदयं विचिंतेज्जा " इति । उक्तस्तृतीयो ध्यातव्यभेदः ।

साम्प्रतं चतुर्थ उच्यते-

जिणदेसिआइँ लक्खण-संठाणासणविहाणमाणाइं ।
उप्पायट्ठिइभंगा, पज्जाया जे अ दव्वाणं ॥ ४३ ॥

जिनाः प्राङ्निरूपितशब्दार्थास्तीर्थकराः,तैर्देशितानि कथितानि जिनदेशितानि । कानि ?, अत आह-लक्षणसंस्थानाऽऽसनवि-

धानमानानि। किम्?,-'विचिन्तयेत्' इति पर्यन्ते वक्ष्यति षष्ठ्यां(?) (५८) गाथायामिति। तत्र लक्षणाऽऽदीनि विचिन्तयेदत्रापि गाथान्ते द्रव्याणामित्युक्तं,तत्प्रतिपदमायोजनीयमिति। तत्र लक्षणं धर्मास्तिकायाऽऽदिद्रव्याणां गत्यादि;तथा संस्थानं मुख्यवृत्त्या पुद्गलरचनाऽऽकारलक्षणं परिमण्डलाऽऽद्यजीवानाम्। यथोक्तम-" परिमंडले पवन्ने, तंसे चउरंस आयते चेव। " जीवशरीराणां च समचतुरस्राऽऽदि। यथोक्तम-"समचउरंसे णिग्गोहमंडले साति खामणे खुज्जे। हुंडे वि य संठाणे, जीवाणं छ मुणेयव्वा ॥१॥" धर्माधर्मयोरपि लोकैकदेशापेक्षया भावनीयमिति। उक्तं च-" हेट्ठा मज्झे उवरिं, उव्वीऊल्लरिमुइंगसंठाणो। लोगो अद्धागारो, सव्वओ खित्तागिई णेओ ॥१॥" तथाऽऽसनाद्याधारलक्षणानि धर्मास्तिकायाऽऽदीनां लोकाऽऽकाशाऽऽदीनि,स्वस्वरूपाणि वा। तथा विधानानि धर्मास्तिकायाऽऽदीनामेव भेदानीत्यर्थः। यथा-" धम्मत्थिकाए धम्मत्थिकायस्स देसे धम्मत्थिकायस्स पदेसे " इत्यादि। तथा मानानि-प्रमाणानि धर्मास्तिकायाऽऽदीनामेवाऽऽत्मीयानि। तथा उत्पादस्थितिभङ्गाऽऽदिपर्यायाः ये च द्रव्याणां धर्मास्तिकायाऽऽदीनां, तान्विचिन्तयेदिति। तत्रोत्पादाऽऽदिपर्यायसिद्धिः "उत्पादव्ययध्रौव्ययुक्तं सत्" इति वचनात्।

युक्तिः पुनरत्र-

" घटमौलिसुवर्णार्थी, नाशोत्पादस्थितिष्वयम।
शोकप्रमोदमाध्यस्थ्यं, जनो याति सहेतुकम ॥ १ ॥
पयोव्रतो न दध्यत्ति, न पयोऽत्ति दधिव्रतः ॥
अगोरसव्रतो नोभे, तस्मात्तत्त्वं त्रयाऽऽत्मकम ॥ २ ॥"

ततश्च धर्मास्तिकायो विवक्षितसमयसंबन्धरूपापेक्षयोत्पद्यते, तदनन्तरातीतसमयसंबन्धरूपापेक्षया तु विनश्यति, धर्मास्तिकायद्रव्याऽऽत्मना तु नित्य इति। उक्तं च-" सर्वद्रव्यं किंचु नियतं, क्षणे क्षणेऽन्यत्वमथ च न विशेषः। सत्योचित्यपचित्यो-राकृतिजातिव्यवस्थानात्॥१॥" आदिशब्दादगुरुलघ्वादिपर्यायपरिग्रहः। चशब्दः समुच्चयार्थ इति गाथाऽर्थः ॥५३॥

किञ्च—

पंचत्थिकायमइअं, लोगमणाइनिहणं जिणक्खायं।
नाणाइजेअविहिअं, तिविहमहोलोगनेआई ॥ ५४ ॥

पञ्चास्तिकायमयं लोकमनाद्यनिधनं जिनाऽऽख्यातमिति,क्रिया पूर्ववत्। तत्रास्तयः प्रदेशाः,तेषां काया अस्तिकायाः,पञ्च च ते अस्तिकायाश्चेति विग्रहः। एते च धर्मास्तिकायाऽऽदयो गत्याद्युपग्रहकरा ज्ञेया इति।

उक्तं च—

" जीवानां पुद्गलानां च, गत्युपग्रहकारणम।
धर्मास्तिकायो ज्ञानस्य, दीपश्चक्षुष्मतो यथा ॥ १ ॥
जीवानां पुद्गलानां च, स्थित्युपग्रहकारणम।
अधर्मः पुरुषस्येव, तिष्ठासोरवनिः समा ॥ २ ॥
जीवानां पुद्गलानां च, धर्माधर्मास्तिकाययोः।
बादराणां घटो यद्व-दाकाशमवकाशदम ॥ ३ ॥
ज्ञानाऽऽत्मा सर्वभावज्ञो, भोक्ता कर्ता च कर्मणाम।
नानासंसारिमुक्ताऽऽख्यो, जीवः प्रोक्तो जिनाऽऽगमे ॥४॥
स्पर्शरसगन्धवर्ण-शब्दमूर्त्तिस्वभावकाः।
सङ्ख्यातभेदनिष्पन्नाः, पुद्गला जिनदेशिताः " ॥ ५ ॥

तन्मयं तदात्मकम; लोक्यत इति लोकस्तम, कुतः किंभूतमिति?, अत आह-अनाद्यनिधनम-अनाद्यपर्यवसितमित्यर्थः। अनेनेश्वराऽऽदिकृतव्यवच्छेदमाह। असावपि दर्शनभेदाश्रित एवेत्यत आह-जिनाऽऽख्यातं तीर्थकरप्रणीतम। आह-जिनदेशितानीत्यस्माज्जिनप्रणीतधर्माधिकारोऽनुवर्त्तत एव, ततश्च जिनाऽऽख्यातमित्यतिरिच्यते। न। अस्याऽऽदरख्यापनार्थत्वात्, आदरख्यापनाऽऽदौ च पुनरुक्तदोषानुपपत्तेः।

तथोक्तम-

" अनुवादाऽऽदरवीप्सा-भृशार्थविनियोगहेत्वसूयासु।
ईषत्संभ्रमविस्मय-गणनस्मरणे न पुनरुक्तम" ॥१॥

तथा-नामाऽऽदिभेदविहितं भेदतो नामाऽऽदिभेदावस्थापितमित्यर्थः।

उक्तञ्च-

" नामं ठवणा दविए, खेत्ते काले तवे च भावे य।
पज्जवलोगे य तहा, अट्ठविहो लोगनिक्खेवो ॥ १ ॥"

भावार्थश्चतुर्विंशतिस्तवविवरणादवसेयः।

साम्प्रतं क्षेत्रलोकमधिकृत्याऽऽह-त्रिविधं त्रिप्रकारम, अधोलोकभेदाऽऽदीनि प्राकृतशैल्याऽधोलोकाऽऽदिनेदम, आदिशब्दाच्चैर्यगूर्ध्वलोकपरिग्रहः। इति गाथाऽर्थः॥ ५४ ॥

किं च-तस्मिन्नेव क्षेत्रलोके इदं चेदं च विचिन्तयेदिति

प्रतिपादयन्नाह-

खिइवलयदीवसागर-निरयविमाणभवणाइसंठाणं।
वोमाइपइट्ठाणं, निचं लोगट्ठिइविहाणं ॥ ५५ ॥

क्षितिवलयद्वीपसागरनिरयविमानभवनाऽऽदिसंस्थानं,तच्च क्षितयः खलु घर्माऽऽद्या ईषत्प्राग्भारावसाना अष्टौ भूमयः परिगृह्यन्ते। वलयानि घनोदधिघनवाततनुवाताऽऽत्मकानि घर्माऽऽदिसप्तपृथिवीपरिक्षेपीण्यपेक्षविंशतिः। द्वीपा जम्बूद्वीपाऽऽदयः स्वयम्भूरमणद्वीपान्ता असङ्ख्येयाः। सागरा लवणसागराऽऽदयः स्वयम्भूरमणसमुद्रपर्यन्ता असङ्ख्येया एव। निरयाः सीमन्ताकाऽऽद्या अप्रतिष्ठानावसानाः संख्येयाः।

यत उक्तम—

" तीसा य पन्नवीसा, पनरस य दसेव सयसहस्साइं।
तिन्नेगं पंचूणं, पंच य नरगा जहा कमसो " ॥ १ ॥

विमानानि ज्योतिष्काऽऽदिसंबन्धीन्यनुत्तरविमानान्तान्यसङ्ख्येयानि, ज्योतिष्कविमानानामसङ्ख्येयत्वात्।

भवनानि भवनवास्यालयलक्षणानि असुराऽऽदिदशनिकायसंबन्धीनि सङ्ख्येयानि।

उक्तं च-

" सत्तेव य कोडीओ, हवंति बावत्तरिं सयसहस्सा।
एसो भवणसमासो, भवणवतीणं वियाणेज्जा ॥ १ ॥"

आदिशब्दादसङ्ख्येयव्यन्तरनगरपरिग्रहः।

उक्तं च-

" हेट्ठोवरि जोयणसय-रहिय दयणाए जोयणसहस्से।
पढमे अंतरियाणं, तीसा णगरा असंखेज्जा ॥ १ ॥"

ततश्च क्षितयश्च वलयानि चेत्यादिद्वन्द्वः। एतेषां संस्थानमाकारविशेषलक्षणं, विचिन्तयेदिति। तथा व्योमाऽऽदिप्रतिष्ठानमित्यत्र प्रतिष्ठितिः प्रतिष्ठानं,भावे ल्युट्। व्योम आकाशम्; आदिशब्दाद्वातोदध्यादिपरिग्रहः। व्योमाऽऽदौ प्रतिष्ठानमस्येति व्योमाऽऽदिप्रतिष्ठानं, लोकस्थितिविधानमिति योगः। विधिर्विधानं, प्रकार इत्यर्थः। लोकस्य स्थितिः लोकस्थितिः, स्थितिर्व्यवस्था मर्यादेत्यनर्थान्तरम्। तद्विधानम। किंभूतम?, नित्यं शाश्वतम। किमा पूर्वं वदति गाथाऽर्थः ॥ ५५ ॥

किं च-

जवओगलक्खणमणा-इनिहणमत्थंतरं सरीराओ ।
जीवमरूवं कारिं, जोइं च सयस्स कम्मस्स ॥ ५६ ॥

उपयुज्यतेऽनेनेत्युपयोगः, साकारानाकाराऽऽदिः। उक्तं च-"स द्विविधोऽष्टचतुर्भेदः।" स एव लक्षणं यस्य स उपयोगलक्षणस्तम्; जीवमिति वक्ष्यति। तथा-अनाद्यनिधनम् अनाद्यपर्यवसितं, नयापवर्गप्रवाहापेक्षया नित्यमित्यर्थः। तथाऽर्थान्तरं पृथग्भूतं, कुतः?, शरीरात्, ज्ञातावेकवचनम्-शरीरेभ्य औदारिकाऽऽदिभ्य इति। किमिति?, अत आह-जीवति, जीविष्यति, जीवितवान् वा जीव इति, तम्। किंभूतमिति?, अत आह-अरूपिणममूर्त्तमित्यर्थः। तथा कर्त्तारं निर्वर्त्तकं, कर्मण इति गम्यते। तथा भोक्तारमुपनोक्तारम्, कस्य?-स्वकस्य आत्मीयस्य, कर्मणो ज्ञानाऽऽवरणाऽऽदेरिति गाथाऽर्थः ॥ ५६ ॥

तस्स य सकम्मजणिअं, जम्माइजलं कसायपायालं ।
वसणसयसावयमणं, मोहाऽऽवत्तं महाभीमं ॥ ५७ ॥

तस्य च जीवस्य च, स्वकर्मजनितम्-आत्मीयकर्मनिर्वर्तितम्। कम्?-संसारसागरमिति वक्ष्यति। किम्भूतम्?, जन्माऽऽदिजलं, जन्म प्रतीतम्; आदिशब्दाज्जरामरणपरिग्रहः। एतान्येवातिबहुत्वाज्जलमिव जलं यस्मिन्स तथाविधस्तम्। तथा कषायपातालं-कषायाः पूर्वोक्ताः, त एवागाधनवजननसामान्येन पातालमिव पातालं यस्मिन् स तथाविधस्तम्। तथा व्यसनशतश्वापदवन्तम्-व्यसनानि दुःखानि,द्यूताऽऽदीनि वा,तथा तान्येव पीडाहेतुत्वात् श्वापदानि, तान्यस्य विद्यन्त इति तद्वान्, तं, (मणं ति) देशीशब्दो मत्वर्थीयः। उक्तं च-"मतुवत्थम्मि सुणेज्जह, आलं इल्लं मणं च मणुयं च" इति। तथा मोहाऽऽवर्तम्-मोहो मोहनीयं कर्म, तदेव तत्र विशिष्टभ्रमिजनकत्वात् आवर्तो यस्मिन् स तथाविधस्तम्। तथा महाभीमम्-अतिभयानकमिति गाथाऽर्थः ॥५७॥

किं च-

अन्नाणमारुएरिअ-संजोगविओगवीइसंताणं ।
संसारसागरमणो-रपारमुहं विचिंतिज्जा ॥ ५८ ॥

अज्ञानं ज्ञानाऽऽवरणकर्मोदयजनित आत्मपरिणामः, स एव तत्प्रेरकत्वान्मारुतो वायुः,तेनेरितः प्रेरितः, कः?-संयोगवियोगवीचिसन्तानो यस्मिन् स तथाविधस्तम्। तत्र संयोगः केनचित्सह संबन्धः, वियोगस्तेनैव विप्रयोगः। एतावेव सततप्रवृत्तत्वाद्वीचय ऊर्मयस्तत्प्रवाहः सन्तान इति भावना। संसरणं संसारः सागर इव संसारसागरस्तम्। किम्भूतम्?-"अणोरपारं" अनाद्यपर्यवसितम्, अशुभमशोभनं, विचिन्तयेत्, तस्य गुणरहितस्य जीवस्येति गाथाऽर्थः ॥ ५८ ॥

तस्स य संतरणमहं, सम्मद्दंसणसुबंधणं णाणं ।
णाणमयकन्नधारं, चारित्तमयं महापोअं ॥ ५९ ॥

तस्य च संसारसागरस्य, सन्तरणसहं सन्तरणसमर्थं, पोतमिति वक्ष्यति। किंविशिष्टम्?, सम्यग्दर्शनमेव शोभनं बन्धनं यस्य स तथाविधः, तम्. अनघम्-अपापम्। ज्ञानं प्रतीतं,तन्मयस्तदात्मकः, कर्णधारो नियामकविशेषो यस्य यस्मिन् वा स तथाविधस्तम्, चारित्रं प्रतीतम्, तदात्मकम्। महापोतमिति महाचोदित्थम्; क्रिया पूर्ववादिति गाथाऽर्थः ॥ ५९ ॥

संवरकयनिच्छिद्दं, तवपवणाऽऽविद्धजवणतरवेगं ।
वेरग्गमग्गपडिअं, विमुत्तिआवीइनिक्खोहं ॥ ६० ॥

इहाऽऽश्रवनिरोधः संवरः, तेन कृतं निश्छिद्रम्, स्थगितरन्ध्रमित्यर्थः। अनशनाऽऽदिलक्षणं तपः, तदेवेष्टपुरं प्रति प्रेरकत्वात् पवन इव तपःपवनः, तेनाऽऽविद्धस्य प्रेरितस्य, जवनतरः शीघ्रतरः, वेगो रयो यस्य स तथाविधस्तम्। तथा विरागस्य भावो वैराग्यं, तदेवेष्टपुरप्रापकत्वाद् मार्ग इव वैराग्यमार्गः, तस्मिन् पतितो गतस्तम्; तथा विश्रोतसिका अपध्यानानि, एता एवेष्टपुरप्राप्तिविघ्नहेतुत्वाद्वीचय इव विश्रोतसिकावीचयः, ताभिर्निष्क्रोभ्यः निष्प्रकम्पस्तमिति गाथाऽर्थः ॥ ६० ॥

एवम्भूतं पोतम्। किम्?-

आरोहुं मुणिवणिआ, महग्घसीलंगरयणपरिपुन्नं ।
जह तं निव्वाणपुरं, सिग्घमविग्घेण पावंति ॥ ६१ ॥

आरोढुमित्यारुह्य, के?, मुनिवणिजः-मन्यन्ते जगतस्त्रिकालावस्थामिति मुनयः, त एवातिनिपुणमायव्ययपूर्वकप्रवृत्तेर्वणिज इव मुनिवणिजः। पोत एव विशेष्यते-महार्घाणि महार्हाणि, शीलाङ्गानि पृथ्वीकायसमारम्भपरित्यागाऽऽदीनि वक्ष्यमाणलक्षणानि,तान्येवैकान्तिकाऽत्यन्तिकसुखहेतुत्वाऽऽरत्नानि,तैः प्रतिपूर्णो भृतस्तम्। यथा येन प्रकारेण, तत्प्रक्रान्तं, निर्वाणपुरं सिद्धिपत्तनं परिनिर्वाणपुरं वेति पाठान्तरम्। शीघ्रम् आशु,स्वल्पेन कालेनेत्यर्थः। अविघ्नेनान्तरायमन्तरेण, प्राप्नुवन्त्यासादयन्ति, तथा विचिन्तयेदिति वर्त्तते। इत्ययं गाथाऽर्थः ॥ ६१ ॥

तत्थ य तिरयणविणिओ-गमइअमेगंतिअं निराबाहं ।
साहाविअं निरुवमं, जह सुक्खं अक्खयमुविंति ॥६२॥

तत्र च परिनिर्वाणपुरे,त्रिरत्नविनियोगाऽऽत्मकमिति-त्रीणि रत्नानि ज्ञानाऽऽदीनि,विनियोगश्चैषां क्रियाकरणं, ततः प्रसूतेस्तदात्मकमुच्यते। तथैकान्तिकमिति-एकान्तभावि; निराबाधमित्याबाधारहितं, स्वाभाविकं न कृत्रिमम्, निरुपममुपमाऽतीतमिति। उक्तं च-"ण वि अत्थि माणुसाणं, तं सोक्खं।" इत्यादि। यथा येन प्रकारेण, सौख्यं प्रतीतम्, अक्षयमपर्यवसानम्, उपयान्ति सामीप्येन प्राप्नुवन्ति, क्रिया प्राग्वदिति गाथाऽर्थः ॥ ६२ ॥

किं बहुणा सव्वं चिअ, जीवाइपयत्थवित्थरोवेअं ।
सव्वनयसमूहमयं, झाइज्जा समयसब्भावं ॥६३॥

किं बहुना जाषितेन?, सर्वमेव निरवशेषमेव, जीवाऽऽदिपदार्थविस्तरोपेतं-जीवाजीवाऽऽश्रवबन्धसंवरनिर्जरामोक्षाऽऽख्यपदार्थप्रपञ्चसमन्वितं, समयसद्भावमिति योगः। किंविशिष्टम्?-सर्वनयसमूहाऽऽत्मकं द्रव्यास्तिकायाऽऽदिनयसङ्घातमयमित्यर्थः। ध्यायेद्विचिन्तयेदिति भावना। समयसद्भावं सिद्धान्तार्थमिति हृदयम्। अयं गाथाऽर्थः। गतं ध्यातव्यद्वारम् ॥६३॥

(१२) साम्प्रतं येऽस्य ध्यातारस्तान्प्रतिपादयन्नाह-

सव्वप्पमायरहिआ, मुणओ खीणोवसंतमोहा य ।
झायारो नाणधणा, धम्मज्झाणस्स निद्दिट्ठा ॥६४॥

प्रमादा मद्याऽऽदयः। यथोक्तम्-"मज्जं विसयकसाया, निद्दा विकहा य पंचमी भणिया।" सर्वेप्रमादैः रहिताः सर्वप्रमादरहिताः,अप्रमादवन्त इत्यर्थः मुनयः साधवः क्षीणोपशान्तमो-

हाश्चेति-क्षीणमोहाः क्षपकनिर्ग्रन्थाः, उपशान्तमोहा उपशामकनिर्ग्रन्थाः। चशब्दादन्ये चाप्रमादिनः, ध्यातारश्चिन्तकाः, धर्मध्यानस्येति संबन्धः। ध्यातार एव विशेष्यन्ते-ज्ञानधना ज्ञानचित्ताः, विपश्चित इत्यर्थः। निर्दिष्टाः प्रतिपादिताः, तीर्थंकरगणधरैरिति गाथार्थः ॥६४॥ उक्ता धर्मध्यानस्य ध्यातारः।

साम्प्रतं शुक्लध्यानस्याद्यभेदद्वयस्याविशेषेणैत-
एव यतो ध्यातार इष्यतो नान्ये पुनरभिधेया
भविष्यन्तीति लाघवार्थं चरमनेदद्वयस्य
च प्रसङ्गत एतानेवाभिधित्सुराह-

एए वि य पुव्वाणं, पुव्वधरा सुप्पसत्थसंघयणा ।
दुन्ह सजोगाजोगा, सुक्काण पराण केवलिणो ॥ ६५ ॥

एत एव येऽनन्तरमेव धर्मध्यानस्याताराः उक्ताः, पूर्वयोरित्याद्ययोर्द्वयोः शुक्लध्याननेदयोः पृथक्त्ववितर्कं सविचारम्, एकत्ववितर्कमविचारमित्यनयोः, ध्यातार इति गम्यते। अयं पुनर्विशेषः-पूर्वधराश्चतुर्दशपूर्ववेदस्तदुपयुक्ताः, इदं च पूर्वधरविशेषणमप्रमादवतामेव वेदितव्यम्; न निर्ग्रन्थानां, माषतुषमरुदेव्यादीनामपूर्वधराणामपि तदुपपत्तेः। सुप्रशस्तसंहनना इत्याद्यसंहननयुक्ताः, इदं पुनरोघत एव विशेषणमिति। तथा द्वयोः शुक्लयोः, परयोरुत्तरकालभाविनोः प्रधानयोर्वा सूक्ष्मक्रियानिवृत्तिव्युपरतक्रियाप्रतिपातिलक्षणयोर्यथासङ्ख्यं सयोग्ययोगिकेवलिनोः, ध्यातार इति योगः। एवं च गम्यते-"सुक्कज्झाणाइदुगवोच्छिन्नस्स तत्तियमपत्तस्स एयाए झाणंतरियाए वट्टमाणस्स केवलनाणं समुप्पज्जइ, केवलियसुक्कलेसो अज्झाणी य० जाव सुहुमकिरियमनियट्टि त्ति" गाथार्थः ॥ ६५ ॥ उक्तमानुषङ्गिकम्।

(१३) इदानीमवसरप्राप्तमनुप्रेक्षाद्वारं व्याचिख्यासुरिदमाह-

झाणोवरमे वि मुणी, निच्चमणिच्चाइचिंतणोवरमो ।
होइ सुभावियचित्तो, धम्मज्झाणेण जो पुव्विं ॥६६॥

इह ध्यानं धर्मध्यानमभिगृह्यते; तदुपरमेऽपि तद्विगमेऽपि, मुनिः साधुः, नित्यं सर्वकालम्, अनित्याऽऽदिचिन्तनोपरमो भवति। आदिशब्दादनित्याशरणैकत्वसंसारपरिग्रहः। एताश्चतस्रोऽनुप्रेक्षा भावयितव्याः, इष्टजनसंप्रयोगादिविषयसुखसंपद इत्यादिना ग्रन्थेन। फलं चासां सचित्ताऽऽदिध्वनभिष्वङ्गभवनिर्वेदादिति ज्ञातव्यम्। अथ किंविशिष्टोऽनित्याऽऽदिचिन्तनोपरमो भवति?, अत आह-सुभावितचित्तः सुभावितान्तःकरणः, केन?, धर्मध्यानेन प्राङ्निरूपितस्वरूपेण, यः कश्चित्, पूर्वमादाविति गाथार्थः ॥ ६६ ॥ गतमनुप्रेक्षाद्वारम्।

अधुना लेश्याद्वारप्रतिपिपादयिषयाऽऽह-

हुंति कमविसुद्धाउ, लेसाओ पीअपम्हसुक्काओ ।
धम्मज्झाणोवगय-स्स तिव्वमंदाइभेआओ ॥ ६७ ॥

इह भवन्ति संजायन्ते, क्रमविशुद्धाः परिपाटिविशुद्धाः, काः?, लेश्याः। ताश्च पीतपद्मशुक्लाः। एतदुक्तं भवति-पीतलेश्यायाः पद्मलेश्या विशुद्धा, तस्या अपि शुक्ललेश्येति क्रमः। कस्यैता भवन्ति?, अत आह-धर्मध्यानोपगतस्य, धर्मध्यानयुक्तस्येत्यर्थः। किंविशिष्टाश्चैता भवन्ति?, अत आह-तीव्रमन्दाऽऽदिभेदा इति। तत्र तीव्रभेदाः पीताऽऽदिस्वरूपेष्वन्याः, मन्दभेदास्त्वाद्याः। आदिशब्दान्मध्यमपरिग्रहः। अथवौघत एव परिणामविशेषात् तीव्रमन्दाऽऽदिभेदा इति गाथार्थः ॥ ६७ ॥ उक्तं लेश्याद्वारम्।

इदानीं लिङ्गद्वारं विवृणवन्नाह-

आगमउवएसाऽऽणा-निसग्गओ जं जिणप्पणीयाणं ।
भावाणं सद्दहणं, धम्मज्झाणस्स तं लिंगं ॥ ६८ ॥

इहाऽऽगमोपदेशाऽऽज्ञानिसर्गतो यज्जिनप्रणीतानां तीर्थंकरप्रकपितानां, भावानां द्रव्याऽऽदिपदार्थानां, श्रद्धानम्-अवितथमेत इत्यादिलक्षणं, धर्मध्यानस्य, तल्लिङ्गमिति। तच्च श्रद्धानेन लिङ्ग्यते धर्मध्यानीति। इह चाऽऽगमः सूत्रमेव, तदनुसारेण कथनमुपदेशः, आज्ञा त्वर्थः, निसर्गः स्वभाव इति गाथाऽर्थः ॥ ६८ ॥

किं च-

जिणसाहुगुणुक्कित्तण-पसंसणादाणविणयसंपन्नो ।
सुअसीलसंजमरओ, धम्मज्झाणी मुणेयव्वो ॥ ६९ ॥

जिनसाधुगुणोत्कीर्तनप्रशंसादानविनयसंपन्न। इह जिनसाधवः प्रतीताः, तद्गुणाश्च निरतिचारसम्यग्दर्शनाऽऽदयः, तेषामुत्कीर्तनं सामान्येन संशब्दनमुच्यते। प्रशंसा त्वहो श्लाघ्यतया भक्तिपूर्विका स्तुतिः, विनयोऽभ्युत्थानाऽऽदिः, दानमशनाऽऽदिप्रदानम्। एतत्संपन्न एतत्समन्वितः। तथा श्रुतशीलसंयमरतः-तत्र श्रुतं सामायिकाऽऽदिबिन्दुसारान्तं, शीलं व्रताऽऽदिसमाधानलक्षणं, संयमस्तु प्राणातिपाताऽऽदिनिवृत्तिलक्षणः। यथोक्तम्-पञ्चाऽऽश्रवादित्यादि। एतेषु श्रुतादिषु रतः; किम्?, धर्मध्यानी विज्ञातव्य इति गाथाऽर्थः ॥ ६९ ॥ गतं लिङ्गद्वारम्।

(१४) अधुना फलद्वारावसरः। तच्च लाघवार्थं शुक्लध्यानफलाधिकारे वक्ष्यतीति। उक्तं धर्मध्यानम्। इदानीं शुक्लध्यानावसर इत्यस्य चान्वर्थः प्राग्निरूपित एव। इदमपि च भावनाऽऽदीनि फलान्तानि तान्येव द्वादश द्वाराणि भवन्ति। तत्र भावनादेशकालाऽऽसनविशेषेषु धर्मध्यानादस्याविशेष एवेत्यतस्तान्यनादृत्याऽऽलम्बनाऽऽदीन्यभिधित्सुराह-

अह खंतिमद्दवऽज्जव-मुत्तीओ जिणमयप्पहाणाओ ।
आलंबणेहि जेहिं, सुक्कज्झाणं समारुहइ ॥ ७० ॥

अथेत्यासनविशेषाऽऽनन्तर्ये, क्षान्तिमार्दवाऽऽर्जवमुक्तयः क्रोधमानमायालोभपरित्यागरूपाः। परित्यागश्चाक्रोधेन वर्त्तनम्, उदयनिरोधः, उदीर्णस्य च विफलीकरणमिति। एवं मानाऽऽदिष्वपि भावनीयम्। एता एव क्षान्तिमार्दवाऽऽर्जवमुक्तयो विशेष्यन्ते-जिनमतप्रधाना इति-जिनमते तीर्थंकरदर्शने, कर्मक्षयहेतुतामधिकृत्य प्रधानाः जिनमतप्रधानाः। प्राधान्यं चाऽऽसामकषायं चारित्रम्, चारित्राच्च निश्चयतो मुक्तिरितिकृत्वा। तदनेन आलम्बनानि प्राङ्निरूपितशब्दार्थानि, यैरालम्बनैः करणभूतैः शुक्लध्यानं समारोहति। तथाच क्षान्त्याद्यालम्बन एव शुक्लध्यानमासादयति, नान्य इति गाथाऽर्थः। व्याख्यातं शुक्लध्यानमधिकृत्याऽऽलम्बनद्वारम्।

(शुक्लध्यानभेदाश्च 'सुक्कज्झाण' शब्दे विलोकनीयाः)

साम्प्रतं क्रमद्वारावसरः-क्रमश्चाऽऽद्ययोर्द्वयोर्धर्मध्यान एवोक्तः। इह पुनरयं विशेषः-

तिहुयणविसयं कमसो, संविविअ मणं अणुम्मि इ नुमत्थो ।
झायइ मुनिप्पकंपो, झाणं अमणो निणो होइ ॥७१॥

त्रिभुवनमधस्तिर्यगूर्ध्वलोकभेदं, तद्विषयो गोचर आलम्बनं

यस्य,मनस इति योगः। तत् त्रिभुवनविषयं,क्रमशः क्रमेण,परिपाट्या प्रतिवस्तुत्यागलक्षणया,संक्षिप्य संकोच्य, किम्?, मनः-अन्तःकरणम्। क?,अणौ परमाणौ, विधायेति शेषः। कः?, छद्मस्थः प्राङ्निरूपितशब्दार्थः। ध्यायति चिन्तयति, सुनिष्प्रकम्पोऽनीव निश्चल इत्यर्थः। ध्यानं शुक्लं, ततोऽपि प्रयत्नविशेषान्मनः अपनीय, अमनाः अविद्यमानान्तःकरणो, जिनो भवत्यर्हन् भवति, चरमयोर्द्वयोर्ध्यातेति वाक्यशेषः । तत्राप्याद्यस्यान्तर्मुहूर्त्तेन शैलेशीमवाप्तस्तस्यां च द्वितीयस्येति गाथाऽर्थः ॥७९॥

आह-कथं पुनः छद्मस्थः त्रिभुवनविषयं मनः संक्षिप्याणौ धारयति, केवली वा ततोऽप्यपनयति ?। (अत्र दृष्टान्तः 'जिणविज्ज' शब्दे तृतीयभागे १५०६ पृष्ठे गतः)

अस्मिन्नेवार्थे दृष्टान्तान्तरमभिधातुकाम आह-

ओसारिएंधणभरो, जह परिहाइ कमसो हुआसो वा।
थोविंधणावसेसो, निव्वाइ तओऽवणीओ अ ॥ ७५ ॥

अपसारितेन्धनभरः—अपनीतदाह्यसंघातः, यथा परिहीयते हानिं प्रपद्यते, क्रमशः क्रमेण, हुताशो वह्निः, वा विकल्पार्थे,स्तोकेन्धनावशेषः हुताशनमात्रं भवति, तथा निर्वाति विध्यापयति, ततः स्तोकेन्धनादपनीतश्चेति गाथाऽर्थः ॥७५॥

अस्यैव दृष्टान्तस्योपनयमाह—

तह विसएंधणहीणो, मणोहुआसो कमेण तणुअम्मि।
विसएंधणं निरुज्झइ, निव्वाइ तओऽवणीओ अ ॥७६॥

तथा विषयेन्धनहीनो गोचरेन्धनहीन इत्यर्थः । मन एव दुःखदाहकारणत्वाद् हुताशो मनोहुताशः, क्रमेण परिपाट्या, तनुके क्षीणे,क?-विषयेन्धने, अणावित्यर्थः। किम्?, निरुध्यते-निश्चयेन ध्रियते, तथा निर्वाति, ततस्तस्मादणौ अपनीतश्चेति गाथाऽर्थः ॥ ७६ ॥

पुनरप्यस्मिन्नेवार्थे दृष्टान्तोपनयावाह—

तोयमिव नालिआए, तत्तायसजायणोदरत्थं वा ।
परिहाइ कमेण जहा, तह जोगिमणोजलं जाण ॥७७॥

तोयमिव उदकमिव, नालिकायाः घटिकायाः,तथा-तप्तं च तदायसभाजनं लोहभाजनं, तदुदरस्थं,वा विकल्पार्थः ।परिहीयते क्रमेण यथा । एष दृष्टान्तः। अयमुपनयः-तथा तेनैव प्रकारेण, योगिमन एवाऽविकलत्वाज्जलं योगिमनोजलं, जानीहि अवबुध्यस्वा तथा-अप्रमादानलतप्तजीवभाजनस्थं मनो जलं परिहीयत इति भावना। अलमतिविस्तरेण इति गाथाऽर्थः ॥७७॥

अपनयति ततोऽपि जिनवैद्य इति वचनादेव तावत्केवली मनोयोगं निरुणद्धीत्युक्तम् ।

अधुना शेषयोगनिरोधविधिमभिधातुकाम आह-

एवं चिअ वयजोगं, निरुंभइ कमेण कायजोगं पि ।
तो सेलेसिं व थिरो, सेलेसी केवली होइ ॥ ७८ ॥

एवमेव पूर्वोक्तेनैव विधाऽऽदिदृष्टान्तैः, किम्?, वाग्योगं, निरुणद्धि। तथा क्रमेण काययोगमपि, निरुणद्धीति वर्त्तते । ततः शैलेश इव मेरुरिव, स्थिरः सन् शैलेशी केवली भवतीति गाथाऽर्थः। (आव०) (इह च भावार्थः 'सेलेसी' शब्दे वक्ष्यते)

(१४) इदानीं ध्यातव्यद्वारं विवृणवन्नाह-

उप्पायट्ठिइभंगा-इपज्जवाणं जमेगदव्वम्मि ।
नाणानयाणुसरणं, पुव्वगयसुआणुसारेणं ॥ ७९ ॥

उत्पादस्थितिभङ्गाऽऽदिपर्यायाणाम, उत्पादाऽऽदयः प्रतीताः । आदिशब्दान्मूर्त्तामूर्त्तग्रहः । अमीषां पर्यायाणां, यदेकस्मिन् द्रव्ये अण्वात्माऽऽदौ, किम् ?,नानानयैर्द्रव्यास्तिकाया ऽऽदिभिः, अनुस्मरणं चिन्तनम् । कथम?, पूर्वगतश्रुतानुसारेण पूर्ववेदः । मरुदेव्यादीनां त्वन्यथा । तत्किमित्याह-

सवियारमत्थवंजण-जोगंतरओ तयं पढमसुक्कं ।
होइ पुहुत्तविअक्कं, सवियारमरागभावस्स ॥ ८० ॥

सविचारम-सह विचारेण वर्त्तत इति सविचारम, "विचारोऽर्थव्यञ्जनयोगसंक्रमः" इति आह च। अर्थव्यञ्जनयोगान्तरतः-अर्थो द्रव्यं, व्यञ्जनं शब्दः, योगो मनःप्रभृति, एतदन्तरत एतद्भेदेन,सविचारम्, अर्थाद्व्यञ्जनं संक्रामतीति विभाषा । तम, कम?-एतत् प्रथमं शुक्लमाद्यं शुक्लं भवति। किंनाम्ना?, इत्यत आह-पृथक्त्ववितर्कं सविचारं-पृथक्त्वेन भेदेन विस्तीर्णभावेन अन्ते वितर्कः श्रुतं यस्मिँस्तत्तथा । कस्येदं भवति ?, इत्यत्राऽऽह-अरागभावस्य रागपरिणामरहितस्येति गाथाऽर्थः ॥८०॥

जं पुण सुनिप्पकंपं, निवायसरणप्पदीवमिव चित्तं ।
उप्पायट्ठिइभंगा-इयाणमेगम्मि पज्जाए ॥ ८१ ॥

यत्पुनः सुनिष्प्रकम्पं चित्तोपरहितं, निर्वातशरणप्रदीप इव निर्गतवातगृहैकदेशस्थदीप इव, चित्तमन्तःकरणं, क्व?, उत्पादस्थितिभङ्गाऽऽदीनामेकस्मिन् पर्याये ॥८१॥

तत्किम् ? अत आह-

अवियारमत्थवंजण-जोगंतरओ तयं बिइयसुक्कं ।
पुव्वगयसुआलंबण-मेगत्तविअक्कमवियारं ॥ ८२ ॥

अविचारमसंक्रमम्, कुतः?, अर्थव्यञ्जनयोगान्तरत इति पूर्ववत्। तत्, किमेवंविधम् ?,द्वितीयं शुक्लं भवति । किमभिधानमिति?,अत आह-एकत्ववितर्कमविचारं-एकत्वेनाभेदेन वितर्कः व्यञ्जनरूपः,अर्थरूपो वा यस्य तत्तथा । इदमपि च पूर्वगतश्रुताऽऽलम्बनम्, पूर्वगतश्रुतानुसारेणैव भवति । अविचाराऽऽदि पूर्ववदिति गाथाऽर्थः ॥८२॥

निव्वाणगमणकाले, केवलिणो दरनिरुद्धजोगस्स ।
सुहुमकिरियाऽनिअट्टिं, तइअं तणुकायकिरियस्स ॥८३॥

निर्वाणगमनकाले मोक्षगमनप्रत्यासन्नसमये, केवलिनः सर्वज्ञस्य, मनोवाग्योगद्वये निरुद्धे सति, अर्द्धनिरुद्धकाययोगस्य, किम्?, सूक्ष्मक्रियानिवर्त्ति-सूक्ष्मा क्रिया यस्मिन् तत्सूक्ष्मक्रियं, सूक्ष्मक्रियं च तदनिवर्ति चेति नाम-निवर्तितुं शीलमस्येति निवर्त्ति, प्रवर्धमानतरपरिणामात्, न निवर्त्ति अनिवर्त्ति, तृतीयं, ध्यानमिति गम्यते। तनुकायक्रियस्येति-तन्वी उच्छ्वासनिःश्वासाऽऽदिलक्षणा, कायक्रिया यस्य स तथाविधस्तस्येति गाथाऽर्थः ॥८३॥

तस्सेव य सेलेसिं, गयस्स सेलेसु व निप्पकंपस्स ।
वुच्छिन्नकिरिअमप्पडि-वाइं झाणं परमसुक्कं ॥ ८४ ॥

तस्यैव च केवलिनः शैलेशीं गतस्य, शैलेशी प्राग्वर्णिता, तां प्राप्तस्य, किंविशिष्टस्य?, निरुद्धयोगत्वाच्छैलेश इव निष्प्रकम्पस्य, मेरुरिव स्थिरस्येत्यर्थः। किम्?, व्यवच्छिन्नक्रियं,योगाभावात्; अप्रतिपाति अनुपरतिस्वभावामिति। एतदेव चास्य नाम, ध्यानं परमशुक्लं, प्रकृष्टार्थमेव तदिति गाथाऽर्थः ॥ ८४ ॥

इत्थं चतुर्विधं ध्यानमभिधायाधुनैतत्प्रतिबद्धमेव वक्तव्यताशेषमभिधित्सुराह-

पढमं जोगे जोगे-सु वा मयं विइअमेगजोगम्मि ।
तइअं च कायजोगे, सुक्कमजोगिम्मि अ चउत्थं ॥ ८५ ॥

प्रथमं पृथक्त्ववितर्कं सविचारं, योगे मनआदौ, योगेषु वा सर्वेषु, मतमिष्टम्, तथाऽऽगमिकश्रुतपाठिनः । द्वितीयम्-एकत्ववितर्कमविचारं, तदेकयोग एव, अन्यतरस्मिन् सक्रमाभावात् । तृतीयं च-सूक्ष्मक्रियानिवर्ति, काययोगे, न योगान्तरे, शुक्लम् अयोगिनि च शैलेशीकेवलिनि, चतुर्थम्-व्युपरतक्रियाऽप्रतिपाति, इति गाथाऽर्थः ॥ ८५ ॥

आह-शुक्लध्यानोपरिमभेदद्वये मनो नास्ति, अमनस्कत्वात् केवलिनः, ध्यानं च मनोविशेषः, 'ध्यै' चिन्तायामिति पाठात्, तदेतत्कथम् ?, इति । उच्यते-

जह छउमत्थस्स मणो, झाणं जणइ सुनिच्चलं संतं ।
तह केवलिणो काओ, सुनिच्चलो जणए झाणं ॥ ८६ ॥

यथा छद्मस्थस्य मनः, किम् ?,-ध्यानं जनयते । सुनिश्चलं सत्, तथा तेनैव प्रकारेण, योगत्वाव्यभिचारात्, केवलिनः, कायः सुनिश्चलो जनयते ध्यानम् । इति गाथाऽर्थः ॥ ८६ ॥

आह-चतुर्थे निरुद्धत्वादसावपि न भवति, तथाविधजीवेऽपि च सर्वभावप्रसङ्गः, तत्र का वार्ता ?, इत्युच्यते-

पुव्वप्पओगओ वि अ, कम्मविणिज्जरणहेउओ चावि ।
सद्दत्थबहुत्ताओ, तह जिणचंदागमाओ अ ॥८७॥
चित्ताभावे वि सई, सुहुमोवरयकिरियाउ जम्हंति ।
जीवोवओगसन्ना-वओ जवत्थस्स झाणाइं ॥ ८८ ॥

काययोगनिरोधिनो योगिनोऽयोगिनो वा, चित्ताभावेऽपि सति सूक्ष्मोपरतक्रिये भण्येते । सूक्ष्मग्रहणात्सूक्ष्मक्रियानिवर्तिनो ग्रहणं, उपरतग्रहणाच्चोपरतक्रियाऽप्रतिपातिन इति ॥ पूर्वप्रयोगादिति हेतुः, कुलालचक्रभ्रमणवदिति दृष्टान्तोऽभ्युपगमः । यथा नाऽकं भ्रमणनिमित्तदण्डाऽऽदिक्रियाऽभावेऽपि भ्रमति, तथाऽत्रापि मनःप्रभृतियोगोपरमेऽपि जीवोपयोगसद्भावतो भावमनसो भावात् जवस्थस्य ध्याने इति । अपिशब्दश्चोदनानिर्णयप्रथमहेतुसंभावनार्थः । चशब्दस्तु प्रस्तुतहेत्वनुकर्षणार्थः । एवं शेषहेतवोऽप्यनया गाथया योजनीयाः ॥ विशेषस्तूच्यते-कर्मविनिर्जरणहेतुत्वाऽपि-कर्मविनिर्जरणहेतुत्वात्, क्षपकश्रेणिवत् । जवति च क्षपकश्रेण्यामिवास्य जवोपग्राहिकर्मनिर्जरेति भावः । चशब्दः प्रस्तुतहेत्वनुकर्षणार्थः । अपिशब्दस्तु द्वितीयहेतुसम्भावनार्थ इति ॥ तथा शब्दार्थबहुत्वात्, यथैकस्यैव हरिशब्दस्य शक्रशाखामृगाऽऽदयोऽनेकेऽर्थाः, एवं ध्यानशब्दस्यापि, न विरोधः । 'ध्यै' चिन्तायाम्, 'ध्यै' काययोगनिरोधे, 'ध्यै' अयोगित्वे, इत्यादि ॥ तथा जिनचन्द्राऽऽगमाश्चैतदेवमिति । उक्तं च-" आगमश्चोपपत्तिश्च, सम्पूर्णं दृष्टिलक्षणम् । अतीन्द्रियाणामर्थानां, सद्भावप्रतिपत्तये ॥ १ ॥" इत्यादि गाथाद्वयार्थः ॥ ८७ ॥ ८८ ॥ उक्तं ध्यातव्यद्वारम् ।

ध्यातारस्तु धर्मध्यानाधिकारे उक्ताः ।

अधुनाऽनुप्रेक्षाद्वारमुच्यते-

सुक्कज्झाणसुभाविअ-चित्तो चिंतेइ झाणविगमे वि ।
निअयमणुप्पेहाओ, चत्तारि चरित्तसंपन्नो ॥ ८९ ॥

शुक्लध्यानशुभाभावितचित्तश्चिन्तयति ध्यानोपरमेऽपि नियतमनुप्रेक्षाश्चतस्रश्चारित्रसंपन्नः, तस्य परिणामरहितस्य तदभावादिति गाथाऽर्थः ॥ ८९ ॥

ताश्चैताः—

आसवदारावाए, तह संसारासुहाणुभावं च ।
जवसंताणमणंतं, वत्थूणं विपरिणामं च ॥ ९० ॥

आश्रवद्वाराणि मिथ्यात्वाऽऽदीनि, तदपायात् दुःखक्षयाद्, तथा-संसारशुभानुभावं च "असुभानुभावबंधी संसारो" इत्यादि । जवसन्तानमनन्तं भाविनारकाऽऽद्यपेक्षया । वस्तूनां विपरिणामञ्च सचेतनाचेतनानाम्; "सव्वट्ठाणाणि असासयाणि" इत्यादि । एताश्चतस्रोऽप्यपायाशुभानन्तविपरिणामानुप्रेक्षा आद्यभेदसंगता एव द्रष्टव्याः । इति गाथाऽर्थः ॥ ९० ॥ उक्तमनुप्रेक्षाद्वारम् ।

इदानीं लेश्याद्वाराभिधित्सयाऽऽह-

सुक्काए लेसाए, दो तइअं परमसुक्कलेसाए ।
थिरयाजिअसेलेसं, लेसाईअं परमसुक्कं ॥ ९१ ॥

सामान्येन शुक्लायां लेश्यायां, द्वे आद्ये सक्कशुक्लक्षणे, तृतीयमुक्लक्षणमेव, परमशुक्ललेश्यायां स्थिरतास्थिरशैलेशं मेरोरपि निष्प्रकम्पतरमित्यर्थः । लेश्याऽतीतं परमशुक्लं चतुर्थमिति गाथाऽर्थः ॥ ९१ ॥ उक्तं लेश्याद्वारम् ।

इदानीं लिङ्गद्वारं विवर्णयिषुस्तेषां नामप्रमाणस्वरूपगुणभावनार्थमाह-

असहासंमोहविवे-गव्वुसग्गा तस्स हुंति लिंगाइं ।
लिंगिज्जइ जेहिं मुणी, सुक्कज्झाणोवगयचित्तो ॥९२॥
चालिज्जइ बीहेइ व, धीरो न परीसहोवसग्गेहिं ।
सुहुमेसु न संमुच्छइ, जावेसु न देवमायासु ॥ ९३ ॥
देहविवित्तं पिच्छइ, अप्पाणं तह य सव्वसंजोगे ।
देवोवहिवुस्सग्गं, निस्संगो सव्वहा कुणइ ॥ ९४ ॥

असहासंमोहविवेकव्युत्सर्गाः, तस्य शुक्लध्यानस्य, भवन्ति लिङ्गानि, लिङ्ग्यते गम्यते यैर्मुनिः शुक्लध्यानोपगतचित्त इति गाथाऽक्षरार्थः ॥ ९२ ॥ अधुना जावार्थमाह-चाल्यते ध्यानान्न परीसहोपसर्गैर्विभेति वा धीरो बुद्धिमान्स्थिरो वा, न तेभ्य इत्यवधारणम् । सूक्ष्मेष्वत्यन्तगहनेषु न संमुह्यति-न संमोहमुपगच्छति, भावेषु पदार्थेषु, न देवमायास्वनेकरूपासित्यसंमोहलिङ्गम्, इति गाथाऽर्थः ॥ ९३ ॥ देहविविक्तं पश्यति आत्मानं, तथा च सर्वसंयोगानिति विषयैकलिङ्गम् । देहोपधिव्युत्सर्गं निःसङ्गः सर्वथा करोतीति व्युत्सर्गलिङ्गमिति गाथाऽर्थः ॥ ९४ ॥ गतं लिङ्गद्वारम् ।

साम्प्रतं फलद्वारमुच्यते । इह च लाघवार्थं प्रथमोपन्यस्तं धर्मफलमभिधाय शुक्लध्यानफलमाह, धर्मफलानामेव शुक्लतराणामाद्यशुक्लद्वयफलत्वादत आह-

हुंति सुराऽऽसवसंवर-विणिज्जराऽमरसुहाइं विउलाइं ।
जाणवरस्स फलाइं, सुहाणुबंधीणि धम्मस्स ॥ ९५ ॥

भवन्ति शुभाऽऽश्रवसंवरनिर्जरामरसुखानि-शुभाऽऽश्रवः-पुण्याऽऽश्रवः, संवरः-अशुभकर्माऽऽगमनिरोधः, निर्निर्जरा-कर्मक्षयः, अमरसुखानि-देवसुखानि । एतानि च दीर्घस्थिति-विशुद्धपुपपाताभ्यां विपुलानि विस्तीर्णानि, ध्यानवरस्य ध्यान-प्रधानस्य, फलानि शुभानुबन्धीनि सुकुलप्रत्ययानि पुनर्बो-धिलाभप्रत्ययाक्केवलशैलेश्यपवर्गानुबन्धीनि, धर्मध्यानस्ये-ति गाथाऽर्थः ॥ ९५ ॥ उक्तानि धर्मध्यानफलानि ।

अधुना शुक्लमधिकृत्याऽऽह-

ते अ विसेसेण सुहा-ऽऽसवादओऽणुत्तरामरसुहं च ।
दुन्हं सुक्काण फलं, परिनिव्वाणं परिल्लाणं ॥ ९६ ॥

ते च विशेषेण शुभाऽऽश्रवाऽऽदयोऽनन्तरोदिताः, अनुत्तरामर-सुखं च, द्वयोः शुक्लयोः, फलमाद्ययोः । परिनिर्वाणं मोक्षगमनं (परिल्लाणं ति) चरमयोर्द्वयोरिति गाथाऽर्थः ॥ ९६ ॥

अथवा सामान्येनैव संसारप्रतिपक्षभूते एते इति-दर्शयति-

आसवदारा संसा-रहेउओ जेन धम्मसुक्केसु ।
संसारकारणाइं, न तो धुवं धम्मसुक्काइं ॥ ९७ ॥

आश्रवद्वाराणि संसारहेतवो वर्त्तन्ते, तानि च यद् यस्माच्च धर्मशुक्लयोर्भवन्ति । संसारकारणानि न तस्माद् ध्रुवं नियमेन धर्मशुक्लानि । इति गाथार्थः ॥ ९७ ॥

(१६) संसारप्रतिपक्षतया च मोक्षहेतु-र्ध्यानमित्यावेदयन्नाह--

संवरविणिज्जराओ, मुक्खस्स पहो तवो तासिं ।
झाणं च पहाणंगं, तवस्स तो मुक्खहेऊ तं ॥ ९८ ॥

संवरविनिर्जरे मोक्षस्य पन्थाः-अपवर्गस्य मार्गः, तपः-पन्थाः मार्गः, तयोः संवरनिर्जरयोः। ध्यानं च प्रधानाङ्गं तपस आभ्यन्तरकारणत्वात् । ततो मोक्षहेतुत्वाद् ध्यानमिति गाथाऽर्थः ॥९८॥

अमुमेवार्थं सुखप्रतिपत्तये दृष्टान्तैः प्रतिपादयन्नाह-

अंबरलोहमहीणं, कमसो जह मलकलंकपंकाणं ।
सोज्झावणयणसोसे, साहंति जलानलाइच्चा ॥ ९९ ॥

अम्बरलोहमहीनां वस्त्रलोहक्षितीनां, क्रमशः क्रमेण,यथा म-लकलङ्कपङ्कानां यथासंख्यं शोध्यापनयनशोषान् यथासंख्य-मेव, साधयन्ति निर्वर्तयन्ति, जलानलाऽऽदित्याः । इति गा-थाऽर्थः ॥९९॥

तह सुज्झाइममत्था, जीवंबरलोहमेइणिगयाणं ।
झाणजलानलसूरा, कम्ममलकलंकपंकाणं ॥ १०० ॥

तथा शोध्यादिसमर्था जीवाम्बरलोहमेदिनीगतानां ध्यानमेव जलानलसूर्याः, कर्मैव मलकलङ्कपङ्काः, तेषामिति गाथाऽर्थः ॥ १०० ॥

किञ्च—

तावो सोसो भेओ, जोगाणं झाणओ जहा नियमं ।
तह तावसोसजेआ, कम्मस्स वि झाइणो नियमा ॥१०१॥

तापः, शोषो, भेदः, योगानां, ध्यानतो ध्यानाद्, यथा नियत-मवश्यम् । तत्र तापो दुःखं, तत एव शोषो दौर्बल्यम्, तत एव भेदो विदारणं; योगानां वाङ्मनादीनां, तथा तेनैव प्रकारेण, तापशोषभेदाः, कर्मणोऽपि भवन्ति । कस्य ?-ध्यायिनः, न यदृच्छया, नियमाद् नियमेनेति गाथाऽर्थः ॥ १०१ ॥

किं च-

जह रोगाऽऽसयसमणं, विसोसणविरेअणोसहविहीहिं ।
तह कम्माऽऽमयसमणं, झाणाणसणाइजोगेहिं ॥१०२॥

यथा रोगाऽऽशयशमनं रोगनिदानचिकित्सा, विशोषणविरेच-नौषधविधिभिः-अभोजनविरेकौषधप्रकारैः; तथा कर्माऽऽमयश-मनं कर्मरोगचिकित्सा, ध्यानानशनाऽऽदिभिर्योगैः, आदिशब्दाद् ध्यानवृद्धिकारकशेषतपोभेदग्रहणमिति गाथाऽर्थः ॥ १०२ ॥

किञ्च-

जह चिरसंचियमिंधण,मनलो पवणसहिओ दुयं दहइ ।
तह कम्मिंधणममिअं, खणेण झाणानलो दहइ ॥१०३॥

यथा चिरसंचितं प्रभूतकालसंचितम्, इन्धनं काष्ठाऽऽदि, ज्व-लनोऽग्निः, पवनसहितो वायुसमन्वितः, द्रुतं शीघ्रं, दहति न-स्मीकरोति । तथा दुःखतापहेतुत्वात्कर्मैवेन्धनम्, अमितमने-कभवोपात्तम्, अनन्तं, क्षणेन समयेन, ध्यानमनल इव ध्यानानल-ः, असौ, दहति भस्मीकरोतीति गाथाऽर्थः ॥ १०३ ॥

जह वा घणसंघाया, खणेण पवणाहया विलयमिंति ।
झाणपवणावहूआ, तह कम्मघणा विलिज्जंति ॥१०४॥

यथा वा घनसङ्घाताः-मेघोत्कराः, क्षणेन, पवनाहता वायुप्रे-रिताः,विलयं विनाशं,यान्ति गच्छन्ति । ध्यानपवनावधूता ध्यान-वायुविक्षिप्ताः, तथा कर्मैव जीवस्वभावा घनाः कर्मघनाः ।

उक्तं च—

"स्थितः शीतांशुवज्जीवः, प्रकृत्या भावशुद्धया ।
कल्मिकावच्च विज्ञानं, तदावरणमभ्रवत्" ॥ १ ॥

इत्यादि । विलीयन्ते विनाशमुपयान्ति, इति गाथाऽर्थः ॥१०४॥

किञ्चेदमन्यदिदृक्षुलोकप्रतीतमेव ध्यानफलमिति दर्शयति-

न कसायसमुत्थेहि अ, वाहिज्जइ माणसेहिँ दुक्खेहिं ।
ईसाविसायसोगा-इएहिँ झाणोवगयचित्तो ॥१०५॥

न कषायसमुत्थैश्च न क्रोधाऽऽशुद्भवैश्च, बाध्यते पीड्यते, मानसैः दुःखैः, मानसग्रहणात्ताप इत्यादयपि यदुक्तम्, तत्र बाध्यते; इ-र्ष्याविषादशोकाऽऽदिभिः,तत्र प्रतिपक्षाभ्युदयोपलम्भजनितो मत्सरविशेष ईर्ष्या,विषादो वैक्लव्यम्, शोको दैन्यम्,आदिश-ब्दाद् हर्षाऽऽदिपरिग्रहः । ध्यानोपगतचित्त इति प्रकटार्थम्। अयं गाथाऽर्थः ॥ १०५ ॥

सीआयवायएहि अ, सारीरेहि सुबहुप्पगारेहिं ।
झाणसुनिच्चलचित्तो, न बाहिज्जइ निज्जरापेही ॥१०६॥

इह कारणे कार्योपचाराच्छीताऽऽतपाऽऽदिभिश्च, आदिशब्दात् क्षुदादिपरिग्रहः । शारीरैः, सुबहुप्रकारैरनेकभेदैः, ध्यानसुनि-श्चलचित्तः ध्यानभावितमतिः, न स बाध्यते, ध्यानसुखादिति गम्यते । अथवा न शक्यते चालयितुं, तत एव निर्जराऽपेक्षी कर्मक्षयापेक्षकः इति गाथाऽर्थः ॥१०६॥ उक्तं फलद्वारम् ।

अधुनोपसंहरन्नाह-

इयमव्वगुणाऽऽहाणं, दिट्ठादिट्ठसुहमाहणं झाणं ।
सुपसत्थं सद्धेअं, नेअं झेअं च निच्चं पि ॥ १०७ ॥

पंचुत्तरेण गाहा-सएण झाणसयगं समुद्दिट्ठं ।
जिणजइचरियासमणे-हिँ कम्ममोहीकरं जइणा ॥१०८॥

'इय' एवमुक्तेन प्रकारेण, सर्वगुणाऽऽधानमशेषगुणस्थानं, दृष्टादृष्टसुखसाधनं ध्यानमुक्तन्यायात्सुष्ठु प्रशस्तं तीर्थकराऽऽदिनिरासेवितत्वाद्, यतश्चैवमतः अरूढेयं, नान्यथेति भावनया, ज्ञेयं ज्ञातव्यं, स्वरूपतः ध्येयमिति, चिन्तनीयं क्रियया। एवं च सति सम्यग्दर्शनज्ञानचारित्राण्यासेवितानि भवन्ति, नित्यमपि सर्वकालमपि। आह-एवं तर्हि शेषक्रियाऽलोपः प्राप्नोति। न। तदासेवनस्यापि तत्त्वतो ध्यानत्वात्। नास्ति काचिदसौ क्रिया,या आगमानुसारेण क्रियमाणा साधूनां ध्यानं न भवतीति गाथार्थः ॥१०७॥ ॥ १०८ ॥ समाप्तं ध्यानशतकम्। आव० ४ अ०। षो संघा०। ('केवलिसमुद्घात' शब्दे तृतीयभागे ६६७ पृ शैलेश्ययवस्थायां ध्यानमुक्तम्)

(१७) ध्यस्वरूपं निरूपयन्नाह-

ध्याता ध्येयं तथा ध्यानं, त्रयं यस्यैकतां गतम्।
मुनेरनन्यचित्तस्य, तस्य दुःखं न विद्यते ॥ १ ॥
ध्याताऽन्तराऽऽत्मा ध्येयस्तु, परमाऽऽत्मा प्रकीर्तितः।
ध्यानं चैकाग्र्यसंवित्तिः, समापत्तिस्तदेकता ॥ २ ॥
मणौ बिम्बप्रतिच्छाया, समापत्तिः परात्मनः।
क्षीणवृत्तौ भवेद् ध्याना-दन्तराऽऽत्मनि निर्मले ॥ ३ ॥
आपत्तिश्च ततः पुण्य-तीर्थकृत्कर्मबन्धतः।
तद्भावाभिमुखत्वेन, संपत्तिश्च क्रमाद्भवेत् ॥ ४ ॥
इत्थं ध्यानफलायुक्तं, विंशतिस्थानकाऽऽश्रयि।
कष्टपात्रं त्वजन्याना-मपि नो दुर्लभं भवेद् ॥ ५ ॥
जितेन्द्रियस्य धीरस्य, प्रशान्तस्य स्थिराऽऽत्मनः।
सुखाऽऽसनस्य नासाग्र-न्यस्तनेत्रस्य योगिनः ॥ ६ ॥
रुद्ध्वाह्यमनोवृत्ते-र्धारणाधारया क्वचित्।
प्रसन्नस्याप्रमत्तस्य, चिदानन्दसुधाह्रिदः ॥ ७ ॥
साम्राज्यमप्रतिद्वन्द्व-मन्तरे च वितन्वतः।
ध्यानिनो नोपमा लोके, सदेवमनुजेऽपि हि ॥ ८ ॥

अष्ट० ३० अष्ट०। "बीए झाणं झियायइ।" दिनस्य द्वितीये प्रहरे ध्यानं ध्यायतीति प्रतिदिनक्रिया। उत्त० २६ अ०। करणप्रत्ययेन निर्विषये मनसि, उत्त० १२ अ०।

झाणंतर-ध्यानान्तर-न०। अदृढाध्यवसायध्यानस्य चान्तरिकायाम्, बृ० १ उ०।

झाणंतरिया-ध्यानान्तरिका-स्त्री०। ध्यानयोः शुक्लध्यानद्वितीयतृतीयभेदलक्षणयोरन्तरं मध्यं ध्यानान्तरम्, तदेव ध्यानान्तरिका। स्था० ए ठा०। अन्तरस्य विच्छेदस्य करणमन्तरिका, ध्यानस्यान्तरिका ध्यानान्तरिका। भ० ५ श० ४ उ०। ध्यानस्य मध्यभागे, कल्प० ६ क्षण। आरब्धध्यानस्य समाप्तावपूर्वस्यानारम्भणे, ज० १ श० ४ उ०। द्रव्याऽऽदीनामन्यतमध्यानवतो यदा चित्तमुत्पद्यते-सम्प्रति शेषाणां ध्यातव्यानां कतरद् ध्यायामीत्येवंविधे विमर्शे, बृ०।

केयं पुनर्ध्यानान्तरिकेति?, उच्यते-

अन्नतरझाणऽंतो, विइअं झाणं तु सो असंपत्तो।
झाणंतरम्मि वट्टइ, विसए व विकुंचियमईओ ॥

अन्यतरस्माद् द्रव्याऽऽद्यन्यतरवस्तुविषयाद्, ध्यानादन्तरो यः कश्चिदद्यापि द्वितीयध्याने न संप्राप्नोति, स द्वितीयं ध्यानमसंप्राप्तः सन् ध्यानान्तरे वर्तते, सा ध्यानान्तरिका भवतीति शेषः। इयमत्र भावना-द्रव्याऽऽदीनामन्यतमध्यानवतो यदा चित्तमुत्पद्यते-सम्प्रति शेषाणां ध्यातव्यानां कतरद् ध्यायामीति, एवंविधो विमर्शो ध्यानान्तरिकेत्युच्यते। अत्र यथा-(विषहे व विकुंचियमईओ त्ति) द्विपथे मार्गद्वयभाजने, ततः कश्चिदेकेन पथा गच्छन् पुरस्ताद् द्विपथे मार्गद्वये हृते सति विकुञ्चितमतिकोऽनयोर्मार्गयोः कतरेण व्रजामीति विमर्शाऽऽकुलबुद्धिः सम्पद्यान्तराले वर्तते। एवमेषोऽपि ध्यानान्तरे इति। बृ० १ उ०।

झाणकोट्ठोवगय-ध्यानकोष्ठोपगत-पुं०। ध्यानं-धर्मध्यानं, शुक्लध्यानं च। तदेव कोष्ठः कुशूलो ध्यानकोष्ठः, तमुपगतो ध्यानकोष्ठोपगतः। यथा हि कोष्ठके धान्यं प्रक्षिप्तं विप्रसृतं भवति, एवं ध्यानतोऽनिप्रकीर्णेन्द्रियान्तःकरणवृत्तौ, रा०। चं० प्र०। ज्ञ०। जं०। सू० प्र०। विपा०। औ०। धर्मध्यानकोष्ठमनुप्रविश्येन्द्रियमनांस्यधिकृत्य संवृताऽऽत्मनि, ज्ञा० १ श्रु० १ अ०। नि०। औ०।

झाणजुत्त-ध्यानयुक्त-त्रि०। ध्यानं चित्तनिरोधः,तेन युक्तो यः स तथा। चित्तनिरोधवति, प्रश्न० ३ सम्व० द्वार।

झाणजोग-ध्यानयोग-पुं०। ७ त०। चित्तनिरोधलक्षणे धर्मध्यानाऽऽदौ विशिष्टमनोवाक्कायव्यापारे, सूत्र० १ श्रु० ८ अ०।

झाणज्झयण-ध्यानाध्ययन-न०। ध्यानप्रतिपादके आवश्यकाध्ययने, आव० ४ अ०।

झाणज्झयणरइ-ध्यानाध्ययनरति-स्त्री०। ७ त०। ध्यानं चाध्ययनं च ध्यानाध्ययने, अध्ययनपूर्वकत्वेऽपि ध्यानस्याल्पाच्तरत्वादभ्यर्हितत्वाच्च पूर्वनिपातः। एकालम्बनसंस्थस्य सदृशप्रत्ययस्य च प्रत्ययान्तरप्रवाहस्वाध्याययोरासक्तौ,पो०१२विव०।

झाणप्पयास-ध्यानप्रकाश-पुं०। ध्यानप्रतिपादके ग्रन्थविशेषे, उक्तञ्च ध्यानप्रकाशे-"जोयविसएण चिरकालीओ।" अष्ट० ८ अष्ट०।

झाणवर-ध्यानवर-न०। ध्यानश्रेष्ठे, सूत्र० १ श्रु० ६ अ०। प्रधानमध्याने, आव० ४ अ०। प्रश्न०। धर्मध्याने, आव० ४ अ०।

झाणविभत्ति-ध्यानविभक्ति-स्त्री०। ध्यानान्यार्त्तध्यानाऽऽदीनि, तेषां विभजनं विभक्तिर्यस्यां ग्रन्थपद्धतौ सा। उत्कालिकश्रुतविशेषे, नं०। पा०।

झाणसंवरजोग-ध्यानसंवरयोग-पुं०। ध्यानमेव संवरयोगो ध्यानसंवरयोगः। स० ३२ सम०।

ध्यानसंवरयोगतामाह-

"नगरं च सिंधुवकृण, मुणिवगो अज्जपुप्फभूईसु अ।
आणयण पुसमित्ते, सुहुमे झाणे विचारो अ ॥ १ ॥"
"आसीन्मुणिरुवको राजा, नगरे सिन्धुपर्वते।
पुष्पभूत्यभिधानस्मिन्-साधवोः सुबहुश्रुताः ॥ १ ॥
बोधितस्तैः स राजेन्द्रः, परमः श्रावकोऽजनि।
पुष्पमित्रश्च शिष्योऽस्ति, तेषामतिबहुश्रुतः ॥ २ ॥
अवसन्नतयाऽन्यत्र, तिष्ठति स्म परं सुखी।

अन्यदा दग्धपुराचार्याः,सूक्ष्मध्याने प्रवेशनम् ॥ ३ ॥
महाप्राणसमं तच्च, तत्र स्याच्चेतनाऽपि न ।
अर्गलार्थाश्च तत्पार्श्वे, पुष्पमित्रोऽथ शब्दितः ॥ ४ ॥
आगतः कथितं तस्य, प्रपन्नं तेन तेऽप्यथ ।
स्थित्वैकत्रापणद्वारके, ध्यानमारेभिरे रहः ॥ ५ ॥
वृत्ते दौःस्थं न कस्यापि, स तेषां किं तु बक्स्यदः ।
अत्रस्था एव बन्धध्वं, व्याकुलाः सन्ति सूरयः ॥ ६ ॥
दिनैः कतिपयैरन्ये-ऽमन्यन्त साधवो मिथः ।
कुर्वन्तः सन्ति किं पूज्याः?, एकस्तत्र व्यभालयत् ॥ ७ ॥
तावद् गुरुर्न चलति, न स्पन्दते न वक्ति च ।
आख्यत्तदर्थं सर्वेषां, रुष्टाः सर्वेऽपि साधवः ॥ ८ ॥
आर्याऽऽख्यासि त्वमाचार्यान्, किं न कालगतानपि ? ।
सोऽवक्कालगता नैते, ध्याने ध्यायन्ति किं त्वमी ॥ ९ ॥
व्याघातमेषां मा कार्षु-रुचुस्ते धूर्तता तव ।
त्वं साधयितुकामोऽसि, वेतालं पूर्णलक्षणैः ॥ १० ॥
आचार्यैरिति ते सर्वे, तेन सार्द्धं व्यधुः कलिम् ।
आनिन्ये तैस्ततो राजा-ऽऽचार्याः कालगता इति ॥ ११ ॥
दृष्टोऽसौ लिङ्गिकः किं तु, न निर्याणं कथञ्चन ।
राजा स्वयमथाऽऽलोक्य, मेने कालगतान् गुरून् ॥ १२ ॥
पुष्पमित्रमवज्ञाय, शिविका सज्जिता ततः ।
अन्यान्यपाये महति, स्पृश्योऽङ्गुष्ठो मम त्वया ॥ १३ ॥
पुष्पस्तमिति संकेतात्, परस्पर्शं प्रत्यबुद्ध सः ।
ऊचे किमार्य ! व्याघातः, सोऽवक् वः शिष्यकैः कृतः ॥ १४ ॥
उक्तास्ते न कृतं स्थैर्यं, भङ्गो ध्यानस्य नः कृतः ।
प्रवेश्यमीदृशे ध्याने, येन स्याद्योगसंग्रहः ॥१५॥ " आ० क० । आव० । आचू० । अष्टाविंशे योगसंग्रहे,प्रश्न० ५ संव० द्वार ।

झाणसयग–ध्यानशतक–न० । ध्यानप्रतिपादके गाथाशतके, "पंचुत्तरेण गाहा-सएण झाणसयगं समुद्दिट्ठं"। (१०८ गाथा) आव० ४ अ० । ध० ।

झाणोवओगचित्त–ध्यानोपयोगचित्त–त्रि० । ध्यानोपयोगे विशिष्टध्यानाभ्यासे चित्तं यस्य सः । विशिष्टध्यानाभ्यासचित्ते, संथा० ।

झाम–ध्मात–त्रि० । दग्धे, आचा० २ श्रु० १ अ० १ उ० । आ० चू० ।

झाम–ध्याम–त्रि० । अनुज्ज्वले, प्रश्न० २ आश्र० द्वार ।

झामण–ध्मापन–न० । प्रदीपनके, व्य० २ उ० । सूत्र० ।

झामथंभिल्ल–ध्मातस्थाणिमल्ल–न० । दग्धस्थूणौ, आचा० २ श्रु० १ अ० १ उ० ।

झामिय–ध्मामित–त्रि० । अग्निना दग्धे, व्य० ७ उ० । वृ० । " वासघरं सव्वं झामियं । " आ० म० १ अ० १ खण्ड । दे० ना० ।

झाय–ध्मात–त्रि० । भस्मीकृते, नं० ।

झायव्व–ध्यातव्य–त्रि० । ध्येये, आव० ४ अ० । दर्श० ।

झाया–ध्यातृ–त्रि० । चिन्तके, आव० ४ अ० । दर्श० ।

झारुअ–स्त्री० । देशी-चीर्याम, " झारुअझामकूवए, झिरिंडए पस्स जे पडिही । " (४७ गाथा) चीरीलतागहनकूपके जीर्णकूपे एष यत् पतिष्यति, इत्यर्थः । दे० ना० ३ वर्ग ।

झावण–ध्मापन–भस्मसात्करणे, आचा० १ श्रु० १ अ० ५ उ० ।

झावणा–ध्मापना–स्त्री० । अग्निसंस्कारे, आ० म० १ अ० १ खण्ड । स च भगवतो निर्वाणप्राप्तस्यान्येषां च साधूनामिक्ष्वाकूणामितरेषां च प्रथमं त्रिदशैः कृतः, पश्चाल्लोकेऽपि संजातः । आ० म० १ अ० १ खण्ड ।

झिंगिर–झिङ्गिर–पुं० । द्वीन्द्रियजीवभेदे, जी० १ प्रति० ।

झिंगिरड–झिङ्गिरड–पुं० । द्वीन्द्रियजीवभेद, जी० १ प्रति० ।

झिंझिय–झिञ्झित–त्रि० । वृत्तुक्काऽऽर्ते, वृ० ६ उ० ।

झिंझिरी–झिञ्झिरी–स्त्री० । वल्लीभेदे, झिंझिरीवल्लीए साखगो त्ति । " आचा० २ श्रु० १ अ० उ० । वल्लीपलाशके, वृ० १ उ० ।

झिम्म–जैह्म्य–न० । येन परवञ्चनादि येण जैह्मं क्रियासु मान्द्यमालम्बते तस्मिन्भावे, प्र० १२ श० ५ उ० ।

झियायंत–ध्यायत्–त्रि० । चिन्तयति, चिपा० १ श्रु० २ अ० ।

झियायमाण–ध्यायमान–त्रि० । जाज्वल्यमाने, दश० १० अ० । ज्वलति, प्र० ८ श० ६ उ० । सूत्र० । दह्यमाने, ज्ञा० १ श्रु० १ अ० । ध्यायमान–त्रि० । चिन्त्यमाने, दश० ५ अ० । भ० ।

झिरिंड–न० । देशी-जीर्णकूपे, दे० ना० ३ वर्ग ।

झिल्लिया–झिल्लिका–स्त्री० । त्रीन्द्रियजीवभेदे, प्रज्ञा० १ पद ।

झिल्लिरिआ–स्त्री० । देशी-चोहीतृणे, प्रज्ञके च । दे० ना० ३ वर्ग ।

झिल्ली–झिल्ली–स्त्री० । झिल्लति-चिल्ल-अच्-पृषो०-गौरा०-ङीष्। कीटभेदे, संज्ञायां कन् । आतपरुचौ, वर्त्यां च । वाच० । कन्दभेदे, प्रज्ञा० १ पद ।

झीण–क्षीण–त्रि० । क्षि-क्त । दुर्बले, क्षामे च । वाच० । अह० । क० प्र० । अल्पे, कृशे च । दे० ना० ३ वर्ग ।

झीर–स्त्री० । देशी--लज्जायाम्, दे० ना० ३ वर्ग ।

झुंझ–पुं० । देशी-तृणपाऽऽख्ये वाद्यविशेषे, दे० ना० ३ वर्ग ।

झुंझिय–झुञ्झित–त्रि० । बुभुक्षिते, झुरितके च । भ० १६ श० ४ उ० ।

झुंझुमुमयय–न० । देशी-मनोदुःखे, दे० ना० ३ वर्ग ।

झुंटण–देशी-प्रवाहे, दे० ना० ३ वर्ग ।

झुंबणग–झुम्बनक–न० । प्रालम्बे कर्णाऽऽभरणविशेषे, ज्ञा० १ श्रु० १ अ० ।

झुट्ठ–न० । देशी-अलीके, दे० ना० ३ वर्ग ।

झुण–जुगुप्स–धा० । निन्दायाम्, " जुगुप्सेझुंणदुगुच्छदुगुंछाः " ॥ ८ । ४ । ४ ॥ इति जुगुप्सतेझुंणाऽऽदेशः । 'झुणइ' प्रा० ४ पाद ।

झुणि–ध्वनि–पुं० । ध्वन्-इन् । "ध्वनिविश्वचोरुः" ॥ ८ । १ । ५२ ॥ इति आदेरस्य उत्वम् । प्रा० १ पाद । अव्यक्ते मृदङ्गाऽऽदिशब्दे, अलङ्कारोक्ते उत्तमकाव्ये च । वाच० । "झुणि कन्नडप्पइट्ठ।" प्रा० ४ पाद ।

झुत्ति–स्त्री० । देशी-छेदे, दे० ना० ३ वर्ग ।

झुल्लरी–देशी- गुल्मे, दे० ना० ३ वर्ग ।

झुसण–जोषण–न० । सेवायाम्, स्था० २ ठा० १ उ० । कल्प० । ज्ञा० ।

झुसणा–जोषणा स्त्री० । सेवायाम्, स्था० ५ ठा० १ उ० ।

झुसिय-जुषित–त्रि० । सेविते, बृ० २ उ० ।

झुसिर-शुषिर-न० । शुषेः शोषस्य दानाच्छुषिरम् । आकाशे, भ० २० श० २ उ० । रन्ध्रे, ज्ञा० १ श्रु० ८ अ० । पोले, नि० चू० १२ उ० । सच्छिद्रे, ग० २ अधि० । अन्तःसाररहिते, दश० १० अ० । असारकाये, प्रश्न० २ आश्र० द्वार । शङ्खाऽऽदौ, रा० । काहलाऽऽदौ, रा० । आ० म० । जी० । आ० चू० । वंशाऽऽदौ वाद्ये, भ० ५ श० ४ उ० । जं० । चतुर्विधे आतोद्यशब्दे, आचा० १ श्रु० २ चू० १७ अ० । " झुसिरा जमलचुल्लीसंठाणसंठिया । " उपा० २ अ० ।

अथ कतिविधं शुषिरमिति प्रज्ञापकाशमाशङ्क्याऽऽह–

शुषिरं पञ्चविधम् । तद् यथा—पुस्तकपञ्चकं, तृणपञ्चकं, दूष्यं-वस्त्रं, तत्पञ्चकं द्विविधम्-अप्रत्युपेक्षकदूष्यपञ्चकं, दुष्प्रत्युपेक्षकदूष्यपञ्चकं च । चर्मपञ्चकं चेति ।

अथ तृणपञ्चकाऽऽदिषु दोषानाह–

तणपणगम्मि वि दोसा, विराहणा होति संजमाऽऽताए ।
सेसेसु वि पणगेसुं, विराहणा संजमे होति ॥

तृणपञ्चकेऽपि दोषा आज्ञाभङ्गाऽऽदयो भवन्ति । विराधना च संयमाऽऽत्मविषया । शेषेष्वपि दूष्यपञ्चकाऽऽदिषु संयमविषया विराधना भवति ।

इदमेव भावयति–

अहिविच्चुगविसकंटग–मादीहिँ खयं व होज्ज आयाए ।
कुंथादि संजमम्मि य, जति उव्वत्तादि तति झुसिरा ॥

तृणाऽऽदिषु शुषिरत्वादहिर्वृश्चिको वा, विषकण्टको वा भवेत् । एतैः, आदिशब्दान्मर्कटिकाऽऽदिभिश्च, तत्र शयान आसीनो वा उपद्रवेत । क्षतं वा दंशाऽऽदिषु सुप्तस्य भवेत् । एषा आत्मविराधना । कुन्थुपनकाऽऽदिप्राणिव्यपरोपणं तु संयमविराधना । तृणेषु च प्रतनो (यति) यावतो वारानुद्वर्तनं परिवर्तनमाकुञ्चनं प्रसारणं वा करोति (तति) तावन्तश्चतुर्लघुकाः । बृ० ३ उ० ।

झुसिरगोलमंतिय–शुषिरगोलसंस्थित–त्रि० । अन्तःशुषिरगोलकाऽऽकारे, भ० ११ श० १० उ० ।

झूर-स्मर-धा० । भ्वा०-पर०-सक०-अनिट् । " स्मरेर्झूर-भूर-भर-भल-लढ-विम्हर-सुमर-पयर-पम्हुहाः " ॥८।४।७४॥ इति स्मरेर्भूराऽऽदेशः । 'झूरइ' । 'सरइ' । प्रा० ४ पाद । स्मरति, अस्मार्षीत् । " झूरइ त्ति " हृदयेन खिद्यते । आचा० १ श्रु० २ अ० ५ उ० । कुटिले, दे० ना० ३ वर्ग ।

झूसण–जोषण–न० । प्रीतौ, सेवायां च । औ० । स्त्रियां टाप् । स्था० २ ठा० २ उ० । आ० चू० । स० ।

झूसरिअ–त्रि० । देशी–अत्यर्थे, स्वच्छे च । दे० ना० ३ वर्ग ।

झूसिय–जुष्ट–त्रि० । सेविते, स्था० २ ठा० २ उ० । औ० । ज्ञा० ।

झूषित–त्रि० । क्वथिते, स्था० २ ठा० २ उ० । कल्प० ।

झेंडुअ–पुं० । देशी–कन्दुके, दे० ना० ३ वर्ग ।

झेय–ध्येय–न० । चिन्तनीये, आव० ४ अ० ।

झोंकलिअ–स्त्री० । देशी–झीकायाम्, दे० ना० ३ वर्ग ।

झोट्ट–स्त्री० । देशी–अर्धमहिष्याम्, दे० ना० ३ वर्ग ।

झोमप्प–न० । देशी–पणके, दे० ना० ३ वर्ग ।

झोमिअ–पुं० । देशी–व्याधे, दे० ना० ३ वर्ग ।

झोल्लिआ–झोल्लिका–स्त्री० । पुरुषद्वयोक्तिते " झोली " इति ख्याते पदार्थे, सूत्र० २ श्रु० ४ अ० ।

झोस–झोष–पुं० । यथेह तीर्थे षण्मासान्तमेव तपः, ततः षण्णां मासानामुपरि यान् मासानापन्नोऽपराधी, तेषां क्षपणमनारोपणम् । प्रस्थे चतुःसेतिकाऽतिरिक्तधान्यस्येव झाटने, स्था० ५ ठा० २ उ० । नि० चू० ।

झोसण–झोषण–न० । मार्गणे, " आलोगणं ति वा मग्गणं ति वा झोसणं ति वा एगट्ठं । " व्य० २ उ० ।

झोसमाण–झोषयत्–त्रि० । क्वथयति, आचा० १ श्रु० ५ अ० २ उ० ।


झोसिय–जुष्ट–त्रि० । सेविते, आचा० १ श्रु० ५ अ० ३ उ० ।

झोषित–त्रि० । क्वथिते, आचा० १ श्रु० ५ अ० २ उ० ।

झोसेमाण–जुषत्–त्रि० । आचरति, आचा० १ श्रु० ८ अ० १ उ० ।

झोसेहि–देशी–क्रिया । गवेषयत इत्यर्थे, बृ० ३ उ० ।

इति श्रीसौधर्मबृहत्तपागच्छीय—कलिकालसर्वज्ञकल्प—भट्टारक—
जैनश्वेताम्बराऽऽचार्यश्री १००८ श्रीमद्विजयराजेन्द्रसूरीश्वर-
विरचिते " अभिधानराजेन्द्रे " झकाराऽऽदिशब्द—
सङ्कलनं समाप्तम् ।



टकार

ट–ट–' ट ' इत्ययं वर्णो मूर्धस्थानीयः स्पर्शसंज्ञः । वाच० ।

ट–पुं० । टल– डः । वामने, पादे, निःशब्दे, वाच० । धने, सूनौ, करटे, धूमे, पाते, आवर्ते, भानुरश्मौ, ताम्रे, त्रासे, स्थिरे, अश्वे च । एका० । करङ्के, टङ्कारे च । न० । वाच० ।

टंक–टङ्क–पुं० । टंक–घञ्, अच् वा । कोपे, कोषे, खड्गे, पाषाणभेदनेऽस्त्रे, वाच० । खड्गाऽऽदीनामग्रभागे, प्रश्न० १ आश्र० द्वार । मुद्राविशेषविशेषे, पञ्चा० ४ विव० । आव० । प्रज्ञा० । छिन्नतटे कूटे, न० । भ० । एकदिशि छिन्ने पर्वते, ज्ञा० १ श्रु० १ अ० । शत्रुञ्जयपर्वते, ती० १ कल्प० । लोमपक्ष्मजनेदे च । जी० १ प्रति० । चतुर्मापकरूपे परिमाणे, नीलकपित्थे, खनित्रे, दर्पे च । पुं० । वाच० । खड्गे, छिद्रभेदे, खाते, जङ्घायाम्, खनित्रे, भित्तौ, तटे च । दे० ना० ४ वर्ग ।

टंकण–टङ्कण–पुं० । टंकि–युच् । 'सोहागा' इतिख्याते क्षारभेदे, वाच० । उत्तरापथे म्लेच्छदेशवास्तव्ये स्वनामख्याते म्लेच्छविशेषे, विशे० । आ० म० । आ० चू० । सूत्र० ।

टंका–टङ्का–स्त्री० । स्वनामख्याते तीर्थे, यत्र वीरः पूज्यते । ती० ४३ कल्प ।

टंकिअ–न० । देशी–प्रसृते, दे० ना० ४ वर्ग ।

टंबरअ–त्रि० । देशी–भारिके, दे० ना० ४ वर्ग ।

टक्कार–टङ्कार–पुं० । अङ्गुल्यादिना शिरआदौ टगिति करणे, व्य० १ उ० ।

टगर–तगर–पुं० । गृ–अच् । तस्य क्रोडस्य गरः । वाच० । " तगर–वसर–तूवरे टः " ॥ ८ । १ । २०५ ॥ इति तस्य टः । प्रा० २ पाद । स्वनामख्याते वृक्षे, वाच० ।

टमरुक–डमरुक–पुं० । " चूलिकापैशाचिके तृतीयचतुर्थयोराद्यद्वितीयौ " ॥ ८ । ४ । ३२५ ॥ इति डस्य टः । प्रा० ४ पाद । वाद्यभेदे, कापालिकयोगवाद्ये चमत्कारे च । वाच० ।

टसर–त्रसर–पुं० । त्रस–अरन् । तन्तुवायोपकरणभेदे, वाच० । " तगर–त्रसर–तूवरे टः " ८ । १ । २०५ । इति त्रस्य टः । प्रा० २ पाद ।

टा–टा–स्त्री० । घटिकायाम, भुवि, भृत्यायां, व्याहृतौ, निगरेऽपि च । एका० ।

टाल–टाल–न० । अवष्टाम्भनि फले, दश० ७ अ० । आचा० ।

टिप्पुरी–टिम्पुरी–स्त्री० । तीर्थभेदे, ती० ।

तत्कल्पं यथा–

" श्रीपार्श्वं चेश्वणाभिख्यं, ध्यात्वा श्रीवीरमप्यथ ।
कल्पं श्रीटिम्पुरीतीर्थ-स्याभिधास्ये यथाश्रुतम् ॥ १ ॥
पारेतजनपदान्त-र्भगवत्यास्तटे महानद्याः ।
नानाघनवनगहना, जयत्यसौ टिम्पुरीति पुरी । " ॥ २ ॥

अत्रैव भारते वर्षे विमलयशा नाम भूपतिरभूत् । तस्य सुमङ्गलादेव्या सह विषयसुखमनुभवतः क्रमाज्जातमपत्ययुगलम् । तत्र पुत्रः पुष्पचूलः, पुत्री पुष्पचूला । अनर्थसार्थमुत्पादयितुः पुष्पचूलस्य कृते लोकैः–" वङ्कचूल " इति नाम । महाजनोपाक्रन्देन राज्ञा रुषितेन निःसारितो नगराद्वङ्कचूलः । गच्छँश्च पतितो भीषणायामटव्यां सह निजपरिजनेन स्वस्रा च लोहवशया । तत्र च क्षुत्पिपासाऽऽर्दितो दृष्टो भिल्लैः, नीतः स्वपल्ल्यां, स्थापितश्च पूर्वपल्लीपतिपदे । पर्यपालयच्चाऽऽद्यम्, अलुण्टयद्ग्रामनगरसार्थाऽऽदीन् । अन्यदा सुस्थिताचार्यो अर्बुदाचलादष्टापदयात्रायै प्रस्थितास्तामेव सिंहगुहां नाम पल्लीं सगच्छाः प्रापुः । जातश्च वर्षाकालः । अजनि च पृथ्वी जीवाऽऽकुला । साधुभिः सहाऽऽलोच्य मार्गयित्वा वङ्कचूलाद् वसतिं स्थितास्तत्रैव सूरयः । तेन च प्रथममेव व्यवस्था कृता । मम सीमाऽन्तर्धर्मकथा न कथनीया; यतो युष्मत्कथायामर्हिसाऽऽदिको धर्मः, न चैवं मल्लोको निर्वहति । 'एवमस्तु' इति प्रतिपद्य तस्थुरुपाश्रये गुरवः । तेन चाऽऽहूय सर्वे प्रधानपुरुषा ज्ञापिताः । अहं राजपुत्रः, मत्समीपे ब्राह्मणाऽऽदय आगमिष्यन्ति, ततो नवकृजीववधो, मांसमद्याऽऽदिप्रसङ्गश्च पल्ल्या मध्ये न कर्त्तव्यः । एवं कृते तु यतीनां न भक्तपानमजुगुप्सितं कल्पत इति । तैस्तथैव कृतं यावच्चतुरो मासान् । प्राप्तो विहारसमयः । अनुज्ञापितो वङ्कचूलः सूरिभिः–" समणाणं सउणाणं " इत्यादिवाक्यैः । ततस्तैः सह चलितो वङ्कचूलः स्वसीमां प्राप । तेन विज्ञप्तं–वयं परकीयसीमायां न प्रविशाम इति । भणितः सूरिभिः–वयं सीमान्तरमुपेताः, तत्किमप्युपदिशामस्तुभ्यम् । तेनोक्तम्–यन्मांसे निर्वहति तदुपदेशेनानुगृह्यतामयं जनः । ततः सूरिनिश्चत्वारो नियमा दत्ताः । तद्यथा–अज्ञातफलानि न भोक्तव्यानि, सप्ताष्टानि पदान्यपसृत्य घातो देयः, पट्टदेवी नाभिगन्तव्या, काकमांसं च न भक्षणीयमिति । प्रतिपन्नास्तेन ते । गुरून् प्रणम्य स स्वगृहानागमत् । अन्यदा गतः सार्थस्योपरि धाट्या, शाकुनकरणान्नागतः सार्थः । त्रुटितं च तस्य पथ्यदनम् । पीडितः क्षुधा राजन्याः, दृष्टश्च तैः किंपाकतरुः फलितः, गृहीतानि फलानि, न जानाति तन्नामधेयमिति तेन न तुक्तानि । इतरैः सर्वैर्बुभुजिरे, मृताश्च तैः किंफलैः । ततश्चिन्तितं तेन–अहो! नियमानां फलं, तत एकाकयेवाऽऽगतः पल्लीं, रजन्यां प्रविष्टः स्वगृहं, दृष्टा पुष्पचूला दीपाऽऽलोकेन पुरुषधिया निजपत्न्या सह प्रसुप्ता । जातस्तस्य कोपस्तयोरुपरि । द्वावप्येतौ खड्गप्रहारेण छिनद्मीति यावदचिन्तयत्तावत् स्मृतो नियमः । ततः सप्ताष्टपदान्यपक्रम्य भूतं ददत्, खड्गकृतमुपरि खड्गेन, व्याहृतं स्वस्रा, जीवतु वङ्कचूल इति । तद्वचः श्रुत्वा लज्जितोऽत्यवगूढवत्–किमेतदिति ? । साऽपि तद्वृत्तान्तमचीकथत् । क्रमेण तस्य तद्राज्यं शासतस्तत्रैव पल्ल्यां तस्यैवाऽऽचार्यस्य शिष्यौ धर्मऋषिधर्मदत्तनामानौ कदाचिद्वर्षारात्रमवाप्यापताम् । तत्र तयोरेकः साधुस्त्रिमासक्षपणं विदधे, द्वितीयश्चतुर्मासक्षपणम् । वङ्कचूलस्तु तद्दत्तनियमानामायतिशुभफलतामवलोक्य व्याजिज्ञपत् । भदन्तौ ! मदनुक-

स्पया कमपि पेशलं धर्मोपदेशं दत्तः। ततस्ताभ्यां चैत्यविज्ञापनदेशना क्लेशनाशिनी विदधे। तेनापि शरावतिकापर्वतसमीपवर्तिन्यां तस्यामेव पल्ल्यां चर्मण्वतीसरित्तीरे कारितमुत्तरं चारु चैत्यम्। स्थापितं श्रीमन्महावीरबिम्बम्। तीर्थतया च रूढं तत्। प्रयान्ति स्म चतुर्दिग्भ्यः सङ्घाः। कालान्तरे कश्चिन्नैगमः सभार्यः सर्वथा तद्यात्रायै प्रस्थितः, प्राप्तः क्रमेण रन्तिनदीम्। नावमारूढौ च दम्पती चैत्यशिखरं व्यलोकयताम्। ततः सरजसं सौवर्णिककल्लोलके कुङ्कुमचन्दनकर्पूरं प्रक्षिप्य जलं लेप्तुमारब्धवती नैगमगृहिणी। प्रमादान्निपतितं तदन्तर्जललतलम्। तां ततो जगदे वणिजा-" अहो! इदं कल्लोलकं नैककोटिमूल्यरत्नखचितं राज्ञा ग्रहणकेऽर्पितमासीत्, ततो राज्ञः कथं त्रुटितव्यम्?। इति चिरं विषद्य घङ्कचूलस्य पल्लीपतेर्विज्ञापितं तत्। यथा-अस्य राजकीयवस्तुनो विचितिः कार्यताम्। तेनापि धीवर आदिष्टस्तल्लोधयितुम्। प्राविशदन्तर्नदम्। विचिन्वता चान्तर्जललतलं दृष्टं तेन हिरण्मयरथस्थं जीवन्तस्वामिश्रीपार्श्वनाथबिम्बं नावत्, पश्यति स्म स बिम्बस्य हृदये तत् कल्लोलकम्। धीवरेणोक्तम्-धन्यावेमौ दम्पती, यद्भगवतो वक्षसि घुसृणचन्दनविलेपनार्हं कल्लोलकं स्थितम्। ततो गृहीत्वा तदर्पितं नैगमस्य। तेनापि दत्तं तस्मै बहु द्रव्यम्। उक्तं च बिम्बस्य रूपं नाविकेन। ततो वङ्कचूलेन अक्षालुना तमेव प्रवेश्य निष्कासितं तद् बिम्बम्। कनकरथस्तु तत्रैव मुक्तः। निवेदितं हि केनापि स्वप्ने प्राग्भवता नृपतेः-यत्र क्षिप्ता सती पुष्पमाला गत्वा तिष्ठति तत्र बिम्बं शोध्यमिति। तदनुसारेण बिम्बमानीय समर्पितं राज्ञे वङ्कचूलाय। तेनापि स्थापितं श्रीवीरबिम्बस्य बहिर्मण्डपे यावत् कालं नव्यं चैत्यमस्मै कारयामीत्यभिसंधिमता। कारिते चैत्यान्तरे यावत्तत्र स्थापनार्थमुत्थापयितुमारब्धे राजकीयाः पुरुषास्तावद्बिम्बं नोत्तिष्ठति स्म। देवताधिष्ठानात्तत्रैव स्थितम्। अद्यापि तत्रैवाऽऽस्ते। धीवरेण पुनर्विज्ञप्तः पल्लीपतिः-यत्तत्र देव! मया नद्यां प्रविष्टेन बिम्बान्तरमपि दृष्टं, तदपि बहिरानयनेनौचितीमञ्चति,पूजाऽऽरूढं हि भवति। ततः पल्लीश्वरेण पृष्टा स्वपरिषत्-नोः! जानीते कोऽप्यनयोर्बिम्बयोः संविधानकं?,केन स्थलतो नद्यन्तर्जललतले न्यस्ते?। इत्याकर्ण्यैकेन पुराविदा स्थविरेण विज्ञप्तम्-देव! एकोऽस्मिन्नगरे पूर्वं नृपतिरासीत्। स च परचक्रेण समुपेयुषा सार्धं योद्धुं सकलचमूसमूहसन्नहनेन गतः। तस्याग्रमहिषी च निजं सर्वस्वमेतच्च बिम्बद्वयं कनकरथस्थं विधाय जलदुर्गमिति कृत्वा चर्मण्वत्यां कोटिम्बके प्रक्षिप्य स्थिता। चिरं युद्धवतस्तस्य कोऽपि खलः किल वार्तामानैषीत्-यदयं नृपतिस्तेन परचक्राधिपतिनृपतिना व्यापादित इति। तत् श्रुत्वा देवी तत्कोटिम्बकमाक्रम्यान्तर्जललतलं प्राक्षिपत्। एकं च तयोरानीतं पूज्यमानं चास्ति। द्वितीयमपि चेद् निःसरति तदोपक्रम्यतामिति। तदाकर्ण्य वङ्कचूलः परमार्हतचूलामणिस्तमेव धीवरं तदानयनाय नद्यां प्रावीविशत्। स च तद्बिम्बं कटीदघ्नपर्जललतलेऽवतिष्ठमानं बहिःस्थशेषाङ्गं चावलोक्य निष्कासनोपायाननेकानकार्षीत्। न च तन्निर्गतमिति दैवतप्रभावमाकलय्य समागत्य च विज्ञापयामीशाय न्यवेदयत् तत्स्वरूपम्। अद्यापि तत्किल तथैवाऽऽस्ते। श्रूयतेऽद्यापि-केनापि धीवरस्थविरेण नौकायाः स्तम्भे जाते तत्कारणं विचिन्वता तस्य हिरण्मयरथस्य कीलिका लब्धा। तां कनकमयीं दृष्ट्वा क्षुब्धेन तेन व्यचिन्ति-यदिमं रथं क्रमात्सर्वं गृहीत्वा ऋद्धिमान् भविष्यामीति। ततश्च रात्रौ निद्रां न लेभे। उक्तश्च केनाप्यदृष्टपुरुषेण-यदिमां तत्रैव विमुच्य स्थेयाः, नो चेत्सद्य एव त्वां हनिष्यामीति। तेन भयाऽऽतेन तत्रैव मुक्ता युगकीलिका इत्यादि। किं न संजायते दैवताधिष्ठितेषु पदार्थेषु?। श्रूयते च संप्रति काले कश्चिन्म्लेच्छः पाषाणपाणिः श्रीपार्श्वनाथप्रतिमां नक्तमनुमुपस्थितः स्तम्भितबाहुर्जातः, महति पूजाविधौ कृते सज्जतामापन्न इति। श्रीवीरबिम्बं महत्, तदपेक्षया लघीयस्तरं श्रीपार्श्वनाथबिम्बमिति महावीरस्यानेकरूपोऽयं देव इति भेदाचेक्षण इत्यास्यां प्राचीकशत्। श्रीमच्चेल्लणदेवस्य महीयस्तममाहात्म्यनिधेः पुरः तास्यां महर्षिभ्यां सुवर्णमुकुटमञ्जाऽऽम्नायः समर्पितः प्रकाशितश्च भव्येभ्यः। सा च सिंहगुहापल्ली कालक्रमात् ' टिम्पुरी ' इत्याख्यया प्रसिद्धा नगरी संजाता। अद्यापि स भगवान् श्रीमहावीरः सचेल्लणपार्श्वनाथः सकलसङ्घेन तस्यामेव पुर्यां यात्रोत्सवैराराध्यते इति। अन्यदा वङ्कचूल उज्जयिन्यां आत्मपातनाय चौर्यवृत्त्या कस्यापि श्रेष्ठिनः सद्मनि गतः, कोलाहलं श्रुत्वा ततः चलितः। ततो देवदत्तायां गणिकायां गणिकयमाणिक्यभूतायां गृहं प्राविशत्। दृष्टा सा कुट्टिनी सह प्रसुप्ता। ततो निःसृत्य गतः पुरः श्रेष्ठिनो वेश्म। तत्रैकविंशोपस्को लेख्यके लुठतीति पुरुषवागभिर्निर्भर्त्स्य निःसारितो गेहात् पुत्रः श्रेष्ठिना। विरराम च यामिनी। यावद्राजकुलं यामीत्यचिन्तयत् तावद्दुर्लक्षगाम धामनिधिः। पल्लीशश्च निःसृत्य नगराकोधां गृहीत्वा तरुतले दिनं नीत्वा पुना रात्रावागाद्राजकुलम्। प्राक्प्रागाराद् बहिर्गोधापुच्छे विलग्य प्राविशत्कोशम्। दृष्टो राजाग्रमहिष्या। रुष्टया पृष्टश्च-कस्त्वमिति?। तेनोचे-चौर इति। तयोक्तम्-मा भैषीः,मया सह सङ्गमं कुरु। सोऽवादीत्-का त्वम्?। साऽप्यूचे-अग्रमहिष्यहमिति। चौरोऽवादीद्-यद्येवं तर्हि ममाम्बा भवसि,अतो यामि?। इति चौरेण निश्चिते, तया स्वाङ्गं नखैर्विदार्य पूत्कृतिपूर्वमाहूता रक्षकाः। गृहीतस्तैः। राज्ञा चानुनयार्थमागतेन तद् दृष्टम्। राज्ञोक्तास्ते-पौरुष्यामेनं गाढं कुर्वीध्वमिति तै उक्षितः। प्रातः पृष्टः क्षितिभृता। तेनाप्युक्तम्-देव! चौर्यार्थाहं प्रविष्टः पश्चादेव ज्ञातोऽगारे देव्या दृष्टोऽस्मि। यावदन्यन्न कथयति तावत्तुष्टो विदितवेद्यो नरेन्द्रः, स्वीकृतः पुत्रतया। स्थापितश्च सामन्तपदे। देवी खिद्यमाना रक्षिता वङ्कचूलेन। अहो! नियमानां शुभफलमित्यनवरतमयमध्यासीत्। प्रेषितश्चान्यदा राज्ञा कामरूपभूपसाधनार्थम्। घातैर्जर्जरितो विजित्य तमगात् स्वस्थानम्। श्लाघिताश्च राज्ञा वैद्याः, यावद् गूढोऽपि घातव्रणो विकशति। तैरुक्तम्-देव! काकमांसेन शोभनो व्रजत्ययम्। तस्य च जिनदासश्रावकेण सार्धं प्रागेव मैत्र्यमासीत्। ततस्तदानयनाय प्रेषितः पुरुषः पुरुषाधिपतिना, येन तद्गत्वा काकमांसं भक्षयतीति। तदाहृतश्च जिनदासोऽवन्तीमागच्छन्नुभे देव्यौ ददर्शावङ्कीत्। तेन पृष्टे—किं हृदयैः?। ताश्चामुक्तम्-अस्माकं भर्ता सौधर्मोच्युतः, अतो राजपुत्रं वङ्कचूलं प्रार्थयावहे, त्वयि गते स मांसं भक्षयिता, तेन गन्ता दुर्गतिम, तेन हृदयं। तेनोक्तम्-तथा करिष्ये,यथा तन्न भक्षयिता। गतश्च तत्र राज्ञोपरोधाद्वङ्कचूलमवोचत्-गृहाण बलिभुक्पिशितम्, यद् भुक्तः सन् प्रायश्चित्तं चरेः। वङ्कचूलोऽवोचत्-जानासि त्वं यदाचार्याण्येकान्तं प्रायश्चित्तं प्राहुः, ततः प्रागेव तदनाचरणं श्रेय इति; "प्रक्षालनाद्धि पङ्कस्य,दूरादस्पर्शनं वरम्।" इति वाक्यात्। निषिद्धो नृपतिः। विशेषप्रतिपन्नव्रतनिवहश्चाच्युतकल्पमगमत्। चलमानेन जिनदासेन ते देव्यौ तथैव हृदयशून्ये दृष्ट्वा प्रो-

कम्-किमिति वदिष्यः ? ; न तावत्स मांसं ग्राहितः । तत्स्याम-भिधेन-स ग्राधिकाराधनवशाद्च्युतं प्राप्तः ।

" चेल्लणापार्श्वनाथस्य, कल्पमेतं यथाश्रुतम् ।
किञ्चिद्विरचयांचक्रुः, श्रीजिनप्रभसूरयः " ॥ १ ॥

इति श्रीचेल्लणापार्श्वनाथस्य कल्पः ॥

टिम्पुरीस्तवस्त्वयम्-

" कनकरत्नविविधैर्नगैरुपलभच्छायैरभिभ्राजिता,
श्रीवीरप्रभुपार्श्वसुव्रतयुगाऽऽदीशाऽऽदिबिम्बैर्युता ।
पल्ली पूतलविश्रुता नियमिनः श्रीवङ्कचूलस्य या,
सा भूत्या चिरमद्भुतां कलयतु प्रौढिं पुरी टिम्पुरी ॥१॥
व्योमचुम्बिशिखरं मनोहरं, रन्तिदेवतटिनीतटस्थितम् ।
अत्र चैत्यमवलोक्य यात्रिकाः, शैत्यमाशु दधति स्वचक्षुषोः२,
मूलनायक इहान्त्यजिनेन्द्र-श्चारुतेषघटितोच्चमूर्त्तिः ।
दक्षिणे जयति चेल्लणपार्श्वो, जात्युदक्तनदपरः फणिकेतुः ॥३॥
एकत आदिजिनोऽत्र जिनोऽन्यो-ऽन्यत्र पुनर्मुनिसुव्रतनाथः ।
एवमनेकजिनेश्वरमूर्ति-स्फूर्तिमदत्र चकास्ति जिनौकः ॥४॥

अस्माम्बिकाद्वारसमीपवर्तिनौ,
श्रीकेशपालौ भुजषट्कभास्वरौ ।
सर्वज्ञपादाम्बुजसेवनालिनौ,
सङ्घस्य विघ्नौघमपोहतः क्षणात् ॥ ५ ॥
यात्रोत्सवानिद्दसिते सहसो दशम्या-
मालोक्य लोकसमवायविधीयमानान् ।
संभावयन्ति भविकाः कलिकालगेहे,
प्राघूर्णकं कृतयुगं ध्रुवमभ्युपेतम् ॥ ६ ॥
अमरमहितमेतत्तीर्थमाराध्य भक्त्या,
फलितसकलकामाः, सर्वनीतीर्जयन्ति ।
बहुलपरिमलाऽऽढ्यं चन्दनं प्राप्य यद्वा,
क इह सहतु तापव्यापमाश्लिष्टनासम् ?॥ ७ ॥
शशधरहर्षाकाङ्क्षोमिते १२९१ शकवत्सरे,
महमणिमहे सङ्घान्वीता उपेत्य पुरीमिमाम् ।
मुदितमनसस्तीर्थस्यास्य प्रभावमहोदधि-
रिति विरचयांचक्रुः स्तोत्रं जिनप्रभसूरयः " ॥ ८ ॥

टिम्पुरीस्तोत्रम् । तं० ४३ कल्प ।

टिंबरु–पुं० । देशी–स्थविरे, दे० ना० ४ वर्ग ।

टिक्क–न० । देशी–तिलके, दे० ना० ४ वर्ग ।

टिंघर–पुं० । देशी–स्थविरे, दे० ना० ४ वर्ग ।

टिट्टिभ–टिट्टिह–पुं० । ' टिट्टि ' इत्यव्यक्तं भाषते । (टिट्टिर) पक्षिभेदे, स्वार्थे कन्, अत्रैवार्थे, वाच० । स्त्रियां ङीप् । आ० म० १ अ० १ खण्ड ।

टिट्टियावण–टिट्टियापन–न० । शब्दायमानकरणे, " मयूरी अंडयं अभिक्खणं अभिक्खणं नो उव्वट्टेइ० जाव नो टिट्टियावेइ ।" ज्ञा० १ श्रु० ४ अ० स्वकीयकर्णसमीपे धृत्वा टिट्टियावेति-शब्दायमानं करोति । ज्ञा० १ श्रु० ४ अ० । बृ० ।

टिप्पी–स्त्री० । देशी–तिलके, दे० ना० ४ वर्ग ।

टिरिटिल्ल–भ्रम–धा० । चलने, स्वा०-पर०-अक०-सेट् । वाच० ।

"भ्रमेष्टिरिटिल्ल-दुण्डुल्ल-ढण्ढल्ल-चक्रम्म-भम्मड-भमड-मम्माड-तलअंट-फंट-फुंप-चुम-गुम-फुम-फुस-दुम-दुस-परी-पराः" ८।४। १६१॥ इति टिरिटिल्लाऽऽदेशः। 'टिरिटिल्लइ', 'भमइ' । प्रा०४ पाद ।

टिविमिक्क–मण्ड–धा० । भूषायाम्, चुरा०-उभ०-पक्षे-स्वा०-पर०-सक०-सेट्-इदित् । वाच० । " मण्डेश्चिअ्र-चिञ्चिअ-चिञ्चिल्ल-रीअ-टिविमिक्काः "८।४।११५। इति टिविमिक्काऽऽदेशः । 'टिविमिक्कइ' । प्रा० ४ पाद ।

टुंट–पुं० । देशी–छिन्नकरे, दे० ना० ४ वर्ग ।

टुवर–तुवर–पुं० । तरति हिनस्ति रोगानसौ । तॄ-क्वरच् । नि०-गुणाभावः । वाच० । 'तगर-वसर-तुवरे टः' ॥ ८ । १ ।२०५॥ इति तस्य टः । प्रा० १ पाद । धान्यभेदे, कषायरसे च, तद्वति त्रि० । आढकयाम्, सौराष्ट्रमृत्तिकायां च । स्त्री० । पित्वात् ङीष् । स्वार्थे कन् । तुवरिकाऽप्यत्रैव । वाच० ।

टेंटा–स्त्री० । देशी–द्यूतस्थाने, दे० ना० ४ वर्ग ।

टेक्कर–न० । देशी–स्थले, दे० ना० ४ वर्ग ।

टोक्कण–न० । देशी–मद्यपरिणामजातभेदे, दे० ना० ४ वर्ग ।

टोक्कल–टोकल–पुं० । एकधान्यनिष्पन्ने व्यञ्जनभेदे, एकधान्यनिष्पन्नान्यपि पूलिकाम्यूलरोटकमण्डकपर्पटकघूघरीटोक्कलचूलीवाटकणिक्काऽऽदीनि पृथक् पृथक् नामाऽऽस्वादवस्त्वेन पृथक् पृथक् द्रव्याणि । ध० २ अधि० ।

टोप्परिया–टोप्परिका–स्त्री० । " दवरी " इति ख्याते जलाऽऽदिनिक्षेपणार्थे वस्तुनि, आचा० २ श्रु० १ अ० ७ उ० । ग० । अन्योपकरणेषु टोप्पटिकाऽपि गृह्यते ।

टोल्लेव–देशी–मधूके, दे० ना० ४ वर्ग ।

टोल्ल–पुं० । देशी–शलभे, दे० ना० ४ वर्ग ।

टोलगइ–टोलगति–पुं० । पञ्चमे वन्दनदोषे, " टोलो व्व उ किंहुंतो, ओसक्कमिसक्कणं दुहओ।" बृ० ३ उ० । प्रव० । पञ्चमं दोषमाह- अवष्वष्कणं पश्चाद्गमनम्, अनिष्वष्कणमग्निमुखगमनं. तेऽवष्वष्कणाभिष्वष्कणे टोलवत्ति ऊर्ध्वदुत्प्लवमानः करोति यत्र तट्टोलगतिवन्दनकमित्यर्थः । प्रव० २ द्वार । आव० । बृ० । उप्राऽऽदिसमप्रचारे च । भ० ७ श० ६ उ० । जं० ।

टोलागइ–टोलाकृति–त्रि० । प्रशस्ताऽऽकारे, भ० ७ श० ६ उ० ।

इति श्रीसौधर्मबृहत्तपागच्छीय–कलिकालसर्वज्ञकल्प–जट्टारक–
जैनश्वेताम्बराऽऽचार्यश्री १००८ श्रीमद्विजयराजेन्द्रसूरीश्वर-
विरचिते " अभिधानराजेन्द्रे " टकाराऽऽदिशब्द–
सङ्कलनं समाप्तम् ।



ठ–ट्ठ–' ठ ' इत्ययं वर्णो मूर्द्धस्थानीयः स्पर्शसंज्ञकः । वाच० ।

ठ–पुं० । महेशमहामन्त्रे, मन्त्रिणि, नृपे, वामदेवे, आसने, शयने, आकाशे, जलाऽऽशये, घटे, चक्रे, मुद्रायाम्, कुण्डले, भगवत्कक्षे, बृहद्ध्याने, साहसे, स्तम्भे, चन्द्रमण्डले च । न० । शवे, शून्ये, मनोज्ञे, कठिने च । त्रि० । एका० ।

ठइअ–पुं० । देशी-उत्किरते, अवकाशे, दे० ना० ४ वर्ग ।

ठक्कार–ठक्कार–पुं० । शङ्करे, विषये, दरे, भासे, शङ्खनिनादे, क्षये, रौद्ररसे, ध्वनौ च । एका० ।

ठक्का–टक्का–स्त्री० । " चूलिकापैशाचिके तृतीयचतुर्थयोराद्यद्वितीयौ " ॥ ८ । ४ । ३२५ ॥ इति टस्य ठः । प्रा० ४ पाद । स्वनामख्याते वाद्यभेदे, वाच० ।

ठक्कुर–ठक्कुर–पुं० । ग्रामाऽऽदिप्रभौ, विशे० । आ० म० ।

ठट्ठारत्त–ठट्टारत्व–न० । शुल्बनागवङ्गकांस्यपित्तलाऽऽदीनां करणघटनाऽऽदिना जीविकायाम्, ध० २ अधि० ।

ठड्ढ–स्तब्ध–त्रि० । "स्तब्धे ठ-ढौ" ॥ ८ । २ । ३६ ॥ इति स्तब्धे संयुक्तयोर्यथाक्रमं ठढौ भवतः । जमे, प्रा० २ पाद ।

ठप्प–स्थाप्य–न० । असंव्यवहार्ये, अनु० । भ० ।

ठरिअ–न० । देशी-गौरविते, ऊर्ध्वस्थिते, दे० ना० ४ वर्ग ।

ठल्ल–पुं० । देशी-निर्धने, दे० ना० ४ वर्ग ।

ठवणपुरिस–स्थापनापुरुष–पुं० । पुरुषप्रतिमाऽऽदौ, स्था० ३ ठा० १ उ० ।

ठवणप्पमाण–स्थापनाप्रमाण–न० । आकारविशेषवद्वस्तुप्रतिपादके नामनि, अनु० ।

से किं तं ठवणप्पमाणे ?। ठवणप्पमाणे सत्तविहे पन्नत्ते । तं जहा–

"णक्खत्तादेवय–कुले, पासंड–गणे अ जीवियाहेऊ ।
आभिप्पाइयनामे, ठवणानामं तु सत्तविहं" ॥ १ ॥

अथ किं तत् स्थापनाप्रमाणम् ?। स्थापनाप्रमाणं सप्तविधमित्यादि । "णक्खत्तगंदा ।" इयमत्र हृदयम्–नक्षत्रदेवताकुलपाखण्डगणाऽऽदीनि वस्तून्याश्रित्य यस्य किञ्चिन्नामस्थापनं क्रियते, सेह स्थापना गृह्यते । न पुनर्यत्तु तदर्थवियुक्तं तदभिप्रायेण, यच्च तत्करणीत्यादिना पूर्वं परिभाषितस्वरूपा सैव प्रमाणं तेन हेतुभूतेन नाम सप्तविधं भवति । अनु० ।

ठवणसव्व–स्थापनासर्व–न० । स्थापनया सर्वमेतदिति कल्पनया अक्षाऽऽदिरूढ्यं सर्वं, स्थापनैव वा अक्षाऽऽदिद्रव्यरूपा सर्वं स्थापनासर्वम् । स्था० १० ठा० ।

ठवणा–स्थापना–स्त्री० । स्थाप्यतेऽमुकोऽयमित्यभिप्रायेण क्रियते निर्वर्त्यत इति स्थापना । काष्ठकर्माऽऽदिगताऽक्षवराटकवत् सद्भावादिरूपे, अनु० । स्था० । लेप्याऽऽदिकर्मणि, स्था० २ ठा० ४ उ० । सर्वस्य वस्तुनो निजे निजे आकारे, विशे० । आकारविशेषे, आ० म० १ अ० १ खण्ड । लेप्याऽऽदिकर्म-अर्हदादिविकल्पेन स्थाप्यते । स्था० १० ठा० । सद्भावासद्भावरूपप्रतिकृतौ, आचा० १ श्रु० २ अ० १ उ० । पत्राऽऽदिलिखिते आकारे, नयो० । भा० म० । स्था० । तच्चित्रं स्थापनेति-तस्य घटस्य चित्रं पत्राऽऽदिलिखित आकारः स्थापना ।

तल्लक्षणं भेदं स्मरन्ति-

"यत्तु तदर्थवियुक्तं, तदभिप्रायेण यच्च तत्करणिः ।
लेप्याऽऽदिकर्म तत् स्था-पनेति क्रियतेऽल्पकालं च" ॥१॥

एतदर्थोऽयम्-यद्वस्तु, तदर्थवियुक्तं भावेन्द्रार्थरहितं, तदभिप्रायेण तदबुद्ध्या, करणिराकृतिः, यच्चेन्द्राऽऽद्याकृतिलेप्याऽऽदिकर्म क्रियते, चशब्दादाकृतिशून्यं चाक्षनिक्षेपाऽऽदि, तत् स्थापनेति; तच्चाल्पकालमित्वरमित्यर्थः । चशब्दाद् यावद्द्रव्यभावि च मृद्द्रव्यमिति, घटकारणीभूता मृदेव द्रव्यघट इत्यर्थः। नयो० । ननु सादृश्यसंबन्धस्य स्थापना निबन्धनीभूतस्यैवंविधस्यैवाऽसद्भावस्थापनोच्छेदप्रसङ्गोऽनिष्प्रायसंबन्धस्यापि तन्नियामकत्वे चाऽन्यापि तस्य सुवचनत्वादिति प्रसङ्गात्तदवस्थपक्षेत्याशङ्कायामाह–

अतिप्रसङ्गो नैवं चा–ऽनिष्प्रायाऽऽकारयोगतः ।
यच्छ्रुतोक्तमनुल्लङ्घ्य, स्थापना नाम चान्यतः ॥ ९९ ॥

(अतिप्रसङ्ग इति) एवमुक्तासद्भकारप्रकारेण च, अतिप्रसङ्गो न भवति, यत् श्रुतोक्तं सिद्धान्तवचनमनुल्लङ्घ्य, असाऽऽकारेवंविधानिष्प्रायसंबन्धं, प्रतिमादाविव चाऽऽकारसंबन्धं पुरस्कृत्य, स्थापनाऽऽङ्क्रियते, अन्यतोऽन्यस्थले च, नाम निक्षेप इति कथमतिप्रसङ्गः ?। तथा च-सूत्रबोधितबलवदनिष्टाननुबन्धीष्टसाधनताकृतकृतगुणस्मृतिजनकसंस्कारोद्बोधकामिप्रायाऽऽकारान्यतरसंबन्धवत्त्वं तत्स्थापनात्वमिति फलितं भवति ॥ ९९ ॥

उक्तविशेषप्रयोजनमेवोपदर्शयितुमाह–

अत एव न धीरर्ह–त्प्रतिमायामिवार्हतः ।
भावसाधोः स्थापनायाः, द्रव्यलिङ्गिनि कीर्त्तिता ॥ १०० ॥

" अत एव " इत्यादि । अत एवोक्तविशेषणनिवेशाद्धेतोर्यद्वत्, अर्हत्प्रतिमायामर्हत इव, द्रव्यलिङ्गिनि प्रकटप्रतिषेधिपार्श्वस्थाऽऽदौ, स्थापनायाः, भावसाधोः, धीः, सिद्धान्ते, न कीर्त्तिता ॥ १०० ॥

कुतः ?, इत्याह–

सा हि स्थाप्यस्मृतिद्वारा, भावाऽऽदरविधायिनी ।
न चोत्कटतरे दोषे, स्थाप्यस्थापकभावना ॥ १०१ ॥

सा हि स्थापनाधीर्हि, स्थाप्यस्मृतिद्वारा " एकसंबन्धिज्ञाने अपरसंबन्धिस्मृतिः" इति नियमविधया स्थाप्यस्मृतिव्यापारेण, भावाऽऽदरस्यस्थाप्यगतगुणप्रणिधानोद्रेकस्य, तज्जनितनिर्जराऽतिशयस्य वा, विधायिनी । न च स्थापनाविषये उत्कटतरे दोषे, प्रतिसन्धीयमाने इति शेषः । स्थाप्यस्थापकभावना, फल–

वतीति शेषः । तथा च द्रव्यलिङ्गिदर्शनादपि न भावसाधुगुणाः । ननु स्मृतिरेव तन्निमानकप्राधिकसादृश्यस्य रजोहरणगोच्छकपतद्ग्रहाऽऽदिरूपस्य तस्याबाधितत्वात्, किं तत्कटदोषवत्त्वेन प्रतिसंधीयमानस्य सा दृश्या । वन्दनकनिर्युक्तौ-

" तित्थयरगुणा पडिमा-सु णऽत्थि णिस्संसयं विआणंतो ।
तित्थयरु त्ति णमंतो, सो पावइ णिज्जरं विउलं ॥५८॥
लिंगं जिणपण्णत्तं, एव णमंतस्स णिज्जरा विउला ।
जइ वि गुणविप्पहीणं, वंदइ अज्झप्पसोहीए ॥ ५९ ॥ "

(अनयोरर्थः ' किइकम्म ' शब्दे तृतीयभागे ५१६ पृष्ठे द्रव्यः) इति गाथाभ्यां सादृश्यसंबन्धमात्रेणार्हत्प्रतिमाया अर्हतो द्रव्यलिङ्गिनो भावसाधोस्तटस्थेन स्मृतेरुत्थापकतयाऽध्यात्मशुद्धिप्रभवनिर्जराऽङ्गत्वेन वन्दनीयत्वं यदाहिमं पूर्वपक्षतया । तन्न । आचार्यैरेकत्रोक्तदोषवत्त्वेनोपस्थितसमानसंविसंवेद्यतालक्ष्यगुणवत्सादृश्यधीस्तकृतदोषानुमतिरूपतया गुणवद्रूपकर्पण्यजकत्वेन तन्निदानरूपत्वेन बलवदनिष्टानुबन्धावहा, अन्यत्र चोक्तकारणाभावान्न तथात्वमिति वैषम्यमुद्भावयित्वा समाधानं कृतम् ।

" संता तित्थयरगुणा, तित्थयरे तेसिमं तु अज्झप्पं ।
ण य सावज्जा किरिया, इयरेसु धुवा समणुमण्णा" ॥६०॥ इति ।

अस्या अर्थः—सन्तो विद्यमानाः शोभना वा तीर्थकरत्वेन प्रतीयमानस्य गुणाः, तीर्थकरेऽर्हति, इयं च प्रतिमा, तेषां नमस्कुर्वताम्, इदमध्यात्मं-समापत्त्यादिफलकानुभूयमानतीर्थकरगुणस्मृताऽऽलम्बनम् । यद्वा-तेषां गुणानाम्, इदमध्यात्मयमध्यारोपविषयः, तटस्थेन स्मृतौ योगजीवानुसमापत्त्यासिद्धेः । न च तासु प्रतिमासु सावद्या सपापा, क्रिया, इतरेषु पार्श्वस्थाऽऽदिषु, ध्रुवा, सेति योज्यते । ततः समनुज्ञा सावद्यक्रियायुक्तपार्श्वस्थाऽऽदिप्रणमनाद्, ध्रुवेति योगः । एवं च सति प्रतिमायामुभयक्रियाभावप्रसङ्गेन उभयफलाभावस्तदालम्बनकस्थाप्यगुणसंकल्परूपमनःशुद्धेर्बलवत्तयैव निराक्रियमाणः पार्श्वस्थाऽऽदिवन्दनेऽपि मनःशुद्धेर्बलवत्तयैव दोषाभावं गुणोदयं च साधयितुं कथं न प्रगल्भते ?, इत्याशङ्क्याशेष उभयविकल एव आकारमात्रतुल्ये कतिपयगुणान्विते चोत्कृष्टगुणाध्यारोपशुभसंकल्परूपतामात्रस्कन्दनिर्जराहेतुः । अन्यत्र त्वसावशुभसंकल्परूपत्वेन निरवद्यकर्मानुभावबद्धिशेष्यकत्वस्य गौरवेणातन्त्रत्वात् सावद्यकर्मबद्धिशेष्यकत्वेनैव विपर्यासलक्षणसमन्वयेन वाऽनन्तक्लेशाऽऽवह इत्यभिप्रायेणाऽऽचार्यैस्तत्रैव निराकृतः ।

तथाहि-

" जह सावज्जा किरिया, अत्थि य पडिमासु एवमियरा वि ।
तयभावे णत्थि फलं, अह होइ अहेउओ होइ ॥ ६१ ॥
कामं उभयाभावो, तह वि फलं अत्थि भणविसुद्धीए ।
तीइ पुण भणविसुद्धी-इ कारणं हुंति पडिमाओ ॥ ६२ ॥
जइ वि अ पडिमा उ जहा, मुणिगुणसंकप्पकारणं लिंगं ।
उभयमवि अत्थि लिंगे, ण य पडिमासूनयं अत्थि ॥ ६३ ॥
णियमा जिणेसु उ गुणा, पडिमाओ दिस्स जे मणे कुणइ ।
अगुणे व वियाणंतो, कं नमउ मणे गुणं काउं ? ॥ ६४ ॥
जह चेइयगलिंगं, जाणंतस्स णमओ धुवं दोसो ।
णिरुद्धसमिअ णाऊ-ण वंदमाणे धुवो दोसो" । ६५ । इति । १०१ ।

(आसां गाथानामर्थः ' किइकम्म ' शब्दे तृतीयभागे ५१७ पृष्ठे गतः)

नन्वेवं स्थापनास्थले सावद्यकर्मानुभावबद्धिशेष्यगुणसंकल्पत्वे भावस्य निर्जराहेतुत्वमित्यागतम् । तथायुक्तम् । सावद्येन निरवद्यकर्मबद्धिशेष्यकत्वेनैव तद्धेतुत्वौचित्यात्तत्कृणगौरवापेक्षया कारणभावगौरवस्य महादोषत्वात् । किञ्च-स्थापनास्थलीयत्वावे जात्युपाध्यन्यतरकृतातिरिक्तविशेषाभावे यथोक्तरूपेणैव हेतुत्वे मायाच्छादितदोषे बालबबिहाराऽऽदिना गुरुताप्रतिसंधानदशायां वन्द्यमाने साधौ कथं निर्जरोत्पत्तिः संगच्छते ? । न च तत्र निरवद्यकर्मयुक्ततयाऽगृहीतासंसर्गकगुणसंकल्पेन पृथगेव निर्जराहेतुत्वाद्दोषः ; तथा सति तुल्यन्यायतया सावद्यकर्मयुक्तत्वेनागृहीतासंसर्गकगुणसंकल्पत्वेन बन्धहेतुतायाः एव युक्तत्वात्, प्रतिमावन्दनादुभयान्नाघाऽऽपत्तेः । न च सत्त्वशुद्धिविधया कारणतायामयमेव प्रकारः, अवञ्चकयोगविधया कारणतायां तु वास्तवविषयतायाः एव निवेशान्न दोष इति वाच्यम् । सत्त्वशुद्धिविधयैव प्रतिमावन्दनान्निर्जरोत्पत्तेः, " तह वि फलं अत्थि भणविसुद्धीए । " इत्यनेन प्रतिपादनात् । किं च--गुणदोषोभयवैकल्यमात्रेण प्रतिमायामर्हद्द्रव्यवसायस्य निर्जराऽङ्गत्वे प्रतिष्ठितापतिष्ठितयोरविशेषाऽऽपत्तेः । न च-

" सयकारियाइ एसा, नायइ तवणाइ बहुफला केइ ।
गुरुकारियाइ अन्ने, विसिट्ठविहिकारियाए य ॥ १ ॥
थंडिल्ले वि य एसा, भणियगणाए पसत्थगा चेव ।
आयासगोमयाई-हि एत्थमुल्लेवणाइ हियं ॥ २ ॥
तवयारंगा इह सो-वओगसाहारणाण फला ।
किं च विसेसेण तओ, सव्वे वि य ते विभइअव्वा " ॥३॥

इतिपूजाविधिविंशिकावचनपर्यालोचनायामिष्टप्रदेति वाच्यम् । तत्र प्रतिष्ठितत्वव्याप्यधर्मपुरस्कारेणैव मानसप्रतिष्ठापुरस्कारेण प्रवृत्तानां पूजाविधिकल्पानां विधिप्रतिष्ठितपूजाजन्यताऽवच्छेदकजातिव्याप्यजात्यवच्छेदेन, मानसाभिप्रायशोधितविधिप्रतिष्ठितपूजाजन्यतावच्छेदकजात्यवच्छेदेन च फलभेदाऽऽनुभेदो युक्त इत्यभिप्रायेण प्रवृत्तावपि प्रतिष्ठासामान्यस्याकिञ्चित्करत्वे तात्पर्याभावात्, अन्यथा प्रतिष्ठाविधिवैयर्थ्यप्रसङ्गात् ।

ततः प्रतिष्ठाऽऽदिविधिजनितः प्रतिमागतोऽतिशयविशेषः काश्चित्स्थापनानिक्षेपो निह्नयनामित्याशङ्क्यायाम्-" संता तित्थयरगुणा " । (आव० ६० गाथा) इत्यादिगाथामेव व्याख्यानान्तरमूचितं पक्षान्तरं परिष्कुर्वन्नाह-

यद्वा प्रतिष्ठाविधिना, स्वाऽऽत्मन्येव पराऽऽत्मनः ।
स्थापना स्यात्समापत्ति-र्बिम्बे सा चोपचारतः ॥ १०२ ॥

यद्वा पक्षान्तरे, प्रतिष्ठाविधिना प्रतिष्ठाकारयितुः स्वाऽऽत्मन्येव, पराऽऽत्मनः परमगुणवतः त्रिभुवनभर्तुः ध्यानतारतम्ये च तात्स्थ्यतदञ्जनत्वस्वरूपा समापत्तिरेव स्थापना स्यात्, निश्चयतः सर्वक्रियाणां तत्फलानां च उद्देश्यसंबन्धित्वेन व्यवह्रियमाणानामपि स्वात्मसंबन्धित्वस्यैव भाष्याऽऽदौ व्यवस्थापनात् । पराऽऽत्मन इत्युपलक्षणम् । स्वभावस्याऽऽहित्यादिप्रतिष्ठया कारयितरि स्वभाव एव स्थाप्यते । परम्परया तु तन्मूलप्रमाणानुपलक्ष्य विषयवचनाऽऽद्यप्रवर्तकत्वसंबन्धस्मारितः । तत्र च खलु प्रतिष्ठा निजभावस्य एव, देवतोद्देशात् स्वात्मन्येव, परं यत् स्थापनामिह वचननीत्या ऊचे-" बीजमिदं परमं यत्, परमाया एव

समरसाऽऽपत्तेः । स्थाप्येन तदपि मुख्या, इत्तैवेति विज्ञेया ॥ १ ॥" इति । नन्वेवं निश्चयतः स्थापनाया आत्मगतायाः प्रामौ प्रतिमायां तद्व्यवहारः कथम् ?। अत आह-बिम्बे च, सा स्थापना उपचारतः, स्वाऽऽत्मनि स्थापितस्य भावस्याऽऽलम्बनतया समापत्तिविषयीक्रियमाणस्य परमाऽऽत्मनः साकारयोगमुद्राऽनुकारितया वा लक्षणया एव इत्यर्थः ॥ १०२ ॥

नन्वेवं यजमानगताद्दष्टमेव प्रतिष्ठाफलं भवद्भिरुपपादितम्, तावता वन्दकपूजकाऽऽदीनां का सिद्धिः?। सा हि तदा स्यात्, यदि प्रतिष्ठाऽऽदितश्चाष्टकालाऽऽदिस्पर्शनाद्यः पूजाफलप्रयोजकः कश्चिदतिशयोऽभ्युपगतः स्यात्, प्रतिष्ठितप्रतिमावन्दनपूजननत्यादिना फलविशेषहेतुत्वस्य इत्थमेव वक्तुं शक्यत्वात् । न च यजमानगताद्दष्टं तदाहितं, तथा चाष्टकाऽऽदिस्पर्शेन व्यधिकरणेन तन्नाशयोगाद् यजमानस्य तदद्दष्टक्षये पुण्यत्वानापत्तेः। एतेन संबन्धविशेषेण यजमानगताद्दष्टस्य प्रतिमागतत्वसमर्थनमपि प्रत्याख्यातम् ।

यत्तु-प्रतिष्ठाविधेर्देवतासंविधानस्य स्वाभेदस्वीयत्वाऽऽदिज्ञानजदाहितसंस्काररूपस्य उत्पादात् फलोत्पत्तिः, चाण्डालाऽऽदिस्पर्शे च तदभावात् फलाभाव इति कस्यचिद् मतम् । तदु मुक्तिप्रतिष्ठितदेवताया अनिमानाज्ञावात्; प्रतिष्ठया तदुपकरणस्य अशक्यक्रियत्वात् चाऽऽचार्यैरेव दूषितम् । तदुक्तम्-" मुक्त्यादौ तत्त्वेन,प्रतिष्ठिताया न देवतायास्तु । स्थाप्ये न च मुख्ये तत्, तदधिष्ठानाऽऽद्यभावेन" ।१। इत्यादेर्न च तस्या उपकारः कश्चिदत्र मुख्य इति; तदतत्त्वकल्पनेषा बालक्रीडासमा भवतीति।

यदपि-" प्रतिष्ठितं पूजयेत् " इति विधिः प्रतिष्ठाकालीनयावद्दृष्टस्पृश्यस्पर्शाभावविशिष्टः प्रतिष्ठाध्वंसः, तद्विशिष्टप्रतिमापूजनं वा फलप्रदं, क्त्वाप्रत्ययादतीतत्वलाभात्" इति गङ्गेशोपाध्यायैरुक्तम्। तदपि तुच्छम् । प्रतिष्ठारूपायां पूजायामेवाऽऽगतेः, तत्र ध्वंसस्यैव फलजनकव्यापारस्याऽऽश्रयणे चाद्दष्टमात्रस्यैव दत्तजलाञ्जलित्वप्रसङ्गात् । कथं चैवं प्रतिष्ठितेऽप्यप्रतिष्ठितत्वज्ञाने न पूजाफलम् ?, प्रतिष्ठाध्वंसत्वेन प्रमीयमाणत्वस्य पूजाफलजनकताऽवच्छेदककोटौ निवेशेन प्रतिष्ठात्वेन प्रमीयमाणत्वस्यैव निवेशौचित्यम, इति नकिञ्चिदेतत् ।

तस्माद् वन्दनपूजनाऽऽदिफलप्रयोजकत्वं कथं प्रतिष्ठायाः ?, इति जिज्ञासायामाह-

प्रतिष्ठितप्रत्यभिज्ञा-समापन्नपराऽऽत्मनः ।
आहार्याऽऽरोपतः सा च, ऋणामपि धर्मभूः ॥१०३॥

(प्रतिष्ठितेति) सा स्थापना,प्रतिष्ठितप्रत्यभिज्ञया,समापन्नो यः पराऽऽत्मा-भगवान्,तस्य, आहार्याऽऽरोपतः,ऋणाम्,उपलक्षणाद् वन्दकानां पूजकानां च, धर्मभूः धर्मकारणं भवति। अयं भावः-प्रतिमायां भगवद्भेदाऽऽरोपं विना न तावद्वन्दनपूजनाऽऽदिफलं हेतुमद्भेणापि संपद्यते, स च काष्ठपाषाणत्वाऽऽदिना भेदप्रत्यक्षे सति स्वरसतो नोदयतीत्याहार्य एव संपादनीयः। आहार्यत्वं चेच्छाजन्यत्वम् । इच्छा च इष्टसाधनताज्ञानसाध्या, इति इष्टसाधनताज्ञानसंपादनाय प्रतिष्ठितां प्रतिमां भगवद्भेदेन अध्यारोपयेदिति विधिः कल्पनीयः। तथा चाऽऽहार्यभगवदध्यारोपविषयप्रतिमापूजनत्वाऽऽदिना फलविशेषहेतुत्वे आहार्यत्वप्रयोजकेच्छाजनकज्ञानोद्देश्यताऽवच्छेदककुक्षिप्रविष्टत्वेन प्रतिष्ठाया अपि परम्परया प्रयोजकत्वमित्युक्तं भवति। "प्रतिष्ठितं पूजयेत्" इत्यत्रापि क्त्वाप्रत्ययस्य स्वाश्रयः शक्त्या लक्षणाऽऽदिना वा प्रतिष्ठाप्रयुक्ताऽऽहार्याऽऽरोपविषयपूजनत्वाऽऽदिनैव फलहेतुता । क्त्वाप्रत्ययस्य चौत्सर्गिकेण क्तप्रत्ययार्थेनाप्प्रत्ययत्वेनैवार्थवत्त्वेति चिन्तामणिकाराद्दप्यतिसूक्ष्ममतिनिपुणं च वयमीक्षामहे ॥ १०३ ॥

उक्तमेव वक्ष्यमाणफलान्वयेनाऽऽह-

तत्कारणेच्छाजनक-ज्ञानगोचरबोधकाः ।
विधयोऽप्युपयुज्यन्ते, तेनेदं दुर्मतं हृतम् ॥ १०४ ॥

(तत्कारणेति) तस्याऽऽहार्याऽऽरोपस्य, कारणं या इच्छा, तज्जनकं यत् "प्रतिष्ठितां प्रतिमां भगवद्भेदेनाध्यारोपयेत्" इति विधिजनितं ज्ञानं, तद्गोचरीभूतायाः प्रतिष्ठाया बोधकाः, इष्टसाधनत्वबोधनाऽऽदिद्वारा तदुत्पत्तिहेतव इति यावत् । विधयो विधिवाक्यानि, अप्युपयुज्यन्ते फलवन्तो भवन्ति, तैः प्रतिष्ठोत्पादने प्रतिष्ठितप्रतिमायामारोपविधिना भगवद्भेदाध्यारोपोपपत्तौ पूजाफलप्रयोजकरूपसिद्धेः । तेनेदं वक्ष्यमाणं, दुर्मतमाध्यात्मिकाऽऽभासानां, हृतं निराकृतम ॥ १०४ ॥

किं तत् ?, इत्याह-

प्रतिष्ठाऽऽद्यनपेक्षायां, शाश्वतप्रतिमार्चने ।
अशाश्वतार्चापूजायां, को विधिः किं निषेधनम् ?॥१०५॥

शाश्वतप्रतिमाऽर्चने प्रतिष्ठाया आदाविह प्रथमतोऽनपेक्षायां तत्रैव तस्याः फले व्यभिचारात् । अशाश्वतार्चानां कृत्रिमप्रतिमानां पूजायां, " प्रतिष्ठितां प्रतिमां पूजयेत् " इति विधिः कः?। "अप्रतिष्ठितं न पूजयेत्" इति निषेधनं च किम् ?, प्रतिष्ठातदभावयोरिष्टानिष्टसाधनतया व्यभिचारादज्ञानेन तत्र विधिनिषेधार्थान्वयस्यायोग्यत्वात् । इति भावः ॥ १०५ ॥

कथमेतन्निरस्तम ?, इत्याह-

पूजाऽऽदिविषयो ज्ञान-विध्यङ्गित्वं यदाश्रिताः ।
शाश्वताशाश्वतार्चासु, विभेदेन व्यवस्थिताः ॥ १०६ ॥

(पूजाऽऽदीति) पूजाऽऽदिविषयः-"प्रतिष्ठितां प्रतिमां पूजयेत्" इत्यादिवाक्यलक्षणः, ज्ञानविधेः 'प्रतिष्ठितां प्रतिमां भगवदभिन्नत्वेनाध्यारोपयेत्" इत्यङ्गवाक्यात्मकस्य, अङ्गित्वं प्रधानत्वम, आश्रिताः, शाश्वताशाश्वतार्चासु, विभेदेन निश्चरूपेण, व्यवस्थिताः तथा च-प्रतिष्ठाया न पूजासहकारित्वम्,किं तु स्वकर्तव्यताबोधकविध्यङ्गताऽऽपन्नविधिविषयनिर्वाहकत्वेन प्रयोजकत्वम् । तच्चाशाश्वतप्रतिमास्थले । अन्यत्र त्वनादिप्रतिष्ठितत्वप्रत्यभिज्ञाय एव तथात्वं, तादृशशिष्टाऽऽचारेण तथैव विधिबोधनादिति विकल्पेनानयोः पूजाफलप्रयोजकव्याहतेर्न कोऽपि दोष इति। अत एव निश्चितानिश्चिताऽऽदिभेदेन स्वल्पबहुभक्तिविधानाऽऽदेर्ज्ञानविशेषाऽऽपेक्षकत्वेन व्यवस्थितविकल्पोपपादकत्वं संगच्छते। अत एव चाविधिप्रतिष्ठितेऽप्यविच्छेदाऽऽदिकारणाऽऽलम्बनोपबृंहितवैज्ञानिकविधिना विधिप्रतिष्ठिततुल्यतामामनन्ति संप्रदायवृद्धाः । भावशोधितशुद्धनिमित्तनैमित्तिककैकान्तशुद्ध्यभावेऽपीदानीन्तनयतिधर्मोपधाऽऽदिक्रियावत्त्वे भावशोधनमात्रेण मध्यमशुद्ध्यपपत्तावस्या अपि च शुभानुबन्धसारत्वादित्यादिकमुपपादितं प्रतिमाशतकाऽऽदौ । तस्मात् स्थापनातदस्थेन भगवद्गुणस्मारकतया तदाहार्याऽऽरोपप्रयोजकतया वा संग्रहनयेनाप्यवश्यं स्वीकर्तव्या, इति व्यवस्थापितम् ॥ १०६ ॥

एतेन तदभ्युपगतव्यवहारोऽपि निरस्त इत्याह-

एतेन व्यवहारोऽपि, स्थापनाऽऽग्रहो हतः ।
तत्रार्हज्जरतीयं किं, नाम्नाऽपि व्यवहर्तरि ?॥ १०७ ॥

(एतेनेति) एतेनानुपदोक्तयुक्तिकदम्बकेन संग्रहस्थापनाव्यवस्थापनेन, व्यवहारोऽपि, स्थापनाया अनाग्रहोऽस्वीकारो, हतो निरस्तः, केषाञ्चिदाचार्याणाम्, यतस्तत्र व्यवहारे, नाम्नाऽपि नामनिक्षेपणापि, व्यवहर्तरि व्यवहारमभ्युपगच्छति, किमिदमर्हज्जरतीयम् ?यदुत स्थापनया व्यवहार इति, न हीन्द्रप्रतिमायां नेन्द्रव्यवहारो भवति, तत्रानवस्थापि भ्रान्त एव । न वा नामाऽऽदिप्रतिपक्षव्यवहारसाङ्कर्यम; इत्येकमाद्रियमाणस्यापरं च परित्यजतः केवलमाद्योपरुविकामात्रमेवेति ॥ नयो० ।

अथ सामान्येनैव स्थापनायाः स्वरूपमाह-

जं पुण तदत्थसुन्नं, तयनिप्पाएण तारिसाऽऽगारं ।
कीरइ व निरागारं, इत्तरमियरं व सा ठवणा ॥२६॥

सा स्थापनाऽभिधीयते, यत्, किम् ?, इत्याह-यत्क्रियतेइन्द्राऽऽदिस्थापनारूपतया विधीयते वस्तु, पुनःशब्दो नामलक्षणात् स्थापनालक्षणस्य वैसदृश्यद्योतकः । केन ?, इत्याहतदभिप्रायेण-तस्य सद्भूतेन्द्रस्यानिप्रायोऽध्यवसायस्तेन । कथंभूतं तद्वस्तु ?, इत्याह-तदर्थशून्यं-स चासावर्थश्च तदर्थः-सद्भूतेन्द्रलक्षणः, तेन शून्यं तदर्थशून्यम् । पुनरपि कथम्भूतम् ?,तादृशाऽऽकारं-सद्भूतेन्द्रसमानाऽऽकारं,वाशब्दस्य निष्प्रकम्पत्वाभिराकारं वा,सद्भूतेन्द्राऽऽकारशून्यमित्यर्थः। चित्रलेप्यकाष्ठापाषाणाऽऽदिषु तादृशाऽऽकारं भवति,अक्षाऽऽदिषु तु निराकारमित्यर्थः। पुनः किंभूतम्?,इत्वरम्-अल्पकालीनम् । इतरद्वा-यावत्कथिकम् । तत्रेत्वरं चित्राक्षाऽऽदिगतम् । यावत्कथिकं तु-नन्दीश्वरचैत्यप्रतिमाऽऽदि । तदपि हि 'तिष्ठतीति स्थापना' इति स्थापनात्वेन समये निर्दिष्टमेव । तदिदमिह तात्पर्यम्-यद्वस्तु सद्भूतेन्द्रार्थशून्यं सत्तद्बुद्ध्या तादृशाऽऽकारं,निराकारं वा स्तोककालं, यावत्कथिकं वा स्थाप्यते सा स्थापनेति । प्रकृते योजना तु इत्थं क्रियते-चित्रकर्माऽऽदिगतः परममुनिः,स्थापनं स्थापना,तया मङ्गलम्, स्थाप्यते इति वा स्थापना, तया मङ्गलं; स्थापनामङ्गलमिति व्यपदिश्यते । इति गाथार्थः ॥ २६ ॥

अथ भाष्यकारः स्वयमेव नामस्थापनामङ्गलयोरुदाहरणमुपदर्शयन्नाह-

जह मंगल्लमिइ नामं, जीवाजीवोभयाण देसीओ ।
रूढं जलणाईयं, ठवणाए सोत्थियाईयं ॥ २७ ॥

यथाशब्द उदाहरणोपन्यासार्थः । क यथा ?, इत्याह-जीवाजीवोभयानां ज्वलनाऽऽदीनां, देशीतो देशीभाषया, मङ्गलमिति नाम रूढम् । तत्र जीवस्याग्नेर्मङ्गलमिति नाम रूढम्, सिन्धुविषये अजीवस्य दधकवलनकस्य मङ्गलमिति नाम रूढम्, लाटदेशे जीवाजीवोभयस्य तु मङ्गलमिति नाम रूढं वन्दनमालायाः, दधिकाऽऽदीनामिहाचेतनत्वात्, पत्राऽऽदीनां तु सचेतनत्वाद् जीवाजीवोभयत्वं भावनीयम् । स्वस्तिकाऽऽदीनां तु या स्थापना लोके, तस्या रूढं स्थापनामङ्गलत्वमिति शेषः । इति गाथार्थः ॥ २७ ॥ विशे० ।

"ठविओ य आरियत्ते, जम्हा तू तेण ठवण त्ति ।" पं०ना० ।

पुनरमलनमपि कृतप्रश्नः-गणधराः प्रतिक्रमणं कुर्वाणाः स्थापनां कुर्वन्ति, न वा ?, कुर्वाणा अपि तीर्थङ्करस्य, अन्यस्य वा ?, इति प्रश्ने, उत्तरम्-तीर्थङ्करस्य देवगुरुरूपत्वेन तत्समीपे प्रतिक्रमणाऽऽदि कुर्वतां स्थापनाप्रयोजनं न स्यात्,जिनपरोक्षे तत्कुर्वतां तु स्थापनाकरणमात्मनामिवेति संभाव्यते।६ प्र० । ह्री० ३ प्रका० । दीपचन्दिरमलकृतप्रश्नः-अक्षमालाऽऽदिका स्थापना या नमस्कारेण विधीयते, तदुपरि उद्द्योते दृष्टिरक्षणं सुकरम्, अन्धकारे कथं च भवति ?, तत्किना च स्थापना शुध्यति, न वा ?, इति प्रश्ने,उत्तरम्-अत्र अक्षमालापुस्तकाऽऽदिकस्थापना नमस्कारेण स्थाप्यते, स्थापनाऽनन्तरं च क्रियाकरणं यावदुद्द्योते यथाशक्ति दृष्टयुपयोगी रक्ष्येते अन्धकारे, दृष्टयुपयोगयोरन्तरे जाते तु पुनः स्थापनां कृत्वा अग्रतः क्रिया क्रियते । यतः स्थापना द्विधा-इत्वरा, यावत्कथिका च । तत्र इत्वराऽक्षमालाऽऽदिका, या नमस्कारेण स्वयं स्थापिता दृष्टयुपयोगयोः स्तोरेव तिष्ठति । यावत्कथिका चाक्षप्रतिमाऽऽदिका या गुरुसकाशात् स्थाप्यते,सा पुनः पुनः स्थापिता न विलोक्यते इति ।६ प्र० । ह्री० ४ प्रका० । कायोत्सर्गे वन्दनकदानावसरे च स्थापनाऽऽचार्यचाक्षनं शुध्यति, न वा ? इति प्रश्ने, उत्तरम्-अत्र कायोत्सर्गकरणावसरे, वन्दनकदानावसरे च स्थापनाऽऽचार्यचाक्षनं न शुद्ध्यतीत्येकान्तो ज्ञातो नास्तीति । १४ प्र० । ह्री० ४ प्रका० । पण्डितनयविजयगणिकृतप्रश्नः-स्थापनाः क्रियते प्रदेशे ऊर्ध्वमधस्तिर्यक् च दूरे स्थापिताः क्रियाशुद्धिहेतवो भवन्ति ?, इति प्रश्ने, उत्तरम्-अत्रोर्द्धं मस्तकात् पादयोरधस्तात् तिर्यक् च ऊर्ध्वमशक्ये स्थाने स्थापिताः स्थापनाः क्रियाशुद्धिनिमित्तं न भवन्तीति वृद्धवादः । यत्तु-उपरितनभूम्यादौ स्थापितासु तासु अधस्तनभूम्यादौ कापि क्रियायाः क्रियमाणत्वं,तत्कारणिकामिति ज्ञेयम् । ४ प्र० । ह्री० २ प्रका० । स्थापने, नं० । 'णिक्खेवो' स्थापनाऽभ्यासक इत्यनर्थान्तरम् । आ० चू० १ अ० । न्यासे, पञ्चा० १ विव० । निधाने निधिर्निक्षेपो न्यासो विरचना प्रस्तारः स्थापनेति पर्यायाः । अनु० । (जिनबिम्बस्थापना 'चेइय' शब्दे तृतीयभागे १२७० पृष्ठे निरूपिता, सा च तत एवावधार्या) पञ्चमे उत्क्रमदोषे, स्था० ३ ठा० ४ उ० । स्थाप्यते साधुनिमित्तं कियन्तं कालं यावन्निर्धार्यते इति स्थापना । यद्वा-स्थापनं साधुभ्यो देयमिदमिति बुद्ध्या देवद्रव्यतुल्यं कियन्तं कालं व्यवस्थापनं स्थापना, तथोपादेयमपि स्थापना । स्वस्थाने चुल्लीस्थाल्यादौ, परस्थाने सुस्थितकल्पकाऽऽदौ चिरकालमित्वरकालं च साधुदाननिमित्तं धार्यमाणमशनाऽऽदिकं स्थापनेति व्युत्पत्तेः । प्रव० ६७ द्वार । पिं० । पं० व० । पञ्चा० । आचा० । ध० । उत्त० । ग० । दर्श० ।

अथ स्थापनाद्वारमाह-

सट्ठाणे परट्ठाणे, दुविहं च ठियं तु होइ नायव्वं ।
खीराऽऽदिपरंपरए, हत्थगयघरंतरं जाव ॥

स्थापितं साधुनिमित्तं, घृतभक्ताऽऽदि । तच्च द्विधा । तद्यथास्वस्थाने,परस्थाने च । तत्र स्वस्थानं-चुल्लयचुल्लाऽऽदि । परस्थानं-छुप्तकाऽऽदि । एकैकं द्विधा-अनन्तरं, परम्परं च । तत्र यस्य साधुनिमित्तं स्थापितस्य सतो विकारान्तरं न भविष्यति, यथा घृताऽऽदि,तदनन्तरस्थापितम् । क्षीराऽऽदिकं तु,परम्परकं परम्परास्थापितम् । तथाहि-क्षीरं स्थापितं सद् दधि भवति, दधि भूत्वा नवनीतं, नवनीतं भूत्वा घृतं, ततो यदेव साधुनिमित्तं क्षीरं भूत्वा घृतीकृत्य ददाति, तदा तत् क्षीरं परम्परास्थापितं भवति । एवमन्यदपीक्षुरसाऽऽदिकं ऊ-

ष्टव्यम्। तथा पङ्क्तिस्थिते गृहत्रये उपयोगावकाशसंभवे सति, हस्तगतासु तिसृषु भिक्षासु एकः साधुरेकां भिक्षां सम्यगुपयोगेन परिभावयन् गृह्णाति। द्वितीयस्तु द्वयोर्गृहयोर्हस्तगते द्वे भिक्षे परिभावयति। ततो गृहत्रयात्परतो यावद् गृहान्तरं न भवति, तावन्न तस्य स्थापनादोषः। गृहान्तरे तु साधुनिमित्तं हस्तगता भिक्षा स्थापना, तत्रोपयोगासंभवात्।

तत्र एतामेव गाथां भाष्यकृद् व्याचिख्यासुः प्रथमतः स्वस्थानमाह-

चुल्ली अवचुल्लो वा, भायणट्ठाणं तु भायणं पिढरे।
सट्ठाणट्ठाणम्मि य, भायणठाणे य चतुभंगा॥

द्विविधं स्थानम्। तद् यथा-स्थानस्वस्थानं, भाजनस्वस्थानं च। तत्र स्थानरूपं स्वस्थानम्-चुल्ली, अवचुल्लो वा। चुल्ल्या अव पश्चात् अवचुल्लः। राजदन्ताऽऽदित्वादवशब्दस्य पूर्वनिपातोऽदन्तता च। तत्र चुल्ली प्रतीता। अवचुल्लो अवष्वष्कः। एतयोश्च स्थितं सद् भक्तं पच्यते। तत एतौ स्थानरूपं स्वस्थानम्। भाजनरूपं तु स्वस्थानं-पिठरं स्थाली, तत्र स्थानस्वस्थाने, भाजनस्वस्थाने च चत्वारो भङ्गाः। तद्यथा-चुल्ल्यां स्थापितं, पिठरं च। चुल्ल्यां स्थापितं, न पिठरे; उष्ट्रिकाऽऽदौ स्थापितत्वात्। न चुल्ल्यां, किं तु पिठरे। तच्च चुल्ल्यवचुल्लाभ्यामन्यत्र प्रदेशान्तरे स्थापितं द्रष्टव्यम्। न चुल्ल्यां,न पिठरे, चुल्ल्यवचुल्लाभ्यामन्यत्र उच्चकाऽऽदौ स्थापितमित्यर्थः।

संप्रति परस्थानमाह-

उच्चगवारगमाई, होइ परट्ठाणमो अणेगविहं।
सट्ठाणे पिढरे चुल्ल- ऽवचुल्ले य एमेव दूरे य॥

उच्चकवारकाऽऽदिकम्, अनेकविधं,परस्थानं परभाजनं भवति द्रष्टव्यम्। तत्र उच्चकं-पटलिकाऽऽदिरूपम्। वारको-लघुघटः आदिशब्दात्पाकभाजनवर्जचुल्ल्यवचुल्लवर्जशेषसकलभाजनपरिग्रहः। अत्रापि स्वस्थानपरस्थानापेक्षया चतुर्भङ्गी। तद् यथा-स्वस्थाने स्वस्थाने, स्वस्थाने परस्थाने, परस्थाने स्वस्थाने, परस्थाने परस्थाने। एतामेव चतुर्भङ्गीं दर्शयति-"सट्ठाणे" इत्यादि। अत्र (सट्ठाणे पिढरे उच्चगे य इति) अनेन नञ्द्वयं सूचितम्, स्वस्थानस्य पिठरोच्चकाभ्यां प्रत्येकमभिसंबन्धात्। तद् यथा-स्वस्थाने चुल्ल्यादौ, पिठरे वा, तथा स्वस्थाने चुल्ल्यादौ, उच्चके च। परस्थाने (एमेव दूरे य त्ति) इह दूरे चुल्ल्यवचुल्लाभ्यामन्यत् प्रदेशान्तरं, तत्रापि तदपेक्षयाऽपि, एवमेव भङ्गत्रयं द्रष्टव्यम्। तद् यथा-भाजनरूपे स्वस्थाने पिठरे परस्थानेऽन्यत्र प्रदेशान्तरे, तथा परस्थानेऽन्यत्र प्रदेशान्तरे परस्थाने उच्चकाऽऽदाविति। सर्वसंख्यया चत्वारो भङ्गाः। तदेतदेवं मूलगाथायाः "सट्ठाणे" इत्यादि पूर्वार्द्धं व्याख्यातम्।

अथ "खीरादिपरंपरए" इति व्याचिख्यासुराह-

एक्केकं तं दुविहं, अणंतरपरंपरे य नायव्वं।
अविकारि कयं दव्वं, तं चेव अणंतरं होइ॥

तत् साधुनिमित्तं स्थानम्, एकैकं स्वस्थानपरस्थानगतं द्विविधं ज्ञातव्यम्। तद् यथा-अनन्तरे अन्तराभावे, विकाररूपव्यवधानाभावे इत्यर्थः। परम्परके, विकारपरम्परायामित्यर्थः। तत्र यत् कर्त्रा स्वयोगेनाविकारि-भूयोऽसंभवविकारि घृतगुडाऽऽदि, तत्कृतं,न हि तस्य भूयोऽपि विकारः संभवति,तत् साधुनिमित्तं स्थापितमनन्तरस्थापितम्। उपलक्षणमेतत्-तेन क्षीराऽऽदिकमपि यस्मिन् दिने साधुनिमित्तं स्थापितं, यदि तस्मिन्नेव दिने ददाति, तर्हि तदपि दध्यादिरूपं विकारान्तरमनापद्यमानमनन्तरस्थापितं द्रष्टव्यम्। तदेव तु क्षीरं साधुनिमित्तं घृतं सद् दध्यादिरूपतया परिकल्प्यमाणं परम्परास्थापितं भवति। एवमिक्षुरसाऽऽदिकमपि तस्मिन्नेव दिने स्थापितं दीयमानमनन्तरस्थापितम्। कल्कवाऽऽदिरूपतया तु परिकल्प्यमाणं परम्परास्थापितमिति।

सम्प्रति विकारीतराणि द्रव्याणि प्रतिपादयति-

उच्छूखीराईयं, विगारि अविगारि घयगुडाईयं।
परियावज्जणदोसा, ओयणदहिमाइयं वा वि॥

इक्षुक्षीराऽऽदिकं विकारि,तस्य कल्कवाऽऽदिदध्यादिविकारसहितत्वात्। तथा ओदनदध्यादिकमपि करम्बाऽऽदिरूपं विकारि। कुतः?, इत्याह-पर्यायाऽऽपादनादोषात्। करम्बाऽऽदिकं हि क्रियमाणं नियमात्पर्यापद्यते, कोथमायातीत्यर्थः। ततस्तदपि विकारि द्रष्टव्यम्। तदेवं विकारीतराणि द्रव्याण्यभिहितानि।

सम्प्रति क्षीराऽऽदिकं परम्परास्थापितं भावयति—

लब्भट्ठ परिन्नायं, अन्नं लद्धं पओयणे घेत्थी।
रिणभीया व अगारी, दहि त्ति दाहं सुए उवणा॥
नवणीय मंसु तक्कं, ति जाव अत्तट्ठिया व गिण्हंति।
देसूणा जाव घयं, कुमुणं पि य जत्तियं काहं॥

'लब्भट्ठं' केनापि साधुना कस्याश्चिद्गारिण्याः सकाशे क्षीरमभ्यर्थितम्। ततस्तया प्रतिज्ञातम्-क्षणान्तरे दास्यामि। साधुना चान्यत्रान्यत् क्षीरं लब्धम्। ततः पूर्वमभ्यर्थितया अगारिण्या दुग्धसंप्राप्तौ सत्यां साधुं प्रति प्रत्यवादि-गृहाण भगवन्! इदं दुग्धमिति। साधुना चोक्तम्-लब्धमन्यत्र मया दुग्धं, ततो यदि तवापि प्रयोजनं भविष्यति, ततो (घेत्थी) ग्रहीष्यामि। एवमुक्ते सा अगारिणी ऋणभीतेव स्वयं नो बुभुजे। किं च। एवं चिन्तयामास-इयः कल्ये, दधि कृत्वा दास्यामीति। तत एवं चिन्तयित्वा स्थापयति। ततो द्वितीयदिने दधि जातं, तदपि साधुना न गृहीतं, तद् नवनीतं तक्रं च जातं, नवनीतमपि घृतं कृतम। इह क्षीराऽऽदिकं सकलमपि स्थापनादोषदुष्टत्वात् साधूनां न कल्पते। यद्वा-क्षीराऽऽदिकं यावद् नवनीतं, मस्तु, तक्रं वा, तावदेतानि सर्वाण्यप्यात्मार्थीकृतानि मा गृह्णीयात् साधुः कुटुम्बे भविष्यतीत्येवमात्मसत्ताकीकृतानि तु साधवो गृह्णन्ति। घृतं त्वात्मार्थीकृतमपि तेजस्कायाऽऽरम्भादाधाकर्मेति न कल्पते। घृतं च स्थापितं सत् तावत् घृतं यावद्देशोना पूर्वकोटी। तथाहि-पूर्वकोट्यायुषा केनापि साधुना वर्षाष्टकप्रमाणेन कस्याश्चित् पूर्वकोट्यायुषोऽगारिण्याः पार्श्वे घृतं ययाचे। तयोक्तम्-क्षणान्तरे दास्यामि। साधुना चान्यत्र घृतं लब्धम्। ततः सा ऋणभीतेव तावद् घृतं धृतवती यावत् साधोरायुः। ततो मृते साधौ तदन्यस्योपयुक्तमिति नास्ति स्थापना। (इह वर्षाष्टकस्याधः पूर्वकोटेरुपरि च चारित्रं न भवति। चारित्रिणं चाधिकृत्य स्थापनादोषः, ततो देशोना पूर्वकोटीत्युक्तम्) एवं गुराऽऽदेरप्यविनाशिनो द्रव्यस्य यथायोगं स्थापनाकालपरिमाणं द्रष्टव्यम्।

(कुसुणं पि व त्ति) कुसुम्भितमपि-करम्बाऽऽदिरूपतया कृतमपि, यावन्तं कालमविनाशनात् कालं, तस्य स्थापना ऊहया । परतस्तु क्वथितत्वाद् दुष्यते पचेति भावः । तदेवं क्षीराऽऽदिकं परम्परास्थापितमुक्तम् ।

साम्प्रतमिक्षुरसाऽऽदिकमपि परम्परास्थापितमाह-

रसकक्कपिंडगुला-पच्छंदियखंडसक्कराणं च ।
होइ परंपरठवणा, अन्नत्थ व जुज्जए तत्थ ॥

इह केनापि साधुना किमपि प्रयोजनमुद्दिश्य कोऽपीक्षुरसं याचितः । स प्रतिज्ञातवान् क्षणान्तरे दास्यामि । साधुना चान्यत्रेक्षुरसो लब्धः । पूर्वमभ्यर्थितश्च ऋणमीत इव तमिक्षुरसं कक्कवं करोति, यावत् शर्करेति । एतेषां चेक्षुरसकक्कवाऽऽदीनामुत्तरोत्तरविपरिणामगुडाऽऽदिपर्यायाऽऽपादनपुरस्सरं क्रियमाणानां स्थापना परम्परस्थापना । एवमन्यत्रापि ऊह्यान्तरे यत्रैव परम्परया स्थापना घटते, तत्र परम्परास्थापना ऊह्या । यावच्च स्थापितस्य साधाकर्मसंभवः, तावदात्मार्थीकृतं कल्पते । कृतपाकाऽऽरम्भं तु न कल्पते ।

सम्प्रति " इत्थगयघरंतरं जाव " इति व्याचिख्यासुराह-

भिक्खग्गाही एग-त्थ कुणइ बिइ तु दोसु उवओगं ।
तेण परं तक्किच्चा, पाहुडिया होइ ठविया उ ॥

भिक्षाग्राही एकत्रोपयोगं करोति, द्वितीयस्तु द्वयोर्गृहयोः,तत्र त्रिषु गृहेषूपयोगसम्भवे स्थापनादोषो न भवति । गृहत्रयात्परं साध्वर्थमुत्पादिता भिक्षा प्राभृतिका स्थापना भवति । उक्तं स्थापनाद्वारम् । पि० स्थाप्यते इति स्थापना । वक्ष्यमाणेनाऽऽरोपणाप्रकारेण शुद्धीभूतेभ्यः सञ्चयमासेभ्यो ये शेषा मासास्तेषां प्रतिनियतदिवसग्रहणतो व्यवस्थापने, व्य० १ उ० । नि० चू० । (प्रस्थापनाभेदाः 'पच्चिकुल' शब्दे वक्ष्यन्ते) अनुज्ञायाम्, एतच्च पञ्चमं गौणमनुज्ञानाम । नं० । पर्युषणायाम्, वर्षाकल्पाद्न्या मर्यादा स्थाप्यते अनयेति व्युत्पत्तेः । नि० चू० १० उ० । (विशेषः ' पज्जुसणा ' शब्दे वक्ष्यते)

ठवणाकप्प-स्थापनाकल्प-पुं० । अकल्पस्थापनाकल्प-शैक्षस्थापनाकल्पोभयरूपे साध्वाचारे, बृ० ।

ठवणाकप्पो दुविहो, अकप्पठवणा य सेहठवणा य ।
पढमो अकप्पिएणं, आहाराऽऽदी न गिण्हावे ॥

स्थापनाकल्पो द्विविधः-अकल्पस्थापनाकल्पः, शैक्षस्थापनाकल्पश्च । तत्राकल्पिकेनानधीतपिण्डैषणाऽऽदिसूत्रार्थेन, आहाराऽऽदिकं न ग्राहयेत्-नाऽऽनाययेत् । तेन नीतं न कल्पत इत्यर्थः । एष प्रथमः-अकल्पस्थापनाकल्प उच्यते ।

अट्ठारसे य पुरिसे, वीसं इत्थीउ दस णपुंसा य ।
दिक्खेति जो ण एते, सेहट्ठवणाए सो कप्पो ॥

अष्टादश भेदाः पुरुषे पुरुषविषयाः, विंशतिः स्त्रियो, दश नपुंसकाः । एतानष्टचत्वारिंशत्प्रभेदान् शैक्षाद् यो न दीक्षते,स एष कल्पकल्पवतोरभेदात् शैक्षस्थापनाकल्प उच्यते । बृ० ६ उ० । नि० चू० । पं० भा० ।

ठवणाकम्म-स्थापनाकर्म-न० । स्थापने प्रतिष्ठापने स्थापना, तस्याः कर्म करणं स्थापनाकर्म । येन ज्ञातेन परमतं दूषयित्वा स्वमतस्थापना क्रियते तत्स्थापनाकर्मेति भावः । तच्च द्वितीयाङ्गे द्वितीयश्रुतस्कन्धे प्रथमाध्ययनं पुण्डरीकाऽऽख्यम् । तत्र दृष्टान्तः-अस्ति काचित् पुष्करिणी कर्दमप्रचुरजला । तन्मध्यदेशे महापुण्डरीकम् । तदुद्धरणार्थं चतसृभ्यो दिग्भ्यश्चत्वारः पुरुषाः सकर्दममार्गं प्रवेष्टुमारब्धाः । ते चाकृततद्धरणा एव पङ्के निमग्नाः । अन्यस्तु तटस्थोऽसंस्पृष्टकर्दम एवामोघवचनतया तद्धृतवानिति ज्ञातम् । उपनयश्चायम्-अत्र कर्दमस्थानीया विषयाः, पुण्डरीकं राजाऽऽदिभव्यपुरुषः, चत्वारः पुरुषाः परतीर्थिकाः, पञ्चमः पुरुषः साधुः, अमोघवचनं धर्मदेशना, पुष्करिणी संसारः, तदुद्धारो निर्वाणमिति । अनेन च ज्ञातेन विषयानिष्वङ्गवतामन्यतीर्थिकानां जन्यस्य संसारानुत्तारकत्वं, साधोश्च तद्विपर्ययं वदता आचार्येण परमतदूषणेन स्वमतं स्थापितमतो भवतीति, इदं ज्ञातं स्थापनाकर्मेति । अथवा-आपन्नं दूषणमपोह्य स्वाभिमतस्थापना कार्येत्येवंविधार्थप्रतिपत्तिर्यतो जायते तत् स्थापनाकर्म । यथा किल-मालाकारेण केनापि राजमार्गे पुरीषोत्सर्गलक्षणापराधापोहाय तत्स्थाने पुष्पगुच्छकरणेन किमिदमिति पृच्छतो लोकस्य हिङ्गुशिवो देवोऽयमिति वदता व्यन्तराऽऽयतनस्थापना कृतेति । एतस्मात् किलाऽऽख्यानकादुक्तार्थः प्रतीयते । इदं स्थापनाकर्मेति ॥ स्था० ४ ठा० ३ उ० ।

अधुना स्थापनाद्वारमभिधित्सुराह—

ठवणाकम्मं एक्कं, दिट्ठंतो तत्थ पोंडरीअं तु ।
अहवा विसन्नदक्कण-हिंगुसिवकयं उदाहरणं ॥ ६६ ॥

स्थाप्यते इति स्थापना, तया, तस्याः,तस्यां वा कर्म-सम्यग्भीप्सितार्थप्ररूपणलक्षणा क्रिया स्थापनाकर्म । एकमिति तुल्यार्थतया, दृष्टान्तो निदर्शनम् । तत्र स्थापनाकर्मणि, पौण्डरीकं तु, तुशब्दात्तथाभूतमन्यच्च । तथा च पौण्डरीकाध्ययने पौण्डरीकं प्ररूप्य प्रक्रिययैवान्यमतनिरासेन स्वमतमवस्थापितमिति । अथवेत्यादि पश्चार्द्धं सुगमम् । लौकिकं चेदमिति गाथाक्षरार्थः । भावार्थस्तु कथानकादवसेयः । तच्चेदम्-"जहा एगम्मि णगरे एगो मालायारो सव्वाइओ करंडे पुप्फे घेत्तूण वीहीए एइ । सो अन्नेण अच्चाहिओ, ताहे तेण सिग्घं वोसिरिऊणं, सा पुप्फपिंडिगा तस्सेव उवरि पल्हत्थिया । ताहे लोओ पुच्छइ-किमेयं ति जेणित्थ पुप्फाणि छड्डेसि ? । ताहे सो भणइ-अहं अन्नोविओ, एत्थ हिंगुसिवो नाम । एवं ते वाणमंतरं हिंगुसिवं नाम उप्पन्नं । लोएण पारद्धाहियं । पूया से जाया । आइण्णं, अज्ज वि ते पामलिपुत्ते हिंगुसिवं नाम वाणमंतरं । एवं जइ किं वि उड्डाहं पावयणीयं कयं होज्जा केण वि पमाएण, ताहे तहा पच्छाइयव्वं, जहा पच्चुग्गं पवयणुब्भावणा हवइ । संजाए उड्डाहे जह गिरिसिद्धेहिं कुसलबुद्धीहिं लोयस्स धम्मसद्धा पवयणवसेण सुट्ठु कया " । एवं तावच्चरणकरणानुयोगं लोकं चाधिकृत्य स्थापनाकर्म प्रतिपादितम् ।

अधुना द्रव्यानुयोगमधिकृत्योपदर्शयन्नाह—

सव्वनिचारं हेउं, सहसा वोत्तुं तमेव अन्नेहिं ।
उवबूहइ सप्पसरं, सामत्थं चऽप्पणो नाउं ॥ ६७ ॥

सह व्यभिचारेण वर्त्तत इति सव्यभिचारः,तं हेतुं-साध्यधर्मान्वयाऽऽख्यिलक्षणं, सहसा तत्क्षणमेव, 'वोत्तुं' अभिधाय,तमेव हेतुमन्यैर्हेतुभिरेव, उपबृंहते समर्थयति,सप्तसरमनेकधा स्फारयन् सामर्थ्यं प्रज्ञाबलम् । चशब्दो निश्चयार्थः आत्मनश्च स्वस्य च ज्ञात्वा विज्ञाय, चशब्दात्परस्य चेति गाथार्थः ॥ ६७ ॥

नावार्थस्त्वयम्-द्रव्यास्तिकाऽऽद्यनेकनयसंकुलप्रवचनज्ञेन साधुना तत्स्थापनाया नयान्तरमतापेक्षया सव्यभिचारं हेतुमभिधाय प्रतिपन्ननयमतानुसारतः तथा समर्थनीयः यथा सम्यगनेकान्तवादप्रतिपत्तिर्जनयतीति । आह-उदाहरणभेदस्थापनाऽधिकारचिन्तायां सव्यभिचारहेत्वभिधानं किमर्थमिति ? । उच्यते-तदाश्रयेण बहुसमुदाहरणानां प्रवृत्तेः, तदन्वितं चोदाहरणमपि प्राय इति ज्ञापनार्थम्; अलं प्रसङ्गेन । अभिहितं स्थापनाकर्मद्वारम् । दश० नि० १ उ० ।

ठवणाकुल-स्थापनाकुल-न० । प्रतिकृष्टकुले, ध० ३ अधि० । स्थापनाकुलानि निर्विशति । अथवा-यानि लोके गर्हितानि कुलानि स्थापितान्युच्यन्ते, तेषामपरिभोग्यतया जिनैः स्थापितत्वात्, तेषु आहाराऽऽदिकमुत्पादयति । ज्य० १ उ० ।

इदाणिं ठवणेति-

ठवणाकुलेसु ठविए-सु वारए अलसे णिरुम्मे ।

अस्या व्याख्या-ठवणापच्छद्धं । ठवणाकुला अतिशयकुला भण्णंति, येष्वाचार्याऽऽदीनां भक्तमानीयते, तेसु ठविएसु अलसे णिधम्मे पविसंते, णिवारेते, इत्यर्थः । नि०चू०१ उ० "सज्जातरसामग्गाइकुलाइ ठवणकुलाइ भण्णंति ।" नि० चू० ४ उ० ।

जे भिक्खू ठवणाकुलाइं अजाणिय अपुच्छिय अगवेसिय पुव्वामेव पिंडवायवडियाए अणुपविसइ, अणुपविसंतं वा साइज्जइ ॥ २४ ॥

(जे भिक्खू ठवणाकुलाइं इति) उप्पाकुला ठवणाकुला, अणोज्जा इत्यर्थः । साधुठवणाए वा ठविज्जंति त्ति ठवणाकुला, सेज्जातरा इत्यर्थः । पुव्वदिट्ठे पुच्छा, अदिट्ठे गवेसणा । अधवा-णामेण वा गोत्तेण वा दिसाए वा पुच्छा, भूमियाइविधेहिं गवेसणा, पुव्वं प्रथमम्, आदावेव । जो पुण पुच्छणगवेसणं करेति, तस्य पुव्वं न भवतीत्यर्थः ।

गाहा-

ठवणाकुला तु दुविधा, लोइय लोउत्तरा समासेण ।
इत्तरिय आवकहिया, दुविधा पुण लोइया होंति ॥५६॥

समासो संखेवो, लोइया दुविहा-इत्तरिया, आवकहिया य ।

इमे इत्तरिया । गाहा-

सूयगपतगकुलाइं, इत्तरिया जे य होंति णिच्चूढा ।
जे जत्थ जुंगिता खलु, ते होंती आवकहिया तु ॥६०॥

कालावधीए जे उप्पा कया ते णिच्चूढा (जे त्ति) कुला, जत्थ विसए, जुंगिता दुगुंछिता, अणोज्जा इत्यर्थः । कम्मेण वा, सिप्पेण वा, जातीए वा । कम्मे-एहाणिया, सोहका, मोरपोसगा । सिप्पे-हेट्ठणहविता, तेरिमा, पयकरा, णिल्लेवा, जातीए-याणा, डोंवा, मारेलिया य । खलुसद्दोऽवधारणे । ते चेव अत्थत्थ जुंगिता, जहा सिंधुए णिल्लेवगा ।

इमे लोगुत्तरा । गाहा-

दुविधा लोउत्तरिया, वसधीसंबद्ध एतरा चेव ।
सत्तघरंतर जाव तु, मुत्तूणं वसधिसंबद्धा ॥ ६१ ॥

वसहीए संबद्धा य, असंबद्धा य । वसहीए मोत्तुं सत्तघरा वसहिसंबद्धा, तेसु भत्तं वा पाणं वा घेत्तव्वं ।

इमा असंबद्धा । गाहा-

दाणे अभिगमसड्ढो, संमत्ते खलु तहेव मिच्छत्ते ।
मामाए अविरयसे, एवं इतरे वि णायव्वा ॥ ६२ ॥

अहाभद्दो दाणरुई दाणसड्ढो सम्महिट्ठी गिहीताणुव्वओ अभिगमसड्ढो (सम्मत्ते त्ति) अविरयसम्महिट्ठी । एतेसु एसणादोसा । खलुसद्दो पादपूरणे । (मिच्छत्ते त्ति) अभिगहियमिच्छे साहुपडिणीए । ईसालुत्तणेणं मा मम घरंपहि समणं ति ण णेइ । अण्णस्स ईसा खलु असणेण चेव-साहू घरं पविसंता अविरया वायाए भणंति न किंचि वि । एतेसु विसगरपंतावणादि दोसा । (इयरे ति) असंबद्धा ॥

गाहा-

एतेमामंतरे, ठवणकुलं जो तु पविसती भिक्खू ।
पुव्वं अपुच्छितेणं, सो पावति आणमादीणि ॥ ६३ ॥

कंठा ।

चोदग आह-लोउत्तरे ठिवाणं लोइयठवणपरिहारेण किंच अम्हं ? । आचार्य आह-

लोउत्तरम्मि ठविता-ण लोगणिब्बाहिरत्तमिच्छंति ।
लोगजढे परिचत्ता, तित्थविवड्ढी य वण्णो य ॥ ६४ ॥

पुव्वद्धं कंठं । लोगदुगुंछिया जे, ते परिहरंतेण तित्थस्स विवड्ढी कता भवति, (वण्णो त्ति) जसो पजावितो भवति तो भण्णति ।

लोइयठवणकुलेसु गेण्हंतस्स इमे दोसा । गाहा-

अयसो पवयणहाणी, विप्परिणामो तहेव य दुगुंछा ।
लोइयठवणकुलेसुं, गहणे आहारमादीणं ॥ ६५ ॥

अयसो त्ति अवण्णो, पवयणहाणी-न कश्चित्प्रव्रजति, संमत्तचरित्ता सेहा विप्परिणमंति, कावालिया इव लोए दुगुंछिता भवंति, अस्पृश्या इत्यर्थः । पच्छद्धं कंठं ।

लोउत्तरिएसु दाणाइसड्ढकुलेसु पविसंतस्स इमे दोसा । गाहा-

आयरियबालवुड्ढा, खवगगिलाणा महोदराऽऽएसा ।
सव्वे वि परिचत्ता, जो ठवणकुलाइं णिव्विसति ॥६६॥

महोदराऽयं बह्वाशी, आएसः प्राघूर्णकः, णि-आधिक्येण, विशति निविशति, प्रविशतीत्यर्थः ।

इमं पच्छद्धं । गाहा-

आयरिए य गिलाणे, गुरुगा लहुगा य खवगे पाहुणए ।
गुरुगो य बालवुड्ढे, सेहे य महोदरे लहुओ ॥६७॥

जो एते ठवणाकुले ण णिविसति, तस्सिमे गुणा । गाहा-

गच्छो महाणुभागो, सबालवुड्ढोऽणुकंपिओ तेण ।

जिनकल्पिकाऽऽदेरलानामाकरत्वात् समुद्रवद् महानुभागः, बालवृद्धगिलाणादीनां च साधारणत्वान्महानुभागः, जो तेसु ण णिविसति तेण सो गच्छो अणुकंपितो ।

गाहा-

लग्गपदोसा य जदा, जो ठवणकुलाइं परिहरइ ॥६८॥

उद्गमदोषाश्च परित्यक्ता भवन्ति।

गच्छवासीणं इमा सामायारी। गच्छम्मि गाहा-

गच्छम्मि एस कप्पो, वासावासे तहेव उडुबद्धे।
कप्पो विधी, एस वासावासे, उडुबद्धे वा।

गामनगरनिगमेसुं, अतिसेसी ठावते सद्धी ॥ ६९ ॥

गामणगरातिसु विहरंताणं अतिसयदव्वा उच्चोसा, ते जेसु कुलेसु लब्भंति, ते ठाविजन्ता, ण सव्वसंघामगा तेसु पविसंति (सद्धि त्ति) संजमे सद्धा जस्स सो सद्धी, आयरिओ।

मज्जाद गाहा-

मज्जादठवणेणं, पवत्तगा सव्वखेत्तेसं आयरिया।
जो तु अमज्जातिट्ठो, आवज्जति मासियं लहुयं ॥७०॥

मज्जाया मेरा, ताणं ठवणा,पवत्तगा य सव्वखेत्तेसु आयरिया भवंति। जो पुण आयरिओ मज्जायं ण ठावेति, ण पवत्तेति वा, सो अमज्जाइट्ठो असमायारिणिप्फण्णं मासलहुं पावति । नि० चू० ४ उ०।

अथ स्थापनामनिधित्सुः प्रस्तावनामाह-

भत्तट्ठिया च खमगा, अंगलं चोयण जिणाहरणं।
जइ खमगा वंदंता, दासंतियरे विहिं वोच्छं ॥ ७४४ ॥

ते हि साधवः क्षेत्रं प्रविशन्तो भक्तार्थिनो वा भवेयुः, कृपका वा। यदि कृपकाः, ततो नोदकस्य नोदना प्रेरणा-यथा प्रथममेव तावदमङ्गलमिदं षष्ठपवासं प्रत्याख्याय प्रविश्यते। सूरिराह-(जिणाहरणं) जिनानामुदाहरणं मन्तव्यम्। ते हि भगवन्तो निष्क्रमणसमये प्रायश्चतुर्थादि तपः कृत्वा निष्क्रामन्ति, न च तेषाममङ्गलम्। एवं तत्रापि भावनीयम्। ततश्च यदि ते कृपकाः, तदा चैत्यानि वन्दमाना एव दर्शयन्ति स्थापनाकुलानि क्षेत्रप्रत्युपेक्षकान्। अथ भक्तार्थिनस्ते, ततः (इयरे त्ति) इतरेषु भक्तार्थिषु यो विधिस्तं वक्ष्ये।

तमेवाऽऽह-

सव्वे दट्ठुं उग्गा-हिएण ओदरि भयं समुप्पज्जे।
तम्हेक्क दोहिं तिहिं वा, उग्गाहिय चेइए वंदे ॥७४५॥

चैत्यवन्दनार्थं गन्तुकामा यदि सर्वेऽपि पात्रकमुद्ग्राहयेयुः, ततः सर्वान् साधूनुद्ग्राहितेन पात्रकेण दृष्ट्वा अहो! औदारिका एते इति श्राद्धकश्चिन्तयति। भयं च तस्य समुत्पद्यते। यथा-कथमेतावतां मयैकेन दास्यत इति ?। तस्मादेकेन द्वाभ्यां त्रिभिर्वा साधुभिरुद्ग्राहितपात्रकैः, शेषैः पुनरनुद्ग्राहितपात्रकैः सहिताः सूरयश्चैत्यानि वन्दन्ते।

अथ यद्येकोऽपि साधुः पात्रकं नोद्ग्राहयति, ततः को दोषः?, इत्याह--

सद्दाभंगोऽणुग्गा-हियम्मि ठवणाइया जवे दोसा।
घरचेइएँ आयरिए, कइपयगमणं च गहणं च ॥७४६॥

अथानुद्ग्राहिते पात्रके प्रयान्ति, ततश्चैत्यानि वन्दमानान् दृष्ट्वा कोऽपि धर्मश्रद्धावान् भक्तपानेन निमन्त्रयेत्, तदा यदि भोजनं नास्तीति कृत्वा न गृह्यते, ततः श्रद्धाभङ्गस्तस्योपजायते। अथ ब्रूयते-पात्रं गृहीत्वा यावद्वयमागच्छामः, तावदेवमेव तिष्ठतु, ततः स्थापनाऽऽदयो दोषा भवेयुः। तस्मादुद्ग्राहणीयं पात्रकम। जिनगृहेषु च वृन्देन सर्वेऽपि चैत्यानि वन्दित्वा गृहचैत्यवन्दनार्थमाचार्येण कतिपयैः साधुभिः सहोद्ग्राहितपात्रकैः समं गमनं कर्त्तव्यं, तत्र यदि श्रावकः प्रासुकेन भक्तपानेन निमन्त्रयेत्, ततो ग्रहणमपि तस्य कर्त्तव्यम्। वृ० १ उ०।

कानि पुनः कुलानि चैत्यवन्दनं विधानास्ते (सूरयः) दर्शयन्ति ?। उच्यते-

दाणे अभिगमसड्ढे, सम्मत्ते खलु तहेव मिच्छत्ते।
मामाए अविरत्ते, कुलाइं दाएंति गीतत्था ॥७१॥

रातो दिवसतो वा बाहिट्ठिया वसहीए वा निक्खं हिंडंता ठवणकुले दासेंति।

दरिसिनेसु गुरुणो इमा सामायारी-

दाणे अभिगमसड्ढे, सम्मत्ते खलु तहेव मिच्छत्ते।
मामाए अविरत्ते,कुलाइं ठाएंति गीयत्था॥५२। नि०चू०४उ०।

एतानि कुलानि स्थापयन्ति गीतार्थाः; अमीषु प्रवेष्टव्यममीषु तु नेति व्यवस्थापयन्तीत्यर्थः।

अथ न स्थापयन्ति तदा किम ?,इत्याह-

दाणे अभिगमसड्ढे, सम्मत्ते खलु तहेव मिच्छत्ते।
मामाए अविरत्ते, कुलाइं अठवितेति चउ गुरुगा॥७४७॥

एतानि कुलान्यस्थापयतश्चत्वारो गुरुकाः प्रायश्चित्तम।

यत एवमतः-

कयउस्सग्गाऽऽमंतण, अपुच्छणे अकहिएगयरदोसा।
ठवणकुलाण य ठवणं, पविसइ गीयत्थसंघाडो ॥५०॥

उत्सर्गे-चैत्यवन्दनं विधाय गतानामैर्यापथिकीकायोत्सर्गे कृते, यद्वा-(ओसय त्ति) आवश्यके कृते सर्वेऽपि साधवो गीतार्थानामन्त्रणीयाः-आगच्छत क्रमाश्रमणाः!, आचार्या स्थापनां प्रवर्त्तयिष्यन्ति। इत्थमुक्ते सर्वेऽप्यागम्य * गुरुपदकमलमभिवन्द्य रचिताञ्जलयस्तिष्ठन्ति। तत आचार्यैः क्षेत्रप्रत्युपेक्षकाः प्रष्टव्याः-कथयत कानि कुलानि प्रवेष्टव्यानि,कानि वा नेति ?। ततस्तैरपि क्षेत्रप्रत्युपेक्षकैर्विधिवत्कथनीयम। यदाचार्यैः क्षेत्रप्रत्युपेक्षकान्न पृच्छन्ति, ते च पृष्टाः सन्तो न कथयन्ति, ततस्तेषु प्रविशतां ये संयमाऽऽत्मविराधनाऽऽदयो दोषास्तानेकतरे-सूरयः,क्षेत्रप्रत्युपेक्षका वा, प्राप्नुवन्ति। ततः कथिते सति यानि गृहीतमिथ्यात्वमामकाविरत्तानि तानि सर्वैरेव स्थाप्यानि, यथा नैतेषु केनापि प्रवेष्टव्यम्,यानि तु दानश्राद्धाऽऽदीनि स्थापनाकुलानि तेषामपि स्थापनं कर्त्तव्यम्। कथम ?, इत्याह-प्रविशति एक एव गीतार्थसङ्घाटको गुर्वादिवैयावृत्यकरः, तेषु।

इदमेव भावयति-

गच्छम्मि एस कप्पो, वासावासे तहेव उडुबद्धे।
गामनगरनिगमेसुं, अइसेसी ठावए सद्धी ॥ ७५१ ॥

वर्षावासे, तथैव ऋतुबद्धे, ग्रामनगरनिगमेषु स्थितानां गच्छे एष कल्पः कः?, इत्याह-अतिशेषाणयतिशायीनि स्निग्धमधुरद्रव्याणि प्राप्यन्ते येषु तान्यतिशेषाणि (सद्धि त्ति) दानश्रद्धाव-

* "वा व्यपि" ॥ ६। ४। ३८ ॥ अनुनासिकलोपः । आगत्य, आगम्य ।

न्ति, एवंविधानि कुलानि स्थापयेत् । एकं गीतार्थसङ्घाटकं मुक्त्वा, शेषसङ्घाटकान्न तत्र प्रवेशं कारयेत् ।

आह निर्युक्तिकारः-

किं कारणं चमढणा, दव्वखओ लग्गमो वि य न सुज्झे ।
गच्छम्मि निग्घय कज्जं,आयरियगिलाणपाहुणए ॥७५२॥

किं कारणं को हेतुः ?, येन स्थापनाकुलेष्वेक एव सङ्घाटकः प्रविशति ?। सूरिराह-(चमढण त्ति) अन्यैरन्यैश्च सङ्घाटकैः प्रविशद्भिस्तानि कुलान्युद्वेगं प्राप्यन्ते । ततश्च द्रव्याणां स्निग्धमधुराणां क्रयो भवति । तदुक्रमोऽपि च न शुद्ध्यति । गच्छे च नियते निश्चितं प्रायोग्यद्रव्यैः कार्यं भवति । किमर्थम्?,इत्याह-आचार्यग्लानप्राघूर्णकानां हेतोरिति निर्युक्तिगाथासमासार्थः ।

अथ भाष्यकार एनामेव विवृणोति-

पुव्विं पि वीरसुणिया, भणिया भणिया पहावइ तुरियं ।
सा चमढणाएँ सिग्गा, नेच्छइ दट्ठुं पि गंतुं जे ॥७५३॥

" जइ काइ वीरसुणिया केणइ पारद्धिएण तित्तिराईणं गहणे विक्कारिया समाणी तित्तिराईणि गिण्हइ, पच्छा सा तेहिं सावएण विणा वि विक्कारेइ, सा वीरसुणिया इतो तओ पहावेइ, जाव न किंचि पेच्छइ, ताहे सा वेयारिया समाणी जइ सो सावयं दट्ठुं पच्छा छिक्कारेइ, तहा वि एयं पि न इच्छइ गंतुं । " अथ गाथाद्वययोजना-यः शुनिकाद्वितीयः शब्दाद्यपेक्षारहितो मृगयां करोति स वीरः उच्यते । तस्य शुनिका, यथा पूर्वमदृष्टेऽपि श्वापदे भणिता भणिता छीत्कृता छीत्कृता सती (तुरियं) त्वरितमितस्ततः प्रधावति, ततः सा 'चमढणया' निरर्थकमुद्वेजनया, 'सिग्गा' श्रान्ता सती, सन्तमपि श्वापदं दृष्ट्वा, पदमपि गन्तुं, ' जे ' इति पादपूरणे, नेच्छति । एष दृष्टान्तः ।

अथोपनयस्त्वेवम्-

एवं सङ्घकुलाइं, चमढिज्जंताइं अन्नमन्नेहिं ।
नेच्छंति किंचि दाउं, संतं पि तहिं गिलाणस्स ॥७५४॥

एवमनेनैव प्रकारेण, सङ्घकुलानि (चमढिज्जंताइं ति) उद्वेज्यमानानि, अन्यान्यैः-क्षुल्लकस्थविरकपकाऽऽदिभिः । यद्वा-(अन्नमन्नेहिं ति) अन्योन्यैः परिफल्गुप्रायैः कारणैः । यथा एकः प्राह-ग्लानस्य शीर्षं दह्यति, शर्करां प्रयच्छ । अपरः प्राह-ममोदरं दह्यति, दध्नः करम्बेन प्रयोजनम् । तदपरः प्राह-प्राघूर्णक आयातोऽस्ति घृताऽऽदिकं देहि । अन्यः प्राह-अहमाचार्यस्य हेतोरायातोऽस्मि,दुग्धं सशर्करं प्रतिलाभयेत्यादि । ततस्तानि ब्रवीत्-यूयं सर्व एव ग्लानाः, अतो वयं कियन्तं प्रयच्छामः ?, को वा जानाति-यूयमाचार्याऽऽदीनां हेतोर्गृह्णीथ, आहोस्विदात्मार्थम् । इत्येवमुद्वेज्यमानानि नेच्छन्ति,सदपि विद्यमानमपि, घृताऽऽदिकं, किञ्चिदित्स्तोकमात्रमपि, ग्लानस्य,उपलक्षणत्वात्-आचार्यप्राघूर्णकाऽऽदेरप्यर्थाय दानम् । ततश्च यत्ते ग्लानाऽऽदयः परिताप्यन्ते, तन्निष्पन्नं प्रायश्चित्तम् । गतं चमढणाद्वारम् ।

अथ द्रव्यक्रयोक्रमाशुद्धिकारणमाह-

अन्नो चमढणदोसो, दव्वखओ लग्गमो वि य न सुज्झे ।
खीणे खुड्डभदव्वे, नत्थि गिलाणस्स पाउग्गं ॥ ७५५॥

अन्योऽपरश्चमढणायां दोषः। कः?, इत्याह-द्रव्यस्याक्रयाऽऽदिभूताऽऽदेः,कारणमन्तरेणापि दिने दिने गृह्यमाणस्य,क्षयो भवति । ततश्च यद्यनिमषमक्रयाऽऽदिरूपं साधूनामर्थाय करोति, क्रीणाति वा,तत लङ्घमोऽपि च न शुद्ध्यति,सदोषत्वात् तदुत्पादितमपि न कल्पत इति भावः । ततः क्षीणे व्ययच्छिन्ने क्षुल्लभद्रके, प्रयोजने उत्पन्नेऽपि नास्ति ग्लानस्य प्रायोग्यं, ततः परितापमहाक्षुद्भावाऽऽदिका ग्लानाऽऽरोपणाऽन्यामद्रकप्रान्तकृताश्च दोषा भवन्ति ।

तानेवाह-

दव्वक्खएण पंतो, इत्थि घाएइ कीस ते दिन्नं ?।
नहो हट्ठपहट्ठो, करिज्ज अन्नं पि साहूणं ॥७५६॥

इह कस्यापि प्रान्तस्य प्रार्या आक्षिका, ततस्तया अन्यान्यसाधूनां याचमानानां प्रायोग्यं द्रव्यं सर्वमपि प्रदत्तम् । ततस्तस्याः पतिर्भोजनार्थमुपविष्टः सन् ब्रूते-कूरं मे परिवेषय । सा प्राह-साधूनां प्रदत्तः । स प्रतिब्रूयात्-पूपलिकां तर्हि परिवेषय । सा प्राह-ता अपि प्रदत्ताः । एवं सूपदुग्धदधिप्रभृतीन्यपि साधूनां वितीर्णानि । इत्थं द्रव्यक्रयेण प्रान्तः कुपितः सन् स्वस्त्रियं घातयेत्-कुट्टयेत् । कस्मात्किमर्थं, त्वया तेभ्यः सर्वमपि दत्तमिति कृत्वा ?। अत्र पाठान्तरम्-" दव्वक्खएण लुद्ध त्ति " लुब्धो लोभाभिभूतः, शेषं प्राग्वत् । यस्तु भद्रको गृहपतिः, स आक्षिकया सर्वस्मिन्नपि दत्ते, तत्रैव च कथिते, हृष्टप्रहृष्टो भवति; हृष्टो-नाम मनसि परितोषवान् । प्रहृष्टस्तु प्रहसितवदनः समुद्भूतरोमहर्ष इति । ततश्च कुर्यादन्यदपि,अवगाढमाऽऽदिकं साधूनामर्थाय कारयेदित्यर्थः । एतद्दोषपरिहरणार्थमेकं गीतार्थसङ्घाटकं मुक्त्वा, शेषाः स्थापनाकुलानि न निर्विशेयुः। प्राघूर्णके चाऽऽयाते सति प्राघूर्ण्यं विधेयं, तच्च स्वभावानुमतैरेव प्रकर्षवद्भिः ।

तथा चात्र दृष्टान्तमाह-

जड्डे महिसे चारिं, आसो गोणे य जे य जावसिया ।
एएसिं पडिवक्खे, चत्तारि उ संजया होंति ॥७५७॥

जड्डो हस्ती, महिषाइत्यौ प्रतीतौ, गोणो बलीवर्दः। एतेषां ये यावासिका यत्सस्तत्प्रायोग्यमुक्षमाषादिरूप आहारः, तेन तद्वदनेन चरन्तीति यावासिकाः, ते अनुकूलां चारीं मानयन्ति । एतेषां जड्डाऽऽदीनां प्रतिपक्षो प्रतिरूपः, पक्षसदृशपक्ष इत्यर्थः । तत्र चत्वारः प्राघूर्णकसंयता भवन्ति । तद्यथा-जड्डसमानो, महिषसमानः, अश्वसमानः, गोसमानश्चेति ।

अथामीषामेव व्याख्यानमाह-

जड्डो जं वा तं वा, सुकुमालं महिसओ महुरमासो ।
गोणो सुगंधिदव्वं, इच्छइ एमेव साहू वि ॥७५८॥

जड्डो हस्ती,स यद्वा तद्वा-सकर्कशकटुकाऽऽदिकमप्याहारयति । यस्तु महिषः, स सुकुमारं वेशकरीद्वाऽऽदिकमभिलषति । अश्वो मधुरं मुद्गमाषाऽऽदिकमभिकाङ्क्षति । गौर्बलीवर्दः, स सुगन्धिद्रव्यमञ्जुलकग्रन्थिपर्णाऽऽदिकमिच्छति । एवमेव साधवश्चत्वारोऽपि विधं भक्तमिच्छन्ति । " तत्थ पढमो जड्डसमाणो पाहुणगसाहु भणइ-मम जं दोसि पंचाउलहरं वा कंजियं वा लब्भइ, तं चेव आणेहि; नवरं उदरपूरं। एवं भणिए किं दोसी-

ण चेव आणेयव्वं, न विसेसेण सोहणं तस्स आणेयव्वं । विइओ पाहुणयसाहू भणइ-परं मे नेहरहिया विधूवासिया सुकुमाला होउ । तइओ जणइ-मद्दुरं नवरि मे होउ । चउत्थो भणइ-अन्नं वा पाणं वा निप्पकिंगधं मे आणेह । एवं ताणं जणंताणं जं लोगं तं सड्ढयकुलेहिंतो विसेसियं आणिज्जइ । तं ठविएसु चेव सड्ढयकुलेसु लब्भइ, ता ठविएसुं पाहुणे य कीरमाणे महंतो निज्जरालाभो, साहुक्कारो य पाविज्जइ । अतो कायव्वं तं जहाविहिं साहूहिं ति । "

आह-यद्येवं तर्हि आरूकुलेषु मा सोऽपि प्रवेशमकार्षीत्, यदा प्राघूर्णकाऽऽदिकार्यं समुत्पन्नं भविष्यति, तदा प्रवेशं करिष्यामः, ततश्च बहुतरमुत्कृष्टं च लप्स्यामहे ।

सूरिराह-

एवं च पुणो ठविए, अप्पविसंते इमे भवे दोसा ।
वीसरण संजयाणं, विसुक्कगोणीइ आरामे ॥७५७॥

एवं च तावच्चमदृणायां दोषा अभिहिताः । पुनःशब्दो विशेषणार्थः । यदि पुनः स्थापनाकुलानि सर्वथैव स्थाप्यन्ते, ततो (ठवियए त्ति) सर्वथैव स्थापितेषु अप्रविशतां साधूनामेते दोषा भवेयुः । तद्य था-विस्मरणं संयतानां भवति, जिह्वा दातव्येतिनियमाज्जावात् । अत्र च विशुष्कया गवा, आरामेण च दृष्टान्तः-"जइ ा एगस्स बोद्दविज्जाइयस्स गोणी-धेणू । सा य पओसपच्चूसेसु कुडवं कुडवं दुद्धस्स य पयच्छेइ । तस्स य दसहिं दिवसेहिं संखडी भविस्सइ । ताहे सो चिंतेइ-एसा यावी ताव बहुयं खीरं देइ, तवा य दुद्धहं खीरं भविस्सइ, समयतया अवस्सं कज्जं, तो इयाणिं न दुहामि । तया चेव एक्कसराए दुहिस्सामि, वरं पे दस कुलवा होंतया । पत्ते च संखडिदिवसे महंतं कुंडयं गहाय गोणीदुहणट्ठयाए दुक्को जाव विसुक्का, दुद्धं वि नत्थि कुरूस्स । एवं संजया वि अणप्पियंतो तेसिं सड्ढाणं पभुहा न चेव जाणंति-किं संजया अत्थि, न वा ? । ते वि संजया जाणिमं दिवसे कज्जं ति भिक्खा जाव न संति ताणि दव्वाणि, तम्हा दोण्ह वा तिण्ह वा दिवसाणं अवस्सं गंतव्वं ।

अहवा आरामदिट्ठंतो-जहा एगो आरामिओ सो चिंतेइ-मम आरामे पुप्फाणं आदयं दिणे दिणे लट्ठेइ, इंदमहदिवसे अ बहुजणो पुप्फाणं कायओ भविस्सइ, तो मा दिणे दिणे पुप्फाइं उच्चेमि, तद्दिवसं वरं बहूणि पुप्फाणि होंताणि त्ति । पत्ते य इंदमहदिवसे सो पत्थिया उ घेत्तुं गओ, ताव सो आरामो लुप्फुल्लो, एगमवि पुप्फं नत्थि । एवं ते यदिवसं कज्जमुप्पन्नं तद्दिवसं पविट्ठा ठवणाकुलेसु । ताहे सड्ढा जणंति-तुम्भे इहं चिय अत्थंता न मुणह वेलं अम्हं, एए चत्ता वेला अप्पविसंतेसु य न कोइ दंमणं पडिवज्जइ । न वा अम्हच्चए गिलाणपाउग्गं वि नत्थि । " यतश्चैवमतः प्रवेष्टव्यं स्थापनाकुलेषु गीतार्थसंघाटकेन ।

स कीदृग्दोषैर्विरहितः ?, इत्यत आह-

अलसं घसिरं सुविरं, खमगं कोहमाणमायलोहिल्लं ।
कोऊहल्लपविण्णं, वेयावच्चं न कारिज्जा ॥७६०॥

अलसं निरुद्यमं, घसितारं बहुभक्षिणं, सुसारं स्वप्नशीलम् । "शीलाऽऽद्यर्थस्येरः" ॥८। २।१४५॥ इति प्राकृतलक्षणबलादुभयत्रापि तृनप्रत्ययस्येरादेशः । क्षपकं प्रतीतं (कोहमाणमायालोहिल्लं त्ति) क्रोधवन्तं, मानवन्तं, मायावन्तं, लोभवन्तम् । सर्वत्रापि मतुप्प्रत्ययः । यथा गोमानिति । (कोऊहल्ल त्ति) मत्वर्थीयप्रत्ययलोपात्कौतूहलिनं, प्रतिबद्धं सूत्रार्थग्रहणसत्कम् । एतान् वैयावृत्यमाचार्यो न कारयेदिति समासार्थः ।

अथैनामेव गाथां विवरीषुः प्रथमतः प्रायश्चित्तमाह-

तिसु लहुओ तिसु लहुआ, गुरुओ गुरुआ य लहुग लहुगो य ।
पेसगकरिंतगाणं, आणाइ विराहणा चेव ॥७६१॥

अलसाऽऽदीन् य आचार्यः स्ववैयावृत्यार्थं प्रेषयति, व्यापारयतीत्यर्थः । यश्चैनिर्दोषैर्दुष्टः स्वयं वैयावृत्यं करोति; तयोः प्रेषककुर्वतोः प्रायश्चित्तम् । तद् यथा-त्रिषु अलसबह्वाशिनिद्रासु लघुको मासः, त्रिषु क्षपककोपनाभिमानिषु चत्वारो लघवः, मायावति गुरुको मासः । लोभवति चत्वारो गुरुकाः । कौतूहलवति चत्वारो लघुकाः, सूत्रार्थप्रतिबद्धे लघुमासः । आज्ञादयश्च दोषाः ; विराधना चाऽऽत्मसंयमविषया ।

तत्रालसस्वप्नशीलभोजनादोषानाह-

ता अत्थइ ना फिडिओ, सइकालो अन्नसमाविरे दोसा ।
गुरुपाई तेण विणा, विराहणुस्सक्कणवणादी ॥७६२॥

अलसः स्वप्नशीलश्च तावदुपविष्टः शयानो वा आस्ते, यावत् सन् विद्यमानकालः सत्कालः, जिज्ञासायां स्फिटितोऽतिक्रान्तः, तदा च पर्यटन्नसौ यद्वा तद्वा नक्तकानं लभते, न प्रायोग्यं, तेन प्रायोग्येण विना या गुर्वादीनामाचार्यबालवृद्धग्लानाऽऽदीनां विराधना तन्निष्पन्नं प्रायश्चित्तम् । यद्वा-अतिक्रान्तायां वेलायामायान्तं वैयावृत्यकरं मत्वा प्रायोग्यस्यानुपक्षणं भारूकानि कुर्युः, उत्सूरे तद्विदध्युरिति भावः। यद्वा-तदुपस्कृतं प्रायोग्यं नक्तं स्थापयेयुः, ततः स्थापनादोषः । आदिशब्दात्साधूनामसंविभक्तं भक्तं कथं मुखे प्रक्षिप्यते ? , इति बुद्ध्या तेषामश्नुवानानामन्तरायाऽऽदयो दोषाः ॥

अप्पत्ते वि अलंनो, हाणी ओसक्कणा य अइनद्दे ।
अणहिंमंतो अ चिरं, न लहइ जं किंचि आणेइ ॥७६३॥

अथ यदेतत् कर्मास्माकं मध्ये समापतितं तन्निर्वाहितं नवस्विति कृत्वा अप्राप्ते काले निद्रामटति, तदा अलाभो-न किमपि प्राप्यते । ततश्चाऽऽचार्याऽऽदीनां हानिरसंस्तरं भवति । यस्तु अतिभद्रकोऽतीव धर्मश्रद्धावान्, गूहयति सोऽवष्वष्कणं, विवक्षितकालादर्वाक् नक्तनिष्पादनं कुर्यात् । यद्वा-असारबलसत्वान्निद्रालुत्वाद्वा चिरमहिएममानः सन् किमपि लभते; यत्किञ्चिद्वा पर्युषितं वल्लचणकाऽऽदिकं वा आनयति, तेन नक्तेनापथ्यतया गुर्वादीनां ग्लानत्वं भवति ; ततः परितापमहादुःखाऽऽदिका ग्लानाऽऽरोपणा ।

अथ 'घसिर त्ति' पदं भावयति-

गिण्हामि अप्पणो ता, पज्जत्तं तो गुरूण घित्थामि ।
घेत्तुं च तेसि घेत्थं, सीयन्नओसक्कओमाई ॥७६४॥

यो महोदरः स वैयावृत्त्ये नियुक्तो निद्रामटन् चिन्तयति-गृह्णामि तावदात्मनो योग्यं पर्याप्तं, ततो गुरूणां हेतोर्ग्रहीष्यामि । यद्वा-तेषां गुरूणां योग्यं गृहीत्वा, तत आत्मनो अर्थाय ग्रहीष्ये, इत्थं विचिन्त्य यदि प्रथमं गुरूणां योग्यं गृहीत्वा पश्चादात्मार्थं गृह्णाति, ततो यावता कालेनाऽऽत्मना पूर्यते, तत्पर्याप्तं भवति, तावता स्थापनाकुलेषु वेलाऽतिक्रमो भवेत् ।

अथ वेलाऽतिक्रमभयाद्देशक एव तेषु प्रविशति, तत आत्मनोऽवशं भवेत्, उदरपूरणं न भवेदिति भावः । ततश्चैवमाहारतया तस्यैव अनागाढपरितापनाऽऽदयो दोषाः ।

अथ क्षपकक्रोधवतो दोषानाह-

परितावेज्जइ खमओ, अह गिण्हइ अप्पणो इयर-हाणी ।
अविदिन्ने कोहिल्लो, रूसइ किं वा तुमं देसि ? ॥७६५॥

यदि क्षपको गुरूणां हेतोः प्रायोग्यं गृह्णाति,नाऽऽत्मनः, ततः स एव परिताप्यते । अथाऽऽत्मनो गृह्णाति, तत इतरेषामाचार्यादीनां, हानिः परितापना । यस्तु क्रोधवान्, सोऽविदीर्णे-अदत्ते सति रुष्यति । रुष्टश्चागारिणं भणति-यदि भवान् न ददाति, तर्हि मा दात् । किं भवदीयं गृहं दृष्ट्वाऽस्माभिः प्रव्रज्या प्रतिपन्नेति ?। किं वा त्वं ददासि, येनैवमहं ददामीति गर्वितो भवसि ? । इत्यादिनिर्दुर्वचनैः सार्द्धं विपरिणमयति ।

मानिमायिनोर्दोषानाह-

लुणाणुट्ठमदिन्ने, थद्धो न य गच्छए पुणो जं वा ।
माई भद्दगभोई, पंतेण व अप्पणो छाए ॥७६६॥

यः स्तब्धः मानी, स ऊने तुच्छे दत्ते, (अणुट्ठ त्ति) अभ्युत्थाने वा अकृते (अदिन्न त्ति) सर्वथैव वा अदत्ते सति, पुनर्भूयः, तदीयं गृहं न गच्छति । भणति च-श्रावकाणामितरेषां च को विशेषः?, यदि द्वितयेऽपि साधूनामभ्युत्थानाऽऽदिविनयप्रक्रियामन्तरेण भिक्षां प्रयच्छन्ति ?; ततो नाहमस्य गृहं भूयः प्रविशामीति । ततो (जं व त्ति) तद्गृहिप्रवेशं विना प्रायोग्यस्यालाभे यत्किञ्चिदाचार्याऽऽदीनां परितापनाऽऽदिकं भवति, तच्छिष्यस्य प्रायश्चित्तम् । यस्तु मायी भद्रकभोजी, प्रायोग्यमुपाश्रयाद्बहिर्भुक्त्वा श्रान्तमानयतीति भावः । यद्वा-प्रान्तेन वल्लचणकाऽऽदिना, आत्मनो योग्यं स्निग्धमधुरद्रव्यं गृह्णाति, गृहीत्वा च गुरूणां दर्शयति ।

लुब्धस्य दोषानाह-

ओजासइ खीराई, दिज्जंते वा न वारई लुद्धो ।
जेऽणेगविसणदोसा, एगस्स वि ते उ लुद्धस्स ॥७६७॥

यो लुब्धः सन् स्थापनाकुलेषु क्षीराऽऽदीन्यवभाषते । यद्वा-श्रद्धाऽतिरेकतस्तैर्दीयमानानि स्निग्धमधुराणि न वारयति, ततश्च येऽनेकेषु स्थापनाकुलं प्रविशत्सु चमढणाऽऽदयो दोषा वर्णिताः, ते सर्वेऽप्येकस्यापि लुब्धस्य प्रवेशतो द्रष्टव्याः ।

कुतूहलिनः सूत्रार्थप्रतिबद्धस्य च दोषानाह-

नरुमाई पिच्छंतो, ता अत्थइ जाव फिट्टई वेला ।
सुत्तत्थे पडिबद्धो, ओसक्कऽभिसक्कमाईया ॥७६८॥

यः कुतूहली, स नटाऽऽदीन् प्रेक्षमाणस्तावदास्ते, यावद्वेला स्फिटति । यस्तु सूत्रे अर्थे वा प्रतिबद्धः आसक्तः, स गुरूणां धर्मकथाऽऽदिव्यग्रतया यदैवान्तरं लभते, तदैवाप्राप्तकालेऽपि भिक्षार्थमवतरति । वेलाऽतिक्रमं वा कृत्वाऽकालवेलाऽऽदाववतरति, ततोऽवष्वष्कणाभिष्वष्कणाऽऽदयो दोषाः ।

यतश्चैवमतः किं कर्त्तव्यमिति ?, आह-

एयदोसविमुक्कं, कमजोगिं नायसीलमायारं ।
गुरुजत्तिमं विणीयं, वेयावच्चं तु कारेज्जा ॥७६९॥

एभिरनन्तरोक्तैः,दोषैर्विमुक्तं वर्जितम्,क्रियाविशिष्टम्?,इत्याह-कृतयोगिनं गीतार्थसङ्गातशीलाऽऽचारम्-ज्ञाते सम्यगवगते,शीले प्रियधर्मताऽऽदिरूपम्,आचारश्चक्रवालसामाचारीरूपो यस्य स तथा, तम् । तथा गुरव आचार्याः,तेषु भक्तिमन्तमान्तरप्रतिबन्धोपेतम् । विनीतमभ्युत्थानाऽऽदिबाह्यविनयवन्तम् । एवंविधं शिष्यं वैयावृत्यमाचार्यः कारयेत् * ।

आह-किमर्थं वैयावृत्यकरस्येयन्तो गुणा मृग्यन्ते ?।

उच्यते-

साहंति य पियधम्मा, एसणदोसे अनिग्गहविसेसे ।
एवं तु विहिग्गहणे, दव्वं वड्ढंति गीयत्था ॥७७०॥

प्रियधर्माणः, उपलक्षणत्वादपरैरप्यनन्तरोक्तगुणैर्युक्ता वैयावृत्यकराः (साहंति त्ति) कथयन्ति, एषणादोषान्-अशुद्धनिष्क्रियाऽऽदीन् । यथा-इत्थं शङ्कितदोषो भवति, इत्थं तु निष्क्रिय इत्यादि । एतैश्च दोषैर्दुष्टं साधूनां न दीयते । अभिग्रहविशेषांश्च जिनकल्पिकस्थविरकल्पिकसंबन्धिनः, कथयन्ति । एवम्-उक्तेन विधिना, स्थापनाकुलेषु ग्रहणे,भक्तं वर्द्धयन्तो गीतार्थाः,द्रव्यमपि घृताऽऽदिकं वर्द्धयन्ति ।

इदमेव भावति-

एसणदोसे व कए, अकए वा जइगुणविकत्थंता ।
कहयंति असद्दहणा, एसणदोसे गुणे चेव ॥७७१॥

एषणादोषे शङ्कितादौ,कृते वा अकृते वा,यतिगुणान् क्षान्तिमार्दवाऽऽदीन्, विकत्थमानाः-विविधं श्लाघ्यमानाः,अश्रद्दधानाः कैतववर्जिताः, न भक्तपोषायनिमित्तमिति भावः । एषणादोषान् कथयन्ति । तथा गुणाः-साधूनां प्राशुकैषणीयभक्तपानप्रभवाः पापकर्मनिर्जराऽऽदयः,तांश्च,गीतार्थाः कथयन्ति । यथा-"समणोवासगस्स णं भंते! तहारूवं समणं वा माहणं वा फासुएणं एसणिज्जेणं असणपाणखाइमसाइमेणं पडिलाभेमाणस्स किं कज्जइ?। गोयमा ! एगंतसो निज्जरा कज्जइ,नत्थि य से पावकम्मे कज्जइ त्ति" ।

अथेत्थं न कथयेयुः, ततः के दोषा इति ?, आह-

बालाई परिचत्ता, अकहिंतेऽणेसणाइगहणं वा ।
न य कहपबंधदोसा, अह य गुणा साहिया होंति ॥७७२॥

तेषु श्राद्धकुलेषु जिनकल्पिका भिक्षार्थमायाताः, तेषां परमान्नाऽऽदिकं लेपकृतमुपनीतं, तैश्च भगवद्भिः प्रतिषिद्धम् । ततस्तानि श्राद्धकानि चिन्तयेयुः-'एत एव प्रधानाः साधवः, इतरे तु स्निग्धमधुरद्रव्यग्राहिणः सर्वेऽपि नामधारकमात्राः साध्वाभासा एवं इति । ततः श्रद्धाभङ्गभाजितानि सूयः प्रायोग्यद्रव्यं नोपदौकयेयुः । एवमभिग्रहविशेषानकथयंश्च गीतार्थबालाऽऽदयः परित्यक्ता भवन्ति । अनेषणातो दोषान्, शुद्धभक्तपानदानस्य च गुणान्न कथयेयुः, ततस्तानि श्राद्धकान्यनेषणां कुर्युः; तत्र च यदि प्रतिषिध्यति, तदाऽपि बालाऽऽदयः परित्यक्ताः ; तेषां प्रायोग्याभावे संस्तरणाभावात् । अथ न प्रतिषिध्यते, ततोऽनेषणाऽऽदिग्रहणं भावयेत् । आदिशब्द एव-

* "डुकृञोऽन्यतरस्याम्" ॥ १ । ४ । ५३ ॥ (पाणि०) डुकृञोर्णौ यः कर्ता स णौ कर्म वा स्यात् । "डुकृञोर्णौ" ॥ २ । २ । ८॥ (हैम०) डुकृञोरणिकर्ता णौ कर्म वा स्यात् ।

णादोषाणामेव स्वगतानेकभेदसूचकः। आह-गोचरप्रविष्टानां साधूनां कथाप्रबन्धः कर्तुं न कल्पते। अमी च साधव इत्यमेषणादोषाऽऽदीनां कथाप्रबन्धतः कथं न दोषभाजो भवन्तीति ?। उच्यते-न च नैवात्र, कथाप्रबन्धदोषा भवन्ति। यदिह भक्तपानलोलुपतया कथां प्रबध्नीयुः, ततो भवेयुर्दोषाः, तच्च नास्ति, एषणाशुद्धिहेतोरेव तेषामित्थं कथनात्। अथ च प्रस्तुतेत्थं कथयद्भिस्तैर्गीतार्थैर्गुणाः-बालवृद्धाऽऽद्युपष्टम्भगुरुप्रभृतयः, साधिता भवन्ति।

कथं पुनस्ते कथयन्ति ?, इत्याह-

ठाणं गमणागमणं, वारं पिंमसोहिमुद्धोगं।
जाणंताण वि तुब्भं, बहुवक्खेवाण कहयामो ॥७७३॥

स्थानं नाम-आत्मप्रवचनसंयमोपघातवर्जितो भूभागः। यत्र स्थितस्य गवाश्वमहिषाऽऽदेराहननाऽऽदि न भवति, स आत्मोपघातवर्जितः। यत्र तु निर्दमनाऽऽद्यशुचिस्थानव्यतिरिक्ते प्रदेशे स्थितस्य लोकः प्रवचनस्यावर्णं न ब्रूयात्, स प्रवचनोपघातवर्जितः। यत्र पुनः पृथिव्यादिकायानां विराधना न भवति, स संयमोपघातवर्जितः। गमनं, गच्छता षट्कायानामुपमर्दनं कुर्वता न गन्तव्यम्। एवमागमनमपि, भिक्षां गृहीत्वा साधुसंमुखमागच्छता दायकेनोपयुक्तेनाऽऽगन्तव्यम। व्यापारः कर्त्तनकएमनपेषणाऽऽदिकः। तं च सम्यग् ज्ञापयन्ति-ईदृशे व्यापारे भित्ता ग्रहीतुं कल्पते, ईदृशे तु नेति। पिण्डशुद्धेरुद्गमकं श्लोकं शेषोद्देशं कथयन्ति-इत्थमाधाकर्माऽऽदयो दोषा उपजायन्ते; इत्थमेभिर्दोषैरदुष्टः पिण्डः साधूनां दीयमानः शुद्धो बहुफलश्च भवतीत्येवंपिण्डनिर्युक्तिक्लेशतो ज्ञापयन्तीति भावः। तथा यद्यपि यूयमिदं साधुधर्मरूपमग्रेऽपि जानीथ, तथाऽपि युष्माकं बहुव्यक्षेपाणामविस्मरणार्थं कथयाम इति।

अपि च-

केसिंचि अनिग्गहिया, अणभिग्गहिएसणा य कोसिंचि।
मा हु अवन्नं काहिह, सव्वे वि हु ते जिणाणाए ॥७७४॥

केषाञ्चित्साधूनाम्,अभिगृहीतैषणा। यथा-जिनकल्पिकानाम्। केषाञ्चित्तु अनभिगृहीता। यथा-गच्छवासिनाम्, सप्तस्वपि एषणासु तेषां भक्तपानस्य ग्रहणात्। एवं चापरां भक्तपानग्रहणसामाचारीं दृष्ट्वा यूयं मा अवज्ञां करिष्यथ। कुतः?, इत्याह-सर्वेऽपि ते भगवन्तो जिनकल्पिकाः स्थविरकल्पिकाश्च, जिनाऽऽज्ञायां वर्तन्ते, स्वस्वकल्पस्थितिपरिपालनात्। अतो न केऽप्यवज्ञातुमर्हन्तीति भावः।

किं च-

संविग्गभाविआणं, लुद्धगदिट्ठंतभाविआणं च।
मुत्तूण खेत्तकाले, भावं च कहिंति सुद्धंपि ॥७७५॥

येषां श्राद्धानां पुरत एषणादोषाः कथ्यन्ते, ते द्विधा-संविग्नभाविताः, लुब्धकदृष्टान्तभाविताश्च। संविग्नैरुद्यतविहारिभिर्भाविताः संविग्नभाविताः। ये तु पार्श्वस्थाऽऽदिभिर्लुब्धकदृष्टान्तेन भावितास्ते लुब्धकदृष्टान्तभाविताः। कथमिति चेत् ?। उच्यते—पार्श्वस्थाः श्राद्धानित्थं प्रज्ञापयन्ति। यथा-कस्यापि हरिणस्य पृष्ठतो लुब्धको धावति, तस्य हरिणस्य पलायनं श्रेयः; लुब्धकस्यापि तत्पृष्ठतोऽनुधावनं श्रेयः। एवं साधोरप्यनेषणीयग्रहणतः पलायितुमेव युज्यते; श्रावकस्यापि तेन तेनोपायेन साधोरेषणीयमनेषणीयं वा दातुमेव युज्यते इति। इत्थं द्विविधानामपि श्राद्धानां पुरतः शुद्धं द्वाचत्वारिंशद्दोषरहितं, यदुद्गमिवोद्गं-स्तोकस्तोकग्रहणात्, तच्छुद्धोञ्छम, उत्सर्गपदमित्यर्थः। तत्कथयन्ति। किं सर्वदैव ?, नेत्याह-मुक्त्वा क्षेत्रकालौ, भावं चेति। क्षेत्रं कर्कशक्षेत्रमध्वानं वा, कालं दुर्भिक्षाऽऽदिकं, भावं ग्लानत्वाऽऽदिकं प्रतीत्य, ते श्राद्धाः किञ्चिदपवादमपि प्राप्नुवन्ति।

अपि च-इदमपि ते श्राद्धा ज्ञापनीयाः-

संथरणम्मि असुद्धं, दोण्ह वि गिण्हंतदितयाणऽहियं।
आउरदिट्ठंतेणं, तं चेव हियं असंथरणे ॥७७६॥

संस्तरणं नाम-प्राशुकमेषणीयं वा अशनाऽऽदि पर्याप्तं प्राप्यते, न च किमपि ग्लानत्वं विद्यते; तत्राशुद्धम-अप्राशुकमनेषणीयं च, गृह्णतो ददतश्च, द्वयोरपि,अहितमपथ्यम; गृह्णतः संयमबाधाविधायित्वात्। ददतस्तु भवान्तरे खल्वायुर्निबन्धनकर्मोपार्जनात्। तदेवाशुद्धम, असंस्तरणे अनिर्वाहे, दीयमानं च हितं पथ्यं भवति। आह-कथं यदेवाकल्प्यं, तदेव च कल्प्यं भवितुमर्हतीति ?। उच्यते-आतुरो रोगी, तस्य दृष्टान्तेनेदं मन्तव्यम। यथा हि-रोगिणः कामप्यवस्थामाश्रित्य अशौषधाऽऽदिकमपथ्यं भवति, काञ्चित्पुनः समाश्रित्य तदेव पथ्यम; एवमिहापि भावनीयम्। तदेवं भावितम-" साहंति य पियधम्मा, एषणदोसे अजिग्गहविसेसे। " (७७० गाथा) इति।

अथ यदुक्तम्-(एवं तु विहिग्गहणे त्ति) तत्र विधिग्रहणं भावयति—

संचइयमसंचइयं, नाऊण असंचयं तु गिण्हंति।
संचइयं पुण कज्जे, निब्बंधे चेव संतरितं ॥७७७॥

प्रायोग्यद्रव्यं द्विधा-सञ्चयिकमसञ्चयिकं च। सञ्चयिकं-घृतगुममोदकाऽऽदि। असञ्चयिकं तु-दुग्धदधिशालिसूपाऽऽदि। तत्र यदसञ्चयिकं, तत् स्थापनाकुलेषु प्रभूतं ज्ञात्वा गृह्णन्ति। सञ्चयिकं पुनर्ग्लानप्राघूर्णकाऽऽदौ महति कार्ये उत्पन्ने गृह्णन्ति। अथ श्राद्धानां महानिर्बन्धो भवति, ततोऽग्लाना अपि गृह्णन्ति, परं सान्तरितम; न दिने दिने इति भावः। एष सञ्चयिकग्रहणस्यापवाद उक्तः।

अथापवादस्यापवादमाह-

अहवण सद्धाविभवे, काले भावं च बालवुड्ढाई।
नाउ निरंतरगहणं, अचिन्नभावे य ठायंति ॥७७८॥

"अहवण त्ति" अथानर्थक्यं प्रकारान्तरद्योतनार्थम। श्रावकाणां श्रद्धां दानरुचिं तीव्रां परिज्ञाय, विज्ञवं च विपुलतरं तदीयगृहेऽवगम्य, कालं दुर्भिक्षाऽऽदिकं, भावं च ग्लानत्वाऽऽदिकं, ज्ञात्वा,बालवृद्धाऽऽदयो वा आप्यायिता भवन्तीति ज्ञात्वा, निरन्तरग्रहणमपि कुर्वन्तिः सञ्चयिकमपि दिने दिने गृह्णन्तीति भावः। यावच्च दायकस्य दानभावो न व्यवच्छिद्यते, तावदच्छिन्ने भावे तिष्ठन्ति; दीयमानं प्रतिषेधयन्तीत्यर्थः। यथा तेषां चूयोऽपि श्रद्धा जायते।

अथ स्थापनाकुले भक्तपानग्रहणे सामाचारीमभिधित्सुराह-

दव्वपमाणं गणणा, खारिय फोमिय तहेव अद्धा य।
संविग्ग एगठाणे, अणेगसाहूसु पन्नरस ॥७७९॥

ऊव्यं शाल्यादि, तस्य प्रमाणं ज्ञातव्यम्-कियदत्र गृहे रसवत्यां शालिमुद्गाऽऽदि दिने दिने प्रविशति ? गणना नाम-कियन्ति घृतपलान्यत्र प्रविशन्ति। यद्वा-कियन्ति मानुषाण्यत्र जेम (य) न्ति। क्कारो लवणं, तेन संस्कृतानि क्कारितानि-करीराऽऽदीनि व्यञ्जनानि, तानि कियन्त्यत्र पच्यन्त इति ? । (फोडिय त्ति) स्फोटितानि मरिचजीरकाऽऽदिकटुभाण्डधूपितानि शालनकानि । एतेषामपि तथैव प्रमाणं ज्ञातव्यम । अद्धा कालः,स ज्ञातव्यः-किमत्र प्रहरे वेला, इत सार्द्धप्रहरे,आहोस्वित्प्रहरद्वये इति । एतद् ऊव्यप्रमाणाऽऽदि विक्रीय संविग्नो मोक्षाभिलाषी । (एगट्ठाणे त्ति) एकः संघाटकः, तत्र प्रविशति । यदि पुनरनेके साधवः स्थापनाकुलेषु प्रविशन्ति, ततः पञ्चदशाऽऽधाकर्माऽऽदयोऽनिसृष्टान्ता उद्गमदोषा भवन्ति, अध्यवपूरकस्य मिश्रजातपर्यन्तभावात् । एष संग्रहगाथासमासार्थः ।

अस्या एव भाष्यकृद् व्याख्यानमाह-

असणाइदव्वमाणे, दसपरिमिएँ एगभत्तमुव्वरति ।
सो एगदिणं कप्पइ, निच्चं तुज्झोयरो इहरा * ॥७८०॥

अशनमोदनमुद्गाऽऽदि, आदिग्रहणात्पानकखाद्यमखाद्यमपरिग्रहः । एतेषां द्रव्याणां परिमितानामपरिमितानां च मानं प्रमाणं ज्ञातव्यम। यत्र परिमितमशनाऽऽदि ऊव्यं प्रविशति,तत्र दशानां मानुषाणां हेतोरुपस्क्रियमाणे, एकस्यापरस्य योग्यं भक्तं भक्तार्थमुद्धरति । स च भक्तार्थ एकस्य साधोः परिपूर्णाऽऽहारमात्ररूप एकं दिनं प्रदातुं कल्पते। इतरथा यदि द्वितीयाऽऽदिदिवसेषु गृह्णन्ति, तदा (निच्चं तु त्ति) स साधुनिः प्रतिदिवसं गृह्यमाणो भक्तार्थो नित्यजेमनमेव तैः आद्धैर्गण्यते, ततश्च तदर्थमध्यवपूरकः प्रक्षिप्यते । एवं तावत्परिमितमाश्रित्योक्तम् ।

अथापरिमितमधिकृत्याऽऽह-

अपरिमियारद्धेण वि, दसण्हमुव्वरइ एगभत्तट्ठो ।
वंजणसमितिमपिट्ठे, वेसणमाईसु य तहेव ॥७८१॥

यत्र पुनरपरिमितं रान्धते, तत्र दशानां मानुषाणामवांगपि नाष्टाऽऽदिसङ्ख्याकानामपि हेतोः, राद्धे, एकस्य योग्यो भक्तार्थ उद्धरति । स च दिने दिने कल्पत इति । आह च चूर्णिकृत्-" अपरिमिए पुण भत्ते, दसण्हट्ठारेण वि एगस्स जत्तट्ठो दिणे दिणे कप्पइ चेव।" तथा व्यञ्जनानि तीमनवटिकाभर्जिकाऽऽदीनि। (समितिम त्ति) समिता कणिका, तया निष्पन्नाः समितिमाः-मण्डकाः, पूपलिका वा, पिष्टमुण्डेरकाऽऽदि। सक्तुप्रभृति वा। (वेसणं) मरिचजीरकादिहिङ्गुप्रभृतिकं कटुभाण्डम । आदिग्रहणाल्लवणशुण्ठ्यादिपरिग्रहः । एतेषामपि परिमाणं तथैव ऊव्यं, यथा अशनाऽऽदीनाम् । एतावता द्रव्यप्रमाणं गणना क्कारितस्फोटितानीति गाथादलं भावितम् ।

अथ " अद्धा य त्ति " पदं व्याचष्टे-

सतिकालऊं नाउं, कुले कुले ताहि तत्थ पविसंति ।
ओसक्कणाइ दोसा, अलंभे बालाइहाणी य ॥७८२॥

सत्कालाऽद्धा-भिक्षायाः संबन्धी यः, तत्र देशकालरूपोऽद्धा, तं ज्ञात्वा, कुले कुले, तस्मिन् देशे, तत्र काले, प्रविशन्ति । अथ देशकाले अतिक्रान्तेऽप्राप्ते वा प्रविशन्ति, ततोऽवष्वष्कणाऽऽदयो दोषाः। अथावष्वष्कणाऽऽदिकं तानि आरुकान्यशुद्धदानदोषश्च न कुर्युः, ततः प्रायोग्यऊव्यस्यालाभे बालाऽऽदीनां हानिर्भवेदिति ।

एगो व होज्ज गच्छो, दोन्नि व तिन्नि व तवणा असंविग्ग ।
सोही गिलाणमाई, असई दवाइ एमेव ॥ ७८३ ॥

विवक्षितक्षेत्रे एको वा गच्छो भवेत्, द्वौ वा, त्रयो वा । तत्रैकं गच्छमाश्रित्य विधिरुक्तः । अथ द्वयादीन् गच्छानधिकृत्य विधिरभिधीयते-(तवणा असंविग्गे त्ति) येषु असंविग्नाः प्रविशन्ति, तेषां आरुकुलानां स्थापना कर्त्तव्या । न तेषु प्रवेष्टव्यम् । अथ प्रविशन्ति, ततः पञ्चदशोऽमदोषानापद्यन्ते । (सोहि त्ति) तद्दोषनिष्पन्ना शोधिः प्रायश्चित्तम । यद्वा-"सोहि त्ति पदं गिलाणमाई" इत्युत्तरपदेन सह योज्यते । अतोऽयमर्थः-ग्लानप्राघूर्णकाऽऽदीनामर्थाय, असंविग्नभावितेष्वपि कुलेषु शोधिरेषणाशुद्धिः; तया शुद्धं भक्तं गृह्यते, न कश्चिद्दोषः । " (असई दवाइ एमेव त्ति) " अन्यत्रासति अविद्यमाने, ऊवाऽऽदिकमप्येवमेव-असंविग्नभावितकुलेषु ग्रहीतव्यमिति द्वारगाथासमासार्थः ।

अथैनामेव विवरीषुराह-

संविग्गमणुन्नाते, अतिंति अहवा कुले विरंचिंति ।
अण्णातुंछं च सहू, एमेव य संजईवग्गे ॥ ७८४ ॥

इह यैस्तत्र क्षेत्रं प्रत्युपेक्षितं, तेषु पूर्वस्थितेषु ये अन्ये साधवः समायान्ति, ते सांभोगिकाः, असांभोगिकाश्च । तत्र चासांभोगिकेषु संविग्नेषु विधिरुच्यते-संविग्नैर्वास्तव्यसाधुनिः,अनुज्ञाते पूर्वस्थापनाकुलेषु, 'प्रविशत, वयमज्ञातोञ्छं गवेषयिष्यामः,' इत्येवमनुज्ञायां प्रदत्तायामागन्तुकाः संविग्नाः स्थापनाकुलेषु (अतिंति त्ति) प्रविशन्ति । वास्तव्यास्तु स्थापनाकुलवर्जेषु गुरुबालवृद्धाऽऽदीनामात्मनश्च हेतोर्भक्तपानमुत्पादयन्ति । अथवा वास्तव्या असहिष्णवः, ततो यावन्तो गच्छाः, तावद्भिर्जागैः स्थापनाकुलानि विरचयन्ति-आर्याः! एतावन्तु कुलेषु प्रवेष्टव्यम्, एतावत्सु पुनरस्माभिरिति । अथवा यथागन्तुकाः (सहू इति) सहिष्णवः समर्थशरीराः, ततोऽज्ञातोञ्छं गवेषयन्तः पर्यटन्ति । एवमेव च संयतीवर्गेऽपि ऊहनीयम । ता अपि द्वयादिगच्छसद्भावे एवंविधमेवंविधं कुर्वन्तीत्यर्थः ।

एवं तु अण्णसंभो-इआण संजोइआण ते चेव ।
जाणित्ता निव्वंधं, वत्थव्वेणं स तु पमाणं ॥ ७८५ ॥

एवं, तुः पुनरर्थे, एवं पुनर्विधिरन्यसाम्भोगिकानामुक्तः ये तु साम्भोगिकाःपरस्परमेकसामाचारीकाः, तेषामागन्तुकानामर्थाय त एव वास्तव्याः स्थापनाकुलेभ्यो भक्तपानमानीय प्रयच्छन्ति । अथ आद्धाः प्राघूर्णकभद्रका अतीव निर्बन्धं कुर्युः । यथा-प्राघूर्णकसंघाटकोऽप्यस्मद्गृहे प्रस्थापनीयः। ततो निर्बन्धं ज्ञात्वा, वास्तव्यसंघाटकेनाऽऽगन्तुकसंघाटकं गृहीत्वा तत्र गन्तव्यम् । यदि च-तत्र प्रचुरप्रायोग्यं प्राप्यते, तत आगन्तुकसंघाटकेन गवेषणा न कर्त्तव्या । यथा-किमित्येतावत्प्रभूतं दीयते?। किं तु, (स तु) स एव वास्तव्यसंघाटकः, तत्र प्रमाणं यावन्मात्रं ग्रहीतव्यम, यद्वा कल्पनीयं, तदेतत्सर्वमपि स एव जानातीति भावः । एष एकस्यां वसतौ स्थितानां विधिरुक्तः । बृ० १ उ० । ओघ० ।

* " सो एगदिणं कप्पतिऽनेकंतिएँ ओदरो इहरा ।"
इति प्राचीनपुस्तकस्थपाठः ।

अथ पृथग्वसतिव्यवस्थितानामाह-

असइ वसहीएँ वीसुं, रायणिए वसहिभोयणा गम्मा *।
असहू अपरिणया वा, ताहे वीसुं सहू वियरे ॥७७६॥

विस्तीर्णाया वसतेरसत्यभावे, विष्वक् पृथग्, अन्यस्यां वसतौ स्थितानाम्, आगन्तुको वास्तव्यो वा यो रत्नाधिक आचार्यः, तस्य वसतावागम्यावमरत्नाधिकेन भोजनं कर्त्तव्यम् । अथैकस्मिन् गच्छे, द्वयोर्वा गच्छयोरसहिष्णवो ग्लाना भवेयुः; अपरिणता वा शैक्षाः-परस्परमिलिताः सन्तोऽसंखडं कुर्युः, तदा (वीसुं ति) अपरिणतान् पृथक् पृथग् भोजयन्ति। (सहू वियरे त्ति) अकारप्रश्लेषादसहिष्णूनां प्रथमालिकां वितरन्ति प्रयच्छन्ति, ततोऽपरिणतान् वसतौ स्थापयित्वा कृतमालिकान् सहिष्णून् गृहीत्वा, सर्वेऽपि रत्नाधिकवसतौ गत्वा मण्डल्यां भुञ्जते।

अथ बोत्तरार्द्धमन्यथा व्याख्यायते-(असहू इति) यद्यमरत्नाधिक आचार्यः स्वयमसहिष्णुर्न शक्नोति रत्नाधिकाऽऽचार्यसन्निधौ गन्तुं, न वा तावन्तीं वेलां प्रतिपालयितुं शक्तः, अपरिणता वा अगीतार्थास्तस्य शिष्याः, तेषां नास्ति कोऽपि सामाचार्या उपदेष्टा, आलोचनाया वा प्रतीच्छकः। ततो विष्वग्वसतौ द्वावप्याचार्यौ समुद्दिशतः (सहू वियरे त्ति) अथवा-यदि रत्नाधिकः सहिष्णुः, तत इतरस्यावमरत्नाधिकस्योपाश्रयं गत्वा समुद्दिशति। एवं तावद् द्वयोर्गच्छयोर्विधिरुक्तः।

अथ त्रयो गच्छा भवेयुः, ततः को विधिरिति ?, आह-

तिण्हं एक्केण समं, भत्तट्ठं अप्पणो अवट्ठं तु।
पच्छा इयरेण समं, आगमणे विरेगो सो चेव ॥७७७॥

यद्येक आचार्यो वास्तव्यो भवति, द्वौ चाऽऽगन्तुकौ, तत इत्थं त्रयाणामाचार्याणां सम्मते द्वयोरागन्तुकयोर्मध्याद् यो रत्नाधिकः, तस्य संबन्धी यो वैयावृत्यकरः, तेनैकेन समं वास्तव्याऽऽचार्यवैयावृत्यकरः पर्यटन् प्राघूर्णकाऽऽचार्यस्य हेतोर्भक्तार्थं परिपूर्णाऽऽहारमात्ररूपम्, आत्मनश्चाऽऽत्मीयाऽऽचार्यार्थमर्धार्धमर्धमात्रं, भाऽकुलेभ्यो गृह्णाति। पश्चादितरेणाऽऽगन्तुकावमरत्नाधिकाऽऽचार्यसंबन्धिना वैयावृत्यकृता समं पर्यटन् तथैव तद्योग्यं नक्तार्थमात्मनश्चार्धमात्रं गृह्णाति। (आगमणे विरेगो सो चेव त्ति) यदि त्रिचतुःप्रभृतीनामाचार्याणामागमनं भवति, ततः स एव विरेको विभजनम्। किमुक्तं भवति ?-तदीयैरपि वैयावृत्यकरैः समं यथाक्रमं पर्यटता वास्तव्यसाधुना आत्मीयाऽऽचार्यार्थं तथा उपाध्यादिनिर्जातैर्नक्तार्थं विभज्य भक्तं ग्रहीतव्यं, यथा सर्वान्तिमवैयावृत्यकरेण समं पर्यटन्नात्मगुरूणां नक्तार्थं परिपूरयतीति।

अथ "गिलाणमाई असति त्ति" पदं विवृणोति-

अतरंतस्स उ जोगा-मईइ इयरेहिँ भाविओवसिउं।
अन्नमहाणमुवक्खवम, जं वा सन्नी सयं भुंजे ॥७८०॥

अतरन्तो ग्लानः, तस्य, उपलक्षणत्वाद्-आचार्यस्यापि, यद्योग्यं प्रायोग्यं, तस्यासत्यलाभे, इतरैर्नाम असंविग्नैः, तैर्भाविनेषु श्राद्धकुलेषु, प्रायेण य, यस्मिन्महानसे तेऽसंविग्ना अध्यवपूरकाऽऽदिदोषदुष्टां भिक्षां गृह्णन्ति, तद्भोजयित्वा, यदन्यस्मिन्महानसे केवलं गृहार्थमेवोपस्कृतं, ततो ग्लानाऽऽद्यर्थं गृह्यते। यद्वा नक्तं पृथगुपस्कृतं, सन्नी स गृहस्वामी श्रावकः, स्वयं भुङ्क्ते, ततो वा गृह्यते, अन्यदीयाद्वा कुलोऽपि गृहाद्यत्प्रहेणकाऽऽदिकमायातं तद् गृह्यते।

अथ 'दवाइ एमेव त्ति' पदं व्याख्यानयन्ति-

असतीए व दवस्स व, परिसित्तियकंजिगुल्लदवाईणि।
अत्तट्ठियाइँ गिण्हइ, सव्वालम्भे विमिस्साई ॥७८१॥

यदि ग्लानस्य गच्छस्य वा योग्यं द्रवं पानकं संविग्नभावितेष्वपि कुलेषु (परिसित्तिय त्ति) येनोष्णोदकेन दधिभाजनानि लेप्यन्ते, तत् परिषिक्तपानकं काञ्जिकमारनालम्, गुल्लद्रवं नाम-यस्यां केवल्लिकायां गुरु उत्कालयते, तस्यां यत्तप्तमतप्तं वा पानीयं तद् गुडोपलिप्तं द्रवं गुरुद्रवम्। आदिग्रहणाच्छिन्नापानकाऽऽदिपरिग्रहः। एतानि पानकानि यदि तैः श्राद्धकैरात्माऽऽर्थितानि प्रथममेवाऽऽत्मार्थं कृतानि, ग्लानाद्यर्थं गृह्णाति। (सव्वालम्भे त्ति) यदि सर्वथैव ग्लानस्य वा गच्छस्य वा योग्यमेषणीयं न लभ्यते, तदा (विमिस्साइ त्ति) विमिश्राणि असंविग्नानां श्राद्धकाणां चार्थायाचित्तीकृतानि, तान्यपि द्वितीयपदे गृह्यन्ते।

अथ "असईइ दवाइ" इत्यत्र योऽयमादिशब्दः, तस्य सफलतामुपदर्शयन्नाह-

पाणट्ठाणपविट्ठो, विसुद्धमाहारलंदिओ गिण्हे।
अद्धाणाइअसंथरे, जइउं एमेव जदमुक्कं ॥७९०॥

पानकार्थं वा प्रविष्टो यदि विशुद्धेनैषणीयेनाऽऽहारेण गृहपतिना छन्द्यते निमन्त्र्यते, ततश्छन्दितः सन् तमपि गृह्णाति। तथा-(अद्धाणाइ त्ति) अध्वनिर्गतानां साधूनां हेतोः, आदिशब्दादवमौदर्याशिवाऽऽदिषु वा असंस्तरणे, असंविग्नभावितकुलेषु, एवमेव ग्लानोक्तविधिना शुद्धान्वेषणे, यतित्वा यत्नं कृत्वा, ततो यदशुद्धमनेषणीयं, तदप्यागमोक्तनीत्या गृह्णन्ति। उक्तं स्थविरकल्पिकानधिकृत्य विहारद्वारम्। बृ० १ उ०।

उवणाणंतय-स्थापनानन्तक-न०। स्थापनानन्तकं यदकादावनन्तकमिति स्थाप्यते। तस्मिन्नन्तकनेदे, स्था० १० ठा०। (इदं च 'अणंतग' शब्दे प्रथमभागे २६० पृष्ठे उक्तव्यम्)

उवणाणय-स्थापनानय-पुं०। स्थापनाप्राधान्यमिच्छति नये, स्थापनानय आह- स्थापनेत्याकारः। ततश्च-"प्रमाणमिदमेवार्थस्याऽऽकारमयतां प्रति। नामाऽऽदि न विनाऽऽकारं, यतः केनापि वेद्यते"॥१॥ तथाहि-नामनोऽर्थान्तरेऽपि वर्त्तयितुं शक्यत्वाद् न तद्बुद्धेरेऽप्याकारावभासमन्तरेण नियतनीलाऽऽद्यर्थग्रहणमित्याकारग्रहण एव ग्रहात् सर्वस्य सिद्धमाकारमयत्वम्, ततो ज्ञानज्ञेयानिधानानिधेयाऽऽदिसकलमाकाराऽऽरोपितमेव संव्यवहारावतारि, तद्विकलस्य खपुष्पस्येवासत्त्वात्। उत्त० १ अ०।

आगारो चिय मइस-द्दवत्थुकिरियाफलाणिहाणाइं।
आगारमयं सव्वं, जमणागारं तयं नत्थि ॥६४॥

आकार एव आकारमात्ररूपाण्येव, कानि?, इत्याह-मतिश्च शब्दश्चेत्यादिद्वन्द्वः। तत्र मतिस्तावज्ज्ञेयाऽऽकारग्रहणपरिणत्त्वादाकारवती। तदनाकारत्वे तु-"नीलस्येदं संवेदनं नपीताऽऽदेः," इति नियमस्य न स्यात्, नियामकाभावात्। नीलाऽऽद्याकारो हि नियामकः, यदा च स नेष्यते, तदा 'नीलग्राहिणी मतिर्न पीताऽऽदिग्राहिणी।" इति कथं व्यवस्थाप्येत?, विशेषाभा-

* गतुं, इति प्राचीनपुस्तके पाठः।

वात्, तस्मादाकारवत्त्वेव मतिरभ्युपगन्तव्या । शब्दोऽपि पौद्गलिकत्वादाकारवानेव । घटाऽऽदिकं तु वस्त्वाकारवत्त्वेन प्रत्यक्षसिद्धमेव । क्रियाऽप्युत्क्षेपणावक्षेपणाऽऽदिका क्रियावतोऽनन्यत्वादाकारवत्त्वेव । फलमपि कुम्भकाराऽऽदिक्रियासाध्यं घटाऽऽदिकं मृत्पिण्डाऽऽदिवस्तुपर्यायरूपत्वादाकारवदेव । अभिधानमपि शब्दः; स च पौद्गलिकत्वादाकारवानित्युक्तमेव । तस्माद् यदस्ति तत्सर्वमाकारमयमेव । यत्त्वनाकारं तन्नास्त्येव, वन्ध्यापुत्राऽऽदिरूपत्वात्तस्येति गाथार्थः ॥ ६४ ॥

अथ प्रयोगद्वारेणानाकारं वस्तु निराचिकीर्षुराह-

न पराणुमयं वत्थुं, आगाराभावओ खपुप्फं व ।
उवलंभव्ववहारा-भावाओ नाणऽऽगारं च ॥ ६५ ॥

परस्याऽऽकारवद्वस्तुनिषेधकस्य, अनुमतमभिप्रेतं, सामर्थ्याद् यदनाकारवद् वस्तु, तन्नास्ति, आकाराभावात्, खपुष्पवत् । अपरमपि हेतुद्वयमाह-" उवलंभ " इत्यादि । (नाणगारमिति) नास्त्यनाकारं वस्तु, सर्वैरेवानुपलभ्यमानत्वात्, तेनाणीयसोऽपि व्यवहारस्याभावाच्च इति पर्यन्तवर्ती, चकारोऽत्र योजनीयः, खपुष्पवदिति दृष्टान्तो हेतुद्वयेऽपि स एवेति गाथार्थः । ॥ ६५ ॥ विशे० ।

ठवणापुरिस-स्थापनापुरुष-पुं० । पुरुषप्रतिमाऽऽदौ, स्था० ३ ठा० १ उ० । काष्ठाऽऽदिनिर्मिते जिनप्रतिमाऽऽदिके, सूत्र० १ श्रु० ४ अ० १ उ० ।

ठवणायरिय-स्थापनाऽऽचार्य्य-पुं० । अक्षनिरटकाऽऽदिषु स्थापिते आचार्ये, (ध०) श्रावकस्य स्थापनाऽऽचार्यविचारः-ननु "गुरुविरहम्मि य ठवणा, गुरुत्वएसोवदंसणत्थं च । जिणविरहम्मि व जिणबिंबसेवणामंतणं सहलं ॥१॥" इत्यादिविशेषाऽऽवश्यकवचनप्रामाण्याद् यतिसामायिकप्रस्तावे भदन्तशब्दं व्याख्यानयता भाष्यकृता साधुमाश्रित्य स्थापनाऽऽचार्यस्थापनमुक्तं, न श्रावकमाश्रित्येति कुतस्तेषां स्थापनाऽधिकार इति चेत् ? न । भदन्तशब्दं भणतां तेषां स्थापनाऽऽचार्यस्थापनं युक्तमेव । अन्यथा भदन्तशब्दपठनं व्यर्थमेव स्यात् । अथ च स्थापनाऽऽचार्यस्थापनमन्तरेणापि वन्दनाऽऽद्यनुष्ठानं विधीयते, तदा वन्दनकनिर्युक्तौ-"आयप्पमाणमित्तो, चउद्दिसिं होइ उग्गहो गुरुणो । " इत्यवग्रहप्रमाणमुक्तम्, तत्कथं घटते ? । न हि गुर्वभावे गुरुगतावग्रहप्रमाणं घटमानं स्यात्, ग्रामाद्यभावे तत्सीमव्यवस्थावत् । ध० २ अधि० । (त्रयोदशानां प्रतिलेखनाभिः स्थापनाऽऽचार्यस्य प्रतिलेखना 'पडिलेहणा' शब्दे वक्ष्यते)

ठवणावीर-स्थापनावीर-पुं० । वीरवर्द्धमानस्वामिस्थापनावत् सुजटस्य स्थापनायाम्, सू० प्र० २० पाहु० ।

ठवणासच्च-स्थापनासत्य-न० । स्थाप्यत इति स्थापना, यल्लेप्याऽऽदिकर्मादिविकल्पेन स्थाप्यते तद्विषये सत्यं स्थापनासत्यम् । यथा-अजिनोऽपि जिनोऽनाचार्योऽप्याचार्योऽयमिति । स्था० १० ठा० । जिनप्रतिमाऽऽदिषु जिनाऽऽदिव्यपदेशे, प्रश्न० २ संव० द्वार । स्थापना सत्या यथाविधमङ्काऽऽदिविन्यासं मुद्राविन्यासं चोपलभ्य प्रयुज्यते, यथा-एकमंकं धुरतो बिन्दुद्वयसहितमुपलभ्य शतमिदमिति, बिन्दुत्रयसहितं सहस्रमिदमिति । तथाविधं मुद्राविन्यासमुपलभ्य मृत्तिकाऽऽदिषु माषोऽयं कार्षापणोऽयमिति । प्रज्ञा० ११ पद । ध० ।

ठवणिंद-स्थापनेन्द्र-पुं० । इन्द्राऽऽकारलक्षिते, स्था० ३ ठा० १ उ० । (व्याख्या चास्य 'इंद' शब्दे द्वितीयभागे ५३३ पृष्ठे गता)

ठविआ-स्त्री० । देशी-प्रतिमायाम्, दे० ना० ४ वर्ग ।

ठविता-स्थापयित्वा-अव्य० । प्ररूप्येत्यर्थे, व्य० १ उ० ।

ठविय-स्थापित-त्रि० । संयतार्थं स्वस्थाने परस्थाने वा स्थापिते स्थापनादोषदुष्टे, व्य० ३ उ० । "ठवियं संकमट्ठाए, तं च होज्ज चलाचलम् ।" (६५गाथा) दश०५ अ०१ उ० । स्थापितं द्विविधम-चिरस्थापितम्,अचिरस्थापितं च । तत्र चिरस्थापिते मासलघु । बृ० १ उ० । ऊर्ध्वे, निकटे, हिक्कायां च । दे० ना०४ वर्ग ।

ठवियगजोइ(ण्)-स्थापनकभोजिन्-त्रि० । स्थापनादोषदुष्टप्राभृतकभोजिनि, व्य १ उ० ।

ठविया-स्थापिता-स्त्री० । आरोपणाभेदे, (स्था०) यत्प्रायश्चित्तमापन्नस्तस्य स्थापितं कृतं, न वाहयितुमारब्धमित्यर्थः । आचार्याऽऽदिवैयावृत्यकरणार्थम्, तत्किं वहन्न शक्नोति वैयावृत्यं कर्तुम्, वैयावृत्यसमाप्तौ तु तत्करिष्यतीति स्थापितोच्यत इति । स्था० ५ ठा० २ उ० । " मासाऽऽदी निक्खित्तं, जं सेसं दिज्जएतत्तु ।" नि० चू०१ उ० । यदि पुनर्यन्मासाऽऽदिकमापन्नं तद् वैयावृत्यमाचार्याऽऽदीनां करोतीति स्थापितं क्रियते, तस्मिंश्च स्थापिते यदन्यत् शेषमुद्घातमनुद्घातं वाऽऽपद्यते, तत्सर्वमपि प्रमादनिवारणार्थमनुद्घातं दीयते सा 'हाऽहमा' आरोपणा । व्य० १ उ० ।

ठा-स्था-धा० । गतिनिवृत्तौ, " स्थष्ठाथक्कचिट्ठनिरप्पाः " ॥ ८ । ४ । १६ ॥ इति निष्ठतेष्ठाऽऽदेशः। 'ठाई' 'ठाअइ' 'ठाणं'। प्रा०४ पाद । "जाहे एया जिब्वइ ताहे णवं ठाहेति।" नि० चू०१ उ०।

ठाउं-स्थातुम्-अव्य० । 'ष्ठा' गतिनिवृत्तौ इत्यस्य तुमुन्प्रत्ययान्तस्य भवति । अवस्थायेत्यर्थे, आव० ५ अ० । " इच्छामि ठाउं काउस्सग्गं । " आव० ५ अ० ।

ठाऊण-स्थित्वा-अव्य० । अवस्थायेत्यर्थे, पञ्चा० १८ विव० ।

ठाण-स्तान-न० । अवकाशे, बृ० ३ उ० ।

ठाण-स्थान-न० । ' स्था ' भावाऽऽदौ ल्युट् । " स्थष्ठाथक्कचिट्ठनिरप्पाः " ॥ ८ । ४ । १६ ॥ इति स्थाधातोष्ठाऽऽदेशः । प्रा०४ पाद । अवस्थितिविशेषे, आव० ५ अ० । एकत्वैव (दश०४ अ०) उपवेशने, दश० ३ अ० । निषद्यायाम्, स्था० १० ठा० । निषदनस्थाने, त्वग्वर्तनस्थाने, भ० १४ श० ८ उ० । पादन्यासविशेषे, भ० ७ श० ७ उ० । अवस्थाने, प्रव० ११२ द्वार । आसने, ज्ञा० १ श्रु० १ अ० । गमनाऽपरभ्य निवेशं कृत्वा क्वचित् प्रदेशेषु अवस्थाने, बृ० १ उ० । स्थितौ, सूत्र० १ श्रु० ५ अ० १ उ० । बृ० । कुड्याऽऽदिषु स्थाने, नि० चू० १ उ० । माने, दे० ना० ४ वर्ग ।

जे भिक्खू अणंतरहियाए पुढवीए ठाणं वा सेज्जं वा निसीहियं वा चेएइ, चेयंतं वा साइज्जइ ॥ १ ॥ जे भिक्खू

ससरक्खाए पुढवीए ठाणं वा सेज्जं वा णिसीहियं वा चेएइ, चेयंतं वा साइज्जइ ॥ २ ॥ जे भिक्खू ससणिद्धाए पुढवीए ठाणं वा सेज्जं वा णिसीहियं वा चेएइ, चेयंतं वा साइज्जइ ॥ ३ ॥ जे भिक्खू चित्तमंताए सिलाए चित्तमंताए लेलुए कोलावासंसि वा दारुए जीव पइट्ठिए सअंडे सपाणे सबीए सहरिए सउस्से उत्तिंगपणगदगमट्टियमक्कडयसंताणयंसि ठाणं वा सेज्जं वा णिसीहियं वा चेएइ, चेयंतं वा साइज्जइ ॥ ४ ॥

ससणिद्धससरक्खसिलालेलुकोलावासा सअंडे सपाणे सबीए सहरिए सउस्से उत्तिंगपणगदगमट्टियमक्कडयसंकमणं, एते सुत्तपदा ।

इमं वक्खाणं । गाहा-

पुढवीमादी ठाणा, जत्तियमित्ता उ आहिया सुत्ते ।
तेसु ठाणादीणी, चेतेंताऽऽणादिणो दोसो ॥ १ ॥

ठाणं काउस्सग्गं, आदिसद्दातो णिसीयणतुयट्टणा,चेयणं करणं,अणंतरहिया णाम सचित्ता,तम्मि सट्ठाणे परट्ठाणे चउलहु।

अहवा । गाहा-

अंतररहिताऽऽयंतर, ईसिं वा होति ससणिद्धा ।
आंतरणविभिन्ना फा-सुगाय पुढवी तु ससरक्खा ॥ २ ॥

अंतरं ववधाणं, तेण रहिता, निरंतरमित्यर्थः । अहवा-पुढवी अणंतभावेण रहिता असंखातजीविका, पज्जत्त पमुख संखेया वि। अथवा-जीए पुढवीए अंतो जीवेहिं रहिया ण अंतरहिया अणंतरहिता, सव्वा सचेयना, न मिश्रा इत्यर्थः । ईसिं उल्ला ससणिद्धा, सेयं पुढवी अचित्ता, सचित्तेण आरद्धएण विभिन्ना ससरक्खा ।

गाहा-

चित्तं जीवो जाणितो, तेणं सह संगया तु होंति सचित्ता ।
पासाणसिला रुंदा, लेलू पुण माट्टिया लेट्टू ॥ ४ ॥

सचेयणा रुंदा महासिला, सचित्तो वा लेलू लेट्टुओ ।

गाहा-

कोला उ घुणा तेसिं. आवासो तप्पतिट्ठियं दारुं ।
अंडा तु मुंगादी, पाणगहणे तमा चउरो ॥ ५ ॥
बितियं तु अप्परूढं, तदेव रूढं तु होति हरिताऽऽदी ।
कीमगनगरुत्तिंगो, मक्कुंकुर णिरंकुरो पणगो ॥६॥

कोला घुणा, तेसिं आवासदारुए वा, जीवपतिट्ठिए सपाणे दारुए, पुढवीए वा । एवं सबीए दारुए, पुढवीए वा. अणंकुरियं बीयं, तं चेव अंकुरुग्गमं हरितं, कीडयणगरगो-वत्तिगो, पणगउल्लो वा; पणगो पंचवण्णो-संकुरो अणंकुरो वा उल्लावेहो, अंडगा मुंगाऽऽदिगा, दगमट्टिया-चिक्खल्लो,सचित्तो, मीसो वा ।

गाहा-

मक्कडसंताणो पुण, लूतापुरतो उ अफुडितो जाव ।
संकमणे तस्सेव उ, पिपीलिकादीणिओ तेसिं ॥ ७ ॥

कोलियपुडगं अफुडियं संताणगं, तस्सेव पुरओ गमणकाले संकमणं भण्णति । अहवा-संताणगं संकमणं पिपीलियमक्कोडगादीणं जाणति । ठाणं उच्चाणं, सेज्जा आसणं, निसीहिका सज्झायकरणं । एएसिं चेयणं करणं, आवण्णसंताणं, पच्छित्तं, आणादिया य दोसा,आय संजमे य दोसा जहासंभवं जाणियव्वं।

पुढवादिएगिंदियाण संघट्टणादिकरणे चेयणोवमा इमा ।

गाहा-

थेरुवमा अक्कंते, मत्ते सुत्ते व जारिसं दुक्खं ।
एमेव य अव्वत्ता, वियणा एगिंदियाणं तु ॥ ८ ॥

जहा थेरस्स जराए जिण्णस्स चरिससतायुस्स तरुणेण बलवता जमलपाणिणा सव्वायामेण अक्कंतस्स जारिसा वेयणा, तारिसा पुढविकाईयाण अधिकतरा ठाणादिदियक्कंतेहिं वेयणा भवति । वेयणा य जीवस्स भवति,णो ऽजीवस्स,ते य जीवलिंगा एगिंदिएसु अव्वत्ता जहा मत्ते सुत्ते वा अव्वत्तं सुहदुक्खलिंगं, एवं एगिंदिएसु वि अव्वत्ता वेयणा दट्ठव्वा, लिंगं च ।

किं च-एगिंदियाण उवयोगपसाहगा इमे दिट्ठंता । गाहा—

जोयणे वा खित्तिए वा, जहा णेहो तणुट्ठितो ।
पावल्ले नेहकज्जेसु, कारेतुं जे अपच्चलो ॥ ९ ॥

जहा रुक्खे त्ति जोयणे सुहुमो नेहगुणो अत्थि जा, ना तेणाहारिएण सरीरोवचयो भवति, ण य अव्वत्तणओ लक्खिज्जति । तहा पुढवीए अत्थि नेहो सुहुमो, सो वि सुहुमत्तणेणं ण दिस्सति, जओ पुढवीए तणुट्ठितो अप्पः, ततो तेण पावल्ले नेहकज्जे हत्थादिसरीरसंभवं कुंभसयकयम् ।

अस्स दिट्ठंतस्स उवसंहारो । गाहा-

कोहातिया परिणामा, तहा एगिंदियाण तु ।
पावल्ले तेसु कज्जेसु, कारेतुं जे अपच्चलं ॥ १० ॥

एगिंदियाणं कोहादिया परिणामा, सागारिया य उवयोगा, तहा सातादियाओ वेयणातो, एते सव्वे भावा सुहुमत्तणओ अणतिसयस्स अणुवलक्खा । जहा सण्णी पज्जत्ता कोहुदया उक्कोसंति,तिव्वेण भिगुडिं वा करेंति, तेसु ते अप्पीतिकज्जेसु तहा पावल्लेण एगिंदिया अपच्चला, असमर्था इत्यर्थः। जम्हा पुढवीकाया एवंविधवेदणमणुभवंति, तम्हा तेसु ठाणादियं ण कायव्वं ।

अववादतो वा करेज्ज । गाहा-

वोसट्ठकायअभिवो, गेलण्णऽद्धाणसंभमेगतरे ।
वसहीवाघाएण य, असती जयणा य जा जत्थ ॥११॥

वोसट्ठकायो पाओवगतो, सो परप्पओगा असुकंपपडिणीयत्तणेण वा अणंतरहियाठाणेसु उवेज्जेज्जा, असिवगहिया वसहिमलभंता रुक्खादिहेट्ठेसु ठायंति, वेज्जट्ठा, ओसहिट्ठा वा गिलाणो जया णिज्जाति, तदा वसहिअभावे अथंडिले ठाएज्ज, अद्धाणं पडिवण्णा वा ठायंति, अगीणमादिसंभवे वा वसहिणिग्गता ठायंति, वसहिवाघाए वा ठायंति, सव्वहा वा वसहिअभावे ठायंति, अणंतरहितादियंकिलाण जा जत्थ जयणा संभवति पमिलेहणपमज्जणादिणा वा, सा सव्वा वि कायव्वा ॥

सुत्त-

जे भिक्खू घुणंसि वा गिहेलुयंसि वा ओसक्कालंसि वा कामजलंसि वा ठाणं वा सिज्जं वा णिसीहियं वा चेएइ, चेयंतं वा साइज्जइ ॥ ५ ॥

गाहा-

थूणाऽऽदी ठाणा खलु, जत्तियमेत्ता उ आहिया सुत्ते ।
तेसिं ठाणादीणं, चेतंताऽऽणादिणो दोसा ॥१२॥

थूणा वेली, गिहेबुओ उंबरो, उसुकालं उक्खलं, कामजलं बहाणपीढं ।

गाहा-

थूणा उ होति वियली, गिहेबुओ उंबरो उ नायव्वो ।
उदुक्खलं उसुकालं, सिणाणपीढं तु कामजलं ॥ १३ ॥

गतार्था । णवरं-सिणाण मज्जणा दो वि पगट्ठा ।

विनियपदं । गाहा-

वोसिट्ठकाएँ असिवे, गेलण्णऽद्धाणसंभमेगतरे ।
वसहीवाघाएण य, असती जयणा य जा जत्थिया ॥१४॥

पूर्ववत् ।

जे भिक्खू कुक्षियंसि वा सिलंसि वा लेलुयंसि वा अंतरिक्खजायंसि वा ठाणं वा सेज्जं वा णिसीहियं वा चेएइ, चेयंतं वा साइज्जइ ॥ ६ ॥

कुलियं कुड्डं, तं जतो णिश्चमचतरति, इयरा सह करजएण सिला, नाएं वा तमी सिला, सिला बेट्ठू पुव्वुत्ता पढमसुत्ते णियमा सचित्ता इह भणिज्जा । शेषं पूर्ववत् ।

गाहा-

कुलियादी ठाणा खलु, जत्तियमेत्ता उ आहिया सुत्ते ।
तेसु ठाणादीणी, चेतंता आणमादीणि ॥ १५ ॥

पूर्ववत् ।

वोसिट्ठकाएँ असिवे, गेलण्णऽद्धाणसंभमेगतरे ।
वसहीवाघाएण य, असती जयणा य जा जत्थिया ।१६।

पूर्ववत् ।

सुत्तं-

जे भिक्खू खंधंसि वा फलिहंसि वा अक्कुडंसि वा गिहमालंसि वा दुब्बंधे दुनिक्खित्ते चलचले ठाणं वा सेज्जं वा निसीहियं वा चेएइ चेयंतं वा साइज्जइ ॥ ७ ॥

(जे भिक्खू खंधंसि वा इत्यादि) खंधे पागारो, पेढं वा, फलिहो अग्गला, अकुडो मंचो । सो य मंडवो । गिहोवरि मालो दुभूमिगादीणि । जहा गयक्खोवसोभितो पासादो सव्वोवरि दाता जं हम्मितलं भूमितलं तरं वा हम्मतलं । एस सुत्तत्थो ।

इमा णिज्जुत्ती । खंधादिगाहा-

खंधो खलु पागारो, पेढं फलिहो तु अग्गला होति ।
अहवा खंधो उ घरो, मंचो अक्कुडो गिहमाई ॥१७॥

अहवा खंधो घरो, गृहे इष्टकादारुसंघातो, स्कन्ध इत्यर्थः । दुबंधे त्ति । बंधो दुविधो-रज्जुबंधो, कट्ठादिसु वेहबंधो वा । तेण सुबद्धं दुबद्धं, दुणिक्खित्तं ति-णिहितं, स्थापितमित्यर्थः । तेण सुणिक्खित्तं, केसिं चि दुक्खिप्पिरिक्खित्तं ति आलावगो, तं अपमिलेहियं दुप्पडिलेहियं वा, तं निप्पकंपं अनिप्पकंपं, अनिष्प्रकम्पित्वादेव चलाचलं चलनाचलनस्वभावं, तादृशे स्थानाऽऽदि न कर्तव्यम-

रज्जुवेहो बंधो, णिहयाणिहतं तु होति निक्खित्तं ।
अनिरिक्खअपडिलेहा, चलाचलमणिप्पकंपं तु ॥ १८ ॥

पवमंतो कायवहे, आउवघाओ य नाणनेदादी ।
तस्सेव पुणो करणे, आहिगरणं असंकरणे वा ॥ १९ ॥

गतार्था । णवरं (णिहयाणिहयं ति) णिक्खयमणिक्खयं वा । तारिसे सदोसे ठाणाइं करेंतस्स इमे दोसा—

ततो णमंतो छण्हं कायाणं विराहणं करेज्ज, अप्पणो वा से हत्थपादादिविराहणा हवेज्जा । भाणादि वा उवकरणजातं विराधेज्जा । तस्स य थूणादियस्स पाविअस्स रज्जुयस्स वा बोडितस्स वा वि संघातियस्स पुणो करणे अणस्स वा अहिणयस्स करणे, अधिकरणं भवति । परिसिद्धकरणे आणादिया दोसा, चउलहुं च से पच्छित्तं ।

वोसिट्ठकाएँ असिवे, गेलण्णऽद्धाण संजमेगतरे ।
वसहीवाघाएण य, असती जयणा य जा जत्थ ॥२०॥

पूर्ववत् । नि० चू० १३ उ० । स्वरूपप्राप्तौ, सम्म० ३ काण्ड । ऊर्ध्वस्थाने, व्य० ४ उ० । कायोत्सर्गे, वृ० १ उ० । नि० चू० । ओघ० । पं० भा० । आचा० । स्था० । आव० । सूत्र० ।

पञ्च स्थानानि मुक्त्वा निर्ग्रन्थैर्निर्ग्रन्थीभिश्चैकत्र कायोत्सर्गो न कार्यः—

पंचहिं ठाणेहिं निग्गंथा य निग्गंथीओ य एगयओ ठाणं वा सेज्जं वा निसीहियं वा चेएमाणा णाइक्कमंति । तं जहा-अत्थेगइया निग्गंथा य निग्गंथीओ य एगं महं आगासियं चिलावायं दीहद्धमकविसमुपविट्ठा, तत्थेगयाओ ठाणं वा सेज्जं वा निसीहियं वा चेएमाणा णाइक्कमंति १। अत्थेगइया णिग्गंथा य णिग्गंथीओ य गामंसि वा नगरंसि वा० जाव रायहाणिं वा वासं उवगया एगइया जत्थ उवस्सयं लभंति, एगइया णो लभंति, तत्थेगयाओ ठाणं वा० जाव णाइक्कमंति २। अत्थेगइया य णिग्गंथा य णिग्गंथीओ य णागकुमारावासंसि वा सुवण्णकुमारावासंसि वा वासं उवगया, तत्थेगयाओ ठाणं वा० जाव णाइक्कमंति ३। आमोसगा दीसंति इच्छंति णिग्गंथीओ चीवरपडियाए पडिगाहेत्तए, तत्थेगयाओ ठाणं वा० जाव णाइक्कमंति ४। जुवाणा दीसंति ते इच्छंति णिग्गंथीओ मेहुणवडियाए पडिगाहेत्तए, तत्थेगयाओ ठाणं वा० जाव णाइक्कमंति ५। इच्चेहिं पंचहिं ठाणेहिं० जाव णाइक्कमंति ।

"पंचहिं" इत्यादि सुगमम् । नवरम् (एगयाओ त्ति) एकत्र (ठाणं ति) कायोत्सर्गः, उपवेशनं वा । (सेज्जं त्ति) शयनम् । (निसीहिय त्ति) स्वाध्यायस्थानं, चेतयन्तः कुर्वन्तो नातिक्रामन्ति-न लङ्घयन्ति, आक्रामन्तीति गम्यते । (अत्थि त्ति) सन्ति भवन्ति, (एगइय त्ति) एके केचन, एकामद्वितीयां, महतीं विपुलामग्रामिकामकामिकां वा अनभिलषणीयां छिन्नाम, आपातः सार्थगोकुलाऽऽदीनां यस्यां सा तथा, ताम् । दीर्घोऽध्वा मार्गो यस्यां सा तथा, तां दीर्घाध्वाम् । मकारस्त्वागमिकः । दीर्घोऽद्धा वा कालो निस्तरणे यस्यां सा दीर्घाद्धा, तामटवीं कान्तारम्, अनुप्रविष्टा दुर्भिक्षाऽऽदिकारणवशात् ; तत्राटव्याम् (एगयओ त्ति) एकतः, एकत्रेत्यर्थः । स्थानाऽऽदि कुर्वन्त आग-

मोक्षसामाचारीं नातिक्रामन्ति १। तथा राजधानी-यत्र राजाऽभिषिच्यते, वासमुपगताः, निवासं प्राप्ता इत्यर्थः। (एगइया य त्ति) एकका एकतरा,निर्ग्रन्था निर्ग्रन्थिका वा.च: पुनरर्थः। अत्र ग्रामाऽऽदौ उपाश्रयं गृहपतिगृहाऽऽदिकमिति ।२। तथा (अत्थेत्ति) अथ गृहपतिगृहाऽऽदिकमुपाश्रयमवलम्ब्य। (एगइया) एके केचन नागकुमाराऽऽवासाऽऽदौ वासमुपगताः। अथवा(अत्थेत्ति) इह संबध्यते, अस्ति सन्ति भवन्ति, निवासमुपगताः, तस्य च नागकुमाराऽऽवासाऽऽदेरतिशून्यत्वात्। अथवा-बहुजनाऽऽश्रयत्वादनायकत्वाच्च निर्ग्रन्थिकारक्षार्थमेकत एव स्थानाऽऽदि कुर्वाणा नातिक्रामन्तीति ३। तथा आमुष्णन्तीत्यामोषकाश्चौराः, इष्यन्ते च इच्छन्ति निर्ग्रन्थिकाः (चीवरपडियाए त्ति) चीवरप्रतिज्ञया वस्त्राणि गृहीष्याम इत्यभिप्रायेण, प्रतिग्रहीतुं यत्रेति गम्यते। तत्र निर्ग्रन्थास्तत्कृतरक्षणार्थमेकतः स्थानादिकमिति ४। तथा मैथुनप्रतिज्ञया-मैथुनार्थमिति ५। इदमपवादसूत्रम्। उत्सर्गश्चापवादसहितो नाध्यगाथानिरवसेयः।

तास्त्रेमाः--

" नयणपयाण चउण्हं, अणुत्तरजुए उ संजए संते।
जे निक्खू विहरेज्जा, अह वा वि करिज्ज सज्झायं" ॥ १ ॥
(एकः साधुरेका स्त्रीत्यादिभङ्गकानामित्यर्थः)।
" असणादि वा हारी, उच्चारादि च आवरिज्जाहिं।
निट्ठुरमसाधुजुत्तं, अणंतरकहं च जो कहए ॥ २ ॥"
(स्त्रीभिः सहेति)
" सो आणा अणवत्थं, मिच्छत्तविराहणं तहा दुविहं।
पावइ जम्हा तेणं, एए उ पए वि वज्जेज्जा ॥ ३ ॥"
" वीयपयमणपज्झे गेलन्नुवसग्गरोहगछाणे।
संजमभयवासासु य, खंतियमाईण णिक्खमणे ॥ ४ ॥" त्ति।
(अपवादोऽनात्मवश इत्यर्थः) स्था० ५ ठा० २ उ०। परमाण्वादीनां स्थितिपरिणामे, विशे०। स्थीयते अनेनेति स्थानम्। कायोत्सर्गपर्यङ्कबन्धपद्माऽऽसनाऽऽदिसकलशास्त्रसिद्धे आसनविशेषे, षो० १२ विव०। प्रकारे, स्था० १० ठा०। भेदे, आ० चू० ४ अ०। स०। स्था०। पदे, स्था० १० ठा०। उत्कर्षापकर्षरूपे (उत्त० ३४ अ०) गुणविशेषे, स्था० ५ ठा० ३ उ०। आकारे, ओघ०। पर्याये, आव० ४ अ०। कारणे, स्था० २ ठा० ४ उ०। चू०। उपादानकारणे, सूत्र० १ श्रु० १ अ० २ उ०। आचा०। निमित्ते, स० २६ सम०। तिष्ठन्त्यस्मिन्निति स्थानम्। सामान्ये, भ० १ श० १ उ०। आचा०। स्था०। वस्तुनि, स्था० ९ ठा०। ज्योतिःस्थाने, यत्रस्थाने च। नि० १ चू० ३ वर्ग ३ अ०। आश्रये, सूत्र० १ श्रु० ११ अ०। स्था०। आव०। आवासे, उत्त० ५ अ०।

स्थानस्य पञ्चदशधा निक्षेपमाह-

नामं ठवणा दविए, खेत्तऽद्धा उड्ढ उवरई वसही।
संजम पग्गह जोधे, अचल गणण संधणा भावे ॥८३॥

तत्र द्रव्यस्थानं-ज्ञशरीरव्यतिरिक्तं. द्रव्याणां सचित्ताचित्तमिश्राणां स्थानमाश्रयः। क्षेत्रस्थानं-नरताऽऽदि, ऊर्ध्वाधस्तिर्यग्लोकाऽऽदि वेति; यत्र क्षेत्रे स्थानं व्याख्यायते। अद्धाकालस्तत्स्थानं-द्विधा,कायस्थिति-भवस्थितिभेदात्। तत्र कायस्थितिः पृथिव्यप्तेजोवायूनामसंख्येया उत्सर्पिण्यवसर्पिण्यः। वनस्पतेस्तु ता एवानन्ताः, विकलेन्द्रियाणामसंख्येया वर्षसहस्राः, पञ्चेन्द्रियतिर्यग्मनुजानां सप्ताष्टौ वा, भवस्थितिस्तु वायूदकवनस्पतिपृथिवीनां त्रिसप्तदशद्वाविंशतिवर्षसहस्राऽऽत्मिका,तेजसस्त्रीण्यहोरात्राणि, द्वीन्द्रियाणां शङ्खाऽऽदीनां द्वादश वर्षाणि, त्रीन्द्रियाणां पिपीलिकानामेकोनपञ्चाशदहोरात्राणि, चतुरिन्द्रियाणां भ्रमराऽऽदीनां षण्मासाः, पञ्चेन्द्रियतिर्यग्मनुष्याणां त्रीणि पल्योपमानि, देवानां नारकाऽऽदीनां च कायस्थितेर्भावाद् भवस्थितिः त्रयस्त्रिंशत्सागरोपमाणीति। इयमुत्कृष्टा। जघन्या तु सर्वेषामन्तर्मुहूर्ताऽऽत्मिका, नवरं देवनारकयोर्दशवर्षसहस्राणीति। अथवा अद्धास्थानं-समयावलिकामुहूर्ताहोरात्रपक्षमासर्त्वयनसंवत्सरयुगपल्योपमसागरोपमोत्सर्पिण्यवसर्पिणीपुद्गलपरावर्ताऽतीतानागतसर्वाद्धारूपमिति। ऊर्ध्वस्थानं तु-कायोत्सर्गाऽऽदिकम्,अस्योपलक्षणत्वान्निषद्याऽऽद्यपि गृह्यते,उपरतिर्विरतिः,तत्स्थानं-देशे सर्वत्र च श्रावकसाधुविषयम्। वसतिस्थानं-यो यत्र ग्राममृहाऽऽदौ वसति। संयमस्थानं-संयमः सामायिकच्छेदोपस्थापनीयपरिहारविशुद्धिसूक्ष्मसंपराये यथाख्यातरूपः, तस्य पञ्चविधस्याप्यसङ्ख्येयानि संयमस्थानानि। किं तदसंख्यम्?, इति चेत्, अतीन्द्रियत्वाद्यस्य न साक्षान्निर्देष्टुं शक्यते। आगमानुसारोपमया तूच्यते-इहैकसमयत्वेन सूक्ष्मास्त्रिजीवा असंख्येयलोकाऽऽकाशप्रदेशप्रमाणा उत्पद्यन्ते, तेभ्योऽग्निकायत्वेन परिणता असंख्येयगुणाः, ततोऽप्यनुभागबन्धाध्यवसायस्थानान्यसंख्येयगुणाः, ततोऽप्यनुभागबन्धाध्यवसायस्थानान्यसंख्येयगुणानि संयमस्थानान्यप्येतावन्त्येवेति सामान्यतः। विशेषतस्तूच्यते-सामायिकच्छेदोपस्थापनीयपरिहारविशुद्धीनां प्रत्येकमसंख्येयलोकाऽऽकाशतुल्यानि संयमस्थानानि सूक्ष्मसंपरायस्यान्तर्मौहूर्तिकत्वादन्तर्मुहूर्तसमयतुल्यान्यसंख्येयानि संयमस्थानानि, यथाख्यातस्य त्वेकमेवाजघन्योत्कृष्टं संयमस्थानम्। अथवा-संयमश्रेण्यन्तर्गतानि संयमस्थानानि ग्राह्याणि; सा चानेन क्रमेण भवति। तद्यथा-अनन्तचारित्रपर्यायनिष्पादितमेकं संयमस्थानमसंख्येयसंयमस्थाननिर्वर्त्तितं कण्डकं, तैश्चासंख्येयैर्जनितं षट्स्थानकं, तदसंख्येयाऽऽत्मिका श्रेणीति। प्रग्रहस्थानं तु-प्रकर्षेण गृह्यन्ते वाचोऽस्येति प्रग्रहः, ग्राह्यवाक्यो नायक इत्यर्थः। स च लौकिको, लोकोत्तरश्च। तस्य स्थानं प्रग्रहस्थानम्। लौकिकं तावत्पञ्चविधम्। तद्यथा-राजा, युवराजो, महत्तरः, अमात्यः, कुमारश्चेति। लोकोत्तरमपि पञ्चविधम्। तद्यथा-आचार्योपाध्यायप्रवृत्तिस्थविरगणावच्छेदिभेदात्। योधस्थानं पञ्चधा। तद्यथा—लौदप्रत्यालौदवैशालमरुकबलसमपादभेदात्। अचलस्थानं तु-चतुर्द्धा, सादिसपर्यवसानभेदात्। तद्यथा-सादिसपर्यवसानं परमाण्वादेर्द्रव्यस्यैकप्रदेशाऽऽदाववस्थानं जघन्यत एकं समयम्, उत्कृष्टतश्चासंख्येयकालमिति। साद्यपर्यवसानानां सिद्धानां भविष्यदद्धारूपम्; अनादिसपर्यवसानमतीताद्धारूपस्य शैलेश्यवस्थाऽन्त्यसमये कार्मणतैजसशरीरभव्यत्वानां चेति। अनाद्यपर्यवसानं धर्माधर्माऽऽकाशानामिति। गणनास्थानम्-एकाद्यादिकं शीर्षप्रहेलिकापर्यन्तम्। सन्धानस्थानं द्विधा-द्रव्यतो, भावतश्च। पुनरेकैकं द्विधा, छिन्नाछिन्नभेदात्। तत्र द्रव्यच्छिन्नसन्धानं कञ्चुकाऽऽदेः। अच्छिन्नसन्धानं तु पद्मोत्पद्मानतन्त्वादेरिति। भावस्थानमपि—प्रशस्ताप्रशस्तभेदाद् द्वेधा। तत्र प्रशस्ताच्छिन्नभावसन्धानमुपशमक्षपकश्रेण्यामारोहतो जन्तो-

रपूर्वसंयमस्थानान्यच्छिन्नान्येव भवन्ति ; श्रेणिव्यतिरेकेण वा प्रवर्द्धमानकण्डकस्येति । छिन्नप्रशस्तभावसन्धानं पुनरौपशमिकाऽऽदिभावादौदयिकाऽऽदिभावान्तरगतस्य पुनरपि शुद्धपरिणामवतस्तत्रैव गमनम् । अप्रशस्ताच्छिन्नभावसन्धानमुपशमश्रेण्यां प्रतिपततोऽविशुद्धयमानपरिणामस्यानन्तानुबन्धिमिथ्यात्वोदयं यावत्, उपशमश्रेणिमन्तरेणापि कषायवशाबन्धाध्यवसायस्थानान्युत्तरोत्तराण्यवगाहमानस्य वा इति । अप्रशस्तच्छिन्नसन्धानं पुनरौदयिकभावादौपशमिकाऽऽदिभावान्तरसंक्रान्तौ सत्यां पुनस्तत्रैव गमनमिति । इह द्वारद्वयं यौगपद्येन व्याख्यातम् । तत्र सन्धानस्थानं द्रव्यविषयम्, इतरत्तु भावविषयमिति । उक्तं स्थानम् ।

अथवा भावस्थानं कषायाणां यत् स्थानमिह परिगृह्यते, तेषामेव जेतृद्रव्यत्वेनाधिकृतत्वात्तेषां किं स्थानं, यदाश्रित्य च ते भवन्ति ? शब्दाऽऽदिविषयानाश्रित्य च ते भवन्तीति तद्दर्शयति-

पंचसु कामगुणेसुं, सद्दफरिसरसरूवगंधेसु ।
जस्स कसाया वट्टंति मूलठाणं तु संसारे ॥ ८५ ॥

तत्रेच्छाऽनङ्रूपः कामः, तस्य गुणाः,यानाश्रित्य चासौ चेतसो विकारमादर्शयति । ते च शब्दस्पर्शरसरूपगन्धाः, तेषु पञ्चस्वपि व्यस्तेषु समस्तेषु वा विषयभूतेषु,यस्य जन्तोर्विषयसुखपिपासोन्मुखस्यापरमार्थदर्शिनः संसाराभिष्वङ्गिणो रागद्वेषनिमित्तोपप्लुतमनोज्ञेतरविषयोपलब्धौ सत्यां कषाया वर्तन्ते प्रादुर्भवन्ति,तन्मूलश्च संसारपादपः प्रादुर्भवतीत्यतः शब्दाऽऽदिविषयोद्भूतकषायाः,संसारे संसारविषयं,मूलस्थानमेवेति । एतदुक्तं भवति-रागाऽऽद्युपहतचेताः परमार्थमजानानोऽनात्मस्वभावेऽपि तत्स्वभावाऽऽरोपणेनान्धादप्यन्धतमः कामी मोदते । तत आह-

" दृश्यं वस्तु परं न पश्यति जगत्यन्धः पुरोऽवस्थितं,
रागान्धस्तु यदस्ति तत्परिहरन् यन्नास्ति तत्पश्यति ।
कुन्देन्दीवरपूर्णचन्द्रकलशश्रीमल्लतापल्लवा-
नारोप्याशुचिराशिषु प्रियतमागात्रेषु मन्मोदते ॥ १ ॥ "

द्वेषं वा कर्कशशब्दाऽऽदौ व्रजतीति । ततश्च मनोज्ञेतरशब्दाऽऽदिविषयाः कषायाणां मूलस्थानं, ते च संसारस्येति गाथातात्पर्यार्थः । आचा० नि० १ श्रु० २ अ० १ उ० । उत्त० । नि० चू० । सूत्र० ।

कहि णं भंते ! बादरपुढविकाइयाणं पज्जत्तगाणं ठाणा पण्णत्ता ? । गोयमा ! सट्ठाणेणं अट्ठसु पुढवीसु । तं जहा-रयणप्पभाए, सक्करप्पभाए, वालुयप्पभाए, पंकप्पभाए, धूमप्पभाए, तमप्पभाए, तमतमप्पभाए, अहे सत्तमाए ईसिप्पब्भाराए, अहोलोए पायालेसु भवणेसु भवणपत्थडेसु निरएसु निरयावलियासु निरयपत्थडेसु, उड्ढलोए कप्पेसु विमाणेसु विमाणावलियासु विमाणपत्थडेसु, तिरियलोए टंकेसु कूडेसु सेलेसु सिहरिसु पब्भारेसु विजयेसु वक्खारेसु वासेसु वासहरकव्वएसु वा वेलासु वेइयासु दारेसु तोरणेसु दीवेसु समुद्देसु। एत्थ णं बादरपुढविकाइयाणं पज्जत्तगाणं ठाणा पण्णत्ता । उववाएणं लोयस्स असंखेज्जइभागे, समुग्घाएणं लोयस्स असंखेज्जइभागे, सट्ठाणेणं लोयस्स असंखेज्जइभागे ।

तस्स णं दुज्जोहणस्स चारगपालस्स बहवे लोहखीलाण य कम्मसकराण य चम्मपट्टाण य अल्लिपल्लाण य पुंजा णिगरा संचिट्ठइ । तस्स णं दुज्जोहणस्स चारगपालस्स बहवे सूचीण य जंडणाण य कोट्टिल्लाण य पुंजा णिगरा संचिट्ठइ । तस्स णं दुज्जोहणस्स चारगपालस्स बहवे सत्थाण य पिप्पलाण य कुहाडाण य णहच्छेयणाण य दब्भाण य पुंजा णिगरा संचिट्ठइ । तस्स णं से दुज्जोहणस्स चारगपालस्स सीहरइस्स रण्णो बहवे चोरे य पारदारिए य गंठिभेदे य रायावकारी य अणाहारए य बालघाते य वीसंभघाते य जुइकरे य खंडपट्टे य पुरिसेहिं गिण्हावेइ, गिण्हावेइत्ता उत्ताणए पाडेइ, लोहदंडेण मुहं विहाडेइ, अप्पेगइए तत्तं तंबं पज्जेइ, अप्पे० तउयं पज्जेइ, अप्पे० सीसगं पज्जेइ, अप्पे० कलकलं पज्जेइ, अप्पे० खारतेल्लं पज्जेइ, अप्पे० तेणं चेव अभिसेगं करेइ, अप्पे० उत्ताणए पाडेइ, अप्पे० आसमुत्तं पज्जेइ, अप्पे० हत्थिमुत्तं पज्जेइ० जाव एलयमुत्तं पज्जेइ, अप्पे० हिट्ठा मुहं पाडेइ, अप्पे० बलस्स वमावेइ, अप्पे० तेणं चेव छवीसं दलयइ, अप्पे० हत्थंदुयाहिं बंधावेइ, अप्पे० पायंदुयाहिं बंधावेइ, अप्पे० हडिबंधणं करेइ, अप्पे० णियलबंधणं करेइ, अप्पे० संकोडियं करेइ, अप्पे० संकलबंधणं करेइ, अप्पे० हत्थच्छिण्णए करेइ० जाव सत्थोवाडिए करेइ, अप्पे० वेणुलयाहिं य० जाव वेयरासीहि य हणावेइ, अप्पे० उत्ताणए करेइ, करेइत्ता उरे सिलं दलावेइ, दलावेइत्ता लउलं दावेइ, पुरिसेहिं उक्कंपावेइ, अप्पे० तंतीहि य० जाव सुत्तरज्जूहि य हत्थेसु य पादेसु य बंधावेइ, अगडम्मि ओचूलं पाणगं पज्जेइ, अप्पे० असिपत्तेहि य० जाव कलंबचीरपत्तेहि य पच्चावेइ, खारतेल्लेणं अब्भंगावेइ, अप्पे० सिलाकेसु य अवदुसु य कोप्परेसु य जाणुसु य खणुएसु य लोहकीलएसु य कम्मसकरासु य दलावेइ, अक्कए भंजावेइ, अप्पे० सूतीओ य दंभणाणि य हत्थंगुलिपासु य पायंगुलियासु य कोट्टिल्लएहिं आउडावेइ, आउडावेइत्ता भूमिं कंडूयावेइ, अप्पे० सत्थिएहि य० जाव णहच्छेदणएहि य अंगं पच्चावेइ, दब्भेहि य कुसेहि य लहुदब्भेहि य वेढावेइ, आयवंसि दलयइ, सुके समाणे चमचमस्स उप्पाडेइ । तए णं से दुज्जोहणचारए एयकम्मे० सुबहुपावं समज्जिणित्ता एगतीसं वाससयाइं परमाउयं पालइत्ता कालमासे कालं किच्चा इमीसे रयणप्पभाए पुढवीए उक्कोसं वारीसं सागरोवमाइं ठिईएसु णेरइएसु उववण्णे । से णं तओ अणंतरं उव्वट्टित्ता इहेव महुराए णयरीए सिरिदामस्स रण्णो बंधुसिरीए देवीए कुच्छिंसि पुत्तत्ताए उववण्णे । तए णं बंधुसिरी णवण्हं मासाणं बहुपडिपुण्णाणं० जाव दारगं पयाया । तए णं तस्स दारगस्स अम्मापियरो णिव्वत्तबारसाहे इमं एयारूवं णामधेज्जं करेइ–होउ णं अम्हं दारगे णंदिसेणे णामेणं । तए णं से णंदिसेणे कुमारे पंचधाइपरिवुडे० जाव परिवड्ढइ । तए णं से णंदिसेणे कुमारे उम्मुक्कबालभावे० जाव विहरइ० जाव जुवराया जाए यावि होत्था । तए णं से णंदिकुमारे रज्जे य० जाव अंतेउरे य मुच्छिए० ४ इच्छइ सिरिदामं रायं जीवियाओ ववरोवित्ता सयमेव रज्जसिरिं कारेमाणे पालेमाणे विहरित्तए । तए णं से णंदिसेणे कुमारे सिरिदामस्स रण्णो अंतरं अलभमाणे अण्णया कयाइ चित्तं अलंकारियं सद्दावेइ, सद्दावेइत्ता एवं वयासी–तुमं णं देवाणुप्पिया! सिरिदामं रायं सव्वट्ठाणेसु सव्वभूमियासु य अंतेउरे य दिण्णवियारे सिरिदामं रायं अजिक्खणं अजिक्खणं अलंकारियकम्मं करेमाणे विहरइ । तं णं तुम्हं देवाणुप्पिया! सिरिदामं रायं अलंकारियकम्मं करेमाणे गीवाए सुरं णिवेसेहि, ता णं अहं तुब्भं अक्खरज्जियं करेस्सामि, तुमं अम्हेहिं सद्धिं उराले भोगभोगाइं भुंजमाणे विहरिस्सइ । तए णं से चित्ते अलंकारिए णंदिसेणस्स कुमारस्स वयणं एयमट्ठं पडिसुणेइ, पडिसुणेइत्ता–तए णं तस्स चित्तस्स अलंकारियस्स इमे एयारूवे० जाव समुप्पज्जित्था । जइ णं ममं सिरिदामे राया एयमट्ठं आगमेइ, तए णं ममं ण जज्जइ केणइ असुभेणं कुमरणेणं मारिस्सति त्ति कट्टु भीए० ४, जेणेव सिरिदामे राया, तेणेव उवागच्छइ, उवागच्छइत्ता सिरिदामं रायं रहसि एवं करयल० जाव एवं वयासी–एवं खलु सामी! णंदिसेणे कुमारे रज्जे य० जाव मुच्छिए० ४ इच्छइ तुब्भे जीवियाओ ववरोवित्ता सयमेव रज्जसिरिं कारेमाणे पालेमाणे विहरित्तए । तए णं से सिरिदामे राया चित्तस्स अलंकारियस्स अंतिए एयमट्ठं सोच्चा णिसम्म आसुरुत्ते० ४ जाव साहट्टु णंदिसेणं कुमारं पुरिसेहिं गिण्हावेइ, एएणं विहाणेणं वज्झं आणवेइ । तं एवं खलु गोयमा! णंदिसेणे पुत्ते० जाव विहरइ । णंदिसेणे कुमारे जयवं! इओ चुओ कहिं गच्छिहिति, कहिं उववज्जिहिति?। गोयमा!। णंदिसेणे कुमारे सट्ठिवासाइं परमाउयं पालइत्ता कालमासे कालं किच्चा इमीसे रयणप्पभाए पुढवीए संसारो तहेव; ततो हत्थिणाउरे णयरे मच्छत्ताए उववज्जिहिति । से णं तत्थ मच्छिएहिं वधिए समाणे तत्थेव सेट्ठिकुले बोहिं पाउणित्ता सोहम्मे कप्पे महाविदेहे वासे सिज्झिहिति, बुज्झिहिति, मुच्चिहिति, परिणिव्वाहिति । विपा० १ श्रु० ६ अ० ।

णंदिवद्धणा–नन्दिवर्द्धना–स्त्री० । जम्बूद्वीपे मन्दरस्य पूर्वे रुचकवरस्य पर्वतस्य रजतकूटवास्तव्यायां दिक्कुमार्याम्, स्था० ८ ठा० । आ० म० । आ० चू० । जं० । आ० क० । शाश्वतपुष्करिणीभेदे, स्था० ४ ठा० २ उ० । ती० । जी० ।

णंदिभाण–नन्दिभाजन–न० । औपग्रहिकोपकरणभेदे, बृ० ।

तदुपयोगश्च-

एकं भरेमि नाणं, अणुकंपा नंदिभाण दरिसेंति ।
निंति व तं वइगाऽऽइसु, गालिंति तह चम्मकरएणं ॥

अथ प्रतिपन्नानां कोऽप्यनुकम्पया ब्रूयात्-अहं युष्मभ्यं दिने दिने एकं भाजनं बिभर्मि पूरयामि, ततस्तत्र नन्दिभाजनं बिभर्ति पूरयति,ततस्तत्र नन्दीभाजनं दर्शयन्ति। अथवा-तद् नन्दिभाजनं भिक्षाचर्यया व्रजिकाऽऽदिषु नयन्ति। तथा प्रासुकं तद् द्रव्यं पानकं चर्मकरकेण गालयन्ति। बृ० १ उ० । ओघ० । नि० चू० ।

इदानीमेतदेव भाष्यकारो व्याख्यानयन्नाह-

वेयावच्चगरो वा, नंदीभाणं धरे अवग्गहियं ।
सो खलु तस्स विसेसो, पमाणजुत्तं तु सेसाणं ॥१०५॥

वैयावृत्यकरो वा नन्दीपात्रं धारयत्यौपग्राहिकम्, आचार्येण समर्पितं,निजं वा स खलु तस्यैव वैयावृत्यकरस्य विशेषः । एतदुक्तं भवति-यदतिरिक्तपात्रकधारणम्, अयं तस्यैव वैयावृत्यकरस्य विशेषः क्रियते । शेषाणां साधूनां प्रमाणयुक्तमेव पात्रकं भवति, उदरप्रमाणयुक्तमित्यर्थः ॥१०५॥

एतच्च प्रमाणातिरिक्तेन पात्रकेन प्रयोजनं भवति-

देज्जाहि भाणपूरं, तु रिक्खिमं कोइ रोहमाईसु ।
तत्थ वि तस्सुवओगो, सेसं कालं तु पडिकुट्ठो ॥१०६॥

दद्याद् भाजनपूरं कश्चिद्दक्षिमान्-पात्रकभरणं कश्चिदीश्वरः कुर्यात् । कदा ?, पत्तनरोधकाऽऽदौ । तत्र पात्रकभरणे तस्य नन्दीपात्रस्योपयोगः, शेषकालमुपयोगः तस्य प्रतिकुष्टः प्रतिषिद्धः, कारणमन्तरेणेत्यर्थः । ओघ० । पं० व० ।

णंदिमित्त–नन्दिमित्र–पुं० । भाविनि द्वितीये वासुदेवे, ती० २० कल्प । मल्ल्या सह प्रव्रजिते राजपुत्रे, ज्ञा० १ श्रु० ८ अ० ।

णंदिमुइंग–नन्दिमृदङ्ग–पुं० । एकतः संकीर्णेऽन्यत्र विस्तृते मुरजविशेषे, रा० । आ० चू० ।

णंदिमुह–नन्दिमुख–पुं० । प्रांगुलप्रमाणशरीरके पक्षिविशेषे, प्रश्न० १ आश्र० द्वार । औ० । रा० ।

णंदिय–नन्दित–त्रि० । समृद्धितरतामुपगते, औ० । स्वनामख्याते स्थविरे, कल्प० । " सिउमद्दवसंपन्नं, उवउत्तं नाणदंसणचरित्ते । थेरं च णंदियं पि य, कासवगुत्तं पणिवयामि " ॥ १ ॥ कल्प० ८ क्षण ।

णंदियगपोसण–नन्दितकपोषण–न० । मनोज्ञाऽऽहाराऽऽदिनिर्वेष्यपशोः परिपालने, बृ० १ उ० ।

णंदियावत्त–नन्द्यावर्त–पुं० । प्रतिदिक्चतुष्कोणके स्वस्तिके, प्रश्न० १ आश्र० द्वार । जं० । रा० । औ० । प्रव० । ब्रह्मलोके कल्पे तदिन्द्रस्य पारियानिके विमाने, स्था० १० ठा० । द्वीन्द्रियजातिभेदे, प्रज्ञा० १ पद । जी० । स्तनितकुमारेन्द्रस्य घोषस्य महाघोषस्य च लोकपालभेदे, स्था० ४ ठा० १ उ० । भ० । सिद्धश्रेणिकापरिकर्मभेदे, स० १२ अङ्ग० ।

णंदिराय–नन्दिराज–पुं० । वीरस्वामिज्येष्ठभ्रातरि नन्दिवर्द्धने, कल्प० ५ क्षण ।

नन्दिराग–पुं० । समृद्धौ सत्यां हर्षे, भ० २ श० ५ उ० ।

णंदिरुक्ख–नन्दिवृक्ष–पुं० । धववृक्षे, अश्वत्थवृक्षे, तुम्बे, कुबेरके, मेषशृङ्गयां च । वाच० । प्रज्ञा० । औ० । ति० । स० । रा० ।

णंदिसूरि–नन्दिसूरि–पुं० । श्रीशत्रुञ्जयतीर्थोद्धारकारके स्वनामके सूरौ, ती० २ कल्प ।

णंदिसेण–नन्दिषेण–पुं० । मथुरायां श्रीदामराजसुते युवराजे नन्दिवर्धनापरनामके, स्था० १० ठा० । विपा० । स्वनामख्याते पार्श्वापत्यीये आचार्ये, यो हि भद्रिकापुर्यां वीरे भगवत्यागते प्रतिमया स्थितश्चौरभ्रान्त्याऽऽरक्षकपुरुषेण भल्लाऽऽहतो जातावधिः स्वर्जगाम । कल्प० ५ क्षण । आ० म० । आ० चू० । नन्दिग्रामे गौतमपुत्रे नन्दिवर्धनसूरिशिष्ये, आ० क० ।

" मगधे हि नन्दिग्रामे, गौतमः कणवृत्तिकः ।
तत्पत्नी धारणी तस्याः, गर्भे षाण्मासिके पिता ॥ १ ॥
मृतो माताऽपि जाते च, मातुलेन स वर्द्धितः ।
नन्दिषेणाभिधस्तस्य, गृहे कर्म चकार सः ॥ २ ॥
प्रतारितः स लोकेन, मातुलेन स्थिरीकृतः ।
मा श्रौषीर्लोकवाक्यानि, तिस्रः सन्ति सुता मम ॥ ३ ॥
दास्यामि तव नैषुस्ताः, कुरूपमिति तं परम् ।
निर्विण्णः सोऽथ निर्गत्य, मुमूर्षुर्वीक्ष्य कुत्रचित् ॥ ४ ॥
नन्दिवर्द्धनसूरीणां, सन्निधौ व्रतमग्रहीत् ।
स षष्ठक्षपकः ख्यातः, यशःकीर्तिरभून्मुनिः ॥ ५ ॥
वैयावृत्येऽभिग्रही च, बालग्लानाऽऽदिसाधुषु ।
शक्रोऽशंसत्तमेकोऽथा-ऽश्रद्धानः सुरोऽभ्यगात् ॥ ६ ॥
चक्रे श्रमणरूपे द्वे, बहिरेकोऽतिसारकी ।
स्थितोऽगादपरो मध्ये, साधूपान्ते ब्रवीदिदम् ॥ ७ ॥
ग्लानर्षिः पतितोऽस्त्येको, वैयावृत्यकरोऽस्ति चेत् ।
स तर्हि तु तच्छ्रुत्वा, षष्ठपारणकेऽपि हि ॥ ८ ॥
सहसा नन्दिषेणर्षि-र्मुक्त्वा कवलमुत्थितः ।
ऊचेऽर्थः केन सोऽवादीद्, ग्लानेनाऽऽगात् स तत्कृते ॥ ९ ॥
अनेषणां सुरश्चक्रे-ऽनेषणीयं न सोऽग्रहीत् ।
भ्रान्त्वा द्विरिः स शुद्धाम्भो, गृहीत्वाऽऽगात्सदन्तिके ॥ १० ॥
आचुक्रोश स तं ग्लानो, मुनिं निष्ठुरया गिरा ।
त्वं वैयावृत्यकारीति, श्रुतो नाम्नैव वर्त्तसे ॥ ११ ॥
स तद्गिरं सुधासारां, मन्यमानः क्षमानिधिः ।
अशोकः क्षालयामास, तं विष्ठाऽऽक्लिन्नमप्यृषिम् ॥ १२ ॥
अथाऽऽदोलिष्ठ यामान्त-र्नीरुजं त्वां करोमि यत् ।
ग्लानोऽवक् न क्षमः सोऽवक्, पृष्ठमारोह तर्हि मे ॥ १३ ॥
पृष्ठमारोप्य तं गच्छं-स्तेन देवेन मायया ।
नन्दिषेणः पुरीवेण, क्लिष्टोऽतीव विगन्धिना ॥ १४ ॥
आक्रुष्श्च कथं वेग-भङ्गान्मे मृतमारणम् ।
करोषि भोक्तुकामस्त्वं, व्रजन्नत्यन्तरंहसा ॥ १५ ॥
मुनिश्लाघ्यकलेपं तं, मत्वानोऽमेध्यलेपनम् ।
आक्रोशं चाऽऽशिषं दध्यौ, कथं स्यादस्य निर्वृतिः ? ॥ १६ ॥
देवस्तुष्टोऽथ संहृत्य, मायां नत्वा च तं मुनिम् ।
शक्रप्रशंसां चाऽऽवेद्य, स्वं विमानं जगाम सः ॥ १७ ॥

वसतौ मुनिरप्यागा-द्गुरोराख्योच्य चुक्तवान् ।
एषणासमितिः पाल्या, तदेवं मुनिपुङ्गवैः" ॥ १८ ॥
आ० क० । आव० । तं० । नि० चू० । स्था० ।

श्रेणिकस्य पुत्रे, स च पूर्वभवे कस्यचिद् धिग्जातिकस्य दास आसीत्, तेन च यद्दपाटे नियुक्तेन स्वामिनो यच्छेषं याचित्वा साधवे दत्त्वा तत्पुण्येन देवलोके गत्वा ततः इत्युत्वा श्रेणिकस्य पुत्रो जज्ञे (आ० चू० ४ अ० । आव०) स च वीरजिनान्तिके प्रव्रज्यां जगृहे,तस्य साधोः श्रेणिकपुत्रस्य नन्दिषेणस्य स्वशिष्यस्य व्रतमुज्झितुकामस्य स्थिरीकरणाय भगवद्वर्द्धमानस्वामिवन्दननिमित्तचलितमुक्ताऽऽभरणश्वेताम्बरपरिधानरूपरमणीयतानिर्जितामरसुन्दरीकं स्वान्तःपुरदर्शनं कारितम् । (सा पारिणामिकी बुद्धिः) स हि [नन्दिषेणस्य] तादृशमन्तःपुरं नन्दिषेणः परित्यक्तं दृष्ट्वा दृढतरं संयमे स्थिरो बभूव । नं० । आ० क० । आ० चू० । ती० । आ० म० । शीलावस्थे चारणमुनौ, महा० । स चावसीदन् मुमूर्षुः चकार ।

तद् यथा—

"ता गोयम ! णंदिसेणेणं, गिरिपरुणं जाव पत्थुयं ।
ताव आयासे इमा वाणी, पभिओ वि णो मरेज्ज तं ॥
दिसामुहाइं जा ओए, ता पेच्छा चारणं मुणिं ।
अकाले नत्थि ते मच्चू, विरम विसयादितो गओ ॥
ताहे वि अणहियासेहिं, विसएहिं जाव पीडिओ ।
ताव चिंता समुप्पन्ना, जहा किं जीविएण मे ? ॥
कुंदेदुनिम्मलयरागं, तित्थं पावमती अहं ।
उड्ढाहिंतो य सिज्झिस्सं, कत्थ गंतुमणारिओ ? ॥
अहवा सक्केणो चंदो, कुंदस्स उणका पहा ।
कलिकलुसकलंकेहिं, वज्जियं जिणसासणं ॥
ता एयं सयलदालिद्द-दुहकिलेसक्खयं-करं ।
पव्वयणं खिंसाचिंतो, कत्थ गंतूण सिज्झिहं ? ॥
दुरुहकं गिरी रोहुं, अत्ताणं चुन्निमो धुवं ।
जाव विसयवसेणाहं, किंचि उड्ढाहयं करे ॥
एवं पुणो वि आरोहुं, दंकुच्चिअं गिरीतमं ।
संचरे किल निरागारं, गयणे पुणरवि जाणियं ॥
अकाले नत्थि ते मच्चू, चरिमं तुज्झ इमं तणुं ।
ता वरूपुट्ठं भोगहलं, वेइत्ता संजमं कुरु ॥
एवं तु जाव वेयारा, चारणसमणोहे सेहिओ ।
ताहे गंतूण सो लिंगं,गुरुपायमूले निवेदिओ"॥महा०६अ०।

जरतक्षेत्रजाभिनन्दनतीर्थकृत्समकालीने पेरवतजे तीर्थंकरे, ति० । ती० । शत्रुञ्जयतीर्थे जिनशान्तिविधायके गणेशे, ती० १ कल्प । द्वीपसमुद्रविशेषाधिपतौ, द्वी० । अजितशान्तिस्तवग्रन्थकारके आचार्ये, जै० इ० ।

णंदिसेणा–नन्दिषेणा–स्त्री० । पूर्वस्मिन्नञ्जनकपर्वते पूर्वस्यां दिशि नन्दापुष्करिण्याम्, जी० ३ प्रति० । ती० । द्वी० । स्था० । अञ्जनकपर्वतानामुत्तरस्यां नन्दापुष्करिण्याम्, द्वी० । नन्दिवर्धनापरनामिकायां पूर्वरुचकवरवास्तव्यायां दिक्कुमार्याम्, द्वी० । स्था० । रतिकरपर्वतानामुत्तरदिक्स्थासु शक्रसामानिकराजधानीषु, द्वी० ।

णंदिसेणिया–नन्दिषेणिका–स्त्री० । स्वनामख्यातायां श्रेणिकभार्यायाम्, सा च वीरान्तिके प्रव्रजिता सिद्धा, इति अन्तकृद्दशानां सप्तमे वर्गे चतुर्थेऽध्ययने सूचितम् । अन्त० ६ वर्ग १६ अ० ।

णंदिस्सर–नन्दिस्वर–पुं० । द्वादशतूर्यसंघातस्वरे, जी० ३ प्रति० । तं० । रा० ।

नन्दीश्वर–पुं० । महेश्वराऽऽख्यव्यन्तरस्य शिष्यनेदे, आ० चू० ४ अ० । आ० क० । नन्दी समृद्धिः, तस्या ईश्वरो द्वीपो नन्दीश्वरः । अनु० । " जंबू लवणे धायइ-कालोयपुक्खराइ जुयलाइ । वारुणिखीरघयक्खू, नंदीसरअरुणदीवुदही ॥ १ ॥ " इति गणनयाऽष्टमे द्वीपे, स्था० ४ ठा० २ उ० । प्रज्ञ० । रा० ।

तत्कल्पं यथा-

" आराध्य श्रीजिनाधीशान्, सुराधीशार्चितक्रमान् ।
कल्पं नन्दीश्वरद्वीप-स्याऽऽख्येऽहं विश्वपावनम् ॥ १ ॥
अस्ति नन्दीश्वरो नाम्ना-ऽष्टमो द्वीपो द्युसन्निभः ।
तत्परिक्षेपिणा नन्दी-श्वरेणाम्भोधिना युतः ॥ २ ॥
एतच्चक्रवालविष्कम्भे, लक्षाशीतिश्चतुर्युगा ।
योजनानां त्रिषष्टिश्च, कोट्यः कोटिशतं तथा ॥ ३ ॥
असौ विविधविन्यासो-द्यानवान् देवभोगभूः ।
जिनेन्द्रपूजासंसक्त-सुरसंपातसुन्दरः ॥ ४ ॥
अस्य मध्यप्रदेशे तु, क्रमात्पूर्वाऽऽदिदिक्षु च ।
अञ्जनवर्णाभाश्चार-स्तिष्ठन्त्यञ्जनपर्वताः ॥ ५ ॥
दशयोजनसाहस्रा-तिरिक्तविस्तृतास्तले ।
सहस्रयोजनाश्चोर्द्धं, क्षुल्लमेरूच्छ्रयाश्च ये ॥ ६ ॥
तत्र प्राग्देवरमणो, नित्योद्द्योतश्च दक्षिणः ।
स्वयंप्रभः प्रतीच्यस्तु, रमणीयोदकस्थिरः ॥ ७ ॥
शतयोजन्यायतानि, तदर्द्धं विस्तृतानि च ।
द्विसप्ततियोजनोच्चा-न्यर्हच्चैत्यानि तेषु च ॥ ८ ॥
पृथग्द्वाराणि चत्वार्यु-र्द्धानि षोडशयोजनम् ।
प्रवेशो योजनान्यष्ट, विस्तारोऽप्यष्ट तेषु तु ॥ ९ ॥
तानि देवासुरनाग-सुपर्णानां दिवौकसाम् ।
समाश्रयास्तेषामेव, नामभिर्विश्रुतानि च ॥ १० ॥
षोडशयोजनाऽऽयामा-स्तावन्मात्राश्च विस्तृतौ ।
अष्टयोजनकोत्सेधा-स्तन्मध्ये मणिपीठिकाः ॥ ११ ॥
सर्वरत्नमया देव-च्छन्दकाः पीठिकोपरि ।
पीठिकाच्योऽधिकाऽऽयामो-च्छ्रयभाजश्च तेषु तु ॥ १२ ॥
ऋषभो वर्द्धमानस्तु, तथा चन्द्राननोऽपि च ।
वारिषेणो वेति नाम्ना, पर्यङ्कासनसंस्थिताः ॥ १३ ॥
रत्नमय्यो युताः स्वस्व-परिवारेण हारिणा ।
शाश्वतार्हत्प्रतिमाः प्र-त्येकमष्टोत्तरं शतम् ॥ १४ ॥
द्वे द्वे नागयक्षभूत-कुण्डधृत्प्रतिमे पृथक् ।
प्रतिमानां पृष्ठतस्तु, छत्रधृत्प्रतिमैकका ॥ १५ ॥
तेषु धूपघटोदाम-घण्टाष्टमङ्गलध्वजाः ।
छत्रतोरणचङ्गेर्यः, पटलाभ्यासनानि च ॥ १६ ॥
षोडश पूर्णकलशाः, दीप्यलङ्करणानि च ।

सुवर्णरुचिररजो-वालुकास्तत्र भूमयः ॥ १७ ॥
आयतनप्रमाणेन, रुचिरा मुखमण्डपाः ।
प्रेक्षार्थमण्डपा अक्ष-वाटिका मणिपीठिकाः ॥ १८ ॥
रम्याश्च स्तूपप्रतिमा-श्चैत्यवृक्षाश्च सुन्दराः ।
इन्द्रध्वजाः पुष्करिण्यो, दिव्याः सन्ति यथाक्रमम् ॥ १९ ॥
प्रतिमाः षोडश चतु-र्द्वारस्तूपेषु सर्वतः ।
शतं चतुर्विंशमेवं, ताः साष्टशततद्गुताः ॥ २० ॥
प्रत्येकमञ्जनाद्रीणां, ककुत्सु चतसृष्वपि ।
गते लक्षे योजनानां, निर्मस्यस्वच्छचारयः ॥ २१ ॥
सहस्रयोजनोद्वेधाः, विष्कम्भे लक्षयोजनाः ।
पुष्करिण्यः सन्ति तासां, क्रमाज्ज्ञानानि षोडश ॥ २२ ॥
नन्दिषेणा चामोघा च, गोस्तूपाऽथ सुदर्शना ।
तथा नन्दोत्तरा नन्दा, सुनन्दा नन्दिवर्द्धना ॥ २३ ॥
भद्रा विशाला कुमुदा, पुण्डरीकिणिका तथा ।
विजया वैजयन्ती च, जयन्ती चापराजिता ॥ २४ ॥
प्रत्येकमासां योजन-पञ्चशत्या परत्र च ।
योजनानां पञ्चशती, यावद्विस्तारभाञ्जि तु ॥ २५ ॥
लक्षयोजनदीर्घाणि, महोद्यानानि तानि तु ।
अशोकसप्तच्छदक-चम्पकचूतसंज्ञया ॥ २६ ॥
मध्ये पुष्करिणीनां च, स्फाटिकाः कल्पभूरुहः ।
लक्षायामेषूद्यानानि, त्रिक्षा दधिमुखाद्रयः ॥ २७ ॥
चतुःषष्टिसहस्रोच्चाः, सहस्रं चावगाहिनः ।
सहस्राणि दशाधस्ता-दुपरिष्टाच्च विस्तृताः ॥ २८ ॥
अन्तरे पुष्करिणीनां, द्वौ द्वौ रतिकराचलौ ।
ततो नवन्ति द्वात्रिंश-देते रतिकराचलाः ॥ २९ ॥
शैलेषु दधिमुखेषु, तथा रतिकराद्रिषु ।
शाश्वतान्यर्हच्चैत्यानि, सन्त्यञ्जनगिरिष्विव ॥ ३० ॥
चत्वारोद्वीपविदिक्षु, तथा रतिकराचलाः ।
दशयोजनसाहस्रा-ऽऽयामविष्कम्भशालिनः ॥ ३१ ॥
योजनानां सहस्रं तु, यावदुच्चत्वशोभिताः ।
सर्वरत्नमया दिव्याः, कूटलक्ष्मीकारधारिणः ॥ ३२ ॥
तत्र द्वयोः रतिकरा-चलयोर्दक्षिणस्थयोः ।
शक्रस्येशानस्य पुन-रुत्तरास्थितयोः पृथक् ॥ ३३ ॥
अष्टानां महादेवीनां, राजधान्योऽष्टदिक्षु ताः ।
लक्षोद्वेधा लक्षमाना-, जिनाऽऽयतनभूषिताः ॥ ३४ ॥
सुजाता सौमनसा चा-र्चिर्माली च प्रभाकरा ।
पद्मा शिवाशुभाञ्जने, चूता चूतावतंसिका ॥ ३५ ॥
गोस्तूपासुदर्शने अ-ऽमलाप्यस्वरसौ तथा ।
रोहिणी नवमी चाथ, रत्ना रत्नोच्चयाऽपि च ॥ ३६ ॥
सर्वरत्ना रत्नसंच-या वसुर्वसुमित्रिका ।
वसुभागाऽपि च वसु-धरानन्दोत्तरे अपि ॥ ३७ ॥
नन्दोत्तरकुरुर्देव-कुरुः, कृष्णा ततोऽपि च ।
कृष्णराजीरमाराम-राकिताः प्राक्क्रमादमूः ॥ ३८ ॥
सर्वर्द्धयस्तासु देवाः, कुर्वते सुपरिच्छदाः ।
चैत्ये शाश्वाहिकाः पुण्य-तिथिषु श्रीमदर्हताम् ॥ ३९ ॥
प्राच्येऽञ्जनगिरौ शक्रः, कुरुतेऽष्टाह्निकोत्सवम् ।
प्रतिमानां शाश्वतीनां, चतुर्द्वारे जिनालये ॥ ४० ॥
तस्य चाग्रे चतुर्विक्स्थ-महावापीविचारिषु ।
स्फाटिकेषु दधिमुख-पर्वतेषु चतुर्ष्वपि ॥ ४१ ॥
चैत्येष्वर्हत्प्रतिमानां, शाश्वतीनां यथाविधि ।
चत्वारः सर्वदिग्पालाः, कुर्वतेऽष्टाह्निकोत्सवम् ॥ ४२ ॥
ईशानेन्द्राऽऽज्ञराहे-ऽञ्जनाद्रौ विदधाति तम् ।
तल्लोकपालास्तद्वापी-दधिमुखाद्रिषु कुर्वते ॥ ४३ ॥
चमरेन्द्रो दाक्षिणात्ये-ऽञ्जनाऽष्टाह्निकोत्सवं चरेत् ।
तद्वाप्यन्तर्दधिमुखे-ऽद्रेस्य दिक्पतयः पुनः ॥ ४४ ॥
पश्चिमे जिनशैले तु, बलीन्द्रः कुरुते महम् ।
तद्दिक्पालास्तु तद्वाप्य-न्तर्नगदधिमुखाद्रिषु ॥ ४५ ॥
वर्षद्वीपदिनाऽऽरब्धा-नुपवासान् कुर्वतिथौ ।
कुर्वन्नन्दीश्वरोपास्यै, श्रेयसीं श्रियमार्जयेत् ॥ ४६ ॥
भक्त्या चैत्यानि वन्दारु-स्तत्स्तोत्रस्तुतिपाठज्ञाक् ।
नन्दीश्वरमुपासीनो-ऽनुपर्वाहस्तदुस्तरम् ॥ ४७ ॥
प्रायः पूर्वाऽऽचार्य-ग्रथितैरेवाथमाचितः श्लोकैः ।
श्रीनन्दीश्वरकल्पो, लिखित इति श्रीजिनप्रभाऽऽचार्यैः" ॥४८॥
इति श्रीनन्दीश्वरकल्पः । ती० ४७ कल्प ।

णंदी–नन्दी–स्त्री० । 'णंदि' शब्दार्थे, आ० म० द्वि० । गवि, दे० ना० ४ वर्ग ।

णंदीचुण्णग–नन्दीचूर्णक–न० । 'णंदिचुण्णग' शब्दार्थे, सूत्र० १ श्रु० ४ अ० २ उ० ।

णंदीसरवर–नन्दीश्वरवर–पुं० । नन्दीश्वर एव वरश्च मनुष्यक्षेत्रापेक्षया बहुतरजिनभवनाऽऽदिसद्भावेन तस्य वरत्वादिति । अष्टमे द्वीपे, स्था० ४ ठा० २ उ० । जी० । द्वी० ।

तद्वक्तव्यता चैवम्–

खोदोदं णं समुद्दं नंदीसरवरे णामं दीवे वट्टे वलयागारसंठाणसंठिते तहेव० जाव परिक्खेवो पउमवरवेइयासंमे परिदारा दारंतरपदेसा जीवा तहेव २; से केणट्ठेणं भंते ! एवं वुच्चइ–णंदीसरवरो दीवो णंदीसरवरो दीवो ? । गोयमा ! देसे देसे बहुओ खुड्डा खुड्डियाओ वावीओ० जाव विलपंतियाओ खोदोदगपडिहत्थाओ उप्पातपव्वया सव्ववइरामया अच्छा०जाव पडिरूवा.अदुत्तरं च णं गोयमा ! णंदीसरदीवचक्कवालविक्खंभबहुमज्झदेसभाए, एत्थ णं चउद्दिसिं चत्तारि अंजणपव्वया पण्णत्ता ।

(खोदोदं णं समुद्दमित्यादि) क्षोदोदं,णमिति पूर्ववत् । समुद्दं,नन्दीश्वरवरो नाम द्वीपो वृत्तो वलयाऽऽकारसंस्थानसंस्थितः, सर्वतः समन्तात्, संपरिक्षिप्य तिष्ठति । चक्रवालविष्कम्भपरिक्षेपाऽऽदिवक्तव्यता प्राग्वत्, यावद् जीवोपपातसूत्रम् । सम्प्रति नामनिमित्तमभिधित्सुराह-(से केणट्ठेणमित्यादि) अथ केन कारणेन एवमुच्यते-नन्दीश्वरवरो द्वीपः नन्दीश्वरवरद्वीप इति ?। भगवानाह-गौतम ! नन्दीश्वरद्वीपे बहवः " खुड्डा खुड्डियाओ वावीओ" इत्यादि प्रागुक्तं सर्वं तावद्वक्तव्यं, यावत् "वाणमंतरा देवा देवीओ य आसयंति सयंति०जाव विहरंति) नवरमत्र वाप्यादयः क्षोदोदकप्रतिपूर्णा वक्तव्याः, पर्वतकाः, पर्वतकेष्वासनानि, गृहकाणि , गृहकेष्वासनानि, प्रासादपंक्तयः, प्रासादपंक्तिषु शिलापट्टकाः सर्वाऽऽत्मना वज्रमयाः, शेषं तथैव । (अदुत्तरं च णं गोयमा ! इत्यादि) अथान्यद् गौतम ! नन्दीश्वरे चत्वारो दिशः समाश्रिताश्चतुर्दिक्, तस्मिन् चक्रवालविष्कम्भेन बहुमध्यदेशभागे एकैकस्यां दिशि एकैकभागेन चत्वारोऽञ्जनकपर्वताः प्रज्ञप्ताः । तद्यथा-पूर्वस्यां दिशि, एवं पश्चिमायां, दक्षिण-

स्यामुत्तरस्याम् । जी० ३ प्रति० । प्रव० । चं० प्र० । सु० प्र० । स्था० । (अञ्जनकपर्वताः स्वस्थाने उक्ताः) " णंदीसरवरदीवस्स णं दीवस्स अंतो सत्त दीवा पण्णत्ता । तं जहा-जंबुद्दीवे, धायइसंडे, पुक्खरवरे, वारुणिवरे, खीरवरे, घयवरे, खोयवरे । णंदीसरवरस्स णं दीवस्स अंतो सत्त समुद्दा पण्णत्ता । तं जहा-लवणे, कालोए, पुक्खरोदे, वरुणोदे, खीरोदे, घओदे, खोओए । स्था० ७ ठा० ।

णंदीसरवरोद-नन्दीश्वरवरोद-पुं० । नन्दीश्वरद्वीपस्यान्तिकः समुद्रे, जी० ।

णंदीसरवरे णं दीवे णंदीसरवरोदे णामं समुद्दे वट्टे वलयागारसंठाणसंठिए० जाव सव्वं तहेव अट्ठो, जहा खोदोदगस्स० जाव सुमणसोमणसा य अत्थ दो देवा महिड्ढिया० जाव परिवसंति, सेसं तहेव० जाव तारगं ॥

"णंदीसरवरे णं" इत्यादि । नन्दीश्वरवरं, णमिति पूर्ववत् । नन्दीश्वरवरोदो नाम समुद्रो वृत्तो वलयाऽऽकारसंस्थानसंस्थितः सर्वतः समन्तात्संपरिक्षिप्य तिष्ठति । यथैव क्षोदोदकसमुद्रस्य वक्तव्यता, तथैवास्यापि अर्थसहिता वक्तव्यता, नवरमत्र सुमनसौमनसौ च द्वौ देवौ वक्तव्यौ, तावतिशयेन स्फीताविति । जी० ३ प्रति० ।

णंदुत्तर-नन्दोत्तर-पुं० । भवनपतीन्द्राणां स्थानीकाधिपतिषु, स्था० ५ ठा० १ उ० ।

णंदुत्तरा-नन्दोत्तरा-स्त्री० । उत्तरपौरस्त्ये रतिकरपर्वते ईशानस्य देवेन्द्रस्य कृष्णायां अग्रमहिष्यां राजधान्याम्, जी० ३ प्रति० । स्वनामख्यातायां शाश्वतनन्दापुष्करिण्याम्, स्था० ४ ठा० २ उ० । मन्दरस्य पर्वतस्य रिष्टकूटवास्तव्यायां दिक्कुमार्याम्, जं० ५ वक्ष० । स्त्री० । स्था० । ति० । ती० । जी० । आ० म० । स्वनामख्यातायां श्रेणिकमहाराजभार्यायाम्, सा च वीरजिनान्तिके प्रव्रज्य सिद्धा, इत्यन्तकृद्दशानां सप्तमे वर्गे तृतीयेऽध्ययने सूचितम् । अन्त०७ वर्ग०१ अ० । ती० ।

णकर-नगर-न० । " चूलिकापैशाचिके तृतीयचतुर्थयोराद्यद्वितीयौ " ॥ ८ । ४ । ३२५ ॥ इति गस्य कः । प्रा० ४ पाद । प्राग्भुप्राकारबद्धे सन्निवेशे, आचा० १ श्रु० ८ अ० ६ उ० ।

णक्क-नासिक्य-न० । नासिकान्तर्नाड्याम्, विपा० १ श्रु० १ अ० । प्रश्न० ।

नक्क-न० । ' नाक ' इति ख्याते जलचरभेदे, प्रज्ञा० १ पद । प्रश्न० । मत्स्यभेदे, जी० १ प्रति० ।

णक्ख-नख-पुं० । "सेषाऽऽदौ वा" ॥८ । २ । ९९॥ इति खादित्वम् । प्रा० २ पाद । करुहे, जी० ३ प्रति० । औ० । करजे, मदनाङ्कुशे च । पुं० । न० । हैम० । नखेषु, दे० ना० ४ वर्ग ।

णक्खणणिया-नखार्चनिका-स्त्री० । नखहरणिकायाम्, " नक्खणणं नक्खकंटाई" नखार्चनं नखहरणिका, सा नखच्छेदनार्थं, कण्टकाऽऽदिशल्योद्धरणार्थं वा गृह्यते । बृ० १ उ० ।

णक्खत्त-नक्षत्र-न० । ज्योतिष्कभेदे, इ० प० ।

विषयसूची-

(१) योग इति वस्तुनो नक्षत्रजातस्य क्रमेण चन्द्रसूर्यैः सह संपातविषये पञ्च प्रतिपत्तीरुद्भाव्य भगवन्मतनिरूपणम् ।
(२) यानि नक्षत्राणि प्रत्येकं द्वे द्वे, तेषां प्रतिपादनम् ।
(३) अष्टाविंशतेर्नक्षत्राणामष्टाविंशतिदेवतानां सामान्यतो नामनिदर्शनम् ।
(४) जम्बूद्वीपेऽभिजिदृक्षजैः सप्तविंशतिनक्षत्रैर्यद्व्यवहारो भवतीति प्रतिपादनम् ।
(५) येषु नक्षत्रेषु गमनप्रस्थानाऽऽदीनि कार्याणि कर्तव्यानि, येषु नेति, तद्दिग्दर्शनम् ।
(६) पादोपगमनलोचकर्माऽऽदीनि येषु नक्षत्रेषु कर्तव्यानि वर्ज्यनक्षत्राण्युद्दिश्य तेषां निरूपणम् ।
(७) किंप्रमृतसंज्ञकानि स्वाध्यायाऽऽदिनक्षत्राणि ।
(८) तपःकर्मोपकरणगणसंग्रहनक्षत्रप्ररूपणं, करणप्ररूपणं च ।
(९) ज्ञानवृद्धिकराणां नक्षत्राणां निदर्शनम् ।
(१०) प्रतिनक्षत्रं मुहूर्तपरिमाणधिचारे चन्द्रेण सार्द्धं नक्षत्रयोगप्रतिपादनम् ।
(११) तथैव सूर्येणापि साकं तदभिधानम् ।
(१२) नक्षत्राणामादानविसर्गपरिज्ञाननिमित्तनिरूपणम् ।
(१३) चन्द्रसूर्ययोगे नक्षत्रशोधनपरामर्शः ।
(१४) यावन्ति भागानि नक्षत्राणि चन्द्रेण सह युज्यन्ते, तेषां प्रतिपादनम् ।
(१५) यानि प्रमर्दयोगीनि नक्षत्राणि, तेषामभिधानम् ।
(१६) यावन्ति नक्षत्राणि यावन्ति भागानि पूर्णिमाऽमाद्ययां, तत्परामर्शः ।
(१७) यद् नक्षत्रं यावत्तारं भवति, तन्निर्देशः ।
(१८) यावन्ति नक्षत्राणि स्वयमस्तंगमनाहोरात्रपरिसमापकतया यं मासं नयन्ति, तन्निरूपणम् ।
(१९) येषां नक्षत्राणां या देवताकतासामभिजिन्नक्षत्रत उत्तराषाढापर्यन्तं विशिष्य विवेचनम् ।
(२०) नक्षत्राणां गोत्राणि ।
(२१) नक्षत्रेषु यानि भोजनानि, तन्निरूपणम् ।
(२२) यन्नक्षत्रं यद्दारिकं, तत्प्रदर्शनम् ।
(२३) नक्षत्रविचयनिदर्शनम् ।
(२४) सायं प्रातश्च नक्षत्रचन्द्रयोगविचारः ।
(२५) पूर्णिमासु चन्द्रनक्षत्रयोगस्य सूर्यनक्षत्रयोगस्य च प्ररूपणम् ।
(२६) यस्मिन् देशे यन्नक्षत्रं यावता कालेन भूयश्चन्द्रेण सह सूर्येण वा साकं योगमुपागच्छति, तावतः कालस्य प्ररूपणम् ।
(२७) नक्षत्राणां संस्थानानि ।
(२८) नक्षत्राणामन्तर्बहिश्च चारप्रतिपादनम् ।

(१) तत्संख्या-

ता जोए ति वत्थुस्स आवलियनिवाते आहिते ति वदेज्जा । ता कहं ते जोगे ति वत्थुस्स आवलियनिवाते आहिते ति वदेज्जा ? । तत्थ खलु इमाओ पंच वत्तिवत्तीओ पण्णत्ताओ । तत्थेगे एवमाहंसु-ता सव्वे वि णं णक्खत्ता कत्तिनादीआ भरणीपज्जवसिआ आहितेति वदेज्जा, एगे

एवमाहंसु । १ । एगे पुण एवमाहंसु–ता सव्वे वि णं णक्खत्ता महाऽऽदीआ अस्सेसापज्जवसिआ आहितेति वदेज्जा, एगे एवमाहंसु । २ । एगे पुण एवमाहंसु–ता सव्वे वि णं णक्खत्ता धणिट्ठाऽऽदिया सवणपज्जवसिया आहिता ति वदेज्जा, एगे एवमाहंसु । ३ । एगे पुण एवमाहंसु–ता सव्वे वि णं णक्खत्ता अस्सिणीआदिआ रेवतिपज्जवसिआ आहिता ति वदेज्जा, एगे एवमाहंसु । ४ । एगे पुण एवमाहंसु–ता सव्वे वि णक्खत्ता भरणीआदिआ अस्सिणीपज्जवसिता आहितेति वदेज्जा, एगे एवमाहंसु ।५। वयं पुण एवं वदामो–ता सव्वे वि णं णक्खत्ता अभिजिताऽऽदिआ उत्तरासाढापज्जवसिआ आहिता ति वदेज्जा । तं जहा–अभिजिए, सवणो, धणिट्ठा, सतभिसता, पुव्वभद्दवता, उत्तराभद्दवता, रेवती, अस्सिणी, भरणी, कत्तिया, रोहिणी, मिगसिरं, अद्दा, पुणव्वसू, पुस्सो, अस्सिलेसा, मघा, पुव्वाफग्गुणी, उत्तराफग्गुणी, हत्थो, चित्ता, साती, विसाहा, अणुराहा, जेट्ठा, मूलो, पुव्वासाढा, उत्तरासाढा ।

अत्र चायमर्थाधिकारः । यथा–योगमिति किं भगवन् ! त्वया समाख्यायत इति ? । ततस्तद्विषयं निर्वचनसूत्रमाह—" ता जोगे ति वत्थुस्स " इत्यादि । ' ता ' इति । आस्तां तावदन्यत्कथनीयम्, इदानीं तावदेतदेव कथ्यते—योग इति वस्तुनो नक्षत्रजातस्य (आवलियनिवाते त्ति) आवलिकया क्रमेण, निपातश्चन्द्रसूर्यैः सह संपातः, आख्यातो मयेति वदेत् स्वशिष्येभ्यः । एवमुक्ते भगवान् गौतमः पृच्छति-" ता कहं ते " इत्यादि । ' ता ' इति पूर्ववत्, कथं केन प्रकारेण, भगवन् ! त्वया योग इति योगस्य वस्तुनो नक्षत्रजातस्याऽऽवलिकानिपातः, स आख्यात इति वदेत् ? । भगवानाह-" तत्थ खलु " इत्यादि । तत्र तस्मिन् नक्षत्रजातस्याऽऽवलिकानिपातविषये, खल्विमाः पञ्च प्रतिपत्तयः परतीर्थिकाभ्युपगमरूपाः प्रज्ञप्ताः । तद्यथा–तत्र तेषां पञ्चानां परतीर्थिकानां मध्ये, एके परतीर्थिका एवमाहुः-' ता ' इति पूर्ववत् । सर्वाण्यपि नक्षत्राणि कृत्तिकाऽऽदीनि भरणीपर्यवसानानि प्रज्ञप्तानि । क्लीबत्वे पुंस्त्वनिर्देशः प्राकृतत्वात् । तत्रैवोपसंहारमाह-" एगे एवमाहंसु १ " । एवं शेषप्रतिपत्तिचतुष्टयगतान्यपि सूत्राणि परिज्ञावनीयानि । तदेवं परप्रतिपत्तीरुपदर्श्य संप्रति स्वमतमुपदर्शयति-" वयं पुण " इत्यादि । वयं पुनरेवं वक्ष्यमाणेन प्रकारेण वदामः । तमेव प्रकारमाह-" ता सव्वे वि णं " इत्यादि । " ता " इति पूर्ववत् । सर्वाण्यपि नक्षत्राण्यभिजिदादीनि, उत्तराषाढापर्यवसानानि प्रज्ञप्तानि । कस्मात्?, इति चेत् । उच्यते–इह सर्वेषामपि सुषमसुषमाऽऽदिरूपाणां कालविशेषाणामादिर्युगम्, " एष उ सुसमसुसमादओ अत्थविसेसो जुगाइणा सह पवत्तते, जुगं तेण सह समप्पंति, इति श्रीपादलिप्तसूरिवचनप्रामाण्याद्, युगस्य चाऽऽदिः प्रवर्तते श्रावणे मासि बहुलपक्षे प्रतिपदि तिथौ बालवकरणे अभिजिति नक्षत्रे चन्द्रेण सह योगमुपगच्छति ।

तथा चोक्तं ज्योतिष्करण्डके-

" सावणबहुलपडिवए, बालवकरणे अभीइणक्खत्ते ।
सव्वत्थ पढमसमए, जुगस्स आई विआणाहि ॥ १ ॥ "

अत्र (सव्वत्थेति) भरते ऐरवते महाविदेहे च, शेषं सुगमम् ।

ततः सर्वेषामपि कालविशेषाणामादौ चन्द्रयोगमधिकृत्याभिजिन्नक्षत्रस्य प्रवर्तमानत्वादभिजिदादीनि नक्षत्राणि प्रज्ञप्तानि । तान्येव तद् यथेत्यादिनोपदर्शयति-"अभिई सवणो" इत्यादि । सू० प्र० १० पाहु० १ पाहु० ।

(२) एतानि नक्षत्राणि प्रत्येकं द्वे द्वे–

दो कत्तियाओ, दो रोहिणीओ, दो मियसिराओ, दो अद्दाओ, एवं जाणियव्वं–

"कत्तिय रोहिणि मियसिर, अद्दा य पुणव्वसू य पुस्सो य ।
तत्तो वि अस्सलेसा, मघा य दो फग्गुणीओ य ॥ १ ॥
हत्थो चित्ता साई, य विसाहा होंति अणुराहा ।
जेट्ठा मूलो पुव्वा–आसाढा उत्तरा चेव ॥ २ ॥
अभिई सवण धणिट्ठा, सयभिसया दो य होंति भद्दवया ।
रेवइ अस्सिणि भरणी, णेयव्वा आणुपुव्वीए" ॥३॥

एवं गाहाणुसारेण णायव्वं० जाव दो भरणीओ ।

द्वे कृत्तिके नक्षत्रापेक्षया, न तु तारकाऽपेक्षया, इत्येवं सर्वत्रेति । " कत्तिए " इत्यादि गाथात्रयेण नक्षत्रसूत्रसंग्रहः ।

(३) कृत्तिकाऽऽदीनामष्टाविंशतेर्नक्षत्राणां क्रमेणाग्न्यादयोऽष्टाविंशतिरेव देवता भवन्ति । ता आह–

दो अग्गी, दो पयावई, दो सोमा, दो रुद्दा, दो अदिई, दो बहस्सई, दो सप्पा, दो पिई, दो भगा, दो अज्जमा, दो सविया, दो तट्ठा, दो वाऊ, दो इंदग्गी, दो मित्ता, दो इंदा, दो निरई, दो आऊ, दो विस्सा, दो बम्हा, दो विण्हू, दो वसू, दो वरुणा, दो अया, दो विविद्धी, दो पूसा, दो अस्सा, दो जमा ।

द्वावग्नी १, एवं प्रजापती २, सौमौ ३, रुद्रौ ४, अदिती ५, बृहस्पती ६, सर्पौ ७, पितरौ ८, भगौ ९, अर्यमणौ १०, सवितारौ ११, त्वष्टारौ १२, वायू १३, इन्द्राग्नी १४, मित्रौ १५, इन्द्रौ १६, निर्ऋती १७, आपः १८, विश्वौ १९, ब्रह्माणौ २०, विष्णू २१, वसू २२, वरुणौ २३, अजौ २४, विवृद्धी (२५)। अन्यान्तरे अदिर्बुध्नाद्यौ २५ । पूषणौ २६, आश्विनौ २७, यमाविति २८ ।

अन्यान्तरे पुनरश्विनीत आरभ्यैता एवमुक्ताः–

"अश्वियमदहनकमलज–शशिशूलनृददितिजीवफणिपितरः ।
योन्यर्यमदिनकृत्त्व–ष्टृपवनशक्राग्निमित्राऽऽख्याः ॥ १ ॥
ऐन्द्री नैर्ऋतितोऽयं, विश्वौ ब्रह्मा हरिर्वसुर्वरुणः ।
अजपादोऽहिर्बुध्नः, पूषा चेतीश्वरा ज्ञानाम् " ॥ २ ॥

स्था० २ ठा० ३ उ० । जं० ।

(४) जंबुद्दीवे दीवे अभिईवज्जेहिं सत्तावीसाए णक्खत्तेहिं संववहारे वट्टति ।

जम्बूद्वीपे, न धातकीखण्डाऽऽदौ, अभिजिद्वर्जैः सप्तविंशत्या नक्षत्रैर्व्यवहारः प्रवर्त्तते, अभिजिन्नक्षत्रस्योत्तराषाढचतुर्थपादानुप्रवेशनादिति । सं० २७ सम० ।

(५) केषु नक्षत्रेषु कानि कार्याणि गमनप्रस्थानाऽऽदीनि कर्त्तव्यानि-

पुस्साऽस्सिणि मिगसिर रे-वई य हत्थो तहेव चित्ता य ।
अणुराह जिट्ठ मूलो, नव णक्खत्ता गमणसिद्धा ॥११॥
मिगसिर महा य मूलो, विसाह तहचेव होइ अणुराहा ।
इत्थुत्तर रेवइ अ-स्सिणी य सवणे य णक्खत्ते ॥१२॥
एएसु य अद्धाणं, पत्थाणं ठाणयं च कायव्वं ।
जइ य गहुत्थ न चिट्ठइ, संझामुक्कं च जइ होइ ॥१३॥
उप्पन्नजत्तपाणो, अद्धाणम्मि ज सया ज जो होइ ।
फलपुप्फवग्गुवेओ, गओ वि खेमेण सो एइ ॥ १४ ॥

सन्ध्यागताऽऽदीनि-

संझागयं रविगयं, विडेरं सग्गहं विलंबिं च ॥
राहुहयं गहभिन्नं, च वज्जए सत्त नक्खत्ते ॥ १५ ॥
अत्थमणे संझागय, रविगय जह पट्ठिओ उ आइच्चो ।
विडेरमविहारिय, सग्गह कूरग्गहठ्ठियं तु ॥ १६ ॥
आइच्चपिट्ठओ जं, विलंबि राहूहयं जहिं गहणं ।
मज्झेण गहो जस्स उ, गच्छइ तं होइ गहनिभिन्नं ॥१७॥
संझागयम्मि कलहो, होइ विवाओ विलंबि नक्खत्ते ।
विडेरे परविजओ, आइच्चगए अणिच्चाणि ॥ १८ ॥
जं सग्गहम्मि कीरइ, नक्खत्ते तत्थ निग्गहो होइ ।
राहुहयम्मि य मरणं, गहभिन्ने सोणिउग्गालो ॥ १९ ॥
संझागयं गहगयं, आइच्चगयं च दुव्वलं रिक्खं ।
संग्गहाऽऽइच्चविमुक्कं, गहमुक्कं चेव बलियाइं ॥ २० ॥

(६) पादोपगमनलोचकर्माऽऽदीनि-

पुस्सो हत्थो अभिई य, अस्सिणी जरणी तहा ।
एएसु य रिक्खेसु य, पाओवगमणं करे ॥ २१ ॥
सवणेण धणिट्ठाई, पुणव्वसू न वि करिज्ज निक्खमणं ।
सयभिसयस्स न बंभे, विज्जाऽऽरंभे पवित्तिज्जा ॥२२॥
हत्थाइ पंच रिक्खा, वत्थुस्स पसत्थगा विणिद्दिट्ठा ।
उत्तर तिन्नि धणिट्ठा, पुणव्वसू रोहिणी पुस्सो ॥२३॥ द०प०।
पुणवसुणा पुस्सेणं, सवणेण धणिट्ठया ।
एएहिं चउरिक्खेहिं, लोयकम्माणि कारए ॥ २५ ॥
द० प०। विशे०। व्य०। आ० म०। पं० व०।

कत्तियाहि विसाहाहिं, मघाहिं जरणीहि य ।
एएहिं चउरिक्खेहिं, लोयकम्माणि वज्जए ॥ २६ ॥
तिहिं उत्तराहिं तह रो-हिणीहिं कुज्जा ज सेहनिक्खमणं ।
सेहोवट्ठावणं कुज्जा, अणुन्ना गणिवायए ॥ २७ ॥
गणसंगहणं कुज्जा, गणहरं चेव ठावए ।
सग्गहं वसहिट्ठाणं, थावराणि पवत्तए ॥ २८ ॥

(७) स्वाध्यायाऽऽदिनक्षत्राणि क्षिप्रमृदुसंज्ञकानि-

पुस्सो य हत्थो अभिई, अस्सिणी य तहेव य ।
चत्तारि खिप्पकारीणि, विज्जाऽऽरंभेसु सोहणा ॥२९॥
विज्जाणं धारणं कुज्जा, बंभलोगे य साहए ।
सज्झायं च अणुन्नं च, उद्दिसो य समुद्दिसो ॥ ३० ॥
अणुराहा रेवई चेव, चित्ता मिगसिरं तहा ।
मिऊ सोयाणि चत्तारि, मित्तकम्मं तेसु कारए ॥ ३१ ॥
भिक्खाचरणऽमचाणं, कुज्जा गहणधारणं ।
संगहोवग्गहं चेव, बालबुड्ढाण कारए ॥ ३२ ॥
(८) अद्दा अस्सेस जिट्ठा य, मूलो चेव चउत्थओ ।
गुरुणो कारए पडिमं, तवोकम्मं च कारए ॥ ३३ ॥
दिव्वमाणुस्सतेरिच्छ-उवसग्गेऽहियासए ।
गुरूसु चरणकरणं, उग्गहोवग्गहं करे ॥ ३४ ॥
महा भरणि पुव्वाणि, तिन्निओ य वियाहिया ।
एएसु य तवं कुज्जा, सब्भितरयबाहिरं ॥ ३५ ॥
तिन्नि सयाणि सट्ठाणि, तवोकम्मा य आहिया ।
उग्गनक्खत्तजोएसु, तेसुमन्नतरं करे ॥ ३६ ॥
कत्तिया य विसाहा य, उएहा एयाणि दुन्निओ ।
लिंपणं सिंचणं कुज्जा, संचारग्गहधारणं ॥ ३७ ॥
उवगरणजंडमाईणं, विवायं चीवराण य ।
उवगरणं विज्जागं च, आयरियाणं च कारए ॥ ३८ ॥
धणिट्ठा सयभिसा साई, सवणो य पुणव्वसू ।
एएसु गुरुसुस्सूसं, चेइयाणं च पूयणं ॥ ३९ ॥
सज्झायकरणं कुज्जा, विज्जाऽऽरम्भे य कारए ।
चेओवट्ठावणं कुज्जा, अणुन्नं गणिवायए ॥ ४० ॥
गणसंगहणं कुज्जा, सेहनिक्खमणं तहा ।
संगहोवग्गहं कुज्जा, गणावच्छेइयं तहा ॥ ४१ ॥
वव१वालवं च २ तह को-लवं च तेतीलयं ४ गराइं च ५ ।
वणियं ६ विट्ठी ७ य तहा, सुद्धपडिवए निसाईया ॥४२॥
सउणि चउप्पय नागं, किंतुग्घं च करणा धुवा हुंति ।
किन्हचउद्दसिरत्तिं, सउणी पडिवज्जए करणं ॥ ४३ ॥
कागणि तिहिं वि कलं, जम्हेसो साहए न पुण काले ।
सत्तहि हरिज्ज नागं, जं सेसं तं भवे करणं ॥ ४४ ॥
द० प०। स०। स्था०। चं० प्र०।

(९) ज्ञानवृद्धिकराणि नक्षत्राणि-

दस नक्खत्ता नाणवुड्ढिकरा पन्नत्ता । तं जहा-
"मिगसिर अद्दा पुस्सो, तिन्नि अ पुव्वाइ मूलमस्सेसा ।
हत्थो चित्ता य तहा, दस वुड्ढिकरा य नाणस्स" ॥१॥
स० १० सम०। द० प०।

(१०) चन्द्रनक्षत्रयोगः-

ता कहं ते मुहुत्तग्गे आहिते ति वदेज्जा ?। ता एतेसि णं अट्ठावीसाए णक्खत्ताणं अत्थि णक्खत्ते, जे णं णव मुहुत्ते,

सत्तावीसं च सत्तट्ठिभागे मुहुत्तस्स चंदेण सद्धिं जोयं जोएति। अत्थि णक्खत्ता, जे णं पण्णरस मुहुत्ते णं चंदेण सद्धिं जोयं जोइंति। अत्थि णक्खत्ता, जे णं तीसं मुहुत्ते चंदेण सद्धिं जोयं जोइंति। अत्थि णक्खत्ता, जे णं पणतालीसं मुहुत्ते णं चंदेण सद्धिं जोगं जोइंति । ता एएसि णं अट्ठावीसाए णक्खत्ताणं कयरे णक्खत्ते, जे णं नव मुहुत्ते, सत्तावीसं च सत्तट्ठिभाए मुहुत्तस्स चंदेण सद्धिं जोयं जोएति ? । कयरे णक्खत्ता, जे णं पण्णरस मुहुत्ते चंदेण सद्धिं जोयं जोइंति ? । कयरे णक्खत्ता, जे णं तीसं मुहुत्ते चंदेण सद्धिं जोगं जोइंति ? । कयरे णक्खत्ता, जे णं पणयालीसं मुहुत्ते चंदेण सद्धिं जोयं जोइंति ?। ता एतेसि णं अट्ठावीसाए णक्खत्ताणं तत्थ जे ते णक्खत्ते,जे णं णव मुहुत्ते,सत्तावीसं च सत्तट्ठिभागे मुहुत्तस्स चंदेण सद्धिं जोयं जोएति; से णं एगे अभिई। तत्थ जे ते णक्खत्ता, जे णं पण्णरस मुहुत्ते चंदेण सद्धिं जोयं जोइंति; ते णं इ। तं जहा–सतभिसया, भरणी, अद्दा, अस्सेसा, साती, जेट्ठा । तत्थ जे णं तीसं मुहुत्तं चंदेण सद्धिं जोगं जोइंति; ते पण्णरस । तं जहा–सवणो, धणिट्ठा, पुव्वाभद्दवता, रेवती, अस्सिणी,कत्तिया, मगसिरं, पुस्सो, महा, पुव्वाफग्गुणी,हत्थो,चित्ता,अणुराहा, मूलो, पुव्वासाढा । तत्थ जे ते णक्खत्ता, ते णं पणतालीसं मुहुत्ते चंदेण सद्धिं जोगं जोइंति, ते णं इ । तं जहा–उत्तराभद्दवता, रोहिणी, पुणव्वसू, उत्तराफग्गुणी, विसाहा, उत्तरासाढा ।

'ता' इति पूर्ववत् । कथं भगवन् ! प्रतिनक्षत्रं मुहूर्त्ताग्रं मुहूर्त्तपरिमाणमाख्यातमिति वदेत् ?। एवमुक्ते भगवानाह-"ता एएसि णं" इत्यादि । 'ता' इति पूर्ववत् । एतेषामष्टाविंशतिनक्षत्राणां मध्ये, अस्ति तन्नक्षत्रं, यत्रैव मुहूर्तान्, एकस्य च मुहूर्तस्य सप्तविंशतिसप्तषष्टिभागान् चन्द्रेण सार्द्धं योगं युनक्ति उपैति । तथाऽस्ति निपातत्वाद्व्ययत्वाद्वा सन्ति तानि नक्षत्राणि, यानि पञ्चदश मुहूर्तान् यावच्चन्द्रेण सह योगमुपयान्ति । तथा सन्ति तानि नक्षत्राणि, यानि त्रिंशतं मुहूर्त्तान् यावच्चन्द्रेण सह योगमश्नुवते । तथा सन्ति तानि नक्षत्राणि, यानि पञ्चचत्वारिंशतं मुहूर्त्तान् यावच्चन्द्रेण सह योगं युञ्जन्ति। एवं सामान्येन भगवतोक्ते विशेषनिर्द्धारणार्थं भगवन्तं पृच्छति गौतमः-" ता एएसि णं " इत्यादि । 'ता' इति पूर्ववत् । एतेषामष्टाविंशतेर्नक्षत्राणां मध्ये, कतरत् तन्नक्षत्रं, यत्रैव मुहूर्त्तान्, एकस्य च मुहूर्तस्य सप्तविंशतिसप्तषष्टिभागान् यावच्चन्द्रेण सह योगं युनक्ति ?। तथा कतराणि तानि नक्षत्राणि, यानि पञ्चदश मुहूर्त्तान् यावच्चन्द्रेण सह योगं युञ्जन्ति ?। तथा कतराणि तानि नक्षत्राणि, यानि त्रिंशतं मुहूर्त्तान् यावच्चन्द्रेण सह योगमश्नुवते ?। तथा कतराणि तानि नक्षत्राणि,यानि पञ्चचत्वारिंशतं मुहूर्त्तान् यावच्चन्द्रेण सार्द्धं योगमुपयान्ति ? । एवं गौतमेन प्रश्ने कृते भगवानाह-" ता एएसि णं " इत्यादि । 'ता' इति पूर्ववत् । एतेषामष्टाविंशतिनक्षत्राणां मध्ये यत्तन्नक्षत्रं नव मुहूर्त्तान्,एकस्य च मुहूर्तस्य सप्तविंशतिसप्तषष्टिभागान् यावच्चन्द्रेण सह योगं युनक्ति । तदेकमभिजिन्नक्षत्रमवसेयम् । कथमिति चेत् ?। उच्यते-इह अभिजिन्नक्षत्रं सप्तषष्टिखण्डीकृतस्याहोरात्रस्यैकविंशतिभागान् चन्द्रेण सह योगमुपैति । ते चैकविंशतिरपि भागा मुहूर्त्तगतभागकरणार्थं त्रिंशता गुण्यन्ते, जातानि षट्शतानि त्रिंशदधिकानि ६३० । तथा चैतावान् कालमधिकृत्य सीमाविस्तारोऽभिजिन्नक्षत्रस्यान्यत्राप्युक्तः-"इ च्चेव सया तीसा,भागाणं अभिइ सीमविक्खंभो । दिट्ठो सव्वद्धरगो, सव्वोहिंऽणंतणाणीहिं ॥ १ ॥ " तेषां सप्तषष्टया भागो ह्रियते, लब्धा नव मुहूर्त्ताः, एकस्य च मुहूर्तस्य सप्तविंशतिः सप्तषष्टिभागाः । ९ । २७ । उक्तं च-" अभिइस्स चंदजोगो, सत्तही खंडिओ अहोरत्तो । भागा य एगवीसं, ते पुण भहिया नव मुहुत्ता " ॥ १ ॥ तथा " तत्थ " इत्यादि । तत्र तेषामष्टाविंशतेर्नक्षत्राणां मध्ये यानि नक्षत्राणि पञ्चदश मुहूर्तान् यावच्चन्द्रेण सह योगमश्नुवते, तानि षट् । तद्यथा-" सतभिसया " इत्यादि । तथाहि-एतेषां षण्णामपि नक्षत्राणां प्रत्येकं सप्तषष्टिखण्डीकृतस्याहोरात्रस्य सत्कान् सार्द्धान् त्रयस्त्रिंशदधिकान् भागान् यावच्चन्द्रेण सह योगो भवति, ततो मुहूर्त्तगतसप्तषष्टिभागकरणार्थं त्रयस्त्रिंशत् त्रिंशता गुण्यते, जातानि नवशतानि नवत्यधिकानि ९९० । यद्यपि सार्द्धे, तदपि त्रिंशता गुणयित्वा द्विकेन भज्यते,लब्धाः पञ्चदश मुहूर्तस्य सप्तषष्टिभागाः, ते पूर्वराशौ प्रक्षिप्यन्ते, जातं पूर्वराशिसहस्रं पञ्चोत्तरम् १००५ । तथा चैतेषां प्रत्येकं कालमधिकृत्य सीमाविस्तारो मुहूर्त्तगतसप्तषष्टिभागानां पञ्चोत्तरं सहस्रमुक्तः-"सयभिसया भरणीओ, अद्दा अस्सेस साइ जिट्ठा य। पंचोत्तरं सहस्सं, भागाणं सीमविक्खंभो ॥१॥" अस्य पञ्चोत्तरसहस्रस्य सप्तषष्टया भागो ह्रियते,लब्धाः पञ्चदश मुहूर्ताः। उक्तं च-"सयभिसया भरणीओ, अद्दा अस्सेस साइ जिट्ठा य। एए इ णक्खत्ता, पण्णरस मुहुत्तसंजोगा ॥ १ ॥ " तथा-तत्र तेषामष्टाविंशतेर्नक्षत्राणां मध्ये यानि नक्षत्राणि त्रिंशतं मुहूर्तान् यावच्चन्द्रेण सह योगं युञ्जन्ति, तानि पञ्चदश। तद्यथा-" सवणो " इत्यादि । तथाहि-एतेषां कालमधिकृत्य प्रत्येकं सीमाविष्कम्भो मुहूर्त्तगतसप्तषष्टिभागानां दशोत्तरे द्वे सहस्रे २०१० । ततस्तयोः सप्तषष्टया भागे हृते लब्धास्त्रिंशन्मुहूर्ताः। तथा-तत्र यानि नक्षत्राणि पञ्चचत्वारिंशतं मुहूर्तान् यावच्चन्द्रेण सार्द्धं योगं युञ्जन्ति, तानि षट्। तद्यथा-उत्तराभाद्रपदा इत्यादि । तेषां हि प्रत्येकं कालमधिकृत्य सीमाविष्कम्भो मुहूर्त्तगतसप्तषष्टिभागानां त्रीणि सहस्राणि पञ्चदशोत्तराणि ३०१५ । ततस्तेषां सप्तषष्टया भागे हृते लब्धाः पञ्चचत्वारिंशदेव मुहूर्ता लभ्यन्ते ।

उक्तं च-

" तिण्णेव उत्तराइं,पुणव्वसू रोहिणी विसाहा य ।
एए इ णक्खत्ता, पणयालमुहुत्तसंजोगा ॥ १ ॥
अवसेसा णक्खत्ता, पनरसए हुंति तीसइमुहुत्ता ।
चंदमि एस जोगो, णक्खत्ताणं समक्खाओ ॥ २ ॥ "
तदेवमुक्तो नक्षत्राणां चन्द्रेण सह योगः ।

(११) संप्रति सूर्येण सह तमभिधित्सुराह-

ता एतेसि णं अट्ठावीसाए णक्खत्ताणं अत्थि णक्खत्ते, जे णं चत्तारि अहोरत्ते छच्च मुहुत्ते णं सूरेण सद्धिं

जोयं जोएति । अत्थि णक्खत्ता, जे णं छ अहोरत्ते एगवीसं च मुहुत्ते सूरेण सद्धिं जोयं जोइंति । अत्थि णक्खत्ता, जे णं तेरस अहोरत्ते बारस य मुहुत्ते सूरेण सद्धिं जोयं जोइंति । अत्थि णक्खत्ता, जे णं वीसं अहोरत्ते तिण्णि य मुहुत्ते सूरेण सद्धिं जोयं जोइंति । ता एतेसि णं अट्ठावीसाए णक्खत्ताणं कतरे णक्खत्ते, जं चत्तारि अहोरत्ते छच्च मुहुत्ते णं सूरेण सद्धिं जोयं जोएति ?। कतरे णक्खत्ता, जे णं छ अहोरत्ते एगवीसं च मुहुत्ते सूरेण सद्धिं जोयं जोइंति ?। कतरे णक्खत्ता, जे णं तेरस अहोरत्ते बारस य मुहुत्ते सूरेण सद्धिं जोयं जोइंति ?। कतरे णक्खत्ता, जे णं वीसं अहोरत्ते तिण्णि य मुहुत्ते सूरेण सद्धिं जोयं जोइंति । ता एतेसि णं अट्ठावीसाए णक्खत्ताणं, तत्थ जे मे णक्खत्ते, जे णं चत्तारि अहोरत्ते छच्च मुहुत्ते सूरेण सद्धिं जोयं जोएति, से णं एगे अभिई । तत्थ जे ते णक्खत्ता, जे णं छ अहोरत्ते एगवीसं च मुहुत्ते सूरेण सद्धिं जोयं जोइंति, ते णं छ । तं जहा–सतभिसया, भरणी, अद्दा, अस्सेसा, सातो, जेट्ठा । तत्थ जे ते णक्खत्ता, जे णं तेरस अहोरत्ते छच्चालस य मुहुत्ते सूरेण सद्धिं जोयं जोएंति, ते णं पण्णरस । तं जहा–सवणो, धणिट्ठा, पुव्वभद्दवता, रेवती, अस्सिणी, कत्तिया, मग्गसिरं, पुस्सो, महा, पुव्वाफग्गुणी, हत्थो, चित्ता, अणुराधा, मूलो, पुव्वासाढा । तत्थ जे ते णक्खत्ता, जे णं वीसं अहोरत्ते तिण्णि य मुहुत्ते सूरेण सद्धिं जोयं जोइंति, ते णं छ । तं जहा–उत्तराभद्दवता, रोहिणी, पुणव्वसू, उत्तराफग्गुणी, विसाहा, उत्तरासाढा ।

"ता एतेसि णं" इत्यादि । 'ता' इति पूर्ववत् । एतेषामनन्तरोदितानामष्टाविंशतिनक्षत्राणां मध्ये अस्ति तन्नक्षत्रं, यच्चतुरो अहोरात्रान् षट् च मुहूर्त्तान् यावत्सूर्येण सार्द्धं योगमुपैति । तथाऽस्तीति सन्ति तानि नक्षत्राणि, यानि षडहोरात्रानेकविंशतिं च मुहूर्तान् सूर्येण सार्द्धं योगं युञ्जन्ति । तथा सन्ति तानि नक्षत्राणि, यानि त्रयोदश अहोरात्रान्, द्वादश च मुहूर्त्तान् यावत्सूर्येण सह योगमुपयान्ति । तथा सन्ति तानि नक्षत्राणि, यानि विंशतिमहोरात्रान् त्रीन् मुहूर्त्तान् यावत्सूर्येण समं योगं युञ्जन्ति । एवं भगवता सामान्येनोक्तौ विशेषावगमनिमित्तं भूयोऽपि भगवान् गौतमः पृच्छति–"ता एतेसि णं" इत्यादि सुगमम् । भगवान् निर्वचनमाह–"ता एतेसि णं" इत्यादि । 'ता' इति पूर्ववत् । एतेषामष्टाविंशतेर्नक्षत्राणां मध्ये यन्नक्षत्रं चतुरो अहोरात्रान् षट् च मुहूर्त्तान् सूर्येण सार्द्धं योगं युनक्ति, तदेकमभिजिन्नक्षत्रमवसेयम् ।

तथाहि–सूर्ययोगविषयं पूर्वाऽऽचार्यप्रदर्शितमिदं करणम्–

" जं रिक्खं जावइए, वच्चइ चंदेण भाग सत्तट्ठी ।
तं पणभागे सग-दियस्स सूरेण तावइए " ॥ १ ॥

अस्या अक्षरगमनिका–यत् ऋक्षं नक्षत्रं यावतो रात्रिन्दिवस्याहोरात्रस्य सम्बन्धिनः सप्तषष्टिभागान् चन्द्रेण सह योगं व्रजति, तत्तत्र रात्रिन्दिवस्य पञ्च भागान् तावतः सूर्येण समं व्रजति । तत्रामीभिर्दशभिरेकविंशतिसप्तषष्टिभागान् चन्द्रेण समं वर्तते, तत एतावतः पञ्चभागानहोरात्रस्य सूर्येण समं वर्तमानमवसेयम् । एकविंशतिश्च पञ्चभिर्भागे हृते लब्धाश्चत्वारोऽहोरात्राः, एकः पञ्चमो भागोऽवतिष्ठते, स मुहूर्त्ताऽऽनयनाय त्रिंशता गुण्यते, जातास्त्रिंशत्, तस्याः पञ्चभिर्भागे हृते लब्धाः षण्मुहूर्त्ता इति ।

उक्तं च–

" अभिई छ च्च मुहुत्ते, चत्तारि य केवले अहोरत्ते ।
सूरेण समं वच्चइ, इत्तो सेसाण वुच्छामि ॥ १ ॥ "

तथा तत्र तेषामष्टाविंशतेर्नक्षत्राणां मध्ये यानि नक्षत्राणि षडहोरात्रानेकविंशतिं च मुहूर्त्तान् यावत् सूर्येण समं योगमुपयान्ति । तानि षट् । तद्यथा–"सयभिसया" इत्यादि । तथाहि–एतानि नक्षत्राणि प्रत्येकं चन्द्रेण समं सार्द्धान् त्रयस्त्रिंशत्संख्याकान् सप्तषष्टिभागानहोरात्रस्य व्रजन्ति, अपार्द्धक्षेत्रत्वादेतेषाम्, तत एतावतः पञ्चभागानहोरात्रस्य सूर्येण समं व्रजन्तीति प्रत्येतव्यं, प्रागुक्तकरणप्रामाण्यात् । त्रयस्त्रिंशतश्च पञ्चभिर्भागे हृते लब्धाः षडहोरात्राः, पञ्चादवतिष्ठन्ते सार्द्धास्त्रयः पञ्चभागाः, ते सवर्णनायां जाताः सप्ततिः, मुहूर्त्ताऽऽनयनाय त्रिंशता गुण्यन्ते, जाते द्वे शते दशोत्तरे २१० ते च मुहूर्त्तार्द्धंगते, ततः परिपूर्णमुहूर्त्ताऽऽनयनाय दशभिर्भागो ह्रियते, लब्धा एकविंशतिर्मुहूर्त्ताः । उक्तं च–"सयभिसया भरणीओ, अद्दा अस्सेस साइ जिट्ठा य । छच्चेव मुहुत्ते इग-वीसं छच्चेवऽहोरत्ते ॥१॥ " तथा तत्र तेषामष्टाविंशतेर्नक्षत्राणां मध्ये यानि नक्षत्राणि त्रयोदश अहोरात्रान् द्वादश मुहूर्त्तान् यावत् सूर्येण समं योगं युञ्जन्ति, व्रजन्तीति पाठान्तरे । तानि पञ्चदश । तद्यथा–"सवणो" इत्यादि । तथाहि–अमूनि परिपूर्णान् सप्तषष्टिभागान् चन्द्रेण समं व्रजन्ति, ततः सूर्येण सह एतानि पञ्चभागानप्यहोरात्रस्य सप्तषष्टिसंख्यान् गच्छन्ति । सप्तषष्टेश्च पञ्चभिर्भागे हृते लब्धास्त्रयोदश अहोरात्राः, शेषौ च द्वौ भागौ तिष्ठतः, तौ त्रिंशता गुण्येते, जाता षष्टिः, तस्याः पञ्चभिर्भागे हृते लब्धा द्वादश मुहूर्त्ताः । उक्तं च–"अवसेसा नक्खत्ता, पनरस वि सूरसहगया जंति । बारस चेव मुहुत्ते, तेरस य समे अहोरत्ते" ॥१॥ तथा तत्र तेषामष्टाविंशतेर्नक्षत्राणां मध्ये यानि नक्षत्राणि विंशतिमहोरात्रान् त्रीन् मुहूर्त्तान् यावत्सूर्येण समं योगमश्नुवते, तानि षट् । तद्यथा–"उत्तरभद्दवया" इत्यादि । एतानि हि षडपि नक्षत्राणि प्रत्येकं चन्द्रेण समं सप्तषष्टिभागानां, शतमेकस्य च सप्तषष्टिभागस्यार्द्धं व्रजन्ति । तत एतावतः पञ्च भागान् अहोरात्रस्य सूर्येण समं व्रजन्तीत्येवमवगन्तव्यम्, शतस्य च पञ्चभिर्भागे हृते लब्धा विंशतिरहोरात्राः । यद्यपि चैकस्य पञ्चभागस्यार्द्धमुद्धरति, तदपि त्रिंशता गुण्यते, जाता त्रिंशत्, तस्या दशभिर्भागे हृते लब्धास्त्रयो मुहूर्त्ताः । सू०प्र०१०पाहु०२पाहु०। ज्यो०।

(१२) नक्षत्राणामादानविसर्गपरिज्ञाननिमित्तनिरूपणम्–

एएसिं रिक्खाणं, आयाणविसग्गजाणणाकरणं ।
चंदम्मि य सूरम्मि य, वोच्छामि अहाणुपुव्वीए ॥

एतेषामनन्तरोदितानां नक्षत्राणामष्टाविंशतिसंख्यानाम्, आदानविसर्गज्ञानकरणमादानविसर्गपरिज्ञाननिमित्तम् । तत्र विवक्षिते दिने चन्द्रेण सूर्येण वा सह उपरि यन्नक्षत्रं, तस्य किल चन्द्रेण सूर्येण वा कृतः परिग्रह इत्यादानम् । पाश्चात्यादिनक्षत्राणि गतानि, तानि किल मुक्तानि परित्यक्तानि, तेषां परित्यागो विसर्गः । तयोः परिज्ञानं–केन नक्षत्रेण सह चन्द्रस्य सूर्यस्य वा

योगो वर्त्तते ?, कानि च प्रागतीतानि ?, इति सम्यग् ज्ञानं, तन्निमित्तं करणं, चन्द्रे सूर्ये च प्रत्येकं यथाऽनुपूर्व्या क्रमेण वक्ष्यामि । तत्र यथोद्देशं निर्देश इति न्यायात् प्रथमतः चन्द्रविषयं करणमाह-

पव्वं पञ्चरसगुणं, तिहिसहियं ओमरत्तपरिहीणं ।
बासीइए विभत्ते, लद्धे अंसे वियाणाहि ॥
जं इच्छइ भागलद्धं, कायव्वं तं चउग्गुणं णियमा ।
अभिइस्स एक्कवीसा, जागे सोहेहि लद्धम्मि ॥
सेसाणं रासीणं, सत्तावीसा तु मंडला सोज्झा ।
अभिइस्स सोहणाऽसं-जवे तु इणमो विही होइ ॥
सेसाओ रासीओ, रूवं घेत्तूण सत्तसट्ठि काऊणं ।
पक्खिव लद्धेसु पुणो, अभिजिइ सोहेउ पुव्वकमा ॥
पंच दस तेरसऽट्ठा-रसे य बावीस सत्तवीसा य ।
सोज्झा दिवड्ढखेत्तं, तं जइवई असाढंता ॥
एयाणि सोहइत्ता, जं सेसं तं हविज्ज नक्खत्तं ।
सोज्झा तीसगुणाओ, सत्तट्ठिहते मुहुत्ताओ ॥

यस्मिन् दिने चन्द्रेण सह युक्तं नक्षत्रं ज्ञातुमिष्यते, तस्माद् दिनात् प्राक् यानि पर्वाणि युगमध्येऽतीतानि, तानि संख्यया परिज्ञाप्य तत्संख्या ध्रियते । सूत्रे च पर्वसंख्याऽप्युपचारात् पर्वेत्यभिहिता । पर्व पञ्चदशतिथ्यात्मकम्, अतस्तत् पञ्चदशभिर्गुण्यते, गुणयित्वा च तेषां पर्वाणामुपरि विवक्षिता-यास्तिथेर्याः प्रागतीतास्तिथयः, ताभिः सहितं संयुक्तं पञ्चदशगुणनाऽनन्तरं पर्वोपरिवर्तिन्योऽतीतास्तिथयो मध्ये प्रक्षिप्यन्त इति । ततो येऽवमरात्रा अतिक्रान्तेषु पर्वसु गताः, तैः परिहीणं क्रियते, ततोऽपनीयत इत्यर्थः । ततो द्व्यशीत्या भागो ह्रियते । तत्र लाभे हृते यल्लब्धं, ये चांशा अवतिष्ठमानाः, तदेतत्सर्वं विजानीहि, बुद्ध्या सम्यगवधारयेति भावः । लब्धं चोपरि स्थापय, अंशाँश्चाऽधस्तात् लब्धश्च राशिरिति व्यवह्रियते, अंशाश्च शेषो राशिरिति ॥ तत्र यद् भवति वर्त्तते भागलब्धं, तद् नियमाच्चतुर्गुणं कर्त्तव्यं, कृते च सति लब्धरूपात् राशेरभिजितो नक्षत्रस्य सम्बन्धिन एकविंशतिभागान् शोधय ॥ शेषाणां तु राशीनामधस्तनस्थानवर्तिनां मध्यात्सप्तविंशतिसंख्यं नक्षत्रमण्डलं शोध्यं, सप्तविंशतिः शोध्या इत्यर्थः ॥ अथोपरितनो राशिः स्तोकतया एकविंशतिरूपं शोधनं न सहते, तत आह-"सेसाओ" इत्यादि । शेषात् अधस्तनरूपात् राशेरेकं रूपं गृहीत्वा सप्तषष्टिभागीक्रियते, कृत्वा च पुनस्ते सप्तषष्टिभागा लब्धेषु लब्धराशिमध्ये प्रक्षिपेत् । प्रक्षिप्य च ततोऽभिजिदष्टादशनक्षत्रसंबन्धिनेकविंशतिभागान्, पूर्वक्रमात् पूर्वक्रमानुसारेण शोधय ॥ शोधयित्वा च पञ्चदशत्रयोदशाष्टादशाष्टाविंशतिसप्तविंशतिरूपान् शोध्यान् छ्रार्द्धक्षेत्रान् छ्रार्द्धक्षेत्रपर्यन्तसूचकान्, तानपि शोधय । एतदेव व्यक्तमाचष्टे-जाऽपदाऽऽदीन् आषाढान्तान्, उत्तरभाद्रपदान्, उत्तराषाढापर्यन्तसूचकानित्यर्थः । तथाहि-पञ्चकं अश्वणादारभ्योत्तरभाद्रपदारूपछ्रार्द्धक्षेत्रपर्यन्तसूचकः । दशको रोहिणीरूपछ्रार्द्धक्षेत्रसीमासूचकः । त्रयोदशकः पुनर्वसुरूपछ्रार्द्धक्षेत्रपर्यन्तव्यापकः । अष्टादशक उत्तराफाल्गुनीरूपछ्रार्द्धक्षेत्रसीमापरिज्ञापकः । द्वाविंशतिर्विशाखारूपछ्रार्द्धक्षेत्रसीमासूचिकेत्यर्थः । सप्तविंशतिरुत्तराषाढारूपछ्रार्द्धक्षेत्रसीमासूचकः । शोधितेषु चामूषु चतुष्परितनेषु यदस्ति तत् त्रिंशता गुणयित्वा, सप्तषष्ट्या भागे हृते ये लब्धास्ते मुहूर्ता ज्ञातव्याः । तत्राप्यवशेषांशा मुहूर्तस्य सप्तषष्टिभागा अवसेया इति करणगाथाक्षरार्थः ।

संप्रति भावना क्रियते-

युगस्य प्रथमे संवत्सरे दशसु पर्वसु गतेषु पञ्चम्यां केन नक्षत्रेण सह योक्तव्यम् ?, इति जिज्ञासायां पर्वसंख्या दशको ध्रियते, ते च दश पञ्चदशभिर्गुण्यन्ते, जातं पञ्चाशदधिकं शतम् १५० । पञ्चम्यां च नक्षत्रेण सह चन्द्रस्य योगो ज्ञातुमिष्ट इति दशानां पर्वणामुपरितनास्तिथयोऽतिक्रान्ताः, ताः प्रक्षिप्यन्ते, जाते चतुष्पञ्चाशदधिकं शतम् १५४ । दशसु पर्वसु द्वावष्टमरात्रौ, ततस्तौ तस्मात्पात्येते, जातं द्विपञ्चाशदधिकं शतम् १५२ । तस्य द्व्यशीत्या लाभो ह्रियते, लब्धमेकं रूपं, तच्च उपरि न्यस्यते, न्यस्य च चतुर्भिर्गुण्यते, जाताश्चत्वारः ४ । शेषं चाधस्तादुद्धरति सप्ततिः । तत्रोपरितनो राशिः स्तोकत्वादेकविंशतिरूपं शोधनं न सहते, ततः सप्ततेरेकं रूपं गृहीत्वा सप्तषष्टिकरणीक्रियते ते च सप्तषष्टिभागा उपरितनराशिमध्ये प्रक्षिप्यन्ते जात उपरितनो राशिरेकसप्ततिः ७१ । अधस्तात्त्वेकोनसप्ततिः ६९ । तत उपरितनराशेरभिजित एकविंशतिः शोध्यते, अधस्तनराशेश्च नक्षत्रमण्डलं सप्तविंशतिः, तत उपरि पञ्चाशत् जाताः ५० । अधस्ताद् द्विचत्वारिंशज्जाताः ४२ । ततः पुनरप्युपरितनराशेरेकविंशतिः शुद्धाः, अधस्ताच्च सप्तविंशतिः । तत उपरि एकोनत्रिंशत् २९ जाताः, अधस्तात् पञ्चदश १५ । ततो भूयोऽप्युपरितनराशेरभिजित एकविंशतिः शोध्यते ८ । अधस्ताच्च पञ्चदशसु त्रयोदशकमण्डलस्थानं पुनर्वसुनक्षत्रपर्यन्तस्तवकम्, अतः पुनर्वसुपर्यन्तानि नक्षत्राणि शुद्धानि । शेषौ द्वौ तिष्ठतः । तस्य द्वे नक्षत्रे शुद्धे । तद्यथा-पुष्यः, आश्लेषा च । उपरि च तिष्ठन्त्यष्टौ । ते त्रिंशता गुण्यन्ते, जाते द्वे शते चत्वारिंशदधिके २४० । तयोः सप्तषष्ट्या लाभे हृते लब्धास्त्रयो मुहूर्त्ताः, एकस्य च मुहूर्तस्य एकोनचत्वारिंशत्सप्तषष्टिभागाः । एकस्य च मुहूर्तस्य सत्केष्वेकोनचत्वारिंशत्संख्येषु सप्तषष्ट्या भागेषु चन्द्रेण हृतेषु पञ्चम्यां सूर्य उदित इति ॥ तथा युगे प्रथमदिवसे प्रतिपदि केन नक्षत्रेण सह युक्तश्चन्द्रः ?, इति चिन्तायां पाश्चात्ययुगपर्वसंख्या ध्रियते चतुर्विंशं शतं १२४ । ततः पञ्चदशभिर्गुण्यते, जातानि षण्णवाधिकान्यष्टादशशतानि १८६० । युगे च त्रिंशदहमरात्रा इति तेभ्यस्त्रिंशत्पात्यते, जातान्यष्टादशशतानि त्रिंशदधिकानि १८३० । तेषां द्व्यशीत्या भागो ह्रियते, लब्धा द्वाविंशतिः । सा उपरि न्यस्यते, न्यस्य च चतुर्भिर्गुण्यते, जाता अष्टाशीतिः । शेषमधस्ताद्धरति षड्विंशतिः ६६ । तत्रोपरितनराशेरेकविंशतिरभिजितः शोध्यते, स्थिता पञ्चात् सप्तषष्टिः ६७ । तया च किलैकं नक्षत्रं लभ्यते । अधस्ताच्च षड्विंशतिरिति सर्वैसंकलनया सप्तविंशतिरपि नक्षत्राण्युत्तराऽऽषाढापर्यन्तानि शुद्धानि । तत आगतमुदयसमय एवाभिजिन्नक्षत्रं चन्द्रेण सह योगमुपयातीति ॥ तथा युगे द्वितीयेऽहोरात्रे द्वितीयायां केन नक्षत्रेण सह युक्तश्चन्द्रः ?, इति चिन्तायां पाश्चात्या तिथिरतिक्रान्ता प्रतिपल्लक्षणा, तत्संख्या एकको ध्रियते, स द्व्यशीत्या भागं न सहते, ततः सप्तषष्टिभागीक्रियते, तस्मादेकविंशतिरभिजितः शोध्यते, स्थिता पञ्चात् षट्चत्वारिंशत् ४६ । सा मुहूर्तकरणार्थम् ३० त्रिंशता गुण्यते । जातानि त्रयोदशशतान्यशीत्यधिकानि

१३०। तेषां सप्तषष्ट्या भागो ह्रियते, लब्धा मुहूर्ता विंशतिः २०। स्थिताः पञ्चात् चत्वारिंशत् ४०। आगतं श्रवणनक्षत्रं विंशतिमुहूर्तेषु, एकस्य च मुहूर्तस्य चत्वारिंशति सप्तषष्टिभागेषु चन्द्रेण भुक्तेषु युगे द्वितीये अहोरात्रे द्वितीयायां सूर्य उदयते। एवं सर्वत्रापि भावनीयम्। ज्यो० ए पाहु०।

[१३] पव्वं पन्नरसगुणं, तिहिसहियं ओमरत्तपरिहीणं।
तिहि उावट्ठसएहिं, भागे सेसम्मि सोहणगं॥

युगमध्ये विवक्षितादू दिनात् प्राक् यानि पर्वाणि अतीतानि, तत्संख्या स्थाप्यते, स्थापयित्वा च पञ्चदशभिर्गुण्यते, ततो विवक्षितादू दिनात् प्राक् पर्वणामुपरि यास्तिथयोऽतिक्रान्तास्तत्सहिता क्रियते। ततस्तदनन्तरमधिकृतादू दिनादर्वाग् ये गता अवमरात्राः, तैः परिहीना क्रियते, ते ततः पात्यन्त इत्यर्थः। ततः शेषस्य त्रिभिः शतैः षट्षष्ट्यधिकैर्विभजेत भागं हरेत्, भागे च हृते यत् शेषं, तस्मिन् शेषे, शोधनकं वक्ष्यमाणस्वरूपं कुर्यात्।

तत्र यस्मिन् शोधनके शुद्धे यन्नक्षत्रं शुद्धं भवति, तदेतत्रिकपयमाह-

चउवीसं च मुहुत्ता, अट्ठेव य केवला अहोरत्ता।
एए पुस्से सेसा, एत्तो सेसाण वोच्छामि॥

चतुर्विंशतिर्मुहूर्ताः, अष्टौ च केवलाः परिपूर्णा अहोरात्राः। एते एतावन्तो मुहूर्ताः, अहोरात्राश्च पुष्ये पुष्यनक्षत्रे, शोध्याः। किमुक्तं भवति?-एतेषु शोधितेषु पुष्यनक्षत्रं शोधितं भवति। अत ऊर्द्धं शेषाणां नक्षत्राणां शोधनकानि वक्ष्ये।

तानि च क्रमेण आह-

राइंदिया विसट्ठी, य मुहुत्ता बारसुत्तरा सुद्धा।
सोलससयं विसाहा, वीसंदेवा य तेसीयं॥

द्वाषष्टिर्द्वाषष्टिसंख्यानि, रात्रिन्दिवानि, द्वादश च मुहूर्ताः, एतावति शोधिते उत्तरफाल्गुनीनक्षत्रं शुद्धं भवति। तथा षोडशशतं षोडशाधिकं शतं, विशाखा विशाखापर्यन्तसूचकं, ततस्तस्मिन् शोधिते विशाखाऽन्तानि नक्षत्राणि शोधितानि भवन्तीति भावः। तथा त्र्यशीतं त्र्यशीत्यधिकं शतं, विश्वग्देवा-विश्वग्देवाधिपतिरुत्तराषाढा इत्यर्थः। अत्राऽयं भावार्थः-त्र्यशीत्यधिकं शतमुत्तराषाढापर्यन्तसूचकमिति।

दो चउपण्णे उच्चे-व मुहुत्ता उत्तरा उ पोट्ठवया।
तिण्णेव एक्कवीसा, उच्च मुहुत्ता उ रोहिणिया॥

द्वे शते चतुष्पञ्चाशे चतुष्पञ्चाशदधिके, षट् च मुहूर्ताः, उत्तराप्रोष्ठपदा-उत्तराभाद्रपदा, उत्तराभाद्रपदपर्यन्तसूचका इत्यर्थः। ततस्त्रीणि शतान्येकविंशत्यधिकानि, षट् च मुहूर्ताः, रोहिणी-रोहिणीसूचका इति योगः।

तिन्नेगट्ठा बारस, य मुहुत्ता सोधणं पुणव्वसुणो।
जं सोहणं न गच्छइ, नक्खत्तं तं तु सूरगयं॥

त्रीणि शतान्येकषष्ट्यधिकानि द्वादश मुहूर्ताः, एतावत् शोधनकं पुनर्वसोः पुनर्वसुनक्षत्रस्य। एतानि च शोधकानि पुष्यं मुक्त्वा शेषाणि द्व्यर्द्धक्षेत्रपर्यन्तानामुक्तानि। तत एतेषामन्तराले यानि नक्षत्राणि, तान्यात्मीयेन प्रमाणेन शोध्यन्ते। तद्यथा-अर्द्धक्षेत्राणि षड्भिरहोरात्रैरेकविंशत्या च मुहूर्तैः; समक्षेत्राणि त्रयोदशभिर्दिनैर्द्वादशभिश्च मुहूर्तैः; द्व्यर्द्धक्षेत्राणि विंशत्या दिनैस्त्रिभिश्च मुहूर्तैरिति। यत्पुनरुद्धरितं शोधनं न गच्छति, तन्नक्षत्रं सूर्यगतमवसेयम्। यदपि राशिः स्तोकतया षट्षष्ट्यधिकशतत्रयभागं न सहते, तत्रापि यथायोगं शोधनं कर्तव्यम्। उक्तं करणम्।

संप्रत्येतद्विषया भावना क्रियते-

युगस्य प्रथमे संवत्सरे चान्द्रे दशसु पर्वस्वतिक्रान्तेषु पञ्चम्यां केन नक्षत्रेण सह योगो दिवसाधिपतेः?, इति चिन्तायां पर्वसंख्या दश ह्रियते, ततः पञ्चदशभिर्गुण्यते, जातं पञ्चाशदधिकं शतम् १५०। दशानां च पर्वणामुपरि पञ्चम्याः प्राक् तिथयोऽतिक्रान्ताश्चतस्रः, ततस्तास्तत्र प्रक्षिप्यन्ते, जातं चतुःपञ्चाशदधिकं शतम् १५४। दशसु च पर्वसु द्वावमरात्रौ। ततस्तौ तस्मात् पात्येते, जातं द्विपञ्चाशदधिकं शतम् १५२। अयं च राशिः षट्षष्ट्यधिकं शतत्रयभागं न सहते, ततो यथासंभवं शोधनकं कर्तव्यम्। तत्र षोडशाधिकेन शतेन विशाखाऽन्तानि नक्षत्राणि शुद्धानि, शेषाणि षट्त्रिंशत्। ततोऽनुराधा त्रयोदशभिरहोरात्रैर्द्वादशभिर्मुहूर्तैः शुद्धा, शेषास्तिष्ठन्ति द्वाविंशतिर्दिवसाः, अष्टादश च मुहूर्ताः। पुनः षड्भिर्दिवसैरेकविंशत्या च मुहूर्तैर्ज्येष्ठा शुद्धा, शेषाः पञ्चदश दिवसाः सप्तविंशतिर्मुहूर्ता अवतिष्ठन्ते। तेभ्यस्त्रयोदशभिर्दिवसैर्द्वादशभिश्च मुहूर्तैर्मूलनक्षत्रं शुद्धं, शेषौ द्वौ दिवसौ, पञ्चदश मुहूर्तास्तिष्ठन्ति। एतावान् कालः पर्वदशकातिक्रमे पञ्चम्यां पूर्वाषाढाप्रविष्टस्य सूर्यस्याभूत्॥ तथा युगस्य प्रथमसंवत्सरपर्यन्ते केन नक्षत्रेण सह समेतो भास्करः?, इति चिन्तायां प्रथमसंवत्सरे पर्वाणि चतुर्विंशतिः, तानि पञ्चदशभिर्गुण्यन्ते, जातानि त्रीणि शतानि षष्ट्यधिकानि ३६०। संवत्सरे च षडमरात्रा इति षट् तेभ्यः पात्यन्ते, जातानि त्रीणि शतानि चतुष्पञ्चाशदधिकानि ३५४। अत्रापि त्रिभिः शतैः षट्षष्ट्यधिकैर्भागो न पूर्यते, ततो यथासंभवं शोधनं कर्तव्यम्। तत्र त्रिभिः शतैरेकविंशत्याऽधिकैः षड्भिश्च मुहूर्तैरार्द्रायास्तानि नक्षत्राणि शुद्धानि, शेषास्तिष्ठन्ति द्वात्रिंशदहोरात्राश्चतुर्विंशतिश्च मुहूर्ताः। तेभ्योऽपि त्रयोदशभिर्दिवसैर्द्वादशभिश्च मुहूर्तैर्मृगशिरो नक्षत्रं, शेषा अवतिष्ठन्ते एकोनविंशतिरहोरात्राः, द्वादश च मुहूर्ताः। तेभ्योऽपि षड्भिर्दिवसैरेकविंशत्या च मुहूर्तैरार्द्रा नक्षत्रं शुद्धं, शेषास्तिष्ठन्ति द्वादश दिवसाः, एकविंशतिर्मुहूर्ताः। एतावान् कालस्तदानीं पुनर्वसुनक्षत्रप्रविष्टस्य सूर्यस्याभवत्। इह यन्नक्षत्रमहोरात्रं कालं यावच्चन्द्रेण सह योगमपारूढं वर्तते, तस्य सूर्येण सह यावन्तं कालं योगः, तस्य त्रिंशत्तमभागप्रमाण एकः सूर्यमुहूर्तः। एवं त्रयोदश मुहूर्ताः, एकस्य च मुहूर्तस्य चतुर्विंशतिर्द्वाषष्टिभागाः, एकस्य च द्वाषष्टिभागस्य सप्तषष्टिधा छिन्नस्य किञ्चित्समधिकाः साऽर्द्धत्रिपञ्चाशद्भागाः। एवंप्रमाणा मुहूर्ता अर्द्धक्षेत्राणां पञ्चदश, समक्षेत्राणां त्रिंशत्, द्व्यर्द्धक्षेत्राणां षट्चत्वारिंशत्। तत्र द्वादशभिर्दिनैरेकविंशत्या च मुहूर्तैर्ये चतुष्पञ्चाशदधिकशतत्रयस्योपरि द्वादश द्वाषष्टिभागाश्चन्द्रसंवत्सरसत्काः, ते चाष्टाविंशतिसंख्याः किञ्चित्समधिकाः सूर्यमुहूर्ता भवन्ति; शेषास्तु किञ्चित्समधिकाः। एवंप्रमाणाः सूर्यमुहूर्ताः षोडश तिष्ठन्ति। तदुच्यते सूर्यप्रज्ञप्तौ-" जे णं दोच्चस्स चंदसंवच्छरस्स आई, से णं पढमस्स चंदसंवच्छरस्स पज्जवसाणे, अणंतरपच्छाकडे समए। तं समयं च णं चंदे केणं णक्खत्तेणं जोएइ, जोइत्ता उत्तराहिं आसाढाहिं उत्तराणं आसाढाणं छव्वीसं मुहुत्ता, उ-

ऽवसिं च बावट्ठिभागा मुहुत्तस्स,बावट्ठिभागं च सत्तट्ठिहा छेत्ता चउपण्णं चुण्णिया भागा सेसा। तं समयं च णं सूरे केणं णक्खत्तेणं जोएइ, जोइत्ता पुणव्वसुस्स सोलस मुहुत्ता अट्ठ य बावट्ठिभागा मुहुत्तस्स, बावट्ठिभागं च सत्तट्ठिहा छित्ता वीसं चुण्णिया भागा सेसा" इति ।

संप्रति पञ्चाशदधिकेन शतेन भागे हृते लब्धाः षडहोरात्राः, शेषं तिष्ठति पञ्चोत्तरं शतं, ततो मुहूर्त्ताऽऽनयनाय छेदराशेरर्द्धक्षेत्राऽऽदीनां नक्षत्राणां कालपरिमाणज्ञानार्थं करणमाह-

नक्खत्तचंदजोगे, नियमा सत्तट्ठिए समुप्पन्ने ।
पण्णेण सएण भए, लद्धई सूरस्स सो जोगो ॥

नक्षत्राणां यावत् प्रमाणो योगः सप्तषष्ट्या नियमाच्छिन्नेन, प्रत्युत्पन्ने इत्यर्थः। तस्मिन् चन्द्रनक्षत्रयोगे सप्तषष्ट्या प्रत्युत्पन्ने पञ्चाशेन पञ्चाशदधिकेन शतेन भजेत् भागहारं कुर्यात्, भागे हृते यद् लब्धं, स तावत्कालप्रमाणः सूर्यस्य योगः ।

इयमत्र भावना-कोऽपि पृच्छति-यस्मिन् क्षेत्रे पञ्चदश मुहूर्त्तानवतिष्ठते चन्द्रः, तत्र सूर्यः कियन्तं कालमवस्थानं करोति ?। तत्र पञ्चदश सप्तषष्ट्या गुण्यन्ते, जातं पञ्चोत्तरं सहस्रम १००५। तस्य पञ्चाशदधिकशतरूपस्य त्रिंशता भागहरणं, लब्धाः पञ्च, तेन पञ्चोत्तरशतस्य भागे हृते लब्धा एकविंशतिर्मुहूर्त्ताः। एतावानर्द्धक्षेत्राणां प्रत्येकं सूर्येण समं योगः । तथा समक्षेत्राणां त्रिंशन्मुहूर्त्ताभ्यन्तरयोगपरिमाणं, ततस्त्रिंशत्सप्तषष्ट्या गुण्यते, जाते द्वे सहस्रे दशोत्तरे २०१०। तेषां पञ्चाशदधिकेन शतेन भागो ह्रियते, लब्धाः त्रयोदश अहोरात्राः, शेषास्तिष्ठन्ति षष्टिः, ततो मुहूर्त्ताऽऽनयनात् छेदराशेस्त्रिंशता भागहरणं, स्थिताः पञ्च, तैः षष्टेर्भागो ह्रियते, लब्धा द्वादश मुहूर्त्ताः, एतावान् समक्षेत्राणां प्रत्येकं सूर्येण सह योगः। तथा द्व्यर्द्धक्षेत्राणां पञ्चचत्वारिंशन्मुहूर्त्ताभ्यन्तरयोगः पञ्चचत्वारिंशत्सप्तषष्ट्या गुण्यते, जातानि त्रीणि सहस्राणि पञ्चदशोत्तराणि ३०१५। तेषां पञ्चाशदधिकेन शतेन भागो ह्रियते, लब्धा विंशतिरहोरात्राः, शेषास्तिष्ठन्ति पञ्चदश, ततो मुहूर्त्ताऽऽनयनाय छेदराशेस्त्रिंशता भागहरणं, स्थिताः पञ्च, तथा दशानां भागे हृते लब्धास्त्रयः पञ्च मुहूर्त्ताः, एतावान् द्व्यर्द्धक्षेत्राणां प्रत्येकं सूर्येण समं योगः ।

साम्प्रतं यथा सूर्ययोगपरिमाणदर्शनतः चन्द्रयोगपरिमाणज्ञानं भवति, तथा प्रतिपादयति-

नक्खत्तसूरजोगो, मुहुत्तरासीकओ उ पंचगुणो ।
सत्तट्ठीए विभत्तो, लद्धो चंदस्स सो जोगो ॥

नक्षत्राणामर्द्धक्षेत्राऽऽदीनां यः सूर्येण सह योगः स मुहूर्त्तराशीक्रियते, कृत्वा च पञ्चभिर्गुण्यते, ततः सप्तषष्ट्या भागे हृते यल्लब्धं, स चन्द्रस्य योगः। अत्रापीयं भावना-कोऽपि शिष्यः पृच्छति-यत्र सूर्यः षट् दिवसान् एकविंशतिं च मुहूर्त्तान् अवतिष्ठते, तत्र चन्द्रः कियन्तं कालं तिष्ठतीति ?। तत्र मुहूर्त्तराशिकरणार्थं षट् दिवसाः त्रिंशता गुण्यन्ते, गुणयित्वा चोपरि एकविंशतिर्मुहूर्त्ताः प्रक्षिप्यन्ते, जाते द्वे शते एकोत्तरे २०१ । ते पञ्चभिर्गुण्यन्ते, जातं पञ्चोत्तरं सहस्रम १००५। तस्य सप्तषष्ट्या भागे हृते लब्धाः पञ्चदश मुहूर्त्ताः,एतावानर्द्धक्षेत्राणां प्रत्येकं चन्द्रेण समं योगः। तथा समक्षेत्राणां सूर्ययोगलब्धत्रयोदशदिवसा द्वादश मुहूर्त्ताः, तत्र दिवससंख्या मुहूर्त्तकरणार्थं त्रिंशता गुण्यते, जातानि त्रीणि शतानि नवत्यधिकानि ३९० । उपरितनाश्च द्वादश मुहूर्त्तास्तत्र प्रक्षिप्यन्ते, जातानि चत्वारि शतानि द्व्युत्तराणि ४०२। तानि पञ्चभिर्गुण्यन्ते, जाते द्वे सहस्रे दशोत्तरे २०१०। तेषां सप्तषष्ट्या भागे हृते लब्धास्त्रिंशन्मुहूर्त्ताः ३०। एतावान् समक्षेत्राणां प्रत्येकं चन्द्रयोगः। तथा द्व्यर्द्धक्षेत्राणां सूर्ययोगः त्रिंशदहोरात्राश्चयो मुहूर्त्ताः, तत्राहोरात्रसंख्या मुहूर्त्तकरणार्थं त्रिंशता गुण्यते, जातानि षट् शतानि, उपरितनाश्च त्रयो मुहूर्त्तास्तत्र प्रक्षिप्यन्ते, जातानि षट् शतानि द्व्युत्तराणि ६०३। तानि पञ्चभिर्गुण्यन्ते,जातानि त्रीणि सहस्राणि पञ्चदशोत्तराणि ३१५। तेषां सप्तषष्ट्या भागे हृते लब्धाः पञ्चचत्वारिंशन्मुहूर्त्ताः ४५ । एतावान् द्व्यर्द्धक्षेत्राणां प्रत्येकं चन्द्रेण सह योगः ।

संप्रत्युपसंहारमाह-

नक्खत्ताणं जोगा, चंदाऽऽइच्चेसु करणसंजुत्ता ।
जाणिया [मुणाहि एत्तो, पविभागं मंडलाणं तु]॥

नक्षत्राणां चन्द्राऽऽदित्येषु चन्द्रविषये, आदित्यविषये च करणसंयुक्ता योगा ज्ञापिताः प्रतिपादिताः। ज्यो० ९ पाहु० ।

(१४) कति नागानि नक्षत्राणि चन्द्रेण सह युज्यन्ते-

ता कहं ते एवंभागा आहिता ति वदेज्जा ?। ता एतेसि णं अट्ठावीसाए णक्खत्ताणं अत्थि णक्खत्ता, जे णं णक्खत्ता पुव्वंभागा समक्खेत्ता तीसतिमुहुत्ता पण्णत्ता । अत्थि णक्खत्ता, जे णं णक्खत्ता पच्छंभागा समक्खेत्ता तीसतिमुहुत्ता पण्णत्ता । अत्थि णक्खत्ता, जे णं णक्खत्ता णत्तंभागा अवड्ढक्खेत्ता पण्णरस मुहुत्ता पण्णत्ता । अत्थि णक्खत्ता, जे णं णक्खत्ता उभयंभागा दिवड्ढक्खेत्ता पणयालीस मुहुत्ता पण्णत्ता । ता एएसि णं अट्ठावीसाए णक्खत्ताणं कतरे णक्खत्ता, जे णं णक्खत्ता पुव्वंभागा समक्खेत्ता तीसतिमुहुत्ता पण्णत्ता ?। कतरे णक्खत्ता, जे णं णक्खत्ता पच्छंभागा समक्खेत्ता तीसतिमुहुत्ता पण्णत्ता ?। कतरे णक्खत्ता, जे णं णक्खत्ता णत्तंभागा अवड्ढक्खेत्ता पण्णरस मुहुत्ता पण्णत्ता ?। कतरे णक्खत्ता, जे णं णक्खत्ता उभयंभागा दिवड्ढक्खेत्ता पणयालीसइमुहुत्ता पण्णत्ता ?। ता एतेसि णं अट्ठावीसाए णक्खत्ताणं, तत्थ णं जे ते णक्खत्ता,जे णं णक्खत्ता पुव्वंभागा समक्खेत्ता तीसतिमुहुत्ता पण्णत्ता। ते णं छ। तं जहा-पुव्वभद्दवया १, कत्तिता २, महा ३, पुव्वफग्गुणी ४, मूलो ५, पुव्वासाढा ६ । तत्थ णं जे ते णक्खत्ता, जे णं णक्खत्ता पच्छंभागा समक्खेत्ता तीसतिमुहुत्ता पण्णत्ता। ते णं दस। तं जहा-अभिई १, सवणो २, धणिट्ठा ३, रेवती ४, अस्सिणी ५, मिगसिरं ६, पुस्सो ७, हत्थो ८, चित्ता ९, अणुराहा १० एवं पच्छंभागा दस हवंति। तत्थ णं जे ते णक्खत्ता, जे णं णक्खत्ता णत्तंभागा अवड्ढक्खेत्ता पण्णरस मुहुत्ता पण्णत्ता।

ते णं छ। तं जहा-सतभिसया १, भरणी २, अद्दा ३, अस्सेसा ४, साती ५, जेट्ठा ६। सत्थं णं जे ते णक्खत्ता तिजयंभागा दिवड्ढखेत्ता पणयालीसतिमुहुत्ता पन्नत्ता। ते णं छ। तं जहा-उत्तरभद्दवया १, रोहिणी २, पुणव्वसू ३, उत्तराफग्गुणी ४, विसाहा ५, उत्तरासाढा ६।

"ता कहं ते" इत्यादि। 'ता' इति पूर्ववत्, कथं केन प्रकारेण भगवन्! त्वया एवंभागानि वक्ष्यमाणप्रकारभागानि नक्षत्राणि आख्यातानि इति भगवान् वदेत्?। एवमुक्ते भगवानाह-"ता एएसि णं" इत्यादि। 'ता' इति पूर्ववत्। एतेषामष्टाविंशतेर्नक्षत्राणां मध्येऽस्तीति सन्ति तानि नक्षत्राणि, यानि पूर्वभागानि-दिवसस्य पूर्वभागश्चन्द्रयोगस्याऽऽदिमधिकृत्य विद्यते येषां तानि पूर्वभागानि, समक्षेत्राणि-समं पूर्णं क्षेत्रमहोरात्रप्रतीतं चन्द्रयोगमधिकृत्यास्ति येषां तानि समक्षेत्राणि; अत एव त्रिंशन्मुहूर्तानि प्रज्ञप्तानि। तथा सन्ति तानि नक्षत्राणि, यानि पश्चाद्भागानि-दिवसस्य पश्चात्तनो भागः चन्द्रयोगमधिकृत्य विद्यते येषां तानि पश्चाद्भागानि, समक्षेत्राणि त्रिंशन्मुहूर्तानि प्रज्ञप्तानि। तथा सन्ति तानि नक्षत्राणि, यानि नक्तंभागानि-नक्तं रात्रौ चन्द्रयोगस्याऽऽदिमधिकृत्य भागोऽवकाशो येषां तानि। तथा अपार्द्धक्षेत्राणीति-अपगतमर्द्धं यस्य तदपार्द्धम्, अर्द्धमात्रमित्यर्थः। अपार्द्धमर्द्धमात्रं क्षेत्रमहोरात्रप्रतीतं येषां चन्द्रयोगस्याऽऽदिमधिकृत्य तान्यपार्द्धक्षेत्राणि। अत एव पञ्चदश मुहूर्तानि-पञ्चदश चन्द्रयोगमधिकृत्य मुहूर्ता विद्यन्ते येषां तानि। तथा सन्ति तानि नक्षत्राणि, यानि नक्षत्राणि उभयभागानि उभयं दिवसं रात्रिः, तस्य उभयस्य-दिवसस्य, रात्रेश्चेत्यर्थः। चन्द्रयोगस्याऽऽदिमधिकृत्य भागो येषां तानि। तथा अर्द्धक्षेत्राणि-द्वितीयमर्द्धं यस्य तत् द्व्यर्द्धं, सार्द्धमित्यर्थः। द्व्यर्द्धं सार्द्धमहोरात्रप्रमितं क्षेत्रं येषां तानि तथा। अत एव पञ्चचत्वारिंशन्मुहूर्तानि प्रज्ञप्तानि। एवं सामान्येनोक्ते विशेषावबोधनार्थं भगवान् गौतमः पृच्छति-"ता एतेसि णं" इत्यादि सुगमम्। भगवान् प्रतिवचनमाह-"ता एतेसि णं" इत्यादि। 'ता' इति पूर्ववत्। एतेषामष्टाविंशतेर्नक्षत्राणां मध्ये यानि नक्षत्राणि पूर्वभागानि समक्षेत्राणि त्रिंशन्मुहूर्तानि प्रज्ञप्तानि, तानि षट्। तद्यथा-"पुव्वभद्दवया" इत्यादि। (एतच्चानन्तरे एव प्राभृतप्राभृते योगस्याऽऽदौ चिन्त्यमाने भावयिष्यते)। तथा तत्र तेषामष्टाविंशतेर्नक्षत्राणां मध्ये यानि नक्षत्राणि पश्चाद्भागानि समक्षेत्राणि त्रिंशन्मुहूर्तानि प्रज्ञप्तानि। तानि दश। तद्यथा-"अभिई" इत्यादि। तथा तत्र तेषामष्टाविंशतेर्नक्षत्राणां मध्ये यानि नक्षत्राणि नक्तंभागानि अपार्द्धक्षेत्राणि पञ्चदश मुहूर्तानि प्रज्ञप्तानि। तानि षट्। तद्यथा-"सयभिसया" इत्यादि। तथा तत्र तेषामष्टाविंशतेर्नक्षत्राणां मध्ये यानि नक्षत्राण्युभयभागानि द्व्यर्द्धक्षेत्राणि पञ्चचत्वारिंशन्मुहूर्तानि। तानि षट्। तद् यथा-"उत्तरभद्दवया" इत्यादि। चं० प्र० १० पाहु० ३ पाहु०। स्था०। सं०। सू० प्र०।

(१५) प्रमर्दयोगीनि नक्षत्राणि-

अट्ठ णक्खत्ता णं चंदेणं सद्धिं पमदं जोगं जोएंति। तं जहा-कत्तिया, रोहिणी, पुणव्वसू, महा, चित्ता, विसाहा, अणुराहा, जिट्ठा।

(पमदं ति) प्रमर्दशब्देन स्पृश्यमानता, तल्लक्षणं योगं योजयन्ति, आत्मनशब्देन सार्द्धं कदाचिद्, न तु तमेव सदैवेति। उक्तं च-"पुणवसु रोहिणि चित्ता, मह जेट्ठऽणुराह कत्तिय विसाहा। चंदस्स उभयजोगो" इति। यानि च दक्षिणोत्तरयोगीनि, तानि प्रमर्दयोगोऽपि कदाचिद्भवन्ति, यतो लोकभीटीकाकृतोक्तम्-एतानि नक्षत्राण्युभययोगीनि चन्द्रस्य दक्षिणेनोत्तरेण च युज्यन्ते, कथञ्चिच्छब्देन प्रमर्दमप्युपयान्तीति। एतत्फलं चेदम्-"एतेषामुत्तरगाः, अहाः सुनिक्षाय चन्द्रमा नितराम्।" इति। स्था० १० ठा०।

(१६) कति नक्षत्राणि कति भागानि पूर्णिमाऽमाभ्याम्-

ता कहं ते जोगस्सादी आहिता ति वदेज्जा?। ता अभिई, सवणो खलु दुवे णक्खत्ता पच्छंभागा समक्खेत्ता सातिरेगउणतालीसमुहुत्ता तं पढमताए सायं चंदेण सद्धिं जोगं जोइंति। ततो पच्छा अवरं सातिरेगं दिवसं। एवं खलु अभिई, सवणो दुवे णक्खत्ता एगं रातिं एगं च सातिरेगं दिवसं चंदेण सद्धिं जोगं जोएंति, जोगं जोइत्ता जोगं अणुपरियट्टंति, जोगं अणुपरियट्टित्ता सायं चंदं धणिट्ठाणं समप्पेंति, समप्पेंतित्ता धणिट्ठा खलु णक्खत्ते पच्छंभागे समक्खेत्ते तीसतिमुहुत्ते तप्पढमताए सायं चंदेण सद्धिं जोगं जोएति। ततो पच्छा अवरं दिवसं। एवं खलु धणिट्ठा णक्खत्ते एगं रातिं एगं च दिवसं चंदेण सद्धिं जोगं जोएति, जोगं जोइत्ता जोगं अणुपरियट्टति, जोगं अणुपरियट्टित्ता सायं चंदं सतभिसताणं समप्पेति। ता सतभिसता खलु णक्खत्ते णत्तंभागे अवड्ढखेत्ते तप्पढमताए सायं चंदेण सद्धिं जोगं जोएति, णो लभति अवरं दिवसं। एवं खलु सतभिसता णक्खत्ते एगं रातिं चंदेण सद्धिं जोगं जोएति, जोगं जोइत्ता अणुपरियट्टति, अणुपरियट्टित्ता पातो चंदं पुव्वाणं पोट्ठवयाणं समप्पेति, ता पुव्वा पोट्ठवता खलु णक्खत्ते पुव्वंभागे समक्खेत्ते तीसतिमुहुत्ते तप्पढमताए पातो चंदेण सद्धिं जोगं जोएति, पच्छा अवरं राइं। एवं खलु पुव्वा पोट्ठवता णक्खत्ते एगं च दिवसं एगं च रातिं चंदेण सद्धिं जोगं जोएति, जोगं जोइत्ता अणुपरियट्टति, जोगं अणुपरियट्टित्ता पातो चंदं उत्तराणं पोट्ठवताणं समप्पेति। उत्तरपोट्ठवता खलु णक्खत्ते पणयालीसतिमुहुत्ते तप्पढमताए पातो चंदेण सद्धिं जोगं जोएति, अवरं च रातिं, ततो पच्छा अवरं दिवसं। एवं खलु उत्तरापोट्ठवता णक्खत्ते दो दिवसे, एगं च रातिं चंदेण सद्धिं जोगं जोएति, जोगं जोइत्ता जोगं अणुपरियट्टति, जोगं अणुपरियट्टित्ता सायं चंदं रेवतीणं समप्पेति। ता रेवती खलु णक्खत्ते पच्छंभागे समक्खेत्ते जहा धणिट्ठा० जाव सायं चंदं अस्सिणीणं समप्पेति। भरणी खलु णक्खत्ते णत्तंभागे अवड्ढ० जहा सतभिसता० जाव पातो चंदं

कत्तिताणं समप्पेति० जाव पातो चंदं रोहिणीणं समप्पेति, रोहिणी जहा उत्तरज्जदवया, मिगसिरं जहा धणिट्ठा। एवं जहा सतज्जिसता, तहा णत्तंभागा णेयव्वा । एवं जहा पुव्वाज-दवता, तहा पुव्वंज्जागा वाप्पि णेयव्वा । जहा धणिट्ठा तहा पच्छंज्जागा अट्ठ णेयव्वा० जाव एवं खलु उत्तरासादा दो दिवसे एगं च रातिं चंदेण सद्धिं जोगं जोएति, जोगं जोइत्ता जोगं अणुपरियट्टति, जोगं अणुपरियट्टित्ता सायं चंदं अभिईसवणाणं समप्पेइ ।

"ता कहं ते" इत्यादि। 'ता' इति पूर्ववत्, कथं ते त्वया भगवन्! योगस्याऽऽदिरुक्त इति वदेत्?। इह निश्चयनयमतेन चन्द्रयोगस्याऽऽदिता सर्वेषामपि नक्षत्राणामप्रतिनियतकालप्रमाणा, ततः सा करणवशादवगन्तव्या । तच्च करणं ज्योतिष्करण्डके समस्तीति तदीक्षां कुर्वता तत्रैव सप्रपञ्चं भावितमतस्ततोऽवधार्यम्। अत्र तु व्यवहारनयमधिकृत्य बाहुल्येन यस्य नक्षत्रस्य यदा चन्द्रयोगस्याऽऽदिर्भवति तमभिधित्सुराह-"ता अभिई" इत्यादि। 'ता' इति पूर्ववत्। द्वे अभिजिच्छ्रवणाऽऽख्ये नक्षत्रे पञ्चाङ्गागे समक्षेत्रे। इहाभिजिन्नक्षत्रं समक्षेत्रं, नाप्यर्द्धक्षेत्रं, नापि द्व्यर्द्धक्षेत्रं, केवलं श्रवणेन सह संबद्धमुपात्तमित्यनेदोपचारात् तदपि समक्षेत्रमुपकल्प्य समक्षेत्रम् इत्युक्तम्। सातिरेकैकोनचत्वारिंशन्मुहूर्त्तप्रमाणे। तथाहि-सातिरेका नव मुहूर्त्ता अभिजितः, त्रिंशन्मुहूर्त्ताः श्रवणस्येत्युभयमीलने यथोक्तं मुहूर्त्तपरिमाणं भवति । तत्प्रथमतया चन्द्रयोगस्य प्रथमतया, सायं विकालवेलायाम्, इह दिवसस्य कतिनभाच्चरमाद्भागादारभ्य यावद्रात्रेः कतितमो भागो यावन्नापि परिस्फुटनक्षत्रमण्डलाऽऽलोकः, तावान् कालविशेषः सायमिति द्रष्टव्यः; तथा लोके व्यवहारदर्शनात्। तस्मिन् सायं समये, चन्द्रेण सार्द्धं योगं युङ्क्तः । इहाभिजिन्नक्षत्रं यद्यपि युगस्याऽऽदौ प्रातश्चन्द्रेण सह योगमुपैति, तथाऽपि श्रवणेन सह सम्बन्धमिह तद्विवक्षितम् । श्रवणनक्षत्रं च मध्याह्नादूर्द्धमपसरति, दिवसे चन्द्रेण सह योगमुपादत्ते। ततस्तत्साहचर्यात्तदपि सायं समये चन्द्रेण सार्द्धं युज्यमानं विवक्षितं ततः सामान्यतः सायं चन्द्रेण सार्द्धं योगं युञ्जन्तीत्युक्तम *। अथवा युगस्याऽऽदिमतिरिक्यान्यदा बाहुल्यमधिकृत्येदमुक्तं, ततो न कश्चिद्दोषः। "ततो पच्छा" इत्यादि। पश्चात् तदूर्द्धम्, अपरमन्यं सातिरेकदिवसं यावत्। एतदेवोपसंहारव्याजेन व्यक्तीकरोति-"एवं खलु" इत्यादि । एवमुक्तेन प्रकारेण, खलिति निश्चये, अभिजिच्छ्रवणौ द्वे नक्षत्रे, सायं समयादारभ्य एकां रात्रिमेकं च सातिरेकं दिवसं, चन्द्रेण सार्द्धं युङ्क्तः। एतावन्तं च कालं युक्त्वा तदनन्तरं योगमनुपरिवर्त्तयति, आत्मनश्चावयत इत्यर्थः । योगं चानुपरिवर्त्य सायं दिवसस्य कतितमे पश्चाद्भागे चन्द्रं धनिष्ठायां समर्पयतः। तदेवमभिजित् श्रवणं धनिष्ठा सायं समये चन्द्रेण सह प्रथमतो योगं युञ्जते । तेनामूनि त्रीण्यपि पश्चाद्भागान्यवसेयानि। ततः समर्पणादनन्तरं धनिष्ठा खलु नक्षत्रं पश्चाद्भागं सायं समये तस्य प्रथमतश्चन्द्रेण सह युज्यमानत्वात् समक्षेत्रं त्रिंशन्मुहूर्त्तं तत्प्रथमतया सायं समये चन्द्रेण सार्द्धं योगं युनक्ति। चन्द्रेण सह योगं युक्त्वा ततः सायं समयादूर्द्धं, ततः पश्चाद्रात्रीः, अपरं च दिवसं यावद् योगं युनक्ति । एतदेवोपसंहारव्याजेनाऽऽचष्टे-" एवं खलु " इत्यादि सुगमं, यावद् योगमनुपरिवर्त्य सायं समये चन्द्रं शतभिषजः समर्पयति। प्रायः परिस्फुटनक्षत्रमण्डलावलोके तत इदं नक्षत्रं नक्तंभागं ऊहनीयम्। तथा चाऽऽह-(ता इत्यादि) 'ता' इति। ततः समर्पणादनन्तरं शतभिषग्नक्षत्रं खलु नक्तंभागमपार्द्धक्षेत्रं पञ्चदशमुहूर्त्तं तत्प्रथमतया चन्द्रेण सार्द्धं योगं युनक्ति। तच्च तथा युक्तं सत्तत्र लभते अपरं दिवसं, पञ्चदशमुहूर्त्तप्रमाणत्वात्, किन्तु रात्रित एव योगमधिकृत्य परिसमाप्तिमुपैति। तथा चाऽऽह-"एवं खलु" इत्यादि सुगमम्। यावद् योगमनुपरिवर्त्य प्रातश्चन्द्रं पूर्वयोः प्रोष्ठपदयोर्नक्षत्रयोः समर्पयति। इह पूर्वप्रोष्ठपदानक्षत्रस्य प्रातश्चन्द्रेण सह प्रथमतया योगः प्रवृत्त इतीदं पूर्वभागमुच्यते। तथा चाऽऽह-(ता पुव्वेत्यादि) ततः समर्पणादनन्तरं पूर्वप्रोष्ठपदा खलु नक्षत्रं पूर्वभागं समक्षेत्रं त्रिंशन्मुहूर्त्तं तत्प्रथमतया प्रातश्चन्द्रेण सह योगं युनक्ति। तच्च तथा युक्तं सत्ततः समयादूर्द्धं तं सकलं दिवसम्, अपरां च रात्रिं यावद्वर्त्तते। एतदेवोपसंहारव्याजेनाऽऽह-"एवं खलु" इत्यादि सुगमं, यावद् योगमनुपरिवर्त्य प्रातश्चन्द्रमुत्तरयोः प्रोष्ठपदयोः समर्पयति। इदं किलोत्तराद्रपदाऽऽख्यं नक्षत्रमुक्तप्रकारेण प्रातश्चन्द्रेण सह योगमधिगच्छति, केवलं प्रथमान् पञ्चदश मुहूर्त्तानधिकानपनीय समक्षेत्रत्वं कल्पयित्वा यदा योगमिच्छन्ति,तदा नक्तमपि योगोऽस्तीत्युभयभागमवसेयम। तथा चाऽऽह-ततः समर्पणादनन्तरं प्रोष्ठपदा नक्षत्रं खलूभयभागं द्व्यर्द्धक्षेत्रं पञ्चचत्वारिंशन्मुहूर्त्तं तत्प्रथमतया प्रातश्चन्द्रेण सार्द्धं योगं युनक्ति। तच्च तथा युक्तं सत्सकलमपि दिवसमपरां च रात्रिं ततः पश्चादपरं दिवसं यावद्वर्त्तते। एतदेवोपसंहारव्याजेन व्यक्तीकरोति-(एवं खलु) इत्यादि सुगमम्, यावद्योगमनुपरिवर्त्य सायं समये चन्द्रं रेवत्याः समर्पयति। ततो रेवतीनक्षत्रं सायं समये चन्द्रेण सह योगमधिगच्छति; ततस्तत्पश्चाद्भागमवसेयम । तथा चाऽऽह-"ता रेवती" इत्यादि। 'ता' इति। ततः समर्पणादनन्तरं,शेषं सुगमम्। इदं च चन्द्रेण युक्तं सत् सायं समयादूर्द्धं सकलां रात्रिमपरं च दिवसं यावदवतिष्ठते, समक्षेत्रत्वात्। एतदेवोपसंहरन् आह-"एवं खलु" इत्यादि सुगमम्। यावद् योगमनुपरिवर्त्य सायं समये चन्द्रमश्विन्याः समर्पयति। तत इदमश्विनी नक्षत्रं सायं समये चन्द्रेण सह युज्यमानत्वात् पश्चाद्भागमवसेयम्। तथा चाऽऽह-"ता" इत्यादि सुगमं, नवरमिदमश्विनी नक्षत्रं समक्षेत्रत्वात् सायं समयादारभ्य तां सकलां रात्रिमपरं च दिवसं यावच्चन्द्रेण सह युक्तमवतिष्ठते। एतदेवोपसंहारव्याजेनाऽऽह-"एवं खलु" इत्यादि सुगमम्। यावद् योगमनुपरिवर्त्य सायं प्रायः परिस्फुटनक्षत्रमालावलोकसमये चन्द्रं भरण्याः समर्पयति। इदं च भरणी नक्षत्रमुक्तयुक्त्या रात्रौ चन्द्रेण सह योगमुपैति, ततो नक्तंभागमवसेयम्। तथाचाऽऽह-"भरणी" इत्यादि पाठसिद्धम्। नवरमिदमपार्द्धक्षेत्रत्वाद्रात्रौ तं योगं परिसमापयति, ततो न लभते चन्द्रेण सह युक्तमपरं दिवसम्। एतदेवोपसंहारव्याजेनाऽऽह-"एवं खलु" इत्यादि सुगमम्। यावद् योगमनुपरिवर्त्य प्रातश्चन्द्रं कृत्तिकानां समर्पयति। इदं च कृत्तिकानक्षत्रमुक्तयुक्त्या प्रातः चन्द्रेण सह योगमुपैति, ततः पूर्वभागमवसेयम्। एतदेवोपसंहारव्याजेन व्यक्तीकरोति-"एवं खलु" इत्यादि सुगमं, यावद्योगमनुपरिवर्त्य प्रातश्चन्द्रं रोहिण्याः समर्पयति। इदं च रोहिणीनक्षत्रं द्व्यर्द्धक्षेत्रम्, एतत् प्रागुक्तयुक्तिवशादुभयभागं प्रतिपत्तव्यम्। (रोहिणी जहा उत्तरभद्दवया इति) रोहिणी यथा प्रागुत्तरभद्रपदा उक्ता, तथा

* बहुत्वं प्राकृतानुवादवशात्।

वक्तव्या । सा चैवम्-" ता रोहिणी खलु णक्खत्ते उभयंभागे दिवड्ढखेत्ते पणयालीसइमुहुत्ते तप्पढमयाए पातो चंदेण सद्धिं जोगं जोएइ, अवरं च राइं, ततो पच्छा अवरं दिवसं। एवं खलु रोहिणी णक्खत्ते दो दिवसे एगं च राइं चंदेण सद्धिं जोगं जोएइ, जोगं जोइत्ता जोगं अणुपरियट्टइ,जोगं अणुपरियट्टित्ता सायं चंदं मिगसिरस्स समप्पेइ।" इति। " मिगसिरं जहा धणिट्ठत्ति।" मृगशिरो नक्षत्रं यथा प्राक् धनिष्ठोक्ता तथा वक्तव्यम्। तद्यथा-"ता मिगसिरे खलु णक्खत्ते पच्छंभागे समक्खेत्ते तीसइमुहुत्ते तप्पढमताए सायं चंदेण सद्धिं जोगं जोएइ, जोगं जोइत्ता ततो पच्छा अवरं दिवसं। एवं खलु मिगसिरे णक्खत्ते एगं राइं एगं च दिवसं चंदेण सद्धिं जोगं जोएइ, जोगं जोइत्ता जोगं अणुपरियट्टइ, जोगं अणुपरियट्टित्ता सायं * चंदं अद्दाए समप्पेइ" इति। "एवं जहा सयभिसया, तहा णत्तंभागा णेयव्वा। एवं जहा पुव्वाभद्दवया तहा पुव्वंभागा छप्पि णेयव्वा। जहा धणिट्ठा तहा पच्छंभागा अट्ठ णेयव्वा" इति। एवमुक्तेन प्रकारेण यथा शतभिषगुक्ता, तथा सर्वाण्यपि नक्तंभागानि नेतव्यानि। यथा पूर्वाभद्रपदा, तथा पूर्वभागानि षडपि नेतव्यानि। यथा धनिष्ठा तथा पश्चाद्भागानि अष्ट नेतव्यानि। उपलक्षणमेतत्। तेन यथोत्तराभद्रपदा, तथा सर्वाण्यप्युभयभागानि द्रष्टव्यानि। तानि चैवम्-" ता अद्दा खलु णक्खत्ते णत्तंभागे अवड्ढखेत्ते पण्णरसमुहुत्ते तप्पढमयाए सायं चंदेण सद्धिं जोगं जोएति, णो लहइ अवरं दिवसं। एवं खलु अद्दा एगं राइं चंदेण सद्धिं जोगं जोएइ,जोगं जोइत्ता जोगं अणुपरियट्टइ, जोगं अणुपरियट्टित्ता पातो चंदं पुणव्वसूणं समप्पेइ।" इदं पुनर्वसुनक्षत्रं द्व्यर्द्धक्षेत्रत्वात् प्रागुक्तयुक्तेरुभयभागमवसेयम्। ततश्चैवं तत्सूत्रम्-" ता पुणव्वसू णक्खत्ते उभयंभागे दिवड्ढखेत्ते पणयालीसइमुहुत्ते तप्पढमयाए पातो चंदेण सद्धिं जोगं जोएइ, अवरं च राइं, ततो पच्छा अवरं दिवसं। एवं खलु पुणव्वसू णक्खत्ते दो दिवसे एगं च राइं चंदेण सद्धिं जोगं जोएइ, जोगं जोइत्ता जोगं अणुपरियट्टइ,जोगं अणुपरियट्टित्ता सायं चंदं पुस्सस्स समप्पेइ"। इदं च पुष्यनक्षत्रं सायं समये दिवसावसानरूपे चन्द्रेण सह योगमधिगच्छति, ततः पश्चाद्भागमवसेयम्। तत एवं तत्सूत्रम्-"ता पुस्से य खलु णक्खत्ते पच्छंभागे समक्खेत्ते तीसइमुहुत्ते तप्पढमयाए सायं चंदेण सद्धिं जोगं जोएइ, जोगं जोइत्ता ततो पच्छा अवरं दिवसं। एवं खलु पुस्से णक्खत्ते एगं राइं एगं च दिवसं चंदेण सद्धिं जोगं जोएइ, जोगं जोइत्ता जोगं अणुपरियट्टइ, जोगं अणुपरियट्टित्ता सायं चंदं असिलेसाए समप्पेइ।" इदं चाऽऽश्लेषा नक्षत्रं सायं समये परिस्फुटनक्षत्रमण्डलाऽऽलोकरूपे प्रायश्चन्द्रेण सह योगमुपैति; तत इदं नक्तंभागमवसेयम्, अपार्द्धक्षेत्रत्वाच्च तस्यामेव रात्रौ योगं परिसमापयति। तत एवं तत्सूत्रम्-"ता असिलेसा खलु णक्खत्ते णत्तंभागे अवड्ढखेत्ते पण्णरसमुहुत्ते तप्पढमयाए सायं चंदेण सद्धिं जोगं जोएइ, जोगं जोइत्ता नो लभइ अवरं दिवसं। एवं खलु असिलेसा णक्खत्ते एगं राइं चंदेण सद्धिं जोगं जोएइ, जोगं जोइत्ता जोगं अणुपरियट्टइ, जोगं अणुपरियट्टित्ता पातो चंदं महाणं समप्पेइ" इति। इदं तु मघानक्षत्रमुक्तयुक्त्या प्रातश्चन्द्रेण सह योगमश्नुते, ततः पूर्वनागमवसेयम्। एवं च तत्सूत्रम्-"ता मघा खलु णक्खत्ते पुव्वंभागे समक्खेत्ते तीसइमुहुत्ते तप्पढमयाए पातो चंदेण सद्धिं जोगं जोएइ, ततो पच्छा अवरं राइं। एवं खलु मघा णक्खत्ते एगं दिवसं एगं च राइं चंदेण सद्धिं जोगं जोएइ, जोगं जोइत्ता जोगं अणुपरियट्टइ, जोगं अणुपरियट्टित्ता पातो चंदं पुव्वाफग्गुणीणं समप्पेइ"। इदमपि पूर्वाफाल्गुनीनक्षत्रं प्रातश्चन्द्रेण सह योगमुक्तनीत्या समधिगच्छति, ततः पूर्वनागं प्रत्येतव्यम्। एवं च तत्सूत्रम्-"ता पुव्वाफग्गुणी णक्खत्ते पुव्वंभागे समक्खेत्ते तीसइमुहुत्ते तप्पढमयाए पातो चंदेण सद्धिं जोगं जोएइ, ततो पच्छा अवरं राइं, एवं खलु पुव्वाफग्गुणीणक्खत्ते एगं च दिवसमेगं च राइं चंदेण सद्धिं जोगं जोएइ, जोगं जोइत्ता जोगं अणुपरियट्टइ, जोगं अणुपरियट्टित्ता पातो चंदमुत्तराणं फग्गुणीणं समप्पेइ।" एतच्चोत्तराफाल्गुनीनक्षत्रं द्व्यर्द्धक्षेत्रम्,अतः प्रागुक्तयुक्तिवशादुभयभागं वेदितव्यम्। एवं च तत्सूत्रम्-"ता उत्तराफग्गुणी णक्खत्ते उभयंभागे दिवड्ढखेत्ते पणयालीसइमुहुत्ते तप्पढमयाए पातो चंदेण सद्धिं जोगं जोएइ, अवरं च राइं, ततो पच्छा अवरं च दिवसं। एवं खलु उत्तराफग्गुणी णक्खत्ते दो दिवसे एगं च राइं चंदेण सद्धिं जोगं जोएइ, जोगं जोइत्ता जोगं अणुपरियट्टइ, जोगं अणुपरियट्टित्ता सायं चंदं हत्थस्स समप्पेइ"। एतच्च हस्तनक्षत्रं सायं दिवसावसानसमये चन्द्रेण सह योगमधिरोहति, तेन पश्चाद्भागमवसेयम्। तत्सूत्रं चैवम्-" ता हत्थे खलु णक्खत्ते पच्छंभागे समक्खेत्ते तीसइमुहुत्ते तप्पढमयाए सायं चंदेण सद्धिं जोगं जोएइ, ततो पच्छा अवरं दिवसं। एवं खलु हत्थं नक्खत्ते एगं राइमेगं च दिवसं चंदेण सद्धिं जोगं जोएइ, जोगं जोइत्ता जोगं अणुपरियट्टइ, जोगं अणुपरियट्टित्ता सायं चंदं चित्ताणं समप्पेइ।" इदमपि चित्रा नक्षत्रं सायं समये प्रायो दिवसावसानसमये चन्द्रेण सह योगमुपैति, तत इदमपि पश्चाद्भागमवसेयम्। एवं च तत्सूत्रम्-" ता चित्ता खलु णक्खत्ते पच्छंभागे समक्खेत्ते तीसइमुहुत्ते तप्पढमयाए सायं चंदेण सद्धिं जोगं जोएइ, ततो पच्छा अवरं दिवसं। एवं खलु चित्ता णक्खत्ते एगं राइमेगं च दिवसं चंदेण सद्धिं जोगं जोएइ, जोगं जोइत्ता जोगं अणुपरियट्टइ, जोगं अणुपरियट्टित्ता चंदं सायं साईए समप्पेइ"। स्वातिश्च सायं समये प्रायः परिस्फुटं दृश्यमाने नक्षत्रमण्डलरूपे चन्द्रेण सह योगमुपैति। तत इयं नक्तंभागा प्रत्येया। तत्सूत्रं चेत्थम्-" ता साई खलु णक्खत्ते णत्तंभागे अवड्ढखेत्ते पण्णरसमुहुत्ते तप्पढमयाए सायं चंदेण सद्धिं जोगं जोएइ, नो लभइ अवरं दिवसं। एवं खलु साई णक्खत्ते एगं राइं चंदेण सद्धिं जोगं जोएइ, जोगं जोइत्ता जोगं अणुपरियट्टइ, जोगं अणुपरियट्टित्ता पातो चंदं विसाहाणं समप्पेइ"। इदं च विशाखानक्षत्रं द्व्यर्द्धक्षेत्रं, ततः प्रागुक्तयुक्तिवशादुभयभागमवसेयम्। एवं च तत्सूत्रम्-" विसाहा खलु णक्खत्ते उभयंभागे दिवड्ढखेत्ते पणयालीसइमुहुत्ते तप्पढमयाए पातो चंदेण सद्धिं जोगं जोएइ, अवरं च राइं, ततो पच्छा अवरं दिवसं। एवं खलु विसाहा णक्खत्ते दो दिवसे एगं च राइं चंदेण सद्धिं जोगं जोएइ,जोगं जोइत्ता जोगं अणुपरियट्टइ, जोगं अणुपरियट्टित्ता सायं चंदं अणुराहाए समप्पेइ।" इदं चानुराधानक्षत्रं सायं समये दिवसावसानरूपे चन्द्रेण सह योगमुपैति, ततः प्रागुक्तयुक्तिवशात् पश्चाद्भागमवसेयम्। इत्थं च तत्सूत्रम्-" ता अणुराहा खलु णक्खत्ते पच्छंभागे स-

* अत्र सायमिति प्रायः परिस्फुटनक्षत्रमण्डलाऽऽलोकसमये, अत एवैतन्नक्तंभागम्।

णक्खत्ते तीसइमुहुत्ते तप्पढमयाए सायं चंदेण सद्धिं जोगं जोएइ। ततो पच्छा अवरं दिवसं। एवं खलु अणुराहा णक्खत्ते एगं च राइं एगं च दिवसं चंदेण सद्धिं जोगं जोएइ, जोगं जोइत्ता जोगं अणुपरियट्टइ, जोगं अणुपरियट्टित्ता सायं चंदं जेट्ठाए समप्पेइ।" ज्येष्ठायाश्च सायं समये समर्पयति प्रायः परिस्फुटं दृश्यमाननक्षत्रमण्डले, तत इदं ज्येष्ठा नक्षत्रं नक्तंभागमवसेयम्। तत्सूत्रं चैवम्-" ता जेट्ठा खलु णक्खत्ते नत्तंभागे अवड्ढक्खेत्ते पन्नरसमुहुत्ते तप्पढमयाए सायं चंदेण सद्धिं जोगं जोएइ, नो लभइ अवरं दिवसं। एवं खलु जेट्ठा णक्खत्ते एगं राइं चंदेण सद्धिं जोगं जोएइ, जोगं जोइत्ता जोगं अणुपरियट्टइ, जोगं अणुपरियट्टित्ता पातो चंदं मूलस्स समप्पेइ।" मूलनक्षत्रं चोक्तप्रकारेण प्रायश्चन्द्रेण सह योगमधिगच्छति प्रातः, तत इदं पूर्वभागमवसातव्यम्। तत्सूत्रं चेदम्-" ता मूलणक्खत्ते पुव्वंभागे समक्खेत्ते तीसइमुहुत्ते तप्पढमयाए पातो चंदेण सद्धिं जोगं जोएइ, ततो पच्छा अवरं राइं। एवं खलु मूलणक्खत्ते एगं च दिवसमेगं च राइं चंदेण सद्धिं जोगं जोएइ, जोगं जोइत्ता जोगं अणुपरियट्टइ, जोगं अणुपरियट्टित्ता पातो चंदं पुव्वासाढाणं समप्पेइ।" इदमपि पूर्वाषाढानक्षत्रं प्रातश्चन्द्रेण सह योगमुक्तयुक्त्या समुपैतीति पूर्वभागमवसेयम्। एवं च तत्सूत्रम्-" ता पुव्वासाढा खलु णक्खत्ते तीसइमुहुत्ते तप्पढमयाए पातो चंदेण सद्धिं जोगं जोएइ, अवरं च राइं। एवं खलु पुव्वासाढा णक्खत्ते एगं च दिवसमेगं च राइं चंदेण सद्धिं जोगं जोएइ, जोगं जोइत्ता जोगं अणुपरियट्टइ, जोगं अणुपरियट्टित्ता पातो चंदं उत्तरासाढाणं समप्पेइ।" उत्तराषाढा नक्षत्रं च ह्यर्धक्षेत्रत्वादुभयभागं वेदितव्यम्। तत्सूत्रं चैवम्-" ता उत्तरासाढा खलु णक्खत्ते उभयंभागे दिवड्ढक्खेत्ते पणयालीसं मुहुत्ते तप्पढमयाए पातो चंदेण सद्धिं जोगं जोएइ, अवरं च राइं, ततो पच्छा अवरं दिवसं।" अत ऊर्द्धं चैतद्गतं सूत्रं साक्षादाह-" ०जाव एवं खलु उत्तरासाढा दो दिवसे" इत्यादि। यावत्करणात् पाश्चात्यनक्षत्रगतानि सूत्राण्यनुक्तान्यपि द्रष्टव्यानि। तानि च तथोपदर्शितानि। तदेवं बाहुल्यमधिकृत्योक्तप्रकारेण यथोक्तेषु कालेषु नक्षत्राणि चन्द्रेण सह योगमुपयान्ति, ततः कानिचित्पूर्वभागानि, कानिचित्पश्चाद्भागानि, कानिचिन्नक्तंभागानि, कानिचिदुभयभागानि। चं० प्र० १० पाहु० ४ पाहु०। सू० प्र०। नं०। (अमापूर्णिमाभिनक्षत्रचन्द्रयोगः 'अमावसा' शब्दे प्रथमभागे ७४३ पृष्ठे उक्तः) (कुलोपकुलकुलोपकुलसंज्ञकानि नक्षत्राणि 'कुल' शब्दे तृतीयभागे ५९२ पृष्ठे उक्तानि)

(१७) किं नक्षत्रं कतितारम्-

ता कहं ते तारग्गे आहिते ति वदेज्जा ?। ता एतेसि णं अट्ठावीसाए णक्खत्ताणं अभिई णक्खत्ते कतितारे पन्नत्ते ?। तितारे पन्नत्ते। सवणे णक्खत्ते कतितारे पन्नत्ते ?। तितारे पन्नत्ते। धणिट्ठा णक्खत्ते कतितारे पन्नत्ते ?। पंचतारे पन्नत्ते। सतभिसया णक्खत्ते कतितारे पन्नत्ते ?। सततारे पन्नत्ते। पुव्वापोट्ठवता णक्खत्ते कतितारे पन्नत्ते ?। दुतारे पन्नत्ते। एवं उत्तरा वि। रेवती णक्खत्ते कतितारे पन्नत्ते ?। बत्तीसइतारे पन्नत्ते। अस्सिणी णक्खत्ते कतितारे पन्नत्ते ?। तितारे पन्नत्ते। एवं सव्वे पुच्छिज्जंति। भरणी तितारे पन्नत्ते। कत्तिया छत्तारे पन्नत्ते। रोहिणी पंचतारे पन्नत्ते। मिगसिरे तितारे पन्नत्ते। अद्दा एगतारे पन्नत्ते। पुणव्वसू पंचतारे पन्नत्ते। पुस्से णक्खत्ते तितारे पन्नत्ते। अस्सेसा छत्तारे पन्नत्ते। महा सत्ततारे पन्नत्ते। पुव्वाफग्गुणी दुतारे पन्नत्ते। एवं उत्तरा वि। हत्थे पंचतारे पन्नत्ते। चित्ता एगतारे पन्नत्ते। साती एगतारे पन्नत्ते। विसाहा पंचतारे पन्नत्ते। अणुराहा चउतारे पन्नत्ते। जेट्ठा तितारे पण्णत्ते। मूले एगारसतारे पण्णत्ते। पुव्वासाढा चउतारे पण्णत्ते। उत्तरासाढा णक्खत्ते चउतारे पण्णत्ते।

"ता कहं ते" इत्यादि। 'ता' इति पूर्ववत्। कथं केन प्रकारेण ते त्वया भगवन्! नक्षत्राणां ताराग्रं तारापरिमाणमाख्यातमिति वदेत्?। एवं सामान्यतः प्रश्नं कृत्वा संप्रति नक्षत्रं पृच्छति-"ता एएसि णं" इत्यादि। 'ता' इति पूर्ववत्। एतेषामष्टाविंशतेर्नक्षत्राणां मध्येऽभिजिन्नक्षत्रं कतितारं प्रज्ञप्तम्?। भगवानाह-अभिजिन्नक्षत्रं त्रितारं प्रज्ञप्तम्। एवं शेषाण्यपि प्रश्ननिर्वचनसूत्राणि भावनीयानि।

तारापरिमाणसंग्रहार्थके चेमे जम्बूद्वीपप्रज्ञप्तिसत्के गाथे-

" तिग तिग पंचग सय छग, दुग बत्तीसं तिगं तह तिगं च।
छ पंचग तिग पक्कग, पंचग तिग छक्कगं चेव॥ १॥
सत्तग छग दुग पंचग, इक्किक्कग पंच छउ तिगं चेव।
इक्कारसग चउक्कं, चउक्कगं चेव तारग्गं"॥ २॥

सू० प्र० १० पाहु० ६ पाहु०। स्था०।

" जेट्ठापज्जवसाणाणं एगूणवीसाए णक्खत्ताणं अहाणउइ तारातो तारग्गेणं पण्णत्ताओ।" स० ९९ सम०।

(१८) कति नक्षत्राणि स्वयमस्तंगमनेनाहोरात्रपरिसमापकतया कं मासं नयन्तीति-

ता कहं ते णेता आहिते ति वदेज्जा ?। ता बासाणं पढमं मासं कति णक्खत्ता णेंति ?। ता चत्तारि णक्खत्ता णेंति। तं जहा-उत्तरासाढा, अभिई, सवणो, धणिट्ठा। उत्तरासाढा चोद्दस अहोरत्ते णेति, अभिई सत्त अहोरत्ते णेति, सवणो अट्ठ अहोरत्ते णेति, धणिट्ठा एगं अहोरत्तं णेति। तंसि च णं मासंसि चउरंगुलपोरिसीए छायाए सूरिए अणुपरियट्टति। तस्स णं मासस्स चरिमे दिवसे दो पदाइं चत्तारि य अंगुलाणि पोरिसी भवति। ता वासाणं दोच्चं मासं कति णक्खत्ता णेंति ?। ता चत्तारि णक्खत्ता णेंति। तं जहा-धणिट्ठा, सतभिसया, पुव्वापोट्ठवया, उत्तरापोट्ठवया। धणिट्ठा चोद्दस अहोरत्ते णेति, सयभिसया सत्त अहोरत्ते णेति, पुव्वाभद्दवया अट्ठ अहोरत्ते णेति, उत्तरापोट्ठवता एगं अहोरत्तं णेति। तंसि च णं मासंसि अट्ठंगुले पोरिसीए छायाए सूरिए अणुपरियट्टति। तस्स णं मासस्स चरिमे दिवसे दो पदाइं अट्ठंगुलाइं पोरिसी

भवति । ता वासाणं तइयं मासं कति णक्खत्ता णेंति ?। ता तिण्णि णक्खत्ता णेंति । तं जहा–उत्तरापोट्ठवता, रेवती, अस्सिणी । उत्तरापोट्ठवता चोद्दस अहोरत्ते णेति, रेवती पण्णरस अहोरत्ते णेति, अस्सिणी एगं अहोरत्तं णेति । तंसि च णं मासंसि दुवालसंगुलाए पोरिसीए छायाए सूरिए अणुपरियट्टति । तस्स णं मासस्स चरिमे दिवसे तेहट्ठाणि तिपदाइं पोरिसी भवति । ता वासाणं चउत्थमासं कति णक्खत्ता णेंति ?। ता तिण्णि णक्खत्ता णेंति । तं जहा–अस्सिणी, भरणी कत्तिया । अस्सिणी चउद्दस अहोरत्ते णेति । भरणी पन्नरस अहोरत्ते णेति । कत्तिया एगं अहोरत्तं णेति । तंसि च णं मासंसि सोलसंगुलपोरिसीए छायाए सूरिए अणुपरियट्टइ । तस्स णं मासस्स चरिमे दिवसे तिण्णि पयाइं चत्तारि अंगुलाइं पोरिसी भवति । ता हेमंताणं पढमं मासं कति णक्खत्ता णेंति ?। ता तिण्णि णक्खत्ता णेंति । तं जहा–कत्तिया, रोहिणी, संठाणा । कत्तिया चोद्दस अहोरत्ते णेति । रोहिणी पण्णरस अहोरत्ते णेति । संठाणा एगं अहोरत्तं णेति । तंसि च णं मासंसि वीसंगुलाए पोरिसीए छायाए सूरिए अणुपरियट्टति । तस्स णं मासस्स चरिमे दिवसे तिण्णि पदाइं अट्ठंगुलाइं पोरिसी भवति । ता हेमंताणं दोच्चे मासे कति णक्खत्ता णेंति ?। चत्तारि णक्खत्ता णेंति । तं जहा–संठाणा, अद्दा, पुणव्वसू, पुस्सो । संठाणा चोद्दस अहोरत्ते णेति, अद्दा सत्त अहोरत्ते णेति, पुणव्वसू अद्ध अहोरत्ते णेति, पुस्सो एगं अहोरत्तं णेति । तंसि च णं मासंसि चउवीसंगुलपोरिसीए छायाए सूरिए अणुपरियट्टति । तस्स णं मासस्स चरिमे दिवसे लेहट्ठाणि चत्तारि पदाइं पोरिसी भवति । ता हेमंताणं तइयं मासं कति णक्खत्ता णेंति ?। ता तिण्णि णक्खत्ता णेंति । तं जहा–पुस्से, अस्सेसा, महा । पुस्से चोद्दस अहोरत्तं णेति, अस्सेसा पंचदस अहोरत्ते णेति, महा एगं अहोरत्तं णेति । तंसि च णं मासंसि वीसंगुलाए पोरिसीए छायाए सूरिए अणुपरियट्टति । तस्स णं मासस्स चरिमे दिवसे तिण्णि पदाइं अट्ठंगुलाइं पोरिसी भवति । ता हेमंताणं चउत्थमासं कति णक्खत्ता णेंति ?। ता तिण्णि णक्खत्ता णेंति । तं जहा–महा, पुव्वाफग्गुणी, उत्तराफग्गुणी । महा चोद्दस अहोरत्ते णेति । पुव्वाफग्गुणी पण्णरस अहोरत्ते णेति । उत्तराफग्गुणी एगं अहोरत्तं णेति । तंसि च णं मासंसि सोलस अंगुलाए पोरिसीए छायाए सूरिए अणुपरियट्टति । तस्स णं मासस्स चरिमे दिवसे तिण्णि पदाइं चत्तारि अंगुलाइं पोरिसी भवति । ता गिम्हाणं पढमं मासं कति णक्खत्ता णेंति ?। ता तिण्णि णक्खत्ता णेंति । तं जहा–उत्तराफग्गुणी, हत्थो, चित्ता । उत्तराफग्गुणी चोद्दस अहोरत्ते णेति । हत्थो पण्णरस अहोरत्ते णेति । चित्ता एगं अहोरत्तं णेति । तंसि च णं मासंसि दुवालसअंगुलाए पोरिसीए छायाए सूरिए अणुपरियट्टति । तस्स णं मासस्स चरिमे दिवसे लेहट्ठाणि तिण्णि पदाइं पोरिसी भवति । ता गिम्हाणं बितियं मासं कति णक्खत्ता णेंति ?। ता तिण्णि णक्खत्ता णेंति । तं जहा–चित्ता, साई, विसाहा । चित्ता चोद्दस अहोरत्ते णेति । साती पण्णरस अहोरत्ते णेति । विसाहा एगं अहोरत्तं णेति । तंसि च णं मासंसि अट्ठंगुलाए पोरिसीए छायाए सूरिए अणुपरियट्टति । तस्स णं मासस्स चरिमे दिवसे दो पदाइं अट्ठंगुलाइं पोरिसी भवति । गिम्हाणं तइयं मासं कति णक्खत्ता णेंति ?। ता चत्तारि णक्खत्ता णेंति । तं जहा–विसाहा, अणुराधा, जेट्ठा, मूलो । विसाहा चोद्दस अहोरत्ते णेति । अणुराहा सत्त, जेट्ठा अद्ध, मूले एगं अहोरत्तं णेति । तंसि च णं मासंसि चउरंगुलाए पोरिसीए छायाए सूरिए अणुपरियट्टति । तस्स णं मासस्स चरिमे दिवसे दो पदाणि चत्तारि य अंगुलाणि पोरिसी भवति । ता गिम्हाणं चउत्थं मासं कति णक्खत्ता णेंति ?। तिण्णि णक्खत्ता णेंति । तं जहा–मूलो, पुव्वासाढा, उत्तरासाढा । मूलो चोद्दस अहोरत्ते णेति । पुव्वासाढा पन्नरस अहोरत्ते णेति । उत्तरासाढा एगं अहोरत्तं णेति । तंसि च णं मासंसि वट्टाए समचउरंससंठाणसंठिताए णग्गोधपरिमंडलाए सकायमणुरंगिणीए छायाए सूरिए अणुपरियट्टति । तस्स णं मासस्स चरिमे दिवसे लेहट्ठाणि दो पदाइं पोरिसी भवति ।

(ता कहं ते णेता आहिते ति वदेज्जा) 'ता' इति पूर्ववत् । कथं केन प्रकारेण भगवन् ! ते त्वया स्वयमस्तंगमनेनाहोरात्रपरिसमापको नक्षत्रकर्पो नेता आख्यात इति वदेत् ? । एतदेव प्रतिमासं विपृच्छिषुराह-(ता वासाणमित्यादि) 'ता' इति पूर्ववत् । वर्षाणां वर्षाकालस्य चतुर्मासप्रमाणस्य प्रथमं मासं श्रावणलक्षणं कति नक्षत्राणि स्वयमस्तंगमनेनाहोरात्रपरिसमापकतया नयन्ति गमयन्ति ? । भगवानाह-(ता चत्तारीत्यादि) 'ता' इति पूर्ववत् । चत्वारि नक्षत्राणि स्वयमस्तंगमनेनाहोरात्रपरिसमापकतया क्रमेण नयन्ति । तद्यथा-उत्तराषाढा, अभिजित्, श्रवणो, धनिष्ठा च । तत्रोत्तराषाढा प्रथमान् चतुर्दश अहोरात्रान् स्वयमस्तंगमनेनाहोरात्रपरिसमापकतया नयति, तदनन्तरमभिजिन्नक्षत्रं सप्ताहोरात्रान्नयति । ततः परं श्रवणनक्षत्रमष्टौ अहोरात्रान्नयति । एवं च सर्वसंकलनया श्रावणमासस्यैकोनत्रिंशदहोरात्रा गताः । ततः परं श्रावणमासस्य संबन्धिनं चरममेकमहोरात्रं धनिष्ठा नक्षत्रं स्वयमस्तंगमनेनाहोरात्रपरिसमापकतया नयति । एवं चत्वारि नक्षत्राणि श्रावणमासं नयन्ति । (तंसि च ण-

मित्यादि) तस्मिंश्च श्रावणे मासे चतुरङ्गुलपौरुष्या चतुरङ्गुलाधिकपौरुष्या छायया सूर्योऽनु प्रतिदिवसं परावर्त्तते । किमुक्तं भवति ? –श्रावणे मासे प्रथमादहोरात्रादारभ्य प्रतिदिनमन्यान्यमण्डलसंक्रान्त्या तथा कथञ्चनापि परावर्त्तते, यथा तस्य श्रावणमासस्य पर्यन्ते चतुरङ्गुलाधिका द्विपदा पौरुषी भवति । तदेवाऽऽह-(तस्स णमित्यादि) तस्य श्रावणमासस्य चरमे दिवसे द्वे पदे चत्वारि चाङ्गुलानि पौरुषी भवति । (ता वासाणमित्यादि) 'ता' इति पूर्ववत् । वर्षाणां वर्षाकालस्य चतुर्मासप्रमाणस्य द्वितीयं भाद्रपदलक्षणं मासं कति नक्षत्राणि नयन्ति ? । अस्य वाक्यस्य भावार्थः प्राग्वद्भावनीयः । भगवानाह-('ता' इत्यादि) 'ता' इति पूर्ववत् । चत्वारि नक्षत्राणि नयन्ति । तद्यथा-धनिष्ठा, शतभिषक्, पूर्वाप्रोष्ठपदा, उत्तराप्रोष्ठपदा च । तत्र धनिष्ठा तस्मिन् भाद्रपदे मासे प्रथमान् चतुर्दश अहोरात्रान् स्वयमस्तंगमनेनाहोरात्रपरिसमापकतया नयति । तदनन्तरं शतभिषक् नक्षत्रं सप्ताहोरात्रान्, ततः परमष्टावहोरात्रान् पूर्वाप्रोष्ठपदा । तदनन्तरमेकमहोरात्रमुत्तराप्रोष्ठपदा । एवमेनं भाद्रपदं मासं चत्वारि नक्षत्राणि नयन्ति । (तंसि च णमित्यादि) तस्मिंश्च 'णं' इति वाक्यालङ्कारे । मासे भाद्रपदे अष्टाङ्गुलपौरुष्या अष्टाङ्गुलाधिकपौरुष्या छायया सूर्यो अनु प्रतिदिवसं परावर्त्तते । अयमत्र भावार्थः-भाद्रपदे मासे प्रथमादहोरात्रादारभ्य प्रतिदिवसमन्यान्यमण्डलसंक्रान्त्या तथा कथमपि परावर्त्तते, यथा तस्य भाद्रपदस्य मासस्यान्ते अष्टाङ्गुलिका पौरुषी भवति । एतदेवाऽऽह-(तस्स णमित्यादि) सुगमम् । एवं शेषमासगतान्यपि सूत्राणि भावनीयानि, नवरं (छेहट्ठाणि तिपदाइं ति) रेखा पादपर्यन्तवर्त्तिनी सीमा, तत्स्थानि त्रीणि पदानि पौरुषी भवति । किमुक्तं भवति ?–परिपूर्णानि त्रीणि पदानि पौरुषी भवति । एषा चतुरङ्गुला प्रतिमासं वृद्धिस्तावद्वक्तव्या यावत्पौषमासः, तदनन्तरं प्रतिमासं चतुरङ्गुला हानिर्वक्तव्या । सा च तावद् यावदाषाढो मासः । तेनाऽऽषाढपर्यन्ते द्विपदा पौरुषी भवति । इदं च पौरुषीपरिमाणं व्यवहारत उक्तं, निश्चयतः सार्द्धत्रिंशता अहोरात्रैश्चतुरङ्गुला वृद्धिर्हानिर्वा वेदितव्या ।

तथा च निश्चयतः पौरुषीपरिमाणप्रतिपादनार्थमिमाः
पूर्वाऽऽचार्यप्रदर्शिताः सव्याख्याः करणगाथाः-

" पव्वे पन्नरसगुणे, तिहिसहिए पोरिसीए आणयणे ।
छलसीइविभत्ते, जं लद्धं तं वियाणाहि " ॥ १ ॥

व्याख्या-युगमध्ये यस्मिन् पर्वणि यस्यां तिथौ पौरुषीपरिमाणं ज्ञातुमिष्यते, ततः पूर्वयुगाऽऽदित आरभ्य यानि पर्वाण्यतिक्रान्तानि, तानि स्थाप्यन्ते, धृत्वा च पञ्चदशभिर्गुण्यन्ते, गुणयित्वा च विवक्षितायास्तिथेर्याः प्रागतिक्रान्तास्तिथयः, ताभिः सहितानि क्रियन्ते, कृत्वा च षडशीत्यधिकेन शतेन तेषां भागो ह्रियते । इह एकस्मिन्नयने त्र्यशीत्यधिकमण्डलशतपरिमाणे चन्द्रनिष्पादितानां तिथीनां षडशीत्यधिकं शतं भवति, ततस्तेन भागहरणं, भागे च हृते यल्लब्धं तद्विजानीहि, सम्यगवधारयेत्यर्थः ॥ १ ॥

"जइ होइ विसम लद्धं, दक्खिणमयणं हविज्ज नायव्वं ।
अह हवइ समं लद्धं, नायव्वं उत्तरं अयणं" ॥ २ ॥

तत्र यदि लब्धं विषमं भवति, यथा-एकत्रिकः, पञ्चकः, सप्तको, नवको वा; तदा तत्पर्यन्तवर्त्ति दक्षिणमयनं ज्ञातव्यम् । अथ भवति लब्धं समम् । तद्यथा-द्विकश्चतुष्कः, षट्कोऽष्टको, दशको वा । तदा तत्पर्यन्तवर्त्ति उत्तरायणमवसेयम् । तदेवमुक्तो दक्षिणायनोत्तरायणपरिज्ञानोपायः ॥ २ ॥

सम्प्रति षडशीत्यधिकेन शतेन भागे हृते यच्छेषमवतिष्ठते, यदि वा भागासंभवेन यच्छेषं तिष्ठति, तद्गतविधिमाह-

"अयणगए तिहिरासी, चउग्गुणे पव्वपायभइयव्वं ।
जं लद्धमंगुलाणि य, खयवुड्ढी पोरिसीए उ" ॥ ३ ॥

'अयणगए' इत्यादि । यः पूर्वं भागे हृते, भागासंज्ञवे वा शेषीभूतोऽयनगतस्तिथिराशिर्वर्त्तते, स चतुर्निर्गुण्यते, गुणयित्वा च पर्वपादेन-युगमध्ये यानि सर्वसंख्यया पर्वाणि चतुर्विंशत्यधिकशतसंख्यानि, तेषां पादेन चतुर्थेनांशेन, एकत्रिंशता इत्यर्थः । तथा भागे हृते यल्लब्धं, तान्यङ्गुलानि,चकारादङ्गुलांशाश्च पौरुष्याः क्षयवृद्ध्योर्ज्ञातव्यानि । दक्षिणायने पदध्रुवराशेरुपरि वृद्धौ ज्ञातव्यानि; उत्तरायणे पदध्रुवराशेः क्षये ज्ञातव्यानीत्यर्थः ॥ अथैवंभूतस्य गुणकारस्य भागहारस्य वा कथमुपपत्तिः ? । उच्यते-यदि षष्यशीत्यधिकेन तिथिशतेन चतुर्विंशतिरङ्गुलानि क्षये वृद्धौ वा प्राप्यन्ते, तत एकस्यां तिथौ का वृद्धिः, क्षयो वा ?। राशित्रयस्थापना-१८६। २४। १। तत्राद्येन राशिना एकलक्षणेन मध्यमो राशिश्चतुर्विंशतिरूपो गुण्यते, जातः स तावानेव, 'एकेन गुणितं तदेव भवति' इति वचनात् । तत आद्येन राशिना षडशीत्यधिकशतरूपेण भागो ह्रियते तत्रोपरितनराशेः स्तोकत्वाद्भागो न लभ्यते,ततः छेद्यच्छेदकराश्योः षट्केनापवर्तना, जात उपरितनो राशिश्चतुष्करूपोऽधस्तनः एकत्रिंशत्,लब्धमेकस्यां तिथौ चत्वार एकत्रिंशद्भागाः क्षये वृद्धौ चेति चतुष्को गुणकार उक्त एकत्रिंशद्भागहार इति ॥ ३ ॥

इह यल्लब्धं तान्यङ्गुलानि क्षये वृद्धौ वा ज्ञातव्यानीत्युक्तं तत्र कस्मिन्नयने कियत्प्रमाणध्रुवराशेरुपरि वृद्धौ, कस्मिन् वा अयने किं प्रमाणध्रुवराशेः क्षये ?, इत्येतन्निरूपणार्थमाह-

"दक्खिणे वुड्ढी छप्पया-इ अंगुलाणं तु होइ नायव्वा ।
उत्तरअयणे हाणी, कायव्वा चउहिँ पायाहिं" ॥ ४ ॥

"दक्खिणे वुड्ढी" इत्यादि । दक्षिणायने द्विपदात् पदद्वयस्योपरि अङ्गुलानां वृद्धिर्ज्ञातव्या, उत्तरायणे चतुर्भ्यः पादेभ्यः सकाशादङ्गुलानां हानिः ॥ ४ ॥

तत्र युगमध्ये प्रथमे संवत्सरे दक्षिणायने यतो दिवसादारभ्य वृद्धिः, तन्निरूपयति-

"सावणबहुलपमिवए, छप्पया पुण पोरिसी धुवा होइ ।
चत्तारि अंगुलाइं, मासेणं वड्ढए तत्तो ॥ ५ ॥
इक्कत्तीसइ भागा, तिहिए पुण अंगुलस्स चत्तारि ।
दक्खिणअयणे वुड्ढी, जाव उ चत्तारि उ पयाइं" ॥ ६ ॥

"सावण" इत्यादिगाथाद्वयम् । युगस्य प्रथमे संवत्सरे श्रावणे मासि बहुलपक्षे प्रतिपदि पौरुषी द्विपदा पदद्वयप्रमाणा ध्रुवा भवति, ततस्तस्याः प्रतिपद आरभ्य प्रतितिथिक्रमेण तावद्वर्धते यावन्मासेन सूर्यमासेन सार्द्धत्रिंशदहोरात्रप्रमाणेन चन्द्रमासापेक्षयैकत्रिंशत्तिथिभिरित्यर्थः । चत्वारि अङ्गुलानि वर्धन्ते ॥ ५ ॥ कथमेतदवसीयते, यथा मासेन सूर्यमासेन सार्द्धत्रिंशदहोरात्रप्रमाणेनैकत्रिंशत्तिथ्यात्मकेनेति ?, अत आह-। "इक्कत्तीस" इत्यादि) यत एकस्यां तिथौ चत्वार एकत्रिंशद्भागा वर्द्धन्ते,एतच्च प्रागेव भावितम् । परिपूर्णे तु दक्षिणायने वृद्धिः । परिपूर्णानि चत्वारि पदानि । ततो मासेन सूर्यमासेन सार्द्धत्रिंशदहोरात्रप्रमाणेनैकत्रिंशत्तिथ्यात्मकेनेत्युक्तम् । तदेवमुक्ता वृद्धिः ॥ ६ ॥

संप्रति हानिमाह—

"उत्तरअयणे हाणी, चउहिं पायाहिं जाव दो पाया।
एवं तु पोरिसीए, वुड्ढिखया हुंति नायव्वा" ॥ ७ ॥

"उत्तर" इत्यादि। युगस्य प्रथमे संवत्सरे माघमासे बहुलपक्षे सप्तम्या आरभ्य चतुर्भ्यः पादेभ्यः सकाशात्प्रतिदिवसमेकत्रिंशद्भागचतुष्टयहानिस्तावद्वक्तव्या, यावदुत्तरायणपर्यन्ते द्वौ पादौ पौरुषीति। एष प्रथमसंवत्सरगतो विधिः। द्वितीये संवत्सरे श्रावणमासि बहुलपक्षे त्रयोदशीमादौ कृत्वा वृद्धिः। माघमासे शुक्लपक्षे चतुर्थीमादिं कृत्वा क्षयः। तृतीये संवत्सरे श्रावणमासे शुक्लपक्षे दशमी वृद्धेरादिः। माघमासे बहुलपक्षे प्रतिपत् क्षयस्याऽऽदिः। चतुर्थे संवत्सरे श्रावणमासे बहुलपक्षे सप्तमी वृद्धेरादिः। माघमासे बहुलपक्षे त्रयोदशी क्षयस्याऽऽदिः। पञ्चमे संवत्सरे श्रावणमासे शुक्लपक्षे दशमी वृद्धेरादिः। माघमासे बहुलपक्षे प्रतिपत् क्षयस्याऽऽदिः। चतुर्थे संवत्सरे श्रावणे चतुर्थी वृद्धेरादिः। माघमासे शुक्लपक्षे दशमी क्षयस्याऽऽदिः। एतच्च करणगाथाऽनुपात्तमपि पूर्वाऽऽचार्यप्रदर्शितव्याख्यानादवसितम्। संप्रत्युपसंहारमाह-"एवं तु" इत्यादि। एवमुक्तेन प्रकारेण पौरुष्यां पौरुषीविषये वृद्धिक्षयौ यथाक्रमं दक्षिणायनेषूत्तरायणेषु वेदितव्यौ। तदेवमक्षरार्थमधिकृत्य व्याख्याता करणगाथा ॥७॥

संप्रत्यस्य करणस्य भावना क्रियते-कोऽपि पृच्छति-युग आदित आरभ्य पञ्चाशीतितमे पर्वणि पञ्चम्यां तिथौ कतिपदा पौरुषी भवति?। तत्र चतुरशीतिर्भ्रियते, तस्याश्चाधस्तात्पञ्चम्यां तिथौ पृष्टमिति। पञ्च चतुरशीतिश्च पञ्चदशभिर्गुण्यते, जातानि द्वादश शतानि षष्ट्यधिकानि १२६०। एतेषु मध्येऽधस्तनाः पञ्च प्रक्षिप्यन्ते, जातानि द्वादश शतानि पञ्चषष्ट्यधिकानि १२६५। तेषां षष्टयधिकेन शतेन भागो ह्रियते, लब्धाः षट्, आगतं षट् अयनान्यतिक्रान्तानि, सप्तममयनं वर्त्तते। तद्गतं च शेषमेकोनपञ्चाशदधिकं शतं तिष्ठति १४९। ततश्चतुर्भिर्गुण्यते, जातानि पञ्चशतानि षण्णवत्यधिकानि ५९६। तेषामेकत्रिंशता भागहरणे लब्धा एकोनत्रिंशतिः। शेषास्तिष्ठन्ति सप्त। तत्र द्वादशाङ्गुलानि पाद इत्येकोनत्रिंशतेर्द्वादशभिः पदं लब्धम्। शेषाणि तिष्ठन्ति सप्त अङ्गुलानि, षष्ठं चायनमुत्तरायणं, तद्गतं सप्तमं तु दक्षिणायनं वर्त्तते। ततः पदमेकं, सप्ताङ्गुलानि पदद्वयप्रमाणे ध्रुवराशौ प्रक्षिप्यन्ते, जातानि त्रीणि पदानि सप्ताङ्गुलानि। ये च सप्त एकत्रिंशद्भागाः शेषीभूता वर्त्तन्ते, तान् यवान् कुर्मः। तत्राष्टौ यवा अङ्गुले इति ते सप्त अष्टभिर्गुण्यन्ते, जाताः षट्पञ्चाशत् ५६। तस्या एकत्रिंशता भागे हृते लब्ध एको यवः। शेषास्तिष्ठन्ति यवस्य पञ्चविंशतिरेकत्रिंशद्भागाः। आगतं पञ्चाशीतितमे पर्वणि पञ्चम्यां त्रीणि पदानि, सप्ताङ्गुलानि, एको यवः, एकस्य च यवस्य पञ्चविंशतिरेकत्रिंशद्भागाः। इत्येतावती पौरुषीति। तथाऽपरः कोऽपि पृच्छति-सप्तनवतितमे पर्वणि पञ्चम्यां तिथौ कतिपदा पौरुषी भवति?। तत्र षण्णवतिर्भ्रियते, तस्याश्चाधस्तात् पञ्च षण्णवतिश्च पञ्चदशभिर्गुण्यते, जातानि चतुर्दश शतानि चत्वारिंशदधिकानि १४४०। तेषां मध्येऽधस्तनाः पञ्च प्रक्षिप्यन्ते। जातानि चतुर्दशशतानि पञ्चचत्वारिंशदधिकानि १४४५। तेषां षष्टयधिकेन शतेन भागो ह्रियते, लब्धानि सप्त अयनानि। शेषं तिष्ठति त्रिचत्वारिंशदधिकं शतम् १४३। तच्चतुर्भिर्गुण्यते, जातानि पञ्च शतानि द्विसप्तत्यधिकानि ५७२। तेषामेकत्रिंशता भागो ह्रियते, लब्धान्यष्टादश अङ्गुलानि १८। तेषां मध्ये द्वादशभिरङ्गुलैः पदमिति लब्धमेकं षडङ्गुलानि, उपरि चांशा वर्त्तन्ते चतुर्दश, ते यवाऽऽनयनार्थमष्टभिर्गुण्यन्ते, जातं द्वादशोत्तरं शतम् ११२। तस्यैकत्रिंशता भागे हृते लब्धास्त्रयो यवाः, शेषास्तिष्ठन्ति यवस्यैकोनत्रिंशतिरेकत्रिंशद्भागाः, सप्त चायनान्यतिक्रान्तानि। अष्टमं वर्त्तते, अष्टमं चायनमुत्तरायणम्, उत्तरायणे च पदचतुष्टयरूपात् ध्रुवराशेर्हानिर्वक्तव्या, तत एकं पदं सप्ताङ्गुलानि, त्रयो यवाः, एकस्य च यवस्यैकोनत्रिंशतिरेकत्रिंशद्भागा इति पदचतुष्टयात् पात्यते, शेषं तिष्ठति द्वे पदे चत्वारि चाङ्गुलानि, चत्वारो यवाः, एकस्य च यवस्य द्वादश एकत्रिंशद्भागाः। एतावती युगे आदितः आरभ्य सप्तनवतितमे पर्वणि पञ्चम्यां तिथौ पौरुषीति। एवं सर्वत्र भावनीयम्।

संप्रति पौरुषीपरिमाणतोऽयनगतपरिमाणज्ञापनार्थमियं करणगाथा-

"वुड्ढी वा हाणी वा, जावइया पोरिसीए दिट्ठाओ।
तत्तो दिवसगएणं, जं लद्धं तं खु अयणगयं ॥ ८ ॥"

"वुड्ढी वा" इत्यादि। पौरुष्यां यावती वृद्धिर्हानिर्वा दृष्टा, ततः सकाशाद् दिवसगतेन प्रवर्तमानेन वा त्रैराशिककर्मानुसारतो यल्लब्धं, तदयनगतमयनस्य तावत्प्रमाणं गतं वेदितव्यम्। एष करणगाथाऽक्षरार्थः ॥ ८ ॥

भावना त्वियम्-तत्र दक्षिणायने पदद्वयस्योपरि चत्वार्यङ्गुलानि वृद्धौ दृष्टानि। ततः कोऽपि पृच्छति-कियद् गतं दक्षिणायनस्य?। अत्र त्रैराशिककर्मावतारः; यदि चतुर्भिरङ्गुलस्यैकत्रिंशद्भागैरेका तिथिर्लभ्यते, ततश्चतुर्भिरङ्गुलैः कति तिथीर्लभामहे?। राशित्रयस्थापना-४। १। ४। अत्रान्त्यो राशिरङ्गुलरूप एकत्रिंशद्भागकरणार्थमेकत्रिंशता गुण्यते, जातं चतुर्विंशत्यधिकं शतम् १२४। तेन मध्यो राशिर्गुण्यते, जातं तदेव चतुर्विंशत्यधिकं शतम् १२४, 'एकेन गुणितं तदेव भवति' इति वचनात्। तस्य चतुष्करूपेणाऽऽदिराशिना भागो ह्रियते, लब्धा एकत्रिंशत्तिथयः। आगतं दक्षिणायने एकत्रिंशत्तमायां तिथौ चतुरङ्गुला पौरुष्यां वृद्धिरिति। तथा उत्तरायणे पदचतुष्टयादङ्गुलाष्टकं हीनं पौरुष्यामुपलभ्य कोऽपि पृच्छति-कियद् गतमुत्तरायणस्य?। अत्रापि त्रैराशिकम्। यदि चतुर्भिरङ्गुलस्यैकत्रिंशद्भागैरेका तिथिर्लभ्यते, ततोऽष्टभिरङ्गुलैर्हीनैः कति तिथयो लभ्यन्ते?। राशित्रयस्थापना-४।१।८। अत्रान्त्यो राशिरेकत्रिंशद्भागकरणार्थमेकत्रिंशता गुण्यते, जाते द्वे शतेऽष्टाचत्वारिंशदधिके २४८। ताभ्यां मध्यो राशिरेकरूपो गुण्यते, जाते ते एव द्वे शते अष्टाचत्वारिंशदधिके २४८। तयोराद्येन राशिना चतुष्करूपेण भागहरणम्, लब्धा द्वाषष्टिः ६२। आगतमुत्तरायणे द्वाषष्टितमायां तिथावष्टावङ्गुलानि पौरुष्यां हीनानीति।

"तंसि च णं मासंसि चउप्पए" इत्यादि। तस्मिन्नाषाढे मासे प्रकाश्यस्य वस्तुनो वृत्तस्य वृत्तया, समचतुरस्रसंस्थानसंस्थितस्य च समचतुरस्रसंस्थानसंस्थितया, न्यग्रोधपरिमण्डलसंस्थानस्य न्यग्रोधपरिमण्डलया। उपलक्षणमेतत्-शेषसंस्थानसंस्थितस्य प्रकाश्यस्य वस्तुनः शेषसंस्थितया। आषाढे हि मासे प्रायः सर्वस्यापि प्रकाश्यस्य वस्तुनो दिवसस्य चतुर्भागेऽतिक्रान्ते शेषे वा स्वप्रमाणा छाया भवति। निश्चयतः पुनराषाढमासस्य चरममण्डले, तत्रापि सर्वाभ्यन्तरे मण्डले वर्त्तमाने सूर्ये। ततो यत्प्रकाश्यं वस्तु यत्संस्थानं भवति, तस्य छायाऽपि तथासंस्थानोपजायते। तत्र

कं वृत्तस्य वृत्तया इत्यादि । एतदेवाऽऽह-स्वकायमनुरक्ति-ण्या-स्वस्य स्वकीयस्य छायानिबन्धनस्य वस्तुनः कायः शरीरं स्वकायः, तमनुरज्यते अनुकारं विदधातीत्येवंशीला स्वकायानुरक्तिणी। "संपूच्चानुरुधाऽऽङ्यमाङ्यसपरिस्संसुजपरिदेवि संज्वरपरिक्लिपपरिरटपरिवदपरिदहपरिमुहदुषदिषदुहः०" ॥ ३ । २ । १४२ ॥ (पाणि०) इत्यादिना णिनुण् प्रत्ययः। तया स्वकायमनुरक्तिण्या छायया सूर्योऽनु प्रतिदिवसं परावर्तते । एतदुक्तं भवति-आषाढस्य प्रथमादहोरात्रादारभ्य प्रतिदिवसमन्यान्यमण्डलसंक्रान्त्या तथा कथञ्चनापि सूर्यः परावर्तते, यथा सर्वस्यापि प्रकाश्यस्य वस्तुनो दिवसस्य चतुर्भागेऽतिक्रान्ते, शेषे वा स्वानुकारा स्वप्रमाणा च छाया भवतीति । शेषं सुगमम् । सू० प्र० १० पाहु० १ पाहु०। (नक्षत्राण्यधिकृत्य चन्द्रमार्गाः 'चंदमग्ग' शब्दे तृतीयभागे १०८५ पृष्ठे उक्ताः)

(१६) नक्षत्राणां देवताः-

ता कहं ते देवताणं आहिता ति वदेज्जा ?। ता एएसि णं अट्ठावीसाए णक्खत्ताणं अभिई णक्खत्ते किंदेवताए पण्णत्ते ?। ता बंभदेवताए पण्णत्ते। सवणे णक्खत्ते किंदेवताए पण्णत्ते ?। ता विण्हुदेवताए पण्णत्ते । धणिट्ठा णक्खत्ते किंदेवताए पण्णत्ते ?। ता वसुदेवताए पण्णत्ते । सयभिसया णक्खत्ते किंदेवताए पण्णत्ते ?। ता वरुणदेवताए पण्णत्ते । पुव्वापोट्ठवया णक्खत्ते किंदेवताए पण्णत्ते ?। अजदेवताए पण्णत्ते । उत्तरापोट्ठवया णक्खत्ते किंदेवताए पण्णत्ते ?। ता अहिवड्ढिदेवताए पण्णत्ते । एवं सव्वे वि पुच्छिज्जंति । रेवती पुस्सदेवयाए, अस्सिणी अस्सदेवयाए, भरणी जमदेवयाए, कत्तिया अग्गिदेवयाए, रोहिणी पयावइदेवयाए, संठाणा सोमदेवयाए, अद्दा रुद्ददेवयाए, पुणव्वसू अदितिदेवयाए, पुस्सो बहस्सइदेवयाए, अस्सेसा सप्पदेवयाए, महा पितिदेवयाए, पुव्वाफग्गुणी भगदेवयाए, उत्तराफग्गुणी अज्जमदेवयाए, हत्थे सवितिदेवयाए, चित्ता तट्ठदेवयाए, साती वाउदेवयाए, विसाहा इंदग्गिदेवयाए, अणुराधा मित्तदेवयाए, जेट्ठा इंददेवयाए, मूले णिरितिदेवयाए, पुव्वासाढा आउदेवयाए, उत्तरासाढा विस्सदेवयाए पण्णत्ता ॥

"ता कहं ते देवताणं" इत्यादि । 'ता' इति । पूर्ववत् । कथं केन प्रकारेण भगवन् ! त्वया नक्षत्राधिपतीनां देवतानामध्ययनानि, अधीयन्ते ज्ञायन्ते यैस्तान्यध्ययनानि, नामानीत्यर्थः । आख्यातानीति वदेत् ?। एवं प्रश्ने कृते भगवानाह-"ता एएसि णं" इत्यादि । 'ता' इति पूर्ववत् । एतेषामन्तरोदितानामष्टाविंशतेर्नक्षत्राणां मध्येऽभिजिन्नक्षत्रं किंदेवताकं किंनामधेयदेवताकं प्रज्ञप्तम् ?। भगवानाह-'ता' इत्यादि । 'ता' इति प्राग्वत् । ब्रह्मदेवताकं ब्रह्माभिधदेवताकं प्रज्ञप्तम् । श्रवणनक्षत्रं किंदेवताकं प्रज्ञप्तम् ?। भगवानाह-'ता' इत्यादि । विष्णुदेवताकं विष्णुनामदेवताकं प्रज्ञप्तम् । एवं शेषाण्यपि सूत्राणि भावनीयानि ।

देवताऽभिधानसंग्राहिकाश्लोकास्तिस्रः प्रवचनप्रसिद्धाः संग्रहणिगाथाः-

"बम्हा विण्हु य वसू, वरुणो सह अजो अहिवुद्धी य ।
पूसो आसो जमो अग्गी, पयावई सोमो रुद्दो अदिई बहस्सई चेव ।
नागो पिइ भग अज्जम, सविया तट्ठा य वाऊ य ॥ २ ॥
इंदग्गी मित्तो वि य, इंदो निरई य आउ विस्सो अ ।
नामाणि देवयाणं, हवंति रिक्खाण जहकमसो ॥ ३ ॥"
जं० ७ वक्ष० । सू० प्र० १० पाहु० १४ पाहु० ।

(२०) नक्षत्राणां गोत्राणि-

ता कहं ते गोत्ता आहिता ति वदेज्जा ?। ता एतेसि णं अट्ठावीसाए णक्खत्ताणं अभिई णक्खत्ते किंगोत्ते पण्णत्ते ?। ता मोग्गलायणसगोत्ते पण्णत्ते । सवणे णक्खत्ते किंगोत्ते पण्णत्ते ?। संखायणसगोत्ते पण्णत्ते । धणिट्ठा णक्खत्ते किंगोत्ते पण्णत्ते ?। अग्गतावसगोत्ते पण्णत्ते । सतभिसया णक्खत्ते किंगोत्ते पण्णत्ते ?। कण्हिणयणसगोत्ते पण्णत्ते । पुव्वापोट्ठवता णक्खत्ते किंगोत्ते पण्णत्ते ?। जाउकण्णीयसगोत्ते पण्णत्ते । उत्तरापोट्ठवता णक्खत्ते किंगोत्ते पण्णत्ते ?। धणंजयसगोत्ते पण्णत्ते । रेवती णक्खत्ते किंगोत्ते पण्णत्ते ?। पुस्सायणसगोत्ते पण्णत्ते । अस्सिणी णक्खत्ते किंगोत्ते पण्णत्ते ?। अस्सायणसगोत्ते पण्णत्ते । भरणी णक्खत्ते किंगोत्ते पण्णत्ते ?। भग्गवेससगोत्ते पण्णत्ते ?। कत्तिया णक्खत्ते किंगोत्ते पण्णत्ते ?। अग्गिवेससगोत्ते पण्णत्ते ?। रोहिणी णक्खत्ते किंगोत्ते पण्णत्ते ?। गोतमसगोत्ते पण्णत्ते । संठाणा णक्खत्ते किंगोत्ते पण्णत्ते ?। भारद्दायसगोत्ते पण्णत्ते । अद्दा णक्खत्ते किंगोत्ते पण्णत्ते ?। लोहिच्चायणसगोत्ते पण्णत्ते । पुणव्वसू णक्खत्ते किंगोत्ते पण्णत्ते ?। वासिट्ठसगोत्ते पण्णत्ते । पुस्से णक्खत्ते किंगोत्ते पण्णत्ते ?। ओमजायणसगोत्ते पण्णत्ते । अस्सेसा णक्खत्ते किंगोत्ते पण्णत्ते ?। मंडव्वायणसगोत्ते पण्णत्ते । महा णक्खत्ते किंगोत्ते पण्णत्ते ?। पिंगायणसगोत्ते पण्णत्ते ?। पुव्वाफग्गुणी णक्खत्ते किंगोत्ते पण्णत्ते ?। गोवल्लायणसगोत्ते पण्णत्ते । उत्तराफग्गुणी णक्खत्ते किंगोत्ते पण्णत्ते ?। कासवगोत्ते पण्णत्ते । हत्थे णक्खत्ते किंगोत्ते पण्णत्ते ?। कोसियगोत्ते पण्णत्ते । चित्ता णक्खत्ते किंगोत्ते पण्णत्ते ? । दच्चायणसगोत्ते पण्णत्ते । साई णक्खत्ते किंगोत्ते पण्णत्ते ?। चामरत्थगोत्ते पण्णत्ते । विसाहा णक्खत्ते किंगोत्ते पण्णत्ते ?। सुंगायणसगोत्ते पण्णत्ते । अणुराधा णक्खत्ते किंगोत्ते पण्णत्ते ?। गोलव्वायणसगोत्ते पण्णत्ते । जेट्ठा णक्खत्ते किंगोत्ते पण्णत्ते ?।

तिगिच्छायणसगोत्ते पण्णत्ते । मूले णक्खत्ते किंगोत्ते पण्णत्ते ? । कच्चायणसगोत्ते पण्णत्ते । पुव्वासाढा णक्खत्ते किंगोत्ते पण्णत्ते ? । वग्घावच्चसगोत्ते पण्णत्ते ।

इह नक्षत्राणां स्वरूपतो न गोत्रसंभवः, यत इदं गोत्रस्य स्वरूपं लोके प्रसिद्धिमुपागमत्-प्रकाशकाऽऽद्यपुरुषाभिधानस्तदपत्यसन्तानो गर्गादिप्रभृतो गोत्रमिति । न चैवंस्वरूपं नक्षत्राणां गोत्रं संभवति, तेषामौपपातिकत्वात् । ततश्चेत्थं गोत्रसंभवो ऽवसेयः-यस्मिन्नक्षत्रे शुभैरशुभैर्वा ग्रहैः समानं यस्य गोत्रस्य यथाक्रमं शुभमशुभं वा भवति, तत्तस्य गोत्रम्, ततः प्रश्नोपपत्तिः । ' ता ' इति पूर्ववत् । कथं त्वया नक्षत्राणां गोत्राणि आख्यातानीति वदेत् ? । भगवानाह-" ता एएसि णं " इत्यादि । 'ता' इति पूर्ववत् । एतेषामष्टाविंशतेर्नक्षत्राणां मध्येऽभिजिदभिधानं नक्षत्रं मौद्गल्यायनसगोत्रं मौद्गल्यायनेन सह गोत्रेण वर्त्तते वर्त्तत्था । श्रवणनक्षत्रं सङ्कायनसगोत्रम् । एवं शेषाण्यपि सूत्राणि भावनीयानि ।

क्रमेण गोत्रसंग्राहिकाश्चेमा जम्बूद्वीपप्रज्ञप्तिसत्काश्चतस्रः संग्रहणिगाथाः-

" मोग्गल्लायण संखा-यणे य तह अग्गताव कासिसे ।
तत्तो य जातुकण्णे, धणंजए चेव बोधव्वे ॥ १ ॥
पुस्सायणे अस्साय-णे, य भग्गवेसे य अग्गिवेसे य ।
गोयम भारद्दाए, दोहिवे चेव वासिट्ठे ॥ २ ॥
ओमज्जायणे मंग-ल्लायण पिंगायणे य गोवल्ले ।
कासव कोसिय दब्भा-यण चामरत्था य सुंगा य ॥ ३ ॥
गोलव्वायण तिगिछा-यणे य कच्चायणे हवइ मूले ।
तत्तो य वग्घियायणे, वग्घावच्चे य गोत्ताइं ॥ ४ ॥ "

(जं० ७ वक्ष०) सू० प्र० १० पाहु० १६ पाहु० । चं० प्र० ।

(२१) संप्रति भोजनानि वक्तव्यानि, ततस्तद्विषयं प्रश्नसूत्रमाह-

ता कहं ते जोयणा आहिता ति वदेज्जा ? । ता एतेसि णं अट्ठावीसाए णक्खत्ताणं कत्तियाहिं दधिणा भोच्चा कज्जं साधेति ? । रोहिणीहिं वसभमंसं भोच्चा कज्जं साहेति । संठाणाहिं मिगमंसं जोच्चा कज्जं साहेति । अद्दाहिं णवणीतेण जोच्चा कज्जं साहेति । पुणव्वसुणा घतेणं भोच्चा कज्जं साधेति । पुस्सेणं खीरेणं जोच्चा कज्जं साधेति । अस्सेसाहिं दीवगमंसं जोच्चा कज्जं साधेति । महाहिं कसोरं भोच्चा कज्जं साधेति । पुव्वाफग्गुणीहिं मेढगमंसं जोच्चा कज्जं साधेति । उत्तराहिं फग्गुणीहिं णखीमंसं भोच्चा कज्जं साधेति । हत्थेणं वच्चाणीयपत्तेणं भोच्चा कज्जं साधेति । चित्ताहिं मुग्गसूवेणं जोच्चा कज्जं साधेति । सातिणा फलाइं जोच्चा कज्जं साधेति । विसाहाहिं आसित्तिआ जोच्चा कज्जं साधेति । अणुराहाहिं मासाकूरं भोच्चा कज्जं साधेति । जेट्ठाहिं कोलाडिएणं जोच्चा कज्जं साधेति । मूलेण मूलगसागेणं भोच्चा कज्जं साधेति । पुव्वाहिं आसाढाहिं आमलगसारिएण जोच्चा कज्जं साधेति । उत्तराहिं आसाढाहिं विल्लेहिं भोच्चा कज्जं साधेति । अभिइणा पुप्फेहिं भोच्चा कज्जं साधेति । सवणेणं खीरेणं भोच्चा कज्जं साधेति । धणिट्ठाहिं जूसेणं जोच्चा कज्जं साधेति । सयभिसयाए तुवरीओ जोच्चा कज्जं साधेति । पुव्वाहिं पोट्ठवयाहिं कारिट्ठएहिं भोच्चा कज्जं साधेति । उत्तराहिं पोट्ठवयाहिं वराहमंसं भोच्चा कज्जं साधेति । रेवतीहिं जलयरमंसं भोच्चा कज्जं साधेति । अस्सिणीहिं तित्तिरमंसं जोच्चा कज्जं साधेति । भरणीहिं तिलतंदुलकं भोच्चा कज्जं साधेति ।

ता कहं ते भोयणा इत्यादि । 'ता' इति पूर्ववत् । कथं केन प्रकारेण नक्षत्रविषयाणि जोजनानि आख्यातानीति वदेत् ? । भगवानाह-"ता एएसि णं" इत्यादि । 'ता' इति पूर्ववत् । एतेषामनन्तरोदितानामष्टाविंशतेर्नक्षत्राणां मध्ये कृत्तिकाभिः पुमान् कार्यं साधयति दध्ना संमिश्रमोदनं भुक्त्वा । किमुक्तं भवति ?-कृत्तिकासु प्रारब्धं कार्यं दधिना भुक्ते प्रायो निर्विघ्नं सिद्धिमासादयतीति भावः । एवं शेषेष्वपि सूत्रेषु भावना द्रष्टव्या । सू० प्र० १० पाहु० १७ पाहु० । चं० प्र० ।

(२२) किं नक्षत्रं किं द्वारिकम-

ता कहं ते जोतिसस्स दारा आहिता ति वदेज्जा ? । तत्थ खलु इमाओ पंच पमिवत्तीओ पण्णत्ताओ । तत्थेगे एवमाहंसु-ता कत्तियादिया सत्त णक्खत्ता पुव्वदारिया पण्णत्ता, एगे एवमाहंसु । १ । एगे पुण एवमाहंसु-ता अणुराहादिया सत्त णक्खत्ता पुव्वदारिया पण्णत्ता, एगे एवमाहंसु । २ । एगे पुण एवमाहंसु-ता धणिट्ठादिया सत्त णक्खत्ता पुव्वदारिया पण्णत्ता, एगे एवमाहंसु । ३ । एगे पुण एवमाहंसु-अस्सिणीयादिया सत्त णक्खत्ता पुव्वदारिया पण्णत्ता, एगे एवमाहंसु । ४ । एगे पुण एवमाहंसु-ता भरणियादिया सत्त णक्खत्ता पुव्वदारिया पण्णत्ता । ५ । तत्थ जे ते एवमाहंसु-ता कत्तियादिया सत्त णक्खत्ता पुव्वदारिया पण्णत्ता, ते एवमाहंसु-तं जहा-कत्तिया, रोहिणी, संठाणा, अद्दा, पुणव्वसू, पुस्सो, अस्सेसा । महादिया सत्त णक्खत्ता दाहिणदारिया पण्णत्ता । तं जहा-महा, पुव्वाफग्गुणी, उत्तराफग्गुणी, हत्थो, चित्ता, साई, विसाहा । अणुराधादिया सत्त णक्खत्ता पच्चिमदारिया पण्णत्ता । तं जहा-अणुराधा, जेट्ठा, मूले, पुव्वासाढा, उत्तरासाढा, अभिई, सवणो । धणिट्ठादिया सत्त णक्खत्ता उत्तरदारिया पण्णत्ता । तं जहा-धणिट्ठा, सतभिसया, पुव्वापोट्ठवता, उत्तरापोट्ठवता, रेवती, अस्सिणी, भरणी । तत्थ जे ते एवमाहंसु-ता महादिया सत्त णक्खत्ता पुव्वदारिया पण्णत्ता, ते एवमाहंसु-तं जहा-पुव्वाफग्गुणी, उत्तराफग्गुणी, हत्थो, चित्ता, साती, विसाहा । अणुराधादिया सत्त णक्खत्ता दाहिणदारिया पण्णत्ता ।

तं जहा-अणुराधा, जेट्ठा, मूले, पुव्वासाढा, उत्तरासाढा, अभिई, सवणो। धणिट्ठाऽऽदिया सत्त णक्खत्ता पच्छिमदारिया पण्णत्ता। तं जहा-धणिट्ठा, सतभिसया, पुव्वाभद्दवया, उत्तराभद्दवया, रेवती, अस्सिणी, भरणी। कत्तियाऽऽदिया सत्त णक्खत्ता उत्तरदारिया पण्णत्ता। तं जहा-कत्तिया, रोहिणी, संठाणा, अद्दा, पुणव्वसू, पुस्सो, अस्सेसा। तत्थ जे ते एवमाहंसु-ता धणिट्ठाऽऽदिया सत्त णक्खत्ता पुव्वदारिया पण्णत्ता, ते एवमाहंसु-तं जहा-धणिट्ठा, सतभिसया, पुव्वाभद्दवया, उत्तराभद्दवया, रेवती, अस्सिणी, भरणी। कत्तियाऽऽदिया सत्त णक्खत्ता दाहिणदारिया पण्णत्ता। तं जहा-कत्तिया, रोहिणी, संठाणा, अद्दा, पुणव्वसू, अस्सेसा। महाऽऽदिया सत्त णक्खत्ता पच्छिमदारिया पण्णत्ता। तं जहा-महा, पुव्वाफग्गुणी, उत्तराफग्गुणी, हत्थो, चित्ता, साती, विसाहा। अणुराधाऽऽदिया सत्त णक्खत्ता उत्तरदारिया पण्णत्ता। तं जहा-अणुराधा, जेट्ठा, मूले, पुव्वासाढा, उत्तरासाढा, अभिई, सवणो। तत्थ जे ते एवमाहंसु-ता अस्सिणीआदिया सत्त णक्खत्ता पुव्वदारिया पण्णत्ता, ते एवमाहंसु-तं जहा-अस्सिणी, भरणी, कत्तिया, रोहिणी, संठाणा, अद्दा, पुणव्वसू। पुस्साऽऽदिया सत्त णक्खत्ता दाहिणदारिया पण्णत्ता। तं जहा-पुस्सा, अस्सेसा, महा, पुव्वाफग्गुणी, उत्तराफग्गुणी, हत्थो, चित्ता। सातीआदिया सत्त णक्खत्ता पच्छिमदारिया पण्णत्ता। तं जहा-साती, विसाहा, अणुराहा, जेट्ठा, मूलो, पुव्वासाढा, उत्तरासाढा। अभिईआदिया सत्त णक्खत्ता उत्तरदारिया पण्णत्ता। तं जहा-अभिई, सवणो, धणिट्ठा, सतभिसया, पुव्वाभद्दवया, उत्तराभद्दवया, रेवती। तत्थ जे ते एवमाहंसु-ता जरणीआदिया सत्त णक्खत्ता पुव्वदारिया पण्णत्ता, ते एवमाहंसु-तं जहा-भरणी, कत्तिया, रोहिणी, संठाणा, अद्दा, पुणव्वसू, पुस्सो। अस्सेसाऽऽदिया सत्त णक्खत्ता दाहिणदारिया पण्णत्ता। तं जहा-अस्सेसा, महा, पुव्वाफग्गुणी, उत्तराफग्गुणी, हत्थो, चित्ता, साई। विसाहाऽऽदिया सत्त णक्खत्ता पच्छिमदारिया पण्णत्ता। तं जहा-विसाहा, अणुराहा, जेट्ठा, मूलो, पुव्वासाढा, उत्तरासाढा, अभिई। सवणाऽऽदिया सत्त णक्खत्ता उत्तरदारिया पण्णत्ता। तं जहा-सवणो, धणिट्ठा, सतभिसया, पुव्वाभद्दवया, उत्तराभद्दवया, रेवती, अस्सिणी। एते एवमाहंसु। वयं पुण एवं वदामो-ता अभिईआदिया सत्त णक्खत्ता पुव्वदारिया पण्णत्ता। तं जहा-अभिई, सवणो, धणिट्ठा, सतभिसया, पुव्वाभद्दवया, उत्तराभद्दवया, रेवती। अस्सिणीआदिया सत्त णक्खत्ता दाहिणदारिया पण्णत्ता। तं जहा-अस्सिणी, भरणी, कत्तिया, रोहिणी, संठाणा, अद्दा, पुणव्वसू। पुस्साऽऽदिया सत्त णक्खत्ता पच्छिमदारिया पण्णत्ता। तं जहा-पुस्सा, अस्सेसा, महा, पुव्वाफग्गुणी, उत्तराफग्गुणी, हत्थो, चित्ता। सातीआदिया सत्त णक्खत्ता उत्तरदारिया पण्णत्ता। तं जहा-साती, विसाहा, अणुराहा, जेट्ठा, मूला, पुव्वासाढा, उत्तरासाढा॥

"ता कहं ते जोइसदारा" इत्यादि। 'ता' इति पूर्ववत्। कथं केन प्रकारेण, केन क्रमेणेत्यर्थः?। ज्योतिषो नक्षत्रचक्रस्य, द्वाराणि आख्यातानीति वदेत्?। एवमुक्ते भगवानेतद्विषये यावत्यः परतीर्थिकानां प्रतिपत्तयः, तावतीरुपदर्शयति-(तत्थेत्यादि) तत्र द्वारविचारविषये खल्विमा वक्ष्यमाणस्वरूपाः पञ्च परतीर्थिकानां प्रतिपत्तयः प्रज्ञप्ताः। ता एव क्रमेणाऽऽह-"तत्थेगे" इत्यादि। तत्र तेषां पञ्चानां परतीर्थिकसंघातानां मध्ये एके एवमाहुः-कृत्तिकाऽऽदीनि सप्त नक्षत्राणि पूर्वद्वारकाणि प्रज्ञप्तानि। इह येषु नक्षत्रेषु पूर्वस्यां दिशि गच्छतः प्रायः शुभमुपजायते, तानि पूर्वद्वारकाणि। एवं दक्षिणद्वारकाऽऽदीन्यपि वक्ष्यमाणानि भावनीयानि। अत्रैवोपसंहारमाह-"एगे एवमाहंसु"। एके पुनरेवमाहुः-अनुराधाऽऽदीनि सप्त नक्षत्राणि पूर्वद्वारकाणि प्रज्ञप्तानि। अत्राप्युपसंहारमाह-"एगे एवमाहंसु"। एवं शेषाण्युपसंहारवाक्यानि योजनीयानि। एके पुनरेवमाहुः-धनिष्ठाऽऽदीनि सप्त नक्षत्राणि पूर्वद्वारकाणि। एके पुनरेवमाहुः-अश्विन्यादीनि सप्त नक्षत्राणि पूर्वद्वारकाणि प्रज्ञप्तानि। एके पुनरेवमाहुः-जरण्यादीनि सप्त नक्षत्राणि पूर्वद्वारकाणि। संप्रत्येतेषामेव पञ्चानामपि मतानां भावनिकामाह-"तत्थ जे ते एवमाहंसु" इत्यादि सुगमम्। भगवान् स्वमतमाह-"वयं पुण" इत्यादि पाठसिद्धम्। सू० प्र० १० पाहु० २१ पाहु०।

(२३) नक्षत्रविचयः-

ता कहं ते णक्खत्तविचए आहिते ति वदेज्जा?। ता अयं णं जंबुद्दीवे दीवे०जाव परिक्खेवेणं। ता जंबुद्दीवे णं दीवे दो चंदा पजासेंसु वा, पजासेंति वा, पजासिस्संति वा। दो सूरिया तविंसु वा, तवेंति वा, तविस्संति वा। छप्पण्णं णक्खत्ता जोयं जोएंसु वा, जोयंति वा, जोइस्संति वा। तं जहा-दो अभिई, दो सवणा, दो धणिट्ठा, दो सतभिसया, दो पुव्वापोट्ठवया, दो उत्तरापोट्ठवया, दो रेवती, दो अस्सिणी, दो भरणी, दो कत्तिया, दो रोहिणी, दो संठाणा, दो अद्दा, दो पुणव्वसू, दो पुस्सा, दो अस्सेसा, दो महा, दो पुव्वाफग्गुणी, दो उत्तराफग्गुणी, दो हत्था, दो चित्ता, दो साई, दो विसाहा, दो अणुराधा, दो जेट्ठा, दो मूला, दो पुव्वासाढा, दो उत्तरासाढा। ता एएसि णं छप्पण्णाए णक्खत्ताणं अत्थि णक्खत्ता, जे णं णव मुहुत्ते, सत्तावीसं

च सत्तट्ठिभागे मुहुत्तस्स चंदेण सद्धिं जोयं जोएंति। अत्थि णक्खत्ता,जे णं पण्णरस मुहुत्ते चंदेण सद्धिं जोयं जोएंति। अत्थि णक्खत्ता,जे णं तीसं मुहुत्ते चंदेण सद्धिं जोयं जोएंति। अत्थि णक्खत्ता, जे णं पणयाळीसं मुहुत्ते चंदेण सद्धिं जोयं जोएंति। ता एतेसि णं छप्पण्णाए णक्खत्ताणं कतरे णक्खत्ते, जे णं णव मुहुत्ते सत्तावीसं च सत्तट्ठिभागे मुहुत्तस्स चंदेण सद्धिं जोयं जोएंति?। कतरे णक्खत्ता, जे णं पण्णरस मुहुत्ते चंदेण सद्धिं जोयं जोएंति?। कतरे णक्खत्ता, जे णं तीसं मुहुत्ते चंदेण सद्धिं जोयं जोएंति?। कतरे णक्खत्ता, जे णं पणतालीसं मुहुत्ते चंदेण सद्धिं जोयं जोएंति?। ता एतेसि णं छप्पण्णाए णक्खत्ताणं, तत्थ जे ते णक्खत्ता, जे णं णव मुहुत्ते सत्तावीसं च सत्तट्ठिभागे मुहुत्तस्स चंदेण सद्धिं जोयं जोएंति । ते णं दो अभिई । तत्थ जे ते णक्खत्ता, जे णं पण्णरस मुहुत्ते चंदेण सद्धिं जोयं जोएंति। ते णं बारस । तं जहा–दो सतभिसया, दो भरणी, दो अद्दा,दो अस्सेसा,दो साती,दो जेट्ठा। तत्थ जे ते णक्खत्ता, जे णं तीसं मुहुत्ते चंदेण सद्धिं जोयं जोएंति । ते णं तीसं । तं जहा–दो सवणा, दो धणिट्ठा, दो पुव्वाभद्दवया, दो रेवती, दो अस्सिणी, दो कत्तिया, दो संठाणा, दो पुस्सा, दो महा, दो पुव्वाफग्गुणी, दो हत्था, दो चित्ता, दो अणुराधा, दो मूला, दो पुव्वासाढा। तत्थ जे ते णक्खत्ता, जे णं पणयाळीसं मुहुत्ते चंदेण सद्धिं जोयं जोएंति । ते णं बारस । तं जहा–दो उत्तरापोट्ठवया, दो रोहिणी, दो पुणव्वसू,दो उत्तराफग्गुणी, दो विसाहा, दो उत्तरासाढा ॥ ता एतेसि णं छप्पण्णाए णक्खत्ताणं अत्थि णक्खत्ता, जे णं चत्तारि अहोरत्ते छच्च मुहुत्ते सूरेण सद्धिं जोयं जोएंति। अत्थि णक्खत्ता, जे णं छ अहोरत्ते एक्कवीसं च मुहुत्ते सूरेण सद्धिं जोयं जोएंति । अत्थि णक्खत्ता, जे णं तेरस अहोरत्ते बारस मुहुत्ते सूरेण सद्धिं जोयं जोएंति। अत्थि णक्खत्ता, जे णं वीसं अहोरत्ते तिण्णि य मुहुत्ते सूरेण सद्धिं जोयं जोएंति। ता एतेसि णं छप्पण्णाए णक्खत्ताणं कयरे णक्खत्ता, जे णं तं चेव उच्चारेयव्वं ?। ता एतेसि णं छप्पण्णाए णक्खत्ताणं, तत्थ जे ते णक्खत्ता, जे णं चत्तारि अहोरत्ते छच्च मुहुत्ते सूरेण सद्धिं जोयं जोएंति। ते णं दो अभिई। तत्थ जे ते णक्खत्ता, जे णं छ अहोरत्ते एक्कवीसं च मुहुत्ते सूरेण सद्धिं जोयं जोएंति । ते णं बारस । तं जहा–दो सतभिसया, दो भरणी, दो अद्दा, दो अस्सेसा, दो साती, दो जेट्ठा । तत्थ जे ते णक्खत्ता, जे णं तेरस अहोरत्ते बारस मुहुत्ते सूरेण सद्धिं जोयं जोएंति । ते णं तीसं । तं जहा–दो सवणा० जाव दो पुव्वासाढा । तत्थ जे ते णक्खत्ता, जे णं वीसं अहोरत्ते तिण्णि य मुहुत्ते सूरेण सद्धिं जोयं जोएंति । ते णं बारस । तं जहा–दो उत्तरापोट्ठवया० जाव दो उत्तरासाढा ।

"ता कहं ते" इत्यादि । 'ता' इति पूर्ववत् । कथं केन प्रकारेण (णक्खत्तविचए त्ति) विपूर्वचिञ् स्वभावात् स्वरूपनिर्णये वर्तते । तथा चोक्तमन्यत्र-" आप्तवचनं प्रवचनं,ज्ञाता विचयस्तदर्थनिर्णयनम् । " तत्र विचयनं विचयः, नक्षत्राणां विचयो नक्षत्रविचयः-नक्षत्राणां स्वरूपनिर्णयः, आख्यात इति वदेत ? । भगवानाह-" ता अयं णं " इत्यादि । इदं जम्बूद्वीपप्राकृतं पूर्ववत् परिपूर्णं स्थगं कृत्वा परिभावनीयम् । " ता जंबुद्दीवे णं " इत्यादि । तत्र जम्बूद्वीपे, णमिति वाक्यालङ्कारे । द्वीपे द्वौ चन्द्रौ प्रभासितवन्तौ, प्रभासेते, प्रभासिष्येते । द्वौ सूर्यौ तापितवन्तौ, तापयतः, तापयिष्यतः । षट्पञ्चाशन्नक्षत्राणि चन्द्राऽऽदिभिः सह योगमयुञ्जन्, युञ्जन्ति, योक्ष्यन्ति । तत्र तान्येव षट्पञ्चाशन्नक्षत्राणि दर्शयति-(तं जहा) इत्यादि सुगमम् । इह भरतक्षेत्रे प्रतिदिवसमष्टाविंशतिरेव नक्षत्राणि चारं चरन्ति । ततः पूर्वमस्य दशमस्य प्राभृतस्य द्वितीये प्राभृतप्राभृतेऽष्टाविंशतेर्नक्षत्राणां चन्द्रमसा सूर्येण च सह योगपरिमाणं चिन्तितम् । संप्रति पुनः सकलमेव जम्बूद्वीपमधिकृत्य नक्षत्राणि चिन्त्यमानानि वर्तन्ते, तानि च सर्वसंख्यया षट्पञ्चाशत् । ततस्तेषां सर्वेषामपि चन्द्रसूर्याभ्यां सह योगमधिकृत्य मुहूर्तपरिमाणं चिचिन्तयिषुरिदमाह-" ता एएसि णं " इत्यादि । एतच्च प्रागुक्तद्वितीयप्राभृतप्राभृतवत्परिभावनीयम् । तदेवं कालमधिकृत्य चन्द्रमसा सूर्येण च सह योगपरिमाणं चिन्तितम् ।

संप्रति क्षेत्रमधिकृत्य तं चिचिन्तयिषुः प्रथमतः सीमाविष्कम्भविषयं प्रश्नसूत्रमाह-

ता कहं ते सीमाविक्खंभो आहिते ति वदेज्जा ? । ता एतेसि णं छप्पण्णाए णक्खत्ताणं अत्थि णक्खत्ता,जेसि णं उसया तीसा सत्तट्ठिभागतीसतिभागाणं सीमाविक्खंभो । अत्थि णक्खत्ता, जेसि णं सहस्सं पंचोत्तरं सत्तट्ठिभागतीसतिभागाणं सीमाविक्खंभो । अत्थि णक्खत्ता, जेसि णं दो सहस्सा दसुत्तरा सत्तट्ठिभागतीसतिभागाणं सीमाविक्खंभो। अत्थि णक्खत्ता, जेसि णं तिण्णि सहस्सा पण्णरसुत्तरा सत्तट्ठिभागतीसतिभागाणं सीमाविक्खंभो । ता एतेसि णं छप्पण्णाए णक्खत्ताणं कतरे णक्खत्ता, जेसि णं उसया तीसा० तं चेव उच्चारेयव्वं ?। ता एतेसि णं छप्पण्णाए णक्खत्ताणं तत्थ जे ते णक्खत्ता, जेसि णं उसया तीसा सत्तट्ठिभागतीसतिभागाणं सीमाविक्खंभो। ते णं दो अभिई। तत्थ जे ते णक्खत्ता, जेसि णं सहस्सं पंचोत्तरं सत्तट्ठिभागतीसतिभागाणं सीमाविक्खंभो। ते णं बारस। तं जहा–दो सतभिसया० जाव दो जेट्ठा। तत्थ जे ते णक्खत्ता, जेसि णं दो सहस्सा दसुत्तरा सत्तट्ठिभागतीसतिभागाणं सीमाविक्खंभो। ते णं तीसं। तं जहा–दो सवणा० जाव दो पुव्वासाढा । तत्थ जे ते णक्खत्ता, जेसि णं ति–

णिए सहस्सा पणरसुत्तरा सत्तट्ठिभागतीसतिभागाणं सीमाविक्खंभो । ते णं बारस । तं जहा-दो उत्तरापोट्ठवता० जाव दो उत्तरासाढा ।

"ता कहं ते" इत्यादि । 'ता' इति पूर्ववत् । कथं केन प्रकारेण, कियत्या विभागसंख्यया इत्यर्थः । भगवन् ! त्वया सीमाविष्कम्भ आख्यात इति वदेत् ? । भगवानाह-"ता एतेसि णं" इत्यादि । इहाष्टाविंशत्या नक्षत्रैः स्वगत्या स्वकालपरिमाणेन क्रमशो यावत् क्षेत्रं बुद्ध्या व्याप्यमानं संभाव्यते, तावदेकमर्द्धमण्डलमुपकल्प्यते, एतावत्प्रमाणमेव द्वितीयमर्द्धमण्डलम्, इत्येवंप्रमाणं बुद्धिपरिकल्पितमेकं परिपूर्णमण्डलम् । तस्य मण्डलस्य "मेरुसंसयसहस्सेण अट्ठाणउतीए सएहिं छेत्ता इक्केस णक्खत्तक्खेत्तपरिभागे णक्खत्तविचए पाहुडे आहिए त्ति बेमि" इति वक्ष्यमाणवचनात् अष्टानवतिशताधिकशतसहस्रविभागैर्विभज्यते । किमेवं संख्यानां भागानां कल्पते निबन्धमिति चेत् ? । उच्यते-इह त्रिविधानि नक्षत्राणि । तद्यथा-समक्षेत्राणि, अर्द्धक्षेत्राणि, द्व्यर्धक्षेत्राणि च । तत्र यावत्प्रमाणं क्षेत्रमहोरात्रेण गम्यते नक्षत्रैः, तावत्क्षेत्रप्रमाणं चन्द्रेण सह योगमुपयान्ति गच्छन्ति, तानि समक्षेत्राणि । तानि पञ्चदश । तद्यथा-अश्वयुजौ, भरणिष्ठा, पूर्वाभाद्रपदा, रेवती, अश्विनी, कृत्तिका, मृगशिरः, पुष्यः, मघा, पूर्वाफाल्गुनी, हस्तः, चित्रा, अनुराधा, मूलम्, पूर्वाषाढा इति । तथा यानि अहोरात्रप्रमितस्य क्षेत्रस्यार्द्धं च चन्द्रेण सह योगमनुभवन्ति, तान्यर्द्धक्षेत्राणि, तानि च षट् । तद्यथा-शतभिषक्, भरणी, आर्द्रा, आश्लेषा, स्वातिर्ज्येष्ठेति । तथा द्वितीयमर्द्धं यस्य तद् द्व्यर्द्धं, सार्द्धमित्यर्थः । द्व्यर्द्धमर्द्धाधिकं क्षेत्रमहोरात्रप्रमितं चन्द्रेण योगयोग्यं येषां तानि द्व्यर्द्धक्षेत्राणि । तान्यपि षट् । तद्यथा-उत्तराभाद्रपदा, उत्तराफाल्गुनी, उत्तराषाढा, रोहिणी, पुनर्वसुः, विशाखा चेति । तत्र सीमापरिमाणचिन्तायामहोरात्रः सप्तषष्टिभागीक्रियते, इति समक्षेत्राणां क्षेत्रं प्रत्येकं सप्तषष्टिभागाः परिकल्प्यन्ते । अर्द्धक्षेत्राणां त्रयस्त्रिंशदर्द्धं च द्व्यर्द्धक्षेत्राणां शतमेकमर्द्धं च अभिजिन्नक्षत्रस्यैकविंशतिसप्तषष्टिभागाः । समक्षेत्राणि च नक्षत्राणि पञ्चदशेति सप्तषष्टेः पञ्चदशभिर्गुण्यते, जातं सहस्रं पञ्चोत्तरम् १००५ । अर्द्धक्षेत्राणि षडिति । ततः सार्द्धा त्रयस्त्रिंशत्त्वमभिर्गुण्यते, जाते द्वे शते एकोत्तरे २०१ । द्व्यर्द्धक्षेत्राण्यपि षट् । ततः शतमेकमर्द्धं च षड्भिस्ताड्यते, जातानि षट् शतानि त्र्युत्तराणि ६०३ । अभिजिन्नक्षत्रस्य एकविंशतिः, सर्वसंख्यया जातान्यष्टादश शतानि त्रिंशदधिकानि १८३० । एतावद्भागपरिमाणमेकमर्द्धमण्डलम्, एतावद्भागमेव द्वितीयमिति त्रिंशदधिकान्यष्टादशशतानि ह्रस्व्यां गुण्यन्ते, जातानि षट्त्रिंशच्छतानि षष्ट्यधिकानि ३६६० । एकैकस्मिन्नहोरात्रे किल त्रिंशन्मुहूर्ता इति प्रत्येकमेतेषु षष्ट्यधिकषट्त्रिंशच्छतसंख्येषु भागेषु त्रिंशद्भागकल्पनायां त्रिंशता गुण्यन्ते, जातमेकं शतसहस्रमष्टानवतिशतानि । १०९८०० । तत इत्थं मण्डलस्य भागान् परिकल्प्य भगवान् प्रतिवचनं ददाति-"ता" इति । तत्र एतेषां षट्पञ्चाशतो नक्षत्राणां मध्ये, अस्तीति निपातत्वादार्षत्वाद्वा स्तः, ते नक्षत्रे, ययोः प्रत्येकं षट् शतानि त्रिंशानि त्रिंशदधिकानि, सप्तषष्टित्रिंशद्भागानां सीमाविष्कम्भः सीमापरिमाणम् । तथाऽस्तीति सन्ति तानि नक्षत्राणि, येषां प्रत्येकं पञ्चोत्तरं सहस्रं सप्तषष्टित्रिंशद्भागानां सीमाविष्कम्भः । सन्ति तानि नक्षत्राणि, येषां प्रत्येकं द्वे सहस्रे दशोत्तरे सप्तषष्टित्रिंशद्भागानां सीमाविष्कम्भः । सन्ति तानि नक्षत्राणि, येषां प्रत्येकं त्रीणि सहस्राणि पञ्चदशोत्तराणि, सप्तषष्टित्रिंशद्भागानां सीमाविष्कम्भः । एवं भगवता सामान्येनोक्ते भगवान् गौतमो विशेषावगमनिमित्तं भूयः प्रश्नयति-"ता एतेसि णं" इत्यादि । तत्र एतेषां षट्पञ्चाशतो नक्षत्राणां मध्ये कतराणि तानि नक्षत्राणि, येषां षट्शतानि त्रिंशानि सप्तषष्टित्रिंशद्भागानां सीमाविष्कम्भः ? । (तं चेव उच्चारेयव्वं ति) तदेवानन्तरोक्तमुक्तप्रकारेणोच्चारयितव्यम् । तद्यथा-"कयरे खलु णक्खत्ता, जेसिं सहस्सं पंचोत्तरं सत्तट्ठिभागतीसइभागाणं सीमाविक्खंभो ? । कयरे णक्खत्ता, जेसिं दो सहस्सा दसुत्तरा सत्तट्ठिभागतीसइभागाणं सीमाविक्खंभो" इति । चरमं तु सूत्रं साक्षादाह-"कयरे णक्खत्ता" इत्यादि । एतानि त्रीणि सूत्राणि सुगमानि । भगवानाह-"ता एतेसि णं" इत्यादि । तत्र एतेषां षट्पञ्चाशतो नक्षत्राणां मध्ये यानि तानि नक्षत्राणि, येषां षट्शतानि त्रिंशानि सप्तषष्टित्रिंशद्भागानां सीमाविष्कम्भः । ते द्वे अभिजिन्नक्षत्रे । कथमेतदवसीयते ?, इति चेत् । उच्यते-इह एकैकस्याभिजितो नक्षत्रस्य सप्तषष्टिखण्डीकृतस्याहोरात्रगम्यस्य क्षेत्रस्य सत्का एकविंशतिर्भागाश्चन्द्रयोगयोग्याः, एकैकस्मिंश्च भागे त्रिंशद्भागपरिकल्पनादेकविंशतिस्त्रिंशता गुण्यते, जातानि षट्शतानि त्रिंशदधिकानि ६३० । तथा तत्र तेषां षट्पञ्चाशतो नक्षत्राणां मध्ये यानि तानि नक्षत्राणि, येषां प्रत्येकं पञ्चोत्तरं सहस्रं सप्तषष्टित्रिंशद्भागानां सीमाविष्कम्भः । तानि द्वादश । तद्यथा-द्वे शतभिषजौ (०जाव दो जेट्ठाओ त्ति) यावच्छब्दकरणादेवं द्रष्टव्यम्-"दो भरणीओ, दो अद्दाओ, दो अस्सेसाओ, दो साईओ, दो जेट्ठाओ" इति । तथाहि-एतेषां द्वादशानामपि नक्षत्राणां प्रत्येकं सप्तषष्टिखण्डीकृतस्याहोरात्रगम्यस्य क्षेत्रस्य सत्काः सार्द्धास्त्रयस्त्रिंशद्भागाश्चन्द्रयोगयोग्याः, ततस्त्रयस्त्रिंशत् त्रिंशता गुण्यते, जातानि नवशतानि नवत्यधिकानि ९९० । अर्द्धस्यापि च त्रिंशता गुणयित्वा द्वाभ्यां भागे हृते लब्धाः पञ्चदश १५, सर्वसंख्यया जातं पञ्चोत्तरं सहस्रम् १००५ । तथा तत्र तेषां षट्पञ्चाशतो नक्षत्राणां मध्ये यानि तानि नक्षत्राणि, येषां द्वे सहस्रे दशोत्तरे सप्तषष्टिभागानां त्रिंशद्भागानां सीमाविष्कम्भः । तानि त्रिंशत् । तद्यथा-द्वौ अश्वणौ (०जाव दो पुव्वासाढा इति) यावच्छब्दादेवं पाठो द्रष्टव्यः-"दो धणिट्ठा, दो पुव्वाभद्दवया, दो रेवई, दो अस्सिणी, दो कत्तिया, दो मिगसिरा, दो पुस्सा, दो मघा, दो पुव्वाफग्गुणीओ, दो हत्था, दो चित्ता, दो अणुराहा, दो मूला, दो पुव्वासाढा" इति । तथाहि-एतानि नक्षत्राणि समक्षेत्राणि । तत एतेषां सप्तषष्टिखण्डीकृतस्याहोरात्रगम्यस्य क्षेत्रस्य सत्काः परिपूर्णाः सप्तषष्टिभागाः प्रत्येकं चन्द्रयोगयोग्याः । तेन सप्तषष्टिस्त्रिंशता गुण्यते, जाते द्वे सहस्रे दशोत्तरे इति २०१० । तथा तत्र तेषां षट्पञ्चाशतो नक्षत्राणां मध्ये यानि तानि नक्षत्राणि, येषां प्रत्येकं त्रीणि सहस्राणि पञ्चदशोत्तराणि सप्तषष्टित्रिंशद्भागानां सीमाविष्कम्भः । तानि द्वादश । तद्यथा-द्वे उत्तरे प्रोष्ठपदे (०जाव दो उत्तरासाढा इति) यावच्छब्दकरणादेवं द्रष्टव्यम्-"दो रोहिणी, दो पुणव्वसू, दो उत्तराफग्गुणी, दो विसाहा, दो उत्तरासाढा" इति । एतानि हि नक्षत्राणि द्व्यर्द्धक्षेत्राणि । ततः सप्तषष्टिखण्डीकृतस्याहोरात्रगम्यस्य क्षेत्रस्य सत्काश्चन्द्रयोगयोग्या भागाः, शतमेकमर्द्धं च प्रत्येकमवसन्तव्याः । तत्र शतं त्रिंशता गुण्यते, जातानि त्रीणि

सहस्राणि, अर्द्धमपि त्रिंशता गुणयित्वा द्वाभ्यां विभज्यते, लब्धाः पञ्चदशेति । सू० प्र० १० पाहु० २२ पाहु० ।

(२४) सायं प्रातर्नक्षत्रचन्द्रयोगः-

ता एतेसि णं उप्पण्णाए णक्खत्ताणं किं सता पादो चंदेणं सद्धिं जोयं जोएति ?। किं सता सायं चंदेण सद्धिं जोयं जोएति ?। किं सता दुहओ पविट्ठित्ता पविट्ठित्ता चंदेण सद्धिं जोयं जोएति ?। ता एतेसि णं णक्खत्ताणं णो सया पादो चंदेण सद्धिं जोयं जोएति, णो सया सायं चंदेण सद्धिं जोगं जोएति, णो सया दुहओ पविट्ठित्ता पविट्ठित्ता चंदेण सद्धिं जोयं जोएति । णऽण्णत्थ दोहिं अभिईहिं । ता एतेसि णं दो अभिईओ पायं चिय पायं चिय चोत्तालीसं अमावासं जोएंति, णो चेव णं पुण्णिमासिणिं ॥

" ता एतेसि णं " इत्यादि । ' ता ' इति । तत्र तेषां षट्पञ्चाशतो नक्षत्राणां मध्ये किं नक्षत्रं यत्सदा प्रातरेव चन्द्रेण सार्द्धं योगं युनक्ति ?, किं नक्षत्रं यत्सदा सायं दिवसावसानसमये चन्द्रेण सार्द्धं योगं युनक्ति ?, किं तन्नक्षत्रं यत्सदा द्विधा प्रातः सायं च समये,प्रविश्य प्रविश्य चन्द्रेण सार्द्धं योगं युनक्ति ?। भगवानाह-" ता एतेसि णं " इत्यादि । तत्रैतेषां षट्पञ्चाशतो नक्षत्राणां मध्ये न किमपि तन्नक्षत्रमस्ति, यत्सदा प्रातरेव चन्द्रेण सार्द्धं योगं युनक्ति, नापि तन्नक्षत्रमस्ति यत्सदा सायं समये चन्द्रेण सार्द्धं योगं युनक्ति, नापि तदस्ति नक्षत्रं, यत्सदा द्विधा प्रातः सायं समये च, प्रविश्य प्रविश्य चन्द्रेण सार्द्धं योगं युनक्ति । किं सर्वथा ?, नेत्याह-" णऽण्णत्थ " इत्यादि । नेति प्रतिषेधे, अन्यत्र द्वाभ्यामभिजिदूर्ध्वाभ्यामवसेयः । कस्मात् ?, इत्याह-"ता एतेसि णं" इत्यादि । 'ता' इति । तत्र तेषां षट्पञ्चाशतो नक्षत्राणां मध्ये, एते अनन्तरोदिते द्वे अभिजिती, आभिजिन्नक्षत्रे युगे युगे प्रातरेव प्रातरेव चतुश्चत्वारिंशत्तमाममावास्यां चन्द्रेण सह योगमुपगम्य युङ्क्तः परिसमापयतः, नो चैव पौर्णमासीम् । अथ कथमेतदवसीयते-यथा युगे युगे चतुश्चत्वारिंशत्तमाममावास्यां सदैव प्रातः समये अभिजिन्नक्षत्रं चन्द्रेण सार्द्धं योगमुपागम्य परिसमापयतीति ? । उच्यते-पूर्वाऽऽचार्योपदर्शितकरणवशात् । तथाहि-तिथ्यानयनार्थं तावत्करणमिदम्-

" तिहिरासिमेव वार-द्धीभइए सेसमेगसट्ठिगुणं ।
वावट्ठीए विभत्ते, सेसा अंसा तिहिसमत्ती " ॥ १ ॥

अस्या अक्षरगमनिका-ये युगमध्ये चन्द्रमासा अतिक्रान्ताः,ते तिथेरानयनार्थं त्रिंशता गुण्यन्ते, गुणयित्वा च तस्य राशेर्भागो द्वाषष्ट्या ह्रियते, हृते च भागे यद्वतिष्ठते, तस्मिन्नेकषष्ट्या गुणयित्वा द्वाषष्ट्या विभक्ते ये अंशा उद्धरन्ति, सा विवक्षिते दिने विवक्षिततिथिपरिसमाप्तिः । ततश्चतुश्चत्वारिंशत्तमायाममावास्यायां चिन्त्यमानायां त्रिचत्वारिंशच्चन्द्रमासाः, एकं च चन्द्रमासस्य पर्वावाप्यते । ततस्त्रिचत्वारिंशत् त्रिंशता गुण्यन्ते, जातानि द्वादश शतानि नवत्यधिकानि १२९० । तत उपरितनाः पर्वगताः पञ्चदश प्रक्षिप्यन्ते, जातानि त्रयोदश शतानि पञ्चोत्तराणि १३०५ । तेषां द्वाषष्ट्या भागो ह्रियते, लब्धा एकविंशतिः, सा त्यज्यते, शेषास्तिष्ठन्ति त्रयः, ते एकषष्ट्या गुण्यन्ते, जातं त्र्यशीत्याधिकं शतम् १८३ । तस्य द्वाषष्ट्या भागे हृते लब्धौ द्वौ, तौ त्यक्तौ, शेषस्तिष्ठत्येकोनषष्टिः ५९ । आगतमेकोनषष्टिर्द्वाषष्टिभागाः, तस्मिन् दिने अमावास्यासु पौर्णमासीषु च नक्षत्राऽऽनयनार्थं प्रागुक्तमेव करणम् । तत्र ध्रुवराशिः षट्षष्टिर्मुहूर्त्ताः, एकस्य च मुहूर्त्तस्य पञ्च द्वाषष्टिभागाः, एकस्य च द्वाषष्टिभागस्यैकः सप्तषष्टिभागः ६६ । ६५ । ६७ । तत्र चतुश्चत्वारिंशत्तमा अमावास्या चिन्तयितुमारब्धा, ततश्चतुश्चत्वारिंशता सा गुण्यते, जातानि मुहूर्त्तानामेकोनत्रिंशच्छतानि चतुरुत्तराणि २९०४ । एकस्य च मुहूर्त्तस्य द्वाषष्टिभागानां द्वे शते विंशत्यधिके २२० । एकस्य च द्वाषष्टिभागस्य चतुश्चत्वारिंशत् सप्तषष्टिभागाः ४४/६७ । तत्र पुनर्वसुप्रभृतिकमुत्तराषाढापर्यन्तं चत्वारि शतानि द्विचत्वारिंशदधिकानि मुहूर्त्तानाम्, एकस्य च मुहूर्त्तस्य षट्चत्वारिंशत् द्वाषष्टिभागाः ४४२ । ४६/६२ । इत्येवं प्रमाणं शोध्यते, जातानि मुहूर्त्तानां चतुर्विंशतिशतानि द्वाषष्ट्यधिकानि २४६२ । एकस्य च मुहूर्त्तस्य चतुःसप्तत्यधिकं शतं द्वाषष्टिभागानाम् १७४ । ततोऽभिजिदादिसकलनक्षत्रमण्डलशोधनकमष्टौ शतान्येकोनविंशत्यधिकानि, एकस्य च मुहूर्त्तस्य चतुर्विंशतिर्द्वाषष्टिभागाः; एकस्य च द्वाषष्टिभागस्य षट्षष्टिः सप्तषष्टिभागाः ८१९ । २४ । ६६ । इत्येवंप्रमाणं यावत्संजवं शोधनीयम् । तत्र त्रिगुणमपि शुद्धिमासाद्यतीति त्रिगुणं कृत्वा शोध्यते, स्थिताः पश्चात् षट् मुहूर्त्ताः, एकस्य च मुहूर्त्तस्य सप्तत्रिंशद् द्वाषष्टिभागाः, एकस्य च द्वाषष्टिभागस्य सप्तचत्वारिंशत्सप्तषष्टिभागाः ६ । ३७ । ४७ । आगतं चतुश्चत्वारिंशत्तममाममावास्यामभिजिन्नक्षत्रं, षट्सु मुहूर्त्तेषु सप्तमस्य च मुहूर्त्तस्य सप्तत्रिंशति द्वाषष्टिभागेषु, एकस्य च द्वाषष्टिभागस्य सप्तचत्वारिंशति सप्तषष्टिभागेषु गतेषु परिसमापयति ।

(२५) संप्रत्यमावास्यापौर्णमासीप्रक्रमादेव तत्प्ररूपणां चिकीर्षुरिदमाह-

तत्थ खलु इमाओ बावट्ठि पुण्णिमासिणीओ बावट्ठि अमावासाओ पण्णत्ताओ । ता एतेसि णं पंचण्हं संवच्छराणं पढमं पुण्णिमासिणिं चंदे कंसि देसंसि जोएति ?। ता जंसि णं देसंसि चंदे चरिमं बावट्ठिं पुण्णिमासिणिं जोएति, ता एतेणं पुण्णिमासिणिट्ठाणातो मंडलं चउव्वीसेणं सतेणं छेत्ता दुवत्तीसं भागे उवातिणावेत्ता, एत्थ णं से चंदे पढमं पुण्णिमासिणिं जोएति । ता एतेसि णं पंचण्हं संवच्छराणं दोच्चं पुण्णिमासिणिं चंदे कंसि देसंसि जोएति ?। ता जंसि णं देसंसि चंदे पढमं पुण्णिमासिणिं जोएति,ता एतेणं पुण्णिमासिणिट्ठाणातो मंडलं चउव्वीसेणं सतेणं छेत्ता दुवत्तीसं भागे उवातिणावेत्ता, एत्थ णं से चंदे दोच्चं पुण्णिमासिणिं जोएति । ता एतेसि णं पंचण्हं संवच्छराणं तच्चं पुण्णिमासिणिं चंदे कंसि देसंसि जोएति ?। ता जंसि णं देसंसि चंदे दोच्चं पुण्णिमासिणिं जोएति, ता एतेणं पुण्णिमासिणिट्ठाणातो मंडलं चउव्वीसेणं सतेणं छेत्ता दुवत्तीसं भागे उवातिणावेत्ता, एत्थ णं तच्चं चंदे पुण्णिमासिणिं जोएति। ता एतेसि णं पंचण्हं संवच्छराणं चउत्थिं पुण्णिमासिणिं चंदे कंसि देसंसि

जोएति ?। ता जंसि णं देसंसि चंदे तच्चं पुण्णिमासिणिं जोएति, ताते पुण्णिमासिणिट्ठाणातो मंडलं चउव्वीसेणं सतेणं छेत्ता दोण्णि अट्ठासीते भागसते उवातिणावेत्ता एत्थ णं से चंदे दुवालसमं पुण्णिमासिणिं जोएति ॥ एवं खलु एतेणुवाएणं ताते २ पुण्णिमासिणिट्ठाणातो मंडलं चउव्वीसेणं सतेणं छेत्ता दुवत्तीसं दुवत्तीसं भागे उवातिणावेत्ता तंसि तंसि देसंसि तं तं पुण्णिमासिणिं चंदे जोएति । ता एतेसि णं पंचण्हं संवच्छराणं चरमं वावट्ठिं पुण्णिमासिणिं चंदे कंसि देसंसि जोएति ?। ता जंबुदीवस्स णं दीवस्स पाईणपडीणाऽऽयतउदीणदाहिणाऽऽयताए जीवाए मंडलं चउव्वीसेणं सतेणं छेत्ता दाहिणिल्लंसि चउब्भागमंडलंसि सत्तावीसं च भागे उवातिणावेत्ता अट्ठावीसतिभागं वीसहा छेत्ता अट्ठावीसतिभागे उवातिणावेत्ता तिहिं भागेहिं दोहि य कलाहिं पच्चत्थिमिल्लचउब्भागमंडलं असंपत्ते एत्थ णं से चंदे चरिमं वावट्ठिं पुण्णिमासिणिं जोएति ।

ता एतेसि णं पंचण्हं संवच्छराणं पढमं पुण्णिमासिणिं सूरे कंसि देसंसि जोएति ?। ता जंसि णं देसंसि चंदे चरिमं वावट्ठिं पुण्णिमासिणिं जोएति, ताते पुण्णिमासिणिट्ठाणातो मंडलं चउव्वीसेणं सतेणं छेत्ता चउणउतिभागे उवातिणावेत्ता एत्थ णं से सूरे पढमं पुण्णिमासिणिं जोएइ। ता एतेसि णं पंचण्हं संवच्छराणं दोच्चं पुण्णिमासिणिं सूरे कंसि देसंसि जोएति ?। ता जंसि णं देसंसि सूरे पढमं पुण्णिमासिणिं जोएइ, ताते पुण्णिमासिणिट्ठाणातो मंडलं चउव्वीसेणं सतेणं छेत्ता चउणउतिभागे उवातिणावेत्ता एत्थ णं से सूरे दोच्चं पुण्णिमासिणिं जोएति । ता एतेसि णं पंचण्हं संवच्छराणं तच्चं पुण्णिमासिणिं सूरे कंसि देसंसि जोएति ?। ता जंसि णं देसंसि सूरे दोच्चं पुण्णिमासिणिं जोएति, ताते पुण्णिमासिणिट्ठाणातो मंडलं चउव्वीसेणं सतेणं छेत्ता चउणउतिभागे उवातिणावेत्ता एत्थ णं से सूरे तच्चं पुण्णिमासिणिं जोएति । ता एतेसि णं पंचण्हं संवच्छराणं दुवालसण्हं पुण्णिमासिणिं सूरे कंसि देसंसि जोएति ?। ता जंसि णं देसंसि सूरे तच्चं पुण्णिमासिणिं जोएति, ताते पुण्णिमासिणिट्ठाणातो मंडलं चउव्वीसेणं सतेणं छेत्ता अट्ठवत्ताले भागसते उवातिणावेत्ता एत्थ णं से सूरे दुवालसमं पुण्णिमासिणिं जोएति । एवं खलु एतेणुवाएणं ताते २ पुण्णिमासिणिट्ठाणातो मंडलं चउव्वीसेणं सतेणं छेत्ता चउणउतिचउणउतिभागे उवातिणावेत्ता तंसि तंसि देसंसि तं तं पुण्णिमासिणिं सूरे जोयं जोएति । ता एतेसि णं पंचण्हं संवच्छराणं चरिमं वावट्ठिं पुण्णिमासिणिं सूरे कंसि देसंसि जोएति ?। ता जंबुदीवस्स णं दीवस्स पाईणपडीणाऽऽयतउदीणदाहिणाऽऽयताए जीवाए मंडलं चउव्वीसेणं सतेणं छेत्ता पुरच्छिमिल्लंसि चउब्भागमंडलंसि सत्तावीसभागे उवातिणावेत्ता अट्ठावीसतिभागं वीसधा छेत्ता अट्ठारसभागे उवातिणावेत्ता तिहिं भागेहिं दोहि य कलाहिं दाहिणिल्लचउब्भागमंडलं असंपत्ते एत्थ णं से सूरे चरिमं वावट्ठिं पुण्णिमासिणिं जोएति ।

ता एतेसि णं पंचण्हं संवच्छराणं पढमं अमावासं चंदे कंसि देसंसि जोएति ?। ता जंसि णं देसंसि चंदे चरिमं वावट्ठिं अमावासं जोएति, ताते अमावासट्ठाणातो मंडलं चउव्वीसेणं सतेणं छेत्ता दुवत्तीसं भागे उवातिणावेत्ता एत्थ णं से चंदे पढमं अमावासं जोएति । एवं जेणेव अभिलावेणं चंदस्स पुण्णिमासिणीओ भणिताओ, तेणेव अभिलावेणं अमावासाओ णेयव्वाओ। तं जहा-बितिया, ततिया, दुवालसमी। एवं खलु एतेणुवाएणं ताते २ अमावासट्ठाणातो मंडलं चउव्वीसेणं सतेणं छेत्ता दुतीसं दुतीसं भागे उवातिणावेत्ता तंसि तंसि देसंसि तं तं अमावासं चंदे जोएति । ता एतेसि णं पंचण्हं संवच्छराणं चरमं वावट्ठिं अमावासं चंदे कंसि देसंसि जोएति ?। ता जंसि णं देसंसि चंदे चरिमं वावट्ठिं पुण्णिमासिणिं जोएति, ताते पुण्णिमासिणिट्ठाणातो मंडलं चउव्वीसेणं सतेणं छेत्ता सोलसभागे ओसक्कावइत्ता एत्थ णं से चंदे चरिमं वावट्ठिं अमावासं जोएति । ता एतेसि णं पंचण्हं संवच्छराणं पढमं अमावासं सूरे कंसि देसंसि जोएति ?। ता जंसि णं देसंसि सूरे चरिमं वावट्ठिं अमावासं जोएति, ताते अमावासट्ठाणातो मंडलं चउव्वीसेणं सतेणं छेत्ता चउणउतिभागे उवातिणावेत्ता एत्थ णं से सूरे पढमं अमावासं जोएति । एवं जेणेव अभिलावेणं सूरस्स पुण्णिमासिणीओ, तेणेव अमावासाओ वि । तं जहा-बितिया, ततिया, दुवालसमी। एवं खलु एतेणुवाएणं ताते अमावासट्ठाणातो मंडलं चउव्वीसेणं सएणं छेत्ता चउणउतिचउणउतिभागे उवातिणावेत्ता तंसि तंसि देसंसि तं तं अमावासं सूरे जोएति । ता एतेसि णं पंचण्हं संवच्छराणं चरिमं वावट्ठिं अमावासं सूरे कंसि देसंसि जोएति ?। ता जंसि णं देसंसि सूरे चरिमं वावट्ठिं अमावासं जोएति, ताते पुण्णिमासिणिट्ठाणातो मंडलं चउव्वीसेणं सतेणं छेत्ता सत्तालीसं भागे ओसक्कावइत्ता एत्थ णं से सूरे चरिमं वावट्ठिं अमावासं जोएति ।

ता एतेसि णं पंचण्हं संवच्छराणं पढमं पुण्णिमासिणिं चंदे केणं णक्खत्तेणं जोएति ?। ता धणिट्ठाहिं, धणिट्ठाणं

तिण्णि मुहुत्ता, एगूणवीसं च बावट्ठिभागा मुहुत्तस्स, बावट्ठिभागं च सत्तट्ठिहा छेत्ता पणट्ठिचुल्लियाभागा सेसा। "तत्थ खलु" इत्यादि। तत्र युगे खलु इमा वक्ष्यमाणस्वरूपाः द्वाषष्टिः पौर्णमास्यो,द्वाषष्टिरमावास्याः प्रज्ञप्ताः। एवमुक्ते भगवान् गौतमः पृच्छति-" ता " इत्यादि। 'ता' इति। तत्र युगे एतेषामनन्तरोदितानां चन्द्राऽऽदीनां पञ्चानां संवत्सराणां मध्ये प्रथमां पौर्णमासीं चन्द्रः कस्मिन् देशे युनक्ति परिसमापयति ?। भगवानाह-" ता जंसि णं " इत्यादि। तत्र यस्मिन् देशे चन्द्रश्चरमां पाश्चात्ययुगपर्यन्तवर्तिनीं द्वाषष्टितमां पौर्णमासीं युनक्ति परिसमापयति,तस्मात् पौर्णमासीस्थानाच्चरमद्वाषष्टितमपौर्णमासीपरिसमाप्तिस्थानात् परतो मण्डलं चतुर्विंशत्यधिकेन शतेन छित्त्वा विभज्य, तद्गतान् द्वात्रिंशद्भागानुपादाय गृहीत्वा, अत्र द्वात्रिंशद्भागरूपे देशे चन्द्रः प्रथमां पौर्णमासीं युनक्ति परिसमापयति। भूयः प्रश्नं करोति-"ता एतेसि णं" इत्यादि। " ता " इति। तत्र युगे एतेषामनन्तरोदितानां पञ्चानां संवत्सराणां मध्ये या द्वितीया पौर्णमासी, तां चन्द्रः कस्मिन् देशे परिसमापयति ?। भगवानाह-" ता जंसि णं " इत्यादि। तत्र यस्मिन् देशे चन्द्रः प्रथमां पौर्णमासीं युनक्ति परिसमापयति,तस्मात् पौर्णमासीस्थानात् प्रथमपौर्णमासीपरिसमाप्तिस्थानात् परतो मण्डलं चतुर्विंशत्यधिकेन शतेन छित्त्वा तद्गतान् द्वात्रिंशद्भागानुपादायात्र प्रदेशे स चन्द्रो द्वितीयां पौर्णमासीं परिसमापयति। एवं तृतीयपौर्णमासीविषयमपि सूत्रं व्याख्येयम्। एवं द्वादशपौर्णमासीविषयमपि। नवरं (दोण्णि अट्ठासीते भागसते त्ति) तृतीयस्याः पौर्णमास्याः परतो द्वादशी किल पौर्णमासी नवमी भवति, ततो नवभिर्द्वात्रिंशतो गुणने द्वे शतेऽष्टाशीत्यधिके भवतः २८८। संप्रत्यतिदेशमाह-"एवं खलु" इत्यादि। एवमुक्तेन प्रकारेण खलु निश्चितमेतेनानन्तरोदितेनोपायेन यां पौर्णमासीं यत्र यत्र देशे परिसमापयति,तस्याः तस्याः पौर्णमास्यास्ततोऽनन्तरां पौर्णमासीं तस्मात्तस्मात् पाश्चात्यपाश्चात्यपौर्णमासीपरिसमाप्तिस्थानाद् मण्डलं चतुर्विंशत्यधिकेन शतेन छित्त्वा परतस्तद्गतान् द्वात्रिंशद्द्वात्रिंशतं भागानुपादाय तस्मिन् तस्मिन् देशे तां तां पौर्णमासीं चन्द्रः परिसमापयति। स चैवं परिसमापयंस्तावद्वेदितव्यो, यावद् भूयोऽपि चरमां द्वाषष्टिं पौर्णमासीं तस्मिन् देशे परिसमापयति,यस्मिन् देशे पाश्चात्ययुगे चरमां द्वाषष्टिं पौर्णमासीं परिसमापितवान्। कथमेतदवसीयते ?,इति चेत्। उच्यते-गणितक्रमवशात्। तथाहि-पाश्चात्ययुगे चरमद्वाषष्टितमपौर्णमासीपरिसमाप्तिस्थानात् परतो मण्डलस्य चतुर्विंशत्यधिकशतप्रविभक्तस्य सत्कानां द्वात्रिंशतो भागानामतिक्रमे तस्यास्तस्याः पौर्णमास्याः परिसमाप्तिः, द्वाषष्टिश्च सर्वसंख्यया युगे पौर्णमास्यः। ततो द्वात्रिंशद् द्वाषष्ट्या गुण्यते, जातान्येकोनविंशतिशतानि चतुरशीत्यधिकानि १९८४। तेषां चतुर्विंशत्यधिकेन शतेन भागो ह्रियते, लब्धाः षोडश सकलमण्डलपरावर्ताः, समस्तस्यापि च राशेर्निर्लेपीभवनादागतं-यस्मिन् देशे पाश्चात्ययुगसंबन्धिचरमद्वाषष्टितमपौर्णमासीपरिसमाप्तिः,तस्मिन्नेव देशे विवक्षितस्यापि च युगस्य चरमद्वाषष्टितमपौर्णमासीपरिसमाप्तिः। संप्रति चरमद्वाषष्टितमपौर्णमासीपरिसमाप्तिदेशं पृच्छति-" ता एतेसि णं " इत्यादि। 'ता' इति पूर्ववत्। तत्र युगे एतेषामनन्तरोदितानां पञ्चानां संवत्सराणां मध्ये चरमां द्वाषष्टितमां पौर्णमासीं चन्द्रः कस्मिन् देशे युनक्ति-परिसमापयति ?। भगवानाह-(ता जंबुद्दीवस्स णं दीवस्स इत्यादि) ' ता ' इति पूर्ववत्। जम्बूद्वीपस्य, जमिति वाक्यालङ्कारे। द्वीपस्योपरि प्राचीनापाचीनाऽऽयतया, इह प्राचीनमहणेनोत्तरपूर्वा गृह्यते,अपाचीनग्रहणेन दक्षिणापरा। ततोऽयमर्थः-पूर्वोत्तरदक्षिणापराऽऽयतया;एवमुदीच्यदक्षिणाऽऽयतया, पूर्वदक्षिणोत्तरापराऽऽयतया जीवया प्रत्यञ्चया, धनुष्किया इत्यर्थः। मण्डलं चतुर्विंशेन शतेन चतुर्विंशत्यधिकेन शतेन छित्त्वा विभज्य, भूयश्चतुर्भिर्विभज्यते। ततो दाक्षिणात्ये चतुर्भागमण्डले एकत्रिंशद्भागप्रमाणे सप्तविंशतिभागानुपादायाष्टाविंशतितमं च भागं विंशतिधा छित्त्वा, तद्गतानष्टाविंशतिभागानुपादाय शेषैस्त्रिभिर्भागैश्चतुर्थस्य भागस्य द्वाभ्यां कलाभ्यां पाश्चात्यचतुर्भागमण्डलसंप्राप्तोऽस्मिन् प्रदेशे चन्द्रो द्वाषष्टितमां चरमां पौर्णमासीं परिसमापयति। तदेवं चन्द्रस्य पौर्णमासीपरिसमाप्तिदेशः उक्तः।

संप्रति सूर्यस्य पौर्णमासीपरिसमाप्तिदेशं प्रतिपिपादयिषुस्तद्विषयं प्रश्नसूत्रमाह—(ता एतेसि णं इत्यादि) ' ता ' इति। तत्र युगे एतेषामनन्तरोदितानां पञ्चानां संवत्सराणां मध्ये प्रथमां पौर्णमासीं सूर्यः कस्मिन् देशे स्थितः सन् युनक्ति-परिसमापयति ?। भगवानाह-(ता जंसि णं इत्यादि) तत्र यस्मिन् देशे स्थितः सन् सूर्यश्चरमां पाश्चात्ययुगवर्तिनीं द्वाषष्टितमां पौर्णमासीं युनक्ति-परिसमापयति, तस्मात् पौर्णमासीस्थानात् चरमद्वाषष्टितमपौर्णमासीपरिसमाप्तिनिबन्धनात् स्थानात् परतो मण्डलं चतुर्विंशत्यधिकेन शतेन छित्त्वा विभज्य, तद्गतान् चतुर्नवतिभागान् उपादाय,अत्र प्रदेशे सूर्यः प्रथमां पौर्णमासीं परिसमापयति। किमत्र कारणमिति चेत् ?, उच्यते-इह परिपूर्णेषु त्रिंशदहोरात्रेषु परिसमाप्तेषु सत्सु स एव सूर्यस्तस्मिन्नेव देशे वर्तमानः प्राप्यते, न कतिपयभागन्यूनेषु ; पौर्णमासी च चन्द्रमासपर्यन्ते परिसमाप्तिमुपैति ; चन्द्रमासस्य च परिमाणमेकोनत्रिंशदहोरात्राः, एकस्य चाहोरात्रस्य द्वात्रिंशत् द्वाषष्टिभागाः। ततस्त्रिंशतामेऽहोरात्रे द्वात्रिंशति द्वाषष्टिभागेषु गतेषु सूर्यश्चरमद्वाषष्टितमपौर्णमासीपरिसमाप्तिनिबन्धनात् स्थानात् चतुर्नवतौ चतुर्विंशत्यधिकशतभागेष्वतिक्रान्तेषु प्रथमां पौर्णमासीं परिसमापयन्नाख्यायते। किमुक्तं भवति ?-त्रिंशता भागैस्तमेव देशमप्राप्तः सन्नाख्यायते, त्रिंशतो द्वाषष्टिभागानामहोरात्रसत्कानामद्यापि स्थितत्वात्। भूयः प्रश्नयति-(ता एतेसि णमित्यादि) ' ता ' इति। तत्र युगे एतेषां पञ्चानां संवत्सराणां मध्ये द्वितीयां पौर्णमासीं सूर्यः कस्मिन् देशे स्थितः सन् युनक्ति—परिसमापयति ?। भगवानाह-(ता जंसि णमित्यादि) ' ता ' इति। तत्र यस्मिन् देशे स्थितः सन् सूर्यः प्रथमां पौर्णमासीं परिसमापयति, तस्मात् पौर्णमासीस्थानात् प्रथमपौर्णमासीपरिसमाप्तिनिबन्धनात् स्थानात् परतो मण्डलं चतुर्विंशत्यधिकेन शतेन छित्त्वा तद्गतान् चतुर्नवतिभागान् उपादाय अत्र देशे स्थितः सन् सूर्यो द्वितीयां पौर्णमासीं परिसमापयति। एवं तृतीयपौर्णमासीविषयमपि सूत्रं वक्तव्यम्। एवं द्वादशपौर्णमासीविषयमपि। नवरं (अट्ठचत्ताले भागसते त्ति) तृतीयस्याः पौर्णमास्याः परतो द्वादशी किल पौर्णमासी नवमी,ततश्चतुर्नवतिर्नवभिर्गुण्यते, जातान्यष्टौ शतानि षट्चत्वारिंशदधिकानि ८४६। संप्रति शेष-

पौर्णमासीविषयमतिदेशमाह-(एवं खलु इत्यादि) एवमुक्तेन प्रकारेण,खलु निश्चितम्,एतेनानन्तरोदितेनोपायेन यां यां पौर्णमासीं यत्र यत्र देशे परिसमापयति,तस्यास्तस्याः पौर्णमास्यास्तां तामनन्तरामनन्तरां पौर्णमासीं तस्मात् तस्मात् पाश्चात्यपाश्चात्यपौर्णमासीपरिसमाप्तिनिबन्धनात् स्थानाद् मण्डलं चतुर्विंशत्यधिकेन शतेन छित्वा परतस्तद्गतान् चतुर्नवतिचतुर्नवतिभागानुपादाय तस्मिन् तस्मिन् देशे स्थितः सन् सूर्यस्तां तां पौर्णमासीं परिसमापयति । स चैवं परिसमापयन् तावद् वेदितव्यो यावद् भूयोऽपि चरमां द्वाषष्टितमां पौर्णमासीं तस्मिन् देशे परिसमापयति तस्मिन् देशे पाश्चात्ययुगसंबन्धिनीं चरमां द्वाषष्टितमां पौर्णमासीं परिसमापितवान् । एतच्चावसीयते गणितक्रमवशात् । तथाहि-पाश्चात्ययुगचरमद्वाषष्टितमपौर्णमासीपरिसमाप्तिनिबन्धनात् स्थानात् परतो मण्डलस्य चतुर्विंशत्यधिकशतप्रविभक्तस्य सत्कानां चतुर्नवतिभागानामतिक्रमे तस्याः तस्याः पौर्णमास्याः परिसमाप्तिः, ततश्चतुर्नवतिर्द्वाषष्ट्या गुण्यते, जातान्यष्टाशीतानि अष्टाविंशत्यधिकानि ५८२८ । तेषां चतुर्विंशत्यधिकेन शतेन भागो ह्रियते, लब्धाः सप्तचत्वारिंशत् सकलमण्डलपरावर्त्ताः । न च तैः प्रयोजनं, केवलं राशेर्निर्लेपीभवनाद्यागतं-यस्मिन् देशे स्थितः सन् पाश्चात्ययुगसंबन्धिचरमद्वाषष्टितमपौर्णमासीपरिसमापकः, तस्मिन्नेव देशे विधिक्षितस्यापि युगस्य चरमां द्वाषष्टितमां पौर्णमासीं परिसमापयतीति । संप्रति चरमद्वाषष्टितमपौर्णमासीपरिसमाप्तिनिबन्धनं देशं पृच्छति-"ता एतेसि णं" इत्यादि सुगमम । भगवानाह-"ता जंबुद्दीवस्स णं" इत्यादि । 'ता' इति पूर्ववत् । जम्बूद्वीपस्य द्वीपस्य प्राचीनापाचीनाऽऽयतया, अत्रापि प्राचीनग्रहणेनोत्तरपूर्वां दिग् गृह्यते। अपाचीनग्रहणेन दक्षिणाऽपरा। ततोऽयमर्थः-उत्तरपूर्वदक्षिणापराऽऽयतया, एवमुदीच्यदक्षिणाऽऽयतया, उत्तरापरदक्षिणपूर्वाऽऽयतया जीवया दवरिकया, मण्डलं चतुर्विंशत्यधिकेन शतेन छित्वा विभज्य भूयश्चतुर्भिर्भक्त्वा (पुरच्छिमिल्लंसि चि) पूर्वदिग्वर्तिनि चतुर्भागमण्डले एकत्रिंशत्भागप्रमाणे सप्तविंशतिभागानुपादायाष्टाविंशतितमं च भागं विंशतिधा छित्वा तद्गतानष्टादशभागानुपादाय शेषैस्त्रिभिर्भागैश्चतुर्थस्य च भागस्य द्वाभ्यां कलाभ्यां, विंशतितमाभ्यामित्यर्थः । दाक्षिणात्यचतुर्भागमण्डलमसंप्राप्तः सन्यत्र प्रदेशे स सूर्यश्चरमां द्वाषष्टितमां पौर्णमासीं परिसमापयति । तदेवं सूर्याचन्द्रमसोः पौर्णमासीपरिसमाप्तिदेश उक्तः ।

संप्रति तयोरेवामावास्यापरिसमाप्तिदेशं प्रतिपिपादयिषुः प्रथमतः चन्द्रविषयं प्रश्नसूत्रमाह-(ता एतेसि णमित्यादि) तत्र कुत्रे एतेषामनन्तरोदितानां पञ्चानां संवत्सराणां मध्ये प्रथमामावास्यां चन्द्रः कस्मिन् देशे स्थितः परिसमापयति ?। भगवानाह-(ता जंबुद्दीवे णमित्यादि) तत्र यस्मिन् देशे स्थितः सन् चन्द्रश्चरमां द्वाषष्टिं द्वाषष्टितमाममावास्यां परिसमापयति, ततोऽमावास्याख्यानादमावास्यापरिसमाप्तिस्थानात्, परतो मण्डलं चतुर्विंशत्यधिकेन शतेन छित्वा तद्गताद् द्वात्रिंशतं भागान् उपादायात्र प्रदेशे स चन्द्रः प्रथमाममावास्यां परिसमापयति । (एवमित्यादि) एवमुक्तेन प्रकारेण येनैवाभिलापेन चन्द्रस्य पौर्णमास्यो भणिताः, तेनैवाभिलापेनामावास्या अपि भणितव्याः । तद्यथा-द्वितीया, तृतीया, द्वादशी च । ताश्चैवम-" ता एतेसि णं पंचण्हं संवच्छराणं दोच्चं अमावासं कंसि देसंसि जोएइ ?। ता जंबुद्दीवे णं दीवे पढमं अमावासं जोएइ, ताओ णं अमावासट्ठाणाओ मंडलं चउव्वीसेणं सएणं छेत्ता दोण्हि अट्ठासीए भागसए उवातिणावेत्ता एत्थ णं चंदे दुवालसमं अमावासं जोएइ । " संप्रति शेषासु अमावास्यास्वतिदेशमाह-"एवं खलु" इत्यादि । एतत् प्राग्वद् व्याख्येयम । संप्रति चरमद्वाषष्टितमामावास्यापरिसमाप्तिनिबन्धनं देशं पृच्छति-" ता एतेसि णं " इत्यादि सुगमम् । भगवानाह-(ता जंबुद्दीवे णमित्यादि) तत्र यस्मिन् देशे स्थितः सन् चन्द्रो द्वाषष्टितमां चरमां पौर्णमासीं युनक्ति परिसमापयति, तस्मात् पौर्णमासीस्थानात्-पौर्णमासीपरिसमाप्तिस्थानात् मण्डलं चतुर्विंशत्यधिकेन शतेन छित्वा विभज्य पूर्वं षोडशभागानवष्वक्य । चरमा हि द्वाषष्टितमा अमावास्या चरमद्वाषष्टितमपौर्णमास्याः पक्षेन पञ्चात्पक्षेन च विवक्षितप्रदेशात् षोडशभिश्चतुर्विंशत्यधिकशतभागैः परतः प्रारूप्यते, मासेन द्वात्रिंशता भागैः परतो वर्त्तमानस्य लभ्यमानत्वात् । ततः षोडशभागान् पूर्वमवष्वक्येत्युक्तम । अत्रास्मिन् प्रदेशे स्थितः सन् चन्द्रश्चरमां द्वाषष्टितमाममावास्यां परिसमापयति । संप्रति सूर्यस्यामावास्यापरिसमाप्तिनिबन्धनं देशं पिपृच्छिषुराह-(ता एतेसि णमित्यादि) एतत्प्राग्वद् व्याख्येयम । (एवमित्यादि) एवमुक्तेन प्रकारेण येनैवाभिलापेन सूर्यस्य पौर्णमास्य उक्ताः,तेनैवाभिलापेनामावास्या अपि वक्तव्याः । तद्यथा-द्वितीया, तृतीया, द्वादशी च । ताश्चैवम-" एतेसि णं पंचण्हं संवच्छराणं दोच्चं अमावासं सूरे कंसि देसंसि जोएइ ?। ता जंबुद्दीवे णं दीवे पढमं अमावासं जोएइ, ताओ अमावासट्ठाणाओ मंडलं चउव्वीसेणं सएणं छेत्ता चउणउइभागे उवाइणावेत्ता एत्थ णं से सूरे दोच्चं अमावासं जोएइ । ता एतेसि णं पंचण्हं संवच्छराणं तच्चं अमावासं सूरे कंसि देसंसि जोएइ ?। ता जंबुद्दीवे णं दीवे दोच्चं अमावासं जोएइ, ताओ णं अमावासट्ठाणाओ मंडलं चउव्वीसेणं सएणं छेत्ता चउणउइभागे उवाइणावेत्ता तच्चं अमावासं जोएइ । ता एएसि णं पंचण्हं संवच्छराणं दुवालसं अमावासं सूरे कंसि देसंसि जोएइ ?। ता जंबुद्दीवे णं दीवे सूरे तच्चं अमावासं जोएइ, ताओ अमावासट्ठाणाओ मंडलं चउव्वीसेणं सएणं छेत्ता अट्ठचुत्ताले भागसए उवातिणावेत्ता एत्थ णं से सूरे दुवालसमं अमावासं जोएइ । " संप्रति शेषास्वमावास्यासु अतिदेशमाह-(एवं जाव इत्यादि) एतत् प्राग्वद् व्याख्येयम । संप्रति चरमद्वाषष्टितमामावास्यापरिसमाप्तिनिबन्धनं देशं पृच्छति-" ता एतेसि णं " इत्यादि सुगमम । भगवानाह-(ता जंबुद्दीवे णमित्यादि) यस्मिन् देशे स्थितः सन् सूर्यश्चरमां द्वाषष्टितमाममावास्यां परिसमापयति, तस्मात् पौर्णमासीस्थानात् पौर्णमासीपरिसमाप्तिनिबन्धनाद् देशात् मण्डलं चतुर्विंशत्यधिकेन शतेन छित्वा विभज्यार्धं च सप्तचत्वारिंशतं भागानवष्वक्य अत्र प्रदेशे स्थितः सन् सूर्यश्चरमां द्वाषष्टितमाममावास्यां युनक्ति परिसमापयति । अथ कां पौर्णमासीं केन नक्षत्रेण युक्तश्चन्द्रः सूर्यो वा परिसमापयति ?, इति प्रष्टुकाम आह-(ता एतेसि णमित्यादि)

'ता' इति । तत्र युगे एतेषामनन्तरोदितानां पञ्चानां संवत्सराणां मध्ये प्रथमां पौर्णमासीं चन्द्रः । उपलक्षणमेतत्-सूर्यो वा; केन नक्षत्रेण सह योगमुपागतः सन् युनक्ति-परिसमापयति ? । भगवानाह-(ता धणिट्ठाहिं इत्यादि) 'ता' इति । तत्र तेषां पञ्चानां संवत्सराणां मध्ये प्रथमां पौर्णमासीं चन्द्रः परिसमापयति धनिष्ठाभिः; धनिष्ठानक्षत्रस्य पञ्चतारत्वात् तदपेक्षया बहुवचनम् ; अन्यथा त्वेकवचनं रूढ्यम । तासां च धनिष्ठानां त्रयो मुहूर्ताः, एकस्य च मुहूर्तस्य एकोनविंशतिः षाष्टिभागाः, एकं च द्वाषष्टिभागं समषष्टिधा छित्त्वा पञ्चषष्टिश्चूर्णिकाभागाः शेषाः । तथाहि-पौर्णमासीविषयस्य चन्द्रनक्षत्रयोगस्य परिज्ञानार्थं करणं प्रागेवोक्तं,तत्र षट्षष्टिर्मुहूर्ताः, एकस्य च मुहूर्तस्य पञ्च द्वाषष्टिभागाः,एकस्य च द्वाषष्टिभागस्य एकः समषष्टिभागः ६६। ६२ ६३ इत्येवंरूपो ध्रुवराशिर्भवति;धृत्वा च प्रथमायां पौर्णमास्यां चन्द्रनक्षत्रयोगो ज्ञातुमिष्ट इत्येकेन गुण्यते,'एकेन गुणितं तदेव भवति' इति तावानेव जातः,तस्मादत्रिंशतो नव मुहूर्ताः। एकस्य च मुहूर्तस्य चतुर्विंशतिर्द्वाषष्टिभागाः,एकस्य च द्वाषष्टिभागस्य षट्षष्टिः समषष्टिभागाः; इत्येवंप्रमाणं शोधनकं शोध्यते । तत्र षट्षष्टेरेव मुहूर्ताः शुद्धाः, स्थिताः पश्चात् समपञ्चाशत, तेभ्य एको मुहूर्तो गृहीत्वा द्वाषष्टिभागीकृतः, ते च द्वाषष्टिरपि भागा द्वाषष्टिभागराशौ पञ्चकरूपे प्रक्षिप्यन्ते, जाताः समषष्टिर्द्वाषष्टिभागाः, तेभ्यश्चतुर्विंशतिः शुद्धाः, स्थिताः पश्चात् त्रिचत्वारिंशत्,तेभ्य एकं रूपमादाय समषष्टिभागाः क्रियन्ते। ते च समषष्टिरपि भागाः समषष्टिभागैकमध्ये प्रक्षिप्यन्ते, जाता अष्टषष्टिः समषष्टिभागाः। तेभ्यः षट्षष्टिः शुद्धाः, स्थितौ द्वौ पश्चात्समषष्टिभागौ, ततस्त्रिंशता मुहूर्तैः अवणः शुद्धः,स्थिताः पश्चान्मुहूर्ताः षड्विंशतिः। तत इदमागतम्-धनिष्ठानक्षत्रस्य त्रिषु मुहूर्तेष्वेकस्य च मुहूर्तस्य एकोनविंशतिसंख्येषु द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य पञ्चषष्टिसंख्येषु समषष्टिभागेषु शेषेषु प्रथमपौर्णमासी परिसमाप्तिमुपयाति ।

संप्रति सूर्यनक्षत्रयोगं पृच्छन्नाह-

तं समयं च णं सूरे केणं णक्खत्तेणं जोएति ?। ता पुव्वाहिं फग्गुणीहिं अट्ठावीसं मुहुत्ता, अट्ठतीसं च बावट्ठिभागा मुहुत्तस्स, बावट्ठिभागं च सत्तट्ठिधा छेत्ता दुवत्तीसं चुल्लियाभागा सेसा । ता एतेसि णं पंचण्हं संवच्छराणं दोच्चं पुण्णिमासिणिं चंदे केणं णक्खत्तेणं जोएति ? । ता उत्तराहिं पोट्ठवताहिं, उत्तराणं पोट्ठवताणं सत्तावीसं मुहुत्ता, चोद्दस य बावट्ठिभागे मुहुत्तस्स, बावट्ठिभागं च सत्तट्ठिधा छेत्ता चउसट्ठिचुल्लियाभागा सेसा ।

(तं समयं च णमित्यादि) तं समयमित्यत्र "कालाध्वनोर्यो" ॥ २ । २ । ४२ ॥ इत्यधिकरणत्वेऽपि द्वितीया । ततोऽयमर्थः-तस्मिन् समये, यस्मिन् समये धनिष्ठा नक्षत्रं चन्द्रेण युक्तं यथोक्तविशेषं परिसमापयति, तस्मिन् क्षणे इत्यर्थः । सूर्यः केन नक्षत्रेण युक्तः सन् तां प्रथमां पौर्णमासीं परिसमापयति । भगवानाह-" ता पुव्वाहिं " इत्यादि । 'ता' इति । तदा पूर्वाभ्यां फाल्गुनीभ्यां,पूर्वाफाल्गुनीनक्षत्रस्य द्वितारकत्वात्तदपेक्षया द्विवचनम् । द्विवचने च प्राप्ते प्राकृते बहुवचनम् । तयोश्च पूर्वाफाल्गुन्योस्तदानीमष्टाविंशतिर्मुहूर्ताः, अष्टात्रिंशच्च द्वाषष्टिभागा मुहूर्तस्य, एकं च द्वाषष्टिभागं समषष्टिधा छित्त्वा तस्य सत्काः द्वात्रिंशच्चूर्णिकाभागाः शेषाः । तथाहि-स एव षट्षष्टिर्मुहूर्ताः, एकस्य च मुहूर्तस्य पञ्च द्वाषष्टिभागाः, एकस्य च द्वाषष्टिभागस्य एकः समषष्टिभाग इत्येवंप्रमाणो ध्रुवराशिर्ध्रियते ६६।५।१। धृत्वा च एकेन गुण्यते,'एकेन च गुणितं तदेव भवति' इति तावानेव जातः,ततस्तस्मात् पुष्यशोधनकमेकोनविंशतिर्मुहूर्ताः, एकस्य च मुहूर्तस्य त्रिचत्वारिंशद् द्वाषष्टिभागाः,एकस्य च द्वाषष्टिभागस्य त्रयस्त्रिंशत्समषष्टिभागाः १९।४३।३३। इत्येवंप्रमाणं शोध्यते। अथैतावत्प्रमाणस्य पुष्यशोधनकस्य कथमुत्पत्तिरिति ?। उच्यते-इह पूर्वयुगपरिसमाप्तिवेलायां पुष्यस्य त्रयोविंशतिः समषष्टिभागाः परिसमाप्ताः, चत्वारिंशदवतिष्ठते । ततस्ते चतुश्चत्वारिंशत्समषष्टिभागा मुहूर्तीकरणार्थं त्रिंशता गुण्यन्ते, जातानि त्रयोदश शतानि विंशत्यधिकानि १३२० । तेषां समषष्ट्या भागो ह्रियते, लब्धा एकोनविंशतिर्मुहूर्ताः । शेषास्तिष्ठन्ति समचत्वारिंशत् ४७। ते द्वाषष्टिभागाऽऽनयनार्थं द्वाषष्ट्या गुण्यन्ते, जातानि एकोनत्रिंशच्छतानि चतुर्दशोत्तराणि २९१४। तेषां समषष्ट्या भागो ह्रियते, लब्धास्त्रिचत्वारिंशद्द्वाषष्टिभागाः ४३/६२ । एकस्य च द्वाषष्टिभागस्य त्रयस्त्रिंशत्समषष्टिभागाः ३३/६२ । एतद् ध्रुवराशेः शोध्यते । तद्यथा-षट्षष्टिर्मुहूर्तेभ्य एकोनविंशतिर्मुहूर्ताः शुद्धाः, स्थिताः पश्चात्सप्तचत्वारिंशत्, तेभ्य एको मुहूर्तो गृह्यते, स्थिताः षट्चत्वारिंशत् गृहीतस्य च मुहूर्तस्य द्वाषष्टिभागान् कृत्वा द्वाषष्टिभागराशौ पञ्चकरूपे प्रक्षिप्यन्ते, जाता द्वाषष्टिभागाः समषष्टिः, तेभ्यस्त्रिचत्वारिंशत् शोध्यन्ते, स्थिताः पश्चाच्चतुर्विंशतिः, तेभ्य एकं रूपमुपादीयते, जाता त्रयोविंशतिः, गृहीतस्य च रूपस्य समषष्टिभागाः क्रियन्ते, कृत्वा च समषष्टिभागैकमध्ये प्रक्षिप्यन्ते, जाता अष्टषष्टिः समषष्टिभागाः। तेभ्यस्त्रयस्त्रिंशत् शुद्धाः,स्थिताः पञ्चत्रिंशत् । ततः पञ्चदशभिर्मुहूर्तैरश्लेषा, त्रिंशता च मुहूर्तैर्मघाः शुद्धाः, स्थितः पश्चादेको मुहूर्तः, एकस्य च मुहूर्तस्य त्रयोविंशतिर्द्वाषष्टिभागाः । एकस्य च द्वाषष्टिभागस्य पञ्चत्रिंशत्समषष्टिभागाः १ । ३३ । ३५ तत आगतं पूर्वाफाल्गुनीनक्षत्रस्याष्टाविंशतौ मुहूर्तेषु एकस्य च मुहूर्तस्याष्टात्रिंशत द्वाषष्टिभागस्य द्वात्रिंशति समषष्टिभागेषु शेषेषु सूर्यः प्रथमां पौर्णमासीं परिसमापयति । एते च सूर्यमुहूर्ता एवंभूतैश्च सूर्यमुहूर्तैस्त्रिंशता त्रयोदश रात्रिन्दिवानि, एकस्य च रात्रिन्दिवस्य द्वादश व्यावहारिका मुहूर्ता भवन्ति । तत एतदनुसारेण गतैकदिवसभागगणना, शेषस्थितदिवसगणना च पूर्वाफाल्गुनीनक्षत्रस्य स्वयं कर्तव्या । एवमुत्तरसूत्रेष्वपि सूर्यनक्षत्रयोगे परिभावनीयम् । " ता एतेसि णं " इत्यादि प्रश्नसूत्रं सुगमम । भगवानाह-(ता उत्तराहिं इत्यादि) 'ता' इति पूर्ववत् । उत्तराभ्यां प्रोष्ठपदाभ्याम. अत्रापि द्विवचनम, उत्तराप्रोष्ठपदानक्षत्रस्य द्वितारकत्वात्, बहुवचनं च सूत्रे प्राकृतत्वात् । उत्तरयोश्च प्रोष्ठपदयोः समविंशतिर्मुहूर्ताः, चतुर्दश च द्वाषष्टिभागा मुहूर्तस्य, एकं च द्वाषष्टिभागं समषष्टिधा छित्त्वा तस्य सत्काश्चतुःषष्टिश्चूर्णिकाभागाः शेषाः । तथाहि-स एव ध्रुवराशिः ६६ । ५ । १ द्वितीयपौर्णमासीचिन्तायां द्वाभ्यां गुण्यते, मुहूर्तानां जातं द्वात्रिंशतं शतम् १३२। एकस्य च मुहूर्तस्य दश द्वाषष्टिभागाः १०। एकस्य च द्वाषष्टिभागस्य द्वौ समषष्टिभागौ २, ततः पूर्वरीत्या अभिजितो

नव मुहूर्ताः, एकस्य च मुहूर्तस्य चतुर्विंशतिर्द्वाषष्टिभागाः, एकस्य च द्वाषष्टिभागस्य सप्तकाः षट्षष्टिः सप्तषष्टिभागाः शोध्यन्ते, जातं द्वाविंशं शतं मुहूर्तानाम्, एकस्य च मुहूर्तस्य सप्तचत्वारिंशद् द्वाषष्टिभागाः, एकस्य च द्वाषष्टिभागस्य त्रयः सप्तषष्टिभागाः १२२ । ४७/६७ । ३/६७ । ततस्त्रिंशता मुहूर्तैः भवणः, त्रिंशता धनिष्ठा, पञ्चदशभिः शतभिषक्, त्रिंशता पूर्वाभाद्रपदा शुद्धेति स्थिताः पञ्चात्सप्तदश मुहूर्ताः १७ । शेषं तथैव ।४७।३। तत आगतम्-उत्तराभाद्रपदानक्षत्रस्य सप्तविंशतौ मुहूर्तेष्वेकस्य च मुहूर्तस्य चतुर्दशसु द्वाषष्टिभागेषु, एकस्य च द्वाषष्टिभागस्य चतुःषष्टौ सप्तषष्टिभागेषु गतेषु शेषेषु स्थितायां पौर्णमास्यां परिसमाप्तिमुपैति । सू० प्र० १० पाहु० २२ पाहु० । चं० प्र० ।

संप्रत्यस्यामेव पौर्णमास्यां सूर्यनक्षत्रयोगं चन्द्रनक्षत्रयोगं च पृच्छति-

तं समयं च णं सूरे केणं णक्खत्तेणं जोएति ?। ता उत्तराहिं फग्गुणीहिं. उत्तराणं फग्गुणीणं सत्त मुहुत्ते, तेत्तीसं च बावट्ठिभागा मुहुत्तस्स, बावट्ठिभागं च सत्तट्ठिधा छेत्ता एक्कतीसं चुल्लियाभागा सेसा। ता एतेसि णं पंचण्हं संवच्छराणं तचं पुण्णिमासिणिं चंदे केणं णक्खत्तेणं जोएति ?। ता अस्सिणीहिं, अस्सिणीणं एक्कवीसं मुहुत्ता, णव य बावट्ठिभागा मुहुत्तस्स, बावट्ठिभागं च सत्तट्ठिधा छेत्ता तेवट्ठिं चुल्लियाभागा सेसा। तं समयं च णं सूरे केणं णक्खत्तेणं जोएति ?। ता चित्ताहिं, चित्ताणं एगो मुहुत्तो, अट्ठावीसं च बावट्ठिभागं मुहुत्तस्स, बावट्ठिभागं च सत्तट्ठिधा छेत्ता तीसं चुल्लियाभागा सेसा। ता एतेसि णं पंचण्हं संवच्छराणं दुवालसमं पुण्णिमासिणिं चंदे केणं णक्खत्तेणं जोएति ?। ता उत्तराहिं आसाढाहिं, उत्तराणं आसाढाणं छउवीसं मुहुत्ता, छउवीसं च बावट्ठिभागा मुहुत्तस्स, बावट्ठिभागं च सत्तट्ठिधा छेत्ता चउपण्णं चुल्लियाभागा सेसा। तं समयं च णं सूरे केणं णक्खत्तेणं जोएइ ?। ता पुणव्वसुणा, पुणव्वसुस्स सोलस मुहुत्ता, अट्ठ य बावट्ठिभागा मुहुत्तस्स, बावट्ठिभागं च सत्तट्ठिधा छेत्ता बीसं चुल्लियाभागा सेसा। ता एतेसि णं पंचण्हं संवच्छराणं चरमं बावट्ठिं पुण्णिमासिणिं चंदे केणं णक्खत्तेणं जोएति ?। ता उत्तराहिं आसाढाहिं, उत्तराणं आसाढाणं चरमसमए। तं समयं च णं सूरे केणं णक्खत्तेणं जोएति ?। ता पुस्सेणं, पुस्सस्स एगूणवीसं मुहुत्ता, तेत्ताळीसं च बावट्ठिभागा मुहुत्तस्स, बावट्ठिभागं च सत्तट्ठिधा छेत्ता तेत्तीसं चुल्लियाभागा सेसा ॥

"तं समयं च णं" इत्यादि सुगमम् । भगवानाह-(ता उत्तराहिं इत्यादि) 'ता' इति पूर्ववत् । उत्तराभ्यां फाल्गुनीभ्यां, तयोश्च उत्तरयोः फाल्गुन्योस्तदानीं द्वितीयपौर्णमासीपरिसमाप्तिवेलायां सप्त मुहूर्ताः, त्रयस्त्रिंशच्च द्वाषष्टिभागा मुहूर्तस्य, द्वाषष्टिभागं च सप्तषष्टिधा छित्त्वा तस्य सत्का एकत्रिंशत् चूर्णिकाभागाः शेषाः । तथाहि-स एव ध्रुवराशिर्भ्रियते ६६ । ५ । १ । भृत्वा च द्वितीयस्याः पौर्णमास्याः संप्रति चिन्त्यते इत्यं गुण्यते, जातं द्वाविंशं शतं मुहूर्तानाम्, एकस्य च मुहूर्तस्य दश द्वाषष्टिभागाः, एकस्य च द्वाषष्टिभागस्य द्वौ सप्तषष्टिभागौ । १३२ । १०/६२ । २/६७ । तत एतस्मात् पुष्यशोधनकमेकोनविंशतिमुहूर्तीः, एकस्य च मुहूर्तस्य त्रिचत्वारिंशत् द्वाषष्टिभागाः, एकस्य च द्वाषष्टिभागस्य त्रयस्त्रिंशत् सप्तषष्टिभागाः १९ । ४३/६२ । ३३/६७ । इत्येवं परिमाणं पूर्ववदित्या शोध्यते, स्थितं पश्चाद् द्वादशोत्तरं शतं मुहूर्तानाम्, एकस्य च मुहूर्तस्याष्टाविंशतिर्द्वाषष्टिभागाः, एकस्य च द्वाषष्टिभागस्य षट्त्रिंशत् सप्तषष्टिभागाः ११२ । २८/६२ । ३६/६७ । ततः पञ्चदशभिर्मुहूर्तैरश्लेषा, त्रिंशता मघा, त्रिंशता पूर्वाफाल्गुनी शुद्धा, स्थिताः पञ्चान्मुहूर्ताः सप्तत्रिंशत्, शेषं तथैव । तत आगतं-सूर्येण युक्तमुत्तराफाल्गुनीनक्षत्रं सप्तमुहूर्तेषु, एकस्य च मुहूर्तस्य त्रयस्त्रिंशतद्वाषष्टिभागेषु, एकस्य च द्वाषष्टिभागस्य एकत्रिंशत्सप्तषष्टिभागेषु शेषेषु द्वितीयां पौर्णमासीं परिसमापयति । अधुना तृतीयपौर्णमासीविषयं चन्द्रनक्षत्रयोगं पृच्छति-"ता एतेसि णं" इत्यादि सुगमम् । भगवानाह-(अस्सिणीहिं इत्यादि) अश्विनीनक्षत्रं त्रिनारमिति तदपेक्षया बहुवचनम्, तदानीं च तृतीयपौर्णमासीपरिसमाप्तिवेलायामश्विनीनक्षत्रस्य एकविंशतिमुहूर्ताः, एकस्य च मुहूर्तस्य नव द्वाषष्टिभागाः, एकं च द्वाषष्टिभागं सप्तषष्टिधा छित्त्वा तस्य सत्कास्त्रिषष्टिश्चूर्णिकाभागाः शेषाः । तथाहि-स एव ध्रुवराशिः ६६ । ५ । ७ । तृतीया पौर्णमासी चिन्त्यमाना वर्तत इति त्रिभिर्गुण्यते, जातमष्टानवत्यधिकं शतं मुहूर्तानाम्, एकस्य च मुहूर्तस्य पञ्चदश द्वाषष्टिभागाः, एकस्य च द्वाषष्टिभागस्य त्रयः सप्तषष्टिभागाः १९८ । १५/६२ । ३/६७ । "तत उगुणं पोच्चया" इत्यादिवचनात् एकोनषष्ट्यधिकेन शतेन चतुर्विंशत्या द्वाषष्टिभागैरेकस्य च द्वाषष्टिभागस्य षट्षष्ट्या सप्तषष्टिभागैरभिजिदादीन्युत्तराभाद्रपदपर्यन्तानि षट् नक्षत्राणि शुद्धानि, पश्चादवतिष्ठन्ते ऽष्टात्रिंशत् मुहूर्ताः, एकस्य च मुहूर्तस्य द्विपञ्चाशत् द्वाषष्टिभागाः, एकस्य च द्वाषष्टिभागस्य चत्वारः सप्तषष्टिभागाः ३८ । ५२/६२ । ४/६७ । ततस्त्रिंशता मुहूर्तैः रेवती नक्षत्रं शुद्धं, तिष्ठन्त्यष्टौ मुहूर्ताः, तत आगतं चन्द्रयुक्तमश्विनीनक्षत्रमेकत्रिंशतौ मुहूर्तेष्वेकस्य च मुहूर्तस्य नवसु द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य त्रिषष्टौ सप्तषष्टिभागेषु शेषेषु परिसमापयति । संप्रत्यस्यामेव तृतीयस्यां सूर्यनक्षत्रयोगं पृच्छति-"तं समयं च णं" इत्यादि सुगमम् । भगवानाह-"ता चित्ताहिं" इत्यादि । चित्रायुक्तः सूर्यः परिसमापयति । तदानीं च तृतीयपौर्णमासीपरिसमाप्तिवेलायां चित्रायामेको मुहूर्तः, एकस्य च मुहूर्तस्याष्टाविंशतिर्द्वाषष्टिभागाः, एकं च द्वाषष्टिभागं सप्तषष्टिधा छित्त्वा तस्य सत्कास्त्रिंशच्चूर्णिकाभागाः शेषाः । तथाहि-स एव ध्रुवराशिः ६६ । ५ । १ । संप्रति तृतीयपौर्णमासी-चिन्त्यते त्रिभिर्गुण्यते, जातमष्टानवत्यधिकं शतं मुहूर्तानाम्, एकस्य च मुहूर्तस्य पञ्चदश द्वाषष्टिभागाः, एकस्य च द्वाषष्टिभागस्य त्रयः सप्तषष्टिभागाः १९८ । १५/६२ । ३/६७ । ततः एतस्मात्पुष्यशोधनकम् १९ । ४३ । ३३ पूर्वोक्तप्रकारेण शोध्यते, स्थितं पञ्चादष्टसप्तत्यधिकं मुहूर्तानां शतम्, एकस्य च मुहूर्तस्य त्रयस्त्रिंशद् द्वाषष्टिभागाः, एकस्य च द्वाषष्टिभागस्य सप्तत्रिंशत्सप्तषष्टिभागाः १७८ । ३३/६२ । ३७/६७ । ततः पञ्चाशदधिकेन मुहूर्तशतेनाश्लेषाऽऽदीनि हस्तपर्यन्तानि पञ्च नक्षत्राणि शुद्ध्यन्ति । शेषास्तिष्ठन्त्यष्टाविंशतिर्मुहूर्ताः । शेषं तथैव २८ । ३३ । ३७ । तत आगतम्-सूर्येण सह संप्रयुक्तं चित्रानक्षत्रमेकस्मिन् मुहूर्ते, एकस्य च मुहू-

तस्यां चतुर्विंशतौ द्वाषष्टिभागेषु, एकस्य च द्वाषष्टिभागस्य त्रिंशति सप्तषष्टिभागेषु शेषेषु तृतीयां पौर्णमासीं परिसमापयति। संप्रति द्वादश्यां पौर्णमास्यां चन्द्रनक्षत्रयोगं पृच्छति-" ता एतेसि णं " इत्यादि सुगमम । भगवानाह-" ता उत्तराहिं " इत्यादि । ' ता ' इति पूर्ववत् । उत्तराभ्यामाषाढाभ्यां द्वादशीं पौर्णमासीं चन्द्रः परिसमापयति । तदानीं च तयोरुत्तराषाढयोः षड्विंशतिर्मुहूर्ताः, एकस्य च मुहूर्तस्य षष्ट्या द्वाषष्टिभागानां त्रयस्त्रिंशद्द्वाषष्टिभागाः, एकं च द्वाषष्टिभागं सप्तषष्टिधा छित्त्वा तस्य सप्तकाश्चतुष्पञ्चाशच्चूर्णिकाभागाः शेषाः। तथाहि-स एव ध्रुवराशिः-६६ । ५ । १ । द्वादशी किल पौर्णमासी चिन्त्यते इति द्वादशभिर्गुण्यते, जातानि सप्तशतानि द्विनवत्यधिकानि मुहूर्तानाम्, एकस्य च मुहूर्तस्य षष्ट्या द्वाषष्टिभागाः। एकस्य च द्वाषष्टिभागस्य द्वादश सप्तषष्टिभागाः ७९२ । ६० । १२ । तत एतस्मात् " मूले सत्तेव चोयाला " इत्यादिवचनात् सप्तभिश्चतुश्चत्वारिंशदधिकैर्मुहूर्तानां शतैः, एकस्य च मुहूर्तस्य चतुर्विंशत्या द्वाषष्टिभागैः, एकस्य च द्वाषष्टिभागस्य षट्पञ्चाशता सप्तषष्टिभागैरभिजिदादीनि मूलपर्यन्तानि नक्षत्राणि शुद्धानि, ततस्त्रिंशता मुहूर्तैः पूर्वाषाढा, शेषं तिष्ठत्यष्टादश मुहूर्ताः, एकस्य च मुहूर्तस्य पञ्चत्रिंशद् द्वाषष्टिभागाः, एकस्य च द्वाषष्टिभागस्य त्रयोदश सप्तषष्टिभागाः १८ । ३५ । १३ । तत आगतं—चन्द्रेण युक्तमुत्तराषाढानक्षत्रं द्वादशीं पौर्णमासीं षड्विंशतौ मुहूर्तेषु,एकस्य च मुहूर्तस्य षड्विंशतौ द्वाषष्टिभागस्य चतुष्पञ्चाशत्सप्तषष्टिभागेषु शेषेषु परिसमापयति । संप्रत्यस्यामेव द्वादश्यां पौर्णमास्यां सूर्यनक्षत्रयोगं पृच्छति-" तं समयं च णं " इत्यादि सुगमम । भगवानाह-" ता पुणव्वसुणा " इत्यादि । ' ता ' इति पूर्ववत् । पुनर्वसुना युक्तः सूर्यः परिसमापयति । तदानीं च द्वादशीपौर्णमासीपरिसमाप्तिवेलायां पुनर्वसुनक्षत्रस्य षोडश मुहूर्ताः, अष्टौ च द्वाषष्टिभागा मुहूर्तस्य,एकं च द्वाषष्टिभागं सप्तषष्टिधा छित्त्वा तस्य सप्तका विंशतिश्चूर्णिकाभागाः शेषाः । तथाहि-स एव ध्रुवराशिः ६६ । ५ । १ द्वादशभिर्गुण्यते, जातानि सप्त शतानि द्विनवत्यधिकानि मुहूर्तानाम्, एकस्य च मुहूर्तस्य षष्ट्या द्वाषष्टिभागाः, एकस्य च द्वाषष्टिभागस्य द्वादश सप्तषष्टिभागाः ७९२। ६० । १२ । तत एतस्मात्पुष्यशोधनकं १९ । ४३ । ३३ पूर्वोक्तप्रकारेण शोध्यते, स्थितानि पश्चात्सप्तशतानि त्रिसप्तत्यधिकानि मुहूर्तानाम,एकस्य च मुहूर्तस्य षोडश द्वाषष्टिभागाः, एकस्य च द्वाषष्टिभागस्य षट्चत्वारिंशत् सप्तषष्टिभागाः। ७७३ । १६ । ४६। तत एतस्मात्सप्तभिः शतैश्चतुश्चत्वारिंशदधिकैर्मुहूर्तानाम, एकस्य च मुहूर्तस्य चतुर्विंशत्या द्वाषष्टिभागैः, एकस्य च द्वाषष्टिभागस्य षट्षष्ट्या सप्तषष्टिभागैरश्लेषार्द्रान्तं यावत् नक्षत्राणि शुद्धानि, पश्चादवतिष्ठन्ते अष्टाविंशतिर्मुहूर्ताः, एकस्य च मुहूर्तस्य त्रिपञ्चाशद् द्वाषष्टिभागाः, एकस्य च द्वाषष्टिभागस्य सप्तचत्वारिंशत्सप्तषष्टिभागाः २८ । ५३ । ४७ । तत आगतं पुनर्वसुनक्षत्रं सूर्येण सह योगमुपागतं षोडशसु मुहूर्तेषु शेषेषु, एकस्य च मुहूर्तस्याष्टसु द्वाषष्टिभागेषु, एकस्य च द्वाषष्टिभागस्य विंशतौ सप्तषष्टिभागेषु शेषेषु द्वादशीं पौर्णमासीं परिसमापयति । " ता एतेसि णं " इत्यादि सुगमम । भगवानाह-" ता उत्तराहिं " इत्यादि । उत्तराभ्यामाषाढाभ्यां युक्तश्चन्द्रश्चरमां द्वाषष्टितमां पौर्णमासीं परिसमापयति । तदानीं चरमद्वाषष्टितमपौर्णमासीपरिसमाप्तिवेलायामुत्तरयोराषाढयोश्चरमसमयः। तथाहि-स एव ध्रुवराशिः ६६ । ५ । १ चरमा द्वाषष्टितमा पौर्णमासी संप्रति चिन्त्यमाना वर्तते, इति द्वाषष्ट्या गुण्यते, जातानि मुहूर्तानां चत्वारिंशच्छतानि द्विनवत्यधिकानि, एकस्य च मुहूर्तस्य द्वाषष्टिभागानां त्रीणि शतानि दशोत्तराणि, एकस्य च द्वाषष्टिभागस्य द्वाषष्टिः सप्तषष्टिभागाः ४०९२ । ३१० । ६२ । तत एतस्मात्-" अहसयछ गुणवीसा, सोदसग उत्तराण साढाणं । चउवीसं खलु भागा, बावट्ठी खुत्तियाओ य " ॥ १ ॥ इत्येवंप्रमाणमेकं सकलनक्षत्रपर्यायशोधनकं पञ्चभिर्गुणयित्वा शोध्यते । तच्च पूर्वोक्तेन प्रकारेण शोध्यमानं परिपूर्णं शुद्धिमासादयतीति न किञ्चित्पश्चादवतिष्ठते । तत आगतम्-उत्तराषाढानक्षत्रं चन्द्रेण सह युक्तं चरमसमये चरमां द्वाषष्टितमां पौर्णमासीं परिसमापयति । संप्रत्यस्यामेव द्वाषष्टितमायां पौर्णमास्यां सूर्यनक्षत्रयोगं पृच्छति-"तं समयं च णं" इत्यादि सुगमम् । भगवानाह-" ता पुस्सेणं " इत्यादि। पुष्येण युक्तः सूर्यश्चरमां द्वाषष्टितमां पौर्णमासीं परिसमापयति । तदानीं च द्वाषष्टितमपौर्णमासीपरिसमाप्तिवेलायामेकोनविंशतिर्मुहूर्ताः त्रिचत्वारिंशच्च द्वाषष्टिभागा मुहूर्तस्य, द्वाषष्टिभागं च सप्तषष्टिधा छित्त्वा तस्य सप्तकाश्चत्वारिंशच्चूर्णिकाभागाः शेषाः । तथाहि-स एव ध्रुवराशिः ६६ । ५ । १ द्वाषष्टया गुण्यते, जातानि मुहूर्तानां चत्वारिंशच्छतानि द्विनवत्यधिकानि, एकस्य च मुहूर्तस्य द्वाषष्टिभागानां त्रीणि शतानि दशोत्तराणि, एकस्य च द्वाषष्टिभागस्य द्वाषष्टिः सप्तषष्टिभागाः ४०९२ । ३१० । ६२ । इह पुष्यस्य दशमुहूर्तेष्वेकस्य च मुहूर्तस्याष्टादशसु द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य चतुस्त्रिंशति सप्तषष्टिभागेष्वतिक्रान्तेषु पाश्चात्ययुगं परिसमाप्तिमुपैति, तदनन्तरमन्ययुगं प्रवर्तते । पुष्यस्यापि च तावन्मात्रादतिक्रान्तात् परतो यावद् भूयोऽपि तावन्मात्रस्य पुष्यस्यातिक्रमः, एतावत्प्रमाण एकः परिपूर्णो नक्षत्रपर्यायः । तस्य च प्रमाणमष्टौ शतान्येकोनविंशत्यधिकानि मुहूर्तानाम,एकस्य च मुहूर्तस्य चतुर्विंशतिर्द्वाषष्टिभागाः,एकस्य च द्वाषष्टिभागस्य षट्षष्टिः सप्तषष्टिभागाः ८१९ । २४ । ६६ । तत एतत् पञ्चभिर्गुणयित्वा प्रागुक्ताद् ध्रुवराशेर्द्वाषष्टिगुणिताच्छोध्यते, तच्चापरिपूर्णं शुद्ध्यति, पश्चाच्च राशिर्निर्लेपो जायते, तत आगतं-पुष्यस्य सूर्येण युक्तस्य दशसु मुहूर्तेष्वेकस्य च मुहूर्तस्य अष्टादशसु द्वाषष्टिभागेषु, एकस्य च द्वाषष्टिभागस्य चतुस्त्रिंशति सप्तषष्टिभागेषु अतिक्रान्तेषु एकोनविंशतौ च मुहूर्तेषु, एकस्य च मुहूर्तस्य त्रिचत्वारिंशति द्वाषष्टिभागेषु, एकस्य च द्वाषष्टिभागस्य त्रयस्त्रिंशति सप्तषष्टिभागेषु शेषेषु चरमा द्वाषष्टितमा पौर्णमासी परिसमाप्तिमगमदिति । तदेवं पौर्णमासीविषयश्चन्द्रनक्षत्रयोगः, सूर्यनक्षत्रयोगश्चोक्तः । सू० प्र० १० पाहु० २२ पाहु० । चं०प्र० (अमावास्याविषयश्चन्द्रनक्षत्रयोगः, सूर्यनक्षत्रयोगश्च ' अमावसा ' शब्दे प्रथमभागे ७४३ पृष्ठे निरूपितः)

(२६) संप्रति यन्नक्षत्रं यावद्दानामकं तदेव वा तस्मिन्नेव देशे अन्यस्मिन् वा यावता कालेन भूयश्चन्द्रेण सह योगमुपागच्छति तावन्तं कालं निर्विवक्षुराह—

ता जेणं अज्ज णक्खत्तेणं चंदे जोयं जोएति जंसि देसंसि,से णं इमाणि अट्ठ एगूणवीसाणि मुहुत्तसताइं, चउवी-

सं च बावट्ठिभागे मुहुत्तस्स, बावट्ठिभागं च सत्तट्ठिधा छेत्ता बावट्ठिचुण्णियाभागे उवातिणावेत्ता पुणरवि से चंदे अभिणं सरिसएणं चेव णक्खत्तेणं जोयं जोएति अट्ठंसि देसंसि। ता जेणं अज्ज णक्खत्तेणं चंदे जोयं जोएति जंसि देसंसि, से णं इमाइं सोलस अट्ठतीसं मुहुत्तसताइं अट्ठ य बावट्ठिभागे मुहुत्तस्स, बावट्ठिभागं च सत्तट्ठिधा छेत्ता पणट्ठिचुण्णियाभागे उवातिणावेत्ता पुणरवि से चंदे तेणं चेव णक्खत्तेणं जोयं जोएति अट्ठंसि देसंसि। ता जेणं अज्ज णक्खत्तेणं चंदे जोयं जोएति जंसि देसंसि,से णं इमाइं चउप्पण्णं मुहुत्तसहस्साइं, णव य मुहुत्तसताइं उवातिणावेत्ता पुणरवि से चंदे अभिणं तारिसएणं चेव णक्खत्तेणं जोयं जोएति तंसि देसंसि। ता जेणं अज्ज णक्खत्तेणं चंदे जोयं जोएति जंसि देसंसि, से णं इमे एगं मुहुत्तसयसहस्सं अट्ठासीतिं चेव मुहुत्तसताइं उवातिणावेत्ता पुणरवि से चंदे तेणं चेव णक्खत्तेणं जोयं जोएति तंसि तंसि देसंसि।

"ता जेणं अज्ज णक्खत्तेणं" इत्यादि। 'ता' इति पूर्ववत्। येन नक्षत्रेण सह चन्द्रो अद्य विवक्षिते दिने योगं युनक्ति करोति यस्मिन् देशे, स चन्द्रः, णमिति वाक्यालङ्कारे। इमानि वक्ष्यमाणसंख्याकानि। तान्येवाह-अष्टौ मुहूर्तशतान्येकोनविंशान्येकोनविंशत्यधिकानि, एकस्य च मुहूर्तस्य चतुर्विंशतिद्वाषष्टिभागान्, एकं च द्वाषष्टिभागं सप्तषष्टिधा छित्त्वा द्वाषष्टिचूर्णिकाभागानुपादाय गृहीत्वा, अतिक्रम्येत्यर्थः। पुनरपि स चन्द्रोऽन्येन द्वितीयेन सदृशनाम्ना नक्षत्रेण योगं युनक्ति अन्यस्मिन् देशे। इयमत्र भावना-इह चन्द्रसूर्यनक्षत्राणां मध्ये नक्षत्राणि सर्वशीघ्राणि, तेभ्यो मन्दगतयः सूर्याः, तेभ्योऽपि मन्दगतयश्चन्द्रमसः। (एतच्चाग्रे स्वयमेव प्रपञ्चयिष्यते) षट्पञ्चाशन्नक्षत्राणि प्रतिनियतापान्तरालदेशानि चक्रवालमण्डलतया व्यवस्थितानि सदैवैककपतया परिभ्रमन्ति। तत्र किल युगस्याऽऽदावभिजिता नक्षत्रेण सह योगमधिगच्छति चन्द्रमाः, स च योगमुपागतः सन् शनैः शनैः पश्चादवष्वष्कते; तस्य नक्षत्रेभ्योऽतीव मन्दगतित्वात्। ततो नवानां मुहूर्तानामेकस्य च मुहूर्तस्य चतुर्विंशतिद्वाषष्टिभागानाम्, एकस्य च द्वाषष्टिभागस्य षट्षष्टिसप्तषष्टिभागानामतिक्रमे पुरतः श्रवणेन सह योगमायाति। ततस्ततश्चन्द्रोऽपि शनैः पश्चादवष्वष्कमाणस्त्रिंशता मुहूर्तैः श्रवणेन सह योगं समाप्य पुरतो धनिष्ठया सह योगमुपागच्छति। एवं स्वं स्वं कालमपेक्ष्य सर्वैरपि नक्षत्रैः सह योगस्तावद्वक्तव्यो यावदुत्तराषाढानक्षत्रयोगपर्यन्तः। एतावता च कालेनाष्टौ मुहूर्तशतानि, एकस्य च मुहूर्तस्य चतुर्विंशतिर्द्वाषष्टिभागाः, एकस्य च द्वाषष्टिभागस्य षट्षष्टिः सप्तषष्टिभागा अभवन्। तथाहि-षट् नक्षत्राणि, पञ्चचत्वारिंशत् मुहूर्तानीति षट् पञ्चचत्वारिंशता गुण्यन्ते, जाते द्वे शते सप्तत्यधिके २७०। षट् च नक्षत्राणि पञ्चदश मुहूर्तानीति भूयः षट् पञ्चदशभिर्गुण्यन्ते, जाता नवतिः पञ्चदश त्रिंशन्मुहूर्तानीति पञ्चदश त्रिंशता गुण्यन्ते, जातानि चत्वारि शतानि पञ्चाशदधिकानि ४५०। अभिजितो नव मुहूर्ताः, एकस्य च मुहूर्तस्य चतुर्विंशतिर्द्वाषष्टिभागाः, एकस्य च द्वाषष्टिभागस्य षट्षष्टिः सप्तषष्टिभागा इति भवति सर्वेषामेकत्र मीलने यथोक्ता मुहूर्तसंख्या। एष एतावान् नक्षत्रमासः। ततस्तदनन्तरं यदभिजिन्नक्षत्रमतिक्रान्तं तदपरेण द्वितीयेनाभिजिता नक्षत्रेण सह नवमुहूर्ताऽऽदिकालं योगमुपागच्छति, ततः परमपरेण द्वितीयाद्वाविंशतिसंबन्धिना श्रवणेन सह योगमश्नुते, एवं पूर्ववत् तावद्वाच्यं यावदुत्तराषाढा, तदनन्तरं भूयः प्रथमेनैवाभिजिता नक्षत्रेण सह योगं याति। ततः प्रागुक्तक्रमेण श्रवणाऽऽदिभिः, एवं सकलकालमपि ततो विवक्षिते दिने यस्मिन् देशे येन नक्षत्रेण सह योगमगमच्चन्द्रमाः स यथोक्तमुहूर्तसंख्याऽतिक्रमे भूयस्तादृशेनैवापरेण नक्षत्रेण सह अन्यस्मिन् देशे योगमादत्ते, न तेनैवापि तस्मिन्नेव देशे इति। तथा (ता जेणमित्यादि) अद्य विवक्षिते दिने येन नक्षत्रेण सह योगं युनक्ति यस्मिन् यस्मिन् देशे चन्द्रमाः, स इमानि वक्ष्यमाणसंख्याकानि। तान्येवाह-षोडश मुहूर्तशतानि अष्टात्रिंशदधिकानि, एकोनपञ्चाशतं द्वाषष्टिभागान् मुहूर्तस्य, एकं च द्वाषष्टिभागं सप्तषष्टिधा छित्त्वा तस्य सत्कान् पञ्चषष्टिचूर्णिकाभागानुपादायातिक्रम्य पुनरपि स चन्द्रस्तेनैव नक्षत्रेण सह योगं युनक्ति, परमन्यस्मिन् देशे, न तु तस्मिन्नेव। कुतः?, इति चेत्। उच्यते-इह भूयस्तस्मिन्नेव देशे तेनैव नक्षत्रेण सह योगः, युगद्वयकालातिक्रमे तथा केवलवेदसा ज्योतिश्चक्रगतेरुपलम्भेन। जम्बूद्वीपे च षट्पञ्चाशदेव नक्षत्राणि, ततो विवक्षितनक्षत्रयोगे सति तत आरभ्य षट्पञ्चाशन्नक्षत्रातिक्रमेण तेन नक्षत्रेण सह योगमादत्ते, षट्पञ्चाशन्नक्षत्रातिक्रमश्च प्रागुक्ताष्टाविंशतिनक्षत्रमुहूर्तसंख्यया। तत उक्तम्-"सोलस अट्ठतीस मुहुत्तसया" इत्यादि। तदेवं तादृशेन तेन वा नक्षत्रेण सह अन्यस्मिन् देशे यावता कालेन भूयोऽपि योग उपजायते, तावान् कालविशेष उक्तः। संप्रति तस्मिन्नेव देशे तादृशेन तेन वा नक्षत्रेण सह भूयोऽपि योगो यावता कालेन भवति, तावन्तं कालविशेषमाह-(ता जेणं अज्ज णक्खत्तेणं इत्यादि) अद्य विवक्षिते दिने येन नक्षत्रेण सह योगं चन्द्रो युनक्ति यस्मिन् देशे, स चन्द्रमा इमानि वक्ष्यमाणसंख्याकानि। तान्येवाह-चतुःपञ्चाशन्मुहूर्तसहस्राणि। नव च मुहूर्तशतान्युपादायातिक्रम्य पुनरपि स चन्द्रोऽन्येन तादृशेनैव नक्षत्रेण सह योगं युनक्ति तस्मिन्नेव देशे। इयमत्र भावना-विवक्षिते युगे विवक्षितानामष्टाविंशतेर्नक्षत्राणां मध्ये येन नक्षत्रेण सह यस्मिन् देशे यदा चन्द्रमसो योगो जातो, भूयस्तस्मिन्नेव देशे तदेव तेनैव नक्षत्रेण सह योगो विवक्षितयुगादारभ्य तृतीये युगे, न तु द्वितीये। कुतः?, इति चेत्। उच्यते-इह युगाऽऽदित आरभ्य प्रथमे नक्षत्रमासे यान्येकाभ्यष्टाविंशतिनक्षत्राणि समतिक्रामन्ति द्वितीयेन नक्षत्रमासेन, तेभ्योऽपराणि द्वितीयानि ततो भूयस्तृतीयेन नक्षत्रमासेन, तान्येव प्रथमान्यष्टाविंशतिनक्षत्राणि चतुर्थेन भूयस्तान्येव द्वितीयानि। एवं सकलकालं युगे च नक्षत्रमासाः सप्तषष्टिः। सा च सप्तषष्टिसंख्या त्रिधमेति विवक्षितयुगपरिसमाप्तौ सत्यामन्यस्य युगस्य प्रारम्भे यानि विवक्षितयुगस्याऽऽदौ भुक्तानि नक्षत्राणि, तेभ्योऽपराण्येव द्वितीयानि भोगमायान्ति, न तु तान्येव, युगद्वये च चतुर्व्यधिकानि नक्षत्रमासशतं भवति। सा च चतुर्व्यधिकशतनक्षत्रमासशतसंख्या समेति द्वितीययुगपरिसमाप्तौ षट्पञ्चाशदपि नक्षत्राणि समाप्तिमुपयान्ति, ततो विवक्षितयुगादारभ्य तृतीये युगे तेनैव नक्षत्रेण तस्मिन्नेव देशे

तदा चन्द्रमसो योगः, युगे चाहोरात्राणामष्टादश शतानि त्रिंशदधिकानि; एकैकस्मिंश्चाहोरात्रे मुहूर्तानां त्रिंशत्; ततोऽष्टादशानां शतानां त्रिंशदधिकानां त्रिंशता गुणने भवति यथोक्ता मुहूर्तसंख्या, यथोक्तमुहूर्तसंख्याऽतिक्रमे च तादृशेनैव नक्षत्रेण सह योगः चन्द्रमास्तस्मिन्नेव देशे,न तु तेन नक्षत्रेण, अन्यस्मिन्वा देशे इति। (ता जेणमित्यादि) इदं सूत्रमक्षरार्थमधिकृत्य सुगमम्। भावना तु प्रागेव कृता, नवरं युगद्वयकालं षष्ट्यधिकानि त्रीणि शतानि षट्षष्ट्यधिकानि अहोरात्राणाम्, एकैकस्मिंश्चाहोरात्रे त्रिंशन्मुहूर्ता इति षट्त्रिंशच्छतानां षट्षष्ट्यधिकानां त्रिंशता गुणने यथोक्ता मुहूर्तसंख्या भवति। तदेवं तादृशेन तेन वा नक्षत्रेण सहान्यस्मिन् तस्मिन् वा देशे चन्द्रमसो योगे कालप्रमाणमुक्तम्।

संप्रति सूर्यविषये तदाह-

ता जेणं अज्ज णक्खत्तेणं सूरे जोयं जोएति जंसि देसंसि, से णं इमाइं तिण्णि तावट्ठाइं राइंदियसताइं उवातिणावेत्ता पुणरवि से सूरिए अस्सेणं तारिसएणं चेव णक्खत्तेणं जोयं जोएति तंसि देसंसि। ता जेणं अज्ज णक्खत्तेणं सूरे जोयं जोएति जंसि देसंसि, से णं इमाइं सत्तदुवत्तीसं राइंदियसताइं उवातिणावेत्ता पुणरवि से सूरे तेणं चेव णक्खत्तेणं जोयं जोएति तंसि देसंसि। ता जेणं अज्ज णक्खत्तेणं सूरे जोयं जोएति जंसि देसंसि,से णं इमाइं अट्ठारस तीसाइं राइंदियसताइं उवातिणावेत्ता पुणरवि सूरे अस्सेणं तारिसएणं चेव णक्खत्तेणं जोगं जोएति तंसि देसंसि। ता जेणं अज्ज णक्खत्तेणं सूरे जोयं जोएति जंसि देसंसि, ते णं इमाइं छत्तीसं सट्ठाइं राइंदियसयाइं उवातिणावेत्ता पुणरवि से सूरे तेणं चेव णक्खत्तेणं जोयं जोएति तंसि देसंसि। ता जया णं इमे चंदे गतिसमावण्णए भवति, तता णं इतरे वि चंदे गतिसमावण्णए भवति, जता णं इतरे वि चंदे गतिसमावण्णए भवति, तता णं इमे वि चंदे गतिसमावण्णए भवति। ता जया णं इमे सूरिए गतिसमावण्णे भवति, तया णं इयरे वि सूरिए गतिसमावण्णे भवति, जता णं इतरे सूरिए गतिसमावण्णे भवति, तया णं इमे वि सूरिए गतिसमावण्णे भवति। एवं गहे वि, णक्खत्ते वि। ता जता णं इमे चंदे जुत्ते जोगेणं भवति, तता णं इतरे वि चंदे जुत्ते जोगेणं भवति, जया णं इयरे चंदे जुत्ते जोगेणं भवति, तता णं इमे वि चंदे जुत्ते जोगेणं भवति। एवं सूरे वि, गहे वि, णक्खत्ते वि। सया वि णं चंदा जुत्ता जोएहिं, सता वि णं सूरा जुत्ता जोगहिं, सया वि णं गहा जुत्ता जोगेहिं, सया वि णं णक्खत्ता जुत्ता जोगेहिं। दुहतो वि णं चंदा जुत्ता जोगेहिं, दुहतो वि णं सूरा जुत्ता जोगहिं, दुहतो वि णं गहा जुत्ता जोगेहिं, दुहतो वि णं णक्खत्ता जुत्ता जोगेहिं।

"ता जेणं" इत्यादि। 'ता' इति पूर्ववत्। अद्य विवक्षिते दिने येन नक्षत्रेण सह सूर्यो यस्मिन् देशे योगं युनक्ति, स इमानि त्रीणि षट्षष्ट्यधिकानि रात्रिंदिवशतानि उपादाय अतिक्रम्य, पुनरपि स सूर्यस्तस्मिन्नेव देशे तादृशेनैवान्येन नक्षत्रेण सह योगं युनक्ति, न तु तेनैव। कुतः?, इति चेत्। उच्यते-इह चन्द्रो नक्षत्रमासेनैकेनाष्टाविंशतिनक्षत्राणि भुङ्क्ते। सूर्यस्तु त्रिभिरेवाहोरात्रशतैः षट्षष्ट्यधिकैः। त्रीणि चाहोरात्रशतानि षट्षष्ट्यधिकानि एकः सूर्यसंवत्सरः। ततोऽन्यैस्त्रिभिरहोरात्रशतैः षट्षष्ट्यधिकैरन्यानि द्वितीयान्यष्टाविंशतिनक्षत्राणि परिभुङ्क्ते। तदनन्तरं तृतीयस्तान्येव प्रथमान्यष्टाविंशतिनक्षत्राणि तावत्याऽहोरात्रसंख्यया क्रमेण युनक्ति। ततः षट्षष्ट्यधिकरात्रिन्दिवशतत्रयातिक्रमेण सूर्यस्य तस्मिन्नेव देशे तादृशेनैवापरेण नक्षत्रेण सह योगः, न तु तेनैव। (ता जेणं इत्यादि) इदं सूत्रमक्षरार्थमधिकृत्य सुगमम्, भावना च प्रागेव कृता। (ता जेणमित्यादि) 'ता' इति पूर्ववत्। अद्य विवक्षिते दिने येन नक्षत्रेण सह सूर्यो यस्मिन् देशे योगं युनक्ति, स इमानि अष्टादश रात्रिंदिवशतानि त्रिंशदधिकानि उपादायातिक्रम्य,पुनरपि तस्मिन्नेव देशेऽन्येनैव तादृशेन नक्षत्रेण सह योगं युनक्ति,न तु तेनैव। कस्मात्?, इति चेत्। उच्यते-इह रात्रिन्दिवानामष्टादशशतानि त्रिंशदधिकानि युगे भवन्ति। तत्र सूर्यो विवक्षितदिनादारभ्य तस्मिन्नेव देशे तदैव दिने तेनैव नक्षत्रेण सह योगमागच्छति। तृतीये संवत्सरे युगे च सूर्यवर्षाणि पञ्च; ततस्तृतीये पञ्चमे वा सूर्यसंवत्सरे सूर्यः तेनैव नक्षत्रेण तस्मिन्नेव काले योगमादत्ते, न तु युगातिक्रमे षष्ठे वर्षे इति। "ता जेणं" इत्यादि सुगमं, नवरं षट्त्रिंशदधिकानि षट्शतानि षष्ट्यधिकानि युगद्वये भवन्ति,युगद्वये च दश सूर्यवर्षाणि। ततो युगद्वयातिक्रमे एकादशे वर्षे सूर्यस्य तेनैव नक्षत्रेण सह तस्मिन्नेव देशे योग उपपद्यत इति। इह जम्बूद्वीपे द्वौ चन्द्रमसौ,द्वौ सूर्यौ,एकैकस्य चन्द्रमसो निजो ग्रहाऽऽदिकः परिवार इति श्रुत्वा कश्चिदेवमपि मन्येत-यथा निजकालं ग्रहादिभिः चन्द्राऽऽदीनां गतिः,भिन्नकालं च तेषां नक्षत्राऽऽदिभिः सह योग इति। ततस्तदाशङ्काऽपनोदार्थमाह-(ता जया णमित्यादि) 'ता' इति पूर्ववत्। यदा यस्मिन् काले, अयं प्रत्यक्षत उपलभ्यमानो भरतक्षेत्रे प्रकाशयन् विवक्षितश्चन्द्रः, विवक्षिते मण्डले इति गम्यते। गतिसमापन्नो गतियुक्तो भवति, तदा तस्मिन् काले इतरोऽपि ऐरावतं क्षेत्रं प्रकाशयन् तस्मिन्नेव विवक्षिते मण्डले गतिसमापन्नो भवति। एवं शेषाण्यपि सूत्राणि भावनीयानि। नवरम् (एवं गहे वि, एवं णक्खत्ते वि त्ति) एवमुक्तेन प्रकारेण ग्रहेऽपि द्वावालापकौ वक्तव्यौ, नक्षत्रेऽपि च। तद्यथा-"ता जया णं इमे गहे गहसामावण्णे भवइ, तया णं इतरे वि गहे गहसमावण्णे भवइ, ता जया णं इतरे गहे गहसमावण्णे भवइ, तया णं इमे वि गहे गहसमावण्णे भवइ।" एवं नक्षत्रेऽपि वाच्यम्। "ता जया णं इमे चंदे जुत्ते जोगेणं" इत्यादि सुगमं, नवरं (दुहतो वि त्ति) उभयतोऽपि दक्षिणोत्तरयोः, पूर्वापरद्विभयोर्वा। सू० प्र० १० पाहु० २२ पाहु०। (संवत्सरान्तेषु नक्षत्रचन्द्रयोगः 'संवच्छर' शब्दे वक्ष्यते) (संवत्सरेषु चन्द्रः केन नक्षत्रेणाऽऽवृत्तिं योजयतीति 'आउट्टि' शब्दे द्वितीयभागे ३३ पृष्ठे उक्तम) (अर्द्धमासे केन नक्षत्रेण चन्द्रश्चारं चरतीति 'चंदमंडल' शब्दे तृतीयभागे १०८१ पृष्ठे उक्तम)

(२७) नक्षत्राणां संस्थानानि-

ता कहं ते णक्खत्तसंठिती आहिता ति वदेज्जा?। ता एतेसि णं अट्ठावीसाए णक्खत्ताणं अभिई णक्खत्ते गो-

सीसाऽऽवलिसंठिए पण्णत्ते १, सवणे णक्खत्ते काहारसंठिए पण्णत्ते २, धणिट्ठा णक्खत्ते सउणिपक्खीणगसंठिए पण्णत्ते ३, सतभिसया णक्खत्ते पुप्फोवयारसंठिए पण्णत्ते ४, पुव्वापोट्ठवया णक्खत्ते ५, उत्तरभद्दवया णक्खत्ते अद्धवावीसंठिए पण्णत्ते ६, रेवती णक्खत्ते णावासंठिए पण्णत्ते ७, अस्सिणी णक्खत्ते अस्सखंधगसंठिए पण्णत्ते ८, भरणी णक्खत्ते भगसंठिए पण्णत्ते ९, कत्तिया णक्खत्ते छुरघरसंठिए पण्णत्ते १०, रोहिणी णक्खत्ते सगडसंठिए पण्णत्ते ११, मगसिरे णक्खत्ते मगसीसाऽऽवलिसंठिए पण्णत्ते १२, अद्दा णक्खत्ते रुहिरबिंदुसंठिते पण्णत्ते १३. पुणव्वसू णक्खत्ते तुलासंठिए पण्णत्ते १४, पुस्से णक्खत्ते वद्धमाणगसंठिए पण्णत्ते १५, असिलेसा णक्खत्ते पडागसंठिए पण्णत्ते १६, महा णक्खत्ते पागारसंठिए पण्णत्ते १७, पुव्वाफग्गुणी णक्खत्ते अद्धपलियसंठिए पण्णत्ते १८, उत्तरा वि एवं चेव १९, हत्थे हत्थसंठिए पण्णत्ते २०, चित्ता णक्खत्ते महुफुल्लगसंठिए पण्णत्ते २१, साई णक्खत्ते खीलगसंठिए पण्णत्ते २२, विसाहा णक्खत्ते दामणिसंठिए पण्णत्ते २३, अणुराहा णक्खत्ते एगावलिसंठिए पण्णत्ते २४, जेट्ठा णक्खत्ते गयदंतसंठिए पण्णत्ते २५, मूले णक्खत्ते विच्छुयलंगूलसंठिए पण्णत्ते २६, पुव्वासाढा णक्खत्ते गयविक्कमसंठिए पण्णत्ते २७, उत्तरासाढा णक्खत्ते सीहणिस्साइसंठिए पण्णत्ते २८ ।

नक्षत्राणां संस्थानं वक्तव्यमिति ततस्तद्विषयं प्रश्नसूत्रमाह- "ता कहं ते" इत्यादि । 'ता' इति पूर्ववत् । कथं केन प्रकारेण भगवन्! नक्षत्राणां संस्थितिः संस्थानमाख्यातमिति वदेत्?। एवमुक्ते भगवानाह-"ता एतेसि णं" इत्यादि । 'ता' इति पूर्ववत् । एतेषामनन्तरोदितानामष्टाविंशतेर्नक्षत्राणां मध्येऽभिजिन्नक्षत्रं गोशीर्षाऽऽवलिसंस्थितिं प्रज्ञप्तम् । गोः शीर्षं,तस्याऽऽवली तत्पुद्गलानां दीर्घरूपा श्रेणिः, तत्सदृशं संस्थानं प्रज्ञप्तम् । श्रवणनक्षत्रं कासारसंस्थितं प्रज्ञप्तम् । एवं शेषाण्यपि स्वस्वसंस्थानानि नक्षत्राणि भावनीयानि, नवरं दामनी पशुबन्धनं, शेषं प्रायः सुगमम् ।

संस्थानसंग्राहिकाश्चेमा जम्बूद्वीपप्रज्ञप्तिसत्काश्चितस्रो गाथाः-

" गोसीसाऽऽवलि काहा-र सउणि पुप्फोवयार वावी य ।
नावा आसक्खंधग, भग छुरघरए य सगडुद्धी ॥ १ ॥
मिगसीसाऽऽवलि रुहिर-स्स बिंदु तुल वद्धमाणग पडागा ।
पागारे पल्लंके, हत्थे महुफुल्लए चेव ॥ २ ॥
खीलग दामणि एगा-वली य गयदंत विच्छुअलंगे य ।
गयविक्कमे य तत्तो, सीहनिसाई य संठाणा" ॥ ३ ॥ इति ।

जं० ७ वक्ष० । चं० प्र० १० पाहु० ७ पाहु० । (नक्षत्राणां पञ्चयः ' जोइसिय ' शब्देऽस्मिन्नेव भागे १४६३ पृष्ठे उक्ताः) (२८) (नक्षत्राणामन्तर्बहिश्च चारः ' जोइसिय ' शब्देऽस्मिन्नेव भागे १६०३ पृष्ठे प्रत्यपादि)

णक्खत्तचंदजोग–नक्षत्रचन्द्रयोग–पुं० । सप्तविंशतया नक्षत्रैः साकल्येन चन्द्रस्य योगे, ज्यो० २ पाहु० । (नक्षत्रस्य चन्द्रेण योगो ' णक्खत्त ' शब्दे १७८० पृष्ठे समुक्तः)

णक्खत्तणाम [ण्]–नक्षत्रनामन्–न० । नक्षत्राणामभिधायके शब्दे, अनु० ।

नक्षत्राण्याश्रित्य यन्नाम स्थाप्यते तद्दर्शयति-

से किं तं णक्खत्तणामे ?। णक्खत्तणामे अणेगविहे पण्णत्ते । तं जहा-कत्तिआहिं जाए कत्तिए, कत्तियादिन्ने, कत्तियाधम्मे, कत्तियासम्मे, कत्तियादेवे, कत्तियादासे, कत्तियासेणे, कत्तियारक्खिए । रोहिणीहिं जाए रोहिणीए, रोहिणीदिन्ने, रोहिणीधम्मे, रोहिणीसम्मे, रोहिणीदेवे, रोहिणीदासे, रोहिणीसेणे, रोहिणीरक्खिए । एवं सव्वणक्खत्तेसु णामा जाणियव्वा ।

एत्थ संगहणिगाहाओ-

" कत्तिअ रोहिणि मगसिर,अद्दा य पुणव्वसू अ पुस्से अ ।
तत्तो अ अस्सिलेसा, महा उ दो फग्गुणीओ अ ॥ १ ॥
हत्थो चित्ता साती, होइ विसाहा तहा य अणुराहा ।
जेट्ठा मूला पुव्वा-साढा तह उत्तरा चेव ॥ २ ॥
अभिई सवण धणिट्ठा,सतभिसया दो अ होंति भद्दवया ।
रेवइ अस्सिणि भरणी, एसा णक्खत्तपरिवारो " ॥३॥
सेत्तं णक्खत्तणामे ।

कृत्तिकासु जातः कार्त्तिकः, कृत्तिकाभिर्दत्तः कृत्तिकादत्तः । एवं कृत्तिकाधर्मः, कृत्तिकाशर्मः, कृत्तिकादेवः, कृत्तिकादासः, कृत्तिकासेनः, कृत्तिकारक्षितः । एवमन्यान्यपि रोहिण्यादिसप्तविंशतिनक्षत्राण्याश्रित्य नामस्थापना द्रष्टव्या । तत्र सर्वनक्षत्रसंग्रहार्थं " कत्तिया रोहिणी" इत्यादि गाथात्रयं सुगमम् । नवरमभिजिदुत्तरभद्रपदेन सह पञ्चदशानेषु नक्षत्रेषु कृत्तिकाऽऽदिरेव क्रम इत्यश्विन्यादिक्रममुत्सृज्येत्थमेव पठितव्यानीति । अनु० ।

णक्खत्तणेमी–देशी-विष्णौ, दे० ना० ४ वर्ग ।

णक्खत्तमंमल–नक्षत्रमण्डल–न० । नक्षत्राणां संबन्धिनि मण्डले, जं० ।

नक्षत्रमण्डलस्य अष्टभिर्द्वारैः प्ररूपणा—तत्राद्यौ द्वाराणि यथा—मण्डलसंख्याप्ररूपणा १, मण्डलचारक्षेत्रप्ररूपणा २, अभ्यन्तराऽऽदिमण्डलस्थायिनामष्टाविंशतेर्नक्षत्राणां परस्परमन्तरनिरूपणा ३, नक्षत्रविमानानामायामाऽऽदिनिरूपणम् ४, नक्षत्रमण्डलानां मेरुतोऽबाधानिरूपणम् ५, तेषामेवाऽऽयामाऽऽदिनिरूपणम् ६, मुहूर्तगतिप्रमाणनिरूपणम् ७, नक्षत्रमण्डलानां चन्द्रमण्डलैः समवतारनिरूपणम् ८ ।

तत्राऽऽद्यौ मण्डलसंख्याप्ररूपणाप्रश्नमाह १-

कइ णं भंते ! णक्खत्तमंडला पण्णत्ता ?। गोयमा ! अट्ठ णक्खत्तमंडला पण्णत्ता ।

" कइ णं भंते ! " इत्यादि । कति भदन्त ! नक्षत्रमण्डलानि प्रज्ञप्तानि ?। भगवानाह-गौतम! अष्ट नक्षत्रमण्डलानि प्रज्ञप्तानि, अष्टाविंशतेरपि नक्षत्राणां प्रतिनियतस्वस्वमण्डलेष्वेतावत्स्वेव संचरणात् ।

एतदेव क्षेत्रविभागं प्रदर्शयति-

जंबुद्दीवे दीवे केवइयं ओगाहित्ता केवइया णक्खत्तमंडला पण्णत्ता ?। गोयमा ! जंबुद्दीवे दीवे असीयं जोयण-

सयं ओगाहित्ता एत्थ णं दो णक्खत्तमंडला पण्णत्ता। लवणे णं समुद्दे केवइयं ओगाहेत्ता केवइया णक्खत्तमंडला पण्णत्ता ?। गोयमा ! लवणे णं समुद्दे तिण्णि तीसे जोयणसए ओगाहित्ता एत्थ णं छ णक्खत्तमंडला पण्णत्ता। एवामेव सपुव्वावरेणं जंबुद्दीवे दीवे लवणसमुद्दे अट्ठ णक्खत्तमंडला चवंतीति मक्खायं।

जम्बूद्वीपे द्वीपे कियत्क्षेत्रमवगाह्य कियन्ति नक्षत्रमण्डलानि प्रज्ञप्तानि ?। भगवानाह-गौतम ! जम्बूद्वीपे द्वीपे अशीतमशीत्यधिकं योजनशतमवगाह्यान्तरे द्वे नक्षत्रमण्डले प्रज्ञप्ते। लवणसमुद्रे कियदवगाह्य कियन्ति नक्षत्रमण्डलानि प्रज्ञप्तानि ?। भगवानाह-गौतम ! लवणसमुद्रे त्रीणि त्रिंशदधिकानि योजनशतान्यवगाह्यान्तरे षट् नक्षत्रमण्डलानि प्रज्ञप्तानि। अत्रोपसंहारवाक्येनोक्तसंख्यां मीलयति-एवमेव सपूर्वापरेण जम्बूद्वीपे द्वीपे लवणसमुद्रे चाष्टौ नक्षत्रमण्डलानि भवन्ति, इत्याख्यातम्। मकारोऽत्राऽऽगमिकः।

अथ मण्डलचारक्षेत्रप्ररूपणा २-

सव्वब्भंतराओ णं भंते ! णक्खत्तमंडलाओ केवइआए अबाहाए सव्वबाहिरए णक्खत्तमंडले पण्णत्ते ?। गोयमा ! पंचदसुत्तरे जोयणसए अबाहाए सव्वबाहिरए णक्खत्तमंडले पण्णत्ते ॥

सर्वाभ्यन्तराद् भदन्त ! नक्षत्रमण्डलात् कियत्या अबाधया सर्वबाह्यं नक्षत्रमण्डलं प्रज्ञप्तम् ?। भगवानाह-गौतम ! पञ्चदशोत्तराणि योजनशतान्यबाधया सर्वबाह्यं नक्षत्रमण्डलं प्रज्ञप्तम्। इदं च सूत्रं नक्षत्रजात्यपेक्षया बोद्धव्यम्, अन्यथा सर्वाभ्यन्तरमण्डलस्थायिनामभिजिदादिदशनक्षत्राणामवस्थितमण्डलकत्वेन सर्वबाह्यमण्डलस्यैवाभावात्। तेनायमर्थः संपन्नः-सर्वाभ्यन्तरनक्षत्रमण्डलजातीयात् सर्वबाह्यं नक्षत्रमण्डलजातीयमियत्या अबाधया प्रज्ञप्तमिति बोध्यम्।

अथाभ्यन्तराऽऽदिमण्डलस्थायिनामष्टाविंशतेर्नक्षत्राणां परस्परमन्तरनिरूपणा ३-

णक्खत्तमंडलस्स णं भंते ! णक्खत्तमंडलस्स य एस णं केवइयाए अबाहाए अंतरे पण्णत्ते ?। गोयमा ! दो जोयणाइं णक्खत्तमंडलस्स णक्खत्तमंडलस्स य अबाहाए अंतरे पण्णत्ते ॥

"णक्खत्त" इत्यादि। नक्षत्रमण्डलस्य नक्षत्रविमानस्य, नक्षत्रमण्डलस्य नक्षत्रविमानस्य च भदन्त ! कियत्या अबाधया अन्तरं प्रज्ञप्तम् ?। भगवानाह-गौतम ! द्वे योजने नक्षत्रविमानस्य नक्षत्रविमानस्य च अबाधया अन्तरं प्रज्ञप्तम्। अयमर्थः-अष्टास्वपि मण्डलेषु यत्र यत्र मण्डले यावन्ति नक्षत्राणां विमानानि, तेषामन्तरबोधकमिदं सूत्रम्। यथा अभिजिन्नक्षत्रविमानस्य श्रवणविमानस्य च परस्परमन्तरं द्वे योजने, न तु नक्षत्रसत्कसर्वाभ्यन्तराऽऽदिमण्डलानामन्तरसूचकम्, अन्यथा नक्षत्रमण्डलानां वक्ष्यमाणचन्द्रमण्डलसमवतारसूत्रेण सह विरोधात्।

अथ नक्षत्रविमानानामायामाऽऽदिप्ररूपणा ४-

णक्खत्तमंडले णं भंते ! केवइयं आयामविक्खंभेणं, केवइयं परिक्खेवेणं, केवइयं बाहल्लेणं पण्णत्ते ?। गोयमा ! गाउयं आयामविक्खंभेणं, तंतिगुणं सविसेसं परिक्खेवेणं, अद्धगाउयं बाहल्लेणं पण्णत्ते।

"णक्खत्त" इत्यादि। नक्षत्रमण्डलं भदन्त ! कियदायामविष्कम्भाभ्यां, कियत् परिक्षेपेण, कियद् बाहल्येनोच्चैस्त्वेन प्रज्ञप्तम् ?। भगवानाह-गौतम ! गव्यूतमायामविष्कम्भाभ्यां, तत्त्रैगुण्यात् विशेषात् परिक्षेपेण, अर्धगव्यूतं बाहल्येन प्रज्ञप्तमिति।

स्वप्रत्येषामेव मेरुमधिकृत्याबाधाप्ररूपणा ५-

जंबुद्दीवे णं भंते ! दीवे मंदरस्स पव्वयस्स केवइआए अबाहाए सव्वब्भंतरे णक्खत्तमंडले पण्णत्ते ?। गोयमा ! चोआलीसं जोयणसहस्साइं अट्ठ य वीसे जोयणसए अबाहाए सव्वब्भंतरे णक्खत्तमंडले पण्णत्ते।

जम्बूद्वीपे भदन्त ! द्वीपे मन्दरस्य पर्वतस्य कियत्या अबाधया सर्वाभ्यन्तरं नक्षत्रमण्डलं प्रज्ञप्तम् ?। भगवानाह-गौतम ! चतुश्चत्वारिंशद्योजनसहस्राणि, अष्ट च विंशत्यधिकानि योजनशतान्यबाधया सर्वाभ्यन्तरं नक्षत्रमण्डलं प्रज्ञप्तम।

अथ बाह्यमण्डलाऽबाधां पृच्छति-

जंबुद्दीवे णं भंते ! दीवे मंदरस्स पव्वयस्स केवइआए अबाहाए सव्वबाहिरए णक्खत्तमण्डले पण्णत्ते ?। गोयमा ! पणयालीसं जोयणसहस्साइं तिण्णि अ तीसे जोयणसए अबाहाए सव्वबाहिरए णक्खत्तमंडले पण्णत्ते।

जम्बूद्वीपे भदन्त ! द्वीपे मन्दरस्य पर्वतस्य कियत्या अबाधया सर्वबाह्यं नक्षत्रमण्डलं प्रज्ञप्तम् ?। भगवानाह-गौतम ! पञ्चचत्वारिंशद्योजनसहस्राणि, त्रीणि च त्रिंशदधिकानि योजनशतान्यबाधया सर्वबाह्यं नक्षत्रमण्डलं प्रज्ञप्तम।

अथ तेषामेवाऽऽयामाऽऽदिनिरूपणम् ६-

सव्वब्भंतरेणं भंते ! णक्खत्तमंडले केवइयं आयामविक्खंभेणं, केवइयं परिक्खेवेणं पण्णत्ते ?। गोयमा ! णवणउतिजोयणसहस्साइं छच्च चत्ताले जोयणसए आयामविक्खंभेणं तिण्णि अ जोयणसयसहस्साइं पण्णरस सहस्साइं एगूणणवतिं च जोयणाइं किंचि विसेसाहिए परिक्खेवेणं पण्णत्ते।

'सव्वब्भंतरेणं' इत्यादि प्राग्वत्।

अथ सर्वबाह्यमण्डलं पृच्छति-

सव्वबाहिरए णं भंते ! णक्खत्तमंडले केवइयं आयामविक्खंभेणं, केवइयं आयामपरिक्खेवेणं पण्णत्ते ?। गोयमा ! एगं जोयणसहस्सं छच्च सट्ठे जोयणसए आयामविक्खंभेणं, तिण्णि अ जोयणसयसहस्साइं अट्ठारस य सहस्साइं तिण्णि अ पण्णरसुत्तरे जोयणसए।

"सव्वबाहिरए" इत्यादि प्राग्वत्। मध्यमेषु षट्सु मण्डलेषु तु चन्द्रमण्डलानुसारेणाऽऽयामविष्कम्भपरिक्षेपाः परिज्ञाप्याः, अष्टावपि नक्षत्रमण्डलानि चन्द्रमण्डले समवतरन्तीति भणिष्यमाणत्वात्।

अथ मुहूर्त्तगतिद्वारम् ७-

जया णं परिक्खेवेणं भंते ! णक्खत्ते सव्वब्भंतरं मंडलं उवसंकमित्ता चारं चरइ, तया णं एगमेगेणं मुहुत्तेणं केवइयं खेत्तं गच्छइ ?। गोयमा ! पंच जोयणसहस्साइं दोण्णि अ पणट्ठे जोयणसए अट्ठारस भागसहस्से दोण्णि अ तेवट्ठे भागसए गच्छइ मंडलं एक्कवीसाए भागसहस्सेहिं णवहि अ सट्ठेहिं सएहिं छेत्ता ।

"जया णं" इत्यादि । यदा भदन्त ! परिक्षेपेण नक्षत्रं सर्वाभ्यन्तरं मण्डलमुपसंक्रम्य चारं चरति, तदैकेन मुहूर्त्तेन कियत् क्षेत्रं गच्छति ?। नक्षत्रमित्यत्र जात्यपेक्षयैकवचनम्, अन्यथाऽभ्यन्तरमण्डलगतिचिन्तायां द्वादशानामपि नक्षत्राणां संग्रहाय बहुवचनस्यौचित्यात् । भगवानाह-गौतम ! पञ्च योजनसहस्राणि, द्वे च पञ्चषष्ट्यधिकयोजनशते, अष्टादश च भागसहस्राणि, द्वे च त्रिषष्ट्यधिके भागशते गच्छति मण्डलमेकविंशत्या भागसहस्रैर्नवभिश्च षष्ट्यधिकैः शतैः छित्त्वा इति । अत्रोपपत्तिः-इह नक्षत्रमण्डलकाल एकोनषष्टिर्मुहूर्त्ताः, एकस्य च मुहूर्त्तस्य सप्तषष्ट्यधिकत्रिंशद्भागानां त्रीणि शतानि सप्तोत्तराणीति ५६। ३७५/६७। इदानीमेतदनुसारेण मुहूर्त्तगतिश्चिन्त्यते-तत्र रात्रिंदिवे त्रिंशन्मुहूर्त्ताः, तेषु उपरितना एकोनत्रिंशन्मुहूर्त्ताः प्रक्षिप्यन्ते, जाता एकोनषष्टिर्मुहूर्त्तानाम्। ततः सवर्णनार्थं त्रिभिः शतैः सप्तषष्ट्यधिकैर्गुणयित्वा उपरितनानि त्रीणि शतानि सप्तोत्तराणि प्रक्षिप्यन्ते, जातान्येकविंशतिसहस्राणि नव शतानि षष्ट्यधिकानि २१९६० । अयं प्रतिमण्डलं परिधेः छेदकराशिः। तत्र सर्वाभ्यन्तरमण्डलपरिधिः ३१५०८९ । अयं च योजनाऽऽत्मको राशिर्भागाऽऽत्मकेन राशिना जघन्यार्थः त्रिभिः सप्तषष्ट्यधिकैः शतैः ३६७ गुण्यते । जातम् ११५६३७६६३ । अस्य राशेरेकविंशत्या सहस्रैर्नवभिः शतैः षष्ट्यधिकैर्भागे हृते लब्धानि ५२६५ । शेषम् १८२६३२ १९६० भागाः । एतावती सर्वाभ्यन्तरमण्डलेऽभिजिदादीनां द्वादशनक्षत्राणां मुहूर्त्तगतिः।

अथ बाह्यनक्षत्रमण्डले मुहूर्त्तगतिं पृच्छति-

जया णं भंते ! णक्खत्ते सव्वबाहिरं मंडलं उवसंकमित्ता चारं चरइ, तया णं एगमेगेणं मुहुत्तेणं केवइयं खेत्तं गच्छइ ?। गोयमा ! पंच जोयणसहस्साइं तिण्णि अ एगूणवीसए जोयणसए सोलस य भागसहस्से तिण्णि अ पणट्ठे भागसए गच्छइ मंडलं एगवीसाए भागसहस्सेहिं णवहि अ सट्ठेहिं सएहिं छेत्ता ।

"जया णं" इत्यादि । यदा भदन्त ! नक्षत्रं सर्वबाह्यं मण्डलमुपसंक्रम्य चारं चरति, तदा एकेकेन मुहूर्त्तेन कियत् क्षेत्रं गच्छति ?। अत्राप्येकवचनं प्राग्वत् । भगवानाह-गौतम ! पञ्च योजनसहस्राणि त्रीणि चैकोनविंशत्यधिकानि योजनशतानि षोडश च भागसहस्राणि त्रीणि च पञ्चषष्ट्यधिकानि भागशतानि गच्छति मण्डलमेकविंशत्या भागसहस्रैर्नवभिश्च षष्ट्यधिकैः शतैः छित्त्वा इति । अत्रोपपत्तिः-अत्र मण्डले परिधिः ३१८३१५ । अयं त्रिभिः सप्तषष्ट्यधिकैः शतैः ३६७ गुण्यते, जातम्-११६८२१६०५। अस्य राशेरेकविंशत्या सहस्रैर्नवभिः शतैः षष्ट्यधिकैः भागे लब्धानि ५३१६ योजनानि । शेषम् १६३६५२१९६० भागाः। एतावती सर्वबाह्यनक्षत्रमण्डले मृगशीर्षप्रभृतीनामष्टानां नक्षत्राणां मुहूर्त्तगतिः । उक्ता तावत् सर्वाभ्यन्तरसर्वबाह्यमण्डलवर्तिनां नक्षत्राणां मुहूर्त्तगतिः ।

अथ नक्षत्रतारकाणामवस्थितमण्डलकत्वेन प्रतिनियतगतिकत्वेन चावशिष्टेषु षट्सु मण्डलेषु मुहूर्त्तगतिपरिज्ञानं दुष्करमिति तत्कारणभूतं मण्डलपरिज्ञानं कर्त्तुं नक्षत्रमण्डलानां चन्द्रमण्डलेषु समवतारप्रश्नमाह ८-

एते णं भंते ! अट्ठ णक्खत्तमंडला कतिहिं चंदमंडलेहिं समोअरंति ?। गोयमा ! अट्ठहिं चंदमंडलेहिं समोअरंति । तं जहा-पढमे चंदमंडले, ततिए, छट्ठे, सत्तमे, अट्ठमे, दसमे, इक्कारसमे, पण्णरसमे चंदमंडले ।

"एते णं" इत्यादि । एतानि भदन्त ! अष्टौ नक्षत्रमण्डलानि कतिषु चन्द्रमण्डलेषु समवतरन्ति अन्तर्भवन्ति ?, चन्द्रनक्षत्राणां साधारणमण्डलानि कानीत्यर्थः ?। भगवानाह-गौतम ! अष्टासु चन्द्रमण्डलेषु समवतरन्ति । तद्यथा-प्रथमे चन्द्रमण्डले प्रथमं नक्षत्रमण्डलं चारक्षेत्रम, संचारिणामनवस्थितचारिणां च सर्वेषां ज्योतिष्काणां जम्बूद्वीपे अशीत्यधिकयोजनशतमवगाह्यैव मण्डलप्रवर्तनात् । तृतीये चन्द्रमण्डले द्वितीयं नक्षत्रमण्डलम् । एते च द्वे जम्बूद्वीपे । षष्ठे लवणे भाविनि चन्द्रमण्डले तृतीयम् । तत्रैव भाविनि सप्तमे चतुर्थम् । अष्टमे पञ्चमम् । दशमे षष्ठम् । एकादशे सप्तमम् । पञ्चदशे अष्टमम् । शेषाणि तु द्वितीयाऽऽदीनि सप्त चन्द्रमण्डलानि नक्षत्रैर्विरहितानि। तत्र प्रथमे चन्द्रमण्डले द्वादश नक्षत्राणि । तद्यथा-अभिजित्, श्रवणः, धनिष्ठा, शतभिषक्, पूर्वाभाद्रपदा, उत्तराभाद्रपदा, रेवती, अश्विनी, भरणी, पूर्वाफाल्गुनी, उत्तराफाल्गुनी, स्वातिश्च । द्वितीये पुनर्वसु, मघा च । तृतीये कृत्तिका । चतुर्थे रोहिणी, चित्रा च । पञ्चमे विशाखा । षष्ठे अनुराधा । सप्तमे ज्येष्ठा । अष्टमे मृगशिरः, आर्द्रा, पुष्यः, अश्लेषाः, मूलो, हस्तश्च । पूर्वाषाढोत्तराषाढयोर्द्वे द्वे तारे अभ्यन्तरतो, द्वे द्वे बाह्यत इति । एवं स्वस्वमण्डलावतारसत्कचन्द्रमण्डलपरिध्यनुसारेण प्रागुक्तरीत्या द्वितीयाऽऽदीनामपि नक्षत्रमण्डलानां मुहूर्त्तगतिः परिभावनीया । उक्ता प्रतिमण्डलं चन्द्राऽऽदीनां योजनाऽऽत्मिका मुहूर्त्तगतिः । जं० ७ वक्ष० ।

णक्खत्तमास—न (ना) क्षत्रमास—पुं० । चन्द्रस्य नक्षत्रमण्डले परिवर्त्तमाने निष्पन्न इत्युपचारतो मासोऽपि नक्षत्रं,नक्षत्रेषु भवो नाक्षत्रः, स चासौ मासश्च । चन्द्रश्चारं चरन् यावता कालेनाभिजित आरभ्योत्तराषाढानक्षत्रपर्यन्तं गच्छति तत्कालप्रमाणे मासभेदे, व्य० १ उ० । नि० चू० । स्था० । तन्मानम्-नक्षत्रमासः-सप्तविंशतिरहोरात्राः, एकविंशतिश्च सप्तषष्टिभागा अहोरात्रस्य । नक्षत्रसंवत्सरे ह्यहोरात्राणां त्रीणि शतानि सप्तविंशत्यधिकानि, एकपञ्चाशच्च सप्तषष्टिभागा अहोरात्रस्य । ततस्त्रयाणां शतानां सप्तविंशत्यधिकानां द्वादशभिर्भागो ह्रियते, लब्धाः सप्तविंशतिरहोरात्राः, शेषास्त्रयस्तिष्ठन्ति । तेऽपि सप्तषष्टिभागकरणार्थं सप्तषष्ट्या गुण्यन्ते, जाते द्वे शते एकोत्तरे । २०१ । येऽपि च उपरितना एकपञ्चाशत्सप्तषष्टिभागाः, तेऽपि

च तत्र प्रक्षिप्यन्ते, जाते द्वे शते त्रिपञ्चाशदधिके २५३ । तेषां द्वादशभिर्भागे हृते लब्धा एकविंशतिः सप्तषष्टिभागाः, आगतं यथोक्तं नक्षत्रमासपरिमाणम् । उमो० २ पाहु० । नि० चू० । बृ० । "एगमेगेणं णक्खत्तमासेणं सत्तावीसाइं राइंदियाइं राईदियग्गेणं पण्णत्ता" । सं० २७ सम० । ('मास' शब्देऽन्यवद् वक्ष्यते)

णक्खत्तमुह–नक्षत्रमुख–न० । चन्द्रे, " णक्खत्ताण मुहं बूहि, जक्खत्ताण मुहं चंदो । " उत्त० २५ अ० ।

णक्खत्तविचय–नक्षत्रविचय–पुं० । विपूर्वश्चिञ् स्वभावात् स्वरूपनिर्णये वर्तते । तथा चोक्तमन्यत्र–"आप्तवचनं प्रवचनं, ज्ञात्वा विचयस्तदर्थनिर्णयनम् ।" तत्र विचयनं विचयः, नक्षत्राणां विचयो नक्षत्रविचयः । नक्षत्राणां स्वरूपनिर्णये, सू० प्र० १ पाहु० । (स च 'णक्खत्त' शब्देऽत्रैव भागे १७७७ पृष्ठे उक्तः)

णक्खत्तसंवच्छर–न [ना] क्षत्रसंवत्सर–पुं० । नक्षत्रेषु भवो नाक्षत्रः । किमुक्तं भवति ?–चन्द्रश्चारं चरन् यावता कालेनाभिजित आरभ्योत्तराषाढानक्षत्रपर्यन्तं गच्छति तत्प्रमाणो नाक्षत्रो मासः । यदि वा चन्द्रस्य नक्षत्रमण्डले परिवर्तनतानिबन्धन इत्युपचारतो मासोऽपि नक्षत्रम् । स च द्वादशगुणो नक्षत्रसंवत्सरः । जं० ७ वक्ष० । चन्द्रस्य नक्षत्रमण्डलभोगकालो नक्षत्रमासः, स च सप्तविंशतिर्दिनानि, एकविंशतिः सप्तषष्टिभागा दिवसस्येत्येवंविधद्वादशमासमिते संवत्सरजेदे, स्था० ५ ठा० ३ उ० । स चायं त्रीणि शतानि अहां सप्तविंशत्युत्तराणि एकपञ्चाशच्च सप्तषष्टिभागा इति । स्था० ५ ठा० ३ उ० ।

संप्रति नक्षत्रसंवत्सरमाह–

णक्खत्तचंदजोगो, बारसगुणिओ उ णक्खत्तो ।

नक्षत्रचन्द्रयोगः सप्तविंशत्या नक्षत्रैः साकल्येन च एकत्र चन्द्रेण योगः, एष द्वादशभिर्गुणितो नक्षत्रो नक्षत्रसंवत्सरो भवति । अत्र पुनरेकः समस्तनक्षत्रयोग्यपर्याय एव नक्षत्रमासः । स च सप्तविंशतिरहोरात्राः, एकविंशतिश्च सप्तषष्टिभागा अहोरात्रस्य, एष राशिर्यदा द्वादशभिर्गुण्यते तदा त्रीण्यहोरात्रशतानि सप्तविंशत्यधिकानि, एकपञ्चाशच्च सप्तषष्टिभागा अहोरात्रस्य । एतावत्प्रमाणो नक्षत्रसंवत्सरः । उमो० २ पाहु० ।

नामनिरुक्तिमुक्त्वाऽथ तेषां भेदानाह–

णक्खत्तसंवच्छरे णं भंते ! कइविहे पण्णत्ते ?। गोयमा ! दुवालसविहे पण्णत्ते । तं जहा–सावणे, भद्दवए, आसोए० जाव असाढे । जं वा विहप्फई महग्गहे दुवालसेहिं संवच्छरेहिं सव्वणक्खत्तमंडलं समाणेइ । सेत्तं णक्खत्तसंवच्छरे ॥

"णक्खत्त" इत्यादि। नक्षत्रसंवत्सरो भगवन्! कतिविधः प्रज्ञप्तः ?। जगवानाह-गौतम ! द्वादशविधः प्रज्ञप्तः । तद्यथा–श्रावणः, भाद्रपदः, आश्विनः यावत्पदात् कार्तिकाऽऽदिसंग्रहः । द्वादशस्वाषाढः। अयं भावः–इहैकः समस्तनक्षत्रयोगपर्यायो द्वादशनिर्गुणितो नक्षत्रसंवत्सरः। ततो ये नक्षत्रसंवत्सरस्य पूरका ऊनविंश समस्तनक्षत्रयोग्यपर्यायाः श्रावणभाद्रपदाऽऽदिनामानः, तेऽप्यवयवे समुदायोपचाराद् नक्षत्रसंवत्सरः। ततः श्रावणाऽऽदिद्वादशविधो नक्षत्रसंवत्सरः। वा इति पक्षान्तरसूचने। अथवा बृहस्पतिर्महाग्रहो द्वादशभिः संवत्सरैर्योगमधिकृत्य यत् सर्वं नक्षत्रमण्डलमभिजिदादीन्यष्टाविंशतिनक्षत्राणि परिसमापयति, तावान् कालविशेषो द्वादशवर्षप्रमाणो नक्षत्रसंवत्सरः । जं० ७ वक्ष० । चं० प्र० । तत्स्वरूपे प्रमाणसंवत्सरजेदे, वक्ष्यमाणस्वरूपे प्रमाणसंवत्सरभेदे, वक्ष्यमाणस्वरूपे लक्षणसंवत्सरभेदे च ।

तत्स्वरूपं च—

ता णक्खत्तेणं संवच्छरस्स पंचविहं लक्खणं पण्णत्ते । तं जहा–"समगं णक्खत्ता जोगं,जोएंति समगं उऊ परिणमंति । णऽच्चुण्हं णातिसीते, बहुउदओ होति णक्खत्तो " ॥ १ ॥

"ता णक्खत्त" इत्यादि। 'ता' इति । तत्र नक्षत्रसंवत्सरस्य लक्षणमधिकृत्य पञ्चविधः प्रश्नः। किमुक्तं भवति ?-नक्षत्रसंवत्सरस्य पञ्चविधं लक्षणं प्रश्नसमिति । तदेव गाथयाऽऽह-(समगं णक्खत्ता जोगं जोएंति त्ति) यस्मिन् संवत्सरे समकं समकमेव-एककालमेव, ऋतुभिः सहेति गम्यते । नक्षत्राणि उत्तराषाढाप्रभृतीनि, योगं युञ्जन्ति सन्निहितां पौर्णमासीं परिसमापयन्ति । तथा समकमेव-एककालमेव, तथा तथा परिसमाप्यमानया पौर्णमास्या सह ऋतवो निदाघाऽऽद्याः परिणमन्ति परिसमाप्तिमुपयान्ति। इयमत्र जावना–यस्मिन् संवत्सरे नक्षत्रैर्माससदृशनामकैस्तस्य तस्य ऋतोः पर्यन्तवर्ती मासः परिसमाप्यते, तेषु च तां तां पौर्णमासीं परिसमापयत्सु तथा तथा पौर्णमास्या सह ऋतवोऽपि निदाघाऽऽदिकाः परिसमाप्तिमुपयान्ति । यथा–उत्तराषाढानक्षत्रे आषाढीं पौर्णमासीं परिसमापयति, तथा आषाढ्या पौर्णमास्या सह निदाघोऽपि ऋतुः परिसमाप्तिमुपैति, स नक्षत्रसंवत्सरः, नक्षत्रानुरोधेन तथापरिणममानत्वात् । एतेन च लक्षणद्वयमभिहितं द्रष्टव्यम् । तथा न विद्यते अतिशयेन उष्णम् उष्णरूपः परितापो यस्मिन् स नात्युष्णः, तथा न विद्यते अतिशयेन शीतं यत्र स नातिशीतः। बहु उदकं यस्मिन् स बहूदकः। एवंरूपैः पञ्चभिः समग्रैर्लक्षणैरुपेतो भवति नक्षत्रसंवत्सरः । चं० प्र० १० पाहु० २० पाहु० । स्था० ।

णक्खिव [ण्]–नखिन्–त्रि० । नखाः करजा विद्यन्ते येषां ते नखिनः । प्रशंसायामत्र मतुप्, यथा रूपवती कन्येत्यादिषु । " द्वितीयतुर्ययोरुपरि पूर्वः " । ८ । २ । ९० । द्वितीयतुर्ययोर्द्वित्वप्रसङ्गे उपरि पूर्वौ भवतः। * इति क्षकारस्य ककारः, द्वित्वं च । सुनबेषु, बृ० १ उ० ।

णग–नग–पुं० । पर्वते, औ० । जी० । तं० । सूत्र० । ज्ञा० । प्रश्न० । " जहा से णगाणं पवरे सुमहं मंदरो गिरी ।" उत्त० ११ अ० । वृक्षे च । वाच० ।

णगय–नाग्न्य–न० । नग्नस्य भावो नाग्न्यम् । सरजस्कत्वे,"दूइगहणं जह णगयाणं " । संथा० ।

णगर–नकर–न० । नास्मिन् करोऽस्तीति नकरम् । नञाऽऽदित्वान्नस्योऽकारान्तादेशः । बृ० १ उ० । उत्त० । आचा० । नि० चू० । कल्प० । स्था० । अष्टादशकररहिते, प्र० १ ज्ञा० १ उ० । प्रज्ञा० । स्था० । उत्त० । व्य० । ज्ञा० । ग० । अकरदायिलोकाऽऽवासे, प्रश्न० ३ आश्र० द्वार ।

* यथा–"णक्खाणं, णग्गो, मुच्छा, णिक्करो," इत्यादि ।

णगर–न० । चतुर्गोपुरोद्भासिनि पत्तने, औ० । जं० ।
"ग्रामो वृत्त्यावृतः स्याद्, नगरमुरुचतुर्गोपुरोद्भासिशोभम्,
खेटं नद्यद्रिवेष्टं, परिवृतमजितः खर्वटं पर्वतेन ।
ग्रामैर्युक्तं मटं (ड) म्बं, मिलितदशशतैः पत्तनं रत्नयोनिं,
द्रोणाऽऽख्यं सिन्धुवेलावलयितमथ संबाधनं वाऽद्रिशृङ्गे"॥१॥
सूत्र० २ श्रु० २ अ० ।
"पुण्यक्रियाऽऽदिनिपुणै-श्चातुर्वर्ण्यजनैर्युतम् ।
अनेकजातिसंघट्टं, नैकशिल्पिसमाकुलम् ॥
सर्वदैवतसंनद्धं, नगरं त्वभिधीयते ।" वाच० ।
नगरवासिषु प्रकृतिषु, ज्ञा० १ श्रु० १ अ० । औ० । सैन्यनिवासिप्रकृतिषु, ज० ७ श० ६ उ० ।

णगरगुत्तिय–नगरगुप्तिक–पुं० । नगररक्षके, ज्ञा० १ श्रु० २ अ० । कोट्टपाले, प्रश्न० २ आश्र० द्वार ।

णगरट्ठाण–नगरस्थान–न० । उत्सवग्रामस्थाने, कल्प० ४ क्षण ।

णगरणिग्गमण–नगरनिर्गमन–न० । नगरजलनिर्गमने, भ० ३ श० ७ उ० । नगरजलनिर्गमनकाले, ज्ञा० १ श्रु० २ अ० ।

णगरणिवेस–नगरनिवेश–पुं० । नगरवासकल्पनायाम्, स० ७२ सम० ।

णगरधम्म–नगरधर्म–पुं० । नगराऽऽचारे, स्था० १० ठा० ।

णगरमाण–नगरमान–न० । नगरस्य द्वादशयोजनाऽऽयामसप्तयोजनव्यासाऽऽदिपरिज्ञाने, कल्पशाऽऽदिनिरीक्षणपूर्वकसूत्रव्याख्ययास्थानवर्णाऽऽदिव्यवस्थापरिज्ञाने, जं० । पञ्चचत्वारिंशोऽयं कलानेदः । जं० २ वक्ष० । ज्ञा० । स० ।

णगरमारी–नगरमारी–स्त्री० । नगरवासिलोकानां मारिकृते प्राणक्षये, जी० ३ प्रति० ।

णगररक्खिय–नगररक्षिक–पुं० । नगरं रक्षति यः स नगररक्षिकः । कोट्टपाले, नि० चू० ४ उ० ।

णगरवह–नगरवध–पुं० । सर्वेषां नगरवासिनामपराध्यनपराध्यविवेकेन प्रत्यनीकराजाऽऽज्ञया मारणे, "से सुच्चई नगरवहे व सद्दे ।" अथ तेषां नारकाणां भयानकशब्दो नगरवध इव श्रूयते । यथा नगरसंबन्धो महानाक्रन्दः स्यात्तादृशो, सूत्र० १ श्रु० ५ अ० १ उ० ।

णगराय–नगराज–पुं० । मन्दरे, मेरौ च, स्था० ६ ठा० ।

णगरावास–नगराऽऽवास–पुं० । नगराणामावासेषु, नगरकेषु वा आवासेषु, स० ।

णगरी–नगरी–स्त्री० । पुर्याम्, औ० ।
तद्वर्णकः–
ते णं काले णं ते णं समए णं चंपा नामं नयरी होत्था-रिद्धत्थिमियसमिद्धा, पमुइयजणजाणवया, आइण्णजणमणुस्सा, हलसयसहस्ससंकिट्ठविकिट्ठलट्ठपण्णत्तसेउसीमा, कुक्कुडसंडेयगामपउरा, उच्चुजवसालिकलिया, गोमहिसगवेलगप्पभूता, आयारवंतचेइयजुवइविविहसंणिविट्ठबहुला,* उक्कोडियगायगंठिभेयभडतक्करखंडरक्खरहिया, खेमा, णिरुवद्दवा, सुभिक्खा, पासंडिगिहत्थवीसत्थसुहावासा, अणेगकोडिकुडुंबियाऽऽइण्णणिव्वुयसुहा, णमणट्ठगजल्लमल्लमुट्ठियवेलंबयकहगपवगलासगआइक्खगलंखमंखतूणइल्लतुंबवीणियअणेगतालायराणुचरिया, आरामुज्जाणअगडतलागदीहियवप्पिणगुणोववेया, * णंदिघरविउलगंभीरखायफलिहा, चक्कगयभुसुंढिओरोहसयग्घिजमल्लकवाडघणदुप्पवेसा, धणुकुडिलबंकपागारपरिक्खित्ता, कविसीसयवट्टरइयसंट्ठियविरायमाणा, अट्टालयचरियदारगोपुरतोरणउन्नयसुविभत्तरायमग्गा, छेयायरियरइयदढफलिहइंदकीला, विवाणिविणियछेत्तसिप्पियाऽऽइण्णणिव्वुयसुहा, सिंघाडगतिगचउक्कचच्चरपणियाऽऽवणविविहवत्थुपरिमंडिया, सुरम्मा, नरवइपविइण्णमहिवइपहा, अणेगवरतुरगमत्तकुंजररहपकरसीयसंदमाणीयाऽऽइण्णजाणजुग्गा विमुलक्खणवणालिणिसोभियजला, पंडुरवरभवणसन्निमहिया, उत्ताणणयणपेच्छणिज्जा, पासाईया, दरिसणिज्जा, अभिरूवा पडिरूवा ।
तत्र योऽयं णंशब्दः स वाक्यालङ्कारार्थः । 'ते' इत्यत्र च यकारः, स प्राकृतशैलीप्रभवः । यथा–"करेमि भंते!" इत्यादिषु । ततोऽयं वाक्यार्थो जातः–तस्मिन् काले तस्मिन् समये, यस्मिन्नसौ नगरी बभूवेति । अधिकरणे चेयं सप्तमी । अथ कालसमययोः कः प्रतिविशेषः ? उच्यते–काल इति सामान्यकालः वर्तमानावसर्पिण्याश्चतुर्थविभागलक्षणः । समयस्तु-तद्विशेषः, यत्र सा नगरी, स राजा, वर्द्धमानस्वामी च बभूव । अथवा–तृतीयैवेयम् । ततश्च तेन कालेन अवसर्पिणीचतुर्थाऽरकलक्षणेन हेतुभूतेन, समयेन तद्विशेषभूतेन हेतुना चम्पा नाम नगरी (होत्थ त्ति) अभवदासीदित्यर्थः । ननु चेदानीमपि साऽस्ति, किं पुनरधिकृतग्रन्थकरणकाले, तत्कथमुक्तमासीदिति ? उच्यते–अवसर्पिणीत्वात्कालस्य वर्णकग्रन्थवर्णितविभूतियुक्ता सा इदानीं नास्तीति । (रिद्धत्थिमियसमिद्धा) ऋद्धा नवनाऽऽदिनिर्वृद्धिमुपगता, स्तिमिता भयवर्जितत्वेन स्थिरा, समृद्धा धनधान्याऽऽदियुक्ता । ततः पदत्रयस्य कर्मधारयः । (पमुइयजणजाणवया) प्रमुदिता हृष्टाः, प्रमोदकारणवस्तूनां सद्भावात् ; जना नगरीवास्तव्यलोकाः, जानपदाश्च जनपदभवाः, तत्राऽऽयाताः सन्तो यस्याम्, सा प्रमुदितजनजानपदा । पाठान्तरे–"पमुइयजणुज्जाणजणवया" । तत्र प्रमुदितजनान्युद्यानानि जनपदाश्च यस्यां सा तथा । (आइण्णजणमणुस्सा) मनुष्यजनेनाऽऽकीर्णा संकीर्णा, मनुष्यजनाऽऽकीर्णेति वाच्ये राजदन्ताऽऽदिदर्शनाद्दाकीर्णजनमनुष्येत्युक्तम् । आकीर्णो वा गुणव्याप्तो मनुष्यजनो यस्यां सा तथा । (हलसयसहस्ससंकिट्ठविकिट्ठलट्ठपण्णत्तसेउसीमा) हलानां लाङ्गलानां शतैः, सहस्रैश्च, शतसहस्रैर्वा लक्षैः, संकृष्टा विलिखिता विकृष्टं दूरं यावत्, अविकृष्टा वा आसन्ना, लष्टा मनोज्ञा, कर्षकाभिमतफलसाधनसमर्थत्वात् । (पण्णत्त त्ति) योग्यीकृता बीजवपनस्य सेतुसीमा मार्गसीमा यस्याः सा तथा । अथवा संकृष्टाऽऽदिविशेषणविशिष्टानि सेतूनि कृत्वा जलसेककेत्राणि सीमासु यस्याः सा तथा । अथवा—हलशतसहस्राणां सं-

* 'अरिहंतचेइयजणवयविसाणिविट्ठबहुला' इति पाठान्तरम् ।

* 'णंदणवणसन्निसप्पगासा' इति क्वचित् पाठः ।

कृष्टेन संकर्षणेन विकृष्टा दूरवर्तिन्यो लब्धाः प्रकर्षिताः कथिताः सेतुसीमा यस्याः सा तथा; अनेन तज्जनपदस्य लोकबाहुल्यं, क्षेत्रबाहुल्यं चोक्तम् । (कुक्कुडसंमेयगामपउरा) कुक्कुटाः ताम्रचूडाः, षण्ढेयाः षण्ढपुत्रकाः षण्ढा एव, तेषां ग्रामाः समूहास्ते प्रचुराः प्रचूताः यस्यां सा तथा; अनेन लोकप्रमुदितत्वं व्यक्तीकृतम्; प्रमुदितो हि लोकः क्रीडाऽऽद्यर्थं कुक्कुटान् पोषयति, षण्ढांश्च करोतीति । (उच्छुजवसालिकलिया) पाठान्तरेण-" उच्छुजवसालिमालिणीया । " एतदुच्यालेत्यर्थः । अनेन च जनप्रमोदकारणमुक्तं, न ह्येवंप्रकारवस्त्वभावे प्रमोदो जनस्य स्यादिति । (गोमहिसगवेलगप्पभूता) गवादयः प्रभूताः प्रचुरा यस्यामिति वाक्यम्; गवेलका उरभ्राः (आयारवंतचेइयजुवइविविहसन्निविट्ठबहुला) आकारवन्ति सुन्दराऽऽकाराणि, आकारचित्राणि वा यानि चैत्यानि देवताऽऽयतनानि, युवतीनां च तरुणीनां,पण्यतरुणीनामिति द्वन्द्वम् । यानि विविधानि सन्निविष्टानि सन्निवेशनाति पाटकाः, तानि बहुलानि यस्यां सा तथा । " अरिहंतचेइयजणवइविसन्निविट्ठबहुला" इति पाठान्तरम् । तत्राऽर्हच्चैत्यानां जनानां व्रतिनां च विविधानि यानि सन्निविष्टानि पाटकास्तैर्बहुलेति विग्रहः । " सुजायचित्तचेइयजुयविहसन्निविट्ठबहुला " इति च पाठान्तरम् । तत्र च सुयागाः शोभनयज्ञाः, चित्रचैत्यानि प्रतीतानि, यूपचितयो यज्ञेषु यूपचयनानि, द्यूतानि वा क्रीडाविशेषाश्चितयस्तेषां सन्निविष्टानि निवेशाः, तैर्बहुला वा सा तथा । (उक्कोडियगायगंठिछेयभेयकक्खंडरक्खरहिया) उत्कोटा उत्कोचा, लञ्चेत्यर्थः । तथा ये व्यवहरन्ति ते औत्कोटिकाः, गात्रात् मनुष्यशरीरावयवविशेषात् कट्यादेः सकाशाद् ग्रन्थिं कार्षापणाऽऽदिपुट्टलिकां निन्दन्त्याच्छिन्दन्तीति गात्रग्रन्थिभेदकाः । " उक्कोडियगाढगंठिछेय " इति च पाठान्तरं व्यक्तम् । भटाश्चारभटाः बलात्कारप्रवृत्तयः,तस्कराश्च एव चौर्यं कुर्वन्तीत्येवंशीलाः, खण्डरक्षा दण्डपाशिकाः, शुल्कपाला वा, एभीरहिता वा सा तथा; अनेन तत्रोपद्रवकारिणामभावमाह । (खेमा) अशिवाभावात् । (णिरुवद्दवा) निरुपद्रवा, अविद्यमानराजाऽऽदिकृतोपद्रवेत्यर्थः । (सुनिक्खा) सुष्ठु मनोज्ञा प्रचुरा भिक्षा भिक्षुकाणां यस्यां सा सुभिक्षा, अत एव पाषण्डिनां गृहस्थानां च (वीसत्थसुहावासा) विस्रब्धानां निर्भयानामनुत्सुकानां वा सुखः सुखस्वरूपः शुभो वाऽऽवासो यस्यां सा तथा । (अणेगकोडिकुडुंबियाऽऽइण्णणिव्वुयसुहा) अनेकाः कोटयो रूप्यसङ्ख्यानां स्वरूपपरिमाणे वा येषां ते अनेककोटयः, तैः कौटुम्बिकैः कुटुम्बिभिराकीर्णा सङ्कुला वा सा तथा । सा चासौ निर्वृता च सन्तुष्टजनयोगात्सन्तोषवतीति कर्मधारयः; अत एव सा चासौ सुखा च शुभा वेति कर्मधारयः । (नमन्नट्टगजल्लमल्लमुट्ठियवेलंबयकहगपवगलासगआइक्खगलंखमंखतूणइल्लतुंबवीणियभणेगतालायराणुचरिया) नटाः नाटकानां नाटयितारः, नर्तका ये नृत्यन्ति, अङ्किल्ला इत्येके । जल्ला धरत्राखेलकाः, राहुस्तोत्रपाठका इत्यन्ये । मल्लाः प्रतीताः । मौष्टिका मल्ला एव, ये मुष्टिभिः प्रहरन्ति । विडम्बकाः विदूषकाः, कथकाः प्रतीताः, प्लवका ये उत्प्लवन्ते, नद्यादिकं वा तरन्ति । लासका ये रासकान् गायन्ति, जयशब्दप्रयोक्तारो वा, भाण्डा वा इत्यर्थः । आख्यायका ये शुभाशुभमाचक्षते । लङ्घा महावंशाग्रखेलकाः, मङ्खाश्चित्रफलकहस्ता भिक्षुकाः, 'तूणइल्ला' तूणाभिधानवाद्यविशेषवन्तः,तुम्बवीणका वीणावादकाः, अनेके च ये तालाचराः-ताला ऽऽदानेन प्रेक्षाकारिणः,तैरनुचरिता आसेविता वा सा तथा । (आरामुज्जाणअगमतलागदीहियवप्पिणगुणोववेया) आरमन्ति येषु माधवीलतापुष्पाऽऽदिषु दम्पत्यादीनि क्रीमन्ति ते आरामाः,उद्यानानि पुष्पाऽऽदिसदृवृक्षसङ्कुलान्युत्सवाऽऽदौ बहुजनभोग्यानि (अगड त्ति) अवटाः कूपाः, तडागानि प्रतीतानि,दीर्घिका सारणी, (वप्पिण त्ति) केदारः । एतेषां ये गुणाः रम्यताऽऽद्यः,तैरुपपेता युक्ता या सा तथा । उप अप इत इत्येतस्य शब्दत्रयस्य स्थाने शकन्ध्वादिदर्शनादकारलोपे उपपेतेति भवति । क्वचित्पठ्यते-" नंदणवणसन्निभप्पगासा " नन्दनवनं मेरोर्द्वितीयवनं, तत्प्रकाशसन्निभः प्रकाशो यस्यां सा तथा । इह चैकस्य प्रकाशशब्दस्य लोप उष्ट्रमुख इत्यादाविवेति । (उविद्धविपुलगंभीरखायफलिहा) ' उविद्धं ' ऊर्द्धं विपुलं विस्तीर्णं गम्भीरमलब्धमध्यं खातमुपरि विस्तीर्णम् अधः सङ्कटं,परिखा च अध उपरि च समा खातरूपा यस्यां सा तथा । (चक्कगयभुसुंढिओरोहसयग्घिजमलकवाडघणदुप्पवेसा) चक्राणि रथाङ्गानि, अरघट्टाङ्गानि वा, गदाः प्रहरणविशेषाः, भुसुण्ढयोऽप्येवम् । अवरोधः प्रतोलिप्राकारेष्वभ्यन्तरप्रकारः संज्ञायते । शतघ्न्यो महायष्टयः, महाशिला वा, या उपरिष्टात्पातिताः सत्यः शतानि पुरुषाणां घ्नन्तीति, यमलानि समसंस्थितद्वयरूपाणि यानि कपाटानि घनानि च निश्छिद्राणि तैर्दुष्प्रवेशा या सा तथा । (धणुकुडिलवंकपागारपरिक्खित्ता) धनुः कुटिलं कुटिलधनुः, ततोऽपि वक्रेण प्राकारेण परिक्षिप्ता या सा तथा । (कविसीसयवट्टरइयसंठियविरायमाणा) कपिशीर्षकैर्वृत्तिरचितैर्वर्तुलकृतैः सांश्लिष्टैर्विशिष्टसंस्थानवद्भिर्विराजमाना शोभमाना या सा तथा । (अट्टालयचरियदारगोपुरतोरणउन्नयसुविभत्तरायमग्गा) अट्टालकाः प्राकारोपरिवर्त्यायविशेषाः, चरिका अष्टहस्तप्रमाणा नगरप्राकारान्तरालमार्गाः, द्वाराणि प्राकारद्वारिकाः, गोपुराणि पुरद्वाराणि, तोरणानि प्रतीतानि, उन्नतानि गुणवन्ति लक्षणानि च यस्यां सा तथा । सुविभक्ताः विविक्ता राजमार्गा यस्यां सा तथा । ततः पदद्वयस्य कर्मधारयः । (छेयायरियरइयदढफलिहइंदकीला) छेकेन निपुणेनाऽऽचार्येण शिल्पिना रचितो दृढो बलवान् परिघोऽर्गला, इन्द्रकीलश्च गोपुरावयवविशेषो यस्यां सा तथा । (विवणिवणिवच्छेत्तासिप्पियाऽऽइण्णणिव्वुयसुहा) विपणीनां वणिक्पथानां हट्टमार्गाणां, वणिजां च वणिजकानां च क्षेत्रं स्थानं या सा तथा । शिल्पिभिः कुम्भकाराऽऽदिभिराकीर्णा, अत एव जनप्रयोजनसंसिद्धिर्जनानां निर्वृतत्वेन सुखितत्वेन च निर्वृतसुखा च या सा तथा । वाचनान्तरे-छेकशब्दस्य स्थाने ज्ञेयशब्दोऽधीयते । तत्र च ज्ञेकशिल्पिकाऽऽकीर्णेति व्याख्येयम् । (सिंघाडगतिगचउक्कचच्चरचउम्मुहमहापहपहेसु पणियाऽऽपणविविहवत्थुपरिमंडिया) शृङ्गाटकं त्रिकोणं स्थानं, त्रिकं यत्र रथ्यात्रयं मिलति, चतुष्कं रथ्याचतुष्कमेलकं, चत्वरं बहुरथ्याऽऽपातस्थानं, पणितानि भाण्डानि, तत्प्रधाना आपणा हट्टा विविधवस्तूनि अनेकविधद्रव्याणि,एभिः परिमण्डिता या सा तथा । पुस्तकान्तरेऽधीयते-"सिंघाडगतिगचउक्कचच्चरचउम्मुहमहापहपहेसु पणियाऽऽपणविविहवेसपरिमंडिया." तत्र चतुर्मुखं चतुर्द्वारं देवकुलाऽऽदि,महापथो राजमार्गः,पन्थास्तदितरः,ततश्च शृङ्गाटकाऽऽदिषु पणिताऽऽपणैर्विविधवेषैश्च जनैर्विविधवेश्याभिर्वा परिमण्डिता या सा तथा । (सुरम्मा)अतिरमणीया,(नरवइपविइण्णमहिवइपहा)

नरपतिना राज्ञा प्रविकीर्णो गमनाऽऽगमनाभ्यां व्याप्तो महीपतिपथो राजमार्गो यस्यां सा तथा । अथवा-नरपतिना प्रविकीर्णा विक्षिप्ता निरस्ताऽन्येषां महीपतीनां प्रभा यस्यां सा तथा । अथवा-नरपतिभिः प्रविकीर्णा महीपतेः प्रभा यस्यां सा तथा । (अणेगवरतुरगमत्तकुंजररहपकरसीयसंदमाणियाऽऽइण्णजाणजुग्गा) अनेकैर्वरतुरगैर्मत्तकुञ्जरैः (रहपकरे त्ति) रथनिकरैः शिविकाभिः स्यन्दमानाभिराकीर्णा व्याप्ता यानैर्युग्यैश्च या सा तथा । अथवा-अनेके वरतुरगाऽऽदयो यस्यामाकीर्णानि च गुणवन्ति यानाऽऽदीनि यस्यां सा तथा । तत्र शिविकाः कूटाऽऽकारेण छादिताः ' जम्पान ' विशेषाः, स्यन्दमानिकाः पुरुषप्रमाणा जम्पानविशेषाः, यानानि शकटाऽऽदीनि, युग्यानि गोल्लविषयप्रसिद्धानि द्विहस्तप्रमाणानि वेदिकोपशोभितानि जम्पानान्येवेति । (विमुउलणवणलिणिसोभियजला) विमुकुलाभिर्विकसितकमलाभिर्नवानलिनीभिः शोभितानि जलानि यस्यां सा तथा । (पंसुरवरभवणसन्निमहिया) पांसुभिः सुधाधवलैः वरभवनैः प्रासादैः सम्यक् निरन्तरं महितेव महिता पूजिता या सा तथा । (उत्ताणणयणपेच्छणिज्जा) सौभाग्यातिशयाद्भुतानिकैरनिमिषैर्नयनैर्लोचनैः प्रेक्षणीया या सा तथा । (पासाईया) चित्तप्रसन्नकारिणी । (दरिसणिज्जा) यां पश्यञ्चक्षुः श्रमं न गच्छति । (अभिरूवा) मनोज्ञरूपा । (पडिरूवा) द्रष्टारं द्रष्टारं प्रति ' रमणीयं ' रूपं यस्याः सा तथेति । औ० । चं० प्र० । ज्ञा० । रा० ।

णगाहिराय–नगाधिराज–पुं० । श्रीशत्रुञ्जयपर्वते,ती० १ कल्प ।

णगिंद–नगेन्द्र–पुं० । पर्वतप्रधाने मेरौ, सूत्र० १ श्रु० ६ अ० ।

णगिण–नग्न–त्रि० । आवतो निर्ग्रन्थे, आचा० १ श्रु० ६ अ० १ उ० ।

णग्ग–नग्न–त्रि० । नज-क्तः । " अधो मनयाम् " । ८ । २ । ७८ । इति संयुक्तस्य नस्य लुक् । प्रा० २ पाद । "अनादौ शेषाऽऽदेशयोर्द्वित्वम् " ॥ ८ । २ । ८९ ॥ इत्यनादौ वर्तमानस्य गस्य द्वित्वम् । प्रा० २ पाद । दिगम्बरे, नं० । आ० म० ।

णग्गइ–नग्नजित्–पुं० । गन्धारविषये पुरुषपुराधिपतौ स्वनामख्याते राज्ञि, आव० ४ अ० । " नमी राया विदेहेसु, गंधारेसु य णग्गई । " प्रव्रजित इति शेषः । उत्त० १८ अ० ।

अथास्य पूर्वभवचरितनिबद्धं वृत्तमुद्भाव्यते-

अस्मिन् भरते पुण्यवर्द्धनं नाम नगरमस्ति । तत्र सिंहरथो राजा वर्तते गन्धारदेशाधिपतिः । तस्य राज्ञोऽन्यदा द्वावश्वौ प्राभृते समायातौ । तयोः परीक्षार्थमेकस्मिन् तुरङ्गे राजाऽधिरूढः, द्वितीये तुरङ्गेऽपरो नर आरूढः । तेन सममपरैश्चाश्ववारशतैः परिवृतो भूपतिर्बाह्याभिकायां गतः । परीक्षां कुर्वता च राज्ञाऽश्वः प्रधावनगत्या विमुक्तः । सोऽपि बलवता वेगेन निर्ययौ । यथा यथा राजा वल्गामाकर्षयति, तथा तथा स वायुवेगोऽभवत् । पुरोपवनान्यतिक्रम्य सोऽश्वो राजानं लात्वा महाटव्यां प्रविष्टः । श्रान्तेन भूपेन तदाऽस्य वल्गा विमुक्ता । अथ यदा वल्गामोचनेऽश्वः स्थिरीबभूव,तदा राज्ञैनं विपरीतमश्वं मन्यते स्म; ततस्तस्मादुत्तीर्य राजा भूमिचरो बभूव । तं च पानीयं पाययित्वा वृक्षे बबन्ध, स्वप्राणवृत्तिं च फलैर्विदधे । ततः एकं नगमारुह्य क्वचित्प्रदेशे सुन्दरमेकं महावासं ददर्श । राजा कुतूहलात्तस्मिन्नावासे प्रविष्टः । तत्रैकाकिनीं पवित्रगात्रां कन्यां भूपतिर्दृष्टवान् । सा राजानमागच्छन्तं दृष्ट्वा भूरिहर्षाऽऽसनं ददौ । राज्ञा चोक्ते-का त्वम् ?, कोऽयमद्रिनिवासः ?, किमिदं रम्यं धाम ?। सा प्राऽऽह-भूपाल ! प्रथमं मत्पाणिग्रहणं कुरु,साम्प्रतं सिंहविशिष्टं लग्नमस्ति, पश्चात्सर्वं वृत्तान्तमहं कथयिष्यामि । तयेत्युक्ते नरपतिस्तत्र कन्यया समं पूजितं जिनबिम्बं प्रणम्योद्वाहमाकृत्यमलञ्चकार । भूपतिना परिणीता सा कन्या विविधान् भोगोपचारान् चकार, विचित्राश्च भक्तीर्दर्शयामास । अवसरे राजा तां प्रत्येवमाह-विमलः पुण्यैरावयोः संबन्धो जातोऽस्ति,परं त्वं स्ववृत्तान्तं वद-काऽसि त्वम् ?, कथमत्रैकाकिनी वससि ?। स्वभर्त्रैवमुक्ते सा स्वसंबन्धं मूलतो वक्तुमारेभे-क्षितिप्रतिष्ठे नगरे जितशत्रुर्नृपोऽस्ति, सोऽन्यदा परदेशाऽऽयातचरानेवमाह-अहो ! मद्राज्ये किञ्चिद् न्यूनमस्ति । ते प्राऽऽहुः-सर्वमस्ति तव राज्ये, परं विचित्रचित्रा सभा नास्ति । ततो नृपतिश्चित्रकरानाकार्य सभागृहभित्तिभागास्तेषां सर्वेषां समाश्रित्यितुं दत्ताः। सर्वेऽपि चित्रकराः स्वस्वभित्तिभागान् गाढोद्यमेन चित्रयन्ति । तत्रैको वृद्धश्चित्रकरः सकलचित्रकलावेदी स्वभित्तिभागं चित्रयितुमारब्धवान् । सहायशून्यस्य तस्य निरन्तरं गृहतः कनकमञ्जरी रूपवती तत्पुत्री भक्तं तत्राऽऽनयति । अन्यदा सा स्वगृहाद् भक्तमानयन्ती राजमार्गे गच्छन्त्यश्ववारमेकं ददर्श । स च बालस्त्रीवराकाऽऽदिजनसङ्कीर्णेऽपि राजमार्गे त्वरितमश्वमवाहयत् । लोकास्तु तद्भयादितस्ततो नष्टाः। साऽपि क्वचिन्नष्ट्वा स्थिता, पश्चात् तत्राऽऽयाता । भक्तपात्रहस्तां तामागतां वीक्ष्य स वृद्धश्चित्रकरः पुरीषोत्सर्गार्थं बहिर्जगाम । एकत्राऽऽहारपात्रमाच्छादयित्वा सा क्वचिद्भित्तिदेशे वर्णकैर्मयूरपिच्छमालिलेख । अथ तत्र राजा संप्राप्तः । भित्तिचित्राणि पश्यन् कुमार्या लेखिते केकिपिच्छे साक्षात्पिच्छं मन्यमानः करं चिक्षेप । निर्यास्फालनतो नखभङ्गेन विलक्षीभूतं तं नृपं सामान्यपुरुषमेव जानन्ती सा चित्रकरपुत्र्येवमाह-चतुर्थः पादस्त्वं मया लब्धः । नृपः प्राऽऽह-पूर्वं त्वया केन त्रयः पादा लब्धाः,साम्प्रतमहं कथं त्वया चतुर्थः पादो लब्धः ?। सा प्राऽऽह-भूयताम्-योऽद्य राजमार्गे त्वरितमश्वं वाहयन् बालस्त्रीप्रमुखजनानां त्रासमुत्पादयन् हृतः, स मूर्खत्वे प्रथमः पादः । द्वितीयः पाद इतो राजा, यः कुटुम्बलोकसहितैश्चित्रकरैः समं भित्तिभागं जराऽऽतुरस्यैकस्यैव मम पितुर्ददौ । तृतीयः पादो मम पिता, यो नित्यं भक्ते समायाते बहिर्याति । चतुर्थस्तु त्वम्, योऽस्मिन् भित्तिदेशे मल्लिखिते मयूरपिच्छे करं चिक्षेप । किमित्थं त्वया न विमृष्टम्-यदत्र सुधाघृष्टे भित्तिदेशे निराधारा मयूरपिच्छस्थितिः कथम् ?। एवं तस्या वचश्चातुरीरञ्जितो राजा तत्पाणिग्रहणवाञ्छकः सन् तस्याः पितुः समीपे स्वमभिप्रायं प्रेषयित्वा तां प्रार्थितवान् । पित्राऽपि सा दत्ता, सुमुहूर्ते परिणीता, राज्ञः प्रकामं प्रेमपात्रा बभूव । सर्वान्तःपुरीषु च मुख्या जाता । विविधानि वस्त्राणि,रत्नाऽऽभरणानि चाऽऽससाद । एकदा तया मदनाभिधाना स्वदासी रहस्येवं बभाषे-भद्रे ! यदा मदनशान्तो नृपतिः स्वपिति, तदा त्वयाऽहमेवं प्रष्टव्या-स्वामिनि ! कथां कथयेति । तथोक्तम्-अवश्यमहं तदानीं प्रक्ष्ये । अथ रात्रिसमये राजा तद्गृहे समायातः, तां भुक्त्वा रतश्रान्तो यावत् स्वपिति, तावता दास्या इयं पृष्टा-स्वामिनि ! कथां कथय । राज्ञी प्राऽऽह-यावद्राजा निद्रां नाऽऽप्नोति तावन्मौनं कुरु, पश्चात् त्वदग्रे यथेष्टं कथां कथयिष्यामि । राजाऽपि तां कथां श्रोतुकामः कपटनिद्रया सुष्वाप । पुनर्दास्या साम्प्रतं कथां कथयेति पृष्टा चित्रकरपुत्री कथां कथयितुमारेभे-

मधुपुरे वरुणश्रेष्ठचेककरप्रमाणं देवकुलमकारयत्, चतुःकरप्रमाणो देवस्तत्र स्थापितः,स तस्मै देवश्चिन्तितार्थदायको बभूव। अथ दासी प्राऽऽह-एकहस्ते देवकुले चतुःकरप्रमाणो देवः कथं माति ?, इति तया पृष्टे सा राज्ञी प्राऽऽह-इमं रहस्यं तव कल्यरात्रौ कथयिष्यामि, अद्य तु निद्रा समायातीति प्रोच्य सा राज्ञी राज्ञः शय्यायाः पुरो भूमौ सुप्ता । सा दासी तां तथा दृष्ट्वा स्वगृहे गता । राजा मनस्येवं चिन्तयामास-कल्यराज्ञापि कपटनिद्रया सुप्तः सुखानिद्रामवाप । द्वितीयदिनेऽपि राजा तस्या एव गृहेरात्रौ समायातः, राज्ञश्च यावत् सुखं भेजे, पञ्चाऽऽतआस्तोऽपि पूर्वकथानकश्रवणाय कपटनिद्रया सुप्तः । दासी प्राऽऽह-स्वामिनि! कल्यकथितकथानकरहस्यं वद । राज्ञी प्राऽऽह-एकहस्ते देवकुले चत्वारः करा यस्य स चतुःकरो देवो नारायणाऽऽदिस्तत्र स्थापित इति रहस्यम् । इति एका कथा १ ।

अथ तृतीयदिनरात्रावपि राजा तथैव कपटनिद्रया सुप्तः । पुनः कथामद्य कथयेति दासी तामाह । सा प्राऽऽह-विन्ध्याचले पर्वते कोऽपि रक्ताशोकद्रुमः प्रौढोऽस्ति, तस्य घनानि पत्राणि सन्ति, परं छाया नास्ति । दासी प्राऽऽह-पत्राऽऽवृतस्य तस्य छाया कथं न जायते ?। राज्ञी प्राऽऽह-एतद्रहस्यं तव कल्यरात्रौ कथयिष्यामि, अद्याहं रतश्रान्ता निद्रासुखमनुभविष्यामीत्युक्त्वा सुप्ता । सा दासी तु स्वगृहे गता । अपररात्रावपि राजा प्रोक्तान् श्रुत्वा तथैव तत्र सुप्तः। दासी प्राऽऽह-स्वामिनि! कल्यसत्ककथारहस्यं कथनीयम् । राज्ञी प्राऽऽह-तस्य वृक्षस्य सूर्याऽऽतपस्य मूर्द्धि छाया नास्ति, किन्त्वध एव छायाऽस्ति । इति द्वितीया कथा २ ।

अथ पुनस्तथैव रात्रौ नृपे सुप्ते दासीपृष्टा राज्ञी प्राऽऽह-कश्चिन्निवेशे कश्चिद्भूश्वरन् कदाऽपि बन्धूलतरुं ददर्श । तन्निमुग्धां ग्रीवां कुर्वन्प्राप्तशाखः प्रकामं खिन्नस्तस्यैव बन्धूलतरोरुपरि पुरीषोत्सर्गं कृतवान् । दासी राज्ञीं पपच्छ-हे स्वामिनि ! कथमेतद् घटते, स्वग्रीवया बन्धूलतरुं प्राप्तः तदुपरि कथमसावुत्सर्गं चकार?। राज्ञी प्राऽऽह-अद्य निद्रा समायाति, तेनैतत्कथारहस्यं कल्यरात्रावश्यं कथयिष्यामीत्युक्त्वा सुप्ता । कल्यदिनरात्रावपि तथैव नृपे सुप्ते दासीपृष्टा राज्ञी तत्कथातत्त्वं प्राऽऽह-स उष्ट्रः कूपमध्यस्थं तं बन्धूलतरुं ददर्शेति घटत एवेदम् । इति तृतीया कथा ३।

पुनस्तथैव नृपे सुप्ते रात्रौ दासीपृष्टा सा राज्ञी कथामाचख्यौ-कस्मिंश्चिन्नगरे कांचित्कन्या भृशं रूपसौन्याभ्यवत्यासीत्, तद्वरणार्थं तन्मातापितृभ्यां त्रयो नरा आहूताः समायाताः । तदानीं फणिना दष्टा सा कन्या मृता । तया समं मोहादेको वरस्तच्चितायां प्रविष्टो नक्षसाद् बभूव । द्वितीयस्तद्भस्मपिण्डाऽऽदाता तद्भस्मोपरि वासं चकार । तृतीयस्तु सुरमाराध्यामृतं प्राप्तः । तदमृतेन तच्चितायां सिक्तायां कन्यां, प्रथमं वरं च सद्योऽजीवयत् । कन्याऽप्युत्थिता तान् त्रीन् वरान् ददर्श । राज्ञी दासीं प्राऽऽह-हे सखि ! ब्रूहि, तस्याः कन्यायाः को वरो युक्तः?। दासी प्राऽऽह-अहं न वेद्मि त्वमेव ब्रूहि । राज्ञी प्राऽऽह-अद्य निद्रा समायाति, कल्यरात्रौ कथयिष्यामीत्युक्त्वा सुप्ता । द्वितीयदिनरात्रौ दासीपृष्टा साऽवदत्-यस्तस्याः संजीवकः स पिता, यः सहोद्भूतः स बन्धुः । यो भस्मापिण्डाऽऽदाता, स तत्पतिरिति । इति चतुर्थी कथा ४।

तथैवान्यरात्रौ नृपे सुप्ते दासीपृष्टा राज्ञी प्राऽऽह-कश्चिद्नृपः स्वपत्न्यै दिव्यमलङ्कारवरं सुगुप्तभूमिगृहे रत्नाऽऽलोकात् सुवर्णकारैरजीघटत् । तत्रैकः सुवर्णकारः सन्ध्यां पतितां ज्ञातवान् । राज्ञी प्राऽऽह-हे सखि ! तेन रत्नाऽऽलोकसहिते सुगुप्तभूमिगृहे यामिनीमुखं कथं ज्ञातम ?। दासी प्राऽऽह-नाहं वेद्मि, त्वमेव ब्रूहि । राज्ञी प्राऽऽह-साम्प्रतं निद्रा समायातीत्युक्त्वा सुप्ता । द्वितीयदिनरात्रौ दासीपृष्टा सा प्राऽऽह-स सुवर्णकारो राज्यन्ध आसीदिति ज्ञातं तेन । इति पञ्चमीकथा ५ ।

पुनरेकदा रात्रौ सुप्ते नृपे दासीपृष्टा सा प्राऽऽह-केनापि राज्ञा द्वौ मल्लिमल्लुचौ निश्छिद्रपेट्यां क्षिप्तौ समुद्रमध्ये प्रवाहितौ,क्वापि तटे सा पेटी लग्ना केनचिद् नरेण गृहीता, उद्घाट्य तौ दृष्ट्वा पृष्टौजोः ! युवयोरद्य कियतोः कतमो दिवसोऽयम् ? । तयोर्मध्ये चैकः प्राऽऽह-अद्य चतुर्थो दिवसः। राज्ञी प्राऽऽह-हे सखि! तेन चतुर्थो दिवसः कथं ज्ञातः?। दासी प्राऽऽह-अहं न वेद्मि, त्वमेव ब्रूहि । राज्ञी तु साम्प्रतं निद्रा समायातीत्युक्त्वा सुप्ता । द्वितीयदिने रात्रौ दासीपृष्टा राज्ञी प्राऽऽह-स चतुर्थदिनवक्ता पुरुषस्तुर्यञ्जरी वर्त्तते स्मेति तेन तथा प्ररूपितम् । इति षष्ठी कथा ६ ।

पुनरन्यदा दासीपृष्टा सा राज्ञी रात्रौ कथामाचख्यौ-कांचित् स्त्री सपत्नीभयेन निजाङ्गभूषणानि पेट्यां निक्षिप्य मुद्रां च दत्त्वाऽऽलोकभूमौ मुमोच । अन्यदा सा स्त्री सखीनिवासे गता, सपत्नी च विजनं विलोक्य तां पेटीमुद्घाट्यानेकाऽऽभरणश्रेणिमध्यादेकं हारं निष्कास्य स्वतनयायै ददौ । तनया च स्वपतिगृहे तं गुप्तं चकार । कियत्कालानन्तरं सा स्त्री तत्राऽऽयाता, तां पेटीं दूरादवलोक्यैव ज्ञातवती-यदस्याः पेट्या मध्यान्मम हारोऽनयाऽपहृत इति सपत्नीं चौर्येण दूषयामास । सपत्नी शपथान् कुर्वती हारापहारं न मन्यते स्म । तदा सा स्त्री तां सपत्नीं दुष्टदेवपादस्पर्शशपथायाऽऽकर्षितवती । तदानीं भयभ्रान्ता सपत्नी तं हारं तनयागृहादानीय तस्यै ददौ । दासी प्राऽऽह-हे स्वामिनि ! तया कथं ज्ञातो हारापहारः ?। राज्ञी प्राऽऽह-कल्ये रात्रौ कथयिष्यामीत्युक्त्वा सुप्ता । द्वितीयदिनरात्रौ पुनस्तया पृष्टा राज्ञी प्राऽऽह-सा पेटी खच्चकाचमयी बभूवेति ज्ञातं तया । इति सप्तमी कथा ७ ।

कस्यचिद्राज्ञः कन्या केनापि खेऽटेनापहृता । तस्य राज्ञश्चत्वारः पुरुषाः सन्ति-एको निमित्तवेदी, द्वितीयो रथकृत्, तृतीयः सहस्रयोधा, चतुर्थो वैद्यः । तत्र निमित्तवेदी दिशं विवेद । रथकृद्दिव्यं रथं चकार । खगामिनं तं रथमारुह्य सहस्रयोधा, वैद्यश्च विद्याधरपुरं गतौ। सहस्रयोधी तं खेऽटं हतवान्। हन्यमानेन तेन खेऽटेन कन्याशिरश्छिन्नम्, तदैव तेन वैद्येनौषधेन शिरः संयोजितम् । राजा तु पश्चादागतेभ्य एभ्यश्चतुर्भ्यस्तां सुतां ददौ । कन्या प्राऽऽह-एषु मध्ये यो मया सह चितायां प्रवेशं करिष्यति, तमहं वरिष्यामि । इति प्रोच्य सा कन्या सुरङ्गाद्वारि रचितायां चितायां प्रविष्टा । यस्तया सह तत्र प्रविष्टः, स तां कन्यामूढवान् । दासी प्राऽऽह-हे स्वामिनि ! चतुर्षु मध्ये कोऽत्र प्रविष्टः?। राज्ञी प्राऽऽह-अद्य रतिश्रान्ताया मे निद्रा समायातीत्युक्त्वा सुप्ता । द्वितीयवासररात्रौ पुनर्दासीपृष्टा राज्ञी प्राऽऽह-निमित्तवेदी-'इयं न मरिष्यति' इति मत्वा चितां प्रविष्टस्तनस्तामूढवान् । इत्यष्टमी कथा ८ ।

पुनरपि रात्रौ दासीपृष्टा राज्ञी कथामाह-जयपुरनगरे सुन्दरनामा राजाऽऽसीत् । स चान्यदा विपरीताश्वैनैक एवाटव्यां नीतः, ततो बलाद् शिथिलीकृत्याश्वात् स राजा समुत्तीर्णः ।

तमश्वं क्वचित्तरौ बद्ध्वा स्वयमितस्ततो भ्रमन् स कस्मिंश्चित् सरसि जलं पपौ । तत्रैकां सुरूपां तापसपुत्रीं ददर्श । तापसपुत्र्याहूतः स तापसाऽऽश्रमं प्राप । तत्र तापसास्तस्य भृशं सत्कारं चक्रुः । सा कन्या तापसैर्दत्ता, राज्ञा च परिणीता । तां नवोढां कन्यां गृहीत्वा तमेवाश्वमधिरुह्य पश्चाद्वलितोऽन्तराले मार्गे क्वचित् सरपाल्यां राजा सुप्तोऽपि जाग्रन्नेवाऽऽसीत् । राज्ञी तु निद्राणा । केशरिराक्षसेन तत्राऽऽगत्य नृपस्यैवं कथितम्-षण्मासान् यावद् बुभुक्षितोऽहं त्वां भक्ष्यं प्राप्याद्य तृप्तो भविष्यामि, अन्यथा मद्वाञ्छितं देहि । राज्ञोक्तम्-ब्रूहि स्ववाञ्छितम् । तेनोक्तम्—कश्चिद्दशवर्षीयो ब्राह्मणपुत्रः शिरसि पितृदत्तपद्मस्वया कङ्केन हृतः सप्तदिनमध्ये चेद्वलिर्दीयते, तदाऽहं त्वां मुञ्चामि, नान्यथा इति । राज्ञा प्रतिपन्नम् । प्रभाते राजा चलितः कुशलेन स्वपुरं गतः । सैनिकाः सर्वेऽपि मिलिताः । राज्ञा स्वमन्त्रिणं प्रति राक्षसवृत्तान्तः कथितः । मन्त्री सुवर्णपुरुषं निर्माय पटहवादनपूर्वं नगरे भ्रामयामास । तेनैवं घोषयितम्-यो हि ब्राह्मणपुत्रो राज्ञाय स्वजीवितदानेन नृपजीवितं रक्षते, तस्य पित्रोरयं सुवर्णपुरुषो दीयते । इयमुद्घोषणा षट् दिनानि यावत् तत्र जाता । सप्तमदिने एकत्र ब्राह्मो ब्राह्मणपुत्रस्तां निर्घोषणां श्रुत्वैवं मातापितरावबोधयत्-प्राणा गत्वरा: सन्ति, मातापित्रोश्चेऽऽकृणं मम प्राणैः कृत्वा भवेत्, तदा वरं, तेनाहं नृपजीवितरक्षार्थं स्वजीवितं राक्षसाय दत्त्वा सुवर्णपुरुषं दापयामि । एवं भूशमाग्रहेण मातापित्रोरनुमतिं गृहीत्वा राज्ञः समीपे गतः । राज्ञा तु तत्पितुः पादौ शिरसि दापयित्वा स्वयमाकर्ष्य सखड्गस्तस्य पृष्ठतो भूत्वा राक्षसस्य समीपमानीतः । यावता राक्षसो दृष्टस्तावता नृपेणोक्तम्-भो ब्राह्मणपुत्र ! इष्टं स्मर । एवं नृपेणोक्तः स ब्राह्मणपुत्र इतस्ततो नेत्रे निक्षिपन् जहास । तदानीं राक्षसस्तुष्टः प्राऽऽह-यदिष्टं तन्मार्गयेति । स प्राऽऽह-यदि त्वं तुष्टस्तदा हिंसां त्यज, जिनोदितं दयाधर्मं कुरु । राक्षसेनापि तद्वचसा दयाधर्मः प्रतिपन्नः । राजादयोऽपि तं दारकं प्रशंसितवन्तः । अथ दासी प्राऽऽह-हे राज्ञि ! तस्य ब्राह्मणपुत्रस्य को हास्यहेतुः ? तयोक्तम्-साम्प्रतं मे निद्रा समायातीत्युक्त्वा सा सुप्ता । द्वितीयदिने दासीपृष्टा सा राज्ञी प्राऽऽह-हे हले ! अयं तस्य हास्यहेतुः-नृणां हि माता, पिता, नृपः शरणं, ते त्रयोऽपि मत्पार्श्वस्थाः, अहं पुनः कमन्यं शरणं श्रयामि ?, इति विचिन्त्य तस्य हास्यमुत्पन्नम् । इति नवमी कथा ६ ।

एवं सा चित्रकरसुता कथाभिर्मुहुर्मुहुर्मोहयन्ती राजानं वशीचकार । राजा तु तस्यामेवाऽऽसक्तोऽन्यासां राज्ञीनां नामापि न जग्राह । ततस्तस्यामिङ्गितानि पश्यन्त्यः सर्वा अपि सपत्न्यः परमद्वेषं वहन्ति स्म । चित्रकरसुता तु निरन्तरं मध्याह्ने रहस्येकाकिनी कपाटयुगलं दत्त्वा गृहान्तः प्रविश्य पूर्ववस्त्राणि प्रावृत्याऽऽत्मानमेवं शिक्षयामास-आत्मन् ! तवायं पूर्ववेषः, साम्प्रतं राजप्रसादादुत्तरामवस्थां प्राप्य गर्वं मा कुर्याः । एवमात्मनः शिक्षां ददती दृष्ट्वा सपत्न्यो राजानमेवं विज्ञपयामासुः-स्वामिन् ! एषा क्षुद्रा तवाहर्निशं कार्मणं कुरुते, यदस्माकं वचनं न मन्यसे, तदा मध्याह्ने स्वयं तद्गृहं गत्वा तस्याः स्वरूपं विलोकय । नृपतिस्तासां वाक्यं निशम्य मध्याह्ने तस्या गृहं गतः । सा तु तथैव पूर्वनेपथ्यं परिधायाऽऽत्मनः शिक्षां ददती नृपतिना दृष्टा । सर्वाणि तद्वचांस्यपि श्रुतानि । राजा तस्या निर्गर्वतां ज्ञात्वा परमं प्रमोदमवाप । इमां च पट्टराज्ञीं चकार । राज्ञो विशेषान्मनो विनोदमियं व्यधात् । अन्यदा तन्नगरोद्याने विमलाऽऽचार्याः समायाताः । राज्ञा सह नृपस्तद्वन्दनाय तत्र गतः, नगरलोकोऽपि तद्वन्दनार्थं गतः । तदा विमलाऽऽचार्यो देशनां चकार । चित्रकरसुता, नृपश्च द्वावपि प्रतिबुद्धौ श्राद्धकधर्मं गृहीतवन्तौ, परस्परमनाबाधया त्रिवर्गसाधनं कुरुतः । अन्येद्युस्तया दत्तपञ्चपरमेष्ठिनमस्कारस्तत्पिता मृतो व्यन्तरो जातः । कालान्तरेणाऽऽर्हतं धर्ममाराध्य चित्रकरसुता राज्ञी मृता देवीत्वं प्राप । ततश्च्युत्वा वैताढ्ये तोरणाभिधे पुरे दृढशक्तिखेचरस्य पुत्री कनकमाला बभूव । प्राप्तयौवनां तामेकदा वीक्ष्य कन्दर्पतप्तो वासवनामा कश्चित् खेचरोऽपहृत्यात्र महाद्रौ मुक्त्वा स्वचित्ते प्रमोदं बभार । अत्र विद्याबलात् समग्रां सामग्रीं विधाय स वासवविद्याधरो यावद्गन्धर्वोद्वाहाय समुत्सुकोऽभवत्, तावत् कनकमालाऽप्रजःसुवर्णतेजास्तदनुपदिकस्तत्राऽऽयातस्तं वासवं विद्याधरमधिक्षिप्तवान् । तौ द्वावपि कोपाद् घोरं युद्धं कुर्वाणौ परस्परप्रहाराद् मृतौ । कनकमाला तु भृशं भ्रातृशोकं चकार । तदानीं कश्चिद्देवस्तत्राऽऽगत्य कनकमालां प्रत्येवमवदत्-पुत्रि ! भ्रातृशोकं मुञ्च, चित्तं स्वस्थं कुरु, ईदृश एव संसारोऽस्ति, त्वं मम पूर्वभवे पुत्र्यभूः, तिष्ठ त्वमत्रैव गिरौ । अत्र स्थितायास्तव सर्वं भव्यं भविष्यति । एवं देववचनमाकर्ण्य कनकमाला चिन्तयामास-कोऽसौ देवः ?, कथमस्याहं पुत्री ?, असौ मयि स्निह्यते, अहमप्यस्मिन् स्निह्यामि । यावदेवं कनकमाला चिन्तयति-तावत्तज्जनको विद्याधरेन्द्रो दृढशक्तिनामा धावन् तत्राऽऽयातः, स्वपुत्रं स्वर्णतेजसं, विरोधिनं वासवविद्याधरं च मृतं दृष्ट्वा विभ्रमस्तकां च तां पुत्रीं दृष्ट्वैवं विचारयामास-अयं सुतः, इयं सुता, अयं शत्रुरयोऽप्यमी ईदृगवस्थां प्राप्ताः । स्वप्नोपमं जगत्सर्वं दृश्यते । एवं ध्यायतस्तस्य दृढशक्तिविद्याधरस्य जातिस्मरणमुत्पन्नम् । ततोऽसौ शासनदेवीप्रदत्तवेषश्चारणश्रमणो यतिरभूत् । अथ स व्यन्तरस्तया पुत्र्या सह तं श्रमणं ननाम । जीवन्तीं तां पुत्रीं वीक्ष्य स चारणश्रमणस्तं व्यन्तरं नमन्तमपृच्छत्-किमिदमिन्द्रजालं मया दृष्टम् ?। व्यन्तरः प्राऽऽह-तव पुत्रः शत्रुश्च मिथो नियुध्य मृतौ । इयं च कन्या जीवन्त्यपि मया तव मृता दर्शिता । मुनिः प्राह-कथं त्वया मृता कृता ?। स व्यन्तरः स्मृत्वैवमाह-हे मुनिनायक ! एतद्वार्तां शृणु-क्षितिप्रतिष्ठनृपतेर्जितशत्रोरियं प्राग्भवे पत्न्यजनत्, चित्राङ्गदनाम्नश्चित्रकृतो ममैषा पुत्र्यभवत्, एतया प्राग्भवे ऽन्त्यसमये मम नमस्कारा दत्ताः, तत्प्रभावादहं व्यन्तरो जातः । एषा अपि मृता देवी जाता, देवीत्वमनुभूय तव सुताऽत्र भवे जज्ञे । तेन विद्याधरेणापहृत्यात्र चैत्ये मुक्ता, यावार्थमायातेन मया दृष्टा, एतस्या बन्धौ चौरे च मृते यावदिमामहमाश्वासयामि तावद्भवन्तोऽत्र प्राप्ताः । मया विभृष्टमित्यमनेन जनकेन समं मा यात्विति मयैतस्या गोपनमाया विहिता । यत्तव निराशत्वं मया तदानीं कृतं, तत् क्षन्तव्यम् । मुनिरूचे-अहो ! व्यन्तर ! या त्वया तदा माया कृता, सा ममत्वमायापहारिणी जाता, तेन मम भवतोपकृतं, न किमप्यपराधः । एवमुक्त्वा स मुनिर्धर्माऽऽशिषं दत्त्वाऽन्यत्र विजहार । अथ प्राग्भववृत्तान्तं श्रुत्वा सा कन्या जातिस्मृतिभागभूत्, प्राग्जन्मजनकं व्यन्तरं प्राऽऽह-तात ! तं पूर्वभवपतिं मेलय । व्यन्तरः प्राऽऽह-स ते प्राग्भवभर्ता जितशत्रुनृपतिर्देवीभूय च्युतः साम्प्रतं सिंहरथो नाम राजा जातोऽस्ति । स गन्धारदेशे पुण्ड्रवर्द्धननगरादश्वापहृतोऽत्र समायास्यति । स हि त्वामत्रैव सकलसामग्र्या परिणेष्यति । यावत् स इहाभ्येति ता-

यत् त्वमत्रैव तिष्ठेत्युक्त्वा स व्यन्तरः पुराचक्षे शाश्वतजिनबिम्बानि नन्तुं गतवान् ।

इदं सर्वं वृत्तान्तं कथयित्वा सा कन्या राजानं प्रत्याह-स्वामिन् ! त्वमत्र मद्भाग्याऽऽकर्षितः समायातः । सिंहरथराजाऽपीमां पूर्वभवकथां श्रुत्वा पूर्वभवश्वशुरं तं व्यन्तरमस्मरत् । तेन स्मृतः स व्यन्तरस्तत्राऽऽगत्य, दिव्यवादित्रनिर्घोषं कृतवान् । मध्याह्ने जिनबिम्बान्यन्यत्रार्च्य नृपो भुक्ते स्म । ततस्तेन व्यन्तरेण पूरिताशेषवाञ्छितोऽसौ नृपतिस्तत्र मासमेकं स्थितवान् । चिरकालेन स्वराज्यानिष्टशङ्कया राजा तां दयितां प्रतीदमाह-प्रिये ! प्रबलो वैरिव्रजो मे राज्यमुपरुध्स्यति, ततोऽहं स्वपुरं यामि। दयिता जगाद-यदि राज्यं मोक्तुं न शक्यते, तदा व्योमगमनसाधिकां प्रज्ञप्तिविद्यां मन्युक्तादृ गृहाण,यतस्ते व्योमगतिर्यथासुखं स्यात्। प्रियाप्रदत्तां तां विद्यामासाद्य सिंहरथो राजा विद्याधराग्रणीर्बभूव । प्राग्भवप्रेमपूर्णौ तां प्रियामापृच्छ्य स राजा स्वपुरे व्योममार्गेण समागतः। तत्र पुरे कियद्दिनानि स्थित्वा सिंहरथनृपतिस्तं पर्वतं पुनर्गतः। एवं स्वनगरात् तस्मिन्नगे नित्यं गताऽऽगतं कुर्वन् नृपतिः सिंहरथो लोकाऽगतिरितिनाम्नाप्रसिद्धिं प्राऽऽप । अन्यदा तत्र नगे तं नृपं स व्यन्तर एवमाह-अहं मत्स्वामिनिदेशाद् देशान्तरं गमिष्यामि, त्वं मत्पुरीं स्वनगरे नीत्वेमं नगं शून्यं मा कार्षीः। एवमुक्त्वा स व्यन्तरः स्थानान्तरमगात्। नृपस्तन्नगे महन्नगरं व्यधात्, तस्य नग्गतिपुरमिति नाम कृतवान्। तत्रस्थो राजा तया राज्ञ्या सह भोगान् भुञ्जानः सुखेन कालं निर्गमयति स्म । तत्र राज्यं पालयतस्तस्य बहुतरः कालो ययौ । अन्यदा नग्गतिर्नृपः पुरपरिसरे वसन्तोत्सवं द्रष्टुं जगाम, मार्गे च मञ्जरीपुञ्जमञ्जुलमाम्रवृक्षमद्राक्षीत् । ततः एकां मञ्जरीं नृपतिर्लीलया स्वकरेण जघ्राह । ततो "गतानुगतिकाः प्रायो, दृश्यन्ते बहवो नराः। स्वभूपमनुवर्तन्ते, यथा राजा तथा प्रजाः ॥ १ ॥" इति न्यायात् सर्वे तस्य मञ्जरीपत्राऽऽदिकं जगृहुः । भूमिपालः स्त्रीभां कृत्वा ततः पश्चाद्गलितस्तमाम्रवृक्षं काष्ठशेषमालोक्यैवं चिन्तितवान्-अयमाम्रवृक्षो नेत्रप्रीतिकरो, यो मया पूर्वं गच्छता दृष्टः, सोऽयं काष्ठशेषो विगतशोभः साम्प्रतं दृश्यते यथा, तथा सर्वोऽपि जीवः कुटुम्बधनधान्यदेहाऽऽदिसौन्दर्येनष्टो नैव शोभां प्राप्नोति । एतच्च सर्वं विनश्वरं यावन्न क्षीयते तावत्संयमे यत्नः कार्य इति चिन्तनान्नगतिः प्रतिबुद्धो जातः, शासनदेवीप्रदत्तवेषः संयममाददे । उत्त० ६ अ० । आव० । आ० चू० । क्षत्रियपरिव्राजकभेदे, औ० ।

णग्गयमग्ग-नग्गतमार्ग-पुं० । विषमपर्वतमार्गे, तं० ।

णग्गभाव-नग्नभाव-पुं० । अचेलत्वे, "समणाणं णिग्गंथाणं नग्गभावे मुंडभावे ।" स्था० ६ ठा० ।

णग्गिया-नाग्निका-स्त्री० । अवस्त्रायाम्, विशे० ।

णग्गोह-न्यग्रोध-पुं० । वटे, प्रज्ञा० १ पद । नि० चू० ।

णग्गोहपरिमंडल-न्यग्रोधपरिमण्डल-न० । न्यग्रोधवत्परिमण्डलं यस्य स तथा । यथा न्यग्रोध उपरि संपूर्णप्रमाणोऽधस्तु हीनः, तथा यत् संस्थानं नाभेरुपरि संपूर्णम्, अधस्तनु, तस्मिन् संस्थानभेदे, तं० ।

णग्गोहवरपायव-न्यग्रोधवरपादप-पुं० । वटप्रधानवृक्षे, अन्त० १ वर्ग १ अ० ।

णच्च-नृत्-धा० । गात्रविक्षेपे, "व्रजनृतमदां कचः ॥८।४।२५॥ एषामन्त्यस्य द्विरुक्तः 'कच' इति कचः । 'णच्चइ,' नृत्यति । प्रा० ४ पाद ।

नृत्य-न० । पादजङ्घोरुकटपृष्ठदरबाहुहस्तशिरोवदननयनभ्रूमुखाऽऽदिविकारकरणे, नि० चू० १७ उ० । नाटये, स्था० ६ ठा० ।

णच्चंत-नृत्यत्-त्रि० । अङ्गविकारकारके, औ० । नि० चू० । "णच्चंताणि वा हसंताणि वा रमंताणि वा ।" आचा० २ श्रु० २ चू०४ अ० । "णच्चंतकबंधपउरे ।" नृत्यन्ति कबन्धानि शिरोरहितकलेवराणि प्रचुराणि यत्र स तथा । प्रश्न०२ आश्र० द्वार ।

णच्चग-नर्तक-पुं० । नटानां नायके, व्य० ६ उ० ।

णच्चा-ज्ञात्वा-अव्य० । "त्वत्वद्वध्वां चजजभाः क्वचित्" ॥८।२।१५॥ प्रा० २ पाद । अवगम्येत्यर्थे, सूत्र० १ श्रु० ४ अ० १ उ० । अवबुध्येत्यर्थे, सूत्र० १ श्रु० ८ अ० । दश० । आचा० । उत्त० । "सव्वं चच्चा अहिट्ठिए ।" सूत्र० १ श्रु० २ अ० ३ उ० ।

णच्चाविय-नर्तित-न० । नृत्यवदिव कृते, स्था० ६ ठा० ।

णच्चिर-पुं० । देशी-रजकशीले, दे० ना० ४ वर्ग ।

णज्ज-न्याय्य-त्रि० । न्यायोपपन्ने युक्ते, हा० २६ अष्ट० ।

णज्जंत-ज्ञायमान-त्रि० । "ज्ञो णव्वणजौ" ॥८।४।२५२॥ इति जानातेः कर्मणि भावे वा 'णज्ज' इत्यादेशः । अवगम्यमाने, प्रा० ४ पाद । नि० ।

णज्जर-पुं० । देशी-मलिने, दे० ना० ४ वर्ग ।

णज्जर-पुं० । देशी-विमले, दे० ना० ४ वर्ग ।

णट्ट-नाट्य-न० । नटस्य भावः कर्म वा । करचरणाऽऽदिविक्षिप्तपरिस्पन्दविशेषे, आव० ३ अ० । नृत्ते, आ० १ श्रु० १ अ० । प्रश्न० । जं० । जी० । स्था० । करपादभ्रूशिरोऽङ्गयोङ्गाऽऽदीनां सविकारे चलने, ध० ३ अधि० । नृत्ये, प्रज्ञ० १४ पद० ६ उ० । सामिनयनिरभिनयभेदभिन्ने ताण्डवे, जं० ५ वक्ष० । उत्त० । "चउव्विहे णट्टे पण्णत्ते । तं जहा-अंचिए, रिभिए, आरभटे, भसोले ।" एतच्च संप्रदायाऽभावान्न विवृतम् । स्था० ४ ठा० ४ उ० । आ० चू० । एतेऽञ्चितादयश्चत्वारोऽपि भेदा नाट्यशास्त्रप्रसिद्धाः । अथवा-" नट्टं होइ अणेयं, सीयजुयं नामयं तु नायव्वं ।" बृ० १ उ० । एते नाट्यविधयो भरताऽऽदिशास्त्रेभ्योऽवसेयाः । जं० ५ वक्ष० । " बत्तीसतिविहे णट्टे पण्णत्ते ।" द्वात्रिंशद्विधं नाट्यमभिनयविषयवस्तुभेदाद्, यथा राजप्रश्नकृताभिधानद्वितीयोपाङ्गे इति संभाव्यते। द्वात्रिंशत्बद्धप्रतिबद्धमिति केचित् । सम० ३२ सम० ।

तते णं से सूरियाभे देवे समणं भगवं महावीरं दोच्चं पि तच्चं पि एवं वयासी-तुब्भे णं भंते ! सव्वं जाणह जवदंसित्तए त्ति कट्टु समणं भगवं महावीरं तिक्खुत्तो आयाहिणपयाहिणं करेइ,करेइत्ता वंदइ, णमंसइ, वेउव्वियसमुग्घाएणं समोहणति, समोहणित्ता संखित्ताइं जोयणाइं उच्चं दंडं निस्सरइ, निस्सरइत्ता अहे थुहुमे दोच्चं पि वेउव्वियसमुग्घाएणं० जाव बहुसमरमणिज्जं भूमिभागं विउव्वइ । से

जहानामए आलिंग पुक्खरेति वा० जाव मणीणं फासो। तस्स णं बहुसमरमणिज्जस्स भूमिभागस्स बहुमज्झदेसभागे पेच्छाघरमंडवे विउव्वइ, अणेगखंभसयसण्णिविट्ठं वण्णओ। अंतो बहुसमरमणिज्जं भूमिभागं विउव्वइ, उल्लोचं अक्खाडगं मणिपेढियं विउव्वइ। तीसे णं मणिपेढियाए उवरिं सीहासणं सपरिवारं० जाव दामो चिट्ठंति। तए णं से सूरियाभे देवे समणस्स भगवओ महावीरस्स आलोए पणामं करेति, पणामं करेत्ता अणुजाणह मे भगवं तिकट्टु सीहासणवरगयतित्थयराभिमुहे सन्निसन्ने। तए णं से सूरियाभे देवे तप्पढमयाए णाणामणिकणगरयणविमलमहरिहणिउणोवचियमिसिमिसंतविरतियमहाजरणकमगतुमियवरनूसणुज्जलं पीवरपलंबं दाहिणभुयं पसारेति। तओ णं सरिसयाणं सरिसतयाणं सरिसवयाणं सरिसलावण्णरूवजोव्वणगुणोववेयाणं एगाभरणवसणगहियणिज्जोगाणं दुहतो संविद्धिवग्गणिवत्थाणं आविद्धतिलयामेल्लाणं पिणद्धगेविज्जकंचुयाणं लप्पीलियचित्तपट्टपरियरसफेणगावत्तरइयसंगयपलंबवत्थंतचित्तविचित्तवत्थनिवसणाणं एगावलिकंठरइयसोभंतवच्छपरिहत्थभूसणाणं अट्ठसयं णट्टसज्जाणं देवकुमाराणं णिग्गच्छइ। तयाणंतरं च णं णाणामणि०जाव पीवरपलंबं वामभुयं पसारेइ। तओ सरिसयाणं सरिसतयाणं सरिसवयाणं सरिसलावण्णरूवजोव्वणगुणोववेयाणं एगाभरणवसणगहियनिज्जोयाणं दुहतो संविद्धिवग्गनियत्थाणं आविद्धतिलयामेल्लाणं पिणद्धगेविज्जकंचुयाणं खाणामणिकणगरयणभूसणविराइयंगुवंगाणं० जाव अट्ठसयं नट्टसज्जाणं देवकुमारियाणं णिग्गच्छइ। तते णं से सूरियाभे देवे अट्ठसयं संखाणं विउव्वइ, अट्ठसयं संखवायगाणं विउव्वइ, अट्ठसयं संगाणं विउव्वइ, अट्ठसयं संगवायगाणं विउव्वइ, अट्ठसयं संखियाणं विउव्वइ, अट्ठसयं संखियावायगाणं विउव्वइ, अट्ठसयं खरमुहीणं विउव्वइ, अट्ठसयं खरमुहीवायगाणं विउव्वइ, अट्ठसयं पेयाणं विउव्वइ, अट्ठसयं पेयावायगाणं विउव्वइ, अट्ठसयं पिरिपिरियाणं विउव्वइ, ० एवमादियाणं एगूणपण्णं आउज्जविहाणाइं विउव्वति, विउव्वित्ता ते बहवे देवकुमारा य देवकुमारीओ य सद्दावेइ। तते णं ते बहवे देवकुमारा य देवकुमारीओ य सूरियाभेणं देवेणं सद्दाविया समाणा हट्ठतुट्ठ० जाव हियया जेणेव सूरियाभे देवे तेणेव उवागच्छंति, उवागच्छित्ता तेणेव सूरियाभं देवं करयलपरिग्गहियं० जाव वद्धावेइ, वद्धावेइत्ता एवं वयासी-संदिसंतु मे देवाणुप्पिया! जं अम्हेहिं कायव्वं। तए णं से सूरियाभे देवे बहवे देवकुमारा य देवकुमारीओ य एवं वयासी-गच्छह णं तुब्भे देवाणुप्पिया! समणं भगवं महावीरं तिक्खुत्तो आयाहिणपयाहिणं करेह, करेत्ता वंदह, णमंसह, वंदित्ता णमंसित्ता गोयमाइया णं समणाणं णिग्गंथाणं तं दिव्वं देविड्ढिं दिव्वं देवजुइं दिव्वं देवाणुभावं दिव्वं बत्तीसइविहं नट्टविहिं उवदंसेह, उवदंसित्ता खिप्पामेव एवमाणत्तियं पच्चप्पिणह। तते णं ते बहवे देवकुमारा य देवकुमारीओ य सूरियाभेणं देवेणं एवं वुत्ता समाणा हट्ठतुट्ठ० जाव पडिसुणेंति, जेणेव समणे भगवं महावीरे तेणेव उवागच्छंति, उवागच्छंतित्ता समणं भगवं महावीरं० जाव णमंसित्ता जेणेव गोयमाइया समणा णिग्गंथा, तेणेव णिग्गच्छंति। तते णं ते बहवे देवकुमारा य देवकुमारीओ य समामेव समोसरणं करेंति, समामेव समोसरणं करेत्ता समामेव पंती बंधंति, समामेव पंती बंधेत्ता नमंसंति, नमंसित्ता समामेव उवणमंति, उवणमंतित्ता समामेव उस्सप्पंति, समामेव ओसप्पंतित्ता, एवं महिंतामेव उवणमंति, उवणमंतित्ता विमियामेव उस्सप्पंति, उस्सप्पंतित्ता संगयामेव उवणमंति, उवणमंतित्ता० जाव समामेव आउज्जविहाणाइं णिएहंति, समामेव य वाइंसु, पगाइंसु, पणच्चिंसु। किं ते उरेणं मंदं सिरेणं तारं कंठेण व तारं समयरेयगरइयं तुंजाचक्कुहरोवगूढं रत्तं तिट्ठाणकरणसुद्धं सकुहरतुंजंतवंसतंतीतलताललयगहसुसंपउत्तं महुरसमसुललितं मणहरं मिउरिभितपयसंचारं सुरइसुनातिवरचारुरूवं दिव्वं नट्टसज्जं गेयं पगीया वि होत्था। किं ते उक्खित्ताणं संखाणं संगाणं संखियाणं खरमुहीणं पेयाणं पिरिपिरियाणं, आहयंताणं पणवाणं पडहाणं, आसारिज्जंतीणं भंभाणं होरंभाणं, तालिज्जंतीणं जेरीणं जल्लरीणं कुडुक्काणं, आलवंताणं मुरजाणं मुइंगाणं नंदिमुइंगाणं, उत्तालिज्जंताणं आलिंग कुत्तुंबीणं गोमुहीणं महलाणं, मुच्चिज्जंताणं वीणाणं विपंचीणं वल्लकीणं, कुट्टिज्जंतीणं महतीणं कच्छभीणं तंतिवीणाणं, सारिज्जंतीणं बब्बीसाणं सुघोसाणं वंदियोसाणं, फुरिज्जंतीणं भामरीणं परिवाइणीणं, फालंतीणं तूणाणं तुंबवीणाणं, आमोडिज्जंतीणं दक्खाणं, मुच्चिज्जंतीणं मुरुंदाणं हुरुक्कीणं चिच्चिकीणं, वाइज्जंताणं करणाणं डिंडिमाणं किणियाणं कणंवाणं, उल्लासिज्जंताणं ढक्काणं ढढरियाणं कुडुंबरूणं कलसियाणं मदयाणं, आतालिज्जंताणं तलाणं ताडाणं कंसतालाणं, घट्टिज्जंताणं गिरिसयाणं खलियरयाणं मगरियाणं सुसलारियाणं, फूमिज्जंताणं वंसाणं वेणूणं चालीणं पिरिलीणं वक्कणं, तते णं से दिव्वे णट्टे दिव्वे गीए दिव्वे वा-

इए, एवं अब्भुए सिंगारे उराले मणुण्णे मणहरे गीए वाइए णट्टे, जप्पिजलजूए कहकहजूए दिव्वे देवरमणे पवत्ते यावि होत्था। तए णं ते बहवे देवकुमारा य देवकुमारीओ य समणस्स भगवओ महावीरस्स सोत्थियसिरिवत्थनंदियावत्तवद्धमाणभद्दासणकलसमच्छदप्पणमंगल्लभत्तिचित्तं णामं दिव्वं णट्टविहिं उवदंसेंति १। तते णं ते बहवे देवकुमारा य देवकुमारीयाओ य समामेव समोसरणं करेंति, समोसरणं करेत्ता तं चेव जाणियव्वं० जाव दिव्वे देवरमणे पवत्ते यावि होत्था। तते णं ते बहवे देवकुमारा य देवकुमारीयाओ य समणस्स भगवओ महावीरस्स आवडपच्चावमसेढिपसेढिसोत्थियसिरिवत्थिपूसमाणगवद्धमाणगमच्छंमामकरंमाजारामारापुप्फावलिपउमपत्तसागरतरंगवासंतीलयपउमलयभत्तिचित्तं णामं दिव्वं णट्टविहिं उवदंसेंति २। एवं एक्केक्कियाए नट्टविहीए समोसरणादिए सा वत्तव्वया० जाव देवरमणे पवत्ते यावि होत्था। तते णं ते बहवे देवकुमारा य देवकुमारीयाओ य समणस्स भगवओ महावीरस्स ईहामियउसभतुरगणरमगरविहगवालगकिन्नररुरुसरभचमरकुंजरवणलयपउमलयभत्तिचित्तं णामं दिव्वं णट्टविहिं उवदंसेंति ३। एगओचक्कं दुहओचक्कं एगओचक्कवालं दुहओचक्कवालं चक्कद्धचक्कवालं णामं दिव्वं णट्टविहिं उवदंसेंति ४। चंदावलिपविभत्तिं सूरावलिपविभत्तिं च वलयावलिपविभत्तिं च हंसावलिपविभत्तिं च एगावलिपविभत्तिं च तारावलिपविभत्तिं च मुत्तावलिपविभत्तिं च कणगावलिपविभत्तिं च रयणावलिपविभत्तिं च आवलियापविभत्तिणामं दिव्वं णट्टविहिं उवदंसेंति५। चंदुग्गमणपविभत्तिं च सूरुग्गमणपविभत्तिं च उग्गमणुग्गमणपविभत्तिं णामं दिव्वं णट्टविहिं उवदंसेंति ६। चंदागमणपविभत्तिं च सूरागमणपविभत्तिं च आगमणागमणपविभत्तिं णामं दिव्वं णट्टविहिं उवदंसेंति ७। चंदावरणपविभत्तिं च सूरावरणपविभत्तिं च आवरणावरणपविभत्तिं णामं दिव्वं णट्टविहिं उवदंसेंति ८। चंदत्थमणपविभत्तिं च सूरत्थमणपविभत्तिं च अत्थमणत्थमणपविभत्तिं च णामं दिव्वं णट्टविहिं उवदंसेंति ९ चंदमंडलपविभत्तिं च सूरमंडलपविभत्तिं च नागमंडलपविभत्तिं च जक्खमंडलपविभत्तिं च भूयमंडलपविभत्तिं च रक्खसमहोरगगंधव्वमंडलपविभत्तिं च मंडलपविभत्तिं णामं दिव्वं णट्टविहिं उवदंसेंति १०। उसभलीलियविक्कंतं सीहलीलियविक्कंतं हयविलंबियं गयविलंबियं हयविलासियं गयविलासियं मत्तहयविलासियं मत्तगयविलासियं मत्तहयविलंबियं मत्तगयविलंबियं दुयविलंबियं णामं दिव्वं णट्टविहिं उवदंसेंति ११। सागरपविभत्तिं च नागरपविभत्तिं च सागरनागरपविभत्तिं च णामं दिव्वं णट्टविहिं उवदंसेंति १२। णंदापविभत्तिं च चंपापविभत्तिं च णंदाचंपापविभत्तिणामं दिव्वं णट्टविहिं उवदंसेंति १३। मच्छंडापविभत्तिं च मगरंडापविभत्तिं च जारापविभत्तिं च मारापविभत्तिं च मच्छंडामगरंडाजारामारापविभत्तिं च णामं दिव्वं णट्टविहिं उवदंसेंति १४। क त्ति ककारपविभत्तिं च ख त्ति खकारपविभत्तिं च ग त्ति गकारपविभत्तिं च घ त्ति घकारपविभत्तिं च ङ त्ति ङकारपविभत्तिं च ककारखकारगकारघकारङकारपविभत्तिं च णामं दिव्वं णट्टविहिं उवदंसेंति १५। एवं चकारवग्गो वि १६। टकारवग्गो वि १७। तवग्गो वि १८। पवग्गो वि १९। असोयपल्लवपविभत्तिं च अंबपल्लवपविभत्तिं च जंबुपल्लवपविभत्तिं च कोसंबपल्लवपविभत्तिं च पल्लवपविभत्तिं च णामं दिव्वं णट्टविहिं उवदंसेंति २०। पउमलयापविभत्तिं च नागलयापविभत्तिं च० जाव सामलयापविभत्तिं च लयापविभत्तिं च णामं दिव्वं णट्टविहिं उवदंसेंति २१। दुयणामं णट्टविहिं उवदंसेंति २२। विलंबियं णामं णट्टविहिं उवदंसेंति २३। दुयविलंबियं णामं णट्टविहिं उवदंसेंति २४। अंचियं णामं णट्टविहिं उवदंसेंति २५। रिभियं णामं णट्टविहिं उवदंसेंति २६। अंचियरिभियं णामं० उवदंसेंति २७। आरंभडं णामं णट्टविहिं उवदंसेंति २८। असोल्लं णामं णट्टविहिं उवदंसेंति २९। आरंजडभसोलं० उवदंसेंति ३०। उप्पायणिवायपरिणिवायपसत्तं संकुचियं पसारियं रेभयारचियं-भंतं संभंतं णामं दिव्वं णट्टविहिं उवदंसेंति ३१। तते णं ते बहवे देवकुमारा य देवकुमारीओ य समामेव समोसरणं करेंति० जाव दिव्वे देवरमणे पवत्ते यावि होत्था। तए णं ते बहवे देवकुमारा य देवकुमारीओ य समणस्स भगवओ महावीरस्स पुव्वभवचरियाणिबद्धं देवलोयचरियाणिबद्धं चवणचरियाणिबद्धं च गब्भसंहरणचरियाणिबद्धं च जम्मणचरियाणिबद्धं च अभिसेयचरियाणिबद्धं च बालभावचरियाणिबद्धं च जोव्वणचरियाणिबद्धं च कामभोगचरियाणिबद्धं च णिक्खमणचरियाणिबद्धं च तवचरणचरियाणिबद्धं च णाणुप्पायचरियाणिबद्धं च तित्थपवत्तणचरियाणिबद्धं च परिणिव्वाणचरियाणिबद्धं च चरमचरियाणिबद्धं च णामं दिव्वं णट्टविहिं उवदंसेंति ३२। तते णं ते बहवे देवकुमारा य देवकुमारीओ य चउव्विहं वाउत्तं वायंति। तं जहा—ततं, वितंतं, घणं, झुसिरं। तते णं ते बहवे देवकुमारा य देवकुमारीओ य चउव्विहं गेयं गायंति। तं जहा—उक्खित्तं, पायत्तं, मंदायं, रोइयावसाणं च। तते णं ते बहवे देवकुमारा य देवकुमारीओ य चउव्विहं णट्टविहिं उवदंसेंति। तं जहा—अंचियं १, रिभियं २, आरंजडं ३, असोलं च ४। तते णं ते बहवे देवकुमारा

य देवकुमारीओ य चउव्विहं अभिणयं अभिणयंति । तं जहा-दिट्ठंतियं, पाडियंतियं, सामंतोवायणियं, लोयमज्झावसाणियं । तते णं ते बहवे देवकुमारा य देवकुमारीओ य गोयमाऽऽदियाणं समणाणं णिग्गंथाणं दिव्वं देविड्ढिं दिव्वं देवजुतिं दिव्वं देवाणुभावं दिव्वं बत्तीसइविहं णाडगं उवदंसित्ता समणं भगवं महावीरं तिक्खुत्तो आयाहिणपयाहिणं करेइ, करेइत्ता वंदइ, णमंसइ, वंदित्ता णमंसित्ता जेणेव सूरियाभे देवे तेणेव उवागच्छंति, उवागच्छंतित्ता सूरियाभं देवं करयलपरिग्गहियं सिरसावत्तं मत्थए अंजलिं कट्टु जएणं विजएणं वद्धावेंति, वद्धावेंतित्ता एवमाणत्तियं पच्चप्पिणंति ।

" तए णं " इत्यादि । ततः सूर्याभो देवस्तीर्थंकरस्य भगवत आलोके प्रणामं करोति । कृत्वा चानुजानातु भगवान् मामित्यनुज्ञापनां कृत्वा सिंहासनवरगततीर्थंकराभिमुखः सन्निषण्णः । ' तए णं ' इत्यादि । ततः सूर्याभो देवस्तत्प्रथमतया-तस्य नाट्यविधेः प्रथमतायां, दक्षिणं भुजं प्रसारयति। कथंभूतम्?, इत्याह—(णाणामणिकणगरयणविमलमहरिहतवणिज्जुज्जलविचित्तदंडाभिरामे चित्तविचित्तमहाजरणकडगतुडियथंभियबाहे वरवलयसुकयाभरणे) नानाविधानि मणिकनकरत्नानि येषु तानि नानामणिकनकरत्नानि, मणयो नानाविधाइचन्द्रकान्ताऽऽदयः । कनकानि नानावर्णतया, रत्नानि नानाविधानि कर्केतनाऽऽदीनि, तथा विमलानि निर्मलानि, तथा महान्तमुपलोत्कारमर्हन्ति, यदि वा महदुत्सवे क्षणमर्हन्तीति महार्हाणि, तथा निपुणं निपुणबुद्धिगम्यं यथा भवति (एवमुचिय त्ति) परिकर्मितानि । (मिसमिसंत इति) दीप्यमानानि,विरचितानि महाभरणानि यानि कटकानि कलाचिकाऽऽभरणानि, त्रुटितानि बाहुरक्षिकाः, अन्यानि च यानि वरभूषणानि, तैरुज्ज्वलं भास्वरम् । तथा पीवरं स्थूलं प्रलम्बं दीर्घं (तओ णं इत्यादि) । ततस्तस्माद् दक्षिणभुजात् अष्टशतमष्टाधिकं शतं देवकुमाराणां निर्गच्छति। कथभूतानाम्?, इत्याह-सदृशानां,समानाऽऽकाराणामित्यर्थः। तत्राऽऽकारेण कस्यचित् सदृशोऽपि वर्णतः सदृशो न भवति, ततः सदृग्वर्णत्वप्रतिपादनार्थमाह-(सरिसतयाणमिति) सदृशी सदृग्वर्णा त्वग् येषां ते तथा। सदृक्त्वगपि कश्चिद् वयसा विसदृशः संजायेत, तत आह-(सरिसवयाणं) सदृक् समानं वयो येषां ते। (सरिसलावण्णरूवजोव्वणगुणोववेयाणमिति) सादृश्येन लावण्येन सदृशिम्ना, अतिसुन्दरया शरीरकान्त्येति भावः । रूपेण आकृत्या यौवनेन यौवनिकया गुणैर्दक्षत्वप्रियंवदत्वाऽऽदिभिरुपपेताः सदृशलावण्यरूपयौवनगुणोपपेताः, तेषाम् । (एगाभरणवसणगहियनिज्जोयाणमिति) । एकः समान आभरणवसनलक्षणो गृहीतो निर्योग उपकरणमर्थाज्जात्योपकरणं यैस्ते तथा, तेषाम् । (दुहतो संविल्लियमाणिबत्थाणं ति) द्विधातो द्वयोः पार्श्वयोः संवेल्लितानि अग्राणि यस्य तत् द्विधातः संवेल्लिताग्रं, निवसनं सामर्थ्यादुत्तरं यैस्ते तथा, तेषाम् । तथा-(उप्पीलियचित्तपट्टपरियरसफेणणवसरइयसंगयपट्टबत्थयंतचित्तविचित्तणिवसणाणमिति) उत्पीडित अत्यन्तबद्धश्चित्रपट्टो विचित्रवर्णपट्टरूपः परिकरो यैस्ते तथा, तथा यस्मिन्नावर्त्तनैव फेनविनिर्गमो भवति स फेनकाऽऽवर्तः, तेन रचिताः संगता नाट्यविधानुपपन्नाः प्रलम्बा वस्त्रान्ता यस्य निवसनस्य तत्तथा; तत् चित्रं वर्णं 'विल्ललगं' देदीप्यमानं निवसनं परिधानं येषां ते तथा। ततः पूर्वपदेन विशेषणसमासः। तेषाम्, (एगावलिकंठरइयसोभंतवच्छपडिहत्थजूसणाणमिति) एकावली या कण्ठे रचिता तया शोभमानं वक्षो येषां ते तथा। ' पडिहत्थ' शब्दो देशतः परिपूर्णवाचकः । पडिहत्थानि पूर्णानि भूषणानि येषां ते तथा । ततः पूर्वपदेन कर्मधारयः, तेषां (नट्टसज्जाणं) नृत्ये सज्जाः प्रगुणीभूता नृत्यसज्जाः, तेषाम्। तदनन्तरं च यथोक्तविशेषणविशिष्टं वामं भुजं प्रसारयति, तस्मात् वामभुजादष्टशतं देवकुमारिकाणां निर्गच्छति । कथंभूतम ?, इत्याह-"सरिसवयाणं सरिसतयाणं सरिसवयाणं सरिसलावण्णरूवजोव्वणगुणोववेयाणं एगाभरणवसणगहियनिज्जोगाणं दुहतो संविल्लियमाणिबत्थाणं" इति पूर्ववत् । (आविद्धतिलयामेलाणमिति)आविद्धस्तिलक आमेलश्च शेखरको याभिस्ता आविद्धतिलकाऽऽमेलाः, तासां (पिणद्धगेविज्जकंचुयाणमिति) पिनद्धं ग्रैवेयकं ग्रीवाऽऽभरणं कञ्चुकश्च याभिस्तथा, तासां (णाणामणिकणगरयणजूसणविराइयंगुवंगाणमिति) नानाविधानि मणिकनकरत्नानि येषु भूषणेषु तानि नानामणिकनकरत्नभूषणानि, तैर्विराजितान्यङ्गोपाङ्गानि यासां तास्तथा, तासाम् । यावत्करणात्-" चंदाणणाणं चंदद्धसमनिडालाणं चंदाहियसोमदंसणाणं उक्काए उज्जोवेमाणीणं " इति सुगमम् । तथा-" सिंगारागारचारुवेसाणं हसियभणियचिट्ठियविलाससललियसंलावनिउणजुत्तोवयारकुसलाणं गहियाउज्जाणं नट्टसज्जाणं" इति पूर्ववत् । 'तए णं से सूरियाभे देवे' इत्यादि। ततः सूर्याभो देवोऽष्टशतं शङ्खानां विकुर्वति, अष्टशतं शङ्खवादकानाम्, अष्टशतं शृङ्गाणामष्टशतं शृङ्गवादकानाम् १, अष्टशतं शङ्खिकानामष्टशतं शङ्खिकावादकानाम्, ह्रस्वः शङ्खो जात्यन्तराऽऽत्मकः शङ्खिका, तस्या हि स्वरो मनाक् तीक्ष्णो भवति, न तु शङ्खवदतिगम्भीरः २, तथाऽष्टशतं खरमुखीनाम्-काहलानाम्, अष्टशतं खरमुखीवादकानाम ३, अष्टशतं पेयानां, पेया नाम महती काहला, अष्टशतं पेयावादकानाम् ४, अष्टशतं पिरिपिरिकाणां कौलिकपुटावनद्धमुखवाद्यविशेषरूपाणाम्,(एवमादियाणमिति) अष्टशतं पिरिपिरिकावादकानाम् ५, अष्टशतं पणवानां, पणवो नाएड पटहो वा, अष्टशतं पणववादकानाम् ६, अष्टशतं पटहानामष्टशतं पटहवादकानाम् ७, अष्टशतं भम्भानां, भम्भा ढक्का, अष्टशतं भम्भावादकानाम् ८, अष्टशतं होरम्भाणां, होरम्भा महाढक्का, अष्टशतं होरम्भावादकानाम् ९, अष्टशतं भेरीणां ढक्काऽऽकृतिवाद्यविशेषरूपाणाम्, अष्टशतं भेरीवादकानाम् १०, अष्टशतं झल्लरीणां, झल्लरी नाम चर्मावनद्धो वितस्तीर्घवलयाऽऽकारः, अष्टशतं झल्लरीवादकानाम् ११, अष्टशतं दुन्दुभीनाम्, अष्टशतं दुन्दुभिवादकानां, दुन्दुभिर्नेर्याकारः संकटमुखो देवाऽऽतोद्यविशेषः १२, अष्टशतं मुरजानां, महाप्रमाणो मर्दलो मुरजः, अष्टशतं मुरजवादकानाम् १३, अष्टशतं मृदङ्गानां, लघुमर्दलो मृदङ्गः, अष्टशतं मृदङ्गवादकानाम १४, अष्टशतं नन्दीमृदङ्गानाम्, नन्दीमृदङ्गो नाम एकतः संकीर्णोऽन्यत्र विस्तृतो मुरजविशेषः, अष्टशतं नन्दीमृदङ्गवादकानाम् १५, अष्टशतमालिङ्गानाम्, आलिङ्गो मुरजवाद्यविशेष एव । अष्टशतमालिङ्गवादकानाम १६, अष्टशतं कुस्तुम्बीनां, कुस्तुम्बी-चर्मावनद्धपुटो वाद्यविशेषः । अष्टशतं कुस्तुम्बीवादकानाम १७, अष्टशतं गोमुखीनां, गोमुखी लोकतोऽवसेया, अष्टशतं गोमुखी-

वादकानाम् १८, अष्टशतं मर्दलानां, मर्दल उभयतः समः, अष्टशतं मर्दलवादकानाम् १९, अष्टशतं विपञ्चीनां, विपञ्ची त्रितन्त्री वीणा, अष्टशतं विपञ्चीवादकानाम् २०, अष्टशतं वल्लकीनां, वल्लकी सामान्यतो वीणा । अष्टशतं वल्लकीवादकानाम् २१, अष्टशतं भ्रमरीणाम्, अष्टशतं भ्रमरीवादकानाम् २२, अष्टशतं भ्रामरीणाम्, अष्टशतं भ्रामरीवादकानाम् २३, अष्टशतं परिवादिनीनां, परिवादिनी सप्ततन्त्री वीणा । अष्टशतं परिवादिनीवादकानाम् २४, अष्टशतं सुघोषाणाम्, अष्टशतं सुघोषावादकानाम् २५, अष्टशतं सुघोषाणाम्, अष्टशतं सुघोषावादकानाम् २६, अष्टशतं नन्दीघोषाणाम्, अष्टशतं नन्दीघोषावादकानाम् २७, अष्टशतं महतीनाम्, अष्टशतं महतीवादकानाम् २८, अष्टशतं कच्छभीनाम्, अष्टशतं कच्छभीवादकानाम् २९, अष्टशतं चित्रवीणानाम्, अष्टशतं चित्रवीणावादकानाम् ३०, अष्टशतमामोदानाम्, अष्टशतमामोदवादकानाम् ३१, अष्टशतं दक्षकानाम्, अष्टशतं दक्षकवादकानाम् ३२, अष्टशतं नकुलानाम्, अष्टशतं नकुलवादकानाम् ३३, अष्टशतं तृणानाम्, अष्टशतं तृणवादकानाम् ३४, अष्टशतं तुम्बवीणानां, तुम्बयुक्ता वीणा वाऽयकल्यप्रसिद्धा । अष्टशतं तुम्बवीणावादकानाम् ३५, अष्टशतं मुकुन्दानां, मुकुन्दो मुरजो वाद्यविशेषो योऽतिक्षीणं प्रायो वाद्यते, अष्टशतं मुकुन्दवादकानाम् ३६, अष्टशतं हुडुक्कीनाम्, अष्टशतं हुडुक्कीवादकानाम्, हुडुक्की प्रतीता। ३७, अष्टशतं चिच्चिकीनाम्, अष्टशतं चिच्चिकीवादकानाम् ३८, अष्टशतं करटीनाम्, अष्टशतं करटीवादकानाम्, करटी प्रतीता ३९, अष्टशतं डिण्डिमानाम्, अष्टशतं डिण्डिमवादकानाम्, अथ-मप्रस्तावनास्तवकः पणवविशेषो मिण्डिमः ४०, अष्टशतं किणितानाम्, अष्टशतं किणितवादकानाम् ४१, अष्टशतं कमम्बानाम्, अष्टशतं कमम्बावादकानाम्, कमम्बा करटिका ४२, अष्टशतं दर्दरकाणाम्, अष्टशतं दर्दरकवादकानाम्, दर्दरकः प्रतीतः ४३, अष्टशतं दर्दरिकाणाम्, अष्टशतं दर्दरिकावादकानाम्, लघुर्दर्दरी दर्दरिका ४४, अष्टशतं कुतुम्बरूणाम्, अष्टशतं कुतुम्बरूवादकानाम् ४५ अष्टशतं कलशिकानाम्, अष्टशतं कलशिकावादकाम् ४६, अष्टशतं तलानाम्, अष्टशतं तलवादकानाम् ४७, अष्टशतं तालानाम्, अष्टशतं तालवादकानाम् ४८, अष्टशतं कांस्यतालानाम्, अष्टशतं कांस्यतालवादकानाम् ४९, अष्टशतं गिरिशिकानाम्, अष्टशतं गिरिशिकावादकानाम् ५०, अष्टशतं मकरिकाणाम्, अष्टशतं मकरिकावादकानाम् ५१, अष्टशतं शिशुमारिकाणाम्, अष्टशतं शिशुमारिकावादकानाम् ५२, अष्टशतं वंशानाम्, अष्टशतं वंशवादकानाम् ५३, अष्टशतं वालीनाम्, अष्टशतं वालीवादकानाम्, वाली तृणविशेषः, स हि मुखे दत्त्वा वाद्यते ५४। अष्टशतं वेणूनाम्, अष्टशतं वेणुवादकानाम् ५५, अष्टशतं परिल्लीनाम्, अष्टशतं परिल्लीवादकानाम् ५६, अष्टशतं वल्लकानाम्, अष्टशतं वल्लकवादकानाम्, वल्लकस्तूर्यवि-शेषः ५७, अन्याख्यातास्तु भेदा लोकतः प्रत्येतव्याः । एवमादीनि बहून्यातोद्यानि, आतोद्यवादकाँश्च विकुर्वति । सर्वसंख्यया तु मूलभेदापेक्षयाऽऽतोद्यभेदापेक्षया आतोद्यभेदा एकोनपञ्चाशत्, शेषास्तु भेदा एतेष्वेवान्तर्भवन्ति । यथा वंशाऽऽतोद्यविधाने वालीवेणुपरिल्लीवल्लका इति । यथा चाऽऽह-"एवमाइआइं पभू अपणं आउज्जविहाणाइं विउव्वइ त्ति" । विकुर्व्य च तावत् स्वयं विकुर्वितान् बहून् देवकुमारान् देवकुमारिकाश्च शब्दयति । ते च शब्दिताः सन्तो हृष्टतुष्टाऽऽनन्दितचित्ताः सूर्याऽऽभसमीपमागच्छन्ति, आगत्य च करतलपरिगृहीतं दशनखं शिरसावर्त्तं मस्तकेऽञ्जलिं कृत्वा जयेन विजयेन वर्द्धापयित्वा एवमवादिषुः-सन्दिशन्तु देवानां प्रियाः! यदस्माभिः कर्त्तव्यम्। ततः स सूर्याभो देवस्तान् देवकुमारान् देवकुमारिकाश्च एवमवादीत्-गच्छत यूयं देवानां प्रियाः! श्रमणं भगवन्तं महावीरं त्रिःकृत्वः, आदक्षिणप्रदक्षिणं कुरुत, कृत्वा वन्दध्वं, नमस्यत, वन्दित्वा नमस्थित्वा गौतमाऽऽदीनां श्रमणानां निर्ग्रन्थानां तां देवजनप्रसिद्धां दिव्यां देवर्द्धिं दिव्यां देवद्युतिं दिव्यं देवानुभावं दिव्यं द्वात्रिंशद्विधं नाट्यविधिमुपदर्शयत, उपदर्श्य चैतामाज्ञप्तिकां क्षिप्रमेव प्रत्यर्पयत । "तए णं" इत्यादि । ततस्ते बहवो देवकुमारा देवकुमारिकाश्च सूर्याभेन देवेन एवमुक्ताः सन्तो हृष्टा यावत्प्रतिशृण्वन्ति, अभ्युपगच्छन्तीत्यर्थः । प्रतिश्रुत्य च यत्र श्रमणो भगवान् महावीरस्तत्रोपागच्छन्ति, उपागत्य च श्रमणं भगवन्तं महावीरं त्रिःकृत्व आदक्षिणप्रदक्षिणं कुर्वन्ति, कृत्वा च वन्दन्ते, नमस्यन्ति, वन्दित्वा नमस्थित्वा च यस्मिन् प्रदेशे गौतमाऽऽदयः श्रमणास्तत्र समकालमेव एककालमेव समवसरन्ति, मिलन्तीत्यर्थः। समवसृत्य च समकमेव एककालमेव अवनमन्ति, अधो नीचा नवन्ति । अवनम्य च समकमेव उन्नमन्ति, ऊर्द्धमवतिष्ठन्त इति भावः । तदनन्तरं चैव क्रमेण सहितं संगतम्, स्तिमितं वाद्यनमनमुन्नमनं च वाच्यम् । अमीषां च संहिताऽऽदीनां भेदः सम्यक्शीक्षोपेतनाट्योपाध्यायादवगन्तव्यः । ततः स्तिमितं समकमुन्नम्य समकमेव प्रसरन्ति, प्रसृत्य च समकमेव यथायोगमातोद्यविधानानि गृह्णन्ति । गृहीत्वा च समकमेव वादितवन्तः, समकमेव प्रगीतवन्तः, समकमेव प्रनर्तितवन्तः । 'किं ते' इत्यादि । केचिद् देवकुमारा देवकुमारिकाश्च एवं प्रगीता अध्यभवन्निति योगः । कथम् ?, इत्याह-(उरेण मंदमिति) सर्वत्र सप्तम्यर्थे तृतीया । उरसि मन्दं यथा भवति एवं प्रगीताः । (सिरेण तारं कंठेण य तारमिति) शब्देन यथावस्तुकृणोपेतम । किमुक्तं भवति ?-उरसि प्रथमतो गीतमुत्क्षिप्यते, उत्क्षेपकाले च गीतं मन्दं भवति । " आदिमिउमारभंता, " इति वचनात् । अन्यथा गीतगुणक्षतेः, तत उक्तमुरसि मन्दमिति । ततो गायतां मूर्छानमभिघ्नन् स्वर उच्चैस्तरो भवति । स्थानकं च द्वितीयं तृतीयं वा समधिरोहति । ततः शिरसि तारमित्युक्तं, शिरसश्च प्रतिनिवृत्तः सन् स्वरः कण्ठे घुलति, घुलंश्चातिमधुरो भवति । (समयरेवगरहवमिति) (गुंजावंसकुहरोवगूढं) गुञ्जनं गुञ्जा, तत्प्रधानानि यानि चक्राणि शब्दमार्गोप्रतिकूलानि कुहराणि तेषूपगढं गुञ्जावंशकुहरोपगूढम । किमुक्तं भवति ?-तेषां देवकुमाराणां देवकुमारिकाणां च तस्मिन् प्रेक्षागृहमण्डपे गायतां गीतं तेषु प्रेक्षागृहमण्डपस्तत्केषु च कुहरेषु स्थानि रूपाणि प्रतिशब्दसहस्राण्युत्थापयद्वर्त्तते इति । (रत्तमिति) रक्तम्, इह यद् गेयरागरक्तेन गीतं गीयते तत् रक्तमिति । तद् द्विधा प्रसिद्धं (तिट्ठाणकरणसुद्धमिति) त्रीणि स्थानानि उरःप्रभृतीनि तेषु करणेषु क्रियया शुद्धं त्रिस्थानकरणशुद्धम । तद् यथा-उरःशुद्धं, कण्ठशुद्धं, शिरोविशुद्धं च । तत्र यदि उरसि स्वरः स्वभूमिकाऽनुसारेण विशालो भवति, तत उरोविशुद्धं, स एव यदि कण्ठे वर्त्तितो भवति अस्फुटितश्च, ततः कण्ठविशुद्धं, यदि पुनः शिरः प्राप्तः सन् सानुनासिको भवति, ततः शिरोविशुद्धम् । यदि वा यत् उरःकण्ठशिरोभिः श्लेष्मणाऽव्याकुलितैर्विशुद्धैर्गीयते तत् उरःकण्ठशिरोविशुद्ध-

त्वात् त्रिस्थानकरणविशुद्धम्। तथा सकुहरो गुञ्जन् यो वंशो,ये च तन्त्रीतलताललयग्रहाः, तेषु सुष्ठु अतिशयेन सम्प्रयुक्तं सकुहरगुञ्जद्वंशतन्त्रीतलताललयग्रहसुसम्प्रयुक्तम्। किमुक्तं भवति?-सकुहरे वंशे गुञ्जति तन्त्र्यां च वाद्यमानायां यत् वंशतन्त्रीस्वरेणाविरुद्धं तत् सकुहरगुञ्जद्वंशतन्त्रीसुसम्प्रयुक्तं, तथा परस्परहतहस्ततलस्वरानुवर्ति यत् तत् तलसुसम्प्रयुक्तं, मुरजकंशिकाऽऽदीनामातोद्यानामाहतानां यो ध्वनिः यच्च नृत्यं पादोत्क्षेपः, तेन समं यत् तत् तालसुसम्प्रयुक्तम्, तथा शृङ्गमयो दारुमयो दन्तमयोऽङ्गुलिकौशिकस्तेनाऽऽहतायास्तन्त्र्याः स्वरप्रकरो लयस्तमनुसरद् गेयं लयसुसम्प्रयुक्तम्, तथा यः प्रथमं वंशतन्त्र्यादिभिः स्वरो गृहीतस्तन्मार्गानुसारि ग्रहसुसम्प्रयुक्तम्, तथा (महुरमिति) मधुरस्वरेण गीयमानं मधुरं कोकिलारुतवत्, तथा (समामिति) तलवंशस्वराऽऽदिसमनुगतं समं (सललियं ति) यत् स्वरघोलनाप्रकारेण ललतीव, सह ललितेन ललनेन वर्त्तते इति। श्रोत्रेन्द्रियस्य शब्दस्पर्शनमतीव सूक्ष्ममुत्पादयति सुकुमारमिव च प्रतिभासते तत् सललितमिति। अत एव मनोहरम्। पुनः कथंभूतम्?, इत्याह-(मिउरिभितपदसंचारं) तत्र मृदु मृदुना स्वरेण युक्तो मिष्टुरेण, तथा यत्र स्वरोऽक्षरेषु घोलनास्वरविशेषेषु च संचरन् रङ्गतीव प्रतिभासते,स पदसञ्चारो रिङ्गित उच्यते। मृदुः रिङ्गितः पदेषु गेयनिबन्धेषु संचारो यत्र गेये तत् मृदुरिङ्गितपदसंचारं, तथा (सुरइ इति) शोभना रतिर्यस्मिन् श्रोतृणां तत् सुरति,तथा शोभना नतिरवनामोऽवसानो यस्मिन् तत् सुनति, तथा वरं प्रधानं चारु विशिष्टचङ्क्रमोपेतं रूपं स्वरूपं यस्य तद् वरचारुरूपं दिव्यं प्रधानं नृत्तसञ्ज्ञं गेयं प्रगीता अप्यभवन्। "किं ते" इत्यादि। किञ्च-ते देवकुमारा देवकुमारिकाश्च प्रगीतवन्तः, प्रनर्तितवन्तश्च (उद्धमंताणं संखाणमित्यादि) अत्र सर्वत्रापि षष्ठी सप्तम्यर्थे। ततोऽयमर्थः-यथायोगमुध्मायमानाऽऽदिषु शङ्खाऽऽदिषु, इह शङ्खशृङ्गशङ्खिकाखरमुहीपेयापिरिपिरिकाणां वादनमुद्घातमिति प्रसिद्धम्। पणवपटहानामाहननम्, भम्भाहोरम्भाणामास्फालनम्, भेरीझल्लरीदुन्दुभीनां ताडनम्, मुरजमृदङ्गनन्दीमृदङ्गानामालपनम्, आलिङ्गकुस्तुम्बगोमुखीमर्दलानामुत्ताडनम्, वीणाविपञ्चीवल्लकीनां मूर्छनम्, महतीकच्छपीतन्त्रिवीणानां कुट्टनम्, वल्लकीसासुघोषानन्दिघोषाणां सारणं, भ्रामरीपरिवादिनीनां स्पन्दनम्, तूणतुम्बवीणानां स्पर्शनम्, नकुलानामामोटनम्,मुकुन्दहुडुक्कचिच्चिकीनां मूर्छनम्, करटडिण्डिमकिणिककडम्बानां वादनम्, दर्दरदर्दरिकाकुटुम्बरुकलशिकामर्दकानामुत्ताडनम्, तलतालकांस्यतालानामाताडनं, गिरिशकाल्लसिरकामकरिकाशिशुमारिकाणां घट्टनं, वंशवेणुचालीपिरिलीबध्वकानां फुक्करणम्। अत उक्तम्-"उद्धमंताणं सङ्खाणं" इत्यादि। (तए णं से दिव्वे णट्टे दिव्वे गीए इत्यादि) यत एवं प्रगीतवन्त इत्यादि, ततो णमिति पूर्ववत्। तद् दिव्यं गीतं, दिव्यं वादितं, दिव्यं नृत्यमभूदिति योगः। दिव्यं नाम प्रधानम्। पञ्चम-(अब्भुए गीए अब्भुए वाइए अब्भुए नट्टे) अद्भुतमाश्चर्यकारि, (सिंगारे गीए, सिंगारे वाइए, सिंगारे णट्टे) शृङ्गारं शृङ्गाररसोपेतत्वात्। अथवा शृङ्गारं नामालङ्कृतमुच्यते, तत्र यदन्यस्य विशेषकरणेनालङ्कृतमिव गीतं वादनं नृत्यं वा तत् शृङ्गारमिति। (उरालं गीए उरालं वाइए उरालं णट्टे) उदारं स्फारं परिपूर्णगुणोपेतत्वात्, न तु क्वचिदपि हीनं, (मणुण्णे गीए मणुण्णे वाइए मणुण्णे णट्टे) मनोज्ञं मनोऽनुकूलं श्रोतृणां श्रोतृणां च मनोनिर्वृत्तिकरमिति भावः। तच्च मनोनिर्वृत्तिकरत्वं सामान्यतोऽपि स्यादतः प्रकर्षविशेषप्रतिपादनार्थमाह-(मणहरं इति) (मणहरे गीए मणहरे वाइए मणहरे णट्टे) मनो हरति आत्मवशं नयति, तद्विधमप्यतिचमत्कारकारितयेति मनोहरम्। एतदेवाऽऽह-(उप्पिंजलभूए) उत्पिञ्जलमाकुलम्, आकुलभूते। किमुक्तं भवति?-महर्द्धिकदेवानामप्यतिशायितया परमकौतूहलोत्पादकत्वेन सकलदेवासुरमनुजसमूहचित्ताऽऽक्षेपकारीति। (कहकहभूते इति) कहकहेत्यनुकरणं, कहकहेतिभूतं प्राप्तं कहकहभूतम्। किमुक्तं भवति?-निरन्तरं तत्तद्विशेषदर्शनतः समुद्वलितप्रमोदभरपरवशसकलदिक्चक्रवालवर्त्तिप्रेक्षकजनकृतप्रशंसावचनबोलकोलाहलव्याकुलीभूतामिति। अत एवं दिव्यं देवरमणमपि देवानामपि रमणं क्रीमनं प्रवृत्तमभूत्। रा०। आ० म०।

इह द्वात्रिंशद् नाट्यविधयः। ते च येन क्रमेण भगवतो वर्द्धमानस्वामिनः पुरतः सूर्याभदेवेन भाविताः राजप्रश्नीयोपाङ्गे च दर्शिताः, तेन क्रमेण विनेयजनानुग्रहार्थमुपदर्श्यन्ते-तत्र स्वस्तिकश्रीवत्सनन्द्यावर्त्तवर्द्धमानकभद्रासनकलशमत्स्यदर्पणरूपाष्टमङ्गलाऽऽकाराभिनयाऽऽत्मकः प्रथमो नाट्यविधिः। द्वितीय आवर्तप्रत्यावर्तश्रेणिप्रतिश्रेणिस्वस्तिकश्रीवत्सपुष्पमाणवकवर्द्धमानकमत्स्यादमकमकराण्डकजारमारपुष्पावलिपद्मपत्रसागरतरङ्गवासन्तीलतापद्मलताभक्तिचित्राभिनयाऽऽत्मकः। तृतीय ईहामृगऋषभतुरगनरमकरविहगव्यालकिन्नररुरुसरभचमरकुञ्जरवनलतापद्मलताभक्तिचित्राऽऽत्मकः। चतुर्थ एकतश्चक्रद्विधातश्चक्रएकतश्चक्रषाण्द्विधातश्चक्रवालचक्रार्द्धचक्रषाण्नाभिनयाऽऽत्मकः। पञ्चमः चन्द्राऽऽवलिप्रविभक्तिसूर्याऽऽवलिप्रविभक्तिवलयाऽऽवलिप्रविभक्तिहंसाऽऽवलिप्रविभक्तिएकाऽऽवलिप्रविभक्तितारकाऽऽवलिप्रविभक्तिमुक्ताऽऽवलिप्रविभक्तिकनकाऽऽवलिप्रविभक्तिरत्नाऽऽवलिप्रविभक्तियुक्ताऽऽवलिप्रविभक्तिनामा। षष्ठश्चन्द्रोद्गमप्रविभक्तिसूर्योद्गमप्रविभक्त्यभिनयाऽऽत्मक उद्गमोद्गमप्रविभक्तिनामा। सप्तमश्चन्द्राऽऽगमनप्रविभक्तिसूर्याऽऽगमनप्रविभक्त्यभिनयाऽऽत्मक आगमनागमनप्रविभक्तिनामा। अष्टमश्चन्द्राऽऽवरणप्रविभक्तिसूर्याऽऽवरणप्रविभक्त्यभिनयाऽऽत्मक आवरणावरणप्रविभक्तिनामा। नवमश्चन्द्रास्तमनप्रविभक्तिसूर्यास्तमनप्रविभक्त्यभिनयाऽऽत्मकोऽस्तमयास्तमयप्रविभक्तिनामा। दशमश्चन्द्रमण्डलप्रविभक्तिसूर्यमण्डलप्रविभक्तिनागमण्डलप्रविभक्तियक्षमण्डलप्रविभक्तिभूतमण्डलप्रविभक्तिराक्षसमहोरगगन्धर्वमण्डलप्रविभक्त्यभिनयाऽऽत्मको मण्डलप्रविभक्तिनामा। एकादश ऋषभमण्डलप्रविभक्तिसिंहमण्डलप्रविभक्तिहयविलम्बितगजविलम्बितहयविलसितगजविलसितमत्तहयविलसितमत्तगजविलसितमत्तहयविलम्बितमत्तगजविलम्बिताभिनयो द्रुतविलम्बितनामा। द्वादशः सागरप्रविभक्तिनागरप्रविभक्त्यभिनयाऽऽत्मकः सागरनागरप्रविभक्तिनामा। त्रयोदशो नन्दाप्रविभक्तिचम्पाप्रविभक्तिलघ्वभिनयाऽऽत्मको नन्दाचम्पाप्रविभक्त्याख्यः। चतुर्दशो मत्स्याण्डकप्रविभक्तिमकराण्डकप्रविभक्तिजारप्रविभक्तिमारप्रविभक्त्यभिनयाऽऽत्मको मत्स्याण्डकमकराण्डकजारमारप्रविभक्तिनामा। पञ्चदशः क इति ककारप्रविभक्ति ख इति खकारप्रविभक्ति ग इति गकारप्रविभक्ति घ इति घकारप्रविभक्ति ङ इति ङकारप्रविभक्तिरित्येवंक्रमजाविककाराऽऽदिप्रविभक्त्यभिनयाऽऽत्मकः ककारखकारगकारघकार-

ङकारप्रविभक्तिनामा । एवं षोमशञ्चकारछकारजझकारञकार-टकारठकारडकारढकारण-कारप्रविभक्तिनामा । सप्तदशः-तकारथकारदकारधकारनकार-प्रविभक्तिनामा । अष्टादशस्तकारथकारदकारधकारनकार-प्रविभक्तिनामा । एकोनविंशतितमः पकारफकारबकारभकार-कारप्रविभक्तिनामा । विंशतितमोऽशोकपल्लवप्रविभक्त्याम्रप-ल्लवप्रविभक्तिजम्बूपल्लवप्रविभक्तिकोशाम्बपल्लवप्रविभक्त्यात्मि-याऽऽत्मकः पल्लवप्रविभक्तिनामा । एकविंशतितमः पद्मलताप्रवि-भक्तिनागलताप्रविभक्त्यशोकलताप्रविभक्तिचम्पकलताप्रविभ-क्तिचूतलताप्रविभक्तिवनलताप्रविभक्तिवासन्तीलताप्रविभक्त्य-तिमुक्तकलताप्रविभक्तिश्यामलताप्रविभक्त्यभिनयाऽऽत्मको लताप्रविभक्तिनामा । द्वाविंशतितमो द्रुतनामा । त्रयोविंशतितमो विलम्बितनामा । चतुर्विंशतितमो द्रुतविलम्बितनामा । पञ्चवि-शतितमस्त्वञ्चितनामा । षड्विंशतितमो रिभितनामा । सप्तवि-शतितमोऽञ्चितरिभितनामा । अष्टाविंशतितम आरभटनामा । ए-कोनत्रिंशत्तमो भसोलनामा । त्रिंशत्तम आरभटभसोलनामा । ए-कत्रिंशत्तम उत्पातनिपातपरिनिपातप्रसक्तसंकुचितप्रसारितरे-वकारचितभ्रान्तसंभ्रान्तनामा । द्वात्रिंशत्तमस्तु चरमनामानिब-द्धनामा । स च सूर्याऽऽभदेवेन भगवतो वर्द्धमानस्वामिनः पुरतो नगवतश्चरमपूर्वमनुष्यभवचरमदेवलोकभवचरमच्यवनचरम-गर्भसंहरणचरमभरतक्षेत्रादावसर्पिणीतीर्थकरजन्मानिषेकचरम-बालभावचरमयौवनचरमकामभोगचरमनिष्क्रमणचरमतपश्च-रणचरमज्ञानोत्पादचरमतीर्थप्रवर्त्तनचरमनिर्वाणाभिनयाऽऽत्म-को भावितः ३२ । तत्रैतेषां द्वात्रिंशतो नाट्यविधीनां मध्ये काँश्चन नाट्यविधीन् उपन्यस्यति-अप्येकका देवा द्रुतं द्रुतनामकं द्वात्रिंशतितमं नाट्यविधिमुपदर्शयन्ति । एवमप्येकका विलम्बितं नाट्यविधिम्, अप्येकका अञ्चितं नाट्यविधिम्, अप्येकका रिभितं नाट्यविधिम्, अप्येकका अञ्चितरिभितं नाट्यविधिम्, अप्ये-कका आरभटं नाट्यविधिम्, अप्येकका भसोलं नाट्यविधिम्, अप्येकका आरभटभसोलं नाट्यविधिमुपदर्शयन्ति । अप्येकका देवा उत्पातनिपातम्, उत्पातपूर्वो निपातो यस्मिन् स उत्पात-निपातः, तम् । एवं निपातोत्पातं, संकुचितं प्रसारितं, रेव-कारचितमिति गमनागमनं भ्रान्तं संभ्रान्तं नाम नाट्यविधिं सामान्यतो मर्त्तनविधिं द्वात्रिंशदुत्तीर्णमुपदर्शयन्ति । अप्ये-कका देवाश्चतुर्विधं वाद्यं वादयन्ति । तद्यथा-ततं मृदङ्ग-पटहाऽऽदि, वितनं वीणाऽऽदिकं, घनं कंसिकाऽऽदि, शुषिरं काह-लाऽऽदि । अप्येकका देवाश्चतुर्विधं गेयं गायन्ति । तद्यथा-प्र-थमतः समारभ्यमाणमुत्क्षिप्तम्, उत्क्षेपावस्थातो विक्रान्तं मनाक् भरेण प्रवर्तमानं पादान्तम् । (मंदायमिति) मध्यभागे मूर्छना-ऽऽदिगुणोपेततया मन्दं मन्दं घोलनाऽऽत्मकम् । रोचितावसान-मितिरोचितं यथोचितलक्षणोपेततया भावितं, सत्यापितमिति यावत्, अवसानं यस्य तत् रोचितावसानम् । जी० ३ प्रति० । नट्-धा० । नृत्ते, भ्वादि०-परस्मै०-सेट् । " शकाऽऽदीनां द्वि-त्वम् " ॥ ८ । ४ । ३३० ॥ इत्यन्त्यस्य द्वित्वम् । ' णट्टइ, ' नट-ति । प्रा० ४ पाद ।

णट्टग-नर्त्तक-पुं० । स्वयं नृत्यकर्त्तरि, कल्प० ५ क्षण । औ० । रा० । ज्ञा० । प्रश्न० । अनु० ।

णट्टपाल-नाट्यपाल-पुं० । नाट्यस्वामिनि सूत्रधारे, " णट्ट-पालो णिउत्तो तेण गीतवाउत्तकधाऽऽदीहिं आवज्जिओ । " आ० चू० १ अ० ।

णट्टमालय-नृत्यमालक-पुं० । अपडकप्रपातगुहानां स्वामिषु देवेषु, वाचस्पः अपडकप्रपातगुहास्तावन्तो नृत्यमालकाः । स्था० २ ठा० ३ उ० । जी० प्र० । सुषमसुषमभाविनि कल्प-द्रुमविशेषे, जं० २ वक्ष० ।

णट्टवत्थु-नाट्यवस्तु-न० । नृत्यप्रतिपादके पापश्रुते, प्रश्न० ५ सम्व० द्वार । आव० ।

णट्टवाइय-नाट्यवादित्र-न० । नर्त्तकीत्वे, वृ० ५ उ० ।

णट्टविहि-नाट्यविधि-पुं० । ६ त० । नृत्यकरणप्रकारे, स्था० ६ ठा० । नायकचरिताभिनये, भ० ११ श० ६ उ० । सामान्यतो नर्त्तन-विधौ, जी० ३ प्रति० । (तस्य द्वात्रिंशत्प्रकाराः ' णट्ट ' शब्दे १८०३ पृष्ठे दर्शिताः)

णट्टाणीय-नाट्यानीक-पुं० । ब० । नाटयकारकजनसमूहे, भ० १४ श० ६ उ० ।

णट्ठ-नष्ट-त्रि० । सर्वथाऽदृश्यीभूते, आ० म० १ अ० १ खण्ड० । अपगते, सूत्र० १ श्रु० ३ अ० ३ उ० । हारिते, वृ० ३ उ० । " णट्ठे ति वा विगए ति वा अंतद्धाणुए ति वा एगट्ठा । " आ० चू० १ अ० । " णष्टसप्तदसऽभावे " नष्टोऽपगतः सत्यथः सद्-भावः सन्मार्गः परमार्थो येभ्यस्ते । सूत्र० १ श्रु० ३ अ० ३ उ० । रात्रिन्दिवस्य सप्तदशे मुहूर्त्ते, स० ३० सम० ।

णट्ठमइय-नष्टमतिक-त्रि० । मत्या स्वविषयकनिश्चायके, ज्ञा० १ श्रु० १६ अ० ।

णट्ठरय-नष्टरजस्-त्रि० । नष्टं सर्वथाऽदृश्यीभूतं रजो यत्र स तथा । जी० ३ प्रति० । अदृश्यमानरजस्के, आ० म० १ अ० १ खण्ड० ।

णट्ठरुव-नष्टरूपत्-त्रि० । अहोरात्रस्य षड्विंशे मुहूर्त्ते, स० ३० सम० ।

णट्ठसण्ण-नष्टसंज्ञ-त्रि० । मनसा भ्रान्ते, ज्ञा० १ श्रु० १६ अ० ।

णट्ठसुइय-नष्टश्रुतिक-पुं० । निर्यामके, शास्त्रेण दिगादिविवेचन-स्य करणेऽशक्ते, ज्ञा० १ श्रु० १६ अ० ।

णड-नट-पुं० । " टो डः " ॥ ८ । १ । १९५ ॥ इति टस्य डः । प्रा० १ पाद । नाटकानां नाटयितरि, ज्ञा० १ श्रु० १ अ० । रा० । अनु० । नटा ये नाटकानि नर्त्तयन्ति । व्य० ३ उ० । नि० चू० । कल्प० । औ० । " णमा छुविहा-अंसका, वग्गुरिया य । " पं० चू० । नटति नट् अच् । नाटकाऽऽदिदृश्यकाव्यानिनयकर्त्तरि नृत्तकर्-भेदे, जात्याजीविनि वर्णसङ्करभेदे, अशोकवृक्षे, शोणकवृक्षे, नले, किण्वपर्वणि, गोदन्तहरितालें च । वाच० ।

णड्-धा० । व्याकुलीभावे, दिवा०-पर०-सक०-सेट् । " गुपे-र्विरणौ ॥ ८ । ४ । १५० ॥ इति गुप्यतेर्णमाऽऽदेशः । ' णमइ ' 'गुप्यति' । प्रा० ४ पाद ।

णडखाइता-नटखादिता-स्त्री० । नटस्येव संवेगविकलधर्म-कथाकरणोपार्जितभोजनाऽऽदीनां खादितं भक्षणं यस्यां सा नटखादिता । प्रव्रज्याभेदे, स्था० ४ ठा० ४ उ० ।

णडपिडय-नटपिटक-पुं० । स्वनामख्याते नृगुकच्छाभ्यन्तरा-लग्रामे, यत्र कश्चिद् गुरुप्रेषितः साधुः वर्षापातेनावरुद्धः

सामाचारीमुपयुक्त एवाऽऽचरन् ज्ञवालवे उदाहरणम् । आ० क० । आव० ।

णमपेहा–नटप्रेक्षा–स्त्री० । नटा नाटकानां नाटयितारः, तेषां प्रेक्षा नटप्रेक्षा । नटप्रेक्षणके, जी० ३ प्रति० । वीरसाधूनामूर्ज्जयन्तत्वे, कल्प० १ क्षण । बृ० । (नटप्रेक्षोदाहरणम् 'कप्प' शब्दे तृतीयभागे २२६५ पृष्ठे गतम्)

णमाइणाय–नटाऽऽदिज्ञात–न० । नर्तकप्रनृत्त्युदाहरणे, पञ्चा० १६ विव० ।

णमाल–ललाट–न० । "ललाटे च" ॥८।१।२५७। इति लस्य णः । "पक्काऽङ्गारललाटे वा" ॥ ८ । १ । ४७ ॥ इत्यादेरत इत्वाभावपक्षे । मस्तके, प्रा० १ पाद ।

णमिय–नर्तित–त्रि० । विडम्बिते, ज्ञा० १ श्रु० ६ अ० ।

णमी–नटी–स्त्री० । नर्तक्याम्, बृ० ३ उ० । नटजार्यायाम्, स्था० ६ ठा० ।

णमीरंग–नटीरङ्ग–पुं० । नर्तकीरङ्गे नाट्यस्थाने, बृ० ३ उ० ।

णमुरी–देशी–भेके, दे० ना० ४ वर्ग ।

णमुल्ल–नमुल्ल–त्रि० । नमाः सन्त्यस्य डुलच् । नडयुक्ते देशे, वाच० । कारणे कार्योपचारादू नमुलः पादरोग इति । विशे० । आचा० ।

णमुली–स्त्री० । देशी–कच्छपे, दे० ना० ४ वर्ग ।

णणु–ननु–अव्य० । आशङ्कितावधारणे, नि० चू० १ उ० । वितर्के, षो० १६ विव० । अक्रमायाम्, दश० १ अ० । जी० । विशे० । प्रति० । असूयायाम्, विशे० ।

णण्णसूरि–नन्नसूरि–पुं० । चन्द्रगच्छोद्भवे श्रीवप्पनट्टिसूरिशिष्ये सर्वदेवसूरिगुरौ, स च विक्रमसंवत्सरे ९०० मिते विद्यमान आसीत् । जै० इ० ।

णत्त–नक्त–न० । रात्रौ, चं० प्र० १० पाहु० ३ पाहु० ।

णत्तंदिव–नक्तन्दिव–न० । अहोरात्रे, अष्ट० ६ अष्ट० ।

णत्तंभाग–नक्तम्भाग–पुं० । नक्तं रात्रौ चन्द्रयोगस्याऽऽदिमधिकृत्य विद्यन्ते येषां तानि नक्तम्भाणि तथा । चं० प्र० १० पाहु० ३ पाहु० । चन्द्रस्य समयोगिषु नक्षत्रेषु, " अहाऽसेसा साई, सयभिस अभिई य जेट्ठसमजोगा । " स्था० ६ ठा० ।

णत्तिअ–नप्तृक–पुं० । " इदुतौ वृष्टवृष्टिपृथङ्मृदङ्गनप्तृके " ॥ ८ । १ । १३७ । इति ऋत्व इकारोकारौ । प्रा० १ पाद । पुत्रस्य दुहितुर्वा पुत्रे, नि० चू० २ उ० । आ० म० । बृ० । विशे० ।

णत्तिआ–नप्तृका–स्त्री० । पौत्र्यां, दौहित्र्यां च । विपा० १ श्रु० ३ अ० । ग० ।

णत्तुअ–नप्तृक–पुं० । ' णत्तिअ ' शब्दार्थे, नि० चू० २ उ० । आ० म० । बृ० । विशे० ।

णत्तुआ–नप्तृका–स्त्री० । " णत्तिआ " शब्दार्थे, विपा० १ श्रु० ३ अ० । ग० ।

णत्तुआवइ–नप्तृकापति–पुं० । पौत्रीणां दौहित्रीणां वा भर्तृषु, बृ० १ उ० ।

णत्तुइणी–नप्तृकिनी–स्त्री० । पौत्रदौहित्रभार्यायाम्, विपा० १ श्रु० ३ अ० ।

णत्थ–न्यस्त–त्रि० । साध्वर्थमुपकल्पिते, सूत्र० १ श्रु० ४ अ० २ उ० । स्थापिते, अष्ट० ३० अष्ट० ।

णत्थिअ–नास्तिक–पुं० । नास्ति जीवः परलोको वेत्येवं मतिर्यस्य सः । अक्रियावादिनि, स्था० ४ ठा० ४ उ० । आचा० । सूत्र० । (८४ भेदाः ' अकिरियावाइ (ण्) ' शब्दे प्रथमभागे १२१ पृष्ठे उक्ताः) नास्तिकवादिगणमतम्–न सन्ति क्षण स्वपरसंस्थाः । स्था० ४ ठा० ४ उ० । सूत्र० ।

तद् यथा–

नत्थि जीवो, न जाइ, इह परे वा लोए न य किंचि वि फुसइ पुण्णपावं, नत्थि फलं सुकयदुक्कयाणं, पंचमहब्भूतियं सरीरं भासंति हं वातजोगजुत्तं, पंच य खंधे भणंति केइ, मणं च मणजीविका वदंति, वाउजीवो त्ति एवमाहंसु, सरीरं सादियं सनिधणं इहभवे एगे भवे तस्स विप्पणासंसि सव्वनासो त्ति एवं जंपंति मुसावाई ॥

शून्यमिति, जगदिति गम्यते, कथम् ?, आत्माऽऽद्यभावात्, एतदाह–नास्ति जीवः, तत्प्रसाधकप्रमाणाभावात् । स हि न प्रत्यक्षग्राह्यः, अतीन्द्रियत्वेन तस्याभ्युपगमत्वात् । नाप्यनुमानग्राह्यः, प्रत्यक्षाप्रवृत्तावनुमानस्याप्यप्रवृत्तेः । आगमानां च परस्परतो विरुद्धत्वेनाप्रमाणत्वादिति । असत्त्वादेवासौ न याति न गच्छति । इहेति मनुष्यापेक्षया मनुष्यलोके, 'परे वा' परस्मिन् तदपेक्षयैव देवाऽऽदिलोके, न च किञ्चिदपि स्पृशति बध्नाति पुण्यपापं शुभाशुभं कर्म, नास्ति फलं सुकृतदुष्कृतानां पुण्यपापकर्मणां, जीवासत्त्वेन तयोरप्यसत्त्वात् । तथा पञ्चमहाभौतिकं शरीरं भाषन्ते । 'हं' इति निपातो वाक्यालङ्कारे । वातयोगयुक्तं प्राणवायुना सर्वक्रियासु प्रवर्त्तितमित्यर्थः । तत्र पञ्चमहाभौतिकमिति, महान्ति च तानि लोकव्यापकत्वाद् भूतानि च सदूभूतवस्तूनि महाभूतानि । तानि चामूनि-पृथिवी कठिनरूपा, आपो द्रवलक्षणाः, तेज उष्णरूपम्, वायुश्चलनलक्षणः, आकाशे शुषिरलक्षणमिति । एतन्मयमेव शरीरं, नापरः शरीरवर्त्ती तन्निष्पादकोऽस्ति जीव इति विवक्षा । तथाहि–भूतान्येव सन्ति, प्रत्यक्षेण तेषामेव प्रतीयमानत्वात् । तद्व्यतिरेक्ष तु सर्वथाऽप्रतीयमानत्वात् । यत्तु चैतन्यं भूतेषूपलभ्यते, तद् भूतेष्वेव कायाऽऽकारपरिणतेष्वभिव्यज्यते, मद्याङ्गेषु समुदितेषु मदशक्तिवत् । तथा न भूतेभ्योऽतिरिक्तं चैतन्यं, कार्यत्वात्, भूतो घटवदिति । ततो भूतानामेव चैतन्याभिव्यक्तिर्जलस्य बुद्बुदाभिव्यक्तिवदिति । अलीकवादिता चैषामात्मनः सत्त्वात्, सत्त्वं च प्रमाणोपपत्तेः । प्रमाणं च सर्वजनप्रतीतं जातिस्मरणाऽऽद्यन्यथाऽनुपपत्तिलक्षणमनेकधा शास्त्रान्तरप्रसिद्धमिति । न च भूतधर्मश्चैतन्यं, तद्ग्राहेऽपि तस्यानुभवाद्, विवक्षितभूताभावेऽपि प्रेताऽऽद्यवस्थायां चैतन्यसद्भावाच्चेति । (पंच य खंधे भणंति केइ त्ति) पञ्च च स्कन्धान् रूपवेदनाविज्ञानसंज्ञासंस्काराऽऽख्यान्, भणन्ति केचिदिति बौद्धाः । तत्र रूपस्कन्धः पृथिवीधात्वादयो, रूपाऽऽदयश्च । वेदनास्कन्धः पुनः सुखदुःखासुखदुःखेति त्रिविधवेदनास्वभावः । विज्ञानस्कन्धस्तु रूपाऽऽदिविज्ञानलक्षणः । संज्ञास्कन्धश्च संज्ञानिमित्तोद्ग्रहणाऽऽत्मकः प्रत्ययः । संस्कारस्कन्धः पुनः पुण्यापुण्याऽऽदिधर्मसमुदाय इति । न चैतेभ्यो व्यतिरिक्तः कश्चिदात्माऽऽख्यः पदार्थोऽध्यक्षाऽऽदिभिरवसीयत इति । तथा- (मणं च मणजीविया वयंति त्ति) न केवलं पञ्चैव स्कन्धान्, मनश्च मनस्कारो रूपाऽऽदिज्ञानलक्षणानामुपादानकारणभूतः, यमाश्रित्य परलोकोऽभ्युपगम्यते बौद्धैः; मन एव जीवो येषां ते म-

नोजीवाः,त एव मनोजीविकाः । अलीकवादिता चैषां सर्वथाऽननुगामिनि मनोमात्ररूपे जीवे कल्पितेऽपि परलोकासिद्धेः। तदसिद्धिश्च-अवस्थितस्यैकस्याऽऽत्मनोऽसत्त्वात्, मनोमात्राऽऽत्मनः क्षणान्तरस्यैवोत्पादादकृताभ्यागमाऽऽदिदोषप्रसङ्गात् । कथञ्चिदननुगामिनि तु मनसि जीवित्वाभ्युपगमः सम्यक् पक्ष एवेति। तथा (वाउजीवो त्ति एवमाहंसु त्ति) वात उच्छ्वासाऽऽदिलक्षणो जीव इत्याहुरेके । तद्भावाभावयोर्जीवनमरणव्यपदेशाद् नान्यः परलोकयाय्यात्माऽस्तीति । अलीकवादिता चैषां वायोर्जीवत्वेन चैतन्यजीवरूपत्वायोगात् । तथा शरीरं साऽऽदि,उत्पन्नत्वात्,सनिधनं,क्षयदर्शनात् । (इह भवे एगे भव त्ति) इह भवे एव प्रत्यक्षजन्मैव एको भव एकं जन्म,नान्यः परलोकोऽस्ति, प्रमाणाविषयत्वात्, तस्य शरीरस्य, विविधैः प्रकारैः प्रकृष्टो नाशः प्रणाशस्तस्मिन् सति सर्वनाश इति नाऽऽत्मा शुभाशुभरूपं वा कर्माविनष्टमवशिष्यते । एवमेव उक्तप्रकारं ' अंपंति ' जल्पन्ति मृषावादिनः । मृषावादिता चैषां जातिस्मरणाऽऽदिना जीवपरलोकसिद्धेः । प्रश्न० २ आश्र० द्वार । दश० । यथावस्थितं हि वस्त्वनेकान्ताऽऽत्मकं, तच्चास्त्येकान्ताऽऽत्मकमेव चास्तीति प्रतिपत्तिमन्तः सर्वेऽपि नास्तिकाः । स्था० ८ ठा० ।

एकान्ताभिनिवेशे तु ज्ञात्वा सर्वेषां तुल्यत्वमेवेत्याह-

सरूपतस्तु सर्वेऽपि, स्युर्मिथोऽनिश्रिता नयाः ।
मिथ्यात्वमिति को भेदो. नास्तित्वास्तित्वनिर्मितेः? ॥१२५॥

सरूपतस्त्विति स्पष्टः । (मिथोऽनिश्रिता इति) स्याद्वादमुद्रया परस्पराऽऽकाङ्क्षारहिता इत्यर्थः ॥१२५॥

ननु नास्तिकास्तिकव्यवहारप्रयोजकतयैवैतेषां भेदो भविष्यतीत्यत आह-

धर्म्मांशे नास्तिको होको, बार्हस्पत्यः प्रकीर्तितः ।
धर्मांशे नास्तिका ज्ञेयाः, सर्वेऽपि परतीर्थिकाः ॥१२६॥

(धर्म्मांशे इति) धर्मिण आत्मनोऽशे नास्तित्वभागे, एको बार्हस्पत्यश्चार्वाको नास्तिकः प्रकीर्तितः। धर्माणामात्मनः शरीरप्रमाणत्वनानात्वपरिणामित्वध्रुवत्वसर्वैक्यजातीयत्वाऽऽदीनामंशे नास्तित्वपक्षे सर्वेऽपि नैयायिकवैशेषिकवेदान्तिसाङ्ख्यपातञ्जलजैमिनीयाऽऽद्यः परतीर्थिका नास्तिका ज्ञेयाः। यत्र यथावदस्तित्वं तत्र तथा तदनभ्युपगमस्य, स्वरसतो भगवद्वचनाश्रद्धानस्यैव वा नास्तिकपदप्रवृत्तिनिमित्तत्वादिति भावः । चार्वाकाऽऽदिभिन्नदर्शनस्वीकर्तृत्वमेवास्तिकत्वमिति रूढिस्त्वनुकम्पामात्रम् । नयो० । आव० म० । (' ससन्न ' शब्दे द्वितीयभागे ११३४ पृष्ठे लक्षिताक्षदेववक्तव्यतायां नास्तिकवादिनं सुबुद्धिं प्रति स्वयंबुद्धकृत उपदेशो द्रष्टव्यः)

णत्थिभाव–नास्तिभाव–पुं० । अविद्यमानभावे, " णत्थिभावो त्ति वा अविज्जमाणभावो त्ति वा एगट्ठा । " आव० चू० १ अ० ।

णत्थून–नष्ट्वा–अव्य० । नश-क्त्वा। " क्त्वस्तथूनौ ष्टुः " ॥ ८ । ४ । ३१३ ॥ इति ष्ट्वा इत्यस्य स्थाने त्थूनाऽऽदेशः । अदृश्यीभूयेत्यर्थे, प्रा० १ पाद ।

णदियाययण–नद्यायतन–न० । नद्याः प्रधानस्थाने, यत्र तीर्थस्थानेषु लोकाः पुण्यार्थं स्नानाऽऽदि कुर्वन्ति । आचा० २ श्रु० १ चू० ३ अ० ।

णदी–नदी–स्त्री० । गङ्गासिन्धुमहीकोशीप्रभृतिषु सरित्सु, स० ३ अङ्ग । प्रज्ञा० । गिरिनद्यादिषु, प्रज्ञा० ११ पद ।

णदिय–नर्दित–न० । घोषे, ज्ञा० १ श्रु० ९ अ० ।

णद्ध–नद्ध–त्रि० । नियन्त्रिते, तं० । आकृष्टे, दे० ना० ४ वर्ग ।

णपुंसग–नपुंसक–पुं० । न० । न स्त्री न पुमान् नपुंसकम् । ग० १ अधि० । स्त्रीपुरुषोभयाभिलाषिणि पुरुषाऽऽकृतौ पुरुषे, ध० २ अधि० । " स्तनाऽऽदिश्मश्रुकेशाऽऽदि-भावाभावसमन्वितम् । नपुंसकं बुधाः प्राहु-र्मोहानलसुदीपितम् ॥ १ ॥ " तं० ।

तिविहा णपुंसगा पन्नत्ता । तं जहा–णेरइयणपुंसगा, तिरिक्खजोणियणपुंसगा, मणुस्सणपुंसगा । तिरियणपुंसगा तिविहा पन्नत्ता । तं जहा–जलचरा, थलचरा, खहचरा । मणुयणपुंसगा तिविहा पन्नत्ता । तं जहा–कम्मभूमिया, अकम्मभूमिया, अंतरदीवया । स्था० ३ ठा० १ उ० ।

"स्तनकेशवती स्त्री स्या-त्रोमशः पुरुषः स्मृतः । उभयोरन्तरं यच्च, तदभावे नपुंसकम् ॥ १ ॥" स्था० २ ठा० १ उ० । नपुंसकः षण्ढक इति पर्यायौ । बृ० ४ उ० । आव० । (षण्ढकलक्षणानि ' पंडग ' शब्दे वक्ष्यन्ते) " अज्झवसायविसेसं तं इह ते हुंति णपुंसगे । " महा० १ अ० ।

दश नपुंसकाः-

पंढए १ वाइए २ कीवे, ३ कुंभी ४ ईसालुए ५ त्ति अ ।
सउणी ६ तक्कम्मसेवी अ ७, पक्खिआ पक्खिए इअ ८ । ८ । ००।
सोगंधिए अ ९ आसत्ते १०, दस एए नपुंसगा ।
संकिलिट्ठे त्ति साहूणं, पव्वावेउं अकप्पिआ ॥८०१॥

प्रव० १०९ द्वार ।

एषामेकाऽऽदयो दश नपुंसकाः संक्लिष्टचित्ता इतिकृत्वा साधूनां प्रव्राजयितुमकल्प्याः । संक्लिष्टत्वं चैषां सर्वेषामप्यविशेषतो नगरदाहसमानकामाध्यवसायसंपन्नत्वेन स्त्रीपुरुषसेवाभिलाषित्वं विज्ञेयम् , उभयसेविनो ह्येते । ध० ३ अधि० ।

नपुंसकानामिमे षड् भेदाश्चान्येऽपि-

....., वद्धिए विप्पितत्तिए ।
मंतोसहिउवहतए, इसिसत्ते देवसत्ते य ॥ २७९ ॥

नि० चू० ११ उ० । पं० भा० । पं० चू० । आव० ।

नपुंसका द्विविधाः-स्त्रीनेपथ्यकाः, पुरुषनेपथ्यकाश्च । तद् यथा—

एमेव होंति दुविहा, पुरिसनपुंसा वि सत्रि अस्सत्री ।
मज्झत्थाऽऽइरणापिया, कंदप्पा काहिया चेव ॥४३२॥

पुरुषसागारिकाभावे कदाचित्पुंसकसागारिकः प्रतिश्रयो लभ्यते, तत्राप्येवमेव भेदाः कर्तव्याः । तत्र नपुंसका द्विधा-स्त्रीनेपथ्यकाः, पुरुषनेपथ्यकाः । ये पुरुषनेपथ्यकाः ते द्विधा-प्रतिसेविनः, अप्रतिसेविनश्च । ये तु स्त्रीनेपथ्यकास्ते नियमात्प्रतिसेविनः । तत्र पुरुषनपुंसका अपि, न केवलं पुरुषा इत्यपिशब्दार्थः । संक्लिनः, असंक्लिनश्चेति द्विविधाः । उभयेऽपि चतुर्विधाः-मध्यस्थाः, आभरणप्रियाः, कान्दर्पिकाः, काथिकाश्च ।

एक्केका ते तिविहा, थेरा तह मज्झिमा य तरुणा य ।
एवं सन्नी बारस, असन्निणो होंति एक्केके ॥४३३॥

ते मध्यस्थाऽऽद्यस्त्रिविधाः-स्थविराः,मध्यस्थाः,तरुणाश्च । एवं संज्ञिनो द्वादश । असंज्ञिनोऽपि द्वादश भवन्ति । बृ० १ उ० । नि० चू० ।

'नपुंसको भवति' इति महाभाष्यप्रयोगात् अस्य पुंस्त्वमपि। लिङ्गस्य शब्दगतत्वेऽपि शब्दार्थे तदव्यवहारस्तु अनेकाऽऽरोपात्। तद् यथा-लिङ्गत्वं च प्राकृतगुणगतावस्थाऽऽत्मको धर्म एव,तद्विशेषश्च पुंनपुंसकत्वाऽऽदिः। तथाहि-सर्वेषां त्रिगुणप्रकृतिकार्यतया शब्दानामपि तथात्वेन गुणगतविशेषाच्छब्देषु विशेष इति कल्प्यते। स च विशेषः शास्त्रे इत्थमध्यधायि। विकृतसत्त्वाऽऽदीनां तुल्यरूपेणावस्थानाद् नपुंसकत्वं, सत्त्वस्याऽऽधिक्ये पुंस्त्वम्, रजआधिक्ये स्त्रीत्वमिति। एवं च लिङ्गस्य शब्दधर्मत्वेऽपि शब्देन सहार्थाभेदारोपादसति बाधकेऽर्थेऽपि साक्षात् तत्पारतन्त्र्येण वा सर्वत्र तस्य विशेषणत्वम्, शाब्दबोधे शब्दज्ञानस्येष्टत्वाच्च, शब्दस्य नामार्थतावत् तद्गतलिङ्गस्यापि नामार्थतौचित्यात् " न सोऽस्ति प्रत्ययो लोके, यः शब्दानुगमादृते। " इति हर्युक्तेः, " शब्देऽपि यदि नेदेन, विवक्षा स्यात्तदा तथा। नो चेत् स्त्रीत्वाऽऽदिभिः सिद्धोऽप्यसावर्थस्तवभासते ॥१॥" इति हर्युक्तेश्च,शब्दानां तदर्थतोऽवगतेः। तथा प्रातिपदिकार्थः। अनेकविवक्षायां तु स्त्रीत्वाऽऽदिभिरेव सिद्धो ज्ञातः सन् अर्थे प्रकारतया भासते इति तदर्थः। युक्तं चैतत्-'पुंल्लिङ्ग शब्दः' इति व्यवहारात् " स्वमोर्नपुंसकात् " ॥ ७। १। २३ ॥ इति पाणिनिसूत्रे शब्दस्यैव नपुंसकत्वव्यपदेशात्। दारानित्यादौ पुंस्त्वान्वयबाधाच्च लिङ्गस्य शब्दधर्मत्वम्, अन्यथैतेषु लिङ्गानन्वयाऽऽपत्तेर्व्यवहारसूत्रनिर्देशासङ्गत्यापत्तेश्च। तथा अर्थभेदाच्छब्दभेदवद् लिङ्गभेदादपि शब्दभेद इति कल्प्यते, प्रागुक्तधर्मविशेषरूपभेदकसद्भावात्। उक्तं च भाष्ये-"एकार्थे शब्दान्यत्वाद् दृष्टं लिङ्गान्यत्वम्" इति एवं च तटाऽऽदिशब्दानामनेकलिङ्गत्वव्यवहारः समानानुपूर्वीकत्वेनैव। वस्तुतस्तेषां भिन्नानामेव लिङ्गत्वमिति दिक्। वाच०।

जीवाभिगमाऽऽदिषु नपुंसकस्य धर्मचरणमुक्तं, तत्सम्यक्त्वं देशसंयमं, सर्वसंयमं वा ?। पञ्चदश भेदाः सिद्धानां प्रोक्ताः, तत्र मूलनपुंसकत्वे, कृत्रिमत्वे वा मोक्षः ?, तत् साकरं प्रसाद्यमिति प्रश्ने, उत्तरम्-जातिनपुंसकस्य सम्यक्त्वं देशविरतिं च यावत्प्रतिपत्तिर्भवति,न तु परतस्तेन न मोक्षाऽऽप्तिः,मोक्षावाप्तिरपि कृत्रिमनपुंसकानामिति। १६६ प्र०। सेन० प्र० ३ उल्ला०।

णपुंसगपण्णवणी–नपुंसकप्रज्ञापनी–स्त्री०। स्तनाऽऽदिश्मश्रुकेशाऽऽदिभावाभावाऽऽदिसमन्वितमित्यादिलक्षणायां नपुंसकलक्षणाभिधायिन्यां भाषायाम्,शब्दव्यवहारानुगतं नपुंसकलक्षणमाभित्यैतल्लक्षणाऽघटनेऽपि उच्यमाना बाह्न मृषेति भाषाशब्दे, प्रज्ञा० ११ पद।

णपुंसगसिद्धिगसिद्ध–नपुंसकसिद्धगसिद्ध–पुं०। तीर्थंकरप्रत्येकबुद्धवर्जिते नपुंसकलिङ्गशरीरनिर्वृत्तिरूपे व्यवस्थिते सति सिद्धे, नं०। पा०।

णपुंसमवयण–नपुंसकवचन–न०। पीठं देवकुलमित्यादिके नपुंसकलिङ्गे शब्दे, आचा० २ श्रु०१ चू० ४ अ०१ उ०। प्रज्ञा०। अनु०। अन्यक्तगुणसंदोहे नपुंसकलिङ्गं प्रयुज्यते। जी० १ प्रति०।

णपुंसगवेय–नपुंसकवेद–पुं०। वेद्यत इति वेदः, नपुंसकस्य वेदो नपुंसकवेदः। प्रज्ञा० २१ पद। स्त्रीपुंसयोरुपर्यभिलाषे, तद्धेतुके वेदनीयकर्मणि, यदुदये नपुंसकस्य स्त्रीपुंसयोरुभयोरभिलाषः पित्तश्लेष्मणोरुदये मज्जितामिलाषवत्, स महानगरदाहाग्निसमानो नपुंसकवेदः। स्था० ६ ठा०। कर्म०। बृ०। पं० सं०। जी०। स०।

णभ–नभस्–न०। न जाति न दीप्यते इति नभः। ज्ञ० २० श० २ उ०। " खघथधभाम् " ॥ ८। १। १८७॥ इत्यस्य प्राथिकत्वाद् न हः। प्रा० १ पाद। " स्नमदामशिरोनभः " ॥ ८। १। ३२ ॥ इति नभःपर्युदासान्न पुंस्त्वम्। प्रा० १ पाद। आकाशे, औ०। सूत्र०।

णभप्पईव–नभःप्रदीप–पुं०। नभ आकाशं प्रदीपयति यस्तत्था। सूर्ये, कल्प० ३ क्षण।

णभसूर–नभःसूर–पुं०। चन्द्रं सूर्यं वा गृह्णतो राहोः कृष्णपुद्गलभेदे, सू० प्र० २० पाहु०।

णभसेण–नभःसेन–पुं०। अपूर्वचत्वारिंशे ऋषभदेवपुत्रे, कल्प० ७ क्षण।

णमंसण–नमस्यत्–न०। नमस्तिव्ययस्य " नमोवरिवश्चित्रङः क्यच् ॥८।३।१९॥ इति क्यच्। दर्श० १ अ०। प्रणमने, ज्ञा० १ श्रु० १ अ०। भ०। नि०। औ०। आव०। संथा०। स्था०।

णमंसित्तए–नमस्यितुम्–अव्य०। प्रणामपूर्वकप्रशस्तध्वनिनिर्गुणोत्कीर्त्तनं कर्तुमित्यर्थे, उपा० १ अ०। स्था०। रा०। प्रति०। आ० चू०।

णमंसित्ता–नमस्यित्वा–अव्य०। प्रणम्येत्यर्थे, स्था० ३ ठा० १ उ०।

णमण–नमन–न०। शिरसा प्रणाममात्रे, बृ० १ उ०। नि०। पं० भा०। नमस्कारे, उत्त० १ अ०। विनयकरणे, उत्त० ५ अ०। प्रह्वीकरणे, सूत्र० १ श्रु० ४ अ० १ उ०।

णमणी–नमनी–स्त्री०। " गिहिसाधूहि णमिज्जति, तम्हा जं होति णमणि त्ति।" पं० भा०। तृतीयगौणानुज्ञायाम्,नं०।

णमंत–नमत्–त्रि०। आचार्याऽऽदेः प्रणामं कुर्वति, आचा०१ श्रु० ६ अ० ४ उ०।

णमि–नमि–पुं०। स्वनामख्याते विदेहराजे, उत्त०।

अत्र निर्युक्तिकृत–

णिक्खेवो ज नमिम्मी,चउव्विहो दुविहो उ होइ दव्वम्मि।
आगम-नोआगमओ, नोआगमओ य सो तिविहो ॥६५॥
जाणगसरीर भविए, तव्वइरित्ते य से जवे तिविहो।
एगजविय बद्धाउय, अभिमुहओ नामगोत्ते य ॥६६॥
नमिआजनामगोयं, वेयंतो जावओ नमी होइ (६७)

निक्षेपो न्यासः, तुः पूरणे, नमौ नमिविषयश्चतुर्विधश्चतुर्भेदो नामाऽऽदिः। तत्र च नामस्थापने सुगमे। द्विविधो भवति द्रव्ये द्रव्यविषयः। तमेवाऽऽह-आगमनोआगमतः। तत्राऽऽगमतो ज्ञातानुपयुक्तो, नोआगमतश्च। स त्रिविधः-(जाणगसरीरभविए तव्वइरित्ते य त्ति) नमिशब्दस्य प्रत्येकमभिसंबन्धाद् अशरीरनमिर्भव्यशरीरनमिः, तदुव्यतिरिक्तनमिश्च। स तदुव्यतिरिक्तनमिर्भवेत् त्रिविधः-एकभविको, बद्धाऽऽयुष्कोऽऽभिमुखनामगोत्रश्च। एतत्स्वरूपं च प्राग्वत्। तथा नम्यायुर्नामगोत्रं वेदयन् भावतो नमिर्भवति। उत्त० ९ अ०।

अथ तृतीयप्रत्येकबुद्धनमिचरित्रमुच्यते-

मालवमण्डलमण्डनं सुदर्शनपुरमस्ति; तत्र मणिरथो

राजा, तस्य भ्राता युगबाहुर्वर्तते स्म । तस्य भार्या सुशीला सुरूपा मदनरेखा वर्तते स्म । सा बाल्यावस्थात आरभ्य सम्यक्त्वमूलकाद्दशव्रतानि जग्राह । तस्याः पुत्रश्चन्द्रयशा वर्तते स्म । अन्यदा मणिरथेन मदनरेखा दृष्टा, तद्रूपमोहितो नृप एवं चिन्तयति स्म-इयं मदनरेखा मम कथं वशवर्तिनी भवतु ?। भवतु, प्रथमं तावत् साधारणैः कृत्यैस्तां विश्वासयामि, पश्चात्कामाभिलाषमपि तस्याः समये कारयिष्येऽहम् । दुष्करं कार्यं बुद्ध्या किं न सिद्ध्यति ?। एवं चिन्तयित्वा राजा तस्यै ताम्बूलकुसुमवस्त्राभरणाऽऽदिकं प्रेषयति स्म । साऽपि निर्विकारा ज्येष्ठप्रेषितत्वात् सर्वं गृह्णाति स्म । एकदा मणिरथस्तामेकान्ते स्वयमित्युवाच-भद्रे ! त्वं मां भर्तारं विधाय यथेष्टं सुखं भुङ्क्ष्व । सा जगौ-राजन् ! तव लघुबन्धुकलत्रे मय्येतादृशं वचनमयुक्तम्; त्वं निष्कलङ्को भूरिसत्त्वश्च पञ्चमो लोकपालोऽसि, एवं वदंस्त्वं किं न लज्जसे ?, शस्त्राग्निविषयोगैर्मृत्युसाधनं वरं,निजकुलाऽऽचाररहितं जीवितं न श्रेयः। परस्त्रीलम्पटाः स्वजीवितं यशश्च नाशयन्ति । तयैवं प्रतिबोधितोऽपि नृपः कदाग्रहे न मुमोच । एवं च व्यचिन्तयत्-यदाऽस्याः प्रीतिपात्रं मद्बन्धुर्युगबाहुर्व्यापाद्यते,तदेयं मम वशीभविष्यति । अन्यदा मदनरेखा स्वप्ने पूर्णेन्दुं ददर्श । तया युगबाहवे निवेदितः स्वप्नः । युगबाहुना कथितम्-तव सुलक्षणः पुत्रो भविष्यति । तस्या गुरुदेववन्दनार्चनदोहदमुत्पन्नं युगबाहुरपूरयत् । अन्यदा युगबाहुर्वसन्ते मदनरेखया समममुद्याने रन्तुं गतः, तत्रैव रात्रौ कदलीगृहे सुप्तः । परिवारः समन्तात्तद्गृहं वेष्टयित्वा स्थितः । तदाऽवसरं ज्ञात्वा मणिरथनृपस्तत्रैकाकी समायातः । 'अद्य युवराजाऽत्र कथं सुप्तः ?' इति यामिकान् प्रत्युवाच । युगबाहुरपि कदलीगृहाद् बहिरागत्य मणिरथपादौ ननाम । नमतोऽस्य स्कन्धदेशे मणिरथः खड्गं चिक्षेप । स्वयं चैवम्-धिग् मे प्रमादतः करात् खड्गं पतितं, मणिरथेङ्गिताऽऽकारेण तद्दुष्कर्म ज्ञात्वाऽपि स्वामिन्युपेक्षितः । इतोऽवसरे मणिरथः सद्यस्तसो गतः । पितृघातवार्तां निशम्य चन्द्रयशाः पुत्रो घातचिकित्सकैः परिवृतस्तत्राऽऽयातः। चिकित्सकैरन्त्यावस्थागतं युगबाहुं निरीक्ष्य धर्म एवास्यौषधमिति प्रोक्तम्। मदनरेखा स्वभर्तुरन्त्यावस्थां विलोक्य विधिनाऽऽराधनां कारयामास-हे दयित ! मे विज्ञप्तिं शृणु, धनाङ्गनाऽऽद्येषु मोहं त्यज, जैनधर्मं स्वीकुरु, हितं भजस्व, धर्मप्रसादादेव प्रधानं कुटुम्बदेहगेहाऽऽदिकं भवान्तरे प्राप्स्यसि, सर्वाण्यपि पापानि सिरूसाक्षिकमालोचय, पुण्यान्यनुमोदय, सर्वजीवान् क्षमय, अष्टादश पापस्थानानि व्युत्सृज, अनशनं च कुरु, शुभभावनां भावय, चतुःशरणान्याश्रय, परमेष्ठिमन्त्रस्मरणं कुरु, मनसा सम्यक्त्वमाश्रय। इत्येवं मदनरेखावचनानि श्रद्दधानः पञ्चपरमेष्ठिमन्त्रं स्मरन् युगबाहुः परलोकमसाधयत् । मदनरेखा मनस्येवं व्यचिन्तयत्-अथ खलश्चो ज्येष्ठो मम शीलं विध्वंसयिष्यति, ततो निःसरणावसरो मम साम्प्रतमेवास्तीति निश्चित्य मदनरेखा वेगतो निर्गता, सद्य एकाकिन्येव व्रजन्त्युत्पथमाश्रित्य क्वापि महाटव्यां प्राप्ता, विभावरी विरराम, जातं प्रभातं, देवगुरूणां स्मरणं चकार, मध्याह्ने सा प्राणयात्रां फलैरेवाकरोत् । तस्यामेवाटव्यां रात्रौ सुप्तायास्तस्याः शीलप्रभावेण न किञ्चिद्भयं बभूव । सा सती चार्द्धरात्रौ पुत्रं सुषुवे, पितृनामाङ्कितमुद्रिका तस्याङ्गुलौ क्षिप्त्वा रत्नकम्बलेन वेष्टयित्वा शुचिभूमौ निक्षिप्य मदनरेखा शौचार्थं सरसि गता । तत्र स्नानं कुर्वती जलकरिणा शुण्डादण्डेन गृहीता नभसि भ्रामिता । नभसोऽपि पतन्तीं च तां कश्चित्तरुणविद्याधरो वैताढ्यं निनाय । सा विद्याधरं प्राऽऽह-बन्धो ! अहमद्य निश्चयेऽव्यां पुत्रमजीजनम् । स तु रत्नकम्बलवेष्टितो मया तत्रैव मुक्तोऽस्ति। अहं तु सरसि स्नानं कुर्वती जलकरिणोत्क्षिप्ता त्वया गृहीताऽऽनीता । अथ त्वं ततो मत्पुत्रमिहाऽऽनय, मां वा तत्र नय । अन्यथा बालस्य तत्र मरणाऽऽपद्भविष्यति, त्वं प्रसीद, मां पुत्रेण मेलय, पुत्रभिक्षादानेन त्वं मे दयां कुरु । सोऽपि युवा विद्याधर एतस्यां सरागं चक्षुः क्षिपन्नेवमुवाच-गन्धारदेशे रत्नवाहं नाम नगरमस्ति । तत्र विद्याधरेन्द्रो मणिचूडो वर्तते । तस्य प्रिया कमलावती मणिप्रभनामानं पुत्रं मामसूत । यौवनावस्थां च गतस्य मे श्रेणिद्वयं राज्यं दत्त्वा मणिचूडः स्वयं प्रव्रज्यां जग्राह । स चारणमुनिश्चतुर्ज्ञानीभूत्वा साम्प्रतमष्टमे द्वीपे जिनबिम्बानि नन्तुं समायातोऽस्ति । अहं तत्र वन्दितुं गच्छन्नभूवम् । अन्तराले त्वां दृष्ट्वा लात्वा चाहं पुनरत्राऽऽगः । अतः परं त्वं मे प्रिया भव, तवाऽऽदेशकरोऽहमस्मि, तव पुत्रसंबन्धो मया प्रज्ञप्तिविद्यया ज्ञातः, अम्बापहृतो मिथिलेश्वरः पद्मरथाऽऽख्यस्तत्राऽऽयातः,तं बालं सुरूपं दृष्ट्वा गृहीत्वा च स्वपत्न्यै दत्तवान्, तत्रायं प्रकामं सुखजागरेवास्ति। एवं तद्वचः श्रुत्वा मदनरेखाऽचिन्तयत्-असौ स्वतश्चो युवा दृष्टः शीलभङ्गं मे करिष्यति, तावत्कालं मे विलम्बः श्रेयान्, यावदस्य पिता साधुनं वन्द्यते, तदुपदेशात् सर्वं भविष्यतीति ध्यात्वा मदनरेखाऽवदत्-हे भद्र ! त्वं मां प्रथमं नन्दीश्वरे नय,यथाऽहं तज्जिनबिम्बानि वन्दे,पश्चात् कृतकृत्याऽहं तवेप्सितं करिष्यामि । एवं तयोक्ते सहर्षो मणिप्रभस्तां विमानान्तर्निधाय नन्दीश्वरद्वीपे गतः। तत्र शाश्वतजिनबिम्बानि नत्वा मदनरेखाऽऽत्मानं कृतार्थं मन्यमाना मणिप्रभेण समं चतुर्ज्ञानधरं चारणश्रमणं प्रासादमारुपोपविष्टं मणिचूडमुनिं प्रणनाम। स मुनिस्तां सतीं मत्वा स्वसुतं च तत्पतिं ज्ञात्वा तथा देशनां विस्तारयामास, यथाऽसौ विद्याधरः स्वदारसन्तोषव्रतं जग्राह । मदनरेखां च स्वां भगिनीं मेने । हृष्टमानसा सती स्वपुत्रस्य कुशलोदन्तं पप्रच्छ । मुनिराह-महानुभावे ! शोकं मुक्त्वा सर्वं सुतवृत्तान्तं शृणु-जम्बूद्वीपे पुष्कलावतीविजयोऽस्ति, तत्र मणितोरणपुरी, तस्यां मितयशा राजा । स च चक्रवर्त्यभूत् , तस्य पुण्यवती कान्ता, तयोः पुण्यसिंहरत्नसिंहाभिधानौ पुत्रावभूतां, तौ सदयौ धर्मकर्मरतौ विनीतौ सुतः । अन्यदा तौ राज्ये स्थापयित्वा चक्रवर्ती तपस्यां जग्राह । तौ द्वावपि भ्रातरौ चतुरशीतिलक्षपूर्वं यावद्राज्यं प्रपालयतः स्म । एकदा च तौ दीक्षां गृहीतवन्तौ, षोडश पूर्वलक्षाणि यावद्दीक्षां पालयतः स्म,अन्ते समाधिना मृत्वाऽच्युतकल्पे सामानिकौ देवौ जातौ । ततश्च्युत्वा धातकीखण्डभरते हरिषेणराज्ञः समुद्रदत्तानार्यासुतौ सागरदेवदत्ताभिधानौ धार्मिकौ जातौ । अन्यदा तौ द्वादशतीर्थङ्करस्य दृढव्रतस्य बहुव्यतिक्रान्ते तीर्थे सुगुरुसमीपे दीक्षामगृह्णीताम् । तृतीये दिवसे तौ द्वावपि विद्युत्पातेन मृत्वा शुक्रदेवलोके महर्द्धिकौ देवावभूताम् । अन्येद्युस्तौ देवावत्रैव भरते श्रीनेमिजिनेश्वरमिति पृष्टवन्तौ-भगवन् ! नावद्यापि कियान् संसारस्तिष्ठति ?। स भगवान् प्राऽऽह-युवयोर्मध्ये एकोऽत्रैव भरते मिथिलापुर्यां विजयसेननृपतेः पद्मरथाऽऽख्यः पुत्रो भावी, एकस्तु सुदर्शनपुरे युगबाहुपुत्रो मदनरेखाकुक्षिसंभूतो नमिनामा भविष्यति । तस्मिन् भवे द्वावपि युवां शिवपदं प्राप्स्यथ । एवं नेमिजिनवचः

नं निशम्य निजमायुः पूर्णं विधायैको मिथिलापुर्यां पद्मरथो नृपोऽभवत् । तेन पद्मरथेनाश्वापहृतेन तस्मिन् वने समायातेन हे महानुभावे ! स पुत्रो दृष्टो, गृहीतश्च, मिथिलायां नीत्वा स्वपत्न्यै च समर्पितः । तज्जन्ममहोत्सवो महान् विहितः ॥ " अत्रान्तरे तत्र नन्दीश्वरप्रासादेऽन्तरिक्षादेकं विमानमवततार । तन्मध्यादेको दिव्यविभूषाधरः सुरो निर्गत्य मदनरेखां त्रिःप्रदक्षिणीकृत्य प्रथमं प्रणनाम, पश्चाद् मुर्ध्नि प्रणम्याग्रे निविष्टः सुरः । मणिरथनरेन्द्रेण विनयविपर्यासकारणं पृष्टम् । स सुरः प्राऽऽह-अहं पूर्वभवे युगबाहुर्मणिरथनाम्ना हृदयभ्राता निहतः, अनया ममाऽऽराधनानशनाऽऽदिकृत्यानि कारितानि, ततप्रभावादहमीदृशो देवो ब्रह्मदेवलोके जातः । ततो धर्माऽऽचार्यत्वादहमिमां प्रथमं प्रणतः । एवं खेचरं प्रतिबोध्य स सुरो मदनरेखां जगौ-हे सति ! त्वं समादिश, किं ते प्रियं कुर्वे ?। सा प्राऽऽह-मम मुक्तिरेव प्रिया, नान्यत्किमपि, तथाऽपि सुताऽऽनने ऽद्युमुत्सुकां मां त्वमितो मिथिलां पुरीं नय, तत्राहं निर्वृताऽऽत्मना परलोकहितं करिष्यामि। इत्युक्तवतीं तां देवो मिथिलां पुरीं निनाय । तत्र प्रथमं मदनरेखा जिनचैत्यानि नत्वा श्रमणीनामुपाश्रये जगाम । वन्दित्वा पुरोनिविष्टां तां प्रवर्तिन्येवं प्रतिबोधयामास-मूढचेतसो जना धर्मविना नवकृतमिच्छन्तोऽपि मोहवशेन पुत्राऽऽदिषु स्नेहं कुर्वन्ति । संसारे हि मातृपितृबन्धुजनिमनीदयितावधूप्रियतमपुत्राऽऽदीनामनन्तशः संबन्धो जातः । लक्ष्मीकुटुम्बदेहाऽऽदिकं सर्वं विनश्वरम्, धर्म एवैकः शाश्वतः । इत्यादि साध्वीवाक्यैः प्रतिबुद्धा सा सती देवेन पुत्रदर्शनार्थं प्रार्थितैवमाह-भवद्भक्तिकरेण प्रेमपूरेण ममालम्, अतः परं तु साध्वीचरणा एव शरणमित्युक्त्वा साध्वीसमीपे सा प्रव्रज्यां जग्राह । देवस्तां वन्दित्वा स्वस्थाने जगाम । पद्मरथस्य गृहे यथा यथाऽयं बालो वर्द्धते, तथा तथा तस्यान्ये राजानोऽनमन् । ततः पद्मरथराजा तस्य बालस्य नमिरिति नाम कृतवान् । वृद्धिं व्रजतस्तस्य बालस्य कलाऽऽचार्यसेवनात् सर्वाः कलाः समायाताः, सकललोकलोचनहरं यौवनमप्यस्याऽऽयातम् । पित्रा चाष्टाधिकसहस्रराजकन्यानां पाणिग्रहणं कारितम् । पद्मरथोऽस्मै राज्यं दत्त्वा स्वयं तपस्यां गृहीत्वा केवलज्ञानं प्राप्य मोक्षं गतवान् । नमिराजा प्राज्यं राज्यं पालयामास, न्यायेन यशःपात्रमभूत् ॥ अथ पूर्वं युगबाहुं हत्वा मणिरथो नृपोऽसिक्तमनोरथः स्वधाम प्राप्तस्तत्र तदानीमेव प्रचण्डसर्पेण दष्टस्तुर्यं नरकं जगाम । द्वयोर्भ्रात्रोरौर्द्धदैहिकीं क्रियां कृत्वा मन्त्रिभिर्युगबाहुपुत्रश्चन्द्रयशा राज्येऽभिषिक्तः । स न्यायेन राज्यं पालयति स्म । अन्यदा नमिराज्ञो धवलकान्तिर्गजो मदोन्मत्त आलानस्तम्भमुन्मूल्यापरान् हस्तिनोऽश्वान्मनुष्यानपि त्रासयन् चन्द्रयशोनृपनगरसीम्नि समायातः । चन्द्रयशा नृपस्तमागतं श्रुत्वा समन्तात्सुभटैर्वेष्टयित्वा स्वयं वशीकृत्य च जग्राह । नमिराजाऽष्टभिर्दिनैस्तां वार्तां श्रुत्वा चन्द्रयशोऽन्तिके दूतं प्रेषितवान् । दूतोऽपि तत्र गत्वा धवलकरिणं मार्गयामास । कुपितश्चन्द्रयशा दूतं गले धृत्वा नगराद् बहिर्निष्कासयामास । दूतोऽपि नमेः पुरो गत्वा स्वाऽपमानं जगौ । कुपितो नमिराजाऽतुलसैन्यैर्वेष्टितोऽच्छिन्नप्रयाणैः सुदर्शनपुरसमीपे समायातः । चन्द्रयशा नृपतिः स्वसैन्यवेष्टितो यावन्निर्मुखं युद्धार्थं चलितः, तावदपशकुनैर्वारितो मन्त्रिभिरेवमूचे-स्वामिन् ! कोट्टं सज्जीकृत्य तव साम्प्रतं पुरान्तरेऽवस्थातुं युक्तम्, कालविलम्बेनैतत्कार्यं कर्तव्यम् । ततश्चन्द्रयशाः कोट्टं शतघ्नीभिर्जेलाऽऽद्युपस्करैश्च सज्जीकृतवान्, नमिस्तं कोट्टं स्वसैन्यैरवेष्टयत् । अथैकैः सैनिकैः सहोद्भटानां सैनिकानां महान् संग्रामः प्रववृते स्म । नमिः कोट्टभङ्गे विविधानुपायान् विदधाति स्म । चन्द्रयशा नृपस्तु कोट्टरक्षणे विविधानुपायान् करोति स्म । अस्मिन्नवसरे तयोर्माता साध्वी मदनरेखा प्रवर्तिनीमनुज्ञाप्य ततसंग्रामवारणार्थं प्रथमं नमिराजसैन्ये समायाता । नमिरपि तां साध्वीं ननाम । आसने चोपविश्य नमेः पुरः सा साध्वी एवं वाचं विस्तारयामास-अनन्तदुःखैकभाजनेऽस्मिन् संसारे नृजन्म प्राप्य पापैस्त्वं किं मुह्यसे ?, राजन् ! तव बन्धुना चन्द्रयशसा स्वयमागतो हस्ती चेद् गृहीतः, तर्हि तेन समं किं युद्धं करोषि ?, कुरुष्व न किञ्चिद्वेत्सि । यदुक्तम्-" लोभी पश्येद् धनप्राप्तिं, कामिनीं कामुकस्तथा । ग्रसं पश्येद्यथोन्मत्तो, न किञ्चिच्च क्षुधाऽऽकुलः ॥ १ ॥ " इदं साध्वीवचो निशम्य नमिश्चिन्तयामास-'अयं चन्द्रयशा युगबाहुभवोऽस्ति, अहं तु पद्मरथपुत्रोऽस्मि, इयं साध्वी सत्यवादिनी सती कथं मम चानेन समं भ्रातृत्वं वदति ' इति विमृश्य साध्वीं प्रत्येवं भाषते स्म-हे पूज्ये ! असौ क्व ?, अहं क्व ?, भिन्नकुलसंभवयोर्मदेतयोः कथं भ्रातृत्वं वदसि ?। इति नमिनोक्ता साध्वी प्राऽऽह-वत्स ! यौवनैश्वर्यजन्मं मदं मुक्त्वा यदि शृणोषि, तदा सकलं स्वरूपं कथ्यते । अथ श्रोतुमुत्सुकाय नमिनृपाय सर्वं पूर्वस्वरूपं साध्वी जगाद । पुनरेवं बभाषे-सुदर्शनपुरस्वामी युगबाहुस्तवास्य च पिता, अहं मदनरेखा तव मातेति । पद्मरथस्तु तव पालकः पितेति । अनेन भ्रात्रा समं मा विरोधं कुरु, बुद्ध्यस्व हितमिति साध्वीप्रोक्तं युगबाहुनामाङ्कितकरमुद्रादर्शनतः सर्वं नमिः सत्यं विवेद । तां साध्वीं प्रकामं चित्तोल्लासेन स्वमातरं मत्वा विशेषाद्भक्तिभिः प्रणनाम । उवाच च-मातः ! यत् त्वया प्रोक्तं, तत् सर्वं तथ्यमेव । नात्र काचिद्विचारणाऽस्ति, ममेयं करमुद्रा युगबाहुसुतत्वं ज्ञापयति । अयं चन्द्रयशा मे ज्येष्ठभ्राता जनक्येव, परं लोकः कथं प्रत्याय्यते ?। लघुभ्रातृवात्सल्यतो ज्येष्ठभ्रेत् संमुखमायाति, तदाऽहमुचितं विनयं कुर्वन् शोभामुद्वहामि । एवं नमिनृपोक्तमाकर्ण्य सा साध्वी दुर्गद्वारवर्त्मना प्रविश्य राजसौधे जगाम । चन्द्रयशा नृपस्तु तामकस्मादागतामुपलक्ष्य स्वमातरं साध्वीं विशेषादभ्युत्थाय नतवान्, उचिताऽऽसनोपविष्टां तां साध्वीं वृत्तान्तं पृष्टवान् । साध्वी सकलं वृत्तान्तं नमिराजमिलनं यावत् कथयामास । चन्द्रयशा नृपस्तं नमिं निजलघुभ्रातरं मत्वा सभालोकान् प्रत्येवमुवाच-" सुलभाः सन्ति सर्वेषां, पुत्रपत्न्यादयः क्षमाः । दुर्लभः सोदरो बन्धुर्लभ्यते सुकृतैर्यदि ॥१॥ " इत्युक्त्वा चन्द्रयशा नृपोऽपि पुराद् बहिर्निर्गतः । नमिरपि तं ज्येष्ठभ्रातरमभ्यागच्छन्तं दृष्ट्वा सिंहाऽऽसनादुत्थाय भूतलमिलच्छिरः प्रणनाम । चन्द्रयशा नृपोऽपि स्वकराभ्यां भूतलादुत्थाय भृशमाश्लिश्लिष्ट । तुल्याऽऽकारौ तुल्यवर्णौ तावेकमातृपितृसंभूतत्वेन तदा परमप्रीतिपदं जातौ, लोकैः सहोदरौ ज्ञातौ । चन्द्रयशा नृपस्तु तदानीमेव नमिबन्धवे सुदर्शनपुरराज्यं ददौ, स्वयं संग्रामाङ्गणमध्ये दीक्षां लब्धौ । क्रमेण राज्यद्वयं पालयन्नमिः क्षितौ प्रचण्डाऽऽज्ञो जज्ञे । अन्यदा नमेर्वपुषि दाघज्वरो जातः पूर्वकर्मदोषेण तस्य षाण्मासिकी पीडा महती उत्पन्ना, तया निद्रामपि न लेभे, अन्तःपुरीनूपुरशब्दा अपि कर्णशूलायाऽऽसन् ।

नमिराज्ञो दाहज्वरशान्तये स्वयं चन्दनं घर्षयन्तीनामन्तःपुरीणां वलयशब्दाः रोमसु भल्लप्राया बभूवुः। तत्र ताभिर्वलयानि समस्तान्युत्तारितानि, केवलमेकैकं मङ्गलाय रक्षितम् । तदानीं नूपुरकङ्कणशब्दाऽश्रवणेन नमिना कञ्चिन्निकटस्थः सेवकः पृष्टः-कथमधुना कङ्कणशब्दा न श्रूयन्ते ?। तेनोक्तम्-स्वामिन् ! भवत्पीडाकरत्वेनान्तःपुरीभिः कङ्कणान्युत्तारितानि, केवलमेकैकं मङ्गलाय रक्षितमिति,तेन नैकैककङ्कणशब्दाः श्रूयन्ते, परस्परघर्षाभावात् । एवं तद्वचः श्रुत्वा प्रतिबुद्धो नमिरेवं चिन्तयामास-यथा संयोगतः शुभा अशुभाः शब्दा जायन्ते, तथा रागाऽऽदिका दोषाः संयोगत एव भवन्ति । यद्यस्माद्योगादहं मुक्तः स्यां, तदा सर्वसङ्गं विमुच्य दीक्षां ग्रहीष्यामि । तस्येतिध्यायमानस्य रात्रौ सुखेन निद्रा समायाता । निद्रायां स्वप्नमेवं ददर्श-गजमारुह्याहं मन्दरगिरिमारूढः । प्रातः प्रतिबुद्धो नीरोगो जातः ; स एवं व्यचिन्तयत्-अमुं पर्वतं क्वाप्यहमपश्यम्, एवमूहाऽपोहं कुर्वतस्तस्य जातिस्मरणमुत्पन्नम् । एवं च पूर्वभवमपश्यत्-यदाऽहं पूर्वजन्मे शुक्रकल्पे सुराऽभवम्, तदाऽहंज्जन्माभिषेककरणायाहमस्मिन् मेरावगम्म् । अथ कङ्कणदृष्टान्तेनैकत्वं सुखकारीति चिन्तयन् प्रत्येकबुद्धत्वं प्राप्य प्रव्रजितो नमिः । तदा राज्यमन्तःपुरमेकपदे त्यजन्तं नमिं ब्राह्मणरूपधरः शक्रः समागत्य परीक्षितवान्, प्रणतवांश्च । शक्रपरीक्षासमये नमिराजसत्कशक्रप्रश्ननमिराजर्षुत्तरकरूपमुत्तराध्ययनान्तर्गतं नवममध्ययनं संजातम् । उत्त० ९ अ० । इह हि करकण्डुद्विमुखनमिनग्गतिराजानश्चत्वारोऽपि प्रत्येकबुद्धाः संयमिनो विरहन्ति स्म । एकदा ते त्रयोऽपि प्रतिष्ठनगरं प्राप्ताः, तत्र चतुर्मुखदेवकुले क्रमतः पूर्वाऽऽद्येषु चतुर्दिग्द्वारेषु युगपत्प्रविष्टाः, तेषामादरकरणार्थं चतुर्मुखो यक्षः समन्तात् संमुखोऽभवत् । तदानीं करकण्डुः स्वदेहकण्डूरोगोपशमनाय कर्णधृतां शलाकां गोपयन् द्विमुखेन संयमिनोक्तः-पुरमन्तःपुरं राज्यं देशं च विमुच्य पुनस्त्वं किं सञ्चयं कुरुषे ?। करकण्डुमुनिर्यावत् तं प्रति वक्ति,तावद् नग्गतिनमिराजर्षिणा द्विमुखं प्रत्येवमुक्तम्-सर्वाणि राजकार्याणि मुक्त्वा पुनस्त्वया किमिति शिक्षारूपं कार्यं वक्तुमारब्धम्?। यावद् द्विमुखो मुनिर्नमिराजर्षिं प्रति प्रत्युत्तरं दत्ते, तावन्नग्गतिराजर्षिरेवमुवाच-यदा राज्यं परित्यज्य भवान् मुक्तावुत्सहते, तदाऽन्यतिक्रमप्याख्यातुं नार्हति । अथ करकण्डुमुनिस्तान् त्रीन् प्रत्येवमुवाच-साधुषु साधुर्हितं वदन् न दूषणाय जायते, कण्डूपशमनाय कर्णधृतशलाकासञ्चयोऽयुक्त एव, परमसहतामयेयं धृताऽस्तीति । एवं चत्वारोऽपि परस्परं संबुद्धाः सत्यवादिनः सर्वथा संयमाऽऽराधकाः केवलज्ञानमासाद्य शिवं जग्मुः। उत्त० ९ अ० । (करकण्ड्वादीनामुत्पत्तिकथा, प्रव्रज्याकारणं च करकण्ड्वादीनामवसरे तृ०भागे ३५७ पृष्ठे, चतुर्थभागे १७०५ पृष्ठे प्रतिपादितम्, द्विमुखस्य 'दुमुख' शब्दे वक्ष्यते)

तथा च नमिचरित्रं क्रमाद्उपन्यस्यते-

मिहिलावइस्स णमिणो,
उम्मासाऽऽतंकवेज्जपमिसेहो ।
कत्तिएँ सुविणगदंसण,
अहिमंदर णंदिघोसे य ॥ १ ॥
दोण्णि वि नमी विदेहा,
रज्जाइं पजहिऊण पव्वइया ।
एगो नमि तित्थयरो,
एगो पत्तेयबुद्धो उ ॥ २ ॥
जो से नमितित्थयरो,
सो साहस्सीयपरिवुडो जगवं ।
गंधयवहाय पव्वएँ,
पुत्तं रज्जे ठवेऊणं ॥ ३ ॥
वितिओ वि नमी राया,
रज्जं चइऊण गुणगणसमग्गं ।
गंधयवहाय पव्वएँ,
अहिगारो एत्थ विइएणं ॥ ४ ॥
पुप्फुत्तराओ चवणं,
पव्वज्जा होइ एगसमएणं ।
पत्तेयबुद्धकेवलि-
सिद्धिगया एगसमएणं ॥ ५ ॥
सेयं सुजायं सुविभत्तसिंगं,
जो पासिया वसहं गोट्ठमज्झे ।
रिद्धिं अरिद्धिं समुपेहिया णं,
कलिंगराया वि समिक्ख धम्मं ॥ ६ ॥
वुड्ढिं च हाणिं वसनस्स दट्ठुं,
पूरावरेगं च महाणईणं ।
अहो अणिच्चं अधुवं च णच्चा,
पंचालराया वि समिक्ख धम्मं ॥ ७ ॥
जा इंदकेउं सुअलंकियं तु,
दट्ठुं पडंतं वि विलुप्पमाणं ।
रिद्धिं अरिद्धिं समुपेहिया णं,
पंचालराया वि समिक्ख धम्मं ॥ ८ ॥
बहुयाण सद्दयं सोच्चा,
एगस्स य असद्दयं ।
वलयाणं नमी राया,
निक्खंतो मिहिलाहिवो ॥ ९ ॥
जो चूयरुक्खं तु मणाभिरामं,
समंजरीपल्लवपुप्फचित्तं ।
रिद्धिं अरिद्धिं समुपेहियाणं,
गंधारराया वि समिक्ख धम्मं ॥ १० ॥
जहा रज्जं च रट्ठं च, पुरं अंतेउरं तहा ।
सव्वमेयं परिचज्ज, संचयं किं करेसिमं ? ॥ ११ ॥
जया ते पेइए रज्जे, कया किंकरा बहू ।
तेसिं किंचं परिचज्ज, अज्ज किंच्चकरो भवं ? ॥ १२ ॥
जया सव्वं परिचज्ज, मोक्खाय घमसी भवं ।

परं गरिहसी कीस, अत्तनिस्सेसकारए ? ॥ १३ ॥
मोक्खमग्गं पवन्नेसु, साहूसु बंभयारिसु ।
अहियत्थं निवारितो, न दोसं वत्तुमरिहसि ॥ १४ ॥

एतदर्थस्तु प्रायः संप्रदायादवसेय इति तावत् स एवोच्यते । अक्षरार्थस्तु रूपष्ट एव । नवरं मिथिला नाम नगरी, तस्याः पतिः स्वामी मिथिलापतिः, तस्य, अनेनान्येषामपि नमीनां संभवात्तद्व्यवच्छेदार्थमाह-नमेर्नमिनाम्नः, (छम्मासाऽऽयंकवेज्जपमिसेहो त्ति) षण्मासानातङ्को दाहज्वराऽऽत्मको रोगः षण्मासाऽऽतङ्कः, तत्र वैद्यैर्भिषग्भिः प्रतिषेधो निराकरणम्-अचिकित्स्योऽयमित्यभिधानरूपः, षण्मासाऽऽतङ्कवैद्यप्रतिषेधः (कत्तिए त्ति) कार्तिकमासे (सुविणगदंसणमिति) स्वप्न एव स्वप्नकः, तस्मिन् दर्शनं स्वप्नकदर्शनम, अनुदिति शेषः कयोः? (अहिमंदर त्ति) अहिमन्दरयोर्नागराजाचलराजयोः, (नंदिघोसे य त्ति) द्वादशतूर्यसंघातो नन्दी, तस्या घोषः, स च स्वप्नमवलोकयतो जातः, तेन चासौ प्रतिबोधित इत्युपस्कारः॥१॥ इह च मिथिलापतिर्नमिरित्युक्तौ मानुषत्वाधिक्षस्य तीर्थकरस्यापि नमेः संभवाद् व्यामोह इति द्वौ नमी वैदेहावित्याद्युक्तम् ॥२॥ तथा [पुप्फुत्तर त्ति] पुष्पोत्तरविमानात् च्यवनं भ्रंसनम्, एकसमयेनेति योज्यते । प्रव्रज्या च निष्क्रमणं भवत्येकसमयेनैव । तथा प्रत्येकमिति-एकैकं हेतुमाश्रित्य बुद्धा अवगततत्त्वाः प्रत्येकबुद्धाः, केवलिन उत्पन्नकेवलज्ञानाः, सिद्धिगता मुक्तिपदप्राप्ताः, त्रयाणामपि कर्मधारयः । एकसमयेनैव इति; चतुर्णामपि समसमयसंभवात् ॥५॥ तथा [सियं सुजायं ति] श्वेतं वर्णतः, सुजातं प्रथमत एवाहीनसमस्ताङ्गोपाङ्गतया, सुष्ठु शोभने, विभक्ते विभागेनावस्थिते, शृङ्गे विषाणे यस्य स तथा तम, ऋद्धिं बलोपचयाऽऽत्मिकाम्, आरोग्यं तस्यैव बलापचयात्तर्णकाऽऽदिपरिभवरूपां, (समुपेहिया णं ति) सम्यगुत्प्रेक्ष्येति पर्यालोच्य; पाठान्तरतः समुत्प्रेक्ष्यमाणो वा, कलिङ्गराजोऽपीत्यादिशब्द उत्तरापेक्षया समुच्चये ॥६॥ तथा (पूरावरेयं ति) पूरः पूर्णता, अवरेको रिक्तता, अनयोः समाहारः पूरावरेकम् ॥७॥ तथेन्द्रकेतुमिन्द्रध्वजं, प्रविभज्यमानम् इति, जनैः स्वस्ववस्त्रालङ्काराऽऽदिग्रहणत इतश्चेतश्च विक्षिप्यमाणम् ॥८॥ तथा (समंजरीपल्लवपुप्फचित्तं ति) सह मञ्जरीभिः प्रतीताभिः, पल्लवैश्च किशलयैर्यानि पुष्पाणि कुसुमानि, तैश्चित्रः कर्बुरः समञ्जरीपल्लवपुष्पचित्रः, तम; यद्वा-सह मञ्जरीपल्लवपुष्पैर्वर्तते यः स तथा, चित्र आश्चर्योऽनयोर्विशेषणसमासः । [समिक्ख त्ति] आर्षत्वात्समीक्ष्यते पर्यालोचयत्यनेकार्थत्वाद्वा कुरुते वा, वर्तमाननिर्देशः प्राग्वत् । यद्वा-(समिक्ख त्ति) समैक्षिष्ट समीक्षितवान्, धर्मं यतिधर्मम् ॥१०॥ यदा ते त्वया पैतृके पितुरागते राज्ये कृता विहिताः, कृत्यानि कुर्वन्त्यनुतिष्ठन्ति कृत्यकरा नियोगिनः, बहवः प्रभूताः, तदैव कृत्यकरत्वं स्वयं तथा तव कर्तुमुचितमासीदित्युपस्कारः । तेषामिति कृत्यकराणां कृत्यं परापराधपरिज्ञानाऽऽदिकर्त्तव्यं परित्यज्य व्रताङ्गीकारादपहाय, अद्य कृत्यकरो नियुक्तकोऽन्यदोषचिन्तो भवाँस्त्वं, किमिति जात इति शेषः ? ॥१२॥ तथा [मोक्खाय घडसीति] प्राकृतत्वाद् मोक्षाय मोक्षार्थं, घटसे चेष्टसे, तथा (अत्तनिस्सेसकारए त्ति) आत्मनो निःशेषमिति शेषाभावं, प्रक्रमात् कर्मणः, करोति विधत्ते इत्यात्मनिःशेषकारकः । यद्वा-(निस्सेस त्ति) निःश्रेयसो मोक्षः, तत्कारकः ॥१३॥ मोक्षमार्गं मुक्त्यध्वानं प्रतिपन्नेष्वङ्गीकृतवत्सु साधुषु ब्रह्मचारिषु (अहियत्थं ति) अहितार्थं, निवारयन्निषेधयन्, न दोषं परापवादलक्षणम्, अस्येति शेषः, वक्तुमभिधातुमर्हसि । यथा हि ज्वानहितान्निवारयन् कथमर्हतीत्याह, एवं नमिरपि अद्य कृत्यकरो भवान्निति कृत्यकरत्वलक्षणादहितान्निवारयति, तथा दुर्मुखोऽपि संजयं किं करोषीति सञ्जयत एवाहितान्निषेधतीति नायं परापवाद इति वक्तुमुचितम् । यद्वा-(अहियत्थं निवारंतो त्ति) सुपव्यत्ययादहितार्थान्निवारयन्तं (न दोसमिति) मनुष्लोपाच्च दोषमिति न दोषवन्तं वक्तुमर्हसि ॥ १४ ॥

संप्रति सूत्राऽऽलापकनिष्पन्नस्यावसरः, स च सूत्रे सति भवतीति सूत्रानुगमे सूत्रमुच्चारणीयम् । तच्चेदम्-

चइऊण देवलोगा, उववन्नो माणुसम्मि लोगम्मि ।
उवसंतमोहणिज्जो, सरई पोराणयं जाइं ॥ १ ॥

च्युत्वा देवलोकात् प्रतीतात्, उत्पन्नो जातो, मानुषे मानुषसंबन्धिनि, लोके प्राणिगणे, उपशान्तमुदयप्राप्तं, मोहनीयं दर्शनमोहनीयं यस्यासावुपशान्तमोहनीयः, स्मरति चिन्तयति, स्मरेति शेषः । वर्तमाननिर्देशो वा प्राग्वत् । कामित्याह-(पोराणयं ति) पुराणामेव पौराणिकीं, विनयाऽऽदित्वात् ठक् । चिरन्तनीमित्यर्थः । जातिमुत्पत्तिं, देवलोकाऽऽदाविति प्रक्रमः । तद्भवसकलचेष्टोपलक्षणं चेह जातिरिति सूत्रार्थः ॥ १ ॥

ततः किमित्याह-

जाइं सरित्तु भयवं, सहसंबुद्धो अणुत्तरे धम्मे ।
पुत्तं ठवेत्तु रज्जे, अभिणिक्खमई नमी राया ॥ २ ॥

जातिमुत्कटरूपां स्मृत्वा, भगशब्दो यद्यपि ऐश्वर्याऽऽदिष्वनेकार्थेषु वर्तते । उक्तम्-" ऐश्वर्यस्यात्मयाहात्म्य-यशोऽर्कभुतिधीश्रियः । तपोऽर्थोपस्थपुण्येश-प्रयत्नतनवो भगाः ॥१॥" इति । तथाऽपीह प्रासस्तावद् बुद्धिवचन एव गृह्यते, ततो भगो बुद्धिर्यस्यास्तीति भगवान्, (सह त्ति) स्वयमात्मनैव संबुद्धः सम्यगवगततत्त्वः सहसंबुद्धः, नान्यप्रतिबोधित इत्यर्थः । अथवा-(सहसं ति) आर्षत्वात् सह जातिस्मृत्यनन्तरं भगवित्येव, बुद्धः । क ?, इत्याह-अनुत्तरे प्रधाने, धर्मे चारित्रधर्मे, पुत्रं सुतं, स्थापयित्वा निवेश्य, क ?, राज्ये, अभिनिष्क्रामति धर्माभिमुख्येन गृहस्थपर्यायान्निर्गच्छति, स्मेतीहापि शेषः । ततश्च प्रव्रजितवानित्यर्थः । प्राग्वत्तिरूपत्ययेन वा व्याख्येयम । नमिर्नमिनामा, राजा पृथ्वीपतिरिति सूत्रार्थः ॥२॥

स्यादेतत्, कुमारावस्थितः कीदृशान् वा भोगान् भुक्त्वा संबुद्धः किं वाऽभिनिष्क्रामन् करोतीत्याह-

सो देवलोगसरिसे, अंतेउरवरगओ वरे जोए ।
भुंजित्तु नमी राया, बुद्धो भोगे परिच्चयइ ॥ ३ ॥

स इत्यनन्तरमुद्दिष्टः, (देवलोगसरिस त्ति) देवलोकभोगैः सदृशा देवलोकसदृशाः, मयूरव्यंसकाऽऽदित्वान्मध्यमपदलोपी समासः । (अंतेउरवरगओ त्ति) वरं प्रधानं, तच्च तदन्तःपुरं च वरान्तःपुरं, तत्र गतः स्थितो वरान्तःपुरगतः । प्राकृतत्वाच्च वरशब्दस्य परनिपातः । वरान्तःपुरं हि रागहेतुरिति तद्गतस्यास्य भोगपरित्यागाभिधानेन जीविवीर्योल्लासातिरेक उक्तः । तत्रापि कदाचिद्वरः शब्दाऽऽदयो न स्युः, तत्संनवेऽपि वा सुबन्धुरिव कृतघ्निमित्तान्न भुञ्जीताऽपीत्याह-वरान् प्रधानान् भोगान् मनोज्ञशब्दाऽऽदीन्, भुक्त्वा आसेव्य, नमिनामा राजा,

बुद्धो विक्रांततरो, त्रोणानुत्तरूपान्, परित्यजति, स्मेति शेषः । इह पुनर्भोगग्रहणमतिविस्मरणशीला अप्यनुज्ञाता एवेति ज्ञापनार्थमिति सूत्रार्थः ॥ ३ ॥

किं भोगानेव त्यक्त्वाऽभिनिष्क्रान्तवान्, उतान्यदपि ?, इत्याह-

मिहिलं सपुरजणवयं, बलमवरोहं च परियणं सव्वं ।
चिच्चा अभिणिक्खंतो, एगंतमहिट्ठिओ नयवं ॥ ४ ॥

मिथिलां मिथिलानाम्नीं नगरीं, सह पुरैरन्यनगरैर्जनपदेन च वर्तते या सा तथोक्ता, तां, न त्वेककामेव, बलं हस्त्यश्वाऽऽदिचतुरङ्गम्, अवरोधं चान्तःपुरं, परिजनं परिवर्गं, सर्वं निरवशेषं, न तु तथाविधप्रतिबन्धानास्पदं किञ्चिदेव, त्यक्त्वाऽपहाय, अभिनिष्क्रान्तः प्रव्रजितः, (एगंत त्ति) एकोऽद्वितीयः कर्मणामन्तो यस्मिन्निति मयूरव्यंसकाऽऽदित्वात्समासः । तत एकान्तो मोक्षः, तमधिष्ठित इवाऽऽश्रितवानिवाधिष्ठितः, तदुपायसम्यग्दर्शनाऽऽद्यासेवनादधिष्ठित एव वा, इहैव जीवन्मुक्त्यवाप्तेः। यद् वा-एकान्तं रूढ्यतो विजनमुद्यानाऽऽदि । भावतश्च " एकोऽहं न मे कश्चिन्नाहमन्यस्य कस्यचित् । तं तं पश्यामि यस्याहं, नासौ दृश्योऽस्ति यो मम ॥१॥ " इति भावनात् एक एवाहमित्यन्तो निश्चय एकान्तः, प्राग्वत्समासः । तमधिष्ठितो भगवानिति धैर्यवान्, श्रुतवान् वेति सूत्रार्थः ॥ ४ ॥

तत्रैवमभिनिष्क्रामति यदभूत्तदाह; यदि वा यदुक्तं 'सर्वं परित्यज्याभिनिष्क्रान्तः, इति, तत्र कीदृक् तत्त्यज्यमानमासीत् ?, इत्याह-

कोलाहलगसंभूयं, आसी मिहिलाएँ पव्वयंतम्मि ।
तइया रायरिसिम्मी, नमिम्मि अभिणिक्खमंतम्मि ॥५॥

कोलाहलो विलपिताऽऽक्रन्दितकः, कोलाहल एव कोलाहलकः, संभूत इति जातो यस्मिन् तत् कोलाहलकसंभूतम्, आहिताऽऽदेराकृतिगणत्वाद् निष्ठान्तस्य परनिपातः। यदि वा भूतशब्द उपमार्थः, ततः कोलाहलकसंभूतमिति कोलाहलकरूपतामिवाऽऽपन्नम्-हा तात! हा मातरित्यादिकलकलाऽऽकुलितम्, आसीदभूत्, मिथिलायां, सर्वे गृहविहाराऽऽरामाऽऽदीति प्रक्रमः। क्व सति?, प्रव्रज्यामादाने, तदा तस्मिन् काले, राजा चासौ राज्यावस्थामाश्रित्य, ऋषिश्च तत्कालापेक्षया राजर्षिः, यदि वा-राज्यावस्थायामपि ऋषिरिव ऋषिः, क्रोधाऽऽदिषड्वर्गजयात्। तथा च राजनीतिः-"कामः क्रोधस्तथा लोभो, हर्षो मानो मदस्तथा । षड्वर्गमुत्सृजेदेतं, तस्मिन्स्यक्ते सुखी नृपः ॥ १ ॥ " तस्मिन्नमौ नमिनाम्न्यभिनिष्क्रामति गृहात्कषायाऽऽदिभ्यो वा निर्गच्छति । इति सूत्रार्थः ॥५॥

पुनरत्रान्तरे यदभूत्तदाह (शक्रसंवादः)-

अब्भुट्ठियं रायरिसिं, पव्वज्जाठाणमुत्तमं ।
सक्को माहणवेसेण, इमं वयणमब्बवी ॥ ६ ॥

अभ्युत्थितमभ्युद्यतं, राजर्षिं प्राग्वत्, प्रव्रज्यैव स्थानं-तिष्ठन्ति सम्यग्दर्शनाऽऽद्यो गुणा अस्मिन्निति कृत्वा प्रव्रज्यास्थानं, प्रतीति शेषः । उत्तमं प्रधानं, सुपोव्यत्ययेन सप्तम्यर्थे वा द्वितीया । ततः प्रव्रज्यास्थाने उत्तमेऽभ्युद्यतं तद्विषयोद्यमवन्तं, शक्र इन्द्रो, माहनवेषेण ब्राह्मणवेषेण, आगत्येति शेषः । तदा हि तस्मिन्महात्मनि प्रव्रज्यां ग्रहीतुमनसि तदाशयं परीक्षितुकामः स्वयमिन्द्र आजगाम, ततः स इदं वक्ष्यमाणम्, उच्यते इति वचनं वाक्यम्, अब्रवीदुक्तवानिति सूत्रार्थः ॥ ६ ॥

यदुक्तवांस्तदाह-

किं णु णो अज्ज मिहिलाए, कोलाहलगसंकुला ।
सुच्चंति दारुणा सद्दा, पासाएसु गिहेसु य ॥ ७ ॥

किमिति विप्रश्ने, नु इति वितर्के, नो इत्यस्मदर्थे । अद्येत्यस्मिन् दिने, मिथिलायां नगर्यां कोलाहलकेन बहलकलकलाऽऽत्मकेन संकुला व्याकुलाः कोलाहलकसंकुलाः, श्रूयन्ते इत्याकर्ण्यन्ते, शब्दा ध्वनय इति संबन्धः । ते च कदाचिद्वन्दिवृन्दोदीरिता अपि स्युः, तन्निराकरणायाऽऽह-दारयन्ति जनमनांसीति दारुणा विलपिताऽऽक्रन्दिताऽऽदयः, क्व पुनस्ते ?, प्रासादेषु सप्तभूमाऽऽदिषु, गृहेषु सामान्येन वेश्मसु, तथा 'प्रासादो देवतानरेन्द्राणाम्' इति वचनात् प्रासादेषु देवतानरेन्द्रसंबन्धिष्वास्पदेषु, गृहेषु तदितरेषु, चशब्दात् त्रिकचतुष्कचत्वराऽऽदिषु चेति सूत्रार्थः ॥७॥

ततश्च-

एयमट्ठं निसामित्ता, हेऊकारणचोइओ ।
तओ नमी रायरिसी, देविंदं इणमब्बवी ॥ ८ ॥

एवमनन्तरोक्तम्, अर्थमिति, उपचारादर्थाभिधायिनं ध्वनिं, निशम्याऽऽकर्ण्य, हिनोति गमयति विवक्षितमर्थमिति हेतुः, स च पञ्चावयवबाक्यरूपः, कारणं चान्यथाऽनुपपत्तिमात्रं, ताभ्यां चोदितः प्रेरितो हेतुकारणचोदितः, कोलाहलकसंकुलाः दारुणाः शब्दाः श्रूयन्त इत्यनेन हि उभयमेतत् सूचितम् । तथाहि-अनुचितमिदं भवतोऽभिनिष्क्रमणमिति प्रतिज्ञा, आक्रन्दाऽऽदिदारुणशब्दहेतुत्वादिति हेतुः, प्राणव्यपरोपणाऽऽदिवदिति दृष्टान्तः, यद्यदाक्रन्दाऽऽदिदारुणशब्दहेतुस्तत्तद् धर्मार्थिनोऽनुचितं, यथा प्राणव्यपरोपणाऽऽदि, तथा चेदं भवतोऽभिनिष्क्रमणमित्युपनयः, तस्मादाक्रन्दाऽऽदिदारुणशब्दहेतुत्वादनुचितं भवतोऽभिनिष्क्रमणमिति निगमनमिति पञ्चावयवं वाक्यमिह हेतुः, शेषावयवविवक्षाविरहितं त्वाक्रन्दाऽऽदिदारुणशब्दहेतुत्वं भवदभिनिष्क्रमणानुचितत्वं विनाऽनुपपन्नमित्येतावन्मात्रं कारणम्, अनयोस्तु पृथगुपादानं प्रतिपाद्यनेदतः साधनवाक्ययैचित्र्यसूचनार्थम् । तथा च श्रुतकेवली-"कत्थ वि पंचावयवं, दसहा वा सव्वहा ण पडिसिद्धं । न य पुण सव्वं भण्णति, इंदी सधियारमक्खायं ॥१॥ " तथा-" जिणवयणं सिद्धं चिअ, भण्णति कत्थ वि उदाहरणं । आसज्ज उ सोतारं, हेऊ वि कहिं वि वत्तव्वो ॥१॥" (नि०) अथवाऽन्ययव्यतिरेकलक्षणो हेतुः, उपपत्तिमात्रं तु दृष्टान्ताऽऽदिरहितं कारणम् । यथा निरुपमसुखः सिद्धो, ज्ञानाऽनाबाधप्रकर्षात्, अन्यत्र हि निरुपमसुखासंभवान्नोदाहरणमस्ति । दृष्टाश्च प्रकृष्टमत्यादिज्ञानानाबाधाः परमसुखिनो मुनय इति ज्ञानानाबाधप्रकर्षो निरुपमसुखत्वे हेतुरुच्यते । तथा च पूज्याः-"हेऊ अणुगमवतिरे-गलक्खणो सज्जवत्थुगज्झाओ । आहरणं विट्ठंतो, कारणमुवलद्धिमेत्तं तु ॥१७७॥ " (विशे०) इहापि आक्रन्दाऽऽदिदारुणशब्दहेतुत्वमेव हेतुः, तस्योक्तन्यायेनान्वयान्वितत्वात्सति चान्वये व्यतिरेकस्यापि संभवात् । इदमेव चान्वयव्यतिरेकविकलतया विवक्षितमुपपत्तिमात्रं कारणम्, एवं सर्वत्र कारणभावना कार्येत्थं प्रसङ्गेन । प्रकृतमेव सूत्रमनुश्रियते-ततः प्रेरणानन्तरं, नमिर्नमिनामा, राजर्षिर्देवेन्द्रं शक्रमिदं वक्ष्यमाणमब्रवीदुक्तवानिति सूत्रार्थः ॥ ८ ॥

किं तदुक्तवानित्याह-

मिहिलाए चेइए वच्छे, सीयच्छाए मणोरमे ।
पत्तपुप्फफलोवेए, बहूणं बहुगुणे सया ॥ ९ ॥

मिथिलायां पुरि, चित्तिरिह प्रस्ताधात्पत्रपुष्पाऽऽद्युपचयः, तत्र साधु चित्यं,ततः प्रज्ञाऽऽदेराकृतिगणत्वात् स्वार्थिकेऽपि चैत्यमुद्यानम्। तस्मिन्(वच्छे त्ति) सूत्रत्वाच्छब्दलोपे वृक्षैः,शीता शीतला छाया यस्य तच्छीतलच्छायं, तस्मिन्, मनश्चित्तं रमते धृतिमवाप्नोति यस्मिन् तन्मनोरमम्-मनोरमाभिधानं, तस्मिन्, पत्रपुष्पफलानि प्रतीतानि, तैरुपेतं युक्तं पत्रपुष्पफलोपेतं,तस्मिन्, बहूनां प्रक्रमात् खगाऽऽदीनां, बहवो गुणा यस्मात्तत्तथा, तस्मिन्। कोऽर्थः?, फलाऽऽदिभिः प्रचुरोपकारकारिणि,सदा सर्वकालमिति सूत्रार्थः ॥ ९ ॥

तत्र किम् ?, इत्याह—

वाएण हीरमाणम्मि, चेइयम्मि मणोरमे ।
दुहिया असरणा अत्ता, एए कंदंति णो! खगा ॥१०॥

वातेन वायुना, ह्रियमाणे इतस्ततः क्षिप्यमाणे; वातश्च तदा शक्रेणैव कृत इति संप्रदायः। चित्तिरिहेष्टकाऽऽदिचयः, तत्र साधुर्योग्यश्चित्यः प्राग्वत्, स एव चैत्यः, तस्मिन्। किमुक्तं भवति?-अधो बद्धपीठिके उपरि चोच्छ्रितपताके मनोरमे मनोऽभिरतिहेतौ, वृक्षे इति शेषः। दुःखं संजातं येषां ते दुःखिताः,अशरणाःत्राणरहिताः,अत एवाऽऽर्ताः पीडिताः, एते प्रत्यक्षाः,क्रन्दन्त्याक्रन्दशब्दं कुर्वन्ति,भो इत्यामन्त्रणम्, खगाः पक्षिणः। 'इह च किमद्य मिथिलायां दारुणाः शब्दाः श्रूयन्ते?' इति यत् स्वजनजनाऽऽक्रन्दनमुक्तं, तत् खगक्रन्दनप्रायम, आत्मा च वृक्षकल्पः, ततो हि नियतकालमेव सहावस्थितत्वेन, उत्तरकालं च स्वस्वगतिगामितया द्रुमाऽऽश्रितखगोपमा एवामी स्वजनाऽऽदयः।

उक्तं हि-

" यद्वद् द्रुमे महति पक्षिगणा विचित्राः,
कृत्वाऽऽश्रयं हि निशि यान्ति पुनः प्रभाते ।
तद्वज्जगत्यसकृदेव कुटुम्बजीवाः,
सर्वे समेत्य पुनरेव दिशो व्रजन्ते ॥१॥ " इति ।

ततश्चाऽऽक्रन्दाऽऽदिदारुणशब्दहेतुत्वेनाभिधीयमानमसिद्धम् । एते हि स्वजनाऽऽदयो वातेन प्रेर्यमाणा द्रुमविश्लिष्यत्खगा इव स्वस्वप्रयोजनहानिमेवाऽऽशङ्कमानाः क्रन्दन्ति ।

आह च-

" आत्मार्थं सीदमानं स्वजनपरजनो रौति हा हा कुलाऽऽर्तो,
भार्या चाऽऽत्मोपभोगं गृहविभवसुखं स्वं वयस्याश्च कार्यम् ।
क्रन्दन्त्यन्योऽन्यमन्यस्त्विह हि बहुजनो लोकयात्रानिमित्तं,
यश्चान्यस्तत्र कश्चिद् मृगयति हि गुणं रोदितीष्टः स तस्मै"॥१॥

एवं चाऽऽक्रन्दाऽऽदिदारुणशब्दानामभिनिष्क्रमणहेतुकत्वमसिद्धम्, स्वप्रयोजनहेतुकत्वात्तेषाम्, तथा च भवद्धेतुकारणे असिद्धे एवेत्युक्तं भवतीति सूत्रार्थः ॥ १० ॥

ततश्च-

एयमट्ठं निसामित्ता, हेऊकारणचोइओ ।
तओ नमी रायरिसी, देविंदं इणमब्बवी ॥ ११॥

एतमर्थं निशम्य हेतुकारणयोरनन्तरसूत्रसूचितयोः, चोदितः-आक्षिप्तोऽयं भवदभिहितो हेतुः, कारणं चेत्यनुपपत्त्या प्रेरितो हेतुकारणचोदितः, ततो नमिं राजर्षिं देवेन्द्र इदं वक्ष्यमाणमब्रवीदिति सूत्रार्थः ॥ ११ ॥

किं तत् ?, इत्याह—

एस अग्गी य वाऊ य, एयं डज्झइ मंदिरं ।
भयवं! अंतेउरं ते णं, कीस णं नावपेक्खह ?॥ १२ ॥

एष इति प्रत्यक्षोपलभ्यमानोऽग्निश्च वैश्वानरो, वातश्च पवनः, तथैतदिति प्रत्यक्षं, दह्यते भस्मसात् क्रियते, प्रक्रमाद्गृहेतरेतेनाग्निनैव, मन्दिरं वेश्म, भवत्संबन्धीति शेषः। भगवन्निति पूर्ववत्। (अंतेउरंते णं ति) अन्तःपुरादिमुक्तं, (कीस त्ति) कस्मात्, णमिति वाक्यालङ्कारे। नावप्रेक्षसे नावलोकयसे ?। इह च यद्यदात्मनः स्वं तत्तदुत्क्रमणीयं, यथा ज्ञानाऽऽदि, स्वं चेदं भवतोऽन्तःपुरमित्यादिहेतुकारणभावना प्राग्वदिति सूत्रार्थः ॥ १२ ॥

ततश्च--

एयमट्ठं निसामित्ता, हेऊकारणचोइओ ।
तओ नमी रायरिसी, देविंदं इणमब्बवी ॥ १३ ॥

प्राग्वत् ॥१३॥

किमब्रवीत् ?, इत्याह--

सुहं वसामो जीवामो, जेसिं मो नत्थि किंचण ।
मिहिलाए डज्झमाणीए, न मे डज्झइ किंचण ॥ १४ ॥

सुखं यथा भवत्येवं वसामस्तिष्ठामो,जीवामः प्राणान् धारयामः, येषां (मो इति) अस्माकं, नास्ति न विद्यते, किञ्चन वस्तुजातम्। यतः--" एकोऽहं न मे कश्चित्, स्वः परो वाऽपि विद्यते । यदेको जायते जन्तु-र्म्रियतेऽप्येक एव हि ॥ १ ॥ " इति न किञ्चिदन्तःपुराऽऽदि मत्सत्कं, यतश्चैवमतो-मिथिलायामस्यां पुरि दह्यमानायां न मे दह्यते किञ्चित् स्वल्पमिति ॥ मिथिलाग्रहणं तु-न केवलमन्तःपुराऽऽद्येव न मत्संबन्धि, किं त्वन्यदपि स्वजनाऽऽदि, स्वस्वकर्मफलभुजो हि जन्तवस्तथा तथाऽऽत्मिन् भ्राम्यन्तीति किमत्र कस्य स्वं परं वेति ज्ञापनार्थम् ॥ ततश्चानेन प्रागुक्तहेतोरसिद्धत्वमुक्तं, तत्त्वतो ज्ञानाऽऽदिव्यतिरिक्तस्य सर्वस्यास्वकीयत्वादित्यादि प्राग्वदिति सूत्रार्थः ॥१४॥

एतदेव भावयितुमाह-

चत्तपुत्तकलत्तस्स, निव्वावारस्स भिक्खुणो ।
पियं न विज्जए किंचि, अप्पियं पि न विज्जए ॥१५॥
बहुं खु मुणिणो भद्दं, अणगारस्स भिक्खुणो ।
सव्वओ विप्पमुक्कस्स, एगंतमणुपस्सओ ॥ १६ ॥

त्यक्ताः परिहृताः-पुत्राश्च सुताः, कलत्राणि च दाराः, येन स तथा, तस्य, अत एव निर्व्यापारस्य परिहृतकृषिपाशुपाल्याऽऽदिक्रियस्य, भिक्षोरुक्तरूपस्य, प्रियमिष्टं, न विद्यते नास्ति, किञ्चिदल्पमपि, अप्रियमप्यनिष्टमपि, न विद्यते नास्ति, प्रियाप्रियविज्ञानास्तित्वे हि सति पुत्रकलत्रत्यागं न कुर्यात्, एतयोरेवातिप्रतिबन्धविषयत्वादिति भावः। एतेन यदुक्तं-नास्ति किञ्चनेति तत्समर्थितं, तत् स्वकीयत्वं हि पुत्राऽऽद्यत्यागतोऽभिष्वङ्गतः स्यात्, स च निषिद्ध इति ॥ एवमपि कथं सुखेन वसनं जीवनं च ?,इत्याह-बहुं विपुलं, खुरवधारणे, बहुमेव,मुनेस्तपस्विनो,भद्रं कल्याणं सुखं च, अनगारस्य भिक्षोरिति च प्राग्वत्। सर्वतो बाह्यादभ्यन्तराच्च । यद्वा-स्वजनात्परजनाच्च, विप्रमुक्तस्येति पूर्ववत् । एकान्तमेव-कोऽहमित्याद्येकत्वभावनाऽऽश्रमकम्, अनुपश्यतः पर्यालोचयत इति सूत्रद्वयार्थः ॥ १५ ॥ १६ ॥

पुनरपि-

एयमट्ठं निसामित्ता, हेऊकारणचोइओ ।
तओ नमिं रायरिसिं, देविंदो इणमब्बवी ॥ १७ ॥

प्राग्वत् ॥१७॥

पागारं कारइत्ता णं, गोपुरऽट्टालगाणि य ।

उसूलगसयग्घीओ, तओ गच्छसि खत्तिया ! ॥ १८ ॥

प्रकर्षेण कुर्वन्ति तमिति प्राकारः, तं, धूलीइष्टकाऽऽदिविरचितं, कारयित्वा विधाप्य, गोपुराट्टालकानि च-तत्र गोभिः पूर्यन्ते इति गोपुराणि प्रतोलीद्वाराणि, गोपुरग्रहणमर्गलाकपाटोपलक्षणम् । अट्टालकानि प्राकारकोष्ठकोपरिवर्तीन्यायोधनस्थानानि, (उसूलग त्ति) खातिका परबलपातार्थमुपरिदारहितगर्त्ता, (सयग्घीओ त्ति) शतं घ्नन्ति शतघ्नयः, ताश्च यन्त्रविशेषरूपाः, तत एषां सकलं निराकुलीकृत्य (गच्छसि इति) तिङव्यत्ययाद् गच्छ । क्षतात् त्रायत इति क्षत्रियः, तत् संबोधनं क्षत्रिय !,हेतूपलक्षणं चेदम् । स चायम्-यः क्षत्रियः स पुरस्तं प्रत्यवहितो, यथोदितोदयाऽऽदिः,क्षत्रियश्च भवान्,शेषं प्राग्वदिति सूत्रार्थः ।१८।

ततः-

एयमट्ठं निसामित्ता, हेऊकारणचोइओ ।
तओ नमी रायरिसी, देविंदं इणमब्बवी ॥ १९ ॥

प्राग्वत् ॥ १९ ॥

सड्ढं च नगरं किच्चा, तवसंवरमग्गलं ।
खंतिं निउण-पागारं, तिगुत्तं दुप्पधंसगं ॥ २० ॥
धणुं परक्कमं किच्चा, जीवं च इरियं सया ।
धिइं च केयणं किच्चा, सच्चेणं पलिमंथए ॥ २१ ॥
तवनारायजुत्तेणं, भेत्तूणं कम्मकंचुयं ।
मुणी विगयसंगामो, भवाओ परिमुच्चइ ॥ २२ ॥

श्रद्धां तत्त्वरुचिरूपाम्,अशेषगुणगणधारणतया नगरीं पुरीं,कृत्वा हृदि विधाय, अनेन च प्रशमसंवेगाऽऽदीनि गोपुराणि कृत्वेत्युपलक्ष्यते, अर्गलाकपाटं तर्हि किम् ?, इत्याह-तपोऽनशनाऽऽदि बाह्याभ्यन्तरप्रधानः संवर आश्रवनिरोधलक्षणस्तपःसंवरः, तं, मिथ्यात्वाऽऽदिदुष्टनिवारकत्वेनार्गला परिघः, तत्प्रधानं कपाटमप्यर्गलेत्युक्तम्,ततोऽर्गलामर्गलाकपाटं,कृत्वेति संबन्धः। प्राकारः कः?,इत्याह-क्षान्तिः क्षमा,निपुणमिव निपुणं शत्रुरक्षणं प्रति,अक्षाविरोध्यनन्तानुबन्धिकषायरोधितया प्राकारं,कृत्वेति संबन्धः । क्षपयन्तीति क्षमा एषां मानाऽऽदिनिरोधिनां मार्दवाऽऽदीनाम् । तिसृभिरुत्कृष्टकोच्चूलकशतघ्नीसंस्थानीयाभिर्मनोगुप्त्यादिगुप्तिभिर्गुप्तम् । मयूरव्यंसकाऽऽदित्वात्समासः। प्राकारस्य विशेषणम् । अत एव दुःखेन प्रधृष्यते परैरभिभूयत इति दुःप्रधर्षः,स एव दुःप्रधर्षकः,तम्। पठन्ति च-"खंतिं निउण-पागारं,तिगुत्तिं दुप्पधंसयं"इति रूपम्। इत्थं यदुक्तं प्राकारा ऽऽदीन् कारयित्वेति तत्प्रतिवचनमुक्तम् ॥ संप्रति तु प्राकाराट्टालकेष्ववश्यं योक्तव्यम्,तच्च सत्सु प्रहरणाऽऽदिषु,प्रतिपक्षेषु च वैरिषु संभवति। अत आह-धनुः कोदण्डम्,पराक्रमं जीववीर्योल्लासकरूपमुत्साहं कृत्वा, जीवां च प्रत्यञ्चां च, ईर्यामीर्यासमितिम्, उपलक्षणत्वाच्चेषसमितीश्च, सदा सर्वकालं,तद्विरहितस्य जीववीर्यस्याप्यकिञ्चित्करत्वात् । धृतिं च धर्माभिरतिरूपां,केतनं श्रृङ्गमयधनुर्मध्ये काष्ठमयमुष्टिकाऽऽत्मकम्; तदुपरि स्नायुना निबध्यते, इदं तु केन बन्धनीयम् ?,इत्याह-सत्येन मनःसत्याऽऽदिना(पलिमंथए त्ति) बध्नीयात् ॥ ततः किम् ?,इत्याह-तपः षड्विधमाभ्यन्तरं परिगृह्यते, तदेव कर्मप्रत्यनीकभेदतया नाराचः-अयोमयो बाणः, तद्युक्तेन प्रक्रमाद्धनुषा, भित्त्वा विदार्य,कर्म ज्ञानाऽऽवरणाऽऽदि, कञ्चुक इव कर्मकञ्चुकः, तम्। इह कर्मकञ्चुकग्रहणेनाऽऽत्मैवाऽऽवृतो वैरीत्युक्तं भवति । उक्तयति च-"अप्पा मित्तममित्तं च,दुप्पट्ठिय सुप्पट्ठिओ।" कर्मणस्तु कञ्चुकत्वं तद्गतमिथ्यात्वाऽऽदिप्रकृत्युदयवर्तिनः अकामनरमुपरुन्धत आत्मनो दुर्निवारत्वात्, मुनिः प्राग्वत् । कर्मभेदे हेतुमाह जितत्वाद् विगतः संग्रामो यस्य यस्माद्वेति विगतसंग्राम उपरताऽऽक्षोभः सन् ,भवन्यस्मिन् शारीरमानसानि दुःखानीति भवः संसारः,तस्मात् परिमुच्यते । एतेन च यदुक्तम्-प्राकारं कारयित्वेत्यादि,तदित्थमुक्तसाधनम् । इत्थं श्रद्धानगररक्षणाभिधानाद्भवतश्च तत्त्वतस्तद्वेदकतेति श्लोकं भवति । न च भवदभिमतप्राकाराऽऽदिकरणे सकलशारीरमानसक्लेशविमुक्तिलक्षणा मुक्तिरवाप्यते, इतस्तु तदवाप्तिरपीति सूत्रत्रयार्थः ॥२०।२१।२२॥

एवं च तेनोक्ते-

एयमट्ठं निसामित्ता, हेऊकारणचोइओ ।
तओ नमी रायरिसी, देविंदं इणमब्बवी ॥ २३ ॥

प्राग्वत् ॥२३॥

पासाए कारइत्ता णं, वद्धमाणगिहाणि य ।
वालग्गपोइयाओ य, तओ गच्छसि खत्तिया ! ॥२४॥

प्रसीदन्ति नृणां नयनमनांसि येषु ते प्रासादाः, तानुत्कटान्, वर्द्धमानगृहाणि चानेकधा वास्तुविद्याऽभिहितानि। (वालग्गपोइय त्ति) देशीपदं वलभीवाचकम्, ततो वलभीश्च कारयित्वा; अन्ये त्वाकाशतलागमस्याक्षितं क्षुल्लकप्रासादमेव "वालग्गपोइयाओ त्ति" देशीपदाभिधेयमाहुः । ततस्ताश्च क्रौमाद्यानभूताः कारयित्वा,ततोऽनन्तरं गच्छ क्षत्रिय !। एतेन च यः प्रेक्षावान् स शक्ति सामर्थ्ये प्रासादाऽऽदिं कारयिता,यथा ब्रह्मदत्ताऽऽदिः, प्रेक्षावांश्च शक्ति सामर्थ्ये भवानित्यादिहेतुकारणयोः सूचनमकारीति सूत्रार्थः ॥ २४ ॥

एवं च शक्रेणोक्ते-

एयमट्ठं निसामित्ता, हेऊकारणचोइओ ।
तओ नमी रायरिसी, देविंदं इणमब्बवी ॥ २५ ॥

प्राग्वत् ॥२५॥

संसयं खलु सो कुणइ, जो मग्गे कुणई घरं ।
जत्थेव गंतुमिच्छेज्जा, तत्थ कुव्वेज्ज सासयं ॥ २६ ॥

संशीतिः संशयः-इदमित्थं भविष्यति,न वा?,इत्युभयांशाऽवलम्बनप्रत्ययः, तं, खलुरेवकारार्थः । ततः संशयमेव, स कुरुते; यथा-मम कदाचिद् गमनं प्रविष्यतीति । यो मार्गे कुरुते गृहं । गमननिश्चये तु करणायोगात्;अहं तु न संशयितेत्याशयः; सम्यग्दर्शनाऽऽदीनां मुक्तिं प्रत्यवन्ध्यहेतुत्वेन मया निश्चिततत्त्वावाप्तत्वाच्च । यदि नाम न संशयितस्तथापि किमित्येव गृहं न कुरुषे ?। अत आह-यत्रैव विवक्षितप्रदेशे,गन्तुं वातुम्, इच्छेत्-अभिलषेत् । (तत्थेति) व्यवच्छेदफलत्वाद्वाक्यस्य तत्रैव-जिगमिषितप्रदेशे, कुर्वीत विदधीत,स्वस्याऽऽत्मनः,आश्रयो वेश्म स्वाश्रयः,तम् । यद्वा-शाश्वतं नित्यं,प्रक्रमाद् गृहमेव । ततोऽयमर्थः-इदं तावदिहावस्थानं मार्गावस्थानप्रायमेव, यत्र तु जिगमिषितप्रदेशे कुर्वीत विदधीतास्मान्निस्तन्मुक्तिपदं, तदाश्रयविधाने च प्रवृत्ता एव वयम्, ततस्तत्करणप्रवृत्तत्वात् कथं प्रेक्षावत्त्वक्षतिः ?। तथा च यः प्रेक्षावानित्याद्यपि तत्त्वतः सिद्धसाधनतयैवावस्थितमिति सूत्रार्थः ॥ २६ ॥

ततः पुनरपि-

एयमट्ठं निसामित्ता, हेऊकारणचोइओ ।

तओ नमिं रायरिसिं, देविंदो इणमब्बवी ॥ २७ ॥

प्राग्वत् ॥२७॥

आमोसे लोमहारे य, गंठिभेए य तक्करे ।
नगरस्स खेमं काऊणं, तओ गच्छसि खत्तिआ ! ॥२८॥

आ समन्ताद् मुष्णन्ति स्तैन्यं कुर्वन्तीत्यामोषाः, तान्, लोमानि हरन्ति व्यपनयन्ति प्राणिनां ये ते लोमहाराः । किमुक्तं भवति ?-निर्घृणतया, आत्मविघाताऽऽशङ्कया च प्राणान् निहत्यैव ततः सर्वस्वमपहरन्ति । तथा च वृद्धाः-" लोमहाराः प्राणहाराः " इति । तांश्च, ग्रन्थिं द्रव्यसंबन्धिनीं भिन्दन्ति घुर्घुरुकग्रन्थिकर्तिकाऽऽदिना विदारयन्तीति ग्रन्थिभेदाः, तान्, चशब्दो भिन्नक्रमः । तथैव कुर्वन्ति तस्कराः, सर्वकाल चौर्यकारिणः, तांश्च । यत आहुर्वैयाकरणाः-"तदूबृहतोः करपत्योश्चोरदेवतयोः सुट् तलोपश्च ।" (वार्ति०) इह चोत्साद्येति गम्यते, प्रविश्य पिण्डीमित्युक्तौ भक्षयेतिवत् । यद्वा-सप्तम्येवेयं, बहुर्थे चैकवचनम्, ततश्चाऽऽमोषाऽऽदिषूपतापकारिषु सत्सु, नगरस्य पुरस्य क्षेमं सुस्थं, कृत्वा विधाय, ततस्तदनन्तरं, गच्छ क्षत्रिय ! । एतेनापि यः सधर्मा नृपतिः, स इहाधर्मकारिनिग्रहकृत्, यथा भरताऽऽदिः, सधर्मनृपतिश्च भवानित्यादिहेतुकारणसूचना कृतेवेति सूत्रार्थः ॥२८॥

इत्थं शक्रोक्तौ-

एयमट्ठं निसामित्ता, हेऊकारणचोइओ ।
तओ नमी रायरिसी, देविंदं इणमब्बवी ॥ २९ ॥
असइं तु मणुस्सेहिं, मिच्छा दंमो पउंजइ ।
अकारिणोऽत्थ बज्झंति, मुच्चई कारओ जणो ॥ ३० ॥

असकृदनेकधा, तुरेवकारार्थः, ततश्चासकृदेव, मनुष्यैर्मनुजैः, मिथ्या व्यलीकः । किमुक्तं भवति ?-अनपराधिष्वप्यज्ञानाहङ्काराऽऽदिहेतुभिरपराधिष्विव, दण्डनं दण्डो-देशत्यागशरीरनिग्रहाऽऽदिः, प्रयुज्यते व्यापार्यते । कथमिदम् ?, इत्याह-अकारिण आमोषणाऽऽद्यविधायिनः, अत्रेत्यस्मिन् प्रत्यक्षत उपलभ्यमानमनुष्यलोके, बध्यन्ते निगडाऽऽदिभिर्नियन्त्र्यन्ते; मुच्यते त्यज्यते, कारको विधायकः, प्रकृतत्वादामोषणाऽऽदीनाम् । जनो लोकः । तदनेन यदुक्तम्-प्रागामोषकाऽऽद्युत्साद्येन नगरस्य क्षेमं कृत्वा गच्छेति, तत्र तेषां हातुमशक्यतया क्षेमकरणस्याप्यशक्यत्वमुक्तम् । यच्च यः सधर्मेत्यादि सूचितम्, तत्रापरिज्ञानतोऽनपराधिनामपि दण्डमाददतां सधर्मनृपतित्वमपि तावन्निस्यमित्यसिकृता हेतोरिति सूत्रार्थः ॥ २९ ॥ ३० ॥

एयमट्ठं निसामित्ता, हेऊकारणचोइओ ।
तओ नमिं रायरिसिं, देविंदो इणमब्बवी ॥ ३१ ॥

प्राग्वत् ॥३१॥

अथ रमियता स्वजनान्तःपुरपुरप्रासादनृपतिधर्मविषयः किमस्याभिष्वङ्गोऽस्ति, नेति वेति विमृश्य, संप्रति द्वेषाभावं विवेक्तुमिच्छुर्विजिगीषुतामूलत्वाद् द्वेषस्य, तामेव परीक्षितुकामः शक्र इदमुक्तवान्-

जे केइ पत्थिवा तुब्भं *, नाणमंति नराहिवा ! ।
वसे ते ठावइत्ता णं, तओ गच्छसि खत्तिया ! ॥३२॥

* तुज्झमिति पाठान्तरम् ।

ये केचिदिति सामस्त्योपदर्शकम्, पार्थिवा भूपालाः, (तुब्भं ति) तुभ्यं, नानमन्ति न मर्यादया प्रह्वीभवन्ति, तुभ्यमिति नमतीतियोगेऽपि चतुर्थी, "मात्रे पित्रे सावित्रे च, नमामि" इत्यादिवददुष्टैव । वाचनान्तरे पठ्यते च-(तुज्झं ति) तत्र च तवेति शेषविवक्षया षष्ठी । 'नराहिवा !' इत्यत्राऽऽकारो "ह्रस्वदीर्घौ मिथो वृत्तौ" ॥ ८ । १ । ४ ॥ इति लक्षणात् * । ततश्च हे नराधिप ! नृपते !, वशे इत्यात्माऽऽश्रये, तानित्यन्यान्पार्थिवान्, स्थापयित्वा निवेश्य, कृत्वेति यावत् । ततो गच्छ क्षत्रिय !। इहापि यो नृपतिः स नानमत्पार्थिवं नमयिता, यथा भरताऽऽदिरित्यादिहेतुकारणे अर्थत आक्षिप्ते, इति सूत्रार्थः ॥ ३२ ॥

एवं तु सुरपतिनोक्ते-

एयमट्ठं निसामित्ता, हेऊकारणचोइओ ।
तओ नमी रायरिसी, देविंदं इणमब्बवी ॥ ३३ ॥

सूत्रं प्राग्वत् ॥३३॥

जो सहस्सं सहस्साणं, संगामे दुज्जए जिणे ।
एगं जिणेज्ज अप्पाणं, एस से परमो जओ ॥ ३४ ॥
अप्पाणमेव जुज्झाहि, किं ते जुज्झेण बज्झओ ? ।
अप्पणा चेव अप्पाणं, जइत्ता सुहमेहए ॥ ३५ ॥
पंचिंदियाणि कोहं, मायं माणं तहेव लोभं च ।
दुज्जयं चेव अप्पाणं, सव्वमप्पे जिए जियं ॥ ३६ ॥

य इत्यनुदिष्टनिर्देशे, सहस्रं दशशताऽभ्यके, सहस्राणां प्रक्रमात् सुभटानाम्, संग्रामे युद्धे, दुर्जये दुरात्मपरिभवे, जयेदभिभवेत् । संज्ञावने लिङ् । एकमद्वितीयं, जयेद् यदि कथञ्चिज्जीववीर्योल्लासतोऽभिभवेत्, कम् ?, आत्मानं स्वं, दुराचारप्रवृत्तमिति गम्यते । एषोऽनन्तरोक्तः, (से इति) तस्य जेतुः, सुभटदशशतसहस्रजयात्परमः प्रकृष्टो, जयः परेषामभिभवः, तदनेनाऽऽत्मन एवातिदुर्जयत्वमुक्तम् ॥ ३४ ॥ तथा च (अप्पाणमेव त्ति) तृतीयार्थे द्वितीया । ततश्चात्मनैव सह, युद्धस्व संग्रामं कुरु । यद्वा-युधेरन्तर्भावितण्यर्थत्वाद्युध्यस्वेति योधयस्व । कम् ?, आत्मानम्, इदाप्यात्मनैव सहेति शेषः । किम् ?, न किञ्चिदित्यर्थः । ते तव, युद्धेन संग्रामेण, बाह्यत इति बाह्यं पार्थिवाऽऽदिकमाश्रित्य, यदि वा बाह्य इति तृतीयार्थे तस्मिः, ततो बाह्येन युद्धेनेति संबध्यते । एवं च (अप्पणा चेव त्ति) आत्मनैवान्यव्यतिरिक्तेन, आत्मानं स्वं, [जइत्त त्ति] जित्वा, सुखमैकान्तिकात्यन्तिकमुक्तिसुखाऽऽत्मकम्, एधत इति-अनेकार्थत्वाद्धातूनां प्राप्नोति । (अहवा सुहमेहए त्ति) शुभं पुण्यमेधते-अन्तर्भावितण्यर्थत्वाद् वृद्धिं नयति॥३५॥ कथमात्मन्येव जिते सुखावाप्तिः ?, इत्याह-पञ्चेन्द्रियाणि श्रोत्राऽऽदीनि, क्रोधः कोपो, मानोऽहङ्कारो, माया निकृतिः, तथैव लोभश्च गार्ध्यलक्षणो, दुर्जयो दुरभिभवः, चः समुच्चये । एवेति पूरणे । अतति सततं गच्छति तानि तान्यध्यवसायस्थानान्तराणीति व्युत्पत्तेरात्मा मनः, सर्वत्र च सूत्रत्वादात्मना निर्देशः । सर्वमशेषमिन्द्रियादि, उपलक्षणत्वाद् मिथ्यात्वाऽऽदि च, आत्मनि जीवे, जितेऽभिभूते, जितमित्यभिभूतमेव । ननु मनसि जिते जितानि

* अयं तु प्रमादेनोल्लेखः, यतो हि 'मो दीर्घो वा' ॥८।३।३८॥ इतिसूत्रं विवेचयता हेमचन्द्रसूरिणा प्राप्ताप्राप्तविभागात्त्वस्य सूत्रस्य समर्थितम् । तद् यथा-हे गुरु, हे गुरु, हे पटु, हे पटु, पक्षे विकल्पः । हे सोदर्या !, हे सोदर्य ! इह त्वप्राप्ते विकल्पः ।

पञ्चेन्द्रियाऽऽदीनीति, किं पृथक् तज्जयाभिधानेन ?। सत्यम्-तथाऽपि प्रत्येकं दुर्जयत्वख्यापनाय पृथगुपन्यास इत्यदोषः । यद्वा-[दुज्जयं चेव अप्पाणं ति] चकारो हेत्वर्थः, एषोऽवधारणे, निश्चक्रमश्च-आत्मशब्दानन्तरं द्रष्टव्यः । ततश्च यस्मादात्मैव जीव एव दुर्जयस्ततः सर्वस्मिन्द्रियाऽऽद्यात्मनि जिते जितम् । अनेन चेन्द्रियाऽऽदीनामेव दुःखहेतुत्वात्तज्जयतः सुखप्राप्तिः समर्थिता भवति । एवं च फलोपदर्शनद्वारेणैवंविधैव जिगीषुता श्रेयसीत्याचष्टे । ततश्च यो नृपतिरित्याद्यपि तत्त्वतो विजिगीषुत्वदर्शनात् सिद्धसाधनतया प्रत्युक्तमिति सूत्रत्रयार्थः ॥३६॥

भूयोऽपि-

एयमट्ठं निसामित्ता, हेऊकारणचोइओ ।
तओ नमिं रायरिसिं, देविंदो इणमब्बवी ॥ ३७ ॥

प्राग्वत् ॥३७॥

नवरमनन्तरपरीक्षातो द्वेषोऽप्यनेन परिहृत इति निश्चित्य, जिनप्रणीतधर्मं प्रति स्थैर्यं परीक्षितुकामः शक्र इदमवोचत्-

जइत्ता विउले जन्ने, भोएत्ता समणमाहणे ।
दच्चा भोच्चा य जिट्ठा य, तओ गच्छसि खत्तिया ! ॥३८॥

[जइत्त त्ति] याजयित्वा विपुलान् विस्तीर्णान्, यज्ञान् यागान्, भोजयित्वा-अभ्यवहार्य, श्रमणाश्च निर्ग्रन्थाऽऽदयो, ब्राह्मणाश्च द्विजाः, श्रमणब्राह्मणाः, तान्, द्विजाऽऽदिन्द्रयो गोभूमिसुवर्णाऽऽदीन् दत्त्वा, भुक्त्वा च मनोज्ञशब्दाऽऽदीन्, इष्ट्वा च राजर्षित्वात् स्वयमेव यज्ञान्, ततो गच्छ क्षत्रिय ! । अनेन यद्यत्प्राणिप्रीतिकरं तत्तद् धर्माय, यथा हिंसोपरमाऽऽदि, प्राणिप्रीतिकराणि चामूनि यागाऽऽदीनीत्यादिनीत्या हेतुकारणे सूचिते एवेति सूत्रार्थः ॥३८॥

शक्रवचनानन्तरम्-

एयमट्ठं निसामित्ता, हेऊकारणचोइओ ।
तओ नमी रायरिसी, देविंदं इणमब्बवी ॥३९॥

सूत्रं प्राग्वत् ॥३९॥

जो सहस्सं सहस्साणं, मासे मासे गवं दए ।
तस्सा वि संजमो सेओ, अदितस्स वि किंचण ॥ ४० ॥

यः सहस्रं सहस्राणां दशलक्षाऽऽत्मकं, मासे मासे, गवां प्रतीतानां, (दए त्ति) दद्यात्, तस्याप्येवंविधस्य दातुर्यदि कथञ्चिच्चारित्रमोहनीयक्षयोपशमेन संयम आश्रवाऽऽदिविरमणाऽऽत्मकः स्यात्, तदा स एव श्रेयानतिशयप्रशस्यः। कथंभूतस्यापि ?, अददतोऽप्ययच्छतोऽपि, किञ्चन स्वल्पमपि वस्तु । यद्वा-(तस्सा वि त्ति) तस्मादप्युक्तरूपाद् ददतुरधिक्येन विवक्षितात्संयच्छति प्राणिहिंसाऽऽदिभ्यः सम्यगुपरमतीति, सर्वधातूनां पचाऽऽदिषु दर्शनादिति संयमः संयमवान्, साधुरित्यर्थः । श्रेयान् प्रशस्यतरः । अथवा तस्यापि दातुः, प्रक्रमाद्गोदानधर्मात्, संयम एवंरूपः, श्रेयान् शेषं पूर्ववत् । गोदानं चेह यागाऽऽद्युपलक्षणमतिप्रभूतजनाऽऽचरितमित्युपात्तम् । एवं च संयमस्य प्रशस्यतरत्वमभिदधता यागाऽऽदीनां सावद्यत्वमर्थादापादितम् । तथा च यज्ञप्रणेतृभिरुक्तम्-"षट् शतानि नियुज्यन्ते, पशूनां मध्यमेऽहनि । अश्वमेधस्य वचनाद्, न्यूनानि पशुभिस्त्रिभिः ॥ १ ॥" इत्यस्यस्तु वधे च कथमसावद्यता नाम ?। तथा दानान्यप्यशनाऽऽदिविषयाणि, धर्मोपकरणगोचराणि च धर्माय वर्ण्यन्ते ?। यत आह-" अशनाऽऽदीनि दानानि, धर्मोपकरणानि च । साधुभ्यः साधुयोग्यानि, देयानि विधिना बुधैः" ॥१॥ शेषाणि तु सुवर्णगोभूम्यादीनि प्राण्युपमर्दहेतुतया सावद्यान्येव, नोगानां तु सावद्यत्वं सुप्रसिद्धम्; तथा च प्राणिप्रीतिकरत्वादित्यसिद्धो हेतुः । प्रयोगश्च-यत्सावद्यं तत्प्राणिप्रीतिकरं न, यथा हिंसाऽऽदि, सावद्यानि च यागाऽऽदीनीति सूत्रार्थः ॥४०॥

एयमट्ठं निसामित्ता, हेऊकारणचोइओ ।
तओ नमिं रायरिसिं, देविंदो इणमब्बवी ॥ ४१ ॥

' एयमट्ठं ' सूत्रं प्राग्वत् ॥४१॥

नवरम्, इत्थं जिनधर्मस्थैर्यमवधार्य, प्रव्रज्यां प्रति दृढोऽयमुत नेति परीक्षणार्थं शक्र इदमब्रवीत्-

घोराऽऽसमं चइत्ता णं, अन्नं पत्थेसि आसमं ।
इहेव पोसहरओ, भवाहि मणुयाहिवा ! ॥ ४२ ॥

घोरोऽत्यन्तदुरनुचरः, स चासावाश्रमश्च, आङिति स्वपरप्रयोजनाभिव्याप्त्या, श्राम्यन्ति खेदमनुभवन्त्यस्मिन्निति कृत्वा घोराऽऽश्रमो गार्हस्थ्यम्, तस्यैवाल्पसत्त्वैः दुष्करत्वात् । यत आहुः-" गृहाऽऽश्रमसमो धर्मो, न भूतो न भविष्यति । पालयन्ति नराः शूराः, क्लीबाः पाखण्डमाश्रिताः ॥१॥ " तं, त्यक्त्वाऽपहाय, "जहित्ता णं ति" क्वचित्पाठः । तत्र च हित्वा, अन्यमेतदव्यतिरिक्तं कृषिपाशुपाल्याऽऽद्यशक्तकातरजनाभिनन्दितं, प्रार्थयसेऽभिलषसि, आश्रमं प्रव्रज्याव्रक्षणं, नेदं क्लीबसत्त्वानुचरितं भवादृशामुचितमित्यभिप्रायः। तर्हि किमुचितम् ?, इत्याह-इहैवास्मिन्नेव गृहाश्रमे, स्थित इति गम्यते । पोषं धर्मपुष्टिं धत्त इति पोषधः, अष्टम्यादितिथिषु व्रतविशेषः, तत्र रत आशक्तः पोषधरतो, (भवाहि त्ति) भव, अणुव्रताऽऽद्युपलक्षणमेतत्, अस्यैवोपादानं पोषधादेर्नेष्वश्यंभावतस्तपोऽनुष्ठानख्यापकम् । यत आह आश्वसेनः-"सर्वेष्वपि तपोयोगः, प्रशस्तं कालपर्वसु । अष्टम्यां पञ्चदश्यां च, नियतः पोषधं चरेत् ॥१॥" इति । मनुजाधिप ! नृपते !, अत्र च घोरपदेन हेतुराक्षिप्तः । तथाहि-यद्यद् घोरं तद् तत्कर्मार्थिनाऽपि अनुष्ठेयं, यथाऽनशनाऽऽदि, तथा चायं गृहाऽऽश्रमः, शेषमेतदनुसारतोऽभ्यूह्यमिति सूत्रार्थः ॥४२॥

ततश्च-

एयमट्ठं निसामित्ता, हेऊकारणचोइओ ।
तओ नमी रायरिसी, देविंदं इणमब्बवी ॥ ४३ ॥

प्राग्वत् ॥४३॥

मासे मासे उ जो बालो, कुसग्गेण उ भुंजए ।
न सो सुअक्खायधम्मस्स, कलं अग्घइ सोलसिं ॥४४॥

" मासे मासे " इति वीप्सायां द्विर्वचनम्, तुरिहोत्तरत्र चैवकारार्थः, ततश्च मासे मास एव, न त्वेकस्मिन्नेव मासे, अरुमास ऽऽदौ नेति, यः कश्चिद् बालोऽविवेकः, कुशाग्रेणैव तृणविशेषमात्रेण, भुङ्क्ते । एतदुक्तं भवति-यावत् कुशाग्रेऽवतिष्ठते तावदेवाभ्यवहरन्, नातोऽधिकम्; अथवा कुशाग्रेणेति जातावेकवचनम् । तृतीया तु ओदनेनासौ भुङ्क्ते इत्यादिवत् साधकतमत्वेनान्यवह्रियमाणत्वेऽपि विवक्षितत्वात् । नेति निषेधे । स इति यः कुशाग्रैर्भुङ्क्ते स एवंविधकष्टानुष्ठाय्यपि, सुष्ठु शोभनः सर्वसावद्यविरतिरूपत्वात्, आङित्यभिव्याप्त्या, ख्यातस्तीर्थकराऽऽदिभिः कथितः स्वाख्यातः, तथाविधो

धर्मो यस्य सोऽयं स्वाख्यातधर्मा, तस्य, चारित्रिण इत्यर्थः। कलां भागमपि,अर्हति षोडशीं षोडशपूरणीम् ॥ इदमुक्तं भवति-स समोऽपि न भवति, किं पुनस्तुल्यः, अधिको वा। ततो यदुक्तं-यद्यद् घोरं न तत्तद्धर्मार्थिनाऽनुष्ठेयम्,अनशनाऽऽदिवदित्यत्र घोरत्वादित्यनैकान्तिको हेतुः। घोरस्यापि स्वाख्यातधर्मस्यैव धर्मार्थिनाऽनुष्ठेयत्वात्, अन्यस्य स्वात्मविघाताऽऽदिवदन्यथात्वात्। प्रयोगश्चात्र-यत् स्वाख्यातधर्मरूपं न भवति घोरमपि न तद्धर्मार्थिनाऽनुष्ठेयम्, यथा-आत्मवधाऽऽदिः, तथा च गृहाऽऽश्रमः, तद्रूपत्वं चास्य सावद्यत्वाद् हिंसाऽऽदिवदित्यसंप्रसङ्गेन। शेषं प्राग्वदिति सूत्रार्थः ॥४४॥

ततश्च—

एयमट्ठं निसामित्ता, हेऊकारणचोइओ।
तओ नमिं रायरिसिं, देविंदो इणमब्बवी ॥ ४५ ॥

'एयं' सूत्रं प्राग्वत् ॥ ४५ ॥

नवरं यतिधर्मे दृढोऽयमिति निश्चित्य, पुरन्दरोऽयमज्ञिष्वङ्ग इति तद्भावं परीक्षितमपि पुनः परीक्षितुमिन्द्र उवाच-

हिरण्णं सुवण्णं मणिमुत्तं, कंसं दूसं च वाहणं।
कोसं वड्ढावइत्ता णं, तओ गच्छसि खत्तिया !॥ ४६ ॥

हिरण्यं सुवर्णं, स्वर्णं शोभनवर्णं, विशिष्टवर्णकमित्यर्थः। यद्वा-हिरण्यं घटितस्वर्णम्,इतरत्तु सुवर्णं,मणयश्चेन्द्रनीलाऽऽदयः, मुक्ताश्च मौक्तिकानि, मणिमुक्तम्। तथा कांस्यं कांस्यभाजनाऽऽदि, दूष्यं वस्त्राणि, चः स्वगतानेकभेदसंसूचकम्। वाहनं रथाश्वाऽऽदि। वाचनान्तरे पठन्ति च-(सवाहणं ति) सह वाहनैर्वर्तत इति सवाहनम्,हिरण्याऽऽदीति संबन्धः। कोशं भाण्डागारं धर्मलाभाऽऽद्यनेकवस्तुस्वरूपं [वड्ढावइत्ता णं ति] वृद्धिं प्रापय्य, ततः समस्तवस्तुविषयेच्छापरिपूर्तौ, गच्छ क्षत्रिय !। अयमाशयः-यः साऽऽकाङ्क्षो, नासौ धर्मानुष्ठानयोग्यो भवति, यथा मम्मणवणिक्, साऽऽकाङ्क्षश्च भवान्, आकाङ्क्षणीयहिरण्याऽऽदिवस्त्वपरिपूर्तेः, तथाविधत्वमकवदिति। शेषं प्राग्वदिति सूत्रार्थः ॥ ४६ ॥ [तत्कथा ' मम्मण ' शब्दे वक्ष्यते]

ततः-

एयमट्ठं निसामित्ता, हेऊकारणचोइओ।
तओ नमी रायरिसी, देविंदं इणमब्बवी ॥ ४७ ॥

प्राग्वत् ॥४७॥

सुवण्णरुप्पस्स उ पव्वया भवे,
सिया हु केलाससमा असंखया।
नरस्स लुद्धस्स न तेहिं किंचि,
इच्छा हु आगाससमा अणंतिया ॥ ४८ ॥
पुढवी साली जवा चेव, हिरण्णं पसुहिं सह।
पडिपुण्णं नालमेगस्स, इइ विज्जा तवं चरे ॥ ४९ ॥

सुवर्णं रूप्यं च सुवर्णरूप्यमिति समाहारः। तस्य, तुः पूरणे। यद्वा-आर्षत्वाद्विभक्तिलोपः, तुशब्दश्च समुच्चये, ततः सुवर्णस्य रूप्यस्य च पर्वता इव पर्वताः पर्वतप्रमाणा राशयः,(भवे त्ति) भवेयुः स्युः,पर्वतप्रमाणत्वेऽपि च लघुपर्वतप्रमाणा एव स्युः,अत आह-[सिया हु त्ति] स्यात् कदाचित्, दुरवधारेण, निश्चयक्रमश्च, ततः कैलाशसमा एव कैलाशपर्वततुल्या एव, न त्वन्यलघुपर्वतप्रमाणाः, तेऽप्यसंख्याकाः संख्याविरहिताः, न तु द्वित्रा एव, नरस्य पुरुषस्य, उपलक्षणत्वात् स्त्रियः, पक्षकस्य वा। न तैः कैलाशसमैरसंख्यैरपि सुवर्णरूप्यपर्वतैः, किञ्चिदप्यल्पमपि, परितोषोत्पादनं प्रति क्रियत इति शेषः। वाचनान्तरे पठ्यते च-[न तेण त्ति] अत्र च सूत्रत्वाद्वचनव्यत्ययः। कुतः पुनरिदम् ?, इत्याह-इच्छा अभिलाषो,हुरिति यस्मात्, आकाशेन समा तुल्या आकाशसमा, अनन्तिका अन्तरहिता। तथा चैतदनुवादी वाचकः-"न तुष्टिरिह शताज्जन्तो-र्न सहस्राच्च कोटितः। न राज्यात्तैव देवत्वा-लोभस्त्वादपि विद्यते ॥ १ ॥ " ॥ ४८ ॥

किं सुवर्णरूप्ये केवले एव नेच्छापरिपूर्तये?,इत्याशङ्क्याऽऽह-पृथ्वी मही, शालयो लोहितशाल्यादयः,यवाः प्रतीताः, चः शेषधान्यसमुच्चयार्थः। एवोऽवधारणे,स च भिन्नक्रमो नेत्यस्यान्तरं योज्यते। हिरण्यं सुवर्णं, तान्याऽऽद्युपलक्षणमेतत्, पशुभिर्गवाश्वाऽऽदिभिः, सह साकं,प्रतिपूर्णं समस्तम्। वाचनान्तरे पठन्ति च-(सव्वं तं ति) सर्वमशेषं, न तु कियदेव, तत् पृथिव्यादि। नेति नैव,अलं समर्थं, प्रक्रमादिच्छापरिपूर्त्तये। एकस्यापि द्वितीयस्य, अन्तोरिति गम्यते। इत्येतत् श्लोकद्वयोक्तम्, (विज्ज त्ति)सूत्रत्वाद्विदित्वा। यद्वा-इतीत्यस्माद्धेतोः, विद्वान् पण्डितः,तपो द्वादशविधं, चरेदासेवेत। तत एव निस्पृहतयेच्छापरिपूर्तिसंभवादिति भावः। अनेन च संतोष एव निराकाङ्क्षतायां हेतुर्न तु हिरण्याऽऽदिवर्जनमित्युक्तम्। तथा च हिरण्याऽऽदि वर्जयित्वेत्यत्र यदनुमानमुक्तं, तत्र साकाङ्क्षत्वलक्षणो हेतुरसिद्धः, न चाऽऽकाङ्क्षणीयवस्त्वपरिपूर्त्तेस्तस्य सिद्धत्वं, संतुष्टतया ममाऽऽकाङ्क्षणीयवस्तुन एवाभावादिति सूत्रार्थः ॥४९॥

नृपोऽपि—

एयमट्ठं निसामित्ता, हेऊकारणचोइओ।
तओ नमिं रायरिसिं, देविंदो इणमब्बवी ॥ ५० ॥

' एयमट्ठं ' सूत्रं प्राग्वत् ॥५०॥

नवरम्, अविद्यमानविषयेषु विषयवाञ्छानिवृत्तोऽयमिति निश्चित्य,सत्सु तेष्वनिषक्तोऽस्तु, न वा ?,इति विवेचयितुमिन्द्र उवाच-

अच्छेरयमब्भुदए, भोए जहसि पत्थिवा !।
असंते कामे पत्थेसि, संकप्पेण विहण्णसि ॥ ५१ ॥

(अच्छेरयं ति) आश्चर्यं वर्त्तते,यत् त्वमेवंविधोऽपि (अब्भुदए त्ति) अद्भुतकानाश्चर्यरूपान्, भोगान् कामान्, जहासि त्यजसि। वाचनान्तरे पठ्यते च-(चयसि त्ति)पार्थिव ! पृथिवीपते ! पाठान्तरश्च-क्षत्रिय !। अथवा-(अब्भुदए त्ति) अभ्युदये; ततश्च यदभ्युदयेऽपि भोगांस्त्वं जहासि तदाश्चर्यं वर्त्तते। तथा-तथागतश्च-असतोऽविद्यमानान्, कामान्, प्रार्थयसेऽभिलषसि यत्,तदप्याश्चर्यमिति संबन्धः। अथवा-कस्तवात्र दोषः ?, संकल्पेन उत्तरोत्तराप्राप्तभोगाभिलाषरूपेण विकल्पेन, विहन्यसे विविधं बाध्यसे, एवंविधसंकल्पस्यापर्यवसितत्वाद्दुःकम्; अर्माणां स्थूलसूक्ष्माणामिन्द्रियार्थविधायिनां शाकाऽऽदयोऽपि भोः तृप्तिविशेषाणामुपागताः। यद्वा-(अच्छेरगमब्भुदए त्ति) मकारोऽलाक्षणिकः। ततश्चाऽऽश्चर्यादद्भुतयोरेकार्थत्वेऽप्युपादानमतिशयख्यापनार्थम्। अतिशयाद्भुतान् भोगान् जहासि पार्थिव !, असतश्च कामान् प्रार्थयसि यत्,तत्संकल्पेनैवोक्तरूपेण,विहन्यसे बाध्यसे। कथं ह्यन्यथा विवेकिनस्तवैतत्संभवेत्,एतेन च यः सद्विवेको, नासौ प्रासान् विषयानप्राप्ताऽऽ-

काङ्क्षया परिहरति; यथा ब्रह्मदत्तचक्रवर्त्यादिः, सद्विवेकश्च भवानित्यादिहेतुकारणे सूचिते इति सूत्रार्थः ॥ ५१ ॥ (तत्कथा 'बंभदत्त' शब्दे)

तदनु—

एयमट्ठं निसामित्ता, हेऊकारणचोइओ ।
तओ नमी रायरिसी, देविंदं इणमब्बवी ॥ ५२ ॥

आम्बत् ॥ ५२ ॥

सल्लं कामा विसं कामा, कामा आसीविसोवमा ।
कामे पत्थेज्जमाणा य, अकामा जंति दुग्गइं ॥ ५३ ॥

(सल्लं ति)देहान्तश्चलतीति शल्यं शरीरान्तःप्रविष्टं तोमराऽऽदि, शल्यमिव शल्यम्। के ते?,काम्यमानत्वात् कामाः, मनोज्ञशब्दाऽऽदयः। यथाहि-शल्यमन्तश्चलद्विविधबाधाविधायि,तथैतेऽपि, तत्त्वत एषामपि सदा बाधाविधायित्वात्। तथा वेवेष्टि व्याप्नोतीति विषं तालपुटाऽऽदि, विषमिव विषं कामाः, यथैव हि तदुपभुज्यमानं मधुरमित्यापातसुन्दरमिवाऽऽभाति, अथ परिणतावतिदारुणम, एवमेते अपि कामाः, तथा कामाः-आशीषो दंष्ट्राः,तासु विषमस्येत्याशीविषः, तदुपमाः । यथा ह्ययमक्षैरवलोक्यमानः स्फुरन्मणिफणाभूषित इति शोभन इव विभाव्यते, स्पर्शनाऽऽदिभिरनुभूयमानश्च विनाशायैव भवति, तथैतेऽपि कामाः?। किञ्च-कामान् प्रार्थयमाना अभिलषन्तः, अपि शब्दस्य लुप्तनिर्दिष्टत्वात्प्रार्थयमाना अपि, अकामा इच्छमाणकामाभावाद्, यान्ति गच्छन्ति, दुर्गतिं दुष्टां नरकाऽऽदिगतिम्। तदनेन न केवलं शल्याऽऽदिवदनुभूयमाना एवामी दोषकारिणः, किं तु प्रार्थ्यमाना अपीत्युक्तं भवति। तथा यः सद्विवेको, नासौ प्राप्तमप्राप्ताऽऽकाङ्क्षया जहातीत्यादौ सद्विवेकत्वमनैकान्तिको हेतुः। न ह्ययमेकान्तः, यथा-प्राप्तमप्राप्तार्थेन; प्राप्तस्याप्यपायहेतोस्तदुच्छेदकाप्राप्तार्थं विवेकिभिः परिहियमाणत्वात्; अनभ्युपगतोपालम्भश्चायम्,मुमुक्षूणां क्वचिदाकाङ्क्षाया एवासंभवात्। उक्तं हि-"मोक्षे भवे च सर्वत्र,निःस्पृहो मुनिसत्तमः।"इति सूत्रार्थः।५३।

कथं पुनः कामान् प्रार्थयमाना दुर्गतिं यान्ति?, अत आह-

अहे वयइ कोहेणं, माणेणं अहमा गई ।
माया गइपडीघाओ, लोभाओ दुहओ भयं ॥ ५४ ॥

अधो नरकगतौ,व्रजति गच्छति,क्रोधेन कोपेन,मानेनाहङ्कारेण,अधमा नीचा गतिः, भवतीति गम्यते। (माय त्ति) सुब्व्यत्ययात् मायया परवञ्चनाऽऽत्मिकया, गतेः-प्रस्तावात् सद्गतेः, प्रतिघातो विनाशो गतिप्रतिघातो भवति। लोभाद्भार्यलक्षणात्, (दुहओ ति) द्विधा द्विःप्रकारम्-ऐहिकं, पारत्रिकं च। विभ्यत्यस्मादिति भयं दुःखं,तदाशङ्कने साध्वसं च। कामेषु प्रार्थ्यमानेष्ववश्यंभावी क्रोधसंज्वलः, स चेद्गीति कथं न, तत् प्रार्थनातो दुर्गतिगमनमित्यभिप्रायः । यद्वा-सर्वमपि यदिन्द्रेणोक्तं तत्कषायानुपातीति तद्विपाकानुवर्णनमिदमिति सूत्रार्थः ॥ ५४ ॥

एवं बहुभिरप्युपायैस्तमिन्द्रः क्षोभयितुमशक्तः किमकरोत्?, इत्याह--

अवउज्झिऊण माहण-रूवं च विउव्विऊण इंदत्तं ।
वंदइ अभित्थुणंतो, इमाहि महुराहि वग्गूहिं ॥ ५५ ॥
अहो ! ते निज्जितो कोहो, अहो ! माणो पराजितो ।
अहो ! निरकिया माया, अहो ! लोभो वसीकओ ॥ ५६ ॥
अहो ! ते अज्जवं साहु, अहो ! ते साहु मद्दवं ।
अहो ! ते उत्तमा खंती, अहो ! ते मुत्ति उत्तमा ॥ ५७ ॥

(अवउज्झिऊण त्ति)अपोह्य त्यक्त्वा, ब्राह्मणरूपं विप्रवर्णवेषं, (विउव्विऊणं ति) विकृत्य, इन्द्रत्वमुत्तरवैक्रियरूपमिन्द्रभावं, वन्दतेऽभ्येकार्थत्वात् प्रणमति, अभिष्टुवन्नभिमुखेन स्तुतिं कुर्वन्, इमाभिरनन्तरवक्ष्यमाणाभिः, मधुराभिः श्रुतिसुखाभिः, (वग्गूहि ति)आर्षत्वाद् वाग्भिर्वाणीभिः ॥५५॥ तद्यथा-अहो ! इति विस्मये, (ते त्ति) त्वया,नितरामतिशयेन जितोऽभिभूतो निर्जितः, क्रोधः कोपः, यतस्त्वमनानमत्पार्थिववशीकरणप्रेरणायामपि न क्षुभित इत्यभिप्रायः । तथा अहो ! त्वया मानोऽहमितिप्रत्ययहेतुः, पराजितोऽभिभूतः,यस्त्वं मन्दिरं दह्यत इत्याघुष्टेऽपि कथं मयि जीवतीदमिति नाहङ्कृतिं कृतवानिति ॥५६॥ तथा-(अहो निरकिय त्ति) प्राकृतत्वान्निराकृताऽपास्ता माया, यस्त्वं पुनः रङ्काहेतुप्राकाराट्टालकोच्चूलकाऽऽदिषु निकृतिहेतुकेष्वामोषकोत्सादनाऽऽदिषु च न मनो निहितवान्। तथा-अहो ते लोभो वशीकृत इति नियन्त्रितः,यस्त्वं हिरण्याऽऽदि वर्द्धयित्वा गच्छेति सहेतुकमभिहितोऽपि इच्छाया आकाशस्यमत्वमेवोदाहृतवान्,अत एव अहो!ते तवाऽऽर्जवं विनयवत्त्वं,साधु शोभनम्,अहो ! ते साधु मार्दवं मृदुत्वम्,अहो ! ते उत्तमा प्रधाना क्षान्तिः कोपोपशमलक्षणा, अहो ! ते मुक्तिर्निर्लोभता, उत्तमा; व्यत्ययनिर्देशस्त्वनानुपूर्व्यापि प्ररूपणाक्रमितिकृत्वेति सूत्रार्थः ॥५७॥

इत्थं गुणोपवर्णनद्वारेणाभिष्टुत्य संप्रति फलोपदर्शनद्वारेण प्रस्तुतवक्ष्याह-

इहं सि उत्तमो भंते !, पच्छा होहिसि उत्तमो ।
लोगुत्तमुत्तमं ठाणं, सिद्धिं गच्छसि नीरओ ॥ ५८ ॥

इहास्मिन् जन्मनि,असि भवसि,उत्तमः प्रधानः,उत्तमगुणान्वितत्वात्। (भंते त्ति)पूज्यामिधानम। पश्चात् प्रेत्य परलोके भविष्यस्युत्तमः। कथमित्याह--लोकस्य चतुर्दशरज्ज्वात्मकस्य,उत्तममुपरिवर्ति लोकोत्तमम् । उत्तमं-दर्वलाकोऽऽद्यपेक्षया प्रधानम्। अथवा-(लोगुत्तममुत्तम त्ति)मकारोऽलाक्षणिकः,ततो लोकस्य लोके वा,उत्तमोत्तममतिशयप्रधानं लोकोत्तमम्,तिष्ठन्त्यस्मिन्नातः परं गच्छन्तीति स्थानं, किं तत्?,इत्याह-सिद्धिं मुक्तिं,गच्छसि सूत्रत्वाद् गमिष्यसि, निर्गतो रजसः कर्मणः,इति सूत्रार्थः ॥५८॥

उपसंहारमाह-

एवं अभित्थुणंतो, रायरिसिं उत्तमाए सद्धाए ।
पायाहिणं करेंतो, पुणो पुणो वंदई सक्को ॥ ५९ ॥

एवमनोक्तन्यायेन,अभिष्टुवन् राजर्षिमुक्तरूपं, प्रक्रमाक्षमिम, उत्तमया प्रधानया, श्रद्धया भक्त्या, (पायाहिणं ति) प्रदक्षिणां, कुर्वन् विदधत, पुनः पुनः वन्दते प्रणमति, शक्रः पुरन्दरः, इति सूत्रार्थः ॥५९॥

अनन्तरं च यत् कृतवाँस्तदाह-

तो वंदिऊण पाए, चक्कंकुसलक्खणे मुणिवरस्स ।
आभासेणुप्पइओ, ललियचवलकुंडलतिरीमी ॥ ६० ॥

ततस्तदनन्तरं, पाठान्तरतश्च-(स इति) शक्रः, वन्दित्वा, पादौ चरणौ, चक्रं चाङ्कुशश्च प्रतीतावेव, तत्प्रधानानि लक्षणानि

ययोस्तौ, तथा मुनिवरस्य, नमिनाम्न इति प्रक्रमः । तत आकाशेन नभसा, उदिति ऊर्द्धं-देवलोकाभिमुखं, पतितो गत उत्पतितः, साश्चिते च ते सविलासतया, चपले च चञ्चलतया ललितचपले, तथाविधे कुण्डले करणाऽऽभरणे यस्यासौ ललितचपलकुण्डलः, स चासौ तिरीटी च मुकुटवान्, ललितचपलकुण्डलातिरीटीति सूत्रार्थः ॥ ६० ॥

स एवंविधः स्वयमिन्द्रेणाभिष्टूयमानः किमुत्कर्षं मनस्यासीत्, उत न ?, इत्याह-

नमी नमेइ अप्पाणं, सक्खं सक्केण चोइओ ।
चइऊण गेहं वइदेही, सामण्णे पज्जुवट्ठिए ॥६१॥

नमिर्नमयति भावतः प्रह्वीभवन्तमात्मानं स्वं तथाभावनया विशेषतः प्रगुणयति तत्तच्छिक्षकृतां नयति । तत्कालापेक्षया लट् । कथंभूतः सन् ?, साक्षात् प्रत्यक्षतामुपगम्य, शक्रेणेन्द्रेण, (चोइओ त्ति) प्रेरितः, त्यक्त्वाऽपहाय, गेहं गृहं, (वइदेहि त्ति) सूत्रत्वाद् विदेहा नामा जनपदः, सोऽस्यास्तीति वैदेहः, विदेहजनपदाधिपः, न त्वन्य एव कश्चिदिति भावः। यद्वा-विदेहेषु भवा वैदेही मिथिलापुरी, सुपूज्यतयात्र तां च, त्यक्त्वेति संबन्धनीयम् । श्रामण्ये श्रमणभावे पर्युपस्थिते, उद्यतोऽभूदिति शेषः । यद्वा-नमिर्नमयति संयमं प्रति प्रवणीकरोत्यात्मानम्, कीदृशः ?, शक्रेण प्रेरितः, कथम् ?, साक्षात् स्वयं, न त्वन्यपार्श्वप्रहितसंदेशकाऽऽदिना, श्रामण्ये पर्युपस्थितः, न तु तत्प्रेरणतोऽपि धर्मं प्रति विप्लुतोऽभूदिति भावः । इति सूत्रार्थः ॥६१॥

किमेष एवैवंविधः, उतान्येऽपि ?, इत्याह-

एवं करंति संबुद्धा, पंडिया पवियक्खणा ।
विणियट्टंति भोगेसु, जहा से नमी रायरिसी ।६२। त्ति बेमि।

(एवमिति) यथैतेन नमिना निश्चलत्वं कृतं, तथाऽन्येऽपि कुर्वन्ति, उपलक्षणत्वादकार्षुः, करिष्यन्ति च । न त्वयमेव, निदर्शनतयैवास्योपात्तत्वात् । कीदृशाः पुनरन्येऽप्येवं कुर्वन्ति ?, संबुद्धा मिथ्यात्वापगमतोऽवगतजीवाजीवाऽऽदितत्त्वाः। पण्डिताः सुनिश्चितशास्त्रार्थाः, प्रविचक्षणा अभ्यासातिशयतः क्रियां प्रति प्रावीण्यवन्तः, तथाविधाश्च सन्तः किं विदधति ?, विनिवर्तन्ते विशेषेण तदनासेवनाऽनुपरमन्ति, केभ्यः ?, (भोगेसु त्ति) भोगेभ्यः, किंवत् ?, यथा स नमिर्नमिनामा राजर्षिर्निश्चलो भूत्वा तेभ्यो निवृत्त इति ॥ यद्वा-उपदेशपरमेतद्, यत एवं कुर्वन्ति संबुद्धाः पण्डिताः प्रविचक्षणाः। एवमिति कथम् ?, इत्याह-भोगेभ्यो विनिवर्तन्ते विशेषेणात्यन्तनिश्चलतासङ्क्रमेण, निवर्तन्ते, यथा स नमिनामा राजर्षिः, ततो भवद्भिरप्येवंविधैरित्थमेव विधेयमिति सूत्रार्थः ॥ ६२ ॥ इति ब्रवीमीति पूर्ववच्चयाश्च प्राग्वदिति । उत्त० ९ अ० । सूत्र० । भा० चू० । आव० । अपनजिनसदृशप्रव्रजितस्य कच्छस्य सुते विनमिभ्रातरि, यो हि कुसुमोच्चयेन भगवन्तं प्रसाद्य धरणेन्द्राऽऽदेशाद् विद्याधरर्द्धिसंप्राप्तो वैताढ्ये नगे दक्षिणश्रेण्यां राज्यं चकार । (भा०म०१ अ०१ खण्ड । कल्प० । आ० चू०) ततो विजयप्रवृत्तेन भरतचक्रिणा पराजितो रत्नानि दत्त्वा क्रमयां बभूव । आव० १ अ० । आ० म० । (शत्रुञ्जयेऽस्य प्रतिमाः)"आत्मासिना विनमिना, नमिना च निषेवितः । स्वर्गाऽऽरोहणचैत्ये च, श्रीनाभेयः प्रभासते ॥१॥" ती० १ कल्प । स्वनामके खेचरेन्द्रौ, " अस्मिन्नभिविनम्याख्यौ, खेचरेन्द्रमहाऋषी । कोटिद्वय्या महर्षीणां, साहितौ सिद्धिमीयतुः ॥१॥" ती० १ कल्प । अस्यामवसर्पिण्यां भरतक्षेत्रजे एकविंशे तीर्थकरे, परीषहोपसर्गाऽऽदिनामनाद् "नमेस्तु था" इति विकल्पेनोपान्त्यस्याकाराभावपक्षे नमिः। धर्म० २ अधि० । प्राकृतशैल्या ज्ञानदर्शनचारित्रक्षणान्तरसंभवाच्च "तत्थ सव्वे वि परीसहोवसग्गा णामिया कसाय त्ति सामण्णं, विसेसो पुण-"पणया पंचतनिवा, दंसिअमित्ता जिणम्मि तेण णमी ।" (५१) आव० २ अ० । तथा गर्भस्थे भगवति परचक्रनृपैरपि प्रणतिः कृतेति नमिः । ध० २ अधि० । अनु० । ('तित्थयर' शब्दे सर्वं वक्ष्यते) " नवरं नमीणं अरहा दसवाससहस्साइं सव्वाउयं पालइत्ता सिद्धे० जाव पहीणे । " स्था० १० ठा० । कल्प० । "नमिस्स णं अरहओ एगूणचत्तालीसं आहोहियसया होत्था ।" स० ३९ सम० । "नमिस्स णं अरहओ एगचत्तालीसं अज्जियासाहस्सीओ होत्था।"स० ४० सम० । प्रव० । आ० चू० । अन्तकृद्दशानां प्रथमाऽध्ययनोक्तवक्तव्यताकेऽन्तकृत्साधौ, * स्था० १० ठा० ।

णमिऊण–नत्वा–अव्य० । प्रणम्येत्यर्थे, दश० १ अ० । "णमिऊणऽरहंताणं, सिद्धाणं कम्मचक्कमुक्काणं । " नि० चू० १ उ० । पञ्चा० । पं० सं० ।

णमिपव्वज्जा–नमिप्रव्रज्या–स्त्री० । नमेः प्रव्रज्याऽत्राभिधीयते इति नमिप्रव्रज्या । मिथिलाराजस्य नमेः प्रव्रज्यायां शक्रसंवादरूपे नवमे उत्तराध्ययने, उत्त० ९ अ० । स० । ("णमि" शब्दे चैतद्वक्तव्यतोक्ता)

णमिय–नमित–त्रि० । नम्रे, जी० ३ प्रति० । " कुसुमफलभारनमियसाला ।" जी० ३ प्रति० । नीचैर्भावं प्रापिते, जं० १ वक्ष० । नत्वा–अव्य० । प्रणम्येत्यर्थे, कर्म० ४ कर्म० ।

णमियणमिय–नमितनमित–त्रि० । देवर्षिवन्दिते, पं० सू० १ सूत्र ।

णमिसाहु–नमिसाधु–पुं० । धारापद्मपुरीयगच्छीयश्रीशान्तिभद्रसूरिशिष्ये, अनेन रुद्रटरचितकाव्यालङ्कारग्रन्थोपरि टिप्पणं कृतम् । अयं च ११२५ वि० वर्षे विद्यमान आसीत् । जै० इ० ।

णमुदय–नमुदय–पुं० । आजीविकोपासकभेदे, भ० ७ श० १० उ० ।

णमोक्कार–नमस्कार–पुं० नमस्करणं नमस्कारः। नमस्-कृ-घञ् । "नमस्कारपरस्परे द्वितीयस्य" ॥ ८ । १ । ६२ ॥ अनयोर्द्वितीयस्यात ओत्वम्, इत्योत्वमतः । प्रा० १ पाद । " एकस्कयोर्नो-मि " ॥ ८ । २ । ४ ॥ इति नाम्नीति निर्देशात्र स्वः । प्रा० २ पाद । अञ्जलिबन्धशिरोनमनाऽऽदिलक्षणे प्रणाममात्रे, कायेन प्रणमने, आ० १ अ० १ अ० ध० । अर्हदादिप्रणतौ, विशे० सङ्घ० ।

(१) नमस्कारस्य व्याख्यानं चोत्पन्नाऽऽद्यनुयोगद्वारैर्विधेयम्, तानि चामूनि-

उप्पत्ती निक्खेवो, पयं पयत्थो परूवणा वत्थुं ।
अक्खेव पसिद्धि कमो, पओयण फलं नमोक्कारो ।२८०५।

उत्पदनमुत्पत्तिः-प्रसूतिः, सा चास्य नमस्कारस्य नयानुसारेण चिन्त्या । तथा-निक्षेपणं निक्षेपो न्यासः, स चास्य कार्यः । पद्यते गम्यतेऽर्थोऽनेनेति पदं नामिकाऽऽदि, तच्चेह चिन्तनीयम् । पदस्यार्थः पदार्थः, स चास्य वक्तव्यः । प्रकृष्टा रूपणा प्ररूपणा,

* परमरहस्यान्तकृद्दशासु नामापि न श्रूयते ।

सा चास्य द्विविधाऽऽदिभेदतो विधेया । वस्त्यस्मिन् गुणा इति वस्तु, तच्च नमस्कारार्हं वाच्यम् । आक्षेपणमाक्षेपः पूर्वपक्षो वाच्यः। प्रसिद्धिस्तत्परिहाररूपा वक्तव्या । क्रमोऽर्हदादिरभिधेयः। प्रयोजनमर्हदादिक्रमस्य कारणं वाच्यम् । अथवा-येन प्रयुक्तः प्रवर्त्तते तन्नमस्कारस्य प्रयोजनमपवर्गाऽऽख्यं वाच्यम् । तथा-फलं च नमस्करणाऽऽदिक्रियाऽनन्तरभावि स्वर्गाऽऽदिकं निरूपणीयम् । अन्ये तु व्यत्ययेन प्रयोजनफलयोरयं प्रतिपादयन्ति-(नमोक्कारो त्ति) नमस्कारः खल्वेभिर्द्वारैरिन्तनीयः । इति निर्युक्तिगाथासंक्षेपार्थः ॥ २८०५ ॥

(२) अथ निर्युक्तिकार एवोत्पत्तिद्वारं विस्तरेणाऽऽह-

उप्पन्नाऽणुप्पण्णो, इत्थ नया णेगमस्सऽणुप्पण्णो ।
सेसाणं उप्पण्णो, जइ कत्तो तिविहसामित्ता ॥२८०६॥

उत्पन्नश्चासावनुत्पन्नश्चेत्युत्पन्नानुत्पन्नो नमस्कारो मन्तव्यः । आह-कथमेक एवोत्पन्नोऽनुत्पन्नश्च भवति, विरोधाद् ?; इत्याह-(इत्थ इत्यादि) अत्र नयाः प्रवर्तन्ते । ते च नैगमाऽऽद्यः सप्त । नैगमो द्विविधः-सर्वसंग्राही, देशसंग्राही च । तत्राऽऽदिनैगमस्य सामान्यमात्रावलम्बित्वात्, तस्य चोत्पादव्ययरहितत्वाद् नमस्कारस्यापि तदन्तर्गतत्वादनुत्पन्नः । (सेसाणं उप्पण्णो त्ति) शेषा विशेषग्राहिणः, तेषां शेषाणां विशेषग्राहित्वात्, तस्य चोत्पादव्ययवत्त्वाद्, उत्पादव्ययशून्यस्य वान्धेयाऽऽदिवदवस्तुत्वात्, नमस्कारस्य तु वस्तुत्वादुत्पन्न इति । (जइ कत्तो त्ति) यद्युत्पन्नः, कुतः ?; इत्याह-(तिविहसामित्ता) त्रिविधं च तत्स्वामित्वं चेति समासः । तस्मात्त्रिविधस्वामित्वात् त्रिविधस्वामिभावात्त्रिविधकारणादित्यर्थः ॥ २८०६ ॥

तदेव त्रिविधस्वामित्वं दर्शयति-

समुट्ठाणवायणाल-द्धिओ य पढमे नयत्तिए तिविहं ।
उज्जुसुयपढमवज्जं, सेसनया लद्धिमिच्छंति ॥ २८०७ ॥

(समुट्ठाणेत्यादि) समुत्थानतः, वाचनातः, लब्धितश्च । ' नमस्कार उत्पद्यते ' इति वाक्यशेषः । तत्र सम्यक् सकृतं वोत्तिष्ठतेऽस्मादिति समुत्थानम्, निमित्तमित्यर्थः । किं पुनस्तदिह ?, इति । उच्यते-अन्यस्याश्रुतत्वात्, तदाधारतया प्रत्यासन्नत्वाद्देहोऽत्र परिगृह्यते; देहो हि नमस्कारकारणम्, तद्भावभावित्वाद्, बीजवदङ्कुरस्य, इत्येवं देहलक्षणात् समुत्थानाद् नमस्कार उत्पद्यते । तथा-वचनं वाचना गुरुभ्यः श्रवणमधिगम इत्यर्थः, तस्याश्च वाचनायाः सकाशाद् नमस्कारो जायते । तथा-लब्धिस्तदावरणक्षयोपशमलक्षणा, तस्याश्चायमुपजायते । इत्येतत्त्रिविधं कारणं, प्रथमे नैगमसंग्रहव्यवहारलक्षणे त्रिके, नैगमाऽऽदिनयत्रयमतेनावगन्तव्यमित्यर्थः । तथा-ऋजुसूत्रस्य प्रथमवर्जं वाचनालब्धिद्वयं नमस्कारस्य कारणम्, तच्छून्यस्य जन्तोर्देहमात्रसद्भावेऽपि नमस्काराऽऽख्यकार्योत्पत्तिव्यभिचारात् । शेषनयास्तु शब्दाऽऽदयो लब्धिमेवैकां नमस्कारकारणत्वेनेच्छन्ति, वाचनाया अपि लब्धिशून्येष्वभव्याऽऽदिषु नमस्काराजनकत्वात्, लब्धियुक्तेषु तु प्रत्येकबुद्धाऽऽदिषु तदभावेऽपि तत्सद्भावतो व्यभिचारित्वात् । इति निर्युक्तिगाथाद्वयार्थः ॥ २८०७ ॥

" उप्पण्णाऽणुप्पण्णो " (२८०६) इत्यत्र प्राच्यम्-

सत्तामेत्तग्गाही, जेणाऽऽइम-नेगमो तओ तस्स ।
उप्पज्जइ नाजुयं, जुयं न य नासए वत्थुं ॥ २८०८ ॥

येन यस्मात्कारणात्, आद्यनैगमः सत्तामात्रग्राही, ततस्तस्याऽऽद्यनैगमस्य मतेन सर्वं वस्तु माभूतं नाऽविद्यमानं, किं तु सर्वदैव सर्वं सदेव । ततः किम् ?, इत्याह-(उप्पज्जइ न) इत्येवमिहापि नञ् संबध्यते, आवृत्तिव्याख्यानात् । इदमुक्तं भवति-यत्सर्वदैव सत्, तन्नोत्पद्यते । यथा-नभः, तस्याप्युत्पादाभ्युपगम उत्पन्नस्याप्युत्पादप्रसङ्गेनानवस्थाप्राप्तेः । तथा-यद् भूतं विद्यमानं सर्वदैव सद्वस्तु, तन्न नश्यति, सर्वथा सर्वदैव सतो विनाशायोगादिति ॥ २८०८ ॥

तो तस्स नमोक्कारो, वत्युत्तणओ नहं व सो निच्चो ।
संतं पि न तं सव्वो, मुणइ सरूवं व वरणाओ ॥२८०९॥

यत एवम्, ततस्तस्याऽऽद्यनैगमस्य, स नमस्कारो नित्य एव, वस्तुत्वात्, नभोवत्, नोत्पद्यते, नाऽपि विनश्यतीत्यर्थः । अत एवैतन्मतेनानुत्पन्नोऽसावभिधीयते । आह-ननु यदि नमस्कारः सर्वदैव संस्तदा मिथ्यादृष्ट्यवस्थायां किमित्यसौ न लक्ष्यते ?, इत्याह--(संतं पीत्यादि) सर्वावस्थासु सन्तमपि नमस्कारमतिशयज्ञानिनं विहाय न सर्वोऽपि ' मुणति ' जानातीति प्रतिज्ञा । (वरणाओ त्ति) आवरणकर्मसद्भावादिति हेतुः, आत्मनः स्वरूपवदिति दृष्टान्तः । इदमुक्तं भवति-मिथ्यादृष्ट्यवस्थायामपि द्रव्यरूपतया नमस्कारोऽस्ति । सर्वथाऽसतः खरविषाणस्येव पश्चादप्युत्पादायोगात्, केवलं ज्ञानाऽऽवरणेनाऽऽवृतत्वाद् छद्मस्थजन्तवस्तद्रूपतया सन्तमपि तं नमस्कारं न लक्षयन्ति,यथाऽऽत्मनः स्वरूपम् । न हि आत्मनः स्वरूपं नास्ति, केवलममूर्तत्वात् सर्वदा सदपि तत्केवलिनं विहाय न कोऽपि लक्षयति । एवं नमस्कारोऽपि । इयतः सर्वदैव सत्त्वादसावादिनैगमाभिप्रायेणानुत्पन्न उच्यत इति ॥२८०९॥

" सेसाणं उप्पण्णो " [२८०६] इत्येतद् गाथावयवं व्याचिख्यासुराह-

सेसमयं नत्थि तओ-ऽणुप्पायविणासओ खपुप्फं व ।
जमिहऽत्थि तऽणुप्पाय-व्वयधुवधम्मं जहा कुंभो ।२८१०।

शेषाणां विशेषवादिनयानाम्,एतन्मतम्-तत्कोऽसौ परान्निमतो नमस्कारो नास्ति, इति प्रतिज्ञा । अनुत्पादविनाशाद्-उत्पादविनाशाभावादिति हेतुः । खपुष्पवदिति दृष्टान्तः । इह यदस्ति तत्सर्वमुत्पादव्ययध्रुवधर्मकम्, यथा कुम्भः; यस्य पुनरुत्पादाऽऽदयो न सन्ति, तत्सदपि न भवति; यथा खरविषाणम्, उत्पाद-विनाशशून्यश्च परैर्नमस्कारोऽभ्युपगम्यते; ततो नास्त्यसावपि ॥ २८१० ॥

यदुक्तम्-आवरणात्सतोऽप्यस्याग्रहणम्, तत्राऽऽह-

आवरणादग्गणं, नाभावाउ त्ति तत्थ को हेऊ ? ।
नत्तीएँ नमोक्कारो,कहमत्थि य सा नयग्गहणं ?।२८११।

नन्वावरणाद् ज्ञानाऽऽवरणोदयात् सन्नपि नमस्कारः सर्वेण न गृह्यते, न पुनरभावादित्यत्र को हेतुः-किं नियामकम् ?, न किञ्चिदित्यर्थः । अन्नाभावादेवायं सर्वेण सर्वदा न गृह्यते, न पुनरावरणोदयादिति शेषनयाभिप्रायः । किञ्च-तीर्थकराऽऽदिषु भक्तिर्नमस्कारोऽभिधीयते, सा च सर्वदाऽस्ति, न च मिथ्यादृष्ट्यवस्थायां गृह्यत इति परस्परव्याहतमिदम् । तस्मादुत्पन्नोऽसौ गृह्यते, अनुत्पन्नस्तु न गृह्यते, इत्येतदेव सुन्दरम्, किमावरणाऽऽदिकल्पनया ?; इत्यभिप्रायः ॥ २८११ ॥

अथाऽऽद्यनैगमनयमतमाशङ्क्य परिहरन्नाह-

अह परसंतो त्ति तओ, संतो किं नाम कस्स नासंतं ?।
अहणाऽऽइव्ववएसो, नेवं न य परधणाफलया ॥२८१२॥

अथैवं ब्रूषे-(परसंतो त्ति तओ संतो त्ति) परसन्ताने सर्वदैवास्ति नमस्कारः, नानाजीवेषु तस्य सर्वकालमव्यवच्छेदात्। योऽयमत्र नोपलक्ष्यते, तत्राप्यसौ [संतो त्ति] सन्नुच्यते। अत्रोत्तरमाह-[किं नाम कस्स नासंतं ? ति] यदि हि अन्यसन्तानवर्त्यपि वस्त्वन्यस्य सदुच्यते, तर्हि किं नाम वस्तु धनाऽऽदिकं कस्य नासद् ?, अपि तु सर्वं सर्वस्यासत्प्राप्नोति। अस्य चोपलक्षणत्वात्-' इत्थं सर्वं सर्वस्य सत्प्राप्नोति ' इत्यपि द्रष्टव्यम्। ततश्चैवम्-ईश्वरधनेन दरिद्राणामधनानामपि धनवत्त्वाद्धनव्यपदेशः कस्यापि न स्यात्। न चेत्थं परधनस्याफलता भवेत्, अन्यधनस्यान्यत्रापि सत्त्वात्, तथा च तत्फलस्यापि सङ्क्रामादिति ॥२८१२॥

ततः किं भवेद् ?, इत्याह—

सव्वधणं सामन्नं, पावइ भत्तीफलं व सेसं च।
किरियाफलमेवं चा-ऽकयागमो कयविणासो य ॥२८१३॥

एवं सति यदेकस्येश्वरस्य संबन्धि तत्सर्वेषां दरिद्राणामपि धनं सामान्यं साधारणं प्राप्नोति। यद्वा-यदेकस्य नमस्कारवतोऽर्हदादिभक्तिफलं, तन्मिथ्यादृशामपि नमस्कारशून्यानां सामान्यं प्राप्नोति; तथा शेषं च यद्दान-ध्याना-हिंसा-ऽमृषावादाऽऽदिक्रियाफलं, तत्सर्वेषां सामान्यं प्राप्नोति। एवं च सत्यकृतस्यापि पुण्य-पाप-सुखदुःखाऽऽदेरागमः, कृतस्यापि च पुण्यपापाऽऽदेर्विनाशः स्यादिति ॥ २८१३ ॥

पुनरपि नैगममतमाशङ्क्य परिजिहीर्षवः शेषनयाः प्राऽऽहुः-

अह नत्थिमंतसंता-णओ स निच्चो त्ति कहमणुप्पन्नो ?।
नणु संताणित्तणओ, स होइ बीयंकुराइ व ॥२८१४॥

अथानुत्पन्ननमस्कारवादिन् ! एवं ब्रूषे-भक्तिमतां सम्यग्दृष्टीनां यः सन्तानः प्रवाहः, तस्मात् तमाश्रित्य, नित्यो नमस्कारः। सम्यग्दृष्टीनां हि सन्तानो न कदाचिद् व्यवच्छिद्यते। अव्यवच्छिन्नत्वाच्च नित्योऽसौ, यच्च नित्यं तदाकाशवदुत्पद्यते। ततः किलानुत्पन्नो नमस्कार इति परस्याऽऽकूतम्। अत्रोत्तरमाह-(कहमणुप्पन्नो त्ति) नन्वेवमपि कथमनुत्पन्नो नमस्कारः ?, न कथञ्चिदित्यर्थः। कुतः ?, इत्याह-(नणु इत्यादि) ननु यद्यपि सम्यग्दृष्टीनां सन्तानो नित्यः, तथाऽपि सम्यग्दृष्टयः सन्तानिनो नित्या एव, मनुष्याऽऽदिभावेन तेषामुत्पादविनाशादिति। सम्यग्दृष्ट्यव्यतिरेकाच्च नमस्कारोऽपि सन्तानी, सन्तानित्वाच्च (स होइ त्ति) स नमस्कारो नवस्युत्पद्यते, बीजाङ्कुराऽऽदिसन्तानिवदिति। इह यः सन्तानी स उत्पद्यते, यथा बीजाङ्कुराऽऽदिः, सम्यग्दृष्टिसन्तान्यव्यतिरेकात्, सन्तानी च नमस्कार इति उत्पद्यत एव। ततः कथमनुत्पन्नोऽसौ ?, इति ॥ २८१४ ॥

किञ्च—

होज्जाहि नमोक्कारो, नाणं सद्दो व कायकिरिया वा।
अहवा तस्संजोगो, न सव्वहा सो अणुप्पत्ती ॥२८१५॥

नमस्कारो हि ज्ञानं वा भवेत्, " नमो अरिहंताणं " इत्यादिशब्दो वा, शिरोनमनकरकुड्मलभ्रूनर्तनविचेष्टितावयवसंकोचनाऽऽदिलक्षणा कायक्रिया वा, द्विकाऽऽदिको वा ज्ञानाऽऽदिसंयोगो भवेदिति चत्वारः पक्षाः। किञ्चातः ?, इत्याह-(न सव्वहा सो अणुप्पत्ति त्ति) सर्वथा सर्वैरपि प्रकारैर्नायमनुत्पन्नोऽनुत्पन्नो घटत इत्यर्थः। ज्ञानाऽऽदीनां चतुर्णामप्युत्पादाऽऽदिधर्मकत्वादिति ॥ २८१५ ॥

अथ नैगमः प्राऽऽह-ननु ज्ञानाऽऽदीनामुत्पादाऽऽदिधर्मकत्वमसिद्धं, नित्यत्वाद्, आकाशवत्। तत्र ज्ञानस्य तावन्नित्यत्वं साधयन्नाह-

नणु जीवाओऽणन्नं, नाणं निच्चो य सो तओ तं पि।
निच्चुग्घामो य सुए, जमक्खराणंतभागो त्ति ॥२८१६॥

ननु जीवादनन्यदभिन्नं ज्ञानं, नित्यश्चासौ जीवः, ततस्तदव्यतिरेकात्तदपि, 'नित्यम्' इति शेषः। ततो नोत्पादाऽऽदिधर्मकं ज्ञानम्, नित्यत्वात्, नभोवदिति भावः। एवमुत्तरत्रापि भावार्थो वक्तव्यः। किञ्च-"सव्वजीवाणं पि य णं अक्खरस्स अणंतभागो निच्चुग्घाडियओ " इति वचनाद् न क्वचिदपि न विनश्यतीत्यक्षरं केवलज्ञानम्, तस्यानन्तभागो नित्योद्घाटो नित्यावस्थितोऽनावृत एव सर्वदा तिष्ठतीति यदस्माच्छ्रुतेऽभिहितम्, तस्माच्च नित्यं ज्ञानं, नित्यानावृतत्वाद्, नभोवदिति ॥ २८१६ ॥

अहवा अरूवगुणओ, नाणं निच्चं नहावगाहो व्व।
खयणप्पयासपरिणा-मओ य सव्वं जहा भणइ ॥२८१७॥

अथवा-नित्यं ज्ञानम्, अरूपद्रव्यगुणत्वाद्, यथा नभोऽरूपद्रव्यस्यावगाहगुणः। अथवा-सर्वमपि ज्ञानशब्दाऽऽदिकं नित्यं, क्षयनप्रकाशपरिणामत्वात्, तिरोभावाऽऽविर्भावधर्मकत्वादित्यर्थः, यथा परमाणव इति ॥ २८१७ ॥

अथ विशेषतोऽपि शब्दस्य नित्यत्वं साधयन्नाह-

दरिसणपरत्थयाओ, अइंदियत्थत्तओऽणवत्थाओ।
संबंधनिच्चयाओ, सद्दावत्थाणमणुमेअं ॥ २८१८ ॥

इह शब्दस्यावस्थानं सदाऽवस्थितत्वं नित्यत्वमनुमेयं साध्यम्। (दरिसणपरत्थयाओ त्ति) दर्शनं प्रकटनं शब्दस्योच्चारणं व्यापारणं प्रयोग इति यावत्, तस्य दर्शनस्य शब्दप्रयोगस्य परार्थत्वं परप्रत्यायकत्वं, तस्माद्दर्शनपरार्थत्वादिति हेतुः। इदमुक्तं भवति-न खलु वक्तृभिः शब्दोत्पादनमात्रार्थमेव शब्दप्रयोगः क्रियते, किं तु परार्थत्वात् परप्रत्यायननिमित्तत्वादिति; यच्च परार्थं व्यापार्यते तत् तदव्यापारकालात् प्रागप्यस्ति, यथा-वृक्षाऽऽदिच्छेदनक्रियानिमित्तं व्यापार्यमाणः कुठारः छेदनक्रियाव्यापारकालात्प्रागप्यस्ति; ततः शब्दः सदाऽऽवस्थितत्वान्नित्यः सिद्धः।

अत्रैव द्वितीयं हेतुमाह-(अइंदियत्थत्तओ त्ति) अतीन्द्रिया मेरुस्वर्गाऽऽदयोऽर्था अभिधेयत्वेन यस्यासावतीन्द्रियार्थः, तद्भावोऽतीन्द्रियार्थत्वं, तस्मादतीन्द्रियार्थत्वाच्छब्दः, केवलज्ञानवत्। इदमुक्तं भवति-ये इन्द्रियग्राह्या घटाऽऽदयोऽर्थाः, तेषु संकेतवशात्कृतक एव किल वाच्यवाचकत्वसंबन्धः, अतस्तस्माच्छब्दस्य नित्यत्वं न सिध्यति; ये त्वतीन्द्रिया मेरुस्वर्गाऽऽदयोऽर्थाः, तेषामतीन्द्रियत्वेनैव किल संकेतः कर्तुं न शक्यते, अतोऽनादिकालसंसिद्धोऽकृतक एव शब्दस्य तेषु वाच्यवाचकभावसंबन्धः। अतोऽतीन्द्रियार्थैः सहानादिकालसंसिद्धत्वादकृतकत्वेन नित्याद्

वाच्यवाचकभावसंबन्धात्सिद्धं किलशब्दस्य नित्यत्वम् । न हि स्वयमनित्यस्यानादिकालसंसिद्धैर्नित्यैर्मेर्वादिभिरर्थैः सह वाच्यवाचकभावसंबन्धः सिद्धयतीति भावः । तर्हि घटाऽऽदिवाचकशब्दानां कथं नित्यत्वं सिध्यति ?, इति चेत्। उच्यते-मेर्वादिवाचकशब्दानां नित्यत्वे सिद्धे तेषामपि तत्साध्यते; तद्यथा-नित्या घटाऽऽदिवाचकशब्दाः, शब्दत्वाद्, मेर्वादिशब्दवदिति ।

अत्रैव तृतीयहेतुमाह-(अणवत्थाओ त्ति) अयं च विपर्यये बाधक एव हेतुः । मूलहेतुस्त्वित्थं द्रष्टव्यः-नित्याः सर्वेऽपि घटाऽऽदिवाचकाः शब्दाः, अनादिसङ्केतत्वात् तद्वाचकत्वेन मेर्वादिवत् सिद्धत्वाद्, इह यदनादिकालसिद्धं तत्तथेष्टम्, यथा चन्द्रार्कविमानाऽऽदयः, अनादिकालसिद्धाश्च घटाऽऽदिवाचकशब्दाः, तस्मान्नित्या इति । ननु साङ्केतिका एव घटाऽऽदिवाचकशब्दास्ततोऽसिद्धमेषामनादिकालसिद्धत्वमिति चेत् । तदयुक्तम् । सङ्केतस्य कर्तुमशक्यत्वात् । कुतः ?, इत्याह-अनवस्थातः, अनवस्थाप्रसङ्गोऽत्र बाधकं प्रमाणमित्यर्थः । तथाहि-येन शब्देन सङ्केतः क्रियते, तत्रापि सङ्केतकारकं शब्दान्तरमपेक्षणीयम्, तत्राप्यन्यत्, पुनस्तत्राप्यपरमिति, एवमनवस्थाप्रसङ्गतोऽशक्यं सङ्केतकरणम् । अथ पर्यन्ते कश्चिदकृतसङ्केतोऽपि ध्वनिरिष्यते, तर्हि प्राक्तना अपि सर्वे ध्वनयोऽकृतसङ्केताः, शब्दत्वात्, पर्यन्तध्वनिवत्, इत्यसाङ्केतिकत्वात्सिद्धं घटाऽऽदिवाचकशब्दानामनादिकालसिद्धत्वमिति ।

चतुर्थ हेतुमाह-(संबंधनिच्चयाओ त्ति) नित्याः शब्दाः, उक्तन्यायेन तस्य घटाऽऽदिभिः सह वाच्यवाचकभावसंबन्धस्य नित्यत्वात्; तस्यानित्यत्वे वाच्यवाचकभावसंबन्धनित्यत्वानुपपत्तेरिति । इत्थं च ज्ञानाऽऽदीनां नित्यत्वे सिद्धे सिद्धोऽनुत्पन्नस्तदात्मको नमस्कार इत्याद्यनैगमाभिप्राय इति ॥२८१७॥

अथ शेषनया एतैरेव जीवानन्यत्वाऽऽदिहेतुभिर्ज्ञानाऽऽदीनामनित्यत्वं साधयन्ति-

जेणं चिय जीवाओ-ऽणन्नं तेणेव नाणमुप्पाइ ।
उप्पज्जइ जं जीवो, बहुहा देवाऽऽइभावेण ॥ २८१९ ॥

येनैव कारणेन जीवादनन्यदभिन्नं ज्ञानं, तेनैव तदुत्पद्यते, यस्मात्, बहुधा जीवो देवाऽऽदिभावेनोत्पद्यते, तदुत्पादे च ज्ञानस्याप्युत्पादादिति ॥ २८१९ ॥

यदुक्तम्-"निच्चुग्घाडो य सुए"(२८१६) इति तत्राऽऽह-

अविसिट्ठऽक्खरभागो,सुत्तेऽभिहिओ न सम्मनाणं ति ।
कोऽवसरो तस्स इहं, सम्मनाणाहिगारम्मि ? ॥२८२०॥

अक्षरस्य योऽनन्ततमो भागो नित्योद्घाटः श्रुतेऽभिहितः, सोऽविशिष्ट एव सम्यग्मिथ्याविशेषरहित एवोक्तः,न तु सम्यग्ज्ञानरूपः । ततः सम्यग्ज्ञानविचारेऽत्र प्रस्तुते कस्तस्याधिकारः ? । इदमुक्तं भवति—यद्यविशिष्टज्ञानरूपोऽक्षरानन्तभागो नित्योद्घाटत्वेन नित्यः, तर्हि नमस्काररूपस्य सम्यग्ज्ञानस्य नित्यत्वे किमायातम् ?, अतो यत्किञ्चिदेतदिति ॥ २८२० ॥

यदुक्तम्-" अहवा अरूवगुणओ नाणं निच्चं " (२८१७) इत्यादि तत्राऽऽह-

अवगाहणाऽऽइओ नणु, गुणत्तओ चेव पत्तधम्म व्व ।
उप्पायाऽऽइसहावा, तह जीवगुणा वि को दोसो ? ॥२८२१॥

नन्ववगाहनाऽऽदय उत्पादाऽऽदिधर्मका एव,गुणत्वात्,पत्रवीलताऽऽदिगुणवद्;एवं जीवगुणा अपि नमस्काराऽऽदय उत्पादाऽऽदिधर्मका एव, गुणत्वात्, पत्रधर्मवत्, इत्यपि त्वदुक्तविपरीतं ब्रुवतां को दोषः ?, न कश्चिदिति ॥२८२१॥

किञ्च-

अवगाढारं च विणा, कुओऽवगाहो त्ति तेण संजोगो ?।
उप्पाई सोऽवस्सं, गच्चुवगाराऽऽदओ चेवं ॥ २८२२ ॥

अवगाढारं चावगाहकं जीव-परमाणवादिकं विना विचार्यमाणः कुतोऽन्योऽवगाह इति वक्तव्यम् ? । तेनावगाहेन नभसा सहावगाहकस्य जीवाऽऽदेः, तेन चावगाहकेन जीवाऽऽदिना सहावगाह्यस्य नभसः संयोगोऽवगाह इति चेत् । ननु यद्येवं, जितमस्माभिः, यतोऽवश्यमुत्पादी असौ, संयोगत्वात्, छ्यङ्गुलाऽऽदिसंयोगवदिति । एवं गतेरुपकारो गत्युपकारः, स आदियेषां स्थित्युपकाराऽऽदीनां ते गत्युपकाराऽऽदयो धर्मास्तिकायाऽऽदिगुणाः, तेऽप्येवमेवोत्पादवन्तो द्रष्टव्याः, गुणत्वाद्, अवगाहगुणवदिति ॥ २८२२ ॥

अपि च, आकाशपरमाणवादिदृष्टान्ततो नयता नित्यत्वं साध्यते, तच्चाऽऽकाशाऽऽदीनां नित्यत्वमस्माकमसिद्धम्; कुतः ?, इत्याह-

न य पज्जवओ भिन्नं, दव्वमिहेगंतओ जओ तेण ।
तन्नासम्मि कहं वा, नहाऽऽइओ सव्वहा निच्चा ? ॥२८२३॥

न च पर्यायाद् घटाऽऽदिसंयोगवर्णगन्धाऽऽदेः सकाशाद्,यतो यस्माद्,द्रव्यमेकान्ततो भिन्नम्, किन्त्वभिन्नमपि तत्तथाऽऽदिष्यते, तेन तस्मात्कारणात्,तथाहि पर्यायविनाशे, कथं वा केन वा प्रकारेण, नभःवरमाणवादयः सर्वथा नित्याः ? । कथञ्चिद्यदि नित्या भवन्ति, तर्हि भवन्तु । वस्तु सर्वथा नित्यत्वं, तत्तेषां न घटते, पर्यायविनाशे तद्रूपतया तेषामपि विनाशादिति भावः । तत एकान्तनित्यत्वे साध्ये नैतेषां दृष्टान्तत्वं युक्तमिति ॥२८२३॥

यदुक्तम्-"दरिसणपरत्थयाओ " (२८१५) इत्यादि, तत्र दूषणातिदेशमाह-

निच्चत्तसाहणाणि य, सद्दस्सासिद्धयाऽऽइदुट्ठाइं ।
संजवओ वच्चाई, पक्खोदाहरणदोसा य ॥ २८२४ ॥

दर्शनपरार्थत्वाऽऽदीनि शब्दस्य नित्यत्वसाधनानि यानि उक्तानि,तानि न्यायमार्गानुसारिभिः स्वबुद्धेरेवाभ्यूह्य यथासंभवमसिद्धताऽऽदिदोषदुष्टानि वाच्यानि । तथाहि-दर्शनपरार्थत्वादित्यसिद्धो हेतुः, स्वावबोधार्थमपि क्वचिच्छब्दप्रयोगदर्शनात्; तथाऽनैकान्तिकश्च, विपर्यये बाधकप्रमाणाभावात् । विरुद्धो वा, प्रयोगानन्तरमेव विशरारुत्वदर्शनात्; कृतकत्वाद्वा शब्देऽनित्यत्वस्यैव दर्शनात् । इत्यादिदूषणानि सर्वत्राभ्यूह्य वक्तव्यानि । तथा-पक्षोदाहरणदोषाश्च वाच्याः, वयं तु साक्षान्न ब्रूमः, ग्रन्थविस्तरभयात् । तत्र प्रत्यक्षाऽऽदिबाधितः पक्षः, साध्यसाधनविकलमुदाहरणम् । इत्यादिदोषाः स्वयमेव द्रष्टव्या इति ॥ २८२४ ॥

तदेवं नैगमोक्तं दूषयित्वा स्वपक्षसिध्यर्थं शेषनयाः प्राऽऽहुः-

धणिरुप्पाई इंदिय-गज्झत्ताओ पयत्तजत्ताओ ।
पुग्गलसंचूईओ, पच्चयभेए य नेयाओ ॥ २८२५ ॥
उप्पाइ नाणमिटुं, निमित्तसव्वावओ जहा कुंभो ।
तह सद्दकायकिरिया,तस्संजोगो य सोऽनिच्चओ ।२८२६।

उत्पद्यत इत्युत्पादी ध्वनिरिति प्रतिज्ञा, इन्द्रियग्राह्यत्वात्, घटवदिति । तथा-प्रयत्नाज्जायत इति प्रयत्नजः, तद्भावः प्रयत्नजत्वं, तस्मात्प्रयत्नजत्वात् । तथा-पुद्गलेभ्यः संभूतेः । तथा-ताल्वादिप्रत्ययभेदभेदित्वादुत्पादी शब्दः घटवदिति सर्वत्र द्रष्टव्यम् । यश्चोत्पादी स विनाशित्वादनित्य इति सिद्धमेवेति ॥२८२५॥ तथा-उत्पादि ज्ञानं नमस्कारज्ञानमिष्टमिति प्रतिज्ञा, निमित्तसद्भावादिति हेतुः, जिनाऽऽदिविषयाज्जायमानत्वादित्यर्थः । यथा कुम्भ इति दृष्टान्तः । न केवलं ज्ञानं, तथा शब्दशिरोनमनाऽऽदिका कायक्रिया, तेषां च ज्ञानाऽऽदीनां यो द्विकाऽऽदिसंयोगो नित्यत्वेनाभिमतः परस्य, एतत्सर्वमुत्पादि, निजनिजनिमित्ताज्जायमानत्वात्, यथा कुम्भः । ततो ज्ञानाऽऽद्यात्मको नमस्कार उत्पन्न इति सिद्धम् । तदेवं "सेसाणं उप्पण्णो" (२८०६) इति व्याख्यातम् ॥ २८२६ ॥

" जइ कत्तो तिविहस्सामित्ता ?" (२८०६) इत्येतद् व्याचिख्यासुराह-

उप्पत्तिमओऽवस्सं, निमित्तमस्स उ णयत्तियं तिविहं ।
इच्छइ णिमित्तमेत्तो, जमण्णहा नत्थि संभूई ॥२८२७॥

यदि नामोत्पन्नो नमस्कारस्ततः किम् ?। अत्रोच्यते-उत्पत्तिमतश्च वस्तुनोऽवश्यं निमित्तम्, 'अस्ति' इति क्रियाऽध्याहारः । तथा च-सत्यस्य नमस्कारस्योत्पत्तिमत्त्वादविशुद्धनैगमसंग्रहव्यवहारलक्षणं प्रथमनयत्रिकं समुत्थान-वाचनालब्धिस्वरूपं त्रिविधं निमित्तमिच्छति । कुतः ?, इत्याह-(एत्तो इत्यादि) यस्मादेतस्त्रिविधाद् निमित्तादन्यथाऽन्येन प्रकारेण नमस्कारस्य नास्ति संभूतिरुत्पत्तिरिति ॥ २८२७ ॥

तत्र समुत्थानलक्षणं निमित्तं व्याचिख्यासुराह-

देहसमुत्थाणं चिय, हेऊ भवपच्चयावहिस्सेव ।
पुव्वुप्पन्नस्स वि से, इहभवभावो समुत्थाणं ॥२८२८॥

सम्यक् सकृत् वा उत्तिष्ठति जायतेऽस्मादिति समुत्थानम्, देह एव समुत्थानं, तदेव तावद्धेतुर्निमित्तम्, 'से' तस्य नमस्कारस्य । आह-यदाऽयमन्यभव एव स्वाऽऽवरणक्षयादुत्पन्नः स्यात्तदा कथमयं देहो हेतुः ?, इत्याशङ्क्याऽऽह-(पुव्वुप्पन्नस्स वि से इहभवभावो समुत्थाणं ति) प्राग्भवे उत्पन्नस्यापि नमस्कारस्येहभवनाव इहभवशरीरं समुत्थानं कारणं भवति, एतद्भावभावित्वात्तस्य । दृष्टान्तमाह-(भवपच्चयावहिस्सेव त्ति) यथा हि भवप्रत्ययोऽवधिस्तीर्थकराऽऽदिसंबन्धी प्रागुत्पन्नोऽप्येतद्भवशरीरमन्तरेण न भवति । ततश्चेहभवशरीरं तस्य समुत्थानमेवं नमस्कारस्यापीति । एतदुक्तं भवति-यथा पूर्वोत्पन्ना अपि घटाऽऽदयो दीपेनाभिव्यज्यन्ते, तथा पूर्वोत्पन्नोऽपि नमस्कार इहभवदेहेनाभिव्यज्यते, इत्यसौ तस्य निमित्तं व्यपदिश्यत इति ॥२८२८॥

अत्र परमतमाशङ्कय परिहरन्नाह-

अण्णे सयमुत्थाणं, सविरियमणोवगारविमुहं ति ।
तदजुत्तं तदवत्थे, चुयलद्धे लद्धिओ णयं ॥ २८२९ ॥

अन्ये सूरयः स्वकमुत्थानं स्वमुत्थानं, स्ववीर्यमित्याचक्षते । कुतः ?, इत्याह-(अणोवगारविमुहं ति) अन्येनापान्तरालवर्तिना कारणान्तरेण कृत उपकारोऽन्योपकारः, तद्विमुखं तन्निरपेक्षं, यतोऽनन्तरकारणमित्यर्थः, तस्मादन्योपकारविमुखत्वादनन्तरकारणत्वात्स्ववीर्यनमस्कारस्य समुत्थानं कारणमिति । एतन्निरासार्थमाह-(तदजुत्तं ति) तद्वीर्यमयुक्तम्, नमस्कारानन्तरकारणतया व्यभिचारित्वात् । कुतः ?, इत्याह-(तदवत्थे इत्यादि) यतस्तदवस्थेऽपि विद्यमाने वीर्ये कस्यापि लब्धोऽपि नमस्कारः क्षाऽऽवरणोदयात्पुनरपि च्यवते भ्रस्यति; च्युतोऽपि कदाचित् तदावरणक्षयोपशमात्पुनरपि लभ्यते । तत एवं तदवस्थेऽपि वीर्ये च्युतलब्धे नमस्कारे सति विज्ञायते-लब्धितो नान्यद्वीर्ये किमपि नमस्कारकारणमस्ति, व्यभिचारित्वात् । व्यभिचारित्वं च नमस्कारस्य तदन्वयव्यतिरेकानुविधायित्वात् । लब्धिस्तु तस्यान्वयिनि कारणम्, तदन्वयव्यतिरेकानुविधायित्वादिति ॥ २८२९ ॥

तदेवं समुत्थानं व्याख्याय वाचनालब्धिस्वरूपं व्याचिख्यासुराह-

परओ सवणमहिगमो, परोवएसो त्ति वायणाऽभिमया ।
लद्धी य तयाऽऽवरण-क्खओवसमओ सयं लाभो ॥२८३०॥

परतो गुरुभ्यो यच्छ्रवणम्, तथा-अधिगमः, परोपदेशश्च, सा वाचनाऽभिधीयते । लब्धिस्तु का ?, इत्याह-परतो वाचनामन्तरेण नमस्कारस्य यः स्वयं लाभः । कुतः पुनर्या लब्धिः ?, इत्याह-तदावरणक्षयोपशमात्-नमस्काराऽऽवरणकर्मक्षयोपशमादित्यर्थः । आह-ननु तदावरणक्षयोपशम एव लब्धिरन्यत्र प्रसिद्धा, तत् कथमिह तत्कार्यभूतो नमस्कारलाभो लब्धित्वेनोच्यते, नमस्कारकारणस्यैवेह चिन्तयितुं प्रस्तुतत्वात् यथोक्तायाश्च लब्धेर्नमस्कारकारणत्वात् ?। सत्यम्, किन्तु तत्कार्यभूतोऽपि नमस्कारलाभोऽत्र लब्धिरुक्ता, कारणे कार्योपचारादिति । एतदविशुद्धनैगमसंग्रहव्यवहारनयमतेन त्रिविधं नमस्कारकारणं मन्तव्यमिति ॥ २८३० ॥

ऋजुसूत्रमतेन तु द्विविधमेव कारणमिति दर्शयन्नाह-

उज्जुसुयणयमयमिणं, पुव्वुप्पन्नस्स किं समुत्थाणं ?।
अह संपइमुप्पज्जइ, न वायणालद्धिनिमित्तं ॥२८३१॥

ऋजुसूत्रनयस्येदं मतम्-यदि पूर्वजन्मोत्पन्नो नमस्कारः, तदेहभवदेहलक्षणं समुत्थानं तस्य किं करोति ?, न किञ्चिदित्यभिप्रायः; उत्पन्नस्य कारणापेक्षायोगादिति । अथ साम्प्रतमिहभवे समुत्पद्यते नमस्कारः, तर्हि यत्तस्य कारणं तद्वाचनालब्धिभ्यां भिन्नं व्यतिरिक्तं न किञ्चिदुपलक्षयामः; अत इदमेवं द्विविधं तस्य कारणमिति ॥ २८३१ ॥

इदमेव भावयन्नाह-

परओ सयं व लाभो, जइ परओ वायणा सयं लद्धी ।
जं न परओ सयं वा, तओ किमण्णं समुत्थाणं ?॥२८३२॥

नमस्कारस्य हि लाभो जायमानः परतोऽपि भवेत्, स्वयं वा ?, इति द्वयी गतिः, तत्र यदि परत इति पक्षः, तर्हि (वायणत्ति) गुरूपदेशलक्षणा वाचनैव तत्र कारणम् । अथ स्वयमिति पक्षः, तर्हि (लद्धि त्ति) तदावरणक्षयोपशमलक्षणा लब्धिरेव तत्र कारणं, नापरम् । यच्च परतः स्वयं वा नोत्पद्यते, तत्खरविषाणकल्पमवस्त्वेवेत्यध्याहारः; वस्तुन उत्पत्तौ यथोक्तप्रकारद्वयस्यैव संभवात्, अनुत्पन्नस्य चावस्तुत्वादिति । ततस्तस्माद्वाचनालब्धिभ्यामन्यत्किं नाम समुत्थानं, यत्स्वयं परतो वाऽनुत्पन्नस्यावस्तुनः कारणं भवेदिति ? ॥ २८३२ ॥

अथ परभवे समुत्पन्नस्य नमस्कारस्येहजन्मनि स्वतः परतो वाऽनुत्पन्नस्य तस्याभिव्यक्तिलक्षणाया उत्पत्तेः कारणं समुत्थानं भविष्यति । तदप्ययुक्तम् । कुतः ?, इत्याह–

उप्पज्जइ नाईयं, तक्किरिओवरमओ कयघडो व्व ।
अहवा कयं पि कीरइ, कीरउ निच्चं कओ णिट्ठा ?।२८३३।

इहातीतोत्पादक्रियं वस्त्वतीतमभिप्रेतम् । तदेवंभूतं पूर्वभवेऽतीतोत्पादक्रियमतीतं नमस्कारलक्षणं वस्त्विह भवे पुनरपि नोत्पद्यत इति प्रतिज्ञा । (तक्किरिओवरमओ त्ति)तस्य नमस्कारस्योत्पादलक्षणा क्रिया तत्क्रिया, तस्या उपरमो विरामः तत्क्रियोपरमः, तस्मादिति हेतुः । कृतघटवदिति दृष्टान्तः । इह यस्योत्पत्तिक्रियोपरता तत्पुनरपि नोत्पद्यते, यथा पूर्वकृतो घटः; उपरतोत्पत्तिक्रियश्च पूर्वभवोत्पन्नो नमस्कार इष्यते, तत इहभवे पुनरपि नोत्पद्यत इति ॥ अथवा पूर्वं कृतमपि पुनः क्रियते, तर्हि पुनः पुनर्नित्यमेव क्रियताम्, पूर्वकृतत्वाविशेषात् । तथा च सति कुतः करणक्रियाया निष्ठा ?, इति । तदेवं य इहोत्पद्यते नासौ पूर्वोत्पन्न इति सामर्थ्यादुक्तम् ॥ २८३३ ॥

अथवा–भवतु पूर्वोत्पन्नः, तथाऽपि मत्पक्षसिद्धिरिति दर्शयन्नाह–

होउ व पुव्वुप्पन्नो, तह वि न सो लद्धिवायणानिन्नो ।
जेण पुरा वि सयं वा, परओ वा होज्ज से लाभो ॥२८३४॥

भवतु वा नमस्कारस्य पूर्वजन्मन्युत्पादः, तथाऽपि न स तदुत्पादो लब्धिवाचनाभ्यां भिन्नः–न लब्धिवाचनालक्षणकारणद्वयव्यतिरेकेण समुत्थानलक्षणेन कारणेन नमस्कारो जन्यत इत्यर्थः । कुतः ?, इत्याह–येन यस्मात्पुरा परजन्मन्यपि प्रसूतोऽसि त्वं स्वयं वा परतो वा (से) तस्य नमस्कारस्य लाभ इति वक्तव्यम् ?। यदि स्वयं, तर्हि लब्धिरेव तत्कारणम् । अथ परतः, तर्हि वाचना तद्धेतुरिति न किमप्येतत्कारणद्वयव्यतिरिक्तं समुत्थानलक्षणं कारणं पश्याम इति ॥२८३४॥

अथ " सेसनया लद्धिमिच्छंति " (२८०७) इत्येतद्व्याचिख्यासुराह–

सद्दाऽऽइमयं न लहइ, जं गुरुकम्मा पवायणाए वि ।
पावइ य तयावरण–क्खओवसमओ जओऽवस्सं ।२८३५।

शब्दसमभिरूढैवंभूतनयानामेतन्मतम्–यद्यस्मात्कारणाद् गुरुकर्मा प्राणी गुरुभ्यः प्रवाचनायां सत्यामपि नमस्कारं न लभते, लघुकर्मा तु वाचनामन्तरेणाऽपि तदावरणकर्मक्षयोपशमाद् यतोऽवश्यमेव नमस्कारं प्राप्नोति ॥ २८३५ ॥

तो हेऊ लद्धि चिय, न वायणा जइ मइक्खओवसमो ।
तक्कारणो त्ति तम्मि वि, नणु साऽणेगंतिगी दिट्ठा ।२८३६।

(तो हेऊ लद्धि चिय त्ति) ततस्तस्माद्वाचनाया नमस्कारजनने व्यभिचारित्वात्तदावरणक्षयोपशमलक्षणा लब्धिरेव तद्धेतुर्न वाचनेति । यदि तु ऋजुसूत्रः कथमन्वेवं ब्रूयात्–ननु मतिज्ञानाऽऽवरणाऽऽदिकर्मक्षयोपशमस्तत्कारणो वाचनाजन्यः, तथा च सति तत्क्षयोपशमजन्यस्य नमस्कारस्य पारम्पर्येण वाचनाऽपि कारणं भवति । अत्रोच्यते-ननु तस्मिन्नपि मतिज्ञानाऽऽवरणाऽऽदिकर्मक्षयोपशमे जन्ये सा वाचनाऽनैकान्तिकी दृष्टा, गुरुकर्मणां वाचनातोऽपि यथोक्तक्षयोपशमाद्र्शनादिति ॥ २८३६ ॥

अथ कस्यापि तावद्वाचनातः कर्मक्षयोपशमो नवनुपलक्ष्यते, तमाश्रित्य वाचना नमस्कार–कारणं भविष्यति । तदप्ययुक्तम् ।
कुतः ?, इत्याह–

जस्स वि स तम्मित्तो, तस्स वि तम्मत्तकारणं होज्जा ।
न नमोक्कारस्स तई, कम्मक्खओवसमलब्भस्स ॥२८३७॥

यस्यापि जीवस्य स मतिज्ञानाऽऽवरणाऽऽदिकर्मक्षयोपशमस्तन्निमित्तो वाचनाहेतुको दृश्यते, तस्यापि तन्मात्रकारणं यथोक्तक्षयोपशमनिमित्तं (तइ त्ति) सा वाचना भवेत्, न तु नमस्कारस्य कारणं सा युज्यते । कथंभूतस्य ?, इत्याह–कर्मक्षयोपशमलक्ष्यस्य । इदमुक्तं भवति-एवमपि मतिज्ञानाऽऽवरणाऽऽदिक्षयोपशमादेवानन्तरं नमस्कार उत्पद्यते, न तु वाचनातः,ततोऽन्यादेव तत्कारणं युज्यते,न तु वाचना, तस्या यथोक्तक्षयोपशमजनकत्वेनाऽन्यकारणत्वादिति ॥ २८३७ ॥

पुनरपि परमतमाशङ्क्य परिहरन्नाह–

अह कारणोवगारि, त्ति कारणं तेण कारणं सव्वं ।
पाएण वज्जवत्थुं, को नियमो सद्दमेत्तम्मि ? ॥२८३८॥
अह पच्चासन्नतरं, कारणमेगंतियं तओ लद्धिं ।
पडिवज्ज न चेदेवं, न वायणामेत्तनियमो ते ॥२८३९॥

अथ कारणस्य यथोक्तक्षयोपशमस्योपकारिणी वाचनेति, अतः कारणकारणत्वादसौ नमस्कारस्य कारणमिष्यते । अत्रोच्यते–(तेणेत्यादि) तेन तर्हि प्रायेण सर्वमपि क्षितिशय्याऽऽसनाऽऽहार–वस्त्र–पात्राऽऽदिकं बाह्यं वस्तु नमस्कारकारणस्य यथोक्तक्षयोपशमस्योपकारित्वात्परम्परया नमस्कारस्य कारणं प्राप्नोति । अतः को नाम वाचनालक्षणे शब्दमात्रे तत्कारणत्वनियमः ?,इति ॥२८३८॥ अथ परम्परया सर्वस्य बाह्यवस्तुनो नमस्कारकारणोपकारित्वे सत्यपि यदेव प्रत्यासन्नतरं वाचनालक्षणं वस्तु, तदेवाऽऽसन्नोपकारित्वान्नमस्कारस्य कारणमिष्यते । ननु तथाऽपि नमस्कारजनने तदेवैकान्तिकमित्युक्तमेव । तत एकान्तिकमानन्तर्येणातिप्रत्यासन्नतरं लब्धिमेव तत्कारणं प्रतिपद्यस्व । न चेदेवं प्रतिपद्यसे, तर्हि न वाचनामात्रस्य नमस्कारकारणत्वनियमः ' ते ' तव सिध्यति; क्षित्यादेरपि पूर्वोक्तनीत्या तत्कारणत्वप्राप्तेः । तदेवं प्रथमनयस्य त्रिविधं कारणम्, ऋजुसूत्रस्य द्विविधं, शब्दनयास्तु लब्धिमेवैकां नमस्कारकारणमिच्छन्तीति स्थितम् । इति द्वात्रिंशद्गाथार्थः ॥ २८३९ ॥ तदेवमभिहितमुत्पत्तिद्वारम् ।

(३) इदानीं निक्षेपद्वारमुच्यते–तत्र नमस्कारस्य निक्षेपश्चतुर्धा–नामनमस्कारः, स्थापनानमस्कारः, द्रव्यनमस्कारः,भावनमस्कारश्चेति । तत्र–
नामस्थापने क्षुण्णे, द्रव्यस्यशरीरव्यतिरिक्तद्रव्यनमस्कारोऽभिधित्सया पुनराह–

निहणाऽऽइ दव्व भावो–वलद्ध जं कुज्ज सम्मदिट्ठी व ।
नेवाइयं पयं द–व्वभावसंकोयण पयत्थो ॥ ३०४० ॥

नमस्कारतद्वतोरभेदोपचारान्निह्नवाऽऽदिद्रव्यनमस्कारः, आ-

दिशब्दाद् यो द्रव्यार्थे विद्यामन्त्रदेवताऽऽदीनां नमस्कारः क्रियते, सोऽपि द्रव्यनमस्कारः । निह्नवाऽऽदिनमस्कारस्य च द्रव्यत्वमप्राधान्यात्, अप्राधान्यं च तेषां मिथ्यात्वाऽऽदिकलुषितत्वादिति । भावनमस्कारस्त्वागमतः स विज्ञेयो, यमुपयुक्तः सम्यग्दृष्टिरर्हदादीनां कुर्यादिति द्वारम् ॥

(४) अथ पदद्वारमुच्यते-पद्यते गम्यतेऽर्थोऽनेनेति पदम् । तच्च पञ्चधा-नामिकम्, नैपातिकम्, औपसर्गिकम्, आख्यातिकम्, मिश्रं चेति । तत्र 'अश्वः' इति नामिकम् । 'खलु' इति नैपातिकम्, 'परि' इत्यौपसर्गिकम् । 'धावति' इत्याख्यातिकम् । 'संयतः' इति मिश्रम् । एवं नामिकाऽऽदिपञ्चप्रकारपदसंभवे सत्याह-(नेवाइयं पयं ति) निपतत्यर्हदादिपदानामादिपर्यन्तयोरिति निपातः, निपाताद्यागतं, तेन वा निर्वृत्तं, स एव वा स्वार्थिकप्रत्ययविधानान्नैपातिकम् 'नमः' इति पदम् । इति पदद्वारम् ।

(५) अथ पदार्थद्वारमुच्यते-(दव्वभावसंकोयण पयत्थो त्ति) इह 'नमोऽर्हद्भ्यः' इत्यादिषु यत् 'नमः' इति पदं, तस्य नम इति पदस्यार्थः पदार्थः, स च पूजालक्षणः । सा च का ?, इत्याह-(दव्वभावसंकोयण त्ति) द्रव्यसंकोचनम्, भावसंकोचनं च । तत्र द्रव्यसंकोचनं करशिरःपादाऽऽदिसंकोचः, भावसंकोचनं तु विशुद्धस्य मनसोऽर्हदादिगुणेषु निवेशः । अत्र च भङ्गचतुष्टयम् । तद्यथा-द्रव्यसंकोचो न भावसंकोचः, यथा पालकाऽऽदीनाम्, भावसंकोचो न द्रव्यसंकोच इत्यनुत्तरसुराऽऽदीनाम्; द्रव्यसंकोचो भावसंकोचश्च, यथा शम्बस्य; न द्रव्यसंकोचो न भावसंकोच इति शून्यः । इह च भावसंकोचप्रधानो द्रव्यसंकोचोऽपि तच्छुद्धिनिमित्तः ॥ इति निर्युक्तिगाथासंक्षेपार्थः ॥ ९८४० ॥

अथ नमस्कारस्य भाष्यकारो नामाऽऽदिनिक्षेपं विस्तरतो व्याचिख्यासुराह-

नामाऽऽइचउब्भेओ, निक्खेवो मंगलं च सो नेओ ।
नामं नमोऽभिहाणं, ठवणा नासोऽहवाऽऽगारो ॥२८४१॥

नामस्थापनाऽऽदिचतुर्भेदो नमस्कारस्य निक्षेपः । स चाधस्ताद्युक्तमङ्गलस्येव विस्तरतो विज्ञेयः । संक्षेपतस्त्विहाप्युच्यते-(नामं ति) नामनमस्कारो 'नमः' इत्यभिधानम् । स्थापनानमस्कारस्तु-'नमः' इत्यक्षरद्वयस्य विन्यासः । अथवा-नमस्कारकरणप्रवृत्तस्य संकोचितकरचरणस्य काष्ठपुस्तकचित्राऽऽदिगतस्य साध्वादेराकारः स्थापनानमस्कार इति ॥ ९८४१ ॥

द्रव्यनमस्कारमाह-

आगमओऽणुवउत्तो, अज्झेया दव्वओ नमोक्कारो ।
नोआगमओ जाणय-जव्वसरीराइरित्तोऽयं ॥९८४२॥

द्रव्यनमस्कारो द्वेधा-आगमतः, नोआगमतश्च । तत्रानुपयुक्तो नमस्कारस्याध्येता-आगमतो द्रव्यनमस्कारः । नोआगमतोऽयं द्रव्यनमस्कारो ज्ञशरीर-भव्यशरीर-तद्व्यतिरिक्तभेदात्त्रिविध इति । तत्र ज्ञशरीर-भव्यशरीर-वक्तव्यता क्षुण्णा ॥ ९८४२ ॥

तद्व्यतिरिक्तं तु द्रव्यनमस्कारमाह-

मिच्छोवहया जं ना-वओ वि कुव्वंति निन्हवाऽऽईया ।
सो दव्वनमोक्कारो, सम्माणुवउत्तकरणं च ॥ ९८४३॥

मिथ्यात्वोपहता निह्नवाऽऽदयो नावतोऽपि यं नमस्कारं कुर्वन्ति, स ज्ञशरीर-भव्यशरीरव्यतिरिक्तोऽप्रधानत्वाद् द्रव्यनमस्कारः । तथा सम्यग्दृष्टिरप्यनुपयुक्तो यं नमस्कारं करोति स तद्व्यतिरिक्तो द्रव्यनमस्कार इति ॥ ९८४३ ॥

आह-ननु नावतोऽपि कुर्वतां निह्नवाऽऽदीनां किमिति द्रव्यनमस्कारः ? । अत्रोच्यते-अज्ञानित्वात् । अज्ञानित्वं च तेषां मिथ्यादृष्टित्वात्, 'मिथ्यादृष्टेरज्ञानम्' एतदपि कुतः ?, इत्याह-

सदसदविसेसणाओ, नवहेऊ जदिच्छिओवलंभाओ ।
नाणफलाभावाओ, मिच्छदिट्ठिस्स अन्नाणं ॥९८४४॥

प्रागसकृद् व्याख्यातार्था ॥ ९८४४ ॥

प्रकारान्तरेणापि द्रव्यनमस्कारमाह-

जो वा दव्वत्थमसं-जयस्स व भयाइणाऽहवा सो वि ।
दव्वनमोक्कारो च्चिय, कीरइ दमएण रन्नो व्व ॥९८४५॥

यो वा द्रव्यार्थं क्रियते स द्रव्यनमस्कारः । अथवा-द्रव्यलाभं विनाऽपि योऽसंयतस्य राजाऽऽदेर्भयाऽऽदिकारणतो द्रमकाऽऽदिना क्रियते, सोऽपि तद्व्यतिरिक्तो द्रव्यनमस्कार इति ॥ ९८४५ ॥

अथाऽऽगमतो नोआगमतश्च त्रिविधं भावनमस्कारमाह-

आगमओ विन्नाया, तच्चित्तो भावओ नमोक्कारो ।
नोआगमओ सो च्चिय, सेसयकरणोवलत्तो त्ति ॥९८४६॥

तस्मिन् नमस्कारार्थे चित्तमुपयोगो यस्य नान्यत्र-असौ तच्चित्तो विज्ञाता आगमतो भावनमस्कारः, स एव मनस्करणेनोपयुक्तो नमस्कारकर्ता यदा शेषकाभ्यामपि वाक्कायकरणाभ्यामुपयुक्तो नमस्कारं करोति-वचनेन 'नमोऽर्हद्भ्यः' इति ब्रुवाणः, कायेन तु संकोचितकरचरणो यदा नमस्कारं करोतीत्यर्थः, तदाऽसौ नोआगमतो भावनमस्कार उच्यते, उपयोगलक्षणस्याऽऽगमस्य वाक्कायकरणक्रियाभिन्नत्वात्, नोशब्दस्य चेह मिश्रवचनत्वादिति ॥ ९८४६ ॥

अथामुं नामाऽऽदिनिक्षेपमपि नयैर्विचार-

यन्नाह-

नावं चिय मन्नया, सेसा इच्छंति सव्वनिक्खेवे ।
ठवणावज्जे संगह-ववहारा केइ इच्छंति ॥९८४७॥

नावमेव भावनमस्कारमेव इच्छन्ति त्रयोऽपि शब्दनयाः, शुद्धत्वात् । शेषास्तु ऋजुसूत्रान्ताश्चत्वारो नयाः, सर्वाँश्चतुरोऽपि निक्षेपानिच्छन्ति, अविशुद्धत्वात् । केचित्तु व्याचक्षते-संग्रहव्यवहारौ स्थापनावर्जाँस्त्रीन्निक्षेपान्निच्छतः, सद्भावाऽसद्भावस्थापनायाः किल साङ्केतिकनामाभिधेयत्वेन नामनिक्षेप एवान्तर्भावादिति ॥ ९८४७ ॥

तथा-

दव्वट्ठवणावज्जे, उज्जुसुओ तं न जुज्जए जम्हा ।
इच्छइ सुयम्मि भणियं, सो दव्वं किंतु न पुहुत्तं ॥९८४८॥

द्रव्यस्थापनावर्जौ शेषौ द्वावेव नामभावनिक्षेपाविच्छति ऋजुसूत्रः । तदेतद् व्याख्यानं न युज्यते, यस्मादसौ ऋजुसूत्रो द्रव्यमिच्छत्येव, केवलं पृथक्त्वं नेच्छति-बहूनि द्रव्याऽऽवश्यकाऽऽदीनि नेच्छतीत्यर्थः । एतच्च सूत्रेऽनुयोगद्वारलक्षणे,

भणितं प्रतिपादितम् । तद्यथा-" उज्जुसुयस्स एगे अणुवउत्ते आगमओ एगं दव्वावस्सए पुहत्तं नेच्छइ " इति ॥ २८४८ ॥

स्थापनेच्छामप्यस्याऽऽह—

इच्छंतो य स दव्वं, तदणागारं तु भावहेउ त्ति ।
नेच्छेज्ज कहं ठवणं, सागारं भावहेउ त्ति ? ॥२८४९॥

इच्छंश्च ऋतुसूत्रस्तत्प्रसिद्धं सुवर्णाऽऽद्धिकं द्रव्यं पिण्डभावस्थायामनाकारं तथाविधकटककेयूराऽऽद्याकाररहितम्, विशिष्टेन्द्राऽऽद्याकाररहितं वा । कुत इच्छन् ?, इत्याह-भावहेतुर्यतस्तद्-भविष्यत्कुण्डलाऽऽदिपर्यायलक्षणभावहेतुत्वादित्यर्थः । कथं नाम नेच्छेत्स्थापनाम् ?। कथंभूताम् ?, साकारां विशिष्टेन्द्राऽऽद्याकारसहितामपीत्यर्थः । पुनरपि किंविशिष्टाम् ?, इत्याह-भावहेतुभूतां-साकारत्वेन विशिष्टेन्द्राऽऽद्यभिप्रायकारणभूतामित्यर्थः । इदमुक्तं भवति-यो ह्यनाकारमपि भावहेतुत्वाद् द्रव्यमिच्छति ऋजुसूत्रः, स साकारामपि विशिष्टेन्द्राऽऽदिभावहेतुत्वात् स्थापनां किमिति नेच्छेत् ?, इच्छेदेव, नात्र संशय इति ॥ २८४९ ॥

उपपत्त्यन्तरेणापि द्रव्यस्थापनेच्छामस्य साधयन्नाह-

नामं पि होज्ज सन्ना, तव्वं वा तदत्थपरिसुन्नं ।
हेउ त्ति तदिच्छंतो, दव्वट्ठवणा कहं नेच्छे ? ॥२८५०॥

ननु ऋजुसूत्रस्तावन्नाम निर्विवादमिच्छति । तच्च नाम इन्द्राऽऽदिसंज्ञामात्रं वा भवेत्, तद्वाच्यं वा तदर्थपरिशून्यमिन्द्रशब्दवाच्यं वा, इन्द्राऽर्थरहितं वा गोपालदारकाऽऽदि वस्तु भवेदिति त्रयी गतिः । इदं चोभयरूपमपि नामहेतुर्नावकारणमिति कृत्वा इच्छन्नसौ ऋजुसूत्रो द्रव्यस्थापने कथं नाम नेच्छेत् ?, भावकारणत्वाविशेषादिति भावः ॥ २८५० ॥

अह नामं भावम्मि वि,तेणेच्छइ तेण दव्वठवणा वि ।
भावस्साऽऽसन्नयरा, हेऊसद्दो उ बज्झयरो ॥२८५१॥

अथेन्द्राऽऽदिकं नाम भावेऽपि भावेन्द्रेऽपि संनिहितमस्ति, तेन तस्मादिच्छति तदृजुसूत्रः । तेन तर्हि जितमस्माभिः, अस्य न्यायस्य द्रव्यस्थापनापक्षे सुलभतरत्वात् । तथाहि-द्रव्यस्थापने अपि भावस्येन्द्रपर्यायस्यासन्नतरौ हेतू, शब्दस्तु तन्नामलक्षणो बाह्यतर इति । एतदुक्तं भवति-इन्द्रमूर्त्तिलक्षणं द्रव्यं, विशिष्टेन्द्राकाररूपा तु स्थापना, एते द्वे अपीन्द्रपर्यायस्य तादात्म्यसंबन्धेनावस्थितत्वात् सन्निहिततरे, शब्दस्तु नामलक्षणो वाच्यवाचकभावसंबन्धमात्रेणैव स्थितत्वाद् बाह्यतर इति । अतो भावे सन्निहितत्वान्नामेच्छन् ऋजुसूत्रो द्रव्यस्थापने सन्निहिततरत्वात्सुतरामिच्छेदिति । तदेवमृजुसूत्रस्य चतुर्विधनिक्षेपेच्छासाधनेनानन्तरोक्तत्वात्परिहृतं तद्विषयं दुर्व्याख्यानम् ॥ २८५१ ॥

अथ प्राग् यदुक्तम्-" ठवणावज्जे संगहववहारा " [२८४७] इत्यादि, तत्परिहरन्नाह-

संगहिउ असंगहिओ, सव्वो वा नेगमो ठवणमिच्छे ।
इच्छइ जइ संगहिओ, तं नेच्छे संगहो कीस ? ॥२८५२॥

इह संग्रहिकोऽसंग्रहिकः सर्वो वा नैगमस्तावन्निर्विवादं स्थापनामिच्छत्येव । तत्र संग्रहिकः संग्रहमतावलम्बी, सामान्यवादीत्यर्थः । असंग्रहिकस्तु-व्यवहारनयमतानुसारी, विशेषवादीत्यर्थः, सर्वेस्तु समुदितः । ततश्च यदि संग्रहिकः संग्रहमतावलम्बी नैगमस्तां स्थापनामिच्छति, तर्हि संग्रहस्तत्समानमतोऽपि तां किमिति नेच्छति ?, इच्छेदेवेत्यर्थः॥२८५२॥

अहव मयमसंगहिओ, तो ववहारो वि किं न तब्भम्मा ?।
अह सव्वो तो तस्सम-धम्माणो दो वि ते जुत्ता ।२८५३।

(अहव मयमित्यादि) 'अथवा' इत्यव्ययोऽथार्थे । अथ परस्य मतम्-यद्यपि सामान्येन सर्वो नैगमः स्थापनामिच्छति, तथापि व्याख्यानतो विशेषप्रतिपत्तेरसंग्रहिकोऽसौ तामिच्छतीति प्रतिपत्तव्यम् । 'न संग्रहिकः' इत्यध्याहारः, न ततः संग्रहस्य स्थापनेच्छा निषिध्यत इति भावः । अत्रोत्तरमाह-'तो' इत्यादि । तर्ह्येकत्र संश्लिष्टतोऽन्यत्र प्रत्यवतिष्ठते, एवं हि सति व्यवहारोऽपि स्थापनां किमिति 'नेच्छति' इति शेषः । कुतः ?, इत्याह-यतस्तद्धर्माऽसौ-असंग्रहिकनैगमसमानधर्मा व्यवहारनयोऽपि वर्तते, विशेषवादित्वात् । ततश्चैषोऽपि स्थापनामिच्छदेवेति, निषिद्धा चास्यापि त्वया,"ठवणावज्जे संगहववहारा" इति वचनादिति । अथ सर्वोऽप्येकः परिपूर्णो नैगमः स्थापनामिच्छति, न तु संग्रहिकोऽसंग्रहिको वेति भेदवान्, अतस्तद्दृष्टान्तात्संग्रहव्यवहारयोर्न स्थापनेच्छा साधयितुं युक्तेति भावः । अत्रोच्यते-'तो' इत्यादि । ततस्तर्हि तत्समधर्माणौ नैगमसमानधर्माणौ द्वावपि समुदितौ ताविति संग्रहव्यवहारौ युक्तावेव । इदमत्र हृदयम्-तर्हि प्रत्येकं तयोरेकतरनिरपेक्षयोः स्थापनाऽभ्युपगमो मा भूदिति समुदितयोस्तयोः संपूर्णनैगमरूपत्वात्तदभ्युपगमः केन वार्यते, अविभागस्थाद् नैगमात्प्रत्येकं तदेकैकताग्रहणात् ?, इति ॥ २८५३ ॥

इतश्च स्थापनाऽभ्युपगमः संग्रहव्यवहारयोर्युक्तः । कुतः ?, इत्याह-

जं च पवेसो नेगम-नयस्स दोसु बहुसो समक्खाओ ।
तो तम्मयं पि निच्चं, मयमियरेसिं विभिन्नाणं ॥ २८५४ ॥

यच्च यस्मात् प्रवेशोऽन्तर्भावः, " जो सामन्नग्गाही सो नेगमो संगहं गओ " इत्यादिना ग्रन्थेन प्रागन्यत्र च नैगमनयस्य द्वयोः संग्रहव्यवहारयोर्बहुशोऽनेकधा समाख्यातः प्रतिपादितः । ततस्तन्मतमपि स्थापनाऽभ्युपगमलक्षणं नैगमनयमतमपीतरयोः संग्रहव्यवहारयोर्विभिन्नयोर्नैदवतोन्निन्नं पृथग्मतं सम्मतमिति । इदमुक्तं भवति-यथा विभिन्नयोः संग्रहव्यवहारयोर्नैगमोऽन्तर्भूतः, तथा स्थापनाऽभ्युपगमलक्षणं तन्मतमपि तयोरन्तर्भूतमेव; ततो भिन्नं भेदेन तौ तदिच्छत एवस्थापनासामान्यं संग्रह इच्छति, स्थापनाविशेषाँस्तु व्यवहार इत्येतदेव युक्तं; तदनिच्छा तु सर्वथाऽनयोर्न युक्तेति ॥ २८५४ ॥

अत्रैवोपपत्तिमाह-

सामण्णाऽऽइविसिट्ठं, बज्झं पि जमुज्जुसुत्तपज्जंता ।
इच्छंति वत्थुधम्मं, तो तेसिं सव्वनिक्खेवो ॥ २८५५ ॥

यस्माच्च सामान्याऽऽदिविशिष्टं बाह्यमपि न विचित्रं बहुप्रकारमृजुसूत्रपर्यन्ता नया वस्तुधर्ममिच्छन्ति, ततस्तेषां सर्वेऽपि नामाऽऽदयो निक्षेपाः संमता एवेति । अतः " ठवणावज्जे संगहववहारा " (२८४७) इत्यादिना यत्केषाञ्चिन्मतं, तदसंगतमेवेति ॥ २८५५ ॥

'नेवाइयं पयं' [२७४०] इत्येतद् व्याचिख्यासुराह-

निवयइ पयाऽऽइपज्जं-तओ जओ तो नमो निवाउ त्ति ।
सो चिय निययत्थपरो, पयमिह नेवाइयं नाम ॥२७५६॥
पूयत्थमिणं सा पुण. सिरकरपायाऽऽइदव्वसंकोओ ।
भावस्स य संकोओ,मणसा सुद्धस्स विणिवेसो ।२७५७।

यतो यस्मान्निपतति पदाऽऽदिपर्यन्तयोस्ततो 'नमः' इति पदं निपातो भण्यते । स एव 'नमः' इति निपातो निजकार्थपरः स्वार्थिकप्रत्ययोपादानो नैपातिकं पदमित्युच्यत इति ॥ २७५६ ॥ इदं च 'नमः' इति पदं पूजार्थम्, शेषं सुगमम् ॥ २७५७ ॥

अत्र च भावसंकोचलक्षणं भावकरणमेव प्रधानमिति-दर्शयन्नाह-

एत्थं तु भावकरणं, पहाणमेगंतियं ति तस्सेव ।
बज्झं सुद्धिनिमित्तं, भावविसेयं तु तं विफलं ॥२७५८॥
जं जुज्जंतो वि तयं, न तप्फलं लहइ पालगाइ व्व ।
तव्विरहिया लहंति य,फलमिह जमणुत्तराऽऽईयाः।२८५९।
तह वि विसुद्धी पाए-ण बज्झसहियस्स जा न सा इहरा ।
संजायइ तेणोभय-मिट्ठं संवरस्स वा नमओ ॥२७६०॥

सुगमाः, गतार्थाश्च । नवरं भावापेतं भावरहितं तद् बाह्यकरणं विफलमेव । इति विंशतिगाथार्थः ॥ २८५८।२८५९।२७६० ॥

(६) अथ प्ररूपणाद्वारमाह-

दुविहा परूवणा ख-प्पया य नवहा य छप्पया इ णमो ।
किं कस्स केण व कहिं,केवचिरं कइविहो व भवे ?।२७६१।

द्विविधा द्विप्रकारा, प्रकृष्टा प्रधाना, प्रगता वा रूपणा वर्णना प्ररूपणेति । तदेव द्वैविध्यमाह-षट्पदा च षट्प्रकारा,नवधा च नवप्रकारा, चशब्दात्पञ्चपदा, चतुष्पदा च । तत्र षट्पदा 'णमो' इति पदं किं, कस्य, केन वा, क्व वा, कियच्चिरं, कतिविधो वा नवेत्यमस्कारः?। इति निर्युक्तिगाथासंक्षेपार्थः ॥२७६१॥

तत्र किंद्वारव्याख्यानार्थमाह-

किं जीवो तप्परिणओ, पुव्वपमिवन्नओ य जीवाणं ।
जीवस्स य जीवाण य,पडुच्च पमिवज्जमाणं तु ।२७६२।

किं वस्तु नमस्कारः ?, इत्याह-(जीवो त्ति) सामान्येन अविशुद्धनैगमाऽऽदिनयानां जीवः,तद्ज्ञानलब्धियुक्तो योग्यो वा नमस्कारः। शब्दाऽऽदिविशुद्धनयमतं त्वधिकृत्याऽऽह-(तप्परिणओ त्ति) शब्दाऽऽदिविशुद्धनयमतेन तु जीवः, तत्परिणतो नमस्कारपरिणामपरिणत एव नमस्कारो,नापरिणत इति । उक्तं किंद्वारम ।

अथ कस्येतिद्वारमुच्यते-तत्र च यदा पूर्वप्रतिपन्नो नमस्कारः चिन्त्यते, तदा जीवानामसौ विज्ञेयः, बहुजीवस्वामिक इत्यर्थः । प्रतिपद्यमानं तु नमस्कारं प्रतीत्य यदा एको जीवस्तं प्रतिपद्यते, तदा जीवस्यासौ विज्ञेयः, एकजीवस्वामिक इत्यर्थः । यदा तु बहवो जीवास्तं प्रतिपद्यन्ते, तदा जीवानामेष ज्ञातव्यः, बहुजीवस्वामिक इत्यर्थः। इति निर्युक्तिगाथासंक्षेपार्थः ।२७६२।

अथ किंद्वारविषयं भाष्यम-

किं होज्ज नमोक्कारो, जीवोऽजीवोऽहवा गुणो दव्वं ।
जीवो नो खंधो त्ति य,तह नोगामो नमोक्कारो ॥२७६३॥

किं वस्तु नमस्कारो भवेत् ?—जीवः, अजीवो वा । जीवाजीवत्वेऽपि किं गुणो, द्रव्यं वा नमस्कारः ?, इति प्रश्ने नैगमाऽऽद्यविशुद्धनयमतमङ्गीकृत्याऽऽह-जीवो नमस्कारः, नाऽजीवः । स च संग्रहनयापेक्षया मा भूदविशिष्टः पञ्चास्तिकायमयः स्कन्धः । यथाऽऽहुस्तन्मतावलम्बिनः-" पुरुष एवेदं ग्निं सर्वं यद् भूतं यच्च भाव्यम् । उतामृतत्वस्येशानो यदन्नेनातिरोहति " इत्यादि । तथा संग्रहनयविशेषापेक्षयैव मा भूदविशिष्टग्राम इति, 'अतो नो स्कन्धो नो ग्रामः' इति नियुक्तिगाथायां वाक्यशेषः । पञ्चास्तिकायमयस्कन्धैकदेशत्वान्नोशब्दस्य च देशवचनत्वान्नोस्कन्धो जीवो नमस्कारः, तथा- चतुर्दशविधभूतग्रामैकदेशत्वाद् नोशब्दस्य च देशवचनत्वाद् नोग्रामरूपः प्रतिनियतः कोऽपि जीवो नमस्कार इति ।२७६३।

ननु कस्माज्जीवो नमस्कारः, नाऽजीवः ?, इत्याह-

जं जीवो णाणमओ-ऽणन्नो नाणं च जं नमोक्कारो ।
तो सो जीवो दव्वं, गुणो त्ति सामाइएऽनिहियं ।२७६४।

यद्यस्माद् ज्ञानमयो जीवः, ज्ञानं च यस्मात् श्रुतज्ञानरूपो नमस्कारः, अनन्यच्चाव्यतिरिक्तश्च ज्ञानाज्जीवः । ततः स नमस्कारो 'जीवो त्ति' जीव एव, नाजीवः, तस्य ज्ञानशून्यत्वादिति । भवतु जीवो नमस्कारः, केवलं द्रव्यमसौ, गुणो वा ?, इति वक्तव्यमित्याह-' द्रव्यं गुणो वा नमस्कारः ' इत्येतत्सामायिके ' किं सामायिकं ' इति द्वारे-" जीवो गुणपमिवन्नो, नयस्स दव्वट्ठियस्स सामइयं । सो चेव पज्जवट्ठिय-नयस्स जीवस्स एस गुणो ॥ १ ॥" (२६४३) इत्यादिना ग्रन्थेनानिहितमेव, केवलं सामायिकस्थाने नमस्कारो वाच्य इति । ॥ २७६४ ॥

भवतु जीवो नमस्कारः, किन्तु नोस्कन्धो नोग्रामश्च कथमसौ ?, इत्याह-

सव्वत्थिमओ खंधो, तदेक्कदेसो य जं नमोक्कारो ।
देसपमिसेहवयणो, नोसद्दो तेण नोखंधो ॥२७६५॥
भूयग्गामो गामो, तदेक्कदेसो तउ त्ति नोगामो ।
देसो त्ति सो किमेक्को-ऽणेगो नेओ नयमयाओ ॥२७६६॥

सर्वे पञ्चास्तिकायाः, तन्मयस्तैर्निर्वृत्तः परिपूर्णः, स्कन्ध उच्यते । तदेकदेशश्च यस्मान्नमस्कारवान् जीवः, नमस्कारतद्वतोश्चाभेदोपचाराद्नमस्कारोऽपि तदेकदेशः । देशप्रतिषेधवचनश्च नोशब्दः, तेन तस्मात्स्कन्धैकदेशो जीवः, अभेदोपचाराद्नमस्कारश्च नोस्कन्ध इति । तथा-"एगिंदिय सुहुमियरा, सन्नियरपणिंदिया सवितिचऊ । पज्जत्तापज्जत्ता, नेयणं चउदसग्गामा ।१।" इति वचनाच्चतुर्दशविधो भूतग्रामो ग्राम उच्यते । तदेकदेशश्च यस्मात्तकोऽसौ नमस्कारवान् देवमनुष्याऽऽदिजीवोऽभेदोपचाराद्नमस्कारोऽपि तदेकदेश इत्यतोऽसौ नोग्रामोऽभिधीयते । 'देसो त्ति' पृच्छति विनेयः-भूतग्रामस्य देशः सन् स नमस्कारः, किमेकोऽनेको वा ?, इति वक्तव्यम् । गुरुराह-ज्ञेयो नयमतात्-एकत्वमनेकत्वं च तस्य नयमताद्विज्ञेयमित्यर्थः । तदेतावता ' किं जीवो ' (२७६२) इति व्याख्यातम् ॥ २७६५। २७६६ ॥

अथ ' तप्परिणओ ' (२७६२) इत्येतद् व्याचिख्यासुराह-

तप्परिणओ चिय जया, सद्दाईणं तया नमोक्कारो ।
सेसाणमणुवउत्तो,वि लद्धिसहिओऽहवा जोग्गो॥२७६७॥

तत्परिणत एव नमस्कारपरिणामपरिणत एव, यदा जीवो भवति, तदाऽसौ शब्दाऽऽदिनयत्रयमतेन नमस्कारोऽभिधीयते। शेषाणां तु नैगमाऽऽदिनयानामनुपयुक्तोऽपि नमस्कारो जीवो नमस्कार उच्यते। किं सर्वः ?, नेत्याह-लब्धिसहितस्तदावरणकर्मक्षयोपशमयुक्तः, अथवा-योग्यो भव्यशरीराऽऽदिको राज्यार्हकुमारराजवदिति ॥ २८६७ ॥

अथ कथं पुनर्नयमतेन नमस्कारस्यैकत्वमनेकत्वं च ज्ञेयम् ?, इत्याह-

संगहनओ नमोक्का-रजाइसामन्नओ सया एगं ।
इच्चइ ववहारो पुण, एगमिहेगं बहू बहवो ॥२८६८॥
उज्जुसुयाऽऽईणं पुण, जेण सयं संपयं व वत्थुं ति ।
पत्तेयं पत्तेयं, तेण नमोक्कारमिच्छंति ॥ २८६९ ॥

द्वे अपि सुगमे, नवरं व्यवहारनयः पुनरेकं नमस्कारवन्तं जीवमेकं नमस्कारमिच्छति, बहूँस्तद्वतो बहून्नमस्कारानिच्छति, लोकव्यवहारपरत्वात्, लोके चेत्थं दर्शनादिति। ऋजुसूत्राऽऽद्यस्तु बहुत्वं नेच्छन्ति, वर्तमानसमयवर्तिनः स्वकीयस्यैवैकस्य प्रत्येकं प्रत्येकमभ्युपगमादिति ॥ व्याख्यातं किमितिप्ररूपणाद्वारम् ॥ २८६८ ॥ २८६९ ॥

अथ कस्येतिद्वारे " पुव्वपडिवण्णओ य जीवाणं " (२८६२) इत्यादि व्याचिख्यासया प्राऽऽह-

पमिवज्जमाणओ पुण, एगोऽणेगे व संगहं मोत्तुं ।
इट्ठो सेसनयाणं, पमिवन्ना णियमओऽणेगे ॥२८७०॥

प्रतिपद्यमानको नमस्कारस्यैकोऽनेके वा जीवा भवन्तीत्ययं पक्षः संग्रहनयं मुक्त्वा शेषनयानामिष्टः संमतः, पूर्वप्रतिपन्नास्तु नियमेनानेके तेषामिष्टाः, गतिचतुष्टयेऽपि पूर्वप्रतिपन्नस्य सम्यग्दृष्टीनामसंख्येयानां सदैव लाभात् । संग्रहनयस्तु-बहुत्वं सर्वत्र नेच्छतीति तद्वर्जनमिति। तदेवं 'कस्य नमस्कारः ?', इति पृष्टे एकानेकजीवस्वामिको नमस्कार इति निर्णीतम् ॥ २८७० ॥

अथ जीवस्वामिके सत्यपि 'किं नमस्कार्यजीवस्वामिको नमस्कारः, नमस्कर्तृजीवस्वामिको वा ?', इति जिज्ञासायां नयैर्निर्णेयमाह-

कस्स त्ति नमोक्कारो, पुज्जस्स य संपयाणजावाओ ।
नेगमववहारमयं, जह भिक्खा कस्स जइणो त्ति ॥२८७१॥

कस्य नमस्कारः-किंस्वामिकोऽसौ ?, इति पृष्टे गुरुराह-नैगमव्यवहारनयमतमिदम्-पूज्यस्य नमस्कार्यस्य नमस्कारः, न पुनस्तत्कर्तुः। कुतः ?; संप्रदानभावत्-तेन पूज्यस्यैव संप्रदीयमानत्वात्। लोकेऽपि वक्तारो भवन्ति-कस्य भिक्षा ?, 'यतेः,' इति, न पुनस्तद्दातुः ॥ २८७१ ॥

हेत्वन्तरेणापि नमस्कार्यस्वामिकत्वं नमस्कारस्यैतौ समर्थयतः। कथम् ?, इत्याह-

पुज्जस्स व पज्जाओ, तप्पच्चयओ यमाऽऽयधम्म व्व ।
तद्धेउभावओ वा, घडविण्णाणाभिहाणं व ॥ २८७२॥

अथवा-पूज्यस्यैव पर्यायो नमस्कार इति प्रतिज्ञा। (तप्पच्चयओ त्ति) पूज्ये पूज्योऽयमिति प्रत्ययजनकत्वादिति हेतुः। (घडाऽऽयधम्म व्व त्ति) घटस्याऽऽत्मीयरूपाऽऽदिवदिति दृष्टान्तः, यथा-घटे घटप्रत्ययजनकत्वात्तद्रूपाऽऽदयस्तत्पर्याया इत्यर्थः। अथवा-अस्यामेव प्रतिज्ञायां तद्धेतुभावादिति हेतुः-नमस्कारोत्पत्तिहेतुत्वादित्यर्थः। घटविज्ञानाभिधानवदिति दृष्टान्तः। इयमत्र भावना-नमस्कार्येऽर्हदादौ दृष्टे भव्यजन्तोः विशिष्टोल्लासो नमस्कारकरणाभिप्राय उत्पद्यते, ततस्तन्नमस्कारस्य नमस्कार्यो हेतुः, ततस्तद्धेतुभावान्नमस्कार्यस्यैव पूज्यस्यैव पर्यायो नमस्कारः; यथा घटविषयविज्ञानाभिधाने घटहेतुकत्वाद् घटपर्याया इति ॥ २८७२ ॥

किञ्च-युक्त्यन्तरेणापि पूज्यस्वामिक एव नमस्कारः; कथम् ?, इत्याह-

अहवा स करेंतो चे-व तस्स जं जिच्चभावमावण्णो ।
का तस्स नमोक्कारे, चिंता दासक्खरोवम्मे ॥ २८७३ ॥

अथवा-यद्यस्मात् स नमस्कारकर्ता नमस्कारं कुर्वाण एव तस्य नमस्कार्यस्याऽर्हदादेर्भृत्यभावं दासत्वमापन्नः; ततस्तस्य नमस्कारकर्तुर्नमस्कारे का चिन्ता ?-किं ममत्वम् ?। ननु नमस्कारस्तावद् दूरे तिष्ठतु, तस्याऽऽत्माऽपि नात्मीयः, पूज्यस्य भृत्यभावेन समर्पणात्। किंविशिष्टे नमस्कारे चिन्ता न विधेया?, इत्याह-(दासक्खरोवम्मे त्ति) दाससंबन्धिना खरेणौपम्यमुपमानं यस्य तस्मिंस्तथाभूते। इदमुक्तं भवति-" दासेण से खरो कीओ, दासो वी से खरो वी से।"इति सिद्धान्तोक्तन्यायाद्दासकल्पो नमस्कारकर्ता, खरकल्पस्तु नमस्कारः, द्वावप्येतौ नमस्कार्यस्यार्हदादेरेव, न पुनर्नमस्कारकर्तुः किञ्चिदिति किं तस्य चिन्तया ?, इति। तदेवं पूज्यस्यैव नमस्कार इति नैगमव्यवहारनयमतेन प्रतिष्ठितम् ॥ २८७३ ॥

पूज्यं च वस्तु द्विविधं-जीवरूपं जिनाऽऽदि, अजीवरूपं च तत्प्रतिमाऽऽदि। अस्य च जीवाजीवपदद्वयस्यैकवचनबहुवचनाभ्यामष्टौ भङ्गा भवन्ति। तद्यथा-जीवस्य १, अजीवस्य २, जीवानाम् ३, अजीवानाम् ४, जीवस्याऽजीवस्य च ५, जीवस्याजीवानां च ६, जीवानामजीवस्य च ७, जीवानामजीवानां च ८। इमामेवाष्टभङ्गीं सोदाहरणां भाष्यकारः प्राऽऽह-

जीवस्स सो जिणस्स व,अज्जीवस्स व जिणिंदपमिमाए ।
जीवाण जईणं पि व, अज्जीवाणं तु पमिमाणं ॥२८७४॥
जीवस्साऽजीवस्स य, जइणो बिंबस्स चेगओ समयं ।
जीवस्साऽजीवाण य, जइणो पमिमाण चेगत्थं ॥२८७५॥
जीवाणमजीवस्स य, जइणं बिंबस्स चेगओ समयं ।
जीवाणमजीवाण य, जईण पमिमाण चेगत्थं ॥२८७६॥
तिस्रोऽपि गतार्थाः ॥ २८७४।२८७५।२८७६ ॥

अत्र परमतमाशङ्क्य परिहरन्नाह-

जीवो त्ति णमोक्कारो, नणु सव्वमयं कहं पुणो नेओ ?।
इह जीवस्सेव सओ,भणइ सामित्तचिंतेयं ॥२८७७॥

ननु " किं जीवो तप्परिणओ " (२८६२) इत्यत्र पूर्वं जीवो नमस्कार इति सर्वनयसंमतं समानाधिकरणमुक्तम्। इह तु " जीवस्स सो जिणस्स व " (२८७४) इत्यादिषष्ठीनिर्देशात्कथं भेदोऽभिधीयते ? । अत्रोच्यते-(इहेत्यादि) इहास्यामष्टभङ्ग्यां जीवस्यैव सतो नमस्कारस्य तथैव समाना-

धिकरणभाजः सतो नमस्कारस्येत्यर्थः । किम् ?, अत आह-स्वामित्वचिन्तेयं भण्यते-'स जीवरूपो नमस्कारः किं नमस्कार्यस्य संबन्धी, नमस्कर्तुर्वा ?,' इत्येतदिह चिन्त्यत इति भावः । एतच्च नैगमव्यवहारनयमतेन चिन्तितम् ॥ २८७७ ॥

अथ संग्रहनयमतेन चिन्तयन्नाह-

सामण्णमेत्तगाही, सपरजिएयरविसेसनिरवेक्खो ।
संगहनओऽजिमण्णइ, तमिहेगस्सावि सिद्धस्स ॥२८७८॥

सामान्यमात्रग्राही संग्रहनयोऽजिमन्यते तमिह नमस्कारं, संबन्धितया कस्य ?, इत्याह-एकस्य । कथंभूतस्य ?, अविशिष्टस्य जीवाजीवविशेषणरहितस्यैकस्यैवाविशिष्टस्य सत्तामात्ररूपस्य संबन्धितया नमस्कारमसौ मन्यते, न तु द्वयोः, बहूनां चेत्यर्थः । अत्रोपपत्तिमाह-" सपरजिएयरविसेसनिरवेक्खो सि । " स्वश्च परश्च स्वपरौ, स्वपरौ च तौ जीवौ च स्वपरजीवौ, तौ चेतरेऽजीवाश्च स्वपरजीवेतराः, तेषां विशेषा एकद्वित्र्यादयः, स्वपरजीवेतराश्च ते विशेषाश्च स्वपरजीवेतरविशेषाः, तन्निरपेक्षो योऽसौ, ततस्तन्निरपेक्षत्वात् सामान्यमात्रस्यैव संग्रहो नमस्कारं मन्यत इति ॥२८७८॥

एतदेव भावयति-

जीवस्साऽजीवस्स व,सस्स परस्स व विसेसणेऽजिम्मो ।
न य भेयमिच्छइ सया, स नमोसामण्णमेत्तस्स ॥२८७९॥

(जीवस्सेत्यादि) जीवस्याऽजीवस्य वा स्वस्य परस्य वा नमस्कारस्येत्येवं विशेषणे कर्त्तव्येऽजिन्नोऽभेदवानसौ एतैर्भेदैर्नमस्कारं न विशेषयति, किं तु सामान्यमात्रग्राहित्वात् सामान्यमात्रस्यैव नमस्कारमसौ मन्यत इत्यर्थः । नवरमेवं, किं तु नमःशब्दरूपं नमस्कारं स्वस्वरूपेणाऽऽधाराऽऽदिभेदाद्भिन्नमसौ मन्यते, अभिन्नं वा ?, इत्याशङ्क्याऽऽह-न च नमस्कारसामान्यमात्रस्याऽऽधाराऽऽदिभेदेऽपि सदा सर्वकाले स संग्रहनयो भेदमिच्छति, सर्वतः सामान्यमात्रग्राहित्वादिति ॥२८७९॥

अथवा जीवस्य नमस्कार इति षष्ठ्या भेदनिर्देशं मूलतः संग्रहो न मन्यत एव, किमनया तस्य स्वामित्वचिन्तया ?, इति दर्शयन्नाह-

जीवो नमु त्ति तुल्ला-हिगरणयं वेइ न ज स जीवस्स ।
इच्छइ वाऽसुद्धयरो, तं जीवस्सेव नऽण्णस्स ॥२८८०॥

(जीवो इत्यादि) संग्रहः "जीवो नमस्कारः" इति तुल्याधिकरणतां समानाधिकरणतामेव ब्रवीति, न पुनरसौ जीवस्य नमस्कार इति व्यधिकरणमिच्छति, जीवनमस्काराऽऽद्यर्थानां सर्वेषामप्यभेदवादित्वादिति । किमयमेक एव प्रकारस्तस्य ?, नेत्याह-(इच्छइ इत्यादि) इच्छति वाऽशुद्धतरः संग्रहनयस्तं नमस्कारं संबन्धितया, कस्य ?, जीवस्यैव जीवसामान्यस्यैव, न पुनरन्यस्याऽऽद्यभङ्गरहितस्य शेषसप्तभङ्गीगतस्याजीवाऽऽदेरिति ॥२८८०॥

अथ ऋजुसूत्रमधिकृत्याऽऽह-

उज्जुसुयमयं नाणं, सदो किरिया च जं नमोक्कारो ।
होज्ज न हि सव्वहा सो, जुत्तो तक्कत्तुरन्नस्स ॥२८८१॥

ऋजुसूत्रनयस्येदं मतम्-यद्यस्माज्ज्ञानमुपयोगरूपं, शब्दो वा " नमोऽर्हद्भ्यः " इत्यादिकः, क्रिया वा शिरोनमनाऽऽदिरूपा नमस्कारो भवेद् ?, इति अथो गतिः । ततो न हि नैव, सर्वथा सर्वैरपि प्रकारैः, तत्कर्त्तारं विनाऽन्यस्य युक्तः स नमस्कारः । तस्मान्नमस्कर्तृस्वामिक एवासौ युज्यते, न तु नमस्कार्यस्वामिक इतीह भावार्थः ॥ २८८१ ॥

कुतः ?, इत्याह-

नाणं जीवाणऽन्नं, तं कहमत्थंतरस्स पुज्जस्स ?।
जीवस्स होज्ज कह वा,पडिमाए जीवरहियाए ? ॥२८८२॥

(नाणमित्यादि) यदि ज्ञानं नमस्कारस्तदा गुणत्वेन तन्नमस्कर्तुर्जीवादनन्यद्द्रव्यतिरिक्तं वर्त्तते, तत्कथमर्थान्तरस्य पूज्यस्य नमस्कार्यस्याऽर्हदादेः संबन्धि वक्तुं युज्यते ? । यदि वा-अघटमानकमप्यभ्युपगम्य ब्रूमः-जीवस्य पूज्यस्यापि संबन्धि तद् भवतु, जीवरहितायास्त्वचेतनायाः प्रतिमायाः कथं वा केन प्रकारेण तद्भवेत् ?, तस्याः सर्वथा ज्ञानशून्यत्वेन कष्टतरं महासाहसमिदमित्यभिप्रायः ॥ २८८२ ॥

एवं सद्दो किरिया,य सद्द-किरियावओ जओ धम्मो ।
न य धम्मो दव्वंतर-संचारी तो न पुज्जस्स ॥ २८८३ ॥

एवं शब्दः क्रिया च यस्माच्छब्दक्रियावतो नमस्कर्तुर्धर्मः, धर्मश्च न द्रव्यान्तरसंचारी, ततो न पूज्यस्य नमस्कार्यस्य नमस्कार इति ॥ २८८३ ॥

कुतः पुनर्धर्मो द्रव्यान्तरसंचारी न स्याद् ?, इत्याह-

एवं च कयविणासा-ऽकयागमेगत्तसंकराऽऽईया ।
अन्नस्स नमोक्कारे, दोसा बहवो पसज्जंति ॥ २८८४ ॥

एवं ह्यनेन पूजकेन कृते नमस्कारे, अन्यस्य पूज्यस्याभ्युपगम्यमाने बहवो दोषाः प्रसजन्ति । के ?, इत्याह-कृतनाशाकृताऽऽगमैकत्वसङ्करादयः । तत्र येन कृतस्तस्यानभ्युपगमात्कृतनाशः, येन च न कृतः पूज्येन, तत्स्वामित्वाभ्युपगमेऽकृताऽऽगमः । तथा-द्वयोरप्यनिष्टनमस्कारधर्मकत्वादेकत्वं, सङ्करो वा । आदिशब्दात्सहोत्पत्तिविनाशाऽऽदय इति ॥ २८८४ ॥

नैगमाऽऽदिनयवादी पूर्वपक्षयन्नाह-

जइ सामिभावओ हो-ज्ज पूयणिज्जस्स सो तो को दोसो ?।
अत्थंतरभूयस्स वि, जह गावो देवदत्तस्स ॥२८८५॥

यदि पूजकादर्थान्तरभूतस्यापि पूजनीयस्य पूजके स्थितोऽपि स्वामिभावेन स नमस्कारो भवेत्, तर्हि को दोषः स्यात् ?-धर्मेस्य द्रव्यान्तरे संचरणाभ्युपगमान्न कश्चिदित्यर्थः । यथाऽन्यत्र स्थितानामपि गवां देवदत्तः स्वामीति ॥२८८५॥

ऋजुसूत्र उत्तरमाह-

अस्सेदं ववएसो, हवेज्ज दव्वम्मि न उ गुणे जुत्तो ।
पमयस्स सुक्कभावो, जुज्जइ न हि देवदत्तस्स ॥२८८६॥

अन्यत्र स्थितेऽपि गवादिके द्रव्ये, अन्यत्र स्थितस्यापि देवदत्ताऽऽदेरस्येदमिति स्वामित्वव्यपदेशो भवेद्युज्यते, गुणे त्वयं न्यायो न युक्तः; न हि पटस्य शुक्लभावः शुक्लगुणो देवदत्तस्य भण्यते, साङ्कर्यैकत्वाऽऽदिदोषप्रसङ्गादिति ॥ २८८६ ॥

पुनरपि परः प्राऽऽह-

ववएसाभावम्मि वि, नणु सामित्तमणिवारियं चेव ।
अन्नाधाराणं पि हु, सगुणाण व जोगभावाओ ॥२८८७॥

ननु गुणेष्वप्ययं न्यायो दृश्यते एव; तथाहि-अन्याऽऽधाराणामपि देवदत्तसंबन्धिपटाऽऽदिगतानामपि, शुक्लाऽऽदिगुणानामिति शेषः । देवदत्तस्यैते शुक्लाऽऽदिगुणा इति व्यपदेशाभावेऽपि ननु तस्य तत्स्वामित्वमनिवारितमेव । कुतः ?, इत्याह-योगभावादिति, निजपटाऽऽदिगतशुक्लाऽऽदिगुणानां देवदत्तेन युज्यमानत्वादित्यर्थः । केषां वा कस्य स्वामित्वम् ? इत्याह-

यथा-स्वगुणानां रूपाऽऽदीनां देवदत्तस्य स्वामित्वम् । ततः पूजके स्थितस्यापि नमस्कारस्य यदि पूज्यः स्वामी भवेत्, तदा को दोषः ?, इति प्रकृतम् ॥ २८८७ ॥

ऋजुसूत्रः प्राऽऽह-तथाऽपि पूज्यस्य नमस्कार इति न मन्यामहे । कुतः ?, इत्याह-

एवं पि न सो पुज्ज-स्स तप्फलाभावओ परधणं व ।
जुत्तो फलजोगाओ, सधणं पि व पूजयंतस्स ॥२८८८॥

एवमपि न स नमस्कारः पूज्यस्य युक्तः, तत्फलस्य स्वर्गाऽऽदेरभावात्परधनवदिति । युक्तः पुनरसौ पूजकस्य, स्वर्गाऽऽदेः फलस्य सद्भावात्, स्वधनवदिति ॥ २८८८ ॥

पुनरपि नैगमाऽऽदिनयमतमाशङ्क्य ऋजुसूत्रः परिहरन्नाह-

णणु पुज्जस्सेव फलं, दीसइ पूया न पूजयंतस्स ।
नाणुवजीवित्तणओ,तं तस्स फलं जहा नभसो ।२८८९।

ननु पूज्यस्यैव पूजालक्षणं फलं प्रत्यक्षतो दृश्यते,न तु पूजकस्य, ततः तत्फलाभावादित्यसिद्धो हेतुः । एवं नैगमाऽऽदिवादिना प्रोक्ते ऋजुसूत्रः प्राऽऽह--न तत्तस्य पूज्यस्य पूजालक्षणं फलम्, अनुपजीवित्वात्, यथा नभसः। इह यो यस्यानुपजीवी न तत्तस्य फलं,यथा ननसो दह्यमानागुरुकर्पूराऽऽदिधूमपटलप्रसरस्तुमनोगन्धाऽऽदिफलं न भवति,किं तु तदुपजीवकस्य देवदत्ताऽऽदेरेव, अनुपजीवी च पूजाया वीतरागः, अतो न तस्य तत्फलं किं तु पूजकस्यैवेति ॥ २८८९ ॥

न य दिट्ठफलत्थोऽयं, जुत्तो पुज्जस्स वोवगाराय ।
किं तु परिणामसुद्धी, फलमिट्ठं सा य पूजयओ ।२८९०।

न च दृष्टमेव प्रत्यक्षं पूजाऽऽदिकं फलमर्थः प्रयोजनं यस्याऽसौ दृष्टफलार्थोऽयं नमस्कर्तुः नमस्कारो युक्तः, नापि च पूज्योपकारायासौ, किं त्वनन्तरं परिणामविशुद्धिः फलमिष्टं नमस्कारस्य, परम्पराफलं तु स्वर्गापवर्गाऽऽदि । सा च परिणामशुद्धिः, तच्च स्वर्गप्राप्त्यादिकं फलं पूजयतः पूजकस्यैव भवति, न तु पूज्यस्येति । तस्मात्स नमस्कारस्तस्य नमस्कर्तुरेव, न नमस्कार्यस्येति ॥ २८९० ॥

ऋजुसूत्रनयप्रतिज्ञाहेतुनाऽऽह-

कत्तुरहीणत्तणओ, तग्गुणओ तप्फलोवजोगाओ ।
तस्स क्खओवसमओ, तज्जोगाओ य सो तस्स ।२८९१।

कर्तुरेवाधीनत्वात्, तदधीनत्वं च तेनैव क्रियमाणत्वादिति । तथा तद्गुणत्वाद्, ज्ञानशब्दक्रियारूपत्वेन नमस्कारस्य कर्तुर्गुणत्वादित्यर्थः । तथा--तस्य नमस्कारस्य यत् फलं स्वर्गाऽऽदिकं तदुपभोगादिति । तथा--तस्य नमस्कारस्य यः कारणभूतः कर्मक्षयोपशमः, तस्य कर्तृयैव सद्भावात्, कारणपरित्यागेन च कार्यस्यान्यत्रायोगादिति । तथा--तद्योगात्--तत्परिणामरूपत्वादिति । दृष्टान्तास्तु पञ्चस्वपि हेतुषु स्वधनवदित्यादयः स्वयमभ्यूह्या इति ॥ २८९१ ॥

अथ शब्दाऽऽदिनयत्रयमतेन स्वामित्वचिन्तामाह-

जं नाणं चेव नमो, सद्दाऽऽईणं न सद्दकिरियाओ ।
तेण विसेसेण तयं, बज्झस्स न तेऽणुमण्णंति ॥२८९२॥

यद् यस्माद् नमो नमस्कारः शब्दाऽऽदिनयमतेनोपयोगरूपं ज्ञानमेव,न तु शब्दक्रिये,शुद्धत्वेन ज्ञानवादित्वात् तेषामिति भावः। तेन विशेषत एव ते नमस्कारं ते शब्दाऽऽदयो बाह्यस्य जिनेन्द्राऽऽदेस्तत्प्रतिमाऽऽदेर्वा नाऽनुमन्यन्ते नेच्छन्ति,किं तु तदुपयोगवतोऽन्तरङ्गस्यैव पूजकजीवस्य ते तमिच्छन्ति । इति त्रिंशद्गाथार्थः ॥ २८९२ ॥ गतं कस्येति प्ररूपणाद्वारम ।

अथ केनेति द्वारमाह-

नाणाऽऽवरणिज्जस्स य, दंसणमोहस्स जो खओवसमो ।
जीवमजीवे अट्ठसु, भंगेसु य होइ सव्वत्थ ॥ २८९३ ॥

ज्ञानाऽऽवरणीयस्येत्यनेन मतिश्रुतज्ञानाऽऽवरणद्वयं गृह्यते; नमस्कारस्य मतिश्रुतज्ञानान्तर्गतत्वाद्; ज्ञानस्य च सम्यक्त्वसहचरितत्वाद्दर्शनमोहनीयमप्याक्षिप्यते । ततो मतिश्रुतज्ञानाऽऽवरणद्वयस्य, दर्शनमोहनीयस्य च कर्मणो यः क्षयोपशमः 'तेन हेतुभूतेन नमस्कारो लभ्यते' इत्यध्याहारः । तस्य चाऽऽवरणस्य द्विविधानि स्पर्द्धकानि भवन्ति-सर्वोपघातीनि, देशोपघातीनि च । तत्र सर्वेषु सर्वघातिषु हतेषु देशोपघातिनां च प्रतिसमयमनन्तैर्भागैर्विमुच्यमानः क्रमेण नमस्कारस्य प्रथमं नमस्कारलक्षणमक्षरं लभते । एवमेकैकवर्णप्राप्त्या समस्तनमस्कारं प्राप्नोतीति । गतं केनेतिद्वारम ।

अथ कस्मिन्निति द्वारमभिधित्सुराह-[जीवमजीवे इत्यादि] मकारोऽलाक्षणिकः । नमस्कारस्य जीवगुणत्वाज्जीवः, ततो नमस्कारवान् जीवो यदा गजेन्द्राऽऽदौ जीवेऽधिकरणे वर्तते तदा जीवे नमस्कारोऽभिधीयते, यदा तु कटाऽऽद्यजीवे तदाऽजीवेऽसौ व्यपदिश्यते । यदा तु जीवाजीवोभयाऽऽत्मके वस्तुनि तदा जीवाजीवयोः । इत्येकबहुवचनाभ्यां प्रागुक्तेष्वष्टसु भङ्गेषु सर्वत्रायं भवति ॥ इति निर्युक्तिगाथासङ्क्षेपार्थः ॥ २८९३ ॥

विस्तरार्थं त्वभिधित्सुर्भाष्यकारः प्राऽऽह-

केणं ति णमोक्कारो, साहिज्जइ लब्भए व जेणियम्मि ।
कम्मक्खओवसमओ, किं कम्मं को खओवसमो? ॥२८९४॥

केन हेतुना नमस्कारः साध्यते, लभ्यते वा ?, इति जल्पिते गुरुराह-कर्मक्षयोपशमतोऽसौ लभ्यते । विनेयः प्राऽऽह-किं तत्कर्म, कश्च क्षयोपशमः ?, इति ॥ २८९४ ॥

तत्र कर्म तावदाह-

मइसुयनाणाऽऽवरणं, दंसणमोहं च तदुवघाईणि ।
तप्फड्डयाइं दुविहा-इं सव्वदेसोवघाईणि ॥ २८९५ ॥
सव्वेसु सव्वघाई-सु हएसु देसोवघाइयाणं च ।
भागेहिं मुच्चमाणो, समए समए अणंतेहिं ॥ २८९६ ॥
पढमं लहइ नकारं, एक्केक्कं वन्नमेवमन्नं पि ।
कमसो विसुज्झमाणो, लहइ समत्तं नमोक्कारं ॥२८९७॥

तिस्रोऽपि गतार्थाः, नवरं मतिज्ञानाऽऽवरणाऽऽदिस्पर्द्धकानि तीव्रमन्दमध्यमाऽऽदिभेदभिन्नरसविशेषरूपाणि स्थानान्तरादवसेयानीति ॥ २८९५ ॥ २८९६ ॥ २८९७ ॥

यदुक्तम्-' कश्च क्षयोपशमः ? ' इति, तत्राऽऽह-

खीणमुइन्नं वेसय-मुवसंतं भण्णई खओवसमो ।
उदयविघाय उवसमो,जा समुइन्नस्स य विसुद्धी॥२८९८।

पूर्वार्द्धमेवोत्तरार्द्धेन व्याचष्टे-अनुदितस्योदयविघात उपशमः,

समुदीर्णस्योदितस्य पुनर्या विशुद्धिः क्षपणं, स क्षय इति शेषः। क्षयेणोपलक्षित उपशमः क्षयोपशम इति समासः ॥ २८९८ ॥

अथ मतिश्रुताऽऽवरणद्वयस्य, दर्शनमोहनीयस्य च क्षयोपशम इह किमिति गृह्यते ?, इत्याह-

सो सुयनाणं मइमणु-गयं च तं जं च सम्मदिट्ठिस्स ।
तो तद्वाजे जुगवं, मइसुयसम्मत्तलाभो त्ति ॥ २८९९ ॥

स नमस्कारस्तावत्स्वयं श्रुतज्ञानं, तच्च श्रुतज्ञानम् " मइपुव्वं जेण सुयं " इत्यादिवचनान्मत्यनुगतं मतिपूर्वमेव भवति। एते च मतिश्रुते यस्मात्सम्यग्दृष्टेरेव भवतः। ततस्तल्लाभे नमस्कारलाभे, युगपत्समकालं, मतिश्रुतसम्यक्त्वानां लाभो भवतीति। अतो मतिश्रुतज्ञानाऽऽवरणीयद्वयस्य, दर्शनमोहनीयस्य च क्षयोपशमोऽत्र गृह्यत इति ॥ २८९९ ॥ तदेवं व्याख्यातं केनेति द्वारम्।

अथ कस्मिन्निति द्वारं व्याचिख्यासुराह-

कम्हि नमोक्कारोऽयं, बाहिरवत्थुम्मि कत्तुराहारो।
नेगमववहारमयं, जीवादावट्ठभेयम्मि ॥ २९०० ॥
जं सो जीवाणन्नो, तेण तओ जत्थ सो वि तत्थेव ।
एगम्मि अणेगेसु य, जीवाजीवोभएसुं च ॥ २९०१ ॥

कस्मिन् वस्तुन्याधारभूते नमस्कारोऽयं भवतीति शिष्येण पृष्टे गुरुराह-नैगमव्यवहारमतं तावदिदम्-अष्टभेदे पूर्वोक्तभङ्गाष्टकनिर्दिष्टे नमस्कर्तृजीवस्याऽऽधारभूते जीवाऽऽदौ बाह्यवस्तुनि नमस्कारो भवतीति ॥ २९०० ॥ कस्मात्पुनर्नमस्कर्तृजीवाऽऽधारे वस्तुन्ययं भवति ?, इत्याह-(जमित्यादि) यस्मादसौ नमस्कारो नमस्कर्तृजीवादनन्यः, तेन तस्मात्कोऽसौ नमस्कर्तृजीवो यत्रैकस्मिन्-जीवे, अजीवे, उभयस्मिन् वा; अनेकेषु-जीवेषु, अजीवेषु, उभयेषु वा भवति, सोऽपि नमस्कारः, तत्रैव स्याद्, अन्यथा-अनेदायोगादिति ॥ २९०१ ॥

एवमुक्ते पूर्वापरविरोधमुद्भावयन्नाह-

नणु नेगमाऽऽइवयणं, पुज्जस्स तओ कहं न तत्थेव ?।
तस्स य न य तम्मि तओ, धन्नं व नरस्स खेत्तम्मि ।२९०२।

ननु नैगमाऽऽदिवचनं पूर्वमेवं व्याख्यातम्-पूज्यस्य संबन्धी तकोऽसौ नमस्कारः, तत्कथमसौ तत्रैव पूज्ये न भवति ?। सत्यम्-(तस्स य त्ति) तस्यैव पूज्यस्य नैगमाऽऽदिमतेन नमस्कार इति मन्यामहे, न हि किञ्चिद्विस्मृतमिदम्, केवलम् (न य तम्मि तओ त्ति) तस्मिन्नेव पूज्ये तकोऽसौ नमस्कार इति न नियमः। न हि यद्यस्य संबन्धि तस्य स एवाऽऽधारः, अन्यथाऽपि दर्शनात्; यथा-धान्यं भवति देवदत्ताऽऽदिनरस्य संबन्धि, न च तत्तत्रैव, किं तु क्षेत्रे आधारभूते तदिति ॥ २९०२ ॥

संग्रहमतेन नमस्कारस्याऽऽधारमाह-

सामन्नमेत्तगाही, सपरिजिएयरविसेसनिरवेक्खो ।
संगहनओऽजिमन्नइ, आहारे तमविसिट्ठम्मि ॥२९०३॥

व्याख्या पूर्ववत्, नवरमविशिष्टे सामान्यमात्रे आधारे संग्रहस्तं नमस्कारं मन्यत इति ॥२९०३॥

एतदेव भावयति-

जीवम्मि अजीवम्मि व,सम्मि परम्मि व विसेसणेऽजिन्नो।
न य भेदमिच्छइ सया, नमोसामन्नमेत्तस्स ॥ २९०४ ॥

आधारस्य जीवाऽऽदिविशेषणे कर्त्तव्ये सामान्यवादित्वात्यस्मादजिन्नोऽभेदतत्परोऽसौ, तस्मादविशिष्टे आधारे नमस्कारं मन्यत इति। न चाऽऽधाराऽऽदिनेदेन नमस्कारसामान्यमात्रस्यापि सदा नेदमिच्छत्यसौ, किं त्वभेदमेवेच्छति, सामान्यवादित्वादेवेति ॥ २९०४ ॥

अथवा-अन्योऽन्यत्र वर्त्तत इति व्यधिकरणं संग्रहो मूलत एव नेच्छति, इच्छति वा कोऽप्यशुद्धतरो नमस्कारं जीव एव, नाजीवे, इत्येतदर्शयन्नाह-

जीवो नमो त्ति तुल्ला-दिगरणयं वेइ न उ स जीवम्मि ।
इच्छइ वाऽसुद्धयरो, तं जीवे चेव नन्नम्मि ॥ २९०५ ॥

गतार्था ॥२९०५॥

अथ ऋजुसूत्रनयमतेनाऽऽधारचिन्तामाह-

उज्जुसुयमयं नाणं, सदो किरिया च जं नमोक्कारो ।
होज्ज न हि सव्वहा सो,मओ तदत्थंतरब्भूओ ।२९०६।

प्रागुक्तार्था, नवरं न खलु सर्वथाऽसौ नमस्कारः, तस्मात्कर्तुरर्थान्तरभूतो मतः, किं तु कर्त्तैवाऽऽधारे नमस्कार इति भावः ॥ २९०६ ॥

एतदेव समर्थयति—

सगुणम्मि नमोक्कारो, तग्गुणओ नीलया व पत्तम्मि ।
इहरा गुणसंकरओ, सव्वेगत्ताऽऽइओ दोसा ॥२९०७॥

स्वस्याऽऽत्मनो गुणी स्वगुणी, तस्मिन् स्वगुणिनि कर्त्तरि नमस्कारः,नान्यत्रेति प्रतिज्ञा। तद्गुणत्वादिति हेतुः। पत्रे नीलतावदिति दृष्टान्तः। विपर्यये बाधकमाह-इतरथा-अन्यगुणस्य अन्यत्र गमने, गुणानां परस्परं साङ्कर्याद्, गुणिनां सर्वेषामपि साङ्कैर्यैकत्वाऽऽदयो दोषा भवेयुरिति ॥ २९०७ ॥

अत्र कश्चित्प्रेरयति-

जिन्नाऽऽधारं पीच्छइ,नणु रिजुसुत्तो जहा वसइ खम्मि ।
दव्वं तत्थाहिगयं, गुणगुणिसंबंधचिंतेयं ॥ २९०८ ॥

ननु भिन्नाऽऽधारमपि अन्यस्यान्यमप्याधारमृजुसूत्र इच्छत्येव,यथा-अनुयोगद्वारेषु वसतिदृष्टान्तमृजुसूत्रमतेनाभिदधता प्रोक्तम्-' क्व वसति भवान् ?' 'खे आकाशे वसामीति'। तत्कथमिह जिन्नाऽऽधारता निषिध्यते ?, इति। अत्रोत्तरमाह-(दव्वमित्यादि) इदमत्र हृदयम्-द्रव्यं देवदत्ताऽऽदिकं द्रव्यान्तरे आकाशे वर्त्तत इति मन्यत एव ऋजुसूत्रः। इह तु गुण-गुणिसंबन्धचिन्ता प्रस्तुता। ततोऽन्यगुणोऽन्यत्र वर्त्तत इतीहासौ न मन्यत इति न कश्चिद्विरोध इति ॥२९०८॥

एतदेव व्यक्तीकरोति—

सो संमन्नइ न गुणं, नियया हारं तया सयं इहरा।
को दोसो जइ दव्वं, हव्वेज्ज दव्वंतराऽऽहारं ? ॥२९०९॥

गतार्था, नवरं निजाद्याधारादाधारान्तरमाश्रयो यस्य स तथा, तमेवंभूतं गुणं न संमन्यतेऽसाविति ॥ २९०९ ॥

शब्दाऽऽदिनयमतमधिकृत्याऽऽह-

जं नाणं चेव नमो, सद्दाऽऽईणं न सद्दकिरिया वि ।
तेण विसेसेण तयं, बज्झम्मि न तेऽणुमन्नंति ॥२९१०॥
इच्छइ अवि सज्जुसुओ, किरियं पि स तेण तस्स काए वि ।
इच्चंति न सद्दनया, नियमा तो तेसि जीवम्मि ॥२९११॥

यद् यस्माच्छब्दाऽऽदिमते नमो नमस्कारो ज्ञानमेव, न तु शब्दक्रिये अपि, तेन विशेषत एव तं नमस्कारं तत्कर्तुर्जीवाद् बाह्ये वस्तुनि ते शब्दाऽऽदयो नानुमन्यन्त इति ॥२९१०॥ तर्हि ऋजुसूत्राच्छब्दाऽऽदीनां न कश्चिद्भेदः, सर्वैरपि कर्तरि नमस्कारस्याभ्युपगमात् । तदयुक्तम् । यत इच्छत्यपि ऋजुसूत्रः (किरियं पि) क्रियारूपमपि, अपिशब्दाच्छब्दरूपमपि नमस्कारं, तेन तस्य मते " नमोऽर्हद्भ्यः " इत्यादिशब्दमुच्चारयतः शिरोनमनाऽऽदिक्रियां च कुर्वतः कर्तुः कायेऽपि स नमस्कारो भवति । शब्दनयास्तु शब्दक्रियारूपं नमस्कारं नेच्छन्त्येव । किं तूपयोगरूपं ज्ञानमेव तमिच्छन्ति । अतस्तेषां मते नियमात् तदुपयोगवति कर्तृजीव एव नमस्कारो, न काये इति विशेषः । इत्यष्टादशगाथार्थः ॥ २९११ ॥ व्याख्यातं कस्मिन्निति द्वारम् ।

अथ कियच्चिरं कालं नमस्कारो भवतीति द्वारम्, तत्राऽऽह-

उवओग पडुच्चंतो, मुहुत्त लद्धीए होइ उ जहन्ना ।
लद्धोसहिया छावट्ठि सागरा अरिहाऽऽइ पंचविहो ॥२९१२॥

उपयोगं प्रतीत्य जघन्यतः, उत्कृष्टतश्च नमस्कारस्यान्तर्मुहूर्तं स्थितिर्भवति । लब्धेस्तु तदावरणक्षयोपशमरूपाया जघन्याऽऽन्तर्मुहूर्तमेव स्थितिः । उत्कृष्टतस्तु साधिकानि षट्षष्टिः सागरोपमाणि स्थितिर्भवति । इयं च-" दो वारे विजयाइसु " (२७६२) इत्यादिना मतिज्ञानाऽऽदीनामिव भावनीयेति द्वारम् ।

अथ कतिविधो नमस्कार इति द्वारमाह-(अरिहाऽऽइ इत्यादि) अर्हत्सिद्धाऽऽदिपञ्चपदानामादौ नम इति पदस्य निपातात्पञ्चविधो नमस्कारः । इति निर्युक्तिगाथाऽर्थः ॥ २९१२ ॥

अत्र प्राप्यम्-

सो कइविहो त्ति भणिए, पंचविहो भणइ नणु पुराऽभिहियं ।
इक्कं नमोऽभिहाणं, केण विहाणेण पंचविहं ? ॥२९१३॥

स नमस्कारः कतिविधः ?, इति भणिते पृष्टे गुरुराह-पञ्चविध इति । अत्र भणति प्रेरकः-ननु पुरा पूर्वं "नेवाइयं पदं" (२८४०) इत्यत्राभिहितं प्रतिपादितम्, एकमेव ' नमः ' इत्यभिधानम् । तत्केन विधानेन केन भेदेन पञ्चविधमुच्यते ?, इति ॥ २९१३ ॥

अत्रोत्तरमाह-

एगं नमोऽभिहाणं, तदरुहयाईयसन्निवायाओ ।
जायइ पंचविगप्पं, पंचविहत्थोवओगाओ ॥ २९१४ ॥

सत्यम्, एकविधमेव नमोऽभिधानं, किं त्वर्हदादिपञ्चपदानामादौ सन्निपातात्पञ्चविधेऽर्हदादिकेऽर्थे उपयोगान्नमस्करणक्रिययोपयुज्यमानत्वात्पञ्चविकल्पं पञ्चभेदं जायत इति ॥२९१४॥

अथवा " एकं नमोऽभिधानम् " (२९१४) इत्यसिद्धं नैपातिकमिति, सान्वर्थाभिधानेनैव प्रागपि तस्यानेकविधत्वसूचनाऽऽदिति दर्शयन्नाह-

अहवऽन्नपयाइनिवा-यणा हि नेवाइयं च ताइं च ।
पंचारुहयाऽऽईणि य, पयाणि तं निवयए जेसु ॥२९१५॥

अथवा-अन्यपदानामादौ निपातनान्नैपातिकं पदमिदं प्रागुक्तम् । तच्च येष्वन्यपदेष्वादौ निपतति तान्यर्हत्सिद्धाऽऽदीनि पञ्च पदानि, अतः पञ्चानामन्यपदानामादौ निपतनान्नैपातिकमित्यन्वर्थत एव पञ्चविधमिदं सामर्थ्यात्प्रागप्युक्तम् । अत्र तु कतिविधो नमस्कार इति द्वारे स एवार्थो व्यक्तीकृत इति ॥ २९१५ ॥

अथवा-पूर्वं पदद्वार एव पञ्चविधो नमस्कार उक्तः, इह तु कतिविधो भवेत् ?, इति द्वारे पञ्चविधानामर्हदादिपदानामर्थः कथ्यत इत्येतद्दर्शयन्नाह-

अहवा नेवाइयपय-पयत्थमेत्ताभिहाणओ पुव्वं ।
इहमरिहदाइपंचवि-धपयपयत्थोवदेसणया ॥ २९१६ ॥

अथवा-नैपातिकं यत्पदं तस्य यत्पदार्थमात्रं पञ्चानामर्हदादिपदानामादौ निपतनाद् नैपातिकमित्येवंस्वरूपं तस्य यदभिधानं कथनं तस्मान्नैपातिकपदपदार्थमात्राभिधानात्पूर्वमेव पदद्वारे सामर्थ्यात् ' पञ्चविधो नमस्कार उक्तः ' इति शेषः । इह तु ' कतिविधो नमस्कारः ? ' इति द्वारे तेषामेव पञ्चानामर्हदादिपदानां " नमोऽर्हद्भ्यो, नमः सिद्धेभ्यो, नम आचार्येभ्यः " इत्यादिको यः पदार्थस्तस्यैवोपदेशना कथना कार्या, तस्या एव प्रागनुक्तत्वादिति ॥ २९१६ ॥

अत्र परस्य प्रेर्यमाशङ्क्य परिहरन्नाह-

नणु वत्थुम्मि पयत्थो, न जओ तच्चकहणं तहिं जुत्तं ।
तह वि पयत्थं तत्थे-व लाघवत्थं पवोच्चिहिइ ॥२९१७॥

नन्वग्रे वस्तुद्वारेऽर्हदादिपदानामर्थो वक्ष्यते, तत्कथमुच्यते-' इहार्हदादिपदानामर्थोपदेशनात् ' इति ? । तदेतत् परोक्तं न, यतो यस्मादिह ' नमोऽर्हद्भ्यः ' इत्यादिके पदार्थे कथिते सति ततस्तत्र वस्तुद्वारेऽर्हदादीनां " देवासुरमणुएसु, अरिहा पूयसुरुत्तमा जम्हा । अरिणो हंता रयं हंता, अरिहंता तेण वुच्चंति " ॥ १ ॥ इत्यादिकं, (तच्चकहणं ति) तत्त्वकथनं स्वरूपनिवेदनं युक्तं भवति । क्रियतां तर्ह्येवं, कथ्यतामत्र पदार्थ इति चेत् । अत्राऽऽह-(तह वि इत्यादि) यद्यप्यत्र पदार्थे कथिते सति तत्र स्वरूपकथनं युज्यते, तथाऽपि नेह पदार्थः कथ्यते, किं तु ग्रन्थलाघवार्थं तत्रैव वस्तुद्वारे पदार्थं वक्ष्यतीति; अन्यथा यत्रार्हदादिपदानामर्थः, तत्र त्वर्हदादीनां स्वरूपकथनमिति ग्रन्थगौरवमेव स्यादिति गाथापञ्चकार्थः । तदेवमुक्ता षड्विधप्ररूपणा ॥ २९१७ ॥

अथ नवविधां तामभिधित्सुराह-

संतपयपरूवणया, दव्वपमाणं च खेत्त फुसणा य ।
कालो य अंतरं भा-गजावअप्पाबहुं चेव ॥२९१८॥

इति द्वारगाथा । एतैः सत्पदप्ररूपणताऽऽदिभिर्नवभिर्द्वारैर्नमस्कारस्य नवविधेयं प्ररूपणा प्रोच्यते ॥२९१८॥

तत्र प्रथमद्वारमधिकृत्याऽऽह-

संतपयं पमिवज्जे, पडिवज्जंते य मग्गणा गइसु ।
इंदिय काए जोए, वेए य कसाय-लेसासु ॥२९१९॥

सम्मत्तनाणदंसण-संजयउवओगओ य आहारे।
नासगपरित्तपज्ज-त्तसुहुमसन्नी य भवचरिमे ॥२९२०॥

सच्चं तत्पदं च सत्पदं, विद्यमानार्थं पदमित्यर्थः; तच्चेह नमस्कारलक्षणम् । तस्य नमस्कारलक्षणस्य सत्पदस्य पूर्वप्रतिपन्नान्, प्रतिपद्यमानकांश्चाऽऽश्रित्य (मग्गण त्ति) मार्गणा अन्वेषणा कर्त्तव्या । कासु ?, चतसृष्वपि गतिषु । तद्यथा-नमस्कारः किमस्ति, न वा ?। अस्तीति ब्रूमः। तत्र चतुष्प्रकारायामपि गतौ नमस्कारस्य पूर्वप्रतिपन्ना नियमतो विद्यन्ते, प्रतिपद्यमानास्तु विवक्षितकाले भाज्याः-कदाचिद्भवन्ति, कदाचिन्नेति । एवमिन्द्रियाऽऽदिष्वपि चरमान्तेषु द्वारेषु यथा पीठिकायां मतिज्ञानस्य सत्पदप्ररूपणता कृता, तथा नमस्कारस्यापि कर्त्तव्या, तयोरभिन्नस्वामित्वेनैकवक्तव्यत्वादिति । तदेवं गतं सत्पदप्ररूपणताद्वारम् ॥ २९१९ ॥ २९२० ॥

अथ द्रव्यप्रमाणद्वारमुच्यते-तत्र नमस्कारवज्जीवद्रव्यप्रमाणं वक्तव्यम् । एकस्मिन् समये कियन्तो नमस्कारं प्रतिपद्यन्ते, सर्वे वा कियन्त इति ?। क्षेत्रमिति क्षेत्रं वक्तव्यम्-कियति क्षेत्रे नमस्कारः संभवति ?। स्पर्शना च वक्तव्या-कियद्भुवं नमस्कारवन्तः स्पृशन्ति । इदं च द्वारत्रयमधिकृत्याऽऽह-

पलियमसंखेज्जइमो, पमिवन्नो होज्ज खेत्त लोगस्स।
सत्तसु चोद्दसभागे-सु होज्ज फुसणा वि एमेव ॥२९२१॥

(पलियेत्यादि) इह सूचनात्सूत्रमध्यायमर्थः-नमस्कारस्य प्रतिपत्तिमङ्गीकृत्य लोके कदाचिद्भवन्ति, कदाचिन्नेति । यदि भवन्ति जघन्यत एको द्वौ त्रयो वा, उत्कृष्टतस्तु सूक्ष्मक्षेत्रे पल्योपमासंख्येयभागप्रदेशराशितुल्या इति । पूर्वप्रतिपन्नास्तु जघन्यतः सूक्ष्मक्षेत्रपल्योपमासंख्येयभागप्रदेशराशिपरिमाणा एव, उत्कृष्टतस्तेभ्यो विशेषाधिका इति । (खेत्त त्ति) क्षेत्रद्वारमुच्यते-तत्र नमस्कारवान् जीव ऊर्ध्वमनुत्तरसुरेषु गच्छन्नूर्ध्वलोकस्य सप्तसु चतुर्दशभागेषु भवति, अधस्तु षष्ठपृथिव्यां गच्छन् पञ्चसु चतुर्दशभागेषु भवतीति द्रष्टव्यम् । स्पर्शनाद्वारमप्येवं वक्तव्यम् । क्षेत्रस्पर्शनयोस्तु प्रागुक्तो विशेष इति ॥ २९२१ ॥

कालान्तरभावलक्षणं द्वारत्रयमधिकृत्याऽऽह-

एगं पडुच्च हेट्ठा, जहेव नाणाजियाण सव्वद्धा।
अंतर पडुच्चमेगं, जहन्नमंतोमुहुत्तं तु ॥ २९२२ ॥
उक्कोसऽणंतकालं, अवड्ढपरियट्टगं च देसूणं।
णाणाजीवे णत्थि उ, नावे य भवे खओवसमे ॥२९२३॥

एकं नमस्कारवन्तं जीवं प्रतीत्य (हेट्ठा जहेव त्ति) यथैवाऽधस्तादनन्तरमिहैव "उवओग पडुच्चंतो,सुहुमसन्नीएँ होइ व जहन्ना।" (२९१२) इत्यादिना कालः उक्तः, तथेहापि वक्तव्यः। नानाजीवानां तु नमस्कारः सर्वाद्धा सर्वकालं भवति, लोके तस्य सर्वदाऽविच्छेदादिति प्रतिपत्तिः । तस्य पुनर्लाभेऽन्तरमप्येकं जीवं प्रतीत्य जघन्यतोऽन्तर्मुहूर्तं भवति ॥ २९२२ ॥ उत्कृष्टतस्त्वपार्द्धपुद्गलपरावर्तलक्षणोऽनन्तकाल इति । नानाजीवांस्तु प्रतीत्य नास्त्यन्तरं, तदविच्छित्तेरेवेति । भावे तु क्षायोपशमिके नमस्कारो भवेदिति प्राक्षुर्यमङ्गीकृत्यैतदुक्तम्, अन्यथा-क्षायिकौपशमिकयोरप्येके वदन्ति, क्षायिके यथा-श्रेणिकाऽऽदीनाम्, औपशमिके भेदेयन्तर्गतानामिति ॥ २९२३ ॥

भागद्वारमाह--

जीवाणऽणंतभागो, पमिवन्नो सेसगा अणंतगुणा।
वत्थुं तरइंताई, पंच भवे तेसिमो हेऊ ॥ २९२४ ॥

जीवानामनन्ततमो भागो नमस्कारस्य प्रतिपन्नः प्राप्यते। शेषकास्तु तमप्रतिपन्ना मिथ्यादृष्टयोऽनन्तगुणाः । इदं च प्रागद्वारं गाथायां भावद्वारात्पूर्वमुपन्यस्तमपि व्यत्ययेन निर्दिष्टं, विचित्रत्वात्सूत्रगतेः । अल्पबहुत्वद्वारमपि नेह विद्यतम् । पीठिकायां मतिज्ञानस्येव च भावनीयमिति । साम्प्रतं यच्छब्दाऽऽक्षिप्तं पञ्चविधाऽऽदिप्ररूपणामनभिधाय वस्तुद्वारं तावदाह-(वत्थुमित्यादि) वस्तु ब्रूयं दलिकं नमस्कारस्य योग्यमर्हमित्यनर्थान्तरम्,तच्चेह नमस्काराहाः पञ्चार्हदादयो मन्तव्याः । तेषां च वस्तुत्वेन नमस्काराहंत्वेऽयं वक्ष्यमाणलक्षणो हेतुः । इति निर्युक्तिगाथासप्तकार्थः ॥ २९२४ ॥

इह " एगं पडुच्च हेट्ठा जहेव " (२९२२) इत्यादिना नमस्कारस्य कालद्वारं निरूपितम् । अथवा-अन्यथा तच्चिन्तनीयं, कथम् ?, इत्याह भाष्यकारः-

अहवोसप्पुस्सप्पिणि-कालो नियओ य तब्विसिट्ठो य।
तत्थऽत्थि नमोक्कारो, न व त्ति णेयं जहा सुत्तं ॥२९२५॥

अथवा-अवोत्सर्पिण्यवसर्पिणीलक्षणः कालो गृह्यते । स च भरतैरवतेषु नियतः प्रतिनियतेन निजस्वरूपेण वर्त्तते, हैमवतहरिवर्षदेवकुरूत्तरकुरुमहाविदेहरम्यकैरण्यवतेषु पुनस्तद्विशिष्टः। तस्मादुत्सर्पिण्यवसर्पिणीकालाद्विशिष्टो विशेषितस्तत्प्रतिभागरूप एव कालोऽस्ति । तत्र त्रिविधेऽपि काले नमस्कारोऽस्ति, न वा ?, इति चिन्तायां यथा श्रुतं श्रुतसामायिकं पूर्वमुक्तं, तथाऽत्रापि ज्ञेयं, नमस्कारस्यापि श्रुतविशेषरूपत्वादिति ॥ २९२५ ॥

इह च "संतपयपरूवणया" (२९१८) इत्यादिनवद्वाराणां किञ्चिदुक्तमवशिष्यते, किञ्चिच्चेत्यतो भाष्यकारोऽतिदेशमाह-

मइसुयनाणं नवहा, नंदीए जह परूवियं पुव्वं।
तह चेव नमोक्कारो, सो वि सुयन्नंतरो जम्हा ॥२९२६॥

सुगमा ॥२९२६॥ विशे० । आ० म० ।

(आभिनिबोधिकश्रुतज्ञानशब्दावलोकनावसेया चेयम्)

अथ यच्छब्दसूचितां पञ्चविधप्ररूपणामाह-

आरोवणा य नयणा, पुच्छा तह दायणा य निज्जवणा।
एसा वा पंचविहा, परूवणा रोवणा तत्थ ॥२९२७॥

आरोपणा च नयना, पृच्छा तथा-दायना दर्शना दापना वा, निर्यापना वक्ष्यमाणरूपा, एषा वा प्ररूपणा पञ्चविधा ज्ञेया इति ॥ २९२७॥

तत्राऽऽरोपणा का ?,इत्याह-

किं जीवो होज्ज नमो, नमो व जीवो त्ति जं परोप्परओ।
अज्झारोवणमेसो, पज्जणुजोगो मया रुवणा ॥ २९२८ ॥

किं जीव एव भवेन्नमस्कारः, नमस्कार एव वा जीव इति यत् परस्परावधारणाद्ध्यारोपणं पर्यनुयोजनमेष पर्यनुयोग आरोपणा मता संमतेति ॥ २९२८ ॥

भजनाव्याख्यानमाह-

जीवो नमोऽनमो वा, नमो उ नियमेण जीव इति भयणा।
जइ चूओ होइ दुमो,दुमो उ चूओ अचूओ वा ॥२९२७॥

जीवस्तावदनवधारित एव नमो नमस्कारो वा स्यात्सम्यग्दृष्टिः, अनमोऽनमस्कारो वा स्यान्मिथ्यादृष्टिः । नमो नमस्कारस्त्ववधारितो नियमेन जीव एव भवति, अजीवस्य नमस्कारासंभवात् । यथा चूतो द्रुम एव भवति,द्रुमस्तु चूतोऽचूतो वा अविराऽऽदिः स्यादिति । एषा एकपदव्यभिचाराद्भजनेति ।२९२६।

पृच्छास्वरूपमाह-

तो जइ सव्वो जीवो, न नमोक्कारो उ तो मया पुच्छा ।
सो होज्ज किंविसिट्ठो,को वा जीवो नमोक्कारो ?॥२९३०॥

ततो यदि सर्वोऽपि जीवो न नमस्कारः,किं तर्हि ?,कश्चिदेव । ततः पृच्छा मता पृच्छामो भवतः-यो जीवो नमस्कारः, स किंविशिष्टो भवेदिति कथ्यतां ?, को वा जीवो नमस्कारः ?, इत्यपि निवेद्यतामिति । एषा पृच्छेति ॥ २९३० ॥

दापनानिर्यापनयोर्व्याख्यानमाह-

अह दायणा नमोक्का-रपरिणओ जो तओ नमोक्कारो ।
निज्जवणाए सो च्चिय,जो सो जीवो नमोक्कारो।२९३१।

अथानन्तरोक्तप्रश्नस्य निर्वचनरूपा दापनोच्यते-किं पुनस्तन्निर्वचनम ?,यो नमस्कारपरिणतो जीवस्तकोऽसौ नमस्कारः, यस्तु तदपरिणतः स अवनमस्कार इति निर्यापनायां स एव नमस्कारपरिणत एव, योऽसौ जीवः स एव नमस्कारः, नमस्कारोऽपि जीवपरिणाम एव नाजीवपरिणाम इति ॥२९३१॥

अथ दापनानिर्यापनयोः को विशेषः ?, इत्याह-

दायणानिज्जवणाणं, को नेओ दायणा तयत्थस्स ? ।
वक्खाणं निज्जवणा, पच्चन्नासो निगमणं ति ॥२९३२॥

दापनानिर्यापनयोः को भेदः कः प्रतिविशेषः ? । अत्रोच्यते-दापना तदर्थस्य " सो होज्ज किंविसिट्ठो, को वा जीवो नमोक्कारो । " (२९३०) इत्येवं पृच्छापृष्टस्य तस्य नमस्कारस्यार्थस्तदर्थो भण्यते । यथा-" नमोक्कारपरिणओ जो तओ नमोक्कारो त्ति । " निर्यापना तु दापनादर्शितस्यैवार्थस्य प्रत्याभ्यासः प्रत्युच्चारणं निगमनं, यथा-स एव नमस्कारपरिणत एव योऽसौ जीवः स एव नमस्कारः,नमस्कारोऽपि जीवपरिणाम एव नाजीवपरिणाम इति । एवं च निगमनीयम । निगमनकृत एव च दापनानिर्यापनयोर्भेदः, न त्वात्यन्तिक इति भावनीयम ।२९३२।

अथवा-अन्यथाऽनयोर्भेदो दर्श्यते । कथम ?, इत्याह-

तप्परिणय एव जहा, जीवो अविहिओ वा तहा चुज्जो ।
तप्परिणओ स एव हि,निज्जवणाए मओऽणुमओ।२९३३।

अथवा—यथा दापनायां जीवो (अविहिओ त्ति) जीवोऽवधृतो नियमितः । तद्यथा—तत्परिणत एव नमस्कारपरिणत एव जीवो नमस्कारो नान्य इति । (तहा चुज्जो त्ति) तथा तेनैव प्रकारेण निर्यापनायां भूयोऽपि प्रकारान्तरतोऽवधार्यते । कथम ?,इत्याह (तप्परिणओ स एव हि त्ति) यथा दापनायां नमस्कारपरिणत एव जीवो नमस्कार इत्यवधृतं, तथाऽत्र निर्यापनायां तत्परिणतो नमस्कारपरिणतो जीवः स एव मतो नमस्कार एव मत इति भूयोऽवधार्यते । कुतः ?,इत्याह-अनन्य इति कृत्वा,अनन्यत्वादभिन्नत्वादित्यर्थः । इदमुक्तं भवति-यथाऽम्नुपयुक्तो माणवकस्तदुपयोगानन्यत्वादग्निरेव भवति, तथा नमस्कारपरिणतो जीवस्तदुपयोगानन्यत्वान्नमस्कार एव निर्यापनायां भवति । इति दापनानिर्यापनयोर्विशेष इति । तदेवमभिहिता पञ्चविधाऽपि प्ररूपणा ॥ २९३३ ॥

अथवा चतुर्विधा प्ररूपणा सा, कथम ?, इत्याह-

पयईए अगारेण य, नोगारोभयनिसेहओ वा वि ।
इह चिंतिज्जइ भुज्जो, को होज्ज तओ नमोक्कारो?।२९३४।

प्रकृत्या स्वभावेन, अकारेण च प्रतिषेधवाचकेन, नोकारेण, निषेधोभयेन च सहितोऽत्र भूयोऽपि नमस्काराश्चिन्त्यते । तत्र प्रकृतिपक्षे नमस्कारः, अकारसहितस्त्वनमस्कारः, नोकार्युक्तस्तु नोनमस्कारः, निषेधोभयसहितस्तु नोअनमस्कार इति । एवं च चिन्त्यमाने ततः कः किं वस्तु नमस्कारो भवेत् ? । उपलक्षणं चेदं, को वाऽनमस्कारः, कश्च नोनमस्कारः, को वा नोअनमस्कार इत्यपि ऊह्यमिति ॥ २९३४ ॥

एवं च जिज्ञासिते सति भाष्यकारः प्राऽऽह-

पयइ त्ति नमोक्कारो, जीवो तप्परिणओ स चाभिहिओ ।
अनमोक्कारो परिणइ-रहिओ तल्लद्धिरहिओ वा ।२९३५।

प्रकृतिस्तावन्नमस्कारः । स च कः ?, इति यदि पृच्छ्यते, तदाऽसौ जीवस्तत्परिणतो नमस्कारपरिणतो नमस्कार इति प्रागभिहितमेव । अनमस्कारस्तु परिणतिरहितो नमस्कारपरिणतिवर्जितोऽनुपयुक्तः सम्यग्दृष्टिः । तल्लब्धिरहितो वा नमस्कारकारणकर्मक्षयोपशमशून्यो वा मिथ्यादृष्टिरिति ।२९३५।

नोनमस्कारस्तर्हि कः ?, इत्याह-

नोपुव्वो तप्परिणय-देसो देसपडिसेहपक्खम्मि ।
पुणरनमोक्कारो च्चिय, सो सव्वनिसेहपक्खम्मि ॥२९३६॥

नोपूर्वस्तु नोशब्दोपपदो नमस्कारो, नोनमस्कार इत्यर्थः । (तप्परिणयदेसो त्ति) देशप्रतिषेधवचने नोशब्दे तत्परिणतस्य नमस्कारपरिणामयुक्तस्य सम्यग्दृष्टिजीवस्य देश एकदेशो भण्यते । सर्वनिषेधवचने तु नोशब्दे स नोनमस्कारः पुनरप्यनमस्कार एव गम्यत इति ॥ २९३६ ॥

नोअनमस्कारः कः ?, इत्याह-

नोअनमोक्कारो पुण, दुनिसेहपगइगमयभावाओ ।
होइ नमोक्कारो च्चिय, देसनिसेहाम्मि तद्देसो ॥२९३७॥

नोअनमस्कारः पुनर्नोशब्दस्य सर्वनिषेधपक्षे नमस्कार एव भवति, द्वयोर्निषेधयोः प्रकृतिगमकत्वाद्यात " द्वौ नञौ प्रकृतमर्थं गमयतः" इति न्यायादित्यर्थः । देशनिषेधवचने तु नोशब्दे तस्य पूर्वोक्तस्वरूपस्य नमस्कारस्यैकदेशः प्रतीयत इति ॥२९३७॥

इह च " नमस्कारोऽनमस्कारः " इत्यादिनिरुक्तचतुष्टये यदुपन्यस्तं, यच्च वास्तवं, तन्निर्धारयन्नाह-

उवयारदेसणाओ, देस पएस त्ति नोनमोक्कारो ।
नोअनमोक्कारो वा, पयइनिसेहाउ सव्वुत्ति ॥२९३८॥

(देस पएस त्ति) इह यथासंख्येन संबन्धः । तृतीयभङ्गे यो देशो नमस्कारैकदेशो (नोनमोक्कारो त्ति) नोनमस्कार उक्तः, यश्च चतुर्थभङ्गे प्रदेशोऽनमस्कारैकदेशो (नोअन-

मोक्कारो त्ति) नोअनमस्कार उक्तः, स उपचारदेशनादिति संबन्धः । औपचारिकत्वं चेह नोनमस्काररूपस्य, नोअनमस्काररूपस्य च देशप्रतिषेधवचने नोशब्दे संपूर्णस्य वस्तुनोऽभावादिति। अथ सदूभूतभङ्गकप्रतिपादनार्थमाह-(पयईत्यादि) प्रकृतिः प्रथमो भङ्गः, निषेधस्तु द्वितीयभङ्गः, एतौ द्वावपि सद्भूतौ निरुपचरितौ, एतद्भङ्गवाच्यस्य नमस्कारानमस्काररूपस्य वस्तुनः संपूर्णस्य सद्भावादिति । तुशब्दादुपरिमावपि द्वौ भङ्गौ सर्वनिषेधवचने नोशब्दे सति सदूभूतावितिद्रष्टव्यम्, तद्वाच्यस्यापि नमस्काराऽनमस्काररूपस्य वस्तुनः संपूर्णस्य सद्भावादिति ॥ २६३८ ॥

अथैतांश्चतुरो भङ्गान्नयैर्निरूपयन्नाह-

सव्वो वि नमोक्कारो, अनमोक्कारो य वंजणनयस्स ।
होउं चउरूवो वि हु, सेसाणं सव्वनेया वि ॥३७३७॥

इहशब्दनयास्त्रयोऽपि शुरूत्वादखण्डं संपूर्णं देशप्रदेशरहितमेव वस्तु इच्छन्ति । शेषास्तु नैगमाऽऽदयोऽविशुरूत्वादेशप्रदेशरूपमपि मन्यन्त इति । एवं च स्थिते व्यञ्जननयस्य त्रिविधस्यापि शब्दनयस्य भङ्गकप्ररूणामात्रेण प्रकृत्यकारनोकारतदुनययोगाच्चतूरूपोऽपि नमस्कारो भूत्वा परिशिष्टः सर्वोऽपि नमस्कारोऽनमस्कारश्चेति द्विरूप एवावशिष्यते, प्रथमद्वितीयभङ्गवाच्य एवावतिष्ठते । तृतीयचतुर्थभङ्गकौ तु तन्मतेन शून्यावेव, तद्वाच्यस्य देशस्य प्रदेशस्य चासत्त्वादिति । शेषाणां तु नैगमाऽऽदिनयानां सर्वे चत्वारोऽपि भङ्गरूपा भेदाः सद्भूतार्था एव, तन्मतेन देशस्य प्रदेशस्य च सत्त्वादिति । तदेवमुक्ता चतुर्विधाऽपि प्ररूपणा, तद्गमने च गतं सप्रसङ्गं प्ररूपणाद्वारम् ॥ २६३६ ॥ विशे० । आ० म० । आ० चू० । " णमो अरिहंताणं, णमो सिद्धाणं, णमो आयरियाणं, णमो उवज्झायाणं, णमो लोए सव्वसाहूणं । " भ० १ श० १ उ० । दश० ।

(७) नमस्कारस्याऽऽर्थत्वम्-

ये तु वदन्ति-नमस्कारपाठ एव नाऽऽर्षः, युक्तिरिक्तत्वात्-सिद्धानामप्यर्हत्त्वेन पूर्वमर्हन्नमस्कारस्याऽघटमानत्वात्;आचार्योऽऽदिना सर्वसाधवो न वन्दनीया इति तथास्थितपञ्चनमपदानुपपत्तेश्चेति । पापिष्ठतरास्तेऽप्यनाकर्णनीयवाचोऽद्रष्टव्यमुखाः । स्वकपोलकल्पिताऽऽशङ्कया व्यवस्थितसूत्रत्यागायोगात्,ईदृशकदाशङ्कानिराशपूर्वमसंक्लिष्टविस्तृतस्य नमस्कारपाठस्य खितकर्मस्थ निर्युक्तिकृतैव व्यवस्थापितत्वाच्च ।

तदाह-

" न वि संखेवो न वित्थारो, संखेवो दुविह सिद्ध-साहूणं ।
वित्थरओऽणेगविहो, पंचविहो न नुज्जए तम्हा ॥ ३२०१ ॥
अरिहंताऽऽई नियमा, साहू साहू उ तेसु भइयव्वा ।
तम्हा पंचविहो खलु, हेउनिमित्तं इवइ सिद्धो" ॥ ३२०२ ॥
" पुव्वाणुपुव्वि न कमो, नेव य पच्छाणुपुव्विय सत्तमे ।
सिद्धाऽऽईआ पढमा, बीयाए साहुणो आई " ॥ ३२१० ॥
अरिहंतुवएसेणं, सिद्धा नज्जंति तेण अरहाऽऽई ।
न वि कोई परिसाए,पणमित्ता पणमए रन्नो ॥३२१३॥विशे०।

इत्यादिना सामान्यतः सर्वसाधुनमस्करणेन च नास्थानविनयकरणाऽऽदिदूषणम् । अत एव-" सिद्धाण णमो किच्चा, संजयाणं च भावओ । " इत्यादुत्तराध्ययनोक्तं संगच्छत इति। पञ्चपदनमस्कारश्च सर्वश्रुतस्कन्धाभ्यन्तरभूतो, नवपदश्च समूलत्वात् पृथक् श्रुतस्कन्ध इति प्रसिद्धमास्ताम्। अस्य हि निर्युक्तिचूर्ण्यादयः पृथगेव प्रभूता आसीरन्, कालेन तदुच्छेदे सूत्रसूत्रमात्रे तल्लेखनं कृतं पदानुसारिणा वज्रस्वामिनेति महानिशीथपञ्चमाध्ययने व्यवस्थितम् । प्रति० ।

तथा च तद्ग्रन्थः-

एयं तु जं पंचमंगलमहासुयक्खंधस्स वक्खाणं, तं महया पबंधेणं अणंतगमपज्जवेहिं सुत्तस्स य पियभूयाहिं णिज्जुत्तिभासचुन्नीहिं जहेव अणंतनाणदंसणधरेहिं तित्थयरेहिं वक्खाणियं, तहेव समासओ वक्खाणिज्जं तं आसि, अहऽन्नया कालपरिहाणिदोसेणं तओ णिज्जुत्तिभासचुन्नीओ वुच्छिन्नाओ । इओ य वच्चंतेणं कालेणं समएणं महिड्ढिपत्ते पयाणुसारी वइरसामी नाम दुवालसंगसुअहरे समुप्पन्ने । तेण य पंचमंगलमहासुयक्खंधस्स उद्धारो मूलसुत्तस्स मज्झे लिहिओ । मूलसुत्तं पुण सुत्तत्ताए गणहरेहिं अत्थत्ताए अरिहंतेहिं भगवंतेहिं धम्मतित्थयरेहिं तिलोगमहिएहिं वीरजिणिंदेहिं पन्नवियं ति एस वुड्ढसंपयाओ । महा० ५ अ० ।

(तद्विषयोपधानाध्ययनविधिश्च ' उवहाण ' शब्दे द्वितीयभागे १०५० पृष्ठे उक्तः)

जहुत्तविहाणेणं चेव पंचमंगलपभिइसुयनाणस्स वि उवहाणं करेज्जा, से णं गोयमा ! नो हीलिज्जा सुत्तं,नो हीलिज्जा अत्थं,णो हीलिज्जा सुत्तत्थोभयं,से णं नो आसाइज्जा तिकालभावी तित्थयरे, णो आसाइज्जा तिन्नोगसिहरवासी विहूयरयमले सिद्धे, णो आसाइज्जा आयरियउवज्झायसाहुणो, सुट्ठयरं चेव नवेज्जा पियधम्मे दढधम्मे भत्तिजुत्ते,पसंतेणं भावेज्जा सुत्तत्थाणुरंजियमाणुससच्चासंवेगभावन्नो, से एस णं ण लभेज्जा पुणो पुणो नवद्वारगे गब्भवासाइयं अणेगहा जंतणं ति। णवरं गोयमा ! जे णं बाले जाव अविन्नायपुन्नपावाणं विसेसो, ताव णं से पंचमंगलस्स णं गोयमा ! एगंतेणं अउग्गे, तस्स णं पंचमंगलमहासुयक्खंधस्स एगमवि आलावगं ण दायव्वं, जओ अणाइभवंतरसमज्जियाऽसुहकम्मरासिदड्ढणट्ठमिणं लभित्ता णं न बाले सम्ममाराहेज्जा । लहुत्तं च जणइत्ता तस्स केवलं धम्मकहाए गोयमा ! नत्थी समुप्पाइज्जा । तओ नाऊण पियधम्मं दढधम्मं नत्तिजुत्तं, ताहे जावइयं पच्चक्खाणं निव्वाहेउं समत्थो भवइ, तावइयं कारवेज्जइ, राईभोयणं च दुविहतिविहचउव्विहेणं वा जहासत्तीए पच्चक्खाविज्जइ, गोयमा ! णं पणयालाए नमोक्कारसहियाणं चउत्थं चउवीसाए पोरिसीहिं बारसहिं पुरिमड्ढेहिं दसहिं अवड्ढेहिं छहिं निव्विइएहिं चउहिं एगट्ठाणगेहिं

* एतदर्थस्त्वग्रेऽस्मिन्नेव शब्दे आक्षेपद्वारे स्पष्टीभविष्यति ।

दोहिं आयंबिलेहिं एगेणं सुद्धत्थायंबिलेणं अव्वावारत्ताए रोद्दज्झाणविगहाविरहियस्स सज्झाएगग्गचित्तस्स गोयमा ! एवमायंबिलं मासक्खमणं विसेसेज्जा, तओ य जावइयं तवोवहाणमवि समंतो करेज्जा, तावइयं अणुगणेऊणं जाहे जाणेज्जा-जहा णं जत्तियमित्तेणं तवोवहाणेणं पंचमंगलस्स जोग्गीजूओ, ताहे आउत्तो पढेज्जा,ण अण्णह त्ति। से जयवं! पत्तयं कालाइक्कमं एयं, जइ कहमवि अंतराले पंचत्तमुवगच्छे, तओ नमोक्कारविरहिए कह मुत्तिमद्दं साहेज्जा ?। गोयमा ! जं समयं चेव सुत्तोवयारानिमित्तेणं असढभावत्ताए जहासत्तीए किंचि तवमारभेज्जा,तं समयमेवमहीयमुत्तत्थोभयं दट्ठव्वं। जओ णं सो तं पंचनमोक्कारं सुत्तत्थोभयं ण अविहीए गिण्हे,किं तु तहा गेण्हे,जहा जवंतरेसु वि ण विप्पणस्से,एयस्सेव अज्झवसायत्ताए आराहगो भवेज्जा। से जयवं! जेण उ ण अण्णेसिमहीयमाणाणं सुयावरणखओवसमेण कम्महारित्तणेणं पंचमंगलमहियं भवेज्जा, से वि य किं तवोवहाणं करेज्जा ?। गोयमा ! करेज्जा। से जयवं केणं अट्ठेणं ?। गोयमा ! सुहभवबोहिलाभनिमित्तेणं। एवं चेइयाइअकुव्वमाणे नाणकुसीले णेए तहा गोयमा ! णं पव्वज्जादिवसप्पभिइए जहुत्तविणओवहाणेणं ॥ महा० ३ अ० ।

" एसो पंचणमुक्कारो, सव्वपावप्पणासणो।
मंगलाणं च सव्वेसिं, पढमं हवइ मंगलं" ॥ १ ॥

(८) नमस्कारसूत्रसंपदः। अक्षराणि च पदसंपदतानीत्यतोऽक्षरपदसंपदिति द्वारत्रयं प्रस्तावाऽऽयातम, तत्र च प्रथमं तावत्पञ्चपरमेष्ठिनमस्कारमाश्रित्य तदाह--

वण्णऽट्ठसट्ठि नवपएँ, नवकारे अट्ठ संपया तत्थ।
सगसंपय पयतुल्ला, सतरऽक्खर अट्ठमी दुपया ॥३२७॥

अथ कोऽत्र व्याख्यानेऽवसरः, चैत्यवन्दनाविधानस्याधिकृतत्वात् ? । सत्यम् । यदा जिनबिम्बाभावे स्थापनाऽऽचार्यपुरतश्चैत्यवन्दना विधीयते, तदाऽनेन पञ्चपरमेष्ठिमन्त्रेणाऽनाकारस्थापनयाऽक्षाऽऽदिषु जिनाऽऽदयः स्थाप्यन्ते। यदुक्तं बृहद्भाष्ये-" जिणबिंबाभावे पुण, ठवणा गुरुसक्खिया वि कीरंति। चिइवंदण जिय इमा, तत्थ वि परमेट्ठिठवणा उ" ॥१॥ इति। यथा श्रेयोभूतं चैतत् स्तुतिस्तोत्राऽऽदिप्रधानं चैत्यवन्दनाविधानं स्वर्गापवर्गबन्धनिबन्धनसम्यग्दर्शनाऽऽदिहेतुत्वात्;तथा चाऽऽगमः-"थयथुइमंगलेणं भंते ! जीवे किं जणयइ ?। थयथुइमंगलेणं नाणदंसणचरित्तं, बोहिलाभं च जणयइ। नाणदंसणचरित्तसंपन्नेणं जीवे अंतकिरियं कप्पविमाणोववत्तियं आराहेइ" इति। अतो निर्विघ्नेनैतद्विधानसिद्ध्यर्थं प्रथमं पञ्चमङ्गलमेव व्याचक्षते। तथा चोक्तं महानिशीथचतुर्थाध्ययने-*"तस्स य सयलसुक्खहेउभूयस्स न इच्छदेवयाणमुक्कारविरहिए केइ पारं गच्छिज्जा, इट्ठदेवयाणं च नमुक्कारो पंचमंगलमेव गोयमा ! नो णमंति, ता नियमओ पंचमंगलस्सेव पढणं ताव विणओवहाणं कायव्वं।" इत्यलं विस्तरेण।

* तृतीयाध्ययने इति पाठो दृश्यते।

संप्रति भाष्यगाथा व्याख्यायते—वर्णा अक्षराणि अष्टषष्टिः, नमस्कारे पञ्चपरमेष्ठिमहामन्त्ररूपे भवन्तीति शेषः। उक्तं च—" पंचपयाणं पणती—सत्त य सोला—इवण्ण तित्तीसं। एवं इमो समप्पइ, फुरमक्खरमट्ठसट्ठी—ए " ॥ १ ॥ तथा नवपदानि विवक्षितावधियुक्तानि " नमोऽरिहंताणमित्यादीनि, न तु स्त्याद्यन्तानि। भणितं च-"सत्त १ पण २ सत्त ३ सत्त य, ४ नव ५ अट्ठ य ६ अट्ठ ७ अट्ठ ८ नव ९ पइति। इय पयअक्खरसंखा, असढ पुरेइ अडसट्ठी ॥ १ ॥" तथाऽष्टौ संपदो विश्रामस्थानानि (तत्थ त्ति) तासाष्टासु संपत्सु मध्ये क्रमेण सप्त संपदः-पदैः पूर्वोक्तस्वरूपैस्तुल्याः समानाः। अष्टमी पुनः संपत् सप्तदशाऽक्षरप्रमाणा, पर्यन्तपदवर्त्तिपदद्वयाऽऽत्मिका च। यथा-" मंगलाणं च सव्वेसिं, पढमं हवइ मंगलं।" यदुक्तं चैत्यवन्दनाभाष्यप्रवचनसारोद्धाराऽऽदिषु-" पंचपरमिट्ठिनमो, पएँ पए सत्त संपया कमसो। पज्जंते सत्तरऽक्खर-परिमाणा अट्ठमी भणिया ॥ १ ॥" तथा एवं वा चतुर्थपदस्य पाठः-" नवऽक्खरऽट्ठमी दुपयऽट्ठी " ॥ अष्टमी संपत्—" पढमं हवइ मंगलं " इति नवाऽक्षरप्रमाणा ज्ञेया। षष्ठी पुनः—" एसो पंचनमुक्कारो सव्वपावप्पणासणो। " इति। द्विपदमाना। अभ्यधायि-" अंतिमचूलाइतियं, सोल १ऽट्ठ २ नवक्खरा तयं चेव १। जो पढइ भत्तिजुत्तो, सो पावइ सासयं ठाणं ॥ ४ ॥ " एवं च अयस्त्रिंशदक्षरप्रमाणचूलिकासहितो नमस्कारो भणनीय इत्युक्तं भवति। तथा चोक्तं बृहन्नमस्कारफले-"सत्त पण सत्त सत्त य, नवऽक्खरपमाणपयरूपंचपयं। तित्तीसऽक्खरचूलं, सुमिरह नवकारवरमंतं ॥१॥" सिद्धान्तेऽपि स्फुटाक्षरैः-"हवइ मंगलं" इति भणितम्। तथाहि महानिशीथचतुर्थाऽध्ययने सूत्रम-"तहेव च तदत्थाणुगमियं इक्कारसपयपरिच्छिन्नं ति आलावगतित्तीसऽक्खरपरिमाणं "एसो पंचनमुक्कारो,सव्वपावप्पणासणो। मंगलाणं च सव्वेसिं,पढमं हवइ मंगलं ॥१॥ इय चूल त्ति अहिज्जंति त्ति।" तत्र प्रकृतं तदेवम-" हवइ मंगलं " इत्यस्य साक्षादागमे भणितत्वात्, प्रभुश्रीवज्रस्वामिप्रभृतिसुबहुश्रुतसुविहितसंविग्नपूर्वाऽऽचार्यसंमतत्वाच्च " पढमं हवइ मंगलं " इतिपाठेन अष्टषष्टयक्षरप्रमाण एव नमस्कारः पठनीयः। तथा च महानिशीथे-" एयं तु जं पंचमंगलमहासुयक्खंधस्स वक्खाणं तं महया पबंधेण अणंतगमपज्जवेहिं सुत्तस्स य पियभूयाहिं निज्जुत्तिभासचुण्णीहिं जहेव अणंतनाणदंसणधरेहिं तित्थयरेहिं वक्खाणियं, तहेव समासओ वक्खाणिज्जं तं आसि। अहऽन्नया कालपरिहाणिदोसेणं तासो निज्जुत्तिभासचुण्णीओ वुच्छिन्नाओ,इओ य वच्चंतेणं कालेणं समएणं महिड्ढिपत्ते पयाणुसारी वइरसामी दुवालसंगसुयहरे समुप्पन्ने, तेणेसो पंचमंगलमहासुयक्खंधस्स उद्धारो मूलसुत्तस्स मज्झे लिहिओ, मूलसुत्तं पुण सुत्तत्ताए गणहरेहिं अत्थत्ताए अरिहंतेहिं भगवंतेहिं धम्मतित्थगरेहिं तिलोयमहिएहिं वीरजिणिंदेहिं पन्नविअं ति,एस वुड्ढसंपयाओ एत्थ य। जत्थ य पयपएणाणुलग्गं सुत्तालावगं न संपज्जइ,तत्थ तत्थ सुयहरेहिं ति नो णमपए वि कुलिंहियदोसो न दायव्वु त्ति, किं तु जो सो एयस्स अचिंतचिंतामणिकप्पभूयस्स महानिसीहसुयक्खंधस्स पुव्वायरिसो आसि महुराए सुपासनाहजूहे पन्नरसपएहिं उववासेहिं विहिएहिं सासणदेवीए मम अग्गिओ त्ति तहिं चेव खंडासंभीए बहिहियाइएहिं हेऊहिं बहवे पन्नगा परिसमिया,

तहा वि अचंतसुमहत्थाइसयं ति इमं महानिसीहसुयक्खंधं कसिणपवयणस्स परमसारभूयं परं तत्तं महत्थं ति कलिऊण पवयणवच्छल्लत्तणेणं बहुमव्वसत्तोवयारयं च काउं तहा य आगहियट्ठयाए आयरियहरिभद्देणं जं तत्थायरिसे दिट्ठं, तं सव्वं समतीए सोहिऊणं लिहिअं ति अम्हेहिं पि सिद्धसेणदिवायरवुड्ढवाइजक्खसेणदेवगुत्तजसवद्धणखमासमण—सीसरविगुत्तनेमिचंदजिणदासगणिखवगसव्वसिरिपमुहेहिं जुगप्पहाणसुयहरेहिं बहु मन्नियमिणं ति ॥"(महा० ३ अ०)अन्यत्र तु संप्रति वर्त्तमानाऽऽगमः, तत्र मध्ये न कुत्राऽप्येवं नवपदाऽष्टसंपदादिप्रमाणो नवकार उक्तो दृश्यते । यतो भगवत्यादावेवं पञ्चपदान्युक्तानि—" नमो अरिहंताणं, नमो सिद्धाणं, नमो आयरियाणं, नमो उवज्झायाणं, णमो वंजीए लिवीए " इत्यादि । क्वचिद्-" नमो लोए सव्वसाहूणं " इति पाठ इति । तदूर्ध्वमिदमाख्यानपारणाप्रस्तावे चूर्णावित्युक्तम्-" नमो अरिहंताणं ५ " इत्यादि भणित्वा पारयति । नवकारनिर्युक्तिचूर्णौ त्वेवमुक्तम्-" सो नमुक्कारो कमा पयाणि ९ वा, दस वा । तत्थ नव पयाणि-नमो १ अरिहंत २ सिद्ध ३ आयरिय ४ उवज्झाय ५ साहूणं ६ ति । दश त्वेवम्-" अरिहंताणं नमो २ सिद्धाणं ४ " इत्यादि । यत्पुनर्नमस्कारनिर्युक्तावशीतिपदमाना विंशतिगाथाः सन्ति । यथा-" अरिहंतनमुक्कारो, जीवं मोएइ भवसहस्साओ। " (३५७) इत्यादयस्ता नवकारमाहात्म्यप्रतिपादका न पुनर्नवकाररूपं भणितुमर्हन्ति, बहुपदत्वात् तासाम्, नवकारस्य तु नवपदाऽऽत्मकत्वात् । किञ्चासास्वपि गाथासु वर्षशतात् तदूह्यायाञ्च पूर्वपूर्वतरप्रतिषु "हवइ" इति पाठो दृश्यते । श्रीमलयगिरिणाऽप्यावश्यकवृत्तिं कुर्वता वृत्तिमध्ये ता गाथा " हवइ " इति पाठत एव लिखिताः; एतन्निश्चयार्थिना तद्वृत्तिर्निरीक्षणीया; इति परमार्थं ज्ञात्वा कदाग्रहाभिनिवेशाऽऽदिविलसितकल्पितमागमानुक्तं "होइ" इति मुक्त्वा साक्षात्परमागतसूत्रान्तर्गतं श्रीवज्रस्वामिप्रभृतिदशपूर्वधराऽऽदिबहुश्रुतसंविग्नसुविहितव्याख्यातमाहतं " हवइ " त्ति पाठनोऽष्टषष्टिवर्णप्रमाणं परिपूर्णं नवकारसूत्रमध्येतव्यम । तच्चैवम-"नमो अरिहंताणं १,नमो सिद्धाणं २, नमो आयरियाणं ३, नमो उवज्झायाणं ४, नमो लोए सव्वसाहूणं ५ । एसो पंचनमुक्कारो ६, सव्वपावप्पणासणो ७ । मंगलाणं च सव्वेसिं ८, पढमं हवइ मंगलं ९ "॥१॥ अस्य च व्याख्यानं यदेव श्रीवज्रस्वाम्यादिभिः छेदग्रन्थाऽऽदिमध्ये लिखितं, तदेव भक्तिबहुमानातिशयतो विशेषतश्च भव्यसत्त्वोपकारकमिति दर्श्यते । तथाहि-" से भयवं ! किमेयस्स अचिंतचिंतामणिकप्पभूयस्स णं पंचमंगलमहासुयक्खंधस्स सुत्तत्थं पण्णत्तं । तं जहाजे णं एस पंचमंगलमहासुयक्खंधे से णं सयलागमंतरोववत्ती तिलतेल्लकमलमयरंदसव्वलोधपंचत्थिकायमिव जहत्थकिरियाऽणुरावसंपूयगुणकित्तणे जहिच्छिए य फलप्पसाहगे चेव परमत्थुइवाए। सा य परमत्थुई केसिं कायव्वा ? । सव्वजगुत्तमाणं। सव्वजगुत्तमुत्तमे य जे केइ भूए, जे केइ भवंति, जे केइ भविस्संति, ते सव्वे चेव अरिहंतादओ चेव नो णमन्नेसिं । ते य पंचहा-अरिहंते १, सिद्धे २, आयरिए ३, उवज्झाए ४, साहुणो ५। तत्थ एएसिं चेव गब्भत्थसब्भावो इमो । तं जहासनरामरासुरस्स णं सव्वस्सेव जगस्स अहमहापाडिहेराइप्पाइसओवलक्खियं अणन्नसरिसमचिंतमप्पमेयकेवलाहिट्ठियं पवरुत्तमत्तं। (महा० ३ अ०) "अरिहंति वंदणनमंसणाणि अरिहंति पूयसक्कारं । सिद्धिगमणं च अरिहा, अरिहंता तेण वुच्चंति" ॥१॥ (आ० म० द्वि०) सकषा० १ अधि० ३ प्रस्ता० ।

(६) वस्तुद्वारम्-

अथ यदुक्तम्-" वत्थुं तरहंताऽऽई, पंच भवे तेसिमो हेऊ । " (२६२४) इति तदेतत्प्ररूपणायामसमर्थितायामन्तराले प्रागुपन्यस्तत्वात्सांप्रतमासिक्तं कृतमासीत् । तदेदानीं प्ररूपणायाः समर्थितत्वाद्यथाऽवसराऽऽयातं वस्तुद्वारं विस्तरेण व्याचिख्यासुराह-

वत्थुं अरहा पुज्जा, जोग्गा के जे नमोऽभिहाणस्स ।
संति गुणरासओ ते, पंचारुहयाऽऽइजाईया ॥ २६४० ॥

वस्तु दर्शितम्, अर्हाः पूज्याः योग्या नमोऽभिधानस्य के ?, इति पृष्टे गुरुराह-ये नमोऽभिधानस्य योग्यास्ते पञ्च सन्तीति संबन्धः । किंविशिष्टास्ते ?, गुणराशयो गुणसमूहाः । पुनः किं प्रकाराः ?,इत्याह-अर्हदादिजातीया अर्हदादिप्रकाराः-अर्हत्सिद्धाऽऽचार्योपाध्यायसाधव इत्यर्थः । तदेवमत्र वस्त्वर्हदादयो गुणराशयः सन्ति, इतिगुणगुणिनोरभेद उक्तः ॥ २६४० ॥

अथ तयोर्भेदोपचारादिदमाह-

भेओवयारओ वा, वसंति नाणाऽऽदओ गुणा जत्थ ।
तं वत्थुमसाहारण--गुणाओ पंचजाईयं ॥ २६४१ ॥

सुबोधा । नवरं "घटे रूपाऽऽदयः" इत्यादिष्विव गुणगुणिनोर्भेदोपचारादिदैवमुच्यते-वसन्ति ज्ञानाऽऽदयो गुणा यत्र तत्प्रकारं वस्त्वस्तीति ॥ २६४१ ॥

अथ तानेव विशेषेणाऽऽह-

ते अरिहंता सिद्धा--ऽऽयरिओवज्झायसाहवो नेया ।
जे गुणमयभावाओ, गुणा व पुज्जा गुणत्थीणं ॥२६४२॥

ते पञ्चविधवस्तुरूपा अर्हत्सिद्धाऽऽदयो ज्ञेयाः, ये ज्ञानाऽऽदिगुणसमूहमयत्वान्मूर्त्तज्ञानाऽऽदिगुणा इव गुणार्थिनां ज्ञानाऽऽदिगुणाभिलाषिणां भव्यजीवानां पूज्या इति । तदभ्यर्हदादीनां पूज्यत्वे " गुणमयत्वात् " इति हेतुरुक्तः ॥ २६४२ ॥

अथवा हेत्वन्तरमप्याह-

मोक्खत्थिणो व जं मो-क्खहेयओ दंसणाऽऽदितियगं व ।
तो तेऽभिवंदणिज्जा,जइ व मई हेयओ कह ते ?॥२६४३॥

यस्माद्वा मोक्षार्थिनो भव्यसत्त्वस्य मोक्षहेतवोऽर्हदादयः, ततस्तेऽभिवन्दनीयाः पूज्याः,मोक्षहेतुत्वात्, दर्शनाऽऽदित्रिकवदिति । यदि वा-हेहेवंभूता परस्य मतिः स्यात्कथं केन हेतुना ते मोक्षहेतवः ?, तदा तमपि हेतुं कथयामः । इति सप्तदश गाथार्थः ॥ २६४३ ॥

यथा ते हेतवस्तथाऽऽह--

भग्गो अविप्पणासो, आयारे विणयया सहायत्तं ।
पंचविहनमोक्कारं, करेमि एएहि हेऊहिं ॥ २६४४ ॥

अर्हतां नमस्काराऽर्हत्वे मार्गः सम्यग्दर्शनाऽऽदिलक्षणो हेतुः, यस्मादसौ तैः प्रदर्शितः, तस्माच्च मुक्तिः, ततश्च पारम्पर्येण मुक्तिहेतुत्वात्पूज्यास्त इति । (अविप्पणासो त्ति) सिद्धानां तु नमस्कारार्हत्वे अविप्रणाशः शाश्वतत्वं हेतुः । तथाहि-तदविप्रणाशमवगम्य प्राणिनः संसारवैमुख्येन मोक्षाय घटन्त इति । (आयारे त्ति) आचार्याणां तु नमस्कारार्हत्वे आचार एव हेतुः । तथाहि-तानाचारवत आचारव्यापकांश्च

प्राप्य प्राणिन आचारस्य विज्ञातारोऽनुष्ठातारश्च भवन्तीति । (विणयय त्ति) उपाध्यायानां तु नमस्कारार्हत्वे विनयता विनयो हेतुः, यतस्तान् स्वयं विनीतान् प्राप्य कर्मविनयनसमर्थस्य ज्ञानाऽऽदिविनयस्यानुष्ठातारो भवन्ति । (सहायत्तं ति) साधूनां तु नमस्काराऽर्हत्वे सहायत्वं हेतुः, यतस्ते सिद्धिवधूसङ्गमैकलालसानां जन्तूनां तदवाप्तिक्रियासाहाय्यमनुतिष्ठन्तीति । अत एवाऽऽह-पञ्चविधं नमस्कारं करोम्येनिर्हेतुभिरिति निर्युक्तिगाथासंक्षेपार्थः ॥ २९४४ ॥

विस्तरार्थं त्वभिधित्सुर्भाष्यकारः प्राऽऽह-

मग्गोवएसणाओ, अरिहंता हेयओ हि मोक्खस्स ।
तब्भावे भावाओ, तयभावेऽनावओ तस्स ॥२९४५॥

अर्हन्तो यस्माद् मोक्षहेतवस्तस्मात् पूज्या इति प्रक्रमः सम्यग्दर्शनाऽऽदेस्तन्मार्गस्योपदेशनादिति हेतुः । श्रुतज्ञानवदिति दृष्टान्तः स्वयं ऊह्यः । यदि नाम ते तन्मार्गमुपदिशन्ति तथाऽपि कथं मोक्षहेतवः ?, इत्याह-(तब्भावे इत्यादि) तस्य सम्यग्दर्शनाऽऽदिमार्गस्य भावे भावात्, तदभावे चाभावात् तस्य मोक्षस्येति ॥ २९४५ ॥

यद्येवं, तर्हि सम्यग्दर्शनाऽऽदिमार्ग एव मोक्षहेतुः, तदन्वयव्यतिरेकानुविधायित्वात् तस्य; ये तु तदुपदेशकत्वेन तस्य मार्गस्य हेतवोऽर्हन्तस्ते कथं मोक्षहेतवो न युक्ताः ?, इत्येतत्प्रेर्यमाशङ्क्य परिहरन्नाह-

मग्गो च्चिय सिवहेऊ, जुत्तो तव्भेयओ कहं जुत्ता ?।
तदहीणत्तणओऽहव,कारणकज्जोवयाराओ ॥२९४६॥

प्रेरकोपन्यस्तं पूर्वार्द्धमुक्तार्थमेव । उत्तरमाह-(तदहीणत्तणओ इत्यादि) सत्यम्, मार्ग एव मोक्षहेतुः, केवलमर्हन्तोऽपि तत्रैतव एव, तस्यापि मार्गस्य तदुपदेशज्ञेयत्वेन तदधीनत्वादिति । अथवा-मोक्षहेतवोऽर्हन्तः, कारणेऽर्हज्ज्ञाने मार्गलक्षणकार्यधर्मस्य मोक्षहेतुत्वस्योपचारादध्यारोपादिति ॥ २९४६ ॥

आह-नन्वेतावता मार्गस्योपदेशकत्वेनोपकारिणोऽर्हन्तस्ततो मार्गजन्यस्य मोक्षस्य तेऽपि हेतवोऽभिधीयन्त एव इत्युक्तम्, एवं चातिप्रसक्तः । कथम ?, इत्याह-

मग्गोवयारिणो जइ, पुज्जा गिहिणो वि तो तदुवगारी ।
तस्साहणदाणाओ, सव्वं पुज्जं परंपरया ॥ २९४७ ॥

(तस्साहणदाणाओ त्ति) तस्य मार्गस्य साधनानि यानि वस्त्रपात्राऽऽहारशय्याऽऽसनाऽऽदीनि तदानादिति । शेषं सुगमम् ॥ २९४७ ॥

अत्रोत्तरमाह-

जं पच्चासन्नतरं, कारणमेगंतियं च नाणाइं ।
मग्गो तदायारो, सयं च मग्गो त्ति ते पुज्जा ॥२९४८॥

सत्यपि विश्वत्रयस्य परम्परया मार्गोपकारित्वे यत्प्रत्यासन्नतरमैकान्तिकं च मोक्षस्य कारणं ज्ञानाऽऽदित्रयं मोक्षस्य मार्ग इति, तस्य दातारस्तावदर्हन्त एव, न तु गृहस्थाः, नापि वस्त्राऽऽहारशय्याऽऽसनाऽऽदीनि तत्साधनानि, तेषामर्हद्भ्यो लब्धस्य ज्ञानाऽऽदित्रयस्योपकारित्वमात्र एव वर्तनादिति । स्वयमपि च मोक्षस्य मार्गोऽर्हन्तः, दर्शनमात्रेणैव भव्यजन्तूनां तत्प्राप्तिहेतुत्वात्, अतो ज्ञानाऽऽदिमार्गदातृत्वात्, स्वयमपि च मार्गत्वाच्चेऽर्हन्त एव पूज्याः, न तु गृहस्थाऽऽदयः, इति नातिप्रसङ्गः ॥ २९४८ ॥

एतदेवाऽऽह-

जत्ताई-वज्झयरो, हेऊ न य नियमओ सिवस्सेव ।
तदायारो गिहिणो, सयं न मग्गो त्ति नो पुज्जा ॥२९४९॥

भक्तपानवस्त्राऽऽदिभिर्बाह्यतरो दूरवर्ती परम्परया मोक्षस्य हेतुः । न च ज्ञानाऽऽदित्रयवदसावेव नियमतः शिवस्य मोक्षस्य हेतुः, तमन्तरेणाऽप्यन्तकृत्केवल्यादीनां तत्सिद्धेः । अतस्तस्य बाह्यतरानैकान्तिकहेतोर्भक्तपानाऽऽदेर्दातारः,तद्दातारो गृहिणो न पूज्याः, अर्हतामिव तेषामन्तरङ्गैकान्तिकमोक्षहेतुज्ञानाऽऽदित्रयदातृत्वाभावादिति । न च तेऽर्हन्त इव स्वयं मोक्षमार्गः, तद्दर्शनाऽऽदिना मुक्त्यनवाप्तेः, इत्यतोऽपि न ते पूज्या इति ॥ २९४९ ॥

अथाविप्रणाशहेतुकं सिद्धनमस्कारार्हत्वे हेतुं व्याचिख्यासुराह-

मग्गेणाणेण सिवं, पत्ता सिद्धा जमविप्पणासेणं ।
तेण कयत्थत्तणओ, ते पुज्जा गुणमया जं च ॥२९५०॥

यद्यस्मात्सिद्धाः संप्राप्तनिर्वाणसुखा अनेन मार्गेण ज्ञानदर्शनचारित्रलक्षणेन शिवं मोक्षं प्राप्ताः । कथम ?, अविप्रणाशेनानुच्छिन्नसन्तानत्वेन,तस्मात्कृतार्थत्वात्ते पूज्याः । अत्र प्रयोगः-पूज्याः सिद्धाः, अविप्रणाशबुद्धिजनकत्वेन मार्गोपकारित्वात्, जिनेन्द्रवदिति । (गुणमया जं च त्ति) इतश्च ते पूज्याः-ज्ञानाऽऽदिगुणसमूहाऽऽत्मकत्वात्, जिनाऽऽचार्याऽऽदिवदिति ॥ २९५० ॥

अत्र प्रेरकः प्राऽऽह-

गुणपूयामेत्ताओ, फलं ति तप्पूयणं पवज्जामो ।
जं पुण जिणु व्व मग्गो-वयारिणो ते तयं कत्तो ?।२९५१।

गुणानां सम्यग्ज्ञानाऽऽदीनां पूजामात्रतोऽपि फलं विशिष्टं स्वर्गोपवर्गाऽऽदिकमस्तीति तत्पूजनं तेषां गुणवतां सिद्धानां पूजनं प्रतिपद्यामहे । यत्पुनरुच्यते-' जिनवत्ते सिद्धा अपि मार्गोपकारिणः ' इति, तत्तेषां सिद्धानां कुतः ?, न मन्यामहे एतदित्यर्थः, इह तेषामभावात्,असतश्चोपकारायोगादित्यभिप्रायः॥२९५१॥

अत्रोत्तरमाह-

जइ तग्गुणपूयाओ, फलं पवन्नं नणूवगारी सो ।
तेहिंतो तदभावे, का पूया किं फलं वा से ? ॥२९५२॥

यदि तद्गुणपूजातो गुणवत्सिद्धगुणपूजनात्फलमस्तीति त्वया प्रतिपन्नं, तर्हि नन्वसावेव तेभ्यः सिद्धेभ्य उपकारस्त्वयाऽपि प्रतिपन्नः, अन्यथा तदभावे सिद्धाभावे का तेषां पूजा, किं वा ' से ' तस्य पूजकस्य फलम् ?। एवं च सति निर्वृतावविप्रणाशबुद्धिरपि सिद्धाभावे न भवतीत्यय्मुपकारस्तेभ्यः किं नेष्यते?, इति ॥ २९५२ ॥

अथवा " अविप्रणाशबुद्धिहेतुत्वान्मार्गोपकारिणः सिद्धाः " इत्ययमर्थोऽन्यथाऽपि साध्यते । कथम ?, इत्याह-

गंतुरणासाओ वा, सम्मग्गोऽयं जहिच्चियपुरस्स ।
सिद्धो सिद्धेहिंतो, तदभावे पच्चओ कत्तो ?॥२९५३॥

अथवा-अयं सम्यग्दर्शनचारित्रलक्षणो मार्गो यथेप्सितपुरस्य मोक्षनगरस्य सन्मार्ग इत्येवं सिद्धेभ्य एव सिद्धो निश्चितः, नान्यस्मात् । कुतः ?, इत्याह-(संतुरणासाओ त्ति) मोक्षपुरं गन्तुर्मुमुक्षोरपायाभावतोऽनाशादविप्रणाशात् । तदनाशे च सन्मार्गोऽयं सम्यग्दर्शनाऽऽदिको मोक्षपुरस्य मार्ग इत्येवं मुमुक्षूणां प्रत्ययोत्पादात् । तदभावे तु सिद्धेविप्रणाशे कुतोऽयं प्रत्ययः स्यात् ?, न कुतश्चिदित्यर्थः । इदमत्र हृदयम्-यथा पाटलिपुत्राऽऽदिनगरमार्गः कश्चिद् यथेप्सितपुरं गन्तुः सार्थवाहस्य निरपायगमनेनाविप्रणाशात्सन्मार्गोऽयमिति निश्चीयते, एवं सम्यग्दर्शनाऽऽदिको मोक्षपुरमार्गोऽपि तदभीष्टं मोक्षपुरं गन्तुर्भव्यजन्तुसार्थस्य निरपायगमनेनाविप्रणाशात्सन्मार्गोऽयमिति निश्चीयते । अत एवंभूतनिश्चयजनकत्वान्मार्गोपकारिणः सिद्धाः, ततः पूज्या इति ॥ २६५३ ॥

अपि च-

मग्गम्मि रुई तदवि-प्पणासओ तप्फलोवलंभाओ ।
जं जायइ तेहिंतो, नेयरहा तदुवगारो से ॥ २७५४ ॥

यद्यस्मात्सम्यग्दर्शनाऽऽदिको मोक्षमार्गो यथावदयमित्येवं रुचिः प्रीतिर्जायते उत्पद्यते भव्यजन्तूनां (तेहिंतो त्ति) तेभ्यः सिद्धेभ्य एव, नेतरथा नाऽन्यथा । कुतः ?, इत्याह-तदविप्रणाशात्-तेषां सिद्धानां शाश्वतभावोपगमात्; तथा-तत्फलोपलम्भात्-तेषामेव सिद्धानां शाश्वतानुपमसुखलक्षणस्य फलस्योपलम्भात् । ततस्तदुपकारोऽसौ मार्गे रुच्यादिर्भावलक्षणः सिद्धकृतोऽस्याप्युपकार इति ॥ २७५४ ॥

अत्र परमतमाशङ्क्य परिहरन्नाह-

नणु जिणवयणाउ चिय, तदत्थिया तप्फलोवलंभो य।
सच्चं तहा वि तप्फल-सद्भावाओ रुई होइ ॥२६५५॥

ननु जिनवचनाज्जिनोपदेशादेव, तदर्थिता तत्र मार्गे रुचिलक्षणाऽर्थिता, तस्य मार्गस्य यत्फलं सिद्धिसुखलक्षणं तदुपलम्भश्च सर्वमिदं जायते, तत्किमविप्रणाशहेतूपन्यासेन ? । सत्यम् । तथाऽपि तस्य मार्गस्य यत्फलं सिद्धत्वप्राप्तिलक्षणं तस्य सद्भावादविप्रणाशाच्छाश्वतभावाद्विशेषिततरा मार्गे रुचिर्भवतीति इति । अतो वक्तव्य एव सिद्धानामविप्रणाशलक्षणो हेतुरिति ॥ २७५५ ॥

पुनरपि परमतमाशङ्क्य परिहरन्नाह-

अप्प चिय सिवमग्गो, निच्छयओ तह रुई समत्तं ति ।
मग्गोवयारिणो जह,जिणा तहा खीणसंसारा ॥२६५६॥

ननु " कुप्पाथिओ अमित्तं, अप्पा सुप्पाथिओ हवइ मित्तं ।" इत्यादिवचनान्निश्चयतो निश्चयनयमतेनाऽऽत्मैव शिवमार्गो मोक्षमार्गः, तथा-रुचिश्च सम्यक्त्वमात्मैव नापर इति, अतः किमत्र बाह्येनाविप्रणाशहेतुनोपन्यस्तेन ?। सत्यम्। तथाऽपि व्यवहारनयमतेन यथा मार्गोपदेशनाज्जिनास्तीर्थकरा मार्गोपकारिण उच्यन्ते, तथा क्षीणसंसारा अपि सिद्धा अविप्रणाशेन मार्गोपकारिणोऽभिधीयन्त इति न दोषः ॥ २६५६ ॥

अथाऽऽचार्याणामुपाध्यायानां च नमस्कारार्ह-हेतुत्वं व्याचिख्यासुराह-

आयारदेसणाओ, पुज्जा परमोवगारिणो गुरवो ।
विणयाऽऽइगाहणा वा,उवज्झाया सुत्तदा जं च ॥२७५७॥

पूज्याः परमोपकारिणो गुरवः,स्वयमाचारपरत्वात्,परेभ्यश्चाऽऽचारदेशनादिति । तथा-पूज्या उपाध्यायाः,स्वयं विनयवत्त्वात्, शिष्याणां च विनयग्राहणाद्विनयशिक्षणात् । यतश्च सूत्रपाठदास्ते, अतोऽपि पूज्या इति ॥ २६५७ ॥

अथ साधूनां पूज्यार्हत्वकारणम्, तथा-पञ्चानामप्यर्हदादीनां सामान्यं तत्कारणमुपदर्शयन्नाह-

आयारविणयसाहण-साहूजं साहओ जओ दिंति ।
तो पुज्जा ते पंच वि, तग्गुणपूयाफलनिमित्तं ॥२७५८॥

ततः साधवः पूज्याः; यतः किम् ?, इत्याह-(आयार इत्यादि) आचारवत्त्वाद्,विनयवत्त्वाद्,मोक्षसाधने साहाय्यदानात्पूज्यास्ते इति भावार्थः। तथा-सामान्येन पञ्चाप्यर्हदादयः पूज्याः,तद्गुणानां ज्ञानाऽऽदीनां या पूजा,तस्या यत्फलं स्वर्गापवर्गाऽऽदिकं, तन्निमित्तं ते भवन्तीति कृत्वा, तद्गुणपूजाफलनिमित्तत्वादित्यर्थः । इति चतुर्दशगाथार्थः ॥ २६५८ ॥

एवं तावत्समासेनार्हदादीनां नमस्काराऽर्हत्व-द्वारेण मार्गदेशकत्वाऽऽदयो गुणा उक्ताः ।
साम्प्रतं संसाराटवीमार्गदेशकत्वभवसमुद्रनिर्यामकत्वषड्विधजीवनिकायगोपनत्वप्ररूपणाऽऽदिना प्रपञ्चेनार्हतां गुणानुपदर्शयन्नाह-

अमवीए देसयत्तं, तहेव निज्जामया समुद्दम्मि ।
छक्कायरक्खणट्ठा, महगोवा तेण वुच्चंति ॥ २७५९ ॥

नवाट्व्यां देशकत्वं मार्गोपदेशकत्वं कृतमर्हद्भिः, तथैव निर्यामकाः संसारसमुद्रे भगवन्त एव,षट्कायरक्षणार्थं यतः प्रयत्नं चक्रुर्महागोपास्तेनोच्यन्ते ॥ इति निर्युक्तिगाथासंक्षेपार्थः ॥२६५९॥

अथ " जह निव्वुइपुरमग्गं " इत्यादिका विस्तरार्थप्रतिपादनपरा सप्तदश गाथाः सुगमाः । सति च वैषम्ये मूलाऽवश्यकटीकाऽनुसारतो भावनीया इति न प्रतिपादिताः ।

तदेवमुक्तप्रकारेणार्हतां नमस्कारार्हत्वे हेतवो गुणाः प्रतिपादिताः, साम्प्रतं तु प्रकारान्तरेण तद्भूतानेव गुणान् प्रतिपादयन्नाह-

रागदोसकसाए, य इंदियाणि य पंच वि परीसहे ।
उवसग्गे नामयंता, नमोऽरिहा तेण वुच्चंति ॥२७६०॥

रागद्वेषकषायान् इन्द्रियाणि च पञ्चाऽपि परीषहान्,उपसर्गान्नामयन्तोऽर्हन्तो नमोऽर्हाः। इति निर्युक्तिगाथासंक्षेपार्थः॥२६६०॥

(एतद्व्याख्यानरूपं भाष्यं तु नेह प्रपञ्चितं विस्तरभयात्, किन्तु रागद्वेषाऽऽदिशब्देषु यथास्थानेषु द्रष्टव्यम्)

अथ "नामयंता नमोऽरिहा" (२७६०) इत्येतद् व्याचिख्यासुराह-

पहवीकरणं नामण-महवा नासणमओ जहाजोगं ।
नेयं रागाऽऽईणं, तन्नामाओ नमोऽरिहा ॥ ३००८ ॥

रागाऽऽदीनां प्रहीकरणं क्षयभावाऽऽपादनं नमनमुच्यते, मूलतो नाशनं वा । अतो रागाऽऽदीनामेवंविधं नमनं यथायोगं यथाघटमानकं ज्ञेयम् । तन्नामनाच्च नमो नमस्कारस्यार्हा अर्हन्त इति ॥ ३००८ ॥

साम्प्रतं प्राकृतशैल्या अनेकधाऽर्हच्छब्दनिरुक्तसंभव इति

दर्शयन्नाह-'इंदिय' इत्यादि चतस्रो गाथाः, एता अपि तथैव। इदानीममोघतास्थापनार्थमपरान्तरालिकं नमस्कारफलमुपदर्शयति-

अरहंतनमोक्कारो, जीवं मोएइ भवसहस्साओ ।
भावेण कीरमाणो, होइ पुणो बोहिलाभाए ॥३००९॥

इह नामस्थापनाद्रव्यभावलक्षणनमस्कारश्चतुर्विधो गृहीतः, तत्राऽर्हच्छब्देन बुद्ध्या अर्हदाकारवती स्थापना गृह्यते, तस्या नमस्कारः स्थापनानमस्कार इति व्युत्पत्त्या स्थापनानमस्कारः संगृहीतः । (नमोक्कारो त्ति) इत्यनेन नामनमस्कारः । (कीरमाणो त्ति) अञ्जलिप्रग्रहाऽऽदिना क्रियमाण इत्यनेन द्रव्यनमस्कारः । (भावेण त्ति) अनेन तु भावनमस्कार इति । तत्राऽर्हन्नमस्कारः क्रियमाणो जीवं मोचयति भवसहस्रात्, प्रस्तावादनन्तभवेत्यर्थः । अनन्तभवमोचनाच्च मोक्षं प्रापयतीत्युक्तं भवति । यद्यपि च कांश्चित्तद्भव एव मोक्षं न प्रापयति, तथाऽपि भावेनोपयोगविशेषेण क्रियमाणो भावनाविशेषत एवान्यस्मिन्नपि जन्मनि पुनरपि बोधिलाभाय भवति । बोधिलाभश्च निश्चितोऽचिरान्मोक्षहेतुरिति । एवं बाह्यान्यन्तरेण नामाऽऽदिचतुर्विधविधानेन नमस्कारः क्रियमाणो जीवं भवाद् मोचयति, पुनर्बोधिबीजं च जायते ॥ इति निर्युक्तिगाथार्थः ॥ ३००९ ॥

अत्र भाष्यम्-

अरहंताऽऽगारवई, ठवणा नामं मयं नमोक्कारो ।
भावेणं ति य जीवो,दव्वं पुण कीरमाणो त्ति ॥३०१०॥
इय नामाऽऽइचउव्विह–वज्झऽब्भंतरविहाणकरणाओ ।
सो मोएइ भवाओ, होइ पुणो बोहिबीयं च ॥ ३०११ ॥

गतार्थे ॥३०१०।३०११॥

तथा चाऽऽह-

अरहंतनमोक्कारो, धन्नाण जीवक्खयं करंताणं ।
हिययं अणुम्मुयंतो, विसोत्तियावारओ होइ ॥३०१२॥

धनं ज्ञानदर्शनचारित्रलक्षणमर्हन्तीति धन्याः साध्वादयः, तेषां जीवक्षयं तद्भवजीवितक्षपणं कुर्वतां यावज्जीवं हृदयमनुन्मुञ्चन् विस्रोतिकाया विमार्गगमनस्यापध्यानस्य चाऽऽवारकोऽर्हन्नमस्कारो भवति । इति निर्युक्तिगाथार्थः ॥ ३०१२ ॥

भाष्यम्-

धन्ना नाणाऽऽइधणा, परित्तसंसारिणो पयणुकम्मा ।
जीवजीवियं पुणजवो, तस्सेह खयं करिंताणं ॥३०१३॥
इह विस्सोओगमणं, चित्तस्स विसोत्तिया अवज्झाणं ।
अरहंतनमोक्कारो, हिययगओ तं निवारेइ ॥ ३०१४ ॥

गतार्थे ॥३०१३।३०१४॥

अथाऽर्हन्नमस्कारस्यैव महाऽर्थतां दर्शयति-

अरहंतनमोक्कारो, एवं खलु वण्णिओ महत्थो त्ति ।
जो मरणम्मि जवग्गे,अनिक्खणं कीरई बहुसो ।३०१५।

अर्हन्नमस्कार एवं खलु वर्णितो महार्थ इति महान् अर्थो यस्य स महार्थोऽलाक्षरोऽपि द्वादशाङ्कार्थग्राहित्वान्महार्थः । कथं पुनरेतदेवम ?, इत्याह-जो नमस्कारो मरणे प्राणोपरमलक्षणे उपाये समीपभूते, अभीक्ष्णमनवरतं क्रियते बहुशोऽनेकशः । ततश्च महत्यामापदि द्वादशाङ्गीं मुक्त्वा तत्स्थानेऽनुस्मरणान्महार्थः ॥ इति निर्युक्तिगाथार्थः ॥ ३०१५ ॥

कथं पुनर्द्वादशाङ्गार्थो नमस्कारः ?, इत्याशङ्क्य युक्तिमाह भाष्यकारः-

जलणाऽऽइभए सेसं, मोत्तुं पगरणयं महामोल्लं ।
जुधि वाऽतिभए घेप्पइ,अमोहमत्थं जह तहेह ॥३०१६॥
मोत्तुं पि वारसंगं, मरणाऽऽइभएसु कीरए जम्हा ।
अरहंतनमोक्कारो, तम्हा सो वारसंगत्थो ॥ ३०१७ ॥
सव्वं पि वारसंगं, परिणामविसुद्धिहेउमित्तागं ।
तक्कारणजावाओ,कह न तयत्थो नमोक्कारो ?॥३०१८॥
न हु तम्मि देसकाले, सक्को वारसविहो सुयक्खंधो ।
सव्वो अणुचिंतेउं, धंतं पि समत्थचित्तेणं ॥ ३०१९ ॥

चतस्रोऽपि सुगमाः, नवरं (देसकाले त्ति) देशः प्रस्तावः, तद्रूपः कालो देशकालः, तस्मिन्मरणलक्षणे देशकाल इति । (धंतं पि त्ति) धनितमत्यर्थमिति ॥ ३०१६ । ३०१७। ३०१८ । ३०१९ ॥

एकस्मिन्नपि यत्र वीतरागोक्ते पदे सति जीवः संवेगं गच्छति, येन च पदेन विरागत्वं भवति निर्वेदमुपैति, तत्तस्यैकमपि पदं समस्तमोहजालोच्छेदहेतुत्वात्संपूर्णद्वादशाङ्गरूपं ज्ञानमेव भवति, तत्कार्यकर्तृत्वात्, किं पुनरनेकपदाऽऽत्मको नमस्कारः सम्पूर्णं द्वादशाङ्गज्ञानं न भविष्यति ?, इत्यनया भङ्ग्या नमस्कारस्य द्वादशाङ्गरूपतां साधयन्नाह-

एगम्मि वि जम्मि पए, संवेगं कुणइ वीयरायमए ।
तं तस्स होइ नाणं, जेण विरागत्तणमुवेइ ॥३०२०॥
एगम्मि वि जम्मि पए, संवेगं कुणइ वीयरागमए ।
सो तेण मोहजालं, छिंदइ अब्भुप्पओगेणं ॥३०२१॥
ववहाराओ मरणे, तं पयमेक्कं मयं नमोक्कारो ।
अन्नं पि निच्छयाओ, तं चेव य वारसंगत्थो ॥३०२२॥

गतार्था एव, नवरं किं पुनः प्रस्तुते तदेकं पदम ?, इत्याह-" ववहाराओ " इत्यादि । यथा लोकव्यवहारे ' साम्प्रतमल्पस्तन्तुलः, प्रचुरो गोधूमः, संपन्नो यवः, ' इत्यादावनेकमप्येकमुच्यते, तथा मरणसमये क्रियमाणः " पंच नमोक्कारो " अनेकपदाऽऽत्मकोऽपि व्यवहारत एकं पदमत्राभिमतः । निश्चयनयमतेन तदन्यदपि सुबन्तं तिङन्तं वा लघ्वपि यत्संवेगकरं निर्जराफलं पदं तदेतद् द्वादशाङ्गार्थ इति ॥ ३०२० । ३०२१ । ३०२२ ॥

यदुक्तं निर्युक्तिकृता-' अनिक्खणं कीरई बहुसो ' । (३०१५) इति । तत्र किं कारणम ?, इत्याशङ्क्याऽऽह—

जं सोऽतिनिज्जरत्थो, चिंमयत्थो वन्निओ महत्थो वि ।
कीरइ निरंतरमजि–क्खणं तु बहुसो बहू वारा ॥३०२३॥

यद् यस्मादसौ नमस्कारोऽतिनिर्जरार्थः, तथा द्वादशाङ्गगणिपिटकार्थो महार्थश्चोक्तप्रकारेण वर्णितः, तस्माद्भीष्णं निरन्तरं बहुशो बहुधो वाराः क्रियते ॥ इति गाथाऽष्टकार्थः ॥ ३०२३ ॥

अथ निर्युक्तिकृदुपसंहरन्नाह-

अरहंतनमोक्कारो, सव्वपावप्पणासणो ।

मंगलाणं च सव्वेसिं, पढमं हवइ मंगलं ॥ ३०२४ ॥

अत्र "सव्वपावप्पणासणो" इत्यस्य व्याख्यानमाह-

पंसेइ पिबइ व हियं, पाइ जवे वा जियं तओ पावं ।
तं सव्वमट्ठसाम-ञ्जाइभेयं पणासेइ ॥ ३०२५ ॥

पांशयति मलिनयति जीवमिति पापम्, पिबति वा हितमिति पापम्, पाति वा भव एव रक्षति जीवं, न पुनस्तस्मान्निःसर्तुं ददातीति पापम्; तच्च सर्वं, कर्मेहाभिप्रेतम् । कथंभूतम् ? , इत्याह—(अट्ठसामन्नजाइभेयं ति) अष्टौ सामान्येन ज्ञानाऽऽवरणीयाऽऽदयो जातिभेदा यस्य तदष्टसामान्यजातिभेदं प्रणाशयत्युच्छेदयतीति सर्वपापप्रणाशन इति ॥ ३०२५ ॥

" मंगलाणं च सव्वेसिं " (३०२४)
इत्यादेर्व्याख्यानमाह—

नामाऽऽइमंगलाणं, पढमं ति पहाणमहव पंचएहं ।
पढमं पहाणतरयं, व मंगलं पुव्वभणियत्थं ॥३०२६॥

अर्हन्नमस्कारलक्षणं मङ्गलं नामस्थापनाऽऽदिमङ्गलानां मध्ये प्रथमं प्रधानम्, मोक्षलक्षणप्रधानपुरुषाऽर्थसाधकत्वात् । अथवाप्रस्तुतानामेव पञ्चानामर्हत्सिद्धाऽऽदिनावमङ्गलानामेतत्प्रथममाद्यम्, आदावेव निर्दिष्टत्वात् । अथवा-प्रधानतरं प्रथमं, सिद्धाऽऽद्यपेक्षयाऽर्हतां प्रधानतरपरोपकारार्थसाधकत्वादिति । " मंगलमयइ नवाओ," (२४) इत्यादिना च मङ्गलं पूर्वजणितशब्दार्थमेव । इति गाथात्रयार्थः ॥३०२६॥ इत्यर्हन्नमस्कारः समाप्तः । विशे० । (सिद्धनमस्कारशब्दार्थः ' सिद्ध ' शब्देऽभिधास्यते)

संप्रति सिद्धनमस्कारवक्तव्यतामाह-

सिद्धाण नमोक्कारो, जीवं मोएइ भवसहस्साओ ।
भावेण कीरमाणो, होइ पुणो बोहिलाभाए ॥
सिद्धाण नमोक्कारो, धन्नाण भवक्खयं करेंताणं ।
हिययं अणुम्मुयंतो, विसोत्तियाऽऽवारओ होइ ॥
सिद्धाण नमोक्कारो, एवं खलु वन्निओ महत्थो त्ति ।
जो मरणम्मि उवग्गे, अभिक्खणं कीरए बहुसो ॥
सिद्धाण नमोक्कारो, सव्वपावप्पणासणो ।
मंगलाणं च सव्वेसिं, बीयं हवइ मंगलं ॥

गाथाचतुष्टयमप्यर्हन्नमस्कार इव वेदितव्यम् । उक्तः सिद्धनमस्काराधिकारः । आ० म० १ अ० २ खण्ड । (सिद्धशब्दार्थः ' सिद्ध ' शब्दे वक्ष्यते)

साम्प्रतमाचार्यनमस्कारावसरः-

आयरियनमोक्कारो, जीवं मोएइ भवसहस्साओ ।
भावेण कीरमाणो, होइ पुणो बोहिलाभाए ॥
आयरियनमोक्कारो, धन्नाण भवक्खयं करेंताणं ।
हिययं अणुम्मुयंतो, विसोत्तियाऽऽवारओ होइ ॥
आयरियनमोक्कारो, एवं खलु वन्निओ महत्थो त्ति ।
जो मरणम्मि उवग्गे, अभिक्खणं कीरए बहुसो ॥
आयरियनमोक्कारो, सव्वपावप्पणासणो ।
मंगलाणं च सव्वेसिं, तइयं हवइ मंगलं ॥

गाथाचतुष्टयमप्यर्हन्नमस्कारवदवसेयम्, विशेषस्तु सुगम एव इत्युक्त आचार्यनमस्काराधिकारः । आ० म० १ अ० २ खण्ड । (आचार्यशब्दार्थस्तु ' आयरिय ' शब्दे द्वितीयभागे ३०२ पृष्ठे निरूपितः)

साम्प्रतमुपाध्यायनमस्कारः-

उवज्झायनमोक्कारो, जीवं मोएइ भवसहस्साओ ।
भावेण कीरमाणो, होइ पुणो बोहिलाभाए ॥
उवज्झायनमोक्कारो, धन्नाण भवक्खयं करेंताणं ।
हिययं अणुम्मुयंतो, विसोत्तियाऽऽवारओ होइ ॥
उवज्झायनमोक्कारो, एवं खलु वन्निओ महत्थो त्ति ।
जो मरणम्मि उवग्गे, अभिक्खणं कीरए बहुसो ।
उवज्झायणमोक्कारो, सव्वपावप्पणासणो ।
मंगलाणं च सव्वेसिं, चउत्थं हवइ मंगलं ॥

गाथाचतुष्टयमपि सामान्यार्हन्नमस्कारवदवसेयम् । विशेषस्तु सुगम एवेत्युक्त उपाध्यायनमस्काराधिकारः । आ० म० १ अ० २ खण्ड । (उपाध्यायशब्दार्थस्तु ' उवज्झाय ' शब्दे द्वितीयभागे ८८२ पृष्ठे गतः)

अथ साधुनमस्कारः-

साहूण नमोक्कारो, जीवं मोएइ भवसहस्साओ ।
भावेण कीरमाणो, होइ पुणो बोहिलाभाए ॥
साहूण नमोक्कारो, धन्नाण भवक्खयं करेंताणं ।
हिययं अणुम्मुयंतो, विसोत्तियाऽऽवारओ होइ ।
साहूण नमोक्कारो, एवं खलु वन्निओ महत्थो त्ति ।
जो मरणम्मि उवगए, अभिक्खणं कीरए बहुसो ॥
साहूण नमोक्कारो, सव्वपावप्पणासणो ।
मंगलाणं च सव्वेसिं, पंचमं हवइ मंगलं ॥

इदं गाथाचतुष्टयमप्यर्हन्नमस्कारवदवसेयम्, विशेषस्तु सुखोन्नेयः ।

एसो पंचनमोक्कारो, सव्वपावप्पणासणो ।
मंगलाणं च सव्वेसिं पढमं हवइ मंगलं ॥

पाठसिद्धा । तदेवं गतं वस्तुद्वारम् । आ० म० १ अ० २ खण्ड ।

(१०) अथाऽऽक्षेपद्वारं वक्तव्यम् । तत्र परः प्राऽऽह-

न वि संखेवो न वित्थारो, संखेवो दुविह सिद्धसाहूणं ।
वित्थरओऽणेगविहो, पंचविहो न जुज्जए तम्हा ।३२०१।

इह किल सूत्रं संक्षेपविस्तरावतिक्रम्य न वर्त्तते । तत्र संक्षेपवद् यथा सामायिकसूत्रम्, विस्तरवद् यथा चतुर्दश पूर्वाणि । इदं पुननैमस्कारसूत्रमुभयातीतम्, यतोऽत्र न संक्षेपो, नाऽपि विस्तरः । तथा-(संखेवो दुविह त्ति) यद्ययं संक्षेपः स्यात्ततस्तस्मिन् सति द्विविध एव नमस्कारो भवेत्सिद्धसाधुभ्यामिति, परिनिर्वृताऽर्हदादीनां सिद्धशब्देन ग्रहणात्, संसारिणां तु साधुशब्देनेति । संसारिणो ह्यर्हदाचार्याऽऽदयो न साधुत्वमतिवर्तन्ते । अथायं विस्तरतः । तदप्ययुक्तम् । यतो वि-

स्तरतोऽनेकविधो नमस्कारः प्राप्नोति । तथाहि-ऋषभाऽजितसंभवाऽऽदिभ्यो नामग्राहं सर्वतीर्थकरेभ्यः; तथा-सिद्धेभ्योऽप्येकद्वित्रिचतुष्पञ्चाऽऽदिसमयसिद्धेभ्यो यावदनन्तसमयसिद्धेभ्यः,तथा-तीर्थसिद्धप्रत्येकबुद्धाऽऽदिविशेषणविशिष्टेभ्य इत्यादिभिर्भेदैर्विस्तरतोऽनन्तभेदो नमस्कारः प्राप्नोति । यतश्चैवं, तस्मादमुं पञ्चावयवमङ्गीकृत्य पञ्चविधोऽयं नमस्कारो न युज्यत इति ॥ ३२०१ ॥ तदेवमुक्तमाक्षेपद्वारम् ।

(११) अथ प्रसिद्धिद्वारम् । तत्र प्रसिद्धराक्षेपस्य प्रतिविधानमभिधीयते। इह चेदं प्रतिविधानम्-'न संक्षेपो, नापि विस्तरतः' इत्येतदसिद्धम्, संक्षेपत्वादस्य।
अथ संक्षेपकारणवशात्कृतार्थाकृतार्थपरिग्रहेण सिद्धसाधुमात्रक एवोक्त इति चेत् ।
तदयुक्तम् । कारणान्तरस्यापि सद्भावात् । तथा चाऽऽह-

अरिहंताऽऽई नियमा, साहू साहू उ तेसु भइयव्वा ।
तम्हा पंचविहो खलु,हेउनिमित्तं हवइ सिद्धो ॥३२०२॥

इहार्हदादयो नियमात्साधवः, तद्गुणानामपि तत्र भावात् । साधवस्तु तेष्वर्हदादिषु भक्तव्या विकल्पनीयाः, यतस्ते न सर्वेऽप्यर्हदादयः, किं तर्हि ?, केचिदर्हन्तः, येषां तीर्थंकरनामकर्मोदयोऽस्ति,केचित्तु सामान्यकेवलिनः,अन्ये त्वाचार्या विशिष्टसूत्रार्थदेशकाः, अपरे तूपाध्यायाः सूत्रपाठकाः, अन्ये त्वेतद्विशिष्टाः सामान्यसाधव एव शिक्षकाऽऽदयो,न पुनरर्हदादयः। तदेवं साधूनामर्हदादिषु व्यभिचारात् तन्नमस्करणेऽपि नाऽर्हदादिनमस्कारसाध्यस्य विशिष्टस्य फलसिद्धिः । ततश्च संक्षेपेण द्विविधनमस्करणमयुक्तमेव, अव्यापकत्वादिति । अत्र प्रयोगः-साधुमात्रनमस्कारो विशिष्टोऽर्हदादिगुणनमस्कृतिफलप्रापणसमर्थो न भवति,तत्सामान्याभिधाननमस्कारकृत्त्वात्,मनुष्यमात्रनमस्कारवद्, जीवमात्रनमस्कारवद्वेति । तस्मात्संक्षेपतोऽपि पञ्चविध एव नमस्कारो, न तु द्विविधः, अव्यापकत्वात्; विस्तरतस्तु नमस्कारो न विधीयते, अशक्यत्वात् । तथा-"मग्गे अविप्पणासो" इत्यादिको यः पूर्वं पञ्चविधो हेतुरुक्तः, तन्निमित्तमप्ययं पञ्चविधः सिद्धो भवति। इति निर्युक्तिगाथार्थः ॥३२०२॥

अथ भाष्यकार आक्षेपविवरणमाह-

निव्वुयसंसारिकया-कयत्थलक्खणविहाणओ जुत्तो ।
संखेवनमोक्कारो, दुविहोऽयं सिद्धसाहूणं ॥ ३२०३ ॥
उसभाऽऽईणमणंतर-सिद्धाऽऽईणं जिणाऽऽइयाणं च ।
वित्थरओ पंचविहो, न वि संखेवो न वित्थारो॥३२०४॥

गतार्थे ॥ ३२०३।३२०४ ॥

अथ प्रसिद्धिविवरणमाह-

जइ वि जइग्गहणाओ, होइ कयं गहणमरुहयाऽऽईणं ।
तह वि न तग्गुणपूया, जइगुणसामण्णपूयाओ ॥३२०५॥
परिणामसुद्धिहेउं, व पयत्तो सा य वज्झवत्थूओ ।
पायं गुणाहिआओ, जा सा न तदूणगुणलब्भा।३२०६।
जइ मणुयाऽऽइग्गहणे, होइ कयं गहणमरुहयाऽऽईणं ।
न य तव्विसेसबुद्धी, तह जइसामण्णगहणम्मि ।३२०७।
जइ एवं वित्थरओ, जुत्तो तदणंतगुणविहाणाओ ।
जइ तदसज्झमओ, पंचविहो हेउभेयाओ ॥३२०८॥
मग्गोवएसणाई, सोऽजिहिओ तप्पभेयओ नेओ ।
जह लावगाऽऽइभेओ,दिट्ठो लवणाऽऽइकिरियाओ।३२०९।

एता अपि गतार्था एव ॥३२०५।३२०६॥ नवरं (तह जईत्यादि) तथा तेनैव प्रकारेण, यतेः साधोः सामान्यं, तद्ग्रहणे सति नार्हदादिविशेषवति बुद्धिरुत्पद्यत इति ॥ ३२०७ ॥

(तदनंतगुणेत्यादि) तेषामर्हदादीनां ये अनन्ता गुणाः प्रत्येकं क्षेत्रकालजातिगोत्रप्रमाणाऽऽकृतिवयःसंयमाऽऽदिविशेषरूपा उपाधयस्तैः कृत्वा विधानाद् नमस्कारस्य करणादिति ॥३२०८॥

(जह लावगाऽऽईत्यादि) यथा लावक-प्लावक-पाचक-पाठक-याचकाऽऽदीनां लवन-प्लवन-पचन-पठन-याचनाऽऽदिक्रियातो भेदो दृष्टः ॥ ३२०९ ॥

(१२) अत्र क्रमद्वारविचारमाह-

पुव्वाणुपुव्वि न कमो, नेव य पच्छाणुपुव्विए स भवे ।
सिद्धाऽऽईया पढमा, विइयाए साहुणो आई ॥३२१०॥

इह क्रमस्तावद् द्विविधः—पूर्वानुपूर्वी वा, पश्चानुपूर्वी वेति । अनानुपूर्वी किल क्रम एव न भवति, असमञ्जसत्वात् । तत्रायमर्हदादिक्रमः पूर्वानुपूर्वी न भवति, सिद्धानामादावनभिधानादेकान्तकृतकृत्यत्वेन । तथा—" सिद्धाण नमोक्कारं, काऊण-मभिग्गहं तु सो गिण्हे । " इति वचनादर्हन्नमस्कार्यत्वेन च सिद्धानां प्रधानत्वात्, प्रधानस्य चाऽऽद्यर्हत्तत्वेन पूर्वाभिधानादिति भावार्थः । तथा-नैव च पश्चानुपूर्व्येष क्रमो भवेत्, साधूनां प्रथममनभिधानात्, इहाऽप्रधानत्वात्सर्वपाङ्क्तेया हि साधवः । ततश्च तानादौ प्रतिपाद्य यदि पर्यन्ते सिद्धाऽभिधानं स्यात्,तदा भवेत्पश्चानुपूर्वी । तस्मात्प्रथमायाः सिद्धाऽऽदित्वात्, द्वितीयायास्तु साध्वादित्वाद् नेयं पूर्वानुपूर्वी, नापि पश्चानुपूर्वी ॥ इति निर्युक्तिगाथार्थः ॥३२१०॥

एतदेव भाष्यकारः प्राऽऽह-

जेण कयत्था सिद्धा, न जिणा सिद्धाऽऽइओ कमो जुत्तो ।
पच्छक्कमो व जइ सं-जयाऽऽइसिद्धावसाणा तो ।३२११।
जं च जिणाण वि पुज्जा, सिद्धा जं तेसि निक्खमणकाले ।
कयसिद्धनमोक्कारा, करेंति सामाइयं सव्वे ॥ ३२१२ ॥

गतार्थे ॥ ३२११ ॥ ३२१२ ॥

अत्रोत्तरमाह-

अरहंतुवएसेणं, सिद्धा नज्जंति तेण अरहाऽऽई ।
न वि कोई परिसाए, पणमित्ता पणमई रन्नो ॥३२१३॥

इह तावदयं पूर्वानुपूर्वीक्रम एव । यदप्युक्तम्-" सिद्धादिरयं प्राप्नोति " । तदयुक्तम् । यतोऽर्हदुपदेशेनैव सिद्धा अपि ज्ञायन्ते, प्रत्यक्षाऽऽदिगोचारातीतत्वेनाऽऽगमगम्यत्वात् तेषाम् । तेन तस्मादर्हदादिरेव, पूर्वानुपूर्वीक्रम इति गम्यते । अत एव चार्हतामभ्यर्हितत्वमवसेयम् । कृतकृत्यमप्यल्पकाल्यवहितत्वात् प्रायः समानमेव । तथा-नमस्कार्यत्वमप्यसाधकमेव,अर्हन्नमस्कारपूर्वकमेव सिद्धत्वप्राप्तेरर्हतामपि वस्तुतः सिद्धनमस्कार्यत्वादिति ।

आह-यद्येवं तर्ह्याचार्याऽऽदिभिः क्रमः प्राप्तः, अर्हतामप्याचार्योपदेशेन परिज्ञानादिति । तदयुक्तम् । यस्मादर्हत्सि-

रूपोरेवायं वस्तुतस्तुल्यबलयोर्विचारः श्रेयान्, परमनायकपदवर्तित्वात्तयोः । आचार्यास्त्वर्हतां परिषत्कल्पा एव वर्तन्ते । नाऽपि कश्चित्परिषदे (षणामेत्ता) प्रणामं कृत्वा, ततः प्रणमति राज्ञे; इत्यतोऽप्रेयमेवेदम् । इति निर्युक्तिगाथार्थः ॥ ३२१३ ॥

भाष्यकारः प्राऽऽह-

जइ एवं आयरिओ-वएसओ जं जिणाऽऽइपमिवत्ती ।
तेणाऽऽयरियाऽऽइक्रमो, जुत्तो नो चेदणेगंतो ॥३२१४॥

यद्यर्हदुपदेशेन सिद्धा ज्ञायन्त इत्यर्हतामादौ नमस्कारः, तर्ह्येवं सत्याचार्योपदेशत एव यस्माज्जिनाऽऽदीनामर्हदाऽऽदीनां प्रतिपत्तिर्नव्यवलोकस्योपजायते, तस्मादाचार्यादिरेव क्रमो युक्तः, न चेदेवमिष्यते, तर्ह्यनैकान्तोऽयं-यदुपदेशेन यो ज्ञायते तस्य प्राधान्यमितरस्य च गुणभाव इति ॥ ३२१४ ॥

पर एवाऽऽह-

जुत्तो व गणहराणं, जिणाऽऽइओ जं जिणोवएसेणं ।
जाणंति ते विसेसे, सेसा उ गुरूवएसेणं ॥ ३२१५ ॥

काक्षा वदति-युक्तो वा गणधराणां गौतमाऽऽदीनामयं जिनाऽऽदिरर्हदादिक्रमः, यस्मात्ते गौतमाऽऽदयो जिनस्याऽर्हत एवोपदेशेनावशेषान् सिद्धाऽऽचार्याऽऽदीन् जानन्ति, शेषास्तु गणधरशिष्यप्रशिष्याऽऽदयो निजनिजगुरूपदेशेन सिद्धाऽऽदीनर्हतश्च जानन्ति, ततः केषाञ्चिदर्हदादिः, केषाञ्चिदाचार्याऽऽदिः क्रमस्त्वदभिप्रायतोऽनियमेन भवत्विति ॥ ३२१५ ॥

तथा पर एवाऽऽह-

अहवा आयरिउ चिय, सो तेसिं मइ तओ पसत्तो मे ।
आयरियाऽऽइउ चिय, एवं सइ सव्वसाहूणं ॥३२१६॥

अथवा मतिः-स जिनो भगवानाचार्य एव तेषां गणधराणामाचारप्रवर्तकत्वमाश्रित्येति भावः । ततश्चैवं सति-'ज्ञे' भवतामाचार्याऽऽदिरेव सर्वसाधूनां गणधराऽऽदीनां क्रमः प्रसक्तः प्राप्त इति ॥ ३२१६ ॥

अत्र सूरिरुत्तरमाह-

पढमोवएसगहणं, तं चारुहओ न सेसएहिंतो ।
गुरवो वि तदुवइट्ठ-स्स चेव अणुभासया नवरं ॥३२१७॥
अरहंतगुरूवज्झा-यभावओ तस्स गणहराणं पि ।
जुत्तो तयाइउ चिय, न गुरु त्ति तओ जिणे न नवे ॥३२१८॥
स जिणो जिणाऽऽइसयओ, सो चेव गुरू गुरूवएसाओ ।
करणाऽऽइविणयणाओ,सो चेव मओ उवज्झाओ ।३२१९।

इह यद्यप्याचार्याऽऽदयोऽप्यर्हदादीनुपदिशन्ति,तथाऽपि यत्प्रथममुपदेशग्रहणं गणधराणां तदधिकृत्योच्यते । तच्चाऽर्हत एव सकाशाद्, न शेषेभ्य आचार्योपाध्यायाऽऽदिभ्यः । येऽपि गुरव आचार्याऽऽदयोऽर्हदादीनुपदिशन्ति, तेऽपि तदुपदिष्टस्यार्हदुपदिष्टस्यैव, केवलमनुभाषकाः, न पुनः स्वातन्त्र्येण देशकाः इति ॥३२१७॥ अथवा यद्यप्याचार्याऽऽद्युपदेशेनाऽर्हन्तो ज्ञाताः इत्यभ्युपगम्यते, तथाऽप्यर्हदादिरेव क्रमः । कुतः?, इत्याह-(अरहंतेत्यादि) गणधराणाम्, अपिशब्दाच्छेषाऽऽचार्याऽऽदीनामपि,तदादिरर्हदादिरेव क्रमो युक्तः । कुतः?, इत्याह-तस्याऽर्हत एवार्हदुपाध्यायभावतः । स एव हि महावीराऽऽदिर्भगवान्-

इमद्धाप्रातिहार्याऽऽद्यतिशययोगादर्हन्,स एव तत्त्वोपदेशाऽऽदिभ्यो गुरुराचार्यः, स एव चेन्द्रियकषाययोगाऽऽदिविनयनादुपाध्यायः, ततश्चाऽऽचार्याऽऽदिक्रमेऽपि परेणाऽऽद्यमाने सामर्थ्यादर्हदादिरेव क्रमः संपद्यत इति भावः ॥३२१७॥ न चाऽयं गुरुराचार्य इत्यतो जिनोऽर्हन्न भवेत्, किं तु भवेदेव,जिनातिशययोगादिति । एतदेवाऽऽह-(स जिणो इत्यादि) गतार्था ।३२१९।

अथ यदुक्तम्-"जं च जिणाण वि पुज्जा सिद्धा" (३२१२)

इत्यादि; तत्राऽऽह-

जइ सिद्धनमोक्कारं, छउमत्थो कुणइ न य तदाईओ ।
तं पइ तया न दोसो, न हि सो तक्काल्मरुहंतो ॥३२२०॥

यदि निष्क्रमणकाले भगवाँइच्छस्थो गुणाधिकानां सिद्धानां नमस्कारं करोति, करोतु नाम तदा, न कश्चिद्दोषः।कं प्रति न दोषः?, इत्याह-तं छद्मस्थतीर्थंकरं प्रति । न ह्यसौ तत्कालमर्हन्, केवलोत्पत्तावेव तद्भावादिति । यदि छद्मस्थतीर्थंकरापेक्षया गुणाधिकाः सिद्धा भवद्भिरपीष्यन्ते, तर्हि कथं छद्मस्थतीर्थंकराऽऽदिनमस्कारः?, इति चेत् । तदयुक्तम् । कुतः?,इत्याह-न च तदादिश्छद्मस्थतीर्थंकराऽऽदिर्नमस्कार इष्यतेऽस्माभिः, किं तु समुत्पन्नकेवलज्ञानाऽर्हदादिरेव । स च केवल्यर्हन् सिद्धाऽऽदिवस्तुस्तोमस्वरूपोपदेशदानतः सिद्धेभ्यो गुणाधिक इत्युक्तमेवेति; अतोऽर्हदादिरेव नमस्कार इति ॥३२२०॥

अत्राऽऽक्षेपपरिहारौ प्राऽऽह-

एवमकयत्थकाले, सिद्धाऽऽई होउ भणइ तया वि ।
अन्ने संतरुहंता, तओ तयाई तओ निच्चं ॥ ३२२१ ॥

यदि छद्मस्थतीर्थंकरापेक्षया गुणाधिकाः सिद्धाः, तर्ह्येवं सत्यकृतार्थछद्मस्थतीर्थंकरकाले सिद्धाऽऽदिर्नमस्कारो भवतु, न्यायोपपन्नत्वादिति । अत्रोत्तरम-हन्त ! यदाऽत्र भरताऽऽदौ छद्मस्थतीर्थंकरस्तदाऽपि महाविदेहेष्वन्ये केवलिनोऽर्हन्तः सन्ति, ततस्तदादिरर्हदादिरेव, तकोऽसौ नमस्कारो, नित्यं सर्वदा ॥ इति गाथाऽष्टकार्थः ॥ ३२२१ ॥ तदेवमुक्तं क्रमद्वारम् ।

(१३) अथ प्रयोजनफलयोर्दर्शनार्थमाह-

एत्थ य पओयणमिणं, कम्मक्खयमंगलाऽऽगमो चेव ।
इहलोयपारलोइय-दुविहफलं तत्थ दिट्ठंता ॥ ३२२२ ॥

अत्र च नमस्कारकरणे प्रयोजनमिदम् । यदुत-करणकाल एवाऽऽक्षेपेण ज्ञानाऽऽवरणाऽऽदिकर्मक्षयः, अनन्तकर्मपुद्गलापगममन्तरेण भावतो नमस्कारस्याऽप्यप्राप्तेरित्युक्तमेव । तथा-मङ्गलाऽऽगमश्चैव यः करणकालभावीति,तथा-कालान्तरभावि पुनरैहलौकिकपारलौकिकभेदभिन्नं द्विविधं फलम् । तत्र दृष्टान्ता वक्ष्यमाणलक्षणा इति ॥ ३२२२ ॥

तदेव द्विविधं फलं तावद्विवृण्वन्नाह—

इहलोए अत्थकामा, आरोग्गं अजिरई य निप्फत्ती ।
सिद्धी य सग्गसुकुल-पच्चायाऽऽई य परलोए ॥३२२३॥

इहलोके नमस्कारादर्थकामौ भवतः, आरोग्यं नीरुजत्वमुपजायते । एते चाऽऽर्थादयः शुभविपाकिनोऽस्माद्भवन्ति । तथा चाऽऽह-आभिमुख्येन रतिरभिरतिः, सा चेहलोकेऽप्यर्थादिभ्यो भवति, परलोकविषया तु तेभ्य एव, शुभानुबन्धित्वात्; निष्पत्तिः 'पुण्यस्य' इति गम्यते । अथवा-'अभिरतेश्च निष्पत्तिः' इत्येकवाक्यतैव । तथा-सिद्धिश्च,मुक्तिश्च,स्वर्गः,सुकुलप्रत्ययाऽऽदिश्च परलोके इत्यस्याऽऽमुष्मिकफलमिति ॥३२२३॥

(१४) अथाऽत्र द्विविधेऽपि फले पूर्वोपक्षिप्तान् दृष्टान्तानाह-

इहलोयम्मि तिदंडी, सा दिव्वं माणुसुंगचवणमेव ।
परलोए चंमपिंगल,हुंमियजक्खो य दिट्ठंता ॥३२५॥ विशे०।

इहलोके नमस्कारार्थमुदाहरणं त्रिदण्डी—

"एगस्स सावगस्स पुत्तो धम्मं न य लेइ। सो य सावगो कालगतो। सो वि बाहिराहओ (विबाहिओ) एवं चेव विहरइ। अन्नया तेसिं घरसमीवे परिव्वायगो आवासितो। सो तेण समं मेत्तिं करेइ। अन्नया भणइ-आणेह निरुवहयं अणाहं मडयं, जेण ते ईसरियं करेमि। तेण मग्गिओ, अहो उव्वद्धो मणुस्सो। सो मसाणं नीतो। जं च तत्थ पाउग्गं तं च नीयं। सो य दारगो पियरेण नमोक्कारं सिक्खाविओ, भणितो य-जाहे धोहेज्जासि,ताहे एयं पढिज्जासि,विज्जा एसा। सो य तस्स मयगस्स पुरतो ठविओ। तस्स य मयगस्स हत्थे असी दिन्नो। परिव्वायगो विज्जं परियट्टेइ। उट्ठेतुमारद्धो वेयालो। सो दारगो नीतो हियए नमोक्कारं परियट्टेइ। सो वेयालो पमितो। पुणो वि जवति। पुणो वि उट्ठिओ। सुट्ठुतरगं परियट्टेइ। पुणो वि पडितो। तिदंडी भणइ-किं वि जाणसि ?। भणइ-न किं पि जाणामि। पुणो वि जवइ। तइयवारं पुणो वि उट्ठितो। पुणो नमोक्कारं परियट्टेइ। ताहे धाणमंतरेण रूसिऊण तं खग्गं गहाय सो तिदंमी दो खंडा कओ। सुवण्णकोमी (खाडी) जातो। अंगोवंगाणि य से जुत्तजुत्ताइं काउं सव्वरत्ति छूढं। इस्सरो नमोक्कारपभावेण जातो। जइ न होतो नमोक्कारो, तो वेयालेण मारिज्जंतो सो सुवण्णं होतो "।

कामनिष्फलो नमोक्कारतो कहं ?-

"एगा सावित्रा आसी, तीसे भत्ता मिच्छादिट्ठी अण्णं भज्जं आणेउं मग्गइ, तीसे तणए न लग्गइ त्ति। स सवत्तगं ति चिंतेइ-कहं मारेमि ?। अण्णया कण्हसप्पो घमए छुभित्ता आणीतो, संगोवितो य। जिमितो भणइ-आणेह पुप्फाणि अमुगे घरए न-वियाणि। सा पविट्ठा अंधकारं ति नमोक्कारं परिवट्टंती चिंतेइ-जइ वि मे कोइ आपज्जा, तो पि मे मरंतीए नमोक्कारो न नस्सिहिति। ता दूढो हत्थो। सप्पो देवयाए अवहितो पुप्फमाला कया। सा गहिया, दिट्ठा य से। सो संभंतो चिंतेइ-अण्णाणि एयाणि। पुच्छइ य। तीए कहियं-ततो चेव घडातो आणीयाणि एयाणि। गतो तत्थ पेच्छइ घडगं, पुप्फगंधं च। न वि तत्थ कोइ सप्पो। ततो आउट्टो पाए पमितो सव्वं कहेइ, खामेइ य। पच्छा सा चेव घरसामिणी जाया। एवं कामावहो नमोक्कारो "।

आरोग्याभिरईए उदाहरणं—

" एगं नगरं नदीतीरे। खरकम्मिएण सरीरचिंताए निग्गएण नदीए बुब्भंतं माउलुंगं दिट्ठं। रायाए उवणीयं। रन्ना सूयस्स हत्थे दिन्नं। तेण जिब्भियंतस्स उवणीयं पमाणेण वण्णेण गंधेण य अइरित्तं। तस्स मणुसस्स राया तुट्ठो। दिन्ना भोगा। राया भणइ-अण्णदीए मग्गह जाव अन्नं भवे। पत्तयणं गहाय पुरिसा गया। दिट्ठो वणसंडो। जो फलाणि गेण्हइ सो मरइ। रन्नो कहियं। भणइ-अवस्सं आणेयव्वाणि,गोलग-(अक्ख) पडिया गच्छंतु। एवं गया आणेंति। तत्थ जस्स गोलगो आगतो सो पगो वणे पविसइ। पविसित्ता फलाणि बहिं छुभइ, ततो अण्णे आणेंति। जो छुहइ सो मरइ। एवं काले वच्चंते सावगस्स परिवाडी जाया। तत्थ गतो चिंतेइ-मा विराहिय-सामण्णो को वि होज्ज त्ति निसीहियं भणित्ता नमोक्कारं पढंतो दुक्कइ। वाणमंतरस्स चिंता जाया-कत्थ मए एयं सुयपुव्वं ?, णायं, संबुद्धो वंदइ, भणइ य-अहं तत्थेव साहरामि। गतो रण्णो कहियं। रण्णा संमाणितो। तस्स उस्सीसए दिणे दिणे ठवेइ। एवं तेण अग्गिरई,भोगा य लद्धा। जीवियातो य किं अन्नं आरोग्गं ?। राया वि परितुट्ठो त्ति "।

परलोगे वि नमोक्कारफलं-

"वसंतपुरे नयरे जियसत्तू राया। तस्स गणिया साविया। सा चंडपिंगलेण चोरेण समं वसति। अन्नया कयाइ तेण रन्नो घरं हयं (जायं),हारो आणीतो,भीएहिं संगोविज्जइ। अण्णया उज्जाणियाए गमणं। सव्वाओ विभूसियाओ गणियाओ चलंति। तीए सव्वातो अतिसयामि त्ति सो हारो आविद्धो। जीसे देवीए सो हारो, तीए दासीए सो नातो। कहियं रण्णो। सा केण समं वसइ ?। कहिए चंडपिंगलो गहितो सूले भिन्नो। तीए वि चिंतियं-मम दोसेण मारिओ त्ति सा से नमोक्कारं देइ, भणइ य निदाणं। करेहि जहा एयस्स रण्णो पुत्तो आयासि त्ति। कयं निदाणं। अग्गमहिसीए उदरे उववन्नो। दारगो जातो। सा साविया कीलावणधाती जाया। अन्नया चिंतेइ-कालो समो गब्भस्स मरणस्स य होज्जा। कयाइ रमावंती भणइ-मा रोव चंडपिंगल ! त्ति जाई सरिया। संबुद्धो राया सुतो। सो राया जातो। सुचिरेण कालेणं दो वि पच्चइयाणि "।

एवं सुकुलप्पच्चायातीतं सग्गगमणं सिद्धिगमणमिति ।

अह वा विहियं उदाहरणं-

" महुराए नयरीए जिणदत्तो सावगो। तत्थ हुंडिओ चोरो नगरं परिसुसइ। सो कयाइ गहिओ सूले निन्नो। रन्ना भणियं-पभिक्खह बितिया वि से नज्जिहिं ति। ततो रायमणुसा पडिचरंति। सो जिणदत्तो सावगो तस्स नाइदूरे वीतिवयइ। सो चोरो भणइ-सावग ! तुममणुकंपगो सि त्ति साहतोऽहं,देह मम पाणियं, जा मरामि। सावगो भणइ-इमं नमोक्कारं पढेज्जा, ते आणेमि पाणियं। जइ विस्सारेसि तो ते आणीयं पि न देमि। सो ताव होलयाए पढइ। सावगो वि पाणियं गहाय आगतो। ता वेला पयाय (पच्चलं पादामि) त्ति णमोक्कारं घोसंतस्सेव निग्गतो जीवो। जक्खो उववन्नो। सावगो तेहिं मणुस्सेहिं गहितो, चोरभत्तदायगो त्ति रण्णो निवेदियं। राया भणइ-एयं पि सूले भिंदह। आघायणं दिज्जइ। जक्खो ओहिं पउंजइ। पेच्छइ सावगं अप्पणो य सरीरं। ततो पव्वयं उप्पाडेऊण नयरस्स उवरिं ठवेइ। भणइ य-सावगं भट्टारयं न याणह, खामेह, मा भे सव्वे चूरेहामि। ततो मुक्को खामितो विभूईए नयरं पवेसितो। नयरस्स पुव्वेण जक्खस्स आययणं कयं। एवं नमोक्कारेण फलं लब्भइ। " उक्ता नमस्कारनिर्युक्तिः । आ० म० १ अ० २ खण्ड।

अथ भाष्यकारः प्रयोजनफलयोर्विवरणमाह-

सयओवओगकिरिया-गुणलाभो तप्पओयणमिहेव ।
कालंतरनिप्फत्ति, फलमिहपरलोगमोक्खेसु ॥३२५॥
कम्मक्खओऽणुसमयं, तल्लाभे चेव तदुवओगाओ ।
सव्वत्थेसु य मंगल–पविग्घहेऊ नमोक्कारो ॥३२६॥

तस्य नमस्कारस्य प्रयोजनं तत्प्रयोजनमिहैवेहलोके एव । किमिति ?। अत्रोच्यते-तद्विषयसततोपयोगक्रियया यः कर्मक्षय-क्षयोपशमाऽऽदिगुणस्य लाभः। फलं तु नमस्कारस्य (का-

लंतरनिष्पत्तिं ति) । कालान्तरे निष्पत्तिर्यस्य तत्कालान्तरनिष्पत्ति, कालान्तरभावीत्यर्थः । तच्च (इह त्ति) इहलोके,अर्थकामाऽऽदिकम् । (परलोए त्ति) परलोके स्वर्गाऽऽदिकं, मोक्षे तु जरामरणाभावाऽऽदिकमिति । तदेवं सामान्यतः प्रयोजनं फलं चोपदर्शितम् ॥ ३२२५ ॥ अथ प्रयोजनं विशेषतो दर्शयति-(कम्मेत्यादि) (तल्लाभे चेव त्ति) तस्य नमस्कारस्य लाभकाल एव, तदुपयोगान्नमस्कारोपयोगादनुसमयं कर्मक्षयो भवति । तथा-सर्वार्थेषु च सर्वकार्येषु प्रवृत्तानां मङ्गलमविघ्नहेतुर्नमस्कारः संपद्यत इति ॥ ३२२६ ॥

अत्र कश्चिदाह-"ननु नमस्कारोपयोगात्कर्मक्षयो भवति " इत्येतत्कुतः ?, इत्याह-

सुयमागमो त्ति य तओ, सुओवओगप्पओयणो तं च ।
आयहियपरिणामा-वसंवराऽऽइ-बहुविगप्पं च ॥३२२७॥

तकोऽसौ नमस्कारः श्रुतमागम इत्यर्थः । स च श्रुतोपयोगप्रयोजनः श्रुतोपयोगः प्रयोजनं फलमस्येति कृत्वा । तच्च श्रुतोपयोगप्रयोजनमात्महितभावसंवराऽऽदिभेदेन बहुविकल्पं बहुप्रभेदम् । उक्तं च-" आयहियपरिणामा-वसंवरो नवनवो य संवेगो । निक्कंपया तओ नि-ज्जरा य परदेसियत्तं च ॥ १ ॥" इत्यादि । अतो नमस्कारस्य श्रुतरूपत्वाद्भवत्येव तदुपयोगात्कर्मक्षय इति ॥ ३२२७ ॥

(१५) अत्र प्रेरकः प्राऽऽह-

पूयाफलप्पया न हि, नहं व कोवप्पसायविरहाओ ।
जिणसिद्धा दिट्ठंतो, वइधम्मेणं निवाऽऽईया ॥३२२८॥

नमस्कारलक्षणायाः पूजायाः फलं पूजाफलं तत्प्रदौ न हि नैव जिनसिद्धौ, कोपप्रसादरहितत्वात्, नभोवदिति । ये तु पूजाफलदाः ते कोपप्रसादरहिता न भवन्ति, यथा नृपाऽऽदय इत्येष वैधर्म्येण दृष्टान्त इति ॥ ३२२८ ॥

एतदेव समर्थयन्नाह-

पूयाऽणुवगाराओ, अपरिग्गहाओ विमुत्तिभावाओ ।
दूराऽऽइभावओ वा, विफला सिद्धाऽऽइपूय त्ति ॥३२२९॥

विफला सिद्धाऽऽदिपूजेति प्रतिज्ञा । हेतूनाह-पूजाया अनुपक्रियमाणत्वात्, तदपरिग्राहित्वाद्, अमूर्तत्वात्, दूराऽऽदिभावात्, नभोवदिति ॥ ३२२९ ॥

अत्र प्रतिविधानमाह-

जिणसिद्धा दिंति फलं, पूयाए केण वा पवण्णमिणं ? ।
धम्माऽधम्मनिमित्तं, फलमिह जं सव्वजीवाणं ॥३२३०॥
ते य जओ जीवगुणा, तओ न देया न वा समादेया ।
कयनासाऽकयसंजो-गसंकरेगत्तदोसाओ ॥३२३१॥

नन्वयमनुक्तोपालम्भः सर्वोऽपि पूर्वोक्तः, यस्माद् "जिनसिद्धाः पूजायाः फलं ददति" इति केनेदं प्रपन्नम् ?। धर्माधर्मनिमित्तमेव हि यस्मात् स्वर्गनरकाऽऽदिकं फलमिह सर्वजीवानामिति ॥ तौ च धर्माधर्मौ यतो जीवगुणौ, ततो न कस्यापि देयौ दातव्यौ,नापि कुतश्चित्समादेयौ ग्राह्यौ,ज्ञानाऽऽदिगुणवत् । कुतः ?, इत्याह-(कयनासेत्यादि) यदि ह्येते जिनसिद्धाः कुपिताः सन्तः कस्याऽपि धर्ममपहरेयुरधर्मं च प्रयच्छेयुः, तदा कोपविषयभूतस्य प्राणिनः कृतस्य धर्मस्य नाशः, अकृतस्य चाऽधर्मस्याऽऽगमः स्यात्, प्रसन्ना वा यदि कस्याऽप्याकस्मिकं धर्मं प्रयच्छेयुः,अधर्मं चापहारेयुः,तदाऽकृतस्य धर्मस्याऽऽगमः,कृतस्य चाधर्मस्य नाशो भवेदिति । एवं यदा ते प्रसन्नाः कुपिता वा कस्याऽपि संबन्धिनौ धर्माधर्मौ व्यत्यस्यान्यस्य दद्युः, अन्यस्य संबन्धिनौ चापरस्य, तदा प्राणिनां परस्परं धर्माधर्मयोः संकरः, एकत्वं वा स्यात् । एवं स्वर्गनरकाऽऽदिके धर्माधर्मफलेऽपि कृतनाशाऽऽदिभावना कार्येति ॥ ३२३० ॥ ३२३१ ॥

अपि च-

नाणानावाहसुहं, मोक्खो पूयाफलं जओऽनियं ।
तं नाऽऽयपक्खयाओ, देयं जीवाऽऽइभावो व्व ॥३२३२॥

ज्ञाने सत्यनाबाधस्य यत्सुखं तद्रूपो यो मोक्षः, स एव यस्मान्नमस्कारलक्षणायाः पूजायाः परमार्थतो मुख्यं फलमभिमतं,स्वर्गाऽऽदेरानुषङ्गिकफलत्वात् । तच्च यथोक्तं सुखं न कस्याऽपि देयं दातुं शक्यम्, आत्मपर्यायत्वात्, जीवचैतन्याऽऽदिभाववत् । ततश्च पूजाफलदानानिषेधे सिद्धसाधनमेवेति ।३२३२।

यदि पूजाफलं न देयं, तर्हि किं देयमिह भवेत् ?, इत्याह-

भत्ताऽऽइ होज्ज देयं, न तदत्थो पूयणप्पयत्तोऽयं ।
तं पि सकज्जोदयं चिय, वज्झनिमित्तं परो नवरं ।३२३३।

शाल्योदनाऽऽदिरूपं भक्ताऽऽदिकं परस्मै देयं भवेत्, स्थूलपुद्गलस्कन्धमयत्वात्, घटाऽऽदिवत् । केवलं तदर्थो भक्ताऽऽद्यर्थोऽयं पूजनप्रयत्नो न भवति, किं तु मोक्षार्थः । किञ्च-तदपि भक्ताऽऽदिकं स्वकृतात्कर्मण उदय उत्पत्तिर्यस्य तत्स्वकृतोदयं, स्वकृतकर्मजनितमेवेत्यर्थः । यत्तु परः कश्चिदाहाऽऽदृयते, स केवलं बाह्यनिमित्तमात्रमेव । निश्चयतस्तु बाह्यो न कोऽपि कस्यापि दाता, अपहर्ता चेति ॥ ३२३३ ॥

एतदेव समर्थयन्नाह-

कम्मं सुहाऽऽइहेऊ, वज्झयरं कारणं जया देहो ।
सहाऽऽइ वज्झतरयं, जइ दायरि कहा का णु ?॥३२३४॥
तम्हा सकारणं चिय, सुहाऽऽइ वज्झं निमित्तमेत्तायं ।
को कस्स देइ हरइ व,निच्छयओ का कहा सिद्धे?।३२३५।

यदि हन्त ! सुखदुःखानामन्तरङ्गं कर्मैव हेतुः, देहस्तु यदा तेषां बाह्यतरं कारणं, शब्दरूपाऽऽदिकं तु शुभाशुभमपि बाह्यतरं कारणं, तदाऽतिबाह्यतरादपि परभूते दातरि काऽत्र किल कारणत्वकथा ?, इति ॥३२३४॥ तस्मात्स्वमात्मीयं कर्मैव कारणं यस्य तत्स्वकारणमेव सुखाऽऽदि, बाह्यं तु देहशब्दरूपाऽऽदिकं निमित्तमात्रकमेव । ततो निश्चयतः कः कस्मै ददाति, अपहरति वा ?, न कश्चिदित्यर्थः । तथा च सति क्षीणरागद्वेषे सिद्धे का नमस्कारफलदातृत्वकथा ?, इति ॥ ३२३५ ॥

अत्र परप्रेर्ये परिहारं चाऽऽह-

जइ सव्वं सकयं चिय, न दाणहरणासइफलमिहाऽऽवन्नं ।
णणु जत्तो च्चिय सकयं,तत्तो च्चिय तप्फलं जुत्तं।३२३६।
दाणाऽऽइपराणुग्गह-परिणामविसेसओ सओ चेव ।
पुन्नं हरणाऽऽइपरो-वघायपरिणामओ पावं ॥ ३२३७ ॥
तं पुन्नं पावं वा, नियमत्तणि वज्झपच्चयावेक्खं ।
कालंतरपागाओ, देइ फलं न परओ लब्भं ॥ ३२३८ ॥

यद्यत्कप्रकारेण यल्लोकः शुभमशुभं वा फलमनुभवति, तत्स-

वं स्वकृतमेवेष्यते, न पुनः कोऽपि कस्याऽपि किमपि ददात्यपहरति वा; तर्हि दानापहरणाऽऽदीनामिह दातुरपहर्तुर्वा न किञ्चित्फलमित्यापन्नं, स्वकृतस्यैव फलेन तस्य प्राप्तत्वादिति। सूरिराह—ननु यत एव तत्स्वकृतं, तत एव तत्फलं दातुरपहर्तुश्च युक्तम् । दाता हि दानसमये परानुग्रहपरिणामविशेषात्स्वत एव पुण्यं बध्नाति; अपहर्ता तु परोपघातपरिणामात् स्वत एव पापं बध्नाति । अतस्तयोस्तत्पुण्यपापलक्षणं फलं स्वकृतमेवेति कथं न युक्तम् ?, युक्तमेवेति ॥३२३६॥ एतदेवाह—(दाणाऽऽइत्यादि) आदिशब्दाद्दयाऽऽदिपरिग्रहः । (सओ चेव त्ति) स्वत एव स्वकृतमेव दातुः पुण्यं, स्वत एव चापहर्तुः पापम् । शेषं गतार्थमिति ॥३२३७॥ तच्च पुण्यं पापं वा स्वपरिणामजनितमात्मन्येव स्थितं, किं तु बाह्यनिमित्तमात्रापेक्षं कालान्तरे विपाकाच्छुभमशुभं वा फलं ददातीति " परकृतम् " इति व्यपदिश्यते, न पुनः परमार्थतस्तत्तत् पुण्यपापफलं परतो लप्स्यमिति ॥ ३२३८ ॥

ननु परतस्तल्लाभे को दोषः ?, इत्याह-

जइ वा परलहियव्वं, तत्तो चिय जेण तप्परिग्गहियं ।
तो तम्मि सिवं पत्ते,कुगइगए वा कुओ लब्भं ?॥३२३९॥

स्पष्टा ॥३२३९॥

अपि च-यदि येन यद्दत्तं तस्मै तद्देयम्, यस्य चाऽऽपहृतमसावपि तस्याऽऽहरति, तर्हीदं दूषणम् । किं तत् ?, इत्याह-

लहइ अदिंतो व कओ, साहू जं देज्ज पुव्वदायस्स ? ।
कत्तोऽवहारिणो तं,जं पडिहीरिज्ज सेधणिणो ॥३२४०॥
अहव मई जं तेण वि, दिण्णं अण्णस्स तं तओ लद्धुं ।
पडिदेइ तहाऽऽहारी, हारीओ अन्नओ लद्धुं ॥३२४१॥

वा अथवा, इह निर्ग्रन्थत्वेन साधुर्दानमददद्दत्वाऽमृत्वा भवान्तरं प्राप्तः पूर्वमदत्तत्वात्कुतः कस्मादाहाराऽऽदि तल्लभते, यत्पूर्वभवसंबन्धिन आहाराऽऽदिदातुस्तदानीं दद्यात ?, इति । यो वा पूर्वभवे कस्याऽपि संबन्धिनमपहृत्य मृतो जन्मान्तरे निःस्वो जातः (से) तस्य परधनाऽपहारिणः कुतस्तद्धनं यत्पूर्वभवधनिना प्रतिहियते ?, इति ॥ ३२४० ॥ अथ मतिः परस्य भवेत्-तेनापि साधुना यदनेकभवेष्वन्यस्याऽऽहाराऽऽदिकं दत्तं तत् ततो लब्ध्वा पूर्वभवदातुः प्रतिददाति । तथा-योऽपि पूर्वभवे परधनमपहृत्येहभवे निःस्वो जातस्तस्यापि संबन्धिनं नानाभवेष्वन्येनान्येन वाऽपहृतमास्ते, ततश्चासौ ततः स्वधनापहारिणोऽन्यतः सकाशात्स्वापहृतं लब्ध्वा यस्य सत्कं तेन पूर्वमपहृतं तस्मै,'प्रतिदद्यात्', इति शेषः ॥ ३२४१ ॥

तदेतत्सर्वमयुक्तम्, कुतः ?, इत्याह-

एवं होऽणवत्था, दाणग्गहणाणमपरिन्नोगो य ।
जइ परओ लब्भव्वं,दिन्नं वा तस्स तं चेव ॥३२४२॥

यदि दानाऽऽदिविषयस्वपरिणामवशात्पुण्यपापे नेष्येते,किं तु यस्मै दत्तं तत्तस्मादेव परतो लप्स्यमित्यभ्युपगम्यते । यस्माद्वा यदाहाराऽऽदिकं कदाऽपि लब्धं, तस्यैवाऽन्यदा दत्तं, न पुनर्दायकेन ग्राहकस्य किमप्यधिकं कृतमिति चेष्यते; तदैवं सति दानग्रहणयोरनवस्था प्राप्नोति; यस्मै दानं तस्मात्पुनर्ग्रहणं, पुनरपि चान्यस्मै दानं, पुनरपि तस्माद् ग्रहणमित्यादि । ततश्च दानग्रहणपरम्पराव्यापृतस्य मोक्षाभावप्रसङ्गः, दानफलस्य च स्वयमपरिभोगः प्राप्नोति, अन्योन्यदानग्रहणाभ्यामायव्ययविशुद्धत्वादिति ॥ ३२४२ ॥

तदेवं तीर्थिकविशेषाणां सौगातिकाऽऽदीनां मतमपाकृत्योपसंहारपूर्वकं स्वाऽभिमतमुपदर्शयन्नाह-

तम्हा सपराणुग्गह—परिणामाओ सुपत्तविणिओगा ।
दाया पुण्णं पावइ, जं तत्तो से फलं होइ ॥३२४३॥

तस्मात्स्वपरानुग्रहपरिणामेन सुपात्रेषु वित्तविनियोगाद्दाता यत्पुण्यं प्राप्नोति, ततः (से) तस्य दातुः फलं स्वर्गाऽऽदिकं भवतीति ॥ ३२४३ ॥

तदेवमुक्त्वेदानीं दाता स्वत एवेदं स्वर्गाऽऽदिफलं लभते,न तु परतः, गृहीताऽप्येवमेव द्रष्टव्य इति दर्शयन्नाह-

जह सो पत्ताणुग्गह—परिणामाओ फलं सओ लहइ ।
तह गेण्हंतो वि फलं, तदणुग्गहओ सओ लहइ ।३२४४।

गतार्था ॥ ३२४४ ॥

एवं परधनापहार्यपि स्वत एव वधबन्धननरकाऽऽदिकं पापफलं लभते, न परत इति दर्शयति-

हारी वि हरणपरिणा—मदूसिओ वज्जपच्चयावेक्खं ।
पावो पावं पावइ, जं तत्तो से फलं होइ ॥ ३२४५ ॥

श्लथमप्युक्तार्थप्राया ॥ ३२४५ ॥

अथ प्रकृतयोजनामाह-

जह सायत्तं दाणे, परिणामाओ फलं तहेहावि ।
नियपरिणामओ चिय,सिज्झं जिणसिद्धपूयाए॥३२४६॥

प्रकटार्थप्राया ॥ ३२४६ ॥

(१६) अथ जिनाऽऽदिपूजाप्रतिघ्रार्थं प्रमाणयन्नाह-

कज्जा जिणाऽऽइपूया, परिणामविसुद्धिहेउओ निच्चं ।
दाणाऽऽइव्व मग्ग—प्पभावणाओ य कहणं व ।३२४७।

कार्या नित्यं जिनाऽऽदिपूजेति प्रतिज्ञा,स्वपरिणामविशुद्धहेतुत्वादिति हेतुः, दानाऽऽदिवदिति दृष्टान्तः । अथवा-कार्या नित्यमेव जिनाऽऽदिपूजा, मोक्षमार्गप्रभावकत्वात्, धर्मकथनवदिति ॥३२४७॥

" कोपप्रसादरहितत्वात्" इति परोक्तहेतोरनैकान्तिकतां दर्शयन्नाह-

कोवप्पसायरहियं, पि दीसए फलदमन्नपाणाऽऽइं ।
कोवप्पसायरहियं, ति निप्फलं तो अणेगंतो ॥३२४८॥

पूर्वार्द्धं सुबोधम् । ततः "कोपप्रसादरहितं वस्तु निष्फलम् " इत्यनेकान्तः, अन्नपानाऽऽदिनिर्व्यभिचारादिति ॥ ३२४८ ॥

अपि च-विरुद्धोऽप्ययं हेतुरिति दर्शयन्नाह-

कोवाऽऽइविरहियं चिय,सव्वं जमणुग्गहोवघायाय ।
दीसइ तेण विरुद्धं, पन्नमिह कोवप्पसायाओ ॥३२४९॥

इहाऽऽकाशान्नपानपीयूषविषचिन्तामण्यौषधाऽऽदिकं सर्वमपि वस्तु कोपप्रसादविरहितमेव यस्मादनुग्रहोपघातयोः प्रवर्तमानं दृश्यते, तेन तस्मादिह कोपप्रसादतः सकाशात्फलमुच्यमानं विरुद्धमेव

संबध्यते । तथाहि-कोपाऽऽदिरहितादेवाऽऽकाशाऽऽदेर्वेण उपघातः, पङ्कबन्धाऽऽदेस्त्वनुग्रहः; हितमिताऽन्नपानाऽऽदेरनुग्रहः, तस्माद्विपरीतात्पुनरुपघातः । एवं पीयूषविषाऽऽदेरपि सकाशात्कोपाऽऽदिविरहितादेवानुग्रहोपघातौ दृश्येते । ततो विरुद्धोऽयं हेतुः, विपक्ष एव वृत्तिदर्शनादिति ॥ ३२४९ ॥

अथ राजाऽऽदिनां हरणप्रदानहेतवः कोपप्रसादा भवन्तीति प्रत्यक्षत एव दृष्टमिति परस्य मतिर्भवेत्; ननु तदपि सर्वस्वाऽऽहरणं, प्रदानं वा स्वपापपुण्यकृतमेव । यस्तु परः, स तत्र केवलं निमित्तमात्रमेवेति प्रागेव भणितमिति दर्शयन्नाह-

हरणप्पयाणहेऊ, हवेज्ज कोवाऽऽइओ मई तं पि ।
नणु सकयं चिय जणियं, निमित्तमेत्तं परो नवरं ।३२५०।

गतार्था ॥ ३२५० ॥

अथवाऽपहरणप्रदानाऽऽदिकं स्वकृतं नेष्यते, तत्राऽऽह-

जइ वा न सकयहेऊं, तं तो कोवप्पसाययं राया ।
सो सव्वसेवयाणं, समानफलदो कहं न भवे ?॥३२५१॥

पाठसिद्धा ॥ ३२५१ ॥

अपि च-

दीसइ य विसमफलदो, विफलो य समाणसेवयाणं पि ।
भणइ य सुकयपुण्णो, तो से रायप्पसाउ त्ति ॥ ३२५२ ॥

समानसेवकानामपि विषमफलदः केषाञ्चिद्विफलश्च दृश्यते राजा । ततो ज्ञायते-स्वकृतपुण्यपापकृतमेवेदं सर्वमपि वैचित्र्यम, राजाऽऽदिस्तु तत्र निमित्तमात्रमेवेति । अपरं च लोकेऽपि जनयते लोकेऽप्येवं वक्तारो भवन्ति-"सुकृतपुण्यः स देवदत्ताऽऽदिः,(तो से त्ति) ततः 'से' तस्यैव राजप्रसादो जातः" इति । तत एवमादिलोकोक्तेश्च स्वकृतपुण्यपापानुमानं प्रवर्तत इति ।३२५२।

अपि च-

कोवप्पसायहेउं, च जं फलं न हि तदत्थमारंभो ।
न परप्पसायणत्थं, किं तु नियप्पसायत्थं ॥ ३२५३ ॥

कोपप्रसादहेतुकं च यत्किमपि फलं तदर्थो नैवायमस्माकमर्हदादिनमस्कारपूजाऽऽरम्भः, नाऽपि परप्रसादनार्थः, किं तु निजकचित्तस्य यः प्रसादः प्रसत्तिरर्हदादिगुणबहुमानेन शुभरूपता, तदर्थोऽयमारम्भ इति ॥ ३२५३ ॥

परप्रसादनार्थं नाऽऽरम्भ इत्याह-

धम्माऽधम्मा न पर-प्पसायकोवाणुवत्तिणो जम्हा ।
तो न परो त्ति प्पसण्णो, धम्मो कुविउ त्ति वाऽधम्मो ।३२५४।

धर्मार्थो ह्ययमारम्भः । धर्माऽधर्मौ च यस्मान्न परप्रसादकोपानुवर्तिनौ, किं तर्हि ?, जीवगतशुभाशुभपरिणामानुयायिनौ; ततः 'परः प्रसन्नः' इत्येतावता न धर्मः, नापि 'परः कुपितः' इत्येतावन्मात्रेणाऽधर्मः, किं तु निजशुभाशुभपरिणामवशाद्धर्माधर्मौ । तत्र च शुभाशुभपरिणामस्याऽऽलम्बनमर्हदादयो नमस्क्रियमाणाः संपद्यन्ते । शुभपरिणामाच्च धर्मः । तस्माच्चार्थकामाऽऽदयः, स्वर्गापवर्गौ च भवतः । इति संपद्यत एवार्हन्नमस्कारस्य यथोक्तं फलमितीह तात्पर्यमिति ॥ ३२५४ ॥

यदि परप्रसादकोपाऽनुवर्तिनौ धर्माधर्मौ स्यातां, ततः को दोषो भवेत् ?, इत्याह-

तस्साहणमुन्नस्से वि, जइ वा धम्मो परप्पसायाओ ।
तो जो जस्स पसन्नो, स तस्स देज्जा जगद्धम्मं ।३२५५।
कुपिओ हरेज्ज सव्वं, दिज्जा धम्मं व तह य पावं ति ।
अकयाऽऽगमकयनासा, मोक्खगयाणं पि चापडणं ।३२५६।

वाशब्दः प्रस्तावनायां, सा च कृतैव । तस्य धर्मस्य दयादानप्रशमब्रह्मचर्याऽर्हदादिपूजाऽऽदीनि साधनानि, तैः शून्यस्यापि यदि धर्मः परप्रसादमात्रादेवेष्यते, ततस्तर्हि य ईश्वराऽऽदिर्यस्य देवदत्ताऽऽदेः प्रसन्नः स ईश्वराऽऽदिर्जगतोऽपि संबन्धिनं धर्ममपहृत्य तस्यैवैकस्य देवदत्ताऽऽदेः सर्वं दद्यात् । तथाकुपितः स एव तस्य देवदत्ताऽऽदेः संबन्धिनं सर्वं धर्ममपहरेत्, अधर्मं वा सर्वमपि प्रयच्छेत् । तथा च सत्यकृताऽऽगमकृतनाशौ प्राप्नुतः, एकस्याकृतयोरपि धर्माऽधर्मयोरागमाद्, अन्येषां तु स्वयंकृतयोरपि तयोर्नाशादिति । मोक्षगतानामपि च सिद्धानामेवं पतनं स्यात्तदीयपूर्वसुकृतस्यान्यत्र संचरणात्, अन्यदीयाधर्मस्य च तेषु प्रक्षेपादिति ॥ ३२५५ ॥ ३२५६ ॥

किञ्च-परकीयकोपप्रसादाभावेऽपि धर्माऽधर्मौ तवापि प्रसिद्धौ । कथम ?, इत्याह—

जइ वीयरागदोसं, मुणिमक्कोसिज्ज कोइ दुट्ठऽप्पा ।
कोवप्पसायरहिओ, मुणि त्ति किं तस्य नाधम्मो ?।३२५७।
सवओ तस्साऽधम्मो, जइ वंदंतस्स तो धुवं धम्मो ।
कोवप्पसायरहिए, तइ जिणसिद्धे वि को दोसो ?।३२५८।

वीतरागद्वेषौ यस्य तं वीतरागद्वेषं मुनिं यदि दुष्टाऽऽत्मा कश्चिदाक्रोशेत्, तदा "वीतरागद्वेषत्वात्कोपप्रसादरहितः स मुनिः" इत्येतावन्मात्रेण किं तस्याऽऽक्रोष्टुर्नाऽधर्मः स्यात् ?, ननु स्यादेवाऽसौ, सकलशास्त्रलोकप्रतीतत्वादिति ॥ ३२५७ ॥ ततश्च (सवओ त्ति) मुनिं शपमानस्य तस्याऽऽक्रोष्टुर्यद्यधर्मोऽन्युपगतस्त्वया, ततस्तर्ह्यन्यस्य कस्यापि शुभपरिणामस्य तमेव मुनिं वन्दमानस्य ध्रुवं निश्चितं धर्मोऽप्येष्टव्य एव, स्वपरिणाममात्रनिबन्धनत्वस्येहाऽपि समानत्वादिति । यदि नामैवं, ततः प्रकृते किम् ?, इत्याह-तथा तेनैवोक्तप्रकारेण कोपप्रसादरहिते जिने सिद्धे च नमस्कर्तुर्निजशुभपरिणामवशाद्यथोक्तफलप्राप्तौ को दोषः ?, न कश्चिदिति ॥ ३२५८ ॥

(१७) दृष्टान्तान्तरेणाऽप्यर्हदादिभ्यः फलप्राप्तिं समर्थयन्नाह-

हिंसामि मुसं भासे, हरामि परदारमाविसामि त्ति ।
चिंतेज्ज कोइ न य चिं-तियाण कोवाऽऽइसंजुई ॥३२५९॥
तह वि य धम्माधम्मो-दयाऽऽइ संकप्पओ तहेहावि ।
वीयकसाए सवओ-ऽधम्मो धम्मो य संथुणओ ॥३२६०॥

"हनिष्मि हरिणाऽऽदीन्, मृषा भाषेऽहं, तद्धारयणाश्च वञ्चयामि देवदत्ताऽऽदीन्, धनमपहरामि तेषामेव, परदारानाविशामि निर्विवेकोऽहम्," इत्यादि कश्चिच्चिन्तयेत् । न च तेषां चिन्तितानां हिंसाऽऽदिचिन्ताविषयभूतानां हरिणाऽऽदीनां तत्काले कोपाऽऽदिसंभूतिः कोपाऽऽदिसंभवोऽस्ति ॥३२५९॥ तथापि हिंसाऽऽदिचिन्तकस्याधर्मः, दयाऽऽदिसंकल्पकस्तु तद्व्रतो धर्मो भवति । इत्यावयोरविगानेन प्रसिद्धमेव, तथेहापि प्रस्तुते वीतकषायानप्यर्हत्सिद्धाऽऽदीन् शपमानस्याऽधर्मः, संस्तुवतस्तु धर्म इति किं नेष्यते ?, इति ॥ ३२६० ॥

अथोपसंहारपूर्वकं प्रस्तुतमुपदर्शयन्नाह-

तम्हा धम्माऽधम्मा, जुत्ता नियय्प्पसायकोवाओ ।
धम्मत्थिणा पयत्तो, कज्जो तो सप्पसायम्मि ॥३२६१॥
सो य नियय्प्पसाओ-ऽवस्सं जिणसिद्धपूयणाउ त्ति ।
जस्स फलमप्पमेयं, तेण तयत्थो पयत्तोऽयं ॥३२६२॥

सुगमे, नवरं यस्य निजमनःप्रसादस्याप्रमेयमनन्तं फलं येनानन्तफलोऽसौ, तेन कारणेन तदर्थो निजमनःप्रसादार्थ एवाहदादिनमस्कारप्रयत्न इति ॥ ३२६१ ॥ ३२६२ ॥

अस्यैवार्थस्य साधनार्थं प्रमाणयन्नाह-

नाणाऽऽइमयत्ते सइ, पुज्जा कोवप्पसायविरहाओ ।
नियय्प्पसायहेउं,नाणाऽऽइतियं व जिणसिद्धा ॥३२६३॥

निजमनःप्रसादहेतोः पूज्या जिनसिद्धा इति प्रतिज्ञा, ज्ञानाऽऽदिमयत्वे सति कोपप्रसादविरहादिति हेतुः, ज्ञानाऽऽदित्रिकवदिति दृष्टान्तः । कोपाऽऽदिविरहिता लेष्टुकाष्ठाऽऽदयोऽपि विद्यन्ते, अतस्तद्व्यवच्छेदार्थं ज्ञानाऽऽदिमयत्वे सतीति हेतोर्विशेषणमिति ॥ ३२६३ ॥

(१८) परः प्राऽऽह-

पुज्जा जिणाऽऽइवज्जा, न हि मोक्खत्थं सरागदोस त्ति ।
अकयत्थभावओ वि य, दव्वट्ठाए दरिद्द व्व ॥३२६४॥

जिनसिद्धान्वर्जयित्वा शेषा आचार्योपाध्यायसाधवो, न हि नैव, मोक्षार्थं पूज्या इति प्रतिज्ञा, सरागद्वेषत्वाद्, अत एवाऽकृतार्थभावाच्च, द्रव्यार्थं दरिद्रा इवेति ॥ ३२६४ ॥

अत्र प्रतिविधानमाह-

कलुसफलेण न जुज्जइ, किं चित्तं तत्थ जं विगयरागो ।
संते वि जो कसाए, न गिण्हई सो वि तत्तुल्लो ॥३२६५॥

किं तत्र चित्रं किमाश्चर्यं, यद्विगतरागः कलुषफलेन कषायजनितेन चित्तकालुष्येण न युज्यते, विगतकषायोदयत्वात्तस्य । ननु सोऽपि तत्तुल्यो वीतरागसमान एव यः सतोऽपि कषायान्न गृह्णाति । ततश्चास्मात्परमगुरुवचनादाचार्याऽऽदयोऽपि वीतरागतुल्या एव, सतामपि कषायाणां निग्रहात् । ततः सरागद्वेषत्वादित्यसिद्धो हेतुरिति भावः। इयं च गाथा केषुचिदादर्शेषु न दृश्यते; पूर्वटीकाकारैरपि न व्याख्याता; अस्माभिस्तु बहुष्वादर्शेषु दर्शनात्सोपयोगत्वाच्च लिखितेति ॥ ३२६५ ॥

'अकृतार्थत्वात्' इत्यसमपि हेतुरनैकान्तिकः, अकृतार्थत्वे सत्यपि कारणान्तरतोऽपि पूजासंभवादिति दर्शयन्नाह-

न परोवयारओ चिय, धम्मो न परोवयारहेउं च ।
पूयाऽऽरंभो नणु सप-रिणामसुरूत्थमक्खाओ ।३२६६।

'अकृतार्थभावात्' इति ब्रुवतस्तव किमयमभिप्रायः-'स्वयमकृतार्थाः सन्त आचार्याऽऽदयो न परोपकारक्षमाः, अतस्तदसामर्थ्या दरिद्रा इव न ते नमस्करणीयाः' इति । एतच्चायुक्तम् । यतो न परस्मादर्हदादेरुपकारत एव धर्मो नमस्कर्तुः, नापि परस्यार्हदादेरुपकारहेतोस्तस्य नमस्कारपूजाऽऽरम्भः । ननु स्वपरिणामशुद्धयर्थमाख्यातोऽसौ । ततः किञ्चिदकृतार्थत्वे सत्यपि स्वशुभपरिणामनिबन्धनत्वात्पूज्या एवाऽऽचार्याऽऽदय इति ॥ ३२६६ ॥

अथ पञ्चानामपि पूज्यत्वसमर्थनार्थं प्रमाणमाह-

पूया परोवयारा-भावे वि सिवाय जिणवराऽऽईणं ।
परिणामसुद्धिहेउं, सुत्तकिरियाओ य बंभं व ॥३२६७॥

शिवाय मोक्षार्थं भवति पूजा, परोपकाराभावेऽपि पञ्चानामपि जिनवराऽऽदीनामिति साध्यम्, पूजकपरिणामशुद्धिहेतुत्वात्, तन्नमस्कारक्रियायाश्च ज्ञानाऽऽदिगुणविषयबहुमानत्वेन निरवद्यत्वेन च शुभत्वाद्, ब्रह्मचर्याऽऽदिवदिति ॥ ३२६७ ॥

अथ सुप्रसिद्धदृष्टान्तोपदर्शनेनापि जिनाऽऽदिपूजा परोपकाराभावेऽपि शिवायेति समर्थयन्नाह-

परहियगया मेत्ती, करेइ भूयाण कमुवयारं सा ।
अवयारं दूरत्थो, कं वा हिंसाऽऽइसंकप्पो ? ॥३२६८॥
धम्माऽधम्मनिमित्तं, तहा वि तह चेह निरुवगारो वि ।
पूयासुहसंकप्पो, धम्मनिमित्तं जिणाऽऽईणं ॥ ३२६९ ॥

परहृदयगता साधुहृदयस्थिता सर्वभूतेषु या मैत्री सा तेषां पृथिव्यादिभूतानां कमुपकारं करोति ?, न कञ्चित् । तथा-कं वा देवदत्ताऽऽदिहृदयगतो दूरस्थहरिणाऽऽदिभूतग्रामविषयो दूरस्थहरिणाऽऽद्यपेक्षया दूरस्थो हिंसास्तेयाऽऽदिसंकल्पोऽपकारं कुर्यात् ?, न कञ्चित्; तथाऽपि मैत्री हिंसाऽऽदिसंकल्पश्च भूतानामुपकाराऽपकारविरहेऽपि द्वावपि यथासंख्यं धर्माऽधर्मनिमित्तं भवत एव । तथा चैवं चोक्तप्रकारेण निरुपकारोऽपि जिनाऽऽदीनामुपकारमकुर्वन्नपि भूतानां साधुगतमैत्रीसंकल्पवज्जिनाऽऽदीनां पूजा शुभसंकल्पः पूजकस्य धर्मनिमित्तं भवतीति ॥ ३२६९ ॥

(१९) आह-ननु यथा दानं साध्वादीनामुपकारं करोति, नैवं जिनाऽऽदीनां नमस्कारपूजा, तत्कथमसौ धर्मनिमित्तं भवति ?, इत्याशङ्क्याऽऽह-

दाणे वि पराऽणुग्गह-लक्खणसंकप्पमेत्तओ चेव ।
फलमिह न उ पच्चा त-क्कओवगाराऽवगाराओ ।३२७०।
इहरोवउत्तभत्ता-जिण्णाऽऽइ वहम्मि दक्खिणेयस्स ।
दिंतस्स वहावत्ती, तेणाऽऽदाणप्पसंगोऽयं ॥ ३२७१ ॥

साध्वादिदानेऽपि परानुग्रहलक्षणसंकल्पमात्रत एवेह दातुः फलनिष्पत्तिः, न पुनः पश्चात्तत्कृतादु दानकृताद्वपकारादपकाराद्वेति ॥ ३२७० ॥ इतरथोपयुक्ते साध्वादिना भुक्ते योऽजीर्णाऽऽदिदोषस्तेन दाक्षिणेयस्य-दक्षिणा दानं तद्विषयभूतस्य साध्वादेर्वधे मरणे सति दातुर्वधाऽऽपत्तिर्हिंसाऽऽदिदोषसमापत्तिः। तेन च हिंसाऽऽदिदोषेणाऽऽदानप्रसङ्गोऽयं प्राप्नोति; अनिष्टं चैतत्, दातुर्विशुद्धपरिणामत्वात् । न हि तेन साध्वादिजिघांसया दानं दत्तं, किं तु तद्गुणबहुमानाऽऽदिपरिणामेन । न चैवं विशुद्धपरिणामस्यापि पापसंबन्धो घटते, अन्यथा मातृस्तन्यपानादजीर्णाद् बालस्य मरणे मातुस्तद्वधकृतपापप्रसङ्गादिति । तदेवं प्राग् यदुक्तं "पूयाऽणुवगाराओऽपरिग्गहाओ"(३२२६)इत्यादि, तत्र पूजाऽनुपकारादित्ययं हेतुरपाकृतः ॥ ३२७१ ॥

अथ "अपरिग्रहात्" इत्यसुं निराचिकीर्षुराह-

न परपरिग्गहउ चिय,धम्मो किं तु परिणामसुद्धीओ ।
पूया अपरिग्गहम्मि वि, सा य धुवा तो तदारंभो ।३२७२।

न खलु पूजायाः परेण पूज्येन परिग्रहादेव स्वीकारादेव ध-

मः, किं तु स्वपरिणामशुद्धितः । सा च परिणामशुद्धिः पूजायाः परेणापरिग्रहेऽपि ध्रुवा निश्चिता स्वसंवेदनसिद्धा समस्ति, ततस्तदारम्भो नमस्कारपूजाऽऽरम्भ इति ॥ ३२७५ ॥

किञ्च—दानस्यापरिग्रहत्वमभ्युपगम्योक्तं, वस्तुतस्तु तन्नास्त्येवेति दर्शयन्नाह-

इह चोयगमणुमोयग-मणिसेहगमेव संपयाणं ति ।
बहुमुणिपडिमाऽऽइ जओ,न दाणमपरिग्गहं तेण ।३२७३।

इह यतो यस्मात्सत्कृत्य सम्यग्वा प्रदीयते यस्मै तत्संप्रदानम् । तच्च त्रिविधम् । तद्यथा-' दीयतां मह्यं, बहुफलं भवतां भविष्यति' इत्यादिवचनप्रपञ्चेन किञ्चित्प्रेरकं,यथा बटुर्ब्राह्मणः; अपरं त्वित्थमप्रेरकमपि दानस्य ग्रहणपरिभोगाद्यनुमोदकं भवति । यथा मुनिः साधुः; अन्यत्तु पुष्पाऽऽद्यनिषेधादनिषेधकं,यथाऽर्हत्प्रतिमाऽऽदि,सर्वत्र संप्रदानार्थस्य विद्यमानत्वात् । तेन तस्मान्न क्वचिद्दानमपरिग्रहमस्तीति ॥ ३२७३ ॥

अपि च-किमनया दानस्य परिग्रहापरिग्रहचिन्तया ?, कार्यस्यान्यथैव स्थितत्वात; कथम् ?, इत्याह—

दाणमपरिग्गहम्मि वि, धम्मो नियय परिणामसुद्धीओ ।
अपरिग्गहे वि जइ सा,को नाम परिग्गहग्गाहो ?।३२७४।
किं च परहियनियया, मेत्ती नूणहिँ संपरिग्गहिया ।
हिंसासंकप्पो वा, जं धम्माधम्महेउ त्ति ॥ ३२७५ ॥
एवं जिणाऽऽइपूया, सद्धासंवेगसुद्धिहेऊओ ।
अपरिग्गहा वि धम्मा-य होइ सीलव्वयाऽऽइं व ।३२७६।

तिस्रोऽपि व्यक्तार्थाः ॥ ३२७४।३२७५।३२७६ ॥

अथ "विमूर्तिजनावात्" इत्यस्य हेतोर्निरासार्थमाह-

जं चिय मुत्तिविउत्ता, मुत्ता गुणरासओ विसेसेणं ।
तेणं चिय ते पुज्जा,नाणाऽऽइतियं व मोक्खत्थं ।३२७७।

यस्मादेव मूर्तिवियुक्ता अमूर्त्ता मुक्ताः सिद्धाः, तेनैव ते शरीरसंबन्धजनितसकलक्लेशविमुक्तत्वाद् गुणराशयः सन्तो विशेषेण मोक्षार्थं पूज्याः, ज्ञानाऽऽदित्रिकवदिति ॥ ३२७७ ॥

अपि च-

मुत्तिमओ वि न मुत्ती, पूइज्जइ किंतु जे गुणा तस्स ।
ते मुत्तिविउत्त चिय,नणु सिद्धगुणा विसेसेणं ॥३२७८॥

मूर्तिमतोऽपि संबन्धिनी मूर्तिर्न पूज्यते, किं तु गुणाः, ते च मूर्तिवियुक्ता एवामूर्ता एव । ततश्च " न पूज्याः सिद्धाः, अमूर्त्तत्वात्, नभोवत्," इति त्वदुक्तप्रमाणे विरुद्धाव्यभिचारित्वाद् विरुद्धो हेतुः । तथाह्येतदपि शक्यते वक्तुम्-पूज्याः सिद्धाः,अमूर्त्तत्वात्, मूर्त्तसाधुसंबन्ध्यमूर्त्तज्ञानाऽऽदिगुणवदिति । अथ सिद्धगुणा अमूर्ता न भवन्तीति चेदित्याह-ननु सिद्धगुणाः विशेषेणैवामूर्त्ताः; मूर्त्तसाधुगुणा हि ज्ञानाऽऽदयो मूर्त्तादव्यतिरिक्तत्वात् कथञ्चिन्मूर्ता अपि शक्यन्ते वक्तुम्; सिद्धगुणास्तु नैवम्, ततो विशेषेण ते अमूर्त्ता एव; इति न तेषां पूजाविरोध इति ॥ ३२७८ ॥

अथ परमतमाक्षिप्य परिहरन्नाह-

अहव मई मुत्तिमओ, गुणपूया होइ मुत्तिपूयाओ ।
तग्गुणसंबंधाओ, सिद्धगुणाणं तु सा नत्थि ॥३२७९॥

पूया मुत्तिगुणाणं, संबंधे फलमितीह को हेऊ ? ।
अन्नो परिणामाओ, तस्स य को केण संबंधो ? ॥३२८०॥
हियियत्थो * परिणामो, बज्झत्थालंबणनिमित्तमित्तामो ।
देइ फलं सव्वो चिय, सिद्धगुणाऽऽलंबणो चेवं ॥३२८१॥

सुगमाः ॥ ३२७९ ॥ नवरम् (पूयेत्यादि) परिहारवचनं, पूजा च मूर्त्तिश्च गुणाश्च, तेषां पूजामूर्त्तिगुणानां त्रयाणामपि, संबन्ध एवाऽभिमतं फलमवाप्यत इतीह स्वगतविशुद्धपरिणामादन्यः को हेतुः ?, न कोऽपीति । तस्य च स्वगतपरिणामस्य कः संबन्धः केनचिद् बाह्येन ?, न कश्चिदिति ॥ ३२८० ॥ केवलं निजहृदयस्थशुभपरिणामो यथा बाह्यार्हदाद्यालम्बननिमित्तमात्रकः सर्वोऽपि ददात्यभिमतफलमेवममूर्त्तसिद्धगुणाऽऽलम्बनोऽपीति ॥ ३२८१ ॥

अथ यदुक्तं-"दूराऽऽइभावओ वा,विफला सिद्धाइपूय त्ति"

(३२२६) तत्र दूराभावादित्यस्य हेतोर्निराकरणार्थमाह-

जह दूरत्थे वि धिई, बंधुम्मि सरीरपुट्ठिबलहेऊ ।
तणुदोब्बल्लाइफलो, कत्थइ सोगाऽऽइसंकप्पो ॥३२८२॥
तह परिणामो सुद्धो, धम्मफलो हि दूरसंथे वि ।
अविसुद्धो पावफलो, दूरासन्नं ति को भेओ ? ॥३२८३॥
अहवाऽऽयसन्नावोऽयं, परिणामो तेण सव्वमेवेह ।
दूरमहाऽऽलंबणओ,तस्साऽऽसन्नं तओ सव्वं ॥३२८४॥

यथा दूरस्थेऽपि बन्धौ बान्धवजने सुखिनि श्रुते तत्सुखवार्तासंकल्पजनिता धृतिः कस्याऽपि तद्बान्धवस्य दूरस्थस्यापि शरीरपुष्टिबलहेतुर्भवति; क्वचित्तु प्रस्तावे तस्मिन्नपि दुःखिनि श्रुते शोकाऽऽदिसंकल्पस्तनुदौर्बल्याऽऽदिफलः संपद्यते ॥३२८२॥ तथा तेनैव प्रकारेण दूरसंस्थेऽपि सिद्धाऽऽद्यालम्बने तद्गुणबहुमानरूपत्वाच्छुद्धपरिणामः सद्धर्मफलोऽविशुद्धस्तु पापफलः संजायते । अतो दूरस्थमासन्नं वा सिद्धाऽऽद्यालम्बनमिति को भेदः ? केयं निष्फला तद्भेदचिन्ता ?, इत्यर्थः ॥ ३२८३ ॥ अथवा-आत्मस्वभावोऽयं तद्गुणबहुमानलक्षणशुभपरिणामस्तेन तस्मादिह यदनात्मस्वभावं किमपि वस्तु तत्सर्वमप्यस्य विपरीतरूपत्वाद् दूरस्थमेव । अथाऽऽलम्बनत आलम्बनभावमाश्रित्य चिन्त्यते, ततस्तर्हि सर्वमप्यर्हत्सिद्धाऽऽदिकं वस्तु तस्य यथोक्ताऽऽत्मपरिणामस्याऽऽलम्बनमेवेति; अतः का सिद्धेषु दूरस्थता ?, इति ॥ ३२८४ ॥

अथाऽऽक्षेपपरिहारावाह-

जइ सपरिणामउ चिय, धम्मोऽधम्मो व कित्थ बज्झेण ।
जं बज्झाऽऽलंबणओ,सो होइ तओ तदत्थं तं ॥३२८५॥

ननु यदि स्वगतपरिणामादेव धर्माऽधर्मौ भवति, तर्हि किमत्र बाह्येनाऽर्हत्सिद्धाऽऽद्यालम्बनेनापेक्षितेन, स्वपरिणामत एव कार्यसिद्धेः तदपेक्षाया निष्फलत्वात् ?, इति । सूरिराह-यस्मात्सोऽपि परिणामो बाह्याऽऽलम्बनत एव भवति, नाऽन्यथा, ततस्तदर्थं स्वपरिणामोत्पादनार्थं तद् बाह्याऽऽलम्बनमपेक्ष्यत इति ॥ ३२८५ ॥

एतदेव भावयति-

परिणामो बज्झाऽऽलं-बणो सया चेव चित्तधम्मो त्ति ।
विसाणं पि व तम्हा,सुहबज्झाऽऽलंबणपयत्तो ॥३२८६॥

* ' नियत्थो ' इति पाठान्तरम् ।

शुभोऽशुभो वा परिणामः सदैव बाह्याऽऽलम्बनत एव प्रवर्तते, चित्तधर्मत्वात्, विज्ञानवदिति। यथा विज्ञानं बाह्यं नीलपीताऽऽदिकं वस्तु विना न प्रवर्तते, एवं परिणामोऽपीति भावः। तस्मादिह मोक्षाधिकारे शुभबाह्याऽऽलम्बनप्रयत्नो मोक्षार्थिनामिति ॥ ३२८६ ॥

अत्र परः प्राऽऽह-

जत्तो तत्तो व सुभो, होइ किमा-लंबणप्पभेएण ।
जह नाऽणाऽऽलंबणओ,विवरीयाओ वि सो न तहा।३२८७।

ननु यतस्ततो वाऽऽलम्बनात् शुभपरिणामो प्रवतु, किमिह शुभाशुभभेदत आलम्बनप्रभेदेन-किमिति शुभाऽऽलम्बनादेव शुभः परिणाम इष्यते ?, इति भावः। गुरुराह-(जह णाऽणाऽऽलंबणओ वि) यथाऽनालम्बन आलम्बनरहितः शुभपरिणामो न प्रवर्तते, तथा विपरीतादप्यशुभाऽऽलम्बनादसौ न भवति, अन्यथा नीलाऽऽदेरपि शुक्लाऽऽदिज्ञानोत्पत्तिप्रसङ्गादिति ॥ ३२८७ ॥

यदि विपरीताऽऽलम्बनाश्च शुभः परिणामः,तर्हि कुतोऽसौ प्रवर्तते ?, इत्याह-

किं तु सुभाऽऽलंबणओ,पाएण सुभो वि धम्मओ इयरो।
जं होइ तं पयत्तो, सुभासुभाऽऽदाणवोसग्गो ॥३२८८॥

सुगमा, नवरं शुभस्याऽऽलम्बनस्याऽऽदाने,अशुभस्य तु तस्य व्युत्सर्गे शुभपरिणामार्थिना प्रयत्नः कर्तव्य इति ॥३२८८॥

प्रायोग्रहणस्य व्यवच्छेद्यमाह-

अन्नाणिणो मुणिम्मि वि,न सुभो दिट्ठो सुभो य निस्सीले ।
जइ परिणामाउ चिय,फलमिह किं पत्तचिंताए ?।३२८९।

अज्ञानिनोऽभव्यस्य दुरभव्यस्य वा शुभाऽऽलम्बनरूपे मुनावपि न शुभपरिणामो दृष्टः, शुभश्चासौ तस्य निःशीले नास्तिकाऽऽदौ दृष्टः,ततोऽनन्तरगाथायां "सुभालंबणओ पाएण सुभो वि" (३२८८) इत्यत्र "प्रायेण" इत्युक्तमिति भावः। प्रेरकः प्राऽऽह-यद्येवं, तर्ह्यन्यत् प्रेर्यमापन्नं,परिणामादेव भवद्भिस्तावत्फलमिष्यते, ततः किं पात्रापात्रचिन्तया ?, इति। अयमत्र भावार्थः-यदि निःशीलेऽपि पात्रे शुभपरिणामो दृष्टः, ' शुभपरिणामाच्च शुभं फलं भवति ' इति भवद्भिरपि प्रागसकृद् समर्थितं, ततः किं सुशीलनिःशीलपात्रचिन्तया, निःशीलेऽपि पात्रे शुभपरिणामदर्शनात्,तस्माच्च शुभफलभावात् ?, इति ॥३२८९॥

अत्रोत्तरमाह-

सुहपरिणामनिमित्तं, होज्ज सुहं जइ तओ सुहो होज्ज ।
उम्मत्तस्स व न उ सो,सुहो विवज्जासभावाओ ॥३२९०॥

ननु तस्य मिथ्यादृष्टेः शुभपरिणामनिमित्तं शुभपरिणामहेतुकं शुभं फलं स्वर्गाऽऽदिकं प्रवेत्, को वै न मन्यते, यदि तस्याऽऽदित एव तकोऽसौ निःशीलपात्रविषयपरिणामः शुभो भवेत् ?। न चोन्मत्तस्येव तस्याऽसौ शुभः। कुतः ?, इत्याह-विपर्यासभावान्निःशीलेऽपि सुशीलाध्यवसायादिति कुतस्तस्य फलं शुभम् ?, इति। यदप्यस्माभिरुक्तम्-"सुभो य निस्सीले" (३२८९) इति, तदपि तदपेक्षयैव। स हि मिथ्यादृष्टिस्तं शुभपरिणामं मन्यते, तत्त्ववेदिनस्तु तस्य शुभत्वं नेच्छन्त्येव, विपर्यासादिति ॥३२९०॥

पुनरपि परः प्राऽऽह-

नणु मुणिवेसच्चिय निस्सीले वि मुणिबुद्धिए देवो ।
पावइ मुणिदाणफलं, तह किं न कुलिंगदाया वि ॥३२९१॥

ननु मुनिवेषो मुनिवेषस्तेन लुब्धोऽविज्ञातो य उदायिनृपमारकाऽऽदिस्तस्मिन्निःशीलेऽपि मुनिबुद्ध्या दानं ददाता मुनिदानफलं स्वर्गाऽऽदिकं प्राप्नोति, इत्येतद्भवतामपि तावत्संमतम्, तथा तेनैव प्रकारेण कुत्सितलिङ्गी कुलिङ्गी सरजस्काऽऽदिस्तस्मै दाता कुलिङ्गदाता, सोऽपि किं न मुनिफलं प्राप्नोति, मुनिबुद्धेस्तस्यापि तत्र सद्भावात् ?, इति ॥ ३२९१ ॥

गुरुराह-

जं थाणुं मुणिलिंगं, गुणाण सुन्नं पि तेण पमिप व्व ।
पुज्जं थाणुमईए, वि कुलिंगं सव्वहा जुत्तं ॥ ३२९२ ॥

यस्मान्मुनिलिङ्गं ज्ञानाऽऽदिगुणानां स्थानमाश्रयः, तेन तस्मात्कस्याऽपि मायाविनः संबन्धि तच्छून्यमपि गुणैरविज्ञातं पाषाणाऽऽदिनिर्मिताऽर्हत्प्रतिमावत्स्थानमत्याऽपि पूज्यम । कुलिङ्गं तु सर्वथा पूजयितुं न युक्तं, ज्ञानाऽऽदिगुणानां सर्वथैवाऽनाश्रयत्वादिति ॥ ३२९२ ॥

पुनरपि परः प्राऽऽह-

नणु केवलं कुलिंगे, वि होइ तं भावलिंगओ न तओ ।
मुणिलिंगमंगजावं, जाइ जओ तेण तं पुज्जं ॥३२९३॥

ननु केवलं केवलज्ञानं कुलिङ्गेऽपि वर्त्तमानानामन्यतीर्थिकानां भवतीत्यागमे श्रूयते, तत्किमिति स्थानबुद्ध्या तत्पूज्यं नेष्यते ?। गुरुराह-तत्केवलज्ञानं भावलिङ्गतो भवति, न पुनस्ततः कुलिङ्गात्, तस्य केवलज्ञानानङ्गत्वात्। मुनिलिङ्गं पुनर्यस्मादङ्गजावं केवलज्ञानस्य कारणतां याति, तेन तस्मात्तत्पूज्यमिति ॥ ३२९३ ॥

(२०) तदेवं कोपप्रसादविरहाऽऽदीन् पञ्चापि परोपन्यस्तदृष्टान्तीकृत्योपसंहरन्नाह-

तेण मुहाऽऽलंबणओ, परिणामविसुद्धिमिच्छया निच्चं ।
कज्जा जिणाऽऽइपूया, जव्वाणं बोहणत्थं च ॥३२९४॥

येनैवं, तेन तस्मात्परिणामविशुद्धिमिच्छता कार्या विधेया जिनाऽऽदीनां नित्यमेव पूजा। कुतः ?, इत्याह-शुभाऽऽलम्बनतः शुभाऽऽलम्बनरूपत्वात्। न केवलं स्वपरिणामविशुद्धिनिमित्तं, भव्यजनावबोधनार्थं च विधेया जिनाऽऽदिपूजा। तद्दर्शने ह्यनेके भव्याः प्रतिबुध्यन्ते, जिनधर्ममासादयन्ति, समासादिते च स्थिरीभवन्ति। अत एव तत्करणकारणानुमोदनाऽऽदिप्रवृत्तसंवेगातिशयात्क्षपितकर्मणोऽन्तकृत्केवलिनो भूत्वाऽनन्तेन कालेनाऽनन्ताः सिद्धान्ते सिद्धाः श्रूयन्ते ॥ इति सप्ततिगाथार्थः ॥३२९४॥ तदेवमवसितः पञ्चनमस्कारः। विशे०। ल०। ध०। (" णमोऽत्थु णं अरिहंताणं भगवंताणं " इति शक्रस्तवः ' चेइयवंदण ' शब्दे तृतीयभागे १३१७ पृष्ठे, " णमो जिणाणं जियभयाणं " इति च तस्मिन्नेव शब्दे १३१८ पृष्ठे " सिद्धाणं बुद्धाणं " इत्यपि तस्मिन्नेव शब्दे १३१९ पृष्ठे सूत्रपाठक्रमेणोक्तः । व्याख्या चैषां प्रतिपदं तत्तत्स्थानेषु । " इक्को वि णमुक्कारो, जिणवरवसहस्स वद्धमाणस्स । संसारसागराओ, तारेइ नरं व नारिं व ॥ १ ॥ " इत्यपि " चेइयवंदण " शब्दे तृतीयभागे १३२० पृष्ठे उपपादितम् । " जो देवाण वि देवो " इत्यपि तत्रैव पृष्ठे निरूपितम्) " सर्वान् देवान्नमस्यन्ति, नैकं देवं समाश्रिताः । जितेन्द्रियं जितक्रोधाः, दुर्गाण्यतितरन्ति ते ॥ १ ॥ " द्वा० १२ द्वा०।

विषयसूची--

(१) नमस्कारस्य व्याख्यानार्थमुत्पत्ति-निक्षेप-पद-पदार्थ-प्ररूपणा-वस्त्वाक्षेप-प्रसिद्धि-क्रम-प्रयोजन-फलरूपाणां द्वाराणां संग्रहः ।
(२) नमस्कारोत्पत्तिद्वारविस्तरे ज्ञानशब्दयोर्नित्यत्वानित्यत्वविचारः ।
(३) निक्षेपद्वारे नाम-स्थापना-द्रव्य-भावभेदेन निक्षेपस्य चातुर्विध्यम् ।
(४) पदद्वारे नामिक-नैपातिकौपसर्गिकाऽऽख्यातिकमिश्रभेदेन पदस्य पञ्चविधत्वम् ।
(५) द्रव्यसंकोचो न भावसंकोचः, भावसंकोचो न द्रव्यसंकोचः, द्रव्यसंकोचो भावसंकोचश्च, न द्रव्यसंकोचो न भावसंकोच इति भङ्गचतुष्टयप्रतिपादनपुरस्सरं पदार्थद्वारम् ।
(६) प्ररूपणाद्वारे "किं कस्य केन कत्र कियच्चिरं कतिविधो वा नमस्कारः," "इन्द्रियकाययोगवेदकषायलेश्याऽऽहाराऽऽदिचरमान्तः," इत्यादिषट्प्रकारनवप्रकाराभ्यां प्ररूपणाया द्वैविध्यम् ।
(७) नमस्कारपाठस्य युक्तायुक्तत्वे विचार्यमाणे पञ्चपदस्य सर्वश्रुतस्कन्धाऽन्यतरभूतत्वं, नवपदस्य पृथक् श्रुतस्कन्धत्वमित्यत्र श्रीमहानिशीथसूत्रसंवादः।
(८) नमस्कारसूत्रसंपत्सप्तषष्टिवर्ण-नवपदविवेचनम् ।
(९) वस्तुद्वारे गुणगुणिनोर्भेदाभेदपक्षनिरूपणपुरस्सरमर्हत्सिद्धाऽऽचार्योपाध्यायसाधूनां नमस्काराऽर्हत्वे मार्गदेशकत्वाऽऽदिगुणनिरूपणानन्तरं संसाराटवीमार्गदेशकत्व-नवसमुद्धर्नियामकत्व-षड्विधजीवनिकायगोपनत्वं प्ररूप्याऽर्हदादीनां नमस्कारफलप्रदर्शनम् ।
(१०) आक्षेपद्वारे सिद्धसाधुभ्यामेव द्वाभ्यां नमस्कारः कथं न?, परिनिर्वृताऽर्हदादीनां सिद्धशब्देन, आचार्याऽऽदीनां संसारिणां साधुशब्देन ग्रहणात् । तथा-ऋषभाजितसंभवाऽऽदिभ्यो नामग्राहं तीर्थकरेभ्यः, सिद्धेभ्योऽपि एकद्वित्रिचतुष्पञ्चाऽऽदिसमयेभ्यो यावदनन्तसिद्धेभ्यस्तीर्थलिङ्गप्रत्येकबुद्धाऽऽदिविशेषणविशिष्टेभ्य इत्यनन्तभेदस्य नमस्कारस्य पञ्चविधत्वं न युज्यते इति पञ्चविधनमस्काराऽऽक्षेपः ।
(११) प्रसिद्धिद्वारे तदाक्षेपस्य प्रतिविधानम् ।
(१२) क्रमद्वारेऽर्हदादीनां नमस्कारे पौर्वापर्यक्रमव्युत्क्रमाऽऽक्षेपप्रतिविधानविस्तरः ।
(१३) प्रयोजनफलद्वारयोरैहलौकिकपारलौकिकफलप्रदर्शनम् ।
(१४) द्विविधेऽपि फले दृष्टान्तपञ्चकप्रदर्शनम् ।
(१५) अर्हतां पूजाफलदत्वं किमस्ति,न वेति विचारविस्तरः।
(१६) जिनाऽऽदिपूजार्थं सोपपत्तिकप्रमाणोपन्यासः ।
(१७) "हिनस्मि हरिणाऽऽदीन्, मृषा जल्पेऽहं, तद्भाषणाऽन्च वञ्चयामि देवदत्ताऽऽदीन्, धनमपहरामि तेषामेव, परदारान् निषेवेऽहम्" इत्यादिचिन्तया न हि तेषां चिन्तितानां तत्कालं कोपाऽऽदिसंभूतिः, तथापि हिंसाऽऽदिचिन्तकस्याधर्मः, दयाऽऽदिसंकल्पतस्तु तद्वतो धर्मः, तथेहापि तीर्थकरसिद्धाऽऽदीन् शपमानस्याधर्मः, संस्तुवतस्तु धर्म इत्यर्हदादिभ्यः फलप्राप्तिसमर्थनम् ।
(१८) सरागद्वेषत्वात् कृतार्थोज्झनाच्चाऽऽचार्योपाध्यायसाधवो वन्दनीया न वेत्याक्षेपपरिहारौ ।
(१९) साध्वादीनां दानमुपकारं यथा करोति नैवं जिनाऽऽदीनां नमस्कारपूजा, तत्कथमसौ धर्मनिमित्तेतिशङ्कानिरासाय युक्तिप्ररूपणम् ।
(२०) परिणामविशुद्धिमिच्छता जिनाऽऽदीनां नित्यमेव पूजा विधेयेत्युपसंहारः ।

णमोक्काराणिज्जुत्ति–नमस्कारनिर्युक्ति–स्त्री० । नमस्कारप्रतिपादकाऽऽवश्यकनिर्युक्तिगाथाकदम्बे, आ० क० ।

णमोक्कारसहियपच्चक्खाण–नमस्कारसहितप्रत्याख्यान–न० । अद्धाप्रत्याख्यानभेदे, (ध०)

साम्प्रतं सूत्रार्थौ-

उग्गए सूरे नमुक्कारसहियं पच्चक्खाइ, चउव्विहं पि आहारं–असणं पाणं खाइमं साइमं, अन्नत्थऽणाभोगेणं सहसागारेणं वोसिरइ ।

उद्गते सूर्ये, सूर्योद्गमादारभ्येत्यर्थः । नमस्कारेण परमेष्ठिस्तवेन सहितं युक्तं नमस्कारसहितं, प्रत्याख्याति " सर्वे धातवः करोत्यर्थेन व्याप्ताः " इति न्यायाद् नमस्कारसहितं प्रत्याख्यानं करोति, विधेयतयाऽभ्युपगच्छतीत्यर्थः । इदं गुरोरनुवादभङ्गया वचनम । शिष्यस्तु 'प्रत्याख्यामि' इत्याह । एवं व्युत्सृजतीत्यत्रापि वाच्यम । कथं प्रत्याख्याति ?, इत्याह–चतुर्विधमप्याहारमिति न पुनरेकविधाऽऽदिकम, आहारमभ्यवहार्यं, व्युत्सृजतीत्युत्तरेण योगः । इदं चतुर्विधाऽऽहारस्यैव भवतीत्युक्तमेव, रात्रिभोजनतीरणप्रायत्वादस्य, तथा मुहूर्तमानं नमस्कारोच्चारणावसानं च । ननु कालस्यानुक्तत्वात्सङ्केतप्रत्याख्यानमेवेदम् । मैवम । सहितशब्देन मुहूर्तस्य विशेषणात् । अथ मुहूर्तशब्दो न श्रूयते तत्कथं तस्य विशेष्यत्वम् ?। उच्यते–अद्धाप्रत्याख्यानमध्येऽस्य पाठबलात्,पौरुषीप्रत्याख्यानस्य च वक्ष्यमाणत्वादवश्यं तदर्वाग्मुहूर्त एवावशिष्यते । अथ मुहूर्तत्रयाऽऽदिकमपि कुतो न लभ्यते?। उच्यते-अल्पाऽऽकारत्वादस्य, पौरुष्यां हि षडाकाराः, तदस्मिन् प्रत्याख्याने आकारत्रयवति स्वल्प एव कालोऽवशिष्यते, स च नमस्कारेण सहितः, पूर्णेऽपि काले नमस्कारपाठमन्तरेण प्रत्याख्यानस्याऽऽपूर्यमाणत्वात्, सत्यपि नमस्कारपाठे मुहूर्ताभ्यन्तरे प्रत्याख्यानभङ्गात् । तस्सिद्धमेतत्-मुहूर्तमानकालं नमस्कारसहितप्रत्याख्यानमिति । अथ चतुर्विधाऽऽहारमेव व्यक्त्या प्रदर्शयति–अशनम १,पानम २, खादिम ३, स्वादिमं चेति ४। तत्राश्यते इति अशनम, 'अश भोजने' इत्यस्य ल्युमन्तस्य प्रवति । तथा-पीयत इति पानम, 'पा' धातोः । तथा-खाद्यत इति खादिमम, 'खाद भक्षणे' इत्यस्य वक्तव्यादिमत्प्रत्ययान्तस्य । एवं स्वाद्यत इति स्वादिम, 'स्वद आस्वादने' इत्यस्य च रूपम । अथवा-खाद्यं स्वाद्यं चेति । अशनाऽऽद्याहारविभागश्चैवं श्राद्धविधिवृत्तौ-"अशनं-शाल्यादि सक्त्वादि पेयाऽऽदि मोदकाऽऽदि क्षीराऽऽदि सूरणाऽऽदि मण्डकाऽऽदि च ।

यदाह-

" असणं ओअणसत्तुग-मुग्गजगारासऽइ खज्जगविहीं अ ।
खीरासऽइ सूरणासऽई, मंडगपलिई अ विसेयं ॥ १ ॥ "

पानं-सौवीरयवाऽऽदिधावनं सुराऽऽदि सर्वमाप्कायः कर्कटजलाऽऽदिकं च ।

यदाह-

" पाणं सोवीरजवो-दगासऽइ चित्तं सुरासऽइअं चेव ।
आउक्काओ सव्वो, कक्कडगजलासऽइअं च तहा ॥ २ ॥ "

खाद्यं—गृष्टधान्यगुमपर्पटिकाखर्जूरनालिकेरदाक्षाकर्कटचाम्रपनसाऽऽदि ।

यदाह-

" भत्तोसं दंताऽऽई, खज्जूरगनालिकेरदक्खाऽऽई ।
कक्कमिअंबगफणसाऽऽइ बहुविहं खाइमं नेअं ॥ ३ ॥ "

खाद्यं-दन्तकाष्ठताम्बूलतुलसिकापिण्डार्जकमधुपिप्पल्यादि ।

यदाह-

" दंतवणं तंबोलं, चित्तं तुलसी कुद्देरुगाऽऽईअं ।
महुपिप्पलिसुंठाऽऽई, अणेगहा साइमं होइ ॥ ४ ॥ "

(अणेगहेति) सुण्ठी-हरीतकी-पिप्पली-मरीच-जीरक-अजमकजातिफल-जावत्री-कसेरुक-कत्थक-खदिरवटिका-ज्येष्ठीमधुतमालपत्र-एला-लवङ्ग-काकोलिमङ्ग-विमलवण-अजक-अजमोदकुलिञ्जण-पिप्पलीमूल-चिणीकबाबा-कब्बूरक-मुस्ता-कणटाचेलिओ-कर्पूर-सौवर्चल-हरडा-बिभीतक-कुम्भठो-बब्बूल-धव-खदिरखीरमाऽऽदिकच्छूलीपत्र-पूग-हिङ्गुलाष्टक-हिङ्गुत्रेवीसु-पञ्चकूलजवासकमूल-बाबची-तुलसी-कर्पूरीकन्दाऽऽदिकम् । जीरकं स्वभाष्यप्रवचनसारोद्धाराभिप्रायेण स्वाद्यम्, कल्पवृत्त्यभिप्रायेण तु खाद्यम्, अजमकं खाद्यमिति केचित् । सर्वं स्वाद्यम् पलाकपूराऽऽदिजलं च द्विविधाऽऽहारप्रत्याख्याने कल्पते । वेसण-विरहाली-सोआ-कोत्तमी-आमला-गण्ठी-आंबागोली-कचिली-चूइपत्रप्रमुखं खाद्यत्वाद् द्विधाऽऽहारे न कल्पते । त्रिविधाऽऽहारे तु जलमेव कल्पते । शाल्येषु मधुगुडशर्कराखण्डाऽऽद्यपि खाद्यतया दाक्षाशर्कराऽऽदिजलं तक्राऽऽदि च बालकतयोक्तमपि द्विविधाऽऽहाराऽऽदौ न कल्पते । उक्तं च-"दक्खापाणाऽऽईअं, पाणं तह साइमं गुमाऽऽईअं । पढिअं सुअम्मि तह वि हु, तित्तीजणगंति नाऽऽयरिअं " ॥१॥ अनाहारतया व्यवहियमाणान्यपि प्रसङ्गतो दर्श्यन्ते । यथा—पञ्चाङ्गनिम्ब-गुडूची-कमूकिरि-आतुं-अतिविस-चीमि-सूकडि-रक्ता-हरिद्रा-रोहिणी-उपलोट-वज्र-त्रिफला-बालछल्लीत्यन्ये धमासो-नाहिआ-सन्धिरोङ्गणी-एलीओ-हरमीदल-वउणि-बदरी-कंथेरिकरीरमूल-पुंआम-मजीठ-बोब्बीउ-कुंआरि-चित्रक-कुन्दरुप्रभृत्यनिष्टाऽऽस्वादानि रोगाऽऽद्यापदि चतुर्विधाहारेऽप्येतानि कल्प्यानीति कृतं प्रसङ्गेन । अत्र निरवशेषत्यागाकारावाह-(अन्नत्थणाभोगेणं सहसागारेणं) अत्र पञ्चम्यर्थे तृतीया, अन्यत्रेति परिवर्जनार्थः, यथा-' अन्यत्र द्रोणभीष्माभ्यां, सर्वे योद्धाः पराङ्मुखाः ।' इति । ततोऽन्यत्रानाभोगात् सहसाकाराच्च, एतौ वर्जयित्वेत्यर्थः । तत्रानाभोगोऽत्यन्तविस्मृतिः, सहसाकारोऽतिप्रवृत्तयोगानिवर्त्तनमिति । ध० २ अधि० । पं० व० । आव० । प्रव० । ल० ।

पण्डितआनन्दसागरगणिकृतप्रश्नो यथा-

नमस्कारसहितप्रत्याख्यानं रात्रिप्रत्याख्यानमध्ये, पृथग् वा ?। तेन प्रत्याख्यानेन श्राद्धः पौरुषीं यावत्स्यितस्तस्य पौरुष्या लाभो द्विघटिकसत्को वा ? इति प्रश्ने, उत्तरम्-नमस्कारसहितप्रत्याख्यानं दिनमध्ये आयाति, न तु रात्रिमध्ये, तथा-तत्प्रत्याख्यानं निधाय पौरुषीं यावदनुपयोगेन स्थीयते तदा न लाभाय, उपरं गपूर्वं तु ज्ञायतेति । २ प्र० हो० ३ उल्ला० ।

णमोरिह-नमोऽर्ह-पुं० । जिने, आ० म० ।

पालेंति महा गावो, गोवा अहिसावयाऽऽइदुग्गेहिं ।
पउरतणपाणियाणि य, वणाणि पावेंति तह चेव ॥
जीवनिकाया गावो, जं ते पालेंति ते महागोवा ।
मरणाऽऽइन्नयाहि जिणा, निव्वाणवरं च पावेंति ॥
ते उवगारित्तणतो, नमोऽरिहा जत्तियजीवलोगस्स ।
सव्वस्सेह जिणिंदा, लोगुत्तमभावतो तह य ॥

यथा गोपाः गाः पालयन्ति रक्षन्ति अहिश्वापदाऽऽदिदुर्गेभ्यः, वनानि च, प्रचुरतृणपानीयानि प्रापयन्ति, तथैव च जीवनिकाया एव गावः जीवनिकायगावः, तान् ते भगवन्तोऽर्हन्तो जिना महागोपाः, पालयन्ति रक्षन्ति मरणाऽऽदिभ्यो, निर्वाणवरं च प्रापयन्ति । एवं ते जिनेन्द्रा इह अस्मिन् जीवलोके उपकारित्वतो हेतोः सर्वस्य भव्यजीवलोकस्य नमोऽर्हाः ।

एवं तदुक्तेन प्रकारेण नमोऽर्हत्वहेतवो गुणाः प्रतिपादितः । साम्प्रतं प्रकारान्तरेण नमोऽर्हत्वहेतुगुणाऽभिधित्सयाऽऽह-

रागदोसकसाए, इंदियाणि य पंच वि ।
परीसहे उवसग्गे, नामयंता नमोरिहा ॥

रागद्वेषकषायानिन्द्रियाणि च पञ्चापि परीषहानुपसर्गान् नमयन्तो नमोऽर्हाः इति गाथासमासार्थः । आ०म०१ अ०२खण्ड० ।

णम्मया-नर्मदा-स्त्री० । औचित्येन नमनशीलतायाम्, द्वा० १५ द्वा० ।

नर्मदा-स्त्री० । रेवापर्याये अमरकण्टकोद्भवस्य पश्चिमसमुद्रं प्रविष्टे नदीभेदे, " दिवा काकरवाद् भीता, रात्रौ तरति नर्मदाम् । " आव० २ अ० ।

णय-नत-त्रि० । प्रह्वीभूते, सूत्र० १ श्रु० २ अ० २ उ० । ज्ञा० । आचा० ।

नय-पुं० । नयत्यनेकांशाऽऽत्मकं वस्त्वेकांशावलम्बनेन प्रतीतिपथमारोपयतीति, नीयते वा अनेन तस्मिन् ततो वा नयनं नयः । उत्त० १ अ० । पं० चू० । नीयते परिच्छिद्यतेऽनेनास्मादिति वा नयः । अनन्तधर्माऽऽत्मकस्य वस्तुन एकांशपरिच्छित्तौ, अनु० । स्था० । आ० म० । अनन्तधर्माऽऽत्मकस्य वस्तुनो नियतैकधर्माऽऽत्मकावलम्बनेन प्रतीतौ प्रापणे, उत्त० १ अ० । "नयतीति नया वस्तुतत्त्वं प्रबोधमोयरं पावयंति त्ति" । अन्ये भणन्ति-नयन्तीति नयाः कारकाः, व्यञ्जकाः, प्रकाशका इत्यर्थः । आ० चू० १ उ० । नि० चू० । विशे० ।

विषयसूची-

(१) नयनिरुक्तिः ।
(२) नयलक्षणनिरूपणपुरस्सरं नयतत्त्वप्ररूपणम् ।
(३) नयस्वरूपोपपत्तिः ।
(४) वस्तूनामनन्तधर्माऽऽत्मकत्वनिरूपणम् ।
(५) नय इति यदुच्यते, यावद्भागश्चायं, तन्निरूपणम् ।
(६) नयार्था आपेक्षिकाः ।
(७) अपेक्षाऽऽत्मकं वाक्यं नयः ।

(८) सामान्यविशेषविचारः ।
(९) सप्तभङ्ग्यां नयविज्ञागोपदर्शनम् ।
(१०) एकत्रानेकाऽऽकारा प्रमाणधीः ।
(११) नयानां प्रमाणाप्रमाणत्वनिर्णयः ।
(१२) संमत्यादौ यदभिनिविष्टैरनयखण्डनं तत्साधनंनिमित्तं बौद्धाऽऽदिनयपरिग्रहा अपि शुरूपर्यायाऽऽदिवस्तुप्राप्त्या फलतो न मिथ्यारूपा इत्यादिनिरूपणम् ।
(१३) नयविभागे द्रव्यपर्यायार्थिकतया नयस्य संक्षेपतो द्वैविध्यम् ।
(१४) संग्रहविशेषौ द्रव्यपर्यायौ सामान्यविशेषशब्दवाच्यावित्यत्र विचारः ।
(१५) द्रव्यार्थिकपर्यायार्थिकनययोर्नैगमाऽऽदिनयानामन्तर्भावः ।
(१६) सप्तसु नैगमाऽऽदिषु मूलनयेषु विचारे नैगमाऽऽदीनां मतसंग्रहः ।
(१७) सिद्धसेनदिवाकरमते षट् नयाः, नैगमस्य संग्रहव्यवहारयोरन्तर्भावात् ।
(१८) प्रस्थकवसतिप्रदेशदृष्टान्तेन नयप्रमाणपरामर्शः ।
(१९) तत्र प्रस्थकदृष्टान्तः ।
(२०) वसतिदृष्टान्तः ।
(२१) प्रदेशदृष्टान्तः ।
(२२) सर्वे नयाः स्वस्वस्थाने शुद्धाः ।
(२३) ७०० सप्त शतानि नयाः ।
(२४) असंख्याता नया इति मतान्तरनिरूपणम् ।
(२५) निक्षेपनययोजना ।
(२६) द्रव्यार्थिकपर्यायार्थिकनययोर्मिथो विचारः ।
(२७) तौ सव्यपेक्षौ प्रमाणम् ।
(२८) यद् दर्शनं यस्मान्नयाद् जातं सामान्यतस्तन्निरूपणम् ।
(२९) निश्चयव्यवहारयोः सर्वनयान्तर्भावः ।
(३०) दिगम्बरमते नयाः ।
(३१) व्यवहारनयात् साङ्ख्यं प्रवृत्तम् ।
(३२) वेदान्तिसाङ्ख्यदर्शनयोः शुद्धाशुद्धत्वम् ।
(३३) नैगमस्य संग्रहव्यवहारयोरन्तर्भावः ।
(३४) ये शब्दनया ये चार्थनयास्तेषां निरूपणम् ।
(३५) नयोत्पादितेष्वपरिमितेषु दर्शनेषु यस्य मिथ्यात्वं, यस्य च सम्यक्त्वं तन्निरूपणम् ।
(३६) नयफलविमर्शः ।
(३७) ज्ञानक्रियानयद्वारे संग्रहाऽऽदीनां समवतारो भवतीति तत्स्वरूपनिरूपणम् ।
(३८) नयानां पार्थक्ये यैः समवतारः, यत्र वाऽनवतारस्तन्निरूपणम् ।
(३९) आलोचनाऽऽद्यष्टनयानां निरूपणम् ।

(१) अथ नयनिरुक्तिमाह-

स नयइ तेण तहिं वा,तओऽहवा वत्थुणो व जं नयणं ।
बहुहा पज्जायाणं, संभवओ सो नओ नाम ॥ ९१४ ॥

स एव वक्ता संभवद्भिः पर्यायैर्वस्तु नयति गमयतीति नयः । अथवा-नीयते परिच्छिद्यते अनेन, अस्मिन्, अस्माद् वेति नयः; अनन्तधर्माध्यासिते वस्तुन्येकांशग्राहको बोध इत्यर्थः । यदि वा-बहुधा वस्तुनः पर्यायाणां संभवाद्विवक्षितपर्यायेण वचनमधिगमनं परिच्छेदनमसौ नयो नाम ॥ ९१४ ॥ विशे० । इह हि जिनप्रवचने सर्वे वस्त्वनन्तधर्माऽऽत्मकतया संकीर्णस्वभावमिति तत्परिच्छेदकेन प्रमाणेनाऽपि तथैव भवितव्यमित्यसंकीर्णप्रतिनियतधर्मप्रकारकव्यवहारसिद्धये नयानामेव सामर्थ्यम् । नयो० ।

(२) नयतत्त्वं प्ररूपयन्ति-

नीयते येन श्रुताऽऽख्यप्रमाणविषयीकृतस्यार्थस्यांशस्तदितरांशौदासीन्यतः स प्रतिपत्तुरभिप्रायविशेषो नयः ॥ १ ॥

अत्रैकवचनमतन्त्रम्, तेनांशावंशा वा, येन परामर्शविशेषेण श्रुतप्रमाणप्रतिपन्नवस्तुनो विषयीक्रियन्ते तदितरांशौदासीन्यापेक्षया स नयोऽभिधीयते । तदितरांशप्रतिक्षेपे तु तदाभासता भणिष्यते ('णयाभास' शब्दे) ।

प्रत्यपादयाम च स्तुतिद्वात्रिंशति-

" अहो ! चित्रं चित्रं तव चरितमेतन्मुनिपते !,
स्वकीयानामेषां विविधविषयव्यापिधिषणानाम् ।
विपक्षापेक्षाणां कथयसि नयनां सुनयतां,
विपक्षक्षेप्तृणां पुनरिह विभो ! दुष्टनयताम् ॥१॥ "

पञ्चाशति च-

" निःशेषांशजुषां प्रमाणविषयीभूयं समासेदुषां,
वस्तूनां नियतांशकल्पनपराः सप्त श्रुताऽऽसङ्गिनः ।
औदासीन्यपरायणास्तदपरे चांशे भवेयुर्नया-
श्चेदेकान्तकलङ्कपङ्ककलुषास्ते स्युस्तदा दुर्नयाः ॥ १ ॥ "

रत्ना० ७ परि० ।

(३) नयलक्षणे नयस्वरूपोपपत्तिमाह-

सत्त्वाऽसत्त्वाऽऽद्युपेतार्थे-ष्वपेक्षावचनं नयः ।
न विवेचयितुं शक्यं, विनाऽपेक्षां हि मिश्रितम् ॥ २ ॥

(सत्त्वाऽसत्त्वेति) सत्त्वाऽसत्त्वाऽऽदयो ये धर्माः, आदिना नित्याऽनित्यत्वभेदाऽभेदाऽऽदिरिति परिग्रहः । तैरुपेतास्तदात्मका येऽर्थाः जीवपुद्गलाऽऽदयः, तेष्वपेक्षावचनं प्रतिनियतधर्मप्रकारकापेक्षाऽऽख्यशब्दबोधजनकं वचनम्, नयवाक्यमित्यर्थः । इदं वचनरूपस्य नयस्य लक्षणं, ज्ञानरूपस्य तु नयस्य-अपेक्षाऽऽत्मकशब्दबोधत्वमेवेति द्रष्टव्यम् । अपेक्षात्वं च क्षयोपशमजन्यताऽवच्छेदको जातिविशेषो, विषयतविशेषो वेत्यन्यदेतत् ॥

ननु घटोऽस्तीत्यादिवाक्यश्रवणाद् घटविषयकं शाब्दज्ञानं मम जातमित्येव लोकाः प्रतियन्ति;न तु तत्रापेक्षात्वमपीत्यपेक्षाऽऽत्मकनयज्ञानत्वे किं प्रमाणम्?; अत आह-हि निश्चितं,मिश्रितं विरुद्धत्वेन प्रतीयमानैर्नानाधर्मैः करम्बितं वस्तु, अपेक्षां विना विवेचयितुं विवक्षितैकधर्मप्रकारकनिक्षेपविषयीकर्तुं,न शक्यम्; तद्विरुद्धधर्मवत्त्वाज्ज्ञानस्यानपेक्षाऽऽत्मकस्य[स्या]नुपपत्तेर्बोधप्रतिबद्धताऽवच्छेदककोटौ लाघवेनाऽनपेक्षाऽऽत्मकत्वस्यैव निवेशात्,अव्याप्यवृत्तित्वज्ञानकालीनाऽऽहार्यदोषविशेषजन्याऽऽदीनामपेक्षाऽऽत्मकत्वेनैव तत्प्रकारकविशेषणानुपादानात् । तथा च तत्कर्मप्रतिपक्षधर्मवत्तया ज्ञातेऽपि तत्कर्मवत्तया ज्ञायमानस्य[ऽऽहार्यदोषविशेषजन्या]ऽऽदीनामपेक्षाऽऽत्मकतयाऽन्यथाऽनुपपत्तिरेवापेक्षात्वे मानम्,तस्या एव सर्वतो बलवत्प्रमाणत्वात् । तदाह श्रीहर्षः-"अन्यथाऽनुपपत्तिश्चेद्-स्तु वस्तुप्रसाधिका*।पिनष्टधर्मदृष्टत्वैमत्यं,यतः सर्ववबाधिका"।१। इति।न चाऽपेक्षां विना लौकिकोऽपि व्यवहारः संगच्छते,अप्राऽऽप्यवच्छेदेन कापिसंयोगाज्ञावति

* "दस्त्वपेक्षाप्रसाधिकेति पाठः स्यात् ।

वृक्षे शाखाऽऽपेक्षयैव कपिसंयोगवत्त्वव्यवहारात्। न चाऽवच्छेदकावगाह्येवायं[व्यवहारो]न त्वपेक्षाऽऽत्मक इति वाच्यम्,शाखाऽवच्छिन्नो वृक्षः कपिसंयोगवान्,न तु संपूर्ण इति प्रत्ययस्य स्कन्धदेशापेक्षां विनाऽनुपपत्तेः । कथं चैवं सामान्यविशेषापेक्षां विना "घटपटयोः रूपं,घटपटयोर्न रूपम्"इत्यादयो विचित्रनयापेक्षाप्रत्ययाः समर्थनीयाः संग्रहनयाऽऽश्रयणेनैव हि घटपटोभयरूपसामान्योद्भूत [न] त्वविवक्षया घटपटयो रूपमिति प्रत्ययस्योपपत्तेः,द्वयोर्भेदविवक्षायां प्रत्येकाऽन्वयस्य धर्मद्वयावच्छिन्नबाधकपदोपादानस्थल एव व्युत्पन्नत्वात् । व्यवहाराऽऽश्रयणात्तु प्रकृतप्रयोगोऽनुपपन्न एव,मिलितवृत्तित्वान्वय एव तस्य साकाङ्क्षत्वाद् घटपटयोर्न रूपमिति बोधस्यैव तस्मादुत्पत्तेः । यत्तु घटपटयोर्न रूपमिति वाक्यं तात्पर्यभेदेन योग्यायोग्यं-घटपटयोः रूपत्वावच्छिन्नाभावान्वयतात्पर्येऽयोग्यमेव, रूपत्वावच्छेदेन घटपटोभयवृत्तित्वाज्ञाभावान्वयतात्पर्ये च योग्यमेव; घटपटयो रूपमित्यादौ च घटपटोभयवृत्तित्वस्यापि रूपत्वाऽऽदिसामानाधिकरण्येन अन्वयबोध एव साकाङ्क्षत्वाद् न तयोर्घटरूपमित्यपि स्यादिति कैश्चित्कल्प्यते । तदसत् । प्रतिवस्तुन्याकाङ्क्षवैचित्र्यस्यापेक्षाबोधाऽऽत्मकफलवैचित्र्यार्थमेवाऽऽश्रयणात्, उभयरूपसामान्यस्य प्रत्येकरूपविशेषात्कथञ्चिद्भेदानभ्युपगमे त्वदुक्तान्वयव्युत्पत्तिग्रहाद् घटपटयोर्घटरूपमिति जायमानस्य बोधस्य प्रामाण्याऽऽपत्तेश्च; अस्माकं तु स्यादर्थानुप्रवेशस्यैवातिप्रसङ्गभञ्जकत्वान्न दोषः । किञ्चैवम्-द्वयोर्गुरुत्वं न गन्तव्य इत्यादौ का गतिः ?,गुरुत्वसामानाधिकरण्येनैव गन्तव्यत्वसामानाधिकरण्येनाऽपि पृथिवीजलोभयत्वा [ऽऽश्रयवृत्तित्वा]त् विधिनिषेधविषयार्थानिरुक्तेः । अत्र सप्तम्याः स्वार्थान्वयिताऽवच्छेदकस्वरूपत्वादुभयाख्याऽतिरिक्तैवाऽऽधेयताऽर्थः (?)। तत्र च प्रकृत्यर्थस्य तन्निष्ठनिरूपितत्वविशेषणान्वयात्पृथिवीजलोभयविशिष्टाऽऽधेयतात्वेन गुरुत्वं विधेयतया, गन्तव्यत्वं निषेध्यतया प्रतीयते, इत्युक्तौ च नामान्तरेण गुरुत्वसामान्यस्यैव विधेयत्वं, गन्तव्यसामान्यस्यैव च निषेध्यत्वमायुष्मतामतिरिक्ताऽऽधारतायां अनिरूपणात्। अन्यथा घटपटयोर्न घटरूपमित्यादौ जातिघटयोर्न सन्नित्यादाविव घटपटोभयनिरूपितत्वाभाववदाधेयतावद् घटरूपमित्यन्वयोपपादनेऽपि घटपटरूपे इत्यस्योपपादयितुमशक्यत्वाद् घटरूपत्वाऽऽदिस्वरूपाया आधेयतायाः उभयानिरूपितत्वात्। तत्र द्वित्वाऽऽदिस्वरूपैवाऽऽधेयतेति चेद्, द्वयोः प्रत्येकरूपावच्छेदेन द्वित्वाभावान्निषेधस्याऽपि प्रवृत्तिः स्यात्। अनुयोगिताऽवच्छेदकावच्छेदेनैव सप्तम्यर्थाऽऽधेयत्वान्वयव्युत्पत्तेर्नाऽयं दोष इति चेत्,तथाऽपि घटरूपाऽऽकाशो इत्यादिकं कथम् ?, एतद्बुद्धित्वाऽऽदिस्वरूपाया आधेयतायाः उभयानिरूपितत्वात्, तत्र तात्पर्यवशाद् द्वित्वान्वयेऽप्युभयस्यानाधेयत्वाभावात्; तस्मान्नयापेक्षाज्ञानेनाऽत्र विचित्र एव बोधः स्वीकार्यः ॥ २ ॥

(४) नन्वनन्तधर्ममिश्रितं वस्तु कथं विवेचयितुमशक्यम् ?, अनन्तानामपि धर्माणां धर्मि[र्म्य] भिन्नत्वेन धर्मिग्राहकप्रत्याङ्काऽऽदेरेव तद्विवेकरूपत्वात्, सति च तद्विवेके किमपेक्षाऽऽश्रयणेन ?, इत्याशङ्क्याऽऽह-

यद्यप्यनन्तधर्माऽऽत्मा, वस्तु प्रत्यक्षगोचरः ।
तथाऽपि स्पष्टबोधः स्यात्, सापेक्षो दीर्घताऽऽदिवत् ॥३॥

यद्यपि वस्तु घटपटाऽऽदिकम् अनन्तधर्माऽऽत्मकं सत् प्रत्यक्षगोचरः प्रत्यक्षाऽऽदिप्रमाणविषय एकस्मिन् घटाऽऽदौ गृह्यमाणे गृह्यमाणधर्मोपरागेण ऊर्ध्वार्थातिदेशेनातीतानागतवर्तमानानां सदृवृत्तिधर्माणां यावतामेव ग्रहात् परेषां सामान्यलक्षणप्रत्यासत्तिस्था अभिषिक्तस्य घटविषयकतिर्यक्सामान्योपयोगस्य घटताया व्यापकविषयताकप्रत्यक्षत्वं तादृशज्ञानत्वं वा यथा कार्यताऽवच्छेदकत्वं तथा तद्विषयकोर्द्धतासामान्यस्य तादात्म्यसंबन्धेनाऽऽधेयत्वसंबन्धेन वा घटव्यापकविषयताकप्रत्यक्षत्वस्य तादृशज्ञानत्वस्य वा कार्यताऽवच्छेदकताया न्यायसिद्धत्वात् । अत एव-" जे एगं जाणइ, से सव्वं जाणइ " इति पारमर्षवचनानुरोधोऽपि, एकवस्तुग्रहे तद्गतस्वपरपर्यायकुक्षिप्रवेशेन सर्वेषां ग्रहादनुवृत्तिव्यावृत्तिसंबन्धपर्यालोचने तावत्प्रमाणस्यैव वस्तुनोऽनुभवात्। तदाह महावादी सम्मतौ- " एगदवियम्मि जे अ-त्थपज्जवा वयणपज्जवा वा वि । तीयाणागयभूआ, तावइयं तं हवइ दव्वं ॥ ३१ ॥ " (सम्म० १ काण्ड) इति । नन्वेवं सर्वस्य सार्वज्ञाऽऽपत्तिरिति चेत् । न। ऊर्ध्वार्थे इष्टत्वात्; उक्तभगवद्वचनरुच्यनुवेधेन सम्यक्संपन्नत्वानतिप्रसङ्गाद् यद्यप्येवं, तथापि स्पष्टबोधः सत्त्वासत्त्वाऽऽदिप्रतिनियतधर्मप्रकारको बोधः, सदसदाद्याकारको वा बोधः सापेक्षः शाब्दस्थले नयापेक्षया जनितः, प्रत्यक्षस्थले चावश्यवच्छेदकाऽऽदिज्ञानापेक्षः स्यात्। किंवत् ?,दीर्घताऽऽदिवत्-आदीयतेऽनेनेत्यादि ज्ञानं, दीर्घताप्रत्यक्षवदित्यर्थः । यथा हि दण्डाऽऽदिज्ञानकाले तत्परिमाणग्रहेऽप्ययमस्माद्दीर्घ इति दीर्घत्वप्रकारकं ज्ञानं नियतावश्यापेक्षयैव, तथा सदसदाद्यात्मकवस्तुग्रहेऽपि सत्त्वाऽऽदिप्रकारकं ज्ञानं स्वद्रव्याऽऽद्यपेक्षयैवेत्यर्थः; अयमेव तदपेक्षया दीर्घ इतिवत् स्वद्रव्याऽऽद्यपेक्षया सन् परद्रव्याऽऽद्यपेक्षयाऽसन्नित्येव व्यवहारात् । नन्वेवं व्यवहार एव सापेक्षो,न तु बोध इति चेत्। न । व्यवहर्तव्यकाले सति सत्यां चेच्छायां व्यवहारेऽपि तदपेक्षणात् । अन्यथाऽभावज्ञानेऽपि प्रतियोग्यपेक्षा न स्यात्,तदव्यवहार एव सप्रतियोगिकत्वस्थितेः। अथ दीर्घो दण्ड इति ज्ञानं चक्षुःसन्निकर्षमात्राज्जायत एवामुकापेक्षया दीर्घ इति दीर्घत्वावान्तरजात्यवगाहिज्ञान एव चावधिज्ञानापेक्षेति चेत्। न। ह्रस्वत्वेन ज्ञाने दीर्घत्वेन ज्ञानस्यैवापेक्षां विनाऽनुपपत्तेः । तद्वदिहापि परद्रव्याऽऽदिनाऽसत्त्वेन स्वद्रव्याऽऽद्यपेक्षयैव सत्त्वज्ञानमिति प्रतिपत्तव्यम्। अवच्छेदकानवगाहिनस्तु अनवधारणरूपत्वादेवानुपयोगः, द्विहस्ताऽऽदिमात्रेऽनुवृत्तैकहस्तावच्छेदेन महत्त्वग्रहस्तु देशापेक्षयैवेति तस्य निरपेक्षत्वम् । अत एवाऽऽवरणापगमे स्कन्धापेक्षया परिणामे द्विहस्तत्वग्रहेऽपि तावदवच्छेदेन ह्रस्वत्वग्रहस्य नाप्रामाण्यं, देशस्कन्धभेदेनोभयोपपत्तेः। एतेन द्वयोऽवयवावच्छेदेन चक्षुःसंयोगाभावान्नार्द्धनिखातवंशाऽऽदेर्द्विहस्ताऽऽदेः परिमाणग्रह इति प्राच्यनैयायिकानां प्रलापो निरस्तः । यावति भागे नाऽऽवरणं तावति भागे परिमाणवत इव परिमाणस्य ग्रहादेव स्कन्धपर्याप्तपरिमाणग्रहे तत्पर्याप्त्यवच्छेदकयावदवयवावच्छेदेनाऽऽवरणाभावलक्षणयोग्यतायाः एव हेतुत्वे दोषाभावात्। किञ्च-भूयोऽवयवावच्छेदेनेत्यस्य कोऽर्थः ?, यावदवयवसन्निकर्षस्य तावत्यसंभवात्, अनेकतत्तद्योगस्य चातिप्रसक्तत्वाद् भूयोऽवयवावच्छिन्नत्वोपलक्षितोऽऽधारताविशेषस्य च देशस्कन्धापेक्षावैचित्र्यमुखनिरीक्षकत्वादिति न किञ्चिदेतत् । यत्तु विषयतासंबन्धेन परिमाणसाक्षात्कारित्वावच्छिन्नं प्रति स्वाश्रयसमवेतत्वसंबन्धेन तत्तदावरकसंयोगत्वेन प्रतिबन्धकत्वाद् ना-

र्द्धनिखातवंशाऽऽदिपरिमाणग्रहः। यद्वा-अर्द्धनिखातवंशाऽऽदेर्महत्त्वाऽऽदिकं गृह्यत एव, महानयं वंश इति प्रतीतेः। तदवान्तरवैजात्यं तु नानुभूयत इति तत्तद्वैजात्यग्रहं प्रत्यावरकसंयोगस्य विरोधिता। न च निखाताऽनिखातसदृशवंशबोधः सन्निकर्षकतायां तन्महत्त्वाऽऽदिवृत्तिवैलक्षण्यानुभवाद् वैजात्यप्रत्यक्षं [प्रत्यक्षं] प्रत्यावरकसंयोगानां प्रतिबन्धकत्वासंभव इति वाच्यम्; तादृशवैलक्षण्यप्रकारकं प्रत्यक्षं प्रत्येव तेषां विरोधित्वात्। विशेष्यत्वं प्रतिबध्यताऽवच्छेदकः संबन्धः, स्वाश्रयमेव तत्त्वं प्रतिबन्धतावच्छेदकम्, इत्यनतिप्रसङ्गात्। न चैवम्,निखातसंनिकर्षात् तादृशवैलक्षण्यविशेष्यकसाक्षात्काराऽऽपत्तेर्दुर्वारत्वात्। किञ्च-एवमावृत्तैकपार्श्वविच्छेदेन यस्य चक्षुःसंयोगान्नोक्तवैजात्यस्य ग्रहः, तस्यैवान्यदा पुरुषान्तरस्य वा तदानीं पार्श्वान्तरावच्छेदेन चक्षुःसंयोगेऽप्यग्रहः स्यात्, आवरकसंयोगस्य विरोधिनः सत्त्वात्। तत्तत्कालीनतत्तत्पुरुषीयमहत्त्वाऽऽदिप्रत्यक्षं प्रत्येवोक्तप्रतिबन्धकत्वे त्वनावरणकालीनस्य विलक्षणमहत्त्वाऽऽदिप्रत्यक्षस्याऽऽवरणदशाबामुत्पत्तिप्रसङ्गः। न हि तत्रापि सन्निकर्षं विना अन्यद्विशिष्टप्रकारणं क्लृप्तं, येन तद्विलम्बात्तद्विलम्बः स्यात्। अपि च-एवमावृत्तादृष्टनष्टस्थले प्रतिबध्याप्रसिद्धिः स्वप्राचीस्थपुरुषीयोक्तवैजात्यसाक्षात्कारणत्वावच्छिन्न एव स्वप्रतीत्यवच्छिन्नाऽऽवरकसंयोगत्वेन प्रतिबन्धकत्वे तु ऊर्ध्वचाक्षुषेऽप्येवमित्यादिसंयोगप्रतिबन्धकत्वेन निर्वाहे व्यवहितार्थादर्शनान्यथाऽनुपपत्त्या चक्षुःप्राप्यकारित्वसाधनप्रयासस्य वैफल्याऽऽपत्तिरिति न किञ्चिदेतत्। एतेन तादृशवैलक्षण्यसाक्षात्कारप्रयोजकतया चक्षुरादिसंयोगनिष्ठवैजात्यान्तरस्वीकारेणैव निर्वाह इति कल्पनाऽपि तेषामपास्ता, तद्वतोरिति न्यायेनाऽऽनिमुख्यविशेषेणाऽऽवरणाभावविशेषेण वा निर्वाहे तादृशवैजात्यकल्पनायां महागौरवात्, अन्यापेक्षयैव स्वदेशापेक्षयाऽपि न्यूनाधिकत्वावरूपवैजात्यानुभवस्यापेक्षां विनाऽनुपपत्तेश्चेति दिक् ॥ ३ ॥ नयो० । ऊर्ध्व० ।

(५) तत्र नय इति किमुच्यते ?, कतिभेदश्चायम् ?, इत्याह-

एगेण वत्थुणोऽणे-गधम्मुणो जमवधारणेणेव ।
नयणं धम्मेण तओ,होइ नओ सत्तहा सो य ॥२१८०॥

अनेकधर्मणोऽनन्तधर्माऽऽत्मकस्य वस्तुनो यदेकेन नित्यत्वाऽऽदिना, अनित्यत्वाऽऽदिना वा धर्मेणावधारणेनैव साऽवधारणं नयनं प्ररूपणं तकोऽसौ नयो भवति । अनन्तधर्माऽऽत्मकं वस्त्वेकांशेनैव नयति प्ररूपयतीति नयः। कथं पुनरेकस्य वस्तुनो युगपदनन्तधर्माऽऽत्मकत्वम् ?। अत्रोच्यते-सर्वमेव वस्तु तावत्सपर्यायम्। ते च पर्याया द्विविधाः-क्रमपरसाऽऽदयो युगपद्भाविनः, नवपुराणाऽऽदयस्तु क्रमभाविनः। पुनः शब्दार्थपर्यायभेदात्सर्वेऽपि द्विविधाः। तत्र " इन्द्रो दुश्च्यवनो हरिः " इत्यादिशब्दैर्येऽभिलप्यन्ते, ते सर्वेऽपि शब्दपर्यायाः। ये त्वभिलपितुं न शक्यन्ते श्रुतज्ञानविषयत्वातिक्रान्ताः केवलाऽऽदिज्ञानविषयास्तेऽर्थपर्यायाः। पुनरेते द्विविधाः-स्वपर्यायाः, परपर्यायाश्च। पुनस्तेऽपि केचित्स्वाभाविकाः, केचित् तु पूर्वापराऽऽदिशब्दवदापेक्षिकाः। पुनरेते सर्वेऽप्यतीतानागतवर्तमानकालभेदात्त्रिविधा इत्यादिना प्रकारेण समयानुसारतः सुधिया वस्तुनो युगपदनन्तधर्मकत्वं भावनीयम। स च नयः सप्तविधः सप्तप्रकार इति ॥ २१८० ॥ विशे० । आ० म० ।

ननु नयस्य प्रमाणाद्भेदेन लक्षणप्रणयनमयुक्तम्, स्वार्थव्यवसायाऽऽत्मकत्वेन तस्य प्रमाणस्वरूपत्वात्। तथाहि-नयः प्रमाणमेव, स्वार्थव्यवसायकत्वादिष्टप्रमाणवत्, स्वार्थव्यवसायकस्याप्यस्य प्रमाणत्वानभ्युपगमे प्रमाणस्यापि तथाविधस्य प्रमाणत्वं न स्यादिति कश्चित्। तदसत्। नयस्य स्वार्थैकदेशनिर्णीतिलक्षणत्वेन स्वार्थव्यवसायकत्वासिद्धेः। ननु नयविषयतया सम्मतोऽर्थैकदेशोऽपि यदि वस्तु तदा तत्परिच्छेदी नयः प्रमाणमेव, वस्तुपरिच्छेदलक्षणत्वात्प्रमाणस्य। स न चेद्वस्तु तर्हि तद्विषयो नयो मिथ्याज्ञानमेव स्यात्, तस्यावस्तुविषयत्वलक्षणत्वादिति चेत्। तदयुक्तम्। अर्थैकदेशस्य वस्तुत्वावस्तुत्वपरिहारेण वस्त्वंशतया प्रतिज्ञानात्।

तथा चाऽऽहुः-

" नाऽयं वस्तु न चाऽवस्तु, वस्त्वंशः कथ्यते बुधैः।
नाऽसमुद्रः समुद्रो वा, समुद्रांशो यथैव हि ॥ १ ॥
तन्नाम्नस्य समुद्रत्वे, शेषांशस्याऽसमुद्रता।
समुद्रबहुता वा स्यात्, तत्त्वे कस्तु समुद्रवित् ? ॥ २ ॥ "

यथैव हि समुद्रांशस्य समुद्रत्वे शेषसमुद्रांशानामसमुद्रत्वप्रसङ्गात् समुद्रबहुत्वाऽऽपत्तेर्वा तेषामपि प्रत्येकं समुद्रत्वात्; तस्याऽसमुद्रत्वे वा शेषसमुद्रांशानामप्यसमुद्रत्वात् क्वचिदपि समुद्रव्यवहारायोगात् समुद्रांशः समुद्रांश एवोच्यते, तथा-स्वार्थैकदेशो नयस्य न वस्तु,स्वार्थैकदेशान्तराणामवस्तुत्वप्रसङ्गाद् वस्तुबहुत्वानुषक्तेर्वा; नाप्यवस्तु, शेषांशानामप्यवस्तुत्वेन क्वचिदपि वस्तुव्यवस्थाऽनुपपत्तेः। किं तर्हि वस्त्वंश एवासौ तादृक्प्रतीतेर्बाधकाभावात् ? ततो वस्त्वंशे प्रवर्त्तमानो नयः स्वार्थैकदेशव्यवसायलक्षणो न प्रमाणं, नापि मिथ्याज्ञानमिति ॥ १ ॥ (रत्ना०)

नयप्रकारसूचनायाऽऽहुः-

स व्याससमासाभ्यां द्विप्रकारः ॥ ३ ॥

स प्रकृतो नयः व्यासो विस्तरः, समासः संक्षेपः, ताभ्यां द्विभेदः-व्यासनयः, समासनयश्चेति ॥ ३ ॥

व्यासनयप्रकारान् प्रकाशयन्ति-

व्यासतोऽनेकविकल्पः ॥ ४ ॥

एकांशगोचरस्य हि प्रतिपत्राभिप्रायविशेषस्य नयस्वरूपत्वमुक्तं, ततश्चानन्तांशाऽऽत्मके वस्तुन्येकैकांशपर्यवसायिनो यावन्तः प्रतिपत्तृणामभिप्रायास्तावन्तो नयाः, ते च नियतसंख्यया संख्यातुं न शक्यन्त इति व्यासतो नयस्यानेकप्रकारत्वमुक्तम ॥ ४ ॥

समासनयं भेदतो दर्शयन्ति-

समासतस्तु द्विभेदो- द्रव्यार्थिकः, पर्यायार्थिकश्च ॥५॥

नय इत्यनुवर्त्तते; ऊर्णोति द्रोष्यति अद्रुवत तांस्तान् पर्यायानिति ऊर्ध्वं, तदेवार्थः, सोऽस्ति यस्य विषयत्वेन स ऊर्ध्वार्थिकः। पर्येत्युत्पादविनाशौ प्राप्नोतीति पर्यायः स एवार्थः, सोऽस्ति यस्यासौ पर्यायार्थिकः। एतावेव च द्रव्यास्तिकपर्यायास्तिकाविति, द्रव्यस्थितपर्यायस्थिताविति, ऊर्ध्वार्थपर्यायार्थाविति च प्रोच्येते। ननु गुणविषयस्तृतीयो गुणार्थिकोऽपि किमिति नोक्त इति चेत्, गुणस्य पर्याय एवान्तर्भूतत्वेन पर्यायार्थिकेनैव तत्संग्रहात्। पर्यायो हि द्विविधः-क्रमभावी, सहभावी च। तत्र सहभावी गुण इत्यभिधीयते; पर्यायशब्देन तु पर्यायसामान्यस्य स्वव्यक्तिव्यापिनोऽभिधानान्न दोषः। ननु ऊर्ध्वपर्यायव्यतिरिक्तौ सामान्यविशेषौ वि-

येते ततस्तद्गोचरमपरमपि नयद्वयं प्राप्नोतीति चेत्। नैतदनुपपन्नम। द्रव्यपर्यायाभ्यां व्यतिरिक्तयोः सामान्यविशेषयोरप्रसिद्धेः। तथाहि-द्विप्रकारं सामान्यमुक्तम-ऊर्ध्वतासामान्यं, तिर्यक्सामान्यं च। तत्रोर्ध्वतासामान्यं द्रव्यमेव; तिर्यक्सामान्यं तु प्रतिव्यक्तिसदृशपरिणामलक्षणं व्यञ्जनपर्याय एव। स्थूलाः कालान्तरस्थायिनः शब्दानां सङ्केतविषया व्यञ्जनपर्याया इति प्रावचनिकप्रसिद्धेः। विशेषोऽपि वैसदृश्यविवर्तलक्षणः पर्याय एवान्तर्भवतीति नैतान्मिथ्याभिधिकनयावकाशाः ॥ ५ ॥

द्रव्यार्थिकभेदानाहुः-

आद्यो नैगमसंग्रहव्यवहारभेदात् त्रेधा ॥ ६ ॥

आद्यो द्रव्यार्थिकः ॥ ६ ॥

तत्र नैगमं प्ररूपयन्ति-

धर्मयोर्धर्मिणोर्धर्मधर्मिणोश्च प्रधानोपसर्जनभावेन यद्विवक्षणं स नैकगमो नैगमः ॥ ७ ॥

पर्याययोर्द्रव्ययोर्द्रव्यपर्याययोश्च मुख्यामुख्यरूपतया यद्विवक्षणं स एवंरूपो नैके गमा बोधमार्गा यस्याऽसौ नैगमो नाम नयो ज्ञेयः ॥ ७ ॥

अथास्योदाहरणाय सूत्रत्रयीमाहुः-

सच्चैतन्यमात्मनीति धर्मयोः ॥ ८ ॥

प्रधानोपसर्जनभावेन विवक्षणमितीहोत्तरत्र च सूत्रद्वये योजनीयम्। अत्र चैतन्याऽऽख्यस्य व्यञ्जनपर्यायस्य प्राधान्येन विवक्षणम, विशेष्यत्वात्। सत्त्वाऽऽख्यस्य तु व्यञ्जनपर्यायस्योपसर्जनभावेन; तस्य चैतन्यविशेषणत्वादिति धर्मद्वयगोचरो नैगमस्य प्रथमो भेदः ॥ ८ ॥

वस्तुपर्यायवद् द्रव्यमिति धर्मिणोः ॥ ९ ॥

अत्र हि पर्यायवद् द्रव्यं वस्तु वर्त्तत इति विवक्षायां पर्यायवद् द्रव्याऽऽख्यस्य धर्मिणो विशेष्यत्वेन प्राधान्यम, वस्त्वाख्यस्य तु विशेषणत्वेन गौणत्वम। यद्वा—किं वस्तु पर्यायवद् द्रव्यमिति विवक्षायां वस्तुनो विशेष्यत्वात् प्राधान्यम, पर्यायवद् द्रव्यस्य तु विशेषणत्वाद् गौणत्वमिति धर्मिधर्मिणोरुभयगोचरोऽयं नैगमस्य द्वितीयो भेदः ॥ ९ ॥

क्षणमेकं सुखी विषयाऽऽसक्तजीव इति धर्मधर्मिणोः ॥१०॥

अत्र हि विषयाऽऽसक्तजीवाऽऽख्यस्य धर्मिणो मुख्यता, विशेष्यत्वात्, सुखसङ्क्षणस्य तु धर्मस्याप्रधानता, तद्विशेषणत्वेनोपात्तत्वादिति धर्मधर्म्यालम्बनोऽयं नैगमस्य तृतीयो भेदः। न चास्यैवं प्रमाणाऽऽत्मकत्वानुषङ्गो धर्मधर्मिणोः प्राधान्येनात्र ज्ञतेरसंभवात् तयोरन्यतर एव हि नैगमनयेन प्रधानतयाऽनुभूयते। प्राधान्येन द्रव्यपर्यायद्वयाऽऽत्मकं चार्थमनुभवद्विज्ञानं प्रमाणं प्रतिपत्तव्यं नान्यत् ॥ १० ॥ (रत्ना०)

अथ संग्रहस्वरूपमुपवर्णयन्ति-

सामान्यमात्रग्राही परामर्शः संग्रहः ॥ ११ ॥

सामान्यमात्रमशेषविशेषरहितं सत्त्वद्रव्यत्वाऽऽदिकं गृह्णातीत्येवंशीलः, सम्यैकीभावेन पिण्डीभूततया विशेषराशिं गृह्णातीति संग्रहः। अयमर्थः-स्वजातेरविरोधेन विशेषाणामेकरूपतया यद् ग्रहणं स संग्रह इति ॥ ११ ॥

अमुं भेदतो दर्शयन्ति-

अयमुभयविकल्पः-परोऽपरश्च ॥ १२ ॥

तत्र परसंग्रहमाहुः-

अशेषविशेषेष्वौदासीन्यं भजमानः शुद्धद्रव्यं सन्मात्रमभिमन्यमानः परसंग्रहः ॥ १२ ॥

परामर्श इत्यत्रेतनेऽपि योजनीयम् ॥ १२ ॥

उदाहरन्ति-

विश्वमेकं सदविशेषादिति यथा ॥ १३ ॥

अस्मिन् हि वाक्ये हि सदिति ज्ञानाभिधानानुवृत्तिलिङ्गानुमितसत्ताकत्वेनैकत्वमशेषार्थानां संगृह्यते ॥ १३ ॥ (रत्ना०)

अथापरसंग्रहमाहुः-

द्रव्यत्वाऽऽदीन्यवान्तरसामान्यानि मन्वानस्तद्भेदेषु गजनिमीलिकामवलम्बमानः पुनरपरसंग्रहः ॥ १४ ॥

द्रव्यत्वमादिर्येषां पर्यायत्वप्रभृतीनां तानि तथा, अवान्तरसामान्यानि सत्ताऽऽख्यमहासामान्यापेक्षया कतिपयव्यक्तिनिष्ठानि तद्भेदेषु द्रव्यत्वाऽऽद्याश्रयभूतविशेषेषु द्रव्यपर्यायाऽऽदिषु गजनिमीलिकामुपेक्षाम् ॥ १४ ॥

उदाहरन्ति-

धर्माऽधर्माऽऽकाशकालपुद्गलजीवद्रव्याणामैक्यं द्रव्यत्वाज्ञेदादित्यादिर्यथा ॥ १५ ॥

अत्र द्रव्यं द्रव्यमित्यज्ञिप्तज्ञानाभिधानलक्षणलिङ्गानुमितद्रव्यत्वाऽऽत्मकत्वेनैक्यं षण्णामपि धर्माऽऽदिद्रव्याणां संगृह्यते। आदिशब्दाच्चेतनाचेतनपर्यायाणां सर्वेषामेकत्वम्; पर्यायत्वाविशेषादित्यादि द्रष्टव्यम ॥ १५ ॥ (रत्ना०)

अथ व्यवहारनयं व्याहरन्ति-

संग्रहेण गोचरीकृतानामर्थानां विधिपूर्वकमवहरणं येनाभिसन्धिना क्रियते स व्यवहारः ॥ १६ ॥

संग्रहगृहीतान् सत्ताऽऽद्यर्थान् विधाय, न तु निषिध्य यः परामर्शविशेषः, तानेव विभजते, स व्यवहारनयस्तज्ज्ञैः कीर्त्यते ॥ १६ ॥

उदाहरन्ति-

यथा यत्सत्तद् द्रव्यं पर्यायो वेत्यादिः ॥ १७ ॥

आदिशब्दादपरसंग्रहगृहीतार्थगोचरव्यवहारोदाहरणं द्रष्टव्यम। यद् द्रव्यं तज्जीवाऽऽदि षड्विधं, यः पर्यायः स द्विविधः-क्रमभावी, सहभावी चेति। एवं यो जीवः स मुक्तः संसारी च, यः क्रमभावी पर्यायः स क्रियारूपः, अक्रियारूपश्चेत्यादि ॥ १७ ॥ (रत्ना०)

द्रव्यार्थिकं त्रेधाऽभिधाय पर्यायार्थिकं प्रपञ्चयन्ति-

पर्यायार्थिकश्चतुर्धा-ऋजुसूत्रः, शब्दः, समभिरूढः, एवंभूतश्च ॥ १८ ॥

एषु ऋजुसूत्रं तावद्विवृण्वन्ति-

ऋजु वर्तमानक्षणस्थायि पर्यायमात्रं प्राधान्यतः सूत्रयन्नभिप्राय ऋजुसूत्रः ॥ १९ ॥

ऋजु अतीतानागतकालक्षणवक्रकौटिल्यवैकल्यात् प्राञ्जलम; अयं हि द्रव्यं सदपि गुणीभावान्नार्पयति, पर्यायांस्तु क्षणध्वंसिनः प्रधानतया दर्शयतीति ॥ १९ ॥

उदाहरन्ति-

यथा सुखविवर्तः सम्प्रत्यस्तीत्यादिः ॥ २९ ॥

अनेन हि वाक्येन क्षणस्थायिसुखाऽऽख्यं पर्यायमात्रं प्राधान्येन प्रदर्श्यते, तदधिकरणभूतं पुनरात्मद्रव्यं गौणतया नार्प्यते; आदिशब्दाद् दुःखपर्यायोऽधुनाऽस्तीत्यादिकं प्रकृतनयनिदर्शनमभ्यूहनीयम् ॥ २९ ॥ (रत्ना०)

शब्दनयं शब्दयन्ति-

कालाऽऽदिभेदेन ध्वनेरर्थभेदं प्रतिपद्यमानः शब्दः ॥३१॥

कालाऽऽदिभेदेन कालकारकलिङ्गसंख्यापुरुषोपसर्गभेदेन ॥३१॥

उदाहरन्ति-

यथा बभूव भवति भविष्यति सुमेरुरित्यादिः ॥ ३३ ॥

अत्राऽतीतवर्तमानभविष्यत्क्षणकालत्रयभेदात् कनकाऽचलस्य भेदं शब्दनयः प्रतिपद्यते । द्रव्यरूपतया पुनरभेदममुष्योपेक्षते । एतच्च कालभेदे उदाहरणम् । करोति क्रियते कुम्भ इति कारकभेदे, तटस्तटी तटमिति लिङ्गभेदे, दाराः कलत्रमित्यादि संख्याभेदे, एहि मन्ये रथेन यास्यसि न हि यास्यसि यातस्ते पितेति पुरुषभेदे, संतिष्ठतेऽवतिष्ठत इत्युपसर्गभेदे ॥ ३३ ॥ (रत्ना०)

समभिरूढनयं वर्णयन्ति-

पर्यायशब्देषु निरुक्तिभेदेन भिन्नमर्थं समभिरोहन् समभिरूढः ॥ ३६ ॥

शब्दनयो हि पर्यायभेदेऽप्यर्थाभेदमभिप्रैति, समभिरूढस्तु पर्यायभेदे भिन्नानर्थान्भिन्नमन्यते, अभेदं त्वर्थगतं पर्यायशब्दानामुपेक्षत इति ॥ ३६ ॥

उदाहरन्ति-

इन्दनादिन्द्रः, शकनाच्छक्रः, पूर्दारणात् पुरन्दर इत्यादिषु यथा ॥ ३७ ॥

इत्यादिषु पर्यायशब्देषु यथा निरुक्तिभेदेन भिन्नमर्थं समभिरोहन्नभिप्रायविशेषः समभिरूढः, तथाऽन्येष्वपि घटकुटकुम्भाऽऽदिषु द्रष्टव्यः ॥ ३७ ॥ (रत्ना०)

एवंभूतनयं प्रकाशयन्ति-

शब्दानां स्वप्रवृत्तिनिमित्तभूतक्रियाऽऽविष्टमर्थं वाच्यत्वेनाऽभ्युपगच्छन्नेवंभूतः ॥ ४० ॥

समभिरूढनयो हीन्दनाऽऽदिक्रियायां सत्यामसत्यां च वासवाऽऽदेरर्थस्येन्द्राऽऽदिव्यपदेशमभिप्रैति, पशुविशेषस्य गमनक्रियायां सत्यामसत्यां च गोव्यपदेशवत् तथा रूढेः सद्भावात् । एवम्भूतः पुनरिन्दनाऽऽदिक्रियापरिणतमर्थं तत्क्रियाकाले इन्द्राऽऽदिव्यपदेशभाजमभिमन्यते; न हि कश्चिदक्रियाशब्दोऽस्यास्ति, गौरश्व इत्यादिजातिशब्दाभिमतानामपि क्रियाशब्दत्वाद्— गच्छतीति गौः, आशुगामित्वादश्व इति । शुक्लो नील इति गुणशब्दाभिमता अपि क्रियाशब्दा एव-शुचिभवनात् शुक्लो, नीलनान्नील इति । देवदत्तो यज्ञदत्त इति यदृच्छाशब्दाभिमता अपि क्रियाशब्दा एव-देव एनं देयात्, यज्ञ एनं देयादिति । संयोगिद्रव्यशब्दाः समवायिद्रव्यशब्दाश्चाभिमताः क्रियाशब्दा एव-दण्डोऽस्याऽस्तीति दण्डी, विषाणमस्यास्तीति विषाणीत्यस्ति क्रियाप्रधानत्वात् । पञ्चतयी तु शब्दानां व्यवहारमात्राद् न निश्चयादित्ययं नयः स्वीकुरुते ॥ ४० ॥

उदाहरन्ति-

यथेन्दनमनुभवन्निन्द्रः, शकनक्रियापरिणतः शक्रः, पूर्दारणप्रवृत्तः पुरन्दर इत्युच्यते ॥ ४१ ॥ रत्ना० ७ परि० ।

(६) ननु सर्वत्र वास्तव्येवापेक्षा नयप्रवृत्तिहेतुः, उत वैकल्पिकयपि ? । उच्यते- क्वचिद् वैकल्पिकयपि, यत्र मतभेदोऽध्यवसायः । तथा चाऽऽह-

नानानयमयो व्यक्तो, मतभेदो ह्यपेक्षया ।
कोटयन्तरनिषेधस्तु, प्रस्तुतोत्कटकोटिकृत् ॥ ४ ॥

(नानेति) हि निश्चितं मतभेदः—बौद्धौपनिषदादिदर्शनभेदः, नानानयमयः-स्वेच्छानिवेशितत्वेनाऽनेकनयविकाररूपः, वस्तुत्वप्रकृतिरूपो वा; अपेक्षया व्यक्तः, शुक्लपर्यायशुद्धद्रव्याऽऽद्यपेक्षयैव तत्तदर्थव्यवस्थितेः । नयविशेषतात्पर्यमेतद्, न त्वपेक्षेति चेत् । न । तात्पर्येऽप्यपि वस्तुसंबन्धरूपापेक्षामाश्रित्य प्रवृत्तेः, असति संबन्धे तात्पर्यस्य प्रामाण्याप्रसरात् । सा चेयमपेक्षा वैजात्तिकः संबन्धः; अत एव विकल्पसिद्धस्य धर्मिणः प्रतिषेधाऽऽदिसाधनमामनन्ति साम्प्रदायिकाः । ईश्वरो नास्ति, प्रकृतिर्नास्तीत्यादौ विशिष्टज्ञानाऽऽकारविषयत्वेन तत्र धर्मिणो विकल्पसिद्धत्वाद्विशिष्टवस्तुसिद्धौ कथं विशिष्टाऽऽकारो भवेदिति चेत् ?; यथा तव विशिष्टानतिरेकेऽपि विशिष्टाज्ञानोऽतिरिक्तः प्रतिबिम्बबलात् सिद्धः, तथा मम विशिष्टाऽऽकारोऽपीति किं बाधकम् ?; खण्डशः प्रसिद्धधर्मधर्मिरूपसकलपरामर्शासदाकारोत्पत्तेर्नास्त्यस्यातिप्रसङ्गः [?]। यद्वा-आलयविज्ञानसन्ततिरूप आत्माऽपि यदि क्षणिकः, किं पुनर्बाह्यं बाह्यवस्तुष्विति वैराग्यप्रतिपन्थितृष्णोच्छेदैकानित्यभावनोद्देशेन बौद्धदर्शनस्य ?; मुमुक्षुणा सर्वं परित्यज्य स्वात्मनिष्ठेन भवितव्यम्; स च एक एवेति शोकद्वेषाऽऽदिनिबन्धनानेकसंबन्धबुद्धिमलप्रक्षालनगङ्गाजलसमानिकत्वभावनोद्देशेन च वेदान्तिकदर्शनस्य प्रवृत्तेः ; तत्तद्दर्शनार्थज्ञानेषु तत्तद्भावनोद्देशप्रयुक्तमेवोपेक्षात्वं, तेनैव तस्य सुनयत्वव्यवस्थितेः । अन्यथा बौद्धसिद्धान्ते बाह्यार्थज्ञानाऽऽदिवादानां, वेदान्तसिद्धान्ते च प्रतिबिम्बाभासावच्छेददृष्टिसृष्टिवादाऽऽदीनामन्योऽन्यविप्रतिषिद्धत्वेन जात्या दुर्नयत्वं सम्यग्दृष्टिपरिग्रहेणाऽपि निराकर्तुमशक्यत्वात् । न हि जात्या दलाहृतं सद्वैद्यहस्तोपादानमात्रेणाऽमृतायते, रसायनीकरणं तु तस्योक्तापेक्षयैवेति दृढतरमवधेयम् ।

ननूक्तापेक्षयाऽतिशुद्धर्जुसूत्राऽऽदीनामितरनयार्थप्रतिषेधधर्मत्वौ कथं न दुर्नयत्वम्?,इतरांशौदासीन्यस्यैव सुनयलक्षणत्वात् । इष्यन्ते चते नयाः स्वसमये,परसमये च स्वेतरनयार्थबाधेनैव प्रगल्भमाना इत्याशङ्क्याऽऽह-कोट्यन्तरस्येतरनयार्थस्य, निषेधो निराकरणं, प्रस्तुता या तत्कटकोटिस्तत्कारी,विशिष्टविधेर्विशेषणविश्रामेण प्रस्तुतकोटेरुत्कटत्वकृदित्यर्थः। अयं भावः-यदीतरनयार्थप्रतिषेधो द्वेषबुद्ध्या तदा दुर्नयत्वमेव, यदि चोक्तभावनादार्ढ्यानुगतस्वविषयोत्कर्षाऽऽधानाय, तदा सुनयत्वमेव, ज्ञात्या दुर्नयस्याऽपि चिन्ताक्षानेन फलतः सुनयीकरणाद्, भावनाक्षानेन पेदम्पर्यार्थप्रधानकरणप्रमाणवाक्यैकदेशत्वाऽऽपादनाच्च ।

तदाहुः श्रीहरिभद्रसूरयः षोडशप्रकरणे-

" पेदम्पर्यं शुद्ध्यति, यत्राऽसावागमः सुपरिशुद्धः ।
तदभावे तद्देशः, कश्चित् स्यादन्यथाग्रहणात् ॥ १२ ॥ "

अस्य व्याख्या-ऐदम्पर्यं तात्पर्यं पूर्वोक्तं,शुध्यति स्फुटीभवति यत्राऽऽगमे,असावागमः सुपरिशुद्धः प्रमाणभूतः,तदभावे ऐदम्पर्यशुद्ध्यभावे,तद्देशः परिशुद्धाऽऽगमैकदेशः,कश्चिदन्य आगमः स्यात्, न तु मूलाऽऽगम एव,अन्यथाग्रहणाद् मूलाऽऽगमैकदेशस्य सतो विषयस्याऽन्यथाप्रतिपत्तेर्यतः समतामवलम्बमानास्तेऽपि तथेच्छन्ति॥१२॥(पो० १६ विव०)तत्राऽपि च न द्वेषः कार्यो,विषयस्तु यत्नतो मृग्यः,तस्याऽपि न सद्भूवचनं सर्वं सत्यवचनादन्यदिति ।

नन्वयं स्वसमयनयवाक्येभ्यः परसमयनयवाक्यानां को विशेषः, फलतो जातितश्च शुद्ध्यशुद्ध्योरविशेषात् ?। न हि ज्ञानदर्शनचारित्राऽऽदिवादेषु स्वसमये स्थितपक्षोऽपि स्वविषये प्राधान्यं विदधानः ज्ञानाऽऽदिनयविषये च तन्निराकुर्वाणो जात्या शुद्धत्वमङ्गीकुरुते । तथा च स्थितपक्षवचनम्-" जम्हा दंसणणाणा, संपुण्णफलं न दिंति पत्तेयं । चारित्तजुआ दिंति ह, विसिस्सए तेण चारित्तं " ॥१॥ इति । अत्र हि ज्ञानाऽऽदिनये नैतदुक्तुं शक्यम्, यथा त्वया संपूर्णफलप्रापकत्वेन चारित्रमुत्कृष्यते, तथा मया तदुपनायकत्वेन " दासेण मे * " इत्यादिन्यायाद् व्यापारतया चारित्रान्यथासिद्ध्यापादनाच्च ज्ञानाऽऽदिकमेवोत्कर्षमारोपणीयमिति । विजृम्भितं चेदमध्यात्ममतपरीक्षायां बहुधाऽस्माभिः । तथा च प्राधान्यस्याप्यव्यवस्थितत्वात् कुत्र केन नयेन जात्या व्यवस्थेयम् ?, फलतः शुद्धिस्तु स्वपरसमययोरविशिष्टेति चेत्, अत्रोच्यते-यथा देशप्रदेशस्कन्धैकपरमाणुवादीनां स्कन्ध[संबन्ध-] संबन्धाभ्यां भेदः, तथा स्वसमयपरसमयव्यविचित्रनयानां प्रमाणवाक्यान्तर्भावबहिर्भावाभ्याम् । तौ च पदार्थवाक्यार्थाऽऽदिभावेन साकाङ्क्षतया,स्वातन्त्र्येण निराकाङ्क्षतया चेति न जातिभेदाऽनुपपत्तिः। स्वसमये नयेषु निराकाङ्क्षप्रमाणबोधपर्यवसाने तदत्यन्तोत्कर्षरूपकेवलज्ञानफलोद्देशः, परसमये नयेषु च उत्कृष्टावान्तरफलोद्देश इति फलतोऽपि भेदो व्यक्त एवेति सर्वमवदातम।

ननु यद्येवं नयार्था आपेक्षिकाः, तदा अवयव्येकत्वमपि द्वित्वाऽऽदिबुद्धिजन्यमेव स्यात्; उभयमपि वा ज्ञानाऽऽकारमात्रं इति चेत् । न । एकत्वद्वित्वाऽऽदीनामनन्तानां संख्यापर्यायाणामेकद्रव्यवृत्तीनामेव सतां यथा क्रयोपशमबुद्धिविशेषेण प्रतिनियतानामेव ग्रहणमित्यभ्युपगमात् । युक्तं चैतत् । अन्यथा एकत्रैव घटे तद्रूपतद्रसचतोरैक्यमित्यादिना द्विवचनप्रयोगस्य , बहुषु करि-तुरग-रथ-पदातिषु सेनेत्येकवचनप्रयोगस्याऽनुपपत्तेः। अथैकत्वद्वित्वाऽऽदितत्तद्धर्मप्रकारकबुद्धिविषयत्वाऽऽदिकं गौणमेव द्वित्वाऽऽदिव्यवहारनिमित्तं, तच्च तत्तद्धर्मावच्छेदेन पर्याप्तमिति नैको द्वावित्यादेः प्रसङ्गः;मुख्यं तु द्वित्वम्-अपेक्षाबुद्धिजन्यं द्वित्वमन्यदेवेति न दोष इति चेत् । न । उक्तविषयतारूपद्वित्वाऽऽदेरप्येकत्वपर्याप्तत्वात् तत्तद्धर्मप्रकारतानिरूपितत्वविशिष्टविषयतायाः अपि क्वचित्संबन्धाऽऽदिभेदेन प्रकारताभेदादेकस्या अभावात्;भावेऽपि च द्वयस्य प्रत्येकानतिरिक्तत्वेन एकधर्मावच्छेदेन द्वित्वाऽऽदिपर्याप्तिप्रसङ्गाद्,धर्मगतद्वित्वस्यैव तत्पर्याप्त्यवच्छेदकताऽवच्छेदकत्वस्वीकारे च तत्राऽपि द्वित्वस्य वास्तवस्याऽनावाद् रूपत्वरसत्वाऽऽदिप्रकारकबुद्धिविषयत्वस्यैव गौणस्य स्वीकारे,तत्पर्याप्त्यवच्छेदकाऽऽदिगवेषणेऽनवस्थिते वास्तवद्वित्वाऽऽद्यभावे ज्ञानाऽऽकारतापर्यवसानेन साकारवादप्रसङ्गात् । तस्माद् द्रव्यत्वावच्छिन्नैकत्वाऽऽदेः पर्याप्तिस्वीकारेऽनेकान्तवाद एवानाविला व्यवस्थेति ध्येयम् । अत एव-" दव्वट्ठयाए एगे अहं, नाणदंसणट्ठयाए दुवे अहं ।" इत्यादि पारमर्षम् ।

इदमप्यत्र विचार्यते-द्वित्वाऽऽदिकमपेक्षाबुद्ध्या जन्यं वा,व्यङ्ग्यं वेति ?। तत्र जन्यमेवेति नैयायिकाः। व्यङ्ग्यमिति प्राभाकराः। तत्र नैयायिकानयमाशयः-द्वित्वस्य व्यङ्ग्यत्वनये अपेक्षाबुद्धेर्द्वित्वत्वप्रकारकलौकिकप्रत्यक्षत्वकार्यतावच्छेदकत्वं वाच्यम्, जन्यत्वनये तु द्वित्वमेवेति लाघवम्। न च व्यङ्ग्यत्वनयेऽपि लौकिकप्रकारतासंबन्धेन द्वित्वमेव तत्कार्यतावच्छेदकं वक्तुं शक्यम्,गुणत्वसंख्यात्वतद्व्यक्तित्वाऽऽदिना विनाऽप्यपेक्षाबुद्धि तत्प्रत्यक्षप्रसङ्गात्,तेन रूपेण तत्प्रत्यक्षं प्रति तस्या हेतुत्वकल्पने चातिगौरवात्। न च स्वाश्रयविषयतया द्वित्वत्वस्य कार्यतावच्छेदकतया न दोष इति वाच्यम् । तथाऽपि व्यङ्ग्यत्वनये स्वाश्रयविषयत्वं कार्यतावच्छेदकताऽवच्छेदकः संबन्धः,जन्यत्वनये तु समवाय इति जन्यत्वपक्ष एव श्रेयान्,लाघवात्। अथ द्वित्वप्रत्यक्षेऽपि प्रत्यक्षत्वमेव कार्यतावच्छेदकम्, द्वित्ववृत्तिविषयतायाः कार्यतावच्छेदकसंबन्धत्वेनैवानतिप्रसङ्गात् । अन्यथा द्वित्वप्रत्यक्षस्य विषयतया द्वित्वत्वाऽऽदावपि जायमानत्वेन व्यभिचारात् अपेक्षाबुद्धित्वं कारणतावच्छेदकं, तच्च मानसत्वव्याप्यो जातिविशेषः;कारणतावच्छेदकः संबन्धः स्वविषयपर्याप्तत्वम्;तेन घटपटैकत्वबुद्धित्वेनाऽपेक्षाबुद्धेर्घटपटद्वित्वप्रत्यक्षहेतुत्वेऽनन्तकार्यकारणभावाऽऽपत्तिः, द्वित्वप्रत्यक्षताऽवच्छिन्नेऽपेक्षाबुद्धित्वेन सामान्यतो हेतुत्वेऽपि घटपटद्वित्वप्रत्यक्षकाले घटकुड्यद्वित्वप्रत्यक्षाऽऽपत्तिः,स्वविषयवृत्तित्वसंबन्धेनापेक्षाबुद्धेस्तत्राऽपि सत्त्वादित्यादिदूषणानवकाशः। घटपटैकत्वबुद्धेर्घटकुड्यद्वित्वे स्वविषयपर्याप्तत्वसंबन्धेनाऽसत्त्वादिति व्यङ्ग्यत्वनयेऽपि न गौरवमिति चेत् । न । एवं सति प्रत्यक्षत्वं वा कार्यतावच्छेदकं,ज्ञानत्वं वाऽनुभवत्वं वेत्यादौ विनिगमकाभावात् । किञ्च-व्यङ्ग्यत्वादिना मैत्रीयापेक्षाबुद्ध्या संनिकर्षाऽऽदिवशाद् चैत्रीयप्रत्यक्षोत्पत्तिवारणाय चैत्रीयापेक्षाबुद्धित्वस्य चैत्रीयप्रत्यक्षत्वाऽऽदिना कार्यकारणभावो वाच्य इति गौरवमेव । अथ तव पुरुषान्तरापेक्षाबुद्धिजनितद्वित्वस्य पुरुषान्तराप्रत्यक्षत्वाय द्वित्वनिष्ठविषयतासंबन्धेन चैत्रीयप्रत्यक्षे मैत्रीयद्वित्वाऽऽदिभेदस्याऽपि हेतुत्वं कल्पनीयम । यद्वा-चैत्रीयद्वित्वप्रत्यक्षं प्रति चैत्रापेक्षाबुद्धिजन्यद्वित्वेन हेतुता कल्पनीया, कार्यतावच्छेदकः संबन्धो द्वित्वनिष्ठविषयताकारणताऽवच्छेदकस्तादात्म्यम। अत एव-चैत्रमैत्रापेक्षाबुद्धिभ्यां तुल्यविषयाभ्यां युगपदुत्पन्नाभ्यामुत्पादितं द्वित्वमेकमेवेति मतेऽपि न क्षतिरिति कल्पनायामधिकं गौरवमिति चेत् । न। तद्गौरवस्य फलमुखत्वेनाऽदोषत्वात् । यद्यपि द्वित्वाऽऽदावपेक्षाबुद्धेर्नैकत्वावगाहिबुद्धित्वेन हेतुता, अयं घट एक इति बुद्धितोऽपि द्वित्वोत्पत्त्यापत्तेः; नाऽपि नैकत्वावगाहिबुद्धित्वेन,अयमेकश्चिरनष्टो घटश्चैक इति बुद्धितोऽपि तदापत्तेः;तथाऽपि द्वित्वाऽऽदिजनकताऽवच्छेदका मानसत्वव्याप्या नानाजातयो वाच्याः, अन्यदा कदाचिद् द्वित्वं कदाचित्त्रित्वमिति नियमो न स्यात्। न च स्मृतित्वव्याप्यत्वमेव तासां न कुतः?, इति वाच्यम् ; यदूव्यक्तिविशेष्यत्वैकस्मरणं कस्याऽपि न जातं, तत्र स्मरणाऽनुभवकार्यकारणभावकल्पने संस्कारव्यवधानेन क्षणविलम्बे च गौरवात्,स्मृतित्वव्याप्यत्वेऽपि स्मरणाऽसमवेतत्वबुद्धिकल्पनालक्षणे मानसोत्पत्तौ बाधकानावादुपनायकज्ञानघटितसामग्रीसत्त्वात् मानसं प्रति तत्तत्स्मृतिसामान्या प्रतिबन्धकत्वकल्पने च महागौरवात्। सन्तु वा चाक्षुषत्वाऽऽदि-

* "दासेण मे खरो कीओ,दासो वी मे खरो वि मे" इतिन्यायः ।

व्याप्या नानाजातयः, द्वित्वाऽऽदौ मानाभावाद् द्वौ त्रय इत्यादिविलक्षणबुद्धेर्विजातीयकानं प्रकारजेदं विनाऽसंभवात्। अन्यथा-सर्वत्र विषयनिरपेक्षैरेव कैश्चिदन्यव्यवहारजननप्रसक्तात्। न च द्वावित्यादिबुद्धेर्विजातीयकानं विषयः, अवाधुत्वाऽऽपत्तेः। न च 'इमौ द्वौ मधुपौ; एते त्रयः कमलकहारकलहंसाः" इत्यादौ युगपदेव द्वित्वत्रित्वप्रतीतिः, एकत्र बुद्धौ द्वित्वजनकतावच्छेदकजात्यभ्युपगमे जातिसंकरप्रसङ्ग इति वाच्यम्; द्वित्वत्रित्वोत्पादकापेक्षाबुद्धेरुत्पादे सूक्ष्मकालभेदकल्पनात्, 'गिरिरयं वह्निमान्, अहं तदक्रामम्' इत्यनुमितिप्रत्यक्षयोरिव। अथ तत्र भिन्नविषयेऽनुमितिसामग्र्या प्रतिबन्धकत्वाद्स्तु तयोर्युगपदनुत्पादः, न तु प्रकृते इति चेत्, तर्हि प्रतिबन्धकं किञ्चिदत्राऽपि कल्प्यताम्, अन्यथाऽनुपपत्तेर्बलीयस्त्वात्। अस्तु वा तदत्रापेक्षाबुद्धाबुभयजनकतावच्छेदको जातिविशेषः; स च द्वित्वत्रित्वयोस्तज्जन्यतावच्छेदको जातिविशेषः। एतेन समवाय्यसमवायिनिमित्तकारणानामविशिष्टत्वे द्वित्वत्रित्वाऽऽद्युत्पत्तिनियमे किं कारणम्?, द्वाभ्यामेकत्वाभ्यां द्वित्वं त्रिभिस्त्रित्वमारभ्यते इति वक्तुमशक्यत्वात्, एकत्वेषु द्वित्वाऽऽदेरभावात्। न च शुद्धनयापेक्षाबुद्ध्या द्वित्वं, द्वित्वसहितया च तया त्रित्वमुत्पाद्यते इत्यपि सुवचम्, द्वित्वत्रित्वयोर्युगपदेव तत्प्रत्ययविषयत्वात्। न चैकत्वेष्विव द्वित्वाऽऽदिजनकतावच्छेदका जातिविशेषा अभ्युपेयाः, तत एव द्वित्वाऽऽदिव्यवहारोपपत्तौ द्वित्वाऽऽद्युच्छेदप्रसङ्गादित्यादिपर्यनुयोगो निरस्तः; अपेक्षाबुद्धिनिष्ठद्वित्वत्रित्वाऽऽदिजनकतावच्छेदकजातिभेदेनैव ततः सामग्रीभेदात् एकापेक्षाधीजन्यद्वित्वत्रित्वयोरप्यन्यत्र परिपुष्टभेदवज्जातीयत्वेनैव भेदात्॥ उदयनाऽऽचार्यास्तु-तद् द्वित्वप्रागभावगर्भमेव द्वित्वसामग्री, त्रित्वप्रागभावगर्भा च त्रित्वसामग्रीति तयोर्विशेषः। इतोऽपि हि प्रागभावसिद्धिः; अन्यथा तयोर्विशेषो न स्यात्, पर्याप्तिसंबन्धेन द्वित्वाऽऽदिकं प्रति पर्याप्तिसंबन्धेन तत्प्रागभाव एव नियामकः; अत एवैकस्मिन्नपर्याप्तिसंबन्धेन द्वित्वाऽऽदिप्रत्ययः तत्प्रागभावस्यैकस्मिन्पर्याप्तभावेन तस्याऽपि तदभावादित्याहुः॥ अथापेक्षाबुद्धिजन्यत्वे द्वित्वस्य 'द्वे रूप्ये' इति लौकिकप्रत्यक्षानुपपत्तिः; अपेक्षाबुद्धिरथ द्वित्वम्, अथ द्वित्वत्वं निर्विकल्पकं, ततो द्वित्वत्वविशिष्टं प्रत्यक्षं, तदेव च द्वित्वत्वनिर्विकल्पकेन स्वोत्तरवृत्तिविशेषगुणविषया जनितोऽपेक्षाबुद्धिविनाशः, ततश्च 'द्वे रूप्ये' इति लौकिकप्रत्यक्षं, तदेव चापेक्षाबुद्धिविनाशाद् द्वित्वविनाश इति द्वित्वत्वाऽभिमता व्यवस्था, साऽत्रानुपपन्ना; अपेक्षाबुद्धेस्तज्जन्यसंस्कारेण द्वित्वनिर्विकल्पकोत्पत्तिक्षण एव नाशात्। योग्यविशेषविशेषगुणनाशं प्रति स्वोत्तरवृत्तियोग्यजातीयविभुविशेषगुणत्वेन हेतुत्वात् सुषुप्तिप्राक्कालवर्त्तिज्ञाननाशकतयैव तत्सिद्धेः, अन्यथाऽनुभवध्वंसेनैव संस्काराऽन्यथासिद्धेरिति चेत्। न। अपेक्षाबुद्धेः संस्काराजनकत्वादपेक्षाबुद्धित्वस्यापि संस्कारजनकतावच्छेदककोटिप्रवेशात्। न चैवमप्यपेक्षाबुद्धिजनितैकत्वाऽऽदिविशिष्टबुद्ध्या अपेक्षाबुद्धिनाशप्रसङ्गः। तदुक्तम्-"अपेक्षाबुद्धिः संस्कारान् माकार्षीत्, विशिष्टबुद्धिस्तु कुर्यादेव" इति वाच्यम्; विशिष्टबुद्धिजनकेऽपि द्वित्वसामग्र्यादेरेव फलबलेन प्रतिबन्धकत्वकल्पनात्। वस्तुतोऽपेक्षाबुद्धिनाशे द्वित्वलौकिकप्रत्यक्षस्य विशिष्य कारणत्वकल्पनान्न दोषः। न च तथाऽपि पूर्वापेक्षाजनितद्वित्वनिर्विकल्पकेन स्वद्वितीयक्षणोत्पन्नेनापेक्षाबुद्धेस्तृतीयक्षणे नाशप्रसङ्गः, प्रतियोगितयाऽपेक्षाबुद्धिनाशे स्वविषयजनकत्वसंबन्धेन द्वित्वलौकिकप्रत्यक्षत्वेन हेतुत्वात्। नन्वेवमपि 'द्वे रूप्ये' इति लौकिकप्रत्यक्षं कथं, तदुत्पत्तिक्षणे द्वित्वमात्रादिति चेत्?। मैवम्। द्वित्वस्य हि तत्प्रत्यक्षे विषयविषया हेतुत्वं, न तु कार्यसहवर्तितयेति दोषाभावात्। न हि सर्वेषां कारणानां कार्यसहवर्तितयैव हेतुत्वम्, प्रागभावपक्षताऽऽदेरहेतुत्वप्रसङ्गादिति॥ प्राभाकरवृद्धानुसारिणस्तु-सोऽयं नैयायिकाऽऽग्रहो न युक्तः, अनन्तद्वित्वाऽऽदिध्वंसप्रागभावाऽऽदिकल्पनायां गौरवात्, तद्भूयस्त्वपक्षस्यैव युक्तत्वात्। अन्यथा नानापुरुषीयकर्मे काऽपेक्षाबुद्धिः?, समसंख्यतुल्यव्यक्तिकनानाद्वित्वाऽऽदिकल्पनेऽपि महागौरवात्। मम तु नित्यानामेव तेषां तत्तदपेक्षाबुद्धिव्यङ्ग्यत्वाद् दोषाभावात्। न चैवं तेषां जातित्वाऽऽपत्तिः, असमवायित्वे सत्यनेकसमवेतत्वस्य, समवेतत्वस्यैव वा जातिव्यवहारनिमित्तत्वात्। न च विशेषेऽतिप्रसङ्गः, तत्र मानाभावात्। किञ्च-द्वित्वाऽऽदेर्जन्यत्वे प्रतियोगितया नाशाजन्यतानाशे स्वप्रतियोगिजन्यत्वसंबन्धेनापेक्षाबुद्धिनाशत्वेन हेतुता वाच्या; तथा च-द्व्यणुकपरिमाणहेतुपरमाणुद्वित्वस्येश्वरापेक्षाबुद्धिजन्यस्य नाशानुपपत्तिः। न च चैत्रीयद्वित्वनाशे चैत्रापेक्षाबुद्धिनाशो हेतुरित्येवं विशेष्यैव कल्प्यते; परमाणुद्वित्वे तु यादृशोपाधिविशिष्टाया ईश्वरापेक्षाबुद्धेर्हेतुत्वं, तादृशोपाधिनाशादेव तन्नाशः, अविशिष्टायास्तस्या हेतुत्वे सर्वथा द्वित्वोत्पत्तिप्रसङ्गादिति वाच्यम; स्वाव्यवहितपूर्वक्षणावच्छिन्नत्वेनैव तस्यापेक्षाबुद्धित्वमिति तन्नाशात्परमाणुद्वित्वनाशे तस्य क्षणिकत्वप्रसङ्गात्, अतिरिक्तानुगतोपाधेश्चानिर्वचनात्। अपि च-एवं तत्तद्द्वित्वनाशे तत्तदपेक्षाबुद्धिनाशत्वेन हेतुत्वे महागौरवम्। न च फलमुखत्वादस्यादोषत्वम्, अस्यां कल्पनायामेव तावद् गुरुतरं कल्पनीयमिति प्रागेवोपपादितौ तद्दोषताया वज्रलेपत्वात्, तददोषत्वे प्रागनुपपत्तेरेव बीजत्वात्। अपि च-मानाभावाऽऽदिव्याप्यजातिविशेषेणापेक्षाबुद्धेर्द्वित्वाऽऽदिहेतुत्वे ईश्वरापेक्षाबुद्ध्या परमाणुद्वित्वाऽऽदिजननापत्तिः, ईश्वरज्ञानसाधारणद्वित्वाऽऽदिजनकतावच्छेदकजातिस्वीकारे च जन्यसाक्षात्कारित्वाऽऽदिना साङ्कर्यं द्वित्वाऽऽद्युत्पत्तिकाले द्वित्वाऽऽद्यापत्तेश्च दुर्निवारा। एतेन द्वित्वाऽऽदिजनकतावच्छेदकतयाऽपेक्षाबुद्धिनिष्ठलौकिकविषयत्वस्वीकारोऽपि निरस्तः, परार्धाऽऽदिसंख्याऽनुत्पत्तिप्रसक्तेश्च, तदाश्रययावद्द्रव्यवृत्तिलौकिकविषयतायाः असंभवात्, ईश्वरीयापेक्षाबुद्धेरेव तदुत्पत्त्यङ्गीकारे चाऽन्यत्रापि कारणान्तरोच्छेद इति न किञ्चिदेतदित्याहुः॥ केचित्तु द्वित्वत्रित्वाऽऽदिकं तुल्यव्यक्तिवृत्तिकमेव सामान्यम्, अनित्यस्य संयोगाऽऽदेरिव नित्यस्यापि द्वित्वाऽऽदेर्यावत्संश्रयवृत्तित्वे विरोधाभावात्, भिन्नेन्द्रियग्राह्याणां रूपरसाऽऽदीनामिव समानेन्द्रियग्राह्याणामपि सत्यप्येकावच्छेदेन समानदेशत्वे प्रतिनियतव्यञ्जकव्यङ्ग्यत्वे विरोधाभावात्, सहचारदर्शनमात्रस्याकिञ्चित्करत्वात्। भेदश्च विरुद्धधर्माऽध्यासात्। स च न्यूनाधिकदेशपर्याप्तवृत्तित्वमित्याहुः॥ परे तु घटकुटकुण्यकुशूलेषु द्वित्वत्रित्वाऽऽदिप्रतीतावेकतरनाशे तद्भूयोद्वित्वाऽऽदेरपि संयोगाऽऽदेरिव विनाशप्रत्ययादनित्यवृत्तिनानाव्यक्तिकमेव द्वित्वाऽऽदिकम्, आश्रयविनाशोत्पादाभ्यामेव तस्योत्पादविनाशौ। असमवायिकारणं तु चाऽऽश्रयस्यैकत्वं, परिणामं वा, एकवृत्तिकमेकत्वमिव तुल्यव्यक्तिवृत्तिकं द्वित्वाऽऽद्यपि नानेकम्, तुल्यव्यक्तिवृत्तिकाद्वित्वाऽऽदेः प्रतिबन्धकत्वात्। बुद्धिविशेषस्तद्द्रव्यजन्यो, न तूत्पादको, नित्येषु चैकव्यक्तिकमनेकव्यक्तिकं वा नित्यमित्याहुः॥ वयं तु ब्रूमः-जन्यत्वनये अपेक्षाबुद्धेर्जन्यता-

वच्छेदकमेकत्वान्यसंख्यात्वं वाच्यम् । यद्वा-एकत्वजन्यतावच्छेदकतया द्वित्वमारभ्य परार्द्धपर्यन्तमेका जातिः सिध्यति, लाघवात् । ननु जन्यसंख्यात्वमेवैकत्वजन्यतावच्छेदकं,कारणकार्यैकार्थप्रत्यासत्तिभेदात् इति तस्यैव द्वित्वाऽऽदिपरार्द्धपर्यन्तसंख्यावृत्तिजातिविशेषितस्य तथात्वम् । व्यङ्ग्यत्वनये चैकत्वाऽन्यसंख्याप्रत्यङ्क्तत्वम् , उक्तजातिविशेषप्रत्यङ्क्तत्वं वाऽपेक्षाबुद्धेर्जन्यतावच्छेदकं वाच्यम्। द्वयोरप्यनयोर्मतयोरेको धान्यराशिरित्यादिप्रत्ययसिद्धेः सामूहिकैकत्वे व्यभिचारः । न च तत्रैकत्वं गौणमेव; वस्तुतस्त्वपेक्षाबुद्ध्या राशि-सेना-वनाऽऽदौ बहुत्वविशेष एवोत्पाद्यते,व्यङ्ग्यते वेति वाच्यम्;स्वारसिकैकत्वानुभवविरोधात्। एते बहवः कणाः,एते बहवः करि-तुरग-रथ-पदातयः, एते बहव आम्र-निम्ब-धव-खदिरा इत्यादौ राशित्व-सेनात्व-वनत्वाऽद्यनापत्तेश्च । अपेक्षाबुद्ध्या तत्र राशित्वाऽदिरूपस्यैव बहुत्वत्वमेकत्वद्वित्वान्यसंख्यात्वं द्वित्वमारभ्य परार्द्धपर्यन्तवृत्ति जातिविशेषो वा,राशित्वाऽऽदिरूपबहुत्वे चापेक्षाबुद्धिविशेषजन्यतावच्छेदकस्तदव्याप्य एव जातिविशेषः। बहुत्वं च तदवच्छिन्नोपस्थितिश्चैकवचनान्तराद्यादिपदं वेति शाब्दबोधस्थले नानुपपत्तिः । प्रत्यक्षे च बहव इत्यादौ क्वचिद् दोषवशात्तदग्रहान्नानुपपत्तिरिति वाच्यम्; अनुभूयमानैकत्वप्रतीतेर्बहुत्वाविशेषेण समर्थने द्वित्वाऽऽदिप्रतीतेरप्येकत्वविशेषेणैव समर्थयितुं शक्यत्वाद्;वास्तवाभावे गौणानुपपत्तेरप्युक्तत्वाच्च। न च 'ताविमौ नीलपीतौ' इति गौणद्वित्वाऽऽदिलक्षणं द्वाविमौ घटपटावित्यत्र द्वित्वमनुभूयते। न चैकत्र ज्ञाने द्वित्वं प्रकारः, अन्यत्र तु नेत्यपि विनिगन्तुं शक्यम्; विजातीयज्ञानविषयत्वसंबन्धेन स्वस्थितस्वप्रकारतया बुद्धिवैलक्षण्योपपादनमप्युभयत्र तुल्ययोगक्षेमम्। एकऽऽत्मन्यपि च घटे नीलत्वघटत्वाभ्यां द्वित्वमनुभूयत एव,अनुभूयते एव चैते वृक्षा वनमिति बहुत्वाऽवच्छिन्नेऽपि केनचिदुपाधिना एकाकारत्वमिति स्वसामग्रीप्रभवैकत्वद्वित्वानन्तपर्यायोपेतद्रव्य एवाक्षबुद्धिहेतोरपेक्षाऽऽत्मकजात्यवया क्वयोपशमं कदाचिदेकत्वप्रकारकं कदाचिच्च द्वित्वाऽऽदिप्रकारकं ज्ञानं जायते,इत्यपेक्षाबुद्धिगम्यत्वमेव द्वित्वाऽऽदेर्युक्तम्। अत एव नयरूपत्वादस्या नयान्तरसंयोजनया सप्तभङ्गीरीतिरपि संगता। यादृशविषयतावच्छिन्नाया अपेक्षाबुद्धेः परैर्जनकत्वं व्यङ्ग्यकत्वं वा स्वीक्रियते, तादृशविषयतानिरूपितापेक्षात्वाऽऽश्रयविषयता द्वित्वाऽऽदौ नाऽस्माकमसुलभा। सामान्यविशेषत्वाऽऽदेरापेक्षिकत्वेऽपीयमेव रीतिरनुसर्तव्या। न चैवमनपेक्षैकत्वद्वित्वाऽऽदिप्रत्यक्षाऽनुपपत्तिः,द्रव्यनयावलम्बनेनानपेक्षाऽऽत्मकविषयतान्तरस्यापि स्वीकारात्। अत एव सापेक्षत्वमपि स्याद्वादः, अस्मदुक्तपक्ष एवापेक्षाबुद्धिद्वित्वबुद्ध्योः पौर्वापर्यानवभासोपपत्तिः, अनन्तकार्यकारणभावप्रतिबध्यप्रतिबन्धकभावाऽऽदिकल्पनागौरवदूषणानवकाशश्चेति सर्वमवदातम।

(७) तस्मात्स्वसमये परसमये एकत्वद्वित्वाऽऽदिप्रकारकनानाविधलौकिकव्यवहारे च नयापेक्षयैव विविक्तो बोध इति स्थितम्। फलितमाह-

तेन सापेक्षभावेषु, प्रतीत्यवचनं नयः ।
अभावाऽभावरूपत्वात्, सापेक्षत्वं विधावपि ॥ ६ ॥

(तेनेति) तेनोक्तहेतुना सापेक्षत्वभावेषु परस्परप्रतियोगिषु धर्मेषु प्रतीत्यवचनमपेक्षाऽऽत्मकं वाक्यं नय इति सिद्धम्। नन्वेवं स्याद्वाऽस्त्येवेत्येकवचनं नयः स्यात्, न तु स्याद्वस्त्येवेति; तदर्थस्य विधेरप्रतियोगिकत्वात्। अत एवाऽऽह-विधावपि अस्तित्वाऽऽदिभावेऽपि, अभावाभावरूपत्वाद्धास्तित्वाऽऽद्यभावरूपत्वात्तेन रूपेण प्रतियोगिनिरूपणाधीननिरूपणतया सापेक्षत्वमस्त्येव।

अयं भावः-अभावज्ञानेऽपि न सर्वत्र प्रतियोगिज्ञानापेक्षा,प्रतियोगिज्ञानं विनाऽपीदन्त्वप्रमेयत्वाऽऽदिनाभावभानस्य सार्वजनीनत्वात्। घटाभावत्वाऽऽदिना घटाऽभावाऽऽदिज्ञाने घटज्ञानाऽऽद्यपेक्षाप्रतियोगिनिरूपणेन तेषां सप्रतियोगिकत्वं ग्रहीष्यते, तर्हि नास्तित्वाभावत्वाऽऽदिनाऽस्तित्वाऽऽदीनां तेन रूपेण तथात्वे तुल्यमभावाभावः प्रतियोग्येवेति परेषामपि मूलसिद्धान्तात् संयोगाऽऽद्यावेव विशेषणतात्वकल्पनया निर्बाधेन नास्तीति प्रतीतिबलादतिरिक्त एव स इति नव्यमतनिर्युक्तिकत्वात्। तस्मात्स्वरूपतोऽभावाभावत्वयोरपि निष्प्रतियोगिकत्वं, विशिष्टतया तु द्वयोरपि सप्रतियोगिकत्वमिति स्याद्वाद एव श्रेयान्। अथ निष्प्रतियोगिकाभावपक्षे प्रतियोगिज्ञानस्याऽभावं प्रत्यहेतुत्वे विना प्रतियोगिज्ञानेनेत्याकारकप्रत्ययाऽऽपत्तिः। न चाभावत्वस्याऽदीदन्त्येन प्रहादापादकाभावः प्रथममभावाभावत्वयोर्निर्विकल्पकेऽभावत्वाकारकप्रत्यक्षाऽऽपत्तेर्दुर्वारत्वादिन्द्रियस्य चक्षुस्त्वगादिनेदमिन्नत्वेन महागौरवम्। न च पृथग्प्रतियोगिधीहेतुत्वेऽपि नेत्याकारकप्रत्यक्षाऽऽपत्तिः, उपस्थितस्य प्रतियोगिनोऽभावे वैशिष्ट्याभाने बोधकाभावात्। न चाऽभावो न घटीय इत्यादिबाधधीशाद्यां तदापत्तिः, अभावत्वावच्छेदेनाभावे तादृशबाधधिय आद्यार्थत्वात्, अभावत्वसामानाधिकरण्येन च तदृशायामपि प्रतियोगिवैशिष्ट्याभानसंभवात्। यद्वा-घटत्वाऽऽद्यवच्छिन्नप्रकारतानिरूपिताभावविषयताकस्य प्रत्यक्षे घटाऽऽदिधियो हेतुत्वम्, अन्यथा घटाऽऽद्यभाव इत्याकारकप्रत्यक्षं च न जायते, निखिलप्रतियोगिज्ञानकार्यताऽवच्छेदकाऽऽक्रान्तिदृशप्रत्यक्षे यत्किञ्चित्प्रतियोगिज्ञाने असंजनात्, यावत्प्रतियोगिज्ञानस्य चाऽसंभवात्, अभावत्वांशे निर्विकल्पकत्वं, भावांशे यत्किञ्चित्प्रतियोगिविशिष्टविषयत्वाद् यत्किञ्चित्प्रतियोगित्वात् साध्यमेवेति नानुपपत्तिरिति चेत्? न। प्रतियोगिज्ञानाभावेऽप्यभावत्वमात्रेण प्रत्यक्षस्येष्टत्वात्, शून्यमिदं दृश्यते इत्यादिप्रत्ययात्, तत्स्थमेवाभावत्वस्य भावभेदस्य पिशाचाऽऽदिभेदवद् योग्यस्य घटो नाऽस्तीत्यादौ स्वरूपतो भानमिति प्राचां वचनस्योपपत्तेः। न नूल्लेखस्तु प्रतियोगिवाचकपदनियतो न सार्वत्रिकः। किञ्च-उक्तरीत्या प्रतियोगिज्ञानस्य हेतुत्वे केवलाऽभावत्वनिर्विकल्पकाऽऽपत्तिः, अभावत्वस्यानवगतत्वात्। अन्यथाऽभावविशिष्टबुद्धावपि तन्निर्विकल्पकायोगात्। अपि च-घटपटौ नेत्यादि प्रत्यक्षं घटज्ञानपटज्ञानाऽऽदिकार्यताऽवच्छेदकाऽनाऽऽक्रान्ततया तद्धिरहेऽपि स्यात्, तस्माद् घटपटत्वाऽऽद्यवच्छिन्नप्रकारतानिरूपितविषयताकप्रत्यक्षत्वमेव लाघवाद् घटाऽऽदिधीकार्यताऽवच्छेदकं युक्तमिति घटाऽस्तित्वनास्तित्वयोः सप्रतियोगिताऽप्रतियोगिकत्वे तुल्ययोगक्षेमे; त्वदुक्तहेतुसद्भावेऽपि लाघवाद् भावांशत्यागेन केवलाऽभावस्यैव केवलाभावस्याऽपि न भानमिति वक्तुं शक्यत्वात्, निर्विकल्पके प्रमाणाभावात् क्वयोपशमविशेषेणैव तत्तद्विशिष्टज्ञानोपपत्तौ तस्य तदकल्पकत्वात्। अत एव "द्रव्यं पर्यायवियुतं, पर्याया द्रव्यवर्जिताः। क्व कदा केन किंरूपाः, दृष्टा मानेन केन वा ?" ॥१॥ इत्यस्मत्संप्रदायवृद्धाः संगिरन्ते। शुद्धाभावप्रत्यक्षप्रतियोगितासंबन्धावच्छिन्नप्रकारतानिरूपिताभावविषयताकप्रत्यक्ष एव विशेषणतायां हेतुत्वान्न भवतीत्यपि रिक्तं वचः; प्रतियोगितामात्रेण ऊर्ध्वं नास्ति, मेयं नास्तीत्यादे-

रापत्तेः; प्रकारीभूतकिञ्चिद्धर्मावच्छिन्नस्यैव प्रतियोगितावि-शेषणेऽपि न विस्तारः, घटाऽभावपटाऽभावयोरुभयोः सांनिकर्षे घटाऽभावांशे प्रतियोगिविशेषितस्य पटाऽभावांशे च तद्विशेषितस्य समूहाऽऽलम्बनस्य प्रमाणात् । किञ्चैवमिदन्त्वादिनाऽभावप्रत्यक्षं न स्यात्, न स्याच्चाभावप्रतियोगिघट इत्याद्याकारं, तादृशप्रत्यक्षेष्वपि पृथक्कारणत्वकल्पने चाऽतिगौरवम् । तस्मात्सन्निकर्षमात्रस्यैव किञ्चिद्धर्मावच्छिन्नविषयतानिरूपितविषयताकप्रत्यक्षत्वाऽवच्छिन्ने, विशिष्टाऽऽकारप्रत्यक्षत्वाऽवच्छिन्ने वा हेतुत्वम् । अतो नाधायमात्रस्य विचारजन्यचरमशुद्धद्रव्योपयोगितुल्यतेति भावांशेऽभावांशे वा न शुद्धविषयकं प्रत्यक्षमित्यभाव एव सापेक्षो, न भाव इति किमिदमद्भुतरहस्यम् । एतेनाऽभावलौकिकप्रत्यक्षस्य घटाऽऽद्यन्यतमविशिष्टविषयकत्वनियमाद्विशेषसामग्री विना सामान्यसामग्रीमात्रात् कार्योत्पत्तेर्नाभावनिर्विकल्पकं, नेत्थाकारकप्रत्यक्षं वा;विशेषणाऽऽदिज्ञानरूपविशेषसामग्र्यभावात्;न चाऽभावलौकिकप्रत्यक्षत्वघटत्वाऽऽदिविशिष्टविषयकप्रत्यक्षत्वयोर्व्याप्यव्यापकभावाऽभावात्कथं विशेषसामग्रीत्वमिति वाच्यम्;कार्यतावच्छेदकीभूतधर्माऽऽश्रययत्किञ्चिद्व्यक्तिनिष्ठकार्यतानिरूपितकारणताऽवच्छेदकयावत्प्रत्येकतत्तद्धर्मावच्छिन्नसामग्रीत्वादवश्यं कार्यतद्धर्मावच्छिन्नोत्पत्तिरित्येव नियमात्, तद्धर्मव्याप्यधर्माऽवच्छिन्नयत्किञ्चिद्व्यक्तिनिष्ठकार्यतानिरूपितेत्याद्युक्तौ व्याप्तिज्ञानपरामर्शयोः सत्त्वे बाधधीसत्त्वेऽप्यनुमित्यापत्तौ [सकर्म] तद्धर्मव्याप्यव्यापकधर्माऽवच्छिन्नयत्किञ्चिद्व्यक्तिनिष्ठकार्यतानिरूपितेत्याद्युक्तौ गौरवात् । घटत्वाऽऽदिविशिष्टवैशिष्ट्यविषयकप्रत्यक्षत्वस्याऽभावलौकिकप्रत्यक्षत्वव्याप्यतत्तद्भावालौकिकप्रत्यक्षत्वव्याप्यतत्तद्ज्ञानलौकिकप्रत्यक्षत्वव्यापकत्वात्प्रकृतसिद्धेत्यादि नव्यकल्पनाऽपि निरस्ता । एवं सति द्रव्यविषयकप्रत्यक्षस्य,वस्तुविषयकप्रत्यक्षस्य वा यत्किञ्चित्पर्याप्तिविशिष्टविषयकत्वनियमेन भावनिर्विकल्पकस्य शुद्धभावप्रत्यक्षस्याऽपि चाऽसंभवात्। अत एव सविचारया सामान्यदृष्ट्या सर्वं निर्विकल्पकम्, विशेषदृष्ट्या च सर्वं सविकल्पकमित्यनेकान्तः पुरुषदृष्टान्तेन सम्मतौ प्रतिपादितः ।

तथाहि-

"वंजणपज्जायस्स उ, पुरिसो पुरिसो त्ति निच्चमविअप्पो ।
बालाऽऽइवियप्पं पुण, पासइ से अत्थपज्जाओ ॥ ३४ ॥
सविअप्प णिव्विअप्पं, इय पुरिसं जो भणेज्ज अविअप्पं ।
सविअप्पमेव वा णि-च्छएण ण य निच्छिओ समए ॥३५॥"

व्याख्या-व्यञ्जयति न्यनक्ति अर्थानिति व्यञ्जनं शब्दः, न पुनः शब्दनयः, तस्य ऋजुसूत्रसमानपर्यायविषयत्वात् । तस्य पर्यायो वाच्यता तद्ग्राहकनयेन पुरुषः पुरुष इति पुरुषत्वप्रकारकज्ञानविषय इति नित्यमाजन्मनो मरणान्तं यावद्विकल्पः पुरुषत्वाऽतिरिक्तप्रकारकज्ञानविषयः इदमुपलक्षणम्-द्रव्यवस्तुत्वाऽऽदिनाऽप्यविकल्पत्वस्य शुद्धद्रव्योपयोगे तु पदद्वयस्य निर्धर्मकत्वलक्षणया शुद्धधर्मिविषयकभानविषयत्वमेवाविकल्पकत्वं रूढ्यर्थम् । 'से' तस्य पुरुषस्यार्थपर्याय ऋजुसूत्राद्यर्थग्राहकनयः पुनर्बालाऽऽदिविकल्पमेव वा,निश्चयमविकल्पं स्यात्काराऽङ्कितदुर्नयपदघटितमहावाक्यबोधस्वरूपपुरुषद्रव्यं यो भणेद्-अविकल्पमेव सविकल्पमेव वा निश्चयनैकान्तेन स्वसमये परमार्थे न निश्चितः-निश्चयो निश्चितं तदस्यास्तीति निश्चितः,अर्श आदित्वादच्,प्रत्ययो, न तदन्यथेत्यर्थः । दुर्नयानिवेशान्नयदुस्त्वाद्वा संपूर्णानेकान्तवस्तुस्वरूपापरिच्छेदादिति रहस्यम् ॥ तदेवं निषेधवद् विधावपि पक्षत्वं प्रतिपादितम् । एवं स्वरूप्याऽऽद्यपेक्षया सन् पररूप्याऽऽद्यपेक्षयाऽसन् इति तृतीयोल्लिख्यमानावच्छेदकप्रतीत्याऽपि सापेक्षत्वं भावनीयम् । अत एव परेऽपि व्याप्यवृत्त्यव्याप्यवृत्त्यादिव प्रतीतिबलात् तत्तदवच्छिन्नवृत्तिकल्पनं स्वीकुर्वते इति दिक् । नयो० । रत्ना० ।

(८) सामान्यविशेषः । एवं निर्विकल्पसविकल्पस्वरूपे प्रतिपाद्यैव पुरुषाऽऽदिवस्तुनि तद्विपर्ययेण तद्वस्तु प्रतिपादयन् वस्तुस्वरूपानवबोधस्वात्मनि व्यवयत्यतीति दर्शनार्थमाह-

सविअप्पणिव्विअप्पं, इय पुरिसं जो भणेज्ज अविअप्पं ।
सविअप्पमेव वा णि-च्छएण ण य निच्छिओ समए ॥३५॥

सविकल्पनिर्विकल्पं स्यात्कारपदङ्कांकितं पुरुषं द्रव्यं यः प्रतिपादकस्तद्वस्तु ब्रूयादविकल्पमेव सविकल्पमेव वा, निश्चयेनेत्यवधारणेन, स यथाऽवस्थितवस्तुप्रतिपादने प्रस्तुतेऽन्यथाभूतं वस्तुतत्त्वं प्रतिपादयन्निश्चित इति निश्चितं तदस्यास्तीति निश्चितः,अर्श आदित्वादच् । समये परमार्थेनो वस्तुसत्त्वस्य परिच्छेत्तेति यावत् । तथाहि-प्रमाणपरिच्छिन्नं तथैव वादिसुसंवादि वस्तु प्रतिपादयन् वस्तुनः प्रतिपादक इत्युच्यते । न च तथाभूतं वस्तु केनचित्कदाचित् प्रतिपन्नं प्राप्यते वा, येन तथाभूतं तद्वचस्तत्र प्रमाणं भवेत्; तथाभूतवचनाभिधानात् । न चाप्रमाणतया लोके व्यपदेशमासादयेत् ।

परस्पराक्रान्तभेदाभेदाऽऽत्मकस्य वस्तुनः सदसद्भावमभिधायकस्य वचसः पुरुषस्याऽपि तदभिधानद्वारेण सम्यग् मिथ्यावादित्वं प्रतिपाद्याधुना भावविषयं तत्रैवैकान्तानेकान्ताऽऽत्मकमंशं प्रतिपादयतो विवक्षया सुनयदुर्नयप्रमाणरूपतां तत्प्रतिपादकं वचो यथाऽनुभवति, तथा प्रपञ्चतः प्रतिपादयितुमाह । यद्वा-यथैव तद्वस्तु व्यवस्थितं तथैव वचनात्प्रतिपादयतो निपुणत्वं भवति । अन्यथा साङ्ख्यबौद्धकणभुजामिव निरन्निरन्यपरस्परनिरपेक्षोभयवस्तुस्वरूपाभिधानायावस्तुधर्ममहन्मतानुसारिणामपि स्यादस्तीत्यादिसप्तविकल्परूपतामनापन्नवचनलक्षणस्यात्कारपदाङ्कांकितवस्तुधर्मप्रतिपादयतामनिपुणता भवेदिति प्रपञ्चतः सप्तविकल्पोत्थाननिमित्तमुपदर्शयितुं गाथासमूहमाह-

अत्थंतरभूएहि अ, नियएहि य दोहि समयमाईहिं ।
वयणविसेसाऽऽईयं, दव्वमवत्तव्वयं पमइ ॥ ३६ ॥

अथास्तात्पर्यार्थः-अर्थान्तरभूतः पटाऽऽदि-,निजैर्घटः,ताभ्यां निजार्थान्तरभूताभ्यां सदसत्त्वं घटवस्तुनः प्रथमद्वितीयभङ्गनिमित्तं प्रधानगुणभावेन भवतीति प्रथमद्वितीयौ भङ्गौ । यदा तु द्वाभ्यामपि युगपत्तद्वस्त्वभिधातुमभीष्टं भवति, तदाऽवक्तव्यभङ्गनिमित्तं तथाभूतस्य वस्तुनोऽभावात् तत्प्रतिपादकवचनातीतत्वात् तृतीयभङ्गसद्भावो, वचनस्य वा तथाभूतस्याभावाद्वक्तव्यं वस्तु । तथाहि-असत्त्वोपसर्जनसत्त्वप्रतिपादने प्रथमो भङ्गः, तद्विपर्ययेण तत्प्रतिपादने द्वितीयः, द्वयोस्तु धर्मयोः प्राधान्येन गुणभावेन च प्रतिपादने न किञ्चिद्वचः समर्थं, यतो न तावत्समासवचनं तत्प्रतिपादकम्; नापि वाक्यं संभवति । समासः षड्विधः । तावन्न बहुव्रीहिरत्र समर्थः,तस्याऽन्यपदार्थप्रधानत्वात्, अत्र चोभयप्रधानत्वात् । अव्ययीभावोऽपि नात्र प्रवर्त्तते, तस्यात्रार्थेऽसंभवात् । द्वन्द्वसमासे तु यद्यप्युभयपद-

प्राधान्यं,तथाऽपि द्रव्यवृत्तिस्तावन्न प्रकृतार्थप्रतिपादकः,गुणवृत्तिरपि द्रव्याऽऽश्रितगुणप्रतिपादको,द्रव्यमन्तरेण गुणानां तेषूत्पादादिक्रियाऽऽधारत्वासंभवात्तस्य द्रव्याऽऽश्रित्वाद् न प्रधानाऽऽश्रितयोर्गुणयोः प्रतिपाद्यत्वम् । तत्पुरुषोऽपि नाऽत्र विषये प्रवर्त्तते, तस्याऽप्युत्तरपदार्थप्रधानत्वात् । नाऽपि द्विगुः, संख्यापूर्वपदत्वात्तस्य । कर्मधारयोऽपि न, गुणाऽऽधारद्रव्याऽऽश्रयत्वात् । न च समासान्तरसद्भावः,येन युगपद्गुणद्वयं प्रधानभावेन समासपदवाच्यं स्यात् । अत एव न वाक्यमपि तथाभूतगुणद्वयप्रतिपादकं संभवति, तस्यापि पृथग्भिन्नार्थत्वात् । न च केवलं पदं वाक्यं वा लोकप्रसिद्धम्, तस्याऽपि परस्परापेक्षद्रव्याऽऽदिविषयतया तथाभूतार्थप्रतिपादकत्वायोगात् । न च-"तौ सत्" ॥३।२।११७॥ (पाणि०) इति शतृशानचोरिव साङ्केतिकपदवाच्यत्वम्, विकल्पप्रभवशब्दवाच्यत्वप्रसक्तेः, विकल्पानां च युगपदप्रवृत्तेर्नैकदा तयोस्तद्वाच्यतासंभवः,न च तेनार्थान्तरैकान्ताभ्युपगमेऽप्यर्थस्य वाच्यता, तथाभूतस्यात्यन्तासत्त्वात्, सर्वथा सत्त्वेऽनयोर्व्यावृत्तत्वान्महासामान्यवद्वाऽर्थत्वानुपपत्तेः, अर्थान्तरत्वे पररूपादिव स्वरूपादपि व्यावृत्तौ खरविषाणवदसत्त्वाद्वाच्यतैव । न च घटत्वे घटशब्दप्रवृत्तिनिमित्ते विधिरूपे सिद्धे असंबद्ध एव अर्थान्तरत्वे पररूपादपि तत्र पटाऽऽद्यर्थप्रतिषेध इति वाच्यम्, पटाऽऽदेस्तत्राभावाभावत्वे घटशब्दप्रवृत्तिनिमित्तस्य घटत्वस्यैवासिद्धेः, शब्दानां चार्थद्योतकत्वं न कारकत्वमिति तथाभूतार्थप्रकाशेन तथाभूतेन शब्देन विधेयमिति नासंबद्धस्तत्र पटाऽऽद्यर्थप्रतिषेधः। अथवा-सर्वं सर्वाऽऽत्मकमिति साङ्ख्यमतव्यवच्छेदार्थं तत्प्रतिषेधो विधीयते, तत्र तस्य प्रतीत्यभावात् । यद्वा-नामस्थापनाद्रव्यभावभेदेषु विधित्सितविधित्सितप्रकारेण प्रथमतृतीयौ भङ्गौ,न च तत्प्रकाराभ्यां युगपदादिष्टोऽयम्, तथाऽभिधेयपरिणामरहितत्वात्तस्य,यतो यद्यपि विधित्सितरूपेणाऽपि घटः स्यात्,प्रतिनियतनामाऽऽदिभेदव्यवहाराभावप्रसक्तिः । तथा च विधित्सितस्याऽपि नाऽऽत्मलाभ इति सर्वाभाव एव भवेत् । तथा यद्यविधित्सितप्रकारेणाऽप्यघटः स्यात्,तदा तन्निबन्धनव्यवहारोच्छेदप्रसक्तेरेव,एकपक्षाऽभ्युपगमेऽपि तदितराभावे तस्याप्यभाव इत्यपि वाच्यः । अथवा-स्वीकृतप्रतिनियतप्रकारे तत्रैव नामाऽऽदिके यः संस्थानाऽऽदिस्तत्स्वरूपेण घटः, इतरेण चाघट इति प्रथमद्वितीयौ, ताभ्यां युगपदभिधातुमशक्तेरवाच्यः । विवक्षितसंस्थानाऽऽदिनैव यदीतरेणाऽपि; घटरूपादेकस्य सर्वघटाऽऽत्मकत्वप्रसक्तिः । अथ विवक्षितेन, अघटे पटाऽऽदाविव घटार्थिनस्तत्राऽप्यवृत्तिप्रसक्तिः । एकान्ताऽभ्युपगमेऽपि तथाभूतस्य प्रमाणाऽविषयत्वनोऽसत्त्वादवाच्यः ॥३॥ यदि वा-स्वीकृतप्रतिनियतसंस्थानाऽऽदौ मध्यावस्थायां निजरूपम्,कुशूलकपालाऽऽदिलक्षणे पूर्वोत्तराऽवस्थेऽर्थान्तररूपम्, ताभ्यां सदसत्त्वे प्रथमद्वितीयौ, युगपत्ताभ्यामभिधातुमसामर्थ्यादवाच्यलक्षणस्तृतीयो भङ्गः। तथाहि-मध्यावस्थावदितरावस्थायामपि यदि घटः स्यात्तस्याऽनन्तत्वप्रसक्तिः। अथ मध्यावस्थारूपेणाऽप्यघटः, सर्वदा घटाभावप्रसक्तिः। अतीतानागतवर्त्तमानक्षणरूपतया सदसत्त्वात् प्रथमद्वितीयभङ्गौ,ताभ्यां युगपदभिधातुमशक्तेरवाच्यलक्षणस्तृतीयः । तथाहि-यदि वर्त्तमानक्षणवत्पूर्वोत्तरक्षणयोरपि घटः स्यात्तर्हि वर्त्तमानक्षणत्वमेवाऽसौ जातः, पूर्वोत्तरयोर्वर्त्तमानतामाप्तेः। न च वर्त्तमानक्षणमात्रमपि, पूर्वोत्तरापेक्षस्य तदभावेऽभावात् । अथाऽतीतानागतवर्त्तमानक्षणरूपतयाऽप्यघटः, एवं सति सर्वदा तस्याभावप्रसक्तिः, एकान्तपक्षेऽप्ययमेव दोष इत्यनावादेशवाच्यः ॥४॥ यद्वा-क्षणपरिणतिरूपे घटे लोचनप्रतिपत्तिविषयत्वाभ्यां निजार्थान्तरभूताभ्यां सदसत्त्वात् प्रथमद्वितीयौ भङ्गौ,ताभ्यां युगपदभिधातुमशक्योऽवाच्यः। तथाहि-लोचनप्रतिपत्तिविषयत्वेनैव यदीन्द्रियान्तरप्रतिपत्तिविषयत्वेनाऽपि घटः स्यादिन्द्रियान्तरकल्पनावैयर्थ्यप्रसक्तिः, इन्द्रियसङ्करप्रसक्तिश्च । अथेन्द्रियान्तरप्रतिपत्तिविषयत्वेनैव चक्षुर्ग्राह्यप्रतिपत्तिविषयत्वेनापि न घटः,तर्हि तस्याऽरूपत्वप्रसक्तिरेकान्तवादेऽपि तदितराभावे तस्याप्यभावादवाच्य एव । अथ वा—लोचनप्रतिपत्तिविषये तस्मिन्नेव घटे घटशब्दवाच्यता निजं रूपं, कुटशब्दाभिधेयत्वमर्थान्तरभूतं रूपं, ताभ्यां प्रथमद्वितीयौ, युगपत्ताभ्यामभिधातुमिष्टोऽवाच्यः । यदि हि घटशब्दवाच्यत्वेनेव कुटशब्दवाच्यत्वेनापि घटः स्यात्तर्हि त्रिजगत एकशब्दवाच्यताप्रसक्तिः, घटस्य वाऽशेषपटाऽऽदिशब्दवाच्यत्वप्रतिपत्तौ समस्ततद्वाचकशब्दप्रतिपत्तिप्रसङ्गश्च । तथा घटशब्देनाऽपि वाच्यवाच्यः स्याद्, घटशब्दोच्चारणवैयर्थ्यप्रसक्तिः । एकान्ताऽभ्युपगमेऽपि घटस्यैव सत्त्वात्सङ्केतद्वारेणाऽपि न. तद्वाचकः कश्चिच्छब्द इत्यवाच्य एव । अथवा-घटशब्दाभिधेये तस्मिन्नेव घटे हेयोपादेयान्तरकबहिरङ्गोपयोगायोगरूपतया सदसत्त्वात्प्रथमद्वितीयौ, ताभ्यां युगपदादिष्टोऽवाच्यः। यदि हि हेयबहिरङ्गानर्थक्रियाकार्यसन्निहितरूपेणार्थक्रियाक्षमाऽऽदिरूपेणैव घटः स्यात्,तदा पटाऽऽदीनामपि घटत्वप्रसक्तिः, तर्हि घटोपादेयसन्निहिताऽदिरूपेणाप्यघटः स्यात् । अन्तरङ्गस्य वक्तुगतहेतुफलभूतघटाकारावबोधकत्वे तस्योपयोगस्याऽप्यभावे घटस्याऽप्यभावप्रसङ्ग इत्यवाच्यः,एकान्ताऽभ्युपगमेऽप्ययमेव प्रसङ्ग इत्यवाच्यः । अथवा-तत्रैवोपयोगवदर्थावबोधकत्वानभिमतार्थाऽनवबोधकत्वेन सदसत्त्वात् प्रथमद्वितीयौ , ताभ्यां युगपदादिष्टोऽवाच्यः , विवक्षि—तार्थप्रतिपादकत्वेनेवेतरेणाऽपि यदि घटः स्यात्प्रतिनियतोपयोगाभावः, तथाऽभ्युपगमे प्रतिनियतरूपोपयोगप्रतिपत्तेर्न भवेत् । तदुपयोगरूपेणापि यद्यघटो भवेत्,तदा सर्वाभावो, विशेषप्रसङ्गो वा । न चैवम्, तथाऽप्रतीतेः; एकान्तपक्षेऽप्ययमेव प्रसङ्ग इत्यवाच्यः ॥ ६ ॥ अथवा सत्त्वमसत्त्वं वाऽर्थान्तरभूतं, निजं घटत्वं,ताभ्यां प्रथमद्वितीयाभ्यामभेदेन,ताभ्यामनिर्दिष्टो घटोऽवक्तव्यो भवति । तथाहि-यदि सत्त्वमासाद्य घटत्वं विधीयते तदा सत्त्वस्य घटत्वव्याप्तेस्तस्य सर्वगतत्वप्रसङ्गः, तथाऽभ्युपगमे प्रतिभासबाध्यव्यवहारविलोपश्च । तथा-घसत्त्वमर्थमप्यनूद्य यदि घटत्वं विधीयते, तर्हि प्रागभावाऽऽदेश्चतुर्विधस्याऽपि घटेन व्याप्तेरघटत्वप्रसङ्गः, अघटत्वमनूद्य सत्त्वं विधीयते तदा घटत्वं वस्तुदेव सदसत्त्वे प्रसज्येत । तथा च-पटाऽऽदीनां प्रागभावाऽऽदीनां वा नावप्रसक्तिरिति प्राक्तनन्यायेन विशेषणविशेष्यलोपात्स न घट इत्येवमवक्तव्योऽघट इत्येवमप्यवक्तव्यः; न चैतत्तो वाच्यः, अनेकान्तपक्षे तु कथञ्चिदवाच्य इति न कश्चिद्दोषः ॥ १० ॥ यदु व्यञ्जनपर्यायोऽर्थान्तरभूतस्तदतद्विषयत्वात्तस्य घटार्थपर्यायवस्त्वन्यत्राप्रवृत्तेर्निजः, ताभ्यां प्रथमद्वितीयाभ्यां भेदेन ताभ्यां निर्देशो वक्तव्यः, यतोऽत्रापि यदि व्यञ्जनमात्रलक्षो घटपर्यायविधिः,तदा तस्याऽशेषघटाऽऽत्मकताप्रसक्तिरिति भेदनिबन्धनतद्व्यवहारविलोपः । अथाऽर्थपर्यायमनूद्य व्यञ्जनपर्यायविधिः, तत्रापि कार्यकारणव्यतिरेकाभावप्रसक्तिः, सिद्धविशेषानुवादेन घटत्वसामान्य-

विधाने तस्याकार्यत्वात् । एवं च घटस्याभावादवाच्यः, अनेकान्तपक्षेऽपि युगपदभिधातुमशक्यत्वात् कथञ्चिदवाच्यः सिद्धः ॥१२॥ यद्वा-सर्वमर्थान्तरभूतं,तस्य विशेषवदेकत्वादनन्वयिरूपता,अत एव न तावद्वाच्यमस्त्यविशेषवत्,अन्यविशेषस्तु निजः सोऽप्यवाच्यः, अनन्वयात् । प्रत्येकवक्तव्याभ्यां ताभ्यामादिष्टो घटोऽवक्तव्यः, अनेकान्तपक्षे तु कथञ्चिदवक्तव्यः । अथवा-सदसद्भूतरूपाः सत्त्वाऽऽदयो घट इत्यत्र दर्शने अर्थान्तरभूताः सत्त्वाऽऽदयो निजसदसद्भूतरूपत्वाभ्यामादिष्टो घटोऽवक्तव्यः, यतः सदसद्भूतरूपस्य सत्त्वरजस्तमःस्वरूपत्वे रजस्तमसामभावप्रसक्तिः, तेषां परस्परैलक्षण्येनैव सत्त्वात्सदसद्भूतरूपत्वे च वैलक्षण्याभावादभाव इति विशेष्याभावादवाच्यः । असत्त्वेत्वसत्कार्योत्पादप्रसक्तः । न चैतदभ्युपगम्यते,अभ्युपगमेऽपि विशेषणाभावादवाच्यः। अथैवं रूपाऽऽदयोऽर्थान्तरभूता असदभूतरूपमेवं निजं,ताभ्यामादिष्टोऽवक्तव्यः,यथा ह्यरूपाऽऽदिव्यावृत्ता रूपाऽऽदयः,त एव च रूपाऽऽदीनां घटतामवाच्याः,रूपाऽऽदित्वाद् घटस्य,न हि परस्परविलक्षणबुद्धिग्राह्या रूपाऽऽदय एकानेकाऽऽत्मकप्रत्ययग्राह्यरूपाऽऽदिरूपघटतां प्रतिपद्यन्ते, इयं घटता अवाच्यरूपाऽऽदित्वाद् घटस्य न हि परस्परविलक्षणेति विशेष्यलोपादवाच्यः। यदि वा-रूपाऽऽदयोऽर्थान्तरभूताः, असदभूतार्थो निजः, ताभ्यामादिष्टो घटोऽवक्तव्यः, रूपाऽऽद्यात्मकैराभासप्रत्ययविषयव्यतिरेकेणापरसंबन्धाप्रयगतेर्विशेष्याभावाद्रूपाऽऽदिमान् घट इत्यबाह्यगतेराकारप्रतिभासाद् व्यतिरेकेणापररूपाऽऽदिप्रतिभास इति विशेषणाभावादप्यवाच्यः, अनेकान्ते तु कथञ्चिदवाच्यः ॥ १५ ॥ अथवा-बाह्योऽर्थान्तरभूतः,उपयोगस्तु निजः,ताभ्यामादिष्टोऽवक्तव्यः। तथाहि-य उपयोगः स घट इति यदुपेतः,तदुपयोगमात्रकमेव घट इति सत्त्वोपयोगस्य घटत्वप्रसक्तिरिति प्रतिनियतस्वरूपाभावादवाच्यः । अथाऽयं घटस्य उपयोग इत्युच्यते, तथाऽप्युपयोगस्यार्थत्वप्रसक्तिरित्युपयोगाभावे घटस्याऽप्यभावः, ततश्च कथञ्चिदवाच्यः ॥ १६ ॥ एते च त्रयो भङ्गा गुणप्रधानभावेन सकलधर्माऽऽत्मकैकवस्तुप्रतिपादकाः स्वयं तथाभूताः सन्तो निरवयवप्रतिपत्तिद्वारेण सकलादेशाः। वक्ष्यमाणास्तु चत्वारः सावयवप्रतिपत्तिद्वारेणाशेषधर्मोऽऽक्रान्तं वस्तु प्रतिपादयन्तोऽपि विकलादेशा इति केचित्प्रतिपन्नाः। वाक्यं च सर्वमेकानेकाऽऽत्मकं सत्त्वाभिधेयमपि तथाभूतमवबोधयति,यतो न तावन्निरवयवेन वाक्येन वस्तुस्वरूपाभिधानं संभवति । अनन्तधर्मोऽऽक्रान्तैकाऽऽत्मकत्वाद्वस्तुनो निरवयववाक्यस्य त्वेकस्वभाववस्तुविषयत्वात्तथाभूतस्य च वस्तुनोऽसंभवान्निरवयवस्य तस्य वाक्यमभिधायकम्,नाऽपि सावयवं वाक्यं वस्त्वभिधायकं संभवति; वस्तुन एकत्वात् । न च वस्तुनो व्यतिरिक्तास्तदेशाः, तदव्यतिरेकेण तेषामप्रतीतेरेकस्वरूपव्याप्त्याऽनेकांशप्रतिभासः,न च तदेकाऽऽत्मकमेव,अनेकांशानुरक्तस्यैवैकाऽऽत्मनः प्रतिभासात्,अतो वस्तुन एकानेकस्वभावत्वात् तथाभूतवस्त्वभिधायकाः शब्दा अपि तथाभूता एव,नैकान्ततः सावयवाः,उत नैकान्ततो निरवयवरूपा वा;तत्र विवक्षाकृतप्रधानभावः सदेकधर्माऽऽत्मकस्यापेक्षितोऽपराशेषधर्मक्रोडीकृतस्य वाक्यार्थस्य स्यात्कारपदलाञ्छितवाक्यतापत्तेः,स्यादस्ति घटः, स्यान्नाऽस्ति घटः,स्यादवक्तव्यो घटः,इत्येते त्रयो भङ्गा इति सकलादेशाः। विवक्षावैरचिताद्विचित्रधर्मानुरक्तस्य स्यात्कारपदसंसूचितसकलधर्मस्वभावस्य धर्मिणो वाक्यार्थरूपस्य प्रतिपत्तेरत्वारो वक्ष्यमाणका विकलादेशाः-स्यादस्ति च नास्ति घट इति प्रथमो विकलाऽऽदेशः, स्यादस्ति चाऽवक्तव्यश्च घट इति द्वितीयः, स्यान्नास्ति चाऽवक्तव्यश्च घट इति तृतीयः, स्यादस्ति च नास्ति चावक्तव्यश्च घट इति चतुर्थः । एत एव सप्त भङ्गाः स्यात्पदलाञ्छनविरहिणोऽवधारणैकस्वभावा विषयाभावतो दुर्नया भवन्ति । धर्मान्तरोपादानप्रतिषेधाकरणात् स्वार्थमात्रप्रतिपादनप्रवणा एत एव सुनयरूपतामासादयन्ति;स्यात्पदलाञ्छनविवक्षितैकधर्मावधारणवशाद्वा सुनयाः । द्रव्यादेरेकदेशस्य व्यवहारनिबन्धनत्वेन विवक्षितत्वाद् धर्मान्तरस्य वा निषिद्धत्वादतः स्यादस्तीत्यादिप्रमाणमस्त्येवेत्यादिदुर्नयः, अस्तीत्यादिकः सुनयः।

ननु संव्यवहारात् स्यादस्त्येवेत्यादिः सुनय एव व्यवहारकारणम्, स्वपराव्यावृत्तवस्तुविषयप्रवर्त्तकवाक्यव्यवहारकारणत्वात्, अन्यथाऽतदयोगादेवं निरवयवाक्यस्वरूपं दर्शयितुमाह-

अह देसो सब्भावे, देसोऽसब्भावपज्जवे णियओ ।
तं दवियमत्थि नत्थि य, आएसविसेसियं जम्हा ॥१७॥

(अथेति) यदा देशो वस्तुनोऽवयवसद्भावेऽस्तित्वे नियतः सश्नेवायमित्येवं निश्चितोऽपरश्च देशोऽसद्भावे एव पर्याये नास्तित्व एव नियतोऽसन्नेवायमित्यवगतः; अवयवेभ्योऽवयविनः कथञ्चिदभेदादवयवधर्मैस्तस्याऽपि तथाव्यपदेशो यथा कुण्डो देवदत्त इति; ततोऽवयवसत्त्वासत्त्वाभ्यामवयव्यपि सन् न संभवति। ततस्तद् द्रव्यमस्ति च नास्ति चेति भवत्युभयप्रधानावयवभागेन विशेषितं यस्मात्। तथाहि-यद्वयवो न विशिष्टधर्मिणोऽस्ति, परद्रव्याऽऽदिरूपेण च स एव नाऽस्ति। तथा च पुरुषाऽऽदिवस्तुविवक्षितपर्यायेण बाल्याऽऽदिना परिणतं, कुमाराऽऽदिना वा परिणतमित्यादिष्टमिति योज्यम ।

पूर्वभङ्गकप्रदर्शितन्यायेन पञ्चमभङ्गकप्रदर्शनमाह—

सब्भावे आइट्ठो, देसो देसो य लक्खयट्ठा जस्स ।
तं अत्थि अवत्तव्वं, च होइ दवियं वियप्पवसा ॥१८॥

सद्भावेऽस्तित्वे यस्य यस्य संभवति घटाऽऽदेर्धर्मिणो देशो धर्म आदिष्टोऽवक्तव्यानुविद्धस्वभावः,अन्यथा तदसत्त्वात्,न ह्यपरधर्मापरिभक्ततामन्तरेण विवक्षितधर्मास्तित्वमस्य संप्रवति । खरविषाणाऽऽदेरिव तस्यैवापरो देश उभयथाऽस्तित्वनास्तित्वप्रकाराभ्यामेकदैव विवक्षितोऽस्तित्वानुविद्ध एवावक्तव्यस्वभावः;अन्यथा तदसत्त्वप्रसक्तिः। न ह्यस्तित्वाभावे उभयान्तिरिक्तता शशशृङ्गाऽऽदेरिव तस्य संभवति, प्रथमतृतीयकेवलभङ्गव्युदासस्तथाविवक्षावशात्कृतो द्रष्टव्यः, तत्र प्रथमतृतीययोर्भङ्गकयोः परस्परविशेषणभूतयोः प्रतिपाद्येनाधिगन्तुमिष्टत्वात्, प्रतिपादकेनाऽपि तथैव विवक्षितत्वाद्, तत्र तु तद्विपर्ययादतद्धर्माऽऽत्मकस्य धर्मिणः प्रतिपाद्यानुरोधेन तथाभूतधर्माऽऽक्रान्तत्वेन च वक्तुमिष्टत्वात्तद्रूपमस्ति चाऽवक्तव्यम, तद्धर्मविकल्पनवशात् ।

धर्मयोस्तयापरिक्षतयोस्तथा व्यपदेशे धर्मोऽपि तद्द्वारेण तथैव व्यपदिश्येतेति षष्ठभङ्गकं दर्शयितुमाह-

आइट्ठोऽसब्भावे, देसो देसो अ लभयट्ठा जस्स ।
तं णऽत्थि अवत्तव्वं, च होइ दवियं वियप्पवसा ॥१९॥

आदेशमन्तरेण विवक्षितधर्म्मास्तित्वमस्य न संजघटि, यस्य वस्तुनो देशोऽसत्त्वे निश्चितोऽसत्त्वेनेष्यमित्यवक्तव्याऽनुविद्धोऽपरस्मादनुविद्ध उभयथा सप्तलँक्षेत्येवं युगपच्चिन्तितस्तदा तद्द्रव्यं नास्ति चावक्तव्यं च भवति, विकल्पवशाद् व्यपदेशाद् द्रव्यमपि तद्द्रव्यपदेशमासादयति । केवलद्वितीयतृतीयभङ्गकव्युदासेन षष्ठभङ्गः प्रदर्शितः ।

सप्तमप्रदर्शनायाऽऽह-

सब्भावाऽसब्भावे, देसो देसो य उभयहा जस्स ।
तं अत्थि णत्थिऽवत्त-व्वयं च दवियं वियप्पवसा ॥४०॥

यस्य देशिनो देशोऽवयवो देशो धर्मो वा सद्भावे नियतो निश्चितोऽपरस्वसद्भावाद्भावेऽसत्त्वे, तृतीयश्चोभयथेत्येव देशानां सदसत्त्व वक्तव्यः, व्यपदेशात्तदपि द्रव्यमस्ति च नास्ति चावक्तव्यं च भवति, विकल्पवशात्; तथाभूतविशेषणाध्यासितस्य द्रव्यस्यानेन प्रतिपादनाद्परसङ्कव्युदासः । एते च परस्परनिरपेक्षया सप्तभङ्गाऽऽत्मकाः प्रत्येकं स्वार्थं प्रतियन्ति, नान्ययेति प्रत्येकं तत्समुदायो वा सप्तभङ्गाऽऽत्मकः प्रतिपाद्यमपि तथाभूतं दर्शयतीति व्यवस्थितमत्र चाऽऽद्यभङ्गकत्रिधा; द्वितीयोऽपि त्रिधैव; तृतीयो दशधा; चतुर्थोऽपि दशधैव; पञ्चमाऽऽदयस्तु त्रिंशदधिकशतपरिमाणाः । प्रत्येकं श्रीमन्मल्लवादिप्रभृतिभिर्दर्शिताः; पुनश्च षष्टिशत्यधिकाः चतुर्दशशतपरिमाणास्त एव च द्व्यादिसंयोगकल्पनया कोटिशो भवन्तीत्याभिहितं तैरेव । अत्र तु ग्रन्थविस्तरभयात्तथा न प्रदर्शिताः, तत एवावधार्याः । अथानन्तधर्माऽऽत्मके वस्तुनि तत्प्रतिपादकवचनस्य सप्तधा कल्पनेऽष्टमवचनविकल्पपरिकल्पनमपि किं न क्रियते? इति न वक्तव्यम्, तत्परिकल्पननिमित्ताभावात् । तथाहि-नैतत्सऽऽदयवाऽऽत्मकादपरं निमित्तं तत्परिकल्पयितुं युक्तम्, चतुर्थाऽऽदिवचनविकल्पेषु तस्यान्तर्भावप्रसक्तेः । नाऽपि निरवयवाऽऽत्मकमन्योन्यानिमित्तकं तत्परिकल्पनामर्हति, प्रथमाऽऽदिषु तत्पूर्वप्रसक्तेः । न च गत्यन्तरमस्तीति नाऽष्टमभङ्गपरिकल्पना युक्ता । किञ्चाऽसौ क्रमेण वोतधर्मद्वयं प्रतिपादयति, यौगपद्येन वा प्रथमपक्षे गुणप्रधानभावेन तत्प्रतिपादने प्रथमद्वितीययोरन्तर्भावः प्रधानभावेन तत्प्रतिपादने चतुर्थे, यौगपद्येन तत्प्रतिपादने तृतीये, भङ्गकसंयोगकल्पनया भङ्गान्तरकल्पनायां प्रथमद्वितीयभङ्गक एव प्रसज्यते । प्रथमतृतीयसंयोगात्पञ्चमप्रसक्तिः, द्वितीयतृतीयसंयोगात् षष्ठप्रसक्तिः, प्रथमद्वितीयतृतीयसंयोगात्सप्तमः, प्रथमसंयोगे द्विसंयोगकल्पनायां पुनरुक्तदोषः, तस्मान्न कथञ्चिदष्टमभङ्गसंभव इत्युक्तन्यायाद्वस्तुप्रतिपादने सप्तविध एव वचनमार्गः ।

अन्योऽन्यापरित्यागव्यवस्थितस्वरूपवाक्यनयानां शुद्धाशुद्धिविभागेन संग्रहाऽऽदिव्यपदेशमासादयतां द्रव्यार्थिकपर्यायार्थिकनयावेव मूलाधार इति प्रदर्शनार्थमाह-

एवं सत्तवियप्पो, वयणपहो होइ अत्थपज्जाए ।
वंजणपज्जाए पुण, सवियप्पो णिव्वियप्पो उ ॥४१॥

एवमित्यनन्तरोक्तप्रकारेण सप्तविकल्पः सप्तभेदः वचनमार्गो वचनपथो भवत्यर्थपर्यायेऽर्थनये संग्रहव्यवहारर्जुसूत्रलक्षणे सप्ताप्यनन्तरोक्ता भङ्गका प्रवर्त्तन्ते । तत्र प्रथमः संग्रहे सामान्यग्राहिणि, द्वितीयस्तु नास्तीत्ययं तु व्यवहारे विशेषग्राहिणि, ऋजुसूत्रे तृतीयः, चतुर्थः संग्रहव्यवहारयोः, पञ्चमः संग्रहऋजुसूत्रयोः, षष्ठो व्यवहारऋजुसूत्रयोः, सप्तमः संग्रहव्यवहारऋजुसूत्रेषु । व्यञ्जनपर्याये शब्दनये सविकल्पः, प्रथमे पर्यायशब्दवाच्यताविकल्पसद्भावेऽप्यर्थस्यैकत्वात् । द्वितीयतृतीये निर्विकल्पः, ऊर्ध्वार्थसामान्यलक्षणान्तर्गतपर्यायाभिधायकत्वात्, समभिरूढस्य पर्यायनेदनिमित्तार्थत्वात्, एवंभूतस्याऽपि विवक्षितक्रियाकालार्थत्वाद्भिन्नकालसंज्ञाक्रियाभेदेन भिन्नस्यैकशब्दवाच्यत्वात् शब्दाऽऽदिषु तृतीयः, प्रथमद्वितीयसंयोगे चतुर्थः, तेष्वेव चानभिधेयसंयोगे पञ्चमषष्ठसप्तमा वचनमार्गा भवन्ति । अथवा-प्रदर्शितस्वरूपा सप्तभङ्गी संग्रहव्यवहारर्जुसूत्रेषु चार्थनयेषु भवतीत्याह-" एवं सत्तवियप्पा " इत्यादिगाथाम । अस्यास्तात्पर्यार्थः-अर्थनय एव सप्तभङ्गाः, शब्दाऽऽदिषु त्रिषु नयेषु प्रथमतृतीयावेव भङ्गौ । यो ह्यर्थमाश्रित्य वक्तृस्थसंग्रहव्यवहारसूत्राऽऽख्यप्रत्ययः प्रादुर्भवति सोऽर्थनयः, अर्थवशेन तदुत्पत्तेः, अर्थं प्रधानतयाऽसौ व्यवस्थापयतीति कृत्वा। शब्दं तु स्वप्रभवमुपसर्जनतया व्यवस्थापयति, तत्प्रयोगस्य परार्थत्वात् । यस्तु श्रोतरि तच्छब्दश्रवणादुत्पद्यते शब्दसमभिरूढएवंभूताऽऽख्यः प्रत्ययस्तस्य शब्दप्रधानं, तद्वशेन तदुत्पत्तेरर्थः प्रधानं तथाऽप्युपसर्जनं तदुत्पत्तावनिमित्तत्वात्, स शब्दनय उच्यते । तत्र च वचनमार्गः सविकल्पनिर्विकल्पतया द्विविधः सविकल्पं सामान्यनिर्विकल्पपर्यायः, तदभिधानाद्वचनमपि तथा व्यपदिश्यते । तत्र शब्दसमभिरूढौ सङ्ख्याक्रियाभेदेऽप्यभिन्नमर्थं प्रतिपादयत इति तदभिप्रायेण सविकल्पो वचनमार्गः प्रथमभङ्गकरूपः। एवंभूतस्तु क्रियाभेदाद्भिन्नमेवार्थं तत्क्षणे प्रतिपादयतीति निर्विकल्पो द्वितीयभङ्गकरूपस्तद्वचनमार्गः । अवक्तव्यभङ्गकस्तु व्यञ्जननये न संभवत्येव, यतः श्रोत्राभिप्रायो व्यञ्जननयः, स च शब्दश्रवणादर्थं प्रतिपद्यते, न शब्दाश्रवणात् । अवक्तव्यस्तु शब्दाभाविषय इति नावक्तव्यभङ्गको व्यञ्जनपर्याये संभवतीत्यभिप्रायवता व्यञ्जनपर्याये तु सविकल्पनिर्विकल्पौ प्रथमद्वितीयावेव भङ्गावभिहिताविति वाचार्येण । तुशब्दस्य गाथायामेवकारार्थत्वात् ।

इदानीं परस्परूपापरित्यागप्रवृत्तसंग्रहाऽऽदिनयप्रादुर्भूततथाविधा एव वाक्यनयास्तथाविधार्थप्रतिपादका इत्येतत्प्रतिपाद्यान्यथाऽभ्युपगमे तेषामप्यध्यक्षविरोधतोऽभाव एवेत्येतदुपदर्शनाय केवलानां तेषां तावन्मतमुपन्यस्यति-

जह दवियमप्पियं तं, तहेव अत्थि त्ति पज्जवणयस्स ।
ण य स समयपन्नवणा, पज्जवणयमेत्तपमिपुण्णा ॥ ४२ ॥

यथा वर्त्तमानकालसंबन्धितया यद् द्रव्यमर्पितं प्रतिपादयितुमभीष्टं, तत्तथैवास्ति, नान्यथा, अनुत्पन्नविनष्टनयज्ञाविभूतयोरविद्यमानत्वेनाप्रतिपत्तेः; अप्रतीयमानयोश्च प्रतिपादयितुमशक्तेरिति प्रसङ्गात् वर्त्तमानसंबन्धेनैव तस्य प्रतीतेरिति पर्यायार्थिकनयवाक्यस्याऽभिप्रायः। एतदेकान्तवादी दूषयितुमाह-नेति प्रतिषेधे, स इति तथाविधो वाक्यनयः परामृश्यते, समय इति सम्यङ् मीयते परिच्छिद्यत इति समयोऽर्थः, तस्य प्रज्ञापना प्ररूपणा, पर्यायनयमात्रे द्रव्यनयानिरपेक्षे पर्यायनये प्रतिपूर्णा पुष्कला संपद्यते । न स वाक्यनयः सम्यगर्थप्रत्यायनं पूरयतीति पर्यायनयस्य साधारणैकान्तप्रतिपादनरूपस्याध्यक्षबाधनात् । तद्बाधां चाग्रतः प्रतिपादयिष्यते ।

द्रव्यार्थिकवाक्यनयेऽप्ययमेव न्याय इति तदभिप्रायं तावदाह-

पडिपुण्णजोव्वणगुणो, जह लज्जइ बालभावचरिएहिं ।
कुणइ य गुणपणिहाणं, अणागयसुहोवहाणत्थं ॥४३॥

प्राप्तयौवनगुणः पुरुषो लज्जते बालभावसंवृत्ताऽऽत्मीयानुष्ठानस्मरणात्-पूर्वमहमप्यवस्तृश्यसंस्पर्शाऽऽदिव्यवहारमनुष्ठितवान् । यथेत्युदाहरणार्थो गाथायामुपन्यस्तः, यथैवं ततोऽतीतवर्त्तमानयोरेकत्वमवसीयते । करोति च गुणेषूत्साहाऽऽदिषु प्रणिधानमेकाग्र्यम्, अनागतं यत्सुखं तस्योपधानं प्राप्तिः, तस्यै तदर्थमपि, तस्मात्सुखसाधनात्सुखं प्राप्तव्यमिति, यतश्चैवमतोऽनागतवर्त्तमानयोरैक्यम् ।

अत्राऽपि मते यथाऽवस्थितवस्तुस्वरूपप्ररूपणा न प्रतिपूर्यत इति सूत्रान्तरेण दर्शयति-

ण य होइ जोव्वणत्थो, बालो अण्णो वि लज्जइ ण तेण ।
ण वि य अणागयसुयगुण-पसाहणं जुज्जइऽविभत्ते ॥४४॥

न च भवति यौवनस्थः पुरुषो बालः, अपि त्वन्य एव, अन्योऽपि न लज्जते बालचरितेन पुरुषान्तरवत्, तेनाऽन्येन । अथाऽनागतवृद्धावस्थायां सुखप्रसाधनार्थमुत्साहस्तस्य युज्यते अत्यन्तभेदे । एतदेवाऽऽह-विभक्ते इति । विभक्तिर्भेदः । अकारप्रश्लेषादविभक्ते भेदाभावे अविचलितस्वरूपतया तत्प्रसाधकगुणयोगसंभवात्, तस्माद्भेदमात्रं तत्त्वं, कथञ्चिद्भेदव्यवहृतिप्रतिभासबाधितत्वात्, नापि भेदमात्रम्, एकत्वव्यवहारप्रतिपत्तिनिराकृतत्वादिति भेदाभेदाऽऽत्मके तत्त्वमभ्युपगन्तव्यम् । अन्यथा सकलव्यवहारोच्छेदप्रसक्तिः ।

एवमनेदनेदाऽऽत्मकस्य पुरुषतत्त्वस्य यथाऽतीतानागतदोषगुणनिन्दाऽभ्युपगमाऽन्यां संबन्धः, तथैव भेदाऽभेदाऽऽत्मकस्य तस्य संबन्धाऽऽदिभिर्योग इति दृष्टान्तदार्ष्टान्तिकोपसंहारार्थमाह-

जाइकुलरूवलक्खण-सण्णासंबंधओ अहिगयस्स ।
बाल्लाऽऽइभावदिट्ठवि-गयस्स जह तस्स संबंधो ॥४५॥

जातिः पुरुषत्वाऽऽदिका, कुलं प्रतिनियतपुरुषजन्यत्वम्, रूपं सुरूपकुरूपाऽऽदिरूपं, लक्षणं तिलकाऽऽदि सुखाऽऽदिसूचकम्, संज्ञा प्रतिनियतशब्दाभिधेयत्वम् । एभिर्यः संबन्धस्तदात्मपरिणामः, ततस्तमाश्रित्याधिगतस्य ज्ञानस्य तदात्मकत्वेनाभिन्नावभासविषयस्य । यद्वा-संबन्धो जन्यजनकभावः, एभिरधिगतस्य लक्षणतत्स्वभावस्यैकाऽऽत्मकस्येति यावत् । बाल्लाऽऽदिभावैर्दृष्टविगतस्य तैरुत्पादविगमाऽऽत्मकस्य तथा भेदप्रतीतेस्तस्य, यथा तस्य संबन्धो भेदाभेदपरिणतिरूपो, भेदाभेदाऽऽत्मकत्वप्रतिपत्तेर्बाह्याध्यक्षेणाध्यात्मिकाऽध्यक्षतोऽपि तथा प्रतीतेः ।

तथारूपं तत्त्वमस्तीति प्रतिपादयन्नाह दृष्टान्तदार्ष्टान्तिकोपसंहारेण-

तेहिं अतीतानागय-दोसगुणऽणुगंतणब्भुवगमेहिं ।
तह बंधमोक्खसुहदुः-क्खपत्थणा होइ जीवस्स ॥४६॥

ताभ्यामतीतानागतदोषगुणजुगुप्साऽभ्युपगमाभ्यां यथा भेदाभेदाऽऽत्मकस्य पुरुषतत्त्वस्य सिद्धिः, तदा दार्ष्टान्तिकेऽपि (तह बंधमोक्खसुहदुःक्खपत्थणा होइ जीवस्स इति) तथा बन्धमोक्षसुखदुःखप्रार्थना; तत्र च बन्धनोपादानपरित्यागद्वारेण भेदाभेदाऽऽत्मकस्यैव जीवद्रव्यस्य भवति, बाल्लाऽऽद्यात्मकपुरुषद्रव्यवत् । ततो जीवस्य पूर्वोत्तरभावानुभवितुरभावाद्बन्धमोक्षाभावाभावः, उत्पादव्ययध्रौव्याऽऽत्मकतयाऽनाद्यनन्तस्य प्रसाधितत्वात् । तथाहि-मरणचित्तं भावाऽऽद्युत्पादस्थित्यात्मकं, मरणचित्तत्वात्, जीवद्दव्यस्थाविनाशचित्तवत् । तथा जन्माऽऽदौ चित्तप्रादुर्भावोऽतीतचित्तस्थितिविनाशाऽऽत्मकः, चित्तप्रादुर्भावत्वात्, मध्यावस्थाचित्तप्रादुर्भाववत् । अन्यथा तस्याप्यभावप्रसक्तिः । न चास्याभावः, हर्षविषादाऽऽद्यनेकविवर्त्ताऽऽत्मकस्यानन्यत्वात् बाह्यस्यान्तर्मुखाऽऽकारतया स्वसंवेदनाऽध्यक्षतः शरीरवैलक्षण्यतोऽनुभूतेः । न च तथा प्रतीयमानस्याप्यभावः, शरीराऽऽदेरपि बहिर्मुखाऽऽकारतया प्रतीयमानस्याऽभावप्रसक्तेः । न च नित्यैकान्तरूपे आत्मनि जन्ममरणेऽप्यसंभवे, कुतो बन्धमोक्षप्रसक्तिः ? । न च नित्यस्याऽप्यात्मनोऽभिनवबुद्धिशरीरेन्द्रियैर्योगो जन्म, तद्वियोगो मरणमितिकल्पना संगता, अस्याः पूर्वं निषिद्धत्वात् । न चैकान्तोत्पादविनाशाऽऽत्मके विषये इहलोके परलोके च परलोकव्यवस्था, बन्धाऽऽद्यवस्था वा युक्ता । यत ऐहिककायत्यागेनाऽऽमुष्मिकतदुपादानमेकस्यापरलोकः, पूर्वग्रामपरित्यागादग्र्य तदितरैकपुरुषरूपवत् । न च दृष्टान्तेऽप्येकत्वमसिद्धम्, उभयावस्थायास्तस्यैकत्वेन प्रतिपत्तेः । न चेयं मिथ्या, बाधकाभावात्, विरुद्धधर्मसंसर्गाऽऽदेर्बाधकस्याऽध्यक्षबाधाऽऽदिनाऽनिरस्तत्वात् । न च पूर्वावस्थात्यागेन एकस्योत्तरावस्थोपादानमन्तरेण दृष्टः, पृथुबुध्नोदराऽऽद्याकारविनाशवन्मृद्द्रव्यस्य कपालोत्पादनमन्तरेण दर्शनात् । न च कपालोत्पादनमन्तरेण घटविनाश एव न सिद्धः, घटकपालव्यतिरेकेणाऽपरस्य नाशस्याप्रतीतेरिति वक्तव्यम्, कपालोत्पादस्यैव कथञ्चिद्घटविनाशाऽऽत्मकतया प्रतिपत्तेः; अत एव सहेतुकत्वं विनाशस्य, कपालोत्पादस्य सहेतुकत्वात् । न च कपालानां जात्यरूपतैव केवला, घटानिवृत्तौ तद्विविक्तताया नेष्टभावप्रसक्तेः । न चैकस्योभयत्र व्यापारविरोधः, दृष्टत्वात् । न च घटनिवृत्तिकपालयोरेकान्तेन भेदः, कथञ्चिदेकत्वप्रतीतेः । न च मुद्गराऽऽदेर्नाशं प्रत्यव्यापारे क्वचिदभ्युपयोगे कपालेषु न तदुपयोगः, अन्यावस्थायामपि घटक्षणान्तरोत्पत्तिप्रसक्तेः, तस्य तदुत्पादनसामर्थ्यविनाशात्, तस्य स्वर[स]तो विनाशात्तद्व्यतिरेकसामर्थ्यस्याविनाशः । न पूर्वं तद्विनाशेऽपि तस्याविनाशो विरोधिमुद्गरसन्निधानात् । ननु समानजातीया क्षणान्तरं जनयतीति चेत् । न । घटविरोधी न च तद्विनाशयतीति व्याहतत्वात् । न च तद्धेत्वभावात्सामर्थ्याभावः, तथाविधकार्यजननसमर्थहेतोर्जनित्वात् । अन्यथा प्रागपि तथाविधफलोत्पत्तिर्न स्यात् । न च स्वहेतुनिर्वर्त्तित एव दण्डाऽऽदिसन्निधौ सामर्थ्याभावः, दण्डाऽऽदिसन्निधिमपेक्षमाणस्य तस्य तद्धेतुत्वोपपत्तेः, अन्यत्रापि तद्भावस्य तन्मात्रनिबन्धनत्वात् । न च तदुव्यापारानन्तरं तदुपलम्भात्तस्य तत्कार्यत्वे मृद्द्रव्यस्याऽपि तत्कार्यतापसक्तिः, तस्य सर्वदोपलम्भात्, सर्वदा तस्यानभ्युपगमे उत्पादविनाशयोरभावप्रसक्तिश्चेति प्रतिपादितत्वाच्च; तस्यैव तद्रूपतया परिणतौ कथञ्चिदुत्पादस्यापीष्टत्वात् । यदि च पूर्वोत्तराऽऽकारत्यागोपादानतयैकं मृद्द्रव्यमध्यक्षतोऽनुभूयते, तदा तत्तदपेक्षकारणं कार्यविनष्टं च उत्पन्नमनुत्पन्नं चैककालमनेककालं च भिन्नमभिन्नं चेति कथं नाभ्युपगम्यविषयः ? । न चाऽत्र विरोधः, मृद्द्रव्यतिरिक्ततया घटकपालयोरुत्पन्नाविनष्टस्थितिस्वभावतया प्रतीतेः । न च प्रतीयमाने वस्तुस्वरूपे विरोधः, अन्यथा ग्राह्यग्राहकाऽऽकारभेदेनैकत्वेन स्वसंवेदनाऽध्यक्षतः प्रतीयमानस्य संवेदनस्य विरोधप्रसक्तेः । न च संशयदोषप्रसक्तिरिति, उत्पत्तिस्थितिनिरोधानां निश्चितरूपतया वस्तुन्यधिगमात् । न च स्थाणुर्वा

पुरुषो वेति प्रतिपत्त्यादिव प्रकृतानिश्चये सामान्यप्रत्यक्षाद्विशेषाप्रत्यक्षाद् विशेषस्मृतेश्च संशय इति निमित्तमस्ति। न च व्यधिकरणेनादोषप्रसक्तिरिति, घटकपालविनाशोत्पादयोर्मृद्रूव्याऽधिकरणतया प्रतिपत्तेः। न चोभयदोषानुषङ्गः, द्यात्मकस्य वस्तुनो जात्यन्तरत्वात्। सङ्करदोषप्रसक्तिरपि नास्ति, अनुगतव्यावृत्तेस्तदात्मके वस्तुनि स्वस्वरूपेणैव प्रतिभासनात्। अनवस्थादोषोऽपि न संभवी, भिन्नोत्पादव्ययध्रौव्यव्यतिरेकेण तदात्मकस्य वस्तुनोऽध्यक्षे प्रतिभासनात् स्वयमतदात्मकस्याऽपरयोगेऽपि तदात्मकताऽनुपपत्तेः, अन्यथाऽतिप्रसङ्गात्। तथा प्रतिभासादेवाभावाद्दोषोऽपि न संभवी, अबाधितप्रतिभासस्य तदभावेऽभावाद्, भावे वा न तावदवस्तुव्यवस्थितिरिति सर्वव्यवहारोच्छेदप्रसक्तिः। न च द्यात्मकत्वमन्तरेण घटस्य कपालदर्शनाद्विनाशानुमानं संभवति, तत्र तेषां प्रतिबन्धानवकाशात्। न हि तद्विनाशनिमित्तानि मुद्गराऽऽदीनि, हेतुत्वाद् भावस्य कारणत्वात्सत्त्वासत्त्वाभ्यां यद्यपि घटहेतुकानि तानि, तथाऽपि घटसद्भावमेव गमयेयुर्न तदभावम्, न हि धूमः पावकहेतुकस्तदभावगमक उपलब्धः, न वा निमित्तजन्यता तयोः प्रतिबन्धः, भावस्यांशकार्यताऽभ्युपगमात्। नाऽपि तादात्म्यलक्षणः, तयोस्तादात्म्यायोगात्। न च घटस्वरूपव्यावृत्तत्वात्तेषां तदभावप्रतिपत्तिजनकत्वम्, सकलत्रैलोक्याभावप्रतिपत्तिजनकत्वप्रसक्तेः, तेषां ततोऽपि व्यावृत्तस्वरूपत्वात्। न च घटविनाशरूपत्वात्तेषां वाच्यं दोषः, तेषां वस्तुरूपत्वाद्विनाशस्य च निःस्वभावत्वात्, तथा च तादात्म्यविरोधः, अन्यथा घटानुपलम्भवत्तेषामपि तदनुपलब्धिर्भवेत्, तस्मात्प्रागभावाऽऽत्मकः सन् घटः प्रध्वंसाभावाऽऽत्मकतां प्रतिपद्यत इत्यभ्युपगन्तव्यम्। अन्यथा पूर्वोक्तदोषानतिवृत्तेः। सत्त्वलक्षणस्याऽपि हेतोर्गमकत्वमनेनैव प्रकारेण संभवति। अन्यथोत्पद्यनन्तादस्तित्वाभावः, तद्भावे विनाशस्याऽप्यभावः, असतो विनाशायोगादिति द्यात्मकमेकं वस्त्वभ्युपगन्तव्यम्, अन्यथा तदनुपपत्तेरिति प्राक् प्रदर्शितत्वाद् न पुनरुच्यते। यथा चाऽऽत्मनः परलोकगामित्वं शरीरमात्रव्यापकत्वं च तथा प्रतिपादितमेव। ननु शरीरमात्रव्यापित्वे तस्य गमनाभावाद्देशान्तरे तद्ग्रहणोपलब्धिर्न भवेत्, न च तदधिष्ठितशरीरस्य गमनाविरोधात्पुरुषाधिष्ठितदारुयन्त्रवत्। न च मूर्त्तसूत्तंयोर्घटाऽऽकाशयोरिव प्रतिबन्धाभावान्मूर्त्तशरीरगमनेऽपि नामूर्त्तस्याऽऽत्मनो गमनमिति वक्तव्यम्, संसारिणस्तस्यैकान्तेनामूर्त्तत्वासिद्धेस्तत्र प्रतिबन्धाभावासिद्धेः।

एतदेवाऽऽह-

अण्णोणाऽणुगयाणं, इमं व तं व त्ति विभयणमजुत्तं।
जह खीरपाणियाणं, जावंतविसेसपज्जाया ॥ ४७ ॥

अन्योन्यानुगतयोः परस्परानुप्रविष्टयोरात्मकर्मणोरिदं वा तद्वेतीदं कर्म अयमात्मेति यद्विभजनं पृथक्करणं तदयुक्तमघटमानकम्, प्रमाणाभावेन कर्तुमशक्यत्वात्, यथा दुग्धपानीययोः परस्परप्रवेशानुप्रविष्टयोः। किंपरिमाणोऽयमविभागो जीवकर्मप्रदेशयोरित्याह-यावन्तो विशेषपर्यायाः, तावान्, अत एवमवस्तुत्वप्रसक्तेरन्त्यविशेषपर्यन्तत्वात्सर्वविशेषाणाम्।

अन्य इति विशेषणाऽन्यथाऽनुपपत्तेर्जीवकर्मणोरन्योऽन्यानुप्रवेश इत्याह-

रूवाऽऽइपज्जवा जे, देहे जीवदवियम्मि सुक्कम्मि।
ते अण्णोण्णाऽणुगया, पण्णवणिज्जा भवत्थम्मि ॥ ४८ ॥

रूपरसगन्धस्पर्शाऽऽदयो ये पर्याया देहाऽऽश्रिता जीवरूढ्ये विशुद्धरूपे च ये ज्ञानाऽऽदयस्तेऽन्योन्यानुगता जीवे रूपाऽऽदयो देहे ज्ञानाऽऽदय इति प्ररूपणीया भवस्थे संसारिणि, अकारप्रश्लेषाद्वाऽसंसारिणि। न च संसारावस्थायां देहाऽऽत्मनोरन्योन्यानुबन्धाद्रूपाऽऽदिनिस्तद्व्यपदेशः, मुक्तावस्थायां तु तदभावान्नास्तौ युक्त इति वक्तव्यम्, तदवस्थायामपि देहाऽऽश्रितरूपाऽऽदिग्रहणपरिणतज्ञानदर्शनपर्यायद्वारेणाऽऽत्मनस्तथाविधत्वात्, तथा व्यपदेशसंभवादात्मपुद्गलयोश्च रूपाऽऽदिज्ञानाऽऽदीनामन्योऽन्यानुप्रवेशात्कथञ्चिदेकत्वमनेकत्वं च मूर्त्तत्वममूर्त्तत्वं वा व्यतिरेकात्सिद्धमिति।

एतदेवाऽऽह-

एवं एगे आया, एगे दंडे य होइ किरियाए।
करणविसेसेण य तिवि-हजोगसिद्धी उ अविरुद्धा ॥४९॥

एवमित्यनन्तरोदितप्रकारेण मनोवाक्कायद्रव्याणामात्मन्यनुप्रवेशादात्मैव, न तद्व्यतिरिक्तास्त इति तृतीयाङ्केकत्वात् (एगे आया इति) प्रथमस्तत्र प्रतिपादितः सिद्ध एक आत्मा एको दण्ड एका क्रियेति भवति, मनोवाक्कायेषु दण्डक्रियाशब्दौ प्रत्येकमभिसंबन्धनीयौ, करणविशेषेण च मनोवाक्कायस्वरूपेणाऽऽत्मन्यप्रवेशावासाविविधयोगस्वरूपत्वात्त्रिविधयोगसिद्धिरपि आत्मनोऽविरुद्धैवेति। एकस्य सतस्तस्य त्रिविधयोगाऽऽत्मकत्वादनेकान्तरूपता व्यवस्थितैव; न चाऽन्योन्यानुप्रवेशादेकाऽऽत्मकत्वे बाह्याभ्यन्तरविभागाभाव इति। अत्र हर्षविषादाऽऽद्यनेकविवर्त्ताऽऽत्मकमेकं चैतन्यं, यथेह बालकुमारयौवनाऽऽद्यनेकावस्थैकाऽऽत्ममेकं शरीरमध्यक्षतः संवेद्यत इत्यस्याविरोधः, बाह्याभ्यन्तरविभागावपि निमित्तान्तरतद्व्यपदेशसंभवात्।

एतदेवाऽऽह-

ण य बाहिरओ भावो, अब्भिंतरओ य अत्थि समयम्मि।
णो इंदियं पुण पडु-च्च होइ अब्भिंतरो भावो ॥५०॥

आत्मपुद्गलयोरन्योऽन्यानुप्रवेशाद्युक्तप्रकारेणाई तप्रणीतशासनेन बाह्यो भावोऽभ्यन्तरो वा संभवति, मूर्तामूर्त्युत्पादितत्वादनेकाऽऽत्मकत्वाच्च, संसारोदरवर्तिनः सकलवस्तुनोऽभ्यन्तर इति व्यपदेशस्तु नोइन्द्रियमनःप्रतीतस्याऽऽत्मपरिणतिरूपस्य परापेक्षत्वाच्छरीरवानिव। न च शरीराऽऽत्मावयवयोः परस्परानुप्रवेशात् शरीराभेदे आत्मनोऽपि तद्वत्परापेक्षताप्रसक्तिः; इन्द्रियज्ञानस्याशेषपदार्थस्वरूपग्राहकत्वायोगाद्दित्यस्य प्रतिपादयिष्यमाणत्वात्। अतः शरीरप्रतिबद्धत्वमात्मनो न भवति, अमूर्त्तत्वात्। अत्र योगे हेतुरसिद्धः, यदि चात्मपरिणतिरूपमनसः शरीरादात्यन्तिको भेदः स्यात्तद्विकाराविकाराभ्यां शरीरस्य तत्त्वं न स्यात्, तदुपकारापकाराभ्यां वा आत्मनः सुखदुःखानुभवश्च न भवेत्, शरीरविघातकृतश्च हिंसकत्वमनुपपन्नं भवेत्। शरीरपुष्ट्यादेरागाऽऽद्युपचयहेतुत्वं, शरीरस्य कृशोऽहं स्थूलोऽहमिति प्रत्ययविषयत्वं च दूरोत्सारितं भवेत्। पुरुषान्तरशरीरस्येव घटाऽऽकाशयोरपि प्रदेशोऽन्योन्यप्रदेशलक्षणो बन्धोऽस्त्येवेत्ययुक्तो दृष्टान्तः, अन्यथा घटस्यावस्थितिरेव न प्रवेत्, न चाऽन्योन्यानुप्रवेशसद्भावेऽप्याकाशवच्छरीरपरतन्त्रताऽऽत्मनोऽनुपपन्ना, मिथ्यात्वाऽऽदेः पारतन्त्र्यनिमित्तस्याऽऽत्मनि भावात्, आकाशो

च तद्भावात् । न च शरीराऽऽयत्तत्वे सति तस्य मिथ्यात्वाऽऽदिबन्धहेतुभियोगः, तस्माच्च तत्प्रतिबद्धमितीतरेतराश्रयत्वम्,अनादित्वाभ्युपगमेनास्य निरस्तत्वात् । न च शरीरसंबन्धात् प्रागात्मनोऽमूर्त्तत्वम्, अदा तैजसकार्मणः शरीरसंबन्धात् संसारावस्थायां तस्यान्यथाभावात् स्थूलशरीरसंबन्धित्वायोगात् । पुद्गलोपष्टम्भव्यतिरेकेणोर्द्ध्वगतिस्वभावस्यापरदिग्गमनासंभवात्स्थूलशरीरेणातिसूक्ष्मस्य रज्ज्वादिनेवाऽऽकाशस्य संबन्धायोगात् संसारिशून्यमन्यथा जगत्स्यादिति संसार्यात्मनः सूक्ष्मशरीरसंबन्धित्वं सर्वदाऽभ्युपगन्तव्यम् । अथ शरीराऽऽत्मनोस्तादात्म्ये शरीरावयवच्छेदे आत्मावयवस्थापि छेदप्रसक्तिः, अच्छेदे तयोर्भेदप्रसङ्गः । न । कथञ्चिच्छेदस्याभ्युपगमाद्, अन्यथा शरीरात्पृथग्भूतावयवस्य कम्पोपलब्धिर्न भवेत् । न च भिन्नावयवानुप्रविष्टस्य पृथगात्मत्वप्रसक्तिः, तत्रैव पश्चादनुप्रवेशाच्छिन्ने हस्ताऽऽदौ कम्पाऽऽदितल्लिङ्गादर्शनादियं कल्पना । न चाऽन्यत्र गमनात् तस्य तल्लिङ्गानुपलब्धिरेकत्वादात्मनः,शेषस्याऽपि तेन सह गमनप्रसक्तावेकत्र संतताववेनक आत्मेत्येकज्ञानवद् ज्ञानिनामेकत्राऽनुन्नाधारे प्रतिन्नासप्रसक्तेः,शरीरान्तरव्यवस्थितात्मान्तरवत् । न च पृथग्भूतहस्ताऽऽद्यवयवव्यवस्थितोऽसौ,न तत्रैव विनष्ट इति कल्पनाऽपि युक्तिसंगता,शेषस्याऽप्येकत्वेन तद्विनाशप्रसक्तेः । ततोऽन्यत्रागतेस्तत्रासत्त्वाद्विनष्टत्वाच्च तदनुप्रवेशोऽवसीयते,गत्यन्तराभावात् । न चैकत्वे आत्मनो विभागाभावात् छेदाभाव इति वक्तव्यम्,शरीरद्वारेण तस्यापि सविभागत्वात् । अन्यथा सावयवशरीरव्यापिता तस्य कथं भवेत् ? । न चामूर्तद्रव्याऽऽदिव्यवच्छिन्नावयवस्य सर्वदैव तस्य तथाभावः, उत्तरकालमपि तदवयवोपष्टम्भोपलब्धस्यार्थस्य तथैव स्मरणादन्यथा त्वतदृदर्शनात् । न चासारभ्य मूर्त्तद्रव्यवद्द्व्यणुकाऽऽदिप्रक्रमेणावस्थितसंयोगैस्तैरभावः, येन तद्गतस्य तथैव ज्ञानप्रसक्तिः । न चानारब्धत्वात्तस्य निरवयवत्वं, शरीरसर्वगतत्वाज्ज्ञानप्रसक्तेः । न च शरीरासर्वगतोऽसौ, तत्र सर्वत्रैव स्पर्शोपलम्भात् । न तदव्यापकस्य तच्छेदे छेदः, अतिप्रसङ्गात् । न च तदवयवच्छेदेन भिन्नः, तत्र कम्पाऽऽद्युपलब्धेरतस्तत्रैवानुप्रविष्ट एकत्वादिति क्वायते कथं भिन्नाभिन्नयोः संघटनं पश्चादिति । न चैकान्तेन च्छेदाभावा—त्पद्मनालतन्तुवद् विच्छेदाभ्युपगमाद् विघटनमपि तथाभूतादृष्टवशाद्विरुद्धमेव । न चाऽऽत्मनः शरीरमात्रव्यापकत्वेऽन्यशरीरगत्यन्तरसंबन्धान्यथानुपपत्या गतिक्रियाप्रसक्तेरनित्यत्वप्रसक्तिर्दोषः,कथञ्चित्तस्येष्टत्वात्,गृहान्तर्गतप्रदीपप्रभावत् संकोचविकाशाऽऽत्मकत्वेन तस्य न्यायप्राप्तत्वात् । न च देहाऽऽत्मनोरन्योन्यानुवृत्तत्वे देहे ज्ञस्वसाङ्गत्वे आत्मनोऽपि तथात्वप्रसक्तिः, क्षीरोदकवृत्तयोर्लक्षणभेदाभावात् । न हि भिन्नस्वरूपयोरन्योन्यानुप्रवेशे सत्यप्येकत्वयोऽपरस्य क्वायः,यथा पच्यमाने क्षीरे प्रथममुदकत्वयोऽपि न क्षीरक्वायः । न चेह लक्षणभेदो नास्ति । तथाहि-रूपरसगन्धस्पर्शाऽऽदिधर्मवन्तः पुद्गलाः, चेतनालक्षणश्चात्मेति सिद्धस्तयोर्लक्षणभेदः । यथा चैकान्तामूर्ताऽऽदिरूपत्वेऽर्थक्रियाऽऽदेर्व्यवहारस्याभावस्तथा प्रतिपादितमनेकधेति मूर्त्तामूर्त्ताद्यनेकान्ताऽऽत्मकत्वमात्मनोऽभ्युपगन्तव्यम् ।

अस्य च मिथ्यात्वाऽऽदिपरिणतिवशोपात्तपुद्गलात्तादृ विभागलक्षणो बन्धः, तद्वशोपनतसुखदुःखाऽऽद्यनुभवस्वरूपश्च भोगोऽनेकान्ताऽऽत्मत्वे सत्युपपद्यते । अन्यथा तयोरयोग इति प्रतिपादनार्थमाह-(दव्वट्ठियस्सेत्यादि) अथवा परस्परसापेक्षद्रव्यास्तिकपर्यायास्तिकयोः प्ररूपणा प्रदर्शितन्यायेन संभविनी, निरपेक्षयोः कथंसा ?, इत्याह-

दव्वट्ठियस्स आया, बंधइ कम्मं फलं च वेएइ ।
विइयस्स नावमेत्तं, ण कुणइ ण य कोइ वेएइ ॥५१॥

द्रव्यास्तिकस्येयं प्ररूपणाऽऽत्मैकस्थायी कर्म ज्ञानाऽऽदिनिबन्धकं बध्नाति स्वीकरोति, तस्य कर्मणः फलं च कार्यभूतं वेदयते भुङ्क्ते आत्मैव । द्वितीयस्य तु पर्यायार्थिकस्येयं प्ररूपणा-नैवाऽऽत्माऽस्ति, किं तु भावमात्रं विज्ञानमात्रमिति न करोति, न च कञ्चिद्वेदयते, उत्पत्तिक्षणानन्तरध्वंसिनः कर्तृत्वानुभवितृत्वायोगात् ।

तथेयमपि तयोर्नृतयोः प्ररूपणेत्याह-

दव्वट्ठियस्स जो चे-व कुणइ सो चेव वेयई णियमा ।
अन्नो करेइ अन्नो, परिभुंजइ पज्जवणयस्स ॥ ५२ ॥

य एव करोति स एव वेदयते, नित्यत्वात्, द्रव्यास्तिकस्यैतन्मतम् । अन्यः करोत्यन्यश्च भुङ्क्ते,क्षणिकत्वात्,पर्यायस्य नयस्यैतन्मतम् । ननु पूर्वगाथोक्तमेव पुनरपि तदेव तावत्पिष्टपेषणमाचार्येण कृतं नवेत् । न । उत्पत्तिसमनन्तरमेव करणं भोगो वा संभवीति प्राक् प्रतिपादितम्, इहोत्पत्तिक्षण एव कर्त्ता तदनन्तरक्षणश्च भोक्तेति न पुनरुक्तम् । नोक्तृत्वं च परैः भुक्तिर्येषां क्रिया सैव कारकः सैव चोचित इति ।

इयमसंयुक्तयोरनयोः स्वसमयप्ररूपणा न भवति, वा तु स्वसमयप्ररूपणा, तामाह-

जं वयणिज्जविसेसा, संजुज्जंतेसु होंति एएसु ।
सा ससमयपण्णवणा, तित्थयरासायणा अन्ना ॥ ५३ ॥

ये वचनीयस्याभिलापस्य विकल्पास्तत्प्रतिपादका अभिधानभेदाः, संयुज्यमानयोरन्योऽन्यसंबद्धयोर्भवन्त्यनयोर्द्रव्यास्तिकपर्यायास्तिकवाक्यनययोः, ते च कथञ्चिन्नित्य आत्मा कथञ्चिदमूर्त इत्येवमादयः, सैषा स्वसमयस्येति तदर्थस्य प्रज्ञापना निदर्शना । अन्या तु निरपेक्षयोरनयोरेव नययोर्या प्ररूपणा तीर्थकरस्याऽऽसादनाऽधिक्षेपः । " एगमेगेण जीवस्य एएसे अणंतेहिं णाणावरणिज्जपोग्गलेहिं आवेढिए परिवेढिए " इति तीर्थकृद्वचने प्रमाणोपपन्ने सत्यपि " नामूर्त्तं मूर्त्ततामेति, मूर्त्तं नायात्यमूर्त्ततां । द्रव्यं कालत्रयेऽप्येवं, त्र्यवते नात्मरूपतः" ॥१॥ इति तीर्थकृन्मतमेवैतन्नयवादनिरपेक्षमिति कैश्चित्प्रतिपाद्यद्वेस्तस्याधिक्षेपप्रदानात् परस्परनिरपेक्षयोः नययोः प्रज्ञापना तीर्थकराऽऽसादनेति ।

अस्यापवादमाह-

पुरिसज्जायं तु पडु-च्च जाणओ पण्णविज्ज अण्णयरं ।
परिकम्मणानिमित्तं,दाएहा सो विसेसं पि ॥ ५४ ॥

पुरुषजातं प्रतिपन्नपर्यायान्यतरस्वरूपं श्रोतारं वा प्रतीत्याऽऽश्रित्य ज्ञायकः स्याद्द्रव्यादिवित्,प्रज्ञापयेदवक्रीत, अन्यतरत् पर्यायं द्रव्यं वाऽभ्युपेतपर्यायं द्रव्यमेवाङ्गीकृतद्रव्यार्थं च पर्यायमेव कथयेत् । किमित्येकमेव कथयेत् ?,परिकर्म्मनिमित्तं बुद्धिसंस्कारार्थं,परिकर्मितमते दर्शयिष्यते । सः स्याद्वादाभिज्ञः विशेषमपि द्रव्यपर्याययोः परस्परविनिर्भागरूपम्,एकांशविषयविज्ञानस्यान्यथा विपर्ययस्वरूपताप्रसक्तिः स्यात्; तदितराभावे तद्विषयस्याऽ-

प्यनावात् । सम्म० १ काण्ड । स्था० । (सप्तभङ्गीवक्तव्यता तु ' सत्तभंगी ' शब्दे वक्ष्यते)

(७) अथ सप्तभङ्गधामित्थं नयविभागमुपदर्शयन्ति श्रीसिद्धसेनदिवाकरपादाः-

"एवं सत्तविअप्पो, वयणपहो होइ अत्थपज्जाए ।
वंजणपज्जाए पुण, सविअप्पो णिव्विअप्पो उ" ॥४१॥ (स०१का०)

एवमनन्तरोक्तप्रकारेण सप्तविकल्पः सप्तभेदो वचनपथो भवत्यर्थपर्यायेऽर्थनये संग्रहव्यवहारर्जुसूत्रलक्षणे । तत्र प्रथमो भङ्गः संग्रहे सामान्यग्राहिणि, द्वितीयस्तु नास्तीत्ययं व्यवहारे विशेषग्राहिणि, ऋजुसूत्रे तृतीयः, चतुर्थः संग्रहव्यवहारयोः, पञ्चमः संग्रहर्जुसूत्रयोः, षष्ठो व्यवहारर्जुसूत्रयोः, सप्तमः संग्रहव्यवहारर्जुसूत्रेष्विति । प्रयोगश्चैतेषुतुर्यतृतीययोर्व्यत्यये नेष्यते इति न तृतीये ऋजुसूत्रयोजनाऽनुपपत्तिः । अत्र यद्धर्मप्रकारकः संग्रहाऽऽख्यो बोधः प्रथमभङ्गफलत्वेनाभिमतः, तद्धर्मावच्छिन्नप्रकारको व्यवहाराऽऽख्यो बोध एव द्वितीयभङ्गफलत्वेनेष्टव्यः । तेन स्वाद् घटः स्वाश्रीलघट इत्यादिसामान्यविशेषसंग्रहव्यवहाराभ्यां न सप्तभङ्गीप्रवृत्तिः; न चैकवचनबहुवचनाऽऽदिना भङ्गान्तरवृद्धिरित्यवधेयम् । अथ तृतीयभङ्गस्यर्जुसूत्रनिमित्तकतायां किं बीजम्?, युगपत्सत्त्वाऽभ्यासात्, इष्टं हि सङ्ग्रहव्यवहाराभ्यवक्तव्यमेव सूतः, संग्रहव्यवहारौ युगपदुनयथा दिशत एव नेति चेत्, ऋजुसूत्रोऽपि कथं तथा देष्टुं प्रगल्भताम् ?, मध्यमक्षणरूपायाः सत्तायास्तेनाप्यभ्युपगमात् सङ्ग्रहाभिमतयावदनुवृत्तसामान्यानभ्युपगमात् । ऋजुसूत्रेणावक्तव्यनङ्ग उत्थाप्यत इति चेत्, सोऽयं प्रत्येकावक्तव्यत्वकृतोऽवक्तव्यत्वभङ्गः, तदुत्थापने च सङ्ग्रहोऽपि समर्थः । ऋजुसूत्राभिमतमध्यमक्षणरूपसत्तानभ्युपगन्ता तेनाऽपि तदुत्थापनस्य सुकरत्वादिति चेत् । अत्रेदमाभाति-संग्रहव्यवहारौ युगपदुभयथा देष्टुं प्रगल्भेते, स्वाभिमतांशादेशेऽनिष्टसाधनत्वप्रतिसंधानात्, ऋजुसूत्रस्य तु वर्तमानपर्यायमात्रग्राहिणस्तिर्यगूर्द्धताऽऽधारांशान्यतररूपे सामान्यम्, अन्यापोहरूपो विशेषश्चेति द्वावपि संवृताविवेति तदपेक्षया युगपदुभयथाऽऽदार्यतदादेशसंभवादवक्तव्यभङ्गोत्थानमनायाधम् । न चैवमपि तज्जनितबोधस्य प्रसक्तरूपत्वाद् विपर्ययपर्यवसाने संग्रहव्यवहारान्यतरसामान्यमिति वाच्यम्, विषयाबाधे कूटस्थिकजाऽनुमितिरिव प्रकृतिभङ्गजबोधस्य प्रमात्वेन विपर्ययपर्यवसानकदर्थनाऽनवकाशात्, व्यञ्जनपर्याये शब्दनये पुनः सविकल्पः, प्रथमे पर्यायशब्दवाच्यताविकल्पसद्भावादर्थस्यैकत्वाच्च, द्वितीयतृतीययोर्निर्विकल्पश्च, द्रव्यार्थात्सामान्यलक्षणान्निर्गतस्य पर्यायरूपस्य विकल्पस्याभिधायकत्वात्तयोः । तथा च घटो नाम घटवाचकयावच्छब्दवाच्यः। शब्दनयेऽस्त्येव समभिरूढैवंभूतयोर्नास्त्येवेति द्वौ भङ्गौ लभ्येते, लिङ्गसंख्याक्रियाभेदेन भिन्नस्यैकशब्दवाच्यत्वात् शब्दाऽऽदिषु तृतीयः, प्रथमद्वितीयसंयोगाच्चतुर्थः, तेष्वेव चाभिधेयसंयोगे पञ्चमषष्ठसप्तमा वचनमार्गा भवन्ति । अथवा शब्दनये पर्यायान्तरसहिष्णौ सविकल्पो वचनमार्गः, तदसहिष्णौ तु निर्विकल्प इति द्वावेव भङ्गौ, अवक्तव्यभङ्गस्तु व्यञ्जननये न संभवत्येव, श्रोतरि शब्दोपरक्तार्थबोधनस्यैव तत्प्रयोजनत्वात्, अवक्तव्यबोधनस्य च तन्नये संप्रदायविरुद्धत्वेन तथा बुबोधयिषाया एवासंभवादिति । अधिकमस्मत्कृतानेकान्तव्यवस्थायाम् ॥ तदेवं प्रतिपर्यायं सप्तप्रकारकबोधजनकतापर्याप्तिमद्वाक्यं प्रमाणवाक्यमिति लक्षणं सिद्धम् ॥ इत्थं च तदन्तर्भूतस्य तदबहिर्भूतस्य वाऽन्यतरभङ्गस्य प्रदेशगरमाणुदृष्टान्तेन नयवाक्यत्वमेवेत्यर्थतो लभ्यते । इतरप्रतिक्षेपी तु नयो नयाभासो, दुर्नयो वेत्युच्यते ॥ मलयगिरिचरणास्तु-नयो दुर्नयः सुनयश्चेति दिगम्बरिव्यवस्था, न त्वस्माकम्, नयदुर्नययोरर्थाविशेषात्स्याच्छब्देन विवक्षितधर्मोपरागेण कालाऽऽदिभिरेतदवृत्त्याऽभेदोपरागाद्वाऽनन्तधर्मोऽऽत्मकवस्तुप्रतिपादने प्रमाणवाक्यस्यैव व्यवस्थितेः। अत एव स्याच्छब्दलाञ्छिततयैव सर्वेष साधूनां भाषाविनयो विहितः । अवधारणीयभाषा च निषिद्धा; तस्या नयरूपत्वात्, नयानां च सर्वेषां मिथ्यादृष्टित्वात्। तथा चानुस्मरन्ति-" सव्वे णया मिच्छावाइणो त्ति । " न च सप्तानङ्ग्यात्मकं प्रमाणवाक्यम्, एकभङ्ग्यात्मकं च नयवाक्यमित्यपि नियन्तुं शक्यम्, सप्तानङ्ग्याः सप्तविधजिज्ञासोपाधिनिमित्तत्वात् । न च तासां सार्धत्रिकत्वम्।'को जीवः?' इति प्रश्ने लक्षणमात्रजिज्ञासया "स्याद् ज्ञानाऽऽदिलक्षणो जीवः" इति प्रमाणवाक्यरूपस्योत्तरस्य सिद्धान्तसिद्धत्वात् । स्यात्पदस्य चात्राऽनन्तधर्माऽऽत्मकत्वद्योतकत्वेन प्रमाणाङ्गत्वम् । द्योतकत्वं चात्रोपसंपादनकी शक्तिर्लक्षणा वेत्यन्यदेतत् । तत्र च श्रुतपदप्रतिपादनधर्मांशे लौकिकी विषयता स्यात्पदद्योत्या; अनन्तधर्माऽऽत्मकत्वांशे च लोकोत्तरेति विशेष इत्यपि निःसंदधेते । तन्मतमनुरुध्य प्रमाणलक्षणान्तरं समुच्चिनोति च पुनर्वाक्यमेकधर्मकं प्रतिनियतैकधर्मप्रतिपादयिषया प्रयुक्तं स्यात्पदाद्यपेरे येऽनन्ता धर्मास्तानुल्लिखतीत्येवंशीलं वाक्यं तदपि प्रमाणवाक्यं व्यवहर्तव्यमित्यर्थः । अयं च समुच्चयरूढ्यापि संप्रदायमतमिति कृत्वा समुद्घोतः । वस्तुतो नयदुर्नयप्रमाणविभागेनैवादर एव । हेमसूरिभिरपि-"सदेव सत्स्यात्सदिति त्रिधाऽर्थो, मीयेत दुर्नीतिनयप्रमाणैः२८" (स्या०)इत्यादिविभज्याभिधानात्; आकरे नयतदाभासानां व्यक्तेरुदाहृतत्वाच्च । अवधारणी च भाषा एकान्तवादाऽऽत्मिकैव निषिद्धा, न तु नयरूपाणि, तस्याः प्रमाणपरिकल्पितत्वेन तत्रावधारणीयत्वस्य निश्चायकत्वरूपनाषालक्षणान्वयेनैव सिद्धान्तसिद्धत्वात् । अत एव निराकाङ्क्षज्ञानसङ्ख्याऽऽदिस्थले शाब्दसमानाकारमानसस्वीकारे किमपराद्धं शाब्दबोधेनेति पर्यनुयोगो मानसस्य संशयाऽऽकारस्यापि संज्ञवाग्निश्चायकरूपशाब्दबोधानुपपत्तेरेव यौक्तिकैर्निराकृतः । न च भाषामात्रस्यावधारणीयत्वेऽप्याराधकत्वविराधकत्वबहुभयानुभयैः सत्याऽऽदिभेदचतुष्टयोपदेशान्नयभाषाया देशाऽऽराधकत्वेन तृतीयभङ्ग एव निक्षेपात्साधूनामनादरणीयत्वमित्यपि युक्तम्, चतुर्धा विभागस्य द्रव्यभावभाषायामेवोपदेशात्, तत्र च परिगणितमिश्रभाषाभेददशकानामन्तर्भावादेव नयभाषायां दोषाभावात्, श्रुतभावभाषायां च तृतीयभाषायामेवानधिकृतत्वाच्चारित्रभावभाषायामन्तर्योन्योरधिकृतत्वेऽप्ययुक्ततया चतसृणामपि भाषाणेऽपराधकत्वाविरोधस्य प्रज्ञापनाऽऽदावुक्तत्वात् । किञ्च-प्रतीत्यसत्यात्वलक्षणमत्र स्फुटमेव किं नोन्नीयते?, न च सप्तभङ्गात्मकवाक्यस्यैव प्रतीत्यसत्यात्वम्; अपेक्षाऽऽत्मकबोधजनकवाक्यत्वस्यैव तल्लक्षणत्वात्, अन्यथैकत्रापेक्षया ह्रस्वदीर्घाऽऽदिलौकिकवचनस्यालक्ष्यत्वाऽऽपत्तेः । न च सत्या सर्वत्रालौकिक्येव लक्ष्या, जनपदसत्याऽऽदिनेदानामसंग्रहाऽऽपत्तेः। ननु तथाऽप्युत्सर्गतोऽनादरणीयनयदुर्नयभाषयोरविशेषः । तथोक्तं वादिना-"सीसमईवित्थारण-मित्तत्थोऽयं कओ समुल्लावो। इहरा कहामुहं चे-वणत्थि एवं सअमवस्मि ॥२५॥"(सम्म०३ काण्ड)इति चेत् । न।

शिष्यप्रतिविस्तारकत्वं हि नयवाक्यस्य प्रमाणाऽऽत्मकमहावाक्यजन्यशाब्दबोधजनकावान्तरवाक्यार्थज्ञानजनकत्वं, तदनुकूलाऽऽकाङ्क्षोत्थापकत्वं वा, तेन तस्याऽऽदरणीयत्वस्यैव सिद्धेः। तदुक्तं वादिनैव-"पुरिसज्जायं तु पमु-च्च जाणओ पज्जवेज्ज अण्णयरं। परिकम्मणानिमित्तं, दाएहा सो विसेसं पि" ॥५४॥ (सम्म० १ का०)इति। प्रमाणवाक्यमपि ह्यनेकान्तरुचिशालिनं पुरुषविशेषमधिकृत्यैव प्रयुज्यते; तदनयोर्द्वयोरपि कारणिकत्वे प्राप्ते स्वस्वकाले औत्सर्गिकत्वमेव न्यायसिद्धम्; विप्रतिषिद्धकारणविधिस्थले तथाऽनुत्पत्तेः। तस्मात् "स्याद् ज्ञानाऽऽदिगुणो जीवः" इत्यपि सुनयवाक्यमेव,एकभङ्गरूपत्वात्। प्रमाणवाक्यता तत्राऽप्युत्थाप्याऽऽकाङ्क्षाक्रमेण भङ्गषट्कसंयोजनयैव । सकलाऽऽदेशत्वं च प्रतिभङ्गमनन्तधर्माऽऽत्मकत्वद्योतनेन; अन्यथा च विकलाऽऽदेशत्वमित्येके ॥ अक्षरमवस्तुविषयत्वेन त्रिभङ्गेवाऽऽद्यभङ्गेषु तत्, चतुर्षु चोपरितनेषु एकदेशविषयत्वेन विकलाऽऽदेशत्वमित्यन्ये ॥ अयं व्युत्पत्तिविशेषः सर्वसप्तभङ्गीसाधारणः, स्याच्छब्दलाञ्छनैकमात्रेण तु न प्रमाणवाक्यविश्रामः, सुनयवाक्यार्थस्यैव ततः सिद्धेः। अत एव कृष्णः सर्प इत्यादिविशेषणविशेष्यभावबोधकवाक्येऽपि सर्पमात्रे कृष्णत्वस्यानावादनन्ते व्यभिचारात् पृष्ठावच्छेदेन कृष्णोऽप्युदरावच्छेदेन शुक्लत्योपलम्भात् स्याच्छब्दसंयोजनया नयवाक्यत्वमित्याह समन्तभद्रः। लक्ष्यलक्षणाऽऽदिव्यवहारोऽपि नयवाक्यैरेव सिद्ध्यति, तद्दृश्यलौकिकबोधस्यानतिप्रसक्तस्य तेन्य एव सिद्धेः। प्रमाणवाक्यत्वं लौकिकबोधार्थं सप्तभङ्ग्यात्मकमेवाऽऽश्रयणीयम्। अत एव तद्व्यापकत्वं सम्मत्यादौ महता च यत्नेन साधितमिति किमतिविस्तरेण ? ॥ ६ ॥

(१०) नन्वेकत्र वस्तुन्यनेकाऽऽकारा प्रमाणधीः, एकाऽऽकारा च नयधीः कथमुत्पद्यते ?, इति जिज्ञासायामाह-

यथा नैयायिकैरिष्टा, चित्रेऽनेकैकरूपधीः ।
नयप्रमाणजेदेन, सर्वत्रैव तथाऽऽर्हतैः ॥ ७ ॥

(यथेति) यथा नैयायिकैश्चित्रे नीलपीताऽऽदिना शबले घटाऽऽदावनेकरूपा नीलपीताऽऽद्याकारा, एकरूपा च चित्राऽऽकारा धीरिष्टाऽभ्युपगता, तथाऽनुभवात्, स्यान्मतभेदाऽऽश्रयणाद्वा; तथा सर्वत्रैव वस्तुन्येकानेकरूपतया चित्रे प्रमाणनयभेदेन द्विविधा बुद्धिरार्हतैरिष्टा, अनुभवसिद्धेऽर्थे विरोधाभावादिति भावः। यथा च सर्वस्य वस्तुनश्चित्रत्वं तथोक्तमस्माभिरात्मख्यातौ, विस्तरभिया नेह प्रतन्यते।

चित्ररूपे तु मतभेदं तर्करसिकव्युत्पत्त्यर्थमुपदर्शयामः-तत्र नीलं नीलान्यरूपासमवायिकारणं न वेति चित्ररूपे विप्रतिपत्तिः,विधिकोटिः सामानाधिकरण्येन,निषेधकोटिरवच्छेदकावच्छेदेन। तेन नांऽशतो बाधः, सिद्धसाधनं वा। यत्तु नीलरूपासमवायिकारणकं पीतरूपासमवायिकारणकं न वेति प्रतिपत्तिरिति। तन्न । नीलरूपासमवायिकारणस्य नीलस्य पक्षत्वे बाधात्। चित्ररूपस्य पक्षत्वे आश्रयासिद्धेः। यदपि नीलरूपासमवायिकारणकवृत्तित्वविशिष्टरूपत्वं पीतरूपासमवायिकारणवृत्ति न वेति केषाञ्चित्प्रतिपत्युद्भावनम्। तदपि न रमणीयम्। विशिष्टस्य, विशिष्टाऽऽश्रयतया वाऽनतिरिक्तत्वादिति दिक्।

तत्र साम्प्रदायिकाः-नानारूपवद्वयवाऽऽरब्धे वस्तुनि नीलपीताऽऽदिभिरेकं संभूय चित्ररूपमारभ्यते। न च सामग्रीसत्त्वात् श्वेताऽऽदिनिर्नीलाऽऽदेरपि तत्र जननाऽऽपत्तिः, अगत्या नीलेतररूपाऽऽदेर्नीलाऽऽदिकप्रतिबन्धकत्वकल्पनात्;प्रतिबन्धकताऽवच्छेदकः संबन्धः स्वसमवायिसमवेतत्वम् , प्रतिबद्धतावच्छेदकश्च समवायः। चित्रत्वावच्छिन्नेऽपि नीलेतरपीतेतररूपत्वाऽऽदिनैव हेतुता, तेन न केवलनीलकपालाऽऽरब्धे चित्रोत्पत्तिप्रसङ्गः। यत्त्ववयवनिष्ठनीलाभावाऽऽदिघटकस्यैव चित्रं प्रति हेतुत्वमिति। तन्न। नीलपीतोभयकपालाऽऽरब्धे घटपाकजशितावयवपीते स्वचित्रेऽवयवे व्याप्यवृत्तिनीलोत्पत्तिकाले चित्रोत्पत्त्यापत्तेः। न च कार्यसहभावेन नीलाभावाऽऽदीनां तद्धेतुत्वादयमदोषः, नीलपीतश्वेतचित्रितकपालाऽऽरब्धे पीतश्वेतयोः क्रमेण नाशे श्वेतनाशकालेऽपि तदापत्तेरिति; पाकजचित्रे च न व्यभिचारः। पाकादवयवे नानारूपः, अन्यथानन्तरमेवावयविनि चित्रस्वीकारात्; पाकजचित्रस्वीकारे च विजातीयचित्रं प्रति नीलेतरत्वाऽऽदिना हेतुता, अग्निसंयोगजचित्रे चावच्छेदकत्वसंबन्धावच्छिन्न[प्रति] योगिताका नीलजनकाग्निसंयोगाऽऽदेरजावरूपजनकविजातीयाग्निसंयोगाश्च हेतवः। अस्तु वा तेजःसंयोगमात्रजन्ये विजातीये चित्रे विजातीयतेजः संयोगस्य हेतुत्वं, पाकयोरुभयजन्ये विजातीये चित्रे चोभयोरेव रूपमात्रजातिरिक्त एव वा विजातीयतेजःसंयोगो हेतुः.फलबलेन वैजात्यकल्पनात्। न चाग्निसंयोगजमात्रातिरिक्ते रूपमेव हेतुरस्तु इति विनिगमकाभावः। उभयस्थले नीलेतराऽऽदिसमाजाभावस्यैव विनिगमकत्वादित्याहुः॥ शिरोमणिभट्टाऽऽचार्यमतानुसारिणस्तु-चित्रघटेऽव्याप्यवृत्त्येव नीलपीताऽऽदीनि नानारूपाणि, एकरूपमिति प्रतीतेरेकोऽवान्तरावयविरितिवत्समूहैकत्वविषयत्वात्; सविषयावृत्तिव्याप्यवृत्तिजातेरव्याप्यवृत्तित्वविरोधस्तु प्रामाणिक एव। अत एव "लोहितो यस्तु वर्णेन, मुखे पुच्छे च पाण्डुरः। श्वेतः खुरविषाणाभ्यां, स नीलो वृष उच्यते" ॥१॥ इति स्मृतिरप्युपपद्यते। अथाऽव्याप्यवृत्तिनीलाऽऽदिकल्पने गौरवम्। तथाहि-अवच्छेदकतासंबन्धेन नीलाऽऽदिकं प्रति समवायेन नीलेतररूपाऽऽदीनां प्रतिबन्धकत्वमस्मिन् पक्षे वाच्यम्, अन्यथा पीतावयवावच्छेदेन नीलोत्पत्तिप्रसंगात्। न च नीलस्य स्वाश्रयावच्छेदेन नीलजन्यत्वस्वाभाव्यादेव न तदापत्तिः, विनैतादृशप्रतिबध्यप्रतिबन्धकभावं तथा स्वाभाव्यनिर्वाहात्। ननु समवायेन नीलं जायत एव पीतावयवावच्छेदेनेत्यत्र चाऽऽपादकाभाव इति चेत्। न। समवायस्येवावच्छेदकताया अपि कारणनियम्यत्वात्। एवं च नीलाऽऽदौ नीलेन रूपाऽऽदीनां, नीलेतररूपाऽऽदौ वा नीलाऽऽदीनां प्रतिबन्धकत्वे विनिगमकाभावः। मम नीलेतररूपाऽऽदौ नीलाऽऽदीनां न प्रतिबन्धकत्वम्। नीलपीताऽऽरब्धे नीलरूपत्वप्रसङ्गस्य बाधकत्वादिति चेत्। मैवम्। ममाऽपि नीलत्वाऽऽदिकमेव प्रतिबध्यतावच्छेदकं,न तु नीलेतररूपत्वाऽऽदि;गौरवादिति वक्तुं शक्यत्वात्। न च नीलत्वेन प्रतिबन्धकत्वं, न तु नीलेतरत्वेन, गौरवादित्येव किं न स्यादिति वाच्यम्; प्रतिबन्धकताऽवच्छेदकगौरवस्यादोषत्वात्। अस्तु वाऽवच्छेदकतया नीलाऽऽदौ समवायेन नीलाऽऽदीनामेव हेतुत्वम्। न च नानारूपवत्कपालाऽऽरब्धघटनीलस्य तत्कपालावच्छेदेनोत्पत्तिप्रसङ्गः, केवलनीलत्वाऽऽदिनैव तद्धेतुत्वात्। न च केवलत्वं नीलाभावसमानाधिकरणत्वमिति गौरवम्, अनवच्छिन्नसमवायेन नीलाऽऽदिहेतुत्वस्यैव तदर्थत्वात्। समवायेन नीलाऽऽदौ च स्वसमवायिसमवेतत्वसंबन्धेन नीलाऽऽदीनां हेतुत्वं, व्याप्यव-

त्तिनीलस्थलेऽव्याप्यवृत्तित्ववारणाय चावच्छेदकतया नीलाऽऽदौ स्वसमवायिसमवेतद्रव्यसमवायित्वसंबन्धेन नीलेतररूपाऽऽदीनां हेतुत्वमित्यव्याप्यवृत्तित्वपक्षेऽष्टादश कार्यकारणभावाः, चित्ररूपपक्षेऽप्येतावन्त एव । चित्ररूपे नीलेतररूपाऽऽदीनां षट्कस्य, नीलाऽऽदौ च नीलाऽऽदिषट्कस्य हेतुत्वम्, नीलेतराऽऽदिषट्कस्य च नीलाऽऽदौ प्रतिबन्धकत्वमित्यादिनाऽऽधिक्याज्जाघवात् । वस्तुतोऽवच्छेदकतया नीलाऽऽदौ स्वसमवायिसमवेतद्रव्यसमवायिसमवेतत्वसंबन्धेन नीलेतररूपाविशिष्टनीलत्वाऽऽदिनैव हेतुत्वम् । न च नीलेतरत्वाऽऽद्यवच्छिन्नं प्रति नीलविशिष्टनीलेतरत्वाऽऽदिना हेतुत्वे विनिगमकाभावः, नीलत्वापेक्षया नीलेतरत्वस्य गुरुत्वात्,इत्थं चाभिनिष्कर्षेऽस्माकं द्वादशैव कार्यकारणभावा इति लाघवादित्याहुः । तदसत् । चित्ररूपस्वीकारपक्षेऽपि नीलाऽऽदौ नीलेतराऽऽदप्रतिबन्धकत्वेनैव शुक्लावयवमात्राऽऽरब्धे नीलाऽऽद्यनुत्पत्तिनिर्वाहात्, नीलाऽऽदौ नीलाऽऽदिहेतुत्वाकल्पनात्, कार्यकारणभावसंख्यासाम्याद्व्याप्यवृत्तिनानारूपतत्प्रागभावभावावध्वंसाऽऽदिकल्पने परं परस्यैव गौरवात् । किञ्च-अव्याप्यवृत्तिरूपपक्षेऽवच्छेदकतासंबन्धेन रूपे उत्पन्ने पुनस्तेनैव संबन्धेनावयवे रूपोत्पत्तिवारणायावच्छेदकतासंबन्धेन रूपं (प्रत्यवच्छेदकतासंबन्धेन रूपं) प्रतिबन्धकं कल्पनीयमिति गौरवम् । न चावयविनि समवायेनोत्पद्यमानमवयवेऽवच्छेदकतयोत्पत्तुमर्हतीत्यवयविनि रूपस्य प्रतिबन्धकस्य सत्त्वेन रूपसामग्र्यभावादेव नावयवेऽवच्छेदकतया तदा रूपोत्पत्त्यापत्तिरिति वाच्यम् । एवं ह्यवयविनिष्ठरूपाजातावोऽवच्छेदकतासंबन्धेन रूपं प्रति हेतुर्वाच्यः, तथा च नानारूपवत्कपालाऽऽरब्धघटस्य नीलरूपाऽऽदेर्नीलकपालिकाऽवच्छेदेनानुत्पत्तिप्रसङ्गात्, तदवयविनि कपाले रूपसत्त्वात् । अपि च-नीलपीतवत्यग्निसंयोगात्कपालनीलनाशात्तदवच्छेदेनानुत्पत्तिर्न स्यात्, समवायेन रूपं प्रति तेन रूपस्य प्रतिबन्धकत्वात्, तदवच्छिन्नरूपे तदवच्छिन्नरूपस्य प्रतिबन्धकत्वकल्पने चातिगौरवम् । अथावच्छिन्ननीलाऽऽदौ नीलाजातावाऽऽदिषट्कमवयवगतमवयविगतं च हेतुः,रक्तनीलाऽऽरब्धे रक्तनाशकपाकेन व्याप्यवृत्तिनीलोत्पत्तौ चावयविनि नीलाभावाज्जातावनवच्छिन्ननीलोत्पत्तिः, केवलनीले पाकेन क्वचिदुत्पत्तौ च प्राक्तननीलनाशादेद्यावच्छिन्ननीलोत्पत्तिरिति चेत् । न । नीलपीतश्वेताऽऽद्यारब्धे श्वेताऽऽद्यवच्छेदेन नीलजनकपाके सति प्राक्तननीलनाशेन तत्तदवच्छिन्ननानानीलकस्य नाशापेक्षया एकचित्रकल्पनाया एव लघुत्वात् । अथ व्याप्यवृत्तिरूपस्य[व्य]वच्छेदकस्वीकारादवच्छेदकतया नीलाऽऽदिकं प्रत्येव समवायेन नीलाऽऽदेर्हेतुत्वम् । न चैवं घटेऽपि तया नीलाऽऽद्युपपत्तिः;अवयवनाल्पत्वेन, द्रव्यविशिष्टनीलत्वेन वा तद्धेतुत्वात् । न च नीलमात्रपीतमात्रकपाल्याद्याऽऽरब्धनीलपीतकपाले तदापत्तिः, नीलकपाल्याद्यवच्छिन्नतदवच्छेदेन तदुत्पत्तेरिष्टत्वात्,अस्तु वा तया नीलाऽऽदौ नीलेतररूपाऽऽदेरेव विरोधित्वमिति चेत् । न । नीलाऽऽदौ नीलेतररूपाऽऽदिप्रतिबन्धकतयैवोपपत्तौ तत्र नीलाऽऽदिहेतुतायां मानाभावात्तानारूपवदवयवाऽऽरब्धे चित्ररूपस्यैव प्रामाणिकत्वाद् व्याप्यवृत्तेरवच्छेदकायोगाच्चेतराऽऽदौ नीलाऽऽदेः प्रतिबन्धकत्वेऽविनिगमाच्च । यदि च-स्वाऽऽश्रयसंबन्धेन नीलं प्रति स्वव्यापकसमवायेन नीलरूपं हेतुरुपेयते,नीलपीताऽऽद्यारब्धस्थले च स्वाऽऽश्रयसंबन्धेन नीलरूपस्य पीतकपालेऽपि संभवेन व्यभिचारात् शुक्लसंबन्धेन हेत्वभावादेव न तत्र नीलोत्पत्तिरिति विभाव्यते, तदा नीलं प्रति नीलेतररूपाऽऽदेः प्रतिबन्धकत्वे चित्ररूपत्वाऽऽदिना न कल्पनीयमित्यतिलाघवम् । एवं च सामानाधिकरण्यसंबन्धावच्छिन्नप्रतियोगिताको नीलेतराभावः समानावच्छेदकत्वप्रत्यासत्त्या नीलहेतुरित्यपि निरस्तम्; समानाधिकरणस्य व्याप्यवृत्तित्वेन तत्संबन्धावच्छिन्नप्रतियोगिताकनीलेतराभावासत्त्वाच्चेति बहवः संप्रदायं समादधते । केचित्तु-विजातीयचित्रं प्रति स्वविजातीयत्वस्वसंवलितत्वोभयसंबन्धेन रूपविशिष्टरूपत्वेनैव हेतुत्वम् । स्वैवजात्यं च चित्रत्वाव्यतिरिक्तं यत्स्ववृत्ति तद्भिन्नधर्मसमवायित्वम्, स्वसंबलितत्वं च स्वसमवायिसमवेतद्रव्यसमवायिवृत्तित्वम् । न च सत्त्वानुगमः, संबन्धमध्ये तत्तत्प्रवेशात्संबन्धावच्छिन्नप्रतियोगिताकानां हेतुत्वादित्याहुः॥ परे तु नीलपीतोभयाभावपीतरक्तोभयाभावाऽऽदीनां स्वसमवायिसमवेतत्वसंबन्धावच्छिन्नप्रतियोगिकानां समवायावच्छिन्नप्रतियोगिताकानां विजातीयपाकोभयाभावाऽऽदीनां यावत्स्वावच्छिन्नप्रतियोगिताक एको भावश्चित्रत्वावच्छिन्नं प्रति हेतुरित्याहुः॥ रूपत्वेनैव चित्रं प्रति हेतुत्वम्, कार्यसहभावेनाचैत्रेतराभावस्याहेतुत्वेनानतिप्रसङ्गादित्यन्ये॥ परे तु-चित्रत्वावच्छिन्ने रूपत्वेनैव हेतुत्वम्, नीलपीतोभयाऽऽरब्धवृत्तिचित्रत्वावान्तरवैलक्षण्यावच्छिन्ने च नीलपीतोभयत्वेन हेतुता । एवं तत्रितयाऽऽरब्धे तत्रितयत्वेन,नीलपीतोभयाऽऽदिमात्राऽऽरब्धे च नीलपीतान्यतरादितररूपत्वेन प्रतिबन्धकत्वान्न त्रितयारब्धचित्रवति द्वितयाऽऽरब्धसंप्रयोगः। न चैवं गौरवम्,प्रामाणिकत्वात् । वस्तुतः समवायेन द्वितयजचित्रादौ स्वाधिकरणपर्याप्तवृत्तिकत्वसंबन्धेनैव द्वितयाऽऽदिनैव हेतुत्वम्, नातःप्रागुक्तप्रतिबन्धकत्वकल्पनागौरवमित्याहुः। तच्चूक्ष्मास्तु नीलपीतरक्ताऽऽद्यारब्धघटाऽऽदौ नीलपीतरक्ताऽऽदिश्वेतनीलपीतोभयजपीतरक्तोभयजतत्त्रितयजादीनामुत्पत्तिः,सर्वेषां सामग्रीसत्त्वात् । तत्र चरमं व्याप्यवृत्ति,इतराणि त्वव्याप्यवृत्तीनीति विशेषः।न चैकमेव तदस्त्विति वाच्यम्, तत्तदवयवद्रव्यमात्रावच्छेदेनेन्द्रियसन्निकर्षे विलक्षणविलक्षणचित्रोपलम्भात्। न च नीलपीताऽऽदिविशिष्टचित्रेणावान्तरचित्रप्रतीतिसंभवोऽखण्डोऽत्र, सामान्यचित्रत्वेनाखण्डावान्तरचित्रत्वानां सामानाधिकरण्यप्रत्ययात् । न चेदेवं तदा नीलाऽऽद्यविशेषिता ये नीलाऽऽदिभेदास्तत्तदाश्रयरूपसमुदायेनानुगतचित्रप्रतीतेश्चित्रत्वं नीलाऽऽदिभेदसमुदायेन नीलाऽऽद्यनुगतप्रतीतिसम्भवान्नीलत्वाऽऽदिकमपि च विलीयेतेति जातेरव्याप्यवृत्तित्वे पुनरस्त्येकमेव यत्किञ्चिद्यवच्छेन तत्र नीलत्वपीतत्वरक्तत्वविलक्षणचित्रत्वाऽऽदिसंभवादित्याहुः॥ तदिदमखिलमशिक्षितप्रलापमात्रम्॥ चित्रपटोचिते च रूपाप्रतिपत्तेरनुभवविरुद्धत्वात्, शुक्लाऽऽदिरूपाणामपि परस्परभिन्नानां साङ्कर्यसंबन्धेन निर्विगानं तत्र प्रतीतेः, प्रत्येतव्यकल्पनागौरवेण प्रतीतिबाधे रूपाऽऽदेस्तु तन्मात्रगतत्वाऽऽपत्तेः।तदिदमाहुःसंमतिटीकाकृतः-"न च चित्रपटाऽऽद्यावास्तशुक्लाऽऽदिविशेषरूपमात्रं तदुपलम्भान्यथानुपपत्त्याऽस्तीत्यभ्युपगन्तव्यम्, कथं चित्ररूपः पट इति प्रतिभासाभावप्रसक्तेरिति, एकाधिकरण्यावच्छिन्नशुक्लाऽऽद्यवयवावच्छेदः,एवं कथञ्चित्समुदायव्यतिरिक्तचित्रमिति, तत्र शुक्लाऽऽद्यग्रहे चित्राग्रहप्रसक्तिरित्येव तात्पर्यम्। किञ्चिच्छुक्लावयवावच्छेदेनापि चक्षुःसंनिकर्षेण चित्रोपलम्भः स्यात्;अथ चित्रत्वग्रहे परम्परयाऽवयवगतनीलेतररूपीतेतररूपाऽऽदिमत्त्वग्रहो हेतुः,अतएव त्र्यणुकचित्रं चक्षुषा न गृह्यत इत्याचार्याः।न च चित्रत्वनिष्ठविषयतया चित्र-

ग्यग्रहे स्वविशेषसमवेतत्वसंबन्धेनोक्तस्य हेतुत्वे घटावयवगततद्ग्रहात् शुक्लावयवावच्छेदेन चित्रपटसन्निकर्षेऽपि तद्रूपचित्रत्वप्रत्यक्षाऽऽपत्तिरिति वाच्यम्,विशेष्यतया चित्रत्वप्रकारकप्रत्यक्ष एव चरमसमवेतत्वविनिर्मुक्तसंबन्धेन तत्कुतुत्वात् । न च नीलेतररूपत्वाऽऽद्यवच्छिन्नप्रकारताग्रहो न हेतुर्नीलपीतत्वाऽऽदिनाऽवयवगतनीलपीताऽऽदिग्रहेऽप्यवयविचित्रप्रत्यक्षोत्पादादिति वाच्यम्, विलक्षणचित्रप्रत्यक्षे तेन तेन रूपेण तत्तद्ग्रहस्यापि हेतुत्वात् । वस्तुतो नीलेतररूपत्वाऽऽदिव्याप्यत्वेन नीलेतररूपत्वपीतत्वाऽऽद्यनुगमान्न क्षतिरिति चेत् । न । द्व्यणुकचित्ररूपाग्रहे चतुरणुकचित्रप्रत्यक्षानुपपत्तेः, चित्रावयवाऽऽरब्धे चित्रग्रहेऽवयवविषयकनीलेतररूपत्वाऽऽदिव्याप्यचित्रत्वावच्छिन्नप्रकारकग्रहस्यैव हेतुत्वात् । यदि च नीलेतररूपपीतेतररूपाऽऽदिमदवयवावच्छिन्नेन्द्रियसंनिकर्षस्यावयवनीलाऽऽदिगतनीलत्वाऽऽदिग्रहप्रतिबन्धकदोषाभावानां च चित्रप्रत्यक्षे हेतुत्वम्,अतस्त्रसरेणुचित्रस्यापि चक्षुषा ग्रह इत्युद्घोष्यते, तदाऽनन्तहेतुहेतुमद्भावकल्पनागौरवात्, चित्रत्वं व्यासज्यवृत्त्यैव, तत्र च समानाधिकरणनानारूपग्रहव्यङ्ग्यत्वमित्येव कल्प्यमानं शोभते। न चैवं गौरवं,चित्रत्वग्रहे सामानाधिकरण्येन रूपविशिष्टरूपग्रहत्वेनैव हेतुत्वाद्युक्तहेत्वभावे चित्रत्वविनिर्मुक्तचित्रप्रत्यक्षस्य चोभयोस्तुल्यत्वात् । यदि च नानाऽवयवावच्छिन्नपर्या[य]प्तवृत्ति एकं चित्रमप्यनुभूयतेऽत एवैकावयवावच्छेदेन चित्राभावप्रतीतेरप्युपपत्तिरिति स्वीक्रियते, तदैकानेकचित्रद्रव्यस्वभावाभ्युपगमं विना न काऽप्युपपत्तिः, देशस्कन्धनियतधर्माणां तद्ग्राहकसामग्रीग्राह्यत्वेनैवोक्तोपपत्तेः। देशस्कन्धपरिमाणविशेषग्रहेऽपीयमेव गतिरिति दिक् । किञ्च-नीलेतररूपाऽऽदिषट्कस्यैव चित्ररूपे हेतुत्वमित्येतावतैव नोपपत्तिः,अवयवगतोत्कृष्टापकृष्टनीलाद्न्यामपि चित्रसंज्ञत्वात् । ते चोत्कर्षापकर्षौ विचार्यमाणा अनन्ता एव ।

तदाह श्रीसिद्धसेनः-

"पच्चुप्पण्णम्मि वि प-ज्जयम्मि जयणागइं पमइ दव्वं ।
जं एगगुणाऽऽईया, अणंतकप्पा गुणविसेसा" ॥६॥ (स०२का०)

व्याख्या-प्रत्युत्पन्ने वर्त्तमानेऽपि पर्याये भजनागतिं भेदाभेदप्रकारं पतत्यासादयति द्रव्यम, यस्मादेकगुणाऽऽदयः कृष्णत्वाऽऽदयोऽनन्तप्रकारास्तत्र गुणविशेषाः प्रकारत्वाच्चिनः।

तेषां च मध्ये केनचिदेव गुणविशेषेण युक्तं तदिति कृष्णं हि द्रव्यं द्रव्यान्तरेण तुल्यमधिकमूनं वा भवेत्, प्रकारान्तराभावात् । आद्ये सर्वतुल्यत्वे तदेकताऽऽपत्तिः । उत्तरयोः संख्येयाऽऽदिभागगुणवृद्धिहानिभ्यां षट्स्थानकप्रतिपत्तिरवश्यंभाविनी । तथा च प्रतिनियतहानिवृद्धियुक्तकृष्णाऽऽदिपर्यायेण सत्त्वं, नाऽन्येनेति । इत्थं च नीलत्वाऽऽद्यवान्तरजातीनामनन्तत्वात् तरतमशब्दमात्रेण तदनुगमस्य कर्तुमशक्यत्वात् । तत्तदवान्तरजातीयनीलपीताऽऽदीनामनन्तचित्रहेतुत्वकल्पने गौरवमिति षट्स्थानपतितवर्णपर्यायेण चित्रद्रव्यमेव स्वसामग्रीप्रभवमभ्युपगन्तव्यम; आर्षसमाजसिद्धमेतस्याऽपि तथा द्रव्यत्वकार्यतावच्छेदकत्वस्वीकारात् । एतेन चित्रप्रत्यक्षमनेकताऽवच्छेदकमपि चक्षुःसंयोगनिष्ठं वैजात्यं स्वीकर्त्तव्यमित्यपि निरस्तम् । सूक्ष्मैक्षिकयाऽनन्तावान्तरचित्रानुभवादनन्तवैजात्यकल्पनाऽऽपत्तेरत्यन्ताप्रामाणिकत्वादिति द्रष्टव्यम् । अव्याप्यवृत्तिरूपपक्षेऽप्यवयवगतोत्कृष्टापकृष्टनीलाद्न्यामवयविनीलेतरयोरवच्छिन्नयोः सामान्यसामग्रीवशादर्थादनवच्छिन्नस्य नीलस्योत्पत्तिप्रसङ्गोऽवयविनिष्ठेतरत्वाऽऽद्यवच्छिन्न एवावयवनीलेतरत्वाऽऽदिना हेतुत्वे नीलत्वावच्छिन्नस्याऽऽकस्मिकत्वप्रसङ्गः । किमाकस्मिकमिति चेत् ?, तद्ग्रहाविच्छिन्नार्थं तथाप्रवृत्तिविरहः, एतत्कारणसत्त्वे नीलत्वावच्छिन्नस्यावश्यमुत्पत्तिरित्यनिश्चयश्च प्रतीयते । तत्र नीलसामान्यमनवच्छिन्नम्, अवच्छिन्नाश्च तद्विशेषाः । केवलशुक्लेऽपि च स्वरूपयद्भवयवावच्छेदेनेन्द्रियसन्निकर्षेऽणुमहत्त्वोपेतशुक्लत्वविशेषाः, तदनुगतं शुक्लसामान्यं चेत्येकानेकवर्णविशिष्टद्रव्यपरिणामाभ्युपगमं विना न कथमपि विस्तारः। एतेनाऽव्याप्यवृत्तिनीलाऽऽदिकल्पने ग्राहकान्तरकल्पने अव्याप्यवृत्तिद्रव्यसमवेतप्रत्यक्षत्वाऽवच्छिन्नं प्रति चक्षुःसंयोगकावच्छेदकावच्छिन्नसमवायसंबन्धावच्छिन्नाऽऽधारतासंसर्गकर्षेण संयोगाऽऽदिप्रत्यक्षस्थले कक्षीकृतेनैवानतिप्रसङ्गात् । नीलपीतोभयकपालाऽऽरब्धघटीयनीले च नीलकपालैकदेशे परम्परयाऽवच्छेदिकेत्यभ्युपगमादित्यादि निरस्तम् । शाखामूलोभयावच्छिन्नदीर्घतन्तुतरुसंयोगवच्चीलेतरोभयाऽऽद्यवयवावच्छिन्नविलक्षणरूपस्याऽनुभवसिद्धत्वेन तद्ग्राहकोभयाऽऽदिपर्याप्तावच्छेदकताकाऽधिकरणतागर्भसंनिकर्षाऽऽदिकल्पनाया अप्यावश्यकत्वादुपदर्शितसंयोगस्थलेऽपि एकैकावच्छिन्नसंयोगद्वयस्वीकारे च तद्वृत्तिकृता सर्वैश्च नीलेताराऽऽरब्धेऽवयविनि नीलानीलं स्वस्वावच्छेदेन समुत्पद्यमानं रूपमविरोधाद् व्यापकमेवोत्पद्यते, सजातीयविजातीयेषु नानापदार्थेषु जायमानं समूहाऽऽलम्बनमेवैकं ज्ञानमिति सर्वं विलूनशीर्णं स्यात्, यथा दर्शनसंस्कारतात्पर्याभ्यां नानैकसंयोगरूपाभ्युपगमे व्यक्तिं स्याद्वादिनैव (?)। एतेन नानारूपवदवयवाऽऽरब्धे व्याप्यावृत्तीन्येव नीलपीताऽऽदीन्युत्पद्यन्ते, नीलाऽऽदिकं प्रति नीलेताराऽऽदिप्रतिबन्धकत्वनीलाऽऽदिकारणत्वकल्पनापेक्षया व्याप्यवृत्तिनीलपीताऽऽदिकल्पनाया एव न्याय्यत्वादित्यपि परेषां मतं निरस्तम् ; नीलकपालावच्छेदेन चक्षुःसन्निकर्षे पीताऽऽदेरुपलम्भाऽऽपत्तेरपि तत्र दोषत्वात् । तदाह सम्मतिटीकाकारः-"आश्रयव्यापित्वेऽप्येकावयवसहितेऽप्यवयविन्युपलभ्यमानेऽपरावयवानुपलम्भावप्यनेकरूपप्रतिपत्तिः स्यात्, सर्वरूपाणामाश्रयव्यापित्वादिति ।" न च नीलाऽऽद्यवयवावच्छिन्नसन्निकर्षस्य नीलाऽऽदिग्राहकत्वकल्पनादोषः, पीतकपालिकाऽवच्छिन्ननीलपीतोभयकपालावच्छेदेन संनिकर्षेऽपि नीलग्रहप्रसङ्गात् । न च केवलनीलावयवावच्छिन्नसन्निकर्ष एव ग्राहक इति वाच्यम्, नीलपीतोभयद्व्यणुकाऽऽरब्धत्रसरेणुनीलप्रत्यक्षाऽऽपत्तेः । परमाणुसंनिकर्षेऽस्यैव परमाण्ववच्छिन्नसंनिकर्षस्याऽपि द्रव्याग्राहकत्वेन तत्कृतरूपाग्राहकतया चित्रस्वभावत्वमानुभविकम्, तथा ग्राहके ज्ञानेऽपि तत्राक्षणमाया एकाऽऽकारतायाः, सक्षणमानां च नानाऽऽकारताविशेष्यतासांसर्गिकविषयतानां नयनिरूपितानां शुद्धानां चानुलोमप्रतिलोमभावेन समानम्, सांवित्संवेद्यतानियामकवैचित्र्यशालिनीनां च बह्वीनामनुभवात्। अत एव "सावज्जजोगविरओ, तिसु गुत्तो तसु संजुत्तो । उवउत्तो जयमाणो, आया सामाइयं होइ ॥१॥" इति सप्तनयाऽऽत्मकमहावाक्यार्थज्ञाने एकाऽवशिष्टा प्रमाणाऽऽकारता, अनेकांशिकयो नयविषयतापरस्परसंयोगजाश्च बह्वयोऽनुभूयन्ते। नैयायिकास्तु-विशेषणं, तत्र च विशेषणान्तरम् १, विशिष्टस्य वैशिष्ट्यम् २, एकविशिष्टेऽपरवैशिष्ट्यम् ३, एकत्र द्वयम् ४; इत्येवं चतुर्वी

विशिष्टे वैशिष्ट्यबुद्धिः । तत्र मध्यमद्वये विशेषेण विशेष्यताऽवच्छेदकप्रकारकनिश्चयस्वान्त्यां हेतुता, इतरद्वये तु विशेषणाङ्गानासंसर्गग्रहयोः, विशेष्ये विशेषणमितिरीत्या बुद्धित्वं-रक्तत्वाऽऽद्यवच्छिन्नप्रकारतानिरूपितदण्डत्वाऽऽद्यवच्छिन्नप्रकारकबुद्धित्वम्, तेन दण्डो रक्तो दण्डवान्पुरुष इति समूहाऽऽलम्बने नातिप्रसङ्गः, तत्र दण्डत्वाद्यवच्छिन्नप्रकारतायाः रक्तत्वाद्यवच्छिन्नप्रकारतानिरूपितत्वात् । न च विशिष्टवैशिष्ट्यविषयतास्वीकारे रक्तदण्डवानित्यत्र विशेष्ये विशेषणमितिविषयितायां दण्डो रक्तो दण्डवान्पुरुष इति समूहालम्बनव्यावृत्तायां मानाभावः । रक्तरूपदण्डत्वोभयाद्यवच्छिन्नदण्डनिष्ठप्रकारतानिरूपिता रक्तरूपत्वाऽवच्छिन्नप्रकारतानिरूपितशुद्धदण्डत्वाद्यवच्छिन्नप्रकारतायाः आनुभविकत्वम् । किञ्च-रक्तदण्डवानित्यादिवाक्यादुपस्थितस्वघटकाखिलपदार्थाज्जायमानाया अन्वितान्वयबुद्धेः रक्तो दण्डो दण्डवान्पुरुष इति वाक्यजसमूहाऽऽलम्बनावैलक्षण्ये रक्तदण्डाभाववानित्यादिबाधधीकालेऽप्युपस्थापत्तिरिति तत्प्रतिबध्यताऽवच्छेदकतयैव तत्सिद्धिरुक्ताधीया रक्तरूपत्वावच्छिन्नप्रकारतानिरूपितशुद्धदण्डत्वावच्छिन्नप्रकारतानिरूपितपुरुषत्वाऽवच्छिन्नविशेष्यताकाधीयैव प्रतिबद्धत्वाविशिष्टवैशिष्ट्यविषयतायाः बाधप्रतिबध्यतावच्छेदकत्वे उक्तस्थल एवानुपपत्तेः । अपि च-विशकलितज्ञानाद् व्यापकविषयताशालिमानसस्वीकारेण तत्साधारण्येनैव प्रतिबद्धत्वं युक्तिमत् । अथैवं दण्डो रक्तो न वेति संशयकाले रक्तवाक्याद्विशेष्ये विशेषणमिति रीत्याऽन्वयबोधाऽऽपत्तिरिति चेत् । न । प्रथमभिष्टत्वात्, अनन्तरं च विशिष्टस्य वैशिष्ट्यमिति रीत्याऽन्वयविषयः संभवात् । तदनुभवोऽप्यविरुद्धः, प्रात्यक्षिकी बुद्धिरप्युक्तसंशयकाले रक्तत्वांशे संशयाकारा दृष्टैव । यत्तु घटघटत्वाऽऽदिनिर्विकल्पकोत्तरं घटत्वादित्याकारा धीर्विशेष्ये विशेषणमिति रीत्या जायत इति । तत्र घटाऽऽद्यंशे तद्धीप्रकारताया निरवच्छिन्नत्वेऽपसिद्धान्तः, जात्यतिरिक्तस्य किञ्चित्प्रकारेणैव भानात् । तादृशधीविरोधिनोऽसंसर्गग्रहस्यासंभवात्तथा विशेषणधियोऽहेतुत्वाच्च । तस्या घटत्वाऽऽद्यवच्छिन्नत्वे तु तत्रियो घटो नास्तीत्यादिबुद्धिवद्विशिष्टवैशिष्ट्यधीत्वस्यैवाध्यवसितप्रकारकज्ञानमेवोपनायकम्, तस्य च कार्यतावच्छेदकं लौकिकविषयिताशून्यम्, तद्विषयिकज्ञानत्वापेक्षया लाघवाद्विशिष्टवैशिष्ट्याऽऽद्यविषयताशालिप्रत्यक्षत्वमेवेति घटत्वप्रकारकज्ञानोत्तरं जायमानायां घटवदिति बुद्धौ विशिष्टवैशिष्ट्यधीत्वमेव; निर्विकल्पकोत्तरं तु विशेष्ये विशेषणमितिरीत्या लौकिकविषयताशालिज्ञानस्यैव स्वीकारात् । न च दण्डः इत्याद्यात्मकमानसबोधासंग्रहः, तत्र ज्ञानांशे दण्डस्य प्रकारकत्वात् । न चात्मन्युपनीतभावे च ज्ञानाजावेऽपि तत्रागत्य लौकिकविषयाशून्यत्वं निवेशनीयम्; तादात्म्येन स्वस्मिन् स्वप्रकारकत्वाऽभ्युपगमादित्यादिनिरस्तम् । नव्यनये निर्विकल्पकसाधारणप्रत्यासत्तिस्वीकारेणोपनयकार्यताऽवच्छेदके लौकिकविषयिताशून्यत्वस्यैव निवेशात् घटवदित्यादौ सर्वत्र विशेष्ये विशेषणमितिरीत्या विषयतायां प्रागसङ्कुचबाधकस्यैव न साक्षाज्ज्यायैवेति(?)भावः, दण्डी न वेति संशयकाले दण्डाभाववदितिधीर्विशेष्ये विशेषणमितिरीत्या स्यात्, तयाऽभावे प्रतियोगिताऽवच्छेदकविशिष्टप्रतियोगिनो बुद्धेरप्रसिद्ध्या तत्प्रतिबन्धकत्वस्याप्ययोगादिति चेत् । न । तादृशबुद्धेरप्रसिद्धत्वेदण्डाभावसंसर्गग्रहाऽऽदिसामान्यसामग्र्या विशिष्टवैशिष्ट्यविषयिताबोध एव हेतुत्वात्, तादृशबुद्धेरापादकाभावाद्विशेष्ये विशेषणमिति विषयितायाः वैशिष्ट्यविषयिताकबोध एव हेतुत्वात्, तादृशबुद्धेरापादकाभावाद्विशेष्ये विशेषणमिति विषयिताया विशिष्टवैशिष्ट्यविषयिताव्यापकत्वे दण्डाभावावदिति ज्ञानेऽपि तस्याः सत्त्वेन तदवच्छिन्नं प्रति प्रतिबन्धकत्वसंभवाच्च । अत एव दण्डो रक्तो न वेति संशयकाले यदि विशेष्ये विशेषणमिति रीत्याऽपि रक्तदण्डवानिति धियो नोत्पत्तिः, तदा तत्र दण्डो रक्त इत्यादिनिश्चयाजावविशिष्टो दण्डो रक्तो न वेत्यादिसंशयः प्रतिबन्धकः स्वीक्रियते । इत्थं च व्यापकत्वाद् विशिष्टे विशेषणमिति रीत्या विषयतैवानुमितिप्रवृत्त्यादिजनकताऽवच्छेदिका । विशिष्टवैशिष्ट्यबुद्धित्वं तु रक्तदण्डत्वाऽऽदिविशिष्टपर्याप्तिप्रकारताकबुद्धित्वं रक्तदण्डेन जानामीति प्रतीतेरिति संप्रदायविदः । तदसत् । अस्या एवाऽनुमित्यादिजनकताऽवच्छेदकत्वे विशिष्टवैशिष्ट्यविषयितायां मानस्य दूरापास्तत्वात् । रक्तदण्डवानित्यादिज्ञानेऽपि रक्तत्वाऽऽदिप्रकारतानिरूपितदण्डाऽऽदिनिष्ठविशेष्यताया एवानुभवात् रक्ताऽऽदेर्दण्डाऽऽदिविशेष्य इत्येव प्रतीतेः। तस्माद्विशिष्टवैशिष्ट्यविषयताकबुद्धित्वमेवानुमित्यादिजनकताऽवच्छेदकम् । विशेष्ये विशेषणमिति बुद्धित्वं तु विशेषणताऽवच्छेदकसंशयकालीनज्ञानसाधारणमित्यलं संशयप्रतिबन्धकत्वेन, विशिष्टपर्याप्तप्रकारत्वासंभवभिया परामर्शवैशिष्ट्यबुद्धित्वमित्यपि न युक्तम् । वह्निव्याप्ये धनवान्नित्यादौ विशिष्टव्याप्तेरसिद्धत्वेन प्रकारत्वासंभवभिया परामर्शः,दीधितौ क्षणश्लो निरुक्तेरानर्थक्यादाऽऽपातात् । अनेन वैशिष्ट्यं च वैज्ञानिकम्, तेन लोहितवह्निमानित्यादौ न विशिष्टवैशिष्ट्यबोधानुपपत्तिरिति मथुरानाथोक्तमपास्तम् । विशिष्टवैशिष्ट्यविषयतायाविशेषणताऽवच्छेदकसंबन्धभेदेन भिन्नेति सर्वैः स्वीकारेण समवायाऽऽदिघटिततदसंभवस्य वैज्ञानिकसंबन्धेन समाधातुमशक्यत्वाच्च, तत्तत्संबन्धेन विशेषणताऽवच्छेदकप्रकारकनिश्चयस्य तत्तत्संबन्धनिरूपितवैज्ञानिकसंबन्धेनैव विशिष्टवैशिष्ट्यबुद्धित्वाऽवच्छिन्नं प्रति हेतुत्वकल्पने त्वतिगौरवम्, संशयदशायामपि शुद्धसंबन्धेन कार्याऽऽपत्तिश्चा न वेष्टापत्तिः,अनुभवविरोधात्।अन्यथा विशिष्टवैशिष्ट्यं न कार्यतावच्छेदकम्, अर्थसमाप्तासिरूत्वाद्विशेषणज्ञानद्वयादेव तादृशबोधाऽऽपत्तिरिति मिश्रमतसाम्राज्याऽऽपत्तिः,दण्डी रक्तो न वेति संशयानन्तरमजायमानस्य, दण्डो रक्त इति निश्चयानन्तरं च जायमानस्य बोधस्याऽनुभवसिद्धत्वात् । एवं हि तत्रोक्तकार्यकारणभावेन तन्मतं निराक्रियते, नियतसंबन्धग्रहेत्वेऽपायमेव युक्तिरिति । इदं तु स्याद्रक्तदण्डवानित्यत्र दण्डाऽऽश्रितैव प्रकारता, तदवच्छेदकता च रक्तदण्डत्वे च पर्याप्ता, रक्तेन दण्डत्वेन चामुमत्र जानामीति प्रतीतेर्व्यधिकरणस्याप्यवच्छेदकत्वात् । तत्त्वावच्छेदकत्वाऽऽदिकम् इदं रजतमित्यादि पीतशङ्खवदित्यादिभ्रमवदविरुद्धम् । साऽवच्छेदकता तत्तद्धर्मांशे समानाधिकरण्याधिकरणतत्तत्संबन्धावच्छिन्ना, तत्र निरूपकबुद्धित्वं विशिष्टवैशिष्ट्यबुद्धित्वं वह्निव्याप्ये धनवानित्यादावपि संभवतीत्यलं दीधितिकृतः क्षणश्लो निरुक्ता; श्यमेवानुमित्यादिजनकताऽऽद्यवच्छेदिका नानाप्रकारताऽऽदिघटितधर्मस्य जनकताऽऽद्यवच्छेदकत्वे गौरवादिति । अथ दण्डो रक्त इति निर्णयस्य रक्तत्वदण्डत्वोभयधर्माऽवच्छिन्नप्रकारताकत्वं जन्यताऽवच्छेदकमित्यभ्युपगमेऽपि रक्तत्वधर्मिताऽवच्छेदकदण्डत्वप्रकारकनिर्णयजन्ये दण्डरक्तवानिति विशिष्टवैशिष्ट्यबोधे व्यभिचार इति चेत् । न । रक्तत्वप्रकारतानिरूपितदण्डत्वावच्छिन्न-

विशेष्यताशालित्वस्याऽपि तादृशनिर्णयजन्यतावच्छेदके प्रवेशात्, उक्तस्थले दण्डत्वप्रकारतानिरूपितरक्तत्वावच्छिन्नविशेष्यतायां एव सत्त्वात्। उभयधर्मावच्छिन्नप्रकारतां परित्यज्योभयपर्याप्तप्रकारतानिवेशेन हेतुत्वस्वीकारे तु पर्वतो लौहित्याभाववानिति ज्ञानकाले लोहितत्वमानिति विशिष्टवैशिष्ट्यबुद्ध्यभावाऽऽपत्तिः; पर्वतो न लोहित इति ज्ञानस्य लौहित्यप्रकारकपर्वतविशेष्यकज्ञान एव प्रतिबन्धकत्वात्। न च रक्तत्वावच्छिन्नविशेष्यताकरक्तप्रकारकस्य रक्तो रक्त इति स्मरणस्य प्रसङ्गः, तत्र तथा निर्णयस्य हेतुत्वादिति वाच्यम्; रक्तत्वावच्छिन्नविशेष्यतायास्तत्र रक्तत्वप्रकारतानिरूपितत्वेऽपि रक्तत्वावच्छिन्नविशेष्यतात्वे तस्यास्तादृशप्रकारतानिरूपितत्वानभ्युपगमात्, तेन रूपेण रक्तत्वप्रकारतानिरूपितत्वेऽपि रक्तत्वावच्छिन्नविशेष्यतात्वे तच्छालित्वं ज्ञानस्यैव, रक्तो रक्त इत्याकारकस्मृतिजनकतया तादृशस्मरणाऽऽपत्त्यसंभवात्। दण्डो रक्तो न वेति संशयानुव्यवसायस्तु वस्तुत्वाविशिष्टदण्डैवशिष्ट्यावगाही रक्तदण्डेन संदेहीत्यप्रत्ययात्, किं तु रक्तत्वतदभावप्रकारकत्वदण्डविशेष्यकत्वावगाही रक्तत्वेन तदभावेन च दण्डं संदेहीति प्रत्ययादिति न तत्र व्यभिचार इति केचित्। तन्निरस्यम्। समुच्चयानुव्यवसायवत्तत्सदृविशेषणद्वयनिरूपितवैशिष्ट्यविषयताशालित्वस्यैव वक्तुं शक्यत्वात्। रक्तदण्डे न संदेहीत्यनभिलापस्य दण्डिनं जानामीत्यनभिलापवदेवोपपत्तेर्ज्ञानत्वेन संदेहाऽनुव्यवसाये चोक्तप्रकारामावाद्विशेषणीयपर्युदस्यमानस्य विशेषणताऽवच्छेदकस्य विशेष्यनिष्ठसंबन्धावगाहिताया एवोक्तज्ञाने समर्थने चान्यत्राऽतिप्रसङ्गात्। तस्माद्विशेष्ये विशेषणमिति रीत्यैव संशयानुव्यवसाय इति न व्यभिचार इति बहवः। न च संदेहीत्यनुव्यवसायस्य विशेषणमिति रीत्याऽभ्युपगमे रक्तदण्डो द्रष्टव्यमिति व्यवसायानन्तरमपि रक्तदण्डं जानामीत्यनुव्यवसायप्रसङ्ग इति वाच्यम्, रक्तविशिष्टप्रकारतानिरूपितविषयित्वसांसर्गिकविषयितानिरूपितविशेष्यतासंबन्धेनाऽव्यवसायं प्रति रक्तत्वप्रकारतानिरूपितदण्डत्वावच्छिन्नविशेष्यतात्वेन व्यवसायहेतुतायाः आवश्यकत्वात्। अन्यथा रक्तो दण्ड इति प्रत्यभिज्ञानन्तरं रक्तवान् दण्डश्चेति समूहाऽऽलम्बनस्मरणाऽऽदिस्थले रक्तं दण्डं स्मरामीत्यनुव्यवसायोपपत्तेः। न च दण्डो रक्त इति ज्ञानोपरमेऽपि रक्तदण्डं करोमीत्याकारककृतिसाक्षात्कारोत्पत्त्या व्यभिचारः, हेतुताऽवच्छेदके ज्ञानज्ञानिनिवेशे च रक्तदण्डं इत्यनुद्बुद्धसंस्काराद्रक्तत्वनिर्विकल्पकदशायां विशिष्टबोधाऽऽपत्तिः, उद्बोधकानां संस्कारजविशिष्टवैशिष्ट्यबोधहेतुत्वेऽपि तदभावे सामान्यसामग्र्या फलजननेमावाधकमावादिति वाच्यम्, कृतिसाक्षात्कारपूर्वं नियमतो दण्डो रक्त इति स्मरणानभ्युपगमात्। वस्तुतः संस्कारव्याकृष्टज्ञानेच्छाकृतिवृत्तिजातिविशेषं कल्पयित्वा विशेषणताऽवच्छेदकप्रकारकविजातीयगुणत्वेनैव हेतुत्वं स्वीक्रियते, अनन्तस्मृतिव्यक्तिकहेतुत्वकल्पनापेक्षया तादृशजातिकल्पनाया एवोचितत्वात्। न च कृतिसाक्षात्कारपूर्वं विषयस्मृतिकल्पनमावश्यकम्, अन्यथोपनायकज्ञानविरहेण विषयज्ञानासंभवेन कृतिसाक्षात्कारानुदयप्रसङ्गादिति वाच्यम्; ज्ञानलक्षणप्रत्यासत्तेरपीच्छाकृतिसाधारणतद्विषयकविजातीयगुणत्वेनैव हेतुत्वोपगमात्। अवश्यं च गुणमानसजनकावच्छेदकतया संस्काराऽऽदिमावच्छालजातिविशेषकल्पनम्। अन्यथा संस्काराऽऽदिमानसताऽऽपत्तेरिति विशिष्टवैशिष्ट्यानुभवत्वमेव च जन्यताऽवच्छेदकमास्थीयते, स्मरणे च तादृशविषयतानियामक इति बहवः। केचित्तु अनुभवत्वजातौ मानाभावेन ज्ञानत्वस्याऽपि नित्यसाधारणतया जन्यताऽवच्छेदकत्वाज्जन्यप्रत्यक्षवृत्तिजातिविशेष एव विशेषणताऽवच्छेदकप्रकारकनिर्णयजन्यताऽवच्छेदकोऽनुमित्यादौ च परामर्शाऽऽदिरेव तादृशविषयतानियामकः, एवं शाब्दबोधेऽवान्तरवाक्यार्थबोध एव, तथाऽप्यविज्ञातीयप्रत्यक्षत्वस्य तज्जन्यताऽवच्छेदकत्वे इतरव्यापकीभूतान्नावप्रतियोगिपृथिवीत्ववति पृथिवीत्याकारकपरामर्शादितरभेदत्वप्रकारकज्ञानदशायामिव तच्छून्यदशायामपि पृथिवीतरभेदवतीत्याकारकविशिष्टवैशिष्ट्यविषयताशालिनाऽनुमितेरापत्तिः, तादृशानुमितान्वयव्याप्तिज्ञानस्यैव हेतुत्वान्नापत्तिरित्युक्तौ च स्वातन्त्र्येणेतरभेदत्वप्रकारकज्ञानस्य सत्त्वे तादृशानुमित्यनुदयाऽऽपत्तिः। न च पृथिव्यामितरभेदविशेष्यकानुमितेरेव स्वीकारान्नेयमापत्तिः, साध्यविशेष्यकानुमितौ साध्यप्रसिद्धेर्विरोधितया तत्र तादृशानुमित्युत्पादासंभवात्। न च विशेष्ये विशेषणमिति रीत्या पृथिवीतरभेदवतीत्याकारानुमितिस्तत्र जायत एवेति वाच्यम्, तथा सति साध्यज्ञानशून्यकाले तादृशपरामर्शात्पृथिव्यामितरभेदः पृथिवीतरभेदवतीत्याद्याकारकद्विविधविषयताशालिन्या अनुमितेरापत्तेः। न च विशिष्टबुद्धिं प्रति विशेषणज्ञानस्य हेतुत्वान्नेयमापत्तिः, एवमपि प्रमेयत्वेनेतरभेदज्ञानकाले तथाविधानुमितेरापत्तिसंभवात्। न च प्रमेयत्वाऽऽदिना साध्यज्ञानकाले साध्यविशेष्यकानुमितिप्रतिबन्धकीभूतसाध्यसिद्धिसत्त्वे तत्र तथाविधविषयताशाल्यनुमित्यापत्तिरिति वाच्यम्, साध्यताऽवच्छेदकप्रकारकसिद्धेरेव साध्यविशेष्यकानुमितिविरोधित्वात्। अन्यत्रेतरभेदत्वरूपेण नेदन्तरावगाहिसिद्धिकाले तादृशानुमितिवारणाय तत्र पक्षविषयतानिवेश्यसिद्धेः प्रतिबध्यप्रतिबन्धकभावान्तराऽऽपत्तेः, तस्मादितरभेदत्वप्रकारकज्ञानकालीनव्यतिरेकव्याप्तिज्ञानजन्यानुमितिविशिष्टवैशिष्ट्यविषयतास्वीकार आवश्यकः, तत्साधारणं च विशेषणताऽवच्छेदकप्रकारकज्ञानजन्यताऽवच्छेकत्वावश्यकम्। तथा च सतीतरभेदत्वप्रकारकज्ञानशून्यकाले विशेष्ये विशेषणमिति रीत्येतरभेदत्वप्रकारकद्विविधविषयताशाल्यनुमित्यापत्तिः, विशिष्टवैशिष्ट्यानवगाहिन्या विशेष्ये विशेषणमिति रीत्या जायमानाया अनुमितेरप्रसिद्धेः। विशिष्टवैशिष्ट्यावगाहिन्यां च विशेषणताऽवच्छेदकप्रकारकनिर्णयस्य हेतुत्वादिति चेत्, एवमप्यनुमितौ स्वातन्त्र्येणैव हेतुत्वम्, अनुमितिसाधारणजन्यताऽवच्छेदकत्वे नित्यव्यावर्तनाय जन्यत्वनिवेशस्यावश्यकत्वम्, मिथो विशेषणविशेष्यभावे विनिगमनाविरहेण नानाकार्यकारणभावस्याऽऽवश्यकत्वाद्वच्छेदकप्रकारकज्ञानशून्यकालीनस्मरणेऽनीश्वरज्ञाने च विशेष्ये विशेषणमित्येतादृशविषयतामात्रमभ्युपेयते, अतो न व्यभिचारः, न वा नित्यसाधारणमित्याहुः। केचित्तु-विशेषणताऽवच्छेदकसंशयकाले विशिष्टवैशिष्ट्यबोधं स्वीकृत्य विशेषणताऽवच्छेदकप्रकारकज्ञानत्वेनैव हेतुत्वमाहुः। तदसत्। संशयसाधारणज्ञानस्य हेतुत्वेऽप्रामाण्यनिर्णयस्यैवोत्तेजकतया निर्णयत्वेन हेतुत्वे स्वप्रामाण्यकज्ञानस्यैव तथात्वे निर्णयत्वेन हेतुत्वकल्पनाया एवोचितत्वात्। अन्यथा विशेषणताऽवच्छेदप्रकारकज्ञानीयनिर्णयत्वापेक्षया गुरुशरीरस्याप्रामाण्यकज्ञाननिर्णयत्वस्य निवेशने महागौरवप्रसङ्गात्। अथ विशेषणताऽवच्छेदकसंशयकाले तत्र चाप्रामाण्यशङ्कायां भवन्मतस्य

इत्र ममापि विशिष्टवैशिष्ट्यबोधो न जायते, इत्यप्रामाण्यशङ्कानस्वावच्छिन्नाभावस्यैव निवेशे क दोषः ?, इति चेत्, पक्षमपि संशयसाधारणज्ञानस्य विशिष्टवैशिष्ट्यबोधहेतुत्वेऽनुमित्यादिकं प्रति परामर्शहेतुत्वे व्याप्यांशे निर्णयत्वनिवेशे महागौरवाद्विशेषणतोऽवच्छेदकप्रकारकनिश्चयस्य ज्ञानाहार्यस्यैव हेतुत्वस्वीकारादाहार्यतदुत्तरोत्पन्नज्ञाने व्याप्यंशे निर्णयत्वनिवेशानावश्यकत्वात् । ननु तथाऽपि विशेष्ये विशेषणमितिज्ञानसाधारण्ये चाऽतिरिक्तप्रकारिताऽस्तु, तद्वच्छिन्नेऽप्रामाण्यनिश्चयाभावकूटविशिष्टसंशयाभावस्य नियामकस्या—प्रामाण्यज्ञानाभावकूटविशिष्टनिश्चयत्वावच्छिन्नतो लघुत्वादियमेव योग्यता ज्ञानाऽऽदिनिष्ठहेतुताऽवच्छेदिका, बाधाऽऽदिप्रतिबन्धकताऽवच्छेदिका च । अत एवानन्वितान्वयबुद्धेर्बाधाऽऽदिप्रतिबन्धकत्वप्रतिबन्धकत्वे, अत एव च व्याप्तिप्रकारकं निश्चयोत्तरमपि व्याप्यभावांशे आहार्यसंशयाऽऽत्मकतथाविधज्ञानादनुमित्यनापत्तिः, कार्यतासद्भावेन तथाविधसंशयस्य प्रतिबन्धकत्वादिति चेत् । न । अप्रामाण्यनिश्चयत्वावच्छिन्नाभावविशिष्टनिरुक्तसंशयाभावत्वेन हेतुत्वे गौरवात्,प्रतियोगिताऽवच्छेदकप्रकारकनिश्चयस्य प्रतियोगिताऽवच्छेदकविशिष्टधियकेऽज्ञानस्य प्रत्यक्षे हेतुत्वं कल्पमानमज्ञानांशप्रवेशेन लाघवात्तादृशज्ञान एव युक्तमिति तद्बलेन निश्चयजन्यताऽवच्छेदकविशिष्टवैशिष्ट्यविषयतासिद्धेश्च; शाकपाकजत्वाऽऽदौ साध्यव्यापकत्वसंदेहेनाहिते हेतौ साध्यव्यापकत्वव्यभिचारसंदेहः; उपाधिदीधित्युक्तस्तु फलीभूतसंदेहे शाकपाकजत्वविशिष्टे साध्यव्यापकस्याऽविशेषणात् । अन्यथा तु द्रव्यत्वाऽऽदौ तस्य निश्चयात्तत्र तद्विशेषणे तु साध्यव्यापकत्वांशे विशेष्ये विशेषणमिति रीत्या संशयाऽऽकार एव स रक्तो दण्डो न वेति संशयकालीनो रक्तो दण्डवानिति प्रात्यक्षिकबोध इव रक्तत्वांश इति रूपेण द्रष्टव्यम् । इदं तु बोध्यम्-किञ्चिद्धर्मावच्छिन्ने यद्विशेषणतयाऽवच्छेदकं तत्प्रकारकनिश्चयत्वेनैव हेतुत्वमन्तरा धर्मिताऽवच्छेदकानियन्त्रितस्थले दण्डवदित्यादौ तु दण्डत्वाऽऽदिप्रकारकज्ञानत्वेनैव निरूपितताऽवच्छेदकनिश्चयत्वस्य दुर्वचत्वात्, तत्प्रवेशे वैयर्थ्याच्चेति। विशिष्टवैशिष्ट्यमिति बुद्धित्वं तु रक्तदण्डत्वोभयधर्मावच्छिन्नविशेष्यतानिरूपितप्रकारताशालिबुद्धित्वम् । कारणता च तत्र दण्डत्वावच्छिन्नविशेष्यतानिरूपितरक्तत्वप्रकारताशालिनिर्णयत्वेन । कार्यता च रक्तत्वविशिष्टदण्डत्वावच्छिन्नविशेष्यताशालिज्ञानत्वेनैव । तेनैकद्रव्यमिति रीत्या दण्डो रक्तोऽप्रमेय इत्येतादृशे ज्ञाने नाव्यभिचारः,तत्र दण्डत्वविशिष्टविशेष्यतायां रक्तत्वावच्छिन्नत्वेन, रक्तत्वं धर्मितावच्छेदकीकृत्य प्रमेयत्वाऽऽदिबाधकालेऽपि तथाविधज्ञानाऽऽपत्तिरिति तादृशविशेष्यतायां रक्तत्वावच्छिन्नत्वमावश्यकमिति वाच्यम् । एकोऽपि प्रमेयत्वाऽऽदिप्रकारतानिरूपितदण्डत्वावच्छिन्नविशेष्यतामिश्रा वा एव रक्तत्वावच्छिन्नाविशेष्यतायां अभ्युपगमादेकस्याविशेष्यतायां रक्तदण्डत्वोभयावच्छिन्नत्वेनाव्यभिचारात्, तत्रापि रक्तत्वधर्मिताऽवच्छेदकदण्डत्वप्रकारकनिर्णयजन्ये दण्डो रक्तः प्रमेय इत्येतादृशबोधे व्यभिचारवारणाय तादृशविशेष्यतायां रक्तप्रकारकताऽऽदिनिरूपितदण्डत्वावच्छिन्नाविशेष्यताभिन्नत्वं निवेशनीयम् । एकत्र द्वयमिति विषयिता च प्रकारिताद्वयावच्छिन्नविशेष्यतारूपा । यथा-चैत्रो दण्डी कुण्डलीत्यत्र । न चैकमेकत्र त्रयादिकमप्यतिरिच्येत, एकत्र द्वयमिति संकल्पैव संग्रहात् । अयं च दण्डी चैत्रो न कुण्डली, दण्डी चैत्रः कुण्डलीत्युभयत्र सत्त्वादुद्देश्यताऽवच्छेदकत्वविधेयत्वयोः प्रकारताविशेषत्वात् तादृशबाधधीप्रतिबद्ध्यताऽवच्छेदकत्वादेव चास्याश्चैक्यत्वेन शरीरद्वयेनेदं कुण्डलग्रहादेकत्र चैत्रो दण्डी कुण्डली चेति विधियो विशेषो रक्तदण्डाभावधियः समूहालम्बनादेव, इयं चैकाविशिष्टेऽपरवैशिष्ट्यविषयिताव्यापिका दण्डी कुण्डली चैत्रो द्रव्यमित्यत्रैव दण्डी कुण्डली चैत्र इत्यत्राऽपि सत्त्वात्तत्रयोजकसामग्र्याव्यापकसामग्रीकत्वाच्चेति वदन्ति । तदसत् । सामान्यविशेषापेक्षयैकानेकाऽऽत्मकवस्त्वनभ्युपगमे एकान्तवादस्य कुशास्त्रघटमानत्वात् । विशिष्टबुद्धिष्वपि हि सामान्यत एका, विशेषतश्च परानिरूपितत्वेन बहुतरा अपि विषयता अनुभूयन्त इति चतुर्द्वैवेति कोऽभिनिवेशः ?। अत एवैकत्र द्वयस्थलेऽप्येकत्र भासमानयोर्विशेषणयोः परस्परमपि सामानाधिकरण्येन वैशिष्ट्यभानाद्विषयताभेदः,यदि च तत्र प्रकारकतया तयोर्निरूपितत्वविशेषान्नातिरेकः, तदा विशिष्टवैशिष्ट्यस्थलेऽपि एकप्रकारताऽवच्छिन्नापरप्रकारतयोपपत्तावतिरेके किं मानम ?। विशेष्ये विशेषणमिति स्थले हि रक्तत्वप्रकारतानिरूपिता दण्डत्वावच्छिन्ना प्रकारता, विशिष्टवैशिष्ट्यस्थले च रक्तप्रकारताऽवच्छिन्ना दण्डत्वावच्छिन्ना प्रकारतेत्येवं विशेषसंभवात् । स्वीक्रियतां वा तत्रावच्छेदकत्वाऽऽदेरित्येव प्रकारताप्रकारताद्वयघटितरूपेण तु यथा हेतुतावच्छेदकत्वं तथा प्रागुक्तमेव, यथा सन्निवेशधौव्येणेति न रक्तत्वदण्डत्वोभयावच्छिन्नप्रकारतयैव रक्तदण्डस्यैव विशिष्टवैशिष्ट्यविषयता । अन्यथा रक्तदण्डरूप्यवानित्यतो रक्तदण्डवानित्यस्य वैलक्षण्यात् रक्तत्वदण्डस्यैव त्वनिष्ठद्वित्वावच्छिन्नपर्याप्तधीरनाकारवच्छेदकताकप्रकारताऽऽश्रयेऽतिगौरवात् । गुणवान् दण्डवानित्यतो वैलक्षण्यसंपादनाय रक्तत्वत्वविशिष्टदण्डत्वोभयापर्याप्तावच्छेदताकप्रकारकतानुधावने रक्तत्वेन दण्डो,पीतावगाहिनि तादृशबोधेऽवगतेश्च तस्माद् रक्तत्वावच्छिन्नावच्छेदकतानिरूपकदण्डत्वावच्छिन्नप्रकारताकबुद्धित्वमेव रक्तदण्डवानिति विशिष्टवैशिष्ट्यबुद्धित्वमाश्रयणीयम्,अनुमितिहेतुपरामर्शोऽपि हेतुनाऽवच्छेदकतानिरूपितप्रतियोगित्वनिष्ठावच्छेदकतानिरूपिताधिकरणनिष्ठावच्छेदकतानिरूपिताधेयत्वावच्छिन्नावच्छेदकतानिरूपितहेतुताऽवच्छेदकावच्छिन्नप्रकारताकत्वमेव निवेश्यताम् । न च यत्र व्याप्तिधूमत्वयोरैक्ये द्वयमिति रीत्यैव हेतुनिष्ठप्रकारताऽवच्छेदकत्वे तादृशपरामर्शादनुमित्यापत्तिः, इष्टापत्तौ च विरोधव्यभिचारयोर्हत्वाभासत्वानुपपत्तिः, तादृशज्ञानस्य तदज्ञानाप्रतिबध्यत्वादिति तत्साधारण्याय व्याप्तिप्रकारतानिरूपितविशेष्यतात्वेन धूमत्वावच्छिन्नप्रकारता निवेशनीया । तथेन धूमत्वावच्छिन्नत्वं च धूमप्रकारतायां तत्रैव यत्र धूमत्वस्य व्याप्तिधर्मिताऽवच्छेदकत्वम्; अन्यत्र तु धूमप्रकारकत्वेनैवेति नाऽतिप्रसङ्गः । तथा च-प्रागुक्तरीत्या व्याप्यत्वाऽवच्छिन्ननिवेशस्यैवौचित्यात् । न चाऽयमेकान्तोऽपि युक्तः,परस्परानिरूपितावान्तरावयवैः स्थानीयविषयतायां अप्यनुभवात् । न च विशिष्टपर्याप्तप्रकारतैकान्तपक्षोऽपि युक्तः, विशिष्टविशिष्टपर्याप्तप्रकारतान्तरस्याऽपि सिद्ध्यापत्तेः,तत्सिद्धावितरापत्तेः । दण्डविशिष्टपुरुषविशिष्टभूतलपर्याप्तप्रकारताकबुद्धौ च दण्डांशे निश्चयाऽऽत्मकदण्डविशिष्टपुरुषवद् भूतलमिति निश्चयो हेतुः,अत एव दण्डांशे पुरुषांशे च संशयनिश्चयाऽऽत्मकतादृशज्ञानादण्डांशे विशेष्ये विशेषणमिति रीत्या पुरुषांशे विशिष्टनिरूपितवैशिष्ट्यविषयताशालिज्ञानाऽऽपत्तिरित्यभ्युपगमे च विशेषणविशिष्टवै-

शिष्टबुद्धिफले नवमेंशे निश्चयाऽऽत्मकमेकं ज्ञानं हेतुभूतं कल्पनीयम् । ततः पूर्वं चैकैकसङ्ख्यानवतिज्ञानानि पञ्चानुपूर्व्या हेतुभूतानि कल्पनीयानीति सर्वमिदमनुभवसिद्धम् । तत्र विशुद्धक्षोपस्थितवह्निशेषणमिति रीत्या बोधस्वीकारे च तत्र दशमांशेऽनुभूयमानस्य निश्चयाऽऽकारस्य नियामकः, तत्र संशयसामग्र्यभाव एवाऽवाच्यः । तथा च-विशिष्टवैशिष्ट्यधियेता वह्निव्याप्यतद्भाववद्धूमवानित इव पर्वतो वह्निव्याप्यधूमवाश्चेत्यादितोऽपि व्यावृत्ताऽस्तु,तद्वच्चिन्ननियामकश्च तत्तत्संशयसामग्र्यभाव एवेति विषयतावैशेषपर्यनुयोगे किमुत्तरम् ?, तस्मात् क्षयोपशमविशेषजन्यताऽवच्छेदिकाः समनियता एवैता विषयिताः, अत्राऽपेक्षाभेदेन प्रतीयमाना असमुदितपर्याप्ता अनेकाः प्रतिपत्तव्याः, ग्राह्यस्येव ग्राहकस्य विश्रस्वभावस्यापेक्षयैव विवेचयितुं शक्यत्वात् । इत्तैवमखण्डोऽपि विषयताविशेषः सिद्धयेत्, सामान्यदृष्ट्या तथाऽप्यनुभवात् । तथा च-एतेनैव परामर्शाऽऽदेर्हेतुत्वाऽऽपत्तिरिति चेत् । सत्यम् । भावसंप्रदेण विषयताविशेषणे शक्तिविशेषणे वा हेतुत्वेऽभावसंप्रदेण चाभावविशेषणे तथात्वे बाधकाभावाद् व्यवहारोच्छेदस्य व्यवहारनयसिद्धकार्यकारणभावे तैरेव निराकरणात् । अनुभवसिद्धास्तु ग्राह्यग्राहकनिष्ठाः सामान्यविशेषधर्मा न कल्पनामात्रेणाऽऽपादितुं शक्या इति दिक् ।

" अस्तिष्ठन्तु विकल्पवीचिनिचयाः पर्यायमर्यादया,
रूढ्यार्थाऽऽश्रियते तु चेतसि चिरं शाम्यन्तु तत्रैव ते ।
यस्तु प्रस्तुतमस्तु सागरसमं सर्वोपपत्तिक्षमं,
बाह्यं वा स्फुटमान्तरं समुचितस्याद्वादमुद्राङ्कितम् ॥१॥
ईहाऽपायपरम्परापरिचयः सर्वोऽप्ययं युज्यते,
वस्त्वंशेऽप्युपयोगमाकलयतामन्तर्मुहूर्तावधिः ।
अन्येषां तु विकल्पशिल्पघटितो बोधस्तृतीयक्षण-
ध्वंसी ध्वस्तसमस्तहेत्वभिहितः कस्मिन् विचारे क्रमः? ॥२॥

तदेवमेकानेकरूपा नयप्रमाणप्रतिपत्तयः प्रामाणिका इति स्थितम् ॥ ७ ॥ नयो० ।

(११) ननु यदि प्रमाणं नयाः तर्हि ' प्रमाणनयैरधिगमः ' इति प्रमाणनयभेदकल्पनावैयर्थ्यप्रसक्तिः । अथाप्रमाणं, तथाऽप्यधिगमानुपपत्तिः; तत्पृथग्भूतस्यापरस्यासंवेदनात्, प्रमाणाभावाप्रसक्तिश्च । असदेतत् । यतोऽप्रमाणं नयाः, नयन्तीतररूपसापेक्षं स्वविषयं परिच्छिन्दन्तीति नया इति व्युत्पत्तेः । न चापरिच्छेदकाः, नयतेर्गत्यर्थत्वेन ज्ञानार्थत्वात्, ज्ञानस्य च परिच्छेदाऽऽत्मकत्वात् । न च परिच्छेदाऽऽत्मकत्वेऽपि प्रमाणता, समस्तनयविषयीकृतानेकान्तवस्तुग्राहकत्वेन प्रकृष्टं मानं प्रमाणम्, इतरांशसव्यपेक्षस्वांशग्राहिणो नया न भवन्ति, प्रत्येकं स्वविषयनियतत्वात् तेषां तदव्यतिरिक्तस्य वाऽन्यस्य तद्विषयस्याऽननुभवात् । प्रमाणाभावोऽपि न आत्मनः, कथञ्चित् तद्व्यतिरिक्तस्य प्रमाणत्वेनानुभवसिद्धत्वात् । तत्तन्नयविषयीकृतांशेषवस्त्वंशाऽऽत्मकैकद्रव्यग्राहकत्वस्य तत्र प्रतीतेः । न च संशयाऽऽदिज्ञानैरात्मनः प्रमाणत्वेऽतिप्रसङ्गः; प्रमीयतेऽनेन प्रमिणोतीति वा प्रमाणमिति प्रशब्देन तस्य निरस्तत्वात् । न चाऽऽत्मनः कर्तृत्वात् करणरूपप्रमाणताऽनुपपत्तिः,उत्पादव्ययध्रौव्याऽऽत्मकस्य तस्याऽनेकरूपत्वेन कर्तृकरणभावाविरोधात् । एतेन प्रत्येकं मिथ्यादृष्टयो नयाः समुदिताः सम्यक्त्वं प्रतिपद्यन्त इत्यत्र नयसमुदायार्थे दृष्टे प्रत्येकमदृष्टत्वाद् जात्यन्धसमूहवादित्येतन्निरस्तम्, अदृष्टतत्समूहसम्यक्त्वानभ्युपगमात्; स्वविषयपरिच्छेदकत्वाच्च नयानामदृष्टत्वाच्च । नयानामदृष्टत्वादिति हेतुरसिद्धः, परिपूर्णवस्त्वनधिगन्तृत्वाऽऽदिहेतौ प्रतिज्ञार्थैकदेशाऽसिद्धिः; सिद्धसाध्यता च समुदायिनो दृष्टत्वनिषेधे साध्ये; अथ तत्समुदायस्य दृष्टत्वनिषेधः साध्यः, तदाऽप्यक्षविरोधः, समुदायव्यतिरिक्तस्यैकान्तेन समुदायस्याभावात् धर्मिणोऽप्रसिद्धिः, साध्यतावचनसमुदायाभावे नया एव परस्परव्यावृत्तस्वरूपा इति न क्वचित् सम्यक्त्वम्, नयप्रमाणाऽऽत्मकैकवैषम्यप्रतिपत्तेः, रत्नावलीवदिति ।

एतदाह-

जह ऽणेगलक्खणगुणा, वेरुलियाऽऽईमणी विसंजुत्ता ।
रयणावलिववएसं, न लहंति महग्घमुल्ला वि ॥ ५३ ॥

यद्वा-यत् प्रत्येकं न नयेषु सम्यक्त्वं तत्तेषां समुदायेऽपि न भवति, यथा सिकतासु प्रत्येकमभवत् तैलं तासां समुदायेऽपि न भवति । अत्र हेतोरनैकान्तिकताप्रतिपादनार्थमाह-(जह ऽणेगलक्खणेत्यादि) यथाऽनेकप्रकाराः-विविधानि हेतुत्वाऽऽदीनि लक्षणानि नीलत्वाऽऽदयश्च गुणा येषां ते,वैडूर्याऽऽदयोऽनर्घ्यमणयः पृथग्भूता रत्नावलीव्यपदेशं न लभन्ते महार्घमूल्या अपि ।

तह णियया वायसुविणि-च्चिया वि अण्णोण्णपक्खणिरवेक्खा ।
सम्मद्दंसणसद्दं, सव्वे वि णया ण पावेंति ॥ ५३ ॥

तथा प्रमाणावस्थायामितरसव्यपेक्षस्वविषयपरिच्छेदकाले वा स्वविषयपरिच्छेदकत्वेन सुनिश्चिता अप्यन्योन्यपक्षनिरपेक्षाः प्रमाणमित्याख्यां सर्वेऽपि नया न प्राप्नुवन्ति निजकवादनिरपेक्षाः, सामान्याऽऽदिवादे सुविनिश्चिता हेतुप्रदर्शनकुशला अन्योऽन्यपक्षनिरपेक्षत्वात् सम्यग्दर्शनशब्दं सुनया इत्येवं रूपं सर्वेऽपि संग्रहाऽऽदयो नया न प्राप्नुवन्ति ।

जह पुण ते चेव मणी, जहा गुणविसेसभागपरिबद्धा ।
रयणावलि त्ति भण्णइ, जहंति पाभिक्कसण्णाओ ॥५४॥

यथा पुनस्त एव मणयो यथा गुणविशेषपरिपाट्या प्रतिबद्धा रत्नावलीत्याख्यामासादयन्ति, प्रत्येकाभिधानानि च त्यजन्ति, रत्नानुवृत्तया रत्नावल्यास्तदनुवृत्तया च रत्नानां प्रतीतेः रत्नावलीति तत्र व्यपदेशः, न पुनः प्रत्येकाभिधानम् ॥ ५४ ॥

तह सव्वे णयवाया, जहाऽणुरूवं णिउत्तवत्तव्वा ।
सम्मद्दंसणसद्दं, लहंति ण विसेससण्णाओ ॥ ५५ ॥

तथा सर्वे नयवादा यथाऽनुरूपं विनियुक्तवक्तव्या इति । यथेति वीप्साऽर्थे, अनुरूपमिति सादृश्ये, रूपमिति स्वभावः, तेनाऽनुरूपमित्यव्ययीभावः । पुनर्यथाशब्देन स एव " यथा सादृश्ये " । ५ । १ । ७ । (पाणि०) इत्यनेन । यद्यदनुरूपं तत्र विनियुक्तं वक्तव्यम्, उपचारात्तद्वाचकः शब्दो येषां ते तथा, यथाऽनुरूपं द्रव्यध्रौव्याऽऽदिषु प्रमाणाऽऽत्मकत्वेन व्यवस्थिताः सम्यग्दर्शनं प्रमाणमित्याख्यां लभन्ते, न विशेषसंज्ञाः पृथग्भूताभिधानानि; एकाऽऽत्मकत्वेन चैतन्यप्रतिपत्तेः; अन्यथा चाऽप्रतिपत्तेरिति । ननु नयप्रमाणाऽऽत्मकचैतन्यस्याध्यक्षसिद्धत्वेन रत्नावलीतिदृष्टान्तोपादानं व्यर्थम्, न । अध्यक्षसिद्धस्यानेका-

न्तमनभ्युपगच्छन्तं प्रति व्यवहारसाधनाय दृष्टान्तोपादानस्य साफल्यात् । प्रपीतितश्च तेनाऽपि तत्रानेकान्तव्यवहारः ।

दृष्टान्तगुणप्रतिपादनायाऽऽह-

लोइयपरिच्छियसुहो-ऽनिच्छुयवयणपमिवत्तिमग्गो य ।
अह पण्णवणाविसओ, त्ति तेण वीसत्थमुवणीओ॥२६॥

व्युत्पत्तिकल्पनाद् युक्तं प्राणिसमूहसुखप्राह्यत्वमेकानेकाऽऽत्मकभावविषयवचो वाऽऽगमजनकत्वं वा । अथेत्यवधारणार्थः, अनन्तधर्माऽऽत्मकवस्तुप्ररूपकवाक्यविषयत्वं दृष्टान्तस्यैव तैः कारणैः शङ्कव्यवच्छेदेनायमुपदर्शित इति गाथातात्पर्यार्थः ।

न चाऽऽवश्यकव्याख्यायाः प्रागुत्तरकालं च रत्नानां पृथगुपलम्भादिह च सर्वदा तथोपलम्भाभावाद्विषममुदाहरणमिति वक्तव्यम्, अवश्याया उदाहरणत्वेनोपन्यासात् । न च दृष्टान्तदार्ष्टान्तिकयोः सर्वथा साम्यम्, तत्र तदभावानुपपत्तेः । रत्नाऽऽदिकारणेष्वावश्यादि कार्यं सदैवेति साङ्ख्यः, तेषामेवानेन रूपेण व्यवस्थितत्वात् । तदव्यतिरिक्तं विकारमात्रं कार्यं तदेवेति सांख्यविशेष एव । न कार्यं कारणे विद्यते इति तेभ्यस्तत् पृथग्भूतं, न हि कारणमेव कार्यरूपेण व्यवतिष्ठते परिणमते इति वैशेषिकाऽऽदयः । न च कार्यं कारणं वाऽस्ति, द्रव्यमात्रमेव तत्त्वमित्यपरः । एवंभूताभिप्रायवन्त एकान्तवादिनो दृष्टान्तस्य साध्यसमतां मन्यन्ते । तान् प्रत्याह-

इहरा समूहसिच्छो, परिणामकडं व जो जहिं अत्थो ।
ते तं च ण तं तं चे-व व त्ति नियमेण मिच्छत्तं ॥२७॥

इतरथोक्तप्रकाराद्व्यथा, समूहे रत्नानां, सिक्थो निष्पन्नः परिणामकृतो वा मण्यादिष्वावश्यादिः, क्षीराऽऽदिषु दध्यादिर्वा । यो यत्राऽर्थः तं ते मण्यादय आवश्यादिकार्यं, क्षीरं दध्यादिकं, तत्र तत्सद्भावात्, तस्य तत्परिणामरूपत्वात् समूहः सिक्थः परिणामकृतो वेति च द्वयोरुपादानं लौकिकव्यवहारापेक्षया । परमार्थतस्तु परमाणुसमूहपरिणामाऽऽत्मकत्वात् सर्वं एव समूहकृतः, परिणामकृतो वेति न भेदः । अयं चाभ्युपगमो मिथ्या (मिथ्यात्वं च सम्मतौ विवृतम्) । सम्म० १ काण्ड ।

(१५) ननु नयग्रन्थे सम्मत्यादौ बौद्धाऽऽदिदर्शनपरिग्रहेण नैयायिकाऽऽदिदर्शनखण्डनं श्रूयते, तत्र द्विनयपरिग्रहे किं न मिथ्यात्वैकान्त इत्याशङ्क्याऽऽह-

बौद्धाऽऽदिदृष्टयोऽप्यत्र, वस्तुस्पर्शेन नाऽप्रमाः ।
उद्देश्यसाधने रत्न-प्रज्ञायां रत्नबुद्धिवत् ॥ ११ ॥

(बौद्धाऽऽदीति) अत्र नयग्रन्थे उद्देश्यं यद्यपि निविष्टेतरनयखण्डनं, तत्साधने तत्साधननिमित्तं, बौद्धाऽऽदिदृष्टयोऽपि बौद्धाऽऽदिनयपरिग्रहा अपि, वस्तुस्पर्शेन शुद्धपर्यायाऽऽदिवस्तुप्राप्त्या, नाप्रमाः फलतो न मिथ्यात्वरूपा इत्यर्थः । किमत्र ?, रत्नप्रभायां रत्नबुद्धिवत् । यथा हि तत्राऽरत्ने रत्नाध्यवसितया स्वरूपतो न प्रामाण्यम्, दूरविप्रकर्षेण वस्तुप्रापकतया फलतः प्रमाण्यम्, तथा दुर्नयान्तरच्छेदाय सुनयान्तरपरिग्रहेऽपीति न कश्चिद्दोषः ॥ ११ ॥

(१३) एवं सामान्यलक्षणं विचिन्त्य तद्विभागमाह-

अयं संक्षेपतो द्रव्य-पर्यायार्थतया द्विधा ।
द्रव्यार्थिकमते द्रव्यं, तत्त्वं नेष्टमतः पृथक् ॥ १२ ॥

(अयमिति) अयं सामान्यलक्षणलक्षितो नयः संक्षेपतोऽवान्तरभेदापरिग्रहेण द्रव्यपर्यायतया द्रव्यार्थिकः पर्यायार्थिकश्चेति द्विधा द्विप्रकारः, तीर्थङ्करवचनसंग्रहविशेषप्रस्तारमूलत्वेनेत्थमेव मूलनयविभजनात् । तदाह भाष्यकारः-"तित्थयरवयणसंगह-विसेसपत्थारमूलवागरणी । दव्वट्ठिओ य पज्जव-णओ य सेसा वियप्पा सिं ॥३॥" इति । (सम्म० १ काण्ड) तत्राऽऽद्यो द्रव्यार्थिकमत आह-द्रव्यार्थिकस्य मते द्रव्यं तत्त्वं परमार्थं सदतः द्रव्यात् पृथग् भिन्नं विकल्पासिद्धं गुणपर्यायस्वरूपं तत्त्वं नेष्टम् संप्रति सतोऽपि तस्य परमार्थतोऽसत्त्वादिति भावः॥१२॥ नयो० । द्रव्या० ।

(१४) अत्र कुण्ठधियोऽप्यन्तेवासिनो योग्यताप्रतिपादनार्थः प्रकरणाऽऽरम्भः प्रतिपादितः । सा च विशिष्टसामान्यविशेषाऽऽत्मकतदुपायद्योतार्थप्रतिपादनमन्तरेणातः प्रकरणान्न संपद्यत इति प्रकरणाभिधेयं योग्यतोपायद्योतमर्थम्-

तित्थयरवयणसंगह-विसेसपत्थारमूलवागरणी ।
दव्वट्ठिओ य पज्जव-णओ य सेसा वियप्पा सिं ॥३॥

इत्यनया गाथया निर्दिशति । अस्याश्च समुदायार्थः पातनिकयैव प्रतिपादितः । अवयवार्थस्तु-तरन्ति संसारार्णवं येन तत्तीर्थं द्वादशाङ्गम्, तदाधारो वा सङ्घः, तत्कुर्वन्त्युत्पद्यमानमुत्पादयन्ति तत्स्वाभाव्यात्तीर्थकरनामकर्मोदयाद्वेति हेत्वाद्यर्थे टक् । तीर्थकराणां वचनमाचाराऽऽदि, अर्थतस्तस्य तदुपदिष्टत्वात्, तस्य संग्रहविशेषौ द्रव्यपर्यायौ सामान्यविशेषशब्दवाच्यावभिधेयौ, तयोः प्रस्तारः-प्रस्तार्यते येन नयराशिना संग्रहाऽऽदिकेन स प्रस्तारः, तस्य संग्रहव्यवहारप्रस्तारस्य मूलव्याकरणी आद्यवक्ता कर्ता वा द्रव्यास्तिकः द्रुतिर्नवनं द्रव्यं सत्तेति यावत् । तत्राऽस्तीति मतिरस्य द्रव्यास्तिकः "सह सुपा" । २ । १ । ४ । इत्यत्र "सुपा सह" इति योगविभागाद्, मयूरव्यंसकाऽऽदित्वाद्वा द्रव्यास्तिकशब्दयोः समासः । द्रव्यमेव वाऽर्थोऽस्येति द्रव्यार्थिकः, द्रव्ये वा स्थितो द्रव्यस्थितः । परिसमन्तादवनमनः पर्यवो विशेषः, तद् ज्ञाता वक्ता वा यो नयः नीतिः स पर्यवनयः । अत्र चन्द्रोज्ज्वलभयात्पर्यायास्तिक इति वक्तव्ये पर्यवनय इत्युक्तम्, तेनाऽत्राऽपि पर्याय एवाऽस्तीति द्रव्यास्तिकवद् व्युत्पत्तिर्द्रष्टव्या । स च विशेषप्रस्तारस्य ऋजुसूत्रशब्दाऽऽदेरादो वक्ता । ननु च मूलव्याकरणीति अस्य द्रव्यास्तिकपर्यायनयावभिधेयाविति द्विवचनेन भाव्यं, न प्रत्येकं, वाक्यपरिसमाप्तेः । अत एव चकारद्वयं सूत्रनिर्दिष्टम् । शेषास्तु नैगमाऽऽदयो विकल्प्या भेदाः, अनयोर्द्रव्यार्थिकपर्यायार्थिकयोः (सिमिति) प्राकृतशैल्या "बहुवयणेण दुवयणं" इति द्विवचनस्य बहुवचनम् । तथाहि-परस्परविविक्तसामान्यविशेषविषयत्वाद् द्रव्यार्थिकपर्यायार्थिकावेव नयौ । न च तृतीयं प्रकारान्तरमस्ति, यद्विषयोऽन्यस्ताभ्यां व्यतिरिक्तो नयः स्यात् । तृतीयविषयस्य चाऽसंभवः, भेदाभेदविनिर्मुक्तस्य भावात् प्रकृतविकल्पानतिवृत्तेः; तत्स्वभावातिक्रमे वा खपुष्पसदृशत्वप्रसक्तेः, ताभ्यां तद्व्यतोऽर्थान्तरस्य सर्वथा संबन्धप्रतिपादनायासंभवात्समवायान्तरकल्पनायामनवस्थाप्रसक्तेर्विशेषणविशेष्यसंबन्धकल्पनायामप्यपरापरतत्कल्पनाप्रसक्तेर्न संबन्धसिद्धिः । ततः स्थितमेतत् किञ्चिन्नयद्वयबहिर्भावि भावस्वभावान्तरविकल्पनाऽऽविलं विलसति प्ररूपणान्तरमिति । केवलं तयोरेव शुद्ध-

शुद्धिभ्यामनेकधा वस्तुस्वभावानेकरूपणविकल्पाऽभिधानवृत्तयो व्यवतिष्ठन्ते । तत्र शुद्धो द्रव्यास्तिको नयग्रहनयाभिमतविषयप्ररूपकः । तथा च-संग्रहनयाभिप्रायः-सर्वमेव सत्, अविशेषात् । सम्म० १ काण्ड । विशे० । (द्रव्यास्तिकपर्यायास्तिकयोर्मतम् 'दव्वट्ठिय-पज्जवट्ठिय' शब्दयोरुक्तव्यम्)

(१५) तदेवमुक्तौ द्रव्यार्थिकपर्यायार्थिकलक्षणौ मूलनयभेदौ, अनयोर्नैगमाऽऽदिषु मतभेदेन यथाऽन्तर्भावस्तथाऽऽह-

तार्किकाणां त्रयो भेदाः, आद्या द्रव्यार्थतो मताः ।
सैद्धान्तिकानां चत्वारः, पर्यायार्थगताः परे ॥ १८ ॥

(तार्किकाणामिति) तार्किकाणां वादिसिद्धसेनमतानुसारिणामाद्यास्त्रयो भेदाः नैगमसंग्रहव्यवहारलक्षणाः द्रव्यार्थतो मता द्रव्यमेवार्थं विषयीकृत्याभिप्रेताः, आद्यास्त्रयो नैदास्तार्किकमते द्रव्यार्थिका इति संमुखोऽर्थः । सैद्धान्तिकानां जिनभद्रगणिक्षमाश्रमणवचनानुसारिणां चत्वार आद्या ऋजुसूत्रसहिताः, द्रव्यार्थिका इति शेषः । परे तु उक्तशेषाः, उभयेषामपि पर्यायार्थगताः पर्यायार्थिकाः-ऋजुसूत्राऽऽदयश्चत्वारः पर्यायार्थिका वादिनः; शब्दाऽऽदयस्त्रय एव च क्षमाश्रमणानामिति निर्गलितोऽर्थः। ऋजुसूत्रो यदि द्रव्यं नाभ्युपेयात्, तदा " उज्जुसुयस्स एगे अणुवउत्ते एगं दव्वावस्सयं पुहत्तं णेच्छइ " इति सूत्रं विरुध्येतेति सैद्धान्तिकाः । तार्किकानुसारिणस्तु-अतीतानागतपरकीयभेदपृथक्त्वपरित्यागादनुसूत्रेण स्वकार्यसाधकत्वेन स्वकीयप्रवर्तमानवस्तुन एवोपगमाद्ऋजोस्तु तुल्यांशध्रुवांशलक्षणद्रव्याभ्युपगमः; अत एव नास्यासद्भूतिप्रादुर्भावविपर्यायकारणत्वद्रव्यत्वाभ्युपगमोऽपि, अध्रुवधर्माऽऽधारांशे द्रव्यमपि नास्य विषयः, शब्दनयेष्वतिप्रसङ्गात् उक्तसूत्रं त्वनुपयोगांशमादाय वर्त्तमानाऽवश्यकपर्यायद्रव्यपदोपचारात्समाधेयम्,पर्यायार्थिकेन मुख्यद्रव्यपदार्थस्यैव प्रतिक्षेपात् । यदि चैवमप्येकोऽनुपयुक्त एकं द्रव्यावश्यकमित्यत्रानुपयोगस्य विषयनियन्त्रितत्वेनार्थैक्यादुद्देश्यविधेयज्ञानावानुपपत्तिरिति विभाव्यते, यथा द्रव्याऽऽवश्यकपदं द्रव्याऽऽवश्यकत्वेन व्यवहर्तव्यम्, परं विवरणपरतया चैतदयोजनीयमिति न कश्चिद् दोष इत्याद्योचयामः ॥१८॥ (नयो०) सर्वधर्मविरहः शून्यतेति शुद्धतरपर्यायास्तिकमतावलम्बी ऋजुसूत्र एव व्यवस्थितः, अथवा सौत्रान्तिकवैनाषिकौ बाह्यार्थमाश्रितावृजुसूत्रशब्दौ, यथाक्रमं वैभाषिकेण नित्याऽनित्यशब्दवाच्यपुद्गलस्याऽभ्युपगमात् । शब्दनये तु प्रवेशः,तस्य चार्थप्रतिक्षेपेण विज्ञानमात्रसमभिरूढो योगाचारः, एकानेकधर्मविकलतया विज्ञानमात्रस्याप्यभाव इत्येवंभूतो व्यवस्थितः, एवंभूतो माध्यमिक इति व्यवस्थितमेतत् । तस्य तु शब्दाऽऽदयः शाखाः सूक्ष्मभेदा इति न योगद्वारवत्, शेषास्तु योगद्वारेष्वपि द्रव्यार्थिकपर्यायार्थिकौ मूलव्याकरणिनाविति दर्शयत्यनयोर्व्यापकताम् । सम्म० १ काण्ड । अनु० । विशे० ।

(१६) नैगमाऽऽदयो मूलनयाः-

से किं तं णए ?। सत्त मूलणया पण्णत्ता। तं जहा-णेगमे, संगहे, ववहारे, उज्जुसुए, सद्दे, समभिरूढे, एवंभूए॥अनु०।

नैगमः संग्रहश्चैव, व्यवहारर्जुसूत्रकौ ।
शब्दः समभिरूढाऽऽख्यः, एवंभूतश्च सप्त ते ॥ १९ ॥

(नैगम इति) स्पष्टः, ते मूलनयप्रभेदाः ॥ १६ ॥ नयो० । अनु० । विशे० । दश० । स्था० । क्षा० । ग० । भग० । प्रव० । आ० म० ।

तत्र नैगमनयस्य संग्रहव्यवहारयोरन्तर्भावात्, शेषाणां संग्रहाऽऽदीनां षण्णां नयानां संक्षिप्य मतं तावदुपदर्शयन्नाह--

सामण्णमह विसेसो, पच्चुप्पन्नं च नाममेत्तं च ।
पइसइं च जहत्थं, च वयणमिह संगहाऽऽईणं ॥३५७६॥

इह सामान्यमेवास्ति न विशेष इति संग्रहस्य वचनम्, विशेषा एव सन्ति न सामान्यमिति व्यवहारस्य वचः । प्रत्युत्पन्नं च वर्तमानमेव वस्त्वस्ति न त्वतीतमनागतं चेति ऋजुसूत्रस्य वचनम् । नामाऽऽदिनिक्षेपाणां मध्ये भावेन्द्राऽऽदिकं भावनिक्षेप एवास्ति, न नामाऽऽदिक्षेपा इति शब्दनयस्य वचः । इन्द्रशक्रपुरन्दराऽऽदिशब्दानां प्रतिशब्दमन्यान्य एवाऽर्थो वाच्यः, न त्वेक एवेति समभिरूढस्य वचः । यथार्थमेव स्वाभिधायकशब्दवाच्यमर्थं कुर्वदेव घटाऽऽदिकं वस्तु भवति, नाऽन्यथा, इत्येवंभूतनयस्य वचनम् । इत्युक्तप्रकारं संग्रहाऽऽदीनां वचनं मतं संक्षेपेणावगन्तव्यमिति ॥ ३५७६ ॥ विशे० ।

स्वरूपमाह-

नैगमो देशसंग्राही, व्यवहारर्जुसूत्रकौ ।
शब्दः समभिरूढश्चेत्येवमेते प्रचक्षते ॥ ४५ ॥

(नैगम इति) नैगमो नैगमनयः देशसंग्राही अवान्तरसंग्रहः, सर्वसंग्रहस्य सन्मात्रार्थत्वात् तत्त्यागः। व्यवहारर्जुसूत्रकौ व्यवहारनय ऋजुसूत्रनयश्च शब्दः समभिरूढश्चेत्येते नया एवं प्रचक्षते ॥ ४५ ॥

भावमौदयिकं गृह्न-नेवंभूतो नवस्थितम् ।
जीवं प्रवक्त्यजीवं तु, सिद्धं वा पुद्गलाऽऽदिकम् ॥४६॥

(भावमिति) एवंभूतनयस्तु औदयिकं भावं व्युत्पत्तिनिमित्तमेव प्रवृत्तिनिमित्ततया गृह्नन् भवस्थितं संसारिणं जीवं प्रवक्ति-जीवशब्देन व्यपदिशति, अजीवमजीवपदार्थं तु सिद्धं वा पुद्गलाऽऽदिद्रव्यं वेच्छत्यसौ ॥ ४६ ॥

नो अजीवश्च नो जीवो, न जीवाऽजीवयोः पृथक् ।
देशप्रदेशौ नास्येष्टा-विति विस्तृतमाकरे ॥ ४७ ॥

(नो इति) नो जीवो नो अजीवश्च एतत्रये जीवाजीवयोर्वक्तव्ययोः सतोः पृथग् न पार्थक्यं नापद्यते, यतोऽस्य नयस्य देशप्रदेशौ नेष्टाविति, नोशब्दः सर्वनिषेधार्थ एव घटते, इत्येतदाकरेऽनुयोगद्वाराऽऽदौ विस्तृतम् ॥ ४७ ॥

इत्थं स्वसमयसिद्धामेवंभूतनयार्थप्रक्रियामुपपाद्य,तया दिगम्बरोक्तप्रक्रियां दूषयति-

सिद्धो निश्चयतो जीवः, इत्युक्तं यद्दिगम्बरैः ।
निराकृतं तदेतेन, यन्नयेऽन्त्येऽन्यथा प्रथा ॥ ४८ ॥

(सिद्ध इति) एतेन पूर्वोक्तेन सिद्धो निश्चयतो जीव इति यद्दिगम्बरैरुक्तम्-"तिक्काले चदुपाणा, इंदियबलमाउ आणपा-

णा य । ववहारा सो जीवो, णिच्छयदो चुचेदणा जस्स ॥१॥" इत्यादिना, तन्निराकृतम् । यद् यस्मादन्ये एवंभूतनयेऽन्यथा प्रथाऽप्रसिद्धो जीव इत्येव प्रसिद्धिः, शुद्धनिश्चयश्च स एवेति कथं निश्चयतः सिद्धो जीव इति वक्तुं शक्यमिति ? ॥४८॥

नन्वेवंभूतः पर्यायार्थिकेष्वेव शुद्धनिश्चयस्तेनाऽस्मदुक्तावनुपपत्तावपि द्रव्यार्थिकप्रभेदेन सर्वसंग्रहनयेन शुद्धनिश्चयेन तदुपपादयिष्याम इत्याकाङ्क्षायामाह-

आत्मत्वमेव जीवत्व-मित्ययं सर्वसंग्रहः ।
जीवत्वप्रतिभूः सिद्धेः, साधारण्यं निरस्य न ॥४९॥

(आत्मत्वमिति) आत्मत्वमेव जीवत्वं जीवपदप्रवृत्तिनिमित्तं, पारिणामिकभावस्य कालत्रयानुगतत्वेन सत्यत्वात्, औदयिकभावस्य चौपाधिकत्वेन कालत्रयानुगतत्वेन च तुच्छत्वादित्यर्थः । सर्वसंग्रहनयस्तु सिद्धिसाधारण्यं भवस्थतौल्यं निरस्य जीवत्वसाधने न प्रतिभूः, सर्वत्र तुल्यजीवत्वादेवैको व्यवहारतो जीवोऽन्यश्च निश्चय इति विभागकरणमसमीक्षिताभिधानमेवाऽऽपद्येत, सर्वसंग्रह एव हि कर्मोपाधिनिरपेक्षशुद्धद्रव्यार्थिकः,तेन च संसारि चैतन्यमपि निरुपरागं शुद्धमिति परिणेष्यत एव । तदुक्तं द्रव्यसंग्रहे-" मग्गणगुणठाणेहि अ, चउ दस य हवंति तह असुद्धणया । विण्णेया संसारी, सव्वे सुद्धा उ सुद्धणया ॥ १ ॥ " इति । न च संसारिचैतन्यस्य संग्रहनयेन शक्त्या शुद्धचैतन्यं, निश्चयेऽपि व्यक्त्या शुद्धचैतन्यस्य सिद्ध एव निश्चयान्न साधारण्यमिति शङ्कनीयम, संग्रहस्य शक्तिग्राहकत्वेन शक्तिग्राहकताया व्यवहार एव विश्रान्तेर्निश्चयतो हि चेतनाशाली सिद्ध एव जीव इत्यस्य व्याघातात् ॥ ४९ ॥

नन्वेवं निश्चयतः सिद्धस्याऽजीवत्वे भवद्भिरिष्यमाणे भवतामेव ग्रन्थे संसारिसिद्धसाधारणजीवपदार्थाभिधानं कथमित्याशङ्क्यायामाह-

यज्जीवत्वं क्वचिद् द्रव्य-भावप्राणान्वयात् स्मृतम् ।
विचित्रनैगमाऽऽकूतात्, तद् ज्ञेयं न तु निश्चयात् ॥५०॥

(यदिति) यज्जीवत्वं क्वचिद् ग्रन्थे द्रव्यप्राणानां भावप्राणानां चान्वयादेवीकरणात् स्मृतं, संसारिसिद्धसाधारण्यमिति विशेषः । तद्विचित्रो विविधावस्थो यो नैगमस्तस्याऽऽकूतादभिप्रायाद् ज्ञेयं, न तु निश्चयादेवंभूतनयात्, तथा चैवंभूतनयेनैव सिद्धमजीवं वयं प्रतिजानीमहे, न तु नयान्तराभिमतेन जीवत्वेऽपि विप्रतिपद्यामहे, इति शुद्धाशुद्धेन नैगमनयेन साधारणजीवत्वाभ्युपगमेऽपि न क्षतिः । इयांस्तु विशेषः-प्रसिद्धनैगम औदयिकजीवोपलक्षितमात्मत्वाऽऽख्यं पारिणामिकभावमेव जीवपदप्रवृत्तिनिमित्तमभ्युपैति, तद्विशेषश्च कश्चिदुपचारोपजीवी द्रव्यभावप्राणान्यतरत्वेनानुगतमौदयिकक्षायिकभावद्वयमिति नेदं सिद्धान्तार्णवे नयविकल्पकल्लोलवैचित्र्य तत्संस्पर्शव्यसनविक्लवोऽऽवहम ॥ ५० ॥

ननु ' जीव ' प्राणधारणे इत्यत्र भावप्राणधारणत्वमेव धात्वर्थस्य विवक्षितत्वाद्, निश्चयतः सिद्धस्य जीवत्वं समर्थयिष्याम इत्याकाङ्क्षायामाह-

धात्वर्थे भावनिक्षेपा-त्परोक्तं न च युक्तिमत् ।
प्रसिद्धार्थोपरोधेन, यन्नयान्तरमार्गणा ॥ ५१ ॥

(धात्वर्थ इति) धात्वर्थे जीवनार्थे भावनिक्षेपाद् भावसत्यत्व-

हात् परोक्तं निश्चयतः सिद्ध एव जीव इति दिगम्बरोक्तं न च नैव युक्तिमत् । यद् यस्मात्सिद्धोऽनादिधातुपाठाऽऽदिप्रसीयमानो योऽर्थस्तदनुरोधेन नयान्तरस्य मार्गणा विचारणा भवति । तथा च यादृशधात्वर्थमुपलक्षणीकृत्येतरनयार्थप्रतिसन्धानं तादृशधात्वर्थप्रकारकजिज्ञासयैवंभूताऽभिधानस्य सांप्रदायिकत्वान्न तत्र भावनिक्षेपाऽऽश्रयणं युक्तमित्यर्थः । अन्यथा तत्राऽपि निक्षेपान्तराऽऽश्रयणेऽनवस्थानात्प्रकृतमात्रापर्यवसानादन्ततो ज्ञानाद्वैते शून्यतायां वा पर्यवसानात् । किञ्चैतादृगुपरितनैवंभूतस्य प्राक्तनैवंभूताभिधानात् पूर्वमेवाभिधानं युक्तम्,अन्यथाऽप्राप्तकालत्वप्रसङ्गात् । तस्माद् व्यवहाराऽऽद्यभिमतव्युत्पत्त्यनुरोधेनौदयिकभावग्राहकत्वमेवास्य सूरिभिरुक्तं युक्तमिति स्मर्तव्यम् । न चेन्द्रियरूपप्राणानां क्षयोपशमिकत्वात्कथमेवंभूतस्यौदयिकभावमात्रग्राहकत्वमित्यप्याशङ्कनीयम, प्राधान्येनायुःकर्मोदयलक्षणस्यैव जीवनार्थस्य ग्रहणात् । उपहतेन्द्रियेऽप्यायुरुदयेनैव जीवननिश्चयादिति दिक् ॥ ५१ ॥

शङ्काशेषमुपन्यस्य परिहरति-

शैलेश्यन्त्यक्षणे धर्मो, यथा सिद्धिस्तथाऽमुमान् ।
वाच्यं नेत्यपि यत्तत्र, फले चिन्तेह धातुगा ॥५२॥

(शैलेश्यन्त्यक्षण इति) शैलेश्या अयोगिगुणस्थानस्यान्त्यक्षणे च चरमक्षणे यथा निश्चयतो धर्मस्तदर्वाक्तनकालभावी तु व्यवहारत एव । तदुक्तं धर्मसंग्रहण्यां हरिभद्राऽऽचार्यैः-"सो उभयक्खयहेऊ, सेलेसीचरमसमयभावी जो । सेसो पुण णिच्छयओ, तस्सेव पसाहगो नाणिओ " ॥ १ ॥ इति । तथाऽमुमान् जीवोऽपि निश्चयतः सिद्ध एव भविष्यतीत्यपि न वाच्यम् । यतस्तत्र " सो उभयक्खय " इत्यादिगाथायां धारयति सिद्धिगतावात्मानमिति धर्मः, इति फले फलरूपे धात्वर्थे चिन्ता । सा च कुर्वद्रूपत्वेन कारणत्वं वदत एवंभूतनयस्य मते शैलेश्यन्त्यक्षण एव धर्मपदार्थसिद्धिसाक्षिणि,तदनन्तरं सिद्धिसाधारणरूपसाफल्यव्यवधानात्,इह तु धातुगा धात्वर्थावच्छिन्नस्वरूपविषयिणी चिन्ता,सा च केन सहान्वयव्यधानं गवेषयत् ? स्वरूपं तु प्रसिद्ध्यनुरोधेन संसारिण्येव पर्यवसाययेन्न तु सिद्ध इति महान् विशेषः । स्यादेतत् । धर्मपदेऽपि धात्वर्थो धारणसामान्यमेव,तच्च यतो विशेषतात्पर्यवशात्सिद्धिसाधारणरूपविशेषे पर्यवस्यति,तथा जीवपदार्थोऽपि विशेषे पर्यवस्यति,सिद्ध एव दत्तपदो भविष्यति । मैवम् । 'जीव' प्राणधारणे इत्यत्र प्राणपदसमभिव्याहृतसाधारणस्य भूरिप्रयोगवशादौदयिकप्राणधारण एव पर्यवसानात् । अत एव गोपदस्य नानाऽर्थत्वेऽपि ततो भूरिप्रयोगवशात्साक्षाऽऽदिमत एवोपस्थितेः,अश्वाऽऽदेस्तु पदान्तरसमभिव्याहाराऽऽदिनेति तान्त्रिकाः । तदेवमेवंभूतनयाभिप्रायेण सिद्धो न जीव इति व्यवस्थापितम् । यदि पुनः प्रस्थककन्यायाद्विशुद्धतरनैगमभेदमाश्रित्य प्रागुक्तस्वग्रन्थगाथाव्याख्यायते परैः तदा न किञ्चिदस्माकं दुष्यतीति किमेवायासि दृढतरक्रोडेन ? ।

"पेन्डी नलिः प्रणयिपुरुषयमित्याङ्कुराग्रै-
र्यत्पादपद्मकिरणैः कलयत्युदीतम् ।
स्नात्राम्नसा दलितयादवदुष्कृतार्द्रं
राङ्खेश्वरप्रभुमिम [illegible] ॥ ५३ ॥"

(' जीव [illegible] पृष्ठेऽयं विषयः [illegible])

(१७) सिद्धसेनीयाः पुनः षडेव नयानभ्युपगतवन्तः, नैगमस्य संग्रहव्यवहारयोरन्तर्भावविवक्षणात्। तथाहि-यदा नैगमः सामान्यप्रतिपत्तिपरस्तदा संग्रहेऽन्तर्भवति, सामान्याभ्युपगमपरत्वात्। विशेषाभ्युपगमनिष्ठस्तु व्यवहारे।

आह च सिद्धसेनीयमतमुपसंजिघृक्षुर्नाष्यकृत्-

जो सामन्नग्गाही, स नेगमो संगहं गतो अहवा।
इअरो ववहारमितो, जो तेण समाणनिद्देसो ॥ ३९ ॥

आ० म० १ अ० १ खण्ड। विशे०।

(नैगमाऽऽदीनां नयानां पृथक् पृथङ् मतं स्वस्वस्थाने द्रष्टव्यम)

(१८) शुद्धाशुद्धौ नयानां, प्रस्थकाऽऽदिदृष्टान्तैश्च-

से किं तं णयप्पमाणे?। णयप्पमाणे तिविहे पण्णत्ते। तं जहा-पत्थगदिट्ठंतेणं, वसहिदिट्ठंतेणं, पएसदिट्ठंतेणं।

(से किं तं णयप्पमाणे इत्यादि) अनन्तधर्मणो वस्तुन एकांशेन नयनं नयः, स एव प्रमाणं नयप्रमाणं त्रिविधं प्रज्ञप्तमिति। यद्यपि नैगमसंग्रहाऽऽदिभेदतो बहवो नयाः, तथाऽपि प्रस्थकाऽऽदिदृष्टान्तत्रयेण सर्वेषामिह निरूपयितुमिष्टत्वात् त्रैविध्यमुच्यते। तथा चाऽऽह। तद्यथा-प्रस्थकदृष्टान्तेनेत्यादि प्रस्थकाऽऽदिदृष्टान्तत्रयेण हेतुभूतेन त्रिविधं नयप्रमाणं भवतीत्यर्थः।

(१९) प्रस्थकदृष्टान्तं दर्शयति-

से किं तं पत्थगदिट्ठंतेणं?। पत्थगदिट्ठंतेणं से जहानामए केइ पुरिसे परसुं गहाय अभवीसंमुहत्तो गच्छेज्जा, तं पासित्ता कोइ वएज्जा-कहिं भवं! गच्छसि?। अविसुद्धो नेगमो भणइ-पत्थयस्स गच्छामि। तं च कोइ छिंदमाणं पासित्ता वएज्जा-किं भवं! छिंदसि?। विसुद्धो नेगमो भणइ-पत्थयं छिंदामि। तं च कोइ तच्छमाणं पासित्ता वएज्जा-किं भवं तच्छसि?। विसुद्धतराओ णेगमो भणइ-पत्थयं तच्छामि। तं च कोइ उक्कीरमाणं पासित्ता वएज्जा-किं भवं! उक्कीरसि?। विसुद्धतराओ णेगमो भणइ-पत्थयं उक्कीरामि। तं च कोइ लिहमाणं पासित्ता वएज्जा-किं भवं! लिहसि?। विसुद्धतराओ णेगमो भणइ-पत्थयं लिहामि। एवं विसुद्धतरणेगमस्स नामाणट्ठिओ पत्थओ। एवामेव ववहारस्स वि संगहस्स विमेज्जसमारूढो पत्थओ। उज्जुसुयस्स पत्थओ वि पत्थओ, मेज्जं पि पत्थओ, तिण्हं सद्दनयाणं पत्थयस्स अत्थाहिगारं जाणओ, जस्स वा वसेणं पत्थओ निप्फज्जइ, से तं पत्थयदिट्ठंतेणं।

तद् यथा नाम-कश्चित्पुरुषः परशुं कुठारं गृहीत्वा, अटवीसंमुखो गच्छेदित्यादि। इदमुक्तं भवति-प्रस्थको मागधदेशप्रसिद्धो धान्यमानविशेषः। तद्धेतुभूतकाष्ठकर्तनाय कुठारमादायाटवीं गच्छन्तं दृष्ट्वा कश्चिदन्यो वदेत्-क्व भवान् गच्छति?। तत्राविशुद्धनैगमो जानाति, अविशुद्धनैगमनयमतानुसारी सन्नसौ भणति-प्रस्थकं छिनद्मि। किमित्याह-प्रस्थकस्य गच्छामि। इदमुक्तं भवति-नैको गमो बस्तुपरिच्छेदो यस्यासौ तु बहवः, सनिरुक्तवशात्कारकाक्षेपतो नैगम उच्यते। अतो यद्यप्यत्र प्रस्थककारणभूतकाष्ठनिमित्तमेव गमनं, न तु प्रस्थकनिमित्तम्, तथाऽप्यनेकप्रकारवस्त्वभ्युपगमपरत्वात्कारणे कार्योपचारः। तथा व्यवहारदर्शनादेवमप्यभिधत्तेऽसौ-प्रस्थकस्य गच्छामि इति। तं च कश्चिद् छिन्दन्तं वृक्षं पश्येद्, दृष्ट्वा च वदेत्-किं भवाँश्छिनत्ति?। ततः प्राक्तनात्किञ्चिद्विशुद्धनैगमनयमतानुसारी सन्नसौ भणति-प्रस्थकं छिनद्मि। अत्रापि कारणे कार्योपचारात् तथा व्यवहृतिदर्शनादेव काष्ठेऽपि छिद्यमाने प्रस्थकं छिनत्तीत्युत्तरं, केवलं काष्ठस्य प्रस्थकं प्रति कारणतामात्रस्याऽत्र किञ्चिदासन्नत्वाद्विशुद्धत्वं प्राक्पुनरतिव्यवहितत्वाद् मलीमसत्वम्, एवं पूर्वपूर्वापेक्षया यथोत्तरस्य विशुद्धता भावनीया, नवरं-तक्षणन्तं तनूकुर्वन्तम्, उत्किरन्तं वेधनकेन मध्याद्विकिरन्तं लेखन्या मृष्टं कुर्वाणम्। एवमेतेन प्रकारेण तावन्नेयं यावद्विशुद्धतरनैगमस्य (नामाऽऽहिओ त्ति) आकुट्टिनामा प्रस्थकोऽयमित्येवं नामाङ्कितो निष्पन्नः प्रस्थक इति। एवमेव व्यवहारस्याऽपीति लोकव्यवहारप्राधान्येन यो व्यवहारनयः, लोके च पूर्वोक्तावस्थासु सर्वत्र प्रस्थकव्यवहारो दृश्यते, अतो व्यवहारनयोऽप्येवमेव प्रतिपद्यते इति भावः। (संगहस्सेत्यादि) सामान्यरूपतया सर्वं वस्तु संगृह्णाति कोडीकरोतीति संग्रहः, तस्य मतेन चिताऽऽदिविशेषणविशिष्ट एव प्रस्थो भवति, नान्यः। तत्र चितो धान्येन व्याप्तः। स च देशतोऽपि भवत्यत आह-मितः पूरितः। अनेनैव प्रकारेण मेयं समारूढं यत्र स आहिताऽऽदेराकृतिगणत्वाद् मेयसमारूढः। अयमत्र भावार्थः-प्राक्तनत्रयस्याऽविशुद्धत्वात्प्रस्थककारणमपि प्रस्थक उक्तो निष्पन्नः प्रस्थकोऽपि स्वकार्याकरणकालेऽपि प्रस्थक इष्टः, अस्य तु ततो विशुद्धत्वाद्धान्यमानव्याप्तं स्वार्थं कुर्वन्नेव प्रस्थकः, तस्य तदर्थत्वात्। तदभावे च प्रस्थकव्यपदेशेऽतिप्रसङ्गादिति यथोक्त एव प्रस्थकः। सोऽपि प्रस्थकसामान्याद् व्यतिरेकाद् व्यतिरेकप्रस्थकत्वप्रसङ्गात्सर्वं एक एव प्रस्थक इति प्रस्तुतनयो मन्यते, सामान्यवादित्वादिति। (उज्जुसुयस्सेत्यादि) ऋजुसूत्रः पूर्वोक्तशब्दार्थः, तस्य निष्पन्नस्वरूपोऽर्थक्रियाहेतुः प्रस्थकोऽपि प्रस्थकः, तत्परिच्छिन्नं धान्याऽऽदिकमपि वस्तु प्रस्थकः, उभयत्र प्रस्थकोऽयमिति व्यवहारदर्शनात्तथा प्रतीतेः। अपरं चाऽसौ पूर्वस्माद्विशुद्धत्वाद्वर्तमान एव मानमेयं प्रस्थकत्वेन प्रतिपद्यते, नाऽतीताऽनागतकाले, तयोर्विनष्टानुत्पन्नत्वेनासत्त्वादिति। (तिण्हं सद्दनयाणं इत्यादि) शब्दप्रधाना नयाः शब्दनयाः शब्दसमभिरूढैवंभूताः, शब्देऽन्यथा स्थितेऽर्थमन्यथा नेच्छन्त्यमी, किं तु यथैवशब्दो व्यवस्थितस्तथैव शब्देनार्थं गमयन्तीत्यतः शब्दनया उच्यन्ते। आद्यास्तु यथा कथञ्चिच्छब्दाः प्रवर्तन्तामर्था एव प्रधानमित्यभ्युपगमपरत्वादर्थनयाः प्रकीर्त्यन्ते। अत एषां त्रयाणां शब्दनयानां प्रस्थकार्थाधिकारज्ञः प्रस्थकस्वरूपपरिज्ञानोपयुक्तः प्रस्थकः। भावप्रधानात्तु ते नया इत्यतो भावप्रस्थकमेवेच्छन्ति, भावप्रस्थकोपयोगोऽतः स प्रस्थकः, तद्गुणपर्यायवानपि च, ततोऽव्यतिरेकात्प्रस्थकः। यो हि यत्रोपयुक्तः सोऽमीषां मते स एव भवति, उपयोगलक्षणो जीवः, उपयोगश्चेत्प्रस्थकाऽऽदिविषयतया परिणतः किमन्यज्जीवस्य रूपान्तरमस्ति? यत्र व्यपदेशान्तरं स्यादिति भावः। (जस्स वा वसेणेत्यादि) यस्य वा प्रस्थककर्तृगतस्योपयोगस्य वशेन प्रस्थको निष्पद्यते, तत्रोपयोगे वर्त्तमानः कर्ता प्रस्थकः। न हि प्रस्थकेऽनुपयुक्तः

प्रस्थकं निर्वर्तयितुं कर्ता समर्थः, ततस्तदुपयोगानन्यत्वात्स एव प्रस्थकः । इमां च तेऽत्र युक्तिमभिदधति-सर्वं वस्तु स्वात्मन्येव वर्तते, न त्वात्मव्यतिरिक्ते आधारे वक्ष्यमाणयुक्त्या, एतन्मतेनाऽन्यस्याऽन्यत्र वृत्त्ययोगात्,प्रस्थकश्च निश्चयाऽऽत्मकं मानमुच्यते, निश्चयश्च ज्ञानम्, तत्कथं जडाऽऽत्मनि काष्ठभाजने वृत्तिमनुभविष्यति ?,चेतनाचेतनयोः सामानाधिकरण्यानुपपत्तेः, तस्मात्प्रस्थकोपयुक्त एव प्रस्थकः । " से तं " इत्यादि निगमनम् । अनु० ।

प्रस्थकदृष्टान्तं विवेचयति-

प्रस्थकार्थं व्रजामीति, वने गच्छन् ब्रवीति यत् ।
आदिमो ह्युपचारोऽसौ, नैगमव्यवहारयोः ॥ ६२ ॥

(प्रस्थकार्थमित्यादि) प्रस्थको मगधदेशप्रसिद्धो धान्यमानहेतुर्द्रव्यविशेषः, तदर्थं व्रजामीति वने गच्छन् यद् ब्रवीति कञ्चित्,असौ नैगमव्यवहारयोर्हि निश्चितमादिम उपचारः ॥६२॥

नन्वत्र प्रस्थकार्थं वने गच्छतः प्रस्थकेच्छाया मुख्यार्थस्याबाधितत्वात्कथं प्रस्थकपदस्योपचार इति ?।

अत्र आह-

अत्र प्रस्थकशब्देन, क्रियाऽऽविष्टवनैकधीः ।
प्रस्थकेऽहं व्रजामीति, ह्युपचारोऽपि च स्फुटः ॥ ६३ ॥

(अत्रेति) अत्राधिकृतप्रयोगे केत्यधिकरणाकाङ्क्षया, प्रस्थकार्थमिति चतुर्थी, प्रकृतार्थेनैव निवृत्तेः प्रस्थकदलयोग्यवृक्षप्राप्तिरूपक्रियाऽऽविष्टवनस्यैकाऽद्वितीया धीरिति, तत्रोपचार आवश्यक इत्यर्थः । ननु तथाऽपि सप्तम्यन्तप्रश्ने सप्तम्यन्तमेवोत्तरमुचितमित्यत आह-क्व भवान् गच्छतीति प्रश्ने प्रस्थकेऽहं व्रजामीति सप्तम्यन्तप्रस्थकपदस्योपचारोऽपि वने स्फुट एव दृश्यत इत्यर्थः । तथा च वनगमने प्रस्थकशब्देन वनाभिधानं नैगमव्यवहारयोः प्रथम उपचार इति सिद्धम् ॥ ६३ ॥

छिनत्ति प्रस्थकं तक्ष्णो-त्युत्किरामुल्लिखामि च ।
करोमि चेति तदनू-पचाराः शुद्धताऽऽगताः ॥ ६४ ॥

(छिनत्तीति) किं भवान् छिनत्तीति प्रश्ने प्रस्थकं छिनद्मीत्युत्तरे प्रस्थकपदस्य छेदकयोग्ये काष्ठे उपचारः, स पूर्वस्मात् शुद्धः । एवं क्रमेण किं भवान् तक्ष्णोति, उत्किरति, उल्लिखति, करोतीति प्रश्नेषु, प्रस्थकं तक्ष्णोमि, उत्किरामि, उल्लिखामि, करोमीत्युत्तरेषु प्रस्थकपदस्य तक्ष्णाऽऽदिक्रियायोग्यकाष्ठेषूपचाराद् यथोत्तरं भवन्तः क्रमेण शुद्धतामापन्ना भवन्ति । ननु सर्वत्र प्रस्थकपदस्य प्रस्थकयोग्यकाष्ठ एवोपचारः, तत्क्रियाविशेषितार्थधीश्च तत्तत्क्रियावाचकपदसमभिव्याहारादेव भविष्यतीति कथमेतावन्त उपचारा यथाक्रमशुद्धा उच्यन्त इति चेत् ?। सत्यम् । घृतमायुर्दध्यायुर्घृतमायुरित्यादौ दुग्धाऽऽदिकारणे आयुःकार्योपचारस्यातिशयाविशेषेण तारतम्यवत् प्रकृतेऽपि छेदनाऽऽदिक्रियाव्यापाराऽऽवेशेन तज्जन्यावयवसंयोगाऽऽदिविशेषजन्यतया वा विलक्षणेषु काष्ठद्रव्येषु काष्ठप्रस्थकपर्यायोपपत्तिव्यवधानाऽव्यवधानाभ्यां प्रस्थकपदोपचारतारतम्यस्यानुभवसिद्धत्वात् ॥ ६४ ॥

तमेतावतिशुद्धौ तू-त्कीर्णनामानमाहतुः ।
चितं मितं तथा मेया-रूढमेवाऽऽह संग्रहः ॥ ६५ ॥

(तमिति) अतिशुद्धौ त्वेतौ नैगमव्यवहारनयौ तं प्रस्थकमुत्कीर्णनामानं प्रस्थकपर्यायवन्तं प्रस्थकमाहतुः, अनुत्कीर्णनाम्नोऽरूढत्वादविशेषादिति भावः । संग्रहनयस्तु चितमाकादितं प्रस्थकपर्यायं, मितमाकुट्टितनामानं, मेयं धान्यविशेषम्, आरूढं प्रस्थकमाह, मेयारूढपदेन तदनारूढस्यान्यरूढ्यादिविशिष्टस्यासंग्रहाद् नैगमोपदर्शितार्थसंकोचकत्वेन स्वनाम्नोऽन्वर्थत्वसिद्धेः । अयं हि विशुद्धत्वात् कारणे कार्योपचारं कार्यकारणकाले प्रस्थकं च नाङ्गीकुरुते । न च तदा तस्य घटाऽऽद्यात्मकत्वप्रसङ्गः,तदर्थक्रियां विना तथायोगात् । घटाऽऽदिशब्दार्थक्रिया यथा कथञ्चित्तत्रास्त्येवेति चेत्, साधारणतदर्थक्रियाकारित्वस्यैव तदात्मकत्वप्रयोजकत्वात्, तथाऽपि प्रस्थकक्रियाविरहेणाऽयं प्रस्थको घटाऽऽद्यनात्मकत्वाच्च नाप्रस्थक इत्यनुभयरूपः स्याच्च स्यात्,प्रतियोगिकोटौ स्वस्याऽपि प्रवेशेन यावद् घटाऽऽद्यनात्मकत्वासिद्धेः । अर्थक्रियाभावाभावाभ्यां द्रव्यभेदाभ्युपगमे ऋजुसूत्रमतानुप्रवेश इति चेत् । न । नैगमनयोपगतार्थसंकोचनाय कादाचित्कतयोपगमेऽपि सर्वत्र तथाऽभ्युपगमाभावेन तदननुप्रवेशात्,इत्थं चार्थक्रियाकारितदकारिप्रस्थकव्यक्तिभेदादर्थक्रियाजनकप्रस्थकव्यक्तौ प्रस्थकत्वसामान्यमपि नास्तीत्यभ्युपगमेऽपि न कश्चिद्दोषः । वस्तुतो व्यावृत्तिविशेषाऽऽद्यतिरिक्तेन नैयायिकाऽऽदिकल्पितसामान्येन क्वचिदपि निर्वाहः, तन्मते घटत्वाऽऽदिसामान्यस्याऽपि समर्थयितुमशक्यत्वात् । मृत्स्वर्णरजतपाषाणाऽऽदिघटेषु मृत्वस्वर्णत्वाऽऽदिना साङ्कर्येण तदसिद्धेः,अस्तु मृत्त्वे स्वर्णत्वाऽऽदिव्याप्यता,नैवं घटत्वम्,कुम्भकारस्वर्णकारजन्यताऽऽद्यवच्छेदकतया तज्ज्ञानात्यस्याऽवश्यकत्वात्। नहि स्वर्णघटाऽऽदौ चक्राऽऽदिकं मृद्घटाऽऽदौ च लोहदण्डाऽऽदिकं हेतुः,अननुगतधीस्तु कथञ्चित् सौसादृश्यात्,घटपदं तु नानार्थकमित्यभ्युपगमे कथञ्चिदित्याद्यनिर्वचनेनैवाशक्तिरावेदिष्यते । अननुगतानां जातीनामिव व्यक्तीनामपि सौसादृश्येनैवानुगमसंभवेन जात्युच्छेदाऽऽपत्तिः,घटपदस्य नानार्थत्वे स्पष्ट एव लौकिकव्यवहारबाधश्च,घटत्वाऽऽदिकमेकत्ववृत्त्यैव मृत्त्वाऽऽदिकमेव वा, तथा कुम्भकारस्वर्णकाराऽऽदेर्विजातीयकृतिमत्त्वेन चक्राऽऽदिवर्तुलाऽऽदेश्च कथञ्चिद्विजातीयव्यापारकत्वेन हेतुत्वमित्यादिनवीनकल्पना तु(?)दोषादेकत्वाग्रहेऽपि घटत्वाऽऽदिमहादेकत्वस्यैकत्वात्प्रसिद्धरूपेण कार्यकारणभावोच्छेदे व्यवहारविलोपाद्यनुपपत्तेरिति नयविशेषेण तत्र तत्र व्यावृत्तिविशेषरूपसामान्याभ्युपगमं विना न निर्वाह इति प्रकृते कार्यकारणकाले व्यावृत्तिविशेषरूपप्रस्थकत्वसामान्याभावाभ्युपगमे न क्षतिरिति किमति प्रपञ्चितेन ? ॥६५॥

प्रस्थकश्चर्जुसूत्रस्य, मानं मेयमिति त्रयम् ।
न ह्युत्कर्तृगताज्ञावा-च्छब्दानां सोऽतिरिच्यते ॥ ६६ ॥

(प्रस्थकश्चेति) ऋजुसूत्रस्य मानं मेयं चेति त्रयमेव प्रस्थकस्वरूपं, तन्मेयधान्ये च समवहित एव प्रस्थकव्यवहारादेकतरविनाशभावे तत्परिच्छेदासंभवात् । किञ्च-मेयाऽऽरूढः प्रस्थकः प्रस्थकत्वेन व्यपदेश्य इति संग्रहनयमते मेयारूढः प्रस्थकः, प्रस्थकाऽऽरूढं मेयं वा,तथेत्यत्र विनिगमकाभावादुभयत्रैव प्रस्थकपदशक्तेर्व्यासज्यवृत्तित्वं युक्तम् । कथं तर्हि प्रस्थकेन धान्यं मीयत इति प्रयोग एकोत्तरोभयवाचकपदेनैकस्यानुपस्थापनादिति चेत् । न । एतन्नयेन कथञ्चित्प्रस्थकपदशक्यताऽवच्छेदकस्य व्यासज्यवृत्तित्वेन विवक्षणेदात् करणरूपानुप्रवेशस्या-

ऽपि संभवान्न तदनुपपत्तिरिति द्रष्टव्यम् ॥ शब्दानां शब्दसमभिरूढैवंभूताऽऽख्यानां त्रयाणां नयानां मते स प्रस्थकः इकतृंगतान्नाद्वाज्ञातिरिच्यते न भिद्यते इञ्च कर्तृ च इकर्त्तारौ, इकर्त्रोर्गतो इकर्तृगतः, तस्मादिति समासः। प्रस्थकाद् इकगतात् प्रस्थककर्तृगताद्वा प्रस्थकोपयोगादतिरिक्तं प्रस्थकं ते न सहन्ते निश्चयज्ञानात्मकप्रस्थकस्य जडवृत्तित्वायोगाद् बाह्यप्रस्थकस्याऽप्यनुपलम्भकालेऽसत्त्वेनोपयोगानतिरेकाऽऽश्रयणादन्ततो ज्ञानक्षेत्राय पर्यवसानाद्वा। न च ज्ञानाऽऽत्मकत्वोभयनयविषयसमावेशविरोधात्प्रत्येकमनयत्वमाशङ्कनीयम्, तादात्म्येनोभयरूपासमावेशेऽपि विषयत्वतादात्म्याभ्यां तदुभयसमावेशात्। विषयत्वमपि कथञ्चित्तादात्म्यमिति तु नयान्तराऽऽकूतम्, यदाश्रयेण 'अर्थाभिधानप्रत्ययास्तुल्यनामधेयाः' इति प्राचीनैर्गीयत इति दिग् ॥ ६६ ॥ विवेचितः प्रस्थकदृष्टान्तः। नयो०। विशे०।

(२०) वसतिदृष्टान्तः-

से किं तं वसहिदिट्ठंतेणं ? । वसहिदिट्ठंतेणं से जहानामए केइ पुरिसे किंचि पुरिसं वएज्जा-कहिं भवं वससि ?। अविसुद्धो णेगमो भणइ-लोगे वसामि। लोगे तिविहे पण्णत्ते । तं जहा-उड्ढलोए, अहोलोए, तिरिअलोए । तेसु सव्वेसु भवं वससि ?। विसुद्धो णेगमो भणइ-तिरिअलोए वसामि । तिरिअलोए जंबुद्दीवाऽऽइआ सयंभूरमणपज्जवसाणा असंखिज्जा दीवसमुद्दा पण्णत्ता, तेसु सव्वेसु भवं वससि ?। विसुद्धतराओ णेगमो भणइ-जंबुद्दीवे वसामि । जंबुद्दीवे दस खेत्ता पण्णत्ता । तं जहा-भरहे, एरवए, हेमवए, एरण्णवए, हरिवस्से, रम्मगवस्से, देवकुरू, उत्तरकुरू, पुव्वविदेहे, अवरविदेहे। तेसु सव्वेसु भवं वससि ?। विसुद्धतराओ णेगमो भणइ-भरहे वासे वसामि। भरहे वासे दुविहे पण्णत्ते । तं जहा-दाहिणड्ढभरहे, उत्तरड्ढभरहे अ। तेसु सव्वेसु भवं वससि ?। विसुद्धतराओ णेगमो भणइ-दाहिणड्ढभरहे वसामि । दाहिणड्ढभरहे अणेगाइं गामागरणगरखेडकव्वडमडंबदोणमुहपट्टणासमसंवाहसन्निवेसाइं, तेसु सव्वेसु भवं वससि ?। विसुद्धतराओ णेगमो भणइ-पाडलिपुत्ते वसामि । पाडलिपुत्ते अणेगाइं गिहाइं, तेसु सव्वेसु भवं वससि ?। विसुद्धो णेगमो भणइ-मज्झघरे वसामि । एवं विसुद्धस्स णेगमस्स वसमाणो वसइ। एवमेव ववहारस्स वि। संगहस्स संथारसमारूढो वसइ। उज्जुसुअस्स जेसु आगासपएसेसु ओगाढो तेसु वसइ । तिण्हं सद्दनयाणं आयभावे वसइ । सेत्तं वसहिदिट्ठंतेणं ।

(से किं तं वसहीत्यादि) वसतिर्निवासः, तद्दृष्टान्तेन नयविचार उच्यते। तद्यथानामकः कश्चित्पुरुषः पाटलिपुत्राऽऽदौ वसन्तं कञ्चित्पुरुषं वदेत्-क्व भवान् वसति ?। तत्राविशुद्धो नैगमो भणति-अविशुद्धनैगमनयमतानुसारी सन्नसौ प्रत्युत्तरं प्रयच्छति-लोके वसामि। तन्निवासक्षेत्रस्याऽपि चतुर्दशरज्ज्वात्मकलोकादनर्थान्तरत्वात्; इत्थमपि च व्यवहारदर्शनाद् अविशुद्धनैगमस्यातिव्याप्तिपरत्वादिदमसङ्गतं मन्यते। ततस्तिर्यग्लोके वसामीति संक्षिप्योत्तरं ददाति विशुद्धतरास्त्वेवदम्। अथातिविशुद्धतरास्त्वेवदमप्यतिव्याप्तिनिष्ठं मन्यते । ततो जम्बूद्वीपे वसामीति संक्षिप्ततरमाह । एवं भारतवर्षदक्षिणार्द्धभरतपाटलिपुत्रदेवदत्तगृहमर्मगृहेष्वपि भावनीयम । (एवं विसुद्धस्स णेगमस्स वसमाणो वसइ त्ति) एवमुत्तरोत्तरभेदापेक्षया विशुद्धतरनैगमस्य वसन्नेव वसति, नान्यथा । इदमुक्तं भवति-यत्र गृहाऽऽदौ सर्वदा निवासत्वेनाऽसौ विवक्षितस्तत्र तिष्ठन्नेव एष तत्र वसतीति व्यपदिश्यते । यदि पुनः कारणवशतोऽन्यत्र रथ्यादौ वर्तते, तदा तत्र विवक्षते गृहाऽऽदौ वसतीति न प्रोच्यते, अतिप्रसङ्गादिति भावः । (एवमेवेत्यादि) लोकव्यवहारनिष्ठो हि व्यवहारनयः, लोके च नैगमोक्तप्रकाराः सर्वेऽपि दृश्यन्ते इति भावः । अथ चरमनैगमोक्तप्रकारो लोके नेष्यते, कारणतो ग्रामाऽऽदौ वर्तमानेऽपि देवदत्ते पाटलिपुत्रे एष वसतीति व्यपदेशदर्शनादिति चेत्, नैतदेवम् । प्रोषिते देवदत्ते स इह वसति न वेति केनचित् पृष्टो, प्रोषितोऽसौ नेत्र वसतीत्यस्याऽपि लोकव्यवहारस्य दर्शनादिति । (संगहस्सेत्यादि) प्राक्तनाविशुद्धत्वात्संग्रहनयस्य गृहाऽऽदौ तिष्ठन्नपि संस्तारकाऽऽरूढ एव शयनक्रियावान् वसतीत्युच्यते । इदमुक्तं भवति-संस्तारेऽवस्थानादन्यत्र निवासार्थं एव न घटते, चलनाऽऽदिक्रियावत्त्वान्मार्गाऽऽदिप्रवृत्तवत् । संस्तारके च वसतो गृहाऽऽदौ वसतीति व्यपदेशायोग एव, अतिप्रसङ्गात् । तस्मात् क्वाऽसौ वसतीति निवासजिज्ञासायां संस्तारके शय्यामात्रस्वरूपे वसतीत्येतदेवास्य मतेनोच्यते, नान्यदिति भावः। स च नानादेशाऽऽदिगतोऽप्येक एव, संग्रहस्य सामान्यवादित्यादिति । ऋजुसूत्रस्य तु पूर्वस्माद्विशुद्धत्वाद् येष्वाकाशप्रदेशेष्ववगाढः, तेष्वेव वसतीत्युच्यते, न संस्तारके; सर्वस्याऽपि वस्तुवृत्त्या नभस्येवावगाहात् । येषु प्रदेशेषु संस्तारको वर्त्तते, संस्तारकेणैवाऽऽक्रान्तस्ततो येष्वेव प्रदेशेषु स्वयमवगाढस्तेष्वेव वसतीत्युच्यते । स च वर्तमानकाले एवास्ति, अतीतानागतयोर्विनष्टानुत्पन्नत्वेनैतन्मतेऽसत्त्वादिति । त्रयाणां शब्दनयानामात्मभावे स्वस्वरूपे सर्वोऽपि वसति, अन्यस्याऽन्यत्र वृत्त्ययोगात्। तथाहि-अन्योऽन्यत्र वर्तमानः किं सर्वाऽऽत्मना वर्त्तते ?, देशाऽऽत्मना वा ?। यद्याद्यः पक्षस्तर्हि तस्याऽऽधारव्यतिरेकिणा स्वकीयरूपेणाप्रतिभासनप्रसङ्गः । यथा हि-संस्तारकाऽऽधारस्य स्वरूपं सर्वाऽऽत्मना तत्र वृत्तं न तद्व्यतिरेकेणोपलभ्यते, एवं देवदत्ताऽऽदिरपि सर्वाऽऽत्मना तत्राधीयमानस्तद्व्यतिरेकेण नोपलक्ष्यते । अथ द्वितीयो विकल्पः स्वीक्रियते, तर्हि तत्राऽपि देशेऽनेन वर्तितव्यम् । ततः पुनरपि विकल्पद्वयम्-किं सर्वाऽऽत्मना वर्तते, देशाऽऽत्मना वेति ?। सर्वाऽऽत्मपक्षे देशिनो देशरूपताऽऽपत्तिः। देशाऽऽत्मपक्षे तु पुनस्तत्रापि देशे देशिना वर्तितव्यं, ततः पुनरपि तदेव विकल्पद्वयम्; तदेव दूषणमित्यनवस्था । तस्मात्सर्वोऽपि स्वस्वभाव एव निवसति, तत्परित्यागेनान्यत्र निवासे तस्य निःस्वभावताप्रसङ्गादित्यलं बहुजल्पितया।" सेत्तं " इत्यादि निगमनम् । अनु० । नयो० । ननु वसनं नाम वर्त्तनमुच्यते । तथा च-देवदत्तो गृहे वसतीति । किमुक्तं भवति?-देवदत्तो गृहे वर्त्तते, तच्च वर्त्तनं सर्वस्याऽपि वस्तुनः स्वस्वरूप एव, नाऽन्यत्र, तथा प्रत्यक्षत उपलभ्यमानत्वात् । तथाहि-यद् घटगतं स्वरूपं तत् घटे एव वर्त्तते, नाऽन्यत्र भूतले पटाऽऽदौ वेति । प्रसिद्धमेतत्, देवद-

स्ताऽऽदिलक्षणं वस्तु स्वरूपमपहाय कथमन्यत्र विलक्षणस्वरूपे वस्तुनि आकाशलक्षणे वर्त्तितुमुत्सहते । तथा चाऽत्र प्रयोगः-यद्वस्तु सत् तत् सर्वमात्मस्वरूपे वर्त्तते, यथा चेतना जीवे, वस्तु च देवदत्ताऽऽदिकमिति तदपि स्वस्वरूप एव वर्त्तते, नान्यत्रेति । अथवाऽयं व्यतिरेकमुखेन प्रयोगः-विवादाऽऽस्पदीभूतो देवदत्तो नाऽऽकाशप्रदेशेष्ववतिष्ठते, ततो विलक्षणत्वात्, यद् यतो विलक्षणं न तत्तत्र वर्त्तते, यथा छाया आतपे, विलक्षणाश्चाचेतनत्वेन देवदत्तादाकाशप्रदेशा इति नासौ तत्र वर्त्तते ।

उक्तं च भाष्यकारैः-

" आगासे वसइ त्ति य, नणिए नणइ किह अधम्मम्मि ।
मोत्तूणाऽऽयसहावं, वसेज्ज वत्थु विहम्मम्मि ॥ २२४१ ॥
वत्थुं वसइ सहावे, सत्ताओ चेयणा व जीवम्मि ।
न विलक्खणत्तणाओ, भिन्ने छायातवे चेव ॥ २२४२ ॥
एष वसतिदृष्टान्तः ।

(२१) संप्रति प्रदेशदृष्टान्तभावना-

तत्र प्रकृष्टो देशः प्रदेशः, स एव दृष्टान्तः प्रदेशदृष्टान्तः । स चायम्-नैगमो वदति-षण्णां जगति प्रदेशः । तद्यथा-धर्मास्तिकायप्रदेशः, अधर्मास्तिकायप्रदेशः, आकाशास्तिकायप्रदेशः, जीवप्रदेशः, स्कन्धप्रदेशः, स्कन्धगतैकदेशप्रदेशश्च । सर्वत्र षष्ठीतत्पुरुषः समासः । यथा धर्मास्तिकायस्य प्रदेशो धर्मास्तिकायप्रदेशः । एवं सर्वत्रापि । स च धर्मास्तिकायप्रदेशाऽऽदिः सामान्यविवक्षया एको, विशेषाविवक्षयाऽनेक इति । एवं वदति नैगमे संग्रहो वदति-यद् ब्रूषे-षण्णां प्रदेश इत्यादि । तत्र भवति । यस्माद् यः स्कन्धगतैकदेशप्रदेशः, स तस्यैव स्कन्धस्य प्रदेशः, देशस्य स्कन्धाव्यतिरिक्तत्वात् । तथा च लोकेऽपि वक्तारः-" दासेन मे खरः क्रीतो, दासोऽपि मे खरोऽपि मे । " एवं यत्स्कन्धस्य संबन्धिनो देशस्य प्रदेशः, स तस्यैव स्कन्धस्य । ततो मैवं वादीः-यदुत षण्णां प्रदेश इत्यादि, किं त्वेवं वद-यथा पञ्चानां प्रदेशः। तद्यथा-धर्मास्तिकायप्रदेशः, अधर्मास्तिकायप्रदेशः, आकाशास्तिकायप्रदेशः, जीवप्रदेशः, स्कन्धप्रदेश इति । अयं च धर्मास्तिकायप्रदेशः स्वस्वधर्मास्तिकायाऽऽद्यनुगतः सर्वोऽप्येक एव द्रष्टव्यः, सामान्यविवक्षणात् । एवं च संग्रहोऽविशुद्धः प्रतिपत्तव्यः, अपरसामान्याभ्युपगमात् । एवमभिदधानं संग्रहं प्रति व्यवहारोऽभिधत्ते-यदूचे भवान् पञ्चानां प्रदेश इति, नान्यथा । न चैतदस्ति । तस्मादेवं वक्तव्यम्-पञ्चविधः प्रदेशः । तद्यथा-धर्मास्तिकायप्रदेशो यावत् स्कन्धप्रदेश इति । एवमुक्ते व्यवहारेण ऋजुसूत्रो वदति-यद्भाषते भवान्-पञ्चविधः प्रदेश इत्यादि । तदसम्यक् । तत्राऽपि शब्दार्थे विचार्यमाणेऽतिप्रसङ्गदोषापत्तेः । तथाहि-पञ्चविधः प्रदेश इत्युक्ते शब्दार्थपर्यालोचनायां यो यः प्रदेशः स पञ्चविध इति प्राप्तम्, एवं च सत्येकैकः प्रदेशः पञ्चविंशतिविधः प्रदेशः प्रसक्तः । न चैतदस्ति । तस्मादेवमत्र वक्तव्यम्-त्राद्यः प्रदेशः । तद्यथा-स्याद्धर्मास्तिकायप्रदेशः, स्यादधर्मास्तिकायप्रदेशः, स्यादाकाशास्तिकायप्रदेशः, स्याज्जीवप्रदेशः, स्यात् स्कन्धप्रदेशः । एवमाचक्षाणमृजुसूत्रं शब्दनयः प्रत्याचष्टे-यद्वदसि त्राद्यः प्रदेश इत्यादि । तत्र भवति । कथमुच्यते ? यदि त्राद्यः प्रदेश इति समं ततः स्यात्पदलाञ्छने प्रतिनियते धर्मास्तिकायाऽऽद्यनुगतप्रदेशस्वरूपावधारणासंभवात्, धर्मास्तिकायप्रदेशोऽपि स्याद्धर्मास्तिकायप्रदेशः, अधर्मास्तिकायप्रदेशोऽपि स्याद्धर्मास्तिकायप्रदेश इत्यादि । तत एवं वक्तव्यम्-धर्मास्तिकायः प्रदेशः प्रदेशोऽधर्मास्तिकायः, अधर्मास्तिकायः प्रदेशः प्रदेशो धर्मास्तिकाय इत्यादि । एवं हि वदतः शब्दनयस्यायमभिप्रायः-य एव धर्मास्तिकायाऽऽदिरूपो देशी स एव देशः प्रदेशो वा न स्यात्, तद्व्यतिरिक्तत्वात् । न खलु देशिनो भिन्नो देशः प्रदेशो वा भवितुमर्हति, भेदे सति तस्याऽसौ देशः प्रदेशो वेति संबन्धानुपपत्तेः । न हि घटः पटस्येति सचेतसा वक्तुं शक्यम्, संबन्धश्चेत्तर्हि संबन्धस्याऽन्यथाऽनुपपद्यमानत्वाद्देशः प्रदेशो वा देशिनः सकाशादभिन्नः प्रतिपत्तव्यः, तथा च सति य एव देशी स एव देशः प्रदेशश्चेति सिद्धं सामानाधिकरण्यम् । एतदेव च सामाधिकरण्यं समभिरूढोऽपि मन्यते । एवंभूतस्तु प्रदेशवस्तुनो देशः प्रदेशो वा, युक्त्ययोगात् । तथाहि-देशः प्रदेशो वा देशिनो भिन्नोऽभिन्नो वा, गत्यन्तराभावात् । यदि भेदस्तस्येति संबन्धानुपपत्तेः । अथाभेदस्ततो देशः प्रदेशो वा देश्येव, तद्व्यतिरिक्तत्वात्, स्वरूपवत् । तथा च सति यौ देशप्रदेशशब्दौ तौ परमार्थतो धर्मास्तिकायाऽऽदिदेशप्रतिपादकौ, ततो यथा पर्यायशब्दत्वादेककालमेकस्मिन् वस्तुनि घटकुटौ नोच्चार्येते, एकेनाऽपि शब्देन तदर्थस्य प्रतिपादने द्वितीयशब्दप्रयोगस्य नैरर्थक्यात् । एवमिहापि धर्मास्तिकायाऽऽदिरूपे वस्तुनि धर्मास्तिकायाऽऽदिशब्दो देशप्रदेशाऽऽदिशब्दश्च नैककालमुच्चारणमर्हतः, द्वयोरप्येकार्थतयैकेनापि तदर्थस्याऽभिधानत्वेऽपरशब्दप्रयोगस्य वैयर्थ्यात् । तथा च सति धर्मास्तिकायप्रदेशः, अधर्मास्तिकायप्रदेश इत्यादि वचनजातं सर्वमुपपन्नम् । देशप्रदेशशब्दयोः परमार्थतो धर्मास्तिकायाऽऽदिरूपदेशिवाचकतया पौनरुक्त्यदोषानुषङ्गात्त्रयोऽपि च नोशब्द एकदेशवचनः, सोऽप्येतन्मते सर्वथाऽनुपपन्नः, तत्राप्युक्तदोषानतिक्रमात् । तथाहि-नोशब्दः सम्पूर्णं वस्त्वभिदध्यात्, वस्त्वेकदेशं वा ? यदि सम्पूर्णं, ततस्तस्य प्रयोगो निरर्थकः, धर्मास्तिकायाऽऽदिपदेनैव तस्याऽभिधानात् । अथ वाऽस्त्वेकदेशमिति पक्षः । सोऽप्यसमीचीनः, वस्तुनो देशाभावात् । न हि वस्तुनो भिन्नो देश उपपद्यते, तस्येति संबन्धाऽभावात् । अभेदे तु देश्येव, न देश इत्युपपादितमेतत् ।

उक्तं च भाष्यकारैः-

" नो सद्दो वि समत्तं, देसं व भणिज्ज जइ समत्तं तो ।
तस्स पञ्चमोऽणत्थो, अह देसो तो न सो वत्थुं ॥२२५६॥ "

अत्र (न सो वत्थु त्ति) न स देशो वस्तु, भेदपक्षेऽभेदपक्षे वा, तस्याऽसंभवादिति । येऽपि च नीलोत्पलाऽऽदयः शब्दा लोकप्रसिद्धाः, तेऽप्येतन्मतेन विचार्यमाणाः सर्वथाऽनुपपन्नाः। तथाहि-तन्मतेन सर्वं वस्तु प्रत्येकमक्षणरूपं, न तस्य गुणाः पर्याया वा देशाः प्रदेशा वा सर्वथा कथञ्चिन्ना वस्त्वन्तररूपा वर्तन्ते, ततो नीलशब्देनाऽपि तदेव वस्त्वक्षणमभिधीयते, नोत्पलशब्देनाऽपि तदेवेति, नीलोत्पलशब्दयोरन्यतरशब्देन तदर्थस्याऽभिधानात् । द्वितीयशब्दप्रयोगोऽव्यर्थ इत्ययुक्ता नीलोत्पलाऽऽदयः शब्दाः । प्रकृते प्रदेशदृष्टान्तभावनाऽपि तथैव । तदेवमुक्ता नयाः । एतेषां च नयानामाद्याश्चत्वारो नया अर्थनयाः, मुख्यवृत्त्या जीवाऽऽद्यर्थसमाश्रयणात् । शेषास्तु त्रयः शब्दाऽऽदयो नयाः शब्दनयाः, शब्दत एवार्थनिर्देशोपयोगात् ।

उक्तं च-

" चत्वारोऽर्थनया ह्येते, जीवाऽऽद्यर्थविनिश्चयात् ।
त्रयः शब्दनयाः सत्य-पदविद्यां समाश्रिताः " ॥१॥

तत्र (सत्यपदविद्यां समाश्रिता इति) सत्यानि अविपरीतानि, शब्दानुशासनोपदर्शितयथोक्तलक्षणोपेतानीति भावः। तानि च तानि पदानि सत्यपदानि, तेषां विद्या परिज्ञानं कालकारकाऽऽदिभेदतोऽवगमः। तां समाश्रिताः, तद्ग्रहादर्थंनैगमभ्युपगतवन्त इत्यर्थः।

संप्रत्येतेषामेव नयानां प्रभेदसंख्याप्रदर्शनार्थमाह निर्युक्तिकारः-

इक्केक्को य सयविहो, सत्त नयसया हवंति एमेव।
अन्नो वि य आएसो, पंचेव सया नयाणं तु ॥२५६४॥

नया मूलभेदापेक्षया यथोक्तरूपा नैगमाऽऽदयः सप्त, एकैकश्च प्रभेदतः शतविधः शतभेदः, ततः सर्वप्रभेदगणनया सप्त नयशतानि भवन्ति। एवमन्येऽपि च आदेशाः पञ्चशतानि भवन्ति नयानां शब्दाऽऽदीनामेकत्वादेकैकस्य च शतविधत्वादिति हृदयम्। अपिशब्दात् षट् चत्वारि द्वे वा शते। तत्र षट् शतान्येवम्-नैगमः सामान्यग्राही संग्रहे प्रविष्टो, विशेषग्राही व्यवहारे। उक्तं च भाष्यकारैः-"जो सामण्णगाही, स नेगमो संगहं गतो अहवा। इयरो ववहारमितो, जो तेण समाणनिद्देसो" ॥ ३६ ॥ ततः षमेव मूलनयाः, एकैकश्च प्रभेदतः शतभेदः, इति षट् शतानि। अपरादेशाः संग्रहव्यवहारर्जुसूत्रशब्दा इति चत्वार एव मूलनयाः, एकैकश्च शतविध इति चत्वारि शतानि। शतद्वयं तु नैगमाऽऽदीनामृजुसूत्रपर्यन्तानां द्रव्यास्तिकत्वात्, शब्दाऽऽदीनां तु पर्यायास्तिकत्वात्, तयोश्च प्रत्येकं शतभेदत्वात्। अथ वा यावन्तो वचनपथाः, तावन्तो नया इत्यसंख्याताः प्रतिपत्तव्याः। आ० म० १ अ० २ खण्ड।

प्रदेशदृष्टान्तस्तु-

से किं तं पएसदिट्ठंतेणं ?। पएसदिट्ठंतेणं णेगमो भणइ-छएहं पएसो। तं जहा-धम्मपएसो, अधम्मपएसो, आगासपएसो, जीवपएसो, खंधपएसो, देसपएसो। एवं वयंतं णेगमं संगहो भणइ-जं भणसि छएहं पएसो, तं न भवइ, कम्हा ?, जम्हा देसपएसो, सो तस्स दव्वस्स एव, जहा को दिट्ठंतो-"दासेण मे खरो कीओ, दासो वी मे खरो वि मे।" तं मा भणाहि छएहं पएसो, भणाहि-पंचण्हं पएसो। तं जहा-धम्मपएसो, अधम्मपएसो, आगासपएसो, जीवपएसो, खंधपएसो। एवं वयंतं संगहं ववहारो भणइ-जं भणसि-पंचण्हं पएसो, तं न भवइ, कम्हा ?, जइ जहा पंचण्हं गोट्ठिआणं पुरिसाणं केइ दव्वजाए सामण्णे भवइ। तं जहा-हिरण्णे वा, सुवण्णे वा, धण्णे वा, धणे वा, तहा पंचण्हं पएसो, तं मा भणाहि पंचण्हं पएसो, भणाहि-पंचविहो पएसो। तं जहा-धम्मपएसो, अधम्मपएसो, आगासपएसो, जीवपएसो, खंधपएसो। एवं वयंतं ववहारं उज्जुसुओ भणइ-जं भणसि-पंचविहो पएसो, तं न भवइ, कम्हा ?, जइ ते पंचविहो पएसो, एवं ते एक्केको पएसो पंचविहो, एवं ते पणवीसविहो पएसो भवइ, तं मा भणाहि पंचविहो पएसो, भणाहि-भइयव्वो पएसो, सिअ धम्मपएसो, सिअ अधम्मपएसो, सिअ आगासपएसो, सिअ जीवपएसो, सिअ खंधपएसो। एवं वयंतं उज्जुसुयं पइ सद्दनओ भणइ-जं भणसि-भइयव्वो पएसो, तं न भवइ, कम्हा ?, जइ भइअव्वो पएसो, एवं ते धम्मपएसो वि सिअ अधम्मपएसो सिअ आगासपएसो सिअ जीवपएसो सिअ खंधपएसो; अधम्मपएसो वि सिअ धम्मपएसो० जाव खंधपएसो। जीवपएसो वि सिअ धम्मपएसो० जाव सिअ खंधपएसो, खंधपएसो वि सिअ धम्मपएसो० जाव सिअ खंधपएसो। एवं ते अणवत्था भविस्सइ, तं मा भणाहि भइयव्वो पएसो, भणाहि-धम्मे पएसे से पएसे धम्मे, अहम्मे पएसे से पएसे अहम्मे, आगासे पएसे से पएसे आगासे, जीवे पएसे से पएसे नो जीवे, खंधे पएसे से पएसे नो खंधे। एवं वयंतं सद्दनयं समभिरूढो भणइ-जं भणसि-धम्मे पएसे से पएसे धम्मे, जीवे पएसे से पएसे नोजीवे, खंधे पएसे से पएसे नोखंधे, तं न भवइ, कम्हा ?, इत्थं खलु दो समासा भवंति। तं जहा-तप्पुरिसे अ, कम्मधारए अ। तं णं णज्जइ कयरेणं समासेणं भणसि, किं तप्पुरिसेणं ?, किं कम्मधारएणं ?। जइ तप्पुरिसेणं भणसि, तो मा एवं भणाहि, अह कम्मधारएणं भणसि, तो विसेसओ भणाहि-धम्मे अ से पएसे अ मे से पएसे धम्मे, अहम्मे अ से पएसे अ मे से पएसे अहम्मे, आगासे अ से पएसे अ मे से पएसे आगासे, जीवे अ से पएसे अ मे से पएसे नो जीवे, खंधे अ से पएसे अ मे से पएसे नो खंधे। एवं वयंतं समभिरूढं पइ एवंभूओ भणइ-जं जं भणसि तं तं सव्वं कसिणं पडिपुण्णं निरवसेसं एगगहणगहितं, देसे वि मे अवत्थू, पएसे वि मे अवत्थू। से तं पएसदिट्ठंतेणं। से तं नयप्पमाणे ॥

(से किं तं पएसदिट्ठंतेणमित्यादि) प्रकृष्टो देशः प्रदेशो, निर्विभागो भाग इत्यर्थः। स एव दृष्टान्तः, तेन नयमतानि चिन्त्यन्ते। तत्र नैगमो भणति-षण्णां प्रदेशः। तथथा-(धम्मपएस इत्यादि) धर्मशब्देन धर्मास्तिकायो गृह्यते, तस्य प्रदेशो धर्मप्रदेशः। एवमधर्माऽऽकाशजीवास्तिकायेष्वपि योज्यम्। स्कन्धं पुद्गलद्रव्यनिचयः, तस्य प्रदेशः स्कन्धप्रदेशः, देश एषामेव पञ्चानां धर्मास्तिकायाऽऽदिद्रव्याणां प्रदेशद्वयाऽऽदिनिर्वृत्तोऽवयवः, तस्य प्रदेशो देशप्रदेशः। अयं च प्रदेशसामान्याभ्युपगमाच्चारात् षण्णां प्रदेश इत्युक्तम्, विशेषविवक्षायां तु षट् प्रदेशाः, एवं वदन्तं नैगमं प्रति निपुणतरः संग्रहो भणति, यद्भणसि-षण्णां प्रदेश इति, तन्न भवति तन्न युज्यते। कस्माद् ?, यस्माद्यो देशप्रदेश इति षष्ठे स्थाने भवतां प्रतिपादितं, तदसङ्गतमेव। यतो धर्मास्तिकायाऽऽदिद्रव्यस्य संबन्धी यो देशस्तस्य यः प्रदेशः, स वस्तुवृत्त्या तस्यैव द्रव्यस्य यत्संबन्धी देशो विवक्ष्यते, द्रव्याव्यतिरिक्तस्य देशस्य यः प्रदेशः स द्रव्यस्यैव भवति। यथा कोऽत्र दृष्टान्त इत्याह-" दासेणेत्यादि " श्लोकेऽ-

प्येवं व्यवहृतिरिष्यते । यथा कश्चिदाह-मदीयदासेन खरः क्रीतः, तत्र दासोऽपि मदीयः, खरोऽपि मदीयः, दासस्य मदीयत्वात् तत्क्रीतः खरोऽपि मदीय इत्यर्थः । एवमिहाऽपि देशस्य द्रव्यसंबन्धित्वात् तत्प्रदेशोऽपि द्रव्यसंबन्ध्येवेति भावः । तस्मान्मा भण-षण्णां प्रदेशः, अपि त्वेवं भण-पञ्चानां प्रदेश इति, त्वदुक्तषष्ठदेशस्यैवाऽघटनादित्यर्थः । तदेव दर्शयति-तद्यथा-धर्मप्रदेश इत्यादि । एतानि पञ्च द्रव्याणि, तत्प्रदेशश्चेत्येवमविशुद्धसंग्रह एवं मन्यते, अवान्तरद्रव्यसामान्याऽऽद्यभ्युपगमात् । विशुद्धस्तु द्रव्यषाड्द्वयं प्रदेशकल्पनां च नेच्छत्येव,सर्वस्यैव वस्तुसामान्यक्रोडीकृतत्वेनैकत्वादित्यलं प्रसङ्गेन । प्रकृतमुच्यते-एवं वदन्तं संग्रहं ततोऽपि निपुणो व्यवहारो भणति-यद्भणसि-पञ्चानां प्रदेश इति, तन्न भवति न युज्यते, कस्मात् ?, यदि यथा पञ्चानां गोष्ठिकानां पुरुषाणां किञ्चित् द्रव्यं सामान्यमेकं भवति । तद्यथा-हिरण्यं वेत्यादि । एवं यदि प्रदेशोऽपि स्यात्ततो युज्यते वक्तुं पञ्चानां प्रदेश इति । इदमुक्तं भवति-यथा केषाञ्चित्पञ्चानां पुरुषाणां साधारणं किञ्चिद्धिरण्याऽऽदि भवति, एवं पञ्चानामपि धर्मास्तिकायाऽऽदिद्रव्याणां यदेकः कश्चित्साधारणप्रदेशः स्यात्तदेयं वाचो युक्तिर्घटेत; न चैतदस्ति, प्रतिद्रव्यं प्रदेशभेदात् । तस्मान्मा भण-पञ्चानां प्रदेशः । अपि तु पञ्चविधः पञ्चप्रकारः प्रदेशः, द्रव्यलक्षणस्याऽऽश्रयस्य पञ्चविधत्वादिति भावः । तदेवाऽऽह-धर्मप्रदेश इत्यादि । एवं वदन्तं व्यवहारमृजुसूत्रो भणति—यद्भणसि—पञ्चविधः प्रदेशः, तन्न भवति, कस्मात् ?, यस्मादेष पञ्चविधः प्रदेशः, एवमेकैको धर्मास्तिकायाऽऽदिप्रदेशः पञ्चविधः प्रसक्तः, शब्दाद्वा वस्तुव्यवस्था, शब्दे त्वेवमेव प्रतीतिर्भवति । एवं च सति पञ्चविंशतिविधः प्रदेशः प्राप्नोति । तन्मा भण-पञ्चविधः प्रदेशः, किं त्वेवं भण-भाज्यः प्रदेशः स्याद्धर्मप्रदेश इत्यादि । इदमुक्तं भवति-भाज्यो विकल्पनीयो विभजनीयः प्रदेशः कियद्भिर्विभागैः स्याद्धर्मप्रदेश इत्यादि पञ्चभिः, ततश्च पञ्चभेद एव प्रदेशः सिद्ध्यति । स च यथा स्वमात्मीयमात्मीय एवाऽस्ति, न परकीयः, तस्यार्थक्रियासाधकत्वात्, प्रस्तुतनयमतेनासत्त्वादिति । एवं भणन्तमृजुसूत्रं प्रति शब्दनयो भणति-यद्भणसि-ज्ञाप्यः प्रदेशः,तन्न भवति, कुतः?,यदि भाज्यः प्रदेशः, एवं ते धर्मास्तिकायप्रदेशोऽपि कदाचिद्धर्मास्तिकायाऽऽदिप्रदेशः स्यात्, अधर्मास्तिकायप्रदेशोऽपि कदाचिद्धर्मास्तिकायाऽऽदिप्रदेशः स्यात्, इत्थमपि भजनाया अनिवारितत्वात्, यथा एकोऽपि देवदत्तः कदाचिद्भाङ्गो भृत्यः,कदाचिदमात्याऽऽदेरिति । एवमाकाशास्तिकायाऽऽदिप्रदेशेऽपि वाच्यम् । तदेवं नैयत्याभावादनवस्था प्रपद्यते । तन्मैवं भण-भाज्यः प्रदेशः,अपि तु इत्थं भण-"धम्मे पएसे से पएसे धम्मे" इत्यादि । इदमुक्तं भवति-धर्म्मप्रदेश इति,धर्म्माऽऽत्मकः प्रदेश इत्यर्थः। अत्राऽऽह-नन्वयं प्रदेशः सकलधर्मास्तिकायाद्व्यतिरिक्तः सन् धर्म्माऽऽत्मक इत्युच्यते,आहोस्वित् तदेकदेशाव्यतिरिक्तः सन् , यथा सकलजीवास्तिकायैकदेशैकजीवद्रव्याव्यतिरिक्तः संस्तत्प्रदेशो जीवाऽऽत्मक इति व्यपदिश्यत इत्याह-(से पएसे धम्मे त्ति) स प्रदेशो धर्मः, सकलधर्मास्तिकायाद्व्यतिरिक्त इत्यर्थः । जीवास्तिकाये हि परस्परं निष्पन्नेष्वनन्तानि जीवद्रव्याणि भवन्त्यतो य एकजीवद्रव्यस्य प्रदेशः, स निःशेषजीवास्तिकायैकदेशवृत्तिरेव सन् जीवाऽऽत्मक इत्युच्यते । अत्र तु धर्मास्तिकाय एकमेव द्रव्यं, ततः सकलधर्म्मास्तिकायाव्यतिरिक्त एव संस्तत्प्रदेशो धर्म्मात्मक उच्यत इति भावः । अधर्माऽऽकाशास्तिकाययोरप्येकैकद्रव्यत्वादेवमेव भावनीयम् । जीवास्तिकाये तु (जीवे पएसे पएसे नो जीवे त्ति) जीवः प्रदेश इति, जीवास्तिकायाऽऽत्मकः प्रदेश इत्यर्थः। स च प्रदेशो नोजीवः, नोशब्दस्येह देशवचनत्वात्, सकलजीवास्तिकायैकदेशवृत्तिरित्यर्थः । यो ह्येकजीवो द्रव्याऽऽत्मकः प्रदेशः स कथमनन्तजीवद्रव्याऽऽत्मके समस्तजीवास्तिकाये वर्तेत इति भावः । एवं स्कन्धाऽऽत्मकः प्रदेशो नोस्कन्धः, स्कन्धद्रव्याणामनन्तत्वादेकदेशवर्त्तिरित्यर्थः । एवं वदन्तं शब्दनयं नानार्थसमभिरोहणात्समभिरूढः प्राऽऽह-यद्भणसि-धर्म्मः प्रदेशो धर्म्म इत्यादि, तन्न भवति न युज्यते, कस्मात् ?,इत्याह-इह खलु द्वौ समासौ भवतः । तद्यथा-तत्पुरुषः, कर्मधारयश्च । इदमुक्तं भवति-"धम्मे पएसे से पएसे धम्मे" इत्युक्ते समासद्वयाऽऽरम्भकवाक्यद्वयमत्र संभाव्यते । तथाहि-यदि धर्म्मशब्दात् सप्तमीयं तदा सप्तमीतत्पुरुषस्याऽऽरम्भकमिदं वाक्यम् । यथा वने हस्तीत्यादि । अथवा-प्रथमा, तदा कर्म्मधारयस्य । यथा-नीलमुत्पलमित्यादि । ननु यदि वाक्यद्वयमेवाऽत्र संभाव्यते, तर्हि कथं द्वौ समासौ भवत इत्युक्तम ?। उच्यते-समासाऽऽरम्भकवाक्ययोः समासोपचारात् । अथवा-अलुक्समासविवक्षया समासावप्येतौ भवतः, यथा-कण्ठे काल इत्यादीत्यदोषः । यदि नाम द्वौ समासावत्र भवतः, ततः किमित्याह-तत्र ज्ञायते कतरेण समासेन भणसि ?-किं तत्पुरुषेण ?, कर्मधारयेण वा ? । यदि तत्पुरुषेण भणसि, तन्मैवं भण, दोषसंभवादिति शेषः । स चाऽयं दोषः-धर्मे प्रदेश इति भेदाऽऽपत्तिः, यथा कुण्डे बदराणीति । न च प्रदेशप्रदेशिनौ भेदेनोपलक्ष्येते । अथ अभेदेऽपि सप्तमी दृश्यते । यथा-घटे रूपमित्यादि । एवमुभयत्र दर्शनात्संशयलक्षणो दोषः स्यात् । अथ कर्मधारयेण भणसि, ततो विशेषेण (धम्मे अ से पएसे अ से त्ति) धर्मश्च स प्रदेशश्च स इति समानाधिकरणः कर्मधारयः । एवं च सप्तम्याशङ्काऽभावतो न तत्पुरुषसंभव इति भावः । आह-नन्वयं प्रदेशः समस्तादपि धर्मास्तिकायाद्व्यतिरिक्तः सन् समानाधिकरणतया निर्दिश्यते, उत तदेकदेशवृत्तिः सन् ?, यथा जीवास्तिकायैकदेशवृत्तिर्जीवप्रदेश इत्याशङ्क्याऽऽह-(मे से पएसे धम्मे त्ति) स च प्रदेशः सकलधर्मास्तिकायाऽऽदिव्यतिरिक्तो, न पुनस्तदेकदेशवृत्तिरित्यर्थः । शेषभावना पूर्ववत् । "से पएसे नो जीवे से पएसे नो खंधे" इत्यत्राऽपि पूर्ववदेवार्थकथनम् । एवं वदन्तं समभिरूढं प्रत्येवंभूतो भणति-यद्यद् धर्मास्तिकायाऽऽदिकं वस्तु भणसि, तत्तत्सर्वं समस्तं कृत्स्नं देशप्रदेशकल्पनारहितं प्रतिपूर्णमात्मस्वरूपेणाऽविकलं निरवशेषं तदेवैकत्वान्निरवयवम्, एकग्रहणगृहीतम् एकाभिधानाभिधेयं, नामानि ह्येकस्मिन्नर्थे नेच्छन्ति, अभिधानभेदे वस्तुभेदाभ्युपगमात् । तदेवंभूतं तद् धर्मास्तिकायाऽऽदिकं वस्तु भण, न तु प्रदेशाऽऽदिरूपतया, यतो देशप्रदेशौ ममाप्रदेशौ अवस्तुभूतौ, अखण्डस्यैव वस्तुनः सत्त्वेनोपगमात् । तथाहि-प्रदेशप्रदेशिनोर्भेदोऽभेदो वा ? । यदि प्रथमः पक्षः, तर्हि भेदेनोपलब्धिप्रसङ्गः, न च तथोपलब्धिरस्ति । अथाऽभेदस्तर्हि धर्मप्रदेशशब्दयोः पर्यायतैव प्राप्ता, एकार्थविषयत्वात् । न च पर्यायशब्दयोर्युगपदुच्चारणं युज्यते, एकेनैव तदर्थप्रतिपादने

द्वितीयस्य वैयर्थ्यात्, तस्मादेकाभिधानाभिधेयं परिपूर्णमेकमेव वस्त्विति । तदेवमेते निजनिजार्थसत्यताप्रतिपादनपरा विप्रतिपद्यन्ते नयाः । एते च परस्परं निरपेक्षा दुर्नयाः सौगताऽऽदिसमयवत्, परस्परसापेक्षास्तु सुनयाः, तैश्च परस्परसापेक्षैः समुदितैरेव संपूर्णं जिनमतं भवति, नैकैकावस्थायाम् ।

उक्तं च स्तुतिकारेण-

" उदधाविव सर्वसिन्धवः समुदीर्णास्त्वयि नाथ ! दृष्टयः ।
न च तासु भवान् प्रदृश्यते,प्रविभक्तासु सरित्स्विवोदधिः"॥१॥

एते च नया ज्ञानरूपाः,ते जीवगुणत्वेन यद्यपि गुणप्रमाणेऽन्तर्भवन्ति, तथाऽपि प्रत्यक्षाऽऽदिप्रमाणेभ्यो नयरूपतामात्रेण पृथक् सिद्धत्वाद् बहुविचारविषयत्वाच्चिन्ताऽऽगमे प्रतिस्थानमुपयोगित्वाच्च गुणप्रमाणाः पृथगुक्ताः, तदेतत्प्रदेशदृष्टान्तेनेति निगमनम् । प्रस्थकाऽऽदिदृष्टान्तत्रयेणैव नयप्रमाणं प्रतिपाद्योपसंहरति-तदेतन्नयप्रमाणमिति । अनेन च दृष्टान्तत्रयेण दिग्मात्रदर्शनमेव कृतं, यावता यत्किमपि जीवाऽऽदिवस्त्वस्ति, तत्र सर्वत्र नयविचारः प्रवर्तते, इत्यलं बहुजल्पितेनेति । अनु० ।

(२२) एतैर्दृष्टान्तैरयमस्मान्नयाच्छुद्ध इति कथं ज्ञेयम्?,इत्याह-

शुद्धा ह्येतेषु सूक्ष्मार्थाः, अशुद्धाः स्थूलगोचराः ।
फलतः शुद्धतां त्वाहु-र्व्यवहारे न निश्चये ॥ ७४ ॥

(शुद्धा हीति) एतेषु नयेषु उक्तदृष्टान्तरीत्या ये यतः सूक्ष्मार्थाः ते ततः शुद्धाः, ये च यतः स्थूलगोचराः ते ततोऽशुद्धाः, सूक्ष्मत्वं स्थूलत्वं चाऽर्थानां तादृशतादृशबुद्धिविषयत्वेनानुगमनीयम्, न तु बहुल्पविषमत्वेन, तथासत्युत्तरोत्तरेभ्यः पूर्वपूर्वेषां सूक्ष्मार्थत्वप्राप्तेः । यत उक्तम् * -' पूर्वः पूर्वो नयः प्रचुरगोचरः, परः परस्तु परिमितविषयः ॥ ४६ ॥ सन्मात्रगोचरात् संग्रहाद्भेगमो ज्ञानाभावभूमिकत्वाद् भूमविषयः ॥ ४७ ॥ सद्विशेषप्रकाशकाद् व्यवहारतः संग्रहः समस्तसत्समूहोपदर्शकत्वाद् बहुविषयः ॥ ४८ ॥ वर्तमानविषयाद्ऋजुसूत्राद् व्यवहारस्त्रिकालविषयाऽवश्चिन्वित्वादल्पार्थः ॥ ४९ ॥ कालाऽऽदिभेदेन भिन्नार्थोपदर्शिनः शब्दाद्ऋजुसूत्रस्तद्विपरीतवेदकत्वान्महार्थः ॥ ५० ॥ प्रतिपर्यायशब्दमर्थभेदमभीप्सतः समभिरूढाच्छब्दस्तद्विपर्ययानुयायित्वात्सूक्ष्मविषयः ॥ ५१ ॥ प्रतिक्रियं विभिन्नमर्थं प्रतिजानानादेवंभूतात् समभिरूढस्तदन्यथाऽर्थस्थापकत्वाद् महागोचरः ॥५२॥ " इति । एवं सद्ऋजुसूत्राऽऽदेर्व्यवहारस्य बह्वर्थत्वेन सूक्ष्मार्थत्वं स्यादिति बहुविचारसहत्वं सूक्ष्मार्थत्वम्, अल्पविचारसहत्वं च स्थूलार्थत्वमित्यादिकं वा यथासमयं परिजाषणीयम्, इत्थं च निश्चयनयो नैतेषु शुद्धाः, व्यवहारनयाश्चाशुद्धा इति फलितम् । निश्चयत्वं च व्यवहारतदुपजीवनयान्यनयत्वं व्यवहारतदुपजीवितयाऽन्यतरत्वमिति विवेकः । " अहवा सव्वणयमयं, विणिच्छओ इगमयं च ववहारो (विशे०) " इति भाष्योक्तं पक्षान्तरं च निश्चयस्य सप्तभङ्ग्यादिविशेषिततयोपपादनीयम् । अयं च निश्चयव्यवहारयोः शुद्धाशुद्धत्वोपन्यासः स्वरूपतः; फलतः शुद्धतां त्वभियुक्ता व्यवहारनये प्राहुर्न तु निश्चये ॥ ७४ ॥ नयो० । व्य० ॥

(२३) के पुनस्ते प्रभेदाः ?, इत्याह-

इक्किक्को य सयविहो, सत्त नयसया हवंति एमेव ।
अन्नो वि य आएसो, पंचेव सया नयाणं तु ॥२२६४॥

एतेषां मूलजातिभेदतः सप्तानां नैगमाऽऽदिनयानामेकैकः प्रभेदतः शतविधः शतप्रभेदः । एवं च सर्वैरपि प्रभेदैः सप्त नयशतानि भवन्ति । अन्योऽपि चाऽऽदेशः प्रकारः, तेन पञ्च नयशतानि भवन्ति । शब्दाऽऽदिभिस्त्रिभिरपि नयैर्यदा एक एव शब्दनयो विवक्ष्यते तदा पञ्चैव मूलनया भवन्ति, एकैकस्य च शतविधत्वात्पञ्चशतविधत्वं नयानाम् । (अहो वि य त्ति) अपिशब्दात्पट्, चत्वारि, द्वे वा शते नयानाम् । तत्र यदा सामान्यग्राहिणो नैगमस्य संग्रहे, विशेषग्राहिणस्तु व्यवहारेऽन्तर्भावो विवक्ष्यते, तदा मूलनयानां षण्णिधत्वादेकैकस्य च शतभेदत्वात्षट् शतानि नयानाम्; यदा तु संग्रहव्यवहारऋजुसूत्रलक्षणास्त्रयोऽर्थनयाः विवक्ष्यन्ते, एकस्तु शब्दनयः पर्यायास्तिकस्तदा चत्वारो मूलनया भवन्ति, प्रत्येकं च शतभेदत्वाच्चत्वारि नयशतानि । यदा तु नैगमाऽऽदयश्चत्वारोऽप्येको द्रव्यास्तिकः, शब्दनयास्तु त्रयोऽप्येक एव पर्यायास्तिक इत्येवं द्वावेव नयौ विवक्ष्येते, तदा अनयोः प्रत्येकं शतभेदत्वाद्वे नयशते भवतः । इति निर्युक्तिगाथार्थः ॥२२६४॥

(२४) अथवा किमनेन स्तोकनयभेददर्शनेन ?, उत्कृष्टतोऽसंख्याता अपि नया भवन्ति, तेऽपि चापिशब्दाद् गृह्यन्त इति दर्शयन्नाह-

जावंतो वयणपहा, तावंतो वा नया विसद्दाओ ।
ते चेव य परसमया, सम्मत्तं समुदिया सव्वे ॥२२६५॥

' वा ' अथवा, यावन्तो वचनपथा वचनमार्गाः वचनप्रकारास्तेऽपीहापिशब्दात्संगृहीताः । य एव च नयास्त एव च सावधारणाः सर्वेऽपि परसमयास्तीर्थिकसिद्धान्ताः, समुदितास्तु निरवधारणाः स्याच्छब्दलाञ्छिताः सर्वेऽपि नयाः सम्यक्त्वं जिनशासनभावं प्रतिपद्यन्त इत्यर्थः । आह च स्तुतिकारः-" उदधाविव सर्वसिन्धवः समुदीर्णास्त्वयि नाथ ! दृष्टयः । न च तासु भवान् प्रदृश्यते, प्रविभक्तासु सरित्स्वधोदधिः " ॥ १ ॥ इति ॥ २२६५ ॥

एतदक्षममाणः परः प्राऽऽह-

न समेंति न य समेया, सम्मत्तं नेव वत्थुणो गमगा ।
वत्थुविघायाय नया, विरोहओ वेरिणो चेव ॥२२६६॥

न समयन्ति न समुदावभावमापद्यन्ते नयाः, नाऽपि समेतास्ते सम्यक्त्वं भवन्ति, प्रत्येकावस्थायां मिथ्यादृष्टित्वात्, तत्समुदाये महामिथ्यात्वप्रसङ्गात्, प्रचुरविषलवसमुदाये विषप्राचुर्यवत् । नाऽपि ते समेता वस्तुनो गमकाः, प्रत्येकावस्थायां तदगमकत्वात् । समुदिताश्च ते विवदमानाः प्रत्युत वस्तुविघातायैव भवन्ति, न पुनस्तद्गमकाः । कुतः पुनस्ते न समयन्ति ?, न च समुदिताः सम्यक्त्वं, नाऽपि वस्तुगमकाः ?, इत्याह-विरोधित्वाद्वैरिवदिति ॥ २२६६ ॥

अत्रोत्तरमाह-

सव्वे समयंति सम्मं, चेगवसाओ नया विरुद्धा वि ।
भिच्चववहारिणो इव, राओदासीणवसवत्ती ॥ २२६७ ॥

परस्परविरुद्धा अपि नयाः सर्वेऽपि समयन्ति समुदिता जायन्ते, सर्वे च सम्यक्त्वं भवन्ति । कुतः ?, इत्याह-एकस्य जिनसाधोर्वशवर्तित्वाद्, राजवशवर्तिनानाऽभिप्रायभृत्यवर्गवत् । अथवा-व्यवहारिण इवोदासीनवशवर्तिनः । इदमुक्तं भवति-यथा नयदर्शिना आज्ञासारेण एकेन राज्ञा विरोधाऽऽदिनावमा-

* प्रमाणनयतत्त्वालोकालङ्कारे ।

पन्ना बहवोऽपि भृत्याः सम्यगुपायतो विरोधाऽऽदिकारणान्यपनीय एकत्र मील्यन्ते, सत्प्रवृत्तिं च कार्यन्ते; यथा वा धनधान्यभूम्याद्यर्थे परस्परं विवदमाना बहवोऽप्यर्थिप्रत्यर्थिलक्षणा व्यवहारिणः सम्यग् न्यायदर्शिना केनाऽप्युदासीनेन युक्तिभिर्विवादकारणान्यपनीय मील्यन्ते, सन्मार्गे च ग्राह्यन्ते, तथेहापि परस्परविरुद्धान्बहूनपि नयान् सम्यग्ज्ञानी जैनसाधुस्तेषां सावधारणतालक्षणं विरोधकारणमपनीय एकत्र मीलयति, सावधारणत्वे च मिथ्यात्वकारणेऽपनीते तान् सम्यग्रूपतां ग्राहयति । प्रचुरविषलवा अपि हि प्रौढमन्त्रवादिना निर्विषीकृत्य कुष्ठाऽऽदिरोगिणो दत्ता अमृतरूपतां प्रतिपद्यन्त एवेति ॥२२६७॥

प्रत्येकावस्थायामेकैकांशग्राहित्वात्समुदिता अपि कथं ते वस्तुगमकाः ?, इत्याह-

देसगमगत्तणाओ, गमग च्चिय वत्थुणो सुयाऽऽइ व्व ।
सव्वे समत्तगमगा, केवलमिव सम्मनाणम्मि ॥२२६८॥

इह नया वस्तुनस्तावत्सामान्येन गमका अवबोधकाः, प्रापका इति पक्षः, तद्देशगमकत्वात् । ननु वस्तुनो देशमात्रमेव प्रत्येकममी गृह्णन्ति, तत्कथं वस्तुगमका उच्यन्ते ?, इत्याह-श्रुताऽऽदिवत् । इदमुक्तं भवति-घटाऽऽदीनां रूपमात्रमेव चक्षुर्गृह्णाति, न रसाऽऽदिधर्मान्; पर्वताऽऽदीनां चार्वाग्देशमात्रमेव गृह्णाति, न परभागमिति । एवं देशग्राहकमपि सद्वस्तु गमयत्येव, एवं नया अपि । किञ्च-एत एव सर्वे नयाः मिथ्यात्वापगमेन सम्यक्त्वसद्भावे क्रमेण विशुद्ध्यमानाः सर्वाऽऽवरणप्रतिबन्धाभावात्समस्तवस्तुगमका भवन्ति, केवलज्ञानमिवेति ॥२२६८॥

आह-ननु यदि ते प्रत्येकमपि वस्तुगमकाः, तर्हि मिथ्यादृष्टयः कथम् ?, इत्याह-

जमणेगधम्मणो व-त्थुणो तदंसे च सव्वपमित्ती ।
अंध व्व गयावयवे, तो मिच्छदिट्ठिणो बीसुं ॥२२६९॥

यद्यस्मादनेकधर्मस्यानेकधर्मात्मकस्य वस्तुनस्तदंशेऽपि गृहीतेऽनित्यत्वादेकधर्ममात्रेऽपि परिच्छिन्ने बौद्धाऽऽदेर्नैयवादिनः " समस्तं वस्तु मया गृहीतम् " इत्येवंभूता प्रतिपत्तिर्जायते; ततस्तस्माद्विष्वक्पृथगेकैकशो मिथ्यादृष्टयः, विपर्यस्तबुद्धित्वात्, एकस्मिन्पुरुषपादाऽऽद्यवयवे समस्तगजप्रतिपत्तारोऽन्धा इवेति ॥ २२६९ ॥

समुदिता अपि तर्हि कथं ते सम्यग्दृष्टयः ?, इत्याह-

जं पुण समत्तपज्जा-यवत्थुगमग त्ति समुदिया तेणं ।
सम्मत्तं चक्खुमओ, सव्वगयावयवगहणे व्व ॥२२७०॥

यस्मात् तु समुदिता नयाः समस्तपर्याया यस्य वस्तुनः, तत्समस्तपर्यायं वस्तु, तस्य गमकाः प्रापकाः भवन्ति । तेन ते सम्यक्त्वं सम्यग्वादिनो व्यपदिश्यन्ते । यथा समस्तगजावयवग्रहणे सर्वगजावयवसमुदायाऽऽत्मकगजग्राहिनश्चक्षुष्मन्तः । निरवधारणोऽपरनयसापेक्षः स्यात्पदलाञ्छित एकोऽपि नयः सम्यग्वादी, ये तु सावधारणा अन्योन्यमनपेक्षाः स्यात्पदलाञ्छिताः ते बहवोऽपि समुदिता मिथ्यादृष्टय एवेतीह तात्पर्यम् । अत एव ये सावधारणास्ते बहवोऽपि समुदितव्यपदेशं न लभन्ते, तत्त्वतस्तेषामसमुदितत्वात् । निरवधारणास्तु नयाः पृथगपि स्थिताः परस्परं सापेक्षत्वेन समुदिता भवन्त इति ॥ २२७० ॥

दृष्टान्तान्तरेणाऽपि समुदितानां समस्तवस्तुगमकत्वं समर्थयन्नाह-

न समत्तवत्थुगमगा, बीसुं रयणाऽऽवलीए मणओ व्व ।
सहिया समत्तगमगा,मणओ रयणाऽऽवलीए व्व ॥२२७१॥

न समस्तवस्तुगमकाः पृथग्भूता नयाः, परस्परनिरपेक्षत्वात्, पृथक्स्थितरत्नावलीव्यपदेशानर्हमणय इव । त एव समुदिताः समस्तवस्तुगमकाः, यथास्थानविनियोगेन परस्परसापेक्षत्वाद्, एकसूत्रक्रमप्रोतरत्नावलीमणय इवेति ॥ २२७१ ॥

अथ परस्परं विवदमानान्नयान्समीक्ष्य ये मुह्यन्ति, ' न किञ्चिदिह परस्परं मिलति' इत्यादि भाषणतः समयाऽऽसातनां च कुर्वन्ति,तदुपदेशगर्भमुपसंहरन्नाह-

एवं सविसयसच्चे, परविसयपरंमुहत्तए नाउं ।
नेएसु न संमुज्झइ,न य समयाऽऽसायणं कुणइ ॥२२७२॥

एवमुक्तप्रकारेण यो यस्य द्रव्यास्तिकायाऽऽदिनयस्याऽऽत्मीयो नित्यत्वाऽऽदिको विषयस्तन्मात्रप्रतिपादने सत्योऽबितथो नयः, परस्य तु पर्यास्तिकाऽऽदिनयस्य योऽनित्यत्वाऽऽदिको विषयस्तत्र पराङ्मुखः,न तं निराकरोति,निरवधारणत्वेन सम्यग्नयत्वात्, नाऽपि तं स्थापयति, नयत्वेनैकांशग्राहित्वादित्यर्थः । एवंभूतान् सर्वानपि नयान् ज्ञात्वाऽन्योऽन्यरूपतया तेषां स्वविषयप्रतिपादनेऽपि नयविधिज्ञः साधुर्जैनेषु वस्तुषु न संमुह्यति,न दोलायमानमानसो भवति। नाऽपि निन्दाऽऽदिभिः समयाऽऽशातनां विधाय मिथ्यात्वमुपगच्छति, किं तु ' कथञ्चिदेतदप्यस्ति, कथञ्चिदिदमपि च घटते ' इत्यादिरूपतया नयान्विषयविभागेन व्यवस्थाप्य वस्त्वर्थं गमयतीति ॥२२७२॥ विशे० । उक्त० । स्या० ।

(२५) वस्तुनिबन्धनाऽध्यवसायनिमित्तव्यवहारमूलकारणतामनयोः प्रतिपाद्याधुनाऽध्यारोपितानध्यारोपितनामस्थापनाऽद्रव्यभावनिबन्धनव्यवहारनिबन्धनतामनयोरेव प्रतिपादयन्नाहाऽऽचार्यः-

नामं ठवणा दविए, तिएसु दव्वट्ठियस्स निक्खेवो ।
भावो उ पज्जवट्ठिअ-परूवणा एस परमत्थो ॥ ६ ॥

(नामं ठवणेत्यादि) अस्याश्च समुदायार्थः-नामस्थापनाऽद्रव्यमित्येष द्रव्यार्थिकस्य निक्षेपः । भावस्तु पर्यायार्थिकनिरूपणाया निक्षेप इत्येष परमार्थः । सम्म० १ काण्ड । (नामाऽऽदीनां व्याख्या स्वस्वस्थाने । नामस्थापनाऽद्रव्यभावनयानां स्वस्वस्थाने मतानि)

तदेवं नामाऽऽदिनयानां परस्परविप्रतिपत्तिमुपदर्श्य तत्परिहारपूर्वकं मिथ्येतरत्वावं दर्शयितुमाह-

एवं विवयंति नया, मिच्छाऽभिनिवेसओ परोप्परओ ।
इयमिह सव्वनयमयं, जिणमयमणवज्जमुच्चंतं ॥ ७२ ॥

एवमुक्तप्रकारेण परस्परतो मिथ्याभिनिवेशाद् विवदन्ते विवादं कुर्वन्ति नामनयाऽऽदयो नयाः । ततश्च मिथ्यादृष्टय एते, असंपूर्णार्थग्राहित्वात्, गजगात्रजिज्ञासुदेशसंस्पर्शने बहुविधविवादमुखरजात्यन्धवृन्दवत् । यदि नामैते मिथ्यादृष्टयः, तर्हि निर्मिथ्यं किम् ?, इत्याह-इदमिहैव लोके वर्त्तमानमनुभवप्रत्यक्षसिद्धं जिनमतं जैनाऽभ्युपगमरूपम् । कथंभूतम् ?, सर्वनयमयं निःशेषनयसमूहाभ्युपगमनिर्वृत्तम्, अत्यन्तमनवद्यं नामाऽऽदिनयपरस्परोद्भाविताऽविद्यमाननिःशेष-

दोषम, सम्पूर्णार्थग्राहित्वात्, चक्षुष्मतां समन्तात् समस्त-हस्तिशरीरदर्शनोल्लापवत् ॥ इति गाथार्थः ॥ ७२ ॥

तथा च सम्पूर्णार्थग्रहरूपं जिनमतमेव दर्शयति-

नामाऽऽइनेअसद्द-त्थबुद्धिपरिणामभावओ निययं ।
जं वत्थुमत्थि लोए, चउपज्जायं तयं सव्वं ॥ ७३ ॥

घटपटाऽऽदिकं यत् किमपि वस्त्वस्ति लोके,तत् सर्वं प्रत्येक-मेव नियतं निश्चितं चत्वारः पर्याया नामाऽऽकारद्रव्यभाव-लक्षणा यत्र तच्चतुष्पर्यायम्; न पुनर्यथा नामाऽऽदिनयाः प्राहुः, यथा-केवलनाममयं वा, केवलाऽऽकाररूपं वा, केवलद्र-व्यत[1]श्लिष्टं वा, केवलभावाऽऽत्मकं वेति भावः । कुतश्चतुष्पर्या-यमेव ?, इत्याह-(नामादिभेअ इत्यादि) नामाऽऽदिभेदेष्वेकत्व-परिणतिसंवलितनामाऽऽकार-द्रव्य-भावेष्वेवेत्यर्थः । शब्दश्चाऽ-र्थश्च बुद्धिश्च शब्दाऽर्थबुद्धयस्तासां परिणामस्तस्य भावः सद्भावस्तस्मात्,नामाऽऽदिभेदेषु समुदितेष्वेव योऽयं शब्दाऽर्थ-बुद्धीनां परिणामसद्भावस्तस्माद्धेतोः सर्वं चतुष्पर्यायं वस्त्वि-त्यर्थः । प्रयोगः-यत्र शब्दार्थबुद्धिपरिणामसद्भावः, तत् सर्वं चतुष्पर्यायम्, चतुष्पर्यायत्वाभावे शब्दाऽऽदिपरिणामाभावोऽपि न दृष्टः, यथा शशशृङ्गे, तस्माच्चशब्दाऽऽदिपरिणामसद्भावे स-र्वत्र चतुष्पर्यायत्वं निश्चितमिति भावः । इदमुक्तं भवति-अन्यो-ऽन्यसंवलितनामाऽऽदिचतुष्टयाऽऽत्मन्येव वस्तुनि घटाऽऽदिश-ब्दस्य तदभिधायकत्वेन परिणतिर्दृष्टा, अर्थस्याऽपि पृथुबुध्नो-दराऽऽद्याकारस्य नामाऽऽदिचतुष्टयाऽऽत्मकतयैव परिणामः समुपलब्धः, बुद्धेरपि तदाकारग्रहणरूपतया परिणति-स्तदात्मन्येव वस्तुन्यवलोकिता । न चेदं दर्शनं भ्रान्तम्, बाधकाऽभावात् । नाऽप्यदृष्टाऽऽशङ्क्याऽनिष्टकल्पना यु-क्तिमती, अतिप्रसङ्गात्, न हि दिनकराऽस्तमयोदयोपलब्ध-रात्रिन्दिवाऽऽदिवस्तूनां बाधकसम्भावनयाऽन्यथात्वकल्पना-सङ्गतिमावहति । न चेहाऽपि दर्शनाऽदर्शने विहायाऽन्यद् नि-श्चायकं प्रमाणमुपलभामहे, तस्मादेकत्वपरिणत्यापन्ननामा-ऽऽदिनेदेष्वेव शब्दाऽऽदिपरिणतिदर्शनात् सर्वं चतुष्पर्यायं वस्त्विति स्थितम् । इति गाथार्थः ॥ ७३ ॥

आह-ननु यदि नामाऽऽदिचतुष्पर्यायं सर्वं वस्तु, तर्हि किं नामाऽऽदीनां भेदो नास्त्येव ?, इत्याह-

इय सव्वभेअसंघा-यकारिणो भिन्नलक्खणा एते ।
उप्पाया इति जं पि व, धम्मा पइवत्थुमाइज्जा ॥७४॥

इत्येवं ये पूर्वं भिन्नलक्षणा भिन्नस्वरूपा धर्मा नामाऽऽदयः प्राक्कैः, ते प्रतिवस्त्वायोज्या आयोजनीया इति सम्बन्धः । कथ-म्भूताः सन्तः ?, इत्याह-भेदश्च सङ्घातश्च भेदसङ्घातौ, सर्वस्य स्वाऽऽश्रयभूतवस्तुनो भेदसङ्घातौ, तौ कर्तुं शीलं येषां ते सर्व-भेदसङ्घातकारिणो, निजाऽऽश्रयस्य सर्वस्याऽपि वस्तुनः कथ-ञ्चिद् भेदकारिणः,कथञ्चिच्चाभेदकारिण इत्यर्थः । तथाहि-केन-चिदिन्द्र इत्युच्चरिते अन्यः प्राऽऽह-किमनेन नामेन्द्रो विवक्षितः, आहोस्वित् स्थापनेन्द्रः, द्रव्येन्द्रः, भावेन्द्रो वा ?। नामेन्द्रोऽपि द्रव्यतः किं गोपालदारकः, हालिकदारकः, क्षत्रियदारकः, ब्रा-ह्मणदारकः, वैश्यदारकः, शूद्रदारको वा ? इत्यादि । तथा क्षे-त्रतोऽपि नामेन्द्रः किं भारतः, ऐरवतः, महाविदेहजो वा ?, इत्यादि । कालतोऽपि किमतीतकालसंभवी, वर्त्तमानकाल-भावी, भविष्यन् वा ? इत्यादि; अतीतकालज्ञाव्यपि किमितोऽ-नन्ततमसमयभावी, असङ्ख्याततमसमयभावी, संख्याततम-समयभावी वा ?, इत्यादि । भावतोऽपि किं कृष्णवर्णः, गौरव-र्णः, दीर्घः, मन्थरो वा ? इत्यादि । तदेवमेकोऽपि नामेन्द्रस्तदा-ऽऽश्रयभूतोऽर्थस्तावद् द्रव्य-क्षेत्रकालभावभेदाऽधिष्ठितोऽनन्त-भेदत्वं प्रतिपद्यते । तथा स्थापना-द्रव्य-भावाऽऽश्रयस्याऽप्युक्ता-नुसारतः प्रत्येकमनन्तभेदत्वमनुसरणीयम् । इत्येवमेते नामाऽऽ-दयो भेदकारिणः । अभेदकारिणस्तर्हि कथम् ?,इति चेत् । उ-च्यते-यदैकस्मिन्नपि वस्तुनि नामाऽऽद्यश्चत्वारोऽपि प्रतीयन्ते, तदाऽभेदविधायिनः । तथाहि-एकस्मिन्नपि शचीपत्यादौ 'इन्द्र' इति नाम, तदाकारस्तु स्थापना, उत्तरावस्थाकारणत्वं तु द्र-व्यत्वम, दिव्यरूप-सम्पत्तिकुलिशधारण-परमैश्वर्याऽऽदिसंपन्न-त्वं तु भाव इति चतुष्टयमपि प्रतीयते । तस्मादेवं सर्वस्य स्वा-ऽऽश्रयभूतस्य वस्तुनो भेदसङ्घातकारिणो भिन्नलक्षणा एते नामाऽऽद्यो धर्मा उत्पादव्ययध्रौव्यत्रिकवत् प्रतिवस्तु आयो-जनीयाः परस्पराऽविनाभाविनः प्रतिवस्तु दृष्टव्या इति तात्प-र्यम् । इति गाथार्थः ॥ ७४ ॥

" नत्थि नएहिं विहूणं, सुत्तं अत्थो अ जिणमए किंचि ।
आसज्जउ सोयारं, नएण य विसारओ बूया " ॥ १ ॥
इति वचनाज्जिनमते सर्वं वस्तु प्रायो नयैर्विचार्यते,
अतो नामस्थापनाऽऽदीनपि प्रस्तुतान्
नयैर्विचारयन्नाह-

नामाऽऽइतियं दव्व-ट्ठियस्स भावो य पज्जवनयस्स ।
संगहववहारा पढ-मगस्स सेसा य इयरस्स ॥७५॥

एतेषु नामाऽऽदिषु मध्ये नामस्थापना-द्रव्यनिक्षेपत्रयं द्रव्या-स्तिकनयस्यैवाऽभिमतं, न पर्यायास्तिकस्य, नामाऽऽदि-निक्षेपत्रयस्य विवक्षितभावशून्यत्वात्, पर्यायास्तिकस्य तु भावग्राहित्वादिति । भावो भावनिक्षेपः पुनः पर्यायास्ति-कनयस्याऽभिमतो नेतरस्य, तस्य द्रव्यमात्रग्राहित्वेन भावा-ऽनवलम्बित्वादिति । आह-ननु नया नैगमाऽऽदयः प्रसिद्धाः, ततस्तैरेवाऽयं विचारो युज्यते, अथ तेऽत्रैव द्रव्य-पर्याया-स्तिकनयद्वयेऽन्तर्भवन्ति, तर्हि द्रव्यतां कस्य कस्मिन्नन्त-र्भावः ?, इत्याशङ्क्याऽऽह-(संगहेत्यादि) नैगमस्तावत् सामान्यग्राही संग्रहेऽन्तर्भवति, विशेषग्राही तु व्यवहारे, सं-ग्रहव्यवहारौ तु प्रस्तुतनयद्वयस्य मध्ये प्रथमकस्य द्रव्या-स्तिकस्य मतमभ्युपगच्छतः द्रव्यास्तिकमतेऽन्तर्भवत इति तात्पर्यम् । शेषास्तु ऋजुसूत्राऽऽदय इतरस्य द्वितीयस्य पर्या-यास्तिकस्य मतमभ्युपगच्छन्तोऽत्रैवाऽन्तर्भवन्तीति हृदयम् । आचार्यसिद्धसेनमतेन चेह ऋजुसूत्रस्य पर्यायास्तिकेऽन्तर्भावो दर्शितः, सिद्धान्ताऽभिप्रायेण तु संग्रहव्यवहारवद् ऋजुसू-त्रस्याऽपि द्रव्यास्तिक एवान्तर्भावो द्रष्टव्यः । तथा चोक्तं सूत्रे-" उज्जुसुयस्स एगे अणुवउत्ते आगमओ एगं दव्वावस्सयं पुहत्तं नेच्छइ " इति ।

[अस्यार्थः-ऋजुसूत्रस्यैकोऽनुपयुक्त आगमत एकं द्रव्यावश्य-कं पृथक्त्वं नेच्छति । अनुयोगद्वारसूत्रस्योऽयं पाठः । तट्टी-का चेयम्-" उज्जुसुयस्सेत्यादि "-ऋजु अतीताऽनागतपर-कीयपरिहारेण प्राञ्जलं वस्तु सूत्रयत्यभ्युपगच्छतीति ऋजु-सूत्रः, अयं हि वर्तमानकालज्ञाव्येव वस्तु अभ्युपगच्छति, नाऽतीतम; विनष्टत्वात्; नाऽप्यनागतम, अनुत्पन्नत्वात्; व-र्तमानकालभाव्यपि स्वकीयमेव मन्यते, स्वकार्यसाधकत्वा-

त्, स्वधनवत्, परकीयं तु नेच्छति, स्वकार्याऽप्रसाधकत्वात्, परधनवत् । तस्मादेको देवदत्ताऽऽदिरनुयुक्तोऽस्य मते आगमत एकं द्रव्याऽऽवश्यकमिति । " पुहत्तं नेच्छइ त्ति " अतीताऽनागतनेदतः परकीयभेदतश्च पृथक्त्वं पार्थक्यं नेच्छत्यसौ, किं तर्हि ?, वर्तमानकालीनं स्वकमेव चाऽभ्युपैति, तच्चैकमेवेति ।]

तदेनेनाऽस्य द्रव्यवादित्वं दर्शितम्, इति कथं पर्यायास्तिकेऽन्तर्भावः स्यात् ? । इति गाथाऽर्थः ॥ ७५ ॥

आह-ननु संग्रहाऽऽदिनया नामनिक्षेपं सर्वमप्येकत्वेनेच्छन्ति; नेदेन वा ?, एवं स्थापनाऽऽदिनिक्षेपेष्वपि प्रत्येकं वक्तव्यम्, इत्याशङ्क्याऽऽह-

जं सामन्नग्गाही, संगिण्हइ तेण संगहो निययं ।
जेण विसेसग्गाही, ववहारो तो विसेसेइ ॥ ७६ ॥
मउज्जुसुया पज्जा-यवायगा भावसंगहं वेंति ।
उवरिमया विवरीआ, भावं भिंदंति तो निययं ॥ ७७ ॥

यद् यस्मात् कारणात् संग्रहनयः सामान्यग्राही सामान्यवादी, तेन कारणेन संगृह्णात्येकत्वेनाऽध्यवस्यति प्रत्येकं त्रितयं नामस्थापनाद्रव्यनिक्षेपलक्षणं यानि कानिचिद् नाममङ्गलानि तत् सर्वमप्येकं नाममङ्गलम्, तथा स्थापनामङ्गलान्यशेषाण्यप्येकं स्थापनामङ्गलम्, एवं द्रव्यमङ्गलान्यपरिशिष्टान्यप्येकं द्रव्यमङ्गलमित्यर्थः । व्यवहारनयस्तु येन कारणेन विशेषग्राही, ततो नामाऽऽदिनिक्षेपान् विशेषयति भेदेनेच्छति-नाममङ्गलानि सर्वाण्यपि पृथक् नाममङ्गलत्वेनेच्छति, एवं स्थापनाऽऽदिनिक्षेपेष्वपि वाच्यम् ॥ ७६ ॥ (मउज्जुसुयेत्यादि) शब्दर्जुसूत्रनयौ पुनः पर्यायैरेकार्थमिन्नाऽभिधानैर्वस्तु वक्तुं शीलं ययोस्तौ पर्यायवाचिनौ सन्तौ नामस्थापनाद्रव्यनिक्षेपपरिहारेणैकस्यैव भावस्य भावनिक्षेपस्य संगृह्णीतः संग्रहोऽभिन्नत्वमेकत्वं भावसंग्रहस्तं ब्रूतः प्रतिपादयतः । इदमुक्तं भवति-ऋजुसूत्रशब्दनयौ पूर्वनयेभ्यो विशुद्धत्वाद् नाम-स्थापना-द्रव्यनिक्षेपं तावद् नेच्छतः, किन्त्वेकमेव भावनिक्षेपमभ्युपगच्छतः, केवलं समभिरूढैवंभूतनयाऽपेक्षयाऽविशुद्धत्वाद् विभिन्नाऽनेकपर्यायाऽभिधेयत्वेऽपि भावनिक्षेपस्य संग्रहमेकत्वमेव प्रतिपद्यते, न भिन्नत्वमिति भावः । ततश्चैतन्मतेन यदेव मङ्गलशब्दवाच्यं भावमङ्गलं प्रत्यूहोपशमकाऽनिष्टविघातकृद् विघ्नापहरणाऽऽदिशब्दानामपि तदेव वाच्यम्, न भिन्नम्, इति तात्पर्यम् । (उवरिमया विवरीआ इत्यादि) उपरितनौ तु समभिरूढैवंभूतौ नयौ ऋजुसूत्रशब्दनयाऽपेक्षया विपरीतौ भिन्नाऽनेकपर्यायाऽभिधेयस्य भावस्यैकत्वं नेच्छतः, किन्तु भिन्नत्वमभ्युपगच्छतः । तथाहि-समभिरूढमतेनाऽन्यदेव मङ्गलशब्दवाच्यं भावमङ्गलम्, अन्यच्च प्रत्येकं प्रत्यूहोपशमकाऽऽदिपर्यायवाच्यम् । एवम्भूतस्याऽप्येवमेव, केवलमयं पूर्वस्माद् विशुद्धत्वादेकपर्यायाभिधेयमपि भावमङ्गलं भावमङ्गलकार्यं कुर्वदेव मन्यते, नाऽन्यदा, यथा धर्मोपकरणाऽन्वितः सम्यक् चारित्रोपयोगे वर्त्तमानः साधुरिति । तदेवमृजुसूत्रशब्दनयाऽभ्युपगमापेक्षया विपरीताऽभ्युपगमपरत्वाद् विपरीतावेतौ (तो त्ति) तस्माद् भावं भावमङ्गलाऽऽदिकमर्थं नियतं निश्चितं पर्यायभेदाद् नित्यः-नेदेनेच्छत इत्यर्थः । यदि हि पर्यायभेदेऽपि वस्तुनो न भेदः, तर्हि घट-पटाऽऽदीनामपि स न स्यादित्यादियुक्तेः पर्यायभेदेन भिन्नमेव भावमङ्गलमभ्युपगच्छत इति भावः । इति गाथाद्वयार्थः ॥ ७६ ॥ ७७ ॥ विशे० ।

(२६) परस्परं द्रव्यार्थिकपर्यायार्थिकौ--

तत्क्षणक्षयप्रधाने प्रत्यक्षाऽऽदेः प्रमाणस्यानवतारात्प्राधान्यकत्वेन च तस्यैकत्वाध्यवसायिनः प्रवृत्तिप्रतिपादनाद् न पर्यायास्तिकाभिमतपूर्वापरक्षणविविक्तमध्यक्षणमात्रं वस्तु, किं त्वतीताऽनागतपर्यायाऽऽधारमेकं द्रव्यं वास्तीति द्रव्यार्थिकनिक्षेपः सिद्धः, द्रव्यं वा न भूतपर्यायमनुभविष्यत्, पर्यायं चैकमेव, तेनाऽनुभूतपर्यायशब्देन तत्कदाचिदभिधीयते, कदाचिच्चानुभविष्यत्पर्यायशब्देन, यथाऽतीतघृतसंबन्धो घटो घृतघट इत्यभिधीयते; भविष्यत्तत्संबन्धोऽपि तथैवाभिधानगोचरचारी, शुद्धतरपर्यायास्तिकेन च निराकारस्य ज्ञानस्याऽर्थग्राहकत्वाऽसंभवात्, साकारस्य ज्ञानार्थग्राहकत्वासंभवात् साकारं ज्ञानमभ्युपगतं, तत्संवेदनमेव वाऽर्थसंवेदनं ज्ञानाऽनुभवव्यतिरेकेणाऽपरस्याऽर्थानुभवस्याभावाद् घटोपयोग एव घटः, तन्मतेन तत्पर्यायेणाऽतीतेन परिणमद्यद्वा द्रव्यं तच्छब्दवाच्यं द्रव्यार्थिकमतेन व्यवस्थितं पूर्ववत्, अत एव घटाऽऽद्यर्थाभिन्नस्तत्र चानुपयुक्तो द्रव्यमिति प्रतिपादितो द्रव्यार्थिकनिक्षेपश्च, द्रव्यमागमे वाच्यमनेकधा प्रतिपादितम्,इह तु युक्तिसंस्पर्शमात्रमेव प्रदर्श्यते । तदर्थित्वात्प्रयासस्य । भवति विवक्षितवर्तमानसमयपर्यायरूपेणोत्पद्यत इति भावः "विभाषा ग्रहः" ॥ ३ । १ । १४३ ॥ (पाणि०) इत्यत्र सूत्रे केचिद्गत्वेतश्चेत्यपीष्यते । अथवा-द्रुतिर्भावो वज्रकिरीटाऽऽदिधारणवर्त्तमानपर्यायेण इन्द्राऽऽदिरूपतया वस्तुनो भवनं, तद्ग्रहणपर्यायेण वा ज्ञानस्य भवनं, यथा चायं पर्यायार्थिकप्ररूपणा तथा प्रदर्शित एव प्राक्, न पुनरुच्यते । एष एव नयनिक्षेपानुयोगः प्रतिपादितः, उभयप्रविभागः परमार्थः, परमं हृदयमागमस्यैतदव्यतिरिक्तविषयत्वात्सर्वनयवादानाम्, न हि शास्त्रपरमहृदयनयव्यतिरिक्तः कश्चिन्नयो विद्यते । सामान्यविशेषस्वरूपविषयद्वयव्यतिरिक्तविषयोऽन्तराभावाद्विषयिणोऽप्यपरस्य नयान्तरस्याऽभाव इति प्राक् प्रतिपादितम् ।

एतदपि नयद्वयं शास्त्रस्य परमहृदयम्-द्रव्यं पर्यायशून्यं, पर्यायाश्च द्रव्याविरहिण इत्येवंभूतार्थप्रतिपादनपरम्, नाऽन्यथेत्येतस्याऽर्थस्य प्रदर्शनार्थमाह-

पज्जवनिस्सामण्णं, वयणं दव्वट्ठियस्स अत्थि त्ति ।
अवसेसो वयणविही, पज्जवनयणा सपडिवक्खो ॥७॥

परस्परनिरपेक्षस्य नयद्वयस्य प्रत्येकमेवं वचनविधिः-द्रव्यास्तिकस्यानुष्ककविशेषं वचनमस्तीत्येतावन्मात्रं पर्यायास्तिकस्य स्वपरामृष्टसत्ताद्रव्यभावं द्रव्यं पृथिवी घटः शुक्ल इत्याद्याश्रितपर्यायं परस्परनिरपेक्षं चोभयनयवचोऽसदेव,वचनार्थासद्भावनमसदर्थमिति तदर्थस्याऽप्यसत्त्वमावेदितं भवतीति समुदायार्थः ।

अवयवार्थस्तु-पर्यायनयेन सह निःसामान्यमसाधारणं वचनं द्रव्यास्तिकस्याऽस्तीत्येतद् भेदवाद्यभ्युपगतस्य, विशेषस्य त्वनुरूपानुप्रवेशात्, एतच्च वचो निर्विषयं निर्विशेषत्वाद् विवक्षुसुमाऽभिधानवत् । "निर्विशेषं हि सामान्यं, भवेत् शशविषाणवत् ।" इति प्रसाधितत्वात् नाव्याप्तिः, हेतोरसिद्धिः पराभ्युपगमादेव परिहृता । तच्च । एकान्तभावनाप्रवृत्तस्य द्रव्यास्तिकनयस्य परमार्थिता, पर्यायास्तिकस्याऽप्येवंप्रवृत्तस्य न सेति

पश्चार्द्धेन प्रतिपादयति-अवशेष इति शेषः, स चोपयुक्तादन्यः; वचनविधिर्वचनभेदः सत्ताविकलविशेषप्रतिपादकः पर्यायेषु सत्ताव्यतिरिक्तेष्वसत्सु भजनात् सत्ताया आरोपणात्, सत्प्रतिपक्ष इति-सतः प्रतिपक्षो विरोध्यसत् भवति ॥ तथाहि-प्रतिपादको वचनविधिरवस्तुविषयो, निःसामान्यत्वात्, खपुष्पवत् । भावना तु द्रव्यार्थिकवचनविपर्ययेण प्रयोगस्य कार्या । अथवा-अर्थाभिधानप्रत्ययास्तुल्यनामधेया इत्यनयोः स्वरूपमभिधायाभिधानस्य द्रव्यास्तिकस्वरूपस्य तदभिधायकस्य प्रतिपादनार्थमाह-(पज्जवणिस्सामण्णमित्यादि) पर्यायाभिष्क्रान्तं तद्विकलं, सामान्यं संग्रहस्वरूपं यस्मिन् वचने तत्पर्यायनिःसामान्यं वचनम् । किं पुनस्तदित्याह-अस्तीति,तच्च द्रव्यार्थिकस्य रूपं,प्रतिपादकं वा । यद्वा-पर्यायऋजुसूत्रनयविषयादन्यो द्रव्यत्वाऽऽदिविशेषः,स एव च निश्चितं सामान्यं वचनं, द्रव्यत्वाऽऽदिसामान्यविशेषाऽभिधायीति यावत् । तच्चाशुद्रव्यार्थिकसंबन्धि, तत्प्रतिपादकत्वेन तत्स्वरूपत्वेन वा अवशेषो वचनविधिर्वर्णपदवाक्यरूपः, स प्रतिपक्षोऽस्य वचनस्य पर्यायार्थिकनयरूपः, तत्प्रतिपादको वा पर्यायमेव, अन्यथा कथमवशेषवचनविधिः स्यात्, यदि विशेषं नाऽश्रयेत् ? ।

एवं तावद् द्रव्यार्थिकभेदेन भेदमनुभवतां नयानां स्वरूपं प्रतिपाद्यानेकान्तभावाभावतयैवैषां सत्यता नास्त्येतत्प्रतिपादनार्थं ज्ञानानेकान्तमेव तावदाह-

पज्जवणयवोक्कंतं, वत्थुं दव्वट्ठियस्स वयणिज्जं ।
जाव दविओवओगो, अपच्छिमवियप्पनिव्वयणो ॥७॥

द्रव्यास्तिकस्य वक्तव्यं परिच्छेद्यो विषयो, निश्चयकर्तृवचनं च विकल्पनिर्वचनं, विद्यते पश्चिमं यस्मिन् विकल्पनिर्वचने तत्तथा, ततः परं विकल्पवचनाप्रवृत्तेः, यावदपश्चिमविकल्पनिर्वचनो द्रव्योपयोगः प्रवर्तते, तावद् द्रव्यार्थिकस्य विषयो वस्तुतत्त्वपर्यायाऽऽक्रान्तमेव । अन्यथा ज्ञानार्थयोरप्रतिपत्तेरसत्त्वप्रसक्तिः । न हि पर्यायानाक्रान्तसत्तामात्रसद्भावग्राहकं प्रत्यक्षमनुमानं वा प्रमाणमस्ति, द्रव्याऽऽदिपर्यायाऽऽक्रान्तस्यैव सर्वदा सत्तारूपस्य ताभ्यामवगतेः । यद्वा-यद्वस्तु सूक्ष्मतरतमाऽऽदिबुद्धिना पर्यायनयेन स्थूलरूपत्यागेनोत्तरतत्तत्सूक्ष्मरूपाऽऽश्रयणाद् व्युत्क्रान्तं गृहीतत्यक्तम, यथा किमिदंभूतसामान्यं घटाऽऽदिभिर्विना प्रतिपत्तिविषयः, तावत् शुक्लतरूपस्वरूपोऽन्यो विशेष एव, न द्रव्यार्थिकस्य वस्तुविषयो, यतो यावदपश्चिमविकल्पनिर्वचनोऽन्यो विशेषस्तावद् द्रव्योपयोगो द्रव्यज्ञानं प्रवर्तते । न हि द्रव्याऽऽदयो विशेषान्ताः सदादिप्रत्ययावच्छिन्नैकान्तव्यावृत्तिबुद्धिग्राह्यतया प्रतीयन्ते, तथाऽप्रतीयमानास्तथाऽभ्युपगमार्हाः, अतिप्रसङ्गात् ।

तदेवं न सत्ता विशेषविरहिणी, नाऽपि विशेषाः सत्ताविकला इति प्रदर्श्योपसंहरन्नाह-

दव्वट्ठिओ त्ति तम्हा, नत्थि णओ नियम सुद्धजाईओ ।
न य पज्जवट्ठिओ णा- म को य जयणाय उ विसेसो ॥ ६ ॥

तस्माद् द्रव्यार्थिक इति नयः शुद्धजातीयो विशेषविनिर्मुक्तो नास्ति नियमेनेत्यवधारणार्थः, विषयाभावेन विषयिणोऽप्यभावात् । न च पर्यायार्थिकोऽपि कश्चिन्नयो नामेति प्रतिरूढार्थो नियमेन शुद्धस्वरूपः संभवति, सामान्यविकलात्यन्तव्यावृत्तविशेषविषयाभावेन विषयिणोऽप्यभावात् । यदि विषयाभावादिमौ नयौ न स्तः, यदुक्तम-'तीर्थकरवचनसंग्रह' इत्यादि, तद्विरुध्यते इत्याह-(जयणाय उ विसेसो त्ति) भजनायास्तु विवक्षाया एव विशेष इदं द्रव्यमयं पर्याय इत्ययं भेदः, तथा तद्भेदाद्विषयिणोऽपि तथैव भेद इत्यभिप्रायः । भजना च सामान्यविशेषाऽऽत्मके वस्तुनस्त्वे उपसर्जनीकृतविशेषं यदन्वयिरूपं तद्द्रव्यम् इति विवक्षयति यदा तदा द्रव्यार्थिकविषयः, यदा तूपसर्जनीकृतान्वयिरूपं तस्यैव वस्तुनो यद्साधारणं रूपं तद्विवक्ष्यते तदा पर्यायनयविषयस्तद्भवतीति ।

एवंरूपभजनाकृतमेव भेदं दर्शयितुमाह-

दव्वट्ठियवत्तव्वं, अवत्थु णियमेण होइ पज्जाए ।
तह पज्जव वत्थु अव-त्थुमेव दव्वट्ठियनयस्स ॥ १० ॥

पर्यायास्तिकस्य द्रव्यास्तिकाभिधेयमभित्वमवस्त्वेव, भेदरूपापन्नत्वात्, द्रव्यास्तिकस्याऽपि पर्यायास्तिकाभ्युपगता भेदा अवस्तुरूपा एव भवन्ति, सत्तारूपाऽऽपन्नत्वात् । अतो भजनामन्तरेणैकत्र सत्ताया अपरत्र भेदानां नपुंसत्वादिदं द्रव्यमेते च पर्याया इति नास्ति भेदः । न च प्रतिभासमानयोर्द्रव्यपर्यायोः कथं पर्यायास्तिकद्रव्यास्तिकाभ्यां प्रतिवक्तव्यम् ?, यतः प्रतिभासोऽप्रतिभासस्य बाधकः, न तु मिथ्यात्वस्य, मिथ्यारूपस्यापि प्रतिभासनात् । तथाहि-पर्यायास्तिकः प्राऽऽह-न मया द्रव्यप्रतिभासो निषिध्यते, तस्याऽनुभूयमानत्वात्, किं तु विशेषव्यतिरेकेण द्रव्यस्याप्रतिभासनाद्व्यतिरेके तु व्यक्तिस्वरूपवत्तस्यानन्वयात्, उभयरूपतायाश्चैकत्र विरोधाऽऽदिगत्यन्तराभावाद् द्रव्याऽप्रतिभासस्तत्र मिथ्यैव, विशेषप्रतिभासस्त्वन्यथा, बाधकाभावात्, यतः प्रतिक्षणं वस्तुनो वृत्तेर्नाशोत्पादौ पर्यायलक्षणं न क्षितिः । द्रव्यार्थिकस्तु भजनोत्थापितास्वरूपः प्राऽऽह-अस्माकमप्ययमेवाभ्युपगमः, न विशेषप्रतिभासप्रतिक्षेपः, किं तु तस्य भेदोभयविकल्पैर्बाध्यमानत्वाद् मिथ्यारूपतैव, अभेदप्रतिभासस्त्वनुत्पादव्ययलक्षणस्य द्रव्यतद्विषयसर्वदाऽवस्थितेरबाध्यमानत्वात् सत्य इति कल्पना ।

व्यवस्थापितपर्यायास्तिकद्रव्यास्तिकयोरेवंलक्षणप्रदर्शितस्वरूपयोर्मिथ्यारूपताप्रतिपत्तिः सुकरा भविष्यतीत्याह-

उप्पज्जंति वयंति य, भावा नियमेण पज्जवणयस्स ।
दव्वट्ठियस्स सव्वं, सया अणुप्पन्नमविणट्ठं ॥ ११ ॥

उत्पद्यन्ते प्रागभूत्वा भवन्ति,विशेषेण निरन्वयरूपतया व्रजन्ति गच्छन्ति नाशमनुभवन्ति भावाः पदार्था नियमेन इति अवधारणे । पर्यायनयस्य मतेन प्रतिक्षणमुत्पादविनाशस्वभावा एव भावाः पर्यायस्याऽभिमताः, द्रव्यार्थिकस्य सर्वं वस्तु सदाऽनुत्पन्नमविनष्टम्,आकालं स्थितिस्वभावमेवेति मतम् । एतच्च नयद्वयस्याऽभिमतवस्तुकस्य सर्वं वस्तु सदाऽनुत्पन्नमिति प्राक् प्रतिपादितमिति न पुनरुच्यते ।

परस्परनिरपेक्षे च स्वनयनयप्रदर्शितं वस्तु प्रमाणाभावतो न संभवतीत्याह-

दव्वं पज्जवविजुयं, दव्वविउत्ता य पज्जवा णत्थि ।
उप्पायट्ठिइभंगा, हंदि दवियलक्खणं एयं ॥ १२ ॥

द्रव्यं पर्यायविमुक्तं नास्ति, मृत्पिण्डस्थासकोशकुशूलाऽऽद्यनुगतमृत्सामान्यप्रतीतेः । द्रव्यविरहिताश्च पर्याया न सन्ति, अनुगतैकाऽऽकारमृत्सामान्यात् तु विरूपतया मृत्पिण्डस्थासकोशकुशूलाऽऽदीनां विशेषाणां प्रतिपत्तेः । अतो द्रव्यार्थिकाभिमतं वस्तु पर्यायाऽऽक्रान्तमेव,न तद्विविक्तं पर्यायाऽभिमतमपि द्रव्यार्थानुषक्तं तद्विकलं,परस्परविविक्तयोः कदाचिदप्यप्रतिभासनात् । किं-

भूतं पुनर्द्रव्यमस्ति ?, इत्याह-उत्पादस्थितिभङ्गा यथा व्यावर्णितस्वरूपाः परस्परविनिर्भागवर्तिनः,हन्दीत्युपप्रदर्शने । द्रव्यलक्षणं ऊर्ध्वास्तित्वव्यवस्थापको धर्म एव दृश्यताम्, यतः पूर्वोत्तरपर्यायपरित्यागोत्पादाऽऽत्मकैका स्वयं प्रतिपत्तिः तथाभूतऊर्ध्वसत्त्वं प्रतिपादयतीति उत्पादव्ययध्रौव्यलक्षणं वस्त्वभ्युपगन्तव्यम् । एतच्च त्रितयं परस्परानुविद्धम्,अन्यतमाभावे तदितरयोरप्यभावात् । सम्म० १ काण्ड ।

(२७) एते च परस्परसव्यपेक्षा ऊर्ध्वलक्षणं न स्वतन्त्रा इति प्रदर्शनायाऽऽह-

एए पुण संगहओ, पाडिक्कमलक्खणं दुविएइं पि ।
तम्हा मिच्छद्दिट्ठी, पत्तेयं दो वि मूलणया ॥ १३ ॥

एते उत्पादादयः संग्रहतः शिविकोद्वाहिपुरुषा इव परस्परस्वरूपोपादानेनैव लक्षणं,प्रत्येकमेकका उत्पादादयो द्वयोरपि द्रव्यास्तिकपर्यायास्तिकयोरलक्षणम्,उक्तवत्तथाभूततद्विषयाभावे तद्ग्राहकयोरपि तथाभूतयोरभावात्, उत्पादादीनां च परस्परविविक्तरूपाणामसंभवात् । तस्मान्मिथ्यादृष्टी एव प्रत्येकं परस्परविविक्तौ द्रव्यपर्यायौ ऊर्ध्वार्थिकपर्यायार्थिकस्वरूपौ मूलनयौ समस्तनयराशिकारणभूतस्योत्पादे ।

तद्भवतु परस्परनिरपेक्षयोर्मिथ्यात्वम्, उभयनयाऽऽश्रयस्त्वेकः सम्यग्दृष्टिर्भविष्यतीत्याह-

ण य तइओ अत्थि णओ, ण य सम्मत्तं ण तेसु पडिपुण्णं ।
जेण दुवे एगंता, विणज्जमाणा अणेगंता ॥ १४ ॥

न च तृतीयः परस्परसापेक्षोभयथाऽस्ति नयः कश्चित्, तथाभूतार्थस्यानेकान्ताऽऽत्मकत्वात्तद्ग्राहिणः प्रत्ययस्य नयाऽऽत्मकत्वानुपपत्तेः । न च सम्यक्त्वं न तयोः प्रतिपूर्णम्, प्रतिषेधद्वयेन प्रकृतार्थविगतेः, अशेषं हि प्रामाण्यं सापेक्षं गृह्यमाणयोरेव विषययोर्व्यवस्थितम्,येन द्वावप्येकान्तरूपतया व्यवस्थितौ मिथ्यात्वनिबन्धनतःपरित्यागेनान्वयव्यतिरेकौ विशेषेण परस्परत्यागरूपेण भज्यमानौ गृह्यमाणावनेकान्तौ भवत इति सम्यक्त्वहेतुत्वमेतयोरिति । एवं सापेक्षद्वयग्राहिणो नयत्वानुपपत्तेस्तृतीयनयाभावः ।

प्रदर्शितनिरपेक्षग्राहिणा तु मिथ्यात्वं दर्शयितुमाह-

जह एए तह अण्णे, पत्तेयं दुण्णया णया अन्ने ।
हंदि हु मूलणयाणं, पण्णवणा वावडा ते वि ॥ १५ ॥

यथैतौ निरपेक्षद्वयग्राहिणौ मूलनयौ मिथ्यादृष्टी, तथा नयवादरूपेण व्यवस्थितानामपि परस्परनिरपेक्षत्वस्य मिथ्यात्वनिबन्धनस्य तुल्यत्वात् प्रत्येकमितरानपेक्षा अन्येऽपि दुर्नयाः । न च प्रकृतनयद्वयव्यतिरिक्तनयान्तराऽऽश्रयत्वादुभयवादस्य नयानामपि वैचित्र्याद्दन्यत्राऽऽरोपयितुमशक्यत्वात् तद्रूपस्यान्ये सम्यक् प्रत्यया भविष्यन्तीति वक्तव्यम्,यतः हन्दीत्येवं गृह्यताम्,हुरिति हेतौ,मूलनयद्वयपरिच्छिन्नवस्तुनि ये व्यापृतास्तेऽपि तद्विषयव्यतिरिक्तविषयान्तराऽभावात्, सर्वनयवादानां च सामान्यविशेषोभयैकान्तविषयत्वात् तत्र नयान्तरसद्भावः, यतस्तदारभ्योनयवादे नयान्तरं भवेत् ।

ननु संग्रहाऽऽदिनयसद्भावात् कथं तद्व्यक्तिनयान्तराभावः ? । सत्यम् । सन्ति संग्रहाऽऽदयः, किं तु तद्विषयव्यतिरिक्तविषयान्तराभावतस्तद्दूषितयाविषयास्तेऽपि तद्दूषणेनैव दूषिता यतो न मूलच्छेदे तच्छाखास्तदवस्थाः संभवन्तीत्याह-

सव्वणयसमूहम्मि वि, णत्थि णओ उभयवायपक्खओ ।
मूलणयाण उ आणं, पत्तेयविसेसिया विंति ॥ १६ ॥

संग्रहाऽऽदिसकलनयसमूहेऽपि नास्ति कश्चिन्नय उभयवादप्ररूपकः, यतो मूलनयाभ्यामेव यत् प्रतिज्ञातं वस्तु तदेवाऽऽश्रित्य प्रत्येकरूपाः संग्रहाऽऽदयः पूर्वपूर्वनयाधिगतांशविशिष्टमंशान्तरमधिगच्छन्तीति न विषयान्तरगोचराः ।

अतोऽवस्थितं परस्परत्यागप्रवृत्तसामान्यविशेषविषयसंग्रहाऽऽत्मकनयद्वयाधिगमाऽऽत्मकत्वात् वस्त्वप्युभयाऽऽत्मकं न केवलं बाह्यघटाऽऽदि वस्तु उभयात्मकं,तथाविधप्रमाणग्राह्यत्वात्,किन्त्वान्तरमपि, हर्षशोकभयकरणौदासीन्याऽऽद्यनेकाऽऽकारविवर्ताऽऽत्मकैकचेतनास्वरूपं तदात्मकहर्षाऽऽद्यनेकविकाराऽनेकाऽऽत्मकं च स्वसंवेदनाध्यक्षप्रतीतं, तस्य भेदैकान्तैकरूपताऽभ्युपगमे दृष्टाऽदृष्टविषयसुखदुःखसाधनस्वीकारत्यागार्थप्रवृत्तिनिवृत्तिस्वरूपसकलव्यवहारोच्छेदप्रसक्तिरिति प्रतिपादयितुमाह—

ण य दव्वट्ठियपक्खे, संसारो णेव पज्जवणयस्स ।
सासयवित्तिवाई, जम्हा उच्छेअवाईआ ॥ १७ ॥

द्रव्यार्थिकपर्यायार्थिकनयद्वयाऽभिमते वस्तुनि न संसारः संभवति, शाश्वतव्यक्तिप्रतिक्षणान्यत्वैकान्ताऽऽत्मकचैतन्यग्राहकविषयीकृतत्वात्, पावकज्ञानविषयीकृते उदकवत् । तथाहि-संसारः संसृतिः, सा चैकान्तनित्यस्य पूर्वावस्थापरित्यागे सति न संभवति;तत्परित्यागेनैव गतेर्भवान्तराऽऽपत्तेर्वा संसृतेः संभवात् । नाऽप्युच्छेदे तत्पश्चादनन्तरनिरन्वयध्वंसलक्षणे संसृतिः संभवति, गतेर्भावान्तरापत्तेर्वा कथञ्चिदन्वयिरूपमन्तरेणायोगात् । अथैकस्य पूर्वापरशरीराभ्यां वियोगयोगौ संसारः, असावपि सदाऽविकारिणि न संभवति, नित्यस्य पूर्वाऽपरशरीराभ्यां वियोगयोगाऽनुपपत्तेः । निरन्वयक्षणध्वंसिनोऽप्येकाधिकरणत्वाऽसंभवान्न तल्लक्षणः संसारः,न चाऽमूर्तस्याऽऽत्मनः सर्वगतैकमनोऽनिष्कृतशरीरेण विशिष्टयोगयोगौ संसारो, मनसोऽकर्तृकत्वेन शरीरसंबन्धस्याऽनुपपत्तेः । यो ह्यदृष्टस्य विधाता स तन्निर्वर्तितशरीरेण सह संबध्यते, न चैवं मनः । न च मनसः शरीरसंबन्धेऽपि तत्कृतसुखदुःखोपभोक्तृत्वमात्मनि तस्याऽपगमात्, तदर्थं च शरीरसंबन्धोऽभ्युपगम्यत इति तत्संबन्धपरिकल्पनं मनसोऽर्थम्, मनसि सुखदुःखोपभोक्तृत्वाभ्युपगमे वा आत्मनः कल्पनावैयर्थ्यम्, मनस आत्मसिद्धेः ॥ १७ ॥

सुहदुक्खसंपओगो, ण जुज्जई णिच्चवायपक्खम्मि ।
एगंतुच्छेयम्मि वि, सुहदुक्खवियप्पणमजुत्तं ॥ १८ ॥

सुखेनाऽबाधस्वरूपेण, दुःखेन बाधनालक्षणेन, संप्रयोगः संबन्धो, न युज्यते न घटते आत्मनः, नित्यवादपक्षे ऊर्ध्वास्तिकाभ्युपगमे सुखस्वभावस्याऽविचलितरूपत्वात् सदा सुखरूपतैवाऽऽत्मनो न दुःखसंप्रयोगः,दुःखस्वभावत्वे तद्रूपतैव, तस्यादेव,एकान्तोच्छेदे च पर्यायास्तिकपक्षे सुखदुःखसंप्रयोगो न युज्यत इति संबन्धः । तथा पक्षद्वयेऽपि सुखार्थं दुःखवियोगार्थं च विशिष्टनयनं कल्पतेत्र यतनार्थत्वात्, अयुक्तमघटमानकं सुखदुःखोपादानत्यागार्थप्रयत्नस्याप्ययुक्तत्वम्, उक्तन्यायात् । संसरति निरुपभोगभावैराधिवासितं लिङ्गमिति साङ्ख्यमतमपि निरस्तम्, न्यायस्य सर्वैकान्तसाधारणत्वात् ।

एकान्तपक्षे आत्मसुखदुःखोपभोगनिर्वर्तकशरीरसंबन्धहेत्वदृष्टोत्पादकनिमित्तानामप्यसंभवं दर्शयन्नाह-

कम्मं जोगनिमित्तं, बज्झइ बंधट्ठिई कसायवसा ।
अपरिणउच्छिन्नेसु य, बंधट्ठिइकारणं णत्थि ॥ १९ ॥

कर्मादृष्टं योगनिमित्तं मनोवाक्कायव्यापारनिमित्तं,बध्यते आदीयते, बध्यत इति बन्धोऽदृष्टमेव, तस्य स्थितिः कालान्तरफलदातृत्वेनाऽऽत्मन्यवस्थानम्,सा कषायवशात्क्रोधाऽऽदिसामर्थ्यात् । एतदुभयमप्येकान्तवाद्यभ्युपगत आत्मचैतन्यलक्षणे भावे अपरिणते उत्सन्ने च बन्धस्थितिकारणम्,नास्ति। न ह्यपरिणामिन्यत्यन्तानाधेयातिशये आत्मनि क्रोधाऽऽदयः संभवन्ति । नाऽप्येकान्तोत्सन्नेऽनुसन्धानविकले अहमनेनाक्रुष्ट इति द्वेषसंभवः तथा चाऽस्य आक्रुष्टोऽन्यो व्यापृतोऽपरो बद्धोऽपरश्च मुक्त इति कुशलाऽकुशलकर्मगोचरप्रवृत्त्याद्यारम्भवैफल्यशक्तिः, न ह्येकसन्ततिनिमित्तोऽयं व्यवहारः, क्षणिकैकान्तपक्षे सन्ततिकल्पनाबीजभूतोपादानोपादेयभावस्यैवाऽघटमानत्वात् । न चेयमनुसन्धानप्रतिपत्तिः, मिथ्याद्वेषगर्वशोकव्यासन्नोषाऽऽदीनामन्योन्यविरुद्धस्वभावानां क्रमवर्तिनां चिच्चिवर्तानां स्वसंवेदनाध्यक्षसिद्धानां तथा तथाऽनुभवितुश्च संशयविपर्यासादृढज्ञानागोचरीकृतस्यैकस्य चैतस्यानुभवात् । न च बाधारहितानुभवविषयस्यापह्नवः,सुखाऽऽदेरप्यनुभवविषयस्यापह्नुतिप्रसङ्गात् । तथा च प्रमाणप्रमेयाऽऽदिव्यवहारोच्छेदप्रसक्तिः । यदपि मिथ्याऽध्यारोपादानार्थं यत्ने सत्यपि नोत्करीत्युक्तं,तदप्यनेनैव प्रतिविहितम्, यथोक्तप्रतिपत्तेर्मिथ्यात्वासिद्धेः। न चाऽनुमाननिश्चितेऽर्थे आरोपप्रवृत्तिर्धूमनिश्चयावगतधूमध्वज इव । न च मिथ्याज्ञानस्य सहजत्वाविपरीतार्थोपस्थापकानुमानप्रवृत्तिः,तथाऽभ्युपगमे बोधसन्तानवर्त्तस्य सर्वदाऽनिवृत्तिरित्यनुमितिप्रसक्तिः, असहजं तु तत्त्वज्ञानप्राद्भावोऽवश्यं निवर्तते शुक्तिकाधिगमे रजतभ्रम इव, अनिवृत्तौ वा न प्रमाणबाधकं भवेत् । न च क्षणक्षयनिश्चये स एवाऽहमितिप्रत्ययो युक्तः, अपि तु स इवेति स्यात्, न हि गवयनिश्चये गौरेवेति प्रत्ययो दृष्टः, अपि तु गोरिवेति । न च क्रमवत्सु भिन्नकर्तृकेषाऽऽदिपर्यायेषु चैतन्याऽनुस्यूतिप्रत्ययस्य मानसत्वमात्मनि क्षणिकत्वम्, अनुमाननिश्चितत्वेऽपि तदेव स्पष्टमनुभूयमानत्वाद्, विकल्पद्वयस्य युगपदुत्पत्तिः परैरनिष्टेति विकल्परूपत्वे एकत्वप्रत्ययस्य क्षणिकत्वनिश्चयसमये सद्भावो न भवेदित्येकान्तनित्याऽनित्यच्युतोभयपक्ष एव बन्धस्थितिकारणं युक्तिसङ्गतम् ।

किञ्चैकान्तवादिनां संसारनिवृत्तिस्तत्सुखमुक्तिप्राप्त्यर्था प्रवृत्तिश्चासङ्गतेत्याह-

बंधम्मि अपूरंते, संसारन्नोहदंसणं मोहं ।
बंधं च विणा मोक्खमु-हपत्थणा णत्थि मोक्खो य ॥२०॥

बन्धे चासति संसारो जन्ममरणाऽऽदिप्रबन्धः, तत्र तत्कारणे वा मिथ्यात्वाऽऽद्युपचारात् तच्छब्दवाच्ये त्रयोघो भीतिप्राचुर्यं,तस्य दर्शनम्-सर्वे चतुर्गतिपर्यटनं दुःखाऽऽत्मकमिति पर्यालोचनं, मौढ्यं मूढताऽनुपपद्यमानं संसारदुःखोऽन्यविषयत्वाद् मिथ्याज्ञानं बन्ध्यासुतजनितबाध्यगोचरभीतिविषयपर्यालोचनवद्, मिथ्याज्ञानपूर्विका च प्रवृत्तिर्विसंवादिन्येव बन्धं विना संसारनिवृत्तिः, तत्सुखप्रार्थना च न भवत्येव । अथ मोक्षस्याऽनुपपत्तौ निरपराधपुरुषवदबद्धस्य मोक्षसंभवात्, बन्धाभावश्च योगकषाययोः, प्रकृतिस्थित्यनुभागप्रदेशाऽऽत्मकबन्धहेत्वोरेकान्तपक्षे विरुद्धत्वात् । न चैकरूपत्वाद् ब्रह्मणो बन्धाऽऽद्यभावप्ररूपणा न दोषाय, चेतनाऽचेतनाऽऽदिभेदरूपतया जगतः प्रतिपत्तेः । न च नेदंप्रतिपत्तिर्मिथ्याऽविद्यानिर्मितत्वादिति वक्तव्यम्, अविद्यायाः प्रतिपत्तिजननविरोधात्, अविरोधे विद्यारूपताप्राप्तेः द्वैतप्राप्तिरिति प्रतिविहितश्चाद्वैतवाद इति न पुनः प्रतन्यते ।

तदेवमेकान्तान्युपगमे बन्धहेत्वाद्यनुपपत्तेरैहिकाऽऽमुष्मिकसर्वव्यवहारविलोप इत्येकान्तव्यवस्थापकाः सर्वेऽपि मिथ्यादृष्टयो नयाः, अन्योऽन्यविषयापरित्यागवृत्तयस्तु त एव सम्यक्त्वं प्रतिपद्यन्त इत्युपसंहरन्नाह-

तम्हा सव्वे वि णया, मिच्छादिट्ठी सपक्खपडिबद्धा ।
अण्णोण्णणिस्सिआ उण, हवंति सम्मत्तसब्भावा ॥२१॥

यस्मादेकान्तनित्याऽनित्यवस्त्वभ्युपगमो बन्धाऽऽदिकारणयोगकषायाऽभ्युपगमबाधितः, तदभ्युपगमोऽपि नित्याऽऽद्येकान्ताऽभ्युपगमप्रतिहत इत्येवंभूतपूर्वोत्तराभ्युपगमस्वरूपाः, तस्मान्मिथ्यादृष्टयः सर्वेऽपि नयाः स्वपक्षप्रतिबद्धाः स्वक आत्मीयः पक्षोऽभ्युपगमः, तेन प्रतिबद्धाः प्रतिहता ये ते इति, नयज्ञानानां च मिथ्यात्वे तद्विषयस्य तदभिधानस्य च मिथ्यात्वमेव । तेनैवं प्रयोगः-मिथ्या सर्वेनयवादाः, स्वपक्षैकैव प्रतिहतत्वात्, चौरवाक्यवत् ॥ अथ तेषां मिथ्यात्वे बन्धाऽऽद्यनुपपत्तौ सम्यक्त्वाऽनुपपत्तिः सर्वत्रेत्याह-अन्योऽन्यनिःसृताः परस्परापरित्यागेन व्यवस्थिताः, पुनरिति त एव सम्यक्त्वस्य यथाऽवस्थितवस्तुप्रत्ययस्य, सद्भावा भवन्तीति न बन्धाऽऽद्यनुपपत्तिः । ननु यदि नयाः प्रत्येकं सन्ति, कथं प्रत्येकावस्थायां तेषां सम्यक्त्वाभावः ?, स्वरूपव्यतिरेकेणापरसम्यक्त्वाभावात्, तस्य च तेष्वभ्युपगमात् । अथ न सन्ति, कथं तेषां समुदायः सम्यक्त्वनिबन्धनो भवेत्, असतां समुदायानुपपत्तेः ? । न चाऽसतोऽपि सम्यक्त्वं, नयवादिष्वपि सम्यक्त्वप्रसक्तेः । न च प्रत्येकं तेषां सतामसम्यक्त्वेऽपि तत्समुदाये सम्यक्त्वं भविष्यति, " दव्वट्ठिओ त्ति तम्हा, णत्थि णओ" (६) इत्याद्युपसंहारः, तत्र विरोधात् । न च प्रत्येकमेकैकांशग्राहिणः संपूर्णवस्तुग्राहकाः समुदिता इति सम्यक्त्वव्यपदेशमासादयन्ति,तत्तत्स्वगोचरापरित्यागेन तत्रोऽपि विषयान्तरे तेषामप्रवृत्तेः।न च प्रत्येकमसम्यक्त्वे समुदायेऽपि सम्यक्त्वं युक्तम्,सिकतासु तैलवत् असतः सदुत्पत्तेर्विरोधाच्च। अत्राऽभिधीयते-प्रत्येकमप्यपेक्षितेतरांशस्वविषयग्राहकतयैव सन्तो नयाः, तद्व्यतिरिक्तरूपतया त्वसन्त इति सतां तत्समुदाये सम्यक्त्वे न कश्चिद्दोषः । नन्वितरेतरविषयापरित्यागवृत्तीनां ज्ञानानां कथं समुदायः संभवी ?, येन तत्र सम्यक्त्वमभ्युपगम्येत ?,अनुक्तोपालम्भ एवः न ह्येकज्ञानोत्पादे तत्तेषां समुदायो विवक्षितोऽपि तु स्वपरित्येतरेतररूपविषयाध्यवसाय एव समुदायः, "अन्योऽन्यनिश्रिताः" इत्यनेनानेकार्थः प्रतिपादितः । न हि द्रव्यार्थिकपर्यायार्थिकाभ्यामत्यन्तपृथग्भूताभ्यामङ्गुल्यद्रव्ययोगवदुभयवादोऽपरारब्धः । सम्म० १ काण्ड ।

(२०) अथ दर्शनयोजनामभिधित्सुराह-

जातं द्रव्यास्तिकाच्छुद्धा-दर्शनं ब्रह्मवादिनाम् ।
तत्रैके शब्दसन्मात्रं, चित्तन्मात्रं परे जगुः ॥ ११० ॥

(जातामित्यादि) शुद्धाद् द्रव्यास्तिकाद् ब्रह्मवादिनां दर्शनं जातम् । तदाह वादी-"दव्वट्ठियनयपयडी सुद्धा संगहपरूवणा विसओ ॥" (४) इति । तत्रैके ब्रह्मवादिनः शब्दसन्मात्रमिच्छन्ति, अन्ये च चित्सन्मात्रम् । तच्चाऽऽद्यमतावलम्बी शब्दब्रह्मवादं ब्रह्म सर्वेषां शब्दानां सर्वेषां चार्थानां प्रकृतिरित्यभ्युपैति । नयो० । सम्म० । सर्वमेकं सत्, अविशेषादिति द्रव्यास्तिकाऽभिप्रायः । सम्म० ३ काण्ड । स्या० । (शब्दब्रह्मवादिनां मतम् 'सद्' शब्दे वक्ष्यते)

(२९) अथवा व्यवहारनिश्चयनयद्वये तेषां समवतारोऽतस्तस्यैव व्यवहारनिश्चयनयद्वयस्य स्वरूपमुपदर्शयन्नाह—

लोगव्ववहारपरो, ववहारो भणइ कालओ भमरो ।
परमत्थपरो मण्णइ, निच्छइओ पंचवण्णो त्ति ॥३५७९॥

लोकव्यवहाराऽभ्युपगमपरो नयो व्यवहारनय उच्यते । स च कालवर्णस्यैव उत्कटत्वेन लोके व्यवह्रियमाणत्वाद्भ्रमणति प्रतिपादयति कालको भ्रमर इति । परमार्थपरस्तु पारमार्थिकार्थवादी नैश्चयिको निश्चयनय उच्यते । स पुनर्मन्यते-'पञ्चवर्णो भ्रमरः' बादरस्कन्धत्वेन तच्छरीरस्य पञ्चवर्णपुद्गलैर्निष्पन्नत्वात्, शुक्लाऽऽदीनां च व्यक्तभूतत्वेनानुपलक्षणादिति ॥ ३५७९ ॥ विशे० ।

निश्चयव्यवहारौ हि, द्वौ च मूलनयौ स्मृतौ ।
निश्चयो द्विविधस्तत्र, शुद्धाऽशुद्धविभेदतः ॥ १ ॥

(निश्चय इति) हि निश्चितम्, अध्यात्मभाषायां मूलनयौ द्वौ स्मृतौ । तौ च निश्चयव्यवहारौ, निश्चिनोति तत्त्वमिति निश्चयः । १ । व्यवह्रियते इति व्यवहारः । २ । तत्राऽपि निश्चयो नाम द्विविधोः द्विप्रकारः, एकः शुद्धनिश्चयनयः, द्वितीयोऽशुद्धनिश्चयनयः । एवं द्विप्रकारो ज्ञेयः ॥ १ ॥

यथा केवलज्ञानाऽऽदि-रूपो जीवोऽनुपाधिकः ।
शुद्धो मत्यादिकस्त्वात्मा-ऽशुद्धः सोपाधिकः स्मृतः ॥२॥

यथा हि केवलज्ञानाऽऽदिरूपो जीवोऽनुपाधिकः, उपाधिः कर्मजन्यः, तेन विहीनोऽनुपाधिकः, शुद्ध इति शुद्धनिश्चयभेदेन प्रथमः । अत्र हि केवलज्ञानमासाद्य शुद्धगुणमयाऽऽत्मकरूपेण जीवस्याऽभेदो दर्शितः । तथा च मतिज्ञानाऽऽदिक आत्मा अशुद्धनिश्चयभेदेन द्वितीयः । अत्र हि आत्मनः सोपाधिकस्याऽऽवरणक्षयजनितज्ञानविकल्पेनाऽऽत्मा मतिज्ञानी अशुद्ध उपलक्ष्यते । सोपाधिकत्वात् केवलज्ञानाऽऽख्यो गुणः शुद्धगुणस्तद्युक्त आत्माऽपि शुद्धस्तन्नामनयोदयात् शुद्धनिश्चयनयः । १ । मतिज्ञानाऽऽदिगुणोऽशुद्धस्तद्युक्त आत्माऽप्यशुद्धस्तदाख्यया नयोऽपि अशुद्धनिश्चय इति । निश्चयशब्द आत्ममात्रपरः, शुद्धशब्दः कर्माऽऽवरणविशिष्टः । आवरणक्षये शुद्धः, सति तस्मिन्नशुद्धः ॥ २ ॥

अथ व्यवहारस्य भेदं दर्शयति-

सद्भूतश्चाऽप्यसद्भूतो, व्यवहारो द्विधा भवेत् ।
तत्रैकविषयस्त्वाद्यः, परः परगतो मतः ॥ ३ ॥

व्यवहारोऽपि सद्भूतः पुनरसद्भूत इति भेदाभ्यां द्विधा द्विप्रकारः । तत्र आद्यः प्रथम एकविषय एकद्रव्याऽऽश्रितः सद्भूतव्यवहारः । परः पराविषयः परद्रव्याऽऽश्रितोऽसद्भूतव्यवहार इति ॥ ३ ॥

उपचरितसद्भूता-नुपचरितभेदतः ।
आद्यो द्विधा च सोपाधि-गुणगुणिनिदर्शनात् ॥ ४ ॥

उपचरितसद्भूतभेदेन, अनुपचरितसद्भूतभेदेन च आद्यः एकद्रव्याऽऽश्रितसद्भूतव्यवहारो द्विधा द्विप्रकारः । तत्र च सोपाधिकगुणगुणिभेदात् प्रथमो भेदो भवति ॥ ४ ॥

यथोपचारतो लोके, जीवस्य मतिरुच्यते ।

यथा जीवस्य मतिज्ञानम् । अत्र हि मतिरुपाधिः कर्माऽऽवरणक्षयोत्थाऽऽत्मनः सकलज्ञानत्वेन ज्ञानमिति कल्पनं सोपाधिकम्, उपचारतो जातमिदम् ।

अथ द्वितीयभेदमाह-

अनुपचरितसद्भूतो-ऽनुपाधिगुणतद्वतोः ॥ ५ ॥

उपाधिरहितेन गुणेन अनुपाधिक आत्मा यदा संपद्यते, तदा अनुपाधिकगुणगुणिनोर्भेदाज्जिनोऽनुपचरितसद्भूतोऽपि द्वितीयो भेदः समुत्पद्यते इति ॥ ५ ॥

अथास्योदाहरणं श्लोकार्द्धेनाऽऽह-

केवलाऽऽदिगुणोपेतो, गुणयात्मा निरुपाधिकः ।

केवलाऽऽदिगुणोपेतः केवलज्ञानसहितः कर्मक्षयाविर्भूतप्रभूतानुभवभावाऽऽत्मको जीवो निरुपाधिकगुणोपेतो निरुपाधिको गुणी भवति । आत्मा हि संसारावस्थायाम् अष्टकर्मजनितेऽऽवरणपरिस्फुटप्रभावभावितः सोपाधिकगुणैर्मत्यादिभिस्तद्वानिति सोपाधिक आत्मेति व्यपदेशभाग् भवति । अत्र तु तदभावे तद्भावाद् निरुपाधिकगुणगुणिभेदभावनासमुत्पादादनुपचरितसद्भूतभेदोऽपि समुत्पन्नः केवलाऽऽदिरिति केवलस्यैकत्वात् आदिरिति तदुत्थानन्तगुणोदयात् केवलादिरिति कथनम् ।

अथाऽसद्भूतव्यवहारस्यापीत्थमेव भेदद्वयं प्रकटयन्नाह श्लोकार्द्धेन-

असद्भूतव्यवहारो, द्विधैवं परिकीर्तितः ॥ ६ ॥

(असद्भूतेति) असद्भूतव्यवहारोऽपि एवं पूर्वोक्तसद्भूतवद् द्विधा द्विप्रकारः परिकीर्तितः कथित इति ॥ ६ ॥

अथैतस्यासद्भूतव्यवहारस्य भेदद्वयं सोदाहरणं पूर्वकं प्रकटयन्नाह-

असंश्लेषितयोगेऽन्यो, देवदत्तधनं यथा ।
स्यात्संश्लेषितयोगेऽन्यो, यथाऽऽस्ते देहमात्मनः ॥७॥

(असंश्लेषितेति) अत्र द्वयोरपि भेदयोर्मध्ये, अद्यः अग्रे भवोऽद्यो मुख्यः प्रथमः, असंश्लेषितयोगे कल्पितसंबन्धविषये उपचरितासद्भूतव्यवहारो भवेत् । यथा-देवदत्तधनम् । इह धनेन देवदत्तस्य संबन्धः स्वस्वामिभावरूपश्च जायते, तदपि कल्पितत्वात् उपचरितम् । यतो देवदत्तः पुनर्धनं चैकद्रव्यं, न हि तस्माद्भिन्नद्रव्यत्वादसद्भूतभावनाकरणेनासद्भूतव्यवहार इति । तथा द्वितीयोऽन्यः संश्लेषितयोगे कर्मजसंबन्धे भवति । यथा आत्मनो जीवस्य देहमिति आस्ते तिष्ठति । अत्र हि आत्मदेहयोः संबन्धे देवदत्तधनसंबन्धमिव कल्पनं नास्ति विपरीतभावनानिवर्त्यत्वाद् यावज्जीवस्थायित्वाद्नुपचरितं, तथा भिन्नविषयत्वादसद्भूतव्यवहार इति ॥ ७ ॥

अथोक्तविषयस्वामित्वमाह—

नयाश्चोपनयाश्चैते, तथा मूलनयावपि।
इत्थमेव समादिष्टं, नयचक्रेऽपि तत्कृता ॥ ८ ॥

(नयेति) एते नया उक्तलक्षणाः, च पुनरुपनयास्तथैव द्वौ मूलनयौ, अपि निश्चयेन इत्थममुना प्रकारेण एव, नयचक्रेऽपि दिगम्बरदेवसेनकृते शास्त्रे नयचक्रेऽपि, तत्कृता तस्य नयचक्रस्य कृता उत्पादकेन समादिष्टं कथितम । एतावता दिगम्बरमतानुगतनयचक्रग्रन्थपाठपठितनयोपनयमूलनयाऽऽदिकं सर्वमपि सर्वज्ञप्रणीतसदागमोक्तयुक्तियोजनासमानतन्त्रत्वमेवाऽऽस्ते, न किमपि विसंवादितयाऽस्तीति । ८ ।

अथ पुनरपि श्वेताम्बरदिगम्बरयोः समानतन्त्रत्वमुपदिशन्नाह-

यद्यपीहार्थभेदो न, तस्याऽस्माकमपि स्फुटम् ।
तथाऽप्युत्क्रमशैल्याऽसौ, दह्यते चाऽन्तराऽऽत्मना ॥९॥

यद्यपि तस्य देवसेनस्य दिग्वाससोऽपि, तथा अस्माकं श्वेताम्बराणां, स्फुटं प्रकटं यथा स्यात्तथा, इह द्रव्याऽऽदिपरिज्ञानोपयोगिनि नयविचारे, अर्थभेदो विषयभेदो नास्ति, उभयोरप्यर्थाऽऽदेशे विषयाभेदत्वमेव, शब्दाऽऽदेशे किमपि पाठान्तरत्वाद् न किमपि दोषः । यथा हि अर्थे प्रयोजनवन्तस्तार्किकाः, शब्दस्याऽप्रयोजकत्वात् । तथाऽप्यसौ देवसेनो दिगम्बर उत्क्रमशैल्या विपरीतपरिभाषया अर्थस्य तादृशत्वेन शब्दस्यातादृशत्वेन च उत्क्रमशैल्या कृत्वा, अन्तराऽऽत्मना अन्तरङ्गपरिणामेन ईर्ष्यासुत्वाद्, दह्यते खिद्यते । ईर्ष्यालवो हि अन्तरुपतापपरा एव भवन्ति निष्कारणमेवेति । यतः-" यद्यपि न भवति हानिः,परकीयां चरति रासभो ऽक्षाम्। असमञ्जसं तु दृष्ट्वा, तथाऽपि परिखद्यते चेतः ॥१॥ " इति वचनाद् यथोक्तजागवतसिद्धान्तशुद्धपरिभाषां त्यक्त्वा स्वकपोलकल्पितसंस्कृतजाषया श्रीवीतरागोक्तार्थविषयमङ्गीकृत्य नवीनग्रन्थं विरचय्य प्रभावं ख्यापयतीत्यर्थः ॥ ९ ॥

(३०) अथ बोटिकमताऽभिमतविपरीतपरिभाषां दर्शयन्नाह-

तत्त्वार्थेऽपि नयाः सप्त, पञ्चाऽऽदेशान्तरेऽपि वा ।
अन्तर्नूतौ समुत्कृत्य, नवेति किमु कल्पते ? ॥१०॥

तत्त्वार्थसूत्रे नयाः सप्त उक्ताः, पुनरादेशान्तरे मतान्तरे तत्रैव नयाः पञ्च प्रतिपादिताः । तथा च तत्सूत्रम्-" सप्त मूलनयाः, पञ्च इत्यादेशान्तरे " इति । शब्दः, समभिरूढः, एवंभूत इति नयत्रिकं शब्दनय इति नाम्ना संगृहीतानां त्रयाणामेवैकं नाम शब्दनय इति जायते, ततः प्रथमे चत्वारोऽतस्तैः सह पञ्च नया इति । अथैकैकस्य भेदानां शतमस्ति, तत्र च सप्तशतं तथा पञ्चशतम्,एवं मतद्वयेऽपि भेदकल्पनम् । तथोक्तमावश्यके-"इक्किको य सयविहो, सत्त णयसया हवंति एमेव । अण्णे वि दु आएसो, पंचेव सया णयाणं तु " ॥ (२२६४) एतादृशीं शास्त्रपरिभाषां त्यक्त्वा द्रव्यार्थिकपर्यायार्थिकनामानौ एक्वन्तर्नीतावेव उद्धृत्य दूरे कृत्वा नव नयाः कथिताः, इति किमु कल्पते देवसेनेन कः प्रपञ्चः क्रियते ? ॥ १० ॥

पुनश्चर्चां कथयन्नाह-

यदि पर्यायद्रव्यार्थ-नयौ निम्नौ त्रिलोकितौ ।
अर्पितानर्पिताभ्यां तु, स्युर्नैकादश तत्कथम् ? ॥११॥

(यदीति) यदि पर्यायार्थद्रव्यार्थनयौ निम्नौ त्रिलोकितौ पृथक् दृष्टौ, तत्तस्मान्नव नया इति कथम् ?, अर्पितानर्पिताभ्यां सह एकादश नया इति कथं न स्युः, अपि तु स्युः । भावार्थस्वयम्-नैगमसंग्रहव्यवहारभेदाद् आद्यो द्रव्यार्थिकस्त्रिधा, पर्यायार्थिकश्चतुर्धा-ऋजुसूत्रः, शब्दः, समभिरूढः, एवंभूतश्चेति । अर्पितानर्पितभेदावपि सामान्यविशेषपर्यायौ, तौ च द्रव्यपर्याययोरेवेति । तथाहि-सामान्यं द्विप्रकारम्, ऊर्द्धतासामान्यं, तिर्यक्सामान्यं च । तत्र ऊर्द्धतासामान्यं द्रव्यमेव, तिर्यक्सामान्यं तु प्रतिव्यक्ति सदृशपरिणतिलक्षणं व्यञ्जनपर्याय एव, स्थूलाः कालान्तरस्थायिनः शब्दानां सङ्केतविषया व्यञ्जनपर्याया इति प्राचनिकप्रसिद्धेः । विशेषोऽपि वैसदृश्यविवर्त्तलक्षणः पर्याय एवान्तर्भवतीति, नैताभ्यामधिकनयावकाशः ॥११॥

संग्रहे व्यवहारे च, यदीमौ युङ्क्थ केवलम् ।
तदाद्यन्तनयस्तोके, किं न युङ्क्थ हि तावपि ? ॥१२॥

अथ संग्रहे च पुनर्व्यवहारे यदि इमौ अर्पितानर्पितौ युङ्क्थ, तर्हि आद्यन्तनयस्तोके तावपि[द्रव्यपर्यायौ]किं न युङ्क्थ इति ?। यदि एवं कथयथ अर्पितानर्पितसिद्धेरित्यादिसूत्रेषु अर्पिता विशेषाः,अनर्पिताः सामान्याः । तत्र अर्पिता व्यवहाराऽऽदिविशेषनयेषु अन्तर्भवन्ति, अनर्पिताः संग्रहेऽन्तर्भवन्ति, तदा आद्येषु प्रथमेषु, अन्त्येषु पाश्चात्येषु नयस्तोकेषु इमौ द्रव्यपर्यायौ कथं न युञ्जीत सप्तनयसंबन्धसिद्धेरिति विचारणीयम् ?। सिद्धान्ते श्रीजिनवाणी सप्तनयाऽवतारिका एवाऽस्ति, न न्यूनाधिका । यतः-"से किं तं नए ?। सत्त मूलनया पण्णत्ता । तं जहा-णेगमे १, संगहे २, ववहारे ३, उज्जुसुए ४, सद्दे ५, समभिरूढे ६, एवंभूए ७ ।" इत्यादिसूत्रपाठोऽपि ज्ञेयोऽतस्तत्सूत्रमार्गं त्यक्त्वा नया नव इत्यधिकयोजना न साधीयसी । अथ अन्तर्भूतानां पृथक्करणमपि पिष्टपेषणमेवेति ॥१२॥ द्रव्या० ८ अध्या० ।

(३१) व्यवहारनयात्साङ्ख्यम्-

अशुद्धाद् व्यवहाराख्या-त्ततोऽभूत्साङ्ख्यदर्शनम् ।
चेतनाऽचेतनद्रव्या-ऽनन्तपर्यायदर्शकम् ॥ १११ ॥

(अशुद्धादिति) व्यवहाराऽऽख्याद् व्यवहारनामधेयादशुद्धात्ततो द्रव्यार्थिकनयात् साङ्ख्यदर्शनमभूत् । कीदृशं तत् ?, चेतनश्चाचेतनद्रव्यं चानन्तपर्यायाश्चाविर्भावतिरोभावाऽऽत्मकास्तेषां दर्शकं प्रतिपादकमिति । (१११) नयो० । अशुद्धस्तु द्रव्यार्थिको व्यवहारनयमतार्थावलम्बी एकान्तनित्यचेतनवस्तुद्वयप्रतिपादकसाङ्ख्यदर्शनाश्रितोऽत एव तन्मताऽनुसारिणः साङ्ख्याः। सम्म० १ काण्ड ।

(३२) अथ वेदान्तिसाङ्ख्यदर्शनयोः शुद्धाशुद्धद्रव्यार्थिकप्रकृतिकत्वं यदुक्तं, तत्राऽविशेषदृष्ट्या भेदबीजाभावमाशङ्कते-

यद्यप्येतन्मतेऽप्यात्मा, निर्लेपो निर्गुणो विभुः ।
अध्यासाद् व्यवहारश्च, ब्रह्मवादेऽपि संमतः ॥ ११२ ॥

(यद्यपीत्यादि) यद्यपि एतन्मतेऽपि साङ्ख्यमतेऽप्यात्मा निर्लेपः कर्तृत्वाऽऽदिक्षेपरहितो निर्गुणो गुणस्पर्शशून्यो विभुर्व्यापकश्चेति शुक्लाऽऽत्माऽभ्युपगमेनोभयत्र शुक्तितौल्यम् । न च

भोक्तृत्वस्योपचरितस्याऽऽत्मन्यभ्युपगमेन साङ्ख्यदर्शने वेदान्तदर्शनापेक्षयाऽशुद्धत्वम्, यतोऽभ्यासाद् व्यवहारो ब्रह्मवादेऽपि संमतः, ब्रह्मवादिनोऽपि हि बुद्धिगुणान् ज्ञानाऽऽदीनात्मनि कल्पितानेवाऽभ्युपयान्ति, न पारमार्थिकानिति नास्त्यपि प्रकारकृतयोः शुद्धः इति विशेषः ॥ ११२ ॥

प्रत्युताऽऽत्मनि कर्तृत्वं, साङ्ख्यानां प्रातिभासिकम् ।
वेदान्तिनां त्वनिर्वाच्यं,मतं तद् व्यावहारिकम् ॥११३॥

(प्रत्युतेति) प्रत्युत वैपरीत्येन साङ्ख्यानां मते कर्तृत्वम्, उपलक्षणाद्भोक्तृत्वाऽऽदि च, प्रातिभासिकमन्यस्यमेवान्यत्राऽऽरोपितम । वेदान्तिनां तु मतेनान्तःकरणधर्माणां कर्तृत्वाऽऽदीनां कर्तव्यम्, तच्च परमार्थतोऽसदपि व्यवहारतः सदिति स्थूलव्यवहाराऽनुरोधाद्वेदान्तदर्शन एवाशुद्धत्वं स्यात्, अविद्यया ऽप्यन्यधर्मस्यात्मन्यध्यासायत्युपचारेण च व्यवहारबलं कुण्ठगतिनिश्चयबलं चोत्तेजति साङ्ख्यदर्शन एव शुद्धत्वं स्यादिति प्रायः ॥ ११३ ॥

किञ्च-सत्कार्यवादित्वादपि साङ्ख्यस्य न व्यवहाराऽनुरोधित्वम्, व्यवहारमयो हि कारणव्यापारानन्तरमेव कार्योत्पत्तिं पश्यन्न सत्कार्यपक्षमेवाऽऽश्रयते, न च क्षणिकासत्कार्यानभ्युपगममात्रेणास्य व्यवहारपक्षपातित्वम्, तदनभ्युपगमेऽप्युत्पत्त्यनभ्युपगमेन व्यवहारबहिर्भावादित्यभिप्रायस्पष्टीकरणपूर्वं निगमयन्नाह—

अनुत्पन्नत्वपक्षश्च, निर्युक्तौ नैगमे श्रुतः ।
नेति वेदान्तिसाङ्ख्योक्त्योः, संग्रहव्यवहारता ॥११४॥

अनुत्पन्नपक्षश्च निर्युक्तौ नमस्कारनिर्युक्तौ नैगमे नैगमनये श्रुतः " उप्पन्नाणुप्पन्नो, इत्थ पया नेगमस्सऽणुप्पन्नो । सेसाणं उप्पन्नो, अह कसो तिविहसामित्ता ? ॥ ४८०६ ॥" इति (आवश्यकनिर्युक्ति-) वचनात् । तथा चानुत्पत्तिवादी साङ्ख्यो नैगमनयमेवोपजीवी, व्यावहारिकोत्पत्तिवादी वेदान्ती च व्यवहारनयमिति भावः । इति हेतोर्वेदान्तिसाङ्ख्योक्त्योस्तद्दर्शनयोः संग्रहव्यवहारता संग्रहव्यवहाराऽऽश्रयणाद्शुद्धऋजुसूत्रार्थैकप्रकृतिकता न भवति । तथा च संमतौ तथोक्तेः का गतिरिति भावः ? ॥ ११४ ॥

समाधत्ते तथापीतिहेतुना-

तथाऽप्युपनिषद् दृष्टि–सृष्टिवादाऽऽत्मिका परा ।
तस्यां स्वप्नोपमे विश्वे, व्यवहारश्चनोऽपि न ॥ ११५ ॥

तथाऽपि उपनिषद्वेदान्तदर्शनप्रवृत्तिः दृष्टिसृष्टिवादाऽऽत्मिका परा उत्कृष्टा मूलाभियुक्ता, अभ्युपगतत्वात्, तस्यां चाकृतस्वाज्ञानेन स्वप्नोपमे विश्वे जगति सति व्यवहारस्य स्वप्नोऽपि लेशोऽपि नाऽस्ति, तन्मते ज्ञाग्रद्व्यवहारस्य स्वप्नव्यवहारतुल्यत्वात् । तथा च मौलस्य वेदान्तदर्शनस्य व्यवहारापेतत्वे न व्यवहारप्रकृतिता, किं त्वेकाऽऽत्मसंग्रहप्रवणतया संग्रहप्रकृतितैवाऽऽकाशोदकपातकल्पमूलदर्शनप्रवृत्तावेव चेयं मयप्रकृतिचिन्तेति नार्वाचीनवेदान्तिनां मिथो विरुद्धकल्पनाकोटिक्षेपराहतानां व्यवहाराभ्यासक्षमत्वेनाऽपि प्रतिभूतव्यादिति हृदयम् ॥ ११५ ॥

साङ्ख्यशास्त्रे च नानाऽऽत्म–व्यवस्था व्यवहारकृत् ।
इत्येतावत्पुरस्कृत्य, विवेकः संमतावयम् ॥ ११६ ॥

(साङ्ख्येति) साङ्ख्यशास्त्रे च नानाऽऽत्मनां व्यवस्था प्रतिनियतजन्ममरणाऽऽदि व्यवहारकृद्भवति इत्येतावत्पुरस्कृत्य तात्पर्यविषयीकृत्याऽयं विवेकः सम्मतौ । यद्यपि-व्यवहारप्रकृतिकं साङ्ख्यदर्शनं,संग्रहप्रकृतिकं च वेदान्तदर्शनमिति वेदान्तप्रकृतिभूतसंग्रहनयेनैव तथाविधयीकृतस्याऽऽत्मनो भेदकरणेन संग्रहविषयत्वेदकत्वलक्षणसम्बन्धवादु व्यवहारप्रकृतिकत्वं साङ्ख्यदर्शनस्य विवक्षितमिति तात्पर्यम् । तेन सत्कार्याऽऽद्यंशे व्यवहारप्रकृतित्वाऽभावेऽपि न क्षतिः, आत्मन एव सकलशास्त्रप्रयोजनभागित्वेन मुख्यत्वात् , मुख्योद्देशेनैव च नयानां प्रकृतिविकृतिचिन्तायां युक्तत्वादिति प्रायः ॥ ११६ ॥ नयो० । अत्र च नैगमसंग्रहव्यवहारलक्षणास्त्रयो नयाः शुद्धाशुद्धिभ्यां द्रव्यास्तिकमतमाश्रिताः, ऋजुसूत्रशब्दसमभिरूढैवंभूतास्तु शुद्धितारतम्यतः पर्यायनयभेदाः । तथाहि–संग्रहमतं तावत्प्रदर्शितमेव । येषां तु मते न नैगमनयस्य सद्भावस्तस्य स्वरूपमेव वर्णितम्, राश्यन्तरोपलब्धं नित्यत्वमनित्यत्वं च नयतीति निगमव्यवस्थाभ्युपगमपरो नैगमनयः । निगमो हि नित्याऽनित्यसदसत्कृताकृतकरूपेषु भावेष्वपास्तसाकार्यस्वभावः सर्वथैव धर्मधर्मिभेदेन संपद्यत इति । स पुनर्नैगमोऽनेकधा व्यवस्थितः, प्रतिपत्तुरभिप्रायवशाद्व्यवस्थानात् । प्रतिपत्तारश्च नानाभिप्रायाः । यतः केचिदाहुः-" पुरुष एवेदं सर्वमित्यादि " यदाभिख्योक्तम्-" ऊर्द्धमूलमधः शाख–मश्वत्थं प्राहुरव्ययम् । छन्दांसि यस्य पर्णानि, यस्तं वेद स वेदवित् ॥१॥" पुरुषोऽप्येकत्वनानात्मभेदात्कैश्चिद्भ्युपगतो द्वेधा,नानात्वेऽपि तस्य कर्तृत्वाऽकर्तृत्वभेदोऽपरैराश्रितः । कर्तृत्वेऽपि सर्वगतेरभेदः,असर्वगतत्वेऽपि शरीरव्याप्त्यव्याप्तिभ्यां भेदः, व्यापिमूर्तेतरविकल्पाद्भेद एव । अपरैस्तु प्रधानकारणिकं जगदभ्युपगतं,तत्रापि सेश्वरनिरीश्वरभेदाद्भेदोऽभ्युपगतः, अन्यैस्तु परमाणुप्रभवत्वमभ्युपगतं जगतः, तत्रापि सेश्वरनिरीश्वरभेदाद्भेदोऽभ्युपगतः,सेश्वरपक्षेऽपि स्वकृतकर्मसापेक्षानपेक्षत्वाभ्यां तदवस्थ एव भेदाभ्युपगमः। कैश्चित्स्वभावकालनियतदृष्टाऽऽदिवादाः समाश्रिताः, तेष्वपि सापेक्षत्वानपेक्षत्वाभ्युपगमाद् भेदव्यवस्थाऽभ्युपगतैव। तथा कारणं नित्यं कार्यमनित्यमित्यपि द्वैतं कैश्चिदभ्युपगतम, तत्राऽपि कार्यं स्वरूपं नियमेन त्यजति, न वेत्ययमपि भेदाभ्युपगमः । एवं मूर्तैरेव मूर्तमारभ्यते, मूर्तैर्मूर्तं मूर्तैरमूर्तमित्याद्यनेकधा प्रतिपत्तृभिप्रायतोऽनेकधा निगमनाद्नैगमोऽनेकभेदः । व्यवहारनयस्त्वपास्तसमस्तभेदादेकमभ्युपगच्छतोऽयत्नीकृतभेदनिबन्धनव्यवहारविरोधप्रशक्तेः कारकज्ञापकज्ञेदे परिकल्पनाऽनुरोधेन व्यवहारमारचयन् प्रवर्तते इति कारणस्याऽपि न सर्वदा नित्यत्वं, कार्यस्याऽपि नैकान्ततः प्रक्षय इति । ततश्च न कदाचिदनीदृशं जगदिति प्रवृत्तोऽयं व्यवहारो न केवाऽपि प्रवर्त्येत, अन्यथा प्रवर्तकावस्थाप्रसक्तिः, ततो व्यवहारशून्यं जगत् । न च प्रमाणाविषयीकृतः पक्षोऽभ्युपगन्तुं युक्तः,अदृष्टपरिकल्पनाप्रसक्तेः। दृष्टानुरोधेन तु दृष्टमपि वस्तु कल्पयितुं युक्तम्, अन्यथा कल्पनासंभवादिति । संग्रहनैगमाभ्युपगतवस्तुविवेकालोकप्रतीतपथाऽनुसारेण प्रतिपत्तिः,गौरवपरिहारेण प्रमाणप्रमेयप्रमितिप्रतिपादनं व्यवहारप्रसिद्ध्यर्थं परीक्षकैः समाश्रितमिति व्यवहारनयाभिप्रायः । ततः स्थितं नैगमसंग्रहव्यवहाराणां द्रव्यास्तिकनयप्रभेदत्वं, विषयभेदश्चैषां प्रतिपादितः ।

तदुक्तम्-

" द्रव्यं द्रव्यं समाश्रित्य, संग्रहस्तदशुद्धितः ।
नैगमव्यवहारौ स्तां, शेषाः पर्यायमाश्रिताः ॥ १ ॥
अन्यदेव हि सामान्य-मनिष्पन्नज्ञानकारणम् ।
विशेषोऽप्यन्य एवेति, मन्यते नैगमो नयः ॥ २ ॥
सद्रूपताऽनतिक्रान्त-स्वस्वजात्यमिदं जगत् ।
सत्ताकृपतया सर्वं, संगृह्णन् संग्रहो मतः ॥ ३ ॥
व्यवहारस्तु तामेव, प्रतिवस्तुव्यवस्थिताम् ।
तयैव दृश्यमानत्वाद्, व्यवहारयति देहिनः" ॥ ४ ॥ इति ।

पर्यायनयभेदा ऋजुसूत्राऽऽदयः ।

"तत्रर्जुसूत्रनीतिः स्या-द्वस्तुरूपपर्यायसंश्रिता ।
वेश्यरस्यैव भावस्य, भावस्थितिवियोगतः" ॥ १ ॥ सम्म० १ काण्ड ।

(३३) यद्येवं संग्रहव्यवहारौ वेदान्तिसाङ्ख्यदर्शनप्रवर्तकौ, नैगमनयस्तर्हि कस्य दर्शनस्य प्रवर्तकः ?, इति जिज्ञासायामाह-

हेतुर्मतस्य कस्याऽपि, शुद्धाऽशुद्धो न नैगमः ।
अन्तर्भावो यतस्तस्य, सङ्ग्रहव्यवहारयोः ॥ ११७ ॥

(हेतुरिति) सामान्यविशेषाऽऽत्मद्रव्यग्राहित्वेन शुद्धाशुद्धो नैगमनयः कस्याऽपि मतस्य दर्शनस्य न हेतुर्न प्रकृतिः, यतः सामान्यग्रहाय प्रवृत्तस्य संग्रह एव, विशेषग्रहाय च प्रवृत्तस्य व्यवहार एवान्तर्भाव इति । तदुभयनिष्ठं स्वात्मानमेवाक्षममानस्य न निजदर्शनप्रकृतित्वमभिधातुं युज्यत इति ॥ ११७ ॥

कुतस्तर्हि वैशेषिकदर्शनमुत्पन्नं, कथं वा तस्य न सम्यक्त्वम् ?, इत्याकाङ्क्षायामाह-

द्राभ्यां नयाभ्यामुक्तीत-मपि शास्त्रं कणाऽशिना ।
अन्योऽन्यनिरपेक्षत्वा-न्मिथ्यात्वं स्वमताग्रहात् ॥११८॥

(द्राभ्यामिति) द्राभ्यां सामान्यविशेषग्राहिभ्यां संग्रहव्यवहाराभ्यां नयाभ्यामुक्तीतं पृथग् व्यवस्थापितमपि कणाऽशिना कणादमुनिना शास्त्रम्, अन्योऽन्यनिरपेक्षत्वात्परस्परविविक्तद्रव्यपर्यायोभयावगाहित्वात् स्वमताग्रहात् स्वकल्पनाऽभिनिवेशान्मिथ्यात्वम् ॥ न हि नयद्वयावलम्बनमेव शास्त्रस्य सम्यक्त्वप्रयोजकं, किं तु यथास्थाने तन्निवेशः । स च स्वप्रयुक्तनयद्वयेतरयावद्भङ्गानां स्याद्वादलाञ्छितानां परस्परसाकाङ्क्षाणां तात्पर्यविषयतया संपद्यते, एकतरस्याऽप्यतात्पर्ये सिद्धान्तविराधनाया अपरिहारात् । तदाह-" जे वयणिज्जविअप्पा, संजुज्जंतेसु होंति एएसु । सा ससमयपण्णवणा, सिद्धंतविराहणा अण्णा " ॥१॥ इति । तदिह सामान्यविशेषयोगः कुतस्तरामन्येषां जङ्गानामिति स्फुटमेव मिथ्यात्वम्, अतिरिक्तसामान्यविशेषापेक्षां विना महासामान्यान्त्यविशेषयोरिव वस्तुमात्रस्य स्वत एव सामान्यविशेषाऽऽत्मकत्वमित्यर्थस्यैव यथावस्थद्वयविनियोगरूपत्वात्, अन्यथाऽनवस्थानात् । तदिदमुक्तम्-"स्वतोऽनुवृत्तिव्यतिवृत्तिभाजो, भावा न भावान्तरनेयरूपाः । पराऽऽत्मतत्त्वादतथाऽऽत्मतत्त्वाद्, द्वयं वदन्तोऽकुशलाः स्खलन्ति ॥४॥" (स्या०) इति । एतेन नैयायिकदर्शनमपि व्याख्यातम्, पदार्थप्रमाणाऽऽदिभेदं विना प्रायस्तस्य वैशेषिकदर्शनसमानविषयत्वप्रदर्शनात् ॥ ११८ ॥

ननु संग्रहव्यवहारयोरेव विषयविवेकेन नैगमस्याऽन्तर्भावे तस्य पार्थक्ये किं बीजम् ?। अदर्शनेऽपि किञ्चित्कल्पयिष्याम इति चेत्, तर्हि दृष्टं खलम्बद्रव्यपर्यायोभयविषयत्वमेव तथाऽस्तु । तथा च तत एव कणादमतोत्पत्तिर्युक्तेति परीक्षापूर्वमाह-

स्वतन्त्रव्यक्तिसामान्य-ग्रहा येऽत्र तु नैगमे ।
औलूक्यसमयोत्पत्तिं, श्रूमहे तत एव हि ॥ ११९ ॥

(स्वतन्त्रेति) स्पष्टः । अत्र चार्थे प्रदर्शितन्यायेन द्रव्यपर्यायरूपमुभयमपि परस्परविविक्तमेकत्र विद्यत इत्यभिप्रायो नैगमोऽशुद्धद्रव्यास्तिकप्रकृतिरिति सम्मतिवृत्तिस्वरसोऽपीति ध्येयम् ॥ ११९ ॥

ऋजुसूत्राऽऽदितः सौत्रा-न्तिकवैभाषिकौ क्रमात् ।
अभूवन् सौगता योगा-चारमाध्यमिकाविति ॥१२०॥

(ऋजुसूत्राऽऽदित इति) ऋजुसूत्राऽऽदित ऋजुसूत्रशब्दसमभिरूढैवंभूतेभ्यः क्रमात् सौत्रान्तिकवैभाषिकयोगाचारमाध्यमिका इति चत्वारः सौगता अभूवन्नुदपद्यन्त ।

एतेषां स्वरूपमेतेन काव्येन ज्ञेयम्-
" अर्थो ज्ञानसमन्वितो मतिमता वैभाषिकेणेष्यते,
प्रत्यक्षो न हि बाह्यवस्तुविसरः सौत्रान्तिकैराश्रितः ।
योगाऽऽचारमतानुगैरनिमता साकारबुद्धिः परा,
मन्यन्ते बत मध्यमाः कृतधियः स्वच्छां परां संविदम्" ॥१॥ इति ।

एतद्विशेषाऽवगमपुष्पमदार्थिना तु मत्कृतग्रन्थादयं परिशीलनीयम् । अत्र वैभाषिकस्य शब्दनयपक्षपातित्वं, नित्यानित्यशब्दवाच्यपुद्गलाभ्युपगमात्, क्रानार्थलक्षणयौगपद्यरूपत्वं जनपर्यायप्रधानत्वाच्चावगन्तव्यम् । योगाचारमाध्यमिकयोश्च शुद्धशुद्धतरत्वेन समभिरूढैवंभूतपक्षवर्तित्वमिति ॥ १२० ॥

नयसंयोगजः शब्दा-लङ्कारोऽऽदेश्च विस्तरः ।
कियान् वाच्यो वचस्तुल्यसंख्या ह्यभिहिता नयाः ॥१२१॥

(नयेति) शब्दालङ्कारोऽऽदेर्व्याकरणसाहित्याऽऽदिशास्त्रस्य च विस्तरो नयसंयोगजो नानानयमयः, आदित एव तत्प्रवृत्तौ नानानयविवक्षाबाधनुपजीवनात् । अन्यथा सार्वपार्षत्वानुपपत्तिः । अत एव मीमांसका अपि द्रव्यपर्याययोः सार्वजनीनभेदाभेदाऽऽद्युपपत्तये व्यवहारनयमानन्त्यव्यभिचाराभ्यां विभ्यतो व्यक्तिशक्तिमपहाय जातौ शक्तिमुत्पत्तये संग्रहनयं चाश्रियमाणाः स्वमतप्रवृत्तौ नयसंयोगमेवाऽऽदावपेक्षन्ते । यत्तु मीमांसकमतस्याशुद्धद्रव्यास्तिकव्यवहारनयप्रकृतित्वं सम्मतिवृत्तौ नामनिक्षेपावसरे ज्ञापितं, "तच्छब्दार्थयोर्नित्यसंबन्धमात्रबाधापेक्षया, औत्पत्तिकस्तु शब्दस्यार्थेन संबन्धः" इति, तत्सूत्रे औत्पत्तिक इत्यस्य विपरीतलक्षणया नित्य इति व्याख्यानात् पूर्वपूर्वसंकेतापेक्षायामनवस्थानां नित्यपदसंबन्धाभ्युपगम एव । प्रवृत्तिमूलद्रव्यव्यवहाराऽऽद्यन्तशुद्धशास्त्रैदम्पर्यपर्यालोचनायां तु तस्य नयसंयोगत्वमेवमुक्तम् । अन्यथा-शब्दानुशासनेऽपि स्फोटविचारे शब्दसन्मात्रसंग्रहप्राधान्येन नयसंयोगजत्वं न स्यात्, न यसंयोगजत्वे शब्दाऽऽदीनां कथं न स्वसमयतुल्यत्वमिति चेत्, मूढनयानां तेषां यथावद्विभागाकरणात् । अत एव यथावस्थविभागविकीर्षया "सिद्धिः स्याद्वादात्" ॥१।१।२॥ इति (हैम०) सूत्रमुपन्यस्य श्रीहेमसूरयः स्वोपज्ञशब्दानुशासनस्य स्वसमयान्तर्भावेन दृढप्रामाण्यमाविश्चक्रुः । संक्षेपमभिप्रेत्याह उक्तो विस्तरः कियान् वाच्यो, हि यतः, वचस्तुल्यसंख्या नया अभिहिताः ॥१२१॥

स्याद्वादनिरपेक्षैश्च, तैस्तावन्तः परागमाः ।
ज्ञेयोपयुज्य तदियं, दर्शने नययोजना ॥ १२२ ॥

(स्याद्वादेति) तैर्नयैः स्याद्वादनिरपेक्षैः स्याद्वादैकवाक्यसारहितैस्तावन्तो यावन्तुल्यसंख्या एव परागमाः परसिद्धान्ता भवन्ति, अभिनिवेशान्वितनयत्वस्यैव परसमयलक्षणत्वात् । इदमुक्तं सम्मतितृतीयकाण्डे-" जावइया वयणपहा, तावइआ चेव हुंति णयवाया । जावइया णयवाया, तावइया चेव परसमया " ॥ ४७ ॥ एतावत्तु नयेष्विच्छाकल्पितसंयोगजभेदेऽपि समवायान्तराक्षेपकः सुलभ एव, इयं दर्शने नययोजनोपयुज्य ज्ञेया, न त्वापातत एव; आपातज्ञानस्य स्वसमयपरसमयविपर्यासफलत्वात् । अत एव वस्तुस्थितिविचारे-"जे पज्जवेसु णिरया, जीवा परसमयगतिविणिद्दिट्ठा । आवसहावम्मि ठिया, ते सगसमया मुणेयव्वा " ॥ १ ॥ इति दैगम्बरं वचनं वक्तुः सम्यक् स्वसमयनिष्णाततामभिव्यञ्जयति । द्रव्यास्तिकाभिप्रायः स्वसमयः, पर्यायास्तिकाभिप्रायः परसमय इत्यस्य स्याद्वादनिरपेक्षत्वान्नयवाक्यमेवैतदिति चेत्, तर्हि प्रवचनप्रक्रियाव्युत्पादने क इवास्योपयोगः ?, स्थूलसूक्ष्मनयार्थानां क्रमव्युत्पादनस्यैव शास्त्रार्थत्वादिति मुग्धबन्धनमात्रमेतत् । यद्यपि प्रावचनिकानां जिनभद्रसिद्धसेनप्रभृतीनां स्वस्वतात्पर्यविरुद्धविषये सूत्रे परतीर्थिकवक्तव्यताप्रतिबन्धप्रतिपादनं, तदप्यभिनिवेशेन चेत्तदा प्रावचनिकत्वक्षतिरिति । तत्र परतीर्थिकपदं भिन्नपरम्परायाततात्पर्यानुसारिपदम्; अत एव नयाभिप्रायेण प्रवृत्तत्वादिति हेत्वभिधानोपपत्तिः । अत एव च नयाभिप्रायेणोभयसमाधानमस्माभिर्ज्ञानबिन्दौ विहितमिति । एवमन्यत्रापि दर्शनप्रयोजनाभ्यामुपयोगो विधेयः समयनिष्णातैः ॥१२२॥नयो०।

(३४) के पुनरेषु नयेष्वर्थप्रधानाः, के च शब्दनया इति दर्शयन्ति-

एतेषु चत्वारः प्रथमेऽर्थनिरूपणप्रवणत्वादर्थनयाः ॥४४॥
शेषास्तु त्रयः शब्दवाच्यार्थगोचरतया शब्दनयाः ॥४५॥

कः पुनरत्र बहुविषयः, को वाऽल्पविषयो नय इति विवेचयन्ति-

पूर्वः पूर्वो नयः प्रचुरगोचरः, परः परस्तु परिमितविषयः ॥ ४६ ॥

तत्र नैगमसंग्रहयोस्तावन्न संग्रहो बहुविषयो नैगमात्परः, किं तर्हि नैगम एव संग्रहात्पूर्व इत्याहुः--

सन्मात्रगोचरात्संग्रहान्नैगमो भावाऽभावभूमिकत्वाद् भूमविषयः ॥ ४७ ॥

भावाऽभावभूमिकत्वाद्भावाऽभावविषयत्वाद्, भूमविषयो बहुविषयः ॥ ४७ ॥

संग्रहाद् व्यवहारो बहुविषय इति विपर्ययमपास्यन्ति-

सद्विशेषप्रकाशकाद्व्यवहारतः संग्रहः समस्तसत्समूहोपदर्शकत्वाद् बहुविषयः ॥ ४८ ॥

व्यवहारो हि कतिपयान् सत्प्रकारान् प्रकाशयतीत्यल्पविषयः, संग्रहस्तु सकलसत्प्रकाराणां समूहं व्यापयतीति बहुविषयः ॥ ४८ ॥

व्यवहारात् ऋजुसूत्रो बहुविषय इति विपर्यासं निरस्यन्ति-

वर्त्तमानविषयादृजुसूत्राद्व्यवहारस्त्रिकालविषयाऽवलम्बित्वादनल्पार्थः ॥ ४९ ॥

वर्तमानक्षणमात्रस्थायिनमर्थमृजुसूत्रः सूत्रयतीत्यसावल्पविषयः, व्यवहारस्तु कालत्रितयवर्त्यर्थजातमवलम्बत इत्ययमनल्पार्थ इति ॥ ४९ ॥

ऋजुसूत्राच्छब्दो बहुविषय इत्याशङ्कामपसारयन्ति-

कालाऽऽदिभेदेन भिन्नार्थोपदर्शिनः शब्दादृजुसूत्रस्तद्विपरीतवेदकत्वान्महार्थः ॥ ५० ॥

शब्दनयो हि कालाऽऽदिभेदाद्भिन्नमर्थमुपदर्शयतीति स्तोकविषयः, ऋजुसूत्रस्तु कालाऽऽदिभेदतोऽप्यभिन्नमर्थं सूचयतीति बहुविषय इति ॥ ५० ॥

शब्दात्समभिरूढो महार्थ इत्यारेकां पराकुर्वन्ति-

प्रतिपर्यायशब्दमर्थभेदमभीप्सतः समभिरूढाच्छब्दस्तद्विपर्ययाऽनुयायित्वात् प्रभूतविषयः ॥ ५१ ॥

समभिरूढनयो हि पर्यायशब्दानां व्युत्पत्तिभेदेन भिन्नार्थतामर्थयत इति तनुगोचरोऽसौ, शब्दनयस्तु तेषां तदभेदेनाऽप्येकार्थतां समर्थयत इति समधिकविषयः ॥ ५१ ॥

समभिरूढादेवम्भूतो भूमविषय इत्यप्याकूतं प्रतिक्षिपन्ति-

प्रतिक्रियं विभिन्नमर्थं प्रतिजानानादेवंभूतात्समभिरूढस्तदन्यथाऽर्थस्थापकत्वान्महागोचरः ॥ ५२ ॥

एवंभूतनयो हि क्रियाभेदेन भिन्नमर्थं प्रतिजानीत इति तुच्छविषयोऽसौ, समभिरूढस्तु तद्भेदेनाऽप्यभिन्नं भावमभिप्रैतीति प्रभूतविषयः ॥ ५२ ॥

अथ यथा नयवाक्यं प्रवर्त्तते तथा प्रकाशयन्ति-

नयवाक्यमपि स्वविषये प्रवर्त्तमानं विधिप्रतिषेधाभ्यां सप्तभङ्गीमनुव्रजति ॥ ५३ ॥

नयवाक्यम्-प्रागुल्लक्षितविकलाऽऽदेशस्वरूपं; न केवलं सकलाऽऽदेशस्वभावं प्रमाणवाक्यमित्यपिशब्दार्थः । स्वविषये स्वाऽभिधेये प्रवर्तमानं विधिप्रतिषेधाभ्यां परस्परविभिन्नार्थनययुग्मसमुत्थविधाननिषेधाभ्यां कृत्वा सप्तभङ्गीमनुगच्छति, प्रमाणसप्तभङ्गीवदेतद्विचारः कर्त्तव्यः, नयसप्तभङ्गीष्वपि प्रतिभङ्गं स्यात्कारस्यैवकारस्य च प्रयोगसद्भावात् । तासां विकलाऽऽदेशत्वादेव सकलाऽऽदेशाऽऽत्मिकायाः प्रमाणसप्तभङ्ग्या विशेषव्यवस्थापनात् । विकलाऽऽदेशस्वभावा हि नयसप्तभङ्गी, वस्त्वंशमात्रप्ररूपकत्वात्; सकलाऽऽदेशस्वभावा तु प्रमाणसप्तभङ्गी सम्पूर्णवस्तुस्वरूपप्ररूपकत्वादिति ॥ ५३ ॥ रत्ना० ७ परि०।

यावदेवंभेदाभेदरूपं वस्तूपदर्श्य भेदस्य पर्यायार्थिकविषयस्य द्वैविध्यमाह--

सो पुण समासओ चिय,वंजणणियओ य अत्थणियओ य ।
अत्थगओ य अनिओ, नइयव्वो वंजणवियप्पो ॥ ३० ॥

स पुनर्विभागः समासतः संक्षेपतो व्यञ्जननियतः शब्दनयनिबन्धनोऽर्थनियतश्चार्थनयनिबन्धनश्च, तत्राऽर्थगतस्तु विभागोऽनियतः संग्रहव्यवहारर्जुसूत्रार्थप्रधाननयविषयोऽर्थपर्यायोऽनियोऽसदुत्पत्तीतानागतव्यवच्छिन्नाभिधार्थपर्यायरूपत्वा--त्तद्विषया नया अप्यर्थगतो विभागोऽभिन्न इत्युच्यते ।

भाज्यो व्यञ्जनविकल्प इति विकल्पितः शब्दपर्यायो भिन्नोऽभिन्नश्चानेकाभिधान एकः, एकाभिधानश्चैक इति कृत्वा समानलिङ्गसंख्याकालाऽऽदिरनेकशब्दो घटः कुटः कुम्भ इत्यादिरेक एकार्थ इति शब्दनयः। समभिरूढस्तु-भिन्नाभिधेयौ घटकुटशब्दौ भिन्नप्रवृत्तिनिमित्तत्वाद्घटपटवदाऽऽदिशब्दवदित्येकार्थ एकशब्द इति मन्यते। एवंभूतस्तु चेष्टासमय एव घटो घटशब्दवाच्यः, अन्यथाऽतिप्रसङ्गात्।

तदेवमभिन्नोऽर्थो वाच्योऽस्य त्वभिन्नार्थो घटशब्द इति मन्यते यत्तदन्यतो विभक्तेन स्वरूपेणैकमनेकं च वस्तूक्तं तदनन्तप्रमाणमित्याख्यातुमाह-

एगदवियम्मि जे अ-त्थपज्जवा वयणपज्जवा वा वि।
तीयाऽणागयभूया, तावइयं तं हवइ दव्वं ॥ ३१ ॥

एकस्मिन् जीवाऽऽदौ द्रव्येऽर्थपर्याया अर्थग्राहकाः सङ्गृह्यव्यवहारर्जुसूत्राख्यास्तद्ग्राह्या वाऽर्थभेदा वचनपर्यायाः शब्दनयाः शब्दसमभिरूढैवंभूतास्तत्परिच्छेद्या वस्त्वंशा वा, ते चातीताऽनागतवर्त्तमानरूपतया सर्वदा विवर्तन्ते, विवृताः,विवर्तिष्यन्त इति, तेषामानन्त्याद्वस्त्वपि तावत्प्रमाणं भवति॥ तथा हि-अनन्तकालेन सर्वेण वस्तुना सर्वावस्थानां परस्परानुगमेनासादितत्वादवस्थातुल्यावस्थानां कथञ्चिदनन्यत्वाद् घटाऽऽदिवस्तु कुटपुरुषाऽऽदिरूपेणाऽपि कथञ्चिद्विवृतमिति सर्वं सर्वाऽऽत्मकं कथञ्चिदिति स्थितम्। दृश्यते चैकं पुद्गलद्रव्यमतीतानागतवर्त्तमानद्रव्यगुणकर्मसामान्यविशेषपरिणामाऽऽत्मकं युगपत्क्रमेणापि तत्तथाभूतमेव, एकान्तासत उत्पादायोगात्, सतश्च निरन्वयविनाशासंभवादिति प्रतिपादितत्वात्।

एवं तावद् बाह्याभ्यन्तरभेदेन द्विविधस्याऽपि वस्तुनोऽनेकान्ताऽऽत्मकत्वं प्रतिपाद्य तत्प्रतिपादनवाक्यनयानामपि तथाविधमेव स्वरूपं नान्याद्दगभूतमस्तीति प्रतिपादयन्नाह-

पुरिसम्मि पुरिससद्दो, जम्माऽऽई मरणकालपज्जंतो।
तस्स उ बालाऽऽईया, पज्जवजोया बहुवियप्पा ॥ ३२ ॥

अथवा-अर्थव्यञ्जनपर्यायैः शक्तिव्यक्तिरूपैरनन्तैरनुगतोऽर्थः सविकल्पो, निर्विकल्पकश्च। प्रत्यक्षतोऽवगत इति इदानीं पुरुषदृष्टान्तद्वारेण व्यञ्जनपर्यायं तदविकल्पत्वनिबन्धनमर्थपर्यायं च। तत्र सविकल्पत्वनिमित्तमाह-"पुरिसम्मि" इत्यादिना सूत्रेण, अतीतानागतवर्त्तमानानन्तार्थव्यञ्जनपर्यायाऽऽत्मके पुरुषवस्तुनि पुरुष इति शब्दो यस्याऽसौ पुरुषशब्दस्तद्वाच्योऽर्थो जन्माऽऽदिर्मरणपर्यन्तोऽभिन्न इत्यर्थः, पुरुष इत्यभिन्नाभिधानप्रत्ययव्यवहारप्रवृत्तेः। तस्यैव बालाऽऽदयः पर्याययोगाः परिणतिसंबन्धा बहुविकल्पा अनेकभेदाः प्रतिक्षणसूक्ष्मपरिणामान्तर्भूता भवन्ति, तत्रैव तथा व्यतिरेकज्ञानोत्पत्तेः। एवं च स्यादेक इत्यविकल्पः, स्यादनेक इति सविकल्पः सिद्धः। अन्यथाऽभ्युपगमे तदभाव एवेति विपक्षः "अत्थि त्ति णिव्वियप्पं (३३)" इत्यनन्तरगाथया बाधां दर्शयिष्यति, द्वितीयपातनिकया न। गाथार्थस्तु-पुरुषवस्तुनि पुरुषत्वनिर्व्यञ्जनपर्यायः, शेषो बालाऽऽदिधर्मकलापोऽर्थपर्याय इति गाथासमुदायार्थः। ननु कोऽयं पुरुषशब्दः, कथं वा शब्दोऽर्थस्य पर्यायः,ततोऽत्यन्ताभिन्नाद् घटस्येव पटः॥ (३२) सम्म० १ काण्ड।

यच्च कथं शब्दो वस्वन्तरत्वात्पुरुषाऽऽदेर्वस्तुनो धर्मः?, येनाऽसौ तस्य व्यञ्जनपर्यायो भवेदित्युक्तम्। तत्र नामनयाऽभिप्रायात् "नामनामवतोरभेदात्" पुरुषशब्द एव पुरुषार्थस्य व्यञ्जनपर्यायः। यद्वा-पुरुष इति शब्दो वाचको यस्याऽर्थगतत्वाद्वाच्यधर्मस्यासौ पुरुषशब्दः,स चाभिधेयपरिणामरूपोव्यञ्जनपर्यायः कथं नाऽर्थधर्मः, स च व्यञ्जनपर्यायः पुरुषोत्पत्तेरारभ्याऽऽपुरुषविनाशाद्भवतीति जन्माऽऽदिर्मरणसमयपर्यन्त उक्तः, तस्य तु बालाऽऽद्यः पर्याययोगा बहुविकल्पाः,तस्य पुरुषाभिधेयपरिणामवतो बालकुमाराऽऽद्यस्तत्रोपलभ्यमाना अर्थपर्याया भवन्त्यनन्तरूपाः।

एवं च पुरुषो व्यञ्जनपर्यायेणैको, बालाऽऽदिभिस्त्वर्थपर्यायैरनेको, यथा पुरुषस्तथा सर्वं वस्त्वेकमनेकं वा, सर्वस्य तथैवोपलब्धेः, अन्यथाऽभ्युपगमे एकान्तरूपमपि तन्न भवेदिति दर्शयन्नाह-

अत्थि त्ति णिव्वियप्पं, पुरिसं जो भणइ पुरिसकालम्मि।
सो बालाऽऽइवियप्पं, न लहइ तुल्लं वयविज्जा ॥ ३३ ॥

अस्तीत्येवं निर्विकल्पं निष्क्रान्ताशेषभेदस्वरूपं पुरुषमेकरूपं पुरुषद्रव्यं यो ब्रवीति पुरुषकाले पुरुषोत्पत्तिक्षण एवाऽसौ बालाऽऽदिभेदं न लभते, बालाऽऽदिभेदरूपतया नाऽसौ स्वयमेव व्यवस्थिति प्राप्नुयात्, नाऽपि तद्रूपतया अपरमसौ पश्येदेवं वा भेदरूपमेव तत् पुरुषवस्तु प्रसज्येत,तुल्यं वा प्राप्नुयात्,तदप्यनेदरूपं बालाऽऽदितुल्यत्वमेव भावरूपतया प्राप्नुयाऽनेदाप्रतीतावनेदस्याप्यप्रतीतेरभाव इति भावः। यद्वा-अस्तीत्येवं निर्विकल्पं-निश्चिनोति विकल्पो भेदो यस्मिन् पुरुषद्रव्ये तन्निर्विकल्पं भेदरूपं पुरुषं तत्स्वरूपलाभकाले भणत्यसौ बालाऽऽदिविकल्पं न लभेत तुल्यमिति द्रव्यतुल्यतामेवाऽसौ प्राप्नुयात्, अत्राऽपि पूर्ववत् तदग्रहे तदग्रहाऽनेदरूपताया अप्यभाव इति भावः। न चैवमेवास्तीति वक्तव्यम्, सर्वव्यवहारोच्छेदप्रसक्तेरिति भेदाऽभेदरूपमेव वस्तु।

अस्यैवोपसंहारार्थमाह-

वंजणपज्जायस्स उ, पुरिसो पुरिसो त्ति णिच्चमवियप्पो।
बालाऽऽइवियप्पं पुण, पासइ से अत्थपज्जाओ ॥ ३४ ॥

शब्दपर्यायेणाविकल्पः पुरुषः, बालाऽऽदिना त्वर्थपर्यायेण सविकल्पः सिद्ध इति गाथातात्पर्यार्थः। व्यञ्जयति, व्यनक्ति वाऽर्थानिति व्यञ्जनं शब्दो,न पुनः शब्दनयः, तस्य ऋजुसूत्रार्थनयविषयत्वादिति केचित्। तस्य पर्याय आ जन्मनो मरणान्तं यावदनिन्नस्वरूपंपुरुषद्रव्यप्रतिपादकत्वं, तद्वशेन तत्प्रतिपाद्यं वस्तुस्वरूपमत्र ग्राह्यम्, उपचारात्। एवं च द्वितयमप्येतत्पुरुषः पुरुष इत्यनेदरूपतया न भिद्यते,व्यञ्जनपर्यायमतेन पुरुषवस्तु सदाऽविकल्पं, भेदं न प्रतिपद्यत इति यावत्। बालाऽऽदिविकल्पं बालाऽऽदिभेदं पुनस्तस्यैव पश्यत्यर्थपर्याय ऋजुसूत्राऽऽद्यर्थनयः। अत्रापि विषयिणा विषय ऋजुसूत्राऽऽद्यर्थनयविषयेऽभिन्ने पुरुषरूपे नेदे स्वरूपो निर्दिष्टः, उपचारात्। एवं चाभिन्नं पुरुषवस्तु नेदं प्रतिपद्यत इति यावत्। सम्म० १ काण्ड। स्था०।

(३५) नयेषु मिथ्यात्वसम्यक्त्वे। अथ नयोत्पादितेष्वपरिमितेषु दर्शनेषु कस्मिन् मिथ्यात्वं, कस्मिंश्च सम्यक्त्वमिति जिज्ञासायामाह-

नास्ति नित्यो न नो कर्ता, न भोक्ताऽऽत्मा न निर्वृतिः।
तदुपायश्च नेत्याहु-र्मिथ्यात्वस्थानकानि षट् ॥१२३॥

(नास्तीत्यादि) नाऽस्त्यात्मेति चार्वाकमते, न नित्य इति क्षणिकवादिमते, न कर्त्ता न भोक्तेति साङ्ख्यमते। यद्वा-न कर्तेति साङ्ख्यमते, न भोक्तेत्युपचरितभोक्तृत्वस्थानत्युपगमात् वेदान्तिमते, नास्ति निर्वृत्तिः सर्वदुःखविमोक्षलक्षणेति नास्तिकप्रायाणां सर्वज्ञानत्युपगन्तृणां यज्ञवनां मते, अस्ति मुक्तिः परं तदुपायो नास्ति, सर्वभावानां नियतत्वेनाकस्मादेव भावादिति नियतिवादिमते। इत्येतानि षट् मिथ्यात्वस्थानकान्याहुः पूर्वसूरयः॥ १२३ ॥

षमेतद्विपरीतानि, सम्यक्त्वस्थानकान्यपि ।
मार्गत्यागप्रवेशाभ्यां, फल्गुतत्तत्त्वमिष्यते ॥ १२४ ॥

(षमेतदिति) एतेभ्यः प्रागुक्तेभ्यो विपरीतानि षट् सम्यक्त्वस्थानकान्यपि भवन्ति-अस्त्यात्मा नित्यः कर्त्ता साक्षाद्भोक्ता, अस्ति मुक्तिरस्ति च तत्कारणं रत्नत्रयसाम्राज्यमिति । तदिदमुक्तम्-" अत्थि जिओ तह णिच्चो, कत्ता भुत्ता स पुण्णपावाणं । अत्थि धुवं णिव्वाणं, तस्सोवाओ अ छट्ठाणा ॥१॥ " इति चार्वाकाऽऽदिपक्षनिरासश्चातिभूयानिति लताऽऽदित एव तदवगमो विधेयः । नयो० ।

नयाः समुदिताः सम्यक्त्वनः । आद्यस्तुतिकारोऽप्यवोचत-
" नयास्तव स्यात्पदलाञ्छना इमे,
रसोपविद्धा इव लोहधातवः ।
भवन्त्यभिप्रेतफला यतस्ततो,
भवन्तमार्याः प्रणता हितैषिणः ॥१॥" आ०म०१अ०१खण्ड।

अधुना परदर्शनानां परस्परविरुद्धाऽर्थसमर्थकतया मत्सरित्वं प्रकाशयन् सर्वज्ञोपज्ञसिद्धान्तस्यान्योऽन्यानुगतसर्वनयमयतया मात्सर्योन्नावमाविर्भावयति-

अन्योऽन्यपक्षप्रतिपक्षभावाद्,
यथा परे मत्सरिणः प्रवादाः ।
नयानशेषानविशेषमिच्छन्-
न पक्षपातो समयस्तथा ते ॥ ३० ॥

प्रकर्षेणोद्यते प्रतिपाद्यते स्वाभ्युपगतोऽर्थो यैरिति प्रवादाः। यथा येन प्रकारेण, परे भवच्छासनादन्ये, प्रवादाः दर्शनानि मत्सरिणः-अतिशायने मत्वर्थीयविधानात् सातिशयाऽसहनताशालिनः क्रोधकषायकलुषितान्तःकरणाः सन्तः पक्षपातिनः इतरपक्षतिरस्कारेण स्वकीकृतपक्षव्यवस्थापनप्रवणा वर्तन्ते। कस्मादेतेमेत्सरिणः ?,इत्याह-अन्योऽन्यपक्षप्रतिपक्षभावात् । पच्यते व्यक्तीक्रियते साध्यधर्मैविशिष्टचेन हेत्वादिभिरिति पक्षः-कक्षीकृतधर्मप्रतिष्ठापनाय साधनोपन्यासः । तस्य प्रतिकूलः पक्षः प्रतिपक्षः । पक्षस्य प्रतिपक्षो विरोधी पक्षः, तस्य भावः पक्षप्रतिपक्षभावः । अन्योऽन्यं परस्परं यः पक्षप्रतिपक्षभावः पक्षप्रतिपक्षत्वमन्योऽन्यपक्षप्रतिपक्षभावस्तस्मात् । तथाहि-य एव मीमांसकानां नित्यः शब्दः इति पक्षः, स एव सौगतानां प्रतिपक्षः, तन्मते शब्दस्याऽनित्यत्वात् । य एव सौगतानाम्-अनित्यः शब्दः इति पक्षः, स एव मीमांसकानां प्रतिपक्षः । एवं सर्वप्रयोगेषु योज्यम् । तथा तेन प्रकारेण, ते तव, समयग् एति गच्छति शब्दोऽर्थमनेनेति " पुंनाम्नि घः " ॥ ५।३।१३० ॥ समयः सङ्केतः । यद्वा-सम्यगवैपरीत्येनाऽऽयन्ते ज्ञायन्ते जीवाऽजीवाऽऽदयोऽर्था अनेनेति समयः सिद्धान्तः । अथवा-सम्यगयन्ते गच्छन्ति जीवाऽऽदयः पदार्थाः स्वस्मिन् रूपे प्रतिष्ठां प्राप्नुवन्ति अस्मिन्निति समय आगमः । न पक्षपाती नैकपक्षानुरागी । पक्षपातित्वस्य हि कारणं मत्सरित्वं परप्रवादेषूक्तम् । त्वत्समयस्य च मत्सरित्वाभावान्न पक्षपातित्वम् । पक्षपातित्वं हि मत्सरित्वेन व्याप्तम् । व्यापकं च निवर्तमानं व्याप्यमपि निवर्त्तयतीति मत्सरित्वे निवर्त्तमाने पक्षपातित्वमपि निवर्तत इति भावः । 'तव समयः' इति वाच्यवाचकभावलक्षणे संबन्धे षष्ठी । सूत्रापेक्षया गणधरकर्तृकत्वेऽपि समयस्याऽर्थापेक्षया भगवत्कर्तृकत्वाद्वाच्यवाचकभावो न विरुध्यते-"अत्थं भासइ अरहा, सुत्तं गंथंति गणहरा निउणं।" (१११६) इति (भाष्य) वचनात् । अथवा-उत्पादव्ययध्रौव्यप्रपञ्चः समयः, तेषां च भगवता साक्षान्मातृकापदरूपतयाऽभिधानात् । तथा चार्षम्-" उप्पन्नेइ वा, विगमेइ वा, धुवेइ वा " इत्यादेः । मत्सरित्वाभावमेव विशेषणद्वारेण समर्थयति-" नयानशेषानविशेषमिच्छन् " इति । अशेषान् समस्तान्नयान् नैगमाऽऽदीन् अविशेषं निर्विशेषं यथा नवत्येवमिच्छन्नाकाङ्क्षन्, सर्वनयाऽऽत्मकत्ववादेनैकान्तवादस्य । यथा विशकलितानां मुक्तामणीनामेकसूत्रानुस्यूतानां हारव्यपदेशः, एवं पृथगभिसंधीनां नयानां स्याद्वादलक्षणैकसूत्रप्रोतानां श्रुताऽऽख्यप्रमाणव्यपदेश इति । ननु प्रत्येकं नयानां विरूपत्वे कथं समुदितानां निर्विरोधिता ?। उच्यते--यथा हि समीचीनं मध्यस्थं न्यायनिर्णेतारमासाद्य परस्परं विवदमाना अपि वादिनो विवादाद्विरमन्ति, एवं नया अन्योऽन्यं वैरायमाणा अपि सार्वज्ञं शासनमुपेत्य स्याच्छब्दप्रयोगोपशमितविप्रतिपत्तयः सन्तः परस्परमत्यन्तसुहृद्भूतयाऽवतिष्ठन्ते । एवं च सर्वनयाऽऽत्मकत्वे भगवत्समयस्य सर्वदर्शनमयत्वमविरुद्धमेव, नयरूपत्वाद्दर्शनानाम् । न च वाच्यम्, तर्हि भगवत्समयस्तेषु कथं नोपलभ्यत इति ?, समुद्रस्य सर्वसरिन्मयत्वेऽपि विभक्तासु तास्वनुपलम्भात् ।

तथा च वक्तृवचनयोरैक्यमभ्युपेत्य श्रीसिद्धसेनदिवाकरपादाः-
" उदधाविव सर्वसिन्धवः,
समुदीर्णास्त्वयि नाथ ! दृष्टयः ।
न च तासु भवान् प्रदृश्यते,
प्रविभक्तासु सरित्स्विवोदधिः " ॥ १ ॥

अन्ये त्वेवं व्याचक्षते-यथा-' अन्योऽन्यपक्षप्रतिपक्षभावात्परे प्रवादा मत्सरिणस्तथा तव समयः सर्वनयान् मध्यस्थतयाऽङ्गीकुर्वाणो न मत्सरी । यतः कथंभूतः ?, पक्षपाती, पक्षमेकपक्षाभिनिवेशं पातयति तिरस्करोतीति पक्षपाती, रागस्य जीवनाशं नष्टत्वात् ' । अत्र च व्याख्याने मत्सरीति विधेयपदं, पूर्वस्मिंश्च पक्षपातीति विशेषः। अत्र च क्लिष्टाक्लिष्टव्याख्यानविवेको विवेकिभिः स्वयं कार्य इति काव्यार्थः ॥ ३० ॥ स्या० । अष्ट० । सम्म० । न कारणमेव कार्यं परिणामो वा, परिणामो न कार्यं नापि कारणम्,अपि तु द्रव्यमात्रं तत्त्वमिति, तदेव वेति नियमेनैकान्ताभ्युपगमे सर्वं एवैते मिथ्यावादाः, उक्तन्यायेन नियमेन मिथ्यात्वमित्यभिधानात् । कथञ्चिदभ्युपगमे सम्यग्वाद एवैते । इत्युक्तं भवति—यत उत्पादव्ययध्रौव्याऽऽत्मकत्वे वस्तुनः स्थिते, तद्वस्तु तत्तदपेक्षया कार्यमकार्यं च कारणमकारणं च कारणे कार्ये सच्चासच्च कारणं कार्यकाले विनाशवदविनाशवच्च, तथैव प्रतीतेः, अन्यथा चाप्रतीतेः । अत एकान्तरूपस्य वस्तुनोऽभावात् सर्वेऽपि नयाः

स्वविषयपरिच्छेदसमर्थो अपीतरनयविषयव्यवच्छेदेन स्वविषये वर्त्तमाना मिथ्यात्वं प्रतिपद्यन्त इत्युपसंहरन्नाह-

णियवयणिज्जसच्चा, सव्वनया परवियालणे मोहा ।
ते पुण ण दिट्ठसमओ,विभइ य सच्चे व अलिए वा ॥२७॥

निजकवचनीये स्वांशे परिच्छेद्ये सत्याः सम्यग्ज्ञानरूपाः सर्व एव नयाः संग्रहाऽऽदयः परविचालने परविषयेत्क्षनने मोहाः मुह्यन्तीति मोहा मिथ्याप्रत्ययाः, परविषयस्याऽपि सत्यत्वेनोन्मूलयितुमशक्यत्वात् तदभावे स्वविषयस्याऽप्यव्यवस्थितेस्ततश्च परविषयस्यासत्त्वे स्वविषयस्याप्यसत्त्वात् । तत्प्रत्ययस्य मिथ्यात्वमेव, तद्व्यतिरिक्तग्राह्यग्राहकप्रमाणस्य वा भावात्तानेव नयान् पुनःशब्दस्यावधारणार्थत्वात्, नेति प्रतिषेधे, विभजनक्रियाया दृष्टः समयः सिद्धान्तवाक्यमनेकान्ताऽऽत्मकं वस्तुतत्त्वं येन पुंसा स तथा सन् विभजते सत्येतरतया स्वेतरविषयमवधार्यमाणोऽपि तथा तत्रैव विभजते । अपि त्वितरनयविषयसव्यपेक्षमेव स्वनयाऽभिप्रेतं विषयं सत्यमेवावधारयतीति यावद् ग्राह्यसत्यासत्ये इत्येवमभिधानम् । तच्च दृष्टाऽनेकान्तत्वस्य विभजनम्, स्यादस्त्येव द्रव्यार्थत इत्येवंरूपः ।

अतो नयप्रमाणाऽऽत्मकैकरूपतान्यवस्थितमात्मस्वरूपमनुगतव्यावृत्ताऽऽत्मकमुत्सर्गापवादरूपग्राह्यग्राहकाऽऽत्मकत्वाद् व्यवतिष्ठत इत्यर्थप्रदर्शनायाऽऽह-

दव्वट्ठियवत्तव्वं, सव्वं सव्वेण णिच्चमविकप्पं ।
आरद्धो अविभागो, पज्जववत्तव्वमग्गो य ॥२६॥

यत् किञ्चिद् द्रव्यार्थिकस्य संग्रहाऽऽदेः सदादिरूपेण व्यवस्थितं वस्तु वक्तव्यं परिच्छेद्यं तत्सर्वं सर्वेण प्रकारेण नित्यं सर्वकालमविकल्पं निर्भेदं,सर्वस्य सदविशेषाऽऽत्मकत्वात् । तच्च नयेन संपृक्तमिति दर्शयितुमाह-आरब्धश्चाविभागः, स एवाविभागः सत्तारूपो यो द्रव्याऽऽदिनाऽऽकारेण प्रस्तुतः, चशब्दस्य प्रक्रान्ताविभागान्न कर्षणार्थत्वात्; पर्यायवक्तव्यमार्गश्च पर्यायार्थिकस्य यद्वक्तव्यं विशेषस्तस्य मार्गः पन्थाः जातः पर्यायार्थिकपरिच्छेद्यस्वभावो विशेषः संपन्न इति । सम्म० १ काण्ड ।

(३६) एवं नयस्य लक्षणसंख्याविषयान् व्यवस्थाप्येदानीं फलं स्फुटयन्ति-

प्रमाणवदस्य फलं व्यवस्थापनीयम् ॥ ५४ ॥

प्रमाणस्येव प्रमाणवत्, अस्येति नयस्य, यथा खल्वानन्तर्येण प्रमाणस्य संपूर्णवस्वज्ञाननिवृत्तिः फलमुक्तम्, तथा नयस्याऽपि वस्त्वेकदेशाज्ञाननिवृत्तिः फलमानन्तर्येणावधार्यम् । यथा च पारम्पर्येण प्रमाणस्योपादानहानोपेक्षाबुद्धयः संपूर्णवस्तुविषयाः फलत्वेनाभिहिताः, तथा नयस्याऽपि वस्त्वंशविषयाः,ताः परम्पराफलत्वेनावधारणीयाः । तदेतद् द्विप्रकारमपि नयस्य फलं, ततः कथञ्चिद्भिन्नमभिन्नं वाऽवगन्तव्यम् , नयफलत्वान्यथाऽनुपपत्तेः । कथञ्चिद्भेदाभेदप्रतिष्ठा च नयफलयोः प्रागुक्तप्रमाणफलयोरिव कुशलैः कर्त्तव्या । रत्ना० ७ परि० ।

नन्वनेन संमोहहेतुना नयविचारेण भूयत एव किं प्रयोजनम् ?, इत्याह-

अत्थं जो न समिक्खइ,निक्खेवनयप्पमाणओ विहिणा ।
तस्साजुत्तं जुत्तं, जुत्तमजुत्तं व पडिहाइ ॥ २७३ ॥
परसमएगनयमयं, तप्पडिवक्खनयओ निवत्तेज्जा ।
समए व परिग्गहियं, परेण जं दोसबुद्धीए ॥२७४॥

यो नामस्थापनाऽऽदिद्वारेण, तथा नैगमाऽऽदिनयैः, प्रत्यक्षाऽऽदिभिश्च प्रमाणैरर्थं सूक्ष्मेक्षिकया विचार्य न समीक्षते न परिभावयति, तस्याऽविचारितरमणीयतया अयुक्तं युक्तं प्रतिज्ञाति, युक्तमपि वाऽन्यतयाऽयुक्तं प्रतिजानाति, अतः कर्त्तव्यो नयविचारः ॥ २७३ ॥ किञ्च-बौद्धाऽऽदिपरसमयरूपमनित्यत्वाऽऽदिप्रतिपादकस्य ऋजुसूत्राऽऽदिकनयस्य यन्मतं तन्नयविधिज्ञः साधुः (तप्पडिवक्खनयओ त्ति) तस्यानित्यत्वाऽऽदिप्रतिपादकनयस्य प्रतिपक्षभूतो नित्यत्वाऽऽदिप्रतिपादको यो द्रव्यास्तिकाऽऽदिनयस्तस्मात्ततो निवर्त्तयेन्निराकुर्यात् । अथवा-समये स्वसिद्धान्ते, जैनागमेऽपीत्यर्थः । यदज्ञानद्वेषाऽऽदिदोषकलुषितेन परेण दोषबुद्ध्या किमपि जीवाऽऽदिकं वस्तु परिगृहीतं भवति, तदपि नयविधिज्ञो निवर्त्तयेत्-नयोक्तिनिर्गुणरूपतया तत्स्थापयेदित्यर्थः। अस्मात्कर्त्तव्यो नयविचार इति गाथा (द्रव्या) ऽर्थः ॥ २७४ ॥

आह-किं सर्वत्र सर्वदा सर्वोऽपि कर्तव्यो नयविचारः ?, न, इत्याह-

एएहिं दिट्ठिवाए, परूवणा सुत्त-अत्थकहणा य ।
इह पुण अणुजुगमो,अहिगारो तीहिं ओसन्नं ।२७५।

एभिर्नैगमाऽऽदिभिर्नयैः सप्रज्ञैर्दृष्टिवादे सर्ववस्तुप्ररूपणा सूत्राऽर्थकथना च, क्रियते इति शेषः । इह पुनः कालिकश्रुतेऽभ्युपगमो, नावश्यं नयैर्व्याख्या कार्या । यदि च-ओत्रपेक्षया नयविचारः क्रियते, तदा त्रिभिराद्यैरुत्सन्नं प्रायेणात्राधिकार इति निर्युक्तिगाथार्थः ॥ २७५ ॥

किमिति त्रिभिरेवाऽऽद्यनयैरिहाधिकारो, न शेषैः ?,इत्याह-

पायं संववहारो, ववहारं तीहिं तिहिं य जं ओए ।
तेण परिकम्मणत्थं, कालियसुत्ते तदहिगारो ॥२७६॥

सुगमा । नवरं शिष्यमतिपरिकर्मणार्थं तैः स्थूलसंव्यवहारार्थप्रतिपादकैरेव नैगमसंग्रहव्यवहारनयैरिहाधिकार इति गाथार्थः ॥ २७६ ॥

आह-नन्विह पुनर्नाभ्युपगम इत्यभिधाय पुनस्त्रिनयानुज्ञा किमर्थम् ?, इत्याह-

नत्थि नएहिं विहूणं, सुत्तं अत्थो य जिणमए किंचि ।
आसज्ज उ सोयारं, नए नयविसारओ बूया ॥२७७॥

सूत्रमर्थो वा नास्ति जिनमते नयैर्विहीनं किञ्चिदपि, तथाऽप्याचार्यशिष्याणां मतिमान्द्यापेक्षया सर्वनयविचारनिषेधः कृतः । विमलमतिं श्रोतारं पुनरासाद्य नयविशारदः सूरिः समनुज्ञातमात्रनयत्रयं शेषान् वा नयान् ब्रूयादिति निर्युक्तिगाथार्थः ॥ २७७ ॥

अत्र भाष्यम-

जासिज्ज वित्थरेण वि, नयमयपरिणामणासमत्थम्मि ।
तदसत्ते परिकम्मण-मेगनएणं पि वा कुज्जा ॥२७८॥

सुगमा । नवरं वाशब्दाद्व्यङ्गेन त्रयेण वा शिष्यमतिपरिक-

मेषां कुर्यात्, तथाविधमतिमान्यो तु नैकमपि नयं भावेत,इत्येतदपि द्रष्टव्यमिति ॥२२७७॥ तदेवमुक्तं नयद्वारम् । विशे० । अनु० ।

(३७) अथवा ज्ञानक्रियानयद्वये संग्रहाऽऽदीनां समवतारोऽतस्तत्स्वरूपमाह-

नाणाहीणं सव्वं, नाणनओ जणइ किं व किरियाए ।
किरियाए करणनओ, तदुभयगाहो य सम्मत्तं ।३५९१।

ज्ञानाधीनमेव सर्वमैहिकाऽऽमुष्मिकं सुखम्,किमत्र क्रियया कर्तव्यम् ? । युक्तिश्चेहानन्तरमेव वक्ष्यति । करणनयस्तु क्रियानयो वक्ष्यमाणयुक्तेरेव सर्वमैहिकाऽऽमुष्मिकं सुखं क्रियाया एवाऽऽधीनमिति ब्रुवते । उभयग्राहश्चेह सम्यक्त्वं स्थितपक्ष इति ॥ ३५९१ ॥ विशे० । आव० । सूत्र० । सम्म० । नि० चू० । अनु० । आचा० । आ० म० । विषा० । आ० चू० । (ज्ञानक्रियानयशब्दयोर्मतमनयोरवलोकनीयम् । ' अणुओग ' शब्दे प्रथमभागे ३५८ पृष्ठे, ' अज्जरक्खिय ' शब्दे २१४ पृष्ठे च नयानां पार्थक्यमार्यवैरेण कृतम्)

(३८) कैतेषां नयानां समवतारः, क वाऽनवतारः ?, इति संशयापनोदार्थमाह-

मूढनइयं सुयं का-लियं तु न नया समोयरंति इहं ।
अपुहत्तेँ समोयारो, नत्थि पुहत्ते समोयारो ॥२२७९॥

मूढा अविभागस्था नया यत्र तन्मूढनयं,तदेव मूढनयिकम्, किं तत् ?, कालिकं श्रुतम्-काले प्रथमचरमपौरुषीलक्षणे कालग्रहणपूर्वकं पठ्यत इति कालिकं, तत्र न नयाः समवतरन्त्यत्र प्रतिपदं न भण्यन्त इत्यर्थः । क्व पुनस्तर्हीमीषां समवतार आसीत्, कदा चाऽयमनवतारस्तेषामभूद् ?, इत्याह-(अपुहत्ते इत्यादि) चरणकरणाऽनुयोगधर्मकथाऽनुयोगगणिताऽनुयोगद्रव्याऽनुयोगानामपृथग्भावोऽपृथक्त्वं प्रतिसूत्रमविभागेन वक्ष्यमाणेन विभागाभावेन प्रवर्तनं प्ररूपणमित्यर्थः । तस्मिन्नपृथक्त्वे नयानां विस्तरेणाऽऽसीत् समवतारः । चरणकरणाऽऽद्यनुयोगानां पुनर्वक्ष्यमाणलक्षणे पृथक्त्वे नाऽस्ति समवतारो नयानाम्, भवति वा क्वचित्पुरुषापेक्षोऽसौ । इति निर्युक्तिगाथार्थः ॥ २२७९ ॥

भाष्यकारव्याख्या-

अविभागत्था मूढा, नय त्ति मूढनइयं सुयं तेण ।
न समोयरंति संता, पइप्पयं जं न जम्हंति ॥२२८०॥
अपुहत्तमेगभावो, सुत्ते सुत्ते सवित्थरं जत्थ ।
जम्हंतणुओगा चर-णधम्मसंखाण दव्वाणं ॥२२८१॥
तत्थेव नयाणं पि हु, पइवत्थुं वित्थरेण सव्वेसिं ।
देसिंति समोयारं, गुरवो नयणा पुहत्तम्मि ॥२२८२॥
एगो च्चिय देसिज्जइ, जत्थऽणुओगो न सेसया तिण्णि ।
संता वि तं पुहत्तं, तत्थ नया पुरिसमासज्ज ॥ २२८३ ॥

चतस्रोऽपि गतार्थाः,नवरं प्रथमगाथोत्तरार्द्धे यद्यस्मात्सन्तोऽपि प्रतिपदं न नयन्ते,अपृथक्त्वं किमुच्यते ?, इत्याह-एकभावः । एकभावमेव विवृणोति-(सुत्ते सुत्ते इत्यादि) यत्र सूत्रे सूत्रेऽनुयोगा व्याख्यानानि भण्यन्ते । केषाम् ? इत्याह-(चरणेत्यादि) संख्यानं गणितमुच्यते । ततश्चेदमत्र हृदयम्-यत्रैकैकस्मिन् सूत्रे चरणकरणाऽनुयोगः, धर्मकथानुयोगः, गणितानुयोगः, द्रव्यानुयोगश्च सविस्तरं व्याख्यायते, न तु वक्ष्यमाणेन पार्थक्येन तदपृथक्त्वमिति शेषः । पृथक्त्वं तु किमुच्यते ?, इत्याह-(एगो च्चिय इत्यादि) इदं च "कालियसुयं च" (२२९४) इत्यादिवक्ष्यमाणगाथायां व्यक्तीभविष्यतीति + ॥ २२८० ॥ २२८१ ॥ २२८२ ॥ २२८३ ॥

आह-कियन्तं कालं यावत्पुनरिदं पृथक्त्वमासीत् ?, कुतो वा पुरुषविशेषादारभ्य पृथक्त्वमभूदित्याह-

जावंति अज्जवइरा, अपुहुत्तं कालियाऽणुओगस्स ।
तेणाऽऽरेण पुहुत्तं, कालियसुय दिट्ठिवाए य ॥२२८४॥

यावदार्यवैरा गुरवो महामतयस्तावत्कालिकश्रुताऽनुयोगस्यापृथक्त्वमासीत्,तदा व्याख्यातॄणां श्रोतॄणां च तीक्ष्णप्रज्ञत्वात्। कालिकग्रहणं च प्राधान्यख्यापनार्थम्, अन्यथोत्कालिकेऽपि सर्वत्र प्रतिसूत्र चत्वारोऽप्यनुयोगास्तदानीमासञ्जेयेति । तदारतस्त्वार्यरक्षितेभ्यः समारभ्य कालिकश्रुते दृष्टिवादे चाऽनुयोगानां पृथक्त्वमभूत् । इति निर्युक्तिगाथार्थः ॥ २२८४ ॥

भाष्यम्-

अपुहुत्तमासि वइरा, जावं ति पुहुत्तमारओऽनिहिए ।
के ते आसि कया वा, पसंगओ तेसिमुप्पत्ती ॥२२८५॥

आर्यवैरात् यावदपृथक्त्वमासीत्, तदारतस्तु पृथक्त्वमुक्तम्; एतस्मिंश्चाऽभिहिते क एते आर्यवैराः, कदा च ते आसन् ? इति विनेयपृच्छायां प्रसङ्गत आर्यवैराणामुत्पत्तिरुच्यत इति गाथार्थः ॥२२८५॥ विशे० । (' अज्जरक्खिय ' शब्दे २१२ पृष्ठे सर्वं कृत्स्नम्)

नयविभागे विशेषतः कारणमाह-

सविसयसद्दट्ठंता, नयाण तम्मत्तयं च गिण्हंता ।
मन्नंता य विरोहं, अपरीणामाऽतिपरिणामा ॥२२९२॥
गच्छेज्ज मा हु मिच्छं,-परिणामा य सुहुमाइबहुनेए ।
होज्जाऽसत्ते घेत्तुं,न कालिए तो नयविभागो ॥२२९३॥

(सविसयेत्यादि) इह शिष्यास्त्रिविधाः । तद्यथा-अपरिणामाः, अतिपरिणामाः, परिणामाश्चेति । तत्राऽविपुलमतयोऽगीतार्था अपरिणतजिनवचनरहस्या अपरिणामाः । अतिव्युत्पन्नाऽपवाददृष्टयोऽतिपरिणामाः । सम्यक्परिणतजिनवचनास्तु मध्यस्थवृत्तयः परिणामाः । तत्र ये अपरिणामास्ते नयानां यः स्वः स्व आत्मीय आत्मीयो विषयो "ज्ञानमेव श्रेयः क्रिया चाऽश्रेयः" इत्यादिकः, तमश्रद्दधानाः। ये त्वतिपरिणामास्तेऽपि यदेवैकेन नयेन क्रियाऽऽदिकं वस्तु प्रोक्तं तदेव तन्मात्रं प्रमाणतया गृह्णन्त एकान्तनित्याऽऽदिकवस्तुप्रतिपादकनयानां च परस्परविरोधं मन्वाना मिथ्यात्वमागच्छेयुः,येऽप्युक्तस्वरूपाः परिणामाः शिष्यास्ते यद्यपि मिथ्यात्वं न गच्छन्ति, तथाऽपि विस्तरेण नयैर्व्याख्यायमानैर्ये सूक्ष्माः सूक्ष्मतराश्च तद्भेदाः,तान् गृहीतुमशक्ता असमर्था भवेयुरिति मत्वा तत आर्यरक्षितसूरिभिः कालिकश्रुतस्योपलक्षणत्वात्सर्वस्मिन्नपि श्रुते नयविभागो विस्तरव्याख्यारूपो न कृत इति गाथा (त्रया) र्थः ॥२२९२॥ ॥२२९३॥ विशे० । आ० चू० । आ० क० । आ० म० । अभिप्रायविशेषे, चं० प्र० १ पाहु० । आ० म० । न्याये, औ० । नीतौ च । विशे० ।

+ इयं च गाथा ग्रन्थतोऽत्रैवेया, नेह गृहीता ।

(३६) तमेव नयमष्टप्रकारमाह—

आलोयणा य विणए, खेत्त दिसाऽभिग्गहे य काले य।
रिक्खगुणसंपदा वि य, अभिवाहारे य अट्ठमए ।३३९६।

इहाऽऽभिमुख्येन गुरोरात्मदोषप्रकाशनमालोचना; विनयश्च बाह्य आसनदानाभ्युत्थानाऽऽदिः, अन्तरङ्गस्तु बहुमानाऽऽदिः; तथा क्षेत्रमिक्षुक्षेत्राऽऽदि, तथा दिगभिग्रहश्च वक्ष्यमाणलक्षणः, कालश्च दिवसाऽऽदिः, तथा ऋक्षसंपन्नत्वसंपदिति, गुणाः प्रियधर्मत्वाऽऽदयः, तत्संपत्प्राप्तिरिति; अभिव्याहरणमभिव्याहारः कालिकाऽऽदिश्रुतविषय उद्देशसमुद्देशाऽऽदिरिति। अयं चाऽष्टमो नय इति निर्युक्तिगाथासंक्षेपार्थः ॥३३९६॥ विशे० । आ० म० । औ० । (आलोचनाऽऽदिनयानां विवरणं 'सामाइय' शब्दे दर्शयिष्यामि) द्यूतभेदे, कर्त्तरि अच्। नेतरि, न्याय्ये च । त्रि० । वाच० ।

णयकप्प–नयकल्प–पुं० । नयतत्त्वसमाचारे, पं० चू० ।

....., णयकप्पमियाणि वोच्छामि ॥

सव्वेसिं पि णयाणं, आदेसणयंतरं पि सट्ठाणे।
एस णयंतरकप्पो, पुव्वभणएँ विसाखमादीसुं ॥
सव्वे वि णेगमाऽऽदी, आदिस्सति जो णयो स आदेसो।
णयतो अण्हो वि णओ, णयंतरं होति णायव्वं ॥
सट्ठाणे सट्ठाणे, सव्वे बलिया हवंति सव्विमए।
एसो णयकप्पो तू, पुव्वगतम्मी समक्खाओ ॥
उप्पयपुव्व विसाखं, तमादि काउं तु सव्वपुव्वेसु।
जाणतो तु णयविजागो, पच्छं चोदेति अह सीसो ॥
कम्हा कालियसुत्ते, ण णया तु समोयरंति हु कहं वा ?।
नयविगप्पे होति साहण–मोक्खस्स तु भणहति सुणाहि ॥
णयवज्जिओ वि हु अत्थं, दुक्खक्खयकारओ जतिजणस्स।
चरणकरणाणुओगो, तेण उ पढमं कयं दारं ॥
आयारपकप्पधरो, कप्पव्ववहारधारओ अज्जो !।
णयसुत्तवज्जिओ वि हु, गणपरियट्टी अणुण्हातो ॥
पच्छित्तकरण अणुपा–लणा य जणिता उ कप्पववहारे।
एतेण सत्थधारी, गणधारी जो चरणधारी ॥
अज्जो ! त्ति आमंतण–णिद्देसे वा णयस्स सुत्ताइं।
जातिं तु दिट्ठिवाते, पच्छित्तं दिज्जते तह तु ॥
तेहिं विणा विजाणति, आयारपकप्पधारओ जम्हा।
तम्हा तु अणुण्हातो, गणपरियट्टी तु सो णियमा ॥
करणाऽणुपालयाखं, पज्जवकसिणं समासतो णाणं।
करणाऽणुपालणजुतं, पज्जवकसिणं भवे तिविहं ॥
दु–त्ति–पण–चुक्कणयं–तरेसु सोलस हवंति ठाणाइं।
करणट्ठाणपमत्था, करणट्ठाणा उ अपमत्था ॥
एयाइं ठाणाइं, दोहि वि गाहाहिँ जाइँ भणिताइं।
तेसि परूवणमिणमो, समासतो होति बोधव्वा ॥
करणं तु किया होती, पडिलेहणमादि सामयारी तु।
तं पालेज्ज तु णाणे–ण तं च दुविहं मुणेयव्वं ॥ दारं।

पज्जवकसिणं समासो, पज्जवकसिणं तु चोद्दसं पुव्वा।
सामासियं पकप्पो, होति समासो मुणेयव्वो ॥
पज्जवकसिणं तिविहं, सुत्ते अत्थे य तदुभए चेव।
एमेव समासो वि हु, तेहिँ तु पाखिज्जए चरणं ॥
तस्स णएहिं मग्गण, ते उ समासेण होंति दुविहा तु।
दव्वट्ठपज्जवट्ठिय–णया उ अविसेसियविसिट्ठा ॥
वण्हादिसमुदियं तू, दव्वट्ठी दव्वमिच्छते णियमा।
तं चेव पज्जवणओ, दव्वाइविसेसियं इच्छे ॥
अहवा वि तिण्हि वि णया, दव्वट्ठिय-पज्जवट्ठिय-गुणट्ठी।
पज्जायविसेस चिय, सुहुमतरागा गुणा होंति ॥
एगगुणकालगाऽऽदिसु, परिसंखगुणट्ठितो तु णायव्वो।
दव्वा उ गुणा णण्हे, गुणा विसेस त्ति एगट्ठा ॥
आदिण्हे तिण्हि तु णया, एक्को वितिओ य होति उज्जुसुओ।
सद्दादि तिण्हि चेक्को, तिण्हि णया होंति एवं वा ॥
अहवा णिग्गमसंगह–ववहारुज्जुसुएँ होंति चउरेते।
सद्दणया तिण्हि एक्को, पंच णया होंति एवं तु ॥
अहवा वि होज्ज छक्कं, णेगमो संगाहिगो असंगाही।
संगहिगो संगहं तू, ववहारपविट्ठऽसंगाही ॥
तम्हा तु संगहणओ, ववहारो चेव होति उज्जुसुओ।
सद्दो य समभिरूढो, एवंभूतो य छ त्तु णया ॥
एतेहिं पुण सव्वे, वी दुग–तिग–पण–छक्क-मेलिया संता।
सोलस णयंतराइं, समासओ होंति एयाइं ॥
जदि कुणति दवियकप्पं, एतेहिँ णयंतरेहिँ तु विसुद्धं।
करणट्ठाणेँ पसत्था, ते खलु होंती मुणेयव्वा ॥
अकरंते अपसत्था, कप्पे स णयंतरे समक्खाओ। पं०भा०।

इयाणिं नयंतरकप्पो-गाहा-(सव्वेसिं पि नयाणं) आदेसनओ-जो जाणओ आइस्सइ। नयंतरं नाम-नयाओ नयस्स अंतरं। एस णयंतरकप्पो पुव्वभणए भणिओ विसाखादिसु, उप्पयपुव्वमेव विसाखं। तत्थ किर सव्वाणि वि आकरिसिज्जंति। आह-कालियसुत्ते कम्हा नया न समोयरंति ?। उच्यते-(नयवज्जिओ वि हु अत्थं गाहा) सिद्धम्, नया-इति कोऽर्थः ?, नयन्तीति नयाः। अथवा-नयः नीतिमार्गः, पन्थाः, दृष्टिग्राहक इत्यर्थः। ते च नैगमाऽऽद्याः जीवाऽऽदयः पदार्थाः विविधैः प्रकारैः नयन्ति व्यवहारयंति उपदर्शयन्तीत्यर्थः। तेषां च दृष्टिवादे समवतारः। आह-अस्मिन् चरणकरणाऽनुयोगनयवादेऽप्यनभिज्ञानां कथं चरणविशुद्धिर्भवति ?। उच्यते-श्रूयताम्। (आयारपकप्पधरो गाहा) आचरणमाचारः, क्रिया इत्यर्थः। स चाऽष्टप्रकारः-पञ्चसमितयः, गुप्तित्रयम्। एष चारित्राचारः। आचारप्रकल्पधरो नाम-निशीथेषु सूत्रार्थधर इत्यर्थः। किं च-कल्पव्यवहारधरश्च। अज्जो ! त्ति आमन्त्रणे निर्देशो वा (नयसुत्तवज्जिओ त्ति) नयन्तीति नयाः, हुः पादपूरणे। दुक्खक्खयकारओ जम्हा एवं गणपरियट्टी अणुण्हाओ। आह-कथमनुज्ञातः ?। गाहा-(रिच्छित्तकरण) जम्हा पायच्छित्तकरणं अणुपालयंति, तम्हा [illegible]

अणुपालिज्जइ, तं पकप्पयकप्पववहारेसु भणियं,एएण सत्थधारी जो सो गणपरियट्टी अणुण्णाओ चरणजुत्तो जइ भवइ । गाहा-(करणाणुपालगाणं) तं छुविहं-पज्जवकसिणं, समासतश्च । पज्जवकसिणं नाम-चोद्दसपुव्वाणि समासओ आयारपकप्पो, समासः संक्षेप इत्यर्थः । यथा समुरुभूतस्तडागः, चन्द्रमुखी देवदत्ता, सिंहो माणवकः; एकदेशेनाप्यौपम्यं क्रियते । चतुर्दशपूर्वधरः, सर्वपर्यायेषु सूत्रार्थेषु ये चरणकरणाऽऽदयः पदार्थाः, तान् प्रज्ञापयितुं समर्थः । आचारकल्पधरस्त्वेकदेशतः । दोण्हवि चरणकरणं अणुपालेउं समत्था । तेनैकदेशाऽभिज्ञत्वं प्रतीत्य यथा समासतोऽप्यर्थधराः कल्पव्यवहाराऽऽदयो गणपरिपालनसमर्था भवन्ति । (पज्जवकसिणं तिविहं, सुत्ते अत्थे य तदुभए चेव) गाहा-(तिग-पणग) तिगं ति दव्वट्ठियपज्जवट्ठियगुणट्ठिया । अहवा-नेगमसंगहववहारा एगं चेव, उज्जुसुओ विइओ, तइओ सद्दो । अहवा पंचनेगमसंगहववहारा, उज्जुसुओ, सद्दो (छक्को त्ति) नेगमो छुविहो-संगहिओ, असंगहिओ य । संगहिओ संगहं पविट्ठो, असंगहिओ ववहारे । एए छ भवंति । एएसु नयंतरेसु सोलस ठाणाइं भवंति । कयराइं ताइं सोलस ?। उच्यते-छव्विहकप्पे सोलस सोलसविहो अज्जावदवियकप्पो । आहाराइ जीवकप्पं न सोहणे त्ति । एयाइं जइ करेंतो करणट्ठाणाइं पसत्थाइं, अकरेंतस्स ताणि चेव अप्पसत्थाणि । एस नयकप्पो । पं० चू० ।

णयगइ-नयगति-स्त्री० । नयानां सर्वेषां परस्परसापेक्षाणां प्रमाणाबाधितवस्तुव्यवस्थापने,नैगमाऽऽदीनां नयानां स्वस्वमतपोषणे च । प्रज्ञा० १६ पद ।

णयचंदसूरि-नयचन्द्रसूरि-पुं० । हम्मीरमहाकाव्यरम्भामञ्जर्य्याद्यनेकग्रन्थकर्तुर्य्याचार्यें, जै० इ० ।

णयचक्क-नयचक्र-न० । दिगम्बरदेवसेनकृते नयप्रतिपादके शास्त्रे, द्रव्या० ८ अध्या० । पूर्वविद्भिः सकलनयसंग्राहीणि सप्तनयशतान्युक्तानि, यत्प्रतिपादकं सप्तशतारं नयचक्राध्ययनमासीत्। उक्तं च-"इक्केको य सयविहो,सत्त नयसया हवंति एमेव।" (२२६४) इत्यादि । सप्तानां च नयशतानां संग्राहकाः पुनरपि विध्यादयो द्वादश नयाः, यत्प्ररूपकमिदानीमपि द्वादशारं नयचक्रमस्ति । अनु० ।

णयण-नयन-न० । नी-ल्युट् । प्रापणे,आ०म० १ अ० १ खण्ड । उत्त० । करणे ल्युट् । नीत्वा निवेशने,पं० सं० ५ द्वार । विशे० । लोचने, प्रश्न० १ आश्र० द्वार । को० । "वाऽक्ष्यर्थचचनाऽऽद्याः" ॥ ८।१।३३ ॥ इति नयनशब्दस्य प्राकृते स्त्रीत्वमपि-" नयना नयनाइं " प्रा० १ पाद ।

णयणकीया-नयनकीका-स्त्री० । नेत्रमध्यतारायाम्, रा० । ज्ञा० । औ० ।

णयणभूसणकर-नयनभूषणकर-त्रि० । ६ त० । नेत्राऽऽनन्दकरे, नयनयोर्हि आनन्द एव भूषणम् । कल्प० ३ क्षण ।

णयणमाला-नयनमाला-स्त्री० । श्रेणीभूतजननेत्रपङ्क्तौ, भ० ६ श० ३३ उ० ।

णयणविस-नयनविष-न० । दृष्टिविषे, रोषे, ज्ञा० १ श्रु० ६ अ० । भ० ।

णयणामय-नयनामय-पुं० । कामलाऽऽदौ नेत्ररोगे, व्य० ६ उ० ।

णयणिउण-नयनिपुण-त्रि० । नैगमाऽऽदिषु नयेषु निपुणे, सम्म० । नयनिपुणतया नयवक्तव्यताऽवसरे सम्यक्सप्रपञ्चमेव-विकल्पेन नयानभिधत्ते । सम्म० १ काण्ड ।

णयणु-नयज्ञ-त्रि० । सर्वनयरहस्यविज्ञे, अष्ट० ३२ अष्ट० ।

णयप्पमाण-नयप्रमाण-न० । नया नैगमाऽऽदयः सप्त, द्रव्यास्तिकपर्यायास्तिकभेदात् । ज्ञाननयक्रियानयभेदाद् वा द्वौ तौ एतावेव वा प्रमाणं वस्तुतत्त्वपरिच्छेदनं नयप्रमाणम् । आपेक्षिकप्रमाकरणे, स० ५ अङ्ग । (प्रस्थाऽऽदिदृष्टान्तैर्नयप्रमाणं 'णय' शब्दे १८७६ पृष्ठे उक्तम्)

णयप्पहाण-नयप्रधान-त्रि० । नैगमाऽऽदिभिः सप्तभिः प्रत्येकं शतविधैर्नयैः शेषजनप्रधाने, यस्य वा नयाः प्रधानास्तस्मिन्, रा० ।

णयररक्खणपुर-नगररक्षणपुर-न० । नासिक्यपुरस्थानभेदे, ती० २७ कल्प ।

णयरवल्लीवद्द-नगरवल्लीवर्द-पुं० । वर्द्धितगवे, विपा० १ श्रु० २ अ० ।

णयरी-नगरी-स्त्री० । राजधानीकल्पे नगरे,यथा-आमलकल्पा। (रा०) चम्पा । औ० । सू० प्र० ।

णयविजय-नयविजय-पुं० । तपागच्छे श्रीविजयदेवसूरिवराणां शिष्ये यशोविजययोपाध्यायगुरौ, श्रीहीरविजयसूरिशिष्यकल्याणविजयशिष्यलाभविजयशिष्यजीतविजयसतीर्थ्ये स्वनामख्याते आचार्ये, ष्ठा० ।

" प्रकाशार्थं पृथ्वीस्तरणिरुदयाद्रेरिह यथा,
यथा वा पाथोभूत्सकलजगदर्थं जलनिधेः ।
तथा वाराणस्याः सविधमनजन् ये मम कृते,
सतीर्थ्यास्ते तेषां नयविजयविज्ञा विजयिनः " ॥ ५ ॥ (इति यशोविजयोक्तेः) द्वा० ३२ द्वा० । प्रति० । अष्ट० । नय० ।

णयविहि-नयविधि-पुं० । नैगमसंग्रहव्यवहारर्जुसूत्रशब्दसमभिरूढैवंभूतेषु नयभेदेषु, उत्त० २८ अ० ।

णयविहिण्णु-नयविधिज्ञ-त्रि० । नैगमाऽऽदीनां नयानां नीतीनां वा प्रकारज्ञे, ज्ञा० १ श्रु० १ अ० ।

णयसार-नयसार-पुं० । प्रथमभवे पश्चिममहाविदेहे स्वनामख्याते वीरस्वामिजीवे, कल्प० २ क्षण । आ० क० ।

णयाभास-नयाऽऽभास-पुं० । नयान्तरनिरपेक्षे नये दुर्नये,आ० म० १ अ० २ खण्ड । स्वाभिप्रेतादंशादितरांशापलापिनि नये, स्या० ।

नयाऽऽभासं दर्शयन्ति—

स्वाभिप्रेतादंशादितरांशापलापी पुर्नयाऽऽभासः ॥ २ ॥

पुनःशब्दो नयाद् व्यतिरेकं द्योतयति । नयाऽऽभासो नयप्रतिबिम्बाऽऽत्मा दुर्नय इत्यर्थः । यथा तीर्थिकानां नित्याऽनित्याऽऽद्येकान्तप्रदर्शकं सकलं वाक्यमिति ॥ २ ॥ (रत्ना०)

अथ नैगमाऽऽभासमाहुः-

धर्मद्वयाऽऽदीनामैकान्तिकपार्थक्यानिसन्धिर्नैगमाऽऽभासः ॥ ११ ॥

आदिशब्दाद् धर्मिद्वयधर्मधर्मिद्वययोः परिग्रहः । ऐकान्तिकपार्थक्याभिसन्धिरैकान्तिकनेदाऽभिप्रायो नैगमाऽऽभासो नैगमदुर्नय इत्यर्थः ॥ ११ ॥

अत्रोदाहरन्ति-

यथाऽऽत्मनि सत्त्वचैतन्ये परस्परमत्यन्तं पृथग्भूते इत्यादिः ॥ १२ ॥

आदिशब्दाद्धस्त्वाख्यपर्यायवद् द्रव्याऽऽख्यस्योर्ध्वमूर्मिणोः सुखज्ञानलक्षणयोर्धर्मधर्मिणोश्च सर्वथा पार्थक्येन कथनं तदाभासत्वेन द्रष्टव्यम् । नैयायिकवैशेषिकदर्शनं चैतदाभासतया ज्ञेयम् ॥ १२ ॥ (रत्ना०)

संग्रहाऽऽभासमाहुः-

सत्ताऽद्वैतं स्वीकुर्वाणः सकलविशेषाण्यिराचक्षाणस्तदाभासः ॥ १७ ॥

अशेषविशेषेष्वौदासीन्यं भजमानो हि परामर्शविशेषः संग्रहाख्यां लभते, न चाऽयं तथेति तदाभासः ॥ १७ ॥

उदाहरन्ति-

यथा सत्त्वमेव तत्त्वं ततः पृथग्भूतानां विशेषाणामदर्शनात् ॥ १८ ॥

अद्वैतवादिदर्शनान्यखिलानि साङ्ख्यदर्शनं चैतदाभासत्वेन प्रत्येयम् । अद्वैतवादस्य सर्वस्याऽपि दृष्टेष्टाभ्यां विरुध्यमानत्वात् ॥ १८ ॥ (रत्ना०)

व्यवहाराऽऽभासं वर्णयन्ति-

यः पुनरपारमार्थिकऊव्यपर्यायविभागमभिमैति स व्यवहाराभासः ॥ २५ ॥

यः पुनः परामर्शविशेषः कल्पनाऽऽरोपितऊव्यपर्यायप्रविवेकं मन्यते, सोऽत्र व्यवहारदुर्नयः प्रत्येयः ॥ २५ ॥

उदाहरन्ति-

यथा चार्वाकदर्शनम् ॥ २६ ॥

चार्वाको हि प्रमाणप्रतिपन्नं जीवऊव्यपर्यायाऽऽदिप्रविभागं कल्पनाऽऽरोपितत्वेनापह्नुते, अविचारितरमणीयं भूतचतुष्टयप्रविभागमात्रं तु स्थूललोकव्यवहारानुयायितया समर्थयत इत्यस्य दर्शनं व्यवहारनयाऽऽभासतयोपदर्शितम् ॥ २६ ॥ (रत्ना०)

ऋजुसूत्राऽऽभासं ब्रुवते-

सर्वथा ऊव्यापलापी तदाभासः ॥ ३० ॥

सर्वथा गुणप्रधानभावाभावप्रकारेण तदाभास ऋजुसूत्राऽऽभासः ॥ ३० ॥

उदाहरन्ति-

यथा तथागतमतम् ॥ ३१ ॥

तथागतो हि प्रतिक्षणविनश्वरान् पर्यायानेव पारमार्थिकतया समर्थयते, तदाधारभूतं तु प्रत्यभिज्ञाऽऽदिप्रमाणप्रसिद्धं त्रिकालस्थायि ऊव्यं तिरस्कुरुत इत्येतन्मतं तदाभासतयोदाहृतम् ॥ ३१ ॥ (रत्ना०)

शब्दाऽऽभासं ब्रुवते-

तल्लेदेन तस्य तमेव समर्थयमानस्तदाभासः ॥ ३४ ॥

तल्लेदेन कालाऽऽदिभेदेन तस्य ध्वनेस्तमेवार्थनेदमेव, तदाभासः शब्दाभासः ॥ ३४ ॥

उदाहरन्ति-

यथा बभूव भवति भविष्यति सुमेरुरित्यादयो भिन्नकालाः शब्दा भिन्नमेवाऽर्थमभिदधति, भिन्नकालशब्दत्वात्, तादृक्सिन्धुशब्दवदित्यादिः ॥ ३५ ॥

अनेन हि तथाविधपरामर्शोत्थेन वचनेन कृतनायऽऽदिनेदाङ्गीकृतस्यैवाऽर्थस्याऽभिधायकत्वं शब्दानां व्यञ्जितम् । एतच्च प्रमाणविरुद्धमिति तद्वचनस्य शब्दनयाऽऽभासत्वम् । आदिशब्देन करोति क्रियते कट इत्यादिशब्दनयाभासोदाहरणं सूचितम् ॥ ३५ ॥ (रत्ना०)

समभिरूढनयाऽऽभासमाभाषन्ते-

पर्यायध्वनीनामभिधेयनानात्वमेव कक्षीकुर्वाणस्तदाभासः ॥ ३७ ॥

तदाभासः समभिरूढाऽऽभासः ॥ ३७ ॥

उदाहरन्ति-

यथेन्द्रः शक्रः पुरन्दर इत्यादयः शब्दा भिन्नाऽभिधेया एव, भिन्नशब्दत्वात्, करिकुरङ्गतुरङ्गशब्दवदित्यादिः ॥ ३७ ॥ [रत्ना०]

एवंभूताऽऽभासमाचक्षते-

क्रियाऽनाविष्टं वस्तु शब्दवाच्यतया प्रतिक्षिपंस्तु तदाभासः ॥ ४२ ॥

क्रियाऽऽविष्टं वस्तु ध्वनीनामभिधेयं प्रतिजानानोऽपि यः परामर्शस्तदनाविष्टं तत्तेषां तथा प्रतीतिमिति न तूपेक्षते, स एवंभूतनयाऽऽभासः, प्रतीतिविघातानाऽपि२ ॥

उदाहरन्ति-

यथा विशिष्टचेष्टाशून्यं घटाऽऽख्यं वस्तु न घटशब्दवाच्यं, घटशब्दप्रवृत्तिनिमित्तभूतक्रियाशून्यत्वात्, पटवदित्यादिः ॥ ४३ ॥

अनेन हि वचसा क्रियाऽनाविष्टस्य घटाऽऽदेर्वस्तुनो घटाऽऽदिशब्दवाच्यतानिषेधः क्रियते, स च प्रमाणबाधित इति तद्वचनमेवंभूतनयाऽऽभासोदाहरणतयोक्तम् ॥४३॥ रत्ना० ७ परि० ॥

णर–नर–पुं० । नृणन्ति विवेकमासाद्य नयधर्मपरा भवन्तीति नराः । कर्म० ४ कर्म० । "वाऽऽदौ" । ८ । १ । २२६ । असंयुक्तस्याऽऽदौ वर्तमानस्य नस्य णः । इति नस्य णः । प्रा० १ पाद । मनुष्ये, आ० म० १ अ० २ खण्ड । आचा० औ० । प्रज्ञा० । कर्म० । रा० । नराश्चतुर्विधाः-सम्मूर्छिमाः, कर्मभूमिकाः, अकर्मभूमिकाः, अन्तर्भूमिकाः । आ० म० १ अ० १ खण्ड । सामान्यमनुष्ये, सूत्र० १ श्रु० २ अ० १ उ० । रा० । प्राकृतपुरुषे, शास्त्रावबोधविकले, सूत्र० १ श्रु० १ अ० ३ उ० । पुरुषे, सूत्र० १ श्रु० २ अ० ३ उ० । पुंसि, ध० १ अधि० । औ० ।

णरउसभ–नरवृषभ–पुं० । अङ्गीकृतकार्यभरनिर्वाहकत्वाद् वृषभोपमिते नरे, औ० ।

णरकंतप्पवाय–नरकान्तप्रपात–पुं० । जम्बूद्वीपे मन्दरस्योत्तरतो रम्यकवर्षे नरकान्तानद्या उद्गमप्रपातह्रदे, स्था० २ ठा० ३ उ० ।

णरकंता–नरकान्ता–स्त्री० । रम्यकवर्षे पूर्वाऽर्णवगामिन्यां महानद्याम्, जं० ४ वक्ष० । नरकान्ता महापुण्डरीकह्रदाद्दक्षिणतोरणेन विनिर्गत्य रम्यकवर्षे भजतीति हरिकान्तातुल्यवक्तव्या पूर्वसमुद्रमधिगता । स्था० २ ठा० ३ उ० । रा० । जं० । स० ।

णरकंताकूड–नरकान्ताकूट–न० । जम्बूद्वीपे मन्दरस्य पर्वतस्योत्तरेण रुक्मिवर्षधरपर्वतस्य चतुर्थे कूटे, स्था० ७ ठा० ।

णरकिंदग–नरकेन्द्रक–पुं० । सीमान्तकाऽऽदिषु नरकवरेषु, स्था० ६ ठा० ।

णरग–नरक–पुं० । नरान् कायन्ति शब्दयन्ति योग्यतायां अनतिक्रमेणाऽऽकारयन्ति जन्तून् स्वस्वस्थाने इति नरकाः । नं० आ० म० । 'कै' 'शै' 'रै' शब्दे इति धातोः नरान् शब्दयन्तीत्यर्थः । आव० १ अ० । पापकर्मिणां यातनास्थानेषु, सूत्र० २ श्रु० १ अ० । निरये, स्था० ४ ठा० १ उ० । रत्नप्रभाऽऽदिषु नारकोत्पत्तिस्थानेषु, उत्त० ३ अ० ।

(१) नरकपदनिक्षेपार्थं निर्युक्तिकृदाह—

णिरए णक्कं दव्वं, णिरयाउ इहेव जे जवे असुभा ।
खेत्तं णिरओगासो, काओ णिरएसु चेव ठिई ॥ ६४ ॥
भावे उ णिरयजीवा, कम्मुदओ चेव णिरयपाओग्गो ।
सोऊण णिरयदुक्खं, तवचरणे होइ जइयव्वं ॥ ६५ ॥

"णिरए णक्कं" इत्यादि गाथाद्वयम् । तत्र नरकशब्दस्य नामस्थापनाऽऽद्यक्षेत्रकालभावभेदात् षोढा निक्षेपः । तत्र नामस्थापने क्षुण्णे । द्रव्यनरक आगमतः, नोआगमतश्च । आगमतो ज्ञाता, तत्र चाऽनुपयुक्तः । नोआगमतस्तु ज्ञशरीरभव्यशरीरव्यतिरिक्तः । इहैव मनुष्यभवे, तिर्यग्भवे, केचनाऽशुभकारित्वादशुभाः सत्त्वाः कालकसौकरिकाऽऽदय इति । यदि वा-यानि कानिचिदशुभानि स्थानानि चारकाऽऽदीनि, याश्च नरकप्रतिरूपा इमाः, ताः सर्वा द्रव्यनरका इत्यभिधीयन्ते । यदि वा-कर्मनोकर्मद्रव्यभेदाद् द्रव्यनरको द्वेधा-तत्र नरकवेद्यानि यानि बद्धानि कर्माणि तानि चैकभविकस्य बद्धायुष्कस्याऽभिमुखनामगोत्रस्य चाऽऽश्रित्य द्रव्यनरको भवति । नोकर्मद्रव्यनरकस्त्विहैव येऽशुभा रूपरसगन्धवर्णशब्दस्पर्शा इति ॥ क्षेत्रनरकस्तु नरकावकाशकालमहाकालरौरवमहारौरवप्रतिष्ठानाऽभिधानाऽऽदिनरकाणां चतुरशीतिलक्षसंख्यानां विशिष्टो भूभागः ॥ कालनरकस्तु यत्र यावती स्थितिरिति ॥ भावनरकस्तु ये जीवा नरकाऽऽयुष्कमनुभवन्ति । तथा नरकप्रायोग्यः कर्मोदय इति । एतदुक्तं भवति-नरकान्तर्वर्तिनो जीवास्तथा नरकाऽऽयुष्कोदयाऽऽपादिताऽसातावेदनीयाऽऽदिकर्मोदयाश्चैतद् द्वितयमपि भावनरक इत्यभिधीयते । तदेवं श्रुत्वाऽवगम्य तीव्रमसह्यं नरकदुःखं क्रकचपाटनकुम्भीपाकाऽऽदिकं परमाऽधार्मिकाऽऽपादितं परस्परोदीरणाकृतं स्वाभाविकं च, तपश्चरणे संयमाऽनुष्ठाने नरकपातपरिपन्थिनि स्वर्गापवर्गगमनैकहेतौ वाऽऽत्महितमिच्छता प्रयतितव्यम्-परित्यक्तान्यकर्तव्येन यत्नो विधेय इति । सूत्र० १ श्रु० ५ अ० १ उ० । नरकविभक्तिः समाप्ता ।

(२) नरकपृथिव्यः सप्त-

रयणप्पभा, सक्करप्पभा, वालुकप्पभा, पंकप्पभा, धूमप्पभा, तमप्पभा, तमतमप्पभा । प्रज्ञा० २ पद ।

(३) साम्प्रतं पृथ्वीनामगोत्रं वक्तव्यम्-

पढमा णं भंते ! पुढवी किंनामा ?, किंगोत्ता पण्णत्ता ?। गोयमा ! घम्मा नामेणं, रयणप्पभा गोत्तेणं । दोच्चा णं भंते ! पुढवी किंनामा किंगोत्ता पण्णत्ता ?। गोयमा ! वंसा नामेणं, सक्करप्पभा गोत्तेणं । एवं एतेणं अभिलावेणं सव्वासिं पुच्छा । नामाणि इमाणि-सेला तच्चा, अंजणा चउत्थी, रिट्ठा पंचमी, मघा छट्ठी, माघवती सत्तमी । बालुयप्पभा० जाव तमतमप्पभा गोत्तेणं पण्णत्ता ।

तत्र नामगोत्रयोरयं विशेषः-अनादिकालप्रसिद्धमन्वर्थरहितं नाम, सान्वर्थं नाम गोत्रमिति । तत्र नामगोत्रप्रतिपादनार्थमाह-(इमा णं भंते ! इत्यादि) इयं भदन्त ! रत्नप्रभा पृथिवी किंनामा किमनादिकालप्रसिद्धान्वर्थरहितनामा ?, किंगोत्रा किमन्वर्थयुक्तनामगोत्रा ?। भगवानाह-गौतम ! नाम्ना घर्मेति प्रज्ञप्ता, गोत्रेण रत्नप्रभा । तथा चात्रान्वर्थमुपदर्शयन्ति पूर्वसूरयः-रत्नानां प्रभा बाहुल्यं यत्र सा रत्नप्रभा, रत्नबहुलेति भावः । एवं शेषसूत्राण्यपि प्रतिपृथिवीप्रश्ननिर्वचनरूपाणि भावनीयानि । नवरं शर्कराप्रभाऽऽदीनामियमन्वर्थभावना-शर्कराणां प्रभा बाहुल्यं यत्र सा शर्कराप्रभा । एवं बालुकाप्रभा, पङ्कप्रभा इत्यपि भावनीयम् । तथा धूमस्येव प्रभा यस्यां सा धूमप्रभा । तथा तमसः प्रभा बाहुल्यं यत्र सा तमःप्रभा, तमस्तमसः प्रकृष्टतमसः प्रज्ञा बाहुल्यं यत्र सा तमस्तमःप्रज्ञा ।

अत्र केषुचित् पुस्तकेषु संग्रहणी गाथे-

"घम्मा वंसा सेला, अंजण रिट्ठा मघा य माघवती ।
सत्तएहं पुढवीणं, एए नामा उ नायव्वा ॥ १ ॥
रयणा सक्कर-वालुय-पंका धूमा तमा तमतमा य ।
सत्तएहं पुढवीणं, एए गोत्ता मुणेयव्वा" ॥ २ ॥

(४) अधुना प्रतिपृथिवीबाहल्यमभिधित्सुराह-

इमा णं भंते ! रयणप्पभा पुढवी केवतिया बाहल्लेणं पण्णत्ता ?। गोयमा ! इमा णं रयणप्पभा पुढवी असीउत्तरं जोयणसयसहस्सं बाहल्लेणं पण्णत्ता ।

एवं एतेणं अभिलावेणं इमा गाथा अणुगंतव्वा-

"आसीतं बत्तीसं, अट्ठावीसं तहेव वीसं च ।
अट्ठारस सोलसगं, अट्ठुत्तरमेव हेट्ठिमया" ॥१॥

(इमा णं भंते ! इत्यादि) इयं भदन्त ! रत्नप्रभा पृथिवी कियद् बाहल्येन प्रज्ञप्ता ?। अत्र गोत्रेण प्रश्नो नाम्नो गोत्रं प्रधानम्, न च प्रश्नोपपन्नमिति न्यायप्रदर्शनार्थः । उक्तं च-"न हीना वाग् सदा सतामिति ।" भगवानाह-अशीत्युत्तरम्-अशीतियोजनसहस्राभ्यधिकं योजनशतसहस्रं बाहल्येन प्रज्ञप्ता । एवं सर्वाण्यपि सूत्राणि भावनीयानि ।

अत्र संग्रहणी गाथा-

"आसीयं बत्तीसं, अट्ठावीसं तहेव वीसं च ।
अट्ठारस सोलसगं, अट्ठुत्तरमेव हेट्ठिमया ॥ १ ॥"

(५) काण्डानि-

इमा णं भंते ! रयणप्पभा पुढवी कतिविधा पण्णत्ता ?। गोयमा ! तिविधा पण्णत्ता । तं जहा-खरकंडे, पंकबहुले कंडे, आवबहुले कंडे ।

(इमा णं भंते ! इत्यादि) इयं भदन्त ! रत्नप्रभा पृथिवी कतिविधा कतिप्रकारा-कतिविभागा प्रज्ञप्ता ?। भगवानाह-गौतम ! त्रिधा त्रिविभागा प्रज्ञप्ता । तद्यथा-(खरकंडमित्यादि) काण्डं नाम-विशिष्टो भूभागः, खरं कठिनं पङ्कबहुलमब्बहुलं चान्वर्थतः प्रतिपत्तव्यम् । क्रमश्चैतेषामेवमेव । तद्यथा-प्रथमं खरकाण्डं, तदनन्तरं पङ्कबहुलं, ततोऽब्बहुलमिति ।

(६) खरकाण्डवक्तव्यतामाह-

इमीसे णं भंते ! रयणप्पभाए पुढवीए खरकंडे कतिविधे पण्णत्ते ?। गोयमा ! सोलसविधे पण्णत्ते । तं जहा-रयणे, वइरे, वेरुलिए, लोहितक्खे, मसारगल्ले, हंसगब्भे, पुलए, सोगंधिए, जोतिरसे, अंजणे, अंजणपुलए, रयते, जातरूवे, अंके, फलिहे, रिट्ठे कंडे ॥

(इमीसे णं भंते ! इत्यादि) अस्यां भदन्त ! रत्नप्रभायां पृथिव्यां खरकाण्डं कतिविधं प्रज्ञप्तम् ?। भगवानाह-गौतम ! षोडशविधं षोडशविभागं प्रज्ञप्तम् । तद्यथा-(रयणे इति) पदैकदेशे पदसमुदायोपचारात् रत्नकाण्डम्-तच्च प्रथमम्, द्वितीयं वज्रकाण्डम्, तृतीयम्-वैडूर्यकाण्डम्, चतुर्थम्-लोहिताक्षकाण्डम् । पञ्चमम्-मसारगल्लकाण्डम्, षष्ठम्-हंसगर्भकाण्डम्, सप्तमम्-पुलककाण्डम्, अष्टमम्-सौगन्धिककाण्डम्, नवमम्-ज्योतीरसकाण्डम्, दशमम्-अञ्जनकाण्डम्, एकादशम्-अञ्जनपुलाककाण्डम्, द्वादशम्-रजतकाण्डम्, त्रयोदशम्-जातरूपकाण्डम्,चतुर्दशम्-अङ्ककाण्डम्, पञ्चदशम्-स्फटिककाण्डम्, षोडशम्-रिष्टकाण्डम् ॥ तत्र रत्नानि कर्केतनाऽऽदीनि तत्प्रधानं काण्डं रत्नकाण्डम्, वज्ररत्नप्रधानं काण्डं वज्रकाण्डम् । एवं शेषाण्यप्येकैकं च काण्डं योजनसहस्रबाहुल्यम् ।

(७) रत्नकाण्डवक्तव्यतामाह--

इमीसे णं भंते ! रयणप्पभाए पुढवीए रयणकंडे कतिविहे पण्णत्ते ? । गोयमा ! एगागारे पण्णत्ते । एवं० जाव रिट्ठे ।

इमीसे णं भंते ! रयणप्पभाए पुढवीए पंकबहुले कंडे कतिविहे पण्णत्ते ? । गोयमा ! एगागारे पण्णत्ते ।

इमीसे णं भंते ! रयणप्पभाए पुढवीए आवबहुले कंडे कतिविहे पण्णत्ते ? । गोयमा ! एगागारे पण्णत्ते ।

सक्करप्पभाए णं भंते ! पुढवी कतिविधा पण्णत्ता ?। गोयमा ! एगागारा पण्णत्ता । एवं० जाव अहे सत्तमाए ।

(इमीसे णं भंते ! इत्यादि) अस्यां भदन्त ! रत्नप्रभायां पृथिव्यां रत्नकाण्डं कतिविधं कतिप्रकारं, कतिविभागमिति भावः। प्रज्ञप्तम् ?। भगवानाह-एकाकारं प्रज्ञप्तम् । एवं शेषकाण्डविषयाण्यपि प्रश्ननिर्वचनसूत्राणि क्रमेण भणनीयानि । एवं पङ्कबहुलाऽब्बहुलविषयाण्यपि । जी० ३ प्रति० । प्रज्ञा० ।

(८) संप्रति प्रतिपृथिवीनरकाऽऽवाससंख्याप्रतिपादनार्थमाह-

इमीसे णं भंते ! रयणप्पभाए पुढवीए केवतिया णिरयावाससयसहस्सा पण्णत्ता ? । गोयमा ! तीसं निरयावाससतसहस्सा पण्णत्ता । एवं एतेणं अभिलावेणं सव्वासिं पुच्छा ।

इमा गाथा अणुगंतव्वा-

" तीसा य पण्णवीसा, पण्णरस दसेव तिण्णि य हवंति ।
पंचूणं सतसहस्सं, पंचेव अणुत्तरा णरगा ॥ १ ॥ "

०जाव अहे सत्तमाए पंच अणुत्तरा महतिमहालया महाणरगा पण्णत्ता । तं जहा-काले, महाकाले, रोरुए, महारोरुए, अपतिट्ठाणे ॥

(इमीसे णं भंते ! इत्यादि) सुगमम् । नवरमियमत्र सङ्ग्रहणी गाथा-" तीसा य पण्णवीसा, पण्णरस दसेव सयसहस्साइं । तिण्णेगं पंचूणं, पंचेव अणुत्तरा णिरया ॥ १ ॥ " अधः सप्तम्यां च पृथिव्यां काला5ऽदयो महानरका अप्रतिष्ठानाऽभिधानकस्य नरकस्य पूर्वाऽऽदिक्क्रमेण । उक्तं च-" पुव्वेण होइ काले, अवरेण अप्पइट्ठ महकाले । रोरु दाहिणपासे, उत्तरपासे महारोरु ॥ १ ॥ " रत्नप्रभाऽऽदिषु च तमःप्रभापर्यन्तासु षट्सु पृथिवीषु प्रत्येकं नरकाऽऽवासा त्रिविधाः । तद्यथा-आवलिकाप्रविष्टाः, प्रकीर्णकरूपाश्च ।

तत्र रत्नप्रभायां पृथिव्यां त्रयोदश प्रस्तटाः । प्रस्तटा नामवेश्मभूमिकाकल्पाः । तत्र प्रथमे प्रस्तटे पूर्वाऽऽदिषु दिक्षु प्रत्येकमेकोनपञ्चाशत् नरकाऽऽवासाः, चतसृषु च विदिक्षु प्रत्येकमष्टचत्वारिंशत्, मध्ये च सीमान्तकाऽऽख्यो नरकेन्द्रकः, सर्वसंख्यया प्रथमप्रस्तटे नरकाऽऽवासानामावलिकाप्रविष्टानामेकोननवत्यधिकानि त्रीणि शतानि ३८९, शेषेषु च द्वादशसु प्रस्तटेषु प्रत्येकं यथोक्तरं दिक्षु विदिक्षु च एकैकनरकाऽऽवासहानिभावात् अष्टकाष्टकहीना नरकाऽऽवासा ऊह्याः । ततः सर्वसंख्यया रत्नप्रभायां पृथिव्यामावलिकानरकाऽऽवासाश्चतुश्चत्वारिंशत् शतानि त्रयस्त्रिंशदधिकानि ४४३३ । शेषासु एकोनत्रिंशल्लक्षाणि पञ्चनवतिसहस्राणि पञ्चशतानि सप्तषष्ट्यधिकानि २९९५५६७ प्रकीर्णकाः । तथा चोक्तम्-" सत्तट्ठी पंच सया, पणनउइ सहस्स लक्ख गुणतीसं । रयणाए सेढिगया, चोयालसया उ तेत्तीसं ॥ १ ॥ " उभयमीलने त्रिंशल्लक्षा नरकाऽऽवासानाम् ३०००००० ।

शर्कराप्रभायामेकादश प्रस्तटाः; नरकपटलानि अधोऽधो द्व्यूनहीनानीति वचनात् । तत्र प्रथमे प्रस्तटे चतसृषु दिक्षु षट्त्रिंशत् आवलिकाप्रविष्टा नरकाऽऽवासाः, विदिक्षु पञ्चत्रिंशत्, मध्ये चैको नरकेन्द्रकः । सर्वसंख्यया द्वे शते पञ्चाशीत्यधिके २८५, शेषेषु दशसु प्रस्तटेषु प्रत्येकं क्रमेणाधोऽधोऽष्टकाष्टक[illegible]तिदिक् २ एकैकनरकाऽऽवासहानेः, ततस्तत्र [illegible]संख्यया आवलिकाप्रविष्टा नरकाऽऽ[illegible]वासाः षट्त्रिंशतिशतानि पञ्चनवत्यधिकानि २९९५, शेषाश्चतु[illegible]तिलक्षाः सप्तनवतिसहस्राणि त्रीणि शतानि ९[illegible]णि २४९७३०५ पुष्पावकीर्णकाः । उक्तं च-" सत्ताणउ[illegible]हस्सा, चलवीसलक्ख तिसयपंचविहं । सीयाए [illegible]सीससया उ पणनउया " ॥१॥ उभयमीलने पञ्चविंशतिलक्षा नरकाऽऽवासानाम् २५००००० ।

वालुकाप्रभायां नव प्रस्तटाः । प्रथमे च प्रस्तटे एकैकस्यां दिशि आवलिकाप्रविष्टा नरकाऽऽवासाः पञ्चविंशतिः २,विदिशि चतुर्विंशतिः, मध्ये चैको नरकेन्द्रक इति । सर्वसंख्यया सप्तनवतिशतम् । शेषेषु चाष्टसु प्रस्तटेषु प्रत्येकं क्रमेणाऽधोऽधोऽष्टकहानिः । तत्र च कारणं प्रागेवोक्तम् । ततः सर्वसंख्यया तत्राऽऽवलिकाप्रविष्टा नरकाऽऽवासाश्चतुर्दश शतानि पञ्चाशीत्यधिकानि १४८५ । शेषास्तु पुष्पावकीर्णकाः चतुर्दशलक्षा अष्टानवतिसहस्राणि पञ्च शतानि पञ्चदशाऽधिकानि १४९८५१५ । उक्तं च-" पंचसया पन्नरसा, अट्ठनवइ सहस्स लक्ख चोद्दसया । तइयाए सेढिगया, पणसीया चोद्दससया उ ॥१॥ " उभयमीलने पञ्चदश लक्षा नरकाऽऽवासानाम् १५०००००।

पङ्कप्रभायां सप्त प्रस्तटाः । प्रथमे च प्रस्तटे प्रत्येकं दिशि षोडश आवलिकाप्रविष्टा नरकाऽऽवासाः,विदिशि पञ्चदश,मध्ये चैको नरकेन्द्रकः । सर्वसंख्यया पञ्चविंशं शतम् १२५ । शेषेषु षट्सु प्रस्तटेषु पूर्ववत् प्रत्येकं क्रमेणाधोऽधोऽष्टकाष्टकहानिः, ततः सर्वसंख्यया तत्राऽऽवलिकाप्रविष्टा नरकाऽऽवासाः सप्त शतानि सप्तोत्तराणि ७०७ । शेषास्तु पुष्पाऽवकीर्णका नव लक्षा नवनवतिसहस्राणि द्वे शते त्रिनवत्यधिके ९९९२९३ । उक्तं च-" ते णउया दोन्नि सया, नवनउयसहस्स नवय लक्खा य । पंकाए सेढिगया, सत्त सया दोतिसत्तहिया ॥१॥ " उभयमीलने नरकाऽऽवासानां दश लक्षाः १०००००० ।

धूमप्रभायां पञ्च प्रस्तटाः । प्रथमे च प्रस्तटे एकैकस्यां दिशि नव नव आवलिकाप्रविष्टा नरकाऽऽवासाः, विदिशि अष्टौ,मध्ये चैको नरकेन्द्रकः । इति सर्वसंख्यया एकोनसप्ततिः ६९ । शेषेषु च चतुर्षु प्रस्तटेषु पूर्ववत् प्रत्येकं क्रमेणाधोऽधोऽष्टकहानिः,ततः सर्वसंख्यया तत्राऽऽवलिकाप्रविष्टा नरकाऽऽवासा द्वे शते पञ्चषष्ट्यधिके, शेषाः पुष्पाऽऽवकीर्णकाः द्वे लक्षे नवनवतिसहस्राणि सप्त शतानि पञ्चत्रिंशदधिकानि २९९७३५ । उक्तं च-" सत्त सया पणतीसा, नवनवइ सहस्स दो य लक्खा य । धूमाए सेढिगया, पणट्ठा दो सया होंति ॥१॥ " सर्वसंख्यया तिस्रो लक्षा नरकाऽऽवासानाम् ।

तमःप्रभायां त्रयः प्रस्तटाः । तत्र प्रथमे प्रस्तटे प्रत्येकं दिशि चत्वार आवलिकाप्रविष्टा नरकाऽऽवासाः, विदिशि त्रयः त्रयः, मध्ये चैको नरकेन्द्रक इति । सर्वसंख्यया एकोनत्रिंशत् २९, शेषयोस्तु प्रस्तटयोः प्रत्येकं क्रमेणाऽधोऽधोऽष्टकहानिः, ततः सर्वसंख्यया आवलिकाप्रविष्टा नरकाऽऽवासास्त्रिषष्टिः । शेषास्तु नवनवतिसहस्राणि नव शतानि द्वात्रिंशत्यधिकानि पुष्पावकीर्णकाः ९९९३२ । उक्तं च-" नवनउइसयसहस्सा, नव चेव सया हवंति बत्तीसा । पुढवीए छट्ठीए, पइण्णगाणेस संखेवो ॥१॥ " उभयमीलने पञ्चोनं नरकाऽऽवासानां लक्षम् । ९९९९३५ ।

(९) संप्रति प्रतिपृथिवीघनोदध्यस्तित्वप्रतिपादनार्थमाह-

अत्थि णं भंते ! इमीसे रयणप्पभाए पुढवीए अहे घणोदधि त्ति वा घणवाते ति वा तणुवाते ति वा उवासंतरे ति वा ? । हंता अत्थि एवं० जाव अहे सत्तमा ।

(अत्थि णं भंते ! इत्यादि) अस्ति भदन्त ! अस्याः प्रत्यक्षत उपलभ्यमानाया रत्नप्रभायाः पृथिव्या अधो घनः स्त्यानीभूतोदक उदधिर्घनोदधिरिति वा, घनः पिण्डीभूतो वातो घनवात इति वा, तनुवात इति वा, अवकाशान्तरमिति वा । अवकाशान्तरं नाम-शुद्धमाकाशम् ? । भगवानाह-हन्त अस्ति; एवं प्रतिपृथिवी तावद्वाच्यं यावदधः सप्तम्याः ।

इमीसे णं भंते ! रयणप्पभाए पुढवीए खरकंमे केवतियं बाहल्लेणं पण्णत्ता ? । गोयमा ! सोलस जोयणसहस्साइं बाहल्लेणं पण्णत्ते ।

(इमीसे णं भंते ! इत्यादि) अस्या भदन्त ! रत्नप्रभायाः पृथिव्याः संबन्धि यत् प्रथमं खरं खराऽभिधानं काण्डं तत् कियद् बाहल्येन प्रज्ञप्तम् ? । भगवानाह-गौतम ! षोडशयोजनसहस्राणि बाहल्येन प्रज्ञप्तम् ।

(१०) रत्नकाण्डम-

इमीसे णं भंते ! रयणप्पभाए पुढवीए रयणकंडे केवतियं बाहल्लेणं पण्णत्ते ? । गोयमा ! एकजोयणसहस्सबाहल्लेणं पण्णत्ते, एवं० जाव रिट्ठे ।

(इमीसे णं इत्यादि) अस्या भदन्त ! रत्नप्रभायाः पृथिव्या रत्नं रत्नाऽभिधानं काण्डं तत् कियत् बाहल्येन प्रज्ञप्तम् ? । भगवानाह-गौतम ! एकं योजनसहस्रम् । शेषाण्यपि काण्डानि वक्तव्यानि, यावत् रिष्टं रिष्टाऽभिधानं काण्डम् । एवं पङ्कबहुलाब्बहुलकाण्डसूत्रे अपि व्याख्येये ।

(११) पङ्कबहुलम-

इमीसे णं भंते ! रयणप्पभाए पुढवीए पंकबहुले कंडे केवतियं बाहल्लेणं पण्णत्ते ? । गोयमा ! चतुरसीतिजोयणसहस्साइं बाहल्लेणं पण्णत्ते ।

पङ्कबहुलं काण्डं चतुरशीतियोजनसहस्राणि बाहल्येन ।

(१२) अब्बहुलं काण्डम-

इमीसे णं भंते ! रयणप्पभाए पुढवीए अब्बहुले कंमे केवतियं बाहल्लेणं पण्णत्ते ? । गोयमा ! असीतिं जोयणसहस्साइं बाहल्लेणं पण्णत्ते ।

अशीतियोजनसहस्राणि सर्वसंख्यया रत्नप्रज्ञायां बाहल्यमशीतिसहस्राधिकं लक्षम ।

(१३) घनोदधिघनवातयोर्बाहल्यम-

इमीसे णं भंते ! रयणप्पभाए पुढवीए घणोदधि केवतियं बाहल्लेणं पण्णत्ते ? । गोयमा ! वीसं जोअणसहस्साइं बाहल्लेणं पण्णत्ते ।

इमीसे णं भंते ! रयणप्पभाए पुढवीए घणवाते केवतियं बाहल्लेणं पण्णत्ते ? । गोयमा ! असंखेज्जाइं जोअणसहस्साइं बाहल्लेणं पण्णत्ताइं । एवं तणुवाते वि , एवं उवासंतरे वि ।

सक्करप्पभाए णं भंते ! पुढवीए घणोदधि केवतियं बाहल्लेणं पण्णत्ते ? । गोयमा ! वीसं जोअणसहस्साइं बाहल्लेणं पण्णत्ताइं ।

सक्करप्पभाए पुढवीए घणवाते केवइए पण्णत्ते ? । गोयमा ! असंखेज्जाइं जोअणसहस्साइं बाहल्लेणं पण्णत्ताइं ।

एवं तणुवाए वि,उवासंतरे वि,जहा सक्करप्पभाए पुढवीए । एवं० जाव अहे सत्तमाए ।

तस्या अधो घनोदधिः विंशतियोजनसहस्राणि बाहल्येन, तस्या अधो घनवातोऽसंख्येयानि योजनसहस्राणि बाहल्येन, तस्या अप्यधोऽसंख्येयानि योजनसहस्राणि तनुवातो बाहल्येन, तस्या अप्यधोऽसंख्येयानि योजनसहस्राणि बाहल्येनावकाशान्तरम् । एवं शेषाणामपि पृथिवीनां घनोदध्यादयः प्रत्येकं तावद्वक्तव्या यावदधः सप्तम्याः ।

(१४) क्षेत्रच्छेदेन छिद्यमानायाः पृथिव्याः-

इमीसे णं भंते ! रयणप्पभाए पुढवीए असीउत्तरजोयणसतसहस्सबाहल्लाए खेत्तछित्तेणं छिज्जमाणाए अत्थि दव्वाइं वण्णतो-कालनीललोहितहालिद्दसुक्किलाइं,गंधतो-सुब्भिगंधाइं दुब्भिगंधाइं, रसतो-तित्तकडुयकसायअंबिलमहुराइं, फासओ-कक्खडमउयगरुलहुयसीतउसिणणिद्धलुक्खाइं, संठाणतो-परिमंडलवट्टतंसचउरंसआययसंठाणपरिणयाइं अण्णमण्णबद्धाइं अण्णमण्णपुट्ठाइं अण्णमण्णओगाढाइं अण्णमण्णसिणेहपडिबद्धाइं अण्णमण्णघडत्ताए चिट्ठंति ?। हंता ! अत्थि ।

(इमीसे णं भंते ! इत्यादि) अस्यां भदन्त ! रत्नप्रभायां पृथिव्यामशीत्युत्तरयोजनशतसहस्रबाहल्यायां क्षेत्रच्छेदनबुद्ध्यामतरकाण्डविभागेन छिद्यमानायाम्, अस्तीति निपातोऽत्र बहुवचनार्थगर्भः-सन्ति द्रव्याणि, वर्णतः-कालानि नीलानि लोहितानि हारिद्राणि, शुक्लानि, गन्धतः-सुरभिगन्धीनि, दुरभिगन्धीनि च, रसतः-तिक्तरसानि, कटुकानि, कषायाणि, अम्लानि, मधुराणि, स्पर्शतः-कर्कशानि, मृदूनि, गुरूणि, लघूनि, शीतानि, उष्णानि, स्निग्धानि, रूक्षाणि, संस्थानतः-परिमण्डलानि, वृत्तानि, त्र्यस्राणि, चतुरस्राणि, आयतानि । कथंभूतान्येतानि सर्वाण्यपीत्यत आह-(अण्णमण्णपुट्ठाइं इत्यादि) अन्योऽन्यं परस्परं स्पृष्टानि स्पर्शमात्रोपेतानि । तथा-अन्योऽन्यं परस्परमवगाढानि यत्रैकं द्रव्यमवगाढं तत्राऽन्यदपि देशतः, क्वचित्सर्वतोऽवगाढमित्यर्थः । तथाऽन्योऽन्यं परस्परं स्नेहेन प्रतिबद्धानि येनैकस्मिन् चाल्यमाने गृह्यमाणे वा अपरमपि चलनाऽऽदिधर्मोपेतं भवति । (एवमओऽण्णघडत्ताए चिट्ठंति इति) अन्योऽन्यं परस्परं घटन्ते संबध्नन्तीति अन्योऽन्यघटाः,तद्भावोऽन्योऽन्यघटता, तया परस्परं संबद्धतया तिष्ठन्ति । भगवानाह-(हंता ! अत्थि) हन्तेति प्रत्यवधारणे, सत्येवेत्यर्थः ।

(१५) खरकाण्डस्य-

इमीसे णं भंते ! रयणप्पभाए पुढवीए खरस्स कंडस्स सोलसजोयणसहस्सबाहल्लस्स खेत्तछित्तेणं छिज्जंतं चेव० जाव हंता अत्थि, एवं० जाव रिट्ठस्स ॥

एवमस्यामेव रत्नप्रभायां पृथिव्यां खरकाण्डस्य षोडशयोजनसहस्रप्रमाणबाहल्यस्य, तदनन्तरं रत्नकाण्डस्य योजनसहस्रबाहल्यस्य ततो वज्रकाण्डस्य० यावदिष्टकाण्डस्य ।

(१६) पङ्कबहुलस्य-

इमीसे णं भंते ! रयणप्पभाए पुढवीए पंकबहुलस्स कंडस्स चउरासीतिं जोयणसहस्सबाहल्लस्स खेत्तं तं चेव । एवं आबबहुलस्स वि असीतिजोअणसहस्सबाहल्लस्स ॥

तदनन्तरमस्यामेव रत्नप्रभायां पृथिव्यां पङ्कबहुलकाण्डस्य चतुरशीतियोजनसहस्रबाहल्यस्य तदनन्तरमब्बहुलकाण्डस्य अशीतियोजनसहस्रबाहल्यस्य ।

इमीसे णं भंते ! रयणप्पभाए पुढवीए घणोदहिस्स वीसं जोयणस्स बाहल्लस्स खेत्तच्छेदे तहेव । एवं घणवातस्स असंखेज्जजोयणस्स बाहल्लस्स तं चेव ।

तदनन्तरमस्या एव रत्नप्रभाया घनोदधेर्योजनविंशतिसहस्रप्रमाणबाहल्यस्य, ततोऽसंख्यातयोजनप्रमाणबाहल्यस्य घनवातस्य तत एतावत्प्रमाणबाहल्यस्य तनुवातस्य, ततोऽवकाशान्तरस्य तावत्प्रमाणस्य ।

सक्करप्पभाए णं भंते ! पुढवीए बत्तीसुत्तरजोयणसयसहस्सबाहल्लाए खेत्तच्छेदेणं छिज्जमाणाए अत्थि दव्वाइं, वण्णतो० जाव फासतो चिट्ठंति ?। हंता ! अत्थि । एवं घणोदहिस्स वीसं जोअणसहस्सबाहल्लस्स घणवातस्स असंखेज्जजोयणसहस्सबाहल्लस्स । एवं० जाव उवासंतरस्स जहा सक्करप्पभाए, एवं० जाव अहे सत्तमाए ।

ततः शर्कराप्रभायाः पृथिव्याः द्वात्रिंशत्सहस्रोत्तरयोजनसतसहस्रबाहल्यपरिमाणायाः तस्या एवाधस्ताद् यथोक्तबाहल्यानां घनवाततनुवाताऽवकाशान्तराणामेवं यावदधः सप्तम्याः पृथिव्या अष्टसहस्राधिकयोजनशतसहस्रपरिमाणबाहल्यायास्ततः तस्या एवाऽधः सप्तमपृथिव्या अधस्तान्मध्ये घनोदधिघनवाततनुवातावकाशान्तराणां प्रश्ननिर्वचनसूत्राणि यथोक्तद्रव्यविषयाणि भावनीयानि ।

(१७) सम्प्रति संस्थानप्रतिपादनार्थमाह-

इमा णं भंते ! रयणप्पभा पुढवी किंसंठिता पण्णत्ता ?। गोयमा ! झल्लरिसंठिया पण्णत्ता ।

इमीसे णं भंते ! रयणप्पभाए पुढवीए खरे कंमे किंसंठिते पण्णत्ते ?। गोयमा ! झल्लरिसंठिते पण्णत्ते ।

इमीसे णं भंते ! रयणप्पभाए पुढवीए रयणे कंमे किंसंठिते पण्णत्ते ?। गोयमा ! झल्लरिसंठिते पण्णत्ते । एवं० जाव रिट्ठे । एवं पंकबहुले आबबहुले वि । घणोदधि वि, घणवाए वि, उवासंतरे वि, सव्वे झल्लरिसंठिया पण्णत्ता ।

सक्करप्पभाए णं भंते ! पुढवी किंसंठिया पण्णत्ता ?। गोयमा ! झल्लरिसंठिया पण्णत्ता ।

सक्करप्पभाए णं भंते ! पुढवीए घणोदधि किंसंठिए पण्णत्ते ?। गोयमा ! झल्लरिसंठिए पण्णत्ते । एवं० जाव उवासंतरे जहा सक्करप्पभाए वत्तव्वता, एवं० जाव अहे सत्तमाए वि ।

(इमा णं भंते ! इत्यादि) इयं प्रत्यक्षत उपलभ्यमाना, णमिति वाक्यालङ्कृतौ । रत्नप्रभा पृथिवी, किमिव संस्थिता प्रज्ञप्ता ?। भगवानाह-गौतम ! झल्लरीव संस्थिता प्रज्ञप्ता; विस्तीर्णवलयसंस्थानत्वात् । एवमस्यामेव रत्नप्रभायां पृथिव्यां खरकाण्डं, तत्रापि रत्नकाण्डं, ततो वज्रकाण्डम्, ततो यावत

रिष्टकाण्डम्,तदनन्तरं पङ्कबहुलं काण्डम्,ततो जलकाण्डम्,तदनन्तरमस्या एव रत्नप्रभायाः पृथिव्या अधस्तात् क्रमेण घनोदधिघनवाततनुवातावकाशान्तराणि, एवं यावदधः सप्तमी पृथिवी । तस्या अधस्तात् क्रमेण घनोदधिघनवाततनुवातावकाशान्तराणि झल्लरीसंस्थानानि वक्तव्यानि । ननु चैताः सप्तापि पृथिव्यः सर्वासु दिक्षु किमलोकस्पर्शिन्यः ?, उत नेति ब्रूमः । यद्येवं ततः ।

(१८) लोकान्तादबाधा—

इमीसे णं भंते ! रयणप्पभाए पुढवीए पुरच्छिमिल्लाओ चरिमंताओ केवतियं अबाधाए लोयंते पण्णत्ते ?। गोयमा ! दुवालसहिं जोयणेहिं अबाधाए लोयंते पण्णत्ते । एवं दाहिणिल्लातो पच्चच्छिमिल्लातो उत्तरिल्लाओ ।

सक्करप्पभाए णं भंते ! पुढवीए पुरच्छिमिल्लाओ चरिमंताओ केवतियं अबाहाए लोयंते पण्णत्ते ?। गोयमा ! तिभागूणेहिं तेरसहिं जोयणेहिं अबाहाए लोयंते पण्णत्ते, एवं चउद्दिसिं ।

वालुयप्पभाए णं भंते ! पुढवीए पुरच्छिमिल्लाओ पुच्छा ?। गोयमा ! सतिभागेहिं तेरसेहिं अबाधाए लोयंते पण्णत्ते । एवं चउद्दिसिं पि, एवं सव्वासिं चउसु विदिसासु पुच्छियव्वं ।

पंकप्पभाए चोद्दसहिं जोयणेहिं अबाहाए लोयंते पण्णत्ते ।

धूमप्पभाए तिभागूणेहिं पण्णरसेहिं जोयणेहिं अबाहाए लोयंते पण्णत्ते । छट्ठी सतिभागेहिं पण्णरसेहिं जोयणेहिं अबाहाए लोयंते पण्णत्ते । सत्तमाए सोलसएहिं जोयणेहिं अबाधाए लोयंते पण्णत्ते, एवं० जाव उत्तरिल्लातो ॥

(इमीसे णं भंते ! इत्यादि) अस्या भदन्त ! रत्नप्रभायाः पृथिव्याः (पुरच्छिमिल्लाओ इति) पूर्वदिग्भाविनश्चरमान्तात् (केवइयाए इति) कियत्या अबाधया अपान्तरालरूपया लोकान्तोऽलोकावधिपरिच्छिन्नः प्रज्ञप्तः ?। भगवानाह-द्वादशयोजनानि, द्वादशयोजनप्रमाणो य इत्यर्थः । अबाधया लोकान्तः प्रज्ञप्तः । किमुक्तं भवति ?-रत्नप्रभायाः पृथिव्याः पूर्वस्यां दिशि चरमपर्यन्तात् परतो लोकादर्वाग् अपान्तराले द्वादशयोजनानि,एवं दक्षिणस्यामपरस्यामुत्तरस्यां चापान्तराले वक्तव्यम । दिग्ग्रहणं चोपलक्षणम्, तेन सर्वास्वपि विदिक्ष्वपि यथोक्तमपान्तरालमवसातव्यम । शेषाणां तु पृथिवीनां सर्वासु दिक्षु च चरमपर्यन्तादलोकः क्रमेणाधोऽधस्त्रिभागोनेन योजनेनाधिकैर्द्वादशभिर्योजनैरवगन्तव्यः । तद्यथा-शर्कराप्रभायाः पृथिव्याः सर्वासु दिक्षु विदिक्षु च चरमपर्यन्तादलोकादर्वागपान्तरालं त्रिभागोनानि त्रयोदश योजनानि । वालुकाप्रभायाः सत्रिभागानि त्रयोदश योजनानि । पङ्कप्रभायाः परिपूर्णानि चतुर्दश योजनानि, धूमप्रभायास्त्रिभागोनानि पञ्चदश योजनानि । अधः सप्तमपृथिव्याः परिपूर्णानि षोडश योजनानि । सूत्राक्षराणि पूर्ववद् योजनीयानि । जी० ३ प्रति० ।

(१९) रत्नप्रभादीनामधः-

अत्थि णं भंते ! इमीसे रयणप्पभाए पुढवीए अहे गेहाइ वा, गेहावणाइ वा ?। गोयमा ! णो इणट्ठे समट्ठे । अत्थि णं भंते ! रयणप्पभाए पुढवीए इमीसे अहे गामाइ वा० जाव सन्निवेसाइ वा ?। णो इणट्ठे समट्ठे । अत्थि णं भंते ! इमीसे रयणप्पभाए पुढवीए अहे उराला बलाहया संसेयंति संमुच्छंति वासं वासंति ?। हंता ! अत्थि, तिसि वि पकरेइ, देवो वि पकरेइ, असुरो वि, नागो वि । अत्थि णं भंते ! इमीसे रयणप्पभाए पुढवीए बादरे थणियसद्दे ?। हंता अत्थि तिसि वि पकरेंति । अत्थि णं भंते ! इमीसे रयणप्पभाए पुढवीए बादरे अगणिकाए ?। गोयमा ! णो इणट्ठे समट्ठे, णण्णत्थ विग्गहगइसमावण्णएणं । अत्थि णं भंते ! इमीसे रयणप्पभाए पुढवीए चंदिम० जाव तारारूवा ?। णो इणट्ठे समट्ठे । अत्थि णं भंते ! इमीसे रयणप्पभाए चंदाभाइ वा ?। णो इणट्ठे समट्ठे । एवं दोच्चाए पुढवीए भाणियव्वं, एवं तच्चाए वि भाणियव्वं । णवरं देवो वि पकरेइ, असुरो वि पकरेइ, नो नाओ पकरेइ, चउत्थीए वि,नवरं देवो एको पकरेइ, नो असुरो, नो नाओ, एवं हेट्ठिल्लासु देवो एको पकरेइ ।

(बादरे अगणिकाए इत्यादि) ननु यथा बादराग्नेर्मनुष्यक्षेत्र एव तद्भावाभिषेध इहोच्यते, एवं बादरपृथिवीकायस्याऽपि निषेधो वाच्यः स्यात्, पृथिव्यादिष्वेव स्वस्थानेषु तस्य भावादिति । सत्यम । किं तु नेह यद्यत्र नास्ति तत्तत्र सर्वं निषिध्यते, मनुष्याऽऽदिवत्, विचित्रत्वात् सूत्रगतेरतोऽसतोऽपीह पृथिवीकायस्य न निषेध उक्तः । अप्कायवायुवनस्पतीनां त्विह घनोदध्यादिद्रावेण द्रावाभिषेधाभावः सुगम एवेति । (नो नाओ त्ति) नागकुमारस्य तृतीयायाः पृथिव्या अधो गमनं नास्तीत्यत एवाऽनुमीयते । (नो असुरो नो नागो त्ति) इदाप्यत एव वचनाच्चतुर्थ्यादीनामधोऽसुरकुमारनागकुमारयोर्गमनं नाऽस्तीत्यनुमीयते । भ० ६ श० ८ उ० ।

(२०) अथाऽमूनि रत्नप्रभाऽऽदीनां द्वादशयोजनप्रमाणाऽऽदीनि अपान्तरालानि किमाकाशरूपाणि, उत घनोदध्यादिव्याप्तानि ?। उच्यते-घनोदध्यादिव्याप्तानि, तत्र कस्मिन्नपान्तराले कियान् घनोदध्यादिरिति प्रतिपादनार्थमाह-

इमीसे णं भंते ! रयणप्पभाए पुढवीए पुरच्छिमिल्ले चरिमंते कतिविधे पण्णत्ते ?। गोयमा ! तिविधे पण्णत्ते । तं जहा-घणोदधिवलए, घणवायवलए, तणुवातवलए ।

इमीसे णं भंते ! रयणप्पभाए पुढवीए दाहिणिल्ले चरिमंते कतिविधे पण्णत्ते ?। गोयमा ! तिविधे पण्णत्ते । तं जहा, एवं चेव० जाव उत्तरिल्ले, एवं सव्वासिं० जाव अहे सत्तमाए उत्तरिल्ले ।

(इमीसे णं भंते ! इत्यादि) अस्या भदन्त ! रत्नप्रभायाः पृथिव्याः पूर्वदिग्भावी चरमान्तोऽपान्तरालालक्षणः कतिविधः कतिप्रकारः, कतिविभाग इत्यर्थः । प्रज्ञप्तः ?। भगवानाह-गौतम ! त्रिविधः प्रज्ञप्तः । तद्यथा-घनोदधिवलयो वलयाऽऽकारघनोदधिरूप इत्यर्थः । एवं घनवातवलयस्तनुवातवलयश्च । इयमत्र भावना-सर्वासां पृथिवीनामधो यत प्राक् बाहुल्येन

घनोदध्यादीनां परिमाणमुक्तं, तन्मध्यभागे द्रष्टव्यम् । ते हि मध्यभागे यथोक्तप्रमाणबाहल्याः, ततः प्रदेशहान्या प्रदेशवृद्ध्या हीयमानाः स्वस्वपृथिवीपर्यन्तेषु तनुतरभूताः; तनुतरीभूत्वा स्वस्वपृथिवीवलयाऽऽकारेण वेष्टयित्वा स्थिताः। अत एवामूनि वलयान्युच्यन्ते, तेषां वलयानामुच्चैस्त्वं सर्वत्र स्वस्वपृथिव्यनुसारेण परिभावनीयम्, तिर्यग्बाहल्यं पुनरग्रे वक्ष्यते। इदानीं तु विभागमात्रमेवापान्तराळस्य प्रतिपादयितुमिष्टमिति तदेवोक्तम्, एवमस्या रत्नप्रभायाः पृथिव्याः शेषासु दिक्षु, एवं शेषाणामपि पृथिवीनां चतसृष्वपि दिक्षु प्रत्येकं विभागसूत्रं भणितव्यम् ।

(२१) संप्रति घनोदधिवलयस्य तिर्यग्बाहल्यमानमाह-

इमीसे णं भंते ! रयणप्पभाए पुढवीए घणोदधिवलए केवतियं बाहल्लेणं पण्णत्ते ?। गोयमा ! छज्जोयणाइं बाहल्लेणं पण्णत्ते॥

(इमीसे णं भंते ! इत्यादि) अस्या भदन्त ! रत्नप्रभायाः पृथिव्याः सर्वासु दिक्षु चरमान्ते घनोदधिवलयः कियद् बाहल्येन तिर्यग् बाहल्येन प्रज्ञप्तः ? । भगवानाह-गौतम ! षट् योजनानि बाहल्येन प्रज्ञप्तः ।

तत ऊर्ध्वं प्रतिपृथिवि योजनस्य त्रिभागो वक्तव्यः । तद्यथा-

सक्करप्पभाए णं भंते ! पुढवीए घणोदधिवलए केवतियं बाहल्लेणं पण्णत्ते ?। गोयमा ! सतिभागाइं छज्जोयणाइं बाहल्लेणं पण्णत्ते । वालुयप्पभाए पुच्छा?। गोयमा ! तिन्नागूणाइं सत्त जोयणाइं बाहल्लेणं पण्णत्ते । एवं एतेणं अभिलावेणं पंकप्पभाए सत्त जोयणाइं बाहल्लेणं, धूमप्पभाए सतिभागाइं सत्त जोयणाइं पण्णत्ते । तमप्पभाए तिन्नागूणाइं अट्ठ जोयणाइं बाहल्लेणं पण्णत्ते । अहे सत्तमाए अट्ठ जोयणाइं बाहल्लेणं पण्णत्ते ।

शर्कराप्रभायाः सत्रिभागानि, वालुकाप्रभायास्त्रिभागोनानि सप्त योजनानि, पङ्कप्रभायाः परिपूर्णानि सप्त योजनानि,धूमप्रभायाः सत्रिभागानि सप्त योजनानि,तमःप्रभायाः त्रिभागोनानि अष्टौ योजनानि, अधः सप्तमपृथिव्याः परिपूर्णानि अष्टौ योजनानि । सूत्राक्षराणि तु सर्वत्र पूर्ववद् योजनीयानि ।

(२२) संप्रति घनवातवलयस्य तिर्यग् बाहल्यपरिमाण-प्रतिपादनार्थमाह-

इमीसे णं भंते ! रयणप्पभाए पुढवीए घणवातवलए केवतियं बाहल्लेणं पण्णत्ते ?। गोयमा ! अद्धपंचमाइं जोयणाइं बाहल्लेणं पण्णत्ते ॥

सक्करप्पभाए पुच्छा ?। गोयमा ! कोसूणाइं पंच जोयणाइं बाहल्लेणं पण्णत्ते ॥

एवं एएणं अभिलावेणं वालुयप्पभाए पंच जोयणाइं बाहल्लेणं पण्णत्ते ॥

पंकप्पभाए सक्कोसाइं पंच जोयणाइं बाहल्लेणं पण्णत्ते॥

धूमप्पभाए अद्धछट्ठाइं जोयणाइं बाहल्लेणं पण्णत्ते ।

तमप्पभाए कोसूणाइं छ जोयणाइं बाहल्लेणं पण्णत्ते ।

अहे सत्तमाए छ जोयणाइं बाहल्लेणं पण्णत्ते ॥

(इमीसे णं भंते ! इत्यादि) अस्या रत्नप्रभायाः पृथिव्याः घनवातवलयः तिर्यग् बाहल्येन अर्द्धपञ्चमानि सार्द्धानि चत्वारि योजनानि प्रज्ञप्तः । अत ऊर्ध्वं तु प्रतिपृथिवि गव्यूतं वर्द्धनीयम् । तथा चाऽऽह-द्वितीयस्याः पृथिव्याः क्रोशोनानि पञ्च योजनानि,तृतीयस्याः पृथिव्याः परिपूर्णानि पञ्च योजनानि, चतुर्थ्याः पृथिव्याः सक्रोशानि पञ्च योजनानि, पञ्चम्याः पृथिव्या अर्द्धषष्ठानि सार्द्धानि पञ्च योजनानि, षष्ठ्याः पृथिव्याः क्रोशोनानि षट् योजनानि, सप्तम्याः पृथिव्याः परिपूर्णानि षट् योजनानि ।

(२३) संप्रति तनुवातवलयस्य तिर्यग् बाहल्यपरिमाणप्रतिपादनार्थमाह-

इमीसे णं भंते ! रयणप्पभाए पुढवीए तणुवातवलए केवतियं बाहल्लेणं पण्णत्ते ?। गोयमा ! छक्कोसेणं बाहल्लेणं पण्णत्ते ।

एवं एतेणं अभिलावेणं सक्करप्पभाए सतिभागे छक्कोसे बाहल्लेणं पण्णत्ते ।

वालुयप्पभाए तिन्नागूणे सत्तकोसे बाहल्लेणं पण्णत्ते ।

पंकप्पभाए पुढवीए सत्तकोसे बाहल्लेणं पण्णत्ते ।

धूमप्पभाए सतिभागे सत्तकोसे बाहल्लेणं पण्णत्ते ।

तमप्पभाए तिभागूणे अट्ठकोसे बाहल्लेणं पण्णत्ते ।

अहे सत्तमाए पुढवीए अट्ठकोसे बाहल्लेणं पण्णत्ते ।

(इमीसे णं भंते ! इत्यादि) अस्या भदन्त ! रत्नप्रभायाः पृथिव्यास्तनुवातवलयः कियत् किंप्रमाणं बाहल्येन प्रज्ञप्तः ? । भगवानाह-षट्क्रोशं बाहल्येन प्रज्ञप्तः । अत ऊर्ध्वं तु पृथिवीक्रोशस्य त्रिभागो वर्द्धनीयः । तथा चाऽऽह-द्वितीयस्याः पृथिव्याः सत्रिभागोनान् षट् क्रोशान् बाहल्येन प्रज्ञप्तः । तृतीयस्याः पृथिव्याः त्रिभागोनान् सप्त क्रोशान्, चतुर्थ्याः पृथिव्याः परिपूर्णान् सप्त क्रोशान्, पञ्चम्याः पृथिव्याः सत्रिभागान् सप्त क्रोशान्,षष्ठ्याः पृथिव्याः त्रिभागोनान् अष्टौ क्रोशान्, अधः सप्तम्याः पृथिव्याः परिपूर्णान् अष्टौ क्रोशान् ।

उक्तं च-

" छच्चेव अद्ध पंचम, जोयणसद्धं च होइ रयणाए ।
उदहीघणतणुवाया, जहसंखेणं विणिद्दिट्ठा ॥ १ ॥
तिभागो गाउयं चेव, तिन्नागो गाउयस्स य ।
आइ धुवे पक्खेवो, अद्धे अहो जाव सत्तमिया ॥ २ ॥ "

एतेषां च त्रयाणामपि घनोदध्यादिविभागानाम् एकत्र मीलने प्रतिपृथिवि यथोक्तमपान्तराळमानं भवति ।

(२४) संप्रति एतेष्वेव घनोदध्यादिवलयेषु क्षेत्रच्छेदेन कृष्णवर्णाऽऽद्युपेतरूप्यास्तित्वप्रतिपादनार्थमाह-

इमीसे णं भंते ! रयणप्पभाए पुढवीए घणोदधिवलयस्स छज्जोयणबाहल्लस्स खेत्तच्छेएणं छिज्जमाणस्स अत्थि दव्वाइं वण्णओ कालए० जाव हंता अत्थि ।

सक्करप्पभाए णं भंते ! पुढवीए घणोदधिवलयस्स सतिभाग-

जोयणबाहल्लस्स खेत्तच्छेएणं छिज्जमाणस्स० जाव हंता अत्थि, एवं० जाव अहे सत्तमाए जं जस्स बाहल्लं ।

इमीसे णं भंते ! रयणप्पभाए पुढवीए घणवायवलयस्स अद्धपंचमजोयणबाहल्लस्स खेत्तच्छेदेण छिज्ज० जाव हंता अत्थि एवं० जाव अहे सत्तमाए जं जस्स बाहल्लेणं, एवं तणुवातवलयस्स वि० जाव अहे सत्तमा जं जस्स बाहल्लं ।

इमीसे णं भंते ! रयणप्पभाए पुढवीए घणोदधिवलए किंसंठिए पण्णत्ते ? । गोयमा ! वट्टवलयागारसंठाणसंठिते पण्णत्ते । जेणं इमं रयणप्पभं पुढविं सव्वतो समंता संपरिक्खिवित्ता णं चिट्ठति । एवं० जाव अहे सत्तमाए पुढवीए घणोदधिवलए, णवरं अप्पाणं पुढविं संपरिक्खिवित्ता णं चिट्ठंति ।

इमीसे णं भंते ! रयणप्पभाए पुढवीए घणवातवलए किंसंठिते पण्णत्ते ? । गोयमा ! वट्टवलयागारे तहेव० जाव जेणं इमीसे णं रयणप्पभाए पुढवीए घणोदधिवलयं सव्वतो समंता संपरिक्खिवित्ता णं चिट्ठइ । एवं० जाव अहे सत्तमाए घणवातवलयं । इमीसे णं भंते ! रयणप्पभाए पुढवीए तणुवातवलए किंसंठिते पण्णत्ते ? । गोयमा ! वट्टवलयागारसंठाणसंठिए० जाव जेणं इमीसे णं भंते ! रयणप्पभाए पुढवीए घणवातवलयं सव्वतो समंता संपरिक्खिवित्ता णं चिट्ठंति । एवं० जाव अहे सत्तमाए तणुवातवलयं ॥

(इमीसे णं भंते ! इत्यादि) अस्या भदन्त ! रत्नप्रभायाः पृथिव्याः घनोदधिवलयः किमिव संस्थितः किंसंस्थितः प्रज्ञप्तः ?। भगवानाह-गौतम ! वृत्तः चक्रवालतया परिवर्तुलो वलयस्य मध्ये शुषिरवृत्तविशेषस्याऽऽकार आकृतिर्वलयाऽऽकार इव संस्थानं वलयाऽऽकारसंस्थानं,तेन संस्थितो वलयाऽऽकारसंस्थानसंस्थितः । कथमेवं गम्यते ?-वलयाऽऽकारसंस्थानसंस्थित इति ?। तत आह-(जेणमित्यादि) येन कारणेन इमां रत्नप्रभां पृथिवीं सर्वतः सर्वासु दिक्षु विदिक्षु च संपरिक्षिप्य सामस्त्येन वेष्टयित्वा तिष्ठति वर्तते,तेन कारणेन वलयाऽऽकारसंस्थानसंस्थितः प्रज्ञप्तः ।

एवं घनवातवलयसूत्रं, तनुवातवलयसूत्रं च परिभावनीयम । नवरं घनवातवलयो घनोदधिवलयं संपरिक्षिप्येति वक्तव्यम । तनुवातवलयो घनवातवलयं संपरिक्षिप्येति । एवं शेषास्वपि पृथिवीषु प्रत्येकं त्रीणि त्रीणि सूत्राणि भावनीयानि ।

(२५) आयामविष्कम्भौ पृथ्वीनाम-

इमा णं भंते ! रयणप्पभा पुढवी केवतियं आयामविक्खंभेणं पण्णत्ता ? । गोयमा ! असंखेज्जाइं जोयणसहस्साइं आयामविक्खंभेणं, असंखेज्जाइं जोयणसहस्साइं परिक्खेवेणं पण्णत्ता । एवं० जाव अहे सत्तमा ॥

(इमा णं भंते ! इत्यादि) इयं भदन्त ! रत्नप्रभा पृथिवी कियता आयामविष्कम्भेण, समाहारो द्वन्द्वः। आयामविष्कम्भाभ्यां प्रज्ञप्ता । भगवानाह-असंख्येयानि योजनसहस्राणि आयामविष्कम्भेन । किमुक्तं भवति ?-असंख्येयानि योजनसहस्राणि आयामतोऽसंख्येयानि योजनसहस्राणि विष्कम्भेन,आयामविष्कम्भयोस्तु परस्परमल्पबहुत्वचिन्तने तुल्यत्वम्, तथा असंख्येयानि योजनसहस्राणि परिक्षेपेण परिधिना प्रज्ञप्ता । एवमेकैका पृथिवी तावद्वक्तव्या यावदधः सप्तमी पृथिवी ।

(२६) अन्तर्बहिर्वा समाः पृथ्व्यः-

इमा णं भंते ! रयणप्पभा पुढवी अंते य मज्झे य सव्वत्थ समा बाहल्लेणं पण्णत्ता ?। हंता गोयमा ! इमा णं रयणप्पभा पुढवी अंते य मज्झे य सव्वत्थ समा बाहल्लेणं एवं० जाव अहे सत्तमा ॥

(इमा णं भंते ! इत्यादि) इयं भदन्त ! रत्नप्रभा पृथिवी अन्ते च मध्ये च सर्वत्र समा बाहल्येन पिण्डभावेन प्रज्ञप्ता ?। भगवानाह-(गौतम ! इत्यादि) सुगमम् । एवं क्रमेणैकैका पृथिवी तावद्वक्तव्या यावत्सप्तमी ।

(२७) पृथिवीषु जीवाः सर्वत्र उपपन्नपूर्वाः-

इमीसे णं भंते ! रयणप्पभाए पुढवीए सव्वजीवा उववन्नपुव्वा सव्वजीवा उववन्ना ?। गोयमा ! इमीसे णं रयणप्पभाए पुढवीए सव्वजीवा उववन्नपुव्वा, नो चेव णं सव्वजीवा उववन्ना, एवं० जाव अधे सत्तमाए पुढवीए ॥

(इमीसे णं भंते ! इत्यादि) अस्यां भदन्त ! रत्नप्रभायां पृथिव्यां सर्वजीवाः सामान्येन उपपन्नपूर्वाः कालक्रमेण तथा सर्वजीवा उपपन्ना उत्पन्ना युगपत् । भगवानाह-गौतम ! अस्यां रत्नप्रभायां पृथिव्यां सर्वजीवाः सांव्यवहारिकजीवराश्यन्तर्गताः प्रायो वृत्तिमाश्रित्य सामान्येन उपपन्नपूर्वा उत्पन्नपूर्वाः कालक्रमेण संसारस्याऽनादित्वात्, न पुनः सर्वजीवा उपपन्ना उत्पन्ना युगपत्,सकलजीवानामेककाले रत्नप्रभापृथिवीत्वेनोत्पादे सकलदेवनारकाऽऽदिव्यवहाराभावप्रसक्तेः । न चैतदस्ति, तथा जगत्स्वाभाव्यात् । एवमेकैकस्याः पृथिव्यास्तावद्वक्तव्यं यावदधः सप्तम्याः ।

इमा णं भंते ! रयणप्पभा पुढवी सव्वजीवेहिं विजढपुव्वा सव्वजीवेहिं विजढा ?। गोयमा ! इमा णं भंते ! रयणप्पभा पुढवी सव्वजीवेहिं विजढपुव्वा, नो चेव णं सव्वजीवेहिं विजढा, एवं० जाव अहे सत्तमा ॥

(इमा णं इत्यादि) इयं भदन्त ! रत्नप्रभा पृथिवी (सव्वजीवेहिं विजढपुव्वा इति) सर्वजीवैः कालक्रमेण परित्यक्तपूर्वा; तथा सर्वजीवैर्युगपद् विजढा परित्यक्ता । भगवानाह-गौतम ! इयं रत्नप्रभा पृथिवी प्रायो वृत्तिमाश्रित्य सर्वजीवैः सांव्यवहारिकैः कालक्रमेण परित्यक्तपूर्वा, न तु युगपत्, परित्यागस्यासंज्ञत्वात् तथानिमित्ताभावात्,एवं तावद्वक्तव्यं यावदधः सप्तमी पृथ्वी ।

(२८) पृथ्वीषु सर्वे जीवाः प्रविष्टपूर्वाः-

इमीसे णं भंते ! रयणप्पभाए पुढवीए सव्वपोग्गला पविट्ठपुव्वा, सव्वपोग्गला पविट्ठा ?। गोयमा ! इमीसे णं रयणप्पभाए पुढवीए सव्वपोग्गला पविट्ठपुव्वा, नो चेव

णं सव्वपोग्गला पविट्ठा, एवं० जाव अहे सत्तमाए पुढवीए ॥

(इमीसे णं इत्यादि) अस्यां भदन्त ! रत्नप्रभायां पृथिव्यां सर्वे पुद्गला लोकोदरविवरवर्तिनः कालक्रमेण प्रविष्टपूर्वाः, तद्भावेन परिणतपूर्वाः; तथा सर्वे पुद्गलाः प्रविष्टा एककालं तद्भावेन परिणताः ?। भगवानाह-गौतम ! अस्यां रत्नप्रभायां पृथिव्यां सर्वे पुद्गलाः लोकवर्तिनः प्रविष्टपूर्वाः-तद्भावेन परिणतपूर्वाः, संसारस्याऽनादित्वाद्, न पुनरेककालं सर्वपुद्गलाः प्रविष्टाः-तद्भावेन परिणताः, सर्वपुद्गलानां तद्भावेन परिणतौ रत्नप्रभाव्यतिरेकेणाऽन्यत्र सर्वत्राऽपि पुद्गलाभावप्रसक्तेः, न चैतदस्ति, तथाजगत्स्वाभाव्यात् । एवं सर्वासु पृथिवीषु क्रमेण वक्तव्यं, यावदधः सप्तम्यां पृथिव्यामिति ।

(२९) सर्वे पुद्गलाः त्यक्तपूर्वाः-

इमा णं भंते ! रयणप्पभा पुढवी सव्वपोग्गलोहिं विजढपुव्वा, सव्वपोग्गले विजढा ?। गोयमा ! इमा णं भंते ! रयणप्पभा पुढवी सव्वपोग्गलोहिं विजढपुव्वा, नो चेव णं सव्वपोग्गले विजढा, एवं० जाव अहे सत्तमा ॥

(इमा णं भंते ! इत्यादि) इयं भदन्त ! रत्नप्रभा पृथिवी सर्वपुद्गलैः कालक्रमेण (विजढपुव्वा इति) परित्यक्तपूर्वा, तथा सर्वपुद्गलैरेककालं परित्यक्ता ?। भगवानाह-गौतम ! इयं रत्नप्रभा पृथिवी सर्वपुद्गलैः कालक्रमेण परित्यक्तपूर्वा, संसारस्याऽनादित्वात्, न पुनः सर्वपुद्गलैरेककालं परित्यक्ता, सर्वपुद्गलैरेककालं परित्यागे तस्याः सर्वथा स्वरूपाभावप्रसक्तेः । न चैतदस्ति, तथा जगत्स्वाभाव्यतः शाश्वतत्वात् । एतच्चानन्तरमेव वक्ष्यति । एवमेकैका पृथिवी क्रमेण तावद्वाच्या, यावदधः सप्तमी पृथिवी ।

(३०) शाश्वती, अशाश्वती वा रत्नप्रभा ?-

इमा णं भंते ! रयणप्पभा पुढवी किं सासता, असासता ?। गोयमा ! सिय सासता, सिय असासता। से केणट्ठेणं भंते ! एवं वुच्चइ-सिय सासता, सिय असासता ?। गोयमा ! दव्वट्ठयाए सासता, वण्णपज्जवेहिं गंधपज्जवेहिं रसपज्जवेहिं फासपज्जवेहिं असासता, से एएणट्ठेणं गोयमा ! एवं वुच्चति-तं चेव० जाव सिय असासता, एवं० जाव अहे सत्तमा ।

(इमा णं भंते ! इत्यादि) इयं भदन्त ! रत्नप्रभा पृथिवी किं शाश्वती, अशाश्वती ?। भगवानाह-गौतम ! स्यात् कथञ्चित्, कस्याऽपि नयस्याऽभिप्रायेत्यर्थः । शाश्वती। स्यात् कथञ्चित् अशाश्वती। एतदेव सविशेषं जिज्ञासुः पृच्छति-(से केणट्ठेणमित्यादि) 'से' शब्दोऽथशब्दार्थः । स च प्रश्ने, केन अर्थेन कारणेन भदन्त ! एवमुच्यते-यथा स्यात् शाश्वती, स्याद्-शाश्वतीति ?। भगवानाह-गौतम ! (दव्वट्ठयाए इत्यादि) द्रव्यार्थतया शाश्वती,तत्र द्रव्यं सर्वत्राऽन्वयि सामान्यमुच्यते,द्रवति गच्छति तान् तान् पर्यायान् विशेषानिति वा द्रव्यमिति व्युत्पत्तेः, द्रव्यमेवाऽर्थः तात्त्विकपदार्थो यस्य, न तु पर्यायाः, स द्रव्यार्थो द्रव्यमात्रास्तित्वप्रतिपादको नयविशेषः, तद्भावो द्रव्यार्थता, तया द्रव्यमात्रास्तित्वप्रतिपादकतयाऽभिप्रायेणेति यावत्। शाश्वती द्रव्यार्थिकनयमतपर्यालोचनायामेवंविधस्य रत्नप्रभायाः पृथिव्या आकारस्य सदाभावाद् वर्णपर्यायैः कृष्णाऽऽदिभिः, गन्धपर्यायैः सुरभ्यादिभिः, रसपर्यायैस्तिक्ताऽऽदिभिः, स्पर्शपर्यायैः कठिनत्वाऽऽदिभिः, अशाश्वती अनित्या, तेषां वर्णाऽऽदीनां प्रतिक्षणं कियत्कालानन्तरं वाऽन्यथान्यथाभवनात्, अतादवस्थ्यस्य चाऽनित्यत्वात् । न चैवमपि नित्याधिकरणे नित्यत्वाऽनित्यत्वे द्रव्यपर्याययोर्भेदाभेदोपगमात्, अन्यथोभयोरप्यसत्त्वाऽऽपत्तेः । तथाहि-शक्यते वक्तुं परपरिकल्पितं द्रव्यमसत्,पर्यायव्यतिरिक्तत्वात्, वाह्यत्वाऽऽदिपर्यायशून्यवन्ध्यासुतवत्,तथा परपरिकल्पिताः पर्याया असतः द्रव्यत्वव्यतिरिक्तत्वात्, वन्ध्यासुतगतबाह्यत्वाऽऽदिपर्यायवत् । उक्तं च--"द्रव्यं पर्यायवियुतं, पर्याया द्रव्यवर्जिताः । क्व कदा केन किंरूपाः, दृष्टा मानेन केन वा ? ॥१॥" इति कृतं प्रसङ्गेन। विस्तरार्थिना धर्मसंग्रहणिटीका निरूपणीया । "(से एएणऽट्ठेणमित्यादि) उपसंहारमाह-'से' शब्दोऽथशब्दार्थः । स चाऽत्र वाक्योपन्यासे, अथ एतेनाऽनन्तरोदितेन कारणेन गौतम ! एवमुच्यते-स्यात् शाश्वती, स्यादशाश्वती । एवं प्रतिपृथिवि तावद्वक्तव्यं यावदधः सप्तमी पृथिवी । इह यद् यावत्संभवाऽऽस्पदं तच्च तावन्तं कालं शश्वद्भवति, तदा तदपि शाश्वतमुच्यते । यथा तन्त्रान्तरे-" आकप्पट्ठाई पुढवी सासया " इत्यादि । ततः संशये किमेषा रत्नप्रभा पृथिवी सकलकालावस्थायिन्तया शाश्वती ? उताऽन्यथा ?। यथा तन्त्रान्तरीयैरुच्यते इति, ततस्तदपनोदार्थं पृच्छति ।

(३१) कालस्थितिः-

इमा णं भंते ! रयणप्पभा पुढवी कालतो केवचिरं होति ?। गोयमा ! ण कदा वि ण आसि, ण कदा वि णत्थि, ण कदा वि ण भविस्सति, भुविं च, भवति य, भविस्सति य, धुवा णियता सासता अक्खया अव्वया अवट्ठिता णिच्चा एवं० जाव अहे सत्तमा ।

(इमा णं भंते ! इत्यादि) इयं भदन्त ! रत्नप्रभा पृथिवी कालतः कियच्चिरं कियन्तं कालं यावद्भवति ?। भगवानाह-गौतम ! न कदाचिन्नासीत्, सदैवासीदिति भावः। अनादित्वात् । तथा न कदाचिन्न भवति, सर्वदैव वर्तमानकालचिन्तायां भवतीति भावः । अत्रापि स एव हेतुः, सदा भावादिति । तथा न कदाचिन्न भविष्यति, भविष्यच्चिन्तायाः सर्वदैव भविष्यतीति भावः, अपर्यवसितत्वात् । तदेवं कालत्रयचिन्तायां नास्तित्वप्रतिषेधं विधाय संप्रत्यस्तित्वं प्रतिपादयति-(भुविं चेत्यादि) अभूत्, भवति, भविष्यति च। एवं त्रिकालभावित्वेन ध्रुवा, ध्रुवत्वादेव नियता नियतावस्थाना,धर्मास्तिकायाऽऽदिवत्,नियतत्वादेव च शाश्वती शश्वद्भावे प्रलयाभावात्, शाश्वतत्वादेव च सततं गङ्गासिन्धुप्रवाहप्रवृत्ताविप पौण्डरीकह्रद इवान्यतरपुद्गलविघटनेऽन्यान्यतरपुद्गलोपचयनाद्भावात्कया,अक्षयत्वादेव चाव्यया मानुषोत्तराद् बहिः समुद्रवत्,अव्ययत्वादेवावस्थिता स्वप्रमाणावस्थिता सुषमसुषमाऽऽदिवत्, एवं सदाऽवस्थानेन चिन्त्यमाना नित्या जीवस्वरूपवत् । यदि वा ध्रुवाऽऽदयः शब्दा इन्द्रशक्राऽऽदिवत् पर्यायशब्दा नानादेशजविनेयानुग्रहार्थमुपन्यस्ता इत्यदोषः । एवमेकैका पृथिवी क्रमेण तावद्वक्तव्या, या-

षदधः सप्तमी । (पृथिवीषु विभागतोऽन्तरवक्तव्यता 'अंतर' शब्दे प्रथमभागे ७१ पृष्ठे गता)

(३२) पृथिव्यो बाहल्येन तुल्याः-

इमा णं भंते ! रयणप्पभा पुढवी दोच्चं पुढविं पणिहाय बाहल्लेणं किं तुल्ला विसेसाहिया संखेज्जगुणा, वित्थारेणं किं तुल्ला विसेसहीणा संखेज्जगुणहीणा ?। गोयमा ! इमा णं भंते ! रयणप्पभा पुढवी दोच्चं पुढविं पणिहाय बाहल्लेणं णो तुल्ला, विसेसाहिया, नो संखेज्जगुणा, वित्थारेणं णो तुल्ला विसेसहीणा, णो संखेज्जगुणहीणा। दोच्चा णं भंते ! पुढवी तच्चं पुढविं पणिहाय बाहल्लेणं किं तुल्ला, एवं चेव जाणियव्वा। एवं तच्चा चउत्थी पंचमी छट्ठी। छट्ठी णं भंते ! पुढवी सत्तमिं पुढविं पणिहाय बाहल्लेणं किं तुल्ला विसेसाहिया संखेज्जगुणा, एवं चेव जाणियव्वं, सेवं भंते ! भंते ! त्ति।

(इमा णं भंते ! इत्यादि) इयं भदन्त ! रत्नप्रभा पृथिवी द्वितीयां शर्कराप्रभां प्रणिधायाऽऽश्रित्य बाहल्येन पिण्डभावेन किं तुल्या, विशेषाधिका, संख्येयगुणा ?, बाहल्यमधिकृत्येदं प्रश्नत्रयम्। ननु एकाऽशीत्युत्तरयोजनलक्षमाना, अपरा द्वात्रिंशदुत्तरयोजनलक्षमाना इत्युक्तम्, तत्तदर्थावगमे सत्युक्तलक्षणं प्रश्नत्रयमयुक्तम्, विशेषाधिकेति स्वयमेवाऽर्थपरिज्ञानात्। सत्यमेतत्। केवलमप्रश्नोऽयं तदन्यमोहाऽपोहार्थः । एतदपि कथमवसीयते ? इति चेत्, स्वावबोधाय प्रश्नान्तरोपन्यासात्। तथा चाऽऽह-विस्तरेण विष्कम्भेन किं तुल्या, विशेषहीना, संख्येयगुणहीनेति ?। भगवानाह-गौतम ! इयं रत्नप्रभा पृथिवी द्वितीयां पृथिवीं प्रणिधाय बाहल्येन न तुल्या, किं तु विशेषाधिका, नाऽपि संख्येयगुणा । कथमेतदेवमिति चेत् ? । उच्यते-इह रत्नप्रभा पृथिवी अशीत्युत्तरयोजनलक्षमाना, शर्कराप्रभा द्वात्रिंशदुत्तरयोजनलक्षमाना, तदत्रान्तरमष्टाचत्वारिंशद् योजनसहस्राणि, ततो विशेषाधिका घटते, न तुल्या, नाऽपि संख्येयगुणा; विस्तरेण न तुल्या, किं तु विशेषहीना, नाऽपि संख्येयगुणा, प्रदेशाऽऽदिवृद्ध्या प्रवर्द्धमाने तावति क्षेत्रे शर्कराप्रभाया एव वृद्धिसंभवात्। एवं सर्वत्र भावनीयम्। जी० ३ प्रति० १ उ०।

(३३) संप्रति कस्यां पृथिव्यां कस्मिन् प्रदेशे नरकाऽऽवासा इत्येतत् प्रतिपादनार्थं तावदिदमाह-

कइ णं भंते ! पुढवीओ पण्णत्ताओ ? । गोयमा ! सत्त पुढवीओ पण्णत्ताओ । तं जहा-रयणप्पभा० जाव अहे सत्तमा ।

(कइ णं भंते ! इत्यादि) कति भदन्त ! पृथिव्यः प्रज्ञप्ताः ?, इति विशेषाऽभिधानार्थमेतदभिहितम्। उक्तं च-"पुव्वभणियं जं भणणइ तत्थ कारणं अत्थि पडिसेहो, अणुण्णा, कारणविसेसोवलंभो वा"। भगवानाह-गौतम ! सप्त पृथिव्यः प्रज्ञप्ताः। तद्यथा-रत्नप्रभा, यावत्तमस्तमःप्रभा ।

इमीसे णं भंते ! रयणप्पभाए पुढवीए असीउत्तरजोयणसयसहस्सबाहल्लाए उवरिं केवतियं ओगाहित्ता, हेट्ठा केवतियं वज्जेत्ता, मज्झे केवतिए केवतिया निरयावाससयसहस्सा पण्णत्ता ?। गोयमा ! इमीसे णं रयणप्पभाए पुढवीए असीउत्तरजोयणसयसहस्सबाहल्लाए उवरिं एगं जोयणसहस्सं ओगाहित्ता हेट्ठा वि एगं जोयणसहस्सं वज्जेत्ता मज्झे अट्ठत्तरे जोयणसयसहस्से, एत्थ णं रयणप्पभाए पुढवीए नेरतियाणं तीसं निरयावाससयसहस्सा भवंतीति मक्खायं ।

(इमीसे णं इत्यादि) अस्या भदन्त ! रत्नप्रभायाः पृथिव्या उपरि कियत् किंप्रमाणमवगाह्य, उपरितनभागात् कियत् अतिक्रम्येत्यर्थः। अधस्तात् कियत् किंप्रमाणं वर्जयित्वा, मध्ये कियति किंप्रमाणे कियन्ति नरकाऽऽवासाः शतसहस्राणि प्रज्ञप्ताः ?। भगवानाह-गौतम ! अस्याः रत्नप्रभायाः पृथिव्या अशीत्युत्तरयोजनशतसहस्रबाहल्यायाः उपरि एकं योजनसहस्रमवगाह्य, अधस्तादेकं योजनसहस्रं वर्जयित्वा, मध्ये मध्यभागे अष्टसप्तत्युत्तरे अष्टसप्ततिसहस्राधिके योजनशतसहस्रम्, अत्र एतस्मिन् रत्नप्रभायां पृथिव्यां नैरयिकाणां योन्यानि त्रिंशन्नरकाऽऽवासशतसहस्राणि भवन्तीत्याख्यातं मया, शेषैश्च तीर्थकृद्भिः, अनेन सर्वतीर्थकृतामविसंवादिवचनता प्रवेदिता।

(३४) वर्णकः-

ते णं णरगा अंतो वट्टा बाहिं चउरंसा० जाव असुभा णरएसु वेयणा, एवं एएणं अभिलावेणं जवबहिलक्खाणं जाणियव्वं, ठाणपयाणुसारेणं जत्थ जं बाहल्लं जत्तिया वा णेरइयावाससयसहस्सा० जाव अहे सत्तमाए पुढवीए, अहे सत्तमाए मज्झे केवतिए कति अणुत्तरा महतिमहालया महाणिरया पण्णत्ता ?; एवं पुच्छियव्वं वागरेयव्वं पि तहेव छट्ठी सत्तमासु काओअगणिवण्णाभा भाणियव्वा ।

(ते णं णरगा इत्यादि) ते नरका अन्तर्मध्यभागे वृत्ता वृत्ताकारा बहिर्बहिर्भागे चतुरस्राः चतुरस्राऽऽकाराः, इदं च पीठोपरिवर्तिनं मध्यभागमधिकृत्य प्रोच्यते। सकलपीठाऽऽश्रयेक्षया तु आवलिकाप्रविष्टा वृत्तत्र्यस्रचतुरस्रसंस्थानाः, पुष्पावकीर्णास्तु नानासंस्थानाः प्रतिपत्तव्याः । एतच्चाग्रे स्वयमेव वक्ष्यति-[अहे खुरप्पसंठाणसंठिया इति] अधो भूमितले क्षुरप्रस्येव प्रहरणविशेषस्य यत् संस्थानमाकारविशेषः-तीक्ष्णतालक्षणः, तेन संस्थिताः क्षुरप्रसंस्थानसंस्थिताः । तथाहि-तेषु नरकाऽऽवासेषु भूमितले मसृणत्वाज्जावतः शर्करिले पादेषु न्यस्यमानेषु शर्करामात्रसंस्पर्शेऽपि क्षुरप्रेव पादाः कृत्यन्ते[कृत्यन्ते] [निर्बंधकारतमसा इति] नित्यान्धकारा उद्द्योताभावतो यत्तमस्तेन तमसा नित्यं सर्वकालमन्धकारो येषु नित्यान्धकाराः। तत्रापरकाऽऽदिष्वपि नामान्धकारोऽस्ति, केवलं बहिः सूर्यप्रकाशे मन्दं तमो भवति, नरकेषु तु तीर्थकरजन्मदीक्षाऽऽदिकाल्यतिरेकेणान्यदा सर्वकालमपि उद्द्योतलेशस्याऽप्यभावतो जात्यन्धस्येव मेघच्छन्नकालाऽर्द्धरात्र इवातीव बहुलतरो भवति। तत उक्तं-तमसा नित्यान्धकाराः, तमश्च तत्र सदावस्थितम्, उद्द्योतकारिणामभावात्। तथाऽऽह-[ववगयगहचंदसूरनक्खत्तजोइसपहा] व्यपगतः परिभ्रष्टो ग्रहचन्द्रसूर्यनक्षत्ररूपाणाम्, उपलक्षणमेतत्-तारारूपाणां ज्योतिष्काणां पन्थाः मार्गो यत्र व्यपगतग्रहसूर्यनक्षत्रज्योतिष्कपथाः। तथा-[मेयवसापूयरुहिरमंस-

चिक्खिल्ललित्तानुलेवणतला इति] स्वभावतः संपन्नैर्मेदोवसापूतिरुधिरमांसैर्यश्चिक्खिल्लः कर्दमस्तेन लिप्तमुपदिग्धमनुलेपनेन सकृल्लिप्तस्य पुनःपुनरुपलेपनेन तलं भूमिका येषां ते मेदोवसापूतिरुधिरमांसचिक्खिल्लिप्तानुलेपनतलाः, अत एवाशुचयोऽपवित्राः, बीभत्सा दर्शनेष्वतिजुगुप्सोत्पत्तेः, परमदुरभिगन्धा मृतगवादिकलेवरेभ्योऽप्यतीवानिष्टदुरभिगन्धाः (काओअगणिवण्णाभा इति) लोहे धम्यमाने यादृक्पोतो बहुकृष्णरूपोऽग्नेर्वर्णः। किमुक्तं भवति?-यादृशी बहुकृष्णवर्णरूपा अग्निज्वाला विनिर्गच्छतीति तादृशी आभा वर्णस्वरूपं येषां ते कपोताग्निवर्णाभाः, तथा कर्कशोऽतिदुस्सहोऽसिपत्रस्येव स्पर्शो येषां ते कर्कशस्पर्शाः, अत एव-[दुरहियासा इति] दुःखेनाध्यस्यन्ते दुरध्यासाः, अशुभा दर्शनतो नरकास्तथा गन्धरसस्पर्शशब्दैरशुभा अतीवासातरूपाः नरकेषु वेदनाः, एवं सर्वास्वपि पृथिवीष्वालापको वक्तव्यः। जी० ३ प्रति०। ('ठाण' शब्देऽस्मिन्नेव भागे १७०० पृष्ठे दर्शित आलापः) (नरकाऽऽवासंख्या उपर्यधश्चैकैकं योजनसहस्रं मुक्त्वा यावत्प्रमाणं नरकाऽऽवासयोग्यं पृथिवीबाहल्यं, तत्सर्वं संग्रहणीगाथाभिः 'ठाण' शब्दे १७०२ पृष्ठे प्रतिपादितम्)

(३५) संप्रति नरकाऽऽवाससंस्थानप्रतिपादनार्थमाह-

इमीसे णं भंते ! रयणप्पभाए पुढवीए णरगा किंसंठिता पण्णत्ता ?। गोयमा ! दुविधा पण्णत्ता। तं जहा-आवलियपविट्ठा य, आवलियबाहिरा य। तत्थ णं जे ते आवलियपविट्ठा ते तिविहा पण्णत्ता। तं जहा-वट्टा,तंसा,चउरंसा। तत्थ णं जे ते आवलियबाहिरा,ते णाणासंठाणसंठिता पण्णत्ता। तं जहा-अयकोट्ठसंठिया, पिट्ठपयणगसंठिया,कंदूसंठिया, लोहीसंठिया, कडाहसंठिया, थालीसंठिया,पिहडगसंठिया, किण्हगसंठिया, जडजसंठिया,मुरयसंठिया, मुइंगसंठिया, णंदिमुइंगसंठिया, आलिंगसंठिया, सुघोससंठिया, दद्दरसंठिया, पणवसंठिया, पडहसंठिया, भेरीसंठिया, झल्लरिसंठिया, कुत्थुंबकसंठिया,नालीसंठिया,एवं०जाव तमाए।

(इमीसे णं भंते ! इत्यादि) अस्यां भदन्त ! रत्नप्रभायां पृथिव्यां नरकाः किमिव संस्थिताः प्रज्ञप्ताः ? । भगवानाह-गौतम ! नरका द्विविधाः प्रज्ञप्ताः। तद्यथा-आवलिकाप्रविष्टाश्च, आवलिकाबाह्याश्च । चशब्दावुभयेषामप्यशुभतासूचकौ । आवलिकाप्रविष्टा नाम-अष्टासु दिक्षु समश्रेण्या व्यवस्थिताः, आवलिकासु श्रेणिषु प्रविष्टा व्यवस्थिता आवलिकाप्रविष्टाः, ते संस्थानमधिकृत्य त्रिविधाः प्रज्ञप्ताः। तद्यथा-वृत्ताः त्र्यस्राः, चतुरस्राः। तत्र ये ते आवलिकाबाह्याः, ते नानासंस्थानसंस्थिताः प्रज्ञप्ताः। तद्यथा-अयःकोष्ठो लोहमयकोष्ठस्तद्वत् संस्थिताः (पिट्ठपयणगसंठिया इति) यत्र सुरासंधानाय पिष्टं पच्यते तत् पिष्टपचनकं, तद्वत् संस्थिताः ।

अत्र संग्रहणीगाथे-

"अयकोट्ठपिट्ठपयणग-कंदूलोहीकडाहसंठाणा।
थालीपिहडगकिण्हग-उडप मुरए मुइंगेसु।
नंदिमुइंगे आलिं-गि सुघोसे दद्दरे य पणवे य।
पडहगझल्लरिजेरी-कुत्थुंबगनालिसंठाणा" ॥

कण्डूः पाकसंस्थानं, लोहीकटाहौ प्रतीतौ, तद्वत्संस्थानाः, स्थाली उषा,पिहडगं यत्र प्रभूतजनयोग्यं धान्यं पच्यते, उटजस्तापसाऽऽश्रमः, मुरजो मर्दलविशेषः, नन्दीमृदङ्गो द्वादशविधतूर्यान्तर्गतो मृदङ्गः। स च द्विधा । तद्यथा-मुकुन्दो, मर्दलश्च । तत्रोपरि संकुचितोऽधो विस्तीर्णो मुकुन्दः, उपर्यधश्च समो मर्दलः। आलिङ्गो मृन्मयो मुरजः, सुघोषो देवलोकप्रसिद्धो घण्टाविशेषः, आतोद्यविशेषो वा, दर्दरो वाद्यविशेषः,पणवो भाण्डानाम्,पटहः प्रतीतः, भेरी ढक्का, झल्लरी चर्मावनद्धा विस्तीर्णवलयाऽऽकारा, कुस्तुम्बकः संप्रदायगम्यः, नाली घटिका। एवं शेषास्वपि पृथिवीषु तावद् वक्तव्यं यावत् षष्ठ्याः। सूत्रपाठस्त्वेवम्-"सक्करप्पभाए णं भंते ! पुढवीए णरगा किंसंठिया पण्णत्ता ?। गोयमा ! दुविहा पण्णत्ता। तं जहा-आवलियापविट्ठा य, आवलियाबाहिरा य।" इत्यादि।

(३६) अधः सप्तमीविषयं सूत्रं साक्षादुपदर्शयति-

अहे सत्तमाए णं भंते ! पुढवीए नरगा किंसंठिया पण्णत्ता ?। गोयमा ! दुविहा पण्णत्ता। तं जहा-वट्टे य, तंसा य।

(अहे सत्तमाए णं भंते ! इत्यादि) अधः सप्तम्यां भदन्त ! पृथिव्यां नरकाः किमिव संस्थिताः ?। भगवानाह-गौतम ! द्विविधाः प्रज्ञप्ताः। तद्यथा-(वट्टे य तंसा य इति) अधः सप्तम्यां हि पृथिव्यां नरका आवलिकाप्रविष्ट एव, नावलिकाबाह्याः, आवलिकाप्रविष्टा अपि पञ्च, नाधिकाः, तत्र मध्ये अप्रतिष्ठानाभिधाननरकेन्द्रको वृत्तः, सर्वेषामपि नरकेन्द्रकाणां वृत्तत्वात्। शेषास्तु चत्वारः पूर्वाऽऽदिषु दिक्षु ते त्र्यस्रयस्राः, तत उक्तं-वृत्ताश्च त्र्यस्राश्च ।

(३७) संप्रति नरकाऽऽवासानां बाहल्यप्रतिपादनार्थमाह-

इमीसे णं भंते ! रयणप्पभाए पुढवीए नरया केवतियं बाहल्लेणं पण्णत्ता ?। गोयमा ! तिण्णि जोयणसहस्साइं बाहल्लेणं पण्णत्ता। तं जहा-हेट्ठिल्ले चरिमंते घणा सहस्सं, मज्झे सुसिरा सहस्सं, उप्पिं संकुइया सहस्सं, एवं० जाव अहे सत्तमाए ॥

अस्यां भदन्त ! रत्नप्रभायां पृथिव्यां नरकाः कियद् बाहल्येन बहलस्य भावो बाहल्यं-पिण्डत्वावः, उत्सेध इत्यर्थः। तेन प्रज्ञप्ताः ?। भगवानाह—गौतम ! त्रीणि योजनसहस्राणि बाहल्येन प्रज्ञप्ताः। तद्यथा-अधस्तात् पादपीठे घना निचिताः सहस्रं योजनसहस्रं मध्ये पीठस्योपरि मध्यभागे शुषिराः सहस्रं योजनसहस्रं (तत उप्पिं ति) उपरि संकुचिताः शिखरीकृत्य संकोचनमुपगता योजनसहस्रं, तत एवं सर्वसंख्यया नरकाऽऽवासानां त्रीणि योजनसहस्राणि बाहल्यतो भवन्ति, एवं पृथिव्यां पृथिव्यां तावद्वक्तव्यं यावदधः सप्तम्याम्।

तथा चोक्तमन्यत्रापि—

" हेट्ठा घणा सहस्सं, उप्पिं संकोचतो सहस्सं तु।
मज्झे सहस्स सुसिरा, तिण्णि सहस्सूसिया णरया ॥१॥ "

(३८) संप्रति नरकाऽऽवासानामायामविष्कम्भप्रतिपादनार्थमाह-

इमीसे णं भंते ! रयणप्पभाए पुढवीए नरगा केवतियं आयामविक्खंभेणं,केवतियं परिक्खेवेणं पण्णत्ता ?। गोयमा ! दुविधा पण्णत्ता। तं जहा-संखेज्जवित्थडा य, असंखेज्ज-

वित्थडा य । तत्थ णं जे ते संखेज्जवित्थडा ते णं संखेज्जाइं जोयणसहस्साइं आयामविक्खंभेणं, संखेज्जाइं जोयणसहस्साइं परिक्खेवेणं पण्णत्ता । तत्थ णं जे ते असंखेज्जवित्थडा ते णं असंखेज्जाइं जोयणसहस्साइं आयामविक्खंभेणं, असंखेज्जाइं जोयणसहस्साइं परिक्खेवेणं पण्णत्ता । एवं० जाव तमाए ॥

(इमीसे णं भंते ! इत्यादि) अस्यां भदन्त ! रत्नप्रभायां पृथिव्यां नरकाः किंप्रमाणमायामविष्कम्भेन, समाहारो द्वन्द्वः, आयामविष्कम्भाभ्यामित्यर्थः । कियत् परिक्षेपेण परिरयेण प्रज्ञप्ताः ?। भगवानाह-गौतम ! द्विविधाः प्रज्ञप्ताः । तद्यथा-संख्येयविस्तृताश्च,असंख्येयविस्तृताश्च । संख्येयं संख्येययोजनप्रमाणं विस्तृतं विस्तारो येषां ते संख्येयविस्तृताः; एवमसंख्येयं विस्तृतं येषां तेऽसंख्येयविस्तृताः । चशब्दौ स्वगतानेकभेदप्रकाशनपरौ । तत्र ये ते संख्येयविस्तृतास्ते संख्येयानि योजनसहस्राणि आयामविष्कम्भेण,संख्येयानि योजनसहस्राणि परिक्षेपेण । तत्र ये तेऽसंख्येयविस्तृतास्ते असंख्येयानि योजनसहस्राणि आयामविष्कम्भेण,असंख्येयानि योजनसहस्राणि परिक्षेपेण प्रज्ञप्ताः। एवं प्रतिपृथिवि तावद् वक्तव्यं यावत् षष्ठी पृथ्वी । सूत्रपाठस्त्वेवम्-" सक्करप्पभाए णं पुढवीए णरगा केवइयं आयामविक्खंभेणं, केवइयं परिक्खेवेणं पण्णत्ता ?। गोयमा ! दुविहा पण्णत्ता । तं जहा-संखेज्जवित्थडा य, असंखेज्जवित्थडा य।" इत्यादि ॥

अहे सत्तमाए णं भंते ! पुच्छा ?। गोयमा ! दुविधा पण्णत्ता ?। तं जहा-संखेज्जवित्थमे य, असंखेज्जवित्थमा य। तत्थ णं जे से संखेज्जवित्थडे, से णं एक्कं जोयणसयसहस्सं आयामविक्खंभेणं, तिण्णि जोयणसयसहस्साइं सोलस सहस्साइं दोण्णि य सत्तावीसे जोयणसए तिण्णि कोसे अट्ठावीसं धणुसयाइं तेरस य अंगुलाइं अद्धंगुलयं च किंचि विसेसाहिए परिक्खेवेणं पण्णत्ते । तत्थ णं जे ते असंखेज्जवित्थडा, ते णं असंखेज्जाइं जोयणसयसहस्साइं आयामविक्खंभेणं असंखेज्जाइं० जाव परिक्खेवेणं पण्णत्ता ।

(अहे सत्तमाए णं भंते ! इत्यादि) अधः सप्तम्यां भदन्त ! पृथिव्यां नरकाः कियदायामविष्कम्भेण, कियत्परिक्षेपेण प्रज्ञप्ताः ?। भगवानाह-गौतम ! द्विविधाः। तद्यथा-संख्येयविस्तृत एकः; स चाप्रतिष्ठानाऽभिधानो नरकेन्द्रकोऽवसातव्यः। असंख्येयविस्तृताश्चत्वारः। तत्र योऽसौ संख्येयविस्तृतोऽप्रतिष्ठानाऽभिधानो नरकेन्द्रकः, स एकं योजनशतसहस्रमायामविष्कम्भेण, त्रीणि योजनशतसहस्राणि षोडश सहस्राणि द्वे योजनशते सप्तविंशे सप्तविंशत्यधिके त्रयः क्रोशा अष्टाविंशं धनुःशतं त्रयोदश अङ्गुलानि अर्धाङ्गुलं च किञ्चिद्विशेषाधिकं परिक्षेपेण प्रज्ञप्तः । इदं परिक्षेपपरिमाणं गणितभावनया जम्बूद्वीपपरिक्षेपपरिमाणवद्भावनीयम् । ये ते शेषाश्चत्वारोऽसंख्येयविस्तृतास्तेऽसंख्येयानि योजनशतसहस्रायामविष्कम्भेण, असंख्येयानि योजनसहस्राणि परिक्षेपेण प्रज्ञप्ताः ।

(३९) संप्रति नरकाऽऽवासानां वर्णप्रतिपादनार्थमाह-

इमीसे णं रयणप्पभाए पुढवीए नरया केरिसया वण्णेणं पण्णत्ता ?। गोयमा ! काला, कालावभासा, गंभीरलोमहरिसा भीमा उत्तासणया परमकिण्हा वण्णेणं पण्णत्ता, एवं० जाव अहे सत्तमाए ।

(इमीसे णं भंते ! इत्यादि) अस्यां भदन्त ! रत्नप्रभायां पृथिव्यां नरकाः कीदृशा वर्णेन प्रज्ञप्ताः ?। भगवानाह-गौतम ! काला:, तत्र कोऽपि निष्प्रभतया मन्दकालोऽपि आशङ्क्येत, ततस्तदाशङ्कान्यवच्छेदार्थं विशेषणान्तरमाह-कालाऽवभासाः कालः कृष्णोऽवभासः प्रतिभाविनिर्गमो येभ्यस्ते कालावभासाः, कृष्णप्रभापटलोपचिता इति भावः । अत एव गम्भीररोमहर्षाः-गम्भीरोऽतीवोत्कटो रोमहर्षो भयवशाद् येभ्यस्ते गम्भीररोमहर्षाः । किमुक्तं भवति ?-एवं नाम ते कृष्णाः कृष्णाऽवभासाः, यद्दर्शनमात्रेण नारकजन्तूनां भयसंपादनेन रोमहर्षमुत्पादयन्तीति । अत एव भीमा भयानकाः, भीमत्वादेव उत्त्रास्यन्ते नारका जन्तव एभिरिति उत्त्रासनाः, उत्त्रासना एव उत्त्रासनकाः, वर्णेन वर्णमधिकृत्य परमकृष्णाः प्रज्ञप्ताः; यत ऊर्द्धं न किमपि भयानकं कृष्णमस्तीति भावः । एवं प्रतिपृथिवि तावद्वक्तव्यं यावदधः सप्तम्याम् ।

(४०) गन्धमधिकृत्याऽऽह-

इमीसे णं भंते ! रयणप्पभाए पुढवीए णरगा केरिसया गंधेणं पण्णत्ता ?। गोयमा ! से जहानामए अहिमडे ति वा, गोमडे ति वा, सुणममे ति वा,मज्जारमडे ति वा.मणुस्समडे ति वा,महिसमडे ति वा, मुसगमडे ति वा,आसममे ति वा,हत्थिमडे ति वा,सीहमडे ति वा,वग्घमडे ति वा, विगमडे ति वा, दीवियमडे ति वा, मयकुहियचिरविनट्ठकुणिमवावन्नदुरभिगंधे असुइचिलीणविगयबीभच्छदरिसणिज्जे किमिजालाउलसंसत्ते। भवे एयारूवे सिया ?। णो इणट्ठे समट्ठे गोयमा ! इमीसे णं रयणप्पभाए पुढवीए णरगा एत्तो अणिट्ठतरका चेव अकंततरका चेव० जाव अमणामतरा चेव गंधेणं पण्णत्ता । एवं० जाव अहे सत्तमाए पुढवीए ॥

(इमीसे णं भंते ! इत्यादि) प्रश्नसूत्रं सुगमम् । भगवानाह-गौतम ! तद्यथा नाम-अहिमृत इति वा, अहिमृतो नाम-मृताहिदेहः, एवं सर्वत्र भावनीयम् । गोमृत इति वा, श्वमृत इति वा, मार्जारमृत इति वा, हस्तिमृत इति वा, सिंहमृत इति वा, व्याघ्रमृत इति वा, द्वीपकमृत इति वा, द्वीपकश्चित्रकः । सर्वत्र अहिश्चासौ मृतश्च अहिमृत इत्येवं विशेषणसमासः। इह मृतकं सद्यःसंपन्नं न विगन्धि भवति । तत आह-(मयकुहियचिरविणट्ठकुणिमवावन्नेत्यादि) मृतः सन् कुथितः पूतिभावमुपगतो मृतकुथितः, स चोच्छूनावस्थामात्रगतोऽपि भवति । न च स तथा विगन्धस्तत आह-चिरविनष्ट उच्छूनावस्थां प्राप्य स्फुटित इति भावः । सोऽपि तथा दुरभिगन्धः, तथा न भवति, तत आह-(कुणिमवावण्णेति) व्यापन्नं विशरारुभूतं कुणिमं मांसं यस्य स तथा । ततो विशेषणसमासः। दुरभिगन्ध इति । दुरभिः सर्वेषामाभिमुख्येन दुष्टो गन्धो यस्याऽसौ दुरभिगन्धः। अशुचिश्चिलीनो मनसः कल्पिमत्वप-

रिणामहेतुः (विगयं इति) विप्रनष्टं तदभिमुखतया प्राणिनां गतं गमनं यस्मिन् स तथा, बीभत्सया निन्दयाऽदर्शनीयो बीभत्सादर्शनीयः, ततो विशेषणसमासः, अशुचिर्विगतबीभत्सादर्शनीयः (किमिजालाउलसंसत्ते इति) संसक्तः सन् कृमिजालाकुलो जातः कृमिजालाकुलसंसक्तः, मयूरव्यंसकाऽऽदित्वात् समासः, संसक्तशब्दस्य च परनिपातः । एतावदुक्ते गौतम ! आह-(भवे एयारूवे सिया इति) स्याद्भवेदेतद् यदुत भवेयुरेतद्रूपा यथोक्तविशेषणविशिष्टाऽहिमृताऽऽदिरूपगन्धेनाधिकृता नरकाः, सूत्रे च बहुवचनेऽपि एकवचनं प्राकृतत्वात् । भगवानाह-गौतम ! नायमर्थः समर्थः-नायमर्थ उपपन्नः, यतोऽस्यां रत्नप्रभायां पृथिव्यां नरका इतो यथोक्तविशेषणविशिष्टाऽहिमृतादनिष्टतरा एव; तत्र किञ्चिद्द्रव्यमपि कस्याऽप्यनिष्टतरं भवति । तत आह-अकान्ततरा एव स्वरूपतोऽप्यकमनीयतरा एव, अभव्या एवेति भावः । तत्राकान्तमपि कस्याऽपि प्रियं भवति, यथा गर्दाशूकरस्याशुचिः, तत आह-अप्रियतरा एव, न कस्यापि प्रिया इति भावः । अत एवामनोज्ञतरा एव गन्धमधिकृत्य प्रज्ञप्ताः, तत्र मनोज्ञं मनोऽनुकूलमात्रं यत् पुनः स्वविषये मनोऽत्यन्तमासक्तं करोति तद्, न मनोज्ञममनोज्ञम् । एकार्थिका वा एते सर्वे शब्दाः शक्रेन्द्रपुरन्दराऽऽदिवद् नानादेशजविनेयजनानुग्रहार्थमुपात्ताः, एवं पृथिव्यां तावद्वक्तव्यं यावदधः सप्तम्याम् ।

(४१) स्पर्शमधिकृत्याऽऽह-

इमीसे णं भंते ! रयणप्पभाए पुढवीए णरया केरिसया फासेणं पण्णत्ता ? । गोयमा ! से जहानामए असिपत्तेइ वा खुरपत्तेइ वा कलंबचीरियापत्तेइ वा सत्तग्गेति वा कुंतग्गेति वा तोमरग्गेति वा नारायग्गेति वा सूलग्गेति वा लउडग्गेति वा भिंडिमालग्गेति वा सूचिकलापेति वा कविकच्छुत्ति वा विच्छुकंटेति वा इंगालेति वा जालाएति वा मुम्मुरएति वा अच्चि त्ति वा अलाएति वा सुद्धागणिएति वा । भवे एयारूवे सिया ? । णो इणठे समठे । गोयमा ! इमीसे णं रयणप्पभाए पुढवीए णरगा एतो अणिठ्ठतरा चेव० जाव अमणामतरा चेव वा फासेणं पण्णत्ता । एवं० जाव अहे सत्तमाए पुढवीए ॥

(इमीसे णमित्यादि) प्रश्नसूत्रं सुगमम् । भगवानाह-गौतम ! तद्यथा नाम-असिपत्रमिति वा-आसिः खड्गः, तस्य पत्रमसिपत्रं, क्षुरपत्रमिति वा, कदम्बचिरिकापत्रमिति वा, कदम्बचिरिका तृणविशेषः-स च दर्भादप्यतीव तुदकः, शक्तिः प्रहरणविशेषः, तदग्रमिति वा, कुन्ताग्रमिति वा, तोमराग्रमिति वा, भिण्डिमालः प्रहरणविशेषः, तदग्रमिति वा, सूचीकलाप इति वा, कपिकच्छूरिति वा, कपिकच्छूः कण्डूतिजनको वल्लीविशेषः, वृश्चिककंदेश इति वा, अङ्गार इति वा, अङ्गारो निर्धूमाग्निः, ज्वालेति वा, ज्वाला अनलसंबद्धा (मुम्मुर इति वा) मुर्मुरः फुस्फुकाऽऽदौ मसृणोऽग्निः, अर्चिरिति वा, अर्चिरनलविच्छिन्ना ज्वाला, अलातमुल्मुकम्, शुद्धाग्निरयःपिण्डानुगतोऽग्निः, विद्युदादिर्वा, इतिशब्दः सर्वत्रापि उपमाद्योतवस्तुस्वरूपपरिसमाप्तिद्योतकः, वाशब्दः परस्परसमुच्चये । इह कस्याऽपि नरकस्य स्पर्शः शरीरावयवच्छेदकोऽपरस्य ज्वलदकोऽन्यस्य व्यथाजनकोऽपरस्य दाहक इत्यादि । ततः साम्यप्रतिपत्त्यर्थमसिपत्राऽऽदीनां नानाविधानामुपमानानामुपादानम् (भवे एयारूवे सिया इत्यादि) प्राग्वत् ।

(४२) संप्रति नरकाऽऽवासानां महत्त्वमभिधित्सुराह-

इमीसे णं भंते ! रयणप्पभाए पुढवीए णरगा किं महालया पण्णत्ता ? । गोयमा ! अयं णं जंबुद्दीवे दीवे सव्वदीवसमुद्दाणं सव्वब्भंतरए सव्वखुद्दाए वट्टे तेल्लापूत [तेल्लापूप] [तेल्लापूप] संठाणसंठिते वट्टे पुक्खरकण्णियासंठाणसंठिते वट्टे रहचक्कवालसंठाणसंठिते वट्टे पडिपुण्णचंदसंठाणसंठिते एक्कं जोयणसतसहस्सं आयामविक्खंभेणं० जाव किंचि विसेसाहिए परिक्खेवेणं, देवे णं महिड्ढिए० जाव महाणुभागे० जाव इणामेव त्ति कट्टु केवलकप्पं जंबुद्दीवं तिहिं अच्छरागिं वा तिहिं तिसत्तखुत्तो अणुपरियट्टित्ता णं हव्वमागच्छेज्जा, से णं देवे ताए उक्किट्ठाए तुरियाए चवलाए चंडाए सिग्घाए जइणाए छेइयाए उद्धुयाए दिव्वाए देवगईए वीतीवयमाणे जहण्णेणं एगाहं वा दुयाहं वा तियाहं वा, उक्कोसेणं छम्मासे वीईवएज्जा, अत्थेगतिए णरगे वीईवएज्जा, अत्थेगतिए णो वीतीवएज्जा, महालया णं गोयमा ! इमीसे णं रयणप्पभाए पुढवीए णरगा पण्णत्ता । एवं० जाव अहे सत्तमाए अत्थेगतियं नरगं वीईवएज्जा, अत्थेगइयं नरगं नो वीईवएज्जा ।

(इमीसे णं इत्यादि) अस्यां भदन्त ! रत्नप्रभायां पृथिव्यां नरकाः किं महान्तः किंप्रमाणा महान्तः प्रज्ञप्ताः ? । पूर्वं त्वसंख्येयविस्तृता इति कथितं, तच्चासंख्येयत्वं नावगम्यते इति भूयः प्रश्नः । अत एवाऽत्र निर्वचनं भगवानुपमयाऽभिधत्ते-गौतम ! अयमिति यत्र स्थिता वयं, णमिति वाक्यालङ्कारे, अष्टयोजनोच्छ्रितया रत्नमय्या जम्बा उपलक्षितो द्वीपो जम्बूद्वीपः, सर्वद्वीपसमुद्राणां धातकीखण्डलवणाऽऽदीनां सर्वाभ्यन्तर आदिभूतः, सर्वक्षुल्लकः सर्वेभ्यो द्वीपसमुद्रेभ्यः क्षुल्लको ह्रस्वः सर्वक्षुल्लकः । तथाहि-सर्वे लवणाऽऽदयः समुद्राः सर्वे धातकीखण्डाऽऽदयो द्वीपा अस्माद् जम्बूद्वीपादारभ्य प्रवचनोक्तक्रमेण द्विगुणद्विगुणाऽऽयामविष्कम्भपरिक्षेपाः, ततोऽयं शेषसर्वद्वीपसमुद्रापेक्षया सर्वलघुरिति, तथा वृत्तो, यतस्तैलापूपसंस्थानसंस्थितः, तैलेन पक्वोऽपूपस्तैलापूपः, तैलेन हि पक्वोऽपूपः प्रायः परिपूर्णवृत्तो भवति, न घृतेन पक्व इति तैलविशेषणं, तस्येव संस्थानं, तेन संस्थितस्तैलापूपसंस्थानसंस्थितः, तथा वृत्तो, यतः पुष्करकर्णिकासंस्थानसंस्थितः, तथा वृत्तो, यतो रथचक्रवालसंस्थानसंस्थितः, तथा वृत्तो, यतः परिपूर्णचन्द्रसंस्थानसंस्थितः, अनेकोपमानोपमेयभावो नानादेशजविनेयप्रतिपत्त्यर्थः । एकं योजनशतसहस्रमायामविष्कम्भेन, त्रीणि योजनशतसहस्राणि षोडश सहस्राणि द्वे योजनशते सप्तविंशे त्रयः क्रोशा अष्टाविंशं धनुःशतं त्रयोदश अङ्गुलानि अर्द्धाङ्गुलं च किञ्चिद्विशेषाधिकं परिक्षेपेण प्रज्ञप्तः । परिक्षेपपरिमाणगणितभावना क्षेत्रसमासटीकातो, जम्बूद्वीपप्रज्ञप्तिटीकातो वा [illegible]

दितव्या । (देवे य णमित्यादि) देवश्च, णमिति वाक्यालङ्कारे । महर्द्धिकः महती ऋद्धिर्विमानपरिवाराऽऽदिका यस्य स महर्द्धिकः, महती द्युतिः शरीराभरणविषया यस्य स महाद्युतिकः, महद् बलं शरीरं प्राणा यस्य स महाबलः, महद् यशः ख्यातिर्यस्य स महायशाः, तथा (महेसक्खे इति) महेश इति महान् ईश्वर इत्याख्या यस्य स महेशाख्यः । अथवा-ईशनमीशो भावे घञ्प्रत्ययः, ऐश्वर्यमित्यर्थः, 'ईश ऐश्वर्ये इतिवचनात् । तत ईशमैश्वर्यमात्मनः ख्यातिः, अन्तर्भूतण्यर्थतया ख्यापयति प्रथयति, ईशाख्यः महाँश्चासावीशाऽऽख्यश्च महेशाख्यः । क्वचित् " महासोक्खे " इति पाठः । तत्र महत् सौख्यं यस्य प्रभूतसद्वेद्योदयवशात् स महासौख्यः । अन्ये पठन्ति-"महासक्खे इति" तत्रायं शब्दसंस्कारो महाश्वाक्षः । इयं चात्र पूर्वाऽऽचार्यप्रदर्शिता व्युत्पत्तिः, आशुगमनादश्वो मनः, अक्षाणि इन्द्रियाणि स्वविषयव्यापकत्वात्, अश्वश्चाक्षाणि च अश्वाक्षाणि, महान्ति अश्वाक्षाणि यस्याऽसौ महाश्वाक्षः । तथा-(महाणुभागे इति) अनुभागो विशिष्टवैक्रियाधिकरणविषया अचिन्त्या शक्तिः, "भागो चिंता सत्ती" इति वचनात् । महान् अनुभागो यस्य स महानुभागः । अमूनि महर्द्धिक इत्यादीनि विशेषणानि तत्सामर्थ्यातिशयप्रतिपादकानि । यावदिति चप्पुटिकात्रयकरणकालावधिप्रदर्शनपरम् । "इणामेव त्ति कट्टु " एवमेव मुधिकया, " एमेव मोरक्खा (कुक्षा), मुहा य मुद्दिय त्ति नायव्वा । " इति वचनात् । अवक्षयेति भावः । उक्तं च मूलटीकायाम्-(इणामेवेति कट्टु) एवमेव मुधिकया अवक्षयेति इतिकृत्वेति हस्तदर्शितचप्पुटिकात्रयकरणसूचकम्, केवलकल्पं परिपूर्णं जम्बूद्वीपं त्रिभिरप्सरोनिपातैः । अप्सरोनिपातो नाम-चप्पुटिका, तत्र तिसृभिश्चप्पुटिकाभिरिति द्रष्टव्यम् । चप्पुटिकाश्च कालोपलक्षणं, ततो यावता कालेन तिस्रश्चप्पुटिकाः पूर्यन्ते, तावत्कालमध्ये इत्यर्थः । त्रिःसप्तकृत्व एकविंशतिवारान्, अनुपरिवर्त्य सामस्त्येन परिभ्रम्य, ' हव्वं ' शीघ्रमागच्छेत्, स इत्थम्भूतगमनशक्तियोग्यो देवस्तया देवजनप्रसिद्धया उत्कृष्टया प्रशस्तविहायोगतिनामोदयात् प्रशस्तया, शीघ्रसंचरणात् त्वरितया,त्वरा संजाता अस्यामिति त्वरिता,तया त्वरितया, शीघ्रतरमेव तया प्रदेशान्तराक्रमणमिति; चपलेव चपला, तया, क्रोधाविष्टस्येव श्रमसंवेदनात् चण्डमेव चण्डा, तया, निरन्तरं शीघ्रगुणयोगात् शीघ्रा, तया शीघ्रया, परमोत्कृष्टवेगपरिणामोपेता जवना,तया । अन्ये तु जैनया विपक्षजेतृत्वेनेति व्याचक्षते; छेकया निपुणया,चातोद्भूतस्य दिगन्तव्यापिनो रजस इव या गतिः सा उद्भूता, तया । अन्ये त्वाहुः-उद्भूतया तदर्थातिशयेनेति, दिव्या दिवि देवलोके प्रवा दिव्वा, तया, देवगत्या व्यतिव्रजन् जघन्यत एकाहं वा एकमहर्यावत्, एवं द्व्यहं व्यहमुत्कर्षतः षण्मासान् यावत् व्यतिव्रजन्, तत्रास्त्येतद् यदुत एककान् काँश्चन नरकान् व्यतिव्रजेत् उल्लङ्घ्य परतो गच्छेत्, तथाऽस्त्येतत् यदुत-इत्थंभूतयाऽपि गत्या षण्मासानपि यावद् निरन्तरं गच्छन् एककान् काँश्चन नरकान् न व्यतिव्रजेत् नोल्लङ्घ्य परतो गच्छेत्,अतिप्रभूतायामतया तेषामन्तस्य प्राप्तुमशक्यत्वात्, एतावन्तो महान्तो गौतम! अस्यां रत्नप्रभायां नरकाः प्रज्ञप्ताः । एवमेकैकस्यां पृथिव्यां तावद्वक्तव्यं, यावदधः सप्तम्यां, नवरमधः सप्तम्यामेवं वक्तव्यम्-" अत्थेगइयं णरगं वीईवएज्जा,अत्थेगइए नरगे नो वीईवएज्जा ।" अप्रतिष्ठानाऽभिधस्यैकस्य नरकस्य लक्षयोजनाऽऽयामविष्कम्भतया अन्तस्य प्राप्तुं शक्यत्वात्,शेषाणां च चतुर्णामपि प्रभूतासंख्येययोजनकोटीकोटीप्रमाणत्वेनान्तस्य प्राप्तुमशक्यत्वात् ।

(४३) संप्रति किंमया नरकाः?, इति निरूपणार्थमाह-

इमीसे णं भंते ! रयणप्पभाए पुढवीए नरगा किंमया पन्नत्ता ? । गोयमा ! सव्ववइरामया पण्णत्ता । तत्थ णं णरएसु बहवे जीवा य पोग्गला य अवक्कमंति, विउक्कमंति, चयंति, उववज्जंति, सासता णं ते नरगा दव्वट्ठयाए वण्णपज्जवेहिं गंधपज्जवेहिं रसपज्जवेहिं फासपज्जवेहिं असासता, एवं० जाव अहे सत्तमा ॥

(इमीसे णं भंते ! इत्यादि) अस्यां भदन्त ! रत्नप्रभायां पृथिव्यां नरकाः किंमयाः किंविकाराः प्रज्ञप्ताः ?। भगवानाह-गौतम ! (सव्ववइरामया इति) सर्वाऽऽत्मना वज्रमयाः प्रज्ञप्ताः,वज्रशब्दस्य सूत्रे दीर्घता प्राकृतत्वात् । तत्र च येषु नरकेषु णमितिवाक्यालङ्कारे, बहवो जीवाश्च खरबादरपृथिवीकायिकरूपाः,पुद्गलाश्च अपक्रामन्ति,च्यवन्ते,व्युत्क्रामन्ति, उत्पद्यन्ते । एतदेव शब्दद्वयं यथाक्रमं पर्यायद्वयेन व्याचष्टे-(चयंति उववज्जंति) च्यवन्ते,उत्पद्यन्ते । किमुक्तं भवति ?-एके जीवाः पुद्गलाश्च यथायोगं गच्छन्ति, अपरे त्वागच्छन्ति । यस्तु प्रतिनियतसंस्थानाऽऽदिरूप आकारः स तदवस्थ एवेति । अत एवाऽऽह-(सासता णमिति) पूर्ववत्, ते नरका द्रव्यार्थतया तथाविधप्रतिनियतसंस्थानाऽऽदिरूपतया वर्णपर्यायैः गन्धपर्यायैः रसपर्यायैः स्पर्शपर्यायैः पुनरशाश्वता वर्णाऽऽदीनामन्यथाभवनात् । एवं प्रतिपृथिवि तावद्वक्तव्यं यावदधः सप्तमी पृथिवी । जी० ३ प्रति० ।

(४४) किंप्रतिष्ठिता नरकाः?-

तिपइट्ठिया णरगा पन्नत्ता । तं जहा-पुढविपइट्ठिया णरगा, आगासपइट्ठिया, आयपइट्ठिया । णेगमसंगहववहाराणं पुढविपइट्ठिया, उज्जुसुयस्स आगासपइट्ठिया, तिण्हं सद्दणयाणं आयपइट्ठिया ।

स्फुटं केवलं नारका नरकाऽऽवासा आत्मप्रतिष्ठिताः स्वरूपप्रतिष्ठिताः । तत्प्रतिष्ठानं नयैराह-(णेगमेत्यादि) नैकेन सामान्यविशेषग्राहकत्वात् तस्याऽनेकेन ज्ञानेन मिनोति परिच्छिनत्तीति नैगमः । अथवा-निगमा निश्चितार्थबोधाः, तेषु कुशलो भवो वा नैगमः । अथवा-नैको गमोऽर्थमार्गो यस्य स प्राकृतत्वेन नैगमः ॥ १ ॥ संग्रहणं त्रेदानां संगृह्णाति वा तान् संगृह्यन्ते वा ते येन स संग्रहः, सामान्यमात्राभ्युपगमपर इति ॥ २ ॥ व्यवहरणं व्यवह्रियते वा तेन विशेषेण वा सामान्येन व्यवह्रियते निराक्रियतेऽनेनेति लोकव्यवहारपरो व्यवहारो विशेषमात्राभ्युपगमपरः ॥३॥ एतेषां नयानां मतेनेति गम्यम् । ऋजु अवक्रमभिमुखं श्रुतं श्रुतज्ञानं यस्येति ऋजुश्रुतः,ऋजु वाऽतीतानागतवक्रपरित्यागाद् वर्तमानं वस्तु सूत्रयति गमयतीति ऋजुसूत्रः, स्वकीयं सांप्रतं च वस्तु नान्यदित्यभ्युपगमपरः । शब्द्यते अभिधीयते अभिधेयमनेनेति शब्दो वाचको ध्वनिः, नयन्ति परिच्छिन्दन्ति अनेकधर्माऽऽत्मकं सद् वस्तु सावधारणतयैकेन धर्मेणेति नयाः शब्दप्रधाननयाः । ते च त्रयः-शब्दसमभिरूढैवंभूताऽऽख्याः । तत्र शपनमभिधानं, शप्यते वा येन वस्तु स शब्दः, तदभिधेयविमर्शनपरो नयोऽपि श-

व्द एवेति । स च भावनिक्षेपरूपं वर्तमानमभिन्नलिङ्गवाचकं बहुपर्यायमपि च वस्त्वभ्युपगच्छतीति । वाचकं वाचकं प्रति वाच्यभेदं समभिरोहत्याश्रयति यः स समभिरूढः । स ह्यनन्तरोक्तविशेषणस्याऽपि वस्तुनः शक्रपुरन्दराऽऽदिवाचकभेदेन भेदमभ्युपगच्छति,घटपटाऽऽदिवदिति । यथा शब्दार्थो घटते चेष्टत इति घट इत्यादिलक्षण एवमिति तथाभूतः सत्यो घटाऽऽदिरर्थो, नान्यथेत्येवमभ्युपगमपर एवंभूतो नयः । अयं हि भावनिक्षेपाऽऽदिविशेषणोपेतं व्युत्पत्त्यर्थाऽऽविष्टमेवार्थमिच्छति, जलाऽऽहरणाऽऽदिचेष्टावन्तं घटमेवेति । तत्राऽऽद्यत्रयस्याऽशुद्धत्वात् प्रायो लोकव्यवहारपरत्वाच्च पृथिवीप्रतिष्ठितत्वं नारकाणामिति तत्त्वम्, चतुर्थस्य शुद्धत्वात् आकाशस्य च गच्छतां तिष्ठतां वा सर्वभावानामैकान्तिकाऽऽधारत्वाद् ध्रुवोऽनैकान्तिकत्वाच्चाऽऽकाशप्रतिष्ठितत्वमिति, त्रयाणां तु शुद्धतरत्वात् सर्वेषां भावानां स्वभावलक्षणाऽधिकरणस्याऽन्तरङ्गत्वाद्व्यभिचारित्वाच्च आत्मप्रतिष्ठितत्वमिति । न हि स्वस्वभावं विहाय परस्वभावाधिकरणा भावाः कदाचनाऽपि भवन्तीति । यत आह भाष्यकारः-" वत्थुं वसइ सहावे, सत्ताओ चेयणं व जीवम्मि । न विलक्खणत्तणाओ, निच्चे जायातवे चेव" ॥२२४२॥ (विशे०) इति । स्था० ३ ठा० ३ उ० [उपपातः ' उववाय ' शब्दे द्वितीयभागे ६१५ पृष्ठादारभ्य द्रष्टव्यः] [एवं शरीरावहारणावगाहनेऽपि स्वस्थाने]

(४५) नरकदुःखवर्णनम्-

पुच्छिस्सहं केवलिणं महेसिं,
कहंऽजिताओ णरगा पुरत्था ।
अजाणओ मे मुणि ! बूहि जाणं,
कहिं नु बाला नरए उविंति ? ॥१॥

जम्बूस्वामिना सुधर्मस्वामी पृष्टः । तद्यथा-भगवन् ! किंभूता नारकाः, कैर्वा कर्मभिरसुमतां तेषूत्पादः, कीदृश्यो वा तत्रत्या वेदनाः ?, इत्येवं पृष्टः सुधर्मस्वाम्याह-यदेतद्भवताऽहं पृष्टस्तदेतत् केवलिनमतीतानागतवर्तमानसूक्ष्मव्यवहितपदार्थवेदिनं, महर्षिमुग्रतपश्चरणकारिणमनुकूलप्रतिकूलोपसर्गसहिष्णुं श्रीमन्महावीरवर्धमानस्वामिनं, पुरस्तात् पूर्वं पृष्टवानस्मि । यथा-कथं किंभूता अभितापान्विता नरका नरकावासा भवन्ति?, इत्येतदजानतो मे मम हे मुने ! जानन् पूर्वमेव केवलज्ञानेनावगच्छन्, ब्रूहि कथय । कथं नु केन प्रकारेण किमनुष्ठायिनः ?। नुरिति वितर्के । बाला अज्ञा हिताहितप्राप्तिविवेकरहिताः, तेषु नरकेषूप सामीप्येन तद्योग्यकर्मोपादानतया,यान्ति गच्छन्ति ।१।

(४६) किंभूताश्च तत्र गतानां वेदनाः प्राडुःषन्तीत्येतदाऽऽह-

एवं मए पुट्ठे महाणुभावे,
इणं मोऽब्बवी कासवे आसुपन्ने ।
पवेदइस्सं दुहमट्ठदुग्गं,
आदीणियं दुक्कडियं पुरत्था ॥ २ ॥

एवमनन्तरोक्तं, मया विनेयेनोपगम्य पृष्टो महाँश्चतुस्त्रिंशदतिशयरूपोऽनुभावो माहात्म्यं यस्य स तथा । प्रश्नोत्तरकालं चेदं वक्ष्यमाणम्, "मो" इति वाक्यालङ्कारे, केवलाऽऽलोकेन परिज्ञाय मत्प्रश्ननिर्वचनमब्रवीदुक्तवान् । कोऽसौ ?, काश्यपो वीरो वर्द्धमानस्वामी, आशुप्रज्ञः, सर्वत्र सदोपयोगात् , स चैवं मया पृष्टो भगवानिदमाह-यथा यदेतद्भवता पृष्टं तदहं प्रवेदयिष्यामि कथयिष्याम्यग्रतो दत्तावधानः शृणुष्वेति । तदेवाऽऽह-दुःखमिति नरकं दुःखहेतुत्वात् असदनुष्ठानम् । यदि वा नरकाऽऽवास एव दुःखयतीति दुःखम् । अथवा-असातावेदनीयोदयात् तीव्रपीडाऽऽत्मकं दुःखमित्येतच्चाऽर्थतः परमार्थतो विचार्यमाणं दुर्गं गहनं विषमं दुर्विज्ञेयम् असर्वज्ञेन, तत्प्रतिपादकप्रमाणाभावादित्यभिप्रायः । यदि वा [दुहमट्ठदुग्गं ति] दुःखमेवार्थो यस्मिन् स दुःखनिमित्तो वा दुष्प्रयोजनो वा दुःखार्थो नरकः, स च दुर्गो विषमो दुरुत्तरत्वात्, तं प्रतिपादयिष्ये । पुनरपि तमेव विशिनष्टि-आ समन्ताद्दीनमादीनं तद्विद्यते यस्मिन् स आदीनिको-ऽत्यन्तदीनसत्त्वाऽऽश्रयः तद्,दुष्कृतमसदनुष्ठानं पापं वा तत्फलं वा, असातावेदनीयोदयरूपं तद्विद्यते यस्मिन् स दुष्कृतिकः, तं, पुरस्तादग्रतः प्रतिपादयिष्ये । पाठान्तरं वा-(दुक्कडिणं ति) दुष्कृतं विद्यते येषां ते दुष्कृतिनो नारकास्तेषां संबन्धि चरितं पुरस्तात् पूर्वस्मिन् जन्मनि नरकगतिगमनयोग्यं यत्कृतं प्रतिपादयिष्यत इति ।

यथाप्रतिज्ञातमेवाऽऽह-

जे केइ बाला इह जीवियट्ठी, पावाइं कम्माइं करंति रुद्दा ।
ते घोररूवे तमिसंधयारे, तिव्वाभितावे नरए पडंति ॥३॥

ये केचन महारम्भपरिग्रहपञ्चेन्द्रियवधपिशितभक्षणाऽऽदिके सावद्यानुष्ठाने प्रवृत्ता बाला अज्ञा रागद्वेषोत्कटास्तिर्यग्मनुष्याः, इहास्मिन् संसारेऽसंयमजीवितार्थिनः पापोपादानभूतानि कर्मोपयनुष्ठानानि रौद्राः प्राणिनां भयोत्पादकत्वेन भयानकहिंसाऽनृताऽऽदीनि कर्माणि कुर्वन्ति, त एवंभूतास्तीव्रपापोदयवर्तिनो घोररूपेऽत्यन्तभयानके (तमिसंधयारे ति) बहुलतमोऽन्धकारे यत्राऽऽत्माऽपि नोपलभ्यते-चक्षुषा केवलमवधिनाऽपि मन्द मन्दमुलूका इवाहि पश्यन्ति । तथा चाऽऽगमः-"कण्हलेस्से णं भंते ! णेरइए कण्हलेस्सं णेरइयं पणिहाए ओहिणा सव्वओ समंता समभिलोएमाणे केवइयं खेत्तं जाणइ, केवइयं खेत्तं पासइ ?। गोयमा ! नो बहुययरं खेत्तं जाणइ, णो बहुययरं खेत्तं पासइ । इत्तरियमेव खेत्तं जाणइ, इत्तरियमेव खेत्तं पासइ ।" इत्यादि । तथा तीव्रो दुःसहः खदिराङ्गारमहाराशितापादनन्तगुणोऽभितापः संतापो यस्मिन् स तीव्राभितापस्तस्मिन् एवंभूते नरके बहुवेदनेऽपरित्यक्तविषयाऽभिष्वङ्गाः स्वकृतकर्मगुरवः पतन्ति, तत्र च नानारूपा वेदनाः समनुभवन्ति च ।

तथा चोक्तम्-

" अक्खेंदियविसयसुहे, पमइ अविज्झायसिहिसिहाणिवहे ।
संसारोदहिबलए-ऽसुहम्मि दुक्खाऽऽगरे निरए ॥ १ ॥
पूयकलीरथलगुह-कुहरुच्छलिए रुहिरगंडुले ।
कक्खडिकत्तियछुहा-विरिक्कविवइण्णदेहड्ढे ॥ २ ॥
जंतंतरभिज्जंतु-च्छलंतसंसइभरियदिसिविवरे ।
मज्जंतुप्फिमियसमु-च्छलंतसीसट्ठिसंघाए ॥ ३ ॥
सुक्कंदकडाहु-क्कढंतदुक्कयकयंतकम्मंते ।
मूढविनिन्नुक्खित्तु-द्धदेहणिस्संतपब्भारे ॥ ४ ॥
बद्धंधयारदुग्गं-धबंधणागारदुक्करकिलेसे ।
भिन्नकरचरणसंकर-रुहिरवसादुग्गमप्पवहे ॥ ५ ॥

णिद्धमुहणिहसक्खि-त्तबंधणोम्मुहकंधरकबंधे ।
दढगहियतत्तसंडा-सयम्मिसमुक्खुडियजीहे ॥ ६ ॥
तिक्खंकुसग्गकड्ढिय-कंटयरुक्खग्गजज्जरसरीरे ।
निमिसंतरं पि दुल्लह-सुक्खेऽवक्खेवदुक्खम्मि ॥ ७ ॥
इय जीसणम्मि णिरए, पडंति जे विविहसत्तवहनिरया ।
सव्वब्भहा य नरा, जयम्मि कयपावसंघाया ॥८॥" इत्यादि ।

किञ्चान्यत्-

तिव्वं तसे पाणिणो थावरे य,
जे हिंसति आयसुहं पडुच्च ।
जे लूसए होइ अदत्तहारी,
ण सिक्खती सेयवियस्स किंचि ॥ ४ ॥

(तिव्वं तसेत्यादि) तथा तीव्रमतिनिरनुकम्पं रौद्रपरिणामतया हिंसायां प्रवृत्तः, त्रस्यन्तीति त्रसा द्वीन्द्रियाऽऽदयः, तान्, तथा स्थावरांश्च पृथिवीकायाऽऽदीन्, यः कश्चिन्महामोहोदयवर्ती, हिनस्ति व्यापादयति, आत्मसुखं प्रतीत्य, स्वशरीरसुखकृते नानाविधैरुपायैर्यः प्राणिनां लूषक उपमर्दकारी भवति, तथा अदत्तमपहर्तुं शीलमस्यासावदत्तहारी परद्रव्यापहारकः, तथा न शिक्षते नाभ्यसति नादत्ते (सेयवियस्स त्ति) सेचनीयस्याऽऽत्महितैषिणा सदनुष्ठाने यस्य संयमस्य किञ्चिदिति । एतदुक्तं भवति-पापोदयाद् विरतिपरिणामं काकमांसाऽऽदेरपि मनागपि न विधत्ते इति ॥ ४ ॥

तथा-

पागब्भि पाणे बहुणं-तिवाती,
अनिव्वते घातमुवेति बाले ।
णिहो णिसं गच्छति अंतकाले,
अहो सिरं कट्टु उवेइ दुग्गं ॥ ५ ॥

प्रागल्भ्यं धार्ष्ट्यं तद्विद्यते यस्य स प्रागल्भी, बहूनां प्राणिनां प्राणानतीव पातयितुं शीलमस्य स भवत्यतिपाती । एतदुक्तं भवति-अतिपात्यपि प्राणिनः प्राणानतिधार्ष्ट्याद् वदति-यथा वेदाऽभिहिता हिंसा अहिंसैव भवति, तथा राक्षामयं धर्मो यदुत आखेटकेन विनोदक्रिया । यदि वा-"न मांसभक्षणे दोषो, न मद्ये न च मैथुने । प्रवृत्तिरेषा भूतानां, निवृत्तिस्तु महाफला " ॥१॥ इत्यादि । तदेवं क्रूरसिंहकृष्णसर्पवत् प्रकृत्यैव प्राणातिपातानुष्ठायी, अनिर्वृतः कदाचिदप्यनुपशान्तः क्रोधाग्निना दह्यमानः । यदि वा शुष्ककर्मत्स्याऽऽदिवधकजीविकाप्रसक्तः सर्वदा परिणामपरिणतोऽनुपशान्तो, हन्यते प्राणिनः स्वकृतकर्मविपाकेन यस्मिन् स घातो नरकस्तमुप सामीप्येन एति याति, कः?, बालोऽज्ञो रागद्वेषोदयवर्ती, सोऽन्तकाले मरणकाले (निहो त्ति) न्यग्धस्तात् (सिणं ति) अधोऽन्धकारं गच्छतीत्यर्थः, यथा तेन दुश्चरितेन अधः शिरः कृत्वा दुर्गं विषमं यातनास्थानमुपैति; अवाक्शिरा नरके पततीत्यर्थः । सूत्र० १ श्रु० ५ अ० १ उ० ।

(४७) दशविधवेदनाः-

नेरइया णं दसविहं वेयणं पच्चणुभवमाणा विहरंति । तं जहा-सीयं, उसिणं, खुहं, पिवासं, कंडुं, परज्झं, भयं, सोगं, जरं, वाहिं ॥

" नेरइया " इत्यादि कण्ठ्यम् । नवरं वेदनां पीडां, तत्र शीतस्पर्शजनिता शीता, तां, सा च चतुर्थ्यादिनरकपृथिवीष्विति । एवमुष्णां प्रथमाऽऽदिषु, क्षुधं बुभुक्षां, पिपासां तृषं, कण्डूं खर्जुम्, (परज्झं ति) परतन्त्रतां, भयं भीतिं, शोकं दैन्यं, जरां वृद्धत्वं, व्याधिं ज्वरकुष्ठाऽऽदिकमिति । स्था० १० ठा० ।

(४८) साम्प्रतं पुनरपि नरकवर्तिनो नारका यदनुभवन्ति तद्दर्शयितुमाह-

हण छिंदह भिंदणं दहेति,
सद्दे सुणिता परहम्मिया णं ।
ते नारगाओ भयभिन्नसन्ना,
कंखंति कं नाम दिसं वयामो ? ॥ ६ ॥

तिर्यङ्मनुष्यभवात् सृत्वा नरकेषूपपन्ना अन्तर्मुहूर्तेन निर्लूनाऽमजसन्निभानि शरीराण्युत्पादयन्ति पर्याप्तिभावमागताश्चाति-भयानकान् शब्दान् परमाधार्मिकजनितान् शृण्वन्ति । तद्यथा-हत मुष्कराऽऽदिना, छिन्त खड्गाऽऽदिना, भिन्त शूलाऽऽदिना, दहत मुर्मुराऽदिना, णमिति वाक्यालङ्कारे । तदेवंभूतान् कर्णासुखान् शब्दान् भैरवान् श्रुत्वा, ते तु नारका भयोद्भ्रान्तलोचना भयेन भीत्या भिन्ना नष्टा संज्ञाऽन्तःकरणवृत्तिर्येषां ते तथा, नष्टसंज्ञाश्च कां दिशं व्रजामः?, कुत्र गतानामस्माकमेवंभूतस्याऽस्य महाघोरारवदारुणस्य दुःखस्य त्राणं स्यादित्येतत् काङ्क्षन्तीति ।

(४९) ते च भयोद्भ्रान्ता दिक्षु नष्टा यदनुभवन्ति तद्दर्शयितुमाह-

इंगालरासिं जलियं सजोतिं,
तेणोवमं भूमिमणुक्कमंता ।
ते डज्झमाणा कलुणं थणंति,
अरहस्सरा तत्थ चिरट्ठितीया ॥ ७ ॥

(इंगालेत्यादि) अङ्गाररशिं खदिराङ्गारपुञ्जं ज्वलितं ज्वालाऽऽकुलं, तथा सह ज्योतिषोद्द्योतेन वर्तत इति सज्योतिर्भूमिस्तेनोपमा यस्याः सा तदुपमा, तामङ्गारसन्निभां भूमिमाक्रमन्तस्ते नारका दह्यमानाः करुणं दीनं स्तनन्त्याक्रन्दन्ति । तत्र बादराग्नेरभावात्, तदुपमां भूमिमित्युक्तम् । एतदपि दिग्दर्शनार्थमुक्तम्, अन्यथा नारकतापस्येहत्याग्निना नोपमा घटते । ते च नारका महानगरदाहाधिकेन तापेन दह्यमाना अरहःस्वरा अप्रकटस्वरा महाशब्दाः सन्तः, तत्र तस्मिन्नरकावासे, चिरं प्रचुरं कालं स्थितिरवस्थानं येषां ते, तथा क्षुल्लकभवत्रयस्त्रिंशत्सागरोपमाणि, जघन्यतो दशवर्षसहस्राणि तिष्ठन्तीति ।

जइ ते सुया वेयरणीऽऽभिदुग्गा,
णिसिओ जहा खुर इव तिक्खसोया ।
तरंति ते वेयरणिंऽभिदुग्गां,
उसुचोइया सत्तिसु हम्ममाणा ॥ ८ ॥

(जइ ते सुया इत्यादि) सुधर्मस्वामी जम्बूस्वामिनं प्रतीदमाह-यथा भगवतेदमाख्यातम्-यदि ते त्वया श्रुता श्रवणपथमुपागता वैतरणी नाम क्षारोष्णरुधिराऽऽकारजलवाहिनी नदी आभिमुख्येन दुर्गाऽभिदुर्गा दुःखोत्पादिका । तथा निशितो यथा क्षुरस्तीक्ष्णानि शरीरावयवानां कर्तकानि स्रोतांसि यस्याः सा तथा, ते च नारकास्तप्ताङ्गारसन्निभां भूमिं विहायोदकं पिपासाबोऽनितप्ताः सन्तस्तापापनोदायाभिषिषिक्षवो वा तां

वैतरणीमभिदुर्गां तरन्ति । कथंभूताः?, इषुणा शरेण प्रतोदेनेव चोदिताः प्रेरिताः, शक्तिभिश्च हन्यमानास्तामेव भीमां वैतरणीं तरन्ति । तृतीयार्थे सप्तमी ॥ ८ ॥

किञ्च-

कीलेहिँ विज्झंति असाहुकम्मा,
नावं जविते सइविप्पहूणा ।
अन्ने तु सूलाहिँ तिसूलियाहिं,
दीहाहि विप्पूण अहे करंति ॥ ९ ॥

ताँश्च नारकानत्यन्तक्षारोष्णेन दुर्गन्धेन वैतरणीजलेन अभितप्तानायसकीलाकुलां नावमुपगच्छतः पूर्वाऽऽरूढा असाधुकर्माणः परमाधार्मिकाः कीलेषु करणकेषु विध्यन्तीति, ते च विध्यमानाः कलकलायमानेन सर्वस्रोतोऽनुयायिना वैतरणीजलेन नष्टसंज्ञा अपि सुतरां स्मृत्या विप्रहीणा अपगतकर्तव्यविवेका भवन्ति । अन्ये पुनर्नरकपाला नारकैः क्रीडन्तस्तान्नग्नाँश्शूलिकानिर्दीर्घिकाभिरायतानिर्विद्धा अधो भूमौ कुर्वन्तीति ।९।

अपि च-

केसिं च बंधित्तु गले सिलाओ ।
उदगंसि बोलंति महालयंसि ।
कलंबुयावालुएँ मुम्मुरे य,
लोलेंति पच्चंति अ तत्थ अन्ने ॥ १० ॥

(केसिं च इत्यादि) केषाञ्चिन्नारकाणां परमाधार्मिकाणां महतीं शिलां गले बध्वा महत्युदके (बोलंति त्ति) निमज्जयन्ति. पुनस्ततः समाकृष्य वैतरणीनद्याः कलम्बुकावालुकायां मुर्मुराग्नौ च लोलयन्ति अतितप्तवालुकायां चणकानिव समन्ततो लोलयन्ति, तथाऽन्ये तत्र नरकाऽऽवासे स्वकर्मपाशावपाशितान् नारकान् शूलके प्रोतकमांसपेशीवत् पचन्ति भर्जयन्तीति ॥१०॥

तथा-

असूरियं नाम महाभितावं,
अंधंतमं दुप्पतरं महंतं ।
उड्ढं अहेयं तिरियं दिसासु ।
समाहिओ जत्थऽगणी झियाइ ॥ ११ ॥

(असूरियमित्यादि) न विद्यते सूर्यो यस्मिन् सोऽसूर्यो नरको बहलान्धकारः कुम्भीपाकाऽऽकृतिः, सर्व एव वा नरकाऽऽवासोऽसूर्यो व्यपदिश्यते । तमेवंभूतं महाग्नितापमन्धतमसं दुष्प्रतरं दुरुत्तरं महान्तं विशालं नरकं महापापोदयाद् व्रजन्ति । तत्र च नरके ऊर्ध्वमधस्तिर्यक् च सर्वतः समाहितः सम्यगाहितो व्यवस्थापितोऽग्निर्जाज्वल्यतीति । पठ्यते च-(समाहिओ जत्थऽगणी झियाइ) यत्र नरके सम्यगूर्ध्वं भितः समुच्छ्रितोऽग्निः प्रज्वलति, तं तथाभूतं नरकं वराका व्रजन्ति ॥ ११ ॥

किञ्चान्यत्-

जंसी गुहाए जलणेऽतिउट्टे,
अविजाणओ डज्झइ लुत्तपण्णो ।
सया य कलुणं पुण घम्मठाणं,
गाढोवणीयं अतिदुक्खधम्मं ॥ १२ ॥

(जंसी गुहाए इत्यादि) यस्मिन्नरकेऽतिगतोऽसुमान् गुहायामित्युष्ट्रिकाकृतौ नरके प्रवेशितो ज्वलनेऽनावृतिवृतो वेदनाऽभिभूतत्वात् स्वकृतं दुश्चरितमजानन् लुप्तप्रज्ञोऽपगतावधिविवेको दह्यते । तथा सदा सर्वकालं पुनः करुणप्रायं कृत्स्नं वा घर्मस्थानमुष्णस्थानं, तापस्थानमित्यर्थः । (गाढं ति) अत्यर्थमुपनीतम् ढौकितं दुष्कृतकर्मकारिणां यत् स्थानं तत्ते व्रजन्ति । पुनरपि तदेव विशिनष्टि-अतिदुःखरूपो धर्मः स्वभावो यस्मिन्निति । इदमुक्तं भवति—अक्षिनिमेषमात्रमपि कालं न तस्य दुःखस्य विश्राम इति । तदुक्तम्—

" अच्छिनिमीलणमेत्तं, णत्थि सुहं दुक्खमेव पडिबद्धं ।
णिरए णेरइयाणं, अहोणिसं पच्चमाणाणं " ॥ १ ॥ १२ ॥

अपि च-

चत्तारि अगणिओ समारभित्ता,
जेहिं कूरकम्माऽभितविंति बालं ।
ते तत्थ चिट्ठंतिऽभितप्पमाणा,
मच्छा व जीवंतुवजोतिपत्ता ॥ १३ ॥

चतसृष्वपि दिक्षु चतुरोऽग्नीन् समारभ्य प्रज्वाल्य, यस्मिन्नरकाऽऽवासे क्रूरकर्माणो नरकपाला अभिमुखेनात्यर्थं तापयन्ति भर्त्सयन्ति बालमज्ञं नारकं पूर्वकृतदुश्चरितं, ते तु नारकजीवा एवमभितप्यमानाः कदर्थ्यमानाः स्वकर्मनिगमिताः तत्रैव प्रभूतं कालं महादुःखाऽऽकुले नरके तिष्ठन्ति । दृष्टान्तमाहयथा जीवन्तो मत्स्या मीना उपज्योतिरग्नेः समीपे प्राप्ताः परवशत्वादन्यत्र गन्तुमसमर्थाः, तत्रैव तिष्ठन्त्येवं नारका अपि, मत्स्यानां तापासहिष्णुत्वादग्नावत्यन्तं दुःखमुत्पद्यत इत्यतस्तद्ग्रहणमिति ॥ १३ ॥

किञ्चान्यत्-

संतच्छणं णाम महाहितावं,
ते नारया जत्थ असाहुकम्मा ।
हत्थेहि पाएहि य बंधिऊणं,
फलगं व तच्छंति कुहाडहत्था ॥ १४ ॥

(संतच्छमित्यादि) समेकीभावेन तक्षणं संतक्षणं, नामशब्दः संभावनायां, यदेतत्संतक्षणं तत्सर्वेषां प्राणिनां महाग्नितापं महादुःखोत्पादकमित्येवं संभाव्यते । यदेवं ततः किमित्याह-ते नारका नरकपाला यत्र नरकाऽऽवासे स्वभवनादागता असाधुकर्माणः क्रूरकर्माणो निरनुकम्पाः कुठारहस्ताः परशुपाणयः,तान्नारकानत्राणान् हस्तैः पादैश्च बध्वा संयम्य फलकमिव काष्ठशकलमिव, तक्षणुवन्ति तनूकुर्वन्ति, छिन्दन्तीत्यर्थः।१४।

अपि च-

रुहिरे पुणो वच्चसमुच्छिअंगे,
भिन्नुत्तमंगे परिवत्तयंता ।
पयंति णं णेरइए फुरंते,
सजीवमच्छे व अयोकवल्ले ॥ १५ ॥

ते परमाधार्मिकास्तान् नारकान् स्वकीये रुधिरे तप्तकवल्यां प्रक्षिप्ते पुनः पचन्ति । वर्चःप्रधानानि समुच्छ्रितान्यन्त्राणि अङ्गानि वा येषां ते तथा तान्, भिन्नं चूर्णितमुत्तमाङ्गं शिरो येषां ते तथा, तानिति । कथं पचन्तीत्याह-परिवर्तयन्त

उत्तानानवाङ्मुखान् वा कुर्वन्तः, णमिति वाक्यालङ्कारे । तान् स्फुरत इतश्चेतश्च विह्वलमात्मानं निक्षिपतः सजीवमत्स्यानिवाऽऽयसकवल्यामिति ॥ १५ ॥

णो चेव ते तत्थ मसीभवंति,
ण मिज्जती तिव्वऽभिवेयणाए ।
तमाणुजागं अणुवेदयंता,
दुक्खंति दुक्खी इह दुक्कमेणं ॥ १६ ॥

(णो चेवेत्यादि) ते च नारका एवं बहुशः पच्यमाना अपि (णो) नैव तत्र नरके पाके वा नरकानुभवे वा सति मषीभवन्ति नैव भस्मसाद्भवन्ति । तथा तीव्राभिवेदनया नापरमाग्निप्रक्रियमत्स्याऽऽदिकमप्यस्ति, यन्म्रियते उपमीयते; अनन्यसदृशी तीव्रां वेदनां वाचामगोचरामनुभवन्तीत्यर्थः । यदि वा-तीव्राभिवेदनयाऽप्यनुभूतस्वकृतकर्मत्वान्न म्रियन्ते इति । प्रभूतमपि कालं यावत्तत्तादृशं शीतोष्णवेदनाजनितं, तथा दहनच्छेदनभेदनतक्षणत्रिशूलाऽऽरोपणकुम्भीपाकशाल्मल्यारोहणाऽऽदिकं परमाधार्मिकजनितं परस्परोदीरणनिष्पादितं चानुभागं कर्मणां विपाकमनुवेदयन्तः समनुवेदयन्तः समनुभवन्तस्तिष्ठन्ति । तथा स्वकृतेन हिंसाऽऽदिनाऽष्टादशपापस्थानरूपेण सततोदीर्णदुष्कृतेन दुःखिनो दुःखयन्ति पीडयन्ते; नाक्षिनिमेषमपि कालं दुःखेन मुच्यन्त इति ॥१६॥

किञ्चान्यत्-

तेहिं च ते लोलणसंपगाढे,
गाढं सुतत्तं अगणिं वयंति ।
न तत्थ सायं लहतीऽभिदुग्गे,
अरहियाऽभितावा तह वी तविंति ॥ १७ ॥

तस्मिँश्च महायातनास्थाननरके, तमेव विशिनष्टि-नारकाणां लोलने सम्यक् प्रगाढो व्याप्तो भूतः स तथा तस्मिन् नरके, शीतार्ताः सन्तो गाढमत्यर्थं सुष्ठु तप्तमग्निं व्रजन्ति । तत्राऽप्यग्निस्थानेऽभिदुर्गे दह्यमानाः सातं सुखं मनागपि न लभन्ते, अरहितो निरन्तरोऽभितापो दाहो येषां ते अरहिताभितापास्तथाऽपि तान्नारकाँस्ते नरकपालास्तापयन्तीत्यर्थः, तप्ततैलाग्निना दहन्तीति ॥१७॥

अपि च-

से सुच्चई नगरवहे व सद्दे,
दुहोवणीयाणि पयाणि तत्थ ।
उदिण्णकम्माण उदिण्णकम्मा,
पुणो पुणो ते सरहं दुहेंति ॥ १८ ॥

'से' शब्दोऽथशब्दार्थे । अथाऽनन्तरं तेषां नारकाणां नरकपालैः रौद्रैः कदर्थ्यमानानां प्रयानको हाहारवप्रचुर आक्रन्दनशब्दो नगरवध इव श्रूयते समाकर्ण्यते, दुःखेन पीमयोपनीतानि उच्चरितानि करुणाप्रधानानि यानि पदानि-हा मातस्तात ! कष्टम् अनाथोऽहं शरणाऽऽगतस्तव त्रायस्व मामित्येवमादीनां पदानां तत्र नरके शब्दः श्रूयते, उदीर्णमुदयप्राप्तं कटुविपाकं कर्म येषां तथोदीर्णकर्माणो नरकपाला मिथ्यात्वहास्यरत्यादीनामुदये वर्तमानाः पुनः पुनर्बहुशस्ते (सरहं ति) सरभसं सोत्साहं नारकान् दुःखयन्त्यतस्तदसह्यं नानाविधैरुपायैर्दुःखमसातवेदनीयमुत्पादयन्तीति ॥१८॥

तथा-

पाणेहिं णं पाव विओजयंति,
तं ते पवक्खामि जहातहेणं ।
दंमेहिँ तत्था सरयंति बाला,
सव्वेहिँ दंडेहिँ पुराकडेहिं ॥ १९ ॥

(पाणेहि णमित्यादि) णमिति वाक्यालङ्कारे । प्राणैः शरीरेन्द्रियाऽऽदिभिस्ते पापाः पापकर्माणो नरकपाला वियोजयन्ति शरीरावयवानां पाटनाऽऽदिभिः प्रकारैर्विकर्तनादवयवान् विश्लेषयन्ति । किमर्थमेवं कुर्वन्तीत्याह-तद् दुःखकारणं 'ते' युष्माकं प्रवक्ष्यामि यथातथ्येनाविपरीतं प्रतिपादयामीति । दण्डयन्ति पीडामुत्पादयन्तीति दण्डा दुःखविशेषास्तैर्नारकाणामापादितैर्बाला निर्विवेका नरकपालाः पूर्वकृतं स्मारयन्ति । तद्यथा-तदा रुष्टस्त्वं खादसि समुत्कृत्य प्राणिनां मांसं, तथा पिबसि तद्रसं, मद्यं च, गच्छसि परदारान्, साम्प्रतं तद्विपाकापादितेन कर्मणाऽभितप्यमानः किमेवं रारट्षीत्येवं सर्वैः पुराकृतैर्दण्डैर्दुःखावशेषैः स्मारयन्तस्तादृग्भूतमेव दुःखविशेषमुत्पादयन्तो नरकपालाः पीडयन्तीति ॥१९॥

तथा-

ते हम्ममाणा णरगे पमंति,
पुन्ने दुरूवस्स महाऽऽभितावे ।
ते तत्थ चिट्ठंति दुरूवभक्खी,
तुदंति कम्मोवगया किमीहिं ॥ २० ॥

(ते हम्ममाणा इत्यादि) ते वराका नारका हन्यमानास्तोद्यमाना नरकपालेभ्यो नरकेऽन्यस्मिन् घोरतरे नरककदेशे पतन्ति गच्छन्ति । किंभूते नरके ?, पूर्णे भृते, दुष्टं रूपं यस्य तद् दुरूपं विष्ठाऽसृङ्मांसाऽऽदिकं मलं तस्य भृते, तथा महाभितापिते सन्तापोपेते, ते नारकाः स्वकर्मोपचयकृतैवंभूते नरके, दुरूपभक्षिणोऽशुच्यादिभक्षकाः प्रभूतं कालं यावत्तिष्ठन्ति । तथा कृमिभिः नरकपालाऽऽपादितैः परस्परकृतैश्च स्वकर्मोपगताः स्वकर्मदौकितास्तुद्यन्ते व्यथ्यन्ते इति । तथा चाऽऽगमः-" छट्ठी-सत्तमासु णं पुढवीसु नेरइया महंताइं लोहिकुंथुरूवाइं विउव्वित्ता अन्नमन्नस्स कायं समचउरंगेमाणा २ अणुज्झायमाणा अणुज्झायमाणा चिट्ठंति " ॥२०॥

किञ्चान्यत्-

सया कसिणं पुण धम्मठाणं,
गाढोवणीयं अतिदुक्खधम्मं ।
अंदूसु पक्खिप्प विहत्तु देहं,
वेहेण सीसं से ऽभितावयंति ॥ २१ ॥

(सया कसिणमित्यादि) सदा सर्वकालं, कृत्स्नं संपूर्णं, पुनस्तत्र नरके धर्मप्रधानम् उष्णप्रधानं स्थितिः स्थानं नारकाणां भवति । तत्र हि प्रलयातिरिक्ताग्निवाताऽऽदीनामत्यन्तोष्णरूपत्वात् तच्च दृढैर्निधत्तनिकाचितावस्थैः कर्मभिर्नारकाणामुपनीतं द्यौकितम् । पुनरपि विशिनष्टि-अतीव दुःखमसातावेदनीयं धर्मः स्वभावो यस्य तत्तथा, तस्मिँश्चैवंविधे स्थाने स्थितोऽसुमान् अन्दुषु निगमेषु देहं विहत्य प्रक्षिप्य च यथा

शिरश्च 'से' तस्य नारकस्य वेधेन रन्ध्रोत्पादनेनाऽभितापयन्तीति ॥ २१ ॥

अपि च-

छिंदंति बालस्स खुरेण नक्कं,
उट्ठे वि छिंदंति दुवे वि कन्ने ।
जिब्भं विणिक्कस्स विहत्थिमित्तं *,
तिक्खाहि सूलाहिऽजितावयंति ॥ २२ ॥

(छिंदंति बालस्सेत्यादि) ते परमाधार्मिकाः पूर्वदुश्चरितानि स्मारयित्वा बालस्याज्ञस्य निर्विवेकस्य प्रायशः सर्वदा वेदनासमुद्घातोपगतस्य क्षुरप्रेण नासिकां छिन्दन्ति । तथोष्ठावपि, द्वावपि कर्णौ छिन्दन्ति, तथा मद्यमांसरसाभिलिप्सोर्मृषा भाषिणो जिह्वां वितस्तिमात्रामाक्षिप्य तीक्ष्णाभिः शूलाभिरभितापयन्त्यपनयन्ति ॥ २२ ॥

तथा-

ते तिप्पमाणा तलसंपुडं व,
राइंदियं तत्थ थणंति बाला ।
गलंति ते सोणियपूयमंसं,
पज्जोइया खारपइद्धियंगा ॥ २३ ॥

(ते तिप्पमाणेत्यादि) ते छिन्ननासिकौष्ठजिह्वाः सन्तः शोणितं तिप्यमानाः क्वरन्तो यत्र यस्मिन् प्रदेशे रात्रिन्दिवं गमयन्ति, तत्र बाला अङ्गास्तालसंपुटा इव पवनेरितशुष्कतालपत्रसंचया इव सदा स्तनन्ति दीर्घविस्वरमाक्रन्दन्तस्तिष्ठन्ति । तथा प्रद्योतिता वह्निना ज्वलिताः, तथा क्षारेण प्रदिग्धाङ्गाः शोणितं पूयं मांसं च अहर्निशं गलन्तीति ॥ २३ ॥

किञ्च-

जइ ते सुता लोहितपूअपाई,
बालागणीतेअगुणा परेणं ।
कुंभी महंताऽहियपोरिसीया,
समूसिता लोहियपूयपुण्णा ॥ २४ ॥

(जइ ते सुता इत्यादि) पुनरपि सुधर्मस्वामी जम्बूस्वामिनमुद्दिश्य भगवद्वचनमाविष्करोति—यदि ते त्वया श्रुता आकर्णिता, लोहितं रुधिरं पूयं रुधिरमेव पक्वं, ते द्वे अपि पक्तुं शीलं यस्यां सा लोहितपूयपा—चिनी कुम्भी । तामेव विशिनष्टि-बालोऽभिनवः प्रत्यग्रोऽग्निस्तेन तेजोऽभितापः स एव गुणो यस्याः सा बालाग्नितेजोगुणा, परेण प्रकर्षेण तप्तेत्यर्थः । पुनरपि तस्या एव विशेषणमहती बृहत्तरा (अहियपोरिसीयं ति) पुरुषप्रमाणाधिका समुच्छ्रितोष्ट्रिकाऽऽकृतिरूर्ध्वं व्यवस्थिता, लोहितेन पूयेन च पूर्णा सैवंभूता कुम्भी समन्ततोऽग्निना प्रज्वलिता अतीव बीभत्सदर्शनेति भावः ॥ २४ ॥

(५०) तासु च यत् क्रियते तद्दर्शयितुमाह—

पक्खिप्प तासुं पवयंति बाले,
अट्टस्सरे ते कलुणं रसंते ।
तण्हाइया ते तउयं च तत्तं,
पज्जिज्जमाणाऽऽइतरं रसंति ॥ २५ ॥

(पक्खिप्प इत्यादि) तासु प्रत्यग्निना दीप्तासु लोहितपूयशरीरावयवकिल्बिषपूर्णासु दुर्गन्धासु च बालाज्ञारकौल्वाणरहितानार्तस्वरान् करुणं दीनं रसतः प्रक्षिप्य प्रपचन्ति, ते च नारकास्तथा कदर्थ्यमाना विरसमाक्रन्दन्तः तृषार्त्ताः सलिलं प्रार्थयन्तो मद्यं ते अतीव प्रियमासीदित्येवं स्मारयित्वा तप्तं त्रपु पाय्यमाना आर्ततरं रसन्ति रारट्यन्तीति ॥ २५ ॥

उपसंहारमाह—

अप्पेण अप्पं इह वंचइत्ता,
नवाहमे पुव्वसते सहस्से ।
चिट्ठंति तत्था बहु कूरकम्मा,
जहा कडं कम्म तहा सि भारे ॥ २६ ॥

(अप्पेणेत्यादि) इहाऽस्मिन् मनुष्यभवे आत्मना परवञ्चनप्रवृत्तेन स्वत एव परमार्थत आत्मानं वञ्चयित्वा अल्पेन स्तोकेन परोपघातसुखेन आत्मानं वञ्चयित्वा बहुशो भवानां, मध्ये अधमा भवाधमा मत्स्यबन्धकलुब्धकाऽऽदीनां भवास्तान् पूर्वजन्मसु शतसहस्रशः समनुभूय तेषु नवेषु विषयोन्मुखतया सुकृतपराङ्मुखत्वेन वाऽवाप्य महाघोरमतिदारुणं नरकवासं तत्र तस्मिन् मनुष्याः क्रूरकर्माणः परस्परतो दुःखमुदीरयन्तः प्रभूतं कालं यावत्तिष्ठन्ति ।

अत्र कारणमाह-यथा पूर्वजन्मसु यादृग्भूतेन अध्यवसायेन जघन्यजघन्यतराऽऽदीनि कृतानि कर्माणि,तथा तेनैव प्रकारेण (से) तस्य नारकजन्तोर्भीरो वेदनाः प्रादुर्भवन्ति स्वतः, परतः, उभयतो वेति ।

तथाहि-मांसादाः स्वमांसान्येवाग्निना प्रताप्य भक्षन्ते, तथा मांसरसपायिनो निजपूयरुधिराणि तप्तत्रपूणीव पाय्यन्ते, तथा मत्स्यघातकलुब्धकाऽऽदयस्तथैव छिद्यन्ते भिद्यन्ते यावन्मार्यन्ते, तथाऽनृतजाषिणां तत्स्मारयित्वा जिह्वाश्छेद्यन्ते, तथा पूर्वजन्मनि परकीयऽऽव्यापहारिणामङ्गोपाङ्गान्यपह्रियन्ते, तथा पारदारिकाणां वृषणच्छेदः शाल्मल्युपगूहनाऽऽदि च तैः कार्यन्ते । एवं महापरिग्रहाऽऽरम्भवतां क्रोधमानमायालोभिनां च जन्मान्तरस्वकृतक्रोधाऽऽदिदुष्कृतस्मारणेन तादृग्विधमेव दुःखमुत्पाद्यत इति कृत्वा सृष्ट्युच्यते तथाविधं कर्म तादृग्विधभूत एव तेषां तत्कर्मविपाकाऽऽदितो भार इति ॥ २६ ॥

तत्र किञ्चान्यत्-

समज्जिणित्ता कलुसं अणज्जा,
इट्ठेहि कंतेहि य विप्पहूणा ।
ते दुब्भिगंधे कसिणे अफासे,
कम्मोवगा कुणिमे आवसंति ॥ २७ ॥

(समज्जिणित्ता इत्यादि) अनार्या अनार्यकर्मकारित्वाद् हिंसाऽनृतस्तेयाऽऽदिभिराश्रवद्वारैः कलुषं पापं समर्ज्यार्शुभकर्मोपचयं कृत्वा, ते क्रूरकर्माणो दुरभिगन्धे नरके आवसन्तीति संटङ्कः । किंभूताः?-इष्टैः शब्दाऽऽदिभिर्विषयैः कान्तैः कमनीयैः

* वितस्तिवसतिभरतकातरमातुलिङ्गे हः ॥ ८ । १ । २१४ ॥ इति तस्य हः ।

विविधं प्रकर्षेण हीना विप्रमुक्ता नरके वसन्ति, यदि वा बहुर्थे कलुषं समर्जयन्ति, तैर्मातापुत्रकलत्राऽऽदिभिः कान्तैश्च विषयैर्विप्रमुक्ता एकाकिनस्ते दुरभिगन्धेन कुथितकलेवरातिशायिनि नरके कृत्स्ने संपूर्णेऽत्यन्ताशुभस्पर्शे एकान्तोद्वेजनीये शुभकर्मापगताः (कुणिमे त्ति) मांसपेशीरुधिरपूयान्त्रफिफिसकल्मषाऽऽकुले सर्वामेध्याधमे बीभत्सदर्शने हाहाऽऽरवाऽऽक्रन्देन कष्टं मा तावदित्यादिशब्दावधीरितदिगन्तराले परमाधमे नरकाऽऽवासे आ समन्तादुत्कृष्टतस्त्रयस्त्रिंशत्सागरोपमाणि यावद्यस्यां वा नरकपृथिव्यां यावदायुस्तावद्वसन्ति तिष्ठन्ति । (नैरयिकानामुद्वर्तना 'उव्वट्टणा' शब्दे १११ पृष्ठे द्वितीयभागे,उपपातश्च 'उववाय' शब्दे ६२५ पृष्ठे उक्तः । नैरयिकविषयाऽनुद्वर्त्ये तीर्थकृत्वाऽऽदिलाभः, अन्तक्रियाश्च 'अंतकिरिया' शब्दे प्रथमभागे ५६ पृष्ठे द्रष्टव्याः)

(५१) संप्रति नरकेषु पृथिव्यादिस्पर्शस्वरूपमाह-

इमीसे णं भंते ! रयणप्पभाए पुढवीए नेरइया केरिसयं पुढविफासं पच्चणुब्भवमाणा विहरंति ? ।

गोयमा ! अणिट्ठं० जाव अमणामं एवं० जाव अहे सत्तमाए ।

इमीसे णं भंते ! रयणप्पभाए पुढवीए नेरइया केरिसयं आउफासं पच्चणुब्भवमाणा विहरंति ? ।

गोयमा ! अणिट्ठं० जाव अमणामं, एवं० जाव अहे सत्तमाए, एवं० जाव वणस्सई फासं अहे सत्तमाए पुढवीए ।

(रयणप्पभेत्यादि) रत्नप्रभापृथिवीनैरयिका भदन्त ! कीदृशं पृथिवीस्पर्शं प्रत्यनुभवन्तो विहरन्ति?। भगवानाह-गौतम ! (अनिष्टं अकंतं अप्रियं अमणुण्णं अमणामं) अस्यार्थः प्राग्वत् । एवं प्रतिपृथिवि तावदुक्तव्यं यावत् तमस्तमायाम् । एवमप्तेजोवायुवनस्पतिस्पर्शसूत्राण्यपि भावनीयानि । नवरं तेजःस्पर्शेऽनुरूपतापरिणतनरककुड्यादिस्पर्शः, परोदीरितवैक्रियरूपो वा वेदितव्यः, न तु साक्षाद् बादराग्निकायस्पर्शः, तत्राऽसंभवात् ।

(५२) पृथ्वीनां बाहल्याऽऽदि-

इमीसे णं भंते ! रयणप्पभाए पुढवीए दोच्चं पुढविं पणिहाय सव्वमहंतिया बाहल्लेणं, सव्वखुड्डिया सव्वंतेसु ?। हंता गोयमा ! ।

इमीसे णं भंते ! रयणप्पभाए पुढवीए दोच्चं पुढविं पाणिहाय० जाव सव्वखुड्डिया सव्वंतेसु ? । हंता गोयमा ! ।

दोच्चा णं भंते ! पुढवी तच्चं पुढविं पणिहाय सव्वमहंतिया बाहल्लेणं पुच्छा ? । हंता गोयमा ! ।

दोच्चा णं पुढवी० जाव खुड्डिया सव्वंतेसु, एवं एएणं अभिलावेणं० जाव छट्ठिया पुढवी अहे सत्तमिं पुढविं पणिहाय० जाव सव्वखुड्डिया सव्वंतेसु ॥

(५३) महाकर्ममया वेदनाश्च-

इमीसे णं भंते ! रयणप्पभाए पुढवीए निरयपरिसामंतेसु जे पुढवीकाइया० जाव वणस्सइकाइया ते णं भंते ! जीवा महाकम्मतरा चेव, महाआसवतरा चेव, महावेयणतरा चेव ? । हंता गोयमा ! ।

इमीसे णं रयणप्पभाए पुढवीए निरयपरिसामंतेसु तहेव० जाव महावेयणतरका चेव, एवं० जाव अहे सत्तमाए ॥

इमीसे णं भंते ! रयणप्पभाए पुढवीए तीसाए निरयावाससयसहस्सेसु एक्कमेक्कंसि निरयावासंसि सव्वे पाणा सव्वे भूया सव्वे जीवा सव्वे सत्ता पुढवीकाइयत्ताए० जाव वणस्सइकाइयत्ताए णेरइयत्ताए उववन्नपुव्वा ? ।

हंता गोयमा ! असई,अदुवा अणंतखुत्तो,एवं० जाव अहे सत्तमाए पुढवीए, णवरं जत्थ जत्तिया णरगा ।

(इमीसे णं इत्यादि) अस्यां भदन्त ! रत्नप्रभायां पृथिव्यां त्रिंशति नरकावासशतसहस्रेषु एकैकस्मिन् नरकाऽऽवासे सर्वे प्राणा द्वीन्द्रियाऽऽदयः सर्वे भूता वनस्पतिकायिकाः, सर्वे सत्त्वाः पृथिव्यादयः सर्वे जीवाः पञ्चेन्द्रियाऽऽदयः ।

उक्तं च-

" प्राणा द्वित्रिचतुःप्रोक्ताः, भूताश्च तरवः स्मृताः ।
जीवाः पञ्चेन्द्रिया ज्ञेयाः, शेषाः सत्त्वा उदीरिताः ॥ १ ॥ "

पृथिवीकायिकतया अप्कायिकतया वायुकायिकतया वनस्पतिकायिकतया नैरयिकतया उपपन्नपूर्वाः । भगवानाह-(हंतेत्यादि) हन्तेतिप्रत्यवधारणे । गौतम ! असकृत् अनेकवारम्, अथवा-अनन्तकृत्वोऽनन्तान् वारान् संसारस्यानादित्वात् । एवं प्रतिपृथिवि तावद्वक्तव्यम्, यावदधः सप्तमी पृथिवी । नवरं यत्र यावन्तो नरकास्तत्र तावन्त उपयुज्य वक्तव्याः ।

क्वचिदिदमपि सूत्रं दृश्यते-

" इमीसे णं भंते ! रयणप्पभाए पुढवीए णिरयपरिसामंतेसु णं जे बायरपुढविकाइया० जाव वणस्सइकाइया ते णं भंते ! जीवा महाकम्मतरा चेव महाकिरियतरा चेव महावेयणतरा चेव ? । हंता गोयमा !० जाव महावेयणतरा चेव, एवं० जाव अहे सत्तमा । "

अस्यां भदन्त ! रत्नप्रभायां पृथिव्यां नरकपरिसमन्तेषु नरकाऽऽवासपर्यन्तवर्तिषु प्रदेशेषु बादरपृथिवीकायिकाः (० जाव वणस्सइकाइया इति) बादराप्कायिकाः बादरवायुकायिका बादरवनस्पतिकायिकास्ते भदन्त ! जीवा महाकर्मतरा एव महत् प्रभूतमसातवेदनीयं कर्म येषां ते महाकर्माणः,अतिशयेन महाकर्माणो महाकर्मतराः,चेत्यवधारणे । महाकर्मतरा एव कुत इत्याह-(महाकिरियतरा एव) महती क्रिया प्राणातिपाताऽऽदिका आसीत्प्राग्जन्मनि, तद्भवे तु तदध्यवसायानिवृत्त्या येषां ते महाक्रियाः, अतिशयेन महाक्रियतराः " निमित्तकारणहेतुषु सर्वासां विभक्तीनां प्रायो दर्शनम् " इति न्यायात् । हेतावत्र प्रथमा । ततोऽयमर्थः-यतो महाकर्मतरा एव । महाक्रियतरत्वमपि कुत इत्याह-महाश्रवतरा एव महान्त आश्रवाः पापोपादानहेतव आरम्भाऽऽदयो येषामासीरन् ते महाश्रवा अतिशयेन महाश्रवा महाश्रवतराः,चैवेति पूर्ववत्,तदेवं यतो महाकर्मतरा एव,ततो महावेदनतरा एव, नरकेषु क्षेत्रस्वभावजाया अपि वेदनाया अतिदुःसहत्वात् । भगवानाह-हन्त गौतम ! (ते णं

जीवा महाकम्मतरा चेवेत्यादि) प्राग्वत् । एवं प्रतिपृथिवि तावद् वक्तव्यं यावदधःसप्तमी । जी० ।

(एकैकस्मिन् नरके सर्वे जीवा उपपन्नपूर्वा इति 'उववाय' शब्दे द्वितीयभागे ६८० पृष्ठे चिन्तितम्)

(५४) संप्रत्युद्देशकार्थसंग्रहणिगाथाः प्राऽऽह-

पुढविं ओगाहित्ता, नरगा संठाणमेव बाहल्ले ।
विक्खंभपरिक्खेवो, वण्णो गंधो य फासो य ॥ १ ॥
तासे महालयाए, उवमा देवेण होइ कायव्वा ।
जीवा य पोग्गलाऽवक्कमंति तह सासया निरया ॥२॥
उववायपरीमाणं, अवहारुच्चत्तमेव संघयणं ।
संठाणवण्णगंधा, फासा ऊसासमाहारे ॥ ३ ॥
लेस्सा दिट्ठी णाणे, जोगुवओगे तहा समुग्घाए ।
तत्तो खुहा पिवासा, विउव्वणा वेयणा य भए ॥४॥
उववाओ पुरिसाणं, ओवम्मं वेयणाएँ दुविहाए ।
तिऽउव्वट्टण फासो, उववाओ सव्वजीवाणं ॥ ५ ॥

आसामक्षरमात्रगमनिका-[पुढवीओ इति] पृथिव्य अभिधेयाः । तद्यथा-[कइ णं भंते ! पुढवीओ पण्णत्ताओ ?, इत्यादि] तदनन्तरम् [ओगाहित्ता नरगा इति] यस्यां पृथिव्यां यदवगाह्य यादृशाश्च नरकाः, तदभिधेयम् [इमीसे णं भंते ! रयणप्पभाए पुढवीए असीउत्तरजोयणसयसहस्सबाहल्लाए उवरिं केवइयं ओगाहित्ता ? इत्यादि] ततो नरकाणां संस्थानम्, ततो बाहल्यं, तदनन्तरं विष्कम्भपरिक्षेपौ, ततो वर्णः, ततो गन्धः, तदनन्तरं स्पर्शः, ततस्तेषां नरकाणां महत्तायामुपमा देवेन भवति कर्तव्या,ततो जीवाः पुद्गलाश्च तेषु नरकेषु व्युत्क्रामन्तीति,तथा शाश्वताश्च नरका इति वक्तव्यं,तत उपपातो वक्तव्यः । तद्यथा-[इमीसे णं भंते ! रयणप्पभाए पुढवीए कतो उववज्जंति ? इत्यादि] तत एकसमयेनोत्पद्यमानानां परिमाणं, ततोऽपहारः,तत उच्चत्वं,तदनन्तरं संहननं,ततः संस्थानं, ततो वर्णः, तदनन्तरं गन्धः,ततः स्पर्शः,तत उच्छ्वासवक्तव्यता, तदनन्तरमाहारः,ततो लेश्या, ततो दृष्टिः, तदनन्तरं ज्ञानं, ततो योगः, तत उपयोगः,तदनन्तरं समुद्घातः,ततः क्षुत्पिपासे,ततो विकुर्वणाः। तद्यथा-(रयणप्पभापुढविनेरइयाणं भंते ! किं एगत्तं पभू विउव्वित्तए पहुत्तं पभू विउव्वित्तए इत्यादि) ततो वेदना, ततो भयं, तदनन्तरं पुरुषाणां पञ्चानामधः सप्तम्यामुपपातः, तत औपम्यं वेदनाया द्विविधायाः, शीतवेदनाया उष्णवेदनायाश्चेत्यर्थः । ततस्तास्थितिर्वक्तव्या, तदनन्तरमुद्वर्तना, ततः स्पर्शः-पृथिव्यादिस्पर्शो वक्तव्यः, ततः सर्वजीवानामुपपातः । तद्यथा-(इमीसे णं भंते ! रयणप्पभाए पुढवीए तीसाए निरयावाससयसहस्सेसु एगमेगंसि निरयावासंसि सव्वे पाणा सव्वे भूया इत्यादि) । जी० ३ प्रति० २ उ० ।

(५५) पुद्गलपरिणामः-

इमीसे णं भंते ! रयणप्पभाए पुढवीए नेरइया केरिसयं पुग्गलपरिणामं पच्चणुब्भवमाणा विहरंति ? । गोयमा ! अणिट्ठं० जाव अमणामं, एवं० जाव अहे सत्तमाए एवं णेयव्वं ।

(रयणप्पभेत्यादि) रत्नप्रभापृथिवीनैरयिका भदन्त ! कीदृशं पुद्गलपरिणाममाहाराऽऽदिपुद्गलविपाकं प्रत्यनुभवन्तः प्रत्येकं वेदयमाना विहरन्ति ? । भगवानाह-गौतम ! अनिष्टमित्यादि प्राग्वत्, एवं प्रतिपृथिवि तावद् वक्तव्यं, यावदधःसप्तमी । एवं वेदनालेश्यानामगोत्रारतिभयशोकक्षुत्पिपासाव्याध्युच्छ्वासानुतापकोधमानमायालोभाऽऽहारमैथुनपरिग्रहसंज्ञासूत्राणि वक्तव्यानि ।

अत्र संग्रहणीगाथे-

पोग्गलपरिणामं वेयणा य लेसा य णामगोए य ।
अरई भए य सोए, खुहा पिवासा य वाही य ॥ १ ॥
उस्सासे अणुतावे, कोहे माणे य मायँ लोभे य ।
चत्तारि य सन्नाओ, नेरइयाणं तु परिणामा ॥ २ ॥

(५६) संप्रति सप्तमनरकपृथिव्यां ये गच्छन्ति, तान् प्रतिपादयति-

एत्थ किर अतिवतंती, णरवसभा केसवा जलयरा य ।
मंडलिया रायाणो, जे य महारंभ कोडुंबी ॥ ३ ॥

(एत्थ किरेत्यादि) इह परिग्रहसंज्ञापरिणामवक्तव्यतायां चरमसूत्रं सप्तमनरकपृथिवीविषयं, तदनन्तरं च इयं गाथा, तत " एत्थ " इत्यनन्तरमुक्ताधः सप्तमी पृथिवी परामृश्यते । तत्र अधः सप्तमनरकपृथिव्यां, किलेत्यागमवादस्तत्रचने, आप्तवचनमेतदिति भावः । अतिव्रजन्ति अतिशयेन बाहुल्येन गच्छन्ति, नरवृषभाः केशवा वासुदेवा जलचराश्च तन्दुलमत्स्यप्रभृतयो, माण्डलिका वसुप्रभृतय इव, राजानश्चक्रवर्तिनः सुभूमाऽऽदय एव, ये च महारम्भाः कुटुम्बिनः कालसौकरिकाऽऽदय इव ॥ ३ ॥

संप्रति नरकेषु प्रस्तावात् तिर्यगादिषु चोत्तरवैक्रियावस्थानकालमानमाह-

जिन्नमुहुत्तो नरए-सु तिरियमणुएसु होइ चत्तारि ।
देवेसु अद्धमासो, उक्कोसविउव्वणा भणिया ॥ ४ ॥

(भिन्नमुहुत्तो निरएसु इत्यादि) भिन्नः क्षणमो मुहूर्तो भिन्नमुहूर्तः, अन्तर्मुहूर्तमित्यर्थः । नरकेषूत्कर्षतो विकुर्वणा स्थितिकालः, तिर्यङ्मनुष्येषु चत्वारि, अन्तर्मुहूर्तानि देवेष्वर्द्धमासः, उत्कर्षतो विकुर्वणाऽवस्थानकालो भणितः तीर्थकरगणधरैः ॥४॥

संप्रति नरकेषु आहाराऽऽदिस्वरूपमाह-

जे पोग्गला अनिट्ठा, णियमा सो तेसिँ होइ आहारो ।
संठाणं पि य तेसिं, नियमा हुंडं तु णायव्वं ॥ ५ ॥

(जे पोग्गलेत्यादि) ये पुद्गला अनिष्टाः नियमात् स तेषां भवत्याहारः, संस्थानं तु संस्थानं पुनः हुण्डमपि जघन्यमतिनिकृष्टं वेदितव्यम् । एतच्च भवधारणीयशरीरमधिकृत्य वेदितव्यम्, उत्तरवैक्रियसंस्थानस्याग्रे वक्ष्यमाणत्वात् । इयं च प्रागुक्तार्थसंग्रहगाथा, ततो न पुनरुक्तदोषः ॥ ५ ॥

संप्रति विकुर्वणास्वरूपमाह-

असुभा विउव्वणा खलु, नेरइयाणं तु होइ सव्वेसिं ।
वेउव्वियं सरीरं, उसंघयणं हुंडसंठाणं ॥ ६ ॥

सर्वेषां नैरयिकाणां विकुर्वणा खलु निश्चितमशुभा भवति । यद्यपि शुभं विकुर्वणेयं चिन्तयति, तथाऽपि तथाविधप्रतिकूलकर्मोदयतस्तेषामशुभैव विकुर्वणा भवति, तदपि च वैक्रियमुत्तरवैक्रियं शरीरमसंहननम्, अस्थ्यभावात्, उपलक्षणमेतत्, भवधारणीयं च वैक्रियशरीरं च संहननं, तथा हुण्डसंस्थानं, तत उत्तरवैक्रियं शरीरं हुण्डस्थानानाम्न एव भवप्रत्यय उदयभावात् ॥ ६ ॥

अस्साओ उववन्नो, अस्साओ चेव जहइ निरयभवं ।
सव्वपुढवीसु जीवा, सव्वेसु ठिईविसेसेसु ॥ ७ ॥

(अस्साओ उववन्नो इत्यादि) कश्चिद् जीवः सर्वास्वपि पृथिवीषु रत्नप्रभाऽऽदिषु तमस्तमापर्यन्तासु, सर्वेष्वपि च स्थितिविशेषेषु जघन्याऽऽदिरूपेषु असातोऽसातोदयकलित उपपन्न उत्पत्तिकालेऽपि प्राग्भवमरणकाले च्युतमहादुःखानुवृत्तिभावात्, उत्पद्यनन्तरमपि असात एवासातोदयकलित एव, सकलमपि निरयभवं (जहइ) त्यजति क्षपयति, न तु जातुचिदपि सुखलेशमप्यास्वादयति । आह-किं तत्र कदाचित् सातोदयोऽपि भवति येनैवमुच्यते ?। उच्यते-भवति ॥ ७ ॥

तथा चाऽऽह-

उववाएण च सातो, नेरइओ देवकम्मुणा वा वि ।
अज्झवसाणनिमित्तं, अहवा कम्माणुभावेण ॥ ८ ॥

(उववाएणेत्यादि) "उववाएणं" इत्यत्र सप्तम्यर्थे तृतीया, उपपातकाले सातं सातवेदनीयकर्मोदयं कश्चिद्वेदयते, यः प्राग्भवे दादच्छेदाऽऽदिव्यतिरेकेण मरणमुपगतोऽतिसंक्लिष्टाध्यवसायी समुत्पद्यते, तदा न हि तस्य प्राग्भवानुबन्धमाधिरूपं दुःखं, नाऽपि क्षेत्रस्वभावजं, नाऽपि परमाधार्मिककृतं, नाऽपि परस्परोदीरितम् । तत एवंविधदुःखाभावादसौ सातं वेदयते इत्युच्यते । (देवकम्मुणा वा वि इति) देवकर्मणा पूर्वसामन्तिकदेवप्रयुक्तया क्रियया । तथाहि-गच्छति पूर्वं सामन्तिको देवः, पूर्वपरिचितस्य नैरयिकस्य वेदनोपशमनार्थं, यथा बलदेवकृष्णवासुदेवस्य । स च वेदनोपशमो देवकृतो मनाक् कालमात्र एव भवति । तत ऊर्द्धं नियमात् क्षेत्रस्वभावजा, अन्या वा वेदना प्रवर्तते, तथास्वाभाव्यात् । (अज्झवसाणनिमित्तमिति) अध्यवसाननिमित्तं सम्यक्त्वोत्पादकाले, तत ऊर्ध्वं वा कदाचित् तथाविधविशिष्टशुभाध्यवसायप्रत्ययं कश्चिन्नैरयिको बाह्यक्षेत्रस्वभावजवेदनासद्भावेऽपि सातोदयमेवानुभवति, सम्यक्त्वोत्पादकाले हि जात्यन्धस्य चक्षुर्लाभ इव महान् प्रमोद उपजायते, तदुत्तरकालमपि कदाचित् तीर्थकरगुणानुमोदनाऽऽद्यनुगतां विशिष्टां भावनां भावयतः, ततो बाह्यक्षेत्रस्वभावजवेदनासद्भावेऽप्यन्तःसातोदयो विजृम्भमाणो न विरुध्यते । (अहवा कम्माऽणुभावेणमिति) अथवा कर्मानुभावेन बाह्यतीर्थकरजन्मदीक्षाज्ञानापवर्गकल्याणसंभूतिलक्षणसंज्ञानिमित्तमधिकृत्य तथाविधस्य सातवेदनीयस्य कर्मणोऽनुभावेन विपाकोदयेन कश्चिन् सातं वेदयते । न चैतद् व्याख्यानमनार्षम् । यत उक्तं वसुदेवचरिते-इह नैरयिकाः कुम्भ्यादिषु पच्यमानाः कुन्ताऽऽदिभिर्भिद्यमाना वा भयोत्त्रस्तास्तथाविधप्रयत्नवशाद्ऊर्ध्वमुत्प्लवन्ते ॥ ८ ॥

ततस्तदुत्पातपरिमाणप्रतिपादनार्थमाह-

नेरइयाणुप्पाओ, उक्कोसं पंचजोयणसयाइं ।
दुक्खेणऽभिदुयाणं, वेयणसतसंपगाढाणं ॥ ९ ॥

(नेरइयाणुप्पाओ इति) नैरयिकाणां दुःखेनाऽभिद्रुतानां सर्वाऽऽत्मना व्याप्तानां वेदनाशतसंप्रगाढानां वेदनाशतानि अपरिमिता वेदनाः संप्रगाढानि अवगाढानि येषां ते वेदनाशतसंप्रगाढाः । सुखाऽऽदिदर्शनाद् निष्ठान्तस्य परनिपातः । तेषां, हेतुहेतुमद्भावश्चात्र-यतो वेदनाशतसंप्रगाढाः ततो दुःखेनाऽभिद्रुताः । तेषां जघन्यत उत्पातो गव्यूतमात्रम्, एतच्च संप्रदायादवसीयते, तथा च दृश्यते क्वचिदेवमपि पाठः-" नेरइयाणुप्पाओ, गाउयलक्कोसपंचजोयणसयाइं । " इति । उत्कर्षतः पञ्चयोजनशतानि दुःखेनाऽभिहतानामित्युक्तम् ॥ ९ ॥

ततो दुःखमेव निरूपयति-

अच्छिनिमीलणमेत्तं, नत्थि सुहं दुक्खमेव पडिबद्धं ।
नरए नेरइयाणं, अहोनिसं पच्चमाणाणं ॥ १० ॥
अतिसीयं अतिउण्हं, अइतण्हा अइखुहा अइभयं च ।
नरए नेरइयाणं, दुक्खसयाइं अविस्सामं ॥ ११ ॥

(अच्छिनिमीलणमेत्तमित्यादि) नरके नैरयिकाणामुष्णवेदनायाः शीतवेदनाया वा अहर्निशं पच्यमानानां नाऽक्षिनिमीलनमात्रमपि अक्षिनिकोचकालमात्रमपि अस्ति सुखं, किं तु दुःखमेव केवलं प्रतिबद्धमनुबद्धं, सदाऽनुगतमिति भावः ॥ १० ॥ ११ ॥

अथ यत्तेषां वैक्रियशरीरं तत्तेषां मरणकाले कथं भवतीति निरूपणार्थमाह-

तेयाकम्मसरीरा, सुहुमसरीरा य जे अपज्जत्ता ।
जीवेण विप्पमुक्का, वच्चंति सहस्ससो भेदं ॥ १२ ॥

(तेयाकम्मेत्यादि) तैजसकार्मणशरीराणि यानि सूक्ष्मशरीराणि सूक्ष्मनामकर्मोदयवतां पर्याप्तानामपर्याप्तानां चौदारिकशरीराणि वैक्रियाऽऽहारकशरीराणि च तेषामपि प्रायो मांसचक्षुरग्राह्यतया सूक्ष्मत्वात्, तथा यानि अपर्याप्तानि अपर्याप्तशरीराणि, तानि जीवेन मुक्तमात्राणि सन्ति सहस्रसो भेदं व्रजन्ति; विशकलितास्तत्परमाणुसङ्घाता भवन्तीत्यर्थः ॥ १२ ॥

एतासामेव गाथानां संग्राहिकां गाथामाह-

एत्थ य निरयमुहुत्तो पुग्गल असुभा य होइ अस्साओ ।
उववाओ उप्पाओ, अत्थिसरीरा य नायव्वा ॥ १३ ॥

(एत्थ य निरयेत्यादि) प्रथमा गाथा (एत्थ) इतिपदोपलक्षिता । द्वितीया-(भिन्नमुहुत्तो इति) तृतीया-(पोग्गला इति) (जे पोग्गला अतिट्ठा इत्यादि) चतुर्थी-(असुभा इति) (असुभा विउव्वणा खलु इत्यादि) । एवं शेषपदान्यपि भावनीयानि ॥ १३ ॥ जी० ३ प्रति० ३ उ० । (स्त्रीणां सप्तमनरकपृथिवीगमनविचारः ' इत्थिलिंगसिद्ध ' शब्दे द्वितीयभागे ५६१ पृष्ठे गतः)

सुया मे नरए ठाणा, असीलाणं च जा गई ।
बालाणं कूरकम्माणं, पगाढा जत्थ वेयणा ॥ १४ ॥

' मे ' मया नरके स्थानानि श्रुतानि, या गतिर्नरकाऽऽदि अशीलानां गतिर्विद्यते । यत्र यस्यां गतौ क्रूरकर्मणां बालानां मूर्खाणाम् आत्महितविध्वंसकानां प्रगाढा वेदनाऽस्ति ॥ १४ ॥ उत्त० ५ अ० ।

विषयसूची-

(१) नरकनिक्षेपः ।
(२) सप्तनरकपृथिवीनामानि ।
(३) पृथ्वीनामगोत्रनिरूपणम् ।
(४) प्रतिपृथिवि बाहल्यप्ररूपणम् ।
(५) त्रिविधकाण्डप्रतिपादनम् ।
(६) तत्र खरकाण्डवक्तव्यता ।
(७) रत्नकाण्डविचारः ।
(८) प्रतिपृथिवि नरकावाससंख्यासंख्यानम् ।
(९) प्रतिपृथिवि घनोदध्यस्तित्वप्ररूपणा ।
(१०) रत्नकाण्डबाहल्याऽऽख्यानम् ।
(११) पङ्कबहुलकाण्डवक्तव्यता ।
(१२) अब्बहुलकाण्डस्य बाहल्यम् ।
(१३) घनोदधिघनवातयोर्बाहल्यम् ।
(१४) क्षेत्रच्छेदेन छिद्यमानायाः पृथिव्या रूक्ष्याणां वर्णगन्धरसस्पर्शसंस्थानवर्णनम् ।
(१५) खरकाण्डाऽऽदीनां बाहल्यवर्णाऽऽदिप्ररूपणम् ।
(१६) पङ्कबहुलकाण्डाऽऽदीनां बाहल्यवर्णाऽऽदिनिरूपणम् ।
(१७) रत्नप्रभाऽऽदीनां संस्थानप्रतिपादनम् ।
(१८) लोकान्तादबाधा ।
(१९) रत्नप्रभापृथिव्यादीनामधो गृहाऽऽदिसत्तानिराकरणम् ।
(२०) अमूनि रत्नप्रभाऽऽदीनामपान्तराणानि घनोदध्यादिव्याप्तानि, तत्र कस्मिन्नपान्तराले कियान् घनोदध्यादिरिति प्रतिपादनम् ।
(२१) घनोदधिबलयस्य तिर्यग्बाहल्यमानम् ।
(२२) घनवातवलयस्य तिर्यग्बाहल्यपरिमाणप्रतिपादनम् ।
(२३) तनुवातबलयस्य तिर्यग्बाहल्यपरिमाणनिरूपणम् ।
(२४) एष्वेव घनोदध्यादिबलयेषु क्षेत्रच्छेदेन कृष्णवर्णाऽऽद्युपेतरूक्ष्यास्तित्वप्ररूपणम् ।
(२५) पृथ्वीनामायामविष्कम्भौ ।
(२६) पृथ्व्यः समा अन्तर्बहिर्वा ।
(२७) पृथिवीषु जीवाः सर्वत्र उपपन्नपूर्वाः ।
(२८) सर्वे जीवाः पृथ्वीषु प्रविष्टपूर्वाः ।
(२९) त्यक्तपूर्वाः सर्वे पुद्गलाः ।
(३०) रत्नप्रभायाः शाश्वतत्वाशाश्वतत्वविचारः ।
(३१) रत्नप्रभायाः कालास्थितिः ।
(३२) पृथिव्यो बाहल्येन तुल्याः ।
(३३) यस्यां पृथिव्यां यस्मिन् प्रदेशे नरकाऽऽवासास्तत्प्रतिपादनम् ।
(३४) नरकवर्णैकः ।
(३५) नरकावाससंस्थानविवरणम् ।
(३६) अधःसप्तमीविषये संस्थानवर्णनम् ।
(३७) नरकावासानां बाहल्यप्रतिपादनम् ।
(३८) नरकावासानामायामविष्कम्भप्ररूपणम् ।
(३९) नरकावासानां वर्णप्रतिपादनम् ।
(४०) तत्र गन्धविवेकः ।
(४१) तथा स्पर्शप्ररूपणम् ।
(४२) नरकावासानां महत्त्वाभिधानम् ।
(४३) नरका यन्मयास्तत्प्ररूपणम् ।
(४४) नरका यत्प्रतिष्ठितास्तत्प्रतिपादनम् ।
(४५) नरकदुःखवर्णनम् ।
(४६) तत्र गतानां यादृशी वेदना प्राक्तनैर्यति तन्निरूपणम् ।
(४७) दशविधवेदनावर्णनम् ।
(४८) नरकवर्तिनां नारकाणां वेदनानुभवस्य प्रतिपादनम् ।
(४९) नारका भयोद्भ्रान्ता दिक्षु नष्टा यदनुभवन्ति तत्प्ररूपणम् ।
(५०) कुम्भ्यादिषु यत् क्रियते तत्प्रदर्शनम् ।
(५१) नरकेषु पृथिव्यादिस्पर्शस्वरूपनिरूपणम् ।
(५२) पृथ्वीनां बाहल्याऽऽदिप्ररूपणम् ।
(५३) महाकर्ममया वेदनाः ।
(५४) पूर्वोक्तार्थप्रतिपादिकाः संग्रहगाथाः ।
(५५) पुद्गलपरिणामाः ।
(५६) सप्तमनरकपृथिव्यां ये गच्छन्ति तेषां प्रतिपादनं, तत्प्रस्तावादाहारविकुर्वणातदुत्पातपरिमाणाऽऽदिनिरूपणम् ।

णरगगइ-नरकगति-स्त्री० । नृणन्ति विवेकमासाद्य नयधर्मपरा भवन्तीति नरा मनुष्याः, तेषु विषये गतिर्नरकगतिः (कर्म०) नरानुपलक्षणत्वात्तिरश्चोऽपि प्रभूतपापकारिणः कायन्तीवाऽऽह्वयन्तीवेति नरका नरकावासाः, तत्रोत्पन्ना जन्तवोऽपि नरकाः, नरको वा विद्यते येषां ते " अभ्राऽऽदिभ्यः " । ७ । २ । ४६ । [हैम०] इत्यप्रत्यये नरकाः, तेषु विषये गतिर्नरकगतिः । गतिभेदे, कर्म० ४ कर्म० । आव० ।

णरगछिद्द-नरकछिद्र-न्ति० । नरकगतिनिवारके, अष्ट० २० अष्ट० ।

णरगजायणा-नरकयातना-स्त्री० । नरकेषु दुःखभोगे, नरकपीडायाम, [उत्त०]
" प्रदीप्ताङ्गारकल्पेषु, वज्रकण्टकेष्वसन्धिषु ।
क्रूजन्तः करुणं केचिद्, दह्यन्ते नरकाग्निना ॥ १ ॥
अग्निभीताः प्रधावन्तो, गत्वा वैतरणीं नदीम् ।
शीतलोयामिमां कृत्वा, क्षाराम्भसि पतन्ति ते ॥ २ ॥
क्षारदग्धशरीराश्च, मृगवेगोत्थिताः पुनः ।
असिपत्रवनं यान्ति, छायायां कृतबुद्धयः ॥ ३ ॥
शक्त्यसिप्रासकुन्तैश्च, खड्गतोमरयष्टिभिः ।
छिद्यन्ते कृपणास्तत्र, पतद्भिर्वातकम्पितैः ॥४॥ " उत्त० ३ अ० ।

णरगतिग-नरकत्रिक-न० । नरकगति-नरकानुपूर्वी-नरकायुःस्वरूपे नरकत्रये, कर्म० ३ कर्म० । पं० सं० ।

णरगपुढवी-नरकपृथिवी-स्त्री० । रत्नप्रभाऽऽद्यासु पृथिवीषु, उत्त० ३६ अ० । प्रज्ञ० ।

णरगपाल-नरकपाल-पुं० । पञ्चदशप्रकारे परमाधार्मिके, सूत्र० १ श्रु० ५ अ० १ उ० ।

णरगविभत्ति-नरकविभक्ति-स्त्री० । नरकाणां विभागो विभजनं विभक्तिः । नरकप्रविभागे, तदर्थप्रतिपादके सूत्रकृतः प्रथमश्रुतस्कन्धस्य पञ्चमेऽध्ययने, सूत्र० १ श्रु० ५ अ० १ उ० । आ० चू० । स० । " पुढवीफासं अणगा—णुबद्धमं णिरयचालवहणं च । तिसु वेदेति अणगा, अ[illegible]

चेव सेसासु ॥६७॥" सूत्र०नि० १ श्रु०५ अ० १ उ० । (नरकविभक्तिवर्णकः ' णरग ' शब्दे १६०५ पृष्ठे गतः)

णरगाउ-नरकायुष्-न० । नारकायुष्के, कर्म० १ कर्म० ।

णरगावास-नरकावास-पुं० । नरकरूपे आवासे, स्था० ८ ठा० ।

णरगिंद-नरकेन्द्र-पुं० । बृहत्त्वात्प्रधानत्वाच्च तथाविधे नरके, चतुर्ष्वी नरकपृथ्व्यां सप्त नरकेन्द्रकाः । यथोक्तम्-" आरे मारे वारे, तच्छे य मए य बोधव्वे । कक्खोडक्खमे य खडखडे, इंदयनिरया चउत्थीए ॥१॥" स्था० ६ ठा० ।

णरणारीसंपरिवुड-नरनारीसंपरिवृत-त्रि० । नरैर्नारीभिश्च सनन्तात् परिवृते, प्रश्न० ३ आश्र० द्वार ।

णरदत्ता-नरदत्ता-स्त्री० । श्रीमुनिसुव्रतस्य शासनदेव्याम्, प्रव० २७ द्वार । ती० ।

णरदुग-नरद्विक-न० । नरगतिनरानुपूर्वीलक्षणे, कर्म० ३ कर्म० ।

णरदेव-नरदेव-पुं० । नराणां देवाः नरदेवाः । चक्रवर्तिषु, स्था० ५ ठा० १ उ० । " पोग्गलपरियट्टूणं, जं नरदेवंतरं सुए भणियं । " (८०५) विशे० । स्वनामख्याते श्रीऋषभदेवपुत्रे, कल्प० ७ क्षण ।

णरभव-नरभव-पुं० । ६ त० । मनुष्याणां जन्मसु, कर्म० ५ कर्म० ।

णररुहिर-नररुधिर-न० । मनुष्यरुधिरे, तद्धि द्रोहितवर्णोत्कटमिति रक्तत्वेनोपमीयते । रा० ।

णरवइ-नरपति-पुं० । राजनि, रा० । दश० । औ० । स्था० । आव० । विश्रुते राजनि, प्रश्न० ४ सम्व० द्वार । नरनायके, नरस्वामिनि, स० । औ० । ज्ञा० ।

णरवइदत्तपयार-नरपतिदत्तप्रचार-पुं० । नृपानुज्ञातकामचारे, ज्ञा० १ श्रु० १६ अ० ।

णरवइदिन्नपयार-नरपतिदत्तप्रचार-पुं० । नृपानुज्ञातकामचारे, ज्ञा० १ श्रु० १६ अ० ।

णरवरीसर-नरवरेश्वर-पुं० । नराणां श्रेष्ठराजनि, " सगरंतं चक्कट्टी णं, भरहं नरवरीसरो । " उत्त० १८ अ० । उत्क्रिप्तकार्ये भारनिर्वाहकत्वात् । स० ।

णरवसह-नरवृषभ-पुं० । नराणां मध्ये गुणैः प्रधानत्वात् (प्रश्न० ४ आश्र० द्वार) धराभारधुरन्धरत्वाद् वृषभकल्पे, कल्प० ३ क्षण ।

णरवाहण-नरवाहन-पुं० । स्वनामख्याते नृगुकच्छनरेश्वरे, आव० १ अ० । ती० । आ० म० । आ० चू० । कुबेरे, वाच० । (स च महाधनः शालिवाहनेन रुरुक्ष इति ' पणिहि ' शब्दे वक्ष्यते)

णरवाहणा-नरवाहना-स्त्री० । कुबेरायां देव्याम्, ती० ८ कल्प ।

णरविग्गहगइ-नरविग्रहगति-स्त्री० । निरयविग्रहगतौ, स्था० १० ठा० ।

णरवेय-नरवेद-पुं० । पुरुषस्य स्त्रियं प्रत्यभिलाषे, कर्म०४ कर्म० ।

णरसंघायग-नरसंघाटक-न० । नरयुग्मे, जं० १ वक्ष० ।

णरसीह-नरसिंह-पुं० । शूरत्वात् (प्रश्न० ४ आश्र० द्वार) दुःसहपराक्रमत्वात् (कल्प० ३ क्षण) विक्रमयोगात् (स०) सिंहत्वोपमिते नरे, शरीरार्द्धतो नरे शरीरार्द्धतः सिंहे च । ज्ञा० १ श्रु० १६ अ० । विशे० । मानतुङ्गसूर्यन्वयाये जाते स्वनामख्याते सूरौ, " श्रीदेवानन्दगुरु-र्विक्रमसूरिर्गुरुश्च नरसिंहः । बोधितसिंहकयक्षः " । ग० ४ अधि० ।

णरसुंदर-नरसुन्दर-पुं० । ताम्रलिप्तीनगरीश्वरे स्वनामख्याते राजनि, (ध० र०)

तत्कथा पुनरेवम्-

" पयडियसद्दथा बहुविह-सत्था वरकम्मगंथविच्चि व्व ।
नवरं बंधविमुक्का, अत्थि पुरी तामलित्तीह ॥ १ ॥
सम्मंपरिणयजिणसमय-अमयरसदृणियविसयविसपसरो ।
गिहवासासिद्धिक्खचित्तो, राया नरसुंदरो तत्थ ॥ २ ॥
निरुवमलक्खणिमरूवा, बंधुमई नाम आसि से जरणी ।
उज्जेणिसामिणा सा, अवंतिनाहेण परिणीया ॥ ३ ॥
सो तीए अणुरत्तो, आसत्तो मज्जपाणवसणम्मि ।
जूयम्मि अइपसत्तो, मत्तो वोलेइ बहुकालं ॥ ४ ॥
तम्मि निवम्मि पमत्ते, रज्जे रट्ठे विसीयमाणम्मि ।
रज्जपहाणनरेहिं, सचिवेहि य मंतियं सम्मं ॥ ५ ॥
पुत्तं ठवेमि रज्जे, मज्जं पाइत्तु निसि पसुत्तो सो ।
देवीइ समं नियमा-णुसेहिँ उज्जाविओ रन्ने ॥ ६ ॥
चेलंचले य बद्धो, लेहोऽणागमणसूयगो तस्स ।
अह गोसे पडिबुद्धो, जा दिसिचक्कं नियइ राया ॥ ७ ॥
हरिहरिणरुहसद्दू-लसंकुलं सव्वओ पि ता रन्नं ।
तं लेहं च निरिक्खिय, सविसाओ जणइ इय हियं ॥ ८ ॥
ओ पिच्छ पिच्छ पावा-ण ताण सामंतमंतिपमुहाणं ।
तह तह उवयरियाणं, वियरियगुरुदाणमाणाणं ॥ ९ ॥
निच्चं गुरुगुरुतरबहु-पसायपाविय पसिद्धिरिद्धीणं ।
अवराइयए वि सया, सिणिद्धदिट्ठीइ दिट्ठाणं ॥ १० ॥
अविभिन्नरहस्साणं, संसइयत्थेसु पुच्छणिज्जाणं ।
नियकुलकमागयूरुवं, चिट्ठियमेवंविहं सुयणु ! ॥ ११ ॥
इय विरसं जंपंतो, अविन्नाविय दुट्ठदिव्वपरिणामो ।
राया बंधुमईए, सुज्जुत्तिजुत्तं इमं वुत्तो ॥ १२ ॥
किं चिंतिएण सामिय !, विहलीकयसयलपुरिसयारस्स ।
अघमंतघडणरुइणो, दयविहिणो विन्नसिप्पिमिणा ? ॥ १३ ॥
लहु पहु ! चयसु विसायं, गच्छामो तामलित्तिनयरीए ।
नरसुंदरनरनाहं, पिच्छामो तत्थ सप्पणयं ॥ १४ ॥
रन्ना पमिवन्नमिणं, गंतु पयट्टाइँ ताइँ तो कमसो ।
पत्ताइँ तामलित्तीं, पुरीं समीवट्ठउज्जाणे ॥ १५ ॥
अह बंधुमई जंपइ, इहेव चिट्ठेसु सामि ! खणमेगं ।
तुह आगमणं गंतूण भावणो जाव साहेमि ॥ १६ ॥
कह कह वि दोउ एवं, ति जंपिए नरवरेण अह पत्ता ।
निविडपमिबंधबंधुर-बंधवगेहम्मि बंधुमई ॥ १७ ॥
तत्थ य मद्दंतसामं-तविंदसेविज्जमाणपयजुयलो ।
पासट्ठियपणतरुणी-करचालियचामरुप्पीलो ॥ १८ ॥
जय जीव जीव इय से-वगेहिँ बुच्चंतओ य पइवयणं ।
सिंघासणोवविट्ठो, दिट्ठो नरसुंदरो तीए ॥ १९ ॥

तेण वि विम्हियमणसा, जणिणी अवितक्कियागया दट्ठुं।
अब्भियपडिवत्तिपुव्वं, पुट्ठा सयलं पि वुत्तंतं ॥ २० ॥
तो तीइ वि सो कहिओ, उज्जाणे जाव चिट्ठइ निवुत्ति।
सव्विड्ढीइ तओ सो, तयभिमुहं पट्ठिओ ऊत्ति ॥ २१ ॥
सो पुण अवंतिणाहो, अइगाढदुहाइ पीमिओ तइया।
वालुंकिभक्खणत्थं, वगम्मि अ चिब्भिमीकच्छे ॥ २२ ॥
अवदारेणं चोरु, व्व पविसमाणो स कत्थ य नरेण।
मम्मपएसम्मि हओ, मुट्ठीए तह य लउडीए ॥ २३ ॥
निठुरपहारविहुरो, पलायमाणो तओ इमो तुरियं।
धरणीवट्टे पमिओ, निच्चिट्ठो कट्ठमिव व्व ॥ २४ ॥
इत्तो नरसुंदरनर-वरो वि नियविजयरहवरारूढो।
भगिणीवइस्स उनिमुहं, तम्मि पएसम्मि संपत्तो ॥ २५ ॥
नवरं तरलतुरंगम-निट्ठुरखुरखणियरेणुपूरेण।
उक्कुरतिमिरक्कंतं, व नहयलं तक्खणे जायं ॥ २६ ॥
तो दंसणविरहाओ, नरवररहतिक्खचक्कधाराए।
तह निवडियस्स कंठे, दुहा कओऽवंतिनाहस्स ॥ २७ ॥
अह पुव्वुत्तुज्जाणे, अवंतिनाहं निवो अपिच्छंतो।
संभंतो भइणीए, वुत्तंतमिमं कहावेइ ॥ २८ ॥
हा दिव्व ! दिव्व ! किमिअं, ति संभमुब्भंतनरवइतारच्छी।
बंधुमइं बंधुगिरं, निसामिउं आगया तत्थ ॥ २९ ॥
तो अवलोयंतीए, पणट्ठरयणं व निहणदिट्ठीए।
कह कहमवि तमवत्थं, संपत्तो तीइ सो दिट्ठो ॥ ३० ॥
अह नाउ मयं सपइं, गुरुमुग्गरचूरिय व्व सा सहसा।
पमिया अतुच्छमुच्छा-निमीलियच्छी महीपीढे ॥ ३१ ॥
पासठियपरियणविहि-यसिसिरउवयारलद्धचेयन्ना।
परिमुक्कपिक्कमुक्क, एवं विलवेइ दीणमणा ॥ ३२ ॥
हा हियय ! दइय ! पियय म ! गुणनिवहनिवास ! पणयकयतोस !।
केणं पाविट्ठेणं, पयमवत्थं तुमं नीओ ? ॥ ३३ ॥
हा नाह ! तायसु मइं, विओगवज्जासणीइ भिज्जंतं।
हियय हियय सुहावह !, कीस अविक्खेसि चिरकालं ? ॥३४॥
हयदिव्व ! किं न तुट्ठो, रज्जवहारेण देसचायेण।
सुहिजणविओयणेण य, जमेयमवि ववसिओ पाव ! ॥ ३५ ॥
इच्चाइविलवमाणी, वारिज्जंती वि बंधवनिवेण।
सा णियपइणा सद्धिं, पमिया जालाउले जलणे ॥ ३६ ॥
अह निव्वेओवगओ, राया नरसुंदरो विचिंतेइ।
अविचिंतणीयरूवा, अहो अणिच्चा जयस्स ठिई ॥३७॥
जत्थ सुही वि हु दुहिओ, निवो वि रोरो सुमित्तमाव सत्तू।
संपत्ती वि विवत्ती, निमेसमित्तेण परिणमइ ॥ ३८ ॥
कहमहुणा भइणीए, चिरकालाओ समागमो जाओ ?।
कहमिण्हिं पि विओगो, धिरत्थु संसारवासस्स ॥ ३९ ॥

अवि य-

जे खलु तिहुयणजणपलय-ताणकरणक्खमा जिणवरिंदा।
सयया अणिच्चयाए, उररीकीरंति ते वि हहा ! ॥ ४० ॥
रणसवडंमुद्दउब्भड-भिडंतरिवसुइरुचक्कअक्कमणे।
जे पहुणो ते विक्खणे-ण चक्किणो जंति हा निहणं ॥ ४१ ॥
जे गुरुनयबलबद्धभ-इसंगया दलियदक्खपमिवक्खा।
ते वि हु हरिणो हरिणु, व्व हरेह हा हा कयंतहरी ॥ ४२ ॥
मन्ने करिकन्नसुरि-दचावलडिचावलेण निम्मवियं।
इत्थं वत्थुसमत्थं, तेणं अणदिट्ठनट्ठं ति ॥ ४३ ॥

एवंविहे य जं इह, खणमवि निवसंति मुणियपरमत्था।
वीसत्था सगिहेसु, अहह महाधिट्ठिमा तेसिं ॥ ४४ ॥
इय सो विरत्तचित्तो, संवेगो वि हु घणाइसु कहं पि।
भावेण अपडिबद्धो, गेहम्मि गमेइ कइ वि दिणे ॥ ४५ ॥
काहेण नंदणे र-ज्जनारधरणुद्धरे ठविय रज्जं।
सिरिसेणगुरुसमीवे, दिक्खं गिण्हइ महीनाहो ॥ ४६ ॥
बत्थाइसु गामाइसु, समयाइसु कोहमाणमाईसु।
दव्वे खित्ते काले, भावे परिमुक्कपडिबंधो ॥ ४७ ॥
काऊण मणसणं सा-सणं मणे जिणवराण धारंतो।
देहे वि अपमिबद्धो, मरिउं गंवे सुरो जाओ ॥ ४८ ॥
तत्तो य उत्तरुत्तर-सुरनरसिरिमणुहविऊ कइ वि भवे।
पव्वज्जं पमिवज्जिय, सो संपत्तो पयं परमं ॥ ४९ ॥
श्रुत्वैवं नरसुन्दरस्य चरितं, हेतोर्गरीयस्तरात्,
कस्मादप्यनलंभविष्णुमनसो, दीक्षां गृहीतुं द्रुतम्।
संवेगा अपि देहगेहविषय-ऊष्याऽऽदिपु ऊष्यतो,
भावेन प्रतिबन्धबुद्धिमसमां, मैतेषु जन्याः ! कृत ॥ ५० ॥
ध० र० ७४ गाथा ॥

णराअ–नाराच–न० । "वाऽव्ययोत्खातादावदातः" । ८ । १ । ६७ । इत्यातोऽत्वम् । ('णाराय' प्रकरणे वक्ष्यमाणेऽर्थे) प्रा० १ पाद ।

णराहिव–नराधिप–पुं० । राजनि, उत्त० ६ अ० । "कुंथू नाम नराहिवो ।" उत्त० ६ अ० ।

णरिंद-नरेन्द्र–पुं० । नराणामिन्द्रो नरेन्द्रः । दशा० १० अ० । "ह्रस्वः संयोगे दीर्घस्य" ॥८॥ १ । ८५ । इति ह्रस्वः । प्रा० १ पाद । परमैश्वर्ययोगात् (स० । औ०) समस्तभरताधिपे (प्रश्न० ४ आश्र० द्वार) राजनि, औ० । चक्रवर्त्यादौ, ध० २ अधि० । आ० म० । उत्त० । प्रजापतौ, व्य० २ उ० । बृ० ।

णरिंदप्पह–नरेन्द्रप्रभ–पुं० । हर्षपुरीयगच्छोद्भवे ताराचन्द्रसूरिशिष्ये, अनेन अलङ्कारमहोदधिः, काकुत्स्थकेलिश्चेति द्वौ ग्रन्थौ रचितौ । जै० इ० ।

णरिंदवसह–नरेन्द्रवृषभ–पुं० । राजमुख्ये, उत्त० १५ अ० । "एवं नरिंदवसहा, निक्खंता जिणसासणे ।" उत्त० ६ अ० ।

णरिंदसमणी–नरेन्द्रश्रमणी–स्त्री० । मासराजकुलपालितायां श्रमण्याम्, सा चाऽदत्ताऽऽदानेन संसारं पर्यटितेति ।

सा णं लहिऊण अदत्तादाणगं मासरायकुलवालिया णरिंदसमणी गोयमा ! तेणं मायासल्लभावदोसेणं उववन्ना विज्जुकुमाराणं वाहणत्ताए नउलीरूवेणं किंकरी देवेसु तओ चूया समाणी पुणो पुणो उववज्जंती वावज्जंती आहिंमियमाणुसतिरियच्छेसु सयन्नदोहग्गस्स दुक्खदारिद्दपरिगया सव्वलोयपरिभूया सकम्मफलमणुभवमाणी गोयमा ! जाव णं कह वि कम्माणं खओवसमेणं बहुभवंतरेसु तओ चूया समाणी पुणो पुणो उववज्जंती वावज्जंती आहिंमियमाणुसतिरियच्छेसु सयन्नदोहग्गस्स दुक्खदारिद्दपरिगया सव्वलोयपरिभूया सकम्मफलमणुभवमाणी गोयमा ! जाव णं कह वि कम्माणं खओवसमेणं बहुभवंतरेसु तं आयरिए य पाविऊण निरइयारसामण्णपरिवालणेणं सव्वत्थामेसुं च सव्वए मायाऽऽलंबणविप्पमुक्केणं तु उज्जमिऊणं निद्दड्ढावसेसीकयभवंकुरे तहा वि गोयमा ! जा सा सरागा चक्खुणाऽऽलोइया तक्कमदोसेणं माहणिच्छित्ताए परिनिव्वुमेणं से रायकुलवालियाणरिंदसमणीजीवे। महा० २ चू० ।

णरीसर-नरेश्वर-पुं० । नृपे, "इक्खागुरायवसहो,कुंथू नाम नरीसरो।" उत्त० १८ अ०।

णरीसरत्तण-नरेश्वरत्व-न० । नृपत्वे, पञ्चा०।

सामण्णे मणुयत्ते, धम्माओ णरीसरत्तणं णेयं।
इय मुणिऊणं सुंदर!, जत्तो एयम्मि कायव्वो ॥१७॥

सामान्ये बहूनां प्राणिनां साधारणे, मनुजत्वे नरत्वे, धर्मात् कुशलकर्मणः नरेश्वरत्वं नृपत्वं भवतीति ज्ञेयं ज्ञातव्यम्। इत्येतद् ज्ञात्वा अवगम्य, सुन्दर! नरप्रधान! यत्न उद्यमः, अत्र धर्मे, कर्तव्यो विधेयो भवति। इति गाथार्थः ॥१७॥ पञ्चा० ६ विव०।

णरोत्तम-नरोत्तम-पुं० । श्रीऋषभदेवस्य चतुश्चत्वारिंशे पुत्रे, कल्प० ७ क्षण।

णल-नड-पुं० । नस्य णः, ऋस्य तु "मो लः"। ८। १।२०२। इति लः। प्रा० १ पाद। तृणविशेषे, जी० ३ प्रति० २ उ०। प्रज्ञा०। आचा०। शुषिरशरादऽऽकारे यवाऽऽदीनां कमङ्करे, स्था० ५ ठा० २ उ०। चन्द्रवंश्ये नृपभेदे, वानरजेदे, आर्द्रदेवे, पितृगणभेदे, दैत्यजेदे, पद्मे, न०। वाच०।

णलकूवर-नलकूवर-पुं०। नलः कूवरो युगन्धरोऽस्य। कुबेरपुत्रे, वाच०। "अट्ठपुत्ते पयाहिसि सिरीए नलकूवरसमाणे।" आ० म० १ अ० २ खण्ड।

णलगिरि-नलगिरि-पुं० । प्रद्योतनृपतेर्हस्तिरत्ने, अनलगिरिरिति तन्नामान्तरम्। आ० क०। आ० म०। आ० चू०। नि० चू०। आव०।

णलत्थंभ-नलस्तम्भ-पुं० । वृक्षविशेषे, आव० ३ अ०।

णलदाम[ण]-नलदामन्-न०। स्वनामख्याते कुविन्दे, स्था० ४ ठा० ३ उ०। दश०। व्य०। आ० म०। (अधर्मयुक्ते हेतौ नलदामकुविन्दोदाहरणम् 'अधम्मजुत्त' शब्दे प्रथमभागे ५६७ पृष्ठे द्रष्टव्यम्)

णलय-नलद-पुं०। देशी-उशीरे, दे० ना० ४ वर्ग।

णलागणि-नलाग्नि-पुं०। नलदहनप्रवृत्तेऽग्नौ, स्था० ५ ठा० २ उ०।

णलाड-ललाट-न०। "ललाटे लसोः" ॥ ८। २। १२३ ॥ इति ललाटशब्दे लसयोर्व्यत्ययः। "णलामं। णमालं" प्रा० २ पाद।

णल्लिअ-देशी-गृहे, दे० ना० ४ वर्ग।

णलिण-नलिन-न०। ईषद्रक्ते कमले, चं० प्र० १ पाहु० १ पा. हु० पाहु०। रा०। ईषद्रक्तपद्मे, रा०। जं०। आ० म०। प्रज्ञा०। ईषन्नीले पद्मे, जं० १ वक्ष०। जलजकुसुमविशेषे, ज्ञा० १ श्रु० ६ अ०। आचा०। चतुरशीतिलक्षगुणिते नलिनाङ्के, भ० ६ श० ७ उ०। जी०। ज्यो०। जं०। अनु०। स्था०। कच्छाऽऽदिषु द्वात्रिंशे विजयक्षेत्रयुगले, "दो णलिणा।" स्था० २ ठा० ३ उ०। स्वनामख्याते विमाने, स० १८ सम०। स्था०। रुचकपर्वतस्य दाक्षिणात्ये कूटे, द्वी०। स्था०। जम्बूवाः सुदर्शनायाः पूर्वस्यां दिशि पुष्करिण्याम्, जं० ४ वक्ष०। जी०।

णलिणंग-नलिनाङ्ग-न०। चतुरशीतिलक्षगुणिते पद्मशत[illegible] जी० ३ प्रति० ५ अ०। ध्रुव०। जं०। स्था०।

णलिणकूड-नलिनकूट-पुं०। जम्बूद्वीपे मन्दरस्य पर्वतस्य पूर्वस्यां शीतायां महानद्यां उत्तरकूले वक्षस्कारपर्वते, स्था० ३ ठा० ३ उ०। "दो णलिणकूडा।" स्था० २ ठा० ३ उ०।

कहि णं भंते! महाविदेहे वासे णलिणकूमे णामं वक्खारपव्वए पण्णत्ते?। गोयमा! णीलवंतस्स दाहिणेणं सीआए उत्तरेणं मंगलावत्तस्स विजयस्स पच्चच्छिमेणं आवत्तस्स विजयस्स पुरच्छिमेणं एत्थ णं महाविदेहे वासे णलिणकूमे णामं वक्खारपव्वए पण्णत्ते। उत्तरदाहिणायए पाईणपडीणविच्छिण्णे सेसं जहा चित्तकूमस्स० जाव आसयंति। णलिणकूमे णं भंते! कति कूमा पण्णत्ता?। गोयमा! चत्तारि कूमा पण्णत्ता। तं जहा-सिद्धायणकूमे, णलिणकूमे, आवत्तकूमे, मंगलावत्तकूमे, कूमा पंचसइआ रायहाणीओ उत्तरेणं। जं०४ वक्ष०।

णलिणगुम्म-नलिनगुल्म-न०। श्रेणिकनार्यायां नलिनगुल्मायाः अपत्ये, स च वीरजिनान्तिके प्रव्रजितस्त्रीणि वर्षाणि प्रव्रज्यापर्यायं परिपाल्य सहस्रारे उपपन्नः, ततश्च्युत्वा महाविदेहे सेत्स्यति, इति कल्पावतंसिकायां अष्टमेऽध्ययने सूचितम्। नि० १ श्रु० १ वर्ग ८ अ०। अर्हता महापद्मेन प्रव्राजिष्यमाणे स्वनामख्याते राजनि, स्था० ८ ठा०। अष्टमदेवलोकस्थे स्वनामख्याते विमाने, स० १८ सम०। "णलिणगुम्मे विमाणे देवत्ताए उववण्णा।" आ० चू० १ अ०। उत्त०। नलिनीगुल्ममप्यत्र। विशे०। स्वनामख्याते अध्ययने च। "अन्नया पदोसकाले आयरिया णलिणगुम्मं अज्झयणं परियट्टंति।" आव० ४ अ०।

णलिणवण-नलिनवन-न०। पुष्कलावतीविजये पुण्डरीकिण्या नगर्या उत्तरपौरस्त्ये दिग्भागे स्वनामख्याते वने, ज्ञा० १ श्रु० १८ अ०। आ० म०। उत्त०। भनु०।

णलिणावई-नलिनावती-स्त्री०। कच्छाऽऽदिषु चतुर्विंशे विजयक्षेत्रयुगले, स्था० २ ठा० ३ उ०। ज्ञा०।

णलिणी-नलिनी-स्त्री०। पद्मिन्याम्, ज्ञा० १ श्रु० १ अ०। प्रज्ञा०। आ० क०।

णलिणीकुमार-नलिनीकुमार-पुं०। महापद्मतीर्थकृतः प्रथमपुत्रे, "जेट्ठं णलिणकुमारं, रज्जे ठाइत्तु तं महापउमो।" ति०।

णलिणोदग-नलिनोदक-न०। समुद्रभेदे, "गोतित्थोदहि विरहियं, खेत्तं नलिणोदगसमुद्दे।" द्वी०।

णव-नव-त्रि०। संख्याविशेषे ९ विशिष्टे, नि० चू० १ उ०। "नव खोडा।" प्रतिलेखनायाम्, नव खोमकाः, ते च त्रयस्त्रयः प्रमार्जनानां त्रयेण त्रयेण अन्तरिताः कार्याः, इति पदत्रयेणाऽपि पञ्चमी अप्रमादप्रत्युपेक्षणोक्ता। स्था० ६ ठा०। ध०। नि० चू०। प्रत्यग्रे, दश० १ अ०। चं० प्र०। सूत्र०। अपूर्वे, बृ० १ उ०। अजीर्णे, जं० ३ वक्ष०। अभिनवे, आचा० २ श्रु० १ चू० ५ अ० १ उ०। नवकर्मणामनादानम्। नवान्युपचीयमानानि। आव० ४ अ०। "ते वरिसो होइ नवो।" प्रव्रज्यापर्यायेण यस्य त्रीणि वर्षाणि नाधिकमित्येष त्रिवर्षो भवति नवः। व्य० ३ उ०। "नवहरियभासलतपल्लवायारगंभीरदरिसणिज्जा" इति। नवेन

प्रत्यग्रेण हरितेन नीलेन भासमानेन स्निग्धत्वाद्दीप्यमानेन पत्रभारेण दृढसंचयेन यो जातोऽन्धकारस्तेन गम्भीरा अलब्धमध्यभागाः सन्तो दर्शनीयाः । जी० ३ प्रति० ४ उ० । "नवहेमचारुचित्तचंचलकुंडलविलिहिज्जमाणगंडे ।" नवमिव प्रत्यग्रमिव हेम यत्र ते नवहेमनी, नवहेमभ्यां चारु चित्राभ्यां चञ्चलाभ्यां कुण्डलाभ्यां विलिह्यमानौ गण्डौ यस्य स तथा । जी० ४ प्रति० २ उ० ।

नम्–धा० । प्रह्वत्वे शब्दे, " नुदनमोर्वः " ॥ ८ । ४ । २२६ ॥ इत्यनेन अन्त्यस्य नस्य वः । ' नवइ ' नमति । प्रा० ४ पाद ।

णवंगसुत्तपडिबोहिया–नवाङ्गसुप्तप्रतिबोधिता–स्त्री० । नवाङ्गानि श्रोत्र २ चक्षु २ घ्राण २ रसनात्वग्मनोवाक्कायानि सुप्तानि सन्ति प्रतिबोधितानि यौवनेन यस्याः सा तथा । विपा० २ श्रु० १ अ० । नवयौवनायाम्, ज्ञा० १ श्रु० ३ अ० । विपा० । औ० । " नवंगसुत्तपडिबोहियाए ।" द्वे अक्षिणी द्वौ कर्णौ द्वौ नासापुटौ जिह्वास्पर्शने नवमं मनः, एतानि नव अङ्गानि यावदद्यापि यौवनं न भवति तावत्सुप्तानि भवन्ति, न खलु तदानीमेतेषामतीचाराभिष्वङ्गसुखं भवति, ततः सुप्तानीति व्यपदिश्यन्ते, यौवने तु प्राप्तस्वकल्पगुणेन प्रतिबुद्धानि जायन्ते । व्य० १० उ० ।

णवकोडिपरिसुद्ध–नवकोटिपरिशुद्ध–त्रि० । ३ त० । नवभिर्विंशागैर्निर्दोषे, " नवकोडीपरिसुद्धे, णिक्खे पण्णत्ते । " नवभिर्विंशभागैर्निर्दोषे, स्था० ९ ठा० ।

णवक्ख–नव–त्रि० । "शीघ्राऽऽदीनां बहिल्लाऽऽदयः" ॥ ८ । ४ । ४२२ ॥ इत्यपभ्रंशे नवशब्दस्य णवक्खाऽऽदेशः । प्रत्यग्रे, प्रा० ४ पाद ।

णवगणिवेस–नवकनिवेश–पुं० । प्रथमावासे, नि० चू० ।

जे भिक्खू नवआसु गामंसि वा णगरंसि वा [णगारंसि वा]० जाव सन्निवेसंसि वा अणुप्पविसित्ता असणं वा पाणं वा खाइमं वा साइमं वा पडिगाहेइ, पडिगाहंतं वा साइज्जइ ॥ ३६ ॥ नि० चू० ५ उ० ।

(अत्र ' गोयरचरिया ' शब्दः तृतीयभागे ६६१ पृष्ठे दृष्टव्यः)

णवग्गह–नवग्रह–पुं० । अभिनवग्रहणे, सूत्र० १ श्रु० ३ अ० २ उ० ।

णवच्छिद्द–नवच्छिद्र–त्रि० । नवरन्ध्रोपेते, त्रं० ।

णवजोयणिय–नवयोजनिक–त्रि० । नवयोजनाऽऽयामे, " जंबूदीवे णं दीवे नवजोयणिया मच्छा । " स्था० ९ ठा० ।

णवणवमिया–नवनवमिका–स्त्री० । नव नवमानि दिनानि यस्यां सा नवनवमिका, नव नवमानि च भवन्ति नवसु नवकेष्विति तत्परिमाणेयमिति । एकाशीतिदिनैः समाप्येऽभिग्रहविशेषे, (स्था०)

णवणवमिया णं भिक्खुपडिमा एकासीएहिं राईदिएहिं चउहि य पंचुत्तरेहिं भिक्खासएहिं अहासुत्ता० जाव आराहिया यावि भवइ ॥

(णवणवमिया णं) इत्यादि कण्ठ्यं, नवरं नव नवमानि दिनानि यस्यां सा नवनवमिका, नव नवमानि च भवन्ति नवसु नवकेष्विति तत्परिमाणेयमिति, नव च नवकान्येकाशीतिरिति कृत्वा एकाशीत्या रात्रिन्दिवैरहोरात्रैर्भवति । तथा प्रथमनवके प्रतिदिनमेका दत्तिः पानकस्य भोजनस्य चेत्येवमेकोत्तरया वृद्ध्या नवमे नवके नव दत्तयः। ततश्च सर्वसङ्कलनया चतुर्भिश्च पञ्चोत्तरैर्भिक्षाशतैर्यथासूत्रं यथाकल्पं यथामार्गं यथातत्त्वं सम्यक्कायेन स्पृष्टा पालिता शोभिता तीरिता कीर्तिता आराधिता चाऽपि भवतीति । स्था० ९ ठा० । प्रव० । स० । औ० । अन्त० ।

णवणवसंवेग–नवनवसंवेग–पुं० । अपूर्वापूर्वे वैराग्ये, [बृ०]

अथ " नव नवो य संवेगो " इति व्याख्यानयन्नाह–

जह जह सुयमोगाहइ, अइसयरसपसरसंजुयमपुव्वं ।
तह तह पल्हाइ मुणी, णवणवसंवेगसद्धाओ ॥

यथा यथा श्रुतमागमं पूर्वमवगाहते, कथंभूतम् ?–अतिशयरसप्रसरसंयुतम् । अतिशया अर्थविशेषास्तेषु यो रसः श्रोतृणामादेयकारी गुणविशेषः, तस्य यः प्रसरः अतिरेकः, तेन संयुतं युक्तम् । यद्वा–श्रवणं श्रुतं, तत्कथंभूतम् ?–अतिशयस्याऽर्थस्य रस आस्वादनं तत्र यः प्रसरो गमनं तेन संयुतम्, अपूर्वं यथा यथाऽवगाहते तथा तथा मुनिः प्रह्लादते शुभभावसुखास्विकया मोदते । कथंभूतः ? इत्याह–नवनवोऽपूर्वापूर्वो यः संवेगो वैराग्यं, तद्भवा श्रद्धा मुक्तिमार्गाभिलाषलक्षणा यस्य स नवनवसंवेगश्रद्धाक इति । गतं नवनवसंवेगद्वारम् । बृ० १ उ० ।

णवणवसंवेगो खलु, णाणावरणक्खओवसमजाओ ।
तत्ताहिगमो य तहा, जिणवयणायन्नणस्स गुणा ॥३॥

नवनवसंवेगः प्रत्यग्र- प्रत्यग्रः संवेग आर्द्रीभूतःकरणता, मोक्षसुखाऽभिलाष इत्यन्ये । खलुशब्दः पूरणार्थः; संवेगस्य शेषगुणनिबन्धनत्वेन प्राधान्यख्यापनार्थो वा । तथा ज्ञानाऽऽवरणक्षयोपशमभावः ज्ञानाऽऽवरणक्षयोपशमसत्ता संवेगादेव । तत्त्वाभिगमश्च तत्त्वाऽतत्त्वपरिच्छेदश्च तथा, जिनवचनाऽऽकर्णनस्य तीर्थंकरभाषितश्रवणस्य एते गुणा इति ॥ ३ ॥ आ० ।

णवणाम [ण्]–नवनामन्–न० । नवपदार्थनामनि, अनु० ।

नवनामनिदर्शयन्नाह–

से किं तं णवणामे ?। णवणामे णव कव्वरसा पण्णत्ता ।
तं जहा–
वीरो सिंगारो अ–ब्भुओ य रोद्दो अ होइ बोद्धव्वो ।
वीलणओ बीभच्छो, हासो कलुणो पसंतो अ ॥१॥

(से किं तं णवणामे इत्यादि) नवनामे नव काव्यरसाः प्रज्ञप्ताः । तत्र कवेरभिप्रायः काव्यं, रस्यन्तेऽन्तराऽऽत्मनाऽनुभूयन्त इति रसाः, तत्सहकारिकारणसन्निधानोऽद्भूताः चेतोविकारविशेषा इत्यर्थः । उक्तं च–" बाह्यार्थाऽऽलम्बनो वस्तुविकारो मानसो भवेत् । स भावः कथ्यते सद्भिः, तस्योत्कर्षो रसः स्मृतः ॥ १ ॥ " काव्येषूपनिबद्धा रसाः काव्यरसाः, वीरशृङ्गाराऽऽदयः । तानेवाऽऽह–(वीरो सिंगारो) इत्यादि । गाथा सुगमा, नवरम् 'शूर वीर' विक्रान्तौ, इति वीरयति विक्रामय-

ति रागतपोवैरिनिग्रहेषु प्रेरयति प्राणिनमिति उत्तमप्रकृतिपुरुषचरित्रश्रवणाऽऽदिहेतुसमुद्भूतो दानाऽऽद्युत्साहप्रकर्षाऽऽत्मको वीरो रसः, इतिः सर्वत्र गम्यते ॥ १ ॥ शृङ्गं सर्वरसेभ्यः परमप्रकर्षकोटिलक्षणमियर्ति गच्छतीति कमनीयकामिनीदर्शनाऽऽदिसंभवो रतिप्रकर्षाऽऽत्मकः शृङ्गारः सर्वरसप्रधान इत्यर्थः। अत एव " शृङ्गारहास्यकरुणाः, रौद्रवीरभयानकाः। बीभत्साद्भुतशान्ताश्च, नव नाट्ये रसाः स्मृताः ॥१॥ " इत्यादिष्वयं सर्वरसानामादावेव पठ्यते। अत्र तु त्यागतपोगुणौ वीररसे वर्तेते, त्यागतपसी च " त्यागो गुणो गुणशतादधिको मतो मे। " "परं लोकातिगं धाम, तपः श्रुतमिति ह्यृषिः।" इत्यादिवचनात् समस्तगुणप्रधान इत्यनया विवक्षया वीररसस्याऽऽदावुपन्यास इति श्रुतम् ॥ २ ॥ शल्यं त्यागतपःशौर्यकर्माऽऽदि वा सकलभुवनातिशायि किमप्यपूर्वं वस्त्वद्भुतमुच्यते; तद्दर्शनश्रवणाऽऽदिजो जातो रसोऽप्युपचारात् विस्मयरूपोऽद्भुतः ॥३॥ रौद्र्यत्यतिदारुणतया अश्रूणि मोचयति इति रौद्रं, रिपुजनमहदारण्यान्धकाराऽऽदितद्दर्शनाऽऽद्युद्भवो विकृताध्यवसायरूपो रसोऽपि रौद्रः ॥ ४ ॥ व्रीडयति लज्जामुत्पादयति बीभत्सनीयवस्तुदर्शनाऽऽविष्प्रभवो मनोज्यलीकताऽऽदिस्वरूपो ग्रीमनकः, अस्य स्थाने भयजनकसंग्रामाऽऽदिवस्तुदर्शनाऽऽदिप्रभवो भयानको रसः पठ्यतेऽन्यत्र, स चेह रौद्ररसान्तर्भावविवक्षणात् पृथग् नोक्तः ॥५॥ शुक्रशोणितोच्चारप्रश्रवणाऽऽद्यनिष्टसुद्वेजनीयं वस्तु बीभत्समुच्यते, तद्दर्शनश्रवणाऽऽदिप्रभवो जुगुप्साप्रकर्षस्वरूपो रसोऽपि बीभत्सः ॥ ६ ॥ विकृतासंबद्धपरवचनवेषालङ्काराऽऽदिहास्यार्हपदार्थप्रभवो मनःप्रकर्षाऽऽदिचेष्टाऽऽत्मकोऽपि रसो हास्यः ॥ ७ ॥ कुत्सितं रौत्यनेनेति निरुक्तवशात् करुणः, करुणाऽऽस्पदत्वात् करुणः प्रियविप्रयोगाऽऽदिदुःखहेतुसमुत्थः शोकप्रकर्षस्वरूपः करुणो रस इत्यर्थः ॥ ८ ॥ प्रशाम्यंति क्रोधाऽऽदिजनितौत्सुक्यरहितो भवत्यनेनेति प्रशान्तः, परमगुरुवचःश्रवणाऽऽदिहेतुसमुल्लसित उपशमप्रकर्षाऽऽत्मा प्रशान्तो रस इत्यलं विस्तरेण ॥ ९ ॥ अनु०। (एषां नवानाञ्च नवकाव्यरसानां लक्षणानि स्वस्वशब्दे द्रष्टव्यानि)

णवणिहि-नवनिधि-पुं० । अजागृहतीर्थे पार्श्वनाथप्रतिमायाम्, ती० २ कल्प ।

णवणीइया-नवनीतिका-स्त्री० । पुष्पप्रधाने वनस्पतिभेदे, प्रज्ञा० १ पद । " णवणीइया गुम्मा । " जं० २ वक्ष० ।

णवणीय-नवनीत-न० । भ्रक्षणे, औ० । नि० । आ०चू० । आव० । स्था० । ज्ञा० । (मक्खन) (नेनू) (मसका) इतिख्याते, ध० २० । रा० । प्रश्न० । जं० । नि० चू० । भ० । कल्प० । पञ्चा० । जीव० आ० म० । " नवनीतं यथा दध्न-श्चन्दनं मलयादिव । ब्रह्मणश्च वै पुराणेभ्य-स्तथा प्राहुर्मनीषिणः ॥ १ ॥ " उत्त० २५ अ० । नवनीतं हि महाविकृतितया निर्विकृतिकैरभक्ष्यम् । स्था० ९ ठा० । नवनीतमपि गोमहिष्यजाऽविसंबन्धेन चतुर्धा, तदपि सूक्ष्मजन्तुराशिखनित्वात्त्याज्यमेव । यतः-" अन्तर्मुहूर्तात्परतः, सुसूक्ष्मा जन्तुराशयः । यत्र मूर्छन्ति तन्नाद्यं, नवनीतं विवेकिनिः ॥ १ ॥ " इति । ध० २ अधि० ।

णवत्तयकुसंत-नवत्वक्कुशान्त-पुं० । नवा त्वक् येषां ते नवत्वचः कुशान्ता दर्भपर्यन्ताः, नवत्वचश्च ते कुशान्ताश्च नवत्वक्कुशान्ताः । प्रत्यक्त्वगूद्भेदपर्यन्ते, रा० । जी० ।

णवधम्म[ण्]-नवधर्मन्-त्रि० । अभिनवश्रावके, सू० १ श्रु० ।

णवपज्जवण-नवपायन-न० । नवं प्रत्यग्रं 'पज्जणं ति' प्रतापितस्याऽयोघनकुट्टनेन तीक्ष्णीकृतस्य पायनं जलनिक्षेपणं यस्य तन्नवपायनम्, सद्योऽग्नितप्ते तीक्ष्णीकृते जलक्षेपेण शीतीकृते, " णवपज्जणपणं असिपएणं पमिसाहरिया । " उत्त० १४ अ० ७ उ० ।

णवपुव्वि(ण्)-नवपूर्विन्-पुं० । परिपूर्णनवपूर्वधरे, इहासतां नवपूर्विणः परिपूर्णनवपूर्वधराः, किं तु नवमस्य पूर्वस्य यत्तृतीयमाचारनामकं वस्तु, तावन्मात्रधारिणोऽपि नवपूर्विणः। व्य० १ उ० ।

णवबंभचेरगुत्त-नवब्रह्मचर्यगुप्तिगुप्त-त्रि० । नवब्रह्मचर्याणि गुप्तिशब्दलोपाद् वसतिकथाद्या नवब्रह्मचर्यगुप्तयस्ताभिर्गुप्तः संरक्षितो नवब्रह्मचर्यगुप्तिगुप्तः । पा० । नवभिर्मैथुनव्रतस्य रक्षाप्रकारैः सुसंवृत्ते, पा० । नि० चू० ।

णवम-नवम-त्रि० । नवसंख्यापूरके, उत्त० १ अ० । स्था० ।

णवमल्लइ-नवमल्लकिन-पुं० । क्षत्रियविशेषजातीये, वीरस्वामिमोक्षगमनतिथिरात्रौ नवमल्लकिभिः पोषधोपवासः कृतः, तत्र नवमल्लकिजातीयाः काशिदेशस्य राजानः । कल्प० ६ क्षण ।

णवमालिया-नवमालिका-स्त्री० । (नेवारो) पुष्पप्रधाने वनस्पतिभेदे, कल्प० ३ क्षण । आचा० ।

णवमिया-नवमिका-स्त्री० । सुपुरुषस्य किम्पुरुषेन्द्रस्य द्वितीयायामग्रमहिष्याम, स्था० ४ ठा० १ उ० । ज्ञ० । ती० । (अस्याः पूर्वभवः 'अग्गमहिसी' शब्दे प्रथमभागे १७१ पृष्ठे गतः) शक्रस्य देवेन्द्रस्य षष्ठयामग्रमहिष्याम, (अस्याः पूर्वभवकथा ' अग्गमहिसी ' शब्दे प्रथमभागे १७३ पृष्ठे उक्ता) मन्दरस्य पश्चिमे रुचकवरपर्वतस्य रुचकोत्तमकूटे परिवसन्त्यां दिक्कुमार्याम, स्था० ८ ठा० । आव० । आ०चू० । जं० । आ०म० ।

णवमी-नवमी-स्त्री० । अष्टमीदशम्यन्तराले तिथौ, द० प० । विशे० । ज्यो० ।

णवमीपक्ख-नवमीपक्ष-पुं० । नवम्यास्तिथेः पक्षो ग्रहो यस्य तिथिमेदपातोऽऽदिषु तथादर्शनात् तिथिपाते यत्कृत्यस्याष्टमे च क्रियमाणत्वात् स नवमीपक्षः । अष्टमे दिवसे, " चित्तबहुलस्स णवमीपक्खेणं । " जं० ३ वक्ष० ।

णवय-नवत-पुं० । कर्णविशेषभये 'जीन' इति लोकप्रसिद्धेऽर्थे, ज्ञा० १ श्रु० १ अ० । आचा० ।

णवयारचिंतणाइय-नमस्कारचिन्तनाऽऽदिक-त्रि० । परमेष्ठिपञ्चकनमस्कृतिध्यानप्रभृतिके, पञ्चा० १ विव० ।

णवरं-नवरम्-अव्य० । केवलमित्यर्थे, पञ्चा० १८ विव० । ग० । प्रश्न० । विपा० । स्था० । " णवरं केवले " ॥ ८ । २ । १८१ ॥ इति केवलेऽर्थे णवरमिति प्रयोगः । " णवरं पि आइचिअणिव्वमं ति । " प्रा० २ पाद । दे० ना० ।

णवरि-नवरि-अव्य० । आनन्तर्ये, " आनन्तर्ये णवरि " ॥ ८।२। १८८ ॥ आनन्तर्ये णवरीति प्रयोक्तव्यमिति । तथा प्रयोगः-"अ-

वरि अ से रहुवइणा।" केचित्तु केवलानन्तर्यार्थयोर्णवरणवरीत्येकमेव सूत्रं कुर्वते, तन्मते तु उभावप्युभयार्थौ। प्रा० २ पाद। दे० ना०।

णवरिअ–देशी–सदृशार्थे, दे० ना० ४ वर्ग।

णवलग–नवलक–पुं०। वस्त्रमये पक्कदोरकजालकमये वा (नवली वसनी खरिया जाली जावी इति ख्याते) मुद्राकोशे, कोऽपि कस्याऽपि पार्श्वे सुवर्णपणशतं नवलकं क्षिप्तवान्। नं०।

णवलया–देशी–नियमविशेषे, दे० ना० ४ वर्ग।

णवल्ल–नव–त्रि०। "ल्लो नवैकाद् वा" ॥ ८। २। १६५॥ इति स्वार्थे ल्लः। नूतने, प्रा० २ पाद।

णवविगइ–नवविकृति–स्त्री०। नवसु क्षीराऽऽदिविकृतिषु, "णवविगईओ पण्णत्ताओ। तं जहा-खीरं, दहिं, णवणीयं, सप्पिं, तिल्लं गुलो, महुं, मज्जं, मंसं।" स्था० ६ ठा०। (एतासां विस्तरः 'विगइ' शब्दे वक्ष्यते)

णवसुत्त–नवसूत्र–त्रि०। नवं सूत्रं वल्कलाऽऽदि यस्मिन् स तथा। नवसूत्ररचिते, "आसंदियं च नवसुत्तं, पाउल्लाइं संकमट्ठाए।" (१५) सूत्र० १ श्रु० ४ अ० २ उ०।

णवसोयपरिस्सवा–नवश्रोतःपरिस्रवा–स्त्री०। नवभिः श्रोतोभिः छिद्रैः परिस्रवति मलं क्षरति इति नवश्रोतःपरिस्रवा। छिद्रनवकेन मलं क्षरन्त्याम्, स्था०।

णवसोयपरिस्सवा बोंदी पण्णत्ता। तं जहा–दो सोया, दो णित्ता, दो घाणा, मुहं, पोसए, वाऊ।

(णवेत्यादि) नवभिः श्रोतोभिः छिद्रैः परिस्रवति मलं क्षरतीति नवश्रोतःपरिस्रवा बोन्दी शरीरमौदारिकमेवैवंविधं, द्वे श्रोत्रे कर्णौ, नेत्रे नयने, घ्राणे नासिके, मुखमास्यम्, (पोसए त्ति) उपस्थम्, पायुरपानमिति। स्था० ६ ठा०।

णवा–नवा–स्त्री०। प्रत्यग्रयौवनायाम्, अतिनवोढायां वा स्त्रियाम्। सूत्र० १ श्रु० ३ अ० २ उ०। व्रतपर्यायेण यावत्त्रिवर्षायां श्रमण्याम्, व्य० ४ उ०।

णवि–अव्य०। वैपरीत्ये, "णवि वैपरीत्ये" ॥ ८। २। १७८॥ णवीति वैपरीत्ये प्रयोक्तव्यमिति। "णवि हावणे।" प्रा० २ पाद। दे० ना०।

णविअ–नत–न०। "के" ॥ ८। ३। १५६॥ इत्यत इत्वम्। नमने, प्रा० ३ पाद।

णविय–नव्य–त्रि०। अभिनवे, आचा० २ श्रु० २ चू० ३ अ०।

णवोद्धरण–देशी–उच्छिष्टे, दे० ना० ४ वर्ग।

णवोल्लुर–देशी–उच्छिष्टे, दे० ना० ४ वर्ग।

णव्व–नव्य–त्रि०। तत्कालमुत्पन्ने, ध० २ अधि०।

णव्वाउत्त–देशी–ईश्वरे, दे० ना० ४ वर्ग।

णसंतिपरलोगवाइ[ण्]–नशान्तिपरलोकवादिन्–पुं०। न विद्यते शान्तिश्च मोक्षः परलोकश्च जन्मान्तरमित्येवं यो वदति स तथा। अक्रियावादिभेदे, (स्था०) तथाहि–नास्त्यात्मा, प्रत्यक्षाऽऽदिप्रमाणाविषयत्वात्, खरविषाणवत्, तदभावान्न पुण्यपापलक्षणं कर्म तदभावान्न परलोको, नाऽपि मोक्ष इति। यच्चैतच्चैतन्यं तद् भूतधर्म इति। अस्याऽक्रियावादिता स्फुटैव। न चैतस्य मतं संगच्छते, प्रत्यक्षाऽऽद्यप्रवृत्त्या आत्माऽऽदीनां निराकर्तुमशक्यत्वात्, सत्यपि वस्तुप्रमाणप्रवृत्तिदर्शनादागमविशेषसिद्धत्वाच्च, भूतधर्मताऽपि न चैतन्यस्य, विवक्षितभूतान्नाशेऽपि जातिस्मरणाऽऽदिदर्शनादिति। स्था० ८ ठा०।

णसण–व्यसन–न०। व्यवस्थापने, विशे०। न्यासे, आरोपणे, जी० १ प्रति०।

णस्समाण–नश्यत्–त्रि०। "नशेर्णिरिणासणिवहावसेहपमिसासेहावहराः" ॥ ८। ४। १७८॥ इति नशेर्णिर्योगादेशाभावे। प्रा० ४ पाद। "शकाऽऽदीनां द्वित्वम्" ॥ ४। ४। २३०॥ इति सद्वित्वम्। सन्मार्गात् व्यवस्यमाने, उपा० ७ अ०।

णह–नख–पुं०। क्षुराग्रभागे, भ० १२ श० ७ उ०। करजे, तं०। प्रश्न०। स०। प्रज्ञा०। पाणिपादजे, प्रज्ञा० ४० द्वार। गन्धद्रव्यभेदे च। ज्ञा० १ अ०।

नभस्–न०। "स्नमदामशिरोनभः" ॥ ८। १। ३२॥ इतिनभः पर्युदासान्नपुंसकत्वम्। प्रा० १ पाद। आकाशे, दश० ७ अ०। कल्प०।

णहच्छेज्ज–नखच्छेद्य–न०। नखच्छेदनविधिविशेषे कलाभेदे, कल्प० ७ क्षण।

णहच्छेदणय–नखच्छेदनक–न०। नखकर्तन्याम्, आचा० २ श्रु० १ चू० ७ अ० १ उ०।

णहमुह–देशी–घूके, दे० ना० ४ वर्ग।

णहयल–नभस्तल–न०। व्योम्नि, ज्ञा० १ श्रु० १ अ०। प्रश्न०। "ओविरएमि नहयले।" प्रा० २ पाद।

णहरी–देशी–क्षुरिकायाम्, दे० ना० ४ वर्ग।

णहरणी–नखरदनी–स्त्री०। वेणवादिमय्यां नखशोधन्याम्, प० व० ३ द्वार।

णहवाहण–नभोवाहन–पुं०। स्वनामख्याते भरुकच्छराजे पद्मावतीपतौ, यदुभार्यया पद्मावत्याः काव्यश्रवणेन पूर्वं मानितः पश्चात्तिरस्कृतोऽपरिवारो वज्रभूतिराचार्यः। व्य० ३ उ०। आव०। विशे०।

णहसिर–नखशिरस्–न०। नखाग्रे, भ० ५ श० ४ उ०।

णहसिहा–नखशिखा–स्त्री०। नखाग्रभागे, कल्प० ७ क्षण। नि० चू०।

णहसेण–नभःसेन–पुं०। उग्रसेनतनये कमलायाः पत्यौ, विशे०।

णहहरणी–नखहरणी–स्त्री०। नखकर्तन्याम्, यया नखा छद्यन्ते। बृ० ३ उ०।

णहि [ण्]–नखिन्–त्रि०। नखप्रधाने, अनु०।

णहु–नहु–अव्य०। नैवेत्यर्थे, ज्ञा० १ श्रु० ६ अ०। आव०। व्य०।

णाअ–ज्ञात–त्रि०। "ज्ञो जाणमुणौ" ॥ ८। ४। ७॥ इति ज्ञाधातोर्जाणमुणाऽऽदेशाभावे 'णाअ'। अवबुद्धे, प्रा० ४ पाद।

णाआ–देशी–गर्विष्ठे, दे० ना० ४ वर्ग।

णाइ–ज्ञाति–स्त्री० । पूर्वापरसंबद्धे स्वजने, आचा० १ श्रु० २ अ० ५ उ० । भ० । समानजातौ, नि० १ श्रु० १ वर्ग ५ अ० । कल्प० । औ० । विपा० । अनु० । सूत्र० । मातापितृपुत्रकलत्रादौ, सूत्र० १ श्रु० २ अ० ३ उ० । उत्त० । ज्ञा० । ज्ञाने, संविदि, स्था० ५ ठा० ३ उ० ।

णाइं–अव्य० । नञर्थे, " णाइं नञर्थे " ॥ ८ । २ । १६० ॥ इति नञर्थे ' णाइं ति ' प्रयोगः । " णाइं करोमि रोसं । " प्रा० २ पाद ।

णाइमट्टिअ–नातिमृत्तिक–त्रि० । नातिकर्दमे, भ० १५ श० ।

णाइय–नादित–त्रि० । ध्वनिमात्रे, ज्ञा० १ श्रु० १ अ० । विपा० । भ० । प्रतिशब्दे, कल्प० ५ क्षण । रा० । जं० । लपिते, ज्ञा० १ श्रु० १ अ० । औ० ।

णाइल–नागिल–पुं० । आर्यवज्रसेनस्यान्तेवासिनि, यत आर्यनागिला शाखा निर्गता । कल्प० ८ क्षण । आ० चू० । नागिलाकुलवशवर्तिनां साधूनामाचारादारभ्य यावदनुत्तरोपपातिकदशास्तावन्नास्ति आचाम्लम् । व्य० १ उ० । दुष्प्रसहानगारसमये भविष्यति श्रावके, यदनुशिष्टौ दुष्प्रसहोऽनगारः प्रव्रजिष्यति । ति० । महा० । " सड्ढी य नाइलो नाम गाहवती सावगाण पच्छिमओ । " (३४) ति० । ती० । "पविरलगामे जणवए, पविरलमणुएसु नाम दोसेसु । नामेण नाइलो ना-म गणहरो होहिइ महप्पा ॥२०॥ " ति० । इति भविष्यत्यनगारे सुमतिभ्रातरि, महा० ।

अत्थि इहेव भारहे वासे मगहा णाम जणवओ । तत्थ कुसत्थलं नाम पुरं । तम्मि य जवलच्छपुन्नपावे सुमुणियजीवाऽऽदिपयत्थे सुमइ–णाइल–णामधिज्जे दुवे सहोयरे महिड्ढिए सड्ढगे अहेसि । अहन्नया अंतरायकम्मोदएणं वियलियं विहवं तेसिं, ण उण सत्तं परक्कमं ति । एवं अचलियसत्तपरक्कमाणं तेसिं अचंतपरलोगभीरूणं विरयकूमकवमालीयाणं पमिवन्नजहोवइट्ठदाणाइचउक्खंधजइवासगधम्माणं अपिसुणामच्छरीणं अमायावीणं किं बहुणा ? गोयमा ! ते जइवासगे णं आवसहगुणरयणाणं पन्नवा खंतीनिवासे सुयणमेत्तीणं, एवं तेसिं बहुवासरवन्नणिज्जगुणरयणाणं पि जाहे असुहकम्मोदएणं न बहुप्पए संपया ताहे ण पहुप्पंति अट्ठाहियामहिमादओ इट्ठदेवयाणं जहिच्छिए पूयासक्कारे साहम्मियसम्माणे बंधुजणसंववहारे य । अहन्नया अचलंतेसु अतिहिसक्कारेसु अपूरिज्जमाणेसु पणइजणमणोरहेसु विहमंतेसु य सुहिसयणमित्तबंधवकलत्तपुत्तणत्तुयगणेसुं विसायमुवगएहिं गोयमा ! चिंतियं तेहिं सड्ढगेहिं । तं जहा–

"जा विहवो ता पुरिस–स्स होइ आणापमिच्छओ लोओ ।
गलिओदयं घणं वि–ज्जुला व दूरं परिच्चयइ " ॥१॥

एवं च चिंतिऊण परोप्परं भणिउमारद्धे ।

तत्थ पढमो–

"पुरिसेण माणधणव–ज्जिएण परिहीणभागधेज्जेणं ।
ते देसा गंतव्वा, जत्थ ण वासादि दीसंति" ॥१॥

तह बीओ—

"जस्स धणं तस्स जणो, जस्सऽत्थो तस्स बंधवा बहवे ।
धणरहिओ उ मणूसो, होइ समो दासपेसेहिं" ॥२॥

अह एवं परोप्परं संजोज्जेऊण गोयमा ! कयं देसपरिच्चायनिच्छयं तेहिं ति ।

जहा–

"वच्चामो देसंतरं, ति तत्थ णं कयाइ पुज्जंति ।
चिरचिंतिए मणोरहे, हवइ पवज्जाए सह संजोगो" ॥१॥

जइ दिव्वो बहुमन्नेज्जा जाव णं उज्जिसंनंकगयं कुसत्थलं, पमिवन्नं विदेसगमणं । अहन्नया अणुप्पेहेणं गच्छमाणेहिं दिट्ठं पंच साधुणो [ढड्ढं समणो] वासगं ति । तओ जणिअं णाइलेण । जहा–भो भो सुमती जद्दमुह ! पेच्छ केरिसो साहुसत्थो ?, ता एएणं चेव साहुसत्थेणं गच्छामो, जइ पुणो वि तए गंतव्वं । तेण जणियं–एवं होउ त्ति । तओ सम्मिलिया तत्थ सत्थे जाव णं पयाणगमावहंति, ताव णं भणिओ सुमती णाइलेणं । जहा–णं भद्दमुह ! मए हरिवंसतिल्लयमरगयउविणो सुगहियनामधेज्जवाविंसतमतित्थगरस्स णं अरिट्ठनेमिनाहस्स पायमूले सुहनिसन्नेणं एवमवधारियं आसी । जहा–जे एवंविहे अणगाररूवे जवंति, ते य कुसीले, ते दिट्ठीए वि निरिक्खउं न कप्पंति, ता एते साहुणो तारिसे, ण कप्पइ एतेसिं समं अम्हाण गमणं, संसग्गं वा । ता वयंतु एते, अम्हे अप्पसत्थेणं चेव वइस्सामो, न कीरइ तित्थयरवयणस्सातिक्कमो, जओ णं ससुरासुरस्सावि जगस्स अलंघणिज्जा तित्थयरवाणी, अन्नं च जाव एतेहिं संघं गच्छइ, ताव णं चिट्ठउ, ताव दरिसणआलावादीणि य मा भवंतु, ता किं तुम्हेहिं तित्थयरवाणिं उल्लंघियत्ता णं गंतव्वं । एवं तमणुभाणिऊण तं सुमतिं हत्थे गहाय निच्छमिओ णाइलो साहुसत्थाओ, निव्विट्ठो य चक्खुविसोहिए फासुगन्नपएसे । तओ जणियं सुमइणा ।

जहा–

"गुरुणो मायापित्त–स्स जेट्ठजाया तहेव जइणीणं ।
जत्थुत्तरं न दिज्जइ, हा देव ! भणामि किं तत्थ ? ॥१॥
आएसमवी माणं, पमाणपुव्वं तह त्ति नायव्वं ।
मंगलममंगलं वा, तत्थ वियारो न कायव्वो ॥२॥
णवरं एत्थ य णं मे, दायव्वं अज्जमुत्तरमिमस्स ।
खरफरुसकक्कसाणि–ट्ठदुट्ठनिठुरसरेहिं तु ॥३॥

अहवा कह उच्छहइ, जीहा मे जिट्ठजाउणो पुरओ ।
जस्सुच्छंगे वि णियं, मए सदेहं असुइविलित्तं ?॥ ४ ॥
अहवा कीस ण लज्जइ, एस सयं चेव एव पन्नवंतो ।
जं तु कुसीले एते,दिट्ठीए वी ण दट्ठव्वे"॥५॥ साहुणो त्ति ।
जाव न वयइ ताव णं इंगियागारकुसलेणं मुणियं नाइ-
लेण-जहा णं अक्षीयकसाइओ एस मणगं सुमती, ता
किमहं पडिभणामि त्ति चिंतिउं समाढत्तो ।

जहा-

"कज्जेण विणा अकमे, एस पकुविओ हु ताव संचिट्ठे ।
संपइ अणुणिज्जंतो, ण जाणिमो किं च वहु मन्ने?॥१॥
ता किं अणुणेमि इमं, उयाहु बोल्लउ खणऊ ताऽलं वा ।
जेणुवसमियकसाओ, पडिवज्जइ तं तहा सव्वं ॥२॥
अहवा पत्थावमिणं, एयस्स वि संसयं अवहरेमि ।
एस ण जाणइ भद्दं, जाव विसेसं ण परिकहियं" ॥३॥

इति चिंतिऊण जणिउमाढत्तो-

"णो देमि तुज्झ दोसं, ण यावि कालस्स देमि दोसमहं ।
जं पियबुच्चीएँ सहो-यरा वि भणिया पकुव्वंति ॥१॥
जीवाणं वि ण एत्थं, दोसं कम्मट्ठजाअकसिणाणं ।
जं चउगइनिप्फिडिणं, हिओवएसं न बुज्झंति ॥२॥
घणरागदोसकुग्गा-हमोहमिच्छत्तखवमियमणा णं ।
भावियविसकाअडमं, हिओवएसाइ मन्नंति" ॥३॥

एवमाइ सुणिऊण तओ जणिअं सुमइणा-जहा तुमं चेव सत्थवादी जणसु एयाए, णवरं ण जुत्तमेयं जं साहूणं अवण्णवायं भासिज्जइ, अन्नं तु किं न पेच्छसि तुमं एएसिं महाणुभागाणं चोद्दसं बट्ठऽट्ठमदसमदुवालसमासखमणाईहिं आहारग्गहणं, गिम्हे ता वणट्ठाणं वीरासणउक्कुडुयासणनाणाभिग्गहधारणेणं च कट्ठतवोऽणुचरणेणं च सुक्कं मंससोणियं ति, महाउवासगोऽसि तुमं, कहं महाभासासमिती विहिया तए, जेण एरिसगुणजुत्ताणं पि महाणुन्नागाणं साहूणं कुसील त्ति नामं संकप्पियं ति । तओ भणियं नाइलेणं जहा-मा वच्छ ! तुमं एतेणं परितोसमुवयासु जहा अहयं अतिचारेणं परिमुसिओ, अकामनिज्जराए वि किंचि कम्मक्खयं भवइ, किं पुण जं बालतवेणं, ता एते बाल्लतवस्सिणो दट्ठव्वे, जओ ण किंचि उस्सुत्तं मग्गं आयारियं एएसिं पओसे, अन्नं च वच्छ ! सुमइ ! णत्थि मम इमाणोवरि को वि सुहुमो वि मणसा वि पओसो, जेणाहमेएसिं दोसग्गहणं करेमि, किं तु मए जगवओ तित्थयरस्स सगासे एरिसमवधारियं जहा-कुसीले अदट्ठव्वे । ताहे जणिअं सुमइणा जहा-जारिसो तुमं निबुद्धीओ,तारिसो सो वि तित्थयरो, जेणं तुज्झमेयं वायरियं ति । तओ एवं भणमाणस्स सहत्थेणं झंपिअं मुहकुहरं सुमइस्स नाइलेणं,भणिओ य जहा-जड्डमुह ! मा जगेक्कगुरुणो तित्थयरस्सासायणं कुणसु, मए पुण जणसु जहिच्छियं,नाहं ते किं वि पडिभणामि । तओ जणियं सुमइणा जहा-जइ एते वि साहुणो कुसीला,ता एत्थ जगे ण कोइ सुसीलो अत्थि । तओ जणिअं णाइलेण जहा-जड्डमुह सुमइ ! इत्थ जयाऽलंघणिज्जवक्कस्स जगवओ वयणमायरेयव्वं जं वच्छ ! कयाइ ण विसंवएज्जा णो णं बाल्लतवस्सीणं चेट्ठियं, जओ णं जिणिंदवयणेणं नियमओ ताव कुसीले इमे दीसंति, पव्वज्जाए पुण गंधं पि ण दीसइ एएसिं, जेणं पिच्च पिच्च तावेयस्स साहुणो विपज्जयमुहणंतगं दीसइ, ता एस ताव अहिगपरिग्गहदोसेणं कुसीलो,ण एयं साहूणं भगवया इट्ठं जमहियपरिग्गहविधारणं कीरे,ता वच्छ ! हीणसत्ताणं एस वेसो मणसाऽज्झवसिअं जहा जइ ममेयं मुहणंतगं विप्पणस्सिहिइ,ता कीयं कत्थ पावेज्जा ?, नो एवं चिंतेइ मूढो जहा अहिगाणुवओगोवहिधारणेणं मज्झं परिग्गहवयस्स जंगं होही । अहवा किं संजमेऽजिनरओ एस मुहणंतगाइसंजमोवओगधम्मोवगरणेणं विसीएज्जा नियमओ ण विहीए णवरमत्ताणपहीणसत्तोऽहमिइ पायमे लम्मग्गायरणं च पयंसेइ,पवयणं च मइलेइ त्ति एसो जण पेच्छसि सामन्नवतो एएणं कल्लं तीए वि णीयं सेणाए इत्थीए अंगजड्ढिं निज्जाइऊण जन्नाल्लोइयं पक्किंतं तं किं तए ण विन्नायं, एस उण पेच्छसि परूढविप्पोसगविम्हिया णाणा एते य संपयं चेव ल्लोयट्ठाए सहत्थेण अदिन्नं छारगहणं कयं, तए च दिट्ठमेयं ति एसो उ ण पेच्छसि, परूढविप्पोसगं पेच्छसि, संपमियकल्लो एएणं अणुग्गए सूरिए जट्टेह, वच्चामो उग्गयं सूरियं ति तहा विहसियमिणं एसो उण पेच्छसि एसिं जिट्ठसेहो एसो अज्ज रयणीए अणुवउत्तो पसुत्तो विज्जुक्काए फुसिओ ण एतेणं कप्पगहणं कयं, तहा पभाए हरियतणं वासाकप्पं वक्खेणं संघट्टियं, तहा बाहिरोदगस्स णं परिजोगं कयं, बीयकायस्सोयरेणं फरिसं कओ अविहीए, एस खारथंमिल्लाओ महुरं थंमिल्लं संकमिओ, तहा पहपमियत्तेणं साहुणा कम्मसुयाइ कम्मे इरियं पक्किक्कमियव्वं, तहा चरेयव्वं,तहा चिट्ठेयव्वं,तहा आसेयव्वं, तहा सएयव्वं, जहा छक्कायमइगयाणं जीवाणं सुहुमबायरपज्जत्तापज्जत्तगमागमसव्वजीवपाणभूयसत्ताणं संघट्टणपरियावणाकिलामणोद्दवणं वा ण भवेज्जा । ता एतेसिं पव्वइयाणं एयस्स एक्कपवि ण एत्थ दीसइ, जं पुण मुहणंतगं पमिलेहमाणो अज्ज मए एस चोइओ-जहा एरिसं पडिलेहणं करेइ, जेण वाउक्कायस्स फट्ट-

फमस्स संघट्टेज्जा, सरियं च पमिलेहणाए संतियं कारणं ति जस्सेरिसं, जइ णं एरिसं सोवओगं बहुं काहिसि संजमं ण संदेहं जस्सेरिसममाउत्तत्तणं तुज्झं ति, एत्थ च तणहिं विणिवारिओ जहा णं मूगोवाईणं अम्हाणं साहूहिं समं किंचि भणियव्वं कप्पे ता किमेयं ते विसुमरियं, ता भद्दमुह ! एएणं समं संजमट्ठाणं नराणं एगमवि णो परिक्खियं, ता किमेस साहू जन्नेज्जा जस्सेरिसं पमत्तत्तणं, णो एस साहू जस्सेरिसं णिद्धम्मसंपलत्तणं, भद्दमुह ! पेच्च पेच्च मूणो इव णिंत्ति सो अकायणिमद्दणा कह अभिरमे एसो। अहवा वरं मूणो, जस्स णं सुहमपवि नियवयजंगं णो जनेज्जा, एसो उ णियमभंगं करेमाणो केणं जवमेज्जा, ता वच्च ! मुमइ ! भद्दमुह ! ण एरिसकत्तव्वायरणाओ जवंति साहू, एतेहिं च कत्तव्वेहिं तित्थयरवयणं सरेमाणो को एतेसिं वंदणगमवि करेज्जा, अन्नं च एएसिं संसग्गेणं कयाइ अम्हाणं पि चरणकरणेसु सिढिलत्तं भवेज्जा, जेणं पुणो पुणो आहिंमिमो घोरभवपरंपरं। तओ जणियं सुमइणा, जहा णं एए कुसीला, जइ एए कुसीले तहा वि मए एएहिं समं पव्वज्जा कायव्वा, जं पुण तुमं कहेसि तमेव धम्मं, णवरं को अज्ज तं असुकरं समायरिउं सक्को ? ता मए एतेहिं समं गंतव्वं जाव णो दूरं वयंति से साहुणो त्ति। तओ जणियं णाइलेण–भद्दमुह सुमइ ! णो कल्लाणं एतेहिं समं गच्छमाणस्स तुज्झं ति, अहयं च तुज्झं हियवयणं जणामि एवं, तए जं चेव बहुगुणं तमेवाणुसेवय, णाहं तए दुक्खेण धरेमि। अह अन्नया अणेगोवाएहिं पि णिवारिज्जंतो ण उ निओ सो मंदभग्गो सुमती, गोयमा ! पव्वइओ य। अह अन्नया वंचंतेणं मसपंचगेणं आगओ महारोरवो दुवालससंवच्छरिओ दुब्भिक्खो, तओ ते साहुणो तक्काइदोसेण अणालोइयपडिक्कंता मरिऊण उववन्ने जूयजक्खरक्खसपिसायादीणं वाणमंतरदेवाणं वाहणत्ताए, तओ चविऊणं मच्छजातीए कुणिमाहारकूरज्झवसायदोसओ सत्तमाए, तओ उव्वट्टिऊणं तइयाए चउवीसिगाए संमत्तं पाविहिंति। तओ य संमत्तलब्भजत्ताओ तइए जवे चउरो सिज्झिहिंति, एगो ण सिज्झिहिइ जो, सो पंचमगो सव्वजेट्ठो, जओ णं से एगंतमिच्छदिट्ठी अभव्वो य। महा० ४ अ०। ग०।

णाइवं–ज्ञातिवत्–त्रि०। ज्ञातिर्विद्यते यस्य स ज्ञातिवान्। स्वजनवति, "मित्तवं णाइवं होइ।" उत्त० ४ अ०।

णाइविगट्ठ–नातिविकृष्ट–त्रि०। अनत्यन्तदीर्घे, विपा० १ श्रु० ३ अ०।

णाइसंग–ज्ञातिसङ्ग–पुं०। मातापितृकलत्राऽऽदिसङ्गे, सूत्र० १ श्रु० ३ अ० २ उ०।

णाइसीय–नातिशीत–त्रि०। न विद्यतेऽतिशयेन शीतं यत्र स नातिशीतः। अतिशीताऽऽबाधारहिते, सूत्र० १ श्रु० १ अ० १ उ०।

णाउट्ठ–देशी–गोमति, दे० ना० ४ वर्ग।

णाउं–ज्ञात्वा–अव्य०। विज्ञायेत्यर्थे, पञ्चा० ६ विव०। विनिश्चित्येत्यर्थे, आ० म० १ अ० १ खण्ड।

णाऊण–ज्ञात्वा–अव्य०। विज्ञायेत्यर्थे, प्रा० ४ पाद।

णाग–नाक–पुं०। न०। स्वर्गे, ध० २ अधि०।

नाग–पुं०। जवनपतिविशेषे, ज्ञा० १ श्रु० ८ अ०। प्रव०। जी०। औ०। अनु०। नागकुमारे, नं०। भ०। ज्ञा०। स०। हस्तिनि, भ० १२ श० ७ उ०। नागवंशप्रसूते, औ०। ज्ञा०। सूत्त०। आ० क०। प्रज्ञा०। सर्पे, औ०। भद्दिलपुरे नगरे सुलसायाः श्राविकोत्तमायाः पत्यौ, आ० म० १ अ० २ खण्ड। स्था०। अन्त०। कल्प०। आव०। आर्यरक्षितस्य शिष्ये स्वनामख्याते आचार्ये, कल्प० ७ क्षण। द्रुमविशेषे, रा०। कल्प०। आचा०। ध्रुवकरणानां चतुष्पदाऽऽदीनामन्यतमे, सूत्र० १ श्रु० १ अ० १ उ०। जं०। विशे०। कल्प०। स्वनामख्याते द्वीपभेदे, समुद्रभेदे च। सूत्र० १ श्रु० १ अ० ३ उ०। नागकेशरे, नागदन्तके, मुस्तके, देहस्थे उद्गारकारके पवनभेदे, पर्वतभेदे, रङ्गे, सीसके च। वाच०।

णागकुमार–नागकुमार–पुं०। नागाश्च ते कुमाराश्च नागकुमाराः। प्रज्ञा० १ पद। द्वितीयजवनपतिषु, स्था० ३ ठा० ४ उ०। प्रज्ञा०। स्था०। स०। (नागकुमारवक्तव्यताऽन्यत्र)

णागकेउ–नागकेतु–पुं०। चन्द्रकान्तानगरीराजविजयसेननृपसख्यश्रीकान्तव्यवहारिभार्यायाः श्रीसख्याः सुते, येन हि स्तनन्धयेनापि पर्युषणायामष्टमं तपश्चक्रे, (कल्प०) चन्द्रकान्ता नगरी, तत्र विजयसेनो नाम राजा, श्रीकान्ताख्यश्च व्यवहारी, तस्य श्रीसखी भार्या, तया च बहुप्रार्थित एकः सुतः प्रसूतः। स च बालक आसन्ने पर्युषणापर्वणि कुटुम्बकृतामष्टमवार्तामाकर्ण्य जातजातिस्मृतिः स्तन्यपोऽप्यष्टमं कृतवान्। ततस्तं स्तन्यपानमकुर्वाणं पर्युषितमालतीकुसुममिव म्लानमालोक्य मातापितरावनेकान् उपायाँश्चक्रतुः। क्रमाच्च मूर्छां प्राप्तं तं बालं मृतं ज्ञात्वा स्वजना भूमौ निक्षिपन्ति स्म। ततश्च विजयसेनो राजा तं पुत्रं तद्दुःखेन तप्तितरं च मृतं विज्ञाय तरुनग्रहणाय सुभटान् प्रेषयामास। इतश्च अष्टमप्रभावात् प्रकम्पिताऽऽसनो धरणेन्द्रः सकलं तत्स्वरूपं विज्ञाय भूमिस्थं तं बालकममृतवृष्ट्या आश्वास्य विप्ररूपं कृत्वा धनं गृह्णतस्तान् निवारयामास। तत श्रुत्वा राजाऽपि त्वरितं तत्रागत्योवाच–भो भूदेव ! परम्पराऽऽगतमिदमस्माकमपुत्रधनग्रहणं कथं निवारयसि ?। धरणोऽवादीत्–राजन् ! जीवत्यस्य पुत्रः। कथं कु. आस्तीति राजाऽऽदिनिरुक्तम् भूमेस्तं जीवन्तं बालकं साक्षात्कृत्य निधानमिव दर्शयामास। ततः सर्वैरपि सविस्मयैः स्वामिन् ! कस्त्वं कोऽयमिति पृष्टे सोऽवदत्–अहं धरणेन्द्रो नागराजः कृताष्टमतपसोऽस्य महात्मनः साहाय्यार्थमागतोऽस्मि। राजाऽऽदिनिरुक्तम्–स्वामिन् ! जातमात्रेणानेन अष्टमतपः कथं कृतम् ?। धरणेन्द्र उवाच–राजन् ! अयं हि पूर्वभवे कस्यिद्वणिक्पुत्रो बाल्येऽपि मृतमातृक आसीत्, स च अपरमात्राऽत्यन्तं पीड्यमानो मित्राय स्वदुःखं कथयामास। सोऽपि त्वया पूर्वजन्मनि तपो न कृतं तेनैवं पराभवं लभसे इत्युपदिष्टवान्। ततोऽसौ

यथाशक्ति तपोनिरत आगामिन्यां पर्युषणायामवश्यमष्टमं करिष्यामीति मनसि निश्चित्य गृहकुटीरे सुष्वाप । तदा च लब्धावसरया विभ्रा आसन्नप्रदीपनकाग्निकणस्तत्र निक्षिप्तः, तेन च कुटीरके ज्वलिते सोऽपि मृतः, अष्टमध्यानाच्च अयं श्रीकान्तमहेभ्यनन्दनो जातः । ततोऽनेन पूर्वभवचिन्तितमष्टमतपः साम्प्रतं कृतं, तदसौ महापुरुषो लघुकर्माऽस्मिन् भवे मुक्तिगामी यत्नात् पालनीयः, भवतामपि महते उपकाराय भविष्यतीति मत्वा नागराजः स्वहारं तत्कण्ठे निक्षिप्य स्वस्थानं जगाम । ततः स्वजनैः श्रीकान्तस्य मृतकार्यं विधाय तस्य नागकेतुरिति नाम कृतं, क्रमाच्च स बाल्यादपि जितेन्द्रियः परमश्रावको बभूव । एकदा च विजयसेनराजेन कश्चिद् अचौरोऽपि चौरकलङ्केन हतो व्यन्तरो जातः समग्रनगरविघाताय शिलां रचितवान्, राजानं च पादप्रहारेण रुधिरं वमन्तं सिंहाऽऽसनाद् भूमौ पातयामास । तदा स नागकेतुः कथमिमं सङ्घप्रासादविध्वंसं जीवन् पश्यामीति बुद्ध्या प्रासादशिखरमारुह्य शिलां पाणिना दध्रे । ततः स व्यन्तरोऽपि तत्तपःशक्तिमसहमानः शिलां संहृत्य नागकेतुं नतवान् । तद्वचनेन चूपालमपि निरुपद्रवं कृतवान् । अन्यदा च नागकेतुर्जिनेन्द्रपूजां कुर्वन् पुष्पमध्यस्थितसर्पेण दष्टोऽपि तथैवाऽव्यग्रो भावनाऽऽरूढः केवलज्ञानमासादितवान्, ततः शासनदेवताऽर्पितमुनिवेषश्चिरं विहरति स्म । कल्प० १ क्षण ।

णागकेसर–नागकेशर–पुं० । स्वनामख्याते पुष्पप्रधाने वनस्पतौ, वाच० । भाव० ।

णागग्गह–नागग्रह–पुं० । नागावेशोत्थे ज्वराऽऽदौ, जी० ३ प्रति० ।

णागघर–नागगृह–न० । उरगप्रतिमायुक्ते चैत्ये, ज्ञा० १ श्रु० ८ अ० ।

णागजण्ण–नागयज्ञ–पुं० । नागपूजायाम्, नागोत्सवे, ज्ञा० १ श्रु० ८ अ० ।

णागजसा–नागयशस्–स्त्री० । पन्थकपुत्र्यां ब्रह्मदत्तचक्रिभार्यायाम्, उत्त० १३ अ० ।

णागज्जुण–नागार्जुन–पुं० । हिमवदाचार्याणां शिष्ये, (नं०)

मिउमद्दवसंपण्णे, अणुपुव्विं वायगत्तणं पत्ते ।
ओहसुयसमायारे, नागज्जुणवायए वंदे ॥ ४० ॥

(मिउ इत्यादि) मृदुमार्दवसंपन्नान् मृदु कोमलं मनोज्ञं सकलभव्यजनमनःसन्तोषहेतुत्वाद् यन्मार्दवं चोपलक्षणं, तेन क्षान्तिमार्दवाऽऽर्जवसन्तोषसंपन्नानिति द्रष्टव्यम् । तथा आनुपूर्व्या वयःपर्यायपरिपाट्या वाचकत्वं प्राप्तान्; इदं च विशेषणमैदंयुगीनसूरीणां सामाचारीप्रदर्शनपरमवसेयम् । (नं०) तथा ओघश्रुतसमाचारकान् ओघश्रुतमुत्सर्गश्रुतमुच्यते, तत्समाचरन्ति ये ते ओघश्रुतसमाचारकाः, तान् नागार्जुनवाचकान् वन्दे ॥ ४० ॥ नं० ।

आचाराङ्गाऽऽदिषु नागार्जुनीयासां पाठभेदोऽस्ति, स च नागार्जुनोऽयमेवेति प्रतीयते । अन्योऽपि पादलिप्तसूरीणां शिष्यः श्रावको महाप्रज्ञावकः सिद्धनागार्जुननामा आसीत् । तत्कथा चैवम्–

" पुरमत्थि पामलिपुरं, गंधियहट्टं सुरहिगंधड्ढं ।
तत्थ मुरंमो निवई, ईसरसयसहस्सनमियकमो ॥ १ ॥
कयमयणदमो बहुसु-द्धआगमो संगमु त्ति वरसूरी ।
दूरीकयपावभरो, विहरंतो तत्थ संपत्तो ॥ २ ॥
गुणबुद्धिभावकलिओ, सक्किरियालंकिओ दुरसहो ।
लक्खणगंथु व्व सम-त्थि तस्स एगो पवरसीसो ॥ ३ ॥
सो बालो वि समाण-प्पइन्नागुणरयणरोहणसमाणो ।
आणिय चउत्थरसियं, कया वि इय कहइ गुरुपुरओ ॥ ४ ॥
अंबं तंबच्छीए, अपुप्फियं-पुप्फदंतपंताए ।
नवसालिकंजियं नव-बहूइ कुमरेण मे दिन्नं ॥ ५ ॥
तो गुरुणा संलत्तो, वच्छ ! पसिद्धो सि पहसि जं एवं ।
सो आह मह विहिज्जउ, आयारेणं पसाउ त्ति ॥ ६ ॥
तह विहिए गुरुणा तो, अणेण पालित्तओ सि सो वुत्तो ।
बद्धुसिद्धिजुओ वाई, तविओ सूरीहिं नियपए ॥ ७ ॥
कइया वि वसहिबाहिं, वक्खित्तो सो कहिं वि कज्जम्मि ।
जा चिट्ठइ ता तहियं, संपत्ता वाइणो के वि ॥ ८ ॥
पुच्छंति सूरिनिलयं, कहइ इमो वंकदीहरपहेण ।
काहिंति खंडकप्पं बहु, वसहीइ सयं पुणो पत्तो ॥ ९ ॥
दाउ कवामे कवमे-ण सुवइ जा मुणिवरो तहिं ताव ।
पत्ता वाई पुच्छं-ति कत्थ पालित्तओ सूरी ॥ १० ॥
अह पभणंति विणेया, सुहं सुहेणं सुवंति किर गुरुणो ।
उवहासकप्प विहिओ, कुक्कुसहो तओ तेहिं ॥ ११ ॥
गुरुणा वि विरालीए, सहो विहिओ कहंति तो एए ।
लीलाइ तए जिणिया, अम्हे सव्वे वि मुणिनाह ! ॥ १२ ॥
दिज्जउ दंसणमिण्हिं, तो बहु उट्ठेइ सो तयं बहुयं ।
दट्ठुं तज्जिणणत्थं, पवाइणो इय पयंपंति ॥ १३ ॥
पालित्तय ! कहसु फुडं, सयलं महिमंडलं भमंतेण ।
दिट्ठो कह वि सुओ वा, चंदणरससीअलो अग्गी ॥ १४ ॥
"श्रीकालः सुरिराजो नमिविनमिकुलोत्तंसरत्नायमान-
स्तच्छिष्यो वृद्धवादी द्विजकुलतिलकः सिद्धसेनो बभूव ।
बिभ्राणः कूटनिद्रां कपट इति जने विश्रुतो विश्वरूपः,
संजातः संगमोऽयं तदनु च गणभृत् पादलिप्तस्ततोऽहम् ॥१५॥"
इय जिणपवयणनहयल-ससिणो वरवाइणो महाकविणो ।
कहियनियपुव्वपुरिसे, नाणियं पालित्तएणेयं ॥ १६ ॥
अयसाभिधायअभिदु-म्मियस्स पुरिसस्स मुद्धहिययस्स ।
होइ वहंतस्स पुणो, चंदणरससीयलो अग्गी ॥ १७ ॥
इय निज्झिणिया वाए, अपच्चवाए वि वाइणो गुरुणो ।
णवरसतरंगहोला, तरंगलोलाकहा य कया ॥ १८ ॥
समिया य सिरोवियणा, अहुस्स मुरुंमराइणो तह य ।
विहियं तं पहुसं (पइमं) जं, अज्ज वि कइणो न पावंति ॥१९॥

तथाहि–

दीहरफणिंदनाले, महिहरकेसरदिसामुहदलिल्ले ।
उम्म पिअइ कालभमरो, जणमयरंदं पुहइपउमे ॥ २० ॥
जे लक्खलक्खणावे-ण सूरिणा गूढसुत्तमाईया ।
नाया बहुया भावा, वित्थरगंथाउ ते नेया ॥ २१ ॥
अट्ठमिमाईपव्वसु, पालित्तो लेविऊण नियचलणे ।
रेवयविमलगिरीसुं, वंदइ देवे नहपहेणं ॥ २२ ॥

पुनश्च—

इत्तो सुरट्ठविसए, अज्जुणरससिक्किलक्कमाइप्पो ।
सव्वत्थ लक्खलक्खो, जोगी णागज्जुणो अत्थि ॥ २३ ॥
सो दट्ठु भणइ सूरिं, वियरसु नियपायलेवसिद्धिं मे ।
गिण्हेसु मज्झ कंचण-सिद्धिं तो भणइ मुणिपवरो ॥ २४ ॥
जो कंचणसिद्ध ! अकिं-चणस्स मह कंचणस्स सिद्धीए ।
किं कज्जमवज्जाए, कंचणसिद्धा वि किं बलिया ? ॥ २५ ॥

तुह पायलेवसिद्धिं, सावज्जं तेण म हु पयच्छेमि ।
जं सावज्जुवएसो, मुणीण नो कप्पए भद्द ! ॥ २६ ॥
तत्तो इमो विलक्खो, सुलद्धलक्खो लहुं पि सिक्खेइ ।
समणोवासगकिरियं, चिइवंदणवंदणाईयं ॥ २७ ॥
तित्थागयाण सूरी-ण वंदणं देइ चरणकमलेसु ।
कुसलत्तणेण पुरओ, ठाउं सव्वेसि सङ्घाणं ॥ २८ ॥
गुरुचरणं तो काउं, नियमउलिं नमइ तयणु गंधेण ।
लक्खइ स लद्धलक्खो, सत्तुत्तरमोसहीण सयं ॥ २९ ॥
तेणं ओसहिनियरे-ण पायलेवं सयं कुणइ एसो ।
तव्वसओ गयणे कु-क्कुडु व्व उप्पडइ पमइ पुणो ॥ ३० ॥
पुणरागएण गुरुणा, दिट्ठो पुट्ठो य कहइ सो एवं ।
पहु ! तुह पायपसायं, गंधेण मए इमं नायं ॥ ३१ ॥
पहु ! पसिअ कहसु सम्मं, जोगं जेणं हवेमि सुकयत्थो ।
गुरुउवएसेण विणा, जम्हा ण हवंति सिद्धीओ ॥ ३२ ॥
तो चिंतइ मुणिणाहो, सुलद्धलक्खत्तणं इमस्स अहो ! ।
जं देहाए नाओ, धम्मो तह ओसहिगणो य ॥ ३३ ॥
अन्नं पि इमो नाही, सुहेण इय चिंतिउं भणइ सूरी ।
जइ होसि मज्झ सीसो, कहेमि तो तुह अहं जोगं ॥ ३४ ॥
सो आह नाह ! नाहं, सत्तो जइधम्मभारमुव्वहिउं ।
किं तु पहु ! तुह समीवे, गिहत्थधम्मं पवज्जिस्सं ॥ ३५ ॥
एवं करेसु इय भणि-य सूरिणा गाहिओ इमो सम्मं ।
सम्मत्तमूलममलं, गिहिधम्मं पभणिओ य इमं ॥ ३६ ॥
सच्चियतंडुलसरिसे-ण कुणसु तं पायलेवमेयं ति ।
कुणइ तह जियमेसो, जाया नहगमणलद्धी से ॥३७॥
तीए पन्नावओ सो, वंदइ उज्जिंतमाइसु जिणिंदे ।
पाविस्सा णं च पुरं, संठावइ सूरिनामेणं ॥ ३८ ॥
गिरिनारगिरिसमीवे, तुरगसुरंगा दसारमंमवओ ।
चेइंपमुहं विहियं, तेणं नेमिस्स जत्तीए ॥ ३९ ॥
एवं गिहत्थधम्मं, जिणसासणवच्छलं च काऊण ।
इह परलोए कल्लाण-भायणं एस संजाओ ॥ ४० ॥
नागार्जुनस्येति फल्गुं विशिष्टं,सलब्धलक्ष्यस्य निशम्य सम्यक् ।
गुणेऽत्र निःशेषगुणप्रधाने, कृतप्रयत्ना त्रविका भवन्तु ॥ ४१ ॥
ध० र० । आ० क० । स्वनामख्याते काञ्च्यामिभ्यधनेश्वरे,
" काञ्च्यामिभ्यधनेश्वरेण महता, नागार्जुनेनार्चितः ।
यायात्स्तम्भनके पुरे स भवतः, श्रीपार्श्वनाथो जिनः ॥ १ ॥ "
ती० ५ कल्प ।

णागणिय–नाग्न्य–न० । निर्ग्रन्थभावे संयमानुष्ठाने, सूत्र० १ श्रु० ७ अ० ।

णागदंत–नागदन्त–पुं० । गजदन्ते, तदाकारे गृहाभिर्गते नकुण्टके, अल्कुटके, जी० ३ प्रति० । रा० । (वर्णकस्तु ' विजय ' शब्दे विजयद्वारस्य नैषेधिकीवक्तव्यतावसरे वर्णयिष्यते)

णागदत्त–नागदत्त–पुं० । स्वनामख्याते राजपुत्रे, स च पूर्वभवे क्षुल्लकसाधुः कोपेन मृतो ज्यौतिष्केषूपपद्य ततश्च्युतो राजसुततयोत्पन्नः प्रव्रजितः कोपरूपं भावापायं परिहृत्य केवली भूय सिद्धः । स्था० ३ ठा० ४ उ० । दश० । (' अपाय ' शब्दे प्रथमभागे ८०३ पृष्ठे अस्य सर्वो वृत्तान्त उदाहृतः) ऋषभपुत्राणामन्यतमे, कल्प० ७ क्षण । प्रतिष्ठानपुरवास्तव्यनागयसुश्रेष्ठिनः सुते, आ० क० । आव० । आ० चू० । (स च प्रव्रज्याऽयोग्योऽपि सन् निष्प्रतिकर्मतां गृहीत्वा पतित इति ' णिप्पडिकम्म (ण)' शब्दे उदाहरिष्यते) नागदैवताऽऽराधनाद्धन्ये लक्ष्मीपुरवास्तव्यदत्तश्रेष्ठिपुत्रे, आ० क० । आव० । आ० चू० । आ० म० । (स च गन्धर्वकलानिपुणो गन्धर्वेनागदत्त इति ख्यातः सर्पक्रीडापरः पूर्वजन्मभिदेवसर्पैश्चिक्रीडेति कषायप्रतिक्रमणे ' पडिक्कमण ' शब्दे उदाहरिष्यते) वज्रराजभार्यायाः सुभद्रायाः आत्मजस्य महाबलकुमारस्य पूर्वभवसत्कजीवे मणिनगरवास्तव्ये स्वनामख्याते नरे, विपा० २ श्रु० ७ अ० ।

णागदार–नागद्वार–न० । तीo ६ कल्प । सिद्धायतनानां पश्चिमदिक्स्थे नागावासभूते द्वारे, स्था० ४ ठा० २ उ० ।

णागधर–नागधर–पुं० । हस्तिधारकपुरुषे, औ० ।

णागपडिमा–नागप्रतिमा–स्त्री० । नागदैवतप्रतिमायाम्, "तेसिं णं जिणपडिमाणं पुरओ दो दो नागपडिमाओ पण्णत्ताओ" जी० ३ प्रति० ।

णागपरियावणिया–नागपरिज्ञा–स्त्री० । नागा नागकुमारास्तेषां परिज्ञा यस्यां ग्रन्थपद्धतौ सा नागपरिज्ञा । कालिकश्रुतभेदे, तस्याश्चेयं चूर्णिकृता उपदर्शिता भावना–" जाहे तमज्झयणं समणे णिग्गंथे परियट्टइ ताहे अकयसंकप्पस्स चिंते नागकुमारा तत्थत्था चेव तं समणं परियाणंति वंदंति नमंसंति बहुमाणं च करेंति सिग्गनादितकज्जेसु य वरदा भवंति । " नं० । पा० ।

णागपव्वय–नागपर्वत–पुं० । जम्बूद्वीपे मन्दरस्य पश्चिमेन शीतोदाया महानद्या उत्तरेण वक्षस्कारपर्वते, स्था० ५ ठा० २ उ० । " दो णागपव्वया । " स्था० २ ठा० ३ उ० । जं० ।

णागपुप्फ–नागपुष्प–न० । नागकेशरकुसुमे, जं० ४ वक्ष० ।

णागपुर–नागपुर–न० । हस्तिनापुरे राजधानीलक्षणे कुरुजनपदप्रधाननगरे, स्था० १० ठा० । ज्ञा० ।

णागवल्ली–नागवल्ली–स्त्री० । ताम्बूलीलतायाम्, आचा० १ श्रु० ८ अ० १ उ० ।

णागभद्द–नागभद्र–पुं० । सूत्र० १ श्रु० ४ अ० २ उ० । नागद्वीपाधिपतौ देवे, सू० प्र० १६ पाहु० । चं० प्र० ।

णागभूय–नागभूत–न० । स्थविरादार्यरोहणान्निर्गतस्य उद्देहगणस्य प्रथमे कुले, कल्प० ७ क्षण ।

णागमह–नागमह–पुं० । नागदेवताके उत्सवे, आचा० २ श्रु० १ चू० १ अ० २ उ० ।

णागमहाभद्द–नागमहाभद्र–पुं० । नागाऽऽख्यद्वीपाधिपतौ देवे, सू० प्र० १६ पाहु० । चं० प्र० ।

णागमहावर–नागमहावर–पुं० । नागसमुद्राधिपतौ देवे, सू० प्र० १६ पाहु० । चं० प्र० ।

णागमित्त–नागमित्र–पुं० । आर्यमहागिरिशिष्याणामन्यतमे, स्था० ३ ठा० ४ उ० ।

णागर–नागर–पुं० । स्त्री० । नगरवासिनि, कल्प० २ क्षण । आ० म० । प्रश्न० । देवरे, नागरङ्गे, जम्बरत्नभेदे, वाच० ।

णागराइ–नागराज–पुं० । नागकुमारे, " वेलंधरनागराईणं " सं० १७ सम० । स्था० । अष्ट० । अनन्ते, सर्पे, ऐरावते, गजे च । वाच० ।

णागरिय–नागरिक–त्रि० । नगरधर्मैरुपयुक्ते, सूत्र० २ श्रु० ७ अ० ।

णागरुक्ख–नागवृक्ष–पुं० । स्वनामख्याते वृक्षभेदे, " णागरुक्खे सुयंगाणं । " स्था० ८ ठा० । प्रज्ञा० । स० ।

णागलया–नागलता–स्त्री० । तिर्यक्शाखाप्रसराभावाद् लता-कल्पेषु द्रुमविशेषेषु, जं० १ वक्ष० । रा० । जी० । प्रज्ञा० । यस्य तिर्यक् तथाविधा शाखा प्रशाखा वा न प्रसृता सा लतेत्यभिधीयते । रा० । जी० । औ० । प्रज्ञा० ।

णागलयामयवग–नागलतामयएडपक–पुं० । नागलतामयमण्डपके, जी० ३ प्रति० ।

णागलोगेस–नागलोकेश–पुं० । नरगपतौ, अष्ट० ५० अष्ट० ।

णागवर–नागवर–पुं० । प्रधानगजे, औ० । जं० । गजवरे, तं० । हस्तिप्रधाने, भ० ६ श० ३३ उ० । नागसमुद्राधिपतौ देवे, सू० प्र० १६ पाहु० । चं० प्र० ।

णागवसु–नागवसु–पुं० । प्रतिष्ठानपुरे नागश्रियाः पत्यौ नागदत्तपितरि, आ० क० । आव० । आ० चू० ।

णागवाण–नागवाण–पुं० । दिव्याश्वभेदे, जी० ३ प्रति० ।

णागवीही–नागवीथी–स्त्री० । हयवीथ्यां, ऐरावणपदे, " भरणीखात्याग्नेयं, नागाख्या वीथिरुत्तरे मार्गे । " स्था० ६ ठा० ।

णागसाहस्सी–नागसाहस्री–स्त्री० । नागकुमारदेवसहस्रे, स० ७२ सम० । नागिलभार्यायां निर्नामिकाया मातरि, आ० क० । आ० चू० । आ० म० ।

णागसिरी–नागश्री–स्त्री० । प्रतिष्ठाननगरवास्तव्यनागवसुश्रेष्ठिभार्यायां, नागदत्तमातरि, ज्ञा० १ श्रु० १४ अ० । चम्पानगरवास्तव्यसोमद्विजस्य भार्यायाम्, यया धर्मरुचये विषयुक्तान्नं दत्तं पश्चाद् भवेषु भ्रान्त्वा द्रौपदीजन्म लब्धम् । आ० क० । आ० चू० ।

णागसुदाढ–नागसुदाढ–पुं० । सुदाढनामके नागकुमारे, स च पूर्वभवे सिंहस्त्रिपुष्टेन विदारितो नागकुमारतयोपपन्नो वीरजिनाधिष्ठितां नावं बोलितुमारब्धः । आ० क० ।

णागसुहुम–नागसूक्ष्म–न० । स्वनामख्याते मिथ्यादृक्परिकल्पिते श्रुते , तच्चेदानीं नोपलभ्यते । अनु० ।

णागसेण–नागसेन–पुं० । उत्तरचाचालायां जाते स्वनामके गृहपतौ, स च उत्तरचाचालायां स्वामिनं वीरेण प्रतिलम्भितवान् पञ्च दिव्यानि जातानि । कल्प० ६ क्षण । आ० क० । आ० म० । आ० चू० ।

णागहत्थि [ण]-नागहस्तिन्–पुं० । आर्यनन्दिलक्षपणशिष्ये,(नं०)

वड्ढउ वायगवंसो, जसवंसो अज्जनागहत्थीणं ।
वागरणकरणभंगिय–कम्मप्पयडीपहाणाणं ॥ ३५ ॥

(वड्ढउ इत्यादि) विनेयान् वाचयन्तीति वाचकाः, तेषां वंशः क्रमभाविपुरुषपूर्वप्रवाहः, स वर्द्धतां वृद्धिमुपयातु, मा कदाचिदपि तस्य वृद्धिमुपगच्छतो विच्छेदो भूयादिति यावत् । वर्धतामित्यत्राऽऽशंसायां पञ्चमी । कथंभूतो वाचकवंशः ?, इत्याह-यशोवंशो मूर्तो यशसा वंश इव पर्वप्रवाह इव यशोवंशः, अनेनापयशःप्रधानपुरुषवंशव्यवच्छेदमाह । तथा ह्यपयशःप्रधानानामपारसंसारसरित्पतिस्रोतःपतितानां परममुनिजनोपधृतलिङ्गविडम्बकानाम् अलं सन्तानपरिवृद्ध्येति । केषां संबन्धी वाचकवंशः परिवर्द्धतामित्यादि । आर्यनागहस्तिनामार्यनन्दिलक्षपणाशिष्याणाम् । कथंभूतानामित्याह-व्याकरणकरणभङ्गीकर्मप्रकृतिप्रधानानां, तत्र व्याकरणं संस्कृतशब्दव्याकरणं, प्राकृतशब्दव्याकरणं, प्रश्नव्याकरणं च; करणं पिण्डविशुद्ध्यादि । उक्तं च "पिंडविसोही ४ समिई ५, भावण १२ पडिमा य १२ इंदियनिरोहो ५। पडिलेहण २५ गुत्तीओ ३, अभिग्गहा ४ चेव करणं तु "॥१॥ भङ्गी भङ्गबहुलं श्रुतं, कर्मप्रकृतिः प्रतीता । एतेषु प्ररूपणामधिकृत्य प्रधानानाम् । नं० । आ० चू० ।

णागिंद–नागेन्द्र–पुं० नागराजे नागकुमाराणामिन्द्रे, " असुरिंदसुरिंदणागिंदा । " स० । स्वनामख्याते साधुकुले, " नागेन्द्रगच्छमुगोविन्द-वक्त्रोऽलङ्कारकौस्तुभाः । ते विश्ववन्द्या नन्द्यासु-रुदयप्रभसूरयः ॥ ६ ॥ " स्था० । तदुत्पत्तिश्च महादुर्भिक्षान्ते पोतद्वारा धान्यागमने जाते जिनदत्तः श्रावको नागेन्द्रनामपुत्रसहितो वज्रसेनसूरीणामन्तिके दीक्षां जग्राह, ततो नागेन्द्रशाखा प्रवृत्तेति भाति । कल्प० ८ क्षण ।

णागिल–नागिल–पुं० । कुमारनन्दिनः स्त्रीद्रोलसुवर्णकारस्य मित्रे श्रमणोपासके, आ० म० १ अ० २ खण्ड । गच्छविशेषाश्रितेषु साधुषु, कल्प० ८ क्षण । यथा नागिला रजोहरणमूर्ध्वमुखं कृत्वा कायोत्सर्गं कुर्वन्ति । व्य० १ उ० । धातकीखण्डपूर्वविदेहेषु नन्दिग्रामपतौ लब्धिताक्षदेवदेव्याः स्वयंप्रभायाः पूर्वभवजीवनिर्नामिकायाः पितरि, आ० क० ।

णागी–नागी–स्त्री० । सर्पिण्याम्, " मायामई अ णागी, णियमिकवम्वंचणाकुसला ।" मायाऽऽत्मिका नागी निकृतिकपटवञ्चनाकुशला । आव० ४ अ० ।

णाडगज्ज–नाटकीय–न० । नाटकप्रतिबद्धपात्रे, ज्ञा० १ श्रु० १ अ० । विपा० ।

णाडइणी–नाटकिनी–स्त्री० । नर्तक्याम्, बृ० ३ उ० । तत्प्रतिपादके श्रुते च । स्था० ६ ठा० । संथा० । जं० । अनु० । आ० म० । (द्वात्रिंशद्विधिनिबद्धे नाटकं ' नट्ट ' शब्देऽस्मिन्नेव भागे १७०० पृष्ठे उक्तम्)

णाडग–नाटक–न० । अभिनयविशेषे, बृ० ।

णट्टं होइ अगीयं, गीयजुयं नामयं तु णायव्वं ।
इहागीतं गीतविरहितं नाट्यं भवति, यत्पुनर्गीतयुक्तं तन्नाटकं ज्ञातव्यम् । बृ० १ उ० ।

णाडीय–नाडीक–पुं० । नाडीवृक्षस्य फलानि स नाडीकः। वनस्पतिविशेषे, प्र० १० श० ७ उ० ।

णाण–ज्ञान–न० । ज्ञातिर्ज्ञानम्, भावेऽनट्प्रत्ययः । अथवा ज्ञायते वस्तु परिच्छिद्यतेऽनेनेति ज्ञानम्, करणेऽनट् । नं० । पा० । अनु० । नि० चू० । पं० सं० । सम्म० । कर्म० । " ज्ञो जाणमुणौ " ॥ ८ । ४ । ७ ॥ इति ज्ञातेर्जाणमुणाऽऽदेशस्य बाहुलकत्वान्न मुणाऽऽदेशः । प्रा० ४ पाद । "ज्ञस्यणोणः" ॥ ८ । २ । ४२ ॥ इति ज्ञस्य णादेशः । प्रा० २ पाद । उत्त० । विमर्शपूर्वके बोधे, उत्त० १ अ० । संविज्ञानमवगमो भावोऽभिप्राय इत्यनर्थान्तरम् । आ० म० १ अ० १ खण्ड । व्य० । यथास्थि-

तपदार्थपरिच्छेदने,आचा० १ श्रु० ३ अ० १ उ० । द्वा० । अष्ट० । स्था० । द्रव्यपर्यायविषये बोधे, स्था० ३ ठा० २ उ० । विशेषावबोधे, औ० । अष्ट० । स्वपरपरिच्छेदिनि जीवस्य परिणामे ज्ञानाऽऽवरणविगमसभ्यक्ते तत्त्वार्थपरिच्छेदे, आचा० १ श्रु० १ अ० ६ उ० । अष्ट० । स्था० । औ० । सत्यप्रधानायां बुद्धिवृत्तौ,द्वा० २ द्वा० ।

(१) पर्यायार्थिकस्य विशेष एव वस्तु, स एव गृह्यते येन तज्ज्ञानमभिधीयते । " विसेसियं नाणं । " सम्म० २ काण्ड । ज्ञातिर्ज्ञानमिति भावसाधनः, संविदित्यर्थः । ज्ञायते वाऽनेनास्माद्वेति ज्ञानं, तदावरणस्य क्षयः, क्षयोपशमो वा । ज्ञायते वाऽस्मिन्निति ज्ञानमात्मा, तदावरणक्षयक्षयोपशमपरिणामयुक्तो, जानातीति वा ज्ञानम । स्था० ५ ठा० ३ उ० । "एगे णाणे" नं० । आ०म० । ज्ञायन्ते परिच्छिद्यन्ते अर्था अनेनाऽस्मिन् अस्माद्वेति ज्ञानं ज्ञानदर्शनाऽऽवरणयोः क्षयः, क्षयोपशमो वा, ज्ञातिर्वा ज्ञानमावरणद्वयक्षयाऽऽत्याविर्भूत आत्मपर्यायविशेषः। सामान्यविशेषाऽऽत्मके वस्तुनि विशेषांशग्रहणप्रवणः सामान्यांशग्राहकश्च ज्ञानपञ्चकाज्ञानत्रयदर्शनचतुष्टयरूपः, तत्रानेकमप्यवबोधसामान्यात्,एकमुपयोगापेक्षया वा ।तथाहि-लब्धितो बहूनां बोधविशेषाणामेकदा संभवेऽप्युपयोगत एक एव संभवत्येकोपयोगत्वाद् जीवानामिति । स्था० १ ठा० । उत्त० ।

(२) ज्ञानानि-

णाणं पंचविहं पण्णत्तं । तं जहा-आभिणिबोहियणाणं, सुयणाणं, ओहिणाणं, मणपज्जवणाणं, केवलणाणं ।

(णाणं पंचविहं पण्णत्तमित्यादि) ज्ञातिर्ज्ञानं,ज्ञावेऽनट्प्रत्ययः। अथवा-ज्ञायते वस्तु परिच्छिद्यतेऽनेनेति ज्ञानं, करणेऽनट् । शेषास्तु व्युत्पत्तयो मन्दमतीनां संमोहहेतुत्वान्नोपदिश्यन्ते । पञ्चेति संख्यावाचकः, विधानं विधा, "उपसर्गादातः" ॥ ५ । ३ । ११० ॥ इत्यङ्प्रत्ययः । पञ्च विधाः प्रकारा यस्य तत्पञ्चविधं पञ्चप्रकारं, प्रज्ञप्तं प्ररूपितं,तीर्थकरगणधरैरिति सामर्थ्यादवसीयते, अन्यस्य स्वयं प्ररूपकत्वेन प्ररूपणासंभवात् । नं० । ज्ञानं तीर्थकरैरपि सकलकालाविलम्बितसमस्तवस्तुस्तोमसाक्षात्कारिकेवलप्रकृया पञ्चविधमेव प्राप्तं, गणधरैरपि तीर्थकृद्भिरुपदिश्यमानं निजप्रकृया पञ्चविधमेव प्राप्तं, न तु वक्ष्यमाणनीत्या द्विभेदमेवेति । अथवा-प्राङ्नास्तीर्थकरादासं प्राङ्नासं,गणधरैरिति गम्यते । अथवा-प्राङ्नैर्गणधरैरासं तीर्थकरादित्यनुमीयते;तद्यथेत्युदाहरणोपदर्शनार्थः। आभिनिबोधिकज्ञानं,श्रुतज्ञानमवधिज्ञानं,मनःपर्यायज्ञानं,केवलज्ञानं च । नं० । ज्ञ० । रा० । कर्म० । सूत्र० । ध० र० । विशे० । आ० म० । आतु० । प्रव० । दर्श० । अनु० ।

(३) ज्ञाननेदकारणानि-

ननु सकलमपीदं ज्ञानं ज्ञप्त्येकस्वभावं, ततो ज्ञप्त्येकस्वभावत्वाविशेषे किंकृत एष आभिनिबोधिकाऽऽदिभेदः? । ज्ञेयभेदकृत इति चेत् । तथाहि-वर्तमानिकं वस्त्वाभिनिबोधिकस्य ज्ञानस्य ज्ञेयं, त्रिकालसाधारणः समानः परिणामो ध्वनिगोचरः श्रुतज्ञानस्य, रूपिद्रव्याणि अवधिज्ञानस्य, मनोद्रव्याणि मनःपर्यायज्ञानस्य, समस्तपर्यायान्वितं सर्वं वस्तु केवलज्ञानस्य । तदेतदसमीचीनम् । एवं सति केवलज्ञानस्य भेदबाहुल्यप्रसक्तेः । तथाहि-ज्ञेयनेदाद् ज्ञानस्य नेदः । यानि च ज्ञेयानि प्रत्येकमाभिनिबोधिकाऽऽदिज्ञानानामिष्यन्ते तानि सर्वाण्यपि केवलज्ञानेऽपि विद्यन्ते, अन्यथा केवलज्ञानेन तेषामग्रहणप्रसङ्गाद्विषयत्वात्, तथा च सति केवलिनोऽप्यसर्वज्ञत्वप्रसङ्गः, आभिनिबोधिकाऽऽदिज्ञानचतुष्टयविषयज्ञानस्य तेनाग्रहणात् । न चैतदिष्टमिति । अथोच्येत-प्रतिपत्तिप्रकारनेदतः आभिनिबोधिकाऽऽदिज्ञानभेदः । तथाहि-न यादृशी प्रतिपत्तिराभिनिबोधिकस्य ज्ञानस्य तादृशी श्रुतज्ञानस्य, किन्त्वन्यादृशी । एवमवध्यादिज्ञानानामपि प्रतिपत्तव्यं, ततो भवत्येव प्रतिपत्तिनेदतो ज्ञानभेदः । तदप्ययुक्तम् । एवं सत्येकस्मिन् अपि ज्ञाने ऽनेकभेदप्रसक्तेः । तथा हि-तत्तद्देशकालपुरुषस्वरूपभेदेन विविच्यमानमेकैकं ज्ञानं प्रतिपत्तिप्रकारानन्त्यं प्रतिपद्यते, तत्रैषोऽपि पक्षः श्रेयान् । स्यादेतत्, अस्त्यावारकं कर्म,तच्चानेकप्रकारं, ततस्तद्भेदात्तेनावार्यं ज्ञानमप्येकतां प्रतिपद्यते, ज्ञानावारकं च कर्म पञ्चधा, प्रज्ञापनाऽऽदौ तथाऽभिधानात् । ततो ज्ञानमपि पञ्चधा प्ररूप्यते, तदेतदतीव युक्त्यसङ्गतम् । यत आवार्यापेक्षमावारकमत आवार्यभेदादेव तद्भेदः, आवार्यं च ज्ञानिरूपापेक्षया सकलमप्येकरूपं, ततः कथमावारकस्य पञ्चरूपता, येन तद्भेदाद् ज्ञानस्यापि पञ्चविधो भेद उपवर्ण्येत ?। अथ स्वभावत एवाऽऽभिनिबोधाऽऽदिको ज्ञानस्य नेदो, न च स्वभावः पर्यनुयोगमश्नुते, न खलु किमिह दहनो दहति, नाकाशमिति कोऽपि पर्यनुयोगमाचरति । अहो महती महीयसी भवतः शेमुषी । ननु यदि स्वभावत एवाऽऽभिनिबोधाऽऽदिको ज्ञानस्य भेदः, तर्हि भगवतः सर्वज्ञत्वहानिप्रसङ्गः । तथाहि-ज्ञानमात्मनो धर्मः, तस्य चाभिनिबोधाऽऽदिको भेदः स्वभावत एव व्यवस्थितः, ततः क्षीणाऽऽवरणस्यापि तद्भावप्रसङ्गः। सति च तद्भावेऽस्मादृशस्येव भगवतोऽप्यसर्वज्ञत्वमापद्यते, केवलज्ञानभावतः समस्तवस्तुपरिच्छेदाद् नासर्वज्ञत्वमिति चेत्, ननु यदा केवलोपयोगसंभवः, तदा भवतु भगवतः सर्वज्ञत्वं, यदात्वाभिनिबोधिकाऽऽदिज्ञानोपयोगसंभवः, तदा देशतः परिच्छेदसंभवादस्मादृशस्येव तस्यापि बलादसर्वज्ञत्वमापद्यते । न च वाच्यं तस्य तदुपयोग एव न भविष्यत्यात्मनः स्वभावत्वेन तस्याऽपि क्रमेणोपयोगस्य निवारयितुमशक्यत्वात्, केवलज्ञानानन्तरं केवलदर्शनोपयोगवत्, ततः केवलज्ञानोपयोगकाले सर्वज्ञत्वं, शेषज्ञानोपयोगकाले चासर्वज्ञत्वमापद्यते, तच्च विरुद्धमतोऽनिष्टमिति ।

आह च-

" नत्थेगसहावत्ते, आभिणिबोहाइ किं कओ नेओ ? ।
नेयविसेसाउ च्चिय, न सव्वविसयं जओ चरिमं ॥ १ ॥
अह पभिवत्तिविसेसा, नेगम्मि अणेगभेयभावाओ ।
आवरणविभेओ वि हु, सभावभेयं विणा न जवे ॥ २ ॥
तम्मि य सइ सव्वेसिं, खीणावरणस्स पावई नावो ।
तद्धम्मत्ताउ च्चिय, जुत्तविरोहा स चाणिट्ठो ॥ ३ ॥
अरहा वि असव्वन्नू, आभिणिबोहाइनावओ णियमा ।
केवलभावाउ च्चिय, सव्वन्नूनणु विरुद्धमिणं" ॥ ४ ॥

तस्मादिदमेव युक्तियुक्तं पश्यामो-यदुतावग्रहज्ञानादारभ्य यावदुत्कर्षप्राप्तपरमावधिज्ञानं तावत्सकलमप्येकं, तच्चासकलसंज्ञितम्,अशेषवस्तुविषयत्वाऽभावात् । अपरं च केवलिनः,तच्च सकलमसंज्ञितमिति द्वावेव भेदौ । उक्तं च-" तम्हा अवग्गहाओ, आरब्भ इहेगमेव नाणं ति । जुत्तं जउमत्थस्सा; सगलं इयरं च केवलिणो ॥ १ ॥ "

अत्र प्रतिविधीयते—तत्र यत्तावदुक्तं सकलमपीदं ज्ञानं ज्ञप्त्येकस्वभावं, ततो ज्ञप्त्येकस्वभावत्वाविशेषे किं कृत एष आभिनिबोधाऽऽदिको भेद इति ?। तत्र ज्ञप्त्येकस्व-

प्रावता किं सामान्यतो भवताऽभ्युपगम्यते, विशेषतो वा ?। तत्र न तावदाद्यः पक्षः क्षितिमाधत्ते, सिद्धसाध्यतया तस्य बाधकत्वायोगात् । बोधरूपतारूपसामान्यापेक्षया हि सकलमपि ज्ञानमस्माभिरेकमभ्युपगम्यत एव, ततः का नो हानिरिति ?। अथ द्वितीयः पक्षः, तदयुक्तम्, असिद्धत्वात् । न हि नामविशेषतोऽपि ज्ञानमेकमेवोपलभ्यते, प्रतिप्राणि स्वसंवेदनप्रत्यक्षेणोत्कर्षदर्शनात् । अथ यद्युत्कर्षापकर्षमात्रभेददर्शनाद् ज्ञानभेदस्तर्हि तावुत्कर्षापकर्षौ प्रतिप्राणि देशकालापेक्षया शतसहस्रशो भिद्येते, ततः कथं पञ्चरूपता ?। नैष दोषः । परिस्थूरनिमित्तभेदतः पञ्चधात्वस्य प्रतिपादनात् । तथाहि-सकलघातिक्षयो निमित्तं केवलज्ञानस्य, मनःपर्यायज्ञानस्य त्वामर्षौषध्यादिलब्ध्युपेतस्य प्रमादद्वेषेणाप्यकलङ्कितस्य विशिष्टो विशिष्टाध्यवसायानुगतोऽप्रमादः, " तं संजयस्स सव्व-प्पमाय-रहियस्स विविहारिद्धिमतो । " इतिवचनप्रामाण्यात् । अवधिज्ञानस्य पुनस्तथाविधानीन्द्रियरूपिद्रव्यसाक्षादवगमनिबन्धनं क्षयोपशमविशेषः, मतिश्रुतज्ञानयोस्तु लक्षणभेदाऽऽदिकं तथाऽग्रे वक्ष्यते ।

उक्तं च—

" नन्नेगमहावत्तं, ओहेण विसेसओ पुण असिद्धं ।
एगंततस्सहाव-त्तणे उ कह हाणिवुड्ढीओ ? ॥ १ ॥
जं अविचलियसहावे, तत्ते एगं न तस्सहावत्तं ।
न य तं तहोवलद्धा, उक्करिसावगरिसविसेसा ॥ २ ॥
तम्हा परिथूराओ, निमित्तनेयाओ समयसिद्धाओ ।
खवत्तिसंगओ वि य, आभिणिबोहाइओ भेओ ॥ ३ ॥
घाइक्खओ निमित्तं, केवलणाणस्स वण्णिओ समए ।
मणपज्जवणाणस्स उ, तहाविहो अप्पमाउ त्ति ॥ ४ ॥
ओहिं सोऽसस्स तहा, अणिंदिएसुं पि जो खओवसमो ।
मइसुयनाणाणं पुण, लक्खणनेदादिओ भेओ ॥ ५ ॥"

यदप्युक्तं ज्ञेयनेदकृत इत्यादि, तदप्यनभ्युपगमनिरस्कृतत्वाद् दूरापास्तप्रसरम् । न हि वयं ज्ञेयभेदमात्रतो ज्ञानस्य भेदमिच्छामः, एकेनाऽप्यवग्रहाऽऽदिना बहुविधवस्तुग्रहणोपलम्भात् । यदपि च प्रत्यपादि- प्रतिपत्तिप्रकारभेदकृत इत्यादि, तदपि न नो बाधामाधातुमलम् । यतस्ते प्रतिपत्तिप्रकाराः देशकालाऽऽदिभेदेनाऽनन्त्यमपि प्रतिपद्यमाना न परिस्थूरनिमित्तभेदेन व्यवस्थापितानाभिनिबोधिकाऽऽदीन् जातिभेदा नातिक्रामन्ति, तत्कथमेकस्मिन् एकभेदभावप्रसङ्गः । उक्तं च-"न य पमिवत्तिविसेसो, एगम्मि अणेगभेयभावो त्ति । जं ते तहा विसिट्ठे, न जाइनेए विरोधेऽ ॥ १ ॥" यदप्यवादीदावार्यापेक्षं ह्यावरकमित्यादि, तदपि न नो मनोबाधायै । यतः-परिस्थूरनिमित्तनेदमधिकृत्य व्यवस्थापितो ज्ञानस्य नेदः; ततस्तदपेक्षमावारकमपि तथा भिद्यमानं न युष्मादृशदुर्जनवचनीयतामास्कन्दति । एवमुक्ते जितो भूयः सावष्टम्भं परः प्रश्नयति-ननु परिस्थूरनिमित्तभेदव्यवस्थापिता अ—प्यमी आभिनिबोधिकाऽऽदयो नेदा ज्ञानस्याऽऽत्मभूताः, उताऽनात्मभूताः ?। किं चातः-उभयथाऽपि दोषः । तथाहि-यद्यात्मभूताः, ततः क्षीणाऽऽवरणेऽपि तद्भावप्रसङ्गः । तथा चासर्वज्ञत्वं प्रागुक्तनीत्या तस्याऽऽपद्यते । अथाऽनात्मभूताः, तर्हि न ते पारमार्थिकाः, ततः कथमावार्यापेक्षो वास्तव आवारकनेदः। तदपि न मनोरमम्,सम्यग् वस्तुतत्त्वापरिज्ञानात् । इह हि सकलघनपटलविनिर्मुक्तशारददिनमणिरिव समन्ततः समस्तवस्तुस्तोमप्रकाशनैकस्वभावो जीवः, तस्य च तथाभूतस्वभावः केवलज्ञानमिति व्यपदिश्यते । स च यद्यपि सर्वघातिना केवलज्ञानाऽऽवरणेन आक्रियते, तथाऽपि तद्यानन्ततमो भागो नित्योद्घाटित एव, " अक्खरस्सऽणंतो भागो निच्चुग्घाडिओ, जइ पुणो सो वि आवरिज्जा तेण जीवा अजीवत्तणं पावेज्जा।" इत्यादिवक्ष्यमाणवचनप्रामाण्यात् । ततस्तस्य केवलज्ञानाऽऽवरणाऽऽवृतस्य घनपटलाऽऽच्छादितस्येव सूर्यस्य यो मन्दः प्रकाशः सोऽपान्तरालावस्थितमतिज्ञानाऽऽद्यावरणक्षयोपशमभेदसंपादितं नानात्वं भजते । यथा घनपटलाऽऽवृतसूर्यस्य मन्दप्रकाशोऽपान्तरालावस्थितकटकुड्याऽऽद्यावरणं विवरप्रदेशभेदतः, स च नानात्वं तत्तत्क्षयोपशमानुरूपं तथा प्रतिपद्यमानं तत्तत्क्षयोपशमानुसारेणाभिधानभेदमश्नुते । यथा-मतिज्ञानाऽऽद्यावरणक्षयोपशमजनितः स मन्दः प्रकाशो मतिज्ञानं, श्रुतज्ञानाऽऽवरणक्षयोपशमजनितः श्रुतज्ञानमित्यादि,तत आत्मस्वभावभूताज्ञानस्याऽभिनिबोधिकाऽऽदयो नेदाः, ते च प्रवचनोपदर्शितपरिस्थूरनिमित्तभेदतः पञ्चसंख्याः,ततस्तदपेक्षमावारकमपि पञ्चधोपवर्ण्यमानं न विरुध्यते । न चैवमात्मस्वभावभूतत्वे क्षीणाऽऽवरणस्याऽपि तद्भावप्रसङ्गः । यत एते मतिज्ञानाऽऽवरणाऽऽदिक्षयोपशमरूपोपाधिसंपादितसत्ताकाः, यथा-सूर्यस्य घनपटलाऽऽवृतस्य मन्दः प्रकाशभेदः कटकुड्याऽऽवरणविवरभेदोपाधिसंपादितः । ततः कथं ते तथारूपक्षयोपशमाभावे भवितुमर्हन्ति, न खलु सकलघनपटलकटकुड्याऽऽद्यावरणापगमे सूर्यस्य ते तथारूपा मन्दप्रकाशनेदा भवन्ति । उक्तं च-" कम्मविवरागयकिरणा, गेहंतरियस्स जह दिणेसस्स । ते कम्मेहावगमे, न होंति जह तह इमाइं पि " ॥ १ ॥ ततो यथा जन्माऽऽदयो भावा जीवस्य आत्मभूता अपि कर्मोपाधिसंपादितसत्ताकत्वात्तदभावे न सन्ति, तद्वदाभिनिबोधिकाऽऽदयोऽपि नेदा ज्ञानस्याऽऽत्मभूता अपि मतिज्ञानाऽऽवरणाऽऽदिकर्मक्षयोपशमसापेक्षत्वात् तदभावे केवलिनो न भवन्ति, ततो नासर्वज्ञत्वदोषः । उक्तं च-" जमिह खवत्तमत्थधम्मा, जम्माईया न होंति सिद्धाणं । इय केवलीणमाभिणि-बोहियभावम्मि को दोसो ?॥ १ ॥" इति । नं० । आ० म० । आव० । संथा० । कर्म० । सम्म० । स्था० ।

(४) तदेवं ज्ञानपञ्चकस्याऽप्यभिधानार्थं कथिते आह कश्चित्-नन्वादौ मतिश्रुतोपन्यासः किमर्थः ?, इति । अत्राऽऽचार्य आह-

जं सामि-काल-कारण-विसय-परोक्खत्तणेहिँ तुल्लाइँ ।
तब्भावे सेसाणि य, तेणाईए मइसुयाइं ॥८५॥

तेन कारणेनाऽऽदौ मतिश्रुते निर्दिष्टे। येन किम् ?,इत्याह-(जं सामीत्यादि)इति संटङ्कः। मतिशब्दोऽत्राभिनिबोधिकसमानार्थो द्रष्टव्यः आभिनिबोधिकं ह्यौत्पत्तिक्यादिमतिप्रधानत्वाद् मतिरित्यप्युच्यते। यद् यस्मात् कारणात् स्वामिकालकारणविषयपरोक्षत्वैस्तुल्ये समानस्वरूपे मतिश्रुते, तेनाऽऽदौ निर्दिष्टे इत्यर्थः । तत्र स्वामी तावदनयोरेक एव, " जत्थ मइनाणं तत्थ सुयनाणं " इत्यादागमवचनादिति । कालोऽपि द्विधा-नानाजीवापेक्षया, एकजीवापेक्षया च । स चायं द्विविधोऽप्यनयोस्तुल्य एव नानाजीवापेक्षया ह्ययोरपि सर्वकालमनुच्छेदाद्; एकजीवापेक्षया तूभयोरपि निरन्तरसातिरेकसागरोपमषट्षष्टिस्थितिकत्वेनैवाभिधास्यमानत्वादिति । कारणमपीन्द्रियमनोलक्षणं, स्वा-

वरणक्षयोपशमस्वरूपं च द्वयोरपि समानम् । उभयस्यापि सर्वद्रव्याऽऽदिविषयत्वाद् विषयतुल्यता । परनिमित्तत्वाच्च परोक्षत्वसमता । ननु यद्येवमनयोः परस्परं तुल्यता, तर्ह्येकत्र द्वयोरप्युपन्यासोऽस्तु, आदावेव तु तदुपन्यासः कथम्?, इत्याह- (तब्भावे इत्यादि) तद्भावे मतिश्रुतज्ञानसद्भाव एव शेषाणव-धध्यादीनि ज्ञानान्यवाप्यन्ते; नाऽन्यथा,न हि स कश्चित् प्राणी भूतपूर्वः, अस्ति, भविष्यति वा, यो मति-श्रुतज्ञाने अनासाद्य प्रथममेवाऽवध्यादीनि शेषज्ञानानि प्राप्तवान, प्राप्नोति, प्राप्स्यति वेति भावः । ततस्तदवाप्तौ शेषज्ञानावाप्तेश्चाऽऽदौ मतिश्रुतोपन्यासः । इति गाथाऽर्थः ॥ ८५ ॥

भवतु तर्ह्यादौ मति-श्रुतोपादानं, केवलं पूर्वं मतिः, पश्चाच्छ्रुतमित्यत्र किं कारणं, यावता विपर्ययोऽपि कस्मान्न भवति?, इत्याह-

मइपुव्वं जेण सुयं, तेणाईए मइ विसिट्ठो वा ।
मइभेओ चेव सुयं, तो मइसमणंतरं भणियं ॥ ८६ ॥

मतिः पूर्वं प्रथममस्येति मतिपूर्वं, येन कारणेन श्रुतज्ञानं, तेन श्रुतस्याऽऽदौ मतिः तीर्थंकर-गणधरैरुक्तेति शेषः । न ह्यवग्रहाऽऽदिरूपे मतिज्ञाने पूर्वमप्रवृत्ते क्वापि श्रुतप्रवृत्तिरस्तीति भावः । (विसिट्ठो वा. मइभेओ चेव सुयं ति) यदि वा इन्द्रियानिन्द्रियनिमित्तद्वारेणोपजायमानं सर्वं मतिज्ञानमेव, केवलं परोपदेशादागमवचनत्वाच्च भवन् विशिष्टः कश्चिन्मतिभेद एव श्रुतं; मान्यत् । ततो मूलभूताया मतेरादौ विन्यासः,तद्भेदरूपं तु श्रुतज्ञानं तत्समनन्तरं भणितमित्यदोषः । " मइपुव्वं जेण सुयं " इत्यादिकश्चार्थः पुरतः प्रपञ्चेन भणिष्यते । इति गाथाऽर्थः ॥ ८६ ॥

अथ मतिश्रुतानन्तरमवधेस्तत्समनन्तरं च मनःपर्यायज्ञानस्योपन्यासे कारणमाह-

कालविवज्जयसामि-त्तलाभसाहम्मओऽवही तत्तो ।
माणसमित्तो उजम-त्थविसयभावादिसामण्णा ॥ ८७ ॥

ततो मतिश्रुताभ्यामनन्तरमवधिर्निर्दिष्टः । कुतः ?, इत्याह— कालविपर्ययस्वामित्वलाभसाधर्म्यात् । तत्र नानाजीवापेक्षया, एकजीवापेक्षया च मतिश्रुताभ्यां सहावधेः समानस्थितिकालत्वात् कालसाधर्म्यम् । यथा च मिथ्यात्वोदये मतिश्रुतज्ञाने अज्ञानरूपं विपर्ययं प्रतिपद्येते, तथाऽवधिरपि, इति विपर्ययसाधर्म्यम्। य एव च मति-श्रुतयोः स्वामी, स एवावधेरपीति स्वामिसाधर्म्यम् । लाभोऽपि कदाचित्कस्यचिदमीषां त्रयाणामपि ज्ञानानां युगपदेव भवतीति लाभसाधर्म्यम् । (माणसमित्तो इत्यादि) इतोऽवधेरनन्तरं मनोविषयत्वान्मनसि भवं मानसं मनःपर्यायज्ञानं युक्तम्। कुतः?, इत्याह-ऊर्ध्वस्वविषयभावाऽऽदिसामान्यात्;आदिशब्दात् प्रत्यक्षत्वाऽऽदिसामान्यं गृह्यते, समानस्य भावः सामान्यं,साम्यं, तस्मादित्यर्थः। तत्र यथाऽवधिज्ञानं ऊर्ध्वस्थस्यैव भवति, तथा मनःपर्यायज्ञानमपीति ऊर्ध्वस्थसाम्यम् । उभयोरपि पुद्गलमात्रविषयत्वाद् विषयसाम्यम्, द्वयोरपि क्षायोपशमिकभाववृत्तित्वाद्भावसाम्यम्, द्वितयस्यापि साक्षाद्दर्शित्वात् प्रत्यक्षत्वसाम्यम् । एवमन्याऽपि प्रत्यासत्तिरभ्यूह्येति गाथाऽर्थः ॥ ८७ ॥

अथ केवलज्ञानस्य सर्वोपरि निर्देशे कारणमाह-

अंते केवलमुत्तम-ऊसामित्तावसाणलाभाओ ।
इत्थं च मइसुयाइं, परोक्खमियरं च पच्चक्खं ॥ ८८ ॥

अन्ते सर्वज्ञानानामुपरि केवलज्ञानमभिहितम । कुतः?, इत्याह-भावप्रधानत्वान्निर्देशस्य उत्तमत्वात्,सर्वोत्तमं हि केवलज्ञानम्, अतीतानागतवर्तमाननिःशेषज्ञेयस्वरूपाऽवभासित्वादिति । यथा च मनःपर्यायज्ञानस्य यतिरेव स्वामी, तथा केवलज्ञानस्यापि, ततो यतिस्वामित्वसाम्याद् मनःपर्यायज्ञानाऽनन्तरं केवलज्ञानमभिहितम् । तथा समस्ताऽपरज्ञानानामवसान एवाऽस्य लाभादवसान एव निर्देश इति । तदेवमुपन्यासक्रमे समर्थिते सत्याह कश्चित्-नन्वेतानि पञ्च ज्ञानानि किं परोक्षस्वरूपाणि, आहोस्विदत्र प्रत्यक्षाणि ? इति । अत्राऽऽह-(इत्थं चेत्यादि) एतेषु पञ्चसु ज्ञानेषु मध्ये मतिश्रुते परोक्षे, इतरत्त्ववध्यादिज्ञानत्रयं प्रत्यक्षमिति गाथार्थः ॥ ८८ ॥ विशे० ।

(५) तथा चाऽऽगमः-

दुविहे णाणे पण्णत्ते । तं जहा—पच्चक्खे चेव, परोक्खे चेव । पच्चक्खणाणे दुविहे पण्णत्ते । तं जहा—केवलणाणे चेव, णो केवलणाणे चेव ।

ज्ञानं विशेषावबोधः, अश्नाति भुङ्क्ते, अश्नुते वा व्याप्नोति ज्ञानेनार्थानित्यक्ष आत्मा,तं प्रति यद्वर्तते इन्द्रियमनोनिरपेक्षत्वेन तत्प्रत्यक्षमव्यवहितत्वेनार्थसाक्षात्करणादक्षमिति । आह च- " अक्खो जीवो अत्थ-व्वावणभोयणगुणत्तिओ जेणं । तं पइ वट्टइ नाणं, जं पच्चक्खं तमिह तिविहं" ॥ १ ॥ इति । परेभ्योऽक्षापेक्षया पुद्गलमयत्वेन द्रव्येन्द्रियमनोरूपेभ्योऽक्षस्य जीवस्य यत्तत्परोक्षं निरुक्तिवशादिति आह च-"अक्खस्स पोग्गलकया, जं दव्विंदियमणापरा तेण । तेहिंतो जं णाणं, परोक्खमिह तमणुमाणं वा " ॥१॥ इति । अथवा-परैरक्षं संबन्धनं जन्यजनकभावलक्षणमस्येति परोक्षम् । इन्द्रियमनोव्यवधानेनाऽऽत्मनोऽर्थप्रत्ययकर्मसाक्षात्कारीत्यर्थः । स्था० २ ठा० १ उ० । (प्रत्यक्षज्ञानभेदाः ' पच्चक्ख ' शब्दे वक्ष्यन्ते) प्रत्यक्षं द्विविधं-केवलज्ञानं, नो केवलज्ञानं च । (केवलज्ञानभेदाः 'केवलणाण' शब्दे तृतीयभागे ६४७ पृष्ठे गताः)

(६) केवलणाणे दुविहे पण्णत्ते । ओहिणाणे चेव, मणपज्जवणाणे चेव ॥ स्था० २ ठा० १ उ० । आ० म० । आव० । संघा० । कर्म० । सम्म० ।

(अवधिज्ञानभेदः ' ओहि ' शब्दे तृतीयभागे १४० पृष्ठे गतः)
(मनःपर्यायज्ञानभेदाः ' मणपज्जवणाण ' शब्दे वक्ष्यन्ते)

परोक्खणाणे दुविहे पण्णत्ते । तं जहा—आभिणिबोहियणाणे चेव, सुयणाणे चेव ।

(परोक्षज्ञानभेदाः ' परोक्खणाण ' शब्दे वक्ष्यन्ते)

(७) स्वाम्यादिभेदाद् मतिश्रुतभेदः । साम्प्रतं " जं सामि-काल-कारण-विसय-परोक्खत्तणेहिँ तुल्लाइं । (८५) " इति यदुक्तं प्राक्, तदुपजीव्य परः प्राऽऽह—

सामित्ताइविसेसा-भावाओ मइसुएगया नाम ।
लक्खणभेयादिकयं, नाणत्तं तयविसेसे वि ॥ ९६ ॥

परः प्राऽऽह-ननु पूर्वं मतिश्रुतयोः स्वामिकालाऽऽदिभिः तुल्यत्वमभिदधानैर्भवद्भिः स्वहस्ताक्षराऽऽकर्षणमनुष्ठितम्,यत एवं सति

स्वामित्वाऽऽदिभिर्विशेषान्नावान्मतिश्रुतयोरेकतैव प्राप्ता, न भेदः स्यात्; तथा च न ज्ञानपञ्चकसिद्धिः, धर्मभेदे हि वस्तूनां भेदः स्यात्; तद्भेदे तु घटतत्स्वरूपयोरिवाभेद एव श्रेयानिति भावः । अत्राऽऽचार्यः प्रत्युत्तरमाह-(लक्खणेत्यादि) तेषां स्वामित्वाऽऽदीनामविशेषस्तदविशेषस्तत्र सत्यपि मतिश्रुतयोर्नानात्वं भिन्नत्वमस्ति । किंकृतम् ? , इत्याह-लक्षणभेदाऽऽदिकृतम्,आदिशब्दाद् वक्ष्यमाणकार्यकारणनावाऽऽदिपरिग्रहः। इदमुक्तं भवति-यद्यपि स्वामिकालाऽऽदिभिर्मतिश्रुतयोरेकत्वम्, तथाऽपि लक्षणकार्यकारणनावाऽऽदिभिर्नानात्वमस्त्येव, घटाऽऽकाशाऽऽदीनामपि हि सत्त्वप्रमेयत्वार्थक्रियाकारित्वाऽऽदिभिः साम्येऽपि लक्षणाऽऽदिभेदाद्भेद एव । यदि पुनर्बहुभिर्धर्मैर्भेदे सत्यपि कियद्धर्मसाम्यमात्रादेवार्थानामेकत्वं प्रेर्यते, तदा सर्वं विश्वमेकं स्यात्; किं हि नाम तद्वस्त्वस्ति यस्य वस्त्वन्तरैः सह कैश्चिद्धर्मैर्न साम्यमस्ति ? । तस्मात्स्वाम्यादिभिस्तुल्येऽपि लक्षणाऽऽदिभिर्मति-श्रुतयोर्भेदः । इति गाथार्थः ॥ ९६ ॥

तान्येव लक्षणाऽऽदीनि पुरतो विस्तराभिधेयात्संपिण्ड्यैकगाथया दर्शयति-

लक्खणभेया हेऊ-फलनावओ भेयइंदियविभागा ।
वागऽक्खरमूएयर-भेया भेओ मइसुयाणं ॥९७॥

लक्षणभेदाद्भिन्नलक्षणत्वाद् मतिश्रुतयोर्भेदः । तथा-मतिज्ञानं हेतुः, श्रुतं तु तत्फलं तत्कार्यम्; इति हेतुफलनावात् तयोर्भेदः । तथा-(भेय त्ति) विभागशब्दोऽत्रापि योज्यते, ततश्च भेदानां विभागो विशेषो भिन्नत्वं भेदविभागः, तस्मादपि मतिश्रुतयोर्भेदः. अवग्रहाऽऽदिभेदादष्टाविंशत्यादिभेदं हि मतिज्ञानं वक्ष्यते " अक्खर सण्णी सम्मं " इत्यादिवक्ष्यमाणवचनाच्चतुर्दशाऽऽदिभेदं च श्रुतज्ञानमिति भेदविभागात्तयोर्भेद इति नावः । (इंदियविभाग त्ति) तत्त्वतः श्रोत्रविषयमेव श्रुतज्ञानम्, शेषेन्द्रियविषयमपि मतिज्ञानम्, इत्येवं वक्ष्यमाणादिन्द्रियविभागाच्च तयोर्भेदः । (वागेत्यादि) वक्त्रवचाक्षरं च मूकं च वक्त्राऽऽदिप्रतिपक्षभूतानीतराणि च वक्त्राक्षरमूकेतराणि, तैर्योऽसौ भेदः तस्मादपि मतिश्रुतयोर्भेद इत्यर्थः । तथाहि-" अन्ने भणंति मई, वग्गसमा सुयअक्खरिसयं तु सुयं । (१५४) " इत्यादिना ग्रन्थेन कारणत्वाद् वल्कसदृशं मतिज्ञानं, शुम्बसदृशं तु श्रुतज्ञानम्, कार्यत्वादित्यत्रैव वक्ष्यते । तत्र वल्कः पलाशाऽऽदित्वग्रूपः, शुम्बं तु इतरशब्देनोपात्तं तज्ज्ञानिना दवरिकोच्यते । ततश्चायमभिप्रायः-यथा वलनाऽऽदिसंस्कृतो विशिष्टावस्थाऽऽपन्नः सन् वल्को दवरिकेत्युच्यते, तथा परोपदेशाईद्वचनसंस्कृतं विशिष्टावस्थाप्राप्तं सद् मतिज्ञानं श्रुतमभिधीयते, इत्येवं वल्केतरभेदाद् मतिश्रुतयोर्भेदः । तथा-" अन्ने अणक्खरऽक्खर-विसेसओ मइसुयाइं भिंदंति । जं मइनाणमणक्खर-मक्खरमियरं च सुयनाणं" ॥ १६२ ॥ इत्यादिग्रन्थेन वक्ष्यमाणादक्षरेतरभेदात्तयोर्भेदः । तथा-" सपरप्पच्चायणओ, भेओ मूएयराण वाऽभिहिओ। जं तु सुयं मइनाणं, सपरप्पच्चायगं सुत्तं" ॥ १७१ ॥ इत्याद्यभिधास्यमानवचनान्मूकेतरभेदान्मतिश्रुतयोर्भेदः । इति गाथासंक्षेपार्थः। विस्तरार्थं तु भाष्यकारः स्वत एव वक्ष्यति। इयं च गाथा बह्वादर्शेषु न दृश्यते, केवलं क्वचिदादर्शेऽपि दृष्टा,अतीव सोपयोगा च, इत्यस्माभिः किञ्चिद् व्याख्यातेति ॥९७॥

तत्र " यथोद्देशं निर्देशः " इति कृत्वा लक्षणभेदं तावदाह-

जमभिनिबुज्झइ तमभिनि-बोहो जं सुणइ तं सुयं जाणियं ।
सद्दं सुणइ जइ तओ, नाणं तो नाऽऽयभावो तं ॥९८॥

यज्ज्ञानं कर्तृ, वस्तु कर्मतापन्नमभिनिबुध्यते अवगच्छति,तज्ज्ञानमभिनिबोधः तदाभिनिबोधिकं तन्मतिज्ञानमिति यावत् । (जं सुणइ इत्यादि) यत्पुनर्जीवः शृणोति तच्छ्रुतम ; इत्येवं सूत्रोक्तलक्षणभेदान्मतिश्रुतयोर्भेदः । तथा च सूत्रम्-"जइ वि सामित्ताईहिं अविसेसो, तह वि पुणोऽत्थाऽऽयरिया णाणत्तं पण्णवयंति। तं जहा-अभिनिबुज्झइ त्ति आभिणिबोहियं,सुणेइ त्ति सुयं । " इत्यादि । अत्राऽऽह प्रेरकः-यदि नाम यदात्मा शृणोति तत् श्रुतमिति श्रुतज्ञानस्य लक्षणमुच्यते, हन्त ! तर्हि शब्दमेव शृणोति जीव इति सकलजगत्प्रतीतमेव । ततः किं क्षूयते ?, इत्याह-(जइ तओ इत्यादि) यदि च सकः स शब्दो ज्ञानं श्रुतरूपम, (तो त्ति) ततो नाऽऽत्मनो जीवस्य भावः परिणामः तच्छ्रुतं प्राप्नोति, शब्दस्य श्रुतत्वेनेष्टत्वात्, तस्य च पौद्गलिकत्वेन मूर्तत्वात्, आत्मनस्त्वमूर्तत्वाद्, मूर्तस्य चामूर्तपरिणामत्वायोगाद्, आत्मनः परिणामश्च श्रुतज्ञानमिष्यते तीर्थकराऽऽदिभिः,इति कथं न विरोधः?,इति नावः । इति गाथार्थः ॥ ९८ ॥

अत्राऽऽचार्यः प्रत्युत्तरयति-

सुयकारणं जओ सो, सुयं च तक्कारणं ति तो तम्मि ।
कीरइ सुओवयारो, सुयं तु परमत्थओ जीवो ॥९९॥

यतो यस्मात् कारणात् स शब्दो वक्त्राऽभिधीयमानः श्रोतृगतस्य श्रुतज्ञानस्य कारणं निमित्तं भवति, श्रुतं च वक्तृगतश्रुतोपयोगरूपं व्याख्यानकरणाऽऽदौ तस्य वक्त्राऽभिधीयमानस्य शब्दस्य कारणं जायते, इयतः तस्मिन् श्रुतज्ञानस्य कारणभूते कार्यभूते वा शब्दे श्रुतोपचारः क्रियते । ततो न परमार्थतः शब्दः श्रुतं, किं तूपचारत इत्यदोषः । परमार्थतस्तर्हि किं श्रुतम ? , इत्याह-(सुयं त्वित्यादि) परमार्थतस्तु जीवः श्रुतं,ज्ञानज्ञानिनोरनन्यभूतत्वात् । तथा च पूर्वमभिहितम-शृणोतीति श्रुतमात्मैवेति । तस्माच्छ्रूयत इति श्रुतमिति कर्मसाधनपक्षे द्रव्यश्रुतमेवाऽभिधीयते, शृणोतीति श्रुतमिति; कर्तृसाधनपक्षे तु भावश्रुतमात्मैव; इति न काचिदिहात्मभावता श्रुतज्ञानस्य। इति गाथार्थः ॥ ९९ ॥

(८) अथ प्रकारान्तरेणाऽपि मतिश्रुतयोर्लक्षणभेदमाह-

इंदियमणोनिमित्तं, जं विण्णाणं सुयाणुसारेणं ।
नियययुत्तिसमत्थं, तं नावसुयं मई सेसं ॥ १०० ॥

इन्द्रियाणि च स्पर्शनाऽऽदीनि, मनश्च, इन्द्रियमनांसि, तानि निमित्तं यस्य तदिन्द्रियमनोनिमित्तम्,इन्द्रियमनोद्वारेण यद्विज्ञानमुपजायत इत्यर्थः । तत् किम ?,इत्याह-तद्भावश्रुतं श्रुतज्ञानमित्यर्थः । इन्द्रियमनोनिमित्तं च मतिज्ञानमपि भवति, अतस्तद्व्यवच्छेदार्थमाह-श्रुतानुसारेणेति श्रूयत इति श्रुतम् । द्रव्यश्रुतरूपं शब्द इत्यर्थः,स च सङ्केतविषयपरोपदेशरूपः श्रुतग्रन्थाऽऽत्मकश्चेह गृह्यते,तदनुसारेणैव यदुत्पद्यते तत् श्रुतज्ञान,नान्यत् । इदमुक्तं भवति-सङ्केतकाले प्रवृत्तं,श्रुतग्रन्थसंबन्धिनं वा घटाऽऽदि-

शब्दमनुसृत्य वाच्यवाचकभावेन संयोज्य 'घटो घटः' इत्याद्यन्तर्जल्पाकारमन्तःशब्दोल्लेखान्वितमिन्द्रियाऽऽदिनिमित्तं यज्ज्ञानमुदेति तच्छ्रुतज्ञानमिति । तच्च कथंभूतम् ?, इत्याह-'निजकाऽर्थोक्तिसमर्थमिति' निजकः स्वस्मिन् प्रतिभासमानो योऽसौ घटाऽऽदिरर्थः तस्योक्तिः परस्मै प्रतिपादनं तत्र समर्थं क्षमं निजकार्थोक्तिसमर्थम्। अयमिह भावार्थः-शब्दोल्लेखसहितं विज्ञानमुत्पन्नं स्वप्रतिभासमानार्थप्रतिपादकं शब्दं जनयति, तेन च परः प्रत्याय्यते, इत्येवं निजकार्थोक्तिसमर्थमिदं भवति, अभिलाप्यवस्तुविषयमिति यावत्। स्वरूपविशेषणं चैतत्, शब्दानुसारेणोत्पन्नज्ञानस्य निजकार्थोक्तिसामर्थ्याऽव्यभिचारादिति। (सेसेसं ति) शेषमिन्द्रियमनोनिमित्तश्रुतानुसारेण यदवग्रहाऽऽदिज्ञानं तन्मतिज्ञानमित्यर्थः। अत्राऽऽह कश्चित्-ननु यदि शब्दोल्लेखसहितं श्रुतज्ञानमिष्यते, शेषं तु मतिज्ञानम्, तदा वक्ष्यमाणस्वरूपोऽवग्रह एव मतिज्ञानं स्यात्, न पुनरीहापायाऽऽद्यः, तेषां शब्दोल्लेखसहितत्वात्; मतिज्ञानभेदत्वेन चैते प्रसिद्धाः, तत् कथं श्रुतज्ञानलक्षणस्य नातिव्याप्तिदोषः ?, कथं च न मतिज्ञानस्याव्याप्तिप्रसङ्गः ?। अपरं च-अङ्गानङ्गप्रविष्टाऽऽदिषु "अक्खर सन्नी सम्मं, साईयं खलु सपज्जवसियं च।" इत्यादिषु च श्रुतभेदेषु मतिज्ञानभेदस्वरूपाणामवग्रहेहाऽऽदीनां सद्भावात् सर्वस्याऽपि तस्य मतिज्ञानत्वप्रसङ्गात्, मतिज्ञानभेदानां चेहापायाऽऽदीनां साभिलापत्वेन श्रुतज्ञानत्वप्राप्तेरुभयलक्षणसंकीर्णतादोषश्च स्यात्। अत्रोच्यते-यत्तावदुक्तम्-अवग्रह एव मतिज्ञानं स्यात्, न त्वीहाऽऽदयः, तेषां शब्दोल्लेखसहितत्वात्। तदयुक्तम्। यतो यद्यपि ईहाऽऽदयः साभिलापाः, तथाऽपि न तेषां श्रुतरूपता, श्रुतानुसारिण एव साभिलापज्ञानस्य श्रुतत्वात्। अथावग्रहाऽऽदयः श्रुतनिश्रिता एव सिद्धान्ते प्रोक्ताः, युक्तितोऽपि चेहाऽऽदिषु शब्दाभिलापः संकेतकालाऽऽद्याकर्णितशब्दानुसरणमन्तरेण न संगच्छते,अतः कथं न तेषां श्रुतानुसारित्वम् ?। तदयुक्तम्। पूर्वं श्रुतपरिकर्मितमतेरेवैते समुपजायन्त इति श्रुतनिश्रिता उच्यन्ते, न पुनर्व्यवहारकाले श्रुतानुसारित्वमेतेष्वस्ति। वक्ष्यते च-"पुव्वं सुयपरिकम्मिय-मइस्स जं संपयं सुयाऽऽईयं। तं सुयनिस्सियं" इत्यादि। यदपि युक्तितोऽपि चेत्याद्युक्तम्, तदपि न समीचीनम्, संकेतकालाऽऽद्याकर्णितशब्दपरिकर्मितबुद्धीनां व्यवहारकाले तदनुसरणमन्तरेणाऽपि विकल्पपरम्परापूर्वकविविधवचनप्रवृत्तिदर्शनात्, न हि पूर्वप्रवृत्तसंकेताः, अधीतश्रुतग्रन्थाश्च व्यवहारकाले प्रतिविकल्पन्ते- एतच्छब्दवाच्यत्वेनैतत् पूर्वं मयाऽवगतमित्येवंरूपं संकेतम्, तथाऽमुकस्मिन् ग्रन्थे एतदित्थमभिहितमित्येवं श्रुतग्रन्थं चाऽनुसरन्तो दृश्यन्ते, अभ्यासपाटववशात् तदनुसरणमन्तरेणाऽप्यनवरतं विकल्पनाप्रपञ्चप्रवृत्तेः। यत्र तु श्रुतानुसारित्वं तत्र श्रुतरूपताऽस्माभिरपि न निषिध्यते। तस्मात् श्रुतानुसारित्वाभावेन श्रुतत्वाभावादीहापायधारणानां सामस्त्येन मतिज्ञानत्वान्न मतिज्ञानलक्षणस्याव्याप्तिदोषः, श्रुतरूपतायाश्च श्रुतानुसारित्वेन चाऽभिलापज्ञानविशेषेषु भावाद् न श्रुतज्ञानलक्षणस्याऽतिव्याप्तिकृतो दोषः। अपरं च-अङ्गानङ्गप्रविष्टाऽऽदिश्रुतभेदेषु 'मतिपूर्वमेव श्रुतम्' इति वक्ष्यमाणवचनात्प्रथमं शब्दाऽऽद्यवग्रहणकाले ऽवग्रहाऽऽदयः समुपजायन्ते, एते चाश्रुतानुसारित्वान्मतिज्ञानम्, यस्तु तेष्वङ्गानङ्गप्रविष्टश्रुतभेदेषु श्रुताऽनुसारी ज्ञानविशेषः स श्रुतज्ञानम्। ततश्च-अङ्गानङ्गप्रविष्टाऽऽदिश्रुतभेदानां सामस्त्येन मतिज्ञानत्वाभावाद्, ईहाऽऽदिषु च मतिभेदेषु श्रुताऽनुसारित्वाज्ञावेन श्रुतज्ञानत्वाऽसंभवान्नोभयलक्षणसंकीर्णतादोषोऽप्युपपद्यत इति सर्वं सुस्थम्। न चेह मतिश्रुतयोः परमाणुकरिणोरिवाऽत्यन्तिको भेदः समन्वेषणीयः, यतः प्रागिहैवोक्तम्-विशिष्टः कश्चिन्मतिविशेष एव श्रुतं, पुरस्तादपि च वक्ष्यते-बलाकसदृशं मतिज्ञानं तज्ज्ञानितदवरिकारूपं श्रुतज्ञानम्, न च बलाकशुम्बयोः परमाणुकुञ्जरवदात्यन्तिको भेदः, किं तु कारणकार्यभावकृत एव, स चेहाऽपि विद्यते, मतेः कारणत्वेन, श्रुतस्य तु कार्यत्वेनाभिधास्यमानत्वात्। न च कार्यकारणयोरैकान्तिको भेदः; कनककुण्डलाऽऽदिषु, मृत्पिण्डकुण्डाऽऽदिषु च तथाऽदर्शनात्। तस्मात्तदवग्रहापेक्षयाऽनभिलापत्वाद्, ईहाऽऽद्यपेक्षया तु साभिलापत्वात् साभिलापानभिलापं मतिज्ञानम्, अश्रुतानुसारि च; सङ्केतकालप्रवृत्तस्य श्रुतग्रन्थसंबन्धिनो वा शब्दस्य व्यवहारकाले अननुसरणात्। श्रुतज्ञानं तु साभिलापमेव, श्रुतानुसार्येव च, सङ्केतकालप्रवृत्तस्य श्रुतग्रन्थसंबन्धिनो वा शब्दरूपस्य श्रुतस्य व्यवहारकालेऽवश्यमनुसरणादिति स्थितमिति गाथार्थः॥ १००॥

अथ श्रुतज्ञानलक्षणस्याऽव्याप्तिदोषमुद्भावयन्नाह परः-

जइ सुयलक्खणमेयं, तो न तमेगिंदियाण संभवइ।
दव्वसुयाणुभावम्मि वि, नाणमुयं सुत्तजइणो व्व॥१०१॥

यदि श्रुतज्ञानस्येदमनन्तरगाथोक्तं लक्षणमिष्यते- श्रुतानुसारि ज्ञानं यदि श्रुतमभ्युपगम्यत इत्यर्थः, तदा तदेकेन्द्रियाणां न संभवति न घटते, शब्दानुसारित्वस्य तेष्वसंभवात्; तदसंभवश्च मनःप्रभृतिसामग्र्यभावात्। इष्यते चाऽऽगमे-"एगिंदिया नियमं दुयक्खाणी। ते जहा-पुढविकाइया य, सुयअन्नाणी य" इति वचनादेकेन्द्रियाणामपि श्रुतमात्रम्, इत्यव्यापकमेवेदं लक्षणम्। अत्रोत्तरमाह-(दव्वसुयेत्यादि) द्रव्यश्रुतं शब्दस्तस्याभावेऽप्येकेन्द्रियाणां भावश्रुतमभ्युपगन्तव्यम्, सुप्तयतेरिव। इदमुक्तं भवति-यद्यप्येकेन्द्रियाणां कारणवैकल्याद् द्रव्यश्रुतं नास्ति, तथाऽपि स्वापाऽऽद्यवस्थायां साध्वादेरिवाशब्दकारणम्, अशब्दकार्यं च श्रुताऽऽवरणक्षयोपशममात्ररूपं भावश्रुतं केवलिदृष्टममीषां मन्तव्यम्; न हि स्वापाऽऽद्यवस्थायां साध्वादिः शब्दं न शृणोति, न विकल्पयतीत्येतावन्मात्रेण तस्य श्रुतज्ञानाभावो व्यवस्थाप्यते, किं तु स्वापाऽऽद्यवस्थोत्तरकालं व्यक्तीभवद्भावश्रुतं दृष्ट्वा पयसि सर्पिरिव प्रागपि तस्य तदासीदिति व्यवह्रियते, एवमेकेन्द्रियाणामपि सामग्रीवैकल्याद् यद्यपि द्रव्यश्रुताभावः, तथाऽप्यावरणक्षयोपशमरूपं भावश्रुतमवसेयम्, परमयोगिभिर्दृष्टत्वाद् बल्ल्यादिष्वाहारभयपरिग्रहमैथुनसंज्ञाऽऽदेस्तल्लिङ्गस्य दर्शनाच्चेति। आह-ननु सुप्तयतिज्ञानं दृष्टान्तेऽपि तावद्भावश्रुतं नावगच्छामः। तथाहि-श्रुतेरयोगपरिणत आत्मा शृणोतीति श्रुतं, श्रूयते तदिति वा श्रुतमित्यनयोर्मध्ये कया व्युत्पत्त्या सुप्तसाधोः श्रुतमभ्युपगम्यते?। तत्राऽऽद्यपक्षो न युक्तः, सुप्तस्य श्रुतोपयोगासंभवात्। द्वितीयोऽपि न संगतः, तत्र शब्दस्य वाच्यत्वात्, तस्यापि च स्वपतोऽसंभवादिति। सत्यम्। किं तु शृणोत्यनेन,अस्माद्, अस्मिन्वेति व्युत्पत्तिरिहाश्रीयते, एवं च श्रुतज्ञानाऽऽवरणक्षयोपशमो वाच्यः संपद्यते, स च सुप्तयतेः, एकेन्द्रियाणां चास्तीति न किञ्चित्परिहीयते। इति गाथार्थः॥ १०१॥

अथ दृष्टान्तदार्ष्टान्तिकयोर्वैषम्याऽऽपादनेनैकेन्द्रियाणां श्रुतसद्भावं विघटयन्नाह-

नावसुयं नासासो-यलद्धिणो जुज्जए न इयरस्स ।
नासाऽभिमुहस्स जयं, सोऊण य जं हवेज्जाहि ।१०२।

भावश्रुतं युज्यत इति संबन्धः । कस्य युज्यते ?, इत्याह-नाषाश्रोत्रलब्धिमतः-नाषालब्धिमतः, श्रवणेन्द्रियलब्धिमतेत्यर्थः । कथंभूतं यद्भावश्रुतम ?, इत्याह—भाषाऽभिमुखस्य शब्दमभिधित्सोः ' प्रथममेव मध्ये एतत्प्रतिपादयामि ' इत्युपयोगरूपं यद्भवेत्, श्रुत्वा वा परोदीरितां भाषां यद्भवेद् ' एतदनेन प्रतिपादितमिति । ' इह च यथासंख्यमवगन्तव्यम्-भाषालब्धिमतः प्रथमं भवेत्, श्रवणेन्द्रियलब्धिमतस्तु द्वितीयं भवेदिति। (न इयरस्स त्ति) इतरस्य तु भाषाश्रोत्रलब्धिरहितस्य नावश्रुतं न युज्यते । अयमभिप्रायः-यस्य सुप्तसाधोर्नाषाश्रोत्रलब्धिरस्ति, तस्योत्थितस्य परप्रतिपादनपरोदीरितशब्दश्रवणाऽऽदिलक्षणं भावश्रुतकार्यं दृश्यते, तदर्शनाच्च सुप्तावस्थायामपि तस्य लब्धिरूपतया तदाऽऽसीदित्यनुमीयते, यस्य त्वेकेन्द्रियस्य भाषाश्रोत्रलब्धिरहितत्वेन कदाचिदपि भावश्रुतकार्यं नोपलभ्यते, तस्य कथं तदस्तीति प्रतीयेत ?। इति गाथाऽर्थः ॥ १०२ ॥

अत्रोत्तरमाह-

जह सुहुमं नाविंदिय-नाणं दव्विंदियावरोहे वि ।
तह दव्वसुयाभावे, नावसुयं पत्थिवाइणं ॥ १०३ ॥

इह केवलिनो विहाय शेषसंसारिजीवानां सर्वेषामप्यस्तितो-कबहुबहुतरबहुतमाऽऽदितारतम्यभावेन द्रव्येन्द्रियेष्वसत्स्वपि लब्धीन्द्रियपञ्चकाऽऽवरणक्षयोपशमः समस्त्येवेति परममुनिवचनम् । ततश्च यथा येन प्रकारेण पृथिव्यादीनामेकेन्द्रियाणां श्रोत्रचक्षुर्घ्राणरसनलक्षणानां प्रत्येकं निर्वृत्त्युपकरणरूपाणां द्रव्येन्द्रियाणां तत्प्रतिबन्धककर्माऽऽवृतत्वादवरोधेऽप्यभावेऽपि सूक्ष्ममव्यक्तं लब्ध्युपयोगरूपं श्रोत्राऽऽदि भावेन्द्रियज्ञानं भवति, लब्धीन्द्रियाऽऽवरणक्षयोपशमसंभूतार्थीयसी ज्ञानशक्तिर्भवतीत्यर्थः। तथा तेनैव प्रकारेण द्रव्यश्रुतस्य द्रव्येन्द्रियस्थानीयस्याभावेऽपि भावश्रुतं नावेन्द्रियज्ञानकल्पं पृथिव्यादीनां भवतीतिप्रतिपत्तव्यमेव । इदमुक्तं भवति-एकेन्द्रियाणां तावच्छ्रोत्राऽऽदिद्रव्येन्द्रियाभावेऽपि भावेन्द्रियज्ञानं किञ्चिद् दृश्यते एव,वनस्पत्यादिषु स्पष्टलिङ्गोपलम्भात् । तथाहि-कलकण्ठोक्तीर्णमधुरपञ्चमोल्लापश्रवणात्सद्यः कुसुमपल्लवाऽऽदिप्रसवो विरहकवृक्षाऽऽदिषु श्रवणेन्द्रियज्ञानस्य व्यक्तं लिङ्गमवलोक्यते। तिलकाऽऽदितरुषु पुनः कमनीयकामिनीकमलदलदीर्घशरदिन्दुधवललोचनकटाक्षविक्षेपात् कुसुमाऽऽद्याविर्भावश्चक्षुरिन्द्रियज्ञानस्य,चम्पकाऽऽद्यारूढेषु तु विविधसुगन्धिगन्धवस्तुनिकुरम्बोन्मिश्रावियदशीतलसलिलसेकात्सत्प्रकटनं घ्राणेन्द्रियज्ञानस्य, बकुलाऽऽदिभूरुहेषु तु रम्भाऽतिशायिप्रवररूपवरतरुणनामिनीमुखप्रदत्तस्वच्छसुस्वादुसुरभिबारुणीगण्डूषाऽऽस्वादनात् तदाविष्करणं रसनेन्द्रियज्ञानस्य, कुरबकाऽऽदिवाटिपिष्वशोकाऽऽदिद्रुमेषु च घनपीनोन्नतकठिनकुचकुम्भाविर्भावपीनाजितकुम्भोनकुम्भरणन्मणिवलयक्वणत्कङ्कणाऽऽभरणजृम्भितनव्यभामिनीभुजलताऽवगूहनसुखान्निक्षिप्तपद्मरागचूर्णशोणतलतत्पादकमलपार्ष्णिप्रहाराच्च झगिति प्रसूनपल्लवाऽऽदिप्रभवः स्पर्शनेन्द्रियज्ञानस्य स्पष्टं लिङ्गमभिवीक्ष्यते । ततश्च यद्येतेषु द्रव्येन्द्रियासत्त्वेऽप्येतद्भावेन्द्रियजन्यं ज्ञानं सकलजनप्रसिद्धमस्ति, तथा द्रव्यश्रुताभावे भावश्रुतमपि भविष्यति । दृश्यते हि जलाऽऽद्याहारोपजीवनाद्वनस्पत्यादीनामाहारसंज्ञा,संकोचनवल्ल्यादीनां तु हस्तस्पर्शाऽऽदिभीत्याऽवयवसंकोचनाऽऽदिभ्यो भयसंज्ञा, विरहकतिलकचम्पककेशराशोकाऽऽदीनां तु मैथुनसंज्ञा दर्शितैव; बिल्वपलाशाऽऽदीनां तु निधानीकृतरूविणोपरि पादमोचनाऽऽदिभ्यः परिग्रहसंज्ञा । न चैताः संज्ञाः भावश्रुतमन्तरेणोपपद्यन्ते । तस्मादुनावेन्द्रियपञ्चकाऽऽवरणक्षयोपशमाद्भावेन्द्रियपञ्चकज्ञानवद्भावश्रुताऽऽवरणक्षयोपशमसद्भावाद् द्रव्यश्रुताभावेऽपि यत्र यावच्च भावश्रुतमस्त्येवैकेन्द्रियाणाम्, इत्यलं विस्तरेण । तर्हि-" जं विन्नाणं सुयाणुसारेणं " (१००) इति श्रुतज्ञानलक्षणं व्यभिचारि प्राप्नोति, श्रुतानुसारित्वमन्तरेणाऽप्येकेन्द्रियाणां भावश्रुताभ्युपगमादिति चेत् । नैवम्, अभिप्रायापरिज्ञानात्, शब्दोल्लेखसहितं विशिष्टमेव भावश्रुतमाश्रित्य तल्लक्षणमुक्तम्, यत्त्वेकेन्द्रियाणामौघिकमविशिष्टभावश्रुतमात्रं तदावरणक्षयोपशमस्वरूपम्, तच्छ्रुतानुसारित्वमन्तरेणापि यदि भवति, तथाऽपि न कश्चिद् व्यभिचारः । इति गाथाऽर्थः ॥ १०३ ॥

पुनरप्याह परः-

एवं सव्वपसंगो, न तदावरणाणमक्खओवसमा ।
मइसुयनाणाऽऽवरण-क्खओवसमओ मइसुयाइं ॥१०४॥

यदि नाषाश्रोत्रलब्धिरहितानामपि काष्ठकल्पानां पृथिव्यादीनामेकेन्द्रियाणां स्पष्टं किमप्यनुलक्ष्यमाणमपि केनाऽपि वागाडम्बरमात्रेण ज्ञानं व्यवस्थाप्यते, तर्हि सर्वेषामपि केवलज्ञानपर्यन्तानां पञ्चानामपि ज्ञानानां प्रसङ्गः सद्भावस्तेषां प्राप्नोतीत्यर्थः । पञ्चापि ज्ञानानि एकेन्द्रियाणां सन्ति, इत्येतदपि कस्मान्नोच्यते ?, स्पष्टानुपलम्भस्य विशेषाभावादिति भावः। अत्रोत्तरमाह-तदेतन्न। कुतः ?, इत्याह-तदावरणानामवधिमनःपर्यायकेवलज्ञानाऽऽवारककर्मणामत्तयोपशमादिति,अक्षयाक्षोति स्वयमपि द्रष्टव्यम । इदमुक्तं भवति-केवलज्ञानं तावत् स्वावारककर्मणः क्षय एव जायते, अवधिमनःपर्यायज्ञाने तु तस्य क्षयोपशमे भवतः, एतच्चैकेन्द्रियाणां नास्ति, तत्कार्यादर्शनाद्, आगमेऽनुक्तत्वाच्च; इति न सर्वज्ञानप्रसङ्गः । मतिश्रुतेऽपि तर्हि मा भूताम्,इति चेत् । इत्यत्राऽऽह-(मइत्यादि) मतिश्रुतज्ञानाऽऽवरणक्षयोपशमस्त्वेकेन्द्रियाणामस्त्येव, तत्कार्यदर्शनात्, सिद्धान्तेऽभिहितत्वाच्च । ततश्च तत्क्षयोपशमसद्भावान्मतिश्रुते भवत एव तेषाम्। इति गाथाऽर्थः ॥ १०४ ॥

तदेवं सप्रसङ्गः प्रदर्शितो लक्षणभेदाद् मतिश्रुतयोर्भेदः, साम्प्रतं हेतुफलभावात् तमुपदर्शयन्नाह-

मइपुव्वं सुयमुत्तं, न मई सुयपुव्विया विसेसोऽयं ।
पुव्वं पूरणपालण-भावाओ जं मई तस्स ॥ १०५ ॥

"मइपुव्वगं सुत्तं" इति वचनादागमे मतिः पूर्वं यस्य तद् मतिपूर्वं श्रुतमुक्तम्, न पुनर्मतिः श्रुतपूर्विका, इत्यनयोरयं विशेषः । यदि ह्येकत्वं मतिश्रुतयोर्भवेत् , तदा एवंभूतो नियमेन पूर्वपश्चाद्भावो घटतत्स्वरूपयोरिव न स्याद्,अस्ति चाऽयम,ततो भेद इति भावः । किमिति पुनर्मतिपूर्वमेव श्रुतमुक्तम् ?, इत्याह-यद् यस्मात् कारणात् तस्य श्रुतस्य मतिः पूर्वं प्रथममेवोपपद्य-

ते । कुतः ?, इत्याह-पूरणेत्यादि 'पृ' धातुः पालनपूरणयोरर्थयोः पठ्यते, तस्य च पिपर्तीति पूर्वमिति निपात्यते । ततश्च श्रुतस्य पूरणात् पालनाच्च मतिर्यस्मात्पूर्वमेव युज्यते, तस्मान्मतिपूर्वमेव श्रुतमुक्तम्, पूर्वशब्दश्चायमिह कारणपर्यायो द्रष्टव्यः, कार्यात् पूर्वमेव कारणस्य भावात्, "सम्यग्ज्ञानपूर्विका पुरुषार्थसिद्धिः" इत्यादौ तथादर्शनाच्च । ततश्च मतिपूर्वं श्रुतमिति कोऽर्थः ?, श्रुतज्ञानं कार्यम्, मतिस्तु तत्कारणम्, कार्यकारणयोश्च मृत्पिण्डघटयोरिव कथञ्चिद् भेदः प्रतीत एवेति भावः । इति गाथार्थः ॥ १०५ ॥

पूरणाऽऽदिधर्मानेव मतेर्भावयन्नाह-

पूरिज्जइ पालिज्जइ, दिज्जइ वा जं मईए नाऽमइणा ।
पालिज्जइ य मईए, गहियं इहरा पणस्सेज्जा ॥ १०६ ॥

अनुपेक्षाऽऽदिकाले अभ्यूह्य श्रुतपर्यायवर्द्धनेन मत्यैव श्रुतज्ञानं पूर्यते पोष्यते पुष्टिं नीयत इत्यर्थः, तथा मत्यैवान्यतः तत् प्राप्यते गृह्यते, तथा मत्यैव तदन्यस्मै दीयते व्याख्यायते, नामत्या न मतिमन्तरेणेत्यर्थः, प्राकृतत्वात्पुंल्लिङ्गनिर्देशः । तथा गृहीतं सदेतत्परावर्तनचिन्तनद्वारेण मत्यैव पाल्यते स्थिरीक्रियते, इतरथा मत्यभावे तद् गृहीतमपि प्रणश्येदेवेत्यर्थः । श्रुतज्ञानस्यैते पूरणाऽऽदयोऽर्था विशिष्टाभ्यूहधारणाऽऽदीनन्तरेण कर्तुं न शक्यन्ते, अभ्यूहाऽऽदयश्च मतिज्ञानमेव, इति सर्वथा श्रुतस्य मतिरेव कारणम्, श्रुतं तु कार्यम्, कार्यकारणभावश्च भेदे सत्येवोपपद्यते, अभेदे पटतत्स्वरूपयोरिव तदनुपपत्तेः । तस्मात् कारणकार्यरूपत्वाद् मतिश्रुतयोर्भेदः । इति गाथाऽर्थः ॥ १०६ ॥

अथ श्रुतस्य मतिपूर्वतां विघटयन्नाह-

णाणाणऽण्णाणाणि य, समकालाइं जओ मइसुयाइं ।
तो न सुयं मइपुव्वं, मइणाणे वा सुयन्नाणं ॥ १०७ ॥

इह मतिश्रुते वक्ष्यमाणयुक्त्या द्विविधे- सम्यग्दृष्टेर्ज्ञानस्वरूपे, मिथ्यादृष्टेस्त्वज्ञानस्वभावे । तत्र ज्ञाने अज्ञाने चैते प्रत्येकं समकालमेव भवतः, तत्त्वायोपशमलाभस्यापगमे युगपदेव निर्देशात् । यतश्चैते ज्ञाने अज्ञाने च मतिश्रुते पृथक् समकाले भवतः, ततो न श्रुते मतिपूर्वे युज्यते, न हि समसमयोत्पन्नयोः सव्येतरगोविषाणयोरिव पूर्वपश्चाद्भावः सङ्गच्छते । अथोत्सूत्रोऽप्यसदाग्रहवशात्स न त्यज्यते, इत्याह-(मइनाणे वा इत्यादि) इदमुक्तं भवति-मतिज्ञाने समुत्पन्ने तत्समकालं च श्रुतज्ञानेऽनभ्युपगम्यमाने श्रुताऽज्ञानं जीवस्य प्रसज्यते, श्रुतज्ञानानुत्पादेऽप्यापि तदनिवृत्तेः, न च ज्ञानाऽज्ञानयोः समकालमवस्थितिरागमे क्वचिदप्यनुमन्यते, विरोधात्-ज्ञानस्य सम्यग्दृष्टिसंभवित्वात्, अज्ञानस्य तु मिथ्यादृष्टिभावित्वादिति गाथार्थः ॥ १०७ ॥

अत्र प्रतिविधानमाह-

इह लद्धिमइसुयाइं, समकालाइं न तूवओगो सिं ।
मइपुव्वं सुयमिह पुण, सुओवओगो मइप्पभवो ॥१०८॥

ननु ध्यान्ध्यविजृम्भितमिदं परस्य, अभिप्रायापरिज्ञानात् । तथाहि-द्विविधे मतिश्रुते तदावरणक्षयोपशमरूपलब्धितः, उपयोगतश्च । तत्रेह लब्धितो ये मतिश्रुते ते एव समकालं भवतः, यस्त्वनयोरुपयोगः स युगपन्न भवत्येव, किं तु केवलज्ञानदर्शनयोरिव तथास्वाभाव्यात् क्रमेणैव प्रवर्तते । अत्र तर्हि लब्धिमङ्गीकृत्य मतिपूर्वता श्रुतस्योक्ता भविष्यतीति चेत् । नैवम, इत्याह-मतिपूर्वं श्रुतम्, इह तु श्रुतोपयोग एव मतिप्रभवोऽङ्गीक्रियते, न लब्धिरिति भावः । श्रुतोपयोगो हि विशिष्टमन्तर्जल्पाऽऽकारं श्रुतानुसारि ज्ञानमभिधीयते, तच्चावग्रहेहाऽऽदीनन्तरेणाऽऽकस्मिकं न भवति, अवग्रहाऽऽदयश्च मतिरेव, इति तत्पूर्वता श्रुतस्य न विरुध्यते । इति गाथार्थः ॥१०८॥

तदेवं मतिपूर्वं श्रुतमिति समर्थितम्, परस्तु मतेरपि श्रुतपूर्वताऽऽपादनेनाऽविशेषमुद्भावयन्नाह-

सोऊण जा मई जे, सा सुयपुव्व त्ति तेण न विसेसो ।
सा दव्वसुयप्पभवा, भावसुयाओ मई नत्थि ॥ १०९ ॥

परस्माच्छब्दं श्रुत्वा तद्विषया (जे) भवतामपि या मतिरुत्पद्यते सा श्रुतपूर्वा श्रुतकारणैव, शब्दस्य श्रुतत्वेन प्रागुक्तत्वात्, तस्याश्च मतेः तत्प्रभवत्वेन भवतामपि सिद्धत्वात् । ततश्च (न विसेसो त्ति) अन्योऽन्यपूर्वभावितायां मतिश्रुतयोर्न विशेष इत्यर्थः । तथा च सति "न मई सुयपुव्विय त्ति" यदुक्तं प्राक्, तदयुक्तं प्राप्नोतीति भावः । अत्रोत्तरमाह-परस्माच्छब्दमाकर्ण्य या मतिरुत्पद्यते, सा हन्त ! शब्दस्य द्रव्यश्रुतमात्रत्वाद् द्रव्यश्रुतप्रज्ञप्ता, न भावश्रुतकारणा, एतत्तु न केनाऽपि वार्यते, किं त्वेतदेव वयं ब्रूमो यदुत-भावश्रुताद् मतिर्नास्ति, भावश्रुतपूर्विका मतिर्न भवतीत्यर्थः, द्रव्यश्रुतप्रभवा तु भवतु; को दोषः ? । इति गाथाऽर्थः ॥ १०९ ॥

ननु भावश्रुतादूर्ध्वं मतिः किं सर्वथा न भवति ?, इत्याह-

कज्जतया न उ कमसो, कमेण को वा मइं निवारेइ ?।
जं तत्थावत्थाणं, सुयस्स सुत्तोवओगाओ ॥ ११० ॥

भावश्रुताद् मतिः कार्यतयैव नास्तीत्यनन्तरोक्तगाथाऽवयवेन संबन्धः (न उ कमसो त्ति) क्रमशस्तु मतिर्नास्तीत्येवं न, किं तर्हि ?, क्रमशः साऽस्ति, इत्येतत् सर्वोऽपि मन्यते, अन्यथा आमरणावधि श्रुतमात्रोपयोगप्रसङ्गात् । यदि क्रमशः साऽस्ति, तर्हि क्रमेण भवन्त्यास्तस्या भवन्तः किं कुर्वन्ति ?, इत्याह-(कमेणेत्यादि) वाशब्दः पातनार्थे, सा च कृतैव, क्रमेण भवन्तीं मतिं को निवारयति ?, मत्या श्रुतोपयोगो जन्यते, तदुपरमे तु निजकारणकलापात् सदैव प्रवृत्ता पुनरपि मतिरवतिष्ठते, पुनस्तथैव श्रुतम्, तथैव च मतिः, इत्येवं क्रमेण भवन्त्या मतेर्निषेधका वयं न भवाम इत्यर्थः । किमिति ?, इत्याह-यद् यस्मात् कारणात् तत्र तस्यां मतौ अवस्थानं स्थितिर्भवति, श्रुतोपयोगात् च्युतस्य ततः क्रमेण मतिं न निषेधयामः । इदमुक्तं भवति-यथा सामान्यभूतेन सुवर्णेन स्वविशेषरूपाः कङ्कणकुण्डलीयकाऽऽदयो जन्यन्ते, अतस्ते तत्कार्यव्यपदेशं लभन्त एव, सुवर्णं त्वतज्जन्यत्वात् तत्कार्यतया न व्यपदिश्यते, तस्य कारणान्तरजन्यत्वात्, कङ्कणाऽऽदिविशेषोपरमे तु सुवर्णावस्थानं क्रमेण न निवार्यते; एवं मत्याऽपि सामान्यभूतया स्वविशेषरूपश्रुतोपयोगो जन्यते, अतस्तत्कार्यं स उच्यते, मतिस्त्वतज्जन्यत्वात्तत्कार्यतया न व्यपदिश्यते, तस्या हेत्वन्तरात् सदा सिद्धत्वात्, स्वविशेषच्युतश्रुतोपयोगोपरमे तु क्रमाऽऽयातं मत्यवस्थानं न निवार्यते, आमरणान्तं केवलश्रुतोपयोगप्रसङ्गादिति गाथार्थः ॥ ११० ॥

तदेवं भावश्रुतं मतिपूर्वं व्यवस्थाप्य मतान्तरमुपदर्शयन्नाह-

दव्वसुयं मइपुव्वं, जासइ जं नाऽविचिंतियं केइ ।

भावसुयस्साभावो, पावइ तेसिं न य विसेसो ॥१११॥

(केइ त्ति) मतिपूर्वं श्रुतमित्यत्राऽऽगमवचने केचिदेवं व्याचक्षते । किम् ?, इत्याह-द्रव्यश्रुतं शब्दरूपं मतिपूर्वम्, न भावश्रुतम् । तत्र युक्तिमाह-(जम्हा इ जं नाविचिंतियं ति) यद् यस्मात् कारणाद्विचिन्तितम् अविवक्षितं न कोऽपि भाषते न शब्दमुदीरयति, यच्च विवक्षाज्ञानं तत् किल मतिरिति तेषामभिप्रायः, ततश्च मतिपूर्वं द्रव्यश्रुतं सिद्धं भवति । एतस्मिन् व्याख्याने दोषमाह-तेषामेवं व्याख्यातृणां भावश्रुतस्य सर्वथैवाभावः प्राप्नोति, यतो वक्तृगतं विवक्षोपयोगज्ञानं तैरेव मतित्वेन व्याख्यातम्, अन्यथा शब्दस्य मतिपूर्वकत्वाभावात्, श्रोतुरपि शब्दं श्रुत्वा प्रथमं यदवग्रहाऽऽदिज्ञानं तत्तावन्मतिरेव, ऊर्ध्वमपि च तस्या भावश्रुतं नाभ्युपगन्तव्यम्, मतिपूर्वं भावश्रुतमित्यस्मत्पक्षवर्तित्वप्रसङ्गात् । यदशृण्वतोऽभाषमाणस्य चानुप्रेक्षाऽऽदिष्वन्तर्जल्पाकर्षितं ज्ञानं विपरिवर्तते तद्भावश्रुतं भविष्यतीति चेत् । तदयुक्तम्, यतस्तदपि यद्यवग्रहाऽऽद्यात्मकमतिपूर्वं तदा भावश्रुतं नेष्टव्यम्, अस्मत्पक्षाभ्युपगमप्रसङ्गेरेव । अथ मतिपूर्वं तन्नेष्यते, तथाऽपि तत्सविकल्पकत्वेन मतिरेव, शब्दविवक्षाज्ञानवत्; शब्दविवक्षाज्ञानेऽपि हि शब्दविकल्पोऽस्ति, तमन्तरेण शब्दाभिधानासंभवात् । न चाऽसौ भावश्रुतत्वेनेष्टः ; तस्माद् मतेरनन्तरं सर्वत्र शब्दमाश्रयैवोत्थानम्, न भावश्रुतस्य; अस्मत्पक्षाङ्गीकरणप्रसङ्गात् ; विकल्पज्ञानानि च विवक्षाज्ञानवन्मतित्वेनोक्तान्येव, इति सर्वत्र भावश्रुताभावः प्रसजति । भवतु स तर्हि, इति चेत् । इत्याह-(न य विसेसो त्ति) भावश्रुताभावे मतिश्रुतयोर्विशेषो भेदश्चिन्तयितव्यो न स्यात्, स हि द्वयोरेवोपपद्यते । यदा च मतिरेवाऽस्ति, न भावश्रुतम्, तदा तस्याः केन सह भेदचिन्ता युज्येत ?, इति भावः । द्रव्यश्रुतरूपेण शब्देन सह मतेर्भेदचिन्ता भविष्यतीति चेत् । तदयुक्तम् । ज्ञानपञ्चकविचारस्य इहाधिकृतत्वात्, तदधिकारे च शब्देन सह भेदचिन्ताया अप्रस्तुतत्वात् । चिन्त्यतां वा ' मतिपूर्वं द्रव्यश्रुतम् ' इत्येवं मतेः शब्देनापि सह विशेषः, किं तु सोऽपि न घटते । इति गाथार्थः ॥ १११ ॥

कुतो न घटते ?, इत्याह-

दव्वसुयं बुद्धीओ, सा वि तओ जमविसेसओ तम्हा ।
भावसुयं मइपुव्वं, दव्वसुयं लक्खणं तस्स ॥ ११२ ॥

यदिति यस्मात् कारणाद् यथा द्रव्यश्रुतं शब्दो बुद्धेर्मतेः सकाशाद् भवतीति भवद्भिः प्रतिपाद्यते, तथा हन्त ! साऽपि बुद्धिस्ततः शब्दात् श्रोतुर्भवत्येव । ततश्च " मइपुव्वं सुयमुत्तं, न मई सुयपुव्विया विसेसोऽयं । " (१०५) इति मतिश्रुतयोर्भेदप्रतिपादनार्थं योऽसौ विशेषोऽत्र प्रतिपादयितुं प्रस्तुतः, स द्वयोरप्यन्योन्यं पूर्वभाविताया: समानत्वान्न प्राप्नोति, इत्यनन्तरगाथापर्यन्तावयवेन संबन्धः । तस्मात्तेषां मतेऽविशेषतः कारणाद् यदस्माभिः प्राक् समर्थितम्-भावश्रुतं मतिपूर्वमिति, तदेव युक्तियुक्तम् । शब्दलक्षणं तु द्रव्यश्रुतं तस्य भावश्रुतस्य लक्ष्यते गम्यतेऽनेनेति लक्षणं लिङ्गमिति गाथार्थः ॥ ११२ ॥

कुतस्तत्तस्य लक्षणम् ?, इत्याह-

सुयविन्नाणप्पभवं, दव्वसुयमियं जओ विचिंतेउं ।
पुव्वं पच्छा भासइ, लक्खिज्जइ तेण भावसुयं ॥११३॥

श्रुतविज्ञानप्रभवं सविकल्पकविवक्षाज्ञानकार्यं शब्दरूपं द्रव्यश्रुतमिदं यत्परैर्मतिपूर्वत्वेन इष्यते, कथं पुनस्तद्भावश्रुतप्रभवं विज्ञायते ?, इत्याह-यतः सर्वोऽपि पूर्वं विचिन्त्य वक्तव्यमर्थं चित्ते विकल्प्य पश्चात् शब्दं भाषते, यच्च तच्चिन्ताज्ञानं तत् श्रुतानुसारित्वाद् भावश्रुतम्, इति भावश्रुतप्रभवता द्रव्यश्रुतस्य विज्ञायते; यच्च यस्मात् प्रभवति तत्तस्य कार्यम्, यतस्तेन कार्यभूतेन द्रव्यश्रुतेन स्वकारणभूतं भावश्रुतं लक्ष्यत इति तत् तस्य लक्षणमुक्तम्,अस्ति भावश्रुतमत्र, तत्कार्यस्य शब्दस्य श्रवणाद्, इत्येवं तेन भावश्रुतस्य लक्ष्यमाणत्वादिति । द्रव्यश्रुतस्य च भावश्रुतलक्षणता मतान्तरवादिनां विपर्यस्तत्वप्रतिपादनार्थमुपदर्शिता, भावश्रुतप्रभवस्याऽपि शब्दस्य तैर्मतिपूर्वत्वप्रतिपादनादिति गाथाऽर्थः ॥ ११३ ॥

अथ यथा मतिश्रुतयोः कार्यकारणभावाद् भेदः, तथा तयोः प्रत्येकं स्वस्थानेऽपि सम्यक्त्वमिथ्यात्वपरिग्रहाद् भेद एवेत्यनुषङ्गतो दर्शयितुं नन्द्यध्ययनाऽऽगमे मतिश्रुतयोः कार्यकारणभावेन भेदप्रतिपादनानन्तरमिदं सूत्रमस्ति ।

तद्यथा-

" अविसेसिया मई-मइनाणं च, मइअन्नाणं च । विसेसिया मई-सम्मदिट्ठिस्स मई मइनाणं, मिच्छादिट्ठिस्स मई मइअन्नाणं । एवं अविसेसियं सुयं सुयनाणं, सुयअन्नाणं च; विसेसियं सुयं-सम्मदिट्ठिस्स सुयं सुयनाणं, मिच्छादिट्ठिस्स सुयं सुयअन्नाणं । "

सम्यग्दृष्टिमिथ्यादृष्टिसंबन्धतोऽविशेषितेन मतिशब्देन मतिज्ञानं, मत्यज्ञानं च द्वे अपि प्रतिपाद्येते, सम्यग्दृष्टित्वविशेषितेन तु मतिध्वनिना मतिज्ञानमेवोच्यते, मिथ्यादृष्टित्वविशेषितेन तु तेनैव मत्यज्ञानमेवाभिधीयते, एवं श्रुतेऽपि वाच्यमिति सूत्रभावार्थः ।

तदेतदानुषङ्गिकं सूत्रोक्तमनुवर्तमानो भाष्यकारोऽप्याह—

अविसेसिया मइ चिय, सम्मदिट्ठिस्स सा मइन्नाणं ।
मइअन्नाणं मिच्छा-दिट्ठिस्स सुयं पि एमेव ॥११४॥

सम्यग्दृष्टिमिथ्यादृष्टिभावेनाविशेषिता मतिर्मतिरेवोच्यते, न तु मतिज्ञानं मत्यज्ञानं चेति निर्देश्यं व्यपदिश्यते, सामान्यकक्षायां तस्यां ज्ञानाज्ञानविशेषयोर्द्वयोरप्यन्तर्भावात् । यदा तु सम्यग्दृष्टिरेव संबन्धिनी सा मतिर्विवक्ष्यते, तदा मतिज्ञानमिति निर्दिश्यते । यदा तु मिथ्यादृष्टिसंबन्धिनी तदा मत्यज्ञानम् । एवं श्रुतमप्यविशेषितं श्रुतमेव, विशेषितं तु सम्यग्दृष्टेः श्रुतज्ञानम्, मिथ्यादृष्टेस्तु श्रुताज्ञानम्, सम्यग्दृष्टिसंबन्धिनो बोधस्य सर्वस्यापि ज्ञानत्वात्; मिथ्यादृष्टिसत्कस्य त्वज्ञानत्वादिति गाथार्थः ॥ ११४ ॥

ननु यथा मतिश्रुताभ्यां सम्यग्दृष्टिर्घटाऽऽदिकं जानीते, व्यवहरति च; तथा मिथ्यादृष्टिरपि, तत्किमिति तस्य सत्कं सर्वमप्यज्ञानमुच्यते ?, इत्याशङ्क्याऽऽह-

सदसदविसेसणाओ, भवहेउजदिच्छिओवलंभाओ ।
नाणफलाभावाओ, मिच्छदिट्ठिस्स अन्नाणं ॥ ११५ ॥

सच्चासच्च सदसती,तयोरविशेषणमविशेषतः,तस्मादेतोः,

मिथ्यादृष्टेः संबन्धि व्यवहारमात्रेण ज्ञानमपि निश्चयतोऽज्ञानमुच्यते, सतो ह्यसत्त्वेन असद् विशिष्यते, असतोऽपि च सत्त्वेन सद्विद्यते। मिथ्यादृष्टिश्च घटे सत्त्वप्रमेयत्वमूर्तत्वाऽऽदीन्, स्तम्भरम्भाऽम्भोरुहाऽऽदिव्यावृत्त्यादींश्च पटाऽऽदिधर्मान् सतोऽप्यसत्त्वेन प्रतिपद्यते, 'सर्वप्रकारैर्घट एवायम्' इत्यवधारणात्। अनेन ह्यवधारणेन सन्तोऽपि सत्त्वप्रमेयत्वाऽऽदयः पटाऽऽदिधर्मा न सन्तीति प्रतिपद्यते, अन्यथा सत्त्वप्रमेयत्वाऽऽदिसामान्यधर्मद्वारेण घटे पटाऽऽदीनामपि सद्भावात् 'सर्वथा घट एवायम्' इत्यवधारणानुपपत्तेः, 'कथञ्चिद् घट एवायं' इत्यवधारणे त्वनेकान्तवादाभ्युपगमेन सम्यग्दृष्टित्व—प्रसङ्गात्, तथा पटपुटनटशकटाऽऽदिरूपं घटेऽसदपि सत्त्वेनायमभ्युपगच्छति 'सर्वैः प्रकारैर्घटोऽस्त्येव' इत्यवधारणात्, 'स्यादस्त्येव घटः' इत्यवधारणे तु स्याद्वादाऽऽश्रयणात् सम्यग्दृष्टित्वप्राप्तेः। तस्मात्सदसतोर्विशेषाज्ञानादुन्मत्तकस्येव मिथ्यादृष्टेर्बोधोऽज्ञानम्। तथा विपर्यस्ततत्वादेव भवहेतुत्वात् तद्बोधोऽज्ञानम्। तथा पशुवधहेतुत्वात् तद्बोधोऽज्ञानम्। तथा पशुवधतिलाऽऽदिदहनजलाऽऽद्यवगाहनाऽऽदिषु संसारहेतुषु मोक्षहेतुत्वबुद्धेः, दयाप्रशमब्रह्मचर्याऽकिञ्चन्यादिषु तु मोक्षकारणेषु भवहेतुत्वाध्यवसायतो यदुच्छोपलम्भात् तस्याऽज्ञानम्। तथा विरत्यभावेन ज्ञानफलाभावाद् मिथ्यादृष्टेरज्ञानमिति गाथाऽर्थः ॥ ११५ ॥

तदेवं सप्रसङ्गः प्रतिपादितो हेतुफलभावादपि मतिश्रुतयोर्भेदः, साम्प्रतं भेदभेदात्तयोस्तमभिधातुमाह-

जेयकयं च विसेसण—मट्ठावीसइविहंगभेयाइं ।
इंदियविभागओ वा, मइसुयनेओ जओऽभिहियं ॥११६॥

भेदाऽवग्रहाऽऽदयः, अङ्गानङ्गप्रविष्टत्वाऽऽदयश्च, तत्कृतं वा मतिश्रुतयोर्विशेषणं भेदः, यतोऽवग्रहाऽऽदिभेदादष्टाविंशत्यादिविधं मतिज्ञानं, 'वक्ष्यते' इति शेषः। श्रुतज्ञानं त्वङ्गानङ्गप्रविष्टत्वाऽऽदिभेदमग्रेऽभिधास्यते । अथवा-इन्द्रियविभागान्मतिश्रुतयोर्भेदः, यतोऽन्यत्र पूर्वगतेऽभिहितमिति गाथाऽर्थः ॥११६॥

किमभिहितम् ?, इत्याह-

सोइंदिओवलद्धी, होइ सुयं सेसयं तु मइनाणं ।
मोत्तूणं दव्वसुयं, अक्खरलंभो य सेसेसु ॥ ११७ ॥

इन्दो जीवः, तस्येदमिन्द्रियम्, श्रूयतेऽनेनेति श्रोत्रम्, तच्च तदिन्द्रियं चेति श्रोत्रेन्द्रियम्, उपलम्भनमुपलब्धिर्ज्ञानम्, श्रोत्रेन्द्रियेणोपलब्धिः श्रोत्रेन्द्रियोपलब्धिरिति तृतीयासमासः; श्रोत्रेन्द्रियस्य वा उपलब्धिः श्रोत्रेन्द्रियोपलब्धिरिति षष्ठीसमासः; श्रोत्रेन्द्रियद्वारकं ज्ञानमित्यर्थः । श्रोत्रेन्द्रियेणोपलब्धिर्यस्येति बहुव्रीहिणाऽन्यपदार्थे शब्दोऽप्यधिक्रियते । ततश्चाऽऽद्यसमासद्वये श्रोत्रेन्द्रियद्वारकमभिलाषोल्लिखितोपलब्धिलक्षणं भावश्रुतमुक्तं द्रष्टव्यम्, बहुव्रीहिणा तु तस्यां भावश्रुतोपलब्धावनुपयुक्तस्य वदतो द्रव्यश्रुतम्, तदुपयुक्तस्य तु वदत उभयश्रुतमभिहितं वेदितव्यम्। इह च व्यवच्छेदफलत्वात् सर्वं वाक्यं सावधारणं भवति, इष्टश्चावधारणविधिः प्रवर्तते; ततः 'चैत्रो धनुर्धर एव' इत्यादिष्विवेहापोहगम्यवच्छेदेनावधारणं द्रष्टव्यम्। तद्यथा-श्रुते श्रोत्रेन्द्रियोपलब्धिरेव, न तु श्रोत्रेन्द्रियोपलब्धिः श्रुतमेवेति; श्रोत्रेन्द्रियोपलब्धिस्तु श्रुतं मतिर्वा भवति, यथा धनुर्धरश्चैत्रोऽन्यो वेति, श्रोत्रेन्द्रियोपलब्धेरवग्रहेहाऽऽदिरूपाया मतित्वात्, श्रुतानुसारिण्यास्तु श्रुतत्वादिति । यदि पुनः श्रोत्रेन्द्रियोपलब्धिः श्रुतमेवेत्यवधार्यते, तदा तदुपलब्धेर्मतित्वं सर्वथैव न स्यात्, इष्यते च कस्याश्चित् तदपीति भावः । यदि श्रोत्रेन्द्रियोपलब्धिः श्रुतं, तर्हि शेषं किं भवतु ?, इत्याह-(सेसयं त्वित्यादि) श्रोत्रेन्द्रियोपलब्धिं विहाय 'शेषकं' यच्चक्षुरादीन्द्रियचतुष्टयोपलब्धिरूपं तन्मतिज्ञानं, भवति इति वर्तते । तुशब्दः समुच्चये, स चैवं समुच्चिनोति, न केवलं शेषेन्द्रियोपलब्धिर्मतिज्ञानं,किं तु श्रोत्रेन्द्रियोपलब्धिश्च काचिदवग्रहेहाऽऽदिमात्ररूपा मतिज्ञानं भवति; तथा च सत्यनन्तरमवधारणव्याख्यानमुपपन्नं भवति । " सेसयं तु मइनाणं " इति सामान्येनैवोक्ते शेषस्य सर्वस्याप्युत्सर्गेण मतित्वे प्राप्ते सत्यपवादमाह-(मोत्तूणं दव्वसुयं ति) पुस्तकाऽऽदिलिखितं यद् द्रव्यश्रुतं तन्मुक्त्वा परित्यज्यैव शेषं मतिज्ञानं द्रष्टव्यम्, पुस्तकाऽऽदिन्यस्तं हि भावश्रुतकारणत्वात् शब्दवत् द्रव्यश्रुतमेव, इति कथं मतिज्ञानं स्याद् ?, इति भावः । न केवलं श्रोत्रेन्द्रियोपलब्धिः श्रुतम्, किं तु यश्च शेषेषु चतुर्षु चक्षुरादीन्द्रियेषु श्रुतानुसारिसाभिलापविज्ञानरूपोऽक्षरलाभः सोऽपि श्रुतम्, न त्वक्षरलाभमात्रं, तस्येहापायाऽऽत्मके मतिज्ञानेऽपि सद्भावादिति । आह-यदि चक्षुरादीन्द्रियाक्षरलाभोऽपि श्रुतं, तर्हि यदाद्यगाथाऽवयवे 'श्रोत्रेन्द्रियोपलब्धिरेव श्रुतम्' इत्यवधारणं कृतम्, तन्नोपपद्यते। शेषेन्द्रियोपलब्धेरपीदानीं श्रुतत्वेन समर्थितत्वात् । नैतदेवम्, शेषेन्द्रियाक्षरलाभस्याऽपि श्रोत्रेन्द्रियोपलब्धिरूपत्वात् । स हि श्रुतानुसारिसाभिलापज्ञानरूपोऽत्राधिक्रियते, श्रोत्रेन्द्रियोपलब्धिरपि चैवंभूतैव श्रुतमुक्ता । ततश्च साभिलापविज्ञानं शेषेन्द्रियद्वारेणाऽप्युत्पन्नं योग्यतया श्रोत्रेन्द्रियोपलब्धिरेव मन्तव्यम्, अभिलापस्य सर्वस्यापि श्रोत्रेन्द्रियग्रहणयोग्यत्वादिति । अत्राऽऽह-ननु " सोइंदिओवलद्धी होइ सुयं । " तथा-"अक्खरलंभो य सेसेसु । " इत्युभयवचनात् श्रुतज्ञानस्य सर्वेन्द्रियनिमित्तता सिद्धा। तथा-" सेसयं तु मइनाणं " इति वचनात्, तुशब्दस्य समुच्चयाच्च मतिज्ञानस्यापि सर्वेन्द्रियकारणता प्रतिष्ठिता; भवद्भिस्तु इन्द्रियविभागाद् मतिश्रुतयोर्भेदः प्रतिपादयितुमारब्धः; स चैवं न सिध्यति, द्वयोरपि सर्वेन्द्रियनिमित्ततायास्तुल्यत्वप्रतिपादनादिति । अत्रोच्यते-साधूक्तं भवता, किं तु यद्यपि शेषेन्द्रियद्वाराऽऽयातत्वात्तदक्षरलाभः शेषेन्द्रियोपलब्धिरुच्यते, तथाऽप्यभिलापाऽऽत्मकत्वादसौ श्रोत्रेन्द्रियग्रहणयोग्य एव, ततश्च तत्त्वतः श्रोत्रेन्द्रियोपलब्धिरेवाऽयम् । तथा च सति परमार्थतः सर्वं श्रोत्रविषयमेव श्रुतज्ञानम्, मतिज्ञानं तु तद्विषयं शेषेन्द्रियविषयं च सिद्धं भवति, अत इत्थमिन्द्रियविभागान्मतिश्रुतयोर्भेदो न विहन्यते; इत्यलं विस्तरेण । इति पूर्वगतगाथासंक्षेपार्थः ॥ ११७ ॥

अथ विस्तरार्थमभिधित्सुर्भाष्यकार एव परेण पूर्वपक्षं कारयितुमाह-

सोओवलद्धि जइ सुयं, न नाम सोउग्गहाइओ बुद्धी ।
अह बुद्धीओ न सुयं, अहोभयं संकरो नाम ॥११८॥

'श्रोत्रोपलब्धिरेव श्रुतम्' इत्यवधारणार्थमनवगच्छतः 'श्रुतमेव तदुपलब्धिः' इत्येवं च तदर्थमवबुध्यमानस्य परस्य वचनामिदम्। तद्यथा-यदि श्रोत्रोपलब्धिः श्रुतमेव, तर्हि 'नाम'

इति कोमलाऽऽमन्त्रणे, अहो ! श्रोत्रेन्द्रियद्वारोत्पन्ना अवग्रहेहाऽऽदयो बुद्धिर्मतिर्ज्ञानं न प्राप्नुवन्ति, तदुपलब्धेः सर्वस्याऽपि श्रुतत्वेनाऽवधारणात्। मा भूवँस्ते मतिज्ञानम्, किं नः क्रूयते ?, इति चेत्, नैवम्। तथा सति तस्य वक्ष्यमाणाष्टाविंशतिभेदाभिधानव्यवहानेः। अथैतद्दोषभयाद् बुद्धिस्तेऽभ्युपगम्यन्ते, ततस्तर्हि न ते श्रुतम्, तथा च सति-" सोइंदिओवलद्धी, होइ सुयं " (११७) इत्यसङ्गतं प्राप्नोति। अथोभयदोषपरिहारार्थम्, 'उभयं बुद्धिश्च श्रुतं च ते इष्यन्ते, तर्हि एवं सत्येकस्थानमीलितक्षीरनीरयोरिव संकरः, संकीर्णता मतिश्रुतयोरापद्यते, न पृथग्भावः। अथ वा-' यदेव मतिः, तदेव च श्रुतं, यदेव च श्रुतं तदेव मतिः, इत्येवमनयोर्भेदोऽप्यनयोः स्याद्, इति स्वयमेव ऊह्यम्। नेदमेषां तयोः प्रतिपादयितुं प्रस्तुतः, तदेतत् शान्तिकरणप्रवृत्तस्य वेतालोत्थानमिति प्रेरकगाथार्थः ॥ ११६ ॥

तदेतत्प्रेर्यं केचित् यथा परिहरन्ति, तथा तावद्दर्शयन्नाह-

केई वेंतस्स सुयं, सद्दो सुणओ मइ त्ति तं न भवे।
जं सव्वो चिय सद्दो, दव्वसुयं तस्स को भेदो ?॥११६॥

" सोइंदियोवलद्धी " (११७) इत्यत्र श्रोत्रेन्द्रियेणोपलब्धिर्यस्येति केवलबहुव्रीह्याश्रयणात् श्रोत्रेन्द्रियोपलब्धिः शब्द एवेति केचिन्मन्यन्ते, स च प्रज्ञापकस्य ब्रुवतः श्रूयत इति कृत्वा श्रुतम्, शृण्वतस्तु श्रोतुरवग्रहेहापायाऽऽदिरूपेण मन्यते क्रायत इति मतिः। एवं च सत्युभयमुपपन्नं भवति, श्रोत्रगतावग्रहाऽऽदीनां च श्रुतत्वं परिहृतं भवति। आचार्यः प्राऽऽह-'तं न भवे त्ति' तदेतत् केषाञ्चिद् मतं युक्तं न भवति। कुतः ?, इत्याह-यस्मात् कारणात् ब्रुवतः श्रोतुश्च संबन्धी सर्व एव शब्दो द्रव्यश्रुतम्, द्रव्यश्रुतमात्रत्वेन च सर्वत्र तुल्यस्य सतस्तस्य शब्दस्य को भेदः को विशेषः ?, येनासौ वक्तरि श्रुतम्, श्रोतरि तु मतिः स्यात्। यदपि श्रूयत इति श्रुतम्, मन्यते इति मतिः। उच्यते--तत्रापि भावान्तरमात्रकृत एव विशेषः, शब्दस्तु स एव श्रूयते स एव मन्यते, इति न कश्चिद्भयं दृश्यते। इति गाथाऽर्थः ॥ ११६ ॥

दूषणान्तरमप्याह-

किं वा णाणेऽहिगए, सद्देणं जइ य सद्दविण्णाणं।
गहियं तो को भेदो, भणओ सुणओ व जो तस्स ? ॥१२०॥

यदि वा ज्ञाने ज्ञानविचारे अधिकृते किं पुद्गलसंघातरूपेण शब्देन गृहीतेन कार्यम्, अप्रस्तुतत्वात् ?। अथ श्रोत्रेन्द्रियोपलब्धिशब्देन शब्दविज्ञानं गृह्यत इति। अत्राऽऽह-(जइ येत्यादि) यदि च श्रोत्रेन्द्रियोपलब्धेः शब्दस्य कारणभूतत्वात् कार्यभूतत्वाच्चोपचारतो वक्तृगतं श्रोतृगतं च शब्दविज्ञानं श्रोत्रेन्द्रियोपलब्धिशब्दवाच्यत्वेन गृहीतम्, तच्च ब्रुवतः श्रुतं, शृण्वतस्तु मतिरित्युच्यते। हन्त ! ततस्तर्हि तस्य विज्ञानस्य ब्रुवतः शृण्वतो वा यो भेदो विशेषः, स कः ?, इति कथ्यताम्, येन तद्वक्तुः श्रुतं, श्रोतुश्च मतिः स्यात् ?, इति नास्त्यसौ विशेषः, शब्दज्ञानत्वाविशेषादिति भावः। किं च-एवं सति श्रोतुरपि कदाचित् श्रुत्यनन्तरमेव ब्रुवतः सैव शब्दज्ञानिता तन्मतिरवशिष्टा श्रुतं प्रसजति, " वेंतस्स, सुयं " (११६) " सुणओ मइ " (११७) इत्यभ्युपगमात्; ततश्च तदेकत्वं मतिश्रुतयोः, इति कोऽविशयः कृतः स्याद् ? इति। किं च-यदि-शृण्वतः सर्वदैव मतिरित्ययमेकान्तः, तर्हि यदेतद् व्यक्तं सर्वत्रोच्यते-आचार्यपारम्पर्येणेदं श्रुतमायातमिति, तदसत् प्राप्नोति, तीर्थकरादर्वाक् सर्वेषामपि श्रोतृत्वेन मतिज्ञानस्यैवोपपत्तेः। अथ नैवम्, तर्ह्येकत्वं मतिश्रुतयोरिति गाथाऽर्थः ॥ १२० ॥

तदेवम्-" केई वेंतस्स सुयं " (११७) इत्यादि दूषयित्वा प्रस्तुतप्रकरणोपसंहारव्याजेन परमेव शिक्षयन्नाह-

जणओ सुणओ व सुयं, तं जमिह सुयाणुसारि विण्णाणं।
दोण्हं पि सुयाईयं, जं विण्णाणं तयं बुद्धी ॥ १२१ ॥

तस्माद् ब्रुवतः श्रुतम्, शृण्वतस्तु मतिः, इत्येतन्न युक्तम्, उक्तदूषणाद्, अनागमिकत्वाच्च। किं तर्हि युक्तम् ?, इति चेत्। उच्यते-ब्रुवतः शृण्वतो वा यत्किमपि श्रुतानुसारि परोपदेशार्हवचनानुसारि विज्ञानम्, तदिह सर्वं श्रुतम्, यत्पुनर्ह्योरपि वक्तृश्रोतॄणां श्रुतातीतं इषीकमनोमात्रनिमित्तमवग्रहाऽऽदिरूपं विज्ञानम्, तत्सर्वं बुद्धिर्मतिज्ञानमित्यर्थः। तदेवं द्वयोरपि वक्तृश्रोतॄणां प्रत्येकं मतिश्रुते यथोक्तस्वरूपे अभ्युपगन्तव्ये, न पुनरेकैकस्यैकैकमिति भावः। इति गाथाऽर्थः ॥ १२१ ॥

नवत्वेवम्, किं तु-" सोओवलद्धि जइ सुयं, न नाम सोऽणहादओ बुद्धी " (११८) इत्यादिना यः परेण पूर्वपक्षोऽभ्यधायि, तस्य तर्हि कः परिहारः ?, इत्याशङ्क्य भाष्यकार एवेदानीम् "सोइंदिओवलद्धी, होइ सुयं " (११७) इत्यादिमूलगाथां विवृण्वन्नाह—

सोइंदियोवलद्धी, चेव सुयं न उ तई सुयं चेव।
सोइंदिओवलद्धी, वि काइ जम्हा मइण्णाणं ॥१२२॥

इह श्रोत्रेन्द्रियोपलब्धिशब्दस्य तृतीयाषष्ठीसमासः, बहुव्रीहिश्च; आद्यसमासरूपेण भावश्रुतम्, बहुव्रीहिणा तु भावश्रुतानुपयुक्तस्य वदतो द्रव्यश्रुतम्, तदुपयुक्तस्य तु ब्रुवत उभयश्रुतं गृहीतमिति प्राग् वृत्तौ दर्शितं सर्वं ऊह्यम्। अवधारणविधिमपि प्रागुपदर्शितमाह-श्रोत्रेन्द्रियोपलब्धिरेव श्रुतम्, इत्येवमवधारणीयम्। (न उ तइ त्ति) न पुनः सा श्रोत्रेन्द्रियोपलब्धिः श्रुतमेवेति। कुतो नैवमवधार्यते ?, इत्याह-यस्मात् श्रोत्रेन्द्रियोपलब्धिरपि काचित् श्रुतानुसारिणी अवग्रहेहाऽऽदिमात्ररूपा मतिज्ञानमेव, अतः ' श्रोत्रेन्द्रियोपलब्धिः श्रुतमेव ' इति नावधार्यते इति भावः। एवं च सति " न नाम सोऽणहादओ बुद्धी " (११८) इत्यादि परेण यत्प्रेरितम्, तत्परिहृतं भवति, श्रोत्रावग्रहाऽऽदीनामपि बुद्धिरूपतायाः समर्थितत्वादिति गाथाऽर्थः ॥ १२२ ॥

तदेवमवधारणविधिना श्रोत्रावग्रहाऽऽदीनां मतित्वं समर्थितं, यदि वा " सेसयं तु मइनाणं " (११७) इत्यत्र योऽसौ तुशब्दः, ततोऽपि तेषां तत्समर्थ्यते इति दर्शयन्नाह-

तुसमुच्चयवयणाओ, व काइ सोइंदिओवलद्धी वि।
मइरेवं सइ सोऽणहादओ हुंति मइनेया ॥१२३॥

" सेसयं तु मइनाणं " (११७) इत्यत्र योऽसौ तुशब्दः समुच्चयवचनः, ततश्च किमुक्तं भवति ?-शेषकं मतिज्ञानम्, काचिदनपेक्षितपरोपदेशार्हवचना श्रोत्रेन्द्रियोपलब्धिश्च मति-

ज्ञानमित्येवं वा श्रोत्रावग्रहाऽऽदयो भवन्ति मतिज्ञेदाः । तथा च सति मतेरष्टाविंशतिभेदत्वं न परिहीयते,ततश्च "न नाम सोऽवग्रहादयो बुद्धौ" (११८) इत्यादि परप्रेर्यं प्रतिक्षिप्तमेवेति गाथार्थः ॥१२३॥

मूलगाथाया व्याख्यातशेषं व्याख्यानयन्नाह-

पत्ताइगयं सुयकारणं ति सद्दो व्व तेण दव्वसुयं ।
नावसुयमक्खराणं, लाभो सेसं मइन्नाणं ॥१२४॥

मूलगाथायां 'श्रोत्रावग्रहाऽऽदयः, शेषकं च मतिज्ञानम्' इत्युक्ते शेषस्य सर्वस्यापि उत्सर्गतो मतित्वे प्राप्ते, अपवादः- "मोत्तूणं दव्वसुयं ति" (११७) इत्युक्तम् । तत्र किं तद् द्रव्यश्रुतं यदिह वर्ज्यते ?, इत्याह भाष्यकारः-पत्राऽऽदिगतं पुस्तकपत्राऽऽदिलिखितम्, तेन कारणेन द्रव्यश्रुतम्; येन किम् ?, इत्याह-श्रुतकारणमिति । किंवद् ?, इत्याह-शब्दवदिति यथा भावश्रुतकारणत्वात् शब्दो द्रव्यश्रुतम्, तथा-पुस्तकपत्राऽऽदिन्यस्तमपि तत्कारणत्वाद् द्रव्यश्रुतमित्यर्थः। तन्मुक्त्वा शेषचक्षुरादीन्द्रियोपलब्धिरूपं मतिज्ञानम् । (भावस्सुयमक्खराणमित्यादि) न केवलं श्रोत्रेन्द्रियोपलब्धिः श्रुतम्, यश्च श्रुतानुसारित्वाद् भावश्रुतं भावश्रुतरूपः, शेषेषु चक्षुरादीन्द्रियेष्वक्षराणां लाभः परोपदेशार्हद्वचनानुसारिण्यक्षरोपलब्धिरित्यर्थः, सोऽपि श्रुतम्, इत्येवं मूलगाथायां संबन्धः कार्य इति हृदयम्, स च प्राग् वृत्तौ कृत एव । तस्माच्चक्षुरादीन्द्रियेषु यच्छेषमश्रुतानुसार्यवग्रहेहाऽऽद्युपलब्धिरूपम्, तन्मतिज्ञानम्, इत्येवमिहाप्येतत् संबध्यते । इति गाथाऽर्थः ॥ १२४ ॥

अथ परः पूर्वापरविरोधमुद्भावयन्नाह-

जइ सुयमक्खरलाभो, न नाम सोऽोवलद्धिरेव सुयं ।
सोऽोवलद्धिरेव-क्खराइँ सुइसंभवाओ त्ति ॥ १२५ ॥

इयमपि प्राग् मूलगाथावृत्तौ दर्शितार्थैव, तथाऽपि विस्मरणशीलानामनुग्रहार्थं किञ्चिद् व्याख्यायते-ननु यदुक्तन्यायेन शेषेन्द्रियाक्षरलाभोऽपि श्रुतम्, तर्हि श्रोत्रेन्द्रियोपलब्धिरेव श्रुतम्, इति यदवधारणं कृतम्, तदसङ्गतं प्राप्नोति, शेषेन्द्रियाक्षरलाभस्यापि श्रुतत्वात् । अत्रोत्तरमाह-"सोऽोवलद्धिरेवेत्यादि ।" यद्यसौ शेषेन्द्रियाक्षरलाभोऽपि श्रोत्रेन्द्रियोपलब्धिर्न स्यात्, तदा स्यादेवावधारणमसङ्गतम्, तच्च नास्ति, यतः शेषेन्द्रियद्वाराऽऽयातज्ञानेऽपि प्रतिभासमानान्यक्षराणि श्रोत्रेन्द्रियोपलब्धिरेव । अहो ! महदाश्चर्यम्, यतो यदि शेषेन्द्रियाक्षरलाभः, कथं श्रोत्रोपलब्धिः ?; सा चेत्, कथं शेषेन्द्रियाक्षरलाभः ?, इत्याशङ्क्याऽऽह-(सुइसंभवाओ त्ति) शेषेन्द्रियज्ञानप्रतिभासभाञ्जि अक्षराणि श्रोत्रोपलब्धिरेव । कुतः?, इत्याह-तेषां श्रुतेः श्रवणस्य संभवात् । इदमुक्तं भवति-अभिलापरूपाणि हि एतानि अक्षराणि, अभिलापश्च तस्मिन् वा विवक्षिते काले, अन्यदा वा; तत्र वा विवक्षिते पुरुषे, अन्यत्र वा श्रवणयोग्यत्वात् श्रोत्रेणोपलभ्यते । अतः श्रोत्रोपलम्भयोग्यत्वेन श्रुतिसंज्ञत्वात् सर्वोऽप्यभिलापः श्रोत्रोपलब्धिरेव; इति न किञ्चिदवधारणं विरुध्यते । इति गाथाऽर्थः ॥१२५॥

किं सर्वोऽपि शेषेन्द्रियाक्षरलाभः श्रुतम्, आहोस्वित् कश्चिदेव ?, इत्याह-

सो वि हु सुयऽक्खराणं, जो लाभो तं सुयं मई सेसा ।
जइ वा अणक्खर चिय, सा सव्वा न प्पवत्तेज्जा ॥१२६॥

सोऽपि च शेषेन्द्रियाक्षरलाभः स एव श्रुतम्, यः किम् ?, इत्याह-यः श्रुताक्षराणां लाभः, न सर्वः, यः संकेतविषयशब्दानुसारी, सर्वज्ञवचनकारणो वा विशिष्टः श्रुताक्षरलाभः, स एव श्रुतम्,न त्वश्रुतानुसारी; ईहाऽपायाऽऽदिषु परिस्फुरदक्षरलाभमात्रमित्यर्थः । (जइ व त्ति) यदि पुनरक्षरलाभस्य सर्वस्याऽपि श्रुतेन क्रोडीकरणादनक्षरैव मतिरभ्युपगम्येत, तदा सा यथाऽवग्रहेहाऽपायधारणरूपा सिद्धान्ते प्रोक्ता, तथा सर्वाऽपि न प्रवर्तेत, सर्वाऽपि मतित्वं नानुभवेदित्यर्थः, किं त्वनक्षरत्वाद्यवग्रहमात्रमेव मतिः स्यात्, न त्वीहाऽऽदयः, तेषामक्षरलाभाऽऽत्मकत्वात् । तस्मात् श्रुतानुसार्येवाक्षरलाभः श्रुतम्, शेषं तु मतिज्ञानमिति गाथाऽर्थः ॥ १२६ ॥

तदेवं व्याख्याता भाष्यकृताऽपि "सोइंदिओवलद्धी" (११७) इत्यादिगाथा, साम्प्रतं त्वस्यां यः श्रुतविषयः पर्यवसितोऽर्थः प्रोक्तो भवति, तं संपिण्डयोपदर्शयति-

दव्वसुयं भावसुयं, उभयं वा किं कहं व होज्ज त्ति ।
को वा जावसुयं सो, दव्वाइसुयं परिणमेज्जा ? ॥१२७॥

इह "सोइंदियोवलद्धी" (११७) इत्येतस्यां गाथायां "मोत्तूणं दव्वसुयं" (११७) इत्यनेन पुस्तकाऽऽदिन्यस्तं द्रव्यश्रुतमुक्तम्,अक्षरलाभवचनात्तु भावश्रुतम्,श्रोत्रेन्द्रियोपलब्धिवचनेन तु शब्दः, तद् विज्ञाने चेत्युभयश्रुतमुक्तम् । तत्रानन्तरवक्ष्यमाणपूर्वगतगाथायामेतच्चिन्त्यते-किं तद् द्रव्याऽऽदिश्रुतम् ?, कथं वा तद्भवति ?, को वा कियान् वा इत्यर्थः, भावश्रुतस्यांशो भागो द्रव्यश्रुतं द्रव्यश्रुतरूपतया, आदिशब्दाद्वोभयश्रुतरूपतया वा परिणमेदिति गाथाऽर्थः ॥ १२७ ॥

का पुनरसौ पूर्वगतगाथा ?, इत्याह-

बुद्धिदिट्ठे अत्थे, जे भासइ तं सुयं मईसहियं ।
इयरत्थ वि होज्ज सुयं,उवलब्धिसमं जइ भणेज्जा ॥१२८॥

मतिश्रुतयोर्भेदोऽत्र विचार्यत्वेन प्रस्तुतः, इत्यतः केचिदेनां गाथां तदनुयायित्वेन व्याख्यानयन्ति; भाष्यकारस्तु तेनापि प्रकारेण पश्चाद् व्याख्यास्यति, साम्प्रतं प्रस्तावानुयायित्वेन तावद् व्याख्यायते-तत्र बुद्धिः श्रुतरूपेह गृह्यते, तया दृष्टा गृहीताः पर्यालोचिता बुद्धिदृष्टा अभिलाप्या अर्थाः पदार्थाः, ते च बहवः सन्ति, अतस्तन्मध्याद् वक्ता यान् जानाति वक्ति तद् श्रुतम् । कथं यान् जानाति ?, इत्याह-मतिः श्रुतोपयोगरूपा तत्सहितं यथा भवति । एवं यान् यावान् जानाति तत् श्रुतमुभयरूपमित्यर्थः । इदमुक्तं भवति-श्रुताऽऽत्मकबुध्युपलब्धानर्थान् तदुपयुक्तस्यैव वदतो द्रव्यश्रुतभावश्रुतरूपमुभयश्रुतं जायते, तद् श्रुतमित्युक्तेऽपि सामर्थ्यादुभयश्रुतं लभ्यते "जे भासइ" इत्यनेन शब्दरूपस्य द्रव्यश्रुतस्य सूचितत्वात् "बुद्धिदिट्ठे अत्थे" इत्यनेन "मइसहियं" इत्यनेन च भावश्रुतस्याऽभिधित्सितत्वादिति । तदेतावता "सोइंदिओवलद्धी" (११७) इत्यादिगाथोक्तस्य उभयश्रुतस्य स्वरूपमुक्तम्; यान् पुनः प्रथमं श्रुतबुद्ध्या दृष्टानपि पश्चादज्ञानत्वादेवानुपयुक्तो वक्ति, तद् द्रव्यश्रुतम्, इत्येतावद्गाथायामनुक्तमपि सामर्थ्याद् गम्यते; तथा यान् श्रुतबुद्ध्या पश्यत्येव, न तु मनसि स्फुरतोऽपि जानाति तद्भावश्रुतम्, इतीदमपि स्व-

यमेवावगन्तव्यम् । तदेतावता किं तद् द्रव्याऽऽदिश्रुतम् ?, कथं वा तद्भवति ?, इत्येवं चिन्तितम् । अथ-" को वा भावसुयं सो " (१२७) इत्यादि चिन्त्यते-तत्र भावश्रुतमुभयश्रुताद् द्रव्यश्रुताच्चानन्तगुणम्, एतस्मात् तु उभयश्रुतं द्रव्यश्रुतं चानन्ततमे भागे वर्तत इति भावनीयम्, वाचः क्रमवर्तित्वात्, आयुषश्च परिमितत्वात् सर्वेषामपि भावश्रुतविषयभूतानामर्थानामनन्ततममेव भागं वक्ता भाषत इति भावः । ततश्च भावश्रुतस्यानन्ततम एव भागो द्रव्यश्रुतत्वेन उभयश्रुतत्वेन च परिणमतीत्युक्तं भवति । एतच्च सर्वमनन्तरमेव भाष्यकारः स्वयमेव विस्तरतो भणिष्यति, इत्यलं विस्तरेण ।

आह-ननु यानुपयुक्तो भाषते तदुभयश्रुतम्, यस्त्वनुपयुक्तो वक्ति तद् द्रव्यश्रुतमित्युक्तम्; यस्तर्हि न भाषते, केवलं श्रुतबुद्ध्या पश्यत्येव, तत्राऽपि द्रव्यश्रुतरूपता, उभयश्रुतरूपता च किमिति नेष्यते ?, इत्याशङ्क्याऽऽह-" इयरत्थ वि " इत्याद्युत्तरार्द्धम् । " जे भासइ त च सुयं " इत्युक्ते तत्प्रतियोगिस्वरूपमभाष्यमाणावस्थाभावि भावश्रुतमेव इतरत्र शब्दवाच्यं भवति । ततश्चायमर्थः-द्रव्यश्रुतोभयश्रुताभ्यामितरत्राऽपि भावश्रुते भवेत् श्रुतम्-द्रव्यश्रुतरूपता, उभयश्रुतरूपता वा भवेदित्यर्थः । यदि किं स्याद् ?, इत्याह-उपलम्भनमुपलब्धिः, तत्समं तत्प्रमाणं यदि भणेत्--यावद्भस्तुनिकुरम्बमुपलभते तावत्सर्वमुपयुक्तोऽनुपयुक्तो वा यदि ब्रूयादित्यर्थः । एतच्च नास्ति, श्रुतोपलब्ध्या उपलब्धानामर्थानामनन्तत्वात्, वाचः क्रमवर्तित्वाद्, आयुषश्च परिमितत्वादिति । तस्मादभिलाप्यानां श्रुतोपलब्ध्या समुपलब्धानां भावानां मध्यात् सर्वेणापि जन्मना अनन्ततममेव भागं भाषते वक्ता, अतस्तस्यैवानुपयुक्तस्य वदतो द्रव्यश्रुतरूपता, उपयुक्तस्य तु वदत उभयश्रुतरूपता भवेत्, नेतरत्र भावश्रुते, भाषणस्यैवासंभवात् । इति पूर्वगतगाथार्थः ॥ १२८ ॥

तदेवं व्याख्याताऽस्माभिरियं गाथा,
साम्प्रतं भाष्यकारस्तद्व्याख्यानमाह-

जे सुयबुद्धिदिट्ठे, सुयमइसहिओ पन्नासई भावे ।
तं उभयसुयं भणइ, दव्वसुयं जे अणुवउत्तो ॥ १२९ ॥

गतार्थैव । नवरं सुखार्थं किञ्चिद् व्याख्यायते-श्रुतरूपा यका बुद्धिस्तया दृष्टाः पर्यालोचिता ये भावास्तन्मध्याद् " महसहियं" (१२८) इत्यस्य तात्पर्यव्याख्यानमाह-श्रुताऽऽत्मकमतिसहितः, श्रुतोपयुक्त इति यावत् । यान् भावान् प्रज्ञापयते तद् द्रव्यभावरूपमुभयश्रुतं भणयते । यान् पुनरनुपयुक्तो भाषते तद् द्रव्यश्रुतं, शब्दमात्रमेवेत्यर्थः । यस्तु श्रुतबुद्ध्या पर्यालोचयत्येव केवलम्, न तु भाषते, तद्भावश्रुतमित्यर्थाद् गम्यते । इति गाथार्थः ॥ १२९ ॥

उत्तरार्द्धव्याख्यानमाह-

इयरत्थ वि नावसुए, होज्ज तय तस्समं जइ भणिज्जा ।
न य तरइ तच्चियं सो, जमणेगगुणं तयं तत्तो ॥१३०॥

यद्भाषते तदुभयश्रुतं, द्रव्यश्रुतं वेत्युक्ते भावश्रुतमेवेतरत्र शब्दवाच्यं गम्यते । ततश्चेतरत्रापि भावश्रुते भवेत् तद् द्रव्यश्रुतमुभयश्रुतं वा, यदि तत्समसुपलब्धिसमं भणेत्, तच्च नास्ति, यस्माच्छ्रुतज्ञानी स्वबुध्या यावदुपलभते तावद्वक्तुं ' न तरति ' न शक्नोति । कुतः ?, इत्याह-यद् यस्मात् कारणात् ततो भाषाविषयीकृतात् श्रुतात् तदशक्यप्रज्ञापनीयं भावश्रुतमनेकगुणमनन्तगुणम्, अतो नोपलब्धिसमं भणतीति गाथार्थः ॥ १३० ॥

उपलब्धिसममित्येतस्य समासविधिमाह-

सह जवलद्धीए वा, जवलद्धिसमं तया व जं तुल्लं ।
जं तस्समकालं वा, न सव्वहा तरइ वोत्तुं जे ॥१३१॥

यद् भाषणमुपलब्ध्या सह वर्तते तदुपलब्धिसमम्, प्राकृतशैल्यानिपातनात् सहस्य समभावः, या या श्रुतोपलब्धिस्तया तया सह यद्भाषणं तदुपलब्धिसममित्यर्थः। (तया व जं तुल्लं ति) तया चोपलब्ध्या यत् तुल्यं समानं तदुपलब्धिसमम्-यावती काचित् श्रुतोपलब्धिस्तत्तुल्यं तत्संख्यं यद्भाषणं तद्भोपलब्धिसममित्यर्थः । (जं तस्समकालं वेति) तया उपलब्ध्या समकालं वा यद्भाषणं तदुपलब्धिसमम् । यथा मध्ये शूलं वेदयतस्तत्समकालमेवान्यस्मै तद्व्यथाकथनम्, एवमन्तः सर्वामपि श्रुतोपलब्धिमनुभवतस्तत्समकालमेव यद् भाषणं तद्वा उपलब्धिसममिति भावः । किं बहुना ?, सर्वथा सर्वस्मिन्नपि समासविधावयं तात्पर्यार्थः । कः ?, इत्याह-श्रुतज्ञानी यावत् श्रुतबुद्ध्या समुपलभते, तावत्सर्वं न तरति न शक्नोति वक्तुं (जे इति) अलङ्कारमात्रे । इति गाथार्थः ॥ १३१ ॥

(ए) अथ कथं पुनरन्ये एतां गाथां मतिश्रुतभेदार्थे व्याकुर्वन्ति ?, इत्याह-

केई बुद्धिदिट्ठे, मइसहिए नासओ सुयं तत्थ ।
किं सद्दो मइरुनयं, नावसुयं सव्वहा जुत्तं ॥ १३२ ॥

इह केचनाप्याचार्या मतिश्रुतयोर्भेदं प्रतिपिपादयिषवो "बुद्धिदिट्ठे अत्थे, जे भासइ " (१२८) इत्यादि मूलगाथायां बुद्धिः श्रुतबुद्धिरिति न व्याख्यानयन्ति, किं तु ' बुद्धिर्मतिरिति ' व्याचक्षते । ततश्च बुद्ध्या मत्या दृष्टेषु बहुष्वर्थेषु मध्ये काँश्चित् तदृष्टानर्थान्मतिसहितान् भाषमाणस्य श्रुतं भवति । आह-ननु मतिज्ञान्येव मतिसहितो भवति, तत्कथमर्थानां मतिसहितत्वं विशेषणम् ? । सत्यम्, किं तु मूलगाथायां " मइसहियं " (१२८) इति वचनान्मत्युपयोगे वर्तमानोऽत्र वक्ता गृह्यते, अतस्तस्य मत्युपयोगसहितत्वादर्थानामप्युपचारस्तत्तत्सहितत्वमुच्यते । तस्मान्मतिज्ञानदृष्टानर्थान् तदुपयुक्तस्यैव भाषमाणस्य श्रुतं भवतीति तात्पर्यम्; अनुपयुक्तस्य तु वदतो द्रव्यश्रुतम्, पारिशेष्याद्भाषमाणस्य पदार्थपर्यालोचनमात्ररूपं मतिज्ञानम्, इति मतिश्रुतयोर्भेदः । तदेवं कैश्चिन्मूलगाथायाः पूर्वार्द्धं व्याख्याते सूरिर्दूषणमाह-(तत्थ किंसद्दो इत्यादि) तत्र तैरेवं व्याख्याते भावश्रुतं सर्वथैवायुक्तं स्यात् सर्वथा तदभावः प्राप्नोतीत्यर्थः । तथाहि-किं भाष्यमाणः शब्दो भावश्रुतम्, मतिर्वा, उभयं वा ?, इति त्रयी गतिः । अस्य च त्रितयस्य मध्ये नैकमपि भावश्रुतं युक्तमिति भावः । इति गाथार्थः ॥ १३२ ॥

कथम् ?, इत्याह-

सद्दो वा दव्वसुयं, मइराभिण्णोहियं न वा उभयं ।
जुत्तं उभयाभावे, नावसुयं कत्थ तं किं वा ? ॥१३३॥

मत्युपयुक्तस्य शब्दमुदीरयतो यस्तावत् शब्दः स द्रव्यश्रुतमेव, इति कथं भावश्रुतं स्यात् ?, मतिस्त्वाभिनिबोधिकज्ञानम् । भवतु तर्हि मतिशब्दलक्षणमुभयं समुदितं भावश्रुतम्, इत्या-

इ-(न वा उभयं, जुत्तं ति) नैव यथोक्तमुभयं समुदितमपि भावश्रुतं युक्तम्, प्रत्येकावस्थायां तद्भावाभावात्, न हि प्रत्येकं सिकताकणेषु असत्तैलं समुदितावस्थायामपि भवतीति भावः । तदेवमुभयस्य स्वतन्त्रस्याऽस्वतन्त्रस्य वा भावश्रुतत्वेनाभावे सति तद् भावश्रुतं क्व शब्दाऽऽदौ ?, किं वा तत् ?, न किञ्चिदिति भावः । इति गाथार्थः ॥ १३३ ॥

अथ भाषापरिणतिकाले मतेः किमप्याधिक्यमुपजायते, इति उभयस्य श्रुतत्वं न विरुध्यते, इत्याह-

भासापरिणइकाले, मईए किमहियमहऽप्पहुत्तं वा ।
भासासंकप्पविसे-समेत्तओ वा सुयमजुत्तं ॥ १३४ ॥

मतेरन्तर्विज्ञानविशेषस्य भाषापरिणतिकाले शब्दप्रारम्भवेलायां पूर्वावस्थातः किमधिकं रूपं संपद्यते ?, येनोभयावस्थायां सा ज्ञानान्तरं स्यात्. श्रुतव्यपदेशः स्यादित्यर्थः । (महऽप्पहुत्तं वेति) अथवा-अन्यथात्वं किं मतेर्भाषापरिणतिकाले निर्मूलत एव अन्यथाभावः कः, येन श्रुतत्वं स्यात् ?, न कश्चिदिति भावः । भाषाऽऽरम्भ एवात्र विशेषः,इति चेत् ?, इत्याह-(भासेत्यादि) भाषायाः संकल्पः प्रारम्भः, स एव विशेषमात्रम्, मात्रशब्दो मनागपि विकारभवननिषेधार्थः, तस्माद् भाषासंकल्पविशेषमात्राद् मतेः श्रुतत्वमयुक्तम् । एतदुक्तं भवति-अन्तर्विज्ञानस्य स्वयमविशिष्टस्य बाह्यक्रियाऽऽरम्भादत्यन्तजातिभेदाभ्युपगमे धावनवल्गनकराऽऽस्फोटनाऽऽदिबाह्यक्रियाऽऽनन्त्यान्मतेरानन्त्यमेव स्यात्, स्वयं चाऽनुपजातविशेषाणां ज्ञानानां शब्दपरिणतिसन्निधानमात्रत एव ज्ञानान्तरत्वेऽतिप्रसङ्गः स्यात्, अवध्यादिष्वपि तथाप्रसेरिति गाथार्थः ॥ १३४ ॥

तदेवं केषाञ्चिद्विहितं मूलगाथायाः पूर्वार्द्धव्याख्यानं दूषितम्, अथोत्तरार्द्धव्याख्यानमुपदर्श्य दूषयितुमाह-

इयरत्थ वि भइनाणे, होज्ज सुयं ति किह तं सुयं होइ ? ।
किह व सुयं होइ मई,सलक्खणाऽऽवरणभेयाओ ॥१३५॥

" बुद्धिहिट्ठे अत्थे " (१२८) इत्यत्र बुद्धिर्यैर्मतिज्ञानं व्याख्यातम्, तन्मतेन " इयरत्थ वि होज्ज सुयं, जवहऽकिसमं जइ भणेज्जा । " (१२८) इत्युत्तरार्द्धगतस्य इतरत्रशब्दस्य मतिज्ञानमेव वाच्यम्, शब्दसहितमतेर्द्रव्यभावश्रुतत्वेनोक्तत्वात्, तदितरस्य मतिज्ञानस्यैव तत्र संभवात् । ततश्च तद्व्याख्यानमनूद्य दूषयति-इतरत्रापि मतिज्ञाने श्रुतं भवेद् यद्युपलब्धिसमं भाषेत, इति यदुच्यते, तदयुक्तम्, यतो हन्त ! यन्मतिज्ञानम्, तत्कथं श्रुतं भवितुमर्हति ?। श्रुतं चेत्, कथं वा तन्मतिर्भवेत् ?। कुतः पुनरित्थं न भवति ?, इत्याह-मतिश्रुतयोर्यत् स्वकीयं लक्षणम्, कर्म चाऽऽवारकम्, तयोर्भेदेनाऽऽगमे प्रतिपादनात्. यदि च यदेव मतिज्ञानं तदेव श्रुतम्, यदेव च श्रुतं तदेव मतिज्ञानं स्यात्, तदा लक्षणाऽऽवरणभेदोऽपि तयोर्न स्यादिति गाथार्थः ॥ १३५ ॥

तदेवम्-" बुद्धिहिट्ठे अत्थे, जे भासइ " (१२८) इत्यादि मूलगाथां मतिश्रुतभेदप्रतिपादनपरतया व्याचिख्यासोः परस्य मतिर्नावश्रुतं न युज्यत इति प्रतिपादितम् । यदि तु द्रव्यश्रुतं साऽभ्युपगम्यते तदा न दोषः, इत्युपदर्शयन्नाह-

अहव मई दव्वसुय-त्तमेइ जाएज्ज सा विरुज्झेज्जा ।
जो अमुयक्खरलाभो, तं भइसहिओ पभासेज्जा ॥ १३६ ॥

अथवा मतिर्द्रव्यश्रुतत्वमेतु आगच्छतु, न तत्र वयं निषेद्धारः, केवलमेतदेव निर्बन्धेनाभिदधो यदुत-भावेन ज्ञानश्रुतत्वेन सा मतिर्विरुध्येत दर्शितन्यायेन विरोधमनुभवेत्। इदमुक्तं भवति-" केई बुद्धिहिट्ठे, भइसहिए भासओ सुयं" (१३२) इत्यत्र गाथार्द्धे योऽसौ श्रुतशब्दः स यदि द्रव्यश्रुतवाचित्वेन व्याख्यायते तदा विरोधो न भवति । कथम ?, इति चेत्। उच्यते-बुद्धिर्मतिस्तद्दृष्टान् मत्युपयोगसहितानर्थान् भाषमाणस्य सा मतिः शब्दलक्षणस्य द्रव्यश्रुतस्य कारणत्वाद् द्रव्यश्रुतम्, अभाषमाणस्य तु मतिर्ज्ञानम्, इत्येवं मतिद्रव्यश्रुतयोर्भेदः प्रोक्तो भवति, न तु मतिश्रुतज्ञानयोः केवलं विरोधपरिहारमात्रमित्थमुपकल्पितं भवति । अत्राऽऽह कश्चित्-ननु यदि मत्युपयोगे वर्तमानो भाषेत कश्चित् , तदा द्रव्यश्रुतकारणत्वाद् मतिः स्याद् द्रव्यश्रुतम् , एतच्च न भविष्यति, इत्याह-(जो अमुएत्यादि) योऽश्रुतानुभाषार्थक्षरलाभः, तं मत्युपयोगे वर्तमानो भाषेत वक्ता, नाऽत्र कश्चित् संदेहः; यस्तु श्रुतानुसार्यक्षरलाभस्तं श्रुतोपयोगे एव वर्तमानो भाषेत, अतो न तच्छब्दस्य मतिः कारणम्, श्रुतपूर्वत्वात्तस्येति भावः । इदमुक्तं भवति-यः परोपदेशाद्दृष्टचनलक्षणं श्रुतमनुश्रित्याक्षरलाभोऽन्तः स्फुरति तं श्रुतोपयोगे एव वर्तमानो भाषेत, यस्त्वश्रुतानुसारी स्वमत्यैव पर्यालोचित ईहापायेषु स्फुरत्यक्षरज्ञानः, तं यदा मत्युपयोगसहित एव भाषते, तदा तस्य शब्दलक्षणस्य द्रव्यश्रुतस्य कारणत्वाद् भवत्येव मतिर्द्रव्यश्रुतम् । इति गाथार्थः ॥ १३६ ॥

अथास्मिन्नेव मतेर्द्रव्यश्रुतत्वपक्षे " इयरत्थ वि होज्ज सुयं" (१३८) इत्यादौ मूलगाथाया उत्तरार्द्धे योऽर्थः संपद्यते, तमाचार्यः प्रदर्शयन्नाह-

इयरम्मि वि भइनाणे, होज्ज तयं तस्समं जइ भणेज्जा ।
न य तरइ तत्तियं सो, जमणेगगुणं तयं तत्तो ॥१३७॥

भाषमाणस्य मतिर्द्रव्यश्रुतमित्युक्तम् , अतोऽभाषमाणावस्थायां मतिज्ञानमितरत्र शब्दवाच्यं भवति । ततश्चेतरत्राप्यभाषमाणावस्थाज्ञानीति मतिज्ञाने भवेत् तद् द्रव्यश्रुतं यदि तत्समं मतिज्ञानोपलब्धिसमं भणेत्, यावद् मतिज्ञानेनोपलभ्यते तावत्सर्वं वदेदित्यर्थः; एतच्च नास्ति । कुतः ?, इत्याह-(न य) नैव 'तरति' शक्नोति स यावन्मतिज्ञानेनोपलभ्यते तावद् वक्तुम । कुतः ?, इत्याह-यद् यस्मात् ततो वक्तुं शक्यात्तत्सर्वमपि मतिज्ञानोपलब्धमनेकगुणमनन्तगुणमिति गाथाऽर्थः ॥ १३७ ॥

अत्र विनेयः प्राऽऽह-

कह भइसुओवलद्धा, तीरंति न भासिउं बहुत्ताओ ।
सव्वेण जीविएण वि, भासइ जमणंतभागं सो ॥१३८॥

नन्वनन्तरगाथायां मत्युपलब्धाः सर्वेऽपि वक्तुं न शक्यन्त इत्युक्तम्, पूर्वं तु श्रुतोपलब्धा अपि सर्वेऽभिधातुं न पार्यन्त इत्यभिहितम्; तदेतत्कथम, यन्मतिश्रुतोपलब्धा नावा न तीर्यन्ते ज्ञापयितुम् ?। अत्राऽऽह-बहुत्वात्-प्राचुर्यात् । तत्रैतत् स्यात्-कुतः पुनरेतावद्बहुत्वं तेषां निश्चितम् ?, इत्याह-यद् यस्मात् कारणात् सर्वेणाऽप्यायुषा सः मतिश्रुतज्ञानी समुपलब्धानामर्थानामनन्ततममेव भागं भाषत इत्यागमे निर्णीतम्, तस्माद् बहुत्वावगमः । इति गाथार्थः ॥ १३८॥

अथ मत्याद्युपलब्ध्यर्थानां सामस्त्येनाभिधानाशक्यत्वे पूर्वोक्तम्, अपरमपि च हेतुं विषयविभागेनाभिधित्सुराह-

तीरंति न वोत्तुं जे, सुओवलद्धा बहुत्तजावाओ ।
सेसोवलद्धभावा, सा भव्व त्ति अणिहिया ॥१३९॥

सर्वेऽपि श्रुतोपलब्धा भावा न तीर्यन्ते न पार्यन्ते वक्तुम् । 'जे' इति पूर्ववदेव । कुतस्ते वक्तुं न पार्यन्ते ?, इत्याह-बहुत्वभावाद् बहुत्वसद्भावादेवेत्यवधारणीयम्, न तु तत्स्वाभाव्यादित्यभिप्रायः । (सेसोवलद्धभावा, सा भव्व त्ति) शेषं श्रुतादन्यत् प्रस्तुतं मतिज्ञानम्, समानवक्तव्यताप्रस्तावलब्धानि मत्यवधिमनःपर्यायकेवलानि वा शेषाणि, तेन तैर्वा उपलब्धा ज्ञाताः शेषोपलब्धाः, ते च ते भावाश्चेति समासः, स्वाभाव्यादेव अनभिलाप्याऽऽत्मकत्वादेव न तीर्यन्ते भाषितुम् । आह-नन्वेते यथाऽनभिलाप्यत्वादभिधातुं न शक्यन्ते, तथा बहुत्वादपि, तत् किमित्यनभिलाप्यस्वभावत्वमेवैकमत्र हेतुत्वेनोच्यते?; सत्यम्, किं त्वभिलाप्यत्वे सति बहुत्वाल्पत्वचिन्ता क्रियमाणा विभ्राजते, ये तु मूलत एवानभिलाप्यास्तेषु बहुत्वलक्षणो हेतुरुच्यमानोऽपि निष्फल एव, अनभिलाप्याऽऽत्मकत्वेनैवाभिधानाशक्यत्वस्य सिद्धत्वादिति । किं च-(बहुत्तओऽणिहिय त्ति) बहुत्वाच्छेषोपलब्धा भावा यथा वक्तुं न शक्यन्ते, तथा " कइ मइसुओवलद्धा, तीरंति न भासिउं बहुत्ताओ । " (१३८) इत्याद्यनन्तरगाथायामनिहिता एव, इति किं बहुत्वहेतूपन्यासेन ?, पौनरुक्त्यप्रसङ्गात् । शेषज्ञानेषु मध्ये मतिरेव सा तत्र प्रोक्तः, अत्र त्ववध्यादीन्यपि गृहीतानि सन्ति, अतस्तदर्थमयमिहापि वक्तव्य इति चेत्, नैवम्, मतेरुपलक्षणत्वेनावध्यादिष्वप्यसौ तत्र द्रष्टव्य इत्यदोषः । यद्येवम्, तर्हि श्रुतस्यापि बहुत्वलक्षणो हेतुः प्रागुक्त एव, किमितीह पुनरप्युच्यते ?, इति चेत् । सत्यम्, किं तु श्रुतोपलब्धा बहुत्वात्, शेषोपलब्धास्तु तत्स्वाभाव्यान्न शक्यन्ते अभिधातुम्, इति विषयविभागदर्शनार्थं तस्येह पुनरुपन्यासः । अपरस्त्वाह-ननु मत्याद्युपलब्धानामपि केषाञ्चिदभिलाप्यत्वात् किमुच्यते?-(सेसोवलद्धभावा,सा भव्व त्ति) सत्यम्, किं तु तेषां श्रुतविषयत्वेनैवाभिधानाशक्यत्वस्योक्तत्वाददोषः । इति गाथाऽर्थः ॥ १३९ ॥

विनेयः पृच्छति-

कत्तो एत्तियमेत्ता, भावसुयमईण पज्जया जेसिं ।
नामइ अणंतभागं, भणइ जम्हा सुएऽभिहियं ॥१४०॥

कुतः पुनरेतावन्तो ज्ञानश्रुतमत्योः पर्याया उपलब्धार्थविषया विशेषाः, येषां सर्वेणापि जन्मनाऽनन्तज्ञानमेव ज्ञापयत इति प्रागुक्तम् ?। अत्र गुरुराह-उच्यतेऽत्रोत्तरम्-यस्मात् सूत्रे आगमे वक्ष्यमाणमभिहितम्,तस्मात् तयोरेतावन्तः पर्यायाः । इति गाथाऽर्थः ॥ १४० ॥

किं तत्सूत्रेऽभिहितम् ?, इत्याह-

पण्णवणिज्जा जावा, अणंतभागो उ अणभिलप्पाणं ।
पण्णवणिज्जाणं पुण, अणंतभागो सुयनिबद्धो ॥ १४१ ॥

प्रज्ञाप्यन्ते प्ररूप्यन्त इति प्रज्ञापनीया वचनपर्यायत्वेन श्रुतज्ञानगोचरा इत्यर्थः । के ?, जावा ऊर्ध्वाधस्तिर्यग्लोकान्तर्निविष्टभूभवनविमानप्रहनक्षत्रतारकार्केन्द्वादयस्ते सर्वेऽपि मिलिताः । किम् ?, इत्याह-अनन्ततम एव भागे वर्तन्ते । केषाम्?, अत्राऽऽह-अनभिलाप्यानामर्थपर्यायत्वेनावचनगोचराऽऽपन्नानामित्यर्थः, अनभिलाप्यवस्तुराशेरभिलाप्यपदार्थसार्थः सर्वोऽप्यनन्ततम एव भागे वर्तत इत्यर्थः । प्रज्ञापनीयपदार्थानां पुनरनन्तभाग एव चतुर्दशपूर्वलक्षणे श्रुते निबद्धो भगवद्भिर्गणधरैः साक्षाद् ग्रथितः । इति गाथाऽर्थः ॥ १४१ ॥

कुतः पुनरेतद् विज्ञायते यदुत-प्रज्ञापनीयानामनन्तभाग एव श्रुतनिबद्धः ?, इत्याह—

जं चोद्दसपुव्वधरा, ठाणगया परोप्परं होंति ।
तेण उ अणंतभागो, पण्णवणिज्जाण जं सुत्तं ॥१४२॥

यद् यस्मात् कारणात् चतुर्दशपूर्वधराः षट्स्थानपतिताः परस्परं भवन्ति, हीनाधिक्येनेति शेषः । तथाहि-सकलाभिलाप्यवस्तुवेदितया य उत्कृष्टः चतुर्दशपूर्वधरः, ततोऽन्यो हीनहीनतराऽऽदिः, आगमे इत्थं प्रतिपादितः । तद्यथा-" अणंतभागहीणे वा, असंखेज्जभागहीणे वा, संखेज्जभागहीणे वा, संखेज्जगुणहीणे वा, असंखेज्जगुणहीणे वा, अणंतगुणहीणे वा । " यस्तु सर्वस्तोकाऽभिलाप्यवस्तुज्ञायकतया सर्वजघन्यः, ततोऽन्य उत्कृष्ट उत्कृष्टतराऽऽदिरप्येवं प्रोक्तः । तद्यथा-"अणंतभागब्भहिए वा, असंखेज्जभागब्भहिए वा, संखेज्जभागब्भहिए वा, संखेज्जगुणब्भहिए वा, असंखेज्जगुणब्भहिए वा, अणंतगुणब्भहिए वा । " तदेवं यतः परस्परं षट्स्थानपतिताः चतुर्दशपूर्ववेदिनः, तस्मात् कारणाद् यत्सूत्रं चतुर्दशपूर्वलक्षणं तत् प्रज्ञापनीयानां भावानामनन्तभाग एवेति । यदि पुनर्यावन्तः प्रज्ञापनीया भावास्तावन्तः सर्वेऽपि सूत्रे निबद्धा भवेयुः, तदा तद्वेदिनां तुल्यतैव स्यात्, न षट्स्थानपतितत्वमिति भावः । इति गाथाऽर्थः ॥ १४२ ॥

आह-ननु यदि सर्वेऽपि चतुर्दशपूर्ववेदिनः, तर्हि कथं तेषां परस्परं हीनाऽऽधिक्यम् ?, इत्याह-

अक्खरलंभेण समा, ऊणऽहिया होंति मइविसेसेहिं ।
ते वि अ मईविसेसे, सुयनाणऽब्भंतरे जाण ॥ १४३ ॥

चतुर्दशपूर्वगतसूत्रलक्षणेनाक्षरलाभेन समास्तुल्याः सर्वेऽपि चतुर्दशपूर्ववेदिनः, ऊनाधिकास्ते मतिविशेषैर्भवन्ति क्षयोपशमवैचित्र्याद् यथोक्ताक्षरलाभानुसारिभिरेव तैस्तैर्गम्यार्थविषयैर्वैचित्र्यैर्बुद्धिविशेषैर्हीनाधिका भवन्तीत्यर्थः । इह च मतिशब्दोपादानविभ्रमात् ते मतिविशेषा मा भूवन्नाभिनिबोधिकज्ञानविशेषाः, इत्यत आह-' ते वि येत्यादि ' । इदमुक्तं भवति-मतिशब्देनेह श्रुतमतिरेवोक्ता, न त्वाभिनिबोधिकमतिः । ततश्च येऽपि चतुर्दशपूर्ववेदिनो हीनाधिकास्तानपि च मतिविशेषान् श्रुतज्ञानाभ्यन्तरे जानीहि श्रुतज्ञानान्तर्भाविन एव विद्धि, न त्वाभिनिबोधिकान्तर्वर्तिन इति भावः । यद्येवम् " ते वि य मईविसेसे, सुयनाणं चेव जाणाहि । " इत्येवमेव प्रगुणे कस्मादुक्तम्, किमभ्यन्तरशब्दोपादानक्लेशेन ? । नैतदेवम्, अस्याऽपि न्यायस्य दृष्टत्वाद्, अङ्गाभ्यन्तराऽऽदिव्यपदेशवद्.यथा ह्यङ्गमेवाङ्गाभ्यन्तरम्, एवं श्रुतमेव श्रुताभ्यन्तरमित्युक्तं भवति । अथवा-छन्दोऽङ्गभयादभ्यन्तरग्रहणं, यदि वा-" सुयनाण- " इत्यनेन चतुर्दशपूर्वलक्षणं श्रुतमधिक्रियते,तत्रश्च तानपि गम्यान् मतिविशेषाँश्चतुर्दशपूर्वाक्षरलाभरूपस्य श्रुतस्यैवाभ्यन्तरे जानीहि त्वम्, न व्यतिरिक्तानिति शिष्योपदेशः, चतुर्दशभिरपि हि पूर्वैः कश्चित् साक्षात्, कश्चिच्च गम्यतया सर्वोऽप्यभिलाप्य

पदार्थोऽभिधीयत एव; ततश्च गम्या अपि मतिविशेषास्तदन्तर्भाविन एव, तदनुसारित्वादिति गाथाऽर्थः ॥१४३॥

चतुर्दशपूर्वविदक्षरश्रुतानुसारित्वेन यदेतद् मतिविशेषाणां तदन्तर्भावित्वमुक्तम्, तदेव समर्थयन्नाह-

जे अक्खरानुसारे-ण मइविसेसा तयं सुयं सव्वं ।
जे जण सुयनिरवेक्खा, सुद्धं चिय तं मइन्नाणं ॥१४४॥

ये अक्षरानुसारेण श्रुतग्रन्थमनुसृत्य जायन्ते मतिविशेषाः तत्सर्वं श्रुतमेव,इत्यसकृदुक्तम् । ये तु यथोक्तश्रुतनिरपेक्षाः स्वयमेवोत्प्रेक्षितवस्तुतत्त्वा मतिविशेषाः समुत्पद्यन्ते तच्छुद्धं मतिज्ञानमेव,इत्येतदप्यनेकधा प्राग्प्यभिहितम् । तस्माच्चतुर्दशपूर्वगताक्षरानुसारेण जायमानाः प्रस्तुतमतिविशेषाः सर्वे श्रुतमेवेति गाथाऽर्थः ॥ १४४ ॥

(१०) तदेवं द्रव्यश्रुताऽऽदिश्रुतस्वरूपप्रतिपादनप्रकारेण " बुद्धिहिट्ठे अत्थे जे भासइ" (१२८) इत्यादि मूलगाथां व्याख्याय "केई बुद्धिहिट्ठे,मइसहिए भासओ" (१३२) इत्यादिना दर्शितमपि विशेषदूषणाऽभिधित्सया पुनरपि मतान्तरमुपदर्शयन्नाह-

केइ अभासिज्जंता, सुयमणुसरओ वि जे मइविसेसा ।
मन्नंति ते मइ चिय, भावसुयाभावओ तन्नो ॥ १४५ ॥

केचिद् व्याख्यातारः (मन्नंति ते मइ चिय त्ति) तान् मतिविशेषान् श्रुतमनुसरतोऽपि मतिरेवेति मन्यन्ते । ये किम् ?, इत्याह-येऽभाष्यमाणाः, येषु शब्दप्रवृत्तिर्नास्तीत्यर्थः । श्रुतानुसारिणोऽपि मतिविशेषा ये प्रवृत्तिरहिताः केवलं हृद्येव विपरिवर्तन्ते, ते मतिज्ञानमेवेति केचिद् मन्यन्त इति भावः । तदेतद् न । कुतः ?,इत्याह-भावश्रुताभावप्रसङ्गात्, तदभावश्च " किं सद्दो मइरूवयं, नावसुयं सव्वहा जुत्तं । (१३२) " "सद्दो ता दव्वसुयं, मइरामिणिबोहियं न वा उभयं । " (१३२) इत्यादि पूर्वोक्तग्रन्थाद् भावनीयम् । इति गाथाऽर्थः ॥ १४५ ॥

किं च-

किंह मइसुयनाणविऊ, उट्ठाणगया परोप्परं होज्जा ।
नासिज्जंतं मोत्तुं, जइ सव्वं सेसयं बुद्धी ॥ १४६ ॥

यदि भाष्यमाणं मुक्त्वा शेषकं सर्वमपि बुद्धिर्मतिज्ञानमित्यर्थः, तर्हि मतिश्रुतज्ञानाभ्यां विदन्तीति मतिश्रुतज्ञानवेदिनः परस्परं स्वस्थाने परस्थाने च कथं षट्स्थानपतिताः स्युः ?,न कथञ्चिदित्यर्थः । तथाहि-सर्वेणापि जन्मना मतिश्रुतोपलब्धानामर्थानामनन्तभाग एव भाष्यत इति प्रागेवोक्तम् । ततश्च मतिज्ञानी श्रुतज्ञानिनः सकाशात् सदैवानन्तगुणाधिकः, श्रुतज्ञानी त्वितरस्मान्नित्यमनन्तगुणहीन एव प्राप्नोति, इति न तावत्परस्थाने षट्स्थानपतितत्वम् । स्वस्थानेऽपि श्रुतज्ञानी अन्यस्मात् श्रुतज्ञानिनः संख्यातेनैव हीनोऽधिको वा स्यात्, न त्वसंख्यातेन,अनन्तेन वा,भाषकचतुर्दशपूर्वविदां संख्येयवर्षाऽऽयुष्कत्वेन असंख्येयस्यानन्तस्य वा भाषणस्यैवासंभवादिति । अस्यैव च विशेषदूषणस्याभिधानार्थं पुनरत्रेदं मतान्तरमुपन्यस्तम् । अन्यथा हि-" केई बुद्धिहिट्ठे, मइसहिए भासओ सुयं (१३२) " इत्यादिना सर्वमिदं प्रागभिहितमेवेति गाथाऽर्थः ॥ १४६ ॥

तदेवं "बुद्धिहिट्ठे अत्थे" (१२८) इत्यादिपूर्वगतगाथाश्रुतस्वरूपाभिधायिना प्रकारेण व्याख्याता, मतिश्रुतयोश्च भेदस्य व्याख्येयत्वेन प्रस्तुतत्वात्तदभिधायकत्वेनाऽपि मतान्तरेण व्याख्याता, तच्च व्याख्यानमयुक्तत्वाद् दूषितम् । अथाऽऽत्माऽभिमतेन निरवद्यमतिश्रुतभेदप्रकारेणैतां व्याख्यातुमाह-

सामन्ना वा बुद्धी, मइसुयनाणाइँ तीएँ जे दिट्ठा ।
भासइ संजवमित्तं, गहियं न उ नासणामित्तं ॥१४७॥
मइसहियं भावसुयं, तं नियमन्नासओ वि मइरन्ना ।
मइसहियं ति जमुत्तं, सुओवउत्तस्स भावसुयं ॥१४८॥

स्वविहितप्रथमव्याख्यानापेक्षया वाशब्दो यदि वेत्यर्थः, " बुद्धिहिट्ठे अत्थे (१२८) " इत्यत्र येयं बुद्धिः, असौ सामान्या गृह्यते, ततः किम् ?, इत्याह-(मइसुयनाणाइं ति) मतिश्रुतज्ञाने द्वे अपि बुद्धिरिहेत्यर्थः, तया बुद्धिश्रुतज्ञानाऽऽत्मिकया बुद्धया ये दृष्टा भावास्तेषु मध्ये यान् भाषते तद्भावश्रुतमित्युत्तरगाथायां संबन्धः । भाषत इत्यत्र च भाषणस्य संभवमात्रं गृहीतम्, न तु भाषणमात्रम् । ततश्चेदमुक्तं भवति-तत्रान्यत्र वा देशे, तदाऽन्यदा वा काले, स चान्यो वा पुरुषः, सति सामग्रीसंभवे निश्चयेनैतान् भाषत एव, इत्येवं यान् भावानन्तर्विकल्पे प्लवमानान् भाषणयोग्यतायां व्यवस्थापयति, ते ऽभाष्यमाणा अपि भाषणयोग्याः सन्तो भावश्रुतं भवन्ति, न तु भाष्यमाणा एवेति भावः । एवं च सति मत्युपलब्धानामनभिलाप्यानामर्थानां भाषणायोग्यत्वाद्भावश्रुतत्वमपाकृतं भवति । भाषणयोग्यानां त्वभाष्यमाणानामपि सर्वेषां विकल्पप्रतिभासिनामर्थानां भावश्रुतत्वमावेदितं भवति ॥ १४७ ॥ अत एव पर्यवसितमर्थं द्वितीयगाथायामाह-नियतं निश्चितं तद्भावश्रुतमभाषमाणस्याऽपि भवति, योग्यतामात्रेणैव भाषणस्य गृहीतत्वादिति भावः । आह-ये सामान्यबुद्धिदृष्टा अर्था ये भाषणयोग्याः, यदि तेषां भावश्रुतत्वम्, तर्हि मतिज्ञानान्तर्वर्त्यपायविकल्पावबोधिनामपि तत्प्रसङ्गः, न हि तेऽपि न भाषणयोग्याः, इत्याशङ्क्याऽऽह-" मतिसहितमिति । " अस्य व्याख्यानमाह-(मइसहियं तीत्यादि) मतिसहितमिति यदुक्तं तस्य कस्तात्पर्यार्थः ?, इत्याह-श्रुतोपयुक्तस्यैव भाषमाणस्य, अभाषमाणस्य वा भावश्रुतं भवति, नान्यस्य । इदमुक्तं भवति-मतिसहितमिति श्रुतमतिसहितं यथा भवति, एवं यान् भाषते त एव भावश्रुतम्, नान्ये, ततश्च श्रुतोपयुक्तस्यैव भाषणयोग्यानर्थान् विकल्पयतो भावश्रुतं सिद्धं भवति । एवं च सति श्रुतानुसारित्वाभावेन श्रुतोपयुक्तत्वस्याऽसंभवाद् मतिविकल्पस्य भाषणयोग्यत्वे सत्यपि कुतो भावश्रुतत्वम् ?, इति । आह-ननु सामान्या बुद्धिरिह गृहीता, श्रुतोपयुक्तत्वे च गृह्यमाणे कथं मतिदृष्टत्वमर्थानां संभवति ?, श्रुतबुद्धिदृष्टत्वस्यैव तत्र संभवात् । नैतदेवम, मतिपूर्वं हि श्रुतम्, ततो यत्र श्रुतबुद्धिदृष्टत्वं तत्र मतिदृष्टत्वमस्त्येव, इति न काचित् क्षतिः, इत्यलमतिचर्चितेन । तदेवं श्रुतज्ञानोपयुक्तः सामान्यबुद्धिदृष्टानर्थान् संभवतो यान् भाषते तद्भावश्रुतमिति स्थितम् । नन्वर्थानां कथं भावश्रुतत्वम् ?, ज्ञानस्यैव तत्संज्ञत्वात् । सत्यम्, किं तु विषयविषयिणोरभेदोपचाराद् भावश्रुते प्रतिज्ञासमाना अर्था अपि भावश्रुतम्, इत्यदोषः । (मइरन्न त्ति) यथोक्तद्भावश्रुताद्भिन्ना व्यतिरिक्ता मतिरूह्या । इदमुक्तं भवति-येऽनभिलाप्या अपि

सन्तो घटाऽऽदयः श्रुतानुसारित्वान्नाभेन श्रुतोपयुक्तेन विकल्प्यन्ते, ये चाऽर्थपर्यायत्वेन वाचकध्वनेरभावाद् मूकत एवाभिधापितुमशक्या अनभिलाप्याः, ते यस्यां विकल्पौ प्रतिभासन्ते, सा मतिरित्यवगन्तव्या, न तु श्रुतम्, अभिलाप्यवस्तुविषयायां श्रुतानुसारित्वाभावाद्, अनभिलाप्यवस्तुविषयायां तु भाषणायोग्यत्वादिति गाथाद्वयार्थः ॥ १४८ ॥

अथेष्टतोऽवधारणविधिमुपदर्शयन्नाह—

जे भासइ चेय तयं, सुयं तु न तु भासओ सुयं चेव ।
केइ मइए वि दिट्ठा, जं दव्वमुयत्तमुवयंति ॥१४९॥

" बुद्धिदिट्ठे अत्थे, जे भासइ " (१२८) इत्यत्र यान् कदाचित् संभवमात्रेण भाषत एव तत् श्रुतमित्येवमेवावधारणीयम्, न तु भाषमाणस्य श्रुतमेवेति यान् भाषते तत् श्रुतमेवेत्येवं नावधार्येत इत्यर्थः । कुतः ?, इत्याह-यद् यस्मात् कारणात् केचिदभिलाप्याः पदार्था मत्याऽपि दृष्टा अवग्रहेणावगृहीताः, ईहया त्वीहिताः, अपायविकल्पेन तु निश्चिता इत्यर्थः, द्रव्यश्रुतत्वमुपयान्ति, शब्दलक्षणेन द्रव्यश्रुतेन भाष्यन्त इत्यर्थः । यदि च भाषमाणस्य श्रुतमेवेत्यवधार्येत, तदा एषामपि श्रुतत्वं स्यात्, न चैतदिष्यते, श्रुतानुसारित्वाभावेन श्रुतोपयुक्तत्वस्य तेष्वसंभवात्, तस्माद् यथोक्तमेवावधारणमिति गाथाऽर्थः ॥ १४९ ॥

अथ यथोक्तव्याख्यानलब्धमतिश्रुतभेदोपदर्शनपूर्वकमुपसंहरन्नाह-

एवं धणिपरिणामं, सुयनाणं उज्जयहा मइन्नाणं ।
जं निन्नसहावाइं, ताइं तो भिन्नरूवाइं ॥ १५० ॥

एवं प्रागुक्तप्रकारेण केवलाऽभिलाप्यार्थविषयत्वात् सर्वमपि श्रुतज्ञानं ध्वनिपरिणाममेव, ध्वनेः शब्दस्य परिणमनं विपरिवर्तनं परिणामो यत्र तद् ध्वनिपरिणामं भवत्येव, श्रुतानुसारित्वेनोत्पन्नमेव ह्येतदिष्यते, श्रुतं च संकेतकालभाविपरोपदेशरूपः, श्रुतग्रन्थरूपश्च द्विविधः शब्दोऽत्राधिकृतः, तदनुसारेण चोत्पन्ने ज्ञाने ध्वनिपरिणामो भवत्येवेति । मतिज्ञानं तूभयथाऽपि भवति-शब्दपरिणामम्, अशब्दपरिणामं च, अभिलाप्यानभिलाप्यपदार्थविषयं ह्येतत् । ततश्च श्रुतानपेक्षत्वमत्यैव विकल्प्यमानेष्वभिलाप्येषु ध्वनिपरिणामोऽस्मिन्नपि प्राप्यते । अनभिलाप्यविषयतायां तु नाऽसौ तत्र लभ्यते । अनभिलाप्यपदार्था हि स्वयमेव बुद्ध्यमाना अपि वाचकध्वनेरभावाद्विकल्पयितुं, परस्मै प्रतिपादयितुं वा न शक्यन्ते, यथा नालिकेरद्वीपाऽऽयातस्य वल्लघादयः क्षीरेक्षुगुडशर्कराऽऽदिमाधुर्यतारतम्याऽऽख्यो वा;इति कुतस्तद्विषतायां ध्वनिपरिणामः ?। अभिलाप्यपदार्थेभ्योऽनन्तगुणाश्चानभिलाप्याः सन्ति, ततोऽभिलाप्यानभिलाप्यवस्तुविषयत्वात् शब्दाशब्दपरिणामं मतिज्ञानमिति स्थितम् । अथोपसंहरति-(तो त्ति) तस्मात् मतिश्रुते स्वामिकालाऽऽदिभिरविशेषेऽपि भिन्नरूपे वेदवती मन्तव्ये । कुतः ?, इत्याह-यद् यस्मात् कारणाद् ते अपि भिन्नस्वभावे, उक्तन्यायेनैकस्य ध्वनिपरिणामित्वात्, अपरस्य तूभयस्वभावत्वादिति गाथाऽर्थः ॥ १५० ॥

तदेवं मूलगाथायाम्-" बुद्धिदिट्ठे अत्थे, जे भासइ तं सुयं मईसहियं । " (१२८) इत्येतत् पूर्वार्द्धम्-" सामन्ना वा बुद्धी " (१४७) इत्यादिना व्याख्यातम् । अथ-"इयरत्थ वि होज्ज सुयं, उवलद्धिसमं जइ भणेज्जा । " (१२८) इत्येतदुत्तरार्द्धं व्याचिख्यासुराह-

इयर त्ति मइन्नाणं, तओ वि जइ होइ सद्दपरिणामो ।
तो तम्मि वि किं न सुयं, भासइ जं नोवलद्धिसमं ? ।१५१।

" इयरत्थ वि होज्ज सुयं, " (१२८) इति मूलगाथोत्तरार्द्धे इतरशब्दस्य किं वाच्यम् ?, इत्याह-इतरदिति मतिज्ञानं तत्राऽभिसंबध्यते, इत्याचार्येणोक्ते परः प्राऽऽह-(तओ वि जइ होइ सद्दपरिणामो । तो तम्मि वि किं न सुयं ति) तत इति सप्तम्यन्तात्तस्प्रत्ययः, ततश्च-" उभयहा मइन्नाणं " (१५०) इति वचनाद् यदि तस्मिन्नपि मतिज्ञाने शब्दपरिणामो भवति, ततस्तस्मिन्नपि किं न श्रुतं-तदपि भावश्रुतरूपतां किं न प्रतिपद्यते ? इत्यर्थः, शब्दपरिणामस्य श्रुतत्वेन उक्तत्वादिति भावः । अत्राऽऽचार्य उत्तरमाह—(भासइ जं नोवलद्धिसमं ति) यद् यस्मात् कारणादुपलब्धिसमं मतिज्ञानी न भाषते, ततो न मतिज्ञानस्य श्रुतरूपतेति गाथाऽर्थः ॥ १५१ ॥

कथं पुनरुपलब्धिसममसौ न भणति ?, इत्याह-

अभिलप्पाऽणभिलप्पा, उवलद्धा तस्समं च नो भणइ ।
तो होउ उभयरूवं, उभयसहावं ति काऊणं ॥१५२॥

प्रागुक्तन्यायेन अभिलाप्यानभिलाप्याः पदार्था मतिज्ञानोपलब्धाः, एवंभूतोपलब्ध्या च समं भणितुं न शक्नोत्येव, अनभिलाप्यानां सर्वैरेव वक्तुमशक्यत्वादिति भावः । अत्र परः प्राऽऽह—(तो होउ इत्यादि) ततस्तर्हि भवतु मतिज्ञानमुभयरूपं श्रुतमतिरूपम् । कुतः ?, इत्याह—उभयस्वभावमिति कृत्वा, अभिलाप्यानभिलाप्यवस्तुविषयत्वेन द्विस्वभावत्वादित्यर्थः । इदमुक्तं भवति-यदभिलाप्यपदार्थात् उपलभते भाषते च, तत् श्रुतज्ञानमस्तु, अनभिलाप्यपदार्थास्तु भाषणायोग्यान् यदवगच्छति, तन्मतिज्ञानं भवति । इति गाथाऽर्थः ॥ १५२ ॥

अत्रोत्तरमाह—

जं नासइ तं पि जओ, न सुयाऽऽदेसेण किं तु समईए ।
न सुओवलद्धितुल्लं,ति वा जओ नोवलद्धिसमं ॥१५३॥

यदपि किञ्चिदभिलाप्यवस्तूपलब्धं मतिज्ञानी भाषते तदपि यतो न श्रुताऽऽदेशेन, किं तु स्वमत्या, अतो न तत् श्रुतमिति । इदमुक्तं भवति-परोपदेशः, श्रुतग्रन्थश्च श्रुतमिहोच्यते, तदादेशेन तु तदनुसारेण विकल्प्य यदा भाषते, तदा श्रुतोपयुक्तस्य भाषणात् श्रुतमुपपद्यत एव; यत्र तु स्वमत्यैव पर्यालोच्य भाषते न तु श्रुतानुसारेण, तत्र श्रुतोपयुक्तत्वाभावान्मतिज्ञानमेव । तदेवम्-" भासइ जं नोवलद्धिसमं " (१५१) इत्यस्य गाथाऽवयवस्य " अभिलप्पाणभिलप्पा, उवलद्धा " (१५२) इत्यादिना व्याख्यानं कुर्वताऽऽचार्येण मतिज्ञानी मतिज्ञानोपलब्ध्या समं न भाषते, अतस्तत्रोपलब्धिसमं भाषणं न भवति, इत्यतो न मतिज्ञाने श्रुतरूपतेत्युक्तम्; श्रुतज्ञानी त्वभिलाप्यानुपलब्धेऽपि भाषते, ताँश्च भाषतेऽतस्तत्रैवोपलब्धिसमत्वस्य सद्भावात् श्रुतरूपतेति भावः । साम्प्रतं तु मतिज्ञानी श्रुतोपलब्ध्या तुल्यं समं न भाषते, इत्येवमुपलब्धिसमत्वाभावमुपदर्शयन्नाह-(न सुओवलद्धीत्यादि) वाशब्दः प्रकारान्तरद्योतकः, ततश्च न श्रुतोपलब्ध्या तुल्यं मतिज्ञानी भाषत

इति वा,यतो यस्मात् कारणात् नोपलब्धिसमं मतिज्ञानिनो भाषणम्, तस्मान्न तत्र श्रुतरूपता। इदमुक्तं भवति-श्रुतोपलब्धौ परोपदेशार्हद्वचनलक्षणश्रुतानुसारेणोपलब्धानर्थान् भाषते, मत्युपलब्धौ तु तदुपलब्धानेव, इत्यतो न मतिज्ञानिनो भाषणं श्रुतोपलब्धिसमम्, ततश्च न तत्र श्रुतसंभवः । इति गाथार्थः ॥ १५३ ॥

तदेवम्-" सोइंदिओवलद्धी होइ सुयं " (११७) इत्यादिमूलगाथया तत्त्वतः श्रोत्रेन्द्रियविषयमेव श्रुतज्ञानम्, सर्वेन्द्रियविषयं च मतिज्ञानमित्येवं मतिश्रुतयोर्भेदः प्रतिपादितः; तत्प्रतिपादनक्रमे च " बुद्धिट्ठे अत्थे, जे भासइ " (१२७) इत्यादिगाथा समायाता, सा च द्रव्य-भावोभयश्रुतरूपाऽभिधायकत्वेन मतिश्रुतयोर्भेदाऽभिधानपरतया च व्याख्याता, तद्व्याख्याने चावसिते इन्द्रियविभागादपि मतिश्रुतयोर्भेदः ।

साम्प्रतं वल्कशुम्बोदाहरणात्तमभिधित्सुराह-

अन्ने मन्नंति मई, वग्गसमा सुंबसरिसयं सुत्तं ।
दिट्ठंतोऽयं जुत्तिं, जहोवणीओ न संसहइ ॥ १५४ ॥

अन्ये केचनाप्याचार्या मन्यन्ते । किम ?, इत्याह-वल्कसमा वल्कसदृशी मतिः, ततः सैव यदा शब्दतया संदर्भिता भवति-तज्जनितो यदा शब्द उत्तिष्ठतीत्यर्थः, तदा तदुत्थशब्दसहिता श्रुतमुच्यते, तच्च शुम्बसदृशं वल्कजनितदवरिकातुल्यं श्रुतं भवति, एवं तदभ्युपगमः शोभन इति चेत्, नैवमित्याह-(दिट्ठंतोऽयमित्यादि) अयं वल्कशुम्बदृष्टान्तो यथा तैरुपनीतः-लक्षप्रकारेण प्रकृते योजितः, तथा युक्तिं न सहते-न क्रमते, अन्यथा त्वस्मदभिमतवक्ष्यमाणप्रकारेणोपनीयमान एषोऽपि युक्तिक्षमो भविष्यतीति भावः । इति गाथार्थः ॥ १५४ ॥

कुतो न संसहते ?, इत्याह-

भावसुयाभावाओ, संकरओ निव्विसेसभावाओ ।
पुव्वुत्तलक्खणाओ, सलक्खणाऽऽवरणभेयाओ ॥१५५॥

नैष दृष्टान्तो युक्तिं क्रमत इति सर्वत्र साध्यम्, मतेरनन्तरं शब्दमात्रस्यैव भावेन भावश्रुतस्याभावप्रसङ्गात् । अथ मतिसहितोऽयं शब्दो न केवल इति तत्र भावश्रुतत्वं भविष्यति । तदयुक्तम् । कुतः ?, इत्याह-संकरः साङ्कर्यम्, संकीर्णत्वम्, मिश्रत्वमिति यावत्, मतिश्रुतयोस्तस्य प्राप्तेः । निर्विशेषभावाद् वा-यदेव मतिज्ञानम्, तदेव भावश्रुतमिति प्रतिपादनादेकमेव किञ्चित्स्यात्, नोभयमिति भावः । अस्तु विशेषाभाव इति चेत्, नैवम् । कुतः ?, इत्याह-स्वलक्षणाऽऽवरणभेदात् । कथम्भूतात् ?, इत्याह-पूर्वोक्तलक्षणात् "किह व सुयं होइ मई, सलक्खणाऽऽवरणभेयाओ । " (१३५) इति पूर्वाभिहितगाथाऽवयवोक्तस्वरूपात् । इदमुक्तं भवति-अभिनिबुध्यत इत्याभिनिबोधिकम्, श्रूयत इति श्रुतम्, इत्यादिकं मतिश्रुतयोर्यत् स्वकीयं स्वकीयं लक्षणम्, आवारकं च कर्म,तयोर्भेदात् पूर्वाऽभिहितस्वरूपाद् मतिश्रुतयोर्निर्विशेषभावो न युज्यते । यदि हि तयोर्निर्विशेषता एकत्वं स्यात्, तदा लक्षणभेदः, आवरणभेदश्च पूर्वोक्तस्वरूपो न स्यादिति भावः । इति गाथार्थः ॥ १५५ ॥

अथ द्रव्यभावश्रुतयोरनेन दृष्टान्तेन भेदः प्रतिपाद्यते, सोऽपि न युक्तः, इति दर्शयन्नाह-

कप्पेज्ज व सो भा-वदव्वसुत्तेसु तेसु वि न जुत्तो ।
मइसुयभेयावसरे, जम्हा किं सुयविसेसेणं ? ॥ १५६ ॥

यदि वा भावद्रव्यश्रुतयोः सः-वल्कशुम्बोदाहरणाद् भेदः कल्पेत-भावश्रुतं हि कारणत्वात् किल वल्कसदृशम्, शब्दलक्षणं तु द्रव्यश्रुतं कार्यत्वात् शुम्बप्रतिमम्, इत्येवमनयोर्भेद इष्येतेति भावः । तयोरप्यसौ न युक्तः । कुतः ?, इत्याह-यस्मान्मतिश्रुतयोर्भेदाभिधानेऽवसरप्राप्ते (किं सुयविसेसेणं ति) श्रुतयोर्द्रव्यभावश्रुतलक्षयोर्विशेषो भेदः श्रुतविशेषस्तेनाऽभिहितेन किम ?, असंबद्धत्वान्न किञ्चिदित्यर्थः । इति गाथार्थः ॥१५६॥

अथान्यथा परामिप्रायमाशङ्कमानः प्राऽऽह-

असुयऽक्खरपरिणामा, व जा मई वग्गकप्पणा तम्मि ।
दव्वसुयं सुंबसमं, किं पुण तोसिं विसेसेणं ? ॥ १५७ ॥

श्रुतानुसार्यक्षरपरिणामो यस्यां सा श्रुतानुसार्यक्षरपरिणामा, न तथा-श्रुतानुसारित्वरहितशब्दमात्रपरिणामान्विता या मतिरित्यर्थः । तस्यां वा वल्ककल्पना क्रियते, तज्जनितशब्दरूपं तु द्रव्यश्रुतं शुम्बसदृशम्, अतस्तयोः प्रस्तुतोदाहरणाद् भेदो युक्तियुक्तो भविष्यति । श्रुतानुसार्यक्षरपरिणामा मतिर्भावश्रुतमेव स्याद्,अतः पूर्वस्मान्न विशेष्येत; इत्यश्रुताक्षरपरिणामित्वं विशेषणम् । सा च पर्युदासाऽऽश्रयणाद्श्रुतानुसारिणा शब्देनैवान्विता गृह्यते, न तु शब्दपरिणामरहिताऽवग्रहरूपा, तस्याः शब्दजनकत्वाभावेनानन्तरं शुम्बसदृशद्रव्यश्रुताभावादिति । अत्रोत्तरमाह-(किं पुण तोसिं विसेसेणं ति) किं पुनस्तयोर्यथोक्तमतिद्रव्यश्रुतयोर्विशेषेण भेदेनोक्तेन? अप्रस्तुतत्वान्न किञ्चिदित्यर्थः । श्रुतज्ञानेनैव सहाश्र मतेर्नैदो विचारयितुं प्रक्रान्तः, इत्यतः किं द्रव्यश्रुतेन सह तच्चिन्तया ?,इति भावः । इति गाथार्थः ॥ १५७ ॥

एतदेव भावयन्नाह-

इहइं जेणाहिकओ, नाणविसेसो न दव्वभावाणं ।
न य दव्वनाणमेत्ते, वि जुज्जए सोऽसमंजसओ ॥१५८॥

इहास्मिन् प्रक्रमे येन कारणेन ज्ञानयोरेव मतिश्रुतलक्षणयोर्विशेषो भेदोऽधिकृतो न तु द्रव्यभावयोर्मतिज्ञानद्रव्यश्रुतलक्षणयोः, इत्यतः किं तद्भेदाभिधानेन ? इति । न च यथोक्तद्रव्यभावयोरप्यसौ युज्यते । कुतः ?, इत्याह-असमञ्जसतो दृष्टान्तदार्ष्टान्तिकयोर्वैसदृश्यादिति गाथार्थः ॥ १५८ ॥

तथाहि-

जह वग्गा सुंबत्तण-मुविंति सुंबं च तं तओऽण्णं ।
न मइ तहा धणित्तण-मुवेइ जं जीवभावो सा ॥१५९॥

यथा वल्काः शुम्बत्वमुपयान्ति आत्माऽव्यतिरिक्तशुम्बपरिणामाऽऽपन्नाः शुम्बमित्युच्यन्ते, न तु शुम्बाद् व्यतिरिक्ताः; तदपि च शुम्बं तेभ्यो वल्केभ्योऽनन्यरूपमव्यतिरिक्तं, न तथा मतिर्ध्वनित्वमुपैति, यद् यस्माद् कारणाद् सा मतिराभिनिबोधिकज्ञानत्वेन जीवभावो जीवपरिणामः, शब्दस्तु मूर्तत्वान्न जीवभावः; इत्यतः कथममूर्तपरिणामा मतिर्मूर्तध्वनिपरिणाममुपगच्छेत ?, अमूर्तस्य मूर्तपरिणामविरोधात् । तस्माद् दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यादिदमपि व्याख्यानमुपेक्षणीयमिति गाथार्थः ॥ १५९ ॥

पुनः परवचनमाशङ्क्य तस्यैव शिक्षणार्थमाह-

अह जइ वयारो कीरइ, पजवइ अत्थंतरं पि जं जत्तो ।

तं तम्मयं ति भण्णइ,तो मइपुव्वं जओ जाणियं ॥१६०॥
भावसुयं तेण मई, वग्गसमा सुंबसरिसयं तं च ।
जं चिंतिऊण य तया, तो सुयपरिवाडिमणुसरइ ॥१६१॥

अथोपचारः क्रियते-उपचारविधिराश्रीयते, ततश्चार्थान्तरमपि यद् यस्मात् प्रभवति तत्तन्मयमिति भण्यते, यथा-' तदध्यमिदन्तं विक्रियाविस्तरमुपगतम्,' 'तदेकं वचनमेतावन्तं विपाकमापन्नम्' इत्यादि; ततश्चातन्मयेऽपि घटौ मतिगता ज्ञानमयतोपचर्यते । तथा च सति वल्कशुम्बसाहश्येन मतिश्रुतयोरयं भेदः सिद्धो भवति । एवमुक्ते आचार्यः सुहृद् भूत्वा परं शिक्षयति-(तो मइपुव्वं इत्यादि) हन्त ! यद्युपचारवादी भवान्, ततो मतिपूर्वं भावश्रुतं यस्मादागमे भणितम्, तेन कारणेन मतिर्वल्कसमा, तच्च भावश्रुतं शुम्बसदृशम्, इत्येवं दृष्टान्तोपनयं कुरु, येनोपचारमन्तरेणाऽपि सर्वं सुस्थं भवति, यथा हि वल्काः शुम्बकारणम्, तथा मतिरपि भावश्रुतस्य, यथा च शुम्बं वल्कानां कार्यं तथा भावश्रुतमपि मतेः । कुतः ?, इत्याह-यद् यस्मात् कारणात् तया मत्या चिन्तयित्वा ततः श्रुतपरिपाटीमनुसरति-वाच्यवाचकभावेन परोपदेशश्रुतग्रन्थयोजनां वस्तुनि करोति; तस्मान्मतिश्रुतयोर्वल्कशुम्बयोरिव कार्यकारणभावाद् भेदसिद्धिः, इत्येवं दृष्टान्तोपनयौ युक्तिं संसहते,न तु परोक्षप्रकारेणेति गाथाऽर्थः ॥ १६० ॥ १६१ ॥

तदेवं वल्कशुम्बोदाहरणादप्यभिहितो मतिश्रुतयोर्भेदः; साम्प्रतं त्वक्षरानक्षरभेदात्तमभिधित्सुः परानिप्रायं तावदुपन्यस्यन्नाह-

अण्णे अणक्खरऽक्खर-विसेसओ मइसुयाइं निंदंति ।
जं मइनाणमणक्खर-मक्खरमियरं च सुयनाणं ॥१६२॥

अन्ये केचनाऽपि सूरयोऽनक्षराक्षरवद्विशेषतो मतिश्रुते भिन्दन्ति, यद् यस्मात् किल मतिज्ञानमनक्षरम्, श्रुतज्ञानं त्वक्षरत्वद्भवति, इतरच्चानक्षरवदुच्छ्वसितादीत्यर्थः । इति गाथाऽर्थः ॥ १६२ ॥

अत्राऽऽचार्यो दूषणमाह-

जइ मइरणक्खर च्चिय,भविज्ज नेहाऽऽइओ निरभिलप्पे ।
थाणुपुरिसाइपज्जा-यविवेगो किह णु होज्जाहि ? ॥१६३॥

यदि हन्त ! मतिरनक्षरैव स्यात्—अक्षराभिलापरहितैव भवताऽभ्युपगम्यते, तर्हि निरभिलाप्ये प्रतिभासमानाऽभिलाप्ये स्थाण्वादिके वस्तुनि ईहाऽऽदयो न प्रवर्तेरन् । ततः किम् ?, इत्युच्यते-तस्यां मतावनक्षरत्वेन स्थाण्वादिविकल्पाभावात् ' स्थाणुरयं पुरुषो वा ' इत्यादिपर्यायाणां वस्तुधर्माणां विवेको वितर्कोऽन्वयव्यतिरेकाऽऽदिना परिच्छेदो न स्यात्। तथाहि-यदनक्षरं ज्ञानं न तत्र स्थाणुपुरुषपर्यायाऽऽदिविवेकः, यथाऽवग्रहे, तथा चेहाऽऽदयः, तस्मात्तेष्वपि नासौ प्राप्नोतीति गाथाऽर्थः ॥ १६३ ॥

अथ विभ्रान्तस्य परस्योत्तरमाह-

सुयणिस्सियवयणाओ,अह सो सुयओ मओ न बुद्धीओ ।
जइ सो सुयवावारो, तओ किमन्नं मइन्नाणं ? ॥ १६४ ॥

आगमे मतिज्ञानं द्विधा प्रोक्तम्-श्रुतनिःश्रितमवग्रहेहाऽऽदिचतुष्कम्,अश्रुतनिश्रितं चौत्पत्तिक्यादिबुद्धिचतुष्टयम् । ततश्च सूरिरित्थं परानिप्रायमाशङ्कते-अथैवं परो ब्रूयात्-आगमे श्रुतनिःश्रितत्वेनाऽपि मतिज्ञानस्य भणनाद् श्रुतात् श्रुतनोऽक्षराऽऽत्मकादसौ स्थाणुपुरुषाऽऽदिपर्यायविवेकः मतः, न बुद्धेर्न मतेः सकाशात्, तस्याः स्वयमनक्षररूपत्वात् । अत्रोत्तरमाह-(जइ सो इत्यादि) यदि हन्त ! स स्थाणुपुरुषाऽऽदिपर्यायविवेकः श्रुतव्यापारस्तर्ह्यवग्रहं मुक्त्वा किमन्यद् मतिज्ञानम् ?, न किञ्चिदित्यर्थः । यदि स्थाणुपुरुषाऽऽदिपर्यायविवेकोऽक्षराऽऽत्मकत्वात् श्रुतव्यापार इष्यते, तदेहाऽपायाऽऽदयो मतिभेदाः सर्वेऽप्यक्षराऽऽत्मकत्वात् श्रुतत्वमापन्नाः, इत्यतोऽक्षराभिलापरहितमवग्रहं मुक्त्वाऽशेषस्येहाऽऽदिनेदमित्थस्य सर्वस्याऽपि मतिज्ञानस्याभावप्रसङ्गः। इति गाथाऽर्थः ॥ १६४ ॥

अथाऽन्यथा परस्य वचनमाशङ्क्य दूषयितुमाह--

अह सुयओ वि विवेगं, कुणओ न तयं सुयं सुयं नत्थि ।
जो जो सुयवावारो, अन्नो वि तओ मई जम्हा ॥१६५॥

अथ श्रुतादपि स्थाणुपुरुषाऽऽदिविवेकं कुर्वतः प्रमातुर्न तत् श्रुतम्, किं तु मत्यभावभीत्या मतित्वेनाऽभ्युपगम्यते, हन्त ! तर्ह्येकत्र सन्धित्सतोऽन्यतः प्रच्यवते; यत एवं सति श्रुतं क्वचिदपि नास्ति-श्रुताभावः प्राप्नोतीत्यर्थः । कुतः ?, इत्याह--यो यश्चरणकरणाऽऽदिप्रतिपादनव्यक्तेरन्योऽपि श्रुतस्याऽऽचाराऽऽदेर्व्यापारः सकोऽसौ यस्मान्मतिज्ञानमेव, अक्षराऽऽत्मकत्वात्, स्थाणुपुरुषाऽऽदिपर्यायविवेकवदिति गाथाऽर्थः ॥ १६५ ॥

अथ स्थाणुपुरुषाऽऽदिपर्यायविवेको मतिश्च श्रुतं च भविष्यति; अतो नैकस्याप्यभावप्रसङ्ग इत्याह-

मइकाले वि जइ सुयं, तो जुगवं मइसुओवओगा ते ।
अह नेवं एगयरं, पवज्जओ जुज्जए न सुयं ॥ १६६ ॥

स्थाणुपुरुषाऽऽदिपर्यायविवेककालेऽपि यदि श्रुतव्यापार इष्यते, ततो युगपदेव मतिश्रुतोपयोगौ ते तव प्रसज्येते, न चैतत् युक्तम्, समकालं ज्ञानद्वयोपयोगस्य निषिद्धत्वात् । अथैतद्दोषभयाद् नैवमुपयोगद्वयं युगपदभ्युपगम्यते, तर्ह्येकतरं प्रतिपद्यमानस्य स्थाणुपुरुषाऽऽदिपर्यायविवेककाले मतिज्ञानं, श्रुतज्ञानं वा इच्छतो भवत इत्यर्थः, किम् ?, इत्याह-(जुज्जए न सुयं ति) श्रुतमिह प्रतिपत्तुं न युज्यते, किं तु मतिज्ञानमेव। इदमुक्तं भवति-" सावकाशानवकाशयोरनवकाशो विधिर्बलवान् " इति न्यायादन्यत्रानवकाशं मतिज्ञानमेवैकं तवैकतरं प्रतिपद्यमानस्येह प्रतिपत्तुं युज्यते; न तु श्रुतं, तस्याऽन्यत्र श्रुतानुसारिण्याचाराऽऽदिज्ञानविशेषे सावकाशत्वात् । एवं च सति स्थाणुपुरुषाऽऽदिपर्यायविवेको मतेरेव, न तु श्रुतात्, स चाऽक्षराभिलापसमनुगत एव, इति नैकान्तेन मतिज्ञानमनक्षरमिति भावः । इति गाथाऽर्थः ॥ १६६ ॥

किं च—अक्षरानुगतत्वमात्रमुपलभ्य स्थाणुपुरुषाऽऽदिपर्यायविवेको भवता श्रुतनिश्रित उक्तः, एवं चातिप्रसङ्गः प्राप्नोतीति दर्शयति-

जइ सुयनिस्सियमक्खर-मणुसरओ तेण मइचउक्कं पि ।
सुयनिस्सियमावन्नं, तुह तं पि जमक्खरप्पभवं ॥१६७॥

यदि स्थाणुपुरुषाऽऽदिपर्यायविवेकविधानेनात्तरमनुसरतः प्रमातुर्ईहानं श्रुतनिश्रितं भवता प्रोच्यते, तेन तर्ह्यौत्पत्तिक्यादिमतिचतुष्कमपि तव श्रुतनिश्रितमापन्नम्, यस्मात्तदप्यक्षरप्रभवं वर्णाऽऽभिलापमन्तरेण संभवन्ति; तस्मान्मतिचतु-

कमपि स्वदभिप्रायेण श्रुतनिश्रितमायातम्, न चैतदस्ति,आगमेऽश्रुतनिश्रितत्वेन तस्यानिधानात् । तस्माद्देवानां प्रियेणाद्यापि श्रुतनिश्रितस्य स्वरूपमेव नावगम्यते, तत् किं वयं ब्रूमः ? । इति गाथार्थः ॥ १६७ ॥

तदेवं श्रुतनिश्रितवचनश्रवणमात्राद्विभ्रान्तस्तत्स्वरूपमजानानः परो युक्तिभिर्निराकृतोऽपि विलक्षीभूतः प्राऽऽह-

जइ तं सुएण न तओ,जाणइ सुयनिस्सियं कहं भणियं ? ।
जं सुयकओवयारं, पुव्विं इहिंह तयणवेक्खं ॥ १६८ ॥

यदि तं स्थाणुपुरुषाऽऽदिपर्यायविवेकसंघातं श्रुतेन न जानाति सकोऽसौ ज्ञानी, तर्हि श्रुतनिश्रितमेवावग्रहाऽऽदिकं सूत्रे कथं केन प्रकारेण भणितम् ?-मतिः स्वयमनक्षरैव, यस्त्विहाक्षरोपलम्भः स यदि श्रुतनिश्रितो नेष्यते, तर्हि कथमन्यथाऽसौ घटिष्यते ?। इति विस्मयभयाऽऽपूरितहृदयस्य परस्याऽयं प्रश्न इति भावः । अत्रोच्यते-ननु भवानेव प्रष्टव्यो योऽस्माभीक्षितमित्थं प्रलपते-योऽक्षरोपलम्भः स सर्वोऽपि श्रुतनिश्रित इति । अथ न क्रायते भवता, तर्हि वयमेवं ब्रूमः, श्रूयतम् (जं सुए इत्यादि) श्रुतं द्विविधम्-परोपदेशः, आगमग्रन्थश्च । व्यवहारकालात् पूर्वं तेन श्रुतेन कृत उपकारः संस्काराऽऽधानरूपो यस्य तत् कृतश्रुतोपकारम्, यद् ज्ञानमिदानीं तु व्यवहारकाले तस्य पूर्वप्रवृत्तस्य संस्काराऽऽधायकश्रुतस्यानपेक्षमेव प्रवर्तते तत् श्रुतनिश्रितमुच्यते, न त्वक्षराभिलापयुक्तत्वमात्रेणेति भावः । इति गाथार्थः ॥ १६८ ॥

एतदेव भावयन्नाह-

पुव्वं सुयपरिकम्मिय-मइस्स जं संपयं सुयाऽऽईयं ।
तं निस्सियमियरं पुण, अणिस्सिअं मइचउक्कं तं ॥ १६९ ॥

व्यवहारकालात् पूर्वं श्रुतेन परिकर्मिता-आहितसंस्कारा मतिर्यस्य स तथा तस्य साध्वादेर्वर्त्तमानं व्यवहारकाले श्रुतातीतं श्रुतनिरपेक्षं ज्ञानमुपजायते तच्छ्रुतनिश्रितमवग्रहाऽऽदिकं सिद्धान्ते प्रतिपादितम् । इतरत्पुनरश्रुतनिश्रितम्, तच्चौत्पत्तिक्यादिमतिचतुष्कं द्रष्टव्यम्, श्रुतसंस्कारानपेक्षया सहजत्वात् तस्य । अत्राऽऽह-ननु "भरनित्थरणसमत्था, तिवग्गसुत्तत्थगहियपेयाला । उभयलोगे फलवई, विणयसमुत्था हवइ बुद्धी ॥ १ ॥" इत्यादिवचनात् तत्राऽपि मतिचतुष्के वैनयिकी मतिः श्रुतनिश्रिता समस्ति । सत्यम्, किं तु सकृत् श्रुतनिश्रितत्वे सत्यपि बाहुल्यमङ्गीकृत्याश्रुतनिश्रितं तदुच्यते इत्यदोषः * । तस्माद् यदुक्तम्-" जं मइनाणमणक्खर-मियरं सुयनाणमिति " (१६२) तदयुक्तम्, मतेरनक्षरत्वे स्थाणुपुरुषाऽऽदिपर्यायविवेकाभावप्रसक्तात्, श्रुतनिश्रितत्वस्य चान्यथा समर्थितत्वादिति स्थितम् । इति गाथार्थः ॥१६९॥

यद्यनक्षरा मतिर्न भवति, तर्हि " लक्खणभेया हेऊ, फलभावओ (६७) " इत्यादिगाथायां प्रतिज्ञातोऽक्षरानक्षरभेदाद् मतिश्रुतयोर्भेदः कथं गमनीयः ?, इत्याह-

जइयं भावऽक्खरओ, अणक्खरं होज्ज वंजणाऽक्खरओ ।
मइनाणं सुत्तं पुण, उभयं पि अणक्खरऽक्खरओ ॥ १७० ॥

इहाक्षरं तावद् द्विविधम्-द्रव्याक्षरम्,भावाक्षरं च । तत्र द्रव्याक्षरं पुस्तकाऽऽदिन्यस्ताऽऽकाराऽऽदिरूपम्, तालवादिकारणजन्यः शब्दो वा; एतच्च व्यज्यतेऽर्थोऽनेनेति व्यञ्जनाक्षरमप्युच्यते । भावाक्षरं त्वन्तःस्फुरदकाराऽऽदिवर्णज्ञानरूपम् । एवं च सति (भावऽक्खरओ त्ति) भावाक्षरमाश्रित्य मतिज्ञानं भवेत् । कथंभूतम् ?, इत्याह-(उभयं ति) द्रव्यरूपम्-अक्षरवत्, अनक्षरं चेत्यर्थः; मतिज्ञानभेदे ह्यवग्रहे भावाक्षरं नास्तीति तदनक्षरमुच्यते, ईहाऽऽदिषु तु तद्भेदेषु तदस्तीति मतिज्ञानमक्षरवत् प्रतिपाद्यत इति भावः । (अणक्खरं होज्ज वंजणाऽक्खरओ त्ति) व्यञ्जनाक्षरं द्रव्याक्षरमित्यनर्थान्तरम्,तदाश्रित्य मतिज्ञानमनक्षरं भवेत्, न हि मतिज्ञाने पुस्तकाऽऽदिन्यस्ताकाराऽऽदिकं शब्दो वा व्यञ्जनाक्षरं विद्यते,तस्य द्रव्यश्रुतत्वेन रूढत्वात्,द्रव्यमतित्वेनाप्रसिद्धत्वादिति । (सुत्तं पुणेत्यादि) सूत्रं श्रुतज्ञानम्, पुनरुभयमपि-द्रव्यश्रुतम्,भावश्रुतं च इत्यर्थः,प्रत्येकमनक्षरतः,अक्षरतश्च भवेत् । इदमुक्तं भवति-"ऊससियं नीससियं, निच्छूढं खासियं च छीयं च । निस्सिंघिय-मनुसारं, अणक्खरं छेलियाईयं" ॥१॥ इत्यादिवचनाद् द्रव्यश्रुतमनक्षरम्-पुस्तकाऽऽदिन्यस्ताक्षररूपम्, शब्दरूपं च;तदेव साक्षरं भावश्रुतमपि श्रुतानुसार्यकाराद्यक्षरविज्ञानाऽऽत्मकत्वात्साक्षरम्, पुस्तकाऽऽदिन्यस्ताकाराऽऽद्यक्षररहितत्वात् शब्दाभावाच्च तदेवानक्षरम्, पुस्तकाऽऽदिन्यस्ताक्षरस्य शब्दस्य च द्रव्यश्रुतान्तःपातित्वेन भावश्रुतेऽसत्त्वात्; तदेवं मतेर्भावश्रुतस्य च साक्षरानक्षरकृतो नास्ति विशेषः; प्रत्येकं द्वयोरप्यक्षरानक्षररूपत्वेनोक्तत्वात्; केवलं सामान्येन 'श्रुतम्' इत्युक्ते तन्मध्ये द्रव्यश्रुतं लक्ष्यत इति कृत्वा तत्र द्रव्यश्रुतमाश्रित्य द्रव्याक्षरमस्ति, मतौ तु तन्नास्ति,तस्या द्रव्यमतित्वेनाऽऽरूढत्वादिति । एवमनयोर्द्रव्याक्षरापेक्षया साक्षरानक्षरत्वकृतो भेदः । इति गाथार्थः ॥ १७० ॥

तदेवमक्षरेतरभेदाद् मतिश्रुतयोर्भेदमभिधाय मूकेतरभेदात् तमभिधित्सुराह-

सपरप्पच्चायणओ,भेओ मूयराण वाऽभिहिओ ।
जं मूयं मइनाणं, सपरप्पच्चायगं सुत्तं ॥ १७१ ॥

अन्यैस्तु कैश्चिदाचार्यैः स्वपरप्रत्यायनतो मतिश्रुतयोर्भेदोऽभिहितः । कयोरिव ?, इत्याह—मूकेतरयोरिव, यथा हि मूकः स्वमात्मानमेव प्रत्याययति प्रतीतिपथं नयति, न तु परम्, तत्प्रत्यायनहेतुवचनाभावाद्; इतरस्त्वमूकः स्वं परं च प्रत्याययति, वचनसद्भावात् । तथा सति यथा मूकमुखरयोर्भेदः, एवं मतिश्रुतयोरपि, यद् यस्मात् परप्रत्यायनहेतुर्द्रव्याक्षराभावाद् मूकं मतिज्ञानम्, मुखरं तु श्रुतज्ञानम्,

* इममेवाऽभिप्रायं नन्द्यध्ययने अस्या एव गाथाया विवरणस्थले श्रीमन्मलयगिरिसूरिरप्याह । तथाहि-" नन्वश्रुतनिश्रिता बुद्धयो वक्तुमभिप्रेताः, ततो यथस्याश्चिवर्गसूत्रार्थगृहीतसारत्वम्,ततोऽश्रुतनिश्रितत्वे नोपपद्यते, न हि श्रुताभ्यासमन्तरेण त्रिवर्गसूत्रार्थगृहीतसारत्वं संभवति । अत्रोच्यते-इह प्रायो वृत्तिमाश्रित्याऽश्रुतनिश्रितत्वमुक्तम्, ततः स्वरूपश्रुतभावेऽपि न कश्चिद्दोषः " इति ।

" इहातिगुरुकार्यं कुर्निर्वहत्त्वाद् भर इव भरस्तात्त्विकस्तरणे समर्थो भरनिस्तरणसमर्थाः, वयो वर्गास्त्रिवर्गो लोकरूढ्या धर्मार्थकामास्तदर्जनोपायप्रतिपादकं यत् सूत्रं यच्च तदर्थस्तौ त्रिवर्गसूत्रार्थौ, तयोर्गृहीतं 'वेयालं' प्रमाणं सारो वा यया सा तथाविधा ।" इति नन्दिटीकायां व्याख्यातोऽस्या अर्थः ।

कुतः ?, स्वपरप्रत्यायकत्वाद्-द्रव्याक्षरसद्भावेन परप्रत्यायकत्वस्यापि तत्र लभ्यमानत्वादिति भावः । इति गाथार्थः ॥१७१॥

एतदाचार्यो मतिश्रुतयोस्तुल्यताऽऽपादनेन किञ्चिद् दूषयितुमाह-

सुयकारणं ति सद्दो, सुयमिह सो य परबोहणं कुणइ ।
मइहेयवो वि हि परं, बोहिंति कराइचेट्ठाओ ॥१७२॥

इह तावद्भवन्तं पृच्छामः-हन्त ! शब्दः श्रुतमुच्यते, उपलक्षणत्वात्पुस्तकाऽऽदिन्यस्ताक्षरविन्यासश्च श्रुतमभिधीयते (सुयकारणं ति) श्रुतकारणत्वात्-कारणे कार्योपचारादिति भावः । स च शब्दः,पुस्तकाऽऽदिन्यस्ताक्षरविन्यासश्च परबोधनं परप्रत्यायनं करोतीत्येवं परतः श्रुतज्ञानं परप्रत्यायकमुच्यते, न तु स्वतः;इति तावद्भवतोऽभिप्रायः। एतच्च मतिज्ञानेनापि समानम्। कुतः?, इत्याह-हि यस्मान्मतिहेतवोऽपि मतिजनका अपि कराऽऽदिचेष्टाविशेषाः परं बोधयन्त्येव । तथाहि-अक्षराऽऽत्मकत्वात् किलशब्दः,पुस्तकाऽऽदिन्यस्ताक्षरविन्यासश्च श्रुतस्य कारणं, करशीर्षाऽऽदिचेष्टास्त्वक्षररहितत्वात् किल मतिज्ञानस्य हेतवः करवक्त्रसंयोगे हि कृते भुजिक्रियाविषया किल मतिरुत्पद्यते, शीर्षे च धूनिते निवृत्तिप्रवृत्तिविषया सा समुपजायते, इत्येवं मतिहेतवः कराऽऽदिचेष्टाऽपि परप्रबोधिका एकेति गाथाऽर्थः ॥ १७२ ॥

यदि मतिहेतवोऽपि परं प्रबोधयन्ति, ततः किम् ?, इत्याह-

न परप्पबोहयाइं, जं दो वि सरूवओ मइसुयाइं ।
तक्कारणाइं दोण्ह वि,बोहिंति तओ न भेओ सिं॥१७३॥

मतिहेतूनामपि परप्रबोधकत्वे सति न (भेओ सिं) अनयोर्मतिश्रुतयोर्न भेदः। कुतः?,इत्याह-(तउ त्ति) ततस्तस्मात् कारणात्। कस्मात् ?, इत्याह-यद् यस्माद् द्वे अप्येते मतिश्रुते स्वरूपतो विज्ञानाऽऽत्मना न परप्रबोधके, विज्ञानस्य मूकत्वेन परप्रबोधकत्वायोगात्, अवध्यादिवदिति । अथ श्रुतस्य यत्कारणं शब्दाऽऽदिकं तत्परप्रबोधकम्, इत्येतावता मतिज्ञानाद् विशिष्यते श्रुतज्ञानम् । नन्वेतद् मतिज्ञानेऽपि समानम्, तत्कारणस्याऽपि करचेष्टाऽऽदेः परावबोधकत्वादिति । एतदेवाऽऽह-तानि च तानि पूर्वोक्तरूपाणि कारणानि च तत्कारणानि द्वयोरपि मतिश्रुतज्ञानयोर्यथासंख्यं शब्दाऽऽदीनि, करचेष्टाऽऽदीनि च परं बोधयन्त्येव, इति कोऽनयोर्विशेषः ?, न कश्चिदित्यर्थः । इति किमुच्यते-मूकेतरभेदाद् भेदः ? । इति गाथार्थः ॥ १७३ ॥

तदेवं परोक्ते व्यभिचारिते ततो निरुत्तरं विलक्षीभूतं तूष्णींभावमापन्नं परमवलोक्य संजातकारुण्यः स्वयमेव सूरिरुत्तरमाह—

दव्वसुयमसाहारण-कारणओ परविबोहयं होज्जा ।
रूढं ति व दव्वसुयं, सुयं ति रूढा ण दव्वमई ॥१७४॥

द्रव्यश्रुतं पुस्तकन्यस्ताक्षरशब्दरूपं श्रुतज्ञानस्यैव कारणम्, न तु मतेः, इति श्रुतज्ञानं प्रत्यसाधारणकारणत्वाद् द्रव्यश्रुतं परप्रबोधकं भवेत्, न तु कराऽऽदिचेष्टाः, तासां मतिश्रुतोभयकारणत्वेन साधारणकारणत्वादिति भावः । इदमुक्तं भवति-पुस्तकाऽऽदिन्यस्ताक्षररूपं,शब्दाऽऽत्मकं च द्रव्यश्रुतम्,श्रुतज्ञानस्य मतिपूर्वकत्वाद् यद्यप्यानन्तर्येणावग्रहेहाऽऽदीन् जनयति, तथाऽप्यक्षररूपत्वाद् मुख्यतया श्रुतज्ञानस्यैव किलासाधारणं कारणमुच्यते, कारणत्वेनोपचारतः श्रुतज्ञाने ऽन्तर्भवति, परप्रबोधकत्वेन च तत्सर्वस्यापि विदितमिति । एवं कारणस्य परप्रबोधकत्वात् श्रुतज्ञानं परप्रबोधकं घटते, कराऽऽदिचेष्टास्तु मतिज्ञानस्यासाधारणकारणं न भवन्ति, श्रुतज्ञ नहेतुत्वादपि करवक्त्रसंयोगाऽऽदिकायां हि करचेष्टायां दृष्टा ं न केवलं तद्विषयाऽवग्रहाऽऽदय उत्पद्यन्ते, किं तु-"भोक्तुमिच्छत्ययम्" इत्यादिश्रुतानुसारिविकल्पाऽऽत्मकं श्रुतज्ञानमप्युपजायते इति । अतोऽसाधारणकारणत्वाभावात् कराऽऽदिचेष्टाः परमार्थतो मतिज्ञानस्य कारणमेव न संभवन्ति, ततश्च न तत्रान्तर्भवन्ति; तथा च सति न मतिज्ञानं परप्रबोधकम् । अथवा-(दव्वसुयमसाहारणकारणओ त्ति) द्रव्यश्रुतं पुस्तकाऽऽदिन्यस्ताऽऽचाराऽऽदिग्रन्थाक्षररूपम्, गुरुजनोदीरितदेशनाशब्दस्वरूपं च परप्रबोधकं भवेत् । कुतः ?, इत्याह—असाधारणस्य मोक्षं प्रत्यनन्यसाधारणकारणस्य क्षायिकज्ञानदर्शनचारित्रलक्षणस्य वस्तुकलापस्य कारणत्वाद् हेतुत्वात्; ततश्च तद्द्वारेण श्रुतज्ञानमपि परप्रबोधकं घटते, कराऽऽदिचेष्टास्तु यद्यपि मतिज्ञानस्य कारणम्, तथाऽपि यथोक्तो विशिष्टः परप्रबोधस्तासु प्रायो न संभवति, अतो विशिष्टपरप्रबोधाभावाद् न ताः परप्रबोधिकाः, तथा च सति न तद्द्वारेणापि मतिज्ञानं परप्रबोधकम् । इति सूत्रस्य सूचकत्वात् सोपस्कारः पूर्वार्द्धस्यार्थोऽवसेयः । अथोत्तरार्द्धस्य व्याख्या प्रस्तूयते—(रूढं ति वेत्यादि) वेत्यथवा, भवतु मतिज्ञानस्य कारणं कराऽऽदिचेष्टा,तथापि सा 'द्रव्यमतिः' इत्येवमागमे क्वचिदपि न रूढाः; द्रव्यश्रुतं पुनः पूर्वोक्तस्वरूपं ' श्रुतम् ' इत्येव सर्वत्र रूढम् । ततश्च यद्यपि कराऽऽदिचेष्टा मतिज्ञानस्य कारणम्, परप्रबोधिका च; तथापि रूढ्यमतित्वेनाऽऽरूढत्वात् कारणे कार्योपचारतो मतिरूपतया न व्यवह्रियते । अतो मतिज्ञानात् तस्याः पृथग्भूतत्वाद् न तद्द्वारेण तस्य परप्रबोधकत्वम्, रूढ्यश्रुतं तु कारणे कार्योपचारतः श्रुतज्ञानत्वेन प्ररूप्यते, इति तद्द्वारेणास्य परप्रबोधकमुपपद्यते एव । इति युक्तो मूकेतरभेदाद् मतिश्रुतयोर्भेदः । ततश्च-" तक्कारणाइं दोण्ह, वि बोहिंति तओ न भेओ सिं । " (१७३) इत्येतदपास्तं भवतीति गाथाऽर्थः ॥ १७४ ॥

(११) तदेवं कराऽऽदिचेष्टाया मतिकारणत्वमभ्युपगम्योक्तम्, साम्प्रतं सा मतेः कारणमेव न भवति, किं तु श्रुतस्येति दर्शयन्नाह-

सा वा सद्दत्थो च्चिय, तया वि जं तम्मि पच्चओ होइ ।
कत्ता वि हु तदभावे, तदभिप्पाओ कुणइ चिट्ठं ॥१७५॥

यदि वा सा कराऽऽदिचेष्टा करवक्त्रसंयोगाऽऽदिलक्षणा । किम्?,इत्याह-शब्दार्थ एव शब्दो वक्तृसमुदीरितवचनरूपः,तस्यार्थः शब्दार्थः श्रोतृगतज्ञाने प्रतिभासमानतदभिधेयवस्तुरूपः श्रुतज्ञानमिति तात्पर्यम् । किमित्यसौ शब्दार्थ एव ?, इत्याह-यद् यस्मात्;कारणात् तयाऽपि कर्त्रा विहितया तस्मिन् शब्दार्थे-भोजनेच्छाऽऽदिलक्षणे प्रतिपत्तुः प्रत्ययो भवति । तथा कर्ताऽपि तदभावे शब्दाभावे जिह्वारोगाऽऽदिसद्भावात् शब्दोदीरणासामर्थ्याभाव इत्यर्थः । (तदभिप्पाओ त्ति) तस्मिन् शब्दार्थे भोजनेच्छाऽऽदिलक्षणे परस्मै प्रतिपादयितव्येऽभिप्रायो मनोविकल्पो यस्यासौ तदभिप्रायः करोति चेष्टां करवक्त्रसंयोगाऽऽदि

लक्षणम् । इदमुक्तं भवति-यद्यपि कराऽऽदिचेष्टाऽनन्तरभावेनाऽवग्रहाऽऽदीन् जनयति, तथाऽपि शब्दार्थ एव सा श्रुतज्ञानमेवेत्यर्थः; यस्मात् तयाऽपि विहितया तत्र शब्दार्थप्रत्ययो भवति, अतः शब्दार्थप्रत्ययजनकत्वात् कारणे कार्योपचारात् शब्दार्थप्रत्यय एव सा, न पुनर्मतिः, तथा कर्ताऽपि 'भोक्तुमिच्छत्यसौ' इत्यादिप्रतिपत्ता जानात्यित्यभिप्रायवानेव भाषणशक्त्यभावे कराऽऽदिचेष्टां करोति । ततश्च कर्त्राऽपि शब्दार्थद्योतनाभिप्रायेण क्रियमाणत्वात् कराऽऽदिचेष्टा शब्दार्थ एव । ततश्च एषाऽपि श्रुतकारणत्वात् श्रुत एवान्तर्भवति, शब्दवत्, न मतौ, तथा च सत्येषा परमार्थतो मतेः कारणमेव न भवत्यतः कारणद्वारेणाऽपि न परप्रत्यायकं मतिज्ञानम्, श्रुतं तु तद्द्वारेण परावबोधकम् । इति युक्तो मूकेतरभेदाद् मतिश्रुतयोर्भेदः ॥ १७५ ॥ विशे० । स्या० । आ० म० । कर्म० । नं० ।

(१२) श्रुतानन्तरमवधिज्ञानस्य विवेकः-

कालविपर्ययस्वामित्वलाभसाधर्म्याद् मतिश्रुतानन्तरमवधिज्ञानमुक्तम् । प्रवाहापेक्षया, अप्रतिपतितैकसत्त्वाऽऽधारापेक्षया वा यावान् मतिश्रुतयोः स्थितिकालः तावानेवावधिज्ञानस्याऽपि तथा यथैव मतिश्रुतज्ञाने मिथ्यादर्शनोदयतो विपर्ययरूपतामासादयतः,तथाऽवधिज्ञानमपि । तथाहि-मिथ्यादृष्टेः सतस्तान्येव मतिश्रुतावधिज्ञानानि, मत्यज्ञाने श्रुताज्ञानविभङ्गज्ञानानि भवन्ति । उक्तं च-"आद्यत्रयमज्ञानम-पि भवति मिथ्यात्वसंयुक्तम्।" इति । तथा य एव मतिश्रुतज्ञानयोः स्वामी स एवावधिज्ञानस्याऽपि । तथा विभङ्गज्ञानिनः त्रिदशाऽऽदेः सम्यग्दर्शनावाप्तौ युगपदेव मतिश्रुतावधिज्ञानानां लाभसंभवस्ततो लाभसाधर्म्यम् अवधिज्ञानानन्तरं च ऊर्ध्वविषयभावप्रत्यक्षत्वसाधर्म्याद् मनःपर्यायज्ञानमुक्तम् । तथाहि-यथाऽवधिज्ञानं ऊर्ध्वस्थस्य भवति, तथा मनःपर्यवज्ञानमपीति ऊर्ध्वस्थसाधर्म्यम् । तथा यथाऽवधिज्ञानं रूपिद्रव्यविषयं तथा मनःपर्यायज्ञानमपि, तस्य मनःपुद्गलाऽऽलम्बनत्वादिति विषयसाधर्म्यम् । तथा यथाऽवधिज्ञानं क्षायोपशमिके भावे वर्तते, तथा मनःपर्यायज्ञानमपीति भावसाधर्म्यम् । यथा चाऽवधिज्ञानं प्रत्यक्षं तथा मनःपर्यायमपीति प्रत्यक्षत्वसाधर्म्यम् । उक्तं च-" कालविवज्जयसामि-त्तलाभसाहम्मओऽवही तत्तो । माणसमित्तो ऊवम-त्थविसयभावाइँ साहम्मा" ॥ ७७ ॥ (विशे०) तथा मनःपर्यायज्ञानानन्तरं केवलज्ञानस्योपन्यासः, सर्वोत्तमत्वात्, अप्रमत्तयतिस्वामिसाधर्म्यात् सर्वविसंवादाभावाच्च । तथाहि-सर्वाण्यपि मतिज्ञानाऽऽदीनि ज्ञानानि देशतः परिच्छेदकानि, केवलज्ञानं तु सकलवस्तुस्तोमपरिच्छेदकं सर्वोत्तमं, सर्वोत्तमत्वात् चान्ते सर्वशिरःशेखरकल्पे उपन्यस्तम् । तथा—यथा मनःपर्यायज्ञानमप्रमत्तयतेरेवोदयते, तथा केवलमप्यप्रमादभावमुपगतस्यैव यतेर्भवति, नान्यस्य, ततोऽप्रमत्तयतिसाधर्म्यम्। तथा यः सर्वाण्यपि ज्ञानानि समासादयितुं योग्यः स नियमात् सर्वज्ञानावसाने केवलज्ञानमवाप्नोति, ततः सर्वान्ते केवलमुक्तम । उक्तं च-" अन्ते केवलमुत्तं, जइ सामित्तावसाणलाभाओ । " इति । तथा यथा मनःपर्यायज्ञानं न विपर्ययमासादयति, तथा केवलज्ञानमपीति । विपर्ययाभावसाधर्म्यञ्च मनःपर्यायज्ञानानन्तरं केवलज्ञानमुक्तमिति कृतं प्रसङ्गेन । नं० । " खइयं खओवसमियं, दुविहं नाणं मुणेयव्वं । खइयं केवलनाणं, खओवसमियाइँ सेसनाणाइं ॥१॥" पं० भा० ।

(१३) ज्ञानं प्रत्यक्षं परोक्षं च । तथाहि-

तं समासओ दुविहं पण्णत्तं । तं जहा-पच्चक्खं च, परोक्खं च ।

तत्पञ्चप्रकारमपि ज्ञानं समासतः संक्षेपेण द्विविधं द्विप्रकारं प्रज्ञप्तं, तद्यथेत्युदाहरणोपन्यासार्थः । प्रत्यक्षं च, परोक्षं च । नं० । आ० म० । आ० चू० । स्था० । (प्रत्यक्षवक्तव्यता 'पच्चक्ख' शब्दे) (परोक्षभेदाः 'परोक्ख' शब्दे वक्ष्यन्ते) (अवध्यादिज्ञानानां व्याख्या स्वस्वस्थाने) (तृतीयभागे 'ओहि' शब्दे १५६ पृष्ठे ज्ञानदर्शनविभङ्गलक्षणमुक्तम्) ('आभिणिबोहियणाण' शब्दे द्वितीयभागे ४५५ पृष्ठे संशयाऽऽदीनामपि ज्ञानत्वमावेदितम्)

(१४) न ज्ञानमात्मव्यतिरेकेण गुणः-

ननु चैतन्यं ज्ञानमात्मनः क्षेत्रज्ञादन्यदत्यन्तव्यतिरिक्तम्, असमासकरणादत्यन्तमिति लक्ष्यते । अत्यन्तभेदे सति कथमात्मनः संबन्धि ज्ञानमिति व्यपदेशः ?, इति पराशङ्कापरिहारार्थमौपाधिकमिति विशेषणद्वारेण हेत्वभिधानम् । उपाधेरागतमौपाधिकम् । समवायसंबन्धलक्षणेनोपाधिना आत्मनि समेवेतमात्मनः स्वयं जडरूपत्वात् समवायसंबन्धोपढौकितमिति यावत् । यद्यात्मनो ज्ञानाद्व्यतिरिक्तत्वमिष्यते, तदा दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तराभावाद् बुध्यादीनां नवानामात्मविशेषगुणानामुच्छेदावसरे आत्मनोऽप्युच्छेदः स्यात् । तद्व्यतिरिक्तत्वात् । अतो भिन्नमेवाऽऽत्मनो ज्ञानं यौक्तिकमिति । (स्या०) अत्राह-ज्ञानमपि यद्येकान्तेनाऽऽत्मनः सकाशाद्भिन्नमिष्यते, तदा तेन चैत्रज्ञानेन मैत्रस्येव नैव विषयपरिच्छेदः स्यादात्मनः । अथ यत्रैवाऽऽत्मनि समवायसंबन्धेन समवेतं ज्ञानं तत्रैव ज्ञानावभासं करोतीति चेत् । न । समवायस्यैकत्वाद् नित्यत्वाद् व्यापकत्वात् च सर्वत्र वृत्तेरविशेषात् समवायवदात्मनामपि व्यापकत्वादेकज्ञानेन सर्वेषां विषयावबोधप्रसङ्गः । यथा च घटे रूपाऽऽदयः समवायसंबन्धेन समवेताः,तद्विनाशे च तदाश्रयस्य घटस्याऽपि विनाशः।एवं ज्ञानमप्यात्मनि समवेतं, तच्च क्षणिकं,ततस्तद्विनाशे आत्मनोऽपि विनाशाऽऽपत्तेरनित्यत्वाऽऽपत्तिः । अथाऽस्तु समवायेन ज्ञानाऽऽत्मनोः संबन्धः, किं तु स एव समवायः केन तयोः संबध्यते?,समवायान्तरेण चेदनवस्था,स्वेनैव चेत्,किं न ज्ञानाऽऽत्मनोरपि तथा । अथ यथा प्रदीपस्तत्स्वाभाव्यादात्मानं परं च प्रकाशयति, तथा समवायस्येदृगेव स्वभावो यदात्मानं, ज्ञानात्मानौ च संबन्धयतीति चेत्-ज्ञानात्मनोरपि किं न तथास्वभावता, येन स्वयमेवैतौ संबध्येते?। किञ्च-प्रदीपदृष्टान्तोऽपि भवत्पक्षे न जाघटीति। यतः प्रदीपस्तावद् द्रव्यम्, प्रकाशश्च तस्य धर्मः,धर्मधर्मिणोश्च त्वयाऽत्यन्तं भेदोऽभ्युपगम्यते; तत्कथं प्रदीपस्य प्रकाशाऽऽत्मकता ?। तदभावे च स्वपरप्रकाशकस्वभावताभणितिर्निर्मूलैव । यदि च प्रदीपात्प्रकाशस्यात्यन्तभेदेऽपि प्रदीपस्य स्वपरप्रकाशकत्वमिष्यते, तदा घटाऽऽदीनामपि तदनुषज्यते, भेदाविशेषात् । अपि च-तौ स्वपरसंबन्धनस्वभावौ समवायाद्भिन्नौ स्याताम, अभिन्नौ वा ?। यदि-भिन्नौ, ततस्तस्यैतौ स्वभावाविति कथं संबन्धः ?। संबन्धनिबन्धनस्य समवायान्तरस्यानवस्थाभयादनभ्युपगमात् । अथाऽभिन्नौ, ततः समवायमात्रमेव, न तौ । तदव्यतिरिक्तत्वात्, तत्स्वरूपवदिति । किञ्च-यथेह समवायिषु समवाय इति मतिः

समवायं विनाऽप्युपपन्ना, तथेहाऽऽत्मनि ज्ञानमित्ययमपि प्रत्ययस्तं विनैव चेदुच्यते, तदा को दोषः ?। अथाऽऽत्मा कर्ता, ज्ञानं च करणम्,कर्तृकरणयोश्च वर्द्धकिवासीवद्भेद एव प्रतीतेः,तत्कथं ज्ञानाऽऽत्मनोरभेदः?,इति चेत् । न । दृष्टान्तस्य वैषम्यात् । वासी हि बाह्यं करणम्, ज्ञानं चाऽभ्यन्तरं,तत्कथमनयोः साधर्म्यम् ?। न चैवं करणस्य द्वैविध्यमप्रसिद्धम् । यदाहुर्लाक्षणिकाः-" करणं द्विविधं ज्ञेयं, बाह्यमाभ्यन्तरं बुधैः । यथा लुनाति दात्रेण, मेरुं गच्छति चेतसा " ॥ १ ॥ यदि हि किञ्चित्करणमान्तरमेकान्तेन भिन्नमुपदर्श्यते,ततः स्याद् दृष्टान्तदार्ष्टान्तिकयोः साधर्म्यम्, न च तथाविधमस्ति । न च बाह्यकरणगतो धर्मः सर्वोऽप्यान्तरे योजयितुं शक्यते । अन्यथा दीपेन चक्षुषा देवदत्तः पश्यतीत्यत्रापि दीपाऽऽदिवच्चक्षुषोऽप्येकान्तेन देवदत्तस्य भेदः स्यात्; तथा च सति लोकप्रतीतिविरोध इति । अपि च-साध्यविकलोऽपि वासिवर्द्धकिदृष्टान्तः । तथाहि-नायं वर्द्धकिः काष्ठमिदमनया वास्या घटयिष्यते इत्येवं वासिग्रहणपरिणामेनापरिणतः सन् तामगृहीत्वा घटयति, किं तु तथापरिणतस्तां गृहीत्वा । तथापरिणामे च वासिरपि तस्य काष्ठस्य घटने व्याप्रियते,पुरुषोऽपि । इत्येवं लक्षणैक्यार्थसाधकत्वाद् वासिवर्द्धकयोरभेदोऽप्युपपद्यते, तत्कथमनयोर्भेद एवेत्युच्यते ?। एवमात्माऽपि-'विवक्षितमर्थमनेन ज्ञानेन ज्ञास्यामि'इति ज्ञानग्रहणपरिणामवान् ज्ञानं गृहीत्वाऽर्थं व्यवस्यति,ततश्च ज्ञाताऽऽत्मनोरुभयोरपि संवित्तिलक्षणैककार्यसाधकत्वादभेद एव । एवं कर्तृकरणयोरभेदे सिद्धे संवित्तिलक्षणं कार्यं किमात्मनि व्यवस्थितम्, आहोस्विद् विषये इति वाच्यम् ?। आत्मनि चेत्-सिद्धं नः समीहितम्। विषये चेत्, कथमात्मनोऽनुभवः प्रतीयते ?। अथ विषयस्थितसंवित्तेः सकाशादात्मनोऽनुभवस्तर्हि किं न पुरुषान्तरस्यापि ?,तद्भेदाविशेषात्। अथ ज्ञाताऽऽत्मनोरभेदपक्षे कथं कर्तृकरणभाव इति चेत्?,ननु यथा सर्प आत्मानमात्मना वेष्टयतीत्यत्राभेदे यथा कर्तृकरणभावस्तथाऽत्रापि । अथ परिकल्पितोऽयं कर्तृकरणभाव इति चेद्देहेनाऽवस्थायां प्रागवस्थाविलक्षणगतिनिरोधलक्षणार्थक्रियादर्शनात् कथं परिकल्पितत्वम् ?। न हि परिकल्पनाशतैरपि शैलस्तम्भ आत्मानमात्मना वेष्टयतीति वक्तुं शक्यम् । तस्मादभेदेऽपि कर्तृकरणभावः सिद्ध एव। किञ्च-चैतन्यमिति शब्दस्य चिन्त्यतामन्वर्थः-चेतनस्य भावश्चैतन्यम् । चेतनश्चात्मा त्वयाऽपि कीर्त्यते, तस्य भावः स्वरूपं चैतन्यम् । यच्च यस्य स्वरूपं न तत्ततो भिन्नं भवितुमर्हति, यथा वृक्षाद् वृक्षस्वरूपम् । अथास्ति चेतन आत्मा, परं चेतनासमवायसंबन्धाद्, न स्वतः; तथा प्रतीतेरिति चेत्। तदयुक्तम् । यतः प्रतीतिश्चेत् प्रमाणीक्रियते, तर्हि निर्बाधमुपयोगाऽऽत्मक एवाऽऽत्मा प्रसिध्यति । न हि जातुचित् स्वयमचेतनोऽहं चेतनायोगात् चेतनः। अचेतने वा मयि चेतनायाः समवाय इति प्रतीतिरस्ति; ज्ञाताऽहमिति समानाधिकरणतया प्रतीतेः। भेदे तथा प्रतीतिरिति चेत् । न । कथञ्चिदात्म्याभावे सामानाधिकरण्यप्रतीतेरदर्शनात् । यष्टिः पुरुष इत्यादिप्रतीतिस्तु भेदे सत्युपचाराद् दृष्टा, न पुनस्तात्त्विकी । उपचारस्य तु बीजं-पुरुषस्य यष्टिगतस्तब्धत्वाऽऽदिगुणैरभेदः,उपचारस्य मुख्यार्थस्पर्शित्वात् । तथा चाऽऽत्मनि ज्ञाताऽहमिति प्रतीतिः कथञ्चिच्चेतनाऽऽत्मतां गमयति,तामन्तरेण ज्ञाताऽहमिति प्रतीतेरनुपपद्यमानत्वाद्,घटाऽऽदिवत् । न हि घटाऽऽदेरचेतनाऽऽत्मको ज्ञाताऽहमिति प्रत्येति । चैतन्ययोगाभावादसौ न तथा प्रत्येतीति चेत् । न । अचेतनस्यापि चैतन्ययोगाच्चेतनोऽहमिति प्रतिपत्तेरनन्तरमेव निरस्तत्वात् , इत्यचेतनत्वं सिद्धम्-आत्मनो जडस्याऽर्थपरिच्छेदं पराकरोति, तं पुनरिच्छता चैतन्यस्वरूपताऽस्य स्वीकरणीया । ननु ज्ञानवानहमिति प्रत्ययाद्ज्ञानज्ञानयोर्भेदः, अन्यथा धनवानिति प्रत्ययादपि धनधनवतोर्भेदाभावानुषङ्गः । तदसत् । यतो ज्ञानवानहमिति नाऽऽत्मा भवन्मते प्रत्येति, जडत्वैकान्तरूपत्वात्,घटवत् । सर्वथा जडश्च स्यात्-आत्मा ज्ञानवानहमिति प्रत्ययश्च स्यादस्य विरोधाभावात्,इति मा निर्णैषीः; तस्य तथोत्पत्त्यसंभवात् । ज्ञानवानहमिति हि प्रत्ययो नागृहीते ज्ञानाऽऽत्मके विशेषणे विशेष्ये चाऽऽत्मनि जातूत्पद्यते, स्वमतविरोधात्; " नागृहीतविशेषणा विशेष्ये बुद्धिः " इति वचनात् । गृहीतयोस्तयोरुत्पद्यत इति चेत्-कुतस्तद्गृहीतिः ?। न तावत् स्वतः, संवेदनाऽनभ्युपगमात् । स्वसंविदिते ह्यात्मनि ज्ञाने च स्वतः सा युज्यते, नाऽन्यथा, सन्तानान्तरवत् । परतश्चेत्तदपि ज्ञानान्तरं विशेष्यं नागृहीते ज्ञानत्वविशेषणे गृहीतुं शक्यम् । गृहीते हि घटत्वे घटग्रहणमिति ज्ञानान्तरात्तद्ग्रहणेन भाव्यम्, इत्यनवस्थानात् कुतः प्रकृतप्रत्ययः ?। तदेवं नाऽऽत्मनो जमस्वरूपता संगच्छते । तदसङ्गतौ च चैतन्यमौपाधिकमात्मनोऽन्यदिति वाङ्मात्रम् । स्या० । आचा० । विपा० । (' आता ' शब्दे द्वितीयभागे २०० पृष्ठे ज्ञानज्ञानिनोरभेदाभेदविचारोऽदर्शि)

(१५) ज्ञानज्ञानिनोरन्यत्वे बन्धमोक्षपरामर्शः-

चेयणस्स उ जीवा, जीवस्स उ चेयणाउ अन्नत्ते ।
दवियं अन्नक्खणं खलु, हविज्ज न य बंधमोक्खाओ ॥

चैतन्यस्य जीवाज्जीवस्य चेतनाया अन्यत्वे ऊर्ध्वं जीवद्रव्यमलक्षणं 'चेतनालक्षणो जीवः' इति लक्षणरहितं भवेत्,चेतनाया घटाऽऽदिवद् जीवादप्येकान्तव्यतिरिक्तत्वाद्, लक्षणाभावे च लक्ष्यस्याप्यभाव इति, खरशृङ्गवत् । अत्यन्तासन् जीवो न बध्यते, बन्धस्य वस्तुधर्मत्वात्। नापि मुच्यते, बन्धाभावादिति बन्धमोक्षावपि न स्याताम् । अथ मन्येथा अचेतनोऽपि स बध्यते, मुच्यते चेति,तदप्ययुक्तम् । अचेतनानामप्येव धर्मास्तिकायाऽऽदीनां बन्धमोक्षप्रसक्तेः। बृ० १ उ० । विशे० ।

(१६) बोधमात्रं, साकारो वा बोधः प्रमाणम्-

तथाहि-"बोधः प्रमाणम्" इति वदन्तो वैभाषिकाः पर्यनुयोज्याः । किं बोधमात्रस्य प्रामाण्यम्, आहोस्विद् बोधविशेषस्य ?। यदि बोधमात्रस्य,तदा तल्लक्षणमयुक्तम्;व्यवच्छेद्याभावात्। अबोधस्य व्यवच्छेद्यत्वेऽपि संशयविपर्ययाऽऽदीनां बोधस्वभावत्वात् प्रमाणताप्रसक्तिः। न च संशयाऽऽदीनामपि प्रमाणता, लोकशास्त्रविरोधात्। लोकप्रसिद्धं च प्रमाणं व्युत्पादयितुमारब्धम्,तत्र चेन्द्रियाऽऽदेरपि प्रमाणतायाः प्रसिद्धेः बोधस्य प्रामाण्येऽव्याप्तिश्च लक्षणदोषः । न चाबोधरूपस्येन्द्रियाऽऽदेर्लोकप्रमाणता न व्यपदिश्यते, प्रदीपेनोपलब्धं चक्षुषा दृष्टं धूमेनावगतमिति लौकिकव्यवहारदर्शनात् । न चौपचारिकं प्रामाण्यम्, प्रमितिक्रियायां साधकतमत्वेन मुख्यप्रामाण्योपपत्तेः । अत एव शास्त्रान्तरेष्वपि विशेष्योपलब्धिजनकस्य बोधाबोधरूपविशेषत्यागेन, सामान्यतो " लिखितं साक्षिणो भुक्तिः, प्रमाणं त्रिविधं स्मृतम्" इत्युक्तिः । किं च-प्रमीयतेऽनेनेति प्रमाणशब्दः करणविशेषप्रतिपादकः । करणविशेषत्वं चास्य विशेष्योपलब्धिजनकस्य बोधाबोधरूपविशेषत्यागेन सामान्यतो

लिखितस्वरूपकार्यजनकत्वेन कार्यस्य चाव्यभिचाराऽऽदिस्वरूपत्वात् तज्जनकत्वेनापरेण साधकतमेन भाव्यम्,एकस्यैव स्वात्मनि करणक्रियाविरोधात्। ततो बोधाबोधरूपस्य प्रमितिजनकस्य प्रमाणतोपपत्तेर्बोधमात्रं प्रमाणमित्यव्याप्तिलक्षणदोषः प्राप्नोतीति स्थितम्।

अथ बोधविशेषः प्रमाणं,तदाऽत्रापि वक्तव्यम्-कः पुनरसौ बोधस्य विशेषः?। यद्यव्यभिचाराऽऽदिविशेषणविशिष्टत्वं, तदा प्रमितिस्वभावस्य तस्य प्रमाणताप्रसक्तिः। न चाभ्युपगम्यत एवेति वाक्यम्, करणविशेषस्य प्रमाणव्यवस्थितेः। अत एव 'निराकारो बोधोऽर्थसहभाव्येकसामग्र्यधीनस्तत्रार्थे प्रमाणम्' इति वैभाषिकोक्तमसङ्गतम्। अपि च-कर्मणयसौ प्रमाणमभ्युपेयते। यत उक्तम्-"सव्यापारमिवाऽऽभाति, व्यापारेण स्वकर्मणि।" इति। कर्मता च बोधसहभाविनोऽर्थस्य तद्बोधापेक्षया न संभवति, तत्समानकालस्य तत्कृतविकार्यत्वात्। द्वयोः कर्मरूपत्वे च तत्र करणक्रिययोः कथं प्रतिनियमः?। तदभावे चैकस्य सामग्र्यधीनतायामपि सर्वः सर्वस्य बोधो भवेत्। किञ्चैकसामग्र्यधीनत्वस्य द्वयोरप्यविशेषाद्यथा बोधार्थस्य ग्राहकः, तथाऽर्थोऽपि बोधस्य किं न भवेत्?। तत्र 'निराकारो बोधः प्रमाणं' संभवति। अथ स्यान्निराकारो बोधः, प्रमाणं माऽस्त्वसौ, प्रमितिक्रियायां साधकतमत्वात् प्रमाणम्। ननु च बोधस्य प्रमाणस्वरूपत्वादर्थाऽऽकाराऽऽत्मकत्वमयुक्तम्, प्रमेयरूपताऽऽपत्तेः। न च प्रमेयरूपमेव प्रमाणं भवितुमर्हति, प्रमाणस्य तद्ग्राहकत्वेन प्रतिभासनात्। न च तथात्वेन प्रतिभासमानमपि प्रमेयरूपं युक्तम्, प्रमाणप्रमेययोरन्तर्बहिर्व्यवस्थितत्वेनावभासनात्। भेदेन च प्रतिभासमानं नान्यथाऽधिगन्तुं युक्तम्। न हि प्रतिभासः साक्षात् कारणाऽऽकारत्वात् प्रत्यक्षरूपोऽर्थव्यवस्थापकः प्रमाणान्तरादनुग्रहं,बाधां वा प्रतिपद्यते। उक्तं च-"प्रमाणस्य प्रमाणेन, न बाधा नाप्यनुग्रहः। बाधायामप्रमाणत्व-मानर्थक्यमनुग्रहे॥१॥" इति। सर्वदा बहिर्व्युत्क्रान्तार्थावभासिनोऽध्यक्षस्याप्रमाणत्वे प्रमाणान्तरप्रवृत्तिरेव। न चाध्यक्षेण ज्ञानमेव बहिरर्थाकारं प्रतिपद्यते, न बाह्योऽर्थः, इति कथं निराकारता तस्येति वक्तव्यम्?, ज्ञानरूपताया बोधस्याध्यक्षे प्रतिभासनात्, अर्थस्य च ज्ञानरूपतायाः प्रतिपत्तेः। न ह्यनहङ्काराऽऽस्पदत्वेनार्थस्य प्रतिभासे अहङ्काराऽऽस्पदबोधरूपस्यैव ज्ञानरूपता युक्ता। यदि त्वहङ्काराऽऽस्पदत्वेनार्थस्य प्रतिभासः स्यात्तदा रूपादिन्नत्वात्तद्वात्मनोऽहं घट इति प्रतिभासः स्यात्। न चान्यथाभूता प्रतिपत्तिरन्यथाभूतमर्थं व्यवस्थापयितुं शक्ता, प्रतिपत्तिव्यतिरेकेणाप्यर्थव्यवस्थितिप्रसक्तिश्च;नीलप्रतिपत्तेरपि पीताऽऽदिव्यवस्थापनाप्रसङ्गात्। अथ साकारविज्ञानमाकारप्रतिनियमात् तत्प्रतिपाद्यैवार्थस्तदाकारतां तज्जनकस्याऽर्थस्य व्यवस्थापयेदिति प्रतिकर्मव्यवस्था सिध्यति; निराकारं तु विज्ञानं बोधमात्रतया व्यवस्थितम्, सर्वार्थान् प्रत्यविशिष्टत्वात्। नीलस्येदं संवेदनं न पीतस्येति प्रतिकर्मव्यवस्थानिबन्धनं न भवेदिति साकारं ज्ञानमभ्युपगन्तव्यम्। असदेतत्। सर्वार्थान् प्रति बोधमात्रतया निराकारस्याविशिष्टत्वादिति हेतोर्निराकारत्वमपि चक्षुरादिवृत्त्या बोधस्य तथैव नियमितत्वात्। न च नियतत्वस्य सर्वार्थेषु नीलाऽऽदावेव तस्य प्रतीतिः, समानत्वेऽपि वा पुरोवर्तिन्येव नीलाऽऽदौ समानत्वस्य संभवात् न सर्वार्थसाधारणी प्रतिपत्तिः निराकारज्ञानवादिनो न काचित् क्षतिः, तथादृष्टत्वात्। न हि दृष्टेरनुपपन्नं नाम निराकारत्वे किमिति पुरोवर्तिन्येव नीलाऽऽदौ प्रवर्तते,विज्ञानं चक्षुरादिभिस्तथैव नियमितत्वादिति प्रतिपादितं प्राक्। कस्मात्तैः तत्र नियम्यत इति चेत्?,अत्र वस्तुस्वभावैरुत्तरं वाच्यम्। न हि कारणानि कार्यजननप्रतिनियमे पर्यनुयोगमर्हन्ति, तत्र तस्य वैफल्यात्। साकारत्वेऽपि चाऽयं पर्यनुयोगः समानः। तथा हि-साकारमपि ज्ञानं किमिति नीलाऽऽदिकमेव पुरोवर्त्ति,सन्निहितमेव च व्यवस्थापयति, तेनैव तथा तस्य जननाऽऽदिवत् समानमेतन्निराकारत्वेऽपि। किञ्च-चक्षुरादिजन्यं तद्विज्ञानमिति चक्षुराद्याकारं न भवतीति पर्यनुयोगे नूनताऽपि वस्तुस्वभावैरुत्तरं वाच्यमिति वक्तव्यम्, तदस्माभिरभिधीयमानं किमित्यसाङ्गत्यं भवतः प्रतिभाति?। अपि च-साकारता विज्ञानस्य किं साकारेण प्रतीयते, आहोस्वित् निराकारेण?। यदि साकारेण,तदा तत्राऽपि प्रतिपत्तावाकारान्तरपरिकल्पनमित्यनवस्थाप्रसक्तिः। निराकारेण चेत्,बाह्यार्थस्याऽपि तथाभूतेनैव प्रतिपत्तिप्रसक्तिः। न च बाह्ये प्रत्यासत्तिनियमाभावाच्च तथाभूतेन प्रतिपत्तिरिति वाच्यम्,इतरत्रापि प्रत्यासत्तिनियमाभावस्य तुल्यत्वात्। शुक्ले पीताऽऽकारदर्शनाद्भ्रान्तेन प्रतिनियमाभाव इति चेत्,निराकारेऽपि तर्ह्यभ्रान्ततत्वादेव प्रतिनियमो भविष्यतीति किमाकारपरिकल्पनया?। कथमाकारमन्तरेण प्रतिनियम इति न वाच्यम्, आकारेऽप्यस्य समानत्वात्। तथाहि-साकारवादिनोऽपि कथं प्रतिनियम इति प्रेरणायां प्रतिनियताऽऽकारपरिग्रह एव प्रतिनियम इति नोत्तरं युक्तम्, प्रतिनियताऽऽकारपरिग्रहस्यैव प्रतिनियमरूपतयोपन्यस्तस्याद्यापि चिरायमाणत्वात्। अथ चानुमानाद्बाह्योऽर्थः प्रतीयते, तर्हि प्रतिबन्धसिद्धिर्वक्तव्या। न च बाह्योऽर्थोऽध्यक्षतः कदाचनाऽपि सिद्धो, नापि तत्प्रतिबद्धो ज्ञानाऽऽकार इति न प्रतिबन्धसिद्धिः, तामन्तरेण न चानुमानप्रवृत्तिरिति कथं बाह्यार्थसिद्धिः?, यथाऽर्थापत्त्या बाह्योऽर्थोऽधिगम्यते, तथाऽपरयाऽर्थस्वरूपप्रतिपत्तौ तस्याः प्रत्यक्षरूपताप्रसक्तेः। न च स्वरूपप्रतिपत्तिमन्तरेणाप्यनुमानवत्तस्याप्रामाण्यम्,अनुमानस्यावगतप्रतिबन्धलिङ्गरूपत्वेन प्रामाण्यात्, अत्र च तदभावात्। न चाऽत्यन्तपरोक्षस्यार्थस्य केनचिदाकारेण विषयीकरणमिति न तस्य प्रतिपत्तिविषयता, अनुमानविषयस्य तु पूर्वदृष्टत्वात्। इदं तदित्याकारेण प्रतिपत्तिविषयता संभवत्यर्थापत्त्याऽप्यर्थप्रतीतिः। अथ दूरस्थितवृक्षाऽऽदौ मृत्पिण्डाऽऽकारो यथा बाह्यवृक्षाऽऽद्यर्थव्यतिरेकेण न प्रतिभासविषयः,तद्वत्पुरोवर्तिनि स्तम्भाऽऽदौ तदाकारः सत्येव बाह्ये स्तम्भाऽऽद्यर्थे इति सिद्ध एव बाह्यार्थः। न च वृक्षाऽऽद्यावपि पिण्डाऽऽद्याकार एव वृक्षाऽऽदिः,तस्य स्वपरावभासस्यान्यथाप्रतीतेः। असदेतत्। यतः-स्वपराभ्यामसौ सन्निहितः प्रतीयमानः साकारेण वा ज्ञाने प्रतीयते?, निराकारेण वा?। यदि साकारेणेति पक्षः, तदाऽत्रापि ज्ञानाऽऽकार एव, न बाह्योऽर्थ इति कश्चिदप्यर्थासिद्धेरसिद्धो दृष्टान्तः। तथा च-प्रतिबन्धाप्रसिद्धेन ज्ञानाऽऽकाराद् बाह्याऽर्थसिद्धिः। अथ निराकारेण तेनार्थः स्वपराभ्यां प्रतीयत इति प्रतिबन्धसिद्धिरभ्युपगम्यते पिण्डाऽऽद्याकारस्य बाह्यार्थेन सह (?)। नन्वेवं निराकारज्ञानं बाह्यार्थग्राहकं सिद्धमिति व्यर्थं ज्ञानाकारकल्पनम्। नच तत्राऽपि प्रतिभासमानो वृक्षो ज्ञानाकार एवेत्यपरमर्थं सावयति, तत्राप्यपरापरार्थकल्पनायामनवस्थाप्रसङ्गात् कुतोऽर्थसिद्धिः?। ज्ञानाऽऽकाराऽऽदिभिरिति चेत्,ननु प्रतिबन्धाग्रहणे कथं तदा तत्सिद्धिः?, इति पुनरपि तदेव वक्तव्यमित्यपर्यवसिता पर्यनुयोगानवस्था।

तस्माद् निराकारादेव ज्ञानाद् बाह्यार्थसिद्धिरभ्युपगन्तव्या। अथ निराकारं ज्ञानं नीलाऽऽदावर्थे सव्यापारं निर्व्यापारमिति कल्पनाद्वयम्। प्रथमकल्पनायामप्यव्यतिरिक्तव्यापारवत्, उत व्यतिरिक्तव्यापारवत्? इति कल्पनाद्वयम्। आद्यविकल्पे-ज्ञानरूपमेव व्यापारःकश्चित्। न च व्यापारतद्वतोरभेदो युक्तो, धर्मधर्मितया प्रतीतेः। द्वितीयविकल्पेऽपि संबन्धासिद्धिः, ततस्तस्योपकाराभावात्। उपकारेऽपि तस्य तन्निर्वर्तिते ऽपरो व्यापारः कल्पनीय इत्यनवस्था। व्यापारस्यापि चार्थग्रहणव्यापृतावपरो व्यापारः कश्चित् परिकल्पनीय इत्यत्राप्यनवस्था। निर्व्यापारस्यार्थव्यापृतावर्थस्यापि ज्ञानग्रहणे व्यापृतिप्रसक्तिरित्यर्थस्यापि ज्ञानं प्रति ग्राहकता स्यात्। न च निराकारो बोधो निर्व्यापारोऽपि बोधस्वरूपत्वादर्थग्राहकोऽर्थस्याप्यर्थरूपतया बोधं प्रति ग्राहकतो ग्राह्यरूपासंस्पर्शान्न बोधकस्य ग्राहकता (?)। न च ग्राह्यार्थरूपान्यथाऽनुपपत्त्या बोधस्याग्राहकताव्यवस्था, इतरेतराऽऽश्रयदोषप्रसक्तेः। तथाहि-ग्राह्यरूपव्यवस्था ग्राहकरूपसंस्पर्शात्, ग्राहकरूपव्यवस्थाऽपि ग्राह्यरूपसंस्पर्शादिति कथं नेतरेतराश्रयदोषः?। न च समानकालयोर्नीलबोधयोर्ग्राह्यग्राहकभावव्यवस्था, कर्मकर्तृरूपत्वासिद्धेः। न हि समानकालतायां निर्वर्त्यविकार्यप्राप्यरूपकर्मतासंभवः, समानकालस्य निर्वर्त्यविकार्यताऽयोगात्। प्राप्यरूपता च न तद्व्यतिरिक्ता संभवति, समानकालयोर्द्वयोरपि ग्राह्यग्राहकभावाविशेषात्। तन्न निराकारस्यार्थव्यवस्थापकत्वं बोधस्येति विज्ञप्तिमात्रमेव नार्थव्यवस्थेति विज्ञानवादिनोक्तमेतत्, सप्रतिघरूपतयाऽध्यक्षतो बाह्यस्य सिद्धविज्ञप्तिमात्रत्वे तद्रूपताऽभावप्रसक्तिर्नीलवत्। न चाध्यक्षतः सप्रतिघबाह्यरूपतया प्रतीयमानस्य विज्ञप्तिरिति नामकरणे काचिन्न क्षतिः, नामकरणमात्रेण सप्रतिघत्वबाह्यरूपत्वाऽऽदेरर्थधर्मस्याव्यावृत्तेः। अतः सप्रतिघत्वाऽऽदिरूपो बाह्योऽर्थः, तद्विपरीतश्चान्तरो बोध इति कथं विज्ञप्तिमात्रम्?। न च सप्रतिघाऽऽकारतया बोधप्रतिपत्तिः, तद्विषयतया तु तस्य प्रतिपत्तिरस्त्येव, नीलविषयो बोधो मयाऽनुभूयते इति निश्चयोत्पत्तेः। न च प्रतिभासनिश्चयमन्तरेणापरस्य पदार्थस्वरूपव्यवस्थितौ निबन्धनमुपदर्शयामः, ततो निराकारादेव बोधाद् बाह्यार्थसिद्धिरभ्युपेया। असदेतत्। यतो निराकारं ज्ञानमर्थव्यवस्थापकमिति किं प्रत्यक्षतोऽवगम्यते, आहोस्विदनुमानतः, उतार्थापत्तेरिति विकल्पः?। तत्र न तावत् प्रत्यक्षतस्तत्प्रतिपत्तिः, प्रतिभासमानशरीरस्तम्भाऽऽदिव्यतिरिक्तस्यापरस्य ज्ञानस्यानुपलम्भेनासत्त्वात्। न च सुखाऽऽद्यान्तरूपेणाहङ्काराऽऽस्पदतया स्वसंवेदनाध्यक्षतो ज्ञानरूपं प्रतीयत एवेति कथं तस्यानुपलम्भः?, यतः सुखाऽऽदयो नान्तःस्पृष्टशरीराः, नातिरिच्यमाननवः प्रतिभान्ति। अहमिति प्रत्ययोऽपि तथाभूतशरीराऽऽलम्बनतया संवेद्यत इति। न च व्यतिरिक्तो बोधाऽऽत्मा स्वप्नेऽप्यनुभवविषय इति न प्रत्यक्षतो ग्राह्यव्यतिरिक्तवद् ग्राहकस्वरूपमवभासते। अथाचूतशरीराऽऽलम्बनतया संवेद्यत इति न तत्प्रत्यक्षावसेयम्, नाऽप्यनुमानाधिगम्यम्, प्रत्यक्षाप्रवृत्तौ तत्पूर्वकस्य तत्र तस्याप्यप्रवृत्तेः। नाप्यर्थापत्तिस्तद्भावमवगमयति, तस्याः प्रामाण्यानुपपत्तेः। किञ्चअनुस्मरणमात्रमर्थापत्तिः, न चेदं तदित्युल्लेखवदनुस्मरणमदृष्टेऽर्थमासादयति। न च ज्ञानस्वरूपं कदाचनापि दृष्टं, दृष्टे वा तत एव तत्सिद्धेः किमर्थापत्त्या?। अथार्थस्य ज्ञानमिति निराकारस्य ज्ञानस्य प्रतीतेस्तत्सद्भावः। न चार्थग्राहकत्वेन सर्वदाऽर्थस्य ज्ञानमित्येवंप्रतीयमानस्याविसंवादिप्रत्ययविषयस्य तस्याभावः, संवेदनमात्रस्याप्यभावप्रसक्तेः। अतो निराकाराऽविसंवादिप्रत्ययविषया बुद्धिः सिद्धेति युक्तमुक्तम्-निराकारा नो बुद्धिरिति। असदेतत्। यतो निराकाराऽर्थबुद्धिर्यया प्रतीयत इत्यपरा बुद्धेस्तदर्थस्य च ग्राहिका बुद्धिः प्रसज्येत। तथा च सत्याकारमन्तरेण केनाऽऽकारेण बुद्धिरर्थस्येति योग्या प्रतीयेत? न हीदं तदित्यनिरूपिताऽऽकारमाकारान्तरेण योजनामर्हति। न च तथाऽप्रतीयमाना बुद्धिरिति व्यपदेशमासादयति, शशशृङ्गाऽऽदेरपि बुद्धित्वप्रसक्तेः। अथाऽपि स्वात्मनाऽर्थबुद्धिरासीदिति नार्थाऽऽकारव्यतिरिक्ता सा प्रतिज्ञाति, किं तु पृथगपोद्धारपरिकल्पनया प्रकाशरूपतया व्यवस्थापिता बुद्धिरिति व्यपदिश्यते। अयुक्तमेतत्। यतो नाऽव्यतिरेकेण प्रतीयमाना बुद्धिर्विकल्पेनापोद्धर्तुं शक्या; न च पृथक् प्रतीयते सेत्युक्तम्। अथ सुखस्तम्भाऽऽद्याकारतयाऽयं तदन्तःस्पृष्टविरूपाऽऽदिकमेव ज्ञानं प्रतिभाति न पुनस्ततो व्यतिरिक्तमपरं ज्ञानम्, तथा सति संवेदनमात्रमेव प्रसक्तम्। एवं च चक्षुरादिना मया रूपं प्रतीयत इति संबन्धाभावात्कथं प्रतीतिः?; अस्ति चेयं प्रतीतिः। तस्मादुपलब्धेऽत्र रूपाऽऽदिकेऽभिमुखीभूतं चक्षुस्तत्प्रकाशत्वं विदधाति, स वै बुद्धिरुच्यते। न च नीलाऽऽद्याकारमविद्यमानमेव तत्र प्रकाशत्वमुत्पन्नमिति वक्तव्यम्, व्यज्यमाननीलाऽऽदिविषयचक्षुरादिव्यापाराऽऽदिव्यज्यमानस्य प्रकाशत्वस्यैव तत्रोत्पत्तेः, नीलाऽऽदेस्तु पूर्वमेव भावात्। तथा च सत्यर्थस्य बुद्धिरिति व्यपदेशः सिद्ध एव। अत एवोक्तम्-बुद्धिरुपलब्धिर्ज्ञानमित्यनर्थान्तरमिति। एतदप्यसत्। यतो न प्रकाशव्यतिरेकेण नीलाऽऽदिरुपलभ्यत इति कुतः पूर्वव्यवस्थिते एव नीलाऽऽदौ प्रकाशता चक्षुरादेरुदयतीति वक्तुं शक्यम्?, न हि प्रकाशताराहित्यं कदाचिदुपलब्धं नीलाऽऽदिकम्, उपलम्भे वा सर्वस्य सर्वदर्शित्वप्रसक्तिः। अथ नीलस्य प्रकाश इति व्यतिरेक उपलभ्यत एव। न। शिलापुत्रकस्य शरीरं स्तम्भस्य स्वरूपमित्यत्रापि व्यतिरेकोपलब्धेर्व्यतिरेकः स्यात्, प्रकाशस्य प्रकाशतेति चाद्रष्टो भेदः प्रकाशतायाः स्यात्। अथात्रैक एव प्रकाशतोपलभ्यते नापरा इति न प्रकाशस्यापरः प्रकाशः, व्यतिरेकोपलम्भस्य प्रत्यक्षबाधित्वात्, तर्हि नीलप्रकाशयोरपि न प्रत्यक्षप्रतीतो भेद इति, तत्राऽपि समानन्यायतो व्यतिरेकस्यासिद्धेः। नीलाऽऽद्याकारैव प्रकाशिता, सा च बुद्धिरिति सिद्धा साकारता ज्ञानस्य। अथ परोक्षा बुद्धिः निराकारा च ततः साकारस्य बोधस्य बुद्धिरिति विकल्पेऽप्यप्रतिभासनात्; अर्थापत्तेश्च प्रक्रयः, प्रकाशमात्रेणार्थस्य सिद्धत्वाद् व्यर्थं तदपरबुद्धिपरिकल्पनम्। ततश्च यदुक्तम्-निराकारमेव ज्ञानमर्थोन्मुखमुपलक्ष्यमाणं प्रतिनियमेन कथं सर्वसाधारणम्?, इति सिद्धः प्रतिकर्मप्रत्यय इति। तदप्ययुक्तम्। यतो न किञ्चिन्नीलाऽऽद्याकारप्रकाशिताव्यतिरेकेणोपलभ्यतेऽपरमिति कस्यार्थे प्रत्यासन्नता परैः परिकल्प्यते?। प्रकाशता तु यदि निराकारा स्यात्, प्रतिकर्मव्यवस्था न भवेत्। न ह्यालोकमात्रेणामिश्रितघटाऽऽदिरूपेण तद्रूपप्रकाशनं युक्तं, कथं तर्हि चक्षुरादिना घटादिरूपमुपलभ्यत इति व्यवस्था?। बाह्यार्थवादिपरिकल्पिते परोक्षे रूपाऽऽदितदाकारा प्रकाशता चक्षुरादिना जन्यत इति तथा व्यपदेशः संभवी; प्रकाशिता चापोद्धारपरिकल्पनयाऽनादिवासनानियमाद् भिन्ना व्यपदिश्यत इति न किञ्चिदयुक्तम्। यद्वा-पूर्वसमग्रीनश्चक्षुरादिरूपाऽऽद्याकारप्र-

काशतावुद्धिस्वभावोपजायते इत्येकसामग्र्यधीनया तया व्यपदेशः। दृश्यते हि प्रदीपप्रकाश्ययोः समानकालयोः प्रदीपनघटप्रकाशन इत्येकसामग्र्यधीनया व्यपदेशः। न ह्येककालयोरपि प्रकाश्यप्रकाशकयोः कार्यकारणभावमुपपद्यते। ननु यदि साकारं विज्ञानमभ्युपगम्यते, तदा चक्षुरादिकोऽर्थः प्रतिक्षिप्त एव, चक्षुराद्याकारस्य संवेदनमात्रस्यैवोपलम्भेन तदाकारार्थव्यवस्था स्यात्। यतो न बाह्यार्थः, तदाकारं च विज्ञानद्वयमुपलम्भविषयः, तत्त्वे चाज्ञानमेव, तत्रापि साकारं तत्राप्यर्थस्य पुनरुपलब्ध्याऽभ्युपगमे ज्ञानाऽऽकारेऽनुभव इति न कदाचित्स्वरूपेणोपलब्धिर्भवेदिति नार्थव्यवस्था। असदेतत्। कार्यव्यतिरेकेण बाह्यार्थपरिकल्पनाऽर्थापत्त्या वा परेषामभिगतेति तदभ्युपगमादर्थस्यायमाकारं प्रकाशकमनुप्रविष्ट इत्यनिधानार्थोक्तदोषानुपपत्तेः। अथवा-विज्ञानवादेऽर्थासिद्धिप्रेरणं सिद्धसाधनदोषाऽऽवहमिति साकारमेव ज्ञानं प्रमाणमभ्युपगन्तारः सौत्रान्तिकयोगाचाराः।

अत्र प्रतिविधीयते—निराकारं विज्ञानमर्थग्राहकमिति न प्रत्यक्षतः प्रतीयते, शरीरस्तम्भाऽऽदिव्यतिरेकेण उपलम्भस्यासत्त्वादिति। तस्यासत्त्वादित्यत्र हेतुरसिद्धः, अहङ्कारस्य सुखाऽऽदेर्ज्ञानविशेषस्यान्तःसंवेदनप्रत्यक्षानुभूयमानस्य सत्त्वात्। न च स्वसंवेदनप्रत्यक्षसिद्धस्याप्यसत्त्वम्, स्तम्भाऽऽद्याकारस्यापि ज्ञानस्यासत्त्वप्रसक्तेः। न हि तथाप्रतिभासव्यतिरेकेणापरमत्रापि सत्त्वानुबन्धनम्। न चाहमिति प्रत्ययोऽन्तःस्पृष्टशरीराऽऽद्यालम्बनः, शरीरस्य सप्रतिघत्वेन, अपरप्रत्यक्षविषयत्वेन वाऽज्ञानरूपतया सुखाद्यहंप्रत्ययविषयत्वानुपपत्तेः ज्ञानस्यैवाप्रतिघातसंवेद्यरूपस्यान्तःसुखाऽऽकारस्य सुखाद्यहंप्रत्ययविषयत्वात्, अहं कृशः स्थूल इत्यादिशरीराऽऽलम्बनत्वस्याहंप्रत्ययस्यौपचारिकत्वादुपचारनिबन्धनत्वस्य च प्राक् प्रतिपादितत्वात्। तेन निराकारस्य ज्ञानस्य स्वप्रेक्ष्यसंवेदनान्न प्रत्यक्षतो बाह्यव्यतिरिक्तं ग्राहकस्वरूपं प्रतिभातीति प्रत्युक्तम्, नीलमहं वेद्मीति बाह्यनीलार्थग्राहकस्यान्तर्ग्राह्यव्यतिरिक्तस्य स्वसंवेदनाध्यक्षतो ज्ञानस्याहमहमिकया प्रतीतेः। न चान्तः सुखाऽऽदयो बहिश्च नीलाऽऽदयः परिस्फुटवपुषः स्वयं विदिताः प्रतिभान्ति, न पुनस्तद्व्यतिरिक्तं निराकारज्ञानस्वरूपमर्थग्राहकमाभाति, सुखाऽऽदेरर्थग्राहकत्वायोगादिति वक्तव्यम्। यतो बाह्यं प्रति सुखाऽऽदीनां नैवास्माभिरपि ग्राहकत्वमभ्युपगम्यते। न हि सुखाऽऽदयो भावनोपनेयजन्मानो बहिरर्थसन्निधिमन्तरेणाऽपि प्रादुर्भवन्तः पदार्थव्यक्तीनां नियमेनोद्द्योतकाः, स्ववपुःपर्यवसितस्वरूपत्वात् तेषां, चक्षुरादिप्रभवास्तु संविदो बहिरर्थमुद्भासयन्त्यः स्पष्टावभासा अन्वयव्यतिरेकाभ्यां पृथगवसीयन्त इति पदार्थग्राहिण्यस्ता एवाभ्युपगमनीयाः। सुखाऽऽदिवेदिनं तु हृदि परिवर्तमानं बाह्यार्थसंविदपृथगेव, न तद् बाह्यार्थग्राहकतयाऽभ्युपगमविषयः। तदेवं ग्राह्यव्यतिरेकेण निराकारज्ञानस्य संवेदनाध्यक्षसिद्धत्वादनुमानमपि तत्सत्त्वप्रतिपादकत्वेन प्रवर्तत एव विप्रतिपत्तिसद्भावे। यच्चार्थापत्त्यप्रामाण्यान्नाऽतस्तत्प्रतिपत्तिरिति। तत्सिद्धसाधनमेव। यद्यपि निराकारा मया बुद्धिः प्रतीयत इति बुद्धेरप्यपरा बुद्धिर्ग्राहिकेत्याद्युक्तम्। तदप्यसङ्गतमेव; यतः स्वपरार्थग्राहकं बुद्धेः स्वरूपं, तेन च रूपेण स्वसंविदि प्रतिभासमाना कथं शशशृङ्गाऽऽदिवदव्यवस्थितरूपा भवेत्?। यद्यपि तदव्यतिरिक्ततया प्रतीयमाना न विकल्पेनाप्यपोद्धुं शक्या इति। तदप्यसङ्गतम्। ग्राह्यस्वरूपवत्तव्यतया स्वरूपेण तत्प्रतिभासनस्य प्रतिपादितत्वात्। यदपि प्रकाशतारहितं नीलाऽऽदिकं नोपलभ्यते, तथोपलम्भे सर्वं सर्वदा नवेदिति तत्राऽपि यदि ज्ञानं विना नीलाऽऽदिकं नोपलभ्यते इत्युच्यते, तदा सिद्धसाध्यता, तदन्तरेण तदुपलम्भस्यानिष्टेः। अथ नीलमेव प्रकाशरूपमिति प्रतिपाद्यते। तदयुक्तम्। नीलस्य जडतया प्रकाशरूपत्वानुपपत्तेः परस्परपरिहारस्थितलक्षणतया जमाजमयोरेकत्वयोगात्। यदपि नीलस्य प्रकाश इति व्यतिरेकः शिलापुत्रस्य शरीरमित्यादावभेदेऽपि संभवीति। तदपि न सम्यक्। दृष्टान्ते हि प्रत्यक्षावगतो भेदप्रतिभासः स्यात् वाक्ये न तु दार्ष्टान्तिके प्रत्यक्षारूढे तदेव प्रतिभासः समस्ति। तथाहि-ग्राह्यरूपस्तम्भाऽऽद्यनन्यव्यावृत्तत्वेन ग्राह्यतयाऽध्यक्षे प्रतिभाति प्रकाशितुं, स्तम्भाऽऽदिकमपि व्यावृत्तत्वेन ग्राहकतया प्रतीतेर्न स्तम्भः प्रतिभाति, किं त्वहङ्काराऽऽदिस्वभावतयाऽहङ्काराऽऽस्पदश्च प्रतिभासनिश्चयाभ्यामवसीयते, तद्ग्राह्यस्तु तद्विपरीतत्वेन। न चाध्यक्षसिद्धभेदयोर्नीलतत्संवेदनयोः कुतश्चित् प्रमाणाऽऽदिकताऽवसातुं शक्येति न भेदप्रतिभासस्य बाधा। न च नीलाऽऽदिरेव ज्ञानरूपः, अहं नीलाऽऽदिरित्यनवगमात्। तेन नीलाऽऽद्याकारैव प्रकाशिता, सा च बुद्धिरिति साकारता ज्ञानस्येति यदुक्तं, तदपि निरस्तं द्रष्टव्यम्। यदपि प्रकाशतामात्रेणार्थस्य सिद्धत्वाद् व्यर्थं तदपरबुद्धिपरिकल्पनम्, तदपि सिद्धमेव साधितम्; अर्थप्रकाशताया अर्थव्यतिरिक्ताया बुद्धित्वेन तदपरिकल्पनाया असिद्धत्वात्। यदपि नायमाकारं नीलाऽऽद्याकारप्रकाशिताव्यतिरेकेणोपलभ्यत इति कस्यार्थे प्रत्यासन्नता परैः परिकल्प्यते, तदपि नीलाऽऽद्यर्थग्रहणपरिणते ज्ञानस्य स्वसंवेदनाध्यक्षतः सिद्धेरयुक्ततया स्थितम्। प्रकाशता तु यदि निराकारा भवेत्, प्रतिकर्मव्यवस्था न स्यादिति यदुक्तं, तदप्यसङ्गतमेव। यतः प्रकाशता किं नीलाऽऽकारा?, आहोस्विद् ग्राह्याऽऽकाराऽभ्युपगम्यते?। यदि प्रथमो विकल्पस्तदा वक्तव्यम्-किमेकदेशेन नीलाऽऽद्याकारा प्रकाशता?, आहोस्वित् सर्वाऽऽत्मनेति?। तत्र यद्येकदेशेन नीलाऽऽद्याकारा प्रकाशता, तदा खांशैकप्रकाशतापसक्तेरित्यनेकान्तसिद्धिः। अथ सर्वाऽऽत्मना, तदा प्रकाशतायाः जडरूपनीलाऽऽदिस्वभावत्वाद्विज्ञप्तिरूपताऽभावप्रसक्तिः, जमस्य प्रकाशरूपताऽयोगाद्ग्राह्याकारित्वमपीतरेतराश्रयत्वम्। न हि देवदत्तस्य प्रतिनियताऽऽकारतासिद्धौ यज्ञदत्तस्य तदाकारतासिद्धिरिष्टा। न च प्रकाशता साकारतासिद्धिमन्तरेणापि ग्राह्यस्य प्रतिनियतरूपसिद्धिर्निराकारा, ज्ञानस्य प्रतिकर्मव्यवस्थाहेतुत्वप्रसक्तेः। न च यद् यदाकारं तत्तस्य ग्राहकमिति व्याप्तिसिद्धिः, अन्यथोत्तरनीलक्षणपूर्वनीलक्षणस्य ग्राहकः स्यात्। न च तस्याज्ञानरूपत्वाद् नायं दोषः, देवदत्तनीलज्ञानस्य यज्ञदत्तनीलज्ञानग्राहकताप्रसक्तेः। न च तयोः कार्यकारणभावाभावान्नायं दोषः, सदृशसमनन्तरज्ञानं प्रति उत्तरज्ञानक्षणस्य ग्राहकताप्रसक्तेः। अथ तत्र तारुण्यविधसारूप्याभावाद् नायं दोषः। ननु तथाविधं यदि कथञ्चित् सारूप्यमभिधीयते, तदाऽनेकान्तवादाऽऽपत्तिः। अथ सर्वात्मना सारूप्यं, तदोत्तरक्षणस्यापि पूर्वक्षणरूपताप्रसक्तिरित्येकक्षण-

मात्रं सर्वः सन्तानो भवेत् । न च पूर्वोत्तरक्षणयोः परपक्षे भिन्नमानेऽपि वैकान्ततः सारूप्यं संभवति, भेदपक्षे सामान्यवादप्रसक्तेः, अभेदपक्षे तु तदभावप्रसक्तेः । न च परपक्षे सारूप्यग्रहणोपायः संभवतीत्युक्तम् । किञ्च-यदि नीलाऽऽकारं ज्ञानमनुभूयत इति बाह्योऽप्यर्थो नीलतया व्यवस्थाप्यते, तर्हि त्रैलोक्यगतनीलार्थव्यवस्थितिस्ततो भवेत्, सर्वनीलार्थसाधारणत्वात् तस्य । अथ नीलाऽऽकारताविशेषेऽपि कश्चित्प्रतिनियमहेतुस्तत्र विद्यते, यतः पुरोवर्तिन एव नीलाऽऽदेस्ततो व्यवस्था, तर्हि नाकारत्वेऽपि ज्ञानस्य तत एव नियमहेतोः प्रतिनियतार्थव्यवस्थापकत्वं भविष्यतीति तत्साकारपरिकल्पनं व्यर्थम् । यदपि चक्षुरादिना रूपमुपलभ्यत इति व्यपदेशनिबन्धनं जन्यत्वं रूपाऽऽकारप्रकाशस्योक्तम्, तदपि स्वजाड्याऽऽविष्करणमात्रम् । यतो यथा प्रत्यासत्त्या चक्षुरादिकं समानकालं भिन्नकालं वा भिन्नं रूपाऽऽद्याकारं ज्ञानं जनयति, तथैव निराकारमपि ज्ञानं समानकालं भिन्नकालं वा स्वग्राह्यं भिन्नमपि ग्रहीष्यति । न हि चक्षुरादेर्विभिन्नकार्योत्पादनवद् विभिन्नग्राह्यग्रहणे शक्तिप्रक्षयः कश्चिद् ज्ञानस्य संभवी । अथ विभिन्नकार्योत्पादनमप्यसंभवी नाऽभ्युपगम्यते, तर्हि 'प्रमाणमविसंवादि' इति प्रमाणलक्षणप्रणयनमनर्थकं धर्मकीर्तेराप्यते, अविसंवादित्वमप्यर्थक्रियाज्ञानजनकत्वलक्षणस्याऽभावात् । अथ व्यावहारिकमेतद् लक्षणं न पारमार्थिकम्, किं तर्हि पारमार्थिकमिति वक्तव्यम् ?, ..., अज्ञातार्थप्रकाशो वेति चेत्, तत्रापि यदज्ञातस्याऽर्थस्य प्रकाशः स्वसंविदितोऽर्थग्रहणपरिणाम आत्मसंबन्धी, तदाऽऽत्मनाभ्युपगम इति न कश्चिद्दोषः । अथ "स्वरूपस्य स्वतो गतिः" इति वचनादज्ञातार्थप्रकाशः स्वरूपसंवेदनमात्रं, तदाऽव्यक्तबाधदोषः, स्वपरसंवेदकत्वेन ज्ञानस्य स्वसंवेदनाध्यक्षतः प्रतिपत्तेरिति प्रतिपादकत्वात्, प्रतिपादितत्वात्, प्रतिपादयिष्यमाणत्वाच्च । एतेन एकसामग्र्यधीनतया चक्षुरादिना रूपमुपलभ्यत इति व्यपदेश इत्येतदपि निरस्तम् । भिन्नानामेकसामग्र्यधीनत्वलक्षणप्रतिबन्धाविरोधे ग्राह्यग्राहकलक्षणस्यापि तस्याविरोधात् । यथा चैकसामग्र्यधीनानां चक्षुरादीनां समानसमयेऽपि स्वरूपप्रतिनियमः, तथा ग्राह्यग्राहकयोरपि समानकालत्वाविशेषेऽपि विज्ञान—ग्राहकमेव, अर्थस्तु ग्राह्य एवेति प्रतिनियमो भविष्यति । अथ एकसामग्र्यधीनत्वं रूपप्रतिनियमश्चक्षुरादेर्नेष्यते, तर्हि प्रमाणाऽऽदिव्यवहारस्य सकलस्य विलोपात्साकारज्ञानाऽभ्युपगमोऽसङ्गत एव स्यात् । यदपि कार्यव्यतिरेकेण बाह्यार्थकल्पनाऽर्थापत्त्या च परेषामिति तदभ्युपगमेनोच्यते-अर्थस्याऽऽकारः प्रकाशतामनुप्रविष्ट इत्युक्तम्, तदपि परदर्शनानभिज्ञतां ख्यापयति । न हि जैनानां कार्यव्यतिरेकादर्थापत्त्या बाह्यार्थपरिकल्पना, किं तु तद्ग्राहिप्रतिभासवशात् । साकारज्ञानवादिनस्तु-यदि ज्ञानाऽऽकारोऽर्थव्यतिरेकेण नोपपद्यत इत्यर्थव्यवस्थापकः, तदा नियतार्थव्यवस्थापकः स्यात् । जनकस्यैव व्यवस्थापक इति चेत् । न । चक्षुरादेरपि व्यवस्थापकः स्यात् । तज्जनकत्वेऽपि चक्षुरादेरनाकारत्वान्नेति चेत्, ननु चक्षुरादिजन्यत्वेऽपि किमिति तज्ज्ञानं तदाकारं न भवति चक्षुरादि वा साकारज्ञानजनकमिति वक्तव्यम् ?, स्वहेतुबलाऽऽयाततत्स्वभावत्वात् तयोरिति चेत् । ननु निराकारज्ञानपक्षेऽपि तत्स्वाभाव्याद् ज्ञानमेव चक्षुरादिव्यतिरेकेण स्वजनकार्थव्यवस्थापकमिति किन्नाभ्युपगम्यते ?, न्यायस्य समानत्वात् । किञ्च-ग्राहकस्यार्थजन्यत्वेन साकारता, सा च प्रतिभासगोचरा, एवं च ग्राहके आकारस्य जनकस्यैव प्रतिभासविषयत्वेऽन्यस्य तज्जनकस्य कल्पनाप्रसक्तिस्तत्राप्येवमित्यनवस्था भवेत् । तत्र साकारज्ञानानुभवबशादर्थव्यवस्थाप्रकाशताऽनुप्रविष्टताऽर्थाऽऽकारस्यायुक्तैव, वस्त्वन्तरानुप्रवेशासंभवात् । संभवे वा प्रकाशताया अपि चैतन्यरूपतायाः पृथिव्याद्यनुप्रवेशात् परलोकाय दत्तो जलाञ्जलिर्भवेत् । यदप्यर्थवादिन एवाऽयं दोषो, ज्ञानवादे तु सिद्धसाध्यतेति, तदपि न्यायबहिष्कृतम् । प्रमाणसिद्धस्याप्यर्थस्याज्ञानो यदि न दोषाय भवेत्, ज्ञानाज्ञानोऽपि न दोषाय स्यात् । न च शून्यताऽभ्युपगमात् तदभावोऽपि न दोषाऽऽवह इति वक्तव्यम्, तत्प्रतिपादकप्रमाणाभावाद् न तेन साकारज्ञानप्रमाणवादोऽभ्युपगमार्हः, अनेकदोषदुष्टत्वादिति स्थितम् । सम्म० २ काण्ड ।

(१७) जैमिनीयाऽभिमतस्य तु ज्ञातृव्यापारस्य फलानुमेयस्य यथा प्रमाणता न संभवति, तथा स्वतः प्रामाण्यं निराकुर्वद्भिः प्रदर्शितमिति न पुनः प्रतन्यते । यदप्यनधिगतार्थाधिगन्तृत्वं ज्ञातृव्यापारविशेषणत्वेन प्रतिपादितम्, तदप्यसङ्गतमेव । यतः प्रमाणं वस्तुन्यधिगतेऽनधिगते वा व्यभिचाराऽऽदिविशिष्टां प्रमां जनयन्नेपाऽज्ञानविषयः । न चाऽधिगते वस्तुनि किञ्चित्तत्प्रमाणतामाप्नोतीति वक्तव्यम्, विशिष्टतां विदधानस्य प्रमाणतापतिपादनात् । न च पूर्वोऽसन्नेव प्रमाणेन जन्यते, प्रमित्यन्तरोत्पादकत्वेन प्रमाणत्वात् । न च प्रमित्यन्तरजनकत्वेऽधिगते विषये तस्याकिञ्चित्करत्वेनोपप्लवविषयताऽनुपपत्तिः । न च एकान्ततोऽनधिगतार्थाधिगन्तृत्वे प्रामाण्यं तस्यावसातुं शक्यम्, तद् व्यर्थं तथाभावित्वलक्षणं संवादादवसीयते, स च तदर्थोत्तरज्ञानवृत्तिः । न चानधिगतार्थाधिगन्तुरेव प्रामाण्ये संवादप्रत्ययस्य प्रामाण्यमुपपन्नम् । न च प्रमाणेन संवादप्रत्ययेन प्राक्तनस्य प्रामाण्यं व्यवस्थापयितुं शक्यम्, अतिप्रसङ्गात् । अतोऽयथाऽधिगतार्थाधिगन्तुरर्थक्रियानिर्भासिनः सिद्धं ज्ञानस्य प्रामाण्यं, तथा साधननिर्भासिनोऽप्यभ्युपगन्तव्यम् । न च सामान्यविशेषतादात्म्यवादिन एकान्ततोऽनधिगतार्थाधिगन्तृत्वं प्रमाणस्य संभवति, इदानीन्तनास्तित्वस्य पूर्वास्तित्वानेदात्, तस्य च पूर्वमप्यधिगतत्वसंभवात् कथञ्चिदनधिगतार्थाधिगन्तृत्वाभ्युपगमेऽस्मन्मतानुप्रवेशप्रसक्तिः । अथाप्रेक्षापूर्वकारितया प्रमाणस्याऽनुपालम्भविषयत्वेऽपि पुरुषस्य प्रेक्षापूर्वकारिणोऽधिगतविषयमपि प्रमाणं पर्येषमाणस्योपालम्भविषयता । स हि पूर्वाधिगते वस्तुनि प्रेक्षापूर्वकारी किमित्यधिगमाय प्रमाणान्तरमन्वेषते ?, निष्पन्नप्रयोजनापेक्षया हेतुव्यापारतः प्रेक्षापूर्वकारिताहानिप्रसक्तेः ? नैतदिदम् । यतो यदर्थं प्रमाणोत्पत्त्यतिशयजनकत्वेन सप्रयोजनत्वात् प्रमाणान्वेषणस्य न तद्वेष्टुः पुरुषस्योपालम्भार्हता । न च निश्चिते विषये न किञ्चिन्निश्चयान्तरेण प्रयोजनम्, यतस्तदर्थं प्रमाणान्वेषणं न वैयर्थ्यमनुभवेत् । यतो भूय उपलभ्यमाने दृढतरा प्रतिपत्तिर्भवतीति सुखसाधनं तथैव निश्चित्योपादत्ते, दुःखसाधनं च तथात्वेन सुनिश्चितं परित्यजेत् । अन्यथा विपर्ययेणाप्युपादानत्यागौ न स्याताम् । अत एवैकविषयाणामपि शब्दाऽनुमानाध्यक्षाणां प्रामाण्यमुपपन्नम्, प्रतिपत्तिविशेषस्य, प्रीत्यतिशयादेश्च सद्भावात् । न च प्रथमप्रत्ययेनैवाऽर्थक्रियासमर्थप्रदर्शने प्रवर्तितः पुरुषः, प्रापितश्चार्थ इति तज्ज्ञापक-

प्रमाणान्वेषणं वैयर्थ्यमनुभवेत्; भूयो भूय उपलभ्यमाने दृढतरा प्रतिपत्तिर्भवतीति सुखसाधनं तथैव निश्चित्योपादत्ते, दुःखसाधनं च तथात्वेन सुनिश्चितं परित्यजेत; अन्यथा विपर्ययेणाप्युपादानत्यागौ भवेताम्। अत एवैकविषयाणामपि पुरुषप्रवृत्तेः प्रमाणाधीनत्वान्नावाद् विशिष्टप्रमाया एव प्रमाणाधीनत्वात्,तां च जनयत उपेक्षणीयाऽऽदौ विषये प्रमाणस्याप्रवर्तकस्यापि प्रमाणत्वेन लोके प्रसिद्धत्वात्, प्रवृत्तेस्तु पुरुषेच्छानिबन्धनत्वात् तदभावेनोक्तफलजनकस्य प्रमाणत्वव्याघातः। न च पुरुषार्थसाधनप्रवर्तकत्वमेव तस्य प्रवर्तकत्वं, तत्सङ्गावेऽपि प्रवर्तितोऽहमत्र नाशेति तदुपदृष्टे ज्ञानेच्छाप्रतिपत्त्यनुपपत्तेः। न च प्रवृत्त्यभावे तस्य प्रदर्शकत्वान्न तत्प्रदर्शकमिति लोकप्रतीतिः। तस्मान्नधिगतार्थाधिगन्तृत्वमपि ज्ञातृव्यापारविशेषणमुपपत्तिमत्। अतोऽनधिगतार्थाधिगन्तृज्ञातृव्यापारोऽर्थप्रकटताऽऽख्यफलानुमेयो जैमिनीयपरिकल्पितो न प्रमाणमिति स्थितम्।

(१८) सौगतैस्तु 'प्रमाणमविसंवादि ज्ञानम्' इति वचनादविसंवादकत्वं प्रमाणलक्षणमुक्तम्। अविसंवादकत्वं च प्राप्तिनिमित्तं प्रवृत्तिहेतुभूतार्थक्रियाप्रसाधकार्थप्रदर्शकत्वम्। यतोऽर्थक्रियार्थी पुरुषस्तन्निर्वर्तनक्षममर्थमवाप्तुकामः प्रमाणमप्रमाणं वाऽन्वेषते। यदेव चार्थक्रियानिर्वर्तकवस्तुप्रदर्शकं तदेव तेनाभिप्रेयते। प्रत्यक्षानुमाने एव च तथाभूतार्थप्रदर्शके, न ज्ञानान्तरमिति। ते च लक्षणार्हे,तयोश्च द्वयोरप्यविसंवादकत्वमस्ति लक्षणम्। प्रत्यक्षेण ह्यर्थक्रियासाधनं दृष्टतयाऽवगतं प्रदर्शितं भवति; अनुमानेन तु दृष्टलिङ्गाद्यभिचारतयाऽध्यवसितमित्यनयोः प्रदर्शकत्वमेव प्रापकत्वम्। न ह्यन्यां प्रदर्शितेऽर्थे प्रवृत्तौ न प्राप्तिरिति नान्यत् प्रदर्शकत्वव्यतिरेकेण प्रापकत्वम्, तच्च शक्तिरूपम्। उक्तं च-'प्रापणशक्तिः प्रामाण्यं, तदेव च प्रापकत्वम्'। अन्यथा ज्ञानान्तरस्वभावत्वेन व्यवस्थितायाः प्राप्तेः कथं प्रवर्तकज्ञानशक्तिस्वभावता। तत्र यद्यपि प्रत्यक्षं वस्तु क्षणग्राहि, तद्ग्राहकत्वं च तस्य प्रदर्शकत्वं, तथापि क्षणिकत्वेन तस्याप्राप्तेस्तत्सन्तान एव प्राप्यत इति सन्तानाध्यवसायोऽध्यक्षस्य प्रदर्शकव्यापारो द्रष्टव्यः। अनुमानस्य तु वस्त्वग्राहकत्वात् तत्प्रापकत्वं यद्यपि न संभवति, तथाऽपि स्वाकारस्य बाह्यवस्त्वध्यवसायेन पुरुषप्रवृत्तौ निमित्तभावोऽस्तीति तस्य तत्प्रापकमुच्यते। एतदुक्तं भवति-प्रत्यक्षस्य हि क्षणो ग्राह्यः, स च निवृत्तत्वान्न प्राप्तिविषयः, सन्तानस्त्वध्यवसेयः प्रवृत्तिपूर्विकायाः प्राप्तेर्विषय इति तद्विषयं प्रदर्शितार्थप्रापकत्वमध्यक्षस्य प्रामाण्यम्। अनुमानेन त्वारोपितं वस्तु गृहीतं, स्वाकारो वा,तयोर्द्वयोरप्यवस्तुत्वान्न प्रवृत्तिविषयतेति न तद्विषयं तस्य प्रापकत्वम्। अपि त्वारोपितबाह्यव्यापारजनेदाध्यवसायेन वस्तुन्येव प्रवर्तकत्वप्रापकत्वेऽस्य रूढत्वे। तेनानुमानस्य ग्राह्योऽनर्थः, प्राप्यस्तु बाह्यः स्वाकारो भेदेनाध्यवसित इति तद्विषयमस्यापि प्रदर्शितार्थप्रापकत्वं प्रामाण्यमुक्तम्। तथा परमप्युक्तम्-'न ह्यन्यामर्थं परिच्छिद्य प्रवर्तमानोऽर्थक्रियायां विसंवाद्यते' इति। अत्र च प्रत्यक्षानुमानयोर्द्वयोरपि छेदसन्तानविषयोऽध्यवसायो रूढव्यः। तथा प्रामाण्यं वस्तुविषयं द्वयोरिति चोक्तम्। अत्रापि सन्तानविषयित्वेन वस्तुविषयत्वं द्वयोरित्युक्तम्। लौकिकं चैतदविसंवादकत्वं प्रामाण्यं, यतो लोके प्रतिज्ञातमर्थं प्रापयन् पुरुषः संवादकः प्रमाणमुच्यते, तद्वदत्रापि रूढव्यम्। न च क्षणिकस्य ज्ञानस्यार्थप्राप्तिकालं यावदनवस्थितेः कथं प्राप्यते?, इत्याशङ्कनीयम्, प्रदर्शकत्वव्यतिरेकेण तस्यास्तत्राऽसंभवादित्युक्तत्वात्। न चान्यस्य ज्ञानान्तरस्य प्राप्तौ सन्निकृष्टत्वात् तदेव प्रापकमित्याशङ्कनीयम्। यतो यद्यप्यनेकस्माद् ज्ञानक्षणात् प्रवृत्तावर्थप्राप्तिः, तथाऽपि पर्यालोच्यमानमर्थप्रदर्शकत्वमेव ज्ञानस्य प्रापकत्वम्, नान्यत्। तच्च प्रथमज्ञानक्षण एव संपन्नमिति नोत्तरोत्तरज्ञानक्षणानां तदुपयोगि, प्राप्यमाणं च वस्तु नियतदेशकालाऽऽकारं प्राप्यत इति तथाभूतवस्तुप्रदर्शकयोरेव प्रामाण्यं, न ज्ञानान्तरस्य। तेन प्रदर्शितप्रापकत्वलक्षणे प्रामाण्ये पीतसंवादिग्राहिज्ञानानामपि प्रापकत्वात् प्रामाण्यप्रसक्तिर्न भवेत्; तर्हि तानि प्रदर्शितमर्थं प्रापयन्ति; यद्देशकालाऽऽकारं वस्तु तैः प्रदर्शितं न तत्तथा प्रापयति, यथा प्राप्यते न तैस्तथा प्रदर्शितम्। देशाऽऽदिभेदेन वस्तुभेदस्य निश्चितत्वान्न तेषां प्रदर्शितार्थप्रापकता। एवमपि प्रदर्शितार्थप्रापकत्वे जलाऽऽदिप्रदर्शकस्य मरीच्यादिवस्त्वन्तरप्राप्तौ प्रदर्शितप्रापकत्वेन प्रामाण्यप्रसक्तिरिति न किञ्चिदप्रमाणं भवेत्। प्रमाणद्वयातिरिक्तं च ज्ञानं नियतप्रदर्शितार्थप्रापकम्। तेन हि भावाभावसाधारणोऽनियतोऽर्थः प्रदर्शितः। स च तथाभूतोऽसत्त्वात् न प्राप्तुं शक्य इति। न च तत्प्रदर्शितार्थप्रापकत्वेन प्रमाणम्। अनियतार्थप्रदर्शकत्वं च शब्दाऽऽदेः साक्षात्, पारम्पर्येण वा प्रतिपाद्यार्थादनुत्पत्तेः। तत् स्थितं प्रापणशक्तिस्वभावमविसंवादकत्वं प्रामाण्यं द्वयोरेव। प्रापणशक्तिश्च प्रमाणस्यार्थाविनाभावनिमित्ता दर्शनपृष्ठभाविना विकल्पेन निश्चीयते। तथाहि-दर्शनं यतोऽर्थादुत्पन्नं तद्दर्शकमात्मानं स्वानुरूपावसायोत्पादनाद् निश्चिततदर्थाविनाभावित्वं प्रमाणशक्तिनिमित्तं प्रामाण्यं स्वतो निश्चिनोतीत्युच्यते, न पुनर्ज्ञानान्तरं तन्निश्चायकमपेक्ष्यते। अर्थानुभूताविव ततोऽविसंवादकत्वमेव प्रमाणलक्षणमुक्तम्। एतदप्ययुक्तम्। यतो नार्थप्रदर्शकत्वमेव प्रापकत्वं, पुरुषेच्छाऽधीनप्रवृत्तिनिमित्तत्वात्। सति वस्तुन्यर्थप्रापकत्वं पुरुषेच्छाऽऽप्तेः। एतच्च प्राक् प्रतिपादितम्। उपेक्षणीये च विषये पुरुषस्य तद्विषयार्थित्वाऽऽद्यभावे प्राप्तिपरित्यागयोरभावेऽपि तत्प्रदर्शकत्वलक्षणस्य प्रामाण्ये न कश्चिद् व्याघात उपलक्ष्यते। अथेष्टानिष्टसाधनार्थव्यतिरेकेणोपेक्षणीयस्याऽर्थान्तरस्याभावाद् न तत्प्रदर्शकं किञ्चिद् ज्ञानं समस्तीति कथं प्रापकत्वाभावेऽपि प्रदर्शकत्वस्य संभवेन दोषाऽऽपादनं क्रियते। तथा च तृतीयविषयाभावमवगत्यैवोक्तम्-अर्थानर्थविवेचनस्यानुमानायत्तत्वात्। तथा-हिताहितप्राप्तिपरिहारयोरिति च, तृतीयविषयाभावश्च सर्वस्य वस्तुनो राशिद्वयेन भावात्। तथाहि-तृतीयं वस्तु नेष्टसाधनम्, उपेक्षणीयत्वात्। यच्च तत्साधनं न भवति तस्याऽनिष्टसाधनराशावन्तर्भावः। एतच्चाऽयुक्तम्। स्वसंविदितवस्त्वपह्नवस्य युक्तिशतेनापि कर्तुमशक्यत्वात्। तथाहि-यद्वा तद् वस्त्विष्टसाधनं न भवति,तथाऽनिष्टसाधनमपि न भवति, इष्टानिष्टसाधनयोर्यत्नोपादेयत्वहेयत्वदर्शनात्। उपेक्षणीयस्य चायत्नसाध्योपादानत्यागविषयत्वात् कथमिष्टानिष्टसाधनयोरन्तर्भावः?। तत्र प्रदर्शकत्वमेव प्रापकत्वं, बौद्धाभ्युपगमे न प्रदर्शितार्थप्रापकत्वं क्वचिदपि ज्ञाने संभवति। तद्धि संतानाऽऽश्रयेण सौगतैः परिकल्प्यते, न च संतानः संभवति। स हि स्वरूपेण वा वस्तु सन् भवेत्,सन्तानिरूपेण वा?। न तावत्स्वरूपेण, सन्तानिव्यतिरेकेण तस्य वस्तुनोऽसतोऽभ्युपगमात्। अभ्युपगमे वा क्षणिकवादहानिप्रसक्तिः, सामा-

न्यानभ्युपगमश्च निर्निबन्धनो भवेत् । इति न तस्य स्वरूपेण प्रवृत्त्यादिविषयता, सन्तानरूपेणाऽपि तस्य सत्वे सन्तानिन एव तथाभूतानव्यतिरिक्तः सन्तानः प्रवृत्त्यादिविषयः, सन्तानिनां चोत्पत्त्यनन्तरध्वंसित्वाद् न तद्विषयस्य विज्ञानस्य प्रदर्शितार्थप्रापकत्वम्, दृश्यप्राप्ययोः क्षणयोरत्यन्तभेदात् । यत्र हि देशकालभेदेन प्रतीयमानस्याऽपि वस्तुनो भेदोऽभ्युपगम्यते, तत्र स्वरूपेण भिन्नयोः पूर्वोत्तरक्षणयोः कथमभेदः ?, येन प्रदर्शितार्थप्रापकत्वं साधननिर्भासिज्ञानस्य युक्तिसंगतं भवेत् । अथ संवृत्या सन्तानस्य स्वरूपसिद्धिः पूर्वोक्तमदूषणतया च प्रतिपादितम् । सांव्यवहारिकस्य च प्रमाणस्यैतल्लक्षणम्, न त्वेवं लोकव्यवहारानुरोधेन यदि प्रदर्शितार्थप्रापकत्वं साधननिर्भासिज्ञानस्य युक्तिसङ्गतं भवेत् । अथ संवृत्या प्रमाणस्याऽभ्युपगम्यते, तदा नित्यानित्यवस्तुप्रदर्शकस्य तदभ्युपगम्यताम्, लोकव्यवहारस्य तत्रैवोपपत्तेः । न च तथाभूतग्राहकस्य युक्तिबाधितत्वाद् निर्विषयम्, सन्तानविषयस्यैव पूर्वोक्तन्यायेन युक्तिबाधितत्वोपपत्तेः । तन्नाध्यासितार्थप्रापकं प्रत्यक्षं परोऽभ्युपगमेन संजनयति । तथाहि-यदेवाध्यक्षेणोपलब्धं तदेव तेनाध्यवसितम् । न च सन्तानस्तेन पूर्वमुपलब्ध इति कथमसावध्यवसीयते ? । न हि क्षणमात्रभाविनां सन्तानिनां दर्शनविषयत्वे तत्पृष्ठभाविनाऽध्यवसायेन दृष्टस्यैव विषयीकरणम् । न चाऽन्यथाभूतस्य वस्तुग्रहणेऽन्यथाभूताऽध्यवसायिनः प्रदर्शितार्थप्रापकत्वं प्रामाण्यं युक्तम्, तथाऽभ्युपगमे शुक्तिकायां रजताध्यवसायिनोऽपि तत् स्यात् । अथाऽत्र प्रवृत्ते रजतं न प्राप्यत इति न प्रदर्शितार्थप्रापकत्वं, तर्हि सन्तानेऽध्यवसितेक्षणः प्राप्यत इति प्रकृतेऽपि न प्रदर्शितार्थप्रापकत्वम् । अथाऽत्र सन्तान एव प्राप्यते, तर्हि स एव वस्तु सन् भवेदिति न सामान्यधर्मः स्वरूपेण सन्तोऽभ्युपगन्तव्याः, अक्षणिकस्य च वस्तुनः सिद्धेः। यदुक्तं भवद्भिः-दर्शनेन क्षणिकाक्षणिकत्वसाधारणस्यार्थस्य विषयीकरणात् कुतश्चिच्छ्रुतनिमित्तादक्षिवत्यारोपेऽपि न दर्शनमक्षणिकत्वे प्रमाणम्, किं तु प्रत्यक्षाप्रमाणम्, विपरीताध्यवसायाऽऽक्रान्तत्वात् । क्षणिकत्वेऽपि न तत् प्रमाणम्, अनुरूपाध्यवसायाजननात् । नीलरूपे तु तथाविधनिश्चयकरणात् प्रमाणमिति हि विरुध्यते । किञ्च-एवंवादिन एकस्यैव दर्शनस्य क्षणिकत्वाक्षणिकत्वयोरप्रामाण्यम्, नीलाऽऽदौ तु प्रामाण्यं प्रसक्तमित्यनेकान्तवादाभ्युपगमो बलादापतति । न क्षणग्रहणे तद्विपरीतसन्तानाध्यवसायोत्पत्तौ दर्शनस्य प्रामाण्यं युक्तम्, मरीचिका स्वक्षणग्रहणे जलाध्यवसायिन इव । यतो यदेव मायात्वतो दृष्टं, तदेव प्राप्तमित्यध्यवसाये तस्य प्रामाण्यं व्यवस्थाप्यते । न च दृष्टस्य क्षणिकसन्तानिस्वरूपेण सन्तानस्य प्राप्तिरिति प्राक् प्रतिपादितम्, स्वरूपेण तु तस्यासत्वात् प्राप्त्यविषयतैवेति न धर्मोत्तरमतपर्यालोचनया किञ्चित् परमार्थतः प्रदर्शितार्थप्रापकं प्रमाणं संजनयति ; अतः संवादकत्वमपि तन्मतेन प्रमाणलक्षणमयुक्तम् ।

(१६) नैयायिकास्तु- "अव्यभिचाराऽऽदिविशेषणविशिष्टार्थोपलब्धिजनिका सामग्री प्रमाणम्" इति प्रमाणसामान्यलक्षणं प्रतिपन्नाः, तज्जनकत्वमेव प्रामाण्यमिति च । अथ सामग्र्या प्रमाणत्वे साधकतमत्वमनुपपन्नम् । सामग्री ह्यनेककारकसमुदायो वा, तत्र चानेकसमुदाये कस्य स्वरूपेणातिशयो वक्तुं शक्यते ? । तथाहि-सर्वसामग्र्यात् कारणकलापात् कार्यमुपजायमानमुपलभ्यते । तदन्यतमापाये ऽप्यनुपजायमानं कस्य कार्योत्पादने साधकतमत्वमावेदयतु ? । न च समस्तसामग्र्याः साधकतमत्वम्, अपरस्यासाधकतमस्याभावे तदपेक्षया साधकतमत्वस्यानुपपत्तेः, असाधकतममपेक्ष्य साधकतमत्वव्यवस्थितेः। न चानेककारकजन्यत्वेऽपि कार्यस्य "विवक्षातः कारकाणि भवन्ति" इति न्यायात् साधकतमत्वं विवक्षितमिति वक्तव्यम्, पुरुषेच्छानिबन्धनत्वेन वस्तुव्यवस्थितेरयोगात् । अथ कर्मकर्तृविलक्षणस्याऽव्यभिचाराऽऽदिविशेषणविशिष्टोपलब्धिजनकस्य प्रमाणत्वान्न यथोक्तदोषानुषङ्गः । असदेतत् । अनेकसन्निधानात् कार्यस्य स्वरूपालाभे एकस्य तदुत्पत्तौ वैलक्षण्याभावे साधकतमत्वानुपपत्तेः । तत्र कर्मकर्तृवैलक्षण्यमपि साधकतमत्वम् । अत्र चाऽनेकपक्षानुद्भाव्यादुद्द्योतकरोत्तराध्ययनकारप्रवृत्तिभिः साधकतमत्वं निरस्तम्, ते च पक्षा ग्रन्थगौरवभयाद् नेह प्रदर्श्यन्ते । सन्निपत्य जनकत्वे पूर्वोदितदोषाभावः । तथाहि-अनेकस्मिन् सन्निधौ कार्यनिष्पत्तेः साधकतमत्वानुपपत्तिः, तस्मिंस्तु सति यदा नियमेन कार्यमुपजायते तदा कथं न तस्य साधकतमत्वोपपत्तिः ? । असदेतत् । एवं प्रमाणत्वस्याव्यवस्थितिप्रसक्तेः । तथाहि-दीपाऽऽ[illegible] सामग्र्येकदेशस्य कस्याञ्चिदवस्थायां प्रमा[illegible]ऽभिमतस्य सद्भावेऽपि प्रमेयाजनकत्वात् कार्यानिष्पत्तौ तत्सद्भावे तु तन्निष्पत्तौ तस्यापि प्रदीपवदसन्निपत्यकारकत्वात् प्रमाणताप्रसक्तिर्नैवेत् । तथा प्रमातुरपि मूर्छाऽऽद्यवस्थायाम्, अनवधाने वाऽन्यकारकसन्निधानेऽपि कार्यानुपपत्तौ तदवधानाऽऽदिसन्निधाने तज्जन्यकार्यनिष्पत्तेः । सन्निपत्य जनकत्वेन साधकतमत्वप्रसक्तेः । अथ कारकसाकल्यस्य साधकतमत्वेनाऽभ्युपगमात् पूर्वोक्तदोषाभावं केचिन् मन्यन्ते । तथाहि-नैकस्य प्रदीपाऽऽदेः सामग्र्येकदेशस्य करणता, अपि तु कारकसाकल्यस्य, तदभावे कारकसाकल्यानिमित्तकार्यासत्त्वमिति प्रमातृप्रमेयसद्भावे कारकसाकल्यस्योत्पत्तौ प्रमितिलक्षणस्य कार्यस्य भाव एव । अथ मुख्यप्रमातृप्रमेयसद्भावेऽपि पूर्वोदितस्य नियमस्य तुल्यता, न कारकसाकल्यभावाभावनिमित्तत्वात् तन्मुख्या गौणभावस्य । तथाहि-कथञ्चित् कारकवैकल्ये तयोः सत्वेऽपि गौणता । तत्साकल्ये कुतश्चिन्निमित्तान्तराद् यथोक्तप्रमितिलक्षणकार्यनिष्पत्तावगौणता प्रमातृप्रमेययोः, तयोश्चानुपपत्तौ साकल्यस्यासत्त्वम्, अतः कारकसाकल्ये कार्यस्यावश्यंभाव इति तस्यैव साधकतमत्वम् । अनेककारकसन्निधाने ह्युपजायमानोऽतिशयः सन्निपत्य जननं साधकतमत्वं यद्युच्येत, तदा न कश्चिद् दोषः । तथाहि-सामग्र्येकदेशकारकसहभावेऽपि प्रमितिकार्यस्याऽनुपपत्तेरेकदेशस्य न प्रमाणता, सामग्रीसद्भावे त्ववश्यंतया विशिष्टप्रमितिस्वरूपोपपत्तेः । एकदेशापेक्षया तस्या एव सन्निपत्य जनकत्वमेव साधकतमता । न चाऽत्र किमपेक्षया तस्याः साधकतमत्वम् ?। अन्यस्मिन्नसाधकतमे साधके साधकतरे वा सति तदपेक्षया तस्याः साधकतमत्वमुपपत्तिमदिति प्रेरणीयम्; यतो न सामग्र्यन्तर्गतानामेकदेशानां जनकत्वव्याघातः, तेषामेव धर्ममात्रत्वात् सामग्र्यस्येति जनकैकदेशापेक्षया तत्सामग्र्यस्य साधकतमत्वात् प्रमाणत्वमुपपन्नमेव । एतेन यत्परैः प्रेरितं किल सामग्रीकारणं तच्च कर्तृकर्मापेक्षं, सामग्रीजनकत्वेन ज्ञेतृ, तयोर्व्यापृतेरर्थान्तरभूतयोरभावात् किमपेक्ष्य साधकतमत्वमासाद-

येदिति ?। तदपि निरस्तम् । यतः कर्तृकर्मणोः सामग्रीजनकत्वेन स्थितयोः कथमसत्त्वम् ?, तत्सद्भावे च तदपेक्षया कथं न तस्याः करणता ?। अथापि स्यात् तस्यास्तज्जन्यत्वे करणत्वव्याघातः,अन्यतः सिद्धस्य करणत्वसद्भावात् । असदेतत् । यतो दृश्यत एव प्रदीपाऽऽदेस्तज्जन्यत्वे करणत्वव्याघातेऽन्यस्यापि करणत्वसद्भाव इति न कश्चिद् व्याघातः । तज्जन्यत्वकरणत्वयोस्ततोऽव्यभिचाराऽऽदिभिर्विशेषणार्थोपलब्धिजनिका सामग्री बोधस्वभावा तदेकदेशभूतकारकजन्या प्रमाणविशेषिका अप्येतदेव प्रमाणसामान्यलक्षणं प्रतिपादयन्ति । ततत्कार्यभूता वा यथोक्तविशेषके विशिष्टोपलब्धिः प्रमाणसामान्यलक्षणम्, तया स्वकारणस्य प्रमाणाभासेभ्यो व्यवच्छिद्यमानत्वात् । इन्द्रियजत्वाऽऽदिविशेषणविशेषिता सैवोपलब्धिः प्रमाणस्य विशेषलक्षणमिति स्थितं सामग्रीप्रमाणमिति ।

अत्र प्रतिविधीयते-यत्तावदुक्तं कारकसाकल्यकरणत्वेनाभ्युपगमे पूर्वोक्तदोषाभाव इति । अत्र वक्तव्यम्-किमिदं कारकसाकल्यम्-किं सकलान्येव कारकाणि, आहोस्वित्तद्धर्मः, उत तत्कार्यम्, किं वा पदार्थान्तरम् ? , इति पक्षाः । तत्र न तावत् सकलान्येव कारकाणि साकल्यं, कर्तृकर्मभावे तेषां करणत्वानुपपत्तेः; तत्सद्भावे वा नान्येषां कर्तृकर्मरूपता. [illegible] करणत्वाभ्युपगमात् । न च कर्तृकर्मरूपाणामपि तेषा [illegible] त्वम्, तेषां परस्परविरोधात् । तथाहि-ज्ञानचिकीर्षाऽऽधारता, स्वातन्त्र्यं वा कर्तृता; निर्वर्त्याऽऽद्यधर्मयोगित्वात् कर्मत्वम्, प्रधानक्रियाऽनाधारत्वं करणत्वम्, एतानि परस्परविरुद्धानि कथमेकत्र संभवन्ति ? । अथापरापरनिमित्तभेदाऽऽदेः कर्तृकर्मकरणरूपताया अविरोधः । ननु तान्यपि निमित्तानि सकलकारकेभ्यो व्यतिरिक्तानि, उताव्यतिरिक्तानि ?, इति वाच्यम् । यदि-अव्यतिरिक्तानीति पक्षः, तदा तद्भेदे तेषामप्यभेदः, तेषां वा भेदे कारकस्याऽपि भेदः, अन्यथा व्यतिरेकासिद्धेः । अथ व्यतिरिक्तानि तदा संबन्धासिद्धेः । न च समवायलक्षणः संबन्धः, तस्य निषिद्धत्वात्, निषेत्स्यमानत्वाच्च । न चैकान्तभेदे विशेषणविशेष्यभावाऽऽदिकोऽपि संबन्धः कश्चित्संभवति, तत्रापि संबन्धान्तरकल्पनातोऽनवस्थाप्रसक्तेः । न च तस्य संबन्धरूपत्वात् संबन्धान्तरमन्तरेणाऽपि संबन्धत्वानवस्था, एकान्तभेदे संबन्धरूपताया एवायोगात्,कथञ्चिन्निमित्तानां कारकेभ्योऽभेदे अनेकान्तवादाऽऽपत्तिः,तत्र सकलकारकाणि साकल्यम् । अथ कारणधर्मसाकल्यम्-ननु सोऽपि यदि कारकाव्यतिरिक्तस्तदा धर्ममात्रं, कारकमात्रं वा ? । अथ व्यतिरिक्तस्तदा सकलकारकधर्मः साकल्यमिति संबन्धासिद्धेः। संबन्धेऽपि यदि सर्वकारकेषु युगपदसौ संबध्यते, तदा बहुत्वसंख्यया ततपृथक्त्वसंयोगविभागसामान्यानामन्यतमस्वरूपाऽऽपत्तिस्तस्येति तद्दूषणेन तस्य दूषितत्वान्न साधकतमत्वमुपपत्तिमत्। अथ तत्कार्यं साकल्यम् । तदप्ययुक्तम् । नित्यानां साकल्यजननस्वभावत्वे सर्वदा तदुत्पत्तिप्रसक्तेः।ततश्चैकप्रमाणोत्पत्तिसमये सकलतदुत्पाद्यप्रमाणोत्पत्तिप्रसक्तिः। तज्जनकस्वभावस्य कारणेषु पूर्वोत्तरकालभाविनां सर्वप्रमाणानां तदा नित्याभिमतं जनकमात्माऽऽदिकं कारणमिति कथं न तदैव सकलतदुत्पाद्यप्रमाणोत्पत्तिप्रसक्तिः ?। अथाऽऽत्माऽऽदिके सत्यपि तदा तानि न भवन्ति,न तर्हि तत् तत्कारणं,नापि तानि तत्कार्याणीति सकृदपि तानि ततो न भवेयुरिति सकलं जगत्प्रमाणविकलमापद्यते । न चाऽऽत्माऽऽदिके तत्करणसामर्थ्ये सत्यपि स्वयमेव यथाकालं तानि भवन्तीति वक्तव्यम्, तेषां तत्कार्यताभावप्रसक्तेः, तस्मिन् सत्यपि तदाभावात् स्वयमेवान्यदा च भावात् । न च स्वकालेऽपि कारणे सत्येव भवन्तीति तत्कार्यता,गगनाऽऽदिकार्यताप्रसक्तेः, गगनाऽऽदावपि सत्येव तेषां भावात् । न च गगनाऽऽदेरपि तत्प्रति कारणत्वस्येष्टेर्नाऽयं दोषः,प्रमितिलक्षणस्य तत्फलस्याऽपि व्योमाऽऽदिजन्यतयाऽऽत्मनाऽऽत्मविभागाभावप्रसक्तेः। अथ यत्र प्रमितिः समवेता, स एवाऽऽत्मा, न व्योमाऽऽदिरिति न तद्विभागाभावः । ननु समवेत इति कोऽर्थः?, समवायेन संबद्ध इति चेत् । ननु तस्य नित्यसर्वगतैकत्वेन व्योमाऽऽदावपि प्रमितेः संबन्धात्र तत्परिहारेणाऽऽत्मनो विभागः । न च समवायविशेषे समवायिनो विशेषाद्ययं दोषः, समवायस्याभावप्रसक्तेः । अथ यदा यत्र यथा यद् भवति तदा तत्र तथा तदात्माऽऽदिकं कर्तुं समर्थमिति नैकदा सकलतदुत्पाद्यप्रमाणोत्पत्तिप्रसक्तिः । न । स्वभावभूतसामर्थ्यमन्तरेण कार्यस्य कालाऽऽदिनेदायोगात् । अन्यथा दृश्यपृथिव्यादिमहाभूतकार्यनानात्वस्य कारणं किमदृष्टपृथिवीपरमाणवादिचतुर्विधमभ्युपेयते , एकमेवानन्तं नित्यं सर्वगं सर्वोत्पत्तिमतां समवायिकारणमभ्युपगतम् ?। अथ कारणजातभेदमन्तरेण न कार्यभेद उपपद्यते, तर्हि कारणशक्तिभेदमन्तरेणाऽपि न कार्यभेद उपपद्यत इत्यभ्युपगन्तव्यम् । अथ यया शक्त्यैकमनेका शक्तिर्विभक्तेः, तत्राप्यनेकशक्तिपरिकल्पनेऽनवस्थाप्रसक्तेः । न च तदाऽनेकं कार्यं विधास्यतीति न शक्तिभेदपरिकल्पना । असदेतत् । यतो न जैनस्यायमभ्युपगमः-यदुत निष्पाः शक्तीः कयाचित् प्रत्यासत्तिलक्षणया शक्त्या एकः कश्चिद्व्यवस्थापयतीति, किं तु यत्तदात्मकं तदपि तथाविधं न कस्याश्चित् शक्तेः, अपि तु स्वकारणवशात् । न चैकस्यानेकाऽऽत्मकत्वमदृष्टमेव परिकल्प्यते,अनेकरूपाऽऽद्यात्मकस्यैकस्य पटाऽऽदेः प्रमाणतः प्रतिपत्तेः । अन्यथा गुणगुणिनावः एव न स्यात्, समवायस्य तन्निमित्तस्याभावात् । सकलकारणानि साकल्यजननस्वभावानि, सकलकालभाविसाकल्यस्य तदैवोत्पत्तिप्रसक्तेः । न चातज्जननस्वभावानि नैकदाऽपि तदुत्पत्तिः, अतज्जननस्वभावात् सकृदपि तस्यानुपपत्तेः । न च सहकारिसव्यपेक्षाणि तानि तज्जनयन्ति, नित्यस्यानुपकार्यतया सहकार्यपेक्षायोगात् । न च संभूयैककार्यकारित्वं तेषां सहकारित्वम्, एकान्तनित्यवादे तस्यापि निषिद्धत्वात् । तत्र सकलकार्यकारणमपि साकल्यं संभवति । किञ्च-सकलानि कारणानि साकल्यं जनयन्ति, उतासकलानि ? । न तावदसकलानि, अतिप्रसङ्गात् । नापि सकलानि, साकल्यमन्तरेण सकलानीति व्यपदेशाभावात् । भावे वाऽकिञ्चित्करं साकल्यमिति तत्परिकल्पना व्यर्था । किञ्च-यया प्रत्यासत्त्या तानि साकल्यं जनयन्ति तयैव प्रमितिमप्युत्पादयिष्यन्तीति व्यर्था साकल्यपरिकल्पना । अथ साकल्यस्य साधकतमत्वात् तदभावेनाकरणिका प्रमित्युत्पत्तिः, तर्हि साकल्योत्पत्तावपि तेषां न परं साकल्यलक्षणं करणमभ्युपगन्तव्यम् । अन्यथा-अकरणिका साकल्यस्यापि कथमुत्पत्तिः ?। अथ तदुत्पत्तावपि करणाभ्युपगमस्तर्हि तदुत्पत्तावप्यपरं करणमभ्युपगन्तव्यमित्यनवस्था । अथ करणोत्पत्तौ नापरं करणमभ्युपगम्यत इति नानवस्था, तर्हि उपलब्ध्युत्पत्तावपि न करणमभ्युपगन्तव्यमिति न साकल्यप्रमाणपरिकल्पना युक्तिसङ्गता । न च साकल्यस्याध्यक्षाऽऽदिप्रमाणसिद्धत्वादध्यक्षबाधितोऽयं विकल्पकलापः, आत्माऽन्तःकरणतत्संयोगाऽऽदेः करणसाकल्यातीन्द्रियत्वेनाध्यक्षाविषयत्वात्

तत्पूर्वकत्वेन पूर्ववदादेरनुमानस्याप्यभ्युपगमान्न ततोऽपि साकल्यसिद्धिः । केवलं विशिष्टार्थोपलब्धिलक्षणमध्यक्षसिद्धं कार्यं करणमन्तरेण नोपपद्यत इति तत्परिकल्पना, तच्च साकल्यमिति न कल्पयितुं शक्यमात्माऽऽदिकरणसद्भावे कार्यस्योपपत्तावपरपरिकल्पनेऽदृष्टपरिकल्पनाप्रसक्तिः, ततोऽपरापरदृष्टिपरिकल्पनयाऽनवस्थाप्रसक्तेः । तच्च सकलकारणकार्यमपि साकल्यम् । अथ पदार्थान्तरं सकलकारणेभ्यः साकल्यं, तदा यत् किञ्चित् पदार्थान्तरं तत्साकल्यं प्रसज्येत, इति यस्य कस्यचित्पदार्थान्तरस्य सदुभावेऽर्थोपलब्धिर्भवेदिति सर्वदा सर्वस्य सर्वज्ञताप्रसक्तिः; तच्च कारकसाकल्यं प्रमाणम् । तेन प्रमातृप्रमेययोरभावः साकल्याभाव इत्यादि प्रतिक्षिप्तम्, तत्सद्भावेऽपि त्रवदभिप्रायेण साकल्यानुपपत्तेः । यदपि मुख्यगौणभावस्य कारकसाकल्याभावाभावनिमित्तत्वादित्यादि । तदपि व्योमकुसुमावतंसकज्ञावद्धेवदत्तसौभाग्यासौभाग्यप्रख्यं द्रष्टव्यम् । तेन सन्निपत्य जननं साधकतमत्वं यदू व्याख्यातम् । तदपि निरस्तम् । तस्याऽपि साकल्यार्थत्वात् । यदपि साकल्यं हि तेषामेव धर्ममात्रं नैकान्तेन वस्त्वन्तरमित्यभिधेयशून्यं वचः, वस्त्वन्तरपक्षे तु दोषाः प्रतिपादिता एव । यदपि प्रमातृप्रमेयजन्यत्वेऽपि सामग्र्या न करणत्वव्याहतिरिति । तदपि न सङ्गतम् । सामग्र्यास्तज्जन्यत्वेऽनवस्थाऽऽद्यनेकदोषाऽऽपत्तेः प्रतिपादनात् । यदप्यव्यभिचाराऽऽदिविशेषणविशिष्टार्थोपलब्धिजनिका सामग्री प्रमाणमित्युक्तम् । तदप्यसङ्गतम् । अव्यभिचारादेकोपलब्धिविशेषणस्य भवदभिप्रायेणायोगात् । (यथा च तस्यायोगस्तथा प्रत्यक्षलक्षणे प्रदर्शयिष्यामः *) सामग्री च तज्जनिका यथा न संभवति तथाऽभिहितमेव साकल्यं विचारयद्भिः । यच्चाबोधस्वभावस्यापि प्रदीपाऽऽदेः प्रमाणत्वं प्रतिपाद्यते। तदप्यसङ्गतम् । बोधस्वभावस्य तस्य प्रमितिक्रियायां साधकतमत्वायोगात् । यच्च लोकस्तेषां प्रामाण्यं दीपेन मया दृष्टं, चक्षुषाऽवगतं, धूमेन प्रतिपन्नमिति व्यवहरतीति तदुपचारतः,यथा ममाऽयं पुरुषश्चक्षुरिति,न तु मुख्यतः । मुख्यतस्तु बोधस्यैव प्रमितिं प्रति तादात्म्यादव्यवहितं साधकतमत्वम् । चक्षुरादेस्तु बोधव्यवधानाद् गौणम् । न च व्यपदेशमात्रपरतया न पारमार्थिकवस्तुव्यवस्था,उपचारतोऽपि नद्यां घोषः पादरोग इत्यादिव्यपदेशप्रवृत्तेः । न च प्रमाणस्य प्रमितिरूपता विरुद्धा, स्वरूपे विरुद्धासिद्धिः । न च प्रमाणप्रमितयोरेकान्ततो भेद एवाभ्युपगम्यते, कथञ्चिद् बोधादर्थपरिच्छित्तिविशेषस्य भेदात् प्राक्तनपर्यायनिरोधेन कथञ्चिदवस्थितस्यैव बोधस्यार्थपरिच्छित्तिविशिष्टरूपतयोत्पत्तेः । अन्यथा कार्यकारणभावविरोधादित्यसकृत् प्रतिपादितत्वात् । एतेन " लिखितं साक्षिणो भुक्तिः, प्रमाणं त्रिविधं स्मृतम् " इति यत् शास्त्रान्तरेषु बोधाबोधरूपस्य प्रमाणत्वाऽभिधानं तदप्युपचारेण व्याख्येयमित्युक्तं भवति । अन्यथा प्रमाणविरोधप्रदर्शितन्यायेन ..... (?) । यदपि तत्कार्यजूता चोदितविशेषणोपलब्धिस्तस्य सामान्यलक्षणमित्युक्तम् । तदप्यसङ्गतम् । न हि यथोक्तविशेषणोपलब्धिः पराभ्युपगमे न संभवति, नाऽपि पराभ्युपगतप्रमाणकार्यतयाऽसौ सिद्धा, येन स्वकारणं प्रमाणाज्ञासेभ्यो व्यवच्छिद्यात् । तन्नाक्षपादकणभुङ्मतानुसारिपरिकल्पितमपि प्रमाणसामान्यलक्षणमुपपत्तिक्षमम् । तस्मात् ' प्रमाणं स्वार्थनिर्णीतिस्वभावं ज्ञानम् ' इत्येतदेव प्रमाणसामान्यलक्षणमनवद्यम् । ननु चात्रापि स्वग्रहणविधुरस्य ज्ञानस्य नैयायिकाऽऽदिभिरभ्युपगमाद् बौद्धैस्त्वर्थग्रहणविधुरस्येति स्वार्थनिर्णीतिस्वभावताऽसिद्धा । सम्म०१ काण्ड । " ज्ञानं स्वस्थं परस्थं वा, यथा ज्ञानेन गृह्यते ।
ज्ञाता स्वस्थः परस्थो वा,तथा ज्ञानेन गृह्यताम्"॥१॥ सम्म०२अ०।

(२०) अनुव्यवसायप्रकाश्यं ज्ञानम्—

तथाहि नैयायिकाः प्रतिपादयन्ति-घटाऽऽदिज्ञानं स्वग्राह्यं न भवति, ज्ञानान्तरग्राह्यं वा, ज्ञेयत्वात्, घटाऽऽदिवत् । अत्र प्रयोगे हेतुः स्वरूपासिद्धः, आश्रयासिद्धश्च । धर्मिणो ज्ञानस्याऽप्रतिपत्तौ तदाश्रितज्ञेयत्वधर्माप्रतिपत्तेः; न चाऽऽश्रयासिद्धस्य परैर्धार्मिकत्वमभ्युपगम्यते । अन्यथा सामान्याऽऽदिनिषेधे सामान्यस्याऽसिद्धौ परं प्रत्याश्रयासिद्धो हेतुरिति दोषोद्भावनं युक्तियुक्तं भवेत् । घटाऽऽदिज्ञानस्य प्रमाणतः प्रसिद्धेर्नायं दोषः । ननु तत्प्रसिद्धिरध्यक्षतोऽनुमानतो वा ?, प्रमाणान्तरस्याज्ञानधिकारात् । न तावदध्यक्षतः, तस्येन्द्रियार्थसन्निकर्षजत्वाभ्युपगमात् । न च ज्ञानस्य चक्षुरादीन्द्रियेण सन्निकर्षो,न च तदव्यतिरिक्तमिन्द्रियान्तरमस्ति, अथ मनोलक्षणमन्तःकरणमस्ति, तस्य च ज्ञानेन संयुक्तसमवायः सन्निकर्ष इति तत्प्रभवमध्यक्षं तत्र प्रवर्तत इति । तथाहि-आत्मना मनः संयुक्तम्, आत्मनि च समवेतं ज्ञानमिति मनोज्ञानेन्द्रियार्थसन्निकर्षोत्पन्नतदेकार्थसमवेताध्यक्षग्राह्यत्वाद् घटाऽऽदिज्ञानस्य कथमाश्रयासिद्धत्वाऽऽदिर्हेतोर्दोषः ?। अयुक्तमेतद् यदीन्द्रियं मनः सिद्धं भवेत् । अथानुमानात्तत्सिद्धिः तथाहि-घटाऽऽदिज्ञानमिन्द्रियार्थसन्निकर्षजं, प्रत्यक्षत्वे सति ज्ञानत्वाच्चक्षुरादिप्रत्यक्षवदित्याऽऽदिज्ञानत्वस्य हेतोरप्रसिद्धविशेषणत्वम् । न हि घटाऽऽदिज्ञानस्याध्यक्षत्वं सिद्धम्, इतरेतराश्रयत्वात् । तथाहि-मनस इन्द्रियसिद्धावध्यक्षत्वसिद्धिः, तत्सिद्धौ च सविशेषणहेतुसिद्धेर्मनस इन्द्रियसिद्धिरिति व्यक्तमितरेतराश्रयत्वम् । न च घटज्ञानाद् भिन्नमपरं ज्ञानं तद्ग्राहकमनुभूयत इति विशेष्यासिद्धश्च हेतुः, सुखाऽऽदिसंवेदनेन व्यभिचारी च । तथाहि-तत्संवेदनमध्यक्षत्वे सति ज्ञानं च तज्जन्यमिति व्यभिचारः । अथास्यापि पक्षीकरणाद्दोषः । तथा सुखाऽऽदिसंवेदनमिन्द्रियार्थसन्निकर्षजमध्यक्षज्ञानत्वाच्चक्षुरादिप्रभवरूपाऽऽदिवेदनवत्; सुखाऽऽदिर्वा ज्ञानज्ञानवेद्यो, ज्ञेयत्वात्, घटवत् । नन्वेवं व्यभिचारविषयस्य पक्षीकरणे न कश्चिद् हेतुर्व्यभिचारी स्यात् । तथाहि-अनित्यः शब्दः, प्रमेयत्वाद्, घटवदित्यत्राप्यात्माऽऽदेर्व्यभिचारविषयस्य पक्षीकरणाद् न व्यभिचारः । शक्यं ह्यत्राऽपि वक्तुम्-अनित्य आत्माऽऽदिः, प्रमेयत्वाद्, घटवत् । न चाऽत्र प्रत्यक्षबोधः, अन्यत्राऽपि तस्य समानत्वात् । न हि सुखाऽऽद्यविदितस्वरूपं पूर्वं घटाऽऽदिवदुत्पन्नं पुनरिन्द्रियसंबन्धोपजातज्ञानान्तराद्वेद्यत इति लोकप्रतीतिः, अपि तु प्रथममेव स्वप्रकाशरूपं तदुदयमासादयदुपलभ्यते आत्मनि त्रिविध इति चेत् । न । स्वरूपेण पदार्थस्य विरोधाभावात् । अन्यथा प्रदीपाऽऽदेरप्यपरप्रकाशविकलस्वरूपप्रकाशविरोधः स्यात् । तस्य तत्स्वरूपं कुतः सिद्धमिति चेत् ?, प्रदीपाऽऽदौ कुतस्तथा दर्शनमितरत्रापि समानम् । न चैकस्य स्वभावोऽपरत्राप्यभ्युपगमार्हः,अन्यथा स्वपरप्रकाशस्वभावो घटगतः प्रदीपेऽभ्युपगते तयोर्न भेदः । न च तदवगमात् पूर्वमप्रतीयमानमपि सुखाऽऽद्यभ्युपगन्तुं युक्तम्, श्रवणसमवायात् प्राक् पश्चाच्च शब्दस्य सत्ताऽभ्युपगमप्रसङ्गतो नित्यत्वाऽऽपत्तेः । न चाऽऽत्मनो

* प्रत्यक्षलक्षणं सम्मतौ द्रष्टव्यम् ।

ज्ञानाद्यर्थान्तभूता एव सुखाऽऽद्ययोऽनुग्रहाऽऽदिविधायिनो न-वेयुः, इतरथाऽयोगिनोऽपि ते तथा स्युः । न च तेषां तत्रासमवा-यान्नायं दोषः, समवायस्य निषिद्धत्वात् । सुखाऽऽदिग्रहणे मनस इन्द्रियसिद्धिः। अत एव चाऽऽत्मा मनसा युज्यते,तत्र च समवेताः सुखाऽऽद्य इत्यादिक्रिया अनुपपन्नैव । न च निरंशयोरात्ममनसोः संयोगः संभवी,एकदेशेन तत्संयोगे सांशत्वप्रसक्तेः,सर्वाऽऽत्मना संयोगे उभयोरेकत्वप्राप्तेः। यदि च यत्र मनः संयुक्तं तत्र समवेतं ज्ञानं समुत्पादयति, तदा सर्वाऽऽत्मना व्याप्तितया सामान्यदेश-त्वेन मनसः तैः संयुक्तत्वात् सर्वाऽऽत्मसमवेतसुखाऽऽदिषु द्वित्वै-वैकं ज्ञानमुत्पादयतीति प्रतिप्राणि भिन्नं मनःपरिकल्पनमनर्थ-मासज्येत । न च यस्य संबन्धि यन्मनः,तत्समवेतसुखाऽऽदिज्ञाने तदेव हेतुरिति नायं दोषः,प्रतिनियताऽऽत्मसंबन्धित्वस्यैव तत्रा-सिद्धेः । न हि तत्कार्यत्वेन तत्संबन्धेन तस्य नित्यत्वाभ्युपगमात् तत्र चानाधेयाप्रहेयाऽतिशये तत्कार्यतायोगाच्चापि तत्संयोगात् तस्याऽपि तत्रैकदेशेन सर्वाऽऽत्मना वा योगात्। योगेऽपि व्यापक-त्वेन समानदेशिसर्वाऽऽत्मभिर्युगपत् संयोगेन प्रतिनियताऽऽत्म-संबन्धित्वानुपपत्तेः। न च यददृष्टप्रेरितं तत्प्रवर्तते तत्संबन्धीति वक्तव्यम्, अदृष्टस्याचेतनत्वेन प्रतिनियतविषयतया तत्प्रेरकत्वा-योगात् । प्रेरकत्वे वा ईश्वरपरिकल्पनावैयर्थ्यप्रसक्तेः । न च स्व-रप्रेरितयैवासौ तत्प्रेरक इति न तत्परिकल्पनावैयर्थ्यम्, अदृष्टप्रे-रणामन्तरेण ईश्वरस्य साक्षान्मनःप्रेरकत्वोपपत्तेरदृष्टपरि-कल्पनावैयर्थ्यं पुनः प्रसज्यते । न च प्रतिनियतनिमित्तमदृष्ट-परिकल्पना, तस्यापि स्वतः प्रतिनियतत्वासिद्धेः । येनाऽऽ-त्मना यददृष्टं निर्वर्तितं तत्तस्य इति प्रतिनियमसिद्धि-रिति चेत् , ननु किमिदमात्मनोऽदृष्टनिर्वर्तकत्वम् ?, तदाधारभाव इति चेत् , ननु समवायस्यैकत्वे आत्मनां च व्यापकत्वेन एकदेशत्वे प्रतिनियत एव आत्मा प्रति-नियताऽदृष्टाऽऽधार इत्येतदेव दुर्घटम्, समवायाविशेषेऽपि सम-वायिनोर्विशेषात् प्रतिनियमे समवायप्रसक्तेरित्यात्मसुखाऽऽ-द्योस्तत्संवेदनस्य कथञ्चित् तादात्म्यमभ्युपेयम । अन्यथा तदेकार्थसमवेतग्राह्यज्ञानत्वेन सुखाऽऽद्यो न सिद्धिमासादयेयुः। तत्राऽदृष्टमपि मनसः प्रतिनियमहेतुः, न च येनाऽऽत्मना यन्मनः प्रेर्यते तत् तत्संबन्धीति प्रतिनियमः, अदृष्टत्वादात्म-नोऽप्यचेतनत्वेन तत्प्रत्ययप्रेरकत्वात्। चेतनत्वेऽपि नानुपलक्ष्य-स्य प्रेरणमिति न नियतं मनः सिध्यतीति । एकस्मात् ततो युगपत् सर्वसुखाऽऽदिसंवेदनप्रशक्तिः, इत्युक्तन्यायेन सुखाऽऽ-दिसंवेदनस्येन्द्रियार्थसन्निकर्षजन्यत्वाभावाद् हेतुरनैकान्त्यव्य-भिचारी । किञ्च-स्वसंविदितविज्ञानानभ्युपगमे सदसद्वर्गः कस्यचिदेकज्ञानाऽऽलम्बनोऽनेकत्वात् पञ्चाङ्गुलिवदित्यत्र पक्षी-कृतैकदेशेन व्यभिचारः,तज्ज्ञानान्यत्वे सदसद्वर्गयोरनेकत्वाविशे-षेऽप्येकज्ञानाऽऽलम्बनत्वाभावात्, एकशाखाप्रभवत्वानुमानवत्। अथ सर्वज्ञज्ञानस्वसंविदितमिति नानेकत्वानुमानस्य व्यभिचारः, तर्हि तज्ज्ञानवदन्यज्ञानस्यापि न स्वाऽऽत्मनि क्रियाविरोध इति सर्वज्ञानं स्वसंविदितं ज्ञानत्वात् सर्वज्ञज्ञानवदिति तत् दृष्टा-न्तबलात् स्वसंविदितसकलज्ञानसिद्धिः। घटाऽऽदिज्ञानं ज्ञानान्त-रग्राह्यं,ज्ञेयत्वाद्, घटवदित्यत्र च व्यभिचारः । सम्म०२काण्ड ।

ननु " जुगवं दो णत्थि उवओगा, " इति वचनाद् भवतोऽपि युगपद् ज्ञानानुत्पत्तिः सिद्धैव । न । मानसविकल्प-द्वययौगपद्यनिषेधपरत्वादस्य, नेन्द्रियमनोविज्ञानयोर्यौगपद्यनि-षेधः। न च विवादाऽऽस्पदीभूतानि ज्ञानानि क्रमभावीनि ज्ञानत्वाद् मानसविकल्पद्वयवदित्यतोऽनुमानतद्विभ्रमसिद्धिः,अस्य प्रत्य-क्षबाधितकर्मनिर्देशानन्तरप्रयुक्तत्वेन काल्पत्ययापदिष्टत्वात् । न चैतदनुमानबाधितत्वाद् युगपत्प्रतिपत्त्यनुभवः प्रत्यक्षमेव न भवति, अश्रावणः शब्दः, सत्त्वात्, घटवदित्यनुमानबाधितत्वात् श्रावणशब्दज्ञानस्याप्यप्रत्यक्षताप्रसक्तेः । न च सौगतमतमे-तद् जैनमतमिति वक्तव्यम्,-" सहभाविनो गुणाः, क्रमभाविनः पर्यायाः " इति जैनैरभिधानात् ।

तथा सहभावित्वं गुणानां प्रतिपादयता दृष्टान्तार्थमुक्तम्-

" सुखमाह्लादनाऽऽकारं, विज्ञानमयबोधनम् ।
शक्तिः क्रियाऽनुमेया स्याद् , यूनः कान्तासमागमे " ॥ १ ॥

तदेवं मनसोऽसिद्धेन घटाद् विज्ञानं,तेन सन्निकृष्टमिति कुत-स्तत्राऽध्यक्षज्ञानोत्पत्तिरिति यतस्ततस्तत् प्रतीयते ? । न चा-न्यत्तदुत्पत्तौ पराभ्युपगमे निमित्तमस्ति, सद्भावे चेन्द्रियार्थ-सन्निकर्षोत्पन्नत्वाऽऽदिना तव ग्राहिणोऽध्यक्षता विरुध्यते । अथ ज्ञानान्तरेऽस्यानध्यक्षत्वेऽपि घटज्ञानग्राह्यकता भविष्यतीति न धर्म्यसिद्धेराश्रयासिद्धो हेतुर्भविष्यति, घटज्ञानस्य ततः सिद्धेः । असदेतत् । स्वयमसिद्धेन ज्ञानेन गृहीतस्याप्य-गृहीतरूपत्वात् । अन्यथा सर्वज्ञज्ञानगृहीतस्य स्थाणुपुरुष—ज्ञानगृहीतत्वं भवेदिति तस्याऽपि सर्वज्ञताप्रसक्तिः । न च स्वज्ञानगृहीतादगृहीतमिति नायं दोषः, स्वसंविदितज्ञाना-भावे स्वज्ञानमित्यस्यैवासिद्धेः । स्वस्मिन् समवेतस्वज्ञानमभि-धीयत इति नायं दोष इति चेत् । न । तस्याभावात् , भावेऽप्यविशिष्टत्वाच्च । न च स्वोत्पादितं स्वमिति वक्तव्यम्, तदुत्पादस्य परदर्शने तदाधेयत्वेन प्रसिद्धत्वात् । समवाया-भावे च तस्याऽप्यसिद्धत्वाद् नित्यस्य चेश्वरज्ञानस्य तद-सिद्धिः । न च स्वसंविदितज्ञानवादेऽपि स्वसंविदितत्वा-विशेषाद्देवदत्तज्ञानं प्रसज्येत, यज्ञदत्तज्ञानस्य देवदत्ता-संविदितत्वात् स्वज्ञानस्य कथञ्चित् स्वात्मना तादात्म्यात् त-स्यैव तद्रूपतया परिणतेरिति प्रसाधितत्वात् । ज्ञानान्तरेण त-स्यासंवेदनाद् नागृहीतत्वमिति चेत् । न । तस्याऽपि ज्ञानान्तरेण ग्रहणेऽनवस्थाप्रसक्तेः । अग्रहणेऽगृहीतवेदनेन गृहीतस्य द्वितीयज्ञानस्यागृहीतरूपत्वाद् न तेन प्रथमग्रहणमिति तदव-स्था धर्मोसिद्धिः । तेन घटाऽऽदिज्ञानस्य धर्मिणा द्वितीयेन तस्याऽपि तृतीयेन ग्रहणादर्थसिद्धेर्मापरज्ञानकल्पनमिति नानवस्थेति यदुक्तम् । तदप्यसंगतम् । तृतीयाऽऽदेर्ज्ञानस्या-ग्रहणे प्रथमस्याप्यसिद्धेः । उक्तन्यायाद् यदि पुनस्तृतीयज्ञानेन स्वयमसिद्धेनापि द्वितीयं गृह्यते, द्वितीयेन तथाभूतेनैव प्रथमं, तेनाऽपि तथाभूतेनैवार्थो ग्रहीष्यत इति द्वितीयज्ञानपरि-कल्पनमपि व्यर्थमासज्येत । न च विदितोऽर्थ इति ज्ञानविशे-षणस्यार्थस्य प्रतिपत्तेरगृहीतविशेषणा विशेष्ये बुद्धिर्नोपजाय-त इति विशेषणग्राहिज्ञानं द्वितीयं परिकल्प्यते । न च विशे-षणस्याप्युपरि विशेषणविशिष्टता प्रतीयते, येन तृतीयाऽऽदि-ज्ञानपरिकल्पना युक्तिसङ्गता भवेदिति वक्तव्यम् ; विशेषणस्यैव तृतीयाऽऽदिज्ञानपरिकल्पनामन्तरेण ग्रहणासंभवादित्युक्तेः । स्वसंविदितज्ञानाभ्युपगम एव ज्ञानविशेषणविशिष्टार्थप्रतिपत्तिः संभवति, अन्यथा तदयोगादनवस्थानिवृत्तेः । न च विषया-न्तरसंचारादनवस्थानिवृत्तिः,यतो धर्मिज्ञानविषयात् साधनाऽऽ-दिर्विषयान्तरं, तत्र ज्ञानस्योत्पत्तिर्विषयान्तरसंचारः । न चाप-

रापरज्ञानग्राह्यज्ञानसमुत्पत्ताववश्यंभाविबाह्यसाधनो विषयसन्निधानं, येनतत्र ज्ञानस्य संचारो भवेत्, सन्निधानेऽप्यन्तरङ्गबहिरङ्गयोरन्तरङ्गस्यैव बलीयस्त्वान्नान्तरङ्गविषयपरिहारेण बाह्यविषयज्ञानोत्पत्तिर्भवेदिति कुतोऽनवस्थानिवृत्तिः ?। न चादृष्टवशादनवस्थानिवृत्तिः, स्वसंविदितज्ञानाऽभ्युपगमेनाप्यनवस्थानिवृत्तेः संभवात्। अन्यथा कार्येऽनुपपद्यमानेऽदृष्टपरिकल्पनाया उपपत्तेः,स्वसंवेदनेऽपि चादृष्टस्य शक्तिप्रत्यक्षताभावात्। एतेन ईश्वराऽऽदेरनवस्थानिवृत्तिरिति प्रतिविहितम्, तस्यादृष्टकल्पनायाः प्रतिषिद्धत्वाज्ज्ञानाऽऽदेरनुत्पत्तेरनवस्थानिवृत्तिः, धर्मिग्रहणस्थैवमनवस्थोपपत्तेः। किञ्च-शक्तिर्यद्यात्मनोऽव्यतिरिक्ता, तदा तत्क्षये आत्मनेऽपि क्षयाऽऽपत्तिः। व्यतिरिक्ता चेत्,तत एव ज्ञानोत्पत्तेरनर्थकं आत्मा भवेत्। न च सा तस्येति नात्माऽनर्थकम्,समवायाभावे तस्याप्यसिद्धेः। किञ्च-यदि सिद्धिप्रक्षयादनवस्थानिवृत्तेर्बाह्यविषयमपि ज्ञानं न भवेत्, शक्तिप्रक्षयादेव। न च चतुर्थाऽऽदिज्ञानजननशक्तेरेव प्रक्षयः। न। बाह्यविषयज्ञानशक्तेर्युगपदनेकशक्त्यभावात्। भावे वा युगपदनेकज्ञानोत्पत्तेरसक्तिः,सहकार्यपेक्षाऽपि नित्यस्यासंभविनी,प्रतिपादितक्रमेण शक्तिभावे कुतः स इति वक्तव्यम् ?। आत्मन इति चेत्। न। अपरशक्तिवैकल्यात्। ततस्तदभावादपरशक्तिपरिकल्पने तदभावेऽप्यपरशक्तिपरिकल्पनमित्यनवस्था। तदेवं स्वसंविदितविज्ञानाभ्युपगमे कथञ्चिद् घटाऽऽदिज्ञानस्यासिद्धेराश्रयासिद्धो ज्ञेयत्वादिति हेतुः, स्वरूपासिद्धश्चेति व्यवस्थितमेतत् स्वनिर्णीतिस्वभावं ज्ञानमिति। सम्म० २ काण्ड। (युगपद् ज्ञानद्वयानुभवो ' दोकिरिय ' शब्दे निषेत्स्यते)

(२१) ज्ञानस्य स्वप्रकाशकत्वम्-

अस्त्येव प्रदीपाऽऽदिलक्षणो दृष्टान्तो ज्ञानस्य प्रकाशं प्रति स्वजातीयापरानपेक्षणे साध्ये। तथाहि-यथा प्रदीपाऽऽद्यालोको न स्वप्रतिपत्तावालोकान्तरमपेक्षते, तथा ज्ञानमपि स्वप्रतिपत्तौ न समानजातीयज्ञानापेक्षम्। एतावन्मात्रेणाऽऽलोकस्य दृष्टान्तत्वम्, न पुनस्तस्यापि ज्ञानत्वमासाद्यते। येनेन्द्रियाप्राह्यत्वाच्च शुष्यतामिवान्धानामपि तत्प्रतीतेरसङ्ग इति प्रेर्यते। न हि दृष्टान्ते साध्यधर्मिधर्माः सर्वेऽप्यासञ्जयितुं युक्ताः, अन्यथा घटेऽपि शब्दधर्माः शब्दत्वाऽऽदयः प्रसज्येरन्निति तस्याऽपि श्रोत्रग्राह्यत्वप्रसङ्गः। न च साधर्म्यदृष्टान्तमन्तरेण प्रमाणप्रतीतस्यार्थस्याप्रसिद्धिरिति शक्यं वक्तुम्। अन्यथा जीवच्छरीरस्यापि सात्मकत्वे साध्ये तत्प्रसिद्धदृष्टान्तस्याभावात् प्राणाऽऽदिमत्त्वाऽऽदेस्तत्सिद्धिर्न स्यात्। अथ साधर्म्यदृष्टान्ताभावेऽपि दृष्टवैधर्म्यदृष्टान्तस्य घटाऽऽदेः सद्भावात् केवलव्यतिरेकिकेवलाच्च तत्सिद्धिः, तर्हि यत्र स्वप्रकाशकत्वं नास्ति तत्रार्थप्रकाशकत्वमपि नास्ति, यथा घटाऽऽदाविति व्यतिरेकदृष्टान्तसद्भावादर्थप्रकाशकत्वलक्षणाद्धेतोः स्वप्रकाशकत्वं विज्ञानस्य किमिति न सिद्धिमासादयति ?। यत्तूक्तं-कस्यचिदर्थस्य काचित्सामग्री,तेन प्रकाशः प्रकाशान्तरनिरपेक्ष एव स्वग्राहिणि ज्ञाने प्रतिभाति। तदयुक्तमेव। यथा हि स्वसामग्रीतः समुपजायमानाः प्रदीपाऽऽलोकाऽऽदयो न समानजातीयमालोकान्तरं स्वग्राहिणि ज्ञाने प्रतिभासमाना अपेक्षन्ते, तथा स्वसामग्रीतः उपजायमानं विज्ञानं स्वार्थप्रकाशस्वभावं स्वप्रतिपत्तौ न ज्ञानान्तरमपेक्षते, प्रतिनियतत्वात् स्वकारणाऽऽसादितजन्मनां भावशक्तीनाम्। यत्तु प्रदीपाऽऽलोकाऽऽदिकं सजातीयाऽऽलोकान्तरनिरपेक्षमपि स्वप्रतिपत्तौ ज्ञानमपेक्षते, तत्तस्याज्ञानरूपत्वात्; ज्ञानस्य च तद्विपर्ययस्वभावत्वाद् युक्तियुक्तमिति नैकत्र दृष्टः स्वभावोऽन्यत्राऽऽसञ्जयितुं युक्त इति पूर्वपक्षवचो निःसारतया व्यवस्थितम्। अथाऽऽलोकस्य तदन्तरनिरपेक्षा प्रतिपत्तिरुपलब्धेति न तद्दृष्टान्तबलाद् ज्ञानस्यापि ज्ञानान्तरनिरपेक्षा प्रतिपत्तिः; अदृष्टत्वात्, स्वात्मनि क्रियाविरोधाच्च। नन्वेवमुपलक्ष्यमाणेऽपि वस्तुनि यददृष्टत्वं, विरोधश्चोच्येत,तदा स्वात्मवद् घटाऽऽदेरपि बाह्यस्य न ग्राहकं ज्ञानम्। अदृष्टत्वात्, जडस्य प्रकाशायोगाच्चेत्यपि वदतः सौगतस्य न वक्त्रवक्रता समुपजायते। तथाहि-असावप्येवं वक्तुं समर्थः-जडं वस्तु न स्वतः प्रकाशते,विज्ञानवद्,जडत्वहानिप्रसङ्गात्। नाऽपि परतः प्रकाशमानम्, नीलसुखाऽऽदिव्यतिरिक्तस्य विज्ञानस्यासंवेद्यत्वेनासत्त्वात्। अथ नीलस्य प्रकाश इति प्रकाशमाननीलाऽऽदिव्यतिरिक्तस्तत्प्रकाशः। अन्यथा नेदेनास्याप्रतिपत्तौ संवेदनस्य तत्प्रतिभासो न स्यात्। ननु न नीलतद्वेदनयोः पृथगवभासः प्रत्यक्षसंभवी, प्रकाशविविक्तस्य नीलाऽऽदेरननुभवात् तद्विवेकेन च बोधस्याप्रतिभासनात्। न चाध्यक्षतो विवेकेनाप्रतीयमानयोर्नीलतत्संविदोर्भेदो युक्तः, विवेकादर्शनस्य भेदविपर्ययाऽऽत्मत्वान्नीलतत्स्वरूपवत्। अथापि कल्पना नीलतत्संवदोर्भेदमुल्लिखति-नीलस्यानुभव इति। नन्वभेदेऽपि भेदोल्लेखो दृष्टः, यथा शिलापुत्रकस्य वपुः, नीलस्य वा स्वरूपमिति। अथ तत्र प्रत्यक्षाऽऽरूढो भेदो बाधक इति न भेदोल्लेखः सत्यः, स तर्हि नीलसंविदोरपि प्रत्यक्षाऽऽरूढो भेदोऽस्तीति न भेदकल्पना सत्या। तदेवं नीलाऽऽदिकं सुखाऽऽदिकं वस्तु प्रकाशवपुः प्रतिभातीति स्थितम्। तदव्यतिरिक्तस्य प्रकाशस्य प्रतिभासनेनाभावात्। भवतु वा व्यतिरिक्तो बोधः, तथाऽपि न तद्ग्राह्या नीलाऽऽदयो युक्ताः। तथाहि-तुल्यकालो वा बोधस्तेषां प्रकाशकः, भिन्नकालो वा ?। तुल्यकालोऽपि परोक्षः,स्वसंविदितो वा ?। न तावत्परोक्षः, यतोऽप्रत्यक्षोपलम्भस्य नार्थदृष्टेः प्रसिध्यतीत्यादिना स्वसंविदितत्वं ज्ञानस्य प्रसाधयन्त एतत्पक्षं निराकरिष्यामः *। नाऽपि ज्ञानान्तरवेद्यः, अनवस्थाऽऽदिदूषणस्यात्र पक्षे प्रदर्शयिष्यमाणत्वात्। स्वसंवेदनपक्षे तु यथाऽन्तर्नीलिनो बोधः स्वसं वेदितः प्रतिभाति; तथा तत्काले स्वप्रकाशवपुषो नीलाऽऽदयो बहिर्देशसंबन्धितया प्रतिभान्ति, इति समानकालयोर्नीलतत्संवेदनयोः स्वतन्त्रयोः प्रतिभासनात्सव्येतरगोविषाणयोरिव न वेद्यवेदकभावः। समानकालस्यापि बोधस्य नीलं प्रति ग्राहकत्वे नीलस्यापि संप्रति ग्राहकताप्रसङ्गः। समानकालप्रतिभासविशेषेऽपि बुद्धिर्नीलाऽऽदीनां ग्रहणमुपरचयतीति ग्राहिका,नीलाऽऽदयस्तु ग्राह्याः। जैनेनापि युक्तम्। यतो नीलबोधःप्रतिरिक्ता न ग्रहणक्रिया प्रज्ञायते। तथाहि-बोधः सुखाऽऽस्पदीभूतो हृदि,बहिः स्फुटमुद्भासमानतनुश्च नीलाऽऽदिराभाति, न त्वपरा ग्रहणक्रिया प्रतिभासविषया। तदनवभासे च न तया व्याप्यमानतया नीलाऽऽदेः कर्मता युक्ता। भवतु वा नीलबोधव्यतिरिक्ता क्रिया, तथाऽपि किं तस्या अपि स्वतः प्रतीतिः, यद्वा अन्यतः ?। तत्र यदि स्वतो ग्रहणक्रिया प्रतिभाति; तथा सति बोधो, नीलम्, ग्रहणक्रिया चेति त्रयं स्वरूपनिमग्नमेककालं प्रतिभातीति न कर्तृकर्मक्रियाव्यवहृतिः। अथान्यतो ग्रहणक्रिया प्रतिभाति, न तु तत्राप्यपरा ग्रहणक्रियोपेक्ष्या, अन्यथा तस्य ग्राह्यतासिद्धेः; पुनस्तत्राप्यपरा कर्मतानिबन्धनं क्रियोपेक्ष्येत्यन-

* निराकरणं ग्रन्थतोऽवसेयम्।

वस्था । तत्र ग्रहणक्रियाऽपराऽस्ति, तत्स्वरूपानवभासनात् । ततश्चान्तः संवेदनम्,बहिर्नीलाऽऽदिकं च स्वप्रकाशमेवेति स्वसंवित्तिमात्रवादः साधीयान् यदि, तर्ह्यन्तर्निह्नवो बोधो नीलाऽऽदेर्न बोधकः, किं तु स्वप्रकाश एवाऽसौ । तथा सति नीलमहं वेद्मीति कर्मकर्तृभावाभिनिवेशी प्रत्ययो न भवेत्, विषयस्य कर्मकर्तृभावस्याऽभावात् । ननु विषयमन्तरेणापि प्रत्ययो दृष्ट एव, यथा शुक्तिकायां रजतावगमः । अथ बाधकोदयात् पुनर्भ्रान्तिरसौ;नीलाऽऽदौ तु कर्मताऽऽदेर्न बाधाऽस्तीति सत्यता । नन्वत्रापि बोधनीलाऽऽदेः स्वरूपासंसक्तस्य द्वयस्य स्वातन्त्र्योपलम्भोऽस्ति बाधकः कर्मकर्तृभावोल्लेखस्य । अथ किमस्वा भ्रान्तेर्निबन्धनम्?, न हि भ्रान्तिरपि निर्बीजा भवति । ननु पूर्वभ्रान्तिरेवोत्तरकर्मकर्तृभावावगतेर्निबन्धनम् । पूर्वभ्रान्तिकर्मताऽऽदेरप्यपरा पूर्वभ्रान्तिरित्यनादिभ्रान्तिपरम्परा कर्मताऽऽदिर्न तत्त्वम् । अथवा नीलमिति प्रतीतिस्तावन्मात्राध्यवसायिनी पृथग्, अहमित्यपि मतिरन्तरुल्लेखमुद्वहन्ती भिन्ना; वेद्मीत्यपि प्रतीतिरपरैव । ततश्च परस्परासंसक्तप्रतीतित्रितयं क्रमवत्प्रतिभाति, न कर्मकर्तृभावः, तुल्यकालयोस्तस्यायोगात् । भिन्नकाल्योरप्यनवभासनाद् न कर्मताऽऽदिगतिः कथञ्चित् संभविनी । अथापि दर्शनात्प्राक् सत्यपि नीलाऽऽत्मा न भाति, तदुदये च भातीति कर्मता तस्य । नैतदपि साधीयः । यतः प्रागभावोऽर्थस्य न सिद्धः । दर्शनेन स्वकालावधेरर्थस्य ग्रहणात् । दर्शनकाले हि नीलमाजाति, न तु ततः प्राक्, तत्कथं पूर्वभावोऽर्थस्य सिध्येत्? ; तस्य दर्शनस्य पूर्वकाले विरहात् । न च तत्काले दर्शनं प्रागर्थसन्निधिं व्यनक्ति, सर्वदा तत्प्रतिभासप्रसङ्गात् । अथान्येन दर्शनेन प्रागर्थः प्रतीयते । ननु तद्दर्शनादपि प्राग् सद्भावोऽर्थस्यान्येनाप्येष इत्यनवस्था । तस्मात्सर्वस्य नीलाऽऽदेर्दर्शनकाले प्रतिभासनाद् न तत्पूर्वं सत्ता सिद्ध्यति । अथापि पूर्वदृष्टं पश्यामीति व्यवसायात् प्रागर्थः सिद्ध्यति, प्रागर्थसत्तां विना दृश्यमानस्य पूर्वदृष्टेन एकत्वगतेरयोगात् । केन पुनरेकत्वं तयोर्गम्यते ?-किमिदानीन्तनदर्शनेन, पूर्वदर्शनेन वा ? । न तावत्पूर्वदर्शनेन, तत्र तत्काले वावधेरेवार्थस्य प्रतिभासनात् । न हि तेन स्वप्रतिभासिनोऽर्थस्य वर्तमानकालदर्शनव्यभिचरितमध्यवसीयते,तत्काले साम्प्रतिकदर्शनाऽऽदेरभावात् । न चासत्प्रतिभाति, दर्शनस्य वितथत्वप्रसङ्गात् । नापीदानीन्तनदर्शनेन पूर्वदर्शनाऽऽदिव्याप्तिर्नीलाऽऽदेरवसीयते,तद्दर्शनकाले पूर्वदृक्कालस्यास्तमयात् । न चास्तमितपूर्वदर्शनाऽऽदिसंस्पर्शमवतरति प्रत्यक्षम्, वितथत्वप्रसङ्गादेव । तस्मादपास्तत्पूर्वदृगादियोगं सर्वं वस्तु दृशा गृह्यते, पूर्वदृष्टतां तु स्मृतिरुल्लिखति । तदपास्तम् । दृष्टतोल्लेखाभावात् । न च स एवायमिति प्रतीतिरेका । स इति स्मृतिरूपम्,अयमिति तु दृशः स्वरूपं; तत्परोक्षापरोक्षाऽऽकारत्वाद् नैकस्वभावौ प्रत्ययौ; तत्कुतस्तत्त्वसिद्धिः ? । अथानुमानात्प्रागभावोऽर्थस्य सिद्ध्यति, प्राक् सत्तां विना पश्चाद्दर्शनायोगादिति । तदप्यसत् । यतः पश्चाद्दर्शनस्य प्राक् सत्तायाः संबन्धो न सिद्धः, प्राक् सत्तायाः कथञ्चिदप्यसिद्धेः । न चासिद्धया सत्तया व्याप्तं पश्चाद्दर्शनं सिद्ध्यति; येन ततस्तत्सिद्धिः । अथ यदि प्रागर्थमन्तरेण दर्शनमुदयमासादयति; तथा सति नियामकाभावात्सर्वत्र सर्वदा सर्वाऽऽकारं तद्भवेत् । नायमपि दोषः, नियतवासनाप्रबोधेन संवेदननियमात् । तथाहि-स्वप्नावस्थायां वासनाबलाद्दर्शनस्य देशकालाऽऽकारनियमो दृष्ट इति जाग्रदवस्थायामपि तत एवासौ युक्तः । अर्थस्य तु न सत्ता सिद्धा । नापि तद्भेदात् संवित्तिनियम इति तन्न ततः संविद्वैचित्र्यम् । तस्मान्न कथञ्चिदपि नीलाऽऽदेः प्राक् सत्तासिद्धिः । अथ पूर्वसत्ताविरहे किं प्रमाणम् ? । नन्वनुपलब्धिरेव प्रमाणम् । यदि नीलं पूर्वकालसंबन्धिस्वरूपं स्यात्तेनैव रूपेणोपलभ्येत, न च तथा दर्शनकालानुषः सर्वदाऽप्रतिभासनात् । यच्च येनैव रूपेण प्रतिभाति,तत्तेनैव रूपेणास्ति । यथा नीलं नीलरूपतयाऽवभासमानं तथैव सद् न पीताऽऽदिरूपतया । सर्वं चोपलभ्यमानं रूपं वर्तमानकालतयैव प्रतिभाति, न पूर्वाऽऽदितया, तत्र पूर्वं सत्ताऽर्थस्य । अथ नीलं, तद्दर्शनविरतावपि परदृशि प्रतिभातीति साधारणतया ग्राह्यम्; विज्ञानं त्वसाधारणतया प्रकाशकम् । नैतदपि युक्तम् । यतो नीलस्य न साधारणतया सिद्धः प्रतिभासः, प्रत्यक्षेण स्वप्रतिभासितायाः एवावगतेः । न हि नीलं परदृशि प्रतिभातीत्यत्र प्रमाणमस्ति, परदृशोऽनधिगमे नीलाऽऽदेस्तद्वेद्यताऽनधिगतेः । अथानुमानेन नीलाऽऽदीनां साधारणता प्रतीयते । यथैव हि स्वसंताने नीलदर्शनात्तदा दानार्था प्रवृत्तिस्तथाऽपरसन्तानेऽपि प्रवृत्तिदर्शनात्, तद्विषयं दर्शनमनुमीयते । नैतदप्यस्ति । अनुमानेन स्वपरदर्शनभूतो नीलाऽऽदेरेकताऽसिद्धेः;तद्विसदृशव्यवहारदर्शनादुपजायमानं स्वदृष्टसदृशतां परदृष्टस्य प्रतिपादयेत् । यथाऽपरधूमदर्शनात् पूर्वसदृशं दहनमधिगन्तुमीशो, न तु तमेव पूर्वदृष्टम्, सामान्येनान्वयपरिच्छेदात् । नानुमानतोऽपि ग्राह्याऽऽकारस्यैकता । ननु भेदोऽप्यस्य न सिद्ध एव । प्रतिभासनभेदे सति कथमसिद्धः ?, परप्रतिभासपरिहारेण स्वप्रतिभासात्, स्वप्रतिभासपरिहारेण च परप्रतिभासात्, विवेकस्वभावान् व्यतिरेचयति ? ; अन्यथा तस्यायोगात् । ततः स्वपरदृष्टस्य नीलाऽऽदेः प्रतिभासभेदाद् व्यवहारे तुल्येऽपि नैद एव । इतरथा रोमाञ्चनिकरसदृशकार्यदर्शनात् सुखाऽऽदेरपि स्वपरसन्तानानुवृत्तत्वं भवेत् । अथापि सन्तानभेदात् सुखाऽऽदेर्भेदः । ननु सन्तानभेदोऽपि किमन्यभेदात्?, तथा चेदनवस्था । अथ तस्य स्वरूपभेदाद्भेदः, सुखाऽऽदेरपि तर्हि स एवास्तु, अन्यथा भेदासिद्धेः । न ह्यन्यभेदादन्यद्भिन्नम्, अतिप्रसङ्गात् । नीलाऽऽदेरपि स्वपरभासिनः प्रतिभासभेदोऽस्तीति नैकता । अथ देशैकत्वादेकत्वम् । ननु देशस्यापि स्वपरदृष्टस्यानन्तरोक्तन्यायादू नैकता युक्ता । तस्माद् ग्राहकाऽऽकारवत् प्रतिपुरुषमुद्भासमाननीलाऽऽदिकमपि भिन्नमेव । तच्चैककालोपलम्भात्, ग्राहकवत् स्वप्रकाशम् । अथ ग्राहकाऽऽकारश्चिद्रूपत्वाद् वेदको,नीलाऽऽकारस्तु जडत्वाद् ग्राह्यः अत्रोच्यते-किमिदं बोधस्य चिद्रूपत्वम् ?। यदि अपरोक्षं स्वरूपं, नीलाऽऽदेरपि तर्हि तदस्तीति न जडता । अथ नीलाऽऽदेरपरोक्षस्वरूपमन्यस्माद्भवतीति ग्राह्यम् । ननु बोधस्याऽपि स्वसंवेदनमिन्द्रियाऽऽदेर्भवतीति ग्राह्यं स्यात् । अथ यदीन्द्रियाऽऽदिकार्यं न तद्वेद्यं;नीलाऽऽदिकमपि तर्हि नयनाऽऽदिकार्यमस्तु न तु ग्राह्यम् । अथापि बोधो बोधस्वरूपतया नित्यः, नीलाऽऽदिकस्तु प्रकाश्यरूपतया अनित्य इति ग्राह्यः । तदप्यसत् । स्तम्भाऽऽदेर्नयनाऽऽदिवद्भावादुपेति रूपमपरोक्षत्वम् । तदनित्यः स्तम्भाऽऽदिर्भवतु, ग्राह्यस्तु कथम् ? । न हि यद् यस्माद्भवपद्यते तत्तस्य वेद्यम् । अतिप्रसङ्गात् । तस्मादपरोक्षस्वरूपाः स्तम्भाऽऽदयः स्वप्रकाशाः, बोधस्तु नित्योऽनित्यो वा तत्काले केवल-

मुद्भाति,न तु वेदकः; द्वयोरपि परस्परं ग्राह्यग्राहकताऽऽपत्तेः । अथ नीलोन्मुखत्वाद् बोधो ग्राहकः । किमिदं तदुन्मुखत्वं नाम बोधस्य ?। यदि नीलकाले सत्ता, सा नीलस्याऽपि तत्काले समस्तीति नीलमपि बोधस्य वेदकं स्यात् । अथान्यदुन्मुखत्वं तत्, तर्हि स्वरूपनिमग्नं चकासतृतीयस्वरूपं भवेत् । तथाहि-तस्य तदुन्मुखत्वं तद्व्यापारः । स च व्यापारो यदि नीले व्याप्रियते, तदा तत्राप्यपरो व्यापार इत्यनवस्था । अथ न व्याप्रियते, न तद्वशात् बोधस्य ग्राहकत्वं, नीलाऽऽदेस्तु ग्राह्यत्वम् । अथ व्यापारस्यापरव्यापारव्यतिरेकेणापि नीलं प्रति व्यापृतिरूपता, तस्य तद्रूपत्वात् । ननु नीलस्यापि स्वं स्वरूपं विद्यत इति बोधं प्रति ग्रहणव्यापृतिः स्यात् । किञ्च-बोधेन यदि नीलं प्रति ग्रहणक्रिया जन्यते सा नीलाद्भिन्ना, अभिन्ना वा ?। भिन्ना चेत्, न तया तस्य ग्राह्यत्वम्, भिन्नत्वादेव । अथाभिन्ना, तर्हि नीलाऽऽदेर्ज्ञानरूपता, ज्ञानजन्यत्वाद्धुत्तरज्ञानक्षणवत् । अथ ज्ञानस्य एवंभूता शक्तिर्येन तस्य नीलं प्रति ग्राहकता, नीलाऽऽदेस्तु तं प्रति ग्राह्यता । ननु बोधस्य ग्राहकत्वे, नीलाऽऽदेस्तु ग्राह्यत्वे सिद्धे शक्तिपरिकल्पना युक्ता, शक्तेः कार्यानुमेयत्वात् । तदसिद्धौ तु तत्परिकल्पनमयुक्तम्, इतरेतराऽऽश्रयप्रसङ्गात् । तथाहि-बोधस्य शक्तिविशेषसिद्धेर्नीलं प्रति ग्राहकत्वसिद्धिः, तस्मिंश्च तच्छक्तिसिद्धिरिति व्यक्तमितरेतराऽऽश्रयत्वम्; तन्न बोधस्य नीलं प्रति ग्राहकत्वसिद्धिः । तस्माद् व्यतिरिक्तऽपि बोधेऽभ्युपगते सहोपलम्भनियमात् स्वसंवेदनमेव युक्तम् । परमार्थतस्तु सुखाऽऽदयो नीलाऽऽद्यध्यवसायरूपा इत्येतावदेव भाति । निराकारस्तु बोधः स्वप्नेऽपि नोपलभ्यत इति न तस्य सद्भाव इति कथं तस्यार्थग्राहकत्वम् ?। अत एव ते प्रामाण्यस्थिते-इह खलु यत् प्रतिभाति, तदेव सद् व्यवहृतिपथमवतरति; यथा हृदि प्रकाशमानवपुः सुखं, न तत्काले पीताऽनुद्भासमाना समस्ति, विद्यतिरेव च नीलाऽऽदिरूपतया सकलतनुतामाभातीति स्वभावहेतुः । तदेवमर्थग्राहकत्वस्याप्यसिद्धेः, जमस्य प्रकाशविरुद्धत्वाच्च नार्थग्राहकत्वमपि बौद्धेष्टया युक्तम् । अथ बहिर्देशसंबद्धस्य जमस्यापि नीलाऽऽदेरनुभवाद् न नीलाऽऽदिप्रकाशस्य तद्ग्राहकत्वमसिद्धम्; नाप्यनुभूयमाने स्तम्भाऽऽदिके जडे प्रकाशविषयत्वविरोधोद्भावनं युक्तिसङ्गतम् । प्रत्यक्षसिद्धे स्वभावे च सति बुद्धिरुद्धस्वभावाऽऽवेदकस्यानुमानस्य प्रत्यक्षबाधितपक्षनिर्देशानन्तरप्रयुक्तकालात्ययापदिष्टत्वदोषदुष्टहेतुप्रभवत्वेनानुमानाऽऽभासत्वात् । न च प्रत्यक्षसिद्धे स्वभावे विरोधः सिद्ध्यति, अन्यथा ज्ञानस्यापि ज्ञानत्वविरोधप्राप्तिः । नन्वेवं नीलाऽऽदिसंवेदनस्याऽपि हृदि स्वसंवेदनविषयतयाऽनुभवाद् न स्वसंवेदितत्वमसिद्धम्, नापि स्वाऽऽत्मनि क्रियाविरोधोद्भावनं युक्तियुक्तम्, अनुभूयमाने विरोधासिद्धेः । अस्वसंवेदनज्ञानसाधकत्वेनोपन्यस्यमानस्य च हेतोः प्रत्यक्षनिराकृतपक्षविषयत्वेन न साध्यसाधकत्वमित्यपि समानम् । किञ्च-स्वसंविदितज्ञानानभ्युपगमे प्रतीयतेऽयमर्थो बहिर्देशसंबन्धितयेत्यत्र प्रतीतेर्व्यवस्थापिकाया अप्रतीतत्वेनाव्यवस्थितौ व्यवस्थाप्यस्यार्थस्य न व्यवस्थितिः स्यात् । नहि स्वयमव्यवस्थितं खरविषाणाऽऽदि कस्यचिद् व्यवस्थापकमुपलब्धम् । अथ प्रतीतेरसंविदितत्वेऽपि एकार्थसमवेतानन्तरप्रतीतिव्यवस्थापितत्वेन नाव्यवस्थितत्वं, तर्हि तदेकार्थसमवेतानन्तरप्रतीतेरप्यपरतथाभूतप्रतीत्यवस्थापितत्वेनार्थव्यवस्थापनप्रतीतिव्यवस्थापकत्वमिति पुनरपि तथाभूताऽपरा प्रतीतिः प्रतीतिव्यवस्थापिकाऽभ्युपगन्तव्येत्यनवस्था । अथ प्रतीतिव्यवस्थापिका प्रतीतिः स्वसंविदितत्वेन स्वयमेव व्यवस्थितेति नायं दोषः, तर्ह्यर्थव्यवस्थापिकाऽपि प्रतीतिः तथा किं नाभ्युपगम्यते ?, न्यायस्य समानत्वात् । अथ प्रतीतिरप्रतीताऽपि प्रतीत्यन्तरव्यवस्थापिका, तर्हि प्रथमप्रतीतिरप्यव्यवस्थिताऽप्यर्थव्यवस्थापिका भविष्यतीति ' नागृहीतविशेषणा विशेष्ये बुद्धिः ' इति वचः कथं न परिक्षयेत् ?; प्रतीतोऽर्थ इति विशेष्यप्रतिपत्तौ प्रतीतिविशेषणानवगमेऽपि विशेष्यप्रतिपत्त्यभ्युपगमात् । अपि च—यदि तदेकार्थसमवेतज्ञानान्तरग्राह्यं ज्ञानमर्थग्राहकमभ्युपगम्यते, तदा पूर्वपूर्वज्ञानोपलम्भनस्वभावानामुत्तरोत्तरज्ञानानामनवरतमुत्पत्तेर्विषयान्तरसंचारो ज्ञानानां न स्यात्; विषयान्तरसन्निधानेऽपि पूर्वज्ञानलक्षणस्य तदेकार्थसमवेतस्यान्तरङ्गत्वेनातिसन्निहिततरस्य विषयस्य सद्भावात् । यस्त्वाह-विषयोपलम्भनिमित्तमात्रप्रतिपत्तौ प्रतीतिविशेषणस्यार्थस्य सिद्धत्वाद् नानवस्था । तदेतदेव न संगच्छते । स्वसंवेदनज्ञानानभ्युपगमात् । एतच्च प्रतिपादितम् । अपि च-प्रमाणसंप्लवाऽऽदिना नैयायिकेन प्रत्यक्षशाब्दज्ञानयोरेकविषयत्वमभ्युपगतम्, तथा चाध्यक्षज्ञानवत् शाब्देऽपि तस्यैवान्यूनातिरिक्तस्य विषयस्याधिगमे न प्रतिपत्तिभेद इत्यध्यक्षवच्छाब्दमपि स्पष्टप्रतिभासं स्यात् । अथैकविषयत्वे सत्यपि इन्द्रियसंबन्धाभावात् शब्दविषये प्रतिपत्तिभेदः । नन्वक्षैरपि विषयस्वरूपमुद्भासनीयम् । तच्च यदि शाब्देनापि प्रदर्श्यते, तथा सतीन्द्रियसंबन्धाभावेऽपि किमिति न स्पष्टावभासः शाब्दस्य ?। न हि विषयभेदमन्तरेण ज्ञानावभासभेदो युक्तः । अन्यथा ज्ञानावभासभेदाद् विषयभेदव्यवस्था न स्यात् । नहि बहिरपि तदवभासभेदसंवेदनव्यतिरेकेणान्यद् भेदव्यवस्थानिबन्धनमुत्पश्यामः । अन्यच्च प्रत्यक्षेऽपि साक्षादिन्द्रियसंबन्धोऽस्तीति न स्वरूपेण ज्ञातुं शक्यः । तस्यातीन्द्रियत्वात्, किं तु स्वरूपप्रतिभासात् कार्यात् । तच्चाविकलं यदि शाब्देऽपि वस्तुस्वरूपं प्रतिभाति, तदा तत एवेन्द्रियसंबन्धस्तत्राऽपि किं नाभ्युपगम्यते ?। अथ तत्र स्पष्टप्रतिभासाभावाद् नासावनुमीयते । ननु तदभावस्तदङ्गसंगतिविरहात्, तदभावश्च स्फुटप्रतिभासाभावादिति सोऽयमितरेतराऽऽश्रयदोषः । तस्माद् विषयभेदनिबन्धन एव ज्ञानप्रतिभासभेदाध्यवसायोऽभ्युपगन्तव्यः । स च एकविषयत्वे शाब्दाऽध्यक्षज्ञानयोर्न संगच्छते । अथ शब्दैर्वस्तुरूपावभासेऽपि न सकलतत्त्वविशेषावभास इत्यस्पष्टप्रतिभासं तत् । नन्वेवं प्रत्यक्षावभासिनो विशेषस्यार्थक्रियाङ्गस्य तत्राप्रतिभासनात् तदेव भिन्नविषयत्वं शाब्दाध्यक्षयोः प्रसक्तम् । अथोभयत्रापि व्यक्तिस्वरूपमेकमेव नीलाऽऽदित्वं प्रतिभाति, विशदाविशदौ वाऽऽकारौ ज्ञानाऽऽत्मभूतौ । नन्वेवमेकसंवेद्ये विषये प्रतिभासमाने तत्कालः स्पष्टत्वावभासो ज्ञानावभास इति प्राप्तम्, विशिष्टसामग्रीजन्यस्य ज्ञानस्य विशदत्वात् । तदवभासव्यतिरेकेण त्वत्तसंवेद्यनीलप्रतिभासकालेऽन्यस्य भवदभ्युपगमेन वैशद्यप्रतिभासनिमित्तस्यासंभवात् । अथ भवतु विशदज्ञानप्रतिभासनिमित्त एव तत्र वैशद्यप्रतिभासव्यवहारः, तथापि न स्वसंविदिततज्ज्ञानसिद्धिः, तदेकार्थसमवेतज्ञानान्तरवेद्यत्वेऽपि तद्व्यवहारस्य संभवात् । एककालावभासव्यवहारस्तु लघुवृत्तित्वाद् मनसः क्रमानुपलक्षणनिमित्तः, उत्पलपत्रशतव्यतिभेदवत् । नन्वेवं सत्यक्षबुद्धि-

पञ्चकस्यैकज्ञानावभासोऽपि क्रमावभासे सत्यपि तत्र एव क्रमप्रतिभासानुपपन्नक्षणकुत इति सदसद्वर्गः सर्वः कस्यचिदेकज्ञानप्रत्यक्षः प्रमेयत्वात् पञ्चाङ्गुलिवदिति सर्वज्ञसाधकप्रयोगे दृष्टान्तस्य साध्यविकलताप्रसक्तिः । तथा समस्तसदसद्वर्गग्राहकेण सर्वविदृज्ञानेन ज्ञानाऽऽत्मा गृह्यते, उत नेति ?। यदि न गृह्यते, तदा तस्य प्रमेयत्वे सति तेनैव प्रमेयत्वलक्षणो हेतुर्व्यभिचारी, अप्रमेयत्वे तस्य भागासिद्धो हेतुः । अथ सर्वैकज्ञानेन सर्वपदार्थग्राहिणा आत्माऽपि गृह्यत इति नानैकान्तिकः । नन्वेवं सति यथा ईश्वरज्ञानं ज्ञानत्वेऽप्यात्मानं स्वयं गृह्णाति, न च तत्र स्वात्मनि क्रियाविरोधः, तथाऽस्मदादिज्ञानमप्येवं भविष्यतीति न कश्चिद् विरोधः । किञ्चैवमभ्युपगमे ज्ञानं ज्ञानान्तरग्राह्यं प्रमेयत्वाद् घटवदित्यत्र प्रयोगे ईश्वरज्ञानस्य प्रमेयत्वे सत्यपि ज्ञानान्तरग्राह्यत्वाभावात् तेनैवानैकान्तिकः प्रमेयत्वादिति हेतुः । तस्मात् ज्ञानस्य ज्ञानान्तरग्राह्यत्वेऽनेकदोषसंभवात् स्वसंविदितं ज्ञानमभ्युपगन्तव्यम् । ज्ञानस्वरूपञ्चाऽऽत्मा । अन्यथा भिन्नज्ञानसङ्क्रावादाकाशस्येव तस्य ज्ञातृत्वं न स्यात् । न चाऽऽकाशव्यतिरेकेण ज्ञानमात्मन्येव समवेतमिति तस्यैव ज्ञातृत्वं नाऽऽकाशाऽऽदेरिति वक्तुं युक्तम्, समवायस्य निषेत्स्यमानत्वात् । ज्ञानस्य च स्वसंविदितत्वे सिद्धे आत्मनोऽपि तदव्यतिरिक्तस्य तत्सिद्धमिति कथं न स्वसंवेदनप्रत्यक्षसिद्धत्वमात्मनः ?; तत्र प्रथमपक्षस्य दुष्टत्वम्। द्वितीयपक्षेऽपि यदुक्तम्-न हि कश्चित्पदार्थः कर्तृरूपः, करणरूपो वा स्वाऽऽत्मनि कर्मणीव सव्यापारो दृष्ट इति । तदप्यसङ्गतम् । भिन्नव्यापारव्यतिरेकेणापि आत्मनः कर्तृ, प्रमाणस्य च ज्ञानस्य स्वसंविदितत्वप्रतिपादनात् । एकस्यैव च क्रिङ्गाऽऽदिकरणमपेक्ष्यावस्थाभेदेन यथा प्रमातृत्वं, प्रमेयत्वं च भवद्भिरविरुद्धत्वेनाभ्युपगम्यते, तथैकदाऽप्येकस्याऽऽत्मनोऽनेकधर्मसङ्क्रावात् प्रमातृत्वप्रमाणत्वप्रमेयत्वान्यविरुद्धानि किं नाभ्युपगम्यन्ते ?; तत्तद्धर्मयोगात् तत्तत्स्वभावत्वस्य प्रमाणनिश्चितत्वेनाविरोधात् । यदप्युक्तम्-प्रमाणविषयत्वेऽप्यपरोक्षतेत्यस्य कोऽर्थ इत्यादि । तदप्यसारम् । ज्ञातृतया प्रमाणत्वेन च स्वरूपावभासनस्य प्रतिपादितत्वात् । न च घटाऽऽदेः स्वरूपस्य भिन्नज्ञानग्राह्यत्वात् प्रमातुः, प्रमाणस्य च स्वरूपं भिन्नज्ञानग्राह्यम् । तयोश्चिद्रूपत्वेन घटाऽऽदेस्तु तद्विपर्ययेण स्वरूपविरुद्धत्वात् । न च प्रमाणप्रमातृस्वरूपग्राहकस्य प्रत्यक्षस्य तल्लक्षणेनासंग्रहः, तत्संग्राहकस्य लक्षणस्य प्रदर्शितत्वात् । यदपि घटमहं चक्षुषा पश्यामीत्यनेनातिप्रसङ्गाऽऽपादनं कृतम् । तदप्यसङ्गतम् । न हि चक्षुषो जडरूपस्यास्वसंविदितत्वे प्रमातृप्रमात्योरपि चिद्रूपयोरस्वसंविदितत्वं युक्तम्, अन्यस्वनाशत्वानुपपत्तेः । यत्तूक्तम्-इन्द्रियव्यापारे सति शरीराद् व्यवच्छिद्यमानस्य विषयस्यैव केवलस्याऽवभासनमिति । तदत्यन्तमसङ्गतम् । विषयस्येव तद्बोधनासंवेदनस्यापि व्यवस्थापितत्वात्; तदभावे विषयावभास एव न स्यादित्यस्य चातः प्रमात्रवभास उपपन्न एव । सम्म० १ काण्ड । स्या० ।

(२२) साम्प्रतं नित्यपरोक्षज्ञानवादिनां मीमांसकनैयायिकभट्टानाम्, एकाऽऽत्मसमवायिज्ञानान्तरवेद्यज्ञानवादिनां च यौगानां मतं विकुट्टयन्नाह—

स्वार्थावबोधक्षम एव बोधः,
प्रकाशते नार्थकथाऽन्यथा तु ।
परे परेभ्यो नयतस्तथाऽपि,
प्रपेदिरे ज्ञानमनात्मनिष्ठम् ॥१२॥

बोधो-ज्ञानं, स च स्वार्थावबोधक्षम एव प्रकाशते, स्वस्याऽऽत्मस्वरूपस्य, अर्थस्य च पदार्थस्य, योऽवबोधः-परिच्छेदः, तत्र क्षम एव-समर्थ एव प्रतिभासते; इत्ययोगव्यवच्छेदः। प्रकाशत इति क्रियया ऽवबोधस्य प्रकाशरूपत्वसिद्धे—सर्वप्रकाशानां तु स्वार्थप्रकाशकत्वेन, बोधस्यापि तत्सिद्धिः । विपर्यये दूषणमाह-नार्थकथाऽन्यथा स्थिति । अन्यथेति—अर्थप्रकाशने ऽविद्यादाद्, ज्ञानस्य स्वसंविदितत्वानभ्युपगमेऽर्थकथैव न स्यात्। अर्थकथा पदार्थसंबन्धिनी वार्ता, सदसद्रूपाऽऽत्मकं स्वरूपमिति यावत्। तुशब्दोऽवधारणे भिन्नक्रमश्च, स चार्थकथया सह योजित एव । यदि हि ज्ञानं स्वसंविदितं नेष्यते, तदा तेनाऽऽत्मज्ञानाय ज्ञानान्तरमपेक्षणीयम्, तेनाप्यपरमित्यानवस्था; ततो ज्ञानं-तावत्स्वावबोधव्यग्रतामग्नम्; अर्थस्तु—जडतया स्वरूपज्ञापनासमर्थ इति को नामार्थस्य कथामपि कथयेत् ?। तथाऽपि-एवं ज्ञानस्य स्वसंविदितत्वे युक्त्या घटमानेऽपि, परतीर्थान्तरीयाः, ज्ञानं-कर्मताऽऽपन्नम्, अनात्मनिष्ठं न विद्यत आत्मनः स्वस्य निष्ठा निश्चयो यस्य तदनात्मनिष्ठम्, अस्वसंविदितमित्यर्थः, प्रपेदिरे-प्रपन्नाः । कुतः ?, इत्याह-परेभ्यो नयतः; परे-पूर्वपक्षवादिनः, तेभ्यः सकाशाद् ज्ञानस्य स्वसंविदितत्वं नोपपद्यते, स्वात्मनि क्रियाविरोधादित्युपालम्भसंभावनासंभवं यद्वयं, तस्मात् तदाश्रित्येत्यर्थः। इत्थमक्षरगमनिकां विधाय भावार्थः प्रपञ्च्यते-नट्टास्तावदिदं वदन्ति-यद् ज्ञानं स्वसंविदितं न भवति, स्वात्मनि क्रियाविरोधात् । न हि सुशिक्षितोऽपि नटश्चटुः स्वस्कन्धमधिरोढुं पटुः, न च सुतीक्ष्णाऽऽप्यसिधारा स्वं छेत्तुमाहितव्यापारा; ततश्च परोक्षमेव ज्ञानमिति । तदेतन्न सम्यक् । यतः-किमुत्पत्तिः स्वात्मनि विरुध्यते, ज्ञप्तिर्वा ?। यदि उत्पत्तिः, सा विरुध्यतां, न हि वयमपि ज्ञानमात्मानमुत्पादयतीति मन्यामहे । अथ ज्ञप्तिः-ज्ञेयमात्मनि विरुद्धा; तदाऽऽत्मनैव ज्ञानस्य स्वहेतुत्व उत्पादात्, प्रकाशाऽऽत्मनैव प्रदीपाऽऽलोकस्य । अथ प्रकाशाऽऽत्मैव प्रदीपाऽऽलोक उत्पन्न इति परप्रकाशकोऽस्तु, आत्मानमप्येतावन्मात्रेणैव प्रकाशयतीति कोऽयं न्याय?, इति चेत्; तर्हि तेन घराकेणाप्रकाशितेनैव स्थातव्यम्, आलोकान्तराद्धाऽस्य प्रकाशेन भवितव्यम्? प्रथमे प्रत्यक्षबाधो, द्वितीयेऽपि-सैवानवस्थाऽऽपत्तिश्च । अथ नासौ स्वमपेक्ष्य कर्मतया चकास्तीत्यस्वप्रकाशकः स्वीक्रियते, आत्मानं न प्रकाशयतीत्यर्थः; प्रकाशरूपतया तूत्पन्नत्वात् स्वयं प्रकाशत एवेति चेच्छिरं जीव; न हि वयमपि ज्ञानं कर्मतयैव प्रतिभासमानं स्वसंवेद्यं ब्रूमः; ज्ञानं स्वयं प्रतिभासत इत्यादावकर्मकस्य तस्य चकासनात् । यथा तु ज्ञानं स्वं जानामीति कर्मतयाऽपि तद्भाति, तथा प्रदीपः स्वं प्रकाशयतीत्ययमपि कर्मतया प्रथित एव । यस्तु स्वात्मनि क्रियाविरोधो दोष उद्भावितः-सोऽयुक्तः; अनुभवसिद्धेऽर्थे विरोधासिद्धेः; 'घटमहं जानामि' इत्यादौ कर्तृकर्मवद् ज्ञातेरप्ययभासमानत्वात् । स्या० १२ श्लोक । (अतीन्द्रियान् धर्मास्तिकायाऽऽदीन् छद्मस्थो न जानातीति 'छउमत्थ' शब्दे तृतीयभागे १३३६ पृष्ठे उक्तम्)

(२३) अथ ज्ञानिनोऽज्ञानिनश्च निरूपयन्नाह-

जीवा णं भंते ! किं णाणी, किं अण्णाणी ?। गोयमा ! जीवा णाणी वि, अण्णाणी वि । जे णाणी, ते अत्थे-

गइया दुअण्णाणी, अत्थेगइया तिअण्णाणी, अत्थेगइया चउण्णाणी, अत्थेगइया एगण्णाणी । जे दुअण्णाणी, ते आभिणिबोहियणाणी य, सुयणाणी य । जे तिअण्णाणी, ते आभिणिबोहियणाणी, सुयणाणी, ओहिणाणी । अहवा-आभिणिबोहियणाणी, सुयणाणी, मणपज्जवणाणी । जे चउणाणी, ते आभिणिबोहियणाणी, सुयणाणी, ओहिणाणी, मणपज्जवणाणी । जे एगणाणी, ते नियमा केवलणाणी । जे अण्णाणी, ते अत्थेगइया दुअण्णाणी, अत्थेगइया तिअण्णाणी । जे दुअण्णाणी, ते मइअण्णाणी य, सुयअण्णाणी य । जे तिअण्णाणी, ते मइअण्णाणी, सुयअण्णाणी, विभंगणाणी ।

(२४) नैरयिकजीवानधिकृत्याऽऽह-

णेरइयाणं भंते ! किं णाणी, अण्णाणी ? । गोयमा ! णाणी वि, अण्णाणी वि । जे णाणी, ते नियमा तिण्णाणी । तं जहा- आभिणिबोहियणाणी, सुयणाणी, ओहिणाणी । जे अण्णाणी, ते अत्थेगइया दुअण्णाणी, अत्थेगइया तिअण्णाणी, एवं तिण्णि अण्णाणाइं भयणाए ।

इह च नारकाधिकारे-" जे णाणी, ते नियमा तिण्णाणी " इति । सम्यग्दृष्टिनारकाणां भवप्रत्ययमवधिज्ञानमस्तीति कृत्वा ते नियमात् त्रिज्ञानिनः । " जे अण्णाणी ते अत्थेगइया दुअण्णाणी " इति । कथमुच्यते ? । असंज्ञिनः सन्तो ये नारकेषूत्पद्यन्ते, तेषामपर्याप्तावस्थायां विभङ्गाभावादाद्यमेवाज्ञानद्वयमिति ते द्व्यज्ञानिनः । ये तु मिथ्यादृष्टिसंज्ञिभ्य उत्पद्यन्ते, तेषां भवप्रत्ययो विभङ्गो भवतीति तेऽज्ञानिनः । एतदेव नियमयन्नाह—(एवं तिण्णि अण्णाणाणि भयणाए त्ति)

असुरकुमाराणं भंते ! किं णाणी, अण्णाणी ? । जहेव णेरइया तहेव तिण्णि णाणाणि नियमा, तिण्णि अण्णाणि भयणाए, एवं० जाव थणियकुमारा ।

पुढविकाइयाणं भंते ! किं णाणी, अण्णाणी ? । गोयमा ! नो णाणी, अण्णाणी । नियमा दुअण्णाणी-मतिअण्णाणी, सुयअण्णाणी य । एवं० जाव वणस्सइकाइया ।

(२५) द्वीन्द्रियाः सिद्धपर्यन्ताः-

बेइंदियाणं पुच्छा ? । गोयमा ! णाणी वि, अण्णाणी वि । जे णाणी, ते नियमा दुण्णाण । । तं जहा-आभिणिबोहियणाणी य, सुयणाणी य । जे अण्णाणी, ते नियमा दुअण्णाणी । तं जहा-मइअण्णाणी य, सुयअण्णाणी य । एवं तेइंदियचउरिंदिया वि । पंचिंदियतिरिक्खजोणियाणं पुच्छा ? । गोयमा ! णाणी वि, अण्णाणी वि । जे णाणी, ते अत्थेगइया दुण्णाणी, अत्थेगइया तिण्णाणी । एवं तिण्णि णाणाणि, तिण्णि अण्णाणाणि भयणाए । मणुस्सा जहा जीवा तहेव पंच णाणाइं, तिण्णि अण्णाणाणि भयणाए । वाणमंतरा जहा णेरइया, जोइसियवेमाणियाणं तिण्णि णाणाइं, तिण्णि अण्णाणाइं नियमा । सिद्धाणं भंते ! पुच्छा ? । गोयमा ! णाणी, नो अण्णाणी, नियमा एगणाणी, केवलणाणी ।

(बेइंदियाणमित्यादि) द्वीन्द्रियाः केचिद् ज्ञानिनोऽपि सासादनसम्यग्दर्शनभावेनापर्याप्तकावस्थायां भवन्तीत्यत उच्यते-(णाणी वि, अण्णाणी वि त्ति) अनन्तरं जीवाऽऽदिषु षड्विंशतिपदेषु ज्ञान्यज्ञानिनश्चिन्तिताः ।

(२६) अथ तान्येव गतीन्द्रियकायाऽऽदिद्वारेषु चिन्तयन्नाह-

नेरयगइयाणं भंते ! जीवा किं णाणी, अण्णाणी ? । गोयमा ! णाणी वि, अण्णाणी वि, तिण्णि णाणाइं नियमा, तिण्णि अण्णाणाइं भयणाए । तिरियगइयाणं भंते ! जीवा किं णाणी, अण्णाणी ? । दो णाणा, दो अण्णाणा नियमा । मणुस्सगइयाणं भंते ! जीवा किं णाणी, अण्णाणी ? । तिण्णि णाणाइं भयणाए, दो अण्णाणाइं नियमा । देवगतिया जहा नेरयगतिया । सिद्धगइया णं भंते ! ?; जहा सिद्धा ।

गत्यादिद्वाराणि चैतानि-

" गइ इंदिए य काए, सुहुमे पज्जत्तए भवत्थे य ।
भवसिद्धिए य सन्नी, लद्धी उवओगजोगे य ॥ १ ॥
लेस्सा कसाय वेए, आहारे नाणगोयरे काले ।
अंतर अप्पाबहुयं, च पज्जवा चेह दाराइं ॥ २ ॥ "

तत्र च निरये गतिर्गमनं येषां ते निरयगतिकाः, तेषामिह च सम्यग्दृष्टयो, मिथ्यादृष्टयो वा ज्ञानिनोऽज्ञानिनो वा ये पञ्चेन्द्रियतिर्यङ्मनुष्येभ्यो नरके उत्पत्तुकामा अन्तरगतौ वर्तन्ते, ते निरयगतिका विवक्षिताः, एतत्प्रयोजनत्वाद् गतिग्रहणस्येति। (तिण्णि णाणाइं नियम त्ति) अवधेर्भवप्रत्ययत्वेनान्तरगतावपि भावात् । (तिण्णि अण्णाणाइं भयणाए त्ति) असंज्ञिनां नरके गच्छतां द्वे अज्ञाने, अपर्याप्तकत्वे विभङ्गस्याभावात्। संज्ञिनां तु मिथ्यादृष्टीनां त्रीणि अज्ञानानि, भवप्रत्ययविभङ्गस्य सद्भावात् । अतस्त्रीणि अज्ञानानि भजनयेत्युच्यत इति । (तिरियगइयाणं त्ति) तिर्यक्षु गतिर्गमनं येषां ते तिर्यग्गतिकाः, तेषां तदवस्थान्तरालवर्तिनाम् (दो णाण त्ति) सम्यग्दृष्टयो हि अवधिज्ञाने प्रतिपतित एव तिर्यक्षु गच्छन्ति, तेन तेषां द्वे एव ज्ञाने (दो अन्नाणेति) मिथ्यादृष्टयोऽपि विभङ्गज्ञाने प्रतिपतित एव तिर्यक्षु गच्छन्ति, तेन तेषां द्वे अज्ञाने इति । (मणुस्सगइयाणमित्यादि) (तिण्णि णाणाइं भयणाए त्ति) मनुष्यगतौ हि गच्छन्ति केचिज्ज्ञानिनोऽवधिना सहैव गच्छन्ति, तीर्थकरवत् केचिच्च तद्विमुच्यन्ते, तेषां त्रीणि वा द्वे वा ज्ञाने स्यातामिति, ये पुनरज्ञानिनो मनुष्यगत्युत्पत्तुकामास्तेषां प्रतिपतित एव विभङ्गे तत्रोत्पत्तिः स्यादित्यत उक्तम् । (दो अन्नाणाइं नियम त्ति) (देवगइया जहा निरयगइय त्ति) देवगतौ ये ज्ञानिनो यातुकामास्तेषामवधिभवप्रत्यये देवायुःप्रथमसमय एवोत्पद्यते, अवस्तेषां काणामित्युच्यते—" तिण्णि णाणाइं नियम त्ति । ये

निनस्तेऽसंज्ञिभ्य उत्पद्यमाना द्रव्यज्ञानिनोऽपर्याप्तकत्वे विभङ्गस्याभावात्, संज्ञिभ्य उपपद्यमानास्तु द्रव्यज्ञानिनो भवप्रत्ययविभङ्गस्य सद्भावात्, अतस्तेषां नारकाणामित्योक्तम्- " तिन्नि अन्नाणाइं भयणाए त्ति " (सिद्धगइयाणं इत्यादि) यथा सिद्धाः केवलज्ञानिन एव, एवं सिद्धिगतिका अपि वाच्या इति भावः । यद्यपि च सिद्धानां सिद्धिगतिकानां चान्तर्गत्यभावाद् न विशेषोऽस्ति, तथाऽपीह गतिप्रस्तावलाऽऽयातत्वात् ते दर्शिताः, एवं द्वारान्तरेष्वपि परस्परान्तर्भावेऽपि तत्तद्विशेषापेक्षयाऽपौनरुक्त्यं भावनीयमिति ।

(२७) अथेन्द्रियद्वारे-

सइंदियाणं भंते ! जीवा किं णाणी, अण्णाणी ?। गोयमा ! चत्तारि नाणाइं तिण्णि अण्णाणाइं भयणाए । एगिंदिया णं भंते ! जीवा किं णाणी, किं अण्णाणी ?, जहा पुढविकाइया । बेइंदियतेइंदियचउरिंदियाणं दो णाणा, दो अण्णाणा नियमा । पंचिंदिया जहा सइंदिया । अणिंदियाणं भंते ! जीवा किं णाणी, किं अण्णाणी ?, जहा सिद्धा ॥

(सइंदिएत्यादि) सेन्द्रिया इन्द्रियोपयोगवन्तः, ते च ज्ञानिनः, अज्ञानिनश्च । तत्र ज्ञानिनां चत्वार्यादि ज्ञानानि भजनया, स्याद् द्वे, स्यात् त्रीणि, स्यात् चत्वारि । केवलज्ञानं तु नास्ति, तेषामतीन्द्रियज्ञानत्वात्, तस्य द्वयादिभावश्च ज्ञानानां लब्ध्यपेक्षया, उपयोगापेक्षया तु सर्वेषामेकदैकमेव ज्ञानम् । अज्ञानिनां तु त्रीण्यज्ञानानि भजनयैव, स्याद् द्वे, स्यात् त्रीणीति । (जहा पुढविकाइय त्ति) एकेन्द्रिया मिथ्यादृष्टित्वादज्ञानिनः, ते च द्वयज्ञाना एवेत्यर्थः । (बेइंदियेत्यादि) एषां द्वे ज्ञाने सासादनस्तेषूत्पद्यत इति कृत्वा सासादनश्चोत्कृष्टतः षडावलिकामानः, अतो द्वे ज्ञाने तेषु लभ्येते इति । (अणिंदिय त्ति) केवलिनः ।

(२८) कायद्वारे-

सकाइयाणं भंते ! जीवा किं णाणी, अण्णाणी ?। गोयमा ! पंच नाणाइं, तिण्णि अण्णाणाइं भयणाए । पुढविकाइया० जाव वणस्सइकाइया, नो नाणी, अण्णाणी, नियमा दुअण्णाणी । तं जहा-मइअण्णाणी य, सुयअण्णाणी य । तसकाइया जहा सकाइया । अकाइयाणं भंते ! जीवा किं णाणी, किं अण्णाणी ?, जहा सिद्धा ॥

(सकाइयाणमित्यादि) सह कायेनौदारिकाऽऽदिना शरीरेण पृथिव्यादिषट्कायान्यतरेण वा कायेन ये ते सकायास्त एव सकायिकाः, ते च केवलिनोऽपि स्युरिति सकायिकानां सम्यग्दृशां पञ्च ज्ञानानि, मिथ्यादृशां तु त्रीण्यज्ञानानि भजनया स्युरिति । (अकाइयाणं ति) नास्ति काय उक्तलक्षणो येषां तेऽकायाः, त एवाकायिकाः सिद्धाः ।

(२९) सूक्ष्मद्वारे-

सुहुमाणं भंते ! जीवा किं णाणी, किं अण्णाणी ?, जहा पुढविकाइया । बादराणं भंते ! जीवा किं णाणी, किं अण्णाणी ?, जहा सकाइया । नो सुहुमा नो बादरा णं भंते ! जीवा ?, जहा सिद्धा ॥

(जहा पुढविकाइय त्ति) द्वयज्ञानिनः सूक्ष्माः, मिथ्यादृष्टित्वादित्यर्थः । (जहा सकाइय त्ति) बादराः केवलिनोऽपि भवन्तीति कृत्वा ते सकायिकवद्भजनया पञ्च ज्ञानिनश्च त्र्यज्ञानिनश्च वाच्या इति ।

(३०) पर्याप्तकद्वारे-

पज्जत्ताणं भंते ! जीवा किं णाणी, किं अण्णाणी ?। जहा सकाइया । पज्जत्ता णं भंते ! नेरइया किं णाणी, किं अण्णाणी ?। तिण्णि नाणा, तिण्णि य अण्णाणा नियमा जहा नेरइया, एवं० जाव थणियकुमारा । पुढविकाइया जहा एगिंदिया, एवं० जाव चउरिंदिया । पज्जत्ताणं भंते ! पंचिंदियतिरिक्खजोणिया किं णाणी, किं अण्णाणी ?। तिण्णि णाणा, तिण्णि अण्णाणा भयणाए, मणुस्सा जहा सकाइया वाणमंतरजोइसियवेमाणिया जहा नेरइया । अपज्जत्ताणं भंते ! जीवा किं णाणी, किं अण्णाणी ?। तिण्णि णाणा, तिण्णि अण्णाणा भयणाए । अपज्जत्ता णं भंते ! नेरइया किं णाणी, किं अण्णाणी ?। तिण्णि णाणा नियमा, तिण्णि अण्णाणा भयणाए, एवं० जाव थणियकुमारा, पुढविकाइया० जाव वणस्सइकाइया, जहा एगिंदिया । बेइंदियाणं पुच्छा ?। दो णाणा, दो अण्णाणा नियमा, एवं० जाव पंचिंदियतिरिक्खजोणियाणं अपज्जत्तगाणं भंते ! मणुस्सा किं णाणी, किं अण्णाणी ?। तिण्णि नाणाइं भयणाए, दो अण्णाणाइं नियमा । वाणमंतरा जहा नेरइया अपज्जत्तगा, जोइसियवेमाणियाणं तिण्णि नाणा, तिण्णि अण्णाणा नियमा । नो पज्जत्तगा, नो अपज्जत्तगा णं भंते ! जीवा किं णाणी, किं अण्णाणी ?, जहा सिद्धा ॥

(जहा सकाइय त्ति) पर्याप्तकाः केवलिनोऽपि स्युरिति ते सकायिकवत्पूर्वोक्तप्रकारेण वाच्याः, पर्याप्तकद्वार एव चतुर्विंशतिदण्डके पर्याप्तकनारकाणां (तिन्नि य अण्णाणा णियम त्ति) अपर्याप्तकानामेवासंज्ञिनारकाणां विभङ्गाभाव इति पर्याप्तकावस्थायां तेषामज्ञानत्रयमेवेति । (एवं० जाव चउरिंदिय त्ति) द्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियाः पर्याप्तकाः, द्व्यज्ञानिन एवेत्यर्थः । (पज्जत्ता णं भंते ! पंचिंदियतिरिक्खेत्यादि) पर्याप्तकपञ्चेन्द्रियतिरश्चामवधिर्विभङ्गो वा केषाञ्चित् स्यात्, केषाञ्चित्पुनर्नेति त्रीणि ज्ञानानि, अज्ञानानि वा द्वे वा ज्ञाने अज्ञाने वा तेषां स्यातामिति । (बेइंदियाणं दो णाणेत्यादि) अपर्याप्तकद्वीन्द्रियाऽऽदीनां केषाञ्चित्सासादनसम्यग्दर्शनस्य सद्भावाद् द्वे ज्ञाने, केषाञ्चित् पुनः तस्यासद्भावाद् द्वे एवाज्ञाने, अपर्याप्तकमनुष्याणां पुनः सम्यग्दृशामवधिभावे त्रीणि ज्ञानानि, यथा तीर्थंकराणां, तदभावे तु द्वे ज्ञाने, मिथ्यादृशां तु द्वे एवाज्ञाने, विभङ्गस्यापर्याप्तकत्वे तेषामभावात् । अत एवोक्तम्-(तिन्नि नाणाइं भयणाए, दो अण्णाणाइं नियम त्ति) (वाणमंतरेत्यादि) व्यन्तरा अपर्याप्तका नारका इव त्रिज्ञाना द्व्यज्ञानास्त्र्यज्ञाना वा वाच्याः । तेष्वप्यसंज्ञिन्य उत्पद्यमानानामपर्याप्तकानां विभङ्गाभावात्, शेषाणां चावधेर्विभङ्गस्य वा लाभात् । (जोइसियेत्यादि) एतेषु हि संज्ञिन्य एवोत्पद्यन्ते,

तेषां चापर्याप्तकत्वेऽपि भवप्रत्ययस्यावधेर्विभङ्गस्य चावश्य भावात्, त्रीणि ज्ञानान्यज्ञानानि वा स्युरिति । (नोपज्जत्तगनोअपज्जत्तग त्ति) सिद्धः ।

(३१) भवस्थद्वारे—

निरयभवत्थाणं भंते ! जीवा किं णाणी, अण्णाणी ?, जहा निरयगइया । तिरियभवत्थाणं भंते ! जीवा किं णाणी, अण्णाणी ?। तिण्णि णाणा, तिण्णि अण्णाणा भयणाए, मणुस्सभवत्था जहा सकाइया । देवभवत्थाणं भंते ! जहा निरयभवत्था, अभवत्था ?, जहा सिद्धा ॥

(निरयभवत्थाणमित्यादि) निरयभवे तिष्ठन्तीति निरयभवस्थाः प्राप्तोत्पत्तिस्थानाः, ते च यथा निरयगतिकाः त्रिज्ञानाः, द्व्यज्ञानास्त्र्यज्ञानाश्चोक्ताः, तथा वाच्या इति ।

(३२) भव्यद्वारे-

भवसिद्धिया णं भंते ! जीवा किं णाणी, अण्णाणी ?, जहा सकाइया । अभवसिद्धियाणं पुच्छा ? । गोयमा ! नो णाणी, अण्णाणी, तिण्णि अण्णाणाइं भयणाए, नो भवसिद्धिया, नो अभवसिद्धियाणं जीवा जहा सिद्धा ।

भवसिद्धिकाः केवलिनोऽपीति ते सकायिकवद् भजनया पञ्चज्ञानाः, तथा यावत्सम्यक्त्वं न प्रतिपन्नास्तावद्भजनयैव त्र्यज्ञानाश्च वाच्या इति । अभवसिद्धिकानां त्वज्ञानत्रयं भजनया स्यात्, सदा मिथ्यादृष्टित्वात् तेषाम् । अत उक्तम्-"नो णाणी, अण्णाणी" इत्यादीति ।

(३३) संज्ञिद्वारे-

सण्णीणं पुच्छा ? । जहा सइंदिया, असण्णी जहा बेइंदिया, नो सण्णी, नो असण्णी, जहा सिद्धा ।

ज्ञानानि चत्वारि भजनया, अज्ञानानि च त्रीणि तथैवेत्यर्थः । (असण्णी जहा बेइंदिय त्ति) अपर्याप्तकावस्थायां ज्ञानद्वयमपि सासादनतया स्यात्, पर्याप्तकावस्थायां त्वज्ञानद्वयमेवेत्यर्थः । भ० ८ श० २ उ० । (लब्धिभेदा 'लद्धि' शब्दे दर्शयिष्यन्ते)

(३४) लब्धिद्वारे-

णाणलद्धियाणं भंते ! जीवा किं णाणी, अण्णाणी ? । गोयमा ! णाणी, नो अण्णाणी, अत्थेगइया दुणाणी, एवं पंच णाणाइं भयणाए । तस्स अलद्धियाणं भंते ! जीवा किं णाणी, अण्णाणी ? । गोयमा ! णो णाणी, अण्णाणी, अत्थेगइया दुअण्णाणी, तिण्णि अण्णाणाइं भयणाए । आभिणिबोहियणाणलद्धियाणं भंते ! जीवा किं णाणी, अण्णाणी ? । गोयमा ! णाणी, णो अण्णाणी, अत्थेगइया दुणाणी, चत्तारि णाणाइं भयणाए । तस्स अलद्धियाणं भंते ! जीवा किं णाणी, अण्णाणी ?। गोयमा ! णाणी वि, अण्णाणी वि । जे णाणी, ते नियमा एगणाणी, केवलणाणी । जे अण्णाणी, ते अत्थेगइया दुअण्णाणी, तिण्णि अण्णाणाइं भयणाए । एवं सुयणाणलद्धिया वि । तस्स अलद्धिया वि जहा आभिणिबोहियणाणस्स लद्धिया । ओहिणाणलद्धियाणं पुच्छा ? । गोयमा ! णाणी, णो अण्णाणी, अत्थेगइया तिण्णाणी, अत्थेगइया चउणाणी, जे तिण्णाणी, ते आभिणिबोहियणाणी, सुयणाणी, ओहिणाणी । जे चउणाणी, ते आभिणिबोहियणाणी, सुयणाणी, ओहिणाणी, मणपज्जवणाणी । तस्स अलद्धियाणं पुच्छा ? । गोयमा ! णाणी वि, अण्णाणी वि, ओहिणाणवज्जाइं चत्तारि णाणाइं, तिण्णि अण्णाणाइं भयणाए । मणपज्जवणाणलद्धियाणं पुच्छा ? । गोयमा ! णाणी, णो अण्णाणी, अत्थेगइया तिण्णाणी, अत्थेगइया चउणाणी । जे तिण्णाणी, ते आभिणिबोहियणाणी, सुयणाणी, मणपज्जवणाणी । जे चउणाणी, ते आभिणिबोहियणाणी, सुयणाणी, ओहिणाणी, मणपज्जवणाणी । तस्स अलद्धियाणं पुच्छा ? । गोयमा ! णाणी वि, अण्णाणी वि । मणपज्जवणाणवज्जाइं चत्तारि णाणाइं, तिण्णि अण्णाणाइं भयणाए । केवलणाणलद्धियाणं भंते ! जीवा किं णाणी, अण्णाणी ? । गोयमा ! णाणी, णो अण्णाणी नियमा एगणाणी, केवलणाणी । तस्स अलद्धियाणं पुच्छा ? । गोयमा ! णाणी वि, अण्णाणी वि, केवलणाणवज्जाइं चत्तारि णाणाइं, तिण्णि अण्णाणाइं भयणाए । अण्णाणलद्धियाणं भंते ! पुच्छा ? । गोयमा ! नो णाणी, अण्णाणी, तिण्णि अण्णाणाइं भयणाए । तस्स अलद्धियाणं भंते ! ?। गोयमा ! णाणी, नो अण्णाणी, पंच नाणाइं भयणाए, जहा अण्णाणस्स लद्धिया अलद्धिया भणिया, एवं मइअण्णाणस्स, सुयअण्णाणस्स य लद्धिया अलद्धिया य जाणियव्वा । विभंगणाणलद्धियाणं तिण्णि अण्णाणाइं नियमा । तस्स अलद्धियाणं पंच णाणाइं भयणाए, दो अण्णाणाइं नियमा । दंसणलद्धियाणं भंते ! जीवा किं णाणी, अण्णाणी ? । गोयमा ! णाणी वि, अण्णाणी वि, पंच णाणाइं, तिण्णि अण्णाणाइं भयणाए । तस्स अलद्धियाणं भंते ! जीवा किं णाणी, अण्णाणी ?। गोयमा ! तस्स अलद्धिया नत्थि । सम्मद्दंसणलद्धियाणं पंच नाणाइं भयणाए । तस्स अलद्धियाणं तिण्णि अण्णाणाइं भयणाए । मिच्छादंसणलद्धियाणं भंते ! पुच्छा ? । गोयमा ! नो णाणी, अण्णाणी, तिण्णि अण्णाणाइं भयणाए । तस्स अलद्धियाणं भंते ! किं णाणी, अण्णाणी ?। गोयमा ! णाणी वि, अण्णाणी वि । पंच नाणाइं, तिण्णि अण्णाणाइं भयणाए । सम्मामिच्छादंसणलद्धिया अलद्धिया य जहा मिच्छादंसणलद्धिया अलद्धिया य तहेव भाणियव्वा ।

(तस्स अलद्धियाणं ति) तस्य ज्ञानस्य अलब्धिका अलब्धिमन्तो, ज्ञानलब्धिरहिता इत्यर्थः। (आभिणिबोहियणाणेत्यादि) आभिनिबोधिकज्ञानलब्धिकानां चत्वारि ज्ञानानि भजनया, केवलिनो नास्त्याभिनिबोधिकज्ञानमिति। मतिज्ञानस्यालब्धिकास्तु ये ज्ञानिनस्ते केवलिनः, ते चैकज्ञानिन एव; ये त्वज्ञानिनस्तेऽज्ञानद्वयवन्तोऽज्ञानत्रयवन्तो वा; एवं श्रुतेऽपि। (ओहिणाणलद्धीत्यादि) अवधिज्ञानलब्धिकाः त्रिज्ञानाः, केवलमनःपर्यायसद्भावे चतुर्ज्ञाना वा; केवलाभावात्, अवधिज्ञानस्यालब्धिकास्तु ये ज्ञानिनस्ते द्विज्ञाना मतिश्रुतज्ञानवात्, त्रिज्ञाना वा मतिश्रुतमनःपर्यायज्ञानवात्, एकज्ञाना वा केवलभावात्। ये त्वज्ञानिनस्ते द्व्यज्ञाना मत्यज्ञानश्रुताज्ञानभावात्, त्र्यज्ञाना वा त्रयस्यापि भावात्। (मणपज्जवेत्यादि) मनःपर्यवज्ञानलब्धिकास्त्रिज्ञानाः, अवधिकेवलाभावात्, चतुर्ज्ञाना वा केवलस्यैवाभावात्। मनःपर्यवज्ञानस्यालब्धिकास्तु ये ज्ञानिनस्ते द्विज्ञानाः, आद्यज्ञानद्वयभावात्, त्रिज्ञाना वा आद्यत्रयभावात्, एकज्ञाना वा केवलस्यैव भावात्, ये त्वज्ञानिनस्ते द्व्यज्ञाना आद्याज्ञानद्वयभावात्, त्र्यज्ञाना वा अज्ञानत्रयस्यापि भावात्। (केवलनाणेत्यादि) केवलज्ञानलब्धिकाः एकज्ञानिनः, ते च केवलज्ञानिन एव, केवलज्ञानस्यालब्धिकास्तु ये ज्ञानिनस्तेषामाद्यज्ञानद्वयं तत्त्रयं मतिश्रुतमनःपर्यायज्ञानानि वा केवलज्ञानवर्जानि चत्वारि वा ज्ञानानि भजन्ते। ये त्वज्ञानिनस्तेषामाद्यमज्ञानद्वयं, तत्त्रयं वा भवतीत्येवं भजनाऽप्यसेयेति। (अन्नाणलद्धियाणमित्यादि) अज्ञानलब्धिका अज्ञानिनस्तेषां च त्रीण्यज्ञानानि भजनया, द्वे अज्ञाने, त्रीणि वा अज्ञानानीत्यर्थः। अज्ञानालब्धिकास्तु ज्ञानिनस्तेषां च पञ्च ज्ञानानि भजनया पूर्वोपदर्शितया वाच्यानि। (जहा अन्नाणेत्यादि) अज्ञानलब्धिकानां त्रीणि अज्ञानानि भजनयोक्तानि, मत्यज्ञानश्रुताज्ञानलब्धिकानामपि तानि तथैव। तथा अज्ञानालब्धिकानां पञ्च ज्ञानानि भजनयोक्तानि, मत्यज्ञानश्रुताज्ञानलब्धिकानामपि पञ्च ज्ञानानि भजनयैव वाच्यानीति। (विभंगेत्यादि) विभङ्गज्ञानलब्धिकानां तु त्रीण्यज्ञानानि नियमात्, तल्लब्धिकानां ज्ञानिनां पञ्च ज्ञानानि भजनया, अज्ञानिनां च द्वे अज्ञाने नियमादिति। (दंसणलद्धीत्यादि) दर्शनलब्धिकाः श्रद्धानमात्रलब्धिका इत्यर्थः, ते च सम्यक् श्रद्धानवन्तो ज्ञानिनः, सदितरे त्वज्ञानिनः, तत्र ज्ञानिनां पञ्च ज्ञानानि भजनया, अज्ञानिनां तु त्रीण्यज्ञानानि भजनयैवेति। (तस्स अलद्धियाणमित्यादि) तस्य दर्शनस्य येषामलब्धिः, ते न सम्यग्दृशः, सर्वजीवानां रुचिमात्रस्याप्यस्तित्वादिति। (सम्मद्दंसणलद्धियाणं ति) सम्यग्दृष्टीनाम्। (तस्स अलद्धियाणमित्यादि) तस्यालब्धिकानां सम्यग्दर्शनस्यालब्धिमतां मिथ्यादृष्टीनां मिश्रदृष्टीनां च त्रीण्यज्ञानानि भजनया, यतो मिश्रदृष्टीनामप्यज्ञानमेव तात्त्विकसद्बोधाहेतुत्वाद् मिश्रस्येति। (मिच्छादंसणलद्धियाण ति) मिथ्यादृष्टीनाम्। (तस्स अलद्धियाणमित्यादि) तस्यालब्धिकानां मिथ्यादर्शनस्यालब्धिमतां सम्यग्दृष्टीनां मिश्रदृष्टीनां च क्रमेण पञ्च ज्ञानानि, त्रीण्यज्ञानानि च भजनयेति। भ० ८ श० २ उ०। (निर्ग्रन्थानां 'णिग्गंथ' शब्दे तथा संयतानां 'संजय' शब्दे वक्तव्यता)

चरित्तलद्धियाणं भंते! जीवा किंणाणी, अण्णाणी?। गोयमा! पंच नाणाइं भयणाए, तस्स अलद्धियाणं मणपज्जवणाणवज्जाइं चत्तारि नाणाइं, तिण्णि अण्णाणाइं भयणाए। सामाइयचरित्तलद्धियाणं भंते! जीवा किं णाणी, अण्णाणी?। गोयमा! चत्तारि णाणाइं भयणाए, तस्स अलद्धियाणं पंच नाणाइं, तिण्णि य अण्णाणाइं भयणाए। एवं जहा सामाइयचरित्तलद्धिया अलद्धिया य भणिया एवं० जाव अहक्खायचरित्तलद्धिया अलद्धिया य भाणियव्वा, नवरं अहक्खायचरित्तलद्धियाणं पंच नाणाइं भयणाए। चरित्ताचरित्तलद्धियाणं भंते! जीवा किं णाणी, अण्णाणी?। गोयमा! नाणी, नो अण्णाणी, अत्थेगइया दुनाणी, अत्थेगइया तिण्णाणी, जे दुनाणी, ते आभिणिबोहियणाणी, सुयणाणी य। जे तिण्णाणी, ते आभिणिबोहियणाणी य, सुयणाणी य, ओहिणाणी य। तस्स अलद्धियाणं पंच नाणाइं, तिण्णि अण्णाणाइं भयणाए।

(चरित्तलद्धियाणमित्यादि) चरित्रलब्धिका ज्ञानिन एव, तेषां च पञ्च ज्ञानानि भजनया, यतः केवल्यपि चारित्री, चरित्रलब्धिकास्तु ये ज्ञानिनस्तेषां मनःपर्यववर्जानि चत्वारि ज्ञानानि भजनया भवन्ति, क्षयसंयतत्वे आद्यं ज्ञानद्वयं, तत्त्रयं वा; सिद्धत्वे च केवलज्ञानं, द्विज्ञानादपि चरित्रलब्धिशून्यत्वात्, यतस्ते नो चरित्रिणो नोऽचरित्रिण इति। ये त्वज्ञानिनस्तेषां त्रीण्यज्ञानानि भजनया। (सामाइयेत्यादि) सामायिकचरित्रलब्धिका ज्ञानिन एव, तेषां च केवलज्ञानवर्जानि चत्वारि ज्ञानानि भजनया, सामायिकछेदोपस्थापनीयलब्धिकास्तु ये ज्ञानिनः तेषां पञ्च ज्ञानानि भजनया छेदोपस्थापनीयाऽऽदिभावेन, सिद्धभावेन वा; ये त्वज्ञानिनः तेषां त्रीण्यज्ञानानि भजनया, एवं छेदोपस्थापनीयाऽऽदिष्वपि वाच्यम्। एतदेवाऽऽह-(एवमित्यादि) तत्र छेदोपस्थापनीयाऽऽदिचरित्रत्रयलब्धयो ज्ञानिन एव, तेषां चाऽऽद्यानि चत्वारि ज्ञानानि भजनया, तल्लब्धयो यथाख्यातचरित्रालब्धयश्च ये ज्ञानिनः, तेषां पञ्च ज्ञानानि भजनया, ये त्वज्ञानिनस्तेषामज्ञानत्रयं भजनयैव, यथाऽऽख्यातचरित्रलब्धिकानां तु विशेषोऽस्ति, अतः तद्दर्शनायाऽऽह-(नवरमहक्खायेत्यादि) सामायिकाऽऽदिचारित्रचतुष्टयलब्धिमतां ह्यस्थत्वेन चत्वार्येव ज्ञानानि भजनया, यथाख्यातचरित्रलब्धिमतां छद्मस्थेतरभावेन पञ्चापि भजनया भवन्तीति तेषां तथैव तानि उक्तानीति। "चरित्ताचरित्त" इत्यादौ (तस्स अलद्धियाणं ति) चरित्राचरित्रस्यालब्धिकाः श्रावकादन्ये ते च ये ज्ञानिनस्तेषां पञ्च ज्ञानानि भजनया, ये त्वज्ञानिनस्तेषां त्रीण्यज्ञानानि भजनयैव।

दाणलद्धियाणं पंच नाणाइं, तिण्णि अण्णाणाइं भयणाए। तस्स अलद्धियाणं पुच्छा?। गोयमा! नाणी, नो अन्नाणी, णियमा एगनाणी केवलनाणी। एवं० जाव वीरियलद्धिया, अलद्धिया जाणियव्वा। बालवीरियलद्धियाणं तिण्णि नाणाइं, तिण्णि अन्नाणाइं भयणाए। तस्स अलद्धियाणं पंच नाणाइं भयणाए। पंडियवीरियलद्धियाणं

पंच नाणाइं भयणाए । तस्स अलद्धियाणं मणपज्जवनाणवज्जाइं नाणाइं अण्णाणाइं तिण्णि य भयणाए । बालपंडियवीरियलद्धियाणं तिण्णि नाणाइं भयणाए । तस्स अलद्धियाणं पंच णाणाइं तिण्णि अण्णाणाइं भयणाए ।

(दाणलद्धियाणमित्यादि) दानान्तरायक्षयक्षयोपशमाद्दाने दातव्ये लब्धिर्येषां ते दानलब्धयः, ते च ज्ञानिनोऽज्ञानिनश्च । तत्र ये ज्ञानिनः तेषां पञ्च ज्ञानानि भजनया, केवलज्ञानिनामपि दानलब्धियुक्तत्वात् । ये तु अज्ञानिनः तेषां त्रीणि अज्ञानानि भजनयैव, दानस्यालब्धिकास्तु सिद्धाः, ते च दानान्तरायक्षयेऽपि दातव्याभावात् संप्रदानासत्त्वात् दानप्रयोजनाभावाच्च दानालब्धय उक्ताः, ते च नियमात् केवलज्ञानिन इति, लाभभोगोपभोगवीर्यलब्धिः सेतरा । अतिदिशन्नाह-(एवमित्यादि) इह बालब्धयः सिद्धानामेवोक्तन्यायादवसेयाः । ननु दानाऽऽद्यन्तरायक्षयात्केवलिनां दानाऽऽदयः सर्वप्रकारेण कस्मान्न भवन्तीति ?, उच्यते-प्रयोजनाभावात्, कृतकृत्या हि ते भगवन्त इति । (बालवीरियलद्धियाणमित्यादि) बालवीर्यलब्धयोऽसंयताः, तेषां च ज्ञानिनां त्रीणि ज्ञानानि, अज्ञानिनां च त्रीण्यज्ञानानि भजनया भवन्ति, तदलब्धिकास्तु संयताः, संयतासंयताश्च, ते च ज्ञानिन एव; तेषां च पञ्च ज्ञानानि भजनया । " पंडियवीरिय " इत्यादौ (तस्स अलद्धियाणं ति) असंयतानां संयतासंयतानां सिद्धानां चेत्यर्थः,तत्रासंयतानामाद्यज्ञानत्रयमज्ञानत्रयं च भजनया, संयतासंयतानां तु ज्ञानत्रयं भजनयैव भवति, सिद्धानां तु केवलज्ञानमेव, मनःपर्यायज्ञानं तु परिणतवीर्यलब्धिवतामेवेति, नान्येषाम् । अत उक्तम्-(मणपज्जवेत्यादि) सिद्धानां च परिणतवीर्यालब्धिकत्वं परिणतवीर्यवाच्ये प्रत्युपेक्षणाऽऽद्यनुष्ठाने प्रवृत्त्यभावात् । " बालपंडिय " इत्यादौ (तस्स अलद्धियाणं ति) अश्रावकाणामित्यर्थः ।

इंदियलद्धियाणं भंते ! जीवा किं णाणी, अण्णाणी ? । गोयमा ! चत्तारि नाणाइं, तिण्णि य अन्नाणाइं भयणाए । तस्स अलद्धियाणं पुच्छा ?। गोयमा ! नाणी नो अण्णाणी नियमा एगनाणी केवलनाणी । सोइंदियलद्धियाणं जहा इंदियलद्धिया, तस्स अलद्धियाणं पुच्छा ?। गोयमा ! नाणी वि, अन्नाणी वि । जे नाणी, ते अत्थेगइया दुनाणी, अत्थेगइया एगनाणी । जे दुनाणी,ते आभिणिबोहियनाणी, सुयनाणी । जे एगनाणी,ते केवलनाणी,जे अन्नाणी,ते नियमा दुअन्नाणी । तं जहा-मतिअण्णाणी,सुयअण्णाणी । चक्खिंदियघाणिंदियलद्धियाणं अलद्धियाण य जहेव सोइंदियलद्धिया अलद्धिया । जिब्भिंदियलद्धियाणं चत्तारि नाणाइं, तिण्णि अन्नाणाइं भयणाए । तस्स अलद्धियाणं पुच्छा ?। गोयमा ! नाणी वि, अन्नाणी वि । जे नाणी, ते नियमा एगनाणी केवलनाणी, जे अन्नाणी, ते णियमा दुअण्णाणी । तं जहा-मइअन्नाणी य, सुयअन्नाणी य । फासिंदियलद्धिया य, अलद्धिया य जहा इंदियलद्धिया अलद्धिया य ।

(इंदियलद्धियाणमित्यादि) इन्द्रियलब्धिका ये ज्ञानिनः, तेषां चत्वारि ज्ञानानि भजनया, केवलं तु नास्ति, तेषां केवलिनामिन्द्रियोपयोगाभावात् । ये त्वज्ञानिनः, तेषामज्ञानत्रयं भजनयैवेति । इन्द्रियालब्धिकाः पुनः केवलिन एवेत्येकेषाम् तेषां ज्ञानमिति । (सोइंदिय इत्यादि) श्रोत्रेन्द्रियलब्धय इन्द्रियलब्धिका इव वाच्याः, ते च ये ज्ञानिनः, ते अकेवलित्वादाद्यज्ञानचतुष्टयवन्तो भजनया भवन्ति, अज्ञानिनस्तु भजनया त्र्यज्ञानाः, श्रोत्रेन्द्रियालब्धिकास्तु ये ज्ञानिनः ते आद्यद्विज्ञानिनः, ते च अपर्याप्तकाः सासादनसम्यग्दर्शनिनो विकलेन्द्रिया एकज्ञानिनो वा केवलज्ञानिनः,ते हि श्रोत्रेन्द्रियालब्धिका इन्द्रियोपयोगाभावात्, ये त्वज्ञानिनः ते पुनराद्याज्ञानद्वयवन्त इति । (चक्खिंदिय इत्यादि) अयमर्थः-यथा श्रोत्रेन्द्रियलब्धिमतां चत्वारि ज्ञानानि भजनया, त्रीणि चाज्ञानानि भजनयैव, तद्लब्धिकानां च द्वे ज्ञाने, द्वे चाज्ञाने, एकं च ज्ञानमुक्तम् । एवं चक्षुरिन्द्रियलब्धिकानां घ्राणेन्द्रियलब्धिकानां तद्लब्धिकानां च वाच्यम्, तत्र चक्षुरिन्द्रियलब्धिका घ्राणेन्द्रियलब्धिकाश्च ये पञ्चेन्द्रियाः, तेषां केवलवर्जानि चत्वारि ज्ञानानि, त्रीणि चाज्ञानानि भजनया, ये तु विकलेन्द्रियाः चक्षुरिन्द्रियघ्राणेन्द्रियलब्धिकाः, तेषां सासादनसम्यग्दर्शनभावे आद्यं ज्ञानद्वयं, तदभावे त्वाद्यमेवाज्ञानद्वयम्, चक्षुरिन्द्रियघ्राणेन्द्रियालब्धिकास्तु यथायोगं त्रिद्व्येकेन्द्रियाः केवलिनश्च, तत्र त्रिद्वीन्द्रियाऽऽदीनां सासादनभावे आद्यज्ञानद्वयसंभवः, तदभावे त्वाद्याज्ञानद्वयसंभवः, केवलिनां त्वेकं केवलज्ञानमिति । " जिब्भिंदिय " इत्यादौ (तस्स अलद्धिय त्ति) जिह्वालब्धिवर्जिताः, ते च केवलिन एकेन्द्रियाश्चेत्यत आह—(नाणी वीत्यादि) ये ज्ञानिनस्ते नियमात् केवलज्ञानिनः, येऽज्ञानिनस्ते नियमाद् द्व्यज्ञानिनः, एकेन्द्रियाणां सासादनभावतोऽपि सम्यग्दर्शनस्याभावात्, विभङ्गाभावाच्चेति । (फासिंदिय इत्यादि) स्पर्शनेन्द्रियलब्धिकाः केवलज्ञानवर्जज्ञानचतुष्कवन्तो भजनया, तथैवाज्ञानत्रयवन्तो वा; स्पर्शनेन्द्रियालब्धिकास्तु केवलिन एव । इन्द्रियलब्ध्यलब्धिमन्तोऽप्येवंविधा एवेत्यत उक्तम्-(जहा इंदिय इत्यादि)

(३५) उपयोगद्वारे-

सागारोवउत्ताणं भंते ! जीवा किं णाणी, अण्णाणी ? । पंच णाणाइं, तिण्णि अण्णाणाइं भयणाए । आभिणिबोहियणाणसागारोवउत्ताणं भंते ! चत्तारि णाणाइं भयणाए । एवं सुयणाणसागारोवउत्ता वि । ओहिणाणसागारोवउत्ता जहा ओहिणाणलद्धिया । मणपज्जवणाणसागारोवउत्ता जहा मणपज्जवणाणलद्धिया । केवलणाणसागारोवउत्ता जहा केवलणाणलद्धिया । मइअण्णाणसागारोवउत्ताणं तिण्णि अण्णाणाइं भयणाए । एवं सुयअण्णाणसागारोवउत्ता वि । विभंगणाणसागारोवउत्ताणं तिण्णि अण्णाणाइं नियमा । अणागारोवउत्ताणं भंते ! जीवा किं णाणी, अण्णाणी ? । पंच नाणाइं, तिण्णि अण्णाणाइं भयणाए । एवं चक्खुदंसणअचक्खुदंसणअणागारोवउत्ता वि, नवरं चत्तारि नाणाइं, तिण्णि अण्णाणाइं भयणाए । ओहिदंसणअणागारोवउत्ताणं पुच्छा ?।

गोयमा ! नाणी वि,अन्नाणी वि,जे नाणी, ते अत्थेगइया तिनाणी, अत्थेगइया चउनाणी, जे तिनाणी, ते आभिनिबोहियनाणी, सुयनाणी, ओहिनाणी । जे चउनाणी, ते आभिनिबोहियनाणी० जाव मणपज्जवनाणी । जे अन्नाणी, ते नियमा तिअन्नाणी । तं जहा-मइअन्नाणी, सुयअन्नाणी, विभंगनाणी । केवलदंसणअणागारोवउत्ता जहा केवलनाणलद्धिया ॥

(सागारोवउत्ता इत्यादि) आकारो विशेषः, तेन सह यो बोधः स साकारो, विशेषग्राहको बोध इत्यर्थः । तस्मिन्नुपयुक्ताः तत्संवेदका ये ते साकारोपयुक्ताः, ते च ज्ञानिनोऽज्ञानिनश्च, तत्र ज्ञानिनां पञ्च ज्ञानानि भजनया, स्यात् द्वे, स्यात् त्रीणि, स्यात् चत्वारि, स्यादेकं, यच्च स्यात् द्वे इत्युच्यते, तल्लब्धिमात्रमङ्गीकृत्य, उपयोगापेक्षया त्वेकैकमेव ज्ञानमज्ञानं चेति, अज्ञानिनां तु त्रीण्यज्ञानानि भजनयैवेति । अथ साकारोपयोगभेदापेक्षमाह-(आभिणी इत्यादि) (ओहिनाणसागारेत्यादि) अवधिज्ञानसाकारोपयुक्ता यथा अवधिज्ञानलब्धिकाः प्रागुक्ताः, स्यात् त्रिज्ञानिनो मतिश्रुतावधियोगात्, स्याच्चतुर्ज्ञानिनो मतिश्रुतावधिमनःपर्ययोगात् तथा वाच्याः । (मणपज्जव इत्यादि) मनःपर्यवज्ञानसाकारोपयुक्ता यथा मनःपर्यवज्ञानलब्धिकाः प्रागुक्ताः, स्यात् त्रिज्ञानिनो मतिश्रुतमनःपर्ययोगात्, स्याच्चतुर्ज्ञानिनः केवलवर्जज्ञानयोगात् तथा वाच्या इति । (अणागारोवउत्ताणमित्यादि) अविद्यमान आकारो यत्र तदनाकारं दर्शनं, तत्रोपयुक्ताः तत्संवेदका ये ते तथा, ते च ज्ञानिनोऽज्ञानिनश्च, तत्र ज्ञानिनां लब्ध्यपेक्षया पञ्च ज्ञानानि भजनया, अज्ञानिनां तु त्रीण्यज्ञानानि भजनयैव । (एवमित्यादि) यथा अनाकारोपयुक्ता ज्ञानिनोऽज्ञानिनश्चोक्ताः, एवं चक्षुर्दर्शनाऽऽद्युपयुक्ता अपि (नवरं ति) विशेषः पुनरयम्-चक्षुर्दर्शनेतरोपयुक्ताः केवलिनो न भवन्तीति तेषां चत्वारि ज्ञानानि भजनयेति ।

(३६) योगद्वारे-

सजोगीणं भंते ! जीवा किं नाणी, अन्नाणी ? । जहा सकाइया । एवं मणजोगी, वयजोगी वि, कायजोगी वि, अजोगी जहा सिद्धा ।

(सजोगीणमित्यादि) (जहा सकाइय त्ति) प्रागुक्ते कायद्वारे यथा सकायिका भजनया पञ्च ज्ञानाः व्यज्ञानाश्चोक्ताः, तथा सयोगा अपि वाच्याः । एवं मनोयोगाऽऽद्योऽपि, केवलिनोऽपि, मनोयोगाऽऽदीनां भावात् । तथा मिथ्यादृशां मनोयोगाऽऽदिमतामज्ञानत्रयभावाच्च । (अजोगी जहा सिद्ध त्ति) अयोगिनः केवलज्ञानैकज्ञानिन इत्यर्थः ।

(३७) लेश्याद्वारे-

सलेस्साणं भंते !?, जहा सकाइया । किण्हलेस्साणं भंते !?, जहा सकाइया सइंदिया । एवं० जाव पम्हलेस्सा, सुक्कलेस्सा, जहा सलेस्सा । अलेस्सा ?, जहा सिद्धा ।

(जहा सकाइय त्ति) सलेश्याः सकायिकवद्भजनया पञ्च ज्ञानाः, व्यज्ञानाश्च वाच्याः, केवलिनोऽपि शुक्ललेश्यासम्भवेन सलेश्यत्वात् । (किण्हलेस्सेत्यादौ) (जहा सइंदिय त्ति) कृष्णलेश्याश्चतुर्ज्ञानिनः व्यज्ञानिनश्च भजनयेत्यर्थः । (सुक्कलेस्सा जहा सलेस्स त्ति) पञ्च ज्ञानिनो भजनया व्यज्ञानिनश्चेत्यर्थः । (अलेस्सा जहा सिद्ध त्ति) एकज्ञानिन इत्यर्थः ।

(३८) कषायद्वारे—

सकसाइयाणं भंते ! जहा सइंदिया । एवं० जाव लोहकसाइयाणं । अकसाइयाणं भंते ! किं नाणी, अन्नाणी ?। पंच नाणाइं भयणाए ।

(सकसाइया जहा सइंदिय त्ति) भजनया, केवलवर्जचतुर्ज्ञानिनस्त्र्यज्ञानिनश्चेत्यर्थः । (अकसाइयाणमित्यादि) अकषायिणां पञ्च ज्ञानानि भजनया, कथमुच्यते ?-उपशान्तो वीतरागः केवली चाकषायः, तत्र उपशान्तवीतरागस्याऽऽद्यज्ञानचतुष्कं भजनया भवति, केवलिनस्तु पञ्चममिति ।

(३९) वेदद्वारे-

सवेदगाणं भंते ! जहा सइंदिया । एवं इत्थिवेदगा वि, एवं पुरिसवेदगा वि, नपुंसगवेदगा वि ! एवं अवेदगा, जहा अकसाइया ।

(जहा सइंदिय त्ति) सवेदकाः सेन्द्रियवद्भजनया केवलिवर्जचतुर्ज्ञानिनः, व्यज्ञानिनश्च वाच्याः । (अवेदगा जहा अकसाइय त्ति) अवेदका अकषायिवद्भजनया पञ्चज्ञाना वाच्याः, यतोऽनिवृत्तिबादराऽद्ययोऽवेदका भवन्ति, तेषु च उपशान्तो यत्वारि ज्ञानानि भजनया, केवलिनां तु पञ्चममिति ।

(४०) आहारकद्वारे-

आहारगाणं भंते ! जीवा ?; जहा सकसाइया, नवरं केवलनाणं पि । अणाहारगाणं भंते ! जीवा किं नाणी, अन्नाणी ?। मणपज्जवनाणवज्जाइं नाणाइं अन्नाणाइं तिण्णि भयणाए ।

(आहारगेत्यादि) सकषाया भजनया चतुर्ज्ञानाऽज्ञानोक्ताः, आहारका अप्येवमेव, नवरमाहारकाणां केवलमप्यस्ति, केवलिन आहारकत्वादपीति । (अणाहारगाणमित्यादि) मनःपर्यवज्ञानमाहारकाणामेवाऽयं पुनर्ज्ञानत्रयमज्ञानत्रयं च विग्रहे केवलं च केवलिनः समुद्घातशैलेशीसिद्धावस्थास्वनाहारकाणामपि स्यात्। अत उक्तम्-(मणपज्जवेत्यादि) भ० ८ श० २ उ० । प्रज्ञा० । अनु० । कर्म० । (गुणस्थानक्रमाश्रित्य ज्ञानविचारो 'गुणट्ठाण' शब्दे तृतीयभागे ६२७ पृष्ठे कृतः) "मागहा इंगिएणं तु, पेहिएण य कोसला । अनुत्तेण उ पंचाला, नाणुत्तं दक्खिणावहा ॥ १ ॥ " व्य० १० उ० । (आभिनिबोधिकाऽऽदिज्ञानानां विषयाः 'आभिणिबोहियणाण' इत्यादिशब्दे द्रष्टव्याः)(कायस्थितिः 'कायठिइ' शब्दे तृतीयभागे ४५८ पृष्ठे उक्ता) ('पज्जव' शब्दे आभिनिबोधिकाऽऽदिज्ञानपर्यवा द्रष्टव्याः) (जीवाः प्रत्याख्यानं जानन्तीति ' पच्चक्खाण ' शब्दे वक्ष्यते)

(४१) तत्त्वसंवेदनं ज्ञानम्--

विषयप्रतिभासं चा-ऽऽत्मपरिणतिमत्तथा ।
तत्त्वसंवेदनं चैव, ज्ञानमाहुर्महर्षयः ॥ १ ॥

विषयः श्रोत्राऽऽदीन्द्रियज्ञानगोचरः शब्दाऽऽदिः,तस्यैव न पुनस्तदप्रवृत्तौ तज्ज्ञस्याऽऽत्मनोऽर्थानर्थसद्भावस्य, प्रतिभासः प्रति-

भासनं परिच्छेदो यत्र तद् विषयप्रतिभासमैहिकाऽऽमुष्मिकेषु ज्ञानक्रियाविषयेषु अर्थेषु प्रवृत्तावात्मनस्तात्त्विकायानेर्थ-प्रतिभासशून्यमित्यर्थः । ज्ञानमाहुरिति संबन्धः, चशब्द उक्त-ज्ञानविशेषापेक्षया समुच्चयार्थः । इदं च मिथ्यादृशां भवती-ति । तथा आत्मनो जीवस्य परिणतिरनुष्ठानविशेषसंपाद्यः परिणामविशेषः, सैव ज्ञेयतया यस्मिन्नस्ति ज्ञाने न पुनस्तदनु-रूपप्रवृत्तिनिवृत्ती अपि तदात्मपरिणतिमत् । तथेति समुच्चये । इदं चाविरतसम्यग्दृष्टीनां भवति, तत्र परमार्थः, तत् सम्यक् विद्यते ह्रायते येन तत्त्वसंवेदनं, ज्ञेयोपादेयार्थप्रवृत्तिनिवृ-त्तिसंपादकमित्यर्थः। चशब्दः समुच्चये,एवकारोऽवधारणे। तस्य चैवं प्रयोगः-तत्त्वसंवेदनमेव च,नोक्तव्यतिरिक्तम्, इदं च विशु-द्धचारित्रिणां स्यात्, ज्ञानं बोधम्, आहुर्ब्रुवते, महर्षयो महामु-नयः, एते च त्रयोऽपि ज्ञानभेदा मत्यादिविशेषा एवेति ॥ १ ॥

आद्यस्वरूपमाह-

विषकणटकरत्नाऽऽदौ, बालाऽऽदिप्रतिभासवत् ।
विषयप्रतिभासं स्यात्, तद्धेयत्वाऽऽद्यवेदकम् ॥२॥

विषं च स्फटिकाऽऽदिकम्, कणटकाश्च बब्बूलाऽऽद्यवयव-विशेषा इति हेयं वस्तु, रत्नानि च मरकताऽऽदीनि तानि चोपादेयं, विषकणटकरत्नानि तानि आदिर्यस्य तत्तथा, तत्र विषकणटकरत्नाऽऽदौ ऽत्र्ये, इहाऽऽदिशब्दाद् हेयोपादेयरूप-वस्त्वन्तरपरिग्रहः,उपेक्षणीयपरिग्रहो वा । बालः शिशुरादिर्येषां ते बालाऽऽदयः, आदिशब्दादतिमुग्धपरिग्रहः । तेषां प्रति-भासो वस्तुबोधो बालाऽऽदिप्रतिभासः, स इव बालाऽऽदि-प्रतिभासवत्, तत्तुल्यमित्यर्थः । विषयप्रतिभासमुक्तनिर्वचनं ज्ञानं, स्याद् भवेत् । कथं बालाऽऽदिप्रतिभासतुल्यत्वमस्येत्या-ह-तेषां ज्ञेयविषयाणां, हेयत्वाऽऽदि-हेयत्वमुपादेयत्वमुपेक्षणी-यत्वं चेत्यर्थः। तस्यावेदकमनिश्चायकं तद्धेयत्वाऽऽद्यवेदकं यथा बालाऽऽदिप्रतिभासो विषाऽऽदिविषयस्य रूपाऽऽदिमात्रमेवाध्य-वस्यति, न तु हेयत्वाऽऽदिकं तत्त्वम्, एवं यद् ज्ञानं बहु-श्रुतानामप्यनिश्चितग्रन्थीनां मोहमलमलीममसत्त्वेनातत्त्वा-नां हेयतायास्तत्त्वानां चोपादेयतायाः विमर्शाक्षमं तत्त्वातत्त्व-योः समताऽवभासकं विपर्ययावभासकं वा तद्विषयप्रतिभास-मिति भावना । उक्तं च-" विसयपडिभासमित्तं, बालस्सेव-ऽक्खरयणविसयं ति । वयणाऽऽइएसु णाणं, सव्वन्थाणमो णेयं " ॥ १ ॥ (वयणाइएसु त्ति) सूत्रार्थाऽऽदिधिति ।

इदमेव लिङ्गाऽऽदिभिर्निरूपयन्नाह—

निरपेक्षप्रवृत्त्यादि-लिङ्गमेतदुदाहृतम् ।
कृज्ज्ञानाऽऽवरणापायं, महापायनिबन्धनम् ॥ ३ ॥

निर्गता अपेक्षा पैहिकाऽऽमुष्मिकापायशङ्का यस्याः सा तथा निरपेक्षा, प्रवृत्तिः प्रवर्तनमादिर्यस्य निवृत्त्यादेः तन्नि-रपेक्षप्रवृत्त्यादि, निरपेक्षस्य वा निराशङ्कस्य प्रवृत्त्यादि निरपेक्ष-प्रवृत्त्यादि, तल्लिङ्गं चिह्नं यस्य तन्निरपेक्षप्रवृत्त्यादिलिङ्गम्, एत-दनन्तरोदितं विषयप्रतिभासं ज्ञानम्, उदाहृतम् आप्तैरुपदिष्टम्। अथ किंहेतुकमिदमित्यत आह-न ज्ञानमज्ञानं मिथ्यात्वो-दय इति, ते मतिश्रुते, अवधिश्च, नञः कुत्सार्थत्वात् । आह च-

" अविसेसिया मइ चिय, सम्मद्दिट्ठिस्स सा मइण्णाणं ।
मइअण्णाणं मिच्छा-दिट्ठिस्स सुयं पि एमेव ॥११४॥ "

तथा-

" सदसद्विसेसणाओ, नत्तहेउ जहिच्छिओवलंभाओ ।
णाणफलाभावाओ, मिच्छादिट्ठिस्स अण्णाणं ॥५२१॥" (विशे०)

तस्याज्ञानस्य मत्यज्ञानाऽऽदिलक्षणस्याऽऽवरणमावृत्तिकारणं कर्म अज्ञानाऽऽवरणं,तस्यापायोऽपगमः क्षयोपशमो यस्मिन् तदज्ञाना-ऽऽवरणापायं. मत्यज्ञानाऽऽवरणाऽऽदिकर्मक्षयोपशमहेतुकमित्य-र्थः। अथवा-अविद्यमानो ज्ञानाऽऽवरणापायो यत्र तत्तथा। अथ किंफलमिदमित्याह-महान्तश्च ते गुरुका अपायाश्च स्वपरगते-हिकाऽऽमुष्मिकप्रत्यपायास्तेषां निबन्धनं हेतुर्महापायनिबन्ध-नम् । इदं च भावतोऽज्ञानमेव, भवति चाज्ञानं महापायनि-बन्धनम् । यत आह-"अज्ञानं खलु कष्टं, क्रोधाऽऽदिभ्योऽपि सर्वपापेभ्यः। अर्थं हितमहितं वा, न वेत्ति येनाऽऽवृतो लोकः ॥१॥"

अथ द्वितीयज्ञाननिरूपणायाऽऽह-

पाताऽऽदिपरतन्त्रस्य,तद्दोषाऽऽद्यसंशयम् ।
अनर्थाऽऽप्त्याप्तियुक्तं चा-ऽऽत्मपरिणतिमन्मतम् ॥ ४ ॥

पातोऽधःपतनम्, आदिर्यस्य ऊर्द्धतिर्यगाकर्षणविपरीतशिक्षाऽ-ऽवोद्वहनाऽऽदेः तत्पाताऽऽदि, तेन तस्य वा परतन्त्रः पराऽऽयत्तः, पाताऽऽदिपरतन्त्र इव पाताऽऽदिपरतन्त्रः,तस्य विषयकषायाऽऽ-दिवशीकृतस्य देहिनः,तस्मिन् पाताऽऽदौ यो दोषोऽक्षभङ्गमरणा-ऽऽदिलक्षणः स आदिर्यस्य रूतोत्करमृदुस्पर्शाऽऽदिगुणस्य स तथा,तत्र दोषाऽऽदौ,दार्ष्टान्तिके तु कर्मबन्धदुर्गत्यादिदोषे गुणे च अभ्युदयाऽऽदौ ज्ञेयेऽसंशयम्,उपलक्षणमेतत्-अविद्यमानसंदेह-विपर्ययं विलीनमोहग्रन्थित्वेन यथावस्थिताध्यवसायं स्वरूपमित्यर्थः। अनर्थोऽपायोऽलब्धलाऽऽदिरादिर्यस्य सुखस्पर्शाऽऽदेरर्थस्य तथा तस्याऽऽप्तिः प्राप्तिः तया युक्तम् अन्वितम अनर्थाऽऽप्त्याप्तियुक्तम्। इह च यद्यपि पुरुषस्यैवानर्थाऽऽप्त्याप्तियोगस्तथाऽपि ज्ञानाव्यति-रिक्तत्वात् तस्याज्ञानस्यैवानर्थाऽऽप्त्याप्तियुक्तमुक्तम, दार्ष्टान्तिके त्वनर्थाऽऽप्तिः कर्मबन्धदुर्गतिगमनपरम्परारूपाऽऽगमनरूपाऽ-वगन्तव्या, चशब्दो विशेषणान्तरसमुच्चयार्थः । तदेवंविधं ज्ञान-मात्मपरिणतिमत् प्रतिपादितं निर्वचनं मतमभिमतमध्यात्म-तत्त्वविदुषामिति । इह च संवादगाथे-

" मिच्छे उ तयं नाणं, जहऽक्खरयणेसु तग्गयं चेव ।
पडिबंधम्मि वि सद्धा-ऽऽइभावओ सम्मरूवं तु ॥ १ ॥ "

मिच्छे तु, कस्मिन् ?, मोहग्रन्थावित्यर्थः । (तग्गयं चेव त्ति) अक्षे अक्षगतमेव, रत्ने रत्नगतमेव, प्रतिबन्धेऽपि सदनुष्ठान-व्याघातेऽपीत्यर्थः ।

" जमिणं असप्पवित्ती-इ दव्वओ संगयं पि नियमेण ।
होइ फलंगं असुहा-णुबंधवोच्छेयभावाओ ॥१॥ " इति ।

एतदेव लिङ्गाऽऽदिभिर्निरूपयन्नाह—

तथाविधप्रवृत्त्यादि-व्यङ्ग्यं सदनुबन्धि च ।
ज्ञानाऽऽवरणहासोत्थं, प्रायो वैराग्यकारणम् ॥ ५ ॥

तथा तत्प्रकारा विधा स्वरूपं यस्याः सा तथाविधा-"हि-यए जिणाण आणा, चरियं मह परिसं अओऽवस्स । एयं आलप्पालं, अओ ! दूरं विसंवयइ ॥ १ ॥" इत्या-दिभावनया असंक्लिष्टा चासौ प्रवृत्तिश्च हिंसाऽऽदिषु व-र्तनं तथाविधप्रवृत्तिः, स आदिर्यस्य निवृत्तिप्राण्यादेः तत्तथा-विधप्रवृत्त्यादि, तेन व्यज्यते व्यक्तीक्रियते यत्तत्तथाविधप्र-वृत्त्यादिव्यङ्ग्यं; तथा सत् शोभनोऽनुबन्धः परम्परया मो-

क्फलप्रदायकत्वं सदनुबन्धः, सोऽस्यास्तीति सदनुबन्धि, चशब्दो विशेषणसमुच्चये । किंहेतुकमिदमित्याह-ज्ञानाऽऽवरणं मत्याद्याचारकं कर्म, तस्य ह्रासः क्षयोपशमः, तस्माद्युक्तिरुत्पद्यते यत्तद् ज्ञानाऽऽवरणह्रासोत्थम् । कथमिदं सदनुबन्धीत्यत आह-प्रायो बाहुल्येन वैराग्यकारणं सद्भावनानिमित्तं यतो भवतीति गम्यते । यदाह-" बालधूलीगृहक्रीडातुल्याऽस्यां भाति धीमताम् । तमोग्रन्थिविभेदेन, भवचेष्टाऽखिलैव हि ॥१॥ " प्रायोग्रहणं च कषायोदयविशेषे सति तद्वैराग्यकारणं न स्यादपि राज्याऽऽदिप्रसाधानप्रवृत्तनरताऽऽदेरिवेति प्रतिपादनार्थमिति ॥ ५ ॥

तृतीयप्रतिपादनायाऽऽह-

स्वस्थवृत्तेः प्रशान्तस्य, तत्त्वेयत्वाऽऽदिनिश्चयम् ।
तत्त्वसंवेदनं सम्यग्, यथाशक्ति फलप्रदम् ॥ ६ ॥

स्वस्था अनाकुला वृत्तिर्वचनकायव्यापाररूपं वर्तनं यस्य स तथा तस्य स्वस्थवृत्तेः। एतदेव कुत इत्याह--प्रशान्तस्य रागद्वेषाऽऽद्युपशमप्रकर्षवतः, तत्त्वसंवेदनं भवतीति क्रिया । किंभूतमिति ?, आह-तेषां ज्ञेयवस्तुतत्त्वानां ज्ञेयत्वं त्यजनीयत्वम्, आदिशब्दादुपादेयत्वोपेक्षणीयत्वपरिग्रहः । तत्र निश्चयो निर्णयो यस्य तत्तत्त्वेयत्वाऽऽदिनिश्चयमिति यथा वा यदिति शेषः । ततश्च स्वस्थवृत्तेः प्रशान्तस्य पुंसो यद् ज्ञानं तत्तत्त्वसंवेदनमिति योगः । तत्त्वसंवेदनमुक्तनिर्वचनं सम्यक् समीचीनतया यथाशक्ति पुरुषस्य संहननाऽऽदिसामर्थ्यानुसारतः फलप्रदं स्वप्रयोजनप्रसाधकम्, ज्ञानस्य चानन्तरफलं विरतिः, परम्पराफलं त्वपवर्ग इति ॥ ६ ॥

एतस्य लिङ्गाऽऽदि प्रतिपादयन्नाह-

न्याय्याऽऽद्यौ शुद्धवृष्यादि-गम्यमेतत् प्रकीर्तितम् ।
सज्ज्ञानाऽऽवरणापायं, महोदयनिबन्धनम् ॥ ७ ॥

न्यायो नीतिः तस्मादनपेतो न्याय्यः-सम्यग्दर्शनाऽऽदित्रयरूपो मोक्षमार्गः, स आदिर्यस्य न्यायस्य मिथ्यादर्शनाऽऽदिरूपस्य भवमार्गस्य स न्याय्याऽऽदिः, तत्र शुद्धवृत्तिर्निरतिचारप्रवृत्तिः, आदिर्यस्या निवृत्तेः सा तथा तया, गम्यमनुमेयं शुद्धवृष्यादिगम्यम् । एतदनन्तरोदितस्वरूपं तत्त्वसंवेदनज्ञानं, प्रकीर्तितम् ज्ञानस्वरूपविद्भिः संशब्दितम् । किंहेतुकमिति ?, आह सत् शोभनं प्रकृष्टं यद् ज्ञानमाभिनिबोधिकाऽऽदि, तस्य यदावरणं, तस्यापायोऽपगमः क्षयः क्षयोपशमलक्षणो यस्मिन् तद् ज्ञानाऽऽवरणापायम् । अथवा-सन् विद्यमानो ज्ञानाऽऽवरणापायो यत्र तत्तथा फलमस्य । आह-महोदयो महाभ्युदयो निर्वाणं, तस्य निबन्धनमक्लेषेण कारणं महोदयनिबन्धनमिति ॥ ७ ॥

उपसंहरन्नुपदेशमाह-

एतस्मिन् सततं यत्नः, कुग्रहत्यागतो नृशम् ।
मार्गश्रद्धाऽऽदिभावेन, कार्य आगमतत्परैः ॥ ८ ॥

एतस्मिन्ननन्तरोक्ते तत्त्वसंवेदनज्ञाने, सततमनवरतं, यत्न आदरः, कार्य इति संबन्धः । कुतः ?, कुग्रहत्यागतः शास्त्रबाधिताभिनिवेशपरित्यागेन, नृशमत्यर्थं, केन करणभूतेन कार्यो यत्न इत्याह-मार्गो मोक्षमार्गः श्रद्धाऽऽदिर्मार्गश्रद्धाऽऽदिः तद्रूपो भाव आत्मपरिणामो मार्गश्रद्धाऽऽदिभावः तेन, तत्र श्रद्धा श्रद्धानम्, आदिशब्दाद् ज्ञानमासेवनं चेति कार्यो विधेयः । कैरिति ?, आह-आगमतत्परैराप्तप्रवचनप्रधानैरिति ॥ ८ ॥ इति । हा० ९ अष्ट० । द्वा० । अत उक्तम्-" तज्ज्ञानमेव न भवति, यस्मिन्नुदिते विभाति रागगणः । तमसः कुतोऽस्ति शक्तिः, दिनकरकिरणाग्रतः स्थातुम् ? ॥ १ ॥ " नं० । आचा० । ध० ।

गुरुपारतंतनाणं, [सद्दहणं एयसंगयं चेव] (७)

गुरुपारतन्त्र्यं ज्ञानाधिकाऽऽचार्याऽऽयत्तत्वं यत्तद् ज्ञानं बोधो विशिष्टज्ञानविकलानामपि गुरुपारतन्त्र्यस्य ज्ञानफलसाधकत्वात् । यदाह-

" यो निरनुबन्धदोषात्, आरोऽनाभोगवान् वृजिनभीरुः ।
गुरुभक्तो ग्रहरहितः,सोऽपि ज्ञान्येव तत्फलतः ॥ १ ॥
चक्षुष्मानेकः स्या-दन्धोऽन्यस्तन्मतानुवृत्तिपरः ।
गन्तारौ गन्तव्यं,प्राप्नुत एतौ युगपदेव ॥२॥" पञ्चा०११ विव०।
"णाणाहिओ वरचरण-हीणो वि हु पवयणं पभासंतो ।
ण य दुक्करं करेंतो, सुट्ठु वि अप्पागमो पुरिसो ॥१॥ "
तथा-"हीणस्स वि सुद्धपरू-वगस्स नाणाहियस्स कायव्वं।" द्रव्या०१ अध्या० । स्या० (प्रत्यक्षाऽऽदीनां व्याख्या स्वस्वस्थाने) आगमपूर्वके बोधे, द्वा०२३ द्वा० । "अज्ञाणं परियाणामि । " (४२) अज्ञानं सम्यग्ज्ञानादन्यद्, ज्ञानं तु भगवद्वचनम् । ध० ३ अधि० ।

अत्र यशोविजयोपाध्यायकृतमष्टकम-

मज्जत्यज्ञः किलाज्ञाने, विष्ठायामिव शूकरः ।
ज्ञानी निमज्जति ज्ञाने, मराल इव मानसे ॥ १ ॥
निर्वाणपदमप्येकं, भाव्यते यन्मुहुर्मुहुः ।
तदेव ज्ञानमुत्कृष्टं, निर्बन्धो नास्ति भूयसा ॥ २ ॥
स्वभावब्रह्मसंस्कार-स्मरणं ज्ञानमिष्यते ।
ध्यान्ध्यमात्रमतस्त्वन्य-त्तथा चोक्तं महात्मना * ॥ ३ ॥
वादाँश्च प्रतिवादाँश्च, वदन्तोऽनिश्चितांस्तथा ।
तत्त्वान्तं नैव गच्छन्ति, तिलपीलकवद्गतौ ॥ ४ ॥
स्वद्रव्यगुणपर्याय-चर्यावर्या पराऽन्यथा ।
इति दत्ताऽऽत्मसन्तुष्टि-र्मुष्टिज्ञानस्थितिर्मुनेः ॥ ५ ॥
अस्ति चेद् ग्रन्थिभिद् ज्ञानं, किं चित्रैस्तन्त्रयन्त्रणैः ।
प्रदीपाः कोपयुज्यन्ते, तमोघ्नी दृष्टिरेव चेत् ? ॥ ६ ॥
मिथ्यात्वशैलपक्षच्छिद्, ज्ञानदम्भोलिशोभितः ।
निर्भयः शक्रवद् योगी, नन्दत्यानन्दनन्दने ॥ ७ ॥
पीयूषमसमुद्भूत्यं, रसायनमनौषधम् ।
अनन्यापेक्षमैश्वर्यं, ज्ञानमाहुर्मनीषिणः ॥८॥ अष्ट०५अष्ट०।
" जो विणओ तं नाणं, जं नाणं सो अ वुच्चई विणओ ।
विणएण लहइ नाणं, नाणेण वि जाणई विणयं" ॥६२॥ द०१०।
(वचनानुष्ठानं चारित्रवतो नियोगेनेत्युक्तम् ' अणुट्ठाण ' शब्दे प्रथमभागे ३७१ पृष्ठे)

(४३) तत्र ज्ञानयोजनामाह-

श्रुतमयमात्रापोहात्, चिन्तामयभावनामये भवतः ।
ज्ञाने परे यथार्हं, गुरुभक्तिविधानसद्भिक्षे ॥ १२ ॥

श्रुतेन निर्वृत्तं श्रुतमयं, तदेव तन्मात्रमवधृतस्वरूपमन्यज्ञानव्

* हरिभद्राचार्येण । ' अकुथासंजतं नाणं, सुयपाढउ व्व विणएयं ' ।

यनिरपेक्षम्, तदपोहात्तन्निरासात्। अन्यज्ञानद्वयसापेक्षं तु श्रुतमयं न निरस्यत इति ज्ञेयम् । चिन्तामयभावनामये वक्ष्यमाणस्वरूपे नयप्रमाणसूक्ष्मयुक्तिचिन्तानिवृत्तं चिन्तामयं हेतुस्वरूपफलज्ञेदेन कालत्रयविषयं भावनामयं, ते भवतो जायेते ज्ञाने परे प्रधाने यथाहमौचित्येन गुरुभक्तिविधानं सच्छोभनं लिङ्गं ययोः गुरुभक्तिविधानसल्लिङ्गे ॥ १२ ॥

ज्ञानत्रयं सफलं दृष्टान्तद्वारेण प्रतिपिपादयिषुराह-

उदकपयोऽमृतकल्पं, पुंसां सज्ज्ञानमेवमाख्यातम् ।
विधियत्नवच्च गुरुभि-र्विषयतृषमपहरि नियमेन ॥१३॥

उदकपयोऽमृतकल्पमुदकरसाऽऽस्वादकल्पं पयोरसाऽऽस्वादकल्पम् अमृतरसाऽऽस्वादकल्पं,पुंसां विद्वत्पुरुषाणाम्,सज्ज्ञानं सम्यग् ज्ञानम्,एवमाख्यातं स्वरूपतो,विधियत्नवच्च विधौ यत्नः स विद्यते यस्मिंस्तद्विधियत्नवदेव,न विधियत्नशून्यं,गुरुभिराचार्यैराख्यातं विषयतृडपहारि विषयतृषमपहर्तुं शीलमस्येति,नियमेन अवश्यंतया,श्रुतज्ञानं खल्वस्वादुपथ्यसलिलाऽऽस्वादतुल्यं, चिन्ताज्ञानं तु क्षीररसाऽऽस्वादतुल्यं,भावनाज्ञानममृतरसाऽऽस्वादतुल्यमितित्युक्तं भवति, विषयतृष्णपहारीत्युक्तम् ॥ १३ ॥

यस्य तु विषयाभिलाषातिरेकः स ज्ञानत्रयवानेव, फलाज्ञावाद् न भवतीत्ययोग्यत्वप्रतिपादनाय तस्येदमाह-

शृण्वन्नपि सिद्धान्तं, विषयपिपासाऽतिरेकतः पापः ।
प्राप्नोति न संवेगं, तदाऽपि यः सोऽचिकित्स्य इति ।१४।

शृण्वन्नपि तीर्थकराभिहितमर्थतः सिद्धान्तं प्रतिष्ठितपक्षरूपं गणधराऽऽद्युपनिबद्धमागमं विषयपिपासाऽतिरेकतो रूपरसगन्धस्पर्शशब्दाभिलाषातिरेकेण पापः संक्लिष्टाध्यवसायत्वाद् न प्राप्नोति संवेगं मोक्षाभिलाषं, तदाऽपि सिद्धान्तश्रवणकालेऽपि, आस्तां तावदन्यदा, य एवंविधः, सोऽचिकित्स्य इत्यचिकित्सनीयः, स वर्त्तते, शास्त्रविहितदोषचिकित्साया अनर्हत्वादिति ॥१४॥

इत्थं कर्मदोषवतः किं कर्तव्यम् ?, इत्याह-

नैवंविधस्य शस्तं, पण्डित्युपवेशनप्रदानमपि ।
कुर्वन्नेतद् गुरुरपि, तदधिकदोषोऽवगन्तव्यः ॥ १५ ॥

न प्रतिषेधे, एवंविधस्य, पुरुषस्य शस्तं प्रशस्तमनुज्ञातमित्यर्थः । पण्डित्युपवेशनप्रदानमपि अर्थमाण्डित्यं यदुपवेशनं श्रवणार्थं तत्प्रदानमपि कुर्वन् संपादयन्नेतत् पूर्वोक्तं गुरुरपि प्रस्तुतोऽर्थाभिधायी तदधिकदोषोऽयोग्यपुरुषाधिकदोषोऽवगन्तव्योऽवबोधव्यः; सिद्धान्तावज्ञाऽऽपादनादिति ॥ १५ ॥

पूर्वोक्तार्थं व्यतिरेकेणाऽऽह-

यः शृण्वन् संवेगं, गच्छति तस्याऽऽद्यमिह मतं ज्ञानम् ।
गुरुभक्त्यादिविधानात्, कारणमेतद् द्वयस्येष्टम् ॥ १६ ॥

यः कश्चिद् योग्यः शृण्वन्, सिद्धान्तमिति संबध्यते । संवेगं गच्छति आस्कन्दति । तस्य योग्यस्याऽऽद्यमिह प्रथममिह मतं ज्ञानं श्रुतज्ञानम् । गुरुभक्त्यादिविधानाद् गुरुभक्तिविनयबहुमानाऽऽदिकरणात्, कारणमेतद् द्वयस्येष्टं चिन्तामयभावनामयज्ञानद्वयस्य हेतुरेतत् श्रुतज्ञानमिष्टम् । तस्माज्ज्ञानत्रयेऽपि रत्नत्रयकल्पे परमाऽऽदरो विधेय इति ॥ १६ ॥ षो० १० विव० ।

(सुस्सूसा ' शब्दे शुश्रूषाविवेचनम्)

(४४) इदानीं त्रयाणां श्रुताऽऽदिज्ञानानां किञ्चिद्विभागमुपदर्शयति-

ऊहाऽऽदिरहितमाद्यं, तद्युक्तं मध्यमं भवेद् ज्ञानम् ।
चरमं हितकरणफलं, विपर्ययो मोहतोऽन्य इति ॥ ६ ॥

ऊहो वितर्कः,ऊहाऽपोहविज्ञानाऽऽदिरहितमाद्यं प्रथमं श्रुतमयं, तद्युक्तमूहाऽऽदियुक्तं मध्यमं चिन्तामयं भवेद् ज्ञानं द्वितीयं, चरमं भावनामयं तृतीयं हितकरणफलं हितकरणं फलमस्येति स्वहितनिर्वर्तनफलं, विपर्ययो विपर्यासो मिथ्याज्ञानं,मोहतो मोहान्मिथ्यात्वमोहनीयोदयं दृ ज्ञानत्रयादन्योऽबोध इति ॥ ६ ॥

(४५) श्रुतमयज्ञानस्य लक्षणमाह-

वाक्यार्थमात्रविषयं, कोष्ठकगतबीजसन्निभं ज्ञानम् ।
श्रुतमयमिह विज्ञेयं, मिथ्याऽभिनिवेशरहितमलम् ॥७॥

सकलशास्त्रगतवचनाविरोधिनिर्णीतार्थवचनं वाक्यं, तस्यार्थमात्रं प्रमाणनयाधिगमरहितम्, तद्विषयं तद्बोधरूपम्-वाक्यार्थमात्रविषयं, न तु परस्परविभिन्नविषयशास्त्रावयवभूतपदमात्रवाच्यार्थविषयम् । कोष्ठके लोहकोष्ठकाऽऽदौ गतं स्थितं यद् बीजं धान्यं तत्सन्निभमविनष्टत्वात्-कोष्ठकगतबीजसन्निभं, ज्ञानं श्रुतमयमिह प्रक्रमे, विज्ञेयं वेदितव्यम्, मिथ्याऽभिनिवेशोऽसदभिनिवेशः, तेन रहितं विप्रमुक्तम्, अत्रभवत्यर्थम् ॥ ७ ॥

(४६) चिन्तामयज्ञानस्य लक्षणमाह-

यत्तु महावाक्यार्थज-मतिसूक्ष्मसमुयुक्तिचिन्तयोपेतम् ।
उदक इव तैलबिन्दु-र्विसर्पि चिन्तामयं तत्स्यात् ॥८॥

यत्तु यत्पुनर्महावाक्यार्थजमाक्षिप्तेतरसर्वधर्माऽऽत्मकत्ववस्तुप्रतिपादकाभेकान्तवादविषयार्थजन्यमतिसूक्ष्मा अतिशयसूक्ष्मबुद्धिगम्याः शोभना अविसंवादिन्यो या युक्तयः सर्वप्रमाणनयगर्भाः, तच्चिन्तया तदालोचनयोपेतं युक्तम् । उदक इव सलिल इव तैलबिन्दुस्तैलबिन्दुर्यो विसर्पणशीलं विसर्पि विस्तारयुक्तम्, चिन्तया निर्वृत्तं चिन्तामयं, तज्ज्ञानं स्याद्भवेत् ॥ ८ ॥

(४७) भावनाज्ञानलक्षणमाह-

ऐदम्पर्यगतं यद्, विध्यादौ यत्नवत्त्वयोगेन ।
एतत्तु भावनामय-मशुद्धसद्रत्नदीप्तिसमम् ॥९॥

ऐदम्पर्यं तात्पर्यं सर्वज्ञैकक्रियाविषये सर्वज्ञाज्ञैव प्रधानं कारणमित्येवंरूपं तत्र गतं तद्विषयं यद् ज्ञानं विध्यादौ विधिर्ऋषभदेवप्रणीताऽऽदौ,यत्नवत्परमाऽऽदरयुक्तं,तथैवोक्तैः-ऐदम्पर्यवत्त्वापेक्षया यत्नवत्त्वस्य समुच्चयार्थो तथैवेत्यस्य ग्रहणम् । एतत्तु एतत्पुनर्भावनया निर्वृत्तं भावनामयं ज्ञानम् । अशुद्धस्य सद्रत्नस्य जात्यरत्नस्य स्वभावत एव क्षारमृत्पुटपाकाऽऽद्यभावेऽपि जात्यरूपस्य या दीप्तिस्तया सममशुद्धसद्रत्नदीप्तिसमम् । यथा हि जात्यरत्नस्य स्वभावत एवान्यरत्नेभ्योऽधिका दीप्तिर्भवति, एवमिदमपि भावनाज्ञानमशुद्धसद्रत्नकल्पस्य भव्यजीवस्य कर्ममलमलिनस्यापि शेषज्ञानेभ्योऽधिकप्रकाशकारि भवति । अनेन हि ज्ञानं ज्ञातं नाम क्रियाऽप्येतत्पूर्विकैव मोक्षायाऽऽक्षेपेण संपद्यत इति ॥ ९ ॥

साम्प्रतं त्रयाणां श्रुतचिन्ताभावनामयज्ञानानां विषयविभागार्थं फलाभिधानाय प्रक्रमते कारिकाद्वयेन—

आद्य इह मनाक् पुंसः, तदागात् दर्शनग्रहो भवति ।

न भवत्यसौ द्वितीये, चिन्तायोगाद् कदाचिदपि ॥१०॥

आद्ये श्रुतज्ञाने, इह प्रवचने, मनागपीत्, पुंसः पुरुषस्य, तद्रागात् श्रुतमयज्ञानानुरागात्, दर्शनग्रहो भवति, दर्शनं मतं श्रुतमिति एकोऽर्थः। तद्ग्रहः तदाग्रहो यथेदमत्रोक्तमिदमेव च प्रमाणं नान्यदित्येवंरूपो, न भवत्यसौ दर्शनग्रहो यथेदमस्मदीयं दर्शनं शोभनमन्यदीयमशोभनमित्येवंरूपो, द्वितीये चिन्तायोगादतिसूक्ष्मसुयुक्तिचिन्तनसंबन्धात् कदाचिदपि काले नयप्रमाणाधिगमसमन्वितो हि विद्वान् प्रेक्षावत्तया स्वपरतन्त्रोक्तं न्यायबलाऽऽयातमर्थं सर्वं प्रतिपद्यते, तेनास्य दर्शनग्रहो न भवति ॥ १० ॥

चारिचरकसज्जीव–न्यचरकचारणविधानतश्चरमे ।
सर्वत्र हिता वृत्ति–र्गाम्भीर्याद् समरसापत्या ॥ ११ ॥

चारेइचरको भक्षयिता संजीविन्या औषधेरचरकोऽनुपभोक्ता, तस्य चारणमश्यवहारणं, तस्य विधानं संपादनं, तस्माच्चारिचरकसज्जीवन्यचरकचारणविधानतश्चरमे ज्ञावनामयज्ञाने सति सर्वत्र सर्वेषु जीवेषु हिता वृत्तिः हितहेतुः प्रवृत्तिर्न कस्यचिदहिता । गाम्भीर्यादाशयविशेषात् समरसापत्या सर्वानुग्रहरूपया "कयाचित् स्त्रिया कस्यचित् पुरुषस्य वशीकरणार्थं परिव्राजिकोक्ता–यथेमं मम वशवर्तिनं वृषभं कुरु, तया च किल कुतश्चित् सामर्थ्यात् स वृषभः कृतः, तं चारयन्ती पाययन्ती चास्ते । अन्यदा च वटवृक्षस्य अधस्तान्निषण्णे तस्मिन् पुरुषगवे, विद्याधरीयुग्ममाकाशमागमत्, तत्रैकयोक्तम्–अयं स्वाभाविको न गौः, द्वितीययोक्तम्–कथमयं स्वाभाविको भवति ? तत्राऽऽद्ययोक्तम्–अस्य वटस्याधस्तात् संजीवनी नामौषधिरस्ति । यदि तां चरति, तदाऽयं स्वाभाविकः पुरुषो जायते । तच्च विद्याधरीवचनं तया स्त्रिया समाकर्णितं, तया चौषधिं विशेषतोऽज्ञानतया सर्वामेव चारिं तत्प्रदेशवर्तिनीं सामान्येनैव चारितः, यावत्संजीवनीमुपभुक्तवान् । तदुपभोगानन्तरमेवासौ पुरुषः संवृत्तः । " एवमिदं लौकिकमाख्यानकं श्रूयते । यथा तस्याः स्त्रियाः तस्मिन् पुरुषगवे हिता प्रवृत्तिरेवं ज्ञावनाज्ञानसमन्वितस्यापि सर्वत्र भव्यसमुदाये ऽनुग्रहप्रवृत्तस्य हितैव प्रवृत्तिरिति ॥ ११ ॥

विपर्ययो मोहतोऽन्य इत्युक्तम्, स पुनः कः ?, इत्याह–

गुर्वादिविनयरहित–स्य यस्तु मिथ्यात्वदोषतो वचनात् ।
दीप इव मण्डलगतो, बोधः स विपर्ययः पापः ॥ १२ ॥

गुर्वादिविनयरहितस्य गुरूपाध्यायाऽऽदिविनयविकलस्य यस्तु यः पुनर्मिथ्यात्वदोषतो मिथ्यात्वदोषात् तत्त्वार्थश्रद्धानरूपाद् वचनादागमाद् दीप इव, मण्डलगतो मण्डलाऽऽकारो बोधोऽवगमस्तैमिरिकस्येव स तथाविधो, बोधो वचनाद् ज्ञवन्नप्यध्यारोपदोषतो विपर्ययो मिथ्याप्रत्ययरूपः पदमात्रवाच्यार्थविषयः पापः स्वरूपेण वर्तते ॥ १२ ॥

विपर्यय एव प्रस्तुते दृष्टान्तगर्भमुपनयमाह कारिकाद्वयेन–

दण्मीखण्मनिवसनं, भस्माऽऽदिविभूषितं सतां शोच्यम् ।
पश्यत्यात्मानमलं, गृही नरेन्द्रादपि ह्यधिकम् ॥ १३ ॥
मोहविकारसमेतः, पश्यत्यात्मानमेवमकृतार्थम् ।
तद्व्यत्ययलिङ्गरतं, कृतार्थमिति तद्ग्रहादेव ॥ १४ ॥

दण्मीखण्डं प्रसिद्धं, निवसनं परिधानमस्येति दण्मीखण्डनिवसनः, तं भस्माऽऽदिभिर्विभूषितं विच्छुरितं तस्माऽऽदिविभूषितं सत्पुरुषाणां शोच्यं शोचनीयं पश्यत्यवलोकयत्यात्मानमलमत्यर्थं, गृही गृहवान्, नरेन्द्रादपि ह्यधिकं चक्रवर्तिनोऽप्यधिकं यथेति गम्यते ॥ १३ ॥ मोहविकारसमेतो मनोविभ्रमदोषसमन्वितः पश्यत्यात्मानमेवमकृतार्थं सन्तं विपर्ययबोधवान् कृतार्थमिति पश्यति, तस्य कृतार्थस्य व्यत्ययेन यानि लिङ्गानि तेषु रतस्तं तद्व्यत्ययलिङ्गरतम् । अनेनाकृतार्थत्वमेव वस्तुवृत्त्या दर्शयति । एवंविधोऽपि कृतार्थमिति कुतो मन्यते ?। तद्ग्रहादेव, स चासौ ग्रहश्च,तस्मादेव विवक्षितग्रहाऽऽवेशादेव । एवं ग्रहगृहीतेन विपर्ययवत ह्यपनयः कृतः ॥ १४ ॥

ज्ञानविपर्यययोः स्वाम्युपदर्शनार्थमिदं कारिकाद्वयमाह–

सम्यग्दर्शनयोगाद्, ज्ञानं तद् ग्रन्थिभेदतः परमम् ।
सोऽपूर्वकरणतः स्याद्, ज्ञेयं लोकोत्तरं तच्च ॥ १५ ॥

सम्यग्दर्शनयोगात्तत्त्वार्थश्रद्धानसंबन्धाद् ज्ञानं सम्यग्ज्ञानं, तत् सम्यग्दर्शनं ग्रन्थिभेदतो ग्रन्थिभेदात्, परमं प्रधानं स्वरूपतो वर्तते, स ग्रन्थिभेदो नियमत एवापार्द्धपुद्गलपरावर्ताधिकसंसारच्छेदो, अपूर्वकरणतः स्यादपूर्वपरिणामाद् भवेत्, ज्ञेयं लोकोत्तरं तच्च, तच्चापूर्वकरणं लोकात् सर्वस्मादप्युत्तरं प्रधानं ज्ञेयम् । अपूर्वकरणमपूर्वपरिणामः शुभोऽनादावपि संसारे तेषु तेषु धर्मस्थानेषु सूत्रार्थग्रहणाऽऽदिषु वर्तमानस्याभ्यसंज्ञातपूर्व इति कृत्वा ॥ १५ ॥

लोकोत्तरस्य तस्माद्, महानुभावस्य ज्ञान्तचित्तस्य ।
औचित्यवतो ज्ञानं, शेषस्य विपर्ययो ज्ञेयः ॥ १६ ॥

लोकादुत्तरः प्रधानो ज्ञानवानिह गृह्यते, तस्य लोकोत्तरस्य तस्मादिति निगमने महानुभावस्याचिन्त्यशक्तेः शान्तचित्तस्योपशान्तमनसः । औचित्यवत औचित्ययुक्तस्य ज्ञानमनेन ज्ञानस्वामी निर्दर्शितः । शेषस्योक्तगुणविपरीतस्य विपर्ययो ज्ञेयो ज्ञानत्रयादन्यः पदमात्रवाच्यार्थविषयः पूर्वोक्त इति ॥ १६ ॥ षो० ११ विव० ।

(४७) ज्ञानं किमिहभविकं परभविकं वा–

इहभविए भंते ! णाणे, परभविए णाणे, तदुभयभविए णाणे ?। गोयमा ! इहभविए वि णाणे, परभविए वि णाणे, तदुभयभविए वि णाणे य ।

"इहभविए" इत्यादि व्यक्तम्, नवरम् इह च भवे वर्तमानजन्मनि यद्वर्तते, न तु भवान्तरे तदिहभाविकम्,काकुपाठाच्चेह प्रश्नताऽवसेया, तेन किमिहभविकं ज्ञानमुत–(परभविए त्ति) परभवे वर्तमानानन्तरभाविन्यनुगामितया यद्वर्तते तत्पारभविकम्, आहोस्वित्–(तदुभयभविए त्ति) तदुभयरूपयोरिहपरलक्षणयोर्भवयोर्यदनुगामितया वर्तते तत्तदुभयभविकम्, इदं चैवं न पारभविकाद्भिद्यत इति । परतरभवेऽपि यदनुयाति तद् ग्राह्यम्, इहभवव्यतिरिक्तत्वेन परतरभवस्यापि परभवत्वात्, ह्रस्वतानिर्देशश्चेह सर्वत्र प्राकृतत्वादिति, प्रश्ननिर्वचनमपि सुगमं, नवरम्–(इहभविए वि त्ति) ऐहभविकं यदिहाधीतं, नानन्तरभवेऽनुयाति, पारभविकं यदनन्तरभवेऽनुयाति, तदुभयभविकं तु यदिहाधीतं परजन्मे परतरजन्मे चानुवर्तत इति । प्र० १ श० १ उ० । शास्त्राभ्यासे, दर्श० ५ तत्त्व । ज्ञानमागमितमित्येकोऽर्थः । व्य० १० उ० । ज्ञायतेऽनेनेति ज्ञेयप्र-

काशके दीपकल्पे आचाराङ्गश्रुताऽऽदौ, हा० ३० मङ्ग० । बृ० । " तम्हा धिइउदाणु-च्छाहकम्मबलविरियसंकिलेयं णाणं । धारेयव्वं नियमा, न य अविणीएसु दायव्वं ॥ ५ ॥ " अत्र ज्ञानं चन्द्रप्रज्ञप्तिलक्षणम् । चं० प्र० २० पाहु० ।

छउमत्थे णं भंते ! मणूसे परमाणुपोग्गलं किं जाणइ, पासइ, उदाहु न जाणइ, न पासइ ?। गोयमा ! अत्थेगइए जाणइ, ण पासइ, अत्थेगइए ण जाणइ, ण पासइ । छउमत्थे णं भंते ! दुपदेसियं खंधं किं जाणइ, पासइ ? । एवं चेव । एवं० जाव असंखेज्जपएसियं । छउमत्थे णं भंते ! मणुस्से अणंतपएसियं खंधं किं पुच्छा ?। गोयमा ! अत्थेगइए जाणइ, पासइ, अत्थेगइए जाणइ, ण पासइ, अत्थेगइए ण जाणइ,पासइ, अत्थेगइए ण जाणइ,ण पासइ । आहोहिएणं मणुस्से परमाणु० जहा छउमत्थे एवं आहोहिए वि०जाव अणंतपदेसियं। परमाहोहिए णं भंते! मणूसे परमाणुपोग्गलं जं समयं जाणइ, तं समयं पासइ, जं समयं पासइ, तं समयं जाणइ ?। णो इणट्ठे समट्ठे। से केणट्ठेणं भंते ! एवं वुच्चइ—परमाहोहिए णं मणूसे परमाणुपोग्गलं जं समयं जाणइ, णो तं समयं पासइ, जं समयं पासइ, णो तं समयं जाणइ ?। गोयमा ! सागारे से णाणे भवइ, अणागारे से दंसणे भवइ,से तेणट्ठेणं० जाव णो तं समयं जाणइ, एवं० जाव अणंतपएसियं। केवली णं भंते ! मणूसे जहा परमाहोहिए तहा केवली वि० जाव अणंतपएसियं।

(छउमत्थेत्यादि) इह छद्मस्थो निरतिशयो ग्राह्यः । (जाणइ, न पासइ त्ति) श्रुतोपयुक्तः श्रुतज्ञानी, श्रुते दर्शनाभावात्, तदन्यस्तु " न जाणइ न पासइ त्ति " अनन्तप्रदेशिकसूत्रे चत्वारो भङ्गा भवन्ति, जानाति स्पर्शनाऽऽदिना,पश्यति च चक्षुषेत्येकः । तथाऽन्यो जानाति स्पर्शनाऽऽदिना, न पश्यति च चक्षुषा, चक्षुषोऽभावादिति द्वितीयः । तथाऽन्यो न जानाति स्पर्शाद्यगोचरत्वात्, पश्यति चक्षुषेति तृतीयः । तथाऽन्यो न जानाति न पश्यति चाविषयत्वादिति चतुर्थः । छद्मस्थाधिकाराच्छद्मस्थविशेषभूताधोऽवधिकपरमाधोऽवधिकसूत्रे परमावधिकश्चावश्यमन्तर्मुहूर्तेन केवली भवतीति केवलिसूत्रम् । तत्र च (सागारे से नाणे भवइ त्ति) साकारं विशेषग्रहणस्वरूपम् । ' से ' तस्य परमाधोऽवधिकस्य तदा, ज्ञानं भवति, तद्विपर्ययभूतं च दर्शनमतः परस्परविरूपयोरेकसमये नास्ति संभव इति । भ० १८ श० ८ उ० । व्रतभङ्गभेदादतीचाराणां सम्यगवबोधे, ध० ४ अधि० ।

संप्रति [व्रतकर्माणि] ज्ञानाऽऽख्यं द्वितीयभेदं व्याचिख्यासुर्गाथोत्तरार्द्धमाह-

भंगयभेयइयारे, वयाण सम्मं वियाणेइ ॥ ३५ ॥

व्रतानामणुव्रताऽऽदीनामिहैव गाथार्द्धे नेदातिचारप्रस्तावे वक्ष्यमाणस्वरूपाणां भङ्गकान् द्विविधत्रिविधेत्यादीननेकप्रकारान् (सम्मं ति) सम्यक् समयोक्तेन विधिना विजानात्यवबुध्यते (३५) ध० २० ३५ गाथा । (भङ्गसङ्ख्याप्रदर्शनमनुपयुक्तत्वान्नेह प्रतन्यते)

विषयसूची-

(१) सव्युत्पत्तिकं ज्ञाननिर्वचनम् ।
(२) ज्ञानस्य पञ्चविधत्वम् ।
(३) ज्ञानभेदकारणानि ।
(४) आदौ मतिश्रुतोपन्यासे कारणनिरूपणानन्तरं मतिश्रुतानन्तरमवधेस्तत्समनन्तरं च मनःपर्यायज्ञानस्योपन्यासकारणनिरूपणं, केवलज्ञानस्य सर्वोपरि निर्देशे कारणं च ।
(५) प्रत्यक्षपरोक्षत्वाभ्यां ज्ञानस्य द्वैविध्यं प्ररूप्य केवलनोकेवलज्ञानभेदेन प्रत्यक्षज्ञानस्य द्वैविध्यप्रदर्शनम् ।
(६) अवधिमनःपर्यायज्ञानत्वेन केवलज्ञानस्य द्वैविध्यं निरूप्याऽऽभिनिबोधिकश्रुतज्ञानभेदेन परोक्षज्ञानस्य द्वैविध्यप्रदर्शनम् ।
(७) स्वाम्यादिभेदाद् मतिश्रुतभेदः ।
(८) प्रकारान्तरेणापि मतिश्रुतयोर्लक्षणभेदप्ररूपणा ।
(९) आचार्यभेदेन मतिश्रुतभेदार्थे शङ्कानिराकरणे ।
(१०) तदनन्तरं विशेषदूषणाभिधित्सया पुनरपि मतान्तरोपन्यासः ।
(११) कराऽऽदिचेष्टा मतेः कारणमेव न भवति,किन्तु श्रुतस्येतिशङ्कोद्घाटनम् ।
(१२) श्रुतानन्तरमवधिज्ञानस्य विवेकः ।
(१३) वस्तुतो ज्ञानस्य द्वैविध्यमेवेतिनिरूपणम् ।
(१४) न ज्ञानमात्मव्यतिरेकेण गुणः ।
(१५) ज्ञानज्ञानिनोर्भिन्नत्वस्वीकारे बन्धमोक्षाद्यवपरामर्शः ।
(१६) बोधमात्रं प्रमाणं, साकारो वा बोधः प्रमाणमित्यत्र वैनाशिकमतविचारः ।
(१७) जैमिनीयस्वीकृतप्रमाणलक्षणनिराकरणम् ।
(१८) प्रमाणमविसंवादि ज्ञानमिति सौगतनिर्मितलक्षणपरामर्शः ।
(१९) अव्यभिचाराऽऽदिविशेषणविशिष्टाऽर्थोपलब्धिजनिका सामग्री प्रमाणमितिनैयायिकमतव्युदासः ।
(२०) अनुव्यवसायप्रकाश्यं ज्ञानमित्यत्र नैयायिकमतमुद्घाट्य पर्यालोचना ।
(२१) ज्ञानस्य स्वप्रकाशकत्वे प्रदीपाऽऽदिदृष्टान्तमुपन्यस्य पैदार्थपरिशोधनम् ।
(२२) नित्यपरोक्षज्ञानवादिनां भट्टानाम्,एकात्मसमवायिज्ञानान्तरवेद्यज्ञानवादिनां यौगानां च मतस्य विकुट्टनम् ।
(२३) ज्ञानिनोऽज्ञानिनश्च निरूपणम् ।
(२४) तत्र नैरयिकजीवानधिकृत्य प्रदर्शनम् ।
(२५) द्वीन्द्रियाः सिद्धपर्यन्ताः ।
(२६) तान्येव गतिद्वारभवलभ्य चिन्तनम् ।
(२७) इन्द्रियद्वारमुपन्यस्य निरूपणम् ।
(२८) कायद्वारमुद्घाट्य प्ररूपणम् ।
(२९) सूक्ष्मद्वारमुद्दिश्य प्रदर्शनम् ।
(३०) पर्याप्तकद्वारे तत्प्रतिपादनम् ।
(३१) भवस्थद्वारतोऽपि तन्निर्देशः ।
(३२) अद्धयद्वारे ज्ञान्यज्ञानिविचारः ।

(३३) संज्ञिद्वारे तेषां निरूपणम् ।
(३४) लब्धिद्वारमधिकृत्य तत्परामर्शः ।
(३५) उपयोगद्वारमुपन्यस्य तद्दर्शनम् ।
(३६) योगद्वारे सयोज्ययोगिनां तद्विमर्शः ।
(३७) लेश्याद्वारे तथैव सलेश्यालेश्यानाम् ।
(३८) कषायद्वारे सकायिकाकायिकानाम् ।
(३९) वेदद्वारे सवेदकावेदकानाम् ।
(४०) आहारकद्वारे आहारकानाहारकाणाम् ।
(४१) तत्त्वसंवेदनं ज्ञानमिति चिन्तनम् ।
(४२) अज्ञानं सम्यग् ज्ञानादन्यद्, ज्ञानं तु भगवद्वचनम् ।
(४३) तत्र ज्ञानयोजना ।
(४४) त्रयाणां श्रुताऽऽदिज्ञानानां स्वरूपविभागः ।
(४५) तत्र श्रुतमयज्ञानस्य लक्षणम् ।
(४६) चिन्तामयज्ञानस्य लक्षणम् ।
(४७) भावनाज्ञानलक्षणम् ।
(४८) इहभविकपरभविकज्ञानविमर्शः ।
(४९) छद्मस्थजीवानधिकृत्य ज्ञानाऽऽदिपरामर्शः ।

णात–ज्ञात–न० । ज्ञायतेऽस्मिन् सति दार्ष्टान्तिकोऽर्थ इति ज्ञातम् । दृष्टान्ते, स्था० ।

ज्ञायतेऽस्मिन् सति दार्ष्टान्तिकोऽर्थ इति अधिकरणे क्तप्रत्ययोपादानाद् ज्ञातं दृष्टान्तः—साधनसद्भावे साध्यस्याऽवश्यंभावः, साध्याभावे वा साधनस्यावश्यमभाव इत्युपदर्शनलक्षणः । यदाह–"साध्येनानुगमो हेतोः, साध्याभावे च नास्तिता । ख्याप्यते यः स दृष्टान्तः, स साधर्म्येतरो द्विधा ॥१॥" इति । तत्र साधर्म्ये दृष्टान्तः–अग्निरत्र, धूमात्, यथा महानस इति । वैधर्म्यदृष्टान्तस्तु–अग्न्यभावे धूमो न भवति, यथा जलाऽऽशय इति । अथवा–आख्यानकरूपं ज्ञातं, तच्च चरितकल्पितभेदाद् द्विधा–तत्र चरितं यथा–निदानं दुःखाय ब्रह्मदत्तस्येव । कल्पितं यथा–प्रमादवतामनित्यं यौवनाऽऽदीनीति । निदर्शनीयं यथा–पाएसुपत्तेण किसलयानां देशितम् ।

तथाहि–

" जह तुम्भे तह अम्हे, तुम्भे वि य होइ हा ! जहा अम्हे ।
अप्पा हेउ पमंतं, पंसुयपत्तं किसलयाणं ॥ १ ॥ " इति ।

अथवा—उपमानमात्रं ज्ञातम्–सुकुमारः करः किसलयमिवेत्यादिवत् । अथवा– ज्ञातमुपपत्तिमात्रं ज्ञानहेतुत्वात्, कस्मात् ?, यवाः क्रीयन्ते, यस्मात् मुधा न लभ्यन्ते, इत्यादिवदित्येवमनेकधाऽपि साध्यप्रत्यायनरूपं ज्ञातमुपाधिभेदात् चतुर्विधं दर्शयति । स्था० ४ ठा० ३ उ० । " चउव्विहे णाते पण्णत्ते । तं जहा–आहरणे, आहरणतद्देसे, आहारणतद्दोसे, उवन्नासोवणए ।" स्था० ४ ठा० ३ उ० । (आहरणाऽऽदीनां व्याख्या स्वस्वस्थाने) मनुजक्षेत्रे व्यवस्थितानां मनोमात्रग्राहका ऋजुमतय इति कल्पसूत्रावचूर्ण्यादौ, तथा प्रज्ञापनावृत्तौ मनःपर्यायज्ञातम्, इदं चाऽतृतीयद्वीपद्विसमुद्रान्तर्वर्तिसंज्ञिमनोगतद्रव्यावलम्बनमिति व्याख्यानानुसारेण वर्तमानानामेव संज्ञिनां मनोगतपर्यायावलनात्सो जायत इति । तथा च सति यदुक्तं प्रज्ञापनाटीकायाम्–मनःपर्यायज्ञानमपि पल्योपमासंख्येयभागमतीतं जानातीति कथं संगच्छते ?, इति प्रश्ने उत्तरम्–वर्तिपदं मनुजक्षेत्राधिकक्षेत्रवर्तिसंज्ञिमनोगतद्रव्यावबोधनिषेधपरं, न तु वर्तमानसंज्ञिमनोगतद्रव्यावबोधनियमपरम्, तेनावधिज्ञानिवन्मनःपर्यायज्ञान्यपि यथोक्तातीतमनोगतभावान् जानातीति न कश्चिद् विरोध इति । १५० प्र० । सेन० २ उल्ला० ।

णाणंतराय–ज्ञानान्तराय–पुं० । ६ त० । श्रुतस्य तदुग्रहणाऽऽदौ विघ्ने, भ० ८ श० ६ उ० ।

णाणकप्प–ज्ञानकल्प–पुं० । श्रुतज्ञानविषयके कल्पे, पं० भा० ।

एत्तो उ णाणकप्पं, वोच्छामि अहाणुपुव्वीए ।
सुत्तुद्देसे वायरण–पमिच्छपुच्छपरियट्टअणुपेहा ॥
आयरियउवज्झाया, अह होति तु सुत्तकप्पविही ।
आयारमादि काउं, सुयं तु जा होति दिट्ठिवादो तु ॥
अंगाणंगपविट्ठं, कालियमुक्कालियं वा वि ।
तं पुण सव्वं पि भवे, संवादसमुट्ठितं च णिज्जूढं ॥
पत्तेयबुद्धजासिएँ, अह व समत्ती य होज्जाहि ।
पं० भा० । पं० चू० ।

(श्रुतकल्पाऽऽदीनां व्याख्या स्वस्वस्थाने)

णाणकसायकुसील–ज्ञानकषायकुशील–पुं० । ज्ञानमाश्रित्य कषायकुशीले, भ० २५ श० ६ उ० ।

णाणकिरियाणय–ज्ञानक्रियानय–पुं० । ज्ञानक्रियाद्वयं मोक्षहेतुरिति सिद्धान्तव्यवसिते नये, (रत्ना०) (' किरियाणय ' शब्दे तृतीयभागे ५५४ पृष्ठे क्रियाप्राधान्यमुक्तम्) (' णाणणय ' शब्दे ज्ञानप्राधान्यं वक्ष्यते)

अत्र समुच्चयवादी प्राह-ततः सम्यग्ज्ञानं सम्यक् क्रियासद्भावीचीनमेव फलसिद्धिनिबन्धनमित्यभ्युपगन्तव्यम्, न तु ज्ञानैकान्तः कान्तः । क्रियैकान्तोऽपि भ्रान्त एव । "यतः स्त्रीनद्यभोगज्ञो, न ज्ञानात् सुखितो भवेत् * । " इति तु न युक्तम् । यतः सम्यग्ज्ञानकारणैकान्तवादिनामयमुपालम्भो, न पुनरस्माकं, सम्यग्ज्ञानक्रिययोरुभयोरपि परस्परापेक्षयोः कारणत्वस्वीकारात् । न च नितम्बिनीमोदकाऽऽदिगोचरायां प्रवृत्तौ तद्विज्ञानं सर्वथा नास्त्येव, यतः–क्रियाया एव तत्कारणता कल्प्येत । तद्गोचरविज्ञानसनाथैव तत्र प्रवृत्तिः प्रीतिपरम्परोत्पादनप्रत्यला; अन्यथा–उन्मत्तमूर्च्छिताऽऽदेरपि प्रौढप्रेमपरायणप्रणयिनीनिषेवाऽऽश्लेषक्रियाऽपि तदुत्पादाय किं न स्यात् ? । अथासौ क्रियैव तत्त्वतो न भवति, सैव हि क्रिया तात्त्विकी, या स्वकीयकार्याव्यभिचारिणी; हन्त ! तर्हि तदेव तात्त्विकं ज्ञानं यत् स्वकीयकार्याव्यभिचारि कथं " स्त्रीमद्यनोगज्ञः " इत्युपालम्भः शोभेत ? । ततः कार्यमर्जयन्ती यथा निश्चयनयेन क्रिया क्रियोच्यते, तथा ज्ञानमपि; इति कश्चिद् व्यभिचाराभावाद् द्वयमेवैतत् फलोत्पत्तिकारणमनुगुणमिति । रत्ना० ७ परि० ।

अत्र यशोविजयोपाध्यायकृतो वेदान्तिभङ्ग्या समुच्चयवादः–

अत्र ज्ञानकर्मसमुच्चयवादे स्वपरसमयविचारः कश्चिद् लिख्यते-

क्रियानयः क्रियां ब्रूते, ज्ञानं ज्ञाननयः पुनः ।
मोक्षस्य कारणं तत्र, जूयस्यो युक्तयो द्वयोः ॥ १२८ ॥

तत्र मुमुक्षुकर्मव्यापारतन्त्रं तत्त्वज्ञानवृत्ति, न वा ?, इति विप्रतिपत्तिविधिकोटिरुदयनाचार्याणाम्, निषेधकोटिर्भास्करीयाणाम् ।

* "क्रियैव फलदा पुंसां, न ज्ञानं फलदं मतम्" । इति पूर्वार्धम् ।

तत्र भास्करीयाणामयमाशयः-तीर्थविशेषज्ञानमहादानयमनियमाऽऽदिकर्मणां निःश्रेयसकारणत्वं तावच्छब्दबलादेवावगम्यते। तत्त्वज्ञानव्यापारकत्वं तु तेषां निःश्रेयसे जनयितव्ये न तावच्छब्द एव बोधयति, तत्र तस्यौदासीन्यात् । न च साक्षात् साधनताव्याप्तेः साधनताप्रतीतेः परम्परायाश्चाकव्यापारमविधीकृत्य न घटत इत्यपूर्ववाक्यतान्यायेन शब्द एव वस्तुतः तत्त्वज्ञानव्यापारकतां बोधयितुं प्रगल्भते इति शङ्कापदं हृदि निधेयं, सामान्यशब्दोऽन्यतमविशेषबाधे तं त्यजति, न तु विशेषान्तरमुपादित्सितमपि विशिष्य बोधयतीति स्वभावाद् दृष्टान्तस्यैवासंप्रतिपत्तेः । न च कर्मणामाशुतरविनाशित्वेन व्यापारोऽवश्यं स्वीकरणीयः, तत्र दृष्टेन तत्त्वज्ञानेनैवोपपत्तावदृष्टकल्पनाया अन्याय्यत्वाद् लाघवसहकृतानुपपत्तिरेव तत्त्वज्ञानव्यापारकत्वे मानमिति वाच्यम्, तत्त्वज्ञानस्याऽपि व्यवहितत्वेन तत्राऽपि कर्मणोऽदृष्टद्वाराऽऽवश्यकत्वान्निःश्रेयसे द्वारद्वयकल्पने गौरवाद् निःश्रेयसे कर्मणामदृष्टद्वारा हेतुत्वे तत्त्वज्ञानोत्पत्त्यनन्तरमपि यमनियमाऽऽद्यनुष्ठानं स्यादिति चेत्,स्यादेव; तदानीमपि मुमुक्षायां अधिकारस्याकृतेः । न च तत्त्वज्ञानत्वेनैव मोक्षजनकत्वात् प्राथमिकतत्त्वज्ञानादेव मोक्षोत्पत्तौ कथं कर्मानुष्ठानमिति शङ्कनीयम् ? ।

" नित्यनैमित्तिकैरेव, कुर्वाणो दुरितक्षयम् ।
ज्ञानं च विमलीकुर्व-न्नभ्यासेन तु पाचयेत् ॥ १ ॥
अभ्यासात् पक्वविज्ञानः, कैवल्यं लभते नरः " ।

इत्यादि पुराणेषु तदभ्यासश्रवणात् ।

श्रुतिरप्यत्र विपक्षबाधकतया प्रमाणमस्ति । तथाहि-"अन्धंतमः प्रविशन्ति येऽविद्यामुपासते । ततो भूय इव ते तमो य उ विद्यायां रताः।" अस्या अर्थः-अविद्या कर्म,तदुपासते-ज्ञानत्यागेन तत्राऽऽसक्ता भवन्ति ये तेऽन्धंतमः प्रविशन्ति,संसारान्न मुच्यन्ते, तेन केवलकर्मोपासने न जन्माऽऽदिविच्छेदः। ये च विद्यायां रताः,विद्यातत्त्वज्ञानं, तन्मात्राऽऽसक्ताः, उ इत्यव्ययं चकारार्थम् । ते भूयोऽतिशयेन अन्धंतमः प्रविशन्ति,नित्याकरणे प्रत्यवायस्य बहुतरत्वात् । ननु " मोक्षाऽऽश्रमश्चतुर्थो वै,यो भिक्षोः परिकीर्तितः" इत्यागमाच्चतुर्थाऽऽश्रमिणामेव मोक्षेऽधिकारः। तत्र च "संन्यस्य सर्वकर्माणि" इति स्मृतेः कर्ममात्रत्यागात् कथं समुच्चयः, कथं वाऽकरणे प्रत्यवाय इति चेत् । न । यानि कर्माणि उपनीतमात्रकर्तव्यत्वेन विहितानि,तत्परित्यागस्याशास्त्रीयत्वात् संकोचे मानाभावात्, निषिद्धानि काम्यानि च बन्धहेतुत्वाऽनमूलानि च धनत्यागादेव त्यज्यन्त इत्येतावत एव संन्यासपदार्थत्वात् ।

तथा च गीतावचनम्-

" काम्यानां कर्मणां न्यासं, संन्यासं कवयो विदुः । "
" नियतस्य तु संन्यासः, कर्मणो नोपपद्यते ।
मोहात्तस्य परित्यागः, तामसः परिकीर्तितः ॥ " इति ।

साक्षात्समुच्चयप्रतिपादिकाऽपि श्रुतिः—" अविद्यां च विद्यां च यस्तद्वेदोभयं सह । अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते । " अत्राविद्यां कर्म, विद्यां च तत्त्वज्ञानं तुल्यं चेह यो वेद प्राप्नोतीति पूर्वार्द्धार्थः । वेदेति प्रयोगाद् 'विदृ ' ज्ञाने इति धातोरुच्चारणसत्त्वेन भास्करीयैर्दर्शितत्वात् । " तमेव विदित्वा ऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय । " इति वाक्यं त्वेवकारस्य विदित्वा इत्यनन्तरं श्रोजनात् तत्त्वज्ञानस्याप्यपवर्गसामग्रीनिवेशननियमपरं, न तु वाक्यान्तरावधृतकारणताककर्मव्युदासपरम् । समुच्चयेऽन्यान्यपि भूयांसि वचनानि सन्ति । तथा च गीतावचनम्-" स्वे स्वे कर्मण्यभिरतः, संसिद्धिं लभते नरः । स्वकर्मणा तमभ्यर्च्य, सिद्धिं विन्दति मानवः " ॥१॥ विष्णुपुराणेऽप्युक्तम्-" तस्मात् तत्प्राप्तये यत्नः, कर्तव्यः पण्डितैर्नरैः । तत्प्राप्तिहेतुर्विज्ञानं, कर्म चोक्तं महामते ! " ॥ १ ॥ हारीतः-" ज्ञानकर्मभ्यां, प्राप्यते ब्रह्म शाश्वतम् ॥ १ ॥ " श्रुतिश्च-" सत्येन लभ्यः तपसा ह्येष आत्मा सम्यग्ज्ञानेन ब्रह्मचर्येण च " इति । एतन्मूलकमेव परिव्राजादि लिङ्गं प्रमाणम् । " न ह्येकपक्षो विहगः प्रयाति " इत्यादि । न च काम्यनिषिद्धनैमित्तिकाभ्यां कर्मभ्यां न समुच्चयः, तयोस्त्यागात् , न नैमित्तिककाम्ययोर्नैकैकशो व्यभिचारात् संकल्पेनासंभवात् । नाऽपि यत्याश्रमविहितेन-" न्यायाऽऽगतधनस्तत्त्व-ज्ञानिष्ठोऽतिथिप्रियः। श्राद्धकृत् सत्यवादी च, गृहस्थोऽपि विमुच्यते ॥ १ ॥ " इत्यागमेन गृहस्थस्यापि मोक्षश्रवणादित्युपपत्तिविरोधादेव न समुच्चय इति वाच्यम्; यत्राऽऽश्रमे यानि मोक्षहेतुतया विहितानि, तैरेव तदाश्रमे तत्त्वज्ञानस्य समुच्चयोपपत्तेः । न च कर्मणां परस्परव्यभिचाराच्चित्तशुद्धेः स्वर्गवद् वैचित्र्याभावाच्च तत् प्रति कारणत्वमिति वाच्यम्, ज्ञानाविकविशेषाविरहेऽपि प्रतियोगिभेदेन विशेषस्य निःश्रेयसेऽप्यविरोधात् । तत्पुरुषीयमुमुक्षुविहितकर्मत्वेन तत्पुरुषीयविजातीयदुःखध्वंसे हेतुत्वसंभवात् , अवश्यं चानावरूपे कार्ये प्रतियोगिभेदेन विशेषोऽभ्युपेयः , कथमन्यथा आश्रयनाशपाकयोः रूपनाशकारणत्वमिति । न च ज्ञानस्य विहितत्वाददृष्टजनकत्वेनादृष्टस्यैव प्राधान्यम् , न च रागाऽऽद्यभावाद् योगिनोऽदृष्टोत्पत्त्यसंभवः, मुक्तिविरोध्यपूर्वोत्पत्तावेव रागाऽऽदेः सहकारित्वात् तावतैव मोक्षफलकविघ्नानुपपत्तिपरिहारादिति वाच्यम् , मुक्त्यादितत्त्वज्ञानसाध्यतया कृतेन मिथ्याज्ञानविध्वंसेन दृष्टेनैवोपपत्तावदृष्टकल्पनायोगात् । अन्यथा नेषज्ञाऽऽदिष्वपि तत्कल्पनाऽऽपत्तेः। एवं च विहितत्वं तत्रैव व्यभिचारादिति द्रष्टव्यम् । न चावघातवन्नियमादृष्टकल्पना, तत्र वैतुष्यस्याऽन्यथाऽपि संभवेन सा, अत्र तु मिथ्याज्ञानस्य निवृत्तेः, अन्यथाऽसंभवा इति विशेषात् । नन्वत्रापि विरोधिगुणयन्तरोत्पत्तेरपि मिथ्याज्ञानध्वंसः संभवति । न च मिथ्याज्ञानपदं तद्वासनापरं, तत्त्वज्ञानात् तद्ध्वंसस्यैवाङ्गीकारात्, तस्य चान्यथाऽसंभव एवेति वाच्यम्, अचिकित्स्यरोगाऽऽदिना तस्याऽपि संभवात्। न चेतरवासनानाशेऽपि न ततः संसारवासनाया अनाश इति वाच्यम्, सामान्यावच्छेदेन पाक्षिकप्राप्तेरेव नियममूलत्वात् । अन्यथाऽपूर्वाय व्रीहिविशेषे नखनिर्भेदाप्राप्तेः, तत्राऽपि नियमादृष्टानुपपत्तिरिति चेत् । न । शक्यपरिव्राजनपाक्षिकप्राप्तेरेव नियममूलत्वात् । यथा व्रीहीनवहन्तीत्यत्र पक्वे प्राप्तस्य नखनिर्भेदाऽऽदेः शक्येन परिव्राजनेनावघातो नियम्यते-अवहन्तव्या एव, न नखैर्निर्भेत्तव्या इति नेत्रमत्र तत्त्वज्ञानेनैव मिथ्याज्ञानं निवर्तयेत्,न विरोधिगुणरागाऽऽदिना इति शक्यं प्रतिक्षेतुम्, तस्यापुरुषतन्त्रत्वात्। अत एव प्रोक्षितव्रीह्यवघातत्वेनैव श्रवणजन्यतत्त्वज्ञानत्वेन नियमादृष्टहेतुत्वमौत्सर्गिकमिति निरस्तम, प्रोक्षणाऽऽदेः प्रधानाङ्गत्वेन प्रधानापूर्वफलकादृष्टजनकत्वात् । तत्र तथोक्तिसंभवेऽप्यत्र प्रधानस्यैव दृष्टफलत्वेन तथा वक्तुमशक्यत्वात् । किञ्च-अत्र विजातीय-

तत्त्वज्ञानत्वेनैव दृष्टद्वारा मुक्तिहेतुत्वाद् न नियमादृष्टकल्पना। तत्र वैजात्येनैव हेतुत्वे तत्त्वच्छिन्ने प्रोक्षणहेतुत्वोक्तौ करणत्वे प्रोक्षणबाधाऽऽपत्तेः। न चावहन्त्यप्रोक्षणत्वेनाप्यदृष्टहेतुत्वात् तत्राऽपि नियमादृष्टं कल्पनीयम्, दृष्टार्थस्यैव नियमादृष्टार्थस्य सिद्धान्तत्वादित्यन्यत्र विस्तरः।

उदयनानुसारिणस्तु-अनुत्पन्नतत्त्वज्ञानस्य ज्ञानार्थिनः तत्प्रतिबन्धकदुरितनिवृत्तिद्वारा प्रायश्चित्तवत् आरादुपकारकं कर्म, संनिपत्योपकारकं च तत्त्वज्ञानम्, उत्पन्नतत्त्वज्ञानस्य त्वन्तरङ्गधर्मादृष्टेः कारीरीसमाधिवदारब्धाग्निमपालनं लोकसंग्रहार्थम्, यद्यपि लोकसंग्रहे न प्रयोजनं, सुखदुःखाभावतत्साधनेतरत्वात्,तथाऽप्यकरणे लोकानामनित्यत्वेन यत् ज्ञाने तत्परिहारार्थम्, तत्तद्दुःखयोगेन कर्मनाशार्थं वा तत्। इदमेव च द्वारिद्वारयोः कर्मतत्त्वज्ञानयोः कारणत्वं,तुल्यकक्षतया समुच्चयो नेष्ट इत्यनेन विवक्ष्यते। यद्यपि च तीर्थविशेषस्नानाऽऽदीनां तत्त्वज्ञानव्यापारकत्वं न शाब्दं, तथाऽपि तीर्थविशेषस्नानाऽऽदीनि तत्त्वज्ञानद्वारकाणि,मोक्षजनककर्मत्वाद्, यमाऽऽदिवदित्यनुमानात्तथात्वसिद्धिः। न च योगत्वमुपाधिः, "कथयति भगवानिहान्तकाले, भवभयकातरतारकं प्रबोधम्" इत्यादिपुराणात् "रुद्रस्तारकं ब्रह्म व्याचष्टे" इति श्रुतेश्च काशीप्रयागाऽऽदेः तत्त्वज्ञानव्यापारकत्वसिद्धौ तत्र साध्याव्यापकत्वादित्याहुः।

स्वतन्त्रास्तु-तत्त्वज्ञानं प्रत्यङ्गत्वपक्षे कर्मणामपूर्वद्वारा जनकत्वं, दुरितध्वंसकल्पनातो लघुत्वात्। वस्तुतः कर्मणां निःश्रेयसहेतुत्वे तज्जन्यनिःश्रेयसजनकतया तत्त्वज्ञानस्य कर्मव्यापारत्वं वाच्यं,तदेव तु न युक्तम्। "न कर्मणा न प्रजया धनेन। नान्यः पन्था विद्यतेऽयनाय। नास्त्यकृतः कृतेन"। "कर्मणा बध्यते जन्तु-र्विद्यया च विमुच्यते। तस्मात् कर्म न कुर्वन्ति, यतयः पारदर्शिनः ॥१॥" इत्यादिश्रुतिस्मृतिशतेन निषेधात्, कर्मजन्यत्वाभावाच्च। "तपसा कल्मषं हन्ति। विद्यया च मृत्युं तीर्त्वा। ततस्तु तं पश्यति निष्कलं ध्यायमानः, कषायपक्तिः कर्मभ्यः" इत्यादिभिस्तत्त्वज्ञानोत्पत्तिप्रतिबन्धकदुरितनिवृत्तेश्चान्यथासिद्धेः प्रदर्शनात्। न च "विविदिषन्ति यज्ञेन" "सर्वं कर्माखिलं पार्थ !, ज्ञाने परिसमाप्यते" इत्यादिभिः कर्मजन्यताऽपि प्रतीयत इति वाच्यम। सा हि नापूर्वद्वारा प्रतिबन्धकदुरितानुच्छेदेऽपूर्वसहस्रस्याप्यकिञ्चित्करत्वात्, तदुच्छेदेन तज्जनने तु प्रमाणान्तरावधृतकारणाभावेन प्रतिबन्धकाभावेनैवान्यथासिद्धेः। न चैवं यागाऽऽदेरप्यपूर्वेणान्यथासिद्धिः स्यात्, तस्य यागकारणताग्रहोत्तरकल्प्यत्वेनोपजीव्यापरिपन्थित्वात्; इह तु प्रतिबन्धकाभावस्य कार्यमात्रकारणतायाः प्रागेवावधारणमिति शेषात्। अत एव मङ्गलकारीयोः प्रतिबन्धकदुरितनिवृत्तिमात्रफलकत्वं, वृष्टिसमाप्ती तु स्वकारणादेवेति सिद्धान्तः *। किञ्च-कर्मकारणताग्रहानुपजीवनेन लौकिकान्वयव्यतिरेकावधृतमिथ्याज्ञाननिवर्तनभावसंभावितस्य मोक्षसाधनत्वस्य "ज्ञानादेव तु कैवल्यम्, तरति शोकमात्मवित्, ब्रह्मविदाप्नोति परं, ब्रह्मविद् ब्रह्मैव भवति," इत्यादिश्रुतिस्मृतिशतेन तत्त्वज्ञानादिष्टतया ग्रहणात् तदेव मोक्षसाधनम्। कर्माणि तु तत्रैवान्यथासिद्धानीति युक्तं, यथा च न तत्रापि व्यापारः तथोक्तमेव। अत एवार्थावबोधपर्यन्ताध्ययनविधेः, न तु तेन कृत्वाऽनुष्ठानेन स्वर्गाऽऽदिफलकत्वमिति संप्रदायः। न च तत्त्वज्ञानस्य कर्मणां निःश्रेयसप्रागभावव्याप्यप्रागभावप्रतियोगित्वरूपतदनुकूलताबोधने एव तात्पर्यात् मुख्यान्तरसिद्धेऽन्यथासिद्धत्वे तदन्यथासिद्धताया बोधयितुमशक्यत्वात्साक्षतैव श्रुतेः कर्मप्रवृत्तिपरतानिर्वाहादित्याहुः।

अत्र वयं वदामः-मोक्षस्तावत् पुरुषार्थत्वाद् दुःखसाधनकर्मध्वंस एव,न तु दुःखध्वंसः,उत्पन्नानुत्पन्नविवेकेन तद्ध्वंसस्याऽसाध्यत्वात्। तत्र च ज्ञानकर्मणोर्वैजात्येन मुमुक्षुविहितत्वादेव हेतुत्वं तुल्यमेवेत्येकतरपक्षपातो न श्रेयान्। ज्ञाने केवलज्ञानत्वरूपस्य, कर्मणि च यथाख्यातचारित्रत्वरूपस्य वैजात्यस्य कल्पनायाः क्षायिकस्थले क्षायोपशमिकस्थले च तदनुकूलतामात्रस्य द्वयोस्तुल्ययोगक्षेमत्वात्। एतेन कारणोच्छेदकमेण कार्योच्छेदाद् मुक्तिरिति ज्ञानकर्मसहकारित्वं मिथ्याज्ञानोन्मूलने कर्मविनाशकृतस्यैव तस्य दिग्मोहाऽऽदौ हेतुत्वावधारणाऽऽदि निरस्तम्; मिथ्याज्ञाननाशेऽपि विरोधिगुणमात्रस्य हेतुत्वात्, मिथ्याज्ञानप्रभावासहवृत्तिमिथ्याज्ञानध्वंसे च हेतुतायां लोकप्रमाणाविषयत्वेन ज्ञानकर्मणोर्द्वयोरेव कल्पनौचित्यात्। वस्तुतः आर्षसमाजसिद्धत्वात् तद्रूपावच्छिन्नेऽपि न हेतुता, किं तु सामान्यावच्छिन्नध्वंसनये कर्मत्वावच्छिन्नध्वंसे, तत्समं यावत् कर्मक्षयसमनियतक्षायिकसुखत्वावच्छिन्ने वेति न कस्यापि न्यूनत्वम्, परानिमतद्वारस्थान एव फलाभिषेकात्। एकपुरस्कारेणान्यनिराकरणवचनं च तत्तदर्थवाद एवेति न कर्मकारणताबोधकवचनेऽनुकूलत्वमात्रमर्थः। कारणता शक्तपदस्यानुकूलत्वम्, लक्षणायां गौरवात्। अन्यथा सिद्धिश्चतुष्टयराहित्यगर्भत्वेन तत्र लाघवमिति दृष्टिदाने च विधिप्रत्ययमात्रार्थाऽपीष्टानुकूलत्वमात्रमेव स्यादिति यागाऽऽदेरप्यपूर्वेणान्यथासिद्धिः कर्मणाम्, न तत्त्वज्ञाने। न च तद्द्वारा मुक्तौ हेतुत्वमित्युक्तम्। तदपि न युक्तम्। प्रतिबन्धकत्वस्य विशिष्य विश्रामेण तदभावकार्यमात्रेऽनुगतहेतुताया अयोगात्, प्रतिबन्धकविशेषनिवृत्तिहेतुतायाश्च कर्मकारणताग्रहोत्तरकल्पनीयत्वेन तदन्यथासिद्धत्वेनापादकत्वात्। किं च-प्रतिबन्धकनिवृत्त्याऽन्यथासिद्धत्वेन कर्मणोऽहेतुत्वोक्तौ तत्त्वज्ञानस्य सुतरां तथात्वं स्यात्। न हि उत्पन्नकेवलज्ञाना अपि भवोपग्राहिकर्मचतुष्टयं प्रतिबन्धकमनिवर्तयित्वा सद्य एव मुक्तिमासादयन्तीति मुक्तिप्रतिबन्धककर्मनिवर्तकत्वेन तत्त्वज्ञानस्य कुतोऽनान्यथासिद्धिः?। अथ कर्मणो भोगनाश्यत्वेन ज्ञानस्य तदनाशकत्वाद् नान्यथासिद्धिः, न हि भोगस्तत्त्वज्ञानव्यापारः,तथाऽश्रवणात्, तेन विनाऽपि कर्मण एव तदुपपत्तेश्च। न च वासुदेवाऽऽदीनां कायव्यूहश्रवणात् तत्त्वज्ञानेन कायव्यूहमुत्पाद्य भोगद्वारा कर्मक्षयमित्यपि साम्प्रतम्,तपःप्रभावादेव तत्त्वज्ञानस्योत्पादेऽपि कायव्यूहसंभवाद् भोगजननार्थं कर्मभिरवश्यं तत्कार्यनिष्पादनमिति न तत्र तत्त्वज्ञानोपयोगः, यौगपद्यं च कायानां तज्जनककर्मस्वभावात्तपःप्रभावाद्वेति। न च "तावदेवास्य चिरं यावन्न विमोक्षोऽथ संपत्स्यते कैवल्येन" इति श्रुतौ तावदेवास्योत्पन्नतत्त्वज्ञानस्य चिरं विलम्बो यावन्नोत्पन्नकर्मणो विमोक्षः। 'अथ संपत्स्यते कैवल्येन' भोगेन क्षपयित्वेति शेष इति व्याख्यानाद् भोगस्य तत्त्वज्ञानव्यापारत्वं युक्तमेव। न च शेषदाने मानाभावः, सत्यपि ज्ञाने कर्मावस्थाने फलसामान्यभोगस्यैव नाशकत्वेनाऽऽक्षेपादिति वाच्यम्, तत्त्वज्ञाने सति तत्त्वज्ञानदशायां न मोक्षः, किं तु तदपि अक्षण (?) इत्यर्थेनाप्युपपत्तेरिति चेत्। मैवम। कर्मणो भोगनाश्यत्वेऽपि ज्ञानस्य कर्मनाशकत्वम्, भोगस्य तत्त्वज्ञानाव्यापारत्वात्। न च तत्त्वज्ञा-

* नवीनानाम्।

नं विनाऽपि भोगेन कर्मनाशे व्यभिचारः, कर्मप्रागभावासहवृत्तिकर्मनाशे युगपद्भोगे वाच्यव्यभिचाराभावादिति मणिकृतैवोक्तत्वात् ।

अस्मिन्सिद्धान्तेऽपि नाशार्थिवृत्तौ नाश्यनिश्रयविधयैव केवलज्ञानस्य कर्महेतुत्वमनपायम् । तदुक्तं निर्युक्तौ समुद्घाताधिकारेण-" ऊणवेयणिउज्जं अहवहुयं आउयं च थोवग्गं बंधंति जिणा समुग्घायं । " अत्र क्त्वाप्रत्ययबलादेव नियतवर्णोपर्यस्यार्थाज्ञानन्यसिद्धत्वस्य प्रतीतेः कारणत्वलाभे अन्यदप्याभोगवीर्यस्यैव केवलिनः कर्मक्षयहेतुत्वाद्भोगान्वितवीर्यत्वेनैव वीर्यान्विताऽऽभोगत्वेनापि हेतुत्वादुक्तार्थसिद्धिः । यत्पुनः " दोषपक्तिर्मतिज्ञानात्, अकिञ्चिदपि केवलात् । तमःप्रचयनिःशेष-विशुद्धिफलमेव तत् " ॥ १ ॥ इत्यनेन केवलज्ञानस्याकिञ्चित्करत्वमुच्यते, न दोषपक्तिरूपकार्यापेक्षया, न तु पक्वानां भवोपग्राहिणां कर्मणरूपकार्यमप्याश्रित्य, तत्तद्व्यापारस्य सदा जागरूकत्वात् । यदि च स्वरूपशुद्धिग्राहकनयेन १ केवलज्ञानस्य निर्व्यापारत्वं स्वीक्रियते, तदा यथाख्यातचारित्राऽऽत्मकक्रियाया अपि तथात्वमेवाभ्युपगन्तुं युक्तम्; समुद्घाताऽऽदिना कर्मक्षपणव्यापारस्य योगविशेषेणैव वक्तुं शक्यत्वात् । मुक्तिबन्धहेतुविवेकेन फलशुद्धिग्राहकनयेन तत्र चारित्रहेतुत्वाभ्युपगम्यमानो ज्ञानहेतुतामपि न व्याहन्ति । २ । अनन्तकारणग्राहकनयेन तत्र चारित्रमेव हेतुरिति चेत् । न । उत्पत्त्यनन्तरत्वस्य यथाऽऽख्यातचारित्रापेक्षया केवलज्ञान एव संभवाद्, व्यापारानन्तर्यस्य च कल्प्यमानस्योभयत्रापि विनिगमात् । ३ । एतेनाऽऽक्षेपककारणग्राहकनयेन-"जम्हा दंसणनाणा" इत्यादिवचनाच्चारित्रमेव मुक्तिहेतुरित्यपि निरस्तम् । आक्षेपकत्वं हि स्वेतरसकलकारणसमवधाननियतसमवधानकत्वं, तच्च यथाख्यात इव केवलज्ञानेऽपीत्यविशेषात् क्रियोपशमदशायामप्यपुनर्बन्धकाऽऽदिचारित्रव्याप्तज्ञातिविशेषवतश्चारित्रस्येव विषयप्रतिभासाऽऽत्मपरिणामज्ञानोर्ध्वप्राविनिस्तत्त्वज्ञानस्याऽऽक्षेपकत्वाविशेषात् । ४ । मुख्यैकशेषनयेन चारित्रमेवोत्कृष्यत इति चेत् । न । तत्र मुख्यत्वस्यैव विनिगन्तुमशक्यत्वात् । ५ । पुमर्थग्राहकनयेन क्रियायामेव मुख्यत्वं विनिगम्यत इति चेत् । न । परमभावग्राहकनयेन ज्ञान एव तन्निगमनायाः सुवचत्वात् । ६ । "जं सम्मं ति पासहा, तं मोणं ति पासहा " इत्यादिवचनात् कारकसम्यक्त्वशरीरनिर्वाहकत्वनयेन चारित्रमेवोत्कृष्यत इति चेत् । न । " जं अन्नाणी कम्मं खवेइ " इत्यादिवचनात् । सम्यक्क्रियाशरीरनिर्वाहकत्वनयेन चारित्रमेवोत्कृष्यत इति चेत् । न । " जं अन्नाणी कम्मं खवेइ " इत्यादिवचनात् सम्यक् क्रियाशरीरनिर्वाहकत्वनयेन ज्ञानेऽप्युत्कर्षस्य वक्तुं शक्यत्वात् । ७ । एतेन ' सिज्झयणयस्स चरण-स्सुवघाएण नाणदंसणवहो वि । " इत्यादिवचनात् ज्ञाननाशव्याप्यनाशप्रतियोगित्वग्राहकशुद्धनयेन ज्ञानातिशयस्याप्यदुर्वचत्वात् । ८ । व्यापारप्राधान्यग्राहकक्रियानयेन चारित्रोत्कर्ष इत्युक्तावपि दर्शनप्रधानग्राहकज्ञाननयेन ज्ञानोत्कर्षः सुवच एव । ९ । दृष्टान्तौ चात्र पङ्गवन्धौ । तयोरन्यतरस्याऽकिञ्चित्करत्वेन संयोगपक्ष एव श्रेयान् । न च कुर्वद्रूपत्वनये शैलेश्यन्त्यक्षणप्राप्ते चारित्रमुक्तम्, एवं मुक्तिरूपफलोपधायकत्वेन विशिष्यत इत्यपि शङ्कनीयम्, कुर्वद्रूपक्षणस्य सहकारिसमवधाननियतत्वेन तत्कालेनिक्षानक्षणस्यापि मुक्तिहेतुत्वात् । पुञ्जात पुञ्जोत्पत्तिपक्षे बीजपाथःपवनाऽऽदीनामेकत्रोपादानत्वेन, अन्यत्र च निमित्तत्वेन हेतुत्वमिति चारित्रक्षणस्य मुक्तावुपादानत्वेन हेतुत्वाद्विशेष इत्यप्यसाम्प्रतम्, क्षणाऽऽदिसंवलितमुक्तिक्षणे संवलितक्षणस्यैव हेतुत्वात् । तच्चाऽतद्व्यावृत्त्या, शक्तिविशेषाऽऽदिना वेत्यन्यदेतत् । कथं तर्हि- "सद्दुज्जुसुआणं पुण, निव्वाणं संजमो चेव । " इति निर्युक्तिवचनं श्रद्धानम्, तेषां कुर्वद्रूपक्षणावगाहित्वात्, तत्र चैकान्तस्यानुपपन्नमेव निरस्तत्वादिति शङ्कनीयम्; एकैकस्य शतभेदत्वेनाऽपेक्षाकारणत्वरूपस्थूलापेक्षयैव तदेकान्ताभिधानोपपत्तेः । अत एव शैलेश्यन्त्यक्षणप्राप्तिधर्महेतुत्वमिति विशुद्धैवंभूताऽभिप्रायेणैवास्माभिस्तत्र तत्र समर्थितम् । ये तु मिथ्यादृशो मिथ्याज्ञानोन्मूलनद्वारा तत्त्वज्ञानमेव युक्तिहेतुरिति मन्यन्ते, ते मिथ्याज्ञानोन्मूलनेऽपि तत्तन्मनःप्रणिधानरूपक्रियाया हेतुत्वं कथं न पश्यन्ति ? । मिथ्याज्ञानवासनोन्मूलनवत्कर्मनिरपेक्षं तत्त्वज्ञानं हेतुरिति चेत्तर्हि अदृष्टपरिकल्पनमेतत् । मिथ्याज्ञानिवासनायाः स्मृत्येकनाश्यत्वात् तत्त्वज्ञानस्य तन्नाशताया लोकेऽदृष्टत्वाद्, अदृष्टकल्पने चाऽऽगमानुसारेणाज्ञानवत्कर्मणोऽपि मलक्षयद्वारा मुक्तिहेतुत्वकल्पनमेव न्याय्यः । तथा चाभ्यधात् सूरोऽपि वासिष्ठे- " तन्दुलस्य यथा चर्म, यथा ताम्रस्य कालिका । नश्यति क्रियया पुत्र !, पुरुषस्य तथा मलम् " ॥ १ ॥ इत्यादि । किं च-विहितत्वेन पुण्यपापक्षयान्यतरहेतुत्वन्यासे तत्त्वज्ञानस्य कर्मतुल्यत्वम् । न च किञ्चित् सादावेव व्यभिचारः, मुमुक्षुविहितत्वेन व्यासौ व्यभिचाराभावादिति पुष्टिशुद्धनुबन्धद्वारा ज्ञानकर्मणोर्मुक्तौ तुल्यवदेव हेतुतया समुच्चयपक्ष एवानाविल इति सिद्धम् । (नयो०)

ज्ञानमेव शिवस्याधा, मिथ्यासंस्कारनाशनात् ।
क्रियामात्रं त्वभव्याना–मपि नो दुर्लभं भवेत् ॥ १३३ ॥
तन्दुलस्य यथा चर्म, यथा ताम्रस्य कालिका ।
नश्यति क्रियया पुत्र !, पुरुषस्य तथा मलम् ॥ १३४ ॥
बर्बरश्च * तपस्वी च, शूरश्चाप्यकृतव्रणः ।
मद्यपा स्त्री सती चेति, राजन् ! न श्रद्दधाम्यहम् ॥ १३५ ॥
ज्ञानवान् शीलहीनश्च, त्यागवान् धनसंग्रही ।
गुणवान् ज्ञाग्यहीनश्च, राजन् ! न श्रद्दधाम्यहम् ॥ १३६ ॥
इति युक्तिवशात् प्राहु–रुभयोस्तुल्यकक्षताम् ।
मन्त्रेऽप्याहानं देवाऽऽदेः, क्रियायुग् ज्ञानमिष्टकृत् ॥ १३७ ॥
ज्ञानं तुर्ये गुणस्थाने, क्षायोपशमिकं भवेत् ।
अपेक्षते फले षष्ठ–गुणस्थानजसंयमम् ॥ १३९ ॥
प्रायः संभवतः सर्व–गतिषु ज्ञानदर्शने ।
तत्प्रमादो न कर्तव्यो, ज्ञाने चारित्रवर्जिते ॥ १३८ ॥
क्षायिकं केवलज्ञान–मपि मुक्तिं ददाति न ।
तावन्नाविर्भवेद् याव–च्छैलेश्यां शुद्धसंयमः ॥ १३९ ॥
व्यवहारे तपोज्ञान–संयमा मुक्तिहेतवः ।
एकः शब्दर्जुसूत्रेषु, संयमो मोक्षकारणम् ॥ १४० ॥
संग्रहस्तु नयः प्राऽऽह, जीवो मुक्तः सदा शिवः ।

* बठरश्चेति पाठान्तरम् ।

अनवाप्तिन्यायात् करण-स्वर्णन्यायात् क्रिया पुनः॥१४१॥
अनन्तमर्जितं ज्ञानं, त्यक्ताश्चानन्तविभ्रमाः।
न चित्रं कलयाऽप्यात्मा, हीनोऽनूदधिकोऽपि वा॥१४२॥
धावन्तोऽपि नयाः सर्वे, स्युर्ज्ञाने कृतविश्रमाः।
चारित्रगुणलीनः स्या-दिति सर्वनयाऽऽश्रितः॥१४३॥
सुनिपुणमतिगम्यं मन्दधीदुष्प्रवेशं,
प्रवचनवचनं न क्वाऽपि हीनं नयौघैः।
गुरुचरणकृपातो योजयंस्तान् पदे यः,
परिणमयति शिष्यांस्तं वृणीते यशःश्रीः॥ १४४॥
गच्छे श्रीविजयाऽऽदिदेवसुगुरोः स्वच्छे गुणानां गणैः,
प्रौढिं प्रौढिपधाम्नि जीतविजयप्राज्ञाः परामैयरुः।
तत्सातीर्थ्यभृतां नयाऽऽदिविजयप्राज्ञोत्तमानां शिशुः,
तत्त्वं किञ्चिदिदं 'यशोविजय' इत्याख्याभृदाख्यातवान्॥१४५
नयो०।

नाणं किरियारहियं, किरियामित्तं च दो वि एगंता।
असमत्था दाएउं, जम्ममरणदुक्ख मा भाइ॥ ६८॥

ज्ञायते यथावद् जीवाजीवाऽऽदितत्त्वमनेनेति ज्ञानम्, क्रियत इति क्रिया यथोक्तानुष्ठानम्, तया रहितं, जन्ममरणदुःखेभ्यो मा भैषीरिति दर्शयितुम्, दातुं वाऽसमर्थम्। न हि ज्ञानमात्रेणैव पुरुषो भयेभ्यो मुच्यते, क्रियारहितत्वाद्, दग्धप्रदीपनकप्रपलायमानपङ्गुवत्। क्रियामात्रं वा ज्ञानरहितं न भयेभ्यो मा भैषीरिति दर्शयितुं दातुं वा समर्थम्। न हि क्रियामात्रात् पुरुषो भयेभ्यो मुच्यते, ज्ञानविकलत्वात्, प्रदीपनकभयप्रपलायमानान्धवत्। तथा चाऽऽगमः-"हयं नाणं कियाहीणं, हया अन्नाणओ किया। पासंतो पंगुलो दड्ढो, धावमाणो अ अंधओ" ॥३६॥ (महा०) ('मोक्ख' शब्दे चैतद् विवेचयिष्यते) उभयसङ्गावस्तु तेभ्यो मा भैषीरिति दर्शयितुं समर्थः। तथा हि-सम्यग्ज्ञानक्रियावान् भयेभ्यो मुच्यते, उभयसंयोगत्वात्, प्रदीपनकनयान्धस्कन्धाऽऽरूढपङ्गुवत्। (सम्म० ३ काण्ड)

उक्तं च-

संजोगमिद्धीएँ उ गोयमा! फलं,
न हु एगचक्केण रहो पयाइ।
अंधो य पंगू य वणे समिच्चा,
ते संपउत्ता नगरं पविट्ठा॥ ३७॥
नाणं पयासयं सोहउ, तवो संजमो य गुत्तिकरो।
तिण्हं पि समाजोगे, मोयम! मोक्खो न अन्नहा॥३८॥
महा० १ अ०।

(संजोगसिद्धीएत्यादि) तस्मात् सम्यग्ज्ञानाऽऽदित्रितयनयसमूहान्मुक्तिः, नयसमूहविषयं च सम्यग्ज्ञानं श्रुतं च, तद्विषयं सम्यग्दर्शनं, तत्पूर्वं चाशेषपापक्रियानिवृत्तिलक्षणं चारित्रं, प्रधानोपसर्जनभावेन, मुख्यवृत्त्या वा तत्त्रितयदर्शकं च वाक्यमागमो, नान्यः, एकान्तप्रतिपादकस्यासदर्थत्वेन विसंवादकत्वात् तस्य प्रामाण्यानुपपत्तेः। जिनवचनस्य तु तद्विपर्ययेण दृष्टादृष्टार्थेऽपि प्रामाण्यसंगतेः। सम्म० ३ काण्ड। महा०।

(ज्ञानं शीलं श्रुतं वा श्रेय इत्यन्ययूथिकैः सह 'अण्णउत्थिय' शब्दे प्रथमभागे ४५८ पृष्ठे चिन्तितम) आह च-ज्ञानक्रिययोः प्रत्येकं मुक्तेरवापिका शक्तिरसती कथं समुदायेऽपि भवति?। न हि यद्येषु प्रत्येकं नास्ति तत्तेषां समुदायेऽपि भवति, यथा प्रत्येकमसत्समुदितास्वपि सिकतासु तैलं, प्रत्येकमसती ज्ञानक्रिययोर्मुक्तेरवापिका शक्तिः। तदुक्तम्-"पत्तेयमजावाओ, निव्वाणं समुदियासु वि ण जुत्तं। णाणकिरियासु वोत्तुं, सिकयासमुदायतिल्लं व॥१॥" उच्यते-स्यादेवं यदि सर्वथा प्रत्येकं तयोर्मुक्तयनुपकारितोच्येत, यदा तु तयोः प्रत्येकं देशोपकारिका, समुदाये तु संपूर्णा हेतुतोच्यते, तदा न कश्चिद्दोषः। आह च-"वीसुं ण सव्वहा किंचय, सिकयातेलं व साहणाजाओ। देसोवकारिया जा, सा समुदायम्मि संपुण्णा॥१॥" अतः स्थितमेतद् ज्ञानक्रिये समुदिते एव मुक्तिकारणं, न तु प्रत्येकमिति तत्त्वम्।

तथा च पूज्याः-

णाणाहीणं सव्वं, णाणणओ नणइ किं व किरियाए?।
किरियाए करणनओ, तदुभयगाहो य सम्मत्तो३५६१"(विशे०)
"क्वचित्सौख्या शैल्या, क्वचिदधिकृतप्राकृतभुवा,
क्वचिच्चार्थापत्त्या, क्वचिदपि समारोपविधिना।
क्वचिच्चाभ्याहारात्, क्वचिदधिकलप्राकृक्रमबला-
दियं व्याख्या ज्ञेया, क्वचिदपि तथाऽऽम्नायवशतः॥१॥"
उत्त० १ अ०। दर्श०। आ० क०। अष्ट०।

आचार्यः प्राऽऽह-

सव्वेसिं पि नयाणं, बहुविहवत्तव्वयं निसामित्ता।
तं सव्वनयविसुद्धं, जं चरणगुणट्ठिओ साहू॥

सर्वेषामपि मूलनयानाम्, अपिशब्दात्तद्भेदानामपि नयानां ऋज्वस्तिकायाऽऽदीनाम्-बहुविधवक्तव्यतां सामान्यमेव, विशेषा एव, उभयमेव वा परस्परनिरपेक्षमित्यादिरूपाम्, अथवा-नामादिनयानां मध्ये को नयः कं साधुमिच्छतीत्यादिरूपां, निशम्य श्रुत्वा, तत्सर्वनयविशुद्धं सर्वनयसम्मतं वचनं, यच्चरणगुणस्थितश्चारित्रज्ञानस्थितः साधुर्यस्मात् सर्वेऽपि नया भावनिक्षेपमिच्छन्तीति। बृ० ६ उ०। तथा चाऽऽगमः-"दोहिं ठाणेहिं संपन्ने अणगारे अणाइयं अणवदग्गं दीहमद्धं वा चाउरंतसंसारकंतारं वीईवएज्जा। तं जहा-विज्जाए चेव, चरणे चेव।" स्था० २ ठा०। दश०। व्य०।

णाणकुसील-ज्ञानकुशील-पुं०। गुरुकज्ञानाऽऽवरणोदयेनादर्निशं प्रधर्षयति कुत्सितशीले, महा० ३ अ०।

णाणग-नाणक-न०। मुद्रायां, कार्षापणे, पणे च। आ०क०।

"केनापि कस्यचित् प्राज्य-मूल्यनाणकसंभृतः।
न्यस्तो नवलकस्तेनो-पात्तास्ते बहुमूल्यकाः"॥१॥

आ० क०। स्वनामख्याते तीर्थभेदे, मोढेरे वायमे नाणके पल्ल्यां मेलुएमके श्रीमहावीरः। ती० ४३ कल्प।

पन्यासजीतविजयगणिकृतप्रश्नः-यथा प्रत्येहं प्रह्लादनविहारे पञ्चशती वीसलप्रियाणां भोगः कथितोऽस्ति, तन्नाणकं किं नामकं कथ्यते?, इति प्रश्ने, उत्तरम्-वीसलदेवाऽऽज्ञापालितं वीसलप्रियनामकं तत्काले किञ्चिन्नाणकविशेषं संभाव्यते, तदधुना प्रसिद्धं नास्ति, परं षट्त्रिंशन्मूढकरूपमैर्वीसलप्रियनाणकमष्टशतविंशतिसहस्राधिकद्विषष्टिलक्षप्रमाणं कथितमस्तीति॥४०४ प्र०। सेन० ३ उल्ला०।

णाणगुण–ज्ञानगुण–पुं० । जीवाऽऽश्रिते ज्ञा तद्विनाभाविनि पर्याये ज्ञानमाहात्म्ये, आव० ४ अ० ।

णाणच्चासायणा–ज्ञानात्याशातना–स्त्री० । ज्ञानस्य ज्ञानिनां वा हीलनायाम्, भ० ८ श० ६ उ० ।

णाणजोग–ज्ञानयोग–पुं० । ज्ञानमेव योगः कौशलं ब्रह्मप्राप्त्युपायो वा । ब्रह्मज्ञानोपाये निष्ठाभेदे, वाच० । अष्ट० ।

णाणट्ठया–ज्ञानार्थता–स्त्री० । ज्ञानमेवार्थो यस्य स ज्ञानार्थस्तद्भावस्तत्ता । ज्ञानार्थित्वे, स्था० ५ ठा० २ उ० ।

णाणड्ढ–ज्ञानाढ्य–त्रि० । बहुागमे, जीवा० १६ अधि० ।

णाणड्ढि–ज्ञानर्द्धि–स्त्री० । " पभू णं भंते ! चोद्दसपुव्वी । " तथा–"जं अन्नाणी कम्मं" इत्यादिरूपायामृद्धौ, दश० ३ अ० ।

णाणणय–ज्ञाननय–पुं० । ज्ञानमेव प्रधानमैहिकाऽऽमुष्मिकफलप्राप्तिकारणं युक्तियुक्तत्वादिति सिद्धान्तव्यवस्थिते नये, आव० ६ अ० । सम्म० ।

एतन्मतं यथा–

इह केचिज्ज्ञानादेव मोक्षमास्थिषत । तथाहीते ब्रुवते–सम्यग्ज्ञानमेव फलसंपादनप्रत्यलं, न क्रिया; अन्यथा मिथ्याज्ञानादपि क्रियायां फलोत्पादप्रसङ्गात् ।

यदुक्तम्–

"विक्रमैः फलदा पुंसां, न क्रिया फलदा मता ।
मिथ्याज्ञानात् प्रवृत्तस्य,फलासंवाददर्शनात् ॥१२६॥"(नयो०)

तथा–

"श्रियः प्रसूते विपदो रुणद्धि, यशांसि दुग्धे मलिनं प्रमार्ष्टि ।
संस्कारशौचेन परं पुनीते, शुद्धा हि बुद्धिः कुलकामधेनुः ।१।"
रत्ना० ७ परि० ।

इह कश्चिद् ज्ञानमेव प्रधानमपवर्गबीजमिच्छति;–

यतः किल पठ्यमानम्–

"जं अन्नाणी कम्मं, खवेइ बहुआहिं वासकोडीहिं ।
तं नाणी तेहिं ती, खवेइ ऊसासमित्तेणं ॥ १ ॥"

तथा–

"सूई जहा ससुत्ता, न नस्सई कयवरम्मि पडिआ वि ।
जीवो तहा ससुत्तो, न नस्सइ गओ वि संसारे ॥ २ ॥"

तथा–

"नाणं गिण्हइ नाणं, मुणेइ नाणेण कुणइ किच्चाइं ।
भवसंसारसमुद्दं, नाणी नाणट्ठिओ तरइ ॥ ३ ॥"

तस्माद् ज्ञानमेव प्रधानमपवर्गप्राप्तिकारणमतो ज्ञानिन एव कृतिकर्म कार्यम् । अथाऽनन्तरगाथायामेव ऊव्यभावसमायोगे भ्रमण उक्तः । तस्य च कृतिकर्म कार्यमित्युक्तम् । " चरणं च भावो वर्तते " इत्युक्ते सत्याह–

कायं चरणं भावो, तं पुण नाणसहिओ समाणेइ * ।
न य नाणं तु न भावो, तेन र नाणं पणिवयामो ॥७१॥

काममनुमतमिदं यदुत चरणं चारित्रं भावो भावशब्दो भावक्रियोपलक्षणार्थः । तत्पुनर्ज्ञानसहितो ज्ञानयुक्तः समापयति निष्ठां नयति, यतः–इदमित्थमासेवनीयमिति ज्ञानादेवावगम्यते, तस्मात्तदेव प्रधानं, न च ज्ञानं तु न भावः, भाव एव भावक्रियान्तर्गतमिति भावना, तेन कारणेन ' र ' इति निपातः पूरणार्थः । ज्ञानमस्यास्तीति ज्ञानी, तं ज्ञानिनं प्रणमामः पूजयामः । इति गाथाऽर्थः ॥ ७१ ॥

यतश्च बाह्यकरणसहितस्याप्यज्ञानिनश्चरणभाव एवोक्तः–

तम्हा न बज्झकरणं, मज्झ पमाणं न यावि चारित्तं ।
नाणं मज्झ पमाणं, नाणे च ठियं जओ तित्थं ॥७२॥

तस्माच्च बाह्यकरणं पिण्डविशुद्ध्यादिकं मम प्रमाणम्, न चापि चारित्रं व्रतलक्षणं, तज्ज्ञानाभावे तस्याप्यभावात् । अतो ज्ञानं मम प्रमाणं, सति तस्मिँश्चरणस्याऽपि भावात्, ज्ञाने च स्थितं यतस्तीर्थं,तस्याऽऽगमरूपत्वात् । इति गाथाऽर्थः ॥७२॥

किञ्च दर्शनं भावयिष्यते, "सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः" इति वचनात् । तच्च दर्शनं द्विधा–अधिगमजम्,नैसर्गिकं च । इदमपि ज्ञानाऽऽयत्तोदयमेव वर्तते । तथा चाऽऽह–

नाऊण य सब्भावं, अहिगममम्मं पि होइ जीवस्स ।
जाइस्सरणनिसग्गु–ग्गया वि न निरागमा दिट्ठी ॥७३॥

ज्ञात्वा च अवगम्य च सद्भावं सतां भावः सद्भावः, तं, सन्तो जीवाऽऽदयः किमधिगमाद् जीवाऽऽदिपदार्थपरिच्छेदलक्षणात्, सम्यक्त्वं श्रद्धानलक्षणम्, अधिगमसम्यक्त्वम्, इदमधिगमसम्यक्त्वमपि, अपिशब्दात् चारित्रमपि, भवति जीवस्य जायते आत्मन इत्यर्थः । नैसर्गिकमाश्रित्याऽऽह–जातिस्मरणात्सकाशान्निसर्गेण स्वभावेनोद्गता संभूता जातिस्मरणनिसर्गोद्गता, असावपि न निरागमा नागमरहिता, दृष्टिः, दर्शनं दृष्टिरिति, यतः स्वयंभूरमणमत्स्याऽऽदीनामपि जिनप्रतिमाऽऽद्याकारमत्स्यदर्शनाद् जातिमनुस्मृत्य भूतार्थावलोकनपरायणमेव नैसर्गिकं सम्यक्त्वमुपजायते, भूतार्थावलोकनं च ज्ञानं, तस्मादिदमपि ज्ञानाऽऽयत्तोदयमिति कृत्वा ज्ञानस्य प्राधान्याद् ज्ञानिन एव कृतिकर्म कार्यमिति स्थितमयं गाथाऽर्थः ॥ ७३ ॥

इत्थं ज्ञानवादिनोक्ते सत्याहाऽऽचार्यः–

नाणं विमए निययं, न नाणमित्तेण कज्जनिप्फत्ती ।
मग्गन्नू दिट्ठंतो, होइ सचिट्ठो अचिट्ठो अ ॥ ७४ ॥

ज्ञानं प्रक्रान्तं स्वविषये नियतं २ स्वविषयः पुनरस्य प्रकाशनमेव,यतश्चैवमतो न ज्ञानमात्रेण कार्यनिष्पत्तिः, मात्रशब्दः क्रियाप्रतिषेधवाचकः । अत्रार्थे मार्गज्ञदृष्टान्तो भवति, सचेष्टः सव्यापारः, अचेष्टश्च अविद्यमानचेष्टश्च । एतदुक्तं भवति–यथा कश्चित् पाटलिपुत्राऽऽदिमार्गज्ञो जिगमिषुश्चेष्टदेशप्राप्तिलक्षणं कार्यं गमनचेष्टोद्यत एव साधयति, न चेष्टाविकलो भूयसाऽपि कालेन तत्प्रभावादेवैवं ज्ञानी शिवमार्गमविपरीतमवगच्छन्नपि संयमक्रियोद्यत एव तत्प्राप्तिलक्षणं कार्यं साधयति, नानुद्यतो ज्ञानप्रभावादेव, तस्मादलं संयमरहितेन ज्ञानेन । इति गाथाहृदयार्थः ॥ ७४ ॥

प्रस्तुतार्थप्रतिपादकमेव दृष्टान्तान्तरमभिधित्सुराह–

आउज्जनट्टकुसला, वि नट्टिआ तं जणं न तोसेइ ।
जोगं अजुंजमाणी, निंदं खिसं च सा लहइ ॥ ७५ ॥

आतोद्यानि मृदङ्गाऽऽदीनि, नृत्तं करचरणनयनाऽऽदिविशिष्टपरिस्पन्दविशेषलक्षणम्, आतोद्यैः करणभूतैः नृत्तमातोद्यनृत्तं, तस्मिन् कुशला निपुणा आतोद्यनृत्तकुशला, असावपि नर्तकी,

* " समापेः समाणः " । ८ । ४ । १४२ । समाप्नोतेः समाण आदेशो वा । 'समाणइ । समावेइ' ।

अपिशब्दाद् रङ्गजनपरिकृताऽपि, तं जनं रङ्गजनं न तोषयति न हर्षं नयतीत्यर्थः । किंभूता सती ?-योगमयुञ्जती कायाऽऽदिव्यापारमकुर्वती, ततश्च अपरितुष्टाद् रङ्गजनाद् न किञ्चिद् द्रव्यजातं लभत इति गम्यते । अपि तु निन्दां च खिंसां च सा लभते रङ्गजनादिति । तत्समक्षमेव या हीलना सा निन्दा, परोक्षं तु खिंसेति गाथार्थः ॥ ७५ ॥

इत्थं दृष्टान्तमभिधाय दार्ष्टान्तिकयोजनां प्रदर्श-
यन्नाह--

इअ लिंगनाणसहिओ, काइअजोगं न जुंजई जो उ ।
न लहइ स मुक्खसुक्खं,लहइ अ निंदं सपक्खाओ ॥७६॥

'इय' एवं लिङ्गज्ञानाभ्यां सहितो युक्तः लिङ्गज्ञानसहितः कायव्यापारं न युङ्क्ते न प्रवर्तयति, यस्तु न लभते न प्राप्नोति, स इत्थंभूतः, किम् ?, मोक्षसौख्यं सिद्धिसुखमित्यर्थः । लभते च निन्दां स्वपक्षात्, चशब्दात् शिवस्यैव । इह च नर्तकीतुल्यः साधुः, आतोद्यतुल्यं द्रव्यलिङ्गं, नृत्तज्ञानतुल्यं ज्ञानं, योगव्यापारतुल्यं चरणं, रङ्गपरितोषतुल्यः सद्गुरुपरितोषः, दानलाभतुल्यः सिद्धिसुखलाभः । शेषं सुगमम् । यत एवमतो ज्ञानचरणसहितस्यैव कृतिकर्म कार्यमिति गाथाभावार्थः ॥७६॥

चरणरहितं ज्ञानमकिञ्चित्करम्, अस्यार्थस्य
साधका बहवो दृष्टान्ताः सन्तीति प्रदर्श-
नाय पुनरपि दृष्टान्तमाह-

जाणंतो वि अ तरिउं, काइअजोगं न जुंजई नइए ।
सो वुज्झइ सोएणं, एवं नाणी चरणहीणो ॥ ७७ ॥

जानन्नपि च तरीतुं यः कायायोगं कायव्यापारं न युङ्क्ते नद्यां स पुमान् वह्यते ह्रियते श्रोतसा पयःप्रवाहेन, एवं ज्ञानी चरणहीनः संसारनद्यां प्रमोदश्रोतसोह्यत इत्युपनयः । तस्माच्चरणविकलस्य ज्ञानस्याकिञ्चित्करत्वात् उभययुक्तस्यैव कृतिकर्म कार्यमिति गाथाऽभिप्रायः ॥ ७७ ॥

एवमसहायज्ञानपक्षे निराकृते,ज्ञानचरणोभयपक्षे च समर्थिते सत्यपरस्त्वाह-

गुणअहिए वंदणयं, छन्नमत्थ गुणागुणे अजाणंतो ।
वंदिज्ज व गुणहीणं, गुणाहिअं वावि वंदावे ॥ ७८ ॥

इहोत्सर्गतो गुणाधिके साधौ वन्दनं, कर्तव्यमिति वाक्यशेषः। अयं चार्थः-श्रमणं वन्देतेत्यादिग्रन्थसिद्धः,गुणहीने तु प्रतिषेधः, पञ्चानां कृतिकर्मेत्यादिग्रन्थात् । इदं च गुणाधिकत्वं गुणहीनत्वं च तत्त्वतो दुर्विज्ञेयमतः छद्मस्थस्तत्त्वतो गुणागुणानात्मान्तरवर्तिनोऽजानानोऽनवगच्छन् किं कुर्यात्, वन्देत वा गुणहीनं किञ्चित् गुणाधिकं वाऽपि वन्दापयेत्, उभयथाऽपि च दोषः-एकत्र गुणानुक्रान्त्यप्रत्ययः, अन्यत्र तु विनयत्यागप्रत्ययः, तस्मान्मौनीभाव एव श्रेयान्,अत्र वन्दनेन । इति गाथाऽभिप्रायः ॥७८॥

इत्थं चोदकेनोक्ते सति व्यवहारनयमतमधिकृत्य गुणाधिक-
त्वपरिज्ञानकारणानि प्रतिपादयन्नाहाऽऽचार्यः-

आलएणं विहारेणं, ठाणाचंकमणेण य ।
सक्कासुविहिओ नाउं, भासावेणइएण य ॥ ७९ ॥

आलयो वसतिः सुप्रमार्जिताऽऽदिलक्षणा । अथवा-स्त्रीपशुपण्डकविवर्जित इति । तेनाऽऽलयेन, नाऽगुणवत एवं अल्पालयो भवति । विहारो भासकल्पाऽऽदिः, तेन विहारेण, स्थानमूर्ध्वस्थानं, चङ्क्रमणं गमनं,स्थानं च चङ्क्रमणं चेत्येकवद्भावः । तेन चाविरुद्धदेशकायोत्सर्गकरणेन युगमात्रावनिप्रलोकनपुरस्सराऽद्भुतगमनेन चेत्यर्थः । शक्यः सुविहितो ज्ञातुम्, भाषावैनयिकेन च-विनय एव वैनयिकम्, समासोक्त्या भाषणेन आचार्याऽऽदिविषयकरणेन चेति भावना । नैतान्येवंभूतानि प्रायशोऽसुविहितानां भवन्तीति गाथार्थः ॥ ७९ ॥

इत्थमभिहिते सत्याह चोदकः-

आलएणं विहारेणं, ठाणाचंकमणेण य ।
न सक्का सुविहिओ नाउं, भासावेणइएण य ॥ ८० ॥

आलयेन विहारेण स्थानचङ्क्रमणेन च न शक्यः सुविहितो ज्ञातुं, भाषावैनयिकेन चोदायिनृपमारकमाथुरकोट्टराजाऽऽदिभिर्व्यभिचारात् । तथा च प्रतीतमिदम्-असंयता अपि हीनसत्त्वाः लब्ध्यादिनिमित्तं संयतवत्चेष्टन्ते, संयता अपि च कारणतोऽसंयतवदिति गाथार्थः ॥ ८० ॥

किञ्च-

जरहो पसन्नचंदो, सब्भितरबाहिरं उदाहरणं ।
दोसुप्पत्तिगुणकरं, न तेसि बज्झं भवे करणं ॥ ८१ ॥

भरतः प्रसन्नचन्द्रः साभ्यन्तरबाह्यमुदाहरणम्-अभ्यन्तरं भरतः, यतस्तस्य बाह्यकरणरहितस्यापि विनूषितस्यैवाऽऽदर्शकगृहप्रविष्टस्य विशिष्टभावनापरस्य केवलज्ञानमुत्पन्नम्। बाह्यम्-प्रसन्नचन्द्रः । ('पसन्नचंद' शब्दे प्रसन्नचन्द्रकथाविस्तरः) यतस्तस्योत्कृष्टबाह्यकरणवतोऽप्यन्तःकरणविकलस्याधःसप्तमनरकप्रायोग्यकर्मबन्धो बभूव । तदेवं दोषोत्पत्तिगुणकरं न तयोर्भरतप्रसन्नचन्द्रयोः । (बज्झं नवे करणं ति) छान्दसत्वाद्भूत करणं दोषोत्पत्तिकारकं भरतस्य नाभूदशोभनं, बाह्यं करणं गुणकारकं प्रसन्नचन्द्रस्य नाभूच्छोभनमपीति । तस्मादान्तरमेव करणं प्रधानम्, न च तदालयादिनाऽवगन्तुं शक्यते, गुणाधिकं च वन्दनमुक्तमिति कृत्वा भाव एव श्रेयानिति स्थितम् । इत्थं गाथाऽभिप्रायः ॥ ८१ ॥

इत्थं तीर्थाङ्गभूतव्यवहारनयनिरपेक्षं चोदकमवगम्याऽन्येषां पारलौकिकापायप्रदर्शनायाऽऽहाऽऽचार्यः—

पत्तेअबुद्धकरणे, चरणं नासंति जिणवरिंदाणं ।
आहच्चभावकहणे, पंचहिँ ठाणेहिँ पासत्था ॥ ८२ ॥

प्रत्येकबुद्धाः पूर्वभवाभ्यस्तोभयकरणा भरताऽऽदयः,तेषां करणं, तस्मिन्नान्तर एव फलसाधके सति मन्दमतयश्चरणं नाशयन्ति जिनवरेन्द्राणां संबन्धिभूतम्, आत्मनः,अन्येषां च । पाठान्तरं वा-"बोहिं नासंति जिणवरिंदाणं।" कथम्?, "आहच्चभावकहणे त्ति" कादाचित्कभावकथने बाह्यकरणरहितैरेव भरताऽऽदिभिः केवलमुत्पादितमित्यादिलक्षणे, कथं नाशयन्ति ?, पञ्चभिः स्थानैः प्राणातिपाताऽऽदिभिः पारम्पर्येण करणभूतैः, पार्श्वस्था उक्तलक्षणाः । इति गाथाऽर्थः ॥ ८२ ॥

यतश्च-

उम्मग्गदेसणाए, चरणं नासंति जिणवरिंदाणं ।
वावन्नदंसणा खलु, न हु लब्भा तारिसा दट्ठुं ॥८३॥

उन्मार्गदेशनयाऽनयाऽनन्तरोभिहितं चरणं नाशयन्ति जिनवरेन्द्राणां संबन्धिभूतमात्मनोऽन्येषां वा; व्यापन्नदर्शनाः खलु विनष्ट-

सम्यग्दर्शना निश्चयतः 'खलु' इत्यपिशब्दार्थो निपातः । तस्य व्यवहितः संबन्धः। तमुपरिष्टाद् दर्शयिष्यामः । (न हु ब्रन्ना तारिसा दट्ठुं ति) नैव कल्पन्ते तादृशा द्रष्टुमपि, किंपुनर्ज्ञानाऽऽदिना प्रतिलाभयितुमिति गाथाऽर्थः ॥८३॥ आव० ३ अ० । नि० । (दंसण'शब्दे दर्शनप्राधान्यविचारः)

तत्र ज्ञाननयदर्शनम्–इदं ज्ञानमैहिकाऽऽमुष्मिकफलप्राप्तिकारणं प्रधानं, युक्तियुक्तत्वात्, तथा चाऽऽह निर्युक्तिकारः—

नायम्मि गिण्हियव्वे, अगिण्हियव्वम्मि चेव अत्थम्मि ।
जइयव्वमेव इइ जो, उवएसो सो नओ नाम ॥३५६२॥

'नायम्मि' ज्ञाते सम्यक्परिच्छिन्ने ग्रहीतव्ये उपादेये (अगिण्हियव्वम्मि त्ति) अग्रहीतव्ये अनुपादेये, हेय इति भावः। चशब्दः खल्वुभयोर्ग्रहीतव्याग्रहीतव्ययोर्ग्रहीतव्यानुकर्षणार्थः, उपेक्षणीयवस्तुसमुच्चयार्थो वा । एवकारश्चावधारणार्थः । तस्य चैवं व्यवहितः प्रयोगो द्रष्टव्यः । ज्ञान एव ग्रहीतव्ये,तथाऽग्रहीतव्ये, उपेक्षणीये च ज्ञात एव नाज्ञाते अर्थे ऐहिकाऽऽमुष्मिके । तत्रैहिको ग्रहीतव्यः स्रक्चन्दनाऽऽदिभिः, अग्रहीतव्यो विषशस्त्रकण्टकाऽऽदिः, उपेक्षणीयस्तृणाऽऽदिः । आमुष्मिको ग्रहीतव्यः सम्यग्दर्शनाऽऽदिः, अग्रहीतव्यो मिथ्यात्वाऽऽदिः, उपेक्षणीयो विषयाऽऽदिः,तस्मिन्नर्थे यतितव्यमेव अनुस्वारलोपाद् यतितव्यमेवं क्रमेण ऐहिकाऽऽमुष्मिकफलप्राप्त्यर्थिना सत्त्वेन प्रवृत्त्यादिलक्षणो यत्नः कार्य इत्यर्थः । इत्थं चैतदङ्गीकर्त्तव्यम्–सम्यगज्ञाते प्रवर्त्तमानस्य फलविसंवाददर्शनात् ।

तथा चोक्तमन्यैरपि–

"विज्ञप्तिः फलदा पुंसां, न क्रिया फलदा मता ।
मिथ्याज्ञानात् प्रवृत्तस्य,फलासंवाददर्शनात्" ॥१२७॥(नयो०)

तथाऽऽमुष्मिकफलप्राप्त्यर्थिनाऽपि ज्ञानादेव यतितव्यम् । (३५६२) आ० म० १ अ० २ खण्ड । इह ज्ञाननयो ज्ञानप्राधान्यख्यापनार्थं प्रतिपादयति-नन्वैहिकाऽऽमुष्मिकफलार्थिना तावत् सम्यग् विज्ञात एवार्थे प्रवर्त्तितव्यम्; अन्यथाप्रवृत्तौ फलविसंवाददर्शनात् । तथा चान्यैरप्युक्तम्-"विज्ञप्तिः फलदा पुंसां, न क्रिया फलदा मता । मिथ्याज्ञानात्प्रवृत्तस्य, फलासंवाददर्शनात् ॥ २२६ ॥ (नयो०) तथा चाऽऽगमेऽप्युक्तम्-"पढमं नाणं तओ दया" इत्यादि । "जं अन्नाणी कम्मं खवेइ" इत्यादि । तथाऽपरमप्युक्तम्-

"पावाओ विणिवत्ती, पवत्तणा तह य कुसलपक्खम्मि ।
विणयस्स वि पडिवत्ती, तिन्नि वि नाणे समप्पंति ॥ १ ॥"

इतश्च ज्ञानस्यैव प्राधान्यम्, यतस्तार्थंकरगणधैरर्गीतार्थानां केवलानां विहारोऽपि निषिद्धः । तथा च तद्वचनम्-

"गीयत्थो य विहारो, बीओ गीयत्थमीसओ भणिओ ।
एत्तो तइयविहारो, नाणुन्नाओ जिणवरेहिं ॥ १ ॥"

न यस्मादन्धेनान्धः समाकृष्यमाणः सम्यक् पन्थानं प्रतिपद्यत इति भावः । एवं तावत् क्रियोपशमिकं ज्ञानमधिकृत्योक्तम्, क्रायिकमप्यङ्गीकृत्य विशिष्टफलसाधकत्वं तस्यैव ज्ञेयम्, यस्माद्हंतोऽपि भवाम्भोधेः तटस्थस्य दीक्षाप्रतिपन्नस्योत्कृष्टतपश्चरणवतोऽपि न तावदपवर्गप्राप्तिः संजायते, यावदखिलजीवाऽऽदिवस्तुतत्त्वसाक्षात्करणदक्षं केवलज्ञानं नोत्पन्नम् । तस्माद् ज्ञानमेव पुरुषार्थसिद्धेर्निबन्धनम्। प्रयोगश्चात्र-यद् येन विना न भवति तत्तन्निबन्धनमेव, तथा जीवाऽऽद्यविनाभावी तन्निबन्धन एवाङ्कुरः, ज्ञानाविनाभाविनी च सकलपुरुषार्थसिद्धिरिति । ततश्चायं नयश्चतुर्विधसामायिके सम्यक्त्वश्रुतसामायिके एवाभ्युपगच्छति, ज्ञानाऽऽत्मकत्वेन तयोरेव मुख्यमुक्तिकारणत्वात् । देशसर्वविरतिसामायिके तु नेच्छति, ज्ञानकार्यत्वेन गौणत्वात्तयोरिति । विशे० । बृ० । सूत्र० । अनु० । आचा० । नि० चू० । दश० । सम्म० ।

णाणणिण्हवया–ज्ञाननिह्नवता–स्त्री० । ६ त० । श्रुतस्य श्रुतगुरूणां वाऽपलपने, भ० ८ श० ६ उ० ।

णाणणिव्वत्ति–ज्ञाननिर्वृत्ति–स्त्री० । ज्ञानस्य आभिनिबोधिकादितया निष्पत्तौ, सा चाभिनिबोधिकाऽऽदिभेदेन पञ्चविधा । यस्य यावन्ति ज्ञानानि तस्य तावती । भ० २० श० ५ उ० ।

णाणतव–ज्ञानतपस्–न० । तीर्थकृतां केवलोत्पत्त्यर्थं कृतेऽष्टमाऽऽदितपसि,यथा पार्श्वजिनर्षभस्वामिमल्लिनाथारिष्टनेमीनामष्टमेन वासुपूज्यस्य चतुर्थेन शेषाणामजितस्वाम्यादीनामूनविंशतिजिनानां षष्ठेन भक्तेन केवलज्ञानमुत्पेदे । प्रव० ४५ द्वार ।

णाणतह–ज्ञानतथ्य–न० । सत्यादिकेन ज्ञानपञ्चकेन यथास्वमवितथे विषयोपलम्भे, सूत्र० १ श्रु० १३ अ० ।

णाणतिग–ज्ञानत्रिक–न० । मतिज्ञानश्रुतज्ञानावधिज्ञानत्रये, कर्म० ४ कर्म० ।

णाणतिलगगणि–ज्ञानतिलकगणिन्–पुं० । पद्मराजगणिशिष्ये गौतमकुलकवृत्तिकारके, स च वैक्रमीये १६६० मिते वत्सरे वर्त्तमान आसीत् । जै० इ० ।

णाणत्त–नानात्व–न० । नानाभावो नानात्वम् । वर्णाऽऽदिकृते वैचित्र्ये, प्रज्ञा० १५ पद । भ० । नि० चू० । द्र्य० । स्या० ।

णाणत्ता–नानाता–स्त्री० । नानाभावो नानाता । विशेषे, आ० म० १ अ० २ खण्ड ।

अथ 'णाणत्त त्ति' नानात्वलक्षणं विवरीषुराह–

णाणत्त त्ति विसेसो, सो दव्वक्खेत्तकालभावेहिं ।
असमाणाणं णेओ, समाणसंखाणमविसेसो ॥२१६१॥
परमाणुदुयणुयाणं, जह णाणत्तं तहाऽवसेसाणं ।
असमाणाणं तह खे-त्तकालभावप्पजेयाणं ॥ २१६२ ॥

नाना इत्येतस्य भावो नानाता–वस्तूनां परस्परं भिन्नता, विशेष इत्यर्थः । स च विशेषो द्रव्यक्षेत्रकालभावैरसमानानामसमानसंख्यानां ज्ञेयोऽवगन्तव्यः, द्रव्याऽऽदिभिः समानसंख्यानां पुनरविशेष इति ॥ २१६१ ॥ अत्रोदाहरणमाह-(परमाणित्यादि) यथा द्रव्यसंख्यया असमानानां परमाणूनां द्व्यणुकस्कन्धानां च, तथाऽवशेषाणां द्व्यणुकानां त्र्यणुकानां च, तथा त्र्यणुकानां चतुरणुकानां च, तथा चतुरणुकानां पञ्चाणुकानां चेत्यादिद्रव्यसंख्ययाऽसमानानां परस्परं नानात्वं विशेषो ज्ञेयः । तथा तेनैव प्रकारेण क्षेत्रकालभावसंख्ययाऽसमानानां क्षेत्रकालभावप्रदेशानामपि परस्परं नानात्वं विशेषो मन्तव्यः; तद्यथा-एकप्रदेशावगाढानां द्व्यादिप्रदेशावगाढानां च, तथैकसमयस्थितिकानां द्व्यादिसमयस्थितिकानां च, तथा एकगुणकालकाऽऽदीनां द्विगुणकालकाऽऽदीनां चेत्यादि । उपलक्षणं चेदम्-द्रव्यतः समानसंख्यानामपि परमाण्वादीनां क्षेत्रकालभा-

वैर्नानात्वं द्रष्टव्यम् । एवमेकाऽऽदिप्रदेशावगाढानां क्षेत्रावगाढप्रदेशैः समानसंख्यानामपि द्रव्यकालजावैर्नानात्वम्, एकसमयाऽऽदिस्थितीनां च स्थितिसमयैः समानसंख्यानामपि द्रव्यक्षेत्रभावैर्नानात्वम्; एकगुणकालकाऽऽदीनां च वर्णगन्धाऽऽदिगुणैः समानसंख्यानामपि द्रव्यक्षेत्रकालैर्नानात्वमिति ॥२१६२॥ विशे० । आ० चू० ।

ज्ञानात्मन्–पुं० । ज्ञानविशेषत उपचर्जनीकृतदर्शनाऽऽदिरात्मा ज्ञानाऽऽत्मा । सम्यग्दृष्टेरात्मनि, भ० १२ श० १० उ० ।

णाणदंसण–ज्ञानदर्शन–न० । ज्ञानं च दर्शनं च, ज्ञानेन वा दर्शनं ज्ञानदर्शनम् । ज्ञानदर्शनयुग्मे, " अत्थि णं मम अइसेसे णाणदंसणे समुप्पन्ने । " स्था० ७ ठा० ।

णाणदंसणलक्खणा–ज्ञानदर्शनलक्षणा–स्त्री० । ज्ञानं च दर्शनं च लक्षणं स्वरूपं यस्याः सा ज्ञानदर्शनलक्षणा । सम्यग्ज्ञानसम्यग्दर्शनरूपायां मोक्षमार्गगतौ, " मोक्खमग्गगइं तत्थं, सुणेह जिणभासियं । चउकारणसंजुत्तं, णाणदंसणलक्खणं " ॥ १ ॥ उत्त० २८ अ० ।

णाणदंसणसमग्ग–ज्ञानदर्शनसमग्र–त्रि० । ज्ञानदर्शनाभ्यां पूर्णे, " तत्तो णाणदंसणसमग्गे " उत्त० ७ अ० ।

णाणद्दव्व–ज्ञानद्रव्य–न० । ज्ञानद्रव्यं देवकार्ये उपयोगि स्यान्न वा, यदि स्यात्तदा देवपूजायां, प्रासादाऽऽदौ वेति प्रश्ने, उत्तरम्– " एकत्रैव स्थानके देवरिक्तं, क्षेत्रद्रव्यमेव तु ज्ञानरिक्तम् । सप्तक्षेत्र्यामेव तु स्थापनीयं, श्रीसिद्धान्तो जैन एवं ब्रवीति ॥१॥ " एतत्काव्यमुपदेशसप्ततिकाप्रान्तेऽस्त्येतदनुसारेण ज्ञानद्रव्यं देवपूजायां प्रासादाऽऽदौ चोपयोगि भवतीति । ७४ प्र० । सेन० २ उल्ला० ।

णाणदाण–ज्ञानदान–न० । श्रुतज्ञाने, " अन्येभ्यो भव्यवर्गेभ्योऽध्यापनश्रावणाऽऽदिभिः । यद्दानमागमस्यैतज्ज्ञानदानमुदाहृतम् ॥ १ ॥ " ग० २ अधि० ।

णाणदिट्ठि–ज्ञानदृष्टि–स्त्री० । तत्त्वज्ञानरूपायां दृष्टौ, अष्ट० १ अष्ट० ।

णाणदीव–ज्ञानदीप–पुं० । अज्ञानध्वान्तनाशात् तत्त्वज्ञानप्रदीपे, द्वा० २५ द्वा० ।

णाणधण–ज्ञानधन–त्रि० । ज्ञानवित्ते विपश्चिति, आव० ४ अ० ।

णाणधम्म–ज्ञानधर्म–पुं० । वर्धमानसूरिवंशपरम्परायां साधुरङ्गसूरेः शिष्ये, " तच्छिष्या ज्ञानधर्माख्याः, पाठकाः परमोत्तमाः । जैनाऽऽगमरहस्यार्थ-दायका गुणनायकाः ॥ १ ॥ " तच्छिष्याणां दीपचन्द्राणां शत्रुञ्जयाऽऽद्यनेकतीर्थेषु प्रतिष्ठाविधायिनां शिष्येण देवचन्द्रेण यशोविजयकृतज्ञानसाराष्टकस्य टीका विरचिता । अष्ट० ३२ अष्ट० ।

णाणपज्जव–ज्ञानपर्याय–पुं० । ज्ञानविशेषे बुद्धिकृतेऽविभागपलिच्छेदे, भ० २ श० १ उ० ।

णाणपडिणीयया–ज्ञानप्रत्यनीकता–स्त्री० । ज्ञानस्य श्रुताऽऽदेः तत्साधनस्य पुस्तकाऽऽदेः (कर्म० १ कर्म०) तद्भेदाद् ज्ञानवतां वा सामान्येन प्रतिकूलतायाम्, भ० ८ श० ६ उ० ।

णाणपडिसेवणाकुसील–ज्ञानप्रतिसेवनाकुशील–पुं० । ज्ञानस्य प्रतिसेवनया कुशीलो ज्ञानप्रतिसेवनाकुशीलः । प्रतिसेवनाकुशीले, भ० २५ श० ६ उ० ।

णाणपरिणाम–ज्ञानपरिणाम–पुं० । ज्ञानलक्षणे जीवपरिणामे, प्रज्ञा० १५ पद ।

णाणपरीसह–ज्ञानपरीषह–पुं० । ज्ञानं मत्यादि तत्परीषहणं च ज्ञानपरीषहः । विशिष्टस्य ज्ञानस्य सद्भावे मदवर्जने अभावे, दैन्यवर्जने, ग्रन्थान्तरे त्वज्ञानपरीषह इति पठ्यते, तथैव– वास्माभिर्दर्शितम् । उ० ८ श० ८ उ० ।

णाणपायच्छित्त–ज्ञानप्रायश्चित्त–न० । पापं छिनत्तीति । प्रायश्चित्तभेदे, स्था० ३ ठा० ४ उ० ।

णाणपुरिस–ज्ञानपुरुष–पुं० । ज्ञानलक्षणभावप्रधाने पुरुषे, स्था० ३ ठा० १ उ० ।

णाणपेज्जदोस–नानाप्रेमद्वेष–न० । प्रेम च द्वेषश्च प्रेमद्वेषं, नानाप्रकारं प्रेमद्वेषं नानाप्रेमद्वेषम् । अविनयभेदे, स्था० ३ ठा० ३ उ० ।

णाणप्पओस–ज्ञानप्रद्वेष–पुं० । श्रुताऽऽदौ ज्ञाने, ज्ञानवत्सु वाऽप्रीतौ, भ० ८ श० ६ उ० ।

णाणप्पयार–नानाप्रकार–त्रि० । विचित्रे, सूत्र० १ श्रु० १३ अ० । आव० ।

णाणप्पवाय–ज्ञानप्रवाद–न० । यत्र ज्ञानं मत्यादिकं स्वरूपभेदाऽऽदिभिः प्रोच्यते तज्ज्ञानप्रवादम् । स० । स्था० । ज्ञानं ज्ञानाऽऽदिभेदनिष्पं पञ्चप्रकारं तत्सप्रपञ्चं वदति ज्ञानप्रवादम् । नं० । ज्ञानस्य मतिज्ञानाऽऽदिपञ्चकस्य भेदप्ररूपणा यस्मात् तज्ज्ञानप्रवादम् । चतुर्दशानां पूर्वाणां पञ्चमे, भ० । स्था० । तस्य पदपरिमाणमेका पदकोटी । नं० । " णाणप्पवायस्स णं पुव्वस्स बारस वत्थू पण्णत्ता " । स० ।

णाणफल–ज्ञानफल–त्रि० । ज्ञानं फलं येषां तानि ज्ञानफलानि । श्रुतज्ञानाऽऽराधनाऽऽदिषु कर्मसु, उत्त० २ अ० ।

णाणबल–ज्ञानबल–न० । ज्ञानबलमतीताऽऽदिवस्तुपरिच्छेदसामर्थ्यम्, चारित्रसाधनतया मोक्षसाधनसामर्थ्यं वा तस्मिन् । स्था० १० ठा० ।

णाणबोहि–ज्ञानबोधिन्–पुं० । ज्ञानाऽऽवरणक्षयोपशमभूता ज्ञानप्राप्तिः । स्था० २ ठा० ४ उ० ।

णाणभट्ठ–ज्ञानभ्रष्ट–त्रि० । ५ त० । सदसद्विवेकभ्रष्टे, आचा० १ श्रु० ६ अ० ४ उ० ।

णाणभाव–ज्ञानभाव–पुं० । अधिगमे उपयोगे, नि० चू० २० उ० ।

णाणभावणा–ज्ञानभावना–स्त्री० । ज्ञानस्य भावना ज्ञानभावना । एवंभूतं मौनीन्द्रं ज्ञानप्रवचनं यथाऽवस्थितशेषपदार्थोविर्नाभवकमित्येवंरूपायां भावनायाम्, आचा० २ श्रु० ३ चू० १ अ० १ उ० ।

णाणमंजरी–ज्ञानमञ्जरी–स्त्री० । यशोविजयोपाध्यायकृतज्ञानसाराभिधाष्टकग्रन्थस्य देवचन्द्रगणिकृतायां टीकायाम्, सा चात्यशुद्धेति विद्वज्जनचेतश्चमत्कृतिं नादधाति । " स्याद्वादसु-

रहस्यानां, ज्ञानावरणबन्धोदयेन च । देवचन्द्रेण बोधार्थं, सट्टीकेयं विनिर्मिता" ॥ १ ॥ वैक्रमीये रसनिधिजलधिचन्द्र १९९६ मिते संवत्सरे । अष्ट० ३२ अष्ट० ।

णाणमंत-ज्ञानवत्-त्रि० । ज्ञानशालिनि, नि० चू० १ उ० ।

णाणमग्ग-ज्ञानमग्न-त्रि० । आत्मस्वरूपोपलब्धियुक्ते, अष्ट० २ अष्ट० ।

णाणमय-ज्ञानमद-पुं० । आत्मनो विज्ञत्वहेतुकेऽहङ्कारे, "ज्ञानं मददर्पहरं, माद्यति यस्तेन तस्य को वैद्यः ? । अगदो यस्य विषायति, तस्य चिकित्सा कथं क्रियते ?" ॥ १ ॥ सूत्र० १ श्रु० १३ अ० ।

ज्ञानमय-त्रि० । ज्ञानाऽऽत्मके, आव० ४ अ० ।

णाणमूढ-ज्ञानमूढ-पुं० । उदितज्ञानाऽऽचरणे, स्था० ३ ठा० ४ उ० ।

णाणमोह-ज्ञानमोह-पुं० । ज्ञानविषयके मोहे, स्था० २ ठा० ४ उ० । (व्याख्याऽस्य 'मोह' शब्दे द्रष्टव्या)

णाणरासि-ज्ञानराशि-पुं० । सङ्घाधनिकरे, पञ्चा० १५ विव० ।

णाणबल-ज्ञानबल-न० । अतीताऽऽदिवस्तुपरिच्छेदसामर्थ्ये, स्था० १० ठा० ।

णाणवाइ [ण्]-ज्ञानवादिन्-त्रि० । यथाऽवस्थितवस्तुपरिज्ञानादेव मोक्ष इत्येवंवादिनि, सूत्र० १ श्रु० ६ अ० ।

णाणवि-ज्ञानवित्-त्रि० । ज्ञानं यथाऽवस्थितपदार्थपरिच्छेदकं तद्वेत्तीति ज्ञानवित् । ज्ञानवेत्तरि, "से आयवि णाणवि" आचा० १ श्रु० ३ अ० १ उ० ।

णाणविणय-ज्ञानविनय-पुं० । ज्ञानमाभिनिबोधिकाऽऽदि पञ्चधा, तदेव विनयो, ज्ञानस्य वा विनयो भक्त्यादिकरणं ज्ञानविनयः । स्था० ७ ठा० । ज्ञानानां श्रद्धानभक्तिबहुमाननतदुदृष्टार्थभावनाविधिग्रहणाद्यादिनाऽभ्यासे, भ० २५ श० ७ उ० । ज्ञानविनयः पञ्चधा, ज्ञानस्य पञ्चविधत्वात् । औ० ।

ज्ञानविनयमाह-

नाणं सिक्खइ नाणं, गुणेइ नाणेण कुणइ किच्चाइं ।
नाणी नवं न बंधइ, नाणविणीओ हवइ नम्हा ॥ ८३ ॥

ज्ञानं शिक्षयत्यपूर्वं ज्ञानमादत्ते, ज्ञानं गुणयति गृहीतं सत् प्रत्याचर्तयति, ज्ञानेन करोति कृत्यानि संयमकृत्यानि, एवं ज्ञानी नवं कर्म न बध्नाति, प्राक्तनं च विनयति यस्माद् ज्ञानविनीतो ज्ञानेनापनीतकर्मा भवति, तस्मादिति गाथाऽर्थः ॥ ८३ ॥ दश० ९ अ० १ उ० ।

णाणविणयपरिहीण-ज्ञानविनयपरिहीन-त्रि० । ज्ञानाऽऽचारपरिहीने, चं० प्र० २० पाहु० ।

णाणविमलगणि-ज्ञानविमलगणिन्-पुं० । श्रीवल्लभमुनिगुरौ, अयं विक्रमसंवत् १६५४ मिते विद्यमान आसीत् । अनेन महेश्वरसूरिकृतशब्दप्रभेदग्रन्थस्योपरि टीका कृता । जै० इ० ।

णाणविराहणा-ज्ञानविराधना-स्त्री० । विराधना खण्डना, ज्ञानस्य विराधना ज्ञानविराधना, ज्ञाननिन्दया गुर्वादिनिह्नवेन च ज्ञानस्खलनायाम्, ध० ३ अधि० । निह्नवाऽऽदिरूपायां ज्ञानेप्रत्यनीकतायाम्, स० १ सम० ।

णाणविसंवायणाजोग-ज्ञानविसंवादनायोग-पुं० । ज्ञानस्य ज्ञानिनां वा व्यभिचारदर्शनाय व्यापारे, भ० ८ श० ६ उ० ।

णाणविसोहि-ज्ञानविशुद्धि-स्त्री० । ज्ञानाऽऽचारपरिपालनतो ज्ञानस्य विशुद्धौ, स्था० १० ठा० ।

णाणवुड्ढ-ज्ञानवृद्ध-पुं० । ज्ञानं हेयोपादेयवस्तुनिश्चयः, तेन वृद्धा महान्तः । ध० १ अधि० । श्रुतस्थविरेषु, हा० २४ अष्ट० । ज्ञानवृद्ध-पुं० । ज्ञानेन प्रतिबुद्धे, स्था० २ ठा० ४ उ० (व्याख्याऽस्य 'बुद्ध' शब्दे द्रष्टव्या)

णाणसंका-ज्ञानशङ्का-स्त्री० । श्रुतज्ञानविषयकशङ्कायाम्, सूत्र० १ श्रु० १३ अ० ।

णाणसंपण्ण-ज्ञानसंपन्न-पुं० । श्रुतसंपन्ने, स च दोषविपाकं प्रायश्चित्तं चाऽवगच्छतीति आलोचनाऽर्हतयोक्तः । स्था० ८ ठा० ।

णाणसंपण्णया-ज्ञानसंपन्नता-स्त्री० । श्रुतज्ञानसहितत्वे, (उत्त०) ।

नाणसंपन्नयाए णं भंते ! जीवे किं जणयइ ?। नाणसंपन्नयाए णं जीवे सव्वभावाभिगमं जणयइ, नाणसंपन्ने य णं जीवे चाउरंतसंसारकंतारे न विणस्सइ । "जहा सूई ससुत्ता प-डिया वि न विणस्सई । तहा जीवो ससुत्तो संसारे वि न विणस्सइ" ॥ १ ॥ नाणविणयतवचरित्तजोगं संपाउणइ, ससमयपरसमयविसारए संघायणिज्जे भवइ ॥ ५९ ॥

हे भदन्त ! ज्ञानसंपन्नतया ज्ञानस्य श्रुतज्ञानस्य संपन्नता श्रुतज्ञानसंपत्तिः, तया जीवः किं फलं जनयति ?। तदा गुरुराह-हे शिष्य ! श्रुतज्ञानसंपन्नतया जीवः सर्वभावाभिगमम्-सर्वे च ते भावाश्च सर्वभावाः जीवाजीवाऽऽदयः, तेषामभिगमः सर्वभावाऽभिगमः,तं सर्वभावाभिगमं जीवाजीवाऽऽदितत्त्वज्ञानं जनयति । तथा ज्ञानसंपन्नो जीवश्चतुरन्तसंसारकान्तारे चतुर्गतिलक्षणे संसारवने न विनश्यति मोक्षाद् विशेषेण दूरं नाहश्यो भवति । तथाहि-ससूत्रा सूची कचवराऽऽदिषु पतिता सती न नश्यति-अदृश्या न भवति, नाशं न प्राप्नोति । तथा जीवोऽपि ससूत्रः श्रुतज्ञानसहितः संसारे विनष्टे न भवतीति भावः । ततश्च श्रुतज्ञानविनयतपश्चारित्रयोगान् संप्राप्नोति । ज्ञानं च विनयश्च तपश्च चारित्रयोगाश्च ज्ञानविनयतपश्चारित्रयोगाः, तान् सम्यक् प्रकारेण प्राप्नोति, तत्र ज्ञानम्-अवध्यादि, विनयः प्रसिद्धः, तपो द्वादशविधम्, चारित्रव्यापारास्तान् सर्वान् लभते, पुनः श्रुतज्ञानी स्वसमयपरसमयसङ्घातनीयो भवति स्वमतपरमतयोः सङ्घातनीयो मीलनीयः स्यात् । एतावता स्वमतपरमतानभिज्ञत्वेन प्रधानपुरुषत्वात् पण्डितेषु गणनीयो भवतीति भावः ॥ ५९ ॥ उत्त० २९ अ० ।

णाणसमाहि-ज्ञानसमाधि-पुं० । अपूर्वश्रुतावगाहनपूर्वकभावसमाधौ, "जह जह सुयमवगाहइ, अइसयरसपसरसंजुयमउव्वं । तह तह पल्हाइ मुणी, णवणवसंवेगसद्धाए ॥ १ ॥" सूत्र० १ श्रु० १० अ० ।

णाणसागर-ज्ञानसागर-पुं० । तपागच्छीयसोमसुन्दरशिष्ये, गु० ४ अधि० । अनेनाऽऽवश्यकौघनिर्युक्तिचूर्ण्यो, मुनिसुव्रतस्तवनं धनौघनवखण्डपार्श्वनाथस्तवनं चेत्यादयो ग्रन्था वाचि-

ताः । अस्य विक्रमसंवत् १४०५ मिते जन्म, १४१७ मिते दीक्षा, १४४१ मिते सूरिपदं, १४६० मिते स्वर्गतिः । जै० इ० ।

णाणसार–ज्ञानसार–न० । यशोविजयोपाध्यायकृते पूर्णाष्टका-ऽऽदिकेऽष्टश्लोकाऽऽत्मकद्वात्रिंशदष्टकाविभूषिते ग्रन्थविशेषे, अष्ट० १ अष्ट० ।

णाणसिद्ध–ज्ञानसिद्ध–पु० । भवस्थकेवलिनि, दश० ४ अ० ।

णाणा–नाना–अव्य० । न+नाञ् । विनार्थे, अनेकार्थे, उभयार्थे च । वाच० । " णाणाकुमलयाऽऽइण्णं, णाणापक्खिणिसेवियं । णाणाकुसुमसंछन्नं, उज्जाणं णंदणोवमं ।१। " नानाद्रुमलताकीर्णं विविधवृक्षवल्लीनिर्व्याप्तम् । उत्त० २० अ० सूत्र० रा० स० ।

णाणाइगुणजुय–ज्ञानाऽऽदिगुणयुत–त्रि० । सम्यग्ज्ञानश्रद्धानगुरुभक्तिसत्त्वप्रभृतिगुणसंपन्ने, पञ्चा० २ विव० ।

णाणाछंद–नानाछन्द–त्रि० । नाना भिन्नश्छन्दोऽभिप्रायो येषां ते तथा । भिन्नाभिप्रायेषु, सूत्र० २ श्रु० २ अ० ।

णाणादिट्ठि–नानादृष्टि–त्रि० । नानारूपा दृष्टिर्दर्शनं येषां ते तथा । सूत्र० २ श्रु० १ अ० १ उ० । नानारूपा दृष्टिरन्तःकरणप्रवृत्तिर्येषां ते तथा । सर्वज्ञप्रणीताऽऽगमानाश्रयणान्निबन्धनाभावाद् भिन्नदर्शनेषु, सूत्र० २ श्रु० २ अ० ।

णाणाछुवग्गह–ज्ञानाऽऽद्युपग्रह–पुं० । साधुगतज्ञानप्रभृतिगुणोपष्टम्भे, पञ्चा० १२ विव० ।

णाणापन्न–नानाप्रज्ञ–त्रि० । नानाप्रकारा विचित्रक्षयोपशमात् प्रज्ञायतेऽनयेति प्रज्ञा, सा विचित्रा येषां ते तथा । नानामतिषु, सूत्र० २ श्रु० २ अ० ।

णाणापिंडरय–नानापिण्डरत–त्रि० । नाना अनेकप्रकाराभिग्रहविशेषात् प्रतिगृहमल्पाल्पग्रहणाच्च पिण्ड आहारपिण्डः, नाना चासौ पिण्डश्च नानापिण्डः, अन्तप्रान्ताऽऽदि वा । तस्मिन् रता नानापिण्डरताः । नानापिण्डेऽनुद्वेगवत्सु, "णाणापिंडरया दंता, तेण वुच्चंति साहुणो । " दश० १ अ० ।

णाणाभिगम–ज्ञानाभिगम–पुं० । मत्यादिज्ञानेन बोधे, स्था० ३ ठा० २ उ० ।

णाणामणि–नानामणि–पुं० । नानाप्रकारेषु मणिषु, रा० ।

णाणामणिकणगरयणजूसणविराइयंगमंगाणं ।

नानाविधानि मणिकनकरत्नानि येषु भूषणेषु तानि, तैर्नानामणिकनकरत्नभूषणैर्विराजितान्यङ्गोपाङ्गानि यासां तासां तासाम् ।

णाणामणिकणगरयणविमलमहारिहणिउणोचियमिसमिसंतविरइयमहाभरणकडगतुडियथंभियभुयाए जलंतपीवरपलंबदाहिणभुयं पसारेति ।

नानाविधानि मणिकनकरत्नानि येषु तानि नानामणिकनकरत्नानि, मणयो नानाविधाश्चन्द्रकान्ताऽऽदयः, कनकानि नानावर्णतया, रत्नानि नानाविधानि कर्केतनाऽऽदीनि, तथा विमलानि निर्मलानि, तथा महान्तमुपभोक्तारमर्हति । यदि वा-महदुत्सवं क्षणमर्हन्तीति महार्हाणि, तथा निपुणं निपुणबुद्धिगम्यं यथा भवति । रा० भ० जी० । " णाणामणितित्थसुवण्णा० । " नानामणिभिर्नानाप्रकारैर्मणिनिस्तीर्थानि सुवर्णानि यासां ता नानामणितीर्थसुवर्णाः । रा० । जी० । " णाणामणिदामालंकिया । " नानामणयो नानामणिमयानि दामानि मालास्तैरलङ्कृतानि नानामणिदामालङ्कृतानि । रा० । जी० । नानाजातीयेषु मणिषु, कल्प० २ क्षण ।

णाणामल्ल–नानामाल्य–न० । नानारूपे पुष्पे, जी० ३ प्रति० ४ उ० । " नानामल्लपिणद्धा । " नानारूपाणि माल्यानि पुष्पाणि पिनद्धानि आविद्धानि यासां ता नानामाल्यपिनद्धाः । कृतान्तस्य परानिपातः, सुखाऽऽदिदर्शनात् । रा० ।

णाणामय–ज्ञानामृत–न० । ज्ञानमवबोधः, तदेवामृतम्, अविनाशिपदहेतुत्वात् । अष्ट० ७ अष्ट० । ज्ञानरूपे पीयूषे, " पीत्वा ज्ञानामृतं चुक्त्वा, क्रियासुरलताफलम् । साम्यताम्बूलमास्वाद्य, तृप्तिं याति परां मुनिः ॥१॥ " अष्ट० १० अष्ट० ।

णाणायार–ज्ञानाचार–पुं० । ज्ञानं श्रुतज्ञानं, तद्विषय आचारः । स० २३ सम० । श्रुतज्ञानविषये कालाध्ययनविनयाध्यापनाऽऽदिरूपे व्यवहारे, स० १ अङ्ग ।

साम्प्रतं ज्ञानाऽऽचारमाह-

कालें विणएँ बहुमाणे, उवहाणे तह य अनिण्हवणे ।
वंजणअत्थतदुभए, अट्ठविहो णाणमायारो ॥ १६० ॥

(काल इति) यो यस्याङ्गप्रविष्टाऽऽदेः श्रुतस्य काल उक्तः, तस्य तस्मिन्नेव काले स्वाध्यायः कर्तव्यो, नान्यदा, तीर्थकरवचनात् । दृष्टे च कृष्यादेरपि कालग्रहणे फलं, विपर्यये च विपर्यय इति । अत्रोदाहरणम्-" एको साहू पादोसियं कालं घेत्तूण अइक्कंताए वि पढमपोरिसीए अणुवओगेण पढति कालियं सुत्तं । सम्मद्दिट्ठिदेवया चिंतेति-मा अम्हं पंतदेवया उलिज्जत्ति काउं तक्कं कुंभे घेत्तूण तक्कं तक्कं ति तस्स पुरओ अभिक्खणं २ गयागयाइं करेति । तेण य चिरस्स सज्झायस्स घाघातं करेइ त्ति । भणिया य अयाणिए ! को इमो तक्कस्स विक्कयणकालो ?, वेलं ता पलोवेहि । तीए वि भणियं-अहो को इमो कालियसुयस्स सज्झायकालो त्ति ?। तओ साहुणा णायं-जहा ण एसा पागइत्थि त्ति । उवउत्तो णाओ अरत्ते दिसं मिच्छादुक्कडं । देवयाए भणियं-मा एवं करेज्जासि, मा पंता उलेज्जा । तओ काले सज्झाइयव्वं, ण उ अकाले त्ति " । दश० । (एतच्च तृतीयभागे ४९६ पृष्ठे ' कालायार ' शब्दे द्रष्टव्यम)

तथा श्रुतग्रहणं कुर्वता गुरोर्विनयः कार्यः, विनयोऽभ्युत्थानपादधावनाऽऽदिः, अविनयगृहीतं हि तदफलं भवति । दश० नि० ३ अ० । आचा० । (एवं विनयबहुमानोपधानानिह्नवाऽऽदीनां व्याख्या स्वस्वशब्दे रूक्ष्यते)

अत्रानाचरणे प्रायश्चित्तम्-

इदाणिं कालणायाराऽऽदिसु जेऽभिहिता पच्चित्ता,ते केइ मतविसेसिया जहा भवंति न भवंति य, तहा भण्णति-

सुत्तमि एते लहुगा, पच्छित्ता अत्थे गुरुग कोसिं वि ।
तं तु ण जुज्जति जम्हा,दोण्ह वि लहुआ अणज्झाए ॥२१॥

जे एते पच्छित्ता भणिता ते सुत्ते लहुगा, अत्थे गुरुगा, कोसिं मतेणेवं भण्णति । आयरिओ भणति-तदिदं केसिं मतं ण जुज्जते,ण य घडए,णोववज्जति पडिच्छति ।सीसो भणति-कम्हा ?। आयरिओ भणति-जम्हा दोण्ह वि लहुता अणज्झाए

अकाले असज्झाइय वा सुत्तत्थाइं करेंताणं सामण्णेण लहुगा जणिता, तम्हा ण घडति ।

जे पुण केइ आयरिया बहुगुरुविसेसं इच्छंति, ते इमेण कारणेणं भणंति-

अत्थधरो तु पमाणं, तित्थगरमुहुग्गतो तु सो जम्हा ।
पुव्वं च होति अत्थो, अत्थे गुरु जेसि तेसेवं ॥२२॥

सुत्तधरे णामेगे, णो अत्थधरे, एवं चउभंगो कायव्वो । कालदाचराणं भंगाणं सुत्तत्थप्पत्ते गहियाणं गुरुलाघवं चिंतिज्जति, कुलगणसंघसमितीसु सामायारीपरूवणेसु य सुत्तधराओ अत्थधरो पमाणं भवति । तहा गणाणुण्णाकाले गुरू ततियभंगिल्लासति बितियभंगे अत्थधरे गणाणुण्णं करेंति, ण सुत्तधरे; एवं अत्थधरो गुरुतरो, पमाणं च । किं च-तित्थगरमुहुग्गतो सो अत्थो जम्हा, सुत्तं पुण महत्तगणधरमुहुग्गतं-" अत्थं भासति अरहा सोहा, " तम्हा गुरुतरो अत्थो ।

किं च-

" पुव्वं च होति अत्थो, पच्छा सुत्तं भणंति जणियं च ।
अरहा अत्थं भासति, तमेव सुत्तीकरेंति गणधारी ।
अत्थेण विणा सुत्तं, अणिस्सियं केरिसं होति ? ॥१॥ "

(जेसिं त्ति) जेसिं आयरियाणं तेसेवं ति । जगारुद्दिट्ठाणं तगारेणं तिण्णिदेसो कीरति । सगारा पगारो पिट्ठो पिट्ठो कज्जति-एवं ततो भवति । एवंसद्देण य एवं कारणाणि घोसेंति जणंति य । अत्थे गुरूणि सुत्ते लहुआ पच्छित्ता । इत्ति जणितो अट्ठविहो णाणायारो । नि० चू० १ उ० ।

णाणारंभ–नानाऽऽरम्भ–त्रि० । नानाप्रकार आरम्भो धर्मानुष्ठानं येषां ते नानाऽऽरम्भाः । विभिन्नधर्मकेषु, सूत्र० २ श्रु० १ अ० । कृषिपाशुपाल्यविपणिशिल्पिकर्मसेवाऽऽदिषु अन्यतराऽऽरम्भकर्तरि, सूत्र० २ श्रु० २ अ० ।

णाणाराहण–ज्ञानाऽऽराधन–न० । आगमार्थानुपासने, पञ्चा० १७ विव० । " नाणाराहणा तिविहा पण्णत्ता । तं जहा-उक्कोसा, मज्झिमा, जहण्णा । " स्था० ३ ठा० ४ उ० ।

णाणारिय–ज्ञानार्य–पुं० । ज्ञानेन आर्यत्वहेतुना । आर्यभेदे, प्रज्ञा० १ पद । आभिनिबोधिकाऽऽदिभेदात् पञ्चविधा ज्ञानार्याः । प्रज्ञा० १ पद ।

णाणारुइ–नानारुचि–त्रि० । नानारूपा रुचिः चेतोऽभिप्रायो येषां ते तथा । सूत्र० २ श्रु० १ अ० । विनिज्ञाभिप्रायेषु, आहारविहारशयनाऽऽसनाऽऽच्छादनाऽऽभरणयानवाहनगीतवादित्राऽऽदिषु मध्येऽन्यस्यान्या रुचिर्भवति । सूत्र० २ श्रु० २ अ० ।

णाणावरण–ज्ञानाऽऽवरण–न० । ६त० । सामान्यविशेषाऽऽत्मके वस्तुनि विशेषग्रहणाऽऽत्मकस्य बोधस्य मतिश्रुतावधिमनःपर्यायकेवललक्षणस्य स्वप्रभावत आच्छादके अष्टानां कर्मणां प्रथमे, प्रव० २१६ द्वार । पं० सं० । तत्त्व० । बृ० । (ज्ञानाऽऽवरणकर्मणोऽविभागपरिच्छेदैरंशैः सर्वजीवानामनन्ततमो भागो नित्यमावृत इति ' अक्खर ' शब्दे प्रथमभागे १२६ पृष्ठे उक्तम्) ज्ञानाऽऽवरणं पञ्चधा-मतिज्ञानाऽऽवरणं, श्रुतज्ञानाऽऽवरणम्, अवधिज्ञानाऽऽवरणं, मनःपर्यायज्ञानाऽऽवरणं, केवलज्ञानाऽऽवरणं च । प्रव० २१६ द्वार । (तत्र पञ्चानां ज्ञानानां स्वरूपं यथास्थानं दर्शयिष्यते)

इदानीमेतेषामावरणमाह-

एसिं जं आवरणं, पडो व्व चक्खुस्स तं तयावरणं । [९]

एषां मतिज्ञानाऽऽदीनां पञ्चानां ज्ञानानां यदावरणमाच्छादकं, पट इव सूत्राऽऽदिनिष्पन्नशाटक इव, चक्षुषो लोचनस्य, तत्तेषां मतिज्ञानाऽऽदीनामावरणं तदावरणमुच्यते । इदमत्र हृदयम्-यथा घनघनतरघनतमेन पटेनाऽऽवृतं सन्निर्मलमपि चक्षुर्मन्दमन्दतरमन्दतमदर्शनं भवति, तथा ज्ञानाऽऽवरणेन कर्मणा घनघनतरघनतमेनाऽऽवृतोऽयं जीवः शारदशशधरकरनिकरनिर्मलतरोऽपि मन्दमन्दतरमन्दतमज्ञानो भवति, तेन पटोपमं ज्ञानाऽऽवरणं कर्मोच्यते । तत्राऽऽवरणस्य सामान्यत एकरूपत्वेऽपि यत्पूर्वोक्तानेकभेदन्निबन्धस्य मतिज्ञानस्यानेकभेदमेवाऽऽवरणस्वभावं कर्म तन्मतिज्ञानाऽऽवरणमेकग्रहणेन गृह्यते चक्षुषः पटलमिव १ । तथा पूर्वाऽऽनिर्दिष्टभेदसन्दोहस्य श्रुतज्ञानस्य यदावरणस्वभावं कर्म तत् श्रुतज्ञानाऽऽवरणम् २ । तथा प्राक् प्रपञ्चितभेदकदम्बकस्यावधिज्ञानस्य यदावरणस्वभावं कर्म तदवधिज्ञानाऽऽवरणम् ३ । तथा प्राक्निर्णीतभेदद्वयस्य मनःपर्यवज्ञानस्य यदावरणस्वभावं कर्म तन्मनःपर्यायज्ञानाऽऽवरणम् ४ । तथा पूर्वप्ररूपितस्वरूपस्य केवलज्ञानस्य यदावरणस्वभावं कर्म तत्केवलज्ञानाऽऽवरणम् ५ ।

उक्तं च बृहत्कर्मविपाके-

" सरउग्गयससिनिम्मल-तरस्स जीवस्स छायणं जमिह ।
नाणावरणं कम्मं, पडोवमं होइ एवं तु ॥ १ ॥
जह निम्मला वि चक्खू, पडेण केणावि जाइया संती ।
मंदं मंदतरागं, पिच्छइ सा निम्मला जह वि ॥ २ ॥
तह महसुयनाणावर-णओवहिमणकेवलाण आवरणं ।
जीवं निम्मलरूवं, आवरइ इमेहिं भेएहिं " ॥ ३ ॥

तदेवमेतानि पञ्चाऽऽवरणान्युत्तरप्रकृतयः, तन्निष्पन्नं तु सामान्येन ज्ञानाऽऽवरणं मूलप्रकृतिः । यथाऽङ्गुलिपञ्चकनिष्पन्नो मुष्टिः, मूलत्वक्पत्रशाखाऽऽदिसमुदयनिष्पन्नो वा वृक्षः, घृतगुडकणिकाऽऽदिनिष्पन्नो वा मोदक इति; एवमुत्तरत्रापि भावनीयम् । व्याख्यातं पञ्चविधं ज्ञानाऽऽवरणं कर्म । कर्म० १ कर्म० ।

णाणआवरणं चेव, आहियं तु पुणेगहा ॥९९॥

ज्ञानाऽऽवरणं द्विपञ्चधा दशप्रकारमाख्यातम् ।

तानेव दश भेदान् विवेक्तुमाह—

सोयावरणे चेव वि, णाणावरणं च होइ तस्सेव ।
एवं दुयजेएणं, णायव्वं जाव फासो त्ति ॥६०॥

श्रोत्राऽऽवरणं, तथा तस्यैव श्रोत्रस्य ज्ञानाऽऽवरणमेव द्विकभेदेन तावद् ज्ञातव्यं यावत् स्पर्शः । तद्यथा-चक्षुरिन्द्रियाऽऽवरणं चक्षुरिन्द्रियज्ञानाऽऽवरणम्, घ्राणेन्द्रियाऽऽवरणं घ्राणेन्द्रियज्ञानाऽऽवरणम्, रसनेन्द्रियाऽऽवरणं रसनेन्द्रियज्ञानाऽऽवरणम्, स्पर्शेन्द्रियाऽऽवरणं स्पर्शेन्द्रियज्ञानाऽऽवरणमिति । जी० १ उ० (सर्वज्ञसिद्धिप्रस्तावे रागाऽऽदीनां ज्ञानाऽऽवरणत्वम् (ज्ञानाऽऽवरणीयस्योत्तरप्रकृतीरधिकृत्य बन्धोदयसत्तास्थानानां संवेधः " कम्म " शब्दे तृतीयभागे ५०६ पृष्ठे गतः)

णाणावरणिज्ज–ज्ञानाऽऽवरणीय–न० । ज्ञानमावृणोतीति ज्ञानाऽऽवरणीयम् । ज्ञानाऽऽवरणकर्मणि, " सरउग्गयससिनिम्मल-तरस्स जीवस्स छायणं जमिह । नाणाऽऽवरणं कम्मं, पडोवमं होइ एवं तु ॥ १ ॥ " स्था० २ ठा० ४ उ० ।

णाणावरणिज्जे कम्मे दुविहे पण्णत्ते । तं जहा-देसणाणाव-

रणिज्जे चेव, सव्वणाणावरणिज्जे चेव, दरिसणावरणिज्जे कम्मे एवं चेव ।

देशं ज्ञानस्याऽऽभिबोधिकाऽऽदिमावृणोतीति देशज्ञानाऽऽवरणीयम्, सर्वं ज्ञानं केवलाऽऽख्यमावृणोतीति सर्वज्ञानाऽऽवरणीयम्, केवलज्ञानाऽऽवरणं हि आदित्यकल्पकेवलज्ञानरूपस्य जीवस्याऽऽच्छादकतया सान्द्रमेघवृन्दकल्पमिति तत्सर्वं ज्ञानाऽऽवरणम्। मत्याद्यावरणं तु घनाऽऽच्छादिताऽऽदित्येषत्प्रज्ञाकल्पस्य केवलज्ञानदेशस्य कटकुड्याऽऽदिरूपज्ञानाऽऽवरणतुल्यमिति देशाऽऽवरणमिति । पठ्यते च-"केवलणाणावरणं, दंसणछक्कं च मोहबारसगं । ता सव्वघाइसन्ना, भवंति मिच्छत्तवीसइमं"॥१॥ इति । (अनन्तानुबन्धाऽऽदीत्यर्थः) अथवा देशोपघाति सर्वोपघाति पर्युत्कापेक्षया देशसर्वाऽऽवरणत्वमस्य ।

यदाह-

" मइसुयनाणाऽऽवरणं, दंसणमोहं च तदुपघाईणि ।
तप्पडुगाइं पुविहा-हँ देससव्वोपघाईणि ॥ १ ॥
सव्वेसु सव्वघाई-सु हएसु देसोवघाइगाणं च ।
भोगेहिँ मुच्चमाणो, समए समए अणंतेहिं ॥ २ ॥
पढमं लभइ णगारं, पच्छेक्कं वत्थुमेवमन्नं ति ।
कमसो विसुज्झमाणो, लहइ समत्तं णमोक्कारं ॥ ३ ॥"
स्था० २ ठा० ४ उ० ।

णाणावरणिज्जवग्ग-ज्ञानाऽऽवरणीयवर्ग-पुं० । ज्ञानाऽऽवरणकर्मप्रकृतिसमुदाये, क० प्र० ।

णाणावरणिज्जकम्मसंघाय-ज्ञानाऽऽवरणीयकर्मसङ्घात-पुं० । ज्ञानप्रकर्षनिरोधे, "सुयदेवया भगवई, नाणावरणीयकम्मसंघायं । तेसिं खवेउ सययं, जेसिं सुयसागरे भत्ती ॥१॥" पा० ।

णाणावरणोदय-ज्ञानाऽऽवरणोदय-पुं० । तत्काले ज्ञानाऽऽवरणीयकर्मविपाके, आव० ४ अ० ।

णाणाविह-नानाविध-त्रि० । विविधप्रकारे, त्रि० । रा० । बहुप्रकारे, सूत्र० २ श्रु० ३ अ० । स० । "णाणाविहरागवसणा । " नानाविधो नानाप्रकारो रागो येषां तानि नानाविधरागाणि, तान्येव वसनानि वस्त्राणि संवृततया यासां ता नानाविधरागवसनाः । जी० ३ प्रति० ४ उ० । आचा० । रा० । " णाणाविहपंचवण्णेहिं वत्थेहिं । " नानाविधा जातिभेदाद् नानाप्रकारा ये पञ्चवर्णा मणयस्तैरुपशोभितः । आ० म० १ अ० १ खण्ड । प्रज्ञा० । " णाणाविहगुच्छगुम्ममंडवगसोभिया । " प्रत्यासन्नैर्नानाप्रकारैर्गुच्छैर्वृन्ताकीप्रभृतिभिर्गुल्मैर्नवमल्लिकाऽऽदिनिर्मितैर्लताऽऽदिमण्डपकैश्च रूपशोभिता नानाविधगुच्छगुल्ममण्डपकशोभिता । जी० ३ प्रति० ४ उ० । " णाणाविहरागरंजिउड्डियधयविजयवेजयंतीपडागातिपडागमंडिअं करेंति ।" नानाविधा रागा येषु ते नानाविधरागाः, नानाविधरागरुचिरोच्छ्रितरूपीकृतैर्ध्वजैः पताकाऽतिपताकाऽऽदिभिश्च मण्डितां कुर्वन्ति । जी० ३ प्रति० ४ उ० । " णाणामणिकणगरयणखइयउज्जलबहुसमसुविभत्तचित्तरमणिज्जकुट्टिमतला । " नानामणिकनकरत्नानि खचितानि यत्र स नानामणिकनकरत्नखचितः, निष्ठान्तस्य परनिपातो भार्याऽऽदिदर्शनात्। तथोज्ज्वलो निर्मलो बहुसमोऽत्यन्तसमः सुविभक्तो निश्चितो निश्चिद्रो रमणीयश्च भूमिभागो यस्यां सा । जी० ३ प्रति० रा० । "णाणाविहरागभूसियज्झयपडागमंडियं । " नानाविधैः रागैर्भूषिता ये ध्वजाः सिंहाऽऽदिरूपोपलक्षिता वृहत्यः पताकाश्च तास्ताभिर्मण्डितं विद्योतितम् । कल्प० ५ क्षण ।

णाणासील-नानाशील-त्रि० । नानाप्रकारं शीलमनुष्ठानं येषां ते तथा । अनेकाऽऽचारेषु, सूत्र० २ श्रु० १ अ० । परतीर्थिका नानाशीलाः, तत्र शीलं व्रतविशेषः, स च भिन्नस्तेषामनुज्ञातसिद्ध एव । सूत्र० २ श्रु० २ अ० ।

णाणाहुइमंतपयाभिसित्त-नानाऽऽहुतिमन्त्रपदाभिषिक्त-त्रि० । आहुतयो घृतप्रक्षेपाऽऽदिलक्षणाः मन्त्रपदान्यग्नये स्वाहा इत्येवमादीनि, तैरभिषिक्तम् । दीक्षासंस्कृते, दश० ६ अ० १ उ० ।

णाणि [ण्]-ज्ञानिन्-त्रि० । ज्ञानं सकलपदार्थाऽऽविर्भावकं विद्यते यस्यासौ ज्ञानी । आचा० १ श्रु० ४ अ० २ उ० । विशिष्टविवेकवति, सूत्र० १ श्रु० १ अ० ४ उ० । नि० चू० । प्रज्ञा० । यथार्थतत्त्वस्वरूपावबोधिनि, अष्ट० ९ अष्ट० । परमार्थवेदिनि, आचा० १ श्रु० ३ अ० ३ उ० । सूत्र० । जीवस्वरूपतद्बन्धकर्मवेदिनि, सूत्र० १ श्रु० ११ अ० । " णाणी तु णिहिं गुत्तो, खवेइ ऊसासमित्तेणं । " सूत्र० २ श्रु० ५ अ० । अनु० । उत्त० । " जं अन्नाणी कम्मं, खवेइ बहुयाहिं वासकोडीहिं । तं नाणी तेहिं तीहिं, खवेइ ऊसासमेत्तेणं ॥१॥" द० प० । संथा० । ('णाणणय' शब्दे १६६० पृष्ठे ज्ञानप्राधान्यमुक्तम्)

ज्ञानवद्वक्ता यथा -

पढइ नडो वेरग्गं, इच्चाइ निदंसिऊण केइऽत्थ ।
नाणड्ढाणमवन्नं, कुणंति नेयं वियाणंति ॥ ६१ ॥

पठति नटो वैराग्यमित्यादि निर्दिश्य कथयित्वा, आदिशब्दात्-" णिच्छुज्झिजा य बहुजणो जेण तं तह सढो जाणेण समोयरइ" इति दृश्यम्, सुगमं च। केऽपि स्तोका अनाभोगत एव, अनेके च। पकारलोपः पूर्ववत् रूपमिदम् । ज्ञानाऽऽख्यानां बह्वागमानामवज्ञामश्रद्धाऽऽदिरूपां कुर्वन्ति विदधति । नेति निषेधे, इदं च वक्ष्यमाणं, विजानन्ति बुध्यन्ते । इति गाथार्थः ॥६१॥

तदेवाऽऽह-

नाणाहिओ वरतरं, हीणो वि हु पवयणं पभावंतो ।
न य चुक्कर करंतो, सुट्ठु वि अप्पागमो पुरिसो ॥६२॥

सुबोधार्था ।

तथा-

छट्ठऽट्ठमदसमदुवा-लसेहिँ अबहुसुयस्स जा सोही ।
एत्तो बहुअरिया पुण, हविज्ज जिमियस्स नाणिस्स ।६३।

इयमपि सुगमा ।

ननु यद्येवं तर्हि पूर्वोक्तस्य व्याहतिः, सत्यम्, तन्निन्दावाक्यमेवमसौ भण्यते । येन क्रियायामुद्यमं करोति न चाऽसौ गुणविकलः, कथमन्यथा त्वयोक्तं मे " नाणाहियस्स नाणं पूइज्जइ " इत्यादि ।

अत्रैवार्थे जीवोपदेशमाह-

संसारसंभवाद् भवोद्भूताद् दुःखादसाताद् यदि जीव ! त्वं लघान् असि लघसि निर्विण्णः श्रान्तो, मेति निषेधे, तर्हि दीपतुल्यानां दीपसदृशानां, ज्ञानिनां ज्ञानवताम्, अवर्णम-

श्लाघां कुरु। अयमभिप्रायः-ज्ञानवतामवज्ञाऽऽदिकरणाद् ज्ञानाऽऽवरणीयं कर्म बध्यते। तथैव दर्शनाऽऽवरणीयं, तेन च मोहनीयं मोहनीयेन वा उदीर्णेनाऽष्टौ कर्माणि, ततश्च भवभ्रमणम्, एतच्च शतकभगवत्यादिषु सूत्रेषु प्रतीतमिति न वितन्यते। अत उक्तम्-ज्ञानाऽऽद्यवज्ञातो भवदुःखमिति गाथार्थः। जीवा० १६ अधि०। ज्ञानक्रियाकर्तरि, व्य० १ उ०। (जीवा ज्ञानिनोऽज्ञानिनश्च 'णाण' शब्देऽस्मिन्नेव भागे १६७२ पृष्ठे उक्ताः) अवधिज्ञानिनो मनःपर्यवज्ञानिनो वा कियन्तो भवान् कुर्वन्तीति प्रश्ने उत्तरम्-" आभिणिबोहियनाणिस्स णं भंते ! अंतरं कालओ केवच्चिरं होइ ?। गोयमा ! जहन्नेणं अंतोमुहुत्तं, उक्कोसेणं अणंतं कालं० जाव अवड्ढपोग्गलपरियट्टं च देसूणं, सुअनाणिओहिनाणिमणपज्जवनाणीणं एवं चेव, केवलनाणिस्स नत्थि अंतरं।" इत्यादिभगवतीसूत्राष्टमशतकद्वितीयोद्देशके; एतदनुसारेणावधिज्ञानेन मनःपर्यवज्ञानिना वाऽनन्तभवान् कुर्वन्तीति ज्ञायत इति। ३८० प्र०। सेन० ३ उल्ला०।

णाणिंद ज्ञानेन्द्र-पुं०। श्रुताऽऽद्यन्यतरज्ञानवशविवेचितवस्तुविशेषे केवलिनि, स्था० २ ठा० ४ उ०। (व्याख्या 'इंद' शब्दे द्वितीयभागे ५३४ पृष्ठे उक्ता)

णाणुप्पायमहिमा-स्त्री०-ज्ञानोत्पादमहिमन्-पुं०। तीर्थकृतां केवलज्ञानोत्पादे च कृतमहोत्सवे, स्था० ३ ठा० १ उ०।

णाणोवओग-ज्ञानोपयोग-पुं०। ज्ञाने व्याप्रियमाणतायाम्, प्रव० १० द्वार।

णाणोवघाय-ज्ञानोपघात-पुं०। प्रमादतः श्रुतज्ञानोपघाते, स्था० १० ठा०।

णाणोवसंपया-ज्ञानोपसंपत्-स्त्री०। श्रुतज्ञानार्थमाचार्यान्तरोपसंपत्तौ, ध० ३ अधि०। ('उवसंपया' शब्दे द्वितीयभागे ६८५ पृष्ठे तद्विधिः)

णात-ज्ञात-न०। त्रि०। दृष्टान्ते, नि० चू० १० उ०। आदरणे, नि० चू० १५ उ०। अनु०। निदर्शने, पञ्चा० ४ विव०। ज्ञा०। उदाहरणे, ज्ञाताध्ययने, नं०। सूत्र०। आगमिते, प्रश्न० ५ सम्य० द्वार। ज्ञातमागमितमित्येकार्थम्। व्य० ३ उ०। सम्यक्परिच्छिन्ने, त्रि०। आव० ६ अ०। आचा०। विदिते, सूत्र० १ श्रु० ६ अ०। उदारक्षत्रिये, बृ० १ उ०। आचा०। उत्त०। प्रश्न०। इक्ष्वाकुवंशविशेषभूते, ज्ञा० १ श्रु० ८ अ०। श्रीऋषभदेवजातीये (कल्प० ५ क्षण) क्षत्रियविशेषे, पुं०। सूत्र० १ श्रु० ६ अ०। स्था०। आचा०। यद्वंशे श्रीवीरस्वामी जज्ञे। स्था० ६ ठा०। ज्ञातपुत्रे, सूत्र० १ श्रु० २ अ० २ उ०। आ० चू०।

णातकुमार-ज्ञातकुमार-पुं०। राज्यार्हे ज्ञातक्षत्रियकुमारे, ज्ञा० १ श्रु० ८ अ०।

णातकुलचंद-ज्ञातकुलचन्द्र-पुं०। ज्ञातकुले चन्द्र इव। महावीरस्वामिनि, कल्प० ५ क्षण। आचा०।

णातखंड-ज्ञातखण्ड-न०। स्वनामख्याते वने, यत्र महावीरस्वामी प्रव्रजितः। स्था० १० ठा०। आ० चू०।

णातपुत्त-ज्ञातपुत्र-पुं०। ज्ञातः सिद्धार्थः तस्य पुत्रः। कल्प० ५ क्षण। सिद्धार्थक्षत्रियपुत्रे श्रीमहावीरे, " णातपुत्ते महावीरे, एवमाह जिणुत्तमे।" सूत्र० १ श्रु० १ अ० १ उ०।

णाति-ज्ञाति-स्त्री०। स्वजने, सूत्र० १ श्रु० ३ अ० १ उ०।

णादिय-नादित-त्रि०। लपिते, जी० ३ प्रति० ४ उ०।

णाध-नाथ-पुं०। "थो धः शौरसेन्याम्।" ८। ४। २६७। इति प्राकृतसूत्रेण थस्य धकारः। प्रभौ, प्रा० ४ पाद।

णाभि-नाभि-पुं०। शकटरथाङ्गे, दश० ७ अ०। जठरस्य मध्यावयवे, उत्त० २ अ०। अस्यामवसर्पिण्यां भरतक्षेत्रजे प्रथमकुलकरे श्रीऋषभदेवपितरि, आव० १ अ०। नि०। आचा०। ति०। आ० म०। प्रव०। जं०। स्था०।

णाभिचक्क-नाभिचक्र-न०। शरीरमध्यवर्तिनि समस्ताङ्गसन्निवेशमूलभूते देहावयवे, ज्ञा० २६ ज्ञा०।

णाभिप्पभव-नाभिप्रभव-त्रि०। नाभेरुत्पन्ने, तं०।

णाभिरसहरणी-नाभिरसहरणी-स्त्री०। नाभिनाले, तं०।

णाभेय-नाभेय-पुं०। चतुःसहस्रभूपैः सह श्रीनाभेयजिनो दीक्षां जग्राह, तेषां दीक्षोच्चारः केन कारित इति प्रश्ने, उत्तरम्-ततः श्रीप्रथमजिनेन सह प्रभुवद् व्रतं जगृहुरिति ऋषिचरित्राऽऽदौ। २५६ प्र०। सेन० ३ उल्ला०।

णाम-नाम-पुं०। नमनं नामः। परिणामे, भावे, (न०)

कइविहे णं भंते ! णामे पण्णत्ते ?। गोयमा ! छव्विहे णामे पण्णत्ते। तं जहा-उदइए० जाव सन्निवाए। से किं तं उदइए णामे ?। उदइए णामे दुविहे पण्णत्ते। तं जहा-उदइए य, उदयणिप्फण्णे य। एवं जहा सतरसमसए पढमे उद्देसए भावो तहेव इह वि। णवरं इमं णाणत्तं सेसं तहेव० जाव सन्निवाइए॥

नमनं नामः, परिणामो, जाव इत्यनर्थान्तरम्। (णवरं इमं णाणत्तं त्ति) सप्तदशशते भावमाश्रित्य इदं सूत्रमधीतमिह तु नामशब्दमाश्रित्येत्येतावान् विशेष इत्यर्थः। भ० २५ श० ५ उ०।

नामन्-अव्य०। असंकल्पौ, प्रश्न० १ आश्र० द्वार। वाक्यालङ्कारे, स्था० ४ ठा० १ उ०। सूत्र०। दश०। पादपूरणे, प्रा० ३ पाद। विपा०। नि० चू०। शिष्याऽऽमन्त्रणे, जं० १ वक्ष०। विशे०। जीवा०। कोमलाऽऽमन्त्रणे, बृ० ३ उ०। तं०। विशे०। संभावनायाम्, सूत्र० १ श्रु० ५ अ० १ उ०। आचा०। स्था०। ज्ञा०। अनु०। विशे०। दश०। भ०। प्रसिद्धौ, कल्प० १ क्षण। अभ्यनुज्ञायाम्, विशे०। नमति ज्ञानरूपाऽऽदिपर्यायभेदानुसारतो जीवपरमाण्वादिवस्तुप्रतिपादकतया प्रह्वीभवतीति नाम। तथा चाऽऽह-"जं वत्थुणोऽभिहाणं, पज्जवनेयाणुसारियं नाम। पइनेयं जं नमए, पइभेयं जाइयं भणियं॥१॥" उत्त० १ अ०। विशे०। सूत्र०। यादृच्छिकाभिधाने, ज्ञा० १ श्रु० १ अ०।

सामान्येन नामनस्तावल्लक्षणमाह-

पज्जायाणभिधेयं, ठियमणुत्थे तयत्थनिरवेक्खं।
जाइच्छियं च नामं, जावद्दव्वं च पायेण॥ ५५॥

यत् कस्मिँश्चिद् भूतकदारकाऽऽदौ इन्द्राऽऽद्यभिधानं क्रियते, तन्नाम भण्यते। कथंभूतं तत् ?, इत्याह-पर्यायाणां शक्रपुरन्दरपाकशासनशतमखहरिप्रभृतीनां समानार्थवाचकानां ध्वनीनामनभिधेयमवाच्यम्, नामवतः पिण्डस्य संबन्धी धर्मोऽयं नाम्नुपचरितः, स हि नामवान् भूतकदारकाऽऽदिपिण्डः किं-

लैकेन सङ्केतितमात्रेणेन्द्राऽऽदिशब्देनैवाभिधीयते, न तु शेषैः शक्रपुरन्दरपाकशासनाऽऽदिशब्दैः, अतो नामयुक्तपिण्डगतधर्मो नाम्न्युपचरितः पर्यायानभिधेय इति । पुनरपि कथंभूतं तन्नाम ?, इत्याह-(ठियमण्णत्थे त्ति) विवक्षितात् भूतकदारकाऽऽदिपिण्डादन्यच्चासावर्थश्चान्यार्थो देवाधिपाऽऽदिः, सद्भावतस्तत्र यत् स्थितम्, भूतकदारकाऽऽदौ तु सङ्केतमात्रतयैव वर्तते; अथवा-सद्भावतः स्थितमन्यस्मिन्नर्थे-अनुगतः संबद्धः परमैश्वर्याऽऽदिकोऽर्थो यत्र सोऽन्यार्थः-शचीपत्यादिः । सद्भावतस्तत्र स्थितं भूतकदारकाऽऽदौ तर्हि कथं वर्तते ?, इत्याह-तदर्थनिरपेक्षं तस्येन्द्राऽऽदिनाम्नोऽर्थस्तदर्थः परमैश्वर्याऽऽदिस्तस्य निरपेक्षं सङ्केतमात्रेणैव तदर्थशून्ये भूतकदारकाऽऽदौ वर्तते, इति पर्यायानभिधेयम्, स्थितमन्यार्थे, अन्यस्मिन्नर्थे वा; तदर्थनिरपेक्षं यत् क्वचिद् भूतकदारकाऽऽदौ इन्द्राऽऽद्यभिधानं क्रियते, तन्नाम, इतीह तात्पर्यार्थः । प्रकारान्तरेणापि नाम्नः स्वरूपमाह-यादृच्छिकं चेति । इदमुक्तं भवति-न केवलमनन्तरोक्तं, किं त्वन्यत्रावर्तमानमपि यदेवमेव यदृच्छया केनचिद् गोपालदारकाऽऽदेरभिधानं क्रियते, तदपि नाम, यथा मित्थो, रुचित्थ इत्यादि । इदं चोभयरूपमपि कथंभूतम ?, इत्याह-यावद्द्रव्यं च प्रायेणेति-यावदेतद्वाच्यं द्रव्यमवतिष्ठते तावदिदं नाम्याप्यवतिष्ठत इति भावः । किं सर्वमपि ?, न, इत्याह-प्रायेणेति, मेरुद्वीपसमुद्राऽऽदिकं नाम प्रभूतं यावद् द्रव्यभावि दृश्यते; किञ्चिदन्यथाऽपि समीक्ष्यते, देवदत्ताऽऽदिनामवाच्यानां द्रव्याणां विद्यमानानामन्यपरापरनामपरावर्तस्य लोके दर्शनात् । सिद्धान्तेऽपि यदुक्तम्-"नामं आवकहियं ति" तत् प्रतिनियतजनपदाऽऽदिसंज्ञामेवाङ्गीकृत्य, यथोत्तराः कुरव इत्यादि । तदेवं प्रकारद्वयेन नाम्नः स्वरूपमुक्तम्, एतच्च तृतीयप्रकारस्योपलक्षणम्, पुस्तकपत्रचित्राऽऽदिलिखितस्यवस्त्वभिधानभूतेन्द्राऽऽदिवर्णाऽऽवलीमात्रस्याप्यन्यत्र नामत्वेनोक्तत्वादिति । एतच्च सामान्येन नाम्नो लक्षणमुक्तम् । विशे० । (किञ्चिन्नाम निरर्थकमपि भवतीति ' उस्सारकप्पिय ' शब्दे द्वितीयभागे ११७६ पृष्ठे गतम) सर्वस्यापि घटपटाऽऽदिवस्तुन आत्मीयेऽभिधाने, विशे० । द्र० । संज्ञायाम्, " यद् वस्तुनोऽभिधानं, स्थितमन्यार्थे तदर्थनिरपेक्षः । पर्यायानभिधेयं, च नाम यादृच्छिकं च तथा ॥ १ ॥" इति । स्था० ३ ठा० १ उ० । दश० । दशा० । आचा० । उत्त० । यत्तु " णामं आवकहियं " इति सूत्रे प्रोक्तं, तत्प्रतिनियतजनपदसंज्ञामाश्रित्यैवेति ध्येयम् । ननु ' गङ्गायां घोषः ' इत्यत्र गङ्गापदेन गङ्गातीरमभिधीयते । तत्र किं नामनिक्षेपस्य प्रवृत्तिः, उत निक्षेपान्तरस्य ?। नाद्यः । आहन्यादिपर्यायाऽभिधेयत्वेन तत्र नामनिक्षेपाप्रवृत्तेः । न द्वितीयः । प्रसिद्धनिक्षेपान्तराविषये तत्राप्रसिद्धनिक्षेपकल्पने तदियत्ताकृतिप्रसङ्गादिति चेत् । " जत्थ य जं जाणिज्जा, णिक्खेवं णिक्खिवे णिरवसेसं । " इत्यनेन यथापरिज्ञानं निक्षेपान्तरकल्पनाया अप्यनुमतत्वेन दोषाभावात् । अस्तु वा तत्राभिप्रायिकी स्थापनैव, भवतु वा वैज्ञानिको भावनिक्षेपः, एवं गङ्गापदेन तीरे गङ्गानेदाभिव्यक्तिकृत्या गङ्गागतशैत्यपावनत्वाऽऽदिधर्मयोगस्याभिव्यञ्जयितुमशक्यत्वात्, तत्प्रपञ्चितमलङ्कारचूडामणिकृत्तावस्मदादिभिः । तत् किं शक्तिलक्षणाऽन्यतरवृत्तिनिरपेक्षशब्दसङ्केतविषयत्वमेव नामलक्षणं स्थितमन्यार्थे इत्यत्र अनेकार्थव्यवच्छेदवृत्तयेऽशक्यार्थ इति करणार्थाच्चकारस्य पर्यायानभिधेयं चेत्यनेन लक्षणस्य च व्यावृत्तौ तात्पर्यात् । ओमिति चेत्, तर्हि रूपसत्यादिविषयेऽतिव्याप्तिः, तस्य द्रव्यनिक्षेपविषयत्वे च तत्रैव सेति चेत्, न, उक्तलक्षण एव भावनिक्षेपविषयानेदव्यवहारोपयिकरूपरहित्यावशेषेण दाने दोषाभावात् । निरूढलक्षणायाः स्वीकारे तु लक्षणाया निरूढत्वज्ञापकवचनमेव निक्षेपः । तद्विषयविशेषस्तु अन्यव्यावृत्त्यादिना यथाव्यवहारं स्वीकार्य इति नातिप्रसङ्ग इति दिक् । नयो० । पारिभाषिक्यां संज्ञायाम्, विशे० । पितृपितामहाऽऽदेर्वाचकेऽभिधाने, अनु० ।

नौणाऽऽदि नाम चतुर्धा । तद्यथा-नौणं, समयजं, तदुभयजम, अनुभयजं च । तत्र गुणादागतं नौणम् । अथ कोऽसौ गुणः, कथं च तत आगतम् ?। उच्यते-इह शब्दस्य व्युत्पत्तिनिमित्तं योऽर्थो, यथा ज्वलनस्य दीपनं 'ज्वल' दीप्ताविति वचनात्, स गुणः । गुणश्चेह परतन्त्रो विवक्षितो, न पारिणामिको रूपाऽऽदिः; तेन यच्छब्दस्य वस्तुनि प्रवर्तमानस्य व्युत्पत्तिनिमित्तं द्रव्यं, गुणः, क्रिया वा, स गुण इत्यभिधीयते । तत्र द्रव्यं व्युत्पत्तिनिमित्तम्-शृङ्गी, दन्ती, विषाणीत्यादौ । गुणो-जातरूपं सुवर्णं, स्वादु रसाऽम्लेते इत्यादौ । क्रिया-तपनः श्रमणो दमितो हिंसो ज्वलन इत्यादौ । जातिश्च नाम्नो व्युत्पत्तिनिमित्तं न भवति, किं तु प्रवृत्तिनिमित्तं; यथा गोशब्दस्य गोजातिः । तथाहि-गोशब्दस्य गमनक्रिया व्युत्पत्तिनिमित्तं, न गोत्वं, गच्छतीति गौरिति व्युत्पत्तेः केवलमेकार्थसमवायबलाद् गमनक्रियया खुरककुदल्लाङ्गूलसास्नाऽऽदिमत्त्वं प्रवृत्तिनिमित्तमुपलक्ष्यते, इति गच्छत्यगच्छति वा गोपिण्डे गोशब्दस्य प्रवृत्तिः । एवं सर्वेष्वपि जातिशब्देषु नामसु व्युत्पत्तिनिमित्तवत्सु भावनीयम् । ये तु जातिशब्दा व्युत्पत्तिरहिता यथाकथञ्चित् जातिमत्सु रूढिमुपागतास्तेषु व्युत्पत्तिनिमित्तमेव नास्तीति कुतस्तत्र जातेर्व्युत्पत्तिनिमित्तत्वप्रसङ्गः ?। तस्मात् जातिः परतन्त्राऽपि शब्दस्य व्युत्पत्तिनिमित्तमिति न सा गुणग्रहणेन गृह्यते । ये तु गोत्वविशिष्टो गोमानित्यादयो जातिव्युत्पत्तिनिमित्ताः, न ते नामरूपा इति न तैर्व्यभिचारः, ततो गुणादागतं गौणं, व्युत्पत्तिनिमित्तं द्रव्याऽऽदिरूपं गुणमधिकृत्य यद्वस्तुनि प्रवृत्तं नाम तद्गुणनामेति भावार्थः । एतदेव नाम लोके यथार्थमित्याख्यायते । तथा-समयजं यदन्वर्थरहितं समय एव प्रसिद्धम् । यथा-ओदनस्य प्राभृतिका इति नाम । उभयजं यद्गुणाक्षिप्तं समयप्रसिद्धं च, यथा धर्मध्वजस्य रजोहरणमिति नाम । इदं हि समयप्रसिद्धमन्वर्थयुक्तं च । तथाहि-बाह्यम्, आभ्यन्तरं च रजो हियत इत्यनेन रजोहरणम् । तत्र बाह्यं रजोऽपहारित्वमस्य सुप्रतीतम । आन्तररजोऽपहरणसमर्थाश्च परमार्थतः संयमयोगाः, तेषां च कारणमिदं धर्मलिङ्गमिति कारणे कार्योपचाराद् रजोहरणमित्युच्यते ।

उक्तं च-

" हरइ रयं जीवाणं, बज्झं अब्भिंतरं च जं तेणं ।
रयहरणं ति पवुच्चइ, कारणकज्जोवयाराओ ॥ १ ॥
संजमजोगा इत्थं, रओहरा तेसि कारणं जेणं ।
रयहरणं उवयारा, भन्नइ तेणं रओकम्मं ॥२॥ "

अनुभयजं यदन्वर्थरहितं, समयाप्रसिद्धं च । यथा कस्यापि पुंसः शौर्यक्रौर्याऽऽदिगुणासंभवेन उपचाराभावे सिंह इति नाम । यद्वा-देवा एनं देयासुरिति व्युत्पत्तिनिमित्तासंभवे

देवदत्त इति नाम। एवं पिण्ड इति वर्णाऽऽदिरूपमपि नाम गौणाऽऽदिभेदाच्चतुर्धा । तत्र यदा बहूनां सजातीयानां विजातीयानां च कठिनरूव्याणामेकत्र पिण्डने पिण्ड इति नाम प्रवर्तते, तद् गौणम्, व्युत्पत्तिनिमित्तस्य वाच्ये विद्यमानत्वात् । यदा तु समयपरिभाषया पानीयेऽपि पिण्ड इति नाम प्रयुज्यते तदा समयजम्, लोके हि कठिनरूव्याणामेकत्र संश्लेषे पिण्ड इति प्रतीतं,न तु द्रवद्रव्यसंघाते,ततश्च पिण्डनं पिण्ड इति व्युत्पत्त्यर्थाघटनात् । पिं० । नाम च यथार्थाऽऽदिभेदात्त्रिविधम् । तद्यथा-यथार्थम् , अयथार्थम्, अर्थशून्यं च । तत्र यथार्थम्-प्रदीपाऽऽदि,अयथार्थम्-पलाशाऽऽदि,अर्थशून्यमकित्थाऽऽदि । स्था० १ ठा० । विशे० । नामस्थापनाद्रव्यमित्येवं रूव्यार्थिकस्य निक्षेपः । सम्म० १ काण्ड ।

से किं तं णामे ? । णामे दसविहे पण्णत्ते । तं जहा-एगणामे, दुणामे, तिणामे, चउणामे, पंचणामे, छणामे, सत्तणामे, अट्ठणामे, नवणामे, दसणामे ।

(णामे इत्यादि) इह जीवगतज्ञानाऽऽदिपर्यायेऽजीवगतरूपाऽऽदिपर्यायानुसारेण प्रतिवस्तु नैकं नमति तदभिधायकत्वेन प्रवर्तत इति नाम, वस्त्वभिधानमित्यर्थः । उक्तं च-" जं वत्थुणोऽभिहाणं, पज्जयनेयाणुसारियं णामं । पइभेअं जं नमई, पइभेअं जाइयं भणिअं ॥१॥ " अनु० । (एकनामाऽऽदीनां व्याख्या स्वस्वस्थाने) विचित्रपर्यायैर्नैकमयति गत्यादिपर्यायानुभवनं प्रति प्रवणयति जीवमिति नाम । कर्म० ६ कर्म० । पं० सं० । स्था० । दशा० । प्रज्ञा० । गत्यादिहेतौ कर्मणो मूलप्रकृतिभेदे, कर्म० ।

णामकम्म [ण्]-नामकर्मन्-न० । क० स० । जीवानां विचित्रपरिणामकरणमहेतौ कर्मभेदे, कर्म० ।

तद् द्विविधम्:

णामकम्मे दुविहे पण्णत्ते । तं जहा-सुभणामे चेव, असुभणामे चेव ।

विचित्रपर्यायैर्नमयति परिणमयति यज्जीवं तन्नाम ।

एतत्स्वरूपं च-

"जह चित्तयरो निउणो, अणेगरूवाइँ कुणइ रूवाइं ।
सोहणमसोहणाइं, चक्खुमणक्खेहिँ वण्णेहिं ॥ १ ॥
तह नामं पि हु कम्मं, अणेगरूवाइँ कुणइ जीवस्स ।
सोहणमसोहणाइं, इट्ठाणिट्ठाणि लोयस्स" ॥ २ ॥ इति ।

शुभं तीर्थकराऽऽदि, अशुभमनादेयत्वाऽऽदीति । स्था० २ ठा० ४ उ० ।

नामकर्मानिधित्सुराह-

....., ... नामकम्म चित्तिसमं ।
बायालतिनवइविहं, तिउत्तरसयं च सत्तट्ठी ॥ २३ ॥

(नामकम्म चित्तिसमं इत्यादि) नामकर्म भवति चित्रिसमं, चित्रं कर्म, तत् कर्तव्यतया विद्यते यस्य स चित्री चित्रकरः, तेन समं सदृशं चित्रिसमम् । यथा हि चित्री चित्रं चित्रप्रकारं विविधवर्णकैः करोति, तथा नामकर्मापि जीवमनारकोऽयम्, तिर्यग्योनिकोऽयम्, एकेन्द्रियोऽयम्, द्वीन्द्रियोऽयमित्यादिव्यपदेशैरनेकधा करोतीति चित्रिसममिदमिति । एतच्चानेकभेदम् । कथमित्याह-(बायालतिनवइविहं तिउत्तरसयं च सत्तट्ठि त्ति) अत्र विधाशब्दस्य प्रत्येकं योगाद् द्विचत्वारिंशद्विधम् । यद् वा-त्रिनवतिविधम् , यदि वा-त्र्युत्तरशतविधम् ,अथवा-सप्तषष्टिविधम् । चशब्दः समुच्चये व्यवहितसंबन्धश्च, स च तथैव योजितः ॥ २३ ॥ कर्म० १ कर्म० ।

नामकम्मे बायालीसविहे पण्णत्ते । तं जहा-गइनामे, जाइनामे, सरीरनामे, सरीरंगनामे, सरीरबंधणनामे,सरीरसंघायणनामे, संघयणनामे, संठाणनामे, वण्णनामे, गंधनामे, रसनामे, फासनामे, अगुरुलहुयनामे, उवघायनामे, पराघायनामे, आणुपुव्वीनामे, उस्सासनामे, आयवनामे, उज्जोयनामे, विहगगइनामे, तसनामे, थावरनामे,सुहुमनामे, बायरनामे, पज्जत्तनामे, अपज्जत्तनामे, साहारणसरीरनामे, पत्तेयसरीरनामे,थिरनामे, अथिरनामे,सुभनामे, असुभनामे, सुभगनामे, दुब्भगनामे, सुस्सरनामे, दुस्सरनामे, आएज्जनामे, अणाएज्जनामे, जसोकित्तिनामे, अजसोकित्तिनामे, निम्माणनामे, तित्थगरनामे । स० ४२ सम० ।

अथ नामकर्मणो द्विचत्वारिंशतं भेदान् प्रविकटयिषुराह-

गइजाइतणुउवंगा, बंधणसंघायणाणि संघयणा ।
संठाणवन्नगंधर-फासअणुपुव्विविहगगई ॥ २४ ॥

इह नाम्नः प्रस्तावात् सर्वत्र गत्यादिषु नामेत्युपस्कारः कार्यः । तथाहि-गतिनाम, जातिनाम, तनुनाम, उपाङ्गनाम, बन्धननाम, सङ्घातननाम, संहननाम, संस्थाननाम, वर्णनाम, गन्धनाम, रसनाम, स्पर्शनाम, आनुपूर्वीनाम, विहायोगतिनामेति । कर्म० १ कर्म० ।

उक्ता नामकर्मणो द्विचत्वारिंशद्भेदाः । अथ तस्यैव त्रिनवतिभेदान् प्ररूपयितुकामो गत्यादिपदानां पिण्डप्रकृतिसंज्ञकानां मध्ये येन पदेन यावन्तो भेदाः पिण्डिता वर्तन्ते, तान् भेदान् तेषामाह-

गइयाईण उ कमसो,चउ पण पण ति पण पंच ब चउक्कं ।
पण दुग पणऽट्ठ चउ दुग,इय उत्तरभेयपणसट्ठी ॥२५॥

गत्यादीनां पिण्डप्रकृतीनां पूर्वप्रदर्शितस्वरूपाणां पुनः क्रमशः क्रमेण, यथासंख्यमिति यावत्, चतुरादयो भेदा भवन्तीति वाक्यार्थः । तथाहि-गतिनाम चतुर्धा,जातिनाम पञ्चधा, तनुनाम पञ्चधा, उपाङ्गनाम त्रिधा, बन्धननाम पञ्चधा, सङ्घाननाम पञ्चधा, संहननाम षोढा, संस्थाननाम षोढा, वर्णनाम पञ्चधा, गन्धनाम द्वेधा, रसनाम पञ्चधा, स्पर्शनाम अष्टधा, आनुपूर्वीनाम चतुर्धा, विहायोगतिनाम द्वेधा । एतेषां सर्वमीलने भेदाग्रमाह-(इय त्ति) इत्यमुना चतुरादिभेदमीलनप्रकारेणोत्तरभेदानां पञ्चषष्टिरिति ॥ २५ ॥

अमवीसजुया तिनवइ, संते वा पनरबंधणे तिसयं ।
बंधणसंघायगहो, तणुसु सामन्नवन्नचऊ ॥ ३० ॥

एषा पूर्वोक्ता पञ्चषष्टिरष्टाविंशतियुता प्रत्येकप्रकृत्यष्टाविंशत्या सह मीलने त्रिनिरधिका नवतिरित्यनवतिर्भवति । सा च कोपयुज्यत इत्याह-(संते त्ति) प्राकृतत्वात् सत्तायां सत्कर्म प्रतीत्य बोद्धव्येत्यर्थः । वाशब्दो विकल्पार्थो व्यवहितसंबन्धश्च । स चैवं योज्यते-पञ्चदशबन्धनैस्त्रिशतं वा पञ्चदशसंख्यैर्वक्ष्यमाणस्वरूपैर्बन्धनैः प्रदर्शितत्रिनवतिमध्ये प्रक्षिप्तैस्त्रिभिरधि-

कं शतं त्रिंशतं वा, सत्तायामधिक्रियत इति शेषः। अथ त्रिनवतिमध्ये पञ्चदशानां प्रकृतीनां प्रक्षेपेऽष्टोत्तरं शतं भवतीति चेत्। उच्यते-या वक्ष्यमाणाः पञ्चदश बन्धननामप्रकृतयस्तासु मध्यात्स्वामान्यत औदारिकाऽऽदिबन्धनपञ्चकस्य त्रिनवतिमध्ये पूर्वप्रक्षिप्तत्वाच्छेषाणां दशानां प्रक्षेपे त्रिंशतमेव भवतीति न कश्चिद् विरोधः। सूत्रे च-" पुनरबंधणे " इत्यत्र विभक्तिवचनव्यत्ययः प्राकृतत्वात्। इत्युक्ता नामकर्मणः त्रिनवतिरुत्तरशतं च भेदानाम्। अथ सप्तषष्टिभेदानाह-(बंधणसंघायगहो तणूसु त्ति) बन्धनानि च पञ्चदश सङ्घाताश्च संघातनानि पञ्च बन्धनसंघातास्तेषां ग्रहणं ग्रहो बन्धनसंघातग्रहः। तनुषु शरीरेषु तनुग्रहणेनैव बन्धनसंघाता गृह्यन्ते, न पृथग् विवक्ष्यन्त इत्यर्थः। तथा-(सामन्नवन्नचउ त्ति) सामान्यं कृष्णनीलाऽऽद्यविशेषितं वर्णेनोपलक्षितं चतुष्कं सामान्यवर्णचतुष्कं, गृह्यत इति शेषः। अयमत्राऽऽशयः- इह सप्तषष्टिमध्ये औदारिकाऽऽदितनुपञ्चकमेव गृह्यते, न तद्बन्धनानि तत्संघातनानि च, यत औदारिकतन्वा स्वजातीयत्वादौदारिकतनुसदृशानि तद् बन्धनानि तत्संघाताश्च गृहीताः। एवं वैक्रियाऽऽदितन्वाऽपि निजनिजबन्धनसंघाता गृहीता इति न पृथगेते पञ्चदश बन्धनानि पञ्च संघाता गण्यन्ते। तथा-वर्णगन्धरसस्पर्शानां यथासंख्यं पञ्चद्विपञ्चाष्टभेदैर्निष्पन्नां विंशतिमपनीय तेषामेव सामान्यं वर्णगन्धरसस्पर्शलक्षणं चतुष्कं गृह्यते, ततश्चा—नन्तरोदितद्युत्तरशताद्वर्णाऽऽदिषोडशकबन्धनपञ्चदशकसंघातपञ्चकलक्षणानां षट्त्रिंशत्प्रकृतीनामपसारणे सति सप्तषष्टिर्भवतीति ॥ ३० ॥

एतदेवाऽऽह-

इय सत्तट्ठी बंधो-दए य न य सम्ममीसया बंधे।
बंधुदए सत्ताए, वीसऽट्ठवन्नसयं ॥ ३१ ॥

इति पूर्वोक्तप्रकारेण सप्तषष्टिर्नामकर्मप्रकृतीनां भवति। सा च कोपयुज्यते ?, इत्याह-(बंधोदए य त्ति) बन्धश्च उदयश्च बन्धोदयं, तस्मिन् बन्धोदये, बन्धे चोदये च सप्तषष्टिर्भवति, चशब्दादुदीरणायां च सप्तषष्टिः। अथ बन्धनसङ्घातनवर्णाऽऽदिविशेषाणां विवक्षावशादेव बन्धनाधिकार इत्युक्तम्, संप्रति ययोः प्रकृत्योः सर्वथैव बन्धो न भवति, ते आह-(न य सम्ममीसया बंधे त्ति) न च नैव सम्यक्त्वमिश्रके बन्धेऽधिक्रियेते। अयमभिप्रायः-सम्यक्त्वमिश्रयोर्बन्ध एव न भवति, किं तु मिथ्यात्वपुद्गलानामेव। जीवः सम्यक्त्वगुणेन मिथ्यात्वरूपतामपनीय केषाञ्चिदत्यन्तविशुद्धिमापादयति, अपरेषां त्वीषद् विशुद्धिं, केचित्पुनर्मिथ्यात्वरूपा एवावतिष्ठन्ते, तत्र येऽत्यन्तविशुद्धास्ते सम्यक्त्वव्यपदेशभाजः, ईषद्विशुद्धा मिश्रव्यपदेशभाजः, शेषा मिथ्यात्वमिति।

उक्तं च-

" सम्यक्त्वगुणेन ततो, विशोधयति कर्म तत्समिथ्यात्वम्।
यद्वच्छकणप्रमुखैः, शोध्यन्ते कोद्रवा मदनाः ॥ १ ॥
यत्सर्वथाऽपि तत्र वि-शुद्धं तद्भवति कर्म सम्यक्त्वम।
मिश्रे तु दरविशुद्धं, भवत्यशुद्धं तु मिथ्यात्वम् ॥ २ ॥"

उदयोदीरणासत्तासु पुनः सम्यक्त्वमिश्रके अप्यधिक्रियेते। एवं च सति ज्ञानाऽऽवरणे पञ्च, दर्शनाऽऽवरणे नव, वेदनीये द्वे, मोहनीये सम्यक्त्वमिश्रवर्जाः षड्विंशतिः, आयुषि चतस्रः, नाम्नि भेदान्तरसंभवेऽपि प्रदर्शिततयुक्त्या सप्तषष्टिः, गोत्रे द्वे, अन्तराये पञ्चेत्येतद् विंशत्युत्तरं प्रकृतिशतं बन्धेऽधिक्रियते। एतदेव सम्यक्त्वमिश्रसहितं द्वाविंशत्युत्तरप्रकृतिशतमुदये, उदीरणायां च। सत्तायां पुनः शेषकर्मणां पञ्चपञ्चाशद् नाम्नः त्रिनवतिरित्येष्टाचत्वारिंशं शतम्। यद्वा-शेषकर्मणां पञ्चपञ्चाशद् नाम्नश्चोत्तरशतमित्येष्टापञ्चाशं शतमधिक्रियते, इत्येतदेव मनसिकृत्याऽऽह-(बंधुदए सत्ताए इत्यादि) इह शतशब्दस्य प्रत्येकं योगाद् यथासंख्यं बन्धे विंशं शतम्, उदये उपलक्षणत्वादुदीरणायां च द्वाविंशं शतं, सत्तायामष्टपञ्चाशं शतम्; उपलक्षणत्वादष्टाचत्वारिंशं शतमिति भावना सुकरैव ॥ ३१ ॥ कर्म० १ कर्म०। उत्त०।

इदानीं वर्णाऽऽदिचतुष्कोत्तरविंशतिभेदानां शुभाशुभत्वयोरभिधित्सया प्राऽऽह-

नीलकसिणं दुगंधं, तित्तं कडुयं गुरुं खरं रुक्खं।
सीयं च अमुहनवगं, इक्कारसगं सुभं सेसं ॥ ४१ ॥

नीलकृष्णं नीलकृष्णाऽऽख्ये कर्मणी अशुभे, दुर्गन्धनाम ' तिक्तकटुकमिति ' तिक्तकटुके रसनाम्नी, गुरु खरं रूक्षं शीत चेति चत्वारि स्पर्शनामानि। एतानि च सर्वाण्यपि समुदितानि किमुच्यते ?, इत्याह-' अशुभनवकम् ' नव प्रकृतयः परिमाणमस्य प्रकृतिवृन्दस्य तन्नवकम्, अशुभं च तन्नवकं चाशुभनवकम्। ' एकादशकम ' एकादशप्रकृतिसमूहरूपम्, यथा-रक्तपीतश्वेतवर्णाः,सुरभिगन्धो, मधुराऽम्लकषायरसाः, लघुमृदुस्निग्धोष्णस्पर्शा इति शुभं शुभविपाकवेद्यत्वात् शुभस्वरूपम्। कीदृक् तदित्याह-' शेषम्, ' कृष्णनवकादवशिष्टं, कोऽर्थः ?-कृष्णनवकाच्छेषा एकादश वर्णाऽऽदिभेदाः शुभवर्णैकादशकमुच्यत इति ॥४१॥ कर्म० १ कर्म०। ननु च शरीरपर्याप्त्यैव शरीरं भविष्यति, किं प्रागाभिहितेन शरीरनाम्ना ?। नैतदस्ति, साध्यभेदात्। तथाहि-शरीरनाम्नो जीवेन गृहीतानां पुद्गलानामौदारिकाऽऽदिशरीरत्वेन परिणतिः साध्या, शरीरपर्याप्तेः पुनरारब्धशरीरस्य परिसमाप्तिरिति। अथ प्रागुक्तेनोच्छ्वासनाम्नैवोच्छ्वसनस्य सिद्धत्वादिहोच्छ्वासपर्याप्तिर्निर्विषयेति। नैवम्, सतीमप्युच्छ्वासनामोदयेन जनितामुच्छ्वसनलब्धिमात्मशक्तिविशेषरूपामुच्छ्वासपर्याप्तिमन्तरेण व्यापारयितुं न शक्नुयात्। यथाहि-शरीरनामोदयेन गृहीता अप्यौदारिकाऽऽदिपुद्गलाः शक्तिविशेषरूपां शरीरपर्याप्तिं विना शरीरतया परिणमयितुं न शक्यन्त इति शरीरनाम्नः पृथगिष्यते शरीरपर्याप्तिः, एवमत्राप्युच्छ्वासनाम्नः पृथगुच्छ्वासपर्याप्तिरिष्टव्या, तुल्ययुक्तित्वादिति ॥ ४८ ॥ कर्म० १ कर्म०। स०। आ०। आचा०। पं० सं०। (यत्र गुणस्थानके यावत्यः प्रकृतयः संवेधमाश्रित्य भवन्ति, ताः ' कम्म ' शब्दे तृतीयभागे ३१३ पृष्ठे दर्शिताः)

णामकरण-नामकरण-न०। अभिधानमात्रकरणे, आ० म० १ अ० २ खण्ड। "नाम्नाऽन्वर्थेन कीर्तिः स्यात्।" नाम्नाऽन्वर्थेन गुणनिष्पन्नेन कीर्तिः स्यात् तत्कीर्तनमात्रादेव शब्दार्थप्रतिपत्तेर्विदुषां प्राकृतजनस्य च मनःप्रसादाद् यथा ऋषभादुसुधर्मस्वामिप्रभृतीनाम्। द्वा० २८ द्वा०। न०।

णामगुत्त-नामगोत्र-न०। नाम्ना गोत्रमिति प्रसिद्धं यत्कर्म गोत्राऽभिधानं कर्मेत्यर्थः। कल्प० २ क्षण। अन्वर्थयुक्ते नाम्नि, इहान्वर्थयुक्तं नाम सिद्धान्तपरिभाषया नामगोत्रमित्युच्यते। सू० प्र० १६ पाहु०। रा०।

णामणय–नामनय–पुं० । नामरूपमेव सर्वं वस्त्वित्येवं सिद्धान्तं व्यवसिते नये, (नयो०)

नामनयमाह–"यतो नाम विना नास्ति, वस्तुनो ग्रहणं ततः । नामैव तद् यथा कुम्भो, मृदेवान्यो न वस्तुतः ॥१॥" तथाहि–यत्प्रतीतावेव यस्य प्रतीतिः,तदेव तस्य स्वरूपम्। यथा मृत्प्रतीतावेव प्रतीयमानस्य घटस्य मृदेव रूपं, नामप्रतीतावेव प्रतीयते वस्तु । न च विनाऽपि नाम निर्विकल्पकविज्ञानेन वस्तुप्रतीतिरस्तीति हेतोरसिद्धता,असर्वसंविदां वाग्रूपत्वात्। तथा च भर्तृहरिः–" वाग्रूपता चेद् बोधस्य, व्युत्क्रामेतेह शाश्वती । न प्रकाशः प्रकाशेत, सा हि प्रत्यवमर्शिनी " ॥ १ ॥ यदि च नामरूपमेव वस्तु न स्यात्, ततश्च तदवगतावपि वस्तु संशयाऽऽदीनामन्यतममेव स्यात्। तथा च पूज्याः–" संसयविवज्जया वा–ऽणज्झवसाओऽहवा जदिच्छाए । होज्जऽत्थे पडिवत्ती, न वत्थुधम्मो जया णामं ॥ ६२ ॥ " (विशे०) बृह० १ अ० ।

अस्मिंश्च नामाऽऽदिरूपचतुष्टये नामनयः प्रधानं नामैव मन्यते । तत्र ये सुगतमतानुसारिणो "न ह्यर्थे शब्दाः सन्ति" इत्यादिवचनाद् नाम्नो वस्तुधर्मत्वमेव नेच्छन्ति, तान् प्रति नामनयः प्राऽऽह–

वत्थुसरूवं नामं, तप्पच्चयहेउओ सधम्म व्व ।
वत्थुं नाऽणभिहाणा, होज्जाऽभावो विवाऽवच्चो ॥६१॥

नामनयस्यायमभिप्रायः–वस्तुनः स्वरूपं नाम, तत्प्रत्ययहेतुत्वात्, स्वधर्मवत्, इह यद् यस्य प्रत्ययहेतुस्तत् तस्य धर्मः, यथा घटस्य स्वधर्मो रूपाऽऽदयः, यच्च यस्य धर्मो न भवति न तत् तस्य प्रत्ययहेतुः, यथा घटस्य धर्माः पटस्य, संपद्यते च घटाभिधानाद् घटे संप्रत्ययः, तस्मात् तत् तस्य धर्मः; सिद्धश्च हेतुरावयोः,घटशब्दात् पटाऽऽदिव्यवच्छेदेन घट इति प्रतिपत्त्यनुभूतेः। सर्वं च वस्तु नामरूपतां न व्यभिचरतीति दर्शयन्नाह–(वत्थुमित्यादि) यदि वस्तुनो नामरूपता न स्यात्, तदा तद् वस्त्वेव न भवेदिति संबन्धः । कुतः ?,इत्याह–अनभिधानादभिधानरहितत्वादित्यर्थः । अवाच्योऽभिधानरहितत्वेनाऽनभिधेयो योऽसावभावः षष्ठभूताऽऽदिलक्षणस्तद्वदिति दृष्टान्तः। इह यदभिधानरहितं तद् वस्त्वेव न भवति,यथाऽभिधानरहितत्वेनाऽवाच्यः षष्ठभूतलक्षणोऽभावः; अभिधानरहितं च वस्त्वभ्युपगम्यते परैः, ततोऽवस्तुत्वमेवास्य भवेद्, अवस्तुत्वे च कुतस्तत्प्रत्ययहेतुत्वलक्षणस्य हेतोर्वृत्तिः, येनाऽनैकान्तिकता स्यात् ? । तत्र तद्वृत्तौ वा तस्यापि वस्तुत्वमेव भवेत्, स्वप्रत्ययजनकत्वात्, घटाऽऽदिवदिति । विपक्ष एव वृत्तेरभावाद् विरुद्धताऽप्यसंभविनीति । तस्माद् वस्तुधर्म एव नामेति स्थितम् । न च 'नह्यास्तीरे गुडभृतशकटम्' इत्यादिशब्दात् प्रवृत्तस्य कदाचिद् वस्त्वप्राप्तेरवस्तुधर्मता तस्येत्याशङ्कनीयम, प्रत्यक्षाऽऽदिप्रमाणानामपि तत्प्रसङ्गात्–तेभ्योऽपि हि प्रवृत्तस्य कदाचिद् वस्त्वप्राप्तेः । अबाधितेभ्यस्तेभ्यः प्रवृत्तौ भवत्येवाऽर्थप्राप्तिरिति चेत्,तदेतदिहापि समानम् , सुविवेचितादात्मप्रणीतशब्दाद् वस्तुप्राप्तेरवश्यंभावित्वात्, इत्यादि बहुत्र वक्तव्यम, तच्च नोच्यते , ग्रन्थगहनताप्रसङ्गात् , अन्यत्रोक्तत्वाच्च । इति गाथाऽर्थः ॥ ६१ ॥

किं च–

संसयविवज्जया वा–ऽणज्झवसाओऽहवा जदिच्छाए ।
होज्जत्थे पडिवत्ती, न वत्थुधम्मो जया नामं ॥ ६२ ॥

यदा वस्तुधर्मो नाम नेष्यते, तदा वक्त्रा घटशब्दे समुच्चारिते श्रोतुः ' किमयमाह ? ' इत्येवं संशय एव स्यात् , न घटप्रतिपत्तिः । अथवा घटशब्दे प्रोक्ते पटप्रतिपत्तिलक्षणो विपर्ययः स्यात्। अथवा–' न जाने किमप्यनेनोक्तम् ' इति चित्तव्यामोहेन वस्त्वप्रतिपत्तिरूपोऽनध्यवसायः स्यात् । यदि वा–यदृच्छयाऽर्थे प्रतिपत्तिर्भवेत्–कदाचिद् घटस्य, कदाचित् पटस्य, कदाचित्तु स्तम्भस्येत्यादि; न चैवं भवति, तस्माद् वस्तुधर्म एव नाम । इति गाथाऽर्थः ॥ ६२ ॥

अपि च–

वत्थुस्स लक्खलक्खण–संववहाराऽविरोहमिच्छीओ ।
अभिहाणाऽहीणाओ, बुद्धी सद्दो य किरिया य ॥६३॥

वस्तुनो जीवाऽऽदेः, किम् ?, इत्याह–अभिधानाधीना नामाऽऽयत्ताः। काः ?, इत्याह–लक्ष्यं च,लक्षणं च, संव्यवहारश्च लक्ष्यलक्षणसंव्यवहाराः,तेषामविरोधेनाऽविपर्ययेण सिद्धयः प्रतिष्ठाः। तत्र लक्ष्यं जीवत्वाऽऽदि, लक्षणमुपयोगः, संव्यवहारोऽध्येषणप्रेषणाऽऽदिः । तथा बुद्धिशब्दक्रियाश्च 'अभिधानाऽधीनाः' इत्यत्राऽपि संबध्यते । तत्र बुद्धिर्वस्तुनिश्चयरूपा,शब्दो घटाऽऽदिवस्तुनिरूपः, क्रिया चोत्क्षेपणाऽवक्षेपणाऽऽदिका । तस्माद्यदि वस्तु सत्,तदाऽऽयत्ताऽऽत्मलाभत्वात् सर्वव्यवहारानवच्छेदः गाथाऽर्थः ॥६३॥ विशे० ।

णामणिप्फण्ण–नामनिष्पन्न–पुं० । गौणाऽऽदिनामानिष्पन्नभेदे, अनु० नि० चू० १ उ० ।

णामणिमित्तत्त–नामनिमित्तत्व–न० । नामनिमित्तं नामहेतुकं तद्भावस्तत्त्वम् । नामप्रतिपाद्यगुणाऽऽत्मकत्वे, षो० १२ विव० ।

णामधेज्ज–नामधेय–न० । नामैव नामधेयम् । "नामरूपभागाद् धेयः" । ७ । २ । १५८ । इति (हैम०) स्वार्थे धेयप्रत्ययः । सू० प्र० १० पाहु० १३ पाहु० । प्रश्न० । स्था० । प्रशस्ते नामनि, स्था० ६ ठा० । दश० । नि० चू० । नं० । आ० । पर्यायवचनौ, अनु० ।

णामधेज्जवई–नामधेयवती–स्त्री० । प्रशस्तनामधेयवत्याम्, आ० १ श्रु० १ अ० ।

णामपच्चयफड्डगपरूवणा–नामप्रत्ययस्पर्धकप्ररूपणा–स्त्री० । नामप्रत्ययस्य बन्धननामनिमित्तस्य शरीरप्रदेशस्पर्धकस्य प्ररूपणायाम् , क० प्र० । इह नामप्रत्ययस्पर्धकप्ररूपणायां षडनुयोगद्वाराणि । तद्यथा–अविभागप्ररूपणा, वर्गणाप्ररूपणा, स्पर्धकप्ररूपणा, अन्तरप्ररूपणा, वर्गणापुद्गलस्नेहविभागसकलसमुदायप्ररूपणा, स्थानप्ररूपणा चेति । (९३ गा०) क० प्र० । (एतत्सर्वं ' बंध ' शब्दे स्पष्टीभविष्यति)

णामपुरिस–नामपुरुष–पुं० । संज्ञामात्रेण पुरुषे, सूत्र० १ श्रु० ४ अ० १ उ० । पुरुषेतिनाम्नि, स्था० ३ ठा० १ उ० ।

णामप्पमाण–नामप्रमाण–न० । अर्थाभिधायके शब्दे, (अनु०)

अथ नामप्रमाणम्–

से किं तं णामप्पमाणे ?। णामप्पमाणे जस्स णं जीवस्स वा अजीवस्स वा जीवाण वा अजीवाण वा तदुभयस्स वा तदु–

जयाण वा पमाणे त्ति नाम कज्जइ, से तं णामप्पमाणे ।

अथ किं तन्नामप्रमाणम् ? -नामैव वस्तुपरिच्छेदहेतुत्वात्प्रमाणं नामप्रमाणम्, तेन हेतुभूतेन किं नाम भवतीति प्रश्नाभिप्रायः । एवमन्यत्रापि भावनीयम् । अत्रोत्तरमुच्यते-यस्य जीवस्य वाऽजीवस्य वा जीवानां वाऽजीवानां वा तदुभयस्य वा तदुभयानां वा यत्प्रमाणमिति नाम क्रियते तन्नामप्रमाणं न तत् स्थापनाद्रव्यभावहेतुकम्, अपि तु नाममात्रविरचनमेव तत्र हेतुरिति तात्पर्यम् । अनु० ।

णामभेय–नामभेद–पुं० । संज्ञाविशेषे, द्वा० १६ द्वा० ।

णाममुद्दा–नाममुद्रा–स्त्री० । नामाङ्कितायां मुद्रायाम्, उपा० १ अ० । " अभयस्स कहियं नाममुद्दा । " आव० ६ अ० ।

णामय–नामक–पुं० । विनयालङ्कृतो गुर्वादावादेशदानोद्यतेऽसदा वाऽऽत्मानं नामयतीति नामकः । सदा गुर्वादौ प्रह्वे सा० । सूत्र० १ श्रु० १६ उ० ।

णामवग्ग–नामवर्ग–पुं० । नामप्रकृतिसमुदाये, जी० २ प्रति० । क० प्र० ।

णामवीर–नामवीर–पुं० । यस्य जीवस्याजीवस्य वाऽन्वर्थरहितं इति नाम क्रियते स नामवीरः । नामनामवतोरभेदात् तत्तत्सौ वीरश्च नामवीरः । वीरभेदे, सू० प्र० २ पाहु० । ।

णामसच्च–नामसत्य–न० । नामाभिधानं तत्सत्यं नामसत्यम् । नाम्नि सत्ये, यथा कुलमवर्धयन्नपि कुलवर्धन उच्यते; एवं तेनवर्धन इति । स्था० १० ठा० । ध० । प्रज्ञा० ।

णामसम–नामसम–न० । नामाभिधानं, तेन समम् । ग० ४ अधि० । आ० म० । आ० चू० । स्वकीयेन नाम्ना समे, यथा स्वनाम शिक्षितं तथा तदप्यावश्यकम् । विशे० ।

णामसमरण–नामस्मरण–न० । चतुर्विंशतिस्तवाऽऽदिनामानुचिन्तने, नाम्नः स्मरणेन नामिस्मरणे तद्गुणसमापत्त्या फलम् । प्रति० ।

णामसव्व–नामसर्व–न० । नाम च तत्सर्वं चनामसर्वम् । सचेतनाऽऽदेर्वा वस्तुनो यस्य सर्वमिति नाम तन्नामसर्वम्, नाम्ना सर्वं, सर्वमिति वा नाम यस्येति विग्रहाद् नामशब्दस्य पूर्वनिपातः । स्था० ४ ठा० २ उ० ।

णामसुह–नामशुभ–न० । तीर्थकराऽऽदिसंबन्धिनि नामकर्मणि, दश० १ अ० ।

णामाणंतय–नामानन्तक–न० । अनन्तकमिति नाममूतायां वर्णानुपूर्व्याम्, यस्य वा सचेतनाऽऽदेर्वस्तुनोऽनन्तकमिति नाम तस्मिन्, स्था० १० ठा० ।

णामित्ता–नमयित्वा–स्त्री० । नतिं कारयित्वेत्यर्थे, " णामित्ता गहियाणि पच्चक्खगाणि । " नि० चू० १ उ० ।

णामिय–नामिक–न० । वाचके पदे, यथा ' अश्व ' इत्यादि । आ० म० १ अ० २ खण्ड । अनु० ।

णामिंद–नामेन्द्र–पुं० । यथार्थसंज्ञे इन्द्रे, अथवा–इन्द्रार्थशून्यत्वाद् नाममात्रे इन्द्रे, बृ० । " केवलसन्ना उ नामिंदा । " केवला एका संज्ञा तदर्थनिरपेक्षा, स नामेन्द्रः । बृ० १ उ० । स्था० । (विस्तरस्तु 'इंद' शब्दे द्वितीयभागे ५३२ पृष्ठे द्रष्टव्यः)

णामुदय–नामोदय–पुं० । कालोदाय्यादीनामन्ययूथिकानामन्यतमेऽन्ययूथिके, भ० ७ श० १० उ० ।

णामोक्कसिअ–देशी–कार्ये, दे० ना० ४ वर्ग ।

णाय–न्याय–पुं० । ' इण् ' गतौ निपूर्वः । नितरामीयते गम्यते मोक्षोऽनेनेति न्यायः । व्यवहाराध्ययने, व्य० १ उ० । श्रुतोपदेशे, व्य० ३ उ० । अभीष्टार्थसिद्धेः सम्यगुपायत्वाद् न्यायः । अथवा-जीवकर्मसंबन्धापनयनाद् न्यायः । आवश्यके, यथा कारुणिकैरिष्टो न्यायो द्वयोरर्थिनोर्भूमिद्रव्याऽऽदिसंबन्धिविवादं चिरकालीनमप्यपनयति, एवं जीवकर्मणोरनादिकालीनमप्यात्मप्रदेशव्याप्तिसंबन्धमपनयतीत्यावश्यकमपि न्याय उच्यते । अनु० । विशे० । " अच्चेति लोगसंजोगं, एस णाए पवुच्चइ । " योऽयं लोकसंयोगातिक्रम एष न्यायः-एष सन्मार्गो मुमुक्षूणामयमाचारः प्रोच्यतेऽभिधीयते । अथवा-परमात्मानं मोक्षं नयतीति ज्ञान्दसत्वात् कर्तरि घञ् न्यायः । यो हि त्यक्तलोकसंयोग एष एव परात्मनो मोक्षस्य न्यायः । आचा० १ श्रु० २ अ० ६ उ० । नीयते संविधिं प्राप्यते वस्त्वनेनेति न्यायः । प्रस्तुतार्थसाधके प्रमाणे, विशे० । द्विजक्षत्रियविट्शूद्राणां स्ववृत्त्यनुष्ठाने, आव० ६ अ० । उपपत्तौ, पञ्चा० ४ विव० । अविचलितरूपे मार्गे, षो० १६ विव० । अतिदेशे, प्रति० । न्यायनिर्णायके, औ० । ज्ञा० । नं० । ' णात ' शब्दार्थे (दृष्टान्ते), नि० चू० १० उ० ।

णायकारि(ण)–न्यायकारिन्–त्रि० । उपपत्तिकारिणि, " एवं आलोइय पडिक्कंतस्स जो सामाइयं देति सो णायकारी । " आ० चू० १ अ० ।

णायकुमार–ज्ञातकुमार–पुं० । ' णातकुमार ' शब्दार्थे, ज्ञा० १ श्रु० ८ अ० ।

णायकुलचंद–ज्ञातकुलचन्द्र–पुं० । ' णातकुलचंद ' शब्दार्थे, कल्प० ५ क्षण ।

णायखंड–ज्ञातखण्ड–न० । ' णातखंड ' शब्दार्थे, स्था० १० ठा० ।

णायग–ज्ञातक–पुं० । स्त्री० । पूर्वसंस्तुते, व्य० ७ उ० । मातापित्रादौ, सूत्र० १ श्रु० ३ अ० २ उ० । स्वजने, प्रज्ञायमाने, नि० चू० ८ उ० । सूत्र० ।

नायक–त्रि० । प्रभौ, यथा राष्ट्रस्य राष्ट्रमहत्तरकः । स० ३० सम० । दशा० । नगरकटकाऽऽदिप्रधाने, औ० । अधिपतौ, स्था० ५ ठा० १ उ० । प्रणेतरि, सूत्र० १ श्रु० १५ अ० । स्वामिनि, स० १ सम० । व्य० । कर्मणां नेतरि, भ० २० श० २ उ० । व्य० । चक्रवर्त्यादौ राजनि, औ० । प्रधाने, आव० ५ अ० । ज्ञा० । नयति वृद्धिं प्रापयति यः स नायकः । प्रश्न० ५ सम्ब० द्वार । ज्ञानाऽऽदीनां प्रापके, व्य० ३ उ० । सूत्र० ।

णायज्जियधण–न्यायार्जितधन–न० । असिमषीकृषिवाणिज्याऽऽद्युचितकलया परवञ्चननिरपेक्षतयाऽर्जिते द्रव्ये, द्रव्या० ६ अ० । न्यायार्जितं धनं गृहिधर्मः-

तत्र सामान्यतो गेहि-धर्मो न्यायार्जितं धनम् । (५)

(न्यायार्जितं धनमित्यादि) तत्र स्वामिद्रोहमित्रद्रोहविश्वसितवञ्चनचौर्यादिगर्ह्यार्थोपार्जनपरिहारेणार्थोपार्जनोपायभूतः स्वस्ववर्णानुरूपः सदाचारो न्यायः, तेनाऽर्जितं संपादितं

धनम्—अयमेव धर्मः । न्यायार्जितं हि धनमशङ्कनीयतया स्वशरीरेण तत्फलभोगाद् मित्रस्वजनाऽऽदौ संविभागकरणाच्चेह लोकहिताय। यदाह-"सर्वत्र शुचयो धीराः, स्वकर्मबद्धगर्विताः । स्वकर्मनिन्दिताऽऽत्मानः, पापाः सर्वत्र शङ्किताः ॥१॥" सत्पात्रेषु विनियोगाद् दीनाऽऽदौ कृपया वितरणाच्च परलोकहिताय । पठ्यते च धार्मिकस्य धनस्य शास्त्रान्तरे दानस्थानं यथा-" पात्रे दीनाऽऽदिवर्गे च, दानं विधिवदिष्यते । पोष्यवर्गाविरोधेन, न विरुद्धं स्वतश्च यत् ॥ १ ॥" अन्यायोपात्तं तु लोकद्वयेऽप्यहिताय-इहलोके विरुद्धकारिणो वधबन्धाऽऽदयो दोषाः, परलोके च नरकाऽऽदिगमनाऽऽदयः । यद्यपि कस्यचित् पापानुबन्धिपुण्योदयाद्यदिहलोकिकी विपद् न दृश्यते, तथाप्यायत्यामवश्यंभाविन्येव । यतः-" पापेनैवार्थरागान्धः, फलमाप्नोति यत् क्वचित् । वल्मीकाग्निषवस्तत्-मविनाश्य न जीर्यति ॥१॥" इति न्याय एव परमार्थतोऽर्थोपार्जनोपायोपनिषत् । यदाह-" निपानमिव मण्डूकाः, सरः पूर्णमिवाण्डजाः । शुभकर्माणमायान्ति, विवशाः सर्वसंपदः ॥ १ ॥ " इति । ईदृशं धनं च गार्हस्थ्ये प्रधानकारणत्वेन धर्मतयाऽऽदौ निर्दिष्टम्, अन्यथा तदभावे निर्वाहाविच्छेदेन गृहस्थस्य सर्वश्रुतक्रियोपरमप्रसङ्गाद्धर्म एव स्यात् । पठ्यते च-"वित्तीवोच्छेयम्मी, गिहिणो सीयंति सव्वकिरियाओ । निरवेक्खस्स उ जुत्तो, संपुन्नो संजमो चेव ॥ १ ॥" इति । ध० १ अधि० ।

णायज्जियवित्तेस–न्यायार्जितवित्तेश–पुं० । न्यायोपार्जितद्रव्यस्वामिनि, षो० ५ विव० ।

णायज्झयण–ज्ञाताध्ययन–न० । उत्क्षिप्ताऽऽद्युदाहरणप्रतिपादकेऽध्ययने, ज्ञा० । षष्ठस्याङ्गस्य प्रथमश्रुतस्कन्धे १९ ऊनविंशतिज्ञाताध्ययनानि ।

छट्ठस्स अंगस्स दो सुयक्खंधा पण्णत्ता । तं जहा–णायाणि य, धम्मकहाओ य । पढमस्स णं भंते ! सुयक्खंधस्स समणेणं भगवया महावीरेणं० जाव संपत्तेणं णायाणं कति अज्झयणा पण्णत्ता ?। एवं खलु जंबू ! ० जाव समणेणं भगवया महावीरेणं० जाव संपत्तेणं णायाणं एगूणवीसं अज्झयणा पण्णत्ता । तं जहा–

" उक्खित्तणाए संघाडे, अंमे कुम्मे य सेलगे ॥
तुंबे य रोहिणी मल्ली, मायंदी चंदमा इय ॥१॥
दावद्दवे उदगनाए, मंडुक्के तेतली वि य ॥
नंदिफले अवरकंका, आइण्णे सुंसुमा इय ॥२॥
अवरे य पुण्णरीए, णायाए गुणविंसतिमे" ॥

(णायाणि त्ति) ज्ञातान्युदाहरणानीति प्रथमः श्रुतस्कन्धः। (धम्मकहाओ त्ति) धर्मप्रधानाः कथाः धर्मकथा इति द्वितीयः । "उक्खित्त" इत्यादि श्लोकद्वयं सार्द्धम । तत्र मेघकुमारजीवेन हस्तिभवे प्रवर्तमानेन यः पाद उत्क्षिप्तस्तेनोत्क्षिप्तेनोपलक्षितं मेघकुमारचरितमुत्क्षिप्तमेवोच्यते । उत्क्षिप्तमेव ज्ञातमुदाहरणं विवक्षितार्थसाधनमुत्क्षिप्तज्ञातम् । ज्ञातता चास्यैवं भावनीया-दयाऽऽदिगुणवन्तः सहन्त एव देवदाहकृत्यम्, उत्क्षिप्तैकपादो मेघकुमारजीवहस्तीवेति । एतदर्थाऽभिधायकं सूत्रमधीयमानत्वादध्ययनमुक्तम्; एवं सर्वत्र १, तथा-सङ्घाटकः, श्रेष्ठिचौरयोरेकबन्धनबद्धत्वम्, इदमप्यभीष्टार्थज्ञापकत्वाद् ज्ञातम् । एवमौचित्येन सर्वत्र ज्ञातशब्दो योज्यः, यथायथं च ज्ञातत्वं प्रत्यध्ययनं तदर्थावगमादवसेयमिति २, नवरम्-अण्डकं मयूराण्डम् ३, कूर्मश्च कच्छपः ४, शैलको राजर्षिः ५, तुम्बं च अलाबु ६, रोहिणी श्रेष्ठिवधूः ७, मल्ली एकोनविंशतितमजिनस्थानोत्पन्ना तीर्थंकरी ८, माकन्दी नाम वणिक्, तत्पुत्रौ माकन्दीशब्देनेह गृहीतौ ९, चन्द्रमा इति च १०, (दावद्दवे त्ति) समुद्रतटे वृक्षविशेषाः ११, उदक ज्ञातं परिखाजलं, तदेव ज्ञातमुदाहरणमुदकज्ञातम् १२, मण्डूकः नन्दमणिहारश्रेष्ठिजीवः १३, (तेतली वि य त्ति) तेतलीसुताऽमिधानोऽमात्य इति च १४, (नंदिफल त्ति) नन्दिवृक्षाभिधानतरुफलानि १५, अपरकङ्का धातकीखण्डजनरतक्षेत्रराजधानी १६, (आइण्णे त्ति) आकीर्णा जात्याः समुद्रमध्यतिनोऽश्वाः १७, (सुंसुमा इय त्ति) सुंसुमाऽभिधाना श्रेष्ठिदुहिता १८, अपरं च पुण्डरीकज्ञातमेकोनविंशतितममिति १९ । ज्ञा० १ श्रु० १ अ० । आव० । स० ।

णायद–न्यायद–पुं० । न्यायदर्शिनि, ज्ञा० १ श्रु० २ अ० ।

णायपुत्त–ज्ञातपुत्र–पुं० । ज्ञातः सिद्धार्थः तस्य पुत्रः । कल्प० ५ क्षण । वीरवर्द्धमानस्वामिनि, सूत्र० १, श्रु० ६ अ० । आचा० । द्वा०

णायपुत्तवओरय–ज्ञातपुत्रवचोरत–त्रि० । भगवद्धर्मनिःसङ्गतामतिपादनपरे सक्ते, दश० ६ अ० ।

णायपुत्तवयण–ज्ञातपुत्रवचन–न० । श्रीमन्महावीरवचने, १० अ० ।

णायपुत्तिय–ज्ञातपुत्रीय–न० । वीरस्वामिसंबन्धिनि तीर्थे, आचा० १ श्रु० १ अ० ३ उ० ।

णायविहि–ज्ञातविधि–पुं० । स्वजनभेदे, व्य० ।

निक्षोज्ञातविधिसूत्रम्-

भिक्खू य इच्छेज्जा णायविहिं एत्तए, णो से कप्पति थेरे अणापुच्छित्ता; कप्पति से थेरे आपुच्छित्ता णायविहिं एत्तए, थेरा य से वियरेज्जा एवं से कप्पति णायविहिं एत्तए; थेरा य णो से वियरेज्जा एवं से णो कप्पति णायविहिं एत्तए । जे तत्थ थेरेहिं अविइण्णे णायविहिं एइ, से अंतरा छेदे वा परिहारे वा ॥ १ ॥

णो से कप्पति अप्पसुयस्स अप्पागमस्स एगाणियस्स णायविहिं एत्तए । २ । कप्पति से जे तत्थ बहुस्सुए बब्भागमे तस्सऽन्तिं णायविहिं एत्तए; तत्थ णं से पच्छागमणेणं पुव्वाउत्ते चाउलोदणे पच्छाउत्ते भिलिंगसूवे, कप्पति से चाउलोदणे पडिग्गहित्तए, णो से कप्पति भिलिंगसूवे पडिग्गहित्तए ॥ ३ ॥ तत्थ से पच्छागमणेणं पुव्वाउत्ते भिलिंगसूवे पच्छाउत्ते चाउलोदणे, कप्पइ से भिक्खू भिलिंगसूवे पडिग्गहित्तए, नो से कप्पति चाउलोदणे पडिग्गहित्तए, दो वि पुव्वाउत्ते कप्पति दोवि पडिग्गहित्तए ॥ ४ ॥ तत्थ से पच्छागमणेणं दो वि पच्छाउत्ते, णो से कप्पति दो

वि पडिग्गहित्तए ॥ ५ ॥ जे से तत्थ पच्छागमणेणं पच्छाकप्पे, से णो कप्पति पडिग्गहित्तए ॥ ६ ॥ जे से तत्थ पच्छागमणेणं पुव्वाकप्पे, से कप्पति ॥ ७ ॥

भिक्षुः, चशब्दाद् भिक्षुकी च, इच्छेत ज्ञातविधिं स्वजनभेदमागन्तुम् । 'से' तस्य न कल्पते स्थविरान् अनापृच्छ्य ज्ञातविधिमागन्तुम् । "कप्पति थेरे" इदं प्राग्वत् । (नो से कप्प इत्यादि) न 'से' तस्य कल्पते अबहुश्रुतस्य अगीतार्थस्य अल्पागमस्य बहिःशास्त्रेष्वतिपरिचयस्याऽविद्यमाननिजाऽऽगमस्यैकाकिनो ज्ञातविधिमागन्तुम् । कल्पते 'से' तस्य यस्तत्र गच्छे बहुश्रुतः सूत्रापेक्षया, बह्वागमोऽर्थापेक्षया, तेन सार्द्धं ज्ञातविधिमागन्तुम् । तत्र णमिति वाक्यालङ्कारे,तस्य ज्ञातविधिमागतस्य पश्चादागमनेन आगमनात् पश्चाद् यः पूर्वायुक्तः चालोदनः । पूर्वायुक्त इति केचिद् व्याचक्षते-आगमनात्पूर्वं चुल्ल्यामारब्धो रन्धनाय । अपरे व्याचक्षते-आगमनात्पूर्वं पाकाय समीहितम् । एतद् मतद्वयमप्यसङ्गतम; आरब्धे, समीहिते च पुनः प्रक्षेपसंभवात् । तस्मात् पूर्वायुक्त इति किमुक्तं भवति ?-आगमनात्पूर्वं गृहस्थैः स्वभावेन रध्यमानः स तन्दुलोदनो, भिक्षिङ्गसूपो नाम 'सस्नेहः सूपः,' स कल्पते प्रतिगृहीतुम् । योऽसौ तत्र पूर्वमागतः साधव इति हेतोः पश्चादायुक्तः प्रत्यु[illegible] तन्दुलोदनो, भिक्षिङ्गसूपो वा, नासौ कल्पते प्रतिगृहीतुम् । एष सूत्रसंक्षेपार्थः ।

अत्र भाष्यकारो ज्ञातविधिपदं व्याख्यानयति-

अम्मापितिसंबंधो, पुव्वं पच्छा व संथुया जे उ ।
एसो खलु णायविही-ऽणेगे भेया य एक्केके ॥ ३ ॥

मातृद्वारेण,पितृद्वारेण च यः संबन्ध एष ज्ञातविधिः। अथवा-ये पूर्वं संस्तुता मातापित्रादयः,ये च पश्चात् संस्तुताः श्वश्रूश्वशुराऽऽदयः । एष समस्तोऽपि ज्ञातविधिः, एकैकस्मिंश्च मातृद्वारे, पितृद्वारे वा, यदि वा-पूर्वसंस्तुते, पश्चात् संस्तुते वाऽनेके भेदाः । अनेन विधिशब्दो भेदवाची व्याख्यातः ॥३॥

अधुना निर्युक्तिविस्तरः-

णायविहिगमणेणं बहुगा,आणाऽऽदि विराहसंजमाऽऽयाए ।
संजमविराहणा खलु, उग्गमदोसा तहिं होज्जा ॥ ४ ॥

निष्कारणे विधिनाऽपि ज्ञातविधौ गमनं करोति तहिं प्रायश्चित्तं चत्वारो लघुकाः, तथा आज्ञाऽऽदयो दोषाः, तथा संयमे आत्मनि च विराधना । तत्र संयमविराधना, यतस्तत्र खलु निश्चितमुद्गमदोषा आधाकर्माऽऽदयो भवेयुः ॥४॥

कथमुद्गमदोषा भवेयुः ?, अत आह-

दुल्लभलाभा समणा, नीया नेहेण आहकम्मादी ।
चिरआगयस्स कुज्जा, उग्गमदोसं तु एगतरं ॥ ५ ॥

दुर्लभलाभाः खलु श्रमणाः, तथा महता स्नेहेनास्माकं वन्दापनाय नीता निर्गताः, ततश्चिरादागतस्याऽऽत्मस्वजनस्य तस्य प्राघूर्णकत्वकरणायोद्गमदोषमाधाकर्माऽऽदिकमेकतरं कुर्यात् ॥५॥

इति संजमम्मि एसा, विराहणा हो-इमा उ आयाए ।
छगलगसेणावतिकलु-दरयणथाले य एमादी ॥ ६ ॥

इति एवमनया प्रकारेण, एषा अनन्तरोदिता, संयमे विराधना भवति । आत्मविराधना पुनरियं वक्ष्यमाणा-छागदृष्टान्तेन सेनापतौ मृते समागते करुणारोदने, रत्नस्थाले रत्नभृते स्थाले दौकिते, एवमादौ ॥६॥

तत्र यथा छागदृष्टान्तेनाभिसमीहिते सेनापतौ मृते तस्मिन् आगते आत्मविराधना भवति, तथा भावयति-

जह रण्णो सूयस्सा,मंसं मज्जारएण अक्खित्तं ।
सो अण्णो मंसं, मग्गइ इणमो य तत्थाऽऽतो ॥ ७ ॥
कंकुहुंडपोट्टलीए, गलबद्धाए उ छगलओ तत्थ ।
सूयेण य सो बद्धितो, थक्के आत त्ति नाऊणं ॥ ८ ॥

यथा राज्ञा सूपस्य सूपकारस्य मांसं मार्जारेणाऽऽक्षिप्तं नीतं, ततः स सूपकारो प्रीतोऽर्दनो जातो मांसं मृगयते, तस्मिंश्च मृगयमाणे तत्र महानसे अयमतर्कितः कटुभाण्डपोट्टलिकया गलबद्धया युक्तश्छाग आयातः सन् सूपेन सूपकारेण मारितः 'थक्के' प्रस्तावे 'आता' इति ज्ञात्वा। एष दृष्टान्तः ॥७।८॥

साम्प्रतमुपनयमाह-

एवं अहण्णाइं, ताई मग्गंति तं समंतेण ।
सो य तहिं संपत्तो, वरोवितो संजमा तेहिं ॥ ९ ॥

एवं सूपकार इव तस्य साधोर्ये स्वजनाः,तेषां सेनापतिर्मृतः, ततस्तानि स्वजनरूपाणि मानुषाणि (अहण्णाइं इति) मार्जारणानि तं अमणीभूतं सेनापतिभ्रातरमात्मीयं समन्ततो मृगयन्ते, स च मृग्यमाणः तत्रैव संप्राप्तः, ततस्ते समुपस्थिताः स्वजनाः, वयं परिभूता भविष्यामो, न च त्वयि नाथे विद्यमाने परिजनोऽस्माकं युक्तः, तस्मात् कुरु प्रसादमित्येवं तैरुपसर्ग्यमाणः संयमाद् व्यपरोपितः ॥ ९ ॥

संप्रति करणद्वारमाह-

सेणावती मतो तू, भाय पिया वा वि तस्स जो आसी ।
अण्णो य नत्थि अरिहो, नवरि इमो तत्थ संपत्तो ॥१०॥

सेनापतिर्मृतः,तस्य यो भ्राता पिता वा आसीत् सोऽपि तावद् मृतः,अन्यश्च तस्मिन् गृहे अर्हो योग्यः सेनापतित्वस्य, नास्ति, नवरमयमेव योग्यः, स च तत्र संप्राप्तः ॥ १० ॥

तो कलुणं कंदंता, विंति अणाहा वयं विणा तुमए ।
मा य इमा सेणावति-लच्छी संकामओ अन्नं ॥ ११ ॥

ततस्तत्संप्राप्त्यनन्तरं ते स्वजनाः करुणं क्रन्दन्तो ब्रुवते-वयमनाथास्त्वया विना । इयं च प्रत्यक्षत उपलभ्यमाना सेनापतिलक्ष्मीरन्यं पुरुषान्तरं मा संक्रामतु ॥ ११ ॥

तं च कुलस्स पमाणं, बलविरियं तुज्झऽधीणमेयं च ।
पच्छा वि पुणो धम्मं, काहिसि दाणिं पसीयाहि ॥१२॥

त्वं च कुलस्यास्य समस्तस्यापि कुलस्य प्रमाणम्, एतच्च बलं हस्त्यादि, वीर्यमान्तरोत्साहः समस्तस्यापि कुलस्य, तवाधीनं, पश्चादपि त्वं धर्मं करिष्यसि, संप्रति एतदेवार्थमेव यत् सेनापतिपदप्रतिपत्त्या प्रसीद ॥ १२ ॥

एवं कारुण्णेणं, इड्ढीए लोभितो तु सो तेहिं ।
वरोविज्जइ ताहे, संजमजीयाउ सो तेहिं ॥ १३ ॥

एवमुपदर्शितेन प्रकारेण कारुण्येन, ऋद्ध्या च तैः स्वजनैः स लोभितो लोभं ग्राहितः, ततो लोभग्रहणानन्तरं स तैः

संयमजीवितात् व्यपरोप्यते ॥ १३ ॥ तदेवं करुणाद्वारं व्याख्यातम् ।

अथ रत्नस्थालद्वारमाह-

अविभवअविरेगेणं, विणिग्गतो पच्छ इड्ढिमं जातो ।
थालं वसूण पुण्णं, ठवणेंती गेण्हिहमेतं ति ॥ १४ ॥

कदाचित् स व्रती अविभवत्वेन,दारिद्र्येणेत्यर्थः । रिक्थं च पूर्वपुरुषोपार्जितं विरेक्तुं स्वजनैः तदा नेष्टं, ततोऽविरेकेण च रोषेण गृहान्निर्गत्य प्रव्रजितोऽनवत्, पश्चाच्च स स्वजनवर्गो भ्रात्रादिकः ऋद्धिमान् जातः, ततो वसूनां रत्नानां पूर्णं भृतं स्थालं तस्याऽऽगतस्योपनयन्ति,यथा गृहाण रत्नस्थालमेतदिति॥१४॥

तस्स वि दट्ठूण तयं, अह्व लोभकलिओ तओ तु समुद्दिण्णो ।
बत्तरोवितो संजमतो, एए दोसा हवंति तहिं ॥ १५ ॥

तस्यापि साधोः तत् रत्नभूतं स्थालं दृष्ट्वा, अथानन्तरं ततो रत्नभूतस्थालदर्शनाद् लोभकलिः समुदीर्णः सम्यगुदयं प्राप्तः, ततस्तेन संयमाद् व्यपरोपितः । एते दोषास्तत्र ज्ञातविधिगमने भवन्ति ॥ १५ ॥

संप्रति "एमादी" इति व्याख्यानयन् प्रकारान्तरमाह-

अहवा न होज्ज एते, अण्णे दोसा हवंति तत्थ इमे ।
जेहिं तु संजमातो, चालिज्जइ सुट्ठितो ठितओ ॥ १६ ॥

अथवा एतेऽनन्तरोदिता दोषा न भवेयुः, अन्ये इमे वक्ष्यमाणास्तत्र ज्ञातविधिगमने दोषा भवन्ति । यैः सुस्थितोऽपि स्थितकः सन् संयमाच्याव्यते ॥१६॥

के ते दोषा इत्यतस्तत्संसूचकं द्वारगाथाद्वयमाह-

अक्कंदट्ठाणे ससु-रओव्वरए पेल्लणाए उवसग्गे ।
पंथेरोयणभतए, ओनावणे अम्ह कम्मकरा ॥ १७ ॥
आघातो अणुलोमे, अन्निजोग विसे सयं च ससुरेणं ।
पंतवणबंधरुंभण, तं वा ते वाऽतिवातेंति ॥ १८ ॥

आक्रन्दस्थानद्वारं प्रथमम् । द्वितीयं श्वशुरेणापवरके क्षिप्त इति द्वारम् । तृतीयं प्रेरणाद्वारम् । चतुर्थमुपसर्गद्वारम् । पञ्चमं पथि रोदनभूतके भार्या इति द्वारम् । षष्ठमपभ्राजनाद्वारम्-यथाऽस्माकमेष कर्मकर आसीत् । सप्तमं आघातद्वारम् । अष्टममनुलोमद्वारम् । नवममभियोग्यद्वारम् । दशमं विषद्वारम् । ततः स्वयं श्वशुरेण प्रान्तापणबन्धरोधनानि क्रियन्ते, ततः कोपात् तं श्वशुरं सोऽतिपातयेद् विनाशयेत्, ते वा श्वशुरप्रभृतयः तं साधुमतिपातयेयुः, इति एकादशं द्वारमिति द्वारगाथाद्वयसमासार्थः ॥१७।१८॥

साम्प्रतमेतदेव विवरीषुः प्रथमत आक्रन्दस्थानद्वारमाह-

दीसंता * वि हु णीया, पव्वयहियया पि संपकंपेंति ।
कलुणकिवणाणि किं पुण, कुणमाणा एगसेज्जाए ? ।१९।

सेनापतौ मृते स तत्र ज्ञातविधौ गतः, तत्र दृश्यमाना अपि निजकाः पर्वतहृदयमपि पर्वतसदृशमानसमपि साधुं संयमात् संप्रकम्पयन्ति सम्यगन्तर्लीनीभूय प्रकर्षेण व्याचयन्ति, किं पुनरेकस्यां शय्यायां वसतौ करुणकृपणानि रोदनानि कुर्वाणाः?, सुतरां संयमाद् भ्रंशयन्ति ॥१९॥

अक्कंदट्ठाणठितो, तेसिं सोचा उ नायगादीणं ।
पुव्वावरत्तरोयण, 'जाय अणाहा' वए को वि ॥ २० ॥

सोऽधिकृतः साधुर्यत्र ते ज्ञातकाः क्रन्दन्ति, तस्मिन्नाक्रन्दस्थाने स्थितः पूर्वरात्रे अपररात्रे च रोदनं तेषां ज्ञातकाऽऽदीनां करुणकृपणं यथा-'जाता वयमनाथाः,भविष्यामः सर्वेषां परिभवाऽऽस्पदम्'इति श्रुत्वा कश्चिद् व्रजेत् प्रव्रज्यां मुञ्चेदित्यर्थः ।२०। गतमाक्रन्दस्थानम् ।

अधुना " ससुरउव्वरए " इत्यादि द्वारमाह-

महिलाएँ समं ओहुं, ससुरेणं ढक्कितो उ उव्वरओ ।
नायविहिमागयं वा, पेच्छे उव्वत्तिगसगाए ॥ २१ ॥

तस्य साधोः श्वशुरकः, तं तत्र समागतं साधुं दृष्ट्वा निजदुहितरं सर्वालङ्कारभूषितां कारयेत्; कारयित्वा च वन्दापनाय, भिक्षार्थं वा तत्र समागतेन श्वशुरकेन महेलया भार्यया सममपवरके क्षिप्त्वा, अपवरको ढक्कितः-स्थगितद्वारः कृतः । तत्र च उपसर्ग्यमाणः कश्चिदुत्प्रव्रजेत् ।

प्रेरणाद्वारमाह-ज्ञातविधिमागतं च तं साधुं दृष्ट्वा स्वजनवरस्तस्य स्वकीयया उल्लामिकया भार्यया प्रेरयेत् संयमाद् व्यावयेत् ॥२१॥ गतं प्रेरणाद्वारम् ।

साम्प्रतं चतुर्थमुपसर्गद्वारं प्रतिपिपादयिषुरिदमाह-

मोहुम्मायकराइं, उवसग्गाइं करेइ से विरहे ।
जज्जा जेहिँ तरू विव, वाएणं जज्जते सज्जं ॥२२॥

भार्या 'से' तस्य स्वजनविधिगतस्य सा विरहे मोहोन्मादकरान् उपसर्गान् आश्लिष्टाऽऽदीन् करोति, यैस्तरुरिव वातेन भज्यते सद्यः ॥२२॥

संप्रति ' पंथेरोयणभतए ' इति व्याख्यानमाह-

कइवेण सभावेण य, जतओ भोइं पहम्मि पंतावे ।
हियएं अमुंडियं मे, भयवं पंतावए कुवितो ॥ २३ ॥

साधुर्ज्ञातविधिं गतस्तत्र च लज्जया भिक्षां न हिण्डते, तत उल्लामकभिक्षाचर्यायां गतः,तेषां च ज्ञातकानां कैतवेन वा स्वभावेन वा तस्य भार्या भृतकेन समं क्वेत्रं गता,तत्र स भृतकः कैतवेन स्वभावेन वा कर्मणि भार्यां (?) ॥ २३ ॥

कम्महतो पव्वइतो, जतओ एसऽम्ह आसि मा वंदा ।
उव्भामगए खुद्दे, आघायं तस्स सा देइ ॥ २४ ॥

कदाचित् स प्रव्रजितः कर्मकर आसीत्, ततस्तं बहुजनो दृष्ट्वा ब्रूयात्-एषोऽस्माकं भृतक आसीत्, कर्महतः कर्मभग्नः सन् प्रव्रजितः, तस्माद् मा वन्दिषत ।

आघातद्वारमाह-उल्लामकके उल्लामकभिक्षाचर्यागतेऽधिकृते भृतकरूपे साधौ क्षुद्रे मूर्खे तस्य सा भृत्या आघातं ददाति, कुपिता सती आगमपि तं घातयतीत्यर्थः ॥२४॥

अधुनाऽनुलोमोपसर्गमाह-

मा छिज्जउ कुलतंतू, धणगोत्तारं तु जणय मेगसुयं ।
वत्थनमादीएहिं, अभिजोजेउं वसं णेति ॥ २५ ॥

तस्य ज्ञातविधिगतस्य साधोर्ज्ञातविधिरेवं ब्रूयात्-मा छिद्यतां भेदं यायात, कुलतन्तुः कुलसन्तानः, तस्मात् धनरक्षकमेकं सुतं प्रसादं कृत्वा जनय, पश्चात्पुनर्व्रतं गृह्णीथाः, एवमुक्तः सन् कश्चित् उत्प्रव्रजेत् ।

अधुना अभियोग्यद्वारमाह-वस्त्राऽऽदिकैः, आदिशब्दात् खादिमस्वादिमाऽऽदिविशेषपरिग्रहः । तैरभियोज्य वशीकृत्य स्वजनस्तमात्मवशं नयन्ति ॥२५॥

* " सीदंता " इति पाठान्तरम् ।

विषप्रकारमाह-

नेच्छंति देवरा मे, जीवंते इमम्मि इति विसं देज्जा ।
अण्णेण व दावेज्जा, ससुरो वा से करेइ इमं ॥ ५६ ॥

तं ज्ञातविधिगतं साधुं दृष्ट्वा तत्कार्यदं विचिन्तयेत्-अस्मिन् जीवति मां देवरा भोग्यतया नेच्छन्ति,तस्मान्मारयामि केनाप्युपायेन चैनमिति विचिन्त्य स्वयं वा विषं दद्यात्, अन्येन वा दापयेत् । 'सयं च ससुरेण' इत्यादिद्वारमाह-'से' तस्य साधोः श्वशुरो वा स्वयमिदं कुर्यात् ॥ २६ ॥

किं तदित्याह-

पंतवणबंधरुंभण, तस्स वि नीयल्लगा उ खुब्भेज्जा ।
अहवा कसाइतो तू, सो वऽतिवाएज्ज एक्कतरं ॥२७॥

श्वशुरस्तं दृष्ट्वा कुप्येत्, यथा-एतेन मम दुहिता जीवच्छवीकृता, ततः कोपात् तस्य साधोः प्रान्तापणं प्रहारदानं, बन्धनं वा निगमाऽऽदिनिः, रोधं वा गृहाङ्गणराङ्गा अनिर्गमनं कुर्यात्, कारयेत् वा । तस्यापि च साधोः, निजका आत्मीयाः, तमेनामवस्थां प्राप्तं दृष्ट्वा, ज्ञात्वा वा क्षुभ्येयुः, क्षोभाच्च श्वशुरेण समं युद्धं कुर्युः, तत्र परस्परमपद्रावणाऽऽदि भूयात् । अथवा स एव साधुः कषायितः कषायोदयं प्राप्तः सन् एकतरं श्वशुराऽऽद्यन्यतमममितिपातयेत् ॥२७॥

अत्र प्रायश्चित्तविधिमाह-

एक्कम्मि दोसु तीसु व, मूलऽणवट्ठो तहेव पारंची ।
अह सो अतिवाएज्जइ, पावइ पारंचियं ठाणं ॥ ५८ ॥

एकस्मिन्नतिपातिते मूलप्रायश्चित्तभाग् भवति, द्वयोरतिपातितयोरनवस्थाप्यः, त्रिषु अतिपातितेषु पाराञ्ची । अथ स एव अतिपात्यते साधुस्तर्हि स यदि कथमपि जीवति ततः पाराञ्चितं स्थानं प्राप्नोति ॥२८॥

अन्यान् दोषानाह-

अहवा वि धम्मसड्ढा, साहू तेसिं घरे न गेण्हंति ।
उग्गमदोसाऽऽदिभया, ताहे नीया भणंसि इमं ॥ ५९ ॥

अथ वेति प्रकारान्तरेण दोषकथनोद्द्योतने, साधवो धर्मश्रद्धा उद्गमदोषाऽऽदिभयात् तेषां गृहे न किमपि गृह्णन्ति, ततस्ते निजाः स्वजना इदं भणन्ति ॥२९॥

किं तदित्याह-

अम्हं अणिच्छमाणो, आगमणे लज्जणं कुणति एसो ।
ओहावण हिंडंते, अण्णो व्व ओगो व णं भणति ॥३०॥

अस्माकं गृहे किमप्यनिच्छन् एष आगमने लज्जनमयशस्कारं करोति ! यतः-अस्मिन् प्रतिगृहमन्यत्र भिक्षां हिण्डमाने महती नूलमस्माकमपभ्राजना, लोको वाऽन्य इदं भणति ॥३०॥

किं तदित्याह-

नीयल्लस्स वि जत्तं, न तरह दाउं ति तुज्झे किवण त्ति ।
गेहे भुंजसु बुत्ते, भणाति नो कप्पियं भुंजे ॥ ३१ ॥

तं साधुं निष्क्रामदन्तं दृष्ट्वा केचित् अन्ये स्वजनान् प्रति ब्रूयुः-यथा यूयं कृपणा निजकस्याप्येकस्य प्राघूर्णकाऽऽगतस्य जक्तं दातुं न शक्नुथ, ततस्ते एवमुक्ताः सन्तः साधुसमीपमागत्य ब्रुवते-यावन्ति दिनानि यूयमत्र तिष्ठथ, तावन्माऽन्यत्र भिक्षामटत,किं तु गृहे भुङ्क्ष्वम, अन्यत्र निष्काडने हि महत्यस्माकमपभ्राजना । स एवमुक्तः साधुर्भणति-युष्मद्गृहे न भुञ्जे, यतः अहं कल्पिकं भुञ्जे, युष्मद्गृहे च उद्गमाऽऽदिदोषाऽऽशङ्का ॥३१॥

एवमुक्ते ते स्वजनाः प्राऽऽहुः-

किं तं ति खीरमादी, ददामो दिज्जे य नातिभज्जाओ ।
भेंति सुते जायंते, पभिया णे करा बहू पुत्ता ! ॥३२॥

किं तत् कल्पिकं यत्त्वं भुङ्क्षे, ततः साधवो ब्रुवते-यानि युष्माकं यथाप्रवृत्तानि क्षीराऽऽदीनि क्षीरदधिघृतगुडाऽऽदीनि; ततस्ते आहुः-एतानि यथाप्रवृत्तानि दास्यामः । गाथायां "वर्तमानसामीप्ये वर्तमानवद्वा" ॥ ३ । ३ । १३१ ॥ इति वचनात् ते दातुं प्रवृत्ताः, ततो दत्ते क्षीराऽऽदिके भ्रातृभार्याः सुताद् क्षीराऽऽदीनि याचमानान् प्रति ब्रुवते-हे पुत्राः ! बहवोऽस्माकं कराः पतिताः ॥३२॥

तानेवाऽऽह-

दहिघयगुलतेल्लकरा, तक्ककरा चेव पाभिया अम्हं ।
रायकरपेल्लियाणं, समणकरा दुक्करा वोढुं ॥ ३३ ॥

दधिकरघृतकरगुडकरतैलकराः, तथा तक्ककराश्च, अस्माकं पातिताः श्रमणैः । राजकरा अस्माकमपतन्, तैः सदैव प्रेरिता वयं वर्तामहे, परं राजकरप्रेरितानामस्माकमयं श्रमणकरो दुष्करो वोढुमिति, प्रभूतसर्वोपहरणात् ॥३३॥

एए अण्णे य तहिं, नायविहिगमणे होंति दोसाओ ।
तम्हा उ न गंतव्वं, कारणजाते भवे गमणं ॥ ३४ ॥

एते अनन्तरोदिताः, अन्ये चानुक्ताः,तत्र ज्ञातविधिगमने,दोषा भवन्ति,तस्माद् ज्ञातविधौ न गन्तव्यम् । एष उत्सर्गः । कारणे पुनर्ग्लानत्वाऽऽदिलक्षणे जाते पुनरपवादतो गमनं भवेत् ॥३४॥

तदेवाऽऽह-

गेलण्णकारणेणं, पाउग्गासति तहिं तु गंतव्वं ।
जे उ समत्थुवसग्गे, सहिउं ते जंति जयणाए ॥ ३५ ॥

ग्लानत्वकारणेन अन्यत्र प्रायोग्यस्य औषधाऽऽदेरसत्यभावे, उपलक्षणमेतद्-वैद्याभावे च तत्र गन्तव्यम् । तत्र वैद्यस्य, प्रायोग्यस्य औषधस्याऽऽसनाऽऽदेश्च प्राप्यमाणत्वात्, तत्र ये उपसर्गान् सोढुं समर्थाः, ते यतनया वक्ष्यमाणया यान्ति गच्छन्ति ॥३५॥

तामेव यतनामाह-

बहिएँ अणापुच्छाए, लहुगा लहुगो य दोच्चऽणापुच्छा ।
आयरियस्स वि लहुका, अपरिच्छियपेसवंतस्स ॥३६॥

अत्र इदं सूत्रं पठति-"नो से कप्पति थेरे अणापुच्छित्ता नायविहिं एत्तए" इत्यादि । तत्र यदि बहिः स्थविराणामनापृच्छया व्रजति, ततस्तस्य प्रायश्चित्तं चत्वारो लघुकाः, स्थविरान् आपृच्छ्य तैर्विसर्जितो यदि द्वितीयस्थविरान् अनापृच्छ्य व्रजति, ततो द्वितीयानापृच्छायां मासलघु, आचार्योऽपि यदि अपरीक्षितान् प्रेषयति, ततस्तस्यापरीक्षितान् प्रेषयतश्चत्वारो लघुकाः प्रायश्चित्तम् ॥३६॥

तम्हा परिच्छिअव्वो, सज्झाए चेव निक्खमणे य ।
थिरमथिरजाणणट्ठा, सो उववाएहिमोहिं तु ॥ ३७ ॥

यत एवमपरीक्षितप्रेषणे प्रायश्चित्तं,तस्मात्स्थिरास्थिरज्ञानार्थं

स्वाध्याये भिक्षाभावे च परीक्षितव्यः स पण्डितैर्वक्ष्यमाणैरुपायैः ॥ ३७ ॥

तानेवाऽऽह-

चरणकरणस्स सारो, भिक्खायरिया तहेव सज्झाओ ।
एत्थ परितम्ममाणे, तं जाणसु मंदसंविग्गं ॥ ३८ ॥

चरणं व्रतश्रमणधर्माऽऽदि । उक्तं च-"वयसमणधम्म संजमवेयावच्चं च बंभगुत्तीओ । णाणाइतियं तक्को-हनिग्गहो इह चरणमेयं ॥ १ ॥" (सम्म०३ काण्ड) करणं पिण्डविशुद्ध्यादि । उक्तं च-"पिंडविसोही समिती,भावण पडिमा य इंदियनिरोहो । पडिलेहण गुत्तीओ, अभिग्गहा चेव करणं तु ॥१॥" (ग० १ अधि०) तस्य चरणकरणस्य सारो भिक्षाचर्या, स्वाध्यायश्च; ततोऽत्र भिक्षाचर्यायां स्वाध्याये च परिताम्यति क्लेशं मन्यते, तं जानीत मन्दसंविग्नम् ॥३८॥

चरणकरणस्स सारो, भिक्खायरिआ तहेव सज्झाओ ।
एत्थ तु उज्जममाणे, तं जाणसु तिव्वसंविग्गं ॥३९॥

चरणकरणस्य सारो भिक्षाचर्या, तथैव स्वाध्यायः, ततोऽत्र भिक्षाचर्याऽऽदावुद्यच्छति, तं जानीत तीव्रसंविग्नं, तदेवं स्थिरास्थिरपरिज्ञानार्थं परीक्षा उक्ता ॥३९॥

संप्रति किमेष उपसर्गं सहिष्णुः,किं वा न ?, इति परीक्षार्थमाह-

कडवेण सहावेण य, अण्णस्स व साहुणं कहिज्जंते ।
मायापितिभायभगिणी-भज्जापुत्ताऽऽदिएसुं तु ॥ ४० ॥

यथा स शृणोति तथा कैतवेन स्वभावेन वा अन्यस्य साधोः मातापितृभ्रातृभगिनीभार्यापुत्राऽऽदिषु विषये साध्वसं कथ्यते ॥४०॥

केन प्रकारेण ?, इत्यत आह-

सिरकोट्टणकलुणाणि य, कुणमाणाइं तु पायवमियाइं ।
अमुएण न गणियाइं, जो जंपति निप्पिपासो त्ति ॥४१॥

मातापित्रादीनां शिरःकुट्टनकरुणरोदनभाषणानि क्रियमाणानि पादपतितानि वाऽमुकेन न गणितानि, एवं साध्वसे कथ्यमाने, यो जल्पति-अतीव खलु निष्पिपासो घोरहृदयः, न युज्यते साधुना सह वक्तुमपीति ॥४१॥

सो जावतेऽपडिबद्धो, अपडीबद्धो वएज्ज जो एवं ।
सोऽहिति केचियाऊ, नीया जे आसि संसारे ? ॥४२॥

स भावतः स्वज्ञातेषु प्रतिबद्धो ज्ञातव्यो, न शक्तः स सोढुमुपसर्गानिति । यस्तु तथा साध्वसे कथ्यमाने, एवं ब्रूते-संसारे सर्वजीवाः सर्वेषां पुत्रत्वाऽऽदिकमुपगताः, ते आसीरन् संसारेऽनन्ते निजाः,तान् कियतः स शोचयिष्यति ?, किं वा मातापित्रादिभिः शोचितैर्ये निजान् संसाराद् न च संयमे पातयन्ति ?। स ज्ञातव्यो भावतः स्वजनेष्वप्रतिबद्धः समर्थः सोढुमुपसर्गानिति ॥४२॥

मुहरागमादिएहि य, तेसिं नाऊण रागवेरग्गं ।
नाऊण थिरं ताहे, ससहायं पेसवेंति ततो ॥ ४३ ॥

यस्य ज्ञातविधिजिगमिषोः शोभनो मुखरागः, स ज्ञायते स्वजनेषु भावतः प्रतिबद्धः, उपसर्गानसहिष्णुश्च; यस्य तु न तथाविधो मुखरागः स्पष्टो लक्ष्यते स ज्ञेयो भावतः स्वजनेष्वप्रतिबद्धः, सहिष्णुश्च उपसर्गान् । एवं मुखरागाऽऽदिभिस्तेषां ज्ञातविधिं गन्तुमिच्छतां रागं वैराग्यं च, तथा स्थिरमुणलक्षणमस्थिरं च ज्ञात्वा, ततः स्थिरं भावतः स्वजनेष्वप्रतिबद्धं ससहायं सूरयः प्रेषयन्ति ॥४३॥

साम्प्रतमल्पश्रुताद्यागमपदव्याख्यानार्थमाह-

अबहुस्सुतो अगीतो, बाहिरसत्थेहिं विरहितो इयरो ।
तब्विवरीए गच्छे, तारिसगसहायसहितो वा ॥ ४४ ॥

अबहुश्रुतो नामाल्पश्रुतः, स चागीतार्थ उच्यते, इतरोऽल्पागमो यो बाह्यशास्त्रैर्विरहितः, एतादृशो न गच्छेत् स्वजनविधौ, किं तु तद्विपरीतो बहुश्रुते बह्वागमश्च, यदि वा-स्वयमल्पश्रुतोऽल्पाऽऽगमो वा तादृशसहायकसहितः ॥४४॥

बहुश्रुतविशेषमाह-

धम्मकहीवादीहि य, तवस्सिगीएहिं संपरिवुडो उ ।
नेमित्तिएहिं य तहा, गच्छइ सो अप्पछट्ठो उ ॥४५॥

धर्मकथिभिर्वादिभिस्तपस्विभिः षष्ठाद्याऽऽदितपःकारिभिर्गीतार्थैः सूत्रार्थतदुभयनिष्णातैर्नैमित्तिकैश्च संपरिवृतो गच्छेत् । अथ धर्मकथ्यादयो बहवो न सन्ति,ततो जघन्यतोऽप्येककधर्मकथ्यादिसहाय आत्मषष्ठो व्रजेत् ॥४५॥

तत्र प्रवेशविधिमाह—

पत्ताण वेन्न पविसण, अह पुण पत्ता पगे न विज्जाहि ।
तं बाहिरं ठवेउं, वसहिं गेण्हंति अन्नत्थ ॥ ४६ ॥

यदि वेलायां स्थानं प्राप्तास्तर्हि समकालमेव सर्वेषां प्रवेशनम् । अथ पुनः प्रगे प्रभात एव प्राप्ता भवेयुस्तदा तं स्वजनं बहिः स्थापयित्वा वसतिमन्यत्र गृह्णन्ति ॥४६॥

पमिपच्चीकुसलेहिं, सहितो ताहे तु वच्चए तहियं ।
वास पडिग्गहगमणं, नातिसिणेहाऽऽसणग्गहणं ॥४७॥

अन्यत्र वसतौ गृहीतायां प्रतिपक्षिकुशलैः सहितस्ततो बहिःस्थानात् तत्र वसतौ व्रजति, तत्र तावदावासो यावन्निक्षावेलाः,ततः पतद्ग्रहं गृहीत्वा गमनं विधेयम् । तत्र यदि प्राप्तायां निक्षावेलायां पतद्ग्रहं गृहीत्वा व्रजन्ति, तदा तत्कालमेव गृह्णन्ति भक्ताऽऽदिकम्,अथ निक्षावेलायामप्राप्तायां तत्र पतद्ग्रहं गृहीत्वा व्रजन्ति, निमन्त्रयन्ति च ते, तदा तत्क्षणमेव यल्लभन्ते तद् गृह्णन्ति । अथ मुहूर्तानुगुण्यतः कृतनिक्षाकाः तत्र गताः,तर्हि यत्र पतद्ग्रहं न नयन्ति, तत्र च गत्वा नातिस्नेहः स्वज्ञातकानां दर्शनीयः, यदि पुनरतिस्नेहं दर्शयति, ततः-अनुरक्तोऽस्माकमिति ज्ञात्वा ते उपसर्गयेयुः । तथा तत्र गतेनाऽऽसनपरिग्रहः कर्तव्यः, न पुनरेवं चिन्तनीयम्-"आसंदीपल्लियंकेसु, मंचमासालयेसु वा । अणायरियमज्जाणं, आसइत्थ सइत्थ वा" ॥१॥ ( ) आसनपरिग्रहाभावे हि अपभ्राजना भवति । तस्मादासने उपवेष्टव्यम् ॥४७॥

सयमेव उ धम्मकही, सासणपक्खे य निम्मुहे कुणति ।
अप्पडपक्खे य तहिं, कहेइ तल्लद्धिओ अण्णो ॥४८॥

यदि स स्वज्ञातिकसाधुः धर्मकथायां कुशलप्रायः शासनप्रत्यनीकाँश्च निरुत्तरान् कर्तुं समर्थः, ततः स्वयमेव तस्य धर्मकथा कथनीया भवति । अथ सोऽप्रत्युत्पन्नोऽनागमिकः प्रतिपक्षकुशलो वा तदा तस्मिन्नप्रत्युत्पन्नेऽन्यस्तल्लब्धिको धर्मकथालब्धिसंपन्नः प्रत्युत्तरदानलब्धिसंपन्नश्च कथयति ॥४८॥

मक्खिय य पीढमद्दा, पव्वज्जाए य थिरनिमित्तं तु ।

थावच्चापुत्तेणं, आहरणं तत्थ कायव्वं ॥ ४९ ॥

"पीढमहा नाम मुक्खप्पियजंपगा, ते पव्वज्जाओवणावयणाणि भणिज्जंति, ते य पमिवत्तकुसलेणं कहएणं महिया महिया भवंति" इति चूर्णिः । स्थिरीकरणानमित्तं तत्र धर्मकथायां स्थापत्यापुत्रेण ज्ञाताधर्मकथाप्रसिद्धेनाऽऽहरणं कर्तव्यम् ॥४९॥

कहिए व अकहिए वा, जाएणट्ठेउं अइंति भत्तघरं ।
पुव्वाउत्तं तहियं, पच्छाउत्तं व जाणंति ॥ ५० ॥

धर्मे कथिते, अकथिते वा भिक्षाग्रहणवेलायामुक्तमाऽऽदिशब्दाद्विज्ञानार्थं भक्तगृहं महानसं प्रविशन्ति, प्रविश्य च यत्तत्र पूर्वायुक्तं पूर्वप्रवृत्तमुपस्क्रियमाणं, पश्चादायुक्तं यत्तेषु साधुष्वागतेषु तन्निमित्तमुपस्क्रियमाणं तत्परिभावयन्ति ॥५०॥

पूर्वायुक्तमित्यत्र व्याख्यानद्वयं परमतेन दर्शयति-

पुव्वाउत्ताऽऽरुहिते, केसिं वि समीहियं तु जं तत्थ ।
एए न होंति दोसा वि, पुव्वपवत्तं तु जं तत्थ ॥ ५१ ॥

केचिद् व्याचक्षते-पूर्वायुक्तं नाम चुल्ल्यां पाकार्थमारोपितम् । केचिदाचार्यपुनरिदं व्याख्यानम्-यत्तत्र समीहितं पाकाय ढौकितम् । एतौ द्वावप्यादेशौ प्रमाणं न भवतः, तस्मादिदं व्याख्यानम्-यत्तत्र गृहस्थानां पूर्वप्रवृत्तमुपस्क्रियमाणं तत्पूर्वायुक्तमिति ॥५१॥

अथ कस्मादितरदादेशद्वयं न प्रमाणमत आह-

पुव्वाऽऽरुहिते य समी-हिए य किं लुंचइ न खलु अप्पं ?।
तम्हा खलु जं उचियं, तं तु पमाणं न इतरं तु ॥ ५२ ॥

पूर्वं चुल्ल्यामारोपिते समीहिते वा किं न क्षिप्यते ?, इति भावः । तस्मात् खलु यदुचितं व्याख्यानं, तत्प्रमाणं, नेतरत् परकीयमादेशद्वयम् ॥५२॥

बालगपुच्चाऽऽदीहिं, नाउं आयरमणायरेहिं च ।
जं जोग्गं तं गेण्हइ, दव्वपमाणं च जाणेज्जा ॥५३॥

बालकपृच्छाऽऽदिभिरादिशब्दाद् बालकोल्लापाऽऽदिभिश्च पिण्डनिर्युक्तिप्रसिद्धैः, तथा आदरानादराभ्यां च योग्यमयोग्यं विज्ञाय तत्र च यद् योग्यं श्रमणप्रायोग्यं प्रतिभाति तत् गृह्णाति वरवृषभः । द्रव्यप्रमाणं च जानीयात्-कियत् कुटुम्बमन्यद्वा ?, भोजनं कियद् वा रूक्षमित्येवं यद् यावत् प्रायोग्यं प्रतिभासते, तावद् गृह्णीयात् ॥५३॥

संप्रत्येतदेव सविशेषतरमाह-

दव्वपमाणं गणणा, खारिय फोमिय तहेव अद्धा य ।
संविग्ग एगठाणे, अणेगसाहूसु पन्नरस ॥ ५४ ॥

द्रव्यं प्रमाणं नाम द्रव्याणां गणना । यथा-एतावन्तोऽओदनभेदाः, एतावन्ति च शाकविधानानि, इयन्तश्च खाद्यविशेषाः, एतावन्ति च द्राक्षापानकाऽऽदीनि, तथा क्षारितानि लवणखरिटितानि शालकानीत्यर्थः । स्फोटितं जीरकहिङ्गुधूपवासितम् । एतत्सर्वं ज्ञातव्यम् । तथा अद्धा कालो भिक्षाया ज्ञातव्यः, अन्यथाऽवष्वष्कणाऽऽदयो दोषाः स्युः । तथा संविग्ना एकस्थाना एकपक्वाटाऽऽत्मकाः प्रविशन्ति, ततः कल्पते, अनेकसाधुषु अनेकेषु साधुसक्वाटेषु प्रविशत्सु न कल्पते, यतस्तत्र नियमादाधाकर्मसहिता औद्देशिकाऽऽदयः पञ्चदश दोषाः ॥ ५४ ॥

एतदेव विवरीषुः प्रथमतो द्रव्यप्रमाणमाह-

सत्तविहमोदणो खलु, साली वीही य कोद्दवे जवे य ।
गोहुमरालगआर-णकूर खज्जा यऽणेगविहा ॥ ५५ ॥

सप्तविधो, मकारोऽलाक्षणिकः, ओदनः कूरः, तथा-शालिः कलमशाल्यादिकूरः, व्रीहिः सामान्यतण्डुलौदनः, कोद्रवकूरो, यवकूरः, गोधूमकूरो, रालककूरः, अकृष्टपच्याऽरण्यव्रीहिकूरश्च, खाद्यानि च अनेकविधानि ॥५५॥

सागविहाणा य तहा, खारियमादीणि वंजणाइं वा ।
खंडाऽऽदिपाणगाणि य, नाउं तेसिं तु परिमाणं ॥५६॥

शाकविधानानि प्राज्यमनकानि, क्षारिताऽऽदीनि, आदिशब्दात् स्फोटितपरिग्रहः, व्यञ्जनानि, तथा खण्डानि, पानकानि, आदिशब्दाद् द्राक्षाऽऽदिपरिग्रहः । तेषामोदनाऽऽदीनां परिमाणं ज्ञात्वा ॥ ५६ ॥

किमिति ?, आह-

परिमियभत्तट्ठाणे, दसुवक्खमियम्मि एगभत्तट्ठो ।
अपरिमिते आरेण वि, गेण्हइ एवं तु जं जोग्गं ॥५७॥

परिमितभक्तस्थाने परिमितानां भक्तकर्मभेदानिर्दानव्यमिति निश्चये यावद्दशानां योग्यमुपस्कृतं तावत्येकभक्तार्थो ग्राह्यः; एकयोग्यं तत्र भक्तं ग्राह्यमिति भावः । अपरिमिते अपरिमितभक्तस्थाने दशानामारतोऽपि नवानामष्टानां वा योग्यं यदुपस्कृतम्, तत्रैवं स्थानपरिमाणचिन्ताव्यतिरेकेण यद् योग्यं तद् यावत् पर्याप्तं गृह्णाति ॥५७॥

अद्धा य जाणियव्वा, इहरा ओसक्कणाऽऽदयो दोसा ।
संविग्गे संघाओ, एगो इयरेसु न विसंता ॥ ५८ ॥

अद्धा भिक्षावेला ज्ञातव्या, इतरथाऽवष्वष्कणाऽऽदयो दोषा भवेयुः । तथा 'संविग्गे' संविग्नानामेकः सङ्घाटो यत्र प्रविशति तत्र गन्तव्यम् । इतरेषु यत्र बहवः सङ्घाटकाः प्रविशन्ति, तत्र न गच्छन्ति ॥५८॥

तेहिं गिलाणगस्सा, अहागमाइं हवंति सव्वाइं ।
अब्भंगसिरावेहो, अपाणउज्जावणोज्जाइं ॥ ५९ ॥

यदि स्वजनानां संबन्धी कोऽपि ग्लानो वर्तते, ततस्तस्य चिकित्सां वैद्यः करोति । यदि वा-वैद्यः साधुस्वजनानां, स्वजनोऽस्य कस्यापि ग्लानस्य क्रियां करोति, ततस्तत्र ग्लानो ज्ञातविधि नीयते, यतस्तत्र ग्लानस्याभ्यङ्गं शिरावेधोऽपानमपानकर्म छेदेनापनीयानि छेदापनीयानि, एतानि सर्वाणि यथाकृतानि-पुरःकर्मपश्चात्कर्मरहितानि भवन्ति ॥५९॥

एतदेव स्पष्टं भावयति-

जइ नीयाण गिलाणो, नीओ विज्जो व कुणइ अन्नस्स ।
तत्थ हु न पच्छकम्मं, जायइ अब्भंइमाईसु ॥ ६० ॥

यदि निजकानां संबन्धी ग्लानो, वैद्यो वा निजको ऽन्यस्य कुरुते किंचित्सां, तत्र 'हु' निश्चितं, न पश्चात्कर्माभ्यङ्गाऽऽदिषु जायते ।

कथं न जायते ?, इत्याह-

पुव्वं च मंगलट्ठा, उप्पेउं जइ करेइ गिहियाणं ।
सिरवेधवत्थिकम्मा-इएसु न उ पच्छकम्मोऽयं ॥ ६१ ॥

पूर्वं यदि मङ्गलार्थं साधौ 'उप्पेयं' देशीपदमेतत्-अभ्यङ्गं कृत्वा, पश्चाद् गृहिकाणां गृहस्थानां करोत्यभ्यङ्गम्, एतत् पश्चात्कर्म

न भवन्ति । एवं शिरावेधवस्तिकर्मोऽऽदिष्वपि पूर्वं साधौ कृत्वा पश्चाद् गृहस्थेषु क्रियमाणेषु न पश्चात्कर्म ॥६१॥

अत्तट्ठा उवणीया, ओसहमादी हवंति ते चेव ।
पत्थाऽऽहारो य तहिं, अहाकमो होइ साहुस्स ॥ ६२ ॥

आत्मार्थं यान्युपनीतानि औषधाऽऽदीनि गृहस्थैः, तान्येव साधोरपि भवन्ति, पथ्याऽऽहारोऽपि च तत्र साधोर्यथाकृतो भवति, न ततः पश्चात्कर्म ॥६२॥

अगिलाणे उ गिहिम्मी, पुव्वुत्ताए करेंति जयणाए ।
अण्णत्थ पुण अग्लेभे, णायविहिं नेंति अन्नतरं ॥ ६३ ॥

यदि निजकानां संबन्धी न कश्चिद् ग्लानो, नाऽपि निजको वैद्योऽन्यत्र चिकित्सां करोति, तदा गृहिणि गृहस्थे अग्लाने, अन्यत्र पूर्वोक्तया यतनया-पूर्वं कल्पाध्ययने ग्लानसूत्रे चिकित्सा यतना उक्ता, तया चिकित्सां कुर्वन्ति । तथाऽन्यौषधीनां लाभो नास्ति । तत आह-अन्यत्र पुनरौषधीनामलाभे ज्ञातविधिमन्यतरं ते ग्लानं नयन्ति । तदेवं ग्लानविधिरभ्युक्तः ॥६३॥

सम्प्रति लाभचिन्तायामज्ञानविधिमाह-

अहुणा तु लाभचिंता, तत्थ गयाणं इमा हवइ तेसिं ।
जइसड्ढेगाऽऽयरिय-स्स होंति तो मग्गणा नऽत्थि ॥६४॥

अधुना तेषां तत्र गतानां ज्ञातविधौ गतानामियं लाभचिन्ता भवति । यदि ते धर्मकथ्यादयः सर्वेऽप्येकस्याऽऽचार्यस्य भवन्ति, तर्हि नाऽस्ति मार्गणा; सर्वमाचार्यस्याऽभवतीति भावः ॥६४॥

संतासंती अहवा, अण्णगणा जे वितीयगा नीया ।
तत्थ इम मग्गणा ऊ, आभव्वे होइ नायव्वा ॥ ६५ ॥

सद्भावो नाम-सन्ति साधवः, परं न धर्मकथाऽऽदिषु कुशलाः, असद्भावो-मूलत एव न सन्ति साधवः । एवं सद्भावेनासद्भावेन वा येऽन्यगणसत्का द्वितीयका नीताः, तेषामियमाभाव्ये मार्गणा भवति ज्ञातव्या ॥६५॥

तामेवाऽऽह-

जं सो उवसामेती, तम्मिस्साए य आगया जे तु ।
ते सव्वे आयरितो, लभते पव्वायगो तस्स ॥ ६६ ॥

स ज्ञातविधिमागतः सन् यमुपशमयति प्रव्रज्यापरिणामं ग्राहयति,ये च तन्मिश्रया तस्य ज्ञातविधिमागतस्य निश्रया-स्वज्नोऽस्माकमिति बुद्धया तत्समीपमागताः, तान् सर्वान्,यो ज्ञातविधिं दुष्टुमागतः,तस्य साधोर्यः प्रव्राजक आचार्यः,स लभते ।

जे पुण अह भावेणं, धम्मकहिं सुंदरो त्ति वा सोउं ।
आउ-वसामिय तेहिं, तेसिं चिय ते हवंती उ ॥ ६७ ॥

ये पुनः यदि वा ये-सुन्दरो धर्मकथी इति श्रोतुमागताः सन्तः, वैक्षेपैकथ्यादिभिरुपशामिताः प्रव्रज्यापरिणामं ग्राहिताः, ते तेषामेव भवन्ति ॥ ६७ ॥

अण्णेहिं कारणेहि य, गच्छंताणं तु जयण एसेव ।
ववहारो सेहस्स य, ताइं च इमाइं कज्जाइं ॥ ६८ ॥

आस्तां स्वजनबन्धापनाय, ग्लानप्रयोजनेन वा ज्ञातविधिं गतानां यतना प्रागुक्ता प्रवर्तते, अन्यैर्वा कारणैर्वक्ष्यमाणैर्ज्ञातविधिं गच्छतामेवाऽनन्तरोदिता यतना-एषैव शैक्षस्य विषये अनन्तरोदित आभवनव्यवहारः । तानि चान्यानि कार्याणि कारणानीमानि ॥६८॥

तान्येवाऽऽह-

तवसोसिय अप्पाणा, ओमे य अमंथरं गच्छेज्जा ।
रमणिज्जं वा खेत्तं, तिकालजोगं तु गच्छस्स ॥ ६९ ॥

तपसा विकृष्टेन शोषितस्तपःशोषितः, स्वजनाश्च प्रचुरदानाः, तत आप्यायननिमित्तं सपरिवारो ज्ञातविधिं व्रजेत । अथवा-अवमं दुर्भिक्षं ज्ञातं, तत्रासंस्तरन्तो ज्ञातविधिं गच्छेयुः, रमणीयं वा तत् क्षेत्रं गच्छस्य त्रिकालयोग्यं, ततो गच्छन्ति ॥६९॥

त्रिकालयोग्यतामेव भावयति-

वासे निच्चिक्खिल्लं, सीयल्लं दव्व पउरमेव गिम्हासु ।
सिसिरे य घणनिवाया, वसही तह घट्ठ मट्ठा य ॥ ७० ॥

सर्वे वर्षाकाले ' निच्चिक्खिल्लं ' कर्दमाभावः, ग्रीष्मेषु ग्रीष्मकाले प्रचुरं शीतलं द्रव लभ्यते, शिशिरे शीतकाले घनमतिशयेन निर्वाता वसतिर्लभ्यते घृष्टा मृष्टा च ॥७०॥

छिण्णमंडवयं च तयं, सपक्खपरपक्खविरहितोमाणं ।
पत्तेय उग्गह त्ति य, काऊणं तत्थ गच्छेज्जा ॥७१॥

यदन्यत् क्षेत्रं गन्तव्यं तच्छिन्नमण्डपकं,यत्र तु स्वजनाः सन्ति तत्स्वपक्षपरपक्षकृतावमानविरहितम् । गाथायामपमानशब्दस्याऽन्यथानिपातः प्राकृतत्वात् । प्रत्येकं ग्लानबालाऽऽदीनामवग्रह उपष्टम्भश्च जायते,इति कृत्वा इति हेतोः,तत्र ज्ञातविधौ गच्छेत् ।

उद्देसं काहामि य, धम्मं गाहिस्स पव्वयाविस्सं ।
सड्ढाणि व वुग्गाहे, निच्छुभपादी ततो गच्छे ॥ ७२ ॥

धर्मोपदेशं वा स्वजनानां करिष्यामि । यदि वा-धर्मं श्रावकधर्मं ग्राहयिष्यामि । अथवा-ते निष्क्रमितुकामा वर्तन्ते, ततः प्रव्राजयिष्यामि, दानश्रद्धानि वा तानि कुलानि भिक्षुकाऽऽदिव्युद्ग्राहयेत्, तत एतैः कारणैर्ज्ञातविधिं गच्छेत् । व्य० ६ उ० ।

णायव्व-ज्ञातव्य-त्रि० । स्वरूपतोऽवबोधव्ये, आव० ५ अ० । उत्त० । दश० ।

णायसंग-ज्ञातसङ्ग-पुं० । पुत्राऽऽदिसंबन्धे, सूत्र० १ श्रु० ३ अ० २ उ० । " विवद्धो नायसंगेहिं । " ज्ञातसङ्गैर्विबद्धो मातापितृपुत्रकलत्राऽऽदिमोहितः । सूत्र० १ श्रु० ३ अ० २ उ० ।

णायसंड-ज्ञातखण्ड-न० । कुसुमपुराद् बहिरुद्याने, आ० म० १ अ० २ खण्ड० । यत्र वीरस्वामी प्रव्रजितः । आचा० २ श्रु० ३ चू० १ अ० । आ० म० । कल्प० ।

णायागय-न्यायागत-त्रि० । द्विजक्षत्रियविट्शूद्राणां स्ववृत्त्यनुष्ठानलक्षणेन लोकव्यवहारेण न्यायेन प्राप्ते, आव० ६ अ० ।

णायाधम्मकहा-ज्ञाताधर्मकथा-स्त्री० । ज्ञातानि उदाहरणानि तत्प्रधाना धर्मकथा ज्ञाताधर्मकथा । अथवा-ज्ञातानि ज्ञाताध्ययनानि प्रथमश्रुतस्कन्धे, धर्मकथा द्वितीये यासु ग्रन्थपद्धतिषु ता ज्ञाताधर्मकथाः, पृषोदराऽऽदित्वात् पूर्वपदस्य दीर्घान्तता । षष्ठेऽङ्गे. (ज्ञा०)

तत्र जम्बूस्वामी सुधर्माणं गणधरमेवं पप्रच्छ-

तते णं से अज्जजंबूणामे जायसड्ढे जायसंसए जायकोऊहल्ले संजायसड्ढे संजायसंसए संजायकोऊहल्ले उप्पन्नसड्ढे उप्पन्नसंसए उप्पन्नकोऊहल्ले समुप्पन्नसड्ढे समुप्पन्नसंसए समुप्पन्नकोऊहल्ले उट्ठाए उट्ठेति,उट्ठाए उट्ठित्ता जेणामेव अज्जसुहम्मे

थेरे तेणामेव उवागच्छइ, उवागच्छइत्ता अज्जसुहम्मे थेरे तिक्खुत्तो आयाहिणं पयाहिणं करेइ, करेइत्ता वंदति, नमंसति, वंदित्ता नमंसित्ता अज्जसुहम्मस्स थेरस्स नच्चासन्ने नाइदूरे सुस्सूसमाणे णमंसमाणे अभिमुहे पंजलिउडे विणएणं पज्जुवासमाणे एवं वयासी–जति णं भंते ! समणेणं भगवया महावीरेणं आइगरेणं तित्थगरेणं सयंसंबुद्धेणं पुरिसुत्तमेणं पुरिससीहेणं पुरिसपुंडरीएणं पुरिसवरगंधहत्थीणं लोगुत्तमाणं लोगनाहेणं लोगहिएणं लोगपईवेणं लोगपज्जोयगरेणं अभयदएणं चक्खुदएणं मग्गदएणं सरणदएणं बोहिदएणं धम्मदएणं धम्मदेसएणं धम्मवरचाउरंतचक्कवट्टीणं अप्पडिहयवरनाणदंसणधरेणं जिणेणं जावएणं बुद्धेणं बोधएणं मुत्तेणं मोयगेणं तिन्नेणं तारएणं सिवमयलमरूवमणंतमक्खयमव्वाबाहमपुणरावत्तयं सासयं ठाणमुवगएणं पंचमस्स अंगस्स विवाहपन्नत्तीए अयमट्ठे पन्नत्ते । छट्ठस्स णं अंगस्स भंते ! णायाधम्मकहाणं के अट्ठे पण्णत्ते ? । जंबू ! ति अज्जसुहम्मे थेरे अज्जजंबूनामं अणगारं एवं वयासी–एवं खलु जंबू ! समणेणं भगवया महावीरेणं० जाव संपत्तेणं छट्ठस्स अंगस्स दो सुयक्खंधा पन्नत्ता । तं जहा–नायाणि य, धम्मकहाओ य । ज्ञा० १ श्रु० १ अ० ।

('णायज्झयण' शब्देऽत्रैव भागे २००३ पृष्ठे 'धम्मकहा' शब्दे च श्रुतस्कन्धाऽध्ययनानि द्रष्टव्यानि)

विषयः-

से किं तं नायाधम्मकहाओ ?। नायाधम्मकहासु णं नायाणं नगराइं उज्जाणाइं चेइयाइं वणसंडाइं समोसरणाइं रायाणो अम्मापियरो धम्मायरिया धम्मकहाओ इहलोइया परलोइया इड्ढिविसेसा जोगपरिच्चाया पव्वज्जाओ परियाया सुयपरिग्गहा तवोवहाणाइं संलेहणाओ भत्तपच्चक्खाणाइं पाओवगमणाइं देवलोगगमणाइं सुकुले पच्चायाइओ पुण बोहिलाभो अंतकिरियाओ आघविज्जंति दस धम्मकहाणं वग्गा । तत्थ णं एगमेगाए धम्मकहाए पंच पंच अक्खाइयासयाइं, एगमेगाए अक्खाइयाए पंच पंच उवक्खाइयासयाइं, एगमेगाए उवक्खाइयाए पंच पंच अक्खाइयासयाइं, एवमेव सपुव्वावरेणं अद्धट्ठाओ कहाणगकोडीओ हवंति त्ति मक्खायं। नायाधम्मकहाणं परित्ता वायणा संखिज्जा अणुओगदारा संखेज्जा वेढा संखेज्जा सिलोगा संखेज्जाओ निज्जुत्तीओ संखेज्जाओ संगहणीओ संखेज्जाओ पडिवत्तीओ सेणं अंगट्ठयाए छट्ठे अंगे दो सुयक्खंधा एगूणवीसं अज्झयणा एगूणवीसं उद्देसणकाला एगूणवीसं समुद्देसणकाला संखेज्जा पयसहस्सा पयग्गेणं संखिज्जा अक्खरा अणंता गमा अणंता पज्जवा परित्ता तसा अणंता थावरा सासयकडनिबद्धनिकाइया जिणपन्नत्ता भावा आघविज्जंति पन्नविज्जंति परूविज्जंति दंसिज्जंति निदंसिज्जंति उवदंसिज्जंति, से एवं आया एवं नाया एवं विन्नाया एवं चरणकरणपरूवणा आघविज्जइ, सेत्तं नायाधम्मकहाओ ॥ ६ ॥

"से किं तं" इत्यादि । अथ कास्ता ज्ञाताधर्मकथाः ?, ज्ञातानि उदाहरणानि, तत्प्रधानाः धर्मकथा ज्ञाताधर्मकथाः । अथवाज्ञातानि ज्ञाताध्ययनानि प्रथमश्रुतस्कन्धे धर्मकथा, द्वितीये यासु ग्रन्थपद्धतिषु ता ज्ञाताधर्मकथाः, पृषोदरादित्वात् पूर्वपदस्य दीर्घान्तता । सूरिराह–ज्ञाताधर्मकथासु, णमितिवाक्यालङ्कारे, ज्ञातानामुदाहरणभूतानां, नगराऽऽदीन्याख्यायन्ते । तथा-(दस धम्मकहाणं वग्गा इत्यादि) इह हि प्रथमश्रुतस्कन्धे एकोनविंशतिर्ज्ञाताध्ययनानि । ज्ञातानि उदाहरणानि तत्प्रधानान्यध्ययनानि । द्वितीयश्रुतस्कन्धे दश धर्मकथाः धर्मस्याहिंसाऽऽदिलक्षणस्य प्रतिपादिकाः कथाः धर्मकथाः । अथवा-धर्मादनपेता धर्म्याः, धर्म्याश्च ताः कथाश्च धर्मकथाः । तत्र प्रथमे श्रुतस्कन्धे यान्येकोनविंशतिर्ज्ञाताध्ययनानि, तेषु आदिमानि दश ज्ञातानि ज्ञातान्येव, न तेष्वाख्यायिकाऽऽदिसंभवः । शेषाणि पुनः नव ज्ञातानि, तेष्वेकैकस्मिन् चत्वारिंशानि पञ्च पञ्चाऽऽख्यायिकाशतानि भवन्ति । एकैकस्यां चाख्यायिकायां पञ्च पञ्चोपाख्यायिकाशतानि । एकैकस्यां चोपाख्यायिकायां पञ्च पञ्चाऽऽख्यायिकाशतानि । सर्वसंख्यया एकविंशं कोटिशतं लक्षाः पञ्चाशत् । तत एवं स्थिते प्रस्तुतसूत्रस्याऽवतारः । आह च टीकाकृत्-" इगवीसं कोडिसयं, लक्खा पन्नास चेव होइ बोधव्वा । एवं कए समाणे, अद्दिगयसुत्तस्स पत्थाओ ॥ १ ॥ " द्वितीयश्रुतस्कन्धे दश कथानां वर्गाः, वर्गः समूहो, दशधर्मकथासमुदाय इत्यर्थः । अत एव च दशाध्ययनानि एकस्यां धर्मकथायां, कथासमूहरूपायामध्ययनप्रमाणायां पञ्च पञ्चाऽऽख्यायिकाशतान्येकैकस्यां चाऽऽख्यायिकायां पञ्चपञ्चोपाख्यायिकाशतानि, एकैकस्यां चोपाख्यायिकायां पञ्चपञ्चाऽऽख्यायिकाशतानि, सर्वसंख्यया पञ्चविंशं कोटिशतम् । इह नव ज्ञाताध्ययनसंबद्धाऽऽख्यायिकाऽऽदिसदृशा या आख्यायिकाऽऽदयः पञ्चाशल्लक्षाधिकैकविंशतिकोटिशतप्रमाणाः, ता अस्मात् पञ्चविंशतिकोटिप्रमाणाऽऽद्योः शोध्यन्ते, ततः शेषा अपुनरुक्ता अर्द्धचतुर्थाः कथानककोट्यो भवन्ति । तथा चाऽऽह-एवमेवोक्तप्रकारेणैव गुणने शोधने च कृते सपूर्वापरेण श्रुतस्कन्धाः पूर्वापरश्रुतस्कन्धकथाः समुदिता अपुनरुक्ताः (अद्धट्ठाओ त्ति) अर्द्धचतुर्थाः कथानककोट्यो भवन्तीत्याख्यातं तीर्थकरगणधरैः । आह च टीकाकृत्-

" पणवीसं कोडिसयं, एत्थ य समलक्खणा इमा जम्हा ।
नव नायासंबद्धा, अक्खाइयमाइया तेणं ॥ १ ॥
ता सोहिज्जंति फुडं, इमाओ रासीओ वेगलाणं तु ।
पुणरुत्तवज्जियाणं, पमाणमेयं विणिद्दिट्ठं ॥ २ ॥ "

तथा "नायाधम्मकहाणं परित्ता वायणा" इत्यादि सर्वं प्राग्वद् भावनीयम्, यावन्निगमनं, नवरं संख्येयानि पदसहस्राणि, पदाग्रेण पदपरिमाणेन च तानि पञ्च लक्षाः षट्सप्ततिसहस्राः, पदमपि चात्रौपसर्गिकं,नैपातिकं,नामिकमाख्यातिकं,मिश्रं चेति

वेदितव्यम्। तथा चाऽऽह चूर्णिकृत्-"पयगेणं ति-उवसग्गपयं, निवायपयं, नामियपयं, अक्खायपदं, मिस्सपयं च । एए पए अहिकिच्च पंचलक्खा छावत्तरिसहस्सा पयगेणं भवंति ।" अथवा-इह पदं सूत्रालापकरूपमुपगृह्यते, ततः तथारूपपदापेक्षया संख्येयानि पदसहस्राणि भवन्ति, न लक्षाः । आह च चूर्णिकृत्-"अथवा सुत्तालावगपयगेणं संखेज्जाइं पयसहस्साइं भवंति त्ति ।" न० । स० । आव० । अनु० । सूत्र० । ग्रन्थान्ते टीकाकारोऽभयदेवसूरिः-समासा चेयं ज्ञाताधर्मकथाप्रदेशटीकेति ।

"नमः श्रीवर्द्धमानाय, श्रीपार्श्वप्रभवे नमः ।
नमः श्रीमत्सरस्वत्यै, सहायेभ्यो नमो नमः ॥ १ ॥
इह हि गमनिकार्थं, यन्मयाऽभ्यूहयोक्तम्,
किमपि समयहीनं, तच्छिोध्यं सुधीभिः ।
न हि भवति विधेया सर्वथाऽस्मिन्नुपेक्षा,
हयितजिनमतानां तायिनां चाङ्गिवर्गे ॥ २ ॥
परेषां दुर्लक्षा भवति हि विवक्षा फुटमिदं,
विशेषाभूतानामतुलवचनज्ञानमहसाम् ।
निराम्नायाधीभिः पुनरतितरां मादृशजनैः,
ततः शास्त्रार्थे मे वचनमनघं दुर्लभमिह ॥ ३ ॥
ततः सिद्धान्ततस्त्वद्दैः, स्वयमूह्यः स यत्नतः ।
न पुनरस्मदाख्यात, एव ग्राह्यो नियोगतः ॥ ४ ॥
तथाऽपि माऽस्तु मे पापं, सङ्गमन्युपजीवनात् ।
वृद्धन्यायानुसारित्वात्, हितार्थं च प्रवृत्तितः ॥ ५ ॥
तथाहि किमपि स्फुटीकृतमिह स्फुटेऽप्यर्थतः,
सकृद्वचनिदेशतो विविधवाचनातोऽपि यत् ।
समाधेयपदसंश्रयाद्विगुणयुक्तकेऽपि यत्,
परा ऽऽभहितहेतवेऽनभिनिवेशिना चेतसा ॥ ६ ॥
यो जैनागमितं प्रमाणमनघं व्युत्पादयामासिवान्,
प्रस्थानैर्विविधैर्निरस्य निखिलं बौद्धाऽऽदिसंबन्धि तत् ।
नानावृत्तिकथाः कथापथमतिक्रान्तं च चक्रे तपो,
निःसंबन्धविहारमप्रतिहतं शास्त्रानुसारात्तथा ॥ ७ ॥
तस्याऽऽचार्यजिनेश्वरस्य मदवद्वृद्धादिप्रतिस्पर्धिनः,
तद्बन्धोरपि बुद्धिसागर इति ख्यातस्य सूरेर्भुवि ।
शिष्योबन्धनिबद्धबन्धुरवचःशब्दाऽऽदिसल्लक्षणः,
श्रीसंविग्नविहारिणः श्रुतनिधेश्चारित्रचूडामणेः ॥ ८ ॥
शिष्येणाभयदेवा ऽऽख्य-सूरिणा विवृतिः कृता ।
ज्ञाताधर्मकथाङ्गस्य, श्रुतभक्त्या समासतः ॥ ९ ॥"

ज्ञा० २ श्रु० १० वर्ग १ अ० ।

णारइय-नारयिक-पुं० । नैरयिके नरकपृथिवीषूत्पन्ने, प्रा० २ पाद ।

णारग-नारक-पुं० । नरकेषु भवा नारकाः । नरको वा विद्यते येषां ते नारकाः । नरकपृथिवीषूपपन्नेषु जीवेषु, नं० । आ०म० । प्रव० । कर्म० । आव० ।

नारकाऽस्तित्वसिद्धिः-

किं मण्णे नेरइया, अत्थि नऽत्थि त्ति संसओ तुज्झं ।
वेयपयाण य अत्थं, न जाणसी तेसिमो अत्थो ।१८८७।

किं नारकाः सन्ति, न वा ? इति त्वं मन्यसे । अयं च तव संशयो विरुद्धवेदपदश्रवणनिबन्धनः । तथाहि-" नारको वै एष जायते यः शूद्रान्नमश्नाति " इत्यादि । एष ब्राह्मणो नारको जायते यः शूद्रान्नमश्नातीत्यर्थः; इत्यादीनि वाक्यानि नारकसत्ताप्रतिपादकानि, "न ह वै प्रेत्य नारकाः सन्ति" इत्यादीनि तु नारकाभावप्रतिपादकानि, तेषां वेदपदानामर्थं, चशब्दाद्युक्तिहृदयं च त्वं न जानासि, यत एतेषामयं वक्ष्यमाणोऽर्थ इति ॥ १८८७ ॥

अत्र भाष्यम-

तं मन्नसि पच्चक्खा, देवा चंदाऽऽइओ तहऽन्ने वि ।
विज्जामंतोवायण-फलाइसिद्धीए गम्मंति ।१८८८।
जे पुण सुइमेत्तफला, नेरइय त्ति किह ते गहेयव्वा ।
सक्खमणुमाणओ वा-ऽणुवलंभा निन्नजाईया ?।१८८९।

हे आयुष्मन्नकम्पित ! त्वमेवं मन्यसे-देवास्तावच्चन्द्राऽऽदयः प्रत्यक्षप्रमाणसिद्धा एव, अन्ये त्वप्रत्यक्षा अपि विद्यामन्त्रोपयाचितकाऽऽदिफलसिद्ध्याऽनुमानतो गम्यन्ते; ये पुनः "नारकाः" इत्यभिधानमात्ररूपा श्रुतिरेव फलं येषां, न पुनः तदभिधायकशब्दव्यतिरिक्तोऽर्थः, ते साक्षात्, अनुमानतो वाऽनुपलभ्यमानत्वेन तिर्यङ्नरामरेभ्यः सर्वथा भिन्नजातीयाः कथं 'सन्ति' इति ग्रहीतव्याः, शशविषाणवद् ?, इति ॥१८८८॥ १८८९॥

अथ भगवानुत्तरमाह--

मह पच्चक्खत्तणओ, जीवाई य व्व णारए गिण्ह ।
किं जं सप्पच्चक्खं, तं पच्चक्खं नवरि इक्कं ? ॥१८९०॥
जं कासइ पच्चक्खं, पच्चक्खं तं पि गेप्पए लोए ।
जह सीहाऽऽइदारिसणं, सिद्धं न य सव्वपच्चक्खं ।१८९१।

हे आयुष्मन् ! अकम्पित ! साक्षादनुपलभ्यमानत्वादित्यसिद्धो हेतुः, यतोऽहं केवलप्रत्यक्षेण साक्षादेव पश्यामि नारकान्, ततो मत्प्रत्यक्षत्वात् 'सन्ति' इति गृहाण प्रतिपद्यस्व नारकान्, जीवाजीवाऽऽदिपदार्थवत् । अथैवं मन्यसे-ममाप्रत्यक्षत्वात्कथमेतान् गृण्हामि ? । ननु क्षुरनिप्रायोऽयम्, यतः किं यत् स्वस्याऽऽत्मनः प्रत्यक्षं तदेवैकं नवरं प्रत्यक्षमुच्यते ?, इति काक्वा नेयम् । ननु यद्यपि कस्यचित् प्रत्यक्षितपुरुषस्यान्यस्य प्रत्यक्षं, तदपि प्रत्यक्षमिति गृह्यते व्यवह्रियते लोके। तथाहि-सिंहसरजहंसाऽऽदिदर्शनं सिद्धं प्रसिद्धं लोके, न च सिंहाऽऽदयः सर्वजनप्रत्यक्षाः, देशकालग्रामनगरसरित्समुद्राऽऽदयश्च न सर्वेऽपि भवतः प्रत्यक्षाः, अथ चान्यस्यापि प्रत्यक्षास्ते प्रत्यक्षतयो व्यवह्रियमाणा दृश्यन्ते, अतो मत्प्रत्यक्षा नारकाः किमिति प्रत्यक्षतया न व्यवह्रियन्ते ?, इति ॥१८९०॥१८९१॥

अथाभिप्रायान्तरमाशङ्क्य परिहरन्नाह-

अहवा जमिंदियाणं, पच्चक्खं किं तदेव पच्चक्खं ?।
उवयारमेत्तओ तं, पच्चक्खमणिंदियं तत्थ ॥१८९२॥

अथवा-किं यदिन्द्रियाणां प्रत्यक्षं तदेव प्रत्यक्षमिष्यते भवता, मदीयं तु प्रत्यक्षं नाभ्युपगम्यते, अतीन्द्रियत्वात् ?। ननु महानयं विपर्यासः, यस्मादुपचारमात्रत एव तदिन्द्रियप्रत्यक्षं प्रत्यक्षतया व्यवह्रियते-यथाऽनुमाने बाह्यधूमाऽऽदिलिङ्गद्वारेण बाह्यमग्न्यादि वस्तु ज्ञायते, नैवमत्र, तत उपचारात् प्रत्यक्षमिव प्रत्यक्षमुच्यते । परमार्थतस्तु-इदमपि परोक्षमेव, यतोऽक्षो जीवः, स चानुमानवदत्रापि वस्तु साक्षाद् न पश्यति, किं

स्विन्द्रियद्वारेणैव, ततोऽतीन्द्रियमेव तथ्यं प्रत्यक्षमवगन्तव्यम्, तत्र जीवेन साक्षादेव वस्तुन उपलम्भादिति ॥ १८९२ ॥ (विशे०)

अनुमानं त्विदम्-

पावफलस्स पगिट्ठ-स्स भोइणो कम्मओऽवसेस व्व ।
संति धुवं तेऽभिमया, नेरइया अह मई होज्जा ।१८९९।
अच्चत्थदुक्खिया जे, तिरियनरा नारग त्ति तेऽनिमया ।
तं न जओ सुरसोक्ख-प्पगरिससरिसं न ते दुक्खं।१९००।

प्रकृष्टस्य पापफलस्य भोगिनः केचित् ध्रुवं सन्ति(कर्मओ त्ति) कर्मफलत्वात् तस्य इत्यर्थः। अवशेषवदिति-यथा जघन्यमध्यमपापफलभोगिनः शेषाः तिर्यङ्नरा विद्यन्त इत्यर्थः, इति दृष्टान्तः। (तेऽभिमया नेरइय त्ति) ये प्रकृष्टपापफलभोगिनः, ते नारका इति अभिमताः। अथ परस्यैवंजुना मतिर्भवेत्, अत्यर्थं दुःखिता ये तिर्यङ्मनुष्याः, त एव प्रकृष्टपापफलभोगित्वान्नारकव्यपदेशभाजो भविष्यन्ति,किमदृष्टनारककल्पनया ?। इति नैतत्र। यतोऽतिदुःखितानामपि तिर्यङ्मनुष्याणां यद् दुःखं तदमरसौख्यप्रकर्षसदृशप्रकर्षेण्न भवति। इदमुक्तं भवति-येषामुत्कृष्टपापफलभोगः, तेषां संभवद्भिः सर्वैरपि प्रकारैर्दुःखेन भवितव्यम्, न चैवमतिदुःखितानामपि तिर्यगादीनां दृश्यते, आलोकतरुच्छायाशीतपवनसरित्सरःकूपजलाऽऽदिसुखस्यातिदुःखितेष्वपि तेषु दर्शनात्-छेदनभेदनपाचनदहनदम्भनवज्रकण्टकशिलाऽऽस्फालनाऽऽदिभिश्च नरकप्रसिद्धैः प्रकारैः दुःखस्यादर्शनाद्, इत्यादिप्रागुक्तानुसारेण स्वयमेवाभ्यूह्य वाच्यमिति। आगमार्थश्चायमवगन्तव्य इति।

" सततमनुबद्धमुक्तं, दुःखं नरकेषु तीव्रपरिणामम्।
तिर्यक्ष्वुष्णभयक्षु-त्तृषादिदुःखं सुखं चाल्पम ॥ १ ॥
सुखदुःखे मनुजानां, मनःशरीराऽऽश्रये बहुविकल्पे।
सुखमेव तु देवाना-मल्पं दुःखं तु मनसि भवम् ॥ २ ॥ "
इति ॥ १८९९ ॥ १९०० ॥

प्रागनेकशोऽभिहितानुमानतोऽपि नारकान् साधयितुमाह-

सच्चं चेदमकंपिय !, मह वयणाओऽवसेसवयणं व ।
सव्वण्णुत्तणओ वा, अणुमयसव्वण्णुवयणं व ॥१९०१॥

नारकाः सन्ति इति सत्यमकम्पित ! इदं, मद्वचनत्वात्, यथाऽवशेषं स्वसंशयाऽऽदिविषयं मद्वचनम्। अथवा-सर्वज्ञवचनत्वाद् इत्येव हेतुर्वक्तव्यः, त्वदनुमतमनुजैमित्यादिसर्वज्ञवचनवदिति ॥ १९०१ ॥

अपि च-

जयरागदोसमोहा-जावाओ सच्चमणइवाई च *।
सव्वं चिय मे वयणं, जाणयमज्झत्थवयणं व ॥१९०२॥

प्रागनेकधा व्याख्यातेयम् ॥ १९०२ ॥

अकम्पिताऽभिप्रायमाशङ्क्याऽऽत्मनि सर्वज्ञताऽऽदिसाधनाय भगवानाह-

किह सव्वण्णु त्ति मई, पच्चक्खं सव्वसंसयच्छेया ।
जयरोगदोसरहिओ, तल्लिंगाभावओ सोम्म !॥१९०३॥

इयमपि व्याख्याताऽर्था। यद्यपि "न ह वै प्रेत्य नारकाः सन्ति" इत्यादौ नारकाभावः शङ्क्यते भवता, तदप्ययुक्तम्, यतोऽयमत्राभिप्रायो मन्तव्यः-न खलु प्रेत्य परलोके मेर्वादिवच्छाश्वताः केचनाप्यवस्थिता नारकाः सन्ति, किन्तु य इहोत्कृष्टं पापमर्जयति, स इतो गत्वा प्रेत्य नारको भवति, अतः केनापि तत्पापं न विधेयं, येन प्रेत्य नारकैर्भूयते। विशे०। आ० म०। सूत्रकृदङ्गप्रथमश्रुतस्कन्धचतुर्थाध्ययनवृत्तौ-"छिन्नपादद्रुजस्कन्धाः, छिन्नकर्णोष्ठनासिकाः। छिन्नतालुशिरोमेढ्राः,भिन्नाक्षिहृदयोदराः "॥१॥ इत्युक्तम्, तत्र नारकाणां नपुंसकत्वे छिन्नभेद्रा इति कथमिति प्रश्ने, उत्तरम्-नारकाणां नपुंसकत्वेऽपि भेद्रच्छेदो न विरुध्यते, " महिलासहावो सरयन्नजेओ, मेहि मइतं मत्तआ य वाणी।" इत्यादिलक्षणस्य पुरुषमाह्याऽऽश्रयोक्तत्वादिति। २५६ प्र०। सेन० ३ उल्लो०। ('णरग' शब्देऽत्रैव भागे ११९७ पृष्ठे सर्वा वक्तव्यतोक्ता)

णारगदुक्खोववण्णण-नारकदुःखोपवर्णन-न०। नारकाणामुपलक्षणत्वाद् तिर्यगादीनां चाऽऽशर्मोपवर्णने, (ध०)

तथा चोक्तं धर्मबिन्दौ—

" नारकदुःखोपवर्णनमिति। " नरके भवा नारकाः, तेषामुपलक्षणत्वात् तिर्यगादीनां च दुःखान्यशर्माणि, तेषामुपवर्णनं विधेयम्। यथा-

" तीक्ष्णैरसिभिर्तीक्ष्णैः, कुन्तैर्विषमैः परश्वधैश्चक्रैः।
परशुत्रिशूलतोमर-मुद्गरवासीभुसण्डीभिः ॥ १ ॥
संभिन्नतालुशिरस-श्छिन्नभृजाश्छिन्नकर्णनासौष्ठाः।
भिन्नहृदयोदराम्राः, भिन्नाक्षिपुटाः सुदुःखार्ताः ॥२॥
निपतन्त स्तप्यन्तो, विचेष्टमाना महीतले दीनाः।
नेक्षन्ते भ्रातरं, नैरयिकाः कर्मपटलान्धाः ॥ ३ ॥
क्षुत्तृड्हिमोष्णभयार्दितानां,
पराभियोगव्यसनातुराणाम्,
अहो तिरश्चामपि दुःखितानां,
सुखानुषङ्गः किल वार्तयेतत् ॥ ४ ॥
मानुष्यकेऽपि दारि-द्र्यदौर्भाग्यशोकरोगार्त्यानि।
जातिकुलाचयवाऽऽदि-न्यूनत्वं चाश्नुते प्राणी ॥ ५ ॥
देवेषु च्यवनवियोगदुःखितेषु,
क्रोधेर्ष्यामदमदनातिरागितेषु।
आर्याः ! नस्तदिह विचार्य संगिरन्तां,
यत्सौख्यं किमपि निबेधनीयमस्ति ॥ ६ ॥" इति। ध० १ अधि०।

णारय-नारद-पुं०। समुद्रविजयनृपपालिते सौर्यपुरे यदुवंशसः सुतस्य सोमभित्रायां जातस्य यदुदत्तस्य सोमयशोनामभार्यायां जाते पुत्रे, आ० क०।

तत्कथा—

"आसीद् यदा सौर्यपुरे, समुद्रविजयो नृपः।
तदा यदुयशास्तत्र, तापसस्तस्य वल्लभा ॥ १ ॥
सोमभित्रा सुतो यज्ञ-दत्तः सोमयशाः स्नुषा।
तत्पुत्रो नारदस्तेषा-मुज्झवृष्या च भोजनम ॥ २ ॥
तदप्येकान्तरं ते चा-ऽशोकाधो नारदं सुतम्।
मुक्त्वोच्छ्वन्ति दिवा यान्ती, जृम्भकास्तेन वर्त्मना ॥ ३ ॥
ते दृष्ट्वाऽवधिना ज्ञात्वा, स्वमिकायकृतं ततः।
स्तम्भन्ति स्म तरोश्छायां, मा भूत्तापोऽस्य दुःसहः ॥ ४ ॥
प्रत्यावृत्तैर्ग्रहातस्तैः, शिक्षितो व्यक्तचेतनः।
पूर्वप्रेम्णा ददे तस्य, विद्याः प्रज्ञप्तिकाऽऽदिकाः ॥ ५ ॥

* १८७८ गाथाऽपीयमेव गता।

याति व्योम्ना ततः कृत्वा, पादयोर्मणिपादुके ।
सुवर्णकुपिकाकाणि-रन्यदा द्वारकां गतः" ॥ ६ ॥

आ० क० । औ० । ब्राह्मणपरिव्राजकनेदे, ती० २७ कल्प० । गन्धर्वानीकाधिपतौ गन्धर्वे, स्था० ७ ठा० । ब्रह्मा० । नारदाः सर्वेऽपि मोक्षं एव यान्ति, स्वर्गं वेति प्रश्ने, उत्तरम्-नारदा मोक्षं, स्वर्गं च यान्तीति आवश्यकचूर्णौ । किञ्च-ते पूर्वं मिथ्यात्विनः पश्चात्सम्यक्त्विनस्तत्रैवोक्ता इति । अन्यच्च-भीम १ महाभीम २ रुद्र ३ महारुद्र ४ काल ५ महाकाल ६ चतुर्मुख ७ नवमुख ८ उन्मुखा ९ एवंविधानि तेषां नामान्यपि सन्तीति । ७० प्र० । सेन० ३ उल्ला० । नव नारदाः कस्मिन् वासुदेवके संजाता ?, इति साकरं प्रसाद्यमिति प्रश्ने, उत्तरम्-नव नारदा वासुदेवसमानकालीनाः संजाय्यन्ते, तत्तच्चरित्राऽऽदिषु तदारके तेषां गमनाऽऽगमनाऽऽदिश्रवणादिति ॥ १०६ प्र० । सेन० ३ उल्ला० ।

णारयपुत्त–नारदपुत्र–पुं० । स्वनामके चोरजिनाभगारे, भ० ५ श० ७ उ० । (स च 'णिग्गंथीपुत्त' शब्दे पुद्गलविषयं प्रश्नं करिष्यति)

णाराचंद–नाराचन्द्र–पुं० । हर्षपुरीयगच्छोद्भवे मलधारिदेवप्रभसूरिशिष्ये, अनेन मुरारिकविकृतानर्घराघवटीका, न्यायकन्दलीटीका, ज्योतिषसारः, प्राकृतदीपिका च इत्यादयो बहवो ग्रन्था रचिताः । जै० इ० ।

णाराय–नाराच–न० । यन्त्रास्थ्नोरुभयतो मर्कटबन्ध एव केवलं, न पुनः कीलिका ऋषभसंकृपट्टश्च तादृशे तृतीये संहनने, औ० १ प्रति० । तं० । रा० । स्था० । चं० प्र० । कर्म० । सर्वद्रोहवाणे, पुं० । जं० ३ वक्ष० । तं० । स० । स्था० ।

णारायण–नारायण–पुं० । दशरथपुत्रे रामभ्रातरि लक्ष्मणनामके अवसर्पिण्यां भरतक्षेत्रजे अष्टमे वासुदेवे, प्रव० २१० द्वार । ति० । स० । आव० । वासुदेवमात्रे, सूत्र० ९ अ० ।

णारिकंतप्पवायदह–नारिकान्ताप्रपातह्रद–पुं० । यत्र नारिकान्ता महानदी निपतति, यच्च नारिकान्तादेवीद्वीपेन सनाथेन भूषितमध्यभागः तस्मिन् रम्यकवर्षीये प्रपातह्रदे, स्था० २ ठा० ३ उ० ।

णारिकंता–नारिकान्ता–स्त्री० । रम्यकवर्षे अपरार्णवगायां महानद्याम्, जं० ६ वक्ष० । स० । रा० । (नीलवद्वर्षधरपर्वते केशरिद्रहादुत्तरतो निर्गत्य पश्चिमसमुद्गा नारिकान्ता इति 'णीलवंत' शब्दे व्याख्यास्यते)

णारिकंताकूड–नारिकान्ताकूट–न० । जम्बूद्वीपे मन्दरस्य उत्तरेण नीलवतः पर्वतस्य षष्ठे कूटे, स्था० ९ ठा० ।

णारी–नारी–स्त्री० । नरस्त्रियाम्, ह० ४ उ० ।

निरुक्तिः-

पुरिसे कामरागपसिबद्धे णाणाविहेहिं उवायसयसहस्सेहिं बहुबंधणमाणयंति पुरिसाणं नो अन्नो एरिसो अरी अत्थि जं नारीओ । तं जहा–नारीसमा न नराणं अरीओ नारीओ ॥

(पुरिसे इत्यादि यावत् नारीओ त्ति) 'नारीओ त्ति' अयमर्थः । कथम् ?, ना-आ-अरि इति । नानाविधैरुपायशतसहस्रैः कामरागप्रतिबद्धे पुरुषे बधबन्धनं प्रति, आ इति-'आणयंति' प्रापयन्ति (अरीति) पुरुषाणां च नान्यसदृशोऽरिः शत्रुः, अस्तीति नार्यः । (तं जहा त्ति) तत्पूर्वोक्तं, यथेति दर्शयति-नारीसमा न नराणाम् अरयः सन्तीति नार्यः । तं०। "जहा नई वेयरणी, दुत्तरा इह संमता । एवं लोगंसि नारीओ, दुत्तरा अ नईमया ॥ १६ ॥" सूत्र० १ श्रु० ३ अ० ४ उ० । उत्त० । (स्त्रीपरिज्ञा 'इत्थी' शब्दे द्वितीयभागे ६२ पृष्ठे दर्शिता)

णारोट–देशी–विल्ले, दे० ना० ४ वर्ग ।

णाल–नाल–न० । कन्दोपरिवर्त्यवयवे, जं० ४ वक्ष० । उत्पलाऽऽदिपुष्पाऽऽधारे, आचा० २ श्रु० १ चू० १ अ० ८ उ० ।

णालंदइज्ज–नालन्दीय–न० । नालन्दायां भवं नालन्दीयं नालन्दासमीपोद्यानकथनेन वा निर्वृत्तं नालन्दीयम् । सूत्रकृताङ्गस्य द्वितीयश्रुतस्कन्धस्य षष्ठेऽध्ययने, सूत्र० ।

साम्प्रतं प्रत्ययार्थं दर्शयितुकाम आह-

णालंदाएँ समीवे, मणोरहे नाम–इंदभूइणा ।
अज्झयणं उदगस्स उ, एयं नालंदइज्जं तु ॥ ४ ॥

(नालंदाए इत्यादि) नालन्दायाः समीपे मनोरथाऽऽख्ये उद्याने इन्द्रभूतिना गणधरेणोदकाऽऽख्यनिर्ग्रन्थपृष्ठेन, तुशब्दस्यैवकारार्थत्वात् तस्यैव, भाषितमिदमध्ययनम् । नालन्दायां जातं नालन्दीयम्, नालन्दासमीपोद्यानकथनेन वा निर्वृत्तं नालन्दीयम् । यथा चेदमध्ययनं नालन्दायां संवृत्तं तथा-" पासावच्चिज्जो पु-च्छियाइयो अज्जगोयमं ! उदगो । सावगपुच्छाधम्मं, सोउं कहियम्मि उवसंता ॥ ५ ॥" सूत्र० २ श्रु० ७ अ० । स्था० । प्रश्न० ।

णालंदा–नालंदा–स्त्री० । प्रतिषेधवाचिनो नकारस्य, तदर्थस्यैवालंशब्दस्य, 'डु दाञ्' दाने इत्येतस्य धातोर्मीलनेन नालं ददातीति नालंदा । इदमुक्तं भवति-प्रतिषेधप्रतिषेधेन धात्वर्थस्यैव प्राकृतस्य गमनात् सदाऽर्थिभ्यो यथाभिलषितं ददातीति नालंदा । राजगृहनगरबाहिरिकायाम्, (सूत्र०)

तदिह प्रतिषेधवाचिनाऽलंशब्देनाऽधिकार इत्येतद् दर्शयितुमाह-

पडिसेहणणगारस्स, इत्थीसद्देण चेव अन्नसदो ।
रायगिहे नयरम्मी, नालंदा होइ बाहिरिया ॥ ३ ॥

(पडिसेहणेत्यादि) सत्यप्यलंशब्दस्यार्थत्रये नकारस्य सान्निध्यात् प्रतिषेधविधानादप्येवेह गृह्यते, ततश्च निरुक्तविधानादयमर्थः-नालं ददातीति नालंदा बाहिरिका, या स्त्रियोद्देशकत्वेन च नालशब्दस्य स्त्रीलिङ्गता, सा च सदैवैहिकाऽऽमुष्मिकसुखहेतुत्वेन सुखप्रदा राजगृहनगरबाहिरिका धनकनकसमृद्धत्वेन सत्साध्वाश्रयत्वेन च सर्वकामप्रदेति । सूत्र० २ श्रु० ७ अ० । आ० म० । सा च बाहिरिका राजगृहनगरादुत्तरस्यां दिशि, तत्र श्रीवीरस्वामी चतुर्दशवर्षाराज्ञान् कृतवान् । कल्प० ६ क्षण ।

"नालन्दाऽलंकृते यत्र, वर्षाराज्ञामतुर्दश ।
अवतस्थे प्रभुर्वीरः, तत्कथं नास्तु पावनम् ? ॥ २५ ॥

यस्यां नैकानि तीर्थानि, नालंदा नाम नश्रियम् ।
भव्यानां जनिताऽऽनन्दा, नालन्दा नः पुनातु सा" ॥ २६ ॥
ती० ११ कल्प ।

णालवच्छ-नालवत्स-पुं० । पितृभ्रातृपुत्रप्रभृतिके वल्लीवर्गे, (वृ०) श्रुतोपसंपदि द्वाविंशतिनालवत्सानि लभ्यन्ते, यथा-माता, पिता, भ्राता, भगिनी, पुत्रो, दुहिता, मातुर्माता, मातुःपिता, मातुर्भ्राता, मातुर्भगिनी । एवं पितुर्माता, पिता, भ्राता, भगिनी, भ्रातृपुत्रो, दुहिता, भगिन्याः पुत्रपुत्रिकाः, पुत्रस्य पुत्रः, पुत्रपुत्रिकाः, दुहितुः पुत्रः, पुत्रिका चेति । बृ० ४ उ० । (श्रुतोपसंपद्ग्रहणे ' उवसंपया ' शब्दे द्वितीयभागे १०१४ पृष्ठे, तथा-' उग्गह ' शब्दे ७२० पृष्ठे च विस्तरो गतः)

णालंपिअ-देशी-आक्रन्दिते, दे० ना० ४ वर्ग ।

णालंबो-देशी-कुन्तले, दे० ना० ४ वर्ग ।

णालिएर-नारि [ङि] केर-पुं० । नल-इण्-नालिः, केन वायुना जलेन वा इलति चलति कः । रलयोरैक्यम् । वृक्षभेदे, वाच० । अयं चैकजीविको वृक्षभेदः । प्रज्ञा० १ पद । आर्द्रे नारिकेरे शुष्के वा कियन्तो जीवाः सन्ति ?, तथा नारिकेरबीजके संख्याताः, असंख्याताः, अनन्ता वा कियन्तो जीवाः सन्ति ?, बतस्तत्र केचिदनन्तजीवाऽऽत्मकं प्रतिपादयन्तीति प्रश्ने, उत्तरम्-बीजकसंबद्धे नारिकेरे एक एव जीव इति । २६५ प्र० । सेन० २ उल्ला० । नारिकेर्यप्यत्र । स्त्री० । आचा० १ श्रु० १ अ० ५ उ० । जं० । प्रज्ञा० । तत्फले, नं० ।

णालिएरदीव-नारिकेलद्वीप-पुं० । नारिकेलवृक्षप्रधाने द्वीपे, यद्वास्तव्या मनुष्या असम्भाषाऽऽदिव्यव्यवहारं नावबुध्यन्ते । भा० म० १ अ० २ खण्ड ।

णालिएरमत्थय-नालिकेरमस्तक-न० । नालिकेरवृक्षस्तबके, आचा० २ श्रु० १ चू० १ अ० ७ उ० ।

णालिया-नालिका-स्त्री० । घटिकायाम्, नि० चू० १ उ० । तं० । ताम्राऽऽदिमयघटिकायाम्, अनु० । आव० । प्रज्ञा० ।
तथा हि कालो मीयते—
णालीऍ पमाणया, जह तीऍ गतो उ नज्जए कालो ।
तह पुव्वधरा जावं, जाणंति व सुज्झपज्जेण ॥
नालिका नाम घटिका, तस्याः पूर्वं प्ररूपणा कर्तव्या; यथा पादलिप्तकृतविचरणे कालज्ञाने । ज्यो० १ उ० ।
संप्रति मानं घटिकाऽऽदीनां वक्तव्यम्-तत्र प्रथमतो नालिकायाः संस्थानाऽऽदि विवक्षुराह-
तीसे पुण संठाणं, छिद्दं उदगं च वोच्छामि ।
तस्याः पुनर्नालिकायाः संस्थानमाकृतिं, तथा छिद्रं विवरमधोभागे येनोदकं नालिकामध्ये प्रविशति, उदकं च यादृग्भूतं छिद्रेण प्रविशति, नालिकां मुक्त्वा यथोक्तनालिका कालविशेषपरिमाणहेतुर्भवति तादृक् सूत्रं वक्ष्यामि ।
तत्र प्रतिज्ञातमेव निर्वाहयितुकामः प्रथमतः संस्थानप्ररूपणां, छिद्रप्रमाणवक्तव्यतोपक्षेपं च कुर्वन्नाह-
दालिमपुप्फाऽऽगारा, लोहमयी नालिगा उ कायव्वा ।
तीसे तलम्मि छिद्दं, छिद्दपमाणं कहिऍ मे सुणह ॥
नालिका घटिका लोहमयी कर्तव्या, सा च संस्थानमधिकृत्य दाडिमपुष्पाऽऽकारा कर्तव्या, दाडिमपुष्पस्येव आकारः संस्थानं यस्याः सा तथा । तस्यादृशैवंभूताया नालिकायाः मूले अधस्तात् छिद्रं कर्तव्यं, तस्य च छिद्रस्य प्रमाणं पूर्वसूरिपरम्परागतं कथयतो मे मम शृणुत ।
छिद्रप्रमाणमेव कथयति-
छन्नउयमूअवालेहिं, तिवस्सजायाऍ गयकुमारीए ।
जज्जुकयपिंडिएहिं उ, कायव्वं नालियाछिद्दं ॥
त्रिवर्षजातायाः त्रीणि वर्षाणि जातायास्त्रिवर्षजाता, "कालो द्विगौ च मेयैः"॥३।१।५७॥ इति तत्पुरुषसमासः । तस्या गजकुमार्याः षण्णवतिसंख्यैर्मूत्रबालैः पुच्छमूलवालैः ऋजूकृतपिण्डितैरूर्ध्वमृजूकृत्यैकत्र मीलितैर्नालिकाया अधस्तात् तत्तले छिद्रं कर्तव्यम् । किमुक्तं भवति?-ऊर्ध्वमृजूकृता गजकुमार्याः षण्णवतिसंख्या पुच्छमूलबाला एकत्र पिण्डिकृता यावत्प्रमाणे छिद्रे परिपूर्णे याति, न चापान्तरालं सूक्ष्ममपि भवति, तावत्प्रमाणं नालिकाया अधो मूले छिद्रं कर्तव्यम् ।
प्रकारान्तरेण छिद्रप्रमाणमाह-
अहवा छवस्सजाया-ऍ गयकुमारीऍ पुच्छवालेहिं ।
तिहिँ तिहिँ गुणेहिँ तेहिँ उ, कायव्वं नालियाछिद्दं ॥
अथवेति प्रकारान्तरद्योतने, गजकुमार्या द्विवर्षजातायाः, तैः प्रागुक्तसंख्याकैः षण्णवत्येत्यर्थः । पुच्छबालैः प्रत्येकं द्वाभ्यां द्वाभ्यां गुणैः गुण्यन्ते स्म, गुणा गुणिता इत्यर्थः; तैः । किमुक्तं भवति ?-षण्णवतिसंख्यैर्द्विगुणितैर्नालिकाया अधो मूले छिद्रं कर्तव्यमिति भावार्थः प्राग्वदवगन्तव्यः ।
प्रकारान्तरेण छिद्रप्रमाणमेवाऽऽह-
अहवा सुवण्णमासे-हिँ चउहिँ चउरंगुला कया सूई ।
नालियतलम्मि तीए, कायव्वं नालियाछिद्दं ॥
अथवेति पूर्ववत् । सुवर्णमाषैर्वक्ष्यमाणप्रमाणैश्चतुर्भिश्चतुःसंख्यैः चतुरङ्गुलप्रमाणा या कृता सूची, तया सूच्या नालिकाया अधस्तात् तले नालिकाछिद्रं नालिकारूपकालविशेषप्रमितये कर्तव्यम् । किमुक्तं भवति?-यावत्प्रमाणे छिद्रे यथोक्तप्रमाणा सूचिः प्रविशति, न च मनागप्यपान्तरालं भवति, तावत्प्रमाणं छिद्रं कर्तव्यमिति । ज्यो० २ पाहु० । आचा० । यष्टिविशेषे, चतुर्हस्तप्रमाणयष्टिविशेषरूपायां नालिकायाम्, अनु० । भ० । आत्मप्रमाणाच्चतुरङ्गुलाधिकायां यष्टौ, ओघ० । द्यूतविशेषे, ज्ञ० ६ श० ७ उ० । कलम्बुकावृत्ते, सू० प्र० ४ पाहु० ।

णालियाखेड-नालिकाखेट-न० । द्यूतविशेषे, मा द्यूविद्दयाद्विपरितपाशकनिपतनमिति नालिकया यत्र पाशकः पात्यते । जं० २ वक्ष० । ज्ञा० । ओघ० ।

णाली-नाडी-स्त्री० । " डो लः " । ८ । १ । २०२ । इति डस्य लः । प्रा० १ पाद । देहस्थायां शिरायाम्, गुच्छस्य काण्डे, नाले, व्रणभेदे, गण्डदूर्वायाम्, षष्टिपलाऽऽत्मके काले, तृणभेदे, वंशनालयां च । वाच० ।

नाली-स्त्री० । कालमापिकायां घटिकायाम्, जी० ३ प्रति० २ उ० । नि० चू० । औ० । वल्लीभेदे, प्रज्ञा० १ पद ।

णावा-नौ-स्त्री० । " नाव्यावः " । ८ । १ । १६४ । इत्यौत आवाऽऽदेशः । प्रा० १ पाद । जलतरणसाधने तरणौ, वाच० । आचा० । बृ० । (नावारोहणप्रकाराः ' णईसंतार ' शब्देऽत्रैव

भागे १७४६ पृष्ठे दर्शिताः । विस्तरस्तु ' पमिसेवणा ' शब्दे वक्ष्यते)

णावापूरग–नौपूरक–पुं० । चुलुके, " तिहिं नावापूरएहिं आयामइ " ' नावापूरओ नाम पसती । ' बृ० ।

णावासंतारिम–नौसंतार्य–न० । यत्र नावा तरति तावत्युदके, आचा० १ श्रु० १ चू० ३ अ० १ उ० ।

णाविय–नापित–पुं० । नखशोधके वारिके, व्य० ६ उ० । कल्प० ।

णाविक–पुं० । नावा जीवति नाविकः । अनु० । नौवाहके, भ० ५ श० ४ उ० । कैवर्तके, ज्ञा० १ श्रु० ६ अ० । " णंदो नाम नाविओ नंगाए लोगं उत्तारेइ । " आ० म० १ अ० २ खण्ड । " णाविओ विव नावं ति । " नाविक इव नावं द्रोणीम् । भ० ५ श० ४ उ० । आ० म० ।

णास–नाश–पुं० । अभावाऽऽपादने, आ० म० १ अ० १ खण्ड । उत्त० । ध्वंसे, विशे० । अभावे, (द्रव्या०)

अथ नाशस्वरूपमाह–

नाशोऽपि द्विविधो ज्ञेयो, रूपान्तरविगोचरः ।
अर्थान्तरगतिश्चैव, द्वितीयः परिकीर्तितः ॥ २५ ॥

नाशोऽपि द्विविधो ज्ञातव्यः, एकस्तत्र रूपान्तरविगोचरः रूपान्तरपरिणामः, द्वितीयस्तु अर्थान्तरगतिरर्थान्तरभावगमनं चेति । ज्ञापार्थमस्वयम्–

" परिणामो ह्यर्थान्तर–गमनं न च सर्वथा व्यवस्थानम् ।
न च सर्वथा विनाशः, परिणामस्तद्विदामिष्टः ॥ १ ॥
सत्पर्यायेण विनाशः, प्रादुर्भावोऽसता च पर्यवतः ।
द्रव्याणां परिणामः, प्रोक्तः खलु पर्यवनयस्य ॥ २ ॥ "

एतद्वचनं संमतिप्रकरणवृत्तिविषये–कथञ्चित् सद् रूपान्तरं प्राप्नोति, सर्वथा न विनश्यति यत्तद् द्रव्यार्थिकनयस्य परिणामत्वं कथितम् । पूर्वसत्पर्यायेण विनश्यति, उत्तरासत्पर्यायेणोत्पद्यते यत्तत्पर्यायार्थिकनयस्य परिणामत्वं कथितम् । एतदभिप्रायं विचारयतामेको रूपान्तरपरिणामविनाशः, एकश्चार्थान्तरगमनविनाशः, इत्थं विनाशस्यापि भेदद्वयं संपन्नम् ॥२५॥

पुनराह–

तत्रान्धतमसस्तेजो–रूपान्तरस्य संक्रमः ।
अणोरप्यन्तरापातो, ह्यर्थान्तरगमश्च सः ॥ २६ ॥

(तत्र इति) तत्र नाशे अन्धतमसोऽन्धकारस्य तेजोरूपान्तरस्य संक्रम उद्योतताऽवस्थितद्रव्यस्य रूपान्तरपरिणामरूपनाशो ज्ञेयः, च पुनरणोः परमाणोरप्यन्तरापातोऽणोरप्यन्तरसंक्रमो द्विप्रदेशाऽऽदिभावमनुभवन पूर्वपरमाणुत्वं विगतमित्यनेनाऽर्थान्तरगमः स्कन्धपर्याय उत्पन्नः, तेन कृत्वार्थान्तरगतिरूपनाशस्य स्थितिर्भवति । निष्कर्षस्त्वयम्–यद्यप्यन्धकारस्तथापि तदाकारपरमाणुप्रचयो निरन्धतमः क्षमास्ति, तत्रैव पुनरुद्योतपरमाणुप्रचयसंचारनिरस्तान्धकारपरमाणुत्वतत्स्थानतत्तत्परमाणुसंक्रमितेजःपरमाणुत्वलक्षणो रूपान्तरसंक्रमो जातः, यथा वा-अवयवानां परमाणूनामवयविस्कन्धत्वसंक्रमेणार्थान्तरत्वोद्भावनयाऽर्थान्तरगतिलक्षणो नाशः समुत्पन्न इति ॥२६॥

पुनराह–

रूपान्तराणुसंबन्धात्, स्कन्धत्वं यद्यणोरपि ।
तत्संयोगविभागाभ्या–मपि भेदप्रबन्धता ॥ २७ ॥

यद्यपि अणोः रूपान्तरपरमाणुसंबन्धात् स्कन्धत्वमणुसंबद्धस्कन्धताऽस्ति, तदिति तथाऽपि संयोगविभागाभ्यां कृत्वा द्रव्योत्पादनाशाभ्यां द्विप्रकाराभ्यामेव भेदप्रबन्धता द्रव्यविनाशद्वैविध्यमेव ज्ञेयम्, एतदुपलक्षणं ज्ञेयम्, यतो द्रव्योत्पादविभागेन यथा पर्यायोत्पादविभागः, तथा द्रव्यनाशविभागेनैव पर्यायनाशविभागो भवेदिति, ततः समुदायविभागः, तथाऽर्थान्तरगमनं चेति द्वयमेव व्यवह्रियते । तत्र प्रथमः–तन्तुपर्यन्तपटनाशः, द्वितीयः घटोत्पत्तिपर्यन्तमृत्पिण्डाऽऽदिनाशश्च ज्ञेयः । उक्तं च सम्मतितृतीयकाण्डे " विगमस्स वि एस विही, समुदयजणियम्मि सो व दुवियप्पो । समुदयविभागमित्तं, अत्थंतरभावगमणं च ॥ ३४ ॥ " इत्यादिगाथया ज्ञेयम् ॥२७॥ द्रव्या० ए अध्या० ।

न्यास–पुं० । निक्षेपे, विशे० । उत्त० । अनु० । स्था० । नामस्थापनाद्रव्यभावैर्वस्तुनो निक्षेपो न्यासः । स० ।

णासण–नाशन–न० । पलायने, गणादपक्रमणे, राजाऽऽदिभयेनान्तर्धाने, ध० २ अधि० । नृपदावाऽऽदिभयेन चैत्यस्य गर्भगृहाऽऽदिष्वन्तर्धाने, प्रव० ३८ द्वार । कर्मप्रकृतेः स्थितुकसंक्रमणे प्रकृत्यन्तरगमने, आचा० १ श्रु० ९ अ० १ उ० ।

न्यासन–न० । व्यवस्थापने, अनु० ।

णासणिण्हव–न्यासनिह्नव–पुं० । न्यस्यते रक्षणायान्यस्मै समर्प्यते इति न्यासः सुवर्णाऽऽदिः, तस्य निह्नवोऽपलापः । न्यासापहारे, ध० २ अधि० ।

णासव–नाशि–धा० । नश्–णिच् । अभावाऽऽपादने, "नशेर्विष्ठङ-नासव-हारष-विप्पगाल-पलावाः " । ८ । ४ । ३१ । इति एयन्तस्य नशेर्णासवाऽऽदेशः । ' णासवइ ' नाशयति । प्रा० ४ पाद ।

णासा–नासा–स्त्री० । घोणायाम्, तं० । पञ्चा० । प्रज्ञा० । औ० । आ० म० । गन्धग्राहकेन्द्रिये, वाच० ।

णासाणिस्सासवोऊ–नासानिश्वासवायु–पुं० । अतिलघुत्वाद् नासानिश्वासवातवाहो, प्र० ६ श० ३३ उ० । जी० ।

णासाभेय–नासाभेद–पुं० । नासिकाविवरकरणे, प्रश्न० १ आश्र० द्वार ।

णासावहार–न्यासापहार–पुं० । न्यासस्य धनधान्याऽऽदिस्थापनिकाया अपहरणमपलापो न्यासापहारः । ध० २ अधि० । स्थूलमृषावादविरतेः प्रथमेऽतिचारे, स्वामिमित्रविश्वस्तदेवगुरुबालद्रोहन्यासापहाराऽऽदीनि तु तत्तत्स्थाप्राप्याणि महापातकानि सर्वथा परिहृत्य वर्जनीयानि । ध० २ अधि० । उत्त० ।

णासि [ण्]–नाशिन्–त्रि० । विनश्यनशीले, स्वा० ।

णासिक्कपुर–नासिक्यपुर–न० । पञ्चवटीविभूषितोत्तरकूलाया गोदावर्या दक्षिणकूलस्थे स्वनामख्याते नगरे, आ० क० । आ० म० । आ० चू० । तं० ।

" चंदप्पहजिणचंदं, चंदिअ जिअमत्तवसयं पणिस्सामि ।
नासिक्कलिमलनिवहं, नासिक्कपुरस्स कप्पमहं ॥ १ ॥"

"नासिक्कपुरातित्थस्स उप्पत्ति चंभणाइपरतित्थिया एवं वएणंतिपुव्विं किर नारयरिसिणा एगया भयवं कमलाऽऽसणो पुट्ठो-

पुव्वभूमिट्ठाणं कत्थ त्ति ? कमलाऽऽसणेणं भणियं जत्थेव इमं मऊरं पउमं पविट्ठइ, तं चेव पविसं भूमिट्ठाणं ति । अण्णया चिरंचिणा तं पउमं मुक्कं, पच्छिमं मरहट्ठजणवयभूमीए अरुणगंगाहिं नईहिं भूसियाए णाणाविहवण्णरुक्खसमणहराए देवभूमिप्पभाए । तत्थ पउमाऽऽसणेण पउमपुरं ति नगरं निवेसियं । तत्थ कयजुगे जणो आदरो पिउमहेण ,मिलिआ सुरा सव्वे, असुरा य हक्कारिज्जंता वि नाऽऽगया सुरभएणं । ते भणंति-जइ नयवं चंदप्पहसामी अंतरे आगच्छइ, ता अम्हे वीसत्था आगच्छामो, तओ चमक्कियचित्तो चउत्थएणं जत्थ सामी विहरइ तत्थ गंतूण पणमिऊण जोडियकरसंपुडो विण्णवेइ—नयवं ! तत्थाऽऽगच्छह, जहा मज्झ कज्जं सिज्झइ । सामिणा नाणेणं—अह पडिरूवेणावि तं सिज्झिस्सइ । तओ वंभणा चंदकंतिमणिमयं बिंबं सोहम्मिंदाओ घित्तूण तत्थाऽऽणीयं । आगया दाणवा,पारद्धो जणमहो अ । तत्थ कारिओ चंदप्पहविहारो पवावइणा, सुरदुवारे य सिरिसुंदरो ठाविओ नयरक्खणपुरे । एवं ताव पढमजुगे पउमपुरं ति तित्थं पसिद्धं । तेयाजुगे य दासरही रामो सीयालक्खणसंजुओ पिउआणाए वणवासं गओ,गोदमगंगातीरे पंचवडीआसमे चिरं वणाहारेणं ठिओ । इत्थंतरे रावणभइणी सुप्पणहा तत्थ पत्ता, रामं दट्ठूण अज्झोववण्णा एत्थंतरे रामेण पडिसिद्धा लक्खणमुवट्ठिया । तेण तीए नासिया छिण्णा, तत्थ नासिक्कपुरं जायं । कमेण सीया रावणेण हरिआ, राहवेण जुद्धे वाघाइओ रावणो, विभीसणस्स दिण्णं लंकारज्जं, तओ नयरिं पइट्ठलंतेण रामेण चंदप्पहसामिणो जन्मेणं उद्धरिअं, पसगमुद्धारो । एवं णासिक्कपुरे संजाए कालंतरे पुणरवि नाउं आगओ मिहिलाहिवो तत्थ जणयराओ, तेण य तत्थ दस जणा कारिया, जणट्ठाणं ति तक्खयरं कयं ।" (ती०) (नासिक्यपुरस्य जनस्थानमिति नामान्तरं यथा ज्ञातमिति देवज्ञानीकृते ' जणट्ठाण ' शब्देऽस्मिन्नेव भागे १३७७ पृष्ठे द्रष्टव्यम् । तथा 'कुंतीविहार' इत्यपि नाम, तद्धक्तव्यता ' कुंतीविहार ' शब्दे तृतीयभागे ५७० पृष्ठे गता) इओ अ दीवायणरिसिणा बारवईए दहिए जयक्खीणप्पभाए जायवंसे बलकुमारो नाम आयवखत्तिओ आसि । तस्स गब्भवई जच्चा, सा बारवईए मज्झमाणीए बहुजत्तिपुव्वं दीवायणरिसिणा मुक्कजाविता चंदप्पहसामिणं चेव सरणमागया, पुत्ते समए पुत्तवंती पुत्तं तत्थेव पसूआ,दढप्पहारि त्ति से नामं कयं,सो अ अइकंतबालभावो संपत्तजुव्वणो जाओ महारहो, इक्कगेणावि सुमरुलक्खेणं समं जुद्धं काउं समत्थो । अण्णया तत्थ चोरेहिं गावीओ हरियाओ । ताओ सव्वाओ वि इक्केण दढप्पहारिणा चोरे निग्गिण्हिऊण वालियाओ । तओ तं अइपयंडपरिक्कमं पासिऊण बंभणाइनरलोएणं तस्स तलारयं (?) दिण्णं, निग्गहिया तेण चोरवरमाइणो, जाओ सो कमेण महाराया । तत्थेव नयरे जायवंसस्स भग्गं मूलं उव्वरियं ति सव्वहुमाणं चंदप्पहसामिणो तेण भवणमुद्धरिअं । एवं तइअजुगे उद्धारो कारावितो । पुव्विं किर कल्लाणकडए नयरे परमद्धी नाम राया रज्जं करेइ । तेण जिणभत्तेण तत्थ पासाए चंदकंतमणिबिंबं सोऊण चिंतिअं-अहमेयं बिंबं नियनयरे आणिऊण देवयावसरे पूइस्सामि त्ति । तओ कहंचि तक्खइयरं नाउं नासिक्कनयरलोएण तंबमयसंपुडमज्झे तं बिंबं निक्खिविय लट्ठवरि लेवो दिन्नो, जाया लेवमई पडिमा । तओ रत्ता जिणमंदिरमागएण तं बिंबं व दिट्ठं । पुच्छिओ लोओ । तेण अद्दिट्ठ विसत्ते रत्ता चिंतियं-कहं एयं चेव लेवपडिमं भिंदित्ता मूलबिंबं कड्ढेमि त्ति, तओ परिंदेण तस्स उद्धारं काउं चउवीसं गामा देवस्स दिण्णा । जं तेसु दक्खिणमुण्णज्जइ,·····(?) । तओ किंचिप च कालंतरगए आसन्नवत्तिनंबयदेवाहिट्ठियमहादुग्गबंभगिरिट्ठिओ वाइओ नाम महल्लयखत्तियजाई वरडो आसि, तेण पासाओ पाडिओ, तं सोऊण पल्लीवालवंसावयंससलाहुईसरपुत्तमाणिक्कपुत्तेणं कुच्छिसरोवररायहंसेण साहकुमारसीहेण परमसावएण पासाओ पुण णवो कारिओ । सफलीकयं नायागयं नियवित्तं, उत्तारिओ अप्पा भवसमुद्दाओ । एवमणेगुद्धारं नासिक्कमहातित्थं भज्ज वि जत्तामहूसवकरणेण आराहिंति साउहिसाओ आगंतूण संघा, पभावंति कलिकालदप्पनिग्गहणं भयवओ सासणं ति " ।

" नासिक्कपुरस्स इमं, कप्पं पोराणपरमतित्थस्स ।
वावन्नपदंताणं, संपज्जइ वंछिया रिद्धी ॥१॥
किंचि परसमइयमुहा, ससमयपारविउमुहाउ तह सोउं ।
सिरिजिणपहसूरीहिं, लिहिओ नासिक्कपुरकप्पो ॥ २ ॥"
इतिश्रीनासिक्यपुरकल्पः । ती० २७ कल्प ।

णासियासिंघाणग–नासिकासिङ्घाणक–न० । घ्राणजमलविशेषे, तं० ।

णाह–नाथ–पुं० । " अथधधभां० " । ८ । १ । १८७ । इति थस्य हः । प्रा० १ पाद । प्रभौ, स० १ समo । योगक्षेमकृति,नं० । झा० । स्वामिनि, स्या० ।

णाहड–नाथ–पुं० । मरुदेशे सत्यपुर (साचोर) नगरे श्रीवीरजिनबिम्बकारके गृहपतौ, ती० १६ कल्प ।

णाहल–लाहल–न० । " लाहलालाङ्गलालूले वाऽऽदेर्णः " । ८ । १ २५६ । इत्यादेर्लस्य वा णः । प्रा०१ पाद । म्लेच्छविशेषे, प्रा० द्वि० १ पाद ।

णाहवाइय–नाथवादिक–पुं० । पार्श्वस्थे, पार्श्वस्था नाथवादिकमपकुलचारिणः । सूत्र० १ श्रु० ३ अ० ४ उ० ।

णाहसुतेय–नाथसुतेजस्–पुं० । अतीतायामुत्सर्पिण्यां भारतातीतजिने, प्रव० ७ द्वार ।

णाहि–नहि–अव्य० । " किलाऽथवा-दिवा-सहनहेः किराहवइ दिवे सहु नाहिं " । ८ । ४ । ४१६ । इति अपभ्रंशे नहेर्नाहिमादेशः । निश्चिते निषेधे, "पेक्खु गहीरिम सायरहो पइ वि कणिय नाहिं ओहट्टइ । " प्रा० ४ पाद ।

णाहिय–नास्तिक–पुं० । लोकायतिके, स्या० । " धर्मैतेऽनास्तिको लोको, बार्हस्पत्यः प्रकीर्तितः । धर्मोऽत्रे नास्तिका ज्ञेयाः, सर्वेऽपि परतीर्थिकाः ॥ १२५ ॥" नयो० ।

णाहियवाइ (ण्)–नास्तिकवादिन्–पुं० । भारतवर्षके जीवनास्तित्वप्रतिपादके, दश० १ अ० ।

णाहियवाय–नास्तिकवाद–पुं० । चार्वाकमतान्युपगमे, (ग०) धूर्ताऽऽख्यानाऽऽदिवदसंबद्धजल्पने, ग० २ अधि० ।

णाहिविच्छअ–देशी–अघने, दे० ना० ४ वर्ग ।

णि–नि–अव्य० । नह–निः। नितरामर्थे, विपा० १ श्रु० ९ अ० ।

उत्त० । नैयत्ये, भगु० । निश्चये, आधिक्ये च । उत्त० १ अ० । सूत्र० । आ० चू० । निवेशे, भृशार्थे, नित्यार्थे, संशये, कौशले, क्षेपे, उपरमे, सामीप्ये, आदरे, दाने, मोक्षे, अन्तर्भावे, बन्धने, राशौ, अंशभागे, विन्यासे च । वाच० ।

णिअकल–देशी–वर्तुले, दे० ना० ४ वर्ग ३६ गाथा ।

णिअच्छ–दृश्–धा० । प्रेक्षणे, " दृशो निअच्छ-पेच्छावयच्छा-वयज्झ-घज्ज-सव्ववेक्खौअक्खावक्खावअक्खपुलोएपुलए–निआवआसपासाः " । ८ । ४ । १८१ । इति सूत्रेण 'निअच्छ' आदेशः । 'निअच्छइ' । पश्यति । प्रा० ४ पाद । दे० ना० ।

णिअमी–देशी–दम्भे, दे० ना० ४ वर्ग २६ गाथा ।

णिअत्थ–परिहिते, दे० ना० ४ वर्ग ३३ गाथा ।

णिअय–देशी–रते, शयनीये, शाश्वते, घटे च । दे० ना० ४ वर्ग ४८ गाथा ।

णिअरिअ–देशी–निकरेण स्थिते, दे० ना० ४ वर्ग ३८ गाथा ।

णिअर्ल–देशी–नूपरे, दे० ना० ४ वर्ग २८ गाथा ।

णिअंधण–देशी–वस्त्रे, दे० ना० ४ वर्ग ३८ गाथा ।

णिअंसण–देशी–वस्त्रे, दे० ना० ४ वर्ग ३८ गाथा ।

णिआणिआ–देशी–कुतूणोद्धरणे, दे० ना० ४ वर्ग ३५ गाथा ।

णिआर–देशी–रिपुगृहे, दे० ना० ४ वर्ग २७ गाथा ।

णिइय–नित्य–त्रि० । सदकारणवति, नं० । अप्रच्युतानुत्पन्नस्थिरैकस्वभावे, सूत्र० १ श्रु० १ अ० ४ उ० । परिणामानित्यतायामपि द्रव्यार्थतया नियते, सूत्र० २ श्रु० ४ अ० ।

णिइयपिंड–नित्यपिण्ड–पुं० । नित्रन्त्रितपिण्डे, पं० चू० ।

णिउअ–निभृत–त्रि० । " उदृत्वादौ " । ८ । १ । १३१ । इति ऋत उत्वम् । नितरां भृते, प्रा० १ पाद ।

णिउक्क–देशी–तूष्णीके, दे० ना० ४ वर्ग २७ गाथा ।

णिउक्कण–देशी–वायसे, मूके च । दे० ना० ४ वर्ग ५१ गाथा ।

णिउज्जम–निरुद्यम–पुं० । कार्यमात्रोद्यमरहिते, " णिउज्जमा वणगा समणगा पव्वयंति । " सूत्र० २ श्रु० २ अ० ।

णिउज्जमाण—नियोजयत्—त्रि० । व्यापारयति, सूत्र० १ श्रु० १० अ० ।

णिउड्ड–मस्ज–धा० । मज्जने, "मस्जेराउड्ड णिउड्डुवुड्ड-खुप्पाः", । ८ । ४ । १०१ । इति मज्जतेः णिउड्डाऽऽदेशः । णिउड्डइ । मज्जति । प्रा० ४ पाद ।

णिउण–निगुण–त्रि० । नियतगुणे, निश्चितगुणे च । विशे० । सुनिश्चिते, पञ्चा० ४ विव० ।

निपुण–त्रि० । कुशले, इति वृद्धोक्तिः । सूक्ष्मदर्शिनि, उपा० ७ अ० । भौ० । आव० । आचा० । सूक्ष्मे, औ० । सूक्ष्मज्ञाने, स्था० ६ ठा० । उपायाऽऽरम्भके, अनु० । नि० चू० । " सुणं तावं सूरपण्ण–त्तिवण्णणं वित्थरेण जं णिउणं । " निपुणं निपुणमतिगम्यम् । ज्यो० २ पाहु० । रा० । ज्ञा० । " सव्वं च णगरं किच्चा, तवसंवरमग्गलं । खंतिं णिउणपागारं, तिगुत्तं दुप्पधंसयं ॥ २० ॥ " निपुणमिव निपुणम् । उत्त० ७ अ० । उपायविचक्षणे, कल्प० ३ क्षण । संयमानुष्ठानकुशले, दश० २ चू० । संगतोपचारकुशले, औ० । "न वा लभेज्जा निउणं सहायं, गुणाहियं वा गुणओ समं वा ॥ ५ ॥ " उत्त० ३२ अ० । अवगततत्त्वे, आचा० १ श्रु० २ अ० २ उ० । "निउणगंधव्वगीयरइया ।" निपुणगन्धर्वगीतरतिकाः–निपुणाः परमकौशलोपेता ये गन्धर्वजातीया देवास्तेषां गीतं तत्र रतिर्येषां ते तथा । जी० ३ प्रति० ४ उ० । " निउणगंधव्वसमयकुसलेहिं । " निपुणं यथा भवति एवं गन्धर्वसमये नाट्यसमये ये कुशलाः । जी० ३ प्रति० ४ उ० ।

णिउणकुसल–निपुणकुशल–पुं० । निपुणानां मध्ये अतिशयेन कुशले, रा० ।

णिउणणयजुय–निपुणनययुत–त्रि० । सूक्ष्मनीतिसंगते, पञ्चा० २ विव० ।

णिउणदिट्ठि–निपुणदृष्टि–स्त्री० । सूक्ष्मबुद्धौ, पं० व० ४ द्वार । पञ्चा० ।

णिउणधी–निपुणधी–त्रि० । ६ बहु० । कुशलबुद्धौ, षो० ६ विव० ।

णिउणबुद्धि–निपुणबुद्धि–स्त्री० । सूक्ष्मधियाम्, पञ्चा० ११ विव० ।

णिउणसिप्पोवगय–निपुणशिल्पोपगत–त्रि० । निपुणं यथा भवति एवं शिल्पं क्रियाकौशलमुपगतः । रा० । निपुणानि सूक्ष्माणि यानि शिल्पानि अङ्गमर्दनाऽऽदीनि तान्युपगतोऽधिगतः । ज्ञा० १ श्रु० १ अ० । औ० । सूक्ष्मशिल्पसमन्विते, उत्त० ५ अ० ।

णिउणिय–नैपुणिक–पुं० । निपुणं सूक्ष्मं ज्ञानं, तेन चरन्तीति नैपुणिकाः । निपुणा एव वा नैपुणिकाः । निपुणज्ञानेषु निपुणेषु, (स्था०)

नव णिउणिया वत्थू पण्णत्ता । तं जहा–"संखाणे निमित्ते काइए, पोराणे पारिहत्थिए । परिपंमिए य वाई य भूयकम्मे तिगिच्छिए " ॥ १ ॥

निपुणं सूक्ष्मं ज्ञानं, तेन चरन्तीति नैपुणिकाः, निपुणा एव वा नैपुणिकाः । (वत्थु त्ति) आचार्याऽऽदिपुरुषवस्तूनि, पुरुषा इत्यर्थः । (संखाणे सिलोगो) सङ्ख्यानं गणितं, तद्योगात् पुरुषोऽपि तथा, सङ्ख्याने वा विषये निपुण इति । एवमन्यत्रापि, नवरं निमित्तं चूडामणिप्रभृतिः, कायिकं शारीरिकम्, इहापिङ्गलाऽऽदिप्राणतत्त्वमित्यर्थः । पुराणो वृद्धः, स च चिरजीवित्वाद् दृष्टबहुविधव्यतिकरत्वाच्चैपुणिक इति, पुराणं वा शास्त्रविशेषः, तज्ज्ञो निपुणप्रायो भवति ॥ ४ ॥ (पारिहत्थिए त्ति) प्रकृत्यैव दत्तः सर्वप्रयोजनानामकालहीनतया कर्तेति च ॥ ५ ॥ तथा परः प्रकृष्टः पण्डितः प्रपण्डितः, वरपण्डितो बहुशास्त्रज्ञः, परो वा मित्राऽऽदिः पण्डितो यस्य स तथा, सोऽपि निपुणसंसर्गान्निपुणो भवति, वैद्यकृष्णकवदिति । वादी वादलब्धिसंपन्नो, वः परेण न जीयते, मन्त्रवादी धातुवादी वेति । ज्वराऽऽदिरक्षानिमित्तं भूतिदानं भूतिकर्म, तत्र निपुणः । तथा चिकित्सने निपुणः, अथवाऽनुप्रवादाभिधानस्य नवमपूर्वस्य नैपुणिकानि वस्तूनि अध्ययनविशेषा एवेति । स्था० ६ ठा० ।

णिउणोचिय–निपुणोचित–त्रि० । निपुणेन शिल्पिना परिकर्मिते, भ० ६ श० ३३ उ० ।

णिउत–नियुत–त्रि० । नितरां संगते, ज्ञा० १ श्रु० १८ अ० ।

णिउत्त–नियुक्त–त्रि० । व्यापारिते,पञ्चा० ८ विव० । आ० म० । उत्त० । उचितव्यापारे,नियोगेनार्पिते,अनु० ।

णिउर-निकुर पुं० । वृक्षविशेषे, ज्ञा० १ श्रु० ८ अ० ।

णूपुर–न० । " इदेतौ नूपुरे वा " ॥ ८ । १ । १२३ ॥ इति ऊत इत्वम् । स्त्रीणां पादाऽऽभरणे, प्रा० १ पाद ।

णिउरंब-निकुरम्ब–न० । समूहे, औ० । जी० । रा० । जं० । ज्ञा० । "रम्भे महामेहनिउरंबभूए।" महामेहवृन्दकल्प इत्यर्थः । ज्ञा० १ श्रु० १ अ० ।

णिएल्लग-निजकीय-त्रि० । आत्मीये, " ताहे जा इच्छंति सव्वे णिएल्लगा । " आ० म० १ अ० १ खण्ड ।

णिओग–नियोग–पुं० । नियतो निश्चितो हितो वाऽनुकूलः सूत्रस्यानिधेयेन सह यो योगः सम्बन्धः स नियोगः । अनुयोगशब्दस्यार्थे, विशे० ।

अधुना नियोगमाह–

अहिगो जोगो निओगो, जहाऽइदाहो जवे निदाहो त्ति ।
अत्थनिउत्तं सुत्तं, पसुवइ चरणं जओ मुक्खो ॥

निराधिक्ये, अधिको योगो नियोगो, यथाऽतिदाघो निदाघः, कस्य केन सहाऽऽधिक्यमिति चेत् ?;उच्यते-सूत्रस्यार्थेन । आधिक्येन योगस्य किं फलमिति चेत् ?, अत आह–अर्थेन सममाधिक्येन नियुक्तं सूत्रं, चरणं चारित्रं प्रसूते, यतः संसाराद् मोक्षः ॥

अत्रैव प्रसवने दृष्टान्तमाह–

वच्छनियोगे खीरं, अत्थनियोगेण चरणमेवं तु ।
पत्तग दंमियमुन्नयं, दंमीसरिसो तहिं अत्थो ॥

यथा गौर्वत्सेन नियुक्ता सती क्षीरं प्रसूते, एवमर्थेन समं नियुक्तं सूत्रं चरणं प्रसूते । यदि पुनरेकं केवलं सूत्रं स्यान्नार्थस्तेन संगृहीतो भवेत्, ततश्चरणप्रसवस्याभावः; यथा वत्सनियोगाभावे गोक्षीरप्रसवस्याभावः; अर्थोऽपि केवलः सूत्रविहीनो न कार्यसाधको, यथा केवलो वत्सः । अत्रैव दृष्टान्तान्तरमाह-(पत्तगदंमियउभयं ति) पत्रकं-लेखः,दण्डिका लेखस्योपरि मुद्रानियोगः, उभयं-पत्रकं,दण्डिका च । इयमत्र भावना– " तिन्नि पुरिसा रायाणमोलग्गंति, राया तुट्ठो कस्सिइ नगरे पसाओ कओ । तत्थ एगेण पुरिसेण जे तम्मि नयरे रायपुरिसा, तेसिं जोगं पत्तयमाणीयं । बिइएण दंमिया चेव केवला । तइएणोभयं । तत्थ जेण मुद्दारित्तं पत्तयमाणीयं, सो रायपुरिसेहिं भणिओ–नत्थि पत्तगस्सोपरि मुद्दाविणिओग त्ति न मन्ने सो । बिइओ भणिओ–अत्थि इयं मुद्दा, परं को रण्णा पसाओ कओ, को वा न कओ त्ति ?, न जाणामो त्ति, तम्हा न देमो त्ति । तइएणोभयं दरिसियं ति सव्वं जहिच्छियं लद्धं । " एष दृष्टान्तः । अयमर्थोपनयः–पत्रकसदृशं सूत्रं, दण्डिकासदृशोऽर्थः, यथा पत्रकं केवलं, दण्डिका वा न कार्यस्य प्रसाधिका, उभयं तु साधकम्, एवं सूत्रमर्थश्च पृथक् न चरणप्रसाधकः, उभयं तु प्रसाधकम् । बृ० १ उ० । आ० चू० । व्यापारे,व्य २ उ० । पञ्चा० । अवश्यतायाम्, पं० व० ४ द्वार । पञ्चा० । नियमे,पं० व० ४ द्वार । ज्ञा० । पञ्चा० । निश्चिता आज्ञाऽऽदिना कृतव्यापारा यस्य स नियोगः । राजनि, जीत० । आमे, क्षेत्रे च । बृ० १ उ० ।

णिओगपुर–नियोगपुर–न० । नियोगो राजा, तस्य पुरम् । राजधान्याम्, देशे, जनपदे, राज्ये, राष्ट्रे च । जीत० ।

णिओजिय–नियोजित–त्रि० । व्यापारिते, " सोऊण जिणागमणं, निउत्तअणिओजियाइएसुं वा । " आ० म० १ अ० ३ खण्ड ।

णिंत–नयत्–त्रि० । निर्गच्छति, नि० चू० १ उ० । आ० म० ।

णिंदंत–निन्दत्–त्रि० । जुगुप्समाने, प्रश्न० ३ आश्र० द्वार । अन्त० ।

णिंदण–निन्दन–न० । मनसा कुत्सने, ज्ञा० १ श्रु० ८ अ० । स्था० । आत्मनैव दोषपरिकुत्सने, भ० १७ श० ३ उ० । पश्चात्तापे, ज्ञा० १ श्रु० १६ अ० ।

णिंदणा–निन्दना–स्त्री० । निन्द-ल्युट्, प्राकृते स्वार्थे तत् । आत्मनैवाऽऽत्मदोषपरिभावने, उत्त० ३ अ० । आत्मसाक्षिकमात्मनो निन्दायाम्, उत्त० ।

तत्फलम–

णिंदणयाए णं भंते ! जीवे किं जणयइ ?। णिंदणयाए णं पच्छाणुतावं जणयइ, पच्छाणुतावेणं विरज्जमाणे करणगुणसेढिं पडिवज्जइ, करणगुणसेढिं पडिवन्ने य अणगारे मोहणिज्जं कम्मं उग्घाएइ ॥ ६ ॥

हे भदन्त ! निन्दनया जीवः किं जनयति ?। गुरुराह-हे शिष्य ! आत्मनः पापस्य निन्दनेन पश्चात्तापं जनयति—हा ! मया दुष्कृतं कृतमित्यादि बुद्धिमुत्पादयति । पश्चात्तापेन विरज्यमानो वैराग्यं प्राप्नुवन् सन् करणगुणश्रेणिमपूर्वकरणेन पूर्वं कदापि अप्राप्तेन विशदमनःपरिणामविशेषगुणश्रेणिं क्षपकश्रेणिं प्रतिपद्यते अङ्गीकुरुते, करणगुणश्रेणिं प्रतिपन्नोऽपूर्वगुणश्रेणिः सन् अनगारः साधुर्मोहनीयं कर्म दर्शनमोहनीयाऽऽदिकं कर्मोद्घातयते अतिशयेन क्षपयति ॥ ६ ॥ उत्त० २९ अ० ।

णिंदा–निन्दा–स्त्री० । ' णिदि ' कुत्सायाम्, अस्य " गुरोश्च हलः " ॥ ३ । ३ । १०३ ॥ इत्यप्रत्ययः । मिथ्यादुष्कृते, आव० ४ अ० । स्वप्रत्यक्षमेव जुगुप्सायाम्, पा० । सूत्र० । प्रति० । उत्त० । आ० म० । आव० । "णिंदामि गरिहामि।" निन्दागर्हाऽभिधेयस्यापि जुगुप्सार्थस्य विशेषतो भेदोऽस्ति । तथाहि–स्वप्रत्यक्षाऽऽत्मसाक्षिकी जुगुप्सा, सा समये सिद्धान्ते निन्दामीत्यनेन गम्यते । या तु गुरुप्रत्यक्षा गुरुसाक्षिकी जुगुप्सा, सा गर्हामीत्यनेन शब्देन गम्यते । विशे० ।

सा च नामाऽऽदिनेदतः षोढा भवति । तथा चाऽऽह–

नामं ठवणा दविए, खेत्ते काले तहेव भावे य ।
एसो खलु णिंदाए, निक्खेवो छव्विहो होइ ॥ ६ ॥

तत्र नामस्थापने क्षुण्णे; द्रव्यनिन्दा–तापसाऽऽदीनामनुपयुक्तस्य वा सम्यग्दृष्टेर्वा उपयुक्तस्य वा निह्नवस्याशोभनद्रव्यस्य वेति । क्षेत्रनिन्दा–यत्र व्याख्यायते वा क्रियते वा संमतस्य वेति । कालनिन्दा–यस्मिन्निन्दा व्याख्यायते वा दुर्भिक्षाऽऽदेर्वा कालस्य । भावनिन्दा–प्रशस्ताप्रशस्तेन द्विभेदा,प्रशस्ता संयमाऽऽद्याचरणविषया,अप्रशस्ता पुनरसंयमाऽऽद्याचरणविषयेति । "हा दुट्ठु कयं हा दुट्ठु कारियं दुट्ठु अणुमयं इ त्ति । अंतो बाहिर डज्झइ,सुसिरो व्व दुमो वणदवेण ॥१॥" अथवौघत एवोपयुक्तसम्यग्दृष्टेरिति ।

आव० ४ अ० । (निन्दायां चित्रकरसुतोदाहरणं ' णग्गइ ' शब्देऽत्रैव भागे १७९५ पृष्ठे ऽवष्टव्यम्)

णिंदाचाग–निन्दात्याग–पुं० । परिवादापनोदे; द्वा० १२ द्वा० ।

णिंदित्ता–निन्दित्वा–अव्य० । जुगुप्सित्वेत्यर्थे, " णिंदित्ता गरहित्ता पमिक्कमित्ता अहारिहं उत्तरगुणं पायच्छित्तं । " आचा० २ श्रु० ३ चू० १ अ० ।

णिंदिया–निन्दिता–स्त्री० । एकदा विजातीयतृणाऽऽद्यपनयनेन शोधितायां कृषौ, स्था० ४ ठा० ४ उ० ।

णिंब–निम्ब–पुं० । ' नीमडा ' इति ख्याते वृक्षविशेषे, प्रज्ञा० १ पद । तत्फले, न० । उज्जयिन्यामम्बर्षिद्विजपुत्रे मालुकाऽऽत्मजे, स च पित्रा सह, प्रव्रजितो दुर्विनीतत्वेन साधुभिस्तिरस्कृत इति विनयोपगते उदाहरणम् । आ० क० । आव० ।

णिंबअ–निम्बक–पुं० । अभिप्रायवशाद् निम्बक इति नामाभिधेये, अनु० ।

णिंबोलिया–निम्बगुलिका–स्त्री० । निम्बफले, ज्ञा० १ श्रु० १६ अ० ।

णिकरण–निकरण–न० । निश्चयेन नितरां नियतं वा क्रियन्ते नानादुःखावस्था जन्तवो येन तन्निकरणम् । निकारे, शारीरमानसदुःखोत्पादने, आचा० १ श्रु० २ अ० ५ उ० ।

णिकाइय–निकाचित–त्रि० । निर्युक्तिसंग्रहणीहेतूदाहरणाऽऽदिभिरनेकधा व्यवस्थापिते, नं० । नितरां काचनं बन्धनं निकाचितम् । कर्मणः सर्वकरणानामयोग्यत्वेनावस्थापने,पूर्वबद्धस्य तप्तमिलितसंकुटितलोहशलाकासंबन्धसमाने करणे,स्था० । "चउव्विहे निकाइए पण्णत्ते । तं जहा-पगइनिकाइए, ठिइनिकाइए, अणुभागनिकाइए, पएसनिकाइए । " स्था० ४ ठा० २ उ० ।

णिकाइंसु–निकाचितवत्–त्रि० । नितरां बद्धवति, भ० १ श० १ उ० । नियमितवति, सूत्र० २ श्रु० १ अ० ।

णिकाम–निकाम–न० । अत्यर्थे, निश्चये, सूत्र० १ श्रु० १० अ० ।

णिकामकामीण–निकामकामीन–न० । निकाममत्यर्थं प्रार्थ्यते यः स निकामकामीनः । आहारोपकरणाऽऽदिकस्यार्थस्य प्रार्थके, सूत्र० १ श्रु० १० अ० ।

णिकामचारि [ण्]–निकामचारिन्–त्रि० । निकाममत्यर्थं चरति तच्छीलश्च निकामचारी । आधाकर्माऽऽदीनां तन्निमित्तनिमन्त्राणाऽऽदीनां वा ग्रहणशीले, सूत्र० १ श्रु० १० अ० ।

णिकाय–निकाय–पुं० । निसर्गतः काय औदारिकाऽऽदिर्येस्माद् यस्मिन् वा सति स निकायः । मोक्षे, आचा० १ श्रु० १ अ० ३ उ० । समूहे, ओघ० । आ० चू० । गणकायनिकायस्कन्धवर्गराश्यादीनि च स्कन्धैकार्थिकानि । विशे० ।

साम्प्रतं निकायपदं व्याचिख्यासुराह

निर्युक्तिकृत्-

णामं ठवणा सरीरे, गई निकायऽत्थिकाय दविए य ।
मातुग पज्जव संगह–भारे तह जावकाए य ॥२०७॥

नामस्थापने क्षुण्णे । शरीरकायः शरीरमेव तत्प्रायोग्याऽणुसंघाताऽऽत्मकत्वात् । गतिकायो यो भवान्तरगतौ; स च तैजसकार्मणलक्षणः । निकायकायः षड्जीवनिकायः । अस्तिकायो धर्मास्तिकायाऽऽदिः । द्रव्यकायश्च व्यादिघटाऽऽदिसमुदायः । मातृकाकायस्त्र्यादीनि मातृकाऽक्षराणि । पर्यायकायो द्विधा जीवाऽजीवभेदेन-जीवपर्यायकायो ज्ञानाऽऽदिसमुदायः, अजीवपर्यायकायो रूपाऽऽदिसमुदायः । संग्रहकायः संग्रहैकशब्दवाच्यः, त्रिकदुकाऽऽदिवत् । भारकायः कापोती । वृद्धास्तु व्याचक्षते-

एको काओ दुहा जाओ, एगो चिट्ठइ एगो मारिओ ।
जीवंतो मएण मारिओ,तल्लव पाणव केण हेउणा ?॥२०८॥

उदाहरणम्-" एगो काहरो तलाए दो घडा पाणियस्स भरेऊण कावोडीए वहति,सो एगो आउक्कायकाओ दोसु घडेसु दुहा कओ । तओ सो काहरो गच्छंतो पक्खलिओ, एगो घडो भग्गो । तम्मि ओ आउक्काओ सो मओ । इतरम्मि जीवति; तस्स अन्नावे सो वि भग्गो । ताहे सो तेण पुव्वमएण मारिओ त्ति भण्णति । अहवा-एगो घडो आउक्कायभरिओ; ताहे तमाउक्कायं दुहा काऊण अद्धो तावितो, सो मओ । अतावितो जीवति । ताहे सो वि तत्थेव पक्खित्तो । तेण मएण जीवंतो मारिओ त्ति । एस भारकाओ गओ । " भावकायश्चौदारिकाऽऽदिसमुदायः । इह च निकायः काय इत्यनर्थान्तरमिति कृत्वा कायनिक्षेप इत्यक्षुण्ण एवेति गाथाऽर्थः ॥ २८७ ॥

इत्थं पुण अहिगारो, निकायकाएण होइ सुत्तम्मि ।
उच्चरियअत्थसरिसा–ण कित्तणं सेसगाणं पि ॥२०९॥

अत्र पुनः सूत्रे इति प्रयोगः,सूत्र इत्यधिकृताध्ययने । किमित्याह-अधिकारो निकायकायेन भवति । अधिकारः प्रयोजनम्, शेषाणामुपन्यासवैयर्थ्यमाशङ्क्याऽऽह-उच्चरितार्थसदृशानामुच्चरितो निकायः, तदर्थतुल्यानां, कीर्तनं संशब्दनम् ; शेषाणामपि नामाऽऽदिकायानां व्युत्पत्तिहेतुत्वात् प्रदेशान्तरोपयोगित्वाच्चेति गाथाऽर्थः ॥ २८९ ॥ दश० ४ अ० ।

कायमणिओ वि वुच्चइ, बद्धमवि निकायमाहंसु ।

बद्धमपि किञ्चिल्लेखाऽऽदिनिकायम्, (आहंसु त्ति) निकाचितमाख्यातवन्तः । आव० ५ अ० । षड्जीवनिकायवन्निकायः । आवश्यके, अनु० । (असुराऽऽदिनिकायेन्द्राणां, सौधर्माऽऽदिदेवलोकेन्द्राणां च नामानि ' इंद ' शब्दे द्वितीयभागे ५३५ पृष्ठे ऽवष्टव्यानि)

निकाच–पुं० । निकाचनं निकाचः । उन्दने, निमन्त्रणे, स० १२ सम० ।

निकाच्च–अव्य० । व्यवस्थाप्येत्यर्थे, "णिकाय समयं पत्तेयं पत्तेयं पुच्छिस्सामो । " आचा० १ श्रु० ४ अ० २ उ० ।

णिकायकाय–निकायकाय–पुं० । षड्जीवनिकाये,दश० ४ अ० ।

निकायकायः प्रतिपाद्यते-

णिययमहिगो व काओ,जीवनिकाओ [illegible] कायकाओ अ॥५॥

नित्यः कायो निकायः,नित्यताऽस्य त्रिष्वपि कालेषु भावात् । अधिको वा कायो निकायः; यथाऽधिको दाहो निदाह इति । आधिक्यं चास्य धर्माधर्मास्तिकायापेक्षया स्वक्षेत्रापेक्षया वा । तथाहि-एकाऽऽदयो यावदसंख्येयाः पृथिवीकायिकास्तावत्कायः स एव स्वजातीयान्यप्रदेशापेक्षया निकाय इति;एवमन्येष्वपि विज्ञानीयमित्येवं जीवनिकायः सामान्येन निकायकायो भण्यते । अथवा-

जीवनिकायः पृथिव्यादिभेदभिन्नः षड्विधोऽपि निकायो भण्यते, तत्समुदाय एव च निकायकाय इति। आच० ४ अ०।

णिकायणा–निकाचना–स्त्री०। 'कच' बन्धने। नितरां कच्यते स्वयमेव बध्यमायाति कर्म जीवस्य तथाविधसंक्लिष्टाध्यवसायपरिणतस्य, तत्प्रयुङ्क्ते जीव एव,तथानुकूल्येन नयनात्,ततः 'प्रयोक्तृव्यापारे णिच्' (श्रीम०आ-*६५)ततो निकाच्यते अवश्यवेद्यतया निबध्यते यया कर्म सा निकाचना। जीववीर्यविशेषपरिणतिरूपे समस्तकरणानामयोग्यत्वेन व्यवस्थापने,क०प्र०। सूत्र०।

संप्रति निधत्तिनिकाचनाकरणे प्रतिपिपादयिषुराह-

देसोवसमणतुल्ला, होइ निहत्ती निकाइया नवरं।
संकमणं पि निहत्ती–ऐं नत्थि सेसाण वित्थरस्स ॥१॥

(देसोवसमण त्ति) निधत्तिर्निकाचना च देशोपशमनातुल्या। इदमुक्तं भवति-ये देशोपशनाया भेदाः, ये च स्वामिनः, ते अभ्यूनातिरिक्ता निधत्तिनिकाचनयोरपि वेदितव्याः। नवरम् अयमेवं निधत्तिनिकाचनयोरिदं संक्रमणमपि परप्रकृतिसंक्रमणमपि; अपिशब्दादुदीरणाऽऽदीन्यपि निधत्तौ सत्यां न भवन्ति, सङ्क्रमणाऽपवर्तने पुनर्भवत एव; इतरस्यां निकाचनायां शेषे अपि उद्वर्तनापवर्तने अपि न भवतः सकलकरणायोग्यं निकाचितमित्यर्थः॥७२॥

इह यत्र गुणश्रेणिस्तत्र प्रायो देशोपशमनानिधत्तिनिकाचनायथाप्रवृत्तसंक्रमा अपि संभवन्ति, ततस्तत्राऽल्पबहुत्वमाह-

गुणसेढिपएसग्गं, थोवं पत्तेगसो असंखगुणं।
उवसामणाइ तीसु वि, संकमणेऽहप्पवत्ते य ॥ ५ ॥

(गुणसेढि त्ति) गुणश्रेणिप्रदेशाग्रं स्तोकम्। ततः प्रत्येकशः प्रत्येकं प्रत्येकमुपशमनाऽऽदिषु त्रिषु यथाप्रवृत्ते च संक्रमणे असंख्येयगुणं वक्तव्यम्। इयमत्र भावना-यस्य यस्य वा कर्मणो गुणश्रेणिप्रदेशाग्रं सर्वस्तोकम्, ततो देशोपशमनायामसंख्येयगुणम्। ततो निधत्तमसंख्येयगुणम्। ततोऽपि निकाचितमसंख्येयगुणम्। ततोऽपि यथाप्रवृत्तसंक्रमेण संक्रान्तमसंख्येयगुणम्।२। क०प्र० ७+८प्रक०। पं०सं०। स्था०। "इच्चेयं महव्वयउच्चारणं णिकायणा।" निकाचनैव निकाचना, स्ववतप्रतिपत्तिदृढतरनिबन्ध इत्यर्थः। शुभकर्मणां वा निकाचनाहेतुत्वान्निकाचनेयमुच्यते, न च सरागसंयमिनामयमर्थो घटत इति। पा०। ध०। दापने, "निकायण त्ति वा दावण त्ति वा एगट्ठा।" नि० चू० १ उ०। "जं मासातिआरोवणाए विहीणधियाए वा जहा महाए आरोवणाए आरोवयंति, तं णिकाइतं भण्णति।" नि० चू० १० उ०।

णिकायपडिवण्ण–निकायप्रतिपन्न–त्रि०। निर्गतः काय औदारिकाऽऽदिर्यस्माद् यस्मिन् वा सति स निकायो मोक्षः, तं प्रतिपन्नो निकायप्रतिपन्नः। सम्यग्दर्शनाऽऽदेः स्वशक्त्यनुष्ठानाद् मोक्षं प्रतिपन्ने, आचा० १ श्रु० १ अ० ३ उ०।

णिकिंचण–निष्किञ्चन–त्रि०। निर्गतं किञ्चन हिरण्याऽऽदि देयमस्ते निष्किञ्चनाः। आ० म० १ अ० १ खण्ड।

णिकूम–निष्कूट–त्रि०। अमाये, आच० ५ अ०।

णिकेअ–निकेत–पुं०। निवासे, ज्ञा० १ श्रु० १६ अ०। गृहे, उत्त० २ उ०।

णिक्क–देशी-सर्वथा विगतमले, ज्ञा० १ श्रु० १ अ०।

निष्क–पुं०। न०। निश्चयेन कायति कै-कः। शास्त्रीयषोडशमाषकपरिमितसुवर्णानामष्टाधिकशते, व्यवहारिकरूपके दीनारे, (टाका)। चतुःसुवर्णपरिमिते पलपरिमाणे मानभेदे, षोमशरूप्ये (काहन) परिमाणे, वक्षोभूषणे, हेमपात्रे, च। वाच०।

णिक्कअ–निष्क्रय–पुं०। न विद्यते क्रयो यस्य सः। "कगचजतदपयवसऽक्रूपामूर्ध्वे लुक्" । ८। २। ७७। इति यलुक्। "सर्वत्र लवरामचन्द्रे" । ८। २। ७९। इति रलुक्, अनादौ द्वित्वम्। "कगचजतदपयवां प्रायो लुक्" । ८। १। १७७। इति यलुक्। प्रा० २ पाद। "ष्कस्क्यो र्नाम्नि" । ८। २। ४। इति स्कस्य क, नाम्नीति तथा विशेषणात्। क्रयरहिते,प्रा० २ पाद।

णिक्कंकड–निष्कङ्कट–त्रि०। निष्कञ्चुके,निरावरणे,निरुपघाते,स०।

णिक्कंकडच्छाय–निष्कङ्कटच्छाय–त्रि०। निष्कङ्कटा निष्कवचा निरावरणा निरुपघातेति भावः। छाया दीप्तिर्यस्य तन्निष्कङ्कटच्छायम्। रा०। जं०। औ०। निरावरणदीप्तौ, औ०। स०। प्रश्न०। रा०। स्था०। जी०। प्र०।

णिक्कंखिय–निष्काङ्क्षित–न०। काङ्क्षितं देशसर्वकाङ्क्षाऽऽत्मकं,तस्याभावो निष्काङ्क्षितम्। अन्यान्यदर्शनानभिलाषे, उत्त० २ अ०। प्रव०। निर्गता काङ्क्षाऽन्यान्यदर्शनग्रहणरूपा यस्माऽसौ निष्काङ्क्षितः। सूत्र० २ श्रु० ७ अ०। देशसर्वकाङ्क्षारहिते, ध० १ अधि०। ग०। व्य०। रा०। औ०। दर्शनान्तराऽऽकाङ्क्षारहिते, दशा० १० अ०।

णिक्कंत–निष्क्रान्त–त्रि०। प्रव्रज्यां गृहीतवति, आचा० १ श्रु० १ अ० ३ उ०।

णिक्कंतार–निष्कान्तार–न०। कान्तारमरण्यं, निर्गतः कान्तारात् निष्कान्तारः। कान्ताराश्निष्क्रान्ते, "कंतारातो णिक्कंतारं करेउजा।" निष्कान्तारं निष्क्रामितारं वा। स्था० २ ठा० १ उ०।

णिक्कंप–निष्कम्प–पुं०। दृढे, ज्ञा० ६ ज्ञा०। स्थिरचित्तवृत्तौ, बृ०।

अथ निष्कम्पताद्वारमाह-

णाणाऽऽणत्तीऐं पुणो, दंसणतवनियमसंजमे ठिच्चा।
विहरइ विसुज्झमाणो, जावज्जीवं पि णिक्कंपो ॥

ज्ञानस्य या आज्ञेत्यादेशः-"जाऐं सद्धाऐं निक्कंतो, तामेव मणुपालए।" इत्यादिकः, तया दर्शनप्रधाने तपोनियमरूपे संयमे स्थित्वा कर्ममलेन विशुद्ध्यमानः सन् यावज्जीवमपि निष्कम्पः स्थिरचित्तवृत्तिर्विहरति संयमाध्वनि गच्छतीति। बृ० १ उ०।

णिक्कज्ज–देशी-अनवस्थिते, दे० ना० ४ वर्ग ३३ गाथा।

णिक्कट्ठ–निकृष्ट–त्रि०। निष्कर्षिते, तपसा कृशदेहे, स्था० ४ ठा० ४ उ०।

*श्रीमत्प्रणीतं रुचिरतरमस्त्येव शब्दानुशासनं सवृत्तिकं,तत्र नामाऽऽख्यातकृदाख्यं यथार्थाख्यं प्रकरणत्रयं क्रमेण नवदशषट्पादप्रमाणम्, ततश्चात्र श्रीमलयगिरिपूज्यपादकृतप्रकरणपादसूत्रसंख्यासूचनं क्रमेणावसेयमध्यवसितवाङ्मयसारैः।

निष्कृष्ट–त्रि० । तपसा कृशीकृते, स्था० ४ ठा० ४ उ० ।

णिक्कम–देशी–काठिने, दे० ना० ४ वर्ग २९ गाथा ।

णिक्कमण–निष्क्रमण–न० । प्रव्रज्यायाम्, आचा० १ श्रु० ४ अ० ६ उ० । बृ० । निर् + क्रम–ल्युट् । बहिर्गमने, चतुर्थे मासि शिशोः कर्त्तव्ये संस्कारभेदे च । "चतुर्थे मासि कर्त्तव्यं, शिशोर्निष्क्रमणं गृहात् ।" इति मनुः । वाच० ।

णिक्कम्म–निष्कर्मन्–पुं० । निष्क्रान्तः कर्मणो निष्कर्मा । मोक्षे, संवरे, आचा० १ श्रु० ४ अ० ४ उ० ।

णिक्कम्मदंसि [ण्]–निष्कर्मदर्शिन्–त्रि० । निष्कर्मा मोक्षः, संवरो वा, तं द्रष्टुं शीलमस्येति निष्कर्मदर्शी । मोक्षसंवरतत्त्ववेत्तरि, "णिक्कम्मदंसी इह मच्चिएहिं कम्माणि सफलत्तं दट्ठुं ।" आचा० १ श्रु० ४ अ० ४ उ० । निष्कर्माणमात्मानं पश्यतीति तच्छीलश्च निष्कर्मदर्शी । कर्मबन्धनविप्रमुक्ते, "पणिच्चियाणं णिक्कम्मदंसी ।" निष्कर्मत्वादपगताऽऽवरणः सर्वज्ञानी सर्वदर्शी च भवति । आचा० १ श्रु० ३ अ० २ उ० ।

णिक्कल–निष्कल–त्रि० । प्रासाऽऽदिदोषरहिते, प्रश्न० १ आश्र० द्वार ।

णिक्करुण–निष्करुण–त्रि० । निर्गता करुणा दया यस्मादसौ निष्करुणः । स्नेहरहिते, प्रश्न० १ आश्र० द्वार ।

णिक्कवड–निष्कपट–त्रि० । निश्छद्मनि, स्था० ४ ठा० २ उ० ।

णिक्कसण–निष्कसन–न० । निर्गमने, सूत्र० १ श्रु० १४ अ० ।

णिक्कसाय–निष्कषाय–त्रि० । कषायरहिते, आतु० । आगमिष्यन्यामुत्सर्पिण्यां भविष्यति त्रयोदशे तीर्थङ्करे, ती० २० कल्प । स० । प्रव० ।

णिक्कासिज्जंत–निष्कास्यमान–त्रि० । निर्वास्यमाने, निःसार्यमाणे, उत्त० १ अ० ।

णिक्काम–निष्काम–त्रि० । शुभरसगन्धाऽऽद्युपभोगरहिते, बृ० १ उ० ।

णिक्कारण–निष्कारण–न० । ग्लानाऽऽदिकारणाभावे, आव० ६ अ० । व्य० ।

णिक्कामिय–निष्कामित–त्रि० । विनिर्गते, औ० ।

णिक्किंचण–निष्किञ्चन–त्रि० । 'णिक्किंचण' शब्दार्थे, आ० म० १ अ० १ खण्ड ।

णिक्किय–निष्क्रिय–त्रि० । सर्वव्यापित्वेनावकाशाभावाद् गमनागमनाऽऽदिक्रियावर्जिते, प्रश्न० २ आश्र० द्वार । षो० ।

आत्मा निष्क्रिय इति साङ्ख्याः–

जे ते उ वाइणो एवं, लोए तेसिं कओ सिया ? ।
तमाओ ते तमो जंति, मंदा आरंभनिस्सिया ॥ १४ ॥

ये एते अकारकवादिन आत्मनोऽमूर्त्तत्वनित्यत्वसर्वव्यापित्वेभ्यो हेतुभ्यो निष्क्रियत्वमेवाभ्युपपन्नाः, तेषां य एष लोको जरामरणशोकाऽऽक्रन्दनदर्पाऽऽदिक्लेशकृणो नरकतिर्यङ्मनुष्यामरगतिरूपः, सोऽयमेवंभूतो निष्क्रिये सत्यात्मन्यप्रच्युतानुत्पन्नस्थिरैकस्वभावे कुतः कस्मादेतोः स्यात् ?, न कथञ्चित्कुतश्चित्स्यादित्यर्थः । ततश्च दृष्टेष्टबाधारूपात्तमसोऽज्ञानरूपात्ते तमोऽन्तरं निकृष्टं यातनास्थानं यान्ति । किमिति ?, यतो मन्दा जडाः प्राण्युपकारकाः,आरम्भनिश्रिताश्च ते इति ।१४।

अधुना नियुक्तिकारोऽकारकवादिमतनिराकरणार्थमाह–

को वेएई अकयं, कयनासो पंचहा गई नऽत्थि ।
देवमणुस्सगयागइ,भाईसरणाऽऽइया च ण हि ॥१४॥ नि० ।

(को वेएईत्यादि) आत्मनोऽकर्तृत्वात्कृतं नास्ति, ततश्चाकृतं को वेदयते ?। तथा निष्क्रियत्वे वेदनक्रियाऽपि न घटां प्राञ्चति । अथाऽकृतमप्यनुभूयेत, तथा सत्यकृताऽऽगमकृतनाशाऽऽपत्तिः स्यात् । ततश्च एककृतपातकेन सर्वप्राणिगणो दुःखितः स्यात्, एतेन च सुखी स्यादिति । न चैतद् दृष्टमिष्टं वा । तथा व्यापित्वान्नित्यत्वाच्चाऽऽत्मनः पञ्चधा पञ्चप्रकारा-नारकनियैमनुष्यामरमोक्षलक्षणा गतिर्न भवेत् । ततश्च भवतां साङ्ख्यानां काषायचीवरधारणशिरस्तुण्डमुण्डनदण्डधारणभिक्षाभोजित्वपञ्चरात्रोपदेशानुस्मारणमनिष्टमाऽऽपद्यनुष्ठानम्, तथा–" पञ्चविंशतितत्त्वज्ञो, यत्र तत्राऽऽश्रमे रतः । जटी मुण्डी शिखी वाऽपि, मुच्यते नात्र संशयः ॥ १ ॥ " इत्यादि सर्वमनार्थकमापद्येत । तथा–देवमनुष्याऽऽदिषु गत्यागती न स्याताम्, सर्वव्यापित्वादात्मनः । तथा नित्यत्वाच्च विस्मरणाभावाद् जातिस्मरणाऽऽदिका च क्रिया नोपपद्यते, तथाऽऽदिग्रहणात् प्रकृतिः करोति, पुरुष उपभुङ्क्ते इति भुजिक्रिया या समाश्रिता, साऽपि न प्राप्नोति । तस्या अपि क्रियात्वादिति । अथ मुखप्रतिबिम्बोदयन्यायेन भोग इति चेत्, एतत्तु निरन्तराः सुहृदः प्रत्येष्यन्ति, बालभावत्वात् । प्रतिबिम्बोदयस्यापि च क्रियाविशेषत्वादेव । तथा नित्ये चाविकारिण्यात्मनि प्रतिबिम्बोदयस्याऽभावाच्चिकीर्षेतादिति ॥ ३४ ॥

ननु च भुजिक्रियामात्रेण, प्रतिबिम्बोदयमात्रेण च
यद्यप्यात्मा सक्रियः, तथापि न तावन्मात्रेणा-
सौ सक्रियत्वमिष्यते, किं तर्हि
समस्तक्रियावत्त्वे सतीत्येतदा-
शङ्क्य नियुक्तिकृदाह–

ण हु अफलयोवऽणिच्चित–ऽकाऽफलत्तणमिहं अदुमहेऊ ।
णादुरुयोवकुरु–त्तणेणऽगावित्तणे हेऊ ॥३५॥ नि० ।

(ण हु अफलेत्यादि) न हु नैवाऽफलत्वं द्रुमानावे साध्ये हेतुर्भवति । न हि यदेव फलवांस्तदेव द्रुमोऽन्यदा त्वद्रुम इति भावः । एवमात्मनोऽपि सुप्ताऽऽद्यवस्थायां यद्यपि कथञ्चिन्निष्क्रियत्वं,तथाऽपि नैतावता त्वसौ निष्क्रिय इति व्यपदेशमर्हति । तथा स्तोकफलत्वमपि न वृक्षाभावसाधनाङ्गम्,स्वल्पफलोऽपि हि पनसाऽऽदिर्वृक्षस्य व्यपदेशभाग्भवति । एवमात्माऽपि स्वल्पक्रियोऽपि क्रियावानेव । कदाचिदेषा मतिर्भवतो भवेत्–स्तोकक्रियो निष्क्रिय एव । यथैककार्षापणधनो न धनित्वमारभते,इत्यमात्माऽपि स्वल्पक्रियत्वादक्रिय इत्येतदप्युपचारः । यतोऽयं दृष्टान्तः प्रतिनियतपुरुषापेक्षया सोपपद्यते, समस्तपुरुषापेक्षया वा ? । तत्र यद्याद्यः पक्षः, तदा सिद्धसाध्यता । यतः–सहस्राऽऽदिधनव्यपेक्षया निर्धन एवासौ । अथ समस्तपुरुषापेक्षया । तदसाधु । यतोऽन्यान् जरच्चीवरधारिणोऽपेक्ष्य कार्षापणधनोऽपि धनवानेव । तथाऽऽत्मापि यदि विशिष्टसामर्थ्योपेतपुरुषक्रियाऽपेक्षया निष्क्रियोऽभ्युपगम्यते, न काचित्क्षतिः । सामान्यापेक्षया तु क्रियावानेवेत्यलमतिप्रसङ्गेन । एवमनिश्चिताकालफलत्वाऽऽद्यहेतुद्वयमपि न वृक्षाभावसाधकमित्यादि योज्यम् । एवमकुण्ठत्वस्तोकक्षुण्णत्वरूपावपि हेतू

न गोत्वाजावत्वं साधयतः । उक्तन्यायेनैव दार्ष्टान्तिकयोजना कार्येति ॥ ३५ ॥ सूत्र० नि० १ श्रु० १ अ० १ उ० ।

णिक्किव–निष्कृप–त्रि० । कृपारहिते, गतघृणे, पं० व० ४ द्वार । नि० चू० ।

निष्कृपमाह–

चंकमणाऽऽईसत्तो, सुनिक्किवो थावराऽऽइसत्तेसु ।
काउं च नाणुतप्पइ, एरिसओ निक्किवो होइ ॥

स्थावराऽऽदिसत्त्वेषु चङ्क्रमणं गमनम्, आदिशब्दात् स्थानशयनाऽऽसनाऽऽदिकं सक्तः क्वचित्कार्यान्तरे व्यासक्तः सन् सुनिष्कृपः सुष्ठु गतघृणो,निःशूकः करोतीति शेषः,कृत्वा च तेषु चङ्क्रमणाऽऽदिकं नानुतप्यते,केनचिन्नोदितः सन् पश्चात्तापपुरस्सरमित्यादुष्कृतं न ददातीत्यर्थः । ईदृशो निष्कृपो भवति । इदं निष्कृपस्य लक्षणमिति भावः । बृ० १ उ० । " णिक्किव ! अकयण्णुय ! " निष्कृप ! मम दुःखिताया अप्रतीकारात्, अकृतज्ञ ! मदीयोपकारस्यानपेक्षणात् । ज्ञा० १ श्रु० ९ अ० ।

णिक्कीलिय–निष्क्रीलित–न० । गमने, प्रव० २७१ द्वार । औ० । अन्त० ।

णिक्कुड–निष्कुट–पुं० । तापनायाम्, अनु० । आ० म० ।

णिक्कोरण–निष्कोरण–न० । दुःसहस्य वस्तुनोऽपनयने, नि० चू० ।

जे भिक्खू पादं णिक्कोरेइ, कोरावेइ, कोरियमाहडं दिज्जमाणं पडिग्गाहेइ, पडिग्गाहेंतं वा साइज्जइ ॥४६॥

सुहस्स अवणयणं णिक्कोरणं, तं भुसिरं ति कालुण चउलहुं ।

गाहा–

कयमुहे अकयमुहे वा, दुविहा णिक्कोरणाऽनुपायम्मि ।
मुहकारणे य एवं, चउरो भंगा मुणेयव्वा ॥ १८८ ॥

पुव्वद्धं कंठं । भायणस्स मुहकारणे, णिक्कोरणे य चउभंगा ।

गाहा–

मुहकोरण समणट्ठा, बितिए मुहं ततिएँ कोरणं समणे ।
दो गुरु ततिए सुत्तं, दोहि गुरु तवेण कालेणं ॥१८९॥

तत्थ भायणस्स मुहं समणट्ठा कयं,समणट्ठाए णिक्कोरियं। बितियभंगे समणट्ठाए मुहं कयं, आयट्ठाए णिक्कोरितं । ततियभंगे आयट्ठाए मुहं कयं, समणट्ठाए णिक्कोरितं । चरिमे उभयं तं पि आयट्ठाए। एत्थ आदिमेसु दोसु भंगेसु चउगुरुगा-पढमबितियभंगेसु चउगुरुगा । ततियभंगेसु सुत्तनिवातो, चउलहुमित्यर्थः। पढमभंगे दोहि वि तवकालेहिं विसिट्ठो, बितियभंगे तवगुरु, ततियभंगे कालगुरु, चउत्थभंगे दोयरहिए वि भुसिरं ति कालुण चउलहुं भवति ।

गाहा–

एतेसामप्पतरं, पायं जो तिविहकरणजोगेणं ।
णिक्कोरेती भिक्खू, सो पावति आणमादीणि ॥१९०॥

आणादी दोसा; कुंथुमाऽऽदिविराहणे संजमविराहणा; सत्थमादिणा लद्धिते आयविराहणा । तत्थ परितावणाऽऽदिणिप्फण्णं । जम्हा एवमादि दोसा, तम्हा जहाकडं मग्गियव्वं, तस्स अभावे अप्पपरिकम्मं ।

एत्थ इमो अववातो । गाहा–

असिवे ओमोयरिए, रायदुट्ठे भए व गेलण्णे ।
सेहे चरित्तसावय–भए व जयणाएँ णिक्कोरे ॥ १९१ ॥

जत्थ अहाकडं लब्भति, तत्थ असिवाऽऽदिकारणेहिं आगच्छंतो अप्पबहुं परिकम्मं जयणाए णिक्कोरेइ ।

गाहा–

जति नाम पुव्वसुद्धे, कोरिज्जंतम्मि बितिएँ ततिए वा ।
तिण्णि व सत्त वीया, होज्जा सुद्धं तहा वि गता ॥१९२॥

पुव्वं गहणकाले सुद्धे पच्छा कोरिज्जंते (बितिए त्ति) अप्पपरिकम्मे (ततिए त्ति) बहुपरिकम्मे, जति तिण्णि पंच वा सत्त वा बितिया होज्जा तहा वि सुद्धं । नि० चू० १४ उ० । यत्पुनः पात्रस्य मुखकरणानन्तरं तदप्यन्तरवर्तिनो गिरस्योत्कीर्णनं तन्निष्कोर (ल) णमभिधीयते । बृ० १ उ० ।

णिक्ख–निष्क–न० । " एकस्कयोर्नाम्नि " ॥ ७ । २ । ४ ॥ इति एकभागस्य ञः । सुवर्णे, प्रा० २ पाद ।

णिक्खंत–निष्क्रान्त–त्रि० । संसारात् गृहाच्च निःसृते, उत्त० १८ अ० । प्रव्रजिते, सूत्र० १ श्रु० ८ अ० । अनु० । प्रव्रज्याप्रतिपत्त्या गृहवासान्निर्गते, हा० २७ अष्ट० ।

णिक्खत्त–निःक्षत्र–त्रि० । क्षत्रियजातिविहीने, परशुरामेण त्रिःसप्तकृत्वो निःक्षत्रिया पृथिवी कृता । सूत्र० १ श्रु० ८ अ० ।

णिक्खम–निष्क्रम–न० । निष्क्रमणं निष्क्रमः । प्रव्रज्यायाम्,इह च द्विर्भावो,नपुंसकता च प्राकृतत्वात् । निष्क्रमणमेव प्रवस्थानं सुखम् । सुखभेदे, स्था० १० ठा० । भ० । द्रव्यभावगृहात्प्रव्रज्याग्रहणे, दश० १० अ० ।

णिक्खमण–निष्क्रमण–न० । सूर्याचन्द्रमसोः सर्वाभ्यन्तरान्मण्डलाद् बहिर्गमने, सू० प्र० १३ पाहु० । द्रव्यभावसङ्गाद् निष्क्रान्तिरूपप्रव्रज्यायाम् , पं० व० १ द्वार । अन्त० । बृ० । अगारवासान्निर्गमे, पञ्चा० ६ विव० । बहिर्गमने, नि० चू० १ उ० । उद्वर्तने, आचा० १ श्रु० १ अ० ६ उ० ।

णिक्खमणचरियाणिबद्ध–निष्क्रमणचरितानिबद्ध–न० । भगवतो महावीरस्वामिनोऽन्येषां च प्रव्रज्यामहोत्सवचरितनिबद्धे नाट्यविधौ, रा० ।

णिक्खमणपवेस–निष्क्रमणप्रवेश–पुं० । निर्गमनागमनयोः, नि० चू० ।

जे भिक्खू तं पमुच्च णिक्खमइ वा, पविसइ वा, णिक्खमंतं वा पविसंतं वा साइज्जइ ॥१४॥

(पडुच्च त्ति) आहेसो णिहत्थो काइयादि णिग्गच्छति, ताहे संजतो चिंतेति-एस काइयं गतो, अहमवि एयणिस्साए काइयं गच्छामि, उड्डुवेहि वा पहिं वच्चामो ।

गाहा–

संवासे जे दोसा, णिक्खमणे पवेसणम्मि ते चेव ।
णातव्वा तु मतिमता, पुव्वे अवरम्मि य पदम्मि ॥१३५॥

जे संवासे अधिकरणाऽऽदी दोसा भवंति, ते णिग्गच्छंते वि । इमे अधिकतरा । गाहा–

गिहिसहितो ती संका, आरक्खिगमादिगेण्हणाऽऽदीया ।
उभयाचरणे दवाऽसति,अवण्ण अपमज्जऽऽणादीया॥१३६।

गिहत्थसहितो त्ति काउं चोरपारदारिओ त्ति काउं जाहे संका भवति,ताहे दंसपासियाऽऽदीहिं गेण्हणाऽऽदी दोसा। काइयसण्णा उन्नयं ते वोसिरंतो दवावि। असतीए उड्डाहो। लोगो अवण्णं भासति. पादधंमिलाऽऽदी ण पमज्जति संजमविराहणा। नि० चू० ७ उ०। कल्पसूत्रे सामाचार्यामेकपञ्चाशत्तमसूत्रे-" निक्खमित्तए वा पविसित्तए वा " इति पदद्वयमधिकमिव दृश्यत इति प्रश्ने, उत्तरम्-"भत्तपाणपमिआइक्खित्तए" इति वचनात् कश्चित्सामान्यतो विदितानशनः,कश्चिच्च कृतपादपोपगमनो भिक्षुर्विहर्तुं प्रवर्तितुमिच्छेदित्यर्थः संगच्छते, तदनुसारेण सामान्येन कृतानशनस्य " निक्खमित्तए वा " इत्यादिविशेषणानि यथासंभवं संगच्छन्त एव, न तु कृतपादपोपगमनस्येति न काऽप्यधिकतेति। २२ प्र०। सेन० २ उल्ला०। (स्थविरकल्पिका जिनकल्पिका वा कदा निष्कामन्ति, कदा वा प्रविशन्तीति 'थविरकल्प' शब्दे वक्ष्यते) (राज्याभिषेके निष्क्रमणप्रवेशाविषयः ' रायाभिसेय ' शब्दे द्रष्टव्यः)

णिक्खमणाभिसेय–निष्क्रमणाभिषेक–पुं०। निष्क्रमणाभिषेकसामान्याम, ज० ६ श० ३३ ह०।

णिक्खममाण–निष्क्रामत्–त्रि०। निर्गच्छति, आचा० १ श्रु० १ चू० २ अ० ३ ह०।

णिक्खमित्तए–निष्क्रमितुम्–अव्य०। प्रवेष्टुमित्यर्थे, कल्प० ९ क्षण। इ० प०।

णिक्खम्म–निष्क्रम्य–अव्य०। गेहान्निःसृत्य प्रव्रजितो भूत्वेत्यर्थे, सूत्र० १ श्रु० १० अ०। स्वदर्शनविहितां प्रव्रज्यां गृहीत्वेत्यर्थे, सूत्र० २ श्रु० १ अ०।

णिक्खय–देशी–निहते, दे० ना० ४ वर्ग ३२ गाथा।

णिक्खसिअ–देशी–मुषिते, दे० ना० ४ वर्ग ४१ गाथा।

णिक्खित्त–निक्षिप्त–त्रि०। स्वस्थानन्यस्ते, प्रश्न० ३ आश्र० द्वार। विमुक्ते, ज्ञा० १ श्रु० १ अ०। सुप्तोत्थिते, दे० ना० ४ वर्ग। व्यवस्थापिते, आचा० २ श्रु० १ चू० १ अ० ७ ह०। परित्यक्ते,व्य० २ ह०। "णिक्खित्तं णाम-गरहिंगावसं ठवयति।" नि० चू० १ उ०। सचित्तस्योपरि स्थापिते, तच्च एषणादोषदुष्टत्वान्न ग्राह्यम्। प्रव० ६७ द्वार। जीत०।

अथ निक्षिप्तद्वारमाह-

सचित्तमीसएसुं, दुविहं कायेसु होइ निक्खित्तं *।
एक्केकं तं दुविहं, अणंतर परंपरं चेव ॥५७२॥

इह कल्पनीयं निक्षिप्तं द्विधा-सचित्तेषु, मिश्रेषु च। एकैकमपि द्विधा। तद्यथा-अनन्तरं, परम्परं च। तत्रानन्तरमव्यवधानेन, परम्परं व्यवधानेन। यथा सचित्तपृथिवीकायस्योपरि स्थापनिका, तस्या उपरि देयं वस्त्विति। इह परिहार्यापरिहार्यविभागं विना सामान्यतो निक्षिप्तं सचित्ताचित्तमिश्रकल्पभेदात् त्रिधा। तत्र च त्रयश्चतुर्भङ्गाः। तद्यथा-सचित्ते सचित्तम् १, मिश्रे सचित्तम् २, सचित्ते मिश्रम् ३, मिश्रे मिश्रमिलेका चतुर्भङ्गी। तथा-सचित्ते सचित्तम्१, अचित्ते सचित्तम्२, सचित्ते अचित्तम् ३, अचित्ते अचित्तमपि द्वितीया चतुर्भङ्गी। तथा-मिश्रे मिश्रम् १, अचित्ते मिश्रम् २, मिश्रे अचित्तम् ३, अचित्ते अचित्तमिति तृतीया चतुर्भङ्गी।

* पुस्तकान्तरे-"सच्चित्तमीसएहिं दुविहं कापहिं" इतिपाठः।

सम्प्रत्यस्यैवानन्तरपरम्परविभागमाह-

पुढवीआउक्काए–तेऊवाऊवणस्सइतसाणं।
एक्केको छग्गजेओ–ऽणंतरपरऽगणिम्मि सत्तविहो ।५७३।

पृथिव्यप्तेजोवायुवनस्पतित्रसकायानां सचित्तानां प्रत्येकं सचित्तपृथिव्यादिषु निक्षेपः संभवति, तत्र पृथिवीकायस्य निक्षेपः षोढा। तद्यथा-पृथिवीकायस्य पृथिवीकाये निक्षेप इत्येको भेदः, पृथिवीकायस्याप्काये इति द्वितीयः, पृथिवीकायस्य तेजस्काये इति तृतीयः, वातकाये इति चतुर्थः,वनस्पतिकाये इति पञ्चमः, त्रसकाये इति षष्ठः। एवमप्कायाऽऽदीनामपि निक्षेपः प्रत्येकं षोढा भावनीयः। सर्वसङ्ख्यया षट्त्रिंशत् भङ्गाः। एकैकोऽपि च भेदो द्विधा। तद्यथा-अनन्तरेण, परम्परया च। अनन्तरपरम्परव्याख्यानं च प्रागेव कृतम्। केवलमग्निकाये पृथिव्यादीनां निक्षेपः सप्तधा। एतच्च स्वयमेव वक्ष्यति।

संप्रति पृथिवीकाये निक्षेपस्य यदुक्तं प्रत्येकं षोढात्वं, तत्सूत्रकृत् साक्षादर्शयति-

सचित्तपुढविकाए, सचित्तो चेव पुढवि निक्खित्तो।
आऊतेऊवणस्सइ–समीरणतसेसु एमेव ॥५७४॥

सचित्तपृथिवीकाये सचित्तपृथिवीकायो निक्षिप्तः। एवं च पृथिवीकाये इव अप्तेजोवनस्पतिसमीरणत्रसेषु सचित्त एव पृथिवीकायो निक्षिप्त इति पृथिवीकायनिक्षेपः षोढा।

एवं शेषकायेष्वतिदेशमाह-

एमेव सेसयाण वि, निक्खेवो होइ जीवकाएसु।
एक्केको सट्ठाणे, परट्ठाणे पंच पंचेव ॥५७५॥

एवमेव पृथिवीकायस्येव,शेषाणामप्कायाऽऽदीनां, निक्षेपो भवति,जीवनिकायेषु पृथिव्यादिषु। तत्र एकैको भङ्गः स्वस्थाने, शेषाः पञ्च पञ्च परस्थाने। तथाहि-पृथिवीकायस्य पृथिवीकाये निक्षेपः स्वस्थाने, अप्कायाऽऽदिषु शेषेषु पञ्चसु परस्थाने। एवमप्कायाऽऽदीनामपि भावनीयम्। ततः स्वस्थाने एकैको भङ्गः, परस्थाने पञ्च पञ्च। तदेवं प्रथमचतुर्भङ्गिकायाः सचित्ते सचित्तमित्येवंरूपे प्रथमे भङ्गे षट्त्रिंशद् भेदाः।

सम्प्रति प्रथमचतुर्भङ्ग्या एव शेषं भङ्गत्रयं, द्वितीयतृतीयचतुर्भङ्ग्यौ चाऽतिदेशतः प्रतिपादयति-

एमेव मीसएसु वि, मीसाण सचेयणेसु निक्खेवो।
मीसाणं मीसेसु य, दोएहं पि य होइ चित्तेसु ॥५७६॥

एवमेव सचित्तेषु इव मिश्रेष्वपि मिश्रपृथिव्यादिनिक्षेपः षट्त्रिंशद्भेदोऽवगन्तव्यः। एतेन प्रथमचतुर्भङ्गो व्याख्यातः। एवमेव मिश्राणां पृथिव्यादीनां मिश्रेषु पृथिव्यादिषु निक्षेपः षट्त्रिंशद् भेदः। अनेन प्रथमचतुर्भङ्ग्याश्चतुर्थो भङ्गो व्याख्यातः। सर्वसंख्यया प्रथमचतुर्भङ्ग्यां चतुश्चत्वारिंशं भङ्गशतम्। एवमेव द्वयोरपि सचित्तमिश्रयोरचित्तेषु निक्षिप्यमाणयोर्ये द्वे चतुर्भङ्ग्यौ प्रागुक्ते, तत्रापि प्रत्येकं चतुश्चत्वारिंशं भङ्गशतं भवति। सर्वसङ्ख्यया भङ्गानां शतानि चत्वारि द्वात्रिंशदधिकानि भवन्ति। उक्ता निक्षेपस्य भेदाः।

सम्प्रत्यस्यैव निक्षेपस्य पूर्वोक्तं चतुर्भङ्गीत्रयमधिकृत्य कल्प्याकल्प्यविधिमाह-

जत्थ उ सचित्तमीसे, चउभंगो तत्थ चउसु वि अगेज्झं।

तं तु अणंतर इयरं, परित्तऽणंतं च वणकाए ॥५७७॥

यत्र निक्षेपे सचित्तमिश्रे आद्या चतुर्भङ्गी भवति, प्रथमा चतुर्भङ्गी भवतीत्यर्थः । तत्र चतुर्ष्वपि भङ्गेषु, अपिशब्दाद् द्वितीयतृतीयचतुर्भङ्गयोरपि, आद्येषु त्रिषु भङ्गेषु वर्त्तमानमनन्तरं, परम्परा च । वनस्पतिविषये परीतकमनन्तं वा तत्सर्वमग्राह्यम्, सामर्थ्यत्वात् । द्वितीयतृतीयचतुर्भङ्गयोश्चतुर्थे चतुर्थभङ्गे वर्त्तमानं ग्राह्यम्, तत्र दोषाभावात् ।

सम्प्रति सचित्ताऽऽदिभिस्त्रिभिरपि मतान्तरेण तामेव चतुर्भङ्गीं कल्पाकल्पविधिं प्रदर्शयति-

अहव ण सचित्तमीसे, उ एगओ एगओ य अच्चित्तो ।
एत्थ चउक्कभंगो, तत्थाऽऽइण्णे कहा नऽत्थि ॥५७८॥

अथवेति प्रकारान्तरताद्योतकः, णमिति वाक्यालङ्कारे * । इह चतुर्भङ्गी प्रतिपक्षपदोपन्यासे भवति । तत्रैकस्मिन् पक्षे सचित्तमिश्रे एकः, एकश्च अचित्तः; तत् प्रागुक्तक्रमेण चतुर्भङ्गी भवति । तद्यथा-सचित्तमिश्रे सचित्तमिश्रम्, सचित्तमिश्रे अचित्तम्, अचित्ते सचित्तम्, अचित्ते अचित्तमिति । अत्राऽपि प्रागिवैकैकस्मिन् भङ्गे पृथिव्यप्तेजोवायुवनस्पतित्रसभेदात् षट्त्रिंशत् षट्त्रिंशद् भेदाः । सर्वसंख्यया चतुश्चत्वारिंशं भङ्गशतम् । तत्राऽऽदित्रिके आदिमे भङ्गत्रये, कथा नास्ति ग्रहणे वार्त्ता न विद्यते । सामर्थ्याच्चतुर्भङ्गी कल्पते । तदेवं 'पुढवी' इत्यादिमूलगाथायाः पूर्वार्द्धं व्याख्यातम ।

सम्प्रति "एक्केके छहाणंतर" इत्यवयवं व्याचिख्यासुर्द्वितीयचतुर्भङ्ग्याः सत्कस्य तृतीयस्य भङ्गस्य सामान्यतोऽशुद्धस्य विषये विशेषं विभणिषुरनन्तरं, परम्परया वा मार्गणां करोति-

जं पुण अचित्तदव्वे, निक्खिप्पइ चेयणेसु दव्वेसु ।
तहिँ मग्गणा न इणमो, अणंतर परंपरं होइ ॥५७९॥

यत्किमपि अचित्तं द्रव्यमोदनाऽऽदि चेतनेषु सचित्तेषु, मिश्रेषु वा निक्षिप्यते, तत्रेयमनन्तरं, परम्परया वा मार्गणा परिभावनं भवति ।

ओगाहिमादणंतरं, परंपरं पिठरगाइ पुढवीए ।
नवणीयाइ अणंतरं, परंपरं नावमाईसु ॥५८०॥

अवगाहिमाऽऽदि पक्वान्नमण्डकप्रभृति, पृथिव्यामनन्तरनिक्षिप्तम्; पृथिव्या एवोपरि स्थिते पिठरकाऽऽदौ यन्निक्षिप्तमवगाहिमाऽऽदि, तत्परम्परानिक्षेप उक्तः । सम्प्रत्यप्कायमाश्रित्याऽऽह-(नवणीय इत्यादि) नवनीताऽऽदिभक्षणस्यानीभूतघृताऽऽदिसचित्ताऽऽदिरूपे उदके निक्षिप्तमनन्तरनिक्षिप्तं, तदेव नवनीताऽऽदि, अवगाहिमाऽऽदि वा, नावमध्यस्थितेषु नावादिषु स्थितं परम्परनिक्षिप्तम् ।

संप्रति तेजस्कायमधिकृत्यानन्तरपरम्परे व्याख्यातयन् "अगणिम्मि सत्तविहो" इत्यप्यवयवं व्याख्यानयति-

विज्झायमुम्मुरिंगा-ऽच्चेव अप्पत्त पत्त समजाले ।
वोक्कंते सत्त दुगं, जंतोऽलित्ते य जयणाए ॥५८१॥

इह सप्तधाऽग्निः । तद्यथा-विध्यातो,मुर्मुरोऽङ्गारः,अप्राप्तः,प्राप्तः, समज्वालो, व्युत्क्रान्तश्च । तत्र यः स्पृष्टतया प्रथमं नोपलभ्यते, पश्चादिन्धनप्रक्षेपे वर्द्धनमपि गच्छति, स व्युत्क्रान्तः । एते सप्त भेदास्तेजस्कायस्य । तत्र एकैकस्मिन् भेदे भेदद्विकम् । तद्यथा-अनन्तरनिक्षिप्तम्;परम्परनिक्षिप्तं च । तत्र यद् विध्याताऽऽदिरूपे वह्नौ मृण्मयकाऽऽदि प्रक्षिप्यते, तत् अनन्तरनिक्षिप्तम् । यत्पुनरग्नेरुपरि स्थापिते पिठरकाऽऽदौ क्षिप्तं तत्परम्परनिक्षिप्तम् । तत्र सप्तानां भेदानां मध्ये यमेव तमेव वाऽधिकृत्य यन्त्रेषु रसपाकस्थाने कटाहाऽऽदौ अवलिप्ते मृत्तिकाक्षरादिप्टिते यतनया परिशाटिपरिहारेण ग्रहणमिक्षुरसस्य कल्पते ।

सम्प्रत्येनामेव गाथां व्याख्यानयन् प्रथमतो विध्याताऽऽदीनां स्वरूपं गाथाद्वयेनाऽऽह--

विज्झाओ त्ति न दीसइ, अग्गी दीसेइ इंधणे छूढे ।
आपिंगलमगणिकणा, मुम्मुरे निल्लाइंगाले ॥५८२॥
अप्पत्ता उ चउत्थे, जाला पिठरं तु पंचमे पत्ता ।
छट्ठे पुण कन्नसमा, जाला समइच्चिया चरिमे ॥५८३॥

सुगमम, नवरम् (अप्पत्ता उ चउत्थे जाला इति) चतुर्थे अप्राप्ताऽऽख्यो भेदः पिठरमप्राप्ता ज्वाला द्रष्टव्या पञ्चममेयमन्यत्राप्यङ्करगमनिका कार्या ।

संप्रति " जंतोऽलित्ते य जयणाए " इत्यवयवं व्याचिख्यासुराह--

पासोल्लित्त कमाइ, परिसाडी नऽत्थि तं पि य विसालं ।
सो वि य अचिरच्छूढो, उच्चुरसो नाइसामिणो य ॥५८५॥

इह यदीति सर्वत्राऽध्याहियते, यद् यदि कटाहः पिठरविशेषः, पिठरः पार्श्वेषु मृत्तिकयाऽवलिप्तो भवति, दीयमाने चेक्षुरसे यदि परिशाटिर्नोपजायते, तदपि च कटाहरूपं भाजनं यदि विशालं विशालमुखं भवति, सोऽपि चेक्षुरसोऽचिरक्षिप्त-इति कृत्वा यदि नात्युष्णो भवति तदा स दीयमान इक्षुरसः कल्पते । इह यदि दीयमानस्येक्षुरसस्य कथमपि बिन्दुर्बहिः पतति, तर्हि स लेप एव वर्त्तते, न तु चुल्लीमध्यस्थितः तेजस्कायमध्यपतितः, पार्श्वोपलिप्त इति कटाहस्य विशेषणमुक्तम् । तथा विशालमुखादाकृष्यमाणं उदञ्चनः पिठरस्य कर्णे न लगति, ततो न पिठरस्य भङ्ग इति न तेजस्कायविराधनेति विशालग्रहणम् । अनत्युष्णग्रहणे तु कारणं स्वयमेव वक्ष्यति ।

सम्प्रत्युदकमधिकृत्य विशेषमाह-

उसिणोदगं पि गेण्हइ, गुरुरसपरिणामियं न अच्चुसिणं ।
जं तु अघट्टियकन्नं, घट्टियपमणम्मि मा अग्गी ॥५८७॥

उष्णोदकमपि गुरुरसपरिणामिनमनत्युष्णं गृह्णाति । किमुक्तं भवति ?-यत्र कटाहे गुडः पूर्वं कथितो भवति, तस्मिन् निक्षिप्तं जलमीषत्तप्तमपि कटाहसंसक्तगुडरसमिश्रणात् सत्वरमचित्तीभवति, ततस्तदनन्तरमपि कल्पते । अत्राऽपि पार्श्वावलिप्तकटाहस्थितमपरिशाटितमिति विशेषणद्वयमनुपात्तमपि द्रष्टव्यम् । तथा यत् अघट्टितकर्णम्, न यस्मिन् दीयमाने पिठरस्य कर्णावुदञ्चनेन प्रविशता निर्गच्छता वा घट्ट्येते, तदीयमानं कल्पते इत्याह-(घट्टियपमणम्मि मा अग्गी) उदञ्चनेन प्रविशता निर्गच्छता वा पिठरस्य कर्णयोर्घट्ट्यमानयोर्लेपस्योदकस्य वा पतनेन माऽग्निर्विराध्येतेतिकृत्वा । पतेन च वक्ष्यमाणो षोडशभङ्गानामाद्यो भङ्गो दर्शितः ।

सम्प्रति तानेव षोडश भङ्गान् दर्शयति-

पासोल्लित्त कडाहे, नच्चुसिणो अपरिसाडऽघट्टंते ।

* 'अहवण त्ति' अखण्डमव्ययपदमथवेत्यस्यार्थे । वृ० १ उ० ।

सोलस भंगविगप्पा, पढमेऽणुण्हा न सेसेसु ॥५८६॥

पार्श्वावक्षिप्तः कटाहः १, अनत्युष्णो दीयमान इक्षुरसाऽऽदिः २, अपरिशाटिः परिशाट्यभावः ३, (अघट्टंते इति) तदश्रुतेन पिठरकर्णाघट्टने ४, इत्येतानि चत्वारि पदान्यधिकृत्य षोडश भङ्गा भवन्ति ।

भङ्गानां च नयनार्थमियं गाथा-

पयसमणुग अब्भासे-माणं भंगाण तेसिमह रयणा ।
एगंतरियं लहु गुरु, लहुगुरु दुगुणा य वामेसु ॥५८७॥

अस्या व्याख्या-इह यावतां पदानां भङ्गा अभीष्यन्ते, तावन्तो द्विका ऊर्द्धाधःक्रमेण स्थाप्यन्ते- [२ ४] ततः प्रथमो द्विको द्वितीयेन द्विकेन गुण्यते, जाताश्चत्वारः, [४ ८] तैस्तृतीयो द्विको गुण्यते, जाता अष्टौ, तैरपि चतुर्थो द्विको गुण्यते, जाताः षोडश । एतावन्तश्चतुर्णां पदानां भङ्गा भवन्ति ।

तेषां च पुनर्भङ्गानामेषा रचना-प्रथमपङ्क्तावेकान्तरितं लघुगुरु-प्रथमं लघु, ततो गुरु, पुनर्लघु, पुनर्गुरु । एवं यावत् षोडशो भङ्गः । ततः प्रक्षापकापेक्षया वामेषु वामपार्श्वेषु द्विगुणा द्विगुणा लघुगुरवः । तद्यथा—द्वितीयपङ्क्तौ प्रथमं द्वौ लघू, ततो द्वौ गुरू, ततो भूयोऽपि द्वौ लघू, एवं यावत् षोडशो भङ्गः । तृतीयपङ्क्तौ प्रथमं चत्वारो लघवः, ततश्चत्वारो गुरवः, ततश्चत्वारो लघवः, पुनश्चत्वारो गुरवः । चतुर्थपङ्क्त्यां प्रथमस्तु लघवः, ततोऽष्टौ गुरवः ।

स्थापना-अत्र ऋजवोऽशठाः शुद्धाः, वक्राश्चाशुद्धाः । इह षोडशानां भङ्गानामाद्ये भङ्गेऽनुज्ञा, न शेषेषु पञ्चदशसु भङ्गेषु ।

सम्प्रत्युष्णग्रहणे दोषानाह--

दुविहं विराहणं जंसिणे, छड्डणे हाणी य जाणणे ओ य ।

उष्णेऽत्युष्णे इक्षुरसाऽऽदौ दीयमाने द्विधा विराधना-आत्मविराधना, परविराधना च । तथाहि-यस्मिन् भाजने तत्-अत्युष्णं गृह्णाति, तेन तप्तं सद् भाजनं हस्तेन साधुर्गृह्णन् दह्यते, इत्यात्मविराधना । येनापि स्थालेन दात्री ददाति, तेनाप्यत्युष्णेन सा दह्यत इति । तथा-(छड्डणे हाणी य त्ति) अत्युष्णमिक्षुरसाऽऽदि कष्टेन दात्री दातुं शक्नोति, कष्टेन च दाने कथमपि साधुसत्कभाजनाद्विरुज्झने हानिर्दीयमानस्येक्षुरसाऽऽदेः, तथा-(जाणणेओ य इति) तस्य भाजनस्य साधुना वा नयनायोत्पाटितस्य पतद्ग्रहणाऽऽदेर्दात्रा वा दानायोत्पाटितस्योद्भ्रमनस्य गणकरहितस्य अत्युष्णतया झगिति भूमौ मोचने भङ्गः स्यात् । तथा च षड्जीवनिकायविराधनेति ।

संप्रति वायुकायमधिकृत्यानन्तरपरम्परे दर्शयति-

वाउक्खित्ताऽणंतर-परम्परा पप्पमिय वत्थी ॥५८८॥

वातोत्क्षिप्ताः समीरणोत्पाटिताः पर्पटिकाः शालिपर्पटिका अनन्तरनिक्षिप्तं, परम्परनिक्षिप्तं वस्तीति । विभक्तिलोपाद् वस्तौ । उपलक्षणमेतत्-समीरणाऽऽपूरितवस्तिदृतिप्रभृतिव्यवस्थितं मण्डकाऽऽदि ।

संप्रति वनस्पतिवंशविषयं द्विविधमपि निक्षिप्तमाह-

हरियाइ अणंतरिया, परंपरं पिंडरमाइसु वणम्मि ।
पूयाइ पीढे ऽणंतर, भरए कुप्पाइसू इयरा ॥५८९॥

वने वनस्पतिविषये अनन्तरनिक्षिप्तं हरिताऽऽदिषु सचित्तश्रीहिकाप्रभृतिषु अनन्तरिता निक्षिप्ताः, अपूपाऽऽदय इति शेषः। हरिताऽऽदीनामेवोपरि स्थितेषु पिठराऽऽदिषु निक्षिप्ता अपूपाऽऽदयः परम्परनिक्षिप्तम् । तथा बलीवर्दाऽऽदीनां पृष्ठे अनन्तरनिक्षिप्ता अपूपाऽऽदयः, तत्रानन्तरनिक्षिप्तम् । बलीवर्दाऽऽदिपृष्ठ एव भरके कुतुपाऽऽदिषु वा भाजनेषु निक्षिप्ता मोदकाऽऽदयः परम्परनिक्षिप्तम् । इह सर्वत्रानन्तरनिक्षिप्तं न ग्राह्यम्, सचित्तसंघट्टनाऽऽदिदोषसंभवात् । परम्परनिक्षिप्तं तु सचित्तसंघट्टनाऽऽदिपरिहारेण यतनया ग्राह्यमिति सम्प्रदायः । पिं० । आचा० । पञ्चा० । नि० चू० ।

निक्षिप्तं न ग्राह्यम्-

असणं पाणगं वा वि, खाइमं साइमं तहा ।
उदगम्मि हुज्ज निक्खित्तं, उत्तिंगपणगेसु वा ॥ ५९ ॥

अशनं पानकं वाऽपि खाद्यं स्वाद्यं, तथा उदके भवेन्निक्षिप्तमुत्क्लिङ्गपनकेषु वा कीटिकानगरोल्लीषु वेत्यर्थः । " उदयनिक्खित्तं दुविहं-अणंतरं, परंपरं च । अणंतरं-णवणीतपोग्गलियमादी । परंपरं-जलघडोवरि भायणत्थं दधिमादी" । एवं "उत्तिंगपणएसु " भावनीयमिति सूत्रार्थः ॥ ५९ ॥

तं भवे भत्तपाणं तु, संजयाण अकप्पियं ।
दिंतियं पडिआइक्खे, न मे कप्पइ तारिसं ॥ ६० ॥

तद्भवेद् भक्तपानं तु संयतानामकल्पिकं, यतश्चैवमतो ददतीं प्रत्याचक्षीत-न मम कल्पते तादृशमिति सूत्रार्थः ॥ ६० ॥

तथा—

असणं पाणगं वा वि, खाइमं साइमं तहा ।
तेउम्मि हुज्ज निक्खित्तं, तं च संघट्टिया दए ॥ ६१ ॥

अशनं पानकं वाऽपि खाद्यं स्वाद्यं, तथा तेजसि भवेद् निक्षिप्तं तेजसीत्यग्नौ, तेजस्काय इत्यर्थः । तच्च संघट्ट्य यावद्भिक्षां ददामि तावत्तापातिशयेन मा भूदुद्वर्त्तिष्यत इत्याघट्ट्य दद्यादिति सूत्रार्थः ॥ ६१ ॥

तं भवे भत्तपाणं तु, संजयाण अकप्पियं ।
दिंतियं पडिआइक्खे, न मे कप्पइ तारिसं ॥ ६२ ॥

तद्भवेद् भक्तपानं तु संयतानामकल्पिकम्, अतो ददतीं प्रत्याचक्षीत-न मम कल्पते तादृशमिति सूत्रार्थः ॥ ६२ ॥

एवं उस्सिक्किया ओसक्किया उज्जालिया पज्जालिया निव्वाविया उस्सिंचिया निस्सिंचिया ओवत्तिया ओयारिया दए ॥ ६३ ॥

यावद्भिक्षां ददामि तावद् मा भूद् विध्यास्यतीत्युत्सिच्य दद्यात् । (एवं ओसक्किया) अवसर्प्य, अतिदाहभयादुल्मुकान्युत्सार्येत्यर्थः । (एवं उज्जालिया पज्जालिया) उज्ज्वाल्यार्द्रेन्धनं सकृदिन्धनप्रक्षेपेण, प्रज्वाल्य पुनः पुनः । एवं (निव्वाविया) निर्वाप्य, दाहभयादेवेति भावः । एवं (उस्सिंचिया निस्सिंचिया) उत्सिच्यातिभृतादुज्झनभयेन, ततो वा दानार्थं तीमनाऽऽदीनि निषिच्य तद्भाजनाऽर्हितं ऊष्यमन्यत्र भाजने तेन दद्यात् । उद्वर्तनभयेन वा तदर्हितमुदकेन निषिच्य । एवं (ओवत्तिया ओयारिआ) अपवर्त्य तेनैवाग्निनिक्षिप्तेन भाजनेना-

म्येन वा दद्यात्। तथा अवतार्य दाहभयाद्वानार्थं वा दद्यात्। अत्र तदन्यस्य साधुनिमित्तयोगे न कल्पते ॥ ६३ ॥

तं भवे भत्तपाणं तु, संजयाण अकप्पियं ।
दिंतियं पडिआइक्खे, न मे कप्पइ तारिसं ॥ ६४ ॥

"तं भवे त्ति" सूत्रं पूर्ववत्। गोचराधिकार एव गोचरप्रविष्टस्य ॥ ६४ ॥ दश० ५ अ० १ उ०।

से भिक्खू वा भिक्खुणी वा०जाव समाणे से जं पुण पाणगजायं जाणेज्जा अणंतरहियाए पुढवीए० जाव संताणए ओहट्टु २ णिक्खित्ते सिया, असंजए भिक्खुपडियाए उदउल्लेण वा ससणिद्धेण वा सकसाएण वा मत्तेण वा सीतोदएण वा संभोएत्ता आहट्टु दलएज्जा, तहप्पगारं पाणगजायं अफासुयं लाभे संते णो पडिगाहेज्जा। एयं खलु तस्स भिक्खुस्स वा भिक्खुणीए वा सामग्गियं जं सव्वट्ठेहिं समिएहिं सहिएहिं सदा जएज्जासि त्ति बेमि।

(से भिक्खू वेत्यादि) स भिक्षुर्यत्पुनरेवं जानीयात्-तत्पानकं सचित्तेष्वव्यवहितेषु पृथिवीकायाऽऽदिषु तथा मर्कटाऽऽदिसन्तानके वाऽन्यतो भाजनादुद्धृत्योद्धृत्य निक्षिप्तं व्यवस्थापितं स्यात्। यदि वा स एवासंयतो गृहस्थो भिक्षुप्रतिज्ञया भिक्षुमुद्दिश्य उदकार्द्रेण गलद्बिन्दुना सस्निग्धेन गलदुदकबिन्दुना सकषायेण सचित्तपृथिव्याद्यवयवगुण्डितेन मात्रेण भाजनेन शीतोदकेन वा (संभोएत्ता) मिश्रयित्वा, आहृत्य दद्यात्। तथाप्रकारं पानकजातमप्रासुकमनेषणीयमिति मत्वा न परिगृह्णीयात्। एतत्तस्य भिक्षोर्भिक्षुण्या वा सामग्र्यम्-समग्रो भिक्षुभाव इति। आचा० २ श्रु० १ चू० १ अ० ७ उ०।

जे भिक्खू असणं वा पाणं वा खाइमं वा साइमं वा अणंतरं वा पुढवीकायपतिट्ठियं दिज्जमाणं पडिगाहेइ, पडिगाहंतं वा साइज्जइ ॥२५१॥ जे भिक्खू असणं वा० ४ आउकायपइट्ठियं दिज्जमाणं पडिगाहेइ, पडिगाहंतं वा साइज्जइ ॥ २५२ ॥ जे भिक्खू असणं वा० ४ तेउकायपइट्ठियं दिज्जमाणं पडिगाहेइ, पडिगाहंतं वा साइज्जइ ॥ २५३ ॥ जे भिक्खू असणं वा० ४ वणप्फतिकायपइट्ठियं दिज्जमाणं पडिगाहेइ, पडिगाहंतं वा साइज्जइ ॥ २५४ ॥

गाहा-

सचित्तमीसएसुं, कायेसु य होति दुविह निक्खित्तं ।
अणंतर परंपरं वि य, विभासियव्वं जहा सुत्ते ॥ ५० ॥

जे पुढवादीकाया, ते दुविहा-सचित्ता, मीसा वा। सचित्तेसु अणंतरणिक्खित्तं, परंपरणिक्खित्तं वा। मीसेसु वि अणंतरणिक्खित्तं, परंपरणिक्खित्तं वा। पिंडणिज्जुत्तिगाहासुत्ते जहा, तहा सचित्तरं भाणियव्वं। आयारवितियसुयक्खंधे वा जहा सचित्तपिंडेसणासुत्तं, तहा जाणियव्वं।

गाहा-

सुत्तणिवातो अचि-त्तऽणंतरे तं तु गेण्हती जो उ।
सो आणा अणवत्थं, मिच्छत्तविराहणं पावे ॥ ५१ ॥

परित्तसचित्तेसु अणंतरणिक्खित्ते चउलहुं। एत्थ सुत्तं विवरति। सचित्तपरंपरे मासलहुं। मीसे अणंतरे मासलहुं। परंपरे पणगं। अणंतरा ते चेव गुरुगा पच्छित्तेण।

चोदगाऽऽह-

तत्थ भवे णणु एवं, उक्खिप्पं तम्मि तेसि आसासो।
संजतणिमित्त घट्टण, थेरुवमाएणं तऽभुत्तं ॥ ५२ ॥

पुढवादिकायाण उवरि ट्ठियं जं पि उक्खिप्पं, तेण तेहिं आसासो भवति। आचार्याऽऽह-तम्मि उक्खिप्पंते जा संघट्टणा, सा संजयणिमित्तं। ताण य अप्पसंघट्टणाण संघट्टणाए महंती वेदणा भवति। एत्थ थेरुवमा।

गाहा-

जरजज्जरो उ थेरो, तरुणेणं जमलपाणिपुमहंतो।
जारिसवेदणं देहे, एगिंदियघट्टिते तह उ ॥ ५३ ॥

जहा जराजुण्णदेहो थेरो बलवता तरुणेण जमलपाणिणा सुट्ठु आहतो जारिसं वेयणं वेयति, ततो अधिकतरं एगिंदिया संघट्टिता वेयणं अणुहवंति, तम्हा ण जुत्तं जं तुमं भणसि।

इमं वितियपदं। गाहा-

असिवे ओमोयरिए, रायदुट्ठे भए व गेलण्णे।
अद्धाणरोहगे वा, जयणा गहणं तु गीयत्थे ॥५४॥

पूर्ववत्।

गीयत्थो इमाए जयणाए गहणं करेति। गाहा-

पुव्वं मीसे परंपर, मीसेऽणंतर सचित्तपरंपरए।
तत्तो सचित्तऽणंतरे, एमेव अणंतकाए वि ॥ ५५ ॥

पुव्वं मीसे परंपरट्ठितो गेण्हति, ततो मीसे अणंतरो, ततो सचित्ते परंपरे, ततो सचित्ते अणंतरे। एवं अणंतकाए वि। एस परित्ताणंतेसु कमो दरिसिओ।

गहणे पुण इमा जयणा-

पुव्विं परित्ते मीसपरंपरट्ठितो गेण्हति, ततो मीसं अणंतरपरंपरं, ततो सचित्तपरित्तपरंपरं, ततो अणंतमीसं अणंतरं, ततो अणंतसचित्तपरंपरं, ततो परित्तसचित्तअणंतरं, ततो अणंतसचित्तअणंतरं आहारे भणियं।

गाहा-

आहारे जो उ गमो, णियमा उवहिम्मि होति सो चेव।
णायव्वा तु मतिमता, पुव्वे अवरम्मि य पदम्मि ॥५६॥

कंठा ॥ ५६ ॥ नि० चू० १७ उ०। पाचकभाजनादनुद्धृते, औ०।

णिक्खित्तउक्खित्तचरय-निक्षिप्तोत्क्षिप्तचरक-पुं०। निक्षिप्तं भोजनपाऽथासुस्थितं च स्वार्थे, तत एव निक्षिप्तोत्क्षिप्तं, चरत्यभिग्रहवशेन इति निक्षिप्तोत्क्षिप्तचरकः। अनियहविशेषेण तथाविधभिक्षाचरके, औ०। स्था०।

णिक्खित्तचरय-निक्षिप्तचरक-पुं०। निक्षिप्तं पाकभाजनादनुद्धृतं तदर्थमभिग्रहतश्चरति तद्गवेषणाय गच्छतीति निक्षिप्तचरकः। अभिग्रहविशेषात् तथाभिक्षाचरणशीले, औ०।

णिक्खित्तदंड-निक्षिप्तदण्ड-त्रि०। निश्चयेन क्षिप्तः परित्यक्तः कायमनोवाङ्मयः प्राण्युपघातकारी दण्डो यैस्ते तथा।

आचा० १ श्रु० ४ अ० ३ उ० । निक्षिप्ताः संयमिता मनोवाक्कायरूपाः प्राण्युपमर्दकारिणो दण्डा यैस्ते तथा । त्रिविधेन करणेन परित्यक्तदण्डेषु, आचा० १ श्रु० ६ अ० १ उ० ।

णिक्खित्तपुव्व–निक्षिप्तपूर्व–त्रि० । पूर्वमेवाऽऽरब्धे निष्पादिते, आचा० २ श्रु० १ चू० २ अ० ३ उ० ।

णिक्खित्तभर–निक्षिप्तभर–त्रि० । न्यस्तकुटुम्बाऽऽदिकार्यभरे, पञ्चा० १० विव० ।

णिक्खित्तसत्थमुसल–निक्षिप्तशस्त्रमुशल–त्रि० । त्यक्तखड्गाऽऽदिशस्त्रमुशले, भ० ७ श० १ उ० ।

णिक्खिप्पमाण–निक्षिप्यमाण–त्रि० । स्वस्थाने न्यस्यमाने, " अग्गपिंडं उक्खिप्पमाणं, अग्गपिंडं णिक्खिप्पमाणं । " आचा० २ श्रु० १ चू० ४ अ० ५ उ० ।

णिक्खिवियव्व–निक्षेपयितव्य–त्रि० । मोक्तव्ये, प्रश्न० १ संव० द्वार ।

णिक्खिविउं–निक्षिप्य–अव्य० । निक्षेपं कारयित्वेत्यर्थे, व्य० १ उ० ।

णिक्खुड–देशी–अकम्पे, दे० ना० ४ वर्ग २८ गाथा ।

णिक्खुरिअ–देशी–अदृढे, दे० ना० ४ वर्ग ४० गाथा ।

णिक्खेव–निक्षेप–पुं० । निक्षेपणं निक्षेपः । शास्त्राऽऽदेर्नामस्थापनाऽऽदिभेदेन न्यासनं व्यवस्थापनं निक्षेपः । निक्षिप्यते नामाऽऽदिभेदैर्व्यवस्थाप्यते अनेनास्मिन्नस्मादिति वा निक्षेपः । अनु० । पिं० । यथाभूतार्थनिरपेक्षमभिधानमात्रे, आचा० १ श्रु० २ अ० १ उ० । स्था० । यथासंभवमावश्यकाऽऽदेर्नामाऽऽदिभेदप्ररूपणे, अनु० । उपक्रमाऽऽनीतव्याचिख्यासितशास्त्रनामाऽऽदिन्यसने, ज्ञं० १ वक्ष० ।

अथ निक्षेपस्य निरुक्तिमाह–

णिक्खिप्पइ तेण तहिं, तओ व निक्खेवणं व निक्खेवो ।
नियओ व निच्चिओ वा, खेवो नासो त्ति जं भणियं ॥१२॥

निक्षिप्यते शास्त्रमध्ययनोद्देशाऽऽदिकं च नामस्थापनाद्रव्याऽऽदिभेदैर्न्यस्यते व्यवस्थाप्यते अनेन, अस्मिन्, अस्माद्वेति निक्षेपः, गुरुवाक्योगाऽऽदिविवक्षा तथैव । अथवा–निक्षेपणं शास्त्राऽऽदेर्नामस्थापनाऽऽदिभेदैर्न्यसनं व्यवस्थापनमिति निक्षेपः । निरुक्तशब्दक्षेपशब्दयोरर्थमाह–नियतो निश्चितो वा क्षेपः–शास्त्राऽऽदेर्नामाऽऽदिन्यास इति निक्षेप इति यदुक्तम्, ज्ञायत्यर्थं परमार्थ इत्यर्थः ॥ ६१२ ॥ विशे० । आ० म० । उत्त० ।

तत्र जघन्यतोऽप्यसौ चतुर्विधो दर्शनीय इति–नियमार्थमाह–

जत्थ य जं जाणेज्जा, निक्खेवं निक्खिवे निरवसेसं ।
जत्थ वि अ न जाणेज्जा, चउक्कगं निक्खिवे तत्थ ॥

यत्र जीवाऽऽदिवस्तुनि यं जानीयान्निक्षेपं न्यासं, यस्तद्वेर्नित्याभिसम्बन्धात् तत्र वस्तुनि तं निक्षेपं निक्षिपेद् निरुपयेन्निरवशेषं समग्रम् । यत्राऽपि च न जानीयान्निरवशेषं निक्षेपभेदजातं, तत्रापि नामस्थापनाद्रव्यभावचतुष्कं चतुष्कं निक्षिपेत् । इदमुक्तं भवति–यत्र तावन्नामस्थापनाद्रव्यक्षेत्रकालभवभावाऽऽदिलक्षणा भेदा ज्ञायन्ते, तत्र तैः सर्वैरपि वस्तु निक्षिप्यते, यत्र तु सर्वे भेदा न ज्ञायन्ते, तत्राऽपि नामाऽऽदिचतुष्टयेन वस्तु चिन्तनीयमेव, सर्वव्यापकत्वात् तस्य । न हि किमपि तद्वस्त्वस्ति यन्नामाऽऽदिचतुष्टयं व्यभिचरतीतिगाथार्थः । अनु० । आव० । बृ० । आ० चू० । स० । आचा० । विशे० । नं० । आ० म० ।

निक्षेप ओघनिष्पन्नाऽऽदिः–

से किं तं णिक्खेवे ? । णिक्खेवे तिविहे पण्णत्ते । तं जहा–ओहनिप्पण्णे, नामनिप्पण्णे, सुत्तालावगनिप्पण्णे ॥

(से किं तं णिक्खेवे इत्यादि) निक्षेपः पूर्वोक्तशब्दार्थस्त्रिविधः प्रज्ञप्तः । तद्यथा–ओघनिष्पन्न इत्यादि, तत्रौघः सामान्यमध्ययनाऽऽदिकं श्रुतनिधानं, तेन निष्पन्न ओघनिष्पन्नः, नामश्रुतस्य सामायिकाऽऽदिविशेषं नाम, तेन निष्पन्नो नामनिष्पन्नः । सूत्राऽऽलापकः–" करेमि भंते ! सामाइयं " इत्यादिकः, तेन निष्पन्नः सूत्राऽऽलापकनिष्पन्नः ।

एतदेव भेदत्रयं विवरीषुराह–

से किं तं ओहनिप्पण्णे ? । ओहनिप्पण्णे चउव्विहे पण्णत्ते । तं जहा–अज्झयणे, अक्खीणे, आए, खवणा ॥ अनु० ।

(एषां व्याख्या स्वस्वस्थाने)

नामनिष्पन्नः–

से किं तं नामनिप्पण्णे ? । नामनिप्पण्णे सामाइए समासओ चउव्विहे पण्णत्ते । तं जहा–णामसामाइए, ठवणासामाइए, दव्वसामाइए, भावसामाइए । अनु० ।

नामनिष्पन्ननिक्षेपस्तु गुणनिष्पन्ननामकस्यैवेति । सूत्र० १ श्रु० ए अ० ।

सूत्राऽऽलापकनिष्पन्नः–

से किं तं सुत्तालावगनिप्पण्णे ? । इआणिं सुत्तालावगनिप्पण्णं निक्खेवं इच्छावेइ, से अपत्तलक्खणो वि ण णिक्खिप्पइ । कम्हा ?, लाघवत्थं । अत्थि तइए अणुओगदारे अणुगमे त्ति, तत्थ णिक्खित्ते इहं णिक्खित्ते भवइ, इह वा णिक्खित्ते तत्थ णिक्खित्ते भवइ, तम्हा इहं न निक्खिप्पइ, तहिं चेव निक्खिप्पइ, सेत्तं निक्खेवं । अनु० ।

(से किं तं सुत्तालावग इत्यादि) अथ कोऽयं सूत्रालापकनिष्पन्नो निक्षेपः–" करेमि भंते ! सामाइयं । " इदानीं सूत्राऽऽलापकानां आपनाऽऽदिभेदभिन्नो यो न्यासः, स सूत्राऽऽलापकनिष्पन्नो, निक्षेप इति शेषः । अनु० । स्था० । आचा० । आव० । आ० म० । विशे० । नि० चू० । सूत्र० । बृ० । आ० चू० । व्य० । (कस्य नयस्य मते को निक्षेप इति निक्षेपनययोजना 'णय' शब्देऽस्मिन्नेव भागे १८७६ पृष्ठे उक्ता) (नामाऽऽदिनिक्षेपस्य नयविचारः ' णमोक्कार ' शब्देऽस्मिन्नेव भागे १८२४ पृष्ठे गतः) (स्थापनानिक्षेपाऽनुपगन्तॄणां सुप्तकानां मतं ' चेइय ' शब्दे तृतीयभागे १२०६ पृष्ठे खण्डितम्) अप्रस्तुतार्थापाकरणात् प्रस्तुतार्थव्याकरणाच्च निक्षेपः फलवान् । व्य० १ उ० । विन्यासे, विशे० । प्रश्न० । आ० म० । गुणनिक्षेपणे, व्य० ४ उ० । मोक्षे, पं० व० ४ द्वार । मोचने, ओघ० । परित्यागे, आचा० २ श्रु० १ चू० १ अ० १ उ० ।

णिक्खेवग–निक्षेपक–पुं० । भावे णकप्रत्ययं निक्षेपणे (पदन्यासनिक्षेपकः ' वत्थ ' शब्दे वक्ष्यते)

णिक्खेवण–निक्षेपण–न० । निक्षेपे, स्थापने, प्रव० ६ द्वार।

पृथिव्यादौ निक्षिपति–

जे भिक्खू असणं वा पाणं वा खाइमं वा साइमं वा पुढवीए णिक्खिवइ, णिक्खिवंतं वा साइज्जइ ॥३६॥

जे भिक्खू असणं वा० ४ संथारए णिक्खिवइ, णिक्खिवंतं वा साइज्जइ ॥३७॥

गाहा–

पुढवीतणकट्ठादिसु, संथारे तह य होइ वेहासे।
जे भिक्खू णिक्खिवती, सो पावति आणमादीणि ॥६६७॥

पुढविगहणतो ओवट्टगादिभेदा दट्ठव्वा। दब्भाऽऽदितणसंथारए वा, कट्ठसंथारए वा, कंचइऽऽदिफलसंथारे वा, वेहासे वा दोरगेण उल्लेवेइ, एवमादिपगाराण अण्णयरेण जो णिक्खिवइ, तस्स चउलहुं, आणादिया य दोसा, संजमाऽऽयविराहणा ॥

तं तत्थ संजमे। गाहा–

तक्केंत परंपरओ, पलोट्ट छिप्पे व भेद कायवहो।
अहिमूसलाक्षविच्छुय–संचयदोसा पसंगो वा ॥६६८॥

सुण्णे जत्तपाणे चउरिंदिया घरकोइला तक्केंति, तं पि मज्जारी, एवं तक्केंतपरंपरो छुप्पेज्ज वाताऽऽदिवसेण वा पलोट्टेति छक्कायविराहणा, आयपरिहाणी, वेहासट्ठितं मूसगादिछिप्पे भायणभेदो, छक्कायवहो, आयपरिहाणी य। एसा संजमविराहणा। इमा आयविराहणा–अहिस्स, मूसगादिस्स वा सिंघमाणस्स वाला पमेज्जा, णीससंतो वा विसं वा मुंचेज्ज, विच्छुगाइ वा पमेज्ज, जे वा संणिहिसंचए दोसा, तत्थ वि णिक्खित्ते ते चेव दोसा, पसंगओ संनिहिं पट्ठवेज्जा। किं च–जो जत्तपाणं णिक्खिवइ।

गाहा–

सो समणसुविहियाणं, कप्पातो अवचितो त्ति णायव्वा।
दसरायम्मि य पुण्णे, जो उवहिं सो उवहतो होति ॥६६९॥

समणकप्पो तम्मि अवचिओ अपगतः, समणकप्पातो वा अवगओ, एवं णिक्खिवंतस्स दस राते गते जम्मि पाते तं भत्तादि णिक्खिवइ, तं उवहतं होइ, जो य उवहिणिक्खित्तो अत्थइ, दसराइं अपमिलेहिओ, सो वि उवहतो भवति।

गाहा–

उव्वट्टपीढफलगं–तुसंगतं उवितजत्तपाणं तु।
सुविहितकप्पा चवितं, सेयत्थि विवज्जए साहू ॥६७०॥

संथारगाऽऽदियाणं बंधे जो पक्खस्स ण मुंचइ सो उव्वट्टो, णिक्खित्तभत्तपाणो य जो सो सुविहितकप्पातो अवगतो, जो सेयत्थी साधू, तेण वज्जेयव्वो, ण तेण सह संजोगो कायव्वो।

इमो अववातो। गाहा–

बितियपदं गेलण्णे, रोहग अद्धाण उत्तिमट्ठो वा।
एतेहिं कारणेहिं, जयणाए णिक्खिवे भिक्खू ॥६७१॥

गिलाणकज्जवावडो णिक्खिवति, रोहगे वा संकमवसहीए वेहासे करेति, अद्धाणे वा सागारिए भुंजमाणो उत्तिमट्ठं पवण्णस्स वा करणिज्जं करेंतो णिक्खिवति।

एवमादिकारणेहिं णिक्खिवंतो इमाए जयणाए णिक्खिवति। गाहा–

दूरगमणे णिसिं वा, वेहासे इहरहा तु संथारे।
भूमीए ठवेज्ज व णं, घणबंध अभिक्ख उवओगो ॥६७२॥

दूरं गंतुकामो णिसिं वा जं परिवासिज्जति, तं वेहासे दोरगेण णिक्खिवति (इहरहेति) आसण्णे गंतुकामो आसण्णे वा किंचि खोयमादी काउंकामो तत्थ संथारे भूमीए वा ठवेइ। वकारो विगप्पे, णकारो पादपूरणे, तं पि उवेंतो घणं चीरेण बंधइ, पिपीलिगनया डगणादीहिं वा लिंपइ, अभिक्खणं च उवओगं करेति।

जे भिक्खू असणं वा० ४ उवहासे णिक्खिवइ, णिक्खिवंतं वा साइज्जइ ॥ नि० चू० १६ उ०।

(उपहासेऽज्ञानाऽऽदिनिक्षेपे प्रायश्चित्तं 'अणउत्थिय' शब्दे प्रथमभागे ४७१ पृष्ठे गतम्)

णिक्खेवणा–निक्षेपणा–स्त्री० । दलिकनिक्षेपे, क० प्र० ४–५ प्रक०। ('उव्वट्टणा' शब्दे द्वि० भा० ११९० पृष्ठे 'अववट्टणा' शब्दे प्र० भा० ७९९ पृष्ठे च व्याख्यातेयम्)

णिक्खेवणाहिगरण–निक्षेपणाधिकरण–न० । प्रतिलेखनाप्रमार्जनाऽऽद्यकरणेनोत्पन्नेऽधिकरणे, नि० चू० ४ उ०।

णिक्खेवणिज्जुत्तिअणुगम–निक्षेपनिर्युक्त्यनुगम–पुं० । निक्षेपो नामस्थापनाऽऽदिभेदभिन्नः, तद्विषया या निर्युक्तिः निक्षेपनिर्युक्तिः, तस्या वाऽनुगमो निक्षेपनिर्युक्त्यनुगमः। निर्युक्त्यनुगमभेदे, (अनु०)

से किं तं णिक्खेवणिज्जुत्तिअणुगमे ?। णिक्खेवणिज्जुत्तिअणुगमे अणुगए। सेत्तं णिक्खेवणिज्जुत्तिअणुगमे।

अत्रैव प्रागावश्यकसामायिकाऽऽदिपदानां नामस्थापनाऽऽदिनिक्षेपद्वारेण यद् व्याख्यानं कृतं, तेन निक्षेपनिर्युक्त्यनुगमोऽनुगतः प्रोक्तो द्रष्टव्यः। अनु०।

णिक्खेवय–निक्षेपक–पुं० । निक्षेपणं निक्षेपकः। "नाम्नि पुंसि च" ॥ ५। ३। १२१॥ इति। (हैम०) भावे णकप्रत्ययः। प्रथमं स्वार्थे निक्षिप्य पश्चात् साधूनामनुज्ञाने, बृ० १ उ०। निगमने, यथा–"एवं खलु जंबू! समणेणं० जाव सवासगदसाणं पढमस्स अज्झयणस्स अयमट्ठे पण्णत्ते त्ति बेमि।" उपा० १ अ०।

णिक्खोज्ज–निष्क्षोज्य–त्रि० । निष्प्रकम्पे, दर्श० ४ तत्त्व। धादिना क्षोभयितुमशक्ये, स० २ अङ्ग।

णिखव्व–निखर्व–न० । शतगुणिते खर्वे, कल्प० ७ क्षण।

णिखिल–निखिल–न०। समस्ते, अनु०।

णिगच्छमाण–निर्गच्छत्–त्रि० । बहिर्गच्छति, नि० चू० ६ उ०।

णिगाजिय–निगृह्य–अव्य० । निग्रहं कारयित्वेत्यर्थे, "पाए णिगिजिय पप्फोमेमाणे।" स्था० ७ ठा०।

णिगढ–देशी–धर्मे, दे० ना० ४ वर्ग २७ गाथा।

णिगम–निगम–पुं० । प्रभूततरवणिग्वर्गवासे, आचा० १ श्रु० ७ अ० ६ उ०। स्था०। अनु०। जीव०। सूत्र०। प्रश्न०। व्य०। प्रज्ञा०। वणिग्जनप्रधाने स्थाने, भ० १ श० १ उ०। जी०। प्रज्ञा०। वणिग्जनाधिष्ठिते सन्निवेशे, ज्ञा० १ श्रु० ८ अ०। प्रका०। पौरवणिगविशेषे, सू० २ श्रु०। वाणिजकसमूहे, स०

३० सम० । आचा० । दश० । दशा० । वणिजि, भ० ७ श० ६ उ० । " णिगमो णेगमवग्गो वसइ जहिं । " निगमं नाम यत्र नैगमा वाणिजकविशेषाः, तेषां वर्गः समूहो वसति । अत एव निगमे भवा नैगमा इति व्यपदिश्यन्ते । कृ० १ उ० । आव० । स्था० । कारणिके, भ० ७ श० ६ उ० । नि० चू० । सामान्यविशेषाऽऽत्मकस्य वस्तुनो नैकेन प्रकारेणावगमः परिच्छेदो निगमः । सूत्र० २ श्रु० ७ अ० । आ० म० । निश्चितार्थबोधे, स्था० ३ ठा० ३ उ० । "लोगत्थनिबोहा वा णिगमा" (२१७७) लोकार्थनिबोधाः-अर्थाः जीवाऽऽदयः,तेषु नितरामनेकप्रकारा बोधा लोकस्यार्थनिबोधा लोकार्थनिबोधाः । विशे० । विचित्रेष्वभिग्रहविशेषेषु, रा० ।

णिगमण–निगमन–न० । निश्चितं गमनं निगमनम् । निश्चितेऽवसाये, तच्चानुमानस्य दशमोऽवयवः । दश० १ अ० । आ० क० । निगमनं लक्षयन्ति–

साध्यधर्मस्य पुनर्निगमनम् ॥५१॥

साध्यधर्मिण्युपसंहरणमिति योगः ।

यथा तस्मादग्निरत्र ॥५२॥ रत्ना० ३ परि० ।

निगमनाऽऽभासमुदाहरन्ति–

तस्मिन्नेव प्रयोगे तस्मात्कृतकः शब्द इति तस्मात्परिणामी कुम्भ इति च ॥ ८२ ॥

अत्रापि साधनधर्मे साध्यधर्मिणि, साध्यधर्मे वा दृष्टान्तधर्मिण्युपसंहरतो निगमनाऽऽभासः । एवं पञ्चावयवपक्षकस्य भ्रान्त्या वैपरीत्यप्रयोगे तदाभासपञ्चकमपि तर्कणीयम् ॥८२॥ रत्ना० ६ परि० । विशे० ।

णिगर–निकर–पुं० । राशिमात्रे, विपा० १ श्रु० ६ अ० । ज्ञा० । वृन्दे, दलनिकरो दलवृन्दम् । ज्ञा० १ श्रु० ६ अ० । हिरण्यरूप्याऽऽदिनिकरवल्लिकरः । भावस्कन्धे, अनु० ।

णिगलिय–निगरित–त्रि० । जं० २ वक्ष० । सर्वथा शोधिते सारीकृते, त० ।

णिगाम–निकाम–न० । अत्यर्थे, स्था० ५ ठा० २ उ० । आव० ।

णिगामपडिसेवणी–निकामप्रतिसेविनी–स्त्री० । निकाममत्यर्थं बीजपातं यावत् पुरुषं प्रतिसेवते इत्येवं शीला निकामप्रतिसेविनी । बीजपातं यावन्मैथुनकर्मकारिकायाम्,सा च पुरुषसंयुक्ताऽपि गर्भं नो धरते । स्था० ५ ठा० २ उ० ।

णिगामसज्जा–निकामशय्या–स्त्री० । शयनं शय्या,निकामं शय्या निकामशय्या । प्रतिदिवसं प्रकामशय्यायाम्,ध० ३ अधि० । आव० ।

णिगामभोयण–निकामभोजन–न० । " बत्तीसाइपरेणं, पगाम निच्चं तमेव च निगामं । " प्रमाणातीतमाहारं प्रतिदिवसमश्नतो भोजने, पिं० ।

णिगामसाइ [ण्]–निकामशायिन्–पुं० । सूत्रार्थवेत्रामप्युल्लङ्घ्य शयाने, " ..... णिगामसाइस्स । उच्छोलणापहोअस्स दुल्लहा सुगइ तारिसगस्स" ॥ २६ ॥ दश० ४ अ० ।

णिगास–निकर्ष–पुं० । सन्निकर्षे, पुलाकाऽऽदिना परस्परेण संयोजने, भ० २५ श० ७ उ० ।

णिगिज्झ–निगृह्य–अव्य० । स्थित्वेत्यर्थे,कल्प० ६ क्षण । व्य० । स्था० ।

णिगुंज–निकुञ्ज–पुं० । निःशेषेण कौ जायते जन–ड०–पृ० । लताऽऽदिपिहितस्थण्डे, वाच० । ओघ० । " एगम्मि वणनिगुंजे ठविऊण पंथे आगतो । " आ० म० १ अ० २ खण्ड ।

णिगूढ–निगूढ–त्रि० । गुप्ते, मौनिनि च । व्य० ७ उ० । कल्प० ।

णिगूढजाणु–निगूढजानु–त्रि० । गुप्तजानौ, कल्प० २ क्षण ।

णिगूहिय–निगूहित–त्रि० । गोपिते,आ० म० २ अ० । आचा० ।

णिगोय–निगोद–पुं० । अनन्तकायिके, प्रव० २५५ द्वार । सूक्ष्मबादरा निगोदाः पर्याप्ता अपर्याप्ताश्च एकस्मिन्निगोदेऽनन्ता जीवाः,अत्र निगोदः कः?, जीवाश्च के?, इति प्रश्ने,उत्तरम्-निगोदशब्देनेकं शरीरं वनस्पतिरूपं साधारणमनन्तजीवजनितमुच्यते, तत्र चानन्ता जीवास्तिष्ठन्ति, अत एव अनन्तकायिका जीवाः साधारणा उच्यन्ते । ६ प्र० । ही० ३ प्रका० ।

सम्प्रति यथैकस्मिन् निगोदशरीरे अनन्ता जीवाः परिणताः प्रतीतिपथमवतरन्ति, तथा प्रतिपादयन्नाह—

जह अयगोलो धंतो, जाओ तत्ततवणिज्जसंकासो ।
सव्वो अगणिपरिणओ, णिओयजीवे तहा जाण ।१९।
एगस्स दोण्ह तिण्ह व, संखेज्जाणं व पासिउं सक्का ।
दीसंति सरीराइं, णिओयजीवाणऽणंताणं ॥२०॥

"जह अयगोलो" इत्यादि । यथाऽयोगोलो ध्मातः सन्नुप्तस तप्ततपनीयसङ्काशः सर्वोऽग्निपरिणतो भवति, तथा निगोदजीवान् जानीहि । निगोदरूपेऽप्येकैकस्मिन् शरीरे तच्छरीराऽऽत्मकतया अनन्तान् जीवान् जानीहि ॥१९॥ एवं च सति (एगस्सेत्यादि) एकस्य द्वयोस्त्रयाणां यावत्सङ्ख्येयानां, वाशब्दादसङ्ख्येयानां वा निगोदजीवानां शरीराणि द्रष्टुं न शक्यानि । कुतः?, इति चेदुच्यते-अभावात् । न ह्येकाऽऽदिजीवगृहीतानि अनन्तवनस्पतिशरीराणि सन्ति,अनन्तजीवपिण्डाऽऽत्मकत्वात्तेषाम्, कथं तर्ह्युपलभ्यानीत्यत आह-(दीसंतीत्यादि) दृश्यन्ते शरीराणि निगोदजीवानां बादरनिगोदजीवानां अनन्तानाम् । ननु सूक्ष्मनिगोदजीवानां तेषां शरीराणामनन्तजीवसङ्घाताऽऽत्मकत्वेऽप्यनुपलभ्यस्वभावत्वात्, तथा सूक्ष्मपरिणामपरिणतत्वात्; अथ कथमेतदवसीयते?-निगोदरूपं शरीरं नियमादनन्तजीवपरिणामाविर्भावितं भवतीति? उच्यते,जिनवचनात्,तच्चेदम्-"गोला य असंखेज्जा, होंति निगोया असंखया गोले । एक्केको य निगोओ, अणंतजीवो मुणेयव्वो ॥ १ ॥ " प्रज्ञा० १ पद ।

निगोदभेदान् पृच्छति–

कतिविहे णं भंते ! णिओया पण्णत्ता ? । गोयमा ! दुविहा पण्णत्ता । तं जहा–णिओया य, णिओदजीवा य । निओया णं भंते ! कतिविहा पण्णत्ता ?। गोयमा ! दुविहा पण्णत्ता । तं जहा–सुहुमणिओया य, बादरनिओया य । सुहुमनिओया णं भंते ! कतिविहा पण्णत्ता ?। गोयमा ! दुविहा पण्णत्ता । तं जहा–पज्जत्तगा य, अपज्जत्तगा य । बायरनिओया वि दुविहा पण्णत्ता । तं जहा–पज्जत्तगा य,अपज्जत्तगा य । निओदजीवा णं भंते ! कतिविहा पण्णत्ता ?। गोयमा ! दुविहा पण्णत्ता । तं जहा–सुहुमनिओदजीवा य, बायरनिओदजीवा य । सुहुमनिगोदजीवा दुविहा पण्णत्ता । तं

जहा-पज्जत्तगा य, अपज्जत्तगा य । बायरनिगोदजीवा दुविहा पण्णत्ता । तं जहा-पज्जत्तगा य, अपज्जत्तगा य ।

"णिओया णं भंते!" इत्यादि प्रश्नसूत्रं सुगमम । भगवानाह-गौतम ! द्विविधाः प्रज्ञप्ताः । तद्यथा-सूक्ष्मनिगोदाश्च,बादरनिगोदाश्च।तत्र सूक्ष्मनिगोदाः सर्वलोकाऽऽपन्नकाः,बादरनिगोदाः मूलकन्दाऽऽदयः। (सुहुमनिओया णमित्यादि) सूक्ष्मनिगोदा भदन्त ! कतिविधाः प्रज्ञप्ताः ? । भगवानाह-गौतम ! द्विविधाः प्रज्ञप्ताः । तद्यथा-पर्याप्तकाः, अपर्याप्तकाश्च । एवं बादरनिगोदविषयमपि सूत्रं वक्तव्यम ।

संप्रति सामान्यतो निगोदसंख्यां जिज्ञासिषुः पृच्छति-

निओदा णं भंते ! दव्वट्ठयाए किं संखेज्जा, असंखेज्जा, अणंता ?। गोयमा ! नो संखेज्जा,असंखेज्जा,नो अणंता । एवं पज्जत्तगा वि,अपज्जत्तगा वि । सुहुमनिओदा णं भंते! दव्वट्ठयाए किं संखेज्जा, असंखेज्जा,अणंता ?। गोयमा ! नो संखेज्जा,असंखेज्जा,नो अणंता । एवं पज्जत्तगा वि,अपज्जत्तगा वि, एवं बायरा वि पज्जत्तगा वि, अपज्जत्तगा वि, नो संखेज्जा, असंखेज्जा, नो अणंता । निओयजीवा णं भंते ! दव्वट्ठयाए किं संखेज्जा, असंखेज्जा, अणंता ?। गोयमा ! नो संखेज्जा, नो असंखेज्जा, अणंता । एवं पज्जत्ता वि, अपज्जत्ता वि । एवं सुहुमनिओयजीवा वि पज्जत्तगा वि, अपज्जत्तगा वि । बादरनिओयजीवा वि पज्जत्तगा वि, अपज्जत्तगा वि ।

"निओया णं" इत्यादि । निगोदा जीवाऽऽश्रयविशेषाः । भदन्त ! द्रव्यार्थतया द्रव्यरूपतया किं संख्येया असंख्येया अनन्ता वा ?। भगवानाह-गौतम ! नो संख्येयाः,अङ्गुलासंख्येयभागावगाहनानां तेषां सर्वलोकाऽऽपन्नत्वात्,किं त्वसंख्येयाः,असंख्येयलोकाऽऽकाशप्रदेशप्रमाणत्वात् । नाप्यनन्ताः, तथा केवलवेदसाऽनुपपन्नत्वात् । एवमपर्याप्तसामान्यनिगोदसूत्रं पर्याप्तसामान्यनिगोदसूत्रं भावनीयम् । यथा च सामान्यनिगोदविषयसूत्रत्रयमुक्तमेवं सूक्ष्मनिगोदविषयमपि सूत्रत्रयं बादरनिगोदविषयमपि सूत्रत्रयं पृथक् वक्तव्यम् । भावना च पूर्वानुसारेण स्वयं विधेया । तदेवं द्रव्यार्थताविषयाणि नव सूत्राण्युक्तानि ।

संप्रति प्रदेशार्थताविषयाणि नव सूत्राणि विवक्षुः प्रथमतः सामान्यतो निगोदविषयं सूत्रमाह-

निओदा णं भंते ! पदेसट्ठयाए किं संखेज्जा पुच्छा ? । गोयमा ! णो संखेज्जा, णो असंखेज्जा, अणंता । एवं पज्जत्तगा वि, अपज्जत्तगा वि । एवं सुहुमनिओया वि पज्जत्तगा वि, अपज्जत्तगा वि, पएसट्ठयाए सव्वे अणंता । एवं बायरनिओया वि पज्जत्तया वि, अपज्जत्तया वि, पएसट्ठयाए सव्वे अणंता । एवं निओदजीवा वि सत्तविहा पएसट्ठयाए सव्वे अणंता ।

" निओदा णं भंते ! पएसट्ठयाए" इत्यादि । निगोदा उक्तस्वरूपाः, णमिति वाक्यालङ्कारे । भदन्त ! प्रदेशार्थतया प्रदेशरूपतया चिन्त्यमाना किं संख्येया असंख्येया अनन्ता वा ?। भगवानाह-गौतम ! नो संख्येया नो असंख्येयाः, किन्तु अनन्ताः, एकैकस्मिन् निगोदे प्रदेशानामनन्तत्वात् । एवं शेषाण्यष्टौ सूत्राणि पूर्वक्रमेण भावनीयानि ।

सम्प्रत्येतेषामेव सूक्ष्मबादरपर्याप्तापर्याप्तनिगोदानां द्रव्यार्थ-प्रदेशार्थोभयार्थतया परस्परमल्पबहुत्वमाह-

एतेसि णं भंते ! निओयाणं सुहुमाणं बायराणं पज्जत्तगाणं अपज्जत्तगाणं दव्वट्ठयाए पएसट्ठयाए दव्वट्ठपएसट्ठयाए कयरे० २ जाव विसेसाहिया वा ?। गोयमा ! सव्वत्थोवा बायरनिओया पज्जत्तगा दव्वट्ठयाए, बादरनिगोदा अपज्जत्तगा दव्वट्ठयाए असंखेज्जगुणा,सुहुमनिओया अपज्जत्तगा दव्वट्ठयाए असंखेज्जगुणा,सुहुमनिओदा पज्जत्तगा दव्वट्ठयाए संखेज्जगुणा । एवं पदेसट्ठयाए वि । दव्वट्ठपएसट्ठयाए सव्वत्थोवा बादरनिओया पज्जत्तया दव्वट्ठयाए० जाव सुहुमनिओदा पज्जत्तया दव्वट्ठयाए संखेज्जगुणा, सुहुमनिओएहिंतो पज्जत्तएहिंतो दव्वट्ठयाए बादरनिगोदा पज्जत्ता पएसट्ठयाए अणंतगुणा, बायरणिओदा अपज्जत्तगा पएसट्ठयाए असंखेज्जगुणा०जाव सुहुमनिओया पज्जत्ता पएसट्ठयाए संखेज्जगुणा । एवं निओयजीवा वि, णवरिं संकमए० जाव सुहुमनिओयजीवेहिंतो पज्जत्तएहिंतो दव्वट्ठयाए बायरनिओया जीवा पज्जत्ता पएसट्ठयाए असंखेज्जगुणा, सेसं तहेव० जाव सुहुमनिओयजीवा पज्जत्ता पएसट्ठयाए संखेज्जगुणा ।

"एतेसि णं भंते ! निगोदा णं" इत्यादि प्रश्नसूत्रं सुगमम । भगवानाह-गौतम ! सर्वस्तोका बादरनिगोदा मूलकन्दाऽऽदिगताः पर्याप्तका द्रव्यार्थतया, प्रतिनियतक्षेत्रवर्तित्वात्, तेभ्यो बादरनिगोदा अपर्याप्ता द्रव्यार्थतया असंख्येयगुणाः, एकैकपर्याप्तबादरनिगोदनिश्रया असंख्येयानामपर्याप्तानां बादरनिगोदानामुत्पादात्,तेभ्यः सूक्ष्मनिगोदा अपर्याप्तका द्रव्यार्थतया असंख्येयगुणाः, सकललोकाऽऽपन्नतया क्षेत्रस्य संख्येयगुणत्वात्, तेभ्यः सूक्ष्मनिगोदाः पर्याप्ता द्रव्यार्थतया संख्येयगुणाः, सूक्ष्मोद्घोतोऽपर्याप्तेभ्यः पर्याप्तानां संख्येयगुणत्वात् । (पएसट्ठयाए इति) अत ऊर्द्धं प्रदेशार्थतया चिन्ता क्रियते, तामेव करोति-सर्वस्तोकाः बादरनिगोदाः पर्याप्ताः प्रदेशार्थतया, द्रव्याणां स्तोकत्वात् । तेभ्यो बादरनिगोदा अपर्याप्ताः प्रदेशार्थतया असंख्येयगुणाः, द्रव्याणामसंख्येयगुणत्वात् । एवं तेभ्यः सूक्ष्मनिगोदा अपर्याप्ताः प्रदेशार्थतया असंख्येयगुणाः, तेभ्यः सूक्ष्मनिगोदाः पर्याप्ताः प्रदेशार्थतया संख्येयगुणाः । (दव्वट्ठपएसट्ठयाए इति) अधुना द्रव्यार्थप्रदेशार्थतया चिन्ता क्रियते-सर्वस्तोका बादरनिगोदाः पर्याप्ताः द्रव्यार्थतया, बादरनिगोदा अपर्याप्ताः द्रव्यार्थतया असंख्येयगुणाः, तेभ्यः सूक्ष्मनिगोदा अपर्याप्ता द्रव्यार्थतया असंख्येयगुणाः, तेभ्यः सूक्ष्मनिगोदाः पर्याप्ता द्रव्यार्थतया संख्येयगुणाः । अत्र सर्वत्राऽपि युक्तिः प्राक्तनेव । तेभ्यो बादरा निगोदाः पर्याप्ताः प्रदेशार्थतया अनन्तगुणाः, एकैकनिगोदस्यानन्ताणुकानन्तस्कन्धनिष्पन्नत्वात् । तेभ्यो बादरनिगोदा अपर्याप्ताः प्रदेशार्थतया असं-

ख्येयगुणाः, द्रव्याणामसंख्येयगुणत्वात् । तेभ्यः सूक्ष्मनिगोदा अपर्याप्ताः प्रदेशार्थतया असंख्येयगुणाः । युक्तिः प्राक्तनीयैव । तेभ्यः सूक्ष्मनिगोदाः पर्याप्ताः संख्येयगुणाः, द्रव्याणां संख्येयगुणत्वात् । तदेवमुक्ता निगोदाः । अधुना निगोदजीवानाधिकृत्य भेदप्रश्नमाह- * "निगोयजीवा णं भंते !" इत्यादि सुगमम् । भगवानाह-गौतम ! निगोदजीवा द्विविधाः प्रज्ञप्ताः । तद्यथा-सूक्ष्मनिगोदा बादरनिगोदजीवाश्च । चशब्दौ निगोदजीवतया तुल्यतासूचकौ । एवमन्यत्रापि यथायोगं भावनीयौ । "सुहुमनिगोयजीवा णं भंते !" इत्यादि पर्याप्तापर्याप्तविषयं सूत्रं त्विदं पाठसिद्धम् । सम्प्रति द्रव्यार्थतया संख्यां पिपृच्छिषुराह- "सुहुमनिगोयजीवा णं भंते ! दव्वट्ठयाए" इत्यादि प्रश्नसूत्रं सुगमम् । भगवानाह-गौतम ! नो संख्येया नाप्यसंख्येयाः, किं त्वनन्ताः ; प्रतिनिगोदमनन्तानां निगोदजीवद्रव्याणां भावात् । एवमपर्याप्तसूत्रं वक्तव्यम् । तदेवं सामान्यतो निगोददव्यविषयं सूत्रकमुक्तम् । एवं सूक्ष्मनिगोदजीवविषयं सूत्रत्रिकं, बादरनिगोदजीवविषयं सूत्रत्रिकं वक्तव्यम् । सर्वसंख्यया नव सूत्राणि । एवमेव प्रदेशार्थतयाविषयाण्यपि नव सूत्राणि, नानात्वाभावात् । भावना सर्वत्रापि सुप्रतीता । ये किल द्रव्यार्थतयाऽनन्तास्ते प्रदेशार्थतया सुतरामनन्ताः, प्रतिद्रव्यमसंख्यातानां प्रदेशानां भावात् । सर्वसंख्यया चामून्यष्टादश सूत्राणि । साम्प्रतमेतेषामेव सूक्ष्मबादरपर्याप्तापर्याप्तनिगोदजीवानां द्रव्यार्थप्रदेशार्थोभयार्थतया परस्परमल्पबहुत्वमाह-"एएसि णं" इत्यादि । सर्वस्तोका बादरनिगोदजीवाः पर्याप्ता द्रव्यार्थतया, निगोदानां स्तोकत्वात्, तेभ्यो बादरनिगोदजीवा अपर्याप्ता द्रव्यार्थतया असंख्येयगुणाः, निगोदानामसंख्येयगुणत्वात् । तेभ्यः सूक्ष्मनिगोदजीवा अपर्याप्तका द्रव्यार्थतया असंख्येयगुणाः, तेभ्यः सूक्ष्मनिगोदजीवाः पर्याप्ता द्रव्यार्थतया संख्येयगुणाः । कारणं पूर्ववदूह्यम् । प्रदेशार्थतया सर्वस्तोका बादरनिगोदजीवाः पर्याप्ताः, प्रदेशार्थतया द्रव्याणां स्तोकत्वात्; तेभ्यो बादरनिगोदजीवा अपर्याप्ताः प्रदेशार्थतया असंख्येयगुणाः, द्रव्याणामसंख्येयगुणत्वात् । एवं तेभ्यः सूक्ष्मनिगोदजीवा अपर्याप्ताः प्रदेशार्थतया असंख्येयगुणाः, तेभ्यः सूक्ष्मनिगोदजीवाः पर्याप्ताः प्रदेशार्थतया, द्रव्यार्थप्रदेशार्थतया सर्वस्तोकाः, बादरनिगोदजीवाः पर्याप्ता द्रव्यार्थतया, तेभ्यो बादरनिगोदजीवा अपर्याप्ता द्रव्यार्थतया असंख्येयगुणाः, तेभ्यः सूक्ष्मनिगोदजीवा अपर्याप्ता द्रव्यार्थतया असंख्येयगुणाः, तेभ्यः सूक्ष्मनिगोदजीवाः पर्याप्ता द्रव्यार्थतया संख्येयगुणाः, तेभ्यो बादरनिगोदजीवा अपर्याप्ताः प्रदेशार्थतया असंख्येयगुणाः, प्रतिबादरनिगोदपर्याप्तजीवमसंख्येयानां प्रदेशानां भावात्, तेभ्यः सूक्ष्मबादरनिगोदजीवाश्च पर्याप्ताः प्रदेशार्थतया असंख्येयगुणाः, बादरनिगोदापर्याप्तेभ्यो बादरनिगोदपर्याप्तानामसंख्यातगुणत्वात् । तेभ्यः सूक्ष्मनिगोदजीवा अपर्याप्तकाः प्रदेशार्थतया असंख्येयगुणाः, तेभ्यः सूक्ष्मनिगोदजीवाः पर्याप्ताः प्रदेशार्थतया संख्येयगुणाः। भावना प्रागिव ।

सम्प्रति सूक्ष्मबादरपर्याप्तापर्याप्तनिगोदजीवानां द्रव्यार्थप्रदेशार्थोभयार्थतया परस्परमल्पबहुत्वमाह-

एतेसि णं भंते ! सुहुमाणं निगोदाणं बायराणं पज्जत्तगाणं अपज्जत्तगाणं निओयजीवाणं सुहुमाणं बायराणं पज्जत्तगाणं अपज्जत्तगाणं दव्वट्ठयाए पएसट्ठयाए दव्वट्ठपएसट्ठयाए कयरे २० जाव विसेसाहिया वा ?। गोयमा ! सव्वत्थोवा बायरनिओया पज्जत्ता दव्वट्ठयाए, बायरनिओदा अपज्जत्ता दव्वट्ठयाए असंखेज्जगुणा, सुहुमनिगोदा अपज्जत्ता दव्वट्ठयाए असंखेज्जगुणा, सुहुमनिओदा पज्जत्ता दव्वट्ठयाए संखेज्जगुणा, सुहुमनिओएहिंतो पज्जत्तएहिंतो दव्वट्ठयाए बायरनिओदजीवा पज्जत्ता अणंतगुणा, बायरनिओदजीवा अपज्जत्ता दव्वट्ठयाए असंखेज्जगुणा, सुहुमनिओयजीवा अपज्जत्ता दव्वट्ठयाए असंखेज्जगुणा. सुहुमनिओयजीवा पज्जत्ता दव्वट्ठयाए संखेज्जगुणा,पएसट्ठयाए सव्वत्थोवा,बायरनिओदजीवा पज्जत्ता पएसट्ठयाए,बायरनिओदजीवा अपज्जत्ता पएसट्ठयाए असंखेज्जगुणा, सुहुमनिओयजीवा अपज्जत्ता पएसट्ठयाए असंखेज्जगुणा, सुहुमनिओदजीवा पज्जत्ता पएसट्ठयाए संखेज्जगुणा, सुहुमनिओदजीवेहिंतो पज्जत्तएहिंतो बायरनिओया पज्जत्ता पदेसट्ठयाए अणंतगुणा, बायरनिओया अपज्जत्ता पएसट्ठयाए असंखेज्जगुणा० जाव सुहुमनिओया पज्जत्ता पएसट्ठयाए संखेज्जगुणा, दव्वट्ठपदेसट्ठयाए सव्वत्थोवा, बायरनिओया पज्जत्ता दव्वट्ठयाए, बायरनिओदा अपज्जत्ता दव्वट्ठयाए असंखेज्जगुणा० जाव निगोदा पज्जत्ता दव्वट्ठयाए संखेज्जगुणा, सुहुमनिओएहिंतो पज्जत्तएहिंतो बायरनिओदजीवा पज्जत्ता दव्वट्ठयाए अणंतगुणा, सेसा तहेव० जाव सुहुमनिओदजीवा पज्जत्तगा दव्वट्ठयाए संखेज्जगुणा,सुहुमनिओयजीवेहिंतो पज्जत्तएहिंतो दव्वट्ठयाए बायरनिओयजीवा पज्जत्ता, पएसट्ठयाए असंखेज्जगुणा, सेसं तहेव० जाव सुहुमनिओया पज्जत्ता पएसट्ठयाए संखेज्जगुणा ।

'एएसि णं' इत्यादि प्रश्नसूत्रं सुगमम् । भगवानाह-गौतम ! सर्वस्तोका बादरनिगोदाः पर्याप्ता द्रव्यार्थतया, तेभ्यो बादरनिगोदा अपर्याप्ता द्रव्यार्थतयाऽसंख्येयगुणाः, तेभ्यः सूक्ष्मनिगोदा अपर्याप्ता द्रव्यार्थतयाऽसंख्येयगुणाः,तेभ्यः सूक्ष्मनिगोदाः पर्याप्ता द्रव्यार्थतया संख्येयगुणाः । अत्र सर्वत्रापि युक्तिः प्रागुक्तैव । सूक्ष्मनिगोदेभ्यः द्रव्यार्थतया बादरनिगोदजीवाः पर्याप्ता अनन्तगुणाः, एकैकस्मिन् निगोदे अनन्तानां जीवानां भावात्, तेभ्यो बादरनिगोदजीवा अपर्याप्ताः, द्रव्यार्थतया असंख्येयगुणाः, निगोदानामसंख्यातगुणत्वात् । एवं तेभ्यः सूक्ष्मनिगोदजीवा अपर्याप्ता द्रव्यार्थतया असंख्येयगुणाः, तेभ्यः सूक्ष्मनिगोदजीवाः पर्याप्ता द्रव्यार्थतया संख्येयगुणाः, प्रदेशार्थतया सर्वस्तोकाः, बादरनिगोदजीवाः पर्याप्तकाः प्रदेशार्थतया,निगोदानां स्तोकत्वात् । तेभ्यो बादरनिगोदजीवाः अपर्याप्ताः प्रदेशार्थतया असंख्येयगुणाः,निगोदानामसंख्येयगुणत्वात् । एवं तेभ्यः सूक्ष्मनिगोदजीवा अपर्याप्ताः प्रदेशार्थतया असंख्येयगु-

* 'एवं निओयजीवा वि' इत्यारभ्य 'पएसट्ठयाए संखेज्जगुणा' इति यावद् मूले संक्षिप्तमुक्तमिति विभावनीयं सुधीभिः ।

णाः, तेभ्यः सूक्ष्मनिगोदजीवाः पर्याप्ताः प्रदेशार्थतया संख्येयगुणाः, तेभ्यः सूक्ष्मनिगोदजीवेभ्यः पर्याप्तेभ्यो बादरनिगोदाः पर्याप्ताः प्रदेशार्थतया अनन्तगुणाः, एकैकस्य निगोदस्य अनन्ताणुकानन्तस्कन्धनिष्ठाऽऽपन्नत्वात्। तेभ्यो बादरनिगोदा अपर्याप्ताः प्रदेशार्थतया असंख्येयगुणाः, एकैकबादरपर्याप्तनिगोदनिश्रया संख्यातीतानां बादरापर्याप्तनिगोदानामुत्पादात्। तेभ्यः सूक्ष्मनिगोदा अपर्याप्ताः प्रदेशार्थतया असंख्यातगुणाः, तेभ्यः सूक्ष्मनिगोदाः पर्याप्ताः प्रदेशार्थतया संख्येयगुणाः, द्रव्यार्थप्रदेशार्थतया सर्वस्तोकाः, बादरनिगोदाः पर्याप्ता द्रव्यार्थतया, तेभ्यो बादरनिगोदा अपर्याप्ता द्रव्यार्थतया असंख्येयगुणाः, तेभ्यः सूक्ष्मनिगोदा अपर्याप्ता द्रव्यार्थतया असंख्येयगुणाः,तेभ्यः सूक्ष्मनिगोदाः पर्याप्ता द्रव्यार्थतया संख्येयगुणाः। अत्र युक्तिर्निगोदानां द्रव्यार्थतया चिन्तायामिव। तेभ्यः सूक्ष्मनिगोदेभ्यः पर्याप्तेभ्यो बादरनिगोदजीवाः पर्याप्ता द्रव्यार्थतया अनन्तगुणाः, प्रतिबादरनिगोदमनन्तानां जीवानां भावात्। तेभ्यो बादरनिगोदजीवा अपर्याप्ता द्रव्यार्थतया असंख्येयगुणाः, तेभ्यः सूक्ष्मनिगोदजीवा अपर्याप्ता द्रव्यार्थतया असंख्येयगुणाः, तेभ्यः सूक्ष्मनिगोदजीवाः पर्याप्ता द्रव्यार्थतया संख्येयगुणाः। अत्र युक्तिर्निगोदजीवानां द्रव्यार्थतया चिन्तायामिव। तेभ्यः सूक्ष्मनिगोदजीवेभ्यः पर्याप्तेभ्यो द्रव्यार्थतया चिन्तितेभ्यो बादरनिगोदजीवाः पर्याप्ताः प्रदेशार्थतया असंख्येयगुणाः, प्रतिबादरनिगोदपर्याप्तजीवमसंख्येयानां लोकाऽऽकाशप्रमाणानां प्रदेशानां भावात्। तेभ्यो बादरनिगोदजीवा अपर्याप्ताः प्रदेशार्थतया असंख्येयगुणाः, तेभ्यः सूक्ष्मनिगोदजीवा अपर्याप्ताः प्रदेशार्थतयाऽसंख्येयगुणाः, तेभ्यः सूक्ष्मनिगोदजीवाः पर्याप्ताः प्रदेशार्थतया संख्येयगुणाः। युक्तिरत्र निगोदजीवानां प्रदेशार्थतया संख्येयगुणचिन्तायामिव। तेभ्यः सूक्ष्मनिगोदजीवेभ्यः पर्याप्तेभ्यः प्रदेशार्थतया चिन्तितेभ्यो बादरनिगोदाः पर्याप्ताः प्रदेशार्थतया अनन्तगुणाः। एकैकस्मिन् निगोदे अनन्तानामणूनां सद्भावात्। तेभ्यो बादरनिगोदा अपर्याप्ताः प्रदेशार्थतया असंख्येयगुणाः, तेभ्यः सूक्ष्मनिगोदा अपर्याप्ताः प्रदेशार्थतया असंख्येयगुणाः, तेभ्यः सूक्ष्मनिगोदजीवाः पर्याप्ताः प्रदेशार्थतया संख्येयगुणाः। अत्र युक्तिर्निगोदानां प्रदेशार्थतया चिन्तायामिव। जी० ६ प्रति०। सांव्यवहारिकाः के प्रतिपाद्यन्ते, किं निगोदावस्थात उद्वृताः, उत सूक्ष्मनिगोदेभ्य उद्वृताः,उत सूक्ष्ममात्रोद्वृताः?, इति प्रश्ने, उत्तरम्-प्रज्ञापनावृत्तौ निगोदादुद्वृता इति सामान्यं वचो न विशेषबाधां कर्तुं समर्थं स्यात्। सूक्ष्ममात्राणां निगोद इति संज्ञा नाऽस्ति, निगोद इति नाम वनस्पतौ रूढम्, तथा सूत्रेऽपि तथैव दृश्यते-सूक्ष्मनिगोदेभ्य उद्वृताः, अत एव सांव्यवहारिका इति। श्रुतिपरम्परयाऽपि बहुश्रुतानामयं प्रघोषः। यतः-"सर्वे जीवा व्यवहार्य-व्यवहारितया द्विधा। निगोदा व्यवहार्यास्ते,चान्येऽपि व्यवहारिणः"॥१॥इति योगशास्त्रवृत्तौ इति। १३७ प्र०। सेन० १ उल्ला०। अनादिनिगोदमध्ये यथा भव्यस्य ज्ञानदर्शनचारित्राणां सत्ता,तथा अभव्यस्य भवति, न वेति प्रश्ने, उत्तरम्-अभव्यस्य ज्ञानाऽऽदिसत्ता भवति, परमभव्यतया सामग्रीसद्भावेन प्रकटीभवति, भव्यस्य तु तद्योगेऽप्यप्रकटीस्यादिति। १२८ प्र०। सेन० २ उल्ला०। आवलिकायुःप्रमाणं सूक्ष्मबादरनिगोदयोरुभयोः,किं वाऽऽद्यस्यैवेति प्रश्ने, उत्तरम्-सूक्ष्मनिगोदस्य क्षुल्लकभवग्रहणरूपमेवान्तर्मुहूर्त्तमायुर्भवति। बादरनिगोदस्य तु क्षुल्लकभवग्रहणरूपं किञ्चिन्न्यूनमन्तर्मुहूर्त्तरूपं भवति, सामान्येन तूभयोरप्यन्तर्मुहूर्त्तमुच्यत इति १५५ प्र०। सेन० ३ उल्ला०। सूक्ष्मनिगोदान्निर्गतो जीवः पुनः सूक्ष्मनिगोदमध्ये याति, न वेति प्रश्ने, उत्तरम् सूक्ष्मनिगोदान्निर्गतो जीवः पुनरपि सूक्ष्मनिगोदे यातीति। २७३ प्र०। सेन० ३ उल्ला०।

णिगोदजीव–निगोदजीव–पुं०। साधारणनामकर्मोदयवर्तिनि जीवे,प्र० २५ श०६ द्व०। नारकजीवेभ्यो निगोदजीवानां दुःखमधिकं, निगोदजीवेभ्यो वा नारकजीवानाम?, इति प्रश्ने, उत्तरम्-निश्चयतो नारकजीवेभ्यो निगोदजीवानां जन्ममरणाऽऽद्येकशरीरानन्तजीवावस्थानाऽऽदिरूपं महद् दुःखं,परं तन्मत्स्यमूर्च्छनाऽऽदीनामिव नातिदुस्सहम्। व्यवहारतस्तु निगोदजीवेभ्यो नारकजीवानां परमाधार्मिककृतवेदनाऽऽदिरूपं दुःखं प्रति किं साम्यं,हीनाधिकत्वं वा?,इति प्रश्ने,उत्तरम्-तेषां व्यवहारेण समानं दुःखमवलीयते, निश्चयस्तु केवलिगम्य इति। ३४३। ३४४। प्र०। अनादिनिगोदजीवाः किं जनितबहुकर्मबन्धेन तत्र तिष्ठन्तीति प्रश्ने, उत्तरम्-प्रवाहापेक्षया अनादिकर्मसंबन्धेन तत्र तिष्ठन्तीति। ३४५ प्र०। केचन निगोदजीवा लघुकर्माणो व्यवहारराशौ समायान्ति,तेषां तत्र लघुकर्माभवने किं कारणमिति प्रश्ने, उत्तरम्-भव्यत्वपरिपाकाऽऽदिकं तेषां लघुकर्माभवने कारणमिति ३४६ प्र०। सेन० ३ उल्ला०। मांसमध्ये निगोदजीवा उत्पद्यमानाः कथिताः सन्ति। तथाहि-" आमासु अ पक्कासु अ, विपच्चमाणासु मंसपेसीसु। उप्पज्जंति अणंता, तव्वण्णा तत्थ जंतूओ"॥१॥ एतद्गाथायां योगशास्त्रतृतीयप्रकाशमध्ये कथितमस्ति, यन्निगोदशब्देन शरीरं कथ्यते-ऽतो मांसमध्ये शरीरिणोऽनन्ता जीवा उत्पद्यन्ते, तच्छरीराणि कानि?, मांसमेव शरीरतया परिणमति, तद्रूपाणि किं वाऽसंख्यातानि शरीराणि उत्पद्यन्ते तानि, तेषामप्यनन्तशरीरिणामाबाधोत्पद्यते?,न वा?,इति प्रश्ने,उत्तरम्-मांसमध्ये सजङ्गेन्द्रियजीवा अनेके उत्पद्यमानाः संभाव्यन्ते, तथा "आमासु अ पक्कासु अ," एतद्गाथायां ये निगोदजीवा उत्पद्यमानाः कथिताः सन्ति,तत्र निगोदशब्देन सूक्ष्मजीवा एव अर्थः परम्परया कथ्यमानोऽस्ति,परं साधारणवनस्पतिवदनन्तजीवाऽऽश्रय एकशरीरनिगोद एवंविधोऽर्थः कथ्यमानो नास्ति। यतः प्रतिक्रमणसूत्रवृत्तौ मांसमध्ये तरूणां अनेके जीवा उत्पद्यमानाः कथिताः सन्ति, परमनन्ता असंख्याता न कथिताः सन्ति, तस्मादनन्ता असंख्याता यत्र कथिताः सन्ति, परं तत्रानन्ताऽसंख्यातशब्देन बहव इत्यर्थो ज्ञेयः,एवं परम्पराऽस्ति। तानि च जीवशरीराणि मांसपुद्गलतयाऽन्यपुद्गलतया च मिश्रितानि उत्पद्यमानानि संभाव्यन्ते, तथा तक्राऽऽरनालाऽऽदिषु द्वीन्द्रियजीवा उत्पद्यमानाः कथिताः सन्ति, तद्वत्तेषामपि मांसजीवानामाबाधोत्पद्यते इति संभाव्यते, परमेकशरीरस्थानन्तजीवत्वन्नोच्यते इति ज्ञातं नास्तीति॥ ४४ प्र०। सेन० ४ उल्ला०।

णिग्गंथ–निर्ग्रन्थ–पुं०। निर्गता ग्रन्था द्रव्यतः सुवर्णाऽऽदिरूपाद् भावतो मिथ्यात्वाऽऽदिलक्षणादिति निर्ग्रन्थः। व्य० ३ उ०। स्था०। सूत्र०। निर्गतो बाह्याभ्यन्तरो ग्रन्थो यस्मात्स निर्ग्रन्थः। सूत्र० १ श्रु० ६ अ०। बाह्याभ्यन्तरग्रन्थिरहिते, दश० ६ अ०। जैनसाधौ, दश० ३ अ०। स०। स्था०। (व्याख्या

'दिसा' शब्दे द्रष्टव्यः) "णिग्गंथा जिणसासणभवा।" निर्ग्रन्थास्ते भण्यन्ते, ये जिनशासनभवाः प्रतिपन्नपारमेश्वरप्रवचनमुनयः। प्रव० ९४ द्वार। पञ्चविधाः श्रमणाः, तत्र निर्ग्रन्था जैनसाधवः। आचा० १ श्रु० १ चू० १ अ० १ उ०। सूत्र०। स्था०। आ० क०। ज्ञा०। प्रश्न०। आ० चू०। नं०।

(१) निर्ग्रन्थशब्दव्याख्या—

सहिरन्नगा सगंथा, अहिरन्नसुवण्णगा समणा।

सहिरण्यकः सग्रन्थ उच्यते। अत्र हिरण्यग्रहणं बाह्याभ्यन्तरपरिग्रहोपलक्षणं,ततो यः सपरिग्रहः स सग्रन्थः। श्रमणाः पुनरहिरण्यसुवर्णका अतो निर्ग्रन्थाः। हिरण्यं रूप्यं,सुवर्णं कनकम्। बृ० १ उ०। (ग्रन्थनिक्षेपो 'गंथ' शब्दे तृ० भा० ७९३ पृष्ठे उक्तः)

प्रस्तुतयोजनामाह-

सावज्जेण विमुक्का, अब्भिंतरबाहिरेण गंथेण।
निग्गहपरमा य वि हु, तेणेवं होंति निग्गंथा॥

सावद्यः सपापः कर्मोपादाननिबन्धनत्वाद्यो ग्रन्थः,तेन साभ्यन्तरबाह्येन ये मुक्तास्ते निर्ग्रन्था उच्यन्ते। येऽपि चान्तरं ग्रन्थेन न सर्वथा मुक्तास्तेऽपि, ये न विद्वांसः क्रोधाऽऽदिदोषवेदिनः, तथा निग्रहपरमाः, तन्निर्जयप्रधानाः, तेनैवं कारणेन ते निर्ग्रन्था भवन्ति।

(२)अथाऽऽन्तरं ग्रन्थमधिकृत्य ये मुक्ताः,ये चामुक्ताः,तदेतदभिधित्सुराह-

केई सव्वविमुक्का, कोहाईएहिँ केइ भइयव्वा।
सेढिठ्ठगं विरचित्ता, जाणसु जो निग्गओ जत्तो॥

क्रोधाऽऽदिभिरन्तरग्रन्थैः केचित्सर्वविमुक्ताः सर्वैरपि विप्रमुक्ताः,केचित्पुनर्भक्तव्या विकल्पनीयाः-कैश्चिद् मुक्ताः,कैश्चिदपि न मुक्ता इत्यभिप्रायः। अत्र शिष्यः प्राऽऽह-कथं नु नामैवं ज्ञायते?-अमी सर्वथा मुक्ताः, अमी च न मुक्ता इत्युच्यते-श्रेणिद्विकमुपशमश्रेणिक्षपकश्रेणिलक्षणं,विरचय्य यथोक्तपरिपाट्या स्थापयित्वा,ततो जानीहि यो यतः क्रोधाऽऽदेर्निर्गतः,अनिर्गतो वेति। बृ० १ उ०। भ०। उत्त०। सूत्र०। (श्रेणिद्वयप्ररूपणा 'खवगसेढि' शब्दे तृ० भा० ७२७ पृष्ठे,'उवसमसेढि' शब्दे द्वि० भा० १०४३ पृष्ठे च द्रष्टव्या)

(३) एनां क्षपकश्रेणिमध्यासीनेन येन यदनन्तानुबन्ध्यादिकं क्षपितं, स तेन मुक्त इत्यवसातव्यम्। येऽपि श्रेणिद्वयमप्याऽपि न प्रतिपद्यन्ते, किन्तु सामायिकच्छेदोपस्थापनीयपरिहारविशुद्धिकानामन्यतमस्मिन् संयमे वर्तन्ते, तेऽपि संकलनचतुष्टयवर्जैर्द्वादशभिः कषायैर्मुक्ता इत्यवगन्तव्यम्। यत उक्तम्-"बारसविहे कसाए, खविए उवसामिए य जोगेहिं। लब्भइ चरित्तलंभो, तस्स विसेसा इमे पंच॥ १॥"

तथा च-

जे वि अ न सव्वगंथे-हिं निग्गया होंति केइ निग्गंथा।
ते वि य निग्गहपरमा, हवंति तेसिं खउज्जुत्ता॥

ये पि च सरागसंयमवर्त्तिनः सर्वेभ्य आभ्यन्तरग्रन्थेभ्यो न निर्गताः, तेऽपि तेषां संज्वलनकषायाऽऽदीनां क्षयोद्युक्ता उदयनिरोधोदयप्राप्तविफलीकरणाभ्यां क्षयकरणायोद्यताः सन्तो निग्रहपरमा अन्तरग्रन्थानिग्रहप्रधाना भवन्तीत्यतो निर्ग्रन्था उच्यन्ते।

अपि च-

कलुसफलेण न जुज्जइ, किं चित्तं तत्थ जं विगयरागो।
मंते वि जे कसाए, निगिण्हई सो वि तत्तुल्लो॥

कलुषयन्ति सहजनिर्मलं कर्मरजसा मलिनयन्तीति "अच्" ॥ ५। १। ४६॥ इति अच्प्रत्यये कलुषा कषायाः, तेषां यत्फलं पुरुषभावापादनयनमुखविकारे रौद्रध्यानानुबन्धाऽऽदिकं, तेन सह यन्न युज्यते न संबन्धमुपयाति, विगतरागो विशेषेणापुनर्भावेन गतो रागो यस्मात्स विगतरागः, क्षीणमोह इत्यर्थः। तत्र किं चित्रं किमाश्चर्यं?, कषायफलकरणाभावात् किञ्चिदित्यर्थः। यस्तु सतोऽपि विद्यमानानपि कषायान्निगृह्णाति, उदीयमानानेव प्रथमतो निरुणद्धि, कथञ्चिदुदयप्राप्तान् वा विफलीकरोति, सोऽपि तत्तुल्यो वीतराग इव निष्कषायो मन्तव्यः, सतामपि कषायाणामसत्कल्पनाकरणात्, अतः सरागसंयतोऽपि निर्ग्रन्थोऽभिधीयते।

अथ परं प्रश्नयति-

जइ अब्भिंतरमुक्का, बाहिरगंथेण मुक्कया किह णु?।
गिण्हंता उवगरणं, जम्हा अममत्तया तेसु॥

यद्यनन्तरोक्तप्रकारेणाऽभ्यन्तरग्रन्थमुक्ताः,ततो वस्त्रपात्राऽऽदिकमुपकरणं गृह्णन्, ततः कथं,नुरिति वितर्के। बाह्यग्रन्थेन मुक्ता उच्येरन्?,वस्त्राऽऽदेरपि ग्रन्थरूपत्वादित्यभिप्रायः। सूरिराह-यस्मात्तेषु वस्त्रपात्राऽऽदिषु न विद्यते ममत्वं मूर्च्छा येषां ते अममत्वकाः। "शेषाद्वा" ॥ ७। ३। १७५॥ इति कप्रत्ययः। मूर्च्छारहिताः। तेन बाह्यग्रन्थमुक्ता अप्यभिधीयन्ते। इयमत्र भावना-मूर्च्छा परिग्रहो गीयते तन्नूपकरणादिधारणमात्रम्, "मुच्छा परिग्गहो वुत्तो" इति वचनात्। अतः संयमोपष्टम्भाऽऽदिनिमित्तमुपकरणं धारयन्नपि विशुद्धचेतोवृत्तिरपरिग्रह एव ज्ञातव्यः। तदुक्तं परमगुरुभिः-"अज्झत्थविसोहीए, उवगरणं बाहिरं परिहरंतो। अपरिग्गहो त्ति भणिओ, जिणेहिँ तेलुक्कदंसीहिं"। १। बृ० १ उ०। भ०। उत्त०। सूत्र०।

(४) अथ निर्ग्रन्थनिक्षेपमाह निर्युक्तिकृत्-

णिक्खेवो णियंठम्मी, चउव्विहो दुविहो य होइ दव्वम्मि।
आगम णो आगमओ, णो आगमओ य सो तिविहो। ३२। नि०।

निक्षेपो न्यासः (णियंठम्मि त्ति) निर्ग्रन्थे निर्ग्रन्थविषये चतुर्विधः, नाम-स्थापना-द्रव्य-भावभेदात्। तत्र नामस्थापने सुगमे। द्विविधो भवति द्रव्ये-आगमतो, नो आगमतश्च। तत्राऽऽगमतः प्राग्वत्, नो आगमतश्च स इति निर्ग्रन्थशब्दस्य त्रिभेद इति गाथाऽर्थः। उत्त० (पाईटीका) ६ अ०। त्रैविध्यमेवाऽऽह-द्रव्यतो एकः, अन्यो न द्रव्यतो भावतः, अपरो द्रव्यतोऽपि भावतोऽपि। तत्र द्रव्यतो निर्ग्रन्थः स उच्यते, यो लिङ्गसहितो द्रव्यलिङ्गयुक्तो निःशङ्कः सन्नध्यवस्यति, उत्पन्नजातीलायः। यस्तु प्रव्रज्यायामभिमुखो न तावदद्याऽपि प्रव्रजति, कारणेन वा यः साधुः परलिङ्गे वर्त्तते,स द्वितीयो द्वितीयलक्षणयुक्तः। यस्तु उदयसहितो द्रव्यभावलिङ्गयुक्तः स तृतीयः। उभयथा निर्ग्रन्थ इति भावः। बृ० ३ उ०।

जाणगसरीरभविए, तव्वइरित्ते य णिण्हवादीसु।
भावम्मि णियंठो खलु, पंचविहो होइ णायव्वो॥३३॥ नि०।

(जाणगसरीरभविए त्ति) ज्ञशरीरनिर्ग्रन्थो, ज्ञव्यशरीरनिर्ग्रन्थश्च । पश्चात्कृतपुरस्कृतनिर्ग्रन्थपर्यायितयाऽयं घृतकुम्भ इत्यादिन्यायतः प्राग्वद्भावनीयः । तदुव्यतिरिक्तश्च निह्नवाऽऽदिषु । आदिशब्दात्पार्श्वस्थाऽऽदिपरिग्रहः । भावनिर्ग्रन्थोऽप्यागमतो, नो आगमतश्च, तत्राऽऽगमतस्तत्रैव । नो आगमतस्तु स्वत एवाऽऽह निर्युक्तिकृत्-भावे निर्ग्रन्थः, खलुवाक्यालङ्कारे, पञ्चविधः पञ्चभेदो भवति ज्ञातव्य इति गाथाऽर्थः । उत्त० (पाईटीका) ६ अ० ।

(५) पञ्चविधनिर्ग्रन्थस्वरूपं भेदम्-

कइ णं भंते ! णियंठा पन्नत्ता ?। गोयमा ! पंच णियंठा पण्णत्ता । तं जहा-पुलाए, बउसे, कुसीले, णियंठे, सिणाए ।

(णियंठ त्ति) निर्गताः सबाह्याभ्यन्तरग्रन्थादिति निर्ग्रन्थाः साधवः, एतेषां च प्रतिपन्नसर्वविरतीनामपि चित्रचारित्रमोहनीयकर्मक्षयोपशमाऽऽदिकृतो भेदोऽवसेयः । तत्र-(पुलाए त्ति) पुलाको निःसारो धान्यकणः, पुलाकवत्पुलाकः संयमसारापेक्षया, स च संयमवानपि मनाक् तमसारं कुर्वन् पुलाक इत्युच्यते । (बउसे त्ति) बकुशं शबलं, कर्बुरमित्यनर्थान्तरम्, ततश्च बकुशसंयमयोगाद्बकुशः । (कुसीले त्ति) कुत्सितं शीलं चरणमस्येति कुशीलः । (णियंठे त्ति) निर्गतो ग्रन्थान्मोहनीयकर्माऽऽख्यादिति निर्ग्रन्थः । (सिणाए त्ति) स्नात इव स्नातो घातिकर्मजकृगमलपटलक्षालनादिति । ज० २५ श० ६ उ० ।

तओ णियंठा णोसण्णोवउत्ता पण्णत्ता । जहा-पुलाए, णियंठे, सिणाए । तओ णियंठा सण्ण-णोसण्णोवउत्ता पण्णत्ता । तं जहा-बउसे, पडिसेवणाकुसीले, कसायकुसीले ।

(तओ इत्यादि) निर्गता ग्रन्थात् सबाह्याभ्यन्तरादिति निर्ग्रन्थाः संयताः, ' नो ' नैव, संज्ञायामाहाराऽऽद्यभिलाषरूपायां, पूर्वानुभूतस्मरणानागतचिन्ताद्वारेणोपयुक्ता ये ते नोसंज्ञोपयुक्ताः, तत्र पुलाको लब्ध्युपजीवनाऽऽदिना संयमासारताकारको वक्ष्यमाणलक्षणः, निर्ग्रन्थ उपशान्तमोहः, क्षीणमोहो वेति । स्नातको घातिकर्ममलक्षालनाद्यावत्यन्तशुद्धज्ञानस्वरूपः । तथा त्रय एव संज्ञोपयुक्ताः, नोसंज्ञोपयुक्ताश्चेति संकीर्णस्वरूपाः, तथा स्वरूपत्वात् । तथा चाऽऽह-(सण्ण नोसण्णोवउत्त त्ति) संज्ञा चाहाराऽऽदिविषया, नोसंज्ञा च तदभावलक्षणा । संज्ञानोसंज्ञे, तयोरुपयुक्ता इति विग्रहः । पूर्वेह्रस्वता प्राकृतत्वादिति । तत्र बकुशः शरीरोपकरणविभूषाऽऽदिना सबलचारित्रपटः, प्रतिसेवनया मूलगुणाऽऽदिविषयया कुत्सितं शीलं यस्य स तथा । एवं कषायकुशील इति । स्था० ३ ठा० २ उ० । ध०२० । ध० । पं० भा० । पं० चू० । दर्श० । (पुलाकाऽऽदीनां व्याख्या स्वस्वस्थाने)

(६) एते पुलाकाऽऽदयः पञ्च निर्ग्रन्थविशेषा एभिः संयमाऽऽदिनिरनुगमविकल्पैः साध्या भवन्ति-

पडिसेवण वेय रागे, कप्प चरित्त पडिसेवणा णाणे ।
तित्थे लिंग सरीरे, खित्ते काले गति संजम णिकासे ॥१॥
जोगुवओग कसाए, लेसा परिणाम बंध वेदे य ।
कम्मोदीरण उवसं-पजहण सन्ना य आहारे ॥ २ ॥
भव आगरिसे कालं-तरे य समुघाय खेत्त फुसणा य ।
भावे परिणामे खलु, अप्पाबहुयं णियंठाणं ॥ ३ ॥
ज० २५ श० ६ उ० ।

(७) तत्र वेदद्वारे-

पुलाए णं भंते ! किं सवेयए होज्जा, अवेदए होज्जा ?। गोयमा ! सवेयए होज्जा, णो अवेदए होज्जा । जइ सवेदए होज्जा किं इत्थीवेदए होज्जा, पुरिसवेदए होज्जा, पुरिसणपुंसगवेयए होज्जा ? । गोयमा ! णो इत्थीवेयए होज्जा, पुरिसवेयए होज्जा, पुरिसणपुंसगवेयए होज्जा । बउसे णं भंते ! किं सवेयए होज्जा, अवेदए होज्जा ?। गोयमा ! सवेदए होज्जा, णो अवेदए होज्जा । जइ सवेदए होज्जा किं इत्थीवेयए होज्जा, पुरिसवेयए होज्जा, पुरिसणपुंसगवेयए होज्जा ?। गोयमा ! इत्थीवेयए होज्जा, पुरिसवेयए होज्जा, पुरिसणपुंसगवेयए होज्जा । एवं पडिसेवणाकुसीले वि । कसायकुसीले णं भंते ! किं सवेयए पुच्छा ?। गोयमा ! सवेयए वा होज्जा, अवेदए वा होज्जा । जइ अवेदए होज्जा किं उवसंतवेदए होज्जा, खीणवेदए होज्जा ? । गोयमा ! उवसंतवेदए वा होज्जा, खीणवेदए वा होज्जा । जइ सवेदए होज्जा किं इत्थीवेदए होज्जा पुच्छा ?। गोयमा ! तिसु वि जहा बउसे । णियंठे णं भंते ! किं सवेदए पुच्छा ?। गोयमा ! णो सवेदए होज्जा, अवेदए होज्जा । जइ अवेदए होज्जा किं उवसंतवेदए होज्जा, खीणवेदए वा होज्जा पुच्छा ?। गोयमा ! उवसंतवेदए वा होज्जा, खीणवेदए वा होज्जा । सिणाए णं भंते ! किं सवेयए होज्जा ?। जहा णियंठे तहा सिणाए वि, णवरं णो उवसंतवेदए होज्जा, खीणवेदए होज्जा ।

पुलाकबकुशप्रतिसेवनाकुशीलानामुपशमकक्षपकश्रेण्योरभावात् । (नो इत्थीवेयए त्ति) स्त्रियाः पुलाकलब्धेरभावात् । (पुरिसनपुंसगवेयए त्ति) पुरुषः सन् यो नपुंसकवेदको वर्द्धितकत्वाऽऽदिभावात् । (वेदए वा होज्जा, खीणवेदए वा होज्ज त्ति) सूक्ष्मसंपरायगुणस्थानकं यावत्कषायकुशीलो भवति, स च प्रमत्ताप्रमत्तापूर्वकरणेषु सवेदः, अनिवृत्तिबादरे तूपशान्तेषु क्षीणेषु वा वेदेष्ववेदः स्यात्, सूक्ष्मसम्पराये नेति । (णियंठे णमित्यादि) (उवसंतवेयए वा होज्जा, खीणवेयए वा होज्ज त्ति) श्रेणिद्वये निर्ग्रन्थत्वभावादिति । (सिणाए णमित्यादि) (णो उवसंतवेदए होज्जा, खीणवेदए होज्ज त्ति) क्षपकश्रेण्यामेव स्नातकत्वभावादिति ।

(८) रागद्वारे-

पुलाए णं भंते ! किं सरागे होज्जा, वीयरागे होज्जा ?। गोयमा ! सरागे होज्जा, णो वीयरागे होज्जा, एवं० जाव

कसायकुसीले। णियंठे णं भंते! किं सरागे होज्जा पुच्छा ?। गोयमा ! णो सरागे होज्जा, वीयरागे होज्जा । जइ वीयरागे होज्जा किं उवसंतकसायवीयरागे होज्जा, खीणकसायवीयरागे होज्जा ?। गोयमा ! उवसंतकसायवीयरागे होज्जा, खीणकसायवीयरागे होज्जा । सिणाते एवं चेव, णवरं णो उवसंतकसायवीयरागे होज्जा, खीणकसायवीयरागे होज्जा। (पुलाए णं भंते ! किं सरागे त्ति) सरागः सकषायः।

(८) कल्पद्वारे-

पुलाए णं भंते! किं ठियकप्पे होज्जा, अट्ठियकप्पे होज्जा ?। गोयमा ! ठियकप्पे वा होज्जा, अट्ठियकप्पे वा होज्जा । एवं० जाव सिणाए। पुलाए णं भंते ! किं जिणकप्पे होज्जा, थेरकप्पे होज्जा, कप्पातीते होज्जा ? । गोयमा ! णो जिणकप्पे होज्जा, थेरकप्पे होज्जा, णो कप्पातीते होज्जा । बउसे णं भंते पुच्छा ? । गोयमा! जिणकप्पे वा होज्जा, थेरकप्पे वा होज्जा, णो कप्पातीते होज्जा। एवं पडिसेवणाकुसीले वि । कसायकुसीले णं पुच्छा ? । गोयमा ! जिणकप्पे वा होज्जा, थेरकप्पे वा होज्जा, कप्पातीते वा होज्जा । णियंठे णं पुच्छा ? । गोयमा ! णो जिणकप्पे होज्जा, णो थेरकप्पे होज्जा, कप्पातीते होज्जा । एवं सिणाए वि ॥ ५ ॥

(किं ठियकप्पे इत्यादि) आचेलक्याऽऽदिषु दशसु पदेषु प्रथमपश्चिमतीर्थकरसाधवः स्थिता एवाऽवश्यं तत्पालनादिति । तेषां स्थितकल्पः, तत्र वा पुलाको भवेत्। मध्यमतीर्थकरसाधवस्तु तेषु स्थिताश्चाभ्यस्ताश्च स्थितास्थिताश्चेत्यस्थितकल्पः, तेषां तत्र वा पुलाको भवेत्। एवं सर्वेऽपि। अथवा-कल्पो जिनकल्पः, स्थविरकल्पश्चेत्यद्विधेति । तमाश्रित्याऽऽह -(पुलाए णं भंते ! किं जिणकप्पे इत्यादि)(कप्पातीते त्ति) जिनकल्पस्थविरकल्पाद्व्यामन्यत्र । (कसायकुसीले णमित्यादि) (कप्पातीते वा होज्ज त्ति) कल्पातीतो वा कषायकुशीलो भवेत्, कल्पातीतस्य ह्यस्थतीर्थकरस्य सकषायत्वादिति । (णियंठे णमित्यादि) (कप्पातीते होज्ज त्ति) निर्ग्रन्थः कल्पातीत एव भवेत्, यतस्तस्य जिनकल्पस्थविरकल्पधर्मा न सन्तीति ।

(९) चरित्रद्वारे-

पुलाए णं भंते ! किं सामाइयसंजमे होज्जा, छेओवट्ठावणियसंजमे होज्जा, परिहारविसुद्धियसंजमे होज्जा, सुहुमसंपरायसंजमे होज्जा, अहक्खायसंजमे होज्जा ?। गोयमा ! सामाइयसंजमे होज्जा, छेओवट्ठावणियसंजमे होज्जा, णो परिहारविसुद्धियसंजमे होज्जा, णो सुहुमसंपरायसंजमे होज्जा, णो अहक्खायसंजमे होज्जा। एवं बउसे वि। एवं पडिसेवणाकुसीले वि । कसायकुसीले णं पुच्छा ?। गोयमा ! सामाइयसंजमे वा होज्जा० जाव सुहुमसंपरायसंजमे वा होज्जा, णो अहक्खायसंजमे होज्जा । णियंठे णं पुच्छा ?। गोयमा ! णो सामाइयसंजमे वा होज्जा० जाव णो सुहुमसंपरायसंजमे वा होज्जा, अहक्खायसंजमे वा होज्जा। एवं सिणाते वि॥५॥

चरित्रद्वारं व्यक्तमेव।

(१०) प्रतिसेवनाद्वारे-

पुलाए णं भंते ! किं पडिसेवए होज्जा, अपडिसेवए होज्जा ? । गोयमा ! पडिसेवए होज्जा, णो अपडिसेवए होज्जा । जइ पडिसेवए होज्जा, किं मूलगुणपडिसेवए होज्जा, उत्तरगुणपडिसेवए होज्जा ?। गोयमा ! मूलगुणपडिसेवए होज्जा, उत्तरगुणपडिसेवए होज्जा, मूलगुणपडिसेवमाणे पंचण्हं अण्णतरं पडिसेवेज्जा, उत्तरगुणपडिसेवमाणे दसविहस्स पच्चक्खाणस्स अण्णयरं पडिसेवेज्जा । बउसे णं पुच्छा ?। गोयमा ! पडिसेवए होज्जा, णो अपडिसेवए होज्जा । जइ पडिसेवए होज्जा किं मूलगुणपडिसेवए होज्जा, उत्तरगुणपडिसेवए होज्जा ?। गोयमा ! णो मूलगुणपडिसेवए होज्जा, उत्तरगुणपडिसेवए होज्जा । उत्तरगुणपडिसेवमाणे दसविहस्स पच्चक्खाणस्स अण्णयरं पडिसेवेज्जा । पडिसेवणाकुसीले जहा पुलाए। कसायकुसीले पुच्छा ?। गोयमा ! णो पडिसेवए होज्जा । एवं णियंठे वि । एवं सिणाते वि ॥ ६ ॥

(पडिसेवए त्ति) संयमप्रतिकूलार्थस्य संज्वलनकषायोदयात्सेवकः प्रतिसेवकः, संयमविराधक इत्यर्थः । (मूलगुणपडिसेवए त्ति) मूलगुणाः प्राणातिपातविरमणाऽऽद्याः,तेषां प्रतिकूल्येन सेवकः मूलगुणप्रतिसेवकः । एवमुत्तरगुणप्रतिसेवकोऽपि, नवरमुत्तरगुणाः दशविधप्रत्याख्यानरूपाः । (दसविहस्स पच्चक्खाणस्स त्ति) तत्र दशविधं प्रत्याख्यानम्, 'अणागतमइक्कंतं कोडीसहियं' इत्यादिप्राग्व्याख्यातस्वरूपम् । अथवा- "नवकारपोरिसीए" इत्याद्यावश्यकप्रसिद्धम् । (अण्णयरं पडिसेवेज्ज त्ति) एकतरं प्रत्याख्यानं विराधयेदुपलक्षणत्वाच्चास्य पिण्डविशुद्ध्यादिविराधकत्वमपि सम्भाव्यत इति ।

(११) ज्ञानद्वारे—

पुलाए णं भंते ! कइसु णाणेसु होज्जा?। गोयमा ! दोसु वा तिसु वा होज्जा, दोसु होज्जमाणे दोसु आभिणिबोहियणाणसुअणाणेसु होज्जा, तिसु होज्जमाणे तिसु आभिणिबोहियणाणसुअणाणओहिणाणेसु होज्जा । एवं बउसे वि । एवं पडिसेवणाकुसीले वि । कसायकुसीले णं पुच्छा ?। गोयमा! दोसु वा तिसु वा चउसु वा होज्जा । दोसु होज्जमाणे दोसु आभिणिबोहियणाणसुअणाणेसु होज्जा । तिसु होज्जमाणे तिसु आभिणिबोहियणाणसुअणाणओहिणाणेसु होज्जा, अहवा तिसु आभिणिबोहियणाणसुअणाणमणपज्जवणाणेसु होज्जा, चउसु होज्जमाणे चउसु आभिणिबोहियणाणओहिणाणमणपज्जवणाणेसु होज्जा । एवं णियं-

ते वि । सिणाते णं पुच्छा ? । गोयमा ! एगम्मि केवलणाणेसु होज्जा । पुलाए णं भंते ! केवइयं सुयं अहिज्जेज्जा ?। गोयमा ! जहण्णेणं णवस्स पुव्वस्स ततियं आयारवत्थुं, उक्कोसेणं णवपुव्वाइं अहिज्जेज्जा । वउसे णं पुच्छा ?। गोयमा ! जहण्णेणं अट्ठ पवयणमायाओ, उक्कोसेणं दस पुव्वाइं अहिज्जेज्जा । एवं पडिसेवणाकुसीले वि । कसायकुसीले णं पुच्छा ?। गोयमा ! जहण्णेणं अट्ठ पवयणमायाओ, उक्कोसेणं चउद्दस पुव्वाइं अहिज्जेज्जा । एवं णियंठे वि । सिणाते णं पुच्छा ?। गोयमा ! सुयवतिरित्ते होज्जा ॥ ७ ॥

आनिनिबोधिकाऽऽदिज्ञानप्रस्तावाद् ज्ञानविशेषभूतं श्रुतं विशेषेण चिन्तयन्नाह-(पुलाए णं भंते ! केवइयं सुयमित्यादि) (जहण्णेणं अट्ठ पवयणमायाओ त्ति) अष्टप्रवचनमातृपालनरूपत्वाच्चारित्रस्य, तद्वतोऽष्टप्रवचनमातृपरिज्ञानेनाऽवश्यं भावं, ज्ञानपूर्वकत्वाच्चारित्रस्य, तत्परिज्ञानं च श्रुतादतोऽष्टप्रवचनमातृप्रतिपादनपरं श्रुतं वकुशस्य जघन्यतोऽपि भवतीति । तच्च " अट्ठण्हं पवयणमाईणं " इत्यस्य यद्विवरणसूत्रं तत्सम्भाव्यते । यत्पुनरुत्तराध्ययनेषु प्रवचनमातृप्रतिपादननामकमध्ययनं, तद् गुरुत्वाद्विशिष्टतरश्रुतत्वाच्च न जघन्यतः सम्भवतीति बाहुल्याऽऽश्रयं चेदं श्रुतप्रमाणं, तेन न साधुत्वाऽऽदिना व्यभिचार इति ।

(१२) तीर्थद्वारे—

पुलाए णं भंते ! किं तित्थे होज्जा, अतित्थे होज्जा ?। गोयमा ! तित्थे होज्जा, णो अतित्थे होज्जा । एवं वउसे वि । एवं पडिसेवणाकुसीले वि । कसायकुसीले पुच्छा ?। गोयमा ! तित्थे वा होज्जा, अतित्थे वा होज्जा । जइ तित्थे होज्जा किं तित्थयरे होज्जा, पत्तेयबुद्धे होज्जा ?। गोयमा ! तित्थयरे वा होज्जा, पत्तेयबुद्धे वा होज्जा । एवं णियंठे वि । एवं सिणाते ॥ ८ ॥

(कसायकुसीलेत्यादि) कषायकुशीलश्चतुर्ष्वपि स्थानेषु तीर्थकरोऽपि स्यादतस्तदपेक्षया तीर्थव्यवच्छेदे च तदन्योऽवश्यं स्यादिति, तदन्यापेक्षया च " अतित्थे वा होज्ज त्ति " इत्युच्यते । अत एवाऽऽह-" जदि तित्थे होज्जा, किं तित्थयरे होज्जा " इत्यादि ।

(१३) लिङ्गद्वारे-

पुलाए णं भंते ! किं सलिंगे होज्जा, अण्णलिंगे होज्जा, गिहिलिंगे होज्जा ?। गोयमा ! दव्वलिंगं पडुच्च सलिंगे वा होज्जा, अण्णलिंगे वा होज्जा । भावलिंगं पडुच्च णियमं सलिंगे होज्जा, एवं० जाव सिणाए ॥ ९ ॥

लिङ्गं द्विधा-द्रव्यभावभेदात् । तत्र भावलिङ्गं ज्ञानाऽऽदि, एतच्च स्वलिङ्गमेव, ज्ञानाऽऽदिभावस्याऽर्हतामेव भावात् । द्रव्यलिङ्गं तु त्रेधा-स्वलिङ्गपरलिङ्गभेदात् । तत्र स्वलिङ्गं रजोहरणाऽऽदि । परलिङ्गं च त्रिधा-कुतीर्थिकलिङ्गं, गृहस्थलिङ्गं चेत्यत आह-(पुलाए णं भंते ! किं सलिंगे इत्यादि) त्रिविधलिङ्गेऽपि नवेह द्रव्यलिङ्गानपेक्षत्वाच्चरणपरिणामस्येति ।

(१४) शरीरद्वारे-

पुलाए णं भंते ! कइसु सरीरेसु होज्जा ?। गोयमा ! तिसु ओरालियतेयाकम्मएसु होज्जा । वउसे णं भंते ! पुच्छा ?। गोयमा ! तिसु वा चउसु वा होज्जा, तिसु होज्जमाणे तिसु ओरालियतेयाकम्मएसु होज्जा । चउसु होज्जमाणे चउसु ओरालियवेउव्वियतेयाकम्मएसु होज्जा । एवं पडिसेवणाकुसीले वि । कसायकुसीले पुच्छा ?। गोयमा ! तिसु वा चउसु वा पंचसु वा होज्जा । तिसु होज्जमाणे तिसु ओरालियतेयाकम्मएसु होज्जा, चउसु होज्जमाणे चउसु ओरालियवेउव्वियतेयाकम्मएसु होज्जा । पंचसु होज्जमाणे पंचसु ओरालियवेउव्वियआहारगतेयाकम्मएसु होज्जा । णियंठो, सिणाओ य जहा पुलाओ ॥ १० ॥

शरीरद्वारं व्यक्तम् ।

(१५) क्षेत्रद्वारे-

पुलाए णं भंते ! किं कम्मभूमीसु होज्जा ?। गोयमा ! जम्मणसंतिभावं पडुच्च कम्मभूमीए होज्जा, णो अकम्मभूमीए होज्जा ?। वउसे णं पुच्छा ?। गोयमा ! जम्मणसंतिभावं पडुच्च कम्मभूमीए होज्जा, णो अकम्मभूमीए होज्जा । साहरणं पमुच्च कम्मभूमीए होज्जा, अकम्मभूमीए वा होज्जा । एवं० जाव सिणाए ॥ ११ ॥

(पुलाए णं भंते ! किं कम्मभूमीए इत्यादि)(जम्मणसंतिभावं पडुच्च त्ति) जन्म उत्पादः, सद्भावश्च विवक्षितक्षेत्रादन्यत्र,तत्र वा जातस्य,तत्र चरणभावे नास्तित्वम्, एतयोश्च समाहारद्वन्द्वोऽतस्तत्प्रतीत्य पुलाकः कर्मभूमौ भवेत्, तत्र जायते,विहरति च तत्रेत्यर्थः । अकर्मभूमौ पुनरसौ न जायते, तज्जातस्य चारित्राभावात्, न च तत्र वर्तते,पुलाकलब्धौ वर्तमानस्य देवाऽऽदिभिः संहर्तुमशक्यत्वात् । वकुशसूत्रे-(नो अकम्मभूमीए होज्ज त्ति) अकर्मभूमौ वकुशो न जन्मतो जनयति, स्वकृतविहारतश्च, परकृतविहारतस्तु कर्मभूम्यामकर्मभूम्यां च सम्भवतीत्येतदेवाऽऽह-(साहरणं पडुच्चेत्यादि) इह च संहरणं क्षेत्रान्तरात्क्षेत्रान्तरे देवाऽऽदिनेनयनम ।

(१६) कालद्वारे-

पुलाए णं भंते ! किं ओसप्पिणीकाले होज्जा, उस्सप्पिणीकाले होज्जा, णो ओसप्पिणी णो उस्सप्पिणीकाले होज्जा ?। गोयमा ! ओसप्पिणीकाले वा होज्जा, उस्सप्पिणीकाले वा होज्जा, णो ओसप्पिणी णो उस्सप्पिणीकाले वा होज्जा । जइ ओसप्पिणीकाले होज्जा किं सुसमसुसमाकाले होज्जा १, सुसमाकाले होज्जा २, सुसमदुस्समाकाले होज्जा ३, दुस्समसुसमाकाले होज्जा ४, दुस्समाकाले होज्जा ५, दुस्समदुस्समाकाले होज्जा ६ ?। गोयमा ! जम्मणं पमुच्च णो सुसमसुसमाकाले होज्जा १, णो

सुसमाकाले होज्जा २, सुसमदुस्समाकाले वा होज्जा ३, दुस्समसुसमाकाले वा होज्जा ४, णो दुस्समाकाले होज्जा ५, णो दुस्समदुस्समाकाले होज्जा ६ । संतिभावं पडुच्च णो सुसमसुसमाए होज्जा १, णो सुसमाए होज्जा २, सुसमदुस्समाए होज्जा ३, दुस्समसुसमाए होज्जा ४. दुस्समाए होज्जा ५, णो दुस्समदुस्समाए होज्जा ६ । जदि उस्सप्पिणीकाले होज्जा किं दुस्समदुस्समाकाले होज्जा १, दुस्समाकाले होज्जा २, दुस्समसुसमाकाले होज्जा ३, सुसमदुस्समाकाले होज्जा ४, सुसमाकाले होज्जा ५, सुसमसुसमाकाले होज्जा ६ ? । गोयमा ! जम्मणं पडुच्च णो दुस्समदुस्समाकाले होज्जा १, दुस्समाकाले होज्जा २, दुस्समसुसमाकाले वा होज्जा ३, सुसमदुस्समाकाले वा होज्जा ४, णो सुसमाकाले वा होज्जा ५, णो सुसमसुसमाकाले वा होज्जा ६ । संतिभावं पडुच्च णो दुस्समदुस्समाकाले होज्जा १, णो दुस्समाकाले होज्जा २, दुस्समसुसमाकाले होज्जा ३, सुसमदुस्समाकाले वा होज्जा ४, णो सुसमाकाले होज्जा ५, णो सुसमसुसमाकाले होज्जा ६ । जइ णो ओसप्पिणी णो उस्सप्पिणीकाले होज्जा किं सुसमसुसमापलिभागे होज्जा १, सुसमापलिभागे होज्जा २, सुसमदुस्समापलिभागे होज्जा ३, दुस्समसुसमापलिभागे होज्जा ४ ? । गोयमा ! जम्मणं संतिभावं पडुच्च णो सुसमसुसमापलिभागे होज्जा १, णो सुसमापलिभागे होज्जा २, णो सुसमदुस्समापलिभागे होज्जा ३, दुस्समसुसमापलिभागे होज्जा ४ । वउसे णं भंते ! पुच्छा ? । गोयमा ! ओसप्पिणीकाले वा होज्जा, उस्सप्पिणीकाले वा होज्जा, णो ओसप्पिणीकाले वा होज्जा, णो उस्सप्पिणीकाले वा होज्जा । जइ ओसप्पिणीकाले होज्जा किं सुसमसुसमाकाले वा होज्जा पुच्छा ? । गोयमा ! जम्मणं संतिभावं पडुच्च णो सुसमसुसमाकाले होज्जा १, णो सुसमाकाले होज्जा २, सुसमदुस्समाकाले होज्जा ३, सुस्समसुसमाकाले वा होज्जा ४, दुस्समाकाले वा होज्जा ५, णो दुस्समदुस्समाकाले होज्जा ६ । साहरणं पडुच्च अण्णयरे समाकाले जदि ओसप्पिणीकाले होज्जा किं दुस्समदुस्समाकाले होज्जा ? । गोयमा ! जम्मणं पडुच्च णो दुस्समदुस्समाकाले होज्जा, जहेव पुलाए । संतिभावं पडुच्च णो सुस्समदुस्समाकाले होज्जा । एवं संतिभावेण वि जहा पुलाए० जाव णो सुसमसुसमाकाले होज्जा । साहरणं पडुच्च अण्णयरे समाकाले होज्जा, जहा णो ओसप्पिणी णो उस्सप्पिणीकाले होज्जा पुच्छा ? । गोयमा ! जम्मणं संतिभावं पडुच्च णो सुसमसुसमापलिभागे होज्जा । जहेव पुलाए० जाव दुस्समसुसमापलिभागे होज्जा । साहरणं पडुच्च अण्णयरे पलिभागे होज्जा, जइ वउसे, एवं पडिसेवणाकुसीले वि । एवं कसायकुसीले वि । णियंठो, सिणाओ य जहा पुलाए; णवरं एएसिं अब्भहियं साहरणं भाणियव्वं; सेसं तं चेव ॥ १२ ॥

त्रिविधः कालोऽवसर्पिण्यादिः । तत्राऽऽद्यद्वयं भरतैरावतयोः, तृतीयस्तु महाविदेहहैमवताऽऽदिषु । (सुसमदुस्समाकाले वा होज्ज त्ति) आदिदेवकाले इत्यर्थः । (दुस्समसुसमाकाले वेति) चतुर्थे अरके इत्यर्थः । उत्कात्समाऽवसर्पिण्याऽन्यत्राऽसौ जायते । (संतिभावं पडुच्चेत्यादि) अवसर्पिण्यां सद्भावं प्रतीत्य तृतीयचतुर्थपञ्चमाऽऽरकेषु भवेत्, तत्र चतुर्थारके जातः सन्पञ्चमेऽपि वर्त्तते, तृतीयचतुर्थारकसद्भावस्तु तज्जन्मपूर्वक इति । (जइ उस्सप्पिणीत्यादि) उत्सर्पिण्यां द्वितीयतृतीयचतुर्थेष्वरकेषु जन्मतो भवति, तत्र द्वितीयस्याऽन्ते जायते, तृतीये तु चरणं प्रतिपद्यते, तृतीयचतुर्थयोस्तु जायते, चरणं च प्रतिपद्यत इति । सद्भावं पुनः प्रतीत्य तृतीयचतुर्थयोरेव तस्य सत्ता, तयोरेव चरणप्रतिपत्तेरिति । (जइ णो ओसप्पिणीत्यादि) (सुसमसुसमापलिभागे त्ति) सुषमसुषमायाः प्रतिभागः सादृश्यं यत्र काले स तथा । स च देवकुरूत्तरकुरुषु । एवं सुषमाप्रतिभागो हरिवर्षरम्यकवर्षेषु, सुषमदुःषमाप्रतिभागो हैमवतैरण्यवतेषु, दुःषमसुषमाप्रतिभागो महाविदेहेषु । (नियंठो, सिणाओ य जहा पुलाए त्ति) एतौ पुलाकवदुक्तौ । विशेषं पुनराह- (नवरं एएसिं अब्भहियं साहरणं भाणियव्वं त्ति) पुलाकस्य हि पूर्वोक्तयुक्त्या संहरणं नास्त्येतयोश्च तत्सम्भवतीति कृत्वा तदाह्यं, संहरणद्वारेण च यस्तयोः सर्वकालेषु सम्भवोऽसौ पूर्वसंहृतयोर्निर्ग्रन्थस्नातकत्वप्राप्तौ द्रष्टव्यः, यतो नाप्यगतवेदानां संहरणमस्तीति । यदाह- " समणीमवगयवेयं, परिहारपुलायमप्पमत्तं च । चोद्दसपुव्विं आहा-रगं च न य को इ संहरइ ॥ १ ॥ " त्ति ।

(१७) गतिद्वारे सौधर्माऽऽदिका देवगतिरिन्द्राऽऽद्यस्तद्भेदास्तदायुश्च पुलाकाऽऽदीनां निरूप्यते-

पुलाए णं भंते ! कालगए समाणे कं गतिं गच्छइ ? । गोयमा ! देवगतिं गच्छइ । देवगतिं गच्छमाणे किं भवणवासीसु उववज्जेज्जा, वाणमंतरेसु उववज्जेज्जा, जोइसियवेमाणिएसु उववज्जेज्जा ? । गोयमा ! णो भवणवासीणो-वाणमंतरणोजोइसियवेमाणिएसु उववज्जेज्जा । वेमाणिएसु उववज्जमाणे जहण्णेणं सोहम्मे कप्पे, उक्कोसेणं सहस्सारे कप्पे उववज्जेज्जा । वउसे णं एवं चेव, णवरं उक्कोसेणं अच्चुए कप्पे । पडिसेवणाकुसीले जहा वउसो । कसायकुसीले जहा पुलाए, णवरं उक्कोसेणं अणुत्तरविमाणेसु य । णियंठे णं भंते ! एवं चेव, जाव० वेमाणिएसु उववज्जमाणे अजहण्णमणुक्कोसं अणुत्तरविमाणेसु उववज्जेज्जा । सिणाए णं भंते ! कालगए समाणे कं गतिं गच्छति ? । गोयमा ! सिद्धगतिं गच्छति । पुलाए णं भंते !

देवेसु उववज्जमाणे किं इंदत्ताए उववज्जेज्जा, तायत्तीसगत्ताए उववज्जेज्जा, लोगपालत्ताए उववज्जेज्जा, अहमिंदत्ताए उववज्जेज्जा ?। गोयमा ! अविराहणं पडुच्च इंदत्ताए उववज्जेज्जा,सामाणियत्ताए उववज्जेज्जा, तायत्तीसगत्ताए उववज्जेज्जा, लोगपालत्ताए उववज्जेज्जा, णो अहमिंदत्ताए उववज्जेज्जा । विराहणं पडुच्च अण्णयरेसु उववज्जेज्जा । एवं बउसे वि । एवं पडिसेवणाकुसीले वि । कसायकुसीले पुच्छा ?। गोयमा! अविराहणं पडुच्च इंदत्ताए वा उववज्जेज्जा० जाव अहमिंदत्ताए उववज्जेज्जा । विराहणं पडुच्च अण्णयरेसु उववज्जेज्जा । णियंठे पुच्छा ?। गोयमा! अविराहणं पडुच्च णो इंदत्ताए उववज्जेज्जा० जाव णो लोगपालत्ताए उववज्जेज्जा,अहमिंदत्ताए उववज्जेज्जा । विराहणं पडुच्च अण्णयरेसु उववज्जेज्जा । पुलागस्स णं भंते ! देवलोगेसु उववज्जमाणस्स केवइयं कालं ठिई पण्णत्ता ? । गोयमा ! जहण्णेणं पलिओवमपुहत्तं, उक्कोसेणं अट्ठारससागरोवमाइं । बउसस्स णं पुच्छा ? । गोयमा ! जहण्णेणं पलिओवमपुहत्तं , उक्कोसेणं वावीसं सागरोवमाइं । एवं पडिसेवणाकुसीलस्स वि । कसायकुसीलस्स पुच्छा ?। गोयमा ! जहण्णेणं पलिओवमपुहत्तं, उक्कोसेणं तेत्तीसं सागरोवमाइं । णियंठस्स पुच्छा ? । गोयमा ! अजहण्णमणुक्कोसं तेत्तीसं सागरोवमाइं ॥ १३ ॥

तत्र च-(अविराहणं पडुच्च त्ति) अविराधना ज्ञानाऽऽदीनाम् । अथवा लब्धेरनुपजीवनादनस्तां प्रतीत्य अविराधकाः सन्त इत्यर्थः । (अण्णयरेसु उववज्जेज्ज त्ति) भवनपत्यादीनामन्यतरेषु देवेषूत्पद्यन्ते, विराधितसंयमानां भवनपत्यादावुत्पादस्योक्तत्वात् । यच्च प्रागुक्तम्-" वेमाणियेसु उववज्जेज्ज त्ति " तत्संयमाऽविराधकत्वमाश्रित्यावसेयम् ।

(१८) संयमद्वारे संयमस्थानानि,तेषां चाल्पत्वाऽऽदि चिन्त्यते-पुलागस्स णं भंते! केवइया संजमट्ठाणा पण्णत्ता ?। गोयमा ! असंखेज्जा संजमट्ठाणा पण्णत्ता । एवं० जाव कसायकुसीलस्स । णियंठस्स णं भंते ! केवइया संजमट्ठाणा पण्णत्ता ?। गोयमा ! एगे अजहण्णमणुक्कोसए संजमट्ठाणे पण्णत्ते । एवं सिणायस्स वि । एएसि णं भंते ! पुलागबउसपडिसेवणाकसायकुसीले णं णियंठसिणायाणं संजमट्ठाणाणं कयरे कयरे० जाव विसेसाहिया वा ? । गोयमा ! सव्वत्थोवे णियंठस्स सिणायस्स एगे अजहण्णमणुक्कोसए संजमट्ठाणे ! पुलागस्स संजमट्ठाणा असंखेज्जगुणा । बउसस्स संजमट्ठाणा असंखेज्जगुणा । पडिसेवणाकुसीलस्स संजमट्ठाणा असंखेज्जगुणा । कसायकुसीलस्स संजमट्ठाणा असंखेज्जगुणा ॥ १४ ॥

तत्र-(पुलागस्सेत्यादि) संयमश्रेणिः, तस्य स्थानानि शुद्धिप्रकर्षापकर्षकृता भेदाः संयमस्थानानि,तानि च प्रत्येकं सर्वाऽऽकाशप्रदेशाग्रगुणितसर्वाऽऽकाशप्रदेशपरिमाणपर्यवोपेतानि भवन्ति, तानि च पुलाकस्यासङ्ख्येयानि भवन्ति, विचित्रत्वात्कषायचारित्रमोहनीयक्षयोपशमस्य । एवं यावत्कषायकुशीलस्य । (एगे अजहण्णमणुक्कोसए संजमट्ठाणे त्ति) निर्ग्रन्थस्यैकं संयमस्थानं भवति,कषायाणामुपशमस्य क्षयस्य चाविचित्रत्वेन शुद्धेरेकविधत्वादेकत्वादेव च तदजघन्योत्कृष्टं, बहुत्वेन जघन्योत्कृष्टभावसद्भावादिति । अथ पुलाकाऽऽदीनां परस्परतः संयमस्थानाल्पबहुत्वमाह-(एएसि णमित्यादि) सर्वेभ्यः स्तोकं सर्वस्तोकं निर्ग्रन्थस्य स्नातकस्य च संयमस्थानं, कुतो यस्मादेकं किंभूतं तदित्याह-(अजहण्णेत्यादि) एतच्चैवं शुद्धेरेकविधत्वात्, पुलाकाऽऽदीनां तूत्क्रमेणासंख्येयगुणानि तानि क्षयोपशमवैचित्र्यादिति ।

(१९) अथ निकर्षद्वारम्-तत्र निकर्षः सन्निकर्षः पुलाकाऽऽदीनां परस्परेण संयोजनं, तस्य च प्रस्तावनार्थमाह-

पुलागस्स णं भंते! केवइया चरित्तपज्जवा पण्णत्ता ?। गोयमा ! अणंता चरित्तपज्जवा पण्णत्ता । एवं० जाव सिणायस्स । पुलाए णं भंते ! पुलागस्स सट्ठाणसण्णिगासेणं चरित्तपज्जवेहिं किं हीणे, तुल्ले,अब्भहिए ?। गोयमा ! सिय हीणे, सिय तुल्ले, सिय अब्भहिए । जइ हीणे अणंतभागहीणे वा,असंखेज्जभागहीणे वा, संखेज्जभागहीणे वा, संखेज्जगुणहीणे वा, असंखेज्जगुणहीणे वा, अणंतगुणहीणे वा । अह अब्भहिए अणंतभागमब्भहिए वा, असंखेज्जभागमब्भहिए वा, संखेज्जभागमब्भहिए वा, संखेज्जगुणमब्भहिए वा, असंखेज्जगुणमब्भहिए वा,अणंतगुणमब्भहिए वा । पुलाए णं भंते ! बउसस्स परट्ठाणसण्णिगासेणं चरित्तपज्जवेहिं किं हीणे, तुल्ले, अब्भहिए ?। गोयमा ! हीणे, णो तुल्ले, णो अब्भहिए अणंतगुणे । एवं पडिसेवणाकुसीले वि । कसायकुसीलेणं समं छट्ठाणवडिए जहेव सट्ठाणे । णियंठस्स जहा बउसस्स । एवं सिणायस्स वि । बउसे णं भंते ! पुलागस्स परट्ठाणसण्णिगासेणं चरित्तपज्जवेहिं किं हीणे, तुल्ले, अब्भहिए ?। गोयमा ! णो हीणे, णो तुल्ले, अब्भहिए, अणंतगुणमब्भहिए । बउसे णं भंते ! बउसस्स सट्ठाणस्स सण्णिगासेणं चरित्तपज्जवेहिं पुच्छा ?। गोयमा ! सिय हीणे, सिय तुल्ले, सिय अब्भहिए । जइ हीणे छट्ठाणवडिए । बउसे णं भंते! पडिसेवणाकुसीलस्स परट्ठाणसण्णिगासेणं चरित्तपज्जवेहिं किं हीणे छट्ठाणवडिए ?। एवं कसायकुसीलस्स वि ?। बउसे णं भंते! णियंठस्स परट्ठाणसण्णिगासे णं चरित्तपुच्छा ? । गोयमा! हीणे, णो तुल्ले, णो अब्भहिए अणंतगुणहीणे । एवं सिणायस्स वि । पडिसेवणाकुसीलस्स एवं चेव । बउसस्स वत्तव्वया भाणियव्वा । कसायकुसीलस्स सण्णिगासेणं एस चेव बउसवत्तव्वया, णवरं पुलाएण वि समं छट्ठाणवडिए । णियंठे णं भंते ! पुलागस्स परट्ठा-

सन्निगासेणं चरित्तपज्जवेहिं पुच्छा ? । गोयमा ! णो हीणे,णो तुल्ले, अब्भहिए, अणंतगुणमब्भहिए एवं० जाव कसायकुसीलस्स । णियंठे णं भंते ! णियंठस्स सन्निगासेणं पुच्छा ?। गोयमा! णो हीणे,तुल्ले, णो अब्भहिए । एवं सिणायस्स वि । सिणाए णं भंते ! पुलागस्स परट्ठाणसन्निगासेणं, एवं जहा णियंठस्स वत्तव्वया, तहा सिणायस्स वि जाणियव्वा० जाव सिणाए णं भंते! सिणायस्स सट्ठाणसण्णिगासेणं पुच्छा ?। गोयमा ! णो हीणे, तुल्ले, णो अब्भहिए ॥

(पुलागस्सेत्यादि) (चरित्तपज्जव त्ति) चरित्रस्य सर्वविरतिरूपपरिणामस्य,पर्यवा भेदाश्चरित्रपर्यवाः,तेच बुद्धिकृता अविभागपलिच्छेदाः,विषयकृता वा। (सट्ठाणसन्निगासेणं ति) स्वमात्मीयं सजातीयं स्थानं पर्यवाणामाश्रयः स्वस्थानं पुलाकाऽऽदेः पुलाकाऽऽदिरेव, तस्य सन्निकर्षः संयोजनं स्वस्थानसन्निकर्षः, तेन। (किं हीणे त्ति) विशुद्धसंयमस्थानसम्बन्धित्वेन विशुद्धतरपर्यवापेक्षया अविशुद्धतरसंयमस्थानसंबन्धित्वेनाविशुद्धतराः पर्यवा हीनाः,तद्योगात्साधुरपि हीनः। (तुल्ले त्ति) तुल्यशुद्धिकपर्ययोगात्तुल्यः । (अब्भहिए त्ति) विशुद्धतरपर्यवयोगादभ्यधिकः । (सिय हीणे त्ति) अशुद्धसंयमस्थानवर्त्तित्वात् । (सिय तुल्ले त्ति) एकसंयमस्थानवर्तित्वात् । (सिय अब्भहिए त्ति) विशुद्धतरसंयमस्थानवर्त्तित्वात् । (अणंतभागहीणे त्ति) किलासद्भावस्थापनया पुलाकस्योत्कृष्टसंयमस्थानपर्यवाग्रं दश सहस्राणि १०००० तस्य सर्वजीवानन्तकेन शतपरिमाणतया कल्पितेन भागे हृते लब्धे शतम् १००। द्वितीयप्रतियोगिपुलाकचरणपर्यवाग्रं नव सहस्राणि नवशताधिकानि ९९००। पूर्वभागलब्धं शतं, तत्र प्रक्षिप्तं जातानि दश सहस्राणि, ततोऽसौ सर्वजीवानन्तकभागहारलब्धेन शतेन हीन इत्यनन्तभागहीनः । (असंखेज्जभागहीणे व त्ति) पूर्वोक्तकल्पितपर्यायराशेर्दशसहस्रस्य (१००००) लोकाऽऽकाशप्रदेशपरिमाणेनासङ्ख्येयेन कल्पनया पञ्चाशत्प्रमाणेन भागे हृते लब्धा द्विशती; द्वितीयप्रतियोगिपुलाकचरणपर्यवाग्रं नव सहस्राण्यष्टौ च शतानि ९८००। पूर्वभागलब्धा च द्विशती, तत्र प्रक्षिप्ता जातानि दश सहस्राणि, ततोऽसौ लोकाऽऽकाशप्रदेशपरिमाणाऽसंख्येयकभागहारलब्धेन शतद्वयेन हीन इत्यसङ्ख्येयभागहीनः । (संखेज्जभागहीणे व त्ति) पूर्वोक्तकल्पितपर्यायराशेर्दशसहस्रस्य (१००००) उत्कृष्टसङ्ख्येयकेन कल्पनया दशकपरिमाणेन भागे हृते लब्धं सहस्रम । द्वितीयप्रतियोगिपुलाकचरणपर्यवाग्रं नव सहस्राणि ९००० । पूर्वभागलब्धं च सहस्रं तत्र प्रक्षिप्तं,जातानि दश सहस्राणि,ततोऽसावुत्कृष्टसङ्ख्येयकभागहारलब्धेन सहस्रेण हीन इति सङ्ख्येयभागहीनः । (संखेज्जगुणहीणे व त्ति) किलैकस्य पुलाकस्य चरणपर्यवाग्रं कल्पनया सहस्रदशकं, द्वितीयप्रतियोगिपुलाकचरणपर्यवाग्रं च सहस्रं, तत्रोत्कृष्टसङ्ख्येयकेन कल्पनया दशकपरिमाणेन गुणकारेण हीनोऽनभ्यस्त इति संख्येयगुणहीनः । (असंखेज्जगुणहीणे व त्ति) किलैकस्य पुलाकस्य चरणपर्यवाग्रं कल्पनया सहस्रदशकं, द्वितीयप्रतियोगिपुलाकचरणपर्यवाग्रं च द्विशती, ततश्च लोकाऽऽकाशप्रदेशपरिमाणेनासंख्येयकेन कल्पनया पञ्चाशत्प्रमाणेन गुणकारेण गुणितो द्विशतीको राशिर्जायते दशसहस्राणि, स च तेन लोकाऽऽकाशपरिमाणासंख्येयकेन कल्पनया पञ्चाशत्प्रमाणेन गुणकारेण हीन इति असंख्येयगुणहीनः । (अणंतगुणहीणे व त्ति) किलैकस्य पुलाकस्य चरणपर्यवाग्रं कल्पनया सहस्रदशकं, द्वितीयप्रतियोगिपुलाकचरणपर्यवाग्रं च शतम् । ततश्च सर्वजीवानन्तकेन कल्पनया शतपरिमाणेन गुणकारेण गुणितः शतिको राशिर्जायते दशसहस्राणि, स च तेन सर्वजीवानन्तकेन कल्पनया शतपरिमाणेन गुणकारेण हीन इत्यनन्तगुणहीनः । एवमभ्यधिकषट्स्थानकशब्दार्थोऽप्येभिरेव भागापहारगुणकारैर्भावनीयः । तथाहि-एकस्य पुलाकस्य कल्पनया दश सहस्राणि चरणपर्यवमानं, तदन्यस्य नवशताधिकानि नव सहस्राणि, ततो द्वितीयापेक्षया प्रथमोऽनन्तभागाभ्यधिकः । तथा यस्य नवसहस्राण्यष्टौ च शतानि पर्यवाग्रं, तस्मात्प्रथमोऽसंख्येयभागाधिकः, तथा यस्य नव सहस्राणि चरणपर्यवाग्रं,तस्मात्प्रथमः संख्येयभागाधिकः,तथा यस्य चरणपर्यवाग्रं सहस्रमानं, तदपेक्षया प्रथमः संख्येयगुणाधिकः, तथा यस्य चरणपर्यवाग्रं द्विशती, तदपेक्षयाऽऽद्योऽसंख्येयगुणाधिकः, तथा यस्य चरणपर्यवाग्रं शतमानं, तदपेक्षयाऽऽद्योऽनन्तगुणाधिक इति । (पुलाए णं भंते ! वउसस्सेत्यादि) (परट्ठाणसन्निगासेणं ति) विजातीययोगमाश्रित्येत्यर्थः । विजातीयश्च पुलाकस्य बकुशाऽऽदिः, तत्र पुलाको बकुशादू हीनः, तथाविधविशुद्ध्यभावात् । (कसायकुसीलेणं समं छट्ठाणवडिए जहेव सट्ठाणे त्ति) पुलाकः पुलाकापेक्षया यथाऽऽनिहितः, तथा कषायकुशीलापेक्षयाऽपि वाच्य इत्यर्थः । तत्र पुलाकः कषायकुशीलाद्धीनो वा स्यादविशुद्धसंयमस्थानवृत्तित्वात्, तुल्यो वा स्यात्समानसंयमस्थानवृत्तित्वात्, अधिको वा स्याच्छुद्धतरसंयमस्थानवृत्तित्वात्। यतः पुलाकस्य,कषायकुशीलस्य च सर्वजघन्यानि संयमस्थानान्यधः,ततस्तौ युगपदसंख्येयानि तानि गच्छतः,तुल्याध्यवसानत्वात्,ततः पुलाको व्यवच्छिद्यते,हीनपरिणामत्वात्, व्यवच्छिन्ने च पुलाके कषायकुशील एकक एवासंख्येयानि संयमस्थानानि गच्छति, शुभतरपरिणामत्वात्, ततः कषायकुशीलप्रतिसेवनाकुशीलबकुशा युगपदसंख्येयानि संयमस्थानानि गच्छन्ति, ततश्च बकुशो व्यवच्छिद्यते, प्रतिसेवनाकुशीलकषायकुशीलावसंख्येयानि संयमस्थानानि गच्छतः, ततश्च प्रतिसेवनाकुशीलो व्यवच्छिद्यते, कषायकुशीलस्त्वसंख्येयानि संयमस्थानानि गच्छति, ततः सोऽपि व्यवच्छिद्यते, ततो निर्ग्रन्थस्नातकावेकं संयमस्थानं प्राप्नुत इति । (नियंठस्स जहा वउसस्स त्ति) पुलाकः निर्ग्रन्थादनन्तगुणहीन इत्यर्थः,चिन्तितः पुलाकोऽथैः सहाथ बकुशश्चिन्त्यते-(वउसे णमित्यादि) बकुशः पुलाकादनन्तगुणाभ्यधिक एव,विशुद्धतरपरिणामत्वात्, बकुशात्तु हीनाऽऽदिरेव,चित्रपरिणामत्वात्. प्रतिसेवनाकषायकुशीलाऽप्यानपि हीनाऽऽदिरेव,निर्ग्रन्थस्नातकाभ्यां तु हीन एवेति । (वउसस्स वत्तव्वया जाणियव्व त्ति) प्रतिसेवनाकुशीलस्तथा वाच्यो, यथा बकुश इत्यर्थः । कषायकुशीलोऽपि बकुशवद्वाच्यः,केवलं पुलाकाद्बकुशोऽभ्यधिक एवोक्तः, सकषायस्तु षट्स्थानपतितो वाच्यो हीनाऽऽदिरित्यर्थः, तत्परिणामस्य पुलाकापेक्षया हीनसमाधिकस्वभावत्वादिति

(२०) अथ पर्यवाधिकारात्तेषामेव जघन्याऽऽदिभेदानां पुलाकाऽऽदिसंबन्धनामल्पत्वाऽऽदि प्ररूपयन्नाह-

एएसि णं भंते ! पुलागस्स वउसपडिसेवणाकुसीलक-

सायकुसीलणियंठसिणायाणं जहण्णुक्कोसगाणं चरित्तपज्जवाणं कयरे कयरे० जाव विसेसाहिया वा ?। गोयमा ! पुलागस्स कसायकुसीलस्स एएसि णं जहण्णगा चरित्तपज्जवा दोण्ह वि तुल्ला सव्वत्थोवा पुलागस्स जक्कोसगा चरित्तपज्जवा अणंतगुणा। बउसस्स, पडिसेवणाकुसीलस्स य। एएसि णं जहण्णगा चरित्तपज्जवा दोण्ह वि तुल्ला अणंतगुणा । बउसस्स उक्कोसगा चरित्तपज्जवा अणंतगुणा। पडिसेवणाकुसीलस्स उक्कोसगा चरित्तपज्जवा अणंतगुणा, कसायकुसीलस्स उक्कोसगा चरित्तपज्जवा अणंतगुणा; णियंठस्स, सिणायस्स य एएसि णं अजहण्णमणुक्कोसगा चरित्तपज्जवा दोण्ह वि तुल्ला अणंतगुणा ॥१५॥

(२१) योगद्वारे—

पुलाए णं भंते ! किं सजोगी होज्जा, अजोगी होज्जा ?। गोयमा ! सजोगी होज्जा, णो अजोगी होज्जा । जइ सजोगी होज्जा किं मणजोगी होज्जा, वइजोगी होज्जा, कायजोगी होज्जा ?। गोयमा ! मणजोगी वा होज्जा, वइजोगी वा होज्जा, कायजोगी वा होज्जा । एवं० जाव णियंठे । सिणाए णं पुच्छा ?। गोयमा ! सजोगी वा होज्जा, अजोगी वा होज्जा । जइ सजोगी होज्जा किं मणजोगी होज्जा ?; सेसं जहा पुलागस्स ॥ १६ ॥

इदा योगी शैलेशीकरणे ।

(२२) उपयोगद्वारे-

पुलाए णं भंते ! किं सागारोवउत्ते होज्जा, अणागारोवउत्ते होज्जा ?। गोयमा ! सागारोवउत्ते होज्जा, अणागारोवउत्ते होज्जा । एवं जाव० सिणाए ॥ १७ ॥

टीका सुगमत्वान्न लिखिता ।

(२३) कषायद्वारे-

पुलाए णं भंते ! किं सकसायी होज्जा, अकसायी होज्जा ?। गोयमा ! सकसायी होज्जा, णो अकसायी होज्जा। जइ सकसायी होज्जा से णं भंते ! कइसु कसाएसु होज्जा ?। गोयमा ! चउसु कोहमाणमायालोभेसु होज्जा । एवं बउसे वि । एवं पडिसेवणाकुसीले वि । कसायकुसीले णं पुच्छा ?। गोयमा ! सकसायी होज्जा, णो अकसायी होज्जा । जइ सकसायी होज्जा से णं भंते ! कइसु कसाएसु होज्जा ?। गोयमा ! चउसु वा तिसु वा दोसु वा एगम्मि वा होज्जा। चउसु होज्जमाणे चउसु संजलणकोहमाणमायालोभेसु होज्जा। तिसु होज्जमाणे तिसु संजलणमाणमायालोभेसु होज्जा । दोसु होज्जमाणे दोसु संजलणमायालोभेसु होज्जा। एगम्मि होज्जमाणे एगम्मि संजलणलोभेसु होज्जा। णियंठे णं पुच्छा ?। गोयमा ! णो सकसायी होज्जा, अकसायी होज्जा । जइ अकसायी होज्जा किं उवसंतकसायी होज्जा, खीणकसायी होज्जा ?। गोयमा ! उवसंतकसायी वा होज्जा, खीणकसायी वा होज्जा । सिणाए एवं चेव, णवरं णो उवसंतकसायी होज्जा, खीणकसायी होज्जा ॥ १८ ॥

(सकसायी होज्ज त्ति) पुलाकस्य कषायाणां क्षयस्योपशमस्य वा भावात् । (तिसु दोज्जमाणे इत्यादि) उपशमश्रेण्यां क्षपकश्रेण्यां वा संज्वलने क्रोधे उपशान्ते क्षीणे वा, शेषेषु त्रिषु, एवं माने विगते द्वयोर्मायायां तु विगतायां सूक्ष्मसम्परायगुणस्थानके एकत्र लोभे भवेदिति ।

(२४) लेश्याद्वारे-

पुलाए णं भंते ! किं सलेस्से होज्जा, अलेस्से होज्जा ?। गोयमा ! सलेस्से होज्जा, णो अलेस्से होज्जा। जइ सलेस्से होज्जा, से णं भंते ! कइसु लेस्सासु होज्जा ?। गोयमा ! तिसु वि सुद्धलेस्सासु होज्जा । तं जहा-तेउलेस्साए, पम्हलेस्साए, सुक्कलेस्साए । एवं बउसस्स वि । एवं पडिसेवणाकुसीले वि। कसायकुसीले पुच्छा ? । गोयमा ! सलेस्से होज्जा, णो अलेस्से होज्जा । जइ सलेस्से होज्जा से णं भंते ! कइसु लेस्सासु होज्जा ?। गोयमा ! छसु लेस्सासु होज्जा । तं जहा-कण्हलेस्साए० जाव सुक्कलेस्साए । णियंठे णं पुच्छा ?। गोयमा ! सलेस्से होज्जा, णो अलेस्से होज्जा । जइ सलेस्से होज्जा से णं भंते ! कइसु लेस्सासु होज्जा ? । गोयमा ! एगाए सुक्कलेस्साए होज्जा । सिणाए पुच्छा ?। गोयमा ! सलेस्से वा होज्जा, अलेस्से वा होज्जा । जइ सलेस्से होज्जा से णं भंते ! कइसु लेस्सासु होज्जा ?। गोयमा ! एगाए परमसुक्कलेस्साए होज्जा ॥ १९ ॥

(तिसु वि सुद्धलेस्सासु त्ति) भावलेश्यापेक्षया प्रशस्तासु तिसृषु पुलाकोऽवतिष्ठते । कषायकुशीलस्तु षट्स्वपि सकषायमेवाऽऽश्रित्य "पुव्वपडिवन्नओ पुण अन्नयरीए लेस्साए" इत्येतदुक्तमिति सम्भाव्यते । (एक्काए परमसुक्कलेस्साए त्ति) शुक्लध्यानतृतीयभेदावसरे या लेश्या सा परमशुक्ला, अन्यदा तु शुक्लैव, साऽपीतरजीवशुक्ललेश्याऽपेक्षया स्नातकस्य परमशुक्लेति ।

(२५) परिणामद्वारे-

पुलाए णं भंते ! किं वड्ढमाणपरिणामे होज्जा, किं हीयमाणपरिणामे होज्जा, अवट्ठियपरिणामे होज्जा ?। गोयमा ! वड्ढमाणपरिणामे वा होज्जा, हीयमाणपरिणामे वा होज्जा, अवट्ठियपरिणामे वा होज्जा । एवं० जाव कसायकुसीले । णियंठे णं पुच्छा ?। गोयमा ! वड्ढमाणपरिणामे होज्जा, णो हीयमाणपरिणामे होज्जा, अवट्ठियपरिणामे होज्जा । एवं सिणाए वि ॥

(वड्ढमाणपरिणामेत्यादि) तत्र वर्द्धमानः शुक्लांशकर्षं गच्छन्, हीयमानस्त्वपकर्षं गच्छन्, अवस्थितस्तु स्थिर इति । तत्र निर्ग्र-

न्थो हीयमानपरिणामो न प्रवर्तते, तस्य परिणामहानौ कषायकुशीलव्यपदेशात्। स्नातकस्तु हानिकारणाभावाच्च हीयमानपरिणामः स्यादिति।

(२६) परिणामाधिकारादेवेदमाह-

पुलाए णं भंते! केवइयं कालं वड्ढमाणपरिणामे होज्जा?। गोयमा! जहण्णेणं एक्कं समयं, उक्कोसेणं अंतो मुहुत्तं। केवइयं कालं हीयमाणपरिणामे होज्जा?। गोयमा! जहण्णेणं एक्कं समयं, उक्कोसेणं अंतो मुहुत्तं। केवइयं कालं अवट्ठियपरिणामे होज्जा?। गोयमा! जहण्णेणं एक्कं समयं, उक्कोसेणं सत्त समया। एवं० जाव कसायकुसीले वि। णियंठे णं भंते! केवइयं कालं वड्ढमाणपरिणामे होज्जा?। गोयमा! जहण्णेणं अंतो मुहुत्तं, उक्कोसेणं अंतो मुहुत्तं। केवइयं कालं अवट्ठियपरिणामे होज्जा?। गोयमा! जहण्णेणं एक्कं समयं, उक्कोसेणं अंतो मुहुत्तं। सिणाए णं भंते! केवइयं कालं वड्ढमाणपरिणामे होज्जा?। गोयमा! जहण्णेणं अंतो मुहुत्तं, उक्कोसेण वि अंतो मुहुत्तं। केवइयं कालं अवट्ठियपरिणामे होज्जा?। गोयमा! जहण्णेणं अंतो मुहुत्तं, उक्कोसेणं देसूणाई पुव्वकोडी॥ २०॥

(पुलाए णमित्यादि) तत्र पुलाको वर्द्धमानपरिणामकाले कषायविशेषेण बाधिते तस्मिंस्तस्यैकाऽऽदिकं समयमनुभवतीत्यत उच्यते—जघन्येनैकं समयमिति। (उक्कोसेणं अंतो मुहुत्तं ति) एतत्स्वभावत्वाद्वर्द्धमानपरिणामस्येति। एवं बकुशप्रतिसेवनाकुशीलकषायकुशीलेष्वपि, नवरं बकुशाऽऽदीनां जघन्यत एकसमयता मरणादपीष्टा, न पुनः पुलाकस्य, पुलाकस्य पुलाकत्वे मरणाभावात्। स हि मरणकाले कषायकुशीलत्वाऽऽदिना परिणमति, यच्च प्राक् पुलाकस्य कालगमनं, तद् भूतभावापेक्षयेति। निर्ग्रन्थो जघन्येनोत्कर्षेण चान्तर्मुहूर्त्तं वर्द्धमानपरिणामः स्यात्, केवलज्ञानोत्पत्तौ परिणामान्तरभावात्, अवस्थितपरिणामः पुनः निर्ग्रन्थस्य जघन्यत एकं समयं मरणात्स्यादिति। (सिणाए णं भंते! इत्यादि) स्नातको जघन्येतराभ्यामन्तर्मुहूर्त्तं वर्द्धमानपरिणामः, शैलेश्यां तस्यास्तत्प्रमाणत्वात्। अवस्थितपरिणामकालेऽपि जघन्यतस्तस्यान्तर्मुहूर्त्तम्। कथम्?। उच्यते-यः केवलज्ञानोत्पादानन्तरमन्तर्मुहूर्त्तमवस्थितपरिणामो भूत्वा शैलेशीं प्रपद्यते तदपेक्षयेति। (उक्कोसेणं देसूणाई पुव्वकोडी ति) पूर्वकोट्यायुषः पुरुषस्य जन्मतो जघन्येन नवसु वर्षेष्वतिगतेषु केवलज्ञानमुत्पद्यते, ततोऽसौ तदूनां पूर्वकोटीमवस्थितपरिणामः शैलेशीं यावद्विहरति, शैलेश्यां च वर्द्धमानपरिणामः स्यादित्येवं देशोनामिति॥

(२७) बन्धद्वारे-

पुलाए णं भंते! कइ कम्मपगडीओ बंधइ?। गोयमा! आउयवज्जाओ सत्त कम्मपगडीओ बंधइ। बउसे पुच्छा?। गोयमा! सत्तविहबंधए वा अट्ठविहबंधए वा सत्त बंधमाणे आउयवज्जाओ सत्त कम्मपगडीओ बंधइ, अट्ठ बंधमाणे पडिपुण्णाओ अट्ठ कम्मपगडीओ बंधइ। एवं पडिसेवणाकुसीले वि। कसायकुसीले णं पुच्छा?। गोयमा! सत्तविहबंधए वा, अट्ठविहबंधए वा, छव्विहबंधए वा, सत्त बंधमाणे आउयवज्जाओ सत्त कम्मपगडीओ बंधइ, अट्ठ बंधमाणे पडिपुण्णाओ अट्ठ कम्मपगडीओ बंधइ। छ बंधमाणे आउयमोहणिज्जवज्जाओ छ कम्मपगडीओ बंधइ। णियंठे णं पुच्छा?। गोयमा! एगे वेयणिज्जं कम्मं बंधइ। सिणाए णं पुच्छा?। गोयमा! एगविहबंधए वा, अबंधए वा। एगबंधमाणे एगं वेयणिज्जं कम्मं बंधइ॥ २१॥

(आउयवज्जाओ त्ति) पुलाकस्याऽऽयुर्बन्धो नास्ति, तद्बन्धाध्यवसायस्थानानां तस्याभावादिति। (बउसे इत्यादि) त्रिभागाऽऽद्यवशेषाऽऽयुषो हि जीवा आयुर्बध्नन्तीति। त्रिभागाद्याऽऽदौ तत्र बध्नन्तीति कृत्वा बकुशाऽऽदयः सप्तानामष्टानां वा कर्मणां बन्धका भवन्तीति। (छबंधमाणे इत्यादि) कषायकुशीलो हि सूक्ष्मसंपरायत्वे आयुर्न बध्नाति, अप्रमत्तान्तत्वात् तद्बन्धस्य, मोहनीयं च बादरकषायोदयाभावान्न बध्नातीति शेषाः षडेवेति। (एगे वेयणिज्जं ति) निर्ग्रन्थो वेदनीयमेव बध्नाति, बन्धहेतुषु योगानामेव सद्भावात्। (अबंधए व त्ति) अयोगो बन्धहेतूनां सर्वेषामभावाद्बन्धक एवेति॥

(२८) वेदनद्वारे—

पुलाए णं भंते! कइ कम्मपगडीओ वेदेइ?। गोयमा! णियमं अट्ठ कम्मपगडीओ वेदेइ, एवं० जाव कसायकुसीले। णियंठे णं पुच्छा?। गोयमा! मोहणिज्जवज्जाओ सत्त कम्मपगडीओ। सिणाए णं पुच्छा?। गोयमा! वेयणिज्जआउयणामगुत्ताओ चत्तारि कम्मपगडीओ वेदेइ॥ २२॥

(मोहणिज्जवज्जाओ त्ति) निर्ग्रन्थो हि मोहनीयं न वेदयति, तस्योपशान्तत्वात् क्षीणत्वाद् वा। स्नातकस्य तु घातिकर्मणां क्षीणत्वाद्वेदनीयाऽऽदीनामेव वेदनमत उच्यते-(वेयणिज्जेत्यादि)

(२९) उदीरणाद्वारे-

पुलाए णं भंते! कइ कम्मपगडीओ उदीरेइ?। गोयमा! आउयवेयणिज्जवज्जाओ छ कम्मपगडीओ उदीरेइ। बउसे णं पुच्छा?। गोयमा! सत्तविहउदीरए वा, अट्ठविहउदीरए वा, छव्विहउदीरए वा, सत्तविहउदीरेमाणे आउयवज्जाओ सत्त कम्मपगडीओ उदीरेइ, अट्ठविहउदीरेमाणे परिपुण्णाओ अट्ठ कम्मपगडीओ उदीरेइ, छव्विहउदीरेमाणे आउयवेयणिज्जवज्जाओ छ कम्मपगडीओ उदीरेइ। पडिसेवणाकुसीले एवं चेव। कसायकुसीले पुच्छा?। गोयमा! सत्तविहउदीरए वा, अट्ठविहउदीरए वा, छव्विहउदीरए वा, पंचविहउदीरए वा, सत्तविहउदीरेमाणे आउयवज्जाओ सत्त कम्मपगडीओ उदीरेइ, अट्ठउदीरेमाणे परिपुण्णाओ अट्ठ कम्मपगडीओ उदीरेइ, छ उदीरेमाणे आउयवेयणिज्जवज्जाओ छ कम्मपगडीओ उदीरेइ। पंच उदीरेमाणे आउयवेयणिज्जमोहणिज्जवज्जाओ पंच कम्मपगडीओ उदीरेति। णियंठे

णं पुच्छा ?। गोयमा ! पंचविहउदीरए वा, दुविहउदीरए वा, पंच उदीरेमाणे आउयवेयणिज्जमोहणिज्जवज्जाओ पंच कम्मपगडीओ उदीरेइ, दो उदीरेमाणे णामं च गोयं च उदीरेइ। सिणाए णं पुच्छा ?। गोयमा ! दुविहउदीरए वा, अणुदीरए वा, दो उदीरेमाणे णामं च गोयं च उदीरेति ।२३।

(आउयवेयणिज्जवज्जाओ त्ति) अयमर्थः- पुलाक आयुर्वेदनीयप्रकृतीर्नोदीरयति, तथाविधाध्यवसायस्थानाभावात्, किं तु पूर्वं ते उदीर्य पुलाकतां गच्छति, एवमुत्तरत्रापि यो याः प्रकृतीर्नोदीरयति स ताः पूर्वमुदीर्य बकुशाऽऽदितां प्राप्नोति, स्नातकः सयोग्यवस्थायां तु नामगोत्रयोरेवोदीरकः, आयुर्वेदनीये तु पूर्वोदीर्णे एव, अयोग्यवस्थायां त्वनुदीरक एवेति ।

(३०) 'उवसंपज्जहण्ण त्ति' द्वारे-

पुलाए णं भंते ! पुलायत्तं जहमाणे किं जहति, किं उवसंपज्जइ ?। गोयमा ! पुलायत्तं जहति, कसायकुसीलं वा असंजमं वा उवसंपज्जइ । बउसे णं भंते ! बउसत्तं जहमाणे किं जहति, किं उवसंपज्जइ। गोयमा ! बउसत्तं जहति, पडिसेवणाकुसीलं वा कसायकुसीलं वा असंजमं वा संजमासंजमं वा उवसंपज्जइ । पडिसेवणाकुसीले णं भंते ! पुच्छा ?। गोयमा ! पडिसेवणाकुसीलत्तं जहति, बउसं वा कसायकुसीलं वा असंजमं वा संजमासंजमं वा उवसंपज्जइ। कसायकुसीले पुच्छा ?। गोयमा ! कसायकुसीलत्तं जहति, पुलायं वा बउसं वा पडिसेवणाकुसीलं वा णियंठं वा असंजमं वा संजमासंजमं वा उवसंपज्जइ । णियंठे णं पुच्छा ?। गोयमा ! णियंठत्तं जहति, कसायकुसीलं वा सिणायं वा असंजमं वा उवसंपज्जइ । सिणाए णं पुच्छा ?। गोयमा ! सिणायत्तं जहति, सिद्धगतिं उवसंपज्जइ ॥ २४ ॥

उपसम्पदुपसम्पत्तिः प्राप्तिः। (जहण्ण त्ति) हानं त्यागः, उपसंपच्च हानं च उपसंपद्धानं, किं, पुलाकत्वाऽऽदि त्यक्त्वा, किं, कषायत्वाऽऽदिकमुपसम्पद्यते इत्यर्थः । तत्र (पुलाए णमित्यादि) पुलाकः पुलाकत्वं त्यक्त्वा संयतः कषायकुशील एव भवति, तत्सदृशसंयमस्थानतस्तद्भावात् । एवं यस्य यत्सदृशानि संयमस्थानानि सन्ति, स तद्भावमुपसम्पद्यते, मुक्त्वा कषायकुशीलाऽऽदीन् । कषायकुशीलो हि विद्यमानस्वसदृशसंयमस्थानकात्पुलाकाऽऽदिनावानुपसम्पद्यते, अविद्यमानसमानसंयमस्थानकं च निर्ग्रन्थभावम्, निर्ग्रन्थस्तु कषायित्वं वा स्नातकत्वं वा याति, स्नातकस्तु सिद्धगत्येवेति । निर्ग्रन्थसूत्रे-"कसायकुसीले वा, सिणाए वा।" इह भावप्रत्ययलोपात्कषायकुशीलत्वमित्यादि द्रष्टव्यम् । एवं पूर्वसूत्रेष्वपि । तत्रोपशमनिर्ग्रन्थः श्रेणीतः प्रत्यवरोहन् सकषायो भवति, श्रेणीमस्तके तु मृतोऽसौ देवत्वेनोत्पन्नोऽसंयतो भवति नोसंयतासंयतौ, देवत्वे तदभावात् । यद्यपि च श्रेणिपतितोऽसौ संयतासंयतोऽपि भवति, तथाऽपि भासाविद्धोक्तः, अनन्तरतया तदन्नावादिति ।

(३१) संज्ञाद्वारे-

पुलाए णं भंते ! किं सण्णोवउत्ते होज्जा, णो सण्णोवउत्ते होज्जा ?। गोयमा ! णो सण्णोवउत्ते होज्जा । बउसे णं भंते ! पुच्छा ?। गोयमा ! सण्णोवउत्ते होज्जा, णो सण्णोवउत्ते होज्जा । एवं पडिसेवणाकुसीले वि । एवं कसायकुसीले वि । णियंठे, सिणाए य जहा पुलाए ॥२७॥

(सण्णोवउत्ते त्ति) इह संज्ञा आहाराऽऽदिसंज्ञा, तत्रोपयुक्तः कथञ्चिदाहाराऽऽद्यभिष्वङ्गवान् संज्ञोपयुक्तः, नो संज्ञोपयुक्तस्तु आहाराऽऽद्युपभोगेऽपि तत्रानभिष्वङ्गः, तत्र पुलाकनिर्ग्रन्थस्नातका नो संज्ञोपयुक्ता भवन्त्याहाराऽऽदिष्वनभिष्वङ्गात् । ननु निर्ग्रन्थस्नातकावेवं युक्तौ, वीतरागत्वात्, न तु पुलाकः, सरागत्वात्, नैवं, न हि सरागत्वे निरभिष्वङ्गता सर्वथा नाऽस्तीति वक्तुं शक्यते, बकुशाऽऽदीनां सरागत्वेऽपि निःसङ्गतायां अप्रतिपादितत्वात् । चूर्णिकारस्त्वाह-"नो सण्णा नाणसण्ण त्ति।" तत्र च पुलाकनिर्ग्रन्थस्नातका नोसंज्ञोपयुक्ता ज्ञानप्रधानोपयोगवन्तो न पुनराहाराऽऽदिसंज्ञोपयुक्ताः । बकुशाऽऽदयस्तूभयथाऽपि तथाविधसंयमस्थानस्वभावादिति ।

(३२) आहारकद्वारे-

पुलाए णं भंते ! किं आहारए होज्जा, अणाहारए होज्जा ?। गोयमा ! आहारए होज्जा, णो अणाहारए होज्जा। एवं० जाव णियंठे। सिणाए णं पुच्छा ?। गोयमा ! आहारए वा होज्जा, अणाहारए वा होज्जा ॥ २६ ॥

(आहारए होज्ज त्ति) पुलाकाऽऽदिनिर्ग्रन्थान्तस्य विग्रहगत्यादीनामनाहारकत्वकारणानामनावादाहारकत्वमेव । (सिणाए इत्यादि) स्नातकः केवलिसमुद्घाते तृतीयचतुर्थपञ्चमसमयेष्वयोग्यवस्थायां चानाहारकः स्यात्, ततोऽन्यत्र पुनराहारक इति ।

(३३) भवद्वारे-

पुलाए णं भंते ! कइ भवग्गहणाइं होज्जा ?। गोयमा ! जहण्णेणं एक्कं भवग्गहणं, उक्कोसेणं तिण्णि । बउसे णं पुच्छा ?। गोयमा ! जहण्णेणं एक्कं, उक्कोसेणं अट्ठ। एवं पडिसेवणाकुसीले वि । एवं कसायकुसीले वि। णियंठे जहा पुलाए । सिणाए णं पुच्छा ?। गोयमा ! एक्कं ॥ २७ ॥

(पुलाए णमित्यादि) पुलाको जघन्यत एकस्मिन् भवग्रहणे भूत्वा कषायकुशीलत्वाऽऽदिकं संयतत्वानन्तरमेकशोऽनेकशो वा तस्मिन्नेव भवे भवान्तरे वाऽवाप्य सिद्ध्यति, उत्कृष्टतस्तु देवाऽऽदिभवान्तरितान् त्रीन् भवान् पुलाकत्वमवाप्नोति । (बउसेत्यादि) इह कश्चिदेकत्र भवे बकुशत्वमवाप्य कषायकुशीलत्वाऽऽदि च सिद्ध्यति, कश्चित्त्वेकत्रैव बकुशत्वमवाप्य भवान्तरेषु तदन्यान्येव सिद्ध्यतीत्यत उच्यते-(जहण्णेणं एक्कं भवग्गहणं उक्कोसेणं अट्ठ त्ति) किलाऽष्टौ भवग्रहणान्युत्कर्षतया चरणमात्रमवाप्यते, तत्र कश्चित् तान्यष्टौ बकुशतया पर्यन्तिमभवे सकषायत्वाऽऽदियुक्तया, कश्चित्तु प्रतिभवं प्रतिसेवनाकुशीलत्वाऽऽदियुक्तया पूरयतीत्यत उच्यते-(उक्कोसेणं अट्ठ त्ति)

(३४) अथाऽऽकर्षद्वारम्-

पुलागस्स णं भंते ! एगभवग्गहणिया केवइया आगरिसा पण्णत्ता ?। गोयमा ! जहण्णेणं एक्को, उक्कोसेणं तिण्णि । बउसस्स णं पुच्छा ?। गोयमा ! जहण्णेणं एक्को, उक्कोसे-

णं सयग्गसो। एवं पमिसेवणाकुसीले वि। कसायकुसीले एवं चेव। णियंठस्स णं पुच्छा ?। गोयमा ! जहण्णेणं एक्को, उक्कोसेणं दोण्णि। सिणातस्स णं पुच्छा ?। गोयमा ! एक्को०। पुलागस्स णं भंते ! णाणाभवग्गहणिया आगरिसा पण्णत्ता ?। गोयमा ! जहण्णेणं दोण्णि, उक्कोसेणं सत्त। बउसस्स णं पुच्छा ?। गोयमा ! जहण्णेणं दोण्णि, उक्कोसेणं सहस्सग्गसो। एवं० जाव कसायकुसीलस्स। णियंठस्स णं पुच्छा ?। गोयमा ! जहण्णेणं दोण्णि, उक्कोसेणं पंच। सिणातस्स णं पुच्छा ?। णो एक्को वि ॥ २८ ॥

तत्राऽऽकर्षणमाकर्षः, चारित्रस्य प्राप्तिरिति। (एगभवग्गहणिय त्ति) एकभवग्रहणे ये भवन्ति। (सयग्गसो त्ति) शतपरिमाणेनेत्यर्थः। शतपृथक्त्वमिति भावना। उक्तं च-"तिण्हसहस्सपुहत्तं, सयपुहत्तं च होइए त्ति।" (उक्कोसेणं दोण्णि त्ति) एकत्र भवे द्वारद्वयमुपशमश्रेणिकरणाद्युपशमनिर्ग्रन्थत्वस्य द्वाराकर्षाविति। (पुलागस्सेत्यादि) (णाणाभवग्गहणिय त्ति) नानाप्रकारेषु भवग्रहणेषु ये भवन्तीत्यर्थः। (जहण्णेणं दोण्णि त्ति) एक आकर्षः एकत्र भवे, द्वितीयोऽन्यत्रेत्येवमनेकत्र भवे आकर्षौ स्याताम्। (उक्कोसेणं सत्त त्ति) पुलाकत्वमुत्कर्षतस्त्रिषु भवेषु स्यात्, एकत्र च तदुत्कर्षतो द्वारत्रयं भवति। ततश्च प्रथमभवे एक आकर्षोऽन्यत्र च भवद्वये त्रयाणाय इत्यादिभिर्विकल्पैः सप्त ते भवन्तीति। (बउसस्सेत्यादि) (उक्कोसेणं सहस्सग्गसो त्ति) बकुशस्याष्टौ भवग्रहणान्युत्कर्षतः सन्ति,एकत्र च भवग्रहणे उत्कर्षतः आकर्षशतपृथक्त्वमुक्तम्, तत्र च यदाऽष्टास्वपि भवग्रहणेषूत्कर्षतो नव प्रत्येकमाकर्षशतानि भवन्ति, तदा नवानां शतानामष्टाभिर्गुणनात्सप्त सहस्राणि शतद्वयाधिकानि भवन्तीति। (णियंठस्सेत्यादि) (उक्कोसेणं पंच त्ति) निर्ग्रन्थस्योत्कर्षतस्त्रीणि भवग्रहणान्युक्तानि, एकत्र च भवे द्वावाकर्षावित्येवमेकत्र द्वावन्यत्र च द्वावपरत्र चैकं क्षपकनिर्ग्रन्थत्वाकर्षं कृत्वा सिद्ध्यतीति कृत्वोच्यते पञ्चेति।

(३५) कालद्वारे-

पुलाए णं भंते ! कालओ केवचिरं होइ ?। गोयमा ! जहण्णेणं अंतो मुहुत्तं, उक्कोसेण वि अंतो मुहुत्तं। बउसे णं पुच्छा ?। गोयमा ! जहण्णेणं एक्कं समयं,उक्कोसेणं देसूणाइं पुव्वकोडी। एवं पमिसेवणाकुसीले वि। कसायकुसीले वि एवं चेव। णियंठे णं पुच्छा ?। गोयमा ! जहण्णेणं एक्कं समयं,उक्कोसेणं अंतो मुहुत्तं। सिणाए णं पुच्छा ?। गोयमा ! जहण्णेणं अंतो मुहुत्तं,उक्कोसेणं देसूणाइं पुव्वकोडी। पुलागस्स णं भंते ! कालओ केव चिरं होइ ?। गोयमा ! जहण्णेणं एक्कं समयं,उक्कोसेणं अंतो मुहुत्तं। बउसा णं भंते ! पुच्छा ?। गोयमा ! सव्वद्धं, एवं० जाव कसायकुसीला। णियंठा जहा पुलागा। सिणाता जहा बउसा ॥ २९ ॥

(पुलाए णमित्यादि) (जहण्णेणं अंतो मुहुत्तं ति) पुलाकत्वं प्रतिपन्नोऽन्तर्मुहूर्त्तापरिपूर्तौ पुलाको न म्रियते, नाऽपि प्रतिपततीति कृत्वा जघन्यतोऽन्तर्मुहूर्तमित्युच्यते, उत्कर्षतोऽप्यन्तर्मुहूर्तमेतत्प्रमाणत्वाद्देहतत्स्वभावस्येति। (बउसेत्यादि) (जहण्णेणमेक्कं समयं ति) बकुशस्य चरणप्रतिपत्त्यनन्तरसमय एव मरणसंभवादिति। (उक्कोसेणं देसूणा पुव्वकोडि त्ति) पूर्वकोट्यायुषोऽष्टवर्षान्ते चरणप्रतिपत्तेरिति। (णियंठे णमित्यादि) (जहण्णेणं एक्कं समयं ति) उपशान्तमोहस्य प्रथमसमयसमनन्तरमेव मरणसम्भवात्। (उक्कोसेणं अंतो मुहुत्तं ति) निर्ग्रन्थाद्धाया एतत्प्रमाणत्वादिति।(सिणाएत्यादि) (जहण्णेणं अंतो मुहुत्तं ति) आयुष्कान्तिमान्तर्मुहूर्ते केवलोत्पत्तावन्तर्मुहूर्ते जघन्यतः स्नातककालः स्यादिति। पुलाकाऽऽदीनामेकत्वेन कालमानमुक्तम्। अथ पृथक्त्वेनाऽऽह-(पुलागस्स णमित्यादि) जघन्येनैकं समयमिति। कथम् ?। एकस्य पुलाकस्य योऽन्तर्मुहूर्तकालस्यान्त्यसमयेऽन्यपुलाकत्वं प्रतिपन्न इत्येवं जघन्यत्वविवक्षायां द्वयोः पुलाकयोरेकत्र समये सद्भावो, द्वित्वे च जघन्यं पृथक्त्वं भवतीति। (उक्कोसेणं अंतो मुहुत्तं ति)यद्यपि पुलाका उत्कर्षतः एकदा सहस्रपृथक्त्वपरिमाणाः प्राप्यन्ते,तथाऽप्यन्तर्मुहूर्तत्वात्तद्धाया बहुत्वेऽपि तेषामन्तर्मुहूर्तमेव तत्कालः, केवलं बहूनां स्थितौ यदन्तर्मुहूर्तं तदेकपुलाकस्थित्यन्तर्मुहूर्तान्महत्तरमित्यवसेयम्। बकुशाऽऽदीनां तु स्थितिकालः सर्वाद्धा,प्रत्येकं तेषां बहुस्थितिकत्वादिति। (णियंठा जहा पुलाग त्ति)। तथैवम्-जघन्यत एकं समयम्, उत्कर्षतोऽन्तर्मुहूर्तमिति।

(३६) अन्तरद्वारे-

पुलागस्स णं भंते ! केवइयं कालं अंतरं होइ ?। गोयमा ! जहण्णेणं अंतो मुहुत्तं, उक्कोसेणं अणंतं कालं। अणंताओ ओसप्पिणी-उस्सप्पिणीओ कालओ खेत्तओ अवड्ढं पोग्गलपरियट्टं देसूणं, एवं० जाव णियंठस्स। सिणायस्स णं पुच्छा ?। णत्थि अंतरं। पुलागा णं भंते ! केवइयं कालं अंतरं होइ ?। गोयमा ! जहण्णेणं एक्कं समयं, उक्कोसेणं संखेज्जाइं वासाइं। बउसाणं भंते ! पुच्छा ?। गोयमा ! णत्थि अंतरं, एवं० जाव कसायकुसीलाणं। णियंठाणं पुच्छा ?। गोयमा ! जहण्णेणं एक्कं समयं, उक्कोसेणं छम्मासा। सिणायाणं जहा बउसाणं ॥ ३० ॥

(पुलागस्स णमित्यादि) तत्र पुलाकः पुलाको भूत्वा कियता कालेन पुलाकत्वमापद्यते ?। उच्यते-जघन्यतोऽन्तर्मुहूर्तं स्थित्वा पुनः पुलाक एव भवति, उत्कर्षतः पुनरनन्तेन कालेन पुलाकत्वमाप्नोति। कालानन्त्यमेव कालतो नियमयन्नाह-(अणंताओ इत्यादि) इदमेव क्षेत्रतोऽपि नियमयन्नाह-(खेत्तओ इति) स चानन्तः कालः क्षेत्रतो मीयमानः किंमानः ?, इत्याह-(अवड्ढमित्यादि) तत्र पुद्गलपरावर्तः एवं श्रूयते-किल केनाऽपि प्राणिना प्रतिप्रदेशं म्रियमाणेन मरणैर्यावता कालेन लोकः समस्तोऽपि व्याप्यते, तावता क्षेत्रतः पुद्गलपरावर्तो भवति। स च परिपूर्णोऽपि स्यादत आह-अपार्द्धमपगतार्द्धम्,अर्द्धमात्रमित्यर्थः। अपार्द्धोऽप्यर्द्धतः पूर्णः स्यादत आह-(देसूणं ति) देशेन भागेन न्यूनमिति। (सिणायस्स नत्थि अंतर त्ति) प्रतिपाताभावात्। एकत्वापेक्षया पुलाकत्वाऽऽदीनामन्तरमुक्तम्। अथ पृथक्त्वापेक्षया तदेवाऽऽह-(पुलागा णमित्यादि) व्यक्तम्।

(३७) समुद्घातद्वारे-

पुलागस्स णं भंते ! कइ समुग्घाया पण्णत्ता ?। गोयमा ! ति-

णि समुग्घाया पन्नत्ता । तं जहा–वेयणासमुग्घाए, कसायसमुग्घाए, मारणंतियसमुग्घाए । बउसस्स णं भंते ! पुच्छा ?। गोयमा ! पंच समुग्घाया पन्नत्ता । तं जहा–वेयणासमुग्घाए, ०जाव तेयासमुग्घाए । एवं पडिसेवणाकुसीलेवि । कसायकुसीलस्स पुच्छा ?। गोयमा ! छ समुग्घाया पन्नत्ता । तं जहा–वेयणासमुग्घाए, ० जाव आहारगसमुग्घाए । णियंठस्स णं पुच्छा ?। गोयमा ! णत्थि एको वि । सिणायस्स णं पुच्छा ?। गोयमा ! एगे केवलिसमुग्घाए पन्नत्ते ॥ ३१ ॥

(कसायसमुग्घाए इत्यादि) चारित्रवतां संज्वलनकषायोदयसम्भवेन कषायसमुद्घातो भवतीति । (मारणंतियसमुग्घाए त्ति) इह च पुलाकस्य मरणाभावेऽपि मारणान्तिकसमुद्घातो न विरुद्धः,समुद्घातान्निवृत्तस्य कषायकुशीलत्वाऽऽदिपरिणामे सति मरणाभावात् । (नियंठस्स त्ति) (नऽत्थि एको वि त्ति) तथास्वभावत्वादिति ।

(३०) अथ क्षेत्रद्वारम-

पुलाए णं भंते ! लोगस्स किं संखेज्जइभागे होज्जा, असंखेज्जइभागे होज्जा, संखेज्जेसु भागेसु होज्जा, असंखेज्जेसु भागेसु होज्जा,सव्वलोए होज्जा ?। गोयमा ! णो संखेज्जइभागे होज्जा, असंखेज्जइभागे होज्जा, णो संखेज्जेसु भागेसु होज्जा, असंखेज्जेसु भागेसु होज्जा, णो सव्वलोए होज्जा । एवं० जाव णियंठे । सिणाए णं पुच्छा ?। गोयमा ! णो संखेज्जइभागे होज्जा, असंखेज्जइभागे होज्जा, णो संखेज्जेसु भागेसु होज्जा, असंखेज्जेसु भागेसु होज्जा, सव्वलोए वा होज्जा ॥ ३२ ॥

तत्र क्षेत्रमवगाहनाक्षेत्रं, तत्र (असंखेज्जइभागे होज्ज त्ति) पुलाकशरीरस्य लोकासङ्ख्येयभागमात्रावगाहित्वात् । (सिणाए णमित्यादि) (असंखेज्जइभागे होज्ज त्ति) शरीरस्थो दण्डकपाटकरणकाले च लोकासङ्ख्येयभागवृत्तिः, केवलिशरीराऽऽदीनां तावन्मात्रत्वात् । (असंखेज्जेसु भागेसु त्ति) मथिकरणकाले बहोर्लोकस्य व्याप्तत्वेन स्तोकस्य चाव्याप्ततयोक्तस्वाल्लोकस्यासङ्ख्येयेषु भागेषु स्नातको वर्तते, लोकापूरणे च सर्वलोके वर्तत इति ॥ ३२ ॥

(३१) स्पर्शनाद्वारे-

पुलाए णं भंते ! सव्वलोगस्स किं संखेज्जइभागं फुसइ, असंखेज्जइभागं फुसइ, एवं जहा ओगाहणा भणिया,तहा फुसणा वि भाणियव्वा० जाव सिणाए ॥ ३३ ॥

स्पर्शना क्षेत्रवत्प्रवरं क्षेत्रमवगाढमात्रं, स्पर्शना त्ववगाढस्य तत्पार्श्ववर्तिनश्चेति विशेषः ॥ ३३ ॥

(३०) भावद्वारे-

पुलाए णं भंते ! कयरम्मि भावे होज्जा ?। गोयमा ! खओवसमिए भावे होज्जा, एवं० जाव कसायकुसीले । णियंठे पुच्छा ?। गोयमा ! उवसमिए वा, खइए वा भावे होज्जा । सिणाए पुच्छा ?। गोयमा ! खइए भावे होज्जा ॥ ३४ ॥

भावद्वारं व्यक्तमेव ।

(४१) परिमाणद्वारे-

पुलाया णं भंते ! एगसमएणं केवइया होज्जा ?। गोयमा ! पडिवज्जमाणए पडुच्च सिय अत्थि, सिय णत्थि । जइ अत्थि जहण्णेणं एको वा दो वा तिण्णि वा, उक्कोसेणं सयपुहत्तं । पुव्वपडिवण्णए पडुच्च सिय अत्थि, सिय णत्थि । जइ अत्थि जहण्णेणं एको वा दो वा तिण्णि वा, उक्कोसेणं सहस्सपुहत्तं । बउसा णं भंते ! एगसमएणं पुच्छा ?। गोयमा ! पडिवज्जमाणए पडुच्च सिय अत्थि, सिय णत्थि । जइ अत्थि जहण्णेणं एको वा दो वा तिण्णि वा,उक्कोसेणं सयपुहत्तं । पुव्वपडिवण्णए पडुच्च जहण्णेणं कोडिसयपुहत्तं, उक्कोसेण वि कोडिसयपुहत्तं । एवं पडिसेवणाकुसीले वि । कसायकुसीला णं पुच्छा ?। गोयमा ! पडिवज्जमाणए पडुच्च सिय अत्थि, सिय णत्थि । जइ अत्थि जहण्णेणं एको वा दो वा तिण्णि वा, उक्कोसेणं कोडिसहस्सपुहत्तं । पुव्वपडिवण्णए पडुच्च जहण्णेणं कोडिसहस्सपुहत्तं, उक्कोसेण वि कोडिसहस्सपुहत्तं । णियंठा णं पुच्छा ?। गोयमा ! पडिवज्जमाणए पडुच्च सिय अत्थि, सिय णत्थि । जइ अत्थि जहण्णेणं एको वा दो वा तिण्णि वा, उक्कोसेणं वावट्ठं सतं, अट्ठसयं खवगाणं चउपण्णं उवसमगाणं । पुव्वपडिवण्णए पडुच्च सिय अत्थि, सिय णत्थि । जइ अत्थि जहण्णेणं एको वा दो वा तिण्णि वा, उक्कोसेणं सतपुहत्तं । सिणाता णं पुच्छा ?। गोयमा ! पडिवज्जमाणए पडुच्च सिय अत्थि, सिय णत्थि । जइ अत्थि जहण्णेणं एको वा दो वा तिण्णि वा, उक्कोसेणं अट्ठसयं । पुव्वपडिवण्णए पडुच्च जहण्णेणं कोडिपुहत्तं, उक्कोसेण वि कोडिपुहत्तं ॥ ३५ ॥

(पुलाया णमित्यादि) ननु सर्वसंयतानां कोटिसहस्रपृथक्त्वं श्रूयते । इह तु केवलानामेव कषायकुशीलानां तदुक्तं, ततः पुलाकाऽऽदिमानानि ततोऽतिरिच्यन्त इति कथं न विरोधः ?। उच्यते-कषायकुशीलानां यत्कोटिसहस्रपृथक्त्वं,तद् द्वित्राऽऽदिकोटिसहस्ररूपं कल्पयित्वा पुलाकबकुशाऽऽदिसङ्ख्या तत्र प्रवेश्यते, ततः समस्तं संयतमानं यदुक्तं, तन्नातिरिच्यत इति ।

(४२) अल्पबहुत्वद्वारे-

एएसि णं भंते ! पुलागबउसपडिसेवणाकुसीलकसायकुसीलणियंठसिणाताणं कयरे कयरे० जाव विसेसाहिया वा ?। गोयमा ! सव्वत्थोवा णियंठा, पुलागा संखेज्जगुणा, सिणाया संखेज्जगुणा, बउसा संखेज्जगुणा, पडिसेवणाकुसीला संखेज्जगुणा,कसायकुसीला संखेज्जगुणा ॥ ३६ ॥

(सव्वत्थोवा णियंठ त्ति) तेषामुत्कर्षतोऽपि शतपृथक्त्वसङ्ख्यत्वात् । (पुलागा संखेज्जगुण त्ति) तेषामुत्कर्षतः सहस्रपृथक्त्वसङ्ख्यत्वात् । (सिणाया संखेज्जगुण त्ति) तेषामुत्कर्षतः कोटिपृथक्त्वमानत्वात् । (बउसा संखेज्जगुण त्ति) तेषामुत्कर्षतः कोटिशतपृथक्त्वमानत्वात् । (पडिसेवणाकुसीला संखेज्जगु-

ण त्ति) कथमेतत्?,तेषामप्युत्कर्षतः कोटिशतपृथक्त्वमानतयोक्तत्वात्,सत्यम्,किन्तु बकुशानां यत्कोटिशतपृथक्त्वं तद् द्वित्राऽऽदिकोटिशतमानं,प्रतिसेविनां तु कोटिशतपृथक्त्वं चतुःषट्कोटिशतमानमिति न विरोधः । कषायिणां तु सहस्रयातगुणत्वं व्यक्तमेव, तत्कर्षतः कोटिसहस्रपृथक्त्वमानतया तेषामुक्तत्वादिति । भ० २५ श० ६ उ० । उत्त० । ['अणगारधम्म' शब्दे प्र० भा० २७६ पृष्ठे, 'समणधम्म' शब्दे च क्षान्त्यादिर्निर्ग्रन्थधर्मो दृश्यः]

(४३) चत्तारि णिग्गंथा पण्णत्ता । तं जहा–रायणिए समणे णिग्गंथे महाकम्मे महाकिरिए अणायावी असमिए धम्मस्स अणाराहए भवइ १ , रायणिए समणे णिग्गंथे अप्पकम्मे अप्पकिरिए आयावी समिए धम्मस्स आराहए भवइ २ , ओमरायणिए समणे णिग्गंथे महाकम्मे महाकिरिए अणायावी असमिए धम्मस्स अणाराहए भवइ ३ , ओमरायणिए समणे णिग्गंथे अप्पकम्मे अप्पकिरिए आयावी समिए धम्मस्स आराहए भवइ ४ ।

निर्गता बाह्याभ्यन्तरग्रन्थाद् निर्ग्रन्थाः साधवः,रत्नानि भावतो ज्ञानाऽऽदीनि,तैर्यद्बहरतीति रात्निकः,पर्यायज्येष्ठ इत्यर्थः,श्रमणो निर्ग्रन्थो, महान्ति गुरूणि स्थित्यादिभिस्तथाविधप्रमाणाऽभ्यनिष्ठद्यानि कर्माणि यस्य स महाकर्मा । महती क्रिया कायिक्यादिका कर्मबन्धहेतुर्यस्य स महाक्रियः, न आतापयति आतापनां शीताऽऽदिसहनरूपां करोतीत्यनातापी, मन्दश्रद्धत्वादिति । अत एवासमितः समितिभिः । स चैवंभूतो धर्मस्यानाराधको भवतीत्येकः । अन्यस्तु पर्यायज्येष्ठ एवाल्पकर्मा लघुकर्माऽल्पक्रिय इति द्वितीयः । अन्यस्तु अवमो लघुः पर्यायेण रात्निकोऽवमरात्निकः । स्था० ४ ठा० ३ उ० । निर्गतो मोहनीयकर्मलक्षणाद् ग्रन्थादिति निर्ग्रन्थः । निर्ग्रन्थभेदे, भ० २५ श० ६ उ० । प्रव० ।

(४४) स च पञ्चविधः प्रथमसमयाऽऽदिः–

णियंठे पंचविहे पण्णत्ते । तं जहा–पढमसमयणियंठे, अपढमसमयणियंठे, चरिमसमयणियंठे, अचरिमसमयणियंठे, अहासुहुमणियंठे णामं पंचमे ।

निर्गतो ग्रन्थान्मोहनीयाऽऽख्यान्निर्ग्रन्थः क्षीणकषाय उपशान्तमोहो वा, क्षालितसकलघातिकर्ममलपटलत्वात् । स्था० ५ ठा० ३ उ० ।

(४५) तओ ठाणा णिग्गंथाण वा णिग्गंथीण वा अहियाए असुहाए अक्खमाए अणिस्सेयसाए अणाणुगामियत्ताए भवइ । तं जहा–कूअणया, ककरणया, अवज्झाणया । तओ ठाणा णिग्गंथाण वा णिग्गंथीण वा हियाए सुहाए खमाए णिस्सेयसाए, अणुगामियत्ताए भवइ । तं जहा–अकूयणया, अककरणया, अणवज्झाणया ।

"तओ" इत्यादि स्पष्टम् । किन्तु अहिताय अपथ्याय, असुखाय दुःखाय, अक्षमाय अयुक्तत्वाय,अनिःश्रेयसाय अमोक्षाय, अनानुगामिकत्वाय न शुभानुबन्धायेति । कूजनता आर्तस्वरकरणम्, ककरणता शय्योपध्यादिदोषोद्भावनगर्भप्रलपनम् । अपध्यानता आर्तरौद्रध्यायित्वमिति । उक्तविपर्ययसूत्रं व्यक्तमेव । स्था० ३ ठा० ३ उ० । (निर्ग्रन्थानां निर्ग्रन्थीनामेकत्र संवसनं 'संवास' शब्दे निषेत्स्यते)

निर्ग्रन्थशब्दस्थविषयसूची–

(१) निर्ग्रन्थशब्दव्याख्यायामहिरण्यसुवर्णकपदोपादानेन बाह्याभ्यन्तरपरिग्रहशून्यत्वं निर्ग्रन्थस्य लक्षणमुक्तम् ।
(२) क्रोधाऽऽदेर्निर्गमानिर्गमाभ्यां क्षपकश्रेणिमुपकल्प्य निर्ग्रन्थविचारः ।
(३) ये कषायैर्मुक्ता निर्ग्रन्थास्तेषां कषायाणां क्षयकरणायोद्यतत्वेन निग्रहपरमत्वं प्रसाध्य, सतामपि कषायाणामसत्कल्पनाकरणात् सरागसंयतत्वेन निर्ग्रन्थत्वाभिधानम् ।
(४) निर्ग्रन्थनिक्षेपे नामस्थापनाऽऽद्यभावानां मध्ये द्रव्यस्यागमनोआगमज्ञेन निर्ग्रन्थत्रैविध्यं प्ररूप्य, ज्ञशरीरभव्यशरीराऽऽदिप्ररूपणम् ।
(५) पुलाकबकुशकुशीलनिर्ग्रन्थस्नातकभेदेन पञ्चविधनिर्ग्रन्थस्वरूपं निरूप्य, निर्ग्रन्थानां नोसंज्ञोपयुक्तत्वेन पुलाकाऽऽदिभेदत्रयप्ररूपणानन्तरं संज्ञानोसंज्ञोपयुक्तत्वेन बकुशाऽऽदिभेदद्वयप्ररूपणम् ।
(६) पुलाकाऽऽद्यः पञ्च निर्ग्रन्थविशेषा यैः साध्या भवन्ति, तेषां निरूपणाय द्वारगाथाः ।
(७) वेदद्वारे पुलाकाऽऽदीनां स्त्रीपुंसपुंसकवेदत्वप्ररूपणम् ।
(८) रागद्वारे पुलाकाऽऽदीनां सरागवीतरागत्वविचारः, तथा कल्पद्वारे तेषां स्थितकल्पाऽऽदिविवेकः ।
(९) चरित्रद्वारे पुलाकाऽऽदीनां सामायिकच्छेदोपस्थापनीयाऽऽदिविमर्शः ।
(१०) प्रतिसेवनाद्वारे प्रतिसेवकाप्रतिसेवकाऽऽदिविचारः ।
(११) ज्ञानद्वारे पुलाकाऽऽदीनामाभिनिबोधिकश्रुतावधिज्ञाननिरूपणम् ।
(१२) तीर्थद्वारे पुलाकाऽऽदीनां तीर्थातीर्थविचारः ।
(१३) लिङ्गद्वारे पुलाकाऽऽदीनां द्रव्यभावलिङ्गं प्रतीत्य सलिङ्गान्यलिङ्गप्ररूपणम् ।
(१४) शरीरद्वारे पुलाकाऽऽदीनामौदारिकवैक्रियाऽऽहारकाऽऽदिनिरूपणा ।
(१५) क्षेत्रद्वारे पुलाकाऽऽदीनां जन्मास्तित्वं प्रतीत्य, कर्मभूम्यकर्मभूमिप्ररूपणा ।
(१६) कालद्वारे पुलाकाऽऽदीनामवसर्पिण्युत्सर्पिणीकालाभिधानम् ।
(१७) गतिद्वारे पुलाकाऽऽदीनां देवगत्यादिनिरूपणम् ।
(१८) संयमद्वारे पुलाकाऽऽदीनां संयमस्थाननिदर्शनम् ।
(१९) निकर्षद्वारे पुलाकाऽऽदीनां चरित्रपर्यवानश्रित्य प्ररूप्य, परस्परेण हीनतुल्याभ्यधिकत्वकथनम् ।
(२०) पर्यवाधिकारात् तेषामेव जघन्याऽऽदिज्ञेदानां पुलाकाऽऽदिसंबन्धिनामल्पत्वाऽऽदिप्ररूपणम् ।
(२१) योगद्वारे पुलाकाऽऽदीनां सयोग्ययोगित्वं प्रसाध्य, मनोवाक्कायकयोगित्वप्रसाधनम् ।
(२२) उपयोगद्वारे पुलाकाऽऽदीनां साकारानाकारोपयुक्तत्वविचारः ।
(२३) कषायद्वारे पुलाकाऽऽदीनां सकषायाकषायत्वं प्ररूप्य, क्रोधमानमायालोभाऽऽदीनां विमर्शः ।

(२४) लेश्याद्वारे पुलाकाऽऽदीनां सलेश्यालेश्यत्वं निरूप्य, कृष्णशुक्लाऽऽदिलेश्यानिरूपणम् ।
(२५) परिणामद्वारे पुलाकाऽऽदीनां वर्द्धमानहीयमानावस्थितपरिणामत्वप्रदर्शनम् ।
(२६) परिणामाधिकारादेव जघन्योत्कर्षाऽऽदिभेदेन कालनिरूपणम् ।
(२७) बन्धद्वारे पुलाकाऽऽदीनां कर्मप्रकृतिबन्धविचारः ।
(२८) वेदनद्वारे तेषामेव कर्मप्रकृतिवेदविमर्शः ।
(२९) उदीरणाद्वारे तेषामेव कर्मप्रकृत्युदीरणाऽध्यवसायः ।
(३०) उपसंपद्धानद्वारे पुलाकाऽऽदीनां पुलाकत्वाऽऽदित्यागोपादाननिरूपणम् ।
(३१) संज्ञाद्वारे पुलाकाऽऽदीनां संज्ञोपयुक्तनोसंज्ञोपयुक्तत्वविचारणम् ।
(३२) आहारकद्वारे पुलाकाऽऽदीनामाहारकानाहारकत्वप्ररूपणम् ।
(३३) भवद्वारे पुलाकाऽऽदीनां भवग्रहणनिरूपणम् ।
(३४) आकर्षद्वारे जघन्योत्कर्षभेदेनाऽऽकर्षविमर्शः ।
(३५) कालद्वारे पुलाकाऽऽदयः कियच्चिरं भवन्तीति प्रतिपादनम् ।
(३६) अन्तरद्वारे जघन्योत्कर्षतः तेषामेवान्तरनिरूपणम् ।
(३७) समुद्घातद्वारे तेषां समुद्घातविचारः ।
(३८) क्षेत्रद्वारे संख्येयासंख्येयसर्वलोकाऽऽदिभवनभावना ।
(३९) स्पर्शनाद्वारे संख्येयासंख्येयभागेन स्पर्शनप्रतिपादनम् ।
(४०) भावद्वारे पुलाकाऽऽदीनां क्षायोपशमिकाऽऽदिभावविचारः ।
(४१) परिमाणद्वारे तेषामेव परिमाणनिर्देशः ।
(४२) अल्पबहुत्वद्वारे पुलाकाऽऽदीनामल्पबहुत्वनिदर्शनम् ।
(४३) निर्ग्रन्थानां प्रकारान्तरेण चातुर्विध्यम् ।
(४४) प्रथमाप्रथमचरमाचरमसमयथासूक्ष्मनिर्ग्रन्थाऽऽदिनेदेन पञ्चविधत्वम् ।
(४५) कूजनताकर्करणताऽपध्यानताऽऽदिनेदेन निर्ग्रन्थानां, निर्ग्रन्थीनामसुखत्वाऽऽदि प्ररूप्य, तद्वैपरीत्येन सुखत्वाऽऽदिनिरूपणम् ।

नैर्ग्रन्थ्य–न० । निर्ग्रन्थानामिदं नैर्ग्रन्थ्यम् । विशे० । आव० । आर्हते प्रवचने, सूत्र० २ श्रु० ६ अ० । आ० म० ।

णिग्गंथधम्म–निर्ग्रन्थधर्म–पुं० । निर्गतो बाह्याभ्यन्तररूपो ग्रन्थोऽस्यास्तीति निर्ग्रन्थः, स चाऽसौ धर्मश्च निर्ग्रन्थधर्मः । श्रुतचारित्राऽऽख्ये क्षान्त्यादिके वा सर्वज्ञोक्ते धर्मे, सूत्र० २ श्रु० ६ अ० ।

णिग्गंथपावयण–नैर्ग्रन्थ्यप्रावचन–न० । निर्ग्रन्थानां साधूनामिदं नैर्ग्रन्थ्यं, प्रावचनमिति प्रकर्षेणाभिविधिनोच्यन्ते जीवाऽऽदयो यस्मिन्निति प्रावचनम् । जैनाऽऽगमे, "इणमेव णिग्गंथे पावयणे सच्चे अट्ठे, सेसमणट्ठे । " आव० ४ अ० । स्था० । आ० चू० ।

णिग्गंथी–निर्ग्रन्थी–स्त्री० । निर्ग्रन्थः साधुः, तेषामियं निर्ग्रन्थी । साध्व्याम्, स्था० २ ठा० १ उ० ।

सा चतुर्विधा–

चत्तारि णिग्गंथीओ पण्णत्ताओ । तं जहा–रायणिया समणी णिग्गंथी० जाव आराहिया भवइ ४ ।

निर्ग्रन्थसूत्रवत् । स्था० ४ ठा० ३ उ० । (निर्ग्रन्थ्या अधिकारो यथास्थानमुक्तः, वक्ष्यन्ते च । यथा 'गहण' शब्दे तृतीयभागे ८५९ पृष्ठे पतन्त्याः प्रस्खलन्त्या ग्रहणमुक्तम्)

नवरमिह–

छहिं ठाणेहिं णिग्गंथे णिग्गंथिं गिण्हमाणे वा अवलंबमाणे वा नाइक्कमइ । तं जहा–खित्तचित्तं, दित्तचित्तं, जक्खाइट्ठं, उम्मायपत्तं, उवसग्गपत्तं, साहिगरणं । ६ ठा० ४ उ० । (क्षिप्तचित्ताऽऽदीनां प्ररूपणा 'खित्तचित्त' आदिशब्देषु द्रष्टव्या)

चउहिं ठाणेहिं णिग्गंथे णिग्गंथिं आलवमाणे वा संलवमाणे वा णाइक्कमइ । तं जहा–पंथं पुच्छमाणे, पंथं देसमाणे, असणं वा पाणं वा खाइमं वा साइमं वा दलयमाणे वा, दवावेमाणे वा ।

"चउहिं" इत्यादि स्फुटं, किंतु आलपन्नीषत्पथमतया वा जल्पन्, संलपन् मिथो भाषणेन, नातिक्रामति न लङ्घयति निर्ग्रन्थाचारम्– "एगो एगत्थिए सद्धिं, नेव चिट्ठे न संलवे । " विशेषतः साध्व्या इत्येवं रूपं, मार्गप्रश्नाऽऽदीनां पृष्टाऽऽलम्बनत्वादिति । तत्र मार्गं पृच्छन् प्रश्ननीयसाधर्मिकगृहस्थपुरुषाऽऽदीनामभावे–हे आर्ये ! कोऽस्माकमितो गच्छतां मार्गः ?, इत्यादिना क्रमेण, मार्गं वा तस्या देशयन्–धर्मशीले ! अयं मार्गस्ते इत्यादिना क्रमेण, अशनाऽऽदि च ददद्–धर्मशीले ! गृहाणेदमशनाऽऽदीत्येवं, तथाऽशनाऽऽदि दापयन्–आर्ये ! दापयाम्येतत् तुभ्यम्, आगच्छेह गृहाऽऽदावित्यादिविधिनेति । स्था० ४ ठा० २ उ० । (निर्ग्रन्थैर्निर्ग्रन्थिकाभिश्च सह कायोत्सर्गो न कार्यः, इति ' ठाण ' शब्देऽस्मिन्नेव भागे १६६५ पृष्ठे उक्तम्)

सचेला निर्ग्रन्थी, अचेलश्च निर्ग्रन्थः सह संवसतः–

पंचहिं ठाणेहिं समणे णिग्गंथे अचेलए सचेलियाहिं णिग्गंथीहिं सद्धिं संवसमाणे णाइक्कमइ । तं जहा–खित्तचित्ते समणे निग्गंथे निग्गंथेहिं अविज्जमाणेहिं अचेलओ सचेलियाहिं निग्गंथीहिं सद्धिं संवसमाणे नाइक्कमइ । एवमेएणं गमएणं दित्तचित्ते, जक्खाइट्ठे, उम्मायपत्ते, निग्गंथीपव्वाविए समणे निग्गंथेहिं अविज्जमाणेहिं अचेलए सचेलियाहिं निग्गंथीहिं सद्धिं संवसमाणे णाइक्कमइ ॥

अचेलः क्षिप्तचित्ताऽऽदिना क्षिप्तचित्तः शोकेन, तत्प्रतिजागरकाः साधवो न विद्यन्ते, ततो निर्ग्रन्थिकाः पुत्राऽऽदिकमिव तं संगोपायन्तीति न ततोऽप्यसावाज्ञामतिक्रामति । दृप्तचित्तो दर्पातिरेकात्, यक्षाऽऽविष्टो देवाधिष्ठितः, उन्मादप्राप्तो वाताऽऽदिक्षोभात् । निर्ग्रन्थिकया कारणवशात् पुत्राऽऽदिः प्रव्राजितः, स च बालत्वादचेलो महानपि वा तथाविधवृद्धत्वाऽऽदिनेति । स्था० ५ ठा० २ उ० । (अथ निर्ग्रन्थीनां मासकल्पविहारवक्तव्यतायां सर्वा वक्तव्यता)

से गामंसि वा० जाव रायहाणिंसि वा सपरिक्खेवंसि अबाहिरियंसि कप्पइ निग्गंथीणं हेमंतगिम्हासु दो मासा वत्थए ॥ ८ ॥

अस्यापि व्याख्या प्राग्वत्, नवरमबाहिरिके क्षेत्रे कल्पते निर्ग्रन्थीनां हेमन्तग्रीष्मेषु द्वौ मासौ वस्तुमिति ।

अथ भाष्यविस्तरः–

एसेव कमो नियमा, निग्गंथीणं पि होइ नायव्वो ।
जं इत्थं णाणत्तं, तमहं वोच्छं समासेणं ॥१२०७॥

एष एव निर्ग्रन्थसूत्रोक्तः " पवज्जा सिक्खापद, " इत्यादिकः क्रमो नियमान्निर्ग्रन्थीनामपि ज्ञातव्यो भवति । यत्पुनरत्र विहारद्वारे नानात्वं, तदहं वक्ष्ये समासेन ।

प्रतिज्ञातमेव निर्वाहयति–

निग्गंथीणं गणहर-परूवणा खेत्तमग्गणा चेव ।
वसही वियार गन्न-स्स आणणा वारए चेव ॥१२०८॥
भत्तट्ठणए य विही, पडिणीए निक्खनिग्गमे चेव ।
निग्गंथाणं मासो, कम्हा तासिं दुवे मासा? ॥१२०९॥

निर्ग्रन्थीनां यो गणधरो ऋतुवर्त्तापकः, तस्य प्ररूपणा कर्त्तव्या । ततः क्षेत्रस्य संयतीप्रायोग्यस्य मार्गणा प्रत्युपेक्षणा वक्तव्या । ततस्तासां योग्या वसतिर्विचारभूमिश्च, संयतीगणधरस्यानयना, ततो वारको लघुघटस्वरूपं, तदनन्तरं भक्तार्थेन समुद्देशनम्, तस्य विधिर्ग्रहणस्था, ततः प्रत्यनीककृतोपद्रवतो यथा निवारणं, ततो भिक्षायां निर्गमः,ततो निर्ग्रन्थानां कस्मादेको मासः?, तासां च कस्माद् द्वौ मासौ ?। एतानि द्वाराणि वक्तव्यानीति द्वारगाथाद्वयसमुदायार्थः । (अत्र गणधरलक्षणं 'गणहर' शब्दे तृतीयभागे ७२० पृष्ठे समुक्तम्)

अथ क्षेत्रमार्गणाद्वारमाह–

खित्तस्स उ पमिलेहा, कायव्वा होइ आणुपुव्वीए ।
किं वच्चई गणहरो, जो चरई सो तणं वहइ ॥१२१२॥

क्षेत्रस्य संयतीप्रायोग्यस्य, आनुपूर्व्या " दुस्समंगलमामंतण " इत्यादिना पूर्वोक्तक्रमेण,प्रत्युपेक्षणा गणधरेण कर्त्तव्या । अथ किं केन हेतुना गणधरः स्वयमेव क्षेत्रप्रत्युपेक्षणाय व्रजति ?। उच्यते-यो बलीवर्दाऽऽदिश्चारिं चरति, स एव तृणभारं वहति, यो निर्ग्रन्थीगणस्याधिपत्यमनुभवति, स एव सर्वमपि चिन्ताभरमुद्वहति ।

आह-संयत्यः किमर्थं न गच्छन्ति ?, इत्युच्यते–

संजइगमणे गुरुगा, आणादी सजणिपेसिपेक्खणया ।
लोभे तुच्छा आसिया-वणा य एमाइणो (भवे)दोसा॥१२१३।

यदि संयत्यः क्षेत्रं प्रत्युपेक्षितुं गच्छन्ति, तत आचार्यस्य चतुर्गुरवः,आज्ञाऽऽदयश्च दोषाः । यथा शकुनिका पक्षिणी श्येनस्य गम्या भवति (पेसि त्ति) यथा वा मांसपेशिका, आम्रपेशिका वा सर्वस्याऽप्यभिलषणीया, तथा एता अपि। अत एव (पेल्लणय त्ति) विषयार्थिना प्रेर्यन्ते । तथा तुच्छात्वात्, ततो येन तेनाप्याहाराऽऽदिलोभेनोपप्रलोभ्य 'आसियावणं' अपहरणं तासां क्रियते, एवमाद्यो दोषा भवन्ति ।

इदमेव भावयति–

तुच्छेण वि लोभिज्जइ, जरुयच्चाऽऽहरणनिगमिसट्ठेणं ।
णंतनिमंतणवहणे, चेइयरूढाण अक्खिवणं ॥१२१४॥

तुच्छेनाल्पाऽऽहारवस्त्वादिनाऽपि लोभ्यते, अत्र च भृगुकच्छप्रासेन निकृतिभाजनेनोदाहरणम् । कथमित्याह-"णंत त्ति"वक्ष्यामि, तैर्निमन्त्रणां कृत्वा, वहने प्रवहणे चैत्यवन्दनार्थमारूढानां संयतीनामाक्षेपणमपहरणं कृतमिति । " जइ जरुअच्चे आगंतुगवाणियओ,स च निहयसड्ढे संजईओ रूववईओ दट्ठूण कवमसड्ढत्तणं पमिवण्णो । ताओ तस्स वीसंभियाओ । गमणकाले पवत्तिणिं विन्नवेइ-वहणट्ठाणमंगलट्ठा पमिलेहणं करेमि, तो संजईओ पट्ठवेह, अम्हे वि अणुग्गहिया होज्जामो । तओ पट्ठविया । तत्थ गया कवमसड्ढेण भणंति-पढमं वहणे चेइयाइं वंदह, तो पडिलेहणं करेमि त्ति । ताओ जाणंति-अहो ! विवेको । तओ चेइयवंदणत्थमारूढाणं पयट्टियं वहणं० जाव भासियावियाओ "।

एएहि कारणेहिं, न कप्पई संजईण पमिलेहा ।
गंतव्व गणहरेणं, विहिणा जो वण्णिओ पुव्वि ।१२१५।

एतैः कारणैः संयतीनां क्षेत्रप्रत्युपेक्षा कर्तुं न कल्पते, कैः पुनस्तर्हि प्रत्युपेक्षणायां गन्तव्यमित्याह-गन्तव्यं गणधरेण विधिना, कः पुनर्विधिरित्याह–यः पूर्वमत्रैव मासकल्पः प्रकृते स्थविरकल्पिकविहारद्वारे वर्णितः ।

आह-कीदृशं क्षेत्रं प्रत्युपेक्षणीयम ?, उच्यते–

जत्थाहिवई सूरो, समणाणं सो य जाणइ विसेसं ।
एतारिसम्मि खेत्ते, समणाणं होइ पमिलेहा ॥१२१६॥
जहियं दुस्सीलजणो, तक्करसावयभयं च जहिं नत्थि ।
निप्पच्चवायखेत्ते, अज्जाणं होइ पमिलेहा ॥१२१७॥

यत्र ग्रामाऽऽद्याधिपतिर्नागिकाऽऽदिकः शूरः चौरचरटाऽऽदिनिरनभिभवनीय इत्यर्थः। स च श्रमणानां साधूनां विशेषं जानाति-यथेदृशममीषां दर्शने व्रतम्, ईदृशश्च समाचारः, एतादृशे क्षेत्रे साध्वीयोग्ये श्रमणानां प्रत्युपेक्षणा भवति । तथा यत्र दुःशीलजनस्तस्करश्वापदभयं वा यत्र नास्ति, ईदृशे निष्प्रत्यपाये क्षेत्रे आर्यिकाणां प्रायोग्ये प्रत्युपेक्षणा कर्त्तव्या भवति ।

अथ वसतिद्वारमाह–

गुत्ता गुत्तदुवारा, कुलपुत्ते सत्तमंत गंभीरे ।
भीयपरिसप्पविए, ओभासण चिंतणा दाणे* ॥१२१८॥

गुप्ता वृत्या, कुड्येन वा परिक्षिप्ता, गुप्तद्वारा कपाटद्वयोपेतद्वारा, वस्यां च शय्यातरः कुलपुत्रकः । कथंभूतः ?-सत्त्ववान् न केनापि क्षोभ्यते, महदपि च प्रयोजनं कर्तुमध्यवस्यति । गम्भीरो नाम-संयतीनां परुषाऽऽद्याचरणं दृष्ट्वाऽपि विपरिणामं न याति । तथा भीता चकिता पर्षत् यस्य स भीतपर्षत्, आक्षेकसारतया यस्य भृकुटीमात्रमपि दृष्ट्वा परिवारः सर्वोऽपि त्रयेण कल्पमानस्तिष्ठति, न च कदाचिदन्याये प्रवृत्तिं करोति । मार्दवमस्तब्धता, तद्विद्यते यस्य स मार्दविकः, एवंविधो यदि कुलपुत्रको भवति । ततः [ओभासण त्ति] संयतीनामुपाश्रयस्यावभाषणं कर्त्तव्यम् । अवभाषिते च यदसावुपाश्रयमनुजानीते, ततो ज्ञप्यते [चिंतण त्ति] यथा स्वकीयाया दुहितुः, स्नुषाया वा चिन्तां करोषि, तथा यद्येतासामपि प्रत्यनीकाऽऽद्युपसर्गरक्षणे चिन्तां कर्तुमुत्सहसे, ततोऽत्र स्थापयामः । स प्राऽऽह-बाढं करोमि चिन्तां, परं कथं पुनः संरक्षणीयाः? । ततो-

* पुस्तकान्तरे-'शंकिलआसणवारगमंरुलपक्खिणीयवारणया' इति पाठः ।

ऽभिधातव्यम्-यथा किञ्चाकिणी स्वहस्तेन परहस्तेन वा उपदृश्यमाणे रक्ष्येते, तथैता अपि यथात्ममानुषैः, परमानुषैर्वा उपदृश्यमाणा रक्ष्यसि,तत एता रक्षिता भवन्तीति । यदेवं प्रतिपाद्योपाश्रयस्य दानं करोति, ततः स्थापनीयाः ।

अथाप्रतिपद्यमाने स्थापयन्ति, ततश्चत्वारो गुरुकाः-अन्याऽऽचार्याभिप्रायेणामुमेवार्थमाह-

घणकुड्डा सकवाडा, सागारियमाइभगिणिपेरंता ।
निप्पच्चवाय जोग्गा, वित्थिन्नपुरोहडा वसही ॥१२१७॥

घनकुड्या एकैकाऽऽदिमयनिश्चिद्रा, सकपाटा कपाटोपेतद्वारा, सागारिकसत्कानां मातृभगिनीनां गृहाणि पर्यन्ते पार्श्वतो यस्याः सा सागारिकमातृभगिनीगृहपर्यन्ता । गाथायामनुक्तोऽपि गृहशब्दो द्रष्टव्यः । निष्प्रत्यपाया दुर्जनप्रवेशाऽऽदिप्रत्यपायरहिता, विस्तीर्णं 'पुरोहडं' गृहपश्चाद्भागो यस्यां सा विस्तीर्णपुरोहडा, एवंविधा वसतिः संयतीनां योग्या ।

नासन्न-नातिदूरे, विहवापरिणयवयाण पमिवेसे ।
मज्झत्थऽवियाराणं, अकुऊहल्लाविकाणं च ॥१२२०॥

विधवाश्च ताः परिणतवयसश्च स्थविरस्त्रियः, तासां, तथा मध्यस्थानां कन्दर्पाऽऽदिभावविकलानामविकाराणां गीताऽऽदिविकाररहितानाम्,अकुतूहलानाम्-संयत्यो भोजनाऽऽदिक्रियां कथं कुर्वन्तीति कौतुकवर्जितानां,भावितानां साध्वीसामाचारीवासितानां संबन्धि यत्प्रतिवेश्म प्रत्यासन्नगृहं, तत्र नातिदूरे संयतिप्रतिश्रयो ग्राह्यः ।

अथान्याऽऽचार्यप्रतिपाद्यशय्यान्तरस्वरूपमाह-

जोइयमहत्तराऽऽदी, बहुसयणो पिल्लओ कुलीणो य ।
परिणतवओ अभीरू,अणुन्निग्गहिओ अकुतुहली१२२१।
कुलपुत्त सत्तमंतो, नीयपरिस भद्दओ परिणओ अ ।
धम्मट्ठी य विणीतो,अज्जासेज्जायरो जणिओ॥१२२२॥

यो भोगिकमहत्तराऽऽदिर्बहुस्वजनो बहुपाषिकः, तथा प्रेरकः वङ्काऽऽदीनां स्वगृहे प्रविशन्तीनां निवारकः, कुलीनः,परिणतवयाश्च प्रतीतः, अभीरुरुत्पन्ने महत्यपि कार्ये न खिद्येति, कथमेतत् कर्तव्यमिति ?। अनभिगृहीत आभिग्रहिकमिथ्यात्वरहितः, अकुतूहली संयतीनां भोजनाऽऽदिदर्शने कौतुकवर्जितः । यस्तु कुलपुत्रकः, सत्त्ववान् न केनाप्यभिभवनीयः, भीतपर्षत् प्राप्तत्, ऋजुकः शासने बहुमानवान्, परिणतो वयसा मत्या वा, धर्मार्थी धर्मश्रद्धालुः, विनीतो विनयवान् । एष आर्याणां शय्यातरो भणितस्तीर्थकरैः । गतं वसतिद्वारम् । बृ० १ उ० । ('वसहि' शब्दे विशेषविधिः)

अथ विचारद्वारमाह-

अणावायमसंलोगा, अणावाया चेव होइ संलोगा ।
आवायमसंलोगा, आवाया चेव संलोगा ॥१२२३॥

अनापाता असंलोकाः १, अनापाताश्चैव संलोकाः २, आपाता असंलोकाः ३, आपाताः संलोकाश्चेति ४ । चतस्रो विचारभूमयः ।

एतासु संयतीनां विधिमाह-

बीयारे बहि गुरुगा, अंतो वि य तइयवज्जिते चेव ।
तइए वि जत्थ पुरिसा,उवेंति वेसित्थियाओ य ॥१२२४॥

यदि 'पुरोहडे' विद्यमाने संयत्यो ग्रामाद् बहिर्विचारभुवं गच्छन्ति, ततश्चतुर्ष्वपि स्थण्डिलेषु प्रत्येकं चतुर्गुरुकाः, अन्तरेऽपि च ग्रामाभ्यन्तरे पुरोहडाऽऽदौ आपातासंलोकलक्षणं तृतीयस्थण्डिलं वर्जयित्वा शेषेषु त्रिषु स्थण्डिलेषु गच्छन्तीनां त एव चत्वारो गुरुकाः । तृतीयेऽपि स्थण्डिले यत्र पुरुषा वेश्यास्त्रियश्चोपयन्ति आपतन्ति, तत्र चत्वारो गुरुकाः । यत्र तु कुलजानां स्त्रीणामापातो भवति तत्र गन्तव्यम् ।

किं पुनः कारणं प्रथमाऽऽदीनि स्थण्डिलानि तासां नानुज्ञायन्ते ?। उच्यते-

जत्तो दुस्सीला खलु, वेसित्थिनपुंसहेट्ठतेरिच्छा ।
सा उ दिसा पडिकुट्ठा,पढमा तिइया चउत्थी य ॥१२२५॥

(जत्तो त्ति) यस्यां दिशि दुःशीलाः परदारानिगामिनः पुरुषाः, तथा वेश्याः स्त्रियो, नपुंसकाश्च (हेट्ठ त्ति) अधो नापिताः, तिर्यञ्चश्च वानराऽऽदय आपतन्ति, सा तु सा पुनर्दिग्, प्रथमा द्वितीया चतुर्थी च प्रतिषिद्धा, प्रथमाऽऽदीनि स्थण्डिलानीत्यर्थः ।

अथैनामेव निर्युक्तिगाथां व्याचष्टे-

चारभडघोडमिंठा, सोल्लगतरुणा य जे य दुस्सीला ।
लुब्भामित्थी-वेसी-अपुमेसु उवेंति ल तद्दा ॥१२२६॥

चारभटा राजपुरुषाः,घोटाश्चेटाः,भिण्टाः गजपरिचर्त्तकाः,स्वोल्लास्तुरगचिन्तानियुक्ताः। एवमादयो ये तरुणाः सन्तो दुःशीलाः, ते प्रथमद्वितीययोः स्थण्डिलयोरनापातत्वादेकान्तमिति कृत्वा बहुभामकस्त्रीषु वा वेश्यासु वा (अपुमेसु त्ति) नपुंसकेषु वा पूर्वप्रावेषु, तदर्थं तेषामुद्दामकस्त्रीप्रभृतीनां प्रतिसेवनार्थमायान्तीति ।

चतुर्थे तु स्थण्डिले संलोकत्वादेते दुःशीलाऽऽद्याः संयतीवर्गान् पश्येयुः, संयतीवर्गेण वा ते दृश्येरन्नित्यतस्तदपि निषिध्यते-

हिट्ठ ऊवासणहेउं, णेगाऽऽगमणम्मि गहण उड्डाहो ।
वानरमयूरहंसा, छाला सुणगादितेरिच्छा ॥१२२७॥

अधस्ताद्दुष्प्रासनमध्ये शौचकर्म, तत्कृतोरधो नापिते पूर्वप्राप्ते सत्यनेकेषां मनुष्याणां मध्ये शौचकर्मकारापकर्मणामागमने सति यद्युदीर्णमोहास्ते संयतीं गृह्णन्ति, ततो ग्रहणे उड्डाहो भवति, तथा वानरमयूरहंसाः, छगलाः, शुनकाऽऽदयश्च तिर्यञ्चस्तत्राऽऽयाताः संयतीमुपसर्गयेयुः ।

यत एवं ततः किमित्यत आह-

जइ अंतो वाघाओ, बहिया तासिं तइय अणुन्नाया ।
सेसा णाणुन्नाया, अज्जाण वियारभूमीओ ॥ १२२८॥

यद्यन्तरे ग्रामाभ्यन्तरे व्याघातः पुरोहडाऽऽदेरभावः, ततो बहिस्तासां तृतीया विचारभूमिरापातासंलोकरूपाऽनुज्ञाता,तत्रापि स्त्रीणामेवाऽऽपातो ग्राह्यो, न पुरुषाणां,शेषा विचारभूमयोऽनापातासंलोकाऽऽद्या आर्यिकाणां नानुज्ञाताः । गतं विचारद्वारम् । बृ० १ उ० । ('वसहि' शब्दे रात्रौ मात्रकयतना)

अथ संयतीगच्छस्याऽऽनयनमिति द्वारमाह-

पाभिलेहियं च खेत्तं, संजइवग्गस्स आणणा होइ ।

निक्कारणम्मि मग्गओ, कारणे समगं च पुरतो वा।१२२९।

एवं वसतिविचारभूम्यादिविधिना प्रत्युपेक्षितं च संयतीप्रायोग्यं क्षेत्रं,ततः संयतीवर्गस्याऽऽनयनं तत्र क्षेत्रे भवति । कथम् ?, इत्याह-निष्कारणे निर्जरये, निराबाधे वा सति साधवः पुरतः स्थिताः, संयत्यस्तु मार्गतः पृष्ठतः स्थिता गच्छन्ति, कारणे तु समकं वा साधूनां पार्श्वतः, पुरतो वा साधूनामग्रतः स्थिताः संयत्यो गच्छन्ति ।

निप्पच्चवायसंबं-धिभाविए गणहरऽप्पबिइ तइए ।
तेणादिनए सत्थे-ण सद्धि कयकरणसहिते वा ।१२३०।

निष्प्रत्यपाये संयतीनां ये संबन्धिनः स्वज्ञातीयाः, भाविताश्च सम्यक्परिणतजिनवचना निर्विकाराः संयताः,तैः सह गणधर आत्मद्वितीयः, आत्मतृतीयो वा संयतीर्विवक्षितं क्षेत्रं नयति । अथ स्तेनाऽऽदिभयं वर्त्तते, ततः सार्थेन सार्द्धं नयति, यो वा संयतः कृतकरण इक्षुशालेन सहितः संयतीस्तत्र नयति, स च गणधरात्स्वयं पुरतः स्थितो गच्छति, संयत्यस्तु मार्गतः स्थिताः ।

अत्रैव मतान्तरमुपन्यस्य दूषयन्नाह-

लज्जयद्वाइनिविट्ठं, मा पेल्ले वतिणि तेण पुरतेगे ।
तं तु न जुज्जइ अविणय,विरुद्ध उभयं च जयणाए १२३१

एके सूरयो ब्रुवते उज्जयं कायिकीसंज्ञे,तदर्थम् आदिशब्दादपरास्विष्टा क्वचित्प्रयोजने विनिविष्टमुपविष्टं सन्तं संयतं.व्रतिनी मा प्रेरयत्,इत्येतेन हेतुना संयत्यः पुरतो गच्छन्ति । अत्राऽऽचार्य आह-तत्तु यदुक्तं, न युज्यते,कुतः ?, इत्याह-पुरतो गच्छन्तीनां तासामविनयः साधुषु संजायते,लोकविरुद्धं चैवं परिस्फुटं भवति-अहो! महेलाप्रधानमासां दर्शनं,यत एवमतो मार्गतः स्थिता एव ता गच्छन्ति, उज्जयं च कायिकीसंज्ञारूपं यतनया कुर्यात् । का पुनर्यतना ?,इति चेदुच्यते-यत्रैकः कायिकीं संज्ञां वा व्युत्सृजति,तत्र सर्वेऽपि तिष्ठन्ति, तथास्थितांश्च तान् दृष्ट्वा संयत्योऽपि नाग्रतः समागच्छेयुः, ता अपि पृष्ठत एव शरीरचिन्तां कुर्वन्तीति । गतं गच्छस्याऽऽनयनमिति द्वारम् ।

अथ वारकद्वारमाह-

जहियं च अगारिजणो, चोक्खब्भूतो मुईसमायारो ।
कुमुहुद्दरएणं, वारगनिक्खेवणा भणिया ॥१२३२॥

यस्मिंश्च ग्रामाऽऽदावगारीजनोऽविरतिकालोकः,चोक्षभूतः शुचिसमाचारश्च वर्त्तते, तत्र वारकग्रहणं निर्ग्रन्थीभिः कर्त्तव्यम् । अथ न कुर्वन्ति, ततश्चत्वारो गुरवः । यच्च प्रवचनोड्डाहाऽऽदिकं, तन्निष्पन्नं प्रायश्चित्तम् । यत एवमतः कुटमुखे घटकण्ठके शुद्धचीवरदर्दरकेण पिहितस्य वारकस्य निक्षेपणा भणिता भवति ।

थीपडिबद्धे उवस्सए, उस्सग्गपदेण संवसंतीओ ।
वच्चंति काइभूमिं, मत्तगहत्थाण आयमणं ॥१२३३॥

उत्सर्गपदेन संयतीभिः स्त्रीप्रतिबद्धे उपाश्रये वस्तव्यमिति कृत्वा तत्र संवसन्त्यो यदा कायिकीं भूमिं व्रजन्ति, तदा मात्रकहस्तावारकं हस्ते गृहीत्वा व्रजन्ति, तासामगारीणां प्रत्ययो जायते-एताः कायिकीं कृत्वा पश्चादाचमनं करिष्यन्ति, अहो! शुचिसमाचारा इति । तत्र च गतास्तासामदर्शनीभूता आचमनं कुर्वन्ति ।

स च वारको अन्तर्लिप्तः कर्त्तव्यः; कुतः ?, इत्यत आह-

दुक्खं विसुयावेउं, पणगस्स य संभवो अलित्तम्मि ।
संदंते तसपाणा, आवज्जणतक्कणाऽऽईया ॥१२३४॥

वारकोऽलिप्तः सन्, किम् ?, (विसुयावेउं ति) शोषयितुं दुःखं दुःखकरो भवति,अलिप्ते च पानकजाविलत्वात् पनकस्य संभवः संमूर्च्छनं भवति, अलिप्तश्च वारकः पानके प्रक्षिप्ते सति स्यन्दते परिगलति, स्यन्दने च त्रसप्राणिनः कीटिकामाक्षिकाऽऽदयः समागच्छेयुः । (आवज्जणं ति) यदनन्तकायनिकायविकलेन्द्रियेषु संघट्टनाऽऽदिकमापद्यते, तन्निष्पन्नं प्रायश्चित्तम् । (तक्कणाई य त्ति) ततो वारकान् पानकेन परिमलति मक्षिकाः पतन्ति, तासां प्रसनार्थं गृहकोकिला धावति, तस्या अपि प्रक्कणार्थं मार्जारीत्येवं तर्कणम्, तदादयो दोषा भवेयुः ।

यत्र पुनः कायिकीभूमौ सागारिकं भवति, तत्रेयं यतना-

सागारिए परंमुह-दगसद्दमसंफुसंतिओ पेत्तं ।
पुलएज्ज *मा य तरुणी,तो अच्छदवं तु जा दिवसो १२३५

सागारिके सति पराङ्मुखीभूय कायिकीं कृत्वा नेत्रं जघनसंस्पृशन्त्यो दकशब्दं पानकप्रक्षालनानुमापकं कुर्वते, तथा तरुण्यः स्त्रियः किमत्रास्ति पानकं, न वेति जिज्ञासया मा प्रक्षोक्तामिति हेतोस्तस्मिन्वारके तावद्यत्किञ्चित्कलुषं ऊर्ध्वं पानकं प्रक्षिप्तं तिष्ठति, यावद्दिवसः,ततः सन्ध्यासमये तत्पानकं पिबन्ति । गतं वारकद्वारम् ।

अथ भक्तार्थनाविधिद्वारमाह-

मंमद्धिठाणस्सऽसती, बद्धा व तरुणीसु अहिपतंतीसु ।
पत्तेयकमढजुंजण-मंडलिथेरी उ परिवेसे ॥१२३६॥

यद्यसागारिकं,ततो मण्डल्यां समुद्दिशन्ति,अथ मण्डलीभूमिः सागारिकबहुला, ततो मण्डलिस्थानस्यासति, बद्धाद्वा प्रणयेन तरुणीष्वभिपतन्तीषु तत्रौर्णिकमल्लपमधः प्रस्तीर्य तस्योपरि सौत्रिकं तत्राप्यलाबुपात्रकाणि स्थापयित्वा प्रत्येकं कमठकेषु भुञ्जते, प्रवर्त्तिनी च पूर्वाभिमुखा धुरि निविशते, तत एका मण्डलिस्थविरा यमलजननी सहोदरा सर्वासामपि परिवेषयेत्, आत्मनोऽपि योग्यमात्मीये कमठके प्रक्षिपेत् ।

ओगाहिमाइविगई, समन्नाएँ करेइ जत्तिया समणी ।
तासिं पच्चयहेतुं, अणहिक्खट्ठा अकप्पहो अ ॥१२३७॥

अवगाहिमं पक्वान्नम्, आदिशब्दाद् घृताऽऽदिकाश्च विकृतीः, यावत्यः श्रमण्यः,तावतः समभागान्, मण्डलिस्थविरा करोति । किमर्थम् ?,तासां श्रमणीनां प्रत्ययार्थम्,तथा-[अणहिक्खट्ठ त्ति) अनधिकखादनार्थं,सर्वासमप्यविषमसमुद्देशनार्थम्, अकल्पहश्चैवं भवति, असंखडं न भवतीत्यर्थः ।

ताश्च समुद्देशेषूपविशन्त इत्थं ब्रूते-

निव्वीइए विइयाई, विगईओ लंबणा वए विइया ।
अण्ण गिलायंविलिया, अज्ज अहं देह अन्नासिं।१२३८।

एका द्व्यादिसंख्याविकृतयो मुत्कलाः,शेषाणां प्रत्याख्यानम्,अपरा भणति-अद्य मामेतावन्तो लम्बनाः कवलाः, इत ऊर्द्धं नियमः। अन्याऽभिधत्ते-अद्याहमग्लाना, ग्लानपर्युषितमन्नं मया भोक्तव्यमित्येवं प्रतिपन्नाभिग्रहा । तदपरा ब्रूते-अद्याहमाचाम्लिका, कृता चाम्लप्रत्याख्याना,अत इदं विकृत्यादिकमन्यासां प्रय-

* "दृशो नियच्छ०"॥८।४।१८१॥ इत्यादिना 'पुलए' आदेशः।

व्रजत,एवं समुद्दिश्य पात्रकेणाऽऽचमनं कुर्वन्ति,प्रवर्त्तिन्याः कमठकं कुसुका निर्लेपयन्ति,ततः सर्वास्वपि समुद्दिष्टासु मण्डलीषु स्थविरा समुद्दिशन्ति ।

एवंविधं दृष्ट्वा किं भवति ?, इत्याह-

दट्ठूण निहुयवासं, सोयपयत्तं अलुक्खत्तं च ।
इंदियदमं च तासिं, विणयं च जणो इमं भणइ ॥१२३७॥

तासां संयतीनां निभृतवासं विकथाऽऽदिविरहेण निर्व्यापारतयैवाऽवस्थानं, शौचप्रयत्नं वारकग्रहणाऽऽदिरूपम्, अलुक्षत्वं च विकृत्यादिप्रत्याख्यानाभिधानम् , इन्द्रियदमं च भोगाऽऽदीन्द्रियनिग्रहणं, विनयं प्रवर्त्तिन्यादिषु अभ्युत्थानाऽऽदिरूपं, दृष्ट्वा जनो लोक इदं ब्रवीति-

सच्चं तवो य सीलं, अणहिक्खाओ अ एगमेगस्स ।
जइ वंजं जइ सोयं, एयासु परं ण अन्नासु ॥१२४०॥
बाहिरमलपरिलुद्धा, सीअसुगंधा तवोगुणविसुद्धा ।
धन्नाण कुलुप्पन्ना, एआ अ वि होज्ज अम्हं पि ॥१२४१॥

सत्यं वाङ्मनोरविसंवादिता,तपोऽनशनाऽऽदि,शीलं सुस्वभावता,अनधिकखादच्छाविषमभोजनम्,एकैकस्याः परस्परममूषाम्, तथा यदि ब्रह्मचर्यं यदि शौचं शुचिसमाचारता। एतानि सत्याऽऽदीनि,यदि परमेतासु संयतीषु दृश्यन्ते,नान्यासु शाक्याऽऽदिपाखण्डिनीषु,ततो यद्यप्येता बाह्यमलेन परिक्लिष्टाः,तथापि शीलेन सुगन्धाः,तपोगुणैरनशनाऽऽदिभिः,यद्वा-तपसा प्रतीतेन, गुणैश्चोपशमाऽऽदिभिर्विशुद्धाः,धन्यानां कुलोत्पन्नाः,एता येषां कुले समुत्पन्नास्तेऽपि धन्या इति भावः। अपिः संभावनायां संभाव्यते । किमर्थः ?, यदस्माकमपि जननी, दुहिता च एतादृशस्यकुलोज्ज्वालनकारिण्यो भवेयुः ।

एवं तत्थ वसंती-णुवसंतो सो य सिं अगारिजणो ।
गिण्हंति य संमत्तं, मिच्छत्तपरंमुहो जाओ ॥१२४२॥

एवं तत्र वसन्तीनां तासामगारीजन उपशान्तः प्रतिबुद्धः, ततो मिथ्यात्वपराङ्मुखो जातः सन् सम्यक्त्वं गृह्णाति, च-शब्दाद्देशविरतिं वा, कश्चित्तद्गुणग्रामरञ्जितमनाः सर्वविरतिमपि प्रतिपद्यते । गतं निष्क्रामणाविधिद्वारम् ।

अथ प्रत्यनीकद्वारमाह-

तरुणीण अभिद्दवणे, संवरितो संजतो निवारेइ ।
तह वि य अठायमाणे, सागारिओ तत्थुवालभइ ॥१२४३॥

तरुणीनां संयतीनामभिद्रवणे प्रत्यनीकेन विधीयमाने सति संवृतः संयतवेषाऽऽच्छादितः संयतो निवारयति,तथाऽपि चातिष्ठति तस्मिन् सागारिकः शय्यातरः, तत्रोपसर्गे,तमुपालभते ।

एतामेव निर्युक्तिगाथां भावयति-

गणिणीणऽकहणे गुरुगा, सा वि य न कहेइ जइ गुरूणं तु ।
सिट्ठम्मि य ते गंतुं, अणुसट्ठी मित्तमाईहिं ॥१२४४॥

कश्चित्तरुणो विषयलोलुपतया संयतीनामुपद्रवं कुर्यात्, ततस्तत्त्यागादेव ताभिः प्रवर्त्तिन्याः कथनीयम्, यदि न कथयन्ति, ततश्चत्वारो गुरवः । सा च प्रवर्त्तिनी यदि गुरूणां न कथयति, तदा चतुर्गुरवः,आज्ञाऽऽदयश्च दोषाः, तस्मात्कथयितव्यम्, ततः शिष्टे कथिते ते आचार्यास्तस्याविरतिकस्य पार्श्वं गत्वा साध्वीशीलभङ्गस्य दारुणविपाकतामुचितामनुशिष्टिं ददति । यद्युपरमते ततः सुन्दरम् । अथ नोपरमते, ततो यानि तस्य मित्राणि, आदिशब्दाद्ये वा भ्रात्रादयः स्वजनास्तेषां निवेद्यम्, तैः प्रज्ञापिते यदि स्थितः, ततो लष्टम् ।

तह वि य अठायमाणे, वसन्ना भेसिंति तह वि य अठंते ।
अन्नगत्थ घरे पज्जह, तत्थ य वसन्ना वतिणिवेसा ।१२४५।

तथाऽप्यतिष्ठति तस्मिन् प्रत्यनीके, वृषभा गच्छस्य शुभाशुभकार्यचिन्तानियुक्ताः, तं प्रत्यनीकं ज्ञापयन्ति, तथाऽप्यतिष्ठति यस्तरुणः कृतकरणः स संयतीनेपथ्यं कृत्वा तस्य संकेतं प्रयच्छति, यथा-अमुकत्र गृहे समागच्छत, ततो वृषभा व्रतिनीवेषं परिधाय तेन साधुना सह तत्र गत्वा प्रत्यनीकस्य शिक्षां कुर्वन्ति, तथाऽप्यनुपशान्ते तस्मिन् सागारिकस्य निवेद्यते, तेनोपलब्धे यदि स्थितः, ततः सुन्दरम् ।

अथ नास्ति तदानीं सन्निहितः-

सागारिए असंते, किच्चकरे भोइयस्स व कहिंति ।
अछत्थ ठाणे णिंती, खेत्तस्सऽसती सति णिवे वा १२४६

सागारिके असंनिहिते कृत्यकरस्य ग्रामचिन्तानियुक्तस्य नोगिकस्य ग्रामस्वामिनः कथयति, तेन शासितोऽपि यदि नोपरमते,ततः संयतीरन्यत्र स्थाने क्षेत्रे नयन्ति । अथ नास्ति संयतीप्रायोग्यमपरं, स्वयं वा संयता ग्लानाऽऽदिकार्यव्यापृता न शक्नुवन्ति क्षेत्रान्तरं गन्तुं,ततो नृपस्य दण्डिकस्य निवेद्यते, स प्रत्यनीकमुपरुन्धन्तं निवारयति । गतं प्रत्यनीकद्वारम् । बृ० १ उ० । नि० चू० । ("गोयरचरिया" शब्दे तृ० भा० ९७६ पृष्ठे भिक्षाविधिरुक्तः)

अथ निर्ग्रन्थीनां मासः। कस्मात्तासां द्वौ मासाविति द्वारं व्याख्यायते-शिष्यः पृच्छति-किं निर्ग्रन्थीनामष्यधिकानि महाव्रतानि, येन तासां द्वौ मासौ, निर्ग्रन्थानामेकं मासमे-
कत्र वस्तुमनुज्ञायते ?। सूरिराह-

जइ वि य महव्वयाइं, निग्गंथीणं न होंति अहियाइं ।
तह वि य निच्चविहारे,हवंति दोसा इमे तासिं॥१२६४॥

यद्यपि च निर्ग्रन्थीनां महाव्रतानि नाधिकानि भवन्ति,तथाऽपि नित्यविहारे मासे मासे क्षेत्रान्तरं संक्रमणे, इमे दोषास्तासां भवन्ति ।

मंसाइपेसिसरिसा, वसही खेत्तं च कुलमभं जोग्गं ।
एएण कारणेणं, दो दो मासा अवरिसासु ॥१२६५॥

मांसाऽऽदिपेशीसदृशाः संक्ष्याः,सर्वस्याप्यभिलषणीयत्वात्, तथा तासां योग्या वसतिर्दुर्लभा, क्षेत्रं च तत्प्रायोग्योपेतं कुलं च, ततो यथोक्तगुणविकलायां वसतौ दोषदुष्टे वा क्षेत्रे स्थाप्यमानानां बहवः प्रवचनविराधनाऽऽदयो दोषा उपढौकन्ते। एतेन कारणेन तासामवर्षासु वर्षावासं विमुच्य द्वौ द्वौ मासावेकत्र वस्तुमनुज्ञायते ।

अथ द्वयोरुपरि वसन्तीनां दोषान्, द्वितीयपदं चोपदर्शयति-

दुण्हं उवरि वसंती, पायच्छित्तं च होंति दोसा य ।
विज्जपयं च गिलाणे, वसती निक्खं च जयणाए ।१२६६।

द्वयोर्मासयोरुपरि वसन्ति, ततः प्रायश्चित्तं, दोषाश्च भवन्ति, द्वितीयपदं च ग्लाने च सति वसति, नैवं च वतनया ग्रहीतव्यम् । भावार्थो निर्ग्रन्थानामिव ऊह्यः ।

मासावाससूत्रम्-

से गामंसि वा० जाव रायहाणिंसि वा परिक्खेवंसि वा बाहिरियंसि कप्पइ निग्गंथीणं हेमंतगिम्हासु चत्तारि मासा वत्थए, अंतो दो मासे, बाहिं दो मासे, अंतो वसमाणीणं अंतो भिक्खायरिया, बाहिं वसमाणीणं बाहिं भिक्खायरिया ॥ ७ ॥

अस्य व्याख्या प्राग्वत् । नवरं सबाहिरिके क्षेत्रे अन्तर्द्वौ मासौ, बहिर्द्वौ मासावित्येवं चतुरो मासान् निर्ग्रन्थीनां वस्तुं कल्पत इति ।

अथ भाष्यम्-

एसेव कमो नियमा, सपरिक्खेवे सबाहिरीयम्मि ।
नवरं पुण नाणत्तं, अंतो बाहिं चउम्मासा ॥१५६७॥

एष एव पूर्वसूत्रोक्तः क्रमो नियमात् सपरिक्षेपे सबाहिरिके क्षेत्रे वसन्तीनां संयतीनां द्रष्टव्यः, नवरं पुनर्नानात्वं विशेषोऽयम्-अन्तरभ्यन्तरे, बहिर्बाहिरिकायामेवमुभयोश्चत्वारो मासाः पूरणीयाः ।

चउण्हं उवरि वसंती, पायच्छित्तं च होंति दोसा य ।
नाणत्तं असईए तु, अंतो वसही बहिं चरइ ॥१५६८॥

चतुर्णां मासानामुपरि यदि सबाहिरिके क्षेत्रे संयती वसति, तदा तदेव प्रायश्चित्तं, त एव दोषाः, द्वितीयमपि तदेव मन्तव्यम्, नानात्वं विशेषः, पुनरबाहिरिकाया वसतेः, शय्यातरस्य वा यथोक्तगुणस्यासत्यभावे, अन्तः प्राकाराभ्यन्तरे, (वसहि त्ति) वसतौ पूर्वस्यामेव स्थिताः, बहिर्बाहिरिकायां चरन्ति भिक्षाचर्यामटन्ति ।

जोगवसहीए असई, तत्थेव ठिया चरंति बाहिं तु ।
पुव्वगहिए विगिंचिय, तत्तो विय मत्तगादी वि ॥१५६९॥

बहिः संयतीयोग्याया वसतेरभावे, तत्रैवाभ्यन्तरोपाश्रये स्थिताः सत्यो बहिश्चरन्ति, पूर्वगृहीतं शौचकृष्णमृगलाऽऽदि परित्यज्य तत एव बाहिरिकाया मात्रकाऽऽदीन्यानेतव्यानि, न केवलं निक्केत्यादिशब्दार्थः ।

श्रुतसंहननाऽऽदिविषया सामाचारी, क्षेत्रकालाऽऽदिविषया वा स्थितिः स्थविरकल्पिकानामिव ऊह्या । तदेवमुक्त आर्यिकाणामपि मासकल्पविधिः । बृ० १ उ० । (निर्ग्रन्थीनां दूरतः परिहरणीयत्वं 'वसह' शब्दे वक्ष्यते)

णिग्गम-निर्गम-पुं० । निर्गमनं निर्गमः, कुतः सामायिकं निर्गतमित्येवमादिरूपे निर्गमने, विशे० । अनु० । आ० म० ।

निर्गमस्य षड्विधो निक्षेपः-

नामं ठवणा दविए, खेत्ते काले तहेव भावे य ।
एसो उ निग्गमस्स य, निक्खेवो छव्विहो होइ ॥१५३३॥

नामस्थापनानिर्गमौ नामाऽऽवश्यकाऽऽदुक्तानुसारेण भावनीयौ । द्रव्याद् ऊव्यस्य वा निर्गमः, क्षेत्रात्क्षेत्रस्य वा, कालात्कालस्य वा, भावाद्भावस्य वा निर्गम इत्यादि वाच्यम् । इति निर्युक्तिगाथासंक्षेपार्थः ॥ १५३३ ॥

विस्तरार्थं तु भाष्यकारः प्राऽऽह-

दव्वाओ दव्वस्स व, विणिग्गमो दव्वनिग्गमो सो य ।
तिविहो सचित्ताई, तिविहाओ संजवो नेओ ॥ १५३४ ॥

द्रव्याद् द्रव्यस्य वा निर्गमो द्रव्यनिर्गमः । स च सचित्ताऽऽदिद्रव्यसंबन्धित्वात् सचित्ताऽऽदित्रिविधः । तस्य च त्रिविधस्य सचित्ताऽऽदेस्त्रिविधादेव सचित्ताऽऽदेर्द्रव्यात्संजव उत्पादो ज्ञेय इति ॥ १५३४ ॥

तथाहि-

पंचण्हं सचित्ताओ, जूमेरंकुरपयंगवप्फाई ।
किमिगन्नसोणियाई, थीसाओ थीसरीराओ ॥१५३५॥
किमिघुणघुणचुण्णाई, दारूओ जं व निग्गयं जत्तो ।
दव्वं विगप्पबहुओ, जह सन्नाबेयधारेहिं ॥ १५३६ ॥

सचित्ताद् यूमिऊव्यात्सचित्तद्रव्यस्याङ्कुरस्य प्रभवो निर्गमो ज्ञातव्यः, मिश्रस्य तु पतङ्गऊव्यस्य, तस्य हि पक्षाऽऽदयः प्रदेशा अचित्ताः, शेषं तु सचित्तमिति मिश्रता । अचित्तस्य तु दारुऊव्यस्य । तदेवं सचित्तात्सचित्ताऽऽदेस्त्रिविधस्य निर्गम इत्युक्तम् । अथ मिश्रात्स्त्रीशरीरद्रव्यात्सचित्तऊव्यस्य कुमेर्निर्गमो वेदितव्यः, मिश्रस्य तु गर्भद्रव्यस्य मिश्ररूपस्य, तन्नखकेशाऽऽदीनामचित्तत्वात्, शेषस्य तु सचित्तत्वान्मिश्रता; अचित्तस्य तु शोणितद्रव्यस्य । मिश्रात्सचित्ताऽऽदेर्निर्गम इत्यपि भावितम् । अचित्तद्रव्याद्दारुणः काष्ठात्सचित्तस्य कृमिद्रव्यस्य निर्गमः, मिश्रस्य तु घुणस्य, पतङ्गवदस्यापि मिश्रत्वात्; अचित्तस्य तु घुणचूर्णस्य घुणाऽऽकृष्टदारुतदवयवनिवहस्येत्यर्थः । अचित्तात्सचित्ताऽऽदेः निर्गम इत्यपि मतम् । तथा-'जं व'इत्यादि । 'यद्वा ऊव्यं यस्माद् ऊव्यादिकल्पवशतो मानसकल्पनासमारोपाद्यथा सद्भावेन सद्भूतप्रकारेण, उपचारेण वा निर्गतम्, सोऽपि ऊव्यान्निर्गमो ऊव्यनिर्गम उच्यते । तत्र यथा सद्भावेन विकल्पवशाद्यथा दुग्धाऽऽदिद्रव्यात् घृताऽऽदिद्रव्यस्य निर्गमः । अत्र हि भूमेः "संमूर्छजत्वटकन्यायेन" दुग्धात् घृताऽऽदिनिर्गमो न दृश्यत इति 'विकल्पवशतः' इत्युच्यते, दुग्धस्य च दधिघृताऽऽदिभावेन परिणामिकारणता समीक्ष्यते, इत्येतावता यथा सद्भावेनेत्यभिधीयते । उपचारेण तु रूपकाऽऽदेर्द्रव्याद्भोजनाऽऽदेर्निर्गम इत्यादि सर्वं यथासंभवमन्यदपि स्वबुद्ध्याऽभ्यूह्य वक्तव्यमिति ॥ १५३५ ॥ १५३६ ॥

क्षेत्रनिर्गममाह-

खित्तस्स विनिग्गमणं, सरूवओ नऽत्थि तं जमकिरियं ।
खेत्ताओ खेत्तम्मि वि, हविज्ज दव्वाइनिग्गमणं ॥१५३७॥
उवयारओ य खेत्तस्स य, विनिग्गमो लोगनिक्खुडाणं व ।
लद्धं विनिग्गयं ति य, जह खेत्तं राउला उ त्ति ॥१५३८॥

यथा ऊव्यस्यापि क्वचित्कल्पनया निर्गम उच्यते, न तु स्वरूपतः, एवं क्षेत्रस्याऽपि स्वरूपेण कुतोऽपि निर्गमो नास्ति, तस्याऽक्रियत्वेन तदयोगात् । क्षेत्रात्पुनः निर्गमोऽस्ति, यथा आयुःक्षयाऽऽदिसमये ऊर्द्धाधोलोकाऽऽदिक्षेत्राद्देवनारकद्रव्याऽऽदेर्निर्गमः । क्षेत्रेऽपि धान्याऽऽदेर्निर्गमो ऊह्यः, न तु क्षेत्रस्य

स्वरूपेण निर्गमः । किं सर्वथा नास्ति ?, इत्याह-उपचारतः कल्पनामात्रेण, क्षेत्रस्यापि निर्गमः समस्त्येव, यथा लोकक्षेत्राश्चिक्कुटा निर्गता इति; तेषां स्वरूपेणाऽवस्थितानां निर्गमक्रियाभावेऽपि निर्गता इव निर्गता इति निर्गमोपचारः । तथा लब्धं विनिर्गतं क्षेत्रं राजकुलात्, निर्गतं नरताऽऽदिक्षेत्रं दुःषमाऽऽदिकालाद् दुर्भिक्षाऽशिवाऽऽदेर्वैरादीति ॥ १५३७ ॥ १५३८ ॥

कालनिर्गममाह-

कालो वि दव्वधम्मो,निक्किरिओ तस्स निग्गमो पन्नवो ।
तत्तो च्चिय दव्वाओ, पन्नवइ काले व जं जम्मि १५३९
लवयारओ व सरओ,विणिग्गओ णिग्गओ य तत्तोऽहं ।
अहवा दुक्काओ, नरो व बालाइकालाओ ॥१५४०॥

कालोऽपि वर्तनारूपो द्रव्यधर्म एव । स च स्वरूपेण निष्क्रियः,द्रव्यद्वारेणैव तत्क्रियाप्रवृत्तेः तस्य च तत एव स्वाश्रयभूताद् द्रव्यान्निर्गमः प्रभव उत्पत्तिः । यथा-हरिताऽऽदिके यस्मिन् वर्षाऽऽदिके काले प्रभवन्त्युत्पद्यते स कालनिर्गम इति । अथवा-उपचारतोऽपि कालनिर्गमो, यथा-शरत्समयोऽसौ निर्गत आविर्भूतः, ततो वा शरत्कालाद्, दुष्कालाद्वा निर्गतो निःसृतोऽहं बालाऽऽद्यवस्थातो वा नरो निर्गत इत्यादुपचारतः कालनिर्गम इति ॥ १५३९ ॥ १५४० ॥

अथ भावनिर्गममाह—

जावो वि दव्वधम्मो, तत्तो च्चिय तस्स निग्गमो पभवो ।
दव्वस्स व भावाओ,विणिग्गमो भावओऽवगमो ।१५४१।
रूवाइपोग्गलाओ, कसायनाणादओ य जीवाओ ।
निंति पन्नवंति ते वा, तेहिंतो तन्निओगम्मि ।१५४२।

भावोऽपि कालवद् द्रव्यधर्म एव । तस्य च ततो द्रव्याद् यो निर्गमः प्रभवः स भावनिर्गमः, द्रव्यस्य वा जावाच्चिर्गमो भावनिर्गमः । कः ?, इत्याह-जावतो जावमाश्रित्य यो द्रव्यस्यापगमो विनाशः । इदमुक्तं भवति-यदा द्रव्यं पूर्वपर्यायेण विनश्यति, अपूर्वपर्यायेण तूत्पद्यते, तदा पूर्वपर्यायात्प्राक्तनभावाद् द्रव्यस्य निर्गतत्वाद्भावान्निर्गमो भावनिर्गम इत्युच्यते । तथा रूपाऽऽदयो भावाः पुद्गलद्रव्यात्, कषायज्ञानाऽऽदयश्च जीवान्निर्गच्छन्ति प्रभवन्तीति भावानां निर्गमो भावनिर्गम उच्यते । (ते वा तेहिंतो त्ति) अथवा ते पुद्गलजीवाऽऽदयः पदार्थास्तेभ्यो रूपाऽऽदिभ्यः कषायाऽऽदिभ्यश्च भावेभ्यस्तद्विषयेण प्राक्तनभावविनाशे निर्गच्छन्तीति भावेभ्यो निर्गमो भावनिर्गम इत्युच्यत इति । तदेवं विनेयमतिव्युत्पादनार्थमभिहितः षड्विधो निर्गमः ॥ १५४१ ॥ १५४२ ॥

इदानीं प्रकृते यावता प्रयोजनं तदुपदर्शयितुं प्रशस्तभावनिर्गमस्वरूपं तावदर्शयन्नाह-

तत्थ पसत्थं मिच्छु-त्तणाणाविरइजावनिग्गमणं ।
जीवस्स संभवंति य, जं सम्मत्ताइओ तत्तो ॥१५४३॥

तत्रानन्तरोक्ते जावनिर्गमे प्रशस्तं शुभं निर्गमनम् । किम् ?, इत्याह-मिथ्यात्वाऽज्ञानाविरतिलक्षणादप्रशस्तजावात् यन्निर्गमनं निःसरणं जीवस्य । किमिति ?, इत्याह-यद्यस्मात्सज्जवन्त्येव ततो मिथ्यात्वाऽऽद्यप्रशस्तजावनिर्गमाज्जीवस्य मुक्तिपदप्राप्तिहेतवः सम्यक्त्वाऽऽदयो गुणा इति ॥ १५४३ ॥

नवत्येवं, प्रस्तुते केन प्रयोजनम् ?, इत्याह-

एत्थ उ पसत्थभाव-प्पमूइमेत्तं विसेसओऽहिगयं ।
अपसत्थावगमो वि य, सेसा वि तदंगजावाओ १५४४

इह च प्रक्रमे सामायिकाध्ययनं प्रस्तुतम् । तच्च क्षायोपशमिके भावे वर्त्तते । अत इह तस्यैव प्रशस्तक्षायोपशमिकजावस्य या प्रसूतिर्महावीरात् तन्निर्गमरूपा, तयैव विशेषतोऽधिकृतमधिकारः । तथाऽप्रशस्तमिथ्यात्वाऽऽदिविषयौदयिकजावस्य योऽपगमो विनाशस्तेनापि चाधिकारः, तदपगमाजावे प्रशस्तजावप्रसूतेरयोगादिति । शेषास्तु निर्गमनेदास्तदङ्गजावेन प्रशस्तजावनिर्गमकारणतयाऽऽनन्तर्येण पारम्पर्येण वा कोऽपि कथञ्चिद् व्याप्रियत इतीह निर्दिष्टा इति ॥ १५४४ ॥

तदङ्गत्वमेव द्रव्याऽऽदीनां दर्शयति-

वीरो दव्वं खेत्तं, महसेणवणं पमाणकालो य ।
भावो य भावपुरिसो, समासओ निग्गमंगाइं ॥१५४५॥

यतो द्रव्यात्सामायिकं निर्गतं, तद् द्रव्यमत्र श्रीमन्महावीरो मन्तव्यः, यस्मिँश्च क्षेत्रे तन्निर्गतं, तदिह महसेनवनमवगन्तव्यम् । कालस्तु प्रथमपौरुषीलक्षणः प्रमाणकालः । भावस्तु जावपुरुषो वक्ष्यमाणलक्षणः । एतानि समासतः संक्षेपतः सामायिकस्य निर्गमाङ्गानीति ॥ १५४५ ॥

एतदेव दर्शयति-

सामइयं वीराओ, महसेणवणे पमाणकाले य ।
जावपुरिसा हि जावो,विणिग्गओ वक्खमाणोऽयं१५४६।

गतार्था, नवरं श्रीमन्महावीरजीवलक्षणाद्जावपुरुषादयं वक्ष्यमाणविस्तरस्वरूपः सामायिकलक्षणो जावो विनिर्गतः, इह च क्षायोपशमिके जावे वर्त्तमानत्वात् " सामायिकलक्षणो जावः " इत्युक्तम् ॥ १५४६ ॥

अथ महावीरलक्षणस्य द्रव्यस्य निर्गमं तावदभिधित्सुराह-

इच्चेवमाइ सव्वं, दव्वाहीणं जओ जिणस्सेव ।
तो निग्गमणं वोत्तुं, वोच्चं सामाइयस्स तओ ॥१५१७॥

इत्येवमादिकं क्षेत्रकालनिर्गमनाऽऽदिकं सामायिकाध्ययनाऽवश्यकश्रुतस्कन्धाऽऽचाराऽऽदिकं वा सर्वमपि यतो यस्माद् द्रव्यस्य महावीरलक्षणस्याधीनम्,ततस्तस्यैव महावीरजिनस्य निर्गमनमुक्त्वा, ततः सामायिकस्य निर्गमनं वक्ष्य इति ॥१५४७॥

ननु महावीरजिनस्याऽपि निर्गमनं कथं वक्तव्यम् ?, इत्याह-

मिच्छुत्ताइतमाओ, स निग्गओ जह य केवलं पत्तो ।
जह य पसूयं तत्तो, सामइयं तं पवक्खामि ॥१५४८॥

तमिति तदेतत्सर्वं प्रवक्ष्यामीति गाथार्थः ॥१५४८॥ विशे० । अत्र वक्ष्यमाणो भावः सामायिकलक्षणः,एतच्च सर्वं भगवन्महावीरलक्षणद्रव्याधीनमतस्तस्यैव प्रथमतो मिथ्यात्वाऽऽदिभ्यो निर्गममभिधित्सुराह-

पंथं किर देसित्ता, साहूणं अडविविप्पणट्ठाणं ।
संपत्तपढमलंभो, बोधव्वो वद्धमाणस्स ॥१४९९॥

पन्थानं, किलेत्याप्तवादे, देशयित्वा कथयित्वा, साधुभ्यः, सूत्रे षष्ठी प्राकृतत्वात्। (अमवि त्ति)प्राकृतत्वादेवात्र समस्या लोपः । अटव्यां पथो विप्रनष्टेभ्यः परिभ्रष्टेभ्यः, पुनस्तेभ्य एव दे-

शनां श्रुत्वा सम्यक्त्वं प्राप्त एवं सम्यक्त्वप्रथमलाभो बोद्धव्यो वर्द्धमानस्येति गाथाऽक्षरार्थः ॥१४९॥

भावार्थः कथानकादवसेयः। तच्चेदम्-" अवरविदेहे एगम्मि गामे वलाहिओ,सो य रायाऽऽएसेण सगडाणि गहाय दारुनिमित्तं महाअडविं पविट्ठो। इतो य साहुणो मग्गं पवन्ना सत्थेण समं वच्चंति, सत्थे आवासिए निक्खं पविट्ठा, सत्थो गतो, ते मग्गतो पहाविया अयाणंता चुक्का, मूढदिसा पंथं अयाणंता तेण अडविपंथेण मज्झण्हदिवसकाले तण्हाए छुहाए य अपरद्धा तं देसं गया,जत्थ सो सगडसन्निवेसो। सो य वलाहिओ ते पासित्ता महंतं संवेगमावन्नो भणइ-अहो! इमे साहुणो अदेसिया तक्खिण्णो अडविमणुप्पविट्ठा। तेसिं सो परमभत्तीए विउलं असणं पाणं दाऊण आह-एह भगवं!, जेण पंथे समवतारेमि; पुरतो संपत्थितो, ताहे ते वि साहुणो तस्सेव मग्गेण अणुगच्छंति, ततो गुरू तस्स धम्मं कहेउमारद्धो, सो तस्सुवगतो, ततो पंथं समोयारित्ता नियत्तो। ते पत्ता सदेसं। सो पुण अविरयसम्मद्दिट्ठी कालं काऊण सोहम्मे कप्पे पलिओवमट्ठिइओ देवो जातो।"

एतदेवोपप्रदर्शयन् गाथाद्वयमन्तर्भाष्यकृदाह—

अवरविदेहे गाम-स्स चिंतगो रायदारुवणगमणं ।
साहू निक्खनिमित्तं, सत्था हीणे ताहिं पासे ॥१५०॥
दाणऽन्न पंथनयणं, अणुकंप गुरूण कहण सम्मत्तं ।
सोहम्मे उववन्नो, पलियाउ सुरो महिड्ढीओ ॥१५१॥

अपरविदेहे ग्रामस्य चिन्तकः, (रायदारुवणगमणमिति) अत्र निमित्तशब्दलोपो द्रष्टव्यः-राजदारुनिमित्तं तस्य वनगमनं, स साधून् भिक्षानिमित्तं सार्थाद् भ्रष्टान् तत्र दृष्टवान्, ततोऽनुकम्पया परमभक्त्या दानमन्नपानस्य, नयनं प्रापणं पथि, तदनन्तरं गुरोः कथनं, ततः सम्यक्त्वप्राप्तिः, तत्प्रभावान्मृत्वाऽसौ सौधर्मलोके उत्पन्नः पल्योपमायुः सुरो महर्द्धिक इति ।

लद्धूण य सम्मत्तं, अणुकंपाए सो सुविहियाणं वि ।
भासुरवरबोंदिधरो, देवो वेमाणिओ जातो ॥१५२॥

स ग्रामचिन्तकः सुविहितानामनुकम्पया परमभक्त्या तेभ्यः सम्यक्त्वं लब्ध्वा भासुरां दीप्तिमतीं वरां प्रधानां बोन्दिं तनुं धारयतीति भास्वरवरबोन्दिधरः, देवो वैमानिको जातः । इति निर्युक्तिगाथाऽर्थः ॥१५२॥

चइऊण देवलोगा, इह चेव य भारहम्मि वासम्मि ।
इक्खागुकुले जातो, उसभसुयसुतो मरीइ त्ति ॥१५३॥

ततो देवलोकात् स्वायुःक्षये च्युत्वा इहैव भारते वर्षे इक्ष्वाकुकुले जात उत्पन्न ऋषभसुतसुतो मरीचिः,ऋषभपौत्र इत्यर्थः।

यतश्चैवमतः-

इक्खागुकुले जातो, इक्खागुकुलस्स होइ उप्पत्ती ।
कुलगरवंसेऽतीए, भरहस्स सुओ मरीइ त्ति ॥१५४॥

इक्ष्वाकूणां कुलमिक्ष्वाकुकुलं, तस्मिन् जात उत्पन्नो, भरतस्य सुतो मरीचिरिति योगः । तत्र सामान्येन ऋषभपौत्रत्वाभिधाने सतीदं विशेषाभिधानमुपक्रमेव, सामान्याभिधाने सति सर्वेषामपि विशेषाभिधानस्य दर्शनात् । स च इक्ष्वाकुकुले जातः, यतश्चैवमत इक्ष्वाकुकुलस्य भवति उत्पत्तिर्वाच्येति शेषः । ॥१५४॥ आ० म० १ अ० १ खण्ड । आ० चू० (कुलकरवक्तव्यता ' कुलगर ' शब्दे तृतीयभागे ५६२ पृष्ठे समुक्ता)

णिग्गमग-निर्गमक-पुं० । प्रस्थाने, बृ० १ उ० ।

णिग्गमण-निर्गमन-न० । अपक्रमणे, निस्सरणे, पलायने, स्था० १ उ० । निस्सरणमार्गे, ज्ञा० २ श्रु० १ अ० । (गच्छान्निर्गत्योपसंपद्विधिः 'उवसंपया' शब्दे द्वितीयभागे १००५ पृष्ठे उक्तः)

णिग्गय-निर्गत-त्रि० । निःसृते, ज्ञा० १ श्रु० १ अ० । उत्त० । नं० । नि० । अभिनिष्क्रान्ते, आ० म० १ अ० १ खण्ड । रहिते, संथा० । पञ्चा० । अविद्यमाने, स्था० १ ठा० । प्रतिपातिते, स० ६ अङ्ग । " उक्कुमुहे निग्गयजीहनेत्ते । " निर्गतजिह्वनेत्रान् । उत्त० ११ अ० " णिग्गयग्गदंता । " निर्गता अग्रदन्ता यस्य स निर्गताग्रदन्तः । ज्ञा० १ श्रु० ८ अ० । स्थानान्तरप्राप्त्या निश्चिते ऽनिश्चिते गमने, भ० १४ श० १ उ० ।

णिग्गह-निग्रह-पुं० । अनाचारप्रवृत्तेर्निषेधने, नि० १ श्रु० १ वर्ग १ अ० । ज्ञा० । अन्यायकारिणां दण्डे, आव० ६ अ० । ग० । भ० । रोधे, भ० ७ श० ६ उ० । इन्द्रियनोइन्द्रियनियन्त्रणे, उत्त० १७ अ० । आ० चू० ।

णिग्गहजुत्त-निग्रहयुक्त-त्रि० । इन्द्रियकषायाणां निग्रहसमर्थे, बृ० ४ उ० ।

णिग्गहट्ठाण-निग्रहस्थान-न० । वादकाले वादी प्रतिवादी वा येन निगृह्यते तन्निग्रहस्थानम् । सूत्र० १ श्रु० १२ अ० । वादिवञ्चनार्थके प्रतिज्ञाहान्यादौ न्यायपरिन्नाषिते पदार्थे, स्था० १ ठा० ।

णिग्गहदोस-निग्रहदोष-पुं० । निग्रहस्थलाऽऽदिना पराजयस्थानरूपे दोषभेदे, स्था १० ठा० ।

णिग्गहप्पहाण-निग्रहप्रधान-न० । अनाचारप्रवृत्तिनिषेधप्रधाने, नि० १ श्रु० १ वर्ग १ अ० । औ० ।

णिग्गहसमत्थ-निग्रहसमर्थ-पुं० । जितेन्द्रिये, तरुणाऽऽदीनां वा संयतीरूपसर्गयतां स्खरण्टाऽऽदिना शिक्षाकारणदण्डे,बृ० १ उ० ।

णिग्गहिय-निगृहीत-त्रि० । वादे पराजिते, "सो वादी णिग्गहितो, पच्छा सावगेहिं गोट्ठामाहिलो धरितो।" आ०म०२अ०।

णिग्गा-देशी-हरिद्रायाम्, दे०ना० ४ वर्ग २५ गाथा ।

णिग्गाहि-[णि]-निग्राहिन्-निगृह्णाति मनोज्ञवेन वशीकरोतीति निग्राही । निग्रहणशीले उत्त० ४ अ० ।

णिग्गिण-देशी-निर्गते, दे० ना० ४ वर्ग ३६ गाथा।

णिग्गुण-निर्गुण-त्रि० । निर्गतगुणे, प्रश्न० ३ आश्र० द्वार । उत्तरगुणापेक्षया निर्मर्यादे,व्या०३ उ०२ उ० । भ० । उत्तरगुणविकले, जं० २ वक्ष० । स्था० । गुणव्रतरहिते,ज्ञा० १ श्रु० १८अ० । तीक्ष्णाऽऽदिगुणाभावात् (दशा० ६ अ०) क्षान्त्यादिगुणाभावाद् गुणविकले, रा० । भ० ।

णिग्गुणबंभ-निर्गुणब्रह्मन्-न० । योगाऽऽदिरहिते आत्मनि,सत्त्वरजस्तमोरूपगुणरहिते ब्रह्मणि, अष्ट० ८ अष्ट० ।

णिग्गूढ–निर्गूढ–त्रि० स्थिरतया स्थापिते,सूत्र० २ श्रु० ७ अ०।

णिग्गोह–न्यग्रोध–पुं० । वटवृक्षे, अनु० । स्था० । स० । जी०।

णिग्गोहपरिमंडल–न्यग्रोधपरिमण्डल–न० । न्यग्रोधवत्परिमण्डलं यस्य तत्र्यग्रोधपरिमण्डलम् । कर्म० ६ कर्म० । प्रज्ञा० । जी० । नाभेरुपरि न्यग्रोधवन्मण्डले, आद्यसंस्थानयुक्तत्वेन विशिष्टाऽऽकारे द्वितीयसंस्थाने,अनु० । यथा न्यग्रोध उपरिसंपूर्णावयवोऽधस्तनभागे पुनर्न तथा, तथेदमपि नाभेरुपरि विस्तरबहुलं शरीरलक्षणोक्तप्रमाणलाभमधस्तु हीनाधिकप्रमाणमिति । स्था० ६ ठा० । पं० सं० । कर्म० ।

णिग्गोहपरिमंडलणाम–न्यग्रोधपरिमण्डलनामन्–न० । न्यग्रोधपरिमण्डलनिबन्धने नामकर्मभेदे, कर्म० १ कर्म० ।

णिग्घट्ठ–देशी–कुशले, दे० ना० ४ वर्ग ४ गाथा ।

णिग्घाय–निर्घात–पुं० । वैक्रियाशनिप्रपाते, जी० १ प्रति० । प्रज्ञा० । विद्युत्प्रपाते, जी० १ प्रति० ४ उ० । साभ्रे निरभ्रे वा गगने व्यन्तरकृते महागर्जितध्वनौ,स्था० १० ठा० । आव० । नि० चू० । निर्जरणे, सूत्र० १ श्रु० १५ अ० ।

णिग्घायण–निर्घातन–न०। निरधिकक्येन घातो निर्घातः । निर्जरणे, आ० चू० ५ अ० ।

णिग्घायणट्ठ–निर्घातनार्थ–पुं० । निर्घातननिमित्ते, " पावाणं कम्माणं णिग्घायणट्ठाए ।" आव० ५ अ० । निर्घातनमुच्छेदः,स एवार्थः प्रयोजनं तस्मै । ध० २ अधि० ।

णिग्घिण–निर्घृण–त्रि० । न विद्यते घृणा पापजुगुप्सालक्षणा यत्र स निर्घृणः। प्रश्न० १ आश्र०द्वार। न विद्यते घृणा पापजुगुप्सा यस्य सः। प्रव० २७४ द्वार । प्रश्न० । निर्दये, ज्ञा० १ श्रु० ६ अ० । आव० । "मो दीर्घो वा" ॥८ । ३ । ३७॥ इति संबुद्धौ वा दीर्घः । ' रे रे णिग्घिणया ! ' । प्रा० ३ पाद ।

णिग्घिणता–निर्घृणता–स्त्री० । निर्दयतायाम,पञ्चा० १० विव० ।

णिग्घिणमइ–निर्घृणमति–त्रि० । परस्य द्रव्यादिविरते, प्रश्न० ३ आश्र० द्वार ।

णिग्घेउं–निगृहीतुम्–अव्य० । निरुध्येत्यर्थे, " पुव्वपयत्तेण सक्कितो णिग्घेउं ।" नि० चू० १ उ० ।

णिग्घोर–देशी–निर्दये, दे० ना० ४ वर्ग ३७ गाथा ।

णिग्घोस–निर्घोष–पुं० । नितरां घोषो निर्घोषः । तं० । आव० । महाप्रयत्नोत्पादिते शब्दे, ज्ञ० ६ श० ३३ उ० । महाशब्दे, कल्प० ५ क्षण । रा० । आ० म० । विपा० । महाध्वनौ, प्रश्न० १ आश्र० द्वार । जी० । आचा० । ज्ञा० । रा० ।

णिघंटु–निघण्टु–पुं० । नामसङ्ग्रहे, कल्प० २ क्षण । कोशे, औ० । नामकोशे, "णिघंटुछट्ठाणं संगोवंगाणं चउण्हं वेयाणं ।" नि० १ श्रु० १ वर्ग ५ अ० । कल्प० ।

णिघस–निकष–पुं० । कषपट्टगतायां कथितसुवर्णरेखायाम, अनु० । नि० चू० । आ० म० । भ० । चं० प्र० । प्रश्न० । कषपट्टके, सर्वेषामभिधानानामागमो निकषः हेमरजतकल्पजीवाऽऽदिपदार्थपरिज्ञानहेतुत्वात् कषपट्टकः । अनु० ।

णिचय–निचय–पुं०। द्रव्योपचये तन्निमित्ताऽऽपादितकर्मनिचये, सूत्र० १ श्रु० १० अ० । आचा० । रा० । औ० । शूकराऽऽदिसंघाते, पिं० । संचये, ओघ० ।

णिचिक्खिल्ल–निश्चिखिल–पुं० । कर्दमाभावे, व्य० ६ उ० ।

णिचिय–निचित–त्रि० । निबिडे, अनु० । प्रश्न० । रा० । स्था० । औ० । भ० । निबिडतरचयमापन्ने, आ० म० १ अ० १ खण्ड ।

णिच्च–नित्य–त्रि० । शाश्वते, उत्त० १८ अ० । आव० । संघा० । सर्वदाऽवस्थायिनि, आचा० १ श्रु० १ अ० ५ उ० । उत्पत्तिविनाशरहिते, प्रव० १ द्वार । अविनाशधर्मिणि, स्था० । ध० । अविचलितस्वभावे, दश० १ अ० । अव्यवच्छिन्नरूपे, विशे० । अप्रच्युतानुत्पन्नस्थिरैकस्वभावे, आचा० १ श्रु० ५ अ० ५ उ० । स्था० । दश० । अप्रच्युतानुत्पन्नस्थिरैकस्वभावतया कूटस्थनित्यत्वेन व्यवस्थापिते, आचा० १ श्रु० ५ अ० १ उ० । ध्रुवे, प्रश्न० ३ आश्र० द्वार । औ० । सर्वकाले, रा० । कल्प० । जी० । व्य० । प्रश्न० । सर्वदेत्यर्थे, संथा० । जं० । प्रश्न० । रा० । स्था० । सूत्र० । उत्त० । " रागदोसे य जे पावे, पावकम्मप्पवत्तणे । जे निक्खू रुंभई णिच्चं,से न अत्थइ मंडले ॥१॥" उत्त० ३१ अ० । " णिच्चं नीयकम्मोचजीविणो।" नित्यं सदा नीचान्यधमजनोचितानि कर्माण्युपजीवन्ति तैर्वृत्तिं कुर्वन्ति ये ते तथा । प्रश्न० ३ आश्र० द्वार ।

णिच्चउग्गाह–निश्चयोद्ग्राह–पुं० । निश्चयनयोपन्यासे, " तेनाऽऽदौ निश्चयोद्ग्राहो, नग्नानामपहस्तितः । रसायनीकृतविषप्रायोऽसौ न जगद्धितः " ॥७९॥ निश्चयनयोद्ग्राहो निश्चयनयोपन्यासः । नयो० ।

णिच्चंधकारतमस–नित्यान्धकारतमस–न० । नित्यमेवान्धकारतमसं येषु ते तथा । मेघावच्छिन्नाभ्रमरतलकृष्णपक्षरजनीवत् तमोबहुलेषु नरकेषु, सूत्र० २ श्रु० २ अ० ।

णिच्चंपरदार–नित्यंपरदार–पुं० । प्रतिक्रमणसूत्रमध्ये श्राविकाः " णिच्चंपरदारगमणविरईओ । " इत्यादिपाठं कथयन्त्युत "निच्चं कापुरिसगमणविरईओ।" इत्यादि चेति प्रश्ने, उत्तरम्-प्रतिक्रमणसूत्रपाठस्तु श्राद्धश्राविकाणां सदृश एव ज्ञायते, येनैतदवृत्तौ स्त्रियं प्रति परपुरुषवर्जनमुपलक्षणाद् ऊह्यमिति व्याख्यातमस्तीति। ३५ प्र० । सेन० २ उल्ला० ।

णिच्चच्चाणिय–नित्यत्यागिक–त्रि० । नित्यं सर्वदा क्षणा उत्सवा यत्राऽसौ नित्यक्षणिकः । सार्वदिकोत्सवयुक्ते, ज्ञा० १ श्रु० ४ अ० ।

णिच्चतद्धित्त–नित्यतद्धित्र–त्रि०। सदैव तत्परे,पञ्चा० १७ विव० ।

णिच्चदुक्खिय–नित्यदुःखित–त्रि० । सदा दुःखाऽऽकुले, तं० ।

णिच्चदोस–नित्यदोष–पुं० । अविनाशिदोषे,स्था० । तथा नित्यो यो दोषोऽभव्यानां मिथ्यात्वाऽऽदिरनाद्यपर्यवसितत्वात्, स दोषः सामान्यापेक्षया विशेषः । अथवा–सर्वथा नित्ये वस्तुनि अभ्युपगते यो दोषो बालकुमाराऽऽद्यवस्थाजातावाऽऽपत्तिलक्षणः, स दोषः सामान्यापेक्षया दोषविशेष इति । स्था० १० ठा० ।

णिच्चपिंड–नित्यपिण्ड–पुं० । निमन्त्रितस्य नित्यं गृह्यतो ग्राह्ये पिण्डे, प्रव० २ द्वार ।

णिच्चभत्त–नित्यभक्त–न० । अनवरतभोजने,पञ्चा० ६ विव० ।

णिच्चभत्तिय–नित्यभक्तिक–पुं० । नित्यमेकाशनिनि साधौ, कल्प० ९ क्षण ।

णिच्चभाव-नित्यभाव-पुं० । सर्वदा सद्भावे, पञ्चा० ६ विव० ।

णिच्चर-कथ-धा० । दुःखकथने, " दुःखेर्णिच्चरः "॥ ८ । ४ । ३॥ इति दुःखविषयस्य कथेर्णिच्चर इत्यादेशः । ' णिच्चरइ ' दुःखं कथयतीत्यर्थः । प्रा० ४ पाद ।

णिच्चल्ल-मुच्-धा० । दुःखमोचने, " दुःखेर्णिच्चल्लः " ॥ ८ । ४ । ३ ॥ इति दुःखविषयस्य मुचेर्णिच्चल्लाऽऽदेशः । ' णिच्चल्लइ ' दुःखं मुञ्चतीत्यर्थः । प्रा० ४ पाद ।

णिच्चल्ल-त्रि० । " ह्रस्वात् थ्य-श्च-त्स-प्सामनिश्चले " ॥ ७ । २ । २१ ॥ इति अभागस्य च्छो न, अनिश्चलेतिपर्युदासात् । प्रा० २ पाद । अचले, सूत्र० ५ अ० । " जम णिच्चल्लणिप्पंदा, भिसिणीपत्तम्मि रेहइ बलाया । " प्रा० २ पाद । गमागमाऽऽदिरहिते, ज्ञा० १ श्रु० २ अ० । रा० ।

णिच्चलपय-निश्चलपद-न० । मोक्षे, पं० व० ४ द्वार । रा० ।

णिच्चवाय-नित्यवाद-पुं० । नित्यैकान्तवादे, स्था० ।

णिच्चसंदण-नित्यस्यन्दन-त्रि० । नित्यस्रवणशीले सततवाहिनि, कल्प० ६ क्षण ।

णिच्चसति-नित्यस्मृति-स्त्री० । सार्वदिकस्मरणे, पञ्चा० १ विव० । प्रा० ।

णिच्चसहाय-नित्यसहाय-पुं० । अवस्थितसहाये, व्य० ६ उ० ।

णिच्चसुह-नित्यसुख-त्रि० । सदा सौख्ये, आव० ६ अ० ।

णिच्चाणिच्च-नित्यानित्य-त्रि० । स्थितिभवनभङ्गरूपापेक्षया नित्ये, भवनभङ्गरूपापेक्षयाऽनित्ये, स्था० १ ठा० ।
सर्वस्यैव वस्तुन उत्पादव्ययध्रौव्ययुक्तता । इत्यत्र प्रमाणम्-
" असतो नत्थि पसूई, होज्ज व अह होउ खरविसाणस्स ।
न य सव्वहा विणासो, सव्वुच्छेयप्पसंगाओ ॥ १६६८ ॥
तोऽवत्थियस्स केणइ, विलओ धम्मेण भवणमत्तेण ।
सव्वुच्छेओ न मओ, संववहारोवरोहाओ " ॥ १६६९ ॥
अन्यत्र विवृतम् । विशे० । (सादिश्रुतप्रकरणेऽप्येतत्)

णिच्चालोग-नित्याऽऽलोक-पुं० । चतुःषष्टितमे महाग्रहे, " दो णिच्चालोया । " स्था० २ ठा० ३ उ० । कल्प० । सू० प्र० । चं० प्र० । नित्यमालोक उद्द्योतो यत्रेति । सर्वकालमुद्द्योतमाने, कल्प० ३ क्षण ।

णिच्चिंद-निश्चिन्त-त्रि० । "अधः क्वचित्" ॥ ८ । ४ । २६१ ॥ इति शौरसेन्यां तस्य दः । चिन्ताविकले, प्रा० ४ पाद ।

णिच्चुज्जोय-नित्योद्द्योत-पुं० । पञ्चषष्टितमे महाग्रहे, " दो णिच्चुज्जोया । " स्था० २ ठा० ३ उ० । कल्प० । चं० प्र० । सू० प्र० ।

णिच्चुव्विग्ग-नित्योद्विग्न-त्रि० । सदाऽप्रशान्ते, दश० ५ अ० २ उ० । सदोदासीने, अष्ट० २२ अष्ट० ।

णिच्चेट्ठ-निश्चेष्ट-त्रि० । व्यापाररहिते, ज्ञा० १ श्रु० २ अ० ।

णिच्चेयणय-निश्चेतनक-त्रि० । चैतन्यवर्जिते शरीरे, सं० ।

णिच्चोउआ-नित्यर्तुका-स्त्री० । नित्यं सदा, न व्यहमेव ऋतुरक्तप्रवृत्तिलक्षणो यस्याः सा नित्यर्तुका । सदा रजस्वलायाम्, सा च गर्भं न धरते । स्था० ५ ठा० २ उ० ।

णिच्चोयग-नित्योदक-त्रि० । प्रचुरजले, कल्प० ६ क्षण ।

णिच्छइय-नैश्चयिक-पुं० । निश्चये भवो नैश्चयिको नयः निश्चयनये, विशे० । न० ।

णिच्छक्क-देशी-त्रि० । निर्लज्जे, वृ० १ उ० । धृष्टे, व्य० ५ उ० । अनवसरज्ञे, आ० १ श्रु० ९ अ० ।

णिच्छय-निश्चय-पुं० । निराधिक्ये चयनं चयः पिण्डीभवनमधिकश्चयो निश्चयः । अनु० । निरधिकश्चयो निश्चयः । सामान्ये, आ० चू० १ अ० । परमार्थे, पं० व० ३ द्वार । पञ्चा० । आ० म० । आव० । सूत्र० । औ० । अवश्यङ्करणाभ्युपगमे तत्त्वनिर्णये, भ० २ श० ५ उ० । आ० म० । सूत्र० । ज्ञा० । नियमे, अव्यभिचारे, निश्चयपरिच्छेदे, सम्म० ३ काण्ड । इत्थमेवेदं विधेयमित्येवंरूपनिर्णये, भ० १५ श० २ उ० ।

णिच्छयकहा-निश्चयकथा-स्त्री० । अपवादे, "अपवादोणिच्छयकहा भण्णति ।" ऋजुसूत्राऽऽदिभिः शुद्धनयैः क्रियमाणायां कथायाम्, नि० चू० ५ उ० ।

णिच्छयगोयर-निश्चयगोचर-पुं० । निश्चयविषये, द्रव्या० ८ अध्या० ।

णिच्छयणय-निश्चयनय-पुं० । तत्त्वनयमते परिणामवादे, पञ्चा० १३ विव० । द्रव्यास्तिकनये, सम्म० ३ काण्ड । ऋजुसूत्राऽऽद्यास्तु चत्वारो निश्चयनयाः । बृ० ४ उ० । (निश्चयनयस्वरूपं ' णय ' शब्देऽस्मिन्नेव भागे १००२ पृष्ठे प्रतिपादितम्)

निश्चयव्यवहारयोः पार्थक्यम्—

निश्चयाद् व्यवहारेण, कोपचारविशेषता ?।
मुख्यवृत्तिर्यदैकस्य, तदाऽन्यस्योपचारता ॥ २२ ॥

(निश्चयेति) निश्चयाद् निश्चयनयाद् व्यवहारेण सहोपचारविशेषता काऽस्ति ?। व्यवहारविषये उपचारोऽस्ति, निश्चये उपचारो नास्त्येतावद्विशेषता। यदैकनयस्य मुख्यवृत्तिर्गृह्यते,तदा परनयस्योपचारवृत्तिरायाति। रत्नाकरावतारिकायां स्याद्वादरत्नाकरे च प्रसिद्धमस्ति-' स्वस्यार्थसत्यत्वस्याभिमानोऽखिलनयानामन्योऽन्यं वर्तते, फलात् सत्यत्वं तु सम्यग्दर्शनयोग एवास्ति।" एवं च प्रकृतमर्थं व्याख्यायते-निश्चयनयाद् व्यवहारनयेन सहोपचारविशेषता काऽस्ति ?। या उपचारविशेषता वर्तते, तां दर्शयति-यदैकस्य कस्यचिन्नयस्य मुख्यता मुख्यभावो वर्तते, तदाऽन्यस्याऽन्यनयस्य उपचारता गौणत्वं भवतीति ज्ञेयम। यथाहि-निश्चयेन आत्मेति शब्द एतस्य निश्चयार्थस्तु-"असंख्यातप्रदेशी निरञ्जनोऽनन्तज्ञानाऽऽदिगुणोपेतो नित्यो विशुद्धः कर्मदोषैरसङ्गतः सिद्ध इव देहे उपलभ्यते।" तदाऽस्य व्यवहारेणौपाधिकस्य जन्मशरीराऽऽदेः सङ्गतस्यौदयिकाऽऽदिभावोपगतनरनैरयिकाऽऽदिभावस्पर्शतोऽपि गौणत्वं भासते। अथ च 'अतति सातत्येन गच्छति तांस्तान्पर्यायानित्यात्मा। ' संसारस्थो देहाऽऽदिसंगतो जन्ममरणजरायौवनाऽऽदिक्लेशमनुभवमानः प्रत्यक्षप्रमाणेन व्यवहाराऽऽदेशाद् देवो मनुष्यो नारकस्तिर्यङ् च कथ्यते, तत्र सिद्धत्वस्य गौणत्वम् ॥ २२ ॥

अथ पुनस्तदेव प्रतिपादयति-

तेनेदं भाष्यसदिष्टं, ग्रहीतव्यं विनिश्चयम् ।
तत्त्वार्थं निश्चयो वक्ति, व्यवहारो जनोदितम् ॥ २३ ॥

(तेनेति) तेन कारणेनेदं त्रिनिश्चयं निश्चयव्यवहारयोर्लक्षणं, भाष्यसंदिष्टं विशेषाऽऽवश्यकनिरूपितं,ग्रहीतव्यमवधारणीयम् । अथ निश्चयव्यवहारयोर्लक्षणमाह-निश्चयो निश्चयनयः, तत्त्वार्थं युक्तिसिद्धमर्थं, वक्ति कथयति । पुनर्व्यवहारो व्यवहारनयो, जनोदितं लोकाभिमतमात्रित्वं वक्ति। यतो लोकाभिमतमेव व्यवहारः,तस्य ग्राहकं प्रमाणं न भवति, प्रमाणं तु तत्त्वार्थग्राहकमेवास्ति । तथापि प्रमाणस्य सकलतत्त्वार्थग्राही निश्चयनयः, एकदेशतत्त्वार्थग्राही व्यवहारश्चायं विवेकः । निश्चयनयस्य विषयत्वम्, अथ च व्यवहारनयस्य विषयत्वमनुभवसिद्धं भिन्नमेवाऽऽस्ते । यथा सविकल्पकज्ञानं नष्टप्रकारताऽऽदिकमन्यवादिनो भिन्नमेवाऽऽमनन्तीति हृदये विमर्शनीयम् ॥ २३ ॥

अथोपचारं निर्दिशति-

बाह्यस्याऽभ्यन्तरत्वं यद्, बहुव्यक्तेरभेदता ।
यच्च द्रव्यस्य नैर्मल्य-मिति निश्चयगोचराः ॥२४॥

(बाह्येति) यद् बाह्यस्य बाह्यार्थस्याऽभ्यन्तरत्वमन्तरङ्गत्वं वर्तते, तदपि गोचरम्,निश्चयविषयमित्यर्थः। यथा-"समाधिनन्दनं धैर्यो, दम्भोलिः समता सभा । ज्ञानं महाविमानं च,वासवश्रीरियं,पुनः ॥ १ ॥ " इत्यादिपुण्डरीकाध्ययनाऽऽद्यर्थोऽप्येवं भावनीयः । अथ पुनर्बहुव्यक्तेरनेकविशेषस्याभेदता भेदराहित्यं, तदपि निश्चयविषयम् । यथा-"एगे आया"इत्यादि सूत्रम,तथा वेदान्तदर्शनमपि शुद्धसंग्रहनयाऽऽदेशरूपः शुद्धनिश्चयनयार्थः संमतिग्रन्थे कथितः। (स चास्मिन्नेव भागे १८९१ पृष्ठे दर्शितः) तथा पुनर्द्रव्यस्य पदार्थस्य यन्नैर्मल्यं तदपि निश्चयविषयम्, नैर्मल्यं तु विमलपरिणतिः बाह्यनिरपेक्षपरिणामः, सोऽपि निश्चयनयाऽर्थो बोद्धव्यः । यथा-" आया सामाइए, आया सामाइयस्स अट्ठे । " एवमेते अभ्यन्तरत्वाऽऽदयो निश्चयगोचरा एव । यथा यथा रीत्या लोकातिक्रान्तोऽर्थोऽस्ति), तथा तथा रीत्या निश्चयनयस्य भेदा भवन्ति। तस्माच्च लोकोत्तरार्थभावना समायातीति ज्ञेयम् ॥ २४ ॥ रत्ना० ८ अध्या० ।

णिच्छर-निर्झर-पुं० । " चूलिकापैशाचिके तृतीयतुर्ययोराद्यद्वितीयौ " ॥ ८ । ४ । ३२५ ॥ इति चतुर्थस्य झस्य छः । निरिणतप्रस्रवणे, प्रा० ४ पाद ।

णिच्छल्ल-छिद्-धा० । छेदने, " छिदेर्डहाव-णिच्छल्ल-निज्झोड-णिव्वर-णिल्लूर-लूराः " ॥ ८ । ४ । १२४ ॥ इति णिच्छल्लाऽऽदेशः । णिच्छल्लइ, छिंदइ, छिनत्ति । प्रा० ४ पाद ।

णिच्छल्लिय-निश्चल्लिक-त्रि० । त्वक्षीरहिते, बृ० १ उ० ।

णिच्छाय-निश्छाय-त्रि० । गतश्रीके, ज्ञा० ३ श्रु० ३ अ० । विशोभे, प्रश्न० २ आश्र० द्वार ।

णिच्छिड्ड-निश्छिद्र-त्रि० । स्थगितरन्ध्रे,दश० ४ तत्त्व । प्र० ।

णिच्छिण्ण-निश्छिन्न-त्रि० । रूपाऽऽदिव्यावृत्तेः पृथक्कृते,विशे० ।

णिच्छिय-निश्चित-त्रि० । अवश्यं भाविनि, स० ६ अङ्ग । निश्चयवति, ज्ञा० १ श्रु० १ अ० । प्रश्न० । असंशये,स० ११ अङ्ग ।

णिच्छुभण-निच्छुभण-न० । निष्काशने, व्य० ७ उ० । " असंथमिणिच्छुभणे । " नि० चू० १ उ० ।

णिच्छूम-देशी-निर्दये, दे० ना० ४ वर्ग ३७ गाथा ।

णिच्छूढ-निष्ठ्यूत-न० । निष्ठीवने, विशे० । आव० । " केणाप्युणाऽऽदयः " ॥ ८ । ४ । २५८ ॥ इति शब्दस्य निच्छूढाऽऽदेशः प्रा० ४ पाद । उत्क्षिप्ते, प्रश्नोच्चारणे च । वाच० । " सो परिव्वायगो हीलिज्जंतो णिच्छूढो । " आव० १ अ० २ खण्ड ।

णिच्छूहणा-निष्क्षोभणा-स्त्री० । निःसरणात्मकाद् गेहादिति प्रस्तावे, ज्ञा० १ श्रु० १६ अ० ।

णिच्छेय-निश्चेय-त्रि० । निश्चीयत इति निश्चेयः । अवश्यकरणीये, रा० ।

णिच्छोडइत्ता-निश्छोट्य-अव्य० । प्राप्तमर्थं त्याजयित्वेत्यर्थे, प्र० १५ श० । पुरुषान्तरसम्बन्धिहस्ताऽऽद्यवयवतो वियोजयित्वेत्यर्थे, भ० १५ श० । सम्बन्धान्तरसंबद्धहस्ताऽऽदौ गृहीत्वा बलात् क्षिप्त्वेत्यर्थे, स्था० ५ ठा० १ उ० । उपा० ।

णिच्छोमणा-निश्क्षोटना-स्त्री० । स्वजात्मदीयवस्त्राऽऽदीत्यादिरूपे भर्त्सने, भ० १५ श० । ज्ञा० ।

णिच्छोलण-निश्क्षोटन-न० । स्वगपनयने, " अंगादाणं णिच्छोलेइ, णिच्छोलंतं वा साइज्जइ । " 'णिच्छोलेति' स्वचमपनयति, महामणिं प्रकाशयति इत्यर्थः । नि० चू० १ उ० ।

णिजुद्ध-नियुद्ध-न० । सर्वसन्धिविश्लोषणपूर्वके युद्धे, नि० चू० १२ उ० । औ० । ज्ञा० ।

णिज्ज-देशी-सुते, दे० ना० ४ वर्ग २५ गाथा ।

णिज्जप्पपाणभोयण-निर्याप्यपानभोजन-न० । क० स० । निर्यापनाकारकेषु दुर्बलेषु पानभोजनेषु, प्रश्न० ५ सम्व० द्वार ।

णिज्जरट्ठया-निर्जरार्थता-स्त्री० । ममाऽप्येतान् वाचयतः कर्मनिर्जरा विपुला भविष्यतीति प्रयोजने, " जगाहट्ठयाए णिज्जरट्ठयाए पञ्चवजाएणं । " आव० म० १ अ० १ खण्ड । स्था० ।

णिज्जरट्ठि[ण्]-निर्जरार्थिन्-त्रि० । कर्मक्षयकामे, प्रति० ।

णिज्जरण-निर्जरण-न० । यतनोपयोगिज्ञानदर्शनविशुद्धते, औ० । दाने च, " णिज्जरणं भवत्थाणं । " व्य० ७ उ० ।

णिज्जरमाण-निर्जरयत्-त्रि० । निर्जरां कुर्वाणे, भ० १७ श० ३ उ० ।

णिज्जरा-निर्जरा-स्त्री० । निर्जरणं निर्जरा। कर्मक्षये, आव० ३ अ० । पञ्चा० । स्था० । दश० । ओघ० । आचा० । कर्मणां जीवप्रदेशेभ्यः परिशटने, स्था० १० ठा० । कात्स्न्येनानुसमयं विशेषकर्मविपाकहान्या परिशटने, स्था० ४ ठा० ४ उ० । कर्मपुद्गलशाटने, सूत्र० २ श्रु० ५ अ० । आव० । स्था० । नाशे, आ० । कर्मणोऽकर्मताभवने, स्था० २ ठा० ४ उ० । विशरणे परिशटने, स्था० १ ठा० । अपचये, कर्म० ।

एगा णिज्जरा ।

निर्जरणं निर्जरा, विशरणं परिशाटनमित्यर्थः । सा चाष्टविधकर्मापेक्षयाऽष्टविधाऽपि, द्वादशविधतपोजनितत्वेन च द्वादशविधाऽपि, अकामक्षुत्पिपासाशीताऽऽतपदंशमशकसहनब्रह्मचर्यधारणाऽऽद्यनेकविधकारणजनितत्वेनाऽनेकविधाऽपि,द्रव्यतो वस्त्राऽऽदेर्भावतः कर्मणामेवं द्विविधाऽपि वा,निर्जरा सामान्याद्देकेति । ननु निर्जरामोक्षयोः कः प्रतिविशेषः ?, उच्यते-देशतः कर्मक्षयो निर्जरा, सर्वतस्तु मोक्ष इति । स्था० १ ठा० । अनु० । स० ।

अधुना यद्गुणवशाज्जीवानां यावती निर्जरा, तामाह-

एयगुणा पुण कमसो, असंखगुणणिज्जरा जीवा। [७३]

एते प्रागुपदर्शिताः सम्यक्त्वदेशविरतिसर्वविरत्यादयो गुणा धर्मा येषां ते एतद्गुणाः, जीवा इत्युत्तरेण संबन्धः। कथम्?, इत्याह-पुनरिति पुनःशब्दो गुणश्रेणिस्वरूपापेक्षया व्यतिरेकार्थः। क्रमशो यथोत्तरं क्रमेण, असंख्यातगुणिता निर्जरा कर्मपुद्गलपरिशाटरूपा येषां तेऽसंख्यातगुणनिर्जराः, जीवाः सत्त्वाः, भवन्तीति शेषः। तत्र सम्यक्त्वगुणा जीवाः स्तोकपुद्गलनिर्जरकाः, ततो देशविरता असंख्येयगुणनिर्जराः, ततः सर्वविरता असंख्येयगुणनिर्जराः, ततोऽनन्तानुबन्धिविसंयोजका असंख्येयगुणनिर्जराः, ततो दर्शनक्षपका असंख्येयगुणनिर्जराः, ततो मोहशमका असंख्येयगुणनिर्जराः, तत उपशान्तमोहा असंख्येयगुणनिर्जराः, ततः क्षपका असंख्येयगुणनिर्जराः, ततः क्षीणमोहा असंख्येयगुणनिर्जराः, ततः सयोगिकेवलिनोऽसंख्येयगुणनिर्जराः, ततोऽप्ययोगिकेवलिनोऽसंख्येयगुणनिर्जराः (८३) कर्म० ५ कर्म०। स्था०। (देशेन सर्वेण चाऽऽत्मा निर्जरयतीति 'आता' शब्दे द्वितीयभागे १६६ पृष्ठे उक्तम) (भक्तप्रत्याख्यानेन निर्जरा भवतीति 'भक्तपच्चक्खाण' शब्दे वक्ष्यते) "जीवा णं चउहिं ठाणेहिं अट्ठ कम्मपगडीओ णिज्जरेंसु, णिज्जरिंति, णिज्जरिस्संति।" कर्मणोऽकर्मकत्वभावनामिति। इह च देशनिर्जरैव ग्राह्या, सर्वनिर्जरायाश्चतुर्विंशतिदण्डके असम्भवात्, क्रोधाऽऽदीनां च तद्धेतुत्वात्, क्रोधाऽऽदिक्षयस्यैव तत्कारणत्वादिति। स्था० ४ ठा० १ उ०।

ज्ञानी शीघ्रं कर्म क्षपयति। तत्र निर्जराद्वारमाह-

जं अन्नाणी कम्मं, खवेइ बहुयाइँ वासकोडीहिं।
तं नाणी तिहिँ गुत्तो, खवेइ ऊसासमित्तेणं॥

यदज्ञानी जीवो नैरयिकाऽऽदिभवेषु वर्त्तमानो बहीभिर्वर्षकोटीभिः कर्म क्षपयति, तत्कर्म ज्ञानी त्रिषु मनोवाक्कायेषु गुप्तः, समुच्छ्वासमात्रेणापि कालेन क्षपयति। बृ० १ उ०। कर्मनिर्जराहेतौ बुभुक्षाऽऽदिसहने, स्था० ४ ठा० ४ उ०। (वैयावृत्यं महानिर्जराहेतुरित्यतिशयानां प्रसङ्गे 'अइसेस' शब्दे प्र० भा० ३० पृष्ठे आवेदितम्)

यो महावेदनः स महानिर्जरः-

जीवा णं भंते! किं महावेयणा महानिज्जरा, महावेयणा अप्पनिज्जरा, अप्पवेयणा महानिज्जरा, अप्पवेयणा अप्पनिज्जरा?। गोयमा! अत्थेगइया जीवा महावेयणा महानिज्जरा, अत्थेगइया जीवा महावेयणा अप्पनिज्जरा, अत्थेगइया जीवा अप्पवेयणा महानिज्जरा, अत्थेगइया जीवा अप्पवेयणा अप्पनिज्जरा। से केणट्ठेणं?। गोयमा! पडिमापडिवण्णए अणगारे महावेयणे महानिज्जरे, छट्ठसत्तमासु पुढवीसु नेरइया महावेयणा अप्पनिज्जरा, सेलेसिपडिवण्णए अणगारे अप्पवेयणे महानिज्जरे, अणुत्तरोववाइया देवा अप्पवेयणा अप्पनिज्जरा। भ०६ श०१ उ०।

से णूणं भंते! जे महावेयणे से महाणिज्जरे, जे महाणिज्जरे से महावेयणे, महावेयणस्स य अप्पवेयणस्स य से सेए जे पसत्थनिज्जराए?। हंता गोयमा! जे महावेयणे० एवं चेव। छट्ठसत्तमासु णं भंते! पुढवीसु नेरइया महावेयणा?। हंता! महावेयणा। ते णं भंते! समणेहिंतो निग्गंथेहिंतो महानिज्जरतरागा?। णो इणट्ठे समट्ठे। से केणं अट्ठेणं भंते! एवं वुच्चइ-जे महावेयणे० जाव पसत्थनिज्जराए?। गोयमा! से जहानामए दुवे वत्था सिया-एगे वत्थे कद्दमरागरत्ते, एगे वत्थे खंजणरागरत्ते, एएसि णं गोयमा! दोण्हं वत्थाणं कयरे वत्थे दुधोयतराए चेव, दुवामतराए चेव, दुपरिकम्मतराए चेव; कयरे वा वत्थे सुधोयतराए चेव, सुवामतराए चेव, सुपरिकम्मतराए चेव, जे वा से वत्थे कद्दमरागरत्ते, जे वा से वत्थे खंजणरागरत्ते?। जगवं! तत्थ णं जे से कद्दमरागरत्ते से णं वत्थे दुधोयतराए चेव, दुवामतराए चेव, दुपरिकम्मतराए चेव?। एवामेव गोयमा! नेरइयाणं पावाइं कम्माइं गाढीकयाइं चिक्कणीकयाइं सिढिलीकयाइं खिलीकयाइं जवंति, संपगाढं पि य णं ते वेयणं वेयमाणा णो महानिज्जरा नो महापज्जवसाणा जवंति, से जहा वा केइ पुरिसे आहिगरणिं आउट्टेमाणे महया महया सद्देणं महया महया घोसेणं महया महया परंपराघाएणं णो संचाएइ, तीसे आहिगरणीए अहावायरे पोग्गले परिसामित्तए एवामेव गोयमा! नेरइयाणं पावाइं कम्माइं गाढीकयाइं०जाव नो महापज्जवसाणाइं भवंति। जगवं! तत्थ जे से वत्थे खंजणरागरत्ते से णं वत्थे सुधोयतराए चेव, सुवामतराए चेव, सुपरिकम्मतराए चेव?। एवामेव गोयमा!। समणाणं निग्गंथाणं अहावायराइं कम्माइं सिढिलीकयाइं निट्ठियाइं कमाइं विपरिणामियाइं खिप्पामेव विद्धत्थाइं भवंति, जावइयं तावइयं पि य णं ते वेयणं वेयमाणा महानिज्जरा महापज्जवसाणा भवंति, से जहानामए केइ पुरिसे सुक्कं तणहत्थयं जायतेयंसि पक्खिवेज्जा, से नूणं गोयमा!। से सुक्के तणहत्थए जायतेयंसि पक्खित्ते समाणे खिप्पामेव मसमसाविज्जइ?। हंता! मसमसाविज्जइ, एवामेव गोयमा! समणाणं निग्गंथाणं अहावायराइं कम्माइं०जाव महापज्जवसाणाइं जवंति। से जहानामए केइ पुरिसे तत्तंसि अयकवल्लंसि उदगबिंदुं० जाव हंता! विद्धंसमागच्छइ, एवामेव गोयमा! समणाणं निग्गंथाणं० जाव महापज्जवसाणा जवंति, से तेणट्ठेणं जे महावेयणे से महानिज्जरे ०जाव निज्जराए।

(से णूणं भंते! जे महावेयणे इत्यादि) महावेदन उपसर्गाऽऽदिसमुद्भूताविशिष्टपीडः, महानिर्जरो विशिष्टकर्मक्षयः, अनयोश्चान्योन्याऽविनाभूतत्वाविर्भावनाय-"जे महानिज्जरे इत्यादि" प्रत्यावर्त्तनमित्येकः प्रश्नः तथा-महावेदनस्य चाल्पवेदनस्य च

मध्ये स श्रेयान् यः प्रशस्तनिर्जराकः कल्याणानुबन्धनिर्जर इति,एषश्च द्वितीयः प्रश्नः प्रश्नता च काकुपाठाऽवगम्या। इत्येत्याद्युत्तरम्। इह च प्रथमप्रश्नस्योत्तरे महोपसर्गकाले भगवान्महावीरो ज्ञातः, द्वितीयस्याऽपि स एवोपसर्गानुपसर्गावस्थायामिति। यो महावेदनः स महानिर्जर इति यदुक्तं, तत्र व्यभिचारं शङ्कमान आह-(अट्ठीत्यादि) (दुधोवतराए त्ति) दुष्करतरधावनप्रक्रियम्, (दुवामतराए त्ति) दुर्वाम्यतरकं दुस्त्याज्यतरकत्वम्, (दुप्परिकम्मतराए त्ति) कष्टकर्षण्यतेजोजननभङ्गकरणाऽऽदिप्रक्रियम्। अनेन च विशेषणत्रयेणाऽपि दुर्विशोध्यमित्युक्तम्। (गाढीकयाइं ति) आत्मप्रदेशैः सह गाढबद्धानि,सचसूत्रगाढबद्धसूचीकलापवत्। (चिक्कणीकयाइं ति) सूक्ष्मकर्मस्कन्धानां सरसतया परस्परं गाढसम्बन्धकरणतो दुर्भेदीकृतानि, तथाविधमृत्पिण्डवत्। (सिढिलीकयाइं ति) ऋथीकृतानि निधत्तानि, सूत्रबद्धाम्लितसलोहशलाकाकलापवत्। विप्पजूहाणि अनुभूतिव्यतिरिक्तोपायान्तरेण क्षपयितुमशक्यानि, निकाचितानीत्यर्थः। विशेषणचतुष्टयेनाप्येतेन दुर्विशोध्यानि भवन्तीत्युक्तं भवति। एवं च एवमेवेत्याद्युपनयवाक्यं सुघटनं स्यात्। यतश्च तानि दुर्विशोध्यानि स्युस्ततः (संपगाढमित्यादि) (नो महापज्जवसाणा भवंति त्ति) अनेन महानिर्जरायाः अनावस्य निर्वाणाभावलक्षणं फलमुक्तमिति नाप्रस्तुतत्वमस्याऽऽशङ्कनीयमिति। तदेवं यो महावेदनः स महानिर्जर इति विशिष्टजीवापेक्षमवगन्तव्यम्, न पुनर्नारकाऽऽदिक्लिष्टकर्मजीवापेक्षम्। यदपि यो महानिर्जरः स महावेदन इत्युक्तं, तदपि प्रायिकम्। यतो भवत्ययोगी महानिर्जरो, महावेदनस्तु भजनयेति। (अहिगरणि त्ति) अधिकरणी, यत्र लोहकारा अयोघनेन लोहानि कुट्टयन्ति। (आउट्टेमाणे त्ति) आकुट्टयन् (सद्देणं ति) अयोघनघातप्रभवेन ध्वनिना,पुरुषहुङ्कृतिरूपेण वा। (घोसेणं ति) तस्यैवानुनादेन। (परंपराघाएणं ति) परम्परा निरन्तरता, तत्प्रधानो घातस्तामनं, परम्पराघातः, तेन उपर्युपरि घातेनेत्यर्थः। (महावायरे त्ति) स्थूलप्रकारात्। एवमेवेत्याद्युपनये-"गाढीकयाइं" इत्यादिविशेषणचतुष्केण दुष्परिशाटनीयानि भवन्तीत्युक्तं भवति। (सुधोवतराए इत्यादि) अनेन सुविशोध्यं भवतीत्युक्तं स्यात्। (महावायराइं ति) स्थूलतरस्कन्धान्यसाराणीत्यर्थः। (सिढिलीकयाइं ति) ऋथीकृतानि, मन्दविपाकीकृतानि। (निट्ठियाइं कडाइं ति) निःसत्ताकानि विहितानि। (विपरिणामियाइं ति) विपरिणामं नीतानि स्थितिघातरसघाताऽऽदिभिः, तानि च क्रियमेव विध्वस्तानि भवन्ति, एभिश्च विशेषणैः सुविशोध्यानि भवन्तीत्युक्तं स्यात्। ततश्च(जावइयमित्यादि)। भ०६श०१उ०।

या वेदना सा निर्जरा-

से णूणं भंते! जा वेयणा सा निज्जरा, जा निज्जरा सा वेयणा ?। णो इणट्ठे समट्ठे। से केणट्ठेणं भंते ! एवं वुच्चइ-जा वेयणा न सा निज्जरा, जा निज्जरा न सा वेयणा ?। गोयमा ! कम्मवेयणा, णो कम्मनिज्जरा, से तेणट्ठेणं गोयमा !० जाव न सा वेयणा। नेरइयाणं भंते ! जा वेयणा सा निज्जरा, जा निज्जरा सा वेयणा ?। णो इणट्ठे समट्ठे। से केणट्ठेणं एवं वुच्चइ-नेरइयाणं जा वेयणा न सा निज्जरा, जा निज्जरा न सा वेयणा ?। गोयमा ! नेरइयाणं कम्मवेयणा णो कम्मनिज्जरा,से तेणट्ठेणं गोयमा ! ० जाव न सा वेयणा, एवं०जाव वेमाणियाणं। से नूणं भंते ! जं वेदंसु तं निज्जरिंसु, जं निज्जरिंसु तं वेदंसु ?। णो इणट्ठे समट्ठे। से केणट्ठेणं भंते ! एवं वुच्चइ-जं वेदंसु नो तं निज्जरिंसु, जं निज्जरिंसु नो तं वेदंसु ?। गोयमा ! कम्मं वेदंसु,नो कम्मं निज्जरिंसु, से तेणट्ठेणं गोयमा !० जाव नो तं वेदंसु। नेरइयाणं भंते ! जं वेदंसु, तं निज्जरिंसु, एवं नेरइया वि। एवं० जाव वेमाणिया। से नूणं भंते ! जं वेदेंति तं निज्जरंति, जं निज्जरंति तं वेदेंति ?। णो इणट्ठे समट्ठे। से केणट्ठेणं एवं वुच्चइ०जाव नो तं वेदेंति ?। गोयमा ! कम्मं वेदेंति, नो कम्मं निज्जरंति, से तेणऽट्ठेणं गोयमा !० जाव नो तं वेदेंति। एवं नेरइया वि०जाव वेमाणिया। से नूणं भंते ! जं वेदिस्संति, तं निज्जरिस्संति, जं निज्जरिस्संति तं वेदिस्संति ?। णो इणट्ठे समट्ठे। से केणट्ठेणं०जाव णो तं वेदिस्संति ?। गोयमा ! कम्मं वेदिस्संति, नो कम्मं निज्जरिस्संति। से तेणट्ठेणं० जाव नो तं निज्जरिस्संति। एवं नेरइया वि० जाव वेमाणिया। से नूणं भंते ! जे वेदणासमए से निज्जरासमए, जे निज्जरासमए से वेदणासमए ?। णो इणट्ठे समट्ठे। से केणट्ठेणं भंते ! एवं वुच्चइ-जे वेदणासमए न से निज्जरासमए, जे निज्जरासमए न से वेदणासमए ?। गोयमा ! जं समयं वेदेंति नो तं समयं निज्जरंति,जं समयं निज्जरंति नो तं समयं वेदेंति;अण्णम्मि समए वेदेंति अण्णम्मि समए निज्जरंति,अण्णे से वेदणासमए अण्णे से निज्जरासमए,से तेणऽट्ठेणं० जाव न से वेदणासमए। नेरइयाणं भंते ! जे वेदणासमए से निज्जरासमए, जे निज्जरासमए से वेदणासमए ?। णो इणट्ठे समट्ठे। से केणऽट्ठेणं भंते ! एवं वुच्चइ-नेरइयाणं जे वेदणासमए न से निज्जरासमए, जे निज्जरासमए न से वेदणासमए ?। गोयमा ! नेरइयाणं जं समयं वेदेंति नो तं समयं निज्जरंति,जं समयं निज्जरंति नो तं समयं वेदेंति,अण्णम्मि समए वेदेंति अण्णम्मि समए निज्जरंति, अण्णे से वेदणासमए अण्णे से निज्जरासमए,से तेणट्ठेणं०जाव न से वेदणासमए। एवं० जाव वेमाणियाणं।

(कम्मवेयण त्ति) उदयं प्राप्तं कर्म्म वेदना, धर्मधर्मिणोरभेदविवक्षणात्। (नो कम्म निज्जर त्ति)। कर्माभावो निर्जरा, तस्या एवंस्वरूपत्वादिति। (नो कम्म निज्जरिंसु त्ति) वेदितरसं कर्म्म नो कर्म्म तन्निर्जरितवन्तः, कर्मभूतस्य कर्मणो निर्जरणासम्भवादिति। भ० ७ श० ३ उ०। (कियता तपसा कियती निर्जरा भवतीति 'अणइलाय' शब्दे प्रथमभागे ४४४ पृष्ठे द्रष्टव्यम्) (परिणामानुसारेण निर्जरेति ' अइसेस' शब्दे प्र० भागे २५ पृष्ठे गतम) (सम्यक्त्वं विना निर्जरा नास्तीति वक्तव्यते ' सम्मत्त ' शब्दे) "गणवारणमगिलाए, कुणमाणे णिज्ज-

रेति कम्माइं । अन्नेय णिज्जराबे,तम्हा तू णिज्जरा होति ॥१॥" इत्युक्तलक्षणे अनुज्ञारूपेऽर्थे.पं०भा० । क्रियावादिनामक्रियावादिनां च मिथ्यादृशां सकामनिर्जरा भवति,न वा?,यदि सकामनिर्जरा,तर्हि ग्रन्थान्तराणि प्रमाणानीति प्रश्ने, उत्तरम्-क्रियावादिनामक्रियावादिनां च केषाञ्चित्सकामनिर्जराऽपि भवतीत्यवसीयते, यतोऽकामनिर्जरामुत्कर्षतो व्यन्तरेष्वेव । बालतपस्विनां चरकाऽऽदीनां तु ब्रह्मलोकं यावदुपपातः प्रथमोपाङ्गाऽऽदावुक्तोऽस्तीति, तदनुसारेण पूर्वोक्तानां सकामनिर्जरेति तत्त्वम् । प्रज्ञा० ३ पद० । सेन० ३ उल्ला० ।

णिज्जरापेहि [ण्]-निर्जराऽपेक्षिन्-त्रि० । निर्जरणं निर्जरा कर्मणामात्यन्तिकः क्षयः,तामपेक्षते-कथं ममाऽसौ स्यादित्यभिलषतीति निर्जराऽपेक्षी । उत्त० २ अ० । कर्मक्षयमभीप्सौ, उत्त० २ अ० ।

णिज्जरापेहिन्-त्रि० । निर्जरां प्रेक्षितुं शीलमस्येति निर्जराप्रेक्षी । निर्जरातत्त्वज्ञे, " मज्झत्थो णिज्जरापेही, समाहिमणुपालए । " आचा० १ श्रु० ८ अ० ८ उ० ।

णिज्जरापोग्गल-निर्जरापुद्गल-पुं० । निर्जीर्णकर्मदलिके, भ० १८ श० ३ उ० ।

णिज्जराभावणा-निर्जराभावना-स्त्री० । निर्जरातत्त्वपर्यालोचने, (प्रव०) अथ निर्जराभावना-

" संसारहेतुभूतायाः, यः क्षयः कर्मसंततेः ।
निर्जरा सा पुनर्द्वेधा, सकामाकामनेदतः ॥ १ ॥
अमनेषु सकामा स्या-दकामा शेषजन्तुषु ।
पाकः स्वत उपायाच्च, कर्मणां स्यात् यदाम्रवत् ॥ २ ॥
कर्मणां न क्षयो भूया-दित्याशयवतां सताम् ।
वितन्वतां तपस्यादि, सकामा शमिनां मता ॥ ३ ॥
एकेन्द्रियाऽऽदिजन्तूनां, संज्ञानरहिताऽऽत्मनाम् ।
शीतोष्णवृष्टिदहन-च्छेदभेदाऽऽदिभिः सदा ॥ ४ ॥
कष्टं वेदयमानानां, यः शाटः कर्मणां भवेत् ।
अकामनिर्जरामेना-मामनन्ति मनीषिणः ॥ ५ ॥
तपःप्रभृतिभिर्वृद्धिं, व्रजन्ती निर्जरा यतः ।
ममत्वं कर्म संसारं, हन्तासां भावयेत्ततः ॥ ६ ॥ "
प्रव० ६७ द्वार ।

णिज्जराहेउ-निर्जराहेतु-पुं० । क० स० । कर्मक्षयकारणे, ब० स० । कर्मक्षयजनके, पञ्चा० १२ विव० ।

णिज्जरिज्जमाण-निर्जीयमान-त्रि० । नितरामपुनर्भावेन क्षीयमाणे कर्मपुद्गले, भ० १ श० २ उ० । स्था० ।

णिज्जरिय-निर्जरित-त्रि० । सर्वथा क्षयं नीते, त० । " णिज्जरियजरामरणं, वंदित्ता जिणवरं महावीरं । " वन्दित्वा कायवाङ्मनोभिः स्तुतिं विधाय जिना रागद्वेषाऽऽदिजयनशीलाः सामान्यकेवलिनः, तेषु तेभ्यो वा वरः प्रधानातिशयापेक्षया श्रेष्ठो जिनवरस्तम् । तं० ।

णिज्जवग-निर्यापक-पुं० । निर्यापयति तथा करोति यथा गुर्वपि प्रायश्चित्तं शिष्यो निर्वाहयतीति निर्यापकः । स्था० ८ ठा० । प्राकृतत्वाद्रूपनिष्पत्तिः । ध० २ अधि० । पञ्चा० । असमर्थस्य प्रायश्चित्तिनः प्रायश्चित्तस्य सहकशः करणेन निर्वाहके, भ० २५ श० ७ उ० । स हि तथा प्रायश्चित्तं दत्ते यथा परो निर्वोढुमलं भवतीति । स्था० १० ठा० । नेदानीं निर्यापकाः सन्तीति । न० । व्य० १ उ० ।

यद्यप्युक्तं निर्यापका व्यवच्छिन्ना इति, तदपि न तथा, कथमिति चेदत आह-निर्यापकैः निर्याप्यमाणाः । इह द्विविधा निर्याप्यकास्तथा-आत्मनः, परस्य वा । उभयानप्याह-

पादोवगमे इंगिणि, दुविहा खलु होंति आयनिज्जवगा ।
निज्जवगा य परेण उ, जत्तपरिण्णाएँ बोधव्वा ॥

आत्मनिर्यापकाः खलु द्विविधा भवन्ति । तद्यथा-पादपोपगमे, इङ्गिनीमरणे च । परेण पुनर्निर्यापका भक्तपरिज्ञायां बोद्धव्याः । व्य० १० उ० । निर्निक्षिप्तं यापयति प्रायश्चित्तविधिषु याप्यमालोचकं करोति निर्वाहयतीति यावदिति निर्यापः, अकप्रत्ययः । अपराधकारी यथोक्तं प्रायश्चित्तं कर्तुमसमर्थो यथा यथा निर्वाहयति तथा तथा तदुचितप्रायश्चित्तप्रदानतः प्रायश्चित्तं कारयति स निर्यापक इति भावः । व्य० १ उ० ।

णिज्जवणा-निर्यापणा-स्त्री० । निरधिकयेन यान्ति प्राणिनः प्राणास्तेषां निर्यतां निर्गच्छतां प्रयोजकं निर्यापणा । अष्टाविंशगौणर्द्धिसायाम्, प्रश्न०१ आश्र०द्वार । प्रश्नार्थेऽभ्याख्यानस्य निगमने, आव०म०१ अ०२ खण्ड । आ०चू० । "..... णिज्जवणा, पच्चन्नासो णिग्गमणं ति ।" (२९३१) निर्यापना तु दृष्टान्तदर्शितस्यैवार्थस्य प्रत्याभ्यासः प्रत्युच्चारणं निगमनम् । विशे० । (' णमोक्कार ' शब्देऽस्मिन्नेव भागे १८३४ पृष्ठे व्याख्यातम्) मीमांसिततया निर्दोषत्वेन निश्चयने, व्य० १ उ० । नि० चू० ।

णिज्जाअ-देशी-उपकारे, दे० ना० ४ वर्ग ३४ गाथा ।

णिज्जाण-निर्याण-न० । यान्ति तदिति यानम्, "कृत्यल्युटो बहुलम्" ॥३।३।११३॥ इति (पाणिनि) वचनात्कर्मणि ल्युट् । निरुपमं यानं निर्याणम् । ईषत्प्राग्भाराऽऽख्ये मोक्षपदे, आव० ४ अ० । क्ष० । भावे ल्युट् । संसारात्पलायने, आ० चू० ५ अ० । अनावृत्तिगमने, औ० । आचा० । स्था० । मरणकाले शरीरान्निर्गमे,स्था० ३ ठा० ४ उ० । नगरान्निर्गमे,स्था०३ठा०४उ० । पुरस्य निर्गमनमार्गे, सू० प्र० ४ पाहु० । चं० प्र० । "रायादियाण णिग्गमट्ठाणं णिज्जाणिया,णगरगमे वा जे पियं तं णिज्जाणं" । नि०चू०८उ० ।

णिज्जाणकहा-निर्याणकथा-स्त्री० । राजकथाभेदे, स्था० ४ ठा० २ उ० । (व्याख्या 'रायकहा' शब्दे द्रष्टव्या)

णिज्जाणमग्ग-निर्याणमार्ग-पुं० । निर्याणस्य मोक्षपदस्य मार्गो निर्याणमार्गः । विशिष्टनिर्याणप्राप्तिकारणे, " इत्तमेव णिग्गंथं पावयणं णिज्जाणमग्गं णिव्वाणमग्गं । " आव० ४ अ० । ध० । क्ष० । सिद्धिक्षेत्रगमनोपाये, भ० ६ श० ३३ उ० । निर्याणस्य मरणकाले शरीरिणः शरीरान्निर्गमस्य मार्गो निर्याणमार्गः । पादाऽऽदिके, स्था० ।

पंचविहे जीवस्स णिज्जाणमग्गे पण्णत्ते । तं जहा-पाएहिं, उरूहिं, उरेणं, सिरेणं, सव्वंगेहिं । पाएहिं णिज्जाणमाणे निरयगामी भवइ, उरूहिं णिज्जाणमाणे तिरियगामी भवइ, उरेणं णिज्जाणमाणे मणुयगामी भवइ, सिरेणं णिज्जाणमाणे देवगामी भवइ, सव्वंगेहिं णिज्जाणमाणे सिद्धिगतिपज्जवसाणे पण्णत्ते ।

व्यक्तं, किन्तु निर्याणं मरणकाले शरीरिणः शरीरान्निर्गमः, तस्य मार्गो निर्याणमार्गः पादाऽऽदिकः, तत्र-(पायहि) पादाभ्यां मार्गभूताभ्यां कारणताऽऽपन्नाभ्यां जीवः शरीरान्निर्यातीति शेषः । एवमूरुभ्यामित्यादावपि । अथ क्रमेणास्य निर्याणमार्गस्य फलमाह-पादाभ्यां शरीरान्निर्यान् जीवो (निरयगामित्ति) प्राकृतत्वादनुस्वार इति, निरयगामी भवति । एवमन्यत्रापि । सर्वाणि च तान्यङ्गानि च सर्वाङ्गानि, तैर्निर्यान् सिद्धिगतिः पर्यवसानं संसरणपर्यन्तो यस्य स सिद्धिगतिपर्यवसानः प्रज्ञप्त इति । स्था० ५ ठा० ३ उ० । देवानामुत्तरणमार्गस्तु सौधर्मेशानाऽऽदीनां कल्पानां मध्यतः, तत्र सौधर्मेन्द्रः स्वकीयान्पालकाद् विमानाद्दक्षिणेनोत्तरेणोत्तरति, ईशानेन्द्रस्तु स्वविमानात्पुष्पकाद्दक्षिणेनोत्तरन् दक्षिणेनोत्तरति । ज्ञ० ३६ श० २ उ० ।

णिज्जाणियलेण–नैर्याणिकलयन–न० । नगरनिर्गमगृहे, ज्ञ० १३ श० ६ उ० ।

णिज्जाणिया–निर्याणिकी–स्त्री० । निर्याणक्रीडायाम्, नि० चू० ८ उ० ।

णिज्जामग–निर्यामक–पुं० । प्रापके, विशे० । कर्णधारे, औ० समुद्रे प्रवहणनेतरि, व्य० ३ उ० । आ० म० । आव० । विशे० । आ० क० । रा० ।

सम्प्रति प्रपञ्चेनार्हतां गुणानुपदर्शयन्नाह-

अमवीएँ देसयत्तं, तहेव निज्जामगा समुद्दम्मि ।
छक्कायरक्खणट्ठा, महगोवा तेण वुच्चंति ॥ २७९७ ॥

आ० म० १ अ० २ खण्ड । आ० चू० । आचा० । ('णमोक्कार' शब्देऽस्मिन्नेव भागे १८३६ पृष्ठे व्याख्या समुक्ता) उत्तमार्थाऽऽराधकस्य गुणोत्कीर्तनेनोपबृंहके, दर्श० ४ तत्त्व ।

पावेंति जहा पारं, सम्मं निज्जामगा समुद्दस्स ।
भवजलहिस्स जिणिंदा, तहेव जम्हा अतो अरिहा ॥

प्रापयन्ति नयन्ति यथा येन प्रकारेण पारं पर्यन्तः, सम्यक् शोभनेन विधिना, निर्यामकाः प्रतीताः समुद्रस्य, तथैव भवजलधेर्नैवसमुद्रस्य, पारं जिनेन्द्राः प्रापयन्ति, यस्मादेवमतस्तस्माद्दर्हो नमस्कारस्य । एष संक्षेपार्थः । पुनरेवम्-" एत्थ णिज्जामगा दुविहा । तं जहा-दव्वणिज्जामगा, भावणिज्जामगा य । " (आ० म०)

तत्र यथा जलधौ कालिकावातरहिते अनुकूले गर्जन्नवाते निपुणनिर्यामकसहिता निश्चिताः पोता ईप्सितं पत्तनं प्राप्नुवन्ति, एवम्-

मिच्छत्तकालियावा-यविरहिएँ समत्तगज्जन्नपवाए * ।
एगसमएण पत्ता, सिद्धिवसहिपट्टणं पोया ॥

मिथ्यात्वमेव कालिकावातो मिथ्यात्वकालिकावातः, तेन रहिते प्रवाम्भोधौ, तथा सम्यक्त्वमेव गर्जन्नः प्रवातो यत्र स तथा तस्मिन्, एकसमयेन प्राप्ताः सिद्धिवसतिपत्तनं पोता जीवबोधिस्थाः, अर्हन्निर्यामकोपकारात् ।

ततो यथा सांयात्रिकः सार्थः प्रसिद्धनिर्यामकं चिरगतमपि यात्रासिद्ध्यर्थं पूजयति, एवं ग्रन्थकारोऽपि सिद्धिपत्तनं प्रस्थितोऽभीप्सयात्रासिद्धये निर्यामकरत्नेभ्यस्तीर्थकृद्भ्यः स्तवचिकीर्षयेदमाह-

णिज्जामगरयणाणं, अमूढनाणमइकण्णधाराणं ।
वंदामि विणयपणतो, तिविहेण तिदंडविरयाणं ॥

निर्यामकरत्नेभ्योऽर्हद्भ्यः, अमूढज्ञाना यथावस्थितज्ञानाः, मननं मतिः संविद्, सैव कर्णधारो येषां ते तथाविधाः, तेभ्यो वन्दे विनयप्रणतस्त्रिविधेन त्रिदण्डविरतेभ्यः-" शपाऽऽदिभिर्बहुलम् ॥ (?) " इति चतुर्थी । आ० म०१ अ० २ खण्ड ।

णिज्जाय–निर्यात–त्रि० । निश्चयेनापगते, आव० ६ अ० ।

णिज्जायकारण–निर्यातकारण–त्रि० । निश्चयेन यातमपगतं कारणं प्रयोजनं यस्मिन्नसौ निर्यातकारणः । अपगतप्रयोजने, आव० ६ अ० । ज्ञा० ।

णिज्जायमाण–निर्यत्–त्रि० । निर्याणकारके, " पायहि णिज्जायमाणे निरयगामी भवइ । " स्था० ५ ठा० ३ उ० ।

णिज्जायरूवरयय–निर्यातरूपरजत–त्रि० । निर्गतसुवर्णरूप्ये, ज्ञा० २६ ज्ञा० । " णिज्जायरूवरयए गिहिजोगपरिवज्जए जे से भिक्खू । " दश० ६ अ० ।

णिज्जास–निर्यास–पुं० । स्नेहे, सूत्र० २ श्रु० ३ अ० । रसे, सूत्र० २ श्रु० १ अ० ।

णिज्जिण्ण–निर्जीर्ण–त्रि० । क्षीणे, भ० १ श० १ उ० । क्षीणरसीकृते, भ० १२ श० ४ उ० ।

णिज्जियसत्तु–निर्जितशत्रु–त्रि० । पराजितशत्रौ, रा० । सूत्र० ।

णिज्जियसत्तुसेण–निर्जितशत्रुसेन–त्रि० । स्ववशीकृतविपक्षनृपतिसैन्ये, बृ० १ उ० ।

णिज्जीव–निर्जीव–न० । निर्जीवकरणे, हेमाऽऽदिधातुमारणे, रसेन्द्रस्य मूर्च्छाप्रापणे च । एतच्च एकसप्ततितमा कला । जं० २ वक्ष० । ज्ञा० । औ० । स० ।

णिज्जुत्त–निर्युक्त–त्रि० । खचिते, ज्ञा०१ श्रु०१ अ० । औ० । निश्चयेनाऽऽधिक्येन साधु वा आदौ वा युक्ताः संबद्धा निर्युक्ताः । निर्युक्तिव्यवस्थापितेषु, आ० म० १ अ० १ खण्ड । निश्चयेन प्ररूपिते, आ० म १ अ० ।

णिज्जुत्ति–निर्युक्ति–स्त्री० । निर्युक्तानामेव सूत्रेऽर्थानां युक्तिः परिपाट्या योजनम्, निर्युक्तयुक्तिरितिवाच्ये युक्तशब्दलोपान्निर्युक्तिः । दश०१ अ० । स० । ओघ० । निश्चयेनार्थप्रतिपादिका युक्तिर्निर्युक्तिः । आचा०१ श्रु०२ अ०१ उ० । सूत्र० । जडत्वाद्बहुस्वामिकृते व्याख्यानग्रन्थे, विशे० । व्याख्योपायभूते सत्पदप्ररूपणताऽऽदौ, अनु० ।

साम्प्रतं निर्युक्तिस्वरूपाभिधानार्थमाह-

णिज्जुत्ता ते अत्था, जं बद्धा तेण होइ णिज्जुत्ती ।
तह वि य इच्छावेई, विभासिउं सुत्तपरिवाडी ॥१०८७॥

यद्यस्मात्सूत्रे निश्चयेनाऽऽधिक्येन साधु वा आदौ वा युक्ताः संबद्धा निर्युक्ता एव सन्तस्ते श्रुताभिधेया जीवाजीवाऽऽदयोऽर्था अनया प्रस्तुतनिर्युक्त्या बद्धा व्यवस्थापिताः व्याख्याता इति यावत् । तेनेयं भवति निर्युक्तिः निर्युक्तानां सूत्रे प्रथममेव संबद्धानां सतामर्थानां व्याख्यारूपा युक्तिर्योजनं निर्युक्तयुक्तिरिति

* प्रतिकूलवायुः कालिकावातः । अपरोत्तरस्यां शुद्धविदिग्वातो गर्जभवातः ।

प्राप्ते शाकपार्थिवाऽऽदिदर्शनाद् युक्तलक्षणस्य पदस्य लोपान्निर्युक्तिरिति भवति । ननु यदि प्रथममेव सूत्रेऽर्थाः संबद्धा एव सन्ति, तर्हि किमिति ते निर्युक्तया व्याख्यायन्ते, संबद्धानां स्वयमेव विनेयवर्गेणावबुध्यमानत्वात् ?। तत आह-(तह वि येत्यादि) यद्यपि सूत्रे संबद्धा एवार्थाः सन्ति, तथाऽपि तान् सूत्रे निर्युक्तानपि अर्थान्,विभाषितुं व्याख्यातुं,सूत्रपरिपाटीं सूत्रपद्धतिः, एषयतीव एषयति प्रयोजयति । इयमत्र भावना-अप्रतिबुध्यमाने श्रोतरि गुरुं तदनुग्रहार्थं सूत्रपरिपाट्येव विभाषितुमेषयति-"इच्छत इच्छत मां प्रतिपादयितुम्"इतीत्थं प्रयोजयतीति । क्वचित् सूत्रपरिपाटीमिति पाठः तत्रैव व्याख्या-शिष्य एव सूत्रपरिपाटीमनवबुध्यमानो गुरुमिच्छायां प्रवर्त्तयति-" इच्छत इच्छत मम विभाषितुं व्याख्यातुं सूत्रपरिपाटीम् " इति । व्याख्या च निर्युक्तिरतः पुनर्योजनरूपा निर्युक्तिरित्थमदोषायेति । आ० म० १ अ० १ खण्ड ।

विस्तरतो व्याख्यातुं भाष्यकारः प्राऽऽह—

जं निच्चयाऽऽइजुत्ता, सुत्ते अत्था इमीऍ वक्खाया ।
तेणेयं णिज्जुत्ती, णिज्जुत्तत्थाऽभिहाणाओ ॥१०८६॥

यदयस्मात्सूत्रे निश्चयेनाऽऽदिशब्दादाधिक्येन, आदौ साधु वा युक्ताः संबद्धा निर्युक्ता एव सन्तोऽर्था अनया निर्युक्त्या व्याख्याताः, तेन तस्मात्कारणादियं निर्युक्तार्थाऽभिधानान्निर्युक्तानां युक्तिर्युक्तशब्दलोपान्निर्युक्तिर्भवति ॥ १०८६ ॥

अथ प्रेर्यमाशङ्क्य परिहरन्नाह-

सुत्ते निज्जुत्ताणं, निज्जुत्तीए पुणो किमत्थाणं ।
निज्जुत्ते वि न सव्वे,कोइ अवक्खाणिए मुणइ ।१०८७।

ननु सूत्र एव निर्युक्तानां निबद्धानां सतामर्थानां तद्व्याख्यानार्थं क्रियमाणया निर्युक्त्या किं पुनः कार्यम् ?, न किञ्चिदित्यर्थः। ये हि सूत्रे एव विद्यमानार्थाः सन्ति, तान्स्वत एव विनेयवर्गो ज्ञास्यति, अतस्तद्विभाषणप्रवृत्ता वृथैव निर्युक्तिरिति भावः । अत्रोत्तरम्-(निज्जुत्ते वीत्यादि) सूत्रे निर्युक्तानपि सतः सर्वानप्यर्थान् कोऽपि तथाविधप्रज्ञापाटवरहितः शिष्यो निर्युक्त्याऽव्याख्यातान्न सुणति नाऽवबुध्यत इति ॥ १०८७ ॥

ततः किम् ?, इत्याह-

बो सुयपरिवाडिं चिय, इच्छावेइ तमणिच्छमाणं पि ।
निज्जुत्ते वि तदत्थे, वोत्तुं तदणुग्गहट्ठाए ॥ १०८८ ॥

ततः श्रुतपरिपाट्येव सूत्रपद्धतिरेव विभाषितुमनिच्छन्तमपि तं निर्युक्तिकर्त्तारमाचार्यं तस्य सूत्रस्यार्थास्तदर्थान् सूत्रे निर्युक्तानप्यनवबुध्यमाने श्रोतरि तदनुग्रहार्थं तान् वक्तुमेषयतीव एषयति प्रयोजयति, अतस्तानाचार्यो निर्युक्त्वा विभाषते, इति तस्याः साफल्यमिति ॥ १०८८ ॥

अत्र दृष्टान्तमाह-

फलयम्मि हियं पि मंखो, पडइ पजासइ तहा कराऽऽईहिं ।
दाएइ य पडवत्थुं, सुहबोहत्थं तह इहं पि ॥१०८९॥

यथा मङ्खः फलके नानाप्रकारं लिखितमपि वस्तु ग्रन्थतः पठति, अर्थतश्च प्रज्ञापते-व्याचष्टे,शङ्काकाङ्क्षलयादिना च बालगोपालाङ्गनाऽऽदिमुग्धप्रबोधनार्थं प्रतिवस्त्वपरजन्माऽऽचीर्णं कर्मविपाकाऽऽदिकं दर्शयति । यथा-अन्यजन्मन्यनया भर्त्ता साटिकया बद्धिलस्तेनास्या ईदृशो मातङ्गकुलजन्माऽऽदिको विपाकः, अनया च नर्तुमित्रे प्राघूर्णके समायाते मुखमोटको दत्त आसीद्, अनया तु सत्यपि विनये भिक्षाचरेष्वागच्छत्सु सदैव नास्ति नास्तीत्यावेद्योद्घुष्टं,तेनेदृश ईदृशश्च दुःखविपाको जात इत्यादि । तथाऽऽपि श्रोतृवैचित्र्यं पश्यन् सर्वानुग्रहप्रवणबुद्धिराचार्यः सूत्रे निर्युक्तानप्यर्थान्निर्युक्त्वा विभाषते इति ॥ १०८९ ॥

अथवा-निर्युक्तिगाथोत्तरार्द्धमन्यथा व्याख्यायते ।

कथम् ?, इत्याह-

अहवा सुयपरिवाडी, सुओवएसोऽयमेव जदवस्सं ।
सोयव्वं निस्संकिय-सुयविणयत्थं सुबोहं पि ॥१०९०॥

अथवा-श्रुतपरिपाटी श्रुतस्य विधिः श्रुतस्योपदेशोऽयमेव यदवश्यं सुबोधमपि श्रुतं निःशङ्कितत्वहेतोर्विनयोपचारार्थं च मुमुक्षुभिः श्रोतव्यम् । अत एवंभूता सूत्रपरिपाटी यद्यपि सूत्रे निर्युक्ता एवार्थाः सन्ति, तथाऽपि विभाषितुं व्याख्यानयितुमेषयति प्रयोजयतीत्येषोऽत्र भावार्थः स्वयमेवावगन्तव्य इति ॥ १०९० ॥

"सूत्रपरिपाटीम्" इति पाठान्तरं क्वचित् । तत्राऽऽह-

इच्छह विन्नासिडं मे, सुयपरिवाडिं न सुट्ठु बुज्झामि ।
नातिमई वा सीसो, गुरुमिच्छावेइ वोत्तुं जे ॥१०९१॥

'वा' इत्यथवा, नातिशयेन मतिर्यस्यासौ नातिमतिर्मन्दमतिः शिष्यो गुरुमाचार्यम् (इच्छावेइ त्ति) एषयति प्रयोजयति वक्तुम्, 'जे' इत्यलङ्कारार्थः । कथं वक्तुमेषयति ?, इत्याह-(इच्छह विभासिउं मे त्ति) इच्छत इच्छत विभाषितुं मम श्रुतपरिपाटीं सूत्रपद्धतिं, नाहमेतां सुष्ठु बुद्ध्ये-प्रथममेव निर्युक्तत्वेन सतोऽप्येतदभिधेयानर्थान्मन्दमतित्वाद् भवद्भिरव्याख्यातान्नाहं सम्यगवगच्छामीत्यर्थः । अथ वा-प्रक्रमादेवेह निर्युक्तिः प्रयोक्त्री विवक्ष्यते, ततश्चेत्थमक्षरयोजना--यद्यपि सूत्रे निर्युक्तत्वेन सन्त एवार्थास्तथाऽपि तानप्रतिबुद्ध्यमानः श्रोता यदैवं वक्ति-नातिमतिर्मन्दमतिरहं सदर्थामपि सूत्रपरिपाटीं सुष्ठु न बुध्ये सम्यग् नावगच्छामि, अत इच्छतेच्छत प्रभो ! एतां मम विभाषितुमिति । तदित्थं वदति तस्मिन् श्रोतरि निर्युक्तिरेव गुरुं सूत्रपरिपाटीं वक्तुमेषयति प्रयोजयति-इच्छतेच्छतासै महानुभावायैतां विभाषितुम् । ततो निर्युक्तिद्वारेणैव तस्य शिष्यस्य गुरुस्तां विभाषत इति । 'तदेवं निज्जुत्ता ते अत्था' इत्यादिप्राक्तननिर्युक्तिगाथा व्याख्याता ॥ १०९१ ॥ विशे० । नं० । आव० । औ० । आचा० ।

णिज्जुत्तिअणुगम–निर्युक्त्यनुगम–पुं० । निर्युक्तिर्नामस्थापनाऽऽदिप्रकारैः सूत्रविनञ्जनेत्यर्थः,तद्रूपोऽनुगमस्तस्या वाऽनुगमो व्याख्यानं निर्युक्त्यनुगमः । अनुगमभेदे, (अनु०)

स च त्रिविधः-

से किं तं णिज्जुत्तिअणुगमे ?। णिज्जुत्तिअणुगमे तिविहे पण्णत्ते । तं जहा-निक्खेवनिज्जुत्तिअणुगमे, उवग्घायनिज्जुत्तिअणुगमे, सुत्तफासियनिज्जुत्तिअणुगमे ।

निक्षेपो नामस्थापनाऽऽदिन्यासः,तस्य तद्विषया वा निर्युक्तिः पूर्वोक्तशब्दार्था निक्षेपनिर्युक्तिः, तस्या वाऽनुगमो निक्षेपनिर्युक्त्यनुगमः । तथा उपोद्घातेन व्याख्येयस्य सूत्रस्य व्याख्या विधिसमीपीकरणमुपोद्घातानिर्युक्तिः,तद्रूपस्तस्या वा अनुगम उपोद्घातानिर्युक्त्यनुगमः । तथा सूत्रं स्पृशतीति

सूत्रस्पर्शिका, सा चासौ निर्युक्तिः सूत्रस्पर्शिकनिर्युक्तिः । सूत्रनिक्षेपनिर्युक्त्यनुगमाऽनुगतो वक्ष्यते च । इदमुक्तं भवति-अत्रैव प्रागावश्यकसामायिकाऽऽदिपदानां नामस्थापनाऽऽदिनिक्षेपद्वारेण यद्व्याख्यानं कृतं, तेन निक्षेपनिर्युक्त्यनुगमोऽनुगतः प्रोक्तो द्रष्टव्यः । अनु० । उत्त० । आ० म० । संथा० । विशे० ।

एतदेव निर्युक्तित्रैविध्यं भाष्यकारोऽप्याह-

निज्जुत्ती तिविगप्पा, नासो-वग्घायसुत्तवक्खाणं ।
णिक्खेवस्साणुगया, उद्देसाऽऽईहुवग्घाओ ॥९७२॥

निर्युक्तिस्त्रिविकल्पा त्रिभेदा । कथम् ?, इत्याह-(नासोवग्घायसुत्तवक्खाणं ति) न्यासो नामाऽऽदिनिक्षेपः, उपोद्घातः शास्त्रोत्पत्तिः, सूत्रं प्रतीतम्, तेषां व्याख्यानम्-निक्षेपनिर्युक्तिः, उपोद्घातनिर्युक्तिः, सूत्रस्पर्शिका निर्युक्तिश्चेत्यर्थः । तत्र निक्षेपनिर्युक्तिरनुगता अनुक्रान्ता-पूर्वमेवोक्तेति यावदिति, अत्रैव प्रागावश्यकसामायिकाऽऽदिपदानां नामस्थापनाऽऽदिनिक्षेपद्वारेण यद् व्याख्यानं कृतं, तेन निक्षेपनिर्युक्तिरनुगता प्रोक्ता, द्रष्टव्येत्यर्थः । उपोद्घातनिर्युक्तिस्तूद्देशनिर्देशाऽऽदिभिर्द्वारैरवगन्तव्येति॥९७२॥

तान्येवोद्देशाऽऽदीनि द्वाराण्याह-

उद्देसे निद्देसे, य निग्गमे खेत्त काल पुरिसे य ।
कारण पच्चय लक्खण, नए समोयारणाऽणुमए ॥९७३॥
किं कइविहं कस्स कहिं, केसु कहं केचिरं हवइ कालं ।
कइ संतरमविरहियं, भवागरिसफोसणनिरुत्ती ॥९७४॥

इदं गाथाद्वयमपि पुरस्ताद्विस्तरेण व्याख्यास्यते ॥ ९७३ ॥ ॥ ९७४ ॥ विशे० ।

श्रुतज्ञाने सर्वा निर्युक्तीः संगृह्याऽऽह-

ते वंदिऊण सिरसा, अत्थपरूवस्स तेहिं कहियस्स ।
सुयनाणस्स भगवतो, णिज्जुत्तिं कित्तयिस्सामि ॥१०७७॥

तान् अनन्तरोक्तान् तीर्थकराऽऽदीन्, शिरसा, उपलक्षणत्वाद् मनःकायाभ्यां च, वन्दित्वा, किम् ?, निर्युक्तिं कीर्तयिष्यामि, कस्य ?, अर्थप्रथकत्वस्य, अर्थात्कथञ्चिद्भिन्नत्वात् सूत्रं पृथक् उच्यते, प्राकृतत्वाच्च पृथगेव पृथक्त्वम्, अर्थस्तु सूत्रान्निर्गतः प्रतीत एव, अर्थश्च पृथक्त्वं चार्थपृथक्त्वम्, समाहारो द्वन्द्वः, तस्य, श्रुतज्ञानविशेषणमेतत्; सूत्रार्थोभयरूपस्येत्यर्थः । तैस्तीर्थकरगणधराऽऽदिभिः, कथितस्य प्रतिपादितस्य, कस्य ?, इत्याह-श्रुतज्ञानस्य भगवतः, स्वरूपाऽभिधानमेतत् । सूत्रार्थयोः परस्परं नियोजनं संबन्धनं निर्युक्तिः, ताम्, कीर्तयिष्यामि प्रतिपादयिष्यामि ।

ननु किमशेषश्रुतज्ञानस्य ?, न, किन्तु श्रुतविशेषाणामावश्यकाऽऽदीनाम् । अत आह-

आवस्सयस्स दसका-लियस्स तह उत्तरज्झमायारे ।
सूयगडे निज्जुत्तिं, वोच्छामि तहा दसाणं च ॥१०७४॥
कप्पस्स य णिज्जुत्तिं, ववहारस्स य परमनिउणस्स ।
सूरियपण्णत्तीए, वोच्छं इसिभासियाणं च ॥१०७५॥
एएसिं निज्जुत्तिं, वोच्छामि अहं जिणोवएसेणं ।
आहरणहेउकारण-पयनिवहमिणं समासेणं ॥१०७६॥

आवश्यकस्य, दशवैकालिकस्य, तथा-आचा सत्यआमेत्यनेनापि षड्जैकदेशे पदसमुदायोपचारात्-" उत्तरज्झ " इति । उत्तराध्ययनग्रहणम् । ततोऽयमर्थः-उत्तराध्ययनाऽऽचारयोः । तथा-सूत्रकृते-सूत्रकृताङ्गविषयां निर्युक्तिं वक्ष्ये । तथा-दशानां च दशाश्रुतस्कन्धस्य । तथा-कल्पस्य । तथा-व्यवहारस्य च परमनिपुणस्य । अत्र परमग्रहणं मोक्षाङ्गत्वात्, निपुणग्रहणं स्वयंसकत्वात् । न खल्वयं व्यवहारो मन्वादिप्रणीतव्यवहार इव व्यंसकः, "सङ्घपक्षपाता खु ववहारा।" इति वचनात् । तथा सूर्यप्रज्ञप्तेर्वक्ष्ये । तथा-ऋषिभाषितानां च देवेन्द्रस्तवाऽऽदीनाम् । अनेकशः क्रियाऽभिधानं शास्त्रान्तरविषयत्वात् समासव्यासरूपत्वाच्च शास्त्राऽऽरम्भस्येत्युक्तम् । एतेषां श्रुतविशेषाणां, निर्युक्तिं वक्ष्याम्यहं जिनोपदेशेन, न तु स्वमनीषिकया । कथंभूताम् ?, इत्याह-आहरणहेतुकारणपदनिवहाम्, इमामन्तस्तत्त्वनिष्पन्नां, समासेन संक्षेपेण । तत्र साध्यसाधनान्वयव्यतिरेकप्रदर्शनमाहरणम्, दृष्टान्त इति भावः । साध्ये सत्येव भवति, साध्याभावे च न भवत्येवं साध्यधर्मान्वयव्यतिरेकलक्षणो हेतुः । हेतुमुखस्य प्रथमं दृष्टान्ताभिधानं न्यायप्रदर्शनार्थम्, क्वचिद्धेतुमनाभिधाय दृष्टान्त एवोच्यते । यथा-गतिपरिणामपरिणतानां जीवपुद्गलानां गत्युपष्टम्भको धर्मास्तिकायो, मत्स्याऽऽदीनां सलिलमिव । तथा क्वचिद्धेतुरेव केवलोऽभिधीयते, न दृष्टान्तः, यथा-मदीयोऽयमश्वो, विशिष्टचिह्नोपलब्ध्यन्यथाऽनुपपत्तेः । तथा च निर्युक्तिकारेणाऽप्युक्तं-"जिणवयणं सिद्धं चिय, भण्णइ कत्थइ उदाहरणं । आसज्जउ सोयारं, हेऊ वि कहंचि भण्णेज्जा ॥१॥" इति । कारणमुपपत्तिमात्रम्, यथा-निरुपमसुखः सिद्धः, ज्ञानाद्यबाधकप्रकर्षात् । तत्राविद्वद्ब्रह्मणाऽऽदिलोकेऽप्रतीतः साध्यसाधनधर्मानुगतो दृष्टान्तोऽस्ति । आहरणं च हेतुश्च कारणं च आहरणहेतुकारणानि, तेषां पदान्याहरणहेतुकारणपदानि, तेषां निवहः सङ्घातो यस्यां निर्युक्तौ सा तथाविधा, ताम् ॥१०७४॥१०७५॥१०७६॥ आ०म०१ अ० १ खण्ड।

णिज्जुत्तिगार-निर्युक्तिकार-पुं० । चतुर्दशपूर्वधरे श्रीभद्रबाहौ, तेन हि सर्वा निर्युक्तयः कृताः । आचा० १ श्रु० १ अ० १ उ० । निर्युक्तिकारिणः पूर्वधरा भवन्ति, न वेति प्रश्ने, उत्तरम्-निर्युक्तिकारिणश्चतुर्दशपूर्वविदो भवन्तीति ज्ञायत इति । ११५ प्र० । सेन० १ उल्ला० ।

णिज्जूढ-निर्यूढ-त्रि० । निष्काशिते, व्य० २ उ० । " णिज्जूढपवुट्ठा सा भणेइ । " सा निर्यूढा निष्काशिता सती साधूनामुपरि प्रद्वेषं यायात् । बृ० ३ उ० । पूर्वगताद्धृत्य विरचिते, दश० १ अ० । पं० व० " सत्तेक्कगई सत्त वि, णिज्जूढाई महापरिण्णाओ । " आचा० १ श्रु० १ अ८१ उ० । उज्झितप्राये, बृ० १ उ० ।

णिज्जूह-निर्यूह-पुं० । गवाक्षे, व्य० १ उ० । नीडे, दे० ना० ४ वर्ग २८ गाथा ।

णिज्जूहग-निर्यूहक-त्रि० । पूर्वगतोद्धृतार्थविरचनाकर्तरि, दश० १ अ० । द्वारोपरितनपूर्वनिर्गतदारुणि, न० । प्रश्न० १ आश्र० द्वार ।

णिज्जूहगय-निर्यूहगत-त्रि० । गवाक्षगते, व्य० १ उ० ।

णिज्जूहणा-निर्यूहणा-स्त्री० । निष्काशनायां, कर्मशत्रूणामात्मनगरान्निर्वासनायाम्, " महव्वयउच्चारणं णिज्जूहणा । " पा० । गच्छात् संघाद् वा निष्काशनायाम्. व्य० १ उ० ।

तिन्नतुसारिभागमित्तो, वि जस्स असुभे न विज्जए भावो ।
णिज्जूहणाऽरिहो सो, सेसे णिज्जूहणा भइया ॥ व्य० १ उ० ।

यस्य गच्छान्निर्यूहस्य तिसृचतुर्विभागमात्रोऽपि निर्यूहोऽहमित्यन्यभो भावो न विद्यते, स निर्यूहणाया अर्हो योग्यः । शेषस्य पतद्गुणविकलस्य निर्यूहका,नास्ति न कर्त्तव्येत्यर्थः। बृ०१ उ०।

णिज्जूहित्तए-निर्यूहितुम्-अव्य० । अपाकर्तुमित्यर्थे, व्य०। अधुना-"णिज्जूहित्तए" इति व्याचिख्यासुराह-निर्यूहणा नाम-वैयावृत्यस्याकरणं,यदि वा वसतौ दोषाभावे यत्स्थानं न ददाति एषा निर्यूहणा । वैयावृत्याकरणाऽऽदिना यत्तस्य तपोऽकरणं सा निर्यूहणेति भावः । व्य० २ उ० । (ग्लानपाराञ्चिताऽऽदीनां निर्यूहणा स्वस्वस्थाने द्रष्टव्या) परिस्थागे, स्था० ४ ठा० २ उ०।

णिज्जूहियव्व-निर्यूहितव्य-त्रि० । ताम्बूलिकपत्रदृष्टान्तेन संधाद् बाहिः कर्तव्ये, कल्प० १ क्षण ।

णिज्जोअ-देशी-प्रकरे, दे० ना० ४ वर्ग ३३ गाथा ।

णिज्जोग-निर्योग-पुं० । परिकरे, ज्ञा० १ श्रु० १ अ० । यथा पार्श्वनिर्योगः । बृ० ३ उ०।

णिज्जोमो-देशी-रश्मौ, दे० ना० ४ वर्ग ३१ गाथा ।

णिज्झर-क्षि-धा० । क्षये, " क्षेर्णिज्झरो वा ॥ ८ । ४ । २० ॥ इति क्षयतेर्णिज्झराऽऽदेशो वा । ' णिज्झरइ, ' पक्षे-' खिज्जइ । ' प्रा० ४ पाद ।

निर्झर-पुं० । न० । रहोपः। " द्वितीयतुर्ययोरुपरि पूर्वः " ॥८ । । २ । ९० ॥ इति झकारोपरि जकारः । प्रा० २ पाद । उदकस्य स्रवणे, भ० ५ श० ७ उ० । स्यन्दने, ज्ञा० १ श्रु० १ अ० । स्रोताऽऽदिविवरेषु, अनु० । जीर्णे, दे०ना० ४ वर्ग २६ गाथा ।

णिज्झाअ-देशी-निर्दये, दे० ना० ४ वर्ग ३७ गाथा ।

णिज्झाएत्ता-निर्ध्याय-अव्य० । निपूर्वो ध्या दर्शनार्थः । नि-निर् ध्यात्वा । " ध्यागोर्झागो " ॥ ८ । ४ । ६ ॥ इति ध्या इत्यस्य झक ऽऽदेशः । द्रष्टुमित्यर्थे, प्रा० ४ पाद । प्रलोकयेत्यर्थे, आचा० १ श्रु० ५ अ० ४ उ० । निश्चयेन ध्यात्वा चिन्तयित्वेत्यर्थे, आचा० १ श्रु० १ अ० ६ उ० ।

निर्ध्यातृ-त्रि० । दर्शनानन्तरमतिशयेन चिन्तयति, त्रि० । स्था० ए ठा० ।

णिज्झाएमाण-निर्ध्यायत्-त्रि० । पश्यति, प्रेक्षमाणे, "आलोयमाणे णिज्झाएमाणे।" आचा० २ श्रु० ३ चू० १ अ०।

णिज्झोम-क्षिद्-धा० । फलाऽऽदीनां वृक्षाऽऽदेरिव विशेषणे, "णिज्झोमइ ।" पक्षे-खिन्दइ, खिनत्ति । प्रा० ४ पाद ।

णिज्झोसइत्ता-निर्झोषयित्-त्रि० । पूर्वोपचितकर्मणां क्षपके, आचा०। "णिज्झोसइत्ता का अरती,के आणंदे ?।" पूर्वोपचितकर्मणां निर्झोषयिता क्षपकः,क्षपयिष्यति वा,तृजन्तमेतद्बहुव्रीहन्तं वा। कर्मक्षपणायोद्यतस्य च धर्मध्यायिनः शुक्लध्यायिनो वा महायोगीश्वरस्य निरस्तसंसारसुखदुःखविकल्पाऽऽभासस्य यत्स्यात्तदर्शयति-"का अरई के आणंदे ?।" इष्टाप्राप्तिविनाशोत्थो मानसो विकारो रतिः, अभिलषितार्थावाप्तावानन्दः । योगिचित्तस्य तु धर्मशुक्लध्यानावेशाद्बहुधा ग्रथेयान्तरावकाशस्थात्यानन्दयोरुपादानकारणाभावादनुत्थानमेवेत्यतोऽयविद्दश्यते-केयमरतिर्नाम ?, को वाऽऽनन्द इति ?, नास्त्येवेतरजनसुलभोऽयं विकल्प इति । आचा० १ श्रु० ३ अ० ३ उ० ।

णिट्टंक-देशी-टङ्कच्छिन्ने,विषमे च । दे० ना० ४ वर्ग ५० गाथा।

णिट्ठंकिय-निष्टङ्कित-त्रि० । निर्धारिते,अनु० ३२ अनु०। आ०।

निट्ठंकियं प्रायश्चित्तम्-

तत्थ णं जेसु ठाणेसु जत्तं जत्थ जावइयं पच्छित्तं तमेव निट्ठंकियं जाणइ । से भयवं ! केणमट्ठेणं भणइ-जहा णं तमेव निट्ठंकियं जाणइ ?। गोयमा ! अणंतराणंतरकमेणं इमे पच्छित्तसुत्ता-अणेगे भव्वसत्ता चउगइसंसारवारगाओ बज्झुट्ठणिकाइयदुव्विमोक्खघोर [पारद्ध]पावकम्मनिगमाइं संचुन्निऊण अचिरा विमुच्चिहिंति, इह अहिगारो विहाणं च गोयमा ! विहग इवापरिवुड्ढो वज्जेत्ता नाणदंसणचरित्ताणासगा घोरपरीसहोवसग्गाइं च जिणंतो उग्गाभिग्गहपडिमाए रागदोसेहिं दूरतो विमुक्को रोद्दऽट्टज्झाणविवज्जिओ य विग्गहासु य असतो जो चंदणेण बाहुं आलिंपइ वासिणावज्जो तत्थत्थो संथुणइ, जो य निंदइ, समजावो होज्ज दुण्हं पि, एवं अणिगूहियबलविरियपुरिसकारपरक्कमे समतणमणिलेट्ठुकंचणो वेक्खो परिच्चत्तकलत्तणामो पच्छित्तसुयं अणेगसुयं अणेगगुणगणाइन्नस्स दढव्वयच (प) रित्तस्स एगंतेणं जोग्गस्सेव विवक्खिए पएसे चउक्कन्नं पन्नवेयव्वं,णो छक्कन्नं पन्नवेयव्वं,तहा य जस्स जावइएण पायच्छित्तेणं परमविसोही भवेज्जा,तं तस्स णं अणुयत्तणाविरहिएणं धम्मेक्करसिएहिं वयणेहिं जहट्ठियं अणुणाहियं,तावइयं चेव पायच्छित्तं पयच्छेज्जा,एएणं अट्ठेणं एवं वुच्चइ-जहा णं गोयमा ! तमेव निट्ठंकियं पायच्छित्तं भन्नइ । महा० ७ अ० ।

णिट्ठवणिया-निष्ठापनिका-स्त्री० । परिसमाप्तिकारिकायाम्, यथा पक्षस्य पञ्चदशी, अमावस्या च ।-ज्यो० ४ पाहु० ।

णिट्ठवय-निष्ठापक-पुं० । समाप्तिकारके दिवसे, आव० ६ अ०।

णिट्ठवियंसु-निष्ठापितवत्-त्रि०। निष्ठां नीतवति, ज्ञ०२१ ज्ञा०१उ०।

णिट्ठविय-निष्ठापित-त्रि० । समाप्तिमिते, पं० व० २ द्वार ।

णिट्ठविय अट्ठमदट्ठाण-निष्ठापिताष्टमदस्थान-त्रि० । निष्ठापितानि क्षयं नीतानि अष्टौ मदस्थानानि मानभेदाः-जातिकुलरूपबललाभश्रुततपोविनयमदाख्या येनासौ निष्ठापिताष्टमदस्थानः। क्षीणमदे, ग० १ अधि० ।

णिट्ठा-निष्ठा-स्त्री० । पर्यवसाने, सूत्र० १ श्रु० १५ अ० । समापने, आव० २ अ० । सारे सद्भावे, आ० चू० १ अ० । " एवाणि णिट्ठवाणि णिट्ठं पत्ताणि कम्मसिरो । " आ० चू० १ अ० ।

णिट्ठाण-निष्ठान-न० । निष्पत्तौ,नि० चू०१ उ० । निष्ठीयतेऽत्र । स्था-ल्युट् । प्रक्काऽऽद्यन्नोपसेचने दध्यादौ व्यञ्जने, सर्वगुणोपेते, दश० १ अ० । आव० ।

णिट्ठाणकहा-निष्ठानकथा-स्त्री० । विकथाभेदे,स्था० ४ ठा०२ उ० । (व्याख्या 'भत्तकहा' शब्दे वक्ष्यते)

णिट्ठाभासि [ण्]-निष्ठाभाषिण्-त्रि० । सावधारणभाषिणि, आचा० १ श्रु० १ चू० ४ अ० १ उ० । निश्चय्य भाषिणि, आचा० २ श्रु० १ चू० ४ अ० २ उ० ।

णिट्ठिक–नैष्ठिक–त्रि० । सर्वधर्मप्रकर्षपर्यन्तवर्तिनि, प्रश्न० ३ सम्व० द्वार ।

णिट्ठिय–निष्ठित–त्रि० । निष्ठां गते कृतस्वकार्ये, ज्ञा० १ श्रु० १ अ० । मोक्षे, परिसमाप्ते, आचा० १ श्रु० ५ अ० ६ उ० । व्य० । निःसत्ताके, भ० ६ श० १ उ० । क्षयं गते, ध० ३ अधि० । कालगते, सू० २ उ० । आ० म० । सिद्धे अशनाऽऽदौ, आचा० २ श्रु० १ चू० १ अ० ए उ० ।

निष्ठितशब्दार्थमाह–

असणाऽऽईण चउण्हं वि,आमं जं साहुगहणपाउग्गं ।
तं निट्ठियं वियाणसु,..... ॥

अशनाऽऽदीनां चतुर्णामपि मध्ये यदामममपरिणतं सत् साधुग्रहणप्रायोग्यं कृतं, प्रासुकीकृतमित्यर्थः; तं निष्ठितं विजानीत । पिं० ।

णिट्ठियट्ठ–निष्ठितार्थ–त्रि० । विषयसुखनिष्पिपासे, आचा० १ श्रु० ६ अ० ४ उ० । निष्ठितः समापितोऽर्थः प्रयोजनं यस्य स निष्ठितार्थः । आचा० १ श्रु० ५ अ० ६ उ० । कृतकृत्ये, सूत्र० १ श्रु० १५ अ० । प्रज्ञा० । आ० म० ।

णिट्ठियट्ठि [ण्]–निष्ठितार्थिन्–त्रि० । निष्ठितो मोक्षस्तेनार्थी मुमुक्षौ, आचा० १ श्रु० ५ अ० ६ उ० ।

णिट्ठुभ–क्षर्–धा० । सञ्चाले, "क्षरेः खिरज्झरपज्झरपच्चभणिच्चलणिट्ठुआः" ॥ ८ । ४ । १७३ ॥ इति क्षरेर्णिट्ठुआऽऽदेशः । 'णिट्ठुअइ,' क्षरति । प्रा० ४ पाद ।

णिट्ठुर–निष्ठुर–त्रि० । नि–स्था–उरच् । "क-ग-ट-म-त-द-प-श-ष-सऽकऽपामूर्ध्वं लुक्" ॥ ८ । २ । ७७ ॥ इति षलुक् । प्रा० २ पाद । मार्दवानुगते, ग० १ अधि० । प्रस्तरे, ग० २ अधि० । यथा हेक्काप्रधाना भाषा निष्ठुरा, अशक्यप्रतिकारतया दुर्नेदा वाचा निष्ठुरा । रा० । आचा० ।

णिट्ठुल–निष्ठुर–त्रि० । " हरिद्राऽऽदौ लः " ॥ ८ । १ । २५४ ॥ इति रस्य लः । अमृदुनि, प्रा० १ पाद ।

णिट्ठुवण–निष्ठीवन–न० । नासिकामुखेन परित्यागे, दश० १ तत्त्व । कासितश्लेष्माऽऽदिप्रक्षेपणे, दश० २ अ० । " निट्ठुवणाइ त्ति " निष्ठीवनाऽऽदौ इह साधवो द्विधा-गच्छगताः, गच्छनिर्गताश्च । तत्र ये गच्छनिर्गतास्ते नियमादनिष्ठीवकाः, औपग्राहिकमल्लकाऽऽद्युपकरणासम्भवात् । गच्छगता अपि ये विधिना निष्ठीव्यन्ति ते अनिष्ठीवका एव, न प्रायश्चित्तविषयाः । अविधिना श्लेष्ममल्लके निष्ठीवने दण्डक इव सप्तभङ्गाः, दण्डक इवैव चाऽऽद्येषु प्रत्येकं लघुमासः उत्तरेषु त्रिषु प्रत्येकं रात्रिंदिवपञ्चकम्, सप्तमभङ्गवर्तिनस्त्वनिष्ठीवका एव, विधिना निष्ठीवनात् । उपरितनेष्वपि च त्रिषु भङ्गेषु यदि भूमौ निष्ठीव्यति, तदा मासलघु । यच्च निष्ठीवने प्राणिनां परितापनाऽऽद्युपजायते तन्निष्पन्नं च तस्य प्रायश्चित्तम् । आदिशब्दात्कण्डूयनपरिग्रहः । कण्डूयनेऽपि हि दण्डक इव सप्तभङ्गकम्, तथैव च प्रायश्चित्तविधिः । व्य० १ उ० । निष्ठीवनकर्तरि, स्था० ५ ठा० १ उ० । विशे० ।

णिट्ठुट्टिअ–देशी–यूत्कृते, दे० ना० ४ वर्ग ४१ गाथा ।

णिट्ठूढ–देशी–स्तब्धे, दे० ना० ४ वर्ग ३३ गाथा ।

णिम–देशी– पिशाचे, दे० ना० ४ वर्ग ४५ गाथा ।

णिमाल–ललाट–न० । " पक्ष्मोदारललाटे वा " ॥ ८ । १ । ४७ ॥ इत्यादेरत इत्वं वा । "ललाटे च" ॥ ८ । १ । ५५७ ॥ इत्यादेर्लस्य णः । 'णिमालं' । प्रा० १ पाद । भाले,तं० । उत्त० । अलीके, जी० ३ प्रति० ४ उ० । जं० ।

णिणाय–निनाद–पुं० । नितरां नादो महान् घोषः । जी०, ३ प्रति० ४ उ० । महति घोषे, कल्प० ५ क्षण । ज्ञा० । निर्घोषे, आ० म० १ अ० २ खण्ड । प्रतिध्वनौ, जं० ३ वक्ष० । प्रश्न० ।

णिण्ण–निम्न–त्रि० । " म्नज्ञोर्णः " ॥ ८ । २ । ४२ ॥ इति म्नभागस्य णः। नीचे,प्रा० २ पाद । "णिण्णेसु य आससा पया ।" नीचभूमिभागे, उत्त० १२ अ० । शुष्कसरःप्रभृतौ,न० १५ श० ।

णिण्णक्खु–त्रि० । निस्सारयतीत्यर्थे, " वहिहा वा णिण्णक्खु । " आचा० २ श्रु० १ चू० २ अ० १ उ० ।

णिण्णगा–निम्नगा–स्त्री० । नद्याम्, नीचैर्गामिनि, त्रि० । प्रज्ञा० १ पाद ।

णिण्णय–निर्णय–पुं० । निश्चये, आ० म० १ अ० १ खण्ड । प्रमाङ्कने, विशे० ।

णिण्णार–निर्नगर–त्रि० । नगरनिष्क्रान्ते, " अप्पेगइए णिण्णारे करेहिंति । " भ० १५ श० ।

णिण्णामिया–निर्नामिका–स्त्री० । ईशानकल्पोपपन्नस्य ललिताङ्गनाम्न ऋषभदेवाऽष्टमनवजीवस्वयंप्रभानाम्न्यां देव्याम्, कल्प० ७ क्षण । आ०म० । आ० चू० । तत्कथा ऋषभस्वामिनः श्रेयांसेन 'उसभ' शब्दे द्वितीयभागे भवाष्टककथनावसरे ११२३ पृष्ठे गता)

णिण्णिमेस–निर्निमेष–त्रि० । अचेष्टे, म्रियमाणे, तद्वत्प्रवचनकार्यानुपयोगिनि, स्था० ५ ठा० २ उ० ।

णिण्णेह–निस्नेह–त्रि० । स्नेहरहिते, "जइ ससिणेही तो मुयइ, अह जीवइ णिण्णेह ।" प्रा० ४ पाद ।

णिण्हइया–नैह्नविकी–स्त्री० । ज्ञानक्षिप्तभेदे,प्रज्ञा० १ पद । स० ।

णिण्हग–निह्नव–पुं० । निह्नुवतेऽपलपन्ति अन्यथा प्ररूपयन्तीति निह्नवाः । स्था० ७ ठा० । आ० म० । मिथ्यात्वाभिनिवेशाज्जिनोक्तार्थस्यापलापकेषु जमालयादिषु, विशे० । त्यक्तसम्यग्दर्शनेषु, व्य० १ उ० ।

ते च सप्त–

समणस्स णं भगवओ महावीरस्स तित्थंसि सत्त पवयणणिण्हगा पण्णत्ता । तं जहा–बहुरया, जीवपएसिया,अव्वत्तिया, सामुच्छेइया, दोकिरिया, तेरासिया, अबद्धिया ।

" समणेत्यादि " कण्ठ्यम्, नवरं प्रवचनमागमं निह्नुवतेऽपलपन्त्यन्यथा प्ररूपयन्तीति प्रवचननिह्नवाः प्रकृत्या जिनैस्तत्त्व । (बहुरय त्ति) एकेन समयेन क्रियाऽभ्यासितरूपेण वस्तुनोऽनुत्पत्तेः प्रभूतसमयैश्चोत्पत्तेर्बहुषु समयेषु रताः सक्ता बहुरताः, दीर्घकालत्वव्यप्रसूतिप्ररूपिण इत्यर्थः १ । तथा जीवः प्रदेश एव येषां ते जीवप्रदेशास्त एव जीवप्रादेशिकाः । अथवा—जीवप्रदेशो जीवाभ्युपगमतो विद्यते येषां ते, तथा, चरमप्रदेशजीवप्ररूपिण इति हृदयम् २ । तथा अव्य-

क्रमेस्फुटं वस्तु अभ्युपगमतो विद्यते येषां ते अव्यक्तिकाः, संयताऽऽत्मकमे संदिग्धमुरूय इति भावना ३ । तथा-समुच्छेदः प्रसूत्यनन्तरं सामस्त्येन प्रकर्षेण च च्छेदः समुच्छेदो विनाशः,समुच्छेदं ब्रुवत इति सामुच्छेदिकाः, क्षणक्षयिकत्वभावप्रकपका इत्यर्थः ४ । तथा द्वे क्रिये समुदिते द्विक्रियं, तदर्थीयते तद्वेदिनो वा द्वैक्रियाः, कालाभेदेन क्रियाद्वयानुभवप्ररूपिण इत्यर्थः ५ । तथा--जीवाजीवनोजीवभेदात् त्रयो राशयः समाहृताः त्रिराशि, तत्प्रयोजनं येषां ते त्रैराशिकाः,राशित्रयाऽऽख्यापका इत्यर्थः ६ । तथा-स्पृष्टं जीवेन कर्म न स्कन्धबन्धवदुभवकं, तदेषामस्तीत्यबद्धिकाः, स्पृष्टकर्मविपाकप्ररूपका इति हृदयम् ७ । स्था० ७ ठा० । विशे० ।

निह्नवकारिणां नामान्याह-

एएसि णं सत्तण्हं पवयणणिण्हगाणं सत्त धम्मायरिया होत्था-जमाली, तिस्सगुत्ते, आसाढे, आसमित्ते, गंगे, छल्लुए, गोट्ठामाहिले । स्था० ७ ठा० । नि० चू० । विशे० ।

(एषां व्याख्या स्वस्वस्थाने)

अथ येभ्यो ये निह्नवाः समुत्पन्नास्तदेतदाह-

बहुरय जमालिपभवा, जीवपएसा य तीसगुत्ताओ ।
अव्वत्ताऽऽसाढाओ, सामुच्छेयाऽऽसमित्ताओ ॥२३०१॥
गंगाओ दोकिरिया, छल्लुगा तेरासियाण उप्पत्ती ।
थेरा य गोट्ठमाहिल, पुट्ठमबद्धं परूवेंति ॥ २३०२ ॥

बहुरता जमालिप्रभवाः, जमालेराचार्यात्प्रभव उत्पत्तिर्येषां ते जमालिप्रभवाः १ । जीवप्रदेशाः पुनस्तिष्यगुप्तादुत्पन्नाः २ । अव्यक्ता आषाढात् ३ । सामुच्छेदा अश्वमित्रादिति ४ । गङ्गाद् द्वैक्रियाः ५ । षडुलूकात् त्रैराशिकानामुत्पत्तिः ६ । स्थविराश्च गोष्ठामाहिलाः स्पृष्टमबद्धं प्ररूपयन्ति ७। 'कर्म' इति गम्यते। "पकरिंसु वा"इति पाठान्तरं वा। ततो गोष्ठामाहिलाद्बद्धिका जाता इति सामर्थ्यादवगम्यत इति ॥ २३०१ ॥ २३०२ ॥

येषु स्थानेष्वेते समुत्पन्नास्तानि क्रमेणाऽऽह-

एएसि णं सत्तण्हं पवयणणिण्हगाणं सत्त उप्पत्तिनगरे होत्था । स्था० ७ ठा० । आ० क० ।

तद् यथा-

सावत्थी उसभपुरं, सेयविआ मिहिल उल्लुगातीरं ।
पुरमंतरंजि दसउर, रहवीरपुरं च नयराइं ॥ २३०३ ॥

श्रावस्ती, ऋषभपुरं, श्वेतविका, मिथिला, उल्लुकातीरं, पुरमन्तरञ्जिका, दशपुरं, रथवीरपुरं चेति। एतान्यष्टौ नगराणि निह्नवानां यथायोगमुत्पत्तिस्थानानि बोद्धव्यानि । अष्टमं नगरं द्रव्यलिङ्गमात्रेणापि भिन्नानां सर्वापलापिनां महामिथ्यादृशां वक्ष्यमाणानां बोटिकनिह्नवानां लाघवार्थमुत्पत्तिस्थानमुक्तमिति ॥ २३०३ ॥

अथ भगवतः समुत्पन्नकेवलज्ञानस्य परिनिर्वृतस्य च कः कियता कालेन निह्नवः समुत्पन्नः ?, इत्येतत्प्रतिपादयन्नाह--

चोद्दस सोलस वासा, चोद्दस वीसुत्तरा य दोन्नि सया ।
अट्ठावीसा य दुवे, पंचेव सया य चोयाला ॥२३०४॥
पंचसया चुलसीओ, छच्चेव सया नवुत्तरा होंति ।
नाणुप्पत्तीएँ दुवे, उप्पन्ना निव्वुए सेसा ॥ २३०५ ॥

चतुर्दश वर्षाणि । तथा-षोडश वर्षाणि । तथा-(चोद्दा वीसुत्तरा य दोन्नि सय त्ति) चतुर्दशाधिके द्वे शते, विंशत्युत्तरे च द्वे शते, वर्षाणामिति गम्यते । तथा-अष्टाविंशत्यधिके च द्वे शते, तथा पञ्चैव शतानि चतुश्चत्वारिंशदधिकानि, पञ्च शतानि चतुरशीत्यधिकानि, षट् चैव शतानि नवोत्तराणि भवन्ति । एतावता व्यवधानकालेन ज्ञानोत्पत्तेरारभ्याऽऽद्यौ द्वौ निह्नवौ समुत्पन्नौ। शेषास्तु षट् भवन्ति। श्रीमन्महावीरे निर्वृते निर्वाणकालादारभ्य उक्तशेषेण यथोक्तेन व्यवधानकालेनोत्पन्नाः । इदमुक्तं भवति-श्रीमन्महावीरस्य केवलोत्पत्तेश्चतुर्दशभिर्वर्षैर्बहुरतानिह्नवः समुत्पन्नाः । षोडशभिर्वर्षैर्व्यतिक्रान्तैः जीवप्रदेशाः समुत्पन्नाः। भगवत एव निर्वाणकालाच्छेषेण चतुर्दशाधिकवर्षशतद्वयाऽऽदिना कालेनातिक्रान्तेन शेषा अव्यक्ताऽऽद्यो निह्नवाः समुत्पन्ना इति ॥ २३०४ ॥ २३०५॥ विशे० । आ० क० । आ० चू० । आ० म० । (एषां प्रत्येकं विस्तृतव्याख्या स्वस्वस्थाने) (बोटिकस्य च सूत्रानुक्तस्याष्टमनिह्नवस्य व्याख्या ' बोडिय ' शब्दे वक्ष्यते)

संप्रति निह्नववक्तव्यतां निगमयन्नाह-

एवं एए कहिया, ओसप्पिणिए उ णिएहगा सत्त ।
वीरवरस्स भगवतो, सेसाणं पवयणे नऽत्थि ॥२६१०॥

एवमुक्तेन प्रकारेणैतेऽनन्तरोदिताः कथिताः प्रतिपादिता अस्यामवसर्पिण्यां निह्नवाः सप्त । अष्टमस्तु बोटिकः, तुशब्दः समुच्चये । वीरवरस्य भगवतः प्रवचने तीर्थे । शेषाणां तु तीर्थकृतां प्रवचने (नऽत्थि त्ति) प्राकृतत्वाद् नासन् निह्नवाः ।

तत्र-

मोत्तूणमेसिमेक्कं, सेसाणं जावजीविया दिट्ठी ॥
एक्केक्कस्स य एत्तो, दो दो दोसा मुणेयव्वा ॥२६११॥

मुक्त्वा,एषामेकं गोष्ठामाहिलं निह्नवाधमं,शेषाणां जमालिप्रभृतीनां प्रत्याख्यानमङ्गीकृत्य यावज्जीविका दृष्टिरासीत्। न ते प्रत्याख्यानं गोष्ठामाहिल इवापरिमाणमब्रुवन्निति भावना । आह-प्रकरणादेवेदमवसीयते किमर्थमस्योपन्यासः ? । उच्यते-प्रतिदिवसोपयोगिनः प्रत्याख्यानस्यातीवोपयोगित्वान्मा कश्चित्तथैव प्रतिपद्येत, ततो ज्ञाप्यते-निह्नवानामपि प्रत्याख्यानविषये इयमेव दृष्टिरिति । (एत्तो त्ति) प्राकृतत्वादमीषां मध्ये एकैकस्य निह्नवस्य द्वौ द्वौ दोषौ ज्ञातव्यौ, मुक्त्वैकमिति वर्तते । तथाहि-बहुरता जीवप्रदेशिकाद् प्रत्यूचुर्भवन्तो द्वाभ्यां कारणाभ्यां मिथ्यादृष्टयः । तत्रैकमिदं यद्ब्रूथ-एकप्रदेशो जीव इति, द्वितीयं क्रियमाणं कृतमिति । जीवप्रदेशिका अपि बहुरतान् प्रत्यपादिषुर्यूयमपि कारणद्वयेन मिथ्यादृष्टयः । एकं तावदिदं यद्ब्रूथ- क्रियमाणमकृतं जीवप्रदेशं न जीव इति प्रतिपद्यध्वे । एवं शेषाणामपि परस्परं भावनीयम् । गोष्ठामाहिलमधिकृत्य पुनरेकैकस्य त्रयो दोषाः । तथाहि-बहुरतान् प्रति गोष्ठामाहिलोऽवोचत्-कारणत्रयाद्भवन्तो मिथ्यादृष्टयः । तत्रैकमिदं यत्कृतं कृतमिति ब्रूथ, द्वितीयं स्पृष्टमबद्धं कर्म, तृतीयं यावज्जीवं प्रत्याख्यानमिति । बहुरता अपि तं प्रत्यवोचन्-प्रबानपि कारणत्रयाद् मिथ्यादृष्टिः । एकं तावदिदं यत् क्रियमाणं कृतमिति वदति, द्वितीयं स्पृष्टमबद्धं कर्म, तृतीयमपरिमाणं प्रत्याख्यानमिति । एवं सर्वान् प्रति योजनीयम् । अन्ये त्वाहुः-एकै-

कश्च द्वौ द्वौ दोषौ एवं वेदितव्यौ-एकं आत्मस्वयं विप्रतिपन्नाः, द्वितीयं परानपि व्युद्ग्राहयन्तीति ।

नन्वेता दृष्टयः संसाराय, आहोस्विदपवर्गायेत ?, इत्याशङ्कानिवृत्त्यर्थमाह-

सत्तेया दिट्ठीओ, जाइजरामरणगब्भवसहीणं ।
मूलं संसारस्स उ, हवंति णिग्गंथरूवेणं ॥२६१६॥

सप्तापीता दृष्टयो,बोटिकास्तु मिथ्यादृष्टय एवेति न तद्विचारः। जातिजरामरणगर्भवसतीनामिति । जातिग्रहणं नारकाऽऽदिप्रसूतिग्रहे चरितार्थमिति गर्भवसतिग्रहणमदुष्टम्। मूलकारणं,भवन्तीति योगः । आ जुत्सङ्घाविनीनां जातिजरामरणगर्भवसतीनां मूलमिति प्रत्ययः; तत आह-(संसारस्स उ इति) संसरणं संसारस्तेर्यङ्नरनारकामरभवानुभूतिरूपः प्रदीर्घः,तस्यैव,तु शब्दस्यावधारणत्वात्। केन रूपेणेत्याह-निर्ग्रन्थरूपेण ।

अथैते निह्नवाः किं साधवः,उत तीर्थान्तरीयाः, आहोस्विद् मिथ्यादृष्टयः ?। उच्यते-न साधवः, यतः साधूनामेकस्याप्यर्थाय यत्कृतमशनाऽऽदि तच्चेषाणां न कल्पते, नैवं निह्नवानाम् ।

तथा चाऽऽह-

पवयणनीहूयाणं, जं तेसिं कारियं जहिं जत्थ ।
भज्जं परिहरणाए, मूले तह उत्तरगुणे य ॥ २६१७ ॥

(नीहूय त्ति) देशीवचनमकिञ्चित्करार्थे । ततः प्रवचने पारमेश्वरे यथोक्तक्रियाकलापे प्रत्यकिञ्चित्कराणाम् । अथवा-(नीहूय त्ति) आर्षत्वाद् निह्नुतं, तत्र प्रवचनं निह्नुतमपलपितं यैस्ते प्रवचननिह्नुताः । सुखाऽऽदिदर्शनाद् निह्नान्तस्य पाक्षिकः परनिपातः । तेषाम्, यदशनाऽऽदि, तेषामुपभोगाय कारितं यद् यस्मिन् काले यत्र क्षेत्रे, तद्भाज्यं विकल्पनीयम्। परिहरणे कदाचित्परिहियते,कदाचिन्नेति। यदि लोको न जानाति-यथैते साधुभ्यो भिन्नास्तदा परिहियते, अथ जानाति, तदा न परिहारः । अथवा-परिहरणा नाम परिभोगः । तथा चोक्तम्-" परिहरणा उवभोगो परिभोगो । " ततः कदाचित्परिभुज्यते, कदाचिन्नेति निह्नवत्वपरिज्ञाने युज्यते, शेषकालं नेति । कथम्भूतं तत् अशनाऽऽदि तन्निमित्तं कारितमित्यत आह-मूले मूलगुणविषयम्,आधाकर्माऽऽदि,तथोत्तरगुणे उत्तरगुणविषयं च,क्रीतकृताऽऽदि,ततो नैते साधवो,नापि गृहस्थाः, नाप्यन्यतीर्थ्याः, यतस्तदर्थाय कृतमेकान्तेन कल्पनीयमेव भवति । अत्र तु प्रज्ञना ततो व्यक्ता एवेति ।

आह-यद्बोटिकानां कारितं, तत्र का वार्ता ?, उच्यते-

मिच्छादिट्ठीयाणं, जं तेसिं कारियं जहिं जत्थ ।
सव्वं पि तयं सुद्धं, मूले तह उत्तरगुणे य ॥ २६१८ ॥

तेषां मिथ्यादृष्टीनां बोटिकानामुपभोगाय यत्कारितमशनाऽऽदि गृहस्थैः कारितं मूले मूलगुणविषयमुत्तरगुणे उत्तरगुणविषयं, तत्सर्वमपि शुद्धं कल्पनीयमिति भावः ॥ २६१८ ॥ आ० म० १ अ० २ खण्ड । (निह्नवाः परलोकस्याऽऽराधकाः, अनाराधका वा ?, इति ' आराहग ' शब्दे द्वितीयभागे ३०२ पृष्ठे गतम्) आचार्योपलापिनि, वृ० १ उ० ।

निह्नवद्वारं विवृणोति-

मुत्तत्थतदुभयाइं, जो घेत्तुं निन्हवे तमायरियं ।
लहुया गुरुया अत्थे, गेरुयनायं अबोही य ॥

यः सूत्रार्थतदुभयानि कस्यचित्पार्श्वे गृहीत्वा तमाचार्यं निह्नुते अपलपति-अपरं कमपि विद्यावयातमाचार्यमुद्दिशति । अथवा ब्रूयात्-मया स्वयमेवाऽधीतं श्रुतं निर्णीतं, केवलं तैर्वाचनाऽऽचार्यैः मम दिङ्मात्रमेव दत्तमिति । अत्र च यदि सूत्राऽऽचार्यं निह्नुते, तदा चत्वारो लघुकाः, अर्थे अर्थदायकमाचार्यं निह्नुवानस्य चत्वारो गुरुकाः, तदुभयाऽऽचार्यमपलपतस्तदुभयं प्रायश्चित्तमिति । अत्र च गेरुकः परिव्राजकः, तस्य ज्ञातं दृष्टान्तः । (वृ०) (स च ' अणिण्हवण ' शब्दे प्रथमभागे ३३४ पृष्ठे द्रष्टव्यः) " अवमत्थोवणओ-जहा सो एदाविधं विज्जायरियं निन्हवेतो ओहावणं पत्तो, एवं अन्ने वि अप्पगासं पि वायणायरियं निन्हवेता इह लोए चेव बहूणं समणसावगाईणं हीलणिज्जा भवंति, देवयाहि य उड्डिज्जंति त्ति ।" (अबोही य त्ति) परलोके अबोधिफलं कर्म गुरुनिह्नवकोऽर्जयति, एवंविधस्य (श्रुतं) न दातव्यम् ।

यत आह-

लवइयमइविण्णाणे, न कहेयव्वं सुयं व अत्थो वा ।
न मणी य सयसहस्सो, आविसइ कोत्थु जासस्स ॥

मतिः स्वस्वाभाविकी, विज्ञानं च गुरूपदेशजं, मतिविज्ञाने, ते उपहते दूषिते यस्य स उपहतमतिविज्ञानो गुरुनिह्नुतः । कथमिति चेदुच्यते-इह तावद् गृहस्था अपि मिथ्यादृष्टयस्तत्स्वाभाविक्यतिकरविवेकविकलाः, ऐहिकफलार्थमर्थशास्त्रं धनुर्वेदाऽऽदि यस्य सकाशे शिक्षितवन्तस्तं यावज्जीवं गुरुं प्रतिपद्यमानाः सर्वस्यापि लोकस्य पुरतः श्लाघन्ते, न पुनः कदाऽपि कस्यापि पुरतो निह्नवते । स पुनः सर्वज्ञशासनप्रतिपन्नोऽप्यचिन्त्यचिन्तामणिकल्पश्रुतदायकानपि परमगुरून् निह्नुते श्रूयतेऽसौ तेभ्योऽप्यधमत्वादुपहतमतिविज्ञानोऽनिधीयते । एवंविधे शिष्ये न कथयितव्यम्,श्रुतं वा सूत्रम्,अर्थो वा तदनिधेयः। अमुमेवार्थं प्रतिवस्तूपमया रूढयति-(न मणी इत्यादि) (कोत्थु त्ति) आर्षत्वात् कौस्तुभो नाम मणिः शतसहस्रो लक्षमूल्यो भासस्य शकुन्ताऽऽख्यस्य पक्षिणो गरुडे नाऽऽविशति, अयोग्यत्वात् । एवमस्यापि गुरुनिह्नोतुरस्यन्तापात्रभूतस्य श्रुतेरत्र प्रदानमनुचितमिति न विधेयम् । वृ० १ उ० । कर्म० । नि० चू० । अपलापे, आव० ४ अ० । सूत्र० ।

णिण्हव-निह्नव-पु० । अपलपने, " हवर्णस्याः " ॥ ८ । ४ । २३६ ॥ इत्युवर्णस्याऽऽदेशः । ' णिण्हवइ, ' निह्नुते । प्रा० ४ पाद । अपलपति, वृ० १ उ० ।

निह्नव-पुं० । 'णिण्हग' शब्दार्थे, स्था० ७ ठा० ।

णिण्हवण-निह्नवन-पुं० । अपलपने, प्रव० ६ द्वार (आचार्योपलपनेन का गतिरिति 'अणिण्हवण' शब्दे प्रथमभागे ३३४ पृष्ठे उक्तम्) (आचार्योपलपने प्रायश्चित्तं ' णिण्हग ' शब्देऽनुपदमेव गतम्) अपहृतधनाऽऽदिपरधनापहाराऽऽदेः कं यैरपह्नुते न प्रकाशयति ते निह्नवाः । अपहारगोपनच्छद्मप्रयोगेषु, विपा० १ श्रु० २ अ० ।

णितंब-नितम्ब-पुं० । पर्वताऽऽदेः कटके, स्त्रीकटेः पश्चाद् भागे च । " णीलवंतस्स वासहरपव्वयस्स दाहिणिल्ले णितंबे । " जं० ४ वक्ष० ।

णितिओमाण–नित्यावमान–न० । नित्यमवमानं प्रवेशः स्वपक्षपरपक्षयोर्येषु तानि तथा । सर्वदा निक्षूणां गोचराय कृतप्रवेशेषु कुलेषु,आचा०। नित्यलाभात् तेषु स्वपक्षः संयतवर्गः,परपक्षोऽपरभिक्षाचरवर्गः सर्वो भिक्षार्थं प्रविशेत् । आचा० २ श्रु० १ चू० १ अ० १ उ०।

णितिय–नित्य–न० । ध्रुवे, सतते, नि० चू० ।

जे भिक्खू णितियं वंदइ, वंदंतं वा साइज्जइ ॥४७॥
जे भिक्खू णितियं पसंसइ, पसंसंतं वा साइज्जइ ॥४८॥

'जे णितियं' इत्यादि सूत्रे, णिच्चमवट्ठाणातो णितियो ।

गाहा-

जं पुव्वं णितियं खलु,चउव्विहं वण्णियं तु वितियम्मि ।
तं आलंबणरहितो, सेवंतो होति णितिओ उ ॥९२॥

द्रव्यक्षेत्रकालभावा एतं चतुर्विधं इहैव अध्ययने वितिउद्देसे वण्णियं, तं णिक्कारणे सेवंतो णितिओ भवति । नि० चू० १३ उ०।

णितियपिंड–नित्यपिण्ड–पुं० । मया एतावद्गृहीतव्यं, भवता तु नित्यमेव ग्राह्यमित्येवं नियमग्राहो पिण्डे, स्था० १० ठा० ।

नित्यपिण्डं न गृह्णीयात्-

से भिक्खू वा भिक्खुणी वा गाहावइकुलं पिंडवायपडियाए पविसित्तुकामे से जाइं पुण कुलाइं जाणेज्जा–इमेसु खलु कुलेसु णितिए पिंडे दिज्जति, णितिए अग्गपिंडे दिज्जति, णितिए भाए दिज्जइ, णितिए अवड्ढभाए दिज्जइ, तहप्पगाराइं कुलाइं णितियाइं णितिओमाणाइं णो भत्ताए वा पाणाए पविसेज्ज वा, णिक्खमेज्ज वा । एयं खलु तस्स भिक्खुस्स वा भिक्खुणीए वा सामग्गियं, जं सव्वट्ठेहिं समिते सहिते सयाजुए त्ति बेमि ।

स भिक्षुर्यावद् गृहपतिकुलं प्रवेष्टुकामः। स तच्छब्दार्थे,स च वाक्यार्थोपन्यासार्थः । यानि पुनरेवंभूतानि कुलानि जानीयात् । तद्यथा-इमेषु कुलेषु, खलुशब्दो वाक्यालङ्कारे । नित्यं प्रतिदिनं पिण्डः पोषो दीयते, तथाऽग्रपिण्डः शाल्योदनाऽऽदेः प्रथममुद्धृत्य भिक्षार्थं व्यवस्थाप्यते, सोऽग्रपिण्डः, नित्यं भागोऽर्द्धपोषो दीयते । तथा-नित्यमपार्धभागः पोषचतुर्थभागः । तथाप्रकाराणि कुलानि, नित्यानि नित्यदानयुक्तानि, नित्यदानादेव (णितिओमाणाइं ति) नित्यं (ओमाण त्ति) प्रवेशः स्वपक्षपरपक्षयोर्येषु तानि तथा । इदमुक्तम्भवति-नित्यलाभात्तेषु स्वपक्षः संयतवर्गः, परपक्षोऽपरभिक्षाचरवर्गः, सर्वो निक्षार्थं प्रविशेत् , तानि च बहुश्यो दातव्यमिति तथाभूतमेव पाकं कुर्युः, तत्र च षट्कायवधः । अन्ये च पाके तदन्तरायः कृतः स्यात् । इत्यतस्तानि नो भक्तार्थं पानार्थं वा प्रविशेन्निष्क्रामेद्वेति । सर्वोपसंहारार्थमाह-(एयमित्यादि) एतदिति यदादेरभ्योक्तं, खलुशब्दो वाक्यालङ्कारार्थः । एतत्तस्य भिक्षोः सामग्र्यं समग्रता, यदुद्गमोत्पादनग्रहणैषणासंयोजनाप्रमाणाङ्गाराधूमकारणैः सुपरिशुद्धस्य पिण्डस्योपादानं क्रियते, तद् ज्ञानाऽऽचारसामग्र्यं, दर्शनचारित्रतपोवीर्याऽऽचारसंपन्नता चेति । अथ चैतत्सामग्र्यं सूत्रेणैव दर्शयति-यत्सर्वार्थैः सरसविराऽऽद्रैभिराहारगतैः. यदि वा-रूपरसगन्धस्पर्शगतैः,समितः संयत इत्यर्थः । पञ्चभिर्वा समितः, शुभेतरेषु रागद्वेषरहित इति यावत् । एवम्भूतश्च सह हितेन वर्तत इति सहितः । सहितो वा ज्ञानदर्शनचारित्रैरेवम्भूतश्च सदा युततेन संयमयुक्तो भवेदित्युपदेशः । ब्रवीमीति । जम्बूनामानं सुधर्मस्वामीदमाह-भगवतः सकाशात् श्रुत्वाऽहं ब्रवीमि, न तु स्वेच्छयेति । शेषं पूर्ववदिति । आचा० २ श्रु० १ चू० १ अ० १ उ० । (अत्र वक्तव्यम् ' अग्गपिंड ' शब्दे प्रथमभागे १६५ पृष्ठे उक्तम्)

नित्यपिण्डो न भोक्तव्यः—

जे भिक्खू णितियं पिण्डं भुंजइ,भुंजंतं वा साइज्जइ ।३२।
जे भिक्खू णितियं अवड्ढं भुंजइ, भुंजंतं वा साइज्जइ ।३३।
जे भिक्खू णितियं भागं भुंजइ, भुंजंतं वा साइज्जइ ॥३४॥
जे भिक्खू णितियं उवड्ढभागं भुंजइ,भुंजंतं वा साइज्जइ३५।

पिंडो भत्तट्ठो, अवड्ढो तद्दुहो, तस्स भद्धं भागो त्रिभागः, त्रिभागद्धं उवड्ढभागो ।

गाहा—

एसेव गमो नियमा, णितिए पिंडम्मि होतऽवड्ढे य ।
भागे य तस्सुवड्ढे, पुव्वे अवरम्मि य पदम्मि ॥२२३॥

जो गमो णितिए अग्गपिंडे भणितो, सो चेव गमो पिंडादिएसु चउसु वि सुत्तेसु उस्सग्गावयाएण भाणियव्वो ।

सूत्रार्थप्रतिपादनार्थं पिंडगाहा-

पिंडो खलु भत्तट्ठा, अवड्ढपिंडो उ तस्स जं अद्धं ।
तस्सऽद्ध भागमादी, तस्सद्धमुवड्ढभागो उ ॥ २२३ ॥

गतार्थैव । नि० चू० २ उ० ।

णितियवास–नित्यवास–पुं० । नित्यमवस्थानाद् नित्यः । नित्यवासिनि, ऋतुबद्धवर्षासु प्रमाणाधिकवासे, नि० चू० ।

जे भिक्खू णितियं वासं वसइ, वसंतं वा साइज्जइ ।३६।

ऋतुबद्धवासासु अतिरिक्तं वसतः णितियवासो भवति ।

इदानीं निर्युक्तिमाह-

दव्वे खेत्ते काले, भावे णितियं चउव्विहं होति ।
एतेसिं णाणत्तं, वोच्छामि अहाणुपुव्वीए ॥ २२४ ॥

द्रव्यक्षेत्रकालभावेषु णितियं चतुर्विधं, एतेसिं जं नानात्वं विशेषः, तमानुपूर्व्या वक्ष्ये ।

संयोगचतुष्कभङ्गप्रदर्शनार्थमाह-

दव्वेण य खेत्तेण य, णितियाणितिए चउक्कभयणा उ ।
एमेव कालभावे, दुगस्स व छुए समोतारो ॥ २२५ ॥

दव्वतो णितिए, खेत्ततो णितिए, एवं चउभंगो कायव्वो । तत्थ पढमभंगभावणा संथारगाइदव्वाणि कालदुगातीताणि, तम्मि चेव खेत्ते परिभुंजंतो णितिओ भवति । पढमभंगो संथारगादिदव्वा कालदुगातीता अण्णम्मि खेत्ते ण परिभुंजति । बितियभंगो तम्मि चेव खेत्ते अण्णे संथारगादि गेण्हति । ततियभंगो णितियं परुच्च । चउत्थभंगो सुण्णो । एवं कालभावेसु वि चउभंगो कायव्वो । कालओ वि णितिए,भावओ वि णितिए । तत्थ पढमभंगो कालदुगातीतं च सति सद्दुदिसु भावपरिबद्धो पढमभंगो, कालदुगातीतं वसति, ण सद्दुदिसु

रागपडिबद्धो बितियभंगो। कालदुगनिग्गतस्स वि न सङ्घातिसु भावपमिबद्धो ततियभंगो, चतुर्थः शून्यः, (दुवस्स व दुवे समोतारो त्ति) कालभावदुअस्स दव्वखेत्तदुए समोतारः।

गाहा-

कालो दव्वोतरती, जम्हा व दव्वस्स सो तु पज्जाओ।
भावो खेत्ते जम्हा, वासादी सुन्नमन्नत्थ ॥ २२६ ॥

कालो दव्वे समोतरति, जम्हा सो दव्वपज्जातो, अत्थ दव्वकालेसु चउभंगो भावेयव्वो। भावो खेत्ते समोतरति, जम्हा एगासु भावपमिबंधो भवति। अत्थ वि खेत्ते भावेसु चउभंगो भावेयव्वो। खेत्तकालचउभंगे इमा भावणा-तम्मि य खेत्ते मासातीतं वसति पढमभंगो, चरिमं लहुबद्धितं जत्थ मासकप्पठिया तत्थेव वासंतियाणं बितियभंगो, अन्यकालप्राप्तेरिति। अन्नं भागं पमिवसभं वा संकमंतस्स स चेव, भिक्खायरियाए ततियभंगो, चतुर्थः शून्यः।

जो दव्वणितिओ सो इमे पडुच्च। गाहा-

परिसामिमपरिसामी, संथाराऽऽहारुवहिमुवधिम्मि।
दगलगसरक्खमल्लग-मत्तगमादीसु दव्वम्मि ॥ २२७ ॥

संथारो दुविहो-परिसाडी, अपरिसाडी य। आहारे तेसु चेव कुलेसु गेण्हति। दुविहो उवही-आहितो, उग्गहितो य।

पासवणखेल्लसण्णातिणिमित्तया। गाहा-

कालदुगातीताइं, संथारादीणि सेवमाणा उ।
एसो उ दव्वणितिओ, पुण्णे अंतो बहिं णितो ॥२२८॥

एते संथारगादि दव्वे कालदुगातीतं अपरिहरंतो णितिओ भवति, स बाहिरियंसि वा खेत्तं अंतो मासकप्पे पुण्णे ते चेव संथारगादी बहिं णितो दव्वणितिओ भवति।

इदाणिं खेत्तणितिओ-

ओवासे संथारे, विहारउच्चारउवधिफलगामे।
णगरादिदेसरज्जे, वसमाणे खित्ततो णितिए ॥२२९॥

संथारगोवासे, अहवा संथारो पृथक् परिगृह्यते, विहारो सज्झायभूमी, उच्चारो सण्णाभूमी, कुलगामादि ण मुंचति, पुनः पुनस्तेष्वेव विहरति। एस खेत्तणितिओ।

इदाणिं कालणितिओ-

चाउम्मासा उवरिं, एगट्ठाणे वसंति जे भिक्खू।
बुड्ढिनिमित्ते असती, वसमाणे कालतो णितिए ॥२३०॥

उदुवासकालातीतं वसंतो कालणितिओ, बुड्ढिणिमित्तं वसंतो बहुकालेण वि णितिओ ण भवति। वुड्ढकायंपरिसमासौ उपरिष्वासनं नितिओ भवति।

इदाणिं भावणितिओ—

ओवासे संथारे, भत्ते पाणे परिग्गहे सड्ढे।
सेहेसु संथयेसु य, पमिबद्धे भावतो णितिए ॥ २३१ ॥

जे सेहा ण तावत्पव्वजंति, पूर्वापरेण संथवेण संपुत्ताओ वासादिसु सव्वेसु रागं करेंतो भावपमिबद्धो भवति।

गाहा-

वसही ण परिसा खलु, होहिति अण्णत्थ ऐव संथारो।
ऐत्थं भत्तमणुत्तम-सड्ढा सेहादि वा णत्थि ॥ २३२ ॥

अण्णत्थ परिसा वसही णत्थि त्ति रागं करेंति, एवं संथारगभत्तपाणसड्ढसेहाऽऽदिसु वि।

इदाणिं दव्वखेत्तकालभावेसु पच्चित्तं भणति-

उक्कोसोवधिफलए, देसे रज्जे य वुड्ढवासे य।
लहुगा भावे गुरुगा, सेसे पणगं च लहुगो तु ॥ २३३ ॥

दव्वं पडुच्च उक्कोसोवहिए फलए य चउलहुआ। खेत्तं पडुच्च देसे रज्जेसु चउलहुआ। कालं पडुच्च वासातीते वुड्ढवासातीते य चउलहुया। रागेण भावे सव्वत्थ चउगुरुगा। संथारगवज्जेसु तणेसु मूगलपत्थारपल्लएसु य पणगं। सेसे दव्वादिएसु प्रायशो मासलहुयं।

गाहा—

सुत्तणिवातो णितिए, चतुव्विधे भासियं जाहिं लहुगं।
उच्चारितसरिसाइं, सेसाइं विगोवणट्ठाए ॥ २३४ ॥

चउव्विहे दव्वादि णीयते, जत्थ मासलहुं तत्थ सुत्तणिवातो, सेसा पच्चित्ता शिष्यस्य विगोवणट्ठा भणिता, कारणओ पुण दव्वादिचउव्विहं पि णितियं वसेज्ज।

ते इमे कारणा दुविहा-

असिवे ओमोयरिए, रायदुट्ठे भए व आगाढे।
गेलण्ण उत्तिमट्ठे, चरित्तें सज्झाइए असती ॥ २३५ ॥

बाहिं असिवं वट्टति अतो कालदुगातीतं पि एगक्खेत्ते वसेज्ज। बाहिं ओमरायदुट्ठभोहियभए वा आगाढे वसेज्ज, आगाढे वा गेलण्णे वसेज्ज, उत्तिमट्ठ परियरगा वा वसेज्जा, बाहिया चरगादिसु चरित्तदोसा अतो वसेज्जा, बाहिं वा सज्झाओ ण सुज्झति, अतो सज्झायणिमित्तं वसेज्ज। असती वा बाहिं मासकप्पओभा ण, तत्थेव वसेज्ज।

चोदगाऽऽह-एगखेत्ते कालदुगातीतं वसमाणा कहं सुद्धचरणा?। आचार्याऽऽह-

एगक्खेत्तणिवासा, कालातिक्कंतचारिणो जंति।
सुद्धचरणाणा खलु, विसुद्धमालंबणं जेणं ॥२३६॥

एगखेत्ते कालदुगातिक्कंतं पि वसमाणा, तहा वि निरतियारा, जतो विसुद्धालंबणालंबी, नाणाऽऽवरणाऽऽदयं चाऽऽलंबणं।

किं च-

आणाएँ अमुक्कधुरा, गुणवुड्ढी जेण णिज्जरा तेणं।
मुक्कधुरस्स ण मुणिणो, सोधी संविज्जति चरित्ते ॥२३७॥

आणत्ति तित्थकरवयणं, जहा तित्थकरवयणातो णितियं ण वसति, तहा तित्थकरवयणाओ चेव कारणा णितियं वसति, स एवं आणाए संजमे अमुक्कधुरो चेव, अमुक्कधुरस्स णियमा णाणाऽऽदिगुणपरिवुड्ढी, जेण य तस्स गुणपरिवुड्ढी तेण णिज्जरा विउला भवति, जो पुण तप्परिपक्खे वट्टति, तस्स सोही चरित्तस्स ण विज्जति।

इदाणिं गतोऽप्यर्थः स्फुटतरः क्रियते-

गुणपरिवुड्ढिणिमित्तं, कालातीते ण होंति दोसा तु।
जत्थ तु पहितो णाणी, उविज्ज तहियं न विहरेज्जा ॥२३८॥

कालाओ दुगातिक्कंतं ज्ञानादिगुणपरिवृद्धिनिमित्तं वसतो न दोषः। जत्थ पुण बहिं विहरंतो णाणादीणं हाणी हवेज्ज, ण तत्थ विहरेज्ज इत्यर्थः। नि० चू० २ उ०।

नित्यवासफलम्-ननु किमित्येवमुपदिश्यते?-यावता मासकल्पेन विहरतामवश्यंभाव्येव जीवोपमर्दः, सूत्रार्थोभयहानिरपि जायते,मार्गगमनश्रमसंभवादपरिचितजनाद्युपयोगिभक्तपानाऽऽद्यसंप्राप्तेर्वा वातपित्ताऽऽदिक्षोभादात्मविराधनासंभवाच्च प्रत्यक्षो दोष एव दृश्यत इति। प्रयोगश्चात्र-अयुक्तमिदं मासाऽऽदिविहारेण ग्रामानुग्रामभ्रमणमिति पक्षः । संयमाऽऽत्मविराधनाहेतुत्वादिति हेतुः। तथाविधकष्टसाध्यसावद्यानुष्ठानादिति दृष्टान्तः । यत्संयमाऽऽत्मविराधनाहेतुभूतमनुष्ठानं तत्तत्संयमवतामनाचरणीयमेव, यथा कृष्यादिसावद्यानुष्ठानम्,तथाभूतं चेदं मासकल्पाऽऽदिना ग्रामानुग्रामभ्रमणमित्युपनयः । अतो न युक्तमिदमिति निगमनम्। न चास्य हेतोरसिद्धत्वाऽऽदिदोषोद्भावनाऽपि कर्तुं शक्यते,पूर्वमेव सूत्रार्थोभयसंयमाऽऽत्मविराधनायाः सप्रपञ्चं प्रतिपादितत्वात्। अन्यच्चैकत्र निवासे गुण एव दृश्यते-यतो मार्गगमनाभावात्समस्तजीवोपमर्दाभावे संयमवृद्धिरुपजायते । व्याघाताभावात्प्रासुकैषणीयोचितभक्तपानलाभसंभवाच्च वातपित्ताऽऽदेः क्षोभाभावादात्मविराधनाऽपि न भवति। तथाऽऽचार्यनिवासपुस्तकाऽऽद्यविकलपठनकारणकज्ञानसंभवात् सूत्रार्थोभयवृद्ध्या शिष्या दीक्षा भवन्ति। उक्तं च-"आरोग्यबुद्धिविनयोद्यमशास्त्ररागाः,पञ्चाऽऽन्तरा जगति पाञ्चगुणा भवन्ति । आचार्यपुस्तकनिवाससहायबलाः, बाह्याश्च पञ्च पठनं परिवर्द्धयन्ति ॥ १ ॥" अन्यच्चागमोऽप्येवमेव व्यवस्थितः। यतः-" पंच समिया तिगुत्ता, उज्जुत्ता संजमे तवे चरणे। वाससयं पि वसंता, मुणिणो आराहगा भणिया ॥ १ ॥" इत्याद्यनेकगुणकलापोपेतत्वाद् नित्यवासस्य, युक्तमेव तत्करणमिति मन्तव्यम्। एवं व्यवस्थितेऽपि यदन्यथापरिकल्पनं, तत्कदाग्रहग्रहगृहीतवचनमिवापकर्णनीयमिति स्थितम ।

अत्रोच्यते-यत्तावत्प्रतिपादितम्-'मासाऽऽदिविहारे' इत्यादिना पृथिव्यादिमर्दाऽऽदिना संयमाऽऽदेर्विराधनेति दूषणकदम्बकम्। तद् नित्यवासेऽपि समानमेव । यतो विहारपरिहारेण सर्वदैकत्र निवासवतां प्रासुकैषणीयवसतिज्ञानाभावाद् गृहस्था इवाऽऽश्रयाभावेषु मुक्तसमस्तजीवोपमर्दाऽऽदयः स्वयंग्रहकरणकारणानुमोदनाऽऽदौ प्रवर्तन्ते । ततश्चैषणायामपि जीवनिकायानामाकुट्यापि विराधनोत्पद्यते । ततश्च प्राणातिपात (विरमण) महाव्रतभङ्गनिरर्थकतायां अपि शिरस्तुण्डमुण्डनाऽऽदेर्वैयर्थ्यं स्यात्। अन्यथैकत्र निवासे प्रतिदिनमाहाराऽऽदिदानवन्दनाऽऽदिप्रतिपत्त्योपगृहीतानां साधूनामनादिभवाभ्यासवशवर्तिनां प्रतिबन्धाऽऽदयः संभवन्ति । उक्तं च-पडिबंधो लहुयत्तं, न जणुवयारो न देसविन्नाणं । नाऽऽणाराहणमेए, दोसा अविहारपक्खम्मि " ॥ १ ॥ ततश्च प्रतिबन्धात्संबन्धः, संबन्धाच्चित्तविप्लुतिः, चित्तविप्लुतेरकार्यप्रवृत्तिरिति। एवं वाऽतिस्फुटतरा संयमविराधना-यदा च चित्तविप्लुत्या प्रेरितः स्त्रीसेवाऽऽदौ प्रवर्तते,तदा न केवलं प्रथमव्रतभङ्गः,अपि तु पञ्चानामपीति। तथाहि-रमणीरमणमनाः संकेतस्थाने व्रजन्नागच्छन् वा क्व यास्यसि, कुतो वा प्रत्यावृत्तः?,इति केनचित्प्रेरितोऽलीकशोत्तरदानाय वक्ति-उदरबाधा मेऽस्ति, ततः शरीरचिन्तायै गमिष्यामि,तां वा कृत्वा समागतः,इति वदतो मृषावादः। स्त्र्यादिभिरननुज्ञातमतो निषेवतोऽदत्ताऽऽदानम्। तत्सेवनात् तु प्राणातिपातमैथुनपरिग्रह (विरमण) व्रतभङ्गोऽपि स्त्रीपरिग्रहकरणाद्भवति। अन्यच्च-सूत्रार्थोभयहानिरपि तद्वशगस्य। तथा-समस्तानां कषायाणां वृद्धिरुपजायते ऽनुगमवशगस्य,तदसम्प्राप्तौ ज्वराऽऽद्युन्मादसंभवादात्मविराधना । प्रवचनोपघातश्च-यथैते श्वेताभिक्षवो वदन्ति-चेलाद्यक्षमणे प्रमादायः संबन्धिनमस्माभिः परित्यज्यते, व्यापारः पुनरेतेषामीदृशः। प्रयोगश्चात्र-भवभ्रमणजीरूणां गृहीतव्रतयतीनां समस्तानर्थनिबन्धनो नित्यवास इति अयुक्त एवेति पक्षः । समस्तप्रमादनिबन्धनत्वादिति हेतुः । गृहवासवदिति दृष्टान्तः । यत्प्रमादनिबन्धनं तत् तद् पुनर्यतीनामयोग्यम्,यथा-गृहवासनिषेवनम्,प्रमादनिबन्धनश्चायमित्युपनयः । ततोऽयुक्तोऽयमिति निगमनम् । न चास्य हेतोरसिद्धताऽऽदिदोषोद्भावना विज्ञावयितुं शक्यते, पूर्वोक्तयुक्तेरतिप्रतीतत्वात्। यथोक्तम्-आगमोऽप्येवमेवेत्यादि , तस्यायुक्ततरत्वाद् वक्तुर्महानिर्धर्मता चाऽऽवेदिता भवति।

यतस्तत्रायं प्रक्रमः-

"जो होज्ज उ असमत्थो, रोगेण व पेल्लिओ भुसियदेहो ।
सव्वमवि जहा भणियं, कयाइ न तरेज्ज काउं जे" ॥ १ ॥

अस्या भावार्थः-यः स्यादसमर्थो विकृष्टतपश्चरणाऽऽदिना,रोगेण च, राजभयाऽऽदिना प्रेरितः स्वाभाविकशक्तेश्च्यावितः, तथा भुक्षितदेहो जराऽतिव्याप्तत्वादशक्तिनिविष्टः किं बहुनोक्तेनैवमादिकारणैः सर्वमपि यथाभणितं यथाऽऽगमे प्रतिपादितं क्रियाऽनुष्ठानं, कदाचनाऽपि यदि कथञ्चिद्, विधातुं, (न तरेज्ज सि) न शक्नुयाद्धेति । 'जे' इति पादपूरणे निपात इति गाथाऽर्थः ।

तदा किं प्राप्ताऽऽलम्बन इव समस्तमपि त्यजेदेवेत्याह--

"सो वि य नियमपरक्कम-ववसायधिइबलं अगूहंतो ।
मोत्तूण कूरचरियं, जयई जइ तो अवस्स जई" ॥ १ ॥

अस्या व्याख्या-सोऽपि च पूर्वोक्तकारणैः सकलशक्तिरहितोऽपि निजपराक्रमव्यवसायधृतिबलमगोपयन् कूटचरितं मुक्त्वा,यतते यदि शक्तिपराक्रमोचितं विधत्ते; तदा यतिरेवाऽसौ,सुसाधुरेवेति, न पुनरन्योऽसाधुरित्यर्थः । तत इत्थंभूतस्यापि युक्तसंयमानुष्ठानस्यागम्यत्वेवेति काकाऽऽवेदितम्, समर्थस्य पुनः का वार्ता ?, इति गाथाऽर्थः ।

अतो हेतोर्नित्यवासमपि समस्तानर्थबीजभूतं विदधाना यदीत्थंभूता भवन्ति, तदैवाऽऽराधना, नान्यथेत्यावेदयन्निदं गाथात्रयमाह-

"निम्मम निरहंकारा, उज्जुत्ता नाणदंसणचरित्तेसु ।
एगक्खेत्ते वि ठिया, खवेंति पोराणयं कम्मं ॥ १ ॥
जियकोहमाणमाया, जियलोहपरीसहा य जे धीरा ।
वुड्ढावासे वि ठिया, खवेंति पोराणयं कम्मं ॥ २ ॥
पंचसमिया तिगुत्ता, उज्जुत्ता संजमे तवे चरणे ।
वाससयं पि वसंता, मुणिणो आराहगा भणिया" ॥३॥

सुगमं चेदम्,नवरमस्य विवरणं विदधताऽऽत्तिहितम्-किमिदमेकार्थिकगाथात्रयम्? उच्यते-अत्यादरख्यापनपरम् । आदरश्चात्र सकलशक्तिरहितत्वाद् जङ्घाबलहीनतया चाऽऽगमनिषिद्धमपि नित्यवासं कुर्वन् यदि यथाशक्त्योच्छ्वसिति-निर्ममत्वाऽऽदिविशेषणयुक्तो भवति, तदैवाऽऽराधको, नान्यथेत्यावेदितमिति ।

आगमनिषेधश्चैतः सूत्रादेवावसीयते-

"साहेउ अट्ठमासे, वासासु सुभूमिओ निवा जंति ।
परबलरुद्धे वि पुरे, हावंती मासकप्पं तु ॥ १ ॥
कारणदोसओ जइ, तदुचओ एस कीरई नियमा ।
सव्वेण तह वि कीरइ, संथारग·····याईहिं" ॥२॥

वृद्धावासे पि, न यथाकथञ्चिदेव, कुशलः काशावलम्बनतोऽप्यवसेयः ।

यत आगमवचनमेवं व्यवस्थितम-

" खेत्तेण अद्धजोयण, काहेणं जाव निक्खवेलं ति ।
खेत्तेण य कालेण य, जाणसु सपरक्कमं थेरं ॥१॥ "

अस्या अयं भावार्थः-यदि जङ्घाबलहीनताऽऽदिकारणैः प्रभातेऽस्तमिते वा प्रस्तुतभिक्षाचरवेलायामर्द्धयोजनं गन्तुं शक्नोति, तदा सपराक्रमत्वाद्विहारमेव कार्यते, न नित्यवासम्।

यत आह-

" खेत्तेण अद्धगाउय, कालेणं जाव निक्खवेलं ति ।
खेत्तेण य कालेण य, जाणसु अपरक्कमं थेरं ॥१॥ "

एवं पुनश्चङ्क्रमणरहितत्वान्नित्यवासं यतनया कार्यते।

सा चेयं लेशतः-

"मासे मासे वसही, तणडगलाई य अन्न गेण्हंति ।
भिक्खायरियवियारा, जहिं ठिया तत्थ नऽच्चासु ॥१॥ "

अस्या इयमक्षरगमनिका-वातोद्रेकोपद्रुतोऽपि मूर्द्धाऽऽदिरोगाऽऽघातनुर्जङ्घाबलहीनतया ज्ञानाऽऽदिग्रहणकारणेन वा नित्यवासं कुर्वाणो मासे मासे अन्यां वसतिं, तृणकगलाऽऽदीनि चान्यानि गृह्णाति,भिक्षा च नान्यविभागे, विचारश्च बहिर्भूमिमन्यत्र विभागे स्थितास्तत्रैव, नान्यत्रेति गाथार्थः ।

वसत्यादिविभागासंप्राप्तौ किं कर्तव्यमित्याह-

"अद्धाए जाव एक्कं, करेंति भागं असंथरगामं ।
अद्धाए च्चिय वसहिं, विनजंती जाव मूलवसहीए" ॥१॥

अस्या अयं भावार्थः-(अद्धाए त्ति) यदि तृणकगलाऽऽदिविभागेन स्थातुं शक्नोति, तदैकमेव ग्राममष्टसप्तषष्ठाऽऽदिहीयमानभागैः प्रकुर्वन् यावत्सकलमपि ग्राममेकेनैव विभागेन विधाय वसतिं चान्यान्यां गृह्णाति, तदभावे एकस्यामपि स्थितः संस्तारकं यतीनां विधत्ते, मा चित्तदुष्टेरभावे पापबन्धः स्यादिति। ततस्तच्छुद्धिनिमित्तमागममर्यादापरिपालनार्थं यानयात युक्त्या तिष्ठति, तत आराधको भवतीति गाथाऽर्थः ।

यत्पुनः पूर्वमेवंविधं प्रतिपादितम्-मासकल्पाऽऽदिना विहरतः संयमाऽऽत्मविराधना,सूत्रार्थौभयहानिरिति। तदज्ञानविजृम्भितम्। न हि विदितपरमार्थाः संविग्ना मोक्षसुखाभिलाषिण एवंविधपरमपुरुषाऽऽसेवितं सकलशास्त्रप्रतिपादितं परमनिर्जराकारणमेकान्ततः प्रभावनाकारणं समस्तभव्यप्राणित्राणक्षममुदितोदितमासकल्पविहारमतिदुष्करमवीरपुरुषाणामेवंविधाऽऽलम्बनजाड्यपरिकल्पनया दूषयन्ति। तथाहि-यत्तावत्प्रतिपादितम् अवश्यं मार्गे गतानां पृथिवीकायाऽऽदीनां विराधना संयमविराधना, सा न संभवति। यत ईर्यासमितिसमिताः साधवो भवन्ति। यत उक्तम-"जुगमेत्तंतरदिट्ठी, पयं पयं चक्खुणा विसोहंतो। अव्वक्खित्तस्साऽऽउत्तो,इरियासमिओ मुणी होइ ॥१॥" अथ मार्गे क्वापि सचेतनाया मिश्राया वा भूवः संभवः, क्वापि च हरितायाः संभवो भविष्यति, ततोऽवश्यंभाविनी विराधनेति । न । तत्रावश्यंजाविगमनसंभवे शास्त्रेऽप्यनुज्ञानात्, केवलमत्र प्रायश्चित्तशुद्धेश्च निर्दोष एवेति। यच्चैर्यायुक्तस्यापि चङ्क्रमणकृता विराधनाऽवश्यंभाविनीति भवता संभावितम्। तत्राऽपि न दोषलेशोऽप्यस्ति। यतः-

" उच्चालियम्मि पाए, इरियासमियस्स संकमट्ठाए ।
आवज्जेज्ज कुलिंगी, मरेज्ज तं जोगमासज्ज ॥१॥
न हु तस्स तन्निमित्तं, बंधो सुहुमो वि देसिओ समए ।
अणवज्जो उवओगे-ण सव्वभावेण सो जम्हा ॥२॥ "

इत्यतस्तेषां भगवतां परमसंयमिनां घोरपुरुषचरितानुगामिनां परीषहोपसर्गदत्तोरस्थलानां मासकल्पविहारिणां नास्त्येव संयमविराधनागन्धोऽपि। यच्च-परिश्रमेत्यादिनाऽऽत्मविराधनेत्युक्तम्। तदपि सुखधीबन्धनं व्यतिरिच्यान्यद् न साधयति। यतः प्रायः प्राणिनां रोगशोकभयभोगाऽऽदयः पूर्वोपात्तकर्मवशतः संभवन्ति,न यथाकथञ्चित्, तत्पुनर्नित्यवासेऽपि समानम। यदि पुनरेतदुच्यते-विशेषतो बाह्यकारणकलापमासाद्य तदुदयमासादयति, तदा तस्याङ्गीकृतत्वाद्वश्यवेद्यत्वादात्मविराधनाऽपि न भवति। यतोऽवश्यवेद्यकर्मणां केनाऽपि प्राणं कर्तुं न शक्यते,अवश्यवेद्यत्वादेव । यच्चोक्तम्-अपरापरग्रामनगराऽऽदिगमने अपरिचितजनसकाशादुचितनक्तपानादेरसंभवे वातपित्ताऽऽदिक्षोभः स्यादिति। तदपि बालप्रलापकल्पम्। यतो व्रतग्रहणकाले तदङ्गीकृतमेव लाभालाभाऽऽदिकम्। यतः सर्वदैव साधूनामयमाशयविशेषः-"लाभालाभे सुखे दुःखे, जीविते मरणे तथा । स्तुतौ निन्दाविधाने च, साधवः समचेतसः " ॥ १ ॥ अन्यच्चाऽपूर्वापूर्वग्रामनगराऽऽदौ विहारं विदधतां शिष्योपधिभावकप्रतिबोधाऽऽहाराऽऽदेर्विशेषतो लाभः सम्भवति,विशेषदेशनाश्रवणाद्विशेषतो भावसम्भवादिति । तथाहि-लोकेऽप्येवमेव दृश्यते-देशान्तराऽऽयातप्राघूर्णकस्य सविशेषस्नानविलेपनचीरप्रदानपर्युपासितवचनश्रवणाऽऽदेस्तथैव दर्शनादिति;नित्यवासिनां पुनः सर्वाऽभाव एव,अलब्धदायातप्राघूर्णकस्येव । उक्तं च-" अतिपरिचयादवज्ञा, भवति विशिष्टेऽपि वस्तुनि प्रायः । लोकः प्रयागवासी, कूपे स्नानं सदा चरति " ॥ १ ॥ आगमेऽप्यनाणि-" पडिबंधो लहुयत्ते," इत्यादि । यदपि प्रतिपादितमसूत्रार्थोभयहानिः स्यादिति। तदपि मिथ्यात्वतिमिरावगुण्ठितचेतसो वञ्चना। यतो न हि विहारवतां संयमस्वाध्यायाऽऽद्यनुष्ठानं व्यतिरिच्यान्यत् कर्तव्यमस्ति। यः पुनर्विहारे वस्तुपरिकर्मणादौ तद्व्याघात उद्भावितः, सोऽङ्गीकृत एव; यतः सूत्रार्थोभयाद्यासोऽपि संयमाऽऽद्यनुष्ठाननिमित्तमेव विधीयते,न जनरञ्जनार्थम्। यत एतदुच्यते-"निच्चमि य सज्झाओ।"अन्यच्च-"वैशाखिकमाख्यानं, श्रुत्वा गोपायनं च कुलवद्धाः। संयमयोगैरात्मा, निरन्तरं व्यापृतः कार्यः॥१॥" इति। यदपि मुग्धबुद्धिबन्धनार्थं किञ्चित्प्रयोगश्लेषि जल्पितम् । तदपि न विदुषां मनागप्यसुखमुत्पादयति। साङ्गोपाङ्गैरसिङ्घनाऽऽलिङ्गितत्वाच्चोत्सहते मासकल्पाऽऽद्युचितविहारनिषेधव्यापारान्तरं प्रति,अनेकोपपत्तिनिर्मासकल्पविहारस्य संयमं प्रति श्रवणतया समर्थितत्वादिति । अतः स्थितमिदम्-मोक्षार्थं गृहीतदीक्षेण संयमार्थिना मासकल्पाऽऽदिना विहर्तव्यमिति । अस्यार्थस्यान्वयव्यतिरेकाभ्यामुपदेशमालाविधायकेन भगवता धर्मदासगणिनाऽपि तथैव समर्थितत्वात्।

तथा च तत्सूत्रम्-

" कारणनीयावासे, सुट्ठुतरं उज्जमेण जइयव्वं ।
जह ते संगमथेरा, सपाडिहेरा तया आसि " ॥१॥

अस्यायमक्षरार्थः-कारणे हीनजङ्घाबलत्वज्ञाने, नित्यवासः-कारणनित्यवासः, कारणनित्यवासे सुष्ठुतरमतिशयेन यतितव्यमुद्यमेनाप्रमादेनेत्यर्थः । यथा-ते भगवन्त आगमप्रसिद्धाः संगमस्थविरसूरयः सप्रातिहार्या अप्रमत्ताऽऽदिगुणगणाऽऽवर्जितहृदयतया देवैरपि स्तूयन्ते, तदा, यदाऽसौ भगवान् वृद्धवासमगमत्, आसीद् भूयादिति गाथाऽर्थः । दर्श० ४ तत्त्व ।

जाहे वि अ परितंता, गामाऽऽगरनगरपट्टणमडंबा ।
तो केइ निअयवासी, संगमथेरं ववइसंति ॥ ११ ॥

यदाऽपि च परिश्रान्ताः, सर्वथा श्रान्ता इत्यर्थः । किं कुर्वन्तः सन्तः ?, ग्रामाऽऽकरपत्तनाऽऽश्रयटन्तः सन्तः । ग्रामाऽऽदीनां स्वरूपं प्रसिद्धमेव । ततः केचन नष्टनाशका नित्यवासिनः, न तु सर्व एव । किम् ?, संगमस्थविरमाचार्यं, व्यपदिशन्त्यालम्बनतयेति गाथाऽर्थः ॥ ११ ॥

कथम् ?-

संगमथेरायरिओ, सुट्ठु तवस्सी तहेव गीअत्थो ।
पेहित्ता गुणदोसं, णितियावासं पवन्नो उ ॥ १२ ॥

इयं चान्यकर्तृकी गाथा सोपयोगा च निगदसिद्धा । कः पुनः संगमस्थविरः ?, इत्यत्र कथानकम्-"कोल्लइपुरे नगरे संगमथेरा ऽज्जिनिक्खत्तेण साहूहिं विसज्जिया । ते तं नगरं नवहा काऊण जंघाबलपरिहीणा विहरंति । नगरदेवया किर तेसिं उवरि पसन्ना । तेसिं सीसो दत्तो नाम आहिंडिउं चिरेण कालेण उदंतवाहओ आगओ । सो तेसिं पडिस्सए न पविसति नियमवासिसि काउं । भिक्खावेलाए उग्गाहियं हिंडंता संकिलस्सति, कुटोऽयं सड्ढकुलाणि न दाएंति । एगत्थ सेट्ठिकुले रेवईए गहीओ दारओ । छम्मासा रोवंतस्स आयरिएहिं चप्पुडिया कया । मा रोव । वाणमंतरीए मुक्को । तेहिं तुट्ठेहिं पभिलाभिया जहिच्छिएणं । सो विसज्जिओ । आयरिया सुइरं हिंडिऊण अंतं पंतं गाहायागया समुद्दिछा । आवस्सयआलोचणाए आयरिया भणंति-आलोएहि । सो भणति-तुब्भेहिं समं हिंडिओ सि । ते भणंति-धातिपिंडो ते भुत्तो सि । भणति-मम अतिसुहुमाणि पासंसि त्ति पइट्ठो । देवयाए अछुरसे वासं, मंधकारं च विउव्वियं । एस हीलेइ त्ति । आयरिएहिं भणिओ-एहि । सो भणइ-अंधयारो सि । आयरिएहिं अंगुली दाइया पज्जलिया आउट्टो आलोए सि । आयरिया वि नवमागे परिकहिंति । एवमयं पुट्ठाऽऽलंबणो ण होइ,सव्वेसिं मंदधम्माणमालंबणं ति" ॥ १२ ॥

आह च-

ओमे सीमपवासं, अप्पमिबंधं अजंगमत्तं च ।
न गणेंति एगखित्ते, गणेंति वासं निअयवासी ॥१३॥

'ओमे' दुर्भिक्षे, शिष्यप्रवासं शिष्यगमनं, तथा तस्यैवाप्रतिबन्धमनिष्वङ्गमजङ्गमत्वं च वृद्धत्वं, चशब्दात्तत्रैव क्षेत्रेऽविभागनजनं च । इदमालम्बनजालं न गणयन्ति नापेक्षन्ते, नाऽऽलोचयन्तीत्यर्थः । किं तु एकक्षेत्रे गणयन्ति वासं, नित्यवासिनो मन्दधियः । इति गाथाऽर्थः ॥१३॥ आव० ३ अ० ध०र०।

णितियावाइ(ण्)–नित्यवादिन्–त्रि०। नित्यो मोक्षो यत्र गतानां पुनरागमनाऽऽदि नास्ति । नित्यतयाऽवस्थितिर्यस्यास्ति तस्मिन्नेधर्मके, दशा० ६ अ० । " णितिया सव्वभावा मंगुलीपं । " उपा० ६ अ० ।

णित्त–नेत्र–न० । नयने, लोचने, स्था० १० ठा० ।

णित्तल्ल–निस्तल्ल–त्रि० । अनिवृत्ते, " तेणं णित्तलं मणिरयणं अस्सादेंति । " भ० १५ श० ।

णित्तिरमिअ–देशी–त्रुटिते, दे० ना० ४ वर्ग ४१ गाथा ।

णित्तिरही–देशी–निरन्तरे, दे० ना० ४ वर्ग ४० गाथा ।

णित्तुप–निस्तुप–त्रि० । अचोप्यमे, अवधारिते, बृ० १ उ० ।

णित्तुस–निस्तुष–त्रि० । तुषरहिते, तद्वद्विशुद्धे च । प्रश्न० ४ सम्व० द्वार ।

णित्तेय–निस्तेजस्–त्रि० । गतकान्तौ, नि० १ चू० १ वर्ग १ अ० । निर्वीर्ये, भ० ९ श० ३३ उ० ।

णित्थरण–निस्तरण–न० । पारप्रापणे, जं० ३ वक्ष० । " प्रनिस्तरणसमस्था । " आ० म० १ अ० २ खण्ड० । जं० ।

णित्थरिज्जंत–निस्तीर्यमाण–त्रि० । पर्यन्ते प्राप्यमाणे, संथा० ।

णित्थाण–निस्थान–त्रि० । स्थानभ्रष्टे, हा० १ चू० १८ अ० । स्थानवर्जिते, विपा० १ श्रु० ३ अ० ।

णित्थारग–निस्तारक–त्रि० । पारगे, "णित्थारगपारगा होहा।" इति वन्दकं प्रति गुरुवचनम् । निस्तारकाः संसारसमुद्रात्, प्राणिनां प्रतिज्ञाया वा पारगाः । संसारसमुद्रतीरगामिनो भवत यूयमित्याशीर्वचनम् । पा० । ध० ।

णित्थारणा–निस्तारणा–स्त्री० । पारप्रापणायाम्, जं० ३ वक्ष० । ('परिहार' शब्दे संयमे सीदतां संयतानां निस्तारणा वक्ष्यते)

णिद्दंसण–निदर्शन–न० । कथञ्चिद् गृह्णतः अभ्युपगच्छतः परानुकम्पया निश्चयेन पुनः पुनर्दर्शने, स्था० १० ठा० । अनु० । उत्त० ।

णिद्दंसिय–निदर्शित–त्रि० । नितरामनुज्ञाते, षो० ६ विव० । कथञ्चिद् गृह्णतः परयाऽनुकम्पया निश्चयेन पुनः पुनर्दर्शिते, ग० २ अधि० । अनु० ।

णिद्दरिसण–निदर्शन–न० । निश्चयेन दर्श्यतेऽनेन दार्ष्टान्तिक एवार्थ इति निदर्शनम् । दृष्टान्ते, दश० १ अ० ।

णिद्दा–निद्रा–स्त्री० । निद्रानं निद्रा । प्राणिहिंसा नरकाऽऽदिदुःखहेतुरिति ज्ञानतोऽपि, यद् वा साधूनामाधाकर्म न कल्पते इति परिज्ञानवतोऽपि जीवानां प्राणव्यपरोपणे, पिं० । निद्रयते दानं शुक्लिजीवस्य 'दैप्' शोधने इति वचनाद्, निद्रा । ज्ञाने, आभोगे, तथुक्ता वेदनाऽपि निद्रा । आभोगवत्यां वेदनायाम्, भ० १६ श० ५ उ० ।

णिद्दाह–निदाघ–निदह्यतेऽत्र । नि-दह-घञ् । न्यङ्क्वादित्वात् कुत्वम् । ग्रीष्मे, घर्मे, घर्मकाले च । वाच० । लोकोत्तररीत्या भावनाऽऽदिगणनया एकादशे लौकिकरीत्या ज्येष्ठाऽऽषाढयोर्मासे, आव० ५ अ० ।

णिद्दाह–पुं० । अधिको दाहो निदाहः । असाधारणदाहे, आव० ५ अ० ।

णिद्दाणाण–निद्राध्यान–न० । निद्रापरतन्त्रस्य ध्यानं निद्राध्यानम् । स्त्यानर्द्धिनिद्रया महिषमांसभक्षि-मोदकाभिलाषिहस्तिदन्तोत्पाटकारि-प्राक्कुम्भकारत्वाद्यस्तमृत्पिण्डत्रोटनवत् साधुमस्तकत्रोटि-वटशाखाभेदि-साधूनामिव दुर्ध्याने, आतु० ।

णिद्दक्खय–निद्राक्षय–पुं० । स्वापप्रमोक्षे, निद्राक्षयेण सुप्तोऽपि बुध्यते । स्था० ५ ठा० २ उ० ।

णिद्दड्ढ–निर्दग्ध–पुं० । सीमन्तकप्रस्तारकेन्द्रकात्पूर्वस्यामावलिकायामेकविंशेऽपक्रान्तनरके, स्था० ५ ठा० २ उ० । 'माया' शब्दे उदाहरिष्यमाणायां रत्नायाम्, स्त्री० । महा० २ चू० ।

णिद्दड्ढमज्झ–निर्दग्धमध्य–पुं० । सीमन्तकमध्यादुत्तरस्यामावलिकायामेकविंशेऽपक्रान्तमहानरके, स्था० ६ ठा० ।

णिदड्ढावत्त–निर्दग्धाऽऽवर्त–पुं० । सीमन्तकाऽऽवर्तात् पश्चिमायामेकविंशेऽपक्रान्तमहानरके, स्था० ६ ठा० ।

णिदड्ढोसिट्ठ–निर्दग्धावशिष्ट–पुं० । सीमन्तकावशिष्टादक्षिणस्यामावलिकायामेकविंशेऽपक्रान्तमहानरके, स्था० ६ ठा० ।

णिदय–निर्दय–त्रि० । निष्करुणे, प्रश्न० १ आश्र० द्वार । निष्कृपे, प्रश्न० १ आश्र० द्वार । निर्घृणे, प्रश्न० १ आश्र० द्वार ।

णिदर–निर्दर–पुं० । कन्दरायाम्, हैमेऽभिधानचिन्तामणौ ।

णिदलण–निर्दलन–न० । मर्दने, आचा० १ श्रु० १ अ० ४ उ० ।

णिदहु–विगल–धा० । वि-गम् । "विगलेः थिप्प-णिदहौ" ॥८ । ४ । १७५॥ इति विगमतेर्णिदहाऽऽदेशः । 'णिदहइ' । पक्षे-'विगलइ' । विगलति । प्रा० ४ पाद ।

णिद्दा–निद्रा–स्त्री० । 'द्रा' कुत्सायां गतौ । नियतं द्रातिं कुत्सितत्वमविस्पष्टत्वं गच्छति चैतन्यमनयेति निद्रा । "विदृभिदादिभ्योऽङ्" ॥३ । ३ । १०४॥ इति अङ्प्रत्ययः । स्वापावस्थाविशेषे, कर्म० ६ कर्म० । प्रव० । पा० । पं० सं० । उत्त० । स्था० ।

मुहपमिवोहा णिद्दा, ... [११]

सुखेनाकृच्छ्रेण नखच्छोटिकामात्रेणाऽपि प्रतिबोधो जागरणं स्वप्नतुर्यस्यां स्वापावस्थायां सा सुखप्रतिबोधा निद्रा, तद्विपाकवेद्या कर्मप्रकृतिरपि कारणे कार्योपचारान्निद्रेत्युच्यते । कर्म० १ कर्म० । अनु० । प्रज्ञा० । निद्रा पञ्चविधा–निद्रा १, निद्रानिद्रा २, प्रचला ३, प्रचलाप्रचला ४, स्त्यानर्द्धिश्च ५ इति । बृ० ४ उ० । स० । (आसां पृथक् पृथक् व्याख्या तत्तच्छब्दे)

णिद्दाऽऽदिचउक्कं पमिसिद्धकाले आयरमाणस्स पच्छित्तं जाणति-

दिवसे णिसि पढमे चरिमे, चउक्क आसेवणे लहुमासो ।
आणऽणवत्थुड्डाहो, विराधणा णिद्दबुद्धी य ॥ १३४ ॥

दिवसतो चउसु वि जामेसु, णिसा रात्री, ताए पढमजामे, चरिमे वा जामे, चउक्कं णाम-णिद्दा, णिद्दाणिद्दा, पयला, पयलापयला । आसेवणं णाम-एतासु वट्टति । तत्थ से पसेगं चउसु वि मासलहुं । णिद्दाए दोण्ह वि लहुं, अतिणिद्दाए कालगुरुं । पयलाए तवगुरुं । अतिपयलाए दोहिं वि गुरुं । सुवंताण य इमे दोसा–भगवता पमिसिद्धेसु जओ आणाभंगो कओ भवति, आणाभंगेण य चरणभंगो । जतो भणियं–"आणाए च्चिय चरणं, तब्भंगे जाण किं न भग्गं तु ?।" अणवत्थदोसो य–एगो पडिसिद्धकालेसु सुवतो, अण्णो वि तं दट्ठुं सुवति, "एगेण कयमकज्जं, करेति तप्पच्चया अण्णो ।" उड्डाहो य भवति–दिवसे सुवंतो य दिट्ठो असंजएहिं चिंतयति–जाहे एस णिक्खित्तसज्झायज्झाणजोगो सुवति, ताहे लक्खिज्जति–रातो रतिकिलंतो, एवं उड्डाहो भवति । अहवा भणंति–ण कम्मं, ण धम्मो, अहो सुब्बइत्तं । विराहणा–सुत्तो आलीवणे डज्झेज्जा । णिद्दबुद्धी य । यत उक्तम–"पञ्च वर्द्धन्ति कौन्तेय !, सेव्यमानानि नित्यशः । आलस्यं मैथुनं निद्रा, कृपा क्रोधश्च पञ्चमः ॥१॥" नि० चू० १ उ० । बृ० । (उदकतीरे निद्रापञ्चककरणनिषेधो ' इगतीर ' शब्दे वक्ष्यते)

ऊर्ध्वस्थो निद्रायति, प्रचलायतीत्याह-

छउमत्थे णं भंते ! मणूसे निद्दाएज्ज वा, पयलाएज्ज वा ?। हंता ! निद्दाएज्ज वा, पयलाएज्ज वा, जहा हसेज्जा तहा, णवरं दरिसणावरणिज्जस्स कम्मस्स उदएणं निद्दाएइ वा, पयलाएइ वा, से णं केवलिस्स नत्थि, अट्ठं तं चेव ॥

"छद्मस्थे" इत्यादि । (णिद्दाएज्ज व त्ति) निद्रां सुखप्रतिबोधलक्षणां, कुर्यात् निद्रायेत् । (पयलाएज्ज व त्ति) प्रचलां ऊर्द्धस्थितनिद्राकरणलक्षणां कुर्यात् प्रचलायेत् । भ० ५ श० ४ उ० ।

नितरां द्रान्ति गच्छन्ति कुत्सितामवस्थामिहामुत्र चानयेति निद्रा । तद्वशाद् प्रदीपनकाऽऽदिषु विनाशमिहैवानुभवन्ति । धर्मकार्येष्वपि शून्यमानसत्वान्न प्रवर्तन्ते इति । आकृसङ्कोचनरूपायाम्, सूत्र० २ श्रु० २ अ० । सुप्तायाम्, उत्त० ४ अ० । आ० म० । " जागरिता धम्मीणं, अधम्मियाणं च सुत्तिया सेया । वच्छाहिवभगिणीए, अकंदिसु जिणो जयंतीए ॥२०६॥ " (इति ' जागरिया ' शब्देऽस्मिन्नेव भागे १४४८ पृष्ठे, 'जयंती' शब्दे च १४१६ पृष्ठे चिन्तितम्)

णिद्दाण–निद्राण–त्रि० । सुप्तप्रमत्ते, प्रति० ।

णिद्दाणिद्दा–निद्रानिद्रा–स्त्री० । निद्रातोऽतिशायिनी निद्रा निद्रानिद्रा । मयूरव्यंसकाऽऽदित्वान्मध्यमपदलोपी समासः । कर्म० १ कर्म० । शाकपार्थिवाऽऽदित्वान्मध्यमपदलोपी वा समासः । स्था० ६ ठा० । दुष्प्रबोधायां स्वापावस्थायाम्, कर्म० ।

निद्रानिद्रास्वरूपमाह--

....., णिद्दाणिद्दा य दुक्खपडिबोहा । [११]

दुःखेन कष्टेन बहुनिर्घोलनाप्रकारैरत्यर्थमस्फुटतरीभूतचैतन्यत्वेन प्रतिबोधो यस्यां सा दुःखप्रतिबोधा । कर्म० १ कर्म० । प्रव० । तस्यां हि चैतन्यस्यात्यन्तमस्फुटतरीभूतत्वाद् बहुभिर्घोलनाप्रकारैः प्रबोधो भवत्यतः सुखप्रबोधनिद्रातोऽस्या अतिशायिनीत्वं, तद्विपाकवेद्या कर्मप्रकृतिरपि निद्रानिद्रा । प्रव० २१६ द्वार । कर्म० । पं० सं० । उत्त० । नि० चू० । स्था० । प्रज्ञा० । प्रव० । स० ।

णिद्दापमाय–निद्राप्रमाद–पुं० । क० स० । प्रमादकारणीभूतनिद्रायाम्, "निद्राशीलो न श्रुतं नाऽपि वित्तं, लब्धुं शक्तो हीयते चैव तस्याम् । ज्ञानऽध्यानाभावतो दुःखजागी, लोकद्वेष्टे स्यादतो निद्रयाऽऽलम् ॥१॥" इति । स्था० ६ ठा० ।

णिद्दामत्त–निद्रामत्त–त्रि० । निद्राऽभिभूते, आव० ५ अ० ।

णिद्दायण–निद्रायण–न० । निद्रणस्य स्वप्नावस्थायाम्, बृ० ३ उ० ।

णिद्दारिय–निर्दारित–त्रि० । विस्फारिते, प्रश्न० ३ आश्र० द्वार । निष्कासिते, " निद्दालियग्गजीहे । " उपा० २ अ० ।

णिद्दिट्ठ–निर्दिष्ट–त्रि० । कथिते, विशे० । तं० । प्रतिपादिते, दर्श० ३ तत्त्व । आव० । दर्शिते, पञ्चा० ३ विव० ।

णिद्दुक्खिया–निर्दुःखिका–स्त्री० । दुःखरहितायाम्, तं० ।

णिद्देस–निर्देश–पुं० । निर्देशनं निर्देशः । विशेषाभिधाने, यथा आवश्यके सामायिकमिति । अनु० । आ० म० । "सामाइयं ति निद्देसो त्ति । " (तत्स्वरूपम् ' उद्देश ' शब्दे द्वितीयभागे ७०६ पृष्ठे उक्तम्) (निर्देशनिक्षेपोऽपि तत्रैवोक्तः)

एकाभ्यां चोद्देशनिर्देशाभ्यामधिकारस्तदाह-

ओदइओ खइओ त्ति य, नाणं चरणं ति जावनिद्देसो ।

एत्थ विसेसाहिगओ, समासउद्देसनिद्देसो ॥ १५०२ ॥
अज्झयणं उद्देसो, तं चिय सामाइयं ति निद्देसो ।
बुद्धीए जहासंभव-माजोज्जं सेसएसु पि ॥ १५०३ ॥

औदयिको भावः, क्षायिको भाव इत्यादि । अथवा-ज्ञानं, दर्शनं, चारित्रमित्यादिको ज्ञानाऽऽदीनां क्षायिकक्षायोपशमिकभावप्रवृत्तित्वाद्भावनिर्देशः इह च प्रत्येकमष्टविधे उद्देशो निर्देशे च समासोद्देशः, समासनिर्देशश्च विशेषेणाधिकृतः । तथाहि-प्रस्तुतेऽध्ययनम्, इत्येष समासोद्देशः, सामायिकमिति च विशेषाभिधानरूपत्वात्समासनिर्देशः । एवं स्वबुद्ध्या यथासम्भवं शेषेष्वपि श्रुतस्कन्धचतुर्विंशतिस्तवाऽऽद्यध्ययनेष्वायोज्यम्, यथा श्रुतस्कन्ध इति समासोद्देशः, आवश्यकमिति समासनिर्देश इत्यादि ॥ १५०२ ॥ १५०३ ॥

उत्तरगाथासंबन्धनार्थमाह--

सामाइयं नपुंसय-मस्स पुमं थी नपुंसगं वा वि ।
निद्दिट्ठा तत्थिच्छइ, कं निद्देसं नओ को णु ? ॥१५०४॥

इह सामायिकमिति नपुंसकतया रूढम् । अस्य च त्रिविधो निर्देष्टा उच्चारयिता, स्त्रीपुन्नपुंसकभेदात् । तत्रेदं नयैर्विचार्यते-को नयः कं निर्देशमिच्छति ?-किं निर्देश्यवशात्, निर्देशकवशाद्वा ?, इति विशेषः पृच्छतीति गाथाऽर्थः ॥१५०४॥

अस्मिंश्च प्रश्ने सत्याह-

दुविहं पि नेगमनओ, निद्दिट्ठं संगहो य ववहारो ।
निद्देसयमुज्जुसुओ, उभयसरिच्छं च सद्दस्स ॥१५०५॥

नैके गमा वस्तुधर्मपरिच्छेदा यस्याऽसौ ककारवर्णनाशान्नैगमः, अनेकप्रकारवस्त्वभ्युपगमपर इत्यर्थः । नैगमश्चासौ नयश्च नैगमनयः स द्विविधमपि निर्देश्यवशान्निर्देशकवशाच्च निर्देशमिच्छति, इति शेषः, लोकव्यवहारपरत्वात्, अनेकगमरूपत्वाच्चास्य नयस्य । लोके च निर्देश्यवशात्,निर्देशकवशाच्च निर्देशप्रवृत्तिर्दृश्यते । तत्र निर्देश्यवशाद् यथा-'वासवदत्ता,तरङ्गवती,प्रियदर्शनाकथा' इत्यादि । निर्देष्टृवशात्तु मनुना प्रणीतो ग्रन्थो मनुः, अक्षपादेनोक्तोऽक्षपाद इत्यादि । लोकोत्तरे तु निर्देश्यवशात् षड्जीवनिकायप्रतिपादकमध्ययनं षड्जीविका, साध्वाचारप्रतिपादको ग्रन्थ आचार इत्यादि । तथा-निर्देशकवशान्निर्देशो यथा-कपिलेन प्रणीतं कापिलीयमध्ययनं, हरिकेशिना प्रणीतं हरिकेशीयं, केशिगौतमाभ्यामभिहितं कैशिगौतमीयं, नन्दिसंहिता, जिनप्रवचनमित्यादि । एवं सावद्यविरमणरूपं सामायिकं रूढितो नपुंसकमिति कृत्वा निर्देश्यवशान्नैगमो नपुंसकनिर्देशमेवास्य मन्यते । यथा-सामायिकं नपुंसकमिति । तथा सामायिकं निर्देष्टुः स्त्रीपुंनपुंसकलिङ्गत्वात्तद्वशात्सामायिकस्य त्रिलिङ्गताऽप्येतन्मतेन भवति । यथा-सामायिकं स्त्री,सामायिकं पुरुषः, सामायिकं नपुंसकमिति । यथा वा देवदत्ताऽऽदिना घटाऽऽदिशब्दे समुच्चारिते स घटाऽऽदिशब्द उच्चारयितृदेवदत्ताऽऽदिपरिणामत्वादेवदत्ताऽऽदिशब्दत्वेन व्यपदिश्यते; तथा-तदभिधेयपृथुबुध्नोदराऽऽद्याकारघटाऽऽदिपदार्थपरिणामत्वाद् घटाऽऽदिशब्दत्वेनापि लोके निर्दिश्यते । एवं स्वाभिधेयसावद्यविरमणपर्यायत्वात्सामायिकस्य नैगमो नपुंसकनिर्देशं मन्यते । अभिधायकस्त्रीपुरुषाऽऽदिपरिणामत्वात्तु लिङ्गत्रयनिर्देशमप्यभ्युपगच्छति, यथा-'सामायिकं स्त्री' इत्यादि । आह-'दुविहं पि नेगमणओ' एतावन्मात्रोक्तौ निर्देश्यवशाद्, निर्देशकवशाच्च द्विविधं निर्देशमिच्छतीति कुतो लभ्यते ?, इति । अत्रोच्यते-" निद्दिट्ठं संगहो य ववहारो " इतिवचनात् । अत्र हृदयमर्थः-निर्देष्टमभिधेयं वस्त्वङ्गीकृत्य संग्रहव्यवहारौ निर्देशमिच्छतः, निर्देश्यपर्यायत्वात् वचनस्य, इत्यादियुक्तिश्च भाष्ये वक्ष्यते । तदिदं निर्देष्टं वस्त्वाश्रित्येतिवचनात्प्रागपि " दुविहं पि " इत्यत्र निर्देष्टृनिर्देशकवशान्निर्देश इति गम्यते । (निद्देसयमुज्जुसुओ त्ति) निर्दिशतीति निर्देशको वक्ता, तमङ्गीकृत्य ऋजुसूत्रो निर्देशमिच्छति । यथा-'सामायिकं स्त्री' इत्यादि । वक्तृपर्यायत्वाद्वचनस्येत्यादि युक्तिरत्रापि भाष्येऽभिधास्यते । (उभयसरिच्छं च सद्दस्स त्ति) उभयमिह निर्देश्यं निर्देशकं च वस्तु तस्योभयस्य सदृशं समानलिङ्गमेवाऽऽश्रित्य शब्दनयस्य,निर्देशप्रवृत्तिरिति गम्यते । यदि हि निर्देश्यं नपुंसकं,तदा निर्देष्टाऽपि स्त्रीपुंनपुंसकलक्षणो नपुंसकमेव, वक्तुर्वाच्योपयोगानन्यत्वेन तद्रूपत्वात् । उपयोगप्रधाना हि शब्दनयाः, ततो यो यत्रोपयुक्तः स तद्रूप एव, यथाऽग्न्युपयुक्तोऽग्निः, तथा च सति स्त्रीपुरुषावपि यदा रूढितो नपुंसके सामायिके उपयुक्तौ भवतः, तदा निर्देश्यनपुंसकोपयुक्तत्वान्नपुंसकमेव, तदुपयोगानन्यत्वेन तद्रूपत्वादिति । स्त्रीपुरुषौ वा नपुंसकं श्रुत इत्यस्य स्वर्थस्य शब्दनयमतेनासम्भव एवेति निर्युक्तिगाथासंक्षेपार्थः ॥ १५०५ ॥

अथ विस्तरार्थमभिधित्सुर्नाध्यकारः प्राऽऽह-

जं संववहारपरो-ऽणेगगमो णेगमो तओ दुविहं ।
इच्छइ संववहारो, दुविहो जं दीसए पायं ॥ १५०६ ॥

यद्यस्माल्लोकव्यवहारपरोऽनेकगमश्च नैगमनयः, ततस्तस्मान्निर्देश्यवशान्निर्देशकवशाच्च द्विविधमपि निर्देशमिच्छति । लोकव्यवहारश्च प्रायो द्विधा दृश्यते ॥ १५०६ ॥

कथम ?, इत्याह-

छज्जीवणियाऽऽयारो, निद्दिट्ठमेणं तह सुयं चऽणं ।
तं चेव य जिणवयणं, सव्वं निद्देसयवसेणं ॥ १५०७ ॥
जह वा निद्दिट्ठवसा, वासवदत्तातरंगवइयाइं ।
तह निद्देसगवसओ,लोए मणुरक्खवाइ त्ति ॥ १५०८ ॥

लोको द्विधा-अर्हद्दर्शनानुगतो लोकोत्तररूपः, तव्यतिरिक्तश्च । तत्र लोकोत्तरे निर्देष्टार्थवशान्निर्देशो यथा-षड्जीवनिका नामाध्ययनम्, आचारः, आवश्यकमित्यादि । (तह सुयं च णं, तं चेव त्येत्यादि) तथा अत्रैव लोकोत्तरे तदन्यच्च श्रुतं निर्देशकवशात्सर्वमपि जिनप्रवचनमुच्यते । तथा-अन्यत्किमपि श्रुतं निर्देशकवशादेवोच्यते । तथा-भद्रबाहुनिर्मितं, नन्दसंहिता, कापिलीयमित्यादि । यथा वा-इतरलोके निर्देष्टृवशाद्वासवदत्ता, तरङ्गवतीत्यादिनिर्देशः, निर्देशकवशात्तु मनुः, अक्षपाद इत्यादि ॥ १५०७ ॥ १५०८ ॥

तथा किम ?, इत्याशङ्क्य प्रकृते योजयन्नाह-

तह निद्दिट्ठवसाओ, नपुंसगं नेगमस्स सामइयं ।
थीपुंनपुंसगं वा, तं चिय निद्देसयवसाओ ॥ १५०९ ॥

यथा षड्जीवनिका, आचार इत्यादौ निर्देष्टार्थवशान्निर्देशः, तथाऽत्रापि सावद्यविरमणलक्षणनिर्देष्टृनपुंसकार्थवशात्सामायिकम्, इति नपुंसकनिर्देशः, यथा वा मनुः, अक्षपाद इ-

स्यादौ निर्देशकवशान्निर्देशः, तथाऽत्रापि योषित्पुरुषनपुंसकलक्षणत्रिविधनिर्देशकवशात् तदेव सामायिकं स्त्रीपुंनपुंसकं भवति। स्त्र्यादित्रिविधनिर्देशकवशाद् नन्दसंहितामनुकापिञ्जीयाऽऽदिवत् त्रिष्वपि लिङ्गेषु सामायिकस्य निर्देशप्रवृत्तिः, यथा-'सामायिकं स्त्री' इत्यादि ॥ १५०६ ॥

अथ प्रकारान्तरेणाऽपि लोकव्यवहारोपदर्शनेन प्रकृतं समर्थयन्नाह-

जइ वा घडाऽऽणिहाणं, घडसद्दो देवदत्तसद्दो त्ति।
उभयप्पविरुद्धमेवं, सामइयं नेगमनयस्स ॥ १५१० ॥

इयं च गाथा- यथा वा देवदत्ताऽऽदिना घटाऽऽदिशब्दे समुच्चारिते इत्यादिना व्याख्यातैवेति ॥ १५१० ॥

"निद्दिट्ठं संगहो य ववहारो" (१५०५)इत्येतद्व्याख्यातुमाह-

अत्थाल ञ्चिय वयणं, लहइ सरूवं जओ पईवो व्व।
तो संगहववहारा, भणंति निद्दिट्ठसगं तं ॥ १५११ ॥

यतो यस्मादर्थादेव वाच्याद् घटाऽऽदेः सकाशाद्वाचकं वचनं स्वरूपमात्मन्नात्मीयं लभते,नान्यथा, यथा प्रदीपः।प्रदीपो हि प्रकाश्यमेवार्थं प्रकाशयन् प्रदीपो भण्यते, यदि तु प्रकाश्यं वस्तु न स्यात्, तदा किमपेक्षोऽसौ प्रदीपः स्यात् ?। तस्माद्यथा प्रकाश्यादेवार्थात्प्रदीप आत्मलाभं लभते,तथा वाच्यादेवार्थाद् वचनमात्मस्वरूपमाप्नोति । ततस्तस्मात्संग्रहव्यवहारनयौ निर्दिश्यते इति निर्दिष्टं वाच्यं वस्तु तदधीनमेव तद्वचनं जानतो ह्यतः। वाच्यं चेह सामायिकशब्दस्य सावद्यविरतिरूपः,तदभिधेयोऽर्थः। स च रूढितो नपुंसकतया प्रसिद्ध इति। अतः सामायिकस्य नपुंसकलिङ्गतामेव संग्रहव्यवहारावभ्युपगच्छतः । अथवा सामायिकवतां सत्त्वानां स्त्रीपुंनपुंसकत्वात् तत्परिणामानन्यत्वेन च सामायिकार्थस्य स्त्र्यादिरूपत्वाद्वाच्यवशेन त्रिलिङ्गताऽपि सामायिकस्य संग्रहव्यवहारनयमतेन द्रष्टव्येति ॥ १५११ ॥

प्रकारान्तरेणाऽपि निर्दिष्टवशान्निर्देशं समर्थयन्नाह-

अहवा निद्दिट्ठत्थ-स्स पज्जओ चेव तं सधम्म व्व।
तप्पच्चयकारणओ, घडस्स रूवाइ धम्म व्व॥ १५१२ ॥

अथवा तद्वचनं निर्दिष्टार्थस्य वाच्यवस्तुनः पर्याय एव, तत्प्रत्ययकारणत्वात्-वाच्यार्थप्रतीतिहेतुत्वात्,यथा तस्यैव निर्देशस्य घटाऽऽदेरन्ये संस्थानाऽऽदयो धर्माः। इह यद्यस्य प्रत्ययकारणं तत्तस्य स्वपर्यायः, यथा घटस्य रूपाऽऽदयः,वचनं च वाच्यार्थस्य प्रत्ययकारणम्, अतस्तत्पर्यायः, पर्यायश्च पर्यायिणोऽर्थान्तर एवेति युक्तो निर्देशवशान्निर्देश इति ॥ १५१२ ॥

स्यादेतदसिद्धोऽयं हेतुः, एतत्प्रत्ययकारणत्वाद्वचनस्य, इत्येतन्निराकरणार्थमाह-

वयणं विन्नाणफलं, जइ तं नणिए वि नत्थि किं तेणं ?।
अन्नत्थ पवए वा, मव्वत्थ वि पच्चओ पत्तो ॥१५१३॥
अनियेयसंकरो वा, वत्तरि पच्चओऽगभिहिए वि।
तम्हा निद्दिट्ठवना, नपुंसगं वेति सामइयं ॥ १५१४ ॥

अर्थविज्ञानफलं हि वचनं, यदि भणितेऽप्युदीरितेऽपि वचने (तेति) तदर्थविज्ञानं, नास्ति न भवति, तर्हि कण्ठौष्ठशोषमात्रविधायिना किं तेनोक्तेन, निष्फलत्वात् ?। स्यादेतद्व्यादर्थादन्यत्र वक्तृव्यक्तेऽर्थे विज्ञानं जनयिष्यति वचनम्, ततश्च विज्ञानफलं स्यात् तद्भविष्यति, वाच्येऽर्थे विज्ञानं च न जनयिष्यति, तथा च सति वाच्यार्थपर्यायो वचनं न भविष्यतीत्याशङ्क्याऽऽह-(सव्वत्थेत्यादि) यदि हि वाच्यमर्थं विहाय वक्तृव्यक्तेऽर्थान्तरे प्रत्ययं वचनं जनयेत्तर्ह्यविशेषेणैव सर्वत्राऽर्थे प्रत्ययः प्राप्तः, न वा कश्चिदप्यर्थेऽसौ भवेत्, अविशेषादिति-अतत्पर्यायत्वेऽपि तत्प्रत्ययहेतुत्वे सर्वत्राऽसौ भवेत्, नवा कश्चिद्भवेदिति भावः । स्यादेतद्वचनाव्यक्तौ प्रत्ययो भवत्येव, यथाऽनेनेदमभिहितमिति, तत्किमुच्यते-"जइ तं भणिए वि नत्थि किं तेणं ?" इति । इत्याशङ्क्याऽऽह-"अभिधेयसंकरो वेत्यादि।" अथ वा वाच्यादर्थादन्यत्र प्रत्ययेऽभ्युपगम्यमाने सर्वत्राऽपि प्रत्ययो न भवेदित्येको दोष उक्तः। अथ दोषान्तरमभिधित्सुराह-(अभिधेयसंकरो वेत्यादि) यदि हि वक्तर्यनभिहितेऽपि वचनात्तत्र प्रत्ययोऽभ्युपगम्यते, हन्त ! तर्हि वक्तृव्यदनभिहितानि खरोष्ट्रदेङ्कवकाऽऽदीनि बहूनि वस्तूनि सन्ति, ततो वक्तृव्यस्तेषामपि श्रोतुः प्रत्यये सत्यभिधेयानां सर्वेषाम्, अभिधेयेन वा घटाऽऽदिना सह वक्त्रादीनामन्येषां सङ्करः, एकस्यां श्रोतृप्रतीतौ साङ्कर्ये युगपत्तदाकारसंक्रमणं प्राप्नोति, न चैतदस्ति, एकस्माद्वचनादेकस्यैव प्रतिनियतस्य घटाऽऽद्याकारस्य संवेदनादिति । तस्मादभिधेयपर्याय एव वचनम्, तत्प्रत्ययकारणत्वात् । अतो निर्दिष्टमिह सामायिकशब्दस्यार्थरूपं सामायिकं रूढितो नपुंसकम्, तद्वशात्सामायिकशब्दः संग्रहव्यवहारयोर्नपुंसकलिङ्गवृत्ति । अथवा—सामायिकवतः स्त्रीपुंनपुंसकत्वात्, तत्परिणामानन्यत्वाच्च सामायिकार्थस्य त्रिलिङ्गतामपि संग्रहव्यवहारावभ्युपगच्छतः । ततो निर्दिष्टस्य सामायिकार्थस्य त्रिलिङ्गत्वान्निर्देश्यवशादपि सङ्गृह्यव्यवहारमतेन सामायिकस्य त्रिलिङ्गताऽपि भवति; यथा-'सामायिकं स्त्री' इत्यादि। एतच्च स्वयमेव द्रष्टव्यम् ॥ १५१३ ॥ १५१४ ॥

'निद्देसगमुज्जुसुओ' (१५०५) इति व्याचिख्यासुराह-

उज्जुसुओ निद्देसग-वसेण सामाइयं विणिद्दिसइ।
वयणं वत्तुरहीणं, तप्पज्जाओ य तं जम्हा ॥ १५१५ ॥

ऋजुसूत्रनयो निर्देशकवशेनाभिधातृपारतन्त्र्येण सामायिकं निर्दिशति, यदेव निर्देशकस्य लिङ्गं,तदेव सामायिकस्यासौ मन्यते, यथा-' सामायिकं स्त्री ' इत्यादि, वचनस्य वक्त्रधीनत्वात्, तत्पर्यायत्वाच्च, विज्ञानवदिति।

अथ वचनस्य वक्त्रधीनत्वे युक्तिमाह-

करणत्तणओ मण इव, सपज्जयाओ घडाऽऽइरूवमिव।
साहीणत्तणओ वि य,सधणं व वओ वयंतस्स ॥१५१६॥

वदत एव संबन्धिवचः, इति पर्यन्ते प्रतिज्ञा। अत्र सदृष्टान्तान् हेतूनाह-करणत्वात्,मनोवत्;तथा-स्वपर्यायत्वात्, घटाऽऽदे रूपाऽऽदिवत्; तथा-स्वाधीनत्वात्, स्वधनवदिति ॥१५१६॥

युक्त्यन्तरमाह-

तह सुत्तऽरुत्ताओ,तस्सेवाणुग्गहोवघायाओ।
तस्स तयमिंदियं पि व,इहरा अकयाऽऽगमो होज्जा।१५१७।

तस्यैव वक्तुस्तदुच्च इति पक्षः, वचनस्य सूक्तत्वदुरुक्तत्वाभ्यां वक्तुरेवानुग्रहोपघातदर्शनात्। इह यस्य यस्मिन्सत्यनु-

ग्रहोपघातौ तस्य तदात्मीयम्,यथा देवदत्ताऽऽदेरिन्द्रियम्, इ-ष्येते वचनसूक्तत्वदुरुक्तत्वाभ्यां वक्तुरनुग्रहोपघातौ, तस्मात्त-त्तस्याऽऽत्मीयम् । विपर्यये बाधकमाह-इतरथा अन्यथा वच-नस्य वक्तुरसंबन्धित्वे तस्याऽनुग्रहोपघातयोरकृताभ्यागम एव स्यादिति ॥ १५१७ ॥

अत्र परः प्राऽऽह-

निद्दिट्ठस्स वि कस्सचि, णणूवघायाइओ तयं जुत्तं ।
ते तस्स सकारणओ,इहरा थाणुस्स वि हवेज्जा ॥१५१८॥

ननु न केवलं निर्देशकस्य, किं तु निर्दिष्टस्याप्यभिधेयस्यापि कस्यचित् तस्कराऽऽदेर्वचनादुपघाताऽऽदयो दृश्यन्ते, यथा-'बध्यतां, हन्यतां चायं तस्करः,' मुच्यतां चायमित्यादुक्ते तस्य विषादाऽऽद्युत्पत्तेरुपघाताऽऽदयोऽध्यक्षत एवोपलभ्यन्ते। अतस्त-द्दर्शनाभिर्दिष्टस्याऽपि संबन्धि तद्वचनं वक्तुं युज्यते। अत्रोत्तर-माह-(ते इत्यादि) ये इष्टाऽनिष्टवचनश्रवणात्तस्कराऽऽदेः निर्दिष्ट-स्यानुग्रहाऽऽदयो दृश्यन्ते,ते तस्य स्वकीयश्रवणेन्द्रियमनःपुण्य-पापाऽऽदिकात्कारणादेव मन्तव्याः; न त्विष्टानिष्टवचनोक्तिमात्राद्, अन्यथा श्रोत्राऽऽदिकरणविकलानां स्थाण्वादीनामपि तद्-दुक्तिमात्रात्ते भवेयुरिति ॥ १५१८ ॥

वक्तृधर्मत्वमेव वचनस्य हेत्वन्तरोक्तेः समर्थयन्नाह-

सरनामोदयजाणियं, वयणं देहो व वत्थुपज्जाओ ।
तं नाभिधेयधम्मो, जुत्तमभावाभिहाणाओ ॥१५१९॥

'वक्तृपर्यायो वचनम्' इति प्रतिज्ञा, स्वरूपनामकर्मोदय-जन्यत्वात्, इह यन्नामकर्मोदयजन्यं तत्तस्यैव वक्तुर्देववदृत्ता-ऽऽदेः पर्यायः, यथा तस्यैव देहः, नामकर्मोदयजन्यं च व-चनं, तस्मात्तस्यैव वक्तुः पर्यायः । तत्तस्मान्न वचनमभिधे-यधर्मो युक्तम, किं त्वभिधातुरेव । उपचयमाह-अभाव-स्यापि वचनेनाभिधानात् । इदमुक्तं भवति-अभावोऽपि हि वचनेनाभिधीयते, न च वचनं तद्धर्म्म इति वक्तुं शक्यते, अभावस्यासत्त्वात्, यदि च वचनं तद्धर्म्मः स्यात्, तदा सोऽपि भावः स्याद्, वचनाऽऽश्रयत्वात्, देवदत्ताऽऽदिवदिति ॥१५१९॥

यस्यापि च घटाऽऽदिशब्दाभिधेयस्य घटाऽऽदेर्विश्व वचनं, तत्प्रत्ययकारणत्वाद्धर्म्मत्वेनाभ्युपगम्यते, तत्रापि पृच्छ्यते । किम् ?, इत्याह-

भावम्मि वि संबद्धं, तमसंबद्धं व तं पगासेज्जा ।
जइ संबद्धं तिहुयण-वादि त्ति तयं पगासेउ ॥१५२०॥

भावेऽपि घटाऽऽदिके वचनाभिधेये पृच्छामो भवन्तम्-तद्वचनं तत्र भावे किं संबद्धं सत्तं भावं प्रकाशयति, आहोस्विदसंबद्ध-म् ?, इति । यदि संबद्धं, तर्हि "चउहिं समएहिं लोगो, भा-सए निरंतरं तु होइ फुसो।" (३७६) इत्यादिवचनात् त्रिभुव-नव्यापित्वात्तद्गतं समस्तमपि पदार्थजातं प्रकाशयतु, संबद्ध-त्वाविशेषादिति ॥ १५२० ॥

अथासंबद्धं प्रकाशयति, तत्राऽऽह-

निव्विन्नाणत्तणओ, नासंबद्धं तयं पईवो व्व ।
भासयइ असंबद्धं, अह तो सव्वं पगासेउ ॥१५२१॥

नासंबद्धं तत्पदार्थान् प्रभासयति। कुतः ?, इत्याह-निर्विज्ञा-नत्वात्, विज्ञानादन्यत्वे सत्यसंबन्धत्वादिति भावः। अयं च हेतुः । प्रदीपवदिति दृष्टान्तः । विज्ञानमसंबद्धमपि वस्तु प्रकाशयति, न च वचनं विज्ञानरूपम्, अतो नासंबद्धमर्थं प्र-काशयति, प्रदीपवद् । अथासंबद्धमपि तद्वस्तु प्रकाशयति, तर्हि सर्वमपि प्रकाशयतु, असंबद्धत्वाविशेषात् । तस्माद्वा-क्यप्रत्ययकारणत्वेन तद्धर्म्मो वचनमिति ॥ १५२१ ॥

आह-ननूक्तं वचनमर्थादात्मलाभं भजते, प्रदीपवद्, अतः कथमिदं वक्तुरेवेष्यते ?, इत्याह-

जइ वि वयणिज्ज वत्ता, वज्झऽब्भंतरनिमित्तसामण्णं ।
वत्ता तह वि पहाणो, निमित्तमब्भंतरं जं सो ।१५२२।

इह यद्यपि वचनीयं वक्ता च यथासंख्यं बाह्यमभ्यन्तरं च वचनस्य सामान्यं निमित्तं कारणम, तथाऽपि वक्ता प्रधानः । कुतः ?, इत्याह-यद्यस्माद्बन्तरङ्गं प्रत्यासन्नं निमित्तमसौ । तस्मा-द्वचनस्य वक्तृधर्मत्वात्, यदेव वक्तुर्लिङ्गं तदेव सामायिकस्य ऋजुसूत्रनयमतेन लिङ्गमिति स्थितम् ॥ १५२२ ॥

"उभयसरिच्छं च सद्दस्स ।" (१५०५) इत्येतद्व्याख्या-स्यासुराह-

सद्दो समाणलिंगं, निद्देसं जणइ विसरिसमवत्थुं ।
जवउत्तो निद्दिट्ठा, निद्दिस्साओ जओऽणण्णो ॥१५२३॥

शब्दप्रधानो नयः शब्दो निर्देशं वचनमिच्छति। किंविशिष्टम् ?, इत्याह-समानलिङ्गं निर्देश्यनिर्देशकयोस्तुल्यमेव लिङ्गमसाधि-कृतीत्यर्थः । विसदृशं त्वसमानलिङ्गं निर्देशमघटमानकत्वा-दवस्तुत्वेनैव मन्यते । कुतः ?, इत्याह-उपयुक्तः निर्देश्येऽर्थे-ऽर्पितान्तःकरणो निर्देष्टा यद् यस्मान्निर्देश्यादनन्योऽभिन्नः । इदमुक्तं भवति-वक्तुर्लिङ्गवतोऽपि पुमांसमभिदधतः पुंनि-र्देश एव, स्त्रियं प्रतिपादयतः स्त्रीनिर्देश एव, नपुंसकं निर्दिशतो नपुंसकनिर्देश एव, वाच्ये उपयुक्तस्य वक्तुर्वाच्यत्वादभिन्नत्वा-दिति ॥ १५२३ ॥

तथा चाऽऽह-

थीं निद्दिसइ जइ पुमं, थी चेव तओ जओ तदुवउत्तो ।
थीविण्णाणाणण्णो, निद्दिट्ठसमाणलिंगो त्ति ॥१५२४॥

स्त्र्यादेः समानलिङ्गं स्त्र्यादिकं निर्दिशतः स्त्र्यादिनिर्देश इति तावत्किल प्रतीतमेव। यद्यपि च पुमान् कर्ता स्त्रियं कर्मताऽऽपन्नां निर्दिशति। यथा-वासवदत्ते ! इदमित्थं विधेहीति,तदपि तको-ऽसौ निर्देष्टा पुरुषः स्त्र्येव भवति। कुतः ?, इत्याह-यतो यस्मा-त्तदुपयुक्तः स्त्र्युपयुक्तः स्त्रीविज्ञानाद्वासवदत्ताऽध्यवसायादन-न्योऽभिन्नः सन्निर्दिष्टया स्त्रिया समानलिङ्गः पुरुषो भवति । ततश्च यदा पुरुषो नपुंसकमभिधत्ते, तदाऽपि निर्दिष्टसमानलि-ङ्गत्वान्नपुंसकमेवाऽसौ । एवं स्त्रियां नपुंसके च निर्देष्टरि निर्दि-ष्टसमानलिङ्गता योजनीयेति ॥ १५२४ ॥

ननु कथं स्त्रीविज्ञानादनन्यः स पुरुषोऽपि स्त्र्येव भवति, न पुरुषोऽपि स्यात् ?, इत्याह-

जइ स पुमं तो नत्थी, अह थी न पुमं न वा तदुवउत्तो ।
जो थीविण्णाणमओ,नो थी सो सव्वहा नत्थि ॥१५२५॥

यदि स निर्देष्टा पुमान्,ततो न स्त्री-न स्त्र्यात्मकः स्त्र्युपयोगवा-नित्यर्थः। अथासौ स्त्र्युपयोगोपयुक्तत्वात् स्त्रीत्यभ्युपगम्यते, त-र्हि न पुमान्-न पुंस्त्वेनायमेष्टव्यः,किं तु स्त्र्युपयोगोपयुक्तत्वात् स्त्र्येवासौ मन्तव्य इत्यर्थः। अथ नैवं,तर्हि नवा न स्त्र्यात्मकः,त-

पुंसकः स्त्र्युपयुक्तः,तदुपयुक्तस्य सर्वथैव पुंस्त्वविरोधात् । किं बहुना ?, यः स्त्रीविज्ञानमयः स्त्र्युपयोगोपयुक्तोऽपि न स्त्री, किं तु पुमान्नपुंसकं वा, स एवम्भूतः पदार्थः सर्वथा नास्ति-असन्नेव, खरविषाणवदिति ॥ १५२५ ॥

अथानुपयुक्तः स्त्रियं भावयमाणोऽपि पुरुषो भविष्यति, इत्याशङ्क्याऽऽह-

जासइ वाऽणुवउत्तो, जइ अन्नाणी तओ न तव्वयणं ।
निद्देसो जेण मयं, निच्छियदेसो त्ति निद्देसो ॥१५२६॥

यदि वा उच्यते भवता-अनुपयुक्तोऽसौ पुरुषः स्त्रियं जानते-ऽतो न स्त्रीरूपतां प्रतिपद्यते । तदयुक्तम् , यत एवं सति तकोऽज्ञानानुपयुक्तभावकोऽज्ञानी, उपयोगशून्यत्वात्, घटाऽऽदिवत्, ततश्च न तद्वचनं निर्देशः,उपयोगपूर्वकत्वाभावात्,उन्मत्ताऽऽदिवचनवत् । कुतः ?, इत्याह-येनैतन्मतं सम्मतं विपश्चिताम् । किम् ?, इत्याह-उपयोगपूर्वकतया निश्चित्य देशनं ज्ञापणं देशो निर्देशः । अथवा-निश्चितो देशो भावणं यत्रासौ निर्देशो भण्यते । न च निरुपयोगभावकस्यैवं सम्भवतीति ॥१५२६॥

एतदेव भावयति-

सो जइ नाणुवउत्तो-ऽणुवउत्तो वा न नाम निद्देसो ।
निद्देसोऽणुवउत्तो, य वेइ सद्दो न तं वत्थुं ॥१५२७॥

हन्त ! स यदि निश्चितदेशो निर्देशोऽभ्युपगम्यते,तर्हि तद्ज्ञानदेवदत्ताऽऽदिनोऽनुपयुक्तो युज्यते । अथानुपयुक्तोऽसौ,तर्हि न तस्य निर्देशः, निश्चितज्ञानपूर्वकत्वात्तस्य । किं बहुना ?,निर्देशः, अनुपयुक्तश्च तद्ज्ञानित्येवंभूतं यन्मतं तच्छब्दनयोऽवस्त्वेव ब्रूते,विरुद्धत्वात्,अचेतन आत्मा,अश्रावणः शब्दः,इत्यादिवदिति ॥१५२७॥

अथोपसंहरन्नाह-

तम्हा जं जं निद्दि-स्सइ तदुवउत्तो स तम्मओ होइ ।
वत्ता वयणिज्जाओ,अणण्णो त्ति समाणलिंगो सो ।१५२८।

तस्मादेतच्छब्दनयमतस्य तात्पर्यम्, यः पुरुषाऽऽदिर्वक्ता यं यं स्त्र्यादिकमर्थं तदुपयुक्तः स्त्र्याद्युपयुक्तो निर्देशति वक्ति, स तन्मयो वाच्यार्थाऽऽत्मको भवति । कुतः ?, इत्याह-वक्ता वाक्योपयुक्तो वचनीयादनन्य एव भवतीति कृत्वा । ततो वक्तृवचनीयसमानलिङ्गोऽयमस्य निर्देश इति स्थितम् ॥१५२८॥

प्रकृतमुपदर्शयन्नाह-

सामाइओवउत्तो, जीवो सामाइयं सयं चेव ।
निद्दिसइ जओ सव्वो, समाणलिंगो स तेणेव ॥१५२९॥

इह प्रस्तुते सामायिके निर्देश्य उपयुक्तो निर्देष्टा जीवः सामायिकमेव, भवतीति ज्ञेयः । ततश्चाऽसौ सामायिकं निर्दिशन् स्वकमेवाऽऽत्मानमेव निर्दिशति । कुतः ?, इत्याह-यतो यस्मात्स्त्रीपुंनपुंसकरूपः सर्वोऽप्यसौ निर्देष्टा तदुपयुक्तत्वात् तेनैव निर्देश्येन सामायिकेन समानलिङ्गो भवति, सामायिकार्थस्य रूढितो नपुंसकत्वात्, स्त्रियाः, पुंसो,नपुंसकस्य वा सामायिकमभिदधानस्य नपुंसकलिङ्गनिर्देश एव भवतीति । आह-यदि पुनर्नाम्नस्त्रैविध्यान्निर्देश्यनिर्देशकोभयवशतोऽपि निर्देशः स्यात् तर्हि को दोषः ?। तथाहि-द्विविधो भावोऽर्थस्य विज्ञानं, परिणतिश्च, भावनिक्षायिणश्च शुद्धनयाः । तत्र यदा पुमानुपयुक्तः सामायिकं नपुंसकमाह, तदा वक्तुर्नपुंसकविज्ञानानन्यत्वान्नपुंसकनिर्देशोऽस्तु, निर्देष्टुश्च मुखरोमाऽऽदिरूपपुरुषपरिणतिमयत्वात् पुंनिर्देशोऽपि भवत्विति । अत्रोच्यते-भावस्य द्वैविध्ये सत्यपि वस्तुनो विज्ञानमेवेहोपयोगरूपमधिक्रियते, न पुनस्तत्परिणतिः, विज्ञानरूपस्यैवेह निर्देशस्याभिप्रेतत्वात् । आह-ननु शब्दोऽपि पुद्गलद्रव्यरूपो, निर्देश्यत इति कृत्वा निर्देश एवोच्यते, तत्किमिति तदुपयोगरूप एव निर्देशोऽधिक्रियते । नैतदेवं, शब्दस्य द्रव्यमात्रत्वात् , ज्ञानलक्षणभावग्राहिणश्च शब्दनयाः । अत एव पुरुषपरिणतेः सत्यपि भावत्वे न तस्या इह ग्रहणम्, किं तु विज्ञानरूप एवात्र निर्देशो गृह्यते । तत्रैतदस्यात् , शब्दप्रधान एव हि शब्दनयः, तत्कथमिह शब्दरूपो निर्देशो नेष्यते ?। तदयुक्तम्, भावार्थापरिज्ञानात्। शब्दनयो हि शब्दादेवार्थज्ञानमभ्युपगच्छति, तद्भावभावित्वात्तस्य । एवं च सति शब्दस्य ज्ञानकारणत्वात्, कारणस्य च द्रव्यत्वात्, द्रव्यस्य च ज्ञानशून्यत्वात्, शब्दनयस्य च भावग्राहित्वाद् न शब्दमात्रप्रधानता युक्तेति । अत्रापरस्त्वाह-ननु यदुपयुक्तो वक्ता यमर्थमाह, तद्वशान्निर्देश इष्यते, ततो निर्देश्यवशान्निर्देश इति प्राप्तम्, एवं च सति संग्रहव्यवहारयोः शब्दनयस्य च को विशेषः ?। अत्रोच्यते-संग्रहव्यवहारयोरुपयुक्तस्यानुपयुक्तस्य वा यत्किञ्चिदात्मनिरपेक्षोऽभिधेयमात्रवशाच्छब्दमात्रमेव निर्देशः, इह तु बाह्यवस्तुप्रत्ययमात्रमुररीकृत्य य उपयोगस्तस्मादनन्यत्वादभिधातुर्जीवस्योपयोगरूपं स्वरूपमेव निर्देशोऽङ्गीक्रियते । आह-यद्येवम्, ऋजुसूत्रादस्य को विशेषः, तस्याऽपि हि निर्देशकवशाद् निर्देशः, स एवेहाप्यापन्नः ?। अत्राप्युच्यते-ऋजुसूत्राभिप्रायेणाऽनुपयुक्तस्याऽपि वक्तुः शब्दमात्रं निर्देशः, अत्र तु वाच्योपयोग एव निर्देश इति विशेषः, इत्यलं प्रसङ्गेनेति ॥ १५२९ ॥

तदेवं नयमतान्यभिधाय सम्यग्मिथ्याविभागमाह-

इह सव्वनयमयाइं, परित्तविसयाइँ समुदियाइं तु ।
जइ णं वज्जऽन्नंतर-निद्देसनिमित्तसंगाही ॥ १५३० ॥

इत्येवमुक्तप्रकारेण सर्वाण्यपि नैगमाऽऽदिनयमतानि परीत्तविषयाण्यन्योन्यनिरपेक्षतया एकैकांशग्राहीणि, अतो मिथ्यारूपत्वात् तान्यप्रमाणमिति भावः । समुदितानि पुनस्तान्येवाऽन्योन्यसापेक्षतया संपूर्णवस्तुग्राहित्वाज्जैनं मतं भवति । कथम्भूतं जैनं मतम् ?, इत्याह-(वज्जेत्यादि) बाह्याऽऽभ्यन्तराणि निर्देशस्य वचनस्य शब्दस्य निमित्तानि संग्रहीतुमभ्युपगन्तुं शीलं यस्य तद् बाह्याऽऽभ्यन्तरनिर्देशनिमित्तसंग्राहि । तत्र बाह्यान्यभिधेयघटपटशकटाऽऽदीनि, आभ्यन्तराणि तु स्वरनामकर्मोदयताल्वादिकरणप्रयत्नादीनि निर्देशस्य निमित्तानि रूढत्वानि । समस्ततत्सामग्रीजन्यनिर्देशाभ्युपगमपरत्वेन सम्यग्रूपत्वाज्जैनं मतं प्रमाणमितीह भावार्थः । आह-बाह्यो घटाऽऽदिरर्थः शब्दस्य कथं निमित्तम्, संबन्धाभावात् ? । तदयुक्तं, शब्दार्थयोर्वाच्यवाचकसंबन्धस्य विद्यमानत्वात् । यद्यथस्य शब्दो वाचकः, तद्गृहीतसंकेतस्यापि श्रेत्रुच्चाऽऽदेरसावर्थं प्रतिपादयेदिति चेत् । नैवम्, कर्मक्षयोपशमसव्यपेक्षस्यैव तस्य तत्प्रतिपादकत्वात्, क्षयोपशमस्य च सङ्केताऽऽदिसापेक्षत्वात् । न हि प्रदीपः प्रकाशक इत्येतावन्मात्रेणैवान्धाऽऽदीनामप्यर्थं प्रकाशयति । ननु यदि क्षयोपशमापेक्षः शब्दोऽर्थं प्रकाशयति, तर्हि संकेतकरणेऽपि तदप्रकाशनप्रसङ्गः, न चैतदस्ति, गृहीतसङ्केतानामविज्ञानेनार्थप्रतिपत्तिदर्शनात्, ततः किमन्तर्गडुकल्पक्षयोपशमकल्पनेन ?, तदयुक्तम्,तथाहि-केषा-

क्षिप्रग्रहणमतीनां शास्त्रव्याख्यानाऽऽदौ विषमपदवाक्येषु विशिष्टक्रयोपशमानावात्संकेतोऽपि कर्तुं न शक्यते, अन्ये तु तत्करणेऽपि नार्थं प्रतिपद्यन्ते । यद्यपि केषाञ्चिदपूर्वश्लेच्छभाषाऽऽदिश्रवणेऽकृतसंकेतानामपि क्रमिरत्येव कथमप्यर्थप्रतिपत्तिर्दृश्यते, तथापि क्रयोपशमस्यैवातिपटुत्वं हेतुः । तस्मात्स्वकर्मक्रयोपशमाऽऽदिसामग्रीसव्यपेक्षः शब्दो वाचकः, अर्थस्तु वाच्यः, इति शब्दार्थयोर्वाच्यवाचकभावलक्षणः संबन्ध इति । तदेवं व्याख्याता " दुविहं पि नेगमओ । " (१५०५) इत्यादि गाथा, तद्व्याख्याने च व्याख्यातमुपोद्घातनिर्युक्तिद्वारगाथाद्वयस्य द्वितीयं द्वारम् ॥ १५३० ॥ विशे० । आ० म० । निर्देशनं निर्देशः । कर्माऽऽदिकारकशक्तिनिरूपणाधिकस्य शिक्षार्थमात्रस्य प्रतिपादने, "णिद्देसे पढमा होइ ।" निर्देशे प्रथमा विभक्तिर्भवति । यथा-स वा अयं वाऽऽस्ते, अहं वा आसे । स्था० ८ ठा० । अनु० । प्रश्निते कार्ये नियतार्थे, उत्तरे, न० ३ श्रु० १ उ० । निर्देशो हि प्रथमतः कायप्रयोगेण भाषाद्रव्यादाय पश्चाद्वाक्यपर्याप्तिकरणप्रयोगतो विधीयते । ज्यो० १ पाहु० । हेतुदृष्टान्तोपदर्शनेन स्पष्टतरीकरणे, नं० । उत्सर्गापवादाभ्यां प्रतिपादने, उत्त० १ अ० ।

णिद्देसदोस-निर्देशदोष-पुं० । उचितनिर्देशाकरणरूपे सूत्रदोषे, अनु० । स च यत्र निर्दिष्टपदानामेकवाक्यता न क्रियते, यथेह देवदत्तः स्थाल्यामोदनं पचतीत्यभिधातव्ये पचतीति शब्दं नाभिधत्ते । अनु० । विशे० । निर्देशदोषो नाम यत्र वस्तुपर्यायवाचिनः पदार्थस्यार्थान्तरपरिकल्पनाऽऽश्रयणम् । यथा-द्रव्यपर्यायवाचिनां सत्ताऽऽदीनां द्रव्यादर्थान्तरपरिकल्पनमुलूकस्य । आ० म० १ अ० २ खण्ड ।

णिद्देसवत्ति [णि]-निर्देशवर्तिन्-त्रि० । आज्ञावर्तिनि, " णिद्देसवत्ती पुण जे गुरूणं । " दश० ९ अ० २ उ० ।

णिद्दोत्थ-निर्दौस्थ्य-न० । निर्भये, व्य० ४ उ० । स्वस्थे, व्य० ७ उ० ।

णिद्दोस-निर्दोष-त्रि० । निरवद्ये, पञ्चा० ७ विव० । "अलियमुवघायजाणियं । " इत्यादिद्वात्रिंशत्सूत्रदोषरहिते, स्था० ७ ठा० । आ० म० । अनु० । हिंसाऽऽदिदोषरहिते, अनु० । समस्तोक्तानुक्तदोषविप्रमुक्ते, विशे० । दोषस्याभावे, व्य० १ उ० । अप्रायश्चित्ते, नि० चू० १ उ० । (व्याख्या ' सुद्ध ' शब्दे वक्ष्यते)

णिद्ध-स्निग्ध-पुं० । संयोगे सति संयोगिनां बन्धकारणे रसभेदे, " एगे णिद्धे । " स्था० १ ठा० । पुद्गलद्रव्याणां मिथः संयुज्यमानानां बन्धनिबन्धने तैलाऽऽदिस्थिते रसे, अनु० । कर्म० । आचा० । सस्नेहे, त्रि० । ज्ञा० १ श्रु० ८ अ० । आव० । स० । " डाहं ओसढं रसियं मणुण्णं णिद्धं लुक्खं । " आचा० २ श्रु० १ चू० १ अ० ५ उ० । रात्रिभोजनाद्यङ्गसूत्रयोर्यद् गृहाऽऽदिकं तैलवर्जितमद्यं भवति तदेव स्निग्धमुच्यते । बृ० ५ उ० । अरूक्षे, कल्प० २ क्षण । जीव० । औ० । प्रज्ञा० । जं० । कान्ते, प्रश्न० ४ आश्र० द्वार । तं० । औ० । "णिद्धतेया ।" स्निग्धं मनोहरं तेजो यासां ताः स्निग्धतेजसः । जी० ३ प्रति० ४ उ० । "णिद्धपाणिलेहा ।" वनखण्डाऽपेक्षया स्निग्धा पाणौ रेखा यासां ताः जी० ३ प्रति० ४ उ० । प्रश्न० । जी० ।

णिद्धअ-देशी-अविभिन्नगृहे, दे० ना० ४ वर्ग ३८ गाथा ।

णिद्धंत-निर्ध्मात-त्रि० । नितरामग्निसंयोगेन यद् ध्मातं विशोधितम् । जी० ३ प्रति० ४ उ० । औ० । दग्धमले, औ० । तं० । प्रश्न० ।

णिद्धंधस-निर्धन्धस-पुं० । प्रवचनोपघातनिरपेक्षे, आव० ३ अ० । निर्दये, दे० ना० ४ वर्ग ३७ गाथा ।

णिद्धच्छवि-स्निग्धच्छवि-स्त्री० । स्निग्धा च कान्तिमती च विस्त्वक् । कान्तत्वचि, " सुवण्णवण्णे सुकुमारया य, णिद्धच्छवी । " बृ० ३ उ० ।

णिद्धण-निर्धन-त्रि० । "सर्वत्र ऌवरामचण्डे" ॥८।२।७६॥ इति रलोपः । " द्वितीयतुर्ययोरुपरि पूर्वः "॥८।२।९०॥ इति दकारागमः । प्रा० २ पाद । गोमहिष्यादिरहिते, विपा० १ श्रु० ३ अ० ।

णिद्धधण्णय-निर्धान्यक-त्रि० । धान्यकणविवर्जिते, तं० ।

णिद्धफासणाम[ण्]-स्निग्धस्पर्शनामन्-न० । स्पर्शनामभेदे, यदुदयाज्जन्तुशरीरं घृताऽऽदिवत् स्निग्धं भवति तत् । कर्म० १ कर्म० ।

णिद्धमण-निर्धमन-न० । क्काले, जलनिर्गममार्गे, स्था० ५ ठा० १ उ० । 'खाल' इति देशप्रसिद्धम् । तं० । "कुणालाए णिद्धमणमूले वसही वरिसायाढे देवयाणुकंपेणं न वरिसइ ।" आ० म० १ अ० २ खण्ड । ऋद्धिरससातगौरवैर्युक्तत्वेन मृत्वा यक्षत्वमुपागते आर्यमङ्गुवाचार्ये, आव० ४ अ० । गृहजलप्रवाहे, दे० ना० ४ वर्ग ३९ गाथा (आर्यमङ्गुकथा ' अज्जमंगु ' शब्दे प्रथमभागे २११ पृष्ठे गता)

णिद्धमाअ-देशी-अविभिन्नगृहे, दे० ना० ४ वर्ग ३८ गाथा ।

णिद्धम्म-निर्धर्म-त्रि० । निर्गतो धर्मात् श्रुतचारित्रलक्षणादिति निर्धर्मः । प्रश्न० १ आश्र० द्वार । धर्मादपक्रान्ते, प्रश्न० १ आश्र० द्वार । अविभिन्नगृहे, दे० ना० ४ वर्ग ३८ गाथा ।
निर्धर्मन्-त्रि० । निर्गतो धर्मो यस्य । असंयतीभूते, व्य० १० उ० । पार्श्वस्थाऽऽदिषु, नि० चू० १ उ० । एकमुखयायिनि, दे० ना० ४ वर्ग ३५ गाथा ।

णिद्धाडण-निर्धाटन-न० । निष्कालने, प्रश्न० १ आश्र० द्वार ।

णिद्धारण-निर्धारण-न० । निर् धृ-णिच्-ल्युट् । जातिगुणक्रियासंज्ञाभिः समुदायादेकदेशस्य पृथक्करणे, यथा " नराणां क्षत्रियः शूरः "इत्यादौ नररूपसमुदायात् क्षत्रियजातेरेकदेशस्य शूरत्वेन पृथक्करणम् । वाच० । आचा० ।

णिद्धुणे-निर्धूय-अव्य० । प्रस्फोट्येत्यर्थे, " अणिस्सिए सणिद्धुणे धुन्नमले । " दश० ७ अ० ।

णिद्धूम-निर्धूम-त्रि० । धूमरहिते, "णिद्धूमगं च गामं, महिलाणूनं च सुन्नयं दट्ठुं । " निर्धूमं ग्रामं दृष्ट्वा अतीव भिक्षाप्रस्तावइति ज्ञायते । आ० म० १ अ० २ खण्ड ।

णिद्धूमग-निर्धूमक-पुं० । अपलक्षणभेदे, यत्प्रभावतो राज्यमनुशासति रन्धनीयमेव न भवति । व्य० ३ उ० ।

णिद्धूय-निर्धूत-त्रि० । अपनीते, रा० ।

णिद्धूयजरढपंडुपत्त–निर्द्धूतजरठपाण्डुपत्र–त्रि० । निर्द्धूतानि अपनीतानि जरठानि पाण्डुपत्राणि येभ्यस्ते निर्द्धूतजरठपाण्डुपत्राः । जी० ३ प्रति० ४ उ० । अपगतपुराणपाण्डुपत्रेषु, औ० । " णिद्धूयजरढपंडुपत्ता । " निर्द्धूतान्यपनीतानि जरठानि पाण्डुपत्राणि येभ्यस्ते निर्द्धूतजरठपाण्डुपत्राः । किमुक्तं भवति ?–यानि वृक्षस्थानि जरठानि पाण्डुपत्राणि वातेन निर्धूय निर्धूय भूमौ पतितानि चूमेरपि च प्रायो निर्धूय निर्धूयान्यत्रापसारितानीति । रा० । जी० ।

णिद्धोजास–स्निग्धावभास–त्रि० । स्निग्धत्वेनावभासमाने, ज्ञा० १ श्रु० १ अ० । रा० ।

णिद्धोय–निर्द्धौत–त्रि० । नितरामपुनर्भावेन धौते, " वंदिय णिद्धोयसव्वकम्ममलं । " (१) नितरामपुनर्भावेन धौतः सम्यग्दर्शनज्ञानचारित्रतपःसलिलप्रभावेणापगमितः सर्व एव कर्मैवाष्टप्रकारं जीवमालिन्यहेतुत्वाद् मल इव मलो येन स निर्द्धौतसर्वकर्ममलः । कर्म० १ कर्म० ।

णिधत्त–निधत्त–न० । निधानं निहितं वा निधत्तम्, भावे कर्मणि वा क्तप्रत्यये निपातनाद्दुङ्धञेनार्थवर्जितानां शेषकरणानामयोग्यत्वेन कर्मणोऽवस्थाने, पूर्वबद्धस्य कर्मणस्तत्तत्संमीलितलोहशलाकासंबन्धसमाने करणे, " चउव्विहे णिधत्ते पण्णत्ते । तं जहा–पगइणिधत्ते, ठिइणिधत्ते, अणुभागणिधत्ते, पएसणिधत्ते । " स्था० ४ ठा० २ उ० । विशिष्टानां परस्परतः पुद्गलानां निचयं कृत्वा धारणं रूढिशब्दत्वेन निधत्तमुच्यते । भ० १ श० १ उ० । क० प्र० । पं० सं० ।

णिधत्ति–निधत्ति–पुं० । निधीयते उद्वर्त्तनाऽपवर्त्तनावर्जशेषकरणायोग्यत्वेन व्यवस्थाप्यते यया सा निधत्तिः । पृषोदरादित्वाच्छब्दरूपनिष्पत्तिः । पं० सं० ५ द्वार । निधत्तावस्थाकरणे, नि० चू० १३ उ० । (विस्तरेण ' णिकायणा ' शब्दे २०२० पृष्ठे प्रसङ्गान्निधत्तिरुक्ता)

णिधूय–निर्धूय–अव्य० । अपनीयेत्यर्थे, " णिधूय कम्मं ण पवं चुवेइ । " सूत्र० १ श्रु० ७ अ० ।

णिन्दित्तए–निन्दितुम्–अव्य० । निन्दितुमतिचारान् स्वस्मक्षं जुगुप्सितुमित्यर्थे, स्था० २ ठा० १ उ० ।

णिन्दू–निन्दू–स्त्री० । मृतप्रजायां स्त्रियाम्, निन्दू महेला यद् यदपत्यं प्रसूयते तन्म्रियते, एवं य आचार्यो यं यं प्रव्राजयति स स म्रियते अपगच्छति वा, ततः स निन्दूरिव निन्दूः । व्य० ३ उ० ।

णिपडिसामि [ण्]–निष्परिशाटिन्–त्रि० । परिशाटिरहिते, "णिप्पडिसामिमभुञ्जंतगायकयूमिकम्मंता । " बृ० २ उ० ।

णिपतंत–निपतत्–त्रि० । नीचैः पतति, प्रश्न० १ आश्र० द्वार ।

णिपरिग्गहरुइ–निष्परिग्रहरुचि–पुं० । निर्गता परिग्रहरुचिर्यस्य सः । परिग्रहविरते, प्रश्न० ५ संव० द्वार ।

णिपातिणी–निपातिनी–स्त्री० । अभिमुखपातिन्याम्, "सिलाहिं हम्मंति णिपातिणीहिं । " सूत्र० १ श्रु० ७ अ० ।

णिपीय–निपीत–त्रि० । नितरामास्वादिते, स्था० ।

विपश्चितां नाथ ! निपीततत्त्व–सुधोद्गतोद्गारपरम्परेयम् । [३५]

हे विपश्चितां नाथ ! संख्यावतां मुख्य ! इयमनन्तरोक्ता, निपीततत्त्वसुधोद्गतोद्गारपरम्परा, तवेति प्रकरणान्तरमर्यादया गम्यते । तत्त्वं यथाऽवस्थितवस्तुस्वरूपपरिच्छेदः, तदेव जरामरणापहारित्वाद्विबुधोपभोग्यत्वान्मिथ्यात्वाविषोर्मिनिराकरिष्णुत्वादान्तराऽऽह्लादकारित्वाच्च सुधा पीयूषं तत्त्वसुधा । नितरामनन्यसामान्यतया पीता आस्वादिता या तत्त्वसुधा, तस्या उद्गता प्रादुर्भूता तत्कारणिका उद्गारपरम्परा, उद्गारश्रेणिरित्येतदर्थः । यथाहि–कश्चिदाकण्ठं पीयूषरसमापीय तदनुविधायिनीमुद्गारपरम्परां मुञ्चति, तथा भगवानपि जरामरणापहारित्वामृतं स्वैरमास्वाद्य तदनुविधायिनीं प्रस्तुतानेकान्तवादभेदचतुष्पदीव्यञ्जनामुद्गारपरम्परां देशनां मुखेनोद्गीर्णवानित्याशयः । अथवा–वैरैकान्तवादिभिः मिथ्यात्वगरलभोजनमातृप्ति भक्षितं, तेषां तत्तद्वचनरूपा उद्गारप्रकाराः प्राक् प्रदर्शिताः । यैस्तु पञ्चेन्द्रियप्राचीनपुण्यप्राग्भारानुगृहीतैर्जगद्गुरुवदनेन्दुनिस्यन्दि तत्त्वामृतं मनोहृत्या पीतं तेषां विपश्चितां यथार्थवादविदुषां हे नाथ ! इयं पूर्वदलदर्शितोल्लेखशेखरा उद्गारपरम्परेति व्याख्येयम् । स्या० ३५ श्लोक ।

निपीय–अव्य० । नितरामास्वाद्येत्यर्थ, वाच० ।

णिप्पएस–निष्प्रदेश–पुं० । परमाणौ, विशे० ।

णिप्पंक–निष्पङ्क–त्रि० । आर्द्रमलरहिते, औ० । कर्दमविशेषरहिते, कलङ्कविकले च । स० । प्रज्ञा० । आ० म० । जी० । स्था० । रा० । जं० । "णिरया णिम्मला णिप्पंका । " प्रज्ञा० २ पद ।

णिप्पंद–निष्पन्द–त्रि० । किञ्चिच्चलनेनापि रहिते, उपा० ७ अ० ।

णिप्पकंप–निष्प्रकम्प–त्रि० । स्वरूपतोऽपीषद् व्यभिचारलक्षणकम्पाभावात् (स० २ अङ्ग) अतीव निश्चले, आव० ४ अ० ।

णिप्पच्चक्खाणपोसहोववास–निष्प्रत्याख्यानपौषधोपवास–त्रि० । प्रत्याख्यानपरिणामपर्वदिवसोपवासपरिणामाभावात् (रा०) अविद्यमानपौरुष्यादिप्रत्याख्याने, असत्पर्वदिनोपवासे, दश० ६ अ० । असत्पौरुष्यादिनियमे, अविद्यमानाष्टम्यादिपर्वोपवासे, भ० ७ श० ६ उ० । स्था० ।

णिप्पच्चवाय–निष्प्रत्यवाय–त्रि० । प्रत्यवाय (मार्गोपद्रव) रहिते, " अणक्कंतेण णिप्पच्चवाएण गंतव्वं । " नि० चू० १ उ० ।

णिप्पट्ठ–देशी–अधिके, दे० ना० ४ वर्ग ३१ गाथा ।

णिप्पट्ठपसिणवागरण–निःस्पृष्टप्रश्नव्याकरण–त्रि० । निर्गतानि स्पृष्टानि प्रश्नव्याकरणानि यस्य स तथा । निरुत्तरीकृते, भ० १५ श० ।

निःस्पृष्टप्रश्नव्याकरण–त्रि० । निरस्तानि स्पृष्टानि व्यक्तानि (व्याकरणानि) प्रश्नव्याकरणानि यस्य स निःस्पृष्टप्रश्नव्याकरणः । निरुत्तरीकृते, " अट्ठेहि य हेऊहि य पसिणेहि य वागरणेहि य कारणेहि य णिप्पट्ठपसिणवागरणं करेह । " भ० १५ श० ।

णिप्पडिकम्मया–निष्प्रतिकर्मता–स्त्री० । शरीरस्य प्रतिकर्माऽकरणे, आ० क० ।

निष्प्रतिकर्मद्वारे वैधर्म्योदाहरणगाथामाह–

पडिमाणे नागवसू, नागसिरी नागदत्त पव्वज्जा ।
एगविहारुट्ठाणे, देवय साहू अ विल्लसिरं ॥ १ ॥

अर्थः कथातो ज्ञेयः-
"आसीत्प्रतिष्ठानपुरे, श्रेष्ठी नागवसुः पुरा ।
नागश्रीः श्रेष्ठिनी तस्य, नागदत्तस्तु तत्सुतः ॥ १ ॥
निर्विण्णकामभोगः सन्, व्रतमादत्त सोऽन्यदा ।
जिनकल्पिकसत्कारं, दृष्ट्वाऽवादीद् गुरूनिदम् ॥ २ ॥
जिनकल्पं करिष्येऽहं-मप्याचार्यैर्निवारितः ।
स्वयं स्वीकृत्य तं चक्रे, प्रतिमां व्यन्तरौकसि ॥ ३ ॥
सम्यग्दृशा देवतया, मा विनश्यत्वसाविति ।
स्त्रीरूपेणोपहाराऽऽद्यं, गृहीत्वाऽऽगत्य तत्र सा ॥ ४ ॥
अर्चित्वा व्यन्तरं स्माऽऽह, गृहाण क्षपकोद्धृतम् ।
भक्ष्यभोज्यं गृहीत्वा तत्, स्वादित्वा प्रतिमां स्थितः ॥ ५ ॥
अतीसारोऽस्य संजातो, देवताऽऽख्यद् गुरोरिदम् ।
साधून् प्रेष्याऽऽनयत्तं स, देवताऽकथयत्पुनः ॥ ६ ॥
दत्ता बिल्वगिरं दत्तं, स्वस्थोऽभूच्चिन्तितस्ततः ।
पुनरेतन्न कर्तव्यं, गता निष्प्रतिकर्मता " ॥ ७ ॥ आ० क० । स० । आचा० ।

णिप्पमियार-निष्प्रतीकार-त्रि० । अचिकित्स्ये, प्रश्न०४ सम्व० द्वार ।

णिप्पमिवक्ख-निष्प्रतिपक्ष-त्रि० । बाधकरहिते, स्था० ।

णिप्पन्न-निष्पन्न-त्रि० । सिद्धे, पञ्चा० ८ विव० ।

णिप्पन्नजोग-निष्पन्नयोग-पुं० । योगिविशेषे, षो० ।
तल्लिङ्गं चेदम-
" क्षोभस्यागः परमा च तृप्ति-
रौचित्ययोगः समता च गुर्वी ।
वैराऽऽदिनाशोऽथ शतम्भरा धी-
र्निष्पन्नयोगस्य तु चिह्नमेतत् ॥ १ ॥ " षो० १३ विव० ।

णिप्पन्नमेइणीय-निष्पन्नमेदनीक-पुं० । निष्पन्ना, कोऽर्थः?-निष्पन्नसर्वशस्या मेदिनी यत्र स तथा । शस्यनिष्पत्तिकाले, "णिप्पन्नमेइणीयंसि कालंसि य मुइयपक्कीलिएसु जणवएसु ।" कल्प० ४ क्षण ।

णिप्पत्त-निष्पत्र-त्रि० । स्वभावतः पत्ररहिते, व्य० १ उ० ।

णिप्पत्ति-निष्पत्ति-स्त्री० । निष्पादने, व्य० १ उ० । सिद्धौ, स्था० ६ ठा० । विशे० । गच्छवासे गुणोऽयमपि-"णिप्पत्तिसंताणो ।" निष्पत्तिः सद्गुणत्वेन शिष्यसंसिद्धिः फलसन्तानसाधनसमर्थधान्यनिष्पत्तितुल्या;ततः सन्तानः शिष्यप्रशिष्याऽऽदिवंशः संसारगर्तगताङ्गिवर्गस्य निर्गमनसोपानपरम्परारूपः । पञ्चा० १८ विव० ।

णिप्पन्न-निष्पन्न-पुं० । प्रभारहिते, "देवे चइस्सामीति जाणइ विमाणाभरणाइं णिप्पभाइं पासित्ता ।" विमानाऽऽभरणानां निष्प्रभत्वमौत्पातिकं तच्चतुर्विभ्रमरूपं वा । स्था० ३ ठा० ३ उ० ।

णिप्परिग्गह-निष्परिग्रह-त्रि० । बाह्याऽऽभ्यन्तरपरिग्रहरहिते, बृह० १४ उ० । क्वचिदविद्यमानस्वीकारे, बृह० १४ अ० ।

णिप्पलाय-निष्पलाक-पुं० । भरते वर्षे भविष्यति चतुर्दशे तीर्थंकरे, स० । ती० ।

णिप्पाण-निष्प्राण-त्रि० । उच्छ्वासाऽऽदिरहिते, ज्ञा० १ श्रु० २ अ० ।

णिप्पाव-निष्पाव-पुं० । धान्ये धान्यभेदे, " णिप्पावाई धण्णा, गंधे वाइगपलंकुलसुणाऽऽई । " इति धान्येषु निष्पावः पुलाकधान्यम् । बृ० ५ उ० । जं० । ध० । स्था० । ज० । दश० । आचा० । सत्रिभागकाकण्या त्रिभागोनगुञ्जाद्वयेन वा निवृत्ते प्रतिमाने, अनु० ।

निष्पाप-त्रि० । पापरहिते, वाच० ।

णिप्पिवास-निष्पिपास-त्रि० । पिपासायास्तृष्णाया निर्गतो निष्पिपासः । निस्पृहे, उत्त० १६ अ० । निराकाङ्क्षे, प्रश्न० २ आश्र० द्वार । निःस्नेहे, प्रश्न० १ आश्र० द्वार ।

णिप्पिह-निःस्पृह-त्रि० । इच्छारहिते, प्रा० २ पाद । समस्तपरभावाभिलाषरहिते, अष्ट० ११ अष्ट० ।

णिप्पीलण-निष्पीडन-न० । निश्चयेन पीडने, आचा० १ श्रु० ४ अ० ४ उ० ।

णिप्पुंसण-निष्पुंसन-न० । " क-ग-ट-ड-त-द-प-श-ष-स-ऽक्ऽपामूर्ध्वं लुक् " ॥ ८ । २ । ७७ ॥ इति पलुक् । "अनादौ शेषाऽऽदेशयोः द्वित्वम्" ॥ ८ । २ । ८९ ॥ नो णः । स्फोटने, प्रा० २ पाद ।

णिप्पुरिसणाडग-निष्पुरुषनाटक-न० । निर्गता रहिताः पुरुषा यस्मिन्नाटके तन्निष्पुरुषनाटकम् । केवलस्त्रीपात्रमये नाटके, सङ्घा० १ अधि० १ प्रस्ता० ।

णिप्पुलाय-निष्पुलाक-पुं० । आगमिष्यन्त्यामुत्सर्पिण्यां भरते वर्षे भविष्यति बलदेवजीवे चतुर्दशे तीर्थंकरे, ती० २० कल्प । प्रव० । स० । ति० ।

णिप्फंद-निष्पन्द-त्रि० । ष० स० । " ष्प-स्पयोः फः " ॥ ८ । २ । ५३ ॥ इति ष्पस्य फः । प्रा० २ पाद । हस्ताऽऽद्यवयवचलनरहिते, ज्ञा० १ श्रु० २ अ० । अन्त० । " उम्म खिच्चइ णिप्फंदा, णिसिणीपत्तम्मि रेहइ बलाआ ।" प्रा० २ पाद ।

णिप्फण्ण-निष्पन्न-त्रि० । परिनिष्ठिते, विशे० । " भयवया कहितं णिप्फण्णो । " आ० म० १ अ० २ खण्ड ।

णिप्फरिस-देशी-निर्दये, दे० ना ४ वर्ग ३७ गाथा ।

णिप्फाइक्कण-निष्पाद्य-अव्य० । निर्माप्येत्यर्थे, पञ्चा० ७ विव० ।

णिप्फाइय-निष्पादित-त्रि० । योग्यतामापादिते, आचा० १ श्रु० ८ अ० १ उ० । " ताहे तम्मि विवसे समयसहस्सेणं तत्तं णिप्फादितं चिंतेइ । " आ० म० २ अ० ।

णिप्फायण-निष्पादन-न० । करणे, आसेवने, आव० ४ अ० ।

णिप्फाव-निष्पाव-पुं० । "ष्पस्पयोः फः" ॥ ८ । २ । ५३ ॥ इति ष्पभागस्य फः । प्रा० २ पाद । वल्लनामके धान्यभेदे, जं० २ वक्ष० । णिप्फेडिय-निष्फेटित-त्रि० । निष्काशिते, आ० म० १ अ० २ खण्ड । निःसारिते, सूत्र० १ श्रु० २ अ० । अपहृते, स्था० ३ ठा० ४ उ० ।

णिप्फेस-निष्पेष-पुं० । " ष्पस्पयोः फः " ॥ ८ । २ । ५३ ॥ इति ष्पस्य फः । "द्वितीयतुर्ययोरुपरि पूर्वः" ॥ ८ । २ । ९० ॥ इति फस्योपरि पः । प्रा० २ पाद । संघर्षे, वाच० । शब्दनिर्गमे, दे० ना० ४ वर्ग २९ गाथा ।

णिबंध-निबन्ध-पुं० । नि-बन्ध-घञ् । कालविशेषे देयत्वेन प्रतिश्रुते वस्तुनि, " निबन्धो ऽत्र्यमेव " इति स्मृतिः । " अस्मासि-

यरो य पुत्तनेहेण अणुजाणंति, नेच्छइ निबंधे वि कए, कहं सुचिररक्खियं वयं भंजामि ?।" आव० ४ अ०।

णिबंधण–निबन्धन–न०। निबध्यतेऽनेनात्र वा ल्युट्। हेतौ, त्रा च०। विशे०। आलम्बने, विशे०। वीणादारुतन्त्रीनिबन्धनोर्ध्वभागे च। भावे ल्युट्। बन्धने, वाच०।

णिबंधणवियोग–निबन्धनवियोग–पुं०। निमित्तविरहे, द्वा० २५ द्वा०।

णिबद्ध–निबद्ध–त्रि०। निर्ग्रथिते, स० १ अङ्ग।

णिबोद्धिज्जमाण–निबोद्धयमान–त्रि०। निमज्जमाने, प्रश्न० ३ आश्र० द्वार।

णिब्बल–निर्बल–त्रि०। निर्गतं बलं सामर्थ्यं यस्येति निर्बलम्। निःसारे, आचा० १ श्रु० ५ अ० ४ उ०।

णिब्बलासय–निर्बलाशक–पुं०। निर्बलं निस्सारमन्तप्रान्ताऽऽदिकं यद् द्रव्यं, तदशकस्तद्भोजी। अभिग्रहविशेषेण वल्लचणकाऽऽदिमात्रभोजिनि, आचा० १ श्रु० ५ अ० ४ उ०।

णिब्बलिय–निर्बलित–त्रि०। शुद्धाशुद्धस्वरूपे, विशे०।

णिब्भंजण–निर्भञ्जन–न०। पक्वौदनीर्णदग्धघृते, ध० २ अधि०। प्रश्न०।

णिब्भग्ग–देशी–उद्याने, दे० ना० ४ वर्ग ३४ गाथा।

णिब्भच्छण–निर्भर्त्सन–न०। अरे दुष्टकर्मकारिन्नपसर दृष्टिमार्गादित्यादिरूपे (प्रश्न० २ आश्र० द्वार) आक्रोशविशेषे कटुकवचने, प्रश्न० ३ आश्र० द्वार। अङ्गुल्यादिना तर्जने, नि० चू० १ उ०।

णिब्भच्छणा–निर्भर्त्सना–स्त्री०। न त्वया मम प्रयोजनमित्यादिपरुषवचने, भ० १५ श०।

णिब्भय–निर्भय–त्रि०। इहलोकाऽऽदिसप्तभयविप्रमुक्ते, आव० ४ अ०। प्रश्न०। गतभीके, सूत्र० १ श्रु० ४ अ० १ उ०। आ० म०। अविद्यमानराजाऽऽदिभये, प्रश्न० ३ सम्व० द्वार। भयरहिते, यत्र भयं न विद्यते। "णिब्भयं जत्थ चोरभयं नत्थि"। नि० चू० १ उ०।

णिब्भयणा–निर्भजना–स्त्री०। निश्चिता भजना निर्भजना। निश्चिते भागे, औ०। "द्वितीयतुर्ययोरुपरि पूर्वः"॥ ८। २। ६०॥ इति नकारोपरि वः। प्रा० २ पाद।

णिब्भर–निर्भर–न०। निःशेषेण भरो भारोऽत्र। अतिमात्रे तद्युक्ते, त्रि०। वाच०। "मेघो य णिब्भरं वरिसइ।" आ० म० १ अ० २ खण्ड।

णिब्भिज्जमाण–निर्भिद्यमान–त्रि०। नितरामतिशयेन भिद्यमाने, जी० ३ प्रति० ४ उ०। जं०। प्रावल्याभावेनाधो विदार्यमाणे, "अह ते! कोट्ठपुडाण वा० जाव केतइपुडाण वा अणुवायंसि णिब्भिज्जमाणाणं णिब्भिज्जमाणाणं वा।" भ० १८ श० २ उ० जं०।

णिभ–निभ–त्रि०। सदृशे, जं० ३ वक्ष०। उत्त०। औ०।

णिब्भंग–निर्भङ्ग–पुं०। गात्राणां भञ्जने, प्रश्न० १ आश्र० द्वार।

णिभमेत्त–निर्भमात्र–न०। उदाहरणमात्रे, नि० चू० ७ उ०।

णिभाल–निभाल–धा०। दर्शने, चुरा०। "खंधावारनिवेसे निज्झालेहि।" आ० म० १ अ० २ खण्ड। आचा०।

णिमेक्खण–देशी–न०। गृहे, "सोमलच्छीनिभेक्खणं।" कल्प० ३ क्षण।

णिम–न्यस्–धा०। नि–अस्। स्थापने, "न्यसो णिमणुमौ" ॥ ८।४।१६६॥ इति न्यस्यतेर्णिमाऽऽदेशः। 'णिमइ।' न्यस्यति। प्रा० ४ पाद।

णिमंतणा–निमन्त्रणा–स्त्री०। विषयोपभोगं प्रति प्रार्थने, सूत्र० १ श्रु० ३ अ० २ उ०। भोगोपभोगं प्रति अभ्युपगमकरणे, सूत्र० १ श्रु० ३ अ० २ उ०। अनु०। आचा०। औ०। अगृहीतेनाशनाऽऽदिनाऽहं भवदर्थमशनाऽऽद्यानयामीत्येवं भूतायां (ध० २ अधि०) भक्तितः प्रार्थनायाम्, पञ्चा० १२ विव०। स्था०। जीत०। नि० चू०। ध०। भ०।

अथ निमन्त्रणायाः सामाचार्य्याः स्वरूपम्–

सज्झायाइव्वाओ, गुरुकिच्चे सेसगे असंतम्मि।
तं पुच्छिऊण कज्जे, सेसाण णिमंतणं कुज्जा ॥ ३७ ॥

(सज्झायाइव्वाओ त्ति) स्वाध्यायध्यानाऽऽदिकरणपरिश्रान्तः सन् गुरुकृत्ये रत्नाऽऽधिककार्ये विश्रामणावस्त्रपरिकर्म्माऽऽदौ, शेषके कृतावशेषे, असत्यविद्यमाने, किम् ?, अत आह–तं गुरुम्, पृष्ट्वा यदुताऽहं साधुनिमित्तं भक्ताऽऽद्यानयामीत्यापृच्छ्य, कार्ये भक्तपानकाऽऽदिप्रयोजने, तद्विषयमित्यर्थः। शेषाणां गुरुव्यतिरिक्तानाम्, निमन्त्रणमामन्त्रणं भवदर्थं भक्ताऽऽद्यानयामीत्येवंलक्षणम्, कुर्याद्विदध्यादिति गाथाऽर्थः ॥ ३८ ॥

किमित्येवं सदा व्यापृतेनैवाऽऽसितव्यमित्यत आह–

दुल्लहं खलु मणुयत्तं, जिणवयणं वीरियं च धम्मम्मि।
एयं लद्धूण सया, अपमाओ होइ कायव्वो ॥ ३९ ॥

दुर्लभं खलु दुष्प्रापमेव, मनुजत्वं मानुषत्वम्। तथा–जिनवचनमर्हन्मतं, वीर्यं चोत्साहश्च, धर्म्मे चारित्रधर्मविषये, चशब्दः पदत्रयेऽपि दुर्लभत्वसंबन्धनार्थः। किं चातः, एतन्मनुजत्वाऽऽदित्रयम्, लब्ध्वा प्राप्य, सदा सर्वदा, अप्रमादो धर्म्मकार्येष्वनालस्यम्, भवति स्यात्, कर्तव्यो विधेयः। इत्यतः स्वाध्यायाऽऽदिखिन्ने न निमन्त्रणा कार्येति गाथाऽर्थः ॥ ३९ ॥

दुग्गतरयणाययरय–णगहणतुल्लं जईण किच्चं ति।
आयतिफलमद्धुवसा–हणं च णिउणं मुणेयव्वं ॥४०॥

दुर्गतस्य दरिद्रस्य रत्नाकरे विचित्रमाणिक्योत्पादस्थाने प्रान्तस्य यद्रत्नग्रहणं माणिक्योपादानं, तेन यत्तुल्यं सदृशमभिलाषोपरमाभावसाधर्म्यात्तद्दुर्गतरत्नाकररत्नग्रहणतुल्यम्। किं तदित्याह–यतीनां साधूनाम्, कृत्यं कर्त्तव्यं स्वाध्यायवैयावृत्त्याऽऽदि। यथा हि दुर्गतस्य रत्नाकरे गतस्य रत्नग्रहणे इच्छाया अविच्छेदो भवति, एवं साधोश्चरणमधिगतस्य वैयावृत्याऽऽदिषु साधुकृत्येष्वनवच्छिन्ना वाञ्छा स्यादिति दुर्गतरत्नाकररत्नग्रहणतुल्यं यतिकृत्यमित्युक्तम्। इतिशब्दप्रयोगं दर्शयिष्यामः। तथा आयत्यामागामिकाले, परभवे इत्यर्थः। फलं साध्यमस्येत्यायतिफलम्। पाठान्तरेण–आयतफलं मोक्षफलम्। तथा–अध्रुवाणि नश्वराणि साधनानि मानुष्यकेत्रजात्यादीनि यस्य तदध्रुवसाधनम्। चशब्दः समुच्चयार्थः। इत्येतन्निपुणं सम्यक् 'मुणेयव्वं ति' ज्ञातव्यम्। ज्ञातं च तदेव स्यादुदा सततं तत्राऽप्रमादो विधीयते। इति गाथाऽर्थः ॥४०॥

गुरुमापृच्छ्य साधुनिमन्त्रणा कार्येत्युक्तम्, अथ तमनापृच्छ्यैव प्रत्यासन्नताऽऽदिकारणात् साधवो निमन्त्रितास्तदा को विधिः ?, इत्याह-

इयरेसिं परिक्खित्ते, गुरुपुच्छाए णिओगकरणं ति ।
एवमिणं परिसुद्धं, वेयावच्चे तु अकए वि ॥ ४१ ॥

इतरेषामपि गुर्वपेक्षया शेषसाधूनामपि, आक्षिप्ते उपन्यस्ते निमन्त्रणे, गुरुपृच्छाया रत्नाधिकप्रश्नस्य, नियोगकरणमवश्यंतया विधानम्, युक्तमिति शेषः । इदमुक्तं भवति-यद्यपि शेषसाधुविषया निमन्त्रणोपन्यस्ता, तथाऽपि न तद्वचनादेव प्रवर्तितव्यम्, अपि तु गुरुपृच्छाऽवश्यं विधेयेति । इतिशब्दो वाक्यार्थसमाप्तौ । कस्मादेवमित्याह-एवमुक्तन्यायेन गुरुप्रश्नपूर्वलक्षणेन, इदं शेषसाधुनिमन्त्रणं, परिशुद्धमेव निर्दोषमेव, भवतीति गम्यम् । "सो विहिना य" इत्यादिपूर्वोक्तप्रामाण्यात् । ननु यदि पृष्टो गुरुर्वारयेल्लाभो वा न भवेत्तदा उक्ताऽऽदेरसंपादनेन निमन्त्रणस्य निष्फलत्वात् कथं परिशुद्धताऽस्येत्याह-वैयावृत्ये उक्ताऽऽदिदाने, तुशब्द एवकारार्थो योजित एव । अकृतेऽप्यविहितेऽपि, आस्तां विहिते । भावनस्तस्य कृतत्वात्, गुर्वाज्ञाकरणस्यैव च महाफलत्वात्, गुरोरपि पृष्टाऽऽक्षम्बनतस्तन्निषेधनात्र यथाकथञ्चित् । क्वचित् " वेयावच्चं तु " इति पठ्यते । तत्र वैयावृत्यमेव तन्निमन्त्रणमिति प्रक्रमः, अकृतेऽपि वैयावृत्ये । इति गाथाऽर्थः ॥ ४१ ॥ पञ्चा० १२ विव० ।

णिमंतेमाण–निमन्त्रयत्–त्रि० । निमन्त्रणं कुर्वाणे, " तओ पच्छा तस्स गिहे णिमंतेमाणस्स अणिमंतेमाणस्स । " आचा० २ श्रु० १ चू० २ अ० ३ उ० ।

णिमंसू–देशी-तरुणे, दे० ना० ४ वर्ग ३२ गाथा ।

णिमग्ग–निमग्न–त्रि० । अधोजलगमनानि कुर्वाणे, प्रश्न० ३ आश्र० द्वार । पङ्काऽऽद्यवसन्ने, औ० । आ० म० ।

णिमग्गजला–निमग्नजला–स्त्री० । निमज्जत्यस्मिन् तृणाऽऽदिकमखिलं वस्तुजातमिति निमग्नम्, बहुलवचनादधिकरणे क्तप्रत्ययः । निमग्नं जलं यस्यां सा तथा । तस्मिन्नगुहाया मध्ये वहन्त्यां नद्याम्, जं० ३ वक्ष० । आ० चू० ।

णिमज्जग–निमज्जक–पुं० । वानप्रस्थभेदेषु, ये स्नानार्थं निमग्ना एव क्षणं तिष्ठन्ति । नि० १ श्रु० ४ वर्ग १ अ० । औ० । भ० ।

णिमज्जण–निमज्जन–न० । जलप्रवेशे, ग० २ अधि० । वृ० ।

णिमिअ–स्थापित–त्रि० । " क्तेनाण्कुण्ण्याऽऽद्यः " ॥८। ४।२५८॥ इति स्थापितस्य निमिआदेशः । न्यस्ते, प्रा० ४ पाद ।

णिमित्त–निमित्त–न० । हेतौ, कारणे, विशे० । सहकारिकारणे, निमित्तकारणे च । सूत्र० २ श्रु० २ अ० । अष्ट० । उपष्टम्भकारणे, विशे० । आ० म० । व्य० । द्वे शब्दस्य निमित्ते । तद्यथा-व्युत्पत्तिनिमित्तं, प्रवृत्तिनिमित्तं च । यथा गोशब्दस्य । तथाहि-गोशब्दस्य व्युत्पत्तिनिमित्तं गमनक्रिया, गच्छतीति गौरिति व्युत्पादनात् । तेन च गमनेनैकार्थसमवायतया यदुपलक्षितं सास्नाऽऽदिमत्त्वं, तत्प्रवृत्तिनिमित्तं, तेन गच्छति, अगच्छति वा गोपिण्डे गोशब्दः प्रवर्तते, उभयथाप्यवस्थायां प्रवृत्तिनिमित्तभावात् । अश्वाऽऽदौ तु न प्रवर्तते, यथोक्तरूपस्य प्रवृत्तिनिमित्तस्य तत्राभावात् । व्य० १ उ० । प्रयोजने, फले, संघा० १ अधि० १ प्रस्ता० । अतीतानागतवर्तमानवस्तुपरिज्ञानहेतौ ज्ञानविशेषे, प्रव० ७३ द्वार ।

निमित्तमाह-

तिविहं होइ निमित्तं, तीयपडुप्पन्नऽणागयं चेव ।
तेण न विणा उ नेयं, नज्जइ तेणं निमित्तं तु ॥

त्रिविधं भवति निमित्तम् । तद्यथा-अतीतं, प्रत्युत्पन्नम, अनागतं च । कालत्रयवर्तिलाभालाभाऽऽदिपरिज्ञानहेतुश्चुडामणिप्रभृतिकः, शास्त्रविशेष इत्यर्थः । कुत ?, इत्याह-तेन विवक्षितशास्त्रविशेषेण, विना ज्ञेयं लाभालाभाऽऽदिकं, न ज्ञायत इति लाभाऽऽदिज्ञाननिमित्तत्वान्निमित्तमुच्यते । एतानि कौतुकाऽऽदीनि य आज्ञावति स तत्तदाज्ञावको मन्तव्य इति । बृ० १ उ० । आ० म० । आव० । ग० । पं० व० । ध० । दर्श० ।

जे भिक्खू तीतं निमित्तं करेइ, करंतं वा साइज्जइ ॥७॥
जे भिक्खू पडुप्पण्णं निमित्तं वागरइ, वागरंतं वा साइज्जइ ।८।
जे भिक्खू अणागयं निमित्तं करेइ, करंतं वा साइज्जइ॥९॥

जे भिक्खू पडुप्पण्णं णिमित्तं वागरति-आगमस्स काले लाभादि वागरेति ।

छव्विहं णिमित्तं इमं—

लाभालाभं सुहदुक्खं जीवितमरणऽतीतवज्जाइं ।
गिहिअण्णतित्थियाणं व, जे भिक्खू वागरिज्जा णं ॥८२॥

लाभालाभं सुहं दुक्खं जीवितं मरणं । एतानि छ अतीतकालवर्जाणि वागरेति, वट्टमाणे एस्से चेत्यर्थः । गिहीणं, अण्णतित्थियाणं वा जो वागरेज्ज भिक्खू, सो आणादी दोसा पावेज्ज ।

छव्विहवट्टमाणगपदर्शनार्थं गाहा-

पडुविओ मे अमुओ, लभति ण लभति व तस्सिमा वेला ।
सीमंसा दुक्खी हं, सुही ति अमुअं व ते दुक्खं ॥ ८३ ॥

अमुगो मया अमुगसमीवं पेसितो लाभनिमित्तं,सो तत्थ तं लभेज्ज वा,णो लभेज्जा ?। अथवा इमा तस्स आगमणवेला,सो इरूलाभो अइरूलाभो वा आगच्छति, ण वा ?। सीमं सक्खा वा कोइ पुच्छेज्ज-किमहं सुही, दुक्खी वा ?। अहवा-वट्टमाणकाले चेव वागरेति-इमं ते सारीरं दुक्खं, माणसं वा वट्टति ।

गाहा-

जीवति मओ त्ति वा सं-कितम्मि एगतरगम्मि णिद्देसे ।
एवं होहिति तुज्झं, तस्स व लाभाऽऽदओ एस्सो ॥८४॥

कोइ विदेसत्थो ण णज्जति-जीवति, मतो वा?,एरिसे संकिते पुच्छितो एगतरणिद्देसं करेज्ज, एवं वट्टमाणे, एस्से वा जस्स पुच्छिज्जति सो पच्चक्खो, परोक्खो वा । पच्चक्खो भणति-तुज्झं एस्सकाले एवं होहिति-लाभो, अलाभो वा, सुहं, दुक्खं वा, जीवियं, मरणं वा । परोक्खे-तस्स एस्से काले इमो लाभो, अलाभो वा, सुहं, दुक्खं, जीवितं, मरणं वा नविस्सइ ।

जीवइ त्ति भणिते गाहा-

आणंदं अपमिहयं, संखडिकरणं च उभयथा होति ।
खिन्नादिमरणकोट्टण, अधिकरणमणागए वा वि ॥८५॥

आणंदं अपमिहयं करेति,वट्टमानक इत्यर्थः । मतो त्ति भणिते संखडिकरणं करेज्ज । एवं उभयहा अविधे अधिकरणदोसो भवति । अहवा-मतो त्ति भणिते खिन्नचित्तो भवे, मरति

वा, वरसिरकुट्टणादि वा करेज्ज,मितकिच्चकरणेसु वा अधिकरणं भवे। अहवा-अणागते णिमित्ते वागरिते एते चित्तचित्तासंदिया दोसा भवंति।

अं च णिमित्तबलेण कज्जसंधणं करेज्ज-

उच्चाहो विसीदंते, अगंतुकामस्स होति गमणं तु।
अहिकरणथिरीकरणं, कयविक्कयसंणियत्ती य ॥ ७६ ॥

अणागतणिमित्तवागरणेण कज्जे विसीदंतस्स उच्चाहो कतो भवति, लाभत्थिओ परदेसा अगंतुकामस्स अवस्सं ते लाभो भविस्सति त्ति गमणं करेति। किसिमादिअधिकरणेसु विसीदंतस्स अवस्सं वुड्ढी भविस्सति त्ति वागरिए अधिकरणे स्थैर्यं भवति। अहवा-परदेसं गंतुकामस्स इहेव लाभो भविस्सति त्ति थिरीकरणं भवति, इमं किसादि, इतो कम्मारंभातो संणियत्ता इमम्मि कम्मारंभे पयट्टसु,एवं ते लाभो भविस्सति, एवं अधिकरणदोसा।

एवमापसदोसा-

आएसविसंवादे, पओसनिच्छुभणमादि वोच्छेओ।
अहिकरणं अक्खेण व, उड्डाह अणक्खवादो य ॥७७॥

आएसे य विसंवदति पदोसं गच्छेज्ज, वसही वा णिच्छुभेज्ज, आहारादिवसहीण वा वोच्छेदं करेज्ज, अक्खेण वा निमित्तिएण सद्धिं अधिकरणं भवे, अक्खेण वा निमित्तिएण संवादिते साधूण अक्खवादो भवति, उड्डाहो य भवेज्ज।

गाहा-

नियमा तिकालविसए,नेमित्ते छुब्भिहे भवे दोसो।
सयमेव वट्टमाणे, उभए वा तत्थिमं णातं ॥७८॥

णियमा भवस्सदोसो भवति तिकालविसए-अतीते, वट्टमाणे,परस्से य। छुब्भिहे लाभादिए सयमेव वर्त्तमानकाले आदेसे दोसो भवति, उभयमिति-अप्पणो, परस्स वा। तत्थिमं णातं दृष्टान्त इत्यर्थः।

गाहा-

आकंपिया निमित्ते-ण जोइणी जोतिए चिरगतम्मि।
पुव्वभणितं कहेती, आगतो रुट्ठो य वलवाए ॥७९॥

एगो णिमित्तिओ,तेण जोतिणी गामसामिणी आकंपिता-आवेसंवातिणिमित्तेण आउट्टिता। अण्णया सा जोतिणी जोतियं चिरगतं पुच्छति-कया सो भोतिओ आगच्छति ?। तेण कहियं-अमुगदिणे अमुगवेलाए आगच्छति। सो य आगतो। ताहे तस्स णेमित्तियपुव्वभणितं इत्थमादिपरियणो सव्वं कहेति। तम्मि कहिते सोऽतीसाहुनावेण रुट्ठो बलवाए संपुच्छति।

गाह-

दाराऽऽजोगण एगा-गिआगमो परियणस्स पव्वोणी * ।
पुच्छा य खमणकहणं,सादीयंकार सुविणादी ॥७०॥
कोट्ठो वलवा गज्जं, च पुच्छितो भणति पंचपुंडाऽऽसो।
फालण दिट्ठे जति णे-व तो तुहं अवितहं कति वा ? ॥७१॥

सती असती वा मे दारा,तस्स आजोगणट्ठा एगागी आगतो परियणो सव्वपरिवणो पव्वोणीए णिग्गतो। अन्नागतिया पव्वोणी। तेण पुच्छियं-कहं ते णायं ?। तेहिं कहियं-एरिसो तारिसो आगमो णेमित्तिओ,तेण कहितं। सो तं बोहिरत्तं निमित्तं पुच्छति। तेण किं से सुविणादि सादीयंकारं णिमित्तं आवितहं कहियं। सो भोतिओ कुविओ पुच्छति-एस वलवा गब्भिणी, एतीए किं भविस्सति ?। तेण भणियं-पंचपुंमो आसो भविस्सति। तेण तक्खणा चेव फालविया दट्ठो। ताहे भोतिओ भणति-जइ एवं ण होज्जा, तो तुह पेट्टं फालियं होंतं। एवं अवितहणेमित्तिया कति भविस्संति ?। जम्हा एते दोसा तम्हा ण वागरेज्ज।

गाहा-

असिवे ओमोयरिए, रायदुट्ठे भए व गेलण्णे।
अद्धाणरोहए वा, जयणाए वागरे भिक्खू ॥७२॥
एतेहिऽसंथरंतो, पणगादीकम्मइच्छितो संतो।
एस्सेव पकुप्पं, च भणति जहेसु उवउत्ते ॥७३॥

एतेहिं कारणेहिं असंथरंतो पणगपरिहाणीए जाहे आहाकम्मं अइच्छंतो, ताहे पुव्वं अतीतं णिमित्तं वागरेति भद्देसु अतीव उवउत्तो, पच्छा आगमिस्सं पकुप्पणं। नि० चू० १० उ०। अतीतानागतवर्त्तमानानामतीन्द्रियभावानामभिगमे निमित्तं हेतुर्यद्वस्तुजातं तन्निमित्तं, तदभिधायकशास्त्राण्यपि निमित्तानीत्युच्यन्ते इति। भौमाऽऽदिलक्षणशास्त्रेषु,स्था०। " अट्ठविहे महानिमित्ते पण्णत्ते। तं जहा-भोमे, उप्पाए, सुविणए, अंतलिक्खे, अंगे, सरे, लक्खणे, वंजणे। " स्था० ८ ठा०। आव०। प्रव०। बृ०। (भौमाऽऽदीनां व्याख्या स्वस्वस्थाने) (विस्तरार्थिना तु अङ्गविद्या नाम ग्रन्थो वीक्षणीयः। प्रकाशितं चैतद् 'अंगविज्जा' शब्दे प्र० भागे ३६ पृष्ठे) वाक्यप्रशस्तशकुनाऽऽदिकेषु, सूत्र० १ श्रु० १३ अ०। चूडामणिप्रभृतौ निमित्तकपुरुषे, स्था० ६ ठा०। दश०। आचा०। औ०।

णिमित्तकारण-निमित्तकारण-न०। पटस्य निमित्तं तन्तव एव कारणं निमित्तकारणम्, तदव्यतिरेकेण पटानुपपत्तेः। तथा च तन्तुनिर्मिना न भवति यतः, तथा तक्रतनाऽऽदिचेष्टाव्यतिरेकेणापि न भवति, तस्माच्च चेष्टाया वेमाऽऽदि कारणम। अन्यद्व्यकारणभेदे, आ० म० १ अ० २ खण्ड। आ० चू०।

णिमित्तणिप्पण्ण-निमित्तनिष्पन्न-त्रि०। चिह्ननिष्पन्ने करणनिष्पन्ने, " चिंधणिप्पन्नं ति, करणणिप्पन्नं ति, णिमित्तणिप्पन्नं ति वा एगट्ठं। " आ० चू० १ अ०।

णिमित्तपिंड-निमित्तपिण्ड-पुं०। निमित्तमङ्गुष्ठप्रश्नाऽऽदि, तद्द्वारेण पिण्डो निमित्तपिण्डः। आचा०२ श्रु०१ चू० १ अ०७ उ०। अतीतानागतवर्त्तमानकालेषु लाभाऽऽदिकथनं भिक्षार्थं कुर्वता उत्पादनादोषसंपर्केण गृहीतपिण्डे, ध० ३ अधि०। जीत०।

अथ तद्भोजननिषेधः-

जे भिक्खू णिमित्तपिंडं भुंजइ, भुंजंतं वा साइज्जइ ॥६१॥

तीतमणागतवट्टमाणत्थाणोपलद्धिकारणं णिमित्तं भण्णति जो तं पउंजित्ता असणाऽऽदिमुप्पादेति, सो णिमित्तेहिं पिंडो भण्णति, आणादिया य दोसा, चउलहुं च से पच्छित्तं।

जे भिक्खू णिमित्तपिंडं, कहेज्ज सज्जं तु अहव सातिज्जे।

* 'पव्वोणी' शब्दो देशीवचनः संमुखार्थः।

सो आणा अणवत्थं, मिच्छत्तविराहणं पावे ॥ १४२ ॥
नियमा तिकालविसए, णेमित्ते छव्विहे जवे दोसो ।
सयमेव वट्टमाणे, उज्जए वा तत्थियं णातं ॥ १४३ ॥

कंठ्या । तिविधो कालो-अतीतो, वट्टमाणो, आगमिस्सो । एक्केक्कं छव्विहं णिमित्तं पउंजति । तत्थ इमे छब्भेदा-लाभं, अलाभं, सुहं, दुहं, जीवियं, मरणं । एगम्मि पउत्ते णियमा संजमायपरोभया दोसा भवंति । एत्थ तीतं अप्पदोसतरं, ततो आगमिस्सं बहुदोसतरं, ततो पडुप्पन्नं बहुदोसतरं ।

तत्थ पडुप्पन्ने इमं उदाहरणं-

आकंपिया णिमित्ते-ण जोइणा भोइए चिरगयम्मि ।
पुव्वभणितं कहेती, आगतो रुट्ठो य वलवाए ॥१४४॥

इमा भद्दबाहुकया गाहा ।

एतीए इमाओ दो वक्खाणगाहाओ-

दाराऽऽजोयण एगा-गिआगमो परियणस्स पव्वोणी ।
पुच्छा य खमणकहणं,सादीयंकार सुविणादी ॥१४५॥
कोहो वमणा गब्भं, च पुच्छितो भणति पंचपुंडाऽऽसो ।
फालण दिट्ठे जति णे-व तो तुहं अवितहं कति वा?।१४६।

एगम्मि गामे ओसप्पणो णिमित्ती अत्थति, तत्थ जो गामभोतिओ सो पवसितो, तस्य य जा भोइणी, सा तं णेमित्तियं णिमित्तं पुच्छति । ताहे तेण सा अवितहणिमित्तेणं आकंपिया । अण्णदा सा तं पुच्छति । तेण कहियं-कल्लं अमुगवेलाए एति । सो वि जोइओ चिंतेइ- सव्वं इहेव उट्ठेउं एगागी जामि दारा-भोगेण त्ति गवेसामि-किं वभिचारं वभिचरति, ण वा ?। तस्सागमणवेलाए य सव्वो परियणो पव्वोणीए णिग्गतो । अग्गगतिए एति, सो य दिट्ठो, सागते कए पुच्छइ-कहं भे णातं ?। तेण भणियं-खमगो णेमित्ती,तेण कहियं । आगतो घरं कसुसितमणसा एस वभिचारि त्ति लुत्तुत्तरे णेमित्ती सहावितो,कहेति णिमित्तं,तेण जं किंचि पुव्वभणियं,भुत्तं वा, अणुभूतं वा सुविणादिगतं तं सव्वं सक्कारेहिं कहितं । एवं कहिते वि कोवं ण मुंचति । ततो रुट्ठो पुच्छति-एतीए वडवाए किं गव्वे त्ति । णेमित्तिणा उवओगेण भणियं-किसोरो पंचपुंडो । ततो रुट्ठो कालं ण पडिच्छति त्ति भणति-फालेह उदरं । से फालियं दिट्ठो । ततो भणति-अति एयं णिमित्तं एवं ण भवति, तो तुज्झे पोट्टं फालियं होंतं । परिसा अवितहणिमित्ती केत्तिया भविस्संति ?। जतो वभिचरंति णिमित्ता,आउमत्थपओगा य वितहा भवंति, अधिकरणादओ य दोसा आयपरोभयसमुत्था, संकाऽऽदिया य इत्थीसु दोसा, अतो ण णिमित्तं वागरेयव्वं ।

अववादेण वागरेयव्वं । गाहा-

असिवे ओमोयरिए, रायदुट्ठे भए व गेलण्णे ।
अद्धाण रोहए वा, जयणाए वागरे निक्खू ॥१४७॥

असिवादिकारणेहिं सुट्ठुउवउत्तो तीताइणिमित्तं वागरेति, जाहे पणगपरिहाणीए चउलहुं पत्तो । नि० चू० १३ उ० ।

णिमित्तयाएसि(ण्)–निमित्तादेशिन्–पुं० । निमित्तमतीताऽऽदिभेदभिन्नमादिशति यः स तथा । नैमित्तिकसाधौ,पं०व० ४ द्वार ।

निमित्ताऽऽदेशिनमाह-

तिविहं निमित्तं एक्के-क्कं छव्विहं जं तु वन्नियं पुव्विं ।
अभिमाणाभिनिवेसा, वागरियं आसुरं कुणइ ॥

त्रिविधमतीताऽऽदिकालत्रयविषयं यत्पूर्वमिहैवाऽऽभियोगिकभावनायां वर्णितं, तदेकैकं षड्विधं लाभालाभसुखदुःखजीवितमरणविषयभेदात्षड्प्रकारम् । आह-आभियोगिकभावनानिबन्धनतया पूर्वमिदमुक्तम्, अतः कथमिदमिहाभिधीयत इत्याह-अभिमानाभिनिवेशादहङ्कारतीव्रतया व्याकृतं प्रकटितमेतन्निमित्तमासुरीं भावनां करोति, अन्यथा त्वाभियोगिकी मतिः । बृ० १ उ० ।

णिमित्तलक्खण–निमित्तलक्षण–न० । विज्ञानहेतौ निमित्तशास्त्रे, विशे० ।

अथ निमित्तलक्षणं विवृणवन्नाह-

लक्खिज्जई सुभासुभ-मणेण तो लक्खणं निमित्तं ति ।
जोमाइ तद्दुविहं,तिकालविसयं जिणाभिहियं ॥२१६३॥

लक्ष्यते विज्ञायते यस्माच्छुभाशुभमनेन ततो निमित्तमपि लक्षणम् । तच्चाष्टविधमष्टप्रकारम् । उक्तं च-" जोमसुमिणंऽतलिक्खं, दिव्वं अंगसरलक्खणं तह य । वंजणमट्ठविहं खलु, निमित्तमेयं मुणेयव्वं ॥ १ ॥ " इति । भौमाऽऽदिस्वरूपं च ग्रन्थान्तरादवसेयम् । इदं चाष्टविधमपि निमित्तं प्रत्येकमतीतानागतवर्तमानरूपकालत्रयविषयं जिनैरभिहितमिति ॥ २१६३ ॥ विशे० । आ० चू० ।

णिमित्तसंजोग–निमित्तसंयोग–पुं० । कारणसाहित्ये, " शुभो निमित्तसंयोगो, पञ्चकोदयतो मतः । " (१८) शुभः प्रशस्तो निमित्तसंयोगः सदूयोगाऽऽदिसम्बन्धः,सदूयोगाऽऽदीनामेव निःश्रेयससाधननिमित्तत्वात् । (१८) । द्वा० २१ द्वा० ।

णिमित्तसुद्धि–निमित्तशुद्धि–स्त्री० । शुभहेतुवस्तुशुद्धौ, यथाश्रावकव्रतग्रहणे तत्कालोच्चलितशङ्खपणवाऽऽदिनिनादश्रवणपूर्णजम्भृभृङ्गारछत्रध्वजचामराऽऽद्यवलोकनशुभगन्धाऽऽघ्राणाऽऽदिस्वभावा । ध० २ अधि० ।

णिमित्ताजीविया–निमित्ताजीविका–स्त्री० । त्रैकालिकलाभाऽऽदिविषयनिमित्तोपात्ताऽऽहाराऽऽद्युपजीविने, आ० ४ ठा० ४ उ० ।

णिमिल्लण–निमीलन–न० । नि–मील–ल्युट् । "प्रादेर्मीलेः" ॥८।४।२३२॥ इति अन्त्यस्य द्वित्वं वा, द्वित्वे ह्रस्वो वा । अक्षिसंकोचे, प्रा० ४ पाद ।

णिमीलण–निमीलन–न० । 'णिमिल्लण' शब्दार्थे,प्रा० ४ पाद ।

णिमेण–देशी–स्थाने, दे० ना० ४ वर्ग ३७ गाथा ।

णिमेल–देशी–दन्तमांसे, दे० ना० ४ वर्ग ३० गाथा ।

णिमेल्ला–देशी–धनपाले, दे० ना० ४ वर्ग ३० गाथा ।

णिमेस–निमेष–पुं० । अक्षिनिमीलने, भ० १४ श० १ उ० । आ० म० । स्वाभाविकचक्षुर्निमीलनकाले, वाच० ।

णिम्मद्दग–निर्मर्दक–पुं० । चौरविशेषे, प्रश्न० ३ आश्र० द्वार ।

णिम्मद्दिय–निर्मर्दित–त्रि० । दलिते, प्रश्न० ३ आश्र० द्वार ।

णिम्मम–निर्मम–त्रि० । निर्गतं ममत्वं बाह्याऽऽभ्यन्तरेषु वस्तुषु यस्मादसौ निर्ममः । सूत्र० १ श्रु० १० अ० । ममत्वरहिते, संथा० । आव० । पं० भा० । प्रज्ञा० । आ० म० । वस्त्रपात्राऽऽदिषु ममत्वरहिते, उत्त० १९ अ० । अस्यां जारतचूम्यौ उत्सर्पिण्यां भविष्यति सुलसाजीवे पञ्चदशे तीर्थकरे, प्रव० ४६ द्वार । ती० । ति० । स० ।

णिम्ममत्तभाव–निर्ममत्वभाव–पुं० । आकालं सकलपरिग्रहोपाद्-नशून्यचिदानन्दैकमूर्तिकशुद्धाऽऽत्मस्वभावानुभवजनिते निर्ममत्वे, द्वा० २७ द्वा० ।

णिम्मल–निर्मल–त्रि० । स्वाभाविकाऽऽगन्तुकमलरहिते, जी० ३ प्रति० ४ उ० । तं० । प्रज्ञा० । आ० म० । जं० । रा० । विमले, औ० । प्रश्न० । कठिनमलरहिते, भ० २ श० ५ उ० । स० । औ० । विशुद्धे, द्वा० १ श्रु० १ अ० । स्वच्छे, कल्प० ३ क्षण । भ० । घट्टिनीघटिते, " मट्ठा घट्ठा नीरया निम्मला निप्पंका " प्रज्ञा० २ पद । पूर्वबद्धकर्मविनिर्मुक्ते द्रव्यमलवर्जिते सिद्धे, औ० । ब्रह्मलोके षष्ठां विमानप्रस्तटानां चतुर्थे, स्था० ६ ठा० । निर्गतो मलो यस्मात् । ५ ब० व्री० । कतके, तस्य हि संबन्धाद् जलमलनाशकत्वं प्रसिद्धम् । वाच० ।

णिम्मलजलपुण्ण–निर्मलजलपूर्ण–त्रि० । निर्मलेन जलेन भृते, कल्प० ३ क्षण ।

णिम्मलफलिह–निर्मलस्फटिक–पुं० । विमले स्फटिकमणौ, " निर्मलस्फटिकस्येव, निर्मलं रूपमात्मनः । अध्यस्तोपाधिसंबन्धो, जगस्तत्र विमुह्यति " ॥ ६ ॥ अष्ट० ४ अष्ट० ।

णिम्मलबोहवंत–निर्मलबोधवत्–त्रि० । विमलबोधसंपन्ने, षो० ३ विव० । निर्मलबोधस्तु–" निर्मलबोधोऽप्येवं, शुश्रूषाभावसंभवो ज्ञेयः । शमगर्भशास्त्रयोगात्, श्रुतचिन्ताभावनासारः ॥ " षो० ४ विव० ।

णिम्मल्ल–निर्माल्य–न० । देवोच्छिष्टे देवार्चाऽऽख्ये, वाच० । तदर्थाऽऽदिगतसप्रभावप्रतिमाशेषे, पिं० ।

भोगविणट्ठं दव्वं, णिम्मल्लं विंति गीयत्था ।
यज्जिनबिम्बाऽऽरोपितं सद्विच्छर्दायीभूतं विगन्धिसंजातं दृश्यमानं च निःश्रीकतया न भव्यजनमनःप्रमोदहेतुः, तन्निर्माल्यं ब्रुवन्ति बहुश्रुताः । सङ्घा० १ अधि० १ प्रस्ता० ।

नैर्मल्य–न० । निर्मलपरिणतौ, द्रव्या० ८ अध्या० ।

णिम्मव–निर्पा–धा० । निर् + मा । विरचने, निष्पादने, " निर्मिनिम्माण-निम्मवौ " । ८ । ४ । १६ । इति निरूपूर्वस्य मिमीतेः णिम्माण-निम्मवाऽऽदेशौ । णिम्माणेइ । णिम्मवइ । निर्मिमीते । प्रा० ४ पाद । कर्मणि यक् । निर्माप्यन्ते । परिसमाप्तिं नीयमाने, पं० सू० १ सूत्र ।

णिम्मवइत्ता–निर्मापयितृ–त्रि० । सफलतापर्यन्तकार्यनेतरि, स्था० ४ ठा० ४ उ० ।

णिम्मह–गम्–धा० । गतौ, "गमेरई अइच्छाणुवज्जाघज्जसोक्कुसाकुस-पच्चड-पच्चन्द-णिम्मह-णी-णीण-णीसुक्क-चदअ-रम्भ परिअल्ल-वोल-परिअल्ल-णिरिणास-णिवहावसेहावहराः " ॥ ८ ॥ ४ ॥ १६२ ॥ इति सूत्रेण गमेर्णिम्महाऽऽदेशः । "णिम्महइ" गच्छति । प्रा० ४ पाद ।

णिम्महियरागरोस–निर्मथितरागरोष–त्रि० । निराकृतप्रीतिद्वेषे, जीवा० १ अधि० ।

णिम्माण–निर्मा–धा० । विरचने, निष्पादने, प्रा० ४ पाद ।

निर्माण–न० । उत्तरकरणे, विशे० ।

णिम्माणणाम [ण्]–निर्माणनामन्–न० । सर्वजीवशरीरावयवनिष्पादके अङ्गोपाङ्गकर्मणि, आचा० १ श्रु० २ अ० १ उ० । कर्म० । पं० सं० । उत्त० । प्रव० ।

अंगोवंगणियमणं, णिम्माणं कुणइ सुत्तहारसमं । [४७]

निर्माणं निर्माणनामाङ्गोपाङ्गनियमनम्, अङ्गप्रत्यङ्गानां प्रतिनियतप्रदेशव्यवस्थापनं, करोति विदधाति, अतः सूत्रधारसमं सूत्रभृत्कल्पम् । यदुदयाज्जन्तुशरीरेष्वङ्गोपाङ्गानां प्रतिनियतस्थानवृत्तिता भवति, तत्सूत्रधारकल्पं निर्माणनामेत्यर्थः । तदभावे हि तद्भृतककल्पैरङ्गोपाङ्गनामाऽऽदिभिर्निर्वर्तितानामपि शिरउदराऽऽदीनां स्थानक्वेरनियमः स्यात् । (४७) कर्म० १ कर्म० ।

णिम्माय–निर्मात–पुं० । निष्पन्ने, वृ० ६ उ० । परिनिष्ठामुपागते, व्य० १ उ० । पञ्चा० । विशिष्टाभ्यासवति, कल्प० ३ क्षण । सूत्रार्थतदुभयज्ञे, " आयरियाण सगासे, अमुयेत्तियं तु णिम्माया । " व्य० ३ उ० ।

णिम्मावित्त–निर्मापयितव्य–त्रि० । कर्त्तव्ये, (सूत्र०) " पंच महब्भूया अणिम्मिया अणिम्मावित्ता अकडा णो कित्तिमा " । सूत्र० २ श्रु० १ अ० ।

णिम्मिय–निर्मित–त्रि० । निवेशिते, उपा० ७ अ० । ज्ञा० । न्यस्ते, ज्ञा० १ श्रु० १ अ० । निष्पादिते, सूत्र० २ श्रु० १ अ० । कृते, स्था० ८ ठा० । औ० ।

णिम्मियवाइ [ण्]–निर्मितवादिन्–त्रि० । निर्मितमीश्वरब्रह्मपुरुषाऽऽदिना कृतं लोकं वदतीति निर्मितवादी । ईश्वरकृतलोकवादिलक्षणे अक्रियावादिनि, (स्था०)
" आसीदिदं तमोभूत-मप्रज्ञातमलक्षणम् ।
अप्रतर्क्यमविज्ञेयं, प्रसुप्तमिव सर्वतः ॥ १ ॥
तस्मिन्नेकार्णवीभूते, नष्टे स्थावरजङ्गमे ।
नष्टामरनरे चैव, प्रणष्टोरगराक्षसे ॥ २ ॥
केवलं गह्वरीभूते, महाभूतविवर्जिते ।
अचिन्त्याऽऽत्मा विभुस्तत्र, शयानस्तप्यते तपः ॥ ३ ॥
तत्र तस्य शयानस्य, नाभेः पद्मं विनिर्गतम् ।
तरुणरविमण्डलनिभं, हृद्यं काञ्चनकर्णिकम् ॥ ४ ॥
तस्मिन्पद्मे भगवान्, दण्डी यज्ञोपवीतसंयुक्तः ।
ब्रह्मा तत्रोत्पन्न-स्तेन जगन्मातरः सृष्टाः ॥ ५ ॥
अदितिः सुरसङ्घानां, दितिरसुराणां मनुर्मनुष्याणाम् ।
विनता विहङ्गमानां, माता विश्वप्रकाराणाम् ॥ ६ ॥
कद्रूः सरीसृपाणां, सुलसा माता तु नागजातीनाम् ।
सुरभिश्चतुष्पदाना-मिला पुनः सर्वजीवानाम् " ॥ ७ ॥ इति । प्रमाणयति चासौ–बुद्धिमत्कारणकृतं भुवनं, संस्थानवत्त्वात्, घटवदित्यादि । अक्रियावादिता चास्य न कदाचिदनीदृशं जगदिति वचनादकृत्रिमभुवनस्याकृत्रिमतानिषेधात् । न चेश्वराऽऽदिकर्तृकत्वं जगतोऽस्ति, कुलालाऽऽदिकारकवैयर्थ्यप्रसङ्गात्, कुलालाऽऽदिवच्चेश्वराऽऽदेर्बुद्धिमत्कारणस्यानीश्वरताप्रस-

द्धात् । किञ्च-ईश्वरस्याशरीरतया कारणाभावात् क्रियास्वप्रवृत्तिः स्यात् । सशरीरत्वे च तच्छरीरस्यापि कर्त्रन्तरेण ज्ञात्यम, एवं चानवस्थाप्रसङ्ग इति । स्था० ८ ठा० । ('इस्सर' शब्दे द्वितीयभागे ६३६ पृष्ठे चैतन्मतं परीक्षितम्)

णिम्मिस्सबद्धी-निर्मिश्रबद्धी-स्त्री० । नाक्षबद्धेऽनन्तरस्वजनवर्गे, यद् निर्मिश्राणि-

माया पिया य भाया, भगिणी पुत्तो तहेव धूया य ।
एसा अणंतरा खलु, णिम्मिस्सा होंति बन्धी उ ॥

माता, पिता, भ्राता, भगिनी, पुत्रो, दुहिता च । एषा खलु-अनन्तरा भवति बन्धी । व्य० १० उ० ।

णिम्मूल-निर्मूल-त्रि० । उच्छिन्नमूले, " णिम्मूलुल्लुणकण्णो-ट्ठनासिका छिन्नदारुणपल्लवा । " प्रश्न० १ आश्र० द्वार । " णिम्मूलितंतफुरफुरंतविगलमम्महयविगयगाढदिण्णपहारमुच्छितरुलंतविब्भलविलावकलुणो । " निर्मूलितानि विकुक्षितो बहिःकृतानि अन्त्राणि उदरमध्यावयवविशेषा येषां ते तथा । प्रश्न० ३ आश्र० द्वार ।

णिम्मूलण-निर्मूलन-न० । क्षये, ज्ञा० २६ ज्ञा० ।

णिम्मेअ-देशी-गते, दे० ना० ४ वर्ग ३४ गाथा ।

णिम्मेर-निर्मर्याद-त्रि० । परस्त्रीपरिहाराऽऽदिमर्यादाविलोपित्वात् (रा० । दशा०) लोककुलाऽऽद्यपेक्षया (स्था० ३ ठा० २ उ०) अविद्यमानकुलाऽऽदिमर्यादे, जं० २ वक्ष० । ज्ञ० । प्रतिपन्नाऽपरिपालके, स्था० ३ ठा० १ उ० ।

णिम्मोअ-निर्मोक-पुं० । कञ्चुके, "केंचुआ" इति ख्याते सर्पत्वचि, विशे० । " सेसस्स व निम्मोओ ।" प्रा० २ पाद ।

णिम्मोयणी-निर्मोचनी-स्त्री० । निर्मोके कञ्चुके, " जहा य भोई तणुयं भुयंगो, णिम्मोयणिं हिच्च पलेइ मुत्तो (३४) " उत्त० १४ अ० ।

णिय-निज-त्रि० । आत्मीये, सूत्र० १ श्रु० २ अ० २ उ० । कर्म० । अष्ट० ।

णियजाइल्लछद्दालिया-ऽणंतसो ..... । [८१]

यका यकाः प्रकृतयो यस्यां मूलप्रकृतौ पतिता विद्यन्ते तासां सैव मूलप्रकृतिर्नैजजातिर्वेदितव्या । तथा तथा निजनिजमूलप्रकृतिरूपया निजजात्या यल्लब्धं प्राप्तं दलिकाग्रम् । (८१) कर्म० ५ कर्म० ।

णियइ-निकृति-स्त्री० । मायायाम्, तत्प्रच्छादनार्थं मृषावचने च । प्रश्न० २ आश्र० द्वार । स० ।

नियति-स्त्री० । नियमनं नियतिः । यथाभवने, सूत्र० १ श्रु० १ अ० ३ उ० । अवश्यंभाव्युदये, सूत्र० १ श्रु० १ अ० २ उ० । सा च पदार्थानामवश्यतया यथाभवने प्रयोजककर्त्रीति । स्था० ५ ठा० ४ उ० । आचा० ।

अथ नियतिवादिगोशालानां मतानीह दर्श्यन्ते-

आघायं पुण एगेसिं, उववन्ना पुढो जिया ।
वेदयंति सुहं दुक्खं, अदुवा लुप्पंति ठाणओ ॥१॥

पुनःशब्दः पूर्वोऽऽदिभ्यो विशेषं दर्शयति-नियतिवादिनां पुनरेकेषामेतदाख्यातम् । अत्र चाविवक्षितकर्मका अपि अकर्मका भवन्तीति यथासंभवतोऽत्रापि निष्ठाप्रत्ययः, तद्योगे कर्त्तरि षष्ठी । ततश्चायमर्थः-नैर्नियतवादिभिः पुनरिदमाख्यातं, तेषामयमाशय इत्यर्थः । तद्यथा-उपपन्ना युक्त्या घटमानका इत्यनेन च पञ्चभूततज्जीवतच्छरीरवादिमतमपाकृतं भवति । युक्तिस्तु शैलेशतः प्राग्दर्शितैव, प्रदर्शयिष्यते च । पृथक् पृथक् नारकाऽऽदिभवेषु शरीरेषु चेत्यनेनाऽप्यात्माऽद्वैतवादनिरासोऽवसेयः । के पुनस्ते पृथगुपपन्नास्तदाह-जीवाः प्राणिनः सुखदुःखभोगिनः । अनेन च पञ्चस्कन्धातिरिक्तजीवाभावप्रतिपादकबौद्धमताऽपक्षेपः कृतो द्रष्टव्यः । तथा ते जीवाः पृथक् पृथक् प्रत्येकदेहे व्यवस्थिताः सुखं दुःखं च वेदयन्त्यनुभवन्ति । न वयं प्रतिप्राणिप्रतीतं सुखदुःखानुभवं निह्नुमहे । अनेन चाऽकर्तृवादिनो निरस्ता भवन्ति । अकर्तरि विकारिण्यात्मनि सुखदुःखानुभवानुपपत्तेरिति भावः । तथैतदस्मानिर्नोऽपलप्यते । (अदुवेति) अथवा-ते प्राणिनः सुखं दुःखं चानुभवन्ति, विलुप्यन्ते उच्छिद्यन्ते, स्वायुषः प्रक्षयाद्व्यन्ते, स्थानात्स्थानान्तरं संक्रामन्त इत्यर्थः । ततश्चौपपातिकत्वमप्यस्माभिस्तेषां न निषिध्यते । इति श्लोकार्थः ॥१॥

तदेवं पञ्चभूतास्तित्वाऽऽदिवादिनिरासं कृत्वा यत्तैर्नियतिवादिभिराश्रीयते, तच्छ्लोकद्वयेन दर्शयितुमाह—

न तं सयं कडं दुक्खं, कओ अन्नकडं च णं ? ।
सुहं वा जइ वा दुक्खं, सेहियं वा असेहियं ॥ २ ॥
सयं कडं न अन्नेहिं, वेदयंति पुढो जिया ।
संगइअं तं तहा तेसिं, इहमेगेसि आहियं ॥ ३ ॥

यत् तैः प्राणिभिरनुभूयते सुखं, दुःखं, स्थानविलोपनं वा, न तत्स्वयमात्मना पुरुषकारेण कृतं निष्पादितं दुःखमिति, कारणे कार्योपचाराद् दुःखकारणमेवोक्तम् । अस्य चोपलक्षणत्वात् सुखाऽऽद्यपि ग्राह्यम् । ततश्चेदमुक्तं भवति-योऽयं सुखदुःखानुभवः स पुरुषकारकृतकारणजन्यो न भवतीति । तथा कृतोऽन्येन कालेश्वरस्वभावकर्माऽऽदिना च कृतं भवेत् ? इति स्थलङ्कारे । तथाहि-यदि पुरुषकारकृतं सुखाऽऽद्यनुभूयेत ततः सेवकवणिक्कर्षकाऽऽदीनां समाने पुरुषकारे सति फलप्राप्तिवैसदृश्यं, फलप्राप्तिश्च न भवेत् । कस्यचित्तु सेवाऽऽद्विव्यापारानावेऽपि विशिष्टफलावाप्तिर्दृश्यत इत्यतो न पुरुषकारात्किञ्चिदासाद्यते, किं तर्हि नियतेरवेत्येतच्च द्वितीयश्लोकान्तेऽभिधास्यते । नापि कालः कर्ता, तस्यैकरूपत्वाज्जगति फलवैचित्र्यानुपपत्तेः । कारणभेदे हि कार्यभेदो भवति, नाऽभेदे । तथा चायमेव हि भेदो भेदहेतुर्वा घटते, यदुत विरुद्धधर्माध्यासः, कारणभेदश्च । तथेश्वरकर्तृकेऽपि सुखदुःखे न भवतः । यथाऽसावीश्वरो मूर्तोऽमूर्तो वा ? । यदि मूर्तस्ततः प्राकृतपुरुषस्येव सर्वकर्तृत्वाभावः । अथाऽमूर्तस्तथासत्याकाशस्येव सुतरां निष्क्रियत्वम् । अपि च-यद्यसौ रागाऽऽदिमत्त्वेन ततोऽस्मदाद्यव्यतिरेकाद्विश्वस्याकर्तैव । अथाऽसौ विगतरागः, ततस्तत्कृतं सुभगदुर्भगेश्वरदरिद्राऽऽदिजगद्वैचित्र्यं न घटां प्राञ्चति, ततो नेश्वरः कर्तेति । तथा-स्वभावस्यापि सुखदुःखाऽऽदिकर्तृत्वानुपपत्तिः । यतोऽसौ स्वभावः पुरुषाद्भिन्नोऽभिन्नो वा ? । यदि भिन्नः ?, न पुरुषाऽऽश्रिते सुखदुःखे कर्तृप्रवं, तस्माद्भिन्नत्वादिति । नाप्यभिन्नोऽभेदे पुरुष एव स्यात्तस्य चाकर्तृत्वमुक्तमेव । नाऽपि कर्मणः सुखदुःखं प्रति कर्तृत्वं घटते । यतस्तत्कर्म पुरुषाद्भिन्नमभिन्नं वा भवेत् ? । अभिन्नं चेत्पुरुषमात्रताऽऽपत्तिः कर्म-

णः,तत्र चोक्तो दोषः । अथ भिन्नं तत्किम्-सचेतनम्, अचेतनं वा ? । यदि सचेतनम्,एकस्मिन् काये चैतन्यद्वयाऽऽपत्तिः । अथाऽचेतनम्, तथा सति कुतस्तस्य पाषाणखण्डस्येवाऽस्वतन्त्रस्य सुखदुःखोत्पादनं प्रति कर्तृत्वम् ?, इत्येतच्चोत्तरत्र व्यासेन प्रतिपादयिष्ये; इत्यलं प्रसङ्गेन । तदेवं सुखं सैद्धिकं सिद्धावपवर्गलक्षणायां भवं, यदि वा दुःखम्-असातोदयलक्षणमसैद्धिकं सांसारिकम् । यदि वोभयमप्येतत्सुखं दुःखं वा स्वकृतचन्दनाऽङ्गनाऽऽद्युपभोगक्रियासिद्धौ भवं, तथा कशातामनाङ्गनाऽऽदि सिद्धौ भवं सैद्धिकम् । तथाऽसैद्धिकं सुखमान्तरमानन्दरूपमाकस्मिकमनवधारितबाह्यनिमित्तम् । एवं दुःखमपि ज्वरशिरोऽर्तिशूलाऽऽदिरूपमकृत्थमसैद्धिकम् । तदेतदुभयमपि, न स्वयं पुरुषकारेण कृतं, नाप्यन्येन केनचित् कालाऽऽदिना कृतं, वेदयन्त्यनुभवन्ति, पृथक् जीवाः प्राणिन इति । कथं तर्हि तत्तेषामभूदिति नियतिवादी स्वाभिप्रायमाविष्करोति-(संगइअं ति) सम्यक् स्वपरिणामेन गतिर्यस्य यदा यत्र यत्सुखदुःखानुभवनं, सा सङ्गतिर्नियतिः,तस्यां भवं साङ्गतिकम्। यतश्चैवं न पुरुषकाराऽऽदिकृतं सुखदुःखाऽऽद्यतस्तत्तेषां प्राणिनां नियतिकृतं साङ्गतिकमित्युच्यते। इहास्मिन् सुखदुःखानुभववादे, एकेषां वादिनामाख्यातम्, तेषामयमभ्युपगमः ।

तथा चोक्तम्-

" प्राप्तव्यो नियतिबलाऽऽश्रयेण योऽर्थः,
सोऽवश्यं भवति नृणां शुभोऽशुभो वा ।
भूतानां महति कृतेऽपि हि प्रयत्ने,
नाभाव्यं भवति न भाविनोऽस्ति नाशः ॥ १ ॥ " सूत्र० १ श्रु० १ अ० २ उ० ।

ये नियतिवादिनस्ते ह्येवमाहुः-नियतिर्नाम तत्त्वान्तरमस्ति, यद्वशादेते भावाः सर्वेऽपि नियतेनैव रूपेण प्रादुर्भावमनुभवन्ति, नान्यथा । तथाहि-यद्यदा यतो भवति तत्तदा तत एव नियतेनैव रूपेण भवदुपलभ्यते । अन्यथा कार्यभावव्यवस्था, प्रतिनियतरूपव्यवस्था च न भवेत्, नियामकाभावात् । तत एवं कार्यनैयत्यतः प्रतीयमानामेनां नियतिं को नाम प्रमाणपथकुशलो बाधितुं क्षमते ?, मा प्रापदन्यत्रापि प्रमाणपथव्याघातप्रसङ्गः ।

तथा चोक्तम्-

" नियतेनैव रूपेण, सर्वे भावा भवन्ति यत् ।
ततो नियतिजा ह्येते, तत्स्वरूपानुबोधतः ॥ १ ॥
यद्यदैव यतो यावत्, तत्तदैव ततस्तथा ।
नियतं जायते न्यायात्, क एनां बाधितुं क्षमः ? "॥ २ ॥ नं० ।

एवं श्लोकद्वयेन नियतिवादिमतमुपन्यस्यास्योत्तरदानायाऽऽह-

एवमेयाणि जंपंता, बाला पंडियमाणिणो ।
निययानिययं संतं, अयाणंता अबुद्धिया ॥ ४ ॥

एवमित्यनन्तरोक्तस्योपप्रदर्शने,एतानि पूर्वोक्तानि नियतिवादाऽऽश्रितानि वचनानि । जल्पन्तोऽनिदधतो, वाचा अज्ञाः सदसद्विवेकविकलाः अपि सन्तः, पण्डितमानिनः आत्मानं पण्डितं मन्तुं शीलं येषां ते तथा । किमिति ते एवमुच्यन्ते ?, इत्येतदाह-यतः (निययानिययं संतमिति) सुखाऽऽदिकं किञ्चिन्नियतिकृतमवश्यंभाव्युदयप्राप्तिं, तथाऽनियतमात्मपुरुषकारेश्वराऽऽदिप्राप्तिं सत्,नियतिकृतमेवैकान्तेनाऽऽश्रयन्त्यतोऽजानानाः सुखदुःखाऽऽदिकारणम्,अबुद्धिका बुद्धिरहिता भवन्तीति । तथाहि-आर्हतानां किञ्चित्सुखदुःखानि नियतित एव भवन्ति, तत्कारणस्य कर्मणः कस्मिंश्चिदवसरेऽवश्यंभाव्युदयसद्भावान्नियतिकृतमित्युच्यते । तथा किञ्चिदनियतिकृतं च पुरुषकालेश्वरस्वभावकर्माऽऽदिकृतं, तत्र कथञ्चित्सुखदुःखाऽऽदेः पुरुषकारसाध्यत्वमप्याश्रीयते । यतः क्रियातः फलं भवति, क्रिया च पुरुषकाराऽऽयत्ता प्रवर्त्तते । तथा चोक्तम्-"न दैवमिति संचिन्त्य, त्यजेदुद्यममात्मनः । अनुद्यमेन कस्तैलं, तिलेभ्यः प्राप्तुमर्हति ? ॥ १ ॥" यत्तु समाने पुरुषव्यापारे फलवैचित्र्यं दूषणत्वेनोपन्यस्तं, तददूषणमेव । यतस्तत्रापि पुरुषकारवैचित्र्यमपि फलवैचित्र्ये कारणं भवति । समाने वा पुरुषकारे यः फलाभावः कस्यचिद्भवति, सोऽदृष्टकृतः । तदपि चास्माभिः कारणत्वेनाऽऽश्रितमेव । (सूत्र०) (कालकर्तृत्वविचारः ' काल ' शब्दे तृतीयभागे ४६२ पृष्ठे गतः) तथेश्वरोऽपि कर्त्ता । आत्मैव हि तत्र तत्रोत्पत्तिद्वारेण सकलजगदुत्पापनादीश्वरः तस्य सुखदुःखोत्पत्तिकर्तृत्वं सर्ववादिनामविगानेन सिद्धमेव । यच्चात्र मूर्तामूर्ताऽऽदिदूषणमुपन्यस्तं, तदेवंभूतेश्वरसमाश्रयणे दूरोच्छेदितमेवेति । स्वभावस्याऽपि कथञ्चित्कर्तृत्वमेव । तथाहि-आत्मन उपयोगलक्षणत्वमसंख्येयप्रदेशत्वम् । पुद्गलानां च मूर्त्तत्वं धर्माधर्मास्तिकाययोर्गतिस्थित्युपष्टम्भकारित्वममूर्त्तत्वं चेत्येवमाद्यस्वभावाऽऽपादितम् । यदपि चाऽऽत्मनोऽव्यतिरेकाऽव्यतिरेकरूपं दूषणमुपन्यस्तं, तददूषणमेव । यतः-स्वभाव आत्मनोऽव्यतिरिक्तः । आत्मनोऽपि च कर्तृत्वमभ्युपगतमेव, तदपि स्वभावाऽऽपादितमेवेति । तथा कर्माऽपि कर्तृ भवत्येव । तथि जीवप्रदेशैः सहान्योन्यानुवेधरूपतया व्यवस्थितं कथञ्चिदात्मनोऽभिन्नं, तद्वशाच्चाऽऽत्मा नरकतिर्यङ्मनुष्यामरभवेषु पर्यटन् सुखदुःखाऽऽदिकमनुभवतीति । तदेवं नियत्यनियत्योः कर्तृत्वे युक्तियुक्तपक्षे सति नियतेरेव कर्तृत्वमभ्युपगच्छन्तो निर्युक्तिका भवन्तीत्यवसेयम् ॥ ४ ॥

तदेवं युक्त्या नियतिवादं दूषयित्वा तद्वादिनाम-
पायदर्शनायाऽऽह--

एवमेगे उ पासत्था, ते जुज्जो विप्पगब्भिआ ।
एवं उवट्ठिआ संता, ण ते दुक्खविमोक्खया ॥ ५ ॥

(एवमेगे उ इत्यादि) एवमिति पूर्वाभ्युपगमसंसूचकम्, सर्वस्मिन्नपि वस्तुनि नियतानियते सत्येके नियतमेवाऽवश्यंभाव्येव कालेश्वराऽऽदिनिराकरणेन निर्हेतुकतया नियतिवादमाश्रिताः । तुरवधारणे । त एव नान्ये । किंविशिष्टाः पुनस्ते ?,इति दर्शयति-युक्तिकदम्बकाद् बहिस्तिष्ठन्तीति पार्श्वस्थाः, परलोकक्रियापार्श्वस्था वा । नियतिपक्षसमाश्रयणात्परलोकक्रियावैयर्थ्यम् । यदि वा-पाश इव पाशः, कर्मबन्धनम् । तच्चेह युक्तिविकलनियतिवादप्ररूपणम्, तत्र स्थिताः पाशस्थाः । अन्येऽप्येकान्तवादिनः कालेश्वराऽऽदिकारणिकाः पार्श्वस्थाः, पाशस्था वा द्रष्टव्या इत्यादि । ते पुनर्नियतिवादमाश्रित्यापि, भूयो विविधं विशेषेण वा प्रगल्भिताः धाष्टर्योपगताः परलोकसाधकासु क्रियासु प्रवर्त्तन्ते । धाष्टर्याऽऽश्रयणं तु तेषां नियतिवादाऽऽश्रयणे सत्येव । पुनरपि तत्प्रतिपन्थिनीषु क्रियासु प्रवर्त्तनादिति । ते पुनरेवमप्युपस्थिताः परलोकसाधकासु क्रियासु प्रवृत्ता अपि सन्तो नाऽऽत्मदुःखविमोक्षकाः; असम्यक्प्रवृत्तत्वान्नात्मानं दुःखाद्विमोचयन्ति । गता नियतिवादिनः । सूत्र० १ श्रु० १ अ० २ उ० । आचा० । अकस्मा-

द्भवतीत्यनुपायवादिमतं चात्यन्तोपयुक्तत्वात् किञ्चिद्विचार्यते-अकस्मादिति किं किंशब्दस्य हेत्वभावभवनपरम्, उत-"अमानोनाः प्रतिषेधे" इति स्मरणान्निषेधार्थकस्य किंशब्दस्य क्रियासंबन्धसंभवाद् भवनाभावपरम् ?। किं वा-किंशब्दस्य स्वभिन्नपरतया, अलीकभिन्नपरतया वा स्वहेतुकत्वपरम्, अलीकहेतुकत्वपरं वा ?। अथवा-अकस्मादिति स्वभावादित्यर्थे रूढतया स्वभावादेव कादाचित्कमित्यर्थकः ?। एतेषु पञ्चसु नैकोऽपि प्रकारो युक्तः, नियतावधिकार्यदर्शनात्। अनियतावधित्वे, निरवधित्वे वा कादाचित्कत्वस्वभावव्याकोपात्। तत्स्वभावे च सहेतुकत्वस्याऽवश्यकत्वात्। तदुक्तमुदयनेन-"हेतुश्रुतिनिषेधो न, स्वानुपाऽऽख्यविधिर्न च। स्वभावचर्वणा नैव-मवधेर्नियतत्वतः ॥५॥" इति। अथाऽऽकाशत्वाऽऽदीनां कादाचित्कत्ववत् कादाचित्कत्वमपि न सहेतुकत्वसाधकमिति चेत्। न। आकाशत्वाऽऽदीनां सर्वत्र सत्त्वे आकाशाऽऽदिस्वलक्षणत्वाभावप्रसङ्गात्। तत्स्वभावत्वं च धर्मिग्राहकमानसिद्धमिति हेतुं विनाऽपि देशनियमस्तेषामिति। अथैवं कादाचित्कत्वमपि घटाऽऽदिस्वभावत्वादेव हेतुं विनाऽपि गमनाऽऽदिव्यावृत्तमस्त्विति चेत्। न। कादाचित्कत्वस्यावधिनियतत्वात्। सन्त्यवधयो, न त्वपेक्ष्यन्त इति चेत्। न। नियतपञ्चाङ्गावित्वस्यैवापेक्षार्थत्वात्। अन्यथा गर्दभाद् धूम इत्यपि प्रतीयेत, तन्नियतत्वेऽपि तदृगतोपकाराजनकस्य कथं तद्धेतुत्वमिति चेत् ?। उपकारो हि कार्यमिति तदृगतकार्यहेतुत्वस्य तद्धेतुत्वेऽनन्यत्वात्। अन्यथोपकारहेतुत्वाच्चोपकारेऽप्युपकारान्तरस्वीकारेऽनवस्थाऽऽपत्तेः, तर्हि घटादिति नियतत्वं कपालाऽऽदावेव, न तन्तावितिः। कुत इति चेत् ?, स्वभावादिति गृहाण। अथ तथापि ग्राहकाभावात्तदसिद्धिः, न च धूमाऽऽदौ वह्न्यादेरन्वयव्यतिरेकानुविधायित्वज्ञानसचिवं वह्न्यादिप्रत्यक्षमेव हेतुहेतुमद्भावग्राहकं, धूममात्रेऽन्वयव्यतिरेकज्ञानासम्भवात्। यत्किञ्चिद् धूमे रासभाऽऽदेरपि तथा ज्ञानात् रासभाऽऽदेर्व्यभिचारज्ञानान्न तद्धेतुरिति चेत्। न। वह्न्यादेरपि व्यभिचारशङ्कासाम्राज्यादिति। धूमाऽऽद्यर्थिनो वह्न्यादौ प्रवृत्तिश्च संभावनयैवोपपद्यत इति परमतमिति चेत्। न। सामान्यव्यभिचारानुगतागुरु(ग्रह)विशेषान्तरानुपस्थितिदशायां यत्किञ्चिद्धूमवह्न्यादेस्तद्ग्रहसामग्र्या एव वह्निधूममात्रे तद्ग्राहकत्वात् सति लाघवज्ञाने व्यभिचारशङ्काया अप्रतिबन्धकत्वात्। रासभाऽऽदौ तु व्यभिचारनिर्णय एव। असति तन्निर्णये तत्र धूमहेतुत्वग्रहेऽपि भ्रमत्वमेव, ग्राह्याभावात्। "अनन्यथासिद्धनियतपूर्ववर्तित्वं हि हेतुत्वम्।" तथा च-वह्न्यादेरवधिभूतस्य धूमाऽऽदिनियतपूर्ववर्तित्वादनन्यथासिद्धत्वाच्च तद् दुर्निवारम्। यागाऽऽद्यष्टाऽऽदौ स्वर्गाऽऽदिनिष्ठकार्यतानिरूपितकारणताग्रहभ्रमावच्छेदकविनिर्मोकेण शब्दानुमानाऽऽदिनैव तत्प्रामाण्यस्यापि तत्र व्यवस्थापितत्वात्। तृणाऽरणिमण्यादीनां वह्निकारणताग्रहेऽप्येषमेव रीतिः, तृणत्वेन व्यभिचारज्ञानस्य तेनैव रूपेण कारणताग्रहविरोधित्वात्, अवच्छेदकौदासीन्येन तृणत्वसमानाधिकरणकारणताग्रहे विरोधाभावात्। अवच्छेदकरूपानुपस्थितौ कथमवच्छेद्यकारणताग्रहः ?, कारणतायाः ससंबन्धिकपदार्थत्वेन तत्प्रत्यये संबन्धिज्ञानस्य कारणत्वादिति चेत्। न। "अयं घटः" इति समवायप्रत्यये व्यभिचारात्। अथ येन समवायत्वाऽऽदिना रूपेण ससंबन्धिकता, तेन रूपेण तत्प्रत्यये तस्य हेतुत्वान्न व्यभिचार इति चेत्। न। तथाऽपि ससंबन्धिकताऽवच्छेदकप्रकारकज्ञानत्वेन हेतुत्वमिति संबन्धिमात्रवृत्तित्वस्यैवावच्छेदकपदार्थत्वात्। प्रकृते चेयं वह्निव्यक्तिस्तृणजन्येति कारणताप्रत्यक्षस्यापि तृणकार्यताऽऽश्रयमात्रवृत्तेयं वह्नित्वप्रकारकज्ञानसाध्यत्वसंभवात्। यद्वा-इयं वह्निस्तृणजन्येति प्रत्यक्षस्य एतद्वह्नित्वावच्छिन्नकार्यताऽवगाहित्वे व्यवच्छेदकत्वांशे भ्रमत्वेऽपि कार्यतांशे प्रमात्वान्न कोऽपि दोषः। (१२४) नयो०। सम्म०।

णियइकम्म–नियतिकृत–त्रि०। अवश्यंभाव्युदयप्राप्ते, सूत्र० १ श्रु० १ अ० २ उ०।

णियइकम्म–निकृतिकर्मन्–न०। निकृतेर्मायायाः कर्म्म निकृतिकर्म। एकोनत्रिंशे मौणचौर्ये, प्रश्न०३ आश्र० द्वार।

णियइपच्चाण–निकृतिप्रज्ञान–त्रि०। निकृतिर्माया, तद्विषये प्रज्ञानं यस्य स तथा। ग्लानः प्रतिचरणीयो मा भवत्विति ग्लानवेषमहं करोमीत्येवमादिविकल्पवति, स०। "सद्दे नियइपच्चाणे, कलुसाउलचेयसा। अप्पणो य अबोहीए, महामोहं पकुव्वइ॥१॥" स० ३० सम०।

णियइपव्वय–नियतिपर्वत–पुं०। नियत्या नैयत्येन पर्वता नियतिपर्वताः। नियतपर्वतेषु, यत्र वाणमन्तरा देवा देव्यश्च नवयौवनत्वेन वैक्रियशरीरेण प्रायः सदा रममाणा अवतिष्ठन्त इति। जी० ३ प्रति० ४ उ०। रा०।

णियइवाइ[ण्]–नियतिवादिन्–पुं०। सर्वभावानां नियतिकृतत्ववादिनि, नं०। ('णियइ' शब्दे चैषां मतमनुपदमुपपादितम्)

णियंटिय–नियन्त्रित–त्रि०। नितरां यन्त्रितं नियन्त्रितमिति। नियते प्रतिज्ञातदिनाऽऽदौ ग्लानत्वाऽऽद्यन्तराऽपि नियमात्कर्त्तव्ये प्रत्याख्यानभेदे, न०। एतच्च प्रथमसंहननिनामेवेत्यन्यत्रोक्तम्। स्था० १० ठा०।

मासे मासे अ तवो, अमुगो अमुगदिवसम्मि एवइओ।
हट्ठेण गिलाणेण व, कायव्वो जाव उस्सासो ॥१०॥

मासे मासे च तपः, अमुकोऽमुकदिवसे, एतावत्षष्ठाऽऽदि, हृष्टेन नीरोगेण, ग्लानेन वा अनीरोगेण, कर्त्तव्यं, यावदुच्छ्वासो यावदायुरिति गाथासमासार्थः ॥१०॥

एअं पच्चक्खाणं, णियंटिअं धीरपुरिसपन्नत्तं।
जं गिण्हंतऽणगारा, अणिस्सिअप्पा अपडिबद्धा ॥११॥

एतत्प्रत्याख्यानमुक्तस्वरूपं, नियन्त्रितं धीरपुरुषप्रज्ञप्तं तीर्थकरगणधरप्ररूपितं, यद् गृह्णन्ति प्रतिपद्यन्तेऽनगाराः साधवः, अनिःसृताऽऽत्मानोऽनिदाना अप्रतिबद्धाः क्षेत्राऽऽदिष्विति गाथासमासार्थः ॥ ११ ॥ आव० ६ अ०।

हट्ठेण गिलाणेण व, अमुगतवोऽमुगदिणम्मि नियमेण।
कायव्वो त्ति णिअंटिअं, पच्चक्खाणं जिणा बिंति ॥१५५॥

हृष्टेन नीरोगेण, ग्लानेन वा सरोगेण, अमुकं तपः षष्ठाष्टमाऽऽदि, अमुकस्मिन् दिने, नियमेन निश्चयेन, मयेति शेषः। (कायव्वो त्ति) कर्त्तव्यं, प्राकृतत्वात् पुंसा निर्देशः, नियन्त्रितमिदं प्रत्याख्यानं, जिना ब्रुवते। इदं च प्रत्याख्यानं न सर्वकालं क्रियते, किं तर्हि, नियतकालमेव।

तथा चाऽऽह-

चउदसपुव्विसु जिणक-प्पिएसु पढमम्मि चेव संघयणे।

एअं वोच्छिन्नं चिअ, थेरा वि तया करेसी य ॥९६॥

चतुर्दशपूर्विषु चतुर्दशपूर्वधरेषु जिनकल्पिकेषु, प्रथम एव संहनने वज्रऋषभनाराचाभिधेये,एतन्नियन्त्रितप्रत्याख्यानं, व्यवच्छिन्नमेव । अत्राऽऽह-ननु तस्मिन्नपि काले चतुर्दशपूर्वधराऽऽद्य एव कृतवन्तः, स्थविरैस्तु न कृतमेवेदमित्याह-(थेरा वि तया करेसी य) स्थविरा अपि तदा पूर्वधराऽऽदिकाले,अकार्षुः, चशब्दादन्येऽप्यस्थविराः प्रथमसंहनिन इति । प्रव० ४ द्वार। भ० । आ० चू० । आव० ।

णियंठ–निर्ग्रन्थ–पुं० । निर्गता ग्रन्थात्सबाह्याभ्यन्तरादिति निर्ग्रन्थाः । साधवः, ते पञ्चधा–पुलाकः, बकुशः, कुशीलः, निर्ग्रन्थः, स्नातकश्चेति । तत्र निर्ग्रन्थः निर्गतो मोहनीयकर्मलक्षणाद् ग्रन्थादिति निर्ग्रन्थः । ध० ३ अधि० । भ० ।(सर्वेऽप्येते 'णिग्गंथ' शब्देऽस्मिन्नेव भागे २०३४ पृष्ठे प्रतिपादिताः)

णियंठे पंचविहे पन्नत्ते । तं जहा–पढमसमयणियंठे, अपढमसमयणियंठे, चरिमसमयणियंठे, अचरिमसमयणियंठे, अहासुहुमणियंठे णामं पंचमे ॥

" णियंठे " इत्यादि सुगमम् । नवरम् अन्तर्मुहूर्त्तप्रमाणायां निर्ग्रन्थाद्धायाः प्रथमे समये वर्त्तमान एकः, शेषेषु द्वितीयः, अन्तिमे तृतीयः, शेषेषु चतुर्थः, सर्वेषु पञ्चम इति विवक्षया भेद एषामिति । स्था० ५ ठा० ३ उ० । दरिद्रे, उत्त० १२ अ० ।

णियंठिपुत्त–निर्ग्रन्थिपुत्र–पुं० । पेढालविद्याधरेण सुज्येष्ठाभिधानायां साध्व्यामुत्पादिते सत्यकौ, स्था० १० ठा० ।

तद्वृत्तं चेत्थम–

" सत्यकिः खेचरः कोऽसौ, तदुत्पत्तिर्निगद्यते ॥ (३०)
चेटकस्यैव सुज्येष्ठा, सुताऽऽसीत्प्राव्रजच्च सा ।
उपाश्रयाङ्गणे नित्यं, कायोत्सर्गं ददाति च ॥ ३१ ॥
इतः परिव्राट् पेढालो, विद्यासिद्धो नभश्चरः ।
तनयं ब्रह्मचारिण्याः, विद्यां दातुं निरीक्षते ॥ ३२ ॥
कायोत्सर्गस्थितां दृष्ट्वा, सुज्येष्ठां ब्रह्मचारिणीम् ।
कृत्वा स धूम्र्या श्यामोहं, वीर्यं तस्यां न्यवेशयत् ॥ ३३ ॥
जाते गर्भेऽतिशयिनि, श्यामतस्या न विक्रिया ।
अथैवत श्राद्धगृहे, तत्सूनुर्वन्दितुं प्रभुम् ॥ ३४ ॥
संयतीभिः समं यातः, कालसंदीपकस्तदा ।
अपश्यन्नेभे कुतो भीतिः, स्वाम्याख्यत्सत्यकेरितः ॥ ३५ ॥
तत्पार्श्वेऽथ स गत्वोचे, त्वं रे ! मां मारयिष्यसि ? ।
इत्युदित्वा दृगादात्म-पादयोस्तमपातयत् ॥ ३६ ॥
व्यस्थोऽथ परिव्राजा, हत्वा विद्याः स शिक्षितः ।
रोहिणीं साधयन् पञ्च, भवान् स मारितस्तया ॥ ३७ ॥
षष्ठे षण्मासशेषाऽऽयुः, सिरुधन्तीं तां स नेष्टवान् ।
सप्तमे च भवे तां स, साधनायोपचक्रमे ॥ ३८ ॥
शवं चितास्थं प्रज्वाल्य, तस्योपर्यूर्द्ध्वचर्म च ।
विस्तार्य वामाङ्गुष्ठेन, तत्र तज्ज्वलनावधि ॥ ३९ ॥
तस्य संक्रम्यमाणस्य, कालसंदीपकस्तदा ।
चिक्षेपाऽऽगत्य काष्ठानि, सप्तरात्रे गते ततः ॥४०॥
देवता स्वयमेत्योचे, विघ्नमेतस्य मा कृथाः ।
सिद्ध्याम्यस्याहमूचे तं, कस्मिन्नङ्गे विशामि ते ?॥ ४१ ॥
तेनादर्शयलकं, तत्राऽविशत्तत्राभवद्विलम् ।
सा तुष्टा तद् व्याधात्तेत्रं, स त्रिनेत्रोऽथ विश्रुतः ॥ ४२ ॥
धर्षिताऽनेन साध्वीति, पेढालस्तेन मारितः ।
ततो रुद्राभिधः सोऽभू-त्काले संदीपकं ततः ॥ ४३ ॥
सिद्धांसौ तत्र सोऽनश्य-दूर्द्धाधः स तमन्वगात् ।
सोऽथो विकृत्य त्रिपुरं, पाताले लावणेऽनशत् ॥ ४४ ॥
दग्ध्वा तन्मारयित्वा तं, स विद्याचक्रवर्त्यभूत् ।
सर्वांस्तीर्थकृतो नत्वा, त्रिसन्ध्यं नाट्यपूर्वकम् ॥ ४५ ॥
रमते सोऽथ शक्रस्तं, महेश्वराभिधं व्यधात् ।
स विप्रद्वेषतस्तेषां, विध्वंसयति कन्यकाः ॥ ४६ ॥
अन्तःपुरीर्निभृपानां, स्वस्त्रीभिरिव खेलति ।
तस्य शिष्यद्वयं जज्ञे, नन्दी नन्दीश्वरस्तथा ॥ ४७ ॥
स पुष्पकविमानेन, नभसा सर्वतोऽभ्रमत् ।
अन्यदोज्जयिनीपुर्यां, चण्डप्रद्योतभूभुजः ॥ ४८ ॥
अन्तःपुरं विदध्वंसे, शिवां देवीं विनाऽखिलम् ।
सोऽथ दध्यौ विनाहयोऽयं, कुक्करः खेचरः कथम् ? ॥ ४९ ॥
तत्रैवाऽऽसीद्रुमा नाम, गणिका रूपशालिनी ।
दृष्ट्वाऽऽयान्तं महेशं सा, धूपं तं प्रत्युदक्षिपत् ॥ ५० ॥
सोऽन्यदाऽवातरत्तत्र,तस्या हस्तेऽम्बुजरूपम् ।
स्मेरं च मुकुलं चेशः, स्मेरहस्तमवाहयत् (?) ॥ ५१ ॥
मुकुलं साऽपथन्यूचे, योग्योऽसि त्वममूदृशः ।
न स्मेरकमलप्रायाः, मादृशाः पुनरीक्षसे ॥ ५२ ॥
तङ्कितरङ्जितस्तत्र,तया सार्द्धमुवास सः ।
एकान्ते साऽन्यदाऽप्राक्षी-द्विद्याः स्युर्नान्तिके कदा ?॥ ५३ ॥
सोऽवदन्मैथुनाऽऽसङ्गे, तया राज्ञो न्यवेद्यत ।
राज्ञोचेऽसौ तदा मार्य-स्त्वं रक्ष्या प्रत्ययाय च ॥ ५४ ॥
पश्यं तद्उदरे दत्वा, खड्गेन च्छेदितं भटैः ।
मार्या त्वियमपोत्युक्त्वा, प्रच्छन्नाः स्थापिता भटाः ॥५५॥
मारितस्तैस्तदासक्त-स्तया सह स खेचरः ।
ततो नन्दीश्वरस्ताभि-र्विद्याभिः समधिष्ठितः ॥ ५६ ॥
शिलां व्योम्नि विकृत्योचै र्हा हताश ! हनिष्यसे ।
तमथाऽक्रमयद्भीतो, राजाऽऽर्द्रपटशाटकः ॥ ५७ ॥
सोऽवदच्चेदिदं युग्म-मेतद्रूपं पुरे पुरे ।
विद्याप्याऽऽयतनेऽर्चाये, ततो मुञ्चामि नान्यथा ॥ ५८ ॥
तत्प्रपेदे नरेन्द्रोऽथ, सर्वत्रापि व्यधापयत् ।
तत्प्रासादान्महोच्छाया-नेतस्योत्पत्तिरीदृशी" ॥५९॥आ०क०।

स चोत्सर्पिण्यां जगत्प्रदीपो नाम तीर्थकरो भविष्यति । प्रव० ३६ द्वार । वीरजिनाऽनगारभेदे, भ० ।

स च नारदपुत्रेण पृष्टः पृच्छतां व्याकरोदित्युच्यते–

तेणं कालेणं तेणं समएणं० जाव परिसा पडिगया । तेणं कालेणं तेणं समएणं समणस्स भगवओ महावीरस्स अंतेवासी णारयपुत्ते णामं अणगारे पगइभद्दए० जाव विहरइ । तेणं कालेणं तेणं समएणं समणस्स० जाव अंतेवासी णियंठिपुत्ते णामं अणगारे पगइभद्दए० जाव विहरइ । तए णं से णियंठिपुत्ते अणगारे जेणामेव नारयपुत्ते अणगारे तेणेव उवागच्छइ, उवागच्छइत्ता नारयपुत्तं अणगारं एवं वयासी–मण्णे पोग्गल त्ति अज्जो ! किं सअट्ठा, समज्झा, सपएसा ?,उदाहु-अणट्ठा,अमज्झा,अपएसा ?। अज्जो ! त्ति

नारयपुत्ते अणगारे नियंठिपुत्तं अणगारं एवं वयासी-सव्वे पोग्गला मे अज्जो ! सअट्ठा, समज्झा, सपएसा; नो अणट्ठा, अमज्झा, अपएसा। तए णं से नियंठिपुत्ते अणगारे नारयपुत्तं अणगारं एवं वयासी-जइ णं ते अज्जो ! सव्वे पोग्गला सअट्ठा, समज्झा, सपएसा, नो अणट्ठा, अमज्झा, अपएसा। किं दव्वादेसेणं अज्जो ! सव्वपोग्गला सअट्ठा, समज्झा, सपएसा; नो अणट्ठा, अमज्झा, अपएसा। खेत्तादेसेणं अज्जो ! सव्वपोग्गला सअट्ठा० तहेव चेव; कालादेसेणं तं चेव, भावादेसेणं अज्जो ! तं चेव। तए णं से नारयपुत्ते अणगारे नियंठिपुत्तं अणगारं एवं वयासी-दव्वादेसेण वि मे अज्जो ! सव्वपोग्गला सअट्ठा, समज्झा, सपएसा; नो अणट्ठा, अमज्झा, अपएसा। खेत्ताएसेण वि, कालाएसेण वि, भावाएसेण वि। तए णं से नियंठिपुत्ते अणगारे नारयपुत्तं अणगारं एवं वयासी-जइ णं अज्जो ! दव्वाएसेणं सव्वपोग्गला सअट्ठा, समज्झा, सपएसा; नो अणट्ठा, अमज्झा, अपएसा। एवं ते परमाणुपोग्गले वि असट्ठे, समज्झे, सपएसे; णो अणट्ठे, अमज्झे, अपएसे। जइ णं अज्जो ! खेत्ताएसेण वि सव्वपोग्गला सअट्ठा, समज्झा, सपएसा० जाव एवं ते एगपएसोगाढे वि पोग्गले सअट्ठे, समज्झे, सपएसे। जइ णं अज्जो! कालाएसेणं सव्वपोग्गला सअट्ठा, समज्झा, सपएसा। एवं ते एगसमयट्ठिइए वि पोग्गले सअट्ठे, समज्झे, सपएसे। तं चेव जइ णं अज्जो ! भावाएसेणं सव्वपोग्गला सअट्ठे ३, एवं एगगुणकालए वि पोग्गले सअट्ठे ३ तं चेव, अह ते एवं न भवंति, तो जे वयसि दव्वाएसेण वि सव्वपोग्गला सअट्ठा, समज्झा, सपएसा; नो अणट्ठा, अमज्झा, अपएसा। एवं खेत्ताएसेण वि, कालाएसेण वि, भावाएसेण वि। तं णं मिच्छा। तए णं से नारयपुत्ते अणगारे नियंठिपुत्तं अणगारं एवं वयासी-नो खलु एयं देवाणुप्पिया! एयमट्ठं जाणामो, पासामो। जइ णं देवाणुप्पिया! नो गिलायंति परिकहित्तए, तं इच्छामि णं देवाणुप्पियाणं अंतिए एयमट्ठं सोच्चा निसम्म जाणित्तए। तए णं से णियंठिपुत्ते अणगारे नारयपुत्तं अणगारं एवं वयासी-दव्वाएसेण वि अज्जो ! सव्वपोग्गला सपएसा वि, अपएसा वि अणंता; खेत्ताएसेण वि एवं चेव, कालाएसेण वि, भावाएसेण वि एवं चेव ॥

(दव्वादेसेणं ति) द्रव्यप्रकारेण, द्रव्यत इत्यर्थः। परमाणुत्वाऽऽद्याश्रित्येति यावत्। (खेत्तादेसेणं ति) एकप्रदेशावगाढत्वाऽऽदिनेत्यर्थः। (कालादेसेणं ति) एकाऽऽदिसमयस्थितिकत्वेन। (भावादेसेणं ति) एकगुणकालकत्वाऽऽदिना। (सव्वपोग्गला सपएसा वीत्यादि) इह च यत्सविपर्ययस्वाऽऽदिपृच्छाविचारे प्रक्रान्ते सप्रदेशा अप्रदेशा एव ते प्ररूपिताः, तत्तेषां प्ररूपणे सार्द्धत्वाऽऽदि प्ररूपितमेव भवतीति कृत्वेत्यवसेयम्। तथाहि-सप्रदेशाः सार्द्धाः, समध्या वा। इतरे त्वनर्द्धाः, अमध्याश्चेति। (अणंत त्ति) तत्परिमाणज्ञापनपरं तत्स्वरूपाभिधानम्।

अथ द्रव्यतोऽप्रदेशस्य क्षेत्राऽऽद्याश्रित्याप्रदेशाऽऽदित्वं निरूपयन्नाह--

जे दव्वओ अपएसे से खेत्तओ नियमा अपएसे; कालओ सिय सपएसे, सिय अपएसे; भावओ सिय सपएसे, सिय अपएसे।

(जे दव्वओ अपएसे इत्यादि) यो द्रव्यतोऽप्रदेशः परमाणुः, स च क्षेत्रतो नियमादप्रदेशो, यस्मादसौ क्षेत्रस्यैकत्रैव प्रदेशेऽवगाहते, प्रदेशद्वयाऽऽद्यवगाहे तु तस्याप्रदेशत्वमेव न स्यात्। कालतस्तु यद्यसावेकसमयस्थितिकस्तदाऽप्रदेशोऽनेकसमयस्थितिकस्तु सप्रदेश इति। भावतः पुनर्यद्येकगुणकालकाऽऽदिस्तदाऽप्रदेशो, द्विगुणकालकाऽऽदिस्तु सप्रदेश इति निरूपितो द्रव्यतोऽप्रदेशः।

अथ क्षेत्रतोऽप्रदेशं निरूपयन्नाह-

जे खेत्तओ अपएसे-से दव्वओ सिय सपएसे, सिय अपएसे; कालओ भयणाए, भावओ भयणाए, जहा खेत्तओ एवं कालओ, भावओ। जे दव्वओ सपएसे-से खेत्तओ सिय सपएसे, सिय अपएसे। एवं कालओ, भावओ वि। जे खेत्तओ सपएसे-से दव्वओ नियमा सपएसे, कालओ भयणाए, भावओ भयणाए, जहा दव्वओ तहा कालओ, भावओ वि।

(जे खेत्तओ अपएसे इत्यादि) यः क्षेत्रतोऽप्रदेशः स द्रव्यतः स्यात्सप्रदेशः, द्व्यणुकाऽऽदेरप्येकप्रदेशावगाहित्वात्। स्यादप्रदेशः, परमाणोरप्येकप्रदेशावगाहित्वात्। (कालओ भयणाए त्ति) क्षेत्रतोऽप्रदेशो यः स कालतो भजनया अप्रदेशाऽऽदिर्वाच्यः। तथाहि-एकप्रदेशावगाढ एकसमयस्थितिकत्वादप्रदेशोऽपि स्यादनेकसमयस्थितिकत्वाच्च सप्रदेशोऽपि स्यादिति। (भावओ भयणाए त्ति) क्षेत्रतोऽप्रदेशो योऽसावेकगुणकालकाऽऽदित्वादप्रदेशोऽपि स्यादनेकगुणकालकाऽऽदित्वाच्च सप्रदेशोऽपि स्यादिति। अथ कालाप्रदेशं, भावाप्रदेशं च निरूपयन्नाह-(जहा खेत्तओ, एवं कालओ, भावओ त्ति) यथा क्षेत्रतोऽप्रदेश उक्तः, एवं कालतो भावतश्चासौ वाच्यः। तथाहि-(जे कालओ अपएसे, से दव्वओ सिय सपएसे, सिय अपएसे) एवं क्षेत्रतो, भावतश्च। तथा-(जे भावओ अपएसे से दव्वओ सिय सपएसे, सिय अपएसे) एवं क्षेत्रतः, कालतश्चेति। उक्तोऽप्रदेशः। अथ सप्रदेशमाह-(जे दव्वओ सपएसे इत्यादि) अयमर्थः यो द्रव्यतो द्व्यणुकाऽऽदित्वेन सप्रदेशः, स क्षेत्रतः स्यात्सप्रदेशो द्व्यादिप्रदेशावगाहित्वात्, स्यादप्रदेश एकप्रदेशावगाहित्वात्। एवं कालतो, भावतश्च। तथा-यः क्षेत्रतः सप्रदेशो द्व्यादिप्रदेशावगाहित्वात् स द्रव्यतः सप्रदेश एव, द्रव्यतोऽप्रदेशस्य द्विप्रदेशावगाहासम्भवात्। कालतो, भावतश्चासौ द्विधाऽपि स्यादिति। तथा यः कालतः सप्रदेशः, स द्रव्यतः, क्षेत्रतो, भावतश्च द्विधाऽपि स्यात्। तथा यो भावतः स प्रदेशः, स द्रव्यक्षेत्रकालैर्द्विधाऽपि स्यादिति सप्रदेशसूत्राणां भावार्थ इति।

अथैषामेव द्रव्याऽऽदितः सप्रदेशाप्रदेशानामल्पबहुत्वविभागमाह—

एएसि णं भंते ! पोग्गलाणं दव्वादेसेणं खेत्तादेसेणं कालादेसेणं भावादेसेणं सपएसाणं अपएसाण य कयरे कयरे अप्पा वा,बहुया वा,तुल्ला वा,विसेसाहिया वा ?। नारयपुत्ता ! सव्वत्थोवा पोग्गला भावादेसेणं अपएसा, कालादेसेणं अपएसा असंखेज्जगुणा; दव्वादेसेणं अपएसा असंखेज्जगुणा;खेत्तादेसेणं अपएसा असंखेज्जगुणा, खेत्तादेसेणं चेव सपएसा असंखेज्जगुणा; दव्वादेसेणं सपएसा विसेसाहिया; कालादेसेणं सपएसा विसेसाहिया; भावादेसेणं सपएसा विसेसाहिया। तए णं से नारयपुत्ते अणगारे नियंठिपुत्तं अणगारं वंदइ, नमंसइ,नमंसइत्ता एयमट्ठं सम्मं विणएणं भुज्जो भुज्जो खामेइ, खामेइत्ता संजमेणं० जाव विहरइ॥

" एएसि णं" इत्यादि सूत्रसिद्धं, नवरम् अस्यैव सूत्रोक्ताल्पबहुत्वस्य भावनार्थं गाथाप्रपञ्चो वृद्धोक्तोऽभिधीयते-

" वोच्चं अप्पाबहुयं, दव्वे खेत्तऽद्धभावओ यावि ।
अपएसपएसा-ण पोग्गलाणं समासेणं ॥ १ ॥
दव्वेणं परमाणू, खेत्तेणेगप्पएसमोगाढा ।
कालेणेगसमइया, अपएसा पोग्गला होंति ॥ २ ॥
भावेणं अपएसा, एगगुणा जे हवंति वण्णाइ ।
ते चिय थोवा जं गुण-बाहुल्लं पायसो दव्वे " ॥ ३ ॥

वर्णाऽऽदिनिरित्यर्थः ।

द्रव्ये प्रायेण द्व्यादिगुणा अनन्तगुणान्ताः कालकत्वाऽऽदयो भवन्ति, एकगुणकालकाऽऽदयस्त्वल्पा इति भावः।

"एत्तो कालाएसे-ण अप्पएसा भवे असंखगुणा ।
किं कारणं पुण भवे, जण्ण परिणामबाहुल्ला ? " ॥ ४ ॥

अयमर्थः-यो हि यस्मिन् समये यद्वर्णगन्धरसस्पर्शसङ्घातत्रेवसूक्ष्मत्वबादरत्वाऽऽदिपरिणामान्तरमापन्नः, स तस्मिन् समये तदपेक्षया कालतोऽप्रदेश उच्यते । तत्रैकसमयस्थितिरित्यन्ये, परिणामाश्च बहव इति प्रतिपरिणामं कालाप्रदेशसम्भवात्तद्बहुत्वमिति ।

एतदेव भाव्यते-

" भावेणं अपएसा, जे ते कालेण होंति दुविहा वि ।
दुगुणाऽऽदओ वि एवं, भावेणं जावऽणंतगुणा " ॥ ५ ॥

भावतो येऽप्रदेशा एकगुणकालकत्वाऽऽदयो भवन्ति, ते कालतो द्विविधा अपि भवन्ति; सप्रदेशाः, अप्रदेशाश्चेत्यर्थः । तथा भावेन द्विगुणाऽऽदयोऽपि अनन्तगुणान्ता एवमिति द्विविधा भवन्ति ।

ततश्च-

" कालप्पएसयाणं, एवं एक्केक्कओ भवइ रासी ।
एक्केकगुणठाण-म्मि एगगुणकालयाईसु " ॥ ६ ॥

एकगुणकालकाऽऽदिषु गुणस्थानकेषु मध्ये एकैकस्मिन् गुणस्थानके कालाप्रदेशानामेकैको राशिर्भवति । ततश्चानन्तत्वाद् गुणस्थानकराशीनामनन्ता एव कालाप्रदेशराशयो भवन्ति ।

अथ प्रेरकः--

" आहाऽणंतगुणत्तण--मेवं कालापएसयाणं ति ।
जमणंतगुणट्ठाणे-सु होंति रासी वि हु अणंता" ॥ ७ ॥

(एवमिति) यदि प्रतिगुणस्थानकं कालाप्रदेशराशयोऽभिधीयन्त इति ।

अथोत्तरम्-

" भण्णति एगगुणाण वि, अणंतभागम्मि जं अणंतगुणा ।
तेणासंखगुण च्चिय, भवंति नाणत्तगुणियस्स " ॥ ८ ॥

अयमभिप्रायः-यद्यप्यनन्तगुणकालत्वाऽऽदीनामनन्ता राशयस्तथाऽप्येकगुणकालत्वाऽऽदीनामनन्तभाग एव ते वर्तन्त इति, न तद्द्वारेण कालाप्रदेशानामनन्तगुणत्वम्, अपि त्वसङ्ख्यातगुणत्वमेवेति ।

" एवं ता भावमिणं, पडुच्च कालापएसया सिद्धा।
परमाणुपोग्गलाइसु, दव्वे वि हु एस चेव गमो " ॥ ९ ॥

एवं तावद्भावं वर्णाऽऽदिपरिणाममिममुक्तरूपमेकाऽऽद्यनन्तगुणस्थानवर्तिनमित्यर्थः । प्रतीत्य कालाप्रदेशकाः पुद्गलाः सिद्धाः कालाप्रदेशभावाः पुद्गलाः सिद्धाः प्रतिष्ठिता द्रव्येऽपि द्रव्यपरिणाममप्यङ्गीकृत्य परमाण्वादिष्वेक एव भावपरिणामोक्त एव गमः । व्याख्या-

" एमेव होइ खेत्ते, एगपएसाऽवगाहणाईसु ।
ठाणंतरसंकंति, पडुच्च कालेण मग्गणया " ॥ १० ॥

एवमेव द्रव्यपरिणामवद्भवति, क्षेत्रे क्षेत्रमधिकृत्य, एकप्रदेशावगाढाऽऽदिषु पुद्गलभेदेषु स्थानान्तरगमनं प्रतीत्य कालेन कालाप्रदेशानां मार्गणा, यथा क्षेत्रत एवमवगाहनाऽऽदितोऽपीत्येतदुच्यते ।

"संकोय विकोयं पि हु, पडुच्च ओगाहणाइ एमेव ।
तह सुहुमबायरथिरे-यरेयसद्दाइपरिणामं " ॥ ११ ॥

अवगाहनायाः सङ्कोचं विकोचं च प्रतीत्य कालाप्रदेशाः स्युः । तथा सूक्ष्मबादरस्थिरास्थिरशब्दमनःकर्माऽऽदिपरिणामं च प्रतीत्येति ।

" एवं जो सव्वो च्चिय, परिणामो पोग्गलाण दुहसमए ।
तं तं पमुच्च पण्णि, कालेणं अप्पएसत्तं " ॥ १२ ॥

(पण्णि ति) पुद्गलानामित्यर्थः ।

"कालेण अप्पएसा, एवं भावा पएसपरिहीणो ।
होंति असंखेज्जगुणा, सिद्धा परिणामबाहुल्ला ॥ १३ ॥
एत्तो दव्वादेसे--ण अप्पएसा हवंति संखगुणा ।
के पुण ते परमाणू, कह ते बहुया सि तं सुणसु ?॥ १४ ॥
अणुसंखेज्जपएसिय, असंखऽणंतप्पएसिया चेव ।
चउरो च्चिय रासी पो-ग्गलाण लोए अणंताणं ॥ १५ ॥
तत्थाऽणंतेहिंतो, सुत्तेणं तप्पएसिएहिंतो ।
जेण पएसट्ठाए, भणिया अणवो अणंतगुणा " ॥ १६ ॥

अनन्तेभ्योऽनन्तप्रदेशिकस्कन्धेभ्यः प्रदेशार्थतया परमाणवोऽनन्तगुणाः सूत्रे उक्ताः । सूत्रं चेदम्-" सव्वत्थोवा अणंतपएसिया खंधा दव्वट्ठयाए ते चेव, पएसट्ठयाए अणंतगुणा, परमाणुपोग्गला दव्वट्ठयाए अणंतगुणा, संखेज्जपएसिया खंधा दव्वट्ठयाए संखेज्जगुणा, ते चेव पएसट्ठयाए असंखेज्जगुणा, असंखेज्जपएसिया खंधा दव्वट्ठयाए असंखेज्जगुणा, ते चेव पएसट्ठयाए असंखेज्जगुण त्ति।"

" संखेज्जइमे भागे, संखेज्जपएसिया य वट्टंति ।
नवरमसंखेज्जपए-सियाण भागे असंखइमे "॥ १७ ॥

संख्येयतमे भागे संख्यातप्रदेशिकानामसंख्येयतमे भागे संख्यातप्रदेशिकानामणवो वर्तन्ते, उक्तसूत्रप्रामाण्यादिति ।

" सहवि अ संखेज्जपए-सियाण तेसिं असंखजायत्ते।
बाहुल्लं साहिज्जइ, फुडमवसेसाहि रासीहिं " ॥ १८ ॥

संख्यातप्रदेशिकानन्तप्रदेशिकाऽभिधानाच्चामिह च संख्यातप्रदेशिकराशेः संख्यातभागवृत्तित्वात्तेषां स्वरूपतो बहुत्वमवगम्यते, अन्यथा तस्याप्यसंख्येयभागेऽनन्तभागे वा तेऽन्तर्विष्यन्निति।

"जेणेक्करासिणो खिय, असंखभागे न सेसरासीणं।
तेणासंखेज्जगुणा, अणवो कालप्पएसेहिं" ॥ १९ ॥

न शेषराश्योरित्यस्यायमर्थः-अनन्तप्रदेशिकराशेरनन्तगुणाः, संख्यातप्रदेशिकराशेस्तु संख्यातभागे संख्यातभागस्य च विवक्षया नात्यन्तमल्पताऽतः कालतः सप्रदेशेभ्यश्चप्रदेशेषु च वृत्तिमतामणूनां बहुत्वात्कालाप्रदेशानां च सामायिकत्वेनाऽत्यन्तमल्पत्वात्कालाप्रदेशेभ्योऽसंख्यातगुणत्वं द्रव्याप्रदेशानामिति।

" एत्तो असंखगुणिया, हवंति खेत्ता पएसया समए।
जं ते ता सव्वे खिय, अपएसा खेत्तओ अणवो ॥ २० ॥
दुपएसियाइएसु वि, पएसपरिवड्ढिएसु ठाणेसु।
जन्नइ एक्केको खिय, रासी खेत्तापएसाणं ॥ २१ ॥
एत्तो खेत्तापएसे-ण चेव सपएसया असंखगुणा।
एगपएसोगाढे, मोत्तुं सेसावगाहणया ॥ २२ ॥
ते पुण दुपएसोगा-हणाइया सव्वपोग्गला सेसा।
ते य असंखेज्जगुणा, अवगाहणठाणबाहुल्ला ॥ २३ ॥
दव्वेण होंति एत्तो, सपएसा पोग्गला विसेसहिया।
कालेण य भावेण य, एमेव भवे विसेसहिया ॥ २४ ॥
मायाईया वुड्ढी, असंखगुणिया जमप्पएसाणं।
तो सप्पएसियाणं, खेत्ताधिसेसपरिवुड्ढी " ॥ २५ ॥

एतद्भावना च वक्ष्यमाणस्थापनातोऽवसेया।

"मीसाण संकमं पइ, सपएसा खेत्तओ असंखगुणा।
णाणिया सट्ठाणे पुण, थोव खिय ते गहेयव्वा" ॥ २६ ॥

मिश्राणामित्यप्रदेशसप्रदेशानां मीलितानां संक्रमं प्रति अप्रदेशेभ्यः सप्रदेशेष्वल्पबहुत्वविचारसंक्रमे क्षेत्रतः सप्रदेशाः असंख्येयगुणाः, क्षेत्रतोऽप्रदेशेभ्यः सकाशात् स्वस्थाने पुनः केवलसप्रदेशचिन्तायां स्तोका एव ते क्षेत्रतः सप्रदेशा इति।

एतदेवोच्यते-

" खेत्तेण सप्पएसा, थोवा दव्वट्ठभावओ आहिया।
सपएसऽप्पाबहुयं, सट्ठाणे अत्थओ एवं " ॥ २७ ॥

अर्थत इति व्याख्यानापेक्षया।

" पढमं अपएसाणं, बीयं पुण होइ सप्पएसाणं।
तइयं पुण मीसाणं, अप्पबहु अत्थओ तिण्णि " ॥ २८ ॥

अर्थतो व्याख्यानद्वारेण त्रीण्येतत्पबहुत्वानि भवन्ति। सूत्रे त्वेकमेव मिश्राल्पबहुत्वमुक्तमिति।

" ठाणे ठाणे वड्ढइ, मायाईणं जमप्पएसाणं।
तं चिय मायाईणं, परिहरइ सप्पएसाणं " ॥ २९ ॥

यथा किल कल्पनया एकं समस्तपुद्गलाः, तेषु मायाकालक्षेत्रतोऽप्रदेशाः क्रमेण एकद्विपञ्चदशसहस्रसङ्ख्याः, सप्रदेशास्तु नवनवत्यष्टनवतिपञ्चनवतिनवतिसहस्रसङ्ख्याः, ततश्च मायाप्रदेशेभ्यः कालप्रदेशेषु सदृशं वर्द्धते, तदेवं मायासप्रदेशेभ्यः कालसप्रदेशेषु हीयत इत्येवमन्यत्रापीति।

"अहवा खेत्ताईणं, जमप्पएसाण होइ कमसो।
तं चिय खेत्ताईणं, परिवड्ढइ सप्पएसाणं ॥ ३० ॥
अवरोप्परप्पसिद्धा, वुड्ढी हाणी य होइ दोण्हं पि।
अप्पएससप्पएसा-ण पोग्गलाणं स लक्खणओ ॥ ३१ ॥
ते चेव य ते चउहिँ वि, जमुवचरिज्जंति पोग्गला दुविहा।
तेण उ वुड्ढी हाणी, तेसिं अणेगसंसिद्धा ॥ ३२ ॥ "

चतुर्भिरिति मायकालाऽऽदिनिरुपचर्यन्त इति विशेष्यन्ते।

" एएसिं रासीणं, निद्दिसणम्मि णं भणामि पच्चक्खं।
वुड्ढीए सव्वपोग्गल, जावं ताणं लक्खाणो" ॥ ३३ ॥

कल्पनया यावन्तः सर्वपुद्गलास्तावन्तो लक्षा इति।

" एक्कं च दो य पंच य, दस य सहस्साइँ अप्पएसाणं।
जावाईणं कमसो, चउएह वि जहोचउट्ठाणं ॥ ३४ ॥
णउई पंचाणउई, अट्ठाणउई तहेव नवनउई।
एवइयाइ सहस्सा-इँ सप्पएसाण विवरीयं ॥ ३५ ॥
एएसिं जहसंभव-मत्थोवणयं करिज्ज रासीणं।
सब्भावओ य जाणे-ज्जा ते अणंते जिणाभिहिए " ॥ ३६ ॥

भ० ५ श० ८ उ०।

णियंठिया–नैर्ग्रन्थिकी–स्त्री०। निर्ग्रन्थो भगवाँस्तस्येयं नैर्ग्रन्थिकी। तीर्थकरकृतायाम, "जं जत्तं तत्त वत्तव्वं, एसा आणा नियंठिया।" सूत्र० १ श्रु० ६ अ०। द्वी०।

णियंसण–निवसन–न०। परिधाने, औ०। उत्त०। जीवा०।

णियंसणा–निदर्शना–स्त्री०। "अभवद्वस्तुसंबन्ध उपमा परिकल्पिता,निदर्शना" इति मम्मटोक्ते,असम्बन्धे सम्बन्धरूपातिशयोक्तिलक्षणे वा अर्थालङ्कारभेदे, प्रति०।

णियंसित्ता–न्यूष्य–अव्य०। परिधायेत्यर्थे, " देवदूसजुगलं नियंसित्ता अंगेहिं वरेहि य मट्ठेहि य अघेहि।" जी०३ प्रति० २ उ०। रा०।

णियग–निजक–पुं०। स्वकीये पुत्राऽऽदौ, पञ्चा०१० विव०। नि०। स्वजने, नि० चू० २ उ०। आत्मीये बान्धवे, सुहृदि च। आ० चा० १ श्रु० २ अ० १ उ०।

णियगपरिवाल–निजकपरिवार–पुं०। आत्मीयपरिवारे, "णियगपरिवालेण सद्धिं संपरिवुडे।" रा०। औ०।

णियच्छइत्ता–नियम्य–अव्य०। अवश्यतया प्राप्येत्यर्थे, सूत्र० १ श्रु० २ अ० १ उ०। निश्चयेनावतीर्य युक्त्वेत्यर्थे, सूत्र० १ श्रु० १ अ० २ उ०।

णियजोगपवित्ति–निजयोगप्रवृत्ति–स्त्री०। आत्मीयमनःप्रवृत्तौ, "अस्से णियजोगपवित्तीओ य।" निजयोगानामाचार्यसत्कमनःप्रवृत्तीनां प्रवृत्तिः प्रवर्त्तनं निजयोगप्रवृत्तिः। पञ्चा० २ विव०।

णियट्टपगइअहिगार–निवृत्तप्रकृत्यधिकार–पुं०। आधिधार्मिके बोधिसत्त्वे, ध० १ अधि०।

णियट्टमाण–निवर्त्तमान–त्रि०। व्यावर्त्तमाने, आचा० १ श्रु० ६ अ० ४ उ०।

णियट्टि–निवृत्ति–स्त्री०। 'वृतु' वर्त्तने इत्यस्य निपूर्वस्य क्तिनि निवर्त्तनं निवृत्तिः। त्यागे, प्रतिक्रमणे, आव०।

सा च षोढा। यत आह-

नामं ठवणा दविए, खेत्ते काले तहेव भावे य।

एसो अ णियट्टीए, निक्खेवो छव्विहो होइ ॥

तत्र नामस्थापने गतार्थे, द्रव्यनिवृत्तिस्तापसाऽऽदीनां हलकुट्टाऽऽदिनिवृत्तिरित्याद्यखिलो भावार्थः स्वबुध्या वक्तव्यो,यावत्प्रशस्तभावनिवृत्तेरेवाधिकारः । आव० ४ अ० । भावनिवृत्तिः प्रतिक्रमणम् । आ० चू० १ अ० । आ० म० ।

इदानीं निवृत्तौ दृष्टान्तः-

" एकत्र नगरे शाला-पतिः शाखासु तस्य च ।
धूर्ता वसन्ति तेष्वेको, धूर्तो मधुरगीः सदा ॥१॥
कुचिन्दस्य सुता तस्य, तेन सार्द्धमयुज्यत ।
तेनोचे साऽथ नश्यामो, यावद्वेत्ति न कश्चन ॥२॥
तयोचे मे वयस्याऽस्ति, राजपुत्री तया समम् ।
संकेतोऽस्ति यथा द्राभ्यां, पतिरेकः करिष्यते ॥३॥
तामप्यानय तेनोचे, साऽथ तामप्यचालयत् ।
तदा प्रत्यूषे महति, गीतं केनचनाऽप्यदः ॥४॥"
"जइ फुल्ला कणिआरया, चूअय ! आहिमासयम्मि घुट्ठम्मि ।
तुह न खमं फुल्लेउं, जइ पच्चंता करिंति डमराइं * ॥१॥"
श्रुत्वैवं राजकन्या सा, दध्यौ चूतमहातरुः ।
उपालब्धो वसन्तेन, कर्णिकारोऽधमस्तरुः ॥ ५ ॥
पुष्पितो यदि किं युक्तं, तवोत्तम ! ततस्तया ।
अधिमासघोषणा किं, न श्रुतेत्यस्य गीः शुभा ॥ ६ ॥
चेत्कुचिन्दी करोत्येवं, कर्त्तव्यं किं मयाऽपि तत् ?।
निवृत्ता सा विषादस्य-करणमेऽस्ति विस्मृतः ॥ ७ ॥
राजसूः कोऽपि तत्राऽहि, गोत्रजैस्त्यासितो निजैः ।
ततस्तं शरणीचक्रे, प्रदत्ता तेन तस्य सा ॥ ८ ॥
तेन श्वशुरसाहाय्या-न्निर्जित्य निजगोत्रजान् ।
पुनर्लेभे निजं राज्यं, पट्टराज्ञी बभूव सा ॥ ९ ॥
निवृत्तिर्द्रव्यतोऽभाणि, भावे चोपनयः पुनः ।
कन्यास्थानीया मुनयो, विषया धूर्तसंनिभाः ॥ १० ॥
यो गीतिगानाऽऽचार्योप-देशात्तेभ्यो निवर्त्तते ।
सुगतेर्भाजनं स स्याद्, दुर्गतेस्त्वपरः पुनः" ॥ ११ ॥
"द्वितीयोऽप्यत्र दृष्टान्तो, द्रव्यभावनिवर्त्तने ।
क्वचिद् गच्छे यदा साधुः, क्रमो महणधारणे ॥ १ ॥
इत्याचार्याः पाठयन्ति, तदादरपरायणाः ।
सोऽन्यदोदितदुःकर्मा, निर्गच्छामीति निःसृतः ॥ २ ॥
तदा च तरुणाः शूराः, साभिमानामिदं जगुः ।
मङ्गलार्थं च तत्साधुः, सोपयोगः स शुश्रुवान्" ॥ ३ ॥
"तरिअव्वा य पयत्तिआ, मरिअव्वं वा समरे समत्थपएं ।
असरिसजणउल्लावा, न हु सहिअव्वा कुलपसूएणं " ॥ १ ॥

सूक्तं चैतत्केनाप्युक्तम्-

" लज्जां गुणौघजननीं जननीमिवार्यां-
मत्यन्तशुद्धहृदयामनुवर्त्तमानाः ।
तेजस्विनः सुखमसूनपि संत्यजन्ति,
सत्यस्थितिव्यसनिनो न पुनः प्रतिज्ञाम्" ॥ १ ॥

गीत्यर्थकश्चायम्-

स्वामिसंमानिताः केऽपि, सुभटाः प्राप्तकीर्तयः ।
रणाङ्गणाः प्रणश्यन्तो, निजपक्षयशोऽर्थिनः ॥ २ ॥
ऊचिरे केचिन्नैवं, नष्टाः शोनिष्यथ क्वचित् ।
ततः प्रतिनिवृत्तास्ते, परानीकमनञ्जयन् ॥ ३ ॥
प्रभुसंमानितास्तेऽथ, शोभन्ते स्म समन्ततः ।
एवं गीतार्थमाकर्ण्य, साधुरेवं व्यचिन्तयत् ॥ ४ ॥
रणस्थानीया प्रव्रज्या, नग्नोऽहं विदितोऽधुना ।
भ्रष्टोऽयमिति हीलिष्ये, जनैरसदृशैरपि ॥ ५ ॥
ततः प्रतिनिवृत्तोऽभूद्, दृढधर्मो विशेषतः ।
आलोचितप्रतिक्रान्तो, गुरोरिच्छामपूरयत्" ॥ ६ ॥

आ० क० आव० । आचा० । आ० चू० । समकालप्रतिपन्नानां जीवानामध्यवसायभेदे, स० १४ सम० । क्षीणमोहावस्थायाम्, सूत्र० १ श्रु० ११ अ० ।

णियट्टिबायर-निवृत्तिबादर-पुं० । निवृत्तिप्रधानो बादरो बादरसंपरायो निवृत्तिबादरः । स० १४ सम० । कर्मक्षपणोद्यतेन क्षीणदर्शनसप्तके अपूर्वकरणाऽऽख्यसप्तमगुणस्थानवर्तिनि जीवधर्मे, आव० ४ अ० । " इदाणिं नियट्टी—जदा जीवो मोहणिज्जं कम्मं खवेति वा, उवसमेति वा, तदा अप्पमत्तसंजतस्स अणंतरपमत्ततरेसु अज्झवसाणट्ठाणेसु वट्टमाणो दंसणमोहणिज्जे कम्मे खवेति, उवसामेते वा० जाव हासरतिअरतिसोगभयदुगुंछाणं उदयवोच्छेदो न भवति, ताव सो भगवं अणगारो अंतोमुहुत्तकालं नियट्टि त्ति भवति॥" आ० चू० ४ अ० । कर्म० । (" अपूर्वकरण " शब्दे प्रथमभागे ६११ पृष्ठे विस्तर उक्तः)

णियडि-निकृति-स्त्री० । नितरां करणं निकृतिः । आदरकरणेन परवञ्चने, पूर्वकृतमायाप्रच्छादनार्थे मायान्तरकरणे, भ० १२ श० ५ उ० । प्रश्न० । आव० । स० । आकारवचनाऽऽच्छादने, व्य० ४ उ० । वक्रवृत्त्या कुक्कुचाऽऽदिकरणेन दम्भप्रधानवणिक्प्रोत्रियसाध्वाकारेण परवञ्चनार्थं गलकर्त्तकानामिवावस्थाने, सूत्र० २ श्रु० २ अ० । दश० । आ० म० । ज्ञा० । स्था० । त० । वक्रवृत्त्या कुक्कुचाऽऽदिकरणे, अधिकोपचारकरणेन परवञ्चलने, (इत्यन्ये) मायाप्रच्छादनार्थं मायान्तरकरणे, (इत्यप्यन्ये) ज्ञा० १ श्रु० १५ अ० । मायायाम्, आव० ५ अ० । सूत्र० । व्य० । दश० ।

णियडिछुया-निकृतिस्पृक्-स्त्री० । निकृतिर्वञ्चनार्थं चेष्टा,मायाप्रच्छादनार्थं मायान्तरमित्येके । अत्यादरकरणेन परवञ्चनमित्यन्ये । तद्वत्ता । भ० ८ श० ९ उ० । निकृतिश्च वञ्चनार्थं कायचेष्टाऽऽद्यन्यथाकरणलक्षणाभ्युपचारलक्षणं वा, तद्वत्ता । निकृतौ, स्था० ४ ठा० ४ उ० ।

णियडिसार-निकृतिसार-त्रि० । मायाप्रधाने, पं० व० ३ द्वार ।

णियण-निदान-न० । निर्देशने, " नियणइल्लुणणमहण-वावारे बहुविहे दिया कालं । " वृ० १ उ० ।

णियणिय-निजनिज-त्रि० । स्वकीयस्वकीये, पञ्चा० २ विव० ।

णियणियकाल-निजनिजकाल-पुं० । आत्मीयाऽऽत्मीयकाले, पं० व० १ द्वार ।

णियणियतित्थ-निजनिजतीर्थ-न० । स्वकीयस्वकीयप्रवचनावसरे, पञ्चा० ६ विव० ।

णियत-नियत-त्रि० । निश्चिते, विशे० । सूत्र० । उत्त० । प्रतिनियतस्वरूपे, आ० म० १ अ० १ खण्ड । परिच्छिन्ने, आव० ४

* न क्रमं न युक्तं, प्रत्यन्ता नीचकाः, ममराणि विप्लवरूपाणि, शेषं स्पष्टम् ।

अ० । परिमिते, विशे० । शाश्वते, आव० ४ अ० । एकरूपत्वात् (स्था० ५ ठा० ३ उ०) शाश्वतत्वात् सर्वकालमवस्थिते, जं० ४ वक्ष० ।

णियत्त–निवृत्त–त्रि० । अपरते, " परिग्गहारंभनियत्तदोसा । " उत्त० १४ अ० । " निवृत्ता जीवितास्तेऽत्र, सर्वेऽप्यन्ये पुनर्मृताः । (५) " आ० क० ।

णियत्तण–निवर्तन–न० । भूमिपरिमाणविशेषे, उत्त० १ अ० । आत्मने, आव० ४ अ० ।

णियत्तणसयय–निवर्तनशतक–न० । निवर्त्तनं भूमिपरिणामविशेषो देशविशेषप्रसिद्धः, ततो निवर्तनशतं कर्षणीयत्वेन यस्याऽस्ति तन्निवर्त्तनशतकम् । निवर्त्तनशतकर्षके हले, " पंचहिं हलसएहिं णियत्तणसयएणं हलेणं अवसेसं खेत्तवत्थुं पच्चक्खामि । " उपा० १ अ० ।

णियत्तणिय–निवर्तनिक–न० । निवर्त्तनं क्षेत्रमानविशेषः, तत्परिमाणं निवर्तनिकम् । निवर्त्तनमाने, निजतनुप्रमाणे, (इत्यन्ये) " णियत्तणियमंडलं आलिहेत्ता संलेहणाझूसणाझूसियस्स । " भ० ३ श० १ उ० ।

णियत्तभाव–निवृत्तभाव–त्रि० । निवृत्तपरिणामे अकुष्ठाध्यवसाये, " सुहुमो वि कम्मबंधो, न होइ उ नियत्तभावस्स । " व्य० ५ उ० ।

णियत्तमाण–निवर्तमान–त्रि० । प्रत्यावर्तने, " गुरुगा नियत्तमाणे । ' व्य० १ उ० ।

नियत्ति–निवृत्ति–स्त्री० । निवर्त्तने, " असंजमे नियत्तिं च, संजमे य पवत्तणं । " उत्त० ३१ अ० ।

णियत्थ–निवसित–त्रि० । परिहिते, आ० म० १ अ० २ खण्ड ।

णियदोसपच्चणीय–निजदोषप्रत्यनीक–त्रि० । स्वकीयरागाऽऽदिदूषणप्रतिपक्षे, पञ्चा० १० विव० ।

णियद्दिय–न्यर्दित–त्रि० । नितरामर्दिते, अनुगते, " अट्टनियद्दियचित्ता । " औ० । सू० प्र० ।

णियबुद्धि–निजबुद्धि–स्त्री० । स्वकीयधियाम्, पञ्चा० १० विव० ।

णियम–नियम–पुं० । नियमनं नियमः । दर्श० ५ तत्त्व । अभिग्रहे, निरोधे, पं० चू० । व्रते, संथा० । अभिग्रहविशेषे, संथा० । पञ्चा० । आ० । औ० । ऊर्ध्वक्षेधकालभावेनाभिग्रहग्रहणे, उपा० ७ अ० । संथा० । महाव्रताऽऽदिरूपे, (सूत्र० १ श्रु० ३ अ० २ उ०) विरमणे, संथा० । आ० म० । पिण्डविशुद्ध्यादिके उत्तरगुणे, प्रश्न० ४ सम्व० द्वार । स्त्र० । शौचाऽऽदिके योगिपरिभाषितेऽर्थे, द्वा० ।

नियमाः शौचसन्तोषौ, स्वाध्यायतपसी अपि ।
देवताप्रणिधानं च, योगाऽऽचार्यैरुदाहृताः ॥ १ ॥

(नियमा इति) शौचं शुचित्वम् । तद् द्विविधम्–बाह्यम्, आभ्यन्तरं च । बाह्यं-मृज्जलाऽऽदिभिः कायप्रक्षालनम्, आभ्यन्तरं-मैत्र्यादिभिश्चित्तमलप्रक्षालनम् । सन्तोषः-सन्तुष्टिः । स्वाध्यायः-प्रणवपूर्वाणां मन्त्राणां जपः । तपः-कृच्छ्रचान्द्रायणाऽऽदि । देवताप्रणिधानमीश्वरप्रणिधानं, सर्वक्रियाणां फलनिपेक्षतयेश्वरसमर्पणलक्षणम् । एते योगाऽऽचार्यैः पतञ्जलगादिभिर्नियमा उदाहृताः । षष्ठकम्—" शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः । " इति । (२-३२) द्वा० २१ द्वा० । इन्द्रियाऽऽदिदमने, नं० । " अक्कोधो गुरुशुश्रूषा, शौचमाहारलाघवम् । अप्रमादश्चेति ॥ " द्वा० ७ द्वा० । यदाहुर्भोगवताः-" उपव्रतानि नियमाः ॥ " द्वा० ७ द्वा० । निश्चये, अव्यभिचारे, विशे० । प्रव० । अवश्यंभावनायाम्, सूत्र० १ श्रु० १३ अ० । पञ्चा० । श्रा० । अवश्यकर्त्तव्यताऽङ्गीकारे, पञ्चा० १ विव० । अवश्यंकरणे, स० ६ अङ्ग० । नियोगे, पञ्चा० ७ विव० । नियमः पूर्वमीमांसोक्तः-पक्षतः प्राप्तस्य इतरपक्षव्युदासेन एकतरपक्षे व्यवस्थापनम्, यथा--'व्रीहीनवहन्ति ।' अत्र वितुषीकरणसाधनभूतस्य नखाऽऽदेरवहननस्य वा उभयोः प्राप्तौ अवघात इव प्रवृत्तिर्व्यवस्थाप्यते । व्रते, "नियमस्तु स यत् कर्मा-नित्यमागन्तुसाधनम्" इत्युक्तेऽनित्ये आगन्तुकसाधने उपवासाऽऽदौ कर्मणि, शौचाऽऽदिषु च । वाच० । (विस्तरस्तु वाचस्पत्ये द्रष्टव्यः)

णियमओ–नियमतस्–अव्य० । नियोगेनेत्यर्थे, पञ्चा १० विव० ।

णियमण–नियमन–न० । संयमे, " उद्देसम्मि चउत्थे, समासवयणेण नियमणं भणियं । " (२) आचा० नि० १ श्रु० ४ अ० १ उ० । कारणे, आचा० १ श्रु० २ चू० अ० । बन्धने, सूत्र० १ श्रु० ७ अ० । उपरमे, " अदत्तेरदारानियमणेहिं । " आतु० ।

णियमणिप्पकंप–नियमनिष्प्रकम्प–न० । नियमेनावश्यंभावेन निष्प्रकम्पमविचलं निरतिचारं यत्तत्तथा । निरपवादे, व्रतान्तरं सापवादमपि स्याद्, ब्रह्मचर्यं तु निरपवादमेव । " ण य किंचि अणुन्नायं । " इत्युक्तेः । प्रश्न० १ आश्र० द्वार ।

णियमप्पहाण–नियमप्रधान–त्रि० । विचित्रैरभिग्रहविशेषैरुत्तमे, ते वा नियमा उत्तमा यस्य तस्मिन्, रा० ।

णियमसाधग–नियमसाधक–त्रि० । नियमेन कार्यकारणाव्यभिचारिणि, पं० सू० ४ सूत्र ।

णियमारक्खिय–नियमारक्षिक–पुं० । राज्ञः सर्वप्रकृतीर्यो नियमाद् रक्षति स नियमारक्षिकः । श्रेष्ठिनि, नि० चू० ४ उ० ।

णियमिय–नियमित–त्रि० । अवधृते, विशे० ।

णियय–निजक–त्रि० । आत्मीये, आव० ३ अ० ।

नियत–त्रि० । शाश्वते, सूत्र० १ श्रु० ८ अ० । "णियया सव्वभावा मंगुलीणं ।" नियताः सर्वेऽपि भावा यैर्यथा भवितव्यं ते तथैव भवन्ति, न पुरुषकारबलादन्यथा कर्तुं शक्यन्ते इति । उपा० ६ अ० । "णियया अणियया भिक्खा-यरिआ पाणअलेवाडं ॥" भिक्षाचर्या नियता-कदाचिदाभिग्रहिकी, अनियता-कदाचिदनाभिग्रहिकी । " बृ० १ उ० ।

णियय चारि [ण्]–नियतचारिन्–त्रि० । अप्रतिबद्धविहारिणि, सूत्र० १ श्रु० ७ अ० ।

णिययपरिणाम–निजकपरिणाम–पुं० । स्वाभिप्राये, " णिययपरिणामा । " स्वाभिप्रायात् । जीवा० २८ अधि० ।

णिययपव्वय–नियतपर्वत–पुं० । क० स० । सदा भोग्यत्वेनाव-

स्थितेषु पर्वतेषु, येषु देवा देव्यश्च नवधारणीयेनैव वैक्रियशरीरेण प्रायः सदा रममाणा अवतिष्ठन्ते । रा० । जी० ।

णियपिंड–नियतपिण्ड–पुं० । मया एतावद्गतव्यं, भवता तु नित्यमेव ग्राह्यमित्येवं नियततया गृह्यमाणे पिण्डे, स्था० १० ठा० । (नियतपिण्डनिषेधः ' णितियपिंड ' शब्देऽस्मिन्नेव भागे २०६७ पृष्ठे द्रष्टव्यः)

णिययवयणिज्ज–निजकवचनीय–त्रि० । स्वांशपरिच्छेद्ये, "णिययवयणिज्जसच्चा, सव्वनया विरालणे मोहा ।" सम्म० १ काण्ड ।

णिययवास–नियतवास–पुं० । विहारकाले विहारमकृत्वा एकत्र वासे, "जाहे वि अपरितंता, गामागरनगरपट्टणमंडा । तो केइ नियतवासी, संगमथेरं ववइसंति ॥ ११ ॥" आव० ३ अ० । (' णितियवास ' शब्देऽस्मिन्नेव भागे २०६७ पृष्ठे वक्ष्यतोक्ता) " भवयमणियतविहारं, णिययविहारं ण तावसाहूणं । कारणनीयावासं, जो सेवे तस्स का वत्ता ?" ॥ १ ॥ महा० ४ अ० ।

णिययाणिययय–नियताऽनियत–त्रि० । अवश्यमनवश्यंभाविनि, "निययानियय संतं, अयाणंता अबुद्धिआ । (४)" सुखाऽऽदिकं किञ्चिन्नियतिकृतमवश्यंभाव्युदयप्राप्तिकं, तथाऽनियतमात्मपुरुषकारेश्वराऽऽदिप्राप्तिकं सद् नियतकृतमेवैकान्तेनैवाऽऽश्रयन्त्यतोऽज्ञानानाः । सूत्र० १ श्रु० १ अ० २ उ० ।

णिययाचिप्पायनज्जयविहारि [ण्]–निजकाभिप्रायोद्यतविहारिन्–त्रि० । स्वमतसुविहिते, जी० १ प्रति० ।

णिययावास–नियतवास–पुं० । ' णिययवास ' शब्दार्थे, आव० ३ अ० ।

णियल्ल–निगम–न० । लोहमये "बेमी" इतिख्याते पादयोर्बन्धने, औ० । " नियल्लेहि य बद्धा पिहिया य ।" आ० म० १ अ० २ खण्ड । सूत्र० ।

णियल्लिंगि [ण्]–निजलिङ्गिन्–पुं० । स्वमतवेषिणि, जीवा ३ प्रति० ।

णियल्ल–निगम–पुं० । अष्टाशीतिमहाग्रहाणां त्रयःपञ्चाशत्तमे महाग्रहे, " दो नियल्ला ।" स्था० २ ठा० ३ उ० । चं० प्र० । निज–पुं० । महाग्रहे, स्था० २ ठा० ३ उ० । चं० प्र० ।

णियविहव–निजविभव–पुं० । स्वकीयविभूतौ, पञ्चा० ६ विव० ।

णियसत्ति–निजशक्ति–स्त्री० । स्वसामर्थ्ये, द्वा० १५ द्वा० ।

णियसमय–निजसमय–पुं० । स्वकीयावसरे, पञ्चा० ९ विव० ।

णियसिस्सखंधचढिय–निजशिष्यस्कन्धचटित–त्रि० । साध्वंशाऽऽरूढे, जीवा० २१ अधि० ।

णियाइय–निकाचित–त्रि० । नियमिते, सूत्र० १ श्रु० ए अ० ।

णियाग–नियाग–पुं० । नितरां यजनं यागः पूजा यस्मिन् सोऽयं नियागः । मोक्षे, तत्रैव नितरां पूजा सम्भवात् । वृत्त० १ अ० । अष्ट० । संयमे च । कार्ये कारणोपचारात् । सूत्र० १ श्रु० १ अ० । आचा० ।

नित्य–पुं० । आमन्त्रितपिण्डे, " जे नियागं ममायंति, कीयमुद्देसियाहडं । वहंते समणुजाणंति, इय वुत्तं महेसिणा ॥४६॥" दश० ६ अ० । " उद्देसियं कीयगडं, नियागं अभिहडाणि य ।" इति अनाचरितेषु परिगणनात् । तत्र नियागमित्यामन्त्रितस्य पिण्डग्रहणं नित्यं, न स्वनामन्त्रितस्य । दश० ३ अ० ।

णियागट्ठि [ण्]–नियागार्थिन्–त्रि० । नियागो मोक्षस्तद्धर्मो वा तदर्थिनि, सूत्र० १ श्रु० १ अ० ५ उ० । मोक्षार्थिनि, उत्त० ५ अ० । " एवमेगे णियागट्ठी, धम्ममाराहगा वयं ।" सूत्र० १ श्रु० १ अ० २ उ० ।

णियागपडिवन्न–नियागप्रतिपन्न–त्रि० । यजनं यागो, नियतो निश्चितो वा यागो नियागो मोक्षमार्गः, सकृताध्वर्युत्वाद्धेतोः सम्यग्ज्ञानदर्शनचारित्राऽऽत्मकतया गतं सङ्कृतमिति तं नियागं सम्यग्दर्शनज्ञानचारित्राऽऽत्मकं मोक्षमार्गं प्रतिपन्नो नियागप्रतिपन्नः । मोक्षमार्गस्य सम्यग्दर्शनाऽऽदेरनुष्ठातरि, (आचा०) "णियागपडिवन्ने अमायं कुव्वमाणे वियाहिए ।" आचा० १ श्रु० १ अ० ३ उ० । सूत्र० ।

णियाण–निदान–न० । निश्चितं दानं निदानम् । अप्रतिक्रान्तस्याऽवश्यमुदयापेक्षे तीव्रकर्मबन्धे, आ० चू० ४ अ० नि० चू० ।

अत्थि अणिदाणओ ती–उभेओ तेण परिहर णिदाणे ।
ते पुण तुल्लातुल्ला, मोहणियाणा उपक्खे वि ॥ ५२० ॥

णिदाणं णाम-जं पमुच्च मोहणिज्जं उदिज्जति । तं जहा-इट्ठसद्दाऽऽदि । उक्तं च-"दव्वं खेत्तं कालं, भावं च भवं तहा समासज्ज । तस्स समासुद्दिट्ठो, उदओ कम्मस्स पंचविहो ॥१॥" (उपक्खे वि त्ति) "इत्थीणं पुरिसाण य तुल्ला ।" नि० चू० १५ उ० । दिव्यमानुषऋद्धिसंदर्शनश्रवणाभ्यां तदभिलाषाऽनुष्ठाने, आव० ४ अ० । स्वर्गमर्त्याऽऽदिऋद्धिप्रार्थने, आतु० । स्था० । भोगप्रार्थनायाम्, व्य० १ उ० । स्था० । निदायते लूयते ज्ञानाऽऽराधनालताऽऽनन्दरसोपेतमोक्षफला येन परशुनेव देवेन्द्राऽऽदिगुणर्द्धिप्रार्थनाऽध्यवसानेन तन्निदानम् । स्था० १० ठा० ।

नव निदानानि-

तेणं कालेणं तेणं समएणं रायगिहे नामं णगरे होत्था । वण्णओ । गुणसिलए चेइए रायगिहे णगरे सेणिए णामं राया होत्था । रायवण्णओ । एवं जहा उववातिए० जाव चेल्लणाए सद्धिं विहरति ।

(तेणं कालेणमित्यादि) व्याख्या प्राग्वत् । (सेणिए त्ति) श्रेणिको नाम राजा (होत्थ त्ति) अभवत् , आसीदित्यर्थः । (रायवण्णओ त्ति) राजवर्णकः-"महयाहिमवंतमहंतमलयमंदरमहिंदसारे, अच्चंतविसुद्धरायकुलवंसप्पसूए,निरंतरं रायलक्खणविराइयंगमंगे,बहुजणबहुमाणपूइए,सव्वगुणसमिद्धे०।" (औ०) इत्यादिको वाच्यः । तस्य देवी समस्तान्तःपुरप्रधाना भार्या सकलगुणसमन्विता चेल्लणा नाम्नी । तस्या वर्णको यथा औपपातिकनाम्नि ग्रन्थेऽभिहितस्तथाऽत्राऽभिधातव्यः । स चायम्-"सुकुमालपाणिपाया, अहीणपडिपुण्णपंचिंदियसरीरा, लक्खणवंजणगुणोववेया, माणुम्माणपमाणपडिपुण्णसुजायसव्वंगसुंदरंगी०।"(औ०) इत्यादिको वाच्यः । "जाव त्ति" यावत्करणात्-चेल्लणाए सद्धिं अणुरत्ते इट्ठे सद्दफरिसे रसरूवगंधे पंचविहे माणुस्सए कामभोगे पच्चणुब्भवमाणे विहरइ ।" इतिपदकदम्बकपरिग्रहः, विस्तरव्याख्यौपपातिकानुसारेण वाच्या, नेह विस्तरभिया प्रतन्यते ।

तए णं से सेणिए राया अन्नया कयाइ एहाए कयव-

लिकम्मे कयकोउयमंगल्लपायच्छित्ते सिरसा कंठे माल्लाकमे आविद्धमणिसुवण्णे कप्पियहारऽद्धहारतिसरयपालंबपलंबमाणकडिसुत्तयसोभे पिणद्धगेवेज्जे अंगुलजुग० जाव कप्परुक्खए चेव अलंकियविभूसिते णरिंदे सकोरेंटमल्लदामेणं छत्तेणं धरिज्जमाणेणं० जाव ससि व्व पियदंसणे नरवई, जेणेव बाहिरिया उवट्ठाणसाला जेणेव सीहासणे तेणेव उवागच्छइ, तेणेव उवागच्छित्ता सीहासणवरंसि पुरत्थाभिमुहे निसीयति, निसीइत्ता कोडुंबियपुरिसे सद्दावेइ, सद्दावेइत्ता एवं वयासी–गच्छह णं तुब्भे देवाणुप्पिया ! जाइं इमाइं रायगिहस्स नगरस्स बहिया । तं जहा–आरामाणि य, उज्जाणाणि य, आएसणाणि य, आययणाणि य, देवकुलाणि य, सभाओ य, पवाओ य, पणियसालाओ य, जाणसालाओ य, सुधाकम्मंताओ य, वाणिज्जकम्मंताओ य, कट्ठकम्मंताओ य । जे तत्थ वणमहत्तरया चिट्ठंति, ते एवं वयह–एवं खलु देवाणुप्पिया ! सेणिए राया भिंभिसारे आणवेइ–जया णं समणे जगवं महावीरे आदिगरे० जाव.....पुव्वाणुपुव्विं चरमाणे गामाणुगामं दूइज्जमाणे सुहं सुहेणं विहरमाणे संजमेणं तवसा अप्पाणं भावेमाणे इहेव उ विहरेज्जा, तया णं तुब्भे समणस्स जगवतो महावीरस्स अहापडिरूवं ओग्गहं जाणेह, अवधारेत्ता सेणियस्स रण्णो भिंभिसारस्स एयमट्ठं णिवेदेह ।

(तते णं से सेणिए इत्यादि) ततोऽनेकमल्लयुद्धव्यायामाऽऽदिकरणानन्तरं स पूर्वनिर्दिष्टः श्रेणिको राजा, अन्यदाऽन्यस्मिन्नवसरे, कदाचित् (एहाते इत्यादि) स्नानं कृतवान्, ततोऽनन्तरं कृतं बलिकर्म येन स्वगृहदेवतानां स तथा, कृतानि कौतुकमङ्गल्यान्येव प्रायश्चित्तानि दुःस्वप्नाऽऽदिविघातार्थमवश्यकरणीयत्वाद्येन स तथा । अन्ये त्वाहुः–"पायच्छित्त त्ति" पादेन पादे वा क्षिप्तो दुष्टोपद्रवपरिहारार्थं पादक्षिप्तः, कृतकौतुकमङ्गलप्रायश्चित्तश्चासौ इति विग्रहः । तत्र कौतुकानि मषीतिलकाऽऽदीनि, मङ्गलानि तु दध्यक्षतदुर्वाङ्कुराऽऽदीनि । (सिरसा कंठे मालाकमे त्ति) शिरसा कण्ठे च माला कृता धृता येन स तथा । क्वचित्–"सिरसि एहाए कंठे मालाकमे" इति पाठः । तत्र शिरसि स्नातः । ननु पूर्वमपि "एहाए त्ति" उक्तं, तर्हि किमर्थं भूयोऽपि–"सिरसि एहाए त्ति ।" पुनरुक्तप्रसङ्गात् ? । उच्यते–स्नातः सामान्यतोऽपि कण्ठस्नात उच्यते, अतः पुनरुपादानं, तस्मिन् दिने विशेषत उक्तम्–शिरसि स्नातः, द्वितीयं पदं सुबोधम् । (आविद्धमणिसुवण्णे त्ति) आविद्धं परिहितम् । (कप्पियेत्यादि) कल्पितानीष्टानि रचितानि च हाराऽऽदीनि कटीसूत्रान्तानि यस्य । तानि च सुकृतशोभान्याभरणानि यस्य स तथा । पिनद्धग्रैवेयकः । यावत्करणात्–" अंगुलिज्जुगलछियकयाभरणे, नाणामणिकणगरयणविमलमहरिहनिउणोचियमिसिमिसंतविरइयसुसिलिट्ठविसिट्ठलट्ठआविद्धवीरवलए किं बहुणा ।" इतिपदकदम्बकपरिग्रहः । (कप्परुक्खए चेव त्ति) कल्पवृक्ष एव । (अलंकियविभूसिए त्ति) अलङ्कृतो मुकुटाऽऽदिभिः (विभूसिय त्ति) वस्त्राऽऽदिभिरिति । नराणामिन्द्रो नरेन्द्रः (सकोरेंटेत्यादि) सकोरेण्टानि कोरेण्टाभिधानकुसुमस्तवकवन्ति माल्यदामानि पुष्पस्रजो यत्र तत्तथा, एवंविधेन छत्रेण ध्रियमाणेन, शिरसीत्यध्याहारः । यावत्करणात्–" सेयवरचामराहि मंगल्लजयसद्दकयालोए, अणेगगणनायगदंडनायगराईसरतलवरमाडंबियकोडुंबियमंतिमहामंतिगणगदोवारियअमच्चचेडपीढमद्दणगरनिगमसेट्ठिसेणावतिसत्थवाहदूयसंधिवालसद्धिं संपरिवुडे, धवलमहामेहनिग्गए इव गहगणदिप्पंतरिक्खतारागणाण मज्झे" (औ०) इति पदकदम्बकग्रहः । शशीव प्रियदर्शनो नरपतिर्यत्रैव बाह्या उपस्थानशाला आस्थानमण्डपो, यत्रैव सिंहासनं, तत्रैवोपागच्छति, उपागत्य सिंहासनवरे पूर्वाभिमुखः संनिषीदति, निषद्य कौटुम्बिकपुरुषान् नृपाधिकारिणः पुरुषान् शब्दयति आमन्त्रयति, आमन्त्र्यैवमवादीत्–गच्छत । णमिति वाक्यालङ्कारे । यूयं देवानां प्रियाः सरलस्वभावाः, यानि इमानि अनन्तरं वक्ष्यमाणस्वरूपाणि, राजगृहस्य नगरस्य बहिर्भवन्ति इति शेषः । तद्यथा–(आरामाणीत्यादि) आरमन्ति येषु माधवीलतागृहाऽऽदिषु दम्पत्यादीनि ते आरामाः, प्राकृतत्वान्नपुंसकत्वम् । उद्यानानि पुष्पाऽऽदिमद्वृक्षसंकुलान्युत्सवाऽऽदौ बहुजनभोग्यानि, आवेशनानि येषु लोका आविशन्ति तानि वाऽयस्कारकुम्भकाराऽऽदिस्थानानि, आयतनानि देवकुलपार्श्वोपवरकाः, देवकुलानि प्रतीतानि, सभा–आस्थानमण्डपाः, प्रपा उदकदानस्थानानि, पण्यशालाः पण्यगृहाणि, पण्या पणाः । यानशाला यत्र यानानि निष्पाद्यन्ते । सुधाकर्मान्तानि यत्र सुधापरिकर्म क्रियते । वाणिज्यकर्मान्तानि यत्र वाणिज्यार्थं बहवो मिलन्ति लोकाः । एवं काष्ठकर्मान्तानि यत्र काष्ठानि क्रयार्थं, जलाऽऽभवनभिया वा यत्र संनिक्षिप्तास्तिष्ठन्ति । उपलक्षणत्वात्–दर्भयवल्लयानरथगृहान्वानि द्रष्टव्यानि । चशब्दः सर्वत्रापरापरभेदसंसूचकः । तत्र ये वनमहत्तरकाः, वनमुपलक्षणमाविशन्ताऽऽदीनामाज्ञाता अत्यर्थं ज्ञाता अधिपतित्वेन प्रसिद्धास्तिष्ठन्ति, तान् एवं वदत । किं तदित्यादि–(एवं खलित्यादि) एवमनुप्रकारेण, खल्वित्यवधारणे, अहो देवानां प्रियाः ! श्रेणिको राजा (भिंभसारे त्ति) भिम्भा भेरी, सैव सारा प्रधाना यस्यासौ भिम्भसारः । तदाख्यानमेवं कुमारभावे–" अम्मिणा घरे परिसे सेणिएण य निंभियं घेत्तूण णिग्गतो । अवसेसा कुमारा आभरणगादि । पिउणा पुच्छिया । सव्वेहिं कहियं–जेहिं जं गीयं । सेणिएण भणियं–मए भिंभणी णीया । सेणियो पिउणा भणितो–तुज्झकिं एस सारो ? । तेण जणियं–आमं ति । ततो से रण्णा भिंभसारो णामं कयं ।" शेषं ज्ञातचरमेव । (आणवेइ त्ति) आज्ञापयति । किं तदित्याह–(जया णमित्यादि) यदा, णमिति वाक्यालङ्कारे । श्रमणो भगवान्महावीर आदिकरः । यावत्करणात्–" तित्थगरे सयंसंबुद्धे पुरिसुत्तमे पुरिससीहे०" (औ०) इत्यादिकः समस्तोऽपि औपपातिकग्रन्थप्रसिद्धो भगवद्वर्णको वाच्यः, स चातिमहानिति न लिख्यते, केवलमौपपातिकग्रन्थादवसेयः । सम्प्राप्तुकामो मोक्षं प्रति तदनुकूलव्यापारवान् । पुनः (पुव्वाणुपुव्विं त्ति) पूर्वानुपूर्व्या, नाऽनानुपूर्व्या चेत्यर्थः । (संचरमाणे त्ति) चरन् संचरन् । एतदेवाऽऽह–(गामाणुगामं दूइज्जमाणे त्ति) ग्रामश्च

प्रतीतोऽनुग्रामश्च विवक्षितग्रामानन्तरो ग्रामो ग्रामानुग्रामं,तं ऋजुना गच्छन् एकस्माद् ग्रामादनन्तरं ग्राममनुलक्ष्यत्यर्थः। अनेनाप्रतिबद्धविहारमाह, तत्राप्यौत्सुक्याभावमिति । (सुहं सुहेणं विहरमाणे ति) अत एव सुखं सुखेन शरीरखेदाभावेन, संयमबाधाभावेन च विहरन् स्थानात् स्थानान्तरं गच्छन्, ग्रामाऽऽदिषु वा तिष्ठन्, संयमेन तपसा आत्मानं भावयन् वासयन्, इहैव अत्रैव नगरे, उकारोऽलाक्षणिकः, विहरेदागच्छेत्,तदा यूयं श्रमणस्य भगवतो महावीरस्य यथाप्रतिरूपं विश्रब्धनसाध्ववग्रहसदृशमवग्रहमनुजानीध्वम् अनुददृध्वम् । अनुजानीय श्रेणिकस्य राज्ञो भिम्भासारस्य हि एनमर्थं निवेदयध्वम।

तते णं ते कोडुंबियपुरिसा सेणिएणं रन्ना बिंबिसारेणं एवं वुत्ता समाणा हट्ठ० जाव हियया कय० जाव एवं सामि! त्ति आणाए विणएणं पडिसुणेंति, पडिसुणेत्ता सेणियस्स अंतियाओ पडिणिक्खमंति, पडिणिक्खमित्ता रायगिहं णगरं मज्झं मज्झेणं णिग्गच्छंति, णिग्गच्छित्ता जाइं इमाइं रायगिहस्स बहिया-आरामाणि य० जाव जे तत्थ महत्तरया अन्नया चिट्ठंति, ते एवं वदंति० जाव सेणियस्स रन्नो एयमट्ठं पियं निवेदिज्जा,पियं भे भवतु। दोच्चं पि एवं वदित्ता जामेव दिसिं पाउब्भूता तामेव दिसिं नगरस्स परिगता । तेणं कालेणं तेणं समएणं समणे भगवं महावीरे आदिकरे० जाव गामाणुगामं दूइज्जमाणे० जाव अप्पाणं भावेमाणे विहरति। तए णं रायगिहे णगरे सिंघाडगतियचउक्कचच्चर० जाव परिसा णिग्गया० जाव पज्जुवासेति। तते णं जेणेव महत्तरया तेणेव उवागच्छति,तेणेव उवागच्छित्ता समणं भगवं महावीरं तिक्खुत्तो वंदति,नमंसति,वंदित्ता नमंसित्ता णामं गोयं पुच्छति, पुच्छित्ता णामगोत्ताए धारेंति,णामगोत्ताए धारेंतित्ता एगंततो मिलंति,एगंततो मिलित्ता एगंतमवक्कमंति,एगंतमवक्कमित्ता एवं वदासी-जस्स णं देवाणुप्पिया! सेणिए राया बिंबिसारे दंसणं कंखति,जस्स णं देवाणुप्पिया! सेणिए राया दंसणं पत्थेति० जाव अभिलसति, जस्स णं देवाणुप्पिया! सेणिए राया णामगोत्तस्स वि सवणताए हट्ठतुट्ठ० जाव भवति,से णं समणे भगवं महावीरे आदिकरे तित्थकरे० जाव सव्वण्णू सव्वदरिसी पुव्वाणुपुव्विं चरमाणे गामाणुगामं दूइज्जमाणे सुहं सुहेणं विहरति। इहमागते इहसंपत्ते० जाव अप्पाणं भावेमाणे सम्मं विहरइ; तं गच्छह णं देवाणुप्पिया ! सेणियस्स रन्नो एयमट्ठं निवेदेमो-पियं भे भवतु त्ति कट्टु एयमट्ठं आसमग्गस्स पडिसुणेंति, आसमग्गस्स पडिसुणेत्ता जेणेव रायगिहे नगरे तेणेव उवागच्छंति, तेणेव उवागच्छित्ता रायगिहं नगरं मज्झं मज्झेणं जेणेव सेणियस्स रन्नो गिहे,जेणेव सेणिए राया तेणेव उवागच्छंति, तेणेव उवागच्छित्ता सेणियं रायं करयलपरिग्गहियं० जाव जएणं विजएणं वद्धावेंति, वद्धावित्ता एवं वयासी-जस्स णं सामी ! दंसणं कंखइ० जाव, से णं समणे भगवं महावीरे गुणसिलए चेइए० जाव विहरइ। तेणं देवाणुप्पियाणं पियं निवेदेमो-पियं भे भवतु । तेणं से सेणिए राया तेसिं पुरिसाणं अंतिए एयमट्ठं सोच्चा णिसम्म हट्ठतुट्ठ० जाव हियए सीहासणाओ अब्भुट्ठेति, अब्भुट्ठित्ता जहा कोणिए० जाव वंदति, णमंसति, वंदित्ता णमंसित्ता ते पुरिसे सक्कारेति, सम्माणेति, सक्कारेत्ता सम्माणेत्ता विपुलं जीवियारिहं पीतिदाणं दलयति, पडिविसज्जेति, पडिविसज्जेत्ता णगरगुत्तिए सद्दावेति, णगरगुत्तिए सद्दावित्ता एवं वयासी-खिप्पामेव भो देवाणुप्पिया ! रायगिहं नगरं सब्भितरबाहिरियं आसियसम्मज्जितोवलित्तं० जाव पच्चप्पिणंति । तेणं से सेणिए राया बलवाउयं सद्दावेति, सद्दावेत्ता एवं वयासी-खिप्पामेव भो देवाणुप्पिया ! हयगयरहजोहकलियं चाउरंगिणं सेणं सन्नाहेह० जाव मे वि पच्चप्पिणंति। तते णं से सेणिए राया जाणसालियं सद्दावेति, जाणसालियं सद्दावेत्ता एवं वदासी-खिप्पामेव भो देवाणुप्पिया ! धम्मियं जाणप्पवरं जुत्तामेव उवट्ठवेह, उवट्ठवेत्ता मम एयमाणत्तियं पच्चप्पिणाहि । तते णं ते जाणसालिए सेणिएणं रन्ना एवं वुत्ते समाणे हट्ठ० जाव हियए जेणेव जाणसाला तेणेव उवागच्छति, तेणेव उवागच्छित्ता जाणसालं अणुपविसंति, जाणसालं अणुपविसित्ता जाणगं पच्चुवेक्खंति,जाणगं संपमज्जंति, जाणगं संपमज्जित्ता दूसं पवीणेंति, दूसं पवीणेत्ता जेणेव वाहणसाला तेणेव उवागच्छंति, उवागच्छित्ता वाहणसालं अणुपविसंति,वाहणसालं अणुपविसित्ता वाहणाइं पच्चुवेक्खंति, वाहणाइं संपमज्जेत्ता वाहणाइं अप्फालेंति,वाहणाइं अप्फालित्ता वाहणाइं णीणेंति,णीणेत्ता ईसीं पमीणेंति,ईसीं पमीणेत्ता वाहणाइं सालं करेंति, वाहणाइं वरभेरमंकिताइं करेत्ता जाणगं जोएंति, जाणगं जोएंतित्ता वक्खं गाहेंति, वक्खं गाहेत्ता पवरलट्ठिपउयधरसमं अरहयति, अरहयित्ता जेणेव सेणिए राया तेणेव उवागच्छंति, तेणेव उवागच्छित्ता० जाव एवं वदासी-जं तए सामी ! धम्मिए जाणप्पवरे आइट्ठा तहं तव आरुहाहि। तते णं से सेणिए राया बिंबिसारे जाणसालियस्स अंतिए एयमट्ठं सोच्चा णिसम्म हट्ठतुट्ठा० जाव मज्जणघरं अणुपविसति० जाव कप्परुक्खए चेव अलंकियविभूसिए णरिंदे० जाव मज्जणघरातो पडिणिक्खमति, पडिणिक्खमित्ता जेणेव चिल्लणा देवी,तेणेव उवागच्छति, तेणेव उवागच्छित्ता चेल्लणं देविं एवं वदासी-एवं खलु देवाणुप्पिए ! समणे भगवं महावीरे आदिगरे तित्थगरे० जाव पुव्वाणुपुव्विं० जाव संजमेणं अप्पाणं भावे-

[जं पुण त्ति] साभिष्वङ्गं तावत् दुष्टमेव, यत्पुनस्तीर्थकरत्वप्रार्थनं निरभिष्वङ्गं रागाभावेन विहितं, तत् अदुष्टमिति संबन्धः । निरभिष्वङ्गतामेव तस्याऽऽह-धर्मात् कुशलानुष्ठानरूपाद् दृढात्सत्त्वाऽऽदेः सकाशाद्धर्मो वा भव्यानाम्, एष तीर्थकरः, भवतीति गम्यम् । किम्भूतः ?, अनेकसत्त्वहितः निखिलजगज्जन्तुजातपरमबान्धवः । कथम् ?, यतो निरुपमसुखसंजनकः अनुपमाऽऽनन्दसंपादको, निर्वाणहेतुत्वात् । अत एवापूर्वचिन्तामणिकल्पः चिन्तातिक्रान्तसुखविधायित्वादिति । [ता इति] यस्मादनेकसत्त्वहितत्वाऽऽदिविशेषणस्तीर्थकरस्तस्माद्, एतस्य तीर्थकरस्यानुष्ठानं सद्भूतदेशनाऽऽदिकमेतदनुष्ठानम् । किमित्याह-हितं पथ्यम्, इष्टार्थसाधकत्वात् । किम्भूतम् ?, अनुपहतमप्रतिघातम् । इह स्थाने इति शब्दो द्रष्टव्यः । ततश्च इति प्रधानजातस्य एवम्भूतप्रवराध्यवसायस्य देहिनः, किम्भूतं तीर्थकरत्वप्रार्थनमित्याह-तस्मिन् धर्मदेशनाऽऽदिजिनानुष्ठाने, प्रवृत्तस्वरूपं प्रवर्त्तनस्वभावम् । ननु तीर्थकरोऽहं भवेयमित्येतस्य प्रार्थनस्य तीर्थकरवृत्तिकत्वात् कथमिदं धर्मदेशनाप्रवर्त्तनस्वभावम् ?, इत्यत आह-अर्थापत्त्या न्यायतः । यद्यपि तत्प्रार्थनं साक्षात्तीर्थकरत्ववृत्तिकं, तथाऽप्यर्थापत्त्या धर्मदेशनाऽऽदावेव वर्त्तते, तीर्थकरत्वप्रार्थनाद्वारेण धर्मदेशनाऽऽदिजिनानुष्ठानस्यैव हिताऽऽदिविशेषणस्य प्रार्थितत्वादिति तीर्थकरत्वप्रार्थनमदुष्टं, न दूषणवदिति गाथाद्वयार्थः ॥ ३८ ॥ ३९ ॥ पञ्चा० ४ विव० ।

("जाईपराहओ खलु, कासि नियाणं तु हत्थिणपुरम्मि ।
चुलणीए बंभदत्तो, उववन्नो नलिणगुम्माओ॥१॥" (उक्त० १३ अ०) इति निदानकरणे ब्रह्मदत्तोदाहरणं 'बंभदत्त' शब्दे वक्ष्यते) (द्रौपद्याः पूर्वभवे निदानकरणं 'दुवई' शब्देऽग्रे वक्ष्यते) स्वर्गाद्याप्त्यादिलक्षणेऽर्थे, सूत्र० १ श्रु० २ अ० ३ उ० । आकाङ्क्षायाम्, सूत्र० १ श्रु० १६ अ० । कारणे, वृ० १ उ० । विशे० । सूत्र० । उत्थानकारणे, वृ० १ उ० । उत्पादने, आचा० १ श्रु० ६ अ० १ उ० ।

णियाणंझाण–निदानध्यान–न० । प्राकृतत्वादनुस्वारः । निन्दितेनगङ्गदत्तसम्भूतद्रौपद्यादीनामिव स्वर्गमर्त्याऽऽदिऋद्धिप्रार्थनमध्याने, आतु० ।

णियाणकरण–निदानकरण–न० । चक्रवर्त्तीन्द्राऽऽदिप्रार्थने, स्था० २ ठा० ४ उ० ।

णियाणकारि (ण्)–निदानकारिन्–त्रि० । निदानकरणशीले, "नियाणकारी संगं तु कुरुते उद्धदेहियं ।" स्था० ६ ठा० ।

णियाणमयग–निदानमृतक–पुं० । निदानं कृत्वा बालतपश्चरणाऽऽदिमत्त्वेन मृतेषु, औ० ।

णियाणमरण–निदानमरण–न० । मरणभेदे, स्था० ६ ठा० । (व्याख्याऽस्य 'मरण' शब्दे वक्ष्यते)

+ २१०४ पृष्ठेऽत्र स विषय उक्तः। *आवश्यकसूत्रस्थं ध्यानशतकम्।

णियाणसल्ल–निदानशल्य–न०। निदानं देवाऽऽदिऋद्धीनां दर्शनश्रवणाभ्यामितो ब्रह्मचर्याऽऽदेरनुष्ठानान्ममैता भूयासुरित्यध्यवसायः, तदेव शल्यम् । स० ३ सम० । अधिकरणानुमोदनानिदानशल्यम् । शल्यभेदे, आव० ४ अ० । " दिव्वं वा माणुसं वा विभवं पासित्तुणं सोऊणं वा निदाणस्स उप्पत्ती भवेज्जा, तेणं किं भवति ? उच्यते–" सणियाणस्स चरित्तं न वट्टति । कस्मात् ?, अधिकरणानुमोदनात्, तत्थोदाहरणं बंभदत्तो । " आ० चू० ४ अ० ।

णियामित्ता–नियम्य–अव्य० । नियन्त्रयेत्यर्थे, (सूत्र०) "उवसग्गा णियामित्ता, आमोक्खाए परिव्वए । " सूत्र० १ श्रु० ३ अ० ३ उ० ।

णियावाइ(ण्)-नियतवादिन्–पुं० । नियतं नित्यं वस्तु वदति यः स तथा । एकान्तनित्यवादिन्यक्रियावादिनि,स्था० । नित्यो लोकः, आविर्भावतिरोभावमात्रत्वात् उत्पादविनाशयोः, तथाऽसतोऽनुत्पादाच्छशविषाणस्येव, सतश्चाविनाशात् घटवत्,न हि सर्वथा घटो विनष्टः,कपालाऽऽद्यवस्थाभिः तस्य परिणतत्वात्,तासां चापारमार्थिकत्वाद्. मृत्सामान्यस्यैव पारमार्थिकत्वात् , तस्य चाविनष्टत्वादिति । अक्रियावादी चायम्,एकान्तनित्यस्य स्थिरैकरूपतया सकलक्रियाविलोपाद्युपगमादिति ॥७॥ स्था०८ ठा० ।

णियुद्ध–नियुद्ध–न० । मल्लयुद्धे, जं० २ वक्ष० ।

णियोग–नियोग–पुं० । नियतो निश्चितो वा योगः सम्बन्ध इति नियोगः यथा घटशब्देन घटस्यैव प्रतिपादनं,न पटाऽऽदेरिति । अनुयोगे, आ० म० १ अ० १ खण्ड । व्यापारे, उत्त० ३ अ० । सूत्र० । आ० म० । अवश्यतायाम्, षो० १ विव० । मोक्षमार्गे, सत्संयमे च । सूत्र० १ श्रु० १६ अ० । (विशेषः 'णिओग' शब्देऽस्मिन्नेव भागे ३०१८ पृष्ठे गतः)

णियोगपडिवन्न–नियोगप्रतिपन्न–त्रि० । नियोगो मोक्षमार्गः,सत्संयमो वा,तं सर्वाऽऽत्मना भावतः प्रतिपन्नो नियोगप्रतिपन्नः । मोक्षमार्गप्रतिपन्ने, सूत्र० १ श्रु० १६ अ० ।

णियोचित–नियोजित–त्रि० । " चूलिकापैशाचिके तृतीयवर्गयोराद्यद्वितीयौ" ॥८।४।३२५॥ इति तृतीयस्याऽऽद्यम् । व्यापारिते, प्रा० ४ पाद ।

णियोजित–नियोजित–त्रि० । " नादियुज्योरन्येषाम् "॥८। ४। ३२७॥ इति चूलिकापैशाचिकेऽन्येषामाचार्याणां मते तृतीयस्य प्रथमो न । व्यापारिते, प्रा० ४ पाद ।

णिर–निर्–अव्य० । भृशार्थे, उत्त० १ अ० । निश्चये, आधिक्ये, उत्त० ६ अ० ।

णिरइ–निर्ऋति–स्त्री० । राक्षसे, मूलाधिष्ठातृदेवतायाम् , " दो निरई । " स्था० २ ठा० ३ उ० । जं० ।

णिरओवम–निरयोपम–त्रि० । नरकोपमे नरकतुल्ये, दश० १ चू० । प्रश्न० ।

णिरंकुस–निरङ्कुश–त्रि० । गुर्वाज्ञाऽऽद्यतिचारिणि, ग० २ अधि० । बाधाशून्ये. अनिवार्ये च । वाच० ।

णिरंगी–देशी–शिरोऽवगुण्ठने, दे० ना० ४ वर्ग ३१ गाथा ।

णिरंजण–निरञ्जन–त्रि० । रञ्जनं रागाऽऽद्युपरञ्जनं, तेन शून्यत्वात् (कल्प० ६ क्षण । ज्ञा०) रञ्जनं रागाऽऽद्युपरञ्जनं, तस्मान्निर्गतः । स्था० १० ठा० । रागाऽऽदिमुक्ते, " संखो इव निरंजणे । " स्था० १ ठा० ।

णिरंतर–निरन्तर–त्रि० । निर्गतमन्तरात्, निर्गतमन्तरं वा यस्मात् । निबिडे, निरवधौ, निश्छिद्रे च । वाच० । सतते, नैरन्तर्ये, विशे० । रा० । अविश्रामे, सूत्र० १ श्रु० ५ अ० २ उ० । प्रज्ञा० । स्था० । " निरंतरायलक्खणविराइयंगुवंगो । " नैरन्तर्येण राजलक्षणैरूर्ध्वस्वस्तिकाऽऽदिभिर्विरोचितान्यङ्गानि शिरःप्रभृतीन्युपाङ्गानि चाङ्गुल्यादीनि यस्य स तथा । स्था० २ ठा० १ उ० ।

णिरंतरिय–निरन्तरिक–त्रि० । निर्गताऽन्तरिका छिद्रान्तररूपा येषां ते निरन्तरिकाः । छिद्रान्तररहितेषु, रा० । " णिरंतरिघणकवाडा भित्ती । " रा० । निर्गताऽन्तरिका छिद्रान्तररूपा ययोस्तौ निरन्तरिकौ, अत एव घनौ कपाटौ यस्य तन्निरन्तरिकघनकपाटम् । जी० ३ प्रति० ४ उ० । जं० ।

णिरंबर–निरम्बर–पुं० । निर्गतमम्बरं येभ्यस्ते निरम्बराः । जिनकल्पिकाऽऽदिषु, आ० म० १ अ० १ खण्ड ।

णिरंस–निरंश–पुं० । निरवयवे, विशे० ।

णिरक्क–देशी–चोरे, स्थिते,पृष्ठे च । दे० ना० ४ वर्ग ४१ गाथा ।

णिरग्गिसरण–निरग्निशरण–पुं० । निर्गतमग्नेः पावकाच्छरणं शीताऽऽदिपरित्राणं यत्र । अथवा–निर्गते स्वीकाराभावादग्निशरणे वह्निभवने यत्रासौ निरग्निशरणः । पा० । अग्निशरणरहिते, " इमस्स धम्मस्स णिरग्गिसरणस्स संपक्खालियस्स । " ध० ३ अधि० ।

णिरट्ठ–निरर्थ–त्रि० । निष्प्रयोजने, उत्त० १ अ० । " णिरट्ठसोया परितावमेइ । " निरर्थः शोको यस्याः सा निरर्थशोका । उत्त० २० अ० ।

णिरट्ठग–निरर्थक–न० । अर्थः प्रयोजनं, तद्भावो निरर्थं, तदेव निरर्थकम् । प्रयोजनाऽभावे, " णिरट्ठगम्मि विरमो, मेहुणाओ सुसंवुडो । "(४२) उत्त० २ अ० ।

णिरणुकंप–निरनुकम्प–त्रि० । दयांशवर्जिते, सं० । सूत्र० । निःशूके, प्रश्न० ३ आश्र० द्वार ।

निरनुकम्पमाह–

जो उ परं कंपंतं, दट्ठूण न कंपए कढिणभावो ।
एसो उ णिरणुकंपो, अणु पच्छाभावजोएणं ॥

यस्तु परं कृपाऽऽस्पदं कुतश्चिद् भयात्कम्पमानमपि दृष्ट्वा कठिनभावः सन् न कम्पते, एष निरनुकम्पः । कुतः ?, इत्याह–अनुशब्देन पश्चाद्भाववाचकेन यो योगः संबन्धः,तेन । किमुक्तं भवति ?–अनु पश्चाद् दुःखितः सत्त्वकम्पनादनन्तरं यत्कम्पनं सा अनुकम्पा, निर्गता अनुकम्पा यस्मादिति निरनुकम्प उच्यते । बृ० १ उ० ।

णिरणुतावि [णए]–निरनुतापिन्–पुं० । अपश्चात्तापिनि, जी० । सेवितेऽप्यकृत्ये मनागपि न पश्चात्तापभाक् । प्रव० २७४ द्वार ।

णिरणुबंधग–निरनुबन्धक–त्रि० । अनुबन्धरहिते, द्वा० २१ द्वा० ।

णिरणुबंधदोस–निरनुबन्धदोष–पुं० । क० स० । व्यवच्छिन्नसन्ताने रागाऽऽदौ, षो० १२ विव० ।

णिरति–निरति–स्त्री० । देवानन्दायाम्, कल्प० ६ क्षण ।

णिरत्थ–निरस्त–त्रि० । निष्काशिते, स्था० ७ ठा० ।

णिरत्थग–निरर्थक–न० । सत्यार्थान्निष्क्रान्ते, प्रश्न० २ आश्र० द्वार । वर्णक्रमसत्यार्थरहिते, उत्त० १८ अ० । निर्देशवति, आ० म० १ अ० २ खण्ड० । यत्र वर्णानां क्रममात्रं निर्देशमात्रमुपलभ्यते, न त्वर्थः। यथा–अआइई इत्यादि । विशे० । अनु० निष्प्रयोजने, द्वा० १६ द्वा० । यस्य वाऽवयवेष्वर्थो न विद्यते । यथा–कित्थः, कवित्थः, वाग्जनः । बृ० १ उ० ।

णिरप्प–देशी–पृष्ठे, उद्वेष्टिते च । दे० ना० ४ वर्ग ४६ गाथा ।

णिरया–धा० । गतिनिवृत्तौ, " स्थष्ठा-थक्क-चिट्ठ-निरप्पाः " ४८ । ४ । १६ ॥ इति तिष्ठतेर्निरप्पाऽऽदेशः । ' निरप्पइ ' । तिष्ठति । प्रा० ४ पाद ।

णिरभिग्गह–निरभिग्रह–त्रि० । निर्गता अभिग्रहा येभ्यस्ते निरभिग्रहाः । अभिग्रहरहितेषु केवलसम्यग्दर्शिषु, आव० ६ अ० ।

णिरभिराम–निरभिराम–त्रि० । अरमणीये, " पहसितवीह-णकणिरभिरामे । " प्रश्न० ३ आश्र० द्वार ।

णिरभिस्संग–निरभिष्वङ्ग–त्रि० । सङ्गरहितत्वे, पञ्चा० ६ विव० । सर्वाऽऽशंसाविप्रमुक्ते, पं० व० १ द्वार । मिथ्यादृष्टिभवदारेषु बाह्यद्रव्ये च निस्पृहे, पञ्चा० २ विव० ।

णिरय–निरय–पुं० । निर्गतमविद्यमानमयमिष्टफलं दैवं कर्म सातवेदनीयाऽऽदिरूपं येभ्यस्ते निरयाः । कर्म० ५ कर्म० । स्था० । निर्गतमयं शुभमस्मादिति निरयः । स्था० ४ ठा० १ उ० । सीमन्तकाऽऽदिषु नरकेषु, कर्म० १ कर्म० । स्था० । प्रश्न० । आव० । (सर्वा वक्तव्यता 'णरग' शब्देऽस्मिन्नेव भागे १६०४ पृष्ठादारभ्य १६२५ पृष्ठपर्यन्तं स्थिता) निर्गता अयाच्छुभादिति निरयाः । नारकेषु, स्था० १० ठा० । आचा० ।

निरत–त्रि० । सक्ते, दश० १० अ० । स० ।

णिरयगइ–निरयगति–स्त्री० । निरये नरके वा गतिर्निरयगतिः, निरयश्चासौ गतिश्चेति वा निरयगतिर्निरयप्रापिका वा गतिर्निरयगतिः । स्था० ४ ठा० ३ उ० । निर्गता अयाच्छुभादिति निरया नरकाः, ते गतिर्गम्यमानत्वाद्, निरयो नरकस्तद्गतिर्नामकर्मोदयसंपाद्यो नारकत्वलक्षणः पर्यायविशेषो वेति निरयगतिः । गतिभेदे, स्था० १० ठा० ।

णिरयगोयर–निरयगोचर–पुं० । ब० स० । नरकवर्त्तिनि जीवे, प्रश्न० २ आश्र० द्वार ।

णिरयदंसि [ण्]–निरयदर्शिन् निरयं स्वरूपतो वेत्त्यनर्थपरित्यागरूपत्वाद् ज्ञानस्य, परिहरति च । समानमपि पश्यति, परिहरति च, निरयदर्शी । नरकनिदानवेत्तरि, " जे मारदंसी से णिरयदंसी, जे णिरयदंसी से तिरियदंसी । " आचा० १ श्रु० ३ अ० ४ उ० ।

णिरयपत्थड–निरयप्रस्तट–पुं० । नरकप्रस्तरे, प्रज्ञा० २ पद ।

णिरयपरिसामंत–निरयपरिसामन्त–पुं० । नरकपारिपार्श्वे, भ० १३ श० ६ उ० । निरयवासानां पार्श्वे, भ० १३ श० ४ उ० ।

णिरयपाल–निरयपाल–पुं० । नरकपालेषु परमाधार्मिकेषु, स्था० ४ ठा० १ उ० । (नरकपालकर्तव्यं 'णरग' शब्देऽस्मिन्नेव भागे १६१२ पृष्ठे दर्शितम्)

णिरयरोग–निरयरोग–पुं० । नरकरोगे, " पणकोडि अट्ठसट्ठी, लक्खा नवनवइसहस्सपंचसया । चुलसीअहिया रोगा, हवंति तह सत्तमे नरए ॥१॥" इयं गाथा क्वास्ति?, प्रथमाऽऽदिनरकेषु च कियन्तो रोगा भवन्तीति प्रश्ने, उत्तरम्–इयं गाथैतत्पाठरूपा ग्रन्थे दृष्टाऽपि न स्मर्यते, एतद्भावार्थरूपाऽनुवर्त्तते । यथा–" रोगाणं कोडीओ, हवंति पंचेव लक्ख अडसट्ठी । नवनवइसहस्साइं, पंचसया तह य चुलसीइ" ॥१॥ एते रोगा अप्रतिष्ठाने नरकावासे नित्याः, अन्यत्रापि च संभवन्ति यथायोगम् । ततश्च यस्मिन्नरकभवे एतावन्तो रोगाः क्षयहेतवस्तस्मिन् धर्म एव सार इत्यादरणीयः सर्वशक्त्येत्युपदेशरत्नाकरे पञ्चविंशत्यधिकैकशतपत्रमितपुस्तके एकाशीतितमपत्रे । २७ प्र० । सेन० १ उल्ला० ।

णिरयवास–निरयवास–पुं० । नरकरूपे वासे, " णिरयवासगमणनिधणो । " निरयो नरकः, स एव वासो निरयवासः, तत्र गमनं तदेव निधनं पर्यवसानं यस्य स निरयवासगमननिधनस्तत्फल इत्यर्थः । प्रश्न० १ आश्र० द्वार ।

णिरयविग्गहगइ–निरयविग्रहगति–स्त्री० । निरयाणां नारकाणां विग्रहात् क्षेत्रविभागानतिक्रम्य गतिर्गमनं निरयविग्रहगतिः । स्थितिनिवृत्तिलक्षणायामृजुवक्रूपायां विद्यायोगतिकर्मोपाधायां वा गतौ, स्था० १० ठा० ।

णिरयविभत्ति–निरयविभक्ति–स्त्री० । नरकप्रविभागे, तदर्थके सूत्रकृतेऽध्ययने च, प्रश्न० २ आश्र० द्वार ।

णिरयवेयणिज्ज–निरयवेदनीय–न० । निरये वेद्यतेऽनुभूयते यन्निरययोग्यं वा यद् वेदनीयमत्यन्ताशुभनामकर्माऽऽदि, असातवेदनीयं वा । नरकगतिनामकर्मणि, "णेरइए णिरयवेयणिज्जं सि कम्मंसि ।" स्था० ४ ठा० १ उ० ।

णिरयावलिया–निरयावलिका–स्त्री० । आवलिकाप्रविष्टनरकेषु, "णिरयावलियासु निरयपत्थडेसु ।" प्रज्ञा० ३ पद । ब० व० । यत्राऽऽवलिकाप्रविष्टा इतरे च नरकाऽऽवासाः प्रसक्तास्तद्गामिनश्च नरास्तिर्यञ्चो वा वर्ण्यन्ते, ता निरयावलिकाः, एकस्मिन्नपि ग्रन्थे वाच्ये बहुवचनं शब्दशक्तिस्वाभाव्याद्, यथा पञ्चाला इत्यादि । नं० । पा० । अन्तकृद्दशाङ्गाऽऽदीनां दृष्टिवादपर्यन्तानां पञ्चानामुपाङ्गानामुपाङ्गरूपे कल्पिकाऽऽदिपञ्चवर्गाऽऽत्मकश्रुतस्कन्धे, तत्र पञ्च वर्गाः पञ्चानामुपाङ्गानि । तथाहि–अन्तकृद्दशाङ्गस्य कल्पिका १, अनुत्तरोपपातिकदशाङ्गस्य कल्पावतंसिका २, प्रश्नव्याकरणस्य पुष्पिका ३, विपाकश्रुतस्य पुष्पचूलिका ४, दृष्टिवादस्य दृष्टिदशा ५ । जं० १ वक्ष० ।

तेणं कालेणं तेणं समएणं रायगिहे नामं नयरे होत्था । रिद्धत्थिमियसमिद्धे वण्णओ । असोगवरपायवे पुढविसिलापट्टए । तेणं कालेणं तेणं समएणं समणस्स भगवओ महावीरस्स अंतेवासी अज्जसुहम्मे नामं अणगारे जातिसंपन्ने जहा केसी०जाव पंचहिं अणगारसएहिं सद्धिं संपरिवुडे पुव्वाणुपुव्विं चरमाणे जेणेव रायगिहे नगरे०जाव अहापडिरूवं उग्गहं उग्गिण्हित्ता संजमेणं०जाव विहरति। परिसा निग्गया । धम्मो कहिओ । परिसा पडिगया । तेणं कालेणं तेणं समएणं अज्जसुहम्मस्स अणगारस्स अंतेवासी जंबूनामं अणगारे समचउरंसठाणसंठिए०जाव संखित्तविपुलतेयलेस्से अज्जसुहम्मस्स अणगारस्स अदूरसामंते उड्ढं जाणू० जाव विहरति। तए णं से भगवं जंबू०

जाव सद्दे० जाव पज्जुवासमाणे एवं वयासी-उवंगाणं भंते ! समणेणं०जाव संपत्तेणं के अट्ठे पण्णत्ते ?। एवं खलु जंबू ! समणेणं भगवया० जाव संपत्तेणं एवं उवंगाणं पंच वग्गा पण्णत्ता । तं जहा-निरयावलियाओ, कप्पवडंसियाओ, पुप्फियाओ, पुप्फचूलियाओ, वण्हिदसाओ । जइ णं भंते ! समणेणं० जाव संपत्तेणं उवंगाणं पंच वग्गा पण्णत्ता । तं जहा-निरयावलियाओ० जाव वण्हिदसाओ । पढमस्स णं भंते ! वग्गस्स उवंगाणं निरयावलियाणं समणेणं भगवया०जाव संपत्तेणं कइ अज्झयणा पण्णत्ता ?। एवं खलु जंबू ! समणेणं० उवंगाणं पढमस्स वग्गस्स निरयावलियाणं दस अज्झयणा पण्णत्ता । तं जहा-"काले सुकाले महकाले, कण्हे सुकण्हे तह महाकण्हे । वीरकण्हे बोधव्वे, रामकण्हे तहेव अट्ठमए । पिउसेणकण्हे नवमे, दसमे महसेणकण्हे उ ॥"

भगवता उपाङ्गानां पञ्च वर्गाः प्रज्ञप्ताः । वर्गोऽध्ययनसमुदायः । तद्यथेत्यादिना पञ्च वर्गान् दर्शयति-(निरयावलियाओ कप्पवडिंसियाओ पुप्फियाओ पुप्फचूलियाओ वण्हिदसाओ त्ति) प्रथमवर्गो दशाऽध्ययनाऽऽत्मकः प्रज्ञप्तः । अध्ययनदशकमेवाऽऽह-"काले सुकाले" इत्यादीनां मातृनामभिस्तदपत्यानां पुत्राणां नामानि । यथा-काल्या अयमिति कालः कुमारः । एवं सुकाल्याः, महाकाल्याः, कृष्णायाः, सुकृष्णायाः, महाकृष्णायाः, वीरकृष्णायाः, रामकृष्णायाः, पितृसेनकृष्णाया महासेनकृष्णाया अयमित्येवं पुत्रनाम वाच्यम् । इह काल्या अपत्यमित्याद्यर्थः प्रत्ययेनोत्पाद्यः काल्यादिशब्देष्वपत्येऽर्थे यत्प्रत्ययः । कालस्तु कालाऽऽदिनाम्ना सिद्धेरेव वाच्यः । कालः १, तदनु सुकालः२, महाकालः३, कृष्णः४, सुकृष्णः ५, महाकृष्णः ६, वीरकृष्णः ७, रामकृष्णः ८, पितृसेनकृष्णः ९, महासेनकृष्णः १० दशमः । इत्येवं दशाध्ययनानि निरयावलिकानामके प्रथमे वर्गे इति । नि० १ श्रु० १ वर्ग १ अ०। (निरयावलिकाद्वितीयवर्गवक्तव्यता ' कप्पवडिंसिया ' शब्दे तृतीयभागे २३५ पृष्ठे गता)

तइयस्स णं भंते ! वग्गस्स उवंगाणं पुप्फियाणं के अट्ठे पण्णत्ते ?। एवं खलु जंबू ! समणेणं० जाव संपत्तेणं पुप्फियाणं दस अज्झयणा पण्णत्ता । तं जहा-"चंदे सूरे सुक्के, बहुपुत्तिय पुण्णभद्दे माणिभद्दे य। दत्ते सिवे बलियाए, अणाढिए चेव बोधव्वा ॥१॥" नि०१ श्रु०३ वर्ग १ अ०।

जइ णं भंते ! समणेणं भगवया उक्खेवओ० जाव दस अज्झयणा पण्णत्ता । तं जहा-" सिरि हरि धिति कित्ती, बुद्धी लच्छी य होइ बोधव्वा। इलदेवी सुरदेवी, रसदेवी गंधदेवी य ॥१॥"

जइ णं भंते ! समणेणं भगवया०जाव संपत्तेणं उवंगाणं चउत्थस्स वग्गस्स पुप्फचूलाणं दस अज्झयणा पण्णत्ता ।

पंचमस्स णं भंते ! वग्गस्स उवंगाणं वण्हिदसाणं समणेणं भगवया०जाव संपत्तेणं के अट्ठे पण्णत्ते ?। एवं खलु जंबू ! समणेणं भगवया० जाव दुवालस अज्झयणा पण्णत्ता । तं जहा-"निसढे अणि दह वहे, पगती जुत्ति दसरहे दढरहे य । महाधणू सत्तधणू, दसधणू नाम सए ॥१॥" नि० १ श्रु० ५ वर्ग १ अ०।

एवं खलु जंबू ! समणेणं भगवया महा०जाव निक्खेवओ। एवं सेसा वि एक्कारस अज्झयणा नेयव्वा, संगहणीअणुसारेण अहीणमइरित्तं एक्कारससु वि निरयावलियासुयक्खंधो सम्मत्तो, सम्मत्ताणि उवंगाणि,निरयावलियाउवंगे णं एगो सुयक्खंधो,पंच वग्गा पंचसु दिवसेसु उद्दिस्संति । तत्थ चउसु वग्गेसु दस दस उद्देसगा, पंचमगे बारस उद्देसगा निरयावलियासुयक्खंधो सम्मत्तो । नि०१ श्रु० ५ वर्ग १२ अ०।

इह ग्रन्थे प्रथमवर्गो दशाऽध्ययनाऽऽत्मको निरयावलिकानामकः। द्वितीयवर्गो दशाध्ययनात्मकः, तत्र च कल्पावतंसिका इत्याख्या अध्ययनानाम् । तृतीयवर्गोऽपि दशाध्ययनाऽऽत्मकः, पुष्पिकाशब्दाभिधेयानि च तान्यध्ययनानि । तत्राऽऽद्ये चन्द्रज्योतिष्केन्द्रवक्तव्यता । द्वितीयाध्ययने सूर्यवक्तव्यता । तृतीये शुक्रमहाग्रहवक्तव्यता । चतुर्थाध्ययने बहुपुत्रिकादेवीवक्तव्यता । पञ्चमेऽध्ययने पूर्णभद्रदेववक्तव्यता । षष्ठे माणिभद्रदेववक्तव्यता । सप्तमे प्राग्भवविकचन्दनागतगङ्गदत्तनामकदेवस्य द्विसागरोपमस्थितिकस्य वक्तव्यता । अष्टमाध्ययने शिवगृहपतिमिथिलाव्यास्तव्यस्य देवत्वेनोत्पन्नस्य द्विसागरोपमस्थितिकस्य वक्तव्यता । नवमे च हस्तिनापुरवास्तव्यस्य द्विसागरोपमाऽऽयुष्कतयोत्पन्नस्य देवस्य ..... नामकस्य वक्तव्यता । दशमाऽध्ययने 'अणाढिय' गृहपतेः काकन्दीनगरीवास्तव्यस्य द्विसागरोपमाऽऽयुष्कतयोत्पन्नस्य देवस्य वक्तव्यता। इति तृतीयवर्गे अध्ययनानि । चतुर्थो वर्गोऽपि दशाध्ययनात्मकः, श्री-ह्री-धृति-कीर्ति-बुद्धि-लक्ष्मी-इलादेवी-सुरादेवी-रसादेवी-गन्धदेवीतिवक्तव्यताप्रतिबद्धाध्ययनाऽऽत्मकः । तत्र श्रीदेवीसौधर्मकल्पोत्पन्ना भगवतो महावीरस्य नाट्यविधिदारकविकुर्वणया प्रदर्श्य स्वस्थानं जगाम, प्राग्भवे राजगृहे सुदर्शनगृहपतेः प्रियभार्याया भद्रजाभूया नाम्न्यऽभवत्, न केनापि परिणीता, पतितस्तनी जाता, चरकपरिव्राजिका वरयितृप्रस्थेदिता जर्जराऽपरिणीताऽभूत । सुगमं सर्वं यावच्चतुर्थवर्गः समाप्तः । पञ्चमे वर्गे वह्निदशाभिधानद्वादशाध्ययनानि प्रज्ञप्तानि-" निसढे " इत्यादीनि । प्रायः सर्वोऽपि सुगमः पञ्चमवर्गः । नि० १ श्रु० ३ वर्ग ।

णिरयावास-निरयावास-पुं० । आवसन्ति येषु, ते आवासाः, निरयाश्च ते आवासाश्च निरयाऽऽवासाः । नरकाऽऽवासेषु रत्नप्रभाऽऽदिषु । भ० ।

नरकाऽऽवाससंख्या-

इमीसे णं भंते ! रयणप्पभाए पुढवीए कइ निरयावाससयसहस्सा पण्णत्ता ?। गोयमा ! तीसं निरयावाससयसहस्सा पण्णत्ता । गाहा-* "तीसा य पण्णवीसा, पन्नरस दसेव

* प्रथमपृथ्यां ३० लक्षनरकावासाः । द्वितीये २५ लक्षमिताः । तृतीये १५ लक्षमिताः । चतुर्थे १० लक्षमिताः । पञ्चमे ३ लक्षमिताः । षष्ठके पञ्चूना एकलक्षमिताः । सप्तमे ५ पञ्च । इति गाथार्थः ॥१७२॥ संग्रहणी ।

य सयसहस्सा । तिण्णेगं पंचूणं, पंचेव अणुत्तरा णिरया ॥ १७२ ॥ " जं० १ श० ४ उ० ।

(इयं गाथा 'जाण' शब्देऽस्मिन्नेव भागे १७०२ पृष्ठे वर्णिता)

दोच्चाए णं पुढवीए पणवीसं णिरयावाससयसहस्सा पण्णत्ता । स० २५ सम० ।

रयणप्पभाए णं पुढवीए तीसं णिरयावाससयसहस्सा पण्णत्ता । स० ३० सम० ।

पढमपंचमछट्ठिसत्तमासु चउसु पुढवीसु चोत्तीसं णिरयावाससयसहस्सा पण्णत्ता । स० ३४ सम० ।

बितियचउत्थीसु दोसु पुढवीसु पणतीसं णिरयावाससयसहस्सा पण्णत्ता । स० ३५ सम० ।

चउसु पुढवीसु एकचत्तालीसं णिरयावाससयसहस्सा पण्णत्ता । तं जहा-रयणप्पभाए, पंकप्पभाए, तमाए, तमतमाए ।

(चउसु इत्यादि) क्रमेण सूत्रोक्तासु चतसृषु प्रथमचतुर्थषष्ठसप्तमीषु पृथिवीषु त्रिंशतो दशानां च नरकलक्षाणां पञ्चोनस्य चैकस्य पञ्चानां च नरकाणां यावद्यथोक्तसंख्याहते भवन्तीति । स० ४० सम० ।

पढमचउत्थपंचमासु पुढवीसु तेयालीसं निरयावाससयसहस्सा पण्णत्ता । स० ४३ सम० ।

पढमबिइयासु दोसु पुढवीसु पणपन्नं निरयावाससयसहस्सा पण्णत्ता । स० ५५ सम० ।

पढमदोच्चपंचमासु तिसुपुढवीसु अट्ठावन्नं निरयावाससयसहस्सा पण्णत्ता । स० ५७ सम० ।

चउत्थवज्जासु छसु पुढवीसु चोवत्तरिं निरयावाससयसहस्सा पण्णत्ता । स० ७४ सम० ।

चउरासी निरयावाससयसहस्सा पण्णत्ता ॥

चतुरशीतिस्थानके किमपि लिख्यते-चतुरशीतिर्नरकलक्षाणामुना विभागेन-"तीसा य पण्णवीसा, पण्णरस दसेव तिण्णि य हवंति । पंचूणसयसहस्सं, पंचेव अणुत्तरा णिरया ॥१॥" स० ८४ सम० ।

इमीसे णं रयणप्पभाए पुढवीए केवइयं खेत्तं ओगाहेत्ता केवइया णिरयावासा पण्णत्ता ? । गोयमा ! इमीसे णं रयणप्पभाए पुढवीए असीउत्तरजोयणसयसहस्सबाहल्लाए उवरि एगं जोयणसहस्सं ओगाहेत्ता हेट्ठा चेगं जोयणसहस्सं वज्जेत्ता मज्झे अट्ठसत्तरिजोयणसयसहस्से, एत्थ णं रयणप्पभाए पुढवीए णेरइयाणं तीसं णिरयावाससयसहस्सा भवंतीति मक्खाया, ते णं णिरयावासा अंतो वट्टा बाहिं चउरंसा० जाव असुभा णिरया । स० ।

णिरवकंख-निरवकाङ्क्ष-त्रि० । वाञ्छारहिते, उत्त० ३० अ० ।

णिरवकंखि [ण्]-निरवकाङ्क्षिण्-त्रि० । परित्यक्तभोगे, ज्ञा० १ सु० ६ अ० ।

णिरवग्गह-निरवग्रह-पुं० । विगृहखले, को० ।

णिरवच्च-निरपत्य-त्रि० । अविद्यमानशिष्यसंततौ, स० ७१ समo । शिष्यसन्तानरहिते, कल्प० ८ क्षण । " ··· तित्थसुहम्मातो, निरवच्चा गणहरा सेसा । " आ० म० १ अ०२ खण्ड ।

णिरवज्ज-निरवद्य-त्रि० । असावद्ये, " से संजए समकखाए, निरवज्जाहार जे विऊ । " दश० ५ अ० १ उ० ।

णिरवज्जवत्थुविसय-निरवद्यवस्तुविषय-त्रि० । निरवद्यं सावद्यपरिहारेण वस्तु धर्मगतं तद्विषयो यस्य । असावद्यविषयके, षो० ३ विव० ।

णिरवयक्ख-निरपेक्ष-त्रि० । निर्गताऽपेक्षा परप्राणविषया, परलोकाऽदिविषया वा यस्मिन्नसौ निरपेक्षः, निरवकाङ्क्षो वा । प्रश्न० १ आश्र० द्वार । परप्राणापेक्षावर्जिते, प्रश्न० २ आश्र० द्वार ।

निरवकाङ्क्ष-त्रि० । आकाङ्क्षावर्जिते, प्रश्न० २ आश्र० द्वार ।

णिरवयव-निरवयव-त्रि० निरंशे, विशे० ।

णिरवराहि (ण्)-निरपराधिन्-त्रि० । अकृतापराधे, " निरवराही तो देवया । " आव० ६ अ० ।

णिरवलंब-निरवलम्ब-त्रि० । निरालम्बने, यत्र न पतद्भिः किञ्चिदवाप्यते । प्रश्न० ३ आश्र० द्वार ।

णिरवलाव-निरपलाप-त्रि० । अन्यस्मैऽकथके, " केरिसगस्स, मूले आलोयव्वं ? , निरवलावस्स, जो अन्नस्स न कहेति ! " आव० ४ अ० । निरपलापः स्यान्नान्यस्मै कथयेदित्यर्थः । स० ३२ सम० ।

दंतपुरे दंतवको, सच्चवई मोहले अणवरए ।
धणमित्ते धणसिरीए, पउमसिरी चेव दहमित्ते ॥१७॥

"दंतपुरे नगरे दंतवक्को राया, सच्चवती देवी, तीसे दोहलो-कहं दंतमए पासाए अभिरमेज्ज त्ति ? । रायाए पुच्छियं-दंतनिमित्तं । घोसावियं रन्ना-जहा जाचियं मोल्लं देमि, जो न देइ, तस्स राया विणासं करेइ । तत्थेव नगरे धणमित्तो नाम वाणियओ । तस्स दो भारियाओ-धणसिरी महंती, पउमसिरी कहरिया कि पियतरी य त्ति । अन्नया सवत्तीणं नेडणे धणसिरी भणइ-किं तुमं एवं गव्विया ?, किं तुज्झ ममाओ अहियं ?, जहा सच्चवतीए तहा ते किं पासाओ कीरेज्जा ?। सा भणइ-जइ न करेइ, तो अहं न जीवेमि त्ति उव्वरते वारं बंधित्ता ठिया । वाणियओ आगओ पुच्छइ-कहिं पउमसिरी ?। दासीहिं कहियं । तत्थेव अतिगओ पसाएइ, तहा वि न पसीयति-जइ नत्थि न जीवामि । तस्स मित्तो दहमित्तो नाम, सो आगतो । तेण पुच्छियं सव्वं कहेइ । भणइ-कीरउ, मा इमीए मरंतीए तुमं पि मरिज्जासि, तुमं मरंते अहं पि । रायाए य घोसावियं, तो पच्छन्नं कायव्वं, ताहे सो दहमित्तो पुलिंदगपाउग्गाणि-मणी य, अलत्तगं, कंकणं च गहाय अडवि गओ । दंता लद्धा, पुंजो कओ, तेण पिंगगाण मज्झे बंधित्ता सगडं भरेत्ता आणीया, नगरं पवेसिज्जंतेसु वसभेण तणपिंडगा कड्ढिया । ततो ख-

रु त्ति दंतो पडिओ, नगरगुत्तिएहिं दिट्ठो,गहिओ, रायाए उवणीओ, वज्झो भाणिज्जइ। धणमित्तो सोऊण आगओ। रायाए पायपडिओ विन्नवेइ-जइ। एए मए आणाविया। सो पुच्छिओ भणइ-अहमेयं न याणामि, को त्ति?। एवं ते अपरोप्परं भणंति। रायाए सवधसाविया पुच्छिया,अन्नओ दिन्नो,परिकहियं। पूइत्ता विसज्जिया। एवं णिरवलावेण होयव्वं आयरियएणं। वितिओ वि-एगेण एगस्स हत्थे भाणं वा किंचि दिन्नं, अंतरा पडियं। तत्थ भाणियव्वं-मम दोसो,इयरेण वि मम त्ति।" आव०४ अ०।

णिरवसेस–निरवशेष–त्रि०। समग्रे, अनु०। आव०। समस्ते, भ० १४ श० ३ उ०। संपूर्णे, आ० म० १ अ० १ खण्ड। सर्वस्मिन्, आ० म० १ अ० २ खण्ड। विशे०। पञ्चा०।

णिरवसेसपच्चक्खाण–निरवशेषप्रत्याख्यान–न०। सर्वाऽशनपानत्यागाद् निरवशेषे प्रत्याख्याने, ध० २ अधि०।

इदानीं निरवशेषमाह-

सव्वं असणं सव्वं,च पाणगं खाइमं पि सव्वं पि।
वोसिरइ साइमं पि हु, सव्वं जं तं निरवसेसं ॥१०१॥

'अश' भोजने, अश्यत इत्यशनमोदनमण्डकमोदकखज्जकाऽऽदि। पीयत इति पानं, कर्मणि ल्युट्। खर्जूरद्राक्षापानाऽऽदि। आदनं खादो, भावे घञ्। खादेन निर्वृत्तम-"भावादिमन्" ॥६।४।२१॥ इति इमनि खादिमं नालिकेरफलाऽऽदि, गुडधानाऽऽदिकं च। स्वदनं स्वादः, तेन निर्वृत्तं, तथैव इमनि स्वादिमम्। एलाफलकर्पूरलवङ्गपूगीफलहरीतकीनागराऽऽदि। ततश्च सर्वमशनं, सर्वं पानकं, खादिमं च सर्वमपि व्युत्सृजति परित्यजति स्वादिममपि सर्वं यत्,निरवशेषं तद्विज्ञेयमिति। प्रव० ४ द्वार। भ०। "विस्थरत्थो-जो पुण असणस्स सत्तरसविहस्स वोसिरइ, पाणगस्स अणेगविहस्स खज्जूरपाणगादियस्स वा, इमं अणेगविहं-फलमाइ, साइमं अणेगविहं-मधुमादि, तं सव्वं जो वोसिरइ। एतं निरवसेसं।" आव० ६ अ०।

णिरवसेससव्वय–निरवशेषसर्वक–न०। निरवशेषव्यक्तिसमाश्रयेण सर्वं निरवशेषसर्वकम्। यथा अनिमिषाः सर्वे देवाः, न हि देवव्यक्तिरनिमिषत्वं काचिद् व्यभिचरतीत्यर्थः। स्था० ४ ठा० २ उ०।

णिरवाय–निरपाय–त्रि०। अपायेभ्यो निर्गते, षो० ८ विव०।

णिरवेक्ख–निरपेक्ष–त्रि०। पुत्रदारधनधान्यहिरण्याऽऽदिकमनपेक्षमाणे, सूत्र० १ श्रु० ए अ०। अनपेक्षे,आव०४ अ०। अपेक्षारहिते, ध० ३ अधि०। वृत्तिनिस्पृहे, पञ्चा० ४ विव०। जी०। उत्त०। बालाऽऽदिषु चिन्तारहिते, व्य० ३ उ०। आचार्यस्य शिष्यैः, प्रतीच्छकैश्च सर्वं कर्त्तव्यं, ये तु न कुर्वन्ति, ते निरपेक्षा इति। (एतच्च "अइसेस" शब्दे प्रथमभागे २७ पृष्ठे उक्तम्) द्विविधाः साधवः-सापेक्षाः, निरपेक्षाश्च। "णिरवेक्खा जिणाइया, ते सरीरगच्छादिणिरवेक्खत्तणओ णिरवेक्खा।" नि० चू० २० उ०। निरभिष्वङ्गे निरभिष्वङ्गे, "पक्खी पत्तं समादाय, निरवेक्खो परिव्वए।" उत्त० ६ अ०।

णिरवेक्खजइधम्म–निरपेक्षयतिधर्म–पुं०। गच्छनिर्गतसाधुधर्मे, (ध०)

साम्प्रतं निरपेक्षयतिधर्मप्रस्तावनाय तद्योग्यतामाह-

प्रमादपरिहाराय, महासामर्थ्यसंभवे।
कृतार्थानां निरपेक्ष-यतिधर्मोऽतिसुन्दरः ॥८३॥

महासामर्थ्यम्-आद्यसंहननत्रययुक्ततया, वज्रकुड्यसमानधृतितया च कायमनसोः शक्तिः, तस्य संभवे विद्यमानत्वे, प्रमादपरिहाराय प्रागुक्ताष्टविधप्रमादत्यागाय, कृतार्थानां कृतकृत्यानामाचार्योपाध्यायप्रवर्तकस्थविरगणावच्छेदकलक्षणपदपञ्चकयोग्यतया शिष्याणां निष्पादनेन निष्ठितार्थानामित्यर्थः;निरपेक्षयतिधर्मो गच्छनिर्गतयतिधर्मोऽतिसुन्दरोऽतिशयेन श्रेयान्,प्रमादजयार्थं कृतकृत्यानामाचार्याऽऽदीनामयमतिश्रेष्ठ इत्यर्थः। अत्रेदमवधेयम्-निरपेक्षा यतयो-जिनकल्पिकाः, शुद्धपरिहारिकाः, यथालन्दिकाश्च। धर्म० ४ अधि०। (जिनकल्पिकाऽऽदयः पृथक् पृथक् स्वस्वस्थाने दृष्टव्याः)

णिरहंकार–निरहङ्कार–त्रि०। अहङ्काररहिते, उत्त० १६ अ०। रागद्वेषरहिते, सूत्र० १ श्रु० ६ अ०।

णिरहिगरण–निरधिकरण–त्रि०। गुरुतराऽऽरम्भवर्जिते, पञ्चा० १ए विव०।

णिरहिगरणि [ण्]–निरधिकरणिन्–त्रि०। निर्गतमधिकरणमस्मादिति निरधिकरणी। समासान्तविधिः (इन्)। अधिकरणदूरवर्तिनि, भ० १६ श० १ उ०।

णिराअ–देशी–प्रकटे, ऋजौ,रिपौ च। दे०ना०४ वर्ग ५० गाथा।

णिराकिच्च–निराकृत्य–अव्य०। अपनीयेत्यर्थे, सूत्र० १ श्रु० ११ अ०। परित्यज्येत्यर्थे, सूत्र० १ श्रु० ३ अ० ३ उ०। "तनो चायं णिराकिच्च, ते चुओ विप्पगब्भिए।" सूत्र० १ श्रु० १ अ० १ उ०।

णिरागस–निराकर्ष–पुं०। आकृष्यत इति आकर्षो,न विद्यते आकर्षो यस्य स निराकर्षः। ऊर्विणरहिते, "किंसे णिरागसाणं, गुत्तिकरो काहितो राया।" नि० चू० २ उ०।

णिरागारपच्चक्खाण–निराकारप्रत्याख्यान–पुं०। निर्गतं महत्तराऽऽद्याकारान्निराकारम्,तच्च प्रत्याख्यानं चेति। अनाकारप्रत्याख्याने, निराकारेऽप्यनाभोगसहसाकाररूपाऽऽकारद्वयस्याऽवश्यंतावान्महत्तराऽऽद्याकारवर्जनाऽऽश्रयणम्। ध०२ अधि०।

णिराणुकंप–निरनुकम्प–त्रि०। प्राकृतत्वाद् दीर्घः। अनुकम्पारहिते, पं० व० ४ द्वार।

णिरातंक–निरातङ्क–त्रि०। नीरोगे, प्रश्न० ४ आश्र० द्वार। औ०। तं०।

णिराद–देशी–नष्टे, दे० ना० ४ वर्ग ३० गाथा।

णिराबाह–निराबाध–त्रि०। सर्वशारीरकमानसिकबाधाविवर्जिते, दर्श०४ तत्त्व। अष्ट०। स्वाऽऽयत्ताऽऽनन्दरूपत्वात्। (स्था० १० ठा०) बाधारहिते, आव० ४ अ०।

णिराभिराम–निरभिराम–त्रि०। अभिरमणीये, प्रश्न० २ आश्र० द्वार।

णिरामगंध–निरामगन्ध–त्रि०। निर्गतोऽपगत आमोऽविशोधिकोट्याख्यः, तथा गन्धो विशोधिकोटिरूपो यस्मात् स भवति निरामगन्धः। मूलोत्तरगुणभेदभिन्नां चारित्रक्रियां कृतवति, सूत्र० १ श्रु० ६ अ०। "से सव्वदंसी अभिभूय नाणी, णिरामगंधे धिइमं ठितप्पा। (५)" सूत्र० १ श्रु० ६ अ०। "णिरामगंधे सपरिव्वयज्जा।" आचा० १ श्रु० २ अ० ५ उ०।

णिरामय–निरामय–त्रि० । नीरोगे, दश० ४ अ० । निर्मलपरमात्मानुभवे, अष्ट० १० अष्ट० । " अतीव निरामया नो अहो वासो निस्सरइ । " आ० म० १ अ० २ खण्ड ।

णिरामिस–निरामिष–त्रि० । विषयाऽऽदिपदार्थे, उत्त० । "सामिसं कुललं दिस्स, बज्झमाणं णिरामिसं । आमिसं सव्वमुज्झित्ता, विहरिस्सामो णिरामिसा ॥ ४६ ॥ " निष्क्रान्त आमिषाद् गृद्धिहेतोरभिलषितविषयाद्निर्गतं वा आमिषमस्येति । उत्त० पाई० १४ अ० ।

णिरायास–निरायास–त्रि० । अखेदकारणे, प्रश्न० ४ सम्व० द्वार ।

णिरारंभ–निरारम्भ–त्रि० । निर्गत आरम्भादसत्क्रियाप्रवर्त्तनलक्षणान्निरारम्भः । आरम्भरहिते, उत्त० २ अ० ।

णिरालंब–निरालम्ब–त्रि० । ज्ञानाऽऽद्यालम्बनरहिते, व्य० ४ उ० ।

णिरालंबण–निरालम्बन–त्रि० । ज्ञानाद्याऽऽलम्बनीयवस्तुवर्जिते, ज्ञा० १ श्रु० ६ अ० । " गयणमिव णिरालंबणो । " गगनमिव निरालम्बनो, न कुलग्रामाऽऽद्यवलम्बत इति भावः । स्था० ९ ठा० । ऐहिकाऽऽमुष्मिकाऽऽशंसारहिते, "इमम्मि लोए परते य दोसु वि न विज्जइ बंधणं जस्स किंचि वि, से हु निरालंबणे । " आचा० २ श्रु० ४ अ० १ उ० ।

णिरालंबणया–निरालम्बनता–स्त्री० । निर्गत आलम्बनादाश्रयणीयाद् गच्छकुटुम्बकाऽऽदेरिति निरालम्बनस्तद्भावो निरालम्बनता । आश्रयानपेक्षत्वेऽविनयभेदे, स्था० ४ ठा० ३ उ० ।

णिरालोय–निरालोक–त्रि० । निर्गताऽऽलोके, " निरालोयाओ दिसाओ कारेमाणे । " नि० १ श्रु० १ वर्ग १ अ० ।

णिरावकंखि [ण्]–निरावकाङ्क्षिण्–त्रि० । निस्पृहे, " निक्खम्म गेहाउ णिरावकंखी, कायं विऊ सेज्ज नियाणछिन्ने । " निरावकाङ्क्षी कायं शरीरं व्युत्सृज्य निष्प्रतिकर्मतया चिकित्साऽऽदिकमकुर्वन् छिन्ननिदानो भवेत् । सूत्र० १ श्रु० १० अ० ।

णिरावयक्ख–निरवकाङ्क्ष–त्रि० । निरपेक्षे, प्रश्न० ३ आश्र० द्वार ।

णिरावरण–निरावरण–न० । क्षायिकत्वात् (औ० । ज्ञ० । दशा०) समस्ताऽऽवरणरहिते, कल्प० १ क्षण ।

णिरास–निरास–त्रि० । परित्यागे, प्रतिक्षेपे, वधे, निष्कासने, वाच० । आ० म० ।

निराश–पुं० । क्षीणमनोरथे, बृ० ६ उ० । प्रश्न० ।

णिरासंस–निराशंस–त्रि० । इहपरलोकाऽऽशंसाविप्रमुक्ते, आव० ४ अ० । ऐहिकाऽऽमुष्मिकाऽऽशंसारहिते, आचा० २ श्रु० ४ चू० १ अ० ।

णिरासबहुल–निराशबहुल–त्रि० । आशाऽभावप्रचुरे, प्रश्न० ३ आश्र० द्वार ।

णिरासव–निराश्रव–त्रि० । कर्माऽऽदानरहिते, प्रश्न० ३ सम्व० द्वार ।

णिरिअ–देशी–अविशेषिते, दे० ना० ४ वर्ग २८ गाथा ।

णिरिंक–देशी–नते, दे० ना० ४ वर्ग ३० गाथा ।

णिरिंधणया–स्त्री० । निरिन्धन–न० । प्राकृते स्वार्थिकं स्त्रीत्वम् । धूमस्येव कर्मेन्धनविमोचने, भ० ७ श० १ उ० ।

णिरिक्खण–निरीक्षण–न० । आलोकने, सङ्घा० १ अधि० १ प्रस्ता० । आव० ।

णिरिक्खणा–निरीक्षणा–स्त्री० । प्रत्युपेक्षणायाम्, ओघ० ।

णिरिक्खिय–निरीक्षित–त्रि० । आलोकिते, " उप्पण्णनाणदंसणधरेहिं तेलुक्कनिरिक्खियमहियपूइएहिं । " तत्र निरीक्षिता मनोरथपरम्परासम्पत्तिसंभवनिश्चयसमुत्थसम्मदविकासिलोचनैराऽऽलोकिताः । नं० ।

णिरिग्घ–निली–नि – लीङ् । धा० । निलयने, " निलीङेर्णिलीय-णिलुक्क-णिरिग्घ-लुक्क-लिक्क-ङिक्काः " ॥ ८ । ४ । ५५ ॥ इति निलीङो णिरिग्घाऽऽदेशः । 'णिरिग्घइ' । पक्षे-'निलिज्जइ' । निलीयते । प्रा० ४ पाद ।

णिरिणास–गम्–धा० । गमने, " गमेरई अइच्छाणुवज्जाघज्झसोक्कुसाक्कुस-पच्चड्ड-पच्छंद-णिम्मह-णी-णीण-णीलुक्क-पदअरम्भ-परिअल्ल-घोल-परिअव्व-णिरिणास-णिवहावसेहावहराः " ॥ ८ । ४ । १६२ ॥ इति सूत्रेण गमेर्णिरिणासाऽऽदेशः । 'णिरिणासइ' । गच्छति । प्रा० ४ पाद ।

नश्–धा० । अदर्शने, " नशेर्णिरिणास-णिवहावसेह-पमिसा-सेहावहराः " ॥ ८ । ४ । १७८ ॥ इति नशेर्णिरिणासाऽऽदेशः । ' णिरिणासइ ' । नश्यति । प्रा० ४ पाद ।

पिष्–धा० । पेषणे, " पिषेर्णिव्वह—णिरिणास-णिरिणज्ज-रोञ्ज-चड्डाः " ॥ ८ । ४ । १८५ ॥ इति पिषेर्णिरिणासाऽऽदेशः । 'णिरिणासइ' । पिनष्टि । प्रा० ४ पाद ।

णिरिणिज्ज–पिष्–धा० । पेषणे, " पिषेर्णिव्वह-णिरिणास-णिरिणिज्ज-रोञ्ज-चड्डाः " ॥ ८ । ४ । १८५ ॥ इति पिष्धातोर्णिरिणिज्जाऽऽदेशः । ' णिरिणिज्जइ ' । पिनष्टि । प्रा० ४ पाद ।

णिरुभइत्ता–निरुध्य–अव्य० । सन्मार्गे व्यवस्थाप्येत्यर्थे, सूत्र० १ श्रु० ४ अ० २ उ० । दश० ।

णिरुंभणा–निरोधन–न० । प्रक्षेपणे, प्रश्न० १ आश्र० द्वार । प्रतिबन्धे, सूत्र० १ श्रु० ५ अ० १ उ० ।

णिरुच्चार–निरुच्चार–त्रि० । प्राकारस्योर्द्धजनप्रवेशनिर्गमवर्जिते, पुरीषविसर्गार्थं जनानां बहिर्निर्गमनरहिते, ज्ञा० १ श्रु० ८ अ० । निरुद्धपुरीषोत्सर्गे, प्रश्न० ३ आश्र० द्वार ।

णिरुच्छाह–निरुत्साह–त्रि० । सत्त्वपरिवर्जिते, जं० २ वक्ष० । निरुद्यमे, ग० १ अधि० ।

णिरुज–निरुज–न० । रुजानामनाद्यो निरुजम् । रोगाणामभावे, पञ्चा० १६ विव० ।

णिरुजसिखतव–निरुजशिखतपस्–न० । रुजानां रोगाणामभावो निरुजं, तदेव शिखेव शिखा प्रधानं फलतया यत्राऽसौ निरुजशिखः, स एव तपः । पञ्चा० १६ विव० । आरोग्यार्थे तपोभेदे, (प्रव०)

निरुजशिखं तपः प्राऽऽह-

एवं निरुजसिखो वि हु, नवरं सो होइ सामले पक्खे ।

तम्मि य अहिओ कीरइ, गिलाणपडिजागरणनियमो ।५५६।

रुजानां रोगाणामभावो निरुजं, तदेव प्रधानफलाविवक्षया शिखेव शिखा चूला यस्याऽसौ निरुजशिखः, तपोविशेषः । सोऽप्येवमेव सर्वाङ्गसुन्दरतपोवदृष्टनिरुपद्रवासैराचाम्लपारणकैर्दृष्टव्यः । नवरं केवलं स निरुजशिखस्तपोविशेषः, श्यामले कृष्णपक्षे भवति, अधिकश्च तत्र क्रियते ग्लानप्रतिजागरणनियमः, ग्लानो मया पथ्याऽऽदिदानतः प्रतिचरणीय इत्येवंरूपप्रतिज्ञाग्रहणमित्यर्थः । शेषं तु जिनपूजाऽऽदिकं तथैवेति । प्रव० २७१ द्वार ।

णिरुट्ठाइ (ण्)–निरुत्थायिन्–त्रि० । प्रयोजनेऽपि न पुनः पुनरुत्थानशीलः । बृह० १ अ० । निमित्तं विनाऽनुत्थापके, उत्त० ३ अ० ।

णिरुत्त-निरुक्त–न० । अभिधानाक्षरानुसारतो निश्चितार्थस्य वचने भणने, अनु० । अनुयोगे सूत्रव्याख्यायाम्, (वृ०)

सम्प्रति अनुयोगमधिकृत्य निरुक्तद्वारमाह–

निच्छियमुत्त णिरुत्तं, तं पुण सुत्ते य होइ अत्थे य ।
सुत्ते उवरिं वोच्छं, अत्थणिरुत्तं इमं तत्थ ॥

निश्चितमुक्तं निरुक्तम् । तच्च द्विधा–सूत्रस्यार्थस्य च । तत्र सूत्रस्योपरि " नेरुत्तियाणि तस्स उ " इत्यादिना ग्रन्थेन वक्ष्ये । अर्थनिरुक्तं पुनरिदं वक्ष्यमाणम् ।

तदेव विवक्षुः प्रथमतस्तद्विषयान् दृष्टान्तान्

वक्तव्यान् सूचयति–

अणु बायरे य उस्सिय, पाभिसुया चेव अन्नपडले य ।
बत्तिऍ चउक्कनंगो, निरुतादी वत्तणी च जहा ॥

अनुयोगे अणुत्वे बादरत्वे च दृष्टान्तो वक्तव्यः, अनुयोगे उष्ट्रिकापत्रकदृष्टान्तः, उष्ट्रिका मुद्गा । भाषायां प्रतिश्रुतदृष्टान्तः । विभाषायामन्नपटलः । वार्त्तिके चत्वारो भङ्गाः, तत्र मल्लदृष्टान्तः । तथा-निरुक्ताऽऽदीनि । यथा वर्द्धमानस्वाम्याख्यातवान् तथा किमूषभाऽऽदयोऽपि,उतान्यथा ? । उच्यते-तथेति, केवलज्ञानस्य तुल्यत्वात्, यथा वर्त्तनी मार्गः स सर्वजनपदेषु प्रमाणत एकैव भवति । बृ० १ उ० । विशे० । पदज्ञाने, पदव्युत्पत्तिरूपे टीकाऽऽदौ, कल्प० २ क्षण । शब्दनिरुक्तप्रतिपादके वेदाङ्गे,औ० । आ० म० । अनु० । आव० । सर्वैर्हेयोपादेयतया नितरामुक्ते, प्रश्न० ३ सम्व० द्वार । निश्चये, दे० ना० ४ वर्ग ३० गाथा ।

णिरुत्ति–निरुक्ति–स्त्री० । निश्चिता उक्तिर्निरुक्तिः । विशे० । आ० म० । निर्वचने निरुक्तिः । क्रियाकारकभेदपर्यायैः शब्दार्थकथने, विशे० । आ० म० । आ० चू० ।

णिरुत्तिय–नैरुक्तिक–न० । निरुक्ते भवं नैरुक्तम् । निरुक्तवशेनार्थप्रतिपादके नामनि, (अनु०) " से किं तं णिरुत्तिए ? । मह्यां शेते महिषः । भ्रमति चरतीति भ्रमरः । मुहुर्मुहुर्हसतीति मुसलम् । कपेरिव लम्बते कपित्थम् । चिक्कं करोति खल्लं च भवति चिक्खल्लम् । कर्णौ कर्णवन्तौ उलूकः । खस्य माला मेखला । सेत्तं णिरुत्तिए । " अनु० ।

णिरुद्ध–निरुद्ध–त्रि० । आच्छादिते, सूत्र० १ श्रु० १२ अ० । आवृते, सूत्र० १ श्रु० ५ अ० ३ उ० । परिगलिते, आचा० १ श्रु० ४ अ० ३ उ० । विवक्षितदिग्गमननिवारिते, ज्ञा० १ श्रु० १ अ० । जलचरजीवविशेषे, कल्प० ३ क्षण ।

णिरुद्धजोग–निरुद्धयोग–पुं० । चतुर्थे शुक्लध्यानभेदे, सूत्र० १ श्रु० ६ अ० ।

णिरुद्धपन्ना–निरुद्धप्रज्ञ–त्रि० । निरुद्धाऽऽच्छादिता ज्ञानाऽऽवरणाऽऽदिना कर्मणा प्रज्ञा ज्ञानं यस्य सः । अज्ञानप्रकाशे, सूत्र० १ श्रु० ८ अ० ।

णिरुद्धपरियाय–निरुद्धपर्याय–पुं० । निरुद्धो विनाशितः पर्यायो यस्य स निरुद्धपर्यायः । व्य० ३ उ० । पश्चात्कृतत्वेन पूर्वपर्यायनिरोधात् तद्वैवसिकपर्याये, (" निरुद्धपरियाए समणे णिग्गंथे कप्पइ तद्दिवसं आयरियउवज्झायत्ताए ।" इति सूत्रम् ' उद्देस ' शब्दे द्वितीयभागे ८०३ पृष्ठे व्याख्यातम्)

णिरुद्धबुद्धि–निरुद्धबुद्धि–त्रि० । निरुद्धा संशयकोटीकृता बुद्धिर्येषां ते निरुद्धबुद्धिकाः । संशयितेषु, बृ० ३ उ० ।

णिरुद्धवासपरियाय–निरुद्धवर्षापर्याय–पुं० । निरुद्धो विनाशितो वर्षापर्यायो यस्य स निरुद्धवर्षापर्यायः । अनेकवर्षापर्याये, व्य० ३ उ० । नि० चू० । ("तिण्णि य जस्स अपुण्णा, वासा पुण्णेहिँ वा तिहिँ तं तु । वासेहिँ निरुद्धेहिं, लक्खणजुत्तं पसंसंति ॥१॥" इति 'उद्देस' शब्दे द्वितीयभागे ८०५ पृष्ठे व्याख्यातम्)

णिरुद्धाउय–निरुद्धायुष्क–न० । परिगलिते आयुष्के, " इमं णिरुद्धाउयं संपेहाए ।" आचा० १ श्रु० ४ अ० ३ उ० ।

णिरुय–निरुज–न० । ' णिरुज ' शब्दार्थे, पञ्चा० १६ विव० ।

णिरुयसिखतव–निरुजशिखतपस्–न० । ' णिरुजसिखतव ' शब्दार्थे, पञ्चा० १७ विव० ।

णिरुल्ली–देशी–भक्तराऽऽकृतिग्राहे, दे० ना० ४ वर्ग २७ गाथा ।

णिरुवक्कम–निरुपक्रम–पुं० । निर्गत उपक्रमान्निरुपक्रमः । अपवर्तनाकरणाहिते अनुभागे, भ० । तत्र मरणविषयाऽऽयुषि सप्तभिरष्टभिर्वा कर्षैर्गवामिव मरुषु जलगण्डूषग्रहणरूपैर्यत्पुद्गलोपादानं तदतिदृढमपवर्तयितुमशक्यतया निरुपक्रममुच्यते । उत्त० ५ अ० । उपक्रमणाभावे, भ० २० श० १० उ० ।

णिरुवक्कमभाव–निरुपक्रमभाव–पुं० । अनुपक्रमणीयत्वे कर्मणामवश्यंवेद्यस्वभावत्वे, पञ्चा० ३ विव० ।

णिरुवक्कमाउ–निरुपक्रमायुष–त्रि० । अकालमरणरहिते, आ० । आ० म० । यदा ह्यसुमान् स्वायुष्यस्मिन्नागत्रिभागे वा जघन्यतः एकेन द्वाभ्यां चोत्कृष्टतः सप्तभिरष्टभिर्वा वर्षैरन्तर्मुहूर्त्तप्रमाणेन कालेनाऽऽत्मप्रदेशरचनानामिकान्तर्वर्त्तिन आयुष्ककर्मवर्गणापुद्गलान् प्रयत्नविशेषेण विधत्ते तदा निरुपक्रमाऽऽयुर्भवति । आचा० १ श्रु० २ अ० १ उ० । विपा० ।

णिरुवक्कय–देशी–अकृते, दे० ना० ४ वर्ग ४१ गाथा ।

णिरुवकिट्ठ–निरुपक्लिष्ट–त्रि० । स्वगतशोकाऽऽद्युपक्लेशवियुक्ते, उत्त० २५ श० ७ उ० । " इट्ठस्स णवगमुस्स णिरुवकिट्ठस्स जंतुणो ।" अनु० ।

णिरुवक्केस–निरुपक्लेश–पुं० । शोकाऽऽदिबाधावर्जिते, स्था० ७ ठा० । "णिरुवक्केसे परिआए" 'निरुपक्लेशः पर्यायः' इति पर्या-

रेवोपक्लेशै रहितः प्रव्रज्यापर्यायोऽनारम्भी कुचिन्तावर्जितः श्लाघनीयो विदुषामित्येवं चिन्तनीयम् । दश० १ चू० ।

णिरुवगारि[ण्]–निरुपकारिन्–त्रि० । निरुपकर्तुं शीलमस्येति । निरुपकारकारके गुर्वादिकार्येष्वप्रवर्त्तके, आ० म० १ अ० १ खण्ड ।

णिरुवग्गहया–निरुपग्रहता–स्त्री० । गत्यादिरहितपङ्गुवद् धर्मास्तिकायाभावेन तज्जनितगत्युपष्टम्भाभावे, स्था० ४ ठा० ३ उ० ।

णिरुवचरिय–निरुपचरित–त्रि० । उपचारेणाऽऽत्मनोऽसंबन्धिनि, ज्ञा० १ श्रु० ५ अ० ।

णिरुवट्ठाणि[ण्]–निरुपस्थानिन्–त्रि० । निर्गतमुपस्थानमुद्यमो यस्य स निरुपस्थानी । सर्वज्ञप्रणीतसदाचाराऽनुष्ठानविकले, आचा० १ श्रु० ५ अ० ६ उ० ।

णिरुवद्दव–निरुपद्रव–त्रि० । अविद्यमानराजाऽऽदिकृतोपद्रवे, औ० । ज्ञा० । रा० । रोगाऽऽदिक्लेशरहिते, तं० । उपद्रवो नाम-अशिवं, गलरोगाऽऽदिकं वा । तस्याभावो निरुपद्रवम् । उपद्रवाभावे, नं० । " णिरुवद्दवं च खेमं च होहिति । " बृ० ४ उ० । अशिवाऽऽद्युपद्रववर्जिते, बृ० १ उ० ।

णिरुवम–निरुपम–त्रि० । सकलोपमाऽतीते, दर्श० ५ तत्त्व । उपमारहिते, जी० ३ प्रति० ४ उ० । तं० । आव० । "णिरुवमपिंमियभासिरा ।" निरुपमं पिण्डीकृत्य वक्तुंशीलत्वेन पिण्डीकृतायमानमप्रशिरः शिरोऽग्रं येषां ते तथा । तं० ।

णिरुवमसुहसंगय–निरुपमसुखसङ्गत–त्रि० । निरुपमाऽऽख्येनाविद्यमानाऽऽत्तेपेण सङ्गत इति समासः। असंयोगिकाऽऽनन्दयुक्ते, पं० सं० १ द्वार ।

णिरुवयरिय–निरुपचरित–त्रि० । ' णिरुवचरिय ' शब्दार्थे, ज्ञा० १ श्रु० ५ अ० ।

णिरुवलेव–निरुपलेप–त्रि० । द्रव्यतो निर्मलदेहत्वाद् भावतो बन्धहेत्वभावान्निर्गत उपलेपो यस्मादिति निरुपलेपः । स्था० ९ ठा० । द्रव्यतो निर्मलदेहे, भावतस्तु कर्मबन्धहेतुलक्षणोपलेपरहिते, औ० । कल्प० । ज्ञा० । प्रश्न० । स० । लेपरहिते, औ० । स्नेहवर्जिते, प्रश्न० ४ सम्व० द्वार ।

निरुपलेपं दृष्टान्तैर्भावयति-

णिरुवलेवे–कंसपाई इव मुक्कतोए, संखो इव णिरंजणे, जीवे इव अप्पडिहयगई, गगणमिव णिरालंबणे, वाउ व्व अप्पडिबद्धे, सारयसलिलं व सुद्धहियए, पुक्खरपत्तं व णिरुवलेवे, कुम्मो इव गुत्तिंदिए, खग्गिविसाणं व एगजाए, विहग इव विप्पमुक्के, भारंडपक्खी इव अप्पमत्ते, कुंजरो इव सोंडीरे, वसभो इव जायथामे, सीहो इव दुद्धरिसे मंदरो इव अप्पकंपे, सागरो इव गम्भीरे, चंदो इव सोमलेसे, सूरो इव दित्ततेए, जच्चकणगं व जायरूवे, वसुंधरा इव सव्वफासविसहे, सुहुयहुयासण इव तेयसा जलंते । नत्थि णं तस्स भगवंतस्स कत्थइ पडिबंधे भवइ ।

निरुपलेपो द्रव्यभावमलापगमेन, तत्र द्रव्यमलः शरीरसंभवः, भावमलः कर्मजनितः । अथ निरुपलेपत्वं दृष्टान्तैर्दर्शयति-कांस्यपात्रीव मुक्तं तोयमिव स्नेहो येन स तथा, यथा कांस्यपात्रं तोयेन न लिप्यते, तथा भगवान् स्नेहेन न लिप्यते इत्यर्थः । तथा शङ्ख इव निरञ्जनः, रञ्जनं रागाऽऽद्युपरञ्जनं तेन शून्यत्वात् । जीव इव अप्रतिहतगतिः, सर्वत्राऽस्खलितविहारित्वात् । गगनमिव निरालम्बनः, कस्याप्याधारस्यानपेक्षणात् । वायुरिव अप्रतिबद्धः, एकस्मिन् स्थाने क्वाप्यवस्थानाभावात् । शारदसलिलमिव शुद्धहृदयः, कालुष्याकलङ्कितत्वात् । पुष्करपत्रं कमलपत्रं, तद्वन्निरुपलेपः, यथा कमलपत्रे जललेपो न लगति, तथा भगवतः कर्मलेपो न लगतीत्यर्थः । कूर्म इव गुप्तेन्द्रियः । खड्गिविषाणमिव एकजातः । यथा-खड्गिनः श्वापदविशेषस्य विषाणं शृङ्गमेकं भवति, तथा भगवानपि, रागाऽऽदिना सहायेन च रहितत्वात् । विहग इव विप्रमुक्तः, मुक्तपरिकरत्वात् अनियतनिवासाच्च । भारण्डपक्षीव अप्रमत्तः, भारण्डपक्षिणोः किलैकं शरीरम् । यतः-" एकोदराः पृथग्ग्रीवा-स्त्रीपदा मर्त्यभाषिणः । भारण्डपक्षिणस्तेषां, मृतिर्निश्फलेच्छया " ॥ १ ॥ ते चात्यन्तम् अप्रमत्ता एव जीवन्तीति तदुपमा । कुञ्जर इव शौण्डीरः कर्मशत्रून् प्रति शूरः, वृषभ इव जातस्थामा जातपराक्रमः, स्वीकृतमहाव्रतभारोद्वहनं प्रति समर्थत्वात् । सिंह इव दुर्धर्षः, परीषहाऽऽदिश्वापदैरजय्यत्वात् । मन्दर इव मेरुरिव अप्रकम्पः, उपसर्गवातैरचलितत्वात् । सागर इव गम्भीरः, हर्षविषादकारणसङ्गावेऽपि अविकृतस्वभावत्वात् । चन्द्र इव सौम्यलेश्यः, शान्तत्वात् । सूर्य इव दीप्ततेजाः । द्रव्यतो देहकान्त्या, भावतो ज्ञानेन जात्यकनकमिव जातं रूपं स्वरूपं यस्य स तथा । यथा किल कनकं मलज्वलनेन दीप्तं भवति, तथा भगवतोऽपि स्वरूपं कर्ममलविगमेन अतिदीप्तमस्तीति भावः। वसुन्धरा इव पृथ्वीव सर्वस्पर्शसहः, यथा हि शीतोष्णाऽऽदि सर्वं पृथ्वी समतया सहते, तथा भगवानपि । सुष्ठु हुतो घृताऽऽदिभिः सिक्त एवंविधो यो हुताशनोऽग्निस्तद्वत्तेजसा ज्वलन् । नास्यैवं पक्षः-यत्तस्य भगवतः कुत्रापि प्रतिबन्धो भवति, तस्य भगवतः कुत्रापि प्रतिबन्धो नास्तीति भावः । कल्प० ६ क्षण ।

णिरुवसग्ग–निरुपसर्ग–पुं० । जन्माऽऽद्युपसर्गरहिते मोक्षे, प्रति० । आव० । आचा० । आ० चू० । राजगुणभेदे, यतः सकलेऽपि देशे मारिडमराऽऽद्युपसर्गासम्भवः । व्य० ३ उ० ।

णिरुवसग्गवत्तिया–स्त्री० । निरुपसर्गप्रत्यय–पुं० । जन्माऽऽद्युपसर्गाभावेन निरुपसर्गो मोक्षस्तत्प्रत्ययः । " वत्तिया ति " आर्षत्वात् । मोक्षनिमित्ते, " अरिहंतचेइयाणं करेमि काउस्सग्गं णिरुवसग्गवत्तियाए बोहिलाहवत्तियाए । " ध० २ अधि० । ल० ।

णिरुवहय–निरुपहत–त्रि० । घाताऽऽद्यनुपहते, भ० ७ श० १ उ० । ज्ञा० । उक्त० । विकाराविरहिते, औ० । रा० । ज्वराऽऽदिदशाऽऽद्युपद्रवरहिते, जी० ३ प्रति० ४ उ० । रोगाऽऽदिभिरनुपहते, प्रश्न० ४ आश्र० द्वार । " णिरुवहयसुंदरलक्खणपंचिंदियसरीरं ति ।" निरुपहतानि अविद्यमानघाताऽऽद्युपघातानि उदात्तानि शस्तवर्णाऽऽदिगुणानि अत एव लक्षणानि मनोहराणि पञ्चापीन्द्रियाणि यत्र तत्तथा । भ० ए श० ३३ उ० ।

णिरुवहि–निरुपधि–त्रि० । उपधिरुक्तः,मायेत्यनर्थान्तरम् । अथ

च क्रोधाऽऽद्युपलक्षणं, ततश्च निर्गता उपध्यादयः सर्व एव कषाया येभ्यस्ते निरुपधयः। निष्कषायेषु, "हेउविभत्ती निरुवहिजियाण अवहेण य जियंति ॥ १४४ ॥" दश० १ अ०।

णिरुवार-ग्रह-धा०। ग्रहणे, "ग्रहो वल्ल-गेण्ह-हर-पङ्ग-निरुवार-राहि-पच्चुआः" ॥ ८ । ४ । २०६ ॥ इति ग्रहेर्निरुवाराऽऽदेशः। "निरुवारइ"। गृह्णाति। प्रा० ४ पाद।

णिरुस्साह-निरुत्साह-त्रि०। सदनुष्ठाननिरुद्यमे, सूत्र० १ श्रु० ४ अ० १ उ०।

णिरूविअ-निरूपित-त्रि०। आलोच्य कथिते, "विद्धकइणिरूविअं।" वृद्धकविनिरूपितम्। प्रा० २ पाद।

णिरूविऊण-निरूप्य-अव्य०। आलोचयित्वेत्यर्थे, पञ्चा० ८ विव०।

णिरूवियव्व-निरूपयितव्य-त्रि०। आलोचनीये, पञ्चा० ११ विव०।

णिरूह-निरूह-पुं०। विरचने, सूत्र० १ श्रु० ६ अ०।

णिरेय-निरेजस्-त्रि०। निष्प्रकम्पे, भ० ५ श० ७ उ०। कल्प०। निश्चले, नि०चू० २० उ०। सैजसां निरेजसां च पुद्गलानां कायस्थितिरुक्ता। प्र० २५ श० ४ उ०।

णिरेयण-निरेजन-त्रि०। निश्चले, औ०। प्रज्ञा०। निष्प्रकम्पे, आव० ५ अ०।

णिरोदर-निरोदर-त्रि०। विकृतोदररहिते, जी० ३ प्रति० ४ उ०। तुच्छोदरे, प्रश्न० ४ आश्र० द्वार।

णिरोह-निरोध-पुं०। निरोधनं निरोधः। प्रलयकरणे, "जउमत्थाणं झाणं,जोगनिरोहो जिणाणं च।" आव० ४ अ०। आ० क०। अशेषकर्मक्षये, सूत्र० १ श्रु० १४ अ०। निश्चयेन धरणे, आव० ४ अ०।

मुत्तणिरोहे चक्खुं, वच्चणिरोहेण जीवियं जहति।
उड्ढणिरोहे कोढं, गेलञ्ञं वा भवे तीसु ॥ ६६३ ॥

मूत्रनिरोधे विधीयमाने चक्षुरुपहन्यते। वर्चः पुरीषं, तस्य निरोधेन जीवितं परित्यजति, अचिरादेव मरणं भवतीत्यर्थः। ऊर्द्धं वमनं, तस्य निरोधे कुष्ठं भवति, ग्लान्यं वा सामान्यतो मान्द्यं त्रिष्वपि मूत्रपुरीषवमनेषु निरुध्यमानेषु भवेत्। बृ० ३ उ०। प्रकाशप्रवृत्तिनियमरूपविघाते, स च निरोधोऽभ्यासाद् वैराग्याच्च भवति। तदुक्तम्-"अभ्यासवैराग्याभ्यां तन्निरोधः।" द्वा० २३ द्वा०।

णिरोहपरिणाम-निरोधपरिणाम-पुं०। चित्तस्य तथाविधस्वैर्यविशेषे, द्वा०। व्युत्थाननिरोधसंस्कारयोरभिभवप्रादुर्भावाभ्यां निरोधलक्षणचित्तान्वयो निरोधपरिणाम इति। द्वा० २३ द्वा०।

णिलज्ज-निर्लज्ज-त्रि०। लज्जारहिते, "हुं निल्लज्ज! समोसर।" प्रा० २ पाद।

णिलज्जिमा-पुं० । स्त्री० । -निर्लज्जिमन-पुं०। निर्लज्जस्य भावो निर्लज्जिमा। "वेमाऽऽज्जहयाद्याः स्त्रियाम्" ॥८।१।३५॥ इति वा स्त्रियां प्रयोगः। "एसा निलज्जिमा, एस निलज्जिमा"। लज्जारहितत्वे, प्रा० १ पाद।

णिलय-निलय-पुं०। गृहे, उत्त० ३२ अ०। को०। तं०।

णिलयण-निलयन-न०। वसतौ, नयानां निलयनौपम्यम्। वि० शे०। (वसतिदृष्टान्तः 'णय' शब्देऽस्मिन्नेव भागे १८८० पृष्ठे प्रदर्शितः)

णिलाम-ललाट-न०। भाले, प्रश्न० ४ आश्र० द्वार।

णिलिंत-निलीयमान-त्रि०। नीङाऽऽधाधयति, रा०। निविशमाने, औ०।

णिलिज्जमाण-निलीयमान-त्रि०। अपनयति, धान्यशुद्धिं कुर्वाणे, सूत्र० २ श्रु० २ अ०। संवाधनं कुर्वति, सूत्र० १ श्रु० ४ अ० २ उ०।

णिलीअ-निली-धा०। निलयने, "निलीङो णिलीअ-णिलुक्क-णिरिग्घ-लुक्क-लिक्क-लिहक्काः" ॥ ८ । ४ । ५५ ॥ इति निपूर्वस्य लीङो 'णिलीअ' आदेशः। 'णिलीअइ'। निलीयते। प्रा० ४ पाद।

णिलुक्क-देशी-विरते, "क्षिप्तामेव णिलुक्को।" आ०म० १ अ० १ खण्ड। अन्तर्हिते, ज्ञा० १ श्रु० ८ अ०। निलुक्को निवृत्तः। आ० क०।

निल्ली-नि-ली-धा०। निलयने, "निलीङो णिलीअणिलुक्क०-" ॥ ८ । ४ । ५५ ॥ इत्यादिसूत्रेण निलीङो णिलुक्काऽऽदेशः। 'णिलुक्कइ'। निलीयते। प्रा० ४ पाद।

तुम्-धा०। श्राटने, "तुमेस्तोम-तुट्ट-खुट्ट-खुडोलुक्क-णिलुक्क-मुक्कोल्लूराः" ॥८।४।११६॥ इति तुमेर्णिलुक्काऽऽदेशः। "णिलुक्कइ।" तुमति। प्रा० ४ पाद।

णिल्लंक-देशी-पतद्ग्रहे, दे० ना० ४ वर्ग ३१ गाथा।

णिल्लंछण-निर्लाञ्छन-न०। नितरां लाञ्छनमङ्कावयवच्छेदः,गवादिकर्णकम्बलशृङ्गपुच्छच्छेदनासावेधाङ्कनखण्डनत्वग्दाहाऽऽद्युद्घृष्टगालनाऽऽदिरूपे (ध० २ अधि०) छेदनव्यापारे, बलीवर्दतुरङ्गाऽऽदीनां वर्धितकरणे, ध० २ अ०। प्रश्न०। आ० चू०। प्रव०। "नासावेधोऽङ्कनं पुच्छ-च्छेदनं पृष्ठगालनम्। गोकर्णकम्बलच्छेदो, निर्लाञ्छनमुदीरितम् ॥ १ ॥" तत्राऽङ्कनं गवाश्वाऽऽदीनां चिह्नकरणं, मुष्कोऽयमस्तस्य छेदनं वर्द्धितकीकरणं, अस्मिन् जीवबाधा व्यक्तैव। ध० २ अधि०।

णिल्लंछणकम्म-निर्लाञ्छनकर्मन्-न०। निर्लाञ्छनमेव कर्म जीविका निर्लाञ्छनकर्म। गोमहिष्यादीनां नासावेधे,गवाश्वाऽऽदीनां वर्धितकरणे,प्रव०६ द्वार। आ०। उपा०। पञ्चा०। आव०। एतच्च कर्मत उपभोगपरिभोगवर्तिना कर्माऽऽदानहेतुरतीचार एवेति वर्ज्यम्। ध० २ अधि०।

णिल्लुंच-मुच्-धा०। "मुचेश्छड्ढावहेम-मेल्लोस्सिक्क-रेअव-णिल्लुञ्छ-धंसामाः" ॥ ८ । ४ । ७१ ॥ इति मुचेर्णिल्लुञ्छाऽऽदेशः। 'णिल्लुञ्छइ'। मुञ्चति। प्रा० ४ पाद।

णिल्लज्ज-निर्लज्ज-त्रि०। लज्जारहिते, प्रश्न० २ आश्र० द्वार।

णिल्लस-उल्लस-उत्-लस-धा०। उल्लसने, लसिते, "उल्लसेरुसवोसुम्भ-णिल्लस-पुलआअ-गुञ्जोल्लारोआः" ॥८।४।२०२॥ इति उत्पूर्वस्य लसधातोः णिल्लिसाऽऽदेशः। प्रा० ४ पाद।

णिल्लसिअ-देशी-निर्गते, दे० ना० ४ वर्ग ३६ गाथा।

णिल्लालिय-निर्लालित-त्रि०। प्रसारिते, ज्ञा० १ श्रु० १ अ०। विवृतमुखाद् निःसारिते, ज्ञा० १ श्रु० ८ अ०। लपलपायमाने, कल्प० २ क्षण।

णिल्लूर-छिद्-धा०। द्वैधीकरणे, "छिदेर्डुहाव-णिच्चल्ल-निज्झोम-णिव्वर-णिल्लूर-लूराः" ॥ ८ । ४ । १२४ ॥ इति छिदेर्णिल्लूराऽऽदेशः। 'णिल्लूरइ'। छिनत्ति। प्रा० ४ पाद।

णिल्लेव–निर्लेप–त्रि० । चेतनस्य सकलपरभावसंयोगाभावेन व्याप्यव्यापकग्राहककर्तृत्वभोक्तृत्वाऽऽदिशक्तीनां स्वभावावस्थाने, अष्ट० । चेतनस्य सकलपरभावसंयोगाभावेन व्याप्यव्यापकग्राहककर्तृत्वभोक्तृत्वाऽऽदिशक्तीनां स्वभावावस्थानं निर्लेपः । नामतो निर्लेपः-अभिलाषाऽऽत्मकजीवाजीवानाम् । स्थापनानिर्लेपः-निर्ग्रन्थाऽऽकाराऽऽदिः । द्रव्यनिर्लेपः-कांस्यपात्राऽऽदिस्तद्व्यतिरिक्तः शेषस्तु पूर्ववत् । भावनिर्लेपः-जीवाजीवभेदात् । अजीवा धर्माधर्माऽऽकाशाऽऽदिः । जीवस्तु समस्तविजात्याभिष्वङ्गरहितः मुक्ताऽऽत्मा । नयैस्तु ऋजुसूत्रपरिग्रहाऽऽदिश्लिष्टः । नैगमेन संग्रहेण जीवो जात्याऽऽलिष्टः,व्यवहारेणाश्लिष्टः ऋजुसूत्रस्त्यागी । शब्दनयेन सम्यग्दर्शनसम्यग्ज्ञानपरिच्छिन्नपरभावपरित्यागी तन्निमित्तभूतात् धनस्वजनोपकरणात् क्षेप्यनासक्तः । समभिरूढेनाऽरिहन्ताऽऽदिप्रशस्तनिमित्तैर्बहुतरैः परिमाणैरलिप्तत्वात् क्षीणमोहो जिनः केवली चाश्लिष्टः । एवंभूतेन सिद्धः,सर्वपर्यायैरलिप्तत्वात् । वाचनान्तरे तु-नैगमाश्लिष्टः, अंशत्यागी नैगमाऽऽकाररूपेण संग्रहेण सम्यग्दर्शनी सत्तया आत्मानं सर्वथा विभक्तत्वात् । व्यवहारेण तच्छ्रद्धयाऽपास्तरागाऽऽदिश्लेषत्यागात् । ऋजुसूत्रस्तु सन्निमित्ताऽऽदिश्वरक्तत्वेनासक्तत्वात् । शब्दत अनिसंधिजवीर्यबुद्धिपूर्वकोपयोगस्य रागाऽऽदिषु अपरिणमनात् । समभिरूढतः सर्वचेतनायाः सर्ववीर्यस्य विभावाऽऽश्लेषरहितत्वात् । एवंभूततः पूर्वोक्तयासचक्रभ्रमाऽऽदिभवोपग्राहिसर्वपुद्गलसङ्गरहितस्य सिद्धस्य निर्लेपत्वम् । पुनर्निर्लेपत्वे नयचतुष्टयम्, भावनिक्षेपे पर्यायालिप्तत्वेनाऽन्तिमनयत्रयम् । इति तत्त्वार्थवृत्तेराशयः । अत्र भावसम्यक्त्वसाधकनिर्लेपाधिकारः-

संसारे निवसन् स्वार्थ-सज्जः कज्जलवेश्मनि ।
लिप्यते निखिलो लोको, ज्ञानसिद्धो न लिप्यते ॥१॥
नाऽहं पुद्गलभावानां, कर्त्ता कारयिता च न ।
नानुमन्ताऽपि चेत्यात्म-ज्ञानवान् लिप्यते कथम् ? ॥२॥
लिप्यते पुद्गलस्कन्धो, न लिप्ये पुद्गलैरहम् ।
चित्रव्योमाञ्जनेनेव, ध्यायन्निति न लिप्यते ॥३॥
लिप्सताज्ञानसंपात-प्रतिघाताय केवलम् ।
निर्लेपज्ञानमग्नस्य, क्रिया सर्वोपयुज्यते ॥४॥
तपःश्रुताऽऽदिना मत्तः, क्रियावानपि लिप्यते ।
भावनाज्ञानसंपन्नो, निष्क्रियोऽपि न लिप्यते ॥५॥
अलिप्तो निश्चयेनाऽऽत्मा, लिप्तश्च व्यवहारतः ।
शुद्ध्यत्यलिप्तया ज्ञानी, क्रियावान् लिप्तया दृशा ॥६॥
ज्ञानक्रियासमावेशः, सहैवोन्मीलने द्वयोः ।
मुनिकाजेदतस्त्वत्र, नवेदैकैकमुख्यता ॥ ७ ॥
सज्ज्ञानं यदनुष्ठानं, न लिप्तं दोषपङ्कतः ।
शुद्धबुद्धस्वभावाय, तस्मै भगवते नमः ॥८॥

अष्ट० ११ अष्ट० । विगतश्लेपे,न०६ श० ७ उ० । "सेपल्ले खोमे नीरए णिम्मले णिट्ठिए णिल्लेवे अवहडे विसुद्धे भवइ ।" अत्यन्तसंश्लेषात् तन्मयतागतबालाग्रापहारादपनीतभित्त्यादिगतधान्यलेपकोष्ठागारवद् निर्लेपः । भ० ६ श० ७ उ० । अनु० । जी० । श्लेषरहिते पृथुकाऽऽदौ, आव० ४ अ० ।

णिल्लेवग–निर्लेपक–पुं० । रजके, व्य० १ उ० । "रायगिहे सेणिओ राया, तेण खोमजुयलं णिल्लेवगस्स दिन्नं ।" आ० चू० ४ अ० ।

णिल्लेवण–निर्लेपन–न० । मलस्याभावे मलच्छोटने, व्य० १ उ० । नि० चू० । निर्लेपे, " उव्वत्तणणिल्लेवणपीहंते । " ओघ० । द्विविधानि शरीराणि-बद्धानि, मुक्तानि चेति । भ० ७ श० ४ उ० । (तेषां निर्लेपनमपि 'सरीर' शब्दे वक्ष्यते)

णिल्लेहण–निर्लेखन–न० । ईषच्छुष्कस्योद्वर्त्तने, आचा० २ श्रु० १ चू० ३ अ० २ उ० ।

णिल्लोह–निर्लोभ–त्रि० । विगतलोभे, उत्त० ८ अ० । प्रतिबोध्य तेन भगवता निर्लोभचूडामणिना प्रव्राजिता । ती० ३५ कल्प० ।

णिव–नृप–पुं० । राजनि, नि० चू० २ उ० । " दशवेश्यासमो नृपः । " आचा० १ श्रु० २ अ० ६ उ० । दण्डिके, बृ० १ उ० ।

णिवइ–नृपति–पुं० । राजनि, व्य० १ उ० ।

णिवइता–निपतितृ–त्रि० । अवतरीतरि, स्था० ४ ठा० ४ उ० ।

णिवइय–निपतित–त्रि० । उपरि पतिते तथा सत् यत् पीमयति तन्निपतितम् । त्वग्विषे दृष्टिविषे वा विषभेदे, न० । स्था० ४ ठा० ४ उ० । अधोलम्बमाने, "संमुच्छिपइ वा, णिवपइ वा ।" आचा० २ श्रु० १ चू० ४ अ० १ उ० ।

णिवजुप्पय–निपातोत्पात–पुं० । निपातपूर्वक उत्पातो यत्र स निपातोत्पातः । नाट्यभेदे, यत्र पूर्वं निपतन्ति, तत उत्पतन्ति । आ० म० १ अ० १ खण्ड० । जं० ।

णिवकर–नृपकर–पुं० । राजहस्ते, पञ्चा० १८ विव० ।

णिवकरलूयाकिरियाजयणा–नृपकरलूताक्रियायतना–स्त्री० । नृपकरे राजहस्ते लूता वातिको रोगविशेषो नृपकरलूता,तस्या उपशमे क्रिया चिकित्सा मन्त्रापमार्जनाऽऽदिका, तस्यां या यतना प्रयत्नः, सा तथा । राजहस्तलूताचिकित्साप्रयत्ने, पञ्चा० १८ विव० ।

णिवट्टण–निवर्त्तन–न० । निवृत्तौ मार्गनिवर्त्तनस्थाने, ज्ञा० १ श्रु० २ अ० ।

णिवडण–निपतन–न० । अधःपतने, प्रश्न० २ आश्र० द्वार ।

णिवडिऊण–निपत्य–अव्य० । अधःपतित्वेत्यर्थे, " णिवडिऊण लेणेसु पयं पियं करेह मे जयवं ! पसायं । " दर्श० ३ तत्त्व ।

णिवडिय–निपतित–त्रि० । नीचैः पतिते, "सव्वंगेहिं णिवडिया ।" आ० म० १ अ० २ खण्ड ।

णिवण्ण–निवर्ण्ण–त्रि० । शपिते, आव० ४ अ० । सुप्ते, संथा० । त्वग्वर्तिते, बृ० १ उ० ।

णिवण्ण–पुं० । " धम्मं सुक्कं च दुवे, न वि झायइ न वि अ अट्टरुद्दाइं । एसो काउस्सग्गो, णिवण्णओ होइ नायव्वो ॥१॥ " इत्युक्तलक्षणे कायोत्सर्गभेदे, आव० ५ अ० ।

णिवण्णणिवण्ण–निपन्ननिपन्न–पुं० । " अट्टं रुद्दं च दुवे, झायइ झाणाइं जो णिवण्णो उ । एसो काउस्सग्गो, णिवण्णणिवण्णगो नाम ॥१॥" इत्युक्तलक्षणे कायोत्सर्गभेदे, आव० ५ अ० ।

णिवण्णुस्सिय–निष्पन्नोत्सित–पुं० । " धम्मं सुक्कं च दुवे, झायइ झाणाइं जो णिवण्णो उ । एसो काउस्सग्गो, होइ

णिवसुस्सिओ नाम ॥ १ ॥ " इत्युक्तलक्षणे कायोत्सर्गभेदे, आव० ५ अ०।

णिवत्तमाण–निवर्त्तमान–त्रि० । प्रत्यावर्त्तमाने, " गुरुगा णिवत्तमाणे । " व्य० १ उ०।

णिवत्ति–निवृत्ति–स्त्री० । बन्धने, स्था० ४ ठा० १ उ० । निष्पत्तौ, स्था० ४ ठा० ४ उ०।

णिवपडिमा–नृपप्रतिमा–स्त्री० । राज्ञ आकारे, " संगामे णिवपडिमं, देवी काऊण जुज्झति रणम्मि । " व्य० १ उ०।

णिववस–नृपवश–पुं० । नरेशवशे, जीवा० १२ अधि०।

णिवविट्ठि–नृपविष्टि–स्त्री० । राजविष्टौ, व्य० २ उ०।

णिवसण–निवसन–न० । परिधाने, ज्ञा० १ श्रु० ८ उ० । विशिष्टरचनारचिते परितः परिधाने, अनु० । " महिलिअं णिवसणेणं । " अनु० ।

णिवह–निवह–पुं० । सङ्घाते, विशे० । आ० म० ।

गम–धा० । गतौ, " गमेरई-अइच्छाणुवज्जावज्जसोक्कुसाक्कुस–पच्चड्ड–पच्चुन्द–णिम्मह–णी–णीण–णीलुक्क–पदअ–रम्म–परिअल्ल–वोच्च–परिअल–णिरिणास–णिवहावसेहावहराः" ॥ ८ । ४ । १६२ ॥ इति सूत्रेण गमधातोर्णिवहाऽऽदेशो वा । ' णिवहइ ' । पक्षे–' गच्छइ ' । गच्छति । प्रा० ४ पाद ।

नश्–धा० । अदर्शने, "नशेर्णिरिणास–णिवहावसेह–परिसावसेहावहराः" ॥ ८ । ४ । १७८ ॥ इति सूत्रेण णिवहाऽऽदेशः । 'णिवहइ' । नश्यति । प्रा० ४ पाद । समृद्धौ, दे० ना० ४ वर्ग २६ गाथा ।

णिवाअ–देशी–स्वेदे, दे० ना० ४ वर्ग ३४ गाथा ।

णिवाइ[ण्]–निपातिन्–त्रि० । निपतितुं शीलमस्येति निपातीति विगृह्य णिनिः । निपतनं वा निपातः, सोऽस्यास्तीति निपाती । भ्रष्टे, अधःपतिते, संयमादसंयमं प्राप्ते, " जे पुव्वुट्ठाई णो पच्छा णिवाई, जे पुव्वुट्ठाई पच्छा णिवाई, जे णो पुव्वुट्ठाई पच्छा णिवाई । " आचा० १ श्रु० ५ अ० ३ उ० ।

णिवाएइत्ता–निपात्य–अव्य० । लगयित्वेत्यर्थे, " जाणुं धरणितलंसि निहट्टु णिवाडेइत्ता । " जी० ३ प्रति० ४ उ०।

णिवाण–निपान–न० । जलपानस्थाने, बृ० ३ उ०।

णिवाय–निपात–पुं० । निपतनं निपातः । आचा० १ श्रु० ५ अ० ३ उ० । पतने, ज्ञा० १ श्रु० १ अ० । विनाशे, पिं० । निवेशने, प्रश्न० २ आश्र० द्वार । नितरां पातो निपातः । संयोगे, " आयवस्स णिवाएणं । " उत्त० २ अ० । तत्तदर्थद्योतनाय तेषु तेषु निपततीति निपातः । प्रश्न० २ सम्व० द्वार । " निपात एकाजनाङ् " ॥१।१।१४॥ " चादयोऽसत्त्वे ।१।४।५७॥ इति निपातेतिसंज्ञितेषु द्योतकत्वेनापरिमितार्थेषु चाऽऽदिषु, विशे० । ज्ञा० । आ० म० । मरणे, वाच० ।

निवात–त्रि० । वायुप्रवेशरहिते, भ० ७ श० ८ उ० । ज्ञा० । " तंसिप्पेगे अणगारा, हिमवाए णिवायमेसंति । " शीतार्दिता निवातमेष्यन्ति–घट्टशालाऽऽदिवसतीर्वातायनाऽऽदिरहिताः । आचा० १ श्रु० ६ अ० २ उ० ।

णिवायगंभीर–निवातगम्भीर–त्रि० । निवातविशाले, यद् हि गृहाऽऽदिकं वातरहितमपि महद् भवति तत्तथा । भ० ७ श० ८ उ० ।

णिवायण–निपातन–न० । गर्ताऽऽदिप्रक्षेपणे, प्रश्न० २ आश्र० द्वार । सूत्र० । व्याकरणप्रसिद्धे आदेशाऽऽगमाऽसाध्ये समुदायाऽऽदेशे, आ० म० १ अ० २ खण्ड ।

णिवायसरणप्पईव–निवातशरणप्रदीप–पुं० । निर्गतवातगृहैकदेशस्थदीपे, " जं पुण सुनिप्पकंपं, निवायसरणप्पईवमिव चित्तं । " आव० ४ अ० ।

णिवायसरणप्पईवज्झाण–निवातशरणप्रदीपध्यान–न० । वातवर्जितगृहदीपज्वलने, " णिवायसरणप्पईवज्झाणमिव णिप्पकंपे । " प्रश्न० ५ सम्व० द्वार ।

णिवारण–निवारण–न० । नितरां वारणं निवारणम् । प्रतिघाते, ज्ञ० ६ श० ३३ उ० । नितरां वार्यते निषिध्यतेऽनेन शीताऽऽतपाऽऽदीनीति निवारणम् । सौधाऽऽदिके तथाविधे गृहे, वस्त्राऽऽदौ च । उत्त० २ अ० । " न मे निवारणं अत्थि, छवित्ता णं न विज्जई । अहं तु अग्गिं सेवामि, इइ भिक्खू न चिंतए ॥७॥ " उत्त० २ अ० ।

णिवारय–निवारक–त्रि० । मैवं कार्षीरित्येवं निषेधके, ज्ञा० १ श्रु० १६ अ० । नि० ।

णिवारिय–निवारित–त्रि० । प्रतिषिद्धे, आव० ४ अ० ।

णिवास–निवास–पुं० । निवसने भूमिभागे, नि० १ श्रु० १ व० १ अ० ।

णिविट्ठ–निविष्ट–त्रि० । अध्युपपन्ने, आचा० १ श्रु० ४ अ० २ उ० । सूत्र० । ज्ञा० । जीवप्रदेशेषु, भ० १३ श० ७ उ० । तीव्रानुभावजनकतया स्थिते कर्मांशे, प्रज्ञा० २ पद । ज्ञ० ।

निर्विष्ट–त्रि० । लब्धे, उपात्ते, "थोवं बहु णिविट्ठम्मि" इत्यादौ निर्विष्टशब्दस्य सामार्थस्य दर्शनात् । स्था० ५ ठा० २ उ० ।

णिविट्ठकप्पट्ठिइ–निर्विष्टकल्पस्थिति–स्त्री० । कल्पशास्त्रोक्तसाधुसामाचारीभेदे, स्था० ५ ठा० २ उ० । (व्याख्या ' कप्पट्ठिइ ' शब्दे तृतीयभागे २३३ पृष्ठे दर्शिता)

णिविम–निविम–त्रि० । ' ङो लः ' ॥८।१।२०२॥ इत्यस्य कादाचित्कत्वान्न ङस्य लः । प्रा० १ पाद । सान्द्रे, वाच० ।

णिवित्ति–निवृत्ति–स्त्री० । आरम्भानिवर्त्तने, " न मांसभक्खणे दोषो, न मद्ये न च मैथुने । प्रवृत्तिरेषा भूतानां, निवृत्तिस्तु महाफला " ॥ १ ॥ सूत्र० १ श्रु० ८ अ० । "····नियमविहूणस्स, परदारगमस्स उ । अणियत्तस्स भवे बंधो, णिवित्तीए महाफलं ॥ सुघेवाणं (?) निवित्तिं जो, मणसा वि य विराहए । सो मओ दुग्गइं गच्छे, मेघमाला जहज्जिया ॥ " महा० ६ अ० ।

णिवित्तिपहाण–निवृत्तिप्रधान–त्रि० । आरम्भान्तरनिवर्त्तनसारे बहुतरसत्त्वघातनिवर्त्तनसारे, पञ्चा० ७ विव० ।

णिवुट्ठ–निवृष्ट–त्रि० । नितरां वृष्टे, " पवुट्ठो देव त्ति वा णिवुट्ठो देव त्ति वा णो वए । " आचा० २ श्रु० १ चू० ४ अ० १ उ० ।

णिवुट्ठित्ता–निर्वेष्ट्य–अव्य० । हापयित्वेत्यर्थे, " दिवसखेत्तस्स णिवुट्ठित्ता रत्तिखेत्तस्स अभिवुट्ठित्ता चारं चरति । " सू० प्र० १ पाहु० ।

णिवुट्टेमाण–निर्वेष्टयत्–त्रि० । हापयति, सू० प्र० । " विक्खंभवुड्ढिं णिवुट्टेमाणे अट्ठारसजोयणाइं परिरयवुड्ढिं णिवुड्ढेमाणे । " सू० प्र० २ पाहु० ।

णिवुड्ढि–निवृद्धि–स्त्री० । वातपित्ताऽऽदिभिः शरीरोपचयहानौ, स्था० । निरशब्दस्याभावार्थत्वाद्, निरुदरा कन्येत्यादिवत् । "दोण्हं गब्भत्थाणं णिवुड्ढी पण्णत्ता । तं जहा–मणुस्साणं चेव, पंचिंदियतिरिक्खजोणियाणं चेव । " स्था० २ ठा० ३ उ० । " तिहिं ठाणेहिं जीवाणं णिवुड्ढी पण्णत्ता । तं जहा–उड्ढाए, अहोए, तिरियाए ।" स्था० ३ ठा० २ उ० । वृद्धभावे, सू० प्र० १२ पाहु० ।

णिवुत्त–निवृत्त–त्रि० । " निवृत्तवृन्दारके वा " ॥ ८ । १ । १३२ ॥ इति ऋत अत्वम । प्रवृत्तिविमुखे, प्रा० १ पाद ।

णिवेएउं–निवेद्य–अव्य० । गुर्वादेराख्याप्येत्यर्थे, पञ्चा० १५ विव० ।

णिवेयण–निवेदन–न० । गुरोः प्रत्यर्पणे, विशे० । यथा–"भवदीयोऽयं किङ्करः, यूयं मे भवोदधिनिमग्नस्य नाथाः" इत्येवं समर्पणम । पञ्चा० १ विव० ।

णिवेयणापिंड–निवेदनापिण्ड–पुं० । यक्षाऽऽदिभ्यो निवेद्यमाने पिण्डे, नि० चू० ।

जे भिक्खू णिवेयणापिंडं भुंजइ, भुंजंतं वा साइज्जइ ।१८७।

ओवाइयं, अणोवाइयं वा जं पुण्णभद्दमाणिभद्दसव्वाणजक्खमहुमिमादियाण निवेदिज्जति, सो णिवेयणापिंडो । सो य दुविहो–साहुणिस्साकम्मो, अणिस्साकडो य । णिस्साकम्मं गेण्हंतस्स चउगुरुगं, अणिस्साकम्मे मासलहुं, आणादिया य दोसा ।

गाहा–

सव्वाणमाइयाणं, दुविहो पिंमो निवेयणाओ य ।
णिस्साए अणिस्साए, णिस्साए आणमादीणि ॥२०६॥

सव्वाणादिया जे अरहंतपक्खिया देवता, ताण जो पिंडो निवेदिज्जति, सो दुविहो–णिस्साकम्ममणिस्साकम्मो य । णिस्साकम्मं गेण्हंते आणादिया ।

इमेण विधिणा णिस्साकडं करेति । गाहा–

वरुगं करेउ आहा, समणाणत्थं उवक्खडं नोउं ।
सड्ढाकडं उवेति य, णिस्सापिंडम्मि सुत्तं तु ॥२०७॥

दाणरुइस्सट्ठो वा णिवेयणवरुववदेसं कातुं साधूण देति, आधाकम्मं उवितं च । अहवा–जाव साहू अत्थंति, ताव ओवातियं देमो, सुद्धं साहू गिण्हंति, एत्थ ओसक्कणमीसजायउवियगदोसा । जया वा साहू आगमिस्संति, तदा दाहेमो । एत्थ ओसक्कणमीसजातउवियदोसा सड्ढाकडं साहु णिस्साए वा कम्मं साहु णिस्सा वा उवेति, एत्थ उवियगदोसो केवलो । एसा णिस्साकम्मो, एत्थ सुत्तणिवातो, इमो अणिस्सातो कम्मो साहू होउ वा, मा वा, देवता ते पुव्वपवत्तं उवेति, सा य उवितो साहू य पच्छाए सो कप्पति ।

णिस्साकम्मो वि कप्पति इमेहिं कारणेहिं–

अभिवे ओमोयरिए, रायदुट्ठे भए व गेलण्णे ।
अद्धाणरोहए वा, जयणा गहणं तु गीयत्थे ॥२०८॥

पणगपरिहाणी ते गिण्हंति, अहा वा अगीतअपरिणामगा ण जाणंति तहा गीयत्था गेण्हेति । " नि० चू० ११ उ० ।

णिवेस–निवेश–पुं० । नि–आधिक्येन वेशो निवेशः । प्रवेशे, नि० चू० ४ उ० । स्थापने, स्था० ६ ठा० । यत्र प्रभूतानां भाण्डानां प्रवेशस्तादृशे स्थाने, बृ० । " णिवेसो सत्थाऽऽइजत्ता वा ।" निवेशो नाम–यत्र सार्थ आवासितः, आदिग्रहणेन ग्रामो वा, अन्यत्र प्रस्थितः सन् यत्रान्तरा समधिवसति, यात्रायां वागतो लोको यत्र तिष्ठति । एष सर्वोऽपि निवेश उच्यते । बृ० १ उ० ।

णिवेसइत्ता–निवेश्य–अव्य० । अवधार्येत्यर्थे, " इत्थीण चित्तंसि निवेसइत्ता, दट्ठुं ववस्से समणे तवस्सी । " उत्त० ३२ अ० ।

णिवेसण–निवेशन–न० । स्थाने, आचा० १ श्रु० ५ अ० ४ उ० । एकद्वारे पृथक्परिक्षिप्ते अनेकगृहे, आव० ४ अ० । यथा एकनिष्क्रमणप्रवेशानि ह्यादीनि गृहाणि । बृ० १ उ० ।

णिवेसिय–निवेश्य–अव्य० । प्रवेश्येत्यर्थे, " अप्पणो अंगुलाए णिवेसिय णं पीहरइ ।" नि० चू० ३ उ० ।

णिवेसियव्व–निवेष्टव्य–त्रि० । स्थापनीये, " परलोगे चित्तं णिवेसियव्वं असासयं जीवियं । " आ० म० १ अ० १ खण्ड ।

णिव्व–देशी–ककुदे, दे० ना० ४ वर्ग ४७ गाथा ।

णिव्वच्छण–देशी–अवतारणे, दे० ना० ४ वर्ग ४० गाथा ।

णिव्वट्ट–गाढ–त्रि० । अत्यर्थे, "शीघ्राऽऽदीनां बहिर्ह्लाऽऽदयः" ॥८ । ४।४२२ ॥ इति गाढस्य णिव्वट्टः । " विहवे कस्स थिरत्तणउं, जोव्वणि कस्स मरट्ट । सो लेखऊ पत्ताबिअइ, जो लमाइ णिव्वट्ट ॥१॥ " प्रा० ४ पाद ।

णिव्वट्टग–निर्वर्तक–त्रि० । कर्तरि, आव० ४ अ० । करणे, विशे० ।

णिव्वट्टित्ता–निर्वर्त्य–अव्य० । जीवप्रदेशेभ्यः शरीरं पृथक्कृत्वेत्यर्थे, स्था० २ ठा० ४ उ० । (देशेन सर्वेण वाऽऽत्मा शरीरं निर्वर्त्य निर्यातीति, 'आता' शब्दे द्वितीयभागे २०१ पृष्ठे उक्तम्)

णिव्वट्टिय–निर्वर्तित–त्रि० । कृते, स्था० १ ठा० । " असंथडा ति वा, बहुणिव्वट्टियफला ति वा, बहुसंभूया ति वा ।" आचा० २ श्रु० १ चू० ४ अ० २ उ० । प्रश्न० ।

णिव्वड–भू–धा० । पृथग्भवने । "पृथक्स्पष्टे णिव्वडः" ॥८।४।६२॥ इति पृथग्भूते स्पष्टे च कर्तरि भुवो णिव्वमेत्यादेशः । " णिव्वमइ " । पृथग्भवतीत्यर्थः । प्रा० ४ पाद । नग्गे, दे० ना० ४ वर्ग २० गाथा ।

णिव्वण–निर्व्रण–त्रि० । विस्फोटकाऽऽदिकृतक्षतरहिते, जं० २ वक्ष० । औ० । जी० ।

णिव्वत्त–निर्वृत्त–त्रि० । निर्वर्तिते, स्था० ६ ठा० । अतिक्रान्ते, ज्ञा० १ श्रु० १ अ० ।

णिव्वत्तणया–निर्वर्तनता–स्त्री० । निष्पत्तौ, "तओ णिव्वत्तणया तओ परियाइणणा । " प्रज्ञा० ३४ पद ।

णिव्वत्तणा–निर्वर्तना–स्त्री० । इन्द्रियाणां निष्पादनायाम्, उत्त० ३ अ० ।

णिव्वत्तणाहिगरणिकिरिया–निर्वर्तनाधिकरणिक्रिया–स्त्री० । निर्वर्तनमसिशक्तितोमरादीनां निष्पादनं, तदेवाधिकरणक्रिया । आधिकरणिक्याः क्रियाया भेदे,भ०२ श० ३ उ० । स्था० । निह्नवनये, स्था० २ ठा० १ उ० ।

णिव्वत्ति–निर्वृत्ति–स्त्री० । वस्तुनः करणे, " अकोऽसमाहाणं, जमिहं करणं न णिव्वत्ती । " विशे० । निर्वर्त्तनं निर्वृत्तिर्निष्पत्तिः । निष्पत्तौ, भ० ।

निर्वृत्तिभेदाः-

कइविहा णं भंते ! जीवणिव्वत्ती पण्णत्ता ? । गोयमा ! पंचविहा जीवणिव्वत्ती पण्णत्ता । तं जहा–एगिंदियजीवणिव्वत्ती०जाव पंचिंदियजीवणिव्वत्ती । एगिंदियजीवणिव्वत्ती णं भंते ! कइविहा पण्णत्ता ?। गोयमा ! पंचविहा पण्णत्ता । तं जहा–पुढवीकाइयएगिंदियजीवणिव्वत्ती० जाव वणस्सइकाइयएगिंदियजीवणिव्वत्ती । पुढवीकाइयएगिंदियजीवणिव्वत्ती णं भंते ! कइविहा पण्णत्ता ?। गोयमा ! दुविहा पण्णत्ता । तं जहा–सुहुमपुढवीकाइयएगिंदियजीवणिव्वत्ती य,बादरपुढवीकाइयएगिंदियजीवणिव्वत्ती य । एवं एएणं अभिलावेणं भेदो-जहा बहुगबंधे तेयगसरीरस्स० जाव सव्वट्ठसिद्धअणुत्तरोववाइयकप्पातीतवेमाणियदेवपंचिंदियजीवणिव्वत्ती णं भंते ! कइविहा पण्णत्ता ?। गोयमा ! दुविहा पण्णत्ता । तं जहा-पज्जत्तगसव्वट्ठसिद्धअणुत्तरोववाइय० जाव देवपंचिंदियजीवणिव्वत्ती य, अपज्जत्तगसव्वट्ठसिद्धअणुत्तरोववाइय० जाव देवपंचिंदियजीवणिव्वत्ती य । कइविहा णं भंते ! कम्मणिव्वत्ती पण्णत्ता ?। गोयमा ! अट्ठविहा कम्मणिव्वत्ती पण्णत्ता । तं जहा-णाणावरणिज्जकम्मणिव्वत्ती० जाव अंतराइयकम्मणिव्वत्ती । णेरइयाणं भंते ! कइविहा कम्मणिव्वत्ती पण्णत्ता ?। गोयमा ! अट्ठविहा कम्मणिव्वत्ती पण्णत्ता । तं जहा–णाणावरणिज्जकम्मणिव्वत्ती०जाव अंतराइयकम्मणिव्वत्ती य । एवं० जाव वेमाणियाणं । कइविहा णं भंते ! सरीरणिव्वत्ती पण्णत्ता ?। गोयमा ! पंचविहा सरीरणिव्वत्ती पण्णत्ता । तं जहा–ओरालियसरीरणिव्वत्ती० जाव कम्मगसरीरणिव्वत्ती । एवइया णं भंते ! एवं चेव । एवं०जाव वेमाणियाणं,णवरं णायव्वं जस्स जइ सरीराणि । कइविहा णं भंते ! सव्विंदियणिव्वत्ती पण्णत्ता ? । गोयमा ! पंचविहा सव्विंदियणिव्वत्ती पण्णत्ता । तं जहा–सोइंदियणिव्वत्ती० जाव फासिंदियणिव्वत्ती । एवं णेरइया० जाव थणियकुमारा । पुढवीकाइयाणं पुच्छा ? । गोयमा !एगा फासिंदियणिव्वत्ती पण्णत्ता । एवं जस्स जइ इंदियाणि० जाव वेमाणियाणं । कइविहा णं भंते ! आणापाणुणिव्वत्ती पण्णत्ता ? । गोयमा ! चउव्विहा आणापाणुणिव्वत्ती पण्णत्ता । तं जहा–सव्वआणापाणुणिव्वत्ती, देसआणापाणुणिव्वत्ती, सव्वाओसन्नाआणापाणुणिव्वत्ती, देसाओसन्नाआणापाणुणिव्वत्ती, सव्वाओसन्नाआणापाणुणिव्वत्ती, असव्वाओसन्नाआणापाणुणिव्वत्ती । एवं एगिंदियवज्जं जस्स जा आणा०जाव वेमाणियाणं । कइविहा णं भंते ! मणणिव्वत्ती पण्णत्ता ?। गोयमा ! चउव्विहा मणणिव्वत्ती पण्णत्ता । तं जहा–सच्चमणणिव्वत्ती० जाव असच्चामोसमणणिव्वत्ती । एवं एगिंदियवज्जं विगलिंदियवज्जं०जाव वेमाणियाणं । कइविहा णं भंते ! कसायणिव्वत्ती पण्णत्ता ? । गोयमा ! चउव्विहा कसायणिव्वत्ती पण्णत्ता । तं जहा–कोहकसायणिव्वत्ती०जाव लोभकसायणिव्वत्ती । एवं०जाव वेमाणियाणं । कइविहा णं भंते ! वण्णणिव्वत्ती पण्णत्ता ?। गोयमा ! पंचविहा वण्णणिव्वत्ती पण्णत्ता । तं जहा-कालवण्णणिव्वत्ती० जाव सुक्किल्लवण्णणिव्वत्ती । एवं णिरवसेसं० जाव वेमाणियाणं । एवं गंधणिव्वत्ती दुविहा० जाव वेमाणियाणं । रसणिव्वत्ती पंचविहा०जाव वेमाणियाणं । फासणिव्वत्ती अट्ठविहा०जाव वेमाणियाणं । कइविहा णं भंते ! संठाणणिव्वत्ती पण्णत्ता ?। गोयमा ! छव्विहा संठाणणिव्वत्ती पण्णत्ता ?। तं जहा–समचउरंससंठाणणिव्वत्ती० जाव हुंडसंठाणणिव्वत्ती । णेरइयाणं पुच्छा ?। गोयमा ! एगा हुंडसंठाणणिव्वत्ती पण्णत्ता । असुरकुमाराणं पुच्छा ?। गोयमा ! एगा समचउरंससंठाणणिव्वत्ती एवं० जाव थणियकुमारा । पुढवीकाइयाणं पुच्छा ?। गोयमा ! एगा मसूरचंदसंठाणणिव्वत्ती पण्णत्ता । एवं जस्स जं संठाणं०जाव वेमाणिया । कइविहा णं भंते ! सण्णाणिव्वत्ती पण्णत्ता ?। गोयमा ! चउव्विहा सण्णाणिव्वत्ती पण्णत्ता । तं जहा–आहारसण्णाणिव्वत्ती० जाव परिग्गहसण्णाणिव्वत्ती । एवं० जाव वेमाणिया । कइविहा णं भंते ! लेस्साणिव्वत्ती पण्णत्ता ? । गोयमा ! छव्विहा लेस्साणिव्वत्ती पण्णत्ता । तं जहा–कण्हलेस्साणिव्वत्ती०जाव सुक्कलेस्साणिव्वत्ती । एवं० जाव वेमाणिया जस्स जइ लेस्साओ तस्स तत्तिया णाणियव्वा । कइविहा णं भंते ! दिट्ठिणिव्वत्ती पण्णत्ता ? । गोयमा ! तिविहा दिट्ठिणिव्वत्ती पण्णत्ता । तं जहा–सम्मदिट्ठिणिव्वत्ती, मिच्छादिट्ठिणिव्वत्ती, सम्मामिच्छादिट्ठिणिव्वत्ती । एवं० जाव वेमाणिया, जस्स जइविहा दिट्ठी । कइविहा णं भंते ! णाणणिव्वत्ती पण्णत्ता?। गोयमा ! पंचविहा णाणणिव्वत्ती पण्णत्ता । तं जहा–आभिणिबोहियणाणणिव्वत्ती०जाव केवलणाणणिव्वत्ती । एवं एगिंदियवज्जं० जाव वेमाणिया जस्स जइ णाणा । कइविहा णं भंते ! अण्णाणणिव्वत्ती पण्णत्ता ? । गोयमा ! तिविहा अण्णाणणिव्वत्ती पण्णत्ता । तं जहा–मइअण्णाणणिव्वत्ती, सुअअण्णाणणिव्वत्ती, विभंगणाणणिव्वत्ती । एवं

जस्स जइ० जाव वेमाणिया । कइविहा णं भंते ! जोगणिव्वत्ती पण्णत्ता ?। गोयमा ! तिविहा पण्णत्ता । तं जहा—मणजोगणिव्वत्ती,वइजोगणिव्वत्ती,कायजोगणिव्वत्ती । एवं ०जाव वेमाणिया जस्स जइविहो जोगो । कइविहा णं भंते ! उवओगणिव्वत्ती पण्णत्ता ?। गोयमा ! दुविहा उवओगणिव्वत्ती पण्णत्ता । तं जहा—सागारोवओगणिव्वत्ती,अणागारोवओगणिव्वत्ती । एवं० जाव वेमाणिया ।

अत्र सङ्ग्रहणीगाथे वाचनान्तरे-

"जीवाणं णिव्वत्ती,कम्मप्पगडी(णिव्वत्ती)सरीरणिव्वत्ती ।
सव्विंदियणिव्वत्ती, जासा य मणे कसाया य ॥ १ ॥
वण्णे गंधे रसे फासे, संठाणविही य होइ बोधव्वो ।
लेस्सा दिट्ठी णाणे, उवओगो होइ जोगे य "॥ २ ॥

(कइविहेत्यादि) निर्वर्तनं निर्वृत्तिर्निष्पत्तिर्जीवस्यैकेन्द्रियाऽऽदितया निर्वृत्तिर्जीवनिर्वृत्तिः । (जहा बद्धगबंधे तेयगसरीरस्स त्ति) यथा महल्लबन्धाधिकारेऽष्टमशतकनवमोद्देशकाभिहिते तेजःशरीरस्य बन्ध उक्तः,एवमिह निर्वृत्तिर्वाच्या, सा च तत एव दृश्येति । पूर्वं जीवापेक्षया निर्वृत्तिरुक्ता, अथ तत्कार्यतत्कर्मापेक्षया नामाह- (कइविहेत्यादि) (कसायणिव्वत्ति त्ति) कषायवेदनीयपुद्गलनिर्वर्तनम् । (जस्स जं संठाणं ति) तत्राप्कायिकानां स्तिबुकसंस्थानं, तेजसां सूचीकलापसंस्थानं, वायूनां पताकासंस्थानं, वनस्पतीनां नानाऽऽकारसंस्थानं, विकलेन्द्रियाणां हुण्डम्, पञ्चेन्द्रियतिरश्चां, मनुष्याणां च षड्व्यन्तराऽऽदीनां समचतुरस्रसंस्थानम् । भ० १९ श० ८ उ० ।

णिव्वत्तिय–निर्वर्तित–त्रि० । बन्धयोग्यतया निष्पादिते, स्था० १० ठा० । सामान्येनोपार्जिते, स्था० २ ठा० ४ उ० ।

णिव्वमिअ–देशी–परिभुक्ते, दे० ना० ४ वर्ग ३६ गाथा ।

णिव्वय–निर्व्रत–त्रि० । अविरते, स्था० ३ ठा० १ उ० । प्राणातिपाताऽऽद्यनिवृत्ते, स्था० ३ ठा० २ उ० । अणुव्रतरहिते,ज्ञा० १ श्रु० ८ अ० ।

णिव्वयण–निर्वचन–न० । निरुक्तौ, विशे० । शब्दार्थकथने, आ० म० १ अ० २ खण्ड । व्याकरणे, स्था० १० ठा० ।

णिव्वलिअ–देशी–जलधौते, प्रविगणिते, विघटिते च । दे० ना० ४ वर्ग ५१ गाथा ।

णिव्वह–पिष्–धा० । पेषणे, " पिषेर्णिव्वह–णिरिणास-णिरिणज्ज-रोआ–चड्डाः " ॥ ८ । ४ । १७५ ॥ इति पिषेर्णिव्वहाऽऽदेशः । 'णिव्वहइ ।' पिनष्टि । प्रा० ४ पाद । ' णिव्वहेपज्जा । ' निर्वहेयेत् , असारतामापादयेत् । सूत्र० १ श्रु० ७ अ० ।

णिव्वहण–देशी–विवाहे, दे० ना० ४ वर्ग ३६ गाथा ।

णिव्वा–विश्रम–वि–श्रम । धा० । विरामे, श्रमान्ते, स्वास्थ्ये, " विश्रमेर्णिव्वा " ॥ ८ । ४ । ५९ ॥ इति विपूर्वस्य श्रमधातोर्णिव्वाऽऽदेशः । ' णिव्वाइ ' । पक्षे--'वीसमइ' । विश्राम्यति । प्रा० ४ पाद ।

णिव्वाघाइम–निर्व्याघातिम–त्रि० । व्याहननं व्याघातः पर्वताऽऽदिस्खलनम्, तेन निर्वृत्तं व्याघातिमम् । " भावादिमन् " ॥ ६ । ४ । २१ ॥ इति इमन्प्रत्ययः । निर्व्याघातिमं व्याघातान्निर्गतम् । स्वाभाविके, चं० प्र० १८ पाहु० १ पाहु० । सू० प्र० ।

णिव्वाघाय–निर्व्याघात–अव्य० । व्याघातस्याऽभावो निर्व्याघातम् । व्याघाताऽभावे, प्रज्ञा० २ पद । " णिव्वाघाएणं पन्नरसकम्मभूमीसु ।" प्रज्ञा० २ पद । धरणीधराऽऽदिभिः प्रतिहतत्वात् (स्था० ६ ठा०) कटकुड्याऽऽद्यप्रतिहतत्वाद् व्याघातरहिते केवलज्ञाने, औ० । दशा० ।

णिव्वाण–निर्वाण–न० । निर्वृतौ, विशे० । उत्त० । पञ्चा० । आ० चू० । सूत्र० । आत्मस्वास्थ्ये, आ० चू० ४ अ० । आचा० । आव० । कर्मकृतविकाररहितत्वे, स्था० ३ ठा० ३ उ० । सकलसंतापरहितत्वे, औ० । सर्वद्वन्द्वोपरतिभावे, सूत्र० १ श्रु० १ अ० १ उ० । सकलकर्मविरहजे सुखे, ज्ञा० १ श्रु० १ अ० । सकलकर्मक्षयजे आत्यन्तिके सुखे, औ० । अशेषकर्मक्षयरूपे (सूत्र० १ श्रु० ६ अ० । आचा०) मोक्षे, ध० २ अधि० । प्रश्न० । आतु० । सूत्र० । परमपदे, षो १५ विव० । घातिकर्मचतुष्टयरूपेण कर्मक्षयेण केवलज्ञानावाप्तौ, सूत्र० १ श्रु० ११ अ० । मोक्षपदशेषे कर्मक्षयरूपे ईषत्प्राग्भाराऽऽख्ये भूभागोपर्यवस्थितक्षेत्रखण्डे, सूत्र० २ श्रु० २ अ० ।

मोक्षसिद्धिः-

ते पव्वइए सोउं, पहासो आगच्छई जिणसयासं ।
वच्चामि ण वंदामी, वंदित्ता पज्जुवासामि ॥ १९७२ ॥

सुगमा ॥ १९७२ ॥

ततः किमित्याह-

आजन्नो य जिणेणं, जाइजरामरणविप्पमुक्केणं ।
नामेण य गोत्तेण य, सव्वण्णु सव्वदरिसीणं ॥१९७३॥

तथैव ॥ १९७३ ॥

आभाष्य ततः किमुक्तेऽऽसावित्याह-

किं मन्ने एणेव्वाणं, अत्थी नत्थि त्ति संसओ तुज्झ ?।
वेयपयाण य अत्थं, न याणसी तेसिमो अत्थो ॥१९७४॥

हे आयुष्मन् ! प्रभास! त्वमेवं मन्यसे-किं निर्वाणमस्ति, नवा?, इति । अयं च संशयस्तव विरुद्धवेदपदश्रवणनिबन्धनः । तानि चामूनि वेदपदानि-"जरामर्यं वैतत्सर्वं यदग्निहोत्रम् ।" तथा-'सैषा गुहा दुरवगाहा ।' तथा-"द्वे ब्रह्मणी परमपरं च ।" तत्र "परं सत्यं ज्ञानमनन्तरं ब्रह्मेति" एतेषां चायमर्थस्तव चेतसि वर्तते-यदेतदग्निहोत्रं तज्जरामर्यमेव यावज्जीवं कर्त्तव्यमिति । अग्निहोत्रक्रिया च क्रूरवधहेतुत्वाच्चपलरूपा । सा च स्वर्गफलैव स्यान्नापवर्गफला । 'यावज्जीवम्' इतिचोक्ते कालान्तरं नास्ति, यत्रापवर्गहेतुभूताक्रियाऽन्तराऽऽरम्भः स्यात्तस्मात्साधनाभावान्मोक्षाभावः । ततश्चेत्यादिकानि किल मोक्षाभावप्रतिपादकानि । शेषाणि तु तदस्तित्वसूचकानि, यतो गुहाऽत्र मुक्तिरूपा, सा च संसाराभिनन्दिनां दुरवगाहा, दुःप्रवेशात् । तथा-परं ब्रह्म सत्यं मोक्षः, अनन्तरं तु ब्रह्मज्ञानमितितो मोक्षास्तित्वं नास्तित्वं च वेदपदप्रतिपादितमवगम्य तव संशयः । तत्रैषां वेदपदानामर्थं त्वं न जानासि, यतस्तेषामयमर्थो वक्ष्यमाणलक्षण इति ॥ १९७४ ॥ युक्तिमपि मोक्षाभावप्रतिपादने प्रभासाध्यवसितां दूषयितुं भगवान् प्रकटयितुमाह--

मन्नसि किं दीवस्स व, नासो निव्वाणमस्स जीवस्स ?।

दुक्खक्खयाइरूवा,किं होज्ज व से सओऽवत्था ?।१६७५।
आयुष्मन् ! प्रभास ! त्वमेवं मन्यसे-किं दीपस्येवास्य जीवस्य नासो ध्वंस एव निर्वाणम् ?। यथाऽऽहुः सौगतविशेषाः केचित्।
तद्यथा--
"दीपो यथा निर्वृतिमभ्युपेतो,
नैवावनिं गच्छति नान्तरिक्षम्।
दिशं न काञ्चिद्विदिशं न काञ्चित्,
स्नेहक्षयात्केवलमेति शान्तिम् ॥ १ ॥
जीवस्तथा निर्वृतिमभ्युपेतो,
नैवावनिं गच्छति नान्तरिक्षम्।
दिशं न काञ्चिद्विदिशं न काञ्चित्,
क्लेशक्षयात्केवलमेति शान्तिम्"॥ २ ॥ इति।
किं वा यथा जैनाः प्राऽऽहुःतथा निर्वाणं भवेत्?। किं तदित्याह. सतो विद्यमानस्य जीवस्य विशिष्टा काश्चिदवस्था । कथंभूता?,रागद्वेषमदमोहजन्मजरारोगाऽऽदिदुःखक्षयरूपा । उक्तं च-
" केवलसंविदहैन-रूपाः सर्वार्तिदुःखपरिमुक्ताः । मोदन्ते मुक्तिगताः, जीवाः क्षीणाऽऽन्तरारिगणाः ॥१॥" इति ॥१६७४॥
प्रकारान्तरेणापि संशयकारणमाह--

अहवाऽनाइत्तणओ, खस्स व किं कम्मजीवजोगस्स ?।
अविओगाओ न भवे, संसाराभाव एव त्ति ॥१६७६॥

अथवा त्वमेवं मन्यसे-नूनं संसाराभाव एव न भवेत्। कुतः ?, अवियोगाद्वियोगायोगात् । कस्य ?, कर्मजीवयोः संयोगस्य । कुतः ?, अनादित्वात्, खस्येव । इह ययोरनादिः संयोगस्तयोर्वियोगो नास्ति, यथा जीवाऽऽकाशयोः । अनादिश्च जीवकर्मणोः संयोगः । ततो वियोगानुपपत्तिः । ततश्च न संसाराभावः । तथा च सति कुतो मोक्षः?, इति ॥ १६७६ ॥
अथ प्रत्यासत्तेरेवानन्तरोक्तस्यैव प्रतिविधानमाह-

पमिवज्ज मणिओ इव, विओगमिह कम्मजीवजोगस्स ।
तमणाइणो वि कंचण-धाउण वणाणकिरियाहिं।१६७७।

(अणाइणो वि त्ति) अनादेरपि जीवकर्मसंयोगस्य (तमिति) त्वं प्रतिपद्यस्व वियोगं, बन्धमोक्षवादे मणिमकवत् । कयोरिव यो वियोगः?, काञ्चनधातुपाषाणयोरिव । किं निर्हेतुक एव जीवकर्मणोर्वियोगः?। न,इत्याह-ज्ञानक्रियाभ्याम। इदमुक्तं भवति- नायमेकान्तो यदनादिसंयोगो नाभिद्यते, यतः काञ्चनधातुपाषाणयोरनादेरपि संयोगोऽग्न्यादिसंपर्केण विघटत एव, तद्वज्जीवकर्मसंयोगस्याऽपि सम्यग्ज्ञानक्रियाभ्यां वियोगं मणिमकवत् त्वमपीह प्रतिपद्यस्वेति ॥ १६७७ ॥
अथ प्रकारान्तरेणाऽपि मोक्षाभावप्रतिपादकं प्रभासाभिप्रायं भगवान् प्रकटयितुमाह-

जं नारगाइभावो, संसारो नारगाइनिण्णो य ।
को जीवो तं मन्नसि, तन्नासे जीवनासो त्ति ॥१६७८॥

यस्मान्नारकतिर्यग्नरामरभाव एव नारकाऽऽदित्वमेव संसार उच्यते, नान्यः, नारकाऽऽदिपर्यायभिन्नश्च कोऽन्यो जीवः ?, न कोऽपीत्यर्थः। नारकाऽऽदिभावादन्यत्वेन कदाचिदपि जीवस्यानुपलम्भादिति भावः। ततस्तन्नाशे नारकाऽऽदिभावरूपसंसारनाशे जीवस्य स्वस्वरूपनाशात्सर्वथा नाश एव भवति, ततः कस्याऽसौ मोक्षः ?। इति त्वं मन्यसे ? ॥ १६७८ ॥
तदेतदयुक्तम् । कुतः ?, इत्याह-

न हि नारगाइपज्जा-यमेत्तनासम्मि सव्वहा नासो ।
जीवदव्वस्स मओ, मुद्दानासे व हेमस्स ॥१६७९॥
कम्मकओ संसारो, तन्नासे तस्स जुज्जए नासो ।
जीवत्तमकम्मकयं, तन्नासे तस्स को नासो ? ॥१६८०॥

नारकतिर्यगादिरूपेण यो भावः स जीवस्य पर्याय एव, न च पर्यायमात्रनाशे पर्यायिणो जीवद्रव्यस्यापि सर्वथा नाशो मतः, कथञ्चित्तु भवत्यपि । न हि मुद्राऽऽदिपर्यायमात्रनाशे हेम्नः सुवर्णस्य सर्वथा नाशो दृष्टः । ततो नारकाऽऽदिसंसारपर्यायनिवृत्तौ मुक्तिपर्यायान्तरोत्पत्तिर्जीवस्य, मुद्रापर्यायनिवृत्तौ कर्णपूरपर्यायान्तरोत्पत्तिरिव सुवर्णस्य, न किञ्चिद्विरुध्यत इति। ननु यथा कर्मणो नाशे संसारो नश्यति, तथा तन्नाशे जीवत्वस्यापि नाशान्मोक्षाभावो भविष्यति?। एतदप्यसारम्। कुतः?, इत्याह--(कम्मकओ इत्यादि) कर्मकृतः कर्मजनितः संसारः, ततस्तन्नाशे कर्मनाशे तस्य संसारस्य नाशो युज्यत एव,कारणाभावे कार्याभावस्य सुप्रतीतत्वात् । जीवत्वं पुनरनादिकालप्रवृत्तत्वात्कर्मकृतं न भवत्यतस्तन्नाशे कर्मनाशे तस्य जीवस्य को नाशः?, न कश्चित् । कारणव्यापकयोरेव कार्यव्याप्यनिवर्तकत्वात्, कर्म तु जीवस्य न कारणं, नापि व्यापकमिति भावः। ॥ १६७९ ॥ १६८० ॥
इतश्च जीवो न विनश्यति; कुतः ?, इत्याह-

न विणासधम्मो जीव इति प्रतिज्ञा । विकारानुपलम्भादिति हेतुः । इह यो विनाशी तस्य विकारो दृश्यते । यथा मुद्गराऽऽदिध्वस्तस्य कुम्भस्य कपालखण्डलक्षणा अवयवाः; यस्त्वविनाशी न तस्य विकारदर्शनम्, यथा आकाशस्येति । ततो मुक्तस्य जीवस्य नित्यत्वान्नित्यो मोक्ष इति ॥ १६८१ ॥
स्यान्मतिः, तर्हि प्रतिक्षणध्वंसी मोक्षो मा भूत्,-
कालान्तरविनाशी तु भविष्यति, कृतकत्वात्, घटवत् । तदयुक्तम्, घटप्रध्वंसाज्ञानेनैकान्तिकत्वादिति दर्शयन्नाह--

कालंतरनासी वा, घमो व्व कयगाइओ मई होज्जा ।
नो पच्चक्खाभावो, जुवि तद्धम्मा वि जं निच्चो ॥१६८२॥

अत्र प्रेर्य परिहारं चाऽऽह-

अणुदाहरणमजावो, खरसिंगं पि व मई न तं जम्हा ।
कुंभविणासविसिट्ठो, जावो चिय पोग्गलमओ सो।१६८३।

यद्वा-कृतकत्वं मोक्षस्याभ्युपगम्योक्तम्, इदानीं तदेव तस्य नास्तीति सोदाहरणमुपदर्शयन्नाह-

किं वेगंतेण कयं, पोग्गलमेत्तविलयम्मि जीवस्स ।
किं निव्वत्तियमहियं,नभसो घडपेत्तविलयम्मि ।१६८४।

अनुमानात्पुनरपि मुक्तस्य नित्यत्वं साधयति-

दव्वामुत्तत्तणओ, मुत्तो निच्चो नभं व दव्वतया ।
नणु विभुयाइपसंगो, एवं सइ नाणुमाणाओ ॥१६८५॥

नित्यो मुक्ताऽऽत्मा, द्रव्यत्वे सत्यमूर्तत्वात्; (दव्वतय त्ति)यथा द्रव्यत्वे सत्यमूर्तेत्वाश्रित्यं नभः । आह-नन्वनेन दृष्टान्तेन व्यापकत्वाऽऽपि सिध्यति जीवस्य । तथाहि-विभुर्व्यापकः सर्वगतो जीवः, द्रव्यत्वे सत्यमूर्तत्वात्, यथा नभः । तदेतन्न । कुतः ?, सर्वगतत्वबाधकानुमानसद्भावात् । तथाहि-त्वक्पर्यन्तदेहमात्रव्यापको जीवः, तत्रैव तद्गुणोपलब्धेः, स्पर्शनवत्, इत्यनुमानाद् बाध्यते सर्वगतत्वं जीवस्य । एवं " न बध्यते, नापि मुच्यते जीवः,द्रव्यत्वे सत्यमूर्तत्वात्, नभोवद्" इत्याद्यपि दूषणं, "द्रव्यते पुण्यपापकर्मणा जीवः, दानहिंसाऽऽदिक्रियाणां सफलत्वात्, कृष्यादिक्रियावत्, तथा विघटते सम्यगुपायात्कोऽपि जीवकर्मसंयोगः, संयोगत्वात्, काञ्चनधातुपाषाणसंयोगवद्" इत्याद्यनुमानात्परिहर्तव्यमिति ॥ १६८५ ॥

अथवा-किमेकान्तेन बद्धाऽऽद्यैर्मोक्षस्य नित्यत्वं साध्यते, सर्वस्याऽपि वस्तुनः परमार्थतो नित्यानित्यरूपत्वात् ?,तत्कटानुत्कटपर्यायविशेषविवक्षामात्रेणैव हि 'केवलम्' इत्यादिव्यपदेश इति दर्शयन्नाह-

को वा निच्चग्गाहो, सव्वं चिय विभवभंगतिग्भइयं ।
पज्जायंतरमेत्त-प्पणादनिच्चाऽवरुप्पो ॥ १६८६ ॥

अथ कथञ्चिदनित्यत्वेऽपि मोक्षस्य न किञ्चिद् नः कूयत इति भावः । इह " कालंतरनासी वा घडो व्व " इत्यादिगाथाः प्रागपि षष्ठगणधरे बन्धमोक्षविचारे व्याख्याता एव । ततो यदिह न व्याख्यातं, तत्ततो (ग्रन्थतो)ऽवगन्तव्यमिति ॥ १६८६ ॥

अथ प्रथमपक्षे यदुक्तम्-' किं दीवस्स व नासो निव्वाणं ' (१६७५) इत्यादि । तत्रोत्तरमाह-

न य सव्वहा विणासो-ऽणलस्स परिणामओ पयस्सेव ।
कुंभस्स कवालाण व, तहाविगारोवलंभाओ ॥१६८७॥

न प्रदीपानलस्य सर्वथा सर्वप्रकारैर्विनाशः, परिणामत्वात्, पयसो दुग्धस्येव । अथवा-यथा मुद्गराऽऽद्याहतस्य कपालतया परिणतस्य घटस्य, यथा वा चूर्णिकृतानां कपालानाम् । कुतो न सर्वथा विनाशः ?,इत्याह-तथा तेन रूपान्तरप्रकारेण विकारस्य प्रत्यक्षाऽऽदिप्रमाणोपलम्भादिति ॥ १६८७ ॥

अथ प्रेर्य, परिहारं चाऽऽह-

जइ सव्वहा न नासो-ऽणलस्स किं दीसए न सो सक्खं ?।
परिणामसुहुमयाओ, जलयविगारंजणरज व ॥१६८८॥

यदि सर्वथाऽनलस्य न नाशस्तर्हि विध्यातानन्तरं किमित्यसौ साक्षान्न दृश्यते ? । अत्रोत्तरमाह-(परिणामेत्यादि) विध्याते प्रदीपेऽनन्तरमेव तामसपुद्गलरूपो विकारः समुपलभ्यत एव, चिरं चासौ पुरस्ताच्चोपलभ्यते, तत्सूक्ष्मसूक्ष्मतरपरिणामत्वात् । तथाहि-विशीर्यमाणस्य जलदस्यापि यः कृष्णाभ्रपुद्गलविकारः स परिणामसौक्ष्म्याच्चोपलक्ष्यते । तथाऽञ्जनस्यापि पवनेन ह्रियमाणस्य यदुत्कृष्टरजः सङ्घीयते, तदपि परिणामसौक्ष्म्याच्चोपलभ्यते, न पुनरसत्त्वादिति ॥ १६८८ ॥

चित्ररूपश्च पुद्गलपरिणाम इति दर्शयन्नाह-

होऊण इंदियंतर-गब्भा पुणरिंदियंतरग्गहणं ।
संधा एंति न एंति य,पोग्गलपरिणामया चित्ता ।।१६८९।

इह सुवर्णपत्रलवणसुण्डीदरीतकीचित्रकगुडाऽऽदयः स्कन्धाः पूर्वमिन्द्रियान्तरग्राह्याश्चक्षुरादीन्द्रियविषया भूत्वा पुनर्व्यक्तेरकालाऽऽदिसामग्र्यन्तरं प्राप्य पुद्गलपरिणामवैचित्र्याद्विन्द्रियान्तरग्रहणं स्पर्शनरसनाऽऽदीन्द्रियग्राह्यतामायान्ति । तथाहि—सुवर्णं पत्रीकृतं चक्षुर्ग्राह्यं भूत्वा शोधनार्थमग्नौ प्रक्षिप्तं भस्मना मिलितं सत्स्पर्शनेन्द्रियग्राह्यतामेति, पुनः प्रयोगेण भस्मनः पृथक् कृतं चक्षुर्विषयतामुपगच्छति । लवणसुण्ठीहरीतकीचित्रकगुडाऽऽदयोऽपि प्राक् चक्षुरिन्द्रियग्राह्या भूत्वा पश्चात्सूपाऽऽद्यन्ते बह्वौषधसमुदाये च क्वाथचूर्णावलेहाऽऽदिपरिणामान्तरमापन्नाः सन्तो रसनेन्द्रियसंवेद्या भवन्ति । कर्पूरकस्तूरिकाऽऽदीनामपि पुद्गलाश्चक्षुर्ग्राह्या अपि वायुना दूरमुपनीता घ्राणसंवेद्या भवन्ति । योजननवकादुपरतो गतास्तथाविधं कञ्चित्सूक्ष्मपरिणाममापन्ना नैकस्याऽपीन्द्रियस्य विषयतां प्रतिपद्यन्ते इति । अनया दिशाऽन्याऽपि पुद्गलपरिणामता चित्रा भावनीयेति ॥१६८९॥

अथास्यैव पुद्गलपरिणामवैचित्र्यस्य प्रस्तुते योजनार्थमाह-

एगेगिंदियगज्झा, जइ वा दव्वादयो तहा गेया ।
होउं चक्खुग्गज्झा, घाणिंदियगज्झयामेंति ॥१६९०॥

वायुः स्पर्शनेन्द्रियस्यैव ग्राह्यः, रसो रसनस्यैव, गन्धो घ्राणस्यैव, रूपं चक्षुष एव, शब्दस्तु श्रोत्रस्यैव ग्राह्यः । तदेवं यथा वाय्वादयः पुद्गला एकैकस्य प्रतिनियतस्येन्द्रियस्य ग्राह्या भूत्वा पश्चात्परिणामान्तरं किमप्यापन्ना इन्द्रियान्तरग्राह्या अपि भवन्तीति स्वयमेव गम्यते । तथा प्रस्तुता अपि प्रदीपगता आग्नेयाः पुद्गलाश्चक्षुर्ग्राह्या भूत्वा पश्चाद्विध्याते तस्मिन् प्रदीपे त एव तामसीभूताः सन्तो घ्राणेन्द्रियग्राह्यतामुपयान्ति,तत्किमुच्यते ?-"किं दीसए न सो सक्खं ति" (१६८८) । ननु घ्राणेन्द्रियेणोपलक्ष्यते एव विध्यातप्रदीपविकार इति ॥१६९०॥

यद्येवं, ततः प्रस्तुते किमित्याह-

जह दीवो निव्वाणो, परिणामंतरमिओ तहा जीवो ।
भण्णइ परिनिव्वाणो, पत्तोऽणाबाहपरिणामं ॥१६९१॥

यथाऽनन्तरोक्तस्वरूपपरिणामान्तरं प्राप्तः प्रदीपो 'निर्वाणः' इत्युच्यते,तथा जीवोऽपि कर्मविरहितकेवलामूर्तजीवस्वरूपभावलक्षणमबाधं परिणामान्तरं प्राप्तो निर्वाणो निर्वृतिं प्राप्त उच्यते । तस्माद् दुःखाऽऽदिक्षयरूपा सतोऽवस्था निर्वाणमिति स्थितम् ॥ १६९१ ॥

तर्हि शब्दाऽऽदिविषयोपभोगाभावाधिःसुख एवायमिति चेत् । नैवम् । कुतः ?, इत्याह-

मुत्तस्स परं सोक्खं, णाणाणाबाहओ जहा मुणिणो ।
तऊम्मा पुण विरहा-दावरणाऽऽबाहहेऊणं ॥१६९२॥

मुक्तस्य जन्तोः परं प्रकृष्टमकृत्रिममभिधानिमानसं स्वाभाविकं सुखमिति प्रतिज्ञा । (णाणाणाबाहउ त्ति) ज्ञानप्रकर्षे सति जन्मजराव्याधिमरणेष्टवियोगारतिशोककुत्सितपरासाशीतोष्णकामक्षोधमदशाक्यतृष्णारागद्वेषचिन्तौत्सुक्याऽऽदिनिःशेषाबाधविरहितत्वादिति हेतुः । तथाविधप्रकृष्टमुनेरिव । यथोक्ताबाधरहितानि काष्ठादीन्यपि वर्तन्ते,परं तेषां ज्ञानाभावान्न सुखम्,अतस्तद्व्यवच्छेदार्थं ज्ञानग्रहणम् । कथं पुनरसौ प्रकृष्टज्ञानवान्, आबाधरहितश्च ?, इत्याह-(तऊम्मेत्यादि) तद्धर्मा प्रकृष्टज्ञानाबाधवान् मुक्ताऽऽत्मा । कुतः ?, विरहाद्-अभावात् । केषाम् ?; आवरणहेतूनामाबाधहेतूनां च । एतदुक्तं भवति-क्षीणनि-

शेषाऽऽवरणत्वात् प्रकृष्टज्ञानत्वानसौ, वेदनीयकर्माऽऽदीनां च सर्वेषामप्याबाधहेतूनां सर्वथाऽपगमात्सर्वाऽऽबाधरहितोऽयमिति । प्रयोगः-स्वाभाविकेन खेन प्रकाशेन प्रकाशवान्मुक्ताऽऽत्मा, समस्तप्रकाशाऽऽवरणरहितत्वात्,तुहिनांशुवत् । तथा चाऽऽह-"क्षितेः शीतांशुवज्जीवः, प्रकृत्या भावशुद्धया । चन्द्रिकावच्च विज्ञानं, तदावरणमभ्रवत् " ॥१॥ इति । तथा-अनाबाधसुखो मुक्ताऽऽत्मा,समस्ताबाधहेतुरहितत्वात्,ज्वराऽऽद्यपगमे स्वच्छाऽऽतुरवत् । तथा चोक्तम्-"सव्याबाधाभावा-त्स्वर्धकृत्वाच्च भवति परमसुखी । व्याबाधात्रावोऽत्र,स्वच्छस्य ज्वरस्य परमसुखम् " ॥१॥ इति ॥ १९९२ ॥

अपरस्त्वाह-

मुत्तो करणाभावा-दणाणी खं व णणु विरुद्धोऽयं ।
जमजीवया वि पावइ,एत्तो चिय भणइ तन्नाम ।१९९३।

नन्वज्ञानी मुक्ताऽऽत्मा, करणाभावाद्, आकाशवत् । अत्राऽऽचार्यः प्राऽऽह--ननु धर्मिस्वरूपविपरीतसाधनाद्विरुद्धोऽयं हेतुः । तथाहि-अनेनैतदपि सिध्यति-अजीवो मुक्ताऽऽत्मा, करणाभावात्, आकाशवत् । अत्र परः सोत्कर्षं भणति-(तन्नाम त्ति)नामेत्यभ्यनुज्ञायाम्-अस्त्येतत्, न नः किमपि दूष्यते ?। न हि मुक्ताऽऽत्मनामजीवत्वेऽस्माकं, किञ्चिन्नश्यति, येन हेतोर्विरुद्धता प्रेर्यमाणा शोभेत । अत्राऽऽह कश्चित्-ननु मुक्तस्याजीवत्वमार्हतानामप्यनिष्टमेव, ततश्चैतद् दूषणमाचार्येणाऽपि परिहर्त्तव्यमेव, यच्चाऽऽत्मनोऽपि दूषणं समापतति तत्कथं परस्यैवैकस्योद्भाव्यते ?। सत्यमेतत् । किन्तु परशक्तिपरीक्षार्थं प्रेर्यमाचार्यः कृतवान् , कदाचित्तोभाद् विगलितप्रतिज्ञः परोऽपि प्रतिबिधाने स्खलितस्तूष्णीं विदध्यात् । परमार्थतस्तु जीवस्याऽजीवत्वं कदाचिदपि न भवत्येव ॥ १९९३ ॥

कुतः ?, इत्याह-

दव्वाऽमुत्तत्त सद्दा-वजाइओ तस्स दूरविवरीयं ।
न हि जत्तंतरगमणं,जुत्तं नभसो व्व जीवत्तं ॥१९९४॥

तस्य मुक्ताऽऽत्मनो हि यस्मात् कारणान्न युक्तमिति संबन्धः । किं तन्न युक्तम् ?, इत्याह-एकस्या जीवत्वलक्षणाया जातेर्यदजीवत्वलक्षणं जात्यन्तरं तत्र गमनं जात्यन्तरगमनं, तन्न युक्तम् । कथंभूतं जात्यन्तरम् ?, इत्याह-दूरमत्यर्थं विपरीतं दूरविपरीतम्। कस्या दूरविपरीतम्?,इत्याह--(सद्दावजाईओ त्ति) जीवत्वलक्षणायाः स्वाभाविकी स्वभावभूता जातिः स्वभावजातिः, तस्याः । किंवत् या स्वभावजातिः ? , इत्याह-उपमानप्रधानत्वान्निर्देशस्य, द्रव्याऽमूर्त्तत्ववदिति द्रव्यत्ववदमूर्त्तत्ववच्चेत्यर्थः । स्वभावजातेर्दूरविपरीतं सत् कस्य यथा किं न युक्तम ?, इत्याह-नभस इव जीवत्वम् । इदमत्र हृदयम-द्रव्यत्वम्,अमूर्त्तत्वं च जीवस्य तावत्स्वभावभूता जातिः,तस्याश्च यद् दूरविपरीतं जात्यन्तरमद्रव्यत्वम्, अमूर्त्तत्वं च, तत्र गमनं तस्य कस्यामप्यवस्थायां न भवति । एवं जीवत्वमपि जीवस्य स्वभावभूतैव जातिः, ततस्तस्या अपि स्वभावजातेर्यद् दूरविपरीतमजीवत्वलक्षणं जात्यन्तरं तत्र गमनं मुक्तावस्थायामपि तस्य न युज्यते । न ह्यजीवस्य सतो नभसः कदाचिदपि जीवत्वाप्राप्तिर्भवति । तस्मान्मुक्तो जीवो यथाऽद्रव्यं मूर्त्तश्च न भवति, तद्विपक्षस्वभावत्वात्; एवं जीवस्वाभाव्याद्जीवोऽप्यसौ कदाचिदपि न भवति ; अन्यथा नभःपरमाणवादीनामपि स्वस्वभावत्याग,गेन वैपरीत्यापत्त्याऽतिप्रसङ्गादिति ।

अत्राऽऽह-यद्येवं,तर्हि यद्भवतैवोक्तम्-"अजीवो मुक्ताऽऽत्मा,करणाभावाद्, आकाशवद्" इति, तत्कथं नेतव्यम् ? । अत्रोच्यते-परस्य प्रसङ्गाऽऽपादनमेव तदस्माभिः कृतम् ,तत्करणे च कारणमुक्तमेव, न पुनरनेन हेतुना मुक्तस्याजीवत्वं सिद्ध्यति, प्रतिबन्धाभावात् । तथाहि-यदि करणैर्जीवत्वं कृतं भवेत्, यथा दहनेन धूमः, व्यापकानि वा जीवत्वस्य करणानि यदि भवेयुः, यथा शिंशपात्वेन वृक्षत्वम् , तदा करणनिवृत्तौ भवेज्जीवत्वनिवृत्तिः, यथाऽशिंशवृक्षत्वनिवृत्तौ धूमाशिंशपात्वयोः, न चैतदस्ति । जीवत्वस्यानादिपारिणामिकभावरूपत्वेनाकृतकत्वात्। व्याप्यव्यापकभावोऽपीन्द्रियाणां शरीरेणैव सह युज्यते, उभयस्यापि पौद्गलिकत्वात्, न तु जीवत्वेन, जीवस्यामूर्त्तत्वेनात्यन्तं तद्विलक्षणत्वात् । तस्मात्करणनिवृत्तावप्यनिवृत्तमेव मुक्तस्य जीवत्वमिति ॥ १९९४ ॥

आह-यद्येवम्, 'अज्ञानी मुक्ताऽऽत्मा,करणाभावाद्,आकाशवद्' इत्यत्र धर्मिस्वरूपविपरीतसाधनाद् या हेतोर्विरुद्धतोद्भाविता, सा न भवद्भिरपि परिहृता, अतस्तत्रान्यत्किमप्युत्तरमुच्यतामित्याशङ्क्याऽऽह-

मुत्ताऽऽभावओ नो-वलद्धिमंतिंदियाइँ कुंजो व्व ।
जवलंजदाराणि व, ताइं जीवो तदुवलद्धा ॥१९९५॥
तदुवरमे वि सरणओ, तव्वावारे वि नोवलंजाओ ।
इंदियजिणो आया, पंचगवक्खोवलद्धा वा ॥१९९६॥

अनयोर्व्याख्या पूर्ववत्, केवलं प्रस्तुते भावार्थ उच्यते-यदीन्द्रियाण्युपलब्धिमन्ति भवेयुस्तदा तन्निवृत्तावप्युपलब्धिनिवृत्तिर्भवेत्,न चैतदस्ति, अन्वयव्यतिरेकाभ्यां जीवस्योपलब्धिमत्त्वनिश्चयादिति ॥ १९९५ ॥ १९९६ ॥

स्वभावभूतं च ज्ञानं जीवस्य, इति कथं करणनिवृत्तौ मुक्तस्य तन्निवर्तत इति दर्शयन्नाह-

नाणरहिओ न जीवो, सरूवओऽणु व्व मुत्तिभावेणं ।
जं तेण विरुद्धमिदं,अत्थि य सो नाणरहिओ य।१९९७।

यद्यस्माज्ज्ञानरहितो जीवः कदाचिदपि न भवति, ज्ञानस्य तत्स्वरूपत्वात् , यथा मूर्त्तिभावेन रहितोऽणुर्न भवति, तेन तस्मात्कारणाद्विरुद्धमेतद्-"अस्ति चासौ मुक्तो जीवः,अथ च स ज्ञानरहितः" इति। न हि स्वरूपस्याभावे स्वरूपवतोऽवस्थानं युज्यते,तद्व्यतिरिक्तस्य तस्यासत्त्वात्,तथा चानन्तरमेवोक्तम्-"न हि जत्तंतरगमणं, जुत्तं नभसो व्व जीवत्तं । " (१९९४) इति ॥ १९९७ ॥

पराभिप्रायमाशङ्क्यैतदेव समर्थयन्नाह-

किह सो नाणसरूवो, नणु पच्चक्खाणुभूइओ नियए ?।
परदेहम्मि वि गज्झो, तप्पवित्तिनिवित्तिलिंगाओ।१९९८।

ननु कथमसौ जीवो ज्ञानस्वरूप इति निश्चीयते ?। अत्रोत्तरमाह--नन्वित्थमाशंक्यं, ननु निजे देहे तावत्प्रत्यक्षानुभवादेव ज्ञानस्वरूपो जीव इति विज्ञायते, इन्द्रियव्यापारोपरमेऽपि तद्व्यापारोपलब्धार्थानुस्मरणात्, तदुव्यापारेऽपि चान्यमनस्कतायामनुपलम्भात्, अदृष्टश्रुतानामपि चार्थानां तथाविधक्षयोपशमपाटवात्कदाचिद् व्याख्यानावस्थायां चेतसि स्फुरणात् । एतच्च स्वसंवेदनसिद्धमपि भवतः प्रष्टव्यतां गतम् । तथा-

स जन्तुः परदेहेऽपि ज्ञानस्वरूपे एवेति ग्राह्यः । कुतः ?, तथाविधप्रवृत्तिनिवृत्तिलिङ्गादिति ॥ १९९८ ॥

अपि च मुक्तावज्ञानित्वाऽऽपादने महान् विपर्यासः;

कुतः ?, इत्याह-

सव्वाऽऽवरणावगमे, सो सुद्धयरो भवेज्ज सूरो व्व ।
तम्मयजावाभावा-दन्नाणित्तं न जुत्तं से ॥१९९९॥

सेन्द्रियो जन्तुर्देशतोऽप्यावरणक्षये तावत्तारतम्येन ज्ञानयुक्त एव भवति, यस्य त्वनीन्द्रियस्य सर्वमप्यावरणं क्षीणं, स निःशेषाऽऽवरणापगमे शुद्धतर एव भवति-संपूर्णज्ञानप्रकाशयुक्त एव भवतीत्यर्थः, यथा समस्तान्नाऽऽवरणापगमे सम्पूर्णप्रकाशमयः सूर्यः, ततस्तन्मयभावस्य प्रकाशमयत्वस्य करणाभावेनाभावाद्धेतोः 'से' तस्य मुक्तस्य यदज्ञानित्वं प्रेर्यते भवता, तन्न युक्तम्, आधारकाभावे तस्यैव प्रकर्षवतो ज्ञानप्रकाशस्य सद्भावादिति ॥ १९९९ ॥

तदेवं सति किमिह स्थितम् ?, इत्याह-

एवं पगासमइओ,जीवो छिद्दावजासयत्ताओ।
किंचिम्मेत्तं नासइ, छिद्दाऽऽवरणप्पईवो व्व ॥२०००॥
सुबहुयतरं वियाणइ, मुत्तो सव्वप्पिहाणविगमाओ ।
अवणीयघरो व्व नरो,विगयाऽऽवरणप्पईवो व्व ।२००१।

तदेवं सति सर्वदा प्रकाशमयः प्रकाशस्वभाव एव जीवः, केवलं संसार्यवस्थायां बद्धस्थः किञ्चिन्मात्रमवभासयति, क्षीणाक्षीणाऽऽवरणच्छिद्रैरिन्द्रियच्छिद्रैरवभासनात्, सच्छिद्रकुटकुड्यमध्याऽऽद्यन्तरितप्रदीपवदिति । मुक्तस्तु मुक्तावस्थायां प्राप्तो जीवः सुबहुतरं विजानाति—यदस्ति तत्सर्वं प्रकाशयतीत्यर्थः, सर्वेपिधानविगमात्--सर्वाऽऽवरणक्षयादित्यर्थः । अपनीतसमस्तगृहः पुरुष इव, विगतसमस्तकुटकुड्याऽऽद्यावरणप्रदीप इव वेति । यो हि सच्छिद्राऽऽवरणान्तरितः स्तोकं प्रकाशयति, स निःशेषाऽऽवरणापगमे सुबहूनेव प्रकाशयति, न तु तस्य सर्वथा प्रकाशाभाव इति भावः । तस्मात् " मुत्तस्स परं सोक्खं, नाणाणावाहओ " (१९९२) इत्यादि स्थितम् ॥ २००० ॥ २००१ ॥

अथाद्यापि मुक्तस्य सुखाभावं पश्यन् परः प्राऽऽह-

पुण्णापुण्णक्खाइं, जं सुहदुक्खाइं तेण तन्नासे ।
तन्नासाओ मुत्तो, निस्सुहदुक्खो जहाऽऽगासं ॥२००२॥
अहवा निस्सुहदुक्खो, नभं व देहिंदियादभावाओ ।
आधारो देहो चिय, जं सुहदुक्खोवलद्धीणं ॥ २००३ ॥

पुण्यात्सुखमुपजायते, पापाच्च दुःखमिति भवतामपि सम्मतं, तेन तस्मात् तयोः पुण्यपापयोः कारणभूतयोर्नाशे सुखदुःखयोः कार्यरूपयोर्नाशान्निःसुखदुःख एव मुक्तोऽस्मा प्राप्नोति, तत्कारणाभावात्, आकाशवदिति । अथवा निःसुखदुःखोऽसौ, देहेन्द्रियाभावात्,नभोवत्,यद् यस्मादेह एव,तथेन्द्रियाणि च सुखदुःखोपलब्धीनामाधारो दृश्यते, न पुनर्देहाभावे सुखदुःखे दृश्येते, नापीन्द्रियाभावे ज्ञानं काप्युपलभ्यते । ततः सिद्धस्य कथं तदभावात्तानि श्रद्धयिन्ते ?, इति ॥ २००२ ॥ २००३ ॥

अत्रोत्तरमाह-

पुण्णफलं दुक्खं चिय, कम्मोदयओ फलं व पावस्स ।
णणु पावफले वि समं, पच्चक्खविरोहिया चेव ।२००४।

चक्रवर्तिपदलाभाऽऽदिकं पुण्यफलं निश्चयतो दुःखमेव, कर्मोदयजन्यत्वात्, नरकत्वाऽऽदिपापफलवत् । परः प्राऽऽह-ननु पापफलेऽपि समानमिदम् । तथाहि-अत्रापि वक्तुं शक्यत एतत्-उक्तं पापफलं दुःखत्वेनाभिमतं परमार्थतः सुखमेव, कर्मोदयजन्यत्वात्, पुण्यफलवत्, एवं च वदतां प्रत्यक्षविरोधिता, स्वसंवेद्यसुखदुःखयोर्वैपरीत्येन सविषयभावादिति ॥ २००४ ॥

भगवानाह-

जत्तो च्चिय पच्चक्खं, सोम्म ! सुहं नत्थि दुक्खमेवेदं ।
तप्पडियारविभत्तं, तो पुण्णफलं ति दुक्खं ति ॥२००५॥

सौम्य ! प्रभास ! यत एव दुःखे अनुभूयमाने कस्याप्यविपर्यस्तमतेः सुखं प्रत्यक्षं नास्ति, सुखानुभवः स्वसंविदितो न विद्यते, अत एवास्माभिरुच्यते-दुःखमेवेदम् इति, यत् किमप्यत्र संसारचक्रे स्त्रक्चन्दनाङ्गनासंभोगाऽऽदिसुखमपि विद्यते, तत्सर्वं दुःखमेवेत्यर्थः । केवलं तस्यास्त्रक्चन्दनासंभोगाऽऽदिविषयौत्सुक्यजनितारतिरूपस्य दुःखस्य प्रतीकारोऽङ्गनासंभोगाऽऽदेः कस्तत्प्रतीकारस्तेन तत्प्रतीकारेण दुःखमपि सद्विभक्तं मूढैर्भेदेन व्यवस्थापितं तत्प्रतीकारकृतं कामिनीसंभोगाऽऽदिकं पामाकण्डूयनाऽऽदिवत्सुखमध्यवसितम्,शूलाऽऽरोपणशूलशिरोबाधाऽऽदिव्याधिबन्धवधाऽऽदिजनितं तु दुःखमिति । रमणीसंभोगचक्रवर्तिपदलाभाऽऽदि सुखं स्वसंविदितं दुःखमिति वदतां प्रत्यक्षविरोध इति चेत् । तदयुक्तम् । मोहमूढप्रत्यक्षत्वात्तस्य, तल्लाभौत्सुक्यजनितारतिरूपदुःखप्रतीकाररूपत्वाद् दुःखेऽपि तत्र सुखाध्यवसायः, पामाकण्डूयनाऽपथ्याऽऽहारपरिभोगाऽऽदिवत् ।

तथा चोक्तम्-

" नग्नः प्रेत इवाऽऽविष्टः,कृतन्तीमुपगूह्य ताम् ।
गाढाऽऽश्लिष्टसर्वाङ्गः,स सुखी रमते किल ॥ १ ॥
औत्सुक्यमात्रमयसादयति प्रतिष्ठा,
क्लिश्नाति लब्धपरिपालनवृत्तिरेव ।
नातिश्रमापनयनाय यथा श्रमाय,
राज्यं खलूत्तमवधूवदनमिवाऽऽतपत्रम् ॥ २ ॥
भुक्ताः श्रियः सकलकामदुघास्ततः किं ?,
संप्रीणिताः प्रणयिनः स्वधनैस्ततः किम् ?।
दत्तं पदं शिरसि विद्विषतां ततः किं ?,
कल्पं स्थितं तनुभृतां तनुभिस्ततः किम् ? ॥३॥
इत्थं न किञ्चिदपि साधनसाध्यजातं,
स्वप्नेन्द्रजालसदृशं परमार्थशून्यम् ।
अत्यन्तनिर्वृतिकरं यदपेतबाधं,
तद् ब्रह्म वाञ्छत जना यदि चेतनाऽस्ति " ॥४॥ इत्यादिना ।
" पुण्यफलं ति दुक्खं ति । " यत एवमुक्तप्रकारेण दुःखेऽपि सुखाभिमानः, तस्मात्पुण्यफलमपि सर्वं तत्त्वतो दुःखमेवेति ॥२००५॥

एतदेव प्रपञ्चयति--

विसयसुहं दुक्खं चिय, दुक्खपडीयारओ तिगिच्छ व्व ।
तं सुहमुवयाराओ, नो उवयारो विणा तच्चं ॥२००६॥

विषयसुखं तत्त्वतो दुःखमेव,दुःखप्रतीकाररूपत्वात्, कुष्ठगण्डशीतरोगकाथपानच्छेदनदम्भनाऽऽदिचिकित्सावत् । यच्च लोके

तत्र सुखव्यपदेशः प्रवर्त्तते, स उपचारात् । न चोपचारस्तथ्यं पारमार्थिकं विना क्वापि प्रवर्त्तते, माणवकाऽग्नौ सिंहाऽऽद्युपचारवदिति ॥२००६॥

ततः किमित्याह-

तम्हा जं मुत्तसुहं, तं तच्चं दुक्खसंखएऽवस्सं ।
मुणिणोऽणाबाहस्स व, णिप्पडियारप्पसूईओ ॥२००७॥

तस्माद्यन्मुक्तस्य संबन्धि तदेव सुखं तथ्यं निरुपचरितम् । कुतः ?, स्वाभाविकत्वेन निष्प्रतीकाररूपस्य तस्य प्रसूतेरुपपत्तेः । कथम् ?, अवश्यम् । क्व सति ?, दुःखसंक्षये । सांसारिकं हि सर्वं पुण्यफलमपि दुःखरूपतया समर्थितं, ततः पापफलम्, इतरच्च सर्वं दुःखमेवेह।स्ति, नान्यत्, तच्च मुक्तस्य क्षीणम; अतस्तत्संक्षये अवश्यंतया यत् तस्य निष्प्रतीकारं स्वाभाविकं निरुपमं सुखमुत्पद्यते, तदेव तथ्यम् । कस्येव ?, विशिष्टज्ञानवतोऽनाबाधस्य मुनेरिव ।

उक्तं च-

" निर्जितमदमदनानां, वाक्कायमनोविकाररहितानाम् ।
विनिवृत्तपराशानामिहैव मोक्षः सुविहितानाम् "।१। इति।२००७।

अथवा प्रकारान्तरेणापि मुक्तस्य तथ्यसुखसंभवमाह-

जह वा णाणमओऽयं, जीवो णाणोवघाइ चावरणं ।
करणमणुग्गहकारिं, सव्वाऽऽवरणक्खए सुद्धी।२००८।
तह सोक्खमओ जीवो, पावं तस्सोवघाइयं नेयं ।
पुण्णमणुग्गहकारिं, सोक्खं सव्वक्खए सयलं ॥२००९॥

यथा वाऽनन्तज्ञानमयोऽसौ स्वरूपेण जीवः । तदीयज्ञानस्य च मत्यावरणाऽऽदिकमावरणमुपघातकं मन्तव्यम् । करणानि त्विन्द्रियाणि तज्ज्ञानस्य, सूर्याऽऽतपस्य तदावारकमेघपटलच्छिद्राणीवोपकारकाणि । सर्वाऽऽवरणक्षये तु ज्ञानबुद्धिर्निर्मलता सर्वथाऽवभासकत्वलक्षणा भवति । प्रकृतयोजनामाह-तथा तेनैव प्रकारेण स्वरूपतः स्वाभाविकानन्तसौख्यमयो जीवः, तस्य च सुखस्यैवोपघातकारकं पापकर्म विद्येयम् । पुण्यं त्वनुत्तरसुरपर्यन्तसुखफलं तस्य स्वाभाविकसुखस्यानुग्रहकारकम् । ततः सर्वाऽऽवरणापगमे प्रकृष्टज्ञानमिव समस्तपुण्यपापक्षये सकलं परिपूर्णं निरुपचरितं निरुपमं स्वाभाविकमनन्तं सुखं भवति सिद्धस्येति ॥ २००८ ॥ २००९ ॥

अन्येन वा प्रकारेण मुक्तस्य तस्य सुखसम्भवमाह-

जह वा कम्मक्खयओ, सो सिद्धत्ताइपरिणइं लभइ ।
तह संसाराईयं, पावइ तत्तो चिय सुहं ति ॥ २०१० ॥

यथा वा सकलकर्मक्षयादसौ मुक्तोऽत्मा सिद्धत्वाऽऽदिपरिणतिं लभते, तत एव सकलकर्मक्षयात् संसारातीतं वैषयिकसुखाद्विलक्षणस्वरूपं निरुपमं तथ्यं सुखं प्राप्नोति । एतेन यदुक्तम्-" क्षीणपुण्यपापत्वेन कारणाभावान्निःसुखदुःखो मुक्तोऽऽत्मा, व्योमवत्" इत्येतदपि प्रत्युक्तं द्रष्टव्यम्, 'कारणाभावात्' इत्यस्य हेतोरसिद्धत्वात्, सकलकर्मक्षयलक्षणकारणजन्यत्वेन सिद्धसुखस्य सकारणत्वादिति ॥ २०१० ॥

यदुक्तम्-" आधारो देहो चिय, जं सुहदुक्खोवलद्धीणं " (२००३) इति; तत्राऽऽह-

सायाऽसायं दुक्खं, तव्विरहम्मि य सुहं जओ तेणं ।
देहिंदिएसु दुक्खं, सोक्खं देहिंदियाभावे ॥ २०११ ॥

ननु यत्पुण्यफलं सातं सुखतया लोकव्यवहारतोरूढं, तत्सर्वं दुःखमेवेत्यनन्तरमेव समर्थितम् । असातं तु पापफलत्वान्निर्विवादं दुःखमेव । एवं च सति सर्वं दुःखमेवास्ति संसारे; न सुखम । तच्च दुःखं सिद्धस्य सर्वथा क्षीणम । अतस्तद्विरहे यद्यस्मात्सिद्धस्य स्वाभाविकं,निरुपमम्,अनन्तं च युक्तिसिद्धमेव सुखं, तेन तस्मात्कारणात् पारिशेष्यन्यायात् संसारिणामेव जीवानां देहेन्द्रियेष्वाधारभूतेषु यथोक्तरूपं दुःखम्, सुखं तु देहेन्द्रियाभाव एव,सिद्धस्य क्षीणनिःशेषसुखदुःखत्वेन तस्य तत्र युक्तिसिद्धत्वादिति ॥ २०११ ॥

अथवा देहेन्द्रियाभावे सुखाभावलक्षणो दोषस्तस्य भवतु वः, किमित्याह-

जो वा देहिंदियजं, सुहमिच्छइ तं पमुच्च दोसोऽयं ।
संसाराईयमिदं, धम्मंतरमेव सिद्धिसुहं ॥ २०१२ ॥

यो वा कश्चित् संसाराभिनन्दी मोहमूढः परमार्थादर्शी विषयाभिषमात्रगृद्धो देहेन्द्रियजमेव सुखं मन्यते, न तु सिद्धिसुखं, तस्य तेन स्वप्नेऽप्यदर्शनात्, तस्य वादिनः संसारविपक्षे मोक्षे प्रमाणतः साधिते सति "निःसुखः,सिद्धः, देहेन्द्रियाभावात् " इत्ययं दोषो भवेत्, न त्वस्माकं संसारातीतं पुण्यपापफलसुखदुःखाभ्यां सर्वथा विलक्षणं धर्मान्तरभूतमेवानुपममक्षयं निरुपचरितं सिद्धिसुखमिच्छतामिति ॥ २०१२ ॥

अत्र प्रेर्यमाशङ्क्य परिहरन्नाह-

कह णणु मेयं ति मई, नाणाणावाहउ त्ति नणु भणियं ।
तदणिच्चं णाणं पि य,चेयणधम्मोत्ति रागो व्व ।२०१३।

अत्रेवंभूता मतिः परस्य भवेत्-नन्विच्छन्ति भवन्तः सिद्धस्य यथोक्तं सुखं, किन्तु नेच्छामात्रतो वस्तुसिद्धिः, अपि तु प्रमाणतः; ततो येन प्रमाणेन तत्सिद्ध्यति तदुक्तव्यम् । अनुमानेन तदनुमीयत इति चेत्, तर्हि केनानुमानेन तदनुमेयम्-अनुमीयत इत्यर्थः ?, इत्याह-" नाणाणावाहउ त्ति नणु भणियं ति ।" ननु भणितमत्रार्थे प्रागनुमानं सिद्धस्य प्रकृष्टं सुखं, ज्ञानत्वे सत्यनाबाधत्वाद्, मुनिवदिति । पुनरपि परः प्राऽऽह-यद्येवं तर्ह्यनित्यं सुखं ज्ञानं च सिद्धस्य, चेतनधर्मत्वात्, रागवदिति ॥ २०१३ ॥

अथवा हेत्वन्तरमाह-

कयगाइभावओ वा, नाऽऽवरणाऽऽबाहकारणाभावा ।
उप्पायट्ठिइभंग-ऽसहावओ वा न दोसोऽयं ॥२०१४॥

अथवाऽनित्ये सिद्धस्य सुखज्ञाने, तपःप्रभृतिकष्टानुष्ठानेन क्रियमाणत्वात्, आदिशब्दाद्भूतप्राग्भावात्, घटवदिति । अत्रोत्तरमाह-" नावरणेत्यादि । " न सिद्धस्यानित्ये ज्ञानसुखे। कुतः ?, आवरणं चाऽऽबाधश्चाऽऽवरणाऽऽबाधौ, तयोः कारणं हेतुस्तस्याभावात्, आकाशवदिति । इदमुक्तम्भवति-सिद्धस्य ज्ञानं सुखं च यद्यपगच्छेत् तदा स्यादनित्यम्, अपगमश्च ज्ञानस्याऽऽवरणोदयात्, सुखस्य त्वबाधहेतुभूतादसातवेदनीयोदयाऽऽदिकारणाद्भवेत्, आवरणवेदनीयाऽऽदीनि च मिथ्यात्वाऽऽदिभिर्बन्धहेतुभिर्बध्यन्ते, ते च सिद्धस्य न विद्यन्ते; अतस्तदभावाद् नाऽऽवरणाऽऽबाधाकारणसद्भावः,तदभावाच्च न सिद्धस्य

ज्ञानसुखापगमः, तदसत्त्वे च तयोः सदाऽवस्थितत्वात् कथमनित्यत्वम् ? । न च चेतनधर्माः सर्वेऽप्यनित्या भवन्ति, जीवगतद्रव्यत्वामूर्तत्वाऽऽदिभिर्व्यभिचारात् । 'ततश्च चेतनधर्मत्वात्' इत्यनैकान्तिको हेतुः; तथा -कृतकत्वाऽऽदिरप्यनैकान्तिकः, घटप्रध्वंसाभावेन व्यभिचारात् । असिद्धश्चायम्, सिद्धस्य ज्ञानसुखयोः स्वाभाविकत्वेन कृतकत्वाऽऽद्ययोगात् । आवरणाऽऽद्याधकारणाभावेन च तिरोभावमात्रमेव निवर्तते,न पुनस्ते क्रियेते, घटाऽऽदिवत्; नाप्यभूते प्रादुर्भवतः, विद्युदादिवत्, येन तयोरनित्यत्वं स्यात् । न हि घनपटलापगमे चन्द्रज्योत्स्नायाः सूर्यप्रभाया वा तिरोभावमात्रनिवृत्तौ कृतकत्वम्, अभूतप्रादुर्भावो वा वक्तुं युज्यत इति।

अथ तेनाऽऽविर्भूतेन विशिष्टेन रूपेण कृतकत्वादनित्ये सिद्धस्य ज्ञानसुखे, प्रतिक्षणं च पर्यायरूपतया ज्ञेयविनाशे ज्ञानस्य विनाशात्, सुखस्यापि प्रतिसमयं परापरूपेण परिणामादेतयोरनित्यत्वमुच्यते, तर्हि सिद्धसाध्यतेति दर्शयति--" उप्पायट्ठिइ " इत्यादि । इत्थमात्माऽऽकाशघटाऽऽदिरूपस्य सर्वस्यापि वस्तुस्तोमस्य स्थित्युत्पादप्रलयस्वाभाव्याभ्युपगमात्सिद्धसुखज्ञानयोरपि कथञ्चिदनित्यत्वाद् नायं तदनित्यत्वाऽऽपत्तिलक्षणोऽस्माकं दोष इति ॥ २०१४ ॥

तदेवं जीवस्य सदवस्थालक्षणं निर्वाणं, निवृत्तस्य च निरुपमसुखसद्भावं युक्तितः प्रसाध्य वेदोक्तद्वारेणापि तत्साधनार्थमाह-

न ह वै ससरीरस्स, प्पियऽप्पियावहाऽतिरेवमादि व जं ।
तदमोक्खे नासम्मिव,सोक्खाभावम्मिव न जुत्तं ।२०१५।

" न ह वै सशरीरस्य प्रियाप्रिययोरपहतिरस्ति । " " अशरीरं वा वसन्तं प्रियाप्रिये न स्पृशतः " इति च यद्वेदोक्तं, तदप्यमोक्षे मोक्षाभावे-जीवकर्मणोर्वियोगेऽनभ्युपगम्यमाने इत्यर्थः। तथा-'मतिरपि न प्रक्रायते' इति वचनाद् मुक्तावस्थायां सर्वथा नाशे वा जीवस्याऽभ्युपगम्यमाने, सत्त्वे वा मुक्ताऽऽत्मनः सुखाभाव इष्यमाणे न युक्तं प्राप्नोति-अभ्युपगमविरोधस्तवेत्यर्थः । अनेन हि वाक्येन किल यथोक्तौ मोक्षः, सुखी च निष्कर्मणो जीवस्य सत्त्वं, निरुपमसुखं च तस्य, एतानि त्रीण्यपि अभ्युपगम्यन्ते। एतच्च पुरस्ताद्व्यक्तीकरिष्यते । ततोऽस्य त्रितयस्य निषेधं कुर्वतस्तवाभ्युपगमविरोध इति भावः ॥२०१५॥

अत्राऽऽद्यन्तपक्षौ परिहृत्य मध्यगतं जीवनाशपक्षसंभविनमभ्युपगमविरोधं परिहर्तुं तावत्परः प्राऽऽह-

नट्ठो असरीरो चिय, सुहदुक्खाइं पियऽप्पियाइं च।
ताइँ न फुसंति नट्ठं,फुडमसरीरं ति को दोसो ?॥२०१६॥

" न ह वै " इत्यादिवेदवाक्यस्य किल परोऽमुमर्थं मन्यते-शरीरः सर्वनाशेन नष्टः खरविषाणकल्प एवोच्यते, तमेवंभूतमशरीरं नष्टं प्रियाप्रिये सुखदुःखे यन्न स्पृशतः, तत्स्फुटमेव मुच्यत एवेदम्, नष्टस्य सुखदुःखस्पर्शायोगात्, अशरीरशब्देन च जीवनाशाभिधानात्। एवंभूते चास्य वाक्यस्यार्थे मुमुक्षोर्जीवस्य निर्वाणप्रदीपस्येव सर्वनाशमभ्युपगच्छतां कोऽस्माकमभ्युपगमविरोधलक्षणो दोषः ?, न कश्चिदपीति परानिप्राय इति ॥ २०१६ ॥

अत्र प्रभासस्य भगवान् बोधान्यथात्वमवगम्य, एतेषां वेदपदानां यथाऽवस्थितमर्थं व्याचिख्यासुराह-

वेयपयाण य अत्थं, न सुट्ठु जाणसि इमाण तं सुणसु ।
असरीरव्ववएसो, अधणो व्व सओ निसेहाओ ।२०१७।
न निसेहओ य अत्र-म्मि तव्विहे चेव पक्खओ जेण ।
तेणासरीरगहणे, जुत्तो जीवो न खरसिंगं ॥ २०१८ ॥

आयुष्मन् ! प्रभास ! न केवलं युक्तिं, वेदपदानाममीषामर्थं च त्वं सुष्ठु न जानासि, ततस्तं शृणु-" न ह वै " इत्यादिपूर्वार्द्धं सुगमत्वादत्र गाथाद्वये न व्याख्यातं, तदपि सुखप्रतिपत्त्यर्थं व्याख्यायते--' न ' इति निपातो निषेधार्थः । ' ह वै ' इत्येतदपि निपातद्वयं हिशब्दार्थत्वाद्यस्मादर्थे । सह शरीरेण वर्त्तत इति सशरीरो जीवस्तस्य सशरीरस्येत्यत्र एवकारो द्रष्टव्यः । ततश्चायमर्थः-यस्मात् सशरीरस्य जीवस्य प्रियाप्रिययोः सुखदुःखयोरपहतिर्विघातोऽन्तरं नास्ति, न त्वशरीरस्य ; तस्मादशरीरं शरीररहितं मुक्त्यवस्थायां वसन्तं लोकान्तस्थितं जीवं प्रियाप्रिये सुखदुःखे न स्पृशतः । इदमुक्तं भवति-यावदयं जीवः सशरीरः, तावत् सुखेन दुःखेन वा अन्यतरेण कदाचिदपि न मुच्यते । अशरीरस्त्वसौ क्षीणवेदनीयत्वात् सुखदुःखाभ्यां कदाचिदपि न स्पृश्यत इति। एवंभूते चास्य वाक्यस्यार्थे सति योऽयमशरीरव्यपदेशः, असौ सत एव विद्यमानस्यैव जीवस्य मुक्त्यवस्थायां विधीयते,न तु सर्वथा नष्टस्य। कुतः ?, इत्याह-निषेधात्, इह यो यस्य निषेधः स तस्य सत एव विधीयते, न त्वसतः,यथाऽधन इति,अत्र सत एव देवदत्तस्य धननिषेधो विधीयते,न त्वसतः खरविषाणस्य। आह--न विद्यते शरीरं यस्येत्येवं निषेधादन्यपदार्थे जीव एव कथं प्रतीयते ?, इत्याह-" न निसेहओ य " इत्यादि व्याख्यानतो विशेषप्रतिपत्तेः पर्युदासवृत्तिना नञा निषेधो नञ्निषेधस्तस्मान्नञ्निषेधात् कारणात् सशरीरादन्यस्मिंस्तद्विध एव शरीरसदृशे कस्मिंश्चिदन्यपदार्थे संप्रत्ययो विज्ञेयः, यथा " न ब्राह्मणोऽब्राह्मणः " इत्युक्ते ब्राह्मणसदृशः क्षत्रियाऽऽदिरेव गम्यते, न तु तुच्छरूपो भावः । उक्तं च-" नञिवयुक्तमन्यसदृशाधिकरणे लोके तथाह्यर्थगतिः " इति । इह च शरीरसदृशोऽशरीरो जीव एव गम्यते, द्वयोरप्युपयोगरूपत्वेन सदृशत्वात् । न चेद् शरीरं सादृश्यबाधकं, तस्य जीवेन सह क्षीरनीरन्यायतो लोलीभूतत्वेनैकत्वादिति । तदेवं येन यस्मात् कारणात् नञ्निषेधादन्यस्मिंस्तद्विध एवान्यपदार्थे सम्प्रत्ययो भवति, तेन तस्मात्कारणात्, ' अशरीरं वा वसन्तम् ' इत्यत्राशरीरग्रहणे जीव एवाशरीरो युज्यते, न तु खरविषाणं तुच्छरूपोऽभाव इत्यर्थः । तदेवमशरीरमिति व्याख्यातम् । ॥ २०१७ ॥ २०१८ ॥

इदानीं " वा वसन्तम् " इत्येतद्व्याचिख्यासुराह-

जं च वसंतं संतं, तमाहु वासद्दओ सदेइं पि ।
न फुसेज्ज वीयरागं, जोगिणमिट्ठेयरविसेसा ॥ २०१९ ॥

यस्माच्चाशरीरं, कथंभूतम् ?, वसन्तं लोकाग्रे निवसन्तं, तिष्ठन्तमिति यावत् । अनेन वसनविशेषणेन तमशरीरशब्दवाच्यमर्थं सन्तं विद्यमानमाह, न त्वसद्भूतं, वसनस्य सद्धर्मत्वात् । तस्मात्कथं जीवनाशरूपं निर्वाणं स्यात् ?, न केवलमशरीरं मुक्तं,

किं तु वाशब्दात् सदेहमपि सशरीरमपि वीतरागं क्षीणोपशममोहयोगिनं परमसमाधिमन्तं भवस्थमपि न स्पृशेयुः । के ?, इष्टेतरविशेषाः, सुखदुःखभेदा इत्यर्थः ॥ २०१९ ॥

प्रकारान्तरेणापि "वाव सन्तम्" इत्येतद्व्याचिख्यासुराह-

वाव त्ति वा निवाओ, वासद्दत्थो जवंतमिह संतं ।
बुज्झाऽव त्ति व संतं,नाणाइविसिट्ठमहवाऽऽह ॥२०२०॥

वा इत्यथवा-' वाव ' इत्ययं शब्दो निपातः, स च वाशब्दार्थः । ततश्चाशरीरं सन्तं भवन्तं मुक्तौ विद्यमानं जीवं प्रियाप्रिये न स्पृशतः, वाशब्दात् सशरीरमपि वीतरागं न ते स्पृशतः । यदि वा वसन्तमित्यन्यथा व्याख्यायते-" बुज्झाऽव त्ति वेत्यादि " । ' वा ' इत्यथवाऽथमर्थः । " वाव संतं ति । " रक्षणगतिप्रीत्यादिष्वेकोनविंशतावर्थेष्ववधातुः पठ्यते । गत्यर्थाश्च धातवो ज्ञानार्था अपि भवन्ति । ततश्चाह-विनेय ! त्वमेवं बुध्यस्व । किं तदित्याह-अशरीरं सन्तं मुक्तावस्थायां विद्यमानं जीवम्, अथवा ज्ञानाऽऽदिभिर्गुणैर्विशिष्टं सन्तमित्याह-भूते, प्रियाप्रिये न स्पृशतः । वाशब्दात् सशरीरमपि वीतरागमिति तथैवेति ॥ २०२० ॥

आह-नन्वेवमक्षरकुट्या मयाऽपि स्वाभिप्रायसिद्धये व्याख्यानान्तरं कर्तुं पार्यत एव, न ह्ययं भवतैव केवलेन क्रेण्या ग्रहीता, इत्यभिप्रायवतः परस्य मतमाशङ्कय परिहरन्नाह—

न वसंतं अवसंतं, ति वा मई नासरीरमहणाओ ।
फुसणाविसेसणं पि य, जओ मयं संतविसयं ति ।२०२१।

" अशरीरं वाऽवसन्तं " इत्यत्र लुप्तस्य अकारस्य दर्शनात् न वसन्तमवसन्तं काप्यतिष्ठन्तमिति व्याख्यानतो नास्ति मुक्तावस्थायां जीवः, क्वाप्यवसनात्, असत्त्वादेव च नामुं प्रियाप्रिये स्पृशत इति परस्य मतिर्भवेत् । तदेतन्न । कुतः?, इत्याह-अशरीरग्रहणात् । एतदुक्तं भवति-न विद्यते शरीरं यस्येत्यत्र पर्युदासनिषेधात् पूर्वोक्तयुक्त्या मुक्तावस्थायामशरीरो जीवो गम्यते, इत्यतोऽत्राऽकारप्रश्लेषव्याख्यानं कर्तुं न पार्यते, अशरीरग्रहणान्मुक्तौ जीवसिद्धेः । किञ्च-" प्रियाप्रिये न स्पृशतः " इति यदशरीरस्य स्पर्शनाविशेषणं, तदपि यस्मात् सत्विषयमेव मतं, तस्मान्न मुक्तौ जीवस्याभावः । यदि ह्यशरीरशब्दस्य जीवाभावो वाच्यः स्यात्तदा तं प्रियाप्रिये न स्पृशत इति विशेषणमनर्थकं स्यात् । न हि " वन्ध्यापुत्रं प्रियाप्रिये न स्पृशतः " इति विशेष्यमाणं विराजते । तस्मान्मुक्तावस्थो जीव एवाशरीरशब्दवाच्यः, न पुनस्तद्भावः । ततो नाकारप्रश्लेषव्याख्यानं युज्यत इति । तदेवम् "अशरीरं वा वसन्तम्" इत्यनेन जीवकार्मणशरीरविप्रयोगलक्षणस्य मोक्षस्य मुक्तजीवसत्त्वस्य चाभिधानान्नास्तित्वनिषेधं कुर्वतस्तत्त्वाभ्युपगमविरोध एवेति ॥ २०२१ ॥

एवमपि मुक्तस्य सुखाभावलक्षणं तृतीयपक्षमप्रतिविहितमेवोत्पश्यन् परः प्राऽऽह-

एवं पि होज्ज मुत्तो, निस्सुइउक्खत्तणं तु तदवत्थं ।
तं नो पियऽप्पियाइं, जम्हा पुण्णेयरकयाइं ॥२०२२॥
नाणाइछत्तणओ, न फुसंति वीयरागदोसस्स ।
तस्स पियमप्पियं वा, मुत्तमुहं को पसंगोऽत्थ ?॥२०२३॥

एवमभ्युपगमप्रकारेण मुक्तो जीवो भवेदित्यकामैरभ्युपगतमस्माभिः, तथा च सति जीवस्य कर्मवियोगलक्षणो मोक्षः, तत्र जीवसत्त्वं च सिद्धम् । वस्तु निःसुखदुःखत्वं सिद्धस्य मया प्रेरितं, तत् "प्रियाप्रिये अशरीरं न स्पृशतः" इति वचनात् तदघटमानमेव । अत्रोत्तरमाह-तदेतत्, यस्मात्पुण्यपापकर्मजनिते एव जीवानां प्रियाप्रिये सांसारिकसुखदुःखे भवतः, ते च तं क्षीणनिःशेषपुण्यपापकर्माणं सकलसंसारार्णवपारप्राप्तं मुक्ताऽऽत्मानं न स्पृशत इत्युत्तरगाथायां संबन्धः । न चैतावता तस्य निःसुखत्वमिति स्वयमेव द्रष्टव्यम् । कुतः?, इत्याह-(नाणेत्यादि) ज्ञानत्वे सत्यमाबाधकरूपत्वादित्यर्थः । यच्च तत् मुक्तस्य सुखं मुक्तसुखं स्वाभाविकं निष्प्रतीकारं निरुपमं च । "मुत्तस्स परं सोक्खं,बाणाबाहओ जहा मुणिणो" (१९९२) इत्यादिना प्रागेव साधितं,तत्तस्य वीतरागद्वेषस्य मुक्ताऽऽत्मनो न प्रियं न पुण्यजनितं सुखं भण्यते,न चाप्रियं न पापजनितं दुःखं भण्यते,किं त्वेताभ्यां सर्वथा विलक्षणम् , अकर्मजनितत्वेन स्वाभाविकत्वात्, निष्प्रतीकारकरूपत्वात्, निरुपमत्वात्, अप्रतिपातित्वाच्चेति ।

अथ " को पसंगोऽत्थ त्ति " "अशरीरं प्रियाप्रिये न स्पृशतः" इत्युक्ते कोऽत्र मुक्ताऽऽत्मनि मुक्तसुखाभावप्रसङ्गः,न कश्चिदित्यर्थः। पुण्यपापजनितप्रियाप्रिययोरभावे तस्य सुतरामेव भावात्। तस्मात् 'न ह वै सशरीरस्य' इत्यादिवेदपदैर्यथोक्तनीत्या जीवकार्मणशरीरविरहलक्षणो मोक्षः,मुक्तावस्थस्य च जीवस्य सत्त्वम्,तथा " अशरीरं प्रियाप्रिये न स्पृशतः " इत्यतोऽपि वचनात् पुण्यपापक्षयसमुत्थं स्वाभाविकम्,अप्रतिपाति सुखं चास्य इत्येतत् त्रितयं सिद्धम् । अत एतदभ्युपगच्छतस्तवाभ्युपगमविरोध इति स्थितम् । यदपि-" जरामर्यं वैतत् सर्वं यदग्निहोत्रम् " इत्येतस्माद्वाक्यान्मोक्षहेतुक्रियाऽऽरम्भयोग्यकालाभावान्मोक्षाभावं शङ्कसे। तदप्ययुक्तम्;तदर्थापरिज्ञानात्। तस्य ह्ययमर्थः-यदेतदग्निहोत्रं तज्जावज्जीवं सर्वमपि कालं कर्तव्यं, वाशब्दात् मुमुक्षुभिर्मोक्षहेतुभूतमप्यनुष्ठानं विधेयमिति । इत्येवं वेदपदोक्तद्वारेण युक्तिभिश्च प्रसाधितो मोक्षः । जिज्ञासस्य प्रज्ञासस्य तत्संशयः ॥२०२२।२०२३॥

ततः किं कृतवानसावित्याह-

छिन्नम्मि संसयम्मी, जिणेण जरमरणविप्पमुक्केणं ।
सो समणो पव्वइओ, तिहि ओसहसंदियसएहिं।२०२४।

व्याख्या पूर्ववदिति ।२०२४। विशे०। सिद्धसुखे, कर्म० ४ कर्म०। (क्षीनिर्वाणचर्चा, प्रकीर्णकवार्ताश्च ' मोक्ष ' शब्दे संग्रहिष्यन्ते) विध्यापने, आव० ४ अ० । (तीर्थकृतां निर्वाणं ' तित्थयर ' शब्दे वक्ष्यते) निर्वाणप्रधानैककारणत्वान्निर्वाणम्। प्राणातिपातनिवृत्तौ, सूत्र० १ श्रु० ११ अ० । दुःखक्षयणे, दे० ना० ४ वर्ग ३३ गाथा ।

णिव्वाणंग–निर्वाणाङ्ग–न० । मुक्तिकारणे, पञ्चा० १६ विव० ।

णिव्वाणगमणकाल–निर्वाणगमनकाल–पुं० । मोक्षगमनप्रत्यासन्नसमये, दर्श० ४ तत्त्व ।

णिव्वाणगमणपज्जवसाणफल–निर्वाणगमनपर्यवसानफल—त्रि० । निर्वाणगमनं मुक्तिप्राप्तिः पर्यवसाने आनुषङ्गिकसुरमनुजसुखानुभवपर्यन्ते फलं यस्यासौ निर्वाणगमनपर्यवसानफलः । पा० । निर्वाणगमनं मोक्षगमनमेव पर्यवसानं परमार्थरूपं फलं यस्य स तथा । मोक्षैकहेतौ, ध० । " असंखिहिसं-

जयस्स णिव्वाणगमणपज्जवसाणफलस्स इमस्स धम्मस्स ।" ध० २ अधि० ।

णिव्वाणणगर–निर्वाणनगर–न० । निर्वाणपुरे, द० प० । "धम्मं जिणपण्णत्तं, सम्ममिणं सद्दहामि तिविहेणं । तसथावरभूअहियं, पंथं निव्वाणनगरस्स ॥ १ ॥" द० प० ।

णिव्वाणपय–निर्वाणपद–न० । निष्कर्मतांहेतुपदे, अष्ट०५अष्ट० ।

णिव्वाणपसाहण–निर्वाणप्रसाधन–न० । मोक्षसाधने, पं० व० ३ द्वार ।

णिव्वाणपुर–निर्वाणपुर–न० । ईषत्प्राग्भाराऽऽख्ये सिद्धिपत्तने, आव० ४ अ० । दर्श० ।

णिव्वाणभाविं [ण्]–निर्वाणभाविन्–त्रि० । निर्वाणे भविष्यतीति निर्वाणभावी । भव्ये, विशे० ।

णिव्वाणभूय–निर्वाणभूत–त्रि० । असावद्यानुष्ठानभूते, सूत्र० । "णिव्वाणभूयं व परिव्वएज्जा ।" अस्यायमर्थः–यथा हि निर्वृतो निर्व्यापारत्वाद् कस्यचिदुपघाते न वर्तते, एवं साधुरपि सावद्यानुष्ठानरहितः परि समन्ताद् व्रजेदिति । सूत्र०१श्रु० १०अ० ।

णिव्वाणमग्ग–निर्वाणमार्ग–पुं० । निर्वृतिर्निर्वाणं, सकलकर्मक्षयजमात्यन्तिकं सुखमित्यर्थः । निर्वाणस्य मार्गो निर्वाणमार्गः । परमनिर्वृतिकारणे, आव० ४ अ० । ध० । आतु० । सिद्धिक्षेत्रावाप्तिपथे, उपा० २ अ० । सकलकर्मविरहजसुखोपाये, प्रज्ञ० ६ श० ३३ उ० ।

णिव्वाणमहावाय–निर्वाणमहावात–पुं० । सिद्धिमहागोस्थानविशेषे, उपा० ७ अ० ।

णिव्वाणमहोयस–निर्वाणमहौजस–पुं० । ऐरवते वर्षे भविष्यति सप्तमे तीर्थंकरे, ति० । प्रव० ।

णिव्वाणवाइ [ण्]–निर्वाणवादिन्–पुं० । निर्वाणं सिद्धिक्षेत्राऽऽख्यं कर्मच्युतिलक्षणं स्वरूपतस्तदुपायप्राप्तिहेतुतो वा वदितुं शीलं येषां ते तथा । निर्वाणपथदेशके; "पक्खीसु वा गेरुले वेणुदेवे, णिव्वाणवादीणिह णायपुत्ते।" (२१)। सूत्र० २ श्रु० ६ अ० ।

णिव्वाणबीय–निर्वाणबीज–न० । मोक्षसुखयोर्हेतौ, सूत्र० १ श्रु० १२ अ० ।

णिव्वाणसाहण–निर्वाणसाधन–न० । स्त्री० । परमपदप्रापके, सुखसाधने च । षो० १५ विव० । स्त्रियां ङीप् । "निर्वाणसाधनीति च, फलदा तु यथार्थसंज्ञानिः ।" (१०) निर्वाणं साधयतीति निर्वाणसाधनी । मनोयोगसारायाम्, षो० ७ विव० ।

णिव्वाणसिला–निर्वाणशिला–स्त्री० । शत्रुञ्जयस्थशैले नेमिनाथशिलायाम्, "कंदप्पकप्परागा, कुगईविद्दवणनेमिनाहस्स । णिव्वाणसिला नामे–ण अत्थि भुवणम्मि विक्खाया ॥१॥" ती० ३ कल्प ।

णिव्वाणसुह–निर्वाणसुख–न० । निर्वाणमशेषकर्मक्षयस्तदवाप्तौ वा विशिष्टकोशप्रदेशः। तेन तत्र वा सुखं निर्वाणसुखम्। मोक्षसुखे, आचा० १ श्रु० ३ अ० १ उ० ।

णिव्वाणसेट्ठ–निर्वाणश्रेष्ठ–त्रि० । मोक्षप्रधाने, सूत्र० १ श्रु० ६ अ० ।

णिव्वाणाऽऽवेस–निर्वाणाऽऽवेश–पुं० । मोक्षाऽऽवेशे, "यावत्प्रकारा यावन्तः, संसाराऽऽवेशहेतवः । तावन्तस्तद्विपर्यासाः, निर्वाणाऽऽवेशहेतवः ॥२॥" सूत्र० १ श्रु० १२ अ० ।

णिव्वाणि [ण्]–निर्वाणिन्–पुं० । अतीतायामुत्सर्पिण्यां जाते भरतक्षेत्रजे द्वितीये तीर्थंकरे, प्रव० ७ द्वार ।

णिव्वाणी–निर्वाणी–स्त्री० । श्रीशान्तिनाथस्य शासनदेव्याम्, प्रव० २७ द्वार । सा च कनकरुचिः पद्मासनस्था चतुर्भुजा पुस्तकोत्पलयुक्तदक्षिणपाणिद्वया, कमण्डलुकमलकलितवामकरद्वया च । प्रव० २७ द्वार ।

णिव्वाव–निर्वाप–पुं० । शाकघृताऽऽदिपरिमाणे, नि० चू० १उ० ।

णिव्वावकहा–निर्वापकथा–स्त्री० । एतावन्तस्तत्र पक्वान्नभेदाः, व्यञ्जनभेदा वेति भक्तकथायाम्, स्था० ४ ठा० २ उ० ।

णिव्वावण–निर्वापण–न० । विध्यापने, दश० ४ अ० । अभावाऽऽपादने, दश० ८ अ० ।

णिव्वावार–निर्व्यापार–त्रि० । व्यापारान्निर्गतो निर्व्यापारः । निरारम्भे, उत्त० ६ अ० । परिहृतकृषिपशुपाल्याऽऽदिक्रिये, उत्त० ६ अ० ।

णिव्वाविऊण–निर्वाप्य–अव्य० । विध्याप्येत्यर्थे, नि० चू० १ उ० ।

णिसीयमाण–निषीदत्–त्रि० । उपविशति,सूत्र०१ श्रु०१ अ०२ उ० ।

णिसीरिज्जमाण–निसृज्यमान–त्रि० । क्षिप्यमाणे, भ० ८ श० ७ उ० ।

णिसीह–निशीथ–न० । "निशीथपृथिव्योर्वा" ॥८ । १ । २१६ ॥ इति थस्य हो वा । प्रा० १ पाद । अप्रकाशे, नि० चू० ३ उ० । मध्यमरात्रौ, तद्बहुहोद्भूतं यदध्ययनं तन्निशीथम् । आचाराङ्गपञ्चमचूडायाम्, पा० । नं० ।

पच्छन्नं तु निसीहं, निसीहनामं जहऽज्झयणं ।

प्रच्छन्नं तु निशीथनामकमध्ययनमिति । अथवा-निशीथं गुप्तार्थमुच्यते । यथा-अग्रायणीये वीर्यपूर्वे अस्ति नास्ति प्रवादे च पाठः-" जत्थेगो दीवायणे भुंजइ तत्थ दीवायणसयं भुंजइ । जत्थ दीवायणसयं भुंजइ तत्थेगो दीवायणो भुंजइ । तथा-जत्थेगो दीवायणो हम्मइ तत्थ दीवायणसयं हम्मइ । जत्थ दीवायणसयं हम्मइ, तत्थेगो दीवायणो हम्मइ । "

तथा चामुमेवार्थमभिधातुकाम आह-

अग्गेणीयम्मि जहा, दीवायण जत्थ एगो तत्थ सयं ।
जत्थ सयं तत्थेगो, हम्मइ वा भुंजई वा वि ॥

अक्षरगमनिका सुप्रतीता । इदमालापकद्वयं सम्प्रदायप्रतीतार्थमिति गुप्तार्थत्वान्निशीथमिति । आ० म० १ अ० २ खण्ड । आ० चू० । निशीथं च कुतः सिद्धमित्यत आह-"निसिहं नवमापुव्वा, पच्चक्खाणस्स तइयवत्थूओ । आयारनामधेज्जा, वीसइमा पाहुडा ज्ञेया ॥१॥ " व्य० १ उ० । प्रकल्पो निशीथः, स च प्रत्याख्यानपूर्वस्य यत्तृतीयं वस्तु तस्याऽपि यदाचाराऽऽख्यं विंशतितमं प्राभृतम् । आचा० २ श्रु० १ चू० १ अ० १ उ० ।

इयाणिं णिसीहं ति दारं-

णामं ठवणाणिसीहं, दव्वे खेत्ते य काले य भावे य ।
एसो उ णिसीहस्सा, णिक्खेवो छव्विहो होइ ॥६७॥

कंठा । णामठवणा गता । दव्वणिसीहं दुविधं-आगमओ, णोआगमओ य । आगमओ जाणए अणुवउत्ते । णोआगमओ जाणगभव्वसरीरवइरित्तं ।

तं चिमम्-

दव्वणिसीहं कतगा-दिएसु खेत्तं तु कण्हतमुणिरया ।
कालम्मि होति रत्ती, भावणिसीहं तिमं चेव ॥ ६८॥

ऊवतीति ऊव्यम्, णिसीहमप्पकाशम् । कतको णाम-रुक्खो, तस्स फलं, तं कलुसोदए पक्खिप्पइ, तओ कलुसं देहं गायति, तं दव्वणिसीहं, सच्चं भवति, तं अनिसीहं । गयं दव्वनिसीहं । खेत्तनिसीहं-खेत्तमागासं, तु पूरणे, (कण्ह इति) कण्हराईओ, ता अणेण भगवईसुत्ताणुसारेण णेया-"कति णं भंते ! कण्हराईओ पण्णत्ताओ ?। गोयमा ! अट्ठ कण्हराईओ पण्णत्ताओ । कहि णं भंते ! ताओ अट्ठ कण्हराईओ पण्णत्ताओ ?। गोयमा ! उप्पिं सणंकुमारमाहिंदाणं कप्पाणं, हेट्ठिं बंभलोगे कप्पे रिट्ठे विमाणपत्थडे, एत्थ णं अक्खाडगसमचउरंससंठाणसंठियाओ अट्ठ कण्हराईओ पण्णत्ताओ॥" (तमु त्ति) तमुक्काओ, सो य दव्वओ आउक्काओ । सो अणेण भगवतीसुत्ताणुसारेण णेओ-"तमुक्काए णं भंते ! कहिं समुट्ठिए, कहिं णिट्ठिए ?। गोयमा ! जंबुद्दीवस्स दीवस्स बहिया तिरियमसंखेज्जे दीवसमुद्दे वीतीवइत्ता अरुणवरस्स दीवस्स बाहिरिल्लाओ वेइयंताओ अरुणोदयं समुद्दं बायालीसं जोयणसहस्साइं ओगाहित्ता, उवरिल्लाओ उज्जलंताओ एगपदेसियाए सेढीए, एत्थ तमुक्काए समुट्ठिए सत्तरस एक्कवीसे जोयणसते उड्ढं उप्पतित्ता, ततो पच्छा वित्थरमाणे २ सोहम्मीसाणसणंकुमारमाहिंदे चत्तारि वि कप्पे आवरेत्ता णं चिट्ठति, जहं पि णं० जाव बंभलोए कप्पे रिट्ठविमाणपत्थडे संपत्ते, एत्थ तमुक्काए णिट्ठिते । तमुक्काए णं भंते ! किंसंठिते पण्णत्ते ?। गोयमा ! अहे मल्लगसंठिते उप्पिं कुक्कुडपंजरसंठाणसंठिते॥" (णिरया इति) णरगा, ते य सीमंतगादि । एए कण्हतमुणिरया अप्पगासित्ता खेत्तणिसीहं भवंति । खेत्तणिसीहं गतं । इदाणिं कालणिसीहं- कालणिसीहं रात्री । गतं कालणिसीहं । इदाणिं भावणिसीहं- भवणं भावः, णिसीहमप्पगासं, भाव एव णिसीहं भावणिसीहं । तं दुविहं-आगमओ, णोआगमओ य । आगमओ जाणए उवउत्ते, णोआगमओ इमं चेव एक्कप्पज्झयणं, जेण सुत्तत्थतदुभएहिं अप्पगासं, एव अवधारणे इति ।

कोऽर्थः ?-निसीयसद्दपडीकरणत्थं वा भणति-

जं होति अप्पगासं, तं तु णिसीहं ति लोगसंसिद्धं ।
जं अप्पगासधम्मं, अण्णं पि तयं निसीहं ति ॥ ६९ ॥

जमिति अणिद्दिट्ठं, होति भवति, अप्पगासमिति अंधकारं, जकारणिद्देसे तगारो होइ, सद्दस्स अवहारणत्थे तुगारो, अप्पगासवयणस्स णिण्णयत्थे णिसीहं ति, लोगे विसिट्ठं णिसीहं अप्पगासं । जहा कोइ पवसिओ पओसे आगओ, परेण बितिए दिणे पुच्छिओ-कल्ले कं वेलमागओसि ?। भणति-णिसीहे त्ति, रात्रावित्यर्थः । न केवलं लोकसिद्धमप्पगासं णिसीहं जं अप्पगासधम्मं, अण्णं पि, तं णिसीहं । अक्खरत्थो कंठो । उदाहरणं-जहा लोइया रहस्ससुत्ता, विज्जा, मंता, जोगा य अपरिणयाणं ण पगासिज्जंति । अहवा-दव्वखेत्तकालभावणिसीहा अण्णहा वक्खाणिज्जंति-दव्वणिसीहं जाणगभव्वसरीरातिरित्तं कतगफलं, जम्हा तेण कलुसुदयपक्खित्तेण मज्झो णिसीयति, उदगादपगच्छतीत्यर्थः । तम्हा तं चेव कतगफलं दव्वणिसीहं । खेत्तणिसीहं-बहिं दीवसमुद्दादिया, लोगा य; जम्हा ते पप्प नीधपुग्गलाणं तमभावो अवगच्छति । कालणिसीहं-अहो,तं पप्प रातीतमस्स णिसीयणं भवति । भावणिसीहं-

अट्ठविहकम्मपंको, णिसीयते जेण तं णिसीह त्ति ।
अट्ठवऽज्झाहा विसेसो, सुइं पि जं णेति अण्णेसिं ॥७०॥

अट्ठ त्ति संखा,विही भेओ,क्रियत इति कर्म, पंको-दव्वे, भावे य । दव्वे उदगचिक्खणो, भावे णाणावरणातीणि पंको, सो भावपंको णिसीयते जेण । तस्स भावपंकस्स णिसीयणा तिविहा-खओ, उवसमो,खओवसमो य । (जेण त्ति) करणभूतेण, तं णिसीयं भवति, तं चिमं अज्झयणं । जम्हा जहुत्तं आयरमाणस्स अट्ठविहकम्ममंठी वियाराइति, तेणिमं णिसीहं । चोदग आह-जइ कम्मक्खवणस्स सामत्थाओ इमं पि णिसीधं, एवं सव्वऽज्झयणाणं णिसीहत्तं भवति त्ति ?। गुरु भणति-आमं । किं पुण अविसेसा सव्वऽज्झयणा कम्मक्खवणसमुत्था ?। इह अज्झयणे विसेसो । विसेसो णाम भेओ । को पुण विसेसो ?। इमो-(सुइं पि जं णेति अण्णेसिं) सुतिं सवणं सोइंदिओवलद्धी, जम्हा कारणा,ण इति पमिसेहे,एति आगच्छति,प्राप्नोतीत्यर्थः। (अण्णेसिं ति) अगीत अइपरिणामो,अतिपरिणामगाणं ति वक्कसेसं । किं पुण कारणं तेसिमं सुइं पि णागच्छति ?। सुण-इदमज्झयणं अववायबहुलं । ते य अगीयत्थादिदोसदुट्ठा विण्णस्सेज्ज, तेण णागच्छति । अवि पदत्थसंभावणे । किं संभावयति ?-जति अगीयाण, अणुसाहुपरावत्तयंताण वि सवणं पि ण भवति । कओ उद्देसवायणत्थसवणाणि एवं संभावयति ?। अहवऽज्झहागाहा समवतारिज्जति-अप्पगासणिसीहसद्दसामण्णवक्खाणओ। सीसो पुच्छति-लोगुत्तरलोगणिसीहाण को पमिविसेसो ?। उच्यते-"अट्ठविहकम्मपंको गाहा ।" अक्खरत्थो सो चेव । उवसंहारो इमो-जइ वि लोइगारण्णमादीणि णिसीहाणि, तह वि कम्मक्खवणसमत्थाणि ण भवंतीति अविसेसे विसेसो भणितो । किं च-ताणि गिहत्थपासंडीण ण सुतिमागच्छंति । इमं पुण सुतिं पि जं ण एति अण्णेसिं, अण्णे गिहत्थऽण्णतित्थिया अ वि सपक्खा, गीयपासंडीण वि । " नि० चू० १ उ० ।

नृसिंह-पुं० । पुरुषसिंहे, पुरुषोत्तमे, षो० १६ विव० ।

णिसीहकप्प-निशीथकल्प-पुं० । निशीथाभ्ययनमर्यादायाम्, (पं० भा०)

इयाणिं णिसीहकप्पो-

.....,णिसीहकप्पं अतो वोच्छं ।
चउहा णिसीहकप्पो, सद्दहणाऽणुपालण गहण सोही ।
सद्दहणा वि य दुविहा, ओहनिसीहे विभागे य ॥
ओहे त्ति हत्थकम्मं, कुणमाणो रागमूलिया दोसा ।
गिण्हणमादिविभागे, अहवोघो होति जस्सगो ॥
अहवा होतु विभागो, सव्वं चेदं न सद्दहंतस्स ।
सद्दहणाए कप्पो, होति अकप्पो पुण इमो हु ॥
मिच्छत्तस्सुदएणं, ओसन्नविहारताइसद्दहणा ।

गणहरमेरं ओहं, ण सद्दहति जो णिसीहं तु ॥
ओसन्नाण विहारं, सद्दहती सुविहिताण गणमेरं ।
णो सद्दहती जो खलु, एस अकप्पो तु सद्दहणो ॥
जाणि भणिताणि सुत्ते, पुव्वावरवाहिताणि वीसाए ।
ताणि अणुपालयंतो, सव्वाण निसीहकप्पो तु ॥
सुत्तत्थतदुभयाणं, गहणं बहुमाणविणयमच्छेरं ।
चोद्दसपुव्वणिबद्धो, पकप्पगहियम्मि गणधारी ॥
तिविहो य पकप्पधरो, सुत्ते अत्थे य तदुभए चेव ।
सुत्तधर होदु तइओ, बितिओ वा होति गणधारी ॥
तिण्णिपंचपणगछक्कं, अट्ठग नवगं च जस्स उवग्गहं ।
उवणाकरणं दाणं, च सो हु सोही वियाणाहि ॥
णाणादीणं तियगं, पणगं ववहारो होति पंचविहो ।
बितियपणगं च पंच य, छक्कं पुण होंति छक्काया ॥
आलोयणारिहगुणे, अट्ठ तु अहवा विसोहि अट्ठविहा ।
आलोयणमादीयं, मूलं तं जाणती जो उ ॥
आलोयणमादीयं, अणवट्ठं तं तु णवविहं होति ।
पारंचितं तमहवा, दसविह होती च सदेणं ॥
उवणा रोयणकरणं, सफला मासा करेत्तु जो जाणे
सो होति दाणअरिहो, तव्विवरीओ अणरिहो तु ॥
किं पुण तं दायव्वं, पायच्छित्तं तु पुच्छए सीसो ।
भण्णति इमेण विहिणा, दायव्वं तं तहा कमसो ॥
ओहेण तु सट्ठाणं, सट्ठाणविभागताऐं वित्थारो ।
पच्छित्तपुरिसहेतू, किं ति ण संती चरणमादी ?॥
ओहे सट्ठाणं ति य, जह चतुगुरु होति रायपिंडम्मि ।
सट्ठाणविभागे पुण, ईसरमादी मुणेयव्वो ॥
जह वा करकम्मम्मि उ, ओहेणं होति मासगुरुयं तु ।
होति विभागपसंगो-ऽदिट्ठादीओ मुणेयव्वो ॥
पुरिसज्जातं णातुं, व दिज्जए जं च जारिसं वत्थु ।
गुरुमादि बलियदोव्वल्ल-हट्ठगिलाणाऽऽदि जं जोग्गं ॥
होऊ कारणणिक्का-रणे य जयणादिमेविओ जह तु ।
तो देति किं निमित्तं, पच्छित्तं विज्जते सुणसु ॥
" पायच्छित्ते असंतम्मि, चरित्तं तु न चिट्ठइ ।
चरित्तम्मि असंतम्मि, तित्थं ण सचरित्तया ॥
तित्थम्मि य असंतम्मि, णिव्वाणं तु ण गच्छइ ।
णिव्वाणम्मि असंतम्मि, सव्वा दिक्खा णिरत्थया ॥"
एवं णिसीहकप्पो, चउहा तू वण्णितो समासेणं । पं० भा० ।

(चउहा गाहा) "सो निसीहकप्पो चउव्विहो-सद्दहणया, आयरणया, गहणविसोही, सोहिकप्पो य । सद्दहणया दुविहा-ओहे, विभागे य । ओहे ति हत्थकम्मं करेमाणस्स तन्निप्फण्णो दोसो । विभागो गेण्हणादयो । अहवा-ओहो उस्सग्गो, विभागो अववादो । (मिच्छत्तस्सुदएणं गाहा) जो पुण मिच्छत्तोदएण न सद्दहइ, ओसन्नविहारपसंगं चेव करेइ, तस्स दोससंकमया भवइ । तेण बहुदोससंकमो गणधर-धारधरोधो त्ति । गणं धारयन्तीति गणधराः, धारा मेरा, मर्यादा इत्यर्थः । मेराए ओघं, तं गणधरमेरोघं, न सद्दहइ जो निसीहं तु अणुपालणाए (गाहा जाणि भणियाणि) जाणि भणियाणि वीसएहिं उद्देसएहिं निसीहस्स पुव्वावरवाहगाइं त्ति अववादेण उस्सग्गो वाहिओ, ताइं अणुपालेइ, ते अणुपालणा । (गाहा सुत्तत्थ) गहणाविहिगहणे सुत्तत्थतदुभयाणं बहुमाणविणएण चोद्दसपुव्वनिबद्धं अच्छेरंति मज्झमाणेण सो गणपरियट्टी भवइ । (गाहा तिविहो य) सोहिकप्पो त्ति तिविहो पकप्पधरो सुत्तत्थतदुभयाइं, सो गणपरियट्टी, तदुभयवज्जगाणं पुण अत्थधरो गणपरियट्टी, (तिण्णि) तिण्णि जो जाणइ नाणदंसणचरित्तं, (पंच इति) पंच महव्वयाणि । अहवा-पंचिंदियाणि, पायच्छित्तं० जाव पंचिंदियाणं । अहवा-पणगं नाणदरिसणचरित्ततवसंजमाइं जो जाणइ सो परियट्टी । (छक्क त्ति) रायपिंडगहाइं वयाइं (अट्ठग त्ति) आलोयणारिहाइं० जाव मूलं अट्ठविहं पायच्छित्तं । (नवग इति) अणवट्ठप्पनवमाइं । एयाइं ठाणाइं जस्सुवलद्धाणि सो जाणइ विसोहिं, पायच्छित्तकरणदाणं च । (गाहा ओहेण तु) ओहो नाम-अविसेसियं, तेण ओहेण सपायच्छित्तं पडिसेवणाठाणेहिं जहा रायपिंडे चउगुरुगा, एए सट्ठाणे त्ति विभागेण ईसरतलवराइ, अन्ने वि होंति दोसा आकिंचणुग्गमाइ । पायच्छित्तकरणं पुण पुरिसजाइं परिच्छिऊण, देउं च समिक्खिऊण, किं निमित्तं पडिसेवियं ?, कारणे अकारणे त्ति जयणा वा समिक्खियं । किं निमित्तं पायच्छित्तं दिज्जइ ?; पायच्छित्तं सोहिकारणं । (गाहा पायच्छित्तं) पायच्छित्ते य असंते पडिसिद्धमेव । एस निसीहकप्पो" । पं० चू० ।

इदाणिं आयरिओ सिस्सिणीणं च इमं णिसीहऽज्झयणं हिययम्मि थिरं भवउ त्ति णिकायणत्थं इमं इमं भणइ । गाहा-

चउहा णिसीहकप्पो, सद्दहणाऽऽयरणगहणसोही य ।
सद्दहण बहुविहा पुण, ओहेणिसीहे विभागे य ॥३८१॥

अहवा जं एयं पंचमचूलाए वुत्तं सव्वं तं एयं समासतो चउव्विहं । जतो भण्णति-(चउगाहा) ओहे, विभागे य ।

एक्केक्का अणेगविहा इमा । गाहा-

ओहणिसीहं पुण हो-ति पेढियासुत्तमो विभागो उ ।
उस्सग्गुववाओ ऊ, अववाओ होति उ विभागो ॥३८२॥

ओघः समासः, सामान्यमित्यनर्थान्तरम् । तं च णिसीहपेढियाणामणिप्पण्णो णिक्खेवो, उग्गहणादित्यर्थः । विभजनं विभागः, विस्तर इत्यर्थः । स चोसाप उद्देसएहिं जो सुत्तसंगहो, सुत्तत्थो य । अहवा उस्सग्गो ओहो, तस्यापवादः विभागः ।

अहवा-

उस्सग्गो वा ओहो, आणादिसंगमो विभागो उ ।
वत्थुं पप्प तिभागो, अवसिट्ठाऽऽवज्जणा होति ॥३८३॥

सुत्ते सुत्ते जं उस्सग्गदरिसणं तं ओहो होउ, जं पुण सुत्ते सुत्ते अण्णोण्णवत्थुमिच्छत्तविराहणाविभागदरिसणं, सो विभागो । अहवा-आयरियादिपुरिसवत्थुभेदेण जं भणियं सो विभागो, जो पुण अवसिट्ठा आवत्ती सो ओहो ।

अहवा-

पमिसेहो वा ओहो, तक्करणाऽऽणाइ होइ वित्थारो ।
आयासंजमभइया, तस्स य भेदो बहुविकप्पा ॥ ३८५ ॥

ण कप्पइ त्ति काउं जं जं पडिसिद्धं सो सव्वो ओहो। तस्स पमिसिद्धस्स करणाणुण्णा जा आणादिणो य भेदा, एस सव्वो वित्थरो त्ति विभागो । स वित्थरो पुणो भाणियव्वो; णिक्कारणअविधिपडिसेवणणियमा आणाभंगो, अण्णत्था य, मिच्छत्तं च । ण जहा वादी तहा कारि त्ति विराहणाए आयसंजमविराहणाओ भयणिज्जा कया वि भवंति,ण वा । जहा करकम्मकरणे आयविराहणा भवति, ण वा । संजमेण णियमा भवति । पमत्तस्स य पढमाणस्स य आयविराहणा । तस्सेव पाणादिवायसंपत्तीए णो संजमविराहणा । एवं (तस्सि त्ति) विराहणाए भेदा । एवं बहुविगप्पा । अणेगप्पकारा भवउज्ज जाणियव्वा । एवं विभागो ।

गाहा-

अहवा सुत्तनिवाओ, ओहो अत्थाओ होति वित्थारो ।
अविसेसो त्ति व ओहो,जो तु विसेसो स वित्थारो ।३७५।
जे भणिता उ पकप्पे, पुव्वावरबाहिता भवे सुत्ता ।
सो तह समायरंतो, सव्वो आयरणकप्पो उ ॥३७६॥

सुत्तमेत्तप्रतिबद्धं,जहा-पढमसुत्ते करकम्मकरणे मासगुरुं। एस ओहो । सेसो अत्थो, जहा-पढमपोरिसीए करकम्मकरणे मूलं, बितिए छेदो,ततिए छग्गुरुं,चउत्थीए चउगुरुं,पञ्चमीए मासगुरुं। एस विभागो । एवं पढमसुत्ते । एवं चेव सव्वसुत्तेसु । जो अणुवादी अत्थो सो सव्वो विभागो । अहवा-जं दव्वादिपुरिसाविसेसेणं अविसेसिज्जति सो ओहो; दव्वादिपुरिसविसिट्ठं पुण सव्वं वित्थरे णेयव्वं । वुत्तं सट्ठाणसद्दहंतस्स सद्दहणकप्पो । नि० चू० २० उ० ।

णिसीहकरण–निशीथकरण–न० । रहस्यसूत्रार्थे, विशे० ।

साम्प्रतमनिशीथनिशीथयोरेव स्वरूपप्रतिपादनार्थमाह-

भूयाऽपरिणयविगए, च सद्दकरणं तहेवमनिसीहं ।
पच्छन्नं तु निसीहं, निसीहनामं जहऽज्झयणं ॥

भूतमुत्पन्नम्, अपरिणतं नित्यं,विगतं विनष्टम्,भूतापरिणतविगतम् । समाहारत्वादेकवचनम् । किमुक्तम्भवति ?-"उप्पण्णेइ वा, विगमेइ वा,धुवेइ वा" इत्यादि । किंविशिष्टमित्यादि। शब्दकरणं शब्दः क्रियते यस्मिन् तत् शब्दकरणम् । आ० म० १ अ० ५ खण्ड । ('करण' शब्दे तृतीयभागे ३६८ पृष्ठे व्याख्या)

णिसीहगंथ–निशीथग्रन्थ–पुं० । प्रकल्पशास्त्रे, जी० १ प्रति० ।

णिसीहचुण्णि–निशीथचूर्णि–स्त्री० निशीथाऽध्ययनव्याख्यायां चूर्णिग्रन्थे, नि० चू० । सा च चूर्णिः जिनदासगणिमहत्तरेण कृता । विंशतितमोद्देशे " जे भिक्खू मासियं " इत्यादिसूत्राणां विशेषव्याख्या तु चन्द्रसूरिणा कृता । तथाहि-

" प्रणम्य वीरं सुरवन्दितक्रमं,
विशुद्धशुद्ध्याऽखिलनष्टकल्मषम् ।
गुरुंस्तथा निर्मलबुद्धिकारिणो,
विशुद्धतत्त्वान् जगते हितैषिणः ॥ १ ॥
"विंशोद्देशे श्रीनिशीथस्य चूर्णौ,
दुर्गं वाक्यं यत्पदं वा समस्ति ।
स्वस्मृत्यर्थं तस्य वक्ष्ये सुबोधां,
व्याख्यां काञ्चित्सद्गुरुभ्योऽवबुद्ध्य ॥२॥
आदौ मासिकपदमिह, तत्प्रस्तावात्समागता मासाः ।
तानवधीकृत्याऽऽदौ, व्याख्या प्रारभ्यते चात्र ॥ ३ ॥ "
नि० चू० २० उ० ।

इदानीं चूर्णिकारो यदर्थं मया चूर्णिः कृता इत्येतदाविष्करोति-

" जो गाहासुत्तत्थो, चेवंविधपागमो फुडपदत्थो ।
रइतो परिभासाए, साहुण अणुग्गहऽट्ठाए ॥ १ ॥ "

"जो गाहा" इत्यादिगाथाशब्देन भाष्यं गाथानिबन्धत्वादभिधीयते, ततो गाथा च, सूत्रं च, तयोरर्थः इति विग्रहः । (पागमो त्ति) प्राकृतः, प्रकटो वा, पदार्थो वस्तुभावो यत्र स तथा, परिभाष्यतेऽर्थोऽनयेति परिभाषा चूर्णिरुच्यते ।

अधुना चूर्णिकारः स्वनामकथनार्थं गाथायुग्ममाह-

" तिचउपणऽट्ठमवग्गा, तिपणतितिगअक्खरा चेव ।
तेसिँ पढमतिएहिं, तिहुसरजुएहिँ णामं कयं जस्स ॥ १ ॥
गुरुदिण्णं च गणित्तं, महत्तरत्तं च तस्स तुट्ठेहिं ।
तेण कएसा चुण्णी, विसेसनामा निसीहस्स ॥ २ ॥ "

" ति चउ " इत्यादि । वर्गा इह 'अ-क-च-ट-त-प-य-श-वर्गाः' इति वचनात् स्वराऽऽदयो हकारान्ता ग्राह्याः । तद्दिह प्रथमगाथया जिनदास इत्येवंरूपं नामाभिहितम । द्वितीयगाथया तदेव विशेषयितुमाह-" जिणदासगणिमहत्तर इति । तेन रचिता चूर्णिरियम ।

" सम्यक्कृतयाऽऽम्नायभवा-दशेषकं यत्किलास्मृतम् ।
मतिमान्द्याद्वा किञ्चि-त्तच्छोध्यं श्रुतधरैः कृपाकलितैः ॥१॥
श्रीशीलभद्रसूरीणां, शिष्यैः श्रीचन्द्रसूरिभिः ।
विंशकोद्देशके व्याख्या, दग्धा स्वपरहेतवे ॥२॥
वेदाश्वरुद्रयुक्ते ११७४, विक्रमसंवत्सरे तु मृगशीर्षे ।
माघसितद्वादश्यां, समर्थितेयं रवौ वारे ॥ ३ ॥ " नि० चू० २० उ० । ('चंदसूरि' शब्दोऽत्र द्रष्टव्यः)

णिसीहचूला–निशीथचूला–स्त्री० । आचाराङ्गस्य पञ्चमचूडारूपे निशीथाध्ययने, नि० चू० १ उ० ।

आचाराङ्गे विमुक्तिचूलाऽनन्तरं निशीथचूलिका । तत्संबन्धमाह-

" नमिऊणऽरिहंताणं, सिद्धाणं कम्मचक्कमुक्काणं ।
सयणासिणेहविमुक्का-ण सव्वसाहूण भावेणं ॥ १ ॥
सविसेसाऽऽयरजुत्तं, काउ पणामं च अत्थदायिस्स ।
पज्जुसणखमासमण-स्स चरणकरणाणुपालस्स ॥ २ ॥
एवं कयप्पणामो, पकप्पमाणस्स विवरणं वत्ते ।
पुव्वाऽऽयरियकयं चिय, अहं पि तं चेव उ विसेसे ॥ ३ ॥
भणिया विमुत्तिचूला, अणुणाऽवसरो णिसीहचूलाए ।
को संबंधो तस्सा, भण्णइ इणमो णिसामेहि ॥ ४ ॥ "

णवबंभचेरमइओ, अट्ठारसपदसहस्सिओ वेदो ।
इहइ य सपंचचूलो, बहु आयारो पयग्गेणं ॥ १ ॥

ब्रह्मचरणयोरुत्पत्तिनिमित्तं साधनार्थं वा शस्त्रपरिज्ञाऽऽदीनि उपधानश्रुतावसानानि नवाऽध्ययनान्यभिहितानि । जम्हा णव एताणि बंभचेराणि, तम्हा णवबंभचेरमइओ इमो त्ति, जहा-णिम्मओ घडो, तंतुमओ पमो,एवं णवबंभचेरम-

इमो आयारो । सो य अन्भयणसंखाणेण णवऽज्झयणो । पयपरिमाणेण अट्ठारसपयसहस्सिओ वेओ-अट्ठ य दस य अट्ठारस, अट्ठारसे त्ति संखा, पज्जय इति पयं, तं च अत्थपरिच्छेयवायगं पयं भवति, सहस्सं ति गणिताभिहाणेण चउत्थं ठाणं भवति जहासंखं-एगं,दहं,सयं,सहस्सं ति । स एवाऽऽयारो अट्ठारसपयसहस्सिओ वेओ भवति । कहम्?-विद ज्ञाने, अस्य धातोः घञ्प्रत्ययान्तस्य वेद इति रूपं भवति । अतस्तं विदन्ति, तेन विदन्ति, तस्मिन् वा विदन्तीति वेदो भवति । सीसो भणति-किमेत्तियमायारो, उत अण्णं पि से अत्थि किंचि ?। अतो भण्णति-"इयति य सपंचचूलो " इयति भवति इति भणितं होति, चशब्दो चूलाणुकरिसणे, सहेति युक्तः, पंच इति संखावायगो सद्दो, (चूला इति) चूल त्ति वा अग्गं ति वा सिहरं ति वा एगट्ठं । सा य छव्विहा-जहा दसवेयालिए भणिया तहा णायिव्वा । तासिं च पुण इमाओ पंच चूलाओ-पिंडेसणादि जाव उग्गहपडिमा, ताव पढमा चूला । बितीया-सत्तिक्कगा । तइया-भावणा । चउत्था-विमोत्ती । पंचमी-आयारपकप्पो । एतासिं पंचचूलासहिओ आयारो बहु भवति, णवऽज्झयणेहिंतो बहुतरो भवति । (पयग्गेणं ति) अट्ठारसपयसहस्सेहिंतो पंचचूलापएहिं सहितो पयग्गेणं बहुतरो भवति त्ति । अहवा-णवऽज्झयणा पढमचूलासहिता बहु भवंति, अट्ठारसपयसहस्सा पढमचूलापदेहिं सहिता बहुतरा य पयग्गेणं भवंति । एवं कमवुड्ढ्या नेयं, जाव पंचमी चूला । अहवा-सपंचचूलो सुत्तपयग्गेण मूलगंथाओ बहु भवति, अत्थपयग्गेणं बहुतरो भवति । अहवा-बहुबहुतरपदेहिं सेसपदा सूचिता भवंति । ते य इमे-बहुतम-बहुतरतम-बहुबहुतरतम इति । अओ भणति-णवबंभचेरमइओ आयारो अट्ठारसपयसहस्सिओ पढमचूलऽज्झयणसुत्तत्थपदेहिं जुत्तो बहु भवति । पढमचूलासहितो मूलगंथो दुइयचूलऽज्झयणसुत्तत्थपदेहिं जुत्तो बहुतरो भवति । एवं ततियचूलाए वि बहुतमो भवति । पढमचूलासहितो मूलगंथो दुइयचूलऽज्झयणे सुत्तत्थपदेहिं जुत्तो बहुतमो भवति (?) । एवं ततियचूलाए वि बहुतमो भवति । चउत्थीए वि बहुतरतमो भवति । पंचमीए वि बहुबहुतरतमो भवति । (पयग्गेणं ति) पदानामग्रं पदाग्रं, पदाग्रेणेति पदपरिमाणेनेत्यर्थः । स एवं पयग्गेणं बहुबहुतरो भवति । एवं संबंधगाहासूत्रे व्याख्याते चोदग आह-नवबंभचेरमइए आयारे वक्खाते आयारग्गाणुजोगारंभकाले संबंधार्थमिदमेव गाथासूत्रं प्रागुपदिष्टं, प्रथमचूलातश्च द्वितीयचूलाया अनेनैव गाथासूत्रेण संबन्ध उक्तो भवति । एवं द्वितीयचूलातः तृतीयचूलायाः, तथा तृतीयचूलातः चतुर्थचूडायाः, चतुर्थचूलातश्च पञ्चमचूलायाः संबन्ध उक्त एव भवति । एवं सति प्रागुक्तस्य संबन्धगाहासूत्रस्येह पुनरुच्चारणं किमर्थम् ?। आचार्य आह--पुव्वभणियं तु जं एत्थ भण्णति, तत्थ कारणं अत्थि-पमिसेहअणुण्णाकारणं, विसेसोवलंभो वा । सीसो पुच्छति--कस्स पमिसेहो, कहं वा अणुण्णा, किं वा कारणं, को वा विसेसोवलंभो ?। आचार्य आह-तत्र प्रतिषेधः चतुश्चूलात्मके आचारे यत्प्रतिषिद्धं तं सेवंतस्स पच्छित्तं भवति त्ति काउं; किं सेवमाणस्स भण्णति ?। सूत्रम्-"जे भिक्खू हत्थकम्मं करेति, करेंतं वा सातिज्जति" एवमादीणि सुत्ताणि । एस पमिसेहो । अन्नेण कारणं आप्य तमेव अणुजाणंति, तं जयणाए पडिसेवंतो सुद्धो,अजयणाए स पायच्छित्ती । कारणमणुण्णा जुगवं गता । अयसेसोवलंभो इमो-आइल्लाओ चत्तारि चूलाओ कमेणेव अहिज्जंति, पंचमी चूला आयारपकप्पो त्ति बासपरियागस्स आरेण न दिज्जति त्ति, बासपरियागस्स वि अपरिणामगस्स अतिपरिणामगस्स वा न दिज्जति । आयारपकप्पो पुण परिणामगस्स दिज्जति । एतेण कारणेण संबंधगाहा पुनरुच्चार्यते । अहवा बहु अतीतकालत्वात् प्रागुक्तसंबन्धस्य विस्मृतिः स्यात्, अतस्तस्य प्रागुक्तसंबन्धस्य स्मरणार्थं प्रागुक्तमपि संबन्धगाहासूत्रमिह पुनरुच्चार्यते । नि० चू० १ उ० ।

णिसीहज्झयण–निशीथाध्ययन–न० । आचाराङ्गस्य निशीथाध्ययनपञ्चमचूलिकायाम्,आचा० १ श्रु० १ अ०१ उ० । आ०चू० ।

णिसीहपेढिया–निशीथपीठिका–स्त्री० । निशीथचूर्णिचूलिकायाम्, नि० चू० । सुत्तत्थो पेढियाए देओ, न वा ?। कस्स देओ,कस्स वा ण देओ इति ?। अहवा-कहितो सुत्तत्थो पेढियाए णिसीहियपेढियाए सुत्तत्थो व्याख्यातो । सो पुण णिसीहपेढियाए सुत्तत्थो कस्स देओ, कस्स वा न देओ ?, इति भण्णति । जेसिं ताव ण देओ, ते ताव भणामि-

अबहुस्सुते वि पुरिसे, णिण्णरहस्से पईणविज्जत्ते ।
णिस्साणपेहए वा-ऽसंविग्गे दुब्बलचरित्ते ॥ ४६५ ॥

बहु सुयं जस्स सो बहुस्सुतो । सो तिविहो-जहण्णो, मज्झिमो,उक्कोसो । जहण्णो जेण पकप्पऽज्झयणं अधीतं । उक्कोसो चोद्दसपुव्वधरो । तस्मज्झे मज्झिमो । एत्थ जहण्णे वि ताव ण पमिसेहो । न बहुस्सुओ अबहुस्सुतो,येन प्रकल्पाध्ययनं नाधीतमित्यर्थः। तस्य निशीथपीठिका न देया । अहवा-अबहुस्सुतो येन हेट्ठिल्लसुत्तं ण सुयं,सो अबहुस्सुतो भण्णति । (पुरिसे त्ति)पुरिसो तिविहो-परिणामगो,अपरिणामगो,अइपरिणामगो य । एत्थ अपरिणामगअतिपरिणामगाणं पमिसेहो । मिण्णं रहस्सं जस्मिं वि पुरिसे सो णिण्णरहस्सो,रहस्सं ण धारयतीत्यर्थः। इह रहस्सं अववातो भण्णति । तं जो अगीताणं कहेति सो मिण्णरहस्सो । पइण्णविज्जत्तणं वा करेति,जस्स वा तस्स वा कहयति । आदी अदिट्ठभावाण सावगाण जाव कहयति । णिस्साणं णाम-आलंबणं, तं पेहेति प्रार्थयति, अववातपेहि त्ति वुत्तं भवति । तं अववायपदं णिक्कारणे वि सेवतीत्यर्थः । ण संविग्गो असंविग्गो,पासत्थादि त्ति वुत्तं भवति । दुब्बलो चरित्ते दुब्बलचरित्तो, विणा कारणेण मूलुत्तरगुणपमिसेवणं करोतीत्यर्थः ॥ ४६५ ॥ नि० चू० १ उ० ।

णिसीहिया–निशीथिका–स्त्री० । अल्पतरकालिकायां वसतौ, भ० १४ श० १० उ० । आ० चू० । निशीथिकानिक्षेपः-तत्र नामनिष्पन्ननिक्षेपे निशीथिकेति नाम, अस्य च नामस्थापनाद्रव्यक्षेत्रकालभावैः षड्विधो निक्षेपः । नामस्थापने पूर्ववत् । द्रव्यनिशीथम्-आगमतो ज्ञशरीरद्रव्यशरीरव्यतिरिक्तं यद् द्रव्यं प्रच्छन्नम् । क्षेत्रनिशीथं तु-अधोलोकरिष्टविमानपाश्चवर्तिन्यः कृष्णराजयो, यस्मिन् वा क्षेत्रे तद् व्याख्यायते । कालनिशीथं-कृष्णराजयो, यत्र वा काले निशीथं व्याख्यायत इति । भावनिशीथं-नो आगमत इदमेवाध्ययनम्, आगमैकदेशत्वात् गतो नामनिष्पन्नो निक्षेपः । आचा० २ श्रु० २ चू० २ अ० ।

अथाऽऽचाराङ्गस्य द्वितीयस्कन्धके निशीथिकागमनम-

पढमं से भिक्खू वा भिक्खुणी वा अभिकंखति णिसीहियं गमणाए, से जं पुण णिसीहियं जाणेज्जा-सअंडं

सपाणं० जाव मक्कडासंताणयं, तहप्पगारं णिसीहियं अफासुयं अणेसणिज्जं लाभे संते णो वेतिस्सामि ॥

साम्प्रतं सूत्रानुगमे सूत्रमुच्चारणीयम् । तच्चेदम्-(से इत्यादि) स भावभिक्षुर्यदि वसतेरुपहतायां अन्यत्र निशीथिकां स्वाध्यायभूमिं गन्तुमभिकाङ्क्षेत्,तां च यदि स्वाण्डं यावत्ससन्तानकां जानीयात्ततोऽप्रासुकत्वान्न परिगृह्णीयादिति । किं च-

निशीथिकायामन्योऽन्यक्रिया-

से भिक्खू वा भिक्खुणी वा अभिकंखइ णिसीहियं गमणाए,से जं पुण णिसीहियं जाणेज्जा-अप्पपाणं अप्पबीयं ०जाव मक्कडासंताणयं तहप्पगारं णिसीहिं फासुयं एसणिज्जं लाभे संते वेतिस्सामि, एवं सेज्जागमेणं णेयव्वं० जाव उदयपसूयाए त्ति ॥

(से इत्यादि) स भिक्षुरुपाण्डाऽऽदिकां गृह्णीयादिति । एवमन्यान्यपि सूत्राणि शय्यावन्नेयानि यावद्यत्रोदकप्रसूतानि कन्दाऽऽदीनि स्युस्तां न गृह्णीयादिति ।

तत्र गतानां विधिमभिकृत्याऽऽह-

जे तत्थ दुवग्गा वा तिवग्गा वा चउवग्गा वा पंचवग्गा अभिसंधारेइ णिसीहियं गमणाए,ते णो अन्नमन्नस्स कायं आलिंगेज्जा वा, विलिंगेज्जा वा,चुंबेज्जा वा, दंतेहिं वा णहेहिं वा अच्छिंदेज्ज वा,एवं खलु तस्स भिक्खुस्स वा भिक्खुणीए वा सामग्गियं जं सव्वट्ठेहिं सहिए समिए सदा जएज्जा, सेयमिणं मण्णेज्जा सि त्ति बेमि ॥

(जे इत्यादि) ये तत्र साधवो निषेधिकाभूमौ द्वित्राऽऽद्यायच्छेयुः, ते नान्योऽन्यस्य कायं शरीरमालिङ्गेयुः,परस्परं गात्रसंस्पर्शं न कुर्युरित्यर्थः । नापि विविधमनेकप्रकारं यथा मोहोदयो भवति तथा विलिङ्गेयुरिति । तथा कन्दर्पप्रधाना वक्त्रसंयोगाऽऽदिकाः क्रिया न कुर्युरित्येतस्य भिक्षोः सामग्र्यं-यद्यसौ सर्वार्थैरशेषप्रयोजनैरामुष्मिकैः सहितः समन्वितस्तथा समितः पञ्चभिः समितिभिः, सदा यावदायुस्तावत् संयमानुष्ठाने यतेतैतदेव च श्रेय इत्येवं मन्येतेति ब्रवीमीति पूर्ववत् । निशीथिकाऽध्ययनं द्वितीयम् । आचा० २ श्रु० २ चू० ३ अ० ।

नैषेधिकी—स्त्री० 'षिध' गत्यामित्यस्य निपूर्वस्य धञि निषेधः। प्राणातिपाताऽऽदिनिवृत्तिः प्रयोजनमस्या नैषेधिकी । प्राणातिपातनिवृत्तायां तन्त्राम्, ध० १ अधि० । आव० । उत्त० । निषेधो गमनाऽऽदिव्यापारपरिहारः,स प्रयोजनमस्याः,तमर्हतीति वा नैषेधिकी । बृ० २ उ० । जीत० । निषीदनस्थाने, जी० ३ प्रति० ४ उ० । रा० । निषेधः प्रमादेभ्य आत्मनो व्यावर्तनं, तत्र भवा नैषेधिकी । ग० २ अधि० । निषेधेन निर्वृत्ता नैषेधिकी । व्यापारान्तरनिषेधरूपायां सामाचार्याम्, आश्रये प्रविशतो (स्था० १० ठा०) वसतिप्रवेशे निषिद्धोऽहं गमनक्रिययेति भणने, बृ० १ उ० । ध० । रा० । आ० म० । निषेधेनासंवृतगात्रचेष्टानिवारणेन निर्वृत्ता तत्प्रयोजना च या शय्याऽऽदिप्रवेशक्रिया सा नैषेधिकी । पञ्चा० १२ विव० । सामाचारीभेदे, पञ्चा० ।

साम्प्रतं नैषेधिकीमाह-

एवोग्गहप्पवेसे, णिसीहिया तह णिसिद्धजोगस्स ।
एयस्सेसो उचिओ, इयरस्स ण चेव नत्थि त्ति ॥२२॥

एवमुक्तेनाऽवग्रहक्रीयन्यायेन ज्ञानाऽऽदिकार्यलक्षणेन, अवग्रहप्रवेशे शय्याऽऽदिप्रवेशने, नैषेधिकी सामाचारीविशेषो भवति । तथेत्यवग्रहप्रवेशापेक्षया विशेषणान्तरसमुच्चयार्थः। तच्चेदम्-निषिद्धयोगस्येति । अथवा-तथाऽऽगमन्यायेन, निषिद्धयोगस्य निरुद्धासद्व्यापारस्य । कस्मादियमस्येत्याह-एतस्य निषिद्धयोगस्य, एष नैषेधिकीशब्दस्यार्थयोगो, नैषेधिकीशब्दोच्चार इत्यन्ये, उचितः संगतः । विपर्ययमाह-इतरस्यानिषिद्धयोगस्य पुनः, नैव उचित एष इति प्रकृतम् । चशब्दः पुनरर्थः । स च सम्बन्धित एव । कस्मान्नोचित इत्याह-नास्तीति न विद्यते अन्वर्थ इति कृत्वा । इति गाथार्थः ॥२२॥

अथ कस्मादवग्रहप्रवेशे नैषेधिकी विधेयेत्यत आह-

गुरुदेवोग्गहभूमी-ऍं जत्तओ चेव होति परिभोगो ।
इट्ठफलसाहगो सइ, अणिट्ठफलसाहगो इहरा ॥२३॥

गुरुदेवावग्रहभूम्या आचार्यदेवाधिष्ठेयाऽऽश्रयभुवः, यत्नत एव आशातनापरिहारप्रयत्नेनैव, चैवशब्दोऽवधारणे । भवति वर्तते परिभोगः । स च किंभूतः ?, इत्याह-इष्टफलसाधकः ईप्सितार्थनिष्पादकः, कर्मक्षयहेतुरित्यर्थः । सकृत्सर्वदा । इ० कव्यतिरेकमाह-अनिष्टफलसाधकः, कर्मबन्धहेतुरित्यर्थः। इतरथाऽन्यथा,अप्रयत्नत इत्यर्थः। गुरुदेवावग्रहभूमेः परिभोग इति प्रकृतम् । तत्र गुर्ववग्रहस्वरूपमावश्यके ऽभिहितम् । यथा-" आयप्पमाणमेत्तो, चउद्दिसिं होइ उग्गहो गुरुणो । " इति । देवावग्रहस्तु न क्वापि ग्रन्थे दृष्टः, केवलं भण्यमानः श्रुतः । यथा-"सत्थोग्गहो य तिविहो, उक्कोसजहन्नमज्झिमो चेव । उक्कोसो सट्ठिहत्थो, जहण्ण नव सेस विच्चालो ॥ १ ॥ " इति गाथार्थः ॥ २३ ॥

देवाऽऽद्यवग्रहभूमेरेव प्रयत्नपरिभोग्यतां समर्थयन्नाह-

एत्तो ओसरणाऽऽदिसु, दंसणमेत्ते गयाऽऽदिओसरणं ।
सुसइ चेइयसिहरा-ईसु सुस्सावगाणं पि ॥२४॥

(एत्तो त्ति) यतो गुर्वाद्यवग्रहभूमेः प्रयत्नपरिभोग इष्टफलसाधको भवतीतोऽस्मात्कारणात्, अवसरणाऽऽदिषु जिनसमवसरणप्रभृतिषु विषयभूतेषु, तेषामित्यर्थः । षष्ठ्यर्थत्वात्सप्तम्याः । आदिशब्दात्समवसरणसम्बन्धिमहेन्द्रध्वजचामरतोरणाऽऽदिपरिग्रहः । दर्शनमात्रे दृष्टिमात्र एव सति,गजाऽऽद्यपसरणं गजाऽश्वशिविकाप्रभृतिभ्यो देवावग्रहगमनप्रवहणेभ्योऽवतरणं प्रयत्नविशेषलक्षणम् , श्रूयते आकर्ण्यते प्रवचने तेषु तेष्वाख्यानकेषु, तथा चैत्यशिखराऽऽदिकेषु जिनभवनशिखरकलशध्वजप्रभृतिषु, एषामित्यर्थः । दर्शनमात्र इति वर्तते । सुश्रावकाणामपि श्रमणोपासकविशेषाणामपि, समवसरणजिनभवनाऽऽदिषु प्रवेष्टुकामानामिति गम्यते । सुसाधूनां पुनर्गुर्वाद्यवग्रहप्रवेशे प्रयत्नो विधेय इत्यर्थसंसूचनार्थोऽपिशब्दः । सुश्रावकग्रहणं चेतरेषामुक्तविशेषेऽन्यथात्वसंभवोपदर्शनार्थम् । इति गाथार्थः ॥ २४ ॥

अथ यस्य नैषेधिकी भावतो भवति, तमभिधित्सुराह-

जो होइ णिसिद्धप्पा, णिसीहिया तस्स भावतो होइ ।

अणिसिद्धस्स उ एसा, वइमेत्तं चेव दट्ठव्वा ॥ ३५ ॥

यः प्राणी, भवति स्यात्, निषिद्धो निवारितः सावद्ययोगेभ्य आत्मा स्वभावो येन स निषिद्धाऽऽत्मा । नैषेधिकी उक्तनिर्वचना, तस्य प्राणिनः, भावतः परमार्थतः, भवति स्यात् । अथोक्तविपर्ययमाह-अनिषिद्धस्य तु अनिवृत्तस्य पुनः, सावद्यादिति गम्यते । एषा नैषेधिकी, वाङ्मात्रं वाग्येव केवला, निरर्थकेत्यर्थः । भवति स्यात्, द्रष्टव्याऽवसेया । इति गाथाऽर्थः । पञ्चा० २२ विव० ।

साम्प्रतं नैषेधिकीं प्रतिपादयन्नाह-

सेज्जं ठाणं च जहिं, चेएइ तहिं निसीहिया होइ ।
जम्हा तत्थ निसिद्धो, तेणं तु निसीहिया होइ ॥

शेरते अस्यामिति शय्या-शयनस्थानं, तां शय्यां शयनस्थानं चेति स्थानमूर्द्धस्थानं, कायोत्सर्ग इत्यर्थः । यत्र चेतयते 'चिती' संज्ञाने । अनुभवरूपतया विजानाति, वेदयत इत्यर्थः । अथवा चेतयते करोति, धातूनामनेकार्थत्वात् । शयनक्रियां च कुर्वता निश्चयतः शय्या कृता भवति, ततश्च यत्र स्वपितीत्यर्थः । चशब्दो वीराऽऽसनाऽऽद्यनुक्तसमुच्चयार्थः । अथ वा तुशब्दार्थे द्रष्टव्यः, स च विशेषणार्थः । किं विशिनष्टीति चेत् ?, उच्यते-प्रतिक्रमणाऽऽद्यशेषकृतावश्यकः सन् अनुज्ञातो गुरुणां शय्यां स्थानं च यत्र चेतयते, तत्र एवंविधस्थितिक्रियाविशिष्टे स्थाने नैषेधिकी भवति, नाऽन्यत्र । किमित्थमत आह-यस्मात्तत्र निषिद्धोऽसौ, तेन कारणेन नैषेधिकी भवति, निषेधाऽऽत्मकत्वात्तस्या इति । पाठान्तरं वा-" सेज्जं ठाणं च जया, चेते तइया निसीहिया होइ । जम्हा तया निसीहा, निसेहमइया य सा जेण ॥१॥ " इयमुक्तार्थत्वात्सुगमैव । अनेन ग्रन्थेन मूलगाथया आवश्यकीं निर्गच्छन् यां च आगच्छन् नैषेधिकीं करोति, व्यञ्जनमेतद् द्विधेत्येतत् स्थितिरूपनैषेधिकीप्रतिपादनं व्यञ्जनभेदनिबन्धनमधिकृत्य व्याख्यातम् ।

साम्प्रतममुमेवार्थमुपसंजिहीर्षुराह भाष्यकारः-

आवस्सियं च नितो, जं च अयंतो निसीहियं कुणइ ।
सेज्जानिसीहियाए, निसीहियाअभिमुहो होइ ॥

आवश्यकीं निर्गच्छन् नैषेधिकीं करोति, तदेतद् व्याख्यातमिति शेषः । उपलक्षणमेतत् । ततः सह तृतीयपादेन व्यञ्जनमेतद् द्विधेत्यनेनेति द्रष्टव्यम् । साम्प्रतमर्थः पुनर्भवति, स एव गाथाऽवयवार्थः प्रतिपाद्यते । तत्र इत्थमेक एवार्थो भवति । यस्मान्नैषेधिक्यपि नावश्यकर्त्तव्यव्यापारगोचरतामतीत्य वर्तते, ततः संयमयोगानुपालनायाशेषपरिज्ञानार्थं चेत्यमाह-(सेज्जानिसीहियाए, निसीहियाअभिमुहो होइ इति) शय्यैव नैषेधिकी शय्यानैषेधिकी, तस्यां शय्यानैषेधिक्यां विषयभूतायाम्, किं शरीरमपि नैषेधिकीत्युच्यते ?, इत्यत आह-शरीरनैषेधिक्या करणभूतया आगमनं प्रत्यभिमुखः, ततः संवृतगात्रैः साधुभिर्भवितव्यमिति संज्ञां करोति, ततोऽवश्यकर्त्तव्यव्यापाररूपत्वाद् नैषेधिक्यप्यावश्यकीत्येक एवार्थः ।

एतदेव सुव्यक्तं भावयति—

जो होइ निसिद्धऽप्पा, निसीहिया तस्स भावतो होइ ।
अनिसिद्धस्स निसिहिया, केवलमेत्तं हवइ सद्दो ॥

यो भवति निषिद्धाऽऽत्मा-निषिद्धो मूलगुणोत्तरगुणातिचारेभ्य आत्मा येनेति समासः । नैषेधिकी । तस्य निषिद्धाऽऽत्मनो, भावतः परमार्थतो, भवति । न निषिद्धोऽनिषिद्ध उक्तेभ्य एवातिचारेभ्यः, तस्याऽनिषिद्धस्य अनुपयुक्ततया गच्छतो नैषेधिकीशब्दमात्रमेव केवलं भवति, न भावतः । आह-यदि नामैवं, तत एकार्थतायाः किमायातम् ?, उच्यते-निषिद्धाऽऽत्मनो नैषेधिकी भवतीत्युक्तम् ।

स च-

आवस्सयम्मि जुत्तो, नियमनिसिद्धो त्ति होइ नायव्वो ।
अहवा वि निसिद्धऽप्पा, नियमा आवस्सए जुत्तो ॥

आवश्यके मूलगुणोत्तरगुणानुष्ठानरूपे, युक्तः (नियमनिसिद्धो त्ति होइ नायव्वो इति) नियमेन निषिद्धो नियमनिषिद्ध इत्येव भवति ज्ञातव्यः । आवश्यकेऽपि चाऽऽवश्यकयुक्तस्यैवेत्यत एकार्थता । अथवेति प्रकारान्तरदर्शनार्थः, अपिशब्दस्य व्यवहितः सम्बन्धः । निषिद्धाऽऽत्माऽपि नियमादावश्यके युक्तो, यतोऽप्येकार्थतेति । पाठान्तरम्-"अहवा वि निसिरुऽप्पा, सिद्धाणं अंतियं जाइ ।" इति । अस्यायमर्थः-तदेवं तावत् क्रियाया अभेदेन एकार्थता उक्ता, इह तु कार्याभेदेनैकार्थतोच्यते । अथवेति प्रकारान्तरे, निषिद्धाऽऽत्माऽपि सिद्धानामन्तिकं समीपं याति गच्छति । अपिशब्दादावश्यकयुक्तोऽप्यतः कार्याभेदादेकार्थता । आ० म० १ अ० २ खण्ड । आ०चू० । उत्त० । निषेधेन स्वाध्यायव्यतिरिक्तशेषव्यापारप्रतिषेधेन निर्वृत्ता नैषेधिकी । स्वाध्यायमात्रनिमित्ते स्थाने, व्य० १ उ० ।

तत्र का नैषेधिकी, का वाऽभिशय्या ?, इति व्याख्यानयति-

ठाणं निसीहिय त्ति य, एगट्ठं जत्थ ठाणमेवेगं ।
चिंतेति निसिहियं वा, सुत्तऽत्थनिसीहिया सा उ ॥
सज्झायं काऊणं, निसीहियातो निसिं निय वएंति ।
अनिवसिउं जत्थ निसिं, उवेंति पातो तई सेज्जा ॥

तिष्ठन्ति स्वाध्यायव्यापृता अस्मिन्निति स्थानम् । निषेधेन स्वाध्यायव्यतिरिक्तशेषव्यापारप्रतिषेधेन निवृत्ता नैषेधिकी । ततः स्थानमिति वा नैषेधिकीति वा (एगट्ठमिति) एकार्थम्, द्वावप्येतौ तुल्यार्थाविति भावः । व्युत्पत्त्यर्थस्य द्वयोरप्यविशिष्टत्वात् । तत्र यत्र स्थानमेव स्वाध्यायनिमित्तमेकं, न तु ऊर्ध्वं स्थानं, त्वग्वर्तनस्थानं वा । चेतयन्ति निशि रात्रौ, दिवा वा, सा सूत्रार्थहेतुभूता नैषेधिकी । एतेनास्मिन् या नैषेधिकयुक्ता सा सूत्रार्थप्रायोग्या नैषेधिकी प्रतिपत्तव्या, न तु कालकरणप्रायोग्या नैषेधिकी प्रतिपत्तव्या । किमुक्तं भवति ?-यस्यां नैषेधिक्यां दिवा स्वाध्यायं कृत्वा दिवैव, यदि वा निशि च स्वाध्यायं कृत्वा निशैव, निशायामवश्यं नैषेधिकीतो वसतिमुपयन्ति, सा नैषेधिकी, यस्यां पुनर्नैषेधिक्यां दिवा निशायां वा स्वाध्यायं कृत्वा रात्रिमुषित्वा प्रातर्वसतिमुपयन्ति (तई इति) तका अनिशय्या अनिनिषद्येति भावः । व्य० १ उ० । सोपऽवेशनरायां स्वाध्यायभूमौ, स० २३ सम० । ज्ञा० । स्था० । " सिज्जा निसीहियाए य, समावन्नो य गोयरे ।" शय्यायां वसतौ नैषेधिक्यां स्वाध्यायभूमौ शय्यैव वाऽसमञ्जसनिषेधान्नैषेधिकी, तस्यां समापन्नः । दश० ५ अ० २ उ० । स्वाध्यायकरणे, उत्त० २६ अ० । शवपरिष्ठापनभूमौ, अनु० । गृहाऽऽदिव्यापारपरिहारे, सङ्घा० १ अधि० १ प्रस्ता० ।

णिसीहियापरिसह–नैषेधिकीपरिषह–पुं० । निषेधनं निषेधः पापकर्मणां गमनाऽऽदिक्रियायाश्च, स प्रयोजनमस्या नैषेधिकी, श्मशानाऽऽदिस्वाध्यायाऽऽदिभूमिर्निषद्येति यावत्। सैव च परिषहो नैषेधिकीपरिषहः । उत्त०२ अ० । नैषेधिकी स्वाध्यायभूमिः शून्यागाराऽऽदिरूपा,तत्परिषहणं च तत्रोपसर्गेष्वत्रासः । भ० ८ श० ८ उ० । निषद्यापरिषहे, यथा–" श्मशानाऽऽदौ निषद्यायां, स्त्र्यादिकण्टकवर्जिते । उपसर्गाननिष्टेष्टान्, निरीहो निर्भयः सहेत् ॥१॥" ध०२ अधि० । "श्मशानाऽऽदिनिषद्यास्तु,स्त्र्यादिकण्टकवर्जिते । उपसर्गाननिष्टेष्टा–नैकोऽजीरस्पृहः क्षमेत ॥१॥" आ० म० १ अ० २ खण्ड० ।

एतदेव सूत्रकार आह–

सुसाणे सुन्नगारे वा, रुक्खमूले व एगओ ।
अकुक्कुओ निसीएज्जा, न य वित्तासए परं ॥ ३० ॥

(सुसाणे इति) शवानां शयनमस्मिन्निति श्मशानं, तस्मिन् पितृवने, श्वभ्यो हितमिति वाक्ये " शुनश्चादिभ्यो यद् " ॥५।१।२॥ इत्यत्र " शुनः संप्रसारणं दीर्घत्वम्।" (वा०) इति वचनतो यति संप्रसारणे दीर्घत्वे च शून्यम्, तच्च तदगारं च शून्यागारं, तस्मिन् वा । वृक्ष्यत इति वृक्षः, तस्य मूलमधो भूभागो वृक्षमूलं, तस्मिन् वा, एक इक्करूपः, स एवैककः, एको वा प्रतिमाप्रतिपत्त्यादौ गच्छतीत्येकगः, एकं वा कर्मसाहित्यविगमतामोक्षं गच्छति तत्प्राप्तियोग्यानुष्ठानप्रवृत्तेर्यातीत्येकगः, अकुक्कुचोऽशिष्टचेष्टारहितो, निषीदेत् तिष्ठेत्, न च नैव, वित्रासयेत परम् अन्यम् । किमुक्तं भवति ?–"पडिमं पमिवज्जिया मसाणे, नो भायए भयभेरवाइं दिस्स । विविहगुणतवोरए य निच्चं, सरीरं चाभिकंखए स भिक्खू ॥" इत्यागममनुस्मरन् श्मशानाऽऽदावप्येककोऽप्यनेकभयानकोपलम्भेऽपि न स्वयं संविभीयाद्, न च विकृतस्वरमुखविकाराऽऽदिभिरन्येषां भयमुत्पादयेत्। यद्वा–(अकुक्कुए त्ति) अकुकुचः कुष्ठचादिविराधनानयात्कर्मबन्धहेतुत्वेन कुत्सितहस्तपादाऽऽदिभिरस्पन्दमानो निषीदेत्। न च वित्रासयेत् विक्षोभयेत, परमुन्दुराऽऽदि। मा भूदसंयम इति सूत्रार्थः ॥ २० ॥

तत्र च तिष्ठतः कदाचिदुपसर्गोत्पत्तौ यत्कृत्यं तदाह–

तत्थ से अत्थमाणस्स, उवसग्गाऽभिधारए ।
संकाभीओ न गच्छेज्जा, उट्ठित्ता अन्नमासणं ॥ २१ ॥

तत्रेति श्मशानाऽऽदौ 'से' तस्य तिष्ठतः । तथा च–'अत्थमाणस्स त्ति' आसीनस्य, उप सामीप्येन सृज्यन्ते तिर्यङ्मनुष्यामरैः कर्मवशगेनाऽऽत्मना वा क्रियन्त इत्युपसर्गाः, तेऽभिधारयेयुः, अन्तर्भावितेवार्थत्वादभिधारयेयुरिव । कोऽर्थः?–उत्कटतयाऽत्यन्तोत्सिक्तारिपुवदभिमुखीकुर्युरिव। यथैते सह्या वयं, तत्प्रगुणीभूयाऽऽजिमुखैः स्थेयमिति । यद्वा–सोपस्कारत्वात् सूत्राणाम्, उपसर्गाः संजनयेयुस्ततस्तानभिधारयेत्। किमेते ममाचलितचेतसः कर्तुमलमिति चिन्तयेत् । पठ्यते च–"उवसग्गभयं नच्चे।" इति सुगमम । शङ्कानीत इति । तत्कृतापकारशङ्कातो भीतत्रस्तो न गच्छेन्न यायादुत्थाय । कोऽर्थः ?–तत्स्थानमपदाय अन्यदपरम्, आस्यतेऽस्मिन्नित्यासनं स्थानमिति सूत्रार्थः ॥ २१ ॥ उत्त० पाई० ३ अ० ।

णिक्खंतो गयपुरओ, कुरुदत्तसुओ गओ य साएए ।
पडिमंठियस्स कुडिया, अग्गी सीसम्मि जाहेति ॥४३॥ उत्त०नि० ।

निष्क्रान्तः प्रव्रजितो गजपुरात् कुरुदत्तसुतो, गतश्च साकेतम्, प्रतिमास्थितस्य (कुटिय त्ति) हतगवेषकाः, अग्निं शिरसि ज्वालयन्तीति गाथाऽक्षरार्थः भावार्थस्तु वृद्धसम्प्रदायादवसेयः । उत्त० ३ अ० ।

अथ कुरुदत्त (सुत) साधुकथा–अत्र नैषेधिकीपरिषहः । कोऽर्थः ?, यथा ग्रामाऽऽदिषु अप्रतिबद्धेन चर्यापरिषहः सहनीयः, तथा शरीरेऽप्रतिबद्धेन नैषेधिकीपरिषहः सहनीयः । नैषेधिकी नाम शरीरमित्यर्थः । अथ कथा–हस्तिनागपुरे हस्तिपुत्रः कुरुदत्त (सुत) नामा प्रव्रजितः विहरन् क्रमात् साकेतपुराद्दूरप्रदेशे प्रतिमायां स्थितः । तत्र चरमपौरुष्यां गोधनापहारिणश्चौराः समायाताः, तत्पृष्ठे त्वरितं गताः, पश्चाद् गोस्वामिनः समायाताः । तैश्चौरमार्गस्वरूपे पृष्टे स यतिः न किञ्चिद् ब्रूते । ततः संजातकोपैस्तैः शिरसि मृत्पार्लिं कृत्वाऽङ्गारान् क्षिप्ताः, स यतिर्मनागपसृतः तां वेदनामधिसहमानः सिद्धिं गतः । उत्त० २ अ० ।

णिसीहियाय–निशीथिकारत–त्रि० । स्वाध्यायध्यायिनि, आचा० २ श्रु० १ चू० ३ अ० ।

णिसीहियासत्तिक्कय–निशीथिकासप्तैककक–न० । आचाराङ्गस्य द्वितीयश्रुतस्कन्धस्य सप्तैककस्याष्टमाध्ययनस्य द्वितीये निशीथिकाप्रतिपादकेऽध्ययने, आचा० २ श्रु० २ चू० । स्था० ।

णिसुअ–देशी–श्रुते, दे० ना० ४ वर्ग २७ गाथा ।

णिसुंभ–निशुम्भ–पुं० । पञ्चमे प्रतिवासुदेवे, प्रव० २११ द्वार । ति० । आव० । पातिते, दे० ना० ४ वर्ग ३६ गाथा ।

णिसुंभण–निपातयत्–त्रि० । भूमौ पातयति, सूत्र० १ श्रु० ५ अ० १ उ० ।

णिसुंभा–निशुम्भा–स्त्री० । बलेर्वैरोचनेन्द्रस्य पञ्चानामग्रमहिष्याम्, स्था०५ ठा०२ उ० । ज्ञा० । (अस्याः पूर्वोत्तरजन्मकथा अग्गमहिसी ' शब्दे प्रथमभागे १७० पृष्ठे उक्ता)

णिसुट्ठ–निपातित–त्रि० । " क्तेनाऽफुल्लाऽऽदयः " ॥ ८ । ४ । २५५ ॥ इति निपातितशब्दस्य निसुट्ठाऽऽदेशः । प्रा० ४ पाद ।

णिसुढ–नम्–धा० । नतौ, भाराऽऽक्रान्तेर्नमेर्णिसुढ इत्यादेशः । 'णिसुढइ' । भाराऽऽक्रान्तो नमतीत्यर्थः । प्रा० ४ पाद ।

णिसुणिऊण–निश्रुत्य–अव्य० । श्रवणं कृत्वेत्यर्थे, जीवा० १ अधि० ।

णिसेज्जा–निषद्या–स्त्री० । स्त्रीवसतौ, स्त्रीभिः कृतायां मायायाम, " तम्हा समणा ण समेंति आयहियाए सण्णिसेज्जाए।" सूत्र० १ श्रु० ४ अ० १ उ० । पण्यशालायाम, दृष्टे, कुड्यखट्वायाम् । वाच० । ' णिसज्जा ' शब्दार्थे च । प्रव० ६७ द्वार ।

णिसेय–निषेक–पुं० । कर्मपुद्गलानां प्रतिसमयानुभावरचनायाम्, स्था०६ ठा० । आचा० । गर्भाधाने, "निषेकाऽऽदि श्मशानान्तम्।" इति मनुः । वाच० ।

णिसेविय–निषेवित–त्रि० । आसेविते, आ० म० १ अ० १ खण्ड । आश्रिते, उत्त० २० अ० ।

णिसेह–निषेध–पुं० । 'षिध' गत्यामस्य निपूर्वस्य घञि निषेधनं निषेधः । आव० ३ अ० । निवारणायाम, पञ्चा० ११ विव० ।

णिसेहण–निषेधन–न० । वारणे, आ० म० १ अ० २ खण्ड ।

णिसेहणा–निषेधना–स्त्री० । वारणायाम्, आव० १ अ० ।

णिसेहिया–नैषेधिकी–स्त्री० । निषिध्यन्ते निराक्रियन्तेऽस्यां कर्माणीति नैषेधिकी निर्वाणभूमिः । "कृत्यल्युटोऽन्यत्रापि" इत्यत्राधिग्रहणबलाद् ल्युट् । यदि वा निषेधे सकलकर्मानेराकरणलक्षणे तथा नैषेधिकी । मुक्तिगतौ, उत्त० १० अ० । शवपरिष्ठापनाभूमौ, ग० २ अधि० । निषीदनस्थाने, आरकूटसमीपे निषद्यायां, स्त्री० ३ प्रति० ४ उ० ।

णिस्फल–निष्फल–त्रि० । " सषोः संयोगे सोऽध्वोध्वे " ॥८ ।४। २७१ । इति सकारसंयोगे स एव । प्रा० ४ पाद । फलरहिते, प्रा० ४ पाद ।

णिस्संक–निःशङ्क–त्रि० । निर्गते, इहपरलोकाऽऽशङ्कारहिते, व्य० १० उ० । शङ्काया अभावो निःशङ्कम् । संशयाभावे, पञ्चा० ९ विव० । निर्गता शङ्का देशसर्वशङ्कारूपा यस्य स निःशङ्कः । सूत्र० २ श्रु० ७ अ० । आचा० । शङ्कारहिते, उत्त० १९ अ० । निर्भरे, दे० ना० ४ वर्ग ३२ गाथा ।

णिस्संकिय–निःशङ्कित–त्रि० । शङ्कनं शङ्कितं शङ्का, निर्गतं शङ्कितं यस्मादसौ निःशङ्कितः । देशसर्वशङ्कारहिते, व्य० १ उ० । दश० । ध० । ग० । नि० चू० । उत्त० । स्था० । निःसंशये, रा० । शङ्कनं शङ्कितं देशतः सर्वतश्च शङ्काऽऽत्मकम् । तस्याभावो निःशङ्कितम् । उत्त० २० अ० । प्रव० । संशयाभावे निःसंदेहे, औ० ।

णिस्संग–निस्सङ्ग–त्रि० । बाह्याभ्यन्तरसङ्गरहिते, आ० म० १ अ० १ खण्ड । उत्त० । पुत्रकलत्रमित्रधनधान्यहिरण्यसुवर्णाऽऽदिसकलसम्बन्धविकले, पा० । आव० ।

णिस्संचार–निस्संचार–त्रि० । द्वारापद्वारैर्जनप्रवेशनिर्गमवर्जिते, द्वा० १ द्वा० ८ अ० ।

णिस्संत–निःशान्त–त्रि० । नितरामतिशयेन शान्त उपशमो यस्याऽन्तः क्रोधपरिहारेण बहिश्च प्रशान्ताऽऽकारतया निःशान्तः । उत्त० १ अ० । अत्यन्तमन्दभूते, रा० ।

णिस्संधि–निस्सन्धि–त्रि० । निर्विवरे, " णिस्संधिचारविरहिया । " प्रश्न० १ आश्र० द्वार ।

णिस्संस–निःशंस–त्रि० । श्लाघारहिते, प्रश्न० २ आश्र० द्वार ।

णिस्संसय–निस्संशय–त्रि० । संदेहाभावे, "ततो णिज्जीवं निस्संसयं मुणिऊण । " आ० म० १ अ० १ खण्ड । सूत्र० ।

णिस्सङ्क–निःसङ्क–त्रि० । नष्टसङ्के, सूत्र० १ श्रु० ५ अ० १ उ० ।

णिस्सयर–निःस्वकर–न० । स्वकर्मनादिसम्बन्धबन्धनदहनसमर्थानि निःस्वकराणि । कर्मविश्लेषकेषु, आचा० २ श्रु० ४ चू० १ अ० ।

णिस्सरण–निःसरण–न० । पलायने, व्य० १ उ० । निर्गमे, स्था० ४ ठा० २ उ० ।

णिस्सरणणंदि [ण्]–निःसरणनन्दिन्–त्रि० । निःसरणेन निर्गमेण नन्दति यो, नन्दिर्वा यस्य स निःसरणनन्दी । प्राप्तपंकशिष्याऽऽदीनामात्मनो वा गच्छाऽऽदेर्निर्गमेन प्रसन्ने पुरुषजाते, स्था० ४ ठा० २ उ० ।

णिस्सरिअ–देशी–त्रस्ते, दे० ना० ४ वर्ग ४० गाथा ।

णिस्सल्ल–निःशल्य–त्रि० । मिथ्यादर्शनाऽऽदिशल्यरहिते, स० ६ सम० । आ० म० । उत्त० ।

णिस्सह–निःसह–त्रि० । नितरामशक्ते, स० ६ अङ्ग० ।

णिस्सा–निश्रा–स्त्री० । रागे, व्य० १ उ० । पक्षपाते, व्य० ३ उ० । उपसंपदि, व्य० ४ उ० । आश्रयणे, भ० ३ श० २ उ० ।

णिस्साठाण–निश्रास्थान–न० । अवलम्बनस्थाने, उपग्रहहेतौ, स्था० ।

धम्मं पं चरमाणस्स पंच णिस्साठाणा पण्णत्ता । तं जहा–छक्काया, गणो, राया, गाहावई, सरीरं ।

धर्मं श्रुतचारित्ररूपं, प्रभित्यलङ्कारे, चरतः सेवमानस्य, पञ्च निश्रास्थानान्यवलम्बनस्थानानि, उपग्रहहेतव इत्यर्थः । षट्कायाः पृथिव्यादयः, तेषां च संयमोपकारिता आगमप्रसिद्धा ।

तथाहि–पृथिवीकायमाश्रित्योक्तम्–

" ठाणनिसीयतुयट्टण-उच्चारादीण गहणनिक्खेवे ।
घट्टणमगलगलेवो, एमाइ पओयणं बहुहा ॥ १ ॥ "

अप्कायमाश्रित्य–

" परिसेयपियणहत्था-इओयणे वीरओयणे चेव ।
आयमणभाणधुयणे, एमाइ पओयणं बहुहा ॥२॥ "

तेजस्कायमधिकृत्य–

" ओयणवंजणपाणग-आयामुसिणोदगं च कुम्मासा ।
मगलगसरक्खसूइय-पिप्पलमाई य उवओगो ॥ ३ ॥ "

वायुकायमभि–

" दइएण धत्थिणा वा, पओयणं होज्ज वाउणा मुणिणो ।
तेल्लणणम्मि वि होज्जा, सचित्तमीसे परिहरेज्जा ॥४॥"

वनस्पतिं प्रति–

" संथारपायदंड-ग-लोमियकप्पायपीढफलगाई ।
ओसहभेसज्जाणि य, एमाइ पओअणं तरुसु ॥ ५ ॥ "

त्रसकाये पञ्चेन्द्रियतिरश्चमाश्रित्योक्तम्–

"चम्मऽट्ठिदंतनहरो-मसिंगअमिलाणजंगणगोमुत्ते ।
खीरदहिमाइयाणं, पंचिंदियतिरियपरिभोगे " ॥६॥

एवं विकलेन्द्रियमनुष्यदेवानामप्युपग्रहकारिता वाच्या ।

तथा गणो गच्छः, तस्य चोपग्राहिता–" एगस्स कओ धम्मो, " इत्यादिगाथापूर्वादवसेया ।

तथा–

"गुरुपरिवारो गच्छो, तत्थ वसंताण निज्जरा विउला ।
विणयाउ तहा सारण-माईहिं न दोसपसिद्धी ॥ ७ ॥
अन्नत्ताचेक्खाए, लागंति तहिं पयट्टतो ।
नियमेण गच्छवासी, असंगपयसाहगे नेओ ॥ ८ ॥ " इति ।

तथा राजा नरपतिः, तस्य धर्मसहायकत्वं दुष्टेभ्यः साधुरक्षणात् ।

उक्तं च लौकिकैः–

क्षुद्रलोकाऽऽकुले लोके, धर्मं कुर्युः कथं हि ते ?।
क्षान्ता दान्ता अहन्तार-स्तेऽद्याऽजा तान् रक्षति ॥ १ ॥ "

तथा–

" अराजके हि लोकेऽस्मिन्, सर्वतो विद्रुते भयात् ।
रक्षार्थमस्य सर्वस्य, राजानमसृजत्प्रभुः ॥ २ ॥ " इति ।

तथा गृहपतिः शय्यादाता, सोऽपि निश्रास्थानम्, स्थानदानेन संयमोपकारित्वात् ।

यदुक्तम्-

" धृतिस्तेन दत्ता मतिस्तेन दत्ता,
गतिस्तेन दत्ता सुखं तेन दत्तम् ।
गुणश्रीसमालिङ्गितेभ्यो वरेभ्यो,
मुनिभ्यो मुदा येन दत्तो निवासः" ॥ १ ॥

तथा--

" ओ देह उवसयं जइ-वराण तवनियमजोगजुत्ताणं ।
तेणं दिण्णा वत्थ-ऽन्नपाणसयणासणविगप्पं " ॥१॥ इति ।

तथा शरीरं कायः, अस्य च धर्मोपग्राहिता स्फुटैव ।

यतोऽवाचि-

" शरीरं धर्मसंयुक्तं, रक्षणीयं प्रयत्नतः ।
शरीरात् स्रवते धर्मः, पर्वतात्सलिलं यथा " ॥ १ ॥ इति ।

स्रवति चाश्रा ऽऽर्या-

" धर्मं चरतः साधो-र्लोके निश्रापदानि पञ्चैव ।
राजा गृहपतिरपरः, षट्कायाः गणशरीरे च " ॥ १ ॥

इति । शेषं सुगमम् । स्था० ५ ठा० ३ उ० ।

णिस्साण–निश्राण–न० । आलम्बने, " णिस्साणपेहि त्ति अवधातपेहि त्ति वुत्तं भवति । " नि० चू० १ उ० । प्रश्न० ।

णिस्साणपय–निश्राणपद–न० । निश्रायते मन्दश्रद्धाकैरासेव्यते इति निश्राणं, तच्च तत्पदं च निश्राणपदम् । अपवादे, बृ० १ उ० ।

णिस्सार–निःसार–त्रि० । सारवर्जिते प्रज्ञालिप्राग्यगुणवान्ये, स० ६ अङ्ग । सारो हि विषयगणरसतत्प्राप्तौ तृप्तिस्तदभावान्निःसारम् । तथाविधसाररहिते, आचा० १ श्रु० ३ अ० २ उ० । जीर्णे, आचा० १ श्रु० ४ अ० ३ उ० । वेदवचनाऽऽदिवस्तथाविधयुक्तिरहिते परिफल्गुश्रुते, अनु० । विशे० । यत्र सारोऽर्थो न विद्यते अस्थि चर्म शिराघृष्टं क्षुद्र इति । बृ० १ उ० ।

णिस्सारय–निस्सार[वत्]–त्रि० । निर्गत एकान्ततः सारभूतेभ्योऽन्यो यस्य स निःसारः । यदि वा निर्गतस्य सारो निःसारः, स विद्यते यस्याऽसौ निःसारवान् । साररहिते, "णिस्सारए होइ जहा पुलाए । " सूत्र० १ श्रु० ७ अ० ।

णिस्सारिय–निःसारित–त्रि० । संयमाच्च्याविते, विषयोन्मुखतामापादिते, सूत्र० १ श्रु० १४ अ० ।

णिस्सावयण–निश्रावचन–न० । निश्रया वचनं निश्रावचनम् । आहरणतद्देशभेदे, स्था० । कमपि सुशिष्यमालक्ष्य यदन्यप्रबोधार्थं वचनं निश्रावचनं, तच्च विधेयतयोच्यते तदाहरणं निश्रावचनम्-यथा अलहनान् शिनेयान् मार्दवसम्पन्नमन्यमालक्ष्य किञ्चिद् ब्रूयात्, गौतममाश्रित्य भगवानिवेति । तथाहि-किल गौतमं तापसाऽऽदिप्रव्रजितानां केवलोत्पत्तावनुत्पन्नकेवलत्वेनाधृतिमन्तं चिरसंसृष्टोऽसि गौतम !, चिरपरिचितोऽसि गौतम !, मा त्वमधृतिं कार्षीरित्यादिना वचनसंदोहेनानुशासयताऽन्येऽप्यनुशासिताः, तदनुशासनार्थं द्रुमपत्रकाध्ययनं च प्रणिन्ये इति । उक्तं च-" पुच्छाएँ कोसिओ खलु, निस्सावयणम्मि गोयमस्सामी । " स्था० ४ ठा० ३ उ० ।

णिस्सिचमाण–निस्सिञ्चत्–त्रि० । दत्त्वोद्धरितं प्रक्षिपति, "उस्सिचमाणे वा निस्सिचमाणे वा आमज्जमाणे वा पमज्जमाणे वा ।" आचा० २ श्रु० १ चू० ६ अ० ६ उ० ।

णिस्सिचिय–निःसिच्य–अव्य० । तद्भाजनाऽहितं द्रव्यमन्यत्र भाजने क्षिप्त्वेत्यर्थे, दश० ५ अ० १ उ० ।

णिस्सिय–निःश्रित–त्रि० । 'श्रिञ्' सेवायाम् । आ० चू० ४ अ० । निश्रयेण श्रितः संबद्धो निःश्रितः । अध्युपपन्ने, सूत्र० १ श्रु० २ अ० ३ उ० । संबद्धे, प्रवृत्ते, प्रतिबद्धे, सूत्र० १ श्रु० १० अ० । प्रश्न० । लिङ्गप्रमिते, स्था० ६ ठा० । सम्म० । आश्रिते, स्था० १० ठा० । स० । सूत्र० । आसक्ते, सूत्र० १ श्रु० १ अ० १ उ० । भावे क्तः । रागे, आहाराऽऽदिप्रक्षिप्तायाम्, स्था० ७ ठा० । निश्रा रागः, निश्रा संजाताऽस्येति निश्रितः रक्ते, सर्वाऽऽशंसायुक्ते, शिष्यत्वाऽऽदिप्रतिपन्ने, स्था० ५ ठा० २ उ० ।

निःसृत–त्रि० । निर्गते, स्था० ७ ठा० । आचा० । " तं चिय सरूवओ जं, अणिस्सियमिमं ति ।" तमेव लिङ्गनिश्रया जानानो निःसृतं मुणतीत्युच्यते । विशे० ।

णिस्सील–निःशील–त्रि० । निर्गतशुभस्वभावे दुःशीले, स्था० ३ ठा० १ उ० । सुस्वभाववर्जिते, स्था० ३ ठा० २ उ० । गताऽऽचारे, जं० २ वक्ष० । समाधानरहिते, भ० १२ श० ८ उ० । अपगतशुभस्वभावे, ज्ञा० १ श्रु० १८ अ० । महाव्रताणुव्रतविकले, भ० ७ श० ६ उ० । ब्रह्मचर्मपरिणामाभावात् (दश० ५ अ०) गृहस्थे, सूत्र० १ श्रु० १ अ० १ उ० । (निःशीलानां वैविध्यं ' लोग ' शब्दे वक्ष्यते)

तओ ठाणा णिस्सीलस्स णिव्वयस्स णिग्गुणस्स णिम्मेरस्स णिप्पच्चक्खाणपोसहोववासस्स गरहिया भवंति । तं जहा-अस्सिं लोए गरहिए भवइ, उववाए गरहिए भवइ, आयाइगरहिए भवइ । तओ ठाणा ससीलस्स सव्वयस्स सगुणस्स समेरस्स सपच्चक्खाणपोसहोववासस्स पसत्था भवंति । तं जहा-अस्सिं लोगे पसत्थे भवइ, उववाए पसत्थे भवइ, आयाए पसत्थे भवइ ॥

(तओ ठाणा इत्यादि) त्रीणि स्थानानि निःशीलस्य सामान्येन शुभस्वभाववर्जितस्य, विशेषतः पुनर्निर्व्रतस्य प्राणातिपाताऽऽद्यनिवृत्तस्य निर्गुणस्योत्तरगुणापेक्षया, निर्मर्यादस्य लोककुलाऽऽद्यपेक्षया, निःप्रत्याख्यानपोषधोपवासस्य गर्हितानि जुगुप्सितानि भवन्ति । तद्यथा—(अस्सिं ति) विभक्तिपरिणामादयं लोकः ' इदं जन्म ' गर्हितो भवति, पापप्रकृत्या विद्वज्जनजुगुप्सितत्वात् । तथा उपपातोऽकामनिर्जराऽऽदिजनितः किल्बिषाऽऽदिदेवभवो नारकभवो वा, उपपातो देवनारकाणामिति वचनात्, स गर्हितो भवति, किल्बिषाद्यियोग्याऽऽदिरूपतयेति, आजातिस्तस्मात् च्युतस्योद्वृत्तस्य वा कुमानुषत्वतिर्यक्त्वरूपा गर्हिता, कुमानुषाऽऽदित्वादेवेति । उक्तविपर्ययमाह-(तओ इत्यादि) निगदसिद्धम् । स्था० ३ ठा० २ उ० ।

णिस्सेणि–निःश्रेणि–स्त्री० । अवतरणयाम्, प्रश्न० १ आश्र० द्वार । आचा० ।

णिस्सेयस–निःश्रेयस–न० । निश्चितं श्रेयः प्रशस्यम् । स्था० ३ ठा० ४ उ० । कल्याणे, स्था० ६ ठा० । कर्मक्षयहेतुत्वात् (आचा० १ श्रु० ८ अ० ४ उ०) अभ्युदयप्राप्तौ, उत्त० ९ अ० । निश्चितकल्याणे मोक्षे, दश० ४ अ० । मोक्षे, नि० १ श्रु० १ वर्ग १ अ० । स्था० । औ० । नं० । दश० ।

आ० म० । ध० । स्था० । अभिलषितविषयावाप्त्याऽभ्युदये, उत्त० ८ अ० ।

णिस्सेयसिय–नैःश्रेयसिक–त्रि० । निःश्रेयसं विपद्मोक्षमिच्छतीति नैःश्रेयसिकः । भ० १५ श० । निःश्रेयसं मोक्षः,तत्र नियुक्त इव नैःश्रेयसिकः । मोक्षयोग्ये मोक्षार्थिनि, प्रति० । भ० ।

णिस्सेस–निःशेष–त्रि० । सम्पूर्णे, दश० ९ अ० २ उ० ।

णिस्सेसकम्ममुक्क–निःशेषकर्ममुक्त–त्रि० । क्षीणसकलकर्मणि, पञ्चा० २ विव० ।

णिहु–निभृ–त्रि० । सदृशे, आ० म० १ अ० १ खण्ड ।

निहु–त्रि० । निहन्यते निहः । निपूर्वाद्धन्तेः कर्मणि डः । आचा० १ श्रु० २ अ० ३ उ० । मायिनि, सूत्र० १ श्रु० ६ अ० । क्रोधादिभिः पीडिते, सूत्र० १ श्रु० २ अ० १ उ० । निहन्यते प्राणिनः कर्मवशगा यस्मिन् तन्निहम् । आघातस्थाने, सूत्र० १ श्रु० ५ अ० २ उ० ।

स्निह–त्रि० । स्निह्यते स्निह्यते अष्टप्रकारेण कर्मणा इति स्निहः । रागवति, आचा० १ श्रु० ४ अ० ३ उ० । रागद्वेषयुक्ते, आचा० १ श्रु० ५ अ० ३ उ० । ममत्वसहिते, सूत्र० १ श्रु० २ अ० २ उ० ।

णिहट्टु–निर्हृत्य–अव्य० । पृथक् कृत्वेत्यर्थे, " बहु अट्ठियं मंसं पडिभाएत्ता णिहट्टु दलएज्जा । " आचा० २ श्रु० १ चू० १ अ० १० उ० ।

निहत्य–अव्य० । स्थापयित्वेत्यर्थे, ज्ञा० १ श्रु० १६ अ० ।

णिहट्ठु–निघृष्ट–त्रि० । कृतनिघर्षे, " तहिअसणिहट्ठाणंग । " प्रा० २ पाद ।

णिहण–निधन–न० । विनाशे, सम्म० १ काण्ड । पर्यन्ते, द० शै० ४ तत्त्व । " तत्थेव णिहणमुवगतो । " आ० म० १ अ० १ खण्ड । "णिहणाहि रागदोसमल्ले । " कल्प० ५ क्षण । कूले, दे० ना० ४ वर्ग २७ गाथा ।

णिहणिसु–निहतवत्–क्रियावति, आचा० १ श्रु० ६ अ० ३ उ० ।

णिहत्त–निधत्त–न० । निधानं निहितं वा निधत्तं, भावे कर्मणि क्तप्रत्यये निपातनात् । उद्वर्तनापवर्तनावर्जितशेषकरणानामयोग्यत्वेन कर्मणाऽवस्थापने, स्था० ४ ठा० २ उ० । भ० । निषिक्ते, निषेकश्च प्रतिसमयबहुहीनहीनतरस्य दलिकस्यानुभवनार्थं रचना (स० । स्था० । सूत्र०) निक्षिप्ते, प्रमाणे, निकाचिते, "मागहस्स णं जोयणस्स अट्ठधणुसहस्साइं निधत्ते पण्णत्ते ।" स्था० ८ ठा० ।

णिहत्ति–निधत्ति–स्त्री० । उद्वर्तनापवर्तनावर्जशेषकरणाऽयोग्यत्वेन व्यवस्थापने, क० प्र० १ प्रक० ।

णिहम्म–निहन्म–धा० । गतौ, ' णिहम्मइ ' । ' णीहम्मइ । ' आहम्मइ ' । ' पहम्मइ । ' इत्येते तु हन्मगताविति धातोरेव भविष्यन्ति । गच्छति । प्रा० ४ पाद ।

णिहय–निहत–त्रि० । मारिते, " जक्खा हु वेयावमिणं करेंति, तम्हा उ एए णिहया कुमारा ।" (३२) उत्त० १२ अ० । निजयेन हन्यते इति निहतः । जातरिपुभिरिन्द्रियकषायकर्मभिर्हन्यमाने, आचा० १ श्रु० ४ अ० ३ उ० ।

णिहयकंटय–निहतकण्टक–त्रि० । निहता मारणात्कण्टका दायादा यत्र राज्ये तत् तथा । मारितदायादे, स्था० ७ ठा० ।

णिहयरय–निहतरजस्–त्रि० । निहतं रजो यूय इत्थानासम्भवाद् यत्र तन्निहतरजः । शान्तरजसि, रा० । " अप्पेगतिया देवा णिहयरयं णट्ठरयं भट्ठरयं उवसंतरयं पसंतरयं करेंति । " निहतं रजो यस्यां सा निहतरजास्तां, तत्र निहतत्वं रजसः क्षणमात्रमुत्थानाभावेनाऽपि सम्भवति । जी० ३ प्रति० ४ उ० । रा० ।

णिहयसत्तु–निहतशत्रु–त्रि० । निहता रणाङ्गणे पतिताः शत्रवो यत्र तन्निहतशत्रु । हतशत्रुके, " ओहयसत्तु णिहयसत्तु मलियसत्तु निज्जियसत्तु ।" रा० । स्था० । सूत्र० ।

णिहुव–कम्–धा० । इच्छायाम, " कमेर्णिहुवः " ॥ ८ । ४ । ४४ ॥ कमेः स्वार्थे णयन्तस्य णिहुवेत्यादेशः । ' णिहुवइ ' । ' कामेइ । ' प्रा० ४ पाद ।

णिहस–निकष–पुं० । " निकष-स्फटिक-चिकुरे हः " ॥ ८ । १ । १८६ ॥ इति कस्य हः । प्रा० १ पाद । "शषोः सः" ॥ ८ । १ । २६० ॥ इति षस्य सः । प्रा० १ पाद । कषपट्टकरेखायाम्, प्रज्ञा० १७ पद २ उ० । वल्मीके, दे० ना० ४ वर्ग २५ गाथा ।

णिहा–निद्रा–स्त्री० । निहन्यते प्राणिनः संसारे यया सा निद्रा । मायायाम, सूत्र० १ श्रु० ८ अ० ।

णिहाअ–देशी–स्वेदे,समूहे च । दे० ना० ४ वर्ग ४९ गाथा ।

णिहाण–निधान–न० । रत्नाऽऽदौ, स्था० ५ ठा० १ उ० । निधौ, अनु० । निक्षिप्ते, " दव्वे णिहाणमाई । " दश० ७ अ० ।

णिहाय–निधाय–अव्य० । व्यवस्थाप्येत्यर्थे, सन्निधिं कृत्वेत्यर्थे,सूत्र० १ श्रु० ७ अ० । परित्यज्येत्यर्थे, सूत्र० १ श्रु० १३ अ० ।

णिहार–निहार–पुं० । निर्गमे प्रमाणे, स्था० ८ ठा० ।

णिहालेत्ता–निभाल्य–अव्य० । सम्यविलोक्येत्यर्थे, ग० २ अधि० । सम्यक्परीक्ष्येत्यर्थे, ग० १ अधि० ।

णिहि–स्त्री० । पुं० । निधि–पुं० । नितरां धीयते स्थाप्यते यस्मिन् स निधिः । प्राकृते "वेमाऽऽलक्याद्याः स्त्रियाम्" ॥ ८ । १ । ३५ ॥ इति वा स्त्रीत्वम् । प्रा० १ पाद । विशिष्टरत्नसुवर्णाऽऽदिद्रव्यभाजने, स्था० ।

पंच णिही पण्णत्ता । तं जहा–पुत्तणिही, मित्तणिही, सिप्पणिही, धणणिही, धण्णणिही ।

तत्र निधिरिव निधिः, पुत्रश्चासौ निधिश्च पुत्रनिधिर्द्रव्योपार्जकत्वेन पित्रोर्निर्वाहहेतुत्वात्,अत एव स्वभावेन च तयोरानन्दसुखकरत्वाच्च । अत्रोक्तं परैः-" जन्मान्तरफलं पुण्यं, तपोदानसमुद्भवम् । सन्ततिः शुद्धवंश्या हि,परत्रेह च शर्मणः ॥ १ ॥ "इति । तथा मित्रं सुहृत्तच्च तन्निधिश्चेति मित्रनिधिरर्थकामसाधकत्वेनाऽऽनन्दहेतुत्वात् । तदुक्तम्-"कुतस्तस्यास्तु राज्यश्रीः,कुतस्तस्य मृगेक्षणाः । यस्य शूरं विनीतं च, नास्ति मित्रं विचक्षणम् " ॥ १ ॥ शिल्पं चित्राऽऽदिविज्ञानं, तदेव निधिः शिल्पनिधिः । एतच्च विद्योपलक्षणं,तेन विद्या निधिरिव पुरुषार्थसाधनत्वात्।

अत्रोक्तम्-" विद्यया राजपूज्यः स्यात्, विद्यया कामिनीप्रियः। विद्या हि सर्वलोकस्य, वशीकरणकारणम् " ॥१॥ इति। तथा धननिधिः कोशः। धान्यनिधिः कोष्ठागारमिति। अनन्तरं निधिरुक्तः; स च द्रव्यतः पुत्राऽऽदिः। भावतस्तु कुशलानुष्ठानरूपं ब्रह्म। स्था० ५ ठा० ३ उ०। भाण्डागारे, ज्ञा० १ श्रु० ३ अ०।

महापुरुषाणां चक्रवर्तिनां संबन्धि निधिप्रकरणमाह-

एगमेगे णं महानिही नवनवजोयणाइं विक्खंभेणं पण्णत्ते। एगमेगस्स णं रण्णो चाउरंतचक्कवट्टिस्स नव महानिहीओ पण्णत्ताओ। तं जहा-

नेसप्पे पंडुए पिंगे, सव्वरयणे महापउमे।
काले य महाकाले, माणवगमहानिही संखे ॥ १ ॥

"एगमेगे" इत्यादि सुगमम्। नवरं-

नेसप्पम्मि निवेसा, गामागरनगरपट्टणाणं च।
दोणमुहमंडवाणं, खंधाराणं गिहाणं च ॥२॥

इह निधानतन्नायकदेवयोरभेदविवक्षया नैसर्पो देवः, तस्मिन्नसति, तत इत्यर्थः। निवेशाः स्थापनानि अभिनवग्रामाऽऽदीनामिति। अथवा-चक्रवर्तिराज्योपयोगिद्रव्याणि सर्वाण्यपि नवसु निधिष्ववतरन्ति, नवनिधानतया व्यवह्रियन्त इत्यर्थः। तत्र ग्रामाऽऽदीनामभिनवानां पुरातनानां च ये सन्निवेशा निवेशनानि, ते नैसर्पनिधौ वर्तन्ते, नैसर्पनिधितया व्यवह्रियन्त इति भावः। तत्र ग्रामो जनपदप्रायलोकाधिष्ठितः, आकरो यत्र सन्निवेशे सुवर्णाऽऽद्युत्पद्यते, न करो यत्रास्ति तत्करम्, पत्तनं देशीस्थानं, द्रोणमुखं जलपथस्थलपथयुक्तम्, मडम्बमविद्यमानप्रत्यासन्नावासं, स्कन्धावारः कटकनिवेशः, गृहं भवनमिति ॥ २ ॥

गणियस्स य बीयाणं, माणुम्माणस्स जं पमाणं च।
धण्णस्स य बीयाणं, उप्पत्ती पंडुए णिणिया ॥३॥

गणितस्य दीनाराऽऽदिपूगफलाऽऽदिलक्षणस्य, चकारस्य व्यवहितसम्बन्धः; स च दर्शयिष्यते। तथा बीजानां तद्विबन्धभूतानां, तथा मानं सेटिकाऽऽदि, तद्विषयं यत्तदपि मानमेव, धान्याऽऽदिमयमिति भावः। तथोन्मानं तुलाकर्षाऽऽदि, तद्विषयं यत्तदप्युन्मानं, खण्डगुडाऽऽदि भरिममित्यर्थः। ततो द्वन्द्वसमाहारः कार्यः। ततस्तस्य च किमित्याह-यत्प्रमाणं, चकारो व्यवहितसम्बन्ध एव, तथैव दर्शयिष्यते। तत्पाण्डुके भणितमिति स्त्रिक्तपरिणामेन सम्बन्धः। तथा धान्यस्य व्रीह्यादेर्बीजानां च तद्विशेषाणामुत्पत्तिश्च या सा पाण्डुके पाण्डुकनिधिविषया, तद्व्यापारोऽयमिति भावः। ज्ञातितोक्ता जिनाऽऽदिभिरिति ॥ ३ ॥

सव्वा आभरणविही, पुरिसाणं जा य होइ महिलाणं।
आसाण य हत्थीण य, पिंगलयणिहिम्मि सा भणिया ॥४॥
कण्ठ्या ॥ ४ ॥

रयणाइं सव्वरयणे, चउदस पवराइं चक्कवट्टिस्स।
उप्पज्जंति य एगिं-दियाइं पंचिंदियाइं च ॥ ५ ॥

अक्षरघटनैवम्-रत्नान्येकेन्द्रियाणि चक्राऽऽदीनि सप्त, पञ्चेन्द्रियाणि, सेनापत्यादीनि सप्त, उत्पद्यन्ते भवन्ति, यानि चक्रवर्तिनस्तानि सर्वाणि सर्वरत्ने सर्वरत्ननामनि निधौ द्रष्टव्यानीति भावः ॥ ५ ॥

वत्थाण य उप्पत्ती, निप्फत्ती चेव सव्वजत्तीणं।
रंगाण य धोवाण य, सव्वा एसा महापउमे ॥ ६ ॥

वस्त्राणां वासस्तां योत्पत्तिः सामान्यतो, या च विशेषतो निष्पत्तिः सिद्धिः सर्वजत्तीनां सर्ववस्त्रप्रकाराणां, सर्वा वा प्रकृतयः प्रकारा येषां तानि तथा, तेषाम्। किंभूतानां वस्त्राणामित्याह-रङ्गाणां रङ्गवतां, रक्तानामित्यर्थः। धौतानां शुक्लस्वरूपाणां, सर्वैवैषा महापद्मे महापद्मनिधिविषया ॥ ६ ॥

काले कालण्णाणं, नव्वपुराणं च तीसु वासेसु।
सिप्पसयं कम्माणि य, तिन्नि पयाए हियकराइं ॥ ७ ॥

काले कालनाम्नि निधौ, कालज्ञानं कालस्य शुभाशुभरूपस्य ज्ञानं वर्तते, ततो ज्ञायत इत्यर्थः। किंभूतमित्याह-नवीनवस्तुविषयं नव्यं, पुरातनवस्तुविषयं पुराणं, चशब्दाद्वर्तमानवस्तुविषयं वर्तमानं, (तीसु वासेसु त्ति) अनागतवर्षत्रयविषयमतीतवर्षत्रयविषयं चेति। तथा-शिल्पशतं कालनिधौ वर्तते, शिल्पशतं च घट १ लोह २ चित्र ३ वस्त्र ४ नापित ५ शिल्पानां प्रत्येकं विंशतिभेदत्वादिति। तथा कर्माणि च कृषिवाणिज्याऽऽदीनि, कालनिधाविति प्रक्रमः। एतानि च त्रीणि कालज्ञानशिल्पकर्माणि, प्रजाया लोकस्य हितकराणि निर्वाहाभ्युदयहेतुत्वेनेति ॥ ७ ॥

लोहस्स य उप्पत्ती, होइ महाकालें आगराणं च।
रुप्पस्स सुवण्णस्स य, मणिमुत्तसिलप्पवालाणं ॥ ८ ॥

लोहस्य चोत्पत्तिर्महाकाले निधौ भवति वर्तते, तथा आकराणां च लोहाऽऽदिसत्कानामुत्पत्तिराकरी करणलक्षणा, एवं रूप्याऽऽदीनामुत्पत्तिः सम्बन्धनीया। केवलं मणयश्चन्द्रकान्ताऽऽदयः, मुक्ता मुक्ताफलानि, शिलाः स्फटिकाऽऽदिकाः, प्रवालानि विद्रुमाणीति ॥ ८ ॥

जोहाण य उप्पत्ती, आवरणाणं च पहरणाणं च।
सव्वा य जुद्धनीई, माणवए दंडनीई य ॥ ९ ॥

योधानां शूरपुरुषाणां योत्पत्तिरावरणानां संनाहानां प्रहरणानां खड्गाऽऽदीनां, सा युद्धनीतिश्च व्यूहरचनाऽऽदिलक्षणा, माणवके निधौ निधिनायके वा भवति, ततः प्रवर्तत इति भावः। दण्डेनोपलक्षिता नीतिर्दण्डनीतिश्च सामाऽऽदिश्चतुर्विधा। अत एवोक्तमावश्यके-" सेसा उ दंडनीई, माणवगनिहीउ होइ भरहस्स।" ॥ ९ ॥

णट्टविहि णामयविही, कव्वस्स चउव्विहस्स उप्पत्ती।
संखे महानिहिम्मी, तुडियंगाणं च सव्वेसिं ॥ १० ॥

नाट्यं नृत्यं, तद्विधिस्तत्करणप्रकारो, नाटकं चरितानुसारिनाटकलक्षणोपेतं, तद्विधिश्च, इहपदद्वये द्वन्द्वः। तथा काव्यस्य चतुर्विधस्य धर्मार्थकाममोक्षलक्षणपुरुषार्थप्रतिबद्धस्य १, अथवा संस्कृतप्राकृतापभ्रंशसंकीर्णभाषानिबद्धस्य २, अथवा-समविषमार्द्धसमवृत्तबद्धतया गद्यतया चेति ३, अथवा-गद्यपद्यगेयचौर्णपदभेदबद्धस्येति ४। उत्पत्तिः प्रभवः, शङ्खे महानिधौ भवति, तथा तूर्याङ्गानां च मृदङ्गाऽऽदीनां सर्वेषामिति ॥ १० ॥

चक्कट्ठपइट्ठाणा, अट्ठसेहा य नव य विक्खंभे ।
बारसदीहा मंजू-ससंठिया जाएहवीइ मुहे ॥११॥

चक्रेष्वष्टसु प्रतिष्ठानं प्रतिष्ठा अवस्थानं येषां ते तथा । अष्टौ योजनान्युत्सेधेन उच्छ्रायो येषां ते तथा । नव च, योजनानीति गम्यते । विष्कम्भे विस्तरे, निधय इति शेषः । द्वादश योजनानि दीर्घा, मञ्जूषा प्रतीता, तत्संस्थितास्तत्संस्थानाः, जाह्नव्या गङ्गाया मुखे भवन्तीति ॥ ११ ॥

वेरुलियमणिकवाडा, कणगमया विविहरयणपडिपुन्ना ।
ससिसूरचक्कलक्खण-अणुसमजुगबाहुवयणा य ॥१२॥

वैडूर्यमणिमयानि कपाटानि येषां ते तथा; मयशब्दस्य वृत्त्या उत्कर्षतेति-कनकमयाः सौवर्णाः, विविधरत्नप्रतिपूर्णाः प्रतीताः, शशिसूरचक्राऽऽकाराणि लक्षणानि चिह्नानि येषां ते तथा, अनुसमा अविषमाः (जुग त्ति) यूपः, तदाकारा वृत्तत्वादीर्घत्वाच्च बाहवो द्वारशाखा वदनेषु मुखेषु येषां ते तथा, ततः पदत्रयस्य कर्मधारये शशिसूरचक्रलक्षणानुसमयुगबाहुवदना इति । चः समुच्चये ॥ १२ ॥

पलिओवमट्ठिईया, निहिसरिणामा य तेसु खलु देवा ।
जेसिं ते आवासा, अकेया आहिवच्चं च ॥ १३ ॥

(निहिसरिनाम त्ति) निधिभिः सदृक्षं सदृशं नाम येषां देवानां ते तथा, येषां देवानां ते निधय आवासा आश्रयाः, किंभूताः ? अकेया अकदयीयाः सर्वदैव तत्सम्बन्धित्वात्, आधिपत्यं च स्वामिता च तेषु, येषां देवानाम्, इति प्रक्रमः ॥ १३ ॥

एए ते नवनिहिओ, पभूयधणरयणसंचयसमिद्धा ।
जे वसमुवगच्छंती, सव्वेसिं चक्कवट्टीणं ॥ १४ ॥

एए ते गाहा कण्ठ्या ॥ १४ ॥ स्था० ६ ठा० । प्रव० । स० । आ० म० । ति० । आ० चू० ।

लक्षाऽऽदिप्रमाणद्रव्यस्थापने, भ० ३ श० ७ उ० । निधिरिव निधिः । सम्यक्त्वे, यथा हि निरवधिनिधिव्यतिरेकेण महार्हमणिमौक्तिककनकाऽऽदि द्रव्यं न प्राप्यते, तथा सम्यक्त्वमहाविद्यामनधिगतौ चारित्रधर्मैश्वित्तमपि निरुपमसुखसम्पादकं न प्राप्यते । प्रव० १४८ द्वार । ध० । विशे० । निधानं निधिः । निक्षेपे, निधिर्निक्षेपो न्यासो विरचना प्रस्तारः स्थापनेति पर्यायाः । तथा च-लौकिके निधेर्हादं निहितमिदमित्यत्र निपूर्वस्य धातोः निक्षेपार्थत्वप्रसिद्धेः । अनु० ।

णिहित्त-निहित-त्रि० । नि धा-क्त । "सेवाऽऽदौ वा" ॥८।२। ए९ ॥ इति तद्धित्वं वा । पक्षे ततो लोपः । प्रा० २ पाद । निक्षिप्ते, पञ्चा० १० विव० ।

णिहिप-निहित-त्रि० । 'णिहित्त' शब्दार्थे, प्रा० २ पाद ।

णिहू-स्त्री० । अनन्तजीववनस्पतिभेदे, प्रज्ञा० १ पद ।

णिहु-स्निहु-स्त्री० । औषधिभेदे, जी० १ प्रति० ।

णिहुअ-निभृत-त्रि० । " उदृत्वादौ " ॥ ८ । १ । १३१ ॥ अतु इत्यादिषु शब्देषु आदेरेत उत्वम् । प्रा० १ पाद । तदर्थमनुद्युक्ते, सूत्र० १ श्रु० ८ अ० । निर्व्यापारे, वृ० ३ उ० । निश्चले, उत्त० १६ अ० । असंभ्रान्ते, कायस्थित्या उचितधर्मे, " तेसिं सो निहुओदंतो, सव्वजूयसुदावहो ।" दश० ६ अ० । निर्व्यापारे, तूष्णीके, सुरते च । दे० ना० ४ वर्ग ५० गाथा ।

णिहुआ-देशी-स्त्री० । कामितावाप्ते, दे० ना० ४ वर्ग २६ गाथा ।

णिहुइंदिय-निभृतेन्द्रिय-त्रि० । अनुद्धतेन्द्रिये, दश० १ अ० ।

णिहुण-देशी-व्यापारे, दे० ना० ४ वर्ग २६ गाथा ।

णिहूअ-देशी-न० । सुरते, दे० ना० ४ वर्ग २६ गाथा ।

णिहेलण-न० । निलय-पुं० । " णोणाऽऽदयः " ॥ ८ । २ । १७४ ॥ इति निलयस्थाने निहेलणाऽऽदेशः । आलये, गृहे, प्रा० २ पाद । गृहे, सद्मनि च । दे० ना० ४ वर्ग ५१ गाथा ।

णिहोड-नि-वृ-पत्-णिच्-धा० । निवारणे, पातने च । " निवृत्यर्त्योर्णिहोमः ॥ ८ । ४ । २२ ॥ निवृतः पतेश्च एयन्तस्य णिहोडेत्यादेशः । 'णिहोडइ' । निवारयति । पातयति वा । प्रा० ४ पाद । व्य० ।

णिहोलिय-निपातित-त्रि० । अधःकृते, दश० ३ तत्त्व ।

णी-गम्-धा० । गतौ, " गमेरई-अच्छाणुव्वजावज्जसोक्कुसाकुस-पच्चड्ड-पच्चुद्द-णिम्मह-णी-णीण-णीलुक्क-पदअ-रङ्ग-परिअड्ड-घोल-परिअल-णिरिणास-णिवहावसेहावहराः" ॥ ८ । ४ । १६२ ॥ इति सूत्रेण गमधातोर्ण्यादेशः । 'णीइ' । गच्छति । प्रा० ४ पाद ।

णीआरण-देशी-न० । वलिघट्टयाम्, दे० ना० ४ वर्ग ४३ गाथा ।

णीइ-नीति-स्त्री० । नये, स्था० ७ ठा० । अनु० । मर्यादायाम्, पं० चू० । नीयते परिच्छिद्यते एकदेशविशिष्टोऽर्थ आभिरिति नीतयः । नैगमाऽऽदिनयेषु, स्था० २ ठा० २ उ० । कुलकराणां हक्काराऽऽदिषु दण्डनीतिषु, आ० म० १ अ० १ खण्ड । (ताश्च ' कुलगर ' शब्दे तृतीयभागे ५६३ पृष्ठे दर्शिताः) राजनीतौ, " तिविहा नीई पण्णत्ता । तं जहा-सामे, दंमे, भेए । ' तत्र सामनीतेः पञ्च, दण्डस्य त्रयो, भेदस्य, उपप्रदानस्य च पञ्च पञ्च कामन्दकाऽऽदिषु प्रसिद्धाः । ज्ञा० १ श्रु० १ अ० । विपा० । प्रयोगभ्यासमेवम्-" उत्तमं प्रणिपातेन, शूरं भेदेन योजयेत् । नीचमल्पप्रदानेन, समं तुल्यपराक्रमैः " ॥ १ ॥ स्था० ३ ठा० ३ उ० । संग्रामनिर्गमप्रवेशे, आ० क० ।

णीइकोविय-नीतिकोविद-पुं० । लोकनीतिचतुरे, उत्त० २१ अ० ।

णीछूढ-निष्ठ्यूत-न० । निष्ठीवने, नं० ।

णीजूहग-निर्यूहक-न० । द्वारपार्श्वविनिर्गतदारुके, ज्ञा० १ श्रु० १ अ० ।

णीजूहयंतर-निर्यूहकान्तर-न० । निर्यूहकं द्वारपार्श्वविनिर्गतदारु, तयोरन्तरे, ज्ञा० १ श्रु० १ अ० ।

णीड-नीड-न० । पक्षिणामावासस्थाने, प्रा० १ पाद ।

णीण-गम्-धा० । गतौ, "गमेरई०-" ॥८।४।१६२॥इत्यादिसूत्रेण गमधातोर्णीणाऽऽदेशः । 'णीणइ' । गच्छति । प्रा० ४ पाद ।

णीणिज्जमाण-गम्यमान-त्रि० । नीयमाने, " णीणिज्जमाणं पेहाए ।" आचा० १ श्रु० २ चू० ४ अ० ।

णीणित-गमित-त्रि० निर्यूढे धाडिते, नि० चू० १ उ० ।

णीणिया-नीनिका-स्त्री० । चतुरिन्द्रियजीवभेदे, जी० १ प्रति० ।

णीततर-नीचतर-त्रि० । अतिशयेन नीचे, नि० चू० १ उ० ।

णीम–नीप–पुं० । " नीपाऽऽपीमे मो वा " ॥ ८ । १ । २३४ । इत्यनेन पस्य मः । णीमो । णीवो । कदम्बे, प्रा० १ पाद ।

णीय–नीच–त्रि० । अत्यन्तावनतकन्धरे, उत्त० १ अ० । उच्चविपरीते, स्था० ३ ठा० ४ उ० । अपूज्ये, भ० ३ श० १ उ० । निन्द्ये, नि० चू० १ उ० । नीचैः स्थाने, माला ऽऽदौ, उत्त० १ अ० । नित्य–त्रि० । सदाऽवस्थायिनि, स्था० १० ठा० ।

नीत–त्रि० स्वस्थानं प्रापिते, ज्ञा० १ श्रु० १६ अ० उत्त० सूत्र० ।

णीयच्छंद–नीचच्छन्द–त्रि० । अनुअतानिप्राये, स्था० ३ ठा० ४ उ० ।

णीयजण–नीचजन–त्रि० । जात्यादिहीने जने, प्रश्न० २ आश्र० द्वार० । " णीयजणणिसेवियो लोगगरहणिज्जो । " प्रश्न० २ आश्र० द्वार ।

णीयत्तण–नीचत्व–न० । गुणाधिकान् प्रति नीचभावे, दश० ५ अ० १ उ० । निम्नमुखे गृहे, पञ्चा० १३ विव० ।

णीयल्लग–निजक–पुं० । स्वजातीये, " णीयल्लगाण य भया हिरिवत्तियसंजमाहिगारे । " व्य० ४ उ० । आत्मीये, व्य० २ उ० ।

णीयागोय–नीचैर्गोत्र–न० । सर्वजघन्यविगते गोत्रकर्मणभेदे, सूत्र० २ श्रु० १ अ० । कर्म० । नीचैर्गोत्रमपूज्यत्वनिबन्धनमिति कर्मणभेदे, स्था० १ ठा० । यदुदयान्महाधनोऽप्रतिरूपो बुद्ध्यादिसम्पन्नोऽपि पुमान् विशिष्टकुलाभावात् लोकाश्चिन्द्यां प्राप्नोति । कर्म० १ कर्म० । नीचैर्गोत्रोद्भवे वर्णपिलदसम्भूते, सूत्र० २ श्रु० १ अ० ।

णीयावास–नित्यवास–पुं० । विहारकालेऽप्येकत्र वासे, आ० चू० २ अ० ।

णीयावित्ति–नीचैर्वृत्ति–त्रि० । नीचैर्वृत्तिर्वर्तनं यस्य स तथा । अनुच्चवृत्तौ, व्य० १ उ० ।

णीयासण–नीचासन–न० । नीचमासनं नीचासनम् । गुरूणां नीचतरोपवेशे, नि० चू० १ उ० ।

णीर–नीर–न० । पानीये, दर्श० १ तत्त्व ।

णीरंसी–देशी–शिरोऽवगुण्ठने, दे० ना० ४ वर्ग ३१ गाथा ।

णीरज्ज–भञ्ज–धा० । आमर्दने, " भञ्जेर्णीम-मुसुमूर-मूर-सूर-सूड-चिर-पविरज्ज-करज्ज-नीरज्जाः " ॥ ८ । ४ । १०६ ॥ इति भञ्जेर्णीरज्जाऽऽदेशः । ' नीरज्जइ ' । पक्षे–भज्जइ । भनक्ति । प्रा० ४ पाद ।

णीरय–नीरजस्–त्रि० । निर्गतं रजो यस्य । अनु० । आगन्तुकरजोरहितत्वात् (स० । औ०) सहजरजोरहितत्वात् (जं० १ वक्ष० । भौ० । स्था०) स्वाभाविकरजोरहितत्वात् (प्रज्ञा० २ पद । जी०) निर्मले, सूत्र० १ श्रु० १ अ० ३ उ० । भ० । बध्यमानकर्मबन्धनैस्त्यक्ते, पा० । ध० । आ० म० । नीरद–पुं० । मेघे, वाच० ।

णीरव–आ-क्षिप–धा० । आ–क्षिप् । आक्षेपे, " आक्षिपेर्णीरवः " ॥ ८ । ४ । १४५ ॥ इत्याइपूर्वस्य क्षिपेर्णीरवः । ' णीरवइ । ' ' अक्खिवइ ।' आक्षिपति । प्रा० ४ पाद ।

बुभुक्ष्–धा० । भोक्तुमिच्छायाम्, " बुभुक्षि-मीज्योर्णीरव-चोज्जौ " ॥ ८ । ४ । ५ ॥ इति बुभुक्षतेर्णीरवाऽऽदेशः । ' णीरवइ ।' बुभुक्खइ । बुभुक्षते । प्रा० ४ पाद ।

णीरोग–नीरोग–त्रि० । आरोग्ये, स्था० १० ठा० । रोगवर्जिते, ज्ञा० १ श्रु० १ अ० । स्नान्याभावे, वृ० ३ उ० । औ० ।

णीरोगय–नीरोगक–त्रि० । रोगवर्जिते, जी० ३ प्रति० ४ उ० । रा० ।

णील–निर्-सृ–धा० । निर्गमने, " निस्सरेर्णील्ल-णीस-णीम-णरहामाः " ॥ ८ । ४ । ७९ ॥ इति निस्सरतेर्णील्लाऽऽदेशः । णील्लइ । णीसरइ । निस्सरति । प्रा० ४ पाद ।

नील–त्रि० । ईषत्सुन्दररूपे, कृष्णे, वर्णविशेषे, स्था० १ ठा० । तद्युक्ते, " एग णीले । " नीलत्वादिवद् नीलवर्णपरिणते, प्रज्ञा० १ पद । " णीले णीलोभासे । " वनखण्डे, हरितत्वमतिक्रान्तानि कृष्णत्वमसंप्राप्तानि पत्राणि नीलानि, तद्योगाद्वनखण्डा अपि नीलाः । रा० । मरकतमणौ, जी० ३ प्रति० ४ उ० । तं० । जं० । ज्ञा० । पञ्चविंशतितमे महाग्रहे, कल्प० ६ क्षण । " दो णीला । " स्था० २ ठा० ३ उ० । सू० प्र० । चं० प्र० । " एगे णीले । " स्था० १ ठा० । औ० ।

णीलकंठ–नीलकण्ठ–पुं० । शक्रस्य देवेन्द्रस्य महिषानीकाधिपतौ, स्था० ४ ठा० २ उ० ।

णीलकंठी–देशी–वाणवृक्षे, दे० ना० ४ वर्ग ४२ गाथा ।

णीलकणवीर–नीलकरवीर–पुं० । नीलवर्णपुष्पे करवीराऽऽख्ये वृक्षभेदे, रा० ।

णीलकूड–नीलकूट–न० । नीलवर्षधरपर्वतकूटे, स्था० २ ठा० ३ उ० ।

णीलकेसी–नीलकेशी–स्त्री० । कृष्णकेश्यां तरुण्याम्, स्व० ४ उ० ।

णीलगुहा–नीलगुहा–स्त्री० । स्वनामख्याते ह्रदाने, यत्र मुनिसुव्रतनामा तीर्थंकरो निष्क्रान्तः । आ० म० १ अ० १ खण्ड ।

णीलगुलिया–नीलगुटिका–स्त्री० । नीलवर्णा गुटिका नीलगुटिका । गुटीरूपे नीलपदार्थे, " णीलगुलिया गवलप्पगासा । " जी० ३ प्रति० ४ उ० । रा० ।

णीलणाम–नीलनामन्–न० । यदुदयाज्जन्तुशरीरं मरकताऽऽदिवर्णाढ्यं भवति । तस्मिन् नामकर्मभेदे, कर्म० १ कर्म० ।

णीलपत्त–नीलपत्र–त्रि० । नीलवर्णपत्रोपेते, प्रज्ञा० १ पद ।

णीलपाणि–नीलपाणि–त्रि० । नीलः, कालकलाप इति गम्यते । पाणौ येषां ते नीलपाणयः । नीलवर्णकाण्डहस्ते, रा० ।

णीलप्पभ–नीलप्रभ–त्रि० । नीलवर्णे, ज्ञा० १ श्रु० १ अ० ।

णीलफल–नीलफल–त्रि० । " शुष्कनीलफलस्वादु–नोनापक्वान्नपेशला । शालिमूषघृतप्रायप्रलेहव्यञ्जनाकृता " ॥ १ ॥ आ० क० । नीलं फलं यस्याः । जम्बूवृक्षे, वाच० ।

णीलबंधुजीव–नीलबन्धुजीव–त्रि० । नीलवर्णपुष्पे वृक्षविशेषे, रा० ।

णीलमट्टिया–नीलमृत्तिका–स्त्री० नीलवर्णमृत्तिकायाम्, स्वरूपपृथ्वीकायभेदे, आचा० ।

णीलरत्तपीअसुक्किल्ल–नीलरक्तपीतशुक्ल–त्रि० । नीलरक्तपीतशुक्लवर्णमनोहरे, कल्प० ३ क्षण ।

णीललेस्सा-नीललेश्या-स्त्री० । वर्णतो नीलाशोकगुलिकावैडूर्येन्द्रनीलचाषपिच्छाऽऽदिसमवर्णैः, रसतो मरिचपिप्पलीनागराऽऽदिसमधिकतररसैः, गन्धतो मृगतुरगशरीराऽऽदिसमाधिकतरगन्धैः, स्पर्शतो जिह्वाऽऽदिसमधिकतरकर्कशस्पर्शैः सकलप्रकृतिनिष्पन्दजुष्टैर्नीलद्रव्यैर्जनितत्वान्नीलोऽपि लेश्याऽऽत्मपरिणतिरिति । लेश्याभेदे, पा० । स्था० ।

णीलवंत-नीलवत्-पुं० । उत्तरकुरुषु स्वनामख्याते ह्रदे, तद्वासिनि नागकुमारदेवे च । जं० ४ वक्ष० । जी० । ('उत्तरकुरा' शब्दे द्वितीयभागे ७६१ पृष्ठे वक्तव्यतोक्ता) मन्दरस्य पर्वतस्य नन्दनवने द्वितीये दिग्हस्तिकूटे, जं० ।

एवं णीलवंतदिसाहत्थिकूडे मंदरस्स दाहिणपुरच्छिमेणं पुरच्छिमिल्लाए सीआए दक्खिणेणं, एअस्स वि नीलवंतो देवो रायहाणी दाहिणपुरच्छिमेणं ॥

(एवमिति) पद्मोत्तरन्यायेन नीलवान्नाम्ना दिग्हस्तिकूटः मन्दरस्य दक्षिणपूर्वस्यां पौरस्त्यायाः शीतोदाया दक्षिणस्यां ननोऽयं प्राच्यजिनभवनाऽभ्येत्यशास्त्रादयोर्मध्ये ज्ञेयः । एतस्याऽपि नीलवान् देवः प्रभुः, तस्य राजधानी दक्षिणपूर्वस्यामिति । जं० ४ वक्ष० । द्वी० । स्था० । वर्षधरपर्वतभेदे, जं० ।

कहि णं भंते ! जंबुद्दीवे दीवे णीलवंते णामं वासहरपव्वए पण्णत्ते ?। गोयमा ! महाविदेहस्स वासस्स उत्तरेणं रम्मगवासस्स दक्खिणेणं पुरच्छिमलवणसमुद्दस्स पच्चच्छिमेणं पच्चच्छिमलवणसमुद्दस्स पुरच्छिमेणं एत्थ णं जंबुद्दीवे दीवे णीलवंते णामं वासहरपव्वए पण्णत्ते, पाईणपडीणायए उदीणदाहिणवित्थिण्णे, णिसहवत्तव्वया णीलवंतस्स भाणिअव्वा, णवरं जीवा दाहिणेणं धणुं उत्तरेणं, तत्थ केसरीदहो णामं दहो, एत्थ णं सीआ महाणई पव्वुद्दा समाणी उत्तरकुरुं एज्जमाणी उत्तरकुरुं एज्जमाणी जमगपव्वए णीलवंतउत्तरकुरुचंदेरावतमालवंतदहे अ दुहा विभयमाणी विभयमाणी चउरासीए सलिलासयसहस्सेहिं आपूरेमाणी आपूरेमाणी चउसट्ठीए सलिलाकुंडेहिं एज्जमाणी चउसट्ठीए सलिलाकुंडेहिं एज्जमाणी मंदरं पव्वयं दोहिं जोअणेहिं असंपत्ता पुरच्छाभिमुही परावत्ता समाणी अहे मालवंतवक्खारपव्वयं दालयित्ता मंदरस्स पव्वयस्स पुरच्छिमेणं पुव्वविदेहं वासं दुविहा भयमाणी दुविहा भयमाणी एगमेगाओ चक्कवट्टिविजयाओ अट्ठावीसाए अट्ठावीसाए सलिलासहस्सेहिं आपूरेमाणी आपूरेमाणी पंचहिं सलिलासयसहस्सेहिं बत्तीसाए अ सलिलासहस्सेहिं समग्गा अ अहे विजयस्स दारस्स जगइं दालइत्ता पुरच्छिमेणं लवणसमुद्दं समप्पेइ, अवसिट्ठं तं चेव,एवं पारिकंता वि उत्तराभिमुही णेअव्वा । णवरमिमं णाणत्तं गंधावइवट्टवेअड्ढपव्वयं जोअणे असंपत्ता पच्चच्छाभिमुही आवत्ता समाणी अवसिट्ठं तं चेव, पवहे मुहे अ,जहा हरिकंता सलिला ।

क्व भदन्त ! जम्बूद्वीपे द्वीपे नीलवान्नाम्ना वर्षधरपर्वतः प्रज्ञप्तः ?। उत्तरस्यूर्वं तथैव । नवरं रम्यकक्षेत्र महाविदेहेभ्यः परं युग्मिमनुजाऽऽश्रयभूतमस्ति, तस्य दक्षिणतः,अयं च नियमबन्धुरिति तत्साम्येन लाघवं दर्शयति-(णिसह इत्यादि) निषधवक्तव्यता नीलवतोऽपि भणितव्या, नवरमस्य जीवा परम आयामो दक्षिणत उत्तरतः क्रमेण क्रमेण जगत्या चक्रत्वेन न्यूनान्तरत्वात् धनुः पृष्ठमुत्तरतः । अत्र केसरिद्रहो नाम ह्रदः । तस्माच्च शीता महानदी प्रभूढा सती उत्तरकुरून् इयती २ परिगच्छन्ती २ यमकपर्वतौ नीलवदुत्तरकुरुचन्द्रैरावतमाल्यवत्प्रासादकान् पञ्चाऽपि ह्रदाँश्च द्विधा विभजन्ती २ चतुरशीत्या सलिलासहस्रैरापूर्यमाणा २ भद्रशालवनमियती २ आगच्छन्ती २ मन्दरं पर्वतं द्वाभ्यां योजनाभ्यामसंप्राप्ता पूर्वाभिमुखी परावृत्या सती माल्यवद्वक्षस्कारपर्वतमधो विदार्य मेरोः मन्दरस्य पूर्वस्यां पूर्वमहाविदेहं यासं द्विधा विभजन्ती २ एकैकस्मात्कक्षविजयादष्टाविंशत्या २ सलिलासहस्रैरापूर्यमाणा २ आत्मना सह पञ्चभिर्नदीसहस्रैर्द्वात्रिंशता च सलिलासहस्रैः समग्रा अधो विजयस्य द्वारस्य जगतीं विदार्य पूर्वस्यां लवणसमुद्रमुपैति। अवशिष्टं प्रवहव्यासस्त्वाऽऽदिकं तदेवेति निषधनिर्गमशीतोदाप्रकरणोक्तमेव। अथास्मादेवोत्तरतः प्रवृत्तां नारीकान्तामतिदिशति-(एवं णारिकंता इत्यादि) पद्मभुक्तन्यायेन नारीकान्ताऽपि उत्तराभिमुखी नेतव्या । कोऽर्थः ?। यथा नीलवति केसरिद्रहादक्षिणाभिमुखी शीता निर्गता, तथा नारीकान्ता तूत्तराभिमुखी निर्गता । तर्हि अस्याः समुद्रप्रवेशोऽपि तद्देवेत्याशङ्क्यमानमाह-नवरमिदं नानात्वं गन्धापातिनं वृत्तवैताढ्यपर्वतं योजनेनाऽसम्प्राप्ता पश्चिमाभिमुखी आवृत्ता सती इत्यादिकमवशिष्टं सर्वं तदेव, हरिकान्तासदृक्षत्वाद्वाच्यम् । तद्यथा-" रम्मगवासं दुहा विभयमाणी २ उप्पण्णाए सलिलासहस्सेहिं समग्गा अहे जगइं दालइत्ता पच्चच्छिमेणं लवणसमुद्दं समप्पेइ त्ति ।" अत्र चाऽवशिष्टपदसंग्रहे प्रवहमुखव्यासाऽऽदिकं न चिन्तितं, समुद्रप्रवेशावधिकस्यैवाऽऽख्यापकस्य दर्शनात्, तेन तत् पृथग्गाह-प्रवहे च मुखे च यथा हरिकान्तासदृक्षा । तथाहि-प्रवहे पञ्चविंशतियोजनानि विष्कम्भेन अर्द्धयोजनमुद्वेधेन, मुखे २५० योजनानि विष्कम्भेन ५ योजनान्युद्वेधेन, पद्मवत्र हरिसदृक्षां विहाय प्रवहमुखयोर्हरिकान्ताऽतिदेश उक्तस्तद् हरिसदृक्षाप्रकरणेऽपि हरिकान्ताऽतिदेशस्योक्तत्वात् । जं० ।

अथास्य नामनिबन्धनं पृच्छन्नाह-

से केणऽट्ठेणं भंते ! एवं वुच्चइ-णीलवंते वासहरपव्वए णीलवंते वासहरपव्वए ?। गोयमा ! णीले णीलोभासे णीलवंते आइच्चदेवे महिड्ढिए० जाव परिवसइ, सव्वरुप्पिआपए णीलवंते० जाव णिच्चेति ।

" से केणट्ठेणं " इत्यादि प्रश्नः प्राग्वत् । उत्तरसूत्रे चतुर्थो वर्षधरगिरिर्नीलो नीलवर्णत्वान् नीलावभासो नीलप्रकाश आसन्नं वस्त्वन्यदपि नीलवर्णमयं करोति, तेन नीलवर्णयोगान्नीलवान्, नीलवांश्च यत्र महर्द्धिको देवः पल्योपमस्थितिको यावत् परिवसति,तेन तद्योगाद्वा नीलवान् । अथवाऽसौ सर्वात्मना वैडूर्यरत्नमयः, तेन वैडूर्यरत्नपर्यायकनीलमणियोगान्नीलः, शेषं प्राग्वत् । जं० ४ वक्ष० । स्था० । स० । ('कूड' शब्दे तृतीयभागे ६५६ पृष्ठे कूटान्युक्तानि) । "दो णीलवंता" स्था० २ उ० ३ ठा०।

णीलवंतकूड–नीलवत्कूट–न० । नीलवद्वर्षधरपर्वतस्य द्वितीये कूटे. स्था० २ ठा० ३ उ० । जं० । "दो णीलवंतकूडा ।" स्था० २ ठा० ३ उ० ।

णीलवंतदह–नीलवद्ह्रद–पुं० । उत्तरकुरुषु विचित्रचित्रकूटपर्वतसमवक्तव्यताभ्यां यमकाभिधानाभ्यां स्वसमाननामदेवाऽऽवासाभ्यां पर्वताभ्यामनन्तरे महाह्रदे, स्था० ५ ठा० २ उ० । जं० । ('उत्तरकुरा' शब्दे द्वितीयभागे ७५६ पृष्ठे वक्तव्यतोक्ता)

णीलवंतदहकुमार–नीलवद्ह्रदकुमार–पुं० । नीलवद्ह्रदस्याधिपतिर्नागकुमारो देवे, जी० ३ प्रति० ४ उ० ।

णीलवणि–नीलवणि–स्त्री० । प्रत्याख्यानभेदे, सेन०। येन दीक्षाग्रहणार्थं नीलवणिप्रत्याख्यानं कृतं भवति, तस्य दीक्षाग्रहणानन्तरं कल्पते, न वा?, इति प्रश्ने–उत्तरम्–यदि प्रत्याख्यानकरणवेलायामेवं कथितं भवति–यदीक्षाग्रहणाऽनन्तरं नीलवणिः कल्पते, तदा कल्पते, नान्यथेति। ४५६ प्र० । सेन० ३ उल्ला० । नीलवणिप्रत्याख्यानिनां तांदूलनिष्पन्नकङ्कटीपाकप्रमुखं कल्पते, न वा?, इति प्रश्ने, उत्तरम्–परम्परया तत्कल्पनप्रवृत्तिर्दृश्यत इति । ९३ प्र० । सेन० ४ उल्ला० ।

णीला–नीला–स्त्री० । "अजातेः पुंसः" ॥ ८ । ३ । ३१ ॥ इति अजातिवाचिनो नीलशब्दस्य स्त्रियां ङीर्वा, नीली । नीला । प्रा० ३ पाद । नीलश्रेण्यायाम्, सम० । उत्त० । जम्बूद्वीपे मन्दरस्योत्तरेण रकायां महानद्यां सङ्गतायां महानद्याम्, स्था० १० ठा० ।

णीलाभास–नीलाभास–पुं० । पञ्चविंशतितमे महाग्रहे, "दो णीलाभासा ।" स्था० २ ठा० ३ उ० । चं० प्र० । सू० प्र० । कल्प० ।

णीलासोग–नीलाशोक–पुं० । नीलश्चाऽसौ अशोकश्च नीलाशोकः । नीलपुष्पाशोकवृक्षे, ग० । उत्त० । शुकपरिव्राजकजेतुः सुदर्शनश्रेष्ठिन आवासभूतायां सुगन्धिकापुर्यां बहिरुद्याने, ज्ञा० १ श्रु० ५ अ० ।

णीली–नीली–स्त्री० । गुडिकायाम्, ज्ञा० १ श्रु० १६ अ० । जी० । ग० । जं० । गुच्छवनस्पतिभेदे, प्रज्ञा० १ पद । आर्द्रस्त्रीत्वविशिष्टेऽर्थे, "तहेवोसहिओ पक्काओ, निलियाओ छवीइया" दश० ७ अ० ।

णीलीराग–नीलीराग–पुं० । नीलिकायाः सम्बन्धी रागो यस्य स नीलीरागः । नीलीरके, "णीलीरागं खलु, दुमहत्थी सरमासिया ।" व्य० ३ उ० ।

णीलुक्क–गम्–धा० । गतौ, "गमेरई-अच्छाणुवज्जावज्जसोफुल्लाक्कुस-पच्चड्ड-पच्चुन्द-णिआड-णी-णीण-णीलुक्क-पदभ-रम्भ-परिअल्ल-चोल-परिअल-णिरिणास-णिवहावसेढावहराः" ॥ ८ । ४ । १६२ ॥ इति सूत्रेण गम्लृवातोर्णीलुक्कादेशः । 'णीलुक्कइ' । पक्षे 'गच्छइ' । प्रा० ४ पाद ।

णीलुप्पल–नीलोत्पल–न० । "ह्रस्वः संयोगे दीर्घस्य" ॥ ८ । १ । ८४ ॥ इति ओकारस्योकारः । प्रा० १ पाद । कुवलये, जं० १ वक्ष० इन्दीवरे, सौगन्धिके, नीलवर्णे कुमुदे च। वाच० "णीलुप्पलगवलगुलिय।" उप० २ अ० ।

णीलुप्पलकयामेल्ल–नीलोत्पलकृताऽऽपीड–त्रि० । नीलोत्पलकृतशेखरे, उप० ७ अ० ।

णीलुप्पलवण–नीलोत्पलवन–न० । इन्दीवरकानने, तं० ।

णीलोभास–नीलावभास–त्रि० । मयूरगलवद्दृश्यभासमाने, औ० । रा० ।

णीव–नीप–पुं० । कदम्बे, औ० । वृक्षविशेषे, ज्ञा० १ श्रु० ६ अ० । आ० म० ।

णीवार–नीवार–पुं० । न० । शूकराऽऽदीनां पशूनां वन्यस्थानप्रवेशनियते जन्यविशेषे, सूत्र० १ श्रु० १५ अ० । व्रीहिविशेषकणधाने, सूत्र० १ श्रु० ३ अ० २ उ० ।

णीवि–नीवि–स्त्री० । सूत्रबन्धने, को० ६ विव० । कटिवस्त्रबन्धे, वाच० ।

णीस–निस्स्व–त्रि० । "लुत-य-र-व-श-ष-सां श-ष-सां दीर्घः" ॥ ८ । १ । ४३ ॥ इति दीर्घः । निर्धने, प्रा० १ पाद ।

णीसंद–निस्यन्द–पुं० । परिगालपरिस्रावे, "णवमपुव्वणीसंदो" पं० भा० । विन्दौ, कर्म० १ कर्म० ।

णीसंपाय–देशी–परिश्रान्ते, दे० ना० ४ वर्ग ४२ गाथा ।

णीसट्ठ–निसृष्ट–त्रि० । विमुक्ते, प्रश्न० २ आश्र० द्वार । बाहिर्निष्काश्य निवेदिते, यस्य याचकाऽऽदेरर्थाय निष्काशितस्तस्मै प्रदत्ते, बृ० २ उ० ।

णीसणिआ–देशी–निःश्रेण्याम्, दे० ना० ४ वर्ग ४३ गाथा ।

णीसर–रम्–धा० । क्रीडायाम्, "रमेः संखुड्ड-खेड्डोब्भाव-किलिकिञ्च-कोट्टुम-मोट्टाय-णीसर-वेल्लाः" ॥ ८ । ४ । १६८ ॥ इति सूत्रेण रमेर्णीसराऽऽदेशः। 'णीसरइ'। पक्षे–रमइ । रमते । प्रा० ४ पाद ।

निस्-सृ–धा०। निस्सरणे, 'णीसरइ' । निःसरति । प्रा० ४ पाद ।

णीसरण–निस्सरण–न० । फेडसने, व्य० ४ उ० ।

णीसल्ल–निःशल्य–त्रि० । मायादर्शननिदानशल्यरहिते, संथा० ।

णीसवग–निश्रावक–पुं० । कर्मनिर्जरके, आ० म० १ अ० १ खण्ड । विशे० ।

णीसवयाण–निश्रवत्–त्रि० । कर्माणि निर्जरयति, आ० म० १ अ० २ खण्ड ।

णीससंत–निःश्वसत्–त्रि० । "निश्वसेर्हुः" ॥ ८ । ४ । २०१ ॥ इति हुऽऽदेशाभावे शतरि रूपम् । प्रा० ४ पाद । निःश्वासान् मुञ्चति, प्रश्न० ३ आश्र० द्वार । प्राकृते–श्वसतापि । "ऊससमाणे वा, णीससमाणे वा, कासमाणे वा, छीयमाणे वा" आचा० २ श्रु० १ चू० २ अ० ३ उ० ।

णीससिउच्चसियसम–निःश्वसितोच्छ्वसितसम–न० । मानसनिष्क्रमतो ज्ञाने, स्था० ७ ठा० ।

णीसासिय–निःश्वसित–न० । निःश्वसनं निःश्वसितम् । न० अ० श्वसिते, आचा० ५ अ० । विशे० । आ० म० । ह० । कामक्रीडायाः श्वासस्समुद्भवे, ज्ञा० १ श्रु० ए अ० । श्वासमोक्षणे, ध० २ अधि० ।

णीसह–निस्सह–त्रि० । "लुप्त-र-व-श-ष-सां शक्लां दीर्घः" ॥ ८ । १ । ४३ ॥ इति सहोपे दीर्घः । नितरां सहिष्णौ, प्रा० १ पाद ।

णीसा–निश्रा–स्त्री० । पीठफलम् "दगवारएण पिहियं, णीसाए पीढएण वा ।" दश० ५ अ० १ उ० ।

णीसार–नीशार–पुं० । नितरां शीर्य्यते हिमानिलावत्रानेन वा । नि–शृ–घञ् दीर्घः । हिमानिलनिवारणे प्रावरणे, काणकपटे च । वाच० । मणकपे, दे० ना० ४ वर्ग ४१ गाथा ।

णीसास–निःश्वास–पुं० । निर्–श्वस्–घञ्–रलुक् । " ह्रस्वे कि निः " ॥ ८ । १ । ६३ ॥ इतिरेफलोपे सति इत ईकारः ।" णी. सासो ।" प्रा० १ पाद । अधःश्वासे, आ० चू० ५ अ० । श्वासमोक्षणे, तं० (के जीवाः कियता कालेन नि श्वसन्तीति 'आण' शब्दे द्वितीयभागे १०५ पृष्ठे उक्तम्) संख्येयाऽवलिकापरिमिते प्राणाऽपरनामके कालविशेषे, कर्म० ४ कर्म० ।

णीसासय–निःश्वासक–त्रि० । निःश्वसतीति निःश्वासकः । आनप्राणपर्याप्तिपरिनिष्पन्ने, आ० म० १ अ० २ खण्ड । विशे० ।

णीसित्त–निष्क्त–त्रि० । " लुप्तय-र-व-श-ष-सां श-ष-सां दीर्घः ॥ ८ । १ । ४३ ॥ इति षलोपे आदेः स्वरस्य दीर्घः । कृतनिष्सेके, प्रा० १ पाद ।

णीसीसिअ–देशी–निर्वासिते, दे० ना० ४ वर्ग १४२ गाथा ।

णीसेयस–निःश्रेयस–न० । निश्चितकल्याणे, जी० ३ प्रति० ४ उ० ।

णीहट्टु–निर्हृत्य–अव्य० । निःसार्येत्यर्थे, आचा० २ श्रु० १ चू० ६ अ० २ उ० ।

णीहड–निर्हृत–त्रि० । निर्गते, आचा० २ श्रु० १ चू० १ अ० १ उ० । निष्क्रान्ते, आचा० २ श्रु० १ चू० १ अ० ६ उ० ।

णीहडिया–निर्हृतिका–स्त्री० । अन्यत्र नीयमाने सागारिकद्रव्ये, बृ० २ उ० ।

णीहम्म–नि–हम्म–धा० । गतौ, 'णीहम्मइ' 'गच्छति' मच्छति । प्रा० ४ पाद ।

णीहर–निर्–सृ–धा० । बहिर्गमने," निःसरेर्णीहरनीलधामवरहाडाः" ॥ ८ । ४ । ७६ ॥ इति निःसरतेर्णीहराऽऽदेशः । "णीहरइ " । पक्षे–'णीसरइ ।' प्रा० ४ पाद ।

निर्–हृ–धा० । पुरीषोत्सर्जने, 'णीहरइ' निर्हरति । पुरीषोत्सर्गं करोति । उपसर्गवशादयमर्थः । प्रा० ४ पाद ।

णीहरण–निर्हरण–न० । निर्गमे, नि० १ श्रु० १ वर्ग १ अ० । अपनयने, सूत्र० २ श्रु० २ अ० । परित्यागे, नि० चू० १ उ० । आचा० ।

णीहरिअ–देशी–शब्दे, दे० ना० ४ वर्ग ४२ गाथा ।

णीहरित्तए–निर्हर्तुम्–अव्य० । निष्काशयितुमित्यर्थे, भ० ५ श० ४ उ० । विशोधयितुमित्यर्थे, दशा० ७ अ० । विशे० ।

णीहरिय–निर्हृत्य–अव्य० । निष्काश्येत्यर्थे, नि० चू० ९ उ० ।

णीहार–निर्हार–पुं० । मूत्रपुरीषोत्सर्गे, स० ३४ सम० ।

णीहारचारण–नीहारचारण–पुं० । नीहारमवष्टभ्याप्कायिकजीवपीडामजनयति गतिमसङ्गां कुर्वति चारणभेदे, प्रव० ६८ द्वार । ग० ।

णीहारण–निर्हारण–न० । निस्सारणे, स्था० २ ठा० ४ उ० ।

णीहारि–(ण्)–निर्हारिण–त्रि० । व्यापिनि, " जोयणणीहारिणा सरेणं । " योजननिर्हारिणा योजनव्यापिना शब्देन । आ० म० १ अ० २ खण्ड० योजनातिक्रामिणा शब्देन । स० ३४ सम० । प्रबले, आ० म० १ अ० २ खण्ड । घोषवति, घण्टाशब्दवच्छब्दभेदे, स्था० १० ठा० ।

णीहारिम–निर्हारिम–न० निर्हारेण निर्वृत्तं यत्तन्निर्हारिमम् । प्रतिश्रये यो म्रियते तस्यैतत् कलेवरस्य निर्हारणात् निर्हारिममुच्यते पादोपगमनमरणभेदे, प्र० २ श० १ उ० । ('मरण' शब्दे व्याख्या वक्ष्यते) दूरं विनिर्गमनशीले, आ० म० १ अ० १ खण्ड । रा० । ज्ञा० ।

णीहुय–निभृत–त्रि० । अपलपिते, देशी । अकिञ्चित्करे, " पवयणणीहुयाणं । " आ० म० १ अ० २ खण्ड ।

णु–नु–अव्य० । निश्चये, प्रति० । वितर्के, विशे० । सूत्र० । आ० चू० । विकल्पे, अनुनये, अतीते, प्रश्ने, हेतौ, अपमाने, अपदेशे, अनुतापे च । वाच० ।

णुक्कार–नुक्कार–पुं० । नुगितिशब्दकरणे, " अप्पेगइया देवा णुक्कारं करेंति । " (णुक्कारं ति) नुक्कारशब्दं कुर्वन्ति । रा० ।

णुम–न्यस्–धा० । न्यासे, स्थापने, " न्यसो णिम-णुमौ " ॥ ८ । ४ । १६६ ॥ इति न्यस्यतेर्णुमाऽऽदेशः । 'णुमइ' । न्यस्यति । प्रा० ४ पाद ।

छादि–धा० । छादने, "छदेर्णेणुम-नूम-सन्नुम-ढक्कौम्बाल-पव्वाल्लाः " ॥ ८ । ४ । २१ ॥ इति छदेर्यन्तस्य णुमाऽऽदेशः । 'णुमइ' । पक्षे–छाअइ । प्रा० ४ पाद ।

णुमज्जण–निमज्जन–न० । " ह्रिन्योरुत् " ॥ ८ । १ । ९४ ॥ इति इत उत्वम् । अधोऽवगमने, प्रा० १ पाद ।

णुमण्ण–निमग्न–त्रि० । " ह्रिन्योरुत् " ॥ ८ । १ । ६४ ॥ इति इत उत्वम् । ब्रुडिते, प्रा० १ पाद ।

निषण्ण–त्रि० । " उमो निषण्णे " ॥ ८ । १ । १७४ ॥ इतिनिषण्णशब्दे आदेः स्वरस्य परेण सस्वरव्यञ्जनेन सहोमादेशः । "णुमण्णो" । " णिसण्णो " । उपविष्टे, प्रा० १ पाद ।

णुव्व–प्रकाश–धा० । प्रकाशने, " प्रकाशेणुव्वः " ॥ ८ । ४ । ४५ ॥ इति प्रकाशेपर्यन्तस्य णुव्वेत्यादेशः । ' णुव्वइ ' । प्रकाशयति । प्रा० ४ पाद ।

णूणं–नूनम्–अव्य० । निश्चिते, बृ० १ उ० । उत्त० । सूत्र० । भ० । ज्ञा० । क्रि० । उपमाने, अवधारणे, तर्के, प्रश्ने, हेतौ, जं० २ श० ६ उ० ।

णूम–छादि–धा० । छादने, "छदेर्णेणुम-नूम-सन्नुम-ढक्कौम्बाल-पव्वाल्लाः " ॥ ८ । ४ । २१ ॥ इति छदेर्यन्तस्य नूमादेशः । " णूमइ ।" " छाअइ ।" छादयति । प्रा० ४ पाद । " मा हु णूमए तरुणी ।" मा हु समाच्छादयेत्तरुणी । बृ० १ उ० ।

णूम–न० । अवतमसे, गाढतमसे, प्र० १ श० ८ उ० । प्रच्छन्ने गिरिगुहाऽऽदिके, सूत्र० १ श्रु० ३ अ० ३ उ० । आचा० । प्रच्छादने, प्रश्न० २ आश्र० द्वार । गहने, मायायाम, सूत्र० १ श्रु० १ अ० ४ उ० । कर्मणि, आचा० १ श्रु० ८ अ० ८ उ० । सूत्र० । स० । परवञ्चनार्थं निम्नतायां निम्नस्थानस्य च आश्रयणे, प्र० १२ श० ५ उ० । भिन्ने, नि० चू० ११ उ० ।

णूमगिह–छन्नगृह–न० । वृक्षप्रधाने गृहे, आचा० २ श्रु० १ चू० ३ अ० ३ उ० । भूमिगृहे, नि० चू० १२ उ० ।

णूसा–देशी–ज्ञाखायाम्, दे० ना० ४ वर्ग ४३ गाथा ।

णे–णे–अव्य० । 'णे' इति निपातः । पूरणे, जी० ३ अधि० ।

अस्मान्-द्वि० "अम्हे-अम्हो-अम्ह-णे शसा" ॥८।३।१०८॥ इति शसा सहितस्याऽस्मदो 'णे' इत्यादेशः । प्रा० ३ पाद । नि० चू० ।

मया–तृ० । "मि-मे-मम-ममए-ममाइ-मइ-मए-मयाइ-णे टा" ॥ ८ । ३ । १०६ ॥ इति सूत्रेण टाविशिष्टस्याऽस्मदो 'णे' इत्यादेशः । 'णे कयं' मया कृतम् । प्रा० ३ पाद ।

अस्माकम्–ष० । "मे-णो-मज्झ-अम्ह-अम्हं-अम्हे-अम्हो-अम्हाण-ममाण-महाण-मज्झाण आमा" ॥ ८ । ३ ।११४ ॥ इति सूत्रेण आमासहितस्याऽस्मदो 'णे' इत्यादेशः । प्रा० ३ पाद ।

णेउड्ड–देशी–खद्धावे, दे० ना० ४ वर्ग ४४ गाथा ।

णेउणिय–नैपुणिक–न० । 'णिउणिय' शब्दार्थे, अनुप्रवादपूर्वगते स्वनामख्याते वस्तुनि, आ० म० १ अ० २ खण्ड० । विशे० ।

णेउण्ण–नैपुण्य–न० । आत्रेरयाऽऽदिकद्यायाम्, दश० ६ अ० २ उ० । आव० ।

णेउर–नूपुर–न० । ऊकारस्यैकारः । पादाऽऽभरणे, प्रश्न० ४ आश्र० द्वार । "खुड्डियचरणेउरचलणमालिया।" औ० । आ० म० द्वीन्द्रियजीवनेदे, प्रज्ञा० १ पद । जी० । चतुरिन्द्रियजीवभेदे, प्रज्ञा० १ पद । जी० ।

णेऊण–नीत्वा–अव्य० । "युवर्णस्य गुणः" ॥ ८ । ४। २३७॥ इति युवर्णस्य गुणः । गमयित्वेत्यर्थे, प्रा० ४ पाद ।

णेग–नैक–त्रि० । न एकं नैकम् । नायं नञ्, किं तु न इति । प्रभूते, आ० म० १ अ० २ खण्ड । बहुके, प्रश्न० ३ आश्र० द्वार । सूत्र० । विशे० ।

णेगम-नैगम-पुं० । निगमा वणिजः, तेषां स्थानं नैगमम् । वणिजाऽऽवासे, आचा० २ श्रु० १ चू० १ अ० २ उ० । वाणिजके, भ० १८ श० २ उ० । कल्प० । बृ० । सामान्यविशेषग्राहकत्वात्तस्यानेकेन ज्ञानेन मिनोति परिच्छिनत्तीति नैगमः । अथवा निगमा निश्चितार्थबोधाः, तेषु कुशलो भवो वा नैगमः । अथवा–नैको नमोऽर्थमार्गो यस्य स प्राकृतत्वेन नैगमः । निगमेषु वाऽर्थबोधेषु कुशलो नवो वा नैगमः । स्था० ३ ठा० ३ उ० ।

नैकम-पुं० । नैकैर्मानैर्महासत्तासामान्यविशेषज्ञानैर्मिमीते मिनोति वा नैकमः । अथवा नैके गमाः पन्थानो यस्य स नैकगमः । (पृषोदरादित्वात् रूपसिद्धिः) स्था० ७ ठा० । अनु० । अह० । ग० । नयभेदे, आ० म० ।

व्युत्पत्तिः–

णेगेहिं माणेहिं, मिणइ त्ती णेगमस्स णेरुत्ती ।
सेसाणं तु नयाणं, लक्खणमिणमो सुणह वोच्छं ॥

न एकं नैकं, नायं नञ्, किं तु न इति । अनुस्वार इति न भवति (?) प्रभूतानीत्यर्थः । ततो नैकैर्मानैर्महासामान्याविशेषाऽऽदिविषयैः प्रमाणैर्मिमीते परिच्छिनत्ति वस्तुजातमिति नैगमः । "पृषोदराऽऽदयः" ॥ ३ । २ । १५५॥ इतीष्टरूपनिष्पत्तिः । तथा चाऽऽह–इति इयं, नैगमस्य निरुक्तिः निर्वचनम् । उपलक्षणमेतत् । तेनाऽन्यथाऽपि नैगमशब्दव्युत्पत्तिः परिभावनीया । तद्यथा–निश्चितो गमो निगमः परस्परविविक्तसामान्याऽऽदिवस्तुग्रहणम्, स एव प्रज्ञाऽऽदेराकृतिगणतया स्वार्थिकाण्प्रत्ययविधानान्नैगमः । यदि वा–निगम्यन्ते परिच्छिद्यन्ते इति निगमाः, तेषु नवो योऽभिप्रायो नियतपरिच्छेदरूपः स नैगमः । अथवा–नैके गमा यस्यासौ नैगमः । पृषोदराऽऽदित्वात् ककारस्य लोपः । बहुविधवस्त्वभ्युपगमपर इत्यर्थः । आ० म० १ अ० २ खण्ड ।

नैगमनयशब्दार्थं तावदाह–

णेगाइं माणाइं, सामन्नोभयविसेसणाणाइं ।
जं तेहिं मिणइ तो णे-गमो णओ णेगमाणो त्ति ॥२१८६॥

न एकं नैकं, प्रभूतानीत्यर्थः, नैकानि, किं तु प्रभूतानि यानि मानानि सामान्योभयविशेषज्ञानानि । तत्र समानानां भावः सामान्यं, सत्ताद्रव्यत्वम्, उभयं सामान्यविशेषोभयरूपमपरापराद्रसामान्यं वृक्षत्वगोत्वगजत्वाऽऽदिकम्, विशेषास्तु नित्यद्रव्यवृत्तयोऽन्त्यस्वरूपा व्यावृत्याकारबुद्धिहेतवः, तेषां सामान्योभयविशेषाणां ग्राहकाणि ज्ञानानि सामान्योभयविशेषज्ञानानि, तैर्यस्मात् मिनोति, मिमीते वा, ततो नैगमः । अत एव नैकमानो नैकपरिच्छेदः, किं तु विचित्रपरिच्छेद इति ॥ २१८६ ॥

नैगमनयस्यैव व्युत्पत्त्यन्तरमाह–

लोगत्थनिबोहा वा, निगमा तेसु कुसलो नवो वाऽयं ।
अहवा जं नेगगमो–ऽणेगपहो णेगमो तेणं ॥ २१८७॥

'वा' इत्यथवा, निगमा भण्यन्ते । के ? । लोकार्थनिबोधाः–अर्था जीवाऽऽद्याः, तेषु नितरामनेकप्रकारा बोधा निबोधा लोकस्यार्थनिबोधा लोकार्थनिबोधाः तेष्वेवंविधेषु निगमेषु नवः कुशलो वाऽयमिति नैगमः । अथवा–अन्यथा व्युत्पत्तिः–गम्यतेऽनेनेति गमः पन्थाः, नैके गमाः पन्थानो यस्याऽसौ, नैकगमः, वक्ष्यमाणनीत्या बहुविधाभ्युपगमपरत्वाद् नैकमार्गः, निरुक्तविधिना च ककारलोपान्नैगम इति ॥ २१८७ ॥

कथंभूतः पुनरयं, कथं चानुगन्तव्य ?, इत्याह–

सो कमविसुद्धभेओ,लोगपसिद्धिवसओऽणुगंतव्वो ।
विहिणा निलयणपत्थय–गामोवम्माइँ संसिद्धो ॥२१८८॥

स नैगमनयः क्रमेण परिपाट्या विशुद्धा विशेषवन्तो भेदाः प्रकारा यस्य स क्रमविशुद्धभेदः । तथाहि–आद्यभेदोऽस्य निर्विकल्पमहासत्ताऽऽख्यकेवलसामान्यवादित्वात्सर्वाविशुद्धः, गोत्वाऽऽदिसामान्यविशेषवादी तु द्वितीयभेदो विशुद्धाविशुद्धः, विशेषवादी तु तृतीयभेदः सर्वविशुद्धः । विशे० । (दृष्टान्ता 'णय' शब्देऽस्मिन्नेव भागे १७३६ पृष्ठे द्रष्टव्याः)

णेगविह–नैकविध–त्रि० । नानाप्रकारे, नि० चू० १ उ० ।

णेचइय–नैचयिक–पुं० । निचयेन संचयेनार्थाद् धान्यानां ये व्यवहरन्ति ते नैचयिकाः । धान्यव्यापारिषु, व्य० ४ उ० ।

णेच्छंत–अनिच्छत्–त्रि० । अनभिलषति, व्य० २ उ० ।

णेच्छिय–नेच्छित–त्रि० । न इच्छितं नेच्छितम् । इच्छाया अविषयीकृते, जी० ।

णेच्छियकामगामिणो ते मणुयगणा ।

नेच्छितकामगामिनः–न इच्छितमिच्छाविषयीकृतं नेच्छितं, नायं नञ् किं तु नशब्दः, इत्यत्राऽऽदेशाभावः । यथा–नैके द्वेषस्य पर्याया इत्यत्र नेच्छितमिच्छाया अविषयीकृतं कामं स्वेच्छया गच्छन्तीत्येवं शीला नेच्छितकामगामिनः, ते मनुजाः । जी० ३ प्रति० ४ उ० । जं० ।

णेट्टूर-नेट्टूर-पुं० । अनार्यदेशभेदे, तत्रत्यमनुष्ये च । प्रश्न० १ आश्र० द्वार । प्रज्ञा० ।

णेड-नीड-न० । " नीडपीठे वा " ॥ ८ । १ । १०६ ॥ इतीत पत्वं वा । 'नेडं' । 'नीडं' । पक्षिणामावासस्थाने, प्रा० १ पाद ।

णेमालो-देशी-शिरोभूषणभेदे, दे० ना० ४ वर्ग ४३ गाथा ।

णेड्ड-नीड-न० । " सेवाऽऽदौ वा " ॥ ८ । २ । ९९ ॥ इति द्वित्वम् । प्रा० २ पाद । पक्षिणामावासस्थाने, प्रा० २ पाद । नीमे, दे० ना० ४ वर्ग ४४ गाथा ।

णेड्डरिया-देशी-भाऽपदोज्ज्वलदशम्यां जाते कस्मिंश्चिदुत्सवविशेषे, दे० ना० ४ वर्ग ४५ गाथा ।

णेत्त-नेत्र-न० । नयन्त्यर्थदेशमर्थक्रियासमर्थमर्थमाविर्भावयन्ति इति नेत्राणि । चक्षुरादिष्विन्द्रियेषु, आचा० १ श्रु० ४ अ० ४ उ० अक्षिणि, "वाऽक्ष्यर्थवचनाद्याः" ॥ ७ । १ । ३३ ॥ इति वा नपुंसकत्वम्, पक्षे स्त्री । प्रा० १ पाद । " दो णेत्ता " प्रज्ञा० १८ पद । "चक्खुमुहे णिग्गयजीहणेत्ते । " उत्त० १२ अ० । मन्थदण्डाऽऽकर्षणरज्जौ, उपा० २ अ० । वस्त्रभेदे, वृक्षमूले, रथे, जटायाम्, नाड्याम्, शलाकायाम्, प्रापयितरि, नयनसाधने, प्रवर्तके च । वाच० ।

णेत्तमूल-नेत्रशूल-न० । नेत्रपीडायाम्, आ० १ श्रु० १३ अ० ।

णेम-नेम-पुं० । भूमिभागादूर्ध्वं निष्क्रामति प्रदेशे, जं० १ वक्ष० । जी० । रा० । आ० म० । नेमशब्दो देश्यः । कार्ये, पिं० । अवधौ, काले, अर्द्धे, प्राकारे, कैतवे, गतिनाट्ये, अन्यस्मिन्नित्यर्थे च । अर्द्धार्थेऽस्य सर्वनामता । वाच० ।

णेमि-नेमि-पुं० । चक्रस्य बाह्यपरिधौ, जी० ३ प्रति० ४ उ० । सूत्र० । न० । " सुकयनेमिजंतकम्माणं । " भ० ९ श० ३३ उ० । चक्रधारायाम्, स्था० ३ ठा० ३ उ० । धर्मचक्रस्य नेमिवक्तेमिः अस्यामवसर्पिण्यां जाते द्वाविंशे तीर्थकरे, कल्प० ७ क्षण । स० । आ० चू० । आव० । ध० । प्रव० । नेमिचरित्रे सर्वसाधूनां द्वादशाऽऽवर्त्तवन्दनं कृष्णो ददौ इत्युक्तमस्ति, न त्वष्टादशसहस्राणामिति तदुक्तिर्लौकिकी, शास्त्रीया वेति ? । यदि शास्त्रीया तदा कथं तदुपपत्तिः ?, " पयट्ठिआणं च तइयं तु । " इतिवचनात्सर्वेषां च पदस्थत्वाभावात् । यदि सर्वेषां पदस्थत्वं तदा ते कस्मिन् पदे स्थिताः ?, इति प्रश्ने, उत्तरम्—यथा नेमिचरित्रे तथाऽऽवश्यकवृत्त्यादावपि सर्वेषां साधूनां द्वादशाऽऽवर्त्तवन्दनकमुक्तमस्ति, सर्वशब्देन चाष्टादशसहस्रसंख्या समागतैवेति द्वारिका । किं च-सर्वेषामिति पदं विवक्षितसर्वपरं, तेन पदस्थानामेव वन्दनकप्रदानं संजाव्यते, पदस्थेष्वपि ये गुरुनिकटस्थास्ते कथं तद्दापयन्तीति विचारेण सर्वं समञ्जसमेवेति । २३१ प्र० । तथा श्रीकल्पसूत्रे श्रीनेमेश्चत्वारि शतसहस्राण्यार्या उक्ताः सन्ति, नेमिचरित्रे त्वेवम्-" विना च कनकवतीं, रोहिणीं देवकीं तथा । पत्न्योऽपि प्राव्रजन् स्वामि-सन्निधौ सकला अपि ॥ १ ॥ " वसुदेवादिदशाम्यामपि द्वासप्ततिसहस्राण्यपि वसुदेवपत्न्यः श्रीनेमिपार्श्वे प्रव्रज्य मोक्षं गताः । अन्या अपि सहस्रशः कृष्णाऽऽदिपत्न्यः नेमिपार्श्वे प्रव्रजिताः सन्तीति कथं संगच्छते ?, तथा सर्वेषामपि तीर्थकृतां श्राद्धश्राद्धीसाधुसाध्वीसंख्या कल्पसूत्रोक्ताऽपि संदेहमावहतीति प्रश्ने, उत्तरम्-तीर्थकृतां पार्श्वे यैः सम्यक्त्वलाभपूर्वकं देशविरत्यादि प्रतिपन्नं, त एव तीर्थकृत्परिवारमध्ये गण्यन्ते, नान्ये इति न कोऽपि शङ्काऽवकाश इति । २३२ प्र० । अथ पञ्चासहर्षचन्द्रगणिकृतप्रश्नोत्तराणि च यथा-श्रीजिनेन्द्राम्बा जिनेन्द्रप्रसवनानन्तरमपत्यं प्रसूते, न वेति प्रश्ने, उत्तरम्-एकान्तो ज्ञातो नास्ति । नेमिनाथाऽऽदीनां रथनेमाऽऽदेर्लघुभ्रातृतया प्रतीतत्वादिति । ४१६ प्र० । नेमिनाथस्यैकादश गणधरा एकविंशतिस्थानके कथिताः, कल्पसूत्रे त्वष्टादश, तत्कथमिति प्रश्ने, उत्तरम्-तावत पवैकविंशतिस्थानके तथा सप्तविंशस्थानकप्रवचनसारोद्धाराऽऽवश्यकाऽऽदिग्रन्थेषु च कथिताः सन्ति। कल्पसूत्रे तु नेमिनाथस्याष्टादश गणधरा इत्यादि यदन्तरं पतति तन्मतान्तरं ज्ञेयमिति । ४४८ प्र० । सेन० ३ उल्ला० । ('अरिष्टनेमि' शब्दे प्रथमभागे ७६२ पृष्ठे कथोक्ता) ('रहनेमि' शब्दे विस्तृता कथा, राजीमतिरथनेमिसम्वादश्चाभिधास्यते)

णेमिचंद-नेमिचन्द्र-पुं० । वि० सं० १२०० मिते विद्यमाने वैरस्वामिशिष्ये सागरेन्दुस्वामिगुरौ, अयमाचार्यः तर्कशास्त्रेऽतीव कुशल आसीत् । जै० इ० ।

णेमित्तकारण-नैमित्तकारण-न० । निमित्तस्येदं नैमित्तं, तदेव कारणं नैमित्तकारणम् । नैमित्तककारणे, आ० म० १ अ० २ खण्ड । विशे० ।

णेमित्तिय-नैमित्तिक-न० । निमित्तमतीताऽऽदिपरिज्ञानोपायशास्त्रम्, तदेव नैमित्तिकम् । कूटपर्वताऽऽदौ, पापश्रुते, स्था० ९ ठा० । निमित्तं त्रैकालिकं लाभालाभप्रतिपादकं शास्त्रं, तद् वेत्त्यधीते वा नैमित्तिकः । ध० २ अधि० । अष्टाङ्गनिमित्तसम्पन्ने, नि० चू० १ उ० । प्रव० । दश० । आचा० ।

णेमिपडिरूवग-नेमिप्रतिरूपक-न० । नेमिश्चक्रधारा, तद्योगाच्चक्रमपि नेमिस्तत्प्रतिरूपकम् । वृत्ततया तत्सदृशम् । वृत्तस्थाने, भ० १४ श० ६ उ० ।

णेय-ज्ञेय-त्रि० । ज्ञायत इति ज्ञेयम् । ज्ञानविषये, नि० चू० १ उ० । ज्ञानक्रियाविषये परिच्छेद्ये, व्य० १ उ० । विशे० । ज्ञातव्ये, आव० ४ अ० । पञ्चा० ।

णेयव्व-नेतव्य-त्रि० । संवेदनविषयतां प्रापणीये, उत्त० १ अ० ।

णेया-नेतृ-त्रि० । नयनशीलो नेता, नयतेस्ताच्छीलिकस्तृन् । सूत्र० १ श्रु० ३ अ० १ उ० । प्रणायके, सूत्र० १ श्रु० १ अ० २ उ० । स० ।

णेयाउय-नैयायिक-पुं० । न्यायेन चरति नैयायिकः । न्यायाऽबाधिते, आ० चू० ४ अ० । न्यायानुगते, औ० । न्यायनिष्ठे, उत्त० २ अ० । सूत्र० । न्यायमनतिक्रान्ते, दश० ९ अ० । न्यायोपपन्ने, उत्त० ३ अ० । सूत्र० । गौतमशास्त्रज्ञे आप्तपादे, पुं० । ते च प्रमाणप्रमेयाऽऽदीनां पदार्थानामन्वयव्यतिरेकपरिज्ञानान्निःश्रेयसाधिगम इति व्यवस्थिताः । सूत्र० १ श्रु० १ अ० १ उ० । नयनशीलो नैयायिकः, न्याये वा नयो नैयायिकः । मोक्षगमके, ज्ञा० १ श्रु० १ अ० । ध० । भ० । आव० । मोक्षनयनशीले, " नेयाउयं सुअक्खायं, उवादाय समीहए । " नयनशीलो नेता, नयतेस्ताच्छीलिकस्तृन् । स चाऽत्र सम्यग्दर्शनज्ञानचारित्राऽऽत्मको मोक्षमार्गः । श्रुतचारित्ररूपो वा धर्मो मोक्षनयनशीलवान् गृह्यते; मार्गं धर्मं वा मोक्षं प्रति नेतारं सुष्ठु तीर्थकराऽऽदिभिराख्यातं स्वाख्यातं तमुपादाय गृहीत्वा सम्यक् मोक्षाय चेष्टते ध्यानाध्ययनाऽऽदावुद्यमं विधत्ते । सूत्र० २ श्रु० ७ अ० ।

णेरइय--नैरयिक--पुं० । निर्गतमविद्यमानमयमिष्टफलं येभ्यस्ते निरयाः, तेषु भवा नैरयिकाः । क्लिष्टसत्त्वविशेषेषु, स्था० ।
"तिविहा णेरइया पण्णत्ता । तं जहा-कतिसंचया, अकतिसंचया, अवत्तव्वगसंचया, एवं एगिंदियवज्जा० जाव वेमाणिया" (एवमिति) नारकवच्छेषाश्चतुर्विंशतिदण्डकोक्ता वाच्याः, एकेन्द्रियवर्जाः, यतस्तेषु प्रतिसमयमसङ्ख्याता अनन्ता वा अकतिशब्दवाच्या एवोत्पद्यन्ते, न त्वेकः, सङ्ख्याता वा इति ।

आह च--

" असुसमयसंखिज्जा, संखिज्जाओ य तिरियमणुया य ।
एगिंदिएसु गच्छे, आरा ईसाणदेवा य ॥ १ ॥
एगो असंखभागो, वट्टइ उव्वट्टणोववायम्मि ।
एगनिगोए णिच्चं, एवं सेसेसु वि स एव त्ति " ॥ २ ॥

स्था० ३ ठा० १ उ० । दश० । नरकभवमनुप्राप्तेषु जन्तुषु, दश० १ चू० । रत्नशर्कराऽऽदिमहातमःपृथ्वीपर्यन्तनरकाऽऽवासिषु, आचा० १ श्रु० १ अ० ६ उ० । प्रज्ञा० । जी० । सूत्र० । उत्त० । स्था० । (नैरयिकसिद्धादिकोऽधिकारः ' णरग ' शब्देऽस्मिन्नेव भागे १६०४ पृष्ठे उक्तः) (' असुरोववण्ण ' शब्दे प्रथमभागे ८८६ पृष्ठेऽत्यन्ता सर्वा वक्तव्यता गता) (नैरयिकाणाम् अन्तरं, कालस्थितिः, ज्ञानं, दृष्टिः, समुद्घातश्चेत्येवमाद्योऽन्तराऽऽदिशब्देषु, जीवशब्दे च पुद्गलभेदादिश्चलितकर्मनिर्जरणाऽऽदि च सर्वं विलोकयम्)

नैरयिकानाह-

नेरइया सत्तविहा, पुढवीसू सत्तसू भवे ।
(पज्जत्तमपज्जत्ता, तेसिं भेए सुणेह मे)
रयणाऽऽ सक्कराभा, वालुयाभा य आहिया ॥ १५७ ॥
पंकाभा धूमाभा, तमाभा तमतमा तहा ।
इति णेरइया एए, सत्तधा परिकित्तिया ॥ १५८ ॥
लोगस्स एगदेसम्मि, ते सव्वे उ वियाहिया ।
एत्तो कालविभागं तु, तेसिं वोच्छं चउव्विहं ॥ १५९ ॥
संतइं पप्प णाईया, अपज्जवसिया वि य ।
ठितिं पडुच्च सादीया, सपज्जवसिया वि य ॥ १६० ॥
सागरोवमेगं तु, उक्कोसेणं वियाहिया ।
पढमाए जहन्नेणं, दसवाससहस्सिया ॥ १६१ ॥
तिन्नेव सागरा ऊ, उक्कोसेण वियाहिया ।
दोच्चाए उ जहन्नेणं, एगयं सागरोवमं ॥ १६२ ॥
सत्तेव सागरा ऊ, उक्कोसेण वियाहिया ।
तइयाए जहन्नेणं, तिन्नेव सागरोवमा ॥ १६३ ॥
दससागरोवमा ऊ, उक्कोसेणं वियाहिया ।
चउत्थीए जहन्नेणं, सत्तेव सागरोवमा ॥ १६४ ॥
सत्तरस सागरा ऊ, उक्कोसेण वियाहिया ।
पंचमाए जहन्नेणं, दसेव सागरोवमा ॥ १६५ ॥
वावीस सागरा ऊ, उक्कोसेण वियाहिया ।
छट्ठीए य जहन्नेणं, सत्तरस सागरोवमा ॥ १६६ ॥
तेत्तीससागरा ऊ, उक्कोसेण वियाहिया ।
सत्तमाए जहन्नेणं, वावीसं सागरोवमा ॥ १६७ ॥
जा चेव य आउठिई, णेरइयाणं वियाहिया ।
सा तेसिं कायठिई, जहण्णुक्कोसिया भवे ॥ १६८ ॥
अणंतकालमुक्कोसं, अंतोमुहुत्तं जहन्नयं ।
विजढम्मि सए काए, णेरइयाणं तु अंतरं ॥ १६९ ॥
एतेसिं वण्णओ चेव, गंधओ रसफासओ ।
संठाणदेसओ वा वि, विहाणाइं सहस्ससो ॥ १७० ॥

चतुर्दशसूत्राणि-नैरयिकाः सप्तविधाः सप्तप्रकाराः, किमिति ?, यतः, पृथिवीषु सप्तसु (भवे त्ति) भवेयुः, ततस्तद्भेदात्तेषां सप्तविधत्वमिति भावः । काः पुनस्ताः सप्तेत्याह-(रयणाऽऽ त्ति) रत्नानां वैडूर्याऽऽदीनामाभा स्वरूपतः प्रतिभासनमस्या• मिति रत्नाभा, इत्थं चैतत्तत्र रत्नकाण्डस्य भवनपतिभवनानां च विविधरत्नवतां सम्भवात् । एवं सर्वत्र, नवरं शर्करा ऋष्टपाषाणशकलरूपा । तदाह-(धूमाऽऽ त्ति) यद्यपि तत्र धूमासंभवस्तथापि तदाकारपरिणतानां पुद्गलानां सम्भवात्, तमोरूपत्वाच्च तमःप्रभा, प्रकृष्टतरतमत्वाच्च तमस्तमा । इतीत्थमुना पृथिवीसप्तविधस्वरूपकरणेन प्रकारेण नैरयिका एते सप्तधा परिकीर्तिताः । " लोगस्स " इत्यादि सूत्रद्वयं क्षेत्रकालाभिधायि प्राग्वत्, सादिसपर्यवसितत्वं द्विविधस्थित्यनिधानद्वारतो भावयितुमाह-(सागरोपममेगं तु) उत्कृष्टेन व्याख्याता, प्रथमायां प्रक्रमाद्रत्नप्रभायां पृथिव्यां, जघन्येन दशवर्षसहस्राणि यस्यां सा दशवर्षसहस्रिका, प्रस्तावादायुःस्थितेर्नैरयिकाणामितीहोत्तरसूत्रेषु च द्रष्टव्यम् । द्वितीयायां (सागर त्ति) सागरोपमाणि, तुःपूरणे, उत्कृष्टेन व्याख्याता । द्वितीयायाम्-(जहन्नेणं ति) उत्तरत्र तुशब्दस्य पुनःशब्दार्थस्य निष्क्रमत्वेनेह संबन्धाज्जघन्येन पुनरेकं सागरोपमम् सप्तैव सागरोपमाणि तूत्कृष्टेन व्याख्याता । तृतीयायां जघन्येन पुनस्त्रीण्येव सागरोपमाणि । दश सागरोपमाणि तूत्कृष्टेन व्याख्याता । चतुर्थ्यां जघन्येन सप्तचतुःसागरोपमाणि, सप्तदशसागरोपमाणि तूत्कृष्टेन व्याख्याता । पञ्चम्यां जघन्येन दश चैव तु सागरोपमाणि, द्वाविंशतिसागरोपमाणि तूत्कृष्टेन व्याख्याता । षष्ठ्यां जघन्येन सप्तदश सागरोपमाणि, त्रयस्त्रिंशत्सागरोपमाणि तूत्कृष्टेन व्याख्याता । सप्तम्यां नरकपृथिव्यां जघन्येन द्वाविंशतिसागरोपमाणि आयुःस्थितिरुक्ता । कायस्थितिमाह-या चेति, चशब्दोऽवक्तव्यतान्तरोपन्यासे, एवेति भिन्नक्रमः, चः पुनरर्थः, ततो यैव च पुनरायुःस्थितिर्नैरयिकाणां व्याख्याता (से त्ति) एवकारस्य गम्यमानत्वात्सैव. तेषां कायस्थितिः जघन्योत्कृष्टा भवेदित्थं चैतत् उद्वृत्तानां पुनस्तत्रैवानुपपत्तेः, तेहि तत उद्वृत्य गर्भजपर्याप्तकः संख्येयवर्षायुष्वेवोपजायते । यत उक्तम्-" णरगंतो उव्वट्टा, गब्भे पज्जत्तसंखजीवीसु । णियमेण होइ वासो, अट्ठीण उ संभवो वुच्चं" ॥ १ ॥ अन्तरानिधानाभिधायि सूत्रद्वयं प्राग्वत्, नवरमन्तर्मुहूर्तं जघन्यमन्तरं यदाऽन्यतरनरकादुद्वृत्य कश्चिज्जीवो गर्भजपर्याप्तकं मत्स्याऽऽदिषूत्पद्यते, तत्र चातिसंक्लिष्टाध्यवसायोऽन्तर्मुहूर्तमायुः प्रतिपाल्य मृत्वाऽन्यतमनरके एवोपजायते, तदा लभ्यते इति भावनीयमिति चतुर्दशसूत्रार्थः । उत्त० पाई० ३६ अ० ।
(नैरयिकाणां स्थितिः 'ठिइ' शब्देऽस्मिन्नेव भागे १७१७ पृष्ठे गता)

णेरइयत्ता--नैरयिकता--स्त्री० । नैरयिकत्वे नैरयिकभावे, स्था० ४ ठा० ४ उ० ।

णेरइयावास–नैरयिकावास–पुं० नैरयिकाणामावासभूमौ, जी० १ प्रति० । स्था० ।

णेरई–नैर्ऋती–स्त्री० । निर्ऋतिर्देवताऽस्या नैर्ऋती । भ० ७ श० १ उ० । स्था० । पूर्वस्याः पश्चिमायाश्चान्तरालविदिशि, आ० म० १ अ० २ खण्ड । विशे० । स्था० ।

णेरप्प–नैरात्म्य–न० । आत्मरहितत्वे, शौद्धोदनीयाः पुनरेवमाहुः–नैरात्म्यभावना । नं० ।

णेरुत्त–नैरुक्त–न० । अभिधानाक्षरानुसारतो निश्चितार्थस्य वचनं ब्रूयनं निरुक्तं, तत्र भवं नैरुक्तम् । निरुक्तवशेनाऽर्थाभिधायके नाम्नि, यथा महां शेते महिष इत्यादि । अनु० । निरुक्तशास्त्रविदि, पुं० । त्र्य० ७ उ० ।

णेल्ल–नैल्य–न० । नीलीविकारे, भ० १ श० १ उ० । प्रज्ञा० ।

णेल्लच्छ–पाणिमत–पुं० । " गोणाऽऽदयः " ॥ ८ । २ । १७४ ॥ इति पाणिमतशब्दस्य णेलच्छाऽऽदेशः प्राकृते, प्रा० २ पाद । षपदे, दे० ना० ४ वर्ग ४४ गाथा ।

णेल्लिच्छी–देशी–कूपतुलायाम्, दे० ना० ४ वर्ग ४४ गाथा ।

णेवइय–नैतकिक–त्रि० । नीतिकारिणि, त्र्य० १ उ० ।

णेवच्छण–देशी–अवतारणे, दे० ना० ४ वर्ग ४० गाथा ।

णेवत्थ–नेपथ्य–न० । वेषे, प्रश्न० ४ आश्र० द्वार । आ० म० । औ० । रा० । स्त्रीपुरुषाणां वेषे, स्था० ४ ठा० २ उ० । परिधानाऽऽदिरचने, ज्ञा० १ श्रु० १ अ० । केशचीवरसमारचने, दश० ४ तत्त्व । नि० । औ० । निर्मलवेषे, ज्ञा० १ श्रु० १६ अ० । स्था० ।

णेवाइय–नैपातिक–न० । निपतत्यर्हदादिपदानामादिपर्यन्तेषु इति निपातः । निपाते भवं नैपातिकम् । " अध्यात्माऽऽदिभ्य इकण् " ॥६ । ३ । ७८ ॥ इति अध्यात्माऽऽदित्वादिकण् । यदि वा निपात एव नैपातिकम् । निपातसंज्ञके पदे, विशे० । आ० म० ।

णेवाल–नेपाल–पुं० । देशभेदे, नेपालनामा ऋषभदेवपुत्र आसीत्तद्राज्यभूतो देशोऽपि नेपालः । आव० ४ अ० । कल्प० । आ० चू० ।

णेवेज्जपूया–नैवेद्यपूजा–स्त्री० । घृतदधिदुग्धाऽऽदिनानाव्यञ्जनरससमग्राऽऽहारस्य जिनानां पुरः स्थापौकने, " घयदहियनाणाविहवंजणरससमग्गं पयदिणं जिणाणं पुरओ दाऊण भत्तीए सत्तीए जोयणं कायव्वं । " दर्श० १ तत्त्व । (अत्र दृष्टान्तो दर्शनशुद्धिग्रन्थादवसेयः)

णेसज्ज–नैषद्य–पुं० । समपुततयोपविष्टे, प्रव० ६७ द्वार । निषद्यावति, पञ्चा० १७ विव० ।

णेसज्जिय–नैषधिक–पुं० । निषद्यया चरके, निषद्योपविष्टे, बृ० ।

निषद्याः पञ्च भवन्ति–

पंचेव निसिज्जाओ, तासिं विन्नासा उ कायव्वा ।

निषद्याः पञ्चैव भवन्ति, तासां विनाशा कर्त्तव्या । सा चेयमनिषद्या नामोपवेशनविशेषाः, ताः पञ्चविधाः तद्यथा–समपादपुता, गोनिषद्यिका, हस्तिशुण्डिका, पर्यन्ता, अर्द्धपर्यन्ता चेति । तत्र यस्यां समौ पादौ पुतौ च स्पृशतः सा समपादपुता, यस्यां तु गोरिवोपवेशनं सा गोनिषद्यिका, यत्र तु ताभ्यामुपविश्यैकं पादमुत्पाटयति सा हस्तिशुण्डिका । पर्यङ्का प्रतीता । अर्द्धपर्यङ्का च यस्यामेकं जानुमुत्पाटयति, एवंविधनिषद्यया चरन्तीति नैषधिकाः । बृ० ५ उ० । सूत्र० । स्था० । आचा० ।

णेसत्थिया–नैसृष्टिकी–स्त्री० । निसर्जनं निसृष्टं, क्षेपणमित्यर्थः तत्र भवा नैसृष्टिकी, निसृजतः कर्मबन्धरूपायां निसर्गरूपायां वा क्रियायाम्, स्था० २ ठा० १ उ० । " णेसत्थिया किरिया दुविहा पण्णत्ता । तं जहा–जीवणेसत्थिया चेव, अजीवणेसत्थिया चेव । " राजाऽऽदिसमादेशाद्यदुद्गरकस्य यस्याऽऽदिभिर्निसर्जनं सा जीवनैसृष्टिकीति; यत्तु काण्डाऽऽदीनां धनुरादिभिः सा अजीवनैसृष्टिकीति । अथवा-गुर्वादौ जीवं शिष्यं पुत्रं वा निसृजतो ददत एका, अजीवं पुनरेषणीयभक्तपानाऽऽदिकं निसृजतो ददतोऽन्येति । स्था० २ ठा० १ उ० । आव० चू० ।

णेसत्थी–देशी–वणिक्सचिवे, दे० ना० ४ वर्ग ४४ गाथा ।

णेसप्प–नैसर्प–पुं० । निधानभेदे, तदभेदविषयक्रया देवतायां च । स्था० । "णेसप्पंमि निवेसा, गामागरनगरपट्टणाणं च । दोणमुहमडंबाणं, संधाराणं गिहाणं च ॥ १ ॥ " स्था० ९ ठा० । (' णिहि ' शब्दे ऽस्मिन्नेव भागे २१५१ पृष्ठे व्याख्यातम्)

णेसर–देशी–रवौ, दे० ना० ४ वर्ग ४४ गाथा ।

णेसाय–निषाद–पुं० । निषीदन्ति स्वरा यस्मात्स निषादः स्वरविशेषे, " निषीदन्ति स्वरा यस्मा-न्निषादस्तेन हेतुना । सर्वोत्तिभवत्वेषः, यदादित्योऽस्य दैवतम् ॥१॥ " स्था० ७ ठा० ।

णेह–स्नेह–पुं० । " क-ग-च-ज-त-द-प-य-वां प्रायो लुक् " ॥ ८ । १ । १७७ ॥ इति सूत्रेण लुक् । प्रा० १ पाद । मोहोदयजे प्रीतिविशेषे पुत्राऽऽदिष्वत्यन्तानुरागे, आतु० । जीत० । तैलाऽऽदिगतरसे, यदुक्तशादु दाहानुकूल्यम् । आचा० ।

णेहज्झाण–स्नेहध्यान–न० । स्नेहो मोहोदयजः प्रीतिविशेषः पुत्राऽऽदिष्वत्यन्तानुरागः । मरुदेवीसुनन्दादरक्षकमात्राऽऽदीनामिव दुर्ध्याने, भातु० ।

णेहपच्चय–स्नेहप्रत्यय–न० । स्नेहनिमित्ते, क० प्र० १ प्रक० ।

णेहपच्चयफड्ग–स्नेहप्रत्ययस्पर्धक–न० । स्नेहप्रत्ययं स्नेहनिमित्तमेकैकस्नेहाविभागवृद्धानां पुद्गलवर्गणानां समुदायरूपं स्पर्धकं स्नेहप्रत्ययस्पर्धकम् । स्नेहनिमित्ते स्पर्धके, क० प्र० १ प्रक० ।

णेहफड्गपरूवणा–स्नेहस्पर्धकप्ररूपणा–स्त्री० । प्रयोगेण गृहीतानां पुद्गलानां स्नेहमधिकृत्य स्पर्धकप्ररूपणायाम्, क० प्र० १ प्रक० ।

णेहाउ–स्नेहवत्–त्रि० । " आल्लिल्लोल्लाल-वन्त-मंतेत्ते-मणामतोः " ॥ ८ । २ । १५९ ॥ इति मत्वर्थे आलुः । स्निग्धे, प्रा० २ पाद ।

णेहुत्तुप्पियगत्त–स्नेहोत्तेपितगात्र–त्रि० । स्नेहस्नेहितशरीरे, विपा० १ श्रु० २ अ० ।

णो–नो–अव्य० । अवधारणे, सूत्र० १ श्रु० ७ अ० । निषेधे, विशे० । सूत्र० । आ० म० । भ० । सर्वनिषेधे, नं० । देशनिषेधे च । दश० १ अ० । आचा० । विशे० । उत्त० । त्र्य० । " नो कप्पइ आमपलम्बो " इति सूत्रे नोकारशब्दस्यैव भावनां करोति–"नोकारो खलु देसं, पडिसेदयई पकप्पिआ" नोशब्दः

प्रायो देशप्रतिषेधे वर्त्तते । यथा नो घट इत्युक्ते घटैकदेशः कपालाऽऽदिकः प्रतीयते, एवमत्रापि नोकारो देशं प्रतिषेधयति । बृ० १ उ० । कल्प० । "नो धम्मो धम्मेगदेसो, तब्विवरीयं च जं दव्वं ।" नोकारो देशप्रतिषेधकः,तदन्यभावसूचको वा । यथा-नो घट इत्युक्ते घटैकदेशः कपालाऽऽदिकोऽवयवः, तद् विपरीतमन्यद् द्रव्यं पटाऽऽदिकम् । बृ० १ उ० । साहचर्ये,कर्म० १ कर्म० ।

णोअक्खरसंबद्ध–नोअक्षरसंबद्ध–पुं० । अक्षरसम्बद्धादितरो नोअक्षरसम्बद्धः । अक्षरसंबद्धभिन्ने, स्था० ३ ठा० ३ उ० ।

णोअजीव–नोऽजीव–पुं० । अजीवत्वरहिते, नयो० ।

जीवो वा जीवदेशो वा, प्रदेशो वाऽप्यजीवगः ।
अनयैव दिशा ज्ञेयो, नोअजीवपदादपि ॥ ४४ ॥

(जीवो वेति) अनयैवोक्तयैव दिशा नोअजीवपदादपि नोशब्दस्य सर्वनिषेधकत्वे जीवो जीवपदार्थो वा बोध्यः, तस्य देशनिषेधकत्वे चाजीवदेशो वाऽजीवगः अजीवाश्रितः प्रदेशो वा । "अमानोनाः प्रतिषेधे" इत्यनुशासनतौल्येऽपि संसर्गाभावोऽन्योन्याभावश्च नञोऽर्थः । नोशब्दस्य त्वभाव एकदेशो वा, तत्र चान्वयिताऽवच्छेदकावच्छिन्नप्रतियोगिताकत्वतदेकदेशत्वाऽऽदि व्युत्पत्तिबललभ्यमिति सिद्धान्तपरिभाषेति निगर्वः ॥ ४४ ॥ नयो० ।

णोअमण–नोअमनस्–न० । अविवक्षितसम्बन्धिविशेषे मनोमात्रे, स्था० ३ ठा० ३ उ० ।

णोअवयण–नोअवचन–न० । वचनमात्रे, स्था० ३ ठा० ३ उ० ।

णोआउज्जसद्द–नोआतोद्यशब्द–पुं० । आतोद्यादितरो नोआतोद्यशब्दः । स्था० २ ठा० ३ उ० । " णोआउज्जसद्दे दुविहे पण्णत्ते । तं जहा–भूसणसद्दे चेव,नो भूसणसद्दे चेव । " स्था० २ ठा० ३ उ० । (स्वस्वस्थाने व्याख्या)

णोआगम–नोआगम–पुं० । आगमस्याभावे, आगमस्यैकदेशे, आगमेन सह मिश्रणे च । नोशब्दस्य त्रिष्वप्यर्थेषु वर्तमानत्वात् । आ० म० १ अ० १ खण्ड । पदार्थाऽपरिज्ञाने,नं० । ध० । अनु० ।

णोआगास–नोआकाश–न० । आकाशादन्यस्मिन् धर्मास्तिकायाऽऽदौ, स्था० २ ठा० १ उ० ।

णोइंदिय–नोइन्द्रिय–न० । मनसि, साहचर्यात्तत्रोशब्दस्यापरिच्छेदकत्वेनेन्द्रियाणां सदृशमिति तत्सहचरमिति । स्था० ६ ठा० । भ० ।

णोइंदियत्थ–नोइन्द्रियार्थ–पुं० । नोइन्द्रियस्य विषये, स्था० । औदारिकाऽऽदित्वार्थपरिच्छेदकत्वलक्षणधर्मद्वयोपेतमिन्द्रियं, तस्यौदारिकाऽऽदित्वधर्मलक्षणदेशनिषेधान्नोइन्द्रियं मनः, साहचर्यात्तद्वा नोशब्दस्यार्थपरिच्छेदकत्वेनेन्द्रियाणां सदृशमिति तत्सहचरमिति वा नोइन्द्रियं मनः, तस्यार्थो विषयो जीवाऽऽदिर्नोइन्द्रियार्थ इति । स्था० ६ ठा० ।

णोउस्सासग–नोउच्छ्वासक–पुं० । उच्छ्वासपर्याप्तिविकले, "णेरइया दुविहा पण्णत्ता । तं जहा–उस्सासगा चेव, णो उस्सासगा चेव, जाव० वेमाणिया । " स्था० २ ठा० १ उ० ।

णोएगिंदिय–नोएकेन्द्रिय–पुं० । त्रसाऽऽदिषु, आव० ४ अ० ।

णोकम्म–नोकर्मन्–न० । मनोवचनकायाऽऽत्मकेषु कर्मसु, द्रव्या० १३ अध्या० । आ० चू० ।

णोकसाय–नोकषाय–पुं० । कषायैः सहचरा नोकषायाः । हास्याऽऽदिषु, ते च नव, हास्याऽऽदयः षट्, त्रयो वेदाः । अत्र नोशब्दः साहचर्यवाची । एषां हि केवलानां न प्राधान्यमस्ति,किं तु कषायैरनन्तानुबन्ध्यादिभिः सहोदयं यान्ति, तद्विपाकसदृशमेव विपाकं दर्शयन्ति,बुधग्रहवदन्यसंसर्गमनुवर्तन्ते इति भावः । कषायोद्दीपनाद् वा नोकषायाः । उक्तं च–" कषायसहवर्तित्वात्, कषायप्रेरणादपि । हास्याऽऽदिनवकस्योक्ता,नोकषायाकषायता" ॥ १ ॥ कर्म० १ कर्म० । पं० सं० । आ० ।

णोकसायमोहणिज्ज–नोकषायमोहनीय–न० । नोकषायरूपे मोहनीयकर्मणि, तच्च द्विविधम्-हास्याऽऽदिषट्कं, वेदत्रिकं च । कर्म० १ कर्म० ।

णोकसायवेयणिज्ज–नोकषायवेदनीय–न० । नोकषायतया वेद्यते यत्कर्म तन्नोकषायवेदनीयम् । वेदनीयकर्मभेदे,स्था० ।

नवविहे नोकसायवेयणिज्जे कम्मे पण्णत्ते । तं जहा–इत्थीवेए, पुरिसवेए, नपुंसगवेए, हासे, रइ, अरइ, भए, सोगे, दुगुंछा ।

नोशब्दः साहचर्यार्थः,कषायैः क्रोधाऽऽदिभिः सहचरा नोकषायाः, केवलानां नैषां प्राधान्यं, किं तु तैरनन्तानुबन्ध्यादिभिः सहोदयं यान्ति, तद्विपाकसदृशमेव विपाकमादर्शयन्तीति, बुधग्रहवदन्यसंसर्गमनुवर्तन्ते । एवं च नोकषायतया वेद्यते यत्कर्म तन्नोकषायवेदनीयमिति । स्था० ९ ठा० ।

णोकेवलणाण–नोकेवलज्ञान–न० । " णोकेवलणाणे दुविहे पण्णत्ते । तं जहा–ओहिणाणे चेव,मणपज्जवणाणे चेव " स्था० २ ठा० १ उ० ।

णोगार–नोकार–पुं० । निषेधार्थके नोशब्दकारे, विशे० ।

णोगुण–नोगुण–पुं० । गुणेभ्यो विरुद्धं यत्र नो भवति तन्नोगुणम् । अयथार्थे, अनु० ।

से किं तं नोगुणे ? । नोगुणे अकुंतो सकुंतो अमुग्गो समुग्गो अमुद्दो समुद्दो अलालं पलालं अडलिया सडलिया नोपत्तं असइ त्ति पलासो अमाइवाहए माइवाहए अवीअवावए वीअवावए नोइंदगोवाइए इंदगोवे । सेत्तं नोगुणे ।

(से किं तं नोगुणे इत्यादि) गुणनिष्पन्नं यत्र नो भवति तन्नोगुणम्, अयथार्थमित्यर्थः । (अकुंते सकुंते इत्यादि) अविद्यमानः कुन्तोऽस्य प्रहरणविशेष एव(सकुंत त्ति)पक्षी प्रोच्यत इत्यत्यथार्थता । एवमविद्यमानमुद्गोऽपि कर्पूराऽऽद्याधारविशेषः समुद्गः, अद्रुस्याभरणविशेषमुद्रारहितोऽमुद्रः तथा समुद्रो जलराशिः (अलालं पलालं ति) इह प्रकृष्टा लाला यत्र तत्प्रलालं वस्तु,प्राकृते पलालमुच्यते । यत्र तु पलालाभावस्तत्कथं तृणविशेषरूपं पलालमुच्यत इति प्राकृतशैलीमङ्गीकृत्यात्राऽप्यथार्थता मन्तव्या । संस्कृते तु तृणविशेषरूपं पलालं नित्यं त्यक्तिकमेवोच्यते इति न यथार्थाऽयथार्थचिन्ता संभवति । (अडलिया सडलिय त्ति) अत्रापि कुलिकादिभिः सह वर्तमानैश्च प्राकृते ' सडलिय त्ति ' भण्यते, या तु कुलिकारादिसैव पक्किणी सा कथं " सडलिय त्ति " ?, एवमिहापि प्राकृतशै-

लीमेवाङ्गीकृत्याऽयथार्थता । संस्कृते तु शकुनिकैव साऽभिधीयते इति कुतस्तच्चिन्तासंभव इति । एवमन्यथाऽप्यविरोधतः सुधिया भावना कार्या । पलं मांसमनश्नन्नपि पलाश इत्यादि तु सुगमम् । नवरं मातृवाहकाऽऽदयो विकलेन्द्रियजीवविशेषाः । "सेत्तं नोगुणे त्ति" निगमनम् । अनु० ।

णोजीव नोजीव-पुं० । जीवाजीवव्यतिरिक्ते पदार्थे, आ० चू० १ अ० । आ० म० । विशे० । स्था० । (जीवाजीवव्यतिरिक्तं राश्यन्तरमस्तीति ' तेरासिय ' शब्दे वक्ष्यते)

नोजीव इति नोशब्दे-ऽजीवः सर्वनिषेधके ।
देशप्रदेशौ जीवस्य, तस्मिन् देशनिषेधके ॥ ४३ ॥

(नो इति) नोजीव इतिशब्दवाच्ये नोशब्दे सर्वनिषेधके विवक्षितेऽजीव एव । देशनिषेधके तु नोशब्दे आश्रीयमाणे देशनिषेधस्य देशाभ्यनुज्ञानान्तरीयकत्वाज्जीवस्य देशप्रदेशावेव नोजीवशब्दव्यपदेश्यावभ्युपगन्तव्यौ ॥ ४३ ॥ नयो० ।

णोणायार-नोज्ञानाचार-पुं० । ज्ञानाचाराभावे, " णोणायारे दुविहे पण्णत्ते । तं जहा-दंसणायारे चेव, णोदंसणायारे चेव । " स्था० २ ठा० ३ उ० । (स्वस्वशब्दे व्याख्या)

णोतस-नोत्रस-पुं० । त्रसा न भवन्तीति नोत्रसाः । आहाराऽऽदिषु, आव० ४ अ० ।

णोतहा-नोतथा-अव्य० । अन्यथाऽपीतिशब्दस्यार्थे, स्था० ४ ठा० २ उ० ।

णोदंसणायार-नोदर्शनाचार-पुं० । नोदर्शनाऽऽचारश्चारित्राऽऽदिः । "दुविहे णोदंसणायारे पण्णत्ते । तं जहा-चरित्तायारे चेव, नोचरित्तायारे चेव ।" स्था० २ ठा० ३ उ० । (स्वस्वस्थाने व्याख्या)

णोदिय-नोदित-त्रि० । प्रेरिते, गमनाभिमुखीकृते, ज्ञा० १ श्रु० ६ अ० ।

णोपरमाणुपोग्गल-नोपरमाणुपुद्गल-पुं० । स्कन्धेषु, स्था० २ ठा० ३ उ० ।

णोबद्धपासपुट्ठ-नोबद्धपार्श्वस्पृष्ट-पुं० । नोबद्धाः किं तु पार्श्वस्पृष्टा इत्येकपदनिषेधे श्रोत्रेन्द्रियग्रहणगोचराः । एकपदनिषेधे श्रोत्रेन्द्रियग्रहणगोचरेषु, स्था० २ ठा० ३ उ० ।

णोभासासद्द-नोभाषाशब्द-पुं० । अन्यकशब्दे, भाषाशब्दादितरो नोभाषाशब्दः । " णोभासासद्दे दुविहे पण्णत्ते । तं जहा-आउज्जसद्दे चेव, णोआउज्जसद्दे चेव । " स्था० २ ठा० ३ उ० । (स्वस्वस्थाने व्याख्या)

णोभिन्नधम्म-नोभिन्नधर्म-पुं० । स्वत एव नो भिद्यत इति नोभिन्नधर्मम् । सुदृढधर्मे, स्था० २ ठा० ३ उ० ।

णोभूसणसद्द-नोभूषणशब्द-पुं० । भूषणशब्दव्यतिरिक्ते, भूषणं नूपुराऽऽदि । "नोभूसणसद्दे दुविहे पण्णत्ते । तं जहा-तालसद्दे चेव, लत्तियासद्दे चेव ।" स्था० २ ठा० ३ उ० । (स्वस्वस्थाने व्याख्या)

णोमाउयापय-नोमातृकापद-न० । मातृकापदव्यतिरिक्ते अपराधपदे, " नोमाउयं पि दुविहं, पंच पदक्खरं च बोधव्वं । " दश० २ अ० । (अपराधपदव्याख्यानम् ' अवराहपय ' शब्दे प्रथमभागे ७६८ पृष्ठे द्रष्टव्यम्)

णोमालिया-नवमालिका-स्त्री० । " ओत् पूतर-चदर-नवमालिका-नवफलिका-पूगफले " ॥८।१।१७०॥ इति उत ओत्वम् । प्रा० १ पाद । "नेवार" इतिख्याते सुगन्धपुष्पप्रधाने वृक्षभेदे, जं० १ वक्ष० । ज्ञा० । जी० ।

णोलइआ-देशी- चञ्चौ, दे० ना० ४ वर्ग ३६ गाथा ।

णोल्लचआ-देशी-चञ्चौ, दे० ना० ४ वर्ग ३६ गाथा ।

णोल्ल-क्षिप्-धा० । प्रक्षेपणे, "क्षिपेर्णल्लणोल्लक्ख-सोल्ल-पेल्लणोल्लुहुल्ल-परी-घत्ताः " ॥ ८ । ४ । १४३ ॥ इति क्षिपेर्णोल्लाऽऽदेशः । 'णोल्लइ' । क्षिपति । प्रा० ४ पाद ।

णोल्लिय-नोदित-त्रि० । प्रेरिते, प्रश्न० ३ आश्र० द्वार ।

णोसुमण-नोसुमनस्-त्रि० । अपहृतमनःसङ्कल्पे, आव० ३ अ० ।

णोसुयकरण-नोश्रुतकरण-न० । 'करण' शब्दे व्याख्याते करणभेदे, विशे० । (श्रुतकरणव्याख्या ' करण ' शब्दे तृतीयभागे ३६८ पृष्ठे गता)

णोहच्छिया-नवफलिका-स्त्री० । " ओत् पूतर-चदर-नवमालिका-नवफलिका-पूगफले " ॥ ८ । १ । १७० ॥ इति उत ओत्वम् । प्रा० १ पाद । अचिरोत्पन्नफलिकायाम्, वाच० ।

एइं-एइं-अव्य० । नि० । पादपूरणे, वृ० १ उ० । आ० म० । वाक्यालङ्कारे, कल्प० ६ क्षण ।

एहवण-स्नपन-न० । जलक्षालने, नि० चू० १ उ० । सौभाग्यपुत्राऽऽद्यर्थं वध्वादेर्मज्जने, प्रश्न० २ आश्र० द्वार ।

एहाअ-स्नात-त्रि० " सूदम-इत-ण्ण-स्त-ह्-ड्ढ-णां एहः " ॥ ८ । २ । ७५ ॥ इति स्नभागस्य सकाराऽऽक्रान्तो हकारः । कृतस्नाने, प्रा० २ पाद । सामान्यतः कृतस्नाने, दशा १० अ० । " एहाया कयबलिकम्मा । " ज्ञा० १ श्रु० २ अ० ।

एहाण-स्नान-न० । देशतः सर्वतो वा शरीरस्य प्रक्षालने, व्य० १० उ० । उक्त० । आ० म० ।

अथ श्रावकस्य स्नानविधिः-

सम्यक् स्नात्वोचिते काले, संस्नाप्य च जिनान् क्रमात् ।
पुष्पाऽऽद्यारस्तुतिभिश्च, पूजयेदिति तद्विधिः ॥६१॥

अलिङ्गपनककुथ्याद्यसंसक्तवैचम्यशुषिराऽऽदिदोषाऽदूषितभूमौ परिमितवस्त्रपूतजलेन संपातिमसत्त्वरक्षणाऽऽदियतनारूपः । उक्तं च दिनकृत्ये-" तसाऽऽइजीवरहिए, भूमिभागे विसुद्धए । फासुएणं तु नीरेणं, इत्थरेण मलिएण उ ॥ १ ॥ " "काऊणं विहिणा एहाणं," इति । तत्र विधिना परिमितोदकसंपातिमसत्त्वरक्षणाऽऽदियतनयेति तदुपलिलेशः । पञ्चाशकेऽपि-" भूमीपेहणजलगालणाइ जयणा उ होइ एहाणे । एत्तो विसुद्धभावो, अणुहवसिद्धो जिअ बुहाणं ॥ १ ॥ " व्यवहारशास्त्रे तु-"नग्नातैः प्रोक्षिताऽऽयातः, सचेलो भुक्तभूषितः । नैव स्नायादनुव्रज्य, बन्धून् कृत्वा च मङ्गलम् ॥ १ ॥" इत्यादि । स्नानं च द्रव्यभावाभ्यां द्विधा-तत्र द्रव्यस्नानं जलेन शरीरक्षालनम् । तच्च देशतः सर्वतो वा, तत्र देशतो मलोत्सर्गदन्तधावनजिह्वालेखनकरचरणमुखाऽऽदिक्षालनगण्डूषकरणाऽऽदि, सर्वतस्तु सर्वशरीरक्षालनमिति । तत्र च मलोत्सर्गो मौनेन निरवद्यावेलस्थानाऽऽदिविधिनैवोचितः । यतः-

" मूत्रोत्सर्गे मलोत्सर्गे, मैथुनं स्नानभोजनम् ।
सन्ध्यादिकर्म पूजां च, कुर्याज्जापं च मौनवान् ॥ १ ॥"

विवेकविज्ञासेऽपि-

" मौनी वस्त्रावृतः कुर्या-दिनसन्ध्याद्वयेऽपि च ।
उदङ्मुखः शकृन्मूत्रे, रात्रौ याम्याननः पुनः ॥ १ ॥ " इति ।

दन्तधावनमपि-

" अवक्राऽग्रन्थिसत्कूर्च, सूक्ष्माग्रं च दशाङ्गुलम् ।
कनिष्ठाऽग्रसमस्थौल्यं, क्षातवृक्षं सुनूमिजम ॥ १ ॥
कनिष्ठिकाऽनामिकयो-रन्तरे दन्तधावनम् ।
आदाय दक्षिणां दंष्ट्रां, वामां वा संस्पृशँस्तले ॥ २ ॥
तल्लीनमानसः स्वस्थो, दन्तमांसव्यथां त्यजन् ।
उत्तराभिमुखः प्राची-मुखो वा निश्चलाऽऽसनः ॥ ३ ॥ "

इत्यादिनीतिशास्त्रोक्तविधिना विधेयम् ।

गण्डूषोऽपि-

" अभावे दन्तकाष्ठस्य, मुखशुद्धिविधिः पुनः ।
कार्यो द्वादशगण्डूषै-र्जिह्वोल्लेखस्तु सर्वदा ॥ १ ॥ "

इति विधिना कार्योऽप्रत्याख्यानिना, प्रत्याख्यानिनस्तु दन्तधावनाऽऽदि विनाऽपि शुद्धिरेव, तपसो महाफलत्वात्, इदं च द्रव्यस्नानं वपुःपावित्र्यसुखकरत्वाऽऽदिना भावशुद्धिहेतुः । ध० २ अधि० । (स्नानदोषः ' अणायार ' शब्दे प्रथमभागे ३११ पृष्ठे, ३१४ पृष्ठे च शीतोदकाऽऽदिभिः पादाऽऽदिप्रधावने दोषप्रायश्चित्ते उक्ते)

ततो देशस्नानं सर्वस्नानं वा सेवंतस्स आणाभणवत्थमिच्छत्तविराहणा भवंति । एहाणे इमे दोसा-

छक्कायाण विराधणा,तप्पडिबंधो य गारव विनूसा ।
परिसहजीरुसं पि य, अविसासो चेव एहाणम्मि ॥९६॥

एहायंतो छज्जीवणिकाए वहति, एहाणे पमिबंधो भवति, पुनः पुनः स्नातीत्यर्थः । अस्नातसाधुशरीरेभ्यः निर्मलशरीरोऽहमिति गौरवं कुरुते, स्नान एव विभूषाऽलङ्कार इत्यर्थः । अएहाणपरीसहाउ वीहेति, तं तं जिनातीत्यर्थः । लोगस्साविश्रेभणीयो भवति । एते स्नानदोषा उक्ताः । नि० चू० २ उ० ।

स्नानाष्टकम्-पूजाऽऽदि स्नानपूर्वकमिति स्नाननिरूपणायाऽऽह-

द्रव्यतो भावतश्चैव, द्विधा स्नानमुदाहृतम् ।
बाह्यमाध्यात्मिकं चेति, तदन्यैः परिकीर्त्यते ॥ १ ॥

द्रवति गच्छति तांस्तान् पर्यायानिति द्रव्यम्-पुद्गलाऽऽदि, तस्माद् द्रव्यात् द्रव्यतो जलमलक्षणं करणभूतम् १, देहदेशमलक्षणं वा शोधनीयम् २, मनोमलक्षणं वाऽपनेयं, द्रव्यमाश्रित्येत्यर्थः ३, अथवा-द्रव्यतोऽपरमार्थतो द्रव्यशब्दस्याप्राधान्यार्थत्वात् ४, अथवा-द्रव्यतो भावस्नानकारणत्वेन कारणार्थत्वाद् द्रव्यशब्दस्य ५। तथा-भवनं भावः-परिणामः, तस्माद्भावतः शुभध्यानमलक्षणं करणभूतम् १, उपयोगभावाऽऽत्मकजीवमलक्षणं वा शोधनीयम् २, अथवा-औदयिकजीवकारणभूतकर्ममलमलक्षणमपनेतव्यं, लक्षणं करणभूतभावमाश्रित्येत्यर्थः ३, भावतः परमार्थतो भवति ४ । चशब्दः समुच्चये । एवकारोऽवधारणे । एवं चाऽनयोः प्रयोगः-द्रव्यतो भावत एव । ततश्च द्रव्यभावभेदेनैव द्विधा द्विप्रकारं, नामाऽऽदिभेदेन तु चतुर्धाऽपि केवलमिह चतुःप्रकारत्वं स्नानस्य नाश्रितम्, नामस्थापनयोः प्ररूपणामात्रोपयोगित्वात् । न हि स्नानस्य नामस्थापने जिननामस्थापने इव प्रमोदहेतुत्वेन पूजाऽऽगोचरत्वेन च सोपयोग इति । अथवा-एवकारो द्विधेत्यनेन संबध्यते, तथा द्रव्यतो भावतश्चेति । एवं द्विधैव स्नानमुदाहृतं, न तु सप्तधा ।

यथाऽऽहुरेके-

" सप्त स्नानानि प्रोक्तानि, स्वयमेव स्वयंभुवा ।
द्रव्यभावविशुद्ध्यर्थ-मृषीणां ब्रह्मचारिणाम् ॥ १ ॥
आग्नेयं वारुणं ब्राह्मं, वायव्यं दिव्यमेव च ।
पार्थिवं मानसं चैव, स्नानं सप्तविधं स्मृतम् ॥ २ ॥
आग्नेयं भस्मना स्नान-मवगाह्यं तु वारुणम् ।
आपोदृष्टामयं ब्राह्मं, वायव्यं तु गवां रजः ॥ ३ ॥ (मन्त्रस्नानमित्यर्थः)
सूर्यदृष्टं तु यद् दृष्टं, तद्दिव्यमृषयो विदुः ।
पार्थिवं तु मृदा स्नानं, मनःशुद्धिस्तु मानसम् ॥ ४ ॥ "

इति सप्तविधस्नानकथनं ह्यनर्थकम्, यतो यद् बाह्यमलक्षालनप्रत्यलं तत्सर्वं द्रव्यस्नानमेव । यच्चाऽभ्यन्तरमलोन्मूलनायालं, तद्भावस्नानम् । यत्पुनरन्यथाविधं तदस्नानमेव । न च गोरजसा मन्त्रेण वा मलापनयनमुपलभ्यत इति । अतः सुष्ठूक्तं द्विधैव । अथवा-द्रव्यतो द्विविधैव, भावतश्च द्विविधैव इत्येवं द्विधाशब्दप्रयोगः । वैविध्यं च प्रधानाऽप्रधानभेदात् । तच्च दर्शयिष्यत इति । द्रव्यतो भावतश्चैवमिति पाठान्तरे तु, एवकार उपप्रदर्शनार्थः । तेन एवमनेन प्रकारेण द्विधा स्नानं शुचीकरणमुदाहृतं तत्त्ववेदिभिरभिहितम् । अत्रार्थे परेषामप्यविप्रतिपत्तिमुपदर्शयन्नाह-बहिर्नेयं बाह्यं शारीरम्, अध्यात्मे मनसि भवमाध्यात्मिकं, मानसमित्यर्थः । चशब्दः समुच्चयार्थः । इति रूपप्रदर्शने । एवं चानयोः प्रयोगः-बाह्यमिति, आध्यात्मिकमिति च । तदनतिक्रमेण द्रव्यस्नानं भावस्नानं च, अन्यैरिति जैनव्यतिरिक्तताथिकविशेषैः, परिकीर्त्यते संशब्द्यते इति ॥ १ ॥

तत्र द्रव्यस्नानप्रतिपादनायाऽऽह-

जलेन देहदेशस्य, क्षणं यच्छुद्धिकारणम् ।
प्रायोऽन्यानुपरोधेन, द्रव्यस्नानं तदुच्यते ॥ २ ॥

जलेनाम्भसा,न भस्माऽऽदिभिः,तैर्हि द्रव्यस्नानमपि न भवति, मलाऽऽद्यपनयनासमर्थत्वात्तेषाम्, "गन्धलेपापहं शौचम्" इति स्नानलक्षणाच्च, देहदेशस्येति शरीरत्वगूलक्षणावयवस्य । इह च देहग्रहणेन सचेलस्नानेन देवार्चनं कार्यमिति मतमपाकृतम्, जलाऽऽर्द्रवस्त्राणां स्नानतयाऽप्रतीतेः ।

देशस्येत्यनेन तु ये मन्यन्ते-

" एका लिङ्गे गुदे तिस्र-स्तथैकत्र करे दश ।
उभयोः सप्त विक्रेयाः, मृदः शुद्धौ मनीषिभिः ॥ १ ॥
एतच्छौचं गृहस्थानां, द्विगुणं ब्रह्मचारिणाम् ।
त्रिगुणं वानप्रस्थानां, यतीनां च चतुर्गुणम् ॥ २ ॥ " इति ।

ते उपहसिता भवन्ति । न हि तैरेवं शौचं प्रति प्रयत्नवद्भिरपि लिङ्गगुदाऽऽद्यन्तर्भागस्य शौचं कर्तुं शक्यं, किं तु त्वङ्मात्रस्यैव, न च कर्णनासाऽऽद्यनामेवं शौचं तैर्विधीयते, न चैतान्यशुचीनि न भवन्तीति, क्षणं मुहूर्तं यावच्च प्रभूतकालं, यदिति स्नानं, शुद्धिकारणं मलविलयहेतुः, प्रायो बाहुल्येन, प्रायोग्रहणात्तथाविधरोगग्रस्तस्य क्षणमपि शुद्धिकारणं न भवतीति दर्शितम् । कुतः पुनः क्षणमेव शुद्धिकारणम् ?, इत्यत आह-अन्यस्य प्रक्षालितमलापेक्षयाऽपरस्य मलस्याऽनुपरोधोऽनिरोधोऽप्रतिषेधोऽन्यानुपरोधः, तेनान्यानुपरोधेन हेतुना, न हि स्नानं मलाऽऽश्रयत्वभावत्याच्छरीरस्य मलान्तरमुपरोद्धुं शक्नोतीति तदित्थंविधं स्नानम्, किमित्यत आह-द्रव्याण्युरुलक्षणानि नीराऽऽद्यन्याश्रित्य स्नानं द्रव्यभूतं वा स्नानं द्रव्यस्नानमुच्य-

तेऽभिधीयते, स्नानलक्षणविशेषः । अन्ये तु प्रायोऽन्यानुपरोधेनेत्येतदित्थं व्याचक्षते-प्रायो बाहुल्येनान्येषां जलस्वरूपातिरिक्तानां प्राणिनामनुपरोधोऽव्यापादनं प्रायोऽन्यानुपरोधः, सेनेति ॥ २ ॥

अथैतस्यैव कर्तृवशात् प्रधानाऽप्रधानतां दर्शयन्नाह-

कृत्वेदं यो विधानेन, देवताऽतिथिपूजनम् ।
करोति मलिनाऽऽरम्भी, तस्यैतदपि शोभनम् ॥ ३ ॥

कृत्वा विधाय, इदमनन्तरोदितं द्रव्यस्नानं, य इति तदधिकारवान् धार्मिकः, विधानेन धार्मिकजनोचितस्नानविधिना "भूमीपेहणजलगा-णणाइ जयणा उ होइ एहाणओ ।" इत्येवंरूपेण, ततः किमित्याह--देवताऽनन्तरविवेचितस्वरूपमहादेवलक्षणा, अतति सततमप्रतिबद्धविहारितया गच्छतीत्यतिथिः, अविद्यमाना वा तिथिः,उपलक्षणत्वादुत्सवाऽऽदयश्च यस्येत्यतिथिः-सम्यग्मार्गनिरतो यतिः । उक्तं च--" तिथिपर्वोत्सवाः सर्वे, त्यक्ता येन महात्मना । अतिथिं तं विजानीयाऽऽगच्छेयमन्यागते विधुः" ॥१॥ इति। तयोः पूजनमुचितसत्कारकरणं देवताऽतिथिपूजनं,तत्करोति विधत्ते । द्वितीयव्याख्यानपक्षे तु-विधानेन देवताऽतिथिपूजनं करोतीत्येवं सम्बन्धः कार्यः। कोऽसावित्याह-मलिनोऽवद्यमलयुक्त आरम्भो व्यापारो मलिनाऽऽरम्भः, सोऽस्यास्तीति मलिनारम्भी,सावद्ययोगाऽऽद्यनिवृत्तो गृहस्थ इत्यर्थः। कुतीर्थिकशिक्षणाभिप्रायप्रवणं चेदं विशेषणं,तच्चिह्नकरणं चैवम्-हे कुतीर्थिकाः! यदि यूयं मलिनाऽऽरम्भिणस्तदा युष्माकमिदं द्रव्यस्नानं कर्तुमुचितं, नान्यथा। यथा ह्यस्य विशुद्धभावहेतुत्वेन प्रशस्यता, स च विशुद्धो भावो निर्मलाऽऽरम्भाणां सदैवास्तीति किमेतेनेति?। तस्येति देवताऽतिथिपूजनकर्तुर्मलिनाऽऽरम्भिणः,एतदपीति न केवलं वक्ष्यमाणस्वरूपं भावस्नानं शुभपरिणामरूपत्वाच्छोभनमेतदपि द्रव्यस्नानमपि शोभनं साधु; सत्यपि सावद्यत्वे प्रायो मददर्पाऽऽदिहेतुत्वे च शुभभावहेतुत्वात् तस्येति विशेषणात्तदन्यस्य त्वशोभनमेव तदिति सिद्धं भावशुद्धिनिमित्तत्वादिति ॥ ३ ॥

शोभनमिदमित्युक्तं तत्समर्थनार्थमाह-

भावशुद्धिनिमित्तत्वा-त्तयाऽनुभवसिद्धितः ।
कथञ्चिद्दोषभावेऽपि, तदन्यगुणभावतः ॥ ४ ॥

भावोऽध्यवसायः, तच्छुद्धिर्निर्मलता,तस्या निमित्तं कारणं,तस्य भावो भावशुद्धिनिमित्तत्वं,तस्मादेतदपि शोभनमिति प्रकृतम् । न चास्य भावशुद्धिहेतुत्वमसिद्धमित्याह-तथा तेनैव प्रकारेण भावशुद्धिनिमित्ततयैव योऽनुभवः संज्ञावेदनन्तरस्य या सिद्धिः प्रतीतिः सा तथाऽनुभवसिद्धिः,तस्यास्तथाऽनुभवसिद्धितः । अथ द्रव्यस्नानं भावशुद्धिनिमित्तमपि स्वदकायिकायिकाऽऽदिजीवहिंसादोषदूषितत्वादशोभनमेवेत्याशङ्क्याऽऽह--कथञ्चित् केनापि प्रकारेणाप्कायिकाऽऽदिविराधनालक्षणेन, दोषभावेऽपि हिंसालक्षणावद्यसद्भावेऽपि, न केवलं दोषाभावे इत्यपिशब्दार्थः । तस्माद्धिंसाऽऽदिदोषाद्योऽन्यो गुणः सम्यग्दर्शनशुद्धिलक्षणः, स तदन्यगुणस्तस्य भावो लाभस्तदन्यगुणभावः, तस्मात्तदन्यगुणभावतः । आह च-" पूयाए कायवहो, पुप्फिकुट्ठो सो उ किं तु जिणपूआ। सम्मत्तसुद्धिहेउत्ति भावणीया उ णिरवज्जा " ॥ १ ॥ यत्स्नानं पूजार्थं तत्पूजाङ्गत्वात्तद्द्रव्यपदेशमर्हतीति । इह च हेतुप्रयोग एवम्-द्रव्यस्नानमपि शोभनं, भावशुद्धिनिमित्तत्वात्, यद्यद्भावशुद्धिनिमित्तं तत्तच्छोभनम्, यथा चैत्यवन्दनम्, भावशुद्धिनिमित्तं च द्रव्यस्नानं, तस्माच्छोभनमिति । अथायमसिद्धो हेतुरित्यत्रोच्यते-यद्यदाऽनुभूयते तत्तथा प्रतिपत्तव्यम्, यथा विशिष्टं सुखाऽऽदिसंवेदनम्, अनुभूयते च भावशुद्धिनिमित्ततया द्रव्यस्नानं, तस्माद्भावशुद्धिनिमित्तं तदिति । अथ कथञ्चित् सदोषत्वात्कथं शोभनत्वमस्य ?, इत्यत्रोच्यते-यद्विशिष्टतरगुणान्तरोत्पत्तिहेतुस्तत्तदोषसद्भावेऽपि शोभनम्, यथा भ्रमपङ्काऽऽदिदोषोपेतमपि तृड्विच्छेदाऽऽदिविशिष्टतरगुणहेतुकूपखननम्, विशिष्टसम्यग्दर्शनशुद्ध्यादिगुणहेतुश्च द्रव्यस्नानमिति ॥ ४ ॥

यदि भावशुद्धिनिमित्तत्वाच्छोभनं द्रव्यस्नानं, तर्हि करोति मलिनाऽऽरम्भीति कस्मादभिहितम् ?,मलिनाऽऽरम्भणोऽपि तथैव तस्य शोभनत्वादित्याशङ्क्याऽऽह—

अधिकारिवशाच्छास्त्रे, धर्मसाधनसंस्थितिः ।
व्याधिप्रतिक्रिया तुल्या, विज्ञेया गुणदोषयोः ॥ ५ ॥

अधिकारोऽस्यास्तीत्यधिकारी योग्यानुष्ठाता,तस्य वशोऽपेक्षाधिकारी वशस्तस्मात्, न यथाकथञ्चिदित्यर्थः । शास्त्रे सूत्रनिर्युक्त्याऽऽज्ञाऽऽगमे. धर्मसाधनयोः प्रस्तुतयोर्द्रव्यस्नानभावस्नानलक्षणयोः, संस्थितिः सम्यग् व्यवस्था धर्मसाधनसंस्थितिः । किंरूपेयमित्याह-व्याधिप्रतिक्रिया तुल्या रोगचिकित्सावस्था समाना, विज्ञेया सद्गुरूपदेशादधिगमेरवसेया । कयोर्विषया ?, इत्याह-गुणदोषयोः, गुणदोषावाश्रित्येत्यर्थः । इयमत्र भावना-यथाऽऽतुरवशाद् व्याधिचिकित्सा गुणकरी, दोषकरी च, तथा मलिनाऽऽरम्भीतरलक्षणानुष्ठातृवशाद् द्रव्येतरस्नानरूपे धर्मसाधने गुणदोषकरे, द्रव्यस्नानं मलिनाऽऽरम्भिण एव गुणकरं, नेतरस्येति हृदयम् । यतो मलिनाऽऽरम्भी देवतोद्देशेन स्नानाऽऽद्यधिकारी, न त्वितरः । केचित्पुनरेवमाहुः-मलिनाऽऽरम्भ्यपि नेहाधिकारी, यस्माद् वक्ष्यति अयमेव ग्रन्थकारः-" धर्मार्थं यस्य वित्तेहा, तस्याऽनीहा गरीयसी । प्रक्षालनाद्धि पङ्कस्य, दूरादस्पर्शनं वरम् " ॥ १ ॥ इति । अनेन धर्मार्थं सावद्यप्रवृत्तिर्निषिद्धा, तथा शुद्धाऽऽगमैर्यथाज्ञानमिति वक्ष्यति,अनेन च पुष्पत्रोटनाभावो देवसम्बन्धव्यारामाभावश्च दर्शित इति । न चायं सम्यगुच्चारणः, यतः स्नानं विधेयतया देवार्चनार्थमुपदिष्टमेव । यदाह-"तत्थ सुहणा दुहा वि हु, दव्वे एहाएण सुद्धयत्थेण ।" इति । अथ प्रासङ्गिकः स्नानापेक्षोऽयमुपदेशो, न तु देवतोद्देशिकः । एतदपि न सङ्गतम् । एवं हि यदा कदाचित्स्नातो भवेत् तदा देवार्चनं कुर्यादित्युपदिष्टं स्यात्, न नित्यकृत्यतया । नित्यकृत्यं चैतत् । आह च-"वंदंति चेइयाइं,तिक्कालं पूइणं विहिणा उ ।" इति । यच्चोक्तम्-धर्मार्थमित्यादिना धर्मार्था सावद्यप्रवृत्तिर्निषिद्धा,तत् सत्यं,केवलं स निषेधः सर्वविरतापेक्षया,तदधिकारेऽस्य श्रेयःकस्याधिकृतत्वात्। गृहस्थापेक्षया तु सावद्यप्रवृत्तिविशेषोऽनुज्ञात एव । यदाह-"दव्वत्थयं कूवदिट्ठंतो।" इति । तथा वाणिज्याऽऽदिसावद्यप्रवृत्तिरपि काचित् कस्यचिन्न दुष्टा,विषयविशेषप्रत्ययात्तद्रूपत्वेन पापकर्मगुणबीजाज्ञाहेतुत्वात्,यथा संकाशस्य, संकाशश्रावको हि प्रमादाद्भक्तिचैत्यद्रव्यो निबद्धाबाधान्तरायाऽऽदिकर्मा चिरं पर्यटितदुरन्तसंसारकान्तारोऽनन्तकालाल्लब्धमनुष्यभवो दुर्गतनरशिरःशेखररूपः पारगतसमी-

पोपन्नध्वस्तकीयपूर्वभववृत्तान्तः पारगतोपदेशतो दुर्गतत्वनिबन्धनकर्मक्षपणाय,"यदहमुपार्जयिष्यामि द्रव्यं तदुपासाऽऽह्लादनवर्जं जिनाऽऽयतनाऽऽदिषु नियोक्ष्ये," इत्यभिग्रहं गृहीतवान्, कालेन च निर्वाणमवाप्तवानिति। अथ युक्तं संकाशस्यैतत्, तथैव तत्कर्मक्षयोपपत्तेः, न पुनरन्यस्य। नैवम्। सर्वथैवाशुभस्वरूपव्यापारस्य विशिष्टनिर्जराकारणत्वायोगादिति। यत्तु-"शुद्धाऽऽगमैर्यथालाभम्" इत्यादि। तन्न स्वयं पुष्पत्रोटननिषेधनपरं, किं तु पूजाकालोपस्थिते मालिके दर्शनप्रभावनाहेतोर्वर्णिकया न प्रयोक्तव्येत्यस्यार्थस्य व्यापनपरम्, इतरथा-" सुद्धइ दुग्गयनारी, जगगुरुणो सिंदुवारकुसुमेहिं। पूयापणिहाणेणं, लवसत्ता तियसलोगम्मि ॥ १ ॥" (पञ्चा०) न हि तया यथालाभं, न्यायोपात्तवित्तेन वा तानि गृहीतानीति। तथा चैत्यसम्बन्धितया ग्रामाऽऽदीनां प्रतिपादनान्नाऽऽरामाऽऽद्यभावः प्रोक्तः।

यदाह--

" चोएइ चेइयाणं, रुप्पसुवन्नाइ गामगाणाइ।
लग्गंतस्स हु मुणिणो, तिकरणसुद्धी कहं नु भवे ? ॥१॥
भन्नइ पत्थ विनासा, जा पयाइं सयं वि मग्गेज्जा।
न हु तस्स हुज्ज सुद्धी, अह कोइ हरेज्ज पयाइं ॥२॥
सव्वत्थामेण तहिं, संघेणं होइ लग्गियव्वं तु।
सचरित्तीणं एयं, सव्वेसि होइ कज्जं तु ॥३॥"

तदेवं मालिनाऽऽरम्भिणो धर्मार्थं स्नानाऽऽदिकमविरुद्धमिति स्थितम्। ननु यतिरत्र कस्मान्नाधिकारी, यतः कर्मक्षणो व्याधिरेको द्वयोरपि यतिगृहस्थयोरतत्तच्चिकित्साऽपि पूजाऽऽदिलक्षणा समैव भवति, ततो यद्येकस्याधिकारः, कथं नापरस्य?। अथ " स्नानमुद्वर्तनाऽभ्यङ्गं,नखकेशाऽऽदिसंस्क्रियाम्। गन्धमाल्यं च धूपं च, त्यजन्ति ब्रह्मचारिणः" ॥ १ ॥ इति वचनाद् यतेः स्नाने,तत्पूर्वकत्वाद्देवार्चनस्य तस्मिंश्च,नाधिकारः, नैवम, भूषार्थस्यैव तस्य निषेधात्। अथ सावद्यनिवृत्तोऽसाविति तत्र नाधिकारी। ननु यदि यतिः सावद्यान्निवृत्तस्ततः को दोषः,यत्स्नानं कृत्वा देवताऽर्चनं न करोति ?। यदि स्नानपूर्वकदेवताऽर्चने सावद्ययोगः स्यात्, तदाऽसौ गृहस्थस्याऽपि तुल्य इति,तेनापि न कर्त्तव्यं स्यात्। अथ गृहस्थः कुटुम्बाऽऽद्यर्थेऽपि सावद्ये प्रवृत्तः, तेन तत्रापि प्रवर्तताम्, यतिस्तु तत्राप्रवृत्तत्वात्कथं स्नानाऽऽदौ प्रवर्तेत इति ?। ननु यद्यपि कुटुम्बाऽऽद्यर्थं गृही सावद्ये प्रवर्तते, तथाऽपि तेन धर्मार्थं तत्र न प्रवर्तितव्यं स्यात्, यतो नैकं पापमाचरितमित्यन्यदप्याचरितव्यं स्यात्। अथ कूपोदाहरणात् पूजाऽऽदिज्ञानितमारब्धदोषं विशोध्य गृही गुणान्तरमासादयतीति युक्तं गृहिणः स्नानपूजाऽऽदि। ननु यथा गृहिणां कूपोदाहरणात्स्नानाऽऽदि युक्तम, एवं यतेरपि तद् युक्तमेव। एवं च कथं स्नानाऽऽदौ यतिर्नाधिकारीति पूर्वपक्षः ?।

अत्रोच्यते-यतयो हि सर्वथा सावद्यव्यापारान्निवृत्ताः, ततश्च कूपोदाहरणेनाऽपि तत्र प्रवर्तमानानां तेषामवद्यमेव चित्ते स्फुरति, न धर्मः,तत्र सदैव शुभध्यानाऽऽदिभिः प्रवृत्तत्वात्। गृहस्थास्तु सावद्ये स्वभावतः सततमेव प्रवृत्ताः, न पुनर्जिनार्चनाऽऽदिद्वारेण स्वपरोपकाराऽऽत्मके धर्मे, तेन तेषां तत्र प्रवर्तमानानां स एव चित्ते लगति, न पुनरवद्यमिति कर्तृपरिणामवशादधिकारेतरौ मन्तव्याविति। स्नानाऽऽदौ गृहस्थ एवाधिकारी, न यतिरिति। आगमोऽप्येवं व्यवस्थितः।

यदाह-

" छज्जीवकायसंजमो, दव्वत्थए सो विरुज्झए कसिणो।
तो कसिणो संजमविऊ, पुप्फाईयं न इच्छंति ॥१॥
अकसिणपवत्तगाणं, विरयाविरयाण एस खलु जुत्तो।
संसारपयणुकरणे, दव्वत्थए कूवदिट्ठंतो ॥२॥ "

तथा द्रव्यस्तवरूपत्वात् पूजायाः,तस्य च भावस्तवहेतुत्वात् प्रधानत्वाच्च यतीनां न द्रव्यस्तवेऽधिकारः। अत एव सामायिकस्थः श्रावकोऽप्यनधिकारी, तस्याऽपि सावद्यनिवृत्ततया भावस्तवाऽऽरूढत्वेन श्रमणकल्पत्वात्। अत एव गृहिणोऽपि प्रकृत्या पृथिव्याद्युपमर्दनभीरोर्यतनावतः सावद्ये संक्लेशपरुषैर्यतिक्रियाऽनुरागिणो न धर्मार्थं सावद्याऽऽरम्भप्रवृत्तिर्युक्ता। यदाह-"असदारंभपवत्तो,जं च गिही तेण तेसि विन्नेया। तन्निवित्तिफल चिय, एसा परिनामणीयमिणं ॥ १ ॥" न चायमनन्तरोदितोऽसदारम्भप्रवृत्तः,तत्कथं तस्य तन्निवृत्तिफलत्वेन स्नानाऽऽदौ सावद्याऽऽरम्भप्रवृत्तिर्युक्ता, अतः स्थितमिदं न सर्वे एव सर्वत्राधिकारी, किं तु य एवैत्राधिकारी, स एवान्यत्रानधिकारीति ॥ ५ ॥

अथ भावस्नानप्रतिपादनायाऽऽह-

ध्यानाम्भसा तु जीवस्य, सदा यच्छुद्धिकारणम्।
मलं कर्म समाश्रित्य, भावस्नानं तदुच्यते ॥ ६ ॥

ध्यानं शुभचित्तैकाग्रतालक्षणं धर्माऽऽदि, तदेवाम्भो जलं, तद् ध्यानाम्भसेन,तुशब्दः पुनरर्थः,यत् स्नानं,शुद्धिकारणं निर्मलत्वहेतुः, तद्भावस्नानमुच्यते इति सम्बन्धः। प्रक्षालनीयप्रदर्शनायाऽऽह-मलं मालिन्यनिबन्धनं, कर्म ज्ञानाऽऽवरणाऽऽदिलक्षणं, समाश्रित्याऽङ्गीकृत्य, भावान् ध्यानाऽऽदीनाश्रित्य भावतो वा परमार्थतः स्नानं भावस्नानं,तदित्येवंभूतमुच्यते तत्स्वरूपविज्ञैरभिधीयत इति ॥ ६ ॥

अस्यैव कारकभेदेनोत्तमस्वरूपतामाह-

ऋषीणामुत्तमं होत-न्निर्दिष्टं परमर्षिभिः।
हिंसादोषनिवृत्तानां, व्रतशीलविवर्द्धनम् ॥ ७ ॥

पश्यन्ति यथावद् वस्त्विति ऋषयो मुनयस्तेषां, हिशब्दोऽवधारणार्थः, तेन ऋषीणामेवोत्तमं प्रधानमेतद्भावस्नानं निर्दिष्टं प्रतिपादितं,परमर्षिभिर्मुनिपुङ्गवैः,सर्वज्ञैरित्यर्थः। ऋषीणामुत्तममिति विशेषणसामर्थ्यादन्येषां त्वनुत्तममेव तदिति सिद्धं तेषाम,विशिष्टधर्मध्यानाभावादिति। अथवा-ऋषीणामुत्तममेतदेवेत्येवमवधारणं द्रष्टव्यम्। ततश्चोत्तमत्वात्तदेव तेषां विधेयम्। ननु देवार्चनार्थं द्रव्यस्नानमपि, किंभूतानामृषीणामित्याह-हिंसा प्रमत्तयोगात्प्राणव्यपरोपणं,सैव दोषो दूषणं हिंसादोषः,ततो निवृत्ता उपरता ये ते तथा, तेषां हिंसादोषनिवृत्तानाम्, न तु ऋषय एवंविधा एव भवन्तीति विशेषणेमिदमनर्थकम्,नैवम, हेतुतया सोपन्यासात्। ततश्च ऋषीणामुत्तममिदं हिंसादोषनिवृत्तत्वादिति वाक्यार्थः स्यात्। किंभूतमित्याह-व्रतानि महाव्रतानि,शीलं च समाधिः, अथवा-व्रतानि मूलगुणाः, शीलमुत्तरगुणाः, तेषां विशेषेण वर्द्धनं वृद्धिकारणं व्रतशीलविवर्द्धनं, भावस्नानं हि धर्मशुक्लध्यानरूपं, तच्चैतद्विधेयं भवत्येवेति ॥७॥

उपसंहरन्नाह-

स्नात्वाऽनेन यथायोगं, निःशेषमलवर्जितः।
नृपो न लिप्यते तेन, स्नातकः परमार्थतः ॥ ८ ॥

स्नात्वा शौचं विधाय,अनेन भावहेतुद्रव्यस्नानेन,भावस्नाने-

न च यथायोगं यथासंबन्धं द्रव्यस्नानेन मलिनाऽऽत्मभी, भावस्नानेन चेतरः निःशेषमलवर्जितः, परम्परयेण साक्षाच्च सकलकर्ममलमुक्तो भवतीति शेषः । शेषकरणं विना एककर्तृकत्वाभावात् क्त्वाप्रत्ययो न स्यादिति, शेषः-कृत इति । एवंभूतश्च सन् भूयः पुनरपि, न लिप्यते नोपदिह्यते, तेन कर्ममलेन, एवं च स्नातकः स्नातः, परमार्थतो वस्तुवृत्त्या भवति, स्नानान्तरस्नातस्तु परमार्थस्नातो न भवति, विवक्षितमलविगमाभावात्, पुनर्मलोपलेपनाच्चेति । ततो हे कुतीर्थिकाः ! यदि यूयमक्षेपेण परमार्थतः पारमार्थिकस्नातका भवितुमिच्छथ, तदा भावस्नानेनैव स्नात, मा द्रव्यस्नानेन, मलिनाऽऽत्मभावमेव तस्योत्क्त्वादिति हृदयम् । अथ चैवं व्याख्या-स्नात्वा ज्ञानेनेत्यनन्तरोक्तभावस्नानेन, यथायोगं यथायुक्ति, निःशेषमलवर्जितः सन् भूयो न लिप्यते, तेन, कोऽलाविस्याद्-स्नातकः परमार्थतः पारमार्थिकस्नातक इत्यर्थः । इह च क्त्वाप्रत्ययो ऽनेवशादिति ॥८॥ अष्ट० २ अष्ट० । वर्षातः प्रतिनियतदिवसभाविनि भगवत्प्रतिमायाः स्नाने पर्वविशेषे, वृ० १ उ० ।

एहाणमल्लिया-स्नानमल्लिका-स्त्री० । स्नानयोग्ये मल्लिकाविशेषे, ज्ञा० ३ प्रति० । जं० ।

एहारु-स्नायु-न० । अस्थिबन्धनाशिरायाम्, तं० । आचा० ।

एहाविअ-नापित-पुं० । "निम्बनापिते लएहं वा" ॥८।१।२३०॥ इति नस्य एहः । 'एहाविओ,' 'नाविओ' । कुरोपजीविनि, प्रा० १ पाद ।

एहाविअपसेवय-नापितप्रसेवक-पुं० । नखशोधकक्षुराऽऽदिप्राज्ञे, उत्त० २ अ० ।

एहुसा-स्नुषा-स्त्री० । पुत्रवध्वाम्, "आणंदपुरे महमो, एहुसाए समं संवासं काऊण।" आ० म०१ अ० २ अण्ड ।

इति श्रीमत्सौधर्मबृहत्तपागच्छीय—कलिकालसर्वज्ञकल्प—
श्रीमद्भट्टारक—जैनश्वेताम्बराऽऽचार्यश्रीश्री १००८ श्री
विजयराजेन्द्रसूरिविरचिते 'अभिधानराजेन्द्रे'
ण (न) कारादिशब्दसङ्कलनं समाप्तम् ।



त–त–पुं० । ' तक ' हसने, सहने वा क्तप्रत्ययः, डित्वाड्टिलोपः । क्षीरे, अमृते, पुच्छे, क्रोमे, म्लेच्छे, रक्षे, सृगालपुच्छे च । तरुणे, पुण्ये, स्त्री० । न० । वाच० । "तकारः पुंसि संतोषे, निश्चये विस्तरे समे । (४१) धातुवादे विधौ क्रोधे, ता कृपायां स्त्रियां मता ॥" माधव०-एका० । "तः प्रेते निष्फले शान्ते, पौनःपुन्ये वधे च तः ।" इति विश्वदेव०-एका० तच्छब्दनिर्देशे, नि० चू० । यथा-" से गामंसि वा " इत्यादि । नि० चू० २० उ० ।

तअण्णवत्थुअ–तदन्यवस्तुक–पुं० । ' तयण्णवत्थुअ ' शब्दार्थे, स्था० ४ ठा० ३ उ० ।

तआणिं–तदानीम्–अव्य० । तस्मिन् काले तदानीम् । "पानीयाऽऽदिस्वित् ॥ ८ । १ । १०१ ॥ इति ईकारस्येत् । प्रा० १ पाद । तदेत्यर्थे, वाच० ।

तइय–तृतीय–त्रि० । त्रयाणां पूरणः । त्रि-तीयः-संप्रसारणम् । वाच० । "पानीयाऽऽदिस्वित् " ॥८।१।१०१॥ इकारस्येकारः । प्रा० १ पाद । त्रयाणां पूरणे, येन त्रित्वसंख्या पूर्यते तस्मिन् पदार्थे, वाच० । आ० म० । नि० चू० ।

तइयंग–तृतीयाङ्ग–न० । स्थानाङ्गे, प्रति० ।

तइया–तृतीया–स्त्री० । चन्द्रमण्डलस्य तृतीयकलायाः सूर्यमण्डलप्रवेशनिर्गमान्यतररूपक्रियाऽऽत्मिकायां तिथौ, वाच० । स्वनामख्यातायां विभक्तौ, "विवक्षितक्रियासाधकतमं करणं, तस्मिन्स्तृतीया । अनु० । "तइया करणम्मि कया, भणियं च कयं च तेण व मए वा ।" तृतीया करणे, क्त० । यथेत्यादि-भणितं वा कृतं वा, केनेत्याह-तेन वा मया वेति । अत्र यद्यपि कर्तरि तृतीया प्रतीयते, तथाऽपि विवक्षाऽधीनत्वात् कारकप्रवृत्तेः, तेन मया वा कृत्वा भणितं कृतं वा, देवदत्तेनेति गम्यत इति । एवं करणविवक्षाऽपि न दुःश्यतीति शङ्कयामः । तत्त्वं तु बहुश्रुता विदन्तीति । अनु० ।

तइलपत्तिधारगणायग–तैलपात्रीधारकज्ञातग–त्रि० । तैलपात्रीधारकस्य तद्रूपं वा यद् ज्ञातमुदाहरणं तद्गतः प्रासोऽपायावगमजनिताप्रमत्तातिरेकसाधर्म्याद्यः स तथा । तैलपात्रीधारकवदप्रमत्ते, पञ्चा० १४ विव० ।

तइस–तादृश–त्रि० । तस्येव दर्शनमस्य । वाच० । " अतां डइसः " ॥ ८ । ४ । ४०३ ॥ इति अपभ्रंशे तादृशशब्दस्य दादेरवयवस्य डित्संज्ञकः ' अइस ' इत्यादेशः । प्रा० ४ पाद । तथाविधेऽर्थे, वाच० ।

तउ–त्रपु–न० । अग्निं दृष्ट्वा त्रपते लज्जते इव लज्जया ऊर्वीभवतीति वा । सीसके धातौ, वाच० । प्रज्ञा० १ सम्व० द्वार । सू० । उत्त० । तप्यन्ते,पाच्यमाना आर्ततरं रारट्यन्ति । सूत्र० १ श्रु० ५ अ०२ उ० । 'त्रपुक' शब्दोऽप्यत्र । प्रहन ५ संव० द्वार । सूत्र० । प्रज्ञा० । औ० ।

तउत–तव–पञ्च० । ष० । " ङसिङस्त्र्यां तउ-तुज्झ-तुध्र " ॥ ८ । ४।३७२॥ अपभ्रंशे युष्मदो ङसिङसो त्र्यादेशे । प्रा० ४ पाद ।

तउआगर–त्रपुकाकर–पुं० । यत्र त्रपुकं ध्मायते । त्रपुकध्मापनस्थाने, स्था० ८ ठा० । नि० चू० ।

तउस–त्रपुष–न० । त्रपतेः क्विप् । त्रप्-उष दाहे, क-क० । कर्कटीवृक्षे गौराऽऽदित्वात् ङीष् । ' खीरा ' इतिख्याते वृक्षे, वाच० । वल्लीविशेषे, आचा० १ श्रु० १ अ० ५ उ० । स्था० । प्रज्ञा० । पञ्चानि एतेषामेकजीवाधिष्ठानानि, पुष्पाण्यनेकजीवाऽऽत्मकानि । प्रज्ञा० १ पद ।

तउसमिंजिया–त्रपुषमिञ्जिका–स्त्री० । श्लेष्मिकयजीवाविशेषे, जी० १ प्रति० ।

तए–ततस्–अव्य० । तस्मादित्यर्थे, उत्त० १ अ० ।

तओ–ततस्–अव्य० । शौरसेनीमागधीविषये एव दः, प्राकृते तु न दः । प्रा० १ पाद । तस्मादित्यर्थे, वाच० ।

तं–तत्–अव्य० । बहुलाधिकारादन्यस्यापि व्यञ्जनस्य मकारः । "मोऽनुस्वारः" ॥ ८ । १ । २३ ॥ इति मकारस्यानुस्वारः । प्रा० १ पाद । "तं वाक्योपन्यासे " ॥ ८ । २ । १७६ ॥ तं इति वाक्योपन्यासे प्रयोक्तव्यम् । " तं तिअसबंदिमोक्खं । " प्रा० २ पाद । तस्मादित्यर्थे, भ० १५ श० । विपा० । तदितिनिर्देशे, आव०४ अ० । प्रक्रान्तपरामर्शिनि, त्रि० । आचा०१ श्रु० २ अ० ५ उ० । अनु० । " तं जहा-सासमसामो तिविहा पण्णत्ता । तं जहा-जाणिया, अजाणिया, दुव्विअड्ढा आखिया ।" तद्यथेत्युदाहरणोपदर्शनार्थे, नं० आचा० । अनु० । स्था० । तद्यथेति वाक्योपन्यासार्थे, आचा० १ श्रु० ५ अ० ५ उ० । आव० । सूत्र० ।

तंट–देशी–पृष्ठे, दे० ना० ५ वर्ग १ गाथा ।

तंड–देशी-कबिकाग्राहके, शिरोविहीने, स्वराधिके च । दे० ना० ५ वर्ग १९ गाथा ।

तंडव–ताण्डव–न० । नृत्ये, जी० ३ प्रति० ४ उ० । " अप्पेगइया तंडवेंति " । आ० म० १ अ० १ खण्ड । ताण्डवरूपं नृत्यं कुर्वन्ति, रा० ।

तंडुल–तण्डुल–पुं० । तडि-कलच् । धान्याऽऽदिसारे, निस्तुषे धान्याऽऽदौ, तण्डुलीयशाके च । त्रिभङ्गे, पुं० । स्त्री० । टाप् । वाच० । ध० । आ० म० । वृक्षविशेषे, ' टीवरु ' इति गुर्जरभाषा । स० । "आसी य पाणिधंसी,तिम्मियतंडुलपवालपुप्फभोई ।" तण्डुलशब्देन औषध्य उच्यन्ते । आव० १ अ० ।

तंत–तन्त्र–न० । आ० म० १ अ० १ खण्ड । शास्त्रे, पञ्चा० १ विव० । आ० चू० । आ० म० । विद्यायाम्, स्था० ८ ठा० । सिद्धान्ते, पं० व० ४ द्वार । पञ्चम्यां स्त्रीकलायाम्, कल्प० ७ क्षण । "सुत्तं पत्थिवं तंतं, भणिज्जए तम्मि य जमत्थो ।" ' तनु ' विस्तारे तन्यते विस्तार्यते यद्यस्मादनेनास्मादस्मिन् वाऽर्थ इति तन्त्रम् । अथवा तन्यते विशिष्टरचनया तदेव विस्तार्यते इति तन्त्रं सूत्रमेवोच्यते । विशे० ।

तान्त–त्रि० । कायेन खेदयति, ज्ञा०१ श्रु०८ अ० । " संता तंता परितंता । " खेदवाचका एते । नि० १ चू० १ वर्ग १ अ० ।

तंतंतर–तन्त्रान्तर–त० । दर्शनान्तरे, पञ्चा० १० विव० ।

तंतजुत्ति–तन्त्रयुक्ति–स्त्री० । आगमाऽऽश्रितोपपत्तौ, पञ्चा० ४ विव० । शास्त्रीयोपयुक्तौ, पञ्चा० ६ विव० ।

तंतदी–देशी– करम्बे, दे० ना० ५ वर्ग ४ गाथा ।

तंतय–तन्त्रज–त्रि० । तन्त्रं वेमाविश्लेषयन्त्र्यन्निकाऽऽदि, तस्माज्जातं तन्त्रजम् । वस्त्रे, कम्बले च । उत्त० २ अ० ।

तंतव–तन्तव–पुं० । चतुरिन्द्रियजीवविशेषे, प्रज्ञा० १ पद ।

तंताणुसार–तन्त्रानुसार–पुं० । शास्त्रानुसारे, षो० १२ विव० ।

तंतिय–तान्त्रिक–त्रि० । तन्त्रीवादनं शिल्पमस्येति तान्त्रिकः । तन्त्रीवादनशिल्पोपजीविनि, अनु० ।

तंती–तन्त्री–स्त्री० । वीणायाम्, जी० ३ प्रति० ४ उ० । आ० म० । कल्प० । आचा० । औ० । रा० । जं० । सू० प्र० । 'तंती' तान्त्र्यो ज्यायन्ते । अनु० । वीणाविशेषे, प्रश्न०५ सम्व० द्वार । "तंतीतलतालवुमिय।" तन्त्री वीणा, तलतालो हस्ततालः, तालः कंसिका, वुडितानि वादित्राणि । जी०३ प्रति०४ उ० । "तंतीतलतालगीयवाइयरवेणं । " तन्त्री वीणा, तला हस्ततालाः, कंसिकास्तत्रतालो वा हस्ततालाः, गीतवादिते प्रतीते, तेषां यो रवः स तथा तेन । भ० ६ श० ३३ उ० । गुरूच्याम्, देहशिरायाम्, रज्ज्वाम्, नदीभेदे, युवतीभेदे च । वाच० ।

तंतीसम–तन्त्रीसम–त्रि० । वीणाऽऽदितन्त्रीशब्देन तुल्ये, स्था० ७ ठा० ।

तंतु–तन्तु–पुं० । तन्यते भवोऽनेनेति तन्तुः । भवतृष्णायाम्, उत्त २३ अ० । तुरीवेमाऽऽदौ, ज्ञा० ६ श० ३ उ० ।

तंतुकंचोली–देशी–अयकतन्त्रोपकरणे, दे०ना०५ वर्ग७ गाथा ।

तंतुगय–तन्तुगत–त्रि० । तन्तोस्तुरीवेमाऽऽदेरपनीतमात्रे, भ०६ श० ३ उ० ।

तंतुगय–तन्त्रोद्गत–त्रि० । तुरीवेमाऽऽदेरुत्तीर्णे, भ० ८ श० ३ उ० ।

तंतुय–तन्तुज–त्रि० । तन्तुभ्यो जातं तन्तुजम, वस्त्रे, कम्बले च । उत्त० २ अ० ।

तंतुवम–तन्तुवट–पुं० । गन्यप्रधानवनस्पतिविशेषे, ज्ञा० प्र० ।

तंतुवाय–तन्तुवाय–पुं० । कुविन्दे, प्रव० २ द्वार । आ० म० । कल्प० । प्रज्ञा० । अनु० ।

तंतुवायसाला–तन्तुवायशाला–स्त्री० । कुविन्दशालायाम, भ० १५ श० ।

तंतोयार–तन्त्रावतार–पुं० । तन्त्रे आगमे अवतारः प्रवेशः । आगमप्रवेशे, ध० १ अधि० ।

तंदुगुज्जाण–तन्दुकोद्यान–न० । श्रावस्त्या नगर्या बहिरुद्याने, यत्र कोष्ठकं चैत्यम् । आ० चू० १ अ० ।

तंदुल–तन्दुल–पुं० । धान्ये, तन्दुलवाहान् लुनाति । तं० ।

तंदुलच्छिल्लग–तन्दुलच्छिल्लक–त्रि० । तन्दुलप्रमाणखण्डैः कर्पिडते, औ० ।

तंदुलपिट्ठ–तन्दुलपिष्ट–न० । अमाशस्योपहततन्दुलकुक्कुशे, नि० चू० ४ उ० ।

तंदुलमच्छ–तन्दुलमत्स्य–पुं० । मत्स्यभेदे, जी०१ प्रति० प्रज्ञा० ।

तंदुलवेयालिय–तन्दुलवैचारिक–न० । तन्दुलानां वर्षशताऽऽयुष्कपुरुषप्रतिदिनभोग्यानां सङ्ख्याविचारेणोपलक्षितं तन्दुलवैचारिकम् । श्रीवीरहस्तदीक्षितमुनिविरचिते नन्दीसूत्रोक्तप्रन्थविशेषे, तं० ।

निज्जरियजरामरणं, वंदित्ता जिणवरं महावीरं ।
वुच्छं पयन्नगमिणं, तंदुलवेयालियं नाम ॥१॥

ननु कियन्ति प्रकीर्णकानि,कथं तेषां चोत्पत्तिः ? उच्यते-"नंदी १,अणुओगदाराइं २,देविंदत्थओ ३, तंदुलवेयालियं ४, चंदाविज्झयं ५।" इत्यादीनि श्रीनन्दिसूत्रोक्तानि कालिकोत्कालिकनेदभिन्नानि चतुरशीतिसहस्रसंख्यानि प्रकीर्णकान्यभवन् श्रीऋषभस्वामिनः । कथम् ?, ऋषभस्य चतुरशीतिसहस्रप्रमाणाः श्रमणा आसीरन्, तैरेकैकस्य विरचितत्वात् १। एवं संख्येयानि प्रकीर्णकसहस्राणि आसीरन् जिनाऽऽदीनां मध्यमजिनानां यस्य यावन्ति भवन्ति तस्य तावन्ति प्रथमानुयोगतो वेदितव्यानि २। चतुर्दशप्रकीर्णकसहस्राणि आसीरन् वर्द्धमानस्वामिनः ३ । इति तेषां मध्ये श्रीवर्द्धमानस्वामिस्वहस्तदीक्षितेनैकेन साधुना विरचितमिदं तन्दुलवैचारिकप्रकीर्णकं, तस्य व्याख्या क्रियते इति। (निज्जरिय त्ति) निर्जरितं सर्वथा क्षयं नीतं जरा च वृद्धत्वं,मरणं च पञ्चत्वं जरामरणम् । यद्वा-जरया वृद्धभावेन, जरायां वृद्धभावे वा मरणं येन सं निर्जरितजरामरणः,तं वन्दित्वा कायवाङ्मनोभिः स्तुतिं विधाय जिना रागद्वेषाऽऽदिजयनशीलाः सामान्यकेवलिनस्तेषु तेभ्यो वा वरः प्रधानातिशयापेक्षया श्रेष्ठो जिनवरस्तं जिनवरम् । (तं०) महाँश्चासौ वीरश्च कर्मविदारणसहिष्णुर्महावीरस्तम, (वुच्छं ति) वक्ष्ये भणिष्यामि, प्रकीर्णकं श्रीवीरहस्तदीक्षितमुनिविरचितं नन्दीसूत्रोक्तं ग्रन्थविशेषमिदं प्रत्यक्षं तन्दुलानां वर्षशताऽऽयुष्कपुरुषप्रतिदिनभोग्यानां संख्याविचारेणोपलक्षितं तन्दुलवैचारिकं नामेति ॥ १ ॥ (तं०)

अथामीषां निरूपयन्ति-

आहारो उस्सासो, संधिसिराओ य रोमकूवाई ।
पित्तं रुहिरं सुक्कं, गणियं गणियप्पहाणेहिं ॥ १६ ॥

अत्र प्रकीर्णके जीवानां गर्भे आहारस्वरूपम्, गर्भे उच्छ्वासपरिमाणम्, शरीरे सन्धिस्वरूपम्, शरीरे शिराप्रमाणम्, वपुषि रोमकूपानि, पित्तम्, रुधिरम्, शुक्रम् । चशब्दान्मुहूर्ताऽऽदिकम् । एतत्पूर्वोक्तं गणितं संख्याप्रमाणतो निरूपितं, कैः ?, गणितप्रधानैस्तीर्थकरगणधराऽऽदिभिः ॥१६॥ तं० ।

तंदुलिज्ज–तन्दुलीय–शाकविशेषे,है० । वाच० ।

तंदुलेज्जग–तण्डुलीयक–पुं० । हरितवनस्पतिभेदे, प्रज्ञा० १ पद । आचा० ।

तन्दुलेयक–पुं० । हरितवनस्पतिभेदे, प्रज्ञा० १ पद ।

तंब–ताम्र–न० । तम–रक्–दीर्घश्च । प्राकृते–" ह्रस्वः संयोगे " ॥ ८ । १ । ८४ ॥ इति सूत्रेणाऽऽदेर्ह्रस्वः । प्रा० १ पाद । " हतक्य

थोऽसमस्त-स्तम्बे " ॥ ८ । २ । ४५ ॥ अत्रासमस्तस्तम्बे इत्युक्तेस्तस्य थः । " ताम्राऽऽम्रे म्बः " ॥ ८ । २ । ५६ ॥ इति संयुक्तस्य मयुक्तो बकारः । प्रा० २ पाद । धातुविशेषे, प्रज्ञा० १ पद । उत्त० । सूत्र० । "तंबपायाणि वा, तउपायाणि वा, सुवण्णपायाणि वा ।" ग० २ अधि० । अरुणे, पुं० । औ० । तद्वति, त्रि० । वाच० । शुल्बे, प्रश्न० ४ सम्व० द्वार ।

तंबकिमी–देशी–इन्द्रगोपे, दे० ना० ५ वर्ग ६ गाथा ।

तंबकुसुम–देशी–कुरबके, दे० ना० ५ वर्ग ६ गाथा ।

तंबचूल–ताम्रचूम–पुं० । ताम्रा चूमा यस्य । कुक्कुटे, ज्ञा० १ श्रु० १ अ० । " सोचेऽत्यगादाश्रयामो, रात्रेस्तावदतः परम् । ताम्रचूडस्तादर्वा-ङ्न्यार्चिद्विद्यया यदि " ॥१७॥ ती० ७ कल्प ।

तंबटकरी–देशी–शेफालिकायाम्, दे० ना० ५ वर्ग ४ गाथा ।

तंबणह–ताम्रनख–त्रि० । ताम्रा इव रक्ता नखाः करुहा यासां तास्ताम्रनखाः । ताम्रसदृशलोहितनखवति, जी० ३ प्रति० ४ उ० ।

तंबणिद्धणह–ताम्रस्निग्धनख–त्रि० । ताम्रा अरुणाः स्निग्धाः कान्तिमन्तो नखा येषां ते तथा । कान्तिमदरुणनखे, प्रश्न० ४ आश्र० द्वार ।

तंबरत्ति–देशी–गोधूमेषु, कुङ्कुमच्छायायां च । दे० ना० ५ वर्ग ५ गाथा ।

तंबलित्त–ताम्रलिप्त–पुं० । देशभेदे, क्वचित्सिन्धुताम्रलिप्तकोङ्कणाऽऽदिके देशेऽधिका दंशमशका भवन्ति । सूत्र० १ श्रु० २ अ० १ उ० ।

तंबा–देशी–गवि, दे० ना० ५ वर्ग १ गाथा ।

तंबागर–ताम्राकर–पुं० । ताम्रध्मापनस्थाने, यत्र ताम्रं ध्मायते । स्था० ८ ठा० । यत्र ताम्रमुत्पद्यते । ताम्रोत्पत्तिस्थाने, नि० चू० ५ उ० ।

तंबाय–ताम्राक–पुं० । स्वनामख्याते ग्रामे, यत्र भद्रिकापुर्या आगते वीरप्रभवति नन्दिषेणः पार्श्वापत्यीयो भङ्गाहतः स्वर्जगाम । आ० क० । आ० चु० ।

तंबिरा–देशी–गोधूमेषु, कुङ्कुमच्छायायां च । दे० ना० ५ वर्ग ५ गाथा ।

तंबूलीदल–ताम्बूलीदल–न० । नागवल्लिपत्रे, अनेकशकलीकृतकरमर्दितप्रहरमात्रधृतताम्बूलीदलं सचित्तमचित्तं वेति प्रश्ने, उत्तरम्–एतादृशपत्रस्याचित्तीभवने व्यवहारो नास्तीति । १९६ प्र० । सेन० २ उल्ला० ।

तंबेरी–देशी–शेफालिकायाम्, दे० ना० ५ वर्ग ४ गाथा ।

तंबोल–ताम्बूल–न० । " ओत् कूष्माण्डी-तूणीर-कूर्पर-स्थूलताम्बूल-गुडूची-मूल्ये " ॥ ८ । १ । १२४ ॥ इति ऊत ओत् । प्रा० १ पाद । नागवल्लीदले, सूत्र० १ श्रु० ४ अ० २ उ० । पञ्चा० । पत्रपूगखदिरवटिकाकत्थकाऽऽदिस्वादिमे, ध० २ अधि० । प्रव० । अनु० ।

तंबोली–ताम्बूली–स्त्री० । नागवल्ल्याम्, जी० ३ प्रति० ४ उ० । जं० । कन्प्रत्ययोऽत्र, ङीभसिका अपुस्त्वम् ताम्बूलिका इत्यवमादिका बहवः । स्था० ५ ठा० ।

तंबोलीमंडवग–ताम्बूलीमण्डपक–पुं० । ताम्बूली नागवल्ली तन्मया मण्डपकाः । नागवल्लीमयमण्डपे, रा० । जी० ।

तंस–त्र्यस्र–त्रि० । " एगे तंसे । " त्रिकोऽस्रयो यस्मिन् तत् त्र्यस्रम् । स्था० १ ठा० । " वक्राऽऽदावन्तः " ॥८ । १ । २६॥ इत्यनुस्वारः । प्रा० १ पाद । " न दीर्घानुस्वारात् " ॥ ८ । १ । ९२ ॥ इत्यनुस्वारात्परस्य सस्य द्वित्वनिषेधः । प्रा० १ पाद । शृङ्गाटकफलवत् त्रिकोणे, अनु० । " दहस्से वट्टे तंसे चउरंसे । " अनु० ।

तकार–तकार–पुं० । 'त' इत्येवंरूपे वर्णे, आव० ४ अ० ।

तक्क–तक्र–न० । दध्यवयवरूपे, वृ० १ उ० । " तक्ककुसुमेणाहरणं ।" नि० चू० १ उ० ।

तत्क–त्रि० । ईदृशे, अनु० ।

तर्क–पुं० । तर्कणं तर्कः । स्था० १ ठा० । संशयादूर्ध्वं भवितव्यतात्प्रत्यये, सदर्थपर्यालोचनाऽऽत्मके भवितव्यमत्र स्थाणुना पुरुषेण वेत्येवंरूपे ज्ञानविशेषे, सूत्र० १ श्रु० १२ अ० । संभवत्पदार्थास्तित्वाध्यवसायरूपे ऊहे, आचा० १ श्रु० ५ अ० ६ उ० । विमर्शे, स्था० ६ ठा० । विचारे, दश० १ अ० । पर्यालोचने, आचा० १ श्रु० ८ अ० २ उ० ।

तर्कमपि कारणगोचरस्वरूपैः प्ररूपयन्ति–

उपलम्भानुपलम्भनसम्भवं त्रिकालीकलितसाध्यसाधनसंबन्धाऽऽद्यालम्बनमिदमस्मिन् सत्येव भवतीत्याद्याकारं संवेदनमूहाऽपरनामा तर्कः ॥ ७ ॥

उपलम्भानुपलम्भाभ्यां प्रमाणमात्रेण ग्रहणाग्रहणाभ्यां संभव उत्पत्तिर्यस्येति कारणकीर्तनम् । त्रिकालीकलितयोः कालत्रयीवर्तिनोः साध्यसाधनयोर्गम्यगमकयोः संबन्धोऽविनाभावो व्याप्तिरित्यर्थः । स आदिर्यस्याशेषदेशकालवर्तिवाच्यवाचकसम्बन्धस्याऽऽलम्बनं गोचरः यस्य तत्तथेति विषयाऽऽविष्करणम् । इदमस्मिन् सत्येव भवतीत्यादिशब्दादिदमस्मिन्नसति न भवत्येवेत्याकारं, साध्यसाधनसंबन्धाऽऽलम्बनम्, एवंजातीयः शब्द एवंजातीयस्यार्थस्य वाचकः, सोऽपि तथाभूतस्तथाभूतस्य वाच्य इत्याकारं वाच्यवाचकभावाऽऽलम्बनं च संवेदनमिहोपादीयत इति स्वरूपप्रतिपादनम् । एवंभूतं यद्वेदनं स तर्कः कीर्त्यते, ऊह इति च संज्ञान्तरं लभते । ये तु तथागताः प्रामाण्यमूहस्य नेहांचक्रिरे । तेषामशेषशून्यत्वपातकाऽऽपत्तिः । आः ! किमिदमकाण्डकूष्माण्डमाकस्मिकरोङ्खारमभिधीयते । कथं हि तर्कप्रामाण्यानुपगममात्रेणेदृशमसमञ्जसमापन्नोपपद्येत ? । शृणु—आवयामि किञ्च । तर्काप्रामाण्ये तावन्नानुमानस्य प्राणाः; प्रतिबन्धप्रतिपत्त्युपायापायात् । तदभावे न प्रत्यक्षस्याऽपि । प्रत्यक्षेण हि पदार्थान् प्रतिपद्य प्रमाता प्रवर्तमानः क्वचन संवादादिदं प्रमाणमिति, अन्यत्र तु विसंवादादिदमप्रमाणमिति व्यवस्थाग्रन्थिमाबध्नीयात् । न चासु उत्पत्तिमात्रेणैव प्रमाणाप्रमाणविवेकः कर्तुं शक्यः, तद्दशायामुभयोः सौसदृश्यात् । संवादविसंवादापेक्षायां च तन्निश्चये निश्चित एवानुमानोपनिपातः । न चेदं प्रतिबन्धप्रतिपत्तौ तर्कस्वरूपोपायापाये । अनुमानाध्यक्षप्रमाणाभावे च प्रामाणिकमानिनस्ते कौतस्कुती प्रमेयव्यवस्थाऽपीत्यायाता त्वदीयहृदयस्येव सर्वस्य शून्यता । साऽपि वा न प्राप्नोति । प्रमाणमन्तरेण तस्या अपि प्रतिपत्तुमश-

कथत्वादिति । अहो ! महति प्रकटकष्टसंकटे प्रविष्टोऽयं तपस्वी किं नाम कुर्यात् ?। अथ-"धूमाधीर्वह्निविज्ञानं,धूमज्ञानमथान्तयोः । प्रत्यक्षानुपलम्भाभ्या-मिति पञ्चशिरन्वयः" ॥ १ ॥ निर्णीयते । अनुपलम्भोऽपि प्रत्यक्षविशेष एवेति प्रत्यक्षमेव व्याप्तितात्पर्यपर्यालोचनव्यापृतमेवेयम्, तत् किं तर्कोपकल्पनेनेति चेत्, ननु प्रत्यक्षं तावन्नियतधूमाग्निगोचरतया प्राक् प्रावृतत् । तद्यदि व्याप्तिरपि तावन्मात्रैव स्यात्तदाऽनुमानमपि तत्रैव प्रवर्तेतेति कृतस्त्यं धूमाग्महीधरकन्धराऽधिकरणाऽऽशुशुक्षणिलक्षणम । तद्बलाद् बभूवान् विकल्पः सार्वत्रिकीं व्याप्तिं पर्यप्नोति निर्णेतुमिति चेत; को नामैवं नामंस्त तर्कविकल्पस्योपलम्भानुपलम्भसंभवत्वेन स्वीकारात्, किन्तु व्याप्तिप्रतिपत्तावयमेव प्रमाणं कक्षीकरणीयः । अथ तथा प्रवर्तमानोऽयं प्राक् प्रवृत्तप्रत्यक्षव्यापारमेवाभिमुखयतीति तदेव तत्र प्रमाणमिति चेत्, तर्ह्यनुमानमपि लिङ्गग्रहादिप्रत्यक्षस्यैव व्यापारमाभुखयतीति तदेव वैश्वानरवेदने प्रमाणम्, नानुमानमिति किं न स्यात् ?। अथ कथमेवं वक्तुं शक्यम । लिङ्गप्रत्यक्षं हि लिङ्गगोचरमेव, अनुमानं तु साध्यगोचरमिति कथं तत्तद्व्यापारमाभुखयेत्, तर्हि प्रत्यक्षं पुरोवर्तिस्वलक्षणे लक्षणकृष्णमेव । तर्कविकल्पस्तु साध्यसाधनसामान्यावभासीमनोवीति कथं सोऽपि तद्व्यापारमुद्भिधयेत् । अथ सामान्यमसामान्यमेव, असत्त्वादिति कथं तत्र प्रवर्तमानस्तर्कः प्रमाणं स्यादिति चेत; अनुमानमपि कथं स्यात् ?। तस्यापि सामान्यगोचरत्वाव्यभिचारात् । " अन्यत् सामान्यलक्षणं सोऽनुमानस्य विषयः " इति धर्मकीर्तिना कीर्तनात् । तत्त्वतोऽप्रमाणमेवैतद्, व्यवहारेणैवास्य प्रामाण्यात्.सर्व एवायमनुमानानुमेयव्यवहारो बुद्ध्याकूढेन धर्मधर्मिन्यायेनेति वचनादिति चेत्, तर्कोऽपि तथाऽस्तु । अथ नायं तर्कः व्यवहारेणापि प्रमाणम्, सर्वथा वस्तुसंस्पर्शशराहमुखत्वादिति चेत्, अनुमानमपि तथाऽस्तु । अवस्तुनिर्भासमपि परम्परया पदार्थे प्रतिबन्धात् प्रमाणमनुमानमिति चेत्, किं न तर्कोऽपि ?। अवस्तुत्वं च सामान्यस्याद्याऽपि केशरिकिशोरवक्त्रक्रोडदंष्ट्राऽङ्कुराऽऽकर्षायमाणमस्ति । सदृशपरिणामरूपस्यास्य प्रत्यक्षाऽऽदिपरिच्छेद्यत्वादिति तत्त्वत एवानुमानम, तर्कश्च प्रमाणं प्रत्यक्षवदिति पाषाणरेखा ॥ ७ ॥

अत्रोदाहरन्ति-

यथा यावान्कश्चिद्धूमः स सर्वो वह्नौ सत्येव भवतीति तस्मिन्नसत्यसौ न जातुचिदेव ॥ ८ ॥

अत्राऽऽद्यमुदाहरणमन्वयव्याप्तौ,द्वितीयं तु व्यतिरेकव्याप्ताविति ॥ ७ ॥ रत्ना० ३ परि० ।

तक्कणवित्ति–तर्कणवृत्ति–न० । नटनप्लाऽऽचार्याऽऽदीनां कृपणकुले, स्था० ७ ठा० ।

तक्कणा–देशी–इच्छायाम्, दे० ना० ५ वर्ग ४ गाथा ।

तक्कम्मसेवि (णि)–तत्कर्मसेविन्–पुं० । मैथुनमासेव्य वीर्यनिसर्गे सति यः श्वास इव वेदोत्कटतया जिह्वाक्लेदनाऽऽदिनिन्द्यकर्मणा सुखमात्मनो मन्यते स तथा । गलितवृषसदृशखलिकुलेहनकर्तरि, ध० ३ अधि० । बृ० । पं० भा० । पं० चू० ।

तक्कर–तस्कर–पुं० । तदेव चौर्यं कुर्वन्तीत्येवं शीलाः । कृ-अच् । नि० । औ० । परद्रव्यहरे,प्रश्न० ३ आश्र० द्वार । आव० । ज्ञा० । रा० । नि० चू० । आ०चू० । दमनकवृक्षे,पृक्काशाके च । स्त्रियां ङीप् । वाच० ।

तक्करट्ठाण–तस्करस्थान–न० । शून्यदेवकुलाऽऽगाराऽऽदौ,ज्ञा० १ श्रु० २ अ० ।

तक्करत्तण–तस्करत्व–न० । नवमे गौणेऽदत्ताऽऽदाने,प्रश्न० ३ आश्र० द्वार ।

तक्करपओग–तस्करप्रयोग–पुं० । तस्कराश्चौराः,तेषां प्रयोगः संहरणक्रियायां प्रेरणमन्यनुज्ञातं तस्करप्रयोगः,तान् प्रयुङ्क्ते-हरत यूयमिति । स्थूलकादत्तादानविरते द्वितीयेऽतिचारे, आव० ६ अ० । पञ्चा० । आ० । ध० र० ।

तक्कलि–तर्कारी–स्त्री० । वनस्पतिभेदे, प्रज्ञा० १ पद । आचा० । भ० । जयन्तीवृक्षे, वाच० ।

तक्कली–तर्कारी–स्त्री० । ' तक्कलि ' शब्दार्थे, प्रज्ञा० १ पद ।

तक्कलीमत्थय–तर्कारीमस्तक–न० । तर्कारीमध्यवर्तिनि गर्भे,आचा० २ श्रु० १ चू० १ अ० ७ उ० ।

तक्कलीसीसय–तर्कारीशीर्षक–न० । तर्कारीस्तबके, आचा० २ श्रु० १ चू० १ अ० ७ उ० ।

तक्का–तर्का–स्त्री० । स्वकीयविकल्पनायाम्, सूत्र० १ श्रु० १ अ० २ उ० । वितर्के, स्वमतिपर्यालोचने, सूत्र० १ श्रु० १३ अ० । " एगा तक्का । " तर्को विमर्शः । अपायात्पूर्वा ईहाया उत्तराः प्रायः शिरःकण्डूयनाऽऽदयः पुरुषधर्मा इह घटन्त इति सम्प्रत्ययरूपाः, ईदृक्त्वं तु प्राग्वत् । स्था० १ ठा० ।

तक्काभास–तर्काभास–पुं० । तर्कलक्षणरहिते तर्कवदाभासमाने, रत्ना० ।

तर्काऽऽभासमादर्शयन्ति–

अप्रमाण्यपि व्याप्तौ तद्वदाभासस्तर्काभासः ॥ ३५ ॥

व्याप्तिरविनाभावः ॥ ३४ ॥

उदाहरन्ति-

स श्यामो मैत्रातनयत्वादित्यत्र यावान्मैत्रातनयः स श्याम इति यथा ॥ ३६ ॥

न हि मैत्रातनयत्वहेतोः श्यामत्वेन व्याप्तिरस्ति,शाकाऽऽद्याहारपरिणतिपूर्वकत्वात् श्यामतायाः । यो हि जनन्युपयुक्तशाकाऽऽद्याहारपरिणतिपूर्वकस्तनयः स एव श्याम इति सर्वोपेक्षेषु यः प्रत्ययः स तर्क इति ॥ ३६ ॥ रत्ना० ६ परि० ।

तक्कु–तर्कु–पुं० । कृत्-उ० नि० । ' तेकू ' इतिख्याते यन्त्रे, वाच० । "कौसुम्भैस्तन्तुभिस्तर्कु-संपर्किभिरथापरैः । " आ० क० ।

तक्ख–तक्ष–धा० । तनूकरणे, भ्वादि० । पक्षे स्वादि०-पर०-सक०-वेट् । " तक्षेस्तच्छ-चच्छ-रम्फ-रम्फाः " ॥ ८ । ४ । १९४॥ तक्षेरेते चत्वार आदेशा वा भवन्ति । 'तच्छइ,' 'चच्छइ,' 'रम्फइ,' 'रम्फई' । पक्षे 'तक्खइ' । प्रा० ४ पाद । भस्मने तु-संतक्षति । वाच० ।

तक्खन–पुं० । तक्ष-कनिन् । त्वष्टरि, विश्वकर्मणि च । वाच० ।

तक्खण–तक्षण–न० । तस्मिन्नेव क्षणे, " तक्खणओलुग्गदुब्बलसरीरलावण्णसुण्णनिच्चाय । " तत्क्षणमेव प्रव्रजामीतिवचनश्रवणक्षण एव अवरुग्णं ग्लानं दुर्बलं च शरीरं यस्याः सा तथा । लावण्येन शून्या लावण्यशून्या, निश्छाया निष्प्रभा, ततः पदत्रयस्य कर्मधारयः । भ० ६ ह्रा० ३३ उ० ।

तक्खमाण-तक्षत्-त्रि० । तनूकुर्वाते, अनु० ।

तक्खय-तक्षक-पुं० । तक्ष-ण्वुल् । कश्यपस्य सुते नागभेदे, पाच० आव० । विश्वकर्मणि वर्द्धकौ, वाच० ।

तक्खसिला-तक्षशिला-स्त्री० । वहलीदेशे बाहुबलेर्नगर्याम्, आ० म० १ अ० १ खण्ड । कल्प० । आचा० । आ० चू० ।

तगर-तगर-पुं० । गृ-अच्, तस्य कोऽस्य गरः । 'टगर' इति ख्याते वृक्षे, वाच० । गन्धद्रव्यविशेषे, प्रश्न० ५ संव० द्वार । सूत्र० । ज्ञा० । रा० । जं० । जी० । " अगरतगरचोआकुंकुमेण । " अनु० ।

तगार-तकार-पुं० । तच्छब्दघटकस्यानुकरणं 'त' इति । ततः कारप्रत्ययः । निर्देशे, नि० चू० १ उ० ।

तगुण-तद्गुण-पुं० । " अन्त्यव्यञ्जनस्य " ॥ ८ । १ । ११ ॥ इति दकारलोपः समासे तु वाक्यविभक्त्यपेक्षायामन्त्यत्वमनन्त्यत्वं च तेनोभयमपि भवति । प्रा० १ पाद । अलङ्कारोक्ते अर्थालङ्कारभेदे, वाच० ।

तग्ग-देशी-सूत्रे, कङ्कणके, दे० ना० ५ वर्ग १ गाथा ।

तग्गुण-पुं० । 'तगुण' शब्दार्थे, प्रा० १ पाद ।

तच्च-तथ्य-न० । तथा तत्र साधु यत् । वाच० । "हृस्वात् थ्य-श्च-त्स-प्साम्निश्चले " ॥ ८ । २ । २१ ॥ तथ्ये चोऽपि भवति । इति थकारस्य चकारः । प्रा० २ पाद । चकारस्य द्वित्वम् । अवितथे, सत्ये, तथ्यरूपे, उत्त० २७ अ० । जी० । आचा० । तद्वति, त्रि० । वाच० ।

तच्चकम्मसंपउत्त-तथ्यकर्मसंप्रयुक्त-त्रि० । तथ्यानि सत्यफलाव्यभिचारितया कर्माणि क्रियास्तत्संपदा तत्सम्पृक्त्या यः प्रयुक्तः स तथा । तस्मिन् लब्धफले, उत्त० ३ अ० ।

तच्चावाइ(ण्)-तथ्यवादिन्-पुं० । कौशाम्बीराजस्य शतानीकस्य धर्मपाठके, आ० क० । आ० चू० । आ० म० ।

तच्चावाय-तत्त्ववाद-पुं० । तत्त्वानि वस्तूनामैदम्पर्याणि तेषां वादस्तत्त्ववादः । दृष्टिवादे, स्था० १० ठा० ।

तथ्यवाद-पुं० । तथ्यो वादस्तथ्यवादः । दृष्टिवादे, स्था० १० ठा० ।

तच्चित्त-तच्चित्त-त्रि० । तस्मिन् भगवच्चने चित्तं भावो मनो येषां ते तच्चित्ताः सामान्योपयोगापेक्षया वा तच्चित्ताः औ० । तास्मिन्नेव आवश्यके चित्तं सामान्योपयोगरूपं यस्येति तस्मिन् विवक्षिते तावन्मनोयुक्ते, सामान्योपयुक्ते च । ग० २ अधि० । अनु० । विपा० ।

तच्छ-तक्ष-धा० । तनूकरणे, स्वादि० पक्षे-स्वादि० पर०-सक०-सेट् । " तक्षेस्तच्छ-चच्छ-रम्प-रम्फाः " ॥ ८।४।१६४॥ इति तच्छाऽऽदेशः । 'तच्छइ' प्रा० ४ पाद । "कप्पेति करकरएहिं, तच्छेंति परोप्परं सुएहिं ति ।" तक्षयन्ति सर्वशो देहावयवापनयनेन तनून् कारयन्ति । सूत्र० १ श्रु० ५ अ० १ उ० ।

तच्छण-तक्षण-न० । क्षुराऽऽदिना त्वचस्तनूकरणे, विपा० १ श्रु० १ अ० । सूत्र० । वास्या काष्ठस्येव देहकर्तनरूपे शारीरदण्डे, प्रश्न० ३ आश्र० द्वार । ज्ञा० ।

तच्छसिला-तक्षशिला-स्त्री० । वहलीदेशे बाहुबलेर्नगर्याम्, यत्र बाहुबलिनिर्मितं धर्मचक्रम् । ती० ४३ कल्प । प्रति० ।

तच्छिड-देशी-कराले, दे० ना० ५ वर्ग ३ गाथा ।

तच्छिय-तक्षयित्वा-अव्य० । वास्यादिना तत्तणं कृत्वेत्यर्थे, सूत्र० १ श्रु० ४ अ० १ उ० ।

तज्ज-तज्ज-त्रि० । तस्माज्जातं तज्जम् । तच्छब्दविषयीकृतादुत्पन्ने, षो० ७ विव० ।

तर्ज-धा० । ऋर्सने, स्वादि०-पर०-सक०-सेट् । तर्जति । अतर्जीत् । चुरादि०-आत्म०-सक०-सेट् । तर्जयते । अततर्जत । वाच० ।

तज्जण-तर्जन-न० । शिरोऽङ्गुल्यादिस्फोरणतो झास्यसि रे आत्म! इत्यादिभणने, औ० । त० । प्रश्न० । ज्ञा० । आचा० ।

तज्जमाण-तर्जत्-त्रि० । ज्ञास्यथ रे यन्मम इदं वचनं दत्त्वेत्येवं भीषयति, विपा० १ श्रु० १ अ० ।

तज्जाइय-तज्जातिक-त्रि० । तस्माज्जातिरुत्पत्तिर्यस्य सः । तदुत्थे, सूत्र० १ श्रु० ४ अ० २ उ० ।

तज्जाईय-तज्जातीय-त्रि० । अग्निजन्यजातीये, आव० ४ अ० । आचा० ।

तज्जाय-तज्जात-त्रि० । तस्माद् विवक्षितात् सकाशाज्जातं तज्जातम् । तदुत्पन्ने, दशा० ३ अ० । स्था० ।

तज्जायदोसे मइभंगदोसे, पसत्थारदोसे परिहारदोसे ।
सलक्खणकारणहेउदोसे, संकामणं निग्गहसत्थुदोसे ॥१॥

" तज्जाय " इत्यादि सूत्रम् । एते हि गुरुशिष्ययोर्वादिप्रतिवादिनोर्वा वादाश्रया इव लक्ष्यन्ते । तत्र तस्य गुर्वादेर्जातं जातिः प्रकारो वा जन्मकर्माऽऽदिलक्षणं तज्जातं, तदेव दूषणमिति कृत्वा दोषस्तज्जातदोषस्तथाविधकुलाऽऽदिना दूषणमित्यर्थः । अथवा-तस्मात्प्रतिवाद्यादेः सकाशाज्जातः क्रोधान्मुखस्तज्जाऽऽदिलक्षणो दोषस्तज्जातदोषः । (शेषोऽन्यत्र) दशविधदोषाणां मध्ये प्रथमे दोषभेदे, स्था० १० ठा० ।

तज्जायसंसट्ठचरग-तज्जातसंसृष्टचरक-त्रि० । तज्जातेन देयद्रव्यविरोधिना यत्संसृष्टं हस्ताऽऽदि तेन दीयमानं यद्गृह्यते तस्मिन्, स्था० ३ ठा० १ उ० ।

तज्जाया-तज्जाता-स्त्री० । तुल्यजातीयक्रियमाणायां परिष्ठापनायाम्, आव० ४ अ० ।

तज्जिय-तर्जित-न० । एकोनविंशतितमे वन्दनदोषे, वृ० ।

एकोनविंशतिदोषमाह--

ण विकुप्पसि ण पसीयसि, कट्ठसिलो चेव तज्जितं एयं ।
सीसंगुलिमादीहिं व, तज्जेति गुरुं पणिवयंते ॥

काष्ठशिलाशिखरदेवताविशेष इवाऽवन्द्यमानो न कुप्यसि, तथाऽवन्द्यमानोऽप्यविशेषज्ञतया न प्रसीदसीत्येवं तर्जयन् निर्भर्त्सयन् यत्र वन्दते तत्तर्जितम् । यदि च मेलापकमध्ये वन्दनकं मां दास्यतीत्युत्सुकाचार्य ! परं ज्ञास्यते तवैककिन इत्यभिप्रायवान् यदा शीर्षेणाङ्गुल्या वा प्रदेशिनीलक्षणया गुरुं प्रक्षिपन् वन्दमानस्तर्जयति, तद्वा तर्जितम् । वृ० २ उ० ।

तज्जीवतच्छरीर–तज्जीवतच्छरीर–न० । स चाऽसौ जीवश्च तज्जीवः कायाऽऽकारो भूतपरिणामस्तदेव शरीरम् । जीवशरीरयोरैक्ये, सूत्र० १ श्रु० १ अ० १ उ० ।

तज्जीवतच्छरीरवाइ [ण्]–तज्जीवतच्छरीरवादिन्–त्रि० । नास्तिकविशेषे, सूत्र० ।

साम्प्रतं तज्जीवतच्छरीरवादिमतं पूर्वपक्षयन्नाह–

पत्तेअं कसिणे आया, जे बाला जे अ पंडिआ ।
संति पिच्चा न ते संति, नऽत्थि सत्तोववाइया ॥ ११ ॥

तज्जीवतच्छरीरवादिनामयमभ्युपगमः–यथा पञ्चभ्यो भूतेभ्यः कायाऽऽकारपरिणतेभ्यश्चैतन्यमुत्पद्यते, अभिव्यज्यते च, एकैकं शरीरं प्रति प्रत्येकमात्मनः कृत्स्नाः सर्वेऽप्यात्मान एवमवस्थितोः । ये बाला अज्ञाः, ये च पण्डिताः सदसद्विवेकज्ञाः,ते सर्वे पृथग् व्यवस्थिताः न ह्येक एवाऽऽत्मा सर्वव्यापित्वेनाभ्युपगन्तव्यः कालपरिमिताऽऽद्यावयवभागप्रसक्तेः । ननु प्रत्येकशरीराऽऽश्रयत्वेनाऽऽत्मबहुत्वमार्हतानामपीष्टमेवेत्याशङ्क्याऽऽह–सन्ति विद्यन्ते यावच्छरीरं विद्यन्ते, तदभावे तु न विद्यन्ते । तथाहि–कायाऽऽकारपरिणतेषु भूतेषु चैतन्याऽऽविर्भावो भवति,भूतसमुदायविघट्टने च चैतन्यापगमो, न पुनरन्यत्र गच्छच्चैतन्यमुपलक्ष्यते । तदेव दर्शयति–(पिच्चा न ते संतीति) प्रेत्य परलोके न ते आत्मानः सन्ति विद्यन्ते, परलोकानुयायी त्वात्मा शरीराद्भिन्नः स्वकर्मफलभोक्ता न कश्चिदात्माऽऽख्यः पदार्थोऽस्तीति भावः । किमित्येवमत आह–(नऽत्थि सत्तोववाइया) अस्तिशब्दस्तिङन्तप्रतिरूपको निपातो बहुवचने द्रष्टव्यः । तदयमर्थः–न सन्ति न विद्यन्ते, तद्भावे तु न विद्यन्ते; सत्त्वाः प्राणिन उपपातेन निर्वृत्ता औपपातिका भवाद्भवान्तरगामिनो न भवन्तीति तात्पर्यार्थः । तथाहि तदागमः–"विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानु विनश्यतीति, न प्रेत्य संज्ञा अस्तीति ।" ननु प्राक्तुपन्यस्तभूतवादिनोऽस्य च तज्जीवतच्छरीरवादिनः को विशेषः ?, इत्यत्रोच्यते–भूतवादिनो भूतान्येव कायाऽऽकारपरिणतानि धावनवल्गनाऽऽदिक्रियां कियां कुर्वन्त्यस्य तु कायाऽऽकारपरिणतेभ्यो भूतेभ्यश्चैतन्याऽऽख्य आत्मोत्पद्यतेऽभिव्यज्यते च, तेभ्यश्चाभिन्न इत्ययं विशेषः ॥ ११ ॥

एवं च धर्मिणोऽभावाद्धर्मस्याप्यभाव इति दर्शयितुमाह–

नऽत्थि पुण्णे च पावे वा, नऽत्थि लोए इतो परे ।
सरीरस्स विणासेणं, विणासो होइ देहिणो ॥ १२ ॥

पुण्यमभ्युदयप्राप्तिलक्षणं, तद्विपरीतं पापम्,एतदुभयमपि न विद्यते,आत्मनो धर्मिणोऽभावात् । तदभावाच्च नास्तीतोऽस्माल्लोकात् परोऽन्यो लोको यत्र पुण्यपापानुभव इति । अथार्थे सूत्रकारः कारणमाह–शरीरस्य कायस्य विनाशेन भूतविघट्टनेन, देहिन आत्मनोऽप्यभावो भवति, यतो न पुनः शरीरे विनष्टे तस्मादात्मा परलोकं गत्वा पुण्यं पापं वाऽनुभवतीत्यतो धर्मिण आत्मनोऽभावात्तद्धर्मयोः पुण्यपापयोरप्यभाव इति । अस्मिंश्चार्थे बहवो दृष्टान्ताः सन्ति । तद्यथा–यथा जलबुद्बुदो जलातिरेकेण नाऽपरः कश्चिद्विद्यते, तथा भूतव्यतिरेकेण नाऽपरः कश्चिदात्मेति । तथा च यथा कदलीस्तम्भस्य बहिस्त्वगपनयने क्रियमाणे त्वङ्मात्रमेव सर्वं नाऽभ्यन्तरः कश्चित्सारोऽस्त्येव भूतसमुदाये विघट्टति सति तावन्मात्रं विहाय नान्तःसारभूतः कश्चिदात्माऽऽख्यः पदार्थ उपलभ्यते । यथा वा भ्रान्तं भ्राम्यमाणमलातमुपमापि चक्षुर्बुद्धिमुत्पादयति, एवं भूतसमुदायोऽपि विशिष्टक्रियोपेतो जीवभ्रान्तिमुत्पादयतीति । यथा च स्वप्ने बहिर्मुखाऽऽकारतया विज्ञानमनुभूयते,आन्तरेणैव बाह्यमर्थम्,एवमात्मानमन्तरेण तद्विज्ञानं भूतसमुदाये प्रादुर्भवतीति । तथा यथाऽऽदर्शे स्वच्छत्वात्प्रतिबिम्बतो बहिःस्थितोऽप्यर्थोऽन्तर्गतो लक्ष्यते, न चाऽसौ तथा । यथा च ग्रीष्मे भौमेनोष्मणा परिस्पन्दमाना मरीचयो जलाऽऽकारं विज्ञानमुत्पादयन्ति,एवमन्येऽपि गन्धर्वनगराऽऽदयः स्वस्वरूपेणाऽतथाभूता अपि तथा प्रतिभासन्ते,तथाऽऽत्माऽपि भूतसमुदायाऽऽकारपरिणतौ सत्यां पृथगसन्नेव तथा भ्रान्तिं समुत्पादयतीति । अमीषां च दृष्टान्तानां प्रतिपादकानि केचित्सूत्राणि व्याचक्षते । अस्माभिस्तु सूत्राऽदर्शे चिरन्तनटीकायां चादृष्टत्वान्नाभिहितानीति ॥ ननु च यदि भूतव्यतिरिक्तः कश्चिदात्मा न विद्यते, तत्कृते च पुण्यापुण्ये न, तत्कथमेतद्वैचित्र्यं घटते ?। तद्यथा–कश्चिदीश्वरोऽपरो दरिद्रोऽन्यः सुभगोऽपरो दुर्भगः सुखी दुःखी सुरूपो मन्दरूपो व्याधितो नीरोगीत्येवंप्रकारा विचित्रता किंनिबन्धनेति ?। अत्रोच्यते,स्वभावात् । तथाहि–कुत्रचिच्छिलाशकले प्रतिमारूपं विद्यते, तच्च कुङ्कुमागरुचन्दनाऽऽदिविलेपनानुलोममनुभवति,धूपाऽऽमोदं च,अन्यस्मिंस्तु पाषाणखण्डे पादक्षालनाऽऽदि क्रियते,न च तयोः पाषाणखण्डयोः शुभाशुभे स्तः, यदुदयात्स तादृगवस्थाविशेष इत्येवंस्वभावाज्जगद्वैचित्र्यम् । तथाचोक्तम्–"कण्टकस्य च तीक्ष्णत्वं, मयूरस्य विचित्रता । वर्णाश्च ताम्रचूडानां, स्वभावेन भवन्ति हि ॥ १ ॥" इति । तदेवं तज्जीवतच्छरीरवादिमतं गतम् ॥ १२ ॥ सूत्र० १ श्रु० १ अ० १ उ० ।

साम्प्रतं तज्जीवतच्छरीरवादिनो मतं निराचिकीर्षुराह–

जे ते उ वाइणो एवं, लोए तेसिं कओ सिया ?।
तमाओ ते तमं जंति, मंदा आरंभनिस्सिया ॥ १३ ॥

ये तावच्छरीराऽव्यतिरिक्ताऽऽत्मवादिनः एवं पूर्वोक्तयुक्त्या भूतव्यतिरिक्तमात्मानमभ्युपगतवन्तस्ते निराक्रियन्ते–तेषां लोकश्चतुर्गतिभवरूपः सुभगदुर्भगसुरूपकुरूपेश्वरदरिद्रादिगत्या जगद्वैचित्र्यरूपः कुतः स्यात् ?। आत्माऽनङ्गीकारे पुण्यपापाभावे कथं विश्ववैचित्र्यमित्यर्थः ?। ते च नास्तिकदर्शनमसोऽज्ञानरूपात् तमो यान्ति ज्ञानाऽऽवरणाऽऽवृताः पुनर्ज्ञानाऽऽवरणरूपं तमः प्रविशन्ति । अथवा–सद्विवेकप्रध्वंसित्वात्तमो दुःखं, तस्मात्तमो महादुःखं यान्ति, यतस्ते मन्दा जडाः परलोकनिरपेक्षत्वाद्धाऽऽरम्भनिःश्रिताः (सूत्र० द्वी० १ श्रु० १ अ० १ उ०) तत्र यच्चैस्तावदुक्तम् । यथा–न शरीराद्भिन्नोऽस्त्यात्मेति । तदसंगतम् । यतस्तत्प्रसाधकं प्रमाणमस्ति । तच्चेदम्–विद्यमानकर्तृकमिदं शरीरम्,आदिमत्प्रतिनियताऽऽकारकत्वात्,इह यद्यदादिमत्प्रतिनियताऽऽकारं तत्तद् विद्यमानकर्तृकं दृष्टम्। यथा घटः, यच्चाविद्यमानकर्तृकं तदादिमत्प्रतिनियताऽऽकारमपि न भवति,यथाऽऽकाशम् । आदिमत्प्रतिनियताऽऽकारस्य च सकर्तृत्वेन व्याप्तेः व्यापकनिवृत्तौ व्याप्यस्य निवृत्तिरिति सर्वत्र योजनीयम् । तथा विद्यमानाधिष्ठातृकाणीन्द्रियाणि, करणत्वात्, यद्यदिह करणं तत्तद् विद्यमानाधिष्ठातृकं दृष्टम्, यथा–दण्डाऽऽदिकमिति । अधिष्ठातारमन्तरेण करणत्वानुपपत्तेः,यथाऽऽकाशस्य । हृषीकाणां चाधिष्ठाताऽऽत्मा, स च तेभ्योऽन्य इति । तथा विद्यमानाधिष्ठातृकमिदमिन्द्रियविषय-

कदम्बकम्, आदानाऽऽदेयसद्भावात् । इह यत्र यत्राऽऽदानाऽऽदेयसद्भावस्तत्र तत्र विद्यमान आदाता ग्राहको दृष्टः। यथा संदंशकाऽयःपिण्डयोस्तद्भिन्नोऽयस्कार इति। यश्चात्रेन्द्रियैः करणैर्विषयाणामादाता ग्राहकः स तद्भिन्न आत्मेति। तथा विद्यमानभोक्तृकमिदं शरीरं, भोग्यत्वात्, ओदनाऽऽदिवत्। अत्र च कुलालाऽऽदीनां भूतत्वानित्यत्वसंहतत्वदर्शनादात्माऽपि तथैव स्यादिति धर्मविशेषविपरीतसाधनत्वेन विरुद्धा शङ्का न विधेया। संसारिणं आत्मनः कर्मणा सहान्योन्यानुबन्धतः कथञ्चिन्मूर्तत्वाऽऽख्युपगमादिति। तथा यदुक्तम्-"नास्ति सत्त्व औपपातिकः" इति। तदप्ययुक्तम्। यतस्तदहर्जातबालकस्य यः स्तनाभिलाषः सोऽन्याभिलाषपूर्वकः, अभिलाषत्वात्, कुमाराभिलाषवत्। तथा बालविज्ञानमन्यविज्ञानपूर्वकं, विज्ञानत्वात्, कुमारविज्ञानवत्। तथाहि-यदहर्जातबालकोऽपि यावत्स एवायं स्तन इत्येवं नावधारयति, तावन्नोपरतरुदितो मुखमर्पयति स्तने इत्यतोऽस्ति बालके विज्ञानलेशः, स चान्यविज्ञानपूर्वकः। तथाऽन्यद् विज्ञानं भवान्तरविज्ञानं, तस्मादस्ति सत्त्व औपपातिक इति। तथा यदभिहितम्-"विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानु विनश्यतीति।" तत्राप्ययमर्थः-विज्ञानघनो विज्ञानपिण्ड आत्मा भूतेभ्य उत्थायेति प्राक्तनकर्मवशात्तथाविधकायाऽऽकारपरिणते भूतसमुदाये तदुद्भवेन स्वकर्मफलमनुभूय पुनस्तद्विनाशे आत्माऽपि तदनु तेनाऽऽकारेण विनश्यापरपर्यायान्तरेणोत्पद्यते, न पुनस्तैरेव सह विनश्यतीति। तथा यदुक्तम्-धर्मिणोऽभावात्तद्धर्मयोः पुण्यपापयोरभाव इति। तदप्यसमीचीनम्। यतो धर्मी तावदनन्तरोक्तिकदम्बकेन साधितः, तस्सिद्धौ च तद्धर्मयोः पुण्यपापयोरपि सिद्धिरवसेया, जगद्वैचित्र्यदर्शनाच्च। यत्तु स्वभावमाश्रित्योपलशकलं दृष्टान्तत्वेनोपन्यस्तं, तदपि तद्धेतुकर्मवशाद्धेम तथा तथा संवृत्त इति दुर्निवारः पुण्यापुण्यसद्भाव इति। येऽपि बहवः कदलीस्तम्भाऽऽदयो दृष्टान्ता आत्मनोऽभावसाधनायोपन्यस्ताः, तेऽप्यभिहितनीत्याऽऽत्मनो भूतव्यतिरिक्तस्य परलोकयायिनः सारभूतस्य साधितत्वात् केवलं भवतो वाचालतां प्रख्यापयन्ति। इत्यलमतिप्रसङ्गेन। शेषं सूत्रं विवियतेऽधुनेति-तदेवं तेषां भूतव्यतिरिक्ताऽऽत्मनिह्नववादिनां योऽयं लोकश्चतुर्गतिकसंसारो नवादू भवान्तरगतिलक्षणः प्राक् प्रसाधितः सुभगदुर्भगसुरूपमन्दरूपेश्वरदारिद्र्याऽऽदिगत्या जगद्वैचित्र्यलक्षणश्च, स एवंभूतो लोकस्तेषां कुतो भवेत्?। कर्योपपत्त्या घटेत्?; आत्मनोऽनभ्युपगमान्न किञ्चिदित्यर्थः। ते च नास्तिकाः परलोकयायिजीवाऽनभ्युपगमेन पुण्यपापयोश्चाभावमाश्रित्य यत्किञ्चनकारिणोऽज्ञानरूपात्तमसः सकाशादन्यत्तमो यान्ति-नूनोऽपि ज्ञानाऽऽवरणाऽऽदिरूपं महत्तरं तमः संचिन्वन्तीत्युक्तं भवति। यदि वा तम इव तमो दुःखसमुद्घातेन सहसद्भिवैकध्वंसित्वाद् यातनास्थानम्, तस्मादेवंभूतात्तमसः परतरं तमो यान्ति। सप्तमनरकपृथिव्यां रौरवमहारौरवकालमहाकालाप्रतिष्ठानाऽऽख्यं नरकाऽऽवासं यान्तीत्यर्थः। किमिति?। यतस्ते मन्दा जडा मूर्खाः सत्यपि युक्त्युपपन्ने आत्मन्यसद्भिनिवेशात् तद्भावमाश्रित्य प्राण्युपमर्दकारिणि विवेकिजननिन्दिते आरम्भे व्यापारे निश्चयेन नितरां चाश्रिताः संबद्धाः पुण्यपापयोरभाव इत्याश्रित्य परलोकनिरपेक्षयाऽऽरम्भनिःशङ्का इति। सूत्र० १ श्रु० १ अ० १ उ०।

तं जहा-उड्ढं पादतला, अहे केसग्गमत्थया, तिरियं तयपरियंते जीवे,एस आयापज्जवे कसिणे, एस जीवे जीवति, एस मए णो जीवइ, सरीरे धरमाणे धरइ, विणट्ठम्मि य णो धरइ,एयं तं जीवियं भवति,आदहणाए परेहिं निज्जइ, अगणिज्झामिए सरीरे कवोतवण्णाणि अट्ठीणि भवंति,आसंदीपंचमा पुरिसा गामं पच्चागच्छंति, एवं असंते असंविज्जमाणे, जेसिं [तं असंते असंविज्जमाणे] तेसिं तं सुयक्खायं भवति। अन्नो भवति जीवो, अन्नं सरीरं,तम्हा ते एवं नो विपमिवेदेंति-अयमाउसो! आया दीहे ति वा, हस्से ति वा,परिमंडले ति वा, वट्टे ति वा, तंसे ति वा, चउरंसे ति वा, आयते ति वा, छलंसिए ति वा, अट्ठंसे ति वा, किण्हे ति वा, णीले ति वा, लोहियहालिद्दसुक्किले ति वा, सुब्भिगंधे ति वा, दुब्भिगंधे ति वा, तित्ते ति वा, कडुए ति वा, कसाए ति वा, अंबिले ति वा, महुरे ति वा, कक्खडे ति वा, मउए ति वा, गुरुए ति वा, लहुए ति वा, सीए ति वा, उसिणे ति वा, निद्धे ति वा, लुक्खे ति वा, एवं असंते असंविज्जमाणे जेसिं तं सुयक्खायं भवति-अन्नो जीवो, अन्नं सरीरं, तम्हा ते णो एवं उवलब्भंति ॥ १५ ॥

तद्यथा-ऊर्ध्वमुपरि पादतलात्,अधश्च केशाग्रमस्तकात्,तिर्यक् च त्वक्पर्यन्तो जीवः। एतदुक्तं भवति-यदेवैतच्छरीरं, स एव जीवो, नैतस्माच्छरीराद्व्यतिरिक्तोऽस्त्यात्मेत्यतस्तत्प्रमाण एव भवत्यसावित्येवं च कृत्वैष आत्मा योऽयं कायोऽयमेव च तस्याऽऽत्मनः पर्यवः, कृत्स्नः सम्पूर्णः पर्यायोऽवस्थाविशेषः, तस्मिंश्च कायात्मन्यवयवे तदव्यतिरेकात् जीवोऽप्यवयव एव भवति। एष च कायो यावन्तं कालं जीवेदविकृत आस्ते, तावन्तमेव कालं जीवोऽपि जीवतीत्युच्यते, तदव्यतिरेकात्। तथैव कायो यदा मृतो विकारजातमवति, तदा जीवोऽपि न जीवति, जीवशरीरयोरेकाऽऽत्मकत्वात्। यावदिदं शरीरं पञ्चभूताऽऽत्मकमव्यङ्गं धरति, तावदेव जीवोऽपीति। तस्मिंश्च विनष्टे सत्येकस्यापि भूतस्यान्यथाभावे विकारे सति जीवस्याऽपि तदात्मनो विनाशः,तदेवं यावदेतच्छरीरं वातपित्तश्लेष्माऽऽधारं पूर्वस्वभावादप्रच्युतं तावदेव तज्जीवस्य जीवितं भवति। तस्मिंश्च विनष्टे तदात्मा जीवोऽपि विनष्ट इति कृत्वा आदहनायाऽऽसमन्ताद्दहनार्थं इमशानाऽऽदौ नीयते, यतोऽसौ तस्मिंश्च शरीरेऽग्निध्मापिते कपोतवर्णान्यस्थीनि केवलमुपलभ्यन्ते,न तदतिरिक्तोऽपरः कश्चिदिकारः समुपलभ्यते, यत आत्मास्तित्वशङ्का स्यात्। ते च तदुत्थाय जघन्यतोऽपि चत्वारः। आसन्दी मञ्चकः, स पञ्चमो येषां ते आसन्दीपञ्चमाः पुरुषाः,तं कायमग्निना ध्मापयित्वा पुनः स्वग्रामं प्रत्यागच्छन्ति। यदि पुनस्तत्राऽऽत्मा निर्गच्छरीरादिभिन्नः स्यात्ततः शरीराग्निर्गच्छन् दृश्येत। न चोपलभ्यते, तस्माज्जीवस्तदेव शरीरमिति स्थितम्। तदेवमुक्तनीत्याऽसौ जीवोऽसन्नविद्यमानस्तत्र तिष्ठन् गच्छंश्चासंवेद्यमानो येषामयं पक्षस्तेषां तत्स्वाख्यातं भवति, येषां पुनरन्यो जीवोऽन्यच्छरीरमेवंभूतोऽप्रमाणक एवाभ्युपगमस्तस्मात्ते स्वयमूह्याः प्रवर्त्तमाना एवमिति वक्ष्यमाणं तेनैव विप्रतिवेदयन्ति जानन्ति।

यथा-आयुष्मन्! शरीराद् बहिरभ्युपगम्यमानः किंप्रमाणकः स्यादिति वाच्यम्। तत्र किं दीर्घः शरीरात्प्रांशुतरः, उत ह्रस्वोऽकुष्ठश्यामाकतण्डुलाऽऽदिपरिमाणो वा?। तथा संस्थानानां परिमण्डलाऽऽदीनां मध्ये किंसंस्थानः, तथा कृष्णाऽऽदीनां वर्णानां मध्ये कतमवर्णवर्ती, तथा किंगन्धः, वर्णां रसानां मध्ये कतमरसवर्ती?। तथाऽष्टानां स्पर्शानां मध्ये कतमोवः स्पर्शो वर्त्तते?। तदेवं संस्थानवर्णगन्धरसस्पर्शान्यरूपतया कथमप्यसावगृह्यमाणोऽसन्नसौ तथाऽपि केनाऽपि प्रकारेणाभ्युपेयमानोऽपि वेषां तत्स्वभावयातं भवति। यथाऽन्यो जीवोऽन्यच्छरीरकमित्यर्थं पक्षस्तस्मात्पृथगविद्यमानत्वात्ते शरीरात्पृथगात्मवादिनो नैवं वक्तव्यमापन्नमित्याऽऽत्मानमुपजनन्ते ॥ १५ ॥

से जहाणामए केइ पुरिसे कोसीओ असिं अभिनिव्वट्टित्ता णं उवदंसेज्जा-अयमाउसो! असी, अयं कोसी, एवमेव नत्थि केइ पुरिसे अभिनिव्वट्टित्ता णं उवदंसेत्तारो-अयमाउसो! आया, इयं सरीरं। से जहाणामए केइ पुरिसे मुंजाओ इसियं अभिनिव्वट्टित्ता णं उवदंसेज्जा-अयमाउसो! मुंजे इयं इसिया, एवमेव नत्थि केइ पुरिसे उवदंसेत्तारो-अयमाउसो! आया, इयं सरीरं। से जहाणामए केइ पुरिसे मंसाओ अट्ठिं अभिनिव्वट्टित्ता णं उवदंसेज्जा-अयमाउसो! मंसे, अयमट्ठी, एवमेव नत्थि केइ पुरिसे उवदंसेत्तारो-अयमाउसो! आया, इयं सरीरं। से जहाणामए केइ पुरिसे करयलाओ आमलकं अभिनिव्वट्टित्ता णं उवदंसेज्जा-अयमाउसो! करतले, अयं आमलए, एवमेव नत्थि केइ पुरिसे उवदंसेत्तारो-अयमाउसो! आया, इयं सरीरं। से जहाणामए केइ पुरिसे दहिओ नवनीयं अभिनिव्वट्टित्ता णं उवदंसेज्जा-अयमाउसो! नवनीयं, अयं तु दही, एवमेव नत्थि केइ पुरिसे०जाव सरीरं। से जहाणामए केइ पुरिसे तिलेहिंतो तिल्लं अभिनिव्वट्टित्ता णं उवदंसेज्जा-अयमाउसो! तेल्लं, अयं पिन्नाए, एवमेव० जाव सरीरं। से जहाणामए केइ पुरिसे इक्खुत्तो खोतरसं अभिनिव्वट्टित्ता णं उवदंसेज्जा-अयमाउसो! खोतरसे, अयं खोए, एवमेव० जाव सरीरं। से जहाणामए केइ पुरिसे अरणीतो अग्गिं अभिनिव्वट्टित्ता णं उवदंसेज्जा-अयमाउसो! अरणी, अयं अग्गी, एवमेव० जाव सरीरं। एवं असंते असंविज्जमाणे जेसिं तं सुयक्खायं भवति-तं जहा-अन्नो जीवो, अन्नं सरीरं, तम्हा ते मिच्छा। १६।

तद्यथा नाम कश्चित्पुरुषः कोशतः परिवाराद्असिं खड्गमभिनिर्वर्त्य समाकृष्यान्येषामुपदर्शयेत्। तद्यथा-अयमायुष्मन्! असिः खड्गोऽयं च कोशः परिवारः, एवमेव जीवशरीरयोरपि नास्त्युपदर्शयिता। तद्यथा-अयं जीवः, इदं च शरीरमिति, न चास्त्येवमुपदर्शयिता कश्चिदतः कायान्न भिन्नो जीव इति। अस्मिँश्चार्थे बहवो दृष्टान्ताः सन्तीत्यतो दर्शयितुमाह। तद्यथा वा-कश्चित्पुरुषो मुञ्जात् तृणविशेषात् (इसियं ति) तद्वर्तनभूतां शलाकां पृथक्कृत्य दर्शयेत्। तथा मांसादस्थि, तथा करतलादामलकम्, तथा दध्नो नवनीतम्, तिलेभ्यस्तैलमिति, तथेक्षो रसं, तथाऽरणीतोऽग्निमभिनिर्वर्त्य दर्शयेत्। एवमेव शरीराद् जीवमिति न चाऽस्त्येवमुपदर्शयिताऽतोऽसन्नात्मा, शरीरात्पृथगसंवेद्यमानत्वेति। प्रयोगश्चात्र-सुखदुःखनाकृ परलोकयायी नास्त्यात्मा, तिलशशिध्यमानेऽपि शरीरके पृथगनुपलब्धेः, घटाऽऽत्मवत्, व्यतिरेकेण च कोशखड्गवत्। तदेवं युक्तिभिः प्रतिपादितोऽप्यात्मा भवेत्, येषां पृथगात्मादिना स्वदर्शनानुरागादेतत्स्वाभ्यातं भवति। तद्यथा-अन्यो जीवः परलोकानुयायी अमूर्तोऽन्यश्च तद्भववृत्ति मूर्तिमच्छरीरमेतच्च पृथङ् नोपलभ्यते। तस्मात्तन्मिथ्या-वैः कैश्चिदुच्यते यथाऽस्त्यात्मा परलोकानुयायीति ॥ १६ ॥

से हंता तं हणह, खणह, थणह, डहह, पयह, आलुंपह, विलुंपह, सहसक्कारेह, विपरामुसह, एतावं ताव जीवे, णत्थि परलोए वा, ते णो एवं विप्पडिवेदेंति-तं जहा-किरिया इ वा अकिरिया इ वा सुकडे इ वा दुक्कडे इ वा कल्लाणे इ वा पावए इ वा साहू इ वा असाहू इ वा सिद्धी इ वा असिद्धी इ वा निरए इ वा अनिरए इ वा, एवं ते विरूवरूवेहिं कम्मसमारंभेहिं विरूवरूवाइं कामभोगाइं समारभंति भोयणाए ॥ १७ ॥

एतदध्यवसायी च स लोकायतिकः स्वतः प्राणिनामेकेन्द्रियाऽऽदीनां हन्ता व्यापादको भवति, प्राणातिपाते दोषाभावमभ्युपगम्यान्येषामपि प्राण्युपघातकारिणामुपदेशं ददाति। तद्यथा-प्राणिनः खड्गाऽऽदिना घातयेत, पृथिव्यादिकं खनतेत्यादिसुगमम्। यावदेतावानेव शरीरमात्र एव जीवस्ततः परलोकिनोऽभावान्नास्ति परलोकोऽतस्तद्भावाच्च यथेष्टमासत। तथा चोक्तम्-" पिब खाद च साधु शोभने!, यदतीतं वरगात्रि! तन्न ते। न हि भीरु! गतं निवर्त्तते, समुदयमात्रमिदं कलेवरम्" ॥१॥ तदेवं परलोकयायिनो जीवस्याऽभावान्न पुण्यपापे स्तः, नापि परलोक इत्येवं येषां पक्षस्ते लोकायतिकास्तज्जीवतच्छरीरवादिनो, नैवैतद्वक्ष्यमाणं प्रतिवेदयन्ति अभ्युपगच्छन्ति। तद्यथा-क्रियां वा सदनुष्ठानाऽऽत्मिकाम्, अक्रियां वा असदनुष्ठानरूपाम्। एवं नैव ते विप्रतिवेदयन्ति-यदि हि आत्मा तत्क्रियाभावान्न कर्मणो भोक्ता स्यात्ततः पापभयात्सदनुष्ठानचिन्ता स्यात्, तद्भावाच्च सत्क्रियादिचिन्ताऽपि दूरोत्सारितैव। तथा सुकृतं दुष्कृतं वा कल्याणमिति पापमिति वा साधुकृतमसाधुकृतमित्यादिका चिन्तैव नास्ति। तथाहि-सुकृतानां कल्याणविपाकिनां साधुतयाऽवस्थानं, दुष्कृतानां च पापविपाकिनामसाधुत्वेनावस्थानमेतदुभयमपि सत्यात्मनि तत्फलभुजि संभवति, तदभावाच्च कुतोऽनर्थकौ हिताहितप्राप्तिपरिहारौ स्याताम्?। तथा सुकृतेन कल्याणेन साध्वनुष्ठानेनाशेषकर्मक्षयरूपा सिद्धिः, तथा दुष्कृतेन पापानुबन्धिना असाध्वनुष्ठानेन नरको, नरके वा तिर्यक्तरामरगतिलक्षणं स्यादित्येवमात्मिका चिन्तैव न भवेत्, तदाधारस्याऽऽत्मनस्तद्भावस्यानभ्युपगमादिति भावः। पुनरपि लोकायतिकानुष्ठानदर्शनायाऽऽह-(एवं ते इत्यादि) एवमनन्तरोक्तेन प्रकारेण ते नास्तिका आत्माभावं प्रतिपाद्य विरूपं नानाप्रकारं रूपं स्वरूपं येषां ते, तथा कर्मसमारम्भाः सावद्यानुष्ठानरूपाः पशुघातमांसभक्षणसुरापाननिर्लाञ्छनाऽऽदिकाः, तैरेवंभूतैर्नानाविधैः कर्मसमारम्भैः कृषीवलानुष्ठानाऽऽदिनिर्विरूपकान् कामभोगान् समारभन्ते समाददति तदुपभोगार्थमिति ॥ १७ ॥

साम्प्रतं तज्जीवतच्छरीरवादिमतमुपसंजिघृक्षुः प्रस्ता-वमारचयन्नाह-

एवं चेगे पागब्भिया णिक्खम्म मामगं धम्मं पन्नवेंति, तं सद्दहमाणा तं पत्तियमाणा तं रोयमाणा साहु सुयक्खाए समणे ति वा माहणे ति वा कामं खलु आउसो! तुमं पूययामि। तं जहा-असणेण वा पाणेण वा खाइमेण वा साइमेण वा वत्थेण वा पडिग्गहेण वा कंबलेण वा पायपुंछणेण वा, तत्थेगे पूयणाए समाउट्टिंसु, तत्थेगे पूयणाए निकाइंसु ॥ १८ ॥

मूर्तिमतः शरीरादन्यदमूर्तं ज्ञानमात्मन्यनुभूयते, तस्य चामूर्तेनैव गुणिना ज्ञाप्यमतः शरीरात्पृथग्भूत आत्माऽमूर्तो ज्ञानवत्तदाधारभूतोऽस्तीति। न चात्माऽभ्युपगममन्तरेण तज्जीवतच्छरीरवादिनः किञ्चिद्विचार्यमाणं मरणमुपपद्यते। दृश्यन्ते च तथाभूत एव शरीरे म्रियमाणा मृताश्च। कुतः समागतोऽहं, कुत्र चेदं शरीरं परित्यज्य यास्यामि?, तथेदं मे शरीरं पुराणं कर्मेत्यधमाधिकाः शरीरात्पृथग्भावेनाऽऽत्मनि संप्रत्यया अनुभूयन्ते। तदेवमपि स्वानुभवसिद्धेऽप्यात्मनि एके केचन नास्तिकाः पृथक् जीवास्तित्वमश्रद्दधानाः प्रागल्भिकाः प्रागल्भ्येन चरन्ति, धृष्टतामापन्ना अभिदधति। तद्यथा-अयमात्मा शरीरात्पृथग्भूतः स्याच्चेत् संस्थानवर्णगन्धरसस्पर्शान्यतमगुणोपेतः स्यात्। न च ते वराकाः स्वदर्शनानुरागान्धतमसाऽऽवृतदृष्टय एतद्विदन्ति। तथा-मूर्तस्यैवैते धर्मा, नामूर्तस्य, न हि ज्ञानस्य संस्थानाऽऽदयो गुणाः संभाव्यन्ते। न च तत्तदभावेऽपि नास्तीत्येवमात्माऽपि संस्थानाऽऽदिगुणरहितोऽपि विद्यत इति। एवं युक्तिमुक्तमप्यात्मानं धार्ष्टर्याभ्युपगच्छन्ति। तथा निष्क्रम्य च स्वदर्शनविहितां प्रव्रज्यां गृहीत्वा नाऽन्यो जीवः शरीराद्विद्यत इत्येवं यो धर्मो मदीयोऽयमित्येवमभ्युपगम्य स्वतोऽपरेषां च तं तथाभूतं धर्मं प्रतिपादयन्ति; यद्यपि लोकायतिकानां नास्ति दीक्षाऽऽदिकं, तथाप्यपरेण शाक्याऽऽदिना प्रव्रज्याविधानेन प्रव्रज्य पश्चाल्लोकायतिकमधीयानस्य तथाविधपरिणतेस्तदेवाभिरुचितमतो मामकोऽयं धर्मः स्वयमभ्युपगच्छन्त्यन्येषां च प्रज्ञापयन्ति। यदि वा-नीलपटाऽऽद्यभ्युपगन्तुः कश्चिदस्येव प्रव्रज्याविशेष इत्यदोष इति। साम्प्रतं तत्प्रतिक्षिप्तशिष्यव्यापारमधिकृत्याऽऽह-(तं सद्दहमाणे इत्यादि) तं नास्तिकवादुपन्यस्तं धर्मं विषयिणमनुकूलं श्रद्दधानाः स्वमतावतिशयेन रोचयन्तस्तथा प्रतिपादयन्तोऽवितथज्ञानेन गृह्णन्तस्तथा तत्र रुचिं कुर्वन्तस्तथा साधु शोभनमेतद्यथा स्वाख्यातं यथाऽवस्थितो नयतो धर्मोऽन्यथा सति हिंसाऽऽदिष्वप्रवर्तमानः परलोकभयात्सुखसाधनेषु मांसमद्याऽऽदिष्वप्रवृत्तिं कुर्वन्तो मनुष्यजन्मफलवर्जिता भवेयुः। ततः शोभनमकारि भवता हे श्रमण! ब्राह्मण! इति वा यदयं तज्जीवतच्छरीरधर्मोऽस्माकमावेदितः, काममिष्टं तदस्माकं धर्मकथनम्। खलुशब्दो वाक्यालङ्कारे। हे आयुष्मन्! त्वया वयमभ्युद्यताः कार्पट्टिकैस्तीर्थिकैर्वञ्चिताः स्युरिति। तस्मादुपकारिणं त्वां भवन्तं पूजयाम्यऽहमपि कञ्चिदायुष्मतो भगवतः प्रत्युपकारं करोमि। तदेव दर्शयति। तद्यथा-(असणेत्यादि) सुगमम्। यावत्य दृष्टजनकमिति। तत्रैके पूर्वोक्तया पूजया पूजार्थं वा (समाउट्टिंसु त्ति) समाकृताः प्रवृत्तीभूतास्ते राजानः पूजां प्रति प्रवृत्तास्तदुपदेष्टारो वा पूजामभ्युपपन्नाः सन्तस्तं राजादिकं स्वदर्शनप्रतिपन्नमेके केचन स्वदर्शनस्थित्या हिताहितप्राप्तिपरिहारेषु निकाचितवन्तो नियमितवन्तः। तथाहि-भवतेदं तच्छरीरमित्यभ्युपगन्तव्यमन्यो जीवोऽन्यच्च शरीरमित्येतत् परित्याज्यम्, अनुष्ठानमपि एतदनुरूपमेतद्विधेयमित्येवं निकाचितवन्त इति ॥ १८ ॥

पुव्वमेव तेसिं णायं भवति-समणा भविस्सामो अणगारा अकिंचणा अपुत्ता अपसू परदत्तभोइणो भिक्खुणो पावं कम्मं णो करिस्सामि समुट्ठिए ते अप्पणो अप्पमिव्वया भवंति, सयमाइयंति, अन्ने वि आदियावेंति, अन्नं पि आयंतं समणुजाणंति, एवमेव ते इत्थिकामभोगेहिं मुच्छिया गिद्धा गढिया अज्झोववन्ना लुद्धा रागदोसवसट्टा ते णो अप्पाणं समुच्छेदेंति, ते णो परं समुच्छेदेंति, णो अन्नाइं पाणाइं भूताइं जीवाइं सत्ताइं समुच्छेदेंति, पहीणा पुव्वसंजोगं आयरियं मग्गं असंपत्ता इति ते णो हव्वाए णो पाराए अंतरा कामभोगेसु विसन्ना इति पढमे पुरिसजाए तज्जीवतच्छरीरए त्ति आहिए ॥ १९ ॥

तत्र ये भागवताऽऽदिकं लिङ्गमभ्युपगताः पश्चाल्लोकायतग्रन्थमधीयते लोकायताः संवृत्ताः, तेषामादौ प्रव्रज्याग्रहणकाल एवैतत्परिज्ञातं भवति। तद्यथा-परित्यक्तपुत्रकलत्राः श्रमणा यतयो भविष्यामः, अनगारा गृहरहिताः, तथा निष्किञ्चनाः किञ्चन द्रव्यं तद्रहिताः, तथाऽपशवो गोमहिष्यादिरहिताः, परदत्तभोजिनः स्वतः पचनपाचनाऽऽदिक्रियारहितत्वात्, भिक्षणशीला भिक्षवः, किंबहूच्यते-अन्यदपि यत्किञ्चित्पापं सावद्यं कर्मानुष्ठानं तत्सर्वं न करिष्यामीत्येवं सम्यगुत्थानेनोत्थाय पूर्वं पश्चाल्लोकायतिकमुपगता आत्मनः स्वतः कर्मभ्योऽप्रतिविरता भवन्ति। विरत्यभावेऽपि यत्कुर्वन्ति तद्दर्शयति। पूर्वं सावद्याऽऽरम्भनिवृत्तिं विधाय नीलपटाऽऽदिकं च लिङ्गमास्थाय च स्वयमात्मना सावद्यमनुष्ठानमाददते स्वीकुर्वन्ति, अन्यान्यप्यादापयन्ति ग्राहयन्ति, अन्यमप्यादानं परिग्रहं स्वीकुर्वन्तं समनुजानन्ति। एवमेव पूर्वोक्तप्रकारेण स्त्रीप्रधानाः स्त्रियोपलक्षिता वा, कामयन्त इति कामाः, भुज्यन्त इति भोगास्तेषां सातबहुलतयाऽजितेन्द्रियाः सन्तः, तेषु कामभोगेषु मूर्छिता एकीभावतामापन्ना गृद्धाः काङ्क्षावन्तो ग्रथिता अवबद्धा अध्युपपन्ना आधिक्येन भोगेषु, लुब्धा रागद्वेषार्ता रागद्वेषवशगाः कामभोगान्धा वा, त एवं कामभोगेषु आश्रवबद्धाः सन्तो नात्मानं संसारात्कर्मपाशाद्वा समुच्छेदयन्ति मोचयन्ति, नाऽपि परं सदुपदेशदानतः कर्मपाशाकर्षितं समुच्छेदयन्ति कर्मबन्धाद् त्रोटयन्ति, नाप्यन्यान् दशविधप्राणवतिनः प्राणान् प्राणिनः, तथा चाऽभूवन् भवन्ति भविष्यन्ति च भूतानि, तथा वा आयुष्कधारणाज्जीवास्तान्, तथा सत्त्वांस्तथाविधवीर्यान्तरायक्षयोपशमाऽऽपादितवीर्यगुणोपेतास्तान् समुच्छेदयन्ति, असदभिप्रायप्रवृत्तत्वात्। ते चैवंविधास्तज्जीवतच्छरीरवादिनो लोकायतिका अजितेन्द्रियतया कामभोगावसक्ताः पूर्वसंयोगात्पुत्रदाराऽऽदिकात्प्रहीणाः प्रभ्रष्टाः, आरात् यातः सर्वहेयधर्मेभ्य इत्यार्यो मार्गः सदनुष्ठानरूपः, तमसंप्राप्ता इत्येवं पूर्वोक्तया नीत्या ऐहिकाऽऽमुष्मिकलोकद्वयसदनुष्ठानभ्रष्ट

अन्तराल एव भोगेषु त्वरयन्तिक्षुभ्यन्ति । न विस्मर्तितं पाणकरीकोत्क्षेपणेऽऽदिकं कार्यं प्रसाधयन्तीति। अयं च प्रथमः पुरुषस्तज्जीवतच्छरीरवादी परिसमाप्त इति ॥ १६ ॥ सूत्र० १ श्रु० ४ अ० २ उ०।

तज्जेमाण–तर्जयत्–त्रि० । क्षान्तस्थ रे! यन्ममेदं वचनं दत्स्वेत्येवं भीषयति,विपा० १ श्रु० १ अ०।

तट्टाग–तमाग–पुं० । तट–नि० । " चूलिकापैशाचिके तृतीयतुर्ययोराद्यद्वितीयौ " ॥ ८ । ४ । ३२५ ॥ इति चूलिकापैशाचिके आद्यवां टकारस्य टकारः । औ०।

तटाक–पुं० । तटमकति। 'अक' वक्रगतौ, अण्, तडागे, जलाशयभेदे, वाच०।

तमाक–पुं०। ताड्यते आहन्यते तटोऽनेन।'तट'-आकन्। नि०। जलाऽऽशयभेदे, तडागे च । वाच०।

तट्टिया–तट्टिका–स्त्री० । पीठिकायां धर्मोपकरणभेदे, आचा० १ श्रु० २ अ० ५ उ०।

तट्टी–देशी–वृतौ, दे० ना० ५ वर्ग १ गाथा।

तट्ठ–तत्स्थ–त्रि० । तस्मिन् तिष्ठतीति तत्स्थः । तस्मिन् स्थिते, आचा० १ श्रु० १ अ० ३ उ०।

तट्ठ–न० । घट्टिते, सूत्र० १ श्रु० ७ अ०।

तट्ठा–त्वष्टृ–पुं० । चित्रानक्षत्राधिष्ठातरि देवे, अनु० । " दो तट्ठा । " स्था० २ ठा० ३ उ०। जं०। पा०। त्वष्टुरपत्ये, वृषा–सुरे, पुं० । संज्ञानाम्न्यां सूर्यपत्न्याम्, स्त्रीयां ङीप् । त्वष्टादेवताऽधिष्ठातृचित्रानक्षत्रे, वाच०।

तड–तट–त्रि० । तट–अच् । वाच० । कूले, आचा० १ श्रु० २ अ० ३ उ०। नि० चू० । समीपवर्तिनोऽप्युन्नतप्रदेशे, रा० । न–आस्तीरे च। अमरमते–स्त्रियां ङीप् । वाच०।

तट–धा० । उच्छ्राये, भ्वादि० । वाच० ।

तड–धा० । आदितौ, वाच० ।

तन–धा० । विस्तृतौ, तना० उभ० सक० सेट् । वाच० । " तनेस्तम-तड-तड्व-विरल्लाः " ॥ ८ । ४ । १३७ ॥ इतितनधातोस्तम इत्यादेशः । तडइ । पक्षे–तणइ । प्रा० ४ पाद ।

तडउमा–तडउला–स्त्री० । आतत्यायाम्, जं० १ वक्ष० । आउलिवृक्षे, दे० ना० ५ वर्ग ५ गाथा।

तडउलाकुसुम–तडउलाकुसुम–न० । आतत्यीपुष्पे, जी० ३ प्रति० ४ उ० । आ० म० ।

तडतडण–स्फुट–न० । स्फुटने, " तडवडस्स भज्जंति भज्जणे कलंबुयालगा पट्ठे ।" (तमतमि त्ति) स्फुटतः । सूत्र० १ श्रु० ५ अ० १ उ०।

तडतडंत–तडतडत्–त्रि० । तडतडेत्येवंध्वनिं विदधाने, ज्ञा० १ श्रु० १ अ०।

तडफडिअ–देशी–परितश्चलिते, दे० ना० ५ वर्ग ९ गाथा।

तडमडइ–देशी–क्षुभ्यते, दे० ना० ५ वर्ग ७ गाथा।

तडागमह–तडागमख–पुं० । तडागयज्ञे, " अगडमहेसु वा तडागमहेसु वा दहमहेसु वा । " आचा० २ श्रु० १ चू० १ अ० २ उ०।

तडितडिय–तडित्तडित–स्त्री० । विस्तारितविद्युति, औ०।

तडिय–तडित्–स्त्री० । तडयत्यभ्रम् । चुरा०–तड–नि०–इत्वः। वाच० । विद्युति, ज्ञा० १ श्रु० १६ अ०।

तडी–तटी–स्त्री० । " मो लः " ॥ ८ । १ । ७०२ ॥ इति क्वचिद्भवत्येवेत्युक्तेरभ्य लो न भवति । प्रा० १ पाद । नद्यादीनां तटेषु, नि० चू० १ उ० । चिल्लिकटङ्कायाम्, " आउत्ते रीयाती, तडिसकमइच्चद्दिसंधारे । " नि० चू० १ उ० ।

तण–तृण–न० । तरन्तीति तृणानि औणादिको नक्, ह्रस्वश्च । उत्त० २ अ० । " ऋतोऽत् " ॥ ८ । १ । १२६ ॥ इत्र आदेर्ऋकारस्याऽत्वम् । प्रा० १ पाद । कुशाऽऽदौ, आचा० १ श्रु० २ अ० ३ उ० । सूत्र० । जं० । उत्त० ।

से किं तं तणा ? । तणा अणेगविहा पण्णत्ता । तं जहा–
" सेमिय गंतिय होत्तिय, दब्भकुसे पव्वए य पोमइला ।
अज्जुण असाढए रो–हियंसि सुयवेयँ खीरजुसे ॥१॥
एरंडे कुरुविंदे, करकएँ सुंठे तहा विभंगू य ।
महुरतण लुरय सिप्पय, बोधव्वे मुंकलितणे य ॥ २ ॥"
जे यावण्णे तहप्पगारा । सेत्तं तणा । प्रज्ञा० १ पद ।

दर्भवीरणाऽऽदौ, दश० ८ अ० । भ० । आचा० कुशपर्वकाऽऽदौ, सूत्र० १ श्रु० ६ अ० । कुशजङ्घकाशुनाऽऽदौ, जी० १ प्रति० । दूर्वाऽऽदौ, प्रज्ञा० १ पद । दर्भकुशाऽऽदौ, भ० १५ श० । "कुसं च जूवं तणकट्ठमग्गिं।" उत्त० १२ अ० । कुशदर्भचर्चकाशुनसुरभिकुरुविन्दाऽऽदौ, आचा० १ श्रु० १ अ० ५ उ० । "तृण" नक्षत्रे, धा० । वाच० । उत्पले, दे० ना० ५ वर्ग १ गाथा ।

तन–धा० । विस्तृतौ, तना० । उपकारे, वाच० ।

तणग–तृणक–न० । तृणविशेषे, सूत्र० २ श्रु० २ अ०।

तणगहण–तृणग्रहण–न० । तृणानां व्रीहिपलालाऽऽदीनां ग्रहणं तृणग्रहणम् । व्रीहिपलालाऽऽदेरादाने, प्रव० ६१ द्वार ।

तणग्ग–तृणाग्र–न० । तृणस्योपरितने पृथिते भागे,नि० चू० १ उ०।

तणघर–तृणगृह–न० । दर्भाऽऽदितृणमये गृहे, व्य० ४ उ० ।

तणच्छाह–तृणच्छाया–स्त्री० । संकुच्छायायाम्, अनु० ।

तणट्ठाण–तृणस्थान–न० । दर्भाऽऽदितृणशालायाम्, यत्र दर्भाऽऽदीनि स्थाप्यन्ते । नि० चू० १ उ० ।

तणपणग–तृणपञ्चक–न० । तृणानि च पञ्चोपयोगीनि । ध० २ अधि० ।

तणपणगं पुण जणियं, जिणेहिँ जियरागदोसमोहेहिं ।
सालिवीहीकोद्दव–रालयऽरण्णेतणाहिं च ॥ ६८३ ॥

तृणपञ्चकं पुनर्भणितं जिनैर्जितरागद्वेषमोहैर्यथा शालिव्रीहिकोद्दवराल्लकसंबन्धीनि तृणानि पलालप्रायाणि अरण्ये अरण्यविषयाणि च । तत्र शालयः कलमशाल्यिप्रभृतयः, व्रीहयः षष्टिकाऽऽदयः, कोद्रवो धान्यविशेषः प्रतीतः, राल्लकः कङ्गुविशेषः, आरण्यतृणानि श्यामाकप्रमुखाणि ॥ ६८२ ॥ प्रव० ८२ द्वार । जीत० । दश० । पा० । आव० । नि० चू० । बृ० । (तृणपञ्चकाऽऽदिषु दोषाः, तथा प्रायश्चित्तं च 'झुसिर' शब्देऽस्मिन्नेव भागे १६७५ पृष्ठे गतम्)

तणफास–तृणस्पर्श–पुं० । तृणानां कुशाऽऽदीनां स्पर्शः । आचा० १ श्रु० ए अ० २ उ० । सप्तदशतमे परीषहे, प्रश्न० ५ संव० द्वार । आचा० । उत्त० ।

तणफासपरीसह–तृणस्पर्शपरीषह–पुं० । तरन्तीति तृणाति वा औणादिको नक्प्रत्ययो. ह्रस्वत्वं च । तेषां स्पर्शस्तृणस्पर्शः, स एव परीषहस्तृणस्पर्शपरीषहः । उत्त०२ अ० । अशुषिरतृणस्य दर्भाऽऽदेः परिभोगोऽनुज्ञातो हि गच्छनिर्गतानां, गच्छवासिनां यतीनां च, तत्र येषां शयनमनुज्ञातं ते तान् दर्भान् भूमावीषदार्द्रताऽऽदियुक्तायामास्तीर्य संस्तारोत्तरपट्टौ च दर्भाणामुपरि विधाय शेरते । चौरापट्टोपकरणो वाऽत्यन्तजीर्णत्वात् प्रतनुसंस्तारकपट्टो वा तदुपरि शेते, तत्र च शयानस्य यद्यपि कठिनतीक्ष्णाग्रभागैस्तृणैरत्यन्तपीडा समुपजायते, तथापि परुषदर्भाऽऽदितृणस्पर्शं सम्यक् सहेतेति । प्रव०८६ द्वार । आव० । कादाचित्कतृणग्रहणे तत्संस्पर्शजन्यदुःखाधिसहने, भ० ८ श० ८ उ० । प्रव० । तथा चोक्तम्–" अहताल्पाणुचेलत्वे, कादाचित्कं तृणाऽऽदिषु । तत्संस्पर्शोद्भवं दुःखं, सहेदिच्छेद् न तान्मृदून् ॥ १ ॥ " भा० म० १ अ० २ खण्ड० । " अनुतालपाणुचेलत्वे, संस्तृतेषु तृणाऽऽदिषु । सहेत दुःखं तत्स्पर्श-मचमिश्लेन तान्मृदून् " ॥१॥ ध० ३ अधि० ।

एतदेव सूत्रकृदप्याह–

नच्चा उप्पइयं दुक्खं, वेयणाए दुहट्टिए ।
अदीणो थावए पन्नं, पुट्ठो तत्थऽहियासए ॥ ३२ ॥
तेगिच्छं नाभिनंदेज्जा, संचिक्खऽत्तगवेसए ।
एवं खु तस्स सामण्णं, जं न कुज्जा न कारवे ॥ ३३ ॥
अचेलगस्स लूहस्स, संजयस्स तवस्सिणो ।
तणेसु सयमाणस्स, होज्जा गायविराहणा ॥ ३४ ॥

अचेलकस्य रूक्षस्य संयतस्य तपस्विन इति प्राग्वत् । तरन्ति तृणाति दर्भाऽऽदीनि तेषु, शयानस्य, उपलक्षणत्वादासीनस्य वा भवेत्, गात्रस्य शरीरस्य विराधना विदारणा गात्रविराधना, अचेलकत्वाऽऽदीनि तु तपस्विविशेषणानि, मा भूत्सचेलस्य तृणस्पर्शोत्पन्नवेदनाकुलस्य, तत्संजनवेऽपि स्निग्धवेनासंयतस्य च शुषिरहरिततृणोपादानेन तथाविधगात्रविराधनाया असंभव इति ।

ततः किमित्याह–

आयवस्स निवाएणं, तिउला हवइ वेयणा ।
एतं नच्चा न सेवंति, तंतुजं तणतज्जिया ॥ ३५ ॥

आतपस्य घर्मस्य नितरां पातो निपातः, तेन (तिउल त्ति) सूत्रत्वात्तोदिका । यद्वा–त्रीन् प्रस्तावाद् मनोवाक्कायान् विज्ञापितत्वाच्छुराऽऽदीनां दलन्तीव स्वरूपचलनेन त्रिदुला । पाठान्तरतस्तु–अतुला विपुला वा, भवति वेदना । एवं च किमित्याह–एतदनन्तरोक्तं, पाठान्तरत एवं, ज्ञात्वा न सेवन्ते न भजन्ते, आस्तरणायेति गम्यते । तन्तुज्यो जातं तन्तुजम्, पठ्यते च–(तंतयं ति) तत्र तन्त्रं वेमघिल्लेख्यन्यच्चनिकाऽऽदि, तस्माज्जातं तन्त्रजम्, उभयत्र वस्त्रं, कम्बलो वा, तृणैस्तर्जिता निर्भर्त्सितास्तृणतर्जिताः किमुक्तं भवति?–यद्यपि तृणैरत्यन्ताविलिखितशरीरस्य रविकिरणसंपर्कसमुत्पन्नखेदवशतः कृतज्वरनिक्षेपकस्येव पीडोपजायते, तथाऽपि–

" प्रदीप्ताङ्गारकल्पेषु, वज्रकुपमेष्वसन्धिषु ।
कूजन्तः करुणं केचित्, दह्यन्ते नरकाग्निना ॥ १ ॥
अग्निभीताः प्रधावन्तो, गत्वा वैतरणीं नदीम् ।
शीततोयामिमां ज्ञात्वा, क्षाराम्भसि पतन्ति ते ॥ २ ॥
क्षारदग्धशरीराश्च, मृगवेगोत्थिताः पुनः ।
असिपत्रवनं यान्ति, छायायां कृतबुद्धयः ॥ ३ ॥
शक्त्यसिप्रासकुन्तैश्च, खड्गतोमरपट्टिशैः ।
विध्यन्ते कृपणास्तत्र, पतद्भिर्वातकम्पितैः ॥ ४ ॥ "

इत्यादिका इतराश्च नरकेषु परवशेन मयाऽनुभूता वेदनाः, तत्किमयतीयम्?, नूनंश्च लाभः स्ववशस्य सम्यक् सहन इति परिभावनातो न तत्परिजिहीर्षया वस्त्रं कम्बलाऽऽदिकमुपादत्ते । जिनकल्पिकापेक्षं चैतत्, स्थविरकल्पिकाश्च सापेक्षसंयमत्वात् सेवन्तेऽपीति सूत्रार्थः । उत्त० २ अ० ।

अत्र संस्तारद्वारमनुसरन् " विउला भवति वेयणा " इति सूत्रसूचितमुदाहरणमाह–

सावत्थीए कुमारो, भद्दो सो चारिओ त्ति वेरज्जे ।
खारेण तच्चियंगो, तणफासपरीसहं विसहे ।५२। उत्त०नि० ।

श्रावस्त्यां कुमारो नप्ता, स चारिकश्चर इति वैराज्ये क्षारेण तक्षिताङ्गः तृणस्पर्शपरीषहं (विसह त्ति) विषहते, सोढवानिति शेषः । इति गाथार्थः ॥५२॥ भावार्थस्तु संप्रदायादवसेयः । स चायम–" सावत्थीए नयरीए जियसत्तुरण्णो पुत्तो भद्दो नाम, सो निव्विण्णकामभोगो तहारूवाणं थेराणमंतिए पव्वतितो, कालेण एगल्लविहारपडिमं पडिवन्नो, सो विहरंतो वइरज्जे चारिओ त्ति काऊण गहितो, सो य पंतावेऊण खारेण तच्चिओ, सो दब्भेहिं वेढिऊण मुक्को, सो दब्भेहिं लोहियसंमीसितेहिं दुक्खा तिज्जंतो सम्मं सहति ।" एवं शेषसाधुभिरपि सम्यक् सोढव्यस्तृणस्पर्शपरीषहः । उत्त० २ अ० ।

तणफासपरीसहविजय–तृणस्पर्शपरीषहविजय–पुं० । तृणस्पर्शपरीषहविजये, पं० सं० । स चैवम्–गच्छवासिनां गच्छनिर्गतानां वा शुषिरस्य दर्भाऽऽदेस्तृणस्य परिभोगः समनुज्ञातो भगवता, तत्र येषां दर्भाऽऽदितृणानामुपरि शयनमनुज्ञातं स्वगुरुभिः, तेषां दर्भाऽऽदितृणानामुपरि संस्तारकोत्तरपट्टौ निधाय शेरते । अथवा–चौरापट्टोपकरणो यदि वाऽतिजीर्णतया व्यपगतसंस्तारकोत्तरपट्टो दर्भाऽऽदितृणान्यास्तीर्य शेते, तत्र यत्तृणस्पर्शसम्यगधिसहनं स तृणस्पर्शपरीषहविजयः । पं० सं० २ द्वार ।

तणभार–तृणभार–पुं० । तृणभारके, भ० ८ श० ए उ० । बध्यमानतृणसमूहे, वाच० ।

तणमुद्दिआ–देशी–अङ्गुलीयके, दे० ना० ५ वर्ग ९ गाथा ।

तणय–तनय–पुं० । तनोति कुलम् । तन्–कयन् । पुत्रे, दुहितरि, वक्रकुक्ष्यायाम्, लतायाम्, घृतकुमार्यां च । स्त्री०–टाप् । वाच० । आ० म० ।

तणरासी–देशी–प्रसारिते, दे० ना० ५ वर्ग ६ गाथा ।

तणवणस्सइ–तृणवनस्पति–पुं० । बादरवनस्पतिभेदे, भ० ७ श० ६ उ० ।

तणवणस्सइकाइय–तृणवनस्पतिकायिक–पुं० । तृणवद्वनस्पतयस्तृणवनस्पतयः । स्था० १० ठा० । बादरवनस्पतिकायिकभेदे, भ० ७ श० ६ उ० ।

दसविहा तणवणस्सइकाइया पण्णत्ता । तं जहा-मूले, कंदे, ०जाव पुप्फे, फले, बीए ॥

(दसेत्यादि) तृणवच्चनस्पतयस्तृणवनस्पतयः, तृणसाधर्म्यं च बादरत्वेन, तेन सूक्ष्माणां न दशविधत्वमिति । मूलं जटाः कन्दः स्कन्धाऽधोवर्ती । यावत्करणात्-" खंधे " इत्यादीनि पञ्च द्रष्टव्यानि । तत्र स्कन्धः स्थुममिति यत्प्रतीतं, त्वक् वल्कः, शाखा शाखा, प्रवालमङ्कुरः, पत्रं पर्णं, पुष्पं कुसुमं, फलं प्रतीतं,बीजं निष्पत्तेति दशस्थानकाधिकार एव । स्था० १० ठा० ।

इदमपरमाह-

तिविहा तणवणस्सइकाइया पण्णत्ता । तं जहा-संखेज्जजीविया, असंखेज्जजीविया, अणंतजीविया ॥

(तिविहेत्यादि) तृणवनस्पतयो, बादरा इत्यर्थः । संख्यातजीविकाः सङ्ख्यातजीवाः,यथा नालिकाबद्धकुसुमानि, जात्यादीनीत्यर्थः असङ्ख्यातजीविकाः-यथा निम्बाम्राऽऽदीनां मूलकन्दस्कन्दत्वक्शाखाप्रवालाः, अनन्तजीविकाः पनकाऽऽदय इति । इह प्रज्ञापनासूत्राण्यपीत्थम्-

"जे केइ नालियाबद्धा,पुप्फा संखेज्जजीविया ।
णिहुया अणंतजीवा, जे यावन्ने तहाविहा ॥ १ ॥
पउमुप्पलनलिणाणं, सुभगसोगंधियाण य ।
अरविंदकोकणाणं, सयपत्तसहस्सपत्ताणं ॥ २ ॥
विंटं बाहिरपत्ता, य कन्निया चेव एगजीवस्स ।
अब्भिंतरगा पत्ता, पत्तेयं केसरं मिंजा" ॥ ३ ॥

तथा-

"लिंबं च जंबु कोसंब-बसालअंकोल्लपीलुसल्लूया ।
सल्लइमोयइमालुय-वउलपलासे करंजे य" ॥ ४ ॥ इत्यादि ।

"एएसि णं मूला वि असंखिज्जजीविया,कंदा वि,खंदा वि,तया वि,साला वि,पवाला वि, पत्ता पत्तेयजीविया, पुप्फा अणेगजीविया, फला एगट्ठिय त्ति ।" अनन्तरं वनस्पतय उक्ताः, ते च जलाऽऽश्रया बहवो भवन्तीति । स्था० ३ ठा० १ उ० ।

वनस्पतिमेव प्ररूपयन्नाह-

चउव्विहा तणवणस्सइकाइया पण्णत्ता । तं जहा-अग्गबीया, मूलबीया, पोरबीया, खंधबीया ॥

(चउव्विहेत्यादि) वनस्पतिः प्रतीतः, स एव कायः शरीरं येषां ते वनस्पतिकायाः, त एव वनस्पतिकायिकाः, तृणप्रकारा वनस्पतिकायिकास्तृणवनस्पतिकायिकाः, बादरा इत्यर्थः । अग्रं बीजं येषां ते अग्रबीजाः कोरण्टकाऽऽदयः, अग्रे वा बीजं येषां ते अग्रबीजा व्रीह्यादयो, मूलमेव बीजं येषां ते मूलबीजा उत्पलकन्दाऽऽदयः, एवं पर्वबीजा इक्ष्वादयः, स्कन्धबीजाः शल्लक्यादयः, स्कन्धः थुड इति । एतानि च सूत्राणि नान्यतरव्यवच्छेदनपराणि, न बीजरुहसम्मूर्च्छनजाऽऽदीनां नाभावो मन्तव्यः, सूत्रान्तरविरोधादिति । अनन्तरं वनस्पतिजीवानां चतुःस्थानकमुक्तम । स्था० ४ ठा० १ उ० ।

पंचविहा तणवणस्सइकाइया पण्णत्ता । तं जहा-अग्गबीया, मूलबीया, पोरबीया, खंधबीया, बीयरुहा ।

(तणवणस्सइ त्ति) तृणवनस्पतयो बादरवनस्पतयोऽग्रबीजाऽऽदयः क्रमेण कोरण्टका उत्पलकन्दा वंशाः शल्लक्यो जटा एवमादयः । व्याख्यातं चैतत्प्रागिवेति । स्था० ५ ठा० २ उ० ।

छव्विहा तणवणस्सइकाइया पण्णत्ता । तं जहा-अग्गबीया, मूलबीया, पोरबीया, खंधबीया, बीयरुहा, संमुच्छिमा ।

तृणवनस्पतिकायिका बादरा इत्यर्थः । मूलबीजा उत्पलकन्दाऽऽदय इत्यादि व्याख्यातमेव;नवरं संमूर्च्छिमा दग्धभूमौ बीजासत्त्वेऽपि ये तृणाऽऽदय उत्पद्यन्ते, यथाऽधिकृताध्ययनावतारं प्ररूपिता जीवाः । स्था० ६ ठा० ।

तणवरंमी-देशी-उडुपे, दे० ना० ५ वर्ग ७ गाथा ।

तणविंटय-तृणवृन्तक-पुं० । त्रीन्द्रियजीवविशेषे, प्रज्ञा० १ पद । जी० ।

तणवेंटय-तृणवृन्तक-पुं० । ' तणविंटय ' शब्दार्थे, प्रज्ञा० १ पद । जी० ।

तणसूअ-तृणशूक-पुं० । न० । तृणाग्रे, भ० ८ श० ६ उ० ।

तणसोल्हिया-तृणसोल्हिका-स्त्री० । मल्लिकायाम्, ज्ञा० १ श्रु० १६ अ० । जं० ।

तणसोल्ही-देशी-मल्लिकायाम्, दे० ना० ५ वर्ग ६ गाथा ।

तणहार-तृणहार-पुं० । त्रीन्द्रियजीवविशेषे, जी० १ प्रति० । उत्त० । प्रज्ञा० ।

तणु-तनु-स्त्री० । " स्वराणां स्वराः प्रायोऽपभ्रंशे " ॥ ८ । ४ । ३२९ ॥ इति अपभ्रंशे स्वरस्य स्वर एव । प्रा० ४ पाद । देहे, आव० ४ अ० । कर्म० । प्रव० । तं० । आ० म० । मूर्त्तौ, वाच० । सूक्ष्मे, त्रि० । कल्प० २ क्षण । प्रश्न० । तं० । औ० । स० । अल्पे,विरले, कृशे च । स्त्रियां वा ङीप् । तन्वी । तनुः । वाच० । लघुपरिमाणे, न० । जी० ३ प्रति० ।

तणुअ-तनुक-त्रि० । तनुरेव तनुकः । कृशे, आव० ५ अ० । स्वरूपेण कृशे, पञ्चा० १६ विव० । स्तोके, जीत० । सुजरे, भ० १५ श० । लघुसुजरे, ज्ञा० १ श्रु० १२ अ० ।

तणुज-त्रि० । तनुः शरीरं, तस्माज्जातस्तनुजः । उत्त० १४ अ० । शरीरादुत्पन्ने, उत्त० १४ अ० ।

तणुअंत-तन्वन्त्र-न० । सूक्ष्मान्त्रे, " तणुयंते तेण पासवणे परिणमइ । " तेन प्रस्रवणं मूत्रं परिणमति । तं० ।

तणुअट्ठ-तन्वष्ठ-न० । तनुशब्देनोपलक्षितमष्टकम्-" तणुवंगागिइसंघयणजाइगइखगइपुव्वी" इति गाथाऽवयवेन प्रतिपादिते अष्टके, कर्म० । " तणुअट्ठ०-" (१६) तनुशब्देनोपलक्षितमष्टकम् " तणुवंगागिइ संघयण जाइ गइ खगइ पुव्वी " (३) इति गाथाऽवयवेन प्रतिपादितं तन्वष्टकम् । तत्र तनवस्तैजसकार्मणयोरपरावर्तमानासु प्रतिपादितत्वात् शेषा औदारिकवैक्रियाऽऽहारकरूपास्तिस्रः । उपाङ्गानि त्रीणि, आकृतयः षट्,संहननानि षट्, जातयः पञ्च, चतस्रो गतयः, खगतिद्वयम, आनुपूर्वीचतुष्कमिति । तन्वष्टकशब्देन च त्रयस्त्रिंशत्प्रकृतयो गृह्यन्ते । (१६) कर्म० ५ कर्म० ।

तणुई-तन्वी-स्त्री० । ईषत्प्राग्भारायास्तृतीये नाम्नि,स्था०८ ठा० ।

तणुकायकिरिय-तनुकायक्रिय-त्रि० । तन्वी उच्छ्वासनिःश्वासाऽऽदिलक्षणव्यापारवति, आव० ४ अ० ।

तणुग-तनुक-न० । शरीरे, जं० ३ वक्ष० । सूक्ष्मे,जं० २वक्ष० ।

तणुजोग–तनुयोग–पुं० । तनोति विस्तारयत्यात्मप्रदेशानस्यामिति तनुरौदारिकाऽऽदिशरीरं, तया सहकारिकरणभूतया योगस्तनुयोगः । तनुविषयो वा योगस्तनुयोगः । कर्म० ४ कर्म० । कायिके योगे, न मनोवाग्द्रव्याणामुपादानं करोति स कायिको योगः। "किं पुण तणुसंरंभे-ण्ण तेण मुंचइ स वाइओ जोगो । मणइ स माणसिओ, तणुजोगो चेव य विअत्तो ॥१॥" विशे० ।

तणुणमिय–तनुनमित–त्रि० । तनु कृशं नतं नम्रं तनुनतम् । ईषन्नम्रे, जं० २ वक्ष० ।

तणुणाम–तनुनाम–न० । तनोति जन्तुरात्मप्रदेशान् विस्तारयति यस्यां सा तनुः,तज्जनकं कर्मापि तनुः,सैव नाम तनुनाम । शरीरनाम्नि, कर्म० १ कर्म० ।

तणुणिद्द–तनुनिद्र–त्रि० । तन्वी स्तोका निद्रा यस्येति । अल्पनिद्रशीले, वृ० १ उ० ।

तणुतणुइ–तनुतन्वी–स्त्री० । अतितनुत्वात्तनुतनुः । ईषत्प्राग्भारायामतुर्ये नाम्नि, स्था० ८ ठा० ।

तणुपणग–तनुपञ्चक–न० । औदारिकवैक्रियाऽऽहारकतैजसकार्मणलक्षणे, प्रव ११९ द्वार ।

तणुवग्गणा–तनुवर्गणा–स्त्री० । तनूनामौदारिकाऽऽदिशरीराणां भेदाभेदपरिणामाभ्यां योग्यत्वाभिमुख्यास्तनुवर्गणाः । अथवाग्रहयमाणमिश्रस्कन्धाच्चित्तस्कन्धद्रव्यस्य तनुर्देहः शरीरं मूर्त्तिरिति यावत्, तद्योग्यत्वान्निमुखा वर्गणा तनुवर्गणा । द्रव्यवर्गणाभेदे, आ०म०१ अ०१ खण्ड । (तद्वक्तव्यता 'वग्गणा' शब्दे)

तणुरू–तनुरुह–पुं० । शरीरादुत्पन्ने पुत्रे, आ० क० । दुहितरि, स्त्री० । देहजातमात्रे, त्रि० । वाच० ।

तणुमाण–तनुमान–न० । शरीरप्रमाणे, प्रव० १ द्वार ।

पढमाए पुढवीए, नेरइयाणं तु होइ उच्चत्तं ।
सत्तधणु तिन्नि रयणी, छच्चेव य अंगुला पुन्ना ॥९१॥
सत्तमपुढवीए पुण, पंचेव धणुस्सयाइ तणुमाणं ।
मज्झिमपुढवीसु पुणो, अणेगहा मज्झिमं नेयं ॥९२॥

अवगाहते जीवोऽस्यामवगाहना,तनुः,शरीरमित्येकोऽर्थः । सा द्विधा–भवधारणीया, उत्तरवैक्रिया च । तत्र नारकाऽऽदावायुःसमाप्तिं यावदनवरतं धार्य्यतेऽसाविति भवधारणीया । स्वाभाविकशरीरग्रहणोत्तरकालं कार्यविशेषमाश्रित्य विविधा क्रियत इत्युत्तरवैक्रिया । एकैकाऽपि च द्विधा-जघन्या,उत्कृष्टा च । तत्र प्रथमतावत् प्रतिपृथिव्युत्कृष्टा भवधारणीयाऽवगाहना प्रोच्यते-प्रथमायां रत्नप्रभायां पृथिव्यां नारकाणामुत्कर्षतो भवधारणीयावगाहनोच्चत्वं सप्तधनूंषि,तिस्रो रत्नयः,त्रयो हस्ता इत्यर्थः। षमेव चाङ्गुलानि पूर्णानि,उत्सेधाङ्गुलेन सपादैकत्रिंशदङ्गुला इति भावः। सप्तमपृथिव्यां पुनः पञ्चैव धनुःशतान्युत्कर्षतो नारकाणां तनुमानं शरीरोच्छ्रयः,मध्यमपृथिवीषु शर्कराप्रभाऽऽद्यासु तमःप्रभापर्यन्तासु पुनर्मध्यमं प्रथमसप्तमपृथिवीनारकतनुमानयोर्मध्यवर्ति अनेकधा पूर्वपूर्वपृथिवीषु उत्तरोत्तरपृथिवीषु द्विगुणं २ तनुमानमुत्कर्षतो ज्ञातव्यम् । तथाहि-रत्नप्रभानारकतनुमानात् द्विगुणं शर्कराप्रभायां पञ्चदश धनूंषि द्वौ हस्तौ द्वादशाङ्गुलानि देहमानम् । एवं वालुकाप्रभायामेकत्रिंशद्धनूंषि एको हस्तः । पङ्कप्रभायां द्वाषष्टिधनूंषि द्वौ हस्तौ । धूमप्रभायां पञ्चविंशं धनुःशतम् । तमःप्रभायां सार्द्धे द्वे धनुःशते । तमस्तमःप्रभायां पञ्चैव धनुःशतानीति । प्रव० १७६ द्वार ।

तणुय–तनुक–त्रि० । अप्रभागे, सूक्ष्मे (विशे०) प्रतरे, ज्ञा० १ श्रु० ८ अ० । सूक्ष्मे, वाच० ।

तनुज–पुं० । तनुः शरीरं तस्माज्जातस्तनुजः । हरि० १४ अ० । पुत्रे, दुहितरि, स्त्री० । देहजातमात्रे, त्रि० । वाच० ।

तणुयर–तनुतर–त्रि० । अतिशयेन तनुस्तनुतरः । अतिसूक्ष्मे, मल्लिकापत्रादपि तनुतरः । आ०म० १ अ० २ खण्ड ।

तणुरागंत–तनुरागान्त–पुं० । सूक्ष्मसंपरायगुणस्थानकान्ते, क० प्र० १० प्रक० ।

तणुल्ल–तनुल–त्रि० । तनुं शरीरं सुखस्पर्शतया साति अनुगृह्णातीति तनुलम् । तनुसुखाऽऽदौ, जं० २ वक्ष० ।

तणुवाय–तनुवात–पुं० । तनुश्चासौ वातश्च तनुवातः । स्था० ४ ठा० ४ उ० । घनवातस्याधःस्थायिनि विरलपरिणामोपेते बादरवायुकायिकजेदे, जी० १ प्रति० । प्रज्ञा० । पिं० । स्था० ।

तणुवायवलय–तनुवातवलय–न० । तनुवातः स एव वलयमिव वलयं कटकम् । स्था० ३ ठा० ४ उ० । बादरवायुकायिकभेदे,प्रज्ञा० २ पद ।

तणुवी–तन्वी–स्त्री० । तन-उ-स्त्रियां वा ङीप् । वाच० । "तन्वीतुल्येषु " ॥ ८ । २ । ११३ ॥ इति अस्यन्यञ्जनात्पूर्वं उकारः । प्रा० २ पाद । कृशायाम्, वाच० ।

तणुसरीर–तनुशरीर–न० । सूक्ष्मशरीरे, प्रश्न० १ आश्र० द्वार ।

तणूय–तनूज–पुं० । पुत्रे, आ० क० । दुहितरि, स्त्री० । देहजातमात्रे, त्रि० । वाच० ।

तणेण–तृणेण–अव्य० । "तादर्थ्ये केहिं-तेहिं-रेसि-रेसिं-तणेणाः" ॥ ८ । ४ । ४२५ ॥ इत्यपभ्रंशे तादर्थ्ये द्योत्ये 'तणेण' इति निपातः । प्रा० ४ पाद ।

तणेणी–देशी–तृणप्रकारे, दे० ना० ५ वर्ग ३ गाथा ।

तण्ण–तर्ण–पुं० । वत्से, जी० १ प्रति० ।

तार्ण–पुं० । तृणसंबन्धिनि, " किंची सकायसत्थं, किंची परकाय तदुभयं किंची । (२४) " किञ्चिच्छस्त्रं स्वकाय एव अग्निकाय एव अग्निकायस्य । तद्यथा–तार्णोऽग्निः पार्णोऽग्निरुल्कम् । आचा० १ श्रु० १ अ० ४ उ० ।

तण्णय–देशी–आर्द्रे, दे० ना० ५ वर्ग २ गाथा ।

तण्णिट्ठ–तन्निष्ठ–त्रि० । तदर्थिते,आचा०१ श्रु०१ चू०२ अ०१ उ० ।

तण्णिवेसण–तन्निवेशन–त्रि० । सदा तन्निवासिनि, " तप्परक्कारे तस्सण्णी तण्णिवेसणे।"तन्निवेशनः सदा गुरुकुलनिवासी । आचा० १ श्रु० ५ अ० ६ उ० ।

तण्हज्झाण–तृष्णाध्यान–न० । तृष्णा तृषापरीषहोदयस्तस्याध्यानम् । तृषार्तस्य मार्गं गच्छतो जनकसाधुसहितस्य क्षुल्लकस्येव तृषाध्याने, आतु० ।

तण्हा–तृष्णा–स्त्री० । तर्षस्तृष्णा । अभिलाषे, स्था० २ ठा० ३ उ० । वृत्त० । प्रश्न० । ध० । पुद्गलभोगपिपासायाम्, अष्ट० १ अष्ट० । औ० । आव० । वृत्त० । सूत्र० । अनुचितवाञ्छायाम् प्रश्न० ३ आश्र० द्वार । तृषापरीषहोदये, आतु० ।

तण्हागेही–तृष्णागृद्धि–स्त्री० । तृष्णा च प्राप्तद्रव्यरक्षाध्ये-क्षागृद्धिश्चाप्राप्तस्य प्राप्तिवाञ्छा, तद्धेतुकं चादत्ताऽऽदानमिति तृष्णागृद्धिरुच्यते । गौणे अदत्ताऽऽदाने, प्रश्न० ३ आश्र० द्वार ।

तण्हातिअ–तृष्णार्दित–त्रि० । पिपासिते, प्रश्न० १ आश्र० द्वार ।

तण्हाऽभिहय–तृष्णाऽभिहत–त्रि० । तृषाऽभिहते, जी० ३ प्रति० ।

तत–तत–न० । वीणाऽऽदिके, स्था० ४ ठा० ४ उ० । प्रश्न० । ज्ञा० । जी० । आचा० । "ततं वीणाऽऽदिकं ज्ञेयं, विततं पटहाऽऽदिकम् । " ज्ञा० ५ अ० ४ उ० । मृदङ्गपटहाऽऽदिके, जी० ३ प्रति० ४ उ० । रा० । आ० म० । वीणापटहाऽऽदिप्रनिते शब्दे, अतः शुषिरभेदेति व्यपदिश्यते । " तते दुविहे पण्णत्ते । तं जहा–घणे चेव, सुसिरे चेव । " स्था० २ ठा० ३ उ० । आ० चू० ।

ततगइ–ततगति–स्त्री० । ततस्य प्राप्तनगराऽऽदिकं गन्तुं प्रवृत्तत्वेन तथाप्राप्तत्वेन तदन्तरालपथे वर्त्तमानतया प्रसारितक्रमतया च विस्तारं गतस्य, गतिस्ततगतिः । गतिप्रवादसूत्रे, भ० ७ श० ७ उ० ।

तगति–स्त्री० । ततो वा अवधिभूतग्रामाऽऽदेर्नगराऽऽदौ गतिः । प्राकृतत्वेन 'ततगइ' । गतिप्रवादभेदे, भ० ७ श० ७ उ० । "से किं तं ततगति ?। ततगति जेणं जं गामं वा० जाव सन्निवेसं वा संपट्ठिए असंपत्ते अंतरापहे य वट्टइ । से तं ततगति । " प्रज्ञा० १६ पद ।

ततगति–ततगति–स्त्री० । ' ततगइ ' शब्दार्थे, भ० ८ श० ७ उ० ।

तत्त–तत्त्व–न० । परमार्थे, सूत्र० १ श्रु० १ अ० १ उ० । उत्त० । पं० व० । परमार्थजाते, सूत्र० १ श्रु० १ अ० १ उ० । यथाऽवस्थितलोकस्वभावे, सूत्र० १ श्रु० १ अ० ३ उ० । यथाऽवस्थितवस्तुस्वरूपपरिच्छेदे, स्था० । परस्परनिरपेक्षसामान्यविशेषाऽऽत्मके (आचा० १ श्रु० ४ अ० २ उ०) जीवाजीवपुण्यपापाऽऽश्रवबन्धसंवरनिर्जरामोक्षाऽऽत्मके, तथा धर्माधर्माऽऽकाशपुद्गलजीवकालाऽऽत्मके ऊर्ध्वे, नित्यानित्यस्वभावे सामान्यविशेषाऽऽत्मकेऽनाद्यपर्यवसानचतुर्दशरज्ज्वात्मके लोके च । सूत्र० २ श्रु० ५ अ० ।

अमूनि नव तत्त्वानि–

जिवअजियपुन्नपावा–ऽऽसवसंवरबंधमुक्खनिज्जरणा(१५)

जीवश्च, अजीवश्च, पुण्यं च, पापं च, आश्रवश्च, संवरश्च, बन्धश्च, मोक्षश्च, निर्जरणं च निर्जरा, एतानि नव तत्त्वानि । (कर्म०)

जीवाजीवतत्त्वे–

" जीवाऽजीवा पुन्नं, पावाऽऽसवसंवरो य निज्जरणा ।
बंधो मुक्खो य तहा, णव तत्ता हुंति नायव्वा ॥ १ ॥
एगविहदुविहतिविहा, चउव्विहा पंचछव्विहा जीवा ।
चेयणलक्खणरूवी, वेयगाइकरणकापंहिं ॥ २ ॥
एगिंदिय सुहुमियरा, बितिचउरिंदियअसन्निपंचिंदी ।
अपज्जत्ता पज्जत्ता, चउदसभेया अहव जीवा ॥ ३ ॥
पणथावर सुहुमियरा, परित्तवणसन्निअसन्निविगलतिगं ।
इय सोलस अपज्जत्ता, पज्जत्ता जीवचउसीसा ॥ ४ ॥
धम्माधम्मागासा, य दव्वदेसप्पएसओ तिविहा ।
गइठाणऽवगाहगुणा, कालो य अरूविणो दसहा ॥ ५ ॥
खंधा देसपएसा, परमाणू पुग्गला चउद्धा रूवी ।
जीवं विणा अचेयण, अक्खिया सव्वगय लोगे ॥ ६ ॥
कालो माणुसखेत्ते, जियधम्माधम्म लोयपरिमाणा ।
सव्वे दव्वं इट्ठा, कालविणा अत्थिकाया य ॥ ७ ॥
धम्माधम्मागासा, कालो परिणामिए इहं भावे ।
उदयपरिणामिए पुग्गला य सव्वेसु पुण जीवा ॥ ८ ॥ "

पुण्यतत्त्वम्–

" तिरिनरसुराउ सुहं, सायं परभायआयवुज्जोयं ।
जिणऊससनिमाणं, पणिंदिसहसमचउरंसं ॥ ९ ॥
तसदस चउवन्नाई, सुरमणुउगु पंचतणु उवंगतिगं ।
अगुरुलहु पढमखगई, वायालं पुन्नपगईओ ॥ १० ॥ "

पापतत्त्वम्–

" नाणंतराय पण पण, नव बीए नियअसायमिच्छत्तं ।
थावरदस नरयतिगं, कसायपणवीस तिरियदुगं ॥ ११ ॥
चउजाई अवघायं, अपढमसंघयणखगइसंघाणा ।
वन्नाइअसुभचउरो, इयासीई पावपगईओ ॥ १२ ॥ "

आश्रवतत्त्वम्–

" इंदिय कसाय अव्वय, किरिया पण चउर पंच पणवीसा ।
जोगतिगं वायाला, आसवभेया इमा किरिया ॥ १३ ॥
काइय अहिगरणीया, पाउसिया पारितावणी किरिया ।
पाणाइवायरंभिय, परिग्गहिया मायवत्ती य ॥ १४ ॥
मिच्छादंसणवत्ती, अपच्चक्खाण दिट्ठि पुट्ठी य ।
पाडुच्चिय सामंतो–वणीय नेसत्थि साहत्थी ॥ १५ ॥
आणवणि वियारणिया, अणभोगा अणवकंखपच्चइया ।
अन्ना पओग समुदा–ण पिज्जदोसेरियावहिया ॥ १६ ॥ "

संवरतत्त्वम्–

" भावण चरित्त परिसह, समिई जइधम्म गुत्ति बारस उ ।
पंच दुवीसा पण दस, तिय संवरभेयसगवन्ना" ॥ १७ ॥

निर्जराबन्धतत्त्वम्–

" बारसविहं तवो नि–ज्जरा उ अहवा अकामसकामा ।
पयइ ठिई अणुभाग–प्पएसभेया चउहबंधो ॥ १८ ॥
संतपयपरूवणया, दव्वपमाणं च खित्त फुसणा य ।
कालो अंतरभागा, भावऽप्पबहू नवह मुक्खो ॥ १९ ॥
जिण अजिण तित्थ तित्था, गिहिअन्नसलिंगथीनरनपुंसा ।
पत्तेयसयंबुद्धा, बिबुद्धबोहिक्कणिक्का य ॥ २० ॥"

इति मोक्षतत्त्वम् । इत्युक्तं संक्षेपतो नव तत्त्वस्वरूपम । कर्म० १ कर्म० । दर्श० । आ० । आचा० । (विशेषतो व्याख्यानं स्वस्वशब्दे) (साङ्ख्यमते तु तत्त्वानि पञ्चविंशतिस्तानि " संख्य " शब्दे दर्शयिष्यन्ते)

नव सब्भावपयत्था पण्णत्ता । तं जहा–जीवा, अजीवा, पुण्णं, पावं, आसवो, संवरो, निज्जरा, बंधो, मुक्खो ।

(नव सब्भावेत्यादि) सद्भावेन परमार्थेन, अनुपचरितेत्यर्थः । पदार्था वस्तूनि सद्भावपदार्थाः, तद्यथा–जीवाः सुखदुःखज्ञानोपयोगलक्षणाः । अजीवास्तद्विपरीताः, पुण्यं प्रकृतिरूपं कर्म, पापं तद्विपरीतं कर्मैव, आश्रूयते गृह्यतेऽनेनेत्याश्रवः, शुभाशुभकर्माऽऽदानहेतुरिति भावः । संवर आश्रवनिरोधो गुप्त्यादिभिः, निर्जरा विपाकात्तपसो वा कर्मणां देशतः क्षपणात्, बन्ध आश्रवैरात्तस्य कर्मण आत्मना संयोगो मोक्षः, कृत्स्नकर्मक्षयादात्मनः स्वात्मन्यवस्थानमिति । ननु जीवाजीवव्यतिरिक्ताः पुण्यादयो न सन्ति, तथायुज्यमानत्वात् । तथाहि—पुण्यपापे कर्मणी, बन्धोऽपि तदात्मक एव, कर्म च पुद्गल-

परिणामः,पुद्गलाश्चाजीवा इति; आश्रवस्तु मिथ्यादर्शनाऽऽदिरूपः परिणामो जीवस्य,स चाऽऽत्मानं,पुद्गलाँश्च विरहरयकोऽन्यः?; संवरोऽप्याश्रवनिरोधलक्षणो देशसर्वभेद आत्मनः परिणामो निवृत्तिरूपः,निर्जरा तु कर्मपरिशाटौ जीवः कर्मणां यत्पार्थक्यमापादयति स्वशक्त्या, मोक्षोऽप्यात्मा समस्तकर्मविरहित इति । तस्माज्जीवाजीवौ सद्भावपदार्थावितिवक्तव्यम्। अतएवोक्तमिहैव-"उद्दरिय च णं लोपतं सव्वं दुप्पडियारं।तं जहा-जीव चेव, अजीव चेव त्ति?।"अत्रोच्यते-सत्यमेतत्किन्तुयावेव जीवाजीवपदार्थौ सामान्येनोक्तौ, तावेवेह विशेषतो नवधोक्तौ, सामान्यविशेषाऽऽत्मकत्वाद् वस्तुनः,तथेह मोक्षमार्गे शिष्यः प्रवर्त्तनीयो, न संग्रहाभिधानमात्रमेव कर्त्तव्यम्। स च यदैवमाख्यायते-यदुताऽऽश्रवो, बन्धो वा, बन्धद्वाराऽऽख्यातेच पुण्यपापे मुख्यानि तत्त्वानि संसारकारणानि, संवरनिर्जरे च मोक्षस्य,तदा संसारकारणत्यायेनेतरत्र प्रवर्तते, नाऽन्यथेत्यतः षट्कोपन्यासः, मुख्यसाध्यख्यापनार्थं च मोक्षस्येति । स्था० ६ ठा० ।

तत्त–त्रि० । अनुष्ठिते, सूत्र० १ श्रु० ३ अ० ४ उ०।उक्ते, स्था० ८ ठा० । तं० । संतापे, औ० । संतप्ते, " तत्ततवियजक्कणगवण्णा । " औ० ।

तत्तओ–तत्त्वतस्–अव्य० । परमार्थवृत्त्या, अने० १ अधि० ।

तत्तंत–तत्त्वान्त–न० आत्माऽऽदितत्त्वप्रसिद्धिरूपे,द्वा० २३ द्वा० ।

तत्तगोयर–तत्त्वगोचर–त्रि० । तत्त्वविषये, द्वा० २१ द्वा० ।

तत्तचिंता–तत्त्वचिन्ता–स्त्री० । परमार्थचिन्तायाम्, पञ्चा० १ विव० ।

तत्तजला–तप्तजला–स्त्री० । जम्बूद्वीपे मेरोः पूर्वस्यां दिशि शीतायां महानद्यां दक्षिणभागस्थितायां स्वनामख्यातायामन्तर्नद्याम्, स्था० ३ ठा० ४ उ० । " दो तत्तजलाओ । " स्था० २ ठा० ३ उ० । जं० ।

तत्तजिज्ञासा–तत्त्वजिज्ञासा–स्त्री० । ज्ञातुमिच्छा जिज्ञासा, तत्त्वविषया ज्ञानेच्छा तत्त्वजिज्ञासा । तत्त्वविषयकज्ञानेच्छायाम्, षो० १६ विव० ।

तत्तणाण–तत्त्वज्ञान–न० । ऊहाऽपोहविशुद्धमिदमित्थमेवेति निश्चये, ध० १ अधि० ।

तत्तणिण्णीसु–तत्त्वनिर्णिनीषु–पुं० । तत्त्वं प्रतिष्ठापयिषौ, स्वीकृतधर्मव्यवस्थापनार्थं साधनदूषणाभ्यां शब्दाऽऽदेः कथञ्चिन्नित्यत्वाऽऽदिरूपं तत्त्वं प्रतिष्ठापयितुमिच्छौ तत्त्वनिर्णेनीषौ, रत्ना० ।

अथ तत्त्वनिर्णेनीषोः स्वरूपं निरूपयन्ति–

तथैव तत्त्वं प्रतितिष्ठापयिषुस्तत्त्वनिर्णिनीषुः ॥ ४ ॥

तथैव स्वीकृतधर्मव्यवस्थापनार्थं साधनदूषणाभ्याम्, शब्दाऽऽदेः कथञ्चिद् नित्यत्वाऽऽदिरूपं तत्त्वम्,प्रतिष्ठापयितुमिच्छुस्तत्त्वनिर्णिनीषुरित्यर्थः ॥ ४ ॥

अस्यैवाऽऽत्मन्यात्मेतरविचिकित्सहेतवे भेदानुपदर्शयन्ति–

अयं च द्वेधा–स्वात्मनि परत्र चेति ॥ ५ ॥

(अयमिति) तत्त्वनिर्णेनीषुः, कश्चित्स्वतु संदेहाऽऽद्युपहतचेतोवृत्तिः स्वाऽऽत्मनि तत्त्वं निर्णेतुमिच्छति,अपरस्तु परानुग्रहैकरसिकतया परत्र तथा;इति द्वेधाऽसौ तत्त्वनिर्णेनीषुः । सर्वोऽपि च धात्वर्थः करोत्यर्थेन व्याप्त इति स्वाऽऽत्मनि परत्र च तत्त्वनिर्णयं चिकीर्षुरित्यर्थः । अथ परं प्रति तत्त्वनिर्णेनीषोरप्यस्य तन्निर्णयोपजनने जयघोषणामुद्घोषयन्त्येव सन्त्या इति चेत्;ततः किम् ?। जिगीषुता स्यात् इति चेत्, कथं यो यदविच्छुः स तदिच्छुः परोक्तिमात्राद् भवेत् ?। तत्किं नाऽसौ जयमश्नुते ?, वा दमश्नुते। न च तमिच्छति च,अश्नुते चेति किमपि कैतवं तवेति चेत्, स्यादेवं, यद्यनिष्टमपि न प्राप्येत । अवलोक्यन्ते चानिष्टान्यप्यनुकूलप्रतिकूलदैवोपकल्पितानि जन्मैरुपनृत्यमानानि शतशः फलानि । तदिदमिह रहस्यम्-परोपकारैकपरायणस्य कस्यचिद्गादिवृन्दारकस्य परत्र तत्त्वनिर्णेनीषोरानुषङ्गिकं फलं जयः,मुख्यं तु परतत्त्वावबोधनम् । जिगीषोस्तु विपर्यय इति।५।

स्वाऽऽत्मनि तत्त्वनिर्णिनीषुमुदाहरन्ति–

आद्यः शिष्याऽऽदिः ॥ ६ ॥

(आद्य इति) स्वात्मनि तत्त्वनिर्णिनीषुरित्यर्थः। आदिग्रहणादिहोत्तरत्र च स ब्रह्मचारिसुहृदादिराढीयते ॥ ६ ॥

परत्र तत्त्वनिर्णिनीषुमुदाहरन्ति–

द्वितीयो गुर्वाऽऽदिः ॥ ७ ॥

(द्वितीय इति) परत्र तत्त्वनिर्णिनीषुः ॥ ७ ॥

द्वितीयस्य भेदावनिदर्शयति–

अयं द्विविधः–क्षायोपशमिकज्ञानशाली, केवली च ॥८॥

(अयमिति) परत्र तत्त्वनिर्णिनीषुर्गुर्वादिः, ज्ञानाऽऽवरणीयस्य कर्मणः क्षयोपशमेन निर्वृत्तं ज्ञानं मतिश्रुतावधिमनःपर्यायरूपं व्यस्तं समस्तं वा यस्यास्ति स तावदेकः; द्वितीयस्तु तस्यैव क्षयेण यज्जानितं केवलज्ञानं तद्वान् । तदेवं चत्वारः प्रारम्भकाः-जिगीषुः, स्वात्मनि तत्त्वनिर्णिनीषुः, परत्र तत्त्वनिर्णिनीषुश्च क्षायोपशमिकज्ञानशालिकेवलिनाविति । तत्त्वनिर्णिनीषोर्हि ये भेदप्रभेदाः प्रदर्शिताः, न ते जिगीषोः सर्वेऽपि संभवन्ति । तथाहि–न कश्चिद्विपश्चिदात्मानं जेतुमिच्छति । न च केवली परं पराजेतुमिच्छति, वीतरागत्वात् । गौडद्राविडाऽऽदिभेदस्तु नाक्षनियमभेदोपयोगी;प्रसञ्जयति चानन्त्यम्; इति पारिशेष्यात् क्षायोपशमिकज्ञानशाली परत्र जिगीषुर्भवतीत्येकरूप एवाऽसौ न भेदप्रदर्शनमर्हति । यौ च परत्र तत्त्वनिर्णिनीषोर्भेदावुक्तौ, न तौ द्वावपि स्वाऽऽत्मनि तत्त्वनिर्णिनीषोः संभवतः, निर्णीतसमस्ततत्त्वज्ञानशालिनः केवलिनः स्वाऽऽत्मनि तत्त्वनिर्णयैकाऽनुपपत्तेः, इति पारिशेष्यात् क्षायोपशमिकज्ञानवानेव स्वाऽऽत्मनि तत्त्वनिर्णिनीषुर्भवतीत्यसावप्येकरूप एवेति। रत्ना० ८ परि० ।

तत्तञ्जु–तत्त्वज्ञ–त्रि० । तत्त्वं सकलपर्यायोपेतसकलवस्तुस्वरूपं जानातीति तत्त्वज्ञः । वस्तुतत्त्ववेदिनि, पञ्चा० १ विव० । सर्वज्ञे, आव० १ अ० ।

तत्तञ्जुपुट्ठि–तत्त्वज्ञपुष्टि–स्त्री० । तत्त्वस्याविसंवादस्थाने हितोपदेशे, षो० ८ विव० ।

तत्ततव–तप्ततपस्–त्रि० । तापिततपस्के, आर्षत्वाद्धर्माणमुपक्रम्य " उग्गतवे दित्ततवे तत्ततवे । " तप्तं तापितं तपो येन स तप्ततपाः । तेन तप्तपस्तप्तं येन कर्माणि सन्ताप्यन्ते, तेन न च तपसा स्वात्मा तपोरूपः संतापितो, यतोऽन्यस्यास्पृश्यमिव आत्मन्। ओघ० । निo । भ० । ज्ञं० । रा० । सू० प्र० । ज्ञा० ।

तत्ततवणिज्ज–तप्ततपनीय–न० । तप्तसुवर्णे, " तत्ततवणिज्जसंकासो । " प्रज्ञा० १ पद ।

तत्ततवोधण–तप्ततपोधन–त्रि० । तप्तमनुष्ठितं तप एव धनं यस्य स तप्ततपोधनः । पञ्चाग्न्यादितपोविशेषेण निष्टप्तदेहे, सूत्र० १ श्रु० ३ अ० ४ उ० ।

तत्ततेल्ल–तप्ततैल–न० । तप्तं च तत्तैलं च । उष्णतैले, स०११अङ्ग ।

तत्तत्ति–तत्त्वाप्ति–स्त्री०जीवाऽऽदीनां स्वरूपोपलम्भे, षो० (?) ।

तत्तत्थ–तत्त्वार्थ–पुं० । युक्तिसिद्धेऽर्थे, द्रव्या० ८ अध्या० ।

तत्तत्थसद्दहाण–तत्त्वार्थश्रद्धान–न० । तत्त्वार्थानां सर्वविदुपदिष्टतया पारमार्थिकानां जीवाऽऽदिपदार्थानां श्रद्धानमेवमेतदेवेति प्रत्ययः, तत्त्वेन वा भावतोऽर्थानां श्रद्धानं तत्त्वार्थश्रद्धानम् । "तत्तत्थसद्दहाणं, सम्मत्तसमग्गहो ण एयम्मि" । पञ्चा०१ विव० (एतद्बहुवक्तव्यता"सम्मत्त"शब्दे वक्ष्यते)

तत्तदंसण–तत्त्वदर्शन–न० । परमार्थावलोकने, द्वा० २५ द्वा० ।

तत्तदंसि (ण्)–तत्त्वदर्शिन्–त्रि० । मेधाविनि, आचा० १ श्रु० ३ अ० २ उ० । तत्त्वावलोकनकर्तरि, सूत्र० १ श्रु० १५ अ० ।

तत्तदिट्ठि–तत्त्वदृष्टि–स्त्री० । तत्त्वं वस्तुरूपं जीवे जीवत्वमनन्तचैतन्यरूपम्, अजीवे अचैतन्यस्वरूपं, तत्र यथार्थावबोधयुक्तौ, अष्ट० ।

रूपे रूपवती दृष्टि–र्दृष्ट्वा रूपं विमुह्यति ।
मज्जत्यात्मनि नीरूपे, तत्त्वदृष्टिस्त्वरूपिणी ॥ १ ॥
भ्रमवाटी बहिर्दृष्टि–र्भ्रमच्छाया तदीक्षणम् ।
अभ्रान्तस्तत्त्वदृष्टिस्तु, नास्यां शेते सुखाशया ॥ २ ॥
ग्रामाऽऽरामाऽऽदि मोहाय, यद् दृष्टं बाह्यया दृशा ।
तत्त्वदृष्ट्या तदेवान्त–र्नीतं वैराग्यसंपदे ॥ ३ ॥
बाह्यदृष्टेः सुधासार–घटिता जाति सुन्दरी ।
तत्त्वदृष्टेस्तु सा साक्षात्, विण्मूत्रपिठरोदरी ॥ ४ ॥
लावण्यलहरीपूर्णं, वपुः पश्यति बाह्यदृग् ।
तत्त्वदृष्टिः श्वकाकानां, जन्यं कृमिकुलाऽऽकुलम् ॥ ५ ॥
गजाश्वैर्नृपभवनं, विस्मयाय बहिर्दृशः ।
तत्राश्वेभवनात् कोऽपि, भेदस्तत्त्वदृशस्तु न ॥ ६ ॥
जल्पना केशलोचेन, वपुर्धूतमलेन वा ।
महान्तं बाह्यदृग् वेत्ति, चित्तसाम्राज्येन तत्त्ववित् ॥ ७ ॥
न विकाराय विश्वस्यो–पकारायैव निर्मिताः ।
स्फुरत्कारुण्यपीयूष–दृष्टयस्तत्त्वदृष्टयः॥८॥अष्ट० १६अष्ट० ।

तत्तदेट्ठा–तत्त्वदेष्टृ–पुं० । तत्त्वं सकलपर्यायोपेतसकलवस्तुस्वरूपं तद्दिशतीति तत्त्वदेष्टा । तत्त्वोपदेष्टरि, ध० १ अधि० ।

तत्तधम्मजोणी–तत्त्वधर्मयोनि–स्त्री० धृत्यादिके, धृतिः श्रद्धा सुखाविविदिषा जिज्ञासितिरिति तत्त्वधर्मयोनयः । " धिइसद्धासुहविविदिस–नेया जं पायसो ण जोणि त्ति ।" पञ्चा० ४ विव० ।

तत्तपवित्ति–तत्त्वप्रवृत्ति–स्त्री० । तत्त्वानुष्ठाने, षो० ।

कस्मात्पुनस्तत्त्वद्वेषः क्रियत इत्याह–

अद्वेषो जिज्ञासा, शुश्रूषा श्रवणबोधमीमांसाः ।
परिशुद्धा प्रतिपत्तिः, प्रवृत्तिरष्टाङ्गिकी तत्त्वे ॥ १४ ॥

अद्वेषोऽप्रीतिपरिहारः तत्त्वविषयस्तत्पूर्विका ज्ञातुमिच्छा जिज्ञासा तत्त्वविषया ज्ञानेच्छा तत्त्वजिज्ञासा तत्पूर्विका बोधाभ्यनःश्रोतसः सिराकल्पा, श्रोतुमिच्छा शुश्रूषा तत्त्वविषयैव । तत्त्वशुश्रूषानिबन्धनं श्रवणमाकर्णनं तत्त्वविषयमेव । बोधोऽवगमः परिच्छेदोविवक्षितार्थस्य श्रवणनिबन्धनस्तत्त्वविषय एव, मीमांसा सद्विचारूपा बोधानन्तरभाविनी तत्त्वविषयैव । श्रवणं च बोधश्च मीमांसा च श्रवणबोधमीमांसाः । परिशुद्धा सर्वतो भावविशुद्धा, प्रतिपत्तिर्मीमांसोत्तरकालभाविनी निश्चयाऽऽकारा परिच्छित्तिरिदमित्थमेवेति तत्त्वविषयैव । प्रवर्त्तनं प्रवृत्तिरनुष्ठानरूपा परिशुद्धप्रतिपत्त्यनन्तरभाविनी तत्त्वविषयैव, प्रवृत्तिशब्दो द्विरावर्त्यते, तेनायमर्थो भवति–तत्त्वे प्रवृत्तिरष्टभिरङ्गैर्निर्वृत्ताऽष्टाङ्गिकी, एतैरद्वेषाऽऽदिभिरष्टाभिरङ्गैस्तत्त्वप्रवृत्तिः संपद्यते, तेनाऽऽगमान्तरे मूलागमैकदेशभूते न द्वेषः कार्य इति ॥ १४ ॥ षो० १६ विव० ।

तत्तफासुअ–तप्तप्रासुक–त्रि० । तप्तं सत्प्रासुकं त्रिदण्डोद्धृतं तप्तप्रासुकम् । त्रिदण्डोद्धृते तप्ते जलाऽऽदौ, " उसिणोदगं तत्तफासुयं, पडिगाहिज्ज संजए । " दश० ८ अ० ।

तत्तवि[द्]–तत्त्ववित्–त्रि० । तत्त्वं वेत्तीति तत्त्ववित् । जीवाजीवाऽऽदिवस्तुविज्ञातरि, ध० ३ अधि० । परमार्थविदि, नि० १ श्रु० १ वर्ग १ अ० ।

तत्तवेइ [ण्]–तत्त्ववेदिन्–पुं० । तत्त्वज्ञानिनि, आचा० । सारो हि विषयगणस्य तत्प्राप्तौ तृप्तिः, तदभावान्निःसारः, तं दृष्ट्वा ज्ञानी तत्त्ववेदी न विषयाभिष्वंगं विदध्याद्, न केवलं मनुष्याणां, देवानामपि विषयसुखाऽऽस्पदमनित्यं जीवितमिति दर्शयति–" उववायं चवणं णच्चा । " उपपातं जन्म, च्यवनं पातः,तच्च ज्ञात्वा न विषयसङ्गोन्मुखो भवेदिति । यतो निःसारो विषयग्रामः, समस्तः संसारो वा, सर्वाणि च स्थानान्यशाश्वतानि । सारासारवेत्तरि, आचा० १ श्रु० ३ अ०२ उ० ।

तत्तबोहविहाइणी–तत्त्वबोधविधायिनी–स्त्री० । अभयदेवविरचितायां स्वनामख्यातायां सम्मतिटीकायाम्, " प्रद्युम्नसूरेः शिष्येण, तत्त्वबोधविधायिनी । एषा चाभयदेवेन, सम्मतेर्विवृतिः कृता " ॥१॥ सम्म० ३ काण्ड ।

तत्तरसाभाय–तत्त्वरसाऽऽस्वाद–पुं० । तत्त्वे परमार्थे रस आस्वादिहेतुस्तस्याऽऽस्वादस्तत्त्वरसाऽऽस्वादः । परमार्थाऽऽसक्तिहेत्वास्वादे, नि० १ श्रु० १ वर्ग १ अ० ।

तत्तलोहपह–तप्तलोहपथ–पुं० । तप्ते लोहमयमार्गे, प्रश्न० १ आश्र० द्वार ।

तत्तसंदिट्ठि–तत्त्वसंदृष्टि–स्त्री० । तत्त्वसंदर्शने, षो० १५ विव० ।

तत्तसंवेयण–तत्त्वसंवेदन–न० । तत्त्वं परमार्थः, तत्सम्यक् प्रवृत्त्याद्युपहतत्वेन विद्यते यस्मिंस्तत् । ज्ञानभेदे, द्वा० ६ द्वा० । सम्यग्ज्ञाने, पं० सू० ४ सूत्र० । हा० ।

तत्तसमजोइभूय–तप्तसमज्योतिर्भूत–त्रि० । तप्तेन तापेन समा तुल्या ज्योतिषा वह्निना भूता जाता या सा तप्तसमज्योतिर्भूता । तापसदृशवह्निजाते, भ० १० श० ५ उ० ।

तत्तसुइ–तत्त्वश्रुति–स्त्री० । तत्त्वश्रवणे, द्वा० ।

ततः किमित्याह—

पुण्यबीजं नयत्येवं, तत्त्वश्रुत्या सदाशयः ।
जवद्वाराम्भसस्त्यागाद्, वृद्धिं मधुरवारिणा ॥ २१ ॥

एवं धर्मस्य प्राणेभ्योऽप्यधिकत्वप्रतिपत्त्या, तत्रोत्सर्गप्रवृत्त्या, तत्त्वश्रुत्या तथा तत्त्वश्रवणेन, मधुरवारिणा, सदाशयः शोभनपरिणामः, जवबीजलक्षणस्य द्वाराम्भसस्त्यागात्, पुण्यबीजं वृद्धिं नयति । यथा हि मधुरोदकयोगतस्तन्माधुर्यानवगमेऽपि बीजं प्ररोहमादत्ते, तथा तत्त्वश्रुतेरचिन्त्यसामर्थ्यात्तत्त्वविषयस्पष्टसंवित्त्वभावेऽपि अतत्त्वश्रवणत्यागेन तदयोगात् पुण्यवृद्धिः स्यादेवेति भावः ॥ २१ ॥

तत्त्वश्रवणतस्तीव्रा, गुरुभक्तिः सुखाऽऽवहा ।
समापत्त्यादिभेदेन, तीर्थकृद्दर्शनं ततः ॥ २२ ॥

(तत्त्वेति) तत्त्वश्रवणतः, तीव्रा उत्कटा, गुरौ तत्त्वश्रावयितरि, भक्तिराराध्यत्वेन प्रतिपत्तिः, सुखावहोभयलोकसुखकरी, ततो गुरुभक्तेः समापत्त्यादिभेदेन तीर्थकृद्दर्शनं भगवत्साक्षात्कारलक्षणं जवति । तदुक्तम्–"गुरुभक्तिप्रभावेण,तीर्थकृद्दर्शनं मतम् । समापत्त्यादिनेदेन, निर्वाणैकनिबन्धनम् " ॥ १ ॥ समापत्तिरत्र ध्यानजस्पर्शना भण्यते, आदिना तन्नामकर्मबन्धविपाकतद्वारापरयुपपत्तिपरिग्रहः ॥ २२ ॥ द्वा० २२ द्वा० ।

तत्तसुस्सूसा–तत्त्वशुश्रूषा–स्त्री० । तत्त्वश्रवणेच्छायाम्, द्वा० २२ द्वा० ।

तत्ताणिव्वुइजोइत्त–तत्त्वानिर्वृत्तभोजित्व–न० । तत्त्वं च तदनिर्वृत्तं चातत्त्वादणोद्भूतं च तदकमिति विशेषणान्यथानुपपत्त्या गम्यते तद्भोजित्वमिति । असचित्तोदकभोजित्वे, ग० २ अधि० ।

तत्ताणुरूवत्त–तत्त्वानुरूपत्व–न० । पञ्चदशतमे सत्यवचनातिशेषसम्प्राप्ते, तत्त्वानुभोजित्वं विवक्षितवस्तुस्वरूपानुसारिता । रा० ।

तत्तातत्तवइगरकराल–तत्त्वातत्त्वव्यतिकरकराल–त्रि० । तत्त्वं चातत्त्वं च तत्त्वातत्त्वे, तयोर्व्यतिकरो व्यतिकीर्णता मिश्रता स्वभावविनिमयः तत्त्वातत्त्वव्यतिकरः, तेन कराला भयङ्करः । तत्त्वेऽतत्त्वाभिनिवेशोऽतत्त्वे तत्त्वाभिनिवेश इत्येवंरूपेण संज्ञायमानव्यतिकरेण भयङ्करे, स्था० ।

तत्ताब्भास–तत्त्वाभ्यास–पुं० । परमार्थाभ्यासे, षो० १३ विव० ।

तत्ताभिणिवेस–तत्त्वाभिनिवेश–पुं० । तत्त्वश्रद्धाने, षो० । " गुरुभक्तिः परमाऽस्यां,विधौ प्रयत्नस्तथा धृतिः करणे । तद्ध्वन्याऽऽसिद्धिश्रवणं, तत्त्वाभिनिवेशपरमफलम् ॥ १ ॥ " षो० १० विव० । वस्तुस्वरूपनिर्णयातिशये, पञ्चा० ६ विव० ।

तत्तायगोलकप्प–तप्तायोगोलकल्प–त्रि० । तप्तलोहपिण्डसदृशे, "तत्तायगोलकप्पो,पमत्तजीवो निवारियप्पसरो । (२७१)" आ० ।

तत्तालोग–तत्त्वालोक–पुं० । परमार्थप्रकाशे, द्वा० २४ द्वा० ।

तत्ति–तृप्ति–स्त्री० । घ्राणे, स्था० १ ठा० । सन्तोषे, आतु० । बुभुक्षाऽऽद्युपशमलक्षणायाम्, विशे० ।

तत्ति–स्त्री० । सारायाम्, " गणतत्तिविप्पमुक्का । " गणस्य गच्छस्य या तत्तिः सारा, तया विप्रमुक्ताः । व्य० १ उ० । चिन्तायाम् प्रति० ।

तत्तिय–तात्त्विक–पुं० । न० । वास्तवे, द्वा० १६ द्वा० । आ० म० । " महावतिसहस्रेषु, वरमेको हि तात्त्विकः । तात्त्विकस्य समं पात्रं, न भूतो न भविष्यति ॥ १ ॥ " अतस्तात्त्विकाय पात्राऽऽदिकं देयम् । ध० २ अधि० ।

तावत्–त्रि० । "जत्तियं गहियं तत्तियं णियं, सेसं नट्ठं, ततो गतो सि घरं । " आ० म० १ अ० २ खण्ड । ' तत्तियं ' अवधारणमात्रमेव कार्यम् । व्यवहारे, नि० चू० ११ उ० ।

तत्तियजोग–तात्त्विकयोग–पुं० । केनापि नयेन मोक्षबीजनिष्पत्तौ, द्वा० १६ द्वा० ।

तत्तियधम्मत्ति–तात्त्विकधर्मप्ति–स्त्री० । तात्त्विकस्वाभ्यासशुद्धस्य तत्त्वान्यासिकमात्रस्य धर्मस्याहिंसाऽऽदेरासिरुपलब्धिः । मन्यासशुद्धस्याहिंसाऽऽदेरुपलब्धौ, द्वा० १० द्वा० ।

तत्तिल्ल–तृप्तिमत्–त्रि० । तृप्तिर्विद्यते यस्य स तदस्यास्त्यस्मिन्निति मतुप् । " आलिवल्लोल्लाल-वन्त-मन्तेत्तेर-मणा-मतोः " ॥ ८ । २ । १५९ ॥ इति मतुपः स्थाने इल्लाऽऽदेशः । प्रा० दुगिढ० २ पाद । तृप्ते, कल्प० ६ क्षण । तत्परे, दे० ना० ५ वर्ग ३ गाथा ।

तत्तिल्वऽज्झवसाण–तत्तीव्राध्यवसान–त्रि० । तस्मिन्नेवाऽऽत्मशरीरके तीव्रं प्रारम्भकालादारभ्य प्रतिक्षणं प्रहर्षयायि प्रयत्नविशेषलक्षणमध्यवसानं यस्य स तथा । तस्मिन्, ग० २ अधि० ।

तत्ती–देशी–तत्परतायाम्, आदेशे च । दे०ना०५ वर्ग ३०गाथा ।

तत्तीइग–तार्तीयिक–त्रि० । तृतीयमेव तार्तीयिकम् । स्वार्थे ठीकण्प्रत्ययः । ध० २ अधि० । त्रयाणां पूरणे, येन त्रित्वसंख्या पूर्यते तस्मिन् पदार्थे, वाच० ।

तत्तु–तत्र–अव्य० । " यत्रतत्रयोस्यस्य मित्सक्कोऽत्तु इत्यादेशः ॥ ८ । ४ । ४०४ ॥ इति तत्रशब्दस्य मित्सक्कोऽत्तु इत्यादेशः । प्रा० ४ पाद । तस्मिन्नित्यर्थे, वाच० ।

तत्तुमिल्ल–देशी–सुरते, दे० ना० ५ वर्ग ६ गाथा ।

तत्थ–तत्र–अव्य० । तस्मिन् काला ऽऽदौ,तत्र तस्मिन्नित्यर्थे, वाच० । स्था० । अनु० । प्रश्न० । वाक्योपन्यासार्थे, सूत्र० २ श्रु० २ अ० । निर्धारणार्थे च । दश० १ अ० । ' तहि ' शब्दार्थे च । प्रा० १ पाद ।

तथ्य–न० । तत्र साधुः यत् । सत्ये, वाच० । विशे० । ज्ञा० । निरुपचरिते, मुख्ये च । विशे० ।

स्तब्ध–त्रि० । परमाधार्मिकदेवपरस्परोदीरितदुःखसंपातजनितात् त्रासमुपपन्ने, जी० १ प्रति० । स्था० ।

त्रस्त–त्रि० । भीते, ज्ञा० १ श्रु० १ अ० ।

तत्थावाइ(ण्)–तथ्यवादिन्–पुं० । ' तत्थावाइ (ण्) ' शब्दार्थे, आ० क० ।

तत्थून–दृष्ट्वा–अव्य० । "ऋतोऽत्" ॥ ८ । १ । १२६ ॥ इदेत्तदोस्तः । दृस्य तः । " क्त्वस्तुमत्थूनौ ष्ट्वः " ॥ ८ । ४ । ३१३ ॥ इति ष्ट्वस्थाने क्त्वस्तुमत्थूनइत्यादेशौ । विलोक्येत्यर्थे, प्रा० दुं० ४ पाद ।

तद्–तत्–त्रि० । लोकत्रयव्यापिनि, किंचन्तत्त्वेन प्रायशो ह्यसन्तत्वादेतादृशाः प्राकृते न प्रयुज्यन्ते । जै० गा० ।

तदक्ख–तदाख्य–त्रि० । तेन अर्थेन आख्या येषां ते तदाख्याः । अहिंसके, नि० चू० २० उ० ।

तदज्झवसाण–तदध्यवसान–त्रि० । तस्यामेवाध्यवसानं भोगक्रिया प्रयत्नविशेषकपं यस्य स तस्मिन् । तदध्यवसिते, वि-पा० १ श्रु० २ अ० । अनु० ।

तदज्झवसिय–तदध्यवसित–त्रि० । तस्मिन्नेव विवक्षिते आवश्यके अध्यवसितं क्रियासंपादनविषयमस्येति तदध्यवसितः । तद्विषयकाध्यवसाययुक्ते, ग० २ अधि० । अनु० ।

तदट्ठ–तदर्थ–पुं० । तस्मै अर्थस्तदर्थः । आचा० १ श्रु० २ अ० ५ उ० । तत्प्राप्तौ, विपा० १ श्रु० २ अ० ।

तदट्ठोवउत्त–तदर्थोपयुक्त–त्रि० । तस्य (विवक्षितस्य) आवश्यकस्यार्थस्तदर्थः, तस्मिन्नुपयुक्तस्तदर्थोपयुक्तः । अनु० । तत्प्राप्तये उपयोगवति, विपा० १ श्रु० १ अ० । ग० । तदभिधेयोपयुक्ते, औ० ।

तदण्णवयण–तदन्यवचन–न० । वचनभेदे, स्था० । तस्माद्विवक्षितघटाऽऽदेरन्यः पटाऽऽदिः, तस्य वचनं तदन्यवचनं, घटापेक्षया पटवचनवत्, नोभयवचनमनभिनिवृत्तिर्वचनमात्रं किमथाऽऽदिनादिति । अथवा-स शब्दव्युत्पत्तिनिमित्तधर्मविशिष्टोऽर्थोऽनेनोच्यते इति तद्वचनं, यथार्थनामेत्यर्थः । ज्वलनतपनाऽऽदिवत् । तथा तस्माच्छब्दव्युत्पत्तिनिमित्तधर्मविशिष्टादन्यः शब्दप्रवृत्तिनिमित्तधर्मविशिष्टोऽर्थः, उच्यतेऽनेनेति तदन्यवचनमयथार्थनामेत्यर्थः । स्था० ३ ठा० ३ उ० ।

तदप्पियकरण–तदर्पितकरण–त्रि० । तस्मिन् भगवत्यर्पितानि करणानीन्द्रियाणि शब्दरूपाऽऽदिषु श्रोत्रचक्षुरादीनि यैस्ते तदर्पितकरणाः । औ० । ग० । तस्मिन्नेवाऽऽहृयके यथोचितव्यापारनियोगेनार्पितानि नियुक्तानि येन स तदर्पितकरणः । सम्यग्यथास्थानन्यस्तोपकरणे, ध० । तस्यामेवार्पितानि दौकितानि करणानि इन्द्रियाणि येन स तथा तस्मिन् । दौकितेन्द्रिये, ध० ३ अधि० ।

तदाभास–तदाभास–पुं० । तत्सदृशे, पञ्चा० ४ विव० ।

तदाहार–तदाधार–त्रि० । ते पृथिव्यादय आधारो येषां ते तदाधाराः । तत्राऽऽहितेषु, प्रज्ञा० १ आभ० द्वार ।

तदाहार–पुं० । तानेव पृथिव्यादीन् आहारयन्तीति तदाहाराः । तद्भक्षके, प्रज्ञा० १ आभ० द्वार ।

तदुभयहिय–तदुभयहित–त्रि० । इहपरलोकहिते, पं० भा० ।

ततो–ततस्–अव्य० । तस्मादित्यर्थे, प्रा० १ पाद ।

तदो–ततस्–अव्य० । " तो दो तसो वा " ॥ ८ । २ । १६० ॥ इति ततः प्रत्यवयस्य वा तो दो इत्यादेशौ । तस्मादित्यर्थे, प्रा० १ पाद ।

तद्दिअयव–देशी–नूत्ये, दे० ना० ५ वर्ग ८ गाथा ।

तद्दिअस–देशी–अनुदिवसे, दे० ना० ५ वर्ग ८ गाथा ।

तद्दिअसिअ–देशी–अनुदिवसे, दे० ना० ५ वर्ग ८ गाथा ।

तद्दिअह–देशी–अनुदिवसे, दे० ना० ५ वर्ग ८ गाथा ।

तद्देस–तद्देश–पुं० । तस्य देशस्तद्देशः । उदाहरणदेशे, दश० १ अ० ।

तद्दोस–तद्दोष–पुं० । तस्योदाहरणस्यैव दोषो यस्मिन् तत्तद्दोषः । उदाहरणदोषे, दश० १ अ० ।

तद्दोस–तद्दोष–त्रि० । कुष्ठिनि, औ० । श्वेतकुष्ठिनि, पिं० । स च त्वग्दोषो द्वाभ्यां प्रकाराभ्यां भवति । तद्यथा–"संदंतमसंदंते, अस्संदिणसित्तमंसलपसुत्ती । किमिपूयं रसिगा वा, पस्संदंति तत्थिमा अवणा " ॥१॥ व्य० ६ उ० । (इयं गाथा ' वगडा ' शब्दे एगवगमावसरे व्याख्यास्यते)

तद्धिय–तद्धित–त्रि० । न० । तस्मै हितं तद्धितमित्यन्वर्थाभिधायका ये प्रत्ययास्ते तद्धिताः । यथा गोभ्यो हितो गव्यो देश इत्यादि । प्रज्ञा० २ सम्य० द्वार । आ० चू० । तेभ्यो विग्रहस्थतत्तत्प्रकृतीनां स्वविशिष्टतया प्रयोगेभ्यो हितः । व्याकरणोक्ते प्रत्ययभेदे, वाच० ।

तद्धियए–तद्धितज–न० । तद्धिताज्जातं तद्धितजम् । इह तद्धितशब्देन तद्धितप्राप्तिहेतुभूतोऽर्थो गृह्यते, तत्रायम्, यद्यपि " तुन्नाए तंतुवाए " तद्धितप्रत्ययो न दृश्यते, तत्रापि तद्धेतुभूतार्थस्य विद्यमानत्वात्तद्धितजं सिद्धं भवति । अनु० । भावप्रमाणभेदे, अनु० ।

से किं तं तद्धियए ?। तद्धियए अट्ठविहे पण्णत्ते । तं जहा-

" कम्मे सिप्पे सिलोए, संजोगे समीवए अ संजूहे ।
इस्सरिए अवच्चेण य, तद्धियणामं तु अट्ठविहं " ॥१॥

(से किं तं तद्धियए इत्यादि) तद्धिताज्जातं तद्धितजम् । इह तद्धितशब्देन तद्धितप्राप्तिहेतुभूतोऽर्थो गृह्यते । तत्रायम्, यद्यपि-" तुन्नाए तंतुवाए " तद्धितप्रत्ययो न दृश्यते, तत्रापि तद्धेतुभूतार्थस्य विद्यमानत्वात्तद्धितजं सिद्धं भवति । " कम्मे गाहा " पाठसिद्धः, नवरं श्लोकः श्लाघा, संयूथो ग्रन्थरचना, एते च कर्मशिल्पाऽऽदयोऽर्थास्तद्धितप्रत्ययस्योत्पत्तौनिमित्तीभवन्तीत्येतद्धेतुत्वात्तद्धितजं नामाष्टविधमुच्यत इति भावः ।

से किं तं कम्मनामे ?। कम्मनामेअणेगविहे पण्णत्ते । तं जहा–तणहारए, कट्ठहारए, पत्तहारए, दोसिए, सोत्तिए, कप्पासिए, भंडवेआलिए, कोलालिए । सेत्तं कम्मनामे ।

तत्र कर्मतद्धितजं (दोसिए, सोत्तिए इत्यादि) दृष्यं पण्यमस्येति दौषिकः । सूत्रं पण्यमस्येति सौत्रिकः । शेषं प्रतीतम् । नवरं भाण्डविचारः कर्मास्येति नापडवैचारिकः, कौलालानि मृद्भाण्डानि पण्यमस्येति कौलालिकः । अत्र क्वापि " तणहारिए " इत्यादिपाठो दृश्यते ॥ तत्र कश्चिदाह-नन्वत्र तद्धितप्रत्ययो न कश्चिदुपलभ्यते, तथा वक्ष्यमाणेष्वपि " तुन्नाए तंतुवाए " इत्यादिषु नायं दृश्यते, तत्किमित्येवंभूतनाम्नामिहोपन्यासः ?। अत्रोच्यते-अस्मादेव सूत्रोपन्यासात्तृणानि हरति वहतीत्यादिकः कश्चिदाद्यव्याकरणदृष्टस्तद्धितोत्पत्तिहेतुभूतोऽर्थो द्रष्टव्यः, ततो यद्यपि साक्षात् तद्धितप्रत्ययो नास्ति, तथाऽपि तदुत्पत्तिनिबन्धनभूतमर्थमाश्रित्येह तद्विधेर्दृष्टो न विरुध्यते । यदि तद्धितोत्पत्तिहेतुरर्थोऽस्ति, तर्हि तद्धितोऽपि कस्मान्नोत्पद्यत इति चेत् ?, लोके इत्थमेव रूढत्वादिति ब्रूमः । अथवा-अस्मादेवाऽऽद्यमुनिप्रणीतसूत्रज्ञापकादेवं आर्षीयास्तद्धितप्रत्यय एवामी केचित्प्रतिपत्तव्या इति ।

अथ शिल्पतद्धितनामोच्यते-

से किं तं सिप्पणामे ?। सिप्पणामे अणेगविहे पण्णत्ते । तं जहा–वत्थिए, तंतिए, तुण्णाए, तंतुवाए, पट्टकारे, उप्पट्टे, वरुडे, मुंजकारे, कट्ठकारे, छत्त–

कारे, वंभकारे, पोत्थकारे, चित्तकारे, दंतकारे, लेप्पकारे । सेत्तं सिप्पनामे ।

वस्त्रं शिल्पमस्येति वास्त्रिकः, तन्त्रीवादनं शिल्पमस्येति तान्त्रिकः। "तुन्नाए तंतुवाए" इत्यादि प्रतीतम् । आक्षेपपरिहारौ तूक्तावेव । यदिह पूर्वं चर्कभिदु वाचनाविशेषे प्रतीतं नाम इष्यते, तदेशान्तरकृढितोऽवसेयम ।

अथ ऋणघातद्धितनामोच्यते-

से किं तं सिलोअणामे ?। सिलोअणामे अणेगविहे पण्णत्ते । तं जहा-समणे, माहणे, सव्वातिही । सेत्तं सिलोगणामे ।

(समणे इत्यादि) श्रमणाऽऽदीनि नामानि ऋणघात्यर्थेषु साधुप्रभृतिषु रूढान्यतोऽस्मादेव सूत्रनिबन्धनात् ऋणघात्यर्थास्तद्धिताः, तदुत्पत्तिहेतुभूतमर्थमात्रं वाऽऽश्रित्य प्रतिपत्तव्यम् ।

संयोगतद्धितनाम-

से किं तं संजोगनामे ?। संजोगनामे अणेगविहे पण्णत्ते । तं जहा-रण्णो ससुरए, रण्णो जमाउए, रण्णो साले, रण्णो दूते, रण्णो जामिणीवई । सेत्तं संजोगनामे ।

राज्ञः श्वशुर इत्यादि । अत्र संबन्धरूपः संयोगो गम्यते। अत्रापि चास्मादेव रूपकात्तद्धितनामता, चित्रं च पूर्वगतं शब्दप्राभृतं प्रत्यक्षं च, अतः कथमिह भावनास्वरूपमस्माद्धेतोः सम्यगवगम्यते ।

समीपतद्धितनाम-

से किं तं समीवणामे ?। समीवणामे अणेगविहे पण्णत्ते । तं जहा-गिरिसमीवे णगरं गिरिणगरं, विदिसिसमीवे णगरं विदिसिणगरं, वेनायसमीवे णगरं वेनायणगरं, णगरायसमीवे नगरं णगरायणगरं । सेत्तं समीवणामे ।

गिरिसमीपे नगरं गिरिनगरम् । अत्र "अदूरभवश्च" ॥ ४ । २ । ७० ॥ (पाणि०) इति अण् न भवति, गिरिनगरमित्येव प्रतीतत्वात्, विदिशाया अदूरभवं नगरं वैदिशम् । अत्र तु "अदूरभवश्च" ॥ ४ । २ । ७० ॥ इति (पाणि०) अण् भवत्येव, इत्थं रूढत्वादिति ।

संयूथतद्धितनाम-

से किं तं संजूहनामे ?। संजूहनामे अणेगविहे पण्णत्ते । तं जहा-तरंगवइकारे, मलयवइकारे, अत्ताणसट्ठिकारे, विंदुकारे । सेत्तं संजूहनामे ।

(तरंगवइकारे इत्यादि) तद्धितनामता चेहोत्तरत्र च पूर्ववद्भावनीया ।

ऐश्वर्यतद्धितनाम-

से किं तं ईसरिअनामे ?। ईसरिअनामे अणेगविहे पण्णत्ते । तं जहा-ईसरे, तलवरे, मडंबिए, कोडुंबिए, इब्भे, सेट्ठी, सत्थवाहे, सेणावई । सेत्तं ईसरिअनामे ।

(राईसरे इत्यादि) इह राजाऽऽदिशब्दनिबन्धनमैश्वर्यं प्रेक्ष्य गन्तव्यं, राजेश्वराऽऽदिशब्दार्थस्त्विहैव पूर्वं व्याख्यात एव ।

अपत्यतद्धितनाम-

से किं तं अवच्चनामे ? । अवच्चनामे अणेगविहे पण्णत्ते । तं जहा-अरिहंतमाया, चक्कवट्टिमाया, बलदेवमाया, वासुदेवमाया, रायमाया, मुणिमाया, वायगमाया । सेत्तं अवच्चनामे ॥

(तित्थयरमाया इत्यादि) तीर्थंकरोऽपत्यं यस्याः सा तीर्थंकरमाता । एवमन्यत्रापि सुप्रसिद्धेनाऽप्रसिद्धं विशिष्यते । अतः तीर्थंकराऽऽदिनिर्मातरो विशेषिताः। तद्धितनामत्वभावना तथैव । गतं तद्धितनाम । अनु० ।

तद्धियय-तद्धितज-न० । 'तद्धियए' इतिशब्दार्थे, अनु० ।

तद्धून-दृष्ट्वा-अव्य० । "क्त्वस्यो द्धुः" ॥ ८ । ४ । ३१३ ॥ इति द्धुस्थाने द्धून इत्यादेशः। "ऋतोऽत्" ॥८।१।१२६॥ऋदृतो दोस्तदस्य तः । प्रा० ४ पाद । विलोक्येत्यर्थे, वाच० ।

तपागच्छ-तपागच्छ-पुं० । घोरतपःकारित्वेन तपाविरुदप्राप्ताद्यगच्छजगच्चन्द्रसूरेः प्रतिष्ठिते गच्छे,तपा इतिशब्दस्तत्सार्थको देशीप्रसिद्धः। यथा तत्काले विरुदतया प्राप्तस्तथैव सर्वैरेव विद्वद्भिर्व्यवह्रियते। केचित्तु 'तपोगच्छ' इति शुद्धसंस्कृतमपि व्यवहरन्ति। जै० इ० ।

तपोरिह-तपोऽर्ह-न० । प्रायश्चित्तभेदे, जीत० ।

साम्प्रतं भावाऽऽदिविषयं तपोऽर्हं प्रायश्चित्तमाह-

दट्ठुगिलाणा जाव-मि दिज्ज दट्ठुस्स न उ गिलाणस्स ।
जावइयं वा विसहइ, तं दिज्ज सहिज्ज वा कालं ॥६७॥

भावे भावतः, कश्चिदालोचनाग्राही दृष्टो नीरोगः समर्थः । कश्चिद् ग्लानो रोगी शक्तिविकल इत्येतद्विचार्य (दिज्ज दट्ठुस्स न उ गिलाणस्स) तुशब्दस्य विशेषणार्थत्वात् दृष्टस्य जीतोक्तादधिकमपि दद्यात्, ग्लानस्य तु न दद्यात्, जीतोक्तादूनं वा दद्यात् । यावन्मात्रं वा विषहते कर्तुं शक्नोति,तत्प्रायश्चित्तं तावन्मात्रं दद्यात्,कालं वा सहेत-यावता प्रगुणो भवति तावत्प्रतीक्ष्य रोगनिवृत्तौ समर्थस्य दद्यादित्यर्थः । उक्तो भावः ॥ ६८ ॥

संप्रति सप्रपञ्चं पुरुषद्वारमाह-

पुरिसा गीया-ऽगीया, सहा-ऽसहा तह सढा-ऽसढा केइ ।
परिणामा-ऽपरिणामा, अइपरिणामा इ वत्थूणं ॥६९॥

इहाऽऽलोचनाग्राहिणः पुरुषाः किंस्वरूपाः?,इति प्रथममेवाऽऽचार्यैर्विचार्यः, ततस्तदपेक्षया प्रायश्चित्तं दातव्यम्, ते च बहुप्रकाराः। तद्यथः-गीतार्थो अधिगताऽऽचारप्रकल्पाऽऽदिनिशीथान्तश्रुताः। तद्विपरीतस्त्वगीतो अगीतार्थः । सहाः-सर्वप्रकारैः समर्थाः, असहा असमर्थाः। तथा कोचित्-शठा मायाविनः, अशठाः सरलाऽऽत्मानः, परिणामका अपरिणामका अतिपरिणामकाश्च वस्तुभूतसर्गापवादरूपेषु विषये। एते च परिणामकाऽऽदयश्चयोऽपि पूर्वमेव "जेयाइमसहहओ" इति गाथाया विवरणे व्याख्याताः, अतो नात्र पुनः प्रतन्यन्त इति ॥ ६९ ॥

तह थिइसंघयणोभय-संपन्ना तदुभएण हीणा य ।
आयपरोभयणोभय-तरगा तह अणुतरगा य ॥७०॥

तथा धृतिसंहननोभयसंपन्नाः, तदुभयेन हीनाश्च । इह भङ्गचतुष्टयं संभवति-तत्र धृत्या संपन्ना इत्येकः। संहननेन संपन्ना इति द्वितीयः। उभयेन धृतिसंहननाऽऽख्येन संपन्ना इति तृतीयः। तदुभयेन हीनाश्चेति चतुर्थः । तथा-आत्मपरोभयानुभयतरका

इति । अत्रापि चतुर्भङ्गः-आत्मानुग्राहकं तपः, परोपष्टम्भकारे वैयावृत्यं, तयोर्द्वयोरपि समर्थाः, परं ये तप एव कुर्वन्ति, न वैयावृत्यं, ते-आत्मतरकाः, (स्वार्थेऽत्र कः प्रत्ययः) न परतरका इत्याद्यो भङ्गाः। ये तु वैयावृत्यमेव कुर्वन्ति,न तपः,ते-अन्यतरकाः, नात्मतरका इति द्वितीयः। ये तूभयमपि कुर्वन्ति, ते तु उभयतरका इति तृतीयो भिये पुनरुभयं न कुर्वन्ति ते नोभयतरका इति चतुर्थः। तथाः (अण्णतरग त्ति) अन्यतरकाः-ये तपोवैयावृत्ययोरन्यतरदेकमेव कर्तुं शक्नुवन्ति, नोभयकरणक्षमा इत्यर्थः॥७०॥

कप्पट्ठियादओ वि य, चउरो जे चेयरा समक्खाया।
सावेक्खेयरजेया-दओ य जे ताण पुरिसाण ॥७१॥

कल्पः सततासेवनीयः समाचारः।

स चायं दशधा-

"आचेलुक्कोद्देसिय-सिज्जायररायपिंडकिइकम्मे।
वयजेट्ठपडिक्कमणे, मासे पज्जोसवणकप्पो" ॥६॥ (पञ्चा० १७ विव०)

अस्या व्याख्या-न विद्यते चेलं वस्त्रं यस्याऽसावचेलकः, तस्य भाव आचेलक्यं, सचेलत्वे चायमचेलकव्यपदेशः।

तथा चान्यत्रापि दृश्यते-

"जह जलमवगाहंतो, बहुचेलो वि सिरवेट्ठियकडिल्लो।
जग्गइ नरो अचेलो, तह मुणओ संतचेला वि ॥ २६०० ॥
तह थोवजुन्नकुच्छिय-चेलेहि वि भन्नए अचेलु त्ति।
जइ तुरसेल्लिय! अप्पय, मे पेच्छि नग्गिया वत्तो२६०१। (विशे०)

उद्देशेन साधुसंकल्पेन कृतमौद्देशिकम् आधाकर्म, शय्यया वसत्या तरति भवाम्भोधिमिति शय्यातरः, राज्ञा नृपः, तयोः पिण्डो भक्ताऽऽदिरूपः-शय्यातरपिण्डो, राजपिण्डश्च। द्वौद्देशिकाऽऽदीनां त्रयाणामपि परिहारोऽवसेयः। कृतिकर्म ज्येष्ठानुक्रमेण वन्दनकदानम्, व्रतानि पञ्च महाव्रतानि, ज्येष्ठः-वर्षशतदीक्षितायाऽपि साध्व्या अद्यतनदीक्षितोऽपि साधुर्गरीयान्। प्रतिक्रमणं प्रतीतम्, मासः मासकल्पः, परिवसतोऽवस्थानमेकत्र निवासो निरुक्तिवशात्पर्युषणा, इति।

एतस्मिन् दशविधे कल्पे स्थिताः कल्पस्थिताः प्रथमचरमजिनसाधवः, ते आदावयवत्वेन येषां ते कल्पस्थिताऽऽदयः। कल्पस्थिताऽऽदयः-'कल्पस्थितपरिणतकृतयोगितरमाणाख्याः' तत्र कल्पस्थिताः कथिता एव, परिणताः परिणतं परिपाकमापन्नं जीवेन सह प्रतीकीभावं चारित्रं येषां ते, कृतयोगिनः चतुर्थषष्ठाष्टमाऽऽदितपोभिः परिकर्मितशरीराः "तरमाण त्ति"। "शकेऽय-तर-तीर-पारः" ॥ ८। ४। ८६ ॥ इत्यनेन प्राकृतलक्षणसूत्रेण शक्धातोः तराऽऽदेशे कृते शक्नुवानाः, शक्तिमुल्लभां कुर्वाणा इत्यर्थः। ये एते चत्वारः सप्रतिपक्षाः समाख्याताः कथिताः कल्पस्थिताद्या इतरे-अकल्पस्थितापरिणताकृतयोगितरमाणाऽऽख्याः, अकल्पस्थिता मध्यमद्वाविंशतिजिनसाधवो, महाविदेहजाश्च, एते हि दशविधस्थितकल्पमध्यात् शय्यातरपिण्डाद्यानचतुर्यामपुरुषज्येष्ठत्वकृतिकर्मकरणाऽऽख्येषु चतुर्षु स्थिताः, शेषेषु षट्सु पुनरस्थिताः। ते ह्येतानि षट् स्थानानि गुणानुल्लोम्यमाश्रित्य कदाचित्कानिचित् कुर्वन्ति वा, न वेति। अपरिणताऽऽदयस्तु परिणताऽऽदिविपरीताः (सावेक्खेयरजेयादओ य जे इति) जे इतिपादपूरणे। कल्पस्थिताः कल्पस्थिताऽऽदयोऽष्टावपि द्विविधाः-सापेक्षा गच्छवासिनो, निरपेक्षा जिनकाल्पिकाऽऽदयः। (ताण पुरिसाणं) इत्यग्रेतनगाथायां सम्बध्यते। सा चेयं गाथा-

जो जह सत्तो बहुतर-गुणो व तस्साहियं पि दिज्जाहि।
हीणस्स हीणतरगं, हासिज्ज व सव्वहीणस्स ॥ ७२ ॥

तेषां पुरुषाणां कल्पस्थिताऽऽदीनां सापेक्षनिरपेक्षभेदानां प्रागाथाद्वयोक्तगीतार्थाऽऽदीनां च मध्याद् यो यथा शक्तः तपः कर्तुं क्षमः, बहुतरगुणो वा धृतिसंहननसंपन्नः परिणतः कृतयोगी आत्मपरतरो वा भवेत, तस्याधिकमपि जीतोक्तादतिरिक्तमपि दद्यात्। हीनस्य धृतिसंहननाऽऽदिरहितस्य हीनतरं जीतोक्तादल्पतरं दद्यात्, सर्वहीनस्य सामस्त्येनाक्षमस्य, सर्वमपि तपः क्षपणात् ह्रासयेत्, न किमपि तस्य दद्यात्, मिथ्यादुष्कृतेनैव तस्य शुद्धिरादेश्येत्यर्थः।

पुनः पुरुषविशेषानेवाऽऽह-

इत्थं पुण बहुतरगा, भिक्खु त्ति अकयकरणाऽणभिगया य।
जं-तेण जीयमट्ठम-भत्तं तं निव्विगाईयं ॥ ७३ ॥

अत्र पुनर्बहुतरा बहुभेदाः, आचार्योपाध्यायकृतकरणगीतार्थस्थिराऽऽद्याः, भिक्षवः साधव इति, अकृतकरणास्तपोभिरपरिकर्मितशरीराः, अनभिगताश्चाऽगीतार्थाः। चशब्दादस्थिराः। एतेषां च सर्वेषां यथाऽर्हं सूक्ष्मबादरातिचाराऽऽदिना यज्जीतं जीतदानव-निर्विकृत्याद्यष्टमभक्तान्तं, ज्ञेयमिति शेषः।यद्वा-यन्त्रेणैतद् ज्ञेयमित्यर्थः। इदं चात्र गाथान्ते यन्त्रकस्य पञ्चम्या दीर्घपङ्क्तेः पश्चिमानुपूर्व्या तपो गृह्यतेम्,एतदीयश्च तपोविशेषः सर्वोऽपि यन्त्रकेण स्पष्टीभवति। ततस्तस्यायं लेखनविधिः कथ्यते-इह दीर्घेण पङ्क्तिरचनायां त्रयोदश गृहाणि स्थाप्यन्ते। पृथुत्वेन धान्यपङ्क्तौ पञ्चदश गृहाणि।द्वितीयतृतीयपङ्क्त्योश्चतुर्दश, चतुर्थपञ्चमपङ्क्त्योस्त्रयोदश,षष्ठसप्तमपङ्क्त्योर्द्वादश, अष्टमनवमपङ्क्त्योरेकादश। दशमैकादशपङ्क्त्योर्दश, द्वादशत्रयोदशपङ्क्त्योर्नवगृहाणीति।अत्र चाऽऽद्यायाःपृथुपङ्क्तेरुपरि निरपेक्षः स्थाप्यते,द्वितीयाया आचार्यः कृतकरणः, तृतीयाया आचार्योऽकृतकरणः, चतुर्थ्या उपाध्यायः कृतकरणः, पञ्चम्या उपाध्यायोऽकृतकरणः, षष्ठ्या गीतार्थः स्थिरः कृतकरणो भिक्षुः, सप्तम्या गीतार्थः स्थिरोऽकृतकरणो भिक्षुः, अष्टम्या गीतार्थोऽस्थिरः कृतकरणो भिक्षुः, नवम्या गीतार्थोऽस्थिरोऽकृतकरणो भिक्षुः,दशम्या अगीतार्थः स्थिरः कृतकरणः, एकादश्या अगीतार्थः स्थिरोऽकृतकरणः, द्वादश्या अगीतार्थोऽस्थिरः कृतकरणः, त्रयोदश्या उपरि अगीतार्थोऽस्थिरोऽकृतकरणो भिक्षुरिति स्थापयित्वा पृथुत्वेन प्रथमायां पङ्क्तौ निरपेक्षस्याधो गृहद्वये शून्यं स्थाप्यम्,यतस्तयोः पाराञ्चिकानवस्थाप्येन भवतः। ते च जिनकल्पिकस्य न सम्भवतः, तस्य हि स्वभावेनैव निरपेक्षत्वात्। अथ तयोः शून्ययोरधस्त्रयोदशसु गृहेषु मूलच्छेदषड्गुरुषड्लघुचतुर्गुरुचतुर्लघुमासगुरुमासलघुभिन्नमासविंशतिकपञ्चदशकदशकपञ्चकानि स्थाप्यन्ते, द्वितीयायां पङ्क्तौ पाराञ्चिकाऽऽदीनि दशकान्तानि, तृतीयायामनवस्थाप्याऽऽदीनि पञ्चकान्तानि, चतुर्थ्यामनवस्थाप्याऽऽदीनि दशकान्तानि, अष्टम्यां छेदाऽऽदीनि दशकान्तानि, नवम्यां षड्गुर्वादीनि पञ्चकान्तानि, दशम्यां षड्गुर्वादीनि दशकान्तानि, एकादश्यां षड्लघ्वादीनि पञ्चकान्तानि, द्वादश्यां षड्लघ्वादीनि दशकान्तानि, त्रयोदश्यां चतुर्गुर्वादीनि पञ्चकान्तानि स्थाप्यन्ते।

	१	२	३	४	५	६	७	८	९	१०	११	१२	१३
	निरपेक्षः	आचार्यः कृतकरणः	आचार्योऽकृतकरणः	उपाध्यायः कृतकरणः	उपाध्यायोऽकृतकरणः	गीतार्थः स्थिरः कृतकरणो भिक्षुः	गीतार्थः स्थिरोऽकृतकरणो भिक्षुः	गीतार्थोऽस्थिरः कृतकरणो भिक्षुः	गीतार्थोऽस्थिरोऽकृतकरणो भिक्षुः	अगीतार्थः स्थिरः कृतकरणो भिक्षुः	अगीतार्थः स्थिरोऽकृतकरणो भिक्षुः	अगीतार्थोऽस्थिरः कृतकरणो भिक्षुः	अगीतार्थोऽस्थिरोऽकृतकरणो भिक्षुः
१	०	पाराञ्चिक	अनवस्थाप्य	अनवस्थाप्य	मूल	मूल	छेद	छेद	६	६	६	६	४
२	०	अनवस्थाप्य	मूल	मूल	छेद	छेद	६	६	६	६	४	४	४
३	मूल	मूल	छेद	छेद	६	६	६	६	४	४	४	४	*
४	छेद	छेद	६	६	६	६	४	४	४	४	*	*	*
५	६	६	६	६	४	४	४	४	*	*	*	*	२५
६	६	६	४	४	४	४	*	*	*	*	२५	२५	२०
७	४	४	४	४	*	*	*	*	२५	२५	२०	२०	१५
८	४	४	*	*	*	*	२५	२५	२०	२०	१५	१५	१०
९	*	*	*	*	२५	२५	२०	२०	१५	१५	१०	१०	५
१०	*	*	२५	२५	२०	२०	१५	१५	१०	१०	५		
११	२५	२५	२०	२०	१५	१५	१०	१०	५				
१२	२०	२०	१५	१५	१०	१०	५						
१३	१५	१५	१०	१०	५								
१४	१०	१०	५										
१५	५												

अत्रैषं भावना--यत्राऽपराधे कृतकरणाऽऽचार्यस्य पारा ञ्चिकं, तत्रैवापराधे अकृतकरणाऽऽचार्याऽऽदीनां दीर्घपङ्क्तिक्रमेणानवस्थाप्याऽऽदीनि प्रायश्चित्तानि भवन्ति । तथा यत्रापराधे कृतकरणाऽऽचार्यस्याऽनवस्थाप्यं,तत्रैवाऽपराधे शेषाणां तत्रैव क्रमेण प्रायश्चित्तानीत्येवं सर्वदीर्घपङ्क्तिषु भावना कार्या। इदं सप्रपञ्चं पुरुषद्वारम् ।

सम्प्रति सेवनामाह-

आउट्टियाइ दप्प--प्पमायकप्पेहिं वा निसेविज्जा ।
दव्वं खित्तं कालं, भावं चाऽऽसेवए पुरिसो ॥७४॥

आकुट्टिकया- उपेत्य सावद्यकरणोत्साहाऽऽत्मिकया, दर्पप्रमादकल्पैर्वा,दर्पो धावनङ्केपनवल्गनाऽऽदिकः हास्यजनकवचनाऽऽदिर्वा दर्परूपो वा प्रमादो-रात्रौ चाप्रतिलेखनाप्रमार्जनाऽऽद्यनुपयुक्तता, कल्पः करणे दर्शनाऽऽदिचतुर्विंशतिरूपे सति गीतार्थस्य कृतयोगिन उपयुक्तस्य यतनयाऽऽधाकर्माऽऽधानरूपः,तैरेतैश्चतुर्भिः प्रतिसेवनाकैरासेवकः पुरुषो निषेवेत प्रतिसेवेत, द्रव्यमाहाराद्दिकं किञ्चिद्वस्तुजातमाद्दीत,क्षेत्रं ग्रिन्नमस्मयाऽऽदिकं स्तोकलोकाऽऽश्रयं साद्धयोजनद्वयं यावदविद्यमानवसतिप्रदेशं यत्र सम्पूर्णा भिक्षा न लभ्यते,काले दुर्भिक्षाऽऽदिर्यत्र सर्वथाऽऽहाराऽऽदि न प्राप्यते, तं प्रतिसेवेत । अयमाशयः-साधुना महति क्षेत्रे काले च गत्वा सेव्यम्,आकुट्टिकाऽऽदिभिर्हि सर्वं ग्रिन्नमस्मयाऽऽदिकं क्षेत्रं दुष्कालं च प्रतिसेवमानः संयमाऽऽत्मविराधने प्राप्नुयात्। भावं च हृष्टग्लानत्वाऽऽदिकं प्रतिसेवेत, आकुट्टिकाऽऽदिनिरहितान्नौषधाऽऽदिकं भुक्त्वा ग्लानत्वाऽऽदिकं भावमुत्पादयेदित्यर्थः। उक्ताः स्वरूपतः प्रतिसेवनाः ।

तासां प्रायश्चित्तमाह-

जं जीयदाणपुत्तं, एयं सव्वं पमायसहियस्स ।
इत्तु चिय ठाणंतर--मेगं वड्ढित्तु दप्पवओ ॥ ७५ ॥

यज्जीतदानं जीतव्यवहारे तपोदानमुक्तम्, एतत्सर्वं प्रायः प्रमादसहितस्य, प्रमादप्रतिसेवना प्राग्गाथायिवरणव्याख्यातव्याऽऽदिसेवना भणिता । इत एव प्रमादप्रतिसेवकप्रायश्चित्तादेकं स्थानान्तरं वर्द्धयेद् दर्पवतः । अयमर्थः-प्रमादप्रतिसेवनया निम्नमासलघुमासगुरुमासचतुर्लघुचतुर्गुरुषट्लघुषड्गुरूणामापत्तौ निर्विकृतिकपुरिमार्द्धैकासनाऽऽचाम्लचतुर्थषष्ठाऽऽख्यं तपो दीयते, दर्पप्रतिसेवाकारिणस्तु निम्नमासाऽऽदीनामापत्तौ सत्यां स्थानान्तरवृद्धिः कार्या, निर्विकृतिकं मुक्त्वा पुरिमार्द्धाऽऽदीनि दशमान्तानि तपांसि देयानीति ॥

आउट्टियाइ ठाणं-तरं व सट्ठाणमेव वा दिज्जा ।
कप्पेण पडिक्कमणं, तदुभयमहवा विणिद्दिट्ठं ॥ ७६ ॥

आकुट्टिकाप्रतिसेवायां साधोः स्थानान्तरं वा दद्यात्, दर्पप्रतिसेवाकारिणः सकाशात् स्थानवृद्ध्यादिकं तपःस्थानं वितरेत्, दर्पासेविनो हि निम्नमासाऽऽद्यापत्तौ पुरिमार्द्धाऽऽदीनि दशमान्तानि दीयन्ते । अस्य त्वेकासनाऽऽदीनि द्वादशान्तानि देयानि। स्वस्थानमेव वा दद्यात्। इहाऽऽपत्तिरूपं प्रायश्चित्तं स्वस्थानमुच्यते,यथाऽऽकुट्टिकया पञ्चेन्द्रियवधे मूलम्,अन्यत्रापि चाऽऽकुट्टिकया यत्रापराधे यद्भिन्नमासाऽऽदिकमुक्तं, तत्तत्र स्वस्थानं, तदेवाऽऽकुट्टिकाप्रतिसेविनो दद्यादित्यर्थः॥ कल्पेन कल्पप्रतिसेवनया प्रतिसेवितो प्रतिक्रमणं मिथ्यादुष्कृतं प्रायश्चित्तम् । अथवा-तदुभयं आलोचनामिथ्यादुष्कृतोभयरूपं प्रायश्चित्तं विनिर्दिष्टम् ।

इदं चोक्तस्वरूपं प्रायश्चित्तं परिणामानुरूपेणैव दद्यादित्याह-

आलोयणकालम्मि वि, संकेसविमोहिभावओ नाउं ।
हीणं वा अहियं वा, तम्मेत्तं वा वि दिज्जाहि ॥७७॥

आलोचनाकालेऽपि क्रमप्राप्तापराधविशेषं यः सर्वथा न प्रकाशयति कथयति, कथयन्नप्यर्द्धं कथितं वा करोति,स संक्लिष्टपरिणाम इति ज्ञात्वा तस्याधिकमपि दद्यात्, यः पुनः संवेगमुपगतो निन्दागर्हाऽऽदिभिर्विशुद्धपरिणामः, तस्य हीनमपि दद्यात्, यः पुनर्मध्यपरिणामः, तस्य तन्मात्रमेव दद्यात् ।

उक्तमेवार्थं द्रढयन्नाह-

इय दव्वाइं बहुए, गुरुसेवाए य बहुतरं दिज्जा ।
हीणतरे हीणतरं, हीणतरे वा वि झोसु त्ति ॥७८॥

इत्यमुना प्रकारेण द्रव्याऽऽदौ द्रव्यक्षेत्रकालभावाऽऽख्ये प्रतिसेविते बहुगुणिते प्रचुरदोषत्वेन सर्वथा वा विपरीतलक्षणया वा बहुदोषे गुरुसेवायां गुरुतरायां प्रतिसेवायां कृतायां बहुतरं प्रायश्चित्तं दद्यात् । हीनतरेऽल्पदोषे द्रव्याऽऽदिके प्रतिसेविते हीनतरमल्पतरं वा प्रायश्चित्तं दद्यात् । ततोऽपि हीनतरे हीनतराद् हीनतरं यावत् सर्वहीने इत्यल्पदोषे द्रव्याऽऽदौ अत्यल्पीयस्यां सेवायाम् । (झोसु त्ति) क्षेपणात् ह्रासः कार्यः, सर्वस्तोकं तपो देयमित्यर्थः ।

कृताऽपि च सर्वथाऽपि ह्रासः क्रियते,इति प्रतिपादयन्नाह-

झोसिज्जइ सुबहुं पि हु, जीएणंऽन्नं तवारिहं बहुओ ।
वेयावच्चगरस्स उ, दिज्जइ साणुग्गहतरं वा ॥ ७९ ॥

इह जीतेनाऽऽद्यक गुरुनिर्वितीर्णं षण्मासाऽऽदिकं तपो बहतः पञ्चकेष्वपि दिवसेषु गतेष्वन्यच्चातुर्मासिकं षाण्मासिकं वा तपोर्हं च समापन्नं, ततस्तत् क्षिप्यते सुबहुकमपि ह्रास्यते, सर्वथाऽपि तत्तस्य न दीयते इत्यर्थः । वैयावृत्यकरस्य च सानुग्रहतरं वा दीयते। झोऽर्थः-यावन्मात्रं तपश्चर्यमाणः स वैयावृत्यं कर्तुं शक्नोति, तस्य तावन्मात्रमेव तपो दीयते नाधिकम् । एष सप्रपञ्चस्तपोऽर्हप्रायश्चित्तविधिः । जीत० ।

तप्प–तप्र–पुं० । नदीप्रवाहेण प्लाव्यमाने दूरादानीयमाने काष्ठसमुदाये, आ० म० १ अ० १ खण्ड । प्रश्न० । उड्डपके, ज्ञ० ११ श्रु० १० अ० । विशे० । नं० । आ० चू० ।

तप्पक्खिय–तत्पाक्षिक–त्रि० । तेषां विवक्षितानां संविग्नानां पक्षस्तत्पक्षः, तत्र भवस्तत्पाक्षिकः । व्य० १ उ० । तस्य प्रयोजनेषु सहाये, भ० ३ श० ७ उ० ।

तप्पज्ज–तात्पर्य–न० । तत्परस्य भावः, ष्यञ् । वक्रोक्तिच्छायाम्, अभिप्राये, तत्परतायां च । आचा० १ श्रु० ३ अ० १ उ० ।

तप्पडिवक्ख–तत्प्रतिपक्ष–पुं० । तद्विरुद्धे,यथा- परिणतप्रतिपक्षा अपरिणताः । नि० चू० १ उ० ।

तप्पडिवक्ख–तत्प्रतिपक्ष–त्रि० । तद्भाविनि, षो० १ विव० ।

तप्पडिरूवगववहार–तत्प्रतिरूपकव्यवहार–पुं० । तेन प्रतिरूपकं सदृशं तत्प्रतिरूपकं, तस्य विविधमवहरणं व्यवहारः प्रक्षेपः तत्प्रतिरूपकव्यवहारो यद्यत्र घटते ब्रीदिघृताऽऽदिषु पलञ्जीवशाऽऽदेः प्रक्षेपे, तत्प्रतिरूपेण वशाऽऽदिना व्यवहरणे तत्प्रतिरूपकव्यवहारः । स्थूलादत्ताऽऽदानविरतेश्चतुर्थेऽतिचारे, श्रा० । पञ्चा० । ध० । भाव० ।

तप्पढमया–तत्प्रथमता–स्त्री० । तेषां विवक्षितानाम् (भ० ए श० ३३ उ०) अणुव्रताऽऽदीनां प्रथमं तत्प्रथमं, तद्भावस्तत्प्रथमता । तस्याम्, उत्त० १ अ० । प्रथमे कल्पे, कल्प० २ क्षण ।

तप्पण–तर्पण–न० । उपकरणे, स० ३० समo । शक्तौ, प्रश्न० ५ सम्व० द्वार । स्नेहाऽऽदौ शरीरबृंहणे, विपा० १ श्रु० १ अ० । स्नेहद्रव्यविशेषैर्बृंहणे, ज्ञा० १ श्रु० १३ अ० ।

तप्पणालोमिय–तर्पणाऽऽलोमित–न० । सक्त्वालोमने, जलाऽऽद्यालोमितसक्तौ, स्था० ४ ठा० ३ उ० ।

तप्पमाण–तर्पमाण–त्रि० । क्षरति, सूत्र० १ श्रु० ५ अ० १ उ० । स० ।

तप्पर–तत्पर–त्रि० । तद्रूपतया वर्त्तमानेऽन्यस्मिन्, यथा परमाणोरपरः परमाणुः । आचा० २ श्रु० २ चू० ६ अ० । आसक्ते, आचा० १ श्रु० १ अ० ७ उ० ।

तप्पागारसंठिय–तत्प्राकारसंस्थित–त्रि० । अधोमुखसरावाऽऽकारसंस्थिते, भ० ११ श० १० उ० । आ० चू० ।

तप्पुरक्खार–तत्पुरस्कार–पुं० । तस्याऽऽचार्यस्य पुरस्करणं पुरस्कारः । सर्वकार्येष्वग्रतः स्थापने, आचा० १ श्रु० ५ अ० ४ उ० । तमाचार्यं सर्वकार्येषु पुरस्करोतीति तत्पुरस्कारः । आचार्यानुमत्या क्रियाऽनुष्ठायिनि, त्रि० । आचा० १ श्रु० ५ अ० ६ उ० ।

तप्पुरिस–तत्पुरुष–पुं० । द्वितीयाऽऽदिविभक्त्यन्तपदानां स्वनाम. ख्याते समासे, यथा तीर्थे काक इवाऽऽस्ते तीर्थकाकः । "ध्वाङ्क्षेणाऽऽक्षेपे ॥२ । १ । ४२॥ इति (पाणि०) सप्तमीतत्पुरुषः अनु० ।

से किं तं तप्पुरिसे ?। तप्पुरिसे अणेगविहे पण्णत्ते । तं जहा–तित्थे कागो तित्थकागो, वणे हत्थी वणहत्थी, वणे वराहो वणवराहो, वणे महिसो वणमहिसो, वणे मयूरो वणमयूरो । सेत्तं तप्पुरिसे ॥

तीर्थे काक इवाऽऽस्ते तीर्थकाकः । "ध्वाङ्क्षेणाऽऽक्षेपे" ॥ २ । १ । ४२ ॥ इति (पाणि०) सप्तमीतत्पुरुषः । शेषं स्पष्टम् । अनु० ।

तब्भत्तिय–तद्भक्तिक–त्रि० । तत्र भक्तिः सेवा बहुमानो वा येषां ते तद्भक्तिकाः । तत्सेवके, भ० ५ श० ७ उ० ।

तब्भवमरण–तद्भवमरण–न० । तस्मै भवाय मनुष्याऽऽदेः सतो मनुष्याऽऽदावेव बद्धाऽऽयुषो यन्मरणं तत् तद्भवमरणम् । इदं च नरतिरश्चामेव भवति । बालमरणभेदे, भ० २१ श० १ उ० । स० । स्था० । प्रव० ।

तत्स्वरूपम्–

मोत्तुं अकम्मभूमग–णरतिरिए सुरगणे य णेरइए ।
सेसाणं जीवाणं, तब्भवमरणं तु कोसिं च ॥१५॥

(मोत्तुं गाहा) मुक्त्वा अपहाय, कान् ?,(अकम्मभूमगणरतिरिए त्ति) सूत्रत्वादकर्म्मभूमिजाश्च ते देवकुरुत्तरकुर्वादिभूत्पन्नतया नरतिर्यञ्चश्च अकर्म्मभूमिजनरतिर्यञ्चः, तान्, तेषां हि तद्भवानन्तरं देवेष्वेवोत्पादः, तथा सुरगणांश्च सुरनिकायान् । किमुक्तं भवति?–चतुर्निकायवर्तिनोऽपि देवान्, निरयो नरकः, तस्मिन् भवा नैरयिकाः । इहापि चशब्दानुवृत्तेस्तांश्च, मुक्त्वेति संबन्धः । तेषां देवानां च तद्भवानन्तरं तिर्यङ्मनुष्येष्वेवोत्पत्तेः । शेषाणामेतद्व्यतिरिक्तानां कर्म्मभूमिजनरतिरश्चां,जीवानां प्राणिनां तद्भवमरणं, तेषामेव पुनस्तत्रोत्पत्तेस्तत्किं यस्मिन् भवे वर्त्तते जन्तुस्तद्भवयोग्यमेवाऽऽयुर्बद्ध्वा पुनस्तत्क्षयेण म्रियमाणस्य भवति, तुशब्दस्तेषामपि संख्येयवर्षाऽऽयुषामेवेति विशेषव्यापकः, असंख्येयवर्षाऽऽयुषां हि युगलधार्मिकत्वादकर्मभूमिजानामिव देवेष्वेव तत्पादः, तेषामपि न सर्वेषां, किं तु केषाञ्चिद् तद्भवोत्पादानुरूपमेवाऽऽयुःकर्मापचिन्वतामिति गाथार्थः ।

मोत्तूण ओहिमरणं, आवी वीआइअं तु तं चेव ।
सेसा मरणा सव्वे, तब्भवमरणे य णायव्वे ॥ १६ ॥

अत्रान्तरे प्रत्यन्तरेषु (मोत्तूण ओहिमरणं) इत्यादि गाथा दृश्यते, न चास्या भावार्थः सम्यगवबुध्यते, नापि चूर्णिकृताऽसौ व्याख्याता । उत्त० पाई० ५ अ० ।

तब्भारिय–तद्भार्य–त्रि० । तस्य सोमस्य भार्या इव भार्या अत्यन्तवश्यत्वात्पोषणीयत्वाच्चेति तद्भार्यः दासे, ज्ञा० १ श्रु० ७ उ० ।

तब्भारिक–त्रि० । तद्भारो येषां वोढव्यतयाऽस्ति ते तद्भारिकाः । दासे, भ० ३ श० ७ उ० ।

तब्भावणाभाविय–तद्भावनाभावित–त्रि० । तस्याऽऽद्यस्यकस्य भावना अव्यवच्छिन्नपूर्वपूर्वतरसंस्कारस्य तदनुष्ठानरूपतया ज्ञानाऽऽदिभावेन परिणताऽऽद्यस्यकानुष्ठानपरिणामे,अनु० । विपा० । ग० ।

तब्भूम–तद्भौम–त्रि० । तस्यामेव भूमौ भवस्तद्भौमः । तद्भूमिवास्तव्यश्लोकपरिचिते; कृ० १ उ० ।

तम–पुं०–तमस्–न० । तमयति खेदयति जनलोचनानीति तमः । औणाऽऽदिकोऽसुन् । उत्त० १ अ० । "स्नमदामशिरोऽनभः" ॥ ८ । १ । ३२ ॥ इति प्राकृते पुंस्त्वम् । प्रा० १ पाद । अन्धकारे, औ० । आचा० । कृष्णचतुर्दश्यां, रजन्यां वा तेजोरूप्याभावे, कृ० १ उ० । नि० चू० । मोहे, औ० । अज्ञाने, ध० २ अधि० । स्था० । मिथ्याज्ञाने, स्था० ४ ठा० २ उ० । बद्धस्पृष्टनिधत्ते ज्ञानाऽऽवरणीये निकाचिते, आव० ५ अ० । अप्कायपरिणामस्वरूपेऽन्धकारे, स्था० ४ ठा० २ उ० । तमिस्रे, स० । आत्मनो वैरपीडाऽऽदौ, प्रव० ७२ द्वार । द्रव्याभावरूपान्धकारे, षो० १५ विव० । सम्म० । शोके, दे० ना० ५ वर्ग १ गाथा ।

तमण–देशी–धुल्यौ, दे० ना० ५ वर्ग २ गाथा ।

तमतम–तमस्तम–पुं० । तमस्तमा सप्तमनरकपृथ्वी, तस्यामुत्पन्ना नारका अपि तमस्तमाः, उपचारात् । यद्वा–तमस्तमा विद्यते येषां ते तमस्तमाः । "अश्राऽऽदिभ्यः" ॥ ७ । २ । ४६ ॥ इत्यप्प्रत्ययः । सप्तमनरकपृथिवीनारकेषु, कर्म० ५ कर्म० ।

तमतमग–तमस्तमाग–पुं० । सप्तमपृथ्वीनारके, " तमतमगो अइक्खिप्पं, संमत्तं लभिय तम्मि बहुगद्धं । मणुयदुगस्सुक्कोसं, सवज्जरिसभस्स बंधत्ते ॥१६०॥" पं० सं० ५ द्वार । प्रश्न० ।

तमतमप्पभा–तमस्तमप्रभा–स्त्री० । तमसः प्रभा यस्याः सा । सप्तमनारकपृथिव्याम्, अनु० । प्रज्ञा० ।

तमतमा–तमस्तमा–स्त्री० । अतिशयवत्तमस्तद्रूपद्रव्ययोगात्तमस्तमा । सप्तमनरकपृथिव्याम्, अनु० । स्था० ।

तमतिमिर–तमस्तिमिर–न० । अन्धकारे, रात्रौ यदा रजो धूमधूमिका भवति तदा तमतिमिरं भण्यते । बृ० ४ उ० । विज्ञानमन्दताऽऽपत्त्वे, आ० चू० ५ अ० । नि० चू० ।

तमतिमिरपडल–तमस्तिमिरपटल–न० । तमो विज्ञानमन्दता,यथा पृथ्वीकायाऽऽदीनां तिमिरविज्ञानाल्पता, तथा शेषाणां तमस्तिमिरनिमित्तभूतं पटलं तमस्तिमिरपटलम् । ज्ञानाऽऽवरणीयाऽऽदिकर्मसङ्घाते,आ०चू० । यद्वा-तमोऽपरिज्ञानं तस्य हेतुभूतं तिमिरपटलं तमस्तिमिरपटलम् । ज्ञानाऽऽवरणाऽऽदिकर्मबन्धे, आ० चू० । अथवा-तमोऽतत्त्वबोधः,स एव तिमिरं तमस्तिमिरं,तस्य कारणं पटलं तमस्तिमिरपटलम् । अथवा तमोऽपरिज्ञानहेतुः,स एव बहलस्तिमिरं,तस्य पटलं वर्गः समूहः । अन्ये पुनर्भणन्ति-तमो बद्धं स्पृष्टं निधत्तं ज्ञानाऽऽवरणीयं निकाचितं तिमिरं,तस्य पटलं वृन्दं तमस्तिमिरपटलम् । ज्ञानाऽऽवरणीयकर्मसंघाते,आ० चू० ५ अ० । यदा तस्यामेव रजन्यां रजःप्रभृतयो मेघदुर्दिनं च भवति, तदा तमस्तिमिरपटलमभिधीयते । यथा तत्रैवान्धकारे पुरुषः किञ्चिदपि न पश्यति । अन्धकारसमूहे, बृ० ४ उ० ।

तमतिमिरपडलजूय–तमस्तिमिरपटलजूत–त्रि० । दर्शनाऽऽवरणीयोदयादकिञ्चित्प्रेक्षयति, नि० चू० ।

तमतिमिरपडलजूओ, पावं चिंतेति दीहसंसारी ।
कण्हाएँ चउद्दसिए, रात्रो जासइ..... ॥

दव्वाभावो य तमं भण्णति, तम्मि चेव रातो जदा रयरेणुधूमिगा भवति तदा तमतिमिरं भण्णति, जदा पुण ता चेव रातीए रयादिया मेहदुद्दिणं च भवति, तदा तमतिमिरपडलं भण्णति, सुट्ठु अन्धकारं, णऽत्थ पुरिसो किंचि पासति, एवं उदएण तिव्वतरतिव्वतमेण पुरिसो तमतिमिरपडलभूतो भण्णति, भूतशब्दः सादृश्योपमार्थे द्रष्टव्यः । अहवा-तम एव तिमिरमेव पडलं तमतिमिरपडलं, अन्धकारविशेष इत्यर्थः । एतेण उवमा कज्जति, तेण तमतिमिरपडलजूतो, इहापि भूतशब्द उपमार्थः । यथाऽन्धकारेण न किञ्चिदुपलभ्यते, एवं तीव्रकषायोदयान्न चारित्रगुणः कश्चिदुपलभ्यते । अहवा पि उदयविकारेण य दव्वचक्खिंदियस्संऽतःकरणं पडलं भण्णति, तब्भावे य चक्खुदंसणावरणोदयओ व तिमिरपडलेहिं पुरिसस्स तमो भवति, न किञ्चित्पश्यतीत्यर्थः । तेण उवमा जस्स कज्जति, सो तमतिमिरपडलभूतो, इहापि भूतशब्द उपमार्थे । नि० चू० १० उ० ।

तमतिमिरपडलविद्धंसण–तमस्तिमिरपटलविध्वंसन–त्रि० । तमोऽज्ञानं तदेव तिमिरं तमस्तिमिरम् । अथवा–तमो बद्धस्पृष्टं निधत्तं ज्ञानाऽऽवरणीयं, निकाचितं तिमिरं, तस्य पटलं वृन्दं तमस्तिमिरपटलं, तद्विध्वंसयति विनाशयतीति तमस्तिमिरपटलविध्वंसनः । अज्ञाननिराशकर्तरि, ल० । आव० । ध० ।

तमपज्जलण–तमःप्रज्वलन–त्रि० । तमोबलेनाऽज्ञानबलेनाऽन्धकारबलेन वा प्रज्वलति दर्पितो भवतीति तमःप्रज्वलनम् । अज्ञानबलेन अन्धकारबलेन वा दृप्ते; स्था० ४ ठा० ३ उ० ।

तमपडल–तमःपटल–न० । ज्ञानाऽऽवरणे, ज्ञा० ६ श० ४ उ० । अन्धकारसमूहे, उत्त० ४ अ० ।

तमपडलमोहजालपलिच्छन्न–तमःपटलमोहजालप्रतिच्छन्न–त्रि० । तमःपटलमिव तमःपटलं ज्ञानाऽऽवरणं,मोहो मोहनीयं,तदेव जालं मोहजालं, ताभ्यां प्रतिच्छन्ना आच्छादिता ये ते तथा । ज्ञानाऽऽवरणीयमोहनीयकर्मभ्यामाच्छादितेषु,भ० ६ श० ४ उ० ।

तमप्पभा–तमःप्रभा–स्त्री० । तमसः प्रभा बाहुल्यं यत्र सा तमःप्रभा । प्रज्ञा०१७२ द्वार । तमोमय्यां षष्ठ्यां नरकपृथिव्याम्,प्रज्ञा० १ पद । भ० । अनु० ।

तमप्पविट्ठ–तमःप्रविष्ट–त्रि० । तमः प्रविष्ट इव तमःप्रविष्टः । तमःकर्मप्रवेशकर्तरि, ज्ञा० ६ श० ४ उ० ।

तमबल–तमोबल–पुं० । तमोऽज्ञानं बलं सामर्थ्यं,यस्य सः,तमोऽन्धकारं वा तदेव तत्र वा बलं यस्य स तथा । असदाचरति, अज्ञानिनि, रात्रिञ्चरे, चौराऽऽदौ पुरुषजाते, स्था० ४ ठा० ३ उ० ।

तमबलपलज्जण–तमोबलप्रलजन–पुं० । तमो मिथ्याज्ञानमन्धकारं वा तदेव बलं यत्र । अथवा-तमस्युक्तरूपे बले च सामर्थ्ये प्रलज्यते रतिं करोतीति तमोबलप्रलजनः । तमोबलरते पुरुषजाते, स्था० ४ ठा० ३ उ० ।

तमोबलप्रलज्जन–पुं० । तमोबलेनान्धकारबलेन सञ्जरन् प्रलज्जते इति तमोबलप्रलज्जनः । प्रकाशचारिणि पुरुषजाते, स्था० ४ ठा० ३ उ० ।

तमरयविद्धंसणाण–तमोरजोविध्वंसज्ञान–न० । तमोरजसी अज्ञानपातके विध्वंसयति नाशयतीति यत्तत्तमोरजोविध्वंसं, तच्च तद् ज्ञानं च तमोरजोविध्वंसज्ञानम् । अज्ञानपातकनाशके ज्ञाने, स० ५ अङ्ग ।

तमस्सई–तमस्वती–स्त्री० । तमोऽन्धकारमस्यास्तीति तमस्वती । व्य० ५ उ० । बहलतमःपटलकलितायां रात्रौ, बृ० १ उ० ।

तमा–तमा–स्त्री० । तमोरूपद्रव्ययुक्तत्वात् तमा इति । अनु० । षष्ठ्यां नरकपृथिव्याम्, स्था० ७ ठा० । अन्धकारयुक्तत्वेन रात्रितुल्यत्वादधोदिशि, स्था० १० ठा० । प्रज्ञा० । " सोमा ईसाणा दिच्चय,विमला य तमा य बोधव्वा ।" विशे० । आ०म० ।

तमाम–भ्रामि–धा० । भ्रम-णिच् । " भ्रमेस्तालिअण्टतमाडौ " ॥ ८ । ४ । ३० ॥ इति भ्रमेर्यन्तस्य वा ' तमाड ' इत्यादेशः । ' तमामइ ' । पक्षे-' भमामइ ' । भ्रमणे, प्रा० ४ पाद ।

तमाल–तमाल–पुं० । संख्येयजीवको वलयाऽऽकारवनस्पतिभेदे, आचा० १ श्रु० १ अ० ५ उ० । प्रज्ञा० । भ० । औ० । रा० ।

तमाललया–तमालवल्लता–स्त्री० । सुतालनन्दनामनगरवास्तव्यस्य तालध्वजनाम्नो राज्ञो भार्यायाम् , दर्श० १ तत्त्व । पुष्करद्वीपार्धे द्वीपे मङ्गलावतीविजये अमरकेतुपितृसमरनन्दपालितायां पुरि, दर्श० ३ तत्त्व ।

तमिसंधयार–तमिस्रान्धकार–पुं० । न० । बहुलतमोऽन्धकारे, यत्राऽऽमावसिनोपलभ्यते चक्षुषा केवलमवधिनाऽपि मन्दं मन्दमुलूका इवाहि पश्यन्ति । सूत्र० १ श्रु० ५ अ० १ उ० । पिं०

तमिस्स–तमिस्र–न० । अन्धकारे, स्था० ४ ठा० ३ उ० ।

तमुक्काय–तमस्काय–पुं० । तमसोऽप्कायपरिणामस्वरूपस्यान्धकारस्य कायः प्रचयस्तमस्कायः । अप्कायपरिणामरूपतमःप्रचये, प्रव० २५५ द्वार । स्था० । तमस्कायस्य रूढ्यर्थत्वम्-

जंबुदीवाउ अस्सं-खेज्ज इमा अरुणवरसमुद्दाओ ।
बायाल्लीससहस्से, जगईउ जहं विलंघेउं ॥ ४१२ ॥
समसेणीएँ सत्तरम, एक्कवीसाइं जोअणसयाइं ।
उल्लसिओ तमरूवो, बलयागारो अबुक्काओ ॥ ४१३ ॥
तिरिअं वित्थरमाणो, आवरयंतो सुरालयचउक्कं ।
पंचमकप्पेऽरिट्ठ–म्मि पत्थमे चत्तदिसिं मिलिओ ।४१४।

जम्बूद्वीपादसंख्येयतमो योऽसावरुणवरसमुद्रः,तमाश्रित्य द्विचत्वारिंशद् योजनसहस्राणि जगत्या जघं विलङ्घ्य, समश्रेण्या समभिलितया एकविंशत्यधिकानि सप्तदश शतानि यावद्वलयाकारस्तमोरूपो, देवानामपि तत्रोद्द्योताभावेन महान्धकारात्मकत्वात् अप्काय उल्लसितः। अयमर्थः-एतस्माज्जम्बूद्वीपात्तिर्यगसंख्यातान् द्वीपसमुद्रान् व्यतिक्रम्याऽरुणवरनामा द्वीपः समस्ति, तद्वेदिकापर्यन्ता द्विचत्वारिंशद्योजनसहस्रावगाढस्वरूपं समुद्रमवगाह्याऽभ्यन्तरे जलोपरितनतलाद्ऊर्ध्वमेकविंशत्युत्तराणि सप्तदशयोजनशतानि यावत्समश्रेण्याकारतया गत्वा वलयाऽऽकृतिरप्कायमयो महान्धकाररूपस्तमस्कायः समुल्लसित इति । अयं तिर्यक् विस्तरन् सुरालयचतुष्कं सौधर्मैशानसनत्कुमारमाहेन्द्ररूपदेवलोकचतुष्टयमावृण्वन्नाच्छादयन्नूर्ध्वं तावद् गतो यावत्पञ्चमे ब्रह्मलोकनामके कल्पे तृतीयेऽरिष्टविमानप्रस्तटे चतसृष्वपि दिक्षु मिलित इति ।

अथ तमस्कायस्य संस्थानमाह-

हेट्ठा मल्लयमूल–ट्ठिइट्ठिओ उवरि बंभलोयं जा ।
कुक्कुमपंजरगाऽऽगा–रसंठिओ सो तमुक्काओ ॥४१५॥

अधस्तादधोभागेन मल्लकमूलस्थितिस्थितो-मल्लकं सरावं,तस्य मूलं बुध्नस्तस्य स्थितिः संस्थानं तया स्थितो व्यवस्थितः, शरावबुध्नाऽऽकार इति भावः। उपरिष्टाच्च यावत् कुक्कुटपञ्जराऽऽकारसंस्थितः, स पूर्वोक्तस्वरूपः तमस्कायो भवति,तमसां तमिस्रपुद्गलानां कायो राशिस्तमस्काय इति । स्थापना-[११]

अथाऽस्य तमस्कायस्य विष्कम्भं परिधिं च प्राऽऽह-

खुविहो से विक्खंभो, संखेज्जो अत्थि तह असंखेज्जो ।
पढमम्मि य विक्खंभे, संखेज्जा जोयणसहस्सा ॥ ४१६ ॥
परिहीएँ ते असंखा, बीए विक्खंभपरिहिजोएहिं ।
हुंति असंखसहस्सा, नवरमिमं होइ वित्थारो ॥ ४१७ ॥

द्विविधो द्विप्रकारः (से त्ति) तस्य तमस्कायस्य विष्कम्भो विस्तरो भवति-संख्यातः, तथा असंख्यातश्च । तत्र प्रथमे विष्कम्भे आदित आरभ्य ऊर्ध्वं संख्येययोजनानि यावत्संख्येययोजनसहस्राः प्रमाणलोभवन्ति । परिधौ परिक्षेपे पुनस्त एव योजनसहस्रा असंख्याताः, अधस्तमस्कायस्य संख्यातयोजनविस्तृतत्वेऽप्यसंख्यातद्वीपपरिक्षेपतो बृहत्तरत्वात्परिक्षेपस्यासंख्यातयोजनसहस्रैः प्रमाणत्वमविरुद्धम् । आन्तरबाह्यपरिक्षेपविभागस्तु नोक्तः,उभयस्याप्यसंख्यातत्वेन तुल्यत्वादिति। तथा द्वितीये विष्कम्भपरिधियोर्गाढ्यं विष्कम्भेन परिधिना च प्रत्येकमसंख्यातयोजनसहस्रा भवन्ति, नवरंकेवलमिदमसंख्यातयोजनसहस्ररूपं च प्रमाणं विस्तारे भवति।बलयाऽऽकारादूर्द्धं यदसौ तमस्कायक्रमेण विस्तरति, तदानीमेवं प्रमाणमवसेयमिति भावः। अस्य च तमस्कायस्य महत्त्वमित्थमागमविदः प्रवेदयन्ति-यथा यो देवो महर्द्धिको यया गत्या तिसृभिश्चपुटिकाभिरेकविंशतिवारान् सकलं जम्बूद्वीपमनुपरिवृत्याऽऽगच्छेत्,स एव देवः तयैव गत्या षड्भिरपि मासैः संख्यातयोजनविस्तारमेव तमस्कायं व्यतिव्रजेत्नेतरामिति। यदा च कश्चिद्देवः परदेव्याः सेवाहेवाकपरस्त्वाहाराऽऽदिभिरपराधमाधत्ते, तदा बलवद्देवभयात्पलाय्य देवानामपि दूरितयाऽऽकृष्टिभावकत्वेन गमनविघातहेतौ तस्मिंस्तमस्काये निलीयत इति। प्रव०२५५ द्वार ।

किमियं भंते ! तमुक्काए त्ति पवुच्चइ–किं पुढवितमुक्काए त्ति पवुच्चइ, आउतमुक्काए त्ति पवुच्चइ ?। गोयमा ! नो पुढवितमुक्काए त्ति पवुच्चइ, आउतमुक्काए त्ति पवुच्चइ। से केणट्ठेणं ?। गोयमा ! पुढविकाए णं अत्थेगइए सुभे संपकासेइ, अत्थेगइए देसं नो पकासेइ, से तेणट्ठेणं ॥

(किमियमित्यादि) (तमुक्काए त्ति) तमसां तमिस्रपुद्गलानां कायो राशिस्तमस्कायः । स च नियत एवेह स्कन्धः कश्चिद्विवक्षितः, स च तादृशः पृथ्वीरजःस्कन्धो वा स्यादुदकरजःस्कन्धो वा; न त्वन्यः, तदन्यस्यातादृशत्वादिति । पृथिव्यधिकारसन्देहादाह—(किं पुढवीत्यादि) स्पष्टम् । (पुढविकाए णमित्यादि) पृथ्वीकायोऽस्त्येकः कश्चिच्छुभो भास्वरो; यः किंविध इत्याह-देशं विवक्षितक्षेत्रस्य प्रकाशयति, भास्वरत्वाद् मणिवादित्, तथाऽस्त्येकः पृथिवीकायो देशं पृथिवीकायान्तरं प्रकाश्यमपि न प्रकाशयति, अभास्वरत्वादम्बोपलवद्, नैवं पुनरप्कायः,तस्य सर्वस्याप्यप्रकाशकत्वात्, ततश्च तमस्कायस्य सर्वथैवाप्रकाशकत्वादप्कायपरिणामतैव । भ० ६ श० ५ उ० ।

अत्र न्यायमार्गानुयायिनः सङ्गिरन्ते-ननु पृथिव्यादीनां चतुर्णां सकर्णा वर्णयन्तु रूढ्यताम्, तिमिरद्वयायोस्तु रूढ्यतावाचोयुक्तिर्युक्तिरेकैव, नासामभाव एव हि तमश्छाये गदतां सच्छाये । तथाहि-शशधरदिनकरकरनिकरनिरन्तरप्रसरासंभवे सर्वतोऽपि सति तम इति प्रतीयते, यदा तु प्रतिनियतप्रदेशेनाऽऽतपच्छाऽऽदिना प्रतिबद्धरश्मेः पुञ्जो यत्र यत्र न संयुज्यते, तदा तत्र तत्र च्छायेति-प्रतीयते, प्रतिबन्धकाभावे तु स्वरूपेणाऽऽलोकः समालोकयत इत्यालोकाभाव एव तमश्छाये । यदि च-तमो रूढ्यं भवेत्, तदा रूपिरूढ्यसंस्पर्शाद्यभिचारात् स्पर्शवद्रूढ्यस्य च महतः प्रतिघातहेतुत्वात्तरत्नतरतुङ्गतरङ्गपरम्परोपेतपारावारवत्तार इव, प्रथमजलधरधारोरणीधौताञ्जननगिरिगरीयःशृङ्गप्रतिवादिनीव, निर्यन्निर्झरोत्कारविरचितदुर्वारशीकराऽऽसारसिच्यमानाऽभिरामारामसहीरुहसमूहप्रतिच्छन्द इव च प्रवृत्ते तिमिरभरे सञ्जातः पुंसः प्रतिबन्धः स्यात् । भूगोलकस्येव चाऽस्यावयवभूतानि खण्डावयविरूढ्यानि प्रतीयेरन्, एवं छायायामपि, इति कथं ते रूढ्ये भवेताम् ?।

अत्राभिदध्महे-तमसस्तावद्भावस्वभावतास्वीकृतिरानुभविकी, आनुमानिकी वा ?। न तावदानुभविकी, यतोऽभावानुभवो

भावान्तरोपलम्भे सत्येव संभवी, कुम्भाभावोपलम्भवत् । न च प्रचुरतरतिमिरनिकरपरिकरितापवरकोदरे स्वकरतलाऽऽदिमात्रस्याप्युपलम्भः संभवति, तत्कथं तदनुभूतिर्न स्यात् ? । कथं वा प्रदीपाऽऽदिप्रभाप्राग्भारप्रोज्जृम्भणमन्तरेणाख्योपलम्भः ?, कुम्भाऽऽद्यभावो हि तदभाव एवानुभूयमानो दृष्टः, तत्कथमेष न्यायमुद्राऽतिक्रमो न कृतः स्यात् ? । अथ यो भावो यावता सामग्र्येण गृह्यते तदभावोऽपि तावतैव तेन तदिहाऽऽलोकस्य स्वातन्त्र्येणाऽऽलोकान्तरमन्तरेणैव ग्रहणमालोकिम्, इति तदभावस्याऽपि तर्किं न स्यात् ?, इति चेत् । अहो ! पीतविषस्याप्यमृतोद्गारः, एवं वदता त्वयैव तमसि द्रव्यलाञ्छनाद्रात् । किमिदमीदृशमिन्द्रजालमिति चेत् ? । इदमीदृशमेवेन्द्रजालमालोक्यताम्—आलोकः किल चक्षुषा संयोगात् गृह्यते, यदि च तदभावस्याऽपि तत्सामग्र्येणैव ग्रहणं स्यात्, तदा तस्याऽपि ग्रहणे चक्षुःसंयोगसद्भावादावार्ता ऊर्ध्वताऽऽपत्तिः, संयोगस्य गुणत्वेन तद्वृत्तित्वात् । अथासंयुक्तोऽप्ययं प्रेक्ष्यते, तदा कथं वो भावो यावतेत्यादि सूक्तोक्तं न स्यात् ?; कथं वा चक्षुषः प्राप्यकारिताप्रवादः सुप्रवादः स्याद् ? । विशेषणविशेष्यभावसंबन्धबन्धुरस्यान्धकारस्य ग्रहणादक्षमदोष इति चेत्, कतमस्त्वैष विशेषणम् ?। न शरीरस्य, तदन्यत्राऽपि प्रतिभासनात् । नाऽपि भूतलकलशकुक्ष्याऽऽदेः, तत एव । तर्हि भवतु नञ्रस इति चेत् । तदशस्त्रम्; एतस्य तद्विशेषणविशेष्यीभावेन कदाचिदप्रतिभासनात् । तथैतदभावतास्वाकृतिरानुभविकी भव्या ।

नाऽप्यानुमानिकी, यतः कतमोऽत्र हेतुराख्यायते संख्यावता ?- किं भावविलक्षणत्वेन लक्ष्यमाणत्वं, भावविलक्षणसामग्रीसमुत्पाद्यत्वम्, असत्येवाऽऽलोके तत्प्रतिभासनम्, आलोकग्रहणसामग्र्या गृह्यमाणत्वम्, तिमिरद्रव्योत्पादककारणाभावः, द्रव्यगुणकर्मातिरिक्तकार्यत्वम्, आलोकविरोधित्वं, भावरूपताप्रसाधकप्रमाणाभावो वा ?, इत्यष्टपक्षी राक्षसीव त्वत्पक्षभक्षयन्नक्षणविचक्षणोपतिष्ठते । तत्र न तावदाद्यः पक्षः क्षेमङ्करः, 'कुम्भोऽयं स्तम्भोऽयम्' इति हि यथा कुम्भाऽऽदयो भावा विधिमुखेन प्रत्यक्षेण प्रेक्ष्यन्ते, तथेदं तम इति तमोऽपि, अभावरूपतायां तस्य प्रतिषेधमुखेन प्रत्ययः प्रादुष्यात् । यथा कुम्भोऽत्र नास्तीति । ननु नाशप्रध्वंसाऽऽदिप्रत्यया विधिमुखेनाऽपि प्रवर्तमाना दृश्यन्ते । नैवम्, नाशाऽऽदिशब्दानामेव भावप्रतिषेधाभिधायकत्वात्, अत एव हि कुम्भस्य प्रध्वंस इति सोपपदानामेषां प्रयोगोपपत्तिः । यदि तु तमःप्रभृतिशब्दा अपि तत्समानार्थतामाबिभ्रीरन्, तदानीं कुम्भस्याभाव इतिवदालोकस्य तम इत्यपि प्रोच्येत, न चैवं कश्चिदपि क्वचिदपि प्रवक्ति । अथाऽऽलोकाभावे संकेतितस्तमःशब्दो, नाऽनावमात्रे, ततो न तथाव्यपदेश इति चेत् । नैवम्, यदि ह्यन्धकाररूपोऽनावोऽपि विधिमुखेन वीक्ष्येत, तदानीं किमन्यदेतस्य भाववैलक्षण्येन लक्ष्यमाणत्वं स्यात् ?। यतो हेतुसिद्धिर्भवेत् ।

अथ भाववैलक्षण्यसामग्रीसमुत्पाद्यत्वं हेतुः, तथाहि-समवाय्यसमवायिनिमित्तकारणकलापव्यापाररूपाभावोत्पादिका सामग्री, नैव तमसीयं समग्रंस्त । तदशस्तम्, यतः किमिदं समवायिकारणनाम्ना त्वमाम्नासीः ?। यत्र कार्यं समवेतमुत्पद्यते तदिति चेत् । तदसम्यक्,समवायस्य निरन्तरमुद्गुदगोष्ठीषु गौरवार्हत्वात्; तत्प्रसाधकत्वान्निमतस्य 'इह तन्तुषु पटः' इत्यादिप्रत्ययस्याप्रसिद्धेः, 'पटे तन्तवः' इत्यादिरूपस्याऽस्याऽऽबालगोपालं प्रतीतित्वात्, सिद्धौ वा इह भूतले घटाभाव इत्यनावप्रत्ययेन व्यभिचाराच्च । संबन्धमात्रपूर्वतायाः प्रसाधने सिद्धसाधनात्, अविष्वग्भावमात्रनिमित्ततया तदङ्गीकाराच्च । एकान्तैकस्वरूपत्वेन चाऽस्यैकवस्तुसमवायसम्भवे समस्तवस्तुसमवायस्य, विनश्यदेकवस्तुसमवायाभावे समस्तवस्तुसमवायाभावस्य वा प्रसङ्गात् । तत्तदवच्छेदकभेदात् तद्व्यपपत्तौ तस्यापि कथञ्चिद्भेदाऽऽपत्तेः,अनेकपुरुषावच्छिन्नपर्वादेरपि तावत्स्वभावभावेन कथञ्चिद्भेदात् । अप्रच्युतानुत्पन्नस्थिरैकरूपतया चाऽस्याऽऽकाशसामान्यादेतादृग्वस्तुसमाश्रितत्वमेव भवेत्, न तु कार्यवस्तुसमाश्रितत्वम् । तत्तत्सहकारिकारणकलापोपनिपातप्रभावात् कार्यसमवायस्वीकारोऽपि सनिकारः, तत्स्वभावप्रभावप्रतिबद्धानां तेषामपि सदा सन्निधानप्रधानत्वात्, तथा चास्तमिता समवायिकारणाकिंवदन्ती । तदसत्त्वे किमसमवायिकारणन ?, समवायिकारणप्रत्यासन्नत्वं हि तल्लक्षणम्, तदसत्त्वे कथमेतत् स्यात् ? । तथा च तच्छेषभूतस्य निमित्तकारणस्याऽपि का व्यवस्था ? । सत्तु वा कारणान्यमूनि, तथाऽपि यथाकथञ्चिदालोककलापस्योत्पादः, तथा तमसोऽपि भविष्यति, किमरुचिविरचनाभिर्व्यर्थमासितुं शक्यते ?। किमस्योत्पादकमिति चेत् । आलोकस्य किमिति वाच्यम् ? । तेजोऽणव इति चेत् । अस्याऽपि तमोऽणव एव सन्तु । सिद्धास्तावत् तैजसास्तेऽविवादेन वादिप्रतिवादिनोरिति चेत् । तामसा अपि तद्वदेव किं न सेत्स्यन्ति ?, इति त्वज्यतामाग्रहः ।

असत्येवाऽऽलोके तत्प्रतिभासनमप्यसम्यक्, न हि यस्मिन्नसत्येव वस्तु प्रतिभासते तत् तदभावमात्रमेव भवति, असत्येव व्यवधाने प्रतिभासमानैरिष्टाऽऽदिभिर्व्यभिचारात् । कथं च नैवं प्रतिबन्धकेऽसत्येव समुत्पद्यमानस्य स्फोटस्याऽपि तदभावमात्रता स्यात् ?। अथ स्फोटो दाहकाऽऽद्यभक्ततया स्पार्शनप्रत्यक्षेणाऽनुभूयते, अभावमात्रतायां हि तस्य नेयमौपपत्तिकी स्यात्, तर्हि तमोऽपि स्पार्शनेन तेनैव प्रत्यक्षेण प्रेक्ष्यमाणं कथमभावस्वभावं भवेत् ? ॥

अथाऽऽलोकग्रहणसामग्र्या गृह्यमाणत्वं हेतुः, तथा च शङ्करन्यायभूषणो-' योहि भावो यावत्या सामग्र्या गृह्यते, तदभावोऽपि तावत्यैव, इत्यालोकग्रहणसामग्र्या गृह्यमाणं तमस्तदभाव एवेति ।" तदपि न किञ्चित्, तमोग्रहणसामग्र्या गृह्यमाणस्याऽऽलोकस्यैव तदभावतासङ्गेनाऽनैकान्तिकत्वात्,घटपटयोर्वा समानग्रहणसामग्रीकतया परस्परानावत्वप्रसङ्गात् ॥

अथ तिमिरद्रव्योत्पादककारणाभावो हेतुः, तथा च श्रीधरः—तमःपरमाणवः स्पर्शवन्तः, तद्रहिता वा ? । न तावत् स्पर्शवन्तः, स्पर्शवतस्तत्कार्यद्रव्यस्य क्वचिदप्यनुपलम्भात् । अदृष्ट्याशरात्रावात् स्पर्शवत्कार्यद्रव्याऽनारम्भका इति चेत् । रूपवन्तो वायुपरमाणवोऽदृष्टव्यापारवैगुण्याद् रूपवत् कार्यं नारभन्ते इति किं न कल्प्येत ?, किं वा न कल्पितमेकजातीयावेव परमाणोरदृष्टोपग्रहाच्चतुर्धा कार्याणि जायन्त इति ?। कार्यैकसमधिगम्याः परमाणवो यथा कार्यमुश्रीयन्ते,न तद्विलक्षणाः, प्रमाणाभावादिति चेत् । एवं तर्हि तामसाः परमाणवोऽप्यस्पर्शवन्तः कल्पनीयाः, तादृशाश्च कथं तमोद्रव्यमारभेरन् ? । अस्पर्शवत्त्वस्य कार्यद्रव्यानारम्भकत्वेनाऽन्वयव्यभिचारोपलम्भात् । कार्यदर्शनात् तदनुगुणं कारणं कल्प्यते, न तु कारणवैकल्येन दृष्टकार्यविपर्यासो युज्यत इति चेत् । न वयमन्धकारस्य प्रत्यक्षिणः, किन्त्वारम्भानुपपत्तेः, नीलिममात्रप्रतीतेश्च द्रव्यमिदं न

भवतीति ब्रूम इति । नैतदुपपत्तिपदवीं प्रतिपद्यते, यतः स्पर्शवन्त एव तामसाः परमाणवः प्रोच्यन्ते । यत्पुनस्तन्नोपादेशिस्पर्शवतस्तत्कार्यद्रव्यस्य क्वचिदप्यनुपलम्भादिति । तदसत्यम्, शीतस्पर्शवतस्तमोऽम्बुनस्तैव तत्कार्यस्य दर्शनात् । तत्र स्पर्शेसद्भावे किं प्रमाणम् ?, इति चेत् । तदभावे किं प्रमाणम् ?, इति वाच्यम्, न हि तत्प्रतिषेधकप्रमाणमन्तरेणाऽस्पर्शत्वात् कार्यद्रव्यानारम्भकत्वया प्रसाधयितुं शक्यते, अस्माकं तु तत्सद्भावे प्रमाणाभावेऽपि तावद् न काचित् क्षतिः । न च नास्त्येव तत्,प्रत्यक्षस्यैव सद्भावात् । तथाहि-दिवा दिवाकरकराक्रान्ताऽऽतपप्रपातोपतप्तवपुषः पथिकास्तमिस्रासन्तमसशैत्यसंपर्कात् प्रमोदन्ते; न च तापाभावमात्रसूत्रित एव तेषां प्रमोदः, प्रतीतिबाधात्, तन्मात्रनिमित्तो हि घटोऽत्र नास्तीतिवत् तापः संप्रति नास्तीति प्रतिषेधमुख एव प्रत्ययः प्रादुःष्यात्; न तु संप्रति शीतलीभूतं मे शरीरमिति विधिमुखः; तथात्वे हि तमोऽभावमात्रसूत्रित एवायमालोकप्रत्यय इत्यपि वावदूकस्य वदतो वदनं न बन्धीभवेत् । अथान्धकारनिबन्धनत्वे शैत्यस्पर्शप्रत्ययस्य निबिडतरघटितकपाटसंपुटे गवलकुवलयकलकपट्टीकण्ठकाकृष्णान्धकारैकार्णवीभूते कारागारे क्षिप्तस्य पुंसः सुतरां तत्प्रत्ययो भवेत्, इति चेत् । तापाभावनिमित्तताऽपि सुतरां स किं तत्र न स्यात् ?, तत्रात्यन्तं तापाभावसम्भवात् । तस्माद् मन्दमन्दसमीरलहरिपरिचय एव अस्पर्शस्येव तत्स्पर्शस्याऽप्यभिव्यक्तौ हेतुः, न चासौ तत्रास्तीति न तत्र तत्प्रतीतिः प्रादुर्भवति । अनुमानतोऽपि तत्र स्पर्शप्रतीतिः,तथाहि-तमः स्पर्शवद्, रूपवत्त्वात्, पृथ्वीवत् । न च रूपवत्त्वमसिद्धम्, अन्धकारः कृष्णोऽयमिति कृष्णाऽऽकारप्रतिभासात् । ननु यदि तिमिरं श्यामरूपपरिकलितकलेवरं स्यात् तदाऽवश्यं स्वप्रतिभासे आलोकमपेक्षेत, कुवलयकोकिलतमालाऽऽदिकृष्णवस्तूनामालोकापेक्षीकृष्णत्वादिति चेत् । तद् नाऽकलङ्कम्, उलूकाऽऽदीनामालोकमन्तरेणापि तत्प्रतिभासात् । अथाऽस्मदादिप्रतिभासमपेक्ष्येदमुच्यते । तदपि न पेशलम्, यतो यद्यपि कुवलयाऽऽदिकमालोकमन्तरेणाऽऽलोकयितुं न शक्यतेऽस्मदादिभिः,तथाऽपि तिमिरमालोकयिष्यते,विचित्रत्वाद् भावानाम्, इतरथा पीतावदातोऽऽदयोऽपि तपनीयमुक्ताफलप्रमुखानालोकनिरपेक्षीकृणा इति प्रदीपचन्द्राऽऽदयोऽपि प्रकाशान्तरमपेक्षेरन् । इति सिद्धं तमो रूपवत् । तथा तमो रूपवत्, काण्यैवत्त्वेन प्रतीयमानत्वात्,कुवलयवत्. इत्यतोऽपि तत्र रूपवत्त्वसिद्धिः,न चात्तरूपं कुम्भाभावाऽऽदिकृष्णाऽऽद्याकारेण कदाचित् प्रतीयमानमालोकितम्, इति रूपवत्त्वसिद्धौ च सिद्धं स्पर्शवत्त्वम् । तथा च तामसपरमाणूनां कार्यद्रव्याऽऽरम्भप्रतिषेधोपन्यस्तमस्पर्शत्वं स्वरूपासिद्धम्, परस्य तामसपरमाणूनामप्रसिद्धेराश्रयासिद्धं चेति स्थितम् ॥

द्रव्यगुणकर्मातिरिक्तकार्यत्वमपि न हेतुः, द्रव्यातिरिक्तकार्यत्वस्य तस्मिन्नसिद्धत्वेनैकदेशासिद्धताऽऽपत्तेः । तत्प्रसिद्धिर्हि तस्याभावरूपतया, अन्यतो वा कुतोऽप्यभिधीयते ?। नाऽऽद्यः पक्षः, परस्पराऽऽश्रयप्रसङ्गात्-अभावरूपतासिद्धौ हि तस्य द्रव्यातिरिक्तकार्यत्वसिद्धिः,ततोऽपि सेति । अन्यहेतुतस्तत्सिद्धौ तु स एवास्तु, किमनेन सिद्धोपस्थायिना कृतकभाक्तिभृत्येनेव कर्तव्यम् ? ॥

आलोकविरोधित्वमपि न साधीयः, न हि यो यद्विरोधी स तदभावस्वभाव एव, वारिवैश्वानरयोः परस्परभावमात्रताऽऽपत्तेः । अथ सहानवस्थानलक्षणो विरोधस्तिमिरस्याऽऽलोकस्वभावतासिद्धौ साधनत्वेनाऽभिप्रेतः, न वध्यघातकभावः, स च भावाभावयोरेव संभवी,न पुनर्द्वयोरपि भावयोः, तदिहाऽऽलोकानवकाशे सत्येव समुज्जृम्भमाणस्यान्धकारस्याऽऽलोकरूपतैव श्रेयसी,कुम्भाद्यभावविदिति चेत् । तदपवित्रम् । अत्राऽपि वध्यघातकभावस्यैव भावात्,घनतरतिमिरपूरिते पथि प्रसर्पता प्रदीपप्रभाप्राग्भारेण तिमिरनिकुरम्बाऽऽडम्बरविडम्बनात् ।

आलोकरूपताप्रसाधकप्रमाणाभावोऽप्यसिद्धः, तत्प्रसाधकानुमानसद्भावात् । तथाहि-भावरूपं तमः,घनतरनिकरलहरिप्रमुखशब्दैर्व्यपदिश्यमानत्वात्, आलोकवत् । न चाऽसिद्धिः साधनस्य।

तथाहि-

" रहःसङ्केतस्थो घनतरतमःपुञ्जपिहिते,
वृथोन्मेषं चक्षुर्मुहुरुपदधानः पथि पथि ।
पटत्काराद्वल्गादपि निभृतसंप्राप्तरमणी-
भ्रमभ्राम्यद्बाहुर्दमदमिकयोत्तास्यति युवा ॥ १ ॥
पर्यस्तो दिवसस्तटीमयमटत्यस्ताचलस्यांशुमान्,
संप्रत्यङ्कुरितान्धकारनिकरैर्लम्बालका घौरभूत् ।
एह्यन्तर्विश वेश्मनः प्रियसखि ! द्वारस्थलीतोरण-
स्तम्भाऽऽलम्बितबाहुवल्लि ! रुदती किं त्वं पथः पश्यसि?॥२॥
तिमिरलहरीगुर्वीमुर्वीं करोतु विकस्वरां,
हरतु नितरां निद्रामुद्रां क्षणाद् गुणिनां गणान् ।
तदपि तरणे ! तेजःपुञ्जः प्रियो न ममैष ते,
किमपि तिरयन् ज्योतिश्चक्रं स्वजातिविराजितम् ॥ ३ ॥ "

औपचारिक एवाऽयं तत्र तद्व्यपदेश इति चेत् । नैवम्, एतद्भावरूपताप्रसिद्धिं विना घनतराऽऽदिव्यपदेशस्य भावरूपमुख्यार्थबाधाविरहेण तस्यौपचारिकत्वायोगात्; तथात्वेऽपि वा तस्य तमसो भावरूपतैव प्रसिध्यति, न खलु कुम्भाऽऽद्यभावस्तथाप्रकारोपचारगोचरचारितामास्तिष्णुते। तत्र सादृश्याऽऽद्युपचारकारणाभावात् । तथा-नाभावरूपं तमः, प्रागभावाऽऽद्यस्वभावत्वात् ; व्योमवत् । न चाऽयमपि हेतुरसिद्धः । तथा हि-आलोकस्य प्रागभावः, प्रध्वंसाभावः, इतरेतराभावः, अत्यन्ताभावो वा तमो भवेत् ?। आद्ये-एकस्य, अनेकस्य वाऽयं तत्स्यात् ?। न तावदेकस्याऽऽलोकस्य प्रागभावस्तमः, प्रदीपाऽऽलोकेनैव प्रभाकराऽऽलोकेनाऽपि तस्य निवर्त्यमानत्वात्, यस्य हि यः प्रागभावः स तेनैव निवर्त्यते, यथा पटप्रागभावः पटेनैव । नाप्यनेकस्य,एकेन निवर्त्यमानत्वात्, पटप्रागभाववदेव । न च वाच्यं प्रत्यालोकं स्वस्वनिवर्तनीयस्य तमसो भेदात् प्रदीपाऽऽदिना निवर्तितेऽपि तमोविशेषे पूषाऽऽदिनिवर्तनीयं तमोऽन्तरं तदा तदभावान्न निवर्तते, इत्येकेन निवर्त्यमानत्वादिति हेतुरसिद्ध इति, प्रदीपाऽऽदिनिवर्तिततमसि प्रदेशे दिनकराऽऽदिनिवर्तनीयस्य तमोऽन्तरस्योपलब्धिलक्षणप्राप्तस्यानुपलब्धेः, सम्प्रतिपन्नवत् । यदि चेदं प्रागभावस्वभावं स्यात्, तदा प्रदीपप्रभाप्रबन्धप्रध्वंसेऽस्योत्पत्तिर्न स्यात्, अनादित्वात् प्रागभावस्य । नाप्यालोकस्य प्रध्वंसाभावस्तमः, निवर्त्यमानत्वात्, तस्यैव प्रागभाववत् । नापीतरेतराभावः, तस्य प्रसूतेऽपि प्रचण्डे मार्तण्डीये तेजसि सद्भावेन तमिस्रायामिव वासरेऽपि तमःप्रतीतिप्रसङ्गात् । नाऽप्यालोकस्यात्यन्ताभावस्तमः,

तस्य स्वकारणकलापोपनिपातकाले समुत्पद्यमानत्वात् । इति पक्षद्वयेनाऽप्यघटमानत्वाच्चानुमानिकत्वेऽपि तमसोऽभावरूपतास्वीकृतिः॥ एतत्सकलमपि प्रायेण छायावाऽपि समानमिति यथासंभवं योज्यम्। विशेषतस्त्वेतद्व्यक्तताप्रसिद्धिः परिपाटिप्राप्तस्वादरत्नाऽऽकरादवधारणीया। यत्पुनरत्राचि-तमसि संचरतः पुंसः प्रतिबन्धः स्यादित्यादि, तदखिलमालोकेऽपि समानमिति स एव प्रतिविधास्यतीति किमतिप्रयत्नेन तत्राऽस्माकम् ?। इति सिद्धे तमस्कायो द्रव्ये। (२१) रत्ना० २ परि।

अथ तमस्कायानां संस्थानम्-

तमुक्काए णं भंते ! कहिं समुट्ठिए, कहिं संनिट्ठिए ?। गोयमा ! जंबुद्दीवस्स दीवस्स बहिया तिरियमसंखेज्जे दीवसमुद्दे वीईवइत्ता अरुणवरस्स दीवस्स बाहिरिल्लाओ वेइयंताओ अरुणोदयं समुद्दं बायालीसजोयणसहस्साणि ओगाहित्ता उवरिल्लाओ जलंताओ एगपएसियाए सेढीए तत्थ णं तमुक्काए समुट्ठिए सत्तरस एक्कवीसे जोयणसए उड्ढं उप्पइत्ता तओ पच्छा तिरियं पवित्थरमाणे पवित्थरमाणे सोहम्मीसाणसणंकुमारमाहिंदे चत्तारि वि कप्पे आवरेत्ता णं उड्ढं पि य णं० जाव बंभलोए कप्पेऽरिट्ठविमाणपत्थडं संपत्ते, एत्थ णं तमुक्काए संनिट्ठिए ॥

(एगपएसियाए त्ति) एक एव, न द्वाद्य औत्तराधर्यं प्रति प्रदेशो यस्यां सा तथा, तया, समभित्तितयेत्यर्थः। न च वाच्यम्-एकप्रदेशप्रमाणयेति असंख्यातप्रदेशावगाहस्वभावत्वेन जीवानां तस्यां जीवावगाहाभावप्रसङ्गात् तमस्कायस्य च स्त्रिबुकाऽऽकाराप्कायिकजीवाऽऽत्मकत्वाद् बाह्यमानस्य च प्रतिपादयिष्यमाणत्वादिति। (पत्थ णं ति) प्रज्ञापकाऽऽलेख्यालिखितस्यारुणोदसमुद्राऽऽदेरधिकरणतोपदर्शनार्थमुक्तवान् ॥

तमुक्काए णं भंते ! किं संट्ठिए ?। गोयमा ! अहे मल्लगमूलसंठिए, उप्पिं कुक्कुडगपंजरगसंठिए पण्णत्ते ॥

अधः अधस्तान्मल्लकमूलसंस्थितः शरावबुध्नसंस्थानः समजलान्तस्योपरि सप्तदशयोजनशतान्येकविंशत्यधिकानि यावद्वलयसंस्थानत्वात्।

अथ तमस्कायस्य नामान्याह-

तमुक्काए णं भंते ! केवइयं विक्खंभेणं केवइयं परिक्खेवेणं पण्णत्ते ?। गोयमा ! दुविहे पण्णत्ते। तं जहा-संखेज्जवित्थडे य, असंखेज्जवित्थडे य। तत्थ णं जे से संखेज्जवित्थडे, से णं संखेज्जाइं जोयणसहस्साइं विक्खंभेणं असंखेज्जाइं जोयणसहस्साइं परिक्खेवेणं पण्णत्ते। तत्थ णं जे से असंखेज्जवित्थडे, से णं असंखेज्जाइं जोयणसहस्साइं विक्खंभेणं असंखेज्जाइं जोयणसहस्साइं परिक्खेवेणं पण्णत्ते ॥ तमुक्काए णं भंते ! के महालए पण्णत्ते ?। गोयमा ! अयं णं जंबुद्दीवे दीवे सव्वदीवसमुद्दाणं सव्वब्भंतराए० जाव परिक्खेवेणं पण्णत्ते, देवे णं महिड्ढिए० जाव महाणुभावे इणामेव २ त्ति कट्टु केवलकप्पं जम्बुद्दीवं तिहिं अच्छरानिवाएहिं तिसत्तखुत्तो अणुपरियट्टित्ता णं हव्वमागच्छेज्जा, से णं देवत्ताए व उक्किट्ठाए तुरियाए०जाव देवगईए वीईवयमाणे० जाव एकाहं वा दुयाहं वा तियाहं वा उक्कोसेणं छम्मासे वीईवएज्जा, अत्थेगइए तमुक्कायं वीईवएज्जा, अत्थेगइए तमुक्कायं नो वीईवएज्जा, एमहालए णं गोयमा ! तमुक्काए पण्णत्ते। अत्थि णं भंते ! तमुक्काए गेहाइ वा, गेहवणाइ वा ?। णो इणट्ठे समट्ठे। अत्थि णं भंते ! तमुक्काए गामाइ वा० जाव सन्निवेसाइ वा ?। णो इणट्ठे समट्ठे। अत्थि णं भंते ! तमुक्काए राजा वलाहया संसेयं ति वा, संमुच्छंति वा, वासं ति वा। हंता अत्थि। तं भंते ! किं देवो पकरेइ, असुरो पकरेइ, नागो पकरेइ ?। गोयमा ! देवो वि पकरेइ, असुरो वि पकरेइ, नागो वि पकरेइ। अत्थि णं भंते ! तमुक्काए बादरे थणियसद्दे बादरविज्जुयाए ?। हंता अत्थि। तं भंते ! किं देवो पकरेइ० ?। तिण्णि वि पकरेइ। अत्थि णं भंते ! तमुक्काए बादरे पुढवीकाए बादरे अगणिकाए ?। णो इणट्ठे, णऽण्णत्थ विग्गहगइसमावन्नेणं। अत्थि णं भंते ! तमुक्काए चंदिमसूरियगहगणणक्खत्ततारारूवा ?। णो इणट्ठे समट्ठे, पलिपस्सओ पुण अत्थि। अत्थि णं भंते ! तमुक्काए चंदाभाइ वा, सूराभाइ वा ?। णो इणट्ठे समट्ठे, कादूसणिया पुण सा। तमुक्काए णं भंते ! केरिसए वण्णेणं पण्णत्ते ?। गोयमा ! काले कालोभासे गंभीरलोमहरिसजणणे भीमे उत्तासणए परमकिण्हे वण्णेणं पण्णत्ते, देवे वि णं अत्थेगइए जेणं तप्पढमयाए पासित्ता णं खुब्भाएज्जा, अहे णं अभिसमागच्छेज्जा, तओ पच्छा सीहं सीहं तुरियं तुरियं खिप्पामेव वीईवएज्जा ॥

(केवइयं विक्खंभेणं ति) विस्तारेण। क्वचिद्-" आयामविक्खंभेणं" इति दृश्यते। तत्र चाऽऽयाम उच्यतामिति। (संखेज्जवित्थडे इत्यादि) संख्यातयोजनविस्तृतः, आदित आरभ्य ऊर्द्धं संख्येययोजनानि यावत्, ततोऽसंख्यातयोजनविस्तृत उपरि तस्य विस्तारगामित्वेनोक्तत्वात्। (असंखेज्जाइं जोयणसहस्साइं परिक्खेवेणं ति) संख्यातयोजनविस्तृतत्वेऽपि तमस्कायस्यासंख्यातप्रदेशावगाहत्वेनासंख्यातमद्वीपपरिक्षेपतो बृहत्त्वस्यात्परिक्षेपस्यासंख्यातयोजनसहस्रप्रमाणत्वम्, आन्तरबाह्यपरिक्षेपविभागस्तु नोक्तः, उभयस्याप्यसंख्यातत्वेन तुल्यत्वादिति। (देवे णमित्यादि) अथ किमेतत्पर्यन्तमिदं देवस्य महर्द्धुत्वादिकं विशेषणमित्याह-(०जाव इणामेवेत्यादि) इह यावच्छब्दः पेटम्पर्यार्थः, यतो देवस्य महर्द्धुत्वादिविशेषणानि गमनसामर्थ्यप्रकर्षप्रतिपादनाभिप्रायेणैव प्रतिपादितानि। (इणामेव २ त्ति कट्टु त्ति) इदं गमनमेघमतिशीघ्रत्वाऽऽवेदकचप्पुटिकारूपहस्तव्यापारोपदर्शनपरम्, अनुस्वाराऽश्रवणं च प्राकृतत्वाद्, द्विर्वचनं च शीघ्रत्वातिशयोपदर्शनपर इति रूपप्रदर्शनार्थः। कृत्वा विधायेति। (केवलकप्पं ति) केवलज्ञानकल्पं, परिपूर्णमित्यर्थः। वृद्धव्याख्या तु-केवलः संपूर्णः कल्पत इति कल्पः, स्वकार्यकरणसमर्थो वस्तुरूप इति यावत्। केवलश्चाऽसौ कल्पश्चेति केवलकल्प-

स्तम् । (तिहिं मक्कुरानिवाएहिं ति) तिसृभिर्मक्कुरानिपातैः इति । (तिसत्तखुत्तो त्ति) त्रिगुणाः सप्त त्रिसप्त, त्रिसप्तवारान् त्रिसप्तकृत्वः, एकविंशतिवारानित्यर्थः । (हव्वं ति) शीघ्रम् (अत्थेगइयमित्यादि) संख्यातयोजनमानं व्यतिव्रजेत्, इतरं तु नेति । (उरालाबलाहय त्ति) महान्तो मेघाः (संसेयं ति त्ति) संस्वेदनं, संमूर्च्छनं, वर्षणं च (वायरविज्जुयाए त्ति) इह न बादरतेजस्कायिका मन्तव्याः, इहैव तेषां निषेत्स्यमाणत्वात्, किं तु देवप्रभावजनिता भास्वराः पुद्गलास्त इति । (णऽण्णत्थ विग्गहगइसमावन्नेणं ति)न इति योऽयं निषेधो बादरपृथिवीतेजसोः सोऽन्यत्र विग्रहगतिसमापन्नात् विग्रहगत्यैव बादरे ते भवतः।पृथिवी हि बादरा रत्नप्रभ ऽद्याखद्यासु पृथिवीषु गिरिविमानेषु च, तेजस्तु मनुजक्षेत्र एवेति, तृतीया चेह पञ्चम्यर्थे प्राकृतत्वादिति । (पलिपरसओ पुण भणिय त्ति) परिपार्श्वतः पुनः सन्ति तमस्कायस्य चन्द्राऽऽदय इत्यर्थः । (काद्दलणिभा पुण सा इति)ननु तत्पार्श्वतश्चन्द्राऽऽदीनां सद्भावात्तत्प्रभाऽपि तत्राऽस्ति ?, सत्यम, केवलं कर्मात्मानं दूषयति तमस्कायपरिणामेन परिणमनात्कर्दूषणा, सैव कर्दूषणिका । दीर्घता च प्राकृतत्वात्, अतः सत्यप्यवभासतीति । (काले त्ति) कृष्णः (कालोभासे त्ति) काळोऽपि कश्चित् कुतोऽपि काळो नावभासत इत्यत आह-कालावभासः कालदीप्तिर्यो, (गंभीरलोमहरिसजणणे त्ति) गम्भीरश्चासौ भीषणत्वाद्रोमहर्षजननश्चेति गम्भीरलोमहर्षजननः । रोमहर्षजनकत्वे हेतुमाह-(भीमे त्ति)भीष्मः (उत्तासणए त्ति) उत्कम्पहेतुः । निगमयन्नाह-(परमेत्यादि) यत एवमत एवाऽऽह-(देवे वि णमित्यादि) (दंसणपडिघायाए त्ति) दर्शनप्रतिघातायाम् (खुब्भाएज्ज त्ति) स्कन्दनीयात् क्षुभ्येत, (अहे णमित्यादि) अथैनं तमस्कायमभिसमागच्छेत् प्रविशेत्ततो भयात् (सीहं सीहं ति) कायगतेरतिघेगेन (तुरियं तुरियं ति) मनोगतेरतिवेगात् किमुक्तं भवति ?-क्षिप्रमेव (वीईवएज्ज त्ति) व्यतिव्रजेदिति । प्र० ६ श० ५ उ० ।

तमुक्कायस्स णं चत्तारि णामधेज्जा पण्णत्ता । तं जहा–तमेइ वा,तमुक्कायेइ वा, अंधकारेइ वा, महंधकारेइ वा । तमुक्कायस्स णं चत्तारि णामधेज्जा पण्णत्ता । तं जहा–लोगंधयारेइ वा, लोगतमसेइ वा, देवंधयारेइ वा, देवतमसेइ वा । तमुक्कायस्स णं चत्तारि णामधेज्जा पण्णत्ता । तं जहा–वायफलिहेइ वा,वायफलिहखोभेइ वा,देवारण्णेइ वा, देववूहेइ वा । तमुक्काए णं चत्तारि कप्पे आवरित्ता चिट्ठइ । तं जहा–सोहम्मीसाणं सणंकुमारमाहिंदं ।

(तमुक्कायेत्यादि) सूत्रत्रयं सुगमम् । नवरं तमसोऽप्कायपरिणामस्वरूपस्याऽन्धकारस्य कायः प्रचयस्तमस्कायो,यो ह्यसंख्यातमस्यारुणवरनिधानद्वीपस्य बाह्यवेदिकान्तादरुणोदाख्यं समुद्रं द्विचत्वारिंशद्योजनसहस्राण्यवगाह्योपरितनात् जलान्तादेकप्रदेशिकया श्रेण्या समुत्थितः सप्तदशैकविंशत्यधिकानि योजनशतानि ऊर्द्धमुत्पत्य ततस्तिर्यग्विस्तृणन् सौधर्मीऽऽदीन् चतुरो देवलोकानावृत्योर्द्धमपि ब्रह्मलोकस्य रिष्टविमानप्रस्तटं संप्राप्तः,तस्य नामान्येव नामधेयानि तम इति तमोरूपत्वाद्, इति रूपप्रदर्शने, वा विकल्पे, तमोमात्ररूपताऽभिधायकान्यत्यानि चत्वारि नामानि । तथा परानि चत्वार्येवात्यन्तिकतमोरूपताऽभिधायकानीति श्लोके अयमेवान्धकारो नान्योऽस्ति,दव इति श्लोकान्धकारः, देवानामप्यन्धकारोऽसौ, तत्कुरीरप्रभाया अपि तत्राप्रकाशनादिति देवान्धकारः । अत एव ते बहवतो प्रयत्नेन तत्र नश्यन्तीति श्रुतिरिति । तथाऽन्यानि चत्वारि कार्याऽऽश्रयाणि-वातस्य परिघननात् परिघोऽर्गला,परिघ इव परिघो,वातस्य परिघो वातपरिघः,तथा वातं परिघवत् क्षोभयति हतमार्गं करोतीति वातपरिक्षोभः, वात एव वा परिघस्तं क्षोभयति यस्य तथा । पाठान्तरेण-वातपरिक्षोभ इति । कश्चिद्देवपरिघो देवपरिक्षोभ इति चाऽऽश्रयद्वयस्थाने पठ्यते । देवानामरण्यमिव बलवद्भयेन नाशनस्थानत्वाद्यः स देवारण्यमिति । देवानां व्यूहः सागराऽऽदिः साङ्ग्रामिकव्यूह इव को दुरधिगमत्वात्स देवव्यूह इति । तमस्कायस्वरूपप्रतिपादनायैव (तमुक्काए णमित्यादि) सूत्रं गतार्थम् । किं तु सौधर्माऽऽदीनाऽऽवृणोत्यसौ, कुक्कुटपञ्जरसंस्थानसंस्थितस्य तस्य प्रतिपादनात् । उक्तं च-" तमुक्काए णं भंते! किं संठिए पण्णत्ते? गोयमा ! अहे मल्लगमूलसंठिए, उप्पिं कुक्कुडपंजरसंठिए पण्णत्ते" इति । स्था० ४ ठा० २ उ० ।

अथ पृथिव्यप्कायपर्यायतां पृथिव्यप्कायौ जीवपुद्गलरूपाविति तत्पर्यायतां प्रश्नयन्नाह-

तमुक्कायस्स णं भंते! कइ नामधेज्जा पण्णत्ता ?। गोयमा ! तेरस नामधेज्जा पण्णत्ता । तं जहा–तमेइ वा, तमुक्काएइ वा, अंधकारेइ वा, महंधकारेइ वा, लोगंधकारे वा, लोगतमिस्सेइ वा,देवंधकारेइ वा,देवतमिस्सेइ वा,देवारण्णेइ वा, देववूहेइ वा, देवफलिहेइ वा, देवपडिक्खोभेइ वा, अरुणोदएइ वा समुद्दे । तमुक्काए णं भंते ! किं पुढविपरिणामे, जीवपरिणामे,आउपरिणामे, पोग्गलपरिणामे ?। गोयमा ! नो पुढविपरिणामे, आउपरिणामे वि, जीवपरिणामे वि,पोग्गलपरिणामे वि । तमुक्काए णं भंते ! सव्वे पाणा भूया जीवा सत्ता पुढविकाइयत्ताए० जाव तसकाइयत्ताए उववण्णपुव्वा ?। हंता । गोयमा ! असई अदुवा अणंतखुत्तो, णो चेव णं बादरपुढविकाइयत्ताए, बादरअगणिकाइयत्ताए ॥

(तमेइ वा इत्यादि) तमः, अन्धकाररूपत्वात् इति एतद् वा विकल्पार्थः, तमस्काय इति वा; अन्धकाररूपत्वात्, अन्धकारमिति वा; तमोरूपत्वात्, महान्धकारमिति वा; महातमोरूपत्वात्, लोकान्धकारमिति वा, लोकमध्ये तथाविधस्यान्यस्यान्धकारस्याऽभावात्, एवं लोकतमिस्रमिति वा;देवान्धकारमिति वा; देवानामपि तत्रोद्योताभावेनान्धकाराऽऽत्मभावात् । एवं देवतमिस्रमिति वा; देवाऽरण्यमिति वा, बलवद्देवभयान्नश्यतां देवानां तथाविधारण्यमिव शरणभूतत्वात्, देवव्यूह इति वा, देवानां दुर्भेद्यत्वाद् व्यूह इव चक्राऽऽदिव्यूह इव देवव्यूहः, देवपरिघ इति वा; देवानां नयोत्पादकत्वेन गमनविघातहेतुत्वात्, देवप्रतिक्षोभ इति वा;तत्क्षोभहेतुत्वात् अरुणोदक इति वा समुद्रः अरुणोदकसमुद्रः, जलविकारत्वादिति । पूर्वं पृथिव्यप्तेजस्तमस्कायशब्दवाच्यता पृष्टा, अथ पृथिव्यप्कायपर्यायतां पृथिव्यप्कायौ जीवपुद्गलरूपाविति तत्पर्यायतां प्रश्नयन्नाह-(तमुक्काए णमिति) बादरवायुवनस्पतयः त्रसाश्चतेष्वपद्यन्ते;अप्काये तदुत्पत्तिसम्भवाद्,न त्वितरेऽस्वस्थानत्वाद् । अत उक्तम्-(णो चेव णं इत्यादि) प्र० ६ श० ५ उ० ।

देवास्तमस्कायं कुर्वन्ति-

जाहे णं भंते ! ईसाणे देविंदे देवराया तमुक्कायं काउं कामे भवइ, से कहमिदाणिं पकरेति ?। गोयमा ! ताहे चेव णं ईसाणे देविंदे देवराया अब्भिंतरपरिसाए देवे सद्दावेइ, तए णं ते अब्भिंतरपरिसगा देवा सद्दाविया समाणा, एवं जहेव सक्कस्स० जाव तए णं ते आभिओगिया देवा सद्दाविया समाणा तमुक्कायिए देवे सद्दावेंति । तए णं ते तमुक्कायिया देवा सद्दाविया समाणा तमुक्कायं पकरेंति, एवं खलु गोयमा ! ईसाणे देविंदे देवराया तमुक्कायं पकरेइ । अत्थि णं भंते ! असुरकुमारा देवा तमुक्कायं पकरेंति ? । हंता अत्थि । किंपत्तियं णं भंते ! असुरकुमारा देवा तमुक्कायं पकरेंति ?। गोयमा ! किड्डारतिपत्तियं वा पडिणीयविमोहणट्ठयाए गुत्तीसंरक्खणहेओ वा अप्पणो वा सरीरपच्चायणट्ठयाए एवं खलु गोयमा ! असुरकुमारा देवा तमुक्कायं पकरेंति, एवं० जाव वेमाणिया ।

(जाहे णं इत्यादि) (तमुक्काए त्ति) तमस्कायकारिणः । (किड्डारतिपत्तियं ति) क्रिडारूपा रतिः । अथवा-क्रीडा च खेलनं, रतिश्च निधुवनं क्रीमारतिः, सैव,त एव वा प्रत्ययः कारणं यत्र तत्क्रीमारतिप्रत्ययम् । (गुत्तीसंरक्खणहेओ त्ति) गोपनीयस्यसंरक्षणहेतोर्वेति । भ० १४ श० २ उ० ।

तमुपत्त–तमस्त्व–न० । ज्ञात्वन्धतायाम्, अत्यन्ताज्ञानाऽऽवृतताया, सूत्र० १ श्रु० २ अ० ।

तमोकसिय–तमःकाषिक–त्रि० । तमसि कषितुं शीलं येषां ते तमःकाषिणः,त एव तमःकाषिकाः । परावियाताः क्रियाः कुर्वत्सु, सूत्र० २ श्रु० २ अ० ।

तम्ब–ताम्र–न० । ' तंब ' शब्दार्थे, प्रा० १ पाद ।

तम्मण–तन्मनस्–त्रि० । तस्य देवदत्ताऽदेस्तस्मिन् घटाऽऽऽदौ मनस्तन्मनः । मनोविशेषे, स्था० ३ ठा० ३ उ० । तस्मिन्नेव मनोविशेषोपयोगरूपं यस्य स तथा । तस्मिन् विशेषोपयुक्ते,अनु० ग० । तद्विषयकव्यमनोयुक्ते, विपा १ श्रु० २ अ० ।

तम्मय–तन्मय–त्रि० । तेषां विवक्षितानामनलानिलतृणवनस्पतिगणानां विकारास्तन्मयाः । तद्विकारेषु,प्रज्ञ० १ आश्र० द्वार ।

तम्मयता -तन्मयता–स्त्री० । तत्परतायाम्, षो० १२ विव० ।

तम्मित्त–तन्मात्र–न०-त्रि० । तदेव तन्मात्रम । मयूरव्यसकाऽऽदित्वात् समासः । तदात्मके, सा मात्रा यस्मिन् । "तस्मिंस्तस्मिंश्च तन्मात्रा, तेन तन्मात्रता स्मृता । तन्मात्राण्यविशेषाणि, अविशेषास्ततो हि ते ॥ १ ॥ न शान्ता नापि घोरास्ते, न मूढा आविशेषिणः । " इत्युक्तेषु साङ्ख्योक्तेषु पञ्चसु शब्दाऽऽदिकरणीभूतेषु भूतेषु, वाच० । पञ्च तन्मात्राणि । तद्यथा-गन्धरसरूपस्पर्शशब्दतन्मात्राऽऽख्यानि, तत्र गन्धतन्मात्राद् पृथिवी गन्धरसरूपस्पर्शवती, रसतन्मात्रादापो रसरूपस्पर्शवत्यः, रूपतन्मात्रात्तेजो रूपस्पर्शवत्, स्पर्शतन्मात्राद्वायुः स्पर्शवान् । शब्दतन्मात्रादाकाशं गन्धरसरूपस्पर्शवर्जितमुत्पद्यत इति । सूत्र० १ श्रु० १ अ० १ उ० ।

तम्मियय–तन्मात्रज–न० । शब्दाऽऽदीनि यानि पञ्च तन्मात्राणि सूक्ष्मसंज्ञानि, तेभ्यो जातमुत्पन्नं तन्मात्रजम । अम्बराऽऽदिषु, स्था० २ ठा० १ उ० ।

तम्मुत्ति–तन्मुक्ति–स्त्री० । तेन विवक्षितेन वक्ता सर्वसङ्गेभ्यो विरतिर्मुक्तिस्तन्मुक्तिः । तदुक्तसर्वसङ्गेन विरतौ, आचा० १ श्रु० ५ अ० ४ उ० ।

तम्मेत्त–तन्मात्र–त्रि० । 'तम्मित्त' शब्दार्थे, सूत्र० १ श्रु० १ अ० १ उ० ।

तम्मेयय–तन्मात्रज–न० । ' तम्मियय ' शब्दार्थे, स्था० २ ठा० १ उ० ।

तम्मोत्ति–तन्मुक्ति–स्त्री० । 'तम्मुत्ति' शब्दार्थे, आचा० १ श्रु० ५ अ० ४ उ० ।

तम्बिर–न० । देशी-ताम्रस्यार्थे, प्रा० २ पाद ।

तय–तत–न० । 'तत' शब्दार्थे, स्था० ४ ठा० ४ उ० ।

तयक्खाय–त्वक्खाद–पुं० । त्वचं बाह्यवल्कं खादतीति त्वक्खादः। त्वग्भक्षके घुणाऽऽदौ, स्था० ४ ठा० १ उ० । त्वक्कल्पाऽसारभोकरि, साधौ च । दश० १ अ० ।

तयण्णवत्थुग–तदन्यवस्तुक–पुं० । तस्मात्परोपन्यासाद्वस्तुनोऽन्यदुत्तरभूतं वस्तु यस्मिन्नुपन्यासोपनये स तदन्यवस्तुकः । उपन्यासोपनयोदाहरणभेदे, (स्था०) तस्मात्परोपन्यस्ताद्वस्तुनोऽन्यदुत्तरभूतं वस्तु यस्मिन्नुपन्यासोपनये स तदन्यवस्तुकः। यथा जले पतितानि जलचरा इत्युक्ते, एतद्विघटनाय पतनादन्यदुत्तरमाह-यानि पुनः पातयित्वा खादति नयति वा तानि किं भवन्ति, न किञ्चिदित्यर्थः, अयमपि ज्ञापकतया ज्ञातमुक्तः, अथवा यथारूढमेव ज्ञातमेव । तथाहि--न जलस्थलपतितानि पत्राणि जलचराऽऽदिसत्त्वाः संजनयन्ति,मनुष्याऽऽद्याश्रितानीव । अयमभिप्रायः-यथा जलाऽऽद्याश्रितत्वाज्जलचराऽऽदितया तानि सम्पद्यन्ते, तथा मनुष्याऽऽद्याश्रिततया मनुष्याऽऽदिमत्कूणकाऽऽदितयाऽपि सम्पद्यन्ताम्, आश्रितत्वस्याविशेषात्, न च तानि तथाऽभ्युपगम्यन्त इति जलाऽऽदिगतानामपि जलचरत्वाऽऽद्यसंभव इति । स्था० ४ ठा० ३ उ० । कश्चिदाह-यस्य वादिनोऽन्यो जीवः, अन्यच्च शरीरमिति तस्यान्यशब्दस्याविशिष्टत्वात्तयोरपि तद्वाच्यविशिष्टत्वेनैकत्वप्रसङ्ग इति तस्य जीवशरीरापेक्षया तदन्यवस्तूपन्यासेन परिहारः कर्तव्यः । कथम् ?। नन्वेवं सति सर्वेषामानां परमाणुद्व्यणुकघटपटाऽऽदीनामेकत्वप्रसङ्गः । अन्यः परमाणुरन्यो द्विप्रदेशिक इत्यादिना प्रकारेणाऽन्यशब्दस्याऽविशिष्टत्वात्तेषां तद्वाच्यत्वेनाविशिष्टत्वादिति । तस्मादन्यो जीवोऽन्यच्छरीरमित्येतदेव शोभनमित्येतदू व्याख्यानयोगे, अनेन चैतयोरप्याक्षेपः,तत्र चरणकरणानुयोगेन मांसभक्षण इत्यादावेव कुमाहे तदन्यवस्तूपन्यासेन परिहारः । कथम् ?। " न हिंस्यात्सर्वाणि भूतानि " इत्येतदेवं विरुध्यत इति । लौकिकं तु तस्मिन्नेवोदाहरणे तदन्यवस्तूपन्यासेन परिहारः।" जइ जाणि पुण पक्किल्लाणि पाडिल्लाणि कोइ खाइ वा णेइ वा ताणि किं हवंति त्ति । " दश० १ अ० ६ उ० ।

तयप्पमाणमित्त–त्वक्प्रमाणमात्र–न० । तिलतुषाग्रिजागमात्रे, तत्प्राशनस्य घटते । बृ० ६ उ० ।

तयप्पमाणमेत्त-त्वक्प्रमाणमात्र-न० । 'तयप्पमाणमित्तं शब्दार्थे, भू० ६ उ० ।

तया-त्वक्-स्त्री० । तृणवनस्पतिकायिकभेदे, स्था० ७ ठा० । जल्लायाम्, जी० ३ प्रति०४ उ० । रा० । वाह्यवल्के, स्था० ४ ठा० १ उ० । "तणुओ तिक्खणुओ, असोणिओ केवलं तयाजुत्तो ।" आव० ५ अ० । त्वगिवासारं भोक्तव्यमित्यर्थसूचकत्वात् त्वग् उच्यते, दशवैकालिकस्य द्रुमपुष्पिकाध्ययने, दश० । उक्तं च परमर्षिभिः-"चत्तारि घुणा पण्णत्ता । तं जहा-तयक्खाए, छल्लिक्खाए, कट्ठक्खाए, सारक्खाए । एवमेव चत्तारि भिक्खुगा पण्णत्ता । तं जहा-तयक्खाए०" इत्यादि । कल्पाऽसारलोकुः कर्मनेदमङ्गीकृत्य वज्रसारं तपो भवति । दश० १ अ० ।

तयाणंतर-तदनन्तर-न० । तस्मादव्यवहितोत्तरे, रा० ।

तयाणुग-तदनुग-त्रि० । तदनुगन्तरि, " विवरीयपक्खसंचुयं, अन्नं उत्तं तयाणुगे ।" सूत्र० १ श्रु० १ अ० ४ उ० ।

तयामुह-त्वचामुख-पुं० । सुखकारिणि, कल्प० ३ क्षण ।

तयावंत-त्वग्वत्-त्रि० । त्वग्विद्यते यस्याऽसौ । विशिष्टत्वक् शालिनि, रा० ।

तयाविस-त्वग्विष-पुं० । त्वचि विषं यस्य स त्वग्विषः । प्राकृतत्वात् 'तयाविसो' । दर्वीकरसर्पनेदे, जी० १ प्रति० ।

तयाहार-त्वगाहार-पु० । त्वङ्मात्राऽऽहारकदानप्रस्थापिशेषे, औ० ।

तर-तर-पुं० । तरतीति तरः । स्था० ४ ठा० १ उ० । "ऋवर्णस्यारः" ॥ ८ । ४ । २३४ ॥ इति ऋधातोरन्त्यस्य ऋवर्णस्यार इत्यादेशः । प्रा० ४ पाद । संतरणकर्तरि, तरशब्दो महादोषप्रदर्शने, यथा कृष्णः, कृष्णतर इत्यादि । नि० चू० १ उ० ।

शक-धा० । 'शक सामर्थ्ये, "शकेश्चय-तर-तीर-पाराः" ॥८। ४।८६॥ इति शकनोतेर्धा 'तर' इत्यादेशः । 'तरइ' । प्रा०४ पाद ।

तरस्-न० । वेगे, बले च । औ० ।

तरंग-तरङ्ग-पुं० । तृ-अङ्ग-कुच् । वायुना जलस्य संचालनेन तिर्यगूर्ध्वाऽऽदिप्लवने, वाच० । कल्लोले, प्रश्न० ३ आश्र० द्वार । अष्ट० । कल्प० । कीचिपु, जं० ५ वक्ष० । औ० । ह्रस्वकल्लोले, ज्ञा० १ श्रु० ८ अ० । औ० ।

तरंगवंदण-तरङ्गनन्दन-पुं० । स्वनामख्याते राज्ञि, यस्य गतितरङ्गानाम्ना भार्या, रतितरङ्गिणीनाम्ना दुहिता । दर्श० ३ तत्त्व ।

तरंगमालि [ण]-तरङ्गमालिन्-पु० । समुद्रे, को० ।

तरंगवई-तरङ्गवती-स्त्री० । स्वनामख्यातायां नायिकायाम्, तरङ्गवतीचरितप्रतिबद्धे कथ ग्रन्थे, दश० ३ अ० । आ० म० ।

तरग-तरक-त्रि० । तरन्तीति तरस्ति एव तरकाः । पारगन्तृपु. (स्था०)

चत्तारि तरगा पण्णत्ता । तं जहा-समुद्दं तरामी एगे समुद्दं तरइ, समुद्दं तरामी एगे गोपयं तरइ, गोपयं तरामी एगे गोपय तरइ, गोपयं तरामी एगे समुद्दं तरइ ४ । चत्तारि तरगा पण्णत्ता । तं जहा-समुद्दं तरित्ता णाममेगे समुद्दे विसीयइ, समुद्दं तरित्ता णाममेगे गोपए विसीयइ, गोपयं तरित्ता एगे० ४ ॥

(चत्तारि तरगेत्यादि) व्यक्तम्, नवरं तरस्तीति तरकः तुच प्रत्ययः, समुद्रं समुद्रवत् दुस्तरं संवत्सरादिकं कार्यं तरामि करोमीत्येवमभ्युपगम्य तत्र समर्थत्वादेकः समुद्रं तरति, तद्वत् समर्थयतीत्येकः । अन्यस्तु तदभ्युपगमेऽसमर्थत्वात् गोपदं ततत्कल्पं देशविरत्यादिकमल्पतमं तरति, निर्वाहयतीति । अन्यस्तु गोपदप्रायमभ्युपगम्य धीर्योतिरेकात्समुद्रप्रायमपि साधयतीति । चतुर्थः प्रतीतः । समुद्रप्रायं कार्यं तरित्वा निर्वाह्य समुद्रप्राये प्रयोजनान्तरे विषीदति, न तं निर्वाहयति, विचित्रत्वात् सत्त्वोपक्रमस्येति । एवमन्ये अप इति । स्था० ४ ठा० ४ उ० ।

तरच्छ-तरक्ष-पुं० । व्याघ्रविशेषे, प्रति० । प्रज्ञा० । प्रज्ञा० । भ० । स्त्रियां तरक्षी । प्रज्ञा० १९ पद ।

तरण-तरण-न० । लङ्घने, सूत्र० १ श्रु० ११ अ० । निस्तारणे, नि० चू० १ उ० । पारगमने, ग्रं । ने च । आ० चू० । तरणं चउव्विहं-नामादिपदे । णामट्ठवणाओ गयाओ । दव्वतरणे तिन्नि तन्निज्जंति । तं जहा-दव्वतरओ, दव्वतरणं, दव्वतरियव्वयं । तत्थ दव्वतरओ पुरिसाऽऽदी, दव्वतरणं उडुवादि, दव्वतरियव्वं णदीसमुद्दसराऽऽदि । एवं भावतरणे तिण्णिवरं भावतरओ जीवो, भावतरणं णाणाऽऽदि, भावतरियव्वं संसारो दुरुत्तिहो । एवं प्लवनमपि तरतिः आ० चू० १ अ० ।

तरमट्ठ-देशी-प्रपुञ्जार्थे, दे० ना० ५ वर्ग ५ गाथा ।

तरतम-तरतम-त्रि० । न्यूनाधिकभावान्वितेऽर्थे, तारतम्येन वर्तमान इति शारीरकभाष्यम् । वाच० । " तरतमजोगजुत्तेहिं जालयणेहिं अवणुप्पइत्तं मिच्छइ ।" कल्प० ३ क्षण ।

तरमल्लिहायण-तरमल्लिहायन-त्रि० । तरो वेगो बलं वा । तथा 'मल्ल-मल्ल' धारणे । ततश्च तरो मल्ली धारको वेगाऽऽदिधारको, हायनः संवत्सरो वर्तते येषां ते तरमल्लिहायनाः । यौवनवस्तु, औ० । (?)

तरमाण-तरत्-त्रि० । समर्थे, नि० चू० १ उ० । जी० ।

तरलियमइ-तरलितमति-स्त्री० । विसंस्थुलबुद्धौ, जी० १ प्रति० ।

तरस-देशी-मांसे, दे० ना० ५ वर्ग ४ गाथा ।

तरिअव्व-तरितव्य-त्रि० । निर्वोढव्ये, -"तरिअव्वं च महासिन्धं, मरिअव्वं वा समरे समत्थेणं ।" आव० ४ अ० । समुद्रे, दे० ना० ५ वर्ग ७ गाथा ।

तरित्तए-तरीतुम्-अव्य० । लङ्घयितुमित्यर्थे, प्रति०

तरिया-तरिका-स्त्री० । घृतदध्यादेर्विकृतेऽवयवे, " एक्कगयं घयकिट्टी, पक्कोसहि उवरि तरियसप्पि च ।" ध० २ अधि० ।

तरु तरु-पुं० । तृज-गुणः । वाच० । क-ग-च-ज-त-द-प-य-वां प्रायो लुक् " ॥ ८ । १ । १७७ ॥ इह स्वरादसंयुक्तस्यानादेरित्यस्योऽनादेरित्यस्याधिकाराल्लुग् न । प्रा० १ पाद । वृक्षे दश० १ अ० ।

तरुण तरुण-त्रि० । जन्मपर्यायेण षोडशवर्षोपरिवर्त्ति यावत्त्रिंशद्वर्षाणि यावत्तरुणाः । दश० २ उ० । इत्युक्तलक्षणे प्रशस्तवयसि, भ० १४ श० १ उ० । सूत्र० । ग० । क्षत्त्र० । नूतने, कल्प० ३ क्षण । औ० । ' तरुणदिवाकरकरोहं ' औ० । विशिष्टवर्णाऽऽदिगुणोपेतेऽभिनवे वस्तुनि, जी० ३ प्रति० २ उ० ।

तरुणग–तरुणक–त्रि० । स्तनन्धये, सूत्र० १ श्रु० ३ अ० ४ उ० । अभिनवे, भ० १५ श० ।

तरुणदिवाकर–तरुणदिवाकर–पुं० । अभिनवोदिताऽऽदित्ये, आव० ४ अ० । अन्त० ।

तरुणधम्म–तरुणधर्म–त्रि० । अविपक्वपर्याये, नि० चू० १९ उ० । तारुण्ये वर्तमाने, आ० म० १ अ० २ खण्ड ।

तिण्हाऽऽरेण समाणं, होइ पक्कप्पम्मि तरुणधम्मा उ ।
पंचण्ह दसाकप्पे, जस्स व जो जत्तिओ कालो ॥

व्रतपर्यायमधिकृत्य तिसृणां समानां वर्षाणामारेणार्वाक् वर्तमानः प्रकल्पे निशीथाऽध्ययने तरुणधर्मा अविपक्वपर्यायो भवति, पञ्चानां वर्षाणामर्वाक् वर्तमानस्तु (दसाकप्पे त्ति) उपलक्षणत्वाद्दशाकल्पव्यवहाराणां तरुणधर्मा ज्ञातव्यो,यस्य वा सूत्रकृताङ्गाऽऽदेः श्रुतस्य, यो यावान् कालो व्यवहाराध्ययने दशमोद्देशके भणितः, तस्य तावन्तं कालमसमापयन् तरुणधर्मा भवति । यथा-" कप्पइ चउवालपरियायसमणस्स निग्गंथस्स सूअगडं नाम अंगं उद्दिसित्तए ।" इत्यादि । बृ० १ उ० ।

तरुणपरिकम्म–तरुणपरिकर्म–न० । रोगग्रस्तस्य सतस्तरुणस्य बलविवृद्धिकरणे, व्य० ४ उ० ।

तरुणप्पभ–तरुणप्रभ–पुं० । खरतरगच्छीये जिनकुशलसूरिशिष्ये, अनेन विक्रमसंवत् १४११ मिते श्राद्धप्रतिक्रमणविवरणं नाम ग्रन्थो रचितः । जै० इ० ।

तरुणिया–तरुणिका–स्त्री० । अपरिपक्वायाम्, आचा० २ श्रु० १ चू० १ अ० ।

तरुणीपमिकम्म–तरुणीप्रतिकर्म–न० । एतदेकत्रिंशत्तमकलाभेदे, युवतीनां वर्णाऽऽदिवृद्धिरूपायां सङ्गसक्रियायाम्, जं० २ वक्ष० । ज्ञा० । औ० ।

तरुणीपरिकम्म–तरुणीपरिकर्म–' तरुणीपमिकम्म ' शब्दार्थे, जं० २ वक्ष० ।

तरुतिगिच्छा–तरुचिकित्सा–स्त्री० । वृक्षाणां रोगप्रतीकारलक्षणे एकोनपञ्चाशत्पुरुषकलाभेदे, कल्प० ७ क्षण ।

तरुपक्खंदोल्लय–तरुपक्षान्दोलक–त्रि० । तरुपक्षे तरुपार्श्वे आत्मानमान्दोलयन्ति ये ते तथा । तरुपक्षान्दोलनात्पातेन मृतेषु, औ० ।

तरुपमण–तरुपतन–न० । पिप्पलवटाऽऽदितरुनारुह्य उत्पत्य पतने, नि० चू० ११ उ० । प्र० ।

तरुपतणट्ठाण–तरुपतनस्थान–न० । यत्र मुमूर्षव एवानशनेन तरुवत्पतितास्तिष्ठन्ति, तरुभ्यो वा यत्र पतन्ति । तथाभूते स्थाने, आचा० २ श्रु० २ चू० ३ अ० ।

तल–तल–पुं० । हस्ततले, जं० १ वक्ष० । नि० चू० । आ० म० । औ० । पाणिपादादेरधोभागे, ज्ञा० १ श्रु० १ अ० । तं० । हस्ते, स्था० ८ ठा० । चं० प्र० । ज्ञा० । औ० । कन्प्रत्ययोऽप्यत्र । आ० म० १ अ० १ खण्ड । मध्यखण्डे, स्था० ८ ठा० । अधोभागे, ज्ञा० १ श्रु० १ अ० । प्रतिष्ठाने, " तलसमगतिभग्गपुल्लइतलं । " प्रश्न० ३ आश्र० द्वार । हस्ततालै, रा० । ज्ञा० । दश० । अतिदीर्घे तालवृक्षनिधाने वृक्षे, ज्ञा० १ श्रु० ८ अ० । जी० । आ० म० । तालो वृक्षस्तत्र भवं तालम् । तालवृक्षफले, व्य० १ उ० । प्रासेधौ, शय्यायां च । दे० ना० ५ वर्ग १६ गाथा ।

तलअण्ट–भ्रम–धा० । " भ्रमोष्टिरिटिल्ल-डुण्डुल्ल-ढण्ढल्ल-चक्कम्म-भम्मम-भमड-भमाड-तलअण्ट-झण्ट-क्रम्प-भुम-गुम-फुम-फुस-डुम-डुस-परी-पराः " ॥ ८ । ४ । १६१ ॥ इति भ्रमधातोः 'तलअण्ट' इत्यादेशः । 'तलअण्टइ' । प्रा० ४ पाद । चलने,दिवा०-पर०-सक०-सेट् । भ्राम्यति, अभ्रमीत् । वाच० ।

तलआगत्ती–देशी-कूपे, दे० ना० ५ वर्ग ८ गाथा ।

तलओमा–स्त्री० । गुच्छभेदे, ' तेवेमा ' इति गुर्जरदेशे प्रसिद्धम् । प्रज्ञा० १ पद ।

तलजमलजुगलबाहु–तलयमलयुगलबाहु–त्रि० । तलौ तालवृक्षौ तयोर्यमलं युगलं श्रेणिकयुगलं तलयमलयुगलं, तद्वत् अतिसरलौ पीवरौ बाहू यस्य सः । तालवृक्षसदृशातिसरलपीवरबाहौ, रा० । जी० । तलयमलयुगलपरिघनिभबाहुः। तलौ तालवृक्षौ तयोर्यमलं समश्रेणिकं यद्युगलं द्वयं परिघश्चार्गला, तन्निभौ तत्सदृशौ दीर्घसरलपीनत्वाऽऽदिना बाहू यस्य सः । भ० १४ श० १ उ० ।

तलण–तलन–न० । सुकुमारिकाऽऽदेरिव भ्राष्ट्रभर्जने,प्रश्न० १ आश्र० द्वार । अग्नौ स्नेहेन भर्जने, विपा० १ श्रु० ३ अ० ।

तलतालग–तलताल–पुं० । हस्ततालै, कल्प० १ क्षण । सू० प्र० । चं० प्र० । कल्प० । ज्ञा० । ज्ञ० । हस्तकांशिकयोः, कल्प० ४ क्षण । चं० प्र० ।

तलपत्त–तालपत्र–न० । तालान्निधानवृक्षपर्णे,ज्ञा० १ श्रु० १७ अ० ।

तलप्फल–देशी-शाल्याम्, दे० ना० ५ वर्ग ७ गाथा ।

तलभंगय–तलभङ्गक–पुं० । बाह्याभरणविशेषे, जी० ३ प्रति० ४ उ० । औ० ।

तलवत्त–देशी-करणाऽऽभरणविशेषे, वराहे च । दे० ना० ५ वर्ग २१ गाथा ।

तलवर–तलवर–त्रि० । परितुष्टनरपतिप्रदत्तपट्टबन्धविभूषिते राजस्थानीये,स्था० ४ ठा० । औ० । पञ्चा० । प्रज्ञा० । भ० । जी० । कल्प० । जं० । रा० । अन्त० । ज्ञा० । अनु० । बृ० ।

तलविंट–तालवृन्त–न० । " वाऽऽद्ययोतुखाताद्यावदातः " ॥ ८ । १ । ६७ ॥ इत्याकारस्यात्वम् । पक्षे-तालविण्टम् । प्रा० १ पाद । तालं करतलं वृन्तं बन्धनमस्य,तालस्येव वृन्तमस्य वा । व्यजने, वाच० ।

तलवेंट–तालवृन्त–न० । ' तलविंट ' शब्दार्थे, प्रा० १ पाद ।

तलसारिअ–देशी-गाखिते, दे० ना० ५ वर्ग ९ गाथा । नाखिके, दे० ना० ५ वर्ग ६ गाथा ।

तलाअ–तडाग–पुं० । " डो लः " ॥ ८ । १ । २०२ ॥ इति डस्य लः । प्रा० १ पाद । पुरुषाऽऽदिकृते जलाऽऽश्रयविशेषे, प्रश्न० ४ संव० द्वार । प्रज्ञा० । औ० । अनु० । आ० म० । आचा० । आव० । रा० ।

तलाग–तडाग–पुं० । ' तलाअ ' शब्दार्थे, प्रश्न० ४ संव० द्वार ।

तलार–देशी-नगररक्षके, दे० ना० ५ वर्ग ३ गाथा ।

तलिण–तलिन–न० । प्रतले, औ० ।

तलिम–तल्प–न० । शयनीये, ज्ञा० १ श्रु० १६ अ० । कुट्टिमे, शय्यायाम्, गृहोर्ध्वचूल्याम्, वासभवने च । दे० ना० ५ वर्ग ३० गाथा ।

तलिमा–तलिमा–स्त्री० । तूर्यवाद्यभेदे, नं० । आ० म० ।

तलिय–तलित–त्रि० । स्नेहपक्वे, नि० १ चू० १ वर्ग १ अ० । नि० चू० ।

तलिया–तलिका–स्त्री० । उपानहि, बृ० ।

तलियाउ रत्तिगमणे, कप्पइ तेणे य सावए असहू ।
पुमगा चिचचरीए, बद्धी पुण चिन्धसंघट्टा ॥

तलिकाः क्रमणिकाः, ताश्च रात्रौ गमने कण्टकरक्षणार्थं पदेषु बध्यन्ते, सार्थवशाद्वा पन्थानं मुक्त्वा तत्पार्श्वेन गच्छतां स्तेनभयेन, श्वापदभयेन च त्वरितं गम्यमाने दिवाऽपि बध्यन्ते, असहिष्णुः सुकुमारपादः, स कण्टकसंरक्षणार्थं क्रमणिकाः पादयोर्बध्नाति । ताश्च प्रथममेकतलिकाः, तदप्राप्तौ यावद्बहुतलिका अपि गृह्यन्ते । पुटकानि खल्लकानि, तानि शीतेन पादयोर्विचर्चिकासु विपादिकासु स्फुटतीषु बध्यन्ते । बध्नी पुनस्तलिकाऽऽदीनां चिह्नानां त्रुटितानानां सङ्कटनं तदर्थं गृह्यते । बृ० १ उ० । ध० । व्य० । नि० चू० । ओघ० ।

तलुण–तरुण–त्रि० । प्रत्यग्रे, ज्ञा० १ श्रु० १६ अ० । प्रवर्द्धमानवयसि, आ० म० १ अ० २ खण्ड । दा० ।

तल्ल–देशी-पल्वले, वर्णाऽऽढ्ये तृणे, शय्यायां च । दे० ना० ५ वर्ग १९ गाथा ।

तल्लज–तल्लज–पुं० । तृणविशेषे, प्रश्न० ३ सम्व० द्वार ।

तल्लक–पुं० । सुराविशेषे, जं० २ वक्ष० ।

तल्लय–देशी-शय्यायाम्, दे० ना० ५ वर्ग २ गाथा ।

तल्लिच्च–देशी-तत्परे, दे० ना० ५ वर्ग ३ गाथा ।

तल्लेस्स–तल्लेश्य–त्रि० । तत्रैव लेश्या शुभपरिणामरूपा यस्य सः । ग० २ अधि० । अनु० । लेश्या हि कृष्णाऽऽदिद्रव्यसाचिव्यजनित आत्मपरिणामः । तद्विषयलेश्यायुक्ते, विपा० १ श्रु० २ अ० ।

तव–पुं० । तपस्–न० । "स्तमदामशिरोऽनमः" ॥ ८ । १ । ३२ ॥ इति प्राकृते पुंस्त्वम् । प्रा० १ पाद । तप्यतेऽनेनेति तपः । तापयति अष्टप्रकारं कर्मेति तपतेरौणाऽऽदिकोऽसुप्रत्ययः आ० म० १ अ० २ खण्ड । तापयति कर्म दहतीति तपः । पञ्चा० १६ विव० । स० । तप्यन्ते रसाऽऽदिधातवः कर्माणि वा अनेनेति तपः । ध० ३ अधि० । आ० म० । रसरुधिरमांसमेदोऽस्थिमज्जाशुक्रापेक्षयेन तप्यन्ते, कर्माणि वाऽशुभानीत्यतस्तपोनामनिरुक्तम् । स्था० ५ ठा० १ उ० । चतुर्थाऽऽदिषण्मासान्ते (स्था० ६ ठा०) अनशनाऽऽदौ, प्रश्न० ४ संव० द्वार । आव० । उत्त० । सूत्र० । नं० । दा० । संथा० । दश० । प्रव० । भरूअहानरूप्रतिमासु, उत्त० ३० अ० ।

तपोनिक्षेपः–

निक्खेवो उ तवम्मी, चउव्विहो दुविहो उ होइ दव्वम्मि ।
आगम-नोआगमओ, नोआगमतो य सो तिविहो ॥४३॥
जाणगसरीरभविए, तव्वइरित्ते य पंचतवमाई ।
भावम्मि होइ दुविहो, बज्झो अब्भिंतरो चेव ॥४४॥
बज्झगईणं दुण्ह वि, पुव्वुद्दिट्ठो चउक्कनिक्खेवो ।
पगयं तु भावमग्गे, सिद्धिगईए उ नायव्वं ॥४५॥
दुविहतवो मग्गइ वा, निज्जइ वा जम्ह एत्थ अज्झयणे ।
तम्हा एयऽज्झयणं, तवमग्गगइ त्ति नायव्वं ॥४६॥

गाथाचतुष्टयं प्राग्वत्परं (पंचतवमाइ त्ति) पञ्चतपः पञ्चाग्नितपो यत्र चतसृष्वपि दिक्षु चत्वारोऽग्नयः, पञ्चमश्च तपनः । तल्लोके प्रसिद्धमादित्यशब्दाल्लोकप्रतीतमन्यदपि बृहत्तपःप्रभृति तपो गृह्यते, द्रव्यत्वं चास्याज्ञानमलमलिनत्वेन तथाविधशुद्धानङ्गत्वात् तथाभावे प्रक्रमात्तपो बाह्यमाभ्यन्तरं चाहैव वक्ष्यमाणस्वरूपं, तथा (पुव्वुद्दिट्ठो त्ति) पूर्वत्र मोक्षमार्गगतिनामकेऽध्ययने उद्दिष्टः कथितः पूर्वोद्दिष्टः (भावमग्ग त्ति) सुखत्वयथाद्भावमार्गेण मुक्तिपथेन तपोरूपेण ज्ञानदर्शनचारित्राविनाभावित्वाद्भावतपसः । उत्त० पाई० ३० अ० ।

नामनिरुक्तिमाह–

जहा उ पावयं कम्मं, रागदोससमज्जियं ।
खवेइ तवसा भिक्खू, तमेगग्गमणो सुण ॥ १ ॥

यथा येन प्रकारेण भिक्षुस्तपसा रागद्वेषसमर्जितं रागद्वेषाभ्यामुपार्जितं कर्म क्षपयति, तुशब्दः पादपूरणे । तं तपोमार्गम्, एकाग्रमनाः सावधानचित्तः सन् त्वं शृणु–हे जम्बूस्वामिन् ! अहं वदामीति सम्बन्धः, अनाश्रवेण किल कर्मक्षयः क्रियते ॥१॥

पाणिवहमुसावाए–अदत्तमेहुणपरिग्गहा विरओ ।
राईभोयणविरओ, जीवो होइ अणासवो ॥ २ ॥

हे शिष्य ! ईदृशो जीवो निराश्रवो भवति, कीदृशः ?, प्राणिवधमृषावादादत्तमैथुनपरिग्रहाद्विरतो रहितः, पुना रात्रिभोजनविरतः, एतादृशोऽनाश्रवो भवति ॥ २ ॥

पुनरनाश्रवो यथा भवति तमाह–

पंचसमिओ तिगुत्तो, अकसाओ जिइंदिओ ।
अगारवो य निस्सल्लो, जीवो होइ अणासवो ॥ ३ ॥

कीदृशो ?, जीवः–पञ्चभिः समितिभिः समितः सहितः पञ्चसमितः, पुनस्तिसृभिर्गुप्तिभिर्गुप्तः, पुनरकषायः कषायरहितः, पुनर्जितेन्द्रियः वशीकृतेन्द्रियः, पुनरगारव ऋद्धिरससाताऽऽदिगर्वरहितः, पुनर्निःशल्यः मायानिदानमिथ्यादर्शनशल्यैस्त्रिभी रहितः एतादृशोऽनाश्रवो भवति ॥ ३ ॥

एवंविधोऽनाश्रवश्च यथा क्षपयति, तथा वदति–

एएसिं तु विवच्चासे, रागदोससमज्जियं ।
खवेइ जं जहा भिक्खू, तमेगग्गमणो सुण ॥ ४ ॥

हे शिष्य ! यथा येन प्रकारेण भिक्षुः साधुरेतेषां पूर्वोक्तानां प्राणातिपादमृषावादादत्तमैथुनपरिग्रहरात्रिभोजनविरतिलक्षणानां व्रतानां तथा समितिगुप्त्यादिलक्षणानामनाश्रवकारणानां विपर्यासे वैपरीत्ये प्राणिवधमृषावादादत्तमैथुनपरिग्रहरात्रिभोजनसमित्यभावगुप्त्यजावसेवने सति रागद्वेषाभ्यां समर्जितं सञ्चितं पापकर्म क्षपयति, तं प्रकारमेकाग्रमना एकचित्तः सन् त्वं शृणु ॥ ४ ॥

अत्र दृष्टान्तमाह–

जहा महातलागस्स, सन्निरुद्धे जलागमे ।
उस्सिंचणाए तवणाए, कमेणं सोसणा भवे ॥ ५ ॥

यथा महातडागस्य महाजलाऽऽश्रयस्य जलाऽऽगमे पानीयाऽऽगमनमार्गे सन्निरुद्धे सम्यक्प्रकारेण संवृते सति (उस्सिं-

खणाए वि) तप्तिक्षुजनया क्रियया अग्रहाऽऽदिना कर्षाऽऽकर्षणया, तपनेन रविकिरणाऽऽदिना संतापेन क्रमेण शोषणा जलस्य शोषणं स्यात्, नवीनजलाऽऽगमनमार्गो निरुध्यते, पूर्वसञ्चितं च निष्काश्यते, जलह्रदो रिक्तः स्यात्, इति भावः ॥५॥

अथ दार्ष्टान्तिकमाह-

एवं तु संजयस्साऽवि, पावकम्मनिरासवे ।
भवकोडिसंचियं कम्मं, तवसा निज्जरिज्जइ ॥ ६ ॥

एवमुना प्रकारेण, पापकर्मनिरास्रवे सति पापकर्मणां प्राणिवधाऽऽश्रवाणां निरोधे सति, संयतस्यापि साधोरपि, तपसा द्वादशविधेन. भवकोटिसंचितं कर्म निर्जीर्यते, आधिक्येन क्षयं नीयते । अत्र कोटाग्रहणं बहुत्वोपलक्षणं, कोटानियमस्य असंभवात् ॥ ६ ॥ उत्त० ३० अ० ।

तप ६ आभ्यन्तरं, ६ बाह्यम-" दुविहे तवे पन्नत्ते । तं जहा-बाहिरिए य, अब्भितरिए य । से किं तं बाहिरए तवे ? । बाहिरिए तवे छव्विहे पन्नत्ते । तं जहा-" अणसणं, ऊणोयरिया, भिक्खायरिया, रसपरिच्चाओ, कायकिलेसो, पडिसंलीणया ।" भ० २५ श० ७ उ० । ध० । औ० । दश० । स० । आव० । स्था० । पञ्चा० । आ० चू० । आचा० । नं० । उत्त० । जीव० । (अनशनाऽऽदीनां व्याख्या स्वस्वस्थाने. "तेणं तवेणं तेएणं एगाहच्चं कूडाहच्चं ।" तपोजन्यं तेजस्तप एव.तेन तेजोलेश्यया । भ० १५ श० ।

दुःखहेतुत्वात्तपोन कार्यमिति केषाञ्चिन्मतनिरासः ।
वैराग्ययुक्तेन तपो विधेयमतो वैराग्याङ्गकानन्तरं तपोऽङ्गकमारभ्यते ; तत्रापि परमतमाशङ्क्यमान आह-

दुःखाऽऽत्मकं तपः केचि-न्मन्यन्ते तन्न युक्तिमत् ।
कर्मोदयस्वरूपत्वा-द्वल्लीवर्दाऽऽदिदुःखवत् ॥ ७ ॥

दुःखमसुखमात्मा स्वभावो यस्य तद् दुःखाऽऽत्मकं, किं तत् ?, तपोऽनशनाऽऽदिरूपमिति हृत्या,केचिदनधिगतपारगताऽऽगमगभीरधीः, मन्यन्ते अभ्युपगच्छन्ति । तदिति तपो न नैव, युक्तिमद् उपपत्या सङ्गतं न, मोक्षाङ्गं तप एव न संभवतीति तात्पर्यम् । अथ दुःखाऽऽत्मकमपि सत्कस्मान्न मोक्षाङ्गमित्याह-कर्मोदयस्वरूपत्वादिति । कर्मोदयोऽसातवेदनीयाऽऽदिकर्मविपाकः स्वरूपं स्वभावो यस्य तत्तथा तद्भावस्तत्त्वं तस्मात् । तथाहि-अनशनाऽऽदिषु क्षुत्पिपासाऽऽदयः परिषहाः,ते च वेदनीयकर्मोदयस्वभावा आगमे श्रूयन्ते,इति वेदनीयकर्मोदयाऽऽत्मकमनशनाऽऽदिकर्मोदयस्वरूपत्वान्न मोक्षाङ्गं तर्हि किञ्चिदित्याह-वल्लीवर्दाऽऽदिदुःखवत्-गवादिसत्कसातमिव । प्रयोगश्चैवम् यत्कर्मोदयस्वरूपं,न तन्मोक्षाङ्गं,यथा गवादिदुःखं, कर्मोदयस्वरूपं च तपः, तस्मान्न मोक्षाङ्गमिति स्थितम् । अयं च श्लोकार्धं क्वचित्पञ्चवस्तुकगाथामुपजीव्य मयाऽभिहितः-" एवय जंपि केइ. मोक्खस्स कारणं दुहं ति मोक्खयं । कम्मविवागत्तणओ, भणंति एयं पि पडिसुद्धं ॥ १ ॥ " इति ।१।

कथं दुःखस्वरूपस्यापि तपसो मुक्तिमत्त्वाभ्युपगमे पर एव प्रसङ्गमाह-

सर्व एव च दुःख्येवं, तपस्वी संप्रसज्यते ।
विशिष्टस्त्वद्विशेषेण, सुधनेन धनी यथा ॥ ८ ॥

सर्व एव निरवशेष एव यः कश्चिद् दुःखी दुःखवान्, चशब्दो दृष्टान्तरसमुच्चये,एवं दुःखाऽऽत्मकस्याऽपि तपसो युक्तिमत्त्वाभ्युपगमे सति, स तपस्वी तपोयुक्तः,संप्रसज्यते प्राप्नोति,अनशनाऽऽदिदुःखस्य स्वाध्यादिदुःखस्य च दुःखत्वाऽविशेषात्,दुःखाऽऽत्मकस्य तपसोऽभ्युपगमे च दुःखस्यैव तपस्त्वेनाभ्युपगमादिति भावः। तथाविशिष्टः प्रधानतरः तपस्वी प्रसज्यते इति प्रक्रमः केनेत्याह-तादृशेनेन हेतुना । क इव कनेत्याह-सुधनेन प्रभूतधनेन. धनी महाधना, यथा येन प्रकारेणेति ॥ ८ ॥

अथ सर्व एव दुःखी तपस्वी प्रसज्यतां, को दोषः ?, आह-

महातपस्विनश्चैवं, त्वन्नीत्या नारकाऽऽदयः ।
शमसौख्यप्रधानत्वाद्, योगिनस्स्तुतपस्विनः ॥ ९ ॥

महातपस्विनः विशिष्टतपोधनाः,प्रसज्यन्ते इति गम्यते, चकारो दोषान्तरसमुच्चये, एवमुक्तप्रकारया,त्वन्नीत्या तवन्यायेन,दुःखी तपस्वी अभ्युपगम्यत इत्यर्थः । नारकाऽऽदयो नैरयिकाऽऽदयः,तेषां महादुःखितत्वात्, -आदिशब्दान्महाधेदनाऽभिभूततिर्यगादेः परिग्रहः । शमः स एव सौख्यं शमसौख्यम । यदाह-"तणसंथारनिसन्नो, वि मुणिवरो भट्ठरागमयमोहो । जं पावइ मुत्तिसुहं, कत्तो तं चक्कवट्टी वि ?" ॥१॥ शमसौख्यं प्रधानं येषां ते,तेन वा प्रधाना ये ते तथा, तद्भावस्तत्त्वं, तस्माद्दुःखमसौख्यप्रधानत्वाद्, दुःखितत्वादित्यर्थः । योगिनः समाधिमन्तः,तुशब्दः पुनरर्थः, अतपस्विनः अतपोधनाः, दुःखाऽऽत्मकतपसोऽभावादिति भावना त्वन्नीत्या प्रसज्यन्त इति प्रकृतमेवेति ॥ ९ ॥

पर एव स्वपक्षं निगमयन्नाह-

युक्त्यागमबहिर्भूत-मतस्त्याज्यमिदं बुधैः ।
अशस्ताध्यानजननात्, प्राय आत्माऽपकारकम् ॥ १० ॥

युक्तिश्चोपपत्तिः,आगमश्चाऽऽप्तवचनं.ताभ्यां बहिर्भूतं तद्बाधितं युक्त्यागमबहिर्भूतं, तत्र युक्तिबहिर्भूतता प्राग्वदाशेंना । आगमबहिर्भूतता चैवमवगन्तव्या-"भाविजिणवयणाणं, ममत्तरहियाण नत्थि उवदेसो, अण्णाणम्मि परम्मि य,तो यऊ धीममुज्जो वि" ॥१॥ अनशनाऽऽदौ तु स्वकायपीडा प्रतीतेवेति । अत इति, यस्मादनन्तरोदितदूषणोपेतमत एवमाद्येतोस्त्याज्यं न्यायाद्देमिदमनशनाऽऽदि दुःखाऽऽत्मकं तपः,कैरित्याह-बुधैर्युक्त्यागमहृदयज्ञैः,न तैर्लोकरूढ्या प्रवर्त्तितव्यं भवति.बुधस्वाभाव्यप्रसङ्गादिति हृदयम् । तथाऽऽत्माऽपकारकं स्वस्यानर्थजनकमेव.कुतः ?, अशस्ताध्यानजननात् अप्रशस्ताध्यवसायोत्पादकत्वात्,प्रायो बाहुल्येन,तत्प्रवृत्तेर्हि भोजनाऽऽद्यभावे अप्रशस्तं ध्यानम् । यदाह-"आहारयज्जिते देहे,धातुक्षोभ प्रजायते । तत्र चाऽधिकमर्थोऽपि, चित्तसंक्षोभं समश्नुते ॥ १ ॥" इह च प्रायोग्रहणात् श्रीमन्महावीराऽऽद्यभिर्ध्यभिचारपरिहारो दर्शित इति, अतोऽपि त्याज्यमेवेदं बुधैरिति प्रकृत इति पूर्वपक्षः ॥ १० ॥

अत्र सूरिरुत्तरमाह-

मनइन्द्रिययोगाना-महानिश्चेष्टता जिनैः ।
यतोऽत्र तत्कथं त्वस्य, युक्ता स्याद् दुःखरूपता ? ॥११॥

पूर्वपक्षवादिना यदुक्तम् दुःखाऽऽत्मकं तपो न युक्तिमत्.कर्मोदयस्वरूपत्वात्.तत्र दुःखाऽऽत्मकमिति विशेषणं तपसो न सिद्धमिति तावदाशङ्क्याह-कथम ?, मनश्च चित्तमिन्द्रियाणि च करणानि, योगाश्च प्रत्युपेक्षणाऽऽदयः संयमव्यापारा मनइन्द्रिययोगाः,तेषामहानिश्चेष्टा चोदिता भणिता । अथवा-चशब्दः समुच्चये, तेनानुक्तसुतता च.उदिता उक्ता,जिनैस्तीर्थकरैः,यतो यस्मात्कारणात्, अत्र तपसि । यदाह-

" सो दु तवो कायव्वो, जेण मणो ऽमंगलं न चिंतेइ ।
जेण न इंदियहाणी, जेण य जोगा न हायंति " ॥ १ ॥

तथा—

" ता जह मे देहपीला, न यावि चुयमंससोणियत्तं तु ।
जह धम्मझाणवुड्ढी, तहा इमं होइ कायव्वं ॥ २ ॥"

तदिति तस्मात्कारणात्, कथं केन प्रकारेण ?, न कथञ्चिदित्यर्थः। नु इति वितर्के, अस्य तपसः, युक्ता उपपन्ना, स्याद्भवेत्, दुःखरूपता असुखस्वभावता। तदेवं दुःखाऽऽत्मकत्वं तपसोऽसिद्धं, तदसिद्धावयुक्तमस्वमप्यसिद्धमित्युक्तमिति ॥ ५ ॥

ननु देहपीडाकरत्वेनाऽनशनाऽऽदीनां दुःखस्वरूपत्व-
मनुभूयमानमपि कथमसिद्धमिति व्यपदिश-
न्नाह-

याऽपि चानशनाऽऽदिभ्यः, कायपीडा मनाक् क्वचित् ।
व्याधिक्रियासमा साऽपि, नेष्टसिद्ध्याऽत्र बाधिनी ॥६॥

(याऽपीति) अनशनाऽऽदिभ्य उक्तन्यायेन तावद् देहपीडा न भवत्येव, याऽपि चानशनाऽऽदिभ्य उपवासाऽऽदिभ्यः, आदिशब्दादूनोदरताऽऽदेः सकाशात्, कायपीडा शरीरबाधना, न तु मनःपीडा, मनाक् स्वल्पा, क्वचिद्देशे काले वा, न पुनः सर्वत्र सर्वदा सा संभवति। उक्तन्यायप्रवृत्तस्य साऽपीति इह दृश्यते नासावपि न बाधनी, न वा बाधिका, न मनसो दुःखदा। किमित्यत आह-इष्टसिद्ध्या वाञ्छितार्थसाधनात्, अत्र प्रवचने, किंविधाऽसावित्याह-व्याधिक्रियासमा रोगचिकित्सातुल्या। यथा हि रोगचिकित्सायां मनाक् देहस्य पीडा सत्यपि न बाधिका, आरोग्यनिर्देशः, एवं तपस्यपि देहपीडाभावाऽऽरोग्यसंसिद्धेर्न भावतो बाधिकेति भावनीयमिति ॥ ६ ॥

इष्टार्थसिद्धौ देहपीडाया अदुःखरूपतां दृष्टान्तेन समर्थयन्नाह-

इष्टा चेष्टार्थसंसिद्धौ, कायपीडा ह्यदुःखदा ।
रत्नाऽऽदिवणिगादीनां, तद्वदत्रापि भाव्यताम् ॥ ७ ॥

न केवलमस्माभिरेवेदमुपन्यस्ता, इष्टा च लोके भवलोकिता, इष्टार्थसंसिद्ध्यनिप्रेतप्रयोजनप्राप्तौ सत्यां, कायपीडा देहबाधा, हिशब्दः स्फुटार्थः, अदुःखदा न पीडाकारिणी, केषामित्याह-रत्नानि मरकताऽऽदीनि, आदिर्येषां वस्त्रसुवर्णाऽऽदीनां तानि तथा तेषां, वणिज् वाणिजको रत्नाऽऽदिर्वणिक्, स आदिर्येषां कृषिबलाऽऽदीनां ते तथा तेषां, रत्नाऽऽदिवणिगादीनाम्। ततः किमित्याह-तेषामिव वणिगादीनामिव तद्वत्, अत्रापि अनशनाऽऽदितपोविषयेऽपि, भाव्यतां निपुणधिया पर्यालोच्यताम्। तथाहि-रत्नसुवर्णवसनाऽऽदिवणिक्कृषीबलाऽऽदीनां ममीहितार्थसंसिद्धिबद्धनिश्चयानाम् अपारपारावारापतारकान्तारनिस्तरणधरणीकर्षणाऽऽदिविविधव्यापारपराणानां क्षुत्पिपासा-श्रमाऽऽदिजनितदेहपीडा न मनोविधुरताऽऽधायिनी; एवं साधूनामपारसंसारसागरसंचिरादुत्तितीर्षूणामनशनोनोदरताऽऽदितपोजनितदेहपीडा न मनोबाधाविधायिनीति ॥

इह पुनर्विशेषसम्प्रदाय केचिदेवमूचुः-

किल कोऽपि दरिद्रवणिजको दूरदेशान्तरं गत्वा कथं कथमपि रत्नान्युपार्जितवान्, चिन्तितवांश्च-कथमहमेतानि महामूल्यानि सर्वोऽऽशासम्पादकानि महारत्नानि चौरव्याकुलमरण्यं निस्तीर्य स्वनगरं गत्वोपभोगं नेष्यामि ?। ततस्तेनोत्पन्नबुद्धिना तान्येकत्र स्थाने निहितानि, काचाऽऽदिसकलानि च पोट्टलिकायां बद्धानि। सा च दृष्टाभ्रे निबद्धा। ततश्चोत्पतितप्रायेणाऽहो! रत्नवणिजको गच्छतीत्येवं महता शब्देन व्याहरन्नरण्यमतिक्रामति स्म। ततो मार्गे पल्लीषु ये जनाः, ते तं वीक्ष्य ससंभ्रममागत्य निभालयन्ति स्म। अपश्यंश्च काचाऽऽदिशकलानि, अवधीरितवन्तश्च ग्रहगृहीतोऽयमिति विभावयन्तः। ततः पुनरपि तथैव निवृत्तः, तत्रापि यैः पूर्वं न वीक्षित आसीत्, ते तथैव वीक्षितवन्तोऽवधीरितवन्तश्च। एवं पुनरपि असावरण्यमध्येन गतवान्। ततस्तृतीयवेलायामतिपरिचितत्वादवधीरितस्तस्करजनेन। ततोऽसौ निश्चितवान्-न मां कोऽपि अत्राऽरण्यमार्गे स्खलयिष्यति। इति निश्चित्य रत्नानि गृहीत्वा शीघ्रं तदुपयोगाय वाञ्छितपुरप्राप्तावरण्यात्तन्निर्वाहणे चातीवौत्सुक्येनाऽनवरतं महाप्रयाणकैः क्षुत्पिपासाश्रमाऽऽदीन् भवतो नूपसोऽप्यवगणयन् गन्तुं प्रवृत्तः। बहुतरमार्गमतिलङ्घितः सन् पिपासाऽभिभूतो भावयामास-अहो! अहमद्य जलं विना म्रिये, न च रत्नोपभोगभाजनं भवामीत्येवं भावयता मरणभयजनितेन रत्नोपभोगाऽऽकाङ्क्षिणा दृष्टं सरः पङ्कप्रायपानीयं पङ्कमग्नमृगाऽऽदिकडेवरपूयकृमिजालव्याकुलं विलीनमतिदुर्गन्धं विरसतुच्छजलम्। दृष्ट्वा च गन्धमाघ्रता रसमनास्वादयता दुष्करकरणं कुर्वता अक्षिणी निमील्याञ्जलिभिस्तत् पीतवान्, परं स्वास्थ्यं नागमत्, तदुपहन्यमानश्च क्षीणपिपासादुःखोत्क्षेपेणेष्टपुरं प्राप्तः, रत्नोपयोगसुखं चेति। उपनयस्तु प्रागुक्त एवेति ॥ ७ ॥

तदेवं दुःखाऽऽत्मकतां तपसो व्युदस्य कर्मोदय-
स्वरूपतां व्युदस्यन्नाह-

विशिष्टज्ञानसंवेग-शमसारमतस्तपः ।
क्षायोपशमिकं ज्ञेय-मव्याबाधसुखाऽऽत्मकम् ॥ ८ ॥

विशिष्टाः प्रधानाः सम्यग्दर्शनविशेषितत्वात्-ज्ञानं च तत्त्वसंवेदनं, संवेगश्च संसारभयं, मुक्तिमार्गाभिलाषिता वा, शमश्च कषायेन्द्रियमनसां निरोधः, ज्ञानसंवेगशमाः, विशिष्टाश्च ते चेति कर्मधारयः। तत एव सारोऽन्तर्गतो यस्य, तत्तथा सारं यत्तत्तथा। ज्ञानाऽऽदिसारमेव तपस्तपो भवति, नेतरदल्पफलत्वात्। यदाह-"सड्ढी वाससहस्सा" गाहा। "वज्जीवकायवहगा" गाहा। अत इति। यस्मादुक्तयुक्तेर्दुःखाऽऽत्मकमत एतस्माद्धेतोस्तपोऽनशनाऽऽदि। किमित्याह-त्रयेण उदीर्णचरित्रमोहनीयकर्मक्षयक्षयोपशमलक्षणेन विपाकापेक्षया विष्कम्भितोदयत्वं क्षयोपशमः, तत्र भवं क्षायोपशमिकम्, ज्ञेयं ज्ञातव्यम्। न पुनः कर्मोदयस्वरूपम्। तथा अविद्यमाना व्याबाधा अविरतिजनिता अनन्तराः पारम्पर्यकृता वा ऐहिक्यः पारत्रिका वा यस्मिंस्तदव्याबाधं, तच्च तत्सुखं च तदेवाऽऽत्मा स्वभावो यस्य तदव्याबाधसुखाऽऽत्मकं प्रशमसुखाऽऽत्मकसिद्धसुखानुकारीत्यर्थः। अनेन च श्लोकेन तपसोऽकर्मोदयस्वरूपत्वमसुखस्वरूपत्वं चाऽऽवेदितम्।

उक्तं चैतदन्यत्रापि-

" जं इय इमं न दुक्खं, कम्मविवागो वि सव्वहा नेवं ।
खाउवसमिए भावे, एयं ति जिणागमे भणियं ॥ १ ॥
खंताइसाहुधम्मे, तवगहणं सो खओवसमियम्मि ।
भावम्मि विणिद्दिट्ठे, दुक्खं चोएइ मे सव्वं ॥ २ ॥"

एतेन च तपसो दुःखरूपत्वकर्मोदयस्वरूपत्वपरिहारेण सर्वं एव हि दुःखेत्यादिश्लोकद्वयाभिहितं तपोवृषणं सर्वं परिहृतमवगन्तव्यम्, दुःखस्वरूपत्वाऽऽश्रयत्वात्तस्येति। अन्ये त्विदमष्टकमेवं व्याचक्षते-दुःखाऽऽत्मकं, दुःखमेवेत्यर्थः। तपः केचिन्मन्यन्ते, तदेव दुःखाऽऽत्मकतयोपमननं न युक्तिमत्। कुत इत्याह-कर्मोदयस्वरूपत्वाद् दुःखस्य। किंवदित्याह-बलीवर्दाऽऽदिदुःखवत्, तपसश्च क्षायोपशमिकत्वादिति। इहैव दृष्टा-

न्तराभिधानायाऽऽह-सर्व एव चेत्यादि श्लोकद्वयम्। अथवा दुःखाऽऽत्मकं तपः केचिन्मन्यन्ते कर्मोदयस्वरूपत्वाद् बह्वीवर्ह्याऽऽदिशब्देन क्विोषितत्वाद् दृष्टान्तस्येति सङ्केतुरेवायं वृक्षोऽयं, शाखाऽऽद्यिमत्त्वात्, ग्रामवृक्षवदित्यादिवदिति । अत्राऽऽचार्य आह-तन्न युक्तिमदिति । कुत इत्याह--सर्व एव चेत्यादि श्लोकद्वयम् । इह चशब्दो यस्मादर्थे द्रष्टव्यः । आचार्य एवोभयत्र परस्योपदेशमाह-युक्त्यागमेत्यादि । इदमिति तपसो दुःखाऽऽत्मकत्वमननं, शेषं तु श्लोकचतुष्टयं पूर्ववदेव, नवरं "मनश्चेन्द्रियसंयोगानामहानिश्चोदिता जिनैः," इत्यत्र चशब्दः पूर्वोक्तयुक्त्यपेक्षया युक्त्यन्तरसमुच्चयार्थो द्रष्टव्य इति ॥ ८ ॥ हा० ११ अष्ट० ।

तपश्चान्द्रायणं कृच्छ्रं, मृत्युघ्नं पापसूदनम् ।
आदिधार्मिकयोग्यं स्या-दपि लौकिकमुत्तमम् ॥१७॥

तप इति । लौकिकमपि लोकसिद्धमपि, अपिर्लोकोत्तरं समुच्चिनोति, उत्तमं स्वभूमिकोचितशुभाध्यवसायपोषकम् । द्वा० १२ द्वा० । यो० विं० ।

ज्ञानसारीयं तपोऽष्टकम्-

ज्ञानमेव बुधाः प्राहुः, कर्मणां तापनात्तपः ।
तदाभ्यन्तरमेवेष्टं,बाह्यं तदुपबृंहकम् ॥ १ ॥
आनुस्रोतसिकी वृत्ति-र्बालानां सुखशीलता ।
प्रातिस्रोतसिकी वृत्ति-र्ज्ञानिनां परमं तपः ॥ २ ॥
धनार्थिनां यथा नास्ति, शीततापाऽऽदि दुःसहम् ।
तथा भवविरक्तानां, तथज्ञानार्थिनामपि ॥ ३ ॥
सदुपायप्रवृत्तानां-मुपेयमधुरत्वतः ।
ज्ञानिनां नित्यमानन्द-वृद्धिरेव तपस्विनाम् ॥ ४ ॥
इत्थं च दुःखरूपत्वा-त्तपो व्यर्थमितीच्छताम् ।
बौद्धानां निहता बुद्धि-र्बौद्धाऽऽनन्दाऽपरिज्ञयात् ॥५॥
यत्र ब्रह्मजिनार्चा च, कषायाणां तथा हतिः ।
सानुबन्धा जिनाऽऽज्ञा च, तत्तपः शुद्धमिष्यते ॥ ६ ॥
तदेव हि तपः कार्यं, दुर्ध्यानं यत्र नो भवेत् ।
येन योगा न हीयन्ते, क्षीयन्ते नेन्द्रियाणि वा ॥ ७ ॥
मूलोत्तरगुणश्रेणि-प्राज्यसाम्राज्यसिद्धये ।
बाह्यमाभ्यन्तरं चेत्थं, तपः कुर्यान्महामुनिः ॥ ८ ॥ अष्ट० ३१ अष्ट० ।

('भिक्खाग' शब्दे तेषां चतुर्विधं तपो वक्ष्यते) (कियताऽनशनेन कियती निर्जरा भवतीति ' अम्मइल्लाय ' शब्दे प्रथमभागे ४४४ पृष्ठे द्रष्टव्या)

प्रकीर्णकतपांसि-

एसो बारसभेओ, सुत्तनिबद्धो तवो सुणेयव्वो ।
एयविसेसो उ इमो, पइण्णगोऽणेगभेउ त्ति ॥ ४ ॥

इह तपःशब्दस्य प्राकृतत्वेन पुंस्त्वनिर्देशः । एतदनन्तरोक्तं द्वादशभेदसूत्रत्वेषां भेदानां मीलनत्वात्। सूत्रनिबद्धं शासनोक्तम्, तपस्तप्त्या (सुणेयव्वो त्ति) ज्ञातव्यम्। एतद्विशेषस्तु अनन्तरोक्ततपोभेद एव (इमो त्ति) इदं वक्ष्यमाणं तपः प्रकीर्णकं व्यक्तितः सूत्रनिबद्धम्, न जिनप्रतिमाऽऽदिवत्सूत्रे निबद्धमित्यर्थः । न चोत्सूत्रत्वमस्य, द्वादशभेदतपस्यन्तर्भावात् । तच्चाऽनेकभेदमनेकविधाऽऽलम्बनत्वात् । इतिशब्दः समाप्तौ । इति गाथाऽर्थः ॥ ४ ॥

प्रकीर्णकमेव तपो दर्शयन्नाह--

तित्थयराणिग्गमाई, सव्वगुणपसाहणं तवो होइ ।
भव्वाण हिओ णियमा, विसेसओ पढमवत्ताणं ॥५॥

तीर्थकरनिर्गमाऽऽदि येन तपसा तीर्थकरा निष्क्रान्ताः; आदिशब्दात्तीर्थकरज्ञाननिर्वाणाऽऽदिग्रहः। किंभूतमिदमित्याह-सर्वगुणसाधकं तीर्थकरनिर्गमनाऽऽद्यालम्बनस्य शुभभावप्रकर्षरूपत्वेन ऐहलौकिकाऽऽद्युपकारकारित्वात्। तपो भवतीति व्यक्तम्। अत एव भव्यानां हितं नियमादिति व्यक्तम् । विशेषतः पुनः प्रथमस्थानिनामव्युत्पन्नबुद्धीनां हितत्वादेव निरालम्बनतयाऽपि शुभभावप्रकर्षसंभवात् सर्वमपि हितमेवेति गाथाऽर्थः ॥ ५ ॥ पञ्चा० १६ विव० ।

चान्द्रायणाऽऽदितपः-

चंदायणाइ य तहा, अणुलोमविलोमओ तवो अवरो ।
णिक्खाकवलाण पुढो, विसेओ वुड्ढिहाणीहिं ॥ १८ ॥

चन्द्रायणमिव चन्द्रायणं, तदादि च, आदिशब्दाद्यवमहामवद्रासर्वतोभद्ररत्नावलीकनकावलेयैकावलीसिंहनिष्क्रीडितद्वयाऽऽचाम्लवर्द्धमानगुणरत्नसंवत्सरसप्तसप्तमिकाऽऽदिचतुष्टयकल्याणकाऽऽदितपसामागमप्रसिद्धानां ग्रहः। तथेति वाक्यान्तरोपक्षेपार्थो गाथाऽऽदौ द्रष्टव्यः । अनुलोमविलोमतो गतप्रत्यागत्या, तपोऽपरमन्यत् । कथम्?, भिक्षाकवलानां प्रतीतानां, पृथग्नेदेन, विक्षेपो ज्ञेयो वृद्धिहानिभ्यामिति गाथाऽऽर्थः ॥ १८ ॥ पञ्चा० १६ विव० ।

रोहिण्यादितपः-

अन्नो वि अत्थि चित्तो, तहा तहा देवयाणिओएण ।
मुद्धजणाण हिओ खलु, रोहिणिमाई मुणेयव्वो ॥२३॥

अन्यदपि, अस्ति विद्यते, चित्रम्, तप इति गम्यते। तथा तथा तेन तेन प्रकारेण लोकरूढेन, देवतानियोगेन देवतोद्देशेन मुग्धजनानामव्युत्पन्नबुद्धिलोकानां, हितं खलु पथ्यमेव, विषयाद्व्यासरूपत्वात् । रोहिण्यादिदेवतोद्देशेन यत्तद्रोहिण्यादि । (मुणेयव्वो त्ति) ज्ञातव्यम्। पुंल्लिङ्गता च सर्वत्र प्राकृतत्वादिति गाथाऽर्थः ॥ २३ ॥

देवता एव दर्शयन्नाह--

रोहिणि अंबाय तहा, मंदउणिणया सव्वसंपयासोक्खा ।
सुयसंतिसुरा काली, सिरुआईया तहा चेव ॥ २४ ॥

रोहिणी १ अम्बा २, तथा मन्दपुण्यिका ३, (सव्वसंपयासोक्ख त्ति) सर्वसंपत् ४, सर्वसौख्या चेत्यर्थः ५। (सुयसंतिसुर त्ति) श्रुतदेवता ६, शान्तिदेवता चेत्यर्थः ७। "सुयदेवयसंतिसुरा" इति वा पाठान्तरम् , व्यक्तं च । काली ८, सिरुआयिका ९, इत्येता नव देवताः। तथा चैवेति समुच्चयार्थः। "संवाइया चेव" त्ति पाठान्तरमिति गाथाऽर्थः ॥ २४ ॥

ततः किमित्याह-

एमाइदेवयाओ, पसुत्त अवउसगा उ जे चित्ता ।

पाणादेसपसिद्धा, ते सव्वे चेव होइ तवो ॥ २५ ॥

एवमादिदेवताः प्रतीत्यैतदाराधनयेत्यर्थः । (अवऊसग त्ति) अपवसनानि अवजोषणानि वा । तुः पूरणे । ये चित्रा नानादेशप्रसिद्धास्ते सर्वे चैव भवन्ति तप इति स्फुटमिति । तत्र रोहिणीतपो रोहिणीनक्षत्रादिनोपवासः सप्तमासाधिकसप्तवर्षाणि यावत् । तत्र च वासुपूज्यजिनप्रतिमाप्रतिष्ठा पूजा च विधेयेति । तथा बाह्य (अम्बा) तपः पञ्चसु पञ्चमीष्वेकाशनाऽऽदि विधेयम् । नेमिनाथाम्बिकापूजा चेति । तथा श्रुतदेवतातप एकादशस्वेकादशोपवासो मौनव्रतं श्रुतदेवतापूजा चेति । शेषाणि तु रूढितोऽवसेयानीति गाथाऽर्थः ॥ २५ ॥

अथ कथं देवतोद्देशेन विधीयमानं यथोक्तं तपः स्यादित्याशङ्क्याऽऽह-

जत्थ कसायणिरोहो, बंभं जिणपूयणं अणसणं च ।
सो सव्वो चेव तवो, विसेसओ मुद्धलोयम्मि ॥ २६ ॥

यत्र तपसि कषायनिरोधो ब्रह्म जिनपूजनमिति व्यक्तम् । अनशनं च भोजनत्यागः । (सो त्ति) तत्सर्वं भवति तपो विशेषतः मुग्धलोके । मुग्धलोको हि तथा प्रथमतया प्रवृत्तः सन्नन्यासात्कर्मक्षयोद्देशेनाऽपि प्रवर्त्तते, न पुनरादित एव तदर्थं प्रवर्त्तितुं शक्नोति, मुग्धत्वादेवेति । सद्गुरुवयस्तु मोक्षार्थमेव विहितमिदमिति बुद्ध्वैव वा तपस्यन्ति । यदाह-" मोक्षायैव तु घटते, विशिष्टमतिरुत्तमः पुरुषः । " इति । मोक्षार्थघटना चाऽऽगमविधिनैव । आलम्बनान्तरस्यानाभोगहेतुत्वादिति गाथाऽर्थः ॥ २६ ॥

न चेदं देवतोद्देशेन तपः सर्वथा निष्फलमैहिकफलमेव वा, चरणहेतुत्वादपीति चरणहेतुत्वमस्य दर्शयन्नाह-

एवं पमिवत्तीए, एत्तो मग्गाणुसारिभावाओ ।
चरणं विहियं बहुओ, पत्ता जीवा महाभागा ॥ २७ ॥

एवमित्युक्तानां साधर्मिकदेवतानां कुशलानुष्ठानेषु निरुपसर्गत्वाऽऽदिहेतुना, प्रतिपत्त्या तपोरूपोपचारेण; तथा इत एतस्मात्कषायाऽऽदिनिरोधप्रधानात्तपसः । पाठान्तरेण-एवमुक्तकरणेन मार्गानुसारिभावात् सिद्धिपथानुकूलाध्यवसायाच्चरणं चारित्रम्, विहितमाप्तोपदिष्टं, बहवः प्रभूताः, प्राप्ता अधिगताः, जीवाः सत्त्वाः, महाभागाः महानुभावा इति गाथाऽर्थः ॥२७॥

तथा-

सव्वंगसुंदरो तह, णिरुजसिहो परमभूसणो चेव ।
आयइजणणो सोह-मकप्परुक्खो तहऽच्चो वि ॥२८॥
पढिओ तवोविसेसो, अन्नेहिं वि तेहि तेहिं सत्थेहिं ।
मग्गपमिवत्तिहेउं, इंदि विणयाणुगुणेणं ॥ २९ ॥

सर्वाङ्गानि सुन्दराणि यतस्तपोविशेषात्स सर्वाङ्गसुन्दरः । तथेति समुच्चये । रुजानां रोगाणामभावो निरुजं, तदेव शिखेव शिखा प्रधानं फलतया यत्राऽसौ निरुजशिखः । तथा परमाण्युत्तमानि भूषणान्याभरणानि यत्रेऽसौ परमभूषणः । चैवेति समुच्चये । तथा आयतौ आगामिकालेऽभीष्टफलं जनयति करोति योऽसावायतिजनकः । तथा-सौभाग्यस्य सुभगतायाः संपादने कल्पवृक्ष इव यः स सौभाग्यकल्पवृक्षः । तथेति समुच्चये । अन्योऽप्यपरोऽपि उक्ततपोविशेषात् ॥ २८ ॥ किमित्याह-पठितोऽधीतस्तपोविशेषस्तपोभेदः, अन्यैरपि ग्रन्थकारैः, तेषु तेषु शास्त्रेषु, नानाग्रन्थेष्वित्यर्थः । नन्वयं पठितोऽपि सामिष्वङ्गत्वान्न मुक्तिमार्ग इत्याशङ्क्याऽऽह-मार्गप्रतिपत्तिहेतुः शिवपथाऽऽश्रयणकारणम् । यश्च तत्प्रतिपत्तिहेतुः स मार्ग एवोपचारात्, कथमिदमिति चेदुच्यते-इन्द्रीत्युपप्रदर्शने । विनेयानुगुण्येन शिक्षणीयस्वानुरूप्येण भवन्ति हि केचित्ते विनेया ये सामिष्वङ्गानुष्ठानप्रवृत्ताः सन्तो निरभिष्वङ्गमनुष्ठानं लभन्ते इति गाथाद्वयार्थः ॥ २९ ॥ पञ्चा० १७ विव० ।

अथैते तपोविशेषा आगमे नोपलक्ष्यन्त इत्याशङ्कां परिहरन्नाह-

चित्तं चित्तपयुयं, जिणिंदवयणं असेससत्तहियं ।
परिसुद्धमेत्थ किं तं, जं जीवाणं हियं णऽत्थि ॥३०॥

चित्रमद्भुतमनेकातिशयाऽनिधानत्वाद्भावनाऽऽदिभेदत्वाद्वा चित्रमनेकविधम् । तथा चित्रपदयुतं नानाविधार्थप्रतिपादकाभिधानयुक्तम्, जिनेन्द्रवचनं जिनेश्वराऽऽगमः, अशेषसत्त्वहितं समस्तप्राण्युपकारकं, नव्यानुसारेण मार्गप्रतिपत्त्युपायप्रतिपादनपरत्वात् । परिशुद्धं कषच्छेदतापविशुद्धं सुवर्णमिव निर्दोषम् । एवं चाऽस्मिन् जिनवचने किं तज्जीवानां हितं नास्ति ?, सर्वमपि जीवानां हितमस्तीत्यत इदं तपः परिहृश्यमानाऽऽगमेऽनुपलभ्यमानमप्युपलब्धमिवावगन्तव्यं, तथाविधजनहितत्वादिति गाथाऽर्थः ॥ ३० ॥

तथा-

सव्वगुणपसाहण मो,णेओ तिहिँ अट्ठमेहिँ परिसुद्धो ।
दंसणणाणचरित्ता-ण एस रेसिम्मि सुपसत्थो ॥ ४० ॥

सर्वगुणप्रसाधनः सकलगुणाऽऽवह इति पर्यायस्तपोविशेषः । 'मो' निपातः पूरणार्थः । श्रेयोऽवसेयः, त्रिनिरष्टमैरुपवासत्रयलक्षणैः, परिशुद्धोऽनवद्यः, दर्शनज्ञानचरित्राणां प्रतीतानाम्, एषोऽयम् । (रेसिम्मि त्ति) निमित्तं, सुप्रशस्तोऽतिशयवानुन्नः । तत्रैकमष्टमं दर्शनगुणशुद्धये, एवमपरद्वयं त्रयपरिशुद्धये इति गाथाऽर्थः ॥ ४० ॥

अथ सर्वाङ्गसुन्दराऽऽदितपस्सु सनिदान एव प्राणी प्रवर्त्तते, ततो न न्याय्यान्येतानीत्याशङ्कापरिहारार्थमनिदानतामेषु प्रवृत्तस्य दर्शयन्नाह-

एएसु वट्टमाणो, जावपवित्तीए बीयजावाओ ।
सुद्धाऽऽसयजोगेणं, अणियाणो भवविरागाओ ॥४१॥

एतेष्वनन्तरोक्ततपस्सु प्रवर्तमानो व्याप्रियमाणो जीवः । " एतेसु बहुमाणा " इति पाठान्तरं, व्यक्तं च । कया ?, जावप्रवृत्त्या बहुमानसारक्रियया, अनिदान इति योगः । कुत इत्याह-बीजभावात् बोधिबीजविफलस्य देहिनो बोधिबीजजननेन । एतदेव कथमित्याह-शुद्धाऽऽशययोगेन शुभाध्यवसायसंबन्धेन । शुभाध्यवसायाद्धि बोधिबीजं स्यात् । अनिदानो निदानरहितः स्यात् । तथा-भवविरागात्संसारनिर्वेदाद्यात्किल भवविरागाऽऽदिनिमित्तं तन्निदानं न भवति बोद्ध्यादिप्रार्थनमिव, भवविरागाऽऽदिहेतवश्चोक्ततपांसि केषाञ्चिदतो निर्निदानानि, इति गाथाऽर्थः ॥ ४१ ॥

निर्निदानत्वादेवैतेषां निर्वाणाङ्गतामाचार्यान्तरमतेनाऽपि दर्शयन्नाह-

विसयमरूवऽणुबंधे-हि तह य सुद्धं जओ अणुट्ठाणं ।
णिव्वाणंगं भणियं, अन्नेहि वि जोगमग्गम्मि ॥ ४२ ॥

एयं च विसयसुद्धं, एगंतेणेव जं तओ जुत्तं ।
आरोग्गबोहिलाभा-इपत्थणाचित्ततुल्लं ति ॥ ४३ ॥

विषयो गोचर उक्ततपसामाक्षम्बनीयस्तीर्थकरनिर्गमाऽऽदिः, स्वरूपमुक्ततपसामेव स्वभाव आहारत्यागब्रह्मचर्यजिनपूजासाधुदानाऽऽदिलक्षणः, अनुबन्धश्च तत्परिणामाव्यवच्छेदतः प्रकर्षयायिता, अतस्तेषु विषयस्वरूपानुबन्धेषु । तथा चेति समुच्चये । शुद्धं निरवद्यं, यतो यस्मात्कारणाद्, अनुष्ठानं क्रिया, निर्वाणाङ्गं मुक्तिकारणम्, भणितमुक्तम्, अन्यैरपि तन्त्रान्तरीयैः, किं पुनर्जिनैः, योगमार्गेऽध्यात्मशास्त्रपथे । अतो विषयाऽऽदिशुद्धतयैतेषां निर्वाणाङ्गत्वाभिधानेति हृदयमिति ॥ ४२ ॥ एतच्च एतत्पुनरनन्तरोक्तं तपः, विषयशुद्धं निर्दोषगोचरं, सकलदोषमेषिजिनपतिविषयत्वात् । एकान्तेनैव सर्वथैव, यद्यस्मात्ततः तस्माद्धेतोर्युक्तं सङ्गतम्, प्रार्थनागर्भमपीदं तपः । कुतः?, इत्याह-आरोग्यबोधिलाभाऽऽदीनाम्-" आरोग्गबोहिलाभं, समाहिवरमुत्तमं दिंतु" इति । एवंरूपा या प्रार्थना याचना, तत्प्रधानं यच्चित्तं मनस्तेन तुल्यं समानं यत्तदारोग्यबोधिलाभाऽऽदिप्रार्थनाचित्ततुल्यम्, इति कृत्वा । इति गाथाद्वयार्थः ॥ ४३ ॥

एवमनन्तरोक्तं तपो निर्निदानमिति व्यवस्थापितमथोपदिशन्नाह-

जम्हा एसो सुद्धो, अणियाणो होइ नाविधम्मइणं ।
तम्हा करेह सम्मं, जह विरहो होइ कम्माणं ॥ ४४ ॥

यस्मात्कारणात्, (एसो त्ति) इदमनन्तरोक्तं तपः, शुद्धं निर्दोषम्, भवति स्यात् । किंभूतं सदित्याह-अनिदानं प्राग्युक्तयुक्त्या निदानवर्जितम् । केषामिदमेवंविधमित्याह-भावितमतीनां सदागमवासितमानसानाम्, तस्मात्कारणात्, कुरुत विधत्त । एतदेवेति गम्यम्, सम्यग् भावशुद्ध्या । एतदेव व्यक्ततरमाह-यथा येन प्रकारेण, विरहो विनाशो, भवति जायते, कर्मणां ज्ञानाऽऽवरणाऽऽदीनाम् । (४४) पञ्चा०१६ विव० प्रव० सांवत्सरिकपाक्षिकाष्टमीज्ञानपञ्चमीरोहिणीतपांसि येन यावज्जीवमुच्चारितानि भवन्ति, स रोहिण्या अग्रतः पृष्ठतो वा आगमने षष्ठकरणशक्त्यभावे किं करोतीति प्रश्ने, उत्तरम्-अत्र सर्वथा षष्ठकरणशक्त्यभावे यत्तपः प्रथममागच्छति तत्तपः प्रथमं करोति, स्थितं तु पश्चात्कृत्वा प्रापयतीति । ३४ प्र० । द्वी० ४ प्रका० । रोहिणीदिनाऽऽराधकानां काश्चिद् मिथ्यामतिर्न यातीति प्रश्ने,उत्तरम्-रोहिणीदिनाऽऽराधकानां मिथ्यामतिर्हीता नास्ति । ६ प्र० । द्वी० १ प्रका० ।

तपस्तथा कर्त्तव्यं यथा शरीरक्षानिर्न स्यात्-

तवसो अ पिवासाई, संतो वि न दुक्खरूवगा जेआ ।
जं ते खयस्स हेऊ, निद्दिट्ठा कम्मवाहिस्स ॥ १० ॥

तपसश्च पिपासाऽऽदयः सन्तोऽपि भिक्षाऽऽदानाऽऽदौ न दुःखरूपा ज्ञेयाः । किमित्याह-यद् यस्मात्ते पिपासाऽऽदयः क्षयस्य हेतवो निर्दिष्टा भगवद्भिः कर्मव्याधेरिति गाथार्थः ॥ १० ॥

तथाहि-

वाहिस्स य खयहेऊ, सेविज्जंता कुणंति धिइमेव ।
कम्मुणाई वि जणस्सा, ईसिं दंसियगाऽऽरोग्गं ॥ ११ ॥

व्याधेरपि कुष्ठाऽऽदेः क्षयहेतवः सेव्यमानाः कुर्वन्ति धृतिमेव कटुकाऽऽदयोऽपि जनस्य ईषद्दर्शयन्त आरोग्यम्, अनुभवसिद्धमेतदिति गाथार्थः ॥ ११ ॥

किमेव दृष्टान्तोऽयमर्थोपनयः-

इअ एए चिअ मुणिणो, कुणंति धिइमेव सुद्धभावस्स ।
गुरुआणासंपाडण-चरणाइ सयं निदंसंता ॥ १२ ॥

(इय) एवमेवैव क्षुदाद्यो मुनेः कुर्वन्ति धृतिमेव, न तु दुःखं, शुद्धभावस्य रागाऽऽदिविरहितस्य, किं दर्शयन्तः सन्तः?, गुर्वाज्ञासंपादनचरणादि स्वयं निदर्शयन्त इति गाथार्थः ॥१२॥

ण य ते वि होंति पायं, अविअप्पं धम्मसाहणमइस्स ।
न य एगंतेणं चिय, ते कायव्वा जओ भणियं ॥ १३ ॥

न च तेऽपि भवन्ति प्रायः क्षुदाद्यः, अविकल्पं मातृस्थानविरहेण धर्मसाधनमतेः प्रव्रजितस्य धर्मप्रभावादेव, न चैकान्तेनैव ते क्षुदाद्यः कर्त्तव्या मोहोपशमाऽऽदिव्यतिरेकेण यतो भणितमिति गाथार्थः ॥ १३ ॥

किं तदित्याह-

सो हु तवो कायव्वो, जेण मणोऽमंगलं न चिंतेइ ।
जेण न इंदियहाणी, जेण य जोगा ण हायंति ॥ १४ ॥

तच्चि तपः कर्त्तव्यमनशनाऽऽदि, येन मनोऽमङ्गलमसुन्दरं न चिन्तयति,शुभाध्यवसायनिमित्तात्कर्मक्षयस्य । तथा येनेन्द्रियहानिः,तदभावे प्रत्युपेक्षणाऽऽद्यभावात्, येन च योगाश्चक्रवालसामाचार्यन्तर्गताः व्यापारा न हीयन्ते इति गाथार्थः ॥ १४ ॥

देहे वि अपडिबद्धो, जो सो गहणं करेइ अन्नस्स ।
विहिआणुट्ठाणमिणं, ति कह तओ पावविसओत्ति ?॥१५॥

देहेऽप्यप्रतिबद्धो यः विवेकात्स ग्रहणं करोत्यन्नस्यौदनाऽऽदेर्विहितानुष्ठानमिति, न तु लोभाद्,यतश्चैवमतः कथमसौ पापविषय इति ?, नैव पापविषयः, एतेन कथं न पापविषय इत्येतत्प्रयुक्तमिति गाथार्थः ॥ १५ ॥

किं च-

तत्थ वि अधम्मझाणं, न य आसंसा तओ अ सुहमेव ।
सव्वमियमणुट्ठाणं, सुहाऽऽवहं होइ विन्नेअं ॥ १६ ॥

तत्रापि चान्नग्रहणादौ धर्म्मध्यानं सूत्राऽऽज्ञासंपादनात्, न चाशंसा, सर्वैश्चैवाभिष्वङ्गनिवृत्तेः । यतश्चैवं ततश्च सुखमेव, तत्राऽपि सर्वं यस्मात्राऽऽदि (इयं) एवमुक्तेन न्यायेन सूत्राऽऽज्ञासंपादनाऽऽदिना अनुष्ठानं साधुसंबन्धि सुखाऽऽवहं, भवति विज्ञेयमिति गाथार्थः ॥ १६ ॥ पं० व० १ द्वार । " जहेव पायच्छित्ता ण धविसंति, तहा ससत्तीए तवो कम्मं णाणुट्ठेइ, तओ चउगुणं चउगुणं पायच्छित्तं । " महा० १ चू० ।

पर्वसु तपो न करोति-

संते बलवीरियपुरिसयारपरक्कमे अट्ठमिचाउद्दसीणाणपंचमीपज्जोसवणचाउम्मासिए चउत्थऽट्ठमछट्ठे ण करेज्जा खवणं कप्पं णायरइ चउत्थं कप्पं परिचविज्जा पुव्वाइसं । महा० १ चू० ।

" णो पूयणं तवसा आवहेज्जा । " (२७) नापि तपसा पूजनसत्कारमावहेत्, न पूजनसत्कारनिमित्तं तपः कुर्यादित्यर्थः । यदि वा-पूजासत्कारनिमित्तत्वेन तयाविधार्थत्वेन वा महताऽपि केनचित्तपो मुक्तिहेतुकं न निःसारं कुर्यात् । तदुक्तम्-" परलो-

काधिकं धाम. तपः भूतमिति हवम् । तदेवाधिरूढनिलुप्त-सारं तृणलवायते " ॥ १ ॥ (२७) सूत्र० १ श्रु० ७ अ० ।

चतुर्विधमाजीविकानां तपः--

आजीवियाणं चउव्विहे तवे पण्णत्ते। तं जहा–उग्गतवे, घोरतवे, रसनिज्जूहणया. जिब्भिंदियपडिसंलीणया ।

(आजीवियाणं इत्यादि) आजीविकानां गोशालकशिष्याणाम्. इयं तपोऽष्टमाऽऽदि. क्वचन-"उरमिति" पाठः।तत्र उरं शोभनम। इहलोकाऽऽशंसारहितत्वेनेति घोरमात्मनिरपेक्षं (रसनिज्जूहणया) घृताऽऽदिरसपरित्यागः जिह्वेन्द्रियप्रतिसंलीनता मनोज्ञामनोज्ञेष्वाहारेषु रागद्वेषपरिहार इति; आर्हतानां तु द्वादशधेति । स्था० ४ ठा० २ उ० ।

पर्युषणायामष्टमाऽऽदि तपोऽवश्यं कर्तव्यमिति । कल्प० १ क्षण । बाह्यतपसि,आ०क० । कथाऽन्यत्र)शारीराऽऽदि त्रिविधं तपः कैश्चिद्गु शारीराऽऽदिभेदं त्रिविधमप्युच्यते । यदुक्तं गुरुगुणषट्त्रिंशिकावृत्तौ-कैश्चित्तपस्त्रिविधं शारीराऽऽदिभेदमप्युच्यते ।

यथा-

" देवातिथिगुरुप्राज्ञ-पूजनं शौचमार्जवम् ।
ब्रह्मचर्यमहिंसा च, शारीरं तप उच्यते ॥ १ ॥
अनुद्वेगकरं वाक्यं, सत्यं प्रियहितं च यत् ।
स्वाध्यायाभ्यसनं चैव, वाङ्मयं तप उच्यते ॥ २ ॥
मनःप्रसादः सौम्यत्वं, मौनमात्मविनिग्रहः ।
भावसंशुद्धिरित्येतद्, मानसं तप उच्यते ॥ ३ ॥
शारीराद्वाङ्मयं सारं,वाङ्मयान्मानसं शुभम् ।
जघन्यमध्यमोत्कृष्ट-निर्जराकरणं तपः ॥ ४ ॥"

सात्विकं, राजसं, तामसमिति वा त्रिविधम् ।

यथा-

" तपश्च त्रिविधं ज्ञेय-मफलाऽऽकाङ्क्षिभिर्नरैः ।
श्रद्धया परया तप्तं, सात्विकं तप उच्यते ॥ १ ॥
सत्कारमानपूजार्थं,तपो दम्भेन चैव यत् ।
क्रियते तदिह प्रोक्तं, राजसं चलमध्रुवम् ॥ २ ॥
मूढग्राहेण यच्चाऽऽत्म-पीडया क्रियते तपः ।
परस्योच्चाटनार्थं वा, तत्तामसमुदाहृतम् ॥३॥ "(१०१ गाथा) ग० २ अधि० । तपःफले व्यवदानम्-" तवे वोदाणफले । " स्था० ३ ठा० ३ उ० ।

संयमवान् साधुस्तपो निरतः स्यात्,अतस्तत्फलं प्रश्नपूर्वकमाह-

तवेणं भंते ! जीवे किं जणयइ ? । तवेणं वोयाणं जणयइ ॥ २७ ॥

हे भगवन् ! तपसा कृत्वा जीवः किं फलं जनयति ? गुरुराह-हे शिष्य ! तपसा जीवो व्यवदानं जनयति, पूर्वबद्धकर्मापगमनेन विशेषेण शुद्धिं जनयति ॥ २७ ॥ उत्त० २९ अ० ।

से णयवं ! किं बहुडुमदसमदुवालसऽडुमामासे०जाव णं छम्मासखवणाइं णं अच्चंतघोरबीरुग्गकट्ठमुक्करे संजमजयणे विपुले सुमहंते वि उ कायकेसे कए णिरत्थगे हवेज्जा ? | गोयमा ! ण णिरत्थगे हवेज्जा । से णयवं ! केणं अट्ठेणं ? | गोयमा ! जओ णं खवुडमहिंसगोणादओ वि संजमजुत्ता विउले अकामनिज्जराए सोहम्मकप्पाइसु चयंति, तओ विभागखएणं चुए समाणे निरयाऽऽदिसु संसारमणुसंसरेज्जा; तहा य दुग्गंधामिज्झाचेलीणखारपित्तेजिज्झिसपदच्चेवजल्लसय-कुमणिचिक्खिल्लविले रुहिरचिक्खल्ल दुद्दस्सणिज्जबीभत्थविभिसंधयारगंतुव्विग्गणिज्जगब्भपाक्खजम्मणरामरणाइअणेगसारीरमाणसे मुच्चसुघोरदारुणदुक्खाणमेव भायणं भवंति, ण उण संजमजयणाए विणा जम्मजरामरणाऽऽइहिं घोरपयंडमहारुद्ददारुणदुक्खाणं णिट्ठवणमेगंतियमच्चंतियं नवेज्जा, एवेणं संजमजयणाविपले सुमहंते वि उ कायकेसे पकम्मय गोयमा ! निरत्थगे भवेज्जा । महा० २ चू० ।

" इमेण वा सुचरियतवनियमबंभचेरवासेण " इत्याशंसारहितेन तपः कर्तव्यमिति । सूत्र० २ श्रु० १ अ० । यस्मिन् प्रतिसेविते निर्विकृताऽऽदिप्रणामप्रपर्यवसानं तपो दीयते तत्तपोऽर्हस्यारोपयितुमिति । स्था० १ उ० । निर्विकृतिकाऽऽदिके तपसि. आ० । अभिग्रहस्वाध्यायमध्ये कृततपसो दिनत्रयम, अथवा द्वादशादिनान्युपधानालोचनायामग्रहालोचनायां वा न समायान्तीति ग्रहणे, उत्तरम्-सप्तम्यादिदिनत्रयगणनायां नायान्तीति:१२२प्र० । सेन० २उल्ला० । पक्षोपवासरोहिणीपञ्चम्यादितपस्सु बहुवर्षाऽऽचरितेषु कदाचिद्विस्मृत्या महाकारणाऽऽदिना वा पक्षोपवासाऽऽदिदिने उपवासाभवने पक्षोपवासाऽऽदि तपो मूलतो याति,किंवा यथोक्तवर्षमासजघन्यानन्तरं तत्तपः करणाऽऽदिना निष्ठां नीयत इति प्रश्ने, उत्तरम्-विस्मृत्यादिना तपोदिनज्ञाने तत्रोपवासाभवने द्वितीयदिने दण्डमिमिलं तत्तपः कार्यम्, समाप्तौ च यद्भोज्यं विधेयमित्यकरणि श्राद्धविधौ सन्ति, महाकारणे तु तपोदिने तपःकरणं महत्तराऽऽद्याकरणान्तनवतीति । १६७ प्र० । सेन० २ उल्ला० । तपउपधानेषूद्यमानेषु विंशतिस्थानकाऽऽदि तपः कर्तुं शुद्ध्यति, न वेति प्रश्ने, उत्तरम्-तत्तपः प्रायः कर्तुं न शुद्ध्यतीति, १८५ प्र० । सेन० २ उल्ला० । अथ पुं० विद्याविजयगणिकृतप्रश्नोत्तरे च । यथा चैवाऽऽश्विनस्वाध्यायदिनेषु यत्तपः कृतं स्यात्तत्तपो रोहिण्यालोचनाऽऽदिषु समेति, न वेति प्रश्ने, उत्तरम्-सप्तम्यादिदिनत्रयकृतं तत्तप आलोचनायां न गण्यते, रोहिण्यादि तथाविधसंबद्धतपसि तु गण्यते, न तु सर्वत्रेति । ४०० प्र० । सेन० ३ उल्ला० । तपसा निकाचितकर्मणां क्षयो भवति, न वेति प्रश्ने, उत्तरम्-निकाचितानामपि कर्मणां तपसा क्षयो भवतीति श्रीउत्तराध्ययनसूत्रकृत्यादावुक्तमस्तीति । ४६ प्र० । सेन० ४ उल्ला० ।

तवअ–देशी-व्यापृते, दे०ना० ५ वर्ग २ गाथा ।

तवआयार–तपआचार--पुं० । आचारभेदे, तप आचारो द्वादशविधः । उक्तं च--" बारसविहम्मि वि तवे, अभिंतरबाहिरे कुसलदिट्ठे । अगिलाएँ अणाजीवी, नायव्वो सो तवायारो " ॥१॥ इति । स्था० २ ठा० ३ उ० ।

तवकरण–तपःकरण--न० । तपसोऽनशनाऽऽदिबाह्याभ्यन्तरभेदभिन्नस्य करणं कृतिस्तपःकरणम् । अनशनाऽऽदेर्बाह्याभ्यन्तरभेदनिबन्धस्य तपसः कृतौ, आ० म० १ अ० २ खण्ड ।

तवगुण–तपोगुण–पुं० । अनशनाऽऽदौ, स्था० ६ ठा० ।

तवग्ग–तवर्ग–पुं० । तकाराऽऽदिवर्णपञ्चके, रा० ।

तवग्गपविभत्ति–तवर्गप्रविभक्ति–न० । तकारथकारदकारधकारनकारइत्येवंरूपे प्रविभक्तिनामकेऽष्टादशे नाट्यविधौ,रा० ।

तवचरण–तपश्चरण–न । तपोविधाने तपसि च कृते धृतिं करोति नार्तध्यानम् । अनु० । संयमानुष्ठाने, सूत्र० १ श्रु० ५ अ०

१ उ० । तपश्चरणं ब्रह्मचर्यादि, तत्फलमप्युपचारात्तपश्चरणम् । स्वर्गसंभवे भोगजाते, ज्ञा० १ श्रु० ६ अ० ।

तवचरणचरियणिबद्ध–तपश्चरणचरितनिबद्ध–न० । दिव्ये नाट्यविधौ, रा० ।

तवचरणि[ण्]–तपश्चरणिन्–त्रि० । तपस्विनि, " नाणाइगुणो जीवइ, अइ सुदुमो अइ इमो मुणेयव्वो । साहुज्जंतो पगं, वच्चइ एसो तवचरणी ॥ १ ॥ " स्था० ५ ठा० ३ उ० ।

तवण–तपन–पुं० । तपतीति तपनः । रवौ, अनु० । पिं० । रुचकशिखरतले पूर्वस्यां दक्षिणस्यां च दिशि तृतीये कूटे, द्वी० ।

तवणबंधु–तपनबन्धु–न० । पुं० । कुङ्के, रत्ना० ६ परि० ।

तवणिज्ज–तपनीय–न० । आरक्तसुवर्णे, जी० ३ प्रति० ४ उ० । तं० । भ० । औ० । जं० । सुवर्णविशेषे, जी० ३ प्रति० ४ उ० । तं० । औ० । स० । रा० । जं० । सु० प्र० । ज्ञा० । " तवणिज्जबालुयापत्थडे । " तपनीयमध्यः बालुकाः सिकताः,तासां प्रस्तटः प्रस्तारो यस्मिँस्तत्तथा । जी० ३ प्रति० ४ उ० । रा० । "तवणिज्जलेवूसगा ।" तपनीयस्तपनीयमयो 'लेवूसगो' दाडिमाभिप्रायेण प्राङ्मुखे लम्बमानो मांसलविशेषो गोलकाऽऽकृतिर्येषां तानि । जी० ३ प्रति० ४ उ० । रा० । "तवणिज्जाभरणभूसणविराइअंगुवंगे । " कल्प० २ क्षण ।

तवणिज्जकूड–तपनीयकूट–पुं० । जम्बूद्वीपे रुचकपर्वतस्थे द्वितीयस्मिन् कूटे, स्था० ८ ठा० ।

तवणियमणाणरुक्ख–तपोनियमज्ञानवृक्ष–पुं० । ज्ञानवृक्षे, आ० म० १ अ० १ खण्ड । (अस्योदाहरणम् ' सुय ' शब्दे वक्ष्यते)

तवणी–देशी–भक्षणयोग्ये, दे० ना० ५ वर्ग १ गाथा ।

तवतेण–तपःस्तेन–पुं० । कृपककल्पे, कश्चित्केनाचित् पृष्टस्त्वमसौ कृपक इति ? तदा स पूजाऽऽद्यर्थमाह-अहम् । अथवा यकि-साधव एव कृपकाः । अथवा-तूष्णीमास्ते । दश० ५ अ० २ उ० ।

तवधण–तपोधन–त्रि० । तप एव धनं यस्य सः । तपोधनवति, उत्त० १८ अ० ।

तवप्पमिमा–तपःप्रतिमा–स्त्री० । तपसाऽऽत्मतुलनायाम्, बृ० १ उ० । ('जिणकप्पिय' शब्देऽस्मिन्नेव भागे १४६६ पृष्ठे एतत्स्वरूपम्)

तवप्पहाण–तपःप्रधान–त्रि० । तपसा प्रधाने उत्तमे, शेषमुनिजनापेक्षया, तपो वा प्रधानं यस्य तस्मिन्, ज्ञा० १ श्रु० १ अ० । नि० । रा० ।

तववल–तपोबल–त्रि० । यदनेकभवार्जितमनेकदुःखकारणं निकाचितकर्मग्रन्थिं क्षपयति तस्मिन्, स्था० १० ठा० ।

तववलिय–तपोबलिक–पुं० । तपसा बलिकस्तपोबलिकः । तपसा बलिष्ठे, महताऽपि तपसा यो न क्लाम्यति, यत्र तत्र वा स्वल्पे प्रयोजने तपः करिष्यामि इति विचिन्त्य प्रतिसेवते । यदि वा-षाण्मासिके तपसि दत्ते वदति-समर्थोऽहमन्यदपि तपः कर्तुं तदपि मे देहीति । तस्मिन् तपोबलिके मूलपर्याये, व्य० १ उ० ।

तवभावणा–तपोभावना–स्त्री० । प्रशस्तभावनाभेदे, बृ० १ उ० ।

तवमय–तपोमद–पुं० । तपःप्रधानो मदस्तपोमदः । मदस्थानभेदे, स्था० १० ठा० । स० ।

तवय–तवक–न० । सुकुमारिकाऽऽदितलनभाजने, विपा० १ श्रु० ३ अ० ।

तवविणय–तपोविनय–पुं० । विनयभेदे, दश० ।

तपोविनयमाह–

अवणेइ तवेण तमं, उवणेइ अ सग्ग मोक्खमग्गाणं ।
तवविणयनिच्छियमई, तवोविणीओ हवइ तम्हा ॥८५॥

अपनयति तपसा तमोऽज्ञानम् , उपनयति च स्वर्गं मोक्षमार्गान् आत्मानं जीवम, तपोविनयनिश्चितमतिर्यस्मादेवंविधस्तपोविनीतो भवति तस्मादिति गाथाऽर्थः ॥ ८५ ॥ दश० ९ अ० ।

तवसंजम–तपःसंयम–पुं० । तापयतीति तपस्तत्प्रधानः संयमस्तपःसंयमः । चारित्रज्ञानादिके, विशे० । तप अशनोदरताऽऽदि तत्प्रधानः संयमस्तपःसंयमः । अशनोदरताऽऽदिप्रधाने संयमे, आ० म० १ अ० २ खण्ड ।

तवसंजमप्पहाण–तपःसंयमप्रधान–पुं० । तपः बाह्याभ्यन्तरं द्वादशप्रकारं, तथा संयमः सप्तदशभेदः । पञ्चाऽऽश्रवविरमणाऽऽदिलक्षणः,ताभ्यां प्रधानास्तपःसंयमप्रधानाः । तपःसंयमाभ्यां प्रधाने, " तवसंजमप्पहाणा, गुणधारी जे थवंति सब्भावं । " सूत्र० १ श्रु० ११ अ० ।

तवसंजममुज्जय–तपःसंयमोद्यत–पुं० । तपोऽनशनाऽऽदि संयमस्सप्तविधः, मकारोऽलाक्षणिकः, ततस्तपःसंयमयोरुद्यतस्तपःसंयमोद्यतः । तपःसंयमाभ्यामुद्यते, दश० ३ अध्य ।

तवसंजमरय–तपःसंयमरत–पुं० । ज्ञानसाधौ, औ० ।

तवसमाहि–तपःसमाधि–पुं० । तपसि बाह्याऽऽभ्यन्तरभेदभिन्ने यथाशक्ति निरन्तरं प्रवृत्तिस्तपःसमाधिस्तस्मिन्, प्रव० १० द्वार । दश० ।

तपःसमाधिमाह–

चउव्विहा खलु तवसमाही भवइ । तं जहा–नो इहलोगट्ठयाए तवमहिट्ठिज्जा, नो परलोगट्ठयाए तवमहिट्ठिज्जा, नो कित्तिवन्नसद्दसिलोगट्ठयाए तवमहिट्ठिज्जा, नऽन्नत्थ निज्जरट्ठयाए तवमहिट्ठिज्जा चउत्थं पयं भवइ ।

भवइ अ इत्थ सिलोगो—

चतुर्विधः खलु तपःसमाधिर्भवति । तद्यथेत्युदाहरणोपन्यासार्थः । नेह लोकार्थमिहलोकनिमित्तं लब्ध्यादिवाञ्छया तपोऽनशनाऽऽदिरूपमधितिष्ठेत् कुर्याद्भिक्षुवत् । तथा न परलोकार्थं जन्मान्तरभोगनिमित्तं तपोऽधितिष्ठेद्ब्रह्मदत्तवत् । एवं न कीर्तिवर्णशब्दश्लाघार्थमिति । सर्वदिग्व्यापी साधुवादः कीर्तिः । एकदिग्व्यापी वर्णः । अर्द्धदिग्व्यापी शब्दः । ततस्थान एव श्लाघा, नैतदर्थं तपोऽधितिष्ठेत् । अपि तु नान्यत्र निर्जराऽर्थमिति न कर्मनिर्जरामेकां विहाय तपोऽधितिष्ठेत् । अकामः सन् यथा कर्मनिर्जरैव फलं भवति तथाऽधितिष्ठेदित्यर्थः । चतुर्थं पदं भवति । भवति चात्र श्लोक इति पूर्ववत् ।

स चायम्–

विविहगुणतवोरए य निच्चं,भवइ निरासए निज्जरट्ठिए ।

तवसा धुणइ पुराणपावगं, जुत्तो सया तवसमाहिए ॥४॥

विविधगुणतपोरतो हि नित्यमनशनाऽऽद्युपेक्ष्याऽनेकगुणं यः तपस्तदुक्त एव सदा भवति, निराशो निःस्पृहाश इहलोकाऽऽदिषु निर्जरार्थैकः कर्मनिर्जरार्थी, स एवंभूतस्तपसा विशुद्धेन धुनोत्यपनयति, पुराणपापं चिरन्तनं कर्म, सदा च न बध्नात्येवं युक्तः सदा तपःसमाधाविति सूत्रार्थः । दश० ६ अ० ४ उ० ।

तवसामायारि (ण्)–तपःसामाचारिन्–पुं० । पाक्षिकाऽऽदिषु तपःकर्म स्वयं करोति, परं च कारयति, भिक्षाचर्यां स्वयमनुतिष्ठति, परं च तस्यां नियुङ्क्ते, इति तपःसामाचारी । तस्मिन्, प्रव० ६५ द्वार ।

तपःसामाचारीमाह–

पक्खिएँ पोसहिएसुं, कारेति तवं सयं करेति य वा ।
भिक्खायरियाएँ तहा, निज्जुंजति परं सयं वा वि ॥

पाक्षिके अर्द्धमासे सर्वाणि, पौषधिकेषु च अष्टम्यादिषु पर्वसु परं तपः कारयति, स्वयमपि च करोति, तथा भिक्षाचर्यायां परं नियुङ्क्ते, प्रयोजनमपेक्ष्य स्वयमपि भिक्षाचर्यां गच्छति ।

सव्वम्मि वारसविहे, निज्जुंजइ परं सयं च उज्जुत्तो ।
गणसामाचारीए, गणं विसीयंत चोएति ॥

सर्वस्मिन् द्वादशविधे तपसि यथायोगं परं नियुङ्क्ते, स्वयं सर्वत्र यथाशक्ति उद्युक्तः । व्य० १० उ० ।

तवसिद्ध–तपःसिद्ध–पुं० । तपसा सिद्धे सिद्धभेदे, (आ०म०)

संप्रति तपःसिद्धप्रतिपादनार्थमाह–

न किलिम्मइ जो तवसा, सो तवसिद्धो दढप्पहारि व्व ।
सो कम्मक्खयसिद्धो, जो सव्वक्खीणकम्मंसो ॥

न क्लाम्यति न क्लमं गच्छति यः सदातपसा बाह्याभ्यन्तरेण स एवंभूतस्तपःसिद्धः, अम्लानित्वाद् दृढप्रहारिवदिति गाथाऽक्षरार्थः । आ० म० १ अ० २ खण्ड ।

भावार्थः कथानकादवसेयः । तच्चेदम्–

" धिग्जातिरेको दुर्दान्तो, दुर्विनीतः पुरे क्वचित् ।
स्थानान्निःसारितो दुष्ट-श्चौरपल्लीं भ्रमन् ययौ ॥ १ ॥
चौरसेनापतिस्तं च, पुत्रवुद्ध्या प्रपन्नवान् ।
मृते तस्मिन् स एवाऽभूत्, चौरसेनापतिस्ततः ॥ २ ॥
दृढप्रहारी नाम्नाऽभूद्, दृढप्रहारकः स यत् ।
ससैन्यः सोऽन्यदाऽऽयासीद्, ग्रामभेकं विलुण्टितुम् ॥ ३ ॥
तत्रैको निःस्वविप्रोऽभू-द्बहुमर्कपैः स मार्गितः ।
याचित्वाऽऽनयदुग्धाऽऽदि, परमान्नमपाचयत् ॥ ४ ॥
स्वयं स्नानकृते सोऽगा-च्चौर एकस्तु तद्गृहे ।
प्रविष्टः पायसस्थालि-मपहृत्य जगाम सः ॥ ५ ॥
रुदन्ति मिलिते बाला-स्तस्य पितुः पायसं हृतम् ।
दधावे सोऽथ रोषेण, चौराणां निर्जिघृक्षया ॥ ६ ॥
अनेकाँस्तस्करांस्तत्र, परिघेण जघान सः ।
चौरसेनापतिर्ग्राम-मध्येऽप्नूतेन चिन्तितम् ॥ ७ ॥
एष को ऽप्येक मच्चौरान्, खड्गमाकृष्य धावितः ।
तत्रागादन्तरे धेनु-स्तामहन्नथ तं द्विजम् ॥ ८ ॥
तद्ब्राह्मणी समूचेऽथ, किं कृतं निष्कृप ! त्वया ? ।
साऽपि व्यापादिता तेन, तद्भर्तोऽपि द्विधा कृतः ॥ ९ ॥
प्रस्फुरन्तं तमालोक्य, करुणाऽस्याभवत्तदा ।
हा हा चक्रे मया पापं, का भविष्यति मे गतिः ? ॥ १० ॥
छिन्नकरुणयथोच्चुस्तं, पापास्मानपि मारय ।
पितोरनाथतो जाती, मृत्युर्दारिद्र्यतोऽपि नः ॥ ११ ॥
तदाकर्ण्य विशेषेण, स निर्वेदं परं गतः ।
इतः पापात्कथं मुक्तिः ?, स्यान्मे साधूनथैकत ॥ १२ ॥
दृष्ट्वा ते धर्ममाचख्युः, सर्वपापापहारकम् ।
प्रतिबुद्धः परिव्रज्य, जगृहे क्षान्त्यजिग्रहम् ॥ १३ ॥
यावत्कर्म स्मरत्येत-त्तावद्भोज्यं मया न च ।
हीयमानो हन्यमान-स्तत्रैव विजहार सः ॥ १४ ॥
तत्कृतानुपसर्गाँश्च-धिसेढे स्वकृतं स्मरन् ।
दृढप्रहारी भूत्वा स, कर्मशत्रूनपि प्रति ॥ १५ ॥
षड्भिर्मासैस्तपःशस्त्रै-स्तत्कर्मैन्मूल्य सर्वथा ।
लब्ध्वा केवलज्ञानं, तपःसिद्धो बभूव सः" ॥ १६ ॥ आ० क० ।

तवसूर–तपःशूर–पुं० । तपोधीरे, स्था० ४ ठा० ३ उ० । " तवसूर अणगारा । " संथा० ।

तवसोसिय–तपःशोषित–त्रि० । तपसा शोषमुपगते, व्य० २ उ० ।

तवस्सि [ण्]–तपस्विन्–पुं० । त्रि० । तपोऽस्यास्तीति तपस्वी । तपः संयमतपस्तस्मिन् विद्यमाने, व्य० १ उ० । तपोऽस्यास्तीति तपस्वी, तपो विकृष्टाविकृष्टरूपं विद्यते येषां ते तपस्विनः । प्रव० ६६ द्वार । विकृष्टमष्टमप्रकृतिकं तपो विद्यते येषां ते तपस्विनः । प्रव० १४८ द्वार । ध० । नि० चू० । विकृष्टाऽऽदितपश्चरणकारिषु, प्रव० ४ द्वार । क्षपके, भ० ८ श० ८ उ० । बृ० । स्था० । मासक्षपकाऽऽदिषु, आ० क० । स्था० । चतुर्थभक्ताऽऽदिकारिणि, प्रश्न० ३ सम्व० द्वार । प्रशस्ततपोयुक्ते, प्रश्न० ५ सम्व० द्वार । अनशनाऽऽदितपोविचित्रयुक्तेषु सामान्यसाधुषु, क्षा० १ श्रु० ८ अ० । साधौ, सूत्र० १ श्रु० २ अ० १ उ० । उत्त० । क्षीणदेहे, बृ० १ उ० । अष्टमाऽऽदिक्षपके, त० ५५ श० ७ उ० । निष्टप्तदेहे, सूत्र० १ श्रु० २ अ० १ उ० । प्रशस्ततपोऽन्विते भिक्षौ, उत्त० २ अ० । जितेन्द्रिये, औ० । तपो बाह्याऽऽभ्यन्तरकर्मेन्धनदहनज्वलनकल्पमनवरतशुभध्यानलक्षणमस्ति यस्य स तपस्वी । स्था० २ ठा० ४ उ० ।

तवायार–तपआचार–पुं० । द्वादशविधतपोविशेषानुष्ठिते (स० १ भङ्ग) आचारभेदे, " बारसविहम्मि वि तवे, सब्भिंतरबाहिरे कुसलदिट्ठे । अगिलाएँ अणाजीवी, णायव्वो सो तवायारो ॥ १ ॥ " ध० २ अधि० । तपआचारस्तु द्वादशविधः, बाह्याभ्यन्तरतपःषट्कव्यपदेशात् । तत्र " अनशनमूनोदरता, वृत्तेः संक्षेपणं रसत्यागः । कायक्लेशः संज्ञी-नतेति बाह्यं तपः प्रोक्तम् ॥ १ ॥ " ध० १ अधि० ।

इयाणिं तवायारो भण्णति–

दुविध तवपरूवणया, संताणाऽऽसेवणा तमकरेंते ।
सव्वत्थ होति लहुगो,(सं)झीणविणयऽ(स)ज्झाय मोत्तूणं ४१
बारसविधम्मि वि तवे, सब्भिंतरबाहिरे कुसलदिट्ठे ।
अगिलाएँ अणाजीवी, णायव्वो सो तवायारो ॥ ४२ ॥

दुविहतवे त्ति-बाहिरो, अब्भिंतरो य । बाहिरो छव्विहो-अणसणं, ओमोयरिया, भिक्खायरिसंखाणं, रसपरिच्चाओ,

कायकिलेसो, पडिसंलीणया य। अभिंतरो छव्विहो-पायच्छित्तं, विणओ, वेयावच्चं सज्झाओ, विउस्सग्गो, झाणं चेति। दुविहा तवस्स य पकरणा कायव्वा। पकरणा नाम पवत्तणा। सा य जहा छम्मुक्खियपडमसुत्ते, तहा दट्ठव्वा। इह तु पच्छित्तेणऽहिकारो, तं जणति-सग्गं ठाणं सद्धाणं. सद्धाणस्स आरोवणा सद्धाणारोवणा. तमिति तवो संबज्झति, मकारो पडिसेहे, करेति आचरंतेत्यर्थः। मकारेण य पडिसिद्धे,अणाचरणं अणायारं, तस्स य सट्ठाणं, तं च इमं-"सव्वत्थ होइ लहुगो।"सव्वत्थेति। सव्वेसु पदेसु अणसणाऽऽदिसु सत्तिपुरिसक्का. दपरक्कमे विज्जमाणे नवमकरेंतस्स मासलहु. अप्पसत्थं अकरणमिति कारं उच्चारणं करेइ,संलीणविणयसज्झ यणया तिण्हि,मोत्तूणं।पडिसंलीणया दुविहा-दव्वपडिसंलीणया,भावपडिसंलीणया य। इत्थियसुपंडगपसंसत्ता होंति दव्वम्मि। भावपडिसंलीणया दुविहा-इंदियपडिसंलीणया,णो इंदियपडिसंलीणया। इंदियपडिसंलीणया पंचविहा-सोइंदियाऽऽदि। नोइंदियपडिसंलीणया चउव्विहा-कोहाऽऽदि। एतेसु पडिसंलीणेण भवियव्वं। जो ण भवति, तस्स पच्छित्तं भण्णति। इत्थिसंसत्ताए चक्खुरुं, तिरिक्खित्थिपुरिसेसु चरित्तविराहणाणिप्फण्णं चउगुरुगं। पुरिसेसु चउलहुगं। सोयचक्खुरसफासेसु रागे चउगुरुगं। एतेसु चेव दोसे चउलहुगं। घाणिंदियरागेण गुरुगो, दोसेण लहुगो। कोहे माणे य हु, मायाए मासगुरुगो, लोहे हु। पडिसंलीणया गता। अथ विणओ जणति-आयरियस्स विणयं ण करेति चउगुरुयं, उवज्झायस्स हु, भिक्खुस्स मासगुरुं, खुड्डगस्स मासलहुं। विणओ गओ। सज्झाओ भणति सुत्तपोरिसिं ण करेति मासलहु, अत्थपोरिसिं ण करेति मासगुरु। सीसो पुच्छति-तवस्स कहं आयारो, कहं वा अणायारो भवति? आयरिओ जणति-(बारसविहम्मि वि तवे गाहा) कुसलो दव्वे य, भावे य। दव्वे दव्वलाभे। भावे कम्मक्खए वा। तेहिं भावकुसलेहिं दिट्ठे तवे अगिलाए त्ति अगिलाणभावो मनोवक्कायेहिं अजूरणमणोत्यर्थः। अणाजीवि त्ति-ण आजीवी अणाजीवी, अणासंसीत्यर्थः। आसंसणं इहपरलोगेसु। इहलोगे वरं मे सिलाघा भविस्सति। लोगो य आहट्ठो अत्थवत्थसयणादिभेसज्जं दाहिति। परलोगे इन्दसामाणिगाऽऽदि, रायाऽऽदि वा भविस्सामि। सेसं कंठं। नि० चू० १ उ०।

अथ तपआचारदर्शनायाऽऽह-

बारसविहम्मि वि तवे, सब्भितरबाहिरे कुसलदिट्ठे।
अगिलाए अणाजीवी, णायव्वो सो तवायारो ॥२६॥

द्वादशविधेऽपि द्वादशभेदेऽभ्यन्तरे तदेकदेशे, तपसि तपस्यायां. कार्मणशरीरान्तर्दहस्यैव तापनात्प्रायः सम्यग्दृष्टिरेव वा तपस्तया प्रतीयमानत्वाद्बाह्यमनशनाऽऽदि षोढः। तथा बाह्यदेहस्याऽपि तापनान्मिथ्यादृष्टिरपि वा तपस्तया प्रतीयमानत्वात् बाह्यमनशनाऽऽदि षोढैव। सहाभ्यन्तरेण वर्त्तते साभ्यन्तरबाह्ये तस्मिन्, कुशलदृष्टे निपुणोपलब्धे, सर्वज्ञप्रकथित इत्यर्थः। अग्लान्या अखेदेन, अनाजीवी तस्यैव तपसोऽनुजीवकः सन्, यो जीवः, प्रवर्त्तत इति शेषः। ज्ञातव्यो ज्ञेयः, स जीवः तपआचारः तपसि तपोरूपो य आऽऽचारो ज्ञानाद्याचारस्तपआचारः,आचारतद्वतोरभेदादिति गाथार्थः॥२६॥ पञ्चा० १५ विव०।

तवारिह-तपोऽर्ह-न० । निर्विकृतिकाऽऽदितपःशोध्ये (स्था० १०ठा०) षष्ठे प्रायश्चित्तभेदे, स्था०८ ठा० । प्रव० । अथ तपोऽर्हप्रायश्चित्तविषयः-तत्र तपोऽर्हं वक्तव्यम्-ततश्च रात्रिन्दिवपञ्चकादारभ्य रात्रिदिवपञ्चकाऽऽदि वृद्ध्या तावन्नेयं,यावत् षण्मासाः, तत्र येषु स्थानेषु रात्रिन्दिवपञ्चकं तपः तान्युपदर्शयति-

दंसणगहनिक्खेवे, आवसियाए निसीहियाए य।
गुरुणं च अप्पणामे, वा चउराईदिया हुंति ॥ १२५ ॥

दृष्टं गुरुव्यत्यवेक्षते न प्रमार्जयतीत्येको भङ्गः, न प्रत्युपेक्षते प्रमार्जयतीति द्वितीयः, न प्रत्युपेक्षते न प्रमार्जयतीति तृतीयः, प्रत्युपेक्षते प्रमार्जयतीति चतुर्थः। तत्राऽऽद्येषु त्रिषु भङ्गकेषु पश्चादनुपूर्व्या यथोत्तरं तपःकालविशेषतो लघुमासः प्रत्येकं प्रायश्चित्तम्। चतुर्थे चत्वारो भङ्गाः। तद्यथा-दुष्प्रत्युपेक्षते दुःप्रमार्जयति १, दुष्प्रत्युपेक्षते सुप्रमार्जयति २, सुप्रत्युपेक्षते दुष्प्रमार्जयति ३, सुप्रत्युपेक्षते सुप्रमार्जयति ४। अत्राद्येषु त्रिषु भङ्गकेषु पश्चादनुपूर्व्या यथोत्तरं तपः कालविशेषितानि पञ्चरात्रिन्दिवानि प्रायश्चित्तम्,चतुर्थे भङ्गे शुद्धेरविधिना प्रवृत्तेः। इहाऽऽद्यास्त्रयो भङ्गका मासलघुप्रायश्चित्तविषयाः प्रस्तावाद्गुरुकाः, यतो वक्ष्यमाणेषु प्रायश्चित्तेषु द्रष्टव्याः। यथा, दण्डकग्रहणेऽभिहितं तथा दण्डकनिक्षेपेऽपि वक्तव्यं, नवरं निक्षेपे अधस्ताद् भूमेरुपरि च दण्डसंसक्तसंपर्कविषया भित्तिप्रदेशे प्रमार्जना कर्त्तव्या। तथा वसतेर्निर्गच्छन् यद्यावश्यकीं न करोति, वसतौ प्रविश्य नैषेधिकीम्, तत आवश्यकाकरणाद्नैषेधिकया अकरणे च प्रत्येकं प्रायश्चित्ते रात्रिन्दिवपञ्चकं, तथा (गुरुणं च अप्पणामे इति) अत्र प्रणामग्रहणं दृष्टोत्प्रेक्षाऽऽदेरुपलक्षणं, ततोऽयमर्थः-अवश्यकरणीयप्रयोजनवशतः स्वोपाश्रयाद् बहिर्विनिर्गतो भूयः प्रतिश्रये प्रविशन् 'नमो खमासमणाणं' इति न शृणोति प्रणामं वा न करोति, नापि हस्तस्थानाकुञ्चिकत्वेऽपि हस्तोत्क्षेपम्, तदा प्रायश्चित्तं रात्रिन्दिवपञ्चकम् ॥ १२५ ॥

वेंटियगहनिक्खेवे, निट्ठीवण आयवाउ छायं व।
थेमिल्लकण्हयोमे, मासो राईदिया पंच ॥ १२७ ॥

संस्तारकवेष्टलिकाया ग्रहणे, निक्षेपे च प्रत्येकं दण्ड इव सप्तभङ्गकं, तत्रापि दण्डक इवाऽऽद्येषु त्रिषु लघुमासकेषु पश्चादनुपूर्व्या यथोत्तरं तपःकालविशेषतः प्रत्येकं लघुमासः, उत्तरेषु त्रिषु भङ्गकेषु प्रत्येकं रात्रिन्दिवपञ्चकं, सप्तमे तु भङ्गे शुद्धः। (निट्ठीवण इति) निष्ठीवनाऽऽदौ। इह साधवो द्विधा-गच्छगताः, गच्छनिर्गताश्च। तत्र ये गच्छनिर्गतास्ते नियमान्निष्ठीवकाः,औपग्रहिकमल्लकाऽऽद्युपकरणासंभवात्। गच्छगता अपि ये विधिना निष्ठीवन्ति, ते अनिष्ठीवका एव, न प्रायश्चित्तविषयाः। आदधिना खेलमल्लके निष्ठीवने दण्डक इव सप्तभङ्गाः, दण्डक इवैव चाऽऽद्येषु प्रत्येकं लघुमासः, उत्तरेषु त्रिषु प्रत्येकं रात्रिन्दिवपञ्चकं, सप्तमभङ्गवर्तिनस्त्वनिष्ठीवका एव, विधिना निष्ठीवनात्। उपरितनेष्वपि च त्रिषु भङ्गेषु यदि भूमौ निष्ठीव्यति तदा मासलघु। यच्च निष्ठीवने प्राणिनां परितापनाऽऽद्युपजायते, तच्चिष्पृतं च तस्य प्रायश्चित्तम्। आदिशब्दात्कण्डूयनपरिग्रहः। कण्डूयनेऽपि हि दण्डक इव सप्तभङ्गकं, तथैव च प्रायश्चित्तविधिः। तथा वस्त्राऽऽदिकमातपात् छायां, छायाया वा आतपं संक्रामयत् न प्रत्युपेक्षते, न प्रमार्जयतीत्यादयः पूर्ववत्सप्त भङ्गाः। पूर्ववदेव चाऽऽद्येषु षट्सु भङ्गकेषु प्रायश्चित्त-

विधिः, सप्तमे तु भङ्गे गुरुः। (थंमिल्लेत्यादि) मार्गं व्रजन् अस्थण्डिलात् स्थण्डिलं व्रजेत्, स्थण्डिलात् अस्थण्डिले,तथा कृष्णभूमात् प्रदेशात् नीलभूमौ, नीलभूमेर्वा कृष्णभूमप्रदेशे। एवं शेषवर्णेष्वपि प्रत्येकं योजनीयम्। अथ अध्वनो ग्रामे ग्रामप्रवेशे, ग्रामाद्वा अध्वनि संक्रामन् पादौ न प्रत्युपेक्षते, न प्रमार्जयतीत्यादयो दशमक इव प्रत्येकं सप्तसङ्गाः, षट्सु भङ्गकेषु प्रायश्चित्तविधानं, सप्तसङ्गके तु शुद्धः।

सम्प्रति लाघवमपेक्ष्यमाणश्चेदाईमपि प्रायश्चित्तमत्रैव विषये प्रतिपादयति-

एएसिं अन्नयरं, निरंतरं अतिचरेज्ज तिक्खुत्तो ।
निक्कारणमगिलाणे, पंच उ राइंदिया छेदो ॥ १२८ ॥

एतेषामनन्तरोदितानां रात्रिन्दिवपञ्चकप्रायश्चित्तविषयाणां स्थानानामन्यतरत् स्थानमग्लानो निष्कारणं यो निरन्तरमतिचरेत् त्रिःकृत्वस्त्रीन् वारान् तदा तत्पर्यायस्य छेदः क्रियते, पञ्चरात्रिन्दिवानि । उपलक्षणमेतत्-येष्वनन्तरोदितेषु स्थानेषु मासलघुकानि प्रायश्चित्तान्युक्तानि, तेषामन्यतरत्स्थानमग्लानो निष्कारणं यदि निरन्तरं त्रीन् वारानतिचरति, तदा तत्पर्यायस्य छेदो मासिक इति द्रष्टव्यम् ।

सम्प्रति मासिकानि प्रायश्चित्तानि विभणिषुराह-

हरियाले हिंगुलए, मणोसिला अंजणे य लोणे य ।
मीसगपुढविकाए, जह उदउल्ले तहा मासो ॥ १२९ ॥

यथा उदकार्द्रे तथेति वचनादेवमत्र प्रतिपत्तव्यम्-यथा उदकार्द्रं उदकसङ्क्लिष्टे करे मात्रके वा भिक्षां गृह्णतः प्रायश्चित्तं लघुमासः, तथा हरितालहिङ्गुलकमनःशिलाः प्रतीताः । अञ्जनं सौवीराञ्जनाऽऽदि, लवणं समुद्राऽऽदि, एते सचित्तपृथिवीकायभेदाः। उपलक्षणमेतत्-तेन शुद्धपृथिव्यूषगैरिकवर्णिकासेटिकासौराष्ट्रिक्यादयोऽपि सचित्तपृथिवीकायभेदाः प्रतिपत्तव्याः । तथा मिश्रकः सचिताऽचित्तरूपः कर्दमाऽऽदिर्हरितालाऽऽदिर्वा पृथिवीकायः, एतेष्वपि । किमुक्तं भवति ?-एतैरपि प्रत्येकं सङ्क्लिष्टे करे मात्रके वा भिक्षामाददानस्य लघुमासः । एतत्पुनः सम्प्रदायादवसातव्यम्-सचित्तमिश्रपृथिवीरजोगुण्ठिते सचित्तमिश्रोदकस्निग्धे वा करे मात्रके वा भिक्षामुपाददानस्य पञ्च रात्रिन्दिवानि । उक्तं च-" ससणिद्धे ससरक्खे पणगमिति ।" तथा वनस्पतिकायो द्विविधः-परीत्तेऽनन्तकायश्च । एकैकस्य त्रयो भेदाः-पिष्टं, कुक्कुसा, उत्कुट्टितश्च । पिष्टं, कुक्कुसाश्च प्रतीताः । उत्कुट्टितश्चिञ्चनकाऽऽदिः । तत्र त्रिविधैरपि सचित्तमिश्रपरीत्तवनस्पतिकायैः संसृष्टे करे मात्रके वा भिक्षां गृह्णतो वा लघुमासः। अनन्तसचित्तमिश्रवनस्पतिकायैस्त्रिविधैरपि संसृष्टे गुरुमासः, पुरःकर्मणि पश्चात्कर्मणि च केचिदाहुर्लघुमास इति, परे चत्वारो लघव इति । उक्तं च कल्पचूर्णौ-"पुरकम्मपच्छकम्मेहिं चउलहु।" इति ॥ १२८ ॥

सज्झायस्स अकरणे, काउस्सग्गे तहा अपमिलेहा ।
पोसहियतवे य तहा, अवंदणे चेइयाणं च ॥ १३० ॥

स्वाध्यायस्य वाचनाऽऽदेरकरणे, सामान्यतो मासनिष्पन्नं प्रायश्चित्तमिति योगः । अयमेव भावना-सूत्रपौरुषीं न करोति मासलघु । द्वे सूत्रपौरुष्यावकुर्वतो द्वौ लघुमासौ । तिसृणां सूत्रपौरुषीणामकरणे त्रयो लघुमासाः । चतसृष्वपि सूत्रपौरुषीणामकरणे चतुर्मासलघु। (काउस्सग्गे इति) अकरणे इति अत्रापि नुवर्त्तते, आवश्यक इतिवत् कायोत्सर्गस्य सप्तमी, षष्ठीसप्तम्योरर्थे प्रत्ययभेदात् (?) । अकरणे सामान्यतो मासनिष्पन्नं प्रायश्चित्तमिति सर्वत्रापि योजनीयम् । भावना त्वत्रापीयम्-आवश्यके एकं कायोत्सर्गं न करोति मासलघु । द्वौ न करोति द्विमासलघु । त्रीन् कायोत्सर्गान् न करोति त्रिमासलघु । सकलमेवाऽऽवश्यकं न करोति, प्रावरणप्रावृतो वा वन्दनकानि आवश्यके न ददाति, दोषैरुपेतानि वा ददाति प्रायश्चित्तं मासलघु । नवरं यत्र माया तत्र मासगुरु । तथा-(अपमिलेहा इति) विभक्तेरत्र लोपः प्राकृतत्वात् । अप्रत्युपेक्षायाः, अकरणे सामर्थ्यादवसीयते । तत्रोपधिर्द्विधा-औधिकः,औपग्रहिकश्च । औधिकस्त्रिधा-जघन्यो, मध्यमः, उत्कृष्टश्च । तत्र जघन्यश्चतुर्धा । तद्यथा-मुखपोत्तिका,पात्रकेसरिका,गोच्छकः, पात्रस्थापनं च । उक्तं च-" मुहपोत्ती, पायकेसरिया, गोच्छगो, पायट्ठवणं च। एस चउव्विहो जहन्नो" इति । मध्यमः षड्विधः, तद्यथा-पटलानि, रजस्त्राणं, पात्रबन्धः, चोलपट्टः, मात्रकं, रजोहरणं च। आह च-" पडलाइं रयत्ताणं, पत्ताबंधो य चोलपट्टो य । मत्तग रयहरणं वि य, मज्झिमगो छव्विहो नेओ " ॥ १ ॥ उत्कृष्टश्चतुर्विधः, तद्यथा-पतद्ग्रहस्त्रयः कल्पाः । उक्तं च-" उक्कोसो चउव्विहो, पमिग्गहो तिन्नि पच्छागा " इति । आर्यिकाणामप्युपधिरौधिकस्त्रिविधः, तद्यथा-जघन्यो, मध्यमः, उत्कृष्टश्च । तत्र जघन्यश्चतुर्विधो मुखपोत्तिकाऽऽदिरूपः प्रागुक्तः । मध्यमस्त्रयोदशविधः । तद्यथा-पात्रबन्धः १ रजोहरणं २ पटलानि ३ रजस्त्राणं ४ मात्रकं ५ कमठकः ६ अवग्रहानन्तकं ७ पोट्टः ८ अर्द्धोरुकः ९ वक्षनिका १० कञ्चुकः ११ अवकक्षी १२ वैकक्षी १३ ।

उक्तं च--

" पत्ताबंधाईया, चउरो ते चेव पुव्वनिद्दिट्ठा ।
मत्तो य कमढगं वा, तह ओग्गहऽणंतगं चेव ॥ १ ॥
पट्टो अद्धोरुचिय, वलणिय तह कंचुगे य ओगच्छी ।
वेगच्छी तेरसमा, अज्जाणं होइ नायव्वा ॥ २ ॥"

उत्कृष्टोऽष्टविधः, तद्यथा-पतद्ग्रहस्त्रयः कल्पाः,अभ्यन्तरनिवसनी, बहिर्निवसनी, संघाटी, स्कन्धकरणी च । " उक्कोसो अट्ठविहो, चउरो ते चेव पुव्वनिद्दिट्ठा जे साहूणं, अन्ने य इमे चत्तारो-अब्भितरनियंसणी,बाहिनियंसणी,संघाडी,खंधकरणी य"इति। औपग्राहिकोऽपि साधूनामार्यिकाणां च त्रिविधः । तद्यथा-जघन्यो, मध्यमः, उत्कृष्टश्च । तत्र पीठफलकोच्चारप्रस्रवणखेलमल्लकाऽऽदिर्जघन्यः, मध्यमो दण्डकप्रोञ्छकोच्चारप्रस्रवणखेलमल्लकाऽऽदिरूप आर्यिकाणामधिको वारकः, उत्कृष्टोऽङ्काः संस्तारक एकाङ्गिक इतरो वा, द्वितीयपदे पुस्तकपञ्चकं, फलकं च । " अक्खा संथारो वा, दुविहो एगंगिओ व इयरो वा । विइयपयं पोत्थपणगं,फलगं तह होइ उक्कोसो ॥ १ ॥" तत्रोत्कृष्टमुपधिं यदि यथाकालं न प्रत्युपेक्षते चतुर्मासलघु, मध्यमं यदि न प्रत्युपेक्षते तदा मासगुरु । जघन्यं न प्रत्युपेक्षते पञ्चरात्रिन्दिवानि, दोषैः प्रत्युपेक्षते मासलघु । (पोसहियतवे य तहा इति) पोषं दधातीति पोषधम्-अष्टमीपाक्षिकाऽऽदि । पोषधे भवं पौषधिकं, तच्च तत् तपश्च पौषधिकतपः, तस्मिन्, क्रियमाणे इति सामर्थ्याद्गम्यते । सामान्यतो मासनिष्पन्नं प्रायश्चित्तमिति योजना । तद्यथा-अष्टम्यां चतुर्थं न करोति मासलघु, पाक्षिके चतुर्थं न करोति

मासगुरु, चतुर्मासके अष्टमाकरणे चतुर्मासलघु. सांवत्सरिके अष्टमं न करोति चतुर्मासगुरु । तथा एतेष्वेवाष्टमीपाक्षिकाऽऽदिषु चैत्यानां जिनबिम्बानां, चशब्दाद् ये अन्यस्यां वसतौ सुसाधवस्तेषामप्यवन्दने मासलघु । तथा ये चैत्यभवनस्थिता वैकालिकं कालं प्रतिक्रम्य अकृते आवश्यके प्रभाते च कृते आवश्यके यदि चैत्यानि न वन्दन्ते, तेषामपि मासलघु । उक्तं चास्यैव अवद्वारस्य चूर्णौ-" एएसु चेव अट्ठमिमादीसु चेइयाइं साहुणो साहुणी वा जहण्णाए वसहीए ठिया,ते न वंदंति मासलघु । जइ चेइयघरे ठिया वेयालिकं कालं पमिक्कंता अकए आवस्सए गोसे य कए आवस्सए चेइए न वंदंति मासलहु । " इति ।

साम्प्रतमेनामेव गाथां व्याचिख्यासुः प्रथमतो " सज्झायस्स अकरणे " इत्येतद् व्याख्यानयति-

सुत्तत्थपोरिसीणं, अकरणे मासो उ होइ गुरुलघुगो ।
चाउक्कालं पोरिसि-उवायणं बस्स चउलहुगा ॥१३१॥

सूत्रार्थपौरुष्योः-सूत्रपौरुष्याः, अर्थपौरुष्या इत्यर्थः । अकरणे यथाक्रमं गुरुमासो,लघुमासः । अर्थपौरुषी हि प्रज्ञाऽऽदिविशिष्टसामग्र्यपेक्षा सूत्रायत्ता च । सूत्रपौरुषी त्वनिनवदीक्षितेनाऽपि जडमतिनाऽपि च यथाशक्ति अवश्यं कर्त्तव्या । सूत्राभावे सर्वस्याप्यभावादतः सूत्रपौरुष्या अकरणे मासगुरु । अर्थपौरुष्या अकरणे मासलघु । द्वयोः सूत्रपौरुष्योरकरणे द्वौ लघुमासौ । तिसृणां पौरुषीणामकरणे त्रयो लघुमासा इति सामर्थ्यात्प्रतिपत्तव्यम् । (चाउक्कालमित्यादि) चतुःकालं दिवारात्रिगतप्रथमचरमप्रहररूपेषु चतुर्षु कालेषु सूत्रपौरुषीरवपातयतो भ्रंशयतोऽकुर्वत इत्यर्थः । चतुर्षु लघुकाश्चत्वारो लघुमासाः ।

सम्प्रति ' काउस्सग्गे ' इति व्याख्यानयति-

जइ उस्सग्गे न कुणइ, तइमासा निसण्ण निवणे य ।
सव्वं चेवावस्सं, न कुणइ तहियं चउलहुं ति ॥१३२॥

आवश्यके प्रभाते वैकालिके वा यावतः कायोत्सर्गान्न करोति तावन्तो मासास्तस्य प्रायश्चित्तम् । एकं चेन्न करोति, एको लघुमासः । द्वौ न करोति द्वौ लघुमासौ । त्रीन्न करोति त्रयो लघुमासाः । तथा निषण्ण उपविष्टो, निपन्नः पतितः, सुप्त इत्यर्थः । चशब्दात् प्रावरणप्रावृतो वा यद्यावश्यकं करोति तदा सर्वत्र मासलघु । यदि पुनः सर्वमेवाऽऽवश्यकं न करोति तदा चतुर्लघु-चत्वारो लघुमासाः प्रायश्चित्तम् ।

अधुना " अपडिलेहाइ त्ति " व्याचष्टे-

चाउम्मासुक्कोसे, मासे मज्झे य पंच उ जहन्ने ।
लद्धिस्स अपेहाए, एसा खलु होइ आरुवणा ॥१३३॥

लब्धेः उत्कृष्टस्य प्रागुक्तस्वरूपस्य उपधेरप्रेक्षायामप्रत्युपेक्षायां चत्वारो लघुमासाः । मध्ये मध्यमस्योपधेरप्रत्युपेक्षायां लघुमासः । जघन्ये जघन्यस्य पञ्चरात्रिन्दिवानि । एषा खलु भवति आरोपणा प्रायश्चित्तं प्रत्युपेक्षायामिति ।

संप्रति " पोसहियतवे य " इति व्याख्यानयति-

चउछट्ठऽट्ठमकरणे, अट्ठमिपक्खचउमासवरिसे य ।
लहु गुरु लहुगा गुरुगा, अवंदणे चेइ-साहूणं ॥१३४॥

अत्र यथासंख्येन पदयोजना । सा चैवम्-अष्टम्यां चतुर्थस्याऽकरणे मासलघु । पक्षे पाक्षिके चतुर्थस्याऽकरणे मासगुरु । चतुर्मासे अष्टमस्याऽकरणे चत्वारो लघुमासाः । सांवत्सरिके षष्ठस्याऽकरणे चत्वारो गुरुमासाः । तथा एतेषु चाऽष्टम्यादिषु दिवसेषु चैत्यानाम्, अन्यवसतिगतस्तु साधूनां चाऽवन्दने प्रत्येकं मासलघु ।

सम्प्रति लाघवार्थमत्रैव भेदाहं प्रायश्चित्तमाह-

एतेसु तिण्हमेसुं, जिक्खू जो वट्टए पमाएण ।
सो मासियं ति लग्गइ, उग्घायं वा अणुग्घायं ॥१३५॥

एतेष्वनन्तरोदितेषु स्थानेषु (ति त्ति) त्रीन् वारान् यो भिक्षुः प्रमादेन वर्त्तते, प्रमादैर्वैषां स्थानानामन्यतरत् त्रीन् वारान् अतिचरति, स मासिकं सामान्यतो मासनिष्पन्नं भेदमुद्घातं लघु, अनुद्घातं गुरुकं लगति प्राप्नोति । यत्र यावन्तो मासा लघवो गुरवो वा तपः प्रायश्चित्तं, तत्र तावन्तो मासा लघवो गुरवो वा छेद इति यावत् ।

सम्प्रति शेषाणि यानि चातुर्मासिकानि षाण्मासिकानि वा प्रायश्चित्तानि, ये वा भणिताः छेदाः, यानि च मूलानवस्थितपाराञ्चितानि, तदेतत्सर्वमेकगाथया विवक्षुराह-

छक्कायं चउसु लहुगा, परित्त लहुगा य गुरुग साहारे ।
संघट्टणपरितावण, लहुगुरुगऽतिवायणे मूलं ॥१३६॥

षट्कायाः पृथिव्यप्तेजोवायुवनस्पतित्रसकायरूपाः । तेषां मध्ये चतुर्षु पृथिव्यप्तेजोवायुरूपेषु संघट्टनाऽऽदिनिर्लघुकाः प्रायश्चित्तं, परीत्ते प्रत्येकवनस्पतिकायेऽपि च लघुकाः, साधारे अनन्तवनस्पतिकायिके संघट्टनाऽऽदिषु गुरुकाः । तथा द्वीन्द्रियाऽऽदीनां संघट्टने परितापने च यथायोगं लघुका गुरुकाश्च प्रायश्चित्तम्। अतिपातने विनाशे मूलम् । इयमत्र भावना-पृथिवीकायं संघट्टयति मासलघु , परितापयति मासगुरु, अपद्रावयति जीविताद् व्यपरोपयतीत्यर्थः; चतुर्लघु । एवमप्कायेतेजस्काये वायुकाये प्रत्येकवनस्पतिकाये च द्रष्टव्यम् । उक्तं च-" छक्कायाऽऽदिम चउसु, तइ य परित्तम्मि होति वसकाए । लहु गुरु मासो चउलहु, संघट्टणपरितावणुद्दवणे ॥१॥ " एतत्प्रायश्चित्तमेकैकस्मिन् दिवसे संघट्टनाऽऽदिकरणे; यदि पुनर्द्वौ द्वौ दिवसौ पृथिव्यादीन् संघट्टयति तदा मासगुरु, परितापयति चतुर्लघु, जीविताद् व्यपरोपयति चतुर्गुरुकं, त्रीन् दिवसान् निरन्तरं पृथिव्यादि संघट्टयति चतुर्लघु, परितापयति चतुर्गुरु, अपद्रावयति षम्लघु, निरन्तरं परितापने षम्लघु, अपद्रावणे षम्गुरु, पञ्चदिवसान्निरन्तरं पृथिव्यादीनां संघट्टने षम्लघु,परितापने षम्गुरु, अपद्रावणे मासिकच्छेदः । षमदिवसान्निरन्तरं संघट्टने षम्गुरु,परितापने मासिकच्छेदः, अपद्रावणे चतुर्मासिकच्छेदः। सप्तदिवसान्निरन्तरं पृथिव्यादीनां संघट्टने मासिकच्छेदः । अपद्रावणे षाण्मासिकः । अष्टौ दिवसान्निरन्तरं पृथिव्यादीनां संघट्टने चातुर्मासिकच्छेदः । परितापने षाण्मासिकः । अपद्रावणे मूलम । उक्तं च-" दोहिं दिवसेहिं मासगुरुए आढवेत्ता चउगुरुए जाति० जाव अट्ठहिं संघट्टयति । " अनन्तवनस्पतिकायिकं संघट्टयति मासगुरु । परितापयति चतुर्गुरु । अपद्रावयति चतुर्गुरु । द्विदिवसाऽऽदिनिरन्तरसंघट्टनाऽऽदिषु सरोत्तरैकैकस्थाने वृद्धिः, ततः सप्तभिर्दिवसैर्मूलम् । द्वीन्द्रियं संघट्टयति चतुर्लघु, परितापयति चतुर्गुरु, अ-

षड्भावयति षण्मासेषु । अत्र ह्यादिदिवसं निरन्तरं संघट्टनाऽऽदिषु षण्भिर्दिवसैर्मूलम् । त्रीन्द्रियं संघट्टयति चतुर्गुरु, परितापयति षण्मासेषु, अपद्रावयति षण्गुरु । अत्र पञ्चभिर्दिवसैर्मूलम् । चतुरिन्द्रियं संघट्टयति षण्मासेषु, परितापयतः षण्गुरु, अपद्रावयतो मासिकच्छेदः । अत्र चतुर्भिर्दिवसैर्मूलम् । चतुरिन्द्रियं संघट्टयति षण्मासेषु, परितापयतः षण्गुरु, अपद्रावयतो मासिकच्छेदः । अत्र चतुर्भिर्दिवसैर्मूलम् । पञ्चेन्द्रियं संघट्टयतः षण्गुरु, परितापयतश्छेदः, अपद्रावयतो मूलम् । अत्र द्वयोर्दिवसयोरनवस्थाप्यं, त्रिषु दिवसेषु पाराञ्चितमिति । व्य० १ उ० ।

तपोऽर्हमभिधीयते-

निव्वीए पुरिमड्ढे-गभत्तमायंबिलं चऽणागाढे ।
पुरिमाई खमणंतं, आगाढे एवमत्थे वि ॥ ४३ ॥

इह तपोऽर्हप्रायश्चित्ते ज्ञानदर्शनचारित्रतपोवीर्याऽऽचारपञ्चकशततिचारचक्रमाक्षोभ्यम्, तत्राऽऽद्यो ज्ञानाऽऽचारस्यातिचारे ज्ञानाचारातिचारः, सोऽष्टविधः। तद्यथा-अकाले स्वाध्यायकरणं काल्लातिचारः१। श्रुतमधिजिज्ञासोर्जीतमदावज्ञेपेन गुरुषु,विनयो वन्दनाऽऽदिरुपचारः, तस्याप्रयोजनं, हीनं वा विनयातिचारः २ । श्रुते गुरौ वा बहुमानो हार्दः प्रतिबन्धविशेषः,तस्याऽकरणं बहुमानातिचारः ३। उपधानमाचाम्लाऽऽदितपसा योगविधानं,तस्याकरणमुपधानातिचारः ४। यत्पार्श्वे श्रुतमधीतं तं निह्नुतेऽपलपति अन्यं वा युगप्रधानमात्मनोऽध्यापकं निर्दिशति, स्वयं वाऽधीतमित्याचष्टे, एष निह्नवनामिधानातिचारः ५ । व्यज्यते अर्थोऽनेनेति व्यञ्जनमागमसूत्रं, तन्मात्राक्षरबिन्दुमिरूनमतिरिक्तं वा करोति, संस्कृतं वा विधत्ते, पर्यायैर्वा विदधाति। यथा-"धम्मो मंगलमुक्किट्ठं " इत्यादिस्थाने-" पुन्नं कल्लाणमुक्कोसं, दया संवरनिज्जरेति " व्यञ्जनातिचारः ६ । आगमपदार्थस्यान्यथापरिकल्पनमर्थातिचारः । यथा आचारसूत्रेऽवन्त्यध्ययनमध्ये "आवंती केआ लोगंसि विप्परामुसंतीति । " यावन्तः केचित् लोकेऽस्मिन् पापण्डिलोके विपरामृशन्तीति प्रस्तुतेऽर्थेऽन्योऽर्थः परिकल्प्यते-"आवंति दोइ देसो, तत्थ उ अरहट्टकूवजा केया। घडिमासपमिहियाहिं, तं लोगो विप्परामुसइ । " ७ । यत्र च सूत्रार्थौ द्वावपि विनश्येते, स तदुभयातिचारो यथा-

" धम्मो मंगलमुक्किट्ठो, अहिंसा गिरिमत्थए ।
देवा वि तं नमंसंति, जस्स धम्मे सया मती ॥१॥
आहागमेसु रंधेति, कट्ठेसु रहकारओ ।
रत्तो भत्तंसिणो जत्थ, गहभो जत्थ दीसइ ॥ २ ॥ "

अयं च महीयानतिचारो, यतः सूत्रार्थोभयनाशे मोक्षाभावः, तदभावे दीक्षावैयर्थ्यमिति। एष चाष्टविधोऽपि ज्ञानाचारातिचारो द्विधा-ओघतो, विभागतश्च । तत्र विभागत उद्देशकाध्ययनश्रुतस्कन्धाङ्गेषु विषये प्रमादिनः प्रमादपरस्य काल्लातिक्रमणाऽऽदिष्वष्टसु ज्ञानाऽऽचारातिचारेषु जातेषु क्रमशः क्रमेण तपो निर्विकृतिकं,पुरिमार्द्धैकभक्ते आचाम्लं च, अनागाढे दशवैकालिकाऽऽदिके श्रुते उद्देशकातिचारे,अकालपाठाऽऽदिके निर्विकृतिकम, अध्ययनातिचारे पुरिमार्द्धम, श्रुतस्कन्धातिचारे एकभक्तम,अङ्गातिचारे आचाम्लमित्यर्थः। आगाढे तूत्तराध्ययनभगवत्यादिके श्रुते, एतेष्वतिचारस्थानेषु पुरिमार्द्धाऽऽदि क्रमेणान्तमेव तपो भवति, एतद्विभागतः प्रायश्चित्तमुक्तम् । जीत० । (एतच्च ' अइयार ' शब्दे प्रथमभागे ८ पृष्ठेऽपि व्याख्यातम्)

छेयाइयाण वि तवो, मिउणो परियायगव्वियस्सऽवि य ।
छेयाइयाण वि तवो, जीएण गणाहिवइणो य ॥ ५६ ॥

यच्छेदं न श्रद्दधाति, भणति च व्रतपर्याये दिनपञ्चकाऽऽदौ क्षिप्ते किं मदीयं छिन्नं, सम्पूर्णकर्णनासिकाऽऽद्यवयव एव तावदहमस्मि, तस्य च्छेदाऽऽद्यश्रद्धानपरस्य (मिउणो त्ति) यद्विद्यमाने व्रतपर्याये न संतप्यते, यथा-कष्टं मम पर्यायश्छिन्न इति । यद्वा-अन्येषां लघूनामप्यहमतिलघीयान् जात इति तस्य मृदोः, यश्च पर्यायगर्वितो दीर्घपर्यायत्वात् क्षिप्तेऽपि पर्याये अन्येभ्योऽभ्यधिकपर्याय एव; न न्यूने पर्याये, न च पर्यायच्छेदाद् विभेति, तस्य पर्यायगर्वितस्य। अपि चेति समुच्चये । एतेषामुद्दिष्टानां छेदमापन्नानामपि, आदिशब्दान्मूलानवस्थाप्यपाराञ्चिकान्यथोपपन्नानां, तथा गणाधिपतेराचार्यस्य, चशब्दात्कुलगणसंघाधिपानां च, जीतेन जीतव्यवहारमतेन, तप एव दीयते । अत्राऽऽह-दीयतां नाम छेदाऽऽद्यश्रद्धालुप्रभृतीनां छेदाऽऽद्यापत्तावपि तपः,आचार्याऽऽदीनां तु कथमिति ? अत्रोच्यते-अनेकविधाः शिष्याः परिणामकापरिणामकाः,अतिपरिणामकाः, शैक्षा उच्छृङ्खलाश्चेति । तत्रोत्सर्गे उत्सर्गापवादे चापवादं यथा जानितं ये श्रद्दधत्याचरन्ति च ते परिणामकाः, ये पुनरुत्सर्गमेव श्रद्दधत्याचरन्ति, अपवादं तु न श्रद्दधति, नाचरन्ति वा, तेऽपरिणामकाः, ये चापवादमाचरन्ति नोत्सर्गं, तेऽतिपरिणामकाः, शैक्षा नवदीक्षिताः, उच्छृङ्खला उल्लुण्ठाः,एषामपरिणामिकाऽऽदीनामिमे मा निन्दनीया लाघवजाजोऽभूवन्नित्याचार्याऽऽदीनामपि त एव दीयन्ते, न छेदाऽऽद्य इति। जीत० ('जीयववहार ' शब्देऽस्मिन्नेव भागे १५१३ पृष्ठे, ' तपोरिह ' शब्दे २१८५ पृष्ठे चावशिष्टं द्रष्टव्यम्)

तविय-तप्त-त्रि० । " शर्षैतप्तवज्रे वा " ॥ ८ । २ । १०५ ॥ इति तप्तस्य संयुक्तस्यान्त्यव्यञ्जनात्पूर्वे इकारः । प्रा० २ पाद । तप्ते, स्था० ८ ठा० । " आइच्चतेयसा तविया खणलवदिवसाओ परिणमंति ।" स्था० ५ ठा० ३ उ० ।

तवोकम्म-तपःकर्म-न० । तस्यैवाऽष्टप्रकारस्य कर्मणो बद्धस्पृष्टनिधत्तनिकाचितावस्थस्याऽपि निर्जराहेतुभूतं बाह्याभ्यन्तरभेदेन द्वादशप्रकारं तपःकर्मोच्यते । आचा० १ श्रु० २ अ० १ उ० । निर्विकृतिकाऽऽदिनि (स्था० २ ठा० १ उ० । स० । औ०) महालयाऽऽदिनि (अन्त० ८ वर्ग० ३ अ०) तपःक्रियायाम्, स्था० ४ ठा० ३ उ० ।

तवोकम्मगंथिया-तपःकर्मग्रन्थिका-स्त्री० । तपःकर्मवक्तव्यतार्थाधिकारानुगतायां ग्रन्थपद्धतौ, स० ।

तवोगुणपहाण-तपोगुणप्रधान-त्रि० । षष्ठाष्टमाऽऽदितपोधनवति, दश० ४ अ० ।

तवोमग्गगइ-तपोमार्गगति-स्त्री० । उत्तराध्ययनानां त्रिंशत्तमेऽध्ययने, उत्त० २९ अ० । स० ।

दुविहतवोमग्गगई, बन्निज्जइ जम्ह एत्थ अज्झयणे ।
तम्हा एयऽज्झयणं, तवमग्गगइ त्ति नायव्वं ॥४६॥

द्विविधं तपो बाह्यमाभ्यन्तरं च, तदेव मार्गो भावमार्गः,तत्फलभूता च गतिः सिद्धिगतिः द्विविधतपोमार्गगतिर्जाप्यते यस्मादध्ययने तस्मादेतदध्ययनं तपोमार्गगतिरिति ज्ञातव्यम्, अभिधानोपचारादिति भावः । उत्त० पाई० ३० अ० ।

तवोमय–तपोमद–पुं० । अहमेव विकृष्टतपोविधायी नापि तपसा ग्लानिमुपगच्छामीत्येवंरूपे मदे, सूत्र० १ श्रु० १३ अ० । "पन्नामयं चेव तवोमयं च, णिन्नामए गोयमयं च भिक्खू ।" सूत्र० १ श्रु० १३ अ० ।

तवोवहाण–तपउपधान–न० । विशिष्टतपोविशेषे, सूत्र० १ श्रु० ६ अ० । तपःकर्मणि, "दाणं तवोवहाणं, सरीरसक्कारमो जहासत्ति ।" पञ्चा० ९ विव० । अनियन्त्रिते तपसि, श्रुतोपचारतपसि च । स० ६ अङ्ग ।

तवोवहाणादिय–तपउपधानादिक–त्रि० । तपःकर्मशरीरसत्कारप्रभृतिकाऽऽदौ, "कयमत्थ पसंगेणं, तवोवहाणादिया वि णियसमए । अणुरूवं कायव्वा, जिणाण कल्लाणदियहेसु ।" ॥ २६ ॥ पञ्चा० ६ विव० ।

तवोसमायारिसमाहिसंवुड–तपःसामाचारिसमाधिसंवृत–पुं० । तपसोऽनशनाऽऽद्यात्मकस्य सामाचारी समाचरणम् । यद्वा-तपश्च सामाचारी च तत्कृतो वक्ष्यमाणस्वरूपः समाधिश्च चेतसः स्वास्थ्यं, तैः संवृतो निरुद्धाऽऽश्रवः तपःसामाचारिसमाधिसंवृतः । यद्वा-तपःसामाचारिसमाधिभिः संवृतं संवरणं यस्य स तथा । तपसः समाचरणेन समाधिना च निरुद्धाऽऽश्रवे, उत्त० १ उ० ।

तव्वइरित्तमिच्छादंसणवत्तिया–तद्व्यतिरिक्तमिथ्यादर्शनप्रत्यया–स्त्री० । तस्मात् क्रूनातिरिक्तमिथ्यादर्शनाद्व्यतिरिक्तं मिथ्यादर्शनं नास्त्येवाऽऽत्मेत्यादिमतरूपं प्रत्ययो यस्याः सा तथा, तस्याम्, स्था० २ ठा० १ उ० ।

तव्वत्थुय–तद्वस्तुक–पुं० । तदेव परोपन्यस्तसाधनं वस्त्विति उत्तरभूतं वस्तु यस्मिन् उपन्यासोपनये स तद्वस्तुकः । अथवा-तदेव परोपन्यस्तं वस्तु तद्वस्तु, तदेव तद्वस्तुकं, तद्युक्त उपन्यासोपनयोऽपि तद्वस्तुकः । उपन्यासभेदे, स्था० । यथा कश्चिदाह-समुद्रतटे महान् वृक्षोऽस्ति, तच्छाखा जलस्थलयोरुपरि स्थिता, तत्पत्राणि च यानि जले निपतन्ति तानि जलचरा जीवा भवन्ति; यानि च स्थले तानि स्थलचरा इति । अन्यस्तदुपन्यस्तमेव तरुपत्रपतनवस्तु गृहीत्वा तदुक्तं विघटयति-यदुत यानि पुनर्मध्ये, तेषां का वार्तेत्येतदुपपत्तिमात्रमुत्तरभूतं तद्वस्तुक उपन्यासोपनयः, ज्ञातत्वं चास्य ज्ञाननिमित्तत्वात् । अथवा-यथारूढमेव ज्ञातमेतत् । तथा ह्येवं प्रयोगोऽस्य-जलस्थलपतितपत्राणि न जलचराऽऽदिसत्त्वाः संजनयन्ति, जलस्थलमध्यपतितपत्रवत् । तन्मध्यपतितपत्राणां हि जलस्थलपतितपत्रजलचरत्वाऽऽदिप्राप्तिवदुभयरूपप्रसङ्गः, न चोभयरूपाः सत्त्वा अभ्युपगता इति । अथवा-नित्यो जीवोऽमूर्तत्वादाकाशवदित्युक्ते आह-अनित्य एवास्तु मूर्तत्वात्कर्मवदिति । स्था० ४ ठा० ३ उ० ।

तव्वत्थूवण्णास–तद्वस्तूपन्यास–पुं० । उपन्यासभेदे, दश० १ अ० ।

तव्वत्थुयम्मि पुरिसो, सव्वं नाऊण साहइ अपुव्वं । (७४)

तद्वस्तुके, तद्वस्तूपन्यासे इत्यर्थः । पुरि शयनात् पुरुषः । सर्वं ज्ञात्वा सर्वमाहिणुयात्, किम् ?, कथयति, अपूर्वं, वर्तमाननिर्देशः पूर्ववदिति गाथादलार्थः । भावार्थः कथानकादवसेयः । तच्चेदम्-"एगम्मि देवकुले कप्पडिया मिलिता भणंति-केण मे भमंतेहिं किंचि अच्छेरियं दिट्ठं ? । तत्थ एगो कप्पडिओ भणइ-मए दिट्ठं ति । जइ पुण एत्थ समणोवासओ नऽत्थि, तो साहेमि । तओ सेसेहिं भणियं-णत्थिऽत्थ समणोवासओ । पच्छा सो भणति-मए हिमंतेणं पुव्ववेतालीए समुद्दस्स तमे रुक्खो महतिमहंतो दिट्ठो । तस्सेगा साहा समुद्दपइट्ठिया, एगा य थले । तत्थ जाणि पत्ताणि जले पमंति, ताणि जलचराणि सत्ताणि हवंति, जाणि थले, ताणि थलचराणि हवंति । ते कप्पडिया भणंति-अहो ! अच्छेरियं देवेण भट्टारएण णिम्मियं ति । तत्थेगो सावगो कप्पडिओ । सो भणति-जाणि अद्धमज्झे पमंति, ताणि किं हवंति ? । ताहे सो खुड्डो भणति-मया पुव्वं चेव भणितं । जइ सावओ नऽत्थि तो कहेमि । एतेणं तं चेव पमाणवत्थुमहिकिच्चोदाहरियं ।" एवं तावल्लौकिकमिदं चोक्तन्यायाल्लोकोत्तरस्यापि सूचकम् । तत्र चरणकरणानुयोगे यः कश्चिद्विनेयः कञ्चनासद्ग्राहं गृहीत्वा न सम्यग्वर्त्तते, स खलु तद्वस्तूपन्यासेनैव प्रज्ञापनीयः । यथा कश्चिदाह-"न मांसभक्षणे दोषो, न मद्ये न च मैथुने । प्रवृत्तिरेषा भूतानां, निवृत्तिस्तु महाफला ॥ १ ॥" इदं च किलैवमेव प्रयुज्यते, प्रवृत्तिमन्तरेण निवृत्तेः फलाभावान्निर्विषयत्वेनासंभवाच्च, तस्मात्फलनिबन्धननिवृत्तिनिमित्तत्वेन प्रवृत्तिरप्यदुष्टेति । अत्रोच्यते-इह निवृत्तेर्महाफलत्वं किं दुष्टप्रवृत्तिपरिहाराऽऽत्मकत्वेन, आहोस्विददुष्टप्रवृत्तिपरिहाराऽऽत्मकत्वेनेति ? । यद्याद्यः पक्षः-कथं प्रवृत्तेरदुष्टत्वम् ?, अथापरस्ततो निवृत्तेरप्यदुष्टत्वात्तन्निवृत्तेरपि प्रवृत्तिरूपाया महाफलत्वप्रसङ्गः, तथा च भवति पूर्वापरविरोध इति भावना । द्रव्यानुयोगे तु य एवमाह-एकान्तनित्यो जीवः, अमूर्त्तत्वादाकाशवदिति । स खलु तदेवामूर्तत्वमाश्रित्य तस्योत्क्षेपणाऽऽदावनित्ये कर्मण्यपि तावद्वक्तव्यः । कर्मामूर्त्तमनित्यं चेत्ययं दृष्टदर्शनेनोदाहरणदोष एव, यथाऽन्येषां साधर्म्यसमा जातिरिति । दश० १ अ० ।

तव्वयण–तद्वचन–न० । तस्य विवक्षितार्थस्य घटाऽऽदेर्वचनं भणनं तद्वचनं, घटार्थापेक्षया घटवचनवत् । वचनभेदे, स्था० ३ ठा० ३ उ० ।

तस–त्रस–पुं० । त्रसन्ति उष्णाऽऽद्यभितप्ताः सन्तो विवक्षितस्थानाद्बिभ्यति गच्छन्ति च छायाऽऽद्यासेवनार्थं स्थानान्तरमिति त्रसाः, अनया च व्युत्पत्त्या त्रसाख्यसनामकर्मोदयवर्तिन एव परिगृह्यन्ते, न शेषाः । अथ च शैवैरपीह प्रयोजनं, तत एवं व्युत्पत्तिः-त्रसन्ति अग्निसन्धिपूर्वकमनग्निसन्धिपूर्वकं वा ऊर्ध्वमधस्तिर्यक्षु चलन्तीति त्रसाः तेजोवायुषु, द्वीन्द्रियाऽऽदिषु च । जी० १ प्रति० । त्रसन्तीति त्रसाः । द्वीन्द्रियाऽऽदिषु, सूत्र० २ श्रु० १ अ० । जं० । सू० प्र० । स्था० । पं० सं० । आचा० । आव० । स० । द्वीन्द्रियाऽऽदिकृम्यादिषु, आचा० १ श्रु० ६ अ० १ उ० । द्वित्रिचतुःपञ्चेन्द्रियेषु पर्याप्तापर्याप्तभेदभिन्नेषु, सूत्र० १ श्रु० ५ अ० १ उ० । त्रसनामकर्मोदयतस्त्रस्यन्तीति त्रसाः । द्वीन्द्रियाऽऽदिषु, स्था० २ ठा० १ उ० । सूत्र० । तेजोवायुद्वीन्द्रियाऽऽदिषु, नि० चू० १२ उ० । सूत्र० । द्वित्रिचतुःपञ्चेन्द्रियेषु, सूत्र० १ श्रु० ११ अ० । त्रस्यन्ति तापाऽऽद्युपतप्ताश्छायाऽऽदिकं प्रत्यभिसर्पन्तीति त्रसाः । द्वीन्द्रियाऽऽदिषु, उत्त० ५ अ० । कुन्थ्वादिषु, पा० । दर्दुरप्रभृतिषु, सूत्र० २ श्रु० ३ अ० । त्रससंसारकृतेन कर्मणा समुत्पन्नाः सन्तः सामान्यसंज्ञया प्राणा अभ्युच्यन्ते, तथा विशेषतः 'त्रस' भयचलनयोरिति धात्वर्थानुगमाद्, भयचलनाद्यामुपेतेषु, सूत्र० २ श्रु०

उ अ० । त्रस्यन्तीति त्रसाः तेजोवायुरूपा विकलेन्द्रियपञ्चेन्द्रियभेदात्त्रिधा । सूत्र० १ श्रु० ६ अ० ।

तिविहा तसा पण्णत्ता । तं जहा-तेउकाइया, वाउकाइया, उराला तसा पाणा ।

त्रस्यन्तीति त्रसाः संचलनधर्माणः, तत्र तेजोवायवो गतिथोमात्त्रसाः उदाराः स्थूलास्त्रसा इति त्रसनामकर्मोदयवर्त्तित्वात् प्राणा इति व्यक्तोच्छ्वासाऽऽदिप्राणयोगाद् द्वीन्द्रियाऽऽदयस्तेऽपि गतियोगात् त्रसा इति । स्था० ३ ठा० २ उ० ।

सम्प्रति औदारिकत्रसानाह-

से किं तं उराला तसा पाणा ? उराला तसा पाणा चउव्विहा पण्णत्ता । तं जहा-बेइंदिया, तेइंदिया, चउरिंदिया, पंचिंदिया ।

(से किं तमित्यादि) अथ के ते औदारिकास्त्रसाः ? सूरिराह-औदारिकास्त्रसाश्चतुर्विधाः प्रज्ञप्ताः । तथा द्वीन्द्रियास्त्रीन्द्रियाः चतुरिन्द्रियाः पञ्चेन्द्रियाः । तत्र द्वे स्पर्शरसनरूपे इन्द्रिये येषां ते द्वीन्द्रियाः । त्रीणि स्पर्शनरसनघ्राणरूपाणि इन्द्रियाणि येषां ते त्रीन्द्रियाः चत्वारि स्पर्शनरसनघ्राणचक्षूरूपाणि इन्द्रियाणि येषां ते चतुरिन्द्रियाः । पञ्च स्पर्शनरसनघ्राणचक्षुःश्रोत्ररूपाणि इन्द्रियाणि येषां ते पञ्चेन्द्रियाः । जी० १ प्रति० ।

इदानीं त्रसाधिकारे एतदाह-

से जे पुण इमे अणेगे बहवे तसा पाणा । तं जहा-अंडया,पोयया,जराउया,रसया,संसेइमा, संमुच्छिमा,उब्भिया, उववाइया ॥

(से जे पुण इमे इति) 'से' शब्दोऽथशब्दार्थः । असावप्युपन्यासार्थः । " अथ प्रक्रियाप्रश्नानन्तर्यमङ्गलोपन्यासप्रतिवचनसमुच्चयेषु " इति वचनात् । अथ ये पुनरमी बाह्याऽऽदीनामपि प्रसिद्धाः, अनेके द्वीन्द्रियाऽऽदिभेदेन बहव एकैकस्यां जातौ त्रसाः प्राणिनः-त्रस्यन्तीति त्रसाः प्राणा उच्छ्वासाऽऽदय एषां विद्यन्त इति । तद्यथा-(अंडया इत्यादि) एष खलु षष्ठो जीवनिकायः त्रसकायः प्रोच्यत इति योगः । तत्राण्डाज्जाता अण्डजाः; पक्षिगृहकोकिलाऽऽदयः । पोता एव जायन्त इति पोतजाः । " अन्येष्वपि दृश्यते " ॥ ३ । २ । १०१ । इति डप्रत्ययो जनेरिति वचनात्; ते च हस्तिवल्गुलीचर्मजलूकाप्रभृतयः । जरायुवेष्टिता जायन्त इति जरायुजाः । गोमहिष्यजाऽविकमनुष्याऽऽदयः । अत्रापि पूर्ववद्भप्रत्ययः । रसाज्जाता रसजाः; तक्राऽऽरनालदधितीमनाऽऽदिषु पायुकृम्याकृतयोऽतिसूक्ष्मा भवन्ति । संस्वेदाज्जाता इति संस्वेदजाः, प्रक्कणयूकाशतपादिकाऽऽदयः । संमूर्च्छनाज्जाताः संमूर्च्छनजाः, शलनपिपीलिकामक्षिकाशालूकाऽऽदयः । उद्भेदाज्जन्म येषां ते उद्भेदाः । अथवा-उद्भेदनमुद्भित्, उद्भिज्जन्म येषां ते उद्भिज्जाः; पतङ्गखञ्जरीटपारिप्लवाऽऽदयः । उपपाताज्जाता उपपातजाः । अथवा-उपपाते भवा औपपातिकाः; देवा नारकाश्च ।

एतेषामेव लक्षणमाह-

जेसिं केसिं चि पाणाणं अभिक्कंतं पडिक्कंतं संकुचियं पसारियं रुयं भंतं तसियं पलाइयं आगइगइविण्णाया ॥

येषां केषाञ्चित्सामान्येनैव प्राणिनां जीवानामभिक्रान्तं, अवतीति वाक्यशेषः । अभिक्रमणमभिक्रान्तं, भावे निष्ठाप्रत्ययः । प्रज्ञापकं प्रत्यभिमुखं क्रमणमित्यर्थः । एवं प्रतिक्रमणं प्रतिक्रान्तं, प्रज्ञापकात्प्रतीपं क्रमणमिति भावः । संकोचनं संकुचितं, गात्रसंकोचकरणम् । प्रसारणं प्रसारितं, गात्रविततकरणम् । रवणं रुतं, शब्दकरणम् । भ्रमणं भ्रान्तम्, इतश्चेतश्च गमनम् । त्रसनं त्रस्तं,दुःखाद्युद्वेजनम् । पलायनं पलायितं,कुतश्चिदाशासनम् । तथा आगतेः कुतश्चित् क्वचित्, गतेश्च कुतश्चित्क्वचिदेव च, (विण्णाया इति) विज्ञातारः । आह-अभिक्रान्तप्रतिक्रान्ताभ्यां नाऽऽगतिगत्योः क्वचिद्भेद इति किमर्थं भेदेनाभिधानम् ? उच्यते-विज्ञानविशेषख्यापनार्थम् । एतदुक्तं भवति-य एव विजानन्ति,यथा-वयमभिक्रामामः,प्रतिक्रामामो वा,त एव त्रसाः; न तु वृत्तिं प्रत्यभिक्रमणवन्तोऽपि वल्ल्यादय इति । आह-एवमपि द्वीन्द्रियाऽऽदीनामत्र सञ्ज्ञिप्रसङ्गः, अभिक्रमणप्रतिक्रमणभावेऽप्येवं विज्ञानाभावात् । नैतदेवम् । हेतुसंज्ञाया अवगतेर्बुद्धिपूर्वकमिव ज्ञायते उष्णमुष्णाद्या ज्ञायां प्रति तेषामभिक्रमणाऽऽदिज्ञानात् । न चैवं वल्ल्यादीनामभिक्रमणाद्योघसंज्ञायाः प्रवृत्तेरिति कृतं प्रसङ्गेन ।

अधिकृतत्रसभेदानाह-

जे य कीमपअंगा, जा य कुंथुपिपीलिया, सव्वे बेइंदिया, सव्वे तेइंदिया, सव्वे चउरिंदिया,सव्वे पंचिंदिया, सव्वे तिरिक्खजोणिया, सव्वे नेरइया, सव्वे मणुया, सव्वे देवा, सव्वे पाणा परमहम्मिया ।

(जे य इत्यादि) ये च कीटपतङ्गा इत्यत्र कीटाः कृमयः,"एकग्रहणे तज्जातीयग्रहणम्"इति द्वीन्द्रियाः शङ्खाऽऽदयोऽपि गृह्यन्ते । पतङ्गाः शलभाः । अत्राऽपि पूर्ववच्चतुरिन्द्रिया भ्रमराऽऽदयोऽपि गृह्यन्त इति । तथा याश्च कुन्थुपिपीलिका इति; अनेन त्रीन्द्रियाः सर्व एव गृह्यन्ते । अत एवाऽऽह-सर्वे द्वीन्द्रियाः कृम्यादयः, सर्वे त्रीन्द्रियाः कुन्थ्वादयः, सर्वे चतुरिन्द्रियाः पतङ्गाऽऽदयः। आह-ये च कीटपतङ्गा इत्यादावुद्देशव्यत्ययः किमर्थम् ? उच्यते-विचित्रा सूत्रगतिः,अतन्त्रः क्रम इति ज्ञापनार्थम । सर्वे पञ्चेन्द्रियाः सामान्यतः । विशेषतः पुनः सर्वे तिर्यग्योनयो गवादयः; सर्वे नारका रत्नप्रभानारकाऽऽदिभेदभिन्नाः; सर्वे मनुजाः कर्मभूमिजाऽऽदयः; सर्वे देवा भवनवास्यादयः । सर्वशब्दश्चात्र परिशेषभेदानां त्रसत्वख्यापनार्थः । सर्व एवैते त्रसाः; न त्वेकेन्द्रिया इव त्रसाः, स्थावराश्च इति । उक्तं च-"पृथिव्यप्तेजोवनस्पतयः स्थावराः,तेजोवायुद्वीन्द्रियाऽऽदयश्च त्रसाः" इति । सर्वे प्राणिनः परमधर्माण इति । सर्वे एते प्राणिनो द्वीन्द्रियाऽऽदयः,पृथिव्यादयश्च परमधर्माण इति । अत्र परमं सुखं तद्धर्माणः-सुखधर्माणः, सुखाभिलाषिण इत्यर्थः । यतश्चैवमित्यतो दुःखोत्पादपरिजिहीर्षया एतेषां षण्णां जीवनिकायानां नैव स्वयं दण्डं समारभेतेति योगः ।

षष्ठं जीवनिकायं निगमयन्नाह-

एसो खलु छट्ठो जीवनिकाओ तसकाओ त्ति पवुच्चइ ।

एष खल्वनन्तरोदितः कीटाऽऽदिः षष्ठो जीवनिकायः, पृथिव्यादिपञ्चकापेक्षया षष्ठत्वमस्य । त्रसकाय इति प्रोच्यते-प्रकर्षेणोच्यते, सर्वैरेव तीर्थकरगणधरैरिति प्रयोगार्थः । प्रयोगश्चविद्यमानकर्तृकमिदं शरीरम् , आदिमत्प्रतिनियताऽऽकारत्वात्,

घटवत् । आह-इदं त्रसकायनिगमनमनन्तरिधायास्थाने सर्वे प्राणिनः परमधर्माण इत्यनन्तरसूत्रसंबन्धिसूत्राभिधानं किमर्थम् ? उच्यते-निगमनसूत्रव्यवधानवदर्थान्तरेण व्यवधानख्यापनार्थम् । तथाहि-त्रसकायनिगमनसूत्रावसानो जीवाभिगमः, अवान्तरेऽजीवाभिगमाधिकारः, तदर्थमभिधाय चारित्रधर्मो वक्तव्यः । दश० ४ अ० ।

त्रस–धा० । गतौ, भये, निषेधे च । चुरा०-उभ०-सक०-सेट् । त्रासयति । त्रासयते । अतित्रसत् । वाच० । भये,भ्वादि०-फणा०-पर०-भक०-सेट् । वाच० । "त्रसेर्मर-वोज्र-वज्राः" ॥ ८ । ४ । १९७ ॥ त्रसेरेते त्रय आदेशा वा भवन्ति । 'डरइ,' 'वोज्रइ,' 'वज्जइ' । पक्षे-'तसइ' । प्रा० ४ पाद ।

तसकाइय–त्रसकायिक–पुं० । त्रसनशीलास्त्रसाः, त्रसाः कायाः शरीराणि येषां ते त्रसकायाः, त्रसकाया एव त्रसकायिकाः । दश० ४ अ० । जङ्गमप्राणिनि, स० ३ सम० ।

तसकाय–त्रसकाय–पुं० । त्रसनामकर्मोदयात्त्रस्यन्तीति त्रसाः, तेषां कायो राशिस्त्रसकायः । स्था० २ ठा० १ उ० । त्रसनशीलास्त्रसाः, त्रसाः कायाः शरीराणि येषां ते त्रसकायाः । जङ्गमजीवभेदे, स० १० सम० । " तसकाए छविहे पण्णत्ते । तं जहा-भवसिद्धिए चेव, अभवसिद्धिए चेव । " स्था० २ ठा० १ उ० । (व्याख्या स्वस्वस्थाने)

अथ त्रसकायोद्देशमाह-

बसकाए दाराइं, ताई जाइं हवंति पुढवीए ।
नाणत्तओ विहाणे, परिमाणुवभोगसत्थे य ॥ ५१ ॥

त्रसन्तीति त्रसाः, तेषां कायः, तस्मिन्, तान्येव द्वाराणि भवन्ति, यानि पृथिव्याः प्रतिपादितानि । नानात्वं विधानपरिमाणोपभोगशस्त्रद्वारेषु, चशब्दात्लक्षणे च प्रतिपत्तव्यमिति ।

तत्र विधानद्वारमाह-

दुविहा खलु तसजीवा, लद्धितसा चेव गतितसा चेव ।
लद्धी य तेउवाऊ, तेणऽहिगारो इहं नत्थि ॥ ५२ ॥

(दुविहेत्यादि) द्विविधा द्विभेदाः, खलुरवधारणे, त्रसत्वं प्रति द्विभेदत्वमेव-त्रसनात् स्पन्दनात् त्रसाः, जीवनात् प्राणधारणाज्जीवाः । त्रसा एव जीवास्त्रसजीवाः-लब्धित्रसाः,गतित्रसाश्च । लब्धौ तेजोवायू त्रसौ, लब्धिस्तल्लक्षितोऽत्रम् । लब्धित्रसाधिकारेणाधिकारो नास्ति, तेजसोऽनिहितत्वाद्, वायोश्चानिधास्यमानत्वात्, अतः सामर्थ्याद् गतित्रसा एवाधिक्रियन्ते ।

के पुनस्ते कियद्भेदा इत्याह-

नेरइयतिरियमणुया, सुरा गइतसा चउव्विहा एए ।
पज्जत्ताऽपज्जत्ता, नेरइयाई उ नायव्वा ॥ ५३ ॥

(नेरइयेत्यादि) नारकाः-रत्नशर्कराऽऽदिमहातमःपृथ्वीपर्यन्तनारकवासिनः सप्तभेदाः,तिर्यञ्चोऽपि-द्वित्रिचतुःपञ्चेन्द्रियाः, मनुष्याः-संमूर्छनजाः, गर्भव्युत्क्रान्तपञ्च; सुराः-भवनपतिव्यन्तरज्योतिष्कवैमानिकाः,एते गतित्रसाश्चतुर्विधाः,नामकर्मोदयाभिनिर्वृत्तगतिलक्षणाश्चलित्रसत्वम् । एते च नारकाऽऽदयः पर्याप्तापर्याप्तभेदेन द्विविधा भवन्ति; तत्र पर्याप्तिः पूर्वोक्तैव पोढा, तेषा यथासंभवं निष्पन्नाः पर्याप्ताः, तद्विपरीतास्त्वपर्याप्तका अन्तर्मुहूर्तकालमिति ।

इदानीमुत्तरभेदानाह-

तिविहा तिविहा जोणी, अंमा पोया जराउया चेव ।
वेइंदिय तेइंदिय, चउरो पंचेंदिया चेव ॥ ५४ ॥

(तिविहेत्यादि) अत्र हि शीतोष्णमिश्रभेदात्, तथा-सचित्ताचित्तमिश्रभेदात्, तथा-संवृतविवृतोभयभेदात्, तथा-स्त्रीपुंनपुंसकभेदाच्चेत्यादीनि बहूनि योनीनां त्रिकाणि संभवन्ति, तेषां सर्वेषां संग्रहार्थं त्रिविधा त्रिविधेति वाचा निर्देशः, तत्र नारकाणामाद्यासु तिसृषु भूमिषु शीतैव योनिः, चतुर्थ्यामुपरितननरकेषु शीता,अधस्तननरकेषूष्णा, पञ्चम्यां षष्ठीसप्तमीषूष्णैव, नेतरे, गर्भव्युत्क्रान्तिकतिर्यङ्मनुष्याणामशेषदेवानां च शीतोष्णा योनिर्नेतरे, द्वित्रिचतुःपञ्चेन्द्रियसम्मूर्च्छनजतिर्यङ्मनुष्याणां त्रिविधाऽपि योनिः-शीता, उष्णा, शीतोष्णा चेति । तथा-नारकदेवानामचित्ता, नेतरे, द्वीन्द्रियाऽऽदिसंमूर्च्छजपञ्चेन्द्रियतिर्यङ्मनुष्याणां सचित्ताचित्तमिश्रयोनिर्नेतरे ..... (१) । तथा-देवनारकाणां संवृता योनिर्नेतरे, द्वित्रिचतुरिन्द्रियसम्मूर्च्छनजपञ्चेन्द्रियतिर्यङ्मनुष्याणां विवृता योनिर्नेतरे, गर्भव्युत्क्रान्तिकतिर्यङ्मनुष्याणां संवृतविवृता योनिर्नेतरे । तथा-नारका नपुंसकजपञ्चेन्द्रियतिर्यङ्मनुष्याणां विवृता योनिर्नेतरे । गर्भयोनय एव तिर्यञ्च स्त्रिविधाः स्त्रीपुंनपुंसकयोनयः, मनुष्या अप्येवं त्रैविध्यभाजः, देवाः स्त्रीपुंयोनय एव,तथा परं मनुष्ययोनेस्त्रैविध्यम । तद्यथा-कूर्मोन्नता । तस्यां चार्हत्चक्रवर्त्यादिसत्पुरुषाणामुत्पत्तिः । तथा-शङ्खाऽऽवर्ता । सा च स्त्रीरत्नस्यैव, तस्यां च प्राणिनां संभवो नास्तीति न निष्पत्तिः । तथा-वंशीपत्रा । सा च प्राकृतजनस्येति । तथा परं त्रैविध्यं नियुक्तिकृदाह,यथा- अण्डजाः, पोतजाः, जरायुजाश्चेति । तत्राण्डजाः पक्षिसादयः, पोतजाः वल्गुलीगजकलभाऽऽदयः, जरायुजा गोमहिषीमनुष्याऽऽदयः । तथा द्वित्रिचतुःपञ्चेन्द्रियभेदाश्च निगद्यन्ते । एवमेते त्रिविधास्त्रसा योन्याद्भिदेन प्ररूपिताः ।

एतद्योनिसंग्राहिण्यो गाथाः-

" पुढविदगअगणिमारुय-एक्केक्कनिओयजीवजोणीयं ।
सत्तग सत्तग सत्तग, सत्तग दस चोद्दस य सक्खा ॥ १ ॥
विगलिंदिएसु दो दो, चउरो चउरो य नारयसुरेसु ।
तिरिया सत्तऽट्ठनव य, पणवीसा एगिंदिया ..... ॥ २ ॥
..... होंति चउरो, चोद्दस मणुयाण लक्खाइं ॥ "

एवमेते चतुरशीतियोनिलक्षा भवन्ति ।

तथा कुलपरिमाणम्-

" कुलकोमिसयसहस्सा, बत्तीसऽट्ठ नव य पणवीसा ।
एगिंदिय विगलिंदिय, चउरिंदिय हरियकायाणं ।
अद्धत्तेरस बारस, दस नव चेव कोमिलक्खाइं ॥१॥
जलयरपक्खिचउप्पय-उरभुयपरिसप्पजीवाणं ।
पणवीसं दस्वीसं, च सयसहस्साइं नारयसुराणं ॥२॥
बारस य सयसहस्सा, कुलकोमीणं मणुस्साणं ॥३॥
एगा कोडाकोडी, सत्ताणउइं च सयसहस्साइं ।
पन्नासं च सहस्सा, कुलकोडीणं मुणेयव्वा ॥४॥

अङ्कतः-१९७५०००००००००० सकलकुलसंग्रहोऽयं बोद्धव्यः । आचा० १ श्रु० १ अ० ६ उ० ।

से किं तं तसकाइया ? तसकाइया चउव्विहा पण्णत्ता । तं जहा-बेइंदिया, तेइंदिया, चउरिंदिया, पंचिंदिया । से किं तं बेइंदिया ? बेइंदिया अणेगविहा पण्णत्ता । एवं जहेव पण्णवणाए तहेव निरवसेसं भाणियव्वं० जाव सव्वट्ठसिद्धगा देवा । सेत्तं अणुत्तरोववाइया, सेत्तं पंचिंदिया, सेत्तं तसकाइया ॥

उक्ता प्ररूपणा । जी० ३ प्रति० ४ उ० ।

तदनन्तरं लक्षणद्वारमाह-

दंसणनाणचरित्ते, चरियाचरिए य दाणलाभे य ।
उवओगजोगवीरिए, इंदियविसए य लक्खीए ॥ ५५ ॥
उवओगजोग अज्जव-साणे वीसुं च लद्धिलद्धी य ।
अट्ठविहोदय लेसा, सण्णा छस्सोसे कसाए य ॥ ५६ ॥

(दंसणेत्यादि) दर्शनं सामान्योपलब्धिरूपं, चक्षुरचक्षुरवधिकेवलाऽऽख्यं. मत्यादीनि ज्ञानानि स्वपरपरिच्छेदिनो जीवस्य परिणामाः ज्ञानाऽऽवरणविगमक्षयक्षयोपशमस्वार्थपरिच्छेदाः साकारियकच्छेदोपस्थाप्यपरिहारविशुद्धिसूक्ष्मसम्परायययाख्यातानि,चारित्रं चारित्राचारित्रं देशविरतिस्थूलप्राणातिपाताऽऽदिनिवृत्तिलक्षणं श्रावकाणाम्, तथा दानलाभभोगोपभोगवीर्याः श्रोत्रचक्षुर्घ्राणरसनस्पर्शनाऽऽख्याः देशलब्धयः जीवद्रव्यक्षयनिबन्धनानि लक्षणं भवन्ति । तथोपयोगः साकारोऽनाकारश्चाऽष्टचतुर्भेदः,योगो मनोवाक्कायाऽऽख्यस्त्रिधा, अध्यवसायाश्चानेकविधाः सूक्ष्माः मनःपरिणामसमुत्थाः,विषयेषु पृथक्त्वेनानुदयाः प्राक्तनाश्च हीरमध्यास्रवाऽऽदयः,ज्ञानाऽऽवरणाऽऽद्यन्तरायावसानकर्माष्टकस्य स्वशक्तिपरिणाम उदयः,लेश्याः कृष्णाऽऽदिभेदा अशुभा शुभाश्च कषाययोगपरिणामविशेषसमुत्थाः, संज्ञास्त्वाहारभयपरिग्रहमैथुनाऽऽख्याः। अथवा-दशभेदा असत्यरोक्षाश्रुतसंज्ञाः,क्रोधाऽऽद्याश्रुतसंज्ञाः, तथौघसंज्ञा,लोकसंज्ञा च। उच्छ्वासनिःश्वासौ प्राणापानौ, कषायाः-कर्मसंसारः,तस्यायाः क्रोधादयोऽनन्तानुबन्ध्यादिभेदात् षोडशविधाः । एतानि गाथाद्वयोपन्यस्तानि द्वीन्द्रियाऽऽदीनां लक्षणानि यथासंभवमवगन्तव्यानीति, नैवंविधलक्षणकलापमुक्तयो घटाऽऽदिष्वस्ति, तस्मात्तत्रावैतन्यमध्यवस्यन्ति विद्वांसः ।

अभिहितलक्षणकलापोपसंजिहीर्षया तथा परिमाणप्रतिपादनार्थं गाथामाह-

लक्खणमेयं चेव उ, पयरस्स असंखभागमेत्ता ते ।
निक्खमणे य पवेसो, एगा बीया वि एमेव ॥ ५७ ॥

(लक्खणमित्यादि) तुशब्दः पर्यायान्तरद्योतनः, द्वीन्द्रियाऽऽदिजीवानां लक्षणं लिङ्गमेतावदेव दर्शनाऽऽदिपरिपूर्णं,नान्यदधिकमस्तीति । परिमाणं पुनः क्षेत्रतः संवर्तितलोकप्रतरासंख्येयजागवर्तिप्रदेशराशिप्रमाणाश्रसकायपर्याप्तकाः। एते च बादरतेजस्कायपर्याप्तकेभ्योऽसंख्येयगुणाः, त्रसकायपर्याप्तकेभ्यश्चसकायिकापर्याप्तकाः असंख्येयगुणाः, तथा कालतः प्रत्युत्पन्नत्रसकायिकाः सागरोपमशतपृथक्त्वसमयराशिपरिमाणा जघन्यपदे, उत्कृष्टपदेऽपि सागरोपमशतपृथक्त्वपरिमाणा एवेति । तथा चागमः-" पडुप्पन्ना तसकाइया केवतिकालस्स निल्लेवा सिया ? गोयमा ! जहन्नपए सागरोवमसयसहस्सपुहत्तस्स, उक्कोसपदे वि सागरोवमसयसहस्सपुहत्तस्स ।" उद्वर्तनोपपातौ गाथाशकलेनाभिधत्ते-निष्क्रमणमुत्कर्षतः, प्रवेश उपपातः, जघन्यतश्चैको द्वौ त्रयो वा, उत्कृष्टतस्त्वेवमेवेति-प्रतरस्यासंख्येयभागप्रदेशपरिमाणा एवेत्यर्थः ।

साम्प्रतमविरहितप्रवेशनिर्गमाभ्यां परिमाणविशेषमाह-

निक्खमणपवेसकाले, समयाई एत्थ आवलियभागो ।
अंतोमुहुत्त विरहो, लहुहिसहस्साइं जे दोण्णि ॥ ५८ ॥

(निक्खमेत्यादि) जघन्येन अविरहिताः सन्तस्त्रसेषु उत्पत्तिनिष्क्रमौ वा जीवानामेकं समयं द्वित्रिरित्यादि,(?)उत्कृष्टेनाऽऽवलिकाऽसंख्येयभागमात्रं कालं, संततमेव निष्क्रमः प्रवेशो वा एकजीवाङ्गीकरणेनाविरहितश्चिन्त्यते गाथापश्चिमार्द्धेन-विरहः सातत्येनावस्थानम्, एकजीवो हि त्रसभावेन जघन्यतोऽन्तर्मुहूर्तमासित्वा पुनः पृथिव्याद्येकेन्द्रियेषूत्पद्यते, प्रकर्षेणाधिकं सागरोपमसहस्रद्वयं त्रसभावेनावतिष्ठते सन्तमिति । उक्तं प्रमाणद्वारम् ॥

साम्प्रतमुपभोगशस्त्रवेदनाद्वारत्रयप्रतिपादनायाऽऽह-

मंसाई परिजोगो, सत्थं सत्थाइयं अणेगविहं ।
सारीरमाणसावेय-णा य दुविहा बहुविहा य ॥ ५९ ॥

मांसचर्मकेशरोमनखपिच्छदन्तस्नाय्वस्थिविषाणाऽऽदिभिस्त्रसकायसम्बन्धिनिरुपभोगो भवति, शस्त्रं पुनः शस्त्राऽऽदिकमिति खड्गतोमरक्षुरिकाऽऽदि तदादिर्यस्य जलानलाऽऽदेस्तच्छस्त्राऽऽदिकमनेकविधं स्वकायपरकायोभयद्रव्यभावभेदभिन्नमनेकप्रकारं त्रसकायस्येति । वेदना चात्र प्रसङ्गेनोच्यतेसा च शरीरसमुत्था, मनःसमुत्था च द्विविधा यथासंभवम् । तत्राऽऽद्या-शस्त्रशलाकाऽऽदिभेदजनितेतरप्रियविप्रयोगाप्रियसंप्रयोगाऽऽदिकृता । बहुविधा च ज्वरातीसारकासश्वासजलन्दरशिरोरोगशूलगुदाकीलकाऽऽदिसमुत्था तीव्रेति ।

पुनरप्युपभोगप्रपञ्चाभिधित्सयाऽऽह-

मंसस्स केइ अट्ठा, केई चम्मस्स केइ रोमाणं ।
पिच्छाणं पुच्छाणं, दंताणऽट्ठा वहिज्जंति ॥ ६० ॥
केई वहंति अट्ठा, केइ अणट्ठा पमंगदोसेणं ।
कम्मपसंगपसत्ता, बंधंति हणंति मारंति ॥ ६१ ॥

मांसार्थं मृगशूकराऽऽदयो बध्यन्ते,चर्मार्थं सिंहव्याघ्राऽऽदयः,रोमार्थं मूषिकाऽऽदयः,पिच्छार्थं मयूरगृध्रकपिञ्जलकाऽऽदयः,पुच्छार्थं चमर्याऽऽदयः,दन्तार्थं वारणवराहाऽऽदयः। वध्यन्त इति सर्वत्र संबध्यते। तत्र केचन पूर्वोक्तप्रयोजनमुद्दिश्य हन्यन्ते,केचिच्च प्रयोजनमन्तरेणाऽपि क्रीडया हन्यन्ते। तथा परे प्रसङ्गदोषाद् मृगशूकरशिखिपुलेलुकाऽऽदिना तदन्तरालव्यवस्थितानेकपोतकपिञ्जलशुकसारिकाऽऽदयो हन्यन्ते । तथा कर्म कृष्याद्यनेकप्रकारं,तस्य प्रसङ्गोऽनुष्ठानम्, तत्र प्रसक्तास्तन्निष्ठाः सत्त्वसकायिकान् बहून् घ्नन्ति,रज्ज्वादिना बध्नन्ति, कशलकुटाऽऽदिभिस्ताडयन्ति, मारयन्ति प्राणैर्वियोजयन्तीति ।

एवंविधानाऽऽदिप्रकारकलापमुपवर्ण्य सकलनिर्युक्त्यर्थोपसंहारायाऽऽह-

सेसाइं दाराइं, ताइं जाइं हुवंति पुढवीए ।
एवं तसकायम्मी, निज्जुत्ती कित्तिया एसा ॥ ६२ ॥

(सेसा इत्यादि) लक्षणव्यतिरिक्तानि शेषाणि द्वाराणि, तान्येव यानि पृथ्वीस्वरूपसमधिगमे निरूपितानि, अत एवमशेषद्वा-

राभिधानात्त्रसकाये निर्युक्तिः कीर्तिनैषा सकला भवतीत्यवगन्तव्येति ।

साम्प्रतं सूत्रानुगमेऽस्खलितादिगुणोपेतं सूत्रमुच्चारणीयम् । तच्चेदम्-

संतिमे तसा पाणा । तं जहा-अंडया, पोयया, जराउया, रसया, संसेयया, संमुच्छिमा, उब्भियया, उववाइया ॥६३॥

सन्ति विद्यन्ते त्रस्यन्तीति त्रसाः प्राणिनो द्वीन्द्रियाऽऽदयः । ते च किंप्रकाराः किंप्रकाराश्चेति दर्शयति-तद्यथेति वाक्योपन्यासार्थः । यदि वा-तत्प्रकारान्तरमर्थतो यथा भगवताऽभिहितं तथाऽहं भणामीति । (आचा०) एवमेतस्मिन्नष्टविधे जन्मनि सर्वे त्रसजन्तवः संसारिणो निपतन्ति, नैतद्व्यतिरेकेणान्ये सन्ति । एते चाष्टविधयोनिभाजोऽपि सर्वलोकमतीता बालाकृनाऽऽदिजनप्रत्यक्षप्रमाणसमधिगम्याः,

सन्ति ' चानेन शब्देन त्रैकालिकमस्तित्वं प्रतिपाद्यते त्रसानाम् ।

न कदाचिदेतैर्विरहितः संसारः संभवतीत्येतदपि दर्शयति-

एस संसारे त्ति पवुच्चइ, मंदस्स अविजाणओ निज्झाइत्ता, पमिलेहित्ता पत्तेयं परिनिव्वाणं सव्वेसिं पाणाणं सव्वेसिं भूयाणं सव्वेसिं जीवाणं सव्वेसिं सत्ताणं असायं अपरिनिव्वाणं महब्भयं दुक्खं ति बेमि ॥ ६ ॥

एष अनन्तरजाऽऽदिप्राणिकलापः संसारः प्रोच्यते,नाऽतोऽन्यस्य त्रसानामुत्पत्तिप्रकारोऽस्तीत्युक्तं भवति । कस्य पुनरष्टविधजन्तुग्रामे जन्मोत्पत्तिर्भवतीत्याह-(मंदस्साविजाणओ) मन्दो द्विधाऽज्ञभावभेदात् । तत्र ज्ञेयमन्दोऽतिस्थूलोऽतिकृशो वा,ज्ञानावमन्दोऽप्यनुपचितबुद्धिज्ञः,कुशास्त्रवासितबुद्धिर्वा । अयमपि सदबुद्धेरभावाद् बाल एव । इह भावमन्देनाधिकारः-मन्दस्येति बालस्याविशिष्टबुद्धेः,अत एवाविजानतो हिताहितप्राप्तिपरिहारशून्यमनस इत्येषोऽनन्तरोक्तः संसारो भवतीति । यद्येवं ततः किमित्याह-(निज्झाइत्तेत्यादि) एवमिमं त्रसकायमार्गं बालाकृनाऽऽदिप्रसिद्धं निश्चयेन ध्यात्वा निर्ध्याय,चिन्तयित्वेत्यर्थः। क्त्वाप्रत्ययस्योत्तरक्रियापेक्षया ब्रवीमीत्युत्तरक्रिया सर्वत्र योजनीयेति पूर्ववत् । मनसाऽऽलोच्य ततः प्रत्युपेक्षणं भवतीति दर्शयति-(पमिलेहित्त त्ति) प्रत्युपेक्ष्य दृष्ट्वा यथावदुपलभ्येत्यर्थः । किं तदिति दर्शयति-प्रत्येकमित्येकमेकं त्रसकायं प्रति परिनिर्वाणं सुखं, प्रत्येकसुखभाजः सर्वेऽपि प्राणिनो नान्यदीयमन्य उपभुञ्जते सुखमित्यर्थः । एष च सर्वप्राणिधर्म इति दर्शयति-सर्वेषां प्राणिनां द्वित्रिचतुरिन्द्रियाणां, तथा सर्वेषां भूतानां प्रत्येकसाधारणसूक्ष्मबादरपर्याप्तकापर्याप्तकतरुणामिति, तथा सर्वेषां जीवानां गर्भव्युत्क्रान्तिकसंमूर्छनजौपपातिकपञ्चेन्द्रियाणां,तथा सर्वेषां सत्त्वानां पृथिव्यादीनामेकेन्द्रियाणामिति । इह च प्राणाऽऽदिशब्दानां यद्यपि परमार्थतोऽभेदः, तथापि उक्तन्यायेन भेदो द्रष्टव्यः । उक्तं च-"प्राणा द्वित्रिचतुर्योक्ताः, भूतास्तु तरवः स्मृताः । जीवाः पञ्चेन्द्रियाः प्रोक्ताः,शेषाः सत्त्वा उदीरिताः" ॥ १ ॥ इति । यदि वा-शब्दव्युत्पत्तिद्वारेण समभिरूढनयमतेन भेदो द्रष्टव्यः । तथा-सततप्राणधारणात्प्राणाः, कालत्रयभावनाद् भूताः, त्रिकालजीवनाज् जीवाः, सदाऽस्तित्वात्सत्त्वा इति । तदेवं विचिन्त्य प्रत्युपेक्ष्य च यथा सर्वेषां जीवानां प्रत्येकं परिनिर्वाणं सुखं, तथा प्रत्येकमसातमपरिनिर्वाणं महाभयं दुःखमहं ब्रवीमि । तत्र दुःखयतीति दुःखम्, तद्विशेष्यते-किंविशिष्टमसातमसातवेद्यं कर्म, संविपाकजमित्यर्थः । तथा-अपरिनिर्वाणमिति-परिनिर्वाणं समन्तात् सुखं, न परिनिर्वाणमपरिनिर्वाणं, समन्तात् शरीरमनःपीडाकरमित्यर्थः । तथा-महाभयमिति-महच्च तद्भयं च महाभयं, नाऽतः परमन्यदस्तीति महाभयम । तथाहि-सर्वेऽपि शारीरमानसाभ्यां दुःखाद्युद्विजन्ते प्राणिन इति । इतिशब्द एवमर्थे । एवमहं ब्रवीमि सम्यगुपलब्धत्वो यत्प्रागुक्तमिति ।

एतच्च ब्रवीमीत्याह-

तमंति पाणा पडिसो दिसासु य, तत्थ तत्थ पुढो पास आतुरा परितावंति संति पाणा पुढो सिया ॥

(त्रसंतीत्यादि) एवंविधेन चासाताऽऽदिविशेषणविशिष्टेन दुःखेनानिभूतास्त्रस्यन्त्युद्विजन्ति, प्राणा इति प्राणिनः, कुतः पुनरुद्विजन्तीति दर्शयति-प्रगता दिक् प्रदिग्विदिश इत्यर्थः । ततः प्रदिशः सकाशादुद्विजन्ति । तथाहि-प्राच्यादिषु च दिक्षु व्यवस्थितास्त्रस्यन्ति, एताश्च प्रज्ञापकविधिभक्ता दिशोऽनुदिशश्च गृह्यन्ते, जीवव्यवस्थानश्रवणात् । ततश्चायमर्थः प्रतिपादितो भवति काक्वा, न काचिद्दिगनुद्विग्ना, यस्यां न सन्ति त्रसाः, त्रस्यन्ति वा यस्यां स्थिताः, कोशिकारकीटवत् । कोशिकारकीटो हि दिग्भ्योऽनुदिग्भ्यश्च विभ्यदात्मसंरक्षणार्थं वेष्टनं करोति शरीरस्येति । भावदिगपि न काचित्सादृश्यस्थिः, यस्यां वर्त्तमानो जन्तुर्न त्रस्येत्, शारीरमानसाभ्यां दुःखाभ्यां सर्वत्र नरकाऽऽदिषु जन्तवस्त्रस्यन्ते प्राणिनोऽनन्तासपरिगतमनसः सर्वदाऽवगन्तव्याः । एवं सर्वत्र दिग्विदिगनुदिक्षु च त्रसाः सन्तीति गृह्णीमः । दिग्विदिगनुदिक्स्थितास्त्रस्यन्तीत्युक्तम् । कुतः पुनस्त्रस्यन्ति?,यस्मात्तदारम्भवद्भिस्ते व्यापाद्यन्ते, किं पुनः कारणं ते तानारभन्त इत्याह-(तत्थ तत्थेत्यादि) तत्र तत्र तेषु तेषु कारणेष्वुपन्यस्तेषु वक्ष्यमाणेष्वर्वाजितशोणिताऽऽदिषु च पृथिव्यग्निन्यस्तेषु प्रयोजनेषु, पश्येति । शिष्यचोदना किं तत्पश्येति दर्शयति-मांसत्वक्कृणाऽऽदिगृद्धा आतुराः अस्वस्थमनसः परि समन्तात्तापयन्ति पीडयन्ति नानाविधवेदनोत्पादनेन प्राणिव्यापादनेन वा तदारम्भिणस्त्रसानिति, येन केनचिदारम्भेण प्राणिनां संतापनं भवतीति दर्शयन्नाह-(संतीत्यादि) सन्ति विद्यन्ते प्रायः सर्वत्रैव प्राणाः प्राणिनः पृथक् विनिश्चिताः द्वित्रिचतुःपञ्चेन्द्रियाऽऽश्रिताः पृथिव्याद्याश्रिताः । एतच्च ज्ञात्वा निरवद्यानुष्ठायिना भवितव्यमित्यभिप्रायः ।

अन्ये पुनरन्यथावादिनोऽन्यथाकारिण इति दर्शयन्नाह-

लज्जमाणा पुढो पास अणगारा मो त्ति एगे पवयमाणा जमिणं विरूवरूवेहिं सत्थेहिं तसकायसमारंभेणं तसकायसत्थं समारभमाणा अण्णे अणेगरूवे पाणे विहिंसति, तत्थ खलु भगवया परिण्णा पवेइया-इमस्स चेव जीवियस्स परिवंदणमाणणपूयणाए जाईमरणमोयणाए दुक्खपडिघायहेउं, से सयमेव तसकायसत्थं समारभति, अण्णेहिं वा तसकायसत्थं समारंभावेइ, अण्णे वा तसकायसत्थं समार-

जमाणे समणुजाणइ, तं से अहियाए, तं से अबोहीए, से तं संबुज्झमाणे आयाणीयं समुट्ठाए सोच्चा भगवओ अणगाराणं अंतिए,इहमेगेसिं णायं भवति–एस खलु गंथे, एस खलु मोहे, एस खलु मारे, एस खलु णरए इच्चत्थं गढिए लोए जमिणं विरूवरूवेहिं सत्थेहिं तसकायसमारंभेणं तसकायसत्थं समारंजमाणे अण्णे अणेगरूवेण पाणे विहिंसति ।

पूर्ववद् व्याख्येयं,यावत् "अन्ने अणेगरूवेण पाणे विहिंसइ त्ति।" यानि कानिचित्कारणान्युद्दिश्य च स बन्धः क्रियते, तानि दर्शयितुमाह–

से बेमि अप्पेगे अच्चाए हणंति,अप्पेगे अजिणाए वहंति, अप्पेगे मंसाए वहंति, अप्पेगे सोणियाए वहंति, एवं हिययाए,पित्ताए,वसाए,पिच्छाए,पुच्छाए,बालाए,सिंगाए, विसाणाए,दंताए,दाढाए,णहाए,एहाउणीए, अट्ठीए, अट्ठिमिंजाए;अट्ठाए,अणट्ठाए, अप्पेगे हिंसिसु मे त्ति वा वहंति, अप्पेगे हिंसंति मे त्ति वा वहंति, अप्पेगे हिंसिस्संति मे त्ति वा वहंति, एत्थ सत्थं समारभमाणस्स इच्चेते आरंभा परिण्णाया भवंति ।

(से बेमीत्यादि) तदहं ब्रवीमि–यदर्थं प्राणिनस्तदारम्भप्रवृत्तो व्यापाद्यन्त इति । अप्येकेऽर्चायै घ्नन्ति, अपिरुत्तरापेक्षया समुच्चयार्थः। एके केचन तदर्थित्वेनाऽऽतुराः,अर्च्यतेऽलाबाहारालङ्कारैरित्यर्चा देहः, तदर्थं व्यापादयन्ति । तथाहि–लक्षणवत्पुरुषमक्षतमव्यङ्गं व्यापाद्य तच्छरीरेण विद्यामन्त्रसाधनानि कुर्वन्ति, उपयाचितं वा यच्छन्ति दुर्गाऽऽदीनामग्रतः । अथवार्चा विषं येन भक्षितं, स हस्तिनं मारयित्वा तच्छरीरे प्रक्षिप्यते, पश्चाद्विषं जीर्यति। तथा अजिनार्थं चित्रकव्याघ्राऽऽदीन् व्यापादयन्ति।एवं मांसशोणितहृदयपित्तवसापिच्छपुच्छबालशृङ्गविषाणदन्तदंष्ट्रानखस्नायवस्थ्यस्थिमिञ्जाऽऽदिष्वपि वाच्यम्,मांसार्थं शूकराऽऽदयः,त्रिशूलाऽऽद्येऽर्थाः शोणितं गृह्णन्ति,हृदयानि साधका गृहीत्वाऽश्नन्ति, पित्तार्थं मयूराऽऽदयः, वसार्थं व्याघ्रमकरवराहाऽऽदयः,पिच्छार्थं मयूरगृध्राऽऽदयः,पुच्छार्थं रोज्झाऽऽदयः, बालार्थं चमर्यादयः,शृङ्गार्थे रुरुखड्गयादयः,तत्किल शृङ्गं पवित्रमिति याज्ञिका गृह्णन्ति,विषाणार्थं हस्त्यादयः, दन्तार्थं शृङ्गालाऽऽदयः,तिमिरापहत्वात्तद्दन्तानां,दंष्ट्रार्थं वराहाऽऽदयः,नखार्थं व्याघ्राऽऽदयः, स्नाय्वर्थं गोमहिष्यादयः, अस्थ्यर्थं शङ्खशुक्त्यादयः, अस्थिमिञ्जार्थं महिषवराहाऽऽदयः। एवमेके यथोपदिष्टप्रयोजनकलापापेक्षया घ्नन्ति । अपरे तु कुक्कुलासगृहकोकिलाऽऽदीन्विना प्रयोजनेन व्यापादयन्ति । अन्ये पुनः–(हिंसिसु मे त्ति) हिंसितवानेषोऽस्मत्स्वजनान् सिंहः सर्पोऽवा,अतो घ्नन्ति, मम वा पीडां कृतवानित्यतो घ्नन्ति । तथा चान्ये वर्तमानकाल एव हिनस्ति अस्मान् सिंहोऽन्यो वेति घ्नन्ति । तथाऽन्ये–अस्मानयं हिंसिष्यतीत्यनागतमेव सर्पाऽऽदिकं व्यापादयन्ति ।

एवमनेकप्रयोजनोपन्यासेन हननं त्रसविषयं प्रदर्श्य,उद्देशकार्थमुपसंजिहीर्षुराह–

एत्थ सत्थं असमारभमाणस्स इच्चेते आरंभा परिण्णाया भवंति,तं परिण्णाय मेहावी णेव सयं तसकायसत्थं समारंभेज्जा, णेवऽण्णेहिं तसकायसत्थं समारंभावेज्जा,णेवऽण्णे तसकायसत्थं समारंभंते समणुजाणेज्जा,जस्सेते तसकायसमारंजा परिण्णाया भवंति, से हु मुणी परिण्णायकम्मे त्ति बेमि ॥ ६ ॥

(एत्थ सत्थमित्यादि) प्राग्वद्व्याख्येयम् । यावत्स एव मुनिस्त्रसकायसमारम्भविरतत्वात् परिज्ञातकर्मत्वात् प्रत्याख्यातपापकर्मत्वादिति ब्रवीमि । भगवतः श्रीलोकबन्धोः परमकेवलाऽऽलोकसाक्षात्कृतसकलजगद्वचनप्रपञ्चस्योपदेशादिति । आचा० १ श्रु० १ अ० ६ उ० । (त्रसकायस्य प्रतिसेवना 'पमिसेवणा' शब्दे वक्ष्यते)

तसचउक्क–त्रसचतुष्क–न० । त्रसप्रकृत्योपलक्षितं चतुष्कं त्रसचतुष्कम् । त्रसबादरपर्याप्तप्रत्येकमिति प्रकृत्योपलक्षिते चतुष्के, कर्म० १ कर्म० ।

तसण–त्रसन–न० । पक्षायने, सूत्र० १ श्रु० ७ अ० । स्पन्दने आचा० १ श्रु० १ अ० ६ उ० ।

तसणवग–त्रसनवक–न० । त्रसप्रकृत्या उपलक्षितं नवकं त्रसनवकम् । त्रसबादरपर्याप्तप्रत्येकस्थिरशुभसुभगसुस्वराऽऽदेयलक्षणे, कर्म० २ कर्म० ।

तसणाम[ण्]–त्रसनामन्–न० । त्रसन्ति उष्णाऽऽद्यभितप्ताः सन्तो विवक्षितस्थानाद्बिभ्यति, गच्छन्ति च छायाऽऽसेवनार्थं स्थानान्तरमिति त्रसाः, तत्पर्यायविपाकवेद्यं कर्म त्रसनाम । त्रसगतिनिबन्धने नामकर्मणि, कर्म० १ कर्म० । पं० सं० । प्रव० । यदुदयाच्चलनं स्पन्दनं भवति । भा० । कर्म० ।

विइचउपणिंदियतसा, बायरओ बायरा जिया थूला ।
नियनियपज्जत्तिजुया, पज्जत्ता लद्धिकरणेहिं ॥ ४८ ॥

त्रस्यन्ति उष्णाऽऽद्यभितप्ताः सन्तो विवक्षितस्थानाद्बिभ्यति, गच्छन्ति च छायाऽऽसेवनार्थं स्थानान्तरमिति त्रसाः, तत्पर्यायविपाकवेद्यानि कर्माण्यपि त्रसनाम । ततश्चसात् त्रसनामोदयाज्जीवाः–(विइचउपणिंदिय त्ति) इन्द्रियशब्दस्य प्रत्येकं योगाद् द्वे इन्द्रिये स्पर्शनरसनलक्षणे येषां ते द्वीन्द्रियाः, शङ्खचन्दनककपर्दकजलूकाकृमिगण्डोलकपूतरकाऽऽदयो भवन्ति । त्रीणि स्पर्शनरसनघ्राणलक्षणानीन्द्रियाणि येषां ते त्रीन्द्रियाः, यूकामत्कुणगर्दभेन्द्रगोपककुन्थुमत्कोटकाऽऽदयः । चत्वारि स्पर्शनरसनघ्राणचक्षुर्लक्षणानीन्द्रियाणि येषां ते चतुरिन्द्रियाः,मक्षिकाभ्रमरमशकवृश्चिकाऽऽदयः । पञ्च स्पर्शनरसनघ्राणचक्षुःश्रोत्ररूपाणीन्द्रियाणि येषां ते पञ्चेन्द्रियाः, मत्स्यमकरहरिहरिणसारसराजहंसनरसुरनारकाऽऽदयो भवन्तीति । यदुदयाज्जीवास्त्रि त्रिचतुःपञ्चेन्द्रिया भवन्ति तत्त्रसनामेत्यर्थः । (४८) कर्म० १ कर्म० ।

तसतिग–त्रसत्रिक–न० । त्रसबादरपर्याप्ताऽऽख्ये त्रिके, कर्म० २ कर्म० ।

तसदसग–त्रसदशक–न० । त्रसनामाऽऽदिनामकर्मोत्तरप्रकृतिदशके, (कर्म०)

तसबायरपज्जत्तं, पत्तेयथिरं सुभं च सुभगं च ।
सुसराऽऽइज्जजसं तस-दसगं थावरदसं तु इमं ॥२६॥

नामशब्दस्येहापि संबन्धात्-त्रसनाम, बादरनाम, पर्याप्तनाम, प्रत्येकनाम, स्थिरनाम, शुभनाम, सुभगनाम। चशब्दौ समुच्चये। सुस्वरनाम, आदेयनाम (जसं ति) यशःकीर्तिनाम इत्येवं त्रसशब्देनोपलक्षितं प्रकृतिदशकम, त्रसदशकमुच्यत इति शेषः। कर्म० १ कर्म०।

तसरेणु-त्रसरेणु-पुं०। त्रस्यति पूर्वाऽऽदिवातप्रेरितो गच्छति योरेणुः स त्रसरेणुः। रेणुत्रिः परिमिते प्रमाणविशेषे, प्रव० २५४ द्वार। ओ०। भ०। जं०। स्था०। अनु०। कियद्भिः परमाणुभिस्त्रसरेणुर्भवतीति प्रश्ने, उत्तरम्-अनन्तसूक्ष्मपरमाणुभिरेको व्यवहारपरमाणुर्जायते, अष्टव्यवहारपरमाणुभिरेका उत्श्लक्ष्णिका जायते, ताभिरष्टाभिरेका श्लक्ष्णश्लक्ष्णिका जायते, ताभिरष्टाभिरेक ऊर्ध्वरेणुर्जायते, एभिरष्टभिरेकस्त्रसरेणुर्जायते, एतावता-कोऽर्थः चतुःसहस्रैः परमाणवत्यधिकैर्व्यवहारपरमाणुभिरेकस्त्रसरेणुर्जायते इत्यर्थः। ४८२ प्र०। सेन० ३ उल्ला०।

तसवाइया-त्रसपादिका-स्त्री०। त्रीन्द्रियजीवभेदे, जी० १ प्रति०।

तसवीसइ-त्रसविंशति-स्त्री०। त्रसेनोपलक्षिता विंशतिस्त्रसविंशतिः। त्रसदशकस्थावरदशकद्वये, कर्म० १ कर्म०।

तससि(ण्)-त्रसासिन्-त्रि०। पिपीलिकाऽऽदिसहितोदनभक्षके, नि० चू० १ उ०।

तसिअ-त्रस्त-त्रि०। त्रसनं त्रस्तम्। दुःखोद्वेजने, दश० ४ अ०। परमाधार्मिकदेवपरस्परोदीरितदुःखसंपातभयात् त्रासमुपपन्ने, जी० ३ प्रति० २ उ०। भ०। शुष्के, दे० ना० ५ वर्ग २ गाथा।

तस्सण्णि[ण्]-तत्संज्ञिन्-त्रि०। तस्य संज्ञा तत्संज्ञा-तज्ज्ञानम्, तद्वान् तत्संज्ञी। आचा० १ श्रु० ५ अ० ४ उ०। विवक्षितज्ञानोपयुक्ते, आचा० १ श्रु० ५ अ० ६ उ०।

तस्सेवि [ण्]-तत्सेविन्-पुं०। ये दोषा आलोचयितव्यास्तत्सेवी यो गुरुस्तस्य पुरतो यदालोचनम्। तत्सेविलक्षणे आलोचनादोषे, स्था० १० ठा०।

तह-तथा-अव्य०। तेन प्रकारेण तथा प्रकारे वाच्ये। वाच०। "वाऽव्ययोत्खातादावदातः" ॥८।१।६७॥ इत्यत्वं विकल्पेन। प्रा० १ पाद। उक्तपरामर्शे, कल्प० १ क्षण। पादपूरणे, नि० चू० १ उ०।

तथ्य-न०। तथा तत्र साधु यत्। सत्ये, वाच०। सदर्थाभिधायित्वे, त्रि०। (सूत्र०)

णामतहं ठवणतहं, दव्वतहं चेव होइ भावतहं।
दव्वतहं पुण जो ज-स्स सभावो होति दव्वस्स ॥२४॥

(णामतहमित्यादि) अस्याध्ययनस्य यथातथ्यमिति नाम। तच्च यथाशब्दस्य भावप्रत्ययान्तस्य भवति। तत्र यथाशब्दोल्लङ्घनेन तथाशब्दस्य निक्षेपं कर्तुं नियुक्तिकारस्यायमभिप्रायः-इह यथाशब्दोऽयमनुवादे वर्तते, तथाशब्दश्च विधेयार्थे। तद्यथा-यथेदं तथैवेदं भवता विधेयमित्यनुवादविधेययोश्च विधेयांश एव प्रधानभावमनुभवतीति। यदि वा यथातथ्यमिति तथ्यमतस्तदेव निरूप्यत इति। तत्र यथाभावस्तथ्यं यथाऽवस्थितवस्तुता। तन्नामाऽऽदिभिश्चतुर्धा। तत्र नामस्थापने सुगमे। द्रव्यतथ्यं गाथापश्चार्धेन प्रतिपादयति-तत्र द्रव्यतथ्यं पुनर्यो यस्य सचित्ताऽऽदेः स्वभावो, द्रव्यप्राधान्याद्यद्यस्य स्वरूपम। तद्यथा-उपयोगलक्षणो जीवः, कठिनलक्षणा पृथिवी, द्रवलक्षणा आप इत्यादि। मनुष्याऽऽदेर्वा यो यस्य मार्दवाऽऽदिस्वभावः, अचित्तद्रव्याणां च गोशीर्षचन्दनकम्बलरत्नाऽऽदीनां द्रव्याणां स्वभावः। तद्यथा-" उण्हे करेइ सीयं, सीए उण्हत्तणं पुण जलेइ। कंबलरयणाऽऽदीणं, एस सहावो मुणेयव्वो " ॥ १ ॥

भावतथ्यमधिकृत्याऽऽह-

भावतहं पुण नियमा, णायव्वं छव्विहम्मि भावम्मि।
अहवा वि नाणदंसण-चरित्तविणए अज्झप्पे ॥२५॥

(भावतहमित्यादि) भावतथ्यं पुनर्नियमतोऽवश्यंभावतया षड्विधे औदयिके भावे ज्ञातव्यम्। तत्र कर्मणामुदयेन निर्वृत्त औदयिकः कर्मोदयाऽऽपादितो गत्याद्यनुभवलक्षणः, तथा कर्मोपशमेन निर्वृत्त औपशमिकः कर्मानुदयलक्षण इत्यर्थः। तथा क्षयाज्जातः क्षायिकोऽप्रतिपातिज्ञानदर्शनचारित्रलक्षणः। तथा-क्षयोपशमाच्च जातः क्षायोपशमिको देशोद्योपशमलक्षणः। परिणामेन निर्वृत्तः पारिणामिको जीवाजीवभव्यत्वाऽऽदिलक्षणः। पञ्चानामपि भावानां द्विकाऽऽदिसंयोगाज्जिष्पन्नः सान्निपातिक इति। यदि वा-अध्यात्मन्यान्तरं चतुर्धा भावतथ्यं द्रष्टव्यम्। तद्यथा-ज्ञानदर्शनचारित्रविनयतथ्यमिति। तत्र ज्ञानतथ्यं मत्यादिकेन ज्ञानपञ्चकेन यथास्वमवितथो विषयोपलम्भः। दर्शनतथ्यं शङ्काऽऽद्यतिचाररहितं जीवाऽऽदितत्त्वश्रद्धानम्। चारित्रतथ्यं तु तपसि द्वादशविधे संयमे सप्तदशविधे सम्यगनुष्ठानम्। विनयतथ्यं, द्विचत्वारिंशद्भेदभिन्ने विनये ज्ञानदर्शनचारित्रतप उपचारिकरूपे यथायोगमनुष्ठानं, ज्ञानाऽऽदीनां तु वितथाऽसेवनेनाऽतथ्यमिति। सूत्र० १ श्रु० १३ अ०।

तहक्कार-तथाकार-पुं०। तथाशब्देन तथेत्येवंभूतं पदमभिधीयते, तस्यैतस्य कारः करणम्। पञ्चा० १२ विव०। गुरोः पार्श्वे वाक्यं श्रुत्वा गुरुं प्रति इदं कथनं-यद्भवद्भिरुक्तं तत्तथैवतथाऽस्तु, इति करणं तथाकारः। उत्त० २६ अ०। गुर्वादिषु ब्रुवाणेषु यथाऽऽदिशत यूयं, तथैवेति भणनरूपे सामाचारीभेदे, वृ० १ उ०। तथाकरणं तथाकारः, स च सूत्रप्रश्नगोचरः। यथा भवद्भिरुक्तं तथेदमित्येवंस्वरूपे सामाचारीभेदे, आ० म० १ अ० २ खण्ड। आ० चू०। जीत०। उत्त०। स्था०।

साम्प्रतं तथाकारो यस्य दीयते, तत्प्रतिपादनार्थमाह-

कप्पाकप्पे परिणि-ट्ठियस्स ठाणेसु पंचसु ठियस्स।
संजमतवङ्गयस्स उ, अविगप्पेणं तहक्कारो ॥ १४ ॥

कल्पो विधिः, आचार इत्यर्थः। अकल्पश्च अविधिः। अथवा-कल्पो जिनकल्पस्थविरकल्पाऽऽदिः, अकल्पस्तु चरकाऽऽदिदीक्षा। अथवा-कल्प्यं ग्राह्यम्, अकल्प्यमितरत्। ततः समाहारद्वन्द्वात्कल्पाकल्पं, कल्प्याकल्प्यं वा। तत्र परिनिष्ठितस्य ज्ञाननिष्ठां प्राप्तस्य, अनेन च ज्ञानसंपदुक्ता। तथा तिष्ठन्ति मुमुक्षवो येषु तानि स्थानानि महाव्रतानि तेषु, पञ्चस्विति स्वरूपविशेषणम्। यतो न तान्येकादीनि भवन्ति, यत्राऽपि चत्वारि तान्युच्यन्ते तत्रापि वस्तुतः पञ्चैवेति। स्थितस्याऽऽश्रितस्य, अनेन च मूलगुणसंपत्तिरुक्ता। तथा- संयमः प्रत्युपेक्षोपेक्षाऽऽदिः, तथा-तपआ-

नशनाऽऽदि,ताभ्यामाढ्यः परिपूर्णः,स एव संयमतपआढ्यकः, तस्य,अनेन चोत्तरगुणसंपत्तिरुक्ता । तुशब्द एवकारार्थः । तस्य किमित्याह--अविकल्पेन निर्विकल्पं तदीयवचनेऽवितथत्वाऽऽकूतमकुर्वाणेनेत्यर्थः । तथाकारो-यथा यूयं वदथ, तथैवैतदित्यर्थसंसूचकस्तथेतिशब्दप्रयोगः, कार्य इति गम्यमिति गाथाऽर्थः ॥ १४ ॥

अथ तथाकारस्यैव विषयाभिधानायाऽऽह-

वायणपडिसुणणाए, उवएसे सुत्तअड्ढकहणाए ।
अवितहमेयं ति तहा, अविगप्पेणं तहक्कारो ॥ १५ ॥

वाचनायाः सूत्रदानस्य प्रतिश्रवणा श्रवणं वाचनाप्रतिश्रवणा, तस्यां, तथाकारः प्रयोक्तव्य इति योगः । इदमुक्तं भवति-वाचनां प्रयच्छति सति गुरौ सूत्रग्राहिणा तथाकारः कार्यः । तथोपदेशे सामान्येन सामाचारीप्रतिबद्धे । तथा सूत्रार्थकथनायां, व्याख्यान इत्यर्थः । अवितथं सत्यम्, एतद् यद्यूयं ब्रूथेति ख्यापनपरः,तथेति समुच्चयार्थः; सूत्रार्थकथनापदस्याऽऽदौ द्रष्टव्यः । अविकल्पेन निःसंदेहेन सता तथाकारस्तथेतिशब्दप्रयोगः कार्यो भवतीति शेष इति गाथाऽर्थः ॥ १५ ॥

यः पुनरेवंविधो गुरुर्न भवति,तत्र को विधिरित्याह-

इयरम्मि विगप्पेणं, जं जुत्तिखमं तहिं ण सेसम्मि ।
संविग्गपक्खिए वा, गीए सव्वत्थ इयरे-णं ॥ १६ ॥

इतरस्मिन् कल्पाकल्पपरिनिष्ठिताऽऽदिविशेषणविशिष्टादन्यस्मिन् गुरौ प्रज्ञापयति सति विकल्पेन भजनया, तथाकारः कार्य इति प्रक्रमः । तामेव भजनां दर्शयति-यद्वस्तु युक्तिक्षमं उपपत्तिसहं तेन प्रज्ञापितं, तस्मिन् वस्तुनि तथाकारो विधेयः, न शेषे अयुक्तिक्षमे । इहैव प्रकारान्तरमाह-संविग्नाः संवेगवन्तः सुसाधवः,तेषां पाक्षिकः पक्षग्राही संविग्नपाक्षिकः । " सुद्धं सुसाहुधम्मं, कहेइ निंदइ य निययमायारं । सुत्तविरुद्धायरणं पुरओ, हवइ य सव्वोमरायणिओ ॥ १ ॥ " इत्यादिलक्षणलक्षितः पार्श्वस्थाऽऽदिस्तस्मिन् । णशब्दः प्रकारान्तरद्योतनार्थः । गीते-पदेऽपि पदसमुदायोपचाराद् गीतार्थे विषयभूते, तदन्यस्य त्वकृततत्त्वेन वचनवैतथ्यसंभवात् । सर्वत्र वस्तुनि युक्तिक्षमे तदक्षमे वा तेनोच्यमाने इतरेणोत्सर्गापेक्षयाऽन्येनापवादेनेत्यर्थः । अथवा-(इयरे) इतरस्मिन्नगीतार्थे, न नैव,तथाकारः कार्य इति प्रक्रम इति गाथाऽर्थः ॥ १६ ॥

अथ कल्पाकल्पपरिनिष्ठिताऽऽदिगुणे गुरावक्षीणरागाऽऽदित्वेन संविग्नपाक्षिके चासत्क्रियत्वेन वितथोपदेशसंभवान्न तथाकारः कार्य इत्येतद् दूषयन्नाह-

संविग्गोऽणुवएसं, ण देइ दुब्भासियं कसुविवागं ।
जाणंतो तम्मि तहा, अतहक्कारो ण मिच्छत्तं ॥ १७ ॥

संविग्नो ह्यभीरुर्गुरुः, अनुपदेशम्, नञः कुत्सार्थत्वेन कुत्सितोपदेशमागमबाधितार्थानुशासनम्,न ददाति परस्मै न करोति, तद्दाने संविग्नत्वहानिप्रसङ्गात्। किंभूतः सन्नित्याह-दुर्भाषितमनागमिकार्थोपदेशं,कटुविपाकं दारुणफलं दुरन्तसंसाराऽऽवहं, मरीचिभवे महावीरस्येव जानन्नवबुध्यमानः, को हि पश्यन्नात्मानं कूपे प्रक्षिपतीति, यस्मादेवं ततस्तस्मिन् संविग्ने कल्पाकल्पपरिनिष्ठिताऽऽदिगुणे सद्गुरौ गीतार्थे,संविग्नपाक्षिके च प्रज्ञापयति सति,तथेति निर्विकल्पम्, अतथाकारस्तथाकारस्याप्रयोगः । तुशब्द एवकारार्थः। तस्य चैवं प्रयोगः-मिथ्यात्वमेवासम्यग्दर्शनमेव, मिथ्यात्वहेतुकत्वात्तस्य, न हि मिथ्यात्वं विना निश्चितसुखप्ररूपकत्वेऽपि प्रज्ञापके तथाकारं न प्रयुङ्क्ते इति गाथाऽर्थः ॥ १७ ॥ पञ्चा० १२ विव० ।

तहच्च–तथार्च्य–त्रि० । अवस्थितचित्तवृत्तिके, "दुक्खहाओ तहच्चाओ,जे धम्मट्ठं वियागरे ।" तथाभूता सम्यक्दर्शनप्राप्तियोग्यार्चा लेश्यान्तःपरिणतिरुक्तधर्माणामिति । यदि वा-अर्चा मनुष्यशरीरं,तदप्यकृतधर्मबीजानामार्यकुलोत्पत्तिसकलेन्द्रियसामग्र्यादिरूपं दुर्लभं भवति; जन्तूनां धर्मरूपमर्थं व्याकुर्वन्ति ये, धर्मप्रतिपत्तियोग्या इत्यर्थः । तेषां तथाभूताऽर्चा सुदुर्लभा भवति । सूत्र० १ श्रु० १५ अ० ।

तहणाण–तथाज्ञान–न० । यथा वस्तु तथा ज्ञानं वस्य तत्तथाज्ञानम् । सम्यग्दृष्टिजीवद्रव्ये, तस्यैवावितथज्ञानत्वात् । यथैव यद् वस्तु तथैव ज्ञानमवबोधः प्रतीतिर्यस्मिंस्तत्तथाज्ञानम् । षट्टाऽऽदिद्रव्ये, स्था० १० ठा० । यथा प्रच्छनीयार्थे प्रष्टव्यस्य ज्ञानं तथैव पृच्छकस्यापि ज्ञानं यत्र प्रश्ने स तथाज्ञानः । ज्ञानप्रश्ने, स च गौतमाऽऽदेर्यथा "केवइयकालेणं भंते ! चमरचंचाराययहाणीविरहिया उववायणमित्यादिरिति । " स्था० ९ ठा० ।

तहप्पओग–तथाप्रयोग–पुं० । तथाशब्दस्य प्रयोगे, " तह त्ति पओगो नाम जं-एवमेतं अवितहमेतं जाहे तं तुब्भे वदह, इमेतस्स अत्थस्स संपच्चयत्थं सविसए तह त्ति सद्दं पउंजंति । " आ० चू० १ अ० ।

तहप्पगार–तथाप्रकार–पुं० । पूर्वोक्तप्रकारे, आचा० १ श्रु० १ चू० १ अ० १ उ० । नि० चू० । एवंप्रकारे, जी० १ प्रति० । प्र० । पूर्वोक्तस्वरूपे, कल्प० १ क्षण ।

तहय–तथाच–अव्य० । तथेति चिनोति च चिञ् चयने । पूर्वोक्तार्थदृढीकरणे, वाच० । समुच्चये, पञ्चा० २ विव० ।

तहरी–देशी-पङ्क्तिलायां सुरायाम्, दे० ना० ५ वर्ग २ गाथा ।

तहल्लिया–देशी-गोवाटे, दे० ना० ५ वर्ग ८ गाथा ।

तहा–तथा–अव्य० । तेन प्रकारेण,पं० व० ४ द्वार० कल्प० । विशे० । तथाप्रकारे, वाच० । साम्ये, अभ्युपगमे, पृष्टप्रतिवाक्ये, समुच्चये, निश्चये च । वाच० । नं० । आनन्तर्ये, नं० । आ० म० । अवधिज्ञानेन सहास्य क्षुद्रस्थत्वाऽऽदिनिःसारूप्यप्रदर्शने, आ० म० १ अ० १ खण्ड । समुच्चयनिर्देशावधारणसादृश्यप्रश्नेषु, दश० १ अ० । वाक्योपन्यासे, स च वाक्यस्याऽऽदौ द्रष्टव्यः । पञ्चा० ६ विव० । प्रहणानन्तरे, विशे० । यथाशब्देनानूद्यमानस्य विधेयस्यार्थे, तद्यथा-यथेदं तथेवेदम् । सूत्र० १ श्रु० १३ अ० । पूर्वोक्तार्थे, सूत्र० २ श्रु० ६ अ० । इदाद्यवसानप्रकारसादृश्योपदर्शनार्थे, आव० ४ अ० । दश० ।

तहा–तस्मात्–" सर्वाऽऽदेरुसेहौ " ॥ ८ ॥ ४ । ३५५ ॥ इति अपभ्रंशे सर्वाऽऽदेराकारान्तात्परस्य ङसेर्हा इत्यादेशः । प्रा० ४ पाद ।

तहाकप्प–तथाकल्प–त्रि० । तथाऽऽचारे, द्वा० ३ द्वा० ।

तहाकार–तथाकार–पुं० । तीर्थंकरत्वं केवलज्ञानं च गते, सूत्र० १ श्रु० १२ अ० ।

तहागय–तथागत–पुं० । तथा तेन यथावस्थितपदार्थोपलम्भा-ऽऽत्मकेन प्रकारेण गतं ज्ञानमेषामिति तथागताः । भू० ३ उ० । तथाऽपुनरावृत्त्या गतास्तथागताः । सूत्र०१ श्रु०१५ अ० । अथवा-तथैवापुनरावृत्त्या गतं गमनं येषां ते तथागताः । यदि वा-यथैव ज्ञेयं तथैव गतं ज्ञानं येषां ते तथागताः । आचा० १ श्रु०३ अ०३ उ० । अथवा-तथागतानि यथावस्थितानि तथैवावितथं जानन्ति, न विभङ्गज्ञानिन इव विपरीतं पश्यन्ति । तेषु, सूत्र० १ श्रु० १२ अ० । देवत्वाऽऽदिप्रकारमापन्नेषु, भ० १७ श० २ उ० । यथोक्तानुष्ठायिषु (सूत्र० १ श्रु० २ अ० २ उ०) सिद्धेषु, सर्वज्ञेषु च । आचा० १ श्रु० ३ अ० ३ उ० ।

तहाजुत्त–तथायुक्त–त्रि० । सेवकगुणोपेततया उचिते, जी० ३ प्रति० ४ उ० ।

तहाभूय–तथाभूत–त्रि० । एवंप्रकारं प्राप्ते, " अह णं से होई उवलद्धो तो संति तहाभूएहिं । " सूत्र० १ श्रु० ४ अ० २ उ० ।

तहारूव–तथारूप–त्रि० । तथा तत्प्रकारं रूपं स्वभावो नेपथ्याऽऽदिर्वा यस्य स तथारूपः । दानोचिते, स्था० ३ ठा० १ उ० । उचितस्वभावे, भ० २ श० ५ उ० । भक्तिदानोचितपात्रे, भ० ५ श० ५ उ० । अविज्ञाततव्रतविशेषे, न० । भ० १५ श्रु० ।

तहाविय–तथाविद्–पुं० । तथारूपमनुष्ठानं विदन्तीति तथाविदः । इङ्गिताऽऽचारकुशले, निपुणे, तद्विदि सर्वज्ञे, पुं० । सूत्र० १ श्रु० ४ अ० १ उ० ।

तहाविह–तथाविध–त्रि० । तत्प्रकारे, " तं तहाविहं पेच्छइ । " आ० म० १ अ० २ अध्य० । नि० चू० ।

तहाहि–तथाहि–अव्य० । निपातसमुदायः । ध० ३ अधि० । तथा च हि च द्वन्द्वः । निदर्शने, प्रसिद्धमेवेत्यर्थे, वाच० । उक्तस्योपदर्शने, ध० ३ अधि० । अने० ।

तहि–तत्र–अव्य० । " अपो हिहत्थाः " ॥ ८ । २ । १६१ ॥ इति अप्प्रत्ययस्यैते त्रय आदेशाः । प्रा० २ पाद । तस्मिन्नित्यर्थे, वाच० । जं० । प्रश्न० ।

तहिय–तथ्य–अव्य० । तथेति चिनोति-चिकृचयने पूर्वोक्तार्थेदृढीकरणे, वाच० । उक्तप्रकारमापन्ने, मात्रयाऽप्यन्यूनाधिके, उत्त० ६ अ० । प्रश्न० ।

तथ्य–त्रि० । परमार्थभूते सत्ये, सूत्र० १ श्रु० १४ अ० ।

तहोववत्ति–तथोपपत्ति–स्त्री० । तथैव साध्यसंभवप्रकारेण हेतोरुपपत्तिस्तथोपपत्तिः । अर्थात् सत्येव साध्ये हेतोरुपपत्तिस्तथोपपत्तिः । यथा कृशानुमानयं पाकप्रदेशः, सत्येव कृशानुमत्त्वे धूमवत्त्वस्योपपत्तेः । हेतुप्रयोगभेदे, रत्ना० ६ परि० ।

ता–तस्मात्–अव्य० । " तस्मात्तातः " ॥ ८ । ४ । २७८ ॥ इति शौरसेन्यां तस्माच्छब्दस्य ता इत्यादेशः । प्रा० ४ पाद । पञ्चा० ।

तावत्–अव्य० । तत्परिमाणमस्य । नि० । " यावत्तावत्क्रीवितावर्तमानावटप्रावारकदेवकुलैवमेवे वः " ॥ ८ । १ । २७१ ॥ इति तस्यस्य वकारस्य लोपः । प्रा० १ पाद । प्रस्तुतार्थप्रदर्शके, आ० म० १ अ० २ अध्य० । सूत्र० । तच्छब्दस्य प्रथमैकवचनेऽपि स्त्रियां 'ता' इति । अस्यमामीत्युक्तेः " किं यत्तदोस्यमामि " ॥ ८ । ३ । ३३ ॥ इति ङीर्न भवति । प्रा० ३ पाद ।

ताअ–तात–पुं० । तन-क्त-दीर्घत्वं च । वाच० । मागध्यां दत्वे, प्राकृते तकारलोपः । प्रा० १ पाद । जनके, उत्त० १४ अ० । पुत्रे सूत्र० १ श्रु० ३ अ० २ उ० । प्रश्न० । अनुकम्प्ये, पूज्ये च । त्रि० । वाच० ।

ताइ (ण्) तापि (यि) नू–त्रि० । 'तप' गतौ णिनिप्रत्ययः । मोक्षं प्रति गमनशीले, सूत्र० २ श्रु० ६ अ० । तायते रक्षति दुर्गतेरात्मानमेकेन्द्रियाऽऽदिप्राणिनो वाऽवश्यमिति तायी (?) । उत्त० ८ अ० । तापः स्वदृष्टमार्गोक्तिः, तद्वान् तापी । सुपरिज्ञातदेशतया विनेयपालपितरि, द्वा० २७ द्वा० । दश० । तपनं तापः, स विद्यते यस्यासौ तापी । तस्मिन्, सूत्र० १ श्रु० १५ अ० । आव० ।

त्रायिन्–त्रि० । मनोवाक्कायगुप्तिभिः कृतकारितानुमतिभिर्वाऽऽत्मानं त्रातुं शीलमस्येति त्रायी, जन्तूनां सद्धर्मोपदेशदानतस्त्राणकरणशीले, सूत्र० १ श्रु० १४ अ० । आसन्नभव्यानां त्राणकारणे, सूत्र० २ श्रु० ६ अ० । आत्मनः परेषां च त्राणशीले, सूत्र० २ श्रु० ६ अ० । विशिष्टोपदेशदानादपरेषां त्राणभूते, (सूत्र० १ श्रु० १ अ०) संसारसागरात्प्राणिपूगपालके, (पञ्चा० १६ विव० ।) धर्मकार्योऽऽदिना संसारदुःखेभ्यस्त्राणकर्तरि, दश० २ अ० ।

ताढा–दंष्ट्रा–स्त्री० । ' चूलिकापैशाचिके तृतीयतुर्ययोराद्यद्वितीयौ " ॥ ८ । ४ । ३२५ ॥ इह क्वचिल्लाक्षणिकस्यापीत्युक्तेर्दाढा इत्यस्य स्थाने ताढा इत्यादेशः । प्रा० ४ पाद । दन्तभेदे, दन्तपङ्क्तिद्वयप्रान्तस्थायां द्विगुणाकृतायां दन्तावली च । वाच० ।

तामण–ताडन–न० । उरःशिरःकुट्टनकेशलुञ्चनाऽऽदिषु, भाव० ४ अ० । गुणने, स्था० १ ठा० ।

तादत्थ–तादर्थ्य–न० । तदर्थत्वे, पार्श्ववर्तित्वे, अनु० ३२ अनु० ।

तादिअ–तामयित्वा–अव्य० । तामनं कृत्वेत्यर्थे, उत्त० १९ अ० ।

तादिप्पय–रोदी–रोदने, दे० ना० ४ वर्ग १० गाथा ।

तामिज्जमाण–ताड्यमान–त्रि० । कुड्याऽऽद्यभिघाताऽऽदिना तामनां प्राप्यमाणे, सूत्र० २ श्रु० १ अ० ।

ताण–त्राण–त्रि० । शरणे, आचा० १ श्रु० २ अ० १ उ० । सूत्र० । अनु० । विशे० । स्था० । अनर्थप्रतिघातहेतौ, कल्प० २ क्षण । अनर्थप्रतिहनने, अर्थसंपादने च । न० । तं० ।

वित्तं पसवो य नाइओ, तं बाले सरणं ति मन्नइ ।
एते मम तेसु वी अहं, नो ताणं सरणं न विज्जइ ॥१६॥

(वित्तमित्यादि) वित्तं-धनधान्यहिरण्याऽऽदि, पशवः-करितुरगगोमहिष्यादयः, ज्ञातयः-स्वजना मातापितृपुत्रकलत्राऽऽदयः, तदेव वित्ताऽऽदिकं बालोऽज्ञः शरणं मन्यते । तदेव दर्शयति-ममैते वित्तपशुज्ञातयः परिभोगे उपयोक्ष्यन्ते । तेषु चार्जनपालनसंरक्षणाऽऽदिना शेषोपद्रवनिराकरणेन परिहारेणाऽहं भवामीत्येवं बालो मन्यते । न पुनर्जानीते-यदर्थं धनमिच्छति तच्छरीरमशाश्वतमिति । अपि च-" रिद्धी सहावतरला, रोगजराजंगुरं इयसरीरं । " तथा-" मातापितृसहस्राणि पुत्रदारशतानि च । प्रतिजन्मनि वर्तन्ते, कस्य माता पिताऽपि वा ? ॥ १ ॥ एतदेवाऽऽह-नो नैव, वित्ताऽऽदिकं संसारे क-

थमपि त्राणं भवति, नरकाऽऽदौ पततो नाऽपि रागाऽऽदिनो-पहतस्य क्वचिच्चरणं विद्यते इति ॥ १६ ॥ सूत्र० १ श्रु० २ अ० ३ उ० ।

ताण–पुं० । तताया तन्त्र्याम्, "ताणा यमूणपणासं ।" तत्र षड्जाऽऽदयः स्वराः प्रत्येकं सप्तभिस्तानैर्गीयन्त इत्येवमेकोनपञ्चाशत्तानाः सप्ततन्त्रिकायां वीणायां भवन्ति । अनु० ।

ताद–तात–पुं० । 'तच्छ' शब्दार्थे, प्रा० १ पाद ।

तादत्तिय–तादात्विक–त्रि० । यः किमप्यसंचिन्त्य उत्पन्नमर्थं व्ययति स तादात्विकः । अविचारेणार्थनाशके, ध० १ अधि० ।

तादत्थ–तादर्थ्य–न० । तदर्थभावे, आ० ।

ताम–तावत्–अव्य० । "यावत्तावतोर्ऽऽदेः मः मांहिं" ॥८।४।४०६॥ इत्येते त्रय आदेशाः । ताम-तावं-तामाहिं । प्रा०४ पाद । साकल्ये, अवधौ, माने, अवधारणे, प्रशंसायाम्, पक्षान्तरे, वाक्यभूषणे, तदेत्यर्थे च । तत्परिमाणवति, त्रि० । स्त्रियां ङीप् । तावती । वाच० ।

तामर–देशी-रम्ये, दे० ना० ५ वर्ग १० गाथा ।

तामरस–तामरस–न० । पद्मे, प्रज्ञा० १ पद । स्था० । कल्प० । ताम्रे, स्वर्णे, धुस्तूरे, द्वादशाक्षरपादके छन्दोभेदे च । वाच० । मुहूर्ते, दे० ना० ५ वर्ग १० गाथा ।

तामलित्ति–ताम्रलिप्ति–स्त्री० । जम्बूद्वीपे भारतवर्षे स्वनामख्यातायां नगर्याम्, यत्र मौर्यपुत्र ईशानदेवेन्द्रजीवो गृहपतिरासीत् । भ० ३ श० १ उ० । वङ्गानां आर्यजनपदानां राजधान्याम्, प्रज्ञा० १ पद । प्रव० । सूत्र० । आचा० ।

तामलित्तिया–ताम्रलिप्तिका–स्त्री० । स्थविराज्ञोदासाभिगीतस्य गोदासगणस्य प्रथमशाखायाम्, कल्प० ८ क्षण ।

तामली–तामली–पुं० । ताम्रलिप्तिनगरीवास्तव्ये ईशानदेवेन्द्रजीवे मौर्यपुत्रे गृहपतौ, भ० ।

तेणं कालेणं तेणं समएणं इहेव जंबुद्दीवे दीवे भारहे वासे तामलित्ती नामं नयरी होत्था । वण्णओ । तत्थ णं तामलित्तीए नयरीए तामली नामं मोरियपुत्ते गाहावई होत्था । अड्ढे दित्ते०जाव बहुजणस्स अपरिभूए यावि होत्था । तए णं तस्स मोरियपुत्तस्स तामलिस्स गाहावइस्स अण्णया कयाइ पुव्वरत्तावरत्तकालसमयंसि कुडुंबजागरियं जागरमाणस्स इमे एयारूवे अज्झत्थिए०जाव समुप्पज्जित्था-अत्थि ता मे पुरा पोराणाणं सुचिण्णाणं सुपरिक्कंताणं सुभाणं कल्लाणाणं कडाणं कम्माणं कल्लाणफलवित्तिविसेसो, जेणाहं हिरण्णेणं वड्ढामि, सुवण्णेणं वड्ढामि, धणेणं वड्ढामि, धण्णेणं पुत्तेहिं च पसूहिं वड्ढामि, विउलधणकणगरयणमणि-मोत्तियसंखसिलप्पवालरत्तरयणसंतसारसावएज्जेणं अईव अईव अभिवड्ढामि, तं किं णं अहं पुरा पोराणाणं सुचिण्णाणं० जाव कडाणं कम्माणं एगंतसो क्खयं उवेहमाणे विहरामि, तं०जाव अहं हिरण्णेणं वड्ढामि० जाव अईव अईव अभिवड्ढामि० जाव च मे मित्तनाइनियगसंबंधिपरियणो आढाइ, परियाणाइ, सक्कारेइ, सम्माणेइ, कल्लाणं मंगलं देवयं विणएणं चेइयं पज्जुवासेइ, ताव ता मे सेयं कल्लं पाउप्पभायाए रयणीए०जाव जलंते सयमेव दारुमयं पडिग्गहं करेत्ता विउलं असणं पाणं खाइमं साइमं उवक्खडावेत्ता मित्तणाइनियगसयणसंबंधिपरियणं आमंतेत्ता तं मित्तणाइनियगसयणसंबंधिपरियणं विउलेणं असणपाण-खाइमसाइमेणं वत्थगंधमल्लालंकारेण य सक्कारेत्ता सम्माणेत्ता तस्सेव मित्तणाइनियगसंबंधिपरियणस्स पुरओ जेट्ठपुत्तं कुडुंबे ठावित्ता तं मित्तनाइनियगसंबंधिपरियणं जेट्ठपुत्तं च आपुच्छित्ता सयमेव दारुमयं पडिग्गहं गहाय मुंडे भवित्ता पाणामाए पव्वज्जाए पव्वइत्तए । पव्वइए वि य णं समाणे इमं एयारूवं अभिग्गहं अभिगिण्हिस्सामि-कप्पइ मे जावज्जीवाए छट्ठं छट्ठेणं अणिक्खित्तेणं तवोकम्मेणं उड्ढं बाहाओ पगिज्झिय पगिज्झिय सूराभिमुहस्स आयावणभूमीए आयावेमाणस्स विहरित्तए, छट्ठस्स वि य णं पारणयंसि आयावणभूमीओ पच्चोरुभित्ता सयमेव दारुमयं पडिग्गहं गहाय तामलित्तीए नयरीए उच्च-नीयमज्झिमाइं कुलाइं घरसमुदाणस्स भिक्खायरियाए अडेत्ता सुद्धोदणं पडिग्गहेत्ता तं तिसत्तखुत्तो उदएणं पक्खालेत्ता तओ पच्छा आहारं आहारित्तए त्ति कट्टु एवं संपेहेइ, संपेहेइत्ता कल्लं पाउप्पभायाए०जाव जलंते सयमेव दारुमयं पडिग्गहं कारेइ, कारेइत्ता विउलं असणं पाणं खाइमं साइमं उवक्खडावेइ, उवक्खडावेइत्ता तओ पच्छा एहाए कयबलिकम्मे कयकोउयमंगलपायच्छित्ते सुद्धप्पावेसाइं मंगल्लाइं वत्थाइं पवरपरिहिए अप्पमहग्घाभरणालंकियसरीरे भोयणवेलाए भोयणमंडवंसि सुहासणवरगए, तए णं मित्तणाइनियगसयणसंबंधिपरियणेणं सद्धिं तं विउलं असणं पाणं खाइमं साइमं आसाएमाणे वीसाएमाणे परिभाएमाणे परिभुंजेमाणे विहरइ । जेमिय भुत्तुत्तरागए वि य णं समाणे आयंते चोक्खे परमसुइभूए तं मित्त० जाव परियणं विउलेणं वत्थगंधमल्लालंकारेण य सक्कारेइ, सक्कारेइत्ता तस्सेव मित्तणाइ०जाव परियणस्स पुरओ जेट्ठपुत्तं कुडुंबे ठावेइ, ठावेइत्ता तं मित्तणाइ०जाव परियणं जेट्ठपुत्तं च आपुच्छइ, आपुच्छइत्ता मुंडे भवित्ता पाणामाए पव्वज्जाए पव्वइत्तए । पव्वइए वि य णं समाणे इमं एयारूवं अभिग्गहं अभिगिण्हइ-कप्पइ मे जावज्जीवाए छट्ठं छट्ठेणं० जाव आहारित्तए त्ति कट्टु इमं एयारूवं अभिग्गहं अभिगिण्हइ, अभिगिण्हइत्ता जावज्जीवाए छट्ठं छट्ठेणं अणिक्खित्तेणं तवोकम्मेणं उड्ढं बाहाओ पगिज्झिय

पगिञ्जिय सूराभिमुहे आयावणभूमीए आयावेमाणे विहरइ, छट्ठस्स वि य णं पारणयंसि आयावणभूमीए पच्चोरुहइ, पच्चोरुहइत्ता सयमेव दारुमयं पडिग्गहं गहाय तामलित्तीए नयरीए उच्चनीयमज्झिमाइं कुलाइं घरसमुयाणस्स भिक्खायरियाए अडइ, अडइत्ता सुद्धोयणं पडिग्गहेइ, पडिग्गहेइत्ता तिसत्तखुत्तो उदएणं पक्खालेइ, पक्खालेइत्ता तओपच्छा आहारं आहारेइ। से केणट्ठेणं भंते! एवं वुच्चइ-पाणामाए पव्वज्जा ?। गोयमा! पाणामाए णं पव्वज्जाए पव्वइए समाणे जं जत्थ पासइ, तं इंदं वा खंदं वा रुद्दं वा सिवं वा वेसमणं वा अज्जं वा कोट्टकिरियं वा रायं वा ०जाव सत्थवाहं वा काकं वा साणं वा पाणं वा उच्चं पासइ, उच्चं पणामं करेइ, नीयं पासइ, नीयं पणामं करेइ, जं जहा पासइ, तस्स तहा पणामं करेइ, से तेणट्ठेणं०जाव पव्वज्जा। तए णं से तामली मोरियपुत्ते तेणं उरालेणं विपुलेणं पयत्तेणं पग्गहिएणं बालतवोकम्मेणं सुक्के लुक्खे ०जाव धमणिसंतए जाए यावि होत्था। तए णं तस्स तामलिस्स बालतवस्सिस्स अन्नया कयाइं पुव्वरत्तावरत्तकालसमयंसि अणिच्चजागरियं जागरमाणस्स इमेयारूवे अज्झत्थिए चिंतिए० जाव समुप्पज्जित्था-एवं खलु अहं इमेणं उरालेणं विपुलेणं० जाव उदत्तेणं उत्तमेणं महाणुभागेणं तवोकम्मेणं सुक्के लुक्खे० जाव धमणिसंतए जाए, तं अत्थि ता मे उट्ठाणे कम्मे बले वीरिए पुरिसकारपरक्कमे ताव ता मे सेयं कल्लं० जाव जलंते तामलित्तीए नगरीए दिट्ठाऽदिट्ठे य पासंडत्थे य गिहत्थे य पुव्वसंगतिए य पच्छासंगतिए य परियायसंगतिए य आपुच्छित्ता तामलित्तीए नयरीए मज्झं मज्झेणं निग्गच्छित्ता पाओगकुंडियमादीयं उवगरणं दारुमयं च पडिग्गहं एगंते एमेचा तामलित्तीए नगरीए उत्तरपुरच्छिमे दिसीभाए नियत्तणियमंडलं आलिहित्ता संलेहणाझूसणाझूसियस्स भत्तपाणपडियाइक्खियस्स पाओवगयस्स कालं अणवकंखमाणस्स विहरित्तए त्ति कट्टु एवं संपेहेइ, संपेहेइत्ता कल्लं० जाव जलंते० जाव आपुच्छइ, आपुच्छइत्ता तामली एगंते एमेइ० जाव भत्तपाणपडियाइक्खिए पाओवगमणं निवन्ने। तेणं कालेणं तेणं समएणं बलिचंचा रायहाणी अणिंदा अपुरोहिया यावि होत्था। तए णं ते बलिचंचारायहाणिवत्थव्वया बहवे असुरकुमारा देवा य देवीओ य तामलिं बालतवस्सिं ओहिणा आभोएंति, आभोएंतित्ता अन्नमन्नं सद्दावेंति, सद्दावेंतित्ता एवं वयासी-एवं खलु देवाणुप्पिया! बलिचंचा रायहाणी अणिंदा अपुरोहिया, अम्हे णं देवाणुप्पिया! इंदाहीणा इंदाहिट्ठिया इंदाहीणकज्जा, अयं च णं देवाणुप्पिया! तामली बालतवस्सी तामलित्तीए नयरीए बहिया उत्तरपुरच्छिमे दिसीभाए नियत्तणियमंडलं आलिहित्ता संलेहणाझूसणाझूसिए भत्तपाणपडियाइक्खिए पाओवगमणं निवन्ने, तं सेयं खलु देवाणुप्पिया! अम्हं तामलिं बालतवस्सिं बलिचंचाए रायहाणीए ठिइप्पकप्पं पकरावेत्तए त्ति कट्टु अण्णमण्णस्स अंतिए एयमट्ठं पडिसुणेंति, पडिसुणेंतित्ता बलिचंचाए रायहाणीए मज्झं मज्झेणं निग्गच्छंति, जेणेव रुयगिंदे उप्पायपव्वए, तेणेव उवागच्छंति, वेउव्वियसमुग्घाएणं समोहणंति ०जाव उत्तरवेउव्वियाइं रूवाइं विकुव्वंति त्ति विकुव्वंतित्ता ताए उक्किट्ठाए तुरियाए चवलाए चंडाए जयणाए छेयाए सीहाए सिग्घाए दिव्वाए उद्धुयाए देवगईए तिरियं असंखेज्जाणं दीवसमुद्दाणं मज्झं मज्झेणं जेणेव जंबुद्दीवे दीवे जेणेव भारहे वासे जेणेव तामलित्तीए नगरीए जेणेव तामली मोरियपुत्ते, तेणेव उवागच्छंति, उवागच्छंतित्ता तामलिस्स बालतवस्सिस्स उप्पिं सपक्खिं सपडिदिसिं ठिच्चा दिव्वं देविड्ढिं दिव्वं देवजुतिं दिव्वं देवाणुभावं दिव्वं बत्तीसइविहं नट्टविहिं उवदंसेंति, उवदंसेंतित्ता तामलिं बालतवस्सिं तिक्खुत्तो आयाहिणपयाहिणं करेंति, वंदंति, नमंसंति, नमंसेंतित्ता एवं वयासी-एवं खलु देवाणुप्पिया! अम्हे बलिचंचारायहाणीवत्थव्वया बहवे असुरकुमारा देवा य देवीओ य देवाणुप्पिया! वंदामो, नमंसामो० जाव पज्जुवासामो, अम्हाणं देवाणुप्पिया! बलिचंचा रायहाणी अणिंदा अपुरोहिया, अम्हे य णं देवाणुप्पिया! इंदाहीणा इंदाहिट्ठिया इंदाहीणकज्जा, तं तुब्भे णं देवाणुप्पिया! बलिचंचारायहाणिं आढह, परियाणह, सुमरह, अम्हं बंधेह, निहाणं पकरेह, ठिइप्पकप्पं पकरेह। तए णं तुब्भे कालपासे कालं किच्चा बलिचंचारायहाणीए उववज्जिस्सह, तए णं तुब्भे अम्हं इंदा भविस्सह, तए णं तुब्भे अम्हेहिं सद्धिं दिव्वाइं भोगभोगाइं भुंजमाणा विहरिस्सह। तए णं से तामली बालतवस्सी तेहिं बलिचंचारायहाणिवत्थव्वेहिं बहूहिं असुरकुमारेहिं देवेहि य देवीहि य एवं वुत्ते समाणे एयमट्ठं नो आढाइ, नो परियाणइ, तुसिणीए संचिट्ठइ। तए णं ते बलिचंचारायहाणिवत्थव्वया बहवे असुरकुमारा देवा य देवीओ य तामलिं मोरियपुत्तं दोच्चं पि तच्चं पि तिक्खुत्तो आयाहिणपयाहिणं करेइ, करेइत्ता० जाव अम्हं च णं देवाणुप्पिया! बलिचंचा रायहाणी अणिंदा० जाव ठिइप्पकप्पं पकरेह०, जाव दोच्चं पि त-

चं पि एवं वुत्ते समाणे ०जाव तुसिणीए संचिट्ठइ । तए णं ते बलिचंचारायहाणिवत्थव्वया बहवे असुरकुमारा देवा य देवीओ य तामलिणा बालतवस्सिणा अणाढाइज्जमाणा अपरियाइज्जमाणा जामेव दिसिं पाउब्भूया तामेव दिसिं पडिगया । तेणं कालेणं तेणं समएणं ईसाणे कप्पे अरिंदे अपुरोहिए यावि होत्था । तए णं से तामली बालतवस्सी बहुपडिपुण्णाइं सट्ठिं वाससहस्साइं परियागं पाउणित्ता दो मासियाए संलेहणाए अत्ताणं झूसित्ता सवीसं भत्तसयं अणसणाए छेदित्ता कालमासे कालं किच्चा ईसाणे कप्पे ईसाणवडिंसए विमाणे उववायसभाए देवसयणिज्जंसि देवदूसंतरियं अंगुलस्स असंखेज्जइभागमेत्तीए ओगाहणाए ईसाणे देविंदे विरहियकालसमयंसि ईसाणदेविंदत्ताए उववण्णे । तए णं से ईसाणे देविंदे देवराया अहुणोववन्ने पंचविहाए पज्जत्तीए पज्जत्तिभावं गच्छइ । तं जहा–आहारपज्जत्तीए० जाव भासामणपज्जत्तीए । तए णं बलिचंचारायहाणिवत्थव्वया बहवे असुरकुमारा देवा य देवीओ य तामलिं बालतवस्सिं कालगयं जाणित्ता ईसाणे य कप्पे देविंदत्ताए उववण्णं पासित्ता आसुरुत्ता कुविआ चंडिक्किया मिसिमिसेमाणा बलिचंचाए रायहाणीए मज्झं मज्झेणं निग्गच्छंति, निग्गच्छंतित्ता ताए उक्किट्ठाए०जाव जेणेव जंबुद्दीवे दीवे जेणेव तामलित्ती नयरी जेणेव तामलिस्स बालतवस्सिस्स सरीरए,तेणेव उवागच्छंति, उवागच्छंतित्ता वामे पाए सुंवेणं बंधंति,बंधंतित्ता तिक्खुत्तो मुहे ठहुंहंति,ठहुंहंतित्ता तामलित्तीए नयरीए सिंघाडगतियचउक्कचच्चरचउम्मुहमहापहपहेसु आकड्ढविकड्ढिं करेमाणा महया महया सद्देणं उग्घोसेमाणा उग्घोसेमाणा एवं वयासी–से केणं णो तामली बालतवस्सी सयंगहियलिंगे पाणामाए पव्वज्जाए पव्वइए, केस णं से ईसाणे कप्पे ईसाणे देविंदे देवराया ति कट्टु तामलिस्स बालतवस्सिस्स सरीरयं हीलेंति,निंदंति, खिंसंति, गरहंति, अवमण्णंति, तज्जेंति, तालेंति,परिवहेंति, पव्वहंति, आकड्ढविकड्ढिं करेंति,हीलेत्ता० जाव आकड्ढविकड्ढिं करेत्ता एगंते एडंति, एमंतित्ता जामेव दिसिं पाउब्भूया तामेव दिसिं पडिगया । तए णं ते ईसाणकप्पवासी बहवे वेमाणिया देवा य देवीओ य बलिचंचारायहाणिवत्थव्वएहिं बहूहिं असुरकुमारेहिं देवेहि य देवीहि य तामलिस्स बालतवस्सिस्स सरीरयं हीलिज्जमाणं निंदिज्जमाणं खिंसिज्जमाणं० जाव आकड्ढविकड्ढिं कीरमाणं पासंति, पासंतित्ता आसुरुत्ता० जाव मिसिमिसेमाणा जेणेव ईसाणे देविंदे देवराया तेणेव उवागच्छंति, उवागच्छंतित्ता करयलपरिग्गहियं दसनहं सिरसावत्तं मत्थए अंजलिं कट्टु जएणं विजएणं वद्धावेंति, वद्धावेंतित्ता एवं वयासी–एवं खलु देवाणुप्पिया! बलिचंचारायहाणिवत्थव्वया बहवे असुरकुमारा देवा य देवीओ य देवाणुप्पिये कालगए जाणेत्ता ईसाणे य कप्पे इंदत्ताए उववण्णे पासेत्ता आसुरुत्ता० जाव एगंते एमंति, एमंतित्ता जामेव दिसिं पाउब्भूया तामेव दिसिं पडिगए । तए णं से ईसाणे देविंदे देवराया तेसिं ईसाणकप्पवासीणं बहूणं वेमाणियाणं देवाण य देवीण य अंतिए एयमट्ठं सोच्चा निसम्म आसुरुत्ते० जाव मिसिमिसेमाणे तत्थेव सयणिज्जवरगए तिवलियं भिउडिं णिडाले साहट्टु बलिचंचारायहाणिं अहे सपक्खिं सपडिदिसिं समभिलोएइ,तए णं सा बलिचंचा रायहाणी ईसाणेणं देविंदेणं देवरण्णा अहे सपक्खिं सपडिदिसिं समभिलोइया समाणा तेणं दिव्वप्पभावेणं इंगालभूया मुम्मुरभूया छारिभूया तत्तकवेल्लयभूया तत्तासमजोइभूया जाया यावि होत्था । तए णं ते बलिचंचारायहाणिवत्थव्वया बहवे असुरकुमारा देवा य देवीओ य ते बलिचंचारायहाणिं इंगालभूयं ०जाव समजोइभूयं पासंति, पासंतित्ता भीया उत्तत्था तसिया उव्विग्गा संजायभया सव्वओ समंता आधावंति, परिधावंति, परिधावंतित्ता अण्णमण्णस्स कायं समतुरंगेमाणा चिट्ठंति । तए णं ते बलिचंचारायहाणिवत्थव्वया बहवे असुरकुमारा देवा य देवीओ य ईसाणं देविंदं देवरायं परिकुवियं जाणित्ता ईसाणस्स देविंदस्स देवरण्णो तं दिव्वं देविड्ढिं दिव्वं देवजुतिं दिव्वं देवाणुभावं दिव्वं तेयलेस्सं असहमाणा सव्वे सपक्खिं सपडिदिसिं ठिच्चा करयलपरिग्गहियं दसनहं सिरसावत्तं मत्थए अंजलिं कट्टु जएणं विजएणं वद्धावेंति, वद्धावेंतित्ता एवं वयासी–अहो णं देवाणुप्पिएहिं दिव्वा देविड्ढी० जाव अभिसमण्णागया, तं दिट्ठा णं देवाणुप्पियाणं दिव्वा देविड्ढी० जाव लद्धा पत्ता अभिसमण्णागया खामेमो णं देवाणुप्पिया !, खमंतु णं देवाणुप्पिया !, खमंतुमरिहंतु णं देवाणुप्पिया !, नाइभुज्जो भुज्जो एवं करणयाए त्ति कट्टु एयमट्ठं सम्मं विणएणं भुज्जो भुज्जो खामेंति;तए णं से ईसाणे देविंदे देवराया तेहिं बलिचंचारायहाणिवत्थव्वेहिं बहूहिं असुरकुमारेहिं देवेहि य देवीहि य एयमट्ठं सम्मं विणएणं भुज्जो भुज्जो खामिए समाणे तं दिव्वं देविड्ढिं० जाव तेयलेस्सं पडिसाहरइ, तप्पभिइं च णं गोयमा ! ते बलिचंचारायहाणिवत्थव्वया बहवे असुरकुमारा देवा य देवीओ य ईसाणं देविंदं देवरायं आढंति० जाव पज्जुवासंति; ईसाणस्स य देविंदस्स देवरण्णो आणाउववायवयणनिद्देसे चिट्ठंति ।

एवं खलु गोयमा ! ईसाणेणं देविंदेणं देवरण्णा सा दिव्वा देविड्ढी० जाव अभिसमण्णागए। ईसाणस्स णं भंते ! देविंदस्स देवरण्णो केवइयं कालं ठिई पण्णत्ता ? । गोयमा ! साइरेगाइं दोसागरोवमाणि ठिई पण्णत्ता। ईसाणे णं भंते ! देविंदे देवराया ताओ देवलोगाओ आउक्खएणं० जाव कहिं गच्छिहिति कहिं उववज्जिहिति ?। गोयमा ! महाविदेहे वासे सिज्झिहिति० जाव अंतं काहिति। भ० ३ श० १ उ०।

तामस–तामस–पुं० । तमसि अन्धकारे अविद्यागुणे वा रतः अण् । सर्पे, उलूके, खले च । तमसा गुणभेदेन निर्वृत्तम, अण्। साङ्ख्योक्ते तमोजन्ये अहङ्कारभेदौ, त्रि० । तमसः राहोरपत्यम, अण् । राहुसुतेषु ज्योतिश्चक्रेषु केतुषु, तमसा व्याप्ता, अण् । ङीप् । रात्रौ, जटामांस्यां, तमोऽधिकायां स्त्रियां च । वाच० । अज्ञानपरिणामे, प्रश्न० ४ आश्र० द्वार ।

तामिस्स–तामिस्र–न० । तमिस्रमस्त्यस्मिन्, अण् । साङ्ख्योक्तेऽष्टादशविधे विपर्ययरूपाज्ञानभेदे, वाच० । स्था० । भोगेच्छाप्रतिघातजे क्रोधे, तमिस्रा चारिणि राक्षसे क । अन्धकारमये नरकभेदे, न० । वाच० ।

तामोतर–दामोदर–पुं० । " चूलिकापैशाचिके तृतीयचतुर्थयोराद्यद्वितीयौ " ॥ ८ । ४ । ३२५ ॥ इति चूलिकायां पैशाच्यां च दकारस्य तकारः । प्रा० ४ पाद । "तदोस्तः" ॥ ८ । ४ । ३०१ ॥ इति पैशाच्यां दस्य तः । प्रा० ४ पाद । विष्णौ, वाच० ।

ताय–तात–पुं० । पितरि, भ० ३३ श० ए उ० ।

तायत्तीसग–त्रयस्त्रिंशत्–स्त्री० । त्रयस्त्रिंशायां त्रिंशति, ज० ३ श० १ उ० । प्रज्ञा० ।

त्रायस्त्रिंश–पुं० । इन्द्राणां पूज्ये महत्तरकल्पे, उपा० २ अ० । स्था० । कल्प० ।

तेणं कालेणं तेणं समएणं वाणियगामे णामं णयरे होत्था । वण्णओ–दूइपलासए चेइए सामी समोसढे० जाव परिसा पडिगया। तेणं कालेणं तेणं समएणं समणस्स भगवओ महावीरस्स जेट्ठे अंतेवासी इंदभूई णामं अणगारे० जाव उड्ढंजाणू० जाव विहरइ । तेणं कालेणं तेणं समएणं समणस्स भगवओ महावीरस्स अंतेवासी सामहत्थी णामं अणगारे पगइभद्दए जहा रोहे० जाव उड्ढंजाणू० जाव विहरइ । तए णं से सामहत्थी अणगारे जायसड्ढे० जाव उट्ठाए उट्ठेइत्ता जेणेव भगवं गोयमे तेणेव उवागच्छइ, उवागच्छइत्ता भगवं गोयमं तिक्खुत्तो० जाव पज्जुवासेमाणे एवं वयासी–अत्थि णं भंते ! चमरस्स णं असुरिंदस्स असुरकुमाररण्णो तायत्तीसगा देवा ? । एवं खलु सामहत्थी ! तेणं कालेणं तेणं समएणं इहेव जंबुद्दीवे दीवे भारहे वासे कायंदी णामं णयरी होत्था । वण्णओ । तत्थ णं कायंदीए णयरीए तायत्तीसं सहाया गाहावई समणोवासगा परिवसंति, अड्ढा० जाव अपरिभूया अभिगयजीवाजीवा उवलद्धपुण्णपावा, वण्णओ० जाव विहरंति। तए णं ते तायत्तीसं सहाया गाहावइसमणोवासगा पुव्विं उग्गा उग्गविहारी संविग्गा संविग्गविहारी भवित्ता तओ पच्छा पासत्था पासत्थविहारी ओसण्णा ओसण्णविहारी कुसीला कुसीलविहारी अहाच्छंदा अहाच्छंदविहारी बहूइं वासाइं समणोवासगपरियागं पाउणंति, पाउणंतित्ता अद्धमासियाए संलेहणाए अत्ताणं झूसंति, झूसंतित्ता तीसं भत्ताइं अणसणाए छेदेंति, छेदेंतित्ता तस्स ठाणस्स अणालोइयपडिक्कंता कालमासे कालं किच्चा चमरस्स असुरिंदस्स असुररण्णो तायत्तीसगा देवत्ताए उववण्णा । जप्पभिइं च णं भंते ! कायंदगा तायत्तीसं सहाया समणोवासगा चमरस्स असुरिंदस्स असुररण्णो तायत्तीसगदेवत्ताए उववण्णा, तप्पभिइं च णं भंते ! एवं वुच्चइ–चमरस्स असुरिंदस्स असुरकुमाररण्णो तायत्तीसगा देवा २ ? । तत्थ णं भगवं गोयमे सामहत्थिणा अणगारेणं एवं वुत्ते समाणे संकिए कंखिए वितिगिंछिए भेदसमावण्णे कलुसमावण्णे सामहत्थिणा अणगारेणं सद्धिं जेणेव समणे भगवं महावीरे, तेणेव उवागच्छइ, उवागच्छइत्ता समणं भगवं महावीरं वंदइ, नमंसइ, नमंसइत्ता एवं वयासी–अत्थि णं भंते ! चमरस्स असुरिंदस्स असुररण्णो तायत्तीसगा देवा ?। हंता अत्थि । से केणट्ठेणं भंते ! एवं वुच्चइ–एवं तं चेव सव्वं भाणियव्वं० जाव तप्पभिइं च णं एवं वुच्चइ–चमरस्स असुरिंदस्स असुररण्णो तायत्तीसगा देवा ? । नो इणट्ठे समट्ठे । एवं खलु गोयमा ! चमरस्स णं असुरिंदस्स असुरकुमाररण्णो तायत्तीसगाणं देवाणं सासए नामधेज्जे पण्णत्ते; जं न कदाइ नासी, न कदाइ न भवइ० जाव णिच्चे अव्वोच्छित्तिनयट्ठयाए अत्थे चयंति, अण्णे उववज्जंति । अत्थि णं भंते ! बलिस्स वइरोयणिंदस्स वइरोयणरण्णो तायत्तीसगा देवा ?। हंता अत्थि । से केणट्ठेणं भंते ! एवं वुच्चइ–बलिस्स वइरोयणिंदस्स० जाव तायत्तीसगा देवा ? । एवं खलु गोयमा ! तेणं कालेणं तेणं समएणं इहेव जंबुद्दीवे दीवे भारहे वासे विभेले णामं सन्निवेसे होत्था । वण्णओ । तत्थ णं विभेले सन्निवेसे जहा चमरस्स० जाव उववण्णा । तप्पभिइं च णं भंते ! ते विभेलगा तायत्तीसं सहाया गाहावई समणोवासगा बलिस्स वइरोयणिंदस्स सेसं तं चेव० जाव णिच्चे अव्वोच्छित्तिनयट्ठयाए अत्थे चयंति,अण्णे उववज्जंति । अत्थि णं भंते ! धरणस्स नागकुमारिंदस्स नागकुमाररण्णो तायत्तीसगा देवा ?। हंता अत्थि । से केणट्ठेणं०जाव तायत्तीसगा देवा ?। गोय-

मा ! धरणस्स नागकुमारिंदस्स नागकुमाररण्णो तायत्तीसगाणं देवाणं सासए नामधेज्जे पण्णत्ते। जं न कदाइ नासी० जाव अलो चयंति, अलो उववज्जंति। एवं जूयाणंदस्स वि, एवं० जाव महाघोसस्स वि । अत्थि णं भंते ! सक्कस्स देविंदस्स देवरण्णो पुच्छा ? । हंता अत्थि। से केणट्ठेणं भंते ! ०जाव तायत्तीसगा देवा ?। एवं खलु गोयमा ! तेणं कालेणं तेणं समएणं इहेव जंबुदीवे दीवे भारहे वासे बालाए णामं सन्निवेसे होत्था। वण्णओ। तत्थ णं बालाए सन्निवेसे तायत्तीसं सहाया गाहावई समणोवासगा, जहा चमरस्स० जाव विहरंति। तए णं ते तायत्तीसं सहाया गाहावई समणोवासगा पुव्विं पि पच्छा वि उग्गा उग्गविहारी संविग्गा संविग्गविहारी बहूइं वासाइं समणोवासगपरियागं पाउणंति, पाउणंतित्ता मासियाए संलेहणाए अत्ताणं झूसित्ता सट्ठिं भत्ताइं अणसणाए छेदेंति, छेदेंतित्ता आलोइयपडिक्कंता समाहिपत्ता कालमासे कालं किच्चा० जाव उववण्णा । जप्पभिइं च णं भंते ! ते बालाए तायत्तीसं सहाया गाहावई समणोवासगा, सेसं जहा चमरस्स ०जाव अलो उववज्जंति। अत्थि णं भंते ! ईसाणस्स देविंदस्स देवरण्णो एवं जहा सक्कस्स, णवरं चंपाए णयरीए० जाव उववण्णा । जप्पभिइं च णं भंते ! ते चंपिच्चा तायत्तीसं सहाया, सेसं तं चेव ०जाव अलो उववज्जंति। अत्थि णं भंते ! सणंकुमारस्स देविंदस्स देवरण्णो पुच्छा ? । हंता अत्थि । से केणट्ठेणं ? । जहा धरणस्स तहेव, एवं० जाव पाणयस्स, एवं अच्चुयस्स ०जाव अलो उववज्जंति।

(तेणमित्यादि) (तायत्तीसग त्ति) त्रयस्त्रिंशा मन्त्रिकल्पाः। (तायत्तीसं सहाया गाहावइ त्ति) त्रयस्त्रिंशत्परिमाणाः सहायाः परस्परेण साहाय्यकारिणो गृहपतयः कुटुम्बनायकाः (उग्ग त्ति) उग्रा उदात्ता भावतः (उग्गविहारि त्ति) उदात्ताऽऽचाराः सदनुष्ठानत्वात् (संविग्ग त्ति) संविग्ना मोक्षं प्रति प्रचलिताः, संसारभीरवो वा (संविग्गविहारि त्ति) संविग्नविहारः संविग्नानुष्ठानमस्ति येषां ते तथा। (पासत्थ त्ति) ज्ञानाऽऽदिबहिर्वर्तिनः (पासत्थविहारि त्ति) आकालं पार्श्वस्थसमाचाराः। (ओसन्नि त्ति) अवसन्ना इव श्रान्ता श्वावसन्ना आलस्यादनुष्ठानासम्यक्करणात् (ओसन्नविहारि त्ति) आजन्मशिथिलाचारा इत्यर्थः। (कुसील त्ति) ज्ञानाऽऽद्याचारविराधनात्। (कुसीलविहारि त्ति) आजन्माऽपि ज्ञानाऽऽद्याचारविराधनात्। (अहाछंद त्ति) यथाकथञ्चिदप्राऽऽगमपरतन्त्रतया छन्दोऽभिप्रायो बोधः प्रवचनार्थेषु येषां ते यथाच्छन्दाः। ते चैकदाऽपि भवन्तीत्यत आह्-(अहाछंदविहारि त्ति) आजन्माऽपि यथाच्छन्दा एवेति। (तप्पभिइं च णं ति) यत्प्रभृति त्रयस्त्रिंशत्संख्योपेतास्ते श्रावकास्तत्प्रभृत्युत्पन्नास्तत्प्रभृति च पूर्वमिति। भ० १० श० ४ उ०।

ताय–तात–पुं०। 'ताअ' शब्दार्थे, प्रा० १ पाद।

ताय–तातक–पुं०। स्वार्थे कन्। पितरि, उत्त० २ अ०।

तार–तार–पुं०। स्वार्थे णिच्-अच्। प्रेरणे णिच्। करणाऽऽदौ वा घञ्। वानरभेदे, शुद्धमुक्तायां प्रणवे, देवीप्रणवे, हीङ्कारणे, वाच०। ज्ञा०। गीयतां मूर्धानमाश्रित्य स्वर उच्चैस्तरो भवति-स्थानकं च द्वितीयं तृतीयं वा समधिरोहति-इत्येवंरूपे शिरोजातध्वनौ, रा०। नक्षत्रे, नेत्रमध्यस्थकनीनिकायां च। न०। स्त्री०। रूप्ये, न०। अत्युच्चनादे, अत्युच्चे, निर्मले च। त्रि०। महाविद्याभेदे, बालिभार्यायां च। स्त्री०। वाच०।

तारग–तारक–न०। तारयत्यगाधात् संसारपयोधेर्योगिनमित्यन्वर्थिकया संज्ञया तारकमुच्यते। विवेकजे ज्ञाने, ज्ञा० २६ ज्ञा०। कल्प०। रा०। स०। द्वितीये प्रतिवासुदेवे, पुं०। प्रव० २११ द्वार। ति०।

तारगग्गह–तारकग्रह–पुं०। तारकाऽऽकारा ग्रहास्तारकग्रहाः। नवग्रहे, तत्र च चन्द्राऽऽदित्यराहूणां तारकाऽऽकारत्वादन्ये षट् तथोक्ताः। "छ तारगग्गहा पण्णत्ता। तं जहा-सुक्के,बुधे,बहस्सई, अंगारए, सणिच्चरे, केऊ।" (सुक्के त्ति) शुक्रः, (बहस्सइ त्ति) बृहस्पतिः। अङ्गारको मङ्गलः, (सनिच्चरे त्ति) शनैश्चर इति। स्था० ६ ठा०।

तारगा–तारका–स्त्री०। पुण्यभद्रस्य यक्षेन्द्रस्य यक्षराजस्य तुर्यायामग्रमहिष्याम्, स्था० ४ ठा० १ उ० (अस्याः पूर्वोत्तरभवकथा 'अग्गमहिषी' शब्दे प्र०भा० १७१ पृष्ठे उक्ता) अष्टाशीतिग्रहाणां, सर्वतारकाणां च मण्डलानि कति सन्तीति प्रश्ने, उत्तरम्-यथा चन्द्रसूर्ययोर्मण्डलानां संख्याऽऽदिविचारः शास्त्रे उपलभ्यते, न तथा परग्रहाणां, तथा तारकाणां मण्डलान्यवस्थितान्येव भवन्ति, न तु चन्द्रसूर्यमण्डलवदनियतानीति। २२३ प्र०। सेन० ३ उल्ला०। ज्योतिषि नक्षत्रे, अणु० ३ वर्ग १ अ०। सूत्र०। अश्विन्यादिनक्षत्रेषु, सूत्र० २ श्रु० ६ अ०।

तारग्ग–ताराग्र–न०। तारापरिमाणे, चं० प्र० १ पाहु। सू० प्र०। पं० सं०। (तच्च 'णक्खत्त' शब्देऽस्मिन्नेव भागे १७१ पृष्ठे उक्तम्)

तारण–तारण–पुं०। तारयत्यनेन ल्युट्। मेलके, ६० वर्षमध्ये "शस्यं भवति सामान्यं, तारणे सुरवन्दिते" इत्युक्ते वत्सरभेदे च। तारयितरि, त्रि०। वाच०। तीर्थभेदे, तारणे विष्णुकोटिशिलायां श्रीअजितः। ती० ४३ कल्प।

तारत्तर–देशी–मुहूर्ते, दे० ना० ५ वर्ग १० गाथा।

तारय–तारक–त्रि०। तारणशब्दार्थे, ज्ञा० २६ ज्ञा०।

तारवई–तारवती–स्त्री०। संभारपुरराजबन्धुमारस्य अङ्गारवतीभार्यायां जातायां दुहितरि, आ० चू० ४ अ०।

तारा–तारा–स्त्री०। स्वनामख्यातायां सुग्रीवभार्यायाम्, तस्याश्च कृते संग्रामोऽभूत्। (प्रश्न०) तथाहि-किष्किन्धापुरे बालिसुग्रीवाभिधानावादित्यरथाभिधानस्य विद्याधरस्य सुतौ वानरविद्याबन्तौ विद्याधरौ बभूवतुः। तत्र-"अहिमाणेण य बाली, दाक्खिण्णरस्स तं नियं रज्जं। सिरिकयपव्वज्जो, सुग्गीवो कुणइ पुण रज्जं ॥ १ ॥" तस्य भार्या तारेत्यभिधाना च। ततः कश्चित्खेचराधिपः साहसगत्यभिधानस्ता-

रापरिभोगलालसः सुग्रीवरूपं विधायान्तःपुरं प्रविवेश । तया च चिह्नैः प्रत्यभिज्ञाय निवेदितो जम्बुवदादिमन्त्रिमण्डलस्य । तच्च सुग्रीवद्वयमुपलक्ष्य किमिदमाश्चर्यमिति विस्मयं जगाम । ततश्च-"निज्झामिया य दोन्नि वि, पुरओ ते मंतिवग्गवयणेण । जुज्झंति मच्छरेण य, वलिओ एस अहियसुग्गीवो ॥ १ ॥" ततश्चासौ सत्यसुग्रीवो हनुमदभिधानस्य महाविद्याधरराजस्य नत्वा निवेदयति स्म । स त्वागत्य तयोर्विशेषमजानन्नकृतोपकारः स्वपुरमगमत् । ततश्च लक्ष्मणविनाशितखरदूषणसम्बन्धिनि पातालल्लङ्कापुरे राज्यावस्थं राममेवमालोक्य शरणं प्रपन्नः । ततस्तेन सह गतः सलक्ष्मणो रामः किष्किन्धापुरे स्थितो बहिः कृतश्च सुग्रीवेण बाहुशब्दः, तमुपश्रुत्य समागतोऽसावलीकसुग्रीवो रथाधिरूढो रणरसिकः सन् । तयोर्विशेषमजानन् तद्बलं च रामश्च स्थित उदासीनः कदर्थितः सुग्रीवश्च ततेन । रामस्य गत्वा निवेदितं सुग्रीवेण-देव! तव पश्यतोऽप्यहं कदर्थितः । तेन रामेणोक्तम्-कृतचिह्नः पुनर्युद्ध्यस्व । ततोऽसौ पुनर्युद्ध्यमानो रामेण शरप्रहारेण पञ्चत्वमापादितः । सुग्रीवश्च तारया सह भोगान् बुभुजे । प्रश्न० ४ आश्र० द्वार । दृश० । ज्योतिष्कजेदे, स्था० ५ ठा० १ उ० । स० । ज्योतिर्विमानरूपे, कृत्तिकादिषु च नक्षत्रेषु, (तारापमाणं 'णक्खत्त' शब्दे चाऽस्मिन्नेव भागे १७७१ पृष्ठे, 'चंद' शब्दे तृतीय भागे १०६४ पृष्ठे उक्तम्)

"उ पंच तिन्नि एगं, चउ तिग रस वेय जुयल जुयलं च ।
इंदिय एगं एगं, विसयगि ग समुद्द वारसगं ॥ १ ॥
चउरो तिय तिय पंच य, सत्त दो दो भवे तिया तिन्नि ।
रिक्खे तारपमाणं, जइ तिहितुल्लं इयं कज्जं ॥ २ ॥" इति ।

इह चैकस्थानकानुरोधात्सूत्रत्रयस्य तारापमाणमुक्तं, शेषनक्षत्राणां तु प्रायोऽप्रेतनाध्ययनेषु तद्वक्ष्यति, यस्तु क्वचिदिसंवादस्तारापमाणस्य तथाविधप्रयोजनेषु तिथिविशेषस्य नक्षत्रविशेषयुक्तस्याशुभत्वसूचनार्थत्वेनोक्तगाथयोर्मध्यान्तरवृत्तत्वाच्च बाधक इति । स्था० ६ ठा० । "तारारूवे चलेज्जा ।" स्था० ३ ठा० १ उ० । अश्विन्यादिनक्षत्रेषु, (सूत्र०) नक्षत्रे, सूत्र० १ श्रु० ६ अ० ।

तिहिं ठाणेहिं तारारूवे चलेज्जा-विकुव्वमाणे वा, परियारेमाणे वा, ठाणाओ वा ठाणं संकममाणे तारारूवे चलेज्जा ॥

(तिहिं इत्यादि) (तारारूवे त्ति) तारकमात्रम्, (चलेज्जा) स्वस्थानं त्यजेत्, वैक्रियं कुर्वेद्वा (परिचारेमाणे वा) मैथुनार्थं संरम्भयुक्तमित्यर्थः स्थानकाद्धिकस्मात् स्थानान्तरं संक्रामद् गच्छदित्यर्थः । यथा धातकीखण्डाऽऽदि मेरुं परिहरदित्यर्थः । अथवा क्वचिन्महर्द्धिके देवाऽऽदौ चमरवद्वैक्रियाऽऽदि कुर्वति सति तन्मार्गदानार्थं चलेदिति । उक्तञ्च-" तत्थ णं जे से बाहाइए अंतरे से जहन्नेणं दोन्नि छावट्ठिजोयणसए, उक्कोसेणं बारसजोयणसहस्साइं ।" इति । तत्र व्याघातिकमन्तरं महर्द्धिकदेवस्य मार्गदानादिति । स्था० ३ ठा० १ उ० । परशुराममारितस्य कार्तवीर्यस्य भार्यायामष्टमचक्रवर्तिनः सुभूमस्य मातरि, आ० म० १ अ० २ खण्ड । स० । आव० । जम्बूद्वीपे मन्दरस्योत्तरे रक्तानदीसङ्गतायां महानद्याम्, स्था० १० ठा० । योगदृष्टिभेदे, द्वा० ।

तारायां तु मनाक् स्पृष्टं, दर्शनं नियमाः शुभाः ।
अनुद्वेगो हिताऽऽरम्भे, जिज्ञासा तत्त्वगोचरा ॥ १ ॥

(तारायामिति) तारायां पुनर्दृष्टौ मनागीषत् स्पृष्टं मिश्रापेक्षया दर्शनं शुभाः प्रशस्ता नियमा वक्ष्यमाणा इच्छाऽऽदिरूपाः । तथा-हिताऽऽरम्भे पारलौकिकप्रशस्तानुष्ठानप्रवृत्तिलक्षणेऽनुद्वेगः । तथा-तत्त्वगोचरा तत्त्वविषया, जिज्ञासा ज्ञातुमिच्छा । अद्वेषत एव तत्प्रतिपक्षानुगुण्यात् ॥ १ ॥

नियमाः शौचसन्तोषौ, स्वाध्यायतपसी अपि ।
देवताप्रणिधानं च, योगाऽऽचार्यैरुदाहृताः ॥ २ ॥

(नियमा इति) शौचं शुचित्वं,तद् द्विविधम्-बाह्यम्, आभ्यन्तरं च । बाह्यं मृज्जलाऽऽदिभिः कायप्रक्षालनम्, आभ्यन्तरं मैत्र्याऽऽदिभिश्चित्तमलप्रक्षालनम् । सन्तोषः सन्तुष्टिः, स्वाध्यायः प्रणवपूर्वाणां मन्त्राणां जपः, तपः कृच्छ्रचान्द्रायणाऽऽदि, देवताप्रणिधानमीश्वरप्रणिधानम्-सर्वक्रियाणां फलनिरपेक्षतयेश्वरसमर्पणलक्षणम् । एते योगाऽऽचार्यैः पतञ्जल्यादिभिर्नियमा उदाहृताः । यदुक्तम्-" शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः ।" (२-३२) इति ॥ २ ॥

शौचभावनया स्वाङ्ग-जुगुप्साऽन्यैरसङ्गमः ।
सत्त्वशुद्धिः सौमनस्यै-काग्र्याऽक्षजययोग्यताः ॥ ३ ॥

(शौचेति) शौचस्य भावनया स्वाङ्गस्य स्वकायस्य कारणरूपपर्यालोचनद्वारेण जुगुप्सा घृणा भवति,"अशुचिरयं कायो नात्राऽऽग्रहः कर्तव्यः ।" इति । तथा चान्यैः कायवाङ्मनसङ्गमस्तत्संपर्कपरिवर्जनमित्यर्थः । यः किल स्वयमेव कायं जुगुप्सते, तत्तदवद्यदर्शनात्, स कथं परकीयैस्तथाभूतैः कायैः संसर्गमनुभवति ?। तदुक्तम्-"शौचात् स्वाङ्गजुगुप्सा परैरसंसर्गः ।"(२-४०) इति । तथा सत्त्वस्य प्रकाशसुखाऽऽत्मकस्य, शुद्धौ रजस्तमोभ्यामनभिभवः। सौमनस्यं खेदानुभवेन मानसी प्रीतिरैकाग्र्यं नियते विषये चेतसः स्थैर्यम्, अक्षाणामिन्द्रियाणां जयो विषयपराङ्मुखानां स्वात्मन्यवस्थानं, योग्यता चात्मदर्शने विवेकख्यातिरूपे समर्थत्वम् । एतावन्ति फलानि शौचभावनयैव प्रवन्ति । तदुक्तम्-" सुसत्त्वशुद्धिसौमनस्यैकाग्र्येन्द्रियजयाऽऽत्मदर्शनयोग्यत्वानि चेति ।" (२-४१) ॥ ३ ॥

संतोषादुत्तमं सौख्यं, स्वाध्यायादिष्टदर्शनम् ।
तपोऽङ्गाक्षयोः सिद्धिः, समाधिः प्रणिधानतः ॥ ४ ॥

(संतोषादिति) संतोषात् स्वभ्यस्ताद् योगिन उत्तममतिशयितं सौख्यं भवति, यस्य बाह्येन्द्रियप्रभवं सुखं शतांशेनापि न समम् । तदाह-" संतोषादनुत्तमः सुखलाभः " (२-४२) स्वाध्यायात् स्वभ्यस्तादिष्टदर्शनं जप्यमानमन्त्राभिप्रेतदेवतादर्शनं भवति । तदाह-"स्वाध्यायादिष्टदेवतासंप्रयोगः"(२-४४) तपसः स्वभ्यस्तात् क्लेशाऽऽद्यशुद्धिक्षयद्वाराऽङ्गाक्षयोः कायेन्द्रिययोः सिद्धिः,यथेप्सितमणुत्वमहत्त्वाऽऽदिप्राप्तिसूक्ष्मव्यवहितविप्रकृष्टदर्शनसामर्थ्यलक्षणोत्कर्षः स्यात् । यथोक्तम्-" कायेन्द्रियसिद्धिरशुद्धिक्षयात् तपसः " (२-४३)। प्रणिधानात् ईश्वरप्रणिधानात् समाधिः स्यादु, ईश्वरभक्त्या प्रसन्नो हीश्वरोऽन्तरायरूपान् क्लेशान् परिहृत्य समाधिमुद्बोधयतीति । यथोक्तम्-"समाधिसिद्धिरीश्वरप्रणिधानादिति"(२-४५) तपःस्वाध्यायेश्वरप्रणिधानानां त्रयाणामपि च शोभनाध्यवसायलक्षणत्वेन क्लेशकार्यप्रतिबन्धद्वारा समाध्यनुकूलत्वमेव श्रूयते । यथोक्तम्-" तपः

स्वाध्यायेश्वरप्रणिधानानि क्रियायोगः" (२-१) "समाधिभावनार्थः क्लेशतनूकरणार्थश्चेति।" (२-२) ॥ ४ ॥

विज्ञाय नियमानेता-नेवं योगोपकारिणः ।
अत्रैतेषु रतो दृष्टौ, भवेदिच्छाऽऽदिकेषु हि ॥ ५ ॥

(विज्ञायेति) एतान् शौचाऽऽदीन्नियमान् एवं स्वाङ्गजुगुप्साऽऽदिसाधनत्वेन योगोपकारिणः समाधिनिमित्तान् विज्ञाय । अत्र तारायां दृष्टावेतेषु इच्छाऽऽदिकेषु हि नियमेषु रतो भवेत्, तथाज्ञानस्य तथारुचिहेतुत्वात् । तदत्र कांचित् प्रतिपत्तिः प्रदर्शिता ॥ ५ ॥

भवत्यस्यामविच्छिन्ना, प्रीतिर्योगकथासु च ।
यथाशक्त्युपचारश्च, बहुमानश्च योगिषु ॥ ६ ॥

(भवतीति) अस्यां दृष्टावविच्छिन्ना भावप्रतिबन्धसारतया विच्छेदरहिता, योगकथासु प्रीतिर्भवति, योगिषु भावयोगिषु, यथाशक्ति स्वशक्त्यौचित्येनोपचारश्च ग्रासाऽऽदिसंपादनेन, बहुमानश्चाभ्युत्थानगुणगानाऽऽदिना । अयं च गुरूपक्रमपातपुण्यविपाकाद् योगवृद्धिलाभान्तरशिष्टसंमतत्वकृडोपडवहान्यादिफल इति ध्येयम् ॥ ६ ॥

भयं न भवजं तीव्रं, हीयते नोचिता क्रिया ।
न चानाभोगतोऽपि स्या-दत्यन्तानुचितक्रिया ॥ ७ ॥

(भयमिति) भवजं संसारोत्पन्नं तीव्रं भयं न भवति, तथाऽशुभाऽप्रवृत्तेरुचिता क्रिया क्वचिदपि कार्ये न हीयते, सर्वत्रैव धर्माऽऽदरात् । न चानाभोगतोऽप्यज्ञानादप्यत्यन्तानुचितक्रिया साधुजननिन्दाऽऽदिका स्यात् ॥ ७ ॥

स्वकृत्ये विकले त्रासो, जिज्ञासा सस्पृहाऽधिके ।
दुःखोच्छेदार्थिनां चित्रे, कथंताधीः परिश्रमे ॥ ८ ॥

तत्र सूक्ष्मा औषधविधिवैद्यज्ञापनेन । बादरा स्वयं चिकित्साकरणेन, अन्यस्मात्कारणेन वा । तत्र कश्चिज्जराऽऽदिरोगाऽऽक्रान्तो गृही भिक्षाऽऽद्यर्थं गृहे साधुं प्रविष्टं दृष्ट्वा पृच्छति-भगवन् ! एतस्य मदीयस्याधेर्जातीये कमपि प्रतीकारमिति ? । स प्राऽऽह-भोः श्रावक ! यादृशस्तवाऽयं रोगस्तादृशो ममाऽप्येकदा संजात आसीत् । स चामुकेनौषधेन ममोपशमं गत इति । एवं चाज्ञस्य गृहस्थस्य रोगिणो भैषज्यकरणाभिप्रायोत्पादनादौषधसूचनं कृतम् । अथवा रोगिणा चिकित्सां पृष्टो वदति-" किमहं वैद्यो, येन रोगप्रतीकारं जाने ? " इति । एवं चोक्ते रोगिणोऽनभिज्ञस्य सतोऽस्मिन् विषये वैद्यं पृच्छेति सूचनं कृतमिति सूक्ष्मचिकित्सा । यदा तु स्वयं वैद्यीभूय साक्षादेव वमनविरेचनक्वाथाऽऽदिकं करोति, कारयति वा अन्यस्मात्तदा बादरा चिकित्सेति । एवमुपकृतो हि प्रमुदितो गृही मम भिक्षां प्रकृष्टां दास्यतीति यतिरिमां द्विविधामपि कुरुते, न चैवं तुच्छपिण्डकृते यतिनां कर्तुमुचितम्, अनेकदोषसंभवात् । तथाहि-चिकित्साकरणकाले कन्दफलमूलाऽऽदिजीववधेन क्वाथकथनाऽऽदिपापव्यापारकरणादसंयमो भवेत् । तथा-नीरुक्कृतो गृहस्थः तत्तद्योगोल्वकसमानः प्रगुणीकृतदुर्बलान्धव्याघ्रवदनेकजीववधं कुर्यात् । तथा यदि दैवदुर्योगात्साधुना चिकित्स्यमानस्याऽपि रोगिणो व्याधेराधिक्यं जायते, तदा कुपितस्तत्पुत्राऽऽदिराकृष्य राजकुलाऽऽदौ प्राहयेत् । तथाऽऽहाराऽऽदिबुध्या पते इत्थमित्थं च वैद्यकाऽऽदि कुर्वन्ति, इति प्रवचनमालिन्यं स्यादिति ॥ ६ ॥ प्रव० ६७ द्वार । पिं० । पञ्चा० । विशे० । द्रव्यौषधाऽऽद्युपयोगतः पीडोपशमे, आचा० १ श्रु० ए अ० ४ उ० । ग० । चिकित्सया पिण्डोत्पादनम् । उत्पादनादोषभेदे, स्था० ३ ठा० ४ उ० । पञ्चा० ।

चउव्विहा तिगिच्छा पण्णत्ता । तं जहा-विज्जा, ओसहाइं, आउरे, परियारए ४ ।

"चउव्विहा" इत्यादि कण्ठ्यम् । नवरं चिकित्सा रोगप्रतीकारस्तस्याश्चातुर्विध्यं कारणभेदादिति ।

एतत्सूत्रसम्वादकमुक्तमपरैरपि-

"त्रिषष्ट्यङ्गोपयुपस्थाता, रोगी पादचतुष्टयम् ।
चिकित्सितस्य निर्दिष्टं, प्रत्येकं तच्चतुर्गुणम् ॥ १ ॥
दक्षो विज्ञातशास्त्रार्थो, दृष्टकर्मा शुचिर्निषक् ।
बहुकल्पं बहुगुणं, सम्पन्नं योग्यमौषधम् ॥ २ ॥
अनुरक्तः शुचिर्दक्षो, बुद्धिमान् परिचारकः ।
आढ्यो रोगी भिषग्वश्यो, ज्ञापकः सत्त्ववानपि " ॥३॥ इति ।
इयं द्रव्यरोगचिकित्सा ।

भावरोगचिकित्सा त्वेवम्-

" निव्विगइ निम्बलोमे, तवछट्ठाणमेव उब्भामे ।
वेयावच्चाईमण-संकलिकप्पट्ठियाऽऽइरणं ॥ १ ॥ " इति ।
निर्बलं बल्लाऽऽदि, अवमम्नूनम्, उद्भ्रामो भिक्षाभ्रमणम्, आहिण्डनं देशेषु, मण्डली सूत्रार्थयोः (कप्पट्ठिया) श्रेष्ठिवधूरिति । स्था० ४ ठा० ४ उ० ।

जे भिक्खू तिगिच्छापिंडं भुंजइ, भुंजंतं वा साइज्जइ ॥६४॥

रोगावणयणं तिगिच्छा, तं जोगं करेति गिहिस्स । तस्स आणादिणो दोसा, चउलहुं च पच्छित्तं ।

जे भिक्खु तिगिच्छापिंडं, भुंजेज्ज सयं तु अहव साइज्जे ।
सो आणा अणवत्थं, मिच्छत्तविराहणं पावे ॥१७०॥
नि० चू० १३ उ० ।

चिकित्साद्वारमाह--

भणइ य नाहं विज्जो, अहवा वि कहेइ अप्पणो किरियं ।
अहवा वि वेज्जयाए, तिविह तिगिच्छा मुणेयव्वा ॥

इह चिकित्सा रोगप्रतीकारो, रोगप्रतीकारोपदेशो वा विवक्षिता । ततः साधूनधिकृत्य त्रिविधा त्रिप्रकारा चिकित्सा ज्ञातव्या । तद्यथा-केनापि रोगिणा रोगप्रतीकारे साधुः पृष्टः सन्नाह-किमहं वैद्यः ?, एतावता च किमुक्तं भवति ?-वैद्यस्य समीपे गत्वा चिकित्सा प्रष्टव्या, इत्यनुबोधनादेका चिकित्सा । अथवा रोगिणा पृष्टः सन्नेवमाह-ममाप्येवंविधो व्याधिरासीत्, स चामुकेन जैषजेनोपशान्तिमगमत्, एषा द्वितीया चिकित्सा । अथवा-वैद्यतया वैद्यीभूय साक्षात् चिकित्सां करोति, एषा तृतीया । इहाऽऽद्ये द्वे चिकित्से सूक्ष्मे, तृतीया तु बादरा ।

तत्राऽऽद्यां व्याचिख्यासुराह-

निक्खाइगओ रोगी, किं विज्जोऽहं ति पुच्छिओ भणइ ।
अत्थावत्तीएँ कया, अबुहाणं बोहणा एवं ॥

भिक्षाऽऽदौ भिक्षाऽऽदिनिमित्तं गतः सन् (रोगी इति) अत्र तृतीयार्थे प्रथमा, रोगिणा पृष्टः सन्नाह--किमहं वैद्यो येन कथयामि ?! एवं चोक्ते सति अर्थापत्त्या सामर्थ्यात्, अबुधानां-' वैद्यस्य पार्श्वे गत्वा चिकित्सा कार्यते ' इत्यजानतां, बोधना अनन्तरोक्तस्यार्थस्य ज्ञापनी कृता भवति ।

द्वितीयां व्याख्यानयति-

एरिसयं चिय दुक्खं, नेसज्जेण अमुगेण पउणं मे ।
सहसुप्पन्नं व रुयं, वारेमो अट्ठमाईहिं ॥

एतादृशमेव दुःखं दुःखकारणभूतं गण्डाऽऽदि, अमुकेन भेषजेन प्रगुणं नष्टवेदनमभूत् । तथा वयं सहसोत्पन्नामकस्मादुत्पन्नां रुजमष्टमाऽऽदिभिर्वारयामः । "तत्थोप्पन्ने रोगंकाइए" इत्यादिपरममुनिवचनप्रामाण्यात् । तस्मात् भवताऽपि तथा कर्तव्यमिति भावः ।

तृतीयां चिकित्सां प्रपञ्चयितुमाह-

संसोधण संसमणं, नियाणपरिवज्जणं च जं तत्थ ।
आगंतु-धाउखोभे, य आमए कुणइ किरियं तु ॥

आगन्तुके धातुक्षोभे च सूचनात्सूत्रमिति कृत्वा धातुक्षोभजे च आमये रोगे समुत्पन्ने सति तत्र यत्क्रियां करोति । तद्यथा-संशोधनं हरीतक्यादिदानेन, पित्ताऽऽद्युपशमनं संशमनं, तथा निदानपरिवर्जनं रोगकरेण परिवर्जनं च । एषा तृतीया चिकित्सा ।

अत्र दोषानाह-

असंजमजोगाणं, पसाधणं कायघाओ अयगोलो ।
भुव्वल्लवग्घाऽऽइरणं, अब्भुद्दए गेण्हणुड्डाहो ॥

असंयमयोगानां सावद्यव्यापाराणां प्रसाधनं सातत्येन प्रवर्तनमिदं चिकित्साकरणं, ततो गृहस्थस्तत्तद्योगोल्वकसमानः, ततस्तेन नीरोगीभूतेन ये कायघाता यावज्जीवं प्रवर्त्यन्ते, ते सर्वेऽपि साधुचिकित्साप्रवर्तिता इति । चिकित्साकरणं सातत्येनासंयमयोगानां निबन्धनम् । तथा चात्र दुर्बलव्याघ्रदृष्टा-

न्तः। यथा-अटव्यामन्धो भक्ष्यमप्राप्नुवन् दुर्बलो व्याधः केनाप्यान्ध्यापनयनाय चिकित्स्यते,चिकित्सितः सन् प्रगुणीभूतः प्रथमतस्तस्यैव वैद्यस्य विघातं करोति। ततः शेषाणां बहूनां जीवानाम्। एवमेषोऽपि गृहस्थः साधुना चिकित्स्यमानः साधोः संयमप्राणान् हन्ति, शेषांश्च पृथिवीकायाऽऽदीनिति। यदि पुनः कथमपि चिकित्स्यमानस्यापि तस्यातिशयेन रोगस्योदयः प्रादुर्भावो भवति, ततोऽहमनेनातिशयेन रोगीकृत इति संजातकोपो राजकुमाऽऽदौ ग्राहयति; तथा च सति उड्डाहः प्रवचनस्य माविर्भविष्यतीति। पिं०।

इमं वितियपदं-

असिवे ओमोयरिए, रायदुट्ठे जए व गेलण्णे।
अद्धाणरोहए वा, जयणाए कारए भिक्खू ॥१७६॥
नि० चू० १३ उ०।

जे भिक्खू आरोगियपडिकम्मं करेइ, करंतं वा साइज्जइ।४०।

आरोग्गो णिरुवहयसरीरो, मा मे रोगो भविस्सति त्ति अणागयं चेव रोगपरिकम्मं करेति, तस्स चउलहुं आणाऽऽदिया य दोसा ॥४०॥

जे भिक्खू आरोग्गे, कुज्जा हि अणागयं तु तेगिच्छं।
सो आणा अणवत्थं, मिच्छत्तविराहणं पावे ॥ ७६ ॥
गतार्था।

इमेहिं कारणेहिं अववादेण कुज्जा-

विहरणवायणआवा-सगाण मा मे वयाण वा पीला।
होज्जाहि अकीरंते, कप्पति हु अणागतं काउं ॥ ७७ ॥

विहरणं जाव मासकप्पो ण पूरति ताव करेमि, मा मासकप्पे पुण्णे विहरणस्स वाघातो भविस्सति, रोगे वा उप्पन्ने मा वायणाए वाघाओ भविस्सइ, विविधाण वा आवासगजोगाणं रोगमुप्पण्णे कम्मं असहमाणेहिं हरितादिच्छेदणं अण्णं वा किं वि गिलाणट्ठा वताइयारं करेज्जा,तो अणागयं रोगपकम्मं कज्जति।

जतो भण्णति-

असुओ असुगं कालं, कप्पति वाही ममं ति णं णातुं।
तप्पसमणी उ किरिया, कप्पति इहरा बहू हाणी ॥७८॥

ममं जप्पसरीरस्स असुगो वाही असुगे काले अवस्समुप्पज्जति, तस्स रोगस्स अणागयं चेव किरिया कज्जति, (इहर त्ति) उप्पण्णरोगे किरियाए कज्जमाणीए बहू दोसा, दोसबहुत्ताओ य संजमहाणी भवति।

अणागयं कज्जमाणे इमे गुणा--

अप्पपरअणायासो, न य कायवहो न यावि परिहाणी।
न य चमढणा गिहीणं, एहच्चेज्ज-रिएण दिट्ठंतो ॥७९॥

अणागते रोगपरिकम्मे कज्जमाणे अप्पणो परस्स य अणायासे भवति। कमेण फासुएण कज्जमाणे कायवधो ण भवति। ण य सुत्तत्थे आवस्सगाण परिहाणी भवति। अणागतं जहालाभेण सणियं कज्जमाणे गिहीणं चमढणा ण भवति। किं च-उविक्खितो वाही दुच्छेज्जो भवति। जहा रुक्खो अंकुरावत्थाए एहच्चेज्जो भवति, विवड्ढितो पुण जायमूलो महाखंधो कुहाडेण वि दुच्छेज्जो। रिणं पि अप्पमत्तओ सुच्चेज्जं,वड्ढियं दुगुणचउग्गुणं दुच्छेज्जं। एवं वाही वि अणागतं सुच्छेज्जो पच्छा दुच्छेज्जो। जो सुत्तत्थेसु गहियत्थो, गहणसमत्थो य जो गच्छोवग्गहकारी, कुलगणसंघकज्जेसु य पमाणं, तस्स एसा विधी।

जो पुण अण्णो पुरिसो तस्स इमा विधी—

जो पुण अपुव्वगहणे, उवग्गहे वा अपच्चलो एसि।
अमहू उत्तरकरणे, तस्स नहिच्छाए णं णियोगो ॥८०॥

अभिणवाणं सुत्तत्थाणं गहणे असमत्थो,साधुवग्गस्स वा वत्थपायभत्तपाणओसढभेसज्जादि, एतेहिं उवग्गहं काउं असमत्थो। उत्तरकरणं-तवो, पायच्छित्तं वा, तत्थ वि असहू। एरिसस्स पुरिसस्स इच्छाए णिओगो अवस्समणागयं कायव्वं ति। नि० चू १३ उ०।

नच्चा उप्पइयं दुक्खं, वेयणाए दुहट्टिए।
अदीणो थावए पन्नं, पुट्ठो तत्थऽहियासए ॥ ३२ ॥
तेगिच्छं नाभिनंदेज्जा, संचिक्खऽत्तगवेसए।
एयं खु तस्स सामण्णं, जं न कुज्जा न कारवे ॥ ३३ ॥

चिकित्सां रोगप्रतीकाररूपां नाभिनन्देन्नानुमन्येत, अनुमतिनिषेधाच्च दूरापास्ते करणकारणे, समीक्ष्य-स्वकर्मफलमेव तद्भुज्यत इति पर्यालोच्य। यद्वा-(संचिक्ख त्ति) " अचां संधिद्वोपौ बहुलम्" इत्येकारलोपे "संचिक्खे" समाधिना तिष्ठेत्, न कूजनकर्करायिताऽऽदि कुर्यात्, आत्मानं चरित्राऽऽत्मानं, गवेषयति मार्गयति-कथमयं मम स्यादित्यात्मगवेषकः। किमित्येवमत आह-एतदनन्तरमभिधास्यमानं, (खु त्ति) खलु, स च यस्मादर्थः, ततो यस्मादेतत्तस्य श्रमणस्य, श्रामण्यं श्रमणभावो,यन्न कुर्यान्न कारयेत्। उपलक्षणत्वान्नानुमन्येत, प्रक्रमाच्चिकित्साम्; जिनकल्पिकाऽऽद्यपेक्षं चैतत्। स्थविरकल्पिकापेक्षया तु ' जन्न कुज्जा ' इत्यादौ सावद्यमिति गम्यते। अयमत्र भावः-यस्मात्करणाऽऽदिभिः सावद्यपरिहार एव श्रामण्यं,सावद्याच्च प्रायशश्चिकित्सा, ततस्तान् न अभिनन्देत्,एतदप्यौत्सर्गिकम्, अपवादतस्तु सावद्याऽऽद्येषामियमनुमतैव। यदुक्तम्-"कादं अजिंति अदुवा अहीहं,तवोविहाणेण व उज्जमिस्सं। गणं व णीती य विसारइस्सं, सालंबसेवी समुवेति मोक्खं ॥ १ ॥" इति सूत्रार्थः। उत्त० पाइ० २ अ०। (' गिहितिगिच्छा ' शब्दे तृ० भागे ८६७ पृष्ठे गृहिचिकित्सानिषेधो द्रष्टव्यः) चिकित्सा श्रीजगवत ऋषभस्योपदेशात्प्रवृत्ता। आ० म० १ अ० १ खण्ड।

तिगिच्छापिंड–चिकित्सापिण्ड–पुं०। चिकित्सां वमनविरेचनवस्तिकर्माऽऽदि कारयतो वैद्यभैषज्याऽऽदि सूचयतो वा पिण्डार्थं चिकित्सापिण्डः। चिकित्सया पिण्डोत्पादनम्। उत्पादनादोषभेदे, ध० ३ अधि०। आचा०।

तिगिच्छासंहिया–चिकित्सासंहिता–स्त्री०। चिकित्साशास्त्रे श्लोकस्थाननिदानशारीरचिकित्सितकल्पसंग्रहकाया मूलसंहितायाम्, सूत्र० २ श्रु० २ अ०।

तिगिच्छासत्थ–चिकित्साशास्त्र–न०। आयुर्वेदे, स्था० ७ ठा०।

तिगिच्छि–पुष्परजस्–न०। " गोणाऽऽदयः " ॥ ८ । २ । १७४ ॥ इति पुष्परजःशब्दस्य ' तिगिच्छि ' इति निपातः। प्रा० २ पाद। देशीशब्दो वा। पुष्परजसि, जं० ४ वक्ष०। स्त्री०।

तिगिच्छिकूड–तिगिच्छिकूट–पुं० । चमरस्य उत्पातपर्वते, भ०२ श० ४ उ० । स्था० । (तत्कथनता 'चमर' शब्दे तृतीयभागे १११३ पृष्ठे उक्ता) "दो तिगिच्छिकूडा।" स्था० २ ठा० ३ उ० ।

तिगिच्छिदह–तिगिच्छिह्रद–पुं० । तिगिच्छिः पौष्परजः, तत्प्रधानो ह्रदस्तिगिच्छिह्रदः । निषधवर्षधरपर्वतमध्ये ह्रदे, जम्बूमन्दरस्य दक्षिणे तृतीयह्रदे, जं० ।

तस्स णं बहुसमरमणिज्जस्स भूमिभागस्स बहुमज्झदेसभाए एत्थ णं महं एगे तिगिच्छिदहे णामं दहे पण्णत्ते। पाईणपडीणायए, उदीणदाहिणवित्थिण्णे, चत्तारि जोअणसहस्साइं आयामेणं, दो जोअणसहस्साइं विक्खंभेणं, दस जोअणाइं उव्वेहेणं, अच्छे सण्हे रययमयकूले। तस्स णं तिगिच्छिदहस्स चउद्दिसिं चत्तारि तिसोवाणपडिरूवगा पण्णत्ता। एवं०जाव आयामविक्खंभविहूणा जा चेव महापउमद्दहस्स वत्तव्वया,सा चेव तिगिच्छिद्दहस्स वि वत्तव्वा । तं चेव पउमद्दहप्पमाणं अट्ठो०जाव तिगिच्छिवण्णाइं धिइअइच्छदेवी पलिओवमट्ठिई अ परिवसइ। से एयट्ठेणं गोयमा ! तिगिच्छिदहे । तस्स णं तिगिच्छिदहस्स दक्खिणिल्लेणं तोरणेणं हरिमहाणईं पवूढा समाणी सत्त जोअणसहस्साइं चत्तारि अ एकवीसे जोअणसए एगं च एगूणवीसइं भागं जोअणस्स दाहिणाभिमुही पव्वएणं गंता महया घमघुहपवित्तिएणं० जाव साइरेगं चउजोअणसइएणं पवाएणं पवडइ। एवं जा चेव हरिकंताए वत्तव्वया, सा चेव हरिए वि णेयव्वा । जिब्भियाए कुंमस्स दीवस्स नवणस्स तं चेव पमाणं, अट्ठो वि भाणिअव्वो,० जाव अहे जगई दालइत्ता छप्पएणाए सलिलासहस्सेहिं समग्गा पुरिच्छिमं लवणसमुद्दं समप्पेइ, तं चेव पवहे अ मुहमूले अ पमाणं उव्वेहो अ जो हरिकंताए० जाव वणसंमसंपरिक्खित्ता ॥

(तस्स णमित्यादि) तस्य बहुसमरमणीयस्य भूमिभागस्य बहुमध्यदेशभागे अत्रान्तरे महानेकः तिगिच्छिः पौष्परजः, तत्प्रधानो ह्रदस्तिगिच्छिह्रदो नाम ह्रदः प्रज्ञप्तः । प्राकृते पुष्परजःशब्दस्य 'तिगिच्छि' इति निपातः । देशीशब्दो वा । अन्यत्सर्वं प्रागनुसारेणेति । अथास्यातिप्रदेशसूत्रेण सोपानाऽऽदिवर्णनायाऽऽह-(तस्स णमित्यादि) तस्य तिगिच्छिह्रदस्य चतुर्दिक्षु चत्वारि त्रिसोपानप्रतिरूपकाणि प्रज्ञप्तानि । एवमित्थं प्रकरणे ह्रदवर्णके क्रियमाणे यावच्छब्दोऽत्र कात्स्न्यंवाच्यव्ययम्, तेन यावत्परिपूर्णमेव महापद्मह्रदस्य वक्तव्यता आयामविष्कम्भविहीना, सैव तिगिच्छिह्रदस्य वक्तव्या । यतदेव व्यक्तया आचष्टे-(तं चेव इत्यादि) तदेव महापद्मह्रदगतमेव पद्मानां धृतिदेवीकमलानां प्रमाणम्-एककोटीविंशतिसप्तपञ्चाशत्सहस्रैकशतविंशतिरूपम्,अन्यथाऽत्र पद्मानामायामविष्कम्भरूपप्रमाणस्य महापद्मह्रदगतपद्मेभ्यो द्विगुणत्वेन विरोधापातात्, ह्रदस्य च प्रमाणमुद्वेधरूपं बोध्यम्, आयामविष्कम्भयोः पृथगुक्तत्वादिति । अथैस्तिगिच्छिह्रदस्य वाच्यः। स चैवम्-"से केणट्ठेणं भंते ! एवं वुच्चइ-तिगिच्छिदहे तिगिच्छिदहे ?।" इत्यादिप्राकृतसूत्रानुसारेण वाच्यं, यावत्तिगिच्छिह्रदवर्णकानि तत्पद्माऽऽदीनि धृतिश्चाराधिपत्यं परिपालयति । "से तेणट्ठेणं" इत्यादि प्राग्वत् । जं० ४ वक्ष० ।

तिगिच्छिय–चिकित्सक–पुं० । 'कित' रोगापनयने, स्वार्थे सन्, एवुल् । रोगापनयनकर्तरि वैद्ये, वाच० । स्था० ए ठा० ।

तिगिच्छी–देशी–कमलरजसि, दे० ना० ५ वर्ग १२ गाथा ।

तिगुण–त्रिगुण–न० । त्रयाणां गुणानां समाहारः । सांख्योक्ते प्रधाने, त्रिर्निर्गुण्यते 'गुण' संख्याने, घञ् । त्रिभिर्गुणिते, त्रि० । वाच० । अनु० । जं० ।

तिगुणुक्कम–त्रिगुणोत्क्रम–त्रि० । त्रिगुणं त्रीन् वारान् यावदुत्प्राबल्येन क्रमणं गमनं येषां ते त्रिगुणोत्क्रमाः । त्रीन् वारान् क्रमिणः ते, पिं० ।

तिगुत्त–त्रिगुप्त–त्रि० । तिसृभिरङ्गालकोच्छूनकशतकनीसंस्थानीयाऽऽदिभिर्मनोगुप्त्यादिगुप्तिभिर्गुप्तम् । मयूरव्यंसकाऽऽदित्वात् समासः। उत्त० ६ अ० । मनोवाक्कायकर्मभिर्गुप्ते, ध० २ अधि० । दश० । पं० सू० । आव० । स० । गुप्ताऽऽत्मनि, स्था० ६ ठा० । त्रिस्रो गुप्तयो यत्र तत् त्रिगुप्तम्-मनसा सम्यक् प्रणिहितो,वाचाऽस्खलितान्यक्षराण्युच्चरन्, कायेनाऽऽवर्त्तानविराधयन् वन्दनकं करोति । प्रव० २ द्वार । दश० । मनोवाक्कायगुप्ते, अर्थात् अकुशलमनोवाक्कायप्रवृत्तिनिरोधिनि,एकग्रहणे तज्जातीयग्रहणमिति न्यायात् कुशलमनोवाक्कायोदीरके, आ० म० १ अ० २ खण्ड ।

तिगोण–त्रिकोण–त्रि० । त्रयः कोणा यस्य । त्रिकोटियुक्ते पदार्थे, वाच० । आ० म० ।

तिग्ग–तिग्म–न० । 'तिज्'-मक् । तस्य गः । तीक्ष्णे, तद्वति, त्रि० । वाच० । पं० सं० ।

तिग्घ–त्रिघ्न–न० । त्रिगुणिते, ध० २ अधि० ।

तिघरंतरिय–त्रिगृहान्तरिक–पुं० । त्रीणि गृहाणि अन्तरं भिक्षाग्रहणे येषां ते त्रिगृहान्तरिकाः । एकत्र गृहे भिक्षां गृहीत्वाऽन्यत्रिग्रहविशेषाद् गृहत्रयमतिक्रम्य पुनर्भिक्षां गृह्णन्ति, न निरन्तरं, विगतश्चान्तरं वा । तेषु, औ० ।

तिचक्खु–त्रिचक्षुष्–पुं० । उत्पन्नज्ञानदर्शनधरे श्रमणे माहने, स्था० ३ ठा० ४ उ० ।

तिच्चभिय–त्रिच्चटित–त्रि० । त्रीन् वारान् छटिते,रा० । जी० ।

तिट्ठाणकरणसुद्ध–त्रिस्थानकरणशुद्ध–त्रि० । त्रीणि स्थानानि उरःप्रभृतीनि, तेषु करणेषु क्रियायां शुद्धं त्रिस्थानकरणशुद्धम् । तस्मिन्, तथथा-"उरःशुद्धं, कण्ठशुद्धं, शिरोविशुद्धं च। तत्र यदि उरसि स्वरः स्वभूमिकानुसारेण विशालो भवति, तत उरोविशुद्धम । स एव यदि कण्ठे वर्तितो भवति अस्फुटितश्च, ततः कण्ठविशुद्धम । यदि पुनः शिरः प्राप्तः सन् सानुनासिको भवति, ततः शिरोविशुद्धम्। यदि वा यत् उरःकण्ठशिरोभिः श्लेष्मणाऽव्याकुलितैर्विशुद्धिर्गीयते, तत् उरःकण्ठशिरोविशुद्धत्वात् त्रिस्थानकरणविशुद्धम् । रा० । जं० । जी० ।

तिणइय–त्रिनयिक–न० । त्रिनयोपेते सूत्रे, यानि त्रैराशिकमतमवलम्ब्य रूप्यास्तिकाऽऽदिनयत्रिकेण चिन्त्यन्ते । नं० ।

तिणय–त्रिनत–त्रि० । मध्यपार्श्वोरुलक्षणस्थानत्रयेऽवनते, भ० ३ श० ६ उ० । जी० ।

तिणसूय-तृणशूक-पुं० । न० । तृणाग्रे, भ० १५ श० ।

तिणहत्थय-तृणहस्तक-न० । तृणपूलके, भ० ३ श० ३ उ० ।

तिणाम-त्रिनाम-न० । त्रिभेदे नाम्नि, तच्च-"से किं तं तिणामे ? तिणामे तिविहे पण्णत्ते । तं जहा-दव्वणामे, गुणणामे, पज्जवणामे अ ।" अनु० । "तं पुण णामं तिविहं, इत्थी पुरिसे णपुंसगे चेव ।" अनु० । (एषां त्रयाणां प्ररूपणा 'लिंगतिय' शब्दे उक्ता)

तिणिस-तिनिश-पुं० । वृक्षविशेषे, दश० ६ अ० । जी० । नि० चू० । औ० । स्था० । ज्ञा० । मधुपटले, दे० ना० ५ वर्ग ११ गाथा ।

तिणु-तृण-न० । "स्वराणां स्वराः प्रायोऽपभ्रंशे" ॥ ८।४।३२९ ॥ इति ऋकारस्थाने इकारोऽकारश्च भवति । तणु । तिणु । प्रा० १ पाद । नमाऽऽदौ,खटे च । वाच० ।

तिण्ण-तीर्ण-त्रि० । अतिक्रान्ते, सूत्र० १ श्रु० १२ अ० । पारं गते, सूत्र० १ श्रु० १० अ० । तीर्थकृत्सु, "तिण्णाणं तारयाणं ।" रा० । तीर्ण इव तीर्णः, संसारसागरमिति गम्यते । औ० । तीर्णवत्तीर्णः विशुद्धसम्यग्दर्शनाऽऽदिलाभाद्भवार्णवमिति गम्यते । दश० १० अ० । विशे० । उत्त० । कल्प० । ज्ञा० । ज्ञानदर्शनचारित्रपोतेन भवार्णवं तीर्णवन्तस्तीर्णाः । ल० । सर्वभावज्ञास्तीर्णाः परमदुस्तरम् (आ० म० १ अ० १ खण्ड । ल० । जी०) संसारसागरं, भाविनि भूतवदुपचारात्तीर्णाः । आचा० १ श्रु० ७ अ० ६ उ० । सम्यग्ज्ञानदर्शनचारित्रपोतेन भवार्णवं तीर्णवन्तस्तीर्णाः,न चैषां तीर्णानां पारगतानामावर्तः संभवति, तद्भावे मुक्त्यसिद्धेः, एवं च न मुक्तः पुनर्भवे भवतीति तीर्णत्वसिद्धिः । ध० २ अधि० । एते चाऽऽवर्त्तकाद्यकारणत्वादिभिरनन्तशिष्यैर्भावतोऽतीर्णाऽऽदय एवेष्यन्ते,'काल एव कृत्स्नं जगदावर्त्तयतीति'वचनात् । एतन्निरासायाऽऽह-"तीर्णेभ्यः तारकेभ्यः ।" ज्ञानदर्शनचारित्रपोतेन भवार्णवं तीर्णवन्तस्तीर्णाः, नैतेषां जीविताऽऽवर्त्तवद्भवावर्त्तः, निबन्धनाभावात्,न ह्यस्याऽऽयुष्कान्तरवद्भवाधिकारान्तरं,तद्भावेऽत्यन्तमरणवद् मुक्त्यसिद्धेः,तरिसद्धौ च तद्भावेन भवनाभावः, हेत्वभावात्, न हि मृतस्तद्भावेन भवति, मरणाभावविरोधात्, एतेन ऋत्वाद्यवर्त्तनिदर्शनं प्रत्युक्तं, न्यायानुपपत्तेः, तदावृत्तौ तदवस्थाभावेन परिणामान्तरायोगात्, अन्यथा तस्याऽऽवृत्तिरित्ययुक्तम्, तस्य तदवस्थानिबन्धनत्वात् । अन्यथा तद्हेतुकत्वोपपत्तेः, एवं न मुक्तः पुनर्भवे भवति, मुक्तत्वविरोधात्, सर्वथा भवाधिकारनिवृत्तिरेव मुक्तिरिति, तद्भावेन भावतस्तीर्णाऽऽदिसिद्धिः । (१८) ल० ।

तिण्णसंसार-तीर्णसंसार-त्रि० । लङ्घितभवोदधौ, पा० ।

तिण्हा-तृष्णा-स्त्री० । "सूक्ष्म-क्ष्ण-ष्ण-स्न-ह्न-ह्म-ह्ण्यां ण्हः" ॥ ८। २ । ७५ ॥ इति णकाराऽऽक्रान्तो हकारः । प्रा० १ पाद । पिपासायाम्, स० ५२ सम० ।

तितिक्ख-तितिक्षु-त्रि० । तितिक्षते सहते इति तितिक्षुः । परीषहाऽऽदिनि, स्था० ५ ठा० २ उ० ।

तितिक्खण-तितिक्षण-न० । अधिसहने, स्था० ६ ठा० ।

तितिक्खमाण-तितिक्षमाण-त्रि० । अधिसहति, सूत्र० १ श्रु० ७ अ० ।

तितिक्खा-तितिक्षा-स्त्री० । सहने,सूत्र० १ श्रु० ४ अ० १ उ० । क्षमायाम्, उत्त० १ अ० । ज्ञा० । आचा० । क्षुदादिपरीषहोपनिपातसहिष्णुतायाम्, ज्ञा० २७ ज्ञा० । परीषहोपसर्गसहनरूपायां क्षान्तौ, सूत्र० १ श्रु० ८ अ० । परीषहोपसर्गाऽऽदिदुःखविशेषसहने, आचा० १ श्रु० ८ अ० ८ उ० । परीषहभेदे, परीषहाऽऽदिजये तितिक्षा कार्या । आव० ४ अ० । क्षमा, तितिक्षा, क्रोधनिरोध इत्येकार्थाः । आ० चू० ४ अ० । उपा० । परीषहाऽऽदिजये, स० ३४ सम० ।

तितिक्षाद्वारमाह--

"इंदपुरिमिंददत्ते, बावीससुआ सुरिंददत्ते अ ।
महुराए जिअसत्तू, सयंवरो निच्छुईए अ ॥ १ ॥
अग्गिअए पव्वयए, वहली तह सागरे अ बोधव्वे ।
एगदिवसेण जाया, तत्थेव सुरिंददत्ते अ" ॥ २ ॥
(कथा मनुष्यजन्मदृष्टान्तेषु उक्ता)

सुरेन्द्रदत्तकुमारस्य ऊर्ध्वतितिक्षाभावे उपनयः-

"साधुकल्पः कुमारोऽत्र, कषायाश्चाग्निकाऽऽदयः ।
द्वाविंशतिकुमारास्तु, सुदुर्दान्ताः परीषहाः ॥ १ ॥
रागद्वेषौ पदाती तौ, वेश्या राधाऽऽत्तितारका ।
विशिष्टाऽऽराधना क्रेया, सिद्धिर्निर्वृतिदारिका" ॥ २ ॥ आ० क० । आव० । आ० चू० । ('इंददत्त' शब्दे द्वितीयभागे ५३८ पृष्ठे वृत्तम्)

तित्त-तिक्त-पुं० । श्लेष्माऽऽदिदोषदन्तरि निम्बाऽऽद्याश्रिते रसविशेषे, तथा च भिषक्शास्त्रम्-"श्लेष्माणमरुचिं पित्तं, तृषं कुष्ठं विषं ज्वरम् । हन्यात्तिक्तो रसो बुद्धेः,कर्ता मात्रोपसेवितः" ॥ १ ॥ अनु० । जं० । कर्म० । "एगे तित्ते ।" स्था० १ ठा० । निम्बाऽऽदिवस्तिकरसोपेते, त्रि० । प्रश्न० ३ आश्र० द्वार । तं० । ज्ञा० । उत्त० । प्रज्ञा० । भ० । चरणवृक्षे कुटजे, पुं० । वाच० ।

तित्तग-तिक्तक-पुं० । तिक्त-संज्ञायां कन् । नृनिम्बे, (चिराता) चिरतिक्ते, कृष्णखदिरे,निम्बे,इक्ष्वादीक्षुके,तिक्तार्थे,वाच० । दश० । नि० चू० । पटोले, कटुतुम्ब्याम् , स्त्री० । टाप् । वाच० ।

तित्तणाम (ण)-तिक्तनामन्-न० । रसनामभेदे, यदुदयाज्जीवशरीरं निम्बाऽऽदिवत्तिक्तं भवति । कर्म० १ कर्म० ।

तित्तरसणाम-तिक्तरसनाम-न० । रसनामभेदे, यदुदयवशाज्जन्तुशरीरेषु तिक्तो रसो भवति । यथा निम्बाऽऽदीनां तत्तिक्तरसनाम । पं० सं० ३ द्वार । कर्म० ।

तित्तऽलाबुय-तिक्तालाबुक-स्त्री० । कटुकतुम्बके, ज्ञा० १ श्रु० ९ अ० ।

तित्तविसारण-तिक्तविसारण-न० । उज्जयन्तपर्वताऽऽसन्ने स्थानविशेषे, "गिरिवरमासन्नठिअं, अणीयं तित्तविसारणं नाम । सिलबद्धगाढपीठे, वे लक्खा तत्थ दम्माणं ।१।" ती० ३ कल्प ।

तित्ति-तृप्ति-स्त्री० । प्रीणौ, विशे० । प्रश्न० । अष्ट० ।

पीत्वा ज्ञानामृतं भुक्त्वा, क्रियासुरसताफलम् ।
साम्यताम्बूलमास्वाद्य, तृप्तिं याति परां मुनिः ॥१॥
स्वगुणैरेव तृप्तिश्चेद्-आकालभविनश्वरी ।
ज्ञानिनो विषयैः किं तै-र्यैर्भवेत् तृप्तिरित्वरी ॥२॥
या शान्तैकरसाऽऽस्वादा-दवेत्तृप्तिरतीन्द्रिया ।

सा न जिह्वेन्द्रियद्वारा, षड्रसाऽऽस्वादनादपि ॥३॥
संसारे स्वप्नवन्मिथ्या, तृप्तिः स्यादात्मिकी ।
तथ्या तु भ्रान्तिशून्यस्य, साऽऽत्मवीर्यविपाककृत् ॥४॥
पुद्गलैः पुद्गलास्तृप्तिं, यान्त्यात्मा पुनरात्मना ।
परतृप्तिसमारोपो, ज्ञानिनस्तत्र युज्यते ॥५॥
मधुराऽऽज्यमहाशाक-प्राश्नेऽश्नाति च गोरसात् ।
परब्रह्मणि तृप्तिर्या, जनास्तां जानतेऽपि न ॥६॥
विषयोर्मिविषोद्गारः, स्यादतृप्तस्य पुद्गलैः ।
ज्ञानतृप्तस्य तु ध्यान-सुधोज्झारपरम्परा ॥७॥
सुखिनो विषयाऽतृप्ताः, नेन्द्रोपेन्द्राऽऽदयोऽप्यहो ! ।
भिक्षुरेकः सुखी लोके, ज्ञानतृप्तो निरञ्जनः ॥८॥
अष्ट० १० अष्ट० ।

तित्तिअ–तावत्–अव्य० । तत्परिमाणमस्य । त्रि० । वाच० । " यत्तदेतदोतोरित्तिअ एतल्लुक् च " ॥ ८ । २ । १५६ ॥ इति तच्छब्दात् परस्य कावादेरतोः परिमाणार्थस्य ' इत्तिअ ' इत्यादेशो भवति । प्रा० २ पाद । साकल्ये, अवधौ, तत्परिमाणवति, त्रि० ।

तित्तिकंखि (ण्)–तृप्तिकाङ्क्षिण्–त्रि० । तृप्तिवाञ्छके, अष्ट० ६ अष्ट० ।

तित्तिर–तित्तिरि–पुं० । " तित्तिरौ रः " ॥ ८ । १ । ६० ॥ इति तित्तिरशब्दे रस्येतोऽद्भवति । प्रा० १ पाद । पक्षिविशेषे, सूत्र० २ श्रु० २ अ० । प्रश्न० । उपा० । प्रज्ञा० ।

तित्तिरकरण–तित्तिरिकरण–न० । तित्तिरिमुद्दिश्य यत्र क्रियते तथा यत्र स्थाप्यते एवंभूते स्थाने, आचा० ।

तित्तिरलक्खण–तित्तिरिलक्षण–न० । तित्तिरिस्वरूपप्रतिपादके ग्रन्थविशेषे, सूत्र० २ श्रु० २ अ० ।

तित्ती–देशी–सारे, दे० ना० ५ वर्ग ११ गाथा ।

तित्थ–तीर्थ–न० । तीर्यतेऽनेनेति तीर्थम् । ऊर्यतो नद्यादीनां समोऽवतारश्च भूभागो, जैताऽऽदिप्रवचनं वा । भावतीर्थं तु सङ्घः । स्था० १ ठा० । आ० म० । आ० ।

अथ तीर्थशब्दार्थमाह-

तित्थं ति पुव्वभणियं, संघो जो नाणचरणसंघाओ ।
इह पवयणं पि तित्थं, ततोऽणत्थंतरं जेण ॥ १३८० ॥

तीर्यतेऽनेनेति तीर्थं पूर्वमेवाचाप्युक्तम् । किमित्याह-सङ्घः । किंविशिष्टः ?, ज्ञानदर्शनचारित्रगुणसङ्घातः इह तु प्रवचनमपि तीर्थमुच्यते यस्मात्, ततः सङ्घातात्तदपि श्रुतज्ञानरूपत्वादनर्थान्तरमेवेति ॥ १३८० ॥ विशे० ।

संप्रति तीर्थनिरूपणायाऽऽह-

नामं ठवणा-तित्थं, दव्वतित्थं चेव भावतित्थं च ।
एक्केक्कं पि य एत्तो–ऽणेगविहं होइ नायव्वं ॥

(नामं ति) नामतीर्थं, स्थापनातीर्थं, ऊर्यतीर्थं, भावतीर्थं च । (एत्तो त्ति) नामाऽऽदिनिक्षेपमात्रकरणादनन्तरमेकैकं नामाद्यर्थाऽऽदि अनेकविधं भवति ज्ञातव्यम् । तत्र नामतीर्थमनेकविधं, जीवाजीवविषयाऽऽदिभेदात् । स्थापनातीर्थं साकारानाकारभेदात् । ऊर्यतीर्थमागमाऽऽदिभेदात् ।

तत्र ज्ञशरीरभव्यशरीरतीर्थप्रतिपादनार्थमाह-

दाहोवसमं तण्हा–वुच्छेयण मलपवाहणं चेव ।
तिहिँ अत्थेहिँ निजुत्तं, तम्हा तं दव्वतो तित्थं ॥

इह ज्ञशरीरभव्यशरीरव्यतिरिक्तं आगमतो नोआगमतो वा ऊर्यतीर्थं मागधवरदामाऽऽदि परिगृह्यते, बाह्यदाहाऽऽदेरेव तत्र उपशमसद्भावात् । तथा चाऽऽह-दाहोपशममिति । दाहो बाह्यः संतापः,तस्य उपशमो यस्मिन् तद् दाहोपशमम् । (तण्हाछुच्छेयणं ति) तृषः पिपासायाः छेदनं, जलसंघातेन तदभावात्, तथा मलो बाह्योऽङ्गसमुत्थः, तस्य प्रवाहणं-प्रवाह्यतेऽनेनेति प्रवाहणं,जलेन तस्य प्रक्षालनत्वात् । एवं त्रिभिरर्थैः करणभूतैर्नियुक्तं निश्चयेन युक्तं प्ररूपितम् । यदि वा-प्राकृतत्वात् सप्तम्यर्थे तृतीया । त्रिष्वर्थेषु नियोजनं यस्माद् बाह्यदाहाऽऽदिविषयमेव तस्मात् मागधाऽऽदि ऊर्यतत्तीर्थं, मोक्षसाधकत्वाभावात् ।

संप्रति भावतीर्थमधिकृत्याऽऽह-

कोहम्मि उ निग्गहिए, दाहस्सोवसमणं हवइ तत्थं ।
लोहम्मि उ निग्गहिते, तण्हाए छेयणं होइ ॥
अट्ठविहं कम्मरयं, बहुएहिँ भवेहिँ संचियं जम्हा ।
तवसंजमेण बज्झइ, तम्हा तं भावतो तित्थं ॥

इह भावतीर्थमपि आगमनोआगमभेदतोऽनेकप्रकारं, तत्र नो आगमतो भावतीर्थं क्रोधाऽऽदिनिग्रहसमर्थं प्रवचनमेव गृह्यते । तथा चाऽऽह-क्रोधे एव निगृहीते दाहस्य द्वेषानलजातस्यान्तः प्रशमनं भवति तथ्यं निरुपचरितं, नान्यथा । तथा लोभ एव निगृहीते (तण्हाए छेयणं होति त्ति) तृषोऽभिष्वङ्गलक्षणस्य छेदनं व्यपगमो भवति । तथाऽष्टविधमष्टप्रकारं कर्मैव जीवानां रञ्जनात् कर्मरजः, बहुभिर्भवैः संचितं तपःसंयमेन बाध्यते शोध्यते यस्मात्तस्मात्तत्प्रवचनं भावतीर्थम् ।

दंसणनाणचरित्त–म्मि निजुत्तं जिणवरेहिँ सव्वेहिँ ।
एएण होइ तित्थं, एसो अण्णो वि पज्जाओ ॥

दर्शनज्ञानचारित्रेषु नियुक्तं नियोजितं सर्वैः ऋषभाऽऽदिभिः, जिनवरैस्तीर्थकृद्भिर्यस्मादित्थंभूतेषु त्रिष्वर्थेषु नियुक्तं तस्मात्तत्प्रवचनं भावतीर्थम् । अथवा-येन कारणेनेत्थंभूतेषु त्रिष्वर्थेषु नियुक्तमेतेन कारणेन प्रवचनं भावतस्तिस्थम्,एवंविधलक्षणस्तीर्थशब्दापेक्षयाऽन्यः पर्यायः । आ० म० द्वि० २ अ० ।

अथ तीर्थशब्दार्थमाह-

तिज्जइ जं तेण तहिं, तओ व तित्थं तयं च दव्वम्मि ।
सरियाईणं भागो, निरवायो तम्मि य पसिद्धे ॥१०२६॥
तरिया तरणं तरिय–व्वं च सिद्धाणि तारओ पुरिसो ।
बाहोसुवाइ तरणं, तरणिज्जं निन्नयाईयं ॥ १०२७ ॥

यद् यस्मात्तीर्यते दुस्तरं वस्तु तेन तस्मिँस्ततो वेत्यतस्तीर्थमुच्यते । तच्च नामस्थापनाद्रव्यभावभेदाच्चतुर्विधम् । तत्र नामस्थापने सुगमे । ऊर्ये द्रव्यभूतमप्रधानभूतं सरित्समुद्राऽऽदीनां निरपायः कोऽपि नियतो भागः प्रदेशस्तीर्थमुच्यते । तस्मिंश्च प्रसिद्धे सिद्धे सत्यस्याऽऽपेक्षिकशब्दत्वादेतानि नियमात्सिध्यन्ति ।

कानि ?, इत्याह-तरिता पुरुषः, तरणं बाहूदुपाऽऽदि, तरणीयं तु निम्नगाऽऽदिकमिति ॥ १०२७ ॥

कथं पुनरिदं द्रव्यतीर्थमित्याह-

देहाइतारयं जं, वज्झमलावणयणाइमत्तं च ।
णेगंताऽणवंतिय-फलं च तो दव्वतित्थं तं ॥ १०२८ ॥

यस्मादिदं देहाऽऽदिकमेव द्रव्यमात्रं तारयति-नद्यादिपरकूलमात्रं नयति, न पुनर्जीवं संसारसमुद्रस्य मोक्षलक्षणं परकूलं प्रापयति, अतोऽप्रधानत्वाद् द्रव्यतीर्थम् । तथा बाह्यमेव मलाऽऽदिद्रव्यमात्रमपनयति, न त्वन्तरङ्गं प्राणातिपाताऽऽदिजन्यकर्ममलम् । तथा-अनैकान्तिकफलमेवेदं नद्यादितीर्थं, कदाचिदेतेन नद्यादेस्तरणात्, कदाचित्तु तत्रैव मज्जनात् । तथाऽनात्यन्तिकफलं चेदम्, तथाहि-एकदाऽनेन तीर्णमपि नद्यादिकं पुनरपि च तीर्यते इत्यनात्यन्तिकफलत्वम् । आत्मना चाऽस्य नद्यादितीर्थस्य द्रव्यमात्रत्वेनाप्रधानत्वात् सर्वत्र द्रव्यतीर्थत्वं भावनीयमिति ॥ १०२८ ॥

इह केषाञ्चिन्मतमाशङ्क्य परिहरन्नाह-

इह तारणाऽऽइफलत्तं, ति एहाणपाणाऽवगाहणाऽऽईहिं ।
जवतारयं ति केई, तं नो जीवोवघायाओ ॥ १०२९ ॥
सूणंग पि व तमुदू-हलं व न य पुण्हकारणं एहाणं ।
ण य जइजोग्गं तं मे-मणं व कायंगभावाओ ॥ १०३० ॥

इह केचित्तीर्थिका मन्यन्ते-नद्यादेः संबन्धि द्रव्यतीर्थं किल स्नानपानावगाहनाऽऽदिनिर्विघ्नतया सेव्यमानं भवतारकं संसारमहासमुद्राऽऽदुत्तारकं भवत्येव । कुतः ?, तारणाऽऽदिफलत्वमिति कृत्वा-शरीरसंतारण-मलक्षालन-तृष्णव्यवच्छेद-दाहोपशमाऽऽदिफलत्वादित्यर्थः । अनेन साध्यकृसमीक्षितदेहतारणाऽऽदिफलेन परोक्षस्यापि संसारतारणफलस्यानुमीयमानत्वादिति भावः । तदेतन्नोपपद्यते, स्नानाऽऽदेर्जीवोपघातहेतुत्वात्, फल्गु सिध्नेनुशूलाऽऽदिवदिति । एतदुक्तं भवति-जीवोपघातहेतुत्वाद् दुर्गतिफला एव स्नानाऽऽद्यः, कथं नु भवतारकास्ते भवेयुः, सूनाधष्यजूम्यादीनामपि भवतारकत्वप्रसङ्गादिति ? । इतश्च-नद्यादि तीर्थं भवतारकं न भवति, सूनाङ्गत्वात्-सूनाप्रकारत्वात्, उदूखलाऽऽदिवदिति । न च पुण्यकारणं स्नानं, नापि यतिजनयोग्यं तत्, कामाङ्गत्वात्, मण्डनवत्, अन्यथा ताम्बूलभक्षणपुष्पबन्धनदेहाऽऽदिधूपनाभ्यञ्जनाऽऽद्ययोऽपि च भुजङ्गाऽऽदीनां पुण्यहेतवः स्युः । न च देहतारणाऽऽदिमात्रफलदर्शनेन विशिष्टं भवतारणाऽऽदिकं फलमुपपद्यते, नियामकाभावात्, प्रत्यक्षवीक्षितप्राण्युपमर्दबाधितत्वाच्च, इत्याद्यभ्यूह्य स्वधियाऽत्र दोषजालमभिधानीयमिति ॥ १०२९ ॥ १०३० ॥

अथ परो ब्रूयात्किमित्याह-

देहोवगारि वा ते-ण तित्थमिह दाहनासणाऽऽईहिं ।
मद्दुपज्जमंसवेस्माऽऽ-दओ वि तो तित्थमावन्नं ॥ १०३१ ॥

यदि प्रेरको मन्येत-जाह्नवीजलाऽऽदिकं तीर्थमेव, दाहनाशपिपासोपशमाऽऽदिभिर्देहोपकारित्वात् । अत्रोच्यते-एवं सति ततो मधुमद्यमांसवेश्याऽऽद्ययोऽपि तीर्थमापद्यन्ते, तेषामपि देहोपकारित्वाविशेषादिति । उक्तं द्रव्यतीर्थम् ॥ १०३१ ॥

अथ भावतीर्थमाह-

भावे तित्थं संघो, सुयविहियं तारओ तहिं साहू ।
नाणाऽऽइतियं तरणं, तरियव्वं भवसमुद्दोऽयं ॥ १०३२ ॥

भावे भावविषयं, श्रुतविहितं श्रुतप्रतिपादितं, संघस्तीर्थं, तथा च भगवत्यामुक्तम-"तित्थं भंते ! तित्थं, तित्थयरे तित्थं ? गोयमा ! अरहा ताव नियमा तित्थंकरे, तित्थं पुण चाउवण्णो समणसंघो ।" इति । इह च तीर्थसिद्धौ तारकाऽऽदयो नियमादाक्षिप्यन्त एव । तत्रेह संघे तीर्थे तद्विशेषभूत एव तारकः साधुः, ज्ञानदर्शनचारित्रात्मकं पुनस्तरणं, तरणीयं तु भवसमुद्रः । इह च तीर्थतारकाऽऽदीनां परस्परतो-अन्यता, अनन्यता च विवक्षावशतो बोद्धव्या । तत्र सम्यग्दर्शनाऽऽदिपरिणामात्मकत्वात् संघः तार्थं, तत्रावतीर्णानामवश्यं भवोदधितरणात् । तद्विशेषभूतत्वात् तदन्तर्गत एव साधुस्तारकः, सम्यग्दर्शनाऽऽद्यनुष्ठानात् । साधकतमत्वेन तत्करणरूपतामापन्नं ज्ञानाऽऽदित्रयं तु तरणम् । तरणीयं त्वौदयिकाऽऽदिभावपरिणामाऽऽत्मकः संसारसमुद्र इति ॥ १०३२ ॥

कस्मात् पुनः संघो भावतीर्थमित्याह-

जं नाणदंसणचरि-त्तभावओ तव्विवक्खभावाओ ।
भवजावओ य तारे-इ तेण तं भावओ तित्थं ॥ १०३३ ॥

यद् यस्मात्तारयति पारं प्रापयति तेन तत् संघलक्षणं भावतस्तीर्थमिति संबन्धः । कुतस्तारयतीत्याह-तद्विपक्षभावादिति-तेषां ज्ञानदर्शनचारित्राणां विपक्षो-अज्ञानमिथ्यात्वाऽविरमणानि तद्विपक्षः, तल्लक्षणो भावो जीवपरिणामः तद्विपक्षभावः, तस्मात्तारयति । कुतः ?, इत्याह—ज्ञानदर्शनचारित्रभावतः ज्ञानाऽऽत्मकत्वादित्यर्थः । यो हि ज्ञानाऽऽत्मको भवति सोऽज्ञानाऽऽदिभावात्परं तारयत्येवेति ज्ञापयति । न केवलमज्ञानाऽऽदिभावात्तारयति । तथा भवभावतश्च तारयति, भवः संसारस्तत्र भवनं भावस्तस्मादित्यर्थः । यस्मात्स्वयं ज्ञानाऽऽदिभावाऽऽत्मकः, तथाऽज्ञानाऽऽदिभावाद्भवभावाच्च भव्यांस्तारयति, तस्मादसौ संघो भावतीर्थमितीह तात्पर्यम् ।

उक्तं च-

"रागाऽऽद्यम्भाः प्रमादव्यसनशतचलद्दीर्घकल्लोलमालः,
क्रोधेर्ष्यावाडवाग्निर्मृतिजननमहानक्रचक्रौघरौद्रः ।
तृष्णापातालकुम्भो भवजलधिरयं तीर्यते येन तूर्णं,
तद् ज्ञानाऽऽदिस्वभावं कथितमिह सुरैरार्हतैर्भावतीर्थम् ॥१॥"
इति ॥ १०३३ ॥

तदपरयन्तरमाह-

तह कोहलोहकम्मम-यदाहतण्हामलावणयणाइं ।
एगंतेणऽवंतं, च कुणइ सुद्धिं जओ पाओ ॥ १०३४ ॥

तथा क्रोधश्च, लोभश्च, कर्म च, तन्मयास्तत्स्वरूपा ये दाहतृष्णामलाः । क्रोधो हि जीवानां मनःशरीरसंसारसन्तापजनकत्वाद्दाहः, लोभस्तु विनश्वरविषयपिपासाऽऽविर्भावकत्वात् तृष्णा, कर्म पुनः पवनोद्भूतरुदणरजोवत्सर्वतोऽवगुण्ठनेन मलिन्यहेतुत्वाद् मलः, अतस्तेषां क्रोधलोभकर्ममयानां दाहतृष्णामलानां यदेकान्तेनात्यन्तं चापनयनानि करोति । तथा कर्मकलङ्कमलिनाद्भवौघात् संसारापारनीरप्रवाहात् परकूलं नीत्वा शुद्धिं कर्ममलापनयनलक्षणां यतः करोति, तेन तत्सकलकलङ्कं भावतस्तीर्थमिति पूर्वसम्बन्धः । अपरमपि नद्यादितीर्थं तुच्छनैकान्तिकानात्यन्तिकदाहतृष्णामलापे-

नयनं विदधाति। एतच्च संघतीर्थमनादिकालालीनत्वेनानन्तानां दाहतृष्णामलानामैकान्तिकमात्यन्तिकं चापनयनं करोति, अतः प्रधानत्वाद्भावतीर्थमुच्यते, नद्यादितीर्थं त्वप्रधानत्वाद् द्रव्यतीर्थमिति भावः ॥ १०३४ ॥

अथवा प्राकृते "तित्थं" इत्युक्ते त्रिस्थमित्येतदपि लभ्यते, इत्येतदाह--

दाहोवसमाऽऽइसु वा, जं तिसु थियमहव दंसणाऽऽईसु।
तो तित्थं संघोचिय, उभयं व विसेसणविसेस्सं ॥१०३५॥

अथवा यस्मात्यथोक्तदाहोपशमतृष्णाच्छेदमलक्षालनरूपेषु, यदि वा सम्यग्दर्शनज्ञानचारित्रलक्षणेषु त्रिष्वर्थेषु स्थितं ततस्त्रिस्थं संघ एव, उभयं वा संघत्रिस्थितित्वलक्षणविशेषणविशेष्यरूपं द्रव्यं त्रिस्थम्। इदमुक्तं भवति-किं त्रिस्थं ?-संघः, कश्च संघः ?-त्रिस्थं, नान्यः, इत्येवं विशेषणविशेष्ययोरुभयं संमुलितं त्रिस्थमुच्यत इति ॥ १०३५ ॥

अथवा प्राकृते 'तित्थं' इत्युक्ते त्र्यर्थमित्यपि लभ्यते, इत्येतदर्थमाह-

कोहग्गिदाहसमणा-दओ व ते चेव जस्स तिण्हऽत्था।
होइ तियत्थं तित्थं, तयत्थसद्दो फलत्थोऽयं ॥ १०३६ ॥

क्रोधाग्निदाहोपशमलोभतृष्णाव्यवच्छेदकर्ममलक्षालनलक्षणास्त एवानन्तरोक्तास्त्रयोऽर्थाः फलरूपा यस्य तत्त्र्यर्थं, तच्च संघ एव, तद्व्यतिरिक्तं ज्ञानाऽऽदित्रयं वा त्र्यर्थं प्राकृते तित्थमुच्यते। अर्थशब्दश्चायं फलार्थो मन्तव्यः। इदमुक्तं भवति-भगवान् संघः, तद्व्यतिरिक्तज्ञानाऽऽदित्रयं वा महातरुरिव भव्यैर्निषेव्यमाणं क्रोधाग्निदाहशमनाऽऽदिकांक्षीनर्थान् फलत्यतस्त्र्यर्थमुच्यत इति ॥ १०३६ ॥

अथवा वस्तुपर्यायोऽत्रार्थशब्द इत्याह-

अहवा सम्मदंसण-नाणचरित्ताइ तिण्णि जस्सऽत्था।
तं तित्थं पुव्वोइय-मिह अत्थो वत्थुपज्जाओ ॥१०३७॥

अथवा सम्यग्दर्शनाऽऽदयस्त्रयोऽर्था यस्य तत्त्र्यर्थम्, अर्थशब्दाश्च वस्तुपर्यायः, त्रिवस्तुकमित्यर्थः। तच्च संघ एव, तद्व्यतिरिक्तत्वात्, त एव वा सम्यग्दर्शनाऽऽदयस्त्रयोऽर्थाः समाहृताः त्र्यर्थं, संख्यापूर्वत्वात्, स्वार्थत्वाच्च द्विगोरिति ॥ १०३७ ॥

तदेवं संघो भावतस्तीर्थं, त्रिस्थं, त्र्यर्थं वेति प्रतिपाद्य साम्प्रतमिदमेव जैनं तीर्थमभिप्रेतार्थसाधकं, नान्यदिति प्रमाणतः प्रतिपादयन्नाह-

इह सम्मंसद्धाणो-वलद्धिकिरियासभावओ जइणं।
तित्थमभिप्पेयफलं, सम्मपरिच्छेयकिरिय व्व ॥ १०३८॥

इह जैनमेव तीर्थमभिप्रेतार्थसाधकमिति प्रतिज्ञा, सम्यग्श्रद्धानोपलब्धिक्रियास्वभावत्वात्, सम्यग्दर्शनज्ञानचारित्राऽऽत्मकत्वादित्यर्थः। इह यत् सम्यक्श्रद्धानोपलब्धिक्रियाऽऽत्मकं तदिष्टार्थसाधकं दृष्टं, यथा सम्यक्परिच्छेदवती रोगापनयनक्रिया, यच्चेष्टार्थसाधकं न भवति, तत् सम्यक्श्रद्धानोपलब्धिक्रियाऽऽत्मकमपि न भवति, यथोन्मत्तप्रयुक्तक्रिया, तथा च शेषतीर्थानि। इदमुक्तं भवति-यथा कस्यचिन्निपुणवैद्यस्य सम्यग् रोगाऽऽदिस्वरूपं विदाय विशुद्धश्रद्धानवत् आतुरस्य सम्यगौषधप्रयोगाऽऽदिक्रियां कुर्वतोऽभिप्रेतार्थसिद्धिर्जायते, एवं जैनतीर्थादपीति ॥ १०३८ ॥

अन्यतीर्थनिरपेक्षेवंविधानि न भविष्यन्ति ?, नेत्याह-

नाभिप्पेयफलाइं, तयंगवियलत्तओ कुतित्थाइं।
वियलनयत्तणओ चिय, वियलाइं वियलकिरिय व्व ॥ १०३९॥

सुगताऽऽदिप्रणीतानि कुतीर्थानि नाभिप्रेतफलानि। कुतः ?, इत्याह-(तयंगेत्यादि) तस्याभिप्रेतार्थस्याङ्गानि तदङ्गानि सम्यग्ज्ञानाऽऽदीनि कारणानि, तद्विकलत्वात्तदूदितत्वात्, नयविकलत्वाच्च विकलानि तानि। सर्वैरेव ह्येकैकांशग्राहिभिर्नयैर्मिलितैः संपूर्णमनन्तधर्माऽऽत्मकं वस्तु निश्चीयते; शेषतीर्थानि त्वेकद्व्यादिनयमात्रमतावलम्बित्वेन समग्रनयविकलान्येवेति तानि नयविकलानि, ततो न सम्पूर्णाभिप्रेतफलस्य साधकानीत्यर्थः; विकलक्रियात्वादिति; यथा भिषक्प्रतीचारकाऽऽतुरौषधाऽऽद्यन्यतराङ्गविकला क्रिया न संपूर्णाऽभिप्रेतफलसाधनी, तथा कुतीर्थान्यपीति। तदेवं यथोक्तप्रकारेण द्रव्यभावतीर्थप्ररूपणा कृता ॥ १०३९ ॥

अथ प्रकारान्तरेण तत्प्ररूपणां कर्तुमाह-

अहव सुहोतारुत्ता-रणाइ दव्वे चउव्विहं तित्थं।
एवं चिय भावम्मि वि, तत्थाऽऽइमयं सरक्खाणं॥१०४०॥
तव्विणियाणं बीयं, विसयसुहकुमत्थभावणाधणियं।
तइयं च वोमियाणं, चरिमं जइणं सिवफलं तु ॥१०४१॥

इह द्रव्यतीर्थे चत्वारो भङ्गाः। तद्यथा-सुखावतारं सुखोत्तारम्, सुखावतारं दुरुत्तारम्, दुःखावतारं सुखोत्तारम्, दुःखावतारं दुरुत्तारम्। (४) एवं भावतीर्थेऽपीयं चतुर्भङ्गी द्रष्टव्या। इह च यत्र सुखेनैवावतरन्ति प्रविशन्ति प्राणिनस्तत्सुखावतारम्, सुखेनैव यत उत्तरन्ति-सुखेनैव यद् मुञ्चन्तीत्यर्थः, तत्सुखोत्तारम्; इत्याद्यनुक्तवर्तितीर्थभावार्थः। एवमन्यत्रापि। एतच्च सरजस्कानां शैक्षाणां सम्बन्धि वेदितव्यम्। तथाहि-रागद्वेषकषायेन्द्रियपरीषहोपसर्गमनोवाक्कायजयाऽऽदिलक्षणस्य तथाविधदुष्करकष्टानुष्ठानस्य तैः क्रियमाणस्यादर्शनात्, यथा कथञ्चित्स्वरूपतयाऽपि च तैर्व्रतपरिपालनस्याभिधानात्सुखेनैव प्राणिनस्तद्दीक्षां प्रतिपद्यन्ते, इति तत्तीर्थस्य सुखावतारता। तच्छास्त्रेषु च न तथाविधाऽऽवासकस्वप्नाद्या काचिन्निपुणा युक्तिरस्ति, यद्वासितान्तरात्मा पुमांस्तद्दीक्षां न परित्यजेत्। किं च-" शैक्षो द्वादश वर्षाणि, व्रतं कृत्वा ततः परम्। यद्यशक्तस्तु जेद्यापि, यागं कृत्वा व्रतेश्वरे ॥१॥" इत्यादिना दीक्षात्यागस्य तैर्निर्दोषतयाऽभ्यनुज्ञानात्सुखेनैव तद्दीक्षां जन्तवः परित्यजन्ति, इति तत्तीर्थस्य सुखोत्तारतेति १। द्वितीयभङ्गवर्ति तीर्थं (तव्विणियाणं ति) सुगतानां संबन्धि मन्तव्यम्।

तथाहि-

" सुद्धी शय्या प्रातरुत्थाय पेया,
भक्तं मध्ये पानकं चाऽपराह्णे।
द्राक्षाखण्डं शर्करा चार्द्धरात्रे,
मोक्षश्चान्ते शाक्यपुत्रेण दृष्टः ॥ १ ॥"
" मणुण्णं भोयणं भोच्चा, मणुण्णं सयणाऽऽसणं।
मणुण्णंसि अगारंसि, मणुण्णं झायए मुणी ॥ १ ॥"

इत्यादेस्तैरभिधानतो विषयसुखसिद्धेस्तत्तीर्थस्य सुखावतारता। तथा-कुशास्त्रोक्तनिपुणयुक्तिभिस्तदीक्षावासनोत्पादाद्, व्रतत्यागे च तैर्महतः संसारदुःखाऽऽदेः प्रतिपादनात्, तत्समीपगृहीतव्रतस्य दुष्परित्याज्यत्वात्तत्तीर्थस्य दुरुत्तारता। इमां च युक्तिं भाष्यकारः स्वयमेव किञ्चिदाह-"विसयसुह" इत्यग्रे गतार्थम् २।

दुःखावतारं सुखोत्तारमिति तृतीयं बोटिकानां दिगम्बराणाम् । तच्च नाग्न्यादेर्लज्जाऽऽदिहेतुत्वेन दुरध्यवसेयत्वात्तत्तीर्थस्य दुःखावतारता । अनेषणीयपरिभोगकथाश्रवाद्दुस्त्याऽऽदेस्तदध्यवसायदर्शनात्, नाग्न्यादेश्चातिसज्जनीयत्वेन तत्परानाम्नां तत्तीर्थस्य सुखोत्तारतेति ३ । दुःखावतारं दुरुत्तारमिति चरमं चतुर्थं भोटिकानाम् । जैनानां साधूनां रागद्वेषकषायेन्द्रियपरीषहोपसर्गाऽऽदिजयस्य, तथाऽप्रमत्ततया समितिगुप्तिशिरोलुञ्चनाऽऽदिकष्टाऽनुष्ठानस्य दर्शनात् तत्तीर्थस्य दुःखावतारता । सुशास्त्रोक्तनिपुणयुक्तिभिस्तीव्रतरवासनोत्पादनात्, अतस्त्यागे चातिमहतः संसाराऽऽदिदुःखस्यानिधानात्तत्तीर्थस्य दुरुत्तारता ।४। अन्ये तु सुखोत्तारां दुरुत्तारां च सर्वत्र मुक्तिप्राप्तिमाश्रित्य व्याचक्षते, तत्र सरजस्कानां स्वल्पेनैवेश्वरोक्तानुष्ठानेन किल मुक्तिप्राप्त्यभ्युपगमात्सुखोत्तारं तीर्थं,सुखेनैवास्माद्भवार्णवमुत्तरन्तीति व्युत्पत्तेः । शाक्यानां तु दुरवापविशिष्टध्यानमार्गाद् योगिज्ञानोत्पत्त्यादिक्रमेण मुक्तिप्राप्त्यभ्युपगमाद् दुःखोत्तारता । दुःखेनास्मात्संसारमुत्तरन्ति' इति कृत्वा । बोटिकानां तु भिक्षाशुद्ध्यादीनां गौणत्वेनाभ्युपगमाज्जाम्यलक्षणनिर्ग्रन्थत्वमात्रादेव मुक्त्यभ्युपगमात्सुखोत्तारता । साधूनां तु पूर्वोक्तकष्टानुष्ठानाद् मुक्त्याश्रयणाद् दुरुत्तारता । भवतारपक्षे तु सर्वत्र पूर्वोक्तैव भावना; इत्यलं विस्तरेणेति ॥ १०४० ॥ १०४१ ॥

अत्र प्रेरकः प्राऽऽह-

नणु जं दुहावयारं, दुक्खोत्तारं च तं दुरहिगम्मं ।
लोयम्मि पूइयं जं, सुहावयारं सुहुत्तारं ॥ १०४२ ॥

ननु यद् दुःखावतारं च दुरुत्तारं च तीर्थं तद् दुरधिगम्यम्, एवंभूतं च जैनतीर्थं भवद्भिः प्रतिपादितम्। एतच्चायुक्तम्,एवंभूततीर्थस्य तरणक्रियाविघातित्वेनानिष्टार्थप्रसाधकत्वात्, लोकप्रतीतिबाधितत्वाच्च । तथा चाऽऽह-लोके हि यत्सुखावतारं सुखोत्तारं च तीर्थं, तत्पूजितं तदेवोपादेयम्, तरणक्रियाऽनुकूल्येनेष्टार्थप्रसाधकत्वात्। तस्मात् प्रथम एव भङ्गः श्रेयान्, इति प्रेरकाऽभिप्राय इति ॥ १०४२ ॥

अत्रोत्तरमाह-

एवं तु दव्वतित्थं, जावे दुक्खं हियं अभइ जीवो ।
मिच्छत्तऽण्णाऽविरई-विसयसुहभावणाणुगओ।१०४३।
पडिवक्खो पुण कम्मा-णुभावओ भावओ परमसुक्कं ।
किह मोक्खिउइ जाणंतो,परमहियं दुल्लहं च पुणो।१०४४।

सत्यम्,द्रव्यतीर्थमेवमेवेष्यते यथैव स्वं मूरे,तस्य सुखप्राप्यत्वात्, सुखेनैव च मुक्ष्यमानत्वादिति । भावतीर्थं तु नैवम, तस्य मोक्षहेतुत्वेन जीवानां परमहितत्वात् । यच्च मोक्षहेतुत्वेन हितं तद् दुःखं लभते जीवः-महता कष्टेन तज्जीवः प्राप्नोतीत्यर्थः। कथंभूतो यस्मादेष जीवः?, इत्याह-(मिच्छत्त इत्यादि) यस्मादनादिकालालीनमिथ्यात्वाज्ञानाविरतिविषयसुखभावनाऽनुगतो जीवः, तस्मादित्थंभूतस्य जीवस्यानन्तसंसारदुःखव्यवच्छेदहेतुत्वान्निःसीमनिःश्रेयसावाप्तिनिबन्धनत्वाच्च परमहितं भावतीर्थमतिदुरवापत्वात् पूर्वोक्तकष्टानुष्ठानयुक्तत्वाच्च दुःखावतारम्, तथा-दुरुत्तारं च । कुतः?, इत्याह-(पडिवक्खो इत्यादि) शुभकर्मपरिणत्यनुभावतः पुनः कथमपि परमशुद्धं भावतीर्थं भावतः परमार्थतः प्रतिपक्षो जीवः ' परमहितं दुर्लभं च पुनरपि ' एतज्ज्ञानमपि कथं नु नाम तन्मोक्ष्यति?-कथं ततः उत्तरिष्यति?, न कथञ्चिदित्यर्थः । अतो दुरुत्तारता तस्येति । किञ्च-सद्वेद्यप्रयुक्तकर्कशक्रियोदाहरणतश्च भावतीर्थस्य दुःखावतारोत्तारता भावनीया ॥ १०४३ ॥ १०४४ ॥

कथम?, इत्याह-

अइकक्खडं व किरियं, रोगी दुक्खं पवज्जए पढमं ।
पडिवक्खो रोगक्खय-मिच्छंतो मुंचए दुक्खं ॥१०४५॥
इय कम्मवाहिगहिओ, संजमकिरियं पवज्जए दुक्खं ।
पडिवक्खो कम्मक्खय-मिच्छंतो मुंचए दुक्खं ॥१०४६॥

गाथाद्वयमपि सुबोधम् ॥ १०४५ ॥ १०४६ ॥ विशे० । (जम्बूद्वीपतीर्थवक्तव्यता 'जंबूदीव' शब्देऽभिधेये भागे १३७४ पृष्ठे गता)

तित्थं भंते ! तित्थं, तित्थगरे तित्थं ?। गोयमा ! अरहा ताव णियमा तित्थगरे, तित्थं पुण चाउव्वण्णाइण्णे समणसंघे । तं जहा-समणा, समणीओ, सावया, साविआओ य ।

(तित्थं भंते ! इत्यादि) तीर्थं सङ्घरूपं प्रदन्त ! (तित्थं ति) तीर्थशब्दवाच्यम्, उत तीर्थकरस्तीर्थं तीर्थशब्दवाच्यम्?, इति प्रश्नः । अत्रोत्तरम-अर्हन् तीर्थकरस्तावत्तीर्थप्रवर्त्तयिता, न तु तीर्थम् । तीर्थं पुनः (चाउव्वण्णाइण्णे समणसंघे त्ति) चत्वारो वर्णा यत्र स चतुर्वर्णः, स चासावाकीर्णश्च क्षमाऽऽदिगुणैर्व्याप्तश्चतुर्वर्णाऽऽकीर्णः । क्वचित्-" चाउव्वण्णे समणसंघे " इति पठ्यते,तत्र च व्यत्यमेवेति । भ० २० श० ८ उ० । ('आणा' शब्दे द्वितीयभागे ११६ पृष्ठे तीर्थविचारो द्रष्टव्यः) " भूधुवःस्वस्तरतीति तीर्थं, यत्किञ्चिन्नाम विद्यते । तत्सर्वमेव दृष्टं स्यात्, पुष्करीकेऽभिवन्दिते ॥ १ ॥ " ती० १ कल्प । तीर्यते संसारसमुद्रोऽनेनेति तीर्थम् । रा० । पञ्चा० ल० । आ०म० । स० । आ० चू० । संसारसागरं तरन्ति येन तत्तीर्थम् । नं० । " द्वितीयतुर्ययोरुपरि पूर्वः" ॥ ८ । २ । ७० ॥ इति द्वितीयस्योपरि प्रथमः । प्रा० २ पाद । " ह्रस्वः संयोगे " ॥ ८ । १ । ८४ ॥ इति दीर्घस्य ह्रस्वः । प्रा० १ पाद । प्रवचने, आ० म० १ अ० १ खण्ड । आ० चू० । संसारसागरतारणकारणत्वाज्ज्ञानाऽऽदौ, स० ३० समo। तद्भागाऽऽद्यावतारमार्गे, स्था० १० ठा० । श्रीवीरतीर्थं कियत्कालं यावद् भवतीति प्रश्ने, उत्तरम्-"जंबुद्दीवे दीवे भारहे वासे इमीसे ओसप्पिणीए देवाणुप्पिया ! णं केवतियं तित्थं अणुसज्जिस्सइ ?। " इति भगवतीसूत्रस्थविंशतितमशतकाष्टमोद्देशकानुसारेणैकविंशतिसहस्रवर्षाणि यावत् श्रीवीरतीर्थं प्रवर्तिष्यते। किञ्च-"तित्थं भंते ! तित्थं, तित्थयरे तित्थं?। गोयमा! अरहा ताव नियमा तित्थकरे,तित्थं पुण चाउव्वण्णाइण्णे समणसंघे। तं जहा-समणा,समणीओ, सावगा,साविआओ य।" इति भगवत्यां "दुप्पसहंते चरणं, जाणिअं जं भगवया इहं खेत्ते। आणाजुत्तेणमिणं, ण दोह भइण त्ति वामोहो" ॥१॥ इत्युपदेशपदवचनाद् दुःप्रसहान्तं यावच्चात्र भविष्यतीति। १०प्र० सेन० ३ उ० । अभूवन्केचिन्नस्तीर्थे भवन्ति, तीर्थविच्छेदे वा भवन्ति?, तथा पाक्षिकसूत्रवृत्तावतीर्थेऽन्तकृत्केवलिनो दृष्ट्वा सिद्धयन्ति, भगवत्यां च नवमशतके तदाश्रित्य "तप्पक्खियसावियाए वा" इत्यत्र धर्म्मोपदेशं न दत्ते एकं प्रश्नं कृत-

मेके च मुक्तवेत्यभिप्रायेणाऽश्रुत्वाकेवलिनस्तीर्थे एव भवन्ति ?। अन्यच्चाश्रुत्वाकेवलिनः पञ्चदशभेदभिन्नानां सिद्धानां मध्ये कस्मिन् भेदे समायान्ति ?, तेनैतद्विषये सर्वं सविस्तरं प्रसाद्यमिति प्रश्ने, उत्तरम् -अश्रुत्वाकेवलिनः श्रीभगवतीसूत्रवृत्त्यनुसारेण तीर्थ एव भवन्ति, नातीर्थे। पाक्षिकसूत्रवृत्तौ तु अतीर्थसिद्धाधिकारे एते उक्ता(ने)स्तीर्थे[तथा तीर्थसिद्धाऽऽदिमध्ये यथासंभवमवतरन्तीति। ३८२ प्र०। सेन० ३ उल्ला०। तीर्थे यन्नालिकेराऽऽदि ऊर्ध्वं मानितं,तदेव मुच्यतेऽन्यद्वेति प्रश्ने, उत्तरम्-श्रीशत्रुञ्जयाऽऽदितीर्थे मूलविधिना यदेव मानितमभूत्तदेव मुच्यते,कारणे तु यथाऽऽदेयं न भवति तथा कर्तव्यमिति। ४४२ प्र०। सेन० ३ उल्ला० जं०। (तीर्थस्य प्रभावकाः 'पभावग' शब्दे वक्ष्यन्ते)(ऊर्ध्वलोकाऽऽदिषु शाश्वताशाश्वततीर्थानि 'चेइय' शब्दे तृतीयभागे १२४२ पृष्ठे उक्तानि) (ऋषभस्य राज्ञो वरदातीर्थगमनं ' भरह ' शब्दे वक्ष्यते)

त्रित्थ–न०। त्रिषु वा क्रोधाग्निदाहोपशमलोभतृष्णानिरासकर्ममलापनयनज्ञानेषु ज्ञानाऽऽदिलक्षणेषु वा अर्थेषु तिष्ठन्तीति त्रित्थम्। संघे, प्राकृतत्वात् ' तित्थं '। स्था० १ ठा०।

त्र्यर्थ–न०। त्रयो वा क्रोधाग्निदाहोपशमाऽऽदयोऽर्थाः फलानि यस्य तत्त्र्यर्थम्। अथवा-त्रयो ज्ञानाऽऽदयोऽर्था वस्तूनि यस्य तत्त्र्यर्थम्। संघे, स्था० १ ठा०।

तित्थअर–तीर्थंकर–पुं०। ' तित्थयर ' शब्दार्थे, विशे०।

तित्थंकर–तीर्थ (ङ्) कर–पुं०। तीर्थमुक्तलक्षणं तत् कुर्वन्त्यानुलोम्येन हेतुत्वेन तच्छीलतया वेति तीर्थंकराः। अत्रानुस्वारः प्राकृतत्वात्। पा०। " तीर्थाच्चैके " इति वचनात् स्वप्रत्यये तीर्थशब्दाद् मुम्। नं०। शास्तृषु, पा०। (तीर्थंकरस्य सर्वा वक्तव्यता ' तित्थयर ' शब्दे २२४७ पृष्ठतो वक्ष्यते)

तित्थंकरणाय–तीर्थंकरज्ञात–न०। जिनोदाहरणे, पञ्चा० १ विव०।

तित्थगर–तीर्थंकर–पुं०। ' तित्थयर ' शब्दार्थे, विशे०।

तित्थजत्ता–तीर्थयात्रा–स्त्री०। तीर्थगमने, ध०।

अथ तीर्थयात्रास्वरूपम्-

तत्र तीर्थानि श्रीशत्रुञ्जयोज्जयन्ताऽऽदीनि। तथा-तीर्थकृज्जन्मदीक्षाज्ञाननिर्वाणविहारभूमयोऽपि प्रभूतभव्यस्य शुभभावसंपादकत्वेन भवाम्भोनिधितारणात्तीर्थान्युच्यन्ते। तेषु सद्दर्शनविशुद्ध्यर्थं विधिवज्जिनानुद्दिश्य महोत्सवः तीर्थयात्रा। तत्राऽयं विधिः-प्रथमं मुख्यवृत्त्या ब्रह्मव्रतैकाऽऽहारपादचाराऽऽद्यभिग्रहान् प्रतिपद्यते, सत्यामपि वाहनसामग्र्यां पादचारणाऽऽद्युचितमेव। यतः-"एकाहारी दर्शन-धारी यात्रासु भूशयनकारी। सचित्तपरीहारी, पदचारी ब्रह्मचारी च ॥ १ ॥" ततो राज्ञामनुज्ञापयति, प्रगुणीकरोति च यथाशक्ति युक्तिविशिष्टान् यात्रार्थं देवाऽऽलयान्, कारयति च विविधपटमण्डपप्रौढकटाऽऽदिचक्रत्कूपसरोवराऽऽदीन्, सज्जयति शकटाऽऽद्यनेकविधिवाहनानि, लिम्पयते च स बहुमानं श्रीगुरून् सङ्घं स्वजनवर्गं च,प्रवर्तयत्यमारिम्, करोति चैत्याऽऽदौ महापूजाऽऽदिमहोत्सवम्, ददाति दीनाऽऽदिभ्यो दानम्, प्रोत्साहयति निराधारेभ्यो विभववाहनाऽऽदिदानविधयोद्घोषणापूर्वम्, आह्वयति कवचाङ्काऽऽमुपस्कारार्पणाऽऽदिसंमानपूर्वमनेकोद्भटचट्टान्, प्रगुणयति च गीतनृत्यवाद्याऽऽदि, ततः करोति शुभेऽह्नि प्रस्थानमङ्गलम्, तत्र सकलसमुदायं विशिष्टनोज्यनाभूजाऽऽदिभिः परिनोज्य परिधाप्य च दुकूलाऽऽदिभिर्विधापयति सुप्रतिष्ठधर्मिष्ठपूज्यभागवत्तरनरेभ्यः सङ्घाधिपत्यतिलकम्, विदधाति सङ्घपूजामहम्, मार्गे च सम्यक् सङ्घसंभावनां कुर्वन् प्रतिग्रामं प्रतिपुरं च चैत्येषु स्नात्रपूजाध्वजप्रदानचैत्यपरिपाट्याद्यतुर्लोत्सवं जीर्णोद्धाराऽऽदिचिन्तां च विदधन् तीर्थं प्राप्नोति। तद्दर्शने च रत्नमौक्तिकाऽऽदिवर्द्धापनलपनेप्सितमोदकाऽऽदिलम्भनिकाऽऽदि कुरुते। तीर्थे चाष्टप्रकाराऽऽदिमहापूजाविधिस्नात्रमालोद्घाटनघृतधाराप्रदाननवाङ्गजिनपूजनदुकूलाऽऽदिमयमहाध्वजप्रदानरात्रिजागरणगीतनृत्याऽऽद्युत्सवकरणतीर्थोपवासषष्ठाऽऽदितपोविधानविविधफलभोज्याऽऽदिवस्तुढौकनपरिधापनिकामोचनविचित्रचन्द्रोदयबन्धनदीपतैलघृतधौतिकेलरचन्दनागुरुपुष्पचङ्गेरिकाऽऽदिसमस्तपूजोपकरणप्रदाननवदेवकुलिकाऽऽदिविधापनसूत्रधाराऽऽदिसत्करणतीर्थज्ञातकनिधारणतीर्थरक्षकसंमाननतीर्थदायप्रयत्नेनसाधर्मिकवात्सल्यगुरुसंघपरिधापनाऽऽदिभक्ति-मार्गणादीनाऽऽद्युचितदानाऽऽदिसत्कृत्यानि कुरुते। एवं यात्रां कृत्वा प्रौढप्रवेशोत्सवैः स्वगृहमागतो देवाऽऽद्यानाऽऽदिमहं विधाय सर्वसंघभोजनाऽऽदिसत्कारपूर्वकं विसर्जयेत् वर्षाऽऽदि यावत्तीर्थोपवासाऽऽदिकरणाऽऽदना दिनमाराधयति। इति तीर्थयात्राविधिः। यात्रा च कल्याणकदिवसेषु विशेषलाभकरी। यतः पञ्चाशके नवमविवरणे-

" ता रहणिक्खमणाइ वि, एते उ दिणे पमुच्च कायव्वं।
जं एसो च्चिय विसओ, पहाणमो तीर्थे किरियाए ॥ १ ॥"

तथा-

" संवच्छरचाउम्मा-सिएसु अट्ठाहियासु अ तिहीसु।
सव्वायरेण लग्गइ, जिणवरपूआतवगुणेसुं " ॥ १ ॥

इत्यागमप्रामाण्यादेष्वपि दिवसेषु विशेषलाभकरी ज्ञेया। यात्रायाश्च दर्शनशुद्ध्यङ्गत्वात्प्रयत्नः श्रेयानेव। यतः-

" दंसणमिह मोक्खंगं, परमं एयस्स अट्ठहाऽऽयारो।
निस्संकादी भणिओ, पभावणं तो जिणिंदेहिं ॥ १ ॥
पवरा पभावणा इह, असेसनाणम्मि तीर्थे सब्भावा।
जिणजत्ता य तयंगं, जं पवरं तप्पयासोऽयं" ॥ २ ॥

ध० २ अधि०। (तीर्थयात्रायां पापकर्मयोगो भवति न वेति विचारः ' आणा ' शब्दे द्वितीयभागे १२० पृष्ठे कृतः)

तित्थणिगार–तीर्थनिकार–पुं०। शासनसंकोचे, स्था०।

तथा चाहुराजीविकनयानुसारिणः-

" ज्ञानिनो धर्मतीर्थस्य, कर्तारः परमं पदम्।
गत्वाऽऽयच्छन्ति भूयोऽपि, भवं तीर्थनिकारतः ॥१॥ " स्था०।

केषाञ्चित्सत्यामपि कर्मक्षयानन्तरं मोक्षावाप्तौ तथाऽपि स्वतीर्थनिकारदर्शनतः पुनरपि संसाराऽभिगमनं भवतीदमाशङ्क्याऽऽह-

अकुव्वओ णवं णत्थि, कम्मं नाम विजाणइ।

(अकुव्वओ इत्यादि) तस्य अशेषक्रियारहितस्य योगप्रत्ययाभावात्किमप्यकुर्वतोऽपि, नवं प्रत्ययं, कर्म ज्ञानाऽऽवरणीयाऽऽदिकं, नास्ति न भवति,कारणाभावात्कार्याभाव इति कृत्वा,कर्माभावे च कुतः संसाराभिगमनम्,कर्मकार्यत्वात्संसारस्य,तस्य चोपरताशेषद्वन्द्वस्य स्वपरकल्पनाऽभावाद् रागद्वेषर-

हिततया स्वदर्शननिकाराभिनिवेशोऽपि न भवत्येव । सूत्र० १ श्रु० १५ अ० ।

तित्थपवत्तण-तीर्थप्रवर्तन-न० । तीर्थप्रवर्तने, उत्सर्पिणी-काले चरमतीर्थकृतस्तीर्थे कियत्कालं प्रवर्तिष्यतीति प्रश्ने, उत्तरम्-पञ्चमारके विंशतितमशतकेऽष्टमोद्देशे श्रीऋषभजिनकेवलपर्यायं यावदुत्सर्पिणीकाले चरमतीर्थकृतस्तीर्थे प्रवर्तिष्यतीत्युक्तमस्तीति । ४० प्र० । सेन० १ उल्ला० ।

तित्थपवत्तणचरित्तनिबद्ध-तीर्थप्रवर्तनचरित्रनिबद्ध-न० । नाट्यभेदे, रा० । श्रमणस्य भगवतो महावीरस्य चरमपूर्वमनुष्यभव-चरमच्यवन-चरमगर्भसंहरण-चरमभरतक्षेत्रावसर्पिणी-तीर्थङ्करजन्माऽभिषेक-चरमबालभाव-चरमयौवन-चरमकामभोग-चरमनिष्क्रमण-चरमतपश्चरण-चरमज्ञानोत्पाद-चरमतीर्थप्रवर्तन-चरमपरिनिर्वाणनिबद्धं चरमचरमनिबद्धं नाम द्वात्रिंशत्तमं नाट्यविधिमुपदर्शयति । रा० ।

तित्थपवित्तिहेउत्त-तीर्थप्रवृत्तिहेतुत्व-न० । तीर्थं चतुर्विधश्रमणसङ्घः प्रवचनं वा, तस्य प्रवृत्तिरविच्छेदेन स्थितिः, तस्या हेतुत्वं कारणत्वम् । तीर्थप्रवर्तकतायाम्, ध० ३ अधि० ।

तित्थभेय-तीर्थभेद-त्रि० । तीर्थानि तीर्थभूतदेवकुलादीनि भिनत्ति द्विधा करोति तद्द्रव्यमोषणाय तत्परिकरभेदनेनेति तीर्थभेदः । आ० १ श्रु० ३ अ० । तीर्थमोषके तस्करे, तीर्थं (भेद) मोचके, प्रश्न० ३ आश्र० द्वार ।

तित्थमट्टिया-तीर्थमृत्तिका-स्त्री० । तीर्थमृत्तिकायाम्, रा० ।

तित्थयर-तीर्थंकर-पुं० । तीर्यते भवोदधिरनेन अस्मात् अस्मिन्निति वा तीर्थं वक्ष्यमाणस्वरूपम्, तत्करणशीलः " कृञो हेतुताच्छील्या०-" ॥ ३ । २ । २० ॥ इत्यादिना (पाणि०) टप्रत्यये तीर्थंकरः । अर्हति, विशे० ।

(१) तीर्थंकरशब्दसिद्धिमाह-

अणुलोमहेउतच्छी-लया य जे जावतित्थमेयं तु ।
कुव्वंति पगासंति य, ते तित्थयरा हियत्थकरा ॥१०४७॥

हेतुताच्छील्यानुलोम्यतो ये भावतीर्थमेतत्कुर्वन्ति, गुणतः प्रकाशयन्ति च, ते तीर्थंकराः । तत्र हेतौ-सकलतीर्थंकरणहेतवः "कृञो हेतुताच्छील्याऽऽनुलोम्येषु" ॥ ३ । २ । २० ॥ इत्यादिना (पाणि०) टप्रत्ययविधानात्तीर्थंकराः । यथा यशस्करी विद्येत्यादि । ताच्छील्ये-कृतार्थाऽपि तीर्थंकरनामकर्मोदयतः समग्रप्राणिगणानुकम्पापरतया च सकलमेतीर्थदेशकत्वात्तीर्थंकराः, भरताऽऽदिकेऽत्रे प्रथमनरनाथकुलकराऽऽदिवदिति । आनुलोम्ये-स्त्री-पुरुषबालवृद्धस्थविरकल्पिकजिनकल्पिकाऽऽदीनामनुरूपोत्सर्गापवाददेशनया अनुलोमसकलतीर्थकरणात् तीर्थंकराः, यथावचनकर इत्यादि । एवंभूतास्तीर्थंकराः, अत एव सर्वासुमतां हितस्य मोक्षार्थस्य करणाद्धेतोस्तीर्थंकराः । (१०४७) विशे० । तीर्यते संसारसमुद्रोऽनेनेति तीर्थम् द्वादशाङ्गं प्रवचनं, तदाधारः संघो वा, तत्करणशीलास्तीर्थंकराः । बृ० २ उ० । तीर्थमुत्कलक्षणं, तत्कुर्वन्त्यानुलोम्येन हेतुत्वेन तच्छीलतया चेति तीर्थंकराः । आह च-"अणुलोमहेउतच्छी-लया य जे जावतित्थमेयं तु । कुव्वंति पगासंति य, ते तित्थयरा हियत्थकरा" ॥१०४७॥ (विशे०) इति । स्था० १ ठा० । तीर्यते संसारसमुद्रोऽनेनेति तीर्थं, तच्च प्रवचनाऽऽधारः चतुर्विधः सङ्घः, प्रथमगणधरो वा, तत्करणशीलास्तीर्थंकराः । ध० २ अधि० । रा० । जी० । तीर्थमेव धर्मः, तस्याऽऽदिकर्तारस्तीर्थंकराः, अथवा-तीर्थानामादिकर्तारस्तीर्थंकराः । तथा च प्रत्येकशः सुतीर्थानामादिकर्तारस्तीर्थंकराः । आ० चू० ५ अ० । सङ्घकरणशीलत्वाद् दुःखावतारदुःखोत्तारकपरमतीर्थंकरणशीलाः तीर्थंकराः । आ० म० १ अ० १ खण्ड ।

(२) तत्र च तीर्थंकरणशीलास्तीर्थंकरा अचिन्त्यप्रभावमहापुण्यसंक्रीतनामकर्मविपाकतः, तस्याऽन्यथा वेदनायोगात्, तत्रयेनेह जीवा जन्मजरामरणसलिलं मिथ्यादर्शनाविरतिगम्भीरं महाभीषणकषायपातालं सुदुर्लङ्घ्यमोहाऽऽवर्तरौद्रं विचित्रदुःखौघदुष्प्रापं रागद्वेषपवनविक्षोभितं संयोगवियोगवीचीयुक्तं प्रबलमनोरथवेलाऽऽकुलं सुदीर्घं संसारसागरं तरन्ति तत्तीर्थमिति, एतच्च यथावस्थितसकलजीवाऽऽदिपदार्थप्ररूपकम्, अत्यन्तानवद्यान्याविद्धातचरणकरणक्रियाधारं त्रैलोक्यगतशुद्धधर्मसंपद्युक्तमहासत्त्वाऽऽश्रयम्, अचिन्त्यशक्तिसमन्वितावितथवादिपरमर्षिप्रणीतत्वेन प्रकृष्टं प्रवचनं, सङ्घो वा, निराधारस्य प्रवचनस्य असंभवात् । उक्तं च-" तित्थं भंते ! तित्थं, तित्थगरे तित्थं ?। गोयमा ! अरहा ताव नियमा तित्थकरे, तित्थं पुण चाउवण्णो समणसंघो । " ततश्चैतदुक्तं भवति-घातिकर्मक्षये ज्ञानकैवल्ययोगात् तीर्थंकरनामकर्मोदयसत्तत्समन्वितया आदित्याऽऽदिप्रकाशनिदर्शनतः शास्त्रार्थप्रणयनाद्, मुक्तकैवल्ये तदसंभवेनाऽऽगमानुपपत्तेः, भव्यजनधर्मप्रवर्तकत्वेन परम्परानुग्रहकरास्तीर्थंकरा इति तीर्थंकरत्वसिद्धिः । (४) स्त्री० । तरन्ति येन संसारसागरमिति तीर्थं प्रवचनं, तदव्यतिरेकाच्चेह संघस्तीर्थम्, तत्करणशीलत्वात्तीर्थंकराः । ऋ० १ श० १ उ० । स्त्री० । नं० । " क-ग-च-ज-त-द-प-य-वां प्रायो लुक् " ॥८ । १ । १७७ ॥ इति कलोपः । प्रा० १ पाद । " अवर्णो यश्रुतिः " ॥ ८ । १ । १८० ॥ इत्यकारस्थाने यकारः । क्वचित्कस्य गः । प्रा० १ पाद । द्वादशाङ्गप्रणायकेषु जिनेषु, प्रश्न० ४ संव० द्वार । तीर्थमेव धर्मः, तस्याऽऽदिकर्तारस्तीर्थंकराः, स्वतीर्थानामादिकर्तारः तीर्थंकराः । आ० चू० १ अ० । सप्त० । दर्श० । (तीर्थकृतामतिशयाः 'अइसेस' शब्दे प्रथमभागे ३१ पृष्ठे उक्ताः) (जिनानां परस्परं मोक्षान्मोक्षस्यान्तराणि प्रथमभागे 'अंतर' शब्दे ६६ पृष्ठे निरूपितानि)

(३) तीर्थकृतामचेलत्वे संयमविराधनाऽऽदयो दोषाः कथं न भवन्ति ?, इत्यत्राऽऽह-

निरुपमधिइसंघयणा, चउनाणाऽइसयसत्तसंपन्ना ।
अच्छिद्दपाणिपत्ता, जिणा जियपरीसहा सव्वे ॥९५८१॥
तम्हा बहुत्तदोसे, पावंति न वत्थपत्तरहिया वि ।
तदसाहणं ति तेसिं, तो तग्गहणं न कुव्वंति ॥९५८२॥
तह वि गहिएगवत्था, सवत्थतित्थोवएसणत्थं ति ।
अजिनिक्खमंति सव्वे, तम्मि चुएऽचेलया होंति ।२५८३।

यस्माज्जिनास्तीर्थंकराः सर्वेऽपि निरुपमधृतिसंहननाद्यतिशयवन्तश्चतुर्ज्ञानाः, अतिशयसत्त्वसंपन्नाः, तथा-अच्छिद्रः पाणिरेव पात्रं येषां ते अच्छिद्रपाणिपात्राः, जितसमस्तपरीषहाश्च । (तस्मादिति) तस्माद् वस्त्राभावे ये संयमविराधनाऽऽदयो दोषाः प्रोक्तास्तान् यथोक्तान् दोषान् ते वस्त्रपात्ररहिता अपि न प्राप्नुवन्ति, इत्यतस्तद्ग्रहाऽऽदिकं न साधनम्-न साधकं संयमस्य तेषां तीर्थंकराणाम् । (तो त्ति) तस्माद्यत्किञ्चित्करत्वात् तस्याऽऽग्रहं तत्सं-

वस्त्रस्यानुपकारिणो वस्त्राऽऽदेर्ग्रहणं न कुर्वन्ति तीर्थंकरा इति । ननु यदि ते वस्त्राऽऽदेर्ग्रहणं न कुर्वन्तीत्युच्यते, तर्हि "सव्वे वि एगदूसे-ण निग्गया"(१०२२) इत्यादि विरुध्यते,इत्याशङ्क्याऽऽह-(तह वीरेत्यादि) यद्यपि तत्संयमस्यानुपकारि वस्त्रम्,तथाऽपि सवस्त्रमेव तीर्थं " सवस्त्रा एव साधवस्तीर्थे चिरं भविष्यन्ति " इत्यस्यार्थस्योपदेशनं ज्ञापनं तदर्थं गृहीतैकवस्त्राः सर्वेऽपि तीर्थकृतोऽभिनिष्क्रामन्तीति । तस्मिंश्च वस्त्रे च्युते क्वापि पतिते अचेलका वस्त्ररहितास्ते भवन्ति, न पुनः सर्वदा । ततः "अचेलकाश्च जिनेन्द्राः" इत्यैकान्तिकं यदुक्तम्, तदपवादोऽभिप्रायसूचकमेवेति भावः ॥ २५८/१॥२५८२॥२५८३ ॥ विशे० । (एतद्भव्यत् ' अचेलग ' शब्दे प्रथमभागे १८८ पृष्ठे गतम्) (तीर्थंकरविषयकमाद्यर्थम् ' अचेल ' शब्दे प्रथमभागे २०० पृष्ठे गतम्) (तीर्थकृतामवस्थितसमाचारत्वम् 'अट्ठियकप्प' शब्दे प्रथमभागे २५५ पृष्ठे गतम्)

(४) अनुत्तरोपपातिकमुनयः-

बावीससहस्स नवसय, उसहस्स अणुत्तरोववाइमुणी ।
नेमिस्स सोल पास-स्स वार वीरस्स अट्ठसया ॥२६६॥
ते सेसाणपणाया, (२७०) ॥

ऋषभस्य जिनस्य द्वाविंशतिसहस्राणि, तदुपरि नवशतानि २२९०० । नेमिनाथस्य षोडशशतानि १६०० । पार्श्वजिनस्य द्वादशशतानि १२०० । ज्ञातनन्दनस्य वीरस्य अष्टौ शतानि ८०० ज्ञेयाः । निश्शेषजिनानां ते च सिद्धान्ताऽऽदिपदकरणाद्योक्ताः ॥ सप्त० १२३ द्वार ।

(५) तीर्थपानामष्टादश दोषा इमे न भवन्ति-

पंचेव अंतराया, मिच्छत्तमनाणमविरई कामो ।
हासछग रागदोसा, निद्दाऽट्ठारस इमे दोसा ॥ २७२ ॥

पञ्चान्तरायाः-दान १ लाभ २ वीर्य ३ भोगो-पभोगविषयाः ५; मिथ्यात्वम् ६ अज्ञानम् ७ अविरतिः ८ कामो नोमेच्छा ९; हास्यम् १० रतिः ११ अरतिः १२ शोकः १३ भयं १४ जुगुप्सा १५; रागः १६ द्वेषः १७ निद्रा १८ चैते दोषाः ॥ सप्त०९५ द्वार ।

प्रकारान्तरेणाप्यष्टादश दोषानाह-

हिंसाऽऽइतिगं कीला, हासाऽऽइपंचगं च चउकसाया ।
पयमज्झरअन्नाणा, निद्दा पिम्मं इअ व दोसा ॥१६३॥

हिंसा १ मृषावादः २ अदत्तादानं ३; क्रीडा ४, हास्यं ५ रतिः ६ अरतिः ७ शोकः ८ भयं ९; क्रोधः १० मानः ११ माया १२ लोभः १३; मदः १४ मत्सरः १५ अज्ञानम् १६, निद्रा १७ प्रेम १८ इति वा दोषाः, एभी रहितास्तीर्थंकराः॥ सप्त०९६ द्वार ।

(६) अभिग्रहाः-

तेसिं अभिग्गहा द-व्वमाइ वीरस्सिमे अहिया ॥ (१७०)
अचियत्तगिहाऽऽसणं, निच्चं वोसट्ठकाएँ मोणेणं ।
पाणीपत्तं गिहिऽवं-दणं अभिग्गहपणगमेयं ॥ १७१ ॥

तेषां चतुर्विंशतिजिनानां बहवोऽभिग्रहा द्रव्यक्षेत्रकालभावभेदभिन्ना ज्ञेयाः । वीरजिनस्य इमे वक्ष्यमाणा अधिका भवन्ति । तानाह-अप्रीतिमद्गृहे मया वासो न कार्यः १, नित्यं मया व्युत्सृष्टकायेन स्थितव्यम् २, मौनेन स्थेयम ३, करपात्रेण मया भोक्तव्यम् ४, गृहिवन्दनं गृहस्थविनयोऽन्युत्थानाऽऽदिर्न कार्यः ५ । एते पञ्च वीरस्याधिका अभिग्रहाः ॥ सप्त० ७२ द्वार । आ० म० । कल्प० ।

(७) आदेशसंख्या-

अंगाइसू अवच्चा, नाणीहिँ पयासिया य जे ते य ।
आएसा वीरस्स य, पंचसया ऽऽहेगहऽभेसिं ॥ २७१ ॥
कुरुमकुरुदाण नरओ, वीरंगुट्ठेण चालिओ मेरू ।
तह मरुदेवी सिद्धा, अणंतं थावरा होउं ॥ २७२ ॥
वलयागारं मोत्तुं, सयंभूरमणम्मि सव्वआगारो ।
मीणपउमाण एवं, बहुहाऽऽएसा मुअअवच्चा ॥२७३॥

अङ्गोपाङ्गाऽऽदिसूत्रेष्वबद्धा न ग्रथिता ये भावाः पदार्थाः, ज्ञानिभिः प्रकाशिताश्च ते ज्ञादेशा उच्यन्ते; ते च श्रीवीरस्य पञ्चशतानि भवन्ति । अन्येषां जिनानां त्रयोविंशतिमितानामनेकधा । के ते आदेशा इत्याशङ्क्याह कांश्चिदादेशान् दर्शयति । यथा-कुरुटाकुरुटयोर्नरकगतिः १ । तथा वीरेण अङ्गुष्ठेन मेरुपर्वतश्चालितः २ । तथा मरुदेवी ऋषभजननी अनादिवनस्पतिरूपं उद्धृत्य मोक्षं गता, सा हि अनन्तकायादागत्य प्रत्येकभवे कदलीवनस्पतिरूपेण समुत्पद्य ततो मृत्वा मरुदेवी जाता । ततश्चान्तकृत्केवलीभूय सिद्धा ३ । तथा वलयाऽऽकारं मुक्त्वा स्वयंभूरमणसमुद्रे मत्स्यानां कमठानां च सर्वेऽप्याकारा भवन्ति ४ । इत्याद्यादेशाः सूत्रेऽबद्धाः । एवमन्येऽपि विज्ञेयाः ॥ सप्त० १२६ द्वार । आव० । आ० चू० । आव० ।

(८) षडावश्यकम-

सामइयचउविसत्थय-वंदणपडिकमणकाउसग्गा य ।
पच्चक्खाणं नाणियं, जिणेहिँ आवस्सयं बुद्धा ॥२७२॥
तं दुएह सइ दुकालं, इयराणं कारणे इओ मुणिणो ।
पढमियरवीरतित्थे, रिउजम-रिउपन्न-वक्कजमा ॥२७३॥

सामायिकचतुर्विंशतिस्तवचन्दनकप्रतिक्रमणकायोत्सर्गरूपं षडावश्यकं प्रथमान्तिमजिनयोस्तीर्थे सन्ध्यासमये च प्रतिदिनं द्विवारं भवति, ऋजुजडवक्रजडत्वान्मुनीनाम्, इतरेषां चाविंशतिजिनां तीर्थे कारणे प्रतिक्रमणं भवति, मुनीनामृजुप्राज्ञत्वात् ॥ सप्त० १३८ द्वार । वृ० । कल्प० ।

(९) आहारः-

सव्वे सिसुणो अमयं, उत्तरकुरुफले गिहे उसहो ।
सेसाउ ओयणाई, भुंजिंसु विसिट्ठमाहारं ॥ १३४ ॥

सर्वे जिना बाल्यावस्थायां वर्तमाना अमृतमहगुष्ठ्यस्तं बुभुजिरे, ऋषभ उत्तरकुरूद्भवानि फलानि गृहवासे बुभुजे,त्रयोविंशतिजिना गृहवासे शाल्यादिमनोज्ञाऽऽहारं बुभुजिरे, व्रतग्रहणे कृते सति सर्वे तीर्थपा उक्ताऽऽदिदोषरहितमाहारं कृतवन्तः ॥ सप्त० ७२ द्वार । आ० चू० । आव० । वृ० ।

(१०) जन्मावसरे इन्द्रकृत्यान्याह-

तत्र शक्रस्याऽऽसनचलना-

तए णं तस्स सक्कस्स देविंदस्स देवरण्णो आसणं चलइ । तए णं से सक्के०जाव आसणं चलियं पासइ, पासइत्ता ओहिं पउंजइ, पउंजित्ता भगवं तित्थयरं ओहिणा आभोएइ,आभोएइत्ता हट्ठतुट्ठचित्ते आणंदिए पीइमणे परमसोमणस्सिए हरिसवसविसप्पमाणहियए धाराहयकयंबकुसुमचंचमाल इ-

व ऊससिअरोमकूवे विअसिअवरकमलनयणवयणे पचलिअवरकडगतुडिअकेऊरमउडकुंडलहारविराइयवत्थे पालंबपलंबमाणघोलंतभूसणधरे ससंभमं तुरिअं चवलं सुरिंदे सीहासणाओ अब्भुट्ठेइ, अब्भुट्ठेइत्ता पायपीढाओ पच्चोरुहइ, पच्चोरुहइत्ता वेरुलिअवरिट्ठरिट्ठअंजणनिउणोचिअमिसिमिसिंतमणिरयणमंडिआओ पाउयाओ ओमुअइ, ओमुअइत्ता एगसाडिअं उत्तरासंगं करेइ, करेइत्ता अंजलिमउलिअग्गहत्थे तित्थयराभिमुहे सत्तट्ठपयाइं अणुगच्छइ, अणुगच्छित्ता वामं जाणुं अंचेइ, अंचेइत्ता दाहिणजाणुं धरणितलंसि साहट्टु तिक्खुत्तो मुद्धाणं धरणितलंसि निवेसइ, निवेसित्ता ईसिं पच्चुन्नमइ, पच्चुन्नमइत्ता कडगतुडिअथंभिआओ भुआओ साहरइ, साहरइत्ता करयलपरिग्गहिअं सिरसावत्तं मत्थए अंजलिं कट्टु एवं वयासी-णमोऽत्थु णं अरिहंताणं भगवंताणं आइगराणं तित्थयराणं सयंसंबुद्धाणं पुरिसुत्तमाणं पुरिससीहाणं पुरिसवरपुंडरीआणं पुरिसवरगंधहत्थीणं लोउत्तमाणं लोगनाहाणं लोगहिआणं लोगपईवाणं लोगपज्जोअगराणं अभयदयाणं चक्खुदयाणं मग्गदयाणं सरणदयाणं जीवदयाणं बोहिदयाणं धम्मदयाणं धम्मदेसयाणं धम्मनायगाणं धम्मसारहीणं धम्मवरचाउरंतचक्कवट्टीणं दीवो ताणं सरणं गई पइट्ठा अप्पडिहयवरनाणदंसणधराणं विअट्टछउमाणं जिणाणं जावयाणं तिण्णाणं तारयाणं बुद्धाणं बोहयाणं मुत्ताणं मोअगाणं सव्वन्नूणं सव्वदरिसीणं सिवमयलमरुअमणंतमक्खयमव्वाबाहमपुणरावित्ति सिद्धिगइनामधेयं ठाणं संपत्ताणं नमो जिणाणं जिअभयाणं णमोऽत्थु णं भगवओ तित्थगरस्स आइगरस्स०जाव संपाविउकामस्स वंदामि णं भगवं! तं तत्थगयं इहगए,पासउ मे भयवं! तत्थगए इहगयं ति कट्टु वंदइ, वंदित्ता सीहासणवरंसि पुरत्थाभिमुहे सन्निसण्णे। तए णं तस्स सक्कस्स देविंदस्स देवरण्णो अयमेयारूवे०जाव संकप्पे समुप्पज्जित्था-उप्पण्णे खलु भो! जंबुद्दीवे दीवे भगवं तित्थयरे,तं जीयमेयं तीअपच्चुप्पण्णमणागयाणं सक्काणं देविंदाणं देवराईणं तित्थयराणं जम्मणमहिमं करेत्तए, तं गच्छामि णं अहं पि भगवओ तित्थगरस्स जम्मणमहिमं करेमि त्ति कट्टु एवं संपेहेइ, संपेहेइत्ता हरिणेगमेसिं पायत्ताणीयाहिवइं देवं सद्दावेइ, सद्दावेइत्ता एवं वयासी-खिप्पामेव भो देवाणुप्पिआ! सभाए सुहम्माए मेघोघरसिअगंभीरमहुरयरसद्दं जोअणपरिमंडलं सुघोसं सुस्सरं घंटं तिक्खुत्तो उल्लालेमाणा उल्लालेमाणा महया महया सद्देणं उग्घोसेमाणे उग्घोसेमाणे एवं वयाहि-आणवइ णं भो! सक्के देविंदे देवराया-" गच्छइ णं भो ! सक्के देविंदे देवराया जंबुद्दीवे दीवे भगवओ तित्थयरस्स जम्मणमहिमं करित्तए; तं तुब्भे वि णं देवाणुप्पिआ! सव्विड्ढीए सव्वजुईए सव्वबलेणं समुदएणं सव्वायरेणं सव्वविभूईए सव्वविभूसाए सव्वसंभमेणं सव्वणाडएहिं सव्वारोहेहिं सव्वपुप्फगंधमल्लालंकारविभूसाए सव्वदिव्वतुडिअसद्दसन्निणाएणं महया इड्ढीए०जाव रवेणं णियगपरिवारसंपरिवुडा सगाइं २ जाणविमाणवाहणाइं दुरूढा समाणा अकालपरिहीणं चेव सक्कस्स० जाव अंतिअं पाउब्भवह "।

(११) आदेशानन्तरं ' हरिनैगमेषी ' यत्करोति तदाह-

तए णं से हरिणेगमेसी देवे पायत्ताणीयाहिवई सक्केणं देविंदेणं देवरण्णा एवं वुत्ते समाणे हट्ठतुट्ठ०जाव एवं देवो! त्ति आणाए विणएणं वयणं पडिसुणेइ, पडिसुणेइत्ता सक्कस्स अंतियाओ पडिणिक्खमइ, पडिणिक्खमइत्ता जेणेव सभाए सुहम्माए मेघोघरसिअगंभीरमहुरयरसद्दा जोअणपरिमंडला सुघोसा घंटा, तेणेव उवागच्छइ,उवागच्छइत्ता तं मेघोघरसिअगंभीरमहुरयरसद्दं जोअणपरिमंडलं सुघोसं घंटं तिक्खुत्तो उल्लालेइ।

(१२) घण्टास्वरेण यदभूत्तदाह--

तए णं तीसे मेघोघरसिअगंभीरमहुरयरसद्दाए जोअणपरिमंडलाए सुघोसाए घंटाए तिक्खुत्तो उल्लालिआए समाणीए सोहम्मे कप्पे अणेगेहिं एगूणेहिं बत्तीसविमाणवाससयसहस्सेहिं अद्धाइं एगूणाइं बत्तीसं घंटासयसहस्साइं जमगसमगं कणकणारावं काउं पयत्ताइं पि हुत्था।

उल्लालनानन्तरं यदजायत तदाह-(तए णं तीसे मेघोघरसिअगंभीरमहुर इत्यादि) ततः उल्लालनानन्तरं तस्यां मेघोघरसितगम्भीरमधुरतरशब्दायां योजनपरिमण्डलायां सुघोषायां घण्टायां त्रिःकृत्व उल्लालितायां सत्यां सौधर्मे कल्पे अन्येषु एकोनेषु द्वात्रिंशद्विमानरूपा ये आवासा देवावासस्थानानि तेषां शतसहस्रेषु । अत्र सप्तम्यर्थे तृतीया । अन्यान्येकोनानि द्वात्रिंशद् घण्टाशतसहस्राणि (जमगसमगं) युगपत् कणकणारावं कर्तुं प्रवृत्तान्यप्यभवन् । अत्रापिशब्दो भिन्नक्रमत्वात् घण्टाशतसहस्राण्यपि इत्येवं योजनीयः ।

(१३) अथ घण्टानादतो यत् प्रवृत्तं तदाह-

तए णं सोहम्मे कप्पे पासायविमाणनिक्खुडाऽऽवमिअसद्दघंटापडिसुआसयसहस्ससंकुले जाए यावि होत्था ॥

(तए णमित्यादि) ततो घण्टानां कणकणारावप्रवृत्तेरनन्तरं सौधर्मः कल्पः प्रासादानां विमानानां वा ये निष्कुटा गम्भीरप्रदेशाः, तेषु ये आपतिताः संप्राप्ताः शब्दाः शब्दवर्गणापुद्गलाः, तेभ्यः समुत्थितानि यानि घण्टाप्रतिकुलानां घण्टासंबन्धिप्रतिशब्दानां शतसहस्राणि तैः संकुलो जातश्चाप्यभूत् ।

किमुक्तं भवति?-घण्टायां महता प्रयत्नेन ताडितायां ये विनिर्गताः शब्दपुद्गलाः, तत्प्रतियातवशतः सर्वासु दिक्षु विदिक्षु च दिव्यानुभावतः समुच्छलितैः प्रतिशब्दैः सकलोऽपि सौधर्मः कल्पो बधिर उपजायत इति । एतेन द्वादशयोजनेभ्यः समागतशब्दः श्रोत्रग्राह्यो भवति, न परतः, ततः कथमेकत्र ताडितायां घण्टायां सर्वत्र तच्छब्दश्रुतिरुपजायत इति यदुच्यते, तदप्राकृतमेवावसेयम्, सर्वत्र दिव्यानुभावतस्तथारूपशब्दोच्छलने यथोक्तदोषासंभवात् ।

(१४) देवाश्चिन्तयन्ति-एवं शब्दमये सौधर्मे कल्पे संजाते पदातिपतिर्यदकरोत्तदाह-

तए णं तेसिं सोहम्मकप्पवासीणं बहूणं देवाणं य देवीणं य एगंतरइपसत्ताणं जाव विसयसुहमुच्छियाणं सुस्सरघंटारसिअविउलबोलतुरिअचवलपमिबोहए कए समाणे घोसणकोऊहलदिण्णकण्णएगग्गचित्तउवउत्तमाणसाणं से पायत्ताणीआहिवई देवे तंसि घंटारवंसि निसंतपसंतंसि समंसि तत्थ तत्थ तहिं तहिं देसे महया महया सद्देणं उग्घोसेमाणे उग्घोसेमाणे एवं वयासी-हंत! सुणंतु णं भवंतो बहवो सोहम्मकप्पवासी वेमाणिआ देवा देवीओ अ सोहम्मकप्पवइणो इमो वयणं, हिअसुहत्थं आणवेइ णं भो! सक्के, तं चेव० जाव अंतिअं पाउब्भवह ॥

(तए णमित्यादि) ततः शब्दव्याप्त्यनन्तरं तेषां सौधर्मकल्पवासिनां बहूनां वैमानिकानां देवानां देवीनां च, एकान्ते रतौ रमणे प्रसक्ता आसक्ताः, अत एव नित्यप्रमत्ता विषयसुखेषु मूर्छिता अध्युपपन्नाः । ततः पदत्रयस्य पदद्वयमीक्षनेन कर्मधारयः। तेषां,सुस्वरा या 'षड्भिरर्थन्यायेन' सुघोषा घण्टा, तस्या रसितं, तस्माद्विपुलः सकलसौधर्मदेवलोककुक्षिम्भरिः—यो बोलः कोलाहलः, तेन । अत्र तृतीयालोपः प्राकृतत्वात् । त्वरितं शीघ्रं चपले ससंभ्रमे प्रतिबोधने कृते सति आगामिकालसंज्ञाव्यमाने घोषणे कुतूहलेन-किमिदानीमुद्घोषणं भविष्यतीत्यात्मकेन, दत्तौ कर्णौ यैस्तैस्तथा । एकाग्रं घोषणश्रवणैकविषयं चित्तं येषां ते तथा । एकाग्रचित्तत्वेऽपि कदाचिन्नोपयोगः स्याच्छ्रान्त्यवस्थावशादत आह-उपयुक्तमानसाः शुश्रूषितवस्तुग्रहणपटुमनसः। ततो विशेषणसमासः। तेषाम्। स पदात्यनीकाधिपतिर्देवस्तस्मिन् घण्टारवे नितरां शान्तोऽत्यन्तं मन्दभूतः,ततः प्रकर्षेण सर्वात्मना शान्तः प्रशान्तः । ततस्तृतीयप्रकृत इत्यादाविव विशेषणसमासः । तस्मिन् सति तत्र तत्र तस्मिन् २ देशे महता महता शब्देन तारस्वरेण उद्घोषयन् उद्घोषयन् एवमवादीत्। किमवादीदित्याह-(हंत! सुणंतु णमित्यादि) हन्त! इति हर्षे, स च स्वस्वामिनाऽऽदिष्टत्वाद् जगद्गुरुजन्ममहकरणार्थंप्रस्थाने समारम्भाच्च भूयस्त्वं भवन्तो बहवः सौधर्मकल्पवासिनो वैमानिका देवा देव्यश्च सौधर्मकल्पपतेरिदं वचनं, हितं जन्मान्तरकल्याणाऽऽवहं, सुखं तद्भवसंबन्धि तदर्थमाज्ञापयति भो देवाः! शक्रः, तदेव ज्ञेयं यत् प्राक्सूत्रे शक्रेण हरिनैगमेषिपुर उद्घोषयितव्यमादिष्टं, यावत् प्रादुर्भवत ।

(१५) अथ शक्राऽऽदेशानन्तरं यदेव जातं तदाह-

तए णं ते देवा य देवीओ य एअमट्ठं सोच्चा हट्ठतुट्ठ० जाव हिअया अप्पेगइआ वंदणवत्तिअं, एवं पूअणवत्तिअं, सक्कारवत्तिअं, सम्माणवत्तिअं, दंसणवत्तिअं, कोऊहलवत्तिअं, अप्पेगइआ सक्कस्स वयणमनुवट्टमाणा, अप्पेगइआ अप्पमप्पं मित्तमणुवट्टमाणा अप्पेगइया जीअमेयं एवमादि त्ति कट्टु० जाव पाउब्भवंति ॥

(तए णमित्यादि) ततस्ते देवा देव्यश्च एतमनन्तरोदितमर्थं श्रुत्वा हृष्टतुष्टा यावद्धर्षवशविसर्पद्धृदयाः। अपिः संभावनायाम्, एककाः केचन वन्दनमभिवादनं प्रशस्तकायवाङ्मनःप्रवृत्तिरूपं तत्प्रत्ययं तदस्मान्निखिभुवनभट्टारकस्य कर्त्तव्यमित्येवं निमित्तम् । एवं पूजनप्रत्ययं-पूजनं गन्धमाल्याऽऽदिभिः समभ्यर्चनम् । एवं सत्कारप्रत्ययं-सत्कारः स्तुत्यादिभिर्गुणोद्भावनकरणम् । संमानो मानसप्रीतिविशेषः, तत्प्रत्ययं; दर्शनमदृष्टपूर्वस्य जिनस्य विलोकनं तत्प्रत्ययं,कुतूहलं तत्र यत्नेनास्मत्प्रभुणार्किं कर्त्तव्यमित्यात्मकम्,तत्प्रत्ययम्,अप्येककाः शक्रस्य वचनमनुवर्त्तमानाः, नहि प्रभुवचनमुपेक्षणीयमिति भृत्यधर्ममनुश्रयन्तः।अप्येककाः अन्यमन्यं मित्रमनुवर्त्तमानाः,मित्रगमनानुप्रवृत्ता इत्यर्थः । अप्येककाः जीतमेतद् यत् सम्यग्दृष्टिदेवैर्जिनजन्ममहे यतनीयम् । एवमादीत्यादिकमागमननिमित्तमिति कृत्वा चित्तेऽवधार्य, यावच्छब्दात् "अकालपरिहीणं चेव सक्कस्स देविंदस्स देवरण्णो" इति ग्राह्यम् । अन्तिकं प्रादुर्भवन्ति ।

(१६) इन्द्रः पालकमादिशति-अथ शक्रस्येतिकर्त्तव्यमाह-

तए णं से सक्के देविंदे देवराया ते वेमाणिए देवे अ देवीओ अ अकालपरिहीणं चेव अंतिअं पाउब्भवमाणे पासइ, पासइत्ता हट्ठे पालयं णामं आभिओगिअं देवं सद्दावेइ,सद्दावेइत्ता एवं वयासी-खिप्पामेव भो देवाणुप्पिया! अणेगखंभसयसण्णिविट्ठं लीलट्ठिअसालभंजिआकलिअं ईहामिअउसभतुरगणरमगरविहगवालगकिण्णररुरुसरभचमरकुंजरवणलयपउमलयभत्तिचित्तं खंभुग्गयवइरवेइआपरिगयाभिरामं विज्जाहरजमलजुअलजंतजुत्तं पिव अच्चीसहस्समालिणीअं रूवगसहस्सकलिअं भिसमाणं भिब्भिसमाणं चक्खुल्लोअणलेसं सुहफासं सस्सिरीअरूवं घंटावलिअमहुरमणहरसरं सुहकंतं दरिसणिज्जं णिउणोचिअमिसिमिसिंतमणिरयणघंटिआजालपरिक्खित्तं जोयणसहस्सवित्थिण्णं पंचजोअणसयमुव्विद्धं सिग्घतुरिअजइणं णिव्वाहिं दिव्वं जाणविमाणं विउव्वाहि,विउव्वाहित्ता एअमाणत्तिअं पच्चप्पिणाहि।

(तए णं इत्यादि) ततः स शक्रो देवेन्द्रो देवराजा तान् बहून वैमानिकान् देवान् देव्यश्च (अकालपरिहीणं चेवेति) पूर्ववत् । अन्तिकं प्रादुर्भवत उपतिष्ठमानान् पश्यति । दृष्ट्वा च-" हट्ठ " इत्येकदेशेन सर्वोऽपि हर्षोऽऽलापको ग्राह्यः। पालकं नाम विमानविकुर्वणाधिकारिणमाभियोगिकं देवं शब्दयति, शब्दयित्वा च एवमवादीत्। यदवादीत्तदाह-(खिप्पामेव त्ति) इदं यानविमानवर्णकं प्राग्वत् । नवरं योजनशतसहस्रावेस्तीर्णमित्यत्र प्रमाणाङ्गुलनिष्पन्नं योजनलक्षं ज्ञेयम् । ननु वैक्रियप्रयोगजनितत्वेनोत्सेधाङ्गुलनिष्पन्नत्वमप्यस्य कुतो नेति चेत्?," नगपुढविविमाणाइसु पमाणंगुलेण तु " इति वचनादस्य प्रमाणाङ्गुलनिष्पन्नत्वं युक्तिमद् ' पुढविविमाणाइ ' इति वचनं

शाश्वतविमानापेक्षयेति वाच्यम् । अन्योत्सेधाङ्गुलप्रमाणनिष्पन्नं चेद् जम्बूद्वीपान्तःसुखप्रवेशनीयत्वेन नन्दीश्वरविमानसंकोचनस्य वैयर्थ्याऽऽपत्तेः । तथा श्रीस्थानाङ्गे चतुर्थाध्ययने "चत्तारि लोगे समा पण्णत्ता । तं जहा-अप्पइट्ठाणे णरए जंबुद्दीवे दीवे पालए जाणविमाणे सव्वट्ठसिद्धे महाविमाणे ।" इत्यत्राऽपि पालकविमानस्य जम्बूद्वीपाऽऽदिभिः प्रमाणतः समत्वं प्रमाणाङ्गुलनिष्पन्नत्वेनैव संभवतीति दिक् । तथा-पञ्चशतयोजनोच्चं शीघ्रत्वरितजवनम्, अतिशयेन वेगवदित्यर्थः । निर्याहि प्रस्तुतकार्यनिर्वहणशीलम् । पश्चात् पूर्वपदेन कर्मधारयः । एवंविधं दिव्यं यानविमानं विकुर्वस्व, विकुर्व्य च एतामाज्ञप्तिं प्रत्यर्पय-कृतकृत्यो निवेदय इत्यर्थः ।

(१७) पालकस्तथैव करोति वर्णकयुक्तं विमानम्--

तदनु यदनुतिष्ठति स्म पालकस्तदाह-

तए णं से पालए देवे सक्केणं देविंदेणं देवरण्णा एवं वुत्ते समाणे हट्ठतुट्ठ० जाव वेउव्वियसमुग्घाएणं समोहणित्ता तहेव करेइ । तस्स णं दिव्वस्स जाणविमाणस्स तदेंतिओ तिसोवाणपडिरूवगा वण्णओ । तेसि णं पमिरूवगाणं पुरओ पत्तेअं पत्तेअं तोरणा वण्णओ० जाव पडिरूवा । तस्स णं जाणविमाणस्स अंतो बहुसमरमणिज्जे भूमिभागे, से जहाणामए आलिंगपुक्खरेइ वा० जाव दीविअचम्मेइ वा अणेगसंकुकीलकसहस्सवितते आवमपव्वावमसेढी सुत्थिअसोवत्थिअभद्दासणमच्छंडगमगरंडजारमारफुल्लावलिपउमपत्तसागरतरंगवसंतलयपउमलयभत्तिचित्तेहिं सच्छाएहिं सप्पभेहिं समरीईएहिं सउज्जोएहिं णाणाविहपंचवण्णेहिं मणीहिं उवसोभिए । तेसि णं मणीणं वण्णे गंधे फासे अ जाणिअव्वे, जहा रायप्पसेणइज्जे ॥

(तए णं से पालए देवे सक्केणमित्यादि) ततः स पालको देवः शक्रेण देवेन्द्रेण देवराज्ञा एवमुक्तः सन् हृष्टो यावद्वैक्रियसमुद्घातेन समवहत्य तथैव करोति, विमानं रचयतीत्यर्थः । अथ विमानस्वरूपवर्णनायाऽऽह-(तस्स णमित्यादि) इति सूत्रद्वयी व्यक्ता । अथ तद्भूमिभागं वर्णयन्नाह-(तस्स णं इत्यादि) इदं प्राग्वद् ज्ञेयम्, नवरं मणीनां वर्णो गन्धः स्पर्शश्च ज्ञातव्यो, यथा राजप्रश्नीये द्वितीयोपाङ्गे । अत्राऽपि जगतीपद्मवरवेदिकावर्णनं मणिवर्णाऽऽदयो व्याख्याताः, ततोऽपि वा बोधव्याः ।

(१८) भूमिभागवर्णनम्-अथ प्रेक्षागृहमण्डपवर्णनायाऽऽह-

तस्स णं भूमिभागस्स बहुमज्झदेसभाए पिच्छाघरमंडवे अणेगसंभसयसण्णिविट्ठवण्णओ० जाव पमिरूवे, तस्स उल्लोए पउमलयाभत्तिचित्ते० जाव सव्वतवणिज्जमए० जाव पमिरूवे ।

(' तस्स णमित्यादि) यावच्छब्दग्राह्यं, व्याख्या च यमकराजधानीगतसुधर्मासभाऽधिकारतो ज्ञेया । उपरिभागवर्णनायाऽऽह-(तस्स उल्लोए इत्यादि) तस्योल्लोच उपरिभागपद्मलताभक्तिचित्रः, यावत् सर्वात्मना तपनीयमयम, प्रथमयावच्छब्देन अशोकलताभक्तिचित्र इत्यादि परिग्रहः । द्वितीययावच्छब्दात् "दसणद्धे" इत्यादिविशेषणग्रहः । अत्र राजप्रश्नीये सूर्याभयानविमानवर्णकेऽक्षपाटकसूत्रं दृश्यते, परं बहुत्वेनत्सूत्राऽऽदर्शेषु अदृष्टत्वान्न लिखितम् ।

(१९) अथात्र मणिपीठिकावर्णनायाऽऽह-

तस्स णं मंडवस्स बहुसमरमणिज्जस्स भूमिभागस्स बहुमज्झदेसभागंसि महं एगा मणिपीढिया अट्ठजोअणाइं आयामविक्खंभेणं, चत्तारि जोअणाइं बाहल्लेणं, सव्वमणिमयी । वण्णओ । तीए उवरि महं एगे सिंहासणे । वण्णओ । तस्सुवरि महं एगे विजयदूसे सव्वरयणामए । वण्णओ । तस्स मज्झदेसभागे एगे वइरामए अंकुसे, एत्थ णं महं एगे कुंभिमुत्तादामे, से णं तदद्धुच्चत्तप्पमाणमित्तेहिं चउहिं अद्धकुंभिक्केहिं मुत्तादामेहिं सव्वओ समंता संपरिक्खित्ते । ते णं दामा तवणिज्जलंबूसगा सुवण्णपयरगमंडिआ णाणामणिरयणविविहहारऽद्धहारउवसोभिआ समुदया ईसिं अण्णमण्णं संपत्ता पुव्वाएहिं वाएहिं मंदं मंदं एइज्जमाणा एइज्जमाणा० जाव निव्वुइकरेणं ते पएसे आपूरेमाणा आपूरेमाणा० जाव अईव उवसोभेमाणा अईव उवसोभेमाणा चिट्ठंति ।

(तस्स णमित्यादि) व्यक्तम् । (तीए उवरि इत्यादि) एतद्व्याख्या विजयद्वारस्यप्रकटकप्रासादगतसिंहासनसूत्रवद्दर्शनीया । (तेणमित्यादि) इदं सूत्रं प्राक् पद्मवरवेदिकाजालवर्णके व्याख्यातमिति ततो बोध्यम् । अत्र प्रथमयावत्पदात्-" वेइज्जमाणा २ पलंबमाणा २ पज्जत्तमाणा २ उरालेणं मणुण्णेणं मणहरेणं कण्णमणणिव्वुइकरेणं " इति संग्रहः । द्वितीययावत्पदात्-" सिरीए" इति ग्राह्यम् ।

(२०) संप्रत्यत्राऽऽस्थानिवेशनप्रक्रियामाह--

तस्स णं सीहासणस्स अवरुत्तरेणं उत्तरेणं उत्तरपुरच्छिमेणं; एत्थ णं सक्कस्स चउरासीए सामाणिअसाहस्सीणं चउरासीइभद्दासणसाहस्सीओ, पुरच्छिमेणं अट्ठण्हं अग्गमहिसीणं, एवं दाहिणपुरच्छिमेणं अब्भंतरपरिसाए दुवालसण्हं देवसाहस्सीणं, दाहिणेणं मज्झिमाए परिसाए चउद्दसण्हं देवसाहस्सीणं, दाहिणपच्चत्थिमबाहिरपरिसाए सोलसण्हं देवसाहस्सीणं, पच्चत्थिमेणं सत्तण्हं अणीआहिवईणं; तए णं तस्स सीहासणस्स चउद्दिसिं चउण्हं चउरासीणं आयरक्खदेवसाहस्सीणं,एवमाइ विभासिअव्वं,सूरिआभगमेणं० जाव पच्चणुब्भवमाणे विहरइ ॥

(तस्स णं इत्यादि) तस्य सिंहासनस्य पालकविमानमध्यभागवर्तिनोऽपरोत्तरायां वायव्यामुत्तरस्याम्,उत्तरपूर्वायामैशान्याम्, अत्रान्तरे शक्रस्य चतुरशीतेः सामानिकसहस्राणां चतुरशीतिभद्रासनसहस्राणि, उक्तदिक्त्रये चतुरशीतिभद्रासनसहस्राणीत्यर्थः । पूर्वस्यां दिश्यष्टानामग्रमहिषीणामष्टभद्रासनानि । एवं दक्षिणपूर्वायामग्निकोणेऽभ्यन्तरपर्षदः संबन्धिनां द्वादशानां देवसहस्राणां द्वादश भद्रासनसहस्राणि, दक्षिणस्यां मध्यमा-

मः पर्वतश्चतुर्दशानां देवसहस्राणां चतुर्दश भद्रासनसहस्राणि, दक्षिणपश्चिमायां नैर्ऋतकोणे बाह्यपर्वतः षोडशानां देवसहस्राणां षोडश भद्रासनसहस्राणि, पश्चिमायां सप्तानामनीकाधिपतीनां सप्त भद्रासनानीति। (तए णमित्यादि) ततः प्रथमवलयस्थानानन्तरं द्वितीये वलये तस्य सिंहासनस्य चतुर्दिशि चतसृणां चतुरशीतीनां चतुर्गुणीकृतचतुरशीतिसंख्याकानाम्, आत्मरक्षकदेवसहस्राणां षट्त्रिंशत्सहस्राधिकलक्षत्रयमितानामात्मरक्षकदेवानामित्यर्थः। नावस्ति भद्रासनानि विकुर्वितानीत्यर्थः। एवमादिविभावितत्वमित्यादि वक्तव्यं, सूर्याभगमेन यावत्प्रत्यर्पयति। यावत्पदात् सङ्ग्रहायम्-" तस्स णं दिव्वस्स जाणविमाणस्स इमेयारूवे वण्णावासे पण्णत्ते। से जहाणामए आलिंगपुक्खरेइ वा मुरजमुखपिहणेइ वा आयंसमंडलेइ वा चंदमंडलेइ वा उरब्भचम्मेइ वा उसभचम्मेइ वा वराहचम्मेइ वा सीहचम्मेइ वा वग्घचम्मेइ वा विगचम्मेइ वा दीवियचम्मेइ वा अभिसेयदूसेइ वा आइणगसिलापट्टेइ वा सुमिणदंसणेइ वा आयंसमंडलगयवालसूरियस्स वा हेमंतियबालसूरियस्स वा आइक्खिगिलाण वा रत्तिं पज्जुलिआणं वा असोगवणस्स वा सत्तिवण्णवणस्स वा चंपगवणस्स वा चूअवणस्स वा पारिजायवणस्स वा सव्वओ समंता संकुसुमिअस्स भवे एयारूवे सिआ ?। णो इणट्ठे समट्ठे। तस्स णं दिव्वस्स जाणविमाणस्स इत्तो इट्ठतराए चेव० ४ भवे पण्णत्ते, गंधो फासो अ, जहा मणीणं। तओ णं से पालए देवे तं दिव्वं जाणविमाणं विउव्वित्ता जेणेव सक्के देविंदे देवराया तेणेव उवागच्छइ, उवागच्छित्ता सक्कं देविंदं देवरायं करयलपरिग्गहियं सिरसावत्तं मत्थए अंजलिं कट्टु जएणं विजएणं वद्धावेइ, वद्धावेत्ता तमाणत्तिअं।" इति।

अत्र व्याख्यातस्य दिव्यस्य यानविमानस्यायमेतद्रूपो वर्णकावासः प्रज्ञप्तः। स यथानामको ऽचिरोद्गतस्य तत्कालमुदितस्य हैमन्तिकस्य शिशिरकालसंबन्धिनो बालसूर्यस्य आदिराङ्कुराणां वा (रत्तिमिति) सप्तम्यर्थे द्वितीया। रात्रौ प्रज्वालितानां जपावनस्य किंशुकवनस्य वा, पारिजाताः कल्पद्रुमाः, तेषां वनस्य वा सर्वतः समन्तात् सम्यक् कुसुमितस्य। अत्र शिष्यः पृच्छति-भवेदेतद्रूपः स्यात् कथञ्चित् ?। सूरिराह-नायमर्थः समर्थः। तस्य दिव्यस्य यानविमानस्य इत इष्टतरक एव, किं तत् इष्टतरक इत्यादि प्राग्वत्। गन्धः, स्पर्शश्च यथा प्राग् मणीनामुक्तस्तथेति।

(२१) शक्रक्रिया-

तए णं से सक्के० जाव हिट्ठहिअए दिव्वं जिणिंदाभिगमणजोग्गं सव्वालंकारविभूसिअं उत्तरवेउव्विअं रूवं विउव्वइ, विउव्वइत्ता अट्ठहिं अग्गमहिसीहिं सपरिवाराहिं णट्टाणीएणं गंधव्वाणीएण य सद्धिं तं विमाणं अणुप्पयाहिणीकरेमाणे अणुप्पयाहिणीकरेमाणे पुव्विल्लेणं तिसोवाणेणं दुरूहइ, दुरूहइत्ता० जाव सीहासणंसि पुरत्थाभिमुहे सन्निसण्णे ॥

(तए णमित्यादि) ततः स शक्र इत्यादि व्यक्तं, दिव्यं प्रधानं, जिनेन्द्रस्य जगवतोऽभिगमनाय अभिमुखगमनाय, योग्यमुचितं बादरेण वपुषा सुरसमुदायसर्वातिशायिभीर्भवति, तादृशेनेत्यर्थः। सर्वालङ्कारविभूषितम्-सर्वैः शिरःश्रवणाऽग्रहस्तकादिभिर्विभूषितम्, उत्तरवैक्रियशरीरत्वात्। स्वाभाविकवैक्रियशरीरस्य तु आगमने निरलङ्कारतयैवोत्पादश्रवणात्। उत्तरभवधारणीयशरीरापेक्षया चोत्तरकालभाविवैक्रियरूपं विकुर्वते, विकुर्व्य चाष्टाग्रमहिषीभिः सपरिवाराभिः प्रत्येकं प्रत्येकं षोडशदेवीसहस्रपरिवृताभिर्नाट्यानीकेन गन्धर्वानीकेन च सार्द्धं तं विमानमनुप्रदक्षिणीकुर्वन् अनुप्रदक्षिणीकुर्वन् पूर्वदिक्कस्त्रिसोपानेनाऽऽरोहति, आरुह्य च। यावच्छब्दात्-"जेणेव सीहासणे तेणेव उवागच्छइ, उवागच्छइत्ता" इति ग्राह्यम्। सिंहासने पूर्वाभिमुखः सन्निषण्ण इति।

(२२) अथाऽऽत्मानं सामानिकाऽऽदिभिः यथा पूर्यते तथाऽऽह-

एवं चेव सामाणिया वि उत्तरेणं तिसोवाणेणं दुरूहित्ता पत्तेअं पत्तेअं पुव्वणत्थेसु भद्दासणेसु णिसीअंति, अवसेसा य देवा देवीओ अ दाहिणेल्लेणं तिसोवाणेणं दुरूहित्ता तहेव० जाव णिसीयंति ॥

" एवं चेव इत्यादि " व्यक्तम्। नवरम् अवशेषाभ्यन्तरपर्षदादयः।

(२३) प्रस्थापनाक्रमः-अथ प्रतिष्ठासोः शक्रस्य पुरः प्रस्थायिनां क्रममाह-

तए णं तस्स सक्कस्स तंसि दुरूढस्स इमेऽट्ठ मंगलगा पुरओ अहाणुपुव्वीए संपट्ठिआ। तयणंतरं च णं पुण्णकलसभिंगारदिव्वा य छत्तपडागा सचामरा दंसणरइअआलोअदरिसणिज्जा वाउद्धूअविजयवेजयंती अ समूसिआ गगणतलमणुलिहंती पुरओ अहाणुपुव्वीए संपत्थिआ। तयणंतरं च णं छत्तभिंगारं, तयणंतरं च णं वइरामयवट्टलट्ठसंठिअसुसिलिट्ठपरिघट्ठमट्ठसुपइट्ठिए विसिट्ठे अणेगवरपंचवण्णकुडभीसहस्सपरिमंडिआभिरामे वाउद्धूअविजयवेजयंतीपडागाछत्ताइच्छत्तकलिए तुंगे गयणयलमणुलिहंतसिहरे जोअणसहस्समूसिए महइ महालए महिंदज्झए पुरओ अहाणुपुव्वीए संपत्थिए। तयणंतरं च णं सरूवनेवत्थपरिकप्पिअसुसज्जा सव्वालंकारविभूसिआ पंचअणीआ पंचअणीआहिवइणो० जाव संपट्ठिआ। तयणंतरं च णं बहवे आभिओगिआ देवा य देवीओ अ सएहिं सएहिं विज्जवेहिं० जाव णिओगेहिं सक्कं देविंदं देवरायं पुरओ अ मग्गओ अ पासओ अ अहाणुपुव्वीए संपट्ठिआ। तयणंतरं च णं बहवे सोहम्मकप्पवासी देवा य देवीओ अ सव्विड्ढीए० जाव दुरूढा समाणा मग्गओ अ० जाव संपट्ठिआ। तए णं से सक्के ते पंचाणीअपरिक्खित्तेणं० जाव महिंदज्झएणं पुरओ पकड्ढिज्जमाणेणं चउरासीए सामाणिअ० जाव परिवुडे सव्विड्ढीए० जाव रवेणं सोहम्मकप्पस्स मज्झं मज्झेणं तं दिव्वं देवड्ढिं० जाव उवदंसेमाणे उवदंसेमाणे जेणेव सोहम्मकप्पस्स उत्तरिल्ले निज्जाणमग्गे, तेणेव उवागच्छइ, उवागच्छित्ता जोअणसयसाहस्सीएहिं विग्गहेहिं उवयमाणे उवयमाणे ताए उक्किट्ठाए० जाव देवगईए वीईवयमाणे वीईवयमाणे तिरियमसंखिज्जाणं दीवसमुद्दाणं मज्झं मज्झेणं जेणेव णंदीसरवरे दीवे जेणेव दाहिणपुरच्छिमिल्ले रइकरपव्वए तेणेव उवागच्छइ, एवं० जा चेव सूरिआभस्स वत्तव्वया, णवरं सक्काहिगारो वत्तव्वो,

०जाव तं दिव्वं देवड्डिं ०जाव दिव्वं जाणविमाणं पमिसाहरमाणे पडिसाहरमाणे०जाव जेणेव भगवओ तित्थयरस्स जम्मणणगरे जेणेव जगवओ तित्थयरस्स जम्मणभवणे, तेणेव उवागच्छति, उवागच्छतित्ता जगवओ तित्थयरस्स जम्मणभवणं तेणं दिव्वेणं जाणविमाणेणं तिक्खुत्तो आयाहिणं पयाहिणं करेइ, करेइत्ता भगवओ तित्थयरस्स जम्मणजवणस्स उत्तरपुरच्छिमे दिसीजागे चउरंगुलमसंपत्तं धरणितले तं दिव्वं जाणविमाणं ठवेइ, ठवेइत्ता अट्ठहिं अग्गमहिसीहिं अणीएहिं गंधव्वाणीएण य नट्टाणीएण य सद्धिं ताओ दिव्वाओ जाणविमाणाओ पुरच्छिमिल्लेणं तिसोवाणपडिरूवएणं पच्चोरुहइ । तए णं सक्कस्स देविंदस्स देवरण्णो चउरासीइं सामाणिअसाहस्सीओ जाणविमाणाओ उत्तरिल्लेणं तिसोवाणपडिरूवएणं पच्चोरुहंति, अवसेसा देवा य देवीओ अ ताओ दिव्वाओ जाणविमाणाओ दाहिणिल्लेणं तिसोवाणपडिरूवएणं पच्चोरुहंति ॥

(तए णं तस्स इत्यादि) एतद्व्याख्या भरतचक्रिणोऽयोध्याप्रवेशाधिकारतो ज्ञेया। (तयणमित्यादि) तदनन्तरं क्षुद्रभृङ्गारम्। समाहारादेकवद्भावः क्षुद्रं च "वेरुलिअमिसंतविमलदंडं" इत्यादिवर्णकयुक्तं भरतस्यायोध्याप्रवेशाधिकारतो ज्ञेयम्। भृङ्गारस्य विशिष्टवर्णकचित्रोपेतः पूर्वं न भृङ्गारस्य जलपूर्णत्वेन कथनात्, अयं च जलरिक्तत्वेन विवक्षित इति न पौनरुक्त्यम्। तदनन्तरं वज्रमयो रत्नमयः तथा वृत्तं वर्तुलं, लष्टं मनोज्ञं, संस्थितं संस्थानमाकारो यस्य स तथा। तथा-सुश्लेष्णोऽप्रावयवो, मसृण इत्यर्थः। परिघृष्टः खरशाणया पाषाणप्रतिमावत्। मृष्ट इव मृष्टः सुकुमारशाणया पाषाणप्रतिमेव; सुप्रतिष्ठितो, न तु तिर्यक्पतिततया वक्रः। तत एतेषां पदद्वयपदद्वयमीलनेन कर्मधारयः। अत एव शोभध्वजेभ्यो विशिष्टोऽतिशायी, जयाऽनेकानि वराणि पञ्चवर्णानि कुरुभानां क्षुद्रपताकानां सहस्राणि तैः परिमण्डितोऽवकृतः, स चासावभिरामश्चेति। वातोद्धूतेत्यादिविशेषणद्वयं व्यक्तम्। तथा गगनतलमभ्रतलमनुलिखत् संस्पृशत् शिखरमग्रभागो यस्य स तथा। योजनसहस्रमुच्छ्रितोऽत एवाह-(महइ महालए इति) अतिशयेन महान्, महेन्द्रध्वजः, पुरतो यथाऽनुपूर्व्या संप्रस्थित इति। (तयणमित्यादि) तदनन्तरं स्वकरूपं स्वकर्मानुसारि नेपथ्यं वेषः परिकथितः परिगृहीतो यैस्तानि। तथा (सुसज्जानि) पूर्णसामग्रीकतया प्रगुणानि सर्वालङ्कारविभूषितानि पञ्चानीकानि, पञ्चानीकाधिपतयश्च पुरतो यथानुपूर्व्या संप्रस्थितानि (तयणंतरं च णमित्यादि) तदनन्तरं बहवः आभियोगिका देवाश्च देव्यश्च स्वकैः २ विभवैर्यथास्वकर्मोपस्थितैर्विभवैः संपत्तिभिः, यावच्छब्दात्स्वकैः २ रूपैर्यथा स्वकर्मोपचितैरुत्तरवैक्रियस्वरूपैः, स्वकैः स्वकैः नियोगैरुपकरणैः शक्रं देवेन्द्रं देवराजं पुरतश्च मार्गतश्च पृष्ठतः पार्श्वतश्च उभयोर्यथानुपूर्व्या यथावृद्धक्रमेण संप्रस्थिताः। (तयणंतरं च णमित्यादि) तदनन्तरं बहवः सौधर्मकल्पवासिनो देवाश्च देव्यश्च सर्वर्द्ध्या, यावत्करणादिदमस्य दृश्यम्-सर्वद्युत्या सर्वबलेन सर्वसमुदयेन सर्वादरेण सर्वविभूषया सर्वविभूत्या सर्वविभूषया सर्वसंभ्रमेण सर्वपुष्पगन्धमाल्यालङ्कारेण सर्वत्रुटितशब्दसन्निनादेन महता ऋद्ध्या महता द्युत्या महता बलेन महता समुदयेन महता वरतूर्ययमकसमकप्रवादितेन शङ्खपणवपटहभेरीझल्लरीखरमुखीहुडुक्कमुरजमृदङ्गदुन्दुभिनिर्घोषनादितरवेण, इति ग्राह्यम्। परिवृतः सर्वर्द्ध्या, यावद्रवेण। यावत्करणात्-"सव्वजुईए" इत्यादि प्रागुक्तं ग्राह्यम्। सौधर्मस्य कल्पस्य मध्यं मध्येन तो दिव्यां देवर्द्धिं, यावच्छब्दात् "दिव्वं देवजुइं दिव्वं देवाणुभावं" इति ग्रहः। सौधर्मकल्पवासिनां देवानामुपदर्शयन् २ यत्रैव सौधर्मस्य कल्पस्योत्तरार्हो निर्याणमार्गो निर्गमनमार्गस्तेनैवोपागच्छति। यथा वरयिता नागराणां विवाहोत्सवस्फातिदर्शनार्थं राजपथे याति, नतु रथ्यादौ, तथाऽयमपि। एतेन समग्रदेवलोकाऽऽधारभूतपृथिवीप्रतिष्ठितविमाननिरुद्धमार्गत्वेनेतस्ततः संचरणाभावेन मध्यं मध्येनेति "उत्तरिल्लेणं णिज्जाणमग्गेणं" इत्युक्तमिति ये आहुः, ते आगमसांमुख्ययुक्तिसाङ्गत्यं च प्रष्टव्याः। उपागत्य च योजनशतसाहस्रिकैर्योजनतलक्षप्रमाणैर्विग्रहैः कर्मभिरिव गन्तव्यक्षेत्रातिक्रमरूपैः। एतेन स्थावरस्वरूपस्य विमानस्य पदन्यासरूपाः क्रमाः कथं भवेयुरिति शङ्का निरस्ता। अवपतन अवपतन् तया चोत्कृष्टया। यावत्करणात् "तुरियाए" इत्यादिग्रहः। देवगत्या व्यतिव्रजन् २ तिर्यगसंख्येयानां द्वीपसमुद्राणां मध्यं मध्येन यत्रैव नन्दीश्वरवरद्वीपो यत्रैव तस्यैव पूर्वत्वमध्यभागे दक्षिणपूर्वं आग्नेयकोणवर्ती रतिकरपर्वतस्तत्रैवोपागच्छति। इदं च स्थानाङ्गाऽऽद्याशयेनोक्तम्। अन्यथा प्रवचनसारोद्धाराऽऽदिषु पठ्यमानानां पूर्वाऽऽद्यञ्जनगिरिदिग्व्यवस्थितवापीद्वयबाह्यान्तराले बहिःकोणयोः प्रत्यासत्तौ प्रत्येकं द्वयरूपभावेन तिष्ठतामष्टानां रतिकरपर्वतानां मध्ये विनिर्गमनाविरहात् कतरो रतिकरपर्वतो दक्षिणपूर्वः स्यादिति। ननु सौधर्मादवतरतः शक्रस्य नन्दीश्वरद्वीप एवाऽवतरणं युक्तिमत्, न पुनरसंख्येयद्वीपसमुद्रातिक्रमेण तत्रागमनमित्युच्यते, निर्याणमार्गस्याऽसंख्याततमस्य द्वीपस्य वा समुद्रस्य वा उपरिस्थितत्वेन सम्भाव्यमानत्वात्तथाऽवतरणम्। ततश्च नन्दीश्वराभिगमनेऽसंख्यातद्वीपसमुद्रातिक्रमणं युक्तिमदेवेति। अत्र दृष्टान्तसूत्रम् (एवं०जा चेव सत्ति) एवमुक्तरीत्या चैव सूर्याभस्य वक्तव्यता, यथा सूर्याभः सौधर्मकल्पादवतीर्णस्तथाऽयमपीत्यर्थः। नवरमयं भेदः शक्राधिकारो वक्तव्यः, सौधर्मेन्द्रनाम्ना सर्वं वाच्यम्। (जाव तं दिव्वं) इत्यादि प्रायो व्यक्तं, नवरमत्र प्रथमयावच्छब्दो दृष्टान्तविषयीकृतसूर्याभाधिकारस्याविच्छेदसूचनार्थः। स चाद्यविमानप्रतिसंहरणपर्यन्तो वाच्यः। द्वितीययावच्छब्दो-"दिव्वं देवजुइं दिव्वं देवाणुभावं" इति पदद्वयग्राही। अस्य चायमर्थः-दिव्यां देवर्द्धिं परिवारसंपदं स्वविमानयोग्यसौधर्मकल्पवासिदेवविमानानां मेरौ प्रेषणात्, तथा दिव्यां देवद्युतिं शरीराऽऽभरणाऽऽदिदीप्त्या, तथा दिव्यं देवानुभावं देवगतिहस्ताऽऽदानेन, तथा दिव्यं यानविमानं पालकनामकं जम्बूद्वीपपरिमाणन्यूनविस्ताराऽऽयामकरणेन, प्रतिसंहरन् प्रतिसंहरन् संक्षिपन संक्षिपन्निति। तृतीययावच्छब्दात्-"जेणेव जंबुद्दीवे दीवे जेणेव भारहे वासे" इति ग्राहकः। ननु पूर्वं त्रिसोपानप्रतिरूपकेणोक्तम्, शक्रस्योक्तोऽपरार्धं केषा-

मुत्तार इत्याह-" तए णं सक्कस्स देविंदस्स देवरण्णो " इत्यादि व्यक्तम् ।

(२४) अथ शक्रः किमकार्षीदित्याह-

तए णं से सक्के देविंदे देवराया चउरासीए सामाणिअसाहस्सीएहिं०जाव सद्धिं संपरिवुडे सव्विड्ढीए०जाव दुंदुभिणिग्घोसणाइयरवेणं जेणेव भगवं तित्थयरमाया य, तेणेव उवागच्छइ, उवागच्छइत्ता आलोए चेव पणामं करेइ, करेइत्ता भगवं तित्थयरमायरं च आयाहिणं पयाहिणं करेइ, करेइत्ता करयल० जाव एवं वयासी-णमोऽत्थु ते रयणकुच्छिधारिए !, एवं जहा दिसाकुमारीओ० जाव धण्णा सि पुण्णा सि तं कयत्था सि अहं देवाणुप्पिए ! सक्के णामं देविंदे देवराया भगवओ तित्थयरस्स जम्मणमहिमं करिस्सामि, तेण तुब्भेहिं ण भीइव्वं ति कट्टु ओसोवणिं दलयइ, दलइत्ता तित्थयरपडिरूवगं विउव्वइ, विउव्वइत्ता तित्थयरमाउआए पासे ठवेइ, ठवेइत्ता पंचसक्के विउव्वइ, विउव्वित्ता एगे सक्के भगवं तित्थयरं करयलपुडेणं गिण्हइ,एगे सक्के पिट्ठओ आयवत्तं धरेइ,दुवे सक्का उभओ पासिं चमरुक्खेवं करेंति,एगे सक्के पुरओ वज्जपाणी पकड्ढइ।

" तए णं से सक्के देविंदे देवराया चउरासीए " इत्यादि कण्ठ्यम्। यावत्पदसंग्राह्यं तु पूर्वसूत्रानुसारेण बोध्यम् । यदवादीत्तदाह-(णमोऽत्थु ते इत्यादि) नमोऽस्तु तुभ्यं रत्नकुक्षिधारिके ! एवंप्रकारं सूत्रं,यथा दिक्कुमार्य आहुः,तथाऽवादीदित्यर्थः। यावच्छब्दादिदं ग्राह्यम्-" जगप्पईवदाईए चक्खुणो अमुत्तस्स सव्वजगज्जीववच्छलस्स हिअकरमग्गदेसियस्स वागिंदिविभुप्पहुस्स जिणस्स णाणिस्स नायगस्स बुद्धस्स बोहगस्स सव्वलोगणाहस्स सव्वलोगमंगलस्स णिम्ममस्स पवरकुलसमुप्पभवस्स आइक्खित्तिअस्स जंसि लोगुत्तमस्स जणणी ति।' कियत्पर्यन्तमित्याह-धन्याऽसि पुण्याऽसि त्वं कृतार्थाऽसि, अहं देवानुप्रिये ! शक्रो नाम देवेन्द्रो देवराजा भगवत्तस्तीर्थकरस्य जन्ममहिमां करिष्यामि। तेन युष्माभिर्न भेतव्यमितिकृत्वा अवस्वापिनीं ददाति, सुते मेरुं नीते सुतविरहाऽऽर्त्ता मा दुःखभागभूदिति दिव्यनिद्रया निद्राणां करोतीत्यर्थः। दत्त्वा च तीर्थकरस्य मेरुनेतव्यभगवतः प्रतिरूपकं जिनसदृशं रूपं विकुर्वति, अस्मासु मेरुगतेषु जन्ममहव्यापृतेष्वेषु आसन्नभुवनेश्वरतया कुतूहलाऽऽविना हृतनिद्रा सती माऽयं अस्ता भवत्विति भगवद्व्यापित्विशेषं रूपं विकुर्वतीत्यर्थः। विकुर्व्य च तीर्थकरमातुः पार्श्वे स्थापयति,स्थापयित्वा च पञ्च शक्रान् विकुर्वति, आत्मना पञ्चरूपो भवतीत्यर्थः। विकुर्व्य च तेषां पञ्चानां मध्ये एकः शक्रो भगवन्तं तीर्थकरं परमशुचिना सरसगोशीर्षचन्दनलिप्तेन, धूपवासितेनेति शेषः। करतलयोरूर्द्धयोर्व्यवस्थितयोः पुटं संपुटं, शुक्तिकासंपुटमित्येतदर्थः; तेन गृह्णाति । एकः शक्रः पृष्ठत आतपत्रं छत्रं धरति । द्वौ शक्रावुभयोः पार्श्वयोश्चमरोत्क्षेपं कुरुतः। एकः शक्रः पुरतो वज्रपाणिः सन् प्रकर्षयति-निर्गमयति, आत्मानमिति शेषः। अग्रतः प्रवर्त्तत इत्यर्थः। अत्र च सप्तापि सामानिकाऽऽदिदेवपरिवारे यदिन्द्रस्य स्वयमेव पञ्चरूपविकुर्वणं, तत् त्रिजगद्गुरोः परिपूर्णसेवाभिप्सुत्वेनेति ।

(२५) मेरुगमनम्-

अत्र यथा शक्रो विवक्षितस्थानमाप्नोति तथाऽऽह-

तए णं से सक्के देविंदे देवराया अण्णेहिं बहूहिं भवणवइवाणमंतरजोइसवेमाणिएहिं देवेहिं देवीहि अ सद्धिं संपरिवुडे सव्विड्ढीए० जाव ताए उक्किट्ठाए० जाव वीईवयमाणे वीईवयमाणे जेणेव मंदरे पव्वए जेणेव पंडगवणे जेणेव अभिसेअसिला जेणेव अभिसेअसीहासणे, तेणेव उवागच्छइ, उवागच्छइत्ता सीहासणवरगए पुरत्थाभिमुहे सण्णिसण्णे ।

(तए णं से सक्के इत्यादि) ततः स शक्रो देवेन्द्रो देवराजा अन्यैर्बहुभिर्भवनपतिवाणमन्तरज्योतिष्कवैमानिकैर्देवैर्देवीभिश्च सार्द्धं संपरिवृतः सर्वर्द्ध्या; यावत्करणात्-" सव्वजुईए " इत्यादिपदसंग्रहः पूर्वोक्तो ज्ञेयः । तयोत्कृष्टया । यावत्करणात्-" तुरिआए " इत्यादिग्रहः । व्यतिव्रजन् व्यतिव्रजन यत्रैव मन्दरपर्वतो यत्रैव च पण्डकवनं यत्रैव चाभिषेकशिला यत्रैव चाऽभिषेकसिंहासनं, तत्रैवोपागच्छति,उपागत्य च सिंहासनवरगतः पूर्वाभिमुखः (सण्णिसण्ण इति) पालकविमानं च गृहीतस्वामिकस्य स्वस्वामिनः पादचारित्वेन तमनुव्रजतां देवानामप्यनुपयोगित्वादभिषेकशिलायां यावदनुव्रजदभूदिति संज्ञाप्यते।

(२६) ईशानेन्द्रावसरः-

तेणं कालेणं तेणं समएणं ईसाणे देविंदे देवराया सूलपाणी वसहवाहणे सुरिंदे उत्तरड्ढलोगाहिवई अट्ठावीसविमाणावाससयसहस्साहिवई अरयंबरवत्थधरे एवं जहा सक्के, इमं णाणत्तं-महाघोसा घंटा, लहुपरक्कमो पायत्ताणीयाहिवई, पुप्फओ विमाणकारी, दाहिणिल्ले णिज्जाणभूमी, उत्तरपुरच्छिमिल्लो रइकरपव्वओ, मंदरे समोसरिओ० जाव पज्जुवासइ ॥

(तेणं कालेणमित्यादि) तस्मिन् काले सम्भवजिनजन्मके, तस्मिन् समये दिक्कुमारिकृत्यानन्तरीये, न तु शक्राऽऽगमनानन्तरीये, सर्वेषामिन्द्राणां जिनकल्याणकेषु युगपदेव समागमनाऽऽरब्धस्य जायमानत्वात् । यत्तु सूत्रे शक्राऽऽगमनानन्तरीयमीशानेन्द्राऽऽगमनमुक्तं, तत् क्रमेणैव सूत्रबन्धस्य सम्भवात् । ईशानो देवेन्द्रो देवराजा शूलपाणिर्वृषभवाहनः सुरेन्द्र उत्तरार्द्धलोकाधिपतिः, मेरोरुत्तरतोऽस्यैवाधिपत्यात् । अष्टाविंशतिविमानावासशतसहस्राधिपतिः, अरजांसि निर्मलानि अम्बराणि वस्त्राणि,स्वच्छतयाऽऽकाशकल्पानि वसनानि धरति यः स तथा। एवं यथा शक्रः सौधर्मेन्द्रस्तथाऽयमपि । इदमत्र नानात्वं विशेषः-महाघोषा घण्टा, लघुपराक्रमनामा पदात्यनीकाधिपतिः, पुष्पकनामा विमानकारी, दक्षिणा निर्याणभूमिः, उत्तरपौरस्त्यो रतिकरपर्वतः, मन्दरे समवसृतः समागतः । यावत्पदात्-" भगवंतं तित्थयरं तित्थयरमायरं तिक्खुत्तो आयाहिणपयाहिणं करेइ, करित्ता वंदइ,णमंसइ, वंदित्ता णमंसित्ता णच्चासण्णे णाइदूरे सुस्सूसमाणे णमंसमाणे अभिमुहं विणएणं पंजलिउडे॥ " इति पर्युपास्ते ।

अथातिदेशेनावशिष्टानां सनत्कुमाराऽऽदीन्द्राणां वक्तव्यमाह-

एवं अवसिट्ठा वि इंदा जाणियव्वा० जाव अच्चुओ।

इमं णाणत्तं-

" चउरासीइ असीई, बावत्तरि सत्तरी अ सट्ठी अ।
पन्ना चत्ताळीसा, तीसा वीसा दससहस्सा ॥१॥ "

एए सामाणिआणं।

"बत्तीसऽट्ठावीसा, बारस अट्ठ चउरो सयसहस्सा।
पन्ना चत्तालीसा, छच्च सहस्सा सहस्सारे ॥ १ ॥
आणयपाणयकप्पे, चत्तारि सयाऽऽरणऽच्चुए तिन्नि॥"

एए वेमाणियाणं।

इमे जाणविमाणकारी देवा। तं जहा-

"पालए पुप्फे सोमणसे सिरिवच्छे अ णंदिआवत्ते।
कामगमे पीइगमे, मणोरमे विमलेय सव्वओभद्दे" ॥१॥

सोहम्मगाणं सणंकुमारगाणं बंभलोगाणं महासुक्काणं पाणयगाणं इंदाणं सुघोसा घंटा, हरिणेगमेसी पायत्ताणीआहिवई, उत्तरिल्ला णिज्जाणभूमी, दाहिणपुरच्छिमिल्ले रइकरपव्वए; ईसाणगाणं माहिंदलंतगसहस्सारअच्चुअगाण य इंदाणं महाघोसा घंटा, लहुपरक्कमो पायत्ताणीआहिवई, दाहिणपच्छिमिल्ले णिज्जाणभूमी, उत्तरपच्छिमिल्ले रइकरपव्वए, परिसाओ णं जहा जीवाजिगमे आयरक्खा सामाणिअचउग्गुणा सव्वेसिं जाणविमाणा सव्वेसिं जोयणसयसहस्सवित्थिण्णा उच्चत्तेणं सविमाणप्पमाणमहिंदज्झया सव्वेसिं जोअणसाहस्सिआ सक्कवज्जा मंदरं समोअरंति० जाव पज्जुवासंति।

(एवं अवसिट्ठा वि इत्यादि) एवं सौधर्मेशानेन्द्रवदित्यर्थः अवशिष्टा अपि इन्द्रा वैमानिकानां ज्ञातव्याः, यावदच्युतेन्द्र एकादशाद्दशकल्पाधिपतिरिति। (विमानाऽऽदिसंख्या सामानिकाऽऽदिसंख्या च तत्तच्छब्दे)

(२७) चमराऽऽदीनामागमनम्-

तेणं कालेणं तेणं समएणं चमरे असुरिंदे असुरराया चमरचंचाए रायहाणीए सभाए सुहम्माए चमरंसि सीहासणंसि चउसट्ठीए सामाणिअसाहस्सीहिं तायत्तीसाए तायत्तीसेहिं चउहिं लोगपालेहिं पंचहिं अग्गमहिसीहिं सपरिवाराहिं तिहिं परिसाहिं सत्तहिं अणीएहिं सत्तहिं अणीआहिवईहिं चउहिं चउसट्ठीहिं आयरक्खसाहस्सीहिं अन्नेहिं अ जहा सक्के, णवरं इमं णाणत्तं-दुमो पायत्ताणीआहिवई, ओघस्सरा घंटा वि एं पण्णासं जोअणसहस्साइं माहिंदज्झओ पंच जोअणसयाइं, विमाणकारी आभिओगिओ देवो, अवसिट्ठं तं चेव० जाव मंदरे समोसरइ, पज्जुवासइ ॥

बली-

तेणं कालेणं तेणं समएणं बली असुरिंदे असुरराया एवमेव, णवरं सट्ठी सामाणिअसाहस्सीओ, चउगुणा आयरक्खा, महादुमो पायत्ताणीआहिवई, महाओहस्सरा घंटा, सेसं तं चेव परिसाओ जहा जीवाजिगमे।

धरणः—

तेणं कालेणं तेणं समएणं धरणे तहेव णाणत्तं, छ सामाणिअसाहस्सीओ, छ अग्गमहिसीओ, चउगुणा आयरक्खा, मेघस्सरा घंटा, भद्दसेणो पायत्ताणीआहिवई, विमाणं पण्णवीसं जोअणसहस्साहिं, महिंदज्झओ अट्ठाइज्जाइं जोअणसयाइं।

भवनवासिनः—

एवमसुरिंदवज्जिआणं भवणवासिइंदाणं, णवरं असुराणं ओघस्सरा घंटा, णागाणं मेघस्सरा, सुवण्णाणं हंसस्सरा, विज्जूणं कोंचस्सरा, अग्गीणं मंजुस्सरा, दिसाणं मंजुघोसा, उदहीणं सुस्सरा, दीवाणं महुरस्सरा, वाऊणं णंदिस्सरा, थणियाणं णंदिघोसा, चउसट्ठी सट्ठी खलु छच्च सहस्साओ असुरवज्जाणं सामाणिआओ, एए चउगुणा आयरक्खाओ, दाहिणिल्लाणं पायत्ताणीआहिवई भद्दसेणो, उत्तरिल्लाणं दक्खो ॥

वाणमन्तराः—

वाणमंतरजोइसिआणं अज्जो! एवं चेव, णवरं चत्तारि अ सामाणिअसाहस्सीओ, चत्तारि अग्गमहिसीओ, सोलस आयरक्खसहस्सा विमाणा, जोअणसहस्सं महिंदज्झया, पण्णवीसं जोअणसयं घंटा, दाहिणाणं मंजुस्सरा, उत्तराणं मंजुघोसा, पायत्ताणीआहिवई विमाणकारी अ आभिओगा देवा।

ज्योतिष्काः—

जोइसिआणं सुस्सरा सुस्सरणिग्घोसाओ घंटाओ, मंदरे समोसरणं० जाव पज्जुवासंति।

घण्टासु चायं विशेषः-चन्द्राणां सुस्वरा, सूर्याणां सुस्वरनिर्घोषा, सर्वेषां च मन्दरे समवसरणं वाच्यम्, यावत् पर्युपासते। यावच्छब्दग्राह्यं तु ग्रन्थदर्शितं ततो ज्ञेयम्। एतदुल्लेखस्त्वयम्-"तेणं कालेणं तेणं समएणं चंदा जोइसिंदा जोइसरायाणो पत्तेअं २ चउहिं सामाणिअसाहस्सीहिं चउहिं अग्गमहिसीहिं तिहिं परिसाहिं सत्तहिं अणीएहिं सत्तहिं अणीआहिवईहिं सोलसहिं आयरक्खदेवसाहस्सीहिं एवं, जहा वाणमंतरा, एवं सूरा वि।" नन्वत्रोल्लेखे चन्द्राः सूर्या इत्यत्र बहुवचनं किमर्थम्?, प्रस्तुतकर्मणि एकस्यैव सूर्यस्य चन्द्रस्य चाधिकृतत्वात्; अन्यथेन्द्राणां चतुःषष्टिसङ्ख्याकत्वव्याघातापत्तेः। उच्यते-जिनकल्याणकाऽऽदिषु दश कल्पेन्द्रा विंशतिर्भवनवासीन्द्रा द्वात्रिंशद् व्यन्तरेन्द्राः, एते व्यक्तितः; चन्द्रसूर्यौ तु जात्यपेक्षया; तेन चन्द्राः सूर्या असङ्ख्याता अपि समायान्ति, के नाम न कामयन्ते भुवनत्रयोद्धारकाणां दर्शनम्। यदुक्तं शान्तिचरित्रे श्रीमुनिदेवसूरिकृतश्रीशान्तिदेवजन्ममहवर्णने-" ज्योतिष्कनायकौ पुष्प-दन्तौ सङ्घातिगावितौ। हेमाद्रिमाश्रियस्ते स्म, चतुःषष्टिः सुरेश्वराः " ॥ १ ॥

तए णं से अच्चुए देविंदे देवराया बहवे आभिओगे देवे सद्दावेइ, सद्दावेइत्ता एवं वयासी–खिप्पामेव भो देवाणुप्पिया ! महत्थं महग्घं महारिहं विउलं तित्थयराभिसेयं उवट्ठवेह । तए णं ते इड्ढतुट्ठ० जाव पडिसुणित्ता उत्तरपुरच्छिमं दिसीभागं अवक्कमंति, अवक्कमंतित्ता वेउव्वियसमुग्घाएणं० जाव समोहणित्ता अट्ठसहस्सं सोवण्णियकलसाणं, एवं रुप्पमयाणं मणिमयाणं सुवण्णरुप्पमयाणं सुवण्णमणिमयाणं रुप्पमणिमयाणं सुवण्णरुप्पमणिमयाणं अट्ठसहस्सं भोमिज्जाणं अट्ठसहस्सं वंदणकलसाणं, एवं सिंगाराणं आयंसाणं थालाणं पाईणं सुपइट्ठगाणं चित्ताणं रयणकरंडगाणं वायकरगोणं पुप्फचंगेरीणं, एवं जहा सूरिआभस्स सव्ववंगेरीओ सव्वपडलगाइं विसेसिअंतराइं भाणिअव्वाइं सीहासणछत्तचामरतेल्लसमुग्ग० जाव सरिसवसमुग्गतालिअंटा० जाव अट्ठसहस्सं कडुच्छुआणं विउव्वंति, विउव्वित्ता साहाविए विउव्विए अ कलसे० जाव कडुच्छुए अ गिण्हित्ता जेणेव खीरोदए समुद्दे तेणेव आगम्म खीरोदगं गिण्हंति, गिण्हंतित्ता जाइं तत्थ उप्पलाइं पउमाइं० जाव सहस्सपत्ताइं ताइं गिण्हंति, एवं पुक्खरोदाओ० जाव भरहेरवयाणं मागहाईणं तित्थाणं उदगं मट्टिअं च गिण्हंति, गिण्हंतित्ता, एवं गंगासिंधूणं महाणईणं० जाव चुल्लहिमवंताओ सव्वतुअरे सव्वपुप्फे सव्वगंधे सव्वमल्ले० जाव सव्वोसहीओ सिद्धत्थए अ गिण्हंति, गिण्हंतित्ता पउमद्दहाओ दहोदगं उप्पलादीणि अ । एवं सव्वकुलपव्वएसु वट्टवेअड्ढेसु सव्वमहद्दहेसु सव्ववासेसु सव्वचक्कवट्टिविजएसु वक्खारपव्वएसु अंतरणईसु विभासिज्जा० जाव उत्तरकुरुसु० जाव सुदंसणजंबूसालवगे सव्वतुअरे० जाव सिद्धत्थए अ गिण्हंति । एवं णंदणवणाओ सव्वतुअरे० जाव सिद्धत्थए अ सरसं च गोसीसचंदणं दिव्वं च सुमणदामं गेण्हंति । एवं सोमणसपंडगवणाओ अ सव्वतुअरे० जाव सुमणदामं दद्दरमलयसुगंधिए गंधे अ गिण्हंति, गिण्हंतित्ता एगओ मिलंति, मिलंतित्ता जेणेव सामी तेणेव उवागच्छंति, उवागच्छंतित्ता तं महत्थं० जाव तित्थयराभिसेअं उवट्ठवेंति ॥

यावल्लोमहस्तकपटलकानामिमानि च वस्तूनि सुर्याभानिषेकौपयोगीयस्तुजिः सङ्ख्ययैव तुल्यानि, न तु गुणेनेत्याह विशेषिततराणि । (जं०) ननु मेरुनो ऽभिषेकाङ्गभूतवस्तुग्रहणाय चलन्त्यस्ते देवास्तद्ग्रहणोपयोगीयस्तुजातं कलशभृङ्गारादिकं गृह्णन्तु, परं तदुपयोगिपाण्डुकवनोदरप्रविष्टं सिंहासनचामरादिकं तैलसमुद्गकादिकं च कथं गृह्णन्तीति चेत् ?। उच्यते-विकुर्वणासामर्थ्यादेवेत्यत्र ग्रहणसूत्रस्थातिदेशत्वादेतत्सूत्रपाठस्यान्तर्गतत्वेऽपि ये ग्रहणोचितास्त एव गृहीता इति बोध्यम्, योग्यतावशादेवार्थप्रतिपत्तेः । यच्च धूपकटुच्छुकानां तत्र ग्रहणं तत् कलशभृङ्गारादिदेवहस्तधूपनार्थमिति । अन्यथा सूत्रे साक्षादुपदर्शितस्य धूपकटुच्छुकानां ग्रहणस्य नैरर्थक्यप्रसङ्गात् । अथ प्रस्तुतं सूत्रं गृहीत्वा च यानि तत्र क्षीरोदसमुद्रपद्मानि. यावत्सहस्रपत्राणि तानि गृह्णन्ति । यावत्पदात् कुमुदादिग्रहः पद्मवरया रीत्या पुष्करोदात् तृतीयसमुद्रात् उदकादिकं गृह्णन्ति यतु क्षीरोदादिनिवृत्तैर्वारुणीवरमन्तरा मुक्तापुष्करोदे जलं गृहीतं,तद्वारुणीवरवारिणोऽग्राह्यत्वादिति संभाव्यमिति । यावच्छब्दात्-"समयखित्ते" इति ग्राह्यम् । तेन समयक्षेत्रे मनुष्यक्षेत्रे भरतैरावतयोः प्रख्यातात् पुष्करवरद्वीपार्द्धसत्कयोर्मागधादीनां तीर्थानामुदकं मृत्तिकां च गृह्णन्ति । एवमिति समये क्षेत्रस्थपुष्करवरद्वीपार्द्धसत्कानां मङ्गादीनां महानदीनाम् । आदिशब्दात्-सर्वमहानदीग्रहः । यावत्पदात् तदकपुष्पफलवृत्तिकां च गृह्णन्ति । क्षुद्रहिमवतः सर्वान् तुवरान्(?)कषायद्रव्याणि आमलकादीनि,सर्वाणि जातिभेदेन पुष्पाणि, सर्वान् गन्धान् वासादीन्,सर्वाणि माल्यानि ग्रथितादिनेदभिन्नानि, सर्वा महौषधी राजहंसीप्रमुखाः,सिद्धार्थकांश्च सर्वानू गृह्णन्ति, गृहीत्वा च पद्मह्रदाद् ह्रदोदकमुत्पलानि च गृह्णन्ति । एवं क्षुद्रहिमवन्न्यायेन सर्वेक्षुवर्षधरपर्वतानां वक्तव्यतया कारितेन कुलकराः पर्वताः । मध्यपदलोपेकुलपर्वता हिमवदादयः,तेषु वृत्तवैताढ्येषु,सर्वेमहाह्रदेषु पद्मह्रदादिषु,सर्वेषुवर्षेषु सर्वचक्रवर्त्तिविजयेषु कच्छादिषु वक्षस्कारपर्वतेषु गजदन्तादिकृतिषु माल्यवदादिषु सरिद्रूपादिकृतिषु च चित्रकूटादिषु, तथान्तरनदीषु ग्राहावत्यादिषु,विभाषेत घटेत्, पर्वतेषु तु तुवरादीनां, ह्रदेषूत्पलादीनां कर्मक्षेत्रेषु मागधादितीर्थोदकमृदां,नदीपूदकोभयतटमृदां ग्रहणं वक्तव्यमित्यर्थः । यावत्पदादेव कुरुपरिग्रहः तेन कुरुद्वये चित्रविचित्रयमकगिरिकाञ्चनगिरिह्रदवृक्षेषु यथासंभवं वस्तुजातं गृह्णन्ति । यावत्पदात्-पुष्करवरद्वीपार्द्धस्य पूर्वार्द्धमेरौ भद्रशालवने नन्दने सौमनसवने पण्डकवने च सर्वतुवरादीन् गृह्णन्ति । तथा तस्यैवापरार्द्धे अनेनैव क्रमेण वस्तुजातं गृह्णन्ति । ततो धातकीखण्डपूर्वापरार्द्धयोर्भरतादिक्षेत्रेषु वस्तुग्रहो वाच्यः । ततो जम्बूद्वीपेऽपि तद्ग्रहस्तथैव वाच्यः । किंपर्यन्तमित्याह-सुदर्शनो जम्बूद्वीपगतो मेरुस्तस्य भद्रशालवने सर्वतुवरान्, यावत् सिद्धार्थकांश्च सरसं च गोशीर्षं चन्दनं दिव्यं च सुमनोदामग्रथितपुष्पाणि गृह्णन्ति । एवं सौमनसवनात् । सूत्रपाठे पञ्चमीलोपः प्राकृतत्वात् । पण्डकवनाच्च सर्वतुवरान्, यावत् सुमनोदामदर्दरमलयसुगन्धिकान् गन्धान्, दर्दरमलयौ चन्दनोत्पत्तिस्थानिनृपौ, तेन तद्भवं चन्दनमपि "तात्स्थ्यात्तद्व्यपदेशः" इति न्यायेन दर्दरमलयशब्दाभ्यामभिधीयते । ततो दर्दरमलयनामके चन्दने तयोः सुगन्धः परमगन्धो यत्र तान् दर्दरमलयसुगन्धिकान् गन्धान् वासान् गृह्णन्ति । गृहीत्वा च हस्ततो विप्रकीर्णा आभियोग्यदेवा एकत्र मिलन्ति । मिलित्वा च यत्रैव स्वामी तत्रैवोपागच्छन्ति । उपागत्य च तं महार्थं, यावच्छब्दात्-महार्घं महार्हं विपुलमिति ग्राह्यम् । तीर्थकराभिषेकं तीर्थकराभिषेकयोग्यं क्षीरोदकादिसमुपस्करमुपस्थापयन्ति उपनयन्ति,अच्युतेन्द्रस्य समीपस्थितिं कुर्वन्तीत्यर्थः ।

(२८) अच्युतेन्द्रो यत्करोत्तदाह-

तए णं से अच्चुए देविंदे देवराया दसहिं सामाणिअ-

साहस्सीहिं तायत्तीसाए तायत्तीसएहिं चउहिं लोगपालेहिं तिहिं परिसाहिं सत्तहिं अणीएहिं सत्तहिं अणीयाहिवईहिं चत्ताळीसाए आयरक्खदेवसाहस्सीहिं सद्धिं संपरिवुडे तेहिं साभाविएहिं विउव्विएहि अ वरकमलपइट्ठाणेहिं सुरभिवरवारिपडिपुन्नेहिं चंदणकयवच्चाएहिं आविद्धकंठगुणेहिं पउमुप्पलपिहाणेहिं करयलसुकुमारपरिग्गहिएहिं अट्ठसहस्सेणं सोवणियाणं कलसाणं० जाव अट्ठसहस्सेणं भोमेज्जाणं० जाव सव्वोदएहिं सव्वमट्टियाहिं सव्वतुअरेहिं ०जाव सव्वोसहीहिं सिद्धत्थएहिं सव्विड्ढीए० जाव रवेणं महया महया तित्थयराभिसेएणं अभिसिंचति ।

यावच्छब्दात्-" सव्वजुईए " इत्यारभ्य " दुंदुहिनिग्घोसनाइअं " इत्यन्तं ग्राह्यम् । महता महता तीर्थकराभिषेकेण, अत्र करणे तृतीया । कोऽर्थः ?-येनाभिषेकेण तीर्थकरा अभिषिच्यन्ते, तेनेत्यर्थः । अत्राभिषेकशब्देनाभिषेकोपयोगिक्षीरोदादिजलं ज्ञेयम्, अभिषिञ्चत्यभिषेकं करोतीत्यर्थः ।

(२७) इन्द्राऽऽज्ञयो यत्कुर्वन्ति तदाह-

तए णं सामिस्स महया महया अभिसेअंसि वट्टमाणंसि इंदाइआ देवा उत्तरिल्लसंधूवकडुच्छुअपुप्फगंध० जाव हत्थगया हट्ठतुट्ठ० जाव वज्जसूअपाणी पुरओ चिट्ठंति पंजलिउडा । एवं विजयाणुसारेण० जाव अप्पेगइआ देवा आसित्तसंमज्जिओवलित्तसित्तसुइसम्मट्ठरत्थंतराऽऽवणवीहिअं करेंति० जाव गंधवट्टिभूअं । अप्पेगइआ हिरण्णवासं वासंति । एवं सुवण्णरयणवइरआभरणपत्तपुप्फफलबीअमल्लगंधवण्ण० जाव चुण्णवासं वासंति । अप्पेगइआ हिरण्णविहिं भाइंति,एवं०जाव चुण्णविहिं भाइंति । अप्पेगइआ चउव्विहं वज्जं वाएंति । तं जहा-ततं १, वितततं २,घणं ३,झुसिरं ४। अप्पेगइआ चउव्विहं गेअं गायंति । तं जहा-उक्खित्तं १,पायत्तं २,मंदाइयं ३,रोइआवसाणं ४। अप्पेगइआ चउव्विहं णट्टं णच्चंति । तं जहा-अंचिअं १, दुअं २,आरभटं ३,भसोलं ४। अप्पेगइआ चउव्विहं अभिणयं अभिणयंति । तं जहा-दिट्ठंतिअं १,पाडिस्सुइअं २,सामण्णोवणिवाइअं ३,लोगमज्झावसाणिअं ४। अप्पेगइआ बत्तीसइविहं दिव्वं णट्टविहिं उवदंसेंति । अप्पेगइआ ओप्पायं निवायं, निवाओप्पायं,संकुचिअपसारिअं०जाव भंतसंभंतणामं दिव्वं नट्टविहिं उवदंसंतीति । अप्पेगइआ तंडवेंति,अप्पेगइआ लासेंति,अप्पेगइआ पीणेंति । एवं वुक्कारेंति,अप्फोडेंति,वग्गेंति,सीहणायं णयंति । अप्पेगइया सव्वाइं करेंति । अप्पेगइआ हयहेसिअं करेंति । एवं हत्थिगुलुगुलाइअं,रहघणघणाइअं । अप्पेगइया तिण्णि वि । अप्पेगइआ उच्छोलेंति, अप्पेगइया पच्छोलेंति,अप्पेगइया तिवइं छिंदंति,पायदद्दरयं करेंति,भूमिचवेलं दलयंति । अप्पेगइआ महया सद्देणं रवेंति;एवं संजोगा वि नामिअव्वा । अप्पेगइआ हक्कारेंति; एवं पुक्कारेंति,थक्कारेंति, ओवयंति,उप्पयंति,परिवयंति, जल्लंति, तवंति, पवंति, गज्जंति,विज्जुआयंति, वासेंति । अप्पेगइआ देवुक्कलिअं करेंति । एवं देवा कहकहगं करेंति । अप्पेगइआ दुहुदुहुगं करेंति । अप्पेगइआ विकिअजूआइं रूवाइं विउव्वित्ता पणच्चंति, एवमाइ विभाएज्जा, जहा विजयस्स०जाव सव्वओ समंता आहावेंति, परिधावेंति ॥

अथाऽभिषेकनिर्गमनपूर्वकमाशीर्वादसूत्रमाह-

तए णं से अच्चुइंदे सपरिवारे सामिं महया अभिसेएणं अभिसिंचइ, अभिसिंचइत्ता करयलपरिग्गहिअं० जाव मत्थए अंजलिं कट्टु जएणं विजएणं वद्धावेइ, वद्धावेइत्ता ताहिं इट्ठाहिं० जाव जयजयसद्दं पउंजंति, पउंजित्ता ०जाव पम्हलसुकुमालाए सुरभीए गंधकासाइए गायाइं लूहेइत्ता एवं० जाव कप्परुक्खगं पि व अलंकियविभूसिअं करेइ, करेइत्ता० जाव णट्टविहिं उवदंसेइ, उवदंसेइत्ता अच्छेहिं सण्हेहिं रययामएहिं अच्छरसतंडुलेहिं भगवओ सामिस्स पुरओ अट्ठट्ठमंगलगे आलिहइ । तं जहा-

"दप्पणे भद्दासणयं,वद्धमाणं वरकलसं मच्छ सिरिवच्छा ।
सोत्थिअ णंदावत्ता, लिहिआ अट्ठऽट्ठमंगलगा" ॥१॥

लिहिऊण करेइ उवयारं, किं ते पामलमल्लिअचंपगअसोगपुन्नागचूअमंजरिणवमालिअवउलतिलयकणवीरकुंदकुज्जगकोरंटपत्तदमणगवरसुरभिगंधगंधिअस्स कयग्गहगहिअकरयलपब्भट्ठविप्पमुक्कस्स दसद्धवण्णस्स कुसुमणिअरस्स, तत्थ चित्तं जाणुस्सेहप्पमाणमित्तं ओहिनिकरं करेइ, करेइत्ता चंदप्पभरयणवइरवेरुलिअविमलदंडं कंचणमणिरयणभत्तिचित्तं कालागुरुपवरकंदुरुक्कतुरुक्कधूवगंधुत्तमाणुविद्धं च धूमवट्टिं विणिम्मुअंतं वेरुलिअमयं कडुच्छुअं पगाहित्तु पयए णं धूवं दाऊण जिणवरिंदस्स सत्तट्ठपयाइं ओसरित्ता दसंगुलिअं अंजलिं करिअ मत्थयंसि पयओ अट्ठसयविसुद्धगंथजुत्तेहिं महावित्तेहिं अपुणरुत्तेहिं अत्थजुत्तेहिं संथुणइ, संथुणइत्ता वामं जाणुं अंचेइ, अंचेइत्ता० जाव करयलपरिग्गहिअं मत्थए अंजलिं कट्टु एवं वयासी-णमोऽत्थु ते सिद्ध ! बुद्ध ! णीरय! समण! समाहिअ ! समत्त! समजोगि! सल्लगत्तण ! णिब्भय ! णीरागदोस ! णिम्मम ! णिस्संग ! णीसङ्ग ! माणमूरण ! गुणरयणसीलसागर ! अणंत! अप्पमेय ! भविअ ! धम्मवरचाउरंतचक्कवट्टी ! णमोऽत्थु ते अरहओ त्ति कट्टु वंदइ, णमंसइ, णमंसइत्ता णच्चासण्णे णाइदूरे सुस्सूसमाणे० जाव पज्जुवासइ ।

(तए णमित्यादि) ततः सोऽच्युतेन्द्रः सपरिवारः स्वामिनमनन्तरोक्तस्वरूपेण महता महता अतिशयेन महता अभिषेकेणा-

अभिषिञ्चति. निगमनसूत्रत्वाच्च पौनरुक्त्यम् । अभिषिच्य च करतलपरिगृहीतं, यावत्पदसंग्राह्यं प्राग्वत् । मस्तके अञ्जलिं कृत्वा जयेन विजयेन प्रागुक्तस्वरूपेण वर्द्धयित्वाशिषं प्रयुङ्क्ते, वर्द्धयित्वा च ताभिर्विशिष्टगुणोपेताभिरिष्टाभिः श्रोतृणां वल्लभाभिर्यावत्करणात्-"कंताहिं पियाहिं मणुण्णाहिं वग्गूहिं" इति ग्राह्यम् । अत्र व्याख्या च प्राग्वत् । वाग्भिर्जयजयशब्दं प्रयुङ्क्ते, संभ्रमे द्विर्वचनं जयशब्दस्य । अत्र जयेन विजयेन वर्द्धयित्वा पुनर्जयविजयशब्दप्रयोगो, मङ्गलवचने पुनरुक्तिर्न दोषायेत्यभिहितः। अथाभिषेकोत्तरकालीनं कर्त्तव्यमाह-(पडिजिऊणा इत्यादि) प्रयुज्य च । यावच्छब्दात्-" तप्पढमयाए " इति ग्राह्यम् । अत्र व्याख्या-तेष्वभिषेकोत्तरकालीनकर्त्तव्येषु प्रथमतया आद्यत्वेन पद्ममलसुकुमारया सुरभ्या गन्धकाषायिकया गन्धकषायद्रव्यपरिकर्मितया,लघुशाटिकयेति गम्यम् । गात्राणि रूक्षयति, एवमुक्तप्रकारेण,यावत् कल्पवृक्षमिवालङ्कृतं वस्त्रालङ्कारेण आभरणालङ्कारेण विभूषितं करोति । यावत्करणात्-"लूहित्ता सरसेणं गोसीसचंदणेणं गायाइं अणुलिंपइ, अणुलिंपइत्ता नासानीसासवायवोज्झं चक्खुहरं वण्णफरिसजुत्तं हयलालापेलवाइरेगं धवलं कणगखचियंतकम्मं देवदूसजुयलं निअंसावेइ, निअंसावेइत्ता" इति ग्राह्यम् । अत्र व्याख्या प्राग्वत् । नवरं देवदूष्ययुगलं परिधानोत्तरीयरूपं निवासयति, परिधापयतीति कृत्वा च । यावत्करणात्-" सुमिणदामं पिणद्धावेइ " इति ग्राह्यम् । नाट्यविधिमुपदर्शयति । उपदर्श्य च अच्छैः श्लक्ष्णैः रजतमयैरच्छरसतण्डुलैः भगवतः स्वामिनः पुरतोऽष्टाष्टमङ्गलकान्यालिखति । तद्यथा-" दप्पणे " इति पद्यं सुगमम् । मङ्गलोल्लेखनोत्तरकृत्यमाह-(लिहिऊण सि) अनन्तरोक्तान्यष्टमङ्गलानि लिखित्वा करोत्युपचारमित्याद्यारभ्य कइच्छुकग्रहणपर्यन्तं सूत्रं चक्ररत्नपूजाधिकारलिखितव्याख्यातो व्याख्येयम् । ततः प्रयतः सन् यथा बालजनङ्कारकस्य धूपधूमाकुले अक्षिणी न भवतस्तथा प्रयत्नवान् धूपं दत्वा जिनवरेन्द्राय । सूत्रे षष्ठी आर्षत्वात् । अङ्गपूजार्थं प्रत्यासेदुषा मया निरूढो भगवद्दर्शनमार्गोऽतोऽहं मा परैर्मा दर्शनामृतपानविघ्नकारी स्यामिति सप्ताष्टानि पदान्यपसृत्य दशाङ्गुलिकं मस्तकेऽञ्जलिं कृत्वा प्रयतो यथास्थानमुदात्ताऽनुदात्तस्वरोच्चारेषु प्रयत्नवानष्टशतैरष्टोत्तरशतप्रमाणैर्विशुद्धेन ग्रन्थेन पाठेन युक्तैर्महाबुद्धैर्महाकाव्यैर्यथा महाचरित्रैरपुनरुक्तैरर्थयुक्तैरमत्कारिभिरुदग्रयुक्तैः संस्तौति। संस्तुत्य च वामं जानुम् अञ्चति उत्पाटयति, अञ्चित्वा च यावत्पदात्-" दाहिणं जाणुं धरणितलंसि निवाएइ " इति ग्राह्यम् । अत्र व्याख्या प्राग्वत् । करतलपरिगृहीतं मस्तकेऽञ्जलिं कृत्वा एवं वक्ष्यमाणमवादीत् । यदवादीत्तदाह-(नमोऽत्थु ते सिद्ध! बुद्ध० इत्यादि) नमोऽस्तु ते तुभ्यं हे सिद्ध ! एवं बुद्धेत्यादिपदानि संबन्धनीयानि । तत्र हे बुद्ध ! ज्ञाततत्त्व ! हे नीरजः कर्मरजोरहित ! हे श्रमण ! तपस्विन् ! हे समाहित! अनाकुलितचित्त ! हे समाप्त ! कृतकृत्यत्वात् । अथवा-सम्यक् प्रकारेणाऽऽप्त ! अविसंवादिवचनत्वात् । हे समयोगिन् ! कुशलमनोवाक्काययोगित्वात् । शल्यकर्त्तन ! निर्भय ! नीरागद्वेष ! निर्मम ! निस्सङ्ग ! निर्लेप ! निःशल्य ! (मानमूरण !) मानमर्दन ! गुणेषु रत्नमुत्कृष्टं यच्छीलं ब्रह्मचर्यं तस्य सागर ! अनन्तज्ञानाऽऽत्मकत्वात् । अप्रमेय ! प्राकृतज्ञानापरिच्छेद्य ! अशरीरजीवस्वरूपस्य उच्चस्थैः परिच्छेत्तुमशक्यत्वात् इति । अथवाऽप्रमेय !, भगवद्गुणानामनन्तत्वेन संख्यातुमशक्यत्वात् । भव्य ! कुकिंमनसोग्य ! अत्यासन्नभवसिद्धिकत्वात् । धर्मेण धर्मरूपेण वरेण प्रधानेन चारुरन्तेन चतुर्गत्यन्तकारिणा चक्रेण वर्त्तते इत्येवंशीलः,तस्य सम्बोधनं हे धर्मवरचतुरन्तचक्रवर्तिन् ! नमोऽस्तु तुभ्यम् अर्हते जगत्पूज्याय, इति कृत्वेति संस्तुत्य, वन्दते, नमस्यतीत्यादि सूत्रं प्राग्वत् । यद्यत्र विशेषणवर्णकस्याऽऽदौ 'नमोऽत्थु ते' इत्युक्त्वा पुनरपि 'नमोऽत्थु ते' इत्युक्तं, तत्र पुनरुक्तये, प्रत्युत ज्ञापनाय, यतो जगत्त्रयप्रतिस्रोतआरिभिर्णो जगत्त्रयपतेस्तत्तदसाधारणैकैकविशेषणविभावनात् समुद्भूतप्रणामपरिणामेन हरिणा प्रतिविशेषणं 'नमोऽस्तु ते' इति न प्रयुक्तमिति । इमानि च सर्वाणि विशेषणानि भव्यपदवर्जानि ' नामेकि भूतवकुपचादात् । ' अन्यथाऽभिषेकसमये जिनानामेतादृशविशेषणप्रयुक्तम्, असंजवादिति ।

(३०) अथावशिष्टानामिन्द्राणां वक्तव्यं लाघवादाह-

एवं जहा अच्चुअस्स तहा० जाव ईसाणस्स भाणिअव्वं । एवं भवणवइवाणमंतरजोइसिआ य सूरपज्जवसाणा सएणं सएणं परिवारेणं पत्तेअं पत्तेअं अभिसिंचंति । तए णं ईसाणे देविंदे देवराया पंच ईसाणे विउव्वइ,विउव्वइत्ता एगे ईसाणे भगवं तित्थयरं करयलसंपुडेणं गिण्हइ,गिण्हइत्ता सीहासणवरगए पुरत्थाभिमुहे सण्णिसण्णे; एगे ईसाणे पिट्ठओ आयवत्तं धरेइ; दुवे ईसाणा उभओ पासिं चामरुक्खेवं करेंति; एगे ईसाणे पुरओ सूलपाणी चिट्ठइ ।

(एवं जहा इत्यादि) एवमुक्तविधिना यथाऽच्युतेन्द्रस्याऽभिषेककृत्यं तथा प्राणतेन्द्रस्य यावदीशानेन्द्रस्यापि भणितव्यं,शक्राभिषेकस्य सर्वतश्चरमत्वात् । एवं भवनपतिव्यन्तरज्योतिष्काश्चेन्द्राः सूर्यपर्यवसानाः स्वकेन २ परिवारेण सह प्रत्येकं प्रत्येकमभिषिञ्चन्ति । (तए णमित्यादि) ततस्त्रिषष्टीन्द्राभिषेकानन्तरमीशानो देवेन्द्रो देवराजा पञ्चेशानान् विकुर्वति,एक ईशानः पञ्चधा भवति । एतदेव विभजति-तत्र एक ईशानो भगवन्तं तीर्थंकरं करतलसम्पुटेन गृह्णाति, गृहीत्वा च सिंहासनवरगतः पूर्वाभिमुखः सन्निषण्णः । एक ईशानः पृष्ठतः आतपत्रं धरति । द्वावीशानावुभयोः पार्श्वयोः चमरोत्क्षेपं कुरुतः । एक ईशानः पुरतः शूलपाणिरितष्ठत्यूर्द्धस्थो भवति ।

(३१) अथावशिष्टशक्रस्याभिषेकावसरः-

तए णं से सक्के देविंदे देवराया आभिओगे देवे सद्दावेइ, सद्दावेइत्ता एसो वि तह चेव आणिसेआणमादिसइ, ते वि तह चेव जवणेंति । तए णं से सक्के देविंदे देवराया जगवओ तित्थयरस्स चउद्दिसिं चत्तारि धवलवसभे विउव्वइ, सेए संखदलविमलनिम्मलदधिघणगोखीरफेणरययणिगरप्पगासे पासाइए दरसणिज्जे अभिरूवे पडिरूवे । तए णं तेसिं चउण्हं धवलवसभाणं अट्ठहिं सिंगेहिं तो अट्ठ तोयधाराओ णिग्गच्छंति । तए णं ताओ अट्ठ तोयधाराओ उड्ढं वेहासं समुप्पयंति,समुप्पयंतित्ता एगओ मिलायंति, मिलायंतित्ता जगवओ तित्थयरस्स मुद्धाणंसि निवयंति । तए णं से सक्के

देविंदे देवराया चउरासीईए सामाणिअसाहस्सीहिं,०एअस्सवि तहेव अभिसेओ जाणिअव्वो० जाव ' णमोऽत्थु ते अरहो ' त्ति कटु वंदइ, णमंसइ० जाव पज्जुवासइ ।

स्वप्रत्यक्षप्रयाणिः शक्रो यदकरोत्तदाह-(तए णमित्यादि) तत ईशानेन्द्रेण भगवतः करसंपुटग्रहणानन्तरं स शक्रो देवेन्द्रो देवराजा आभियोग्यान् देवान् शब्दयति, शब्दयित्वा च एषोऽपि तथैवाऽच्युतेन्द्रवदभिषेकविषयिकामाज्ञप्तिं ददाति, तेऽप्याभियोग्यास्तथैवाऽच्युतेन्द्राभियोग्यदेवा इवाभिषेकवस्तून्युपनयन्ति । अथ शक्रः किं किं चकारेत्याह-(तए णमित्यादि) ततोऽभिषेकसामग्र्युपनयनानन्तरं स शक्रो देवेन्द्रो देवराजा भगवतस्तीर्थकरस्य चतुर्दिशि चतुरो धवलवृषभान् विकुर्वति । श्वेतान् । श्वेतत्वमेव रूढयति-शरच्छस्य दलं चूर्णं विमलनिर्मलोऽत्यन्तनिर्मलो यो दधिघनो दधिपिण्डो,बद्धदधीत्यर्थः । गोक्षीरफेनः प्रतीतः, रजतनिकरोऽपि । एतेषामिव प्रकाशो येषां ते तथा, तान् (पासाइए इत्यादि) प्राग्वत् । तदनन्तरं किमित्याह-(तए णमिति) ततस्तेषां चतुर्णां धवलवृषभानामष्टभ्यः शृङ्गेभ्योऽष्टौ तोयधारा निर्गच्छन्ति । ततस्ता अष्टौ तोयधारा ऊर्द्धं विहायसि उत्पतन्ति ऊर्द्धं चलन्ति, उत्पत्य च एकतो मिलन्ति, मिलित्वा च भगवतस्तीर्थंकरस्य मूर्ध्नि निपतन्ति । अथ शक्रः किं कृतवानित्याह-(तए णमिति) ततः स शक्रो देवेन्द्रो देवराजा चतुरशीत्या सामानिकसहस्रैस्त्रयस्त्रिंशता त्रायस्त्रिंशकैर्यावत् संपरिवृतस्तैः स्वाभाविकवैकुर्विककलशैर्महता तीर्थकराभिषेकेणाभिषिञ्चति, इत्यादिसूत्रोक्ताभिषेकविधिः शक्रस्याऽच्युतेन्द्रवदवसेयः । लाघवमाह-एतस्याऽपि तथैवाभिषेको भणितव्यः । कियदन्त इत्याह-यावन्नमोऽस्तु तेऽर्हते इति कृत्वा वन्दते, नमस्यति, नमस्त्वा यावत् पर्युपास्ते इति ।

(३२) अथ कृतकृत्यः शक्रो भगवतो जन्मपुरप्रापणायोपक्रमते-

तए णं से सक्के देविंदे देवराया पंच सक्के विउव्वइ, विउव्वइत्ता एगे सक्के भगवं तित्थयरं करयलपुडेणं गिण्हइ, एगे सक्के पिट्ठओ आयवत्तं धरेइ, दुवे सक्का उभओ पासिं चामरुक्खेवं करेंति, एगे सक्के पज्जपाणी पुरओ पकड्ढइ । तए णं से सक्के चउरासीईए सामाणिअसाहस्सीहिं० जाव अण्णेहिं अ भवणवइवाणमंतरजोइसवेमाणिएहिं देवेहिं देवीहिं अ सद्धिं संपरिवुडे सव्विड्ढीए ०जाव णाइअरवेणं ताए उक्किट्ठाए ०जाव जेणेव जगवओ तित्थयरस्स जम्मणणयरे, जेणेव जम्मणभवणे, जेणेव तित्थयरमाया, तेणेव उवागच्छइ, उवागच्छइत्ता भगवं तित्थयरं माउए पासे ठवेइ, ठवेइत्ता तित्थयरपडिरूवगं पडिसाहरइ, पडिसाहरइत्ता ओसोवणिं पडिसाहरइ, पडिसाहरइत्ता एगं महं खोमजुअलं कुंडलजुअलं च भगवओ तित्थयरस्स उस्सीसगमूले ठवेइ, ठवेइत्ता एगं महं सिरिदामगंडं तवणिज्जलंबूसगं सुवण्णपयरगमंडिअं णाणामणिरयणविविहहारद्धहारउवसोहिअसमुदयं भगवओ तित्थयरस्स उल्लोअंसि णिक्खिवइ, तं णं भगवं तित्थयरं अणिमिसाए दिट्ठीए पेहमाणे पेहमाणे सुहं सुहेणं अभिरममाणे चिट्ठइ ।

(तए णमित्यादि) प्राग्वत् । अथ जन्मनगरप्रापणाय सूत्रम्-(तए णमिति) ततः स शक्रः पञ्चरूपविकुर्वणानन्तरं चतुरशीत्या सामानिकसहस्रैर्यावत् संपरिवृतः सर्वर्द्ध्या यावन्नादितरवेण तयोत्कृष्टया दिव्यया देवगत्या व्यतिव्रजन् व्यतिव्रजन् यत्रैव भगवतस्तीर्थंकरस्य जन्मनगरं, यत्रैव च जन्मभवनं, यत्रैव तीर्थंकरमाता, तत्रैवोपागच्छति । उपागत्य च भगवन्तं तीर्थंकरं मातुः पार्श्वे स्थापयति । स्थापयित्वा च तीर्थंकरप्रतिबिम्बं प्रतिसंहरति । प्रतिसंहृत्य चावस्वापिनीं प्रतिसंहरति । प्रतिसंहृत्य चैकं महत् क्षौमयोर्दुकूलयोर्युगलं कुण्डलयुगलं भगवतस्तीर्थंकरस्योच्चैर्ऊर्ध्वकमूले स्थापयति । स्थापयित्वा च एकं महान्तं श्रीदाम्नां शोभावद्विचित्ररत्नमालानां गण्डं गोलं वृत्ताऽऽकारत्वात् । काण्डं वा समूहः, श्रीदामगण्डं श्रीदामकाण्डं वा, भगवतस्ती ये निक्षिपत्यवलम्बयतीति क्रियायोगः । तपनीयेत्यादि सूत्रं प्राग्वत् । नानामणिरत्नानां ये विविधहाराऽर्द्धहारास्तैरुपशोभितः समुदायः परिकरो यस्य तत् तथा । अयमर्थः-श्रीमत्यो रत्नमालास्तथा ग्रथयित्वा गोलाकारेण कृताः यथा चन्द्रोपके मध्यकुम्बनकतां प्रापिताः, हाराऽर्द्धहाराश्च परिकरकुम्बनकताम् । एकस्वरूपकुम्बनकविधाने प्रयोजनमाह-(तं णमिति प्राग्वत्) भगवांस्तीर्थंकरो निर्निमेषया दृष्ट्याऽत्यादरेण प्रेक्ष्यमाणः प्रेक्ष्यमाणः सुखं सुखेनाभिरममाणो रतिं कुर्वंस्तिष्ठति ।

(३३) अथ वैश्रवणद्वारा शक्रस्य कृत्यमाह-

तए णं से सक्के देविंदे देवराया वेसमणं देवं सद्दावेइ, सद्दावेइत्ता एवं वयासी-खिप्पामेव भो देवाणुप्पिया! बत्तीसं हिरण्णकोडीओ बत्तीसं सुवण्णकोडीओ बत्तीसं रयणकोडीओ बत्तीसं णंदाइं बत्तीसं भद्दाइं सुभगे सुभगरूवजोव्वणलावण्णे अ भगवओ तित्थयरस्स जम्मणभवणंसि साहराहि, साहराहित्ता एअमाणत्तिअं पच्चप्पिणाहि । तए णं से वेसमणे देवे सक्केणं० जाव विणएणं वयणं पडिसुणेइ, पडिसुणेइत्ता जंजए देवे सद्दावेइ,सद्दावेत्ता एवं वयासी-खिप्पामेव भो देवाणुप्पिया! बत्तीसं हिरण्णकोडीओ०जाव भगवओ तित्थयरस्स जम्मणभवणंसि साहरह, एअमाणत्तिअं पच्चप्पिणह । तए णं ते जंजगा देवा वेसमणेणं देवेणं एवं वुत्ता समाणा हट्ठतुट्ठ० जाव खिप्पामेव बत्तीसं हिरण्णकोडीओ० जाव जगवओ तित्थगरस्स जम्मणभवणंसि साहरंति, साहरंतित्ता जेणेव वेसमणे देवे तेणेव०जाव पच्चप्पिणंति । तए णं से वेसमणे देवे जेणेव देविंदे देवराया० जाव पच्चप्पिणइ ॥

(तए णमित्यादि) ततः स शक्रो देवेन्द्रो देवराजा वैश्रवणमुत्तरदिक्पालं देवं शब्दयति, शब्दयित्वा चैवमवादीत्-क्षिप्रमेव भो देवानुप्रियाद्वात्रिंशतं हिरण्यकोटीः,द्वात्रिंशतं सुवर्णकोटीः,

द्वात्रिंशतं नन्दानि वृत्तलोहाऽऽसनानि, द्वात्रिंशतं भद्राणि भद्राऽऽसनानि, सुभगानि शोभनानि, सुजगयौवनलावण्यानि रूपकाणि यत्र तानि तथा । सूत्रे पदव्यत्यय आर्षत्वात् । चः समुच्चये । भगवतस्तीर्थंकरस्य जन्मभवने संहराऽऽनयेत्यर्थः। संहृत्य च एनामाज्ञप्तिं प्रत्यर्पय । ततः स वैश्रमणो देवः शक्रेण, यावत्—" देविंदेणं देवरण्णा एवं वुत्ते समाणे हट्ठतुट्ठचित्तमाणंदिए एवं देवो ! तह त्ति आणाए । " इति ग्राह्यम् । विनयेन वचनं प्रतिशृणोति, प्रतिश्रुत्य च जृम्भकान् तिर्यग्लोके वैताढ्यद्वितीयश्रेणिवासित्वेन तिर्यग्लोकगतनिधानाऽऽदिवेदिनः शब्दयति, शब्दयित्वा चैवमवादीत् । शेषमनुवादसूत्रत्वात् सुबोधम् ।

(३४) अथास्मासु स्वस्थानं प्राप्तेषु निःसौन्दर्यसौन्दर्याधिके भगवति मा दुष्टां दुर्दृष्टिं निक्षिपन्त्वित्युद्घोषणा—

तए णं से सक्के देविंदे देवराया आभिओगे देवे सद्दावेइ, सद्दावेइत्ता एवं वयासी—खिप्पामेव भो देवाणुप्पिया ! जगवओ तित्थयरस्स जम्मणणयरंसि सिं ...व महापहेसु महया महया सद्देणं उग्घोसेमाणे उग्घोसेमाणे एवं वदह—हंद ! सुणंतु भवंतो बहवे भवणवइवाणमंतरजोइसवेमाणिआ देवा य देवीओ अ,जे णं देवाणुप्पिया ! तित्थयरस्स तित्थयरमाउए वा असुभं मणे पधारेइ,अज्जगमंजरिआ इव सयधा मुद्धाणं फुट्टतु त्ति कट्टु घोसणं घोसेह, घोसेइत्ता एअमाणत्तिअं पच्चप्पिणह । तए णं ते आभिओगा देवा० जाव एवं देवो ! त्ति आणाए पडिसुणंति, पडिसुणंतित्ता सक्कस्स देविंदस्स देवरण्णो अंतिआओ पडिणिक्खमंति,पडिणिक्खमंतित्ता खिप्पामेव भगवओ तित्थयरस्स जम्मणणयरंसि सिंघाडग० जाव एवं वयासी-हंद ! सुणंतु भवंतो बहवे भवणवइ० जाव जे णं देवाणुप्पिआ ! तित्थयरस्स० जाव फुट्टिहि त्ति कट्टु घोसणगं घोसंति, घोसंतित्ता एअमाणत्तिअं पच्चप्पिणंति ॥

तदुपायार्थमाह-(तए णमित्यादि) ततो वैश्रवणेनाऽऽज्ञाप्रत्यर्पणानन्तरं स शक्रः देवेन्द्रो देवराजा आभियोग्यान् देवान् शब्दयति, शब्दयित्वा चैवमवादीत्-क्षिप्रमेव नो देवानुप्रियाः ! भगवतस्तीर्थंकरस्य जन्मनगरे शृङ्गाटक० यावन्महापथेषु महता महता शब्देन उद्घोषयन्त उद्घोषयन्त एवं वदत-'हंत' इति प्राग्वत् । शृण्वन्तु भवन्तो बहवो भवनपतिव्यन्तरज्योतिष्कवैमानिका देवाश्च देव्यश्च, योऽनिर्दिष्टनामा देवानां प्रिय ! इति संबोधनं,भवतां मध्ये तीर्थंकरस्य तीर्थंकरमातुर्वोपर्यशुभं मनः प्रधारयति दुष्टं संकल्पयति, तस्य आर्यकमञ्जरिकेव-आर्यको वनस्पतिविशेषो, यो लोके " आजउ " इति प्रसिद्धः, तस्य मञ्जरिका इव मूर्द्धा शतधा स्फुटत्विति कृत्वेत्युक्त्वा घोषणं घोषयत, घोषयित्वा चैतामाज्ञप्तिकां प्रत्यर्पयत इति ॥

(३५) अष्टाह्निका-

तए णं ते बहवे भवणवइवाणमंतरजोइसवेमाणिया देवा भगवओ तित्थयरस्स जम्मणमहिमं करेंति, करेंतित्ता जेणेव णंदीसरवरदीवे तेणेव उवागच्छंति, उवागच्छंतित्ता अट्ठाहिआओ महामहिमाओ करेंति, करेंतित्ता जामेव दिसिं पाउब्भूआ तामेव दिसिं पडिगया ॥

अथ निर्गमनसूत्रमाह-(तए णमिति) ततस्ते बहवो भवनपत्यादयो देवा भगवतस्तीर्थंकरस्य जन्ममहिमानं कुर्वन्ति, कृत्वा च सिद्धसमीहितकार्ये मङ्गलार्थं यत्रैव नन्दीश्वरवरद्वीपस्तत्रैवोपागच्छन्ति, उपागत्याष्टाह्निकामहामहिमा अष्टदिननिर्वर्त्तनीयोत्सवविशेषान् कुर्वन्ति, बहुवचनं चात्र सौधर्मेन्द्राऽऽदिभिः प्रत्येकं क्रियमाणत्वात् । अथ यस्येन्द्रस्य यस्मिन् अञ्जनगिरौ येषु च दधिमुखगिरिषु तल्लोकपालानामष्टाह्निकाधिकारः स ऋषभदेवनिर्वाणाधिकारे उक्त इति नात्र लिख्यते । जं० ५ वक्ष० ।

(३६) इन्द्रसंख्या-

भवणिंद वीस वंतर-पहु दुत्तीसं च चंदसूरा दो ।
कप्पसुरिंदा दस इय, हरि चउसट्ठिति जिणजम्मे ॥१०४॥

भवनपतीनां विंशतिरिन्द्राः २० । व्यन्तराणां प्रभव इन्द्राः द्वात्रिंशच्च ३२ । द्वौ चन्द्रसूर्यौ २ । द्वादशकल्पानां देवलोकानां दश सुरेन्द्राः १० । इति इन्द्राः चतुष्षष्टिश्चतुःसंयुक्ता षष्टिर्यान्ति-आगच्छन्ति जिनजन्मनि । इति गाथाऽर्थः ॥ १०४ ॥ सत्त० ३५ द्वार । आ० चू० । जं० ।

(३७) उपदेशः-

से बेमि जे य अतीता, जे य पडुप्पन्ना, जे य आगमिस्सा अरिहंता भगवंता सव्वे ते एवमाइक्खंति,एवं भासंति, एवं पण्णवेंति, एवं परूवेंति—सव्वे पाणा० जाव सत्ता ण हंतव्वा, ण अज्जावेयव्वा, ण परिघेतव्वा, ण परितावेयव्वा,ण उद्दवेयव्वा, एस धम्मे धुवे णितिए सासए समिच्च लोगं खेयन्नेहिं पवेइए, इति एवं से भिक्खू विरते पाणातिवायतो० जाव परिग्गहातो णो दंतपक्खालणेणं दंतं पक्खालेज्जा, णो अंजणं, णो वमणं,णो धूवणे, णो तं परिआविएज्जा ॥४७॥

सोऽहं ब्रवीम्येतन्न स्वमनीषिकतया, किं तु सर्वतीर्थकराऽऽज्ञयेति दर्शयति-(जे अतीता इत्यादि) ये केचन तीर्थकृत ऋषभाऽऽदयोऽतीताः, ये च विदेहेषु वर्त्तमानाः सीमन्धराऽऽदयो,ये चागामिन्यामुत्सर्पिण्यां भविष्यन्ति पद्मनाभाऽऽदयोऽर्हन्तोऽमरासुरनरेश्वराणां पूजार्हाः,भगवन्त ऐश्वर्याऽऽदिगुणकलापोपेताः, सर्वेऽप्येवं ते व्यक्तवाचा आख्यान्ति प्रतिपादयन्ति । एवं सदेवमनुजायां पर्षदि भाषन्ते स्वत एव, न यथा बौद्धानां बोधिसत्त्वप्रभावात् कुमत्यादिदेशनत इत्येवं प्रकर्षेण ज्ञापयन्ति हेतूदाहरणाऽऽदिभिः, एवं प्ररूपयन्ति नामाऽऽदिभिः, यथा सर्वे प्राणा न हन्तव्या इत्यादि । एष धर्मः प्राणिरक्षणलक्षणः प्राग्व्याकरणे तत्स्वरूपो ध्रुवोऽवश्यंभावी, नित्यः शाश्वत्यादिरूपेण शाश्वत इत्येवं चाभिसमेत्य, केवलज्ञानेनावलोक्य लोकं चतुर्दशरज्ज्वात्मकं, खेदज्ञैस्तीर्थकृद्भिः प्रवेदितः कथित इत्येवं सर्वं ज्ञात्वा स भिक्षुर्विदितवेद्यो विरतः प्राणातिपातादू, यावत्परिग्रहादिति । एतदेव दर्शयितुमाह-(णो दंत इत्यादि) इह पूर्वोक्तमहाव्रतपालनार्थमनेनोत्तरगुणाः प्रतिपाद्यन्ते । तत्रापरिग्रहो निष्किञ्चनः स साधुर्नो दन्तप्रक्षालनेन कदम्बाऽऽदिकाष्ठेन दन्तान् प्रक्षालयेत्, तथा नो अञ्जनं सौवीराऽऽदिकं विभूषार्थमक्षणो-

दद्यात्, तथा नो वमनविरेचनाऽऽदिकाः क्रियाः कुर्यात्, तथा नो शरीरस्य, स्वीयवस्त्राणां वा धूपनं कुर्यात्, नापि कासाऽऽद्यपनयनार्थं तं धूमं योगवर्तिनिष्पादितमापिबेदिति । ४६ । सूत्र० २ श्रु० १ अ० । आचा० । आ० म० ।

धर्मोपायस्य देशका इत्येतद् व्याचिख्यासुराह-

धम्मोवाओ पवयण-महवा पुव्वाइं देसया तस्स।
सव्वजिणाण गणहरा, चोद्दसपुव्वी व जे जस्स ॥

धर्मोपायोनाम प्रवचनं, तदन्तरेण धर्मस्यासम्भवात् । अथवा-पूर्वाणि । तस्य धर्मोपायस्य देशकाः सर्वजिनानां गणधराः, तेषां मूलसूत्रकर्तृत्वात् । अथवा-ये यस्य तीर्थकृतश्चतुर्दशपूर्विणस्ते धर्मोपायदेशकाः, परिपूर्णश्रुततया तेषां यथाऽवस्थितवस्तुदेशकत्वात् ।

सामाइयाऽऽइया वा, वयजीवनिकायभावणा पढमं ।
एसो धम्मोवाओ, जिणेहिं सव्वेहिं उवइट्ठो ॥

वाशब्दः प्रकारान्तरताद्योतनार्थः । अथवा-या प्रथमं व्रतजीवनिकायभावना महाव्रतविषयषड्जीवनिकायथथावस्थितपरिज्ञानसम्यक्श्रद्धानसंरक्षणाध्यवसायरूपा भावना, सामायिकाऽऽदिका रागद्वेषपरिहारेण समभावाऽऽदिका, एष धर्मोपायः, तमन्तरेण सम्यक्चारित्ररूपधर्मासम्भवात् । इत्थम्भूतश्च धर्मोपायो जिनैः सर्वैरप्युपदिष्टः, ततो धर्मोपायस्य देशकास्त एव जिना इति । आ० म० १ अ० १ खण्ड ।

(३८) उपकरणसंख्या-

पत्तं पत्ताबंधो, पायट्ठवणं च पायकेसरिया ।
पडलाइं रयत्ताणं, च गोच्छओ पायनिज्जोगो ॥१७८॥
तिन्नेव य पच्छागा, रयहरणं चेव होइ मुहपुत्ती ।
एआ जिणकप्पियाणं, थेराण समत्तकमिपट्टो ॥१७९॥

साध्वीनां पञ्चविंशत्युपकरणानि-

ओग्गह-ऽणंतगपट्टो, अद्धोरुय चलणिया य बोधव्वा ।
अब्भिंतरबाहिनियं-सणी अ तह कंचुए चेव ॥१८०॥
उक्कच्छिय वेकच्छिय-संघाडी खंधकरणि उवगरणा ।
पुव्विल्ल तेर कमढग-सहिया अज्जाण पणवीसं ॥१८१॥

(गाथार्थः द्वि० भागे 'उवगरण' शब्दे १०६१ पृष्ठे प्ररूपितः)

सप्त यात्रोपकरणानि, सप्त देहोपकरणानि, एतानि साधूनां स्थविरकल्पिकानाम् । द्वादश जिनकल्पिकानां, साध्वीनां पञ्चविंशत्युपकरणानि । सप्त० १२९ द्वार ।

(३९) उपसर्गः-

उवसग्गा पासस्स य, वीरस्स य न उण सेसाणं । (१६९)

उपसर्गाः देवमनुजाऽऽदिकृताः श्रीपार्श्वनाथस्य, वीरजिनस्य च संजाताः, न पुनः शेषाणां द्वाविंशतिजिनानाम् । अयं भावार्थः-श्रीऋषभवीरवर्जानां द्वाविंशतिजिनानां प्रमादो नाभूत, श्रीपार्श्ववीरवर्जानां द्वाविंशतिजिनानामुपसर्गा नाभूवन् । सप्त० ८६ द्वार । आ० चू० । कल्प० । आव० । वृ० ।

(४०) उत्सेधाङ्गुलेनात्माङ्गुलेन च देहमानं जिनानां कथ्यते-

पण धणुसय पञ्चऽट्ठसु, दस पणुसु पणऽट्ठसु य धणुहत्थाणी ।
नवकर सत्तुस्सेहो, आयंगुलि वीससय सव्वे ॥ १३१ ॥
चउ धणु बारस्स हुंगं, उसहायंगुलपमाणअंगुलयं ।
तेणुसहो विंससयं, बारंगुलहाणि जा सुविही ९ ॥१३२॥
वीसंसहुअंगुलहा-णि जावऽणंतो तयऽरू जा नेमी ।
सगवीसंसा पासे, वीरे गवीसं सपन्नासा ॥१३३॥

तत्रोत्सेधाङ्गुलेन ऋषभजिनः पञ्चशत (५००) धनुर्देहमानः १ । (पञ्चऽट्ठसु त्ति) ततः पञ्चाशद्धनुर्हानिः क्रियते अष्टसु जिनेषु । यथा-अजितः सार्द्धचत्वारि धनुःशतानि (४५०) देहमानः २ । सम्भवः चतुःशत (४००) धनुर्देहमानः ३ । अभिनन्दनः (३५०) सार्द्धत्रिशच्छतधनुर्देहमानः ४ । सुमतिः (३००) त्रिंशच्छतधनुर्देहमानः ५ । पद्मप्रभः (२५०) सार्द्धद्विशतधनुर्देहमानः ६ । सुपार्श्वः (२००) द्विशतधनुर्देहमानः ७ । चन्द्रप्रभः (१५०) सार्द्धशतधनुर्देहमानः ८ । सुविधिः (१००) शतधनुर्देहमानः ९ । (दस पणसु त्ति) दशधनुर्हानिः पञ्चसु जिनेषु क्रियते । यथा-शीतलः (९०) नवतिधनुर्देहमानः १० । श्रेयांसः (८०) अशीतिधनुर्देहमानः ११ । वासुपूज्यः (७०) सप्ततिधनुर्देहमानः १२ । विमलः (६०) षष्टिधनुर्देहमानः १३ । अनन्तः (५०) पञ्चाशद्धनुर्देहमानः १४ । (पणऽट्ठसु य त्ति) अष्टसु जिनेषु पञ्चधनुर्हानिः क्रियते । यथा-धर्मः (४५) पञ्चचत्वारिंशद्धनुर्देहमानः १५ । शान्तिः (४०) चत्वारिंशद्धनुर्देहमानः १६ । कुन्थुजिनः (३५) पञ्चत्रिंशद्धनुर्देहमानः १७ । अरः (३०) त्रिंशद्धनुर्देहमानः १८ । मल्लिः (२५) पञ्चविंशतिधनुर्देहमानः १९ । मुनिसुव्रतः (२०) विंशतिधनुर्देहमानः २० । नमिः (१५) पञ्चदशधनुर्देहमानः २१ । नेमिः (१०) दशधनुर्देहमानः २२ । (नवकर त्ति) नवकरदेहमानः पार्श्वजिनः २३ । (सत्तुस्सेहो त्ति) सप्तोत्सेधः सप्तहस्तोन्नतो वीरः २४ । सप्त० ४६ द्वार । " पासे णं अरहा पुरिसादाणीयस्स वज्जरिसहसमचउरंस०नंवरयणिओ उड्ढं उच्चत्तेणं होत्था ।" स्था० ६ ठा० । (आयंगुलवीस सय सव्वे त्ति) आत्माङ्गुलैः सर्वे जिनाश्चतुर्विंशतिरपि विंशत्यधिकशताङ्गुलप्रमाणदेहा ज्ञेयाः । इति गाथाऽर्थः । सप्त० ५० द्वार । प्रमाणाङ्गुलैर्जिनानां देहमानमाह--तत्र उत्सेधाङ्गुलनिष्पन्नानि चत्वारि धनूंषि, तथा एकधनुषो द्वादशांशाः क्रियन्ते, तादृशांशाधिकमृषभदेवस्याऽऽत्माङ्गुलं तथा प्रमाणाङ्गुलमपि भवति । तेनाङ्गुलेन ऋषभो विंशत्यधिकं शतं भवति । एतावता ऋषभदेहमानम् (१२०) अङ्गुलम् १ । (बारंगुलहाणि जा सुविहि त्ति) ततो द्वादशाङ्गुलहानिः क्रियते, यावत् सुविधिर्नवमजिनो भवति । यथा अजितस्याष्टोत्तरशतम् (१०८) अङ्गुलं देहमानम २ । सम्भवस्य (९६) षण्णवत्यङ्गुलानि ३ । अभिनन्दनस्य (८४) चतुरशीत्यङ्गुलम् ४ । सुमतेः (७२) द्विसप्ततिः ५ । पद्मप्रभस्य (६०) षष्टिः ६ । अष्टचत्वारिंशत् (४८) सुपार्श्वस्य ७ । चन्द्रप्रभस्य (३६) षट्त्रिंशत् ८ । सुविधेः (२४) चतुर्विंशत्यङ्गुलम् ९ । (वीसंसहुअंगुलहा-णि जावऽणंतो त्ति) विंशत्यंशयुक्ताङ्गुलद्विकहानिः क्रियते यावदनन्तः । शीतलजिनादारभ्यानन्तं यावत् प्रमाणाङ्गुलद्विकेन, तथैकस्य प्रमाणाङ्गुलस्य पञ्चाशद्भागाः क्रियन्ते, तत्र तादृशैः विंशतिभागैश्च हानिः क्रियते, यथा-शीतलस्य २१ एकविंशतिरङ्गुलानि, तथा एकस्य प्रमाणाङ्गुलस्य पञ्चाशद्भागाः क्रियन्ते, तादृशविंशतिहीने तादृशाः विंशद्भागा देहमानम् १० । श्रेयांसस्य १६ एकोनविंशत्यङ्गुलानि दशांशाः पञ्चाशाः ५० देहमानम् ११ । वासुपूज्यस्याङ्गुलाः १६ षोडश ४० अंशाः पञ्चाशाः ५० । १२ । विमलस्याङ्गुलाः १४ चतुर्दश २० विंशत्यंशाः १३ । अनन्तस्याङ्गुला १२ द्वादश

१४ । (तयऊ जा नेमि त्ति) तदर्द्धहानिर्यावन्नेमिः । धर्मस्य १० दशाङ्गुलाः ४० चत्वारिंशत्यंशाः १५ । शान्तेः ६ नवाङ्गुलाः ३० त्रिंशदंशाः १६ । कुन्थुनाथस्याङ्गुला ८ अष्टौ २० विंशदंशाः ५० पञ्चाशाः १७ । अरनाथस्य ७ सप्ताङ्गुलाः १० दशांशाः ५० पञ्चाशाः १८ । मल्लिनाथस्य षडङ्गुलाः १९ । मुनिसुव्रतस्य ४ चत्वार्यङ्गुलाः ४० चत्वारिंशदंशाः ५० पञ्चाशाः २० । नमेः ३ त्र्यङ्गुलाः ३० त्रिंशदंशाः २१ । नेमेः २ द्व्यङ्गुलं विंशदंशाः ५० पञ्चाशाः २२ । (सगवीसंसा पासे त्ति) पार्श्वस्य २७ सप्तविंशत्यंशाः ५० पञ्चाशाः २३ । (विरेग वीसं ति) वीरस्यैकविंशत्यंशाः २४ । (सपण्णास त्ति) एकाङ्गुलस्य पञ्चाशदंशाः क्रियन्ते तादृशा एकविंशत्यंशाः श्रीवीरस्य देहमानम् । एष पञ्चाशशब्दः शीतलजिनादारभ्य वीरजिनं यावद् ज्ञेयः । सत्त० ५१ द्वार ।

(४१) चतुर्विंशतिजिनानामवधिज्ञानिमुनिसंख्या--

अह ओहिनाणि नवई, चउनवई तह य अट्ठनवई ।
एयाइ सयाइ तओ, इगार दस नव अडसहस्सा ।।२५५।
चुलसी बिसयरि सट्ठी, चउपन्नऽमयाल तह य तेयाला ।
छत्तीसं तीससया, पणवी छव्वीस बावीसा ॥ २५६ ॥
अट्ठार सोल पनरस, चउरस तेरस सया अवधिनाणी ।
लक्खेक तित्तिसमह-स्स चतारि सयाइँ सव्वंके ॥२५७॥

ऋषभस्यावधिज्ञानिमुनयो नवतिशतानि १, एवं सर्वत्र क्रमेण जिनानामवधिज्ञानिमुनिसंख्या ज्ञेया । तथाहि-चतुर्नवतिशतानि २, षण्णवतिशतानि ३, अष्टनवतिशतानि ४। (तउ त्ति)एकादशसहस्राणि ५, दशसहस्राणि ६, नवसहस्राणि ७, अष्टौ सहस्राणि ८। (चुलसी ति)चतुरशीतिशतानि ९, द्विसप्ततिशतानि १०, षष्टिशतानि ११, चतुःपञ्चाशच्छतानि १२, अष्टचत्वारिंशच्छतानि १३ तथा च त्रिचत्वारिंशच्छतानि १४, षट्त्रिंशच्छतानि १५, त्रिंशच्छतानि १६; पञ्चविंशतिशतानि १७, षण्मिंशतिशतानि १८, द्वाविंशतिशतानि १९। अष्टादशशतानि २०, षोडशशतानि २१, पञ्चदशशतानि २२, चतुर्दशशतानि २३, त्रयोदशशतानि २४। एते चतुर्विंशतिजिनानामवधिज्ञानिमुनयः । सर्वेषामङ्कानां परिगणनमीहने १३३४०० एकं लक्षं त्रयस्त्रिंशत् सहस्राणि चत्वारि शतानि भवन्ति। सत्त० ११८ द्वार ।

(४२) कल्पशोधिमाह-

पुरिमस्स दुव्विसुज्झो, चरमस्स य दुरणुपालणओ कप्पो ।
मज्झिमगाण जिणाणं, सुविसुज्झो सुहणुपालणओ ।।२५१।

प्रथमतीर्थकृत्तीर्थानां कल्प आचारो दुर्विशोध्यः दुर्बोध्यः, दुःखेन बोध्यते इति दुर्बोध्यः । चरमजिनस्य दुःखेन पाल्यते । मध्यमकानां जिनानां द्वाविंशतिजिनानां सुखेनावबोध्यः, सुखेन अनुपाल्यः । सत्त० १३७ द्वार आ० म० । कल्प० । स्था० ।

पंचहिं ठाणेहिं पुरिमपच्छिमगाणं जिणाणं दुग्गमं भवइ । तं जहा-दुआइक्खं,दुव्विभजं,दुप्पस्सं,दुतितिक्खं, दुरणुचरं । पंचहिं ठाणेहिं मज्झिमगाणं जिणाणं सुगमं भवइ । तं जहा-सुआइक्खं,सुविभजं, सुपस्सं, सुतितिक्खं, सुरणुचरं । सुगमश्चायं, नवरं पञ्चसु स्थानकेषु आख्यातादिक्रियाविशेषलक्षणेषु पुरिमा भरतैरावतेषु चतुर्विंशतिरादिमाः, ते च पश्चिमकाश्चरमाः पुरिमपश्चिमकाः, तेषां जिनानामर्हतां (दुग्गमं ति) दुःखेन गम्यत इति दुर्गमं, भावसाधनोऽयम्, कृच्छ्रवृत्तिरित्यर्थः । तद्भवति, विनेयानामृजुजडत्वेन,वक्रजडत्वेन च । तानि चेमानि-तद्यथेत्यादि । इह चाख्यानं, विभजनं, दर्शनं, तितिक्षणमनुचरणं चेत्येवं वक्तव्येऽपि येषु स्थानेषु कृच्छ्रवृत्तिर्भवति, तानि तद्योगात् कृच्छ्रवृत्तीन्येवोच्यन्त इति कृच्छ्रवृत्तिद्योतकदुःशब्दविशेषितानि कर्मसाधनशब्दाभिधेयान्याख्यानाऽऽदीनि । विचित्रत्वात् शब्दप्रवृत्तेराह-(दुआइक्खमित्यादि) तत्र दुराख्येयं कृच्छ्राख्येयं वस्तुतत्त्वं विनेयानां महावचनाऽऽटोपप्रबोध्यत्वेन भगवतामायासोत्पत्तेरिति । एवमाख्याने कृच्छ्रवृत्तिरुक्ता । एवं विभजनाऽऽदिष्वपि भावनीया । तथा-आख्यातेऽपि तत्र दुर्विभज्यं कष्टविभजनीयम्, ऋजुजडत्वाऽऽदेरेव तद्भवतीति, दुःशकं शिष्याणां वस्तुतत्त्वस्य विनागेनावस्थापनमित्यर्थः; दुर्विभावमित्यत्र पाठान्तरे-दुर्विभाव्यं,दुःशका विभावना कर्तुं तत्येत्यर्थः । तथा-(दुप्पस्सं ति) दुःखेन दृश्यत इति दुर्दर्शमुपपत्तिभिर्दुःशकं शिष्याणां प्रतीतावारोपयितुं तत्त्वमिति भावः । (दुतितिक्खं ति) दुःखेन तितिक्षते सह्यत इति दुस्तितिक्षं परीषहाऽऽदि दुःशकं परीषहाऽऽदिकमुत्पन्नं तितिक्षयितुं शिष्यं तत्प्रति क्षमां कारयितुमिति भाव इति । (दुरणुचरं ति) दुःखेनानुचर्यतेऽनुष्ठीयत इति दुरनुचरमन्तर्भूतकारितार्थत्वेन दुःशकमनुष्ठापयितुमित्यर्थः । अथवा-तेषां तीर्थे दुराख्येयं दुर्विभज्यमाचार्याऽऽदीनां वस्तुतत्त्वं स्वशिष्यान् प्रति आत्मनाऽपि दुर्दर्शे दुस्तितिक्षं दुरनुचरमित्येवंकारितार्थं विमुच्य व्याख्येयम्, तेषामपि ऋजुजडाऽऽदित्वादिति । मध्यमानां तु सुगममकृच्छ्रवृत्ति, तद्विनेयानामृजुप्राज्ञत्वेनाल्पप्रयत्नेनैव बोधनीयत्वाद्विहितानुष्ठाने सुखप्रवर्तनीयत्वाच्चेति । शेषं पूर्ववच्चरमकृच्छ्रार्थविशिष्टता आख्यानाऽऽदीनां वाच्या । स्था० ५ ठा० १ उ० ।

(४३) कर्मण्यावर्णनं, वेदनं वा-

नो जइया तित्थयरो, सो तइया अप्पणम्मि तित्थम्मि ।
वन्नेइ तवोकम्मं,उवहाणसुयम्मि अज्झयणे ॥१॥ आचा०नि० ।

यो यदा तीर्थकृदुपपद्यते स तदाऽऽत्मीये तीर्थे आचारार्थप्रणयनावसानाध्ययने स्वतपःकर्म व्यावर्णयति,इत्ययं स च तीर्थकृतां कल्पः । इह पुनरुपधानश्रुताख्यं चरममध्ययनमभूत्, अत उपधानश्रुतमित्युक्तमिति । आचा० १ श्रु० ९ अ० १ उ० ।

उदाहु धीरे ते फासे पुट्ठोऽहियासए से पुव्वं पेयं पच्छा पेयं भिउरधम्मं विद्धंसणधम्मं अधुवं अणितियं असासयं चयोवचइयं विपरिणामधम्मं पासह, एवंरूवं संधिं समुवेहमाणस्स एकायतणरयस्स इहविप्पमुक्कस्स णत्थि मग्गे विरतस्स त्ति बेमि ।

तीर्थकरैरप्येतदृरूक्षस्पृष्टनिधत्तनिकाचनावस्थाऽऽयातं कर्मावश्यवेद्यं, नान्यथा तन्मोक्षः, अतोऽन्येनाप्यसातावेदनीयोदये सनत्कुमारदृष्टान्तेन मयैवैतत्सोढव्यमित्याकलय्य नोद्विजितव्यम् । आचा० १ श्रु० ५ अ० २ उ० ।

(४४) कुमारवासकालमानं जिनानाम्-

वीसऽट्ठारस पनरस, सहसुवालस दसेव सहसगा ।
पण अड्ढाई लक्खा,पुव्वसहस्स पण्ण पणवीसं॥१३६॥
समलक्खा इगवीसं, तार पनर सहसत्त सहदुगं ।

तो सहसा पणवीसा, पाउणचउवीस इगवीसं ॥१३७॥
वाससयं मल्लिजिणे, पणसयरी पंचवीस तिन्नि सया ।
वासाइँ तीस तीसं, कुमरत्तं ..... ॥१३८॥

लक्षशब्दः पूर्वशब्दश्चाष्टमजिनं यावत्प्रत्येकमभिसंबध्यते । विंशतिर्लक्षपूर्वाणि १ । अष्टादशलक्षपूर्वाणि २ । पञ्चदशलक्षपूर्वाणि ३ । सार्द्धद्वादशलक्षपूर्वाणि ४ । दशैव लक्षपूर्वाणि ५ । सार्द्धसप्तपूर्वलक्षाणि ६ । पञ्चलक्षपूर्वाणि ७ । सार्द्धत्रिलक्षपूर्वाणि ८ । पञ्चाशत्सहस्रपूर्वाणि ९ । पञ्चविंशतिसहस्रपूर्वाणि १० । (समलक्खा इगवीसं ति) एकविंशतिलक्षवर्षाणि ११ । अष्टादशवर्षलक्षाणि १२ । पञ्चदशलक्षवर्षाणि १३ । सार्द्धसप्तवर्षलक्षाणि १४ । सार्द्धत्रिवर्षलक्षाणि १५ । (तो त्ति)ततः पञ्चविंशतिवर्षसहस्राणि १६ । पादोनचतुर्विंशतिवर्षसहस्राणि १७ । एकविंशतिवर्षसहस्राणि १८ । (वाससयं ति) मल्लिजिने वर्षशतम् १९ । पञ्चसप्ततिवर्षशतानि २० । पञ्चविंशतिवर्षशतानि २१ । त्रीणि वर्षशतानि २२ । वर्षाणि त्रिंशत् २३ । पुनर्वर्षाणि त्रिंशत् २४ । एवं क्रमेण सर्वेषां जिनानां कुमारत्वे ज्ञेयम । सत्त० ५४ द्वार । आ० म० । "पञ्च तित्थयरा कुमारवासमज्झे वसित्ता मुंडे० जाव पव्वइया । तं जहा-वासुपुज्जे, मल्ली, अरिट्ठनेमी, पासे, वीरे ।" स्था० ५ ठा० ३ उ० ।

केवलज्ञाननक्षत्राणि च्यवननक्षत्रवद् भावनीयानि, च्यवननक्षत्राण्यग्रे वक्ष्यन्ते । सत्त० ८८ द्वार ।

(४५) केवलोत्पत्तिस्थानानि-

वीरोमहनेमीणं, जंभियबहिपुरिमताल उज्जिते ।
केवलणाणुप्पत्ती, सेसाणं जम्मठाणेसु ॥ १८५ ॥

वीरस्य जृम्भिकाग्रामाद् बहिः केवलोत्पत्तिः १ । ऋषभस्य पुरिमतालनगरे २ । नेमिजिनस्य उज्जयन्ते रैवतकाचले ३ । शेषाणां जिनानां जन्मस्थानेषु जन्मनगरीषु केवलज्ञानोत्पत्तिर्ज्ञाता । सत्त० ६० द्वार । आ० म० ।

(४६) केवलतपः--

अट्ठमभत्तम्मि कए, नाणमुसहमल्लिनेमिपासाणं ।
वसुपुज्जस्स चउत्थे, सेसाणं छट्ठभत्तते ॥ १९० ॥

ऋषभ१मल्लि१९नेमि२२पार्श्व२३जिनानां अष्टमभक्ते तपसि कृते सति केवलज्ञानमुत्पन्नम । वासुपूज्यस्य १२ चतुर्थतपसि । शेषाणामेकोनविंशतिजिनानां षष्ठभक्ततपसि केवलमुत्पन्नम् । सत्त० ६४ द्वार । आ० म० ।

(४७) केवलमासास्तिथयश्च--

फग्गुणिगारसि किण्हा, सुद्धा एगारसी य पोसस्स ।
कत्तियबहुला पंचमि, पोसस्स चउद्दसी धवला ॥१७०॥
चित्तेगारसिपुन्निम, तह फग्गुणकिण्हछट्ठि सत्त मिया ।
सुद्धा कत्तियतइया, पोसम्मि चउद्दसी बहुला ॥ १८१ ॥
माहेऽमावसि सियबिय, पोसे मासम्मि धवलछट्ठी य ॥
वेसाहसामचउद्दसि, पोसे पुन्निमनवमि सुद्धा ॥ १७२ ॥
सियचित्तइज्ज कत्तिय, बारसि एगारसी य मग्गसिरे ।
फग्गुणबारसि सामा, मग्गम्मि इगारसी अमला ॥१७३॥
आसोअमावसी चि-त्तबहुलचउत्थी वि साहसियदसमी ।
केवलमासा य इमे, भणिया पुव्वं व उसुरासी ॥ १७४ ॥

श्रीऋषभाऽऽदीनां क्रमेण केवलज्ञानोत्पत्तिमासतिथयः । तथाहि-फाल्गुनमासस्य कृष्णैकादश्यां केवलज्ञानं ऋषभस्य जातम् । १ । पौषस्य शुक्लैकादश्यामजितस्य । २ । कार्तिकमासस्य कृष्णपञ्चम्यां सं० ३ । पौषस्य शुक्लचतुर्दश्यामभिनन्दनस्य ४ । चैत्रशुक्लैकादश्यां सुम० ५ । चैत्रस्य पूर्णमास्यां पद्म० ६ । फाल्गुनकृष्णषष्ठ्यां सुपा० ७ । फाल्गुनकृष्णसप्तम्यां चन्द्र० ८ । कार्तिकमासस्य शुक्लतृतीयायां सुवि० ९ । पौषे कृष्णचतुर्दश्यां शीत० १० । माघे अमावास्यायां श्रेया० ११ । माघश्वेतद्वितीयायां वासु०१२। पौषे मासे धवलषष्ठ्यां विम० १३ । वैशाखस्य श्यामचतुर्दश्यामनन्त० १४ । पौषे पूर्णिमायां ध० १५ । पौषे शुक्लनवम्यां शान्ति० १६ । चैत्रस्य श्वेततृतीयायां कुन्थु० १७ । कार्तिकस्य श्वेतद्वादश्यामर० १८ । मार्गशीर्षे श्वेतैकादश्यां मल्लि० १९ । फाल्गुनस्य श्यामद्वादश्यां मुनिसुव्र० २० । मार्गशीर्षविमलैकादश्यां नमि० २१ । भाश्विनमासश्यामामावास्यायां नेमि० २२ । चैत्रमासस्य श्यामचतुर्थ्यां पार्श्व० २३ । वैशाखश्वेतदशम्यां वीर० २४ । एते चतुर्विंशतिजिनानां केवलमासाऽऽदयो भणिताः । सत्त० ८७ द्वार । आ० म० । केवलनक्षत्रराशयः च्यवनकल्याणकवत् । सत्त० ७९ द्वार ।

(४८) केवलवृक्षाः-

णग्गोह सत्तवण्णो, साल पियालो पियंगु छत्ताहो ।
सिरिसो नागो मल्ली, पिलंखु-तिंदुयग-पाडलया ॥१८७॥
जंबू असत्थ दहिवन्न नंदि तिलगा य अंबग असोगो ।
चंपग बउलो वेतस, धायइ साओ य णाणतरू ॥१७८॥

न्यग्रोधवृक्षस्याध ऋषभजिनस्य केवलज्ञानमुत्पन्नम् । १ । एवं प्रतिजिनं प्रतिवृक्षं क्रमेण योजना वाच्या । सप्तपर्णः २ । (साल पियालो पियंगु छत्ताहो) शालः ३ । प्रियालः ४ । प्रियङ्गुः ५ । छत्राभवृक्षः ६ । (सिरिसो नागो मल्ली) शिरीषः ७ । नागनामा ८ । मल्लीवृक्षः ९ । (पिलंखु-तिंदुअग-पाडलया) पिलङ्खुवृक्षः १० । तिन्दुकः ११ । पाटलिका १२ । इति गाथार्थः । ॥ १८७ ॥ (जंबू असत्थ दहिवन्न) जम्बूः १३ । अश्वत्थः १४ । दधिपर्णः १५ । (नंदी तिलगा य अंबग असोगो) नन्दिवृक्षः १६ । तिलकः १७ । आम्रकः १८ । अशोकः १९ । (चंपग बउलो वेतस) चम्पकः २० । बकुशः २१ । वेतसः २२ । (धायइ साओ अ णाणतरू) धातकीवृक्षः २३ । शालश्च २४ । एते चतुर्विंशतिर्ज्ञानतरवः । इति गाथाऽर्थः ॥ १८८ ॥ सत्त० ९२ द्वार । सूत्र० । स० ।

केवलज्ञानवृक्षप्रमाणम्—

ते जिणतणुबारगुणा, चेइयतरुणो वि नवरि वीरस्स ।
चेइयतरुवरि सालो, एगारसधणुदयपरिमाणो ॥ १७९ ॥

(ते जिणतणुबारगुणा) ते वृक्षाः भगवतः शरीरात् द्वादशगुणा भवन्ति । (चेइअतरुणो वि त्ति) च्यैत्यवृक्षा अपि एतावत्प्रमाणा भवन्ति । (नवरि वीरस्स । चेइअतरुवरि सालो त्ति) एतावान् विशेषः-यद्वीरस्य चैत्यवृक्षोपरि शालवृक्षो भवति, स कथम्भूतः ?-(एगारसधणुदयपरिमाणो त्ति) एकादशधनुरुच्चपरिमाणः । चैत्यतरूणां प्रमाणमत्र प्रसङ्गादुक्तमिति गाथाऽर्थः । १७९ । सत्त० ६३ द्वार ।

चैत्यतरूणां विशेषतः प्रमाणम्-

बत्तीसाइं धणुइं*, चेइयरुक्खो य वद्धमाणस्स ।
णिच्चोउगो असोगो, ओच्छण्णो सालरुक्खेणं ॥ ३६ ॥
तिण्हेव गाउआइं, चेइयरुक्खो जिणस्स उसभस्स ।
सेसाणं पुण रुक्खा, सरीरओ बारसगुणा उ ॥ ३७ ॥
सच्चत्ता सपडागा, सवेइया तोरणेहिँ उववेया ।
सुरअसुरगरुलमहिया, चेइयरुक्खा जिणवराणं ॥ ३८ ॥

(निच्चोउगो त्ति) नित्यं सर्वदा ऋतुरेव पुष्पाऽऽदिकालो यस्य स नित्यर्तुकः (असोगो त्ति) अशोकाभिधानो यः समवसरणभूमिमध्ये भवति । (ओच्छण्णो सालरुक्खेणं ति) अवच्छन्नः शालवृक्षेणेति । अत एव वचनादशोकस्योपरि शालवृक्षोऽपि कश्चिदस्तीत्यवसीयत इति ॥ ३६ ॥ (तिण्हेव गाउआइं गाहा) ऋषभस्वामिनो, द्वादशगुणा इत्यर्थः ॥३७॥ (सवेइय त्ति) वेदिकायुक्ताः । एते चाशोकाः समवसरणसम्बन्धिनः सम्भाव्यन्त इति ॥ ३८ ॥ स० ।

(४६) अथ ज्ञानवनान्याह-

उसहस्स य सगडमुहे, उज्जुवालुयनइतमम्मि वीरस्स ।
सेसजिणाणं णाणं, उप्पण्णं पुण वयवणेसु ॥१८६॥

(उसहस्स य सगडमुहे त्ति) ऋषभस्य केवलज्ञानं शकटमुखोद्याने उत्पन्नम १ । (उज्जुवालुअनइतडम्मि वीरस्स त्ति) ऋजुवालुकानदीतटे श्रीवीरस्य केवलज्ञानमुत्पन्नम् २ । (सेस. जिणाणं णाणं, उप्पण्णं पुण वयवणेसु त्ति) पुनःशब्दस्य भिन्नक्रमत्वात् शेषजिनानां पुनर्व्रतवनेषु केवलज्ञानमुत्पन्नमिति ॥ १८६ ॥ सप्त० ६१ द्वार ।

(५०) केवलवेला-

नाणं उसहाईणं,पुव्वण्हे पच्छिमण्हि वीरस्स ॥ (१६१)

(पुव्वण्हे) ऋषभाऽऽदीनां त्रयोविंशतिजिनानां केवलज्ञानं पूर्वाह्णे प्रथमप्रहरे समुत्पन्नम् । (पच्छिमण्हि वीरस्स) पश्चिमप्रहरे वीरस्य केवलज्ञानमुत्पन्नम । सप्त० ९५ द्वार ।

(५१) अथ जिनानां गृहस्थकाल-केवलिकालमानमाह-

जहजुगं कुमरनिवइ-चक्कीकालेहिँ होइ गिहिकालो ।
वयकालाओ केवलि-कालो छउमत्थकालूणो ॥२६८॥

यथायोग्यं कुमारकालनृपतिकालचक्रिकालैरेकीकृतैः गृहस्थकालो भवति । व्रतकालात् उपरितनकाल ऊनः क्रियते, यावानवशिष्यते तावान् केवलिकालो भवति । इति गाथाऽर्थः ॥ २६८ ॥ सप्त० १४३ । १४४ द्वार ।

सम्प्रति केवलिपर्यायो वक्तव्यः, स च श्रामण्यपर्यायात् छद्मस्थपर्यायापगमे स्वयमेव ज्ञेय इति पूर्वोक्तमेव श्रामण्यपर्यायं स्मारयति-

उसभस्स पुव्वलक्खं, पुव्वंगूणमजियस्स तं चेव ।
चउरंगूणं लक्खं, पुणो पुणो जाव सुविहि त्ति ॥

ऋषभस्य भगवतः श्रामण्यपर्यायमेकं पूर्वलक्षम् । अजितस्वामिनस्तदेव एकं पूर्वलक्षमेकेन पूर्वाङ्गेन न्यूनम् । पूर्वाङ्गं नाम चतुरशीतिवर्षलक्षाणि । अत ऊर्ध्वं चतुरङ्गोनं पूर्वलक्षं पुनः पुनस्तावद्वक्तव्यं यावत्सुविधिः । तद्यथा-संभवनाथस्य व्रतपर्याय एकं पूर्वलक्षं चतुर्भिरङ्गैरूनम् । अभिनन्दनस्य एकं पूर्वलक्षमष्टभिः पूर्वाङ्गैरूनम । सुमतिनाथस्य एकं पूर्वलक्षं द्वादशभिः पूर्वाङ्गैरूनम । पद्मप्रभस्य एकं पूर्वलक्षं षोडशभिः पूर्वाङ्गैर्हीनम् । सुपार्श्वस्यैकं पूर्वलक्षं विंशत्या पूर्वाङ्गैर्हीनम । चन्द्रप्रभस्यैकं पूर्वलक्षं चतुर्विंशत्या पूर्वाङ्गैर्हीनम । सुविधिनाथस्यैकं पूर्वलक्षमष्टाविंशत्या पूर्वाङ्गैर्हीनम् ।

सेसाणं परियाओ, कुमारवासेण सहियओ भणितो ।
पत्तेयं पि य पुव्वं, सीसाणमणुग्गहट्ठाए ॥

शेषाणां शीतलस्वामिप्रभृतीनां पर्यायः पूर्वं कुमारवासेन सह भणितः, प्रत्येकमपि च, किमर्थमुभयथाऽपि भणित इति चेदत आह-शिष्याणामनुग्रहाय मन्दमतीनामपि शिष्याणां बुद्धौ सम्यक् प्रतिस्फुरतु । आ० म० १ भ० १ खण्ड । सप्त० ।

केवलिमानमाह-

वीससहस्सा उसहे, वीसं बावीस अहव अजियस्स ।
पनरस चउदस तेरस, बारस इक्कारस दसेव ॥ २५३ ॥
अट्ठऽट्ठम सत्तेव य, छ स्सट्ठा छच्च पंच सट्ठा य ।
पंचेव अऊपंचम, चउ सहसा तिन्नि य सया य ॥२५४॥
बत्तीस सया अहवा, बावीससयाइँ हुंति कुंथुस्स ।
अट्ठावीसं बावी-स तह य अठारस सयाइं ॥ २५५ ॥
सोलस पन्नर दस सय, सत्तेव सया हवंति वीरस्स ।
एवं केवलिनाणं,..... ॥२५६॥

केवलिनां विंशतिसहस्रा ऋषभे वृषभजिनस्य । विंशतिः सहस्रा अजितजिनस्य । अथवा मतान्तरेण द्वाविंशतिः सहस्रा अजितनाथस्य । श्रीसम्भवस्य पञ्चदश सहस्राः । श्रीअभिनन्दनस्य चतुर्दश सहस्राः । श्रीसुमतेस्त्रयोदश सहस्राः । श्रीपद्मप्रभस्य द्वादश सहस्राः । श्रीसुपार्श्वस्य एकादश सहस्राः । श्रीचन्द्रप्रभस्य दशैव सहस्राः । श्रीसुविधिजिनस्य अष्टौऽष्टमाः सहस्राः, सप्त सहस्राः पञ्चशताधिका इत्यर्थः । श्रीशीतलजिनस्य सप्त सहस्राः । श्रीश्रेयांसस्य षट् सहस्राः सार्द्धाः सपञ्चशता इत्यर्थः । श्रीवासुपूज्यस्य षट् सहस्राः । श्रीविमलजिनस्य पञ्च सहस्राः, सार्द्धाः सपञ्चशता इत्यर्थः । श्रीअनन्तजिनस्य पञ्चैव सहस्राः । श्रीधर्मजिनस्य अर्द्धपञ्चमाः सहस्राः, चत्वारः सहस्राः सपञ्चशता इत्यर्थः श्रीशान्तिनाथस्य चत्वारः सहस्राः शतत्रयाधिकाः । श्रीकुन्थुजिनस्य द्वात्रिंशच्छतानि, सहस्रत्रयं शतद्वयाधिकमित्यर्थः । अथवा मतान्तरेण द्वाविंशतिशतानि, सहस्रद्वयं शतद्वयाधिकमित्यर्थः । श्रीअरजिनस्य अष्टाविंशतिशतानि, सहस्रद्वयं शताष्टकाधिकमित्यर्थः । श्रीमल्लिजिनस्य द्वाविंशतिशतानि, सहस्रद्वयं शतद्वयाधिकमित्यर्थः । श्रीमुनिसुव्रतस्य अष्टादश शतानि, सहस्रमेकमष्टशताधिकमित्यर्थः । श्रीनमिजिनस्य षोडश शतानि, सहस्रमेकं षड्भिः शतैरधिकमित्यर्थः श्रीनेमिजिनस्य पञ्चदश शतानि, सहस्रमेकं पञ्चशताधिकमित्यर्थः । श्रीपार्श्वजिनस्य दश शतानि, सहस्रमित्यर्थः । श्रीवीरजिनस्य च सप्तशतानि । एतत्पूर्वोक्तं यथाक्रमं सर्वतीर्थकृतां केवलिमानम् । प्रव० २१ द्वार ।

सर्वेषामेव तीर्थकृतां सिद्धगतिः सर्वाङ्गे एकं लक्षं षट्सप्ततिसहस्राणि शतमेकम् १९६१०० । आव० १ अ० ।

* मतान्तरेणैतत् संभाव्यते ।

(५२) अधुना गणधारमाह-

चुलसीइ पणुणवई, विउत्तरं सोलसुत्तर सयं च ।
सत्तडहियं पणनउई, तेणउई अट्ठसीई य ॥
एक्क सीई छाव-त्तरी य छावट्ठि सत्तवन्ना य ।
पन्ना तेयाल्लीसा, बत्तीसा चेव पणतीसा ॥
तेत्तीसऽट्ठावीसा, अट्ठारस चेव तह य सत्तरसा ।
एक्कारस दस नवगं, गणाण माणं जिणिंदाणं ॥

भगवत आदितीर्थंकरस्य चतुरशीतिर्गणाः । गणो नामेह एकवाचनाऽऽचारक्रियास्थानां समुदायो,न कुलसमुदाय इति पूर्वसूरयः । अजितस्वामिनः पञ्चनवतिर्गणाः । सम्भवनाथस्य द्व्युत्तरं शतम् । अभिनन्दनस्य षोमशोत्तरं शतम् । सुमतिनाथस्य परिपूर्णं शतम् । पद्मप्रभस्य सप्ताधिकं शतम् । सुपार्श्वस्य पञ्चनवतिः । चन्द्रप्रभस्य त्रिनवतिः । सुविधिस्वामिनोऽष्टाशीतिः । शीतलस्य एकाशीतिः । श्रेयांसस्य षट्सप्ततिः । वासुपूज्यस्य षट्षष्टिः । विमलस्य सप्तपञ्चाशत् । अनन्तजिनस्य पञ्चाशत् । धर्मस्य त्रिचत्वारिंशत् । शान्तिनाथस्य षट्त्रिंशत् । कुन्थुनाथस्य पञ्चत्रिंशत् । अरजिनस्य त्रयस्त्रिंशत् । मल्लिस्वामिनोऽष्टाविंशतिः । मुनिसुव्रतस्वामिनोऽष्टादश । नमिनाथस्य सप्तदश । अरिष्टनेमेरेकादश । पार्श्वनाथस्य दश । वर्द्धमानस्वामिनो नव । आ०म०१अ०१ खण्ड० "समणस्स भगवओ महावीरस्स नव गणा होत्था । तं जहा-गोदासगणे, उत्तरबलियस्स य गणे, उद्देहगणे, चारणगणे, उडुवाइयगणे, विस्सवाइगणे, कामिड्ढियगणे, माणवगणे, कोडियगणे ।" (स्था० ९ ठा०) एतज्जिनेन्द्राणामृषभाऽऽदीनां जिनानां यथाक्रमं गणानां मानं परिमाणम् । आ० म० १ अ० १ खण्ड । सत्त० ।

(५३) संप्रति गणधरप्रतिपादनार्थमाह-

एक्कारस उ गणहरा, वीरजिणिंदस्स सेसयाणं तु ।
जावइया जस्स गणा, तावइया गणधरा तस्स ॥

गणधरा नाम मूलसूत्रकर्त्तारः, ते च वीरजिनस्य एकादश, गणास्तु नव, द्वयोर्युगपद्योरेकैकवाचनाऽऽचारक्रियास्थत्वात् । शेषाणां तु जिनवरेन्द्राणां यस्य यावन्तो गणास्तस्य तावन्तो गणधराः, प्रतिगणधरं भिन्नभिन्नवाचनाऽऽचारक्रियास्थत्वात् । आ० म० १ अ० १ खण्ड । प्रव० । " पासस्स णं अरहओ पुरिसादाणीयस्स अट्ठ गणा अट्ठ गणहरा होत्था । तं जहा-सुभे, अज्जघोसे, वसिट्ठे, बंभयारी, सोमे, सिरिधरे, वीरिए, भद्दजसे । " यस्त्वावश्यके तूभयेऽपि दश श्रूयन्ते, " जावइया जस्स गणा, तावइया गणहरा तस्स " इति वचनात्, तदिहाऽस्त्वाऽऽदिकारणमपेक्ष्य द्वयोरविरुद्धमिति संभाव्यते । स्था० ८ ठा० ।

(५४) अथ सर्वेषां जिनानां गर्भस्थितिमाह-

दु चउत्थ नवम बारस तेरस पन्नरस सेस गब्भठिई ।
मासा अम नव तदुवरि, उसहाइकमेणिमे दिवसा ॥७५॥
चउ पणवीसं छदिण, अमवीसं छच्च छच्चिगुणवीसं ।
सग छव्वीसं छ च्छ य, वीसिगवीसं उ उव्वीसं ॥७६॥
उ पण अड सत्त अट्ठ य,अट्ठऽट्ठ उ सत्त हुंति गब्भदिणा(७७)

(दु चउत्थ नवम बारस तेरस पन्नरस सेस गब्भठिइ त्ति) द्वितीय४चतुर्थ४नवम९द्वादश१२त्रयोदश१३पञ्चदश१५शेषजिनेषु गर्भस्थितिः (मासा अम नव त्ति) द्वितीयाऽऽदिषु जिनेषु मासा अष्टौ । शेषजिनेषु नव मासाः । (तदुवरि त्ति) तेषां मासानामुपरि (उसहाइकमेणिमे दिवसा) ऋषभाऽऽदिषु क्रमेण इमे वक्ष्यमाणा दिवसा ज्ञेयाः । इति गाथार्थः ॥७५॥ (चउ पणवीसं छदिण) दिनानीति सर्वत्र गम्यम् । चत्वारि १ पञ्चविंशतिः २ षट् ३ (अडवीसं छच्च छच्चिगुणवीसं) अष्टाविंशतिः ४ षट् च ५ षट् ६ एकोनविंशतिः ७ (सग छव्वीसं छ च्छ य) सप्त ८ षड्विंशतिः ९ षट् १० षट् च ११ (वीसिगवीसं उ उव्वीसं) विंशतिः १२ एकविंशतिः १३ षट् १४ षड्विंशतिः १५ । इति गाथार्थः ॥ ७६ ॥ (उ पण अड सत्त अट्ठ य) षट् १६ पञ्च १७ अष्टौ १८ सप्त १९ अष्ट च २० (अट्ठऽट्ठ उ सत्त हुंति गब्भदिणा) अष्टौ २१ अष्ट २२ षट् २३ सप्त २४ भवन्ति गर्भदिनानि जिनानां गर्भस्थितयः । सत्त० २० द्वार ।

(५५) गृहवासे ज्ञानानि-

मइसुयओहितिनाणा, जाव गिहे पच्छिमन्नवाओ ।(७२३)

मतिश्रुतावधिज्ञानलक्षणानि त्रीणि ज्ञानानि सर्वेषां जिनानां भवन्ति, पश्चिमभवादारभ्य यावन्तं कालं गृहे गृहवासे तिष्ठन्ति । सत्त० ४५ द्वार ।

(५६) तीर्थंकरगोत्राणि वंशाश्च-

गोयमगुत्ता हरिवं-ससंभवा नेमिसुव्वया दो वि ।
कासवगुत्ता इक्खा-गुवंसजा सेस बावीसा ॥ १०६ ॥

श्रीनेमिमुनिसुव्रतौ द्वौ गौतमगोत्रौ हरिवंशसंभवौ च । शेषाः तीर्थपाः द्वाविंशतिः काश्यपगोत्रा इक्ष्वाकुवंशजाश्च । सत्त० ३७ द्वार । कल्प० । आव० ।

(५७) चतुर्दशपूर्विणः-

चउदसपुव्वि-सहस्सा, चउरो अद्धऽट्ठमाणि य सयाणि ।
वीसऽहिय सत्ततीसा, इगवीससया य पन्नासा ॥ ३६२ ॥
पनरस चउवीससया, तेवीससयं य वीससय तीसा ।
दो सहस पनरस सया,सयचउदस तेरससयाइं ॥३६३॥
सय बारस इक्कारस, दस नव अट्ठेव छच्च सय सयरा ।
दसऽहिय छचेव सया,छच्च सया अट्ठसट्ठऽहिया॥३६४॥
सयपंच अद्धपंचम,चउरो अद्धऽहिय तिन्नि य सयाइं ॥
उसभाइजिणिंदाणं, चउद्दसपुव्वीण परिमाणं ॥३६५ ॥

तत्राऽऽदिजिनस्य चतुर्दशपूर्विणां चत्वारः सहस्राः, अर्द्धाष्टमानि च शतानि, पञ्चाशदधिकानि सप्तशतानीत्यर्थः । श्रीअजितजिनस्य विंशत्यधिकसप्तत्रिंशच्छतानि । श्रीसंभवजिनस्य एकविंशतिशतानि पञ्चाशदधिकानि । श्रीअभिनन्दनस्य पञ्चदशशतानि । श्रीसुमतेश्चतुर्विंशतिशतानि । श्रीपद्मप्रभस्य त्रयोविंशतिशतानि । श्रीसुपार्श्वस्य विंशतिशतानि त्रिंशदधिकानि । श्रीचन्द्रप्रभस्य द्वौ सहस्रौ । श्रीसुविधेः पञ्चदशशतानि । श्रीशीतलस्य शतानि चतुर्दश । श्रीश्रेयांसस्य त्रयोदशशतानि । श्रीवासुपूज्यस्य द्वादशशतानि । श्रीविमलजिनस्य एकादशशतानि । श्रीअनन्तजिनस्य दशशतानि । श्रीधर्मस्य नवशतानि । श्रीशान्तेरेव शतानि । श्रीकु-

न्थोः षट्शतानि सप्तत्यधिकानि । श्रीअरजिनस्य दशाधिकानि षडेव शतानि । श्रीमल्लिजिनस्य षट्शतानि अष्टषष्ट्यधिकानि । श्रीमुनिसुव्रतस्य शतानि पञ्च । श्रीनमेश्चत्वारि शतानि पञ्चाशदधिकानि । श्रीनेमेश्चत्वारि शतानि । श्रीपार्श्वजिनस्य त्रीणि शतानि पञ्चाशदधिकानि । श्रीवीरजिनस्य च त्रीणि शतानि । इदं पूर्वोक्तमृषभाऽऽदिजिनेन्द्राणां क्रमेण चतुर्दशपूर्विपरिमाणम् । प्रव० २३ द्वार । "समणस्स णं भगवओ महावीरस्स तिण्णिसया चोद्दसपुव्वीणं अजिणाणं जिणसंकासाणं सव्वक्खरसन्निवाईणं जिणो इव अवितहं वागरमाणाणं उक्कोसिया चउद्दसपुव्विसंपया होत्था ।" स्था० ३ ठा० ४ उ० ।

(५८) श्रावकसंख्या चतुर्विंशतितीर्थकराणाम्-

पढमस्स तिन्नि लक्खा, पंच सहस्सा हुलक्खजा संती ।
लक्खोवरि अजियजई, तेणउई अट्ठसीई य ॥ ३६६ ॥
एगासी छावत्तरि, सत्तावन्ना य तह य पन्नासा ।
एगुणतीस नवासी, इगुणासी पन्नरसऽउवेव ॥ ३६७ ॥
अ चिय सहस्स चउरो, सहस्स नउई सहस्स संतिस्स ।
तत्तो एगो लक्खो, उवरिं गुणसीय चुलसी य ॥३६८॥
तेयासी बावत्तरि, सत्तरि इगुणत्तरी य चउसट्ठी ।
एगुणसट्ठिसहस्सा, य सावगाणं जिणवराणं ॥ ३६९ ॥

तत्र प्रथमजिनस्य श्रावकाणां तिस्रो लक्षाः पञ्चसहस्राऽधिकाः । श्रीअजिताऽऽदिजिनानां, यावत् शान्तिजिनस्तावल्लक्षद्वयं श्राद्धानां, द्विलक्षोपरि च यदधिकं भवति तन्निवेद्यते । तत्र तृतीयगाथावर्त्ति 'सहस्स त्ति' पदस्य सर्वत्राभिसंबन्धात् अष्टनवतिःसहस्राः,कोऽर्थः?-अजितजिनस्य लक्षद्वयमष्टनवतिसहस्राधिकमित्यर्थः । श्रीसंभवस्य लक्षद्वयं त्रिनवतिसहस्राधिकमित्यर्थः । श्रीअभिनन्दनस्य लक्षद्वयमष्टाशीतिसहस्राधिकमित्यर्थः । श्रीसुमतेः लक्षद्वयमेकाशीतिसहस्राधिकमित्यर्थः । श्रीपद्मप्रभस्य लक्षद्वयं षट्सप्ततिसहस्राधिकमित्यर्थः । श्रीसुपार्श्वस्य लक्षद्वयं सप्तपञ्चाशत्सहस्राधिकमित्यर्थः । चन्द्रप्रभस्य लक्षद्वयं पञ्चाशत्सहस्राधिकमित्यर्थः । सुविधेर्लक्षद्वयमेकोनत्रिंशत्सहस्राधिकमित्यर्थः । श्रीशीतलस्य लक्षद्वयं नवाशीतिसहस्राधिकमित्यर्थः । श्रीश्रेयांसस्य लक्षद्वयमेकोनाशीतिसहस्राधिकमित्यर्थः । श्रीवासुपूज्यस्य लक्षद्वयं पञ्चदशसहस्राधिकमित्यर्थः । श्रीविमलजिनस्य लक्षद्वयमष्टसहस्राधिकमित्यर्थः । श्रीअनन्तजिनस्य लक्षद्वयं षट्सहस्राधिकमित्यर्थः । श्रीधर्मस्य लक्षद्वयं चतुर्भिः सहस्रैरधिकमित्यर्थः । श्रीशान्तेः लक्षद्वयं नवतिसहस्राधिकमित्यर्थः । ततः श्रीशान्तिनाथादनन्तरं कुन्थुप्रभृतितीर्थकृतां महावीरपर्यन्तानामेकं लक्षं श्राद्धानां, लक्षोपरि, च यत्संख्यास्थानं तदुच्यते, यथा—एकोनाशीतिः श्रीकुन्थोः, लक्षमेकोनाशीतिसहस्राधिकमित्यर्थः । श्रीअरजिनस्य लक्षमेकं चतुरशीतिसहस्राधिकमित्यर्थः । श्रीमल्लेर्लक्षमेकं त्र्यशीतिसहस्राधिकमित्यर्थः । श्रीमुनिसुव्रतस्य लक्षमेकं द्विसप्ततिसहस्राधिकमित्यर्थः । नमेर्लक्षमेकं सप्ततिसहस्राधिकमित्यर्थः । श्रीनेमेर्लक्षमेकोनसप्ततिसहस्राधिकमित्यर्थः । श्रीपार्श्वस्य लक्षमेकं चतुःषष्टिसहस्राधिकमित्यर्थः । श्रीवीरजिनस्य च लक्षमेकोनषष्टिसहस्राधिकमित्यर्थः । इति जिनवरेऽचतुर्विंशतेः संबन्धिनां श्रावकाणां मानं क्रमेण ज्ञातव्यम् । प्रव० २४ द्वार ।

(५९) अथ चक्रित्वकालः-

तत्तो तित्थयरा चक्कवट्टी होत्था । तं जहा-संती, कुंथू, अरो ।

अत्रोक्तम्-" संती कुंथू अ अरो, अरिहंता चेव चक्कवट्टी य । अवसेसा तित्थयरा, मंडलिआ आसि रायाणो " ॥१॥इति शान्तिकुन्थ्वरजिनानां चक्रित्वं, शेषजिनानां नास्ति चक्रित्वम् । स्था० ३ ठा० ४ उ० । सत्त० ।

(६०) अथ चारित्रम्-

सामाइयचारित्तं, छेओवट्ठावणं च परिहारं ।
तह सुहुमसंपरायं, अहखाइं पंच चरणाइं ॥ २८२ ॥
दुण्हं पण इक्कराणं, तिन्नि उ सामाइयसुहुमऽहक्खाया ।
(२८३)

तत्र प्रथमं सामायिकचारित्रम् १। द्वितीयं छेदोपस्थापनीयम् २। तृतीयं परिहारविशुद्धिकम् ३। चतुर्थं सूक्ष्मसंपरायम् ४। पञ्चमं यथाख्यातम् ५। एतानि पञ्च चारित्राणि भवन्तीति गाथार्थः।२८२। ऋषभवीरयोस्तीर्थे पञ्च चारित्राणि पूर्वोक्तानि भवन्ति । इतरेषां मध्यमद्वाविंशतिजिनानां त्रीणि चारित्राणि भवन्ति । तद्यथा-सामायिक १ सूक्ष्मसंपराय २ यथाख्यातानि ३ । सत्त० १३० द्वार ।

(६१) च्यवननक्षत्रमृषभाऽऽदीनाम्-

उत्तरसाढा रोहिणि, मियसीस पुणव्वसू महा चित्ता ।
वइसाहऽणुराहा मू—ल पुव्व सवणो सयभिसा य ॥६५॥
उत्तरभद्दव रेवइ, पुस्स भरणि कत्तिया य रेवइ य ।
अस्सिणि सवणो अस्सिणि, चित्त विसाहुत्तरा रिक्खा६६

ऋषभजिने उत्तराषाढा नक्षत्रम् १ । एवं सर्वत्र जिननामानि क्रमेण योज्यानि । रोहिणी २ मृगशीर्षम् ३ पुनर्वसु ४ मघा ५ चित्रा ६ विशाखा ७ अनुराधा ८ मूलम् ९ पूर्वाषाढा १० श्रवणः ११ शतभिषक् १२ उत्तराभाद्रपत १३ रेवती १४ पुष्यः १५ भरणी १६ कृत्तिका १७ रेवती १८ अश्विनी १९ श्रवणः २० अश्विनी २१ चित्रा २२ विशाखा २३ उत्तराषाढा २४ एतानि नक्षत्राणि । सत्त० १५ द्वार ।

(६२) अथ च्यवनकल्याणकतिथयो मासाश्च-

बहुलाऽसाढचउत्थी, सुद्धा वइसाहतेरसी कमसो ।
फग्गुणअट्ठमि वइसा—हचउत्थि सावणियबीया य ।६७।
माहस्स कसिणछट्ठी, जह—ट्ठमि चित्तमासपंचमिया ।
फग्गुणनवमी वइसा—हछट्ठि तह जिट्ठजुण्हट्ठी य ॥ ६० ॥
जिट्ठम्मि सुद्धनवमी, तत्तो वइसाहबारसी सुद्धा ।
सावणकसिणा सत्तमि, विसाहमिय भद्दकिण्हा य ॥६१॥
सावणकसिणा नवमी, फग्गुणसियबीय फग्गुणचउत्थी ।
सावणअस्सिणि पुन्निम, कत्तिअबहुला दुवालसिया ॥६२॥
असिया चित्तचउत्थी, असाढसियछट्ठि चवणमासाइं ।
इत्थऽन्नत्थ वि पयमं, अभणियमहिगारओ नेयं ॥६३॥

जूयभविस्सजिणाणं, पुव्वणुपुव्वीएँ वट्टमाणाणं ।
पच्छाणुपुव्वियाए, कल्लाणतिथी य अन्नुन्नं ॥६४॥

ऋषभस्य च्यवनकल्याणके आषाढकृष्णचतुर्थी । १ । अजितजिनस्य वैशाखशुद्धत्रयोदशी २ । फाल्गुनशुद्धाष्टमी संभवस्य ३ । वैशाखचतुर्थी अभिनन्दनस्य ४ । श्रावणशुक्लद्वितीया सु० ५ । माघस्य कृष्णषष्ठी पद्म० ६ । भाऽपदकृष्णाष्टमी सुपा० ७ । चैत्रकृष्णपञ्चमी चन्द्र० ८ । फाल्गुनकृष्णा नवमी सुवि० ९ । वैशाखकृष्णषष्ठी शीत० १० । ज्येष्ठकृष्णषष्ठी श्रेयां० ११ । ज्येष्ठशुक्लनवमी वासु० १२ । वैशाखशुद्धद्वादशी विमल० १३ । श्रावणकृष्णसप्तमी अनन्त० १४ । वैशाखश्वेतसप्तमी धर्म० १५ । भाऽपदकृष्णसप्तमी शान्ति० १६ । श्रावणकृष्णनवमी कुन्थु० १७ । फाल्गुनसितद्वितीयाऽरजि० १८ । फाल्गुनसितचतुर्थी मल्लि० १९ । श्रावणपूर्णिमा मुनिसु० २० । अश्विनपूर्णिमा नमि० २१ । कार्तिककृष्णद्वादशी नेमि० २२ । चैत्रकृष्णचतुर्थी पार्श्व० २३ । आषाढश्वेतषष्ठी वीरजिनस्य २४ । अत्रान्यत्रापि प्रकटं साक्षादित्यर्थः । यदभणितं तदधिकारतो ज्ञेयमिति । भूततीर्थपाः केवलज्ञानिप्रभृतयः, भविष्यज्जिनाः पद्मनाभाऽऽदयः, तेषामन्योन्यं कल्याणकतिथयः पूर्वानुपूर्व्या भवेयुः । यथा हि याः कल्याणकतिथयः भूतकाले प्रथमजिनस्य केवलज्ञानिनः, ता एव भविष्यज्जिनकाले पद्मनाभस्येति । प्रकारान्तरमाह-वर्तमानजिना ऋषभाऽऽदयस्तेषां भूतजिनापेक्षया भविष्यज्जिनापेक्षया च तिथयः पश्चानुपूर्व्या भवेयुः । सत्त० १४ द्वार । आव० ।

(६३) ऋषभाऽऽदीनां क्रमतो च्युतिराशयः-

धणु वसह मिहुण मिहुणो, सीहो कन्ना तुला अली चेव।
धणु धणु मयरो कुंभो, दुसु मीणो ककमो मेसो ॥ ६७ ॥
विस मीण मेस मयरो, मेसो कन्ना तुला य कन्ना य ।
इय चवणरिक्खरासी, जम्मे दिक्खाएँ नाणे वि ॥ ६८ ॥

धनुः १। वृषः २। मिथुनम् ३। मिथुनम् ४। सिंहः ५। कन्या ६। तुला ७। वृश्चिकः ८। धनुः ९। धनुः १०। मकरः ११। कुम्भः १२। मीनः १३। मीनः १४। कर्कटः १५। मेषः १६। वृषः १७ मीनः १८। मेषः १९। मकरः २०। मेषः २१। कन्या २२। तुला २३। कन्या २४ ऋषभाऽऽदीनां क्रमतश्च्युतिराशयः। जन्मकल्याणके, दीक्षाकल्याणके, केवलज्ञानकल्याणकेऽप्येत एव नक्षत्रराशयो भवन्ति । सत्त० १६ द्वार ।

(६४) च्यवनवेला-

चुइवेला निसिअद्धं, जिणाण एमेव एगसमयम्मि ।
चुइमासाइविआरो, भरहेरवएसु स चेव ॥ ६९ ॥

(चुइवेला निसिअद्धं जिणाण त्ति) च्यवनवेला अर्द्धरात्रो जिनानाम् । (एमेव एगसमयम्मि त्ति) एवमेव तत्करीत्या एकस्मिन् समये (चुइमासाइविआरो त्ति) च्यवनमासाऽऽदिविचारः (भरहेरवएसु स चेव त्ति) भरतैरवतेषु स एव, यत् च्यवनमासाऽऽदि ऋषभाऽऽदीनामुक्तं तदेव सर्वभरतैरवतेषु जिनानां समयोऽपि स एव भवति यथा भरतक्षेत्रे, तथैव तस्मिन् समये तस्मिन्क्षेत्रे तस्यां वेलायाम् ऐरवतक्षेत्रेऽपि सैव वेला भवति। इति गाथाऽर्थः ॥ ६९ ॥ इति सर्वेषां जिनानां च्यवनवेला । सत्त० १७ द्वार ।

(६५) छद्मस्थकालमानं सर्वजिनानां कथ्यते-

वाससहस्सं बारस, चउदस अट्ठार वीसवरिसा य ।
मासा छन्नव तिन्नि य, चउ तिग दुगमिक्कग दुगं च॥१७३॥
तिय दुग इक्कग सोलस, वासा तिन्नि य तहेव ऽहोरत्तं ।
मासिक्कारस नवगं, चउपन्नदिणाइं चुन्नसीइं ॥ १७४ ॥
पक्खऽहिय सङ्कवारस, वासा छउमत्थकालपरिमाणं। [१७५]

ऋषभस्य छद्मस्थकालमानं वर्षसहस्रम् १। एवं क्रमेण द्वादश वर्षाणि २। चतुर्दशवर्षाणि ३। अष्टादशवर्षाणि ४। विंशतिवर्षाणि ५। षण्मासाः ६। (" चंदप्पहे णं अरहा छम्मासा छउमत्थे होत्था । " स्था०) नवमासाः ७। त्रयो मासाः ८। चत्वारो मासाः ९। त्रयो मासाः १०। द्वौ मासौ ११। एको मासः १२। द्वौ मासौ १३। त्रीणि वर्षाणि १४। द्वे वर्षे १५। एकं वर्षम् १६। षोडश वर्षाणि १७। त्रीणि च वर्षाणि १८। एकमहोरात्रम् १९। एकादश मासाः २०। नव मासाः २१। चतुःपञ्चाशद्दिनानि २२। चतुरशीतिदिनानि २३। पक्षाधिकसार्द्धद्वादशवर्षाणि २४। इति क्रमात् छद्मस्थकालमानं तीर्थपानाम । सत्त० ८५ द्वार । त्रीण्यहोरात्राणि १८। द्वादश वर्षाणि २४। इति मतभेदः । आ० म० १ अ० १ खण्ड ।

(६६) छद्मस्थतपोमानम-

उग्गं च तवोकम्मं, विसेसओ वद्धमाणस्स । [१७६]
वयदिणमेगं पुन्नं, छमासियं बीययं पणदिणूणं ।
नव चउमासिय दु तिमा-सिया अढाइज्जमासिया दुन्नि १७६
छ दुमासिय दु दिवड्ढय-मासिय बारस तहेगमासीया ।
बावत्तरऽद्धमासिय, पडिमा बारऽट्ठमेहिं च ॥ १७७ ॥
दो चउ दस खमणेहिं, निरंतरं छट्ठमाइपडिमतिगं ।
दुसयगुणतीस छट्ठा, पारणया तिसयगुणवन्ना ॥१७८॥

(उग्गं च तवोकम्मं ति) उग्रं च तपःकर्म सर्वेषां जिनवराणाम् (विसेसओ वद्धमाणस्स त्ति) विशेषतो वर्द्धमानस्य, वीरजिनस्य सर्वेभ्योऽपि जिनेभ्योऽधिकतरमुग्रं तपः, तेषां कर्माभावादिति भावः । श्रीवीरतपःप्रमाणमाह-(वयदिणं ति) व्रतदिनं, यस्मिन् दिने व्रतं गृहीतं तद्दिनमुपोषितवानित्यर्थः । (एगं पुन्नं छमासियं ति) एकं पूर्णं षाण्मासिकं कृतम १ । (बीययं पणदिणूणं ति) द्वितीयषाण्मासिकं पञ्चदिनैरूनं विहितम २ । (नव चउमासिय दु तिमासिय त्ति) स्वामिना नव चातुर्मासिकानि कृतानि, द्वे त्रैमासिके कृते, (अढाइज्जमासिआ दुन्नि त्ति) द्वे सार्द्धद्विमासिके कृते ॥ १७६ ॥ (छ दुमासिय दुदिवड्ढय-मासिय त्ति) षट् द्विमासिकानि द्वे सार्द्धमासिके कृते । (बारस तहेगमासीया) तथैकमासिकानि मासक्षपणानि द्वादश। (बावत्तरऽद्धमासिय त्ति) द्विसप्ततिरर्द्धमासक्षपणानि । (पडिमा बारऽट्ठमेहिं च) प्रतिमा द्वादश विहिता अष्टमनक्तैः, चः पादपूरणे ॥ १७७ ॥ (दो चउ दस खमणेहिं) द्वाभ्यां चतुर्भिर्दशभिश्चोपवासैः (निरंतरं छट्ठमाइपडिमतिगं) अन्तररहितं पारणकरहितं जघ१महाभद्र२सर्वतोभद्र३प्रतिमात्रिकं कृतमिति । (दुसयगुणतीसछट्ठा) द्वे शते एकोनत्रिंशदधिके षष्ठभक्तानि विहितानि । (पारणया ति-

सयगुणवन्ना) 'पक्काधिकसार्द्धद्वादशवर्षैः' श्रीणि शतान्येकोनपञ्चाशत् ३४९ पारणकानि विहितानि । इति गाथार्थः ॥१७८॥ सम० ६४ द्वार ।

(६७) तीर्थंकरयक्षाः-

जक्खा गोमुह महजक्ख तिमुह ईसर सतुंबुरू कुसुमो ।
मायंगो विजयाऽजिय, बंभो मणुओ सुरकुमारो ॥३७५॥
छम्मुह पायाल किन्नर, गरुडो गंधव्व तह य जक्खिंदो ।
कूबर वरुणो भिउडी, गोमेहो वामण मयंगो ॥३७६॥

यक्षा भक्तिदक्षास्तीर्थकृतामिमे-यथा प्रथमजिनस्य गोमुखो यक्षः सुवर्णवर्णो गजवाहनश्चतुर्भुजो वरदाक्षमालिकायुक्तदक्षिणपाणिद्वयो, मातुलिङ्गपाशकान्वितवामपाणिद्वयश्च । अजितनाथस्य महायक्षाभिधो यक्षश्चतुर्मुखः श्यामवर्णः करीन्द्रवाहनोऽष्टपाणिर्नरदमुष्करक्षसूत्रपाशकान्वितदक्षिणपाणिचतुष्टयो, बीजपूरकाभयाङ्कुशशक्तियुक्तवामपाणिचतुष्कश्च । श्रीसम्भवजिनस्य त्रिमुखो नाम यक्षस्त्रिवदनस्त्रिनेत्रः श्यामवर्णो मयूरवाहनः षड्भुजो नकुलगदाभययुक्तदक्षिणकरकमलत्रयो, मातुलिङ्गनागाक्षसूत्रवामपाणिपद्मत्रयश्च । श्रीअभिनन्दनस्य ईश्वरो यक्षः श्यामकान्तिर्गजवाहनश्चतुर्भुजो मातुलिङ्गाक्षसूत्रयुक्तदक्षिणकरकमलद्वयो, नकुलाङ्कुशान्वितवामपाणिद्वयश्च । श्रीसुमतेस्तुम्बुरुर्यक्षः श्वेतवर्णो गरुडवाहनश्चतुर्भुजो वरदशक्तियुक्तदक्षिणपाणिद्वयो, गदानागपाशयुक्तवामपाणिद्वयश्च । श्रीपद्मप्रभस्य कुसुमो यक्षो नीलवर्णः कुरङ्गवाहनश्चतुर्भुजः फलाभययुक्तदक्षिणपाणिद्वयो, नकुलाक्षसूत्रयुक्तवामपाणिद्वयश्च । सुपार्श्वस्य मातङ्गो यक्षो नीलवर्णो गजवाहनश्चतुर्भुजो विल्वपाशयुक्तदक्षिणपाणिद्वयो, नकुलाङ्कुशयुक्तवामपाणिद्वयश्च । श्रीचन्द्रप्रभस्य विजयो यक्षो हरितवर्णस्त्रिलोचनो हंसवाहनो द्विभुजः कृतदक्षिणहस्तचक्रो, वामहस्तधृतमुष्करश्च । श्रीसुविधिजिनस्याऽजितो यक्षः श्वेतवर्णः कूर्मवाहनश्चतुर्भुजो मातुलिङ्गाक्षसूत्रयुक्तदक्षिणपाणिद्वयो, नकुलकुन्तकलितवामपाणिद्वयश्च । श्रीशीतलस्य ब्रह्मा यक्षश्चतुर्मुखस्त्रिनेत्रः श्वेतवर्णः पद्मासनोऽष्टभुजो मातुलिङ्गमुष्करपाशकाभययुक्तदक्षिणपाणिचतुष्टयो, नकुलगदाङ्कुशाक्षसूत्रयुक्तवामपाणिचतुष्टयश्च । श्रीश्रेयांसस्य मनुजो यक्षो, मतान्तरेण ईश्वरो, धवलवर्णस्त्रिनेत्रो वृषभवाहनश्चतुर्भुजो मातुलिङ्गगदायुक्तदक्षिणपाणिद्वयो, नकुलाक्षसूत्रयुक्तवामपाणिद्वयश्च । श्रीवासुपूज्यस्य सुरकुमारो यक्षः श्वेतवर्णो हंसवाहनश्चतुर्भुजो बीजपूरकबाणान्वितदक्षिणकरद्वयो, नकुलधनुर्युक्तवामपाणिद्वयश्च । श्रीविमलस्य षण्मुखो यक्षः श्वेतवर्णः शिखिवाहनो द्वादशभुजः फलचक्रबाणखड्गपाशकाक्षसूत्रयुक्तदक्षिणपाणिषट्को, नकुलचक्रधनुःफलकाङ्कुशाभययुक्तवामपाणिषट्कश्च । श्रीअनन्तस्य पाताल यक्षस्त्रिमुखो रक्तवर्णो मकरवाहनः षड्भुजः पद्मखड्गपाशयुक्तदक्षिणपाणित्रयो, नकुलफलकाक्षसूत्रयुक्तवामपाणित्रयश्च । श्रीधर्मस्य किन्नरो यक्षस्त्रिमुखो रक्तवर्णः कूर्मवाहनः षड्भुजो बीजपूरकगदाभययुक्तदक्षिणपाणित्रयो, नकुलपद्माक्षमालायुक्तवामपाणित्रयश्च । श्रीशान्तिनाथस्य गरुडो यक्षो वराहवाहनः क्रोडवदनः श्यामरुचिश्चतुर्भुजो बीजपूरकपद्मान्वितदक्षिणकरद्वयो, नकुलाक्षसूत्रयुक्तवामपाणिद्वयश्च । श्रीकुन्थोर्गन्धर्वयक्षः श्यामवर्णो हंसवाहनश्चतुर्भुजो वरदपाशकान्वितदक्षिणपाणिद्वयो, मातुलिङ्गाङ्कुशाधिष्ठितवामकरद्वयश्च । श्रीअरजिनस्य यक्षेन्द्रो यक्षः षण्मुखस्त्रिनेत्रः श्यामवर्णः [शङ्ख]शिखिवाहनो द्वादशभुजो बीजपूरकबाणखड्गमुष्करपाशकाभययुक्तदक्षिणकरषट्को, नकुलधनुःफलकशूलाङ्कुशाक्षसूत्रयुक्तवामपाणिषट्कश्च । श्रीमल्लिजिनस्य कूबरो यक्षश्चतुर्मुख इन्द्रायुधवर्णो गजवाहनोऽष्टभुजो वरदपरशुशूलाभययुक्तदक्षिणपाणिचतुष्टयो, बीजपूरकशक्तिमुष्करान्नसूत्रयुक्तवामपाणिचतुष्टयश्च । अन्ये कूबरस्थाने कुबेरमाहुः । श्रीमुनिसुव्रतस्य वरुणो यक्षश्चतुर्मुखस्त्रिनेत्रः सितवर्णो वृषवाहनो जटामुकुटभूषितोऽष्टभुजो बीजपूरकगदाबाणशक्तियुक्तदक्षिणकरकमलचतुष्को, नकुलपद्मधनुःपरशुयुतवामपाणिचतुष्टयश्च । श्रीनमिजिनस्य भृकुटिर्यक्षश्चतुर्मुखस्त्रिनेत्रः सुवर्णवर्णो वृषभवाहनोऽष्टभुजो बीजपूरकशक्तिमुष्करान्नयुक्तदक्षिणकरचतुष्टयो, नकुलपरशुवज्राक्षसूत्रयुक्तवामकरचतुष्टयश्च । श्रीनेमिजिनस्य गोमेधो यक्षस्त्रिमुखः श्यामकान्तिः पुरुषवाहनः षड्भुजो मातुलिङ्गपरशुचक्रान्वितदक्षिणकरत्रयो, नकुलशूलशक्तियुक्तवामपाणित्रयश्च । श्रीपार्श्वजिनस्य वामनो यक्षो, मतान्तरेण पार्श्वनामा, गजमुख उरगफणामणिमंडिताशिराः श्यामवर्णः कूर्मवाहनश्चतुर्भुजो बीजपूरकोरगयुक्तदक्षिणपाणिद्वयो, नकुलभुजगयुक्तवामपाणियुगश्च । श्रीवीरजिनस्य मतङ्गो यक्षः श्यामवर्णो गजवाहनो द्विभुजो नकुलयुतदक्षिणभुजो, वामकरधृतबीजपूरकश्च । प्रव० २६ द्वार ।

(६८) तीर्थंकरदेव्यः-

देवीओ चक्केसरि, अजिआ दुरितारि कालि महकाली ।
अच्चुय संता जाला, सुतारयाऽसोय सिरिवच्छा ॥३७७॥
पवर विजयंऽकुसा प—न्नग त्ति निव्वाण अच्चुया धरणी ।
वइरुट्टऽच्चुत्त गंधा—रि अंब पउमावई सिद्धा ॥३७८॥

तत्राऽऽद्यजिनस्य चक्रेश्वरी देवी, मतान्तरेणाऽप्रतिचक्रा, सुवर्णवर्णा गरुडवाहनाऽष्टकरा वरदबाणचक्रपाशयुक्तदक्षिणपाणिचतुष्टया, धनुर्वज्रचक्राङ्कुशयुक्तवामपाणिचतुष्टया चेति । श्रीअजितस्याजिता देवी गौरवर्णा लोहासनाधिरूढा चतुर्भुजा वरदपाशकाधिष्ठितदक्षिणकरद्वया, बीजपूरकाङ्कुशाङ्ककृतवामपाणिद्वया च । श्रीसम्भवस्य दुरितारिर्देवी गौरवर्णा मेषवाहना चतुर्भुजा वरदाक्षसूत्रभूषितदक्षिणभुजद्वया, फलाभयान्वितवामकरद्वया च । श्रीअभिनन्दनस्य काली नाम देवी श्यामकान्तिः पद्मासना चतुर्भुजा वरदपाशाधिष्ठितदक्षिणकरद्वया, नागाङ्कुशाङ्ककृतवामपाणिद्वया च । श्रीसुमतेर्महाकाली देवी सुवर्णवर्णा पद्मासना चतुर्भुजा वरदपाशाधिष्ठितदक्षिणकरद्वया, मातुलिङ्गाङ्कुशयुक्तवामपाणिद्वया चेति । श्रीपद्मप्रभस्याऽच्युता, मतान्तरेण श्यामा, देवी श्यामवर्णा नरवाहना चतुर्भुजा वरदबाणान्वितदक्षिणकरद्वया, कार्मुकाभययुक्तवामपाणिद्वया च । श्रीसुपार्श्वस्य शान्ता देवी सुवर्णवर्णा गजवाहना चतुर्भुजा वरदाक्षसूत्रयुक्तदक्षिणकरद्वया, शूलाभययुक्तवामहस्तद्वया च । श्रीचन्द्रप्रभस्य ज्वाला, मतान्तरेण भृकुटिः, देवी पीतवर्णा वराहकाख्यजीवविशेषवाहना चतुर्भुजा खड्गभूषितदक्षिणकरद्वया, फलकपरशुयुतवामपाणिद्वया च । श्रीसुविधेः सुतारा देवी गौरवर्णा वृषभवाहना चतुर्भुजा वरदाक्षसूत्रयुक्तदक्षिणभुजद्वया, कलशाङ्कुशाञ्चितवामपाणिद्वया च । श्रीशीतलस्य अशोका देवी नीलवर्णा पद्मासना चतुर्भुजा वरदपाशयुक्तदक्षिणपाणिद्वया, फलाङ्कुशयुक्तवामपाणिद्वया च । श्रीश्रेयांसस्य श्रीवत्सा देवी, मतान्तरेण मानवी, गौरवर्णा सिंहवाहना चतु-

भुजा वरदमुद्गरान्वितदक्षिणकरद्वया, कलशाङ्कुशयुक्तवामकरद्वया च । श्रीवासुपूज्यस्य प्रवरा देवी, मतान्तरेण चण्डा, श्यामवर्णा तुरगवाहना चतुर्भुजा वरदशक्तियुक्तदक्षिणकरयुगा, पुष्पगदायुतवामकरद्वया च । श्रीविमलस्य विजया, मतान्तरेण विदिता, देवी हरितालवर्णा पद्मासना चतुर्भुजा बाणपाशयुक्तदक्षिणकरद्वया, धनुर्नागयुतवामपाणिद्वया च । श्रीअनन्तजिनस्य अंकुशा देवी गौरवर्णा पद्मासना चतुर्भुजा पद्मपाशयुक्तदक्षिणपाणिद्वया, फलकाङ्कुशयुक्तवामकरद्वया च । श्रीधर्मस्य पन्नगा देवी, मतान्तरेण कन्दर्पा, गौरवर्णा मत्स्यवाहना चतुर्भुजा उत्पलाङ्कुशयुक्तदक्षिणपाणिद्वया, पद्माभययुतवामपाणिद्वया च । श्रीशान्तिनाथस्य निर्वाणी देवी कनकरुचिः पद्मासना चतुर्भुजा पुस्तकोत्पलयुक्तदक्षिणपाणिद्वया, कमण्डलुकमलकलितवामकरद्वया च । श्रीकुन्थोरच्युता देवी, मतान्तरेण बलाभिधाना, कनकच्छविर्मयूरवाहना चतुर्भुजा बीजपूरकशूलान्वितदक्षिणपाणिद्वया, भुजगेशपद्मान्वितवामपाणिद्वया च । श्रीअरजिनस्य धारणी देवी नीलवर्णा पद्मासना चतुर्भुजा मातुलिङ्गोत्पलयुक्तदक्षिणपाणिद्वया, पद्ममालसूत्रान्वितवामपाणिद्वया च । श्रीमल्लिजिनस्य वैरोट्या देवी कृष्णवर्णा पद्मासना चतुर्भुजा वरदाक्षसूत्रयुक्तदक्षिणपाणिद्वया, बीजपूरकशक्तियुक्तवामपाणिद्वया चेति । श्रीमुनिसुव्रतस्य अच्छुप्ता देवी, मतान्तरेण नरदत्ता, कनकरुचिर्भद्रासनारूढा चतुर्भुजा वरदाक्षसूत्रयुक्तदक्षिणभुजद्वया, बीजपूरकशूलयुक्तवामकरद्वया च । श्रीनमिजिनस्य गन्धारी देवी श्वेतवर्णा हंसवाहना चतुर्भुजा वरदखड्गयुक्तदक्षिणकरद्वया, बीजपूरककुन्तकलितवामकरद्वया च । श्रीनेमिजिनस्य अम्बा देवी कान्तरुचिः सिंहवाहना चतुर्भुजा आम्रलुम्बिपाशयुतदक्षिणकरद्वया, चक्राङ्कुशाऽऽसक्तवामकरद्वया च । श्रीपार्श्वजिनस्य पद्मावती देवी कनकवर्णा कुक्कुटसर्पवाहना चतुर्भुजा पद्मपाशान्वितदक्षिणकरद्वया, फलाङ्कुशाधिष्ठितवामकरद्वया च । श्रीवीरजिनस्य सिद्धायिका देवी हरितवर्णा सिंहवाहना चतुर्भुजा पुस्तकाभययुक्तदक्षिणकरद्वया, बीजपूरकवीणान्वितवामकरद्वया चेति । अत्र सूत्रकारेण यक्षाणां देवीनां च केवलानि नामान्येवाभिहितानि, न पुनर्नयनवदनवर्णाऽऽदिस्वरूपं निरूपितम्; अस्माभिस्तु शिष्यहिताय निर्वाणकलिकाऽऽदिशास्त्रानुसारेण किञ्चित्तदीयमुखवर्णप्रहरणाऽऽदिस्वरूपं निरूपितमिति । प्रव० २७ द्वार ।

(जन्मवेला २२ । जन्मनक्षत्राणि २३ । जन्मराशयः २४ इति द्वारत्रिकं च्यवनवत्)

(६९) तीर्थंकरजन्मनगर्यः—

....., जम्मस्स इमा उ नयरीओ ।
इक्खागभूमऽउज्झा, सावत्थी दो अउज्झ कोसंबी ।
वाणारसि चंदपुरी, कायंदी भद्दिलपुरं च ॥ ९३ ॥
सीहपुर चंप कंपि-ल्लऽउज्झ रयणपुर ति-गयपुर मिहिला ।
रायगिह मिहिल सूरिय-पुर वाणारसि य कुंडपुरं ॥९४॥

इक्ष्वाकुभूमिः १। अयोध्या नगरी २। श्रावस्ती ३। द्वयोरयोध्या-अयोध्या नगरी ४। अयोध्या नगरी ५। कौशाम्बी ६। वाराणसी ७। चन्द्रपुरी ८। काकन्दी ९। भद्दिलपुरम् १०॥ सिंहपुरम् ११। चम्पा १२। काम्पिल्यपुरम् १३। अयोध्या १४। रत्नपुरम् १५। त्रिषु गजपुरम्-गजपुरम् १६। गजपुरम् १७। गजपुरम १८। मिथिला १९। राजगृहम् २०। मिथिला २१। सौर्यपुरम् २२। वाराणसी २३। कुण्डपुरम् २४ जिनानां क्रमेण जन्मनगराणि। सप्त० २८ द्वार। आ० म०।

(७०) अथ तीर्थंकरजन्मदेशाः कथ्यन्ते-

दुसु कोसला कुणाला, दुसु कोसल वच्छ कासि पुव्वो य।
सुन्न मलय सुन्नऽगा, पंचाला कोसला सुन्नं ॥ ९१ ॥
तिसु कुरु विदेहमगहा, विदेह कोसट्ट कासि तह पुव्वो।
देसा इमे जिणाणं, जम्मस्स ..... ॥ ९२ ॥

(दुसु कोसला कुणाल त्ति) द्वयोः जिनवरयोः-कोशलादेशः १। २। कुणालदेशः ३। (दुसु कोसल वच्छ कासि पुव्वो य त्ति) द्वयोः पुनः-कोशला ४। ५। वत्सदेशः ६। काशीदेशः ७। पूर्वदेशश्च ८। (सुन्न मलय सुन्नऽग त्ति) पुरातनग्रन्थेष्वप्राप्यमाणत्वेनाप्रसिद्धत्वात् शून्यमित्यर्थः ९। मलयदेशः १०। शून्यं प्राग्वत् ११। अङ्गदेशः १२। (पंचाला कोसला सुन्नं ति) पञ्चालाः १३। कोशलाः १४। शून्यं प्राग्वत् १५। इति गाथार्थः ॥ ९१ ॥ (तिसु कुरुविदेहमगह त्ति) त्रिषु कुरुदेशः १६। १७। १८। विदेहदेशः १९। मगधदेशः २०। (विदेह कोसट्ट कासि तह पुव्वो त्ति)विदेहदेशः २१। कुशा (व)र्तदेशः २२। काशीदेशः २३। तथा पूर्वदेशः २४ । (देसा इमे जिणाणं ति) इमेऽनन्तरोक्ता देशाः क्रमेण चतुर्विंशतिजिनानाम् ॥ ९२ ॥ सप्त० २७ द्वार ।

(७१) तीर्थंकरजन्ममासाऽऽदि-

इत्तो उसहाऽऽइ जिणा-ण जम्ममासाइ वुच्छामि (७७)
चित्तबहुलऽट्ठमी सिय-माइऽट्ठमि मग्गचउदसी माहे।
सियबिय वेसाहऽट्ठमि, कत्तियगे कसिणबारसिया ।७८।
जिट्ठसिय पोसकसिणा, य बारसी मग्गपंचमी चेव ।
कसिणा य माहफग्गुण-बारसि फग्गुण चउद्दसिया ।७९।
माहस्स सुद्धतइया, तह वइसाहम्मि तेरसी कसिणा ।
माहसियतइय जिट्ठे,कसिणा तेरसि विसाहचउद्दसिया।८०।
सियमग्गदसमि-गारसि, बहुलऽट्ठमि जिट्ठसावणे मासे।
सावणसियपंचमि पो-सकसिणदसमि सिअचित्ततेरसिया॥

इतो गर्भस्थितिकथनानन्तरम्,ऋषभाऽऽदीनां जन्ममासाऽऽदि वक्ष्ये। तद्यथा-चैत्रबहुलाष्टमी ऋषभजिनस्य जन्म १।श्वेतमाघाष्टमी २। मार्गशीर्षसितचतुर्दशी ३। माघसितद्वितीया ४। वैशाखसिताष्टमी ५। कार्त्तिककृष्णद्वादशिका ६। ज्येष्ठस्य सितद्वादशी ७। पौषस्य कृष्णा द्वादशी ८। मार्गशीर्षकृष्णपञ्चमी ९। माघकृष्णा द्वादशी १०। फाल्गुनकृष्णा द्वादशी ११। फाल्गुनकृष्णचतुर्दशी १२। माघसिततृतीया १३। वैशाखकृष्णत्रयोदशी १४। माघसिततृतीया१५। ज्येष्ठकृष्णत्रयोदशी १६। वैशाखकृष्णचतुर्दशी १७। मार्गशीर्षसितदशमी १८। मार्गशीर्षैकादशी कृष्णा १९। ज्येष्ठमासबहुलाष्टमी २०। श्रावणबहुलाष्टमी २१। श्रावणश्वेतपञ्चमी २२। पौषकृष्णा दशमी २३। चैत्रश्वेतत्रयोदशी २४। इति क्रमेण जन्ममासपक्षतिथयः। सप्त० २८ द्वार।

(७२) अथ जन्मारकानाह-

संखिज्जकालरूवे, तइयऽरयंते उसहजम्मो । (८२)

अजियस्स चउत्थारय-मज्झे पच्छद्धे संभवाऽऽईणं ।
तस्संऽते अराईणं, जिणाण जम्मो तहा मुक्खो ॥७३॥

(संखित्तकालरूवे, तइयऽरयंते उसहजम्मो त्ति) संख्यातकालरूपे तृतीयारकपर्यन्ते ऋषभजिनजन्म, मोक्षश्च ज्ञेय इति गाथार्थः । (अजियस्स चउत्थारयमज्झे त्ति) अजितजिनस्य चतुर्थारकमध्ये जन्म,मोक्षश्चाभूत् । (पच्छद्धे संभवाऽऽईणं ति) पश्चिमार्द्धे सम्भवाऽऽदीनां सप्तदशजिनपर्यन्तानां जन्म, मोक्षश्चाभूत् । (तस्संऽते अराईणं) तस्य तुर्यारकस्यान्ते अराऽऽदिजिनानां वीरपर्यन्तानां सप्तजिनानां जन्म, मोक्षश्चाभूत् । (जिणाण जम्मो तहा मुक्खो) एवं सर्वेजिनानां जन्म, मोक्षश्च । सत्त० २५ द्वार ।

अथ जन्मारकाणां शेषकालमाह-

जम्माउ इगुणनउई-पक्खनिजाउअमियमरयसेसं ।
पुरिमंतिमाण नेअं, तेणऽहियमिमं तु सेसाणं ॥७६॥
अजियस्स अयरकोमी, लक्खा पन्नास,वीस दस एगो ।
कोमिसहस दस एगो, कोमिसयं कोमि दस एगा ॥७७॥
बायालसहस्सूणं, इय नवगे अट्ठगे पुणो इत्तो ।
पणसट्ठिलक्खचुलसी-सहसऽहियं होइ वरिसाणं ॥८०॥
अयरसयं उयाला, सोलससगतिन्नि पल्लियभागतिगं ।
पल्लियस्स एगपाओ, वरिसाणं कोमिसहसो य ॥८१॥
तिसु चुल्लसिसहस्सऽहिया, पणसट्ठिइगारपंचलक्खा य ।
चुल्लसि सहस्सा तो स-ट्ठ दुसय पासस्स अरसेसं ॥९०॥

(जम्माउ इगुणनउई-पक्खनिजाउअमियमरयसेसं ति) जन्मत एकोननवति (८९) पक्षनिजायुर्मितमरकशेषम (पुरिमंतिमाण नेअं ति) प्रथमान्तिमयोर्जिनयोर्ज्ञेयम् । अयं भावः-एकोननवतिपक्षाः चतुरशीतिलक्षपूर्वाणि च श्रीऋषभदेवस्य तृतीयारकशेषं ज्ञेयम् । कोऽर्थः?-श्रीऋषभदेवस्य जन्मतः तृतीयारकमध्ये एतावान् कालोऽवशिष्यत इति । तथा-एकोननवतिपक्षाः द्वासप्ततिवर्षाणि च श्रीवीरस्य जन्मतोऽरकस्य शेषं ज्ञेयम् । श्रीवीरस्य जन्मतः चतुर्थारकमध्ये एतावान् कालोऽवशिष्यत इत्यर्थः । (तेणऽहियमिमं तु सेसाणं ति) तेभ्योऽभिन्नक्रमत्वात् शेषाणां मध्यद्वाविंशतिजिनानां तु, तेन निजायुषा अधिकमिदं वक्ष्यमाणमरकशेषं ज्ञेयमिति गाथाऽर्थः ॥८६॥ (अजियस्स अयरकोमी लक्खा पन्नास त्ति)अजितस्य जन्मतः द्वासप्तति (७२) लक्षपूर्वैरधिकाः " बायालसहस्सूणं इय नवगे " इत्यग्रे वक्ष्यमाणत्वात् द्विचत्वारिंशतवर्षसहस्रैरूनाश्च पञ्चाशल्लक्षाः सागरकोट्यः चतुर्थारकशेषं ज्ञेयम् । एवं शीतलजिनं यावद् निजायुःप्रक्षेपपूर्वकं द्विचत्वारिंशद्वर्षसहस्राऽपनयनपूर्वकं च चतुर्थारकशेषं वाच्यम् । २ (वीस दस एगो त्ति) विंशतिकोटिलक्षाः ६० लक्षपूर्वाधिक० ३। दशकोटिलक्षाः ५० लक्षपूर्वाधिक० ४। एककोटिलक्षाः ४० लक्ष० ५। (कोमिसहस दस इक्को त्ति) दशकोटिसहस्राः ३० लक्षपू० ६ । एककोटिसहस्राः २० लक्षपू० ७। (कोडिसयं कोडि दस एग त्ति) कोटीशतं १० लक्ष० ८। दशकोट्यः २ ल०ए। एका कोटी १ लक्ष० १० । सागराणामिति सर्वत्र गम्यम् । इति गाथार्थः ॥ ८७ ॥ " बायालसहस्सूणं, इय नवगे " इत्यनन्तरोक्ते नवके अजितजिनादारभ्य शीतलजिनं यावद् द्विचत्वारिंशद्वर्षसहस्रैरेतदरकशेषमूनं क्रियते । (अट्ठगे पुणो इत्तो त्ति) इतोऽनन्तरमष्टके पुनः (पणसट्ठिलक्खचुलसीसहसऽहियं होइ वरिसाणं ति) पञ्चषष्टिलक्षचतुरशीतिवर्षसहस्राधिकं भवति, अग्रे वक्ष्यमाणमिति शेष इति गाथार्थः ॥ ८८ ॥ (अयरसयं ति) अतरशतं सागरशतम् । भावना चैवम्-श्रेयांसस्य जन्मतः निजायुरधिकं षञ्चषष्टिलक्ष(६५)चतुरशीति(८४)सहस्रवर्षाद्यधिकं चैकं सागरशतं चतुर्थारकशेषं ज्ञेयम् । एवमरजिनं यावन्निजायुःप्रत्ययपूर्वकं, पञ्चषष्टिलक्षचतुरशीतिसहस्रवर्षप्रक्षेपपूर्वकं च भावनीयम् । (छायाल त्ति) षट्चत्वारिंशत् सागराणि ७२ लक्षा० १२। (सोलस सग तिन्नि पलियभागतिगं ति) षोडशसागराणि ६० लक्षा० १३। सप्तसागराणि १० लक्षा० १४। त्रीणि सागराणि (?) लक्ष० १५ । पल्यत्रिभागश्चिकं पादोनपल्यम् १ लक्ष० १६। (पलियस्स एगपाओ त्ति) पल्यस्यैकपादः चतुर्थांशः निजायुः (९५) सहस्राधिक० १७। (वरिसाणं कोडिसहसो य त्ति) वर्षाणां कोटिसहस्र (७४) सहस्रश्चेति १८ गाथार्थः ॥८९॥ (तिसु चुलसिसहस्सऽहिय त्ति) त्रिषु जिनेष्वनन्तरं भणिष्यमाणेषु चतुरशीतिसहस्राधिकाः (पणसट्ठिइगारपंचलक्खा य त्ति) लक्षशब्दस्य प्रत्येकं योगात् पञ्चषष्टिलक्षाः श्रीमल्लिजिनस्य जन्मतः चतुरशीतिसहस्रवर्षाधिका ५५००० निजायुरधिकाश्च पञ्चषष्टिलक्षाः ६५ वर्षाणि चतुर्थारकशेषमिति नमिजिनं यावद्भावना कार्या १६ । एकादशलक्षाः ३० सहस्र० २० । पञ्चलक्षाश्च १० सह० २१ । (चुल्लसिसहस्स त्ति) चतुरशीतिसहस्राणि वर्षाणि १ सह० २२ । (तो सहू दुसय त्ति) ततः साऽर्द्धे द्वे शते (पासस्स अरसेसं ति) श्रीपार्श्वनाथस्य अरकशेषं ज्ञेयं वर्षशताधिकम् २३। इति गाथाऽर्थः ॥९०॥ चतुर्विंशतिजिनानां जन्मारकाणां शेषकालः । सत्त० २६ द्वार ॥

(७३) अथ तीर्थप्रसिद्धजिनजीवानाह-

उसहे मरीइपमुहा १, सिरिवम्मनिवाइआ सुपासजिणे २ ।
हरिसेणविस्सभूई, सीयलतित्थम्मि ३ जिणजीवा ॥३४॥
सेयंसे सिरिकेऊ, तिविट्ठमरुभूइअमियतेयधणा ।
वसुपुज्जे ११ नंदणनं-दसंखसिद्धत्थसिरिवम्मा ॥३५॥
सुवते ऍरावणनारय-नामा १२ नेमिम्मि कण्हपमुहा य २२ ।
पासे अंबडसच्चइ-आणंदा २३ वीरे सेणियाईय ॥३६॥
सेणिय सुपास पोट्टिल्ल, उदाइ संखे दढाउ सयगे य ।
रेवइ सुलसा वीर-स्स वच्चतित्थत्तणा नव उ ॥ ३७ ॥

(उसहे मरीइपमुहा) ऋषभे मरीचिप्रमुखाः १। (सिरिवम्मनिवाइआ सुपासजिणे) श्रीवर्म्मनृपाऽऽदिकाः सुपार्श्वजिने २। (हरिसेणविस्सभूइ त्ति) श्रीशीतलनाथतीर्थे हरिषेणविश्वभूती जिनजीवौ ज्ञेयौ इति गाथार्थः ॥३४॥ (सेयंसे सिरिकेऊ) श्रेयांसतीर्थे श्रीकेतुनामा (तिविट्ठमरुभूइअमियतेयधणा) त्रिविष्टमरुभूत्यमिततेजोधननामानः ११ (वसुपुज्जे नंदणनंदसंखसिद्धत्थसिरिवच्छा) वासुपूज्यजिनतीर्थे नन्दननन्दसङ्खसिद्धार्थश्रीवर्म्माभिधा १२ इति गाथार्थः॥३५॥ (सुवते ऍरावणनारयनामा) मुनिसुव्रते ऐरावणनारदनामानौ २०। (नेमिम्मि कण्हपमुहा य) नेमितीर्थे कृष्णप्रमुखाश्च २२ । (पासे अंबडसच्चइआणंदा) पार्श्वतीर्थे अम्बडसत्यकयानन्दनामानः २३। (वीरे सेणियाई य)

श्रीवीरतीर्थे श्रेणिकाऽऽदयो जिनजीवा ज्ञेयाः। इति गाथार्थः॥३६॥ (सेणियसुपासपोट्टिलउदाइसंखे त्ति) श्रेणिकः १ सुपार्श्वः २ पोट्टिलः ३ उदायिनामा ४ संखनामा ५ । (दढाउ सयगे) दृढायुः ६ शतकौ च ७ (रेवइ सुलसा) रेवती ८ सुलसाभिधाने ९ (वीरस्स बद्धतित्थत्तणा नव उ) श्रीवीरस्य तीर्थे एते नव जीवा बद्धतीर्थङ्करपदा इति गाथार्थः ॥३७॥ सत्त० १६६ द्वार ।

(७४) भविष्यत्तीर्थकराः-

जंबुदीवे णं दीवे भारहे वासे आगमिस्साए उस्सप्पिणीए चउवीसं तित्थगरा भविस्संति । तं जहा-

" महापउमे सुरदेवे, सुपासे य सयंपभे ।
सव्वाणुभूई अरहा, देवगुत्ते य होक्खइ ॥१॥
उदए पेढालपुत्ते य, पोट्टिले सतकित्तिए ।
मुणिसुव्वए य अरहा, सव्वभावविऊ जिणो ॥२॥
अममे णिक्कसाए य, निप्पुलाए य निम्ममे ।
चित्तउत्ते समाही य, आगमिस्सेण होक्खइ ॥ ३ ॥
संवरे अणियट्टी य, विवाए विमले तहा ।
देवोववाए अरहा, अणंतविजए इय * ॥ ४ ॥
एए वुत्ता चउव्वीसं, भरहे वासम्मि केवली ।
आगमिस्सेण होक्खंति,धम्मातित्थस्स देसगा"॥५॥ स०।

महाविदेहविजयेषु विहरत्सु केवलिजिनेषु उत्पत्स्येष्वन्येषां जिनानां जन्माऽऽदि स्यात्, किं वा तन्मोक्षगमनानन्तरमिति प्रश्ने, उत्तरम्- महाविदेहविजयेषु विहरत्सु केवलिजिनेषु उत्पत्स्येषु वाऽन्येषां जिनानां जन्माऽऽदि न स्यादिति। प्र०२। ही०२ प्रका०।

(७५) अथ युगान्तकृद्भूमिकामाह-

साहूण सिद्धिगमणं, असंखअडचउतिसंखपुरिसं जा ।
संजायमुसहनेमी-पासंऽतिमसेसमुक्खाओ ॥३२३॥

(साहूण सिद्धिगमणं) साधूनां मुनीनां सिद्धिगमनं मोक्षगमनम्(असंखअडचउतिसंखपुरिसं जा, संजायं ति)असंख्याष्टचतुस्त्रिंसंख्यपुरुषं यावत् संजातम । कस्मादित्याह-(उसहनेमिपासंतिमसेसमुक्खाओ)ऋषभनेमिपार्श्वान्तिमशेषाणां मोक्षात्। इयमत्र योजना-श्रीऋषभस्य मोक्षात् असंख्यपुरुषान् यावत् साधूनां सिद्धिगमनं संजातम् १। श्रीनेमेरष्टौ पुरुषान् यावत् साधूनां सिद्धिगमनं संजातम् २२। ("अरहओ णं अरिट्ठनेमिस्स जाव अट्ठमाओ पुरिसजुगाओ जुगंतगरभूमी दुवासपरियाए अंतमकासी ।" स्था० ८ ठा० । " उसभेणं अरहा कोसलिएणं इमीसे उस्सप्पिणीए नवहिं सागरोवमकोडाकोडीहिं वीइक्कंताहिं तित्थे पवत्तिए ।" स्था० ९ ठा०) श्रीपार्श्वस्य मोक्षात् चतुरः पुरुषान् यावत् साधूनां सिद्धिगमनं संजातम ।२३। शेषाणामजितादीनां नमि (२१) पर्यन्तानां जिनानां मोक्षात् (त्रि) ?···संख्यातपुरुषान् यावत्साधूनां सिद्धिगमनं संजातमिति गाथार्थः ॥ ३५ ॥ ३२३ ॥ सत्त० १५० द्वार । " समणस्स णं भगवओ महावीरस्स जाव तच्चाओ पुरिसजुगाओ जुगंतगडभूमी ।" स्था० ३ ठा० ३ उ० ।

(७६) स्थितिकल्पः-

दसहा दुएहं जणिओ, चउहा अजेसि तिहकप्पो(२०७)

दशधा दशप्रकारेण स्थितिकल्पः प्रथमचरमद्वयतीर्थजिनयोस्तीर्थे भणितः । अन्येषां द्वाविंशतितीर्थकृतां चतुःप्रकारो भणितः । सत्त० १३५ द्वार । (विशेषार्थिना ' कप्प ' शब्दस्तृतीयभागे २२५ पृष्ठे विलोकनीयः)

(७७) तत्त्वसंख्या-

जीवाऽऽई नव तत्ता,तिन्निऽहवा देव-गुरु-धम्मा(२०३)
सव्वेसिं जिय-अजिया, पुन्नं पावं च आसवो बंधो ।
संवर निज्जर मुक्खो, पत्तेयमणेगहा तत्ता ॥२८४॥

सर्वेषां जिनानां शासने जीवाऽऽदीनि नव तत्त्वानि । अथवा-त्रीणि तत्त्वानि देवगुरुधर्मरूपाणि भवन्ति । (२८३) सर्वेषां जिनानां तीर्थे जीवाऽजीवौ, पुण्यं,पापं च, आश्रवः, बन्धः, संवरः, निर्जरा,मोक्षः । एतानि नव तत्त्वानि प्रत्येकमनेकधा भवन्ति ॥ सत्त० १३१ द्वार । आ० म० ।

(७८) अथ तीर्थप्रवृत्तिकालः प्रोच्यते-

इगतित्था जा तित्थं, बीयस्सुप्पज्जए य ता नेओ ।
पुव्विल्लतित्थकालो, दुसमंतं पुण चरिमतित्थं ॥२१०॥
केवलिकालेण जुओ, इगस्स बीयस्स तेण पुण हीणो ।
अंतरकालो नेओ,जिणाण तित्थस्स कालो वि॥२११॥
उसहस्स य तित्थाओ, तित्थं वीरस्स पुव्वलक्खऽहियं ।
अयरेगकोमिकोडी, वावीससहस्सवासूणा ॥ २१२ ॥

(इगतित्था जा तित्थं, बीयस्सुप्पज्जए य ता नेओ । पुव्विल्लतित्थकालो)एकस्य तीर्थकृतस्तीर्थात् यावद् द्वितीयतीर्थकृतस्तीर्थमुत्पद्यते तावत्कालं पूर्वतीर्थकृतस्तीर्थकालो ज्ञेयः । (दुसमंतं पुण चरिमतित्थं ति) दुःषमान्तं पुनश्चरमतीर्थम्-पञ्चमाऽऽरकपर्यन्तं यावत् श्रीवीरजिनस्य तीर्थमिति गाथाऽर्थः ॥ २१० ॥ (केवलिकालेण जुओ इगस्स त्ति) एकस्य विवक्षितजिनस्य केवलिकालेन युतः (बीयस्स तेण पुण हीणो) द्वितीयस्य तदग्रेतनस्य जिनस्य पुनस्तेन केवलिकालेन हीनो रहितः (अंतरकालो त्ति) एतादृशोऽन्तरकाल एव (नेओ जिणाण तित्थस्स कालो वि त्ति) जिनानां तीर्थस्यापि कालो ज्ञेयः । तथाहि-श्रीऋषभाजितयोरन्तरकालः पञ्चाशद्लक्षकोटिसागराणि । स च श्रीऋषभस्य केवलिकालेन वर्षसहस्रोनपूर्वलक्षमानेन युतः श्रीअजितस्य केवलिकालेन द्वादशवर्षोनपूर्वाङ्गोनैकपूर्वलक्षमानेन हीनश्च क्रियते । तथा च द्वादशवर्षोनपूर्वाङ्गेनैव पूर्वलक्षोनानि वर्षसहस्रोनैकपूर्वलक्षाधिकानि च पञ्चाशल्लक्षकोटिसागराणि जातानि । एतावतां कालं ५० लक्षकोटिसागर ८३९९०१२ वर्षाधिकं श्रीऋषभस्य तीर्थं प्रवृत्तमित्यर्थः । एवं पार्श्वजिनं यावद्भावना कार्या । इति गाथार्थः ॥ २११ ॥ (उसहस्स य तित्थाओ तित्थं वीरस्स त्ति) ऋषभस्य च तीर्थात् वीरस्य तीर्थं (पुव्वलक्खऽहियं ति) पूर्वलक्षाधिकमधिकं (अयरेगकोमिकोडी) सागरैककोटाकोटी (वावीससहस्सवासूणा) द्वाविंशतिसहस्रवर्षोना भवति । तथाहि-ऋषभस्य केवलिपर्यायः वर्षसहस्रोनमेकं पूर्वलक्षं, ततो नवाशीतिपक्षेषु व्यतीतेषु तृतीयारकः परिसमाप्तः । ततो द्विचत्वारिंशत्सहस्रवर्षोनैकः सागरकोटाकोटिप्रमाणः चतुर्थारको व्यतीतः। तदनु च एकविंशतिसहस्रवर्षप्रमाणः पञ्चमारकः। सर्वेषां पिण्डीकरणे च नवाशीतिपक्षाधिकेन पूर्वलक्षाधिका

*प्रवचनसारोद्धाराऽऽदौ यत्क्रमभेद उपलक्ष्यते,तन्मतान्तरेण।

द्वाविंशतिवर्षसहस्रैश्च न्यूना सागराणाम् एका कोटाकोटिर्भवति। श्रीऋषभस्य तीर्थात् श्रीवीरस्य तीर्थम् एतावता कालेन परिसमाप्तमिति तात्पर्यमिति गाथाऽर्थः ॥ २१२ ॥ इति तीर्थप्रवृत्तिकालः। सत्त० १०१ द्वार।

(७६) तीर्थकरकल्याणतपः-

" इअ अतीअचउवीसजिणवरिंदाणं।
ओसप्पिणिउस्सप्पिणि-भवा णु अणुलोमपडिलोमा ॥ १ ॥
सग्गाइअमहिवलया, पंचसु भरहेसु एरवयपणगे।
कल्लाणयमासतिही-उ सासया न य विदेहेसु ॥ २ ॥
इगजत्तिनिविअआमा-खमणमिगदुतिचउपचकल्लाणे ?।
इअ संखेवतवेणं, आराहइ पंचकल्लाणे ॥ ३ ॥
वित्थरओ उवउत्तं, सुहजम्मेसु करिज्ज पत्तेअं।
जिणवल्लेणं तवसा, दिक्खाइतिगंसु आराहे ॥ ४ ॥
सुमइअत्थ निच्चजत्ते-ण णिग्गओ वासुपुज्ज चउत्थेणं।
पासो मल्ली वि अ अ-ट्ठमेण सेसा उ छट्ठेणं ॥ ५ ॥
अट्ठमजत्तंतम्मी, नाणमुसभनमिनेमिपासाणं।
वसुपुज्जस्स चउत्थे-ण छट्ठजत्तेण सेसाणं ॥ ६ ॥
चउदसमेणं उसभो, वीरो छट्ठेण मासिए पत्ते।
सिद्धवयम्मी सुमई-सुववासो निअभत्ते वि ? ॥ ७ ॥
काउं कल्लाणतवं, उज्जमणं जो करिज्ज विहिपुव्वं।
जिणपहआराहणओ, परमपयं पावए स कमा ॥ ८ ॥
सुहजम्मदिक्खकेवल-सिवाइँ कल्लाणयाइँ पंचेव।
सव्वजिणाणं ज पुणो, वीरस्स सगब्भहरणाइं ॥ ९ ॥
इहखित्तभवजिणाणं, जो आराहेइ पंचकल्लाणं।
तेदसखित्ततिकालिअ-अरिहाण उवासिणा तेण ? ॥ १० ॥
पणकल्लाणयकप्पं, नवीण पूरियमणिट्ठसंकप्पं।
जो पढइ सुणइ भव्वो, सयंवरा तस्स सिद्धिसिरी" ॥११॥
ती० ५० कल्प। प्रव०।

(८०) तीर्थकरणप्रयोजनम्-

ननु सर्वोऽपि प्रेक्षावान् फलार्थी प्रवर्तते, अन्यथा प्रेक्षावत्तातिप्रसङ्गः। ततोऽसौ तीर्थं कुर्वन्नवश्यं फलमपेक्षते। फलं चापेक्षमाणोऽस्मादृश इव व्यक्तमवीतरागः। तदयुक्तम्। यतः तीर्थकरः स एव भवति, यस्तीर्थकरनामकर्मोदयसमन्वितः, न हि सर्वेऽपि भगवन्तो वीतरागास्तीर्थप्रवर्तनाय प्रवर्तन्ते। तीर्थकरनामकर्मैव तीर्थप्रवर्तनफलम्। ततो भगवान् वीतरागोऽपि तीर्थकरनामकर्मोदयतः तीर्थप्रवर्तनस्वभावः सवितेव प्रकाशमुपकार्योपकारानपेक्षं तीर्थं प्रवर्तयतीति न कश्चिद्दोषः।

उक्तं च-

" तीर्थप्रवर्तनफलं, यत्प्रोक्तं कर्म तीर्थकरनाम।
तस्योदयात् कृतार्थोऽप्य-हँस्तीर्थं प्रवर्तयति ॥ १ ॥
तत्स्वाभाव्यादेव, प्रकाशयति भास्करो यथा लोकम्।
तीर्थप्रवर्तनाय, प्रवर्तते तीर्थकर एवम् ॥ २ ॥ "

ननु तीर्थप्रवर्तनं नाम प्रवचनार्थप्रतिपादनं, प्रवचनार्थं चेद् सूत्रमात्रं प्रतिपादयति, तर्हि नियमादसर्वज्ञः, सर्वस्यापि वक्तुरसर्वज्ञतयोपलम्भात्। तथा चात्र प्रयोगः-विवक्षितः पुरुषः सर्वज्ञो न भवति, वक्तृत्वात्, रथ्यापुरुषवदिति। तदसत्। सन्दिग्धव्यतिरेकतया हेतोरनैकान्तिकत्वात्। तथाहि-वचनं न सर्ववेदनेन सह विरुद्ध्यते, अतीन्द्रियेण सह विरोधानिश्चयात्। द्विविधो हि विरोधः-परस्परपरिहारलक्षणः, सहानवस्थानलक्षणश्च। तत्र परस्परपरिहारलक्षणः तादात्म्यप्रतिषेधे, यथा घटपटयोः। न खलु घटः पटाऽऽत्मको भवति, नापि पटो घटाऽऽत्मको भवति। " न सत्ता सत्तान्तरमुपैति " इति वचनात्। ततो(ना)ऽनयोः परस्परपरिहारलक्षणो विरोधः। एवं सर्वेषामपि वस्तूनां भावनीयम्, अन्यथा वस्तुसाङ्कर्यप्रसक्तेः। यस्तु सहानवस्थानलक्षणो विरोधः, स परस्परबाध्यबाधकभावसिद्धौ सिद्ध्यति, नान्यथा। यथा-वह्निशीतयोः। तथा हि-विवक्षिते प्रदेशे मन्दमन्दमभिज्वलनवति वह्नौ शीतस्यापि मन्दमन्दभावः। यदा पुनरत्यर्थज्वालामतिविमुञ्चति वह्निस्तदा सर्वथा शीतस्याभाव इति प्रबलनयोर्विरोधः।

उक्तं च-

" अविकलकारणमेकं, तदपरभावे यदाऽऽभवन्न भवेत्।
भवति विरोधः स तयोः, शीतहुताशाऽऽत्मनोर्दृष्टः ॥ १ ॥ "

न चैवं वचनसंवेदनयोः परस्परं बाध्यबाधकभावः, न हि संवेदने तारतम्येनोत्कर्षमासादयति वचस्विताया तारतम्येनापकर्षं उपलभ्यते, तत्कथमनयोः सहानवस्थानलक्षणो विरोधः। अथ सर्ववेदी वक्ता नोपलब्ध इति विरोध उद्घुष्यते। तदयुक्तम्। अत्यन्तपरोक्षो हि भगवान्, ततः कथमनुपलम्भमात्रेण तस्याभावनिश्चयः, अदृश्यविषयस्यानुपलम्भस्याभावनिश्चायकत्वायोगात्।

आह च प्रज्ञाकरगुप्तः-

" बाध्यबाधकभावः कः, स्यातां तौ युक्तिसंविदौ ?।
तादृशाऽनुपलब्धेश्च-दुच्यतां सैव साधनम् ॥ १ ॥
अनिश्चयकरं प्रोक्त-मीदृक्षानुपलम्भनम्।
तत्रात्यन्तपरोक्षेषु, सदसत्ताविनिश्चयैः ॥ २ ॥ " नं०।

(८१) तीर्थोच्छेदकालः-

पुरिमंऽतिमअट्ठऽट्ठं-तरेसु तित्थस्स नत्थि वुच्छेओ।
मज्झिल्लएसु सत्तसु, एत्तियकालं तु वुच्छेओ ॥४३१॥
चउन्नागो चउन्नागो, तिन्नि य चउन्नाग पलिय-चउन्नागो।
तिन्नेव य चउन्नागा, चउत्थभागो य चउभागो ॥४३२॥

इह हि चतुर्विंशतेस्तीर्थकृतां त्रयोविंशतिरेवान्तराणि भवन्ति। यथा-चतसृणामङ्गुलीनां त्रीण्येवान्तराणि, तत्र पूर्वेषु श्रीऋषभाऽऽदिजिनाऽऽदीनां सुविधिपर्यन्तानां नवानां तीर्थकृतां संबन्धिषु अष्टसु, अन्तिमेषु च शान्तिनाथाऽऽदीनां महावीरान्तानां नवानां जिनानां संबन्धिषु अष्टस्वन्तरेषु तीर्थस्य चतुर्वर्णस्य श्रमणसङ्घस्य नास्ति व्यवच्छेदः। (मज्झिल्लएसु त्ति) मध्यवर्तिषु पुनः सुविधिप्रभृतीनां शान्तिनाथपर्यन्तानां तीर्थकृतामन्तरेषु सप्तसु एतावन्मात्रं वक्ष्यमाणं कालं यावत्तीर्थस्य व्यवच्छेदः। तदेवाऽऽह-(चउन्नागेत्यादि) सुविधिशीतलयोरन्तरे पल्योपमस्य चतुर्भागीकृतस्य एकश्चतुर्भागस्तीर्थव्यवच्छेदोऽर्हद्धर्मवार्त्तीऽपि तत्र नष्टेत्यर्थः। तथा-शीतलश्रेयांसयोरन्तरे पल्योपमस्य चतुर्भागस्तीर्थव्यवच्छेदः। तथा श्रेयांसवासुपूज्ययोरन्तरे पल्योपमसंबन्धिनस्त्रयश्चतुर्भागास्तीर्थव्यवच्छेदः। तथा वासुपूज्यविमलजिनयोरन्तरे पल्योपमस्य चतुर्भागस्तीर्थव्यवच्छेदः। तथा विमलानन्तजिनयोरन्तरे पल्योपमसंबन्धिनस्त्रयश्चतुर्भागास्तीर्थव्यवच्छेदः। तथाऽनन्तधर्मयोरन्तरे पल्योपमस्य चतुर्भागस्तीर्थव्यवच्छेदः। तथा धर्मशान्ति-

नाथयोरन्तरे पल्योपमचतुर्भागस्तीर्थव्यवच्छेदः। इति सर्वाग्रेण प्रागमीलने त्रीणि पल्योपमानि एकचतुर्भागहीनानि जातानि। प्रव० ३६ द्वार।

एएसु णं भंते! तेवीसाए जिणंतरे कस्स कहिं कालियसुयस्स वोच्छेदे पण्णत्ते ? । गोयमा ! एएसु णं तेवीसाए जिणंतरेसु पुरिमपच्छिमएसु अट्ठसु अट्ठसु जिणंतरेसु एत्थ णं कालियसुयस्स वोच्छेदे पण्णत्ते । मज्झिमएसु सत्तसु जिणंतरेसु एत्थ णं कालियसुयस्स वोच्छेदे पण्णत्ते । सव्वत्थ वि णं वोच्छिण्णे दिट्ठिवाए ॥

कस्य जिनस्य सम्बन्धिनः कस्मिन् जिनान्तरे, कयोर्जिनयोरन्तरे, कालिकश्रुतस्यैकादशाङ्गीरूपस्य व्यवच्छेदः प्रज्ञप्तः?, इति प्रश्नः। उत्तरं तु-(एएसु णमित्यादि) इह च कालिकस्य व्यवच्छेदेऽपि पृष्टे यदपृष्टस्याव्यवच्छेदस्याभिधानं तद्विशेषज्ञापने सति विवक्षितार्थबोधनं सुकरं भवतीतिकृत्वा कृतमिति। (मज्झिमएसु सत्तसु त्ति) अनेन 'कस्स कहिं' इत्यस्योत्तरमवसेयम्। तथाहि-मध्यमेषु सप्तस्वित्युक्ते सुविधिजिनतीर्थस्य सुविधिशीतलजिनयोरन्तरे व्यवच्छेदो बभूव, तद्व्यवच्छेदकालश्च पल्योपमचतुर्भागः। एवमन्ये षट् जिनाः, षट् च जिनान्तराणि वाच्यानि। केवलं व्यवच्छेदकालः सप्तस्वप्येवमवसेयः-

" चउभागो चउभागो, तिण्णि य चउभाग पल्लियभागं च।
तिण्णेव य चउभागा, चउत्थभागो य चउभागो ॥ १ ॥" इति।

(एत्थ णं ति) एतेषु प्रज्ञापकेनोपदर्श्यमानेषु जिनान्तरेषु कालिकश्रुतस्य व्यवच्छेदः प्रज्ञप्तः। दृष्टिवादापेक्षया त्वाह-(सव्वत्थ वि णं वोच्छिण्णे दिट्ठिवाए त्ति) सर्वत्रापि सर्वेष्वपि जिनान्तरेषु, न केवलं सप्तस्वेव क्वचित्, कियन्तमपि कालं व्यवच्छिन्नो दृष्टिवाद इति। भ० २० श० ८ उ०।

(७२) अथ प्रसङ्गात् द्वादशचक्रिनामान्याह-

चक्की भरहो सगरो, मघव-सणंकुमर-संति-कुंथु-अरा।
सुहूम-महपउम-हरिसेण-जयनिवा बंभदत्तो य।३४७।

चक्री-भरतः १, सगरनामा २। चक्रिशब्दः प्रत्येकमभिसम्बध्यते। मघवा ३, सनत्कुमारः ४, शान्तिः ५, कुन्थुः ६, अरनामा ७, (सुहूममहपउमहरिसेण त्ति) सुभूमनामा ८, महापद्मः ९, हरिषेणः १० (जयनिवा बंभदत्तो य) जयनृपः ११, ब्रह्मदत्तश्च १२। इति गाथार्थः ॥ ३४७ ॥

अथ नववासुदेवनामान्याह-

विण्हु तिविट्ठु दुविट्ठू, सयंभु पुरिसुत्तमे पुरिससीहे।
तह पुरिसपुंडरीए, दत्ते लक्खमण कण्हे य ॥३४८॥

(विण्हु तिविट्ठु दुविट्ठू सयंभु पुरिसुत्तमे पुरिससीहे) विष्णुः-त्रिपृष्टः१, द्विपृष्टः२,स्वयंभूः३, पुरुषोत्तमः४, पुरुषसिंहः५, तथा पुरुषपुण्डरीकः ६, दत्तनामा ७, लक्ष्मणनामा ८, कृष्णश्च ९। इति गाथार्थः ॥३४८॥

अथ बलदेवनामान्याह-

हरिजिट्ठभायरो नव, बलदेवा अयल-विजय-भद्दा य।
सुप्पहसुदंसणाऽऽणंद-णंदणा रामबलभद्दा ॥ ३४९ ॥

(हरिजिट्ठभायरो) विष्णूनां ज्येष्ठभ्रातरः (नव बलदेवा) नवसंख्या बलदेवा भवन्ति। अचलनामा प्रथमः १, विजयनामा द्वितीयः २, भद्रनामा तृतीयः ३, चः पादपूरणे। (सुप्पहसुदंसणाऽऽणंदनंदण त्ति) सुप्रभनामा चतुर्थः ४, सुदर्शननामा पञ्चमः ५, आनन्दनामा षष्ठः ६, नन्दननामा सप्तमः ७। (रामबलभद्द त्ति) रामनामाऽष्टमः ८, बलभद्रनामा नवमः ९। इति गाथार्थः ॥ ३४९ ॥ पञ्चः ८। प्रव०।

त्रिषष्टिशलाकापुरुषमानमाह-

चउपन्नुत्तमपुरिसा, इह एए होंति जीवपन्नासं।
नवपमिविएहिं जुआ, तेसट्ठिसलागपुरिस भवे ॥३५०॥

(चउपन्नुत्तमपुरिसा, इह एए होंति जीवपन्नासं ति) एते चतुर्विंशतिजिनाः २४, द्वादश चक्रिणः १२, नव वासुदेवाः ९, नव बलदेवाश्चेति चतुःपञ्चाशत् ५४ उत्तमपुरुषा इह जगति भवेयुः। एते सर्वेऽप्युत्तमपुरुषाः संभूय पञ्चाशज्जीवाः। यतः-शान्तिकुन्थुअराः जिनाश्चक्रिणोऽपि जाताः, तथा श्रीवीरजीवस्तु त्रिपृष्टनामा वासुदेवोऽपि जात इति। (नव पडिविण्हहिं जुय त्ति) ते चतुःपञ्चाशदुत्तमपुरुषा नवप्रतिविष्णुभिर्युताः। (तेसट्ठिसलागपुरिस भवे) त्रिषष्टिः शलाकापुरुषा भवन्ति। शलाकापुरुषा इति कोऽर्थः ?-शलाका इव रेखा इव पुरुषाः शलाकापुरुषाः, न कोऽप्यन्यपुरुष ईदृशः चतुःषष्टितमः। इति गाथार्थः ॥ ३५० ॥

अथ प्रतिवासुदेवनामान्याह-

ते आसगीवे तारए, मेरए महुकेढवे निसुंभे य।
बलि पहलाए तह रा-वणे य नवमे जरासंधो ॥३५१॥

अश्वग्रीवः १, तारकः २, मेरकः ३, मधुकैटभः ४, निशुम्भकः ५, (बलि पहलाए तह रा-वणे अ नवमे जरासंधो) बलिः ६, प्रह्लादः ७, तथा रावणश्च ८, नवमो जरासन्धः ९। इति गाथार्थः ॥ ३५१ ॥

अथ कस्य तीर्थे के चक्रिवासुदेवबलदेवा जातास्तानाह-

काले जम्मि जे जस्स जिणस्स जाया,
ते तस्स तित्थम्मि, जिणंतरे जे।
नेया उ तेऽतीअजिणस्स तित्थे,
निएहिं नामेहिं कमेण एवं ॥ ३५२ ॥

(कालम्मि जे जस्स जिणस्स जाया ते तस्स तित्थम्मि त्ति) यस्य जिनस्य काले जिनतीर्थे वर्तमाने ये जाताः ते चक्रिवासुदेवाऽऽदयः तस्य तीर्थे कथ्यन्ते, (जिणंतरे जे, नेयाउ तेऽतीअजिणस्स तित्थे) जिनान्तरे ये जातास्तेऽतीतजिनस्य तीर्थे ज्ञेयाः। (निएहिं नामेहिं कमेण एवं) निजैर्नामभिः क्रमेण एवं वक्ष्यमाणरीत्या। इति गाथार्थः ॥ ३५२ ॥ इदमुपजातिच्छन्दः ।

दो तित्थेस सचक्कि, अट्ठ य जिणा, तो पंच केसीजुया,
दो चक्काहिव, तिन्नि चक्किअ जिणा, तो केसि चक्की हरी।
तित्थेसो इग, तो सचक्कि-अ जिणो केसी सचक्की जिणो,
चक्की, केसवसंजुओ जिणवरो,चक्की अ,तो दो जिणा३५३

(दो तित्थेस सचक्कि अट्ठ य जिणा तो पंच केसीजुआ) द्वौ तीर्थेशौ सचक्रिणौ चक्रवर्त्तिसहितौ, ततोऽष्ट जिनाः,ततः पञ्च वासुदेवयुताः पञ्च जिनाः। (दो चक्काहिव तिन्नि चक्किअ जिणा, तो केसि चक्की हरी) द्वौ ततश्चक्राधिपौ, ततस्त्रयः चक्रि-

प्पो जिनाश्च । ततो वासुदेवः, ततश्चक्री, ततो वासुदेवः । (तित्थेसो इगु तो सचक्किम जिणो केसि त्ति) तीर्थेश एकः, ततः सचक्री जिनः, ततो वासुदेवः, सचक्री जिनः । (चक्की, केसवसंजुओ जिणवरो, चक्की अ, तो दो जिणा) चक्री, केशवसंयुतो जिनवरः, ततश्चक्री, ततो द्वौ जिनौ । इति गाथार्थः ॥ ३५३ ॥ सप्त० १७० द्वार ।

जिनचक्रवर्तिकेशवानां विवरणयन्त्रम्-

तीर्थंकरः	चक्रवर्ती	वासुदेवः
ऋषभस्वामी	भरतचक्रवर्ती	०
अजितस्वामी	सगरचक्रवर्ती	०
शंभवस्वामी	०	०
अभिनन्दनः	०	०
सुमतिनाथः	०	०
पद्मप्रभः	०	०
सुपार्श्वनाथः	०	०
चन्द्रप्रभः	०	०
सुविधिनाथः	०	०
शीतलनाथः	०	०
श्रेयांसनाथः	०	त्रिपृष्टः
वासुपूज्यः	०	द्विपृष्टः
विमलनाथः	०	स्वयंभूः
अनन्तनाथः	०	पुरुषोत्तमः
धर्मनाथः	०	पुरुषसिंहः
०	मघवा चक्रवर्ती	०
०	सनत्कुमारश्चक्री	०
शान्तिनाथः	शान्तिरेव	०
कुन्थुनाथः	कुन्थुरेव	०
अरनाथः	अर एव	०
०	०	पुरुषपुण्डरीकः
०	सुभूमचक्री	०
०	०	दत्तः
मल्लिनाथः	०	०
मुनिसुव्रतः	महापद्मचक्री	०
०	०	लक्ष्मणः
नमिनाथः	हरिषेणचक्री	०
०	जयचक्री	०
नेमिनाथः	०	कृष्णः
०	ब्रह्मदत्तचक्री	०
पार्श्वनाथः	०	०
वर्द्धमानः	०	०

(८३) तीर्थंकरनामान्याह-

जंबुद्दीवे दीवे भारहे वासे चउवीसं तित्थगरा होत्था । तं जहा-उसभ अजिअ संभव अभिणंदण सुमइ पउमप्पभ सुपास चंदप्पभ सुविहि (पुप्फदंत *) सीयल सिज्जंस वासुपुज्ज विमल अणंत धम्म संति कुंथु अर मल्लि मुणिसुव्वय णमि णेमि पास वद्धमाणो य ॥ स० । (तीर्थकृतां मातापितृविचारोऽग्रे करिष्यते)

(चक्रवर्तिनां सर्वा वक्तव्यता 'चक्रवट्टि' शब्दे तृतीयभागे १०६६ पृष्ठतो द्रष्टव्या)

बलदेववासुदेवपितरः-

जंबुद्दीवे णं दीवे भारहे वासे नव बलदेवनव वासुदेवपितरो होत्था । तं जहा-

" पयावई य बंभो, सोमो रुद्दो सिवो महिसरो य ।
अग्गिसीहो य दसरहो, नवमो भणिओ य वसुदेवो" ॥४९॥

वासुदेवमातरः-

जंबुद्दीवे णं दीवे भारहे वासे णव वासुदेवमायरो होत्था । तं जहा-

" मियावई जया चेव, पुहवी सीया य अंबिया ।
लच्छिमई सेसमई, केकई देवई तहा ॥ ५० ॥ "

बलदेवमातरः-

जंबुद्दीवे णं दीवे भारहे वासे णव बलदेवमायरो होत्था । तं जहा-

" भद्दा तह सुभद्दा य, सुप्पभा य सुदंसणा ।
विजया वेजयंती य, जयंती अपराजिया ॥ ५१ ॥
णवमीया रोहिणी य, बलदेवाण मायरो " ।

दशारमण्डलानि-

जंबुद्दीवे णं दीवे भारहे वासे णव दसारमंडला होत्था । तं जहा-उत्तमपुरिसा मज्झिमपुरिसा पहाणपुरिसा ओयंसी तेयंसी वच्चंसी जसंसी छायंसी कंता सोमा सुभगा पियदंसणा सुरूआ सुहसीला सुहाभिगम्मसव्वजणणयणकंता ओहबला अतिबला महाबला अनिहता अपराइया सत्तुमद्दणा रिपुसहस्समाणमद्दणा साणुक्कोसा अमच्छरा अचपला अचंडा मियमंजुलपलावहसियगंभीरमधुरपडिपुण्णसच्चवयणा अब्भुवगयवच्छला सरणा लक्खणवंजणगुणोववेआ माणुम्माणपमाणपडिपुण्णसुजायसव्वंगसुंदरंगा ससिसोम्माकारकंतपियदंसणा अमरिसणा पयंडदंडप्पयारा गंभीरदरिसणिज्जा तालद्धओविद्धगरुलकेऊ महाधणुविकड्ढया महासत्तसागरा दुद्धरा धणुद्धरा धीरपुरिसा जुद्धकित्ति-

* " ऋषभो वृषभः, श्रेयान् श्रेयांसः, स्यादनन्तजिदनन्तः ।
सुविधिस्तु पुष्पदन्तः, मुनिसुव्रतसुव्रतौ तुल्यौ ॥ २९ ॥
अरिष्टनेमिस्तु नेमिः, वीरश्चरमतीर्थकृत् ।
महावीरो वर्द्धमानो, देवार्यो ज्ञातनन्दनः ॥३०॥"
इत्यभिधानचिन्तामणौ पर्यायवाचकाः ।

पुरिसा विउलकुलसमुब्भवा महारयणविहागया अच्छभ-रहसामी सोमा रायकुलवंसतिलया अजिया अजियरहा हलमुसलकणकपाणी संखचक्कगयसत्तिनंदगधरा पवरुज्जल-सुकंतविमलगोत्थुभतिरीडधारी कुंडलउज्जोइयाणणा पुंम-रीयणयणा एकावलिकंठलगियवच्छा सिरिवच्छसुलंछणा वरजसा सव्वोउयसुरभिकुसुमरचितपलंबसोभंतकंतविकसं-तचित्तवरमालरइयवच्छा अट्ठसयविजत्तलक्खणपसत्थ-सुंदरविरइयंगमंगा मत्तगयवरिंदललियविक्कमविलसियगई सारयनवत्थणियमहुरगंभीरकुंचनिग्घोसदुंदुभिनिस्सरा कडि-सुत्तगनीलपीयकोसेज्जवाससा पवरदित्ततेया नरसीहा न-रवई नरिंदा नरवसहा मरुयवसभकप्पा अब्भहियरायतेय-लच्छीपदिप्पमाणा नीलगपीयगवसणा दुवे दुवे रामकेसवा भायरो होत्था। तं जहा–तिविट्ठु य० जाव कण्हे। अयलो० जाव रामे य अपच्छिमे।

बलदेववासुदेवानां पूर्वभवनामानि-

एएसि णं णवण्हं बलदेववासुदेवाणं पुव्वभविया नव नामधेज्जा होत्था। तं जहा–

" विसनूई पव्वयए, धणदत्त समुद्दत्त इसिवाले।
पियमित्त ललियमित्ते, पुणव्वसू गंगदत्ते य ॥ ५२ ॥
एयाइं नामाइं, पुव्वभवे आसि वासुदेवाणं। "
" एत्तो बलदेवाणं, जहक्कमं कित्तइस्सामि ॥ ५३ ॥
विसनंदी य सुबंधू, सागरदत्ते असोग ललिए य।
वाराह धम्मसेणे, अपराइए रायललिए य ॥ ५४ ॥"

एतेषां पूर्वभवधर्माऽऽचार्याः-

एएसि णं नवण्हं बलदेववासुदेवाणं पुव्वभविया नव ध-म्मायरिया होत्था। तं जहा–

" संभूए य सुभद्दे, सुदंसणे सेय कण्हे गंगदत्ते अ।
सागर समुद्दनामे, दुमसेणे णवमिए होइ ॥ ५५ ॥
धम्माऽऽयरिया कित्ती–पुरिसाणं वासुदेवाणं।
पुव्वभवे एआसिं, जत्थ नियाणाइं कासी य ॥५६॥ "

एतेषां निदानभूमयः-

एएसि णं नवण्हं वासुदेवाणं पुव्वभवे नव नियाणभूमी-ओ होत्था। तं जहा–महुरा० जाव हत्थिणाउरं च।

निदानकारणानि-

एतेसि णं नवण्हं वासुदेवाणं नव नियाणकारणा होत्था। तं जहा–गावी जूए० जाव माउआ।

एतेषां प्रतिशत्रवः-

एएसि णं नवण्हं वासुदेवाणं नव पडिसत्तू होत्था। तं जहा–आसग्गीवे० जाव जरासंधे० जाव सचक्केहिं।

के क यान्तीत्याह-

" एक्को य सत्तमीए, पंच य छट्ठीए पंचमीएक्को।
एक्को य चउत्थीए, कण्हो पुण तच्चपुढवीए ॥ ५७ ॥
अणिदाणकडा रामा, सव्वे वि य केसवा नियाणकडा।
उड्ढगामी रामा, केसव सव्वे अहोगामी ॥ ५८ ॥
अट्ठंतकडा रामा, एगो पुण बंभलोयकप्पम्मि।
एक्को से गब्भवसही, सिज्झिस्सइ आगमिस्सेणं॥५९॥"

(जंबुद्दीवेत्यादि) दशाराणां वासुदेवानां मएमलानि बलदेववा-सुदेवद्वयरूपलक्षणाः समुदाया दशारमण्डलानि, अत एव "दुवे दुवे रामकेसव त्ति" वक्ष्यति। दशारमण्डलान्यतिरिक्तत्वाच्च बलदेववासुदेवानां दशारमण्डलानीति पूर्वमुद्दिश्यापि दशार-मण्डलव्यक्तिभूतानां तेषां विशेषणार्थमाह--तद्यथेत्यादि। तद्यथेति बलदेववासुदेवस्वरूपोपन्यासाऽऽरब्धार्थः। केचित्तु दशारमण्डलेना इति। तत्र दशाराणां वासुदेवकुक्षीनप्रजानां मएम-नाः शोभाकारिणो दशारमण्डनाः। उत्तमपुरुषा इति। तीर्थकरा-ऽऽदीनां चतुःपञ्चाशत्, उत्तमपुरुषाणां मध्यवर्तित्वाद् मध्यमपु-रुषाः, तीर्थकरचक्रिणां प्रतिवासुदेवानां च बलाऽऽद्यपेक्षया मध्य-वर्तित्वात्। प्रधानपुरुषास्तात्कालिकपुरुषाणां शौर्याऽऽदिभिः प्र-धानत्वात्, ओजस्विनो मानसबलोपेतत्वात्, तेजस्विनो दीप्तश-रीरत्वात्, वर्चस्विनः शारीरबलोपेतत्वात्, यशस्विनः पराक्रम प्राप्य प्रसिद्धिप्राप्तत्वात्। (जायंसि त्ति) प्राकृतत्वात् जायावन्तः शोभायमानशरीराः, अत एव कान्ताः कान्तियोगात्, सौम्या अरौद्राऽऽकारत्वात्, सुभगा जनवल्लभत्वात्, प्रियदर्शनाः चक्षु-ष्यरूपत्वात्, सुरूपा समचतुरस्रसंस्थानत्वात्, शुभं सुखं वा सुखकरत्वात् शीलं स्वभावो येषां ते शुभशीलाः सुखशीला वा, सुखेनाभिगम्यन्ते सेव्यन्ते ये शुभशीलत्वादेव ते सुखाभिगम्याः, सर्वजननयनानां कान्ता अभिलाष्या ये ते तथा। ततः पदद्वयस्य कर्मधारयः। ओघबलाः प्रवाहबलाः, अव्यवच्छिन्नबलत्वात्। अतिबलाः, शेषपुरुषबलानामतिक्रमात्। महाबलाः प्रशस्तबलाः, अनिहता निरुपक्रमाऽऽयुष्कत्वात्, युद्धे भूम्यामपातित्वात् अ-पराजिताः, तैरेव शत्रूणां पराजितत्वात्। एतदेवाऽऽह-शत्रुमर्द-नाः, तच्छरीरतत्सैन्यकदर्थनात्। रिपुसहस्रमानमथनाः, तद्वाञ्छि-तकार्यविघटनात्। सानुक्रोशाः, प्रणतेष्वद्रोहकत्वात्। अमत्सराः, परगुणग्रहस्याऽपि ग्राहकत्वात्। अचपला मनोवाक्कायस्थैर्यात्। अचण्डा निष्कारणप्रबद्धकोपरहितत्वात्। मिते परिमिते मञ्जुलः कोमलः प्रलापोल्लापो हसितं च येषां ते मितमञ्जुलप्रलापहसिताः, गम्भीरमदर्शितरोषतोषशोकाऽऽदिविकारं मेघनादवद्वा मधुरं श्रवणसुखकरं प्रतिपूर्णमर्थप्रतीतिजनकं सत्यमवितथं वचनं वाक्यं येषां ते तथा। ततः पदद्वयस्य कर्मधारयः। अ-भ्युपगतवत्सलाः, तत्समर्थनशीलत्वात्। शरण्याः त्राणकरणे सा-धुत्वात्। लक्षणानि मानाऽऽदीनि, व्यञ्जनानि तिलकमषाऽऽदीनि, तेषां गुणा महर्द्धिप्राप्त्यादयः, तैरु-पेताः*शर्कराऽऽदिदर्शनादुपपेता युक्ता लक्षणव्यञ्जनगुणोपपेताः। मानमुदकद्रोणपरिमाणशरीरता, कथम्?, उदकपूर्णायां द्रोण्यां निविष्टे पुरुषे यद्यत्र ततो निर्गच्छति तदादि द्रोणप्रमाणं स्या-त्तदा स पुरुषो मानप्राप्त इत्यभिधीयते। उन्मानमर्द्धभारपरि-माणता, कथम्?, तुलाऽऽरोपितस्य पुरुषस्य यद्यर्द्धभारस्तौल्यं नयति तदाऽसावुन्मानप्राप्त उच्यते। प्रमाणमष्टोत्तरशतमङ्गु-लानामुच्छ्रयः। मानोन्मानप्रमाणैः प्रतिपूर्णमन्यूनं, सुजातमाग-धानात् पालनविधिना, सर्वाङ्गसुन्दरं निक्षिप्ताधयवप्रधानमङ्ग शरीरं येषां ते तथा। शशिवत् सौम्याऽऽकारमरौद्रमबीभत्सं

* शर्काराऽऽदिगणस्थत्वात्।

वा कान्तं दीप्तं प्रियं जनानां प्रमोदोत्पादकं दर्शनं रूपं येषां ते तथा। (अमरिसण त्ति) अमर्षणाः प्रयोजनेष्वनलसाः, अमर्षणा वा अपराधिष्वपि कृतक्षमाः। प्रकाएम उत्कटो दण्डप्रकारः आज्ञाविशेषो वा येषां ते तथा। अथवा-प्रचण्डो दुःसाध्यसाधकत्वाद्दण्डप्रचारः सैन्यविचरणं येषां ते तथा। गम्भीरा अलक्ष्यमाणान्तर्वृत्तित्वेन दृश्यन्ते ये ते गम्भीरदर्शनीयाः। ततः पदद्वयस्य कर्मधारयः। प्रचण्डदण्डप्रचारेण ये गम्भीरा दृश्यन्ते। तथा तालो वृक्षविशेषो ध्वजा येषां ते तालध्वजाः बलदेवाः। उद्धिद्धः उच्छ्रितो गरुडलक्षितः केतुर्ध्वजो येषां ते उद्धिद्धगरुडकेतवो वासुदेवाः। तालध्वजाश्च उद्धिद्धगरुडकेतवश्च तालध्वजोद्धिद्धगरुडकेतवः। महाधनुर्विकर्षकाः, महाप्राणत्वाद् महासत्वलक्षणजलस्य सागरा इव सागरा आश्रयत्वान्महासत्वसागराः। दुर्द्धरा रणाङ्गणे-तेषां प्रहरतां केनाऽपि धन्विना धारयितुमशक्यत्वात्। धनुर्धराः कोदण्डप्रहरणाः। धीरेष्वेवैते पुरुषाः पुरुषकारवन्तो, न कातरेष्विति धीरपुरुषाः। युद्धजनिता या कीर्तिस्तत्प्रधानाः पुरुषा युद्धकीर्तिपुरुषाः। विपुलकुलसमुद्भवा इति प्रतीतम्। महारत्नं वज्रं तस्य महाप्राणतया विघटका अङ्गुष्ठतर्जनीभ्यां चूर्णका महारत्नविघटकाः, वज्रं हि अधिकरण्यां धृत्वा अयोघनेनाऽऽस्फोट्यते, न च भिद्यते, तदेव भिन्दन्तीति दुर्भेदं तदिति। अथवा महतीया आरचना सागरशटकव्यूहाऽऽदिना प्रकारेण सिसंग्रामयियोर्महासैन्यस्य, तां रणरङ्गरसिकतया महाबलतया च विघटयन्ति वियोजयन्ति ये ते महारचनाविघटकाः। पाठान्तरेण तु-महारणविघटकाः। अकंपनरतस्वामिनः सौम्या नीरुजः राजकुलवंशतिलकाः अजिताः अजितरथाः हलमुशलकणकपाणयः। तत्र हलमुशले प्रतीते, ते प्रहरणतया पाणौ हस्ते येषां ते बलदेवाः। येषां तु कणका बाणाः पाणौ ते शार्ङ्गधन्वानो वासुदेवाः। शङ्खश्च पाञ्चजन्याभिधानः, चक्रं तु सुदर्शननामकं, गदा च कौमोदकीसंज्ञा लकुटविशेषः, शक्तिश्च त्रिशूलविशेषः, नन्दकश्च नन्दकाभिधानः खड्गः, तान् धारयन्तीति शङ्खचक्रगदाशक्तिनन्दकधराः वासुदेवाः। प्रवरो वरप्रभावयोगात्, उज्ज्वलः शुक्लत्वात् स्वच्छतया वा, सुकान्तः कान्तियोगात्। पाठान्तरे-सुकृतः सुपरिकर्मितत्वात्। विमलो मलवर्जितत्वात्, (कोत्थुभ त्ति) कौस्तुभाभिधानो यो मणिविशेषस्तं, (तिरीमं ति) किरीटं च मुकुटं धारयन्ति ये ते। तथा कुण्डलोद्द्योतिताननाः। पुण्डरीकवन्नयने येषां ते तथा। एकावली आभरणविशेषः, सा कण्ठे ग्रीवायां लगिता विलम्बिता सती वक्षसि उरसि वर्तते येषां ते एकावलीकण्ठलगितवक्षसः। श्रीवत्साभिधानं सुष्ठु लाञ्छनं महापुरुषत्वसूचकं वक्षसि येषां ते श्रीवत्सलाञ्छनाः। वरयशसः, सर्वत्र विख्यातत्वात्। सर्वर्तुकानि सर्वर्तुसम्भवानि सुरभीणि सुगन्धीनि यानि कुसुमानि तैः सुरचिता कृता या प्रलम्बा आपदीना (सोभंत त्ति) शोभमाना कान्ता कमनीया विकसन्ती फुल्लन्ती चित्रा पञ्चवर्णा वरा प्रधाना माला स्रक् रचिता निहिता, रतिदा वा सुखकारिका, वक्षसि येषां ते सर्वर्तुकसुरभिकुसुमरचितप्रलम्बशोभमानकान्तविकसच्चित्रवरमालारचितवक्षसः। तथा अष्टशतसंख्यानि विभक्तानि विविक्तरूपाणि यानि लक्षणानि चक्राऽऽदीनि तैः प्रशस्तानि मङ्गल्यानि सुन्दराणि च मनोहराणि विरचितानि विहितानि (अंगमंग त्ति) अङ्गोपाङ्गानि शिरोऽङ्गुल्यादीनि येषां तेऽष्टशतविभक्तलक्षणप्रशस्तसुन्दरविरचिताङ्गोपाङ्गाः। तथा मत्तगजवरेन्द्रस्य यो ललितो मनोहरो विक्रमः सञ्चरणं तद्वद्विलसिता संजातविलासा गतिर्गमनं येषां ते मत्तगजवरेन्द्रललितविक्रमविलसितगतयः। तथा शरदि भवः शारदः, स चासौ नवं स्तनितं रसितं यस्मिन्निर्घोषे स नवस्तनितः, स चेति समासः। स चासौ मधुरो गम्भीरश्च यः क्रौञ्चनिर्घोषः पक्षिविशेषनिनादः, तद्वद् दुन्दुभिस्वरवच्च स्वरो नादो येषां ते शारदनवस्तनितमधुरगम्भीरक्रौञ्चनिर्घोषदुन्दुभिस्वराः। इह च शरत्काले हि क्रौञ्चा मायन्ति, मधुरध्वनयश्च भवन्तीति शारदग्रहणम्। तथा पीतपाणीयेन शब्दप्रवृत्तौ तद्भक्षादमनोज्ञता तस्य स्यादिति नवस्तनितग्रहणम्, स्वरूपोपदर्शनार्थं मधुरगम्भीरग्रहणमिति। तथा कटीसूत्रमाभरणविशेषः, तत्प्रधानानि नीलानि बलदेवानां, पीतानि वासुदेवानां कौशेयकानि वस्त्रविशेषभूतानि वासांसि वसनानि येषां ते कटीसूत्रकनीलपीतकौशेयवाससः। प्रवरदीप्ततेजसो वरप्रभावतया वरदीप्ततया च। नरसिंहा विक्रमयोगात्। नरपतयः तन्नाथकत्वात्। नरेन्द्राः परमैश्वर्ययोगात्। नरवृषभा उत्क्षिप्तकार्ये भारनिर्वाहकत्वात्। मरुद्वृषभकल्पाः देवराजोपमाः, अभ्यधिकं शेषराजेभ्यः राजतेजोलक्ष्म्या दीप्यमानाः। नीलकपीतकवसना इति पुनर्भणनं निगमनार्थम्। कथं ते नवेत्याह-(दुवे दुवे इत्यादि) एवं च नववासुदेवनवबलदेवा इति। (तिविट्ठु य त्ति) यावत्करणात्-

" बिण्हु तिविट्ठु दुविट्ठु य, सयंभु पुरिसुत्तमे पुरिससीहे।
तह पुरिसपुंडरीए, दत्ते नारायणे कण्हे ॥ १ ॥
अयले विजए भद्दे, सुप्पभे य सुदंसणे।
आनंदे णंदणे पउमे, रामे यावि अपच्छिमे" ॥ २ ॥ इति।

(कित्तीपुरिसाणं ति) कीर्तिप्रधानपुरुषाणामिति।

" महुरा य कणगवत्थू, सावत्थी पोयणं च रायगिहं।
कायंदी कोसंबी, मिहिलपुरी हत्थिणपुरं च ॥ १ ॥ "

तथा-

" गावि जुए संगामे, तह इत्थिपराहओ रंगे।
जन्नाणुराग गोट्ठी, परइड्ढी माइयाई य " ॥ १ ॥ इति।

तथा-

" अस्सग्गीवे तारए, मेरए मधुकेढभे निसुंभे य।
बलि पहलाए तह रा-वणे य नवमे नरासंधो ॥ १ ॥ "
" एए खलु पडिसत्तू, कित्तीपुरिसाण वासुदेवाणं।
सव्वे वि चक्कजोही, सव्वे वि हया सचक्केहिं ॥ २ ॥
अणियाणकडा रामा, सव्वे वि य केसवा नियाणकडा।
उड्ढगामी रामा, केसव सव्वे अहोगामी ॥ ३ ॥ " इति।

(आगमिस्सेण ति) आगामिष्यता कालेन। "आगमिस्साणं ति" पाठान्तरम्। आगामिष्यतां भविष्यतां मध्ये सेत्स्यन्तीति। स०।

(८४) तीर्थोत्पत्तिः-

तेवीसाए पढमे, बीए वीरस्स पुव्व समोसरणे।
संघो? पढमगणहरो२, सुयं च ३तित्थं समुप्पन्नं ॥२०६॥

त्रयोविंशतीर्जनानां प्रथमसमवसरणे तीर्थं समुत्पन्नम्. वीरस्य पुनर्द्वितीये समवसरणे तीर्थं समुत्पन्नम्। तीर्थं नाम प्रवचनं, तच्च निराधारं न भवति, तेन साधुसाध्वीश्रावकश्राविकारूपः चतुर्वर्णः संघः। तथा प्रथमगणधर आद्यगणभृत्, श्रुतं द्वादशाङ्गीरूपम्, एतत्त्रयरूपं तीर्थं समुत्पन्नम्। सत्त० १०० द्वार। आ० म०।

(८५) निर्गमनकालं प्रतिपादयन्नाह-

पासो अरिट्ठनेमी, सेज्जंसो सुमति मल्लिनाथो य ।
पुव्वण्हे निक्खंता, सेसा पुण पच्छिमण्हम्मि ॥२१०॥

पार्श्वनाथोऽरिष्टनेमिः, श्रेयांसः, सुमतिर्मल्लिनाथः; एते पञ्च तीर्थकृतः पूर्वाह्णे निष्क्रान्ताः। शेषाः पुनः श्रीऋषभस्वामिप्रभृतयः पश्चिमाह्णे निष्क्रान्ताः । आ० म० १ अ० १ खण्ड।

(८६) दर्शननामानि, तदुत्पत्तिं चाऽऽह-

जइणं सइवं संखं, वेअंतिअनाहिआण बुद्धाणं ।
वइसेसिआण वि मयं, इमाइं सग दरिसणाइं कमा ॥३३६॥
तिन्नि उसहस्स तित्थे, जायाइं सीयलस्स ते दुन्नि ।
दरिसणमेगं पास-स्स सत्तमं वीरतित्थम्मि ॥ ३४० ॥

(जइणं सइवं संखं) जैनं १ शैवं २ साङ्ख्यम् ३ (वेअंतिअनाहिआण बुद्धाणं ति) वेदान्तिकानां मतं ४ नास्तिकानां मतं ५ बौद्धानां मतम् ६ (वइसेसिआण वि मयं) वैशेषिकानामपि मतम् ७, (इमाइं सग दरिसणाइं कमा) इमानि सप्त दर्शनानि क्रमादनुक्रमेण भवन्तीति गाथाऽर्थः ॥३३६॥ (तिन्नि उसहस्स तित्थे जायाइं ति) पूर्वगाथान्त्यवर्त्तिकमशब्दस्येहसंबन्धादाद्यानि त्रीणि दर्शनानि ऋषभतीर्थे जातानि ३ । (सीयलस्स ते दुन्नि) शीतलस्य तीर्थे ते द्वे दर्शने, तदग्रे चतुर्थपञ्चमे जाते ५, (दरिसणमेगं पासस्स) एकं तदग्रेतनं षष्ठं दर्शनं पार्श्वस्य तीर्थे ६, (सत्तमं वीरतित्थम्मि) सप्तमं दर्शनं वीरतीर्थे संजातमिति गाथाऽर्थः ॥ ३४० ॥ सत्त० १६८ द्वार ।

दीक्षानक्षत्राणि च्यवनवत् । सत्त० ६० द्वार ।

(८७) व्रतपर्यायः-

उसभस्स पुव्वलक्खं, पुव्वंगूणमजियस्स तं चेव ।
चउरंगूणं लक्खं, पुणो पुणो जाव सुविहि त्ति ॥
(अस्मिन्नेव शब्दे २२६४ पृष्ठे पूर्वं केवलिपर्याये व्याख्यातैषा)
पणवीसं तु सहस्सा, पुव्वाणं सीयलस्स परियायो ।
लक्खाइं एक्कवीसं, सिज्जंसजिणस्स वासाणं ॥
चउपन्नं पन्नारस, तत्तो अछट्ठमाइं लक्खाइं ।
अट्ठाइज्जाइं ततो, वाससहस्साइं पणवीसं ॥
तेवीसं च सहस्सा, सयाणि अछट्ठमाणि य हवंति ।
इगवीसं च सहस्सा, वाससऊणा य पणपन्नं ॥
अद्धट्ठमा सहस्सा, अट्ठाइज्जाइं सत्त य सयाइं ।
सयरी विचत्तवासा, दिक्खाकालो जिणिंदाणं ॥

पञ्चविंशतिः पूर्वाणां सहस्राणि शीतलस्य पर्यायो व्रतपर्यायः। श्रेयांसजिनस्य वर्षाणां लक्षाण्येकविंशतिः । वासुपूज्यस्य चतुष्पञ्चाशद्वर्षलक्षाणि । विमलनाथस्य पञ्चदशवर्षलक्षाणि । ततोऽनन्तरमनन्तजितोऽर्द्धाष्टमानि, सार्द्धानि सप्तवर्षलक्षाणि व्रतपर्यायः । धर्मनाथस्यार्द्धतृतीयानि वर्षशतसहस्राणि । शान्तिनाथस्य पञ्चविंशतिर्वर्षसहस्राणि । कुन्थुनाथस्य त्रयोविंशतिवर्षसहस्राणि शतानि चार्द्धाष्टमानि । अरस्वामिन एकविंशतिवर्षसहस्राणि । मल्लिनाथस्य वर्षशतोनानि पञ्चपञ्चाशद्वर्षसहस्राणि । मुनिसुव्रतस्वामिनोऽर्द्धाष्टमानि वर्षसहस्राणि । नमिनाथस्यार्द्धतृतीयानि वर्षशतानि । अरिष्टनेमेः सप्त शतानि । पार्श्वनाथस्य सप्ततिर्वर्षाणाम् । वर्द्धमानस्वामिनो द्वाचत्वारिंशत् । एष यथाक्रमं जिनेन्द्राणामृषभाऽऽदीनां दीक्षाकालो व्रतपर्यायः । आ० म० १ अ० १ खण्ड ।

दीक्षातरुः-

....., णिक्खंताऽसोगतरुतले सव्वे । (१५७)

सर्वे २४ जिना अशोकतरोरधो निष्क्रान्ताः । सत्त० ६७ द्वार ।

(८८) संप्रति यो येन तपसा निष्क्रान्तस्तदभिधित्सुराह-

सुमइऽत्थ निच्चभत्ते-ण निग्गतो वासुपुज्ज(जिणो)चोत्थेण ।
पासो मल्ली वि य अ-ट्ठमेण सेसा उ छट्ठेणं ॥ ३८७ ॥

सुमतिरत्र-अस्यामवसर्पिण्यां चतुर्विंशतितीर्थकृत्सु मध्ये नित्यभक्तेनानवरतभक्तेन निष्क्रान्तः । वासुपूज्यो जिनश्चतुर्थेन, एकेनोपवासेनेत्यर्थः । पार्श्वनाथो मल्लिरपि चाष्टमेन त्रिभिरुपवासैः । शेषास्तु ऋषभस्वामिप्रभृतयः षष्ठेन द्वाभ्यामुपवासाभ्यां निष्क्रान्ताः । आ० म० १ अ० १ खण्ड । ती० । स० ।

(८९) दीक्षापरिवारः-

एगो भगवं वीरो, पासो मल्ली य तिहिँ तिहिँ सएहिं ।
भगवं पि वासुपुज्जो, बहिँ पुरिससएहिं निक्खंतो ३७५॥
उग्गाणं भोगाणं, रायण्णाणं च खत्तियाणं च ।
चउहिँ सहसेहिँ उसहो, सेसा उ सहस्सपरिवारा॥३८६॥

तत्र एको भगवान् वीरो वर्द्धमानस्वामी प्रव्रजितः, न केनाऽपि सह तेन व्रतं गृहीतमित्यर्थः । पार्श्वनाथो, भगवांश्च मल्लिस्त्रिभिस्त्रिभिः शतैः सह व्रतमग्रहीत्। अत्र च मल्लिस्वामी स्त्रीणां पुरुषाणां च प्रत्येकं त्रिभिस्त्रिभिः शतैः सह प्रव्रजितः, ततो मिलितानि षट् शतानि भवन्ति । वस्तुत्रे त्रिभिः शतैरित्युक्तं तत्र केवलाः स्त्रियः पुरुषा वा गृहीताः, द्वितीयः पुनः पक्षः सङ्घपि न विवक्षित इति सम्प्रदायः। स्थानाङ्गटीकायामप्युक्तम्-मल्लिर्जिनः स्त्रीशतैरपि त्रिभिरिति । भगवानपि वासुपूज्यः षड्भिः पुरुषशतैः सह निष्क्रान्तः, संसारकान्ताराद्विर्गतः, प्रव्रजित इति यावत् ॥ ३८५ ॥ ("वासुपुज्जे णं अरहा बहिं पुरिससएहिं मुंडे भवित्ता।" स्था० ६ ठा०) उग्राणामारक्षकस्थानीयानां,भोगानां गुरुप्रायाणां,राजन्यानां मित्रप्रायाणां, क्षत्रियाणां सामन्ताऽऽदीनां सर्वसङ्ख्यया चतुर्भिः सहस्रैः सह ऋषभजिनः प्रथमो जिनो निष्क्रान्तः, व्रतं जग्राहेत्यर्थः । शेषास्तु वीरपार्श्वमल्लिवासुपूज्यनाभेयव्यतिरिक्ता जिना अजिताऽऽद्या एकोनविंशतिः, सहस्रपरिवारा पुरुषसहस्रसहिताः प्राव्राजिषुरिति ॥ ३८६ ॥ प्रव० ३१ द्वार । आ० म० । स० । सत्त० ।

(९०) दीक्षापुरम्-

उसभो अ विणीयाए, बारवईए अरिट्ठनेमी य ।
अवसेसा तित्थयरा, निक्खंता जम्मभूमीसु ॥

ऋषभस्वामी भगवान् विनीतायां नगर्यां निष्क्रान्तः; द्वारवत्यामरिष्टनेमिः; अवशेषा अजितस्वामिप्रभृतयस्तीर्थकरा निष्क्रान्ता जन्मभूमिषु; यत्र जातास्तत्र निष्क्रान्ता इति भावः । आ० म० १ अ० १ खण्ड । स० । सत्त० ।

दीक्षासमये मनःपर्यवज्ञानम्-

....., जायं च चउत्थं मणनाणं ॥ (१५८)

दीक्षायां गृहीतायां तस्मिन् समये सर्वेषां जिनानां चतुर्थं मनःपर्यवज्ञानं जातम् । सत्त० ७१ द्वार ।

(९१) दीक्षामासादयः-

जम्मं व मासपक्खा, नवरं सुवयस्स सुद्धफग्गुणिओ ।
नमिवीराण वयम्मी, कसिणा आसाढमग्गसिरा ॥ २४६ ॥
अट्ठमि नवमी पुन्निम, दुदसि नवमि तेरसीतिगं छट्ठी ।
बारसि तेरसि पनरसि,चउत्थि चउद्दसि य तेरसिया ॥२४७॥
चउद्दसि पंचमिगारसि,एगारसि बारसिय नवमि छट्ठी य ।
एगारसि दसमि तिही,वयम्मि उमरासि पुव्वं व ॥२४८॥

व्रतमासाऽऽदिनक्षत्राणि राशयश्च कथ्यन्ते । (जम्मं व मासपक्ख त्ति)जन्मवद् मासपक्षाः-जन्मकल्याणके ये मासाः पक्षाश्च कथिताः, दीक्षाकल्याणकेऽपि त एव ज्ञेया इत्यर्थः । (नवरं ति) एतावान् विशेषो ज्ञेयः-(सुवयस्स सुद्धफग्गुणिओ त्ति) सुव्रतस्य मुनिसुव्रतस्य व्रते फाल्गुनिको मासः। (नमिवीराण वयम्मि त्ति) नमिजिनवीरजिनयोर्व्रते (कसिणा आसाढमग्गसिर त्ति) कृष्णावाषाढमार्गशीर्षौ, तत्र नमिजिनस्य व्रते कृष्ण आषाढमासः । श्रीवीरजिनस्य व्रते कृष्णो मार्गशीर्षमासः। इति गाथार्थः ॥२४६॥ (अट्ठमि नवमी पुन्निम) अष्टमी, नवमी, पूर्णिमा (दुदसि नवमि तेरसी तिगं छट्ठी) द्वादशी, नवमी, त्रयोदशी त्रिकम्, षष्ठी (बारसि तेरसि पनरसि) द्वादशी १० त्रयोदशी ११ अमावास्या १२ (चउत्थि चउद्दसि य तेरसिया) चतुर्थी १३ चतुर्दशी च १४ त्रयोदशिका १५ । इति गाथार्थः ॥२४७॥ (चउद्दसि पंचमिगारसि) चतुर्दशी १६ पञ्चमी १७ एकादशी १८ (एगारसि बारसि नवमि छट्ठी) एकादशी १९ द्वादशी २० नवमी २१ षष्ठी च २२ (एगारसि दसमि तिही) एकादशी २३ दशमी २४ तिथिः (वयम्मि उमरासि पुव्वं व त्ति) व्रते नक्षत्रराशयः पूर्ववत् । "इय चवणरिक्खरासी,जम्मे दिक्खा वि णाणे वि" इति पूर्वमुक्तत्वात् ये च्यवनसमये नक्षत्रराशयो, व्रतेऽपि त एव ज्ञेयाः । इति गाथार्थः ॥ २४८ ॥ सत्त० ५९ द्वार । दीक्षाराशिश्च यवनवत् । सत्त० ६१ द्वार ।

दीक्षालिङ्गम्-

न उ नाम अन्नलिंगे,न य गिहिलिंगे कुलिंगे वा ॥

सर्व एव तीर्थकृतस्तीर्थकरालिङ्ग एव निष्क्रान्ताः, न तु नाम अन्यलिङ्गे, गृहिलिङ्गे, कुलिङ्गे वा । आ० म० १ अ० १ खण्ड । (अन्यलिङ्गाऽऽद्यर्थोऽन्यत्र)

दीक्षालोचमुष्टिः-

कयपंचमुट्ठिलोआ, उसहो चउमुट्ठिकयलोओ । (२५०)

कृतपञ्चमुष्टिलोचास्त्रयोविंशतिर्जिनाः, ऋषभः चतुर्मुष्टिकृतलोचो जातः । सत्त० ६६ द्वार ।

दीक्षावनानि-

उसभो सिद्धत्थवणे-म्मि वासुपुज्जो विहारगिहगम्मि ।
धम्मो य वप्पगाए, नीलगुहाए मुणी नाम ॥
आसमपयम्मि पासो, वीरजिणिंदो य नायसंडम्मि ।
अवसेसा पव्वइया, सहसंववणम्मि उज्जाणे ॥

ऋषभः-ऋषभस्वामी सिद्धार्थवने उद्याने निष्क्रान्तः,वासुपूज्यो विहारगृहके विहारगृहकाभिधाने उद्याने; धर्मो धर्मस्वामी भगवान् वप्रगायां वप्रगाभिधाने उद्याने । तथा च वक्ष्यति- " सेसाण केवलाई, जेसुज्जाणेसु पव्वइया । " एवं नीलगुहायां नीलगुहाभिधाने उद्याने मुनिनामा मुनिसुव्रतनामा तीर्थकरो निष्क्रान्तः । तथा आश्रमपदे आश्रमपदाभिधाने उद्याने पार्श्वनाथो निष्क्रान्तः; वीरजिनेन्द्रो ज्ञातखण्डे ज्ञातखण्डाभिधाने उद्याने । अवशेषा अजितस्वामिप्रभृतयस्तीर्थकराः सहस्राम्रवणे निष्क्रान्ताः । आ० म० १ अ० १ खण्ड ।

यस्मिन्वयसि निष्क्रान्तास्तदभिधित्सुराह-

वीरो अरिट्ठनेमी, पासो मल्ली य वासुपुज्जो अ ।
पढमवए पव्वइया, सेसा पुण मज्झिमवयम्मि ॥

वीरो महावीरः,अरिष्टनेमिः, पार्श्वनाथो,मल्लिर्वासुपूज्य इत्येते पञ्च तीर्थकृतः प्रथमवयसि कुमारत्वलक्षणे प्रव्रजिताः। शेषाः पुनः ऋषभस्वामिप्रभृतयो मध्यमे वयसि यौवनलक्षणे वर्तमानाः प्रव्रजिताः । आ० म० १ अ० २ खण्ड ।

(९२) दीक्षाशिविका-

एएसि चउव्वीसाए तित्थगराणं चउव्वीसं सीयाओ होत्था । तं जहा-

"सीया सुदंसणा सु-प्पभा य सिद्धत्थ सुप्पसिद्धा य ।
विजया य वेजयंती, जयंति अपराजिया चेव ॥ १४ ॥
अरुणप्पभ चंदप्पभ, सूरप्पभ अग्गिसप्पभा चेव ।
विमला य पंचवन्ना, सागरदत्ता य णागदत्ता य ॥१५॥
अत्थकरा निव्वुइकरि, मणोरमा तह मणोहरा चेव ।
देवकुर उत्तरकुरा, विसाल चंदप्पभाई य ॥ १६ ॥
एआओ सीआओ, सव्वेसिं चेव जिणवरिंदाणं ।
सव्वजगवच्छलाणं, सव्वोउयसुखयछायाए ॥ १७ ॥
पुव्विं ओक्खित्ता मणु-जेहिं सा हट्ठरोमकूवेहिं ।
पच्छा वहंति सीयं, असुरिंदसुरिंदनागिंदा ॥ १८ ॥
चलचवलकुंडलधरा, सच्छंदविकुव्वियाभरणधारी ।
सुरअसुरवंदिआणं, वहंति सीअं जिणिंदाणं ॥ १९ ॥
पुरओ हवंति देवा, नागा पुण दाहिणम्मि पासम्मि ।
पच्चत्थिमेण असुरा, गरुला पुण उत्तरे पासे" ॥ २० ॥

(सव्वोउयसुखयछायाए त्ति) सर्वर्तुकया सर्वेषु शरदादिषु ऋतुषु सुखदया छायया प्रभया आतपाभावलक्षणया वा, युक्ता इति शेषः । तथा-(सा हट्ठरोमकूवेहिं ति) सा शिविका यस्यां जिनोऽध्यारूढः, हृष्टरोमकूपैरुद्भुषितरोमभिरित्यर्थः । तथा (चलचवलकुंडलधर त्ति) चलाश्च ते चपलकुण्डलधराश्चेति वाक्यम् । तथा स्वच्छन्देन स्वरुच्या विकुर्वितानि अन्याभरणानि मुकुटाऽऽदीनि तानि धारयन्ति ये ते तथा । असुरेन्द्राऽऽदय इति योगः । (गरुल त्ति) गरुडध्वजाः सुपर्णकुमारा इत्यर्थः । स० । सत्त० ।

(९३) अथ षट्पञ्चाशद्दिक्कुमारीस्थानान्याह । दिक्कुमारिका नाम-दिक्कुमारजवनपतिविशेषजातिजा देव्यः-

मेरुअहउड्ढलोया, चत्तारिसि रुयगाउ अट्ठ पत्तेअं ।
चउ विदिसिमज्झरुयगा, इंती छप्पन्न दिसिकुमरी ।१०१।

(मेरुअहउड्ढलोय त्ति) मेरोरधोलोकात् १, ऊर्द्धलोका-

त् २ । तत्र अधोलोके गजदन्तगिरिचतुष्टयस्याधस्तादष्टानां दिक्कुमारीणां भवनानि सन्ति । एतच्च सामान्यमात्रेणैव स्थानमुक्तम् । विशेषेण तु संप्रदायगम्यम् । तथा-ऊर्द्धलोके मेरोरुपरि नन्दनवने अष्टौ कूटानि सन्ति । तेषामुपरि अष्टानां दिक्कुमारीणां भवनानि सन्ति । (चउदिसि रुयगाउ त्ति) चतुर्दिग्रतिरुचकात् रुचकाऊर्दिक्चतुष्टयादित्यर्थः । (अट्ठ पत्तेयं ति) एतेभ्यः षट्स्थानकेभ्यः प्रत्येकमष्टावष्टौ समागच्छन्ति । एवमष्टचत्वारिंशद् दिक्कुमार्यो जाताः । (चउ विदिसिमज्झरुयग त्ति) चतस्रो विदिक्करुचकात्, रुचकगिरिविदिग्रत्य इत्यर्थः । चतस्रो मध्यरुचकान्तात् रुचकद्वीपमध्यादित्यर्थः । (इंती उप्पन्न दिसिकुमरी) आगच्छन्ति एवं षट्पञ्चाशद् दिक्कुमार्यः । इति गाथार्थः ॥ १०१ ॥ सत्त० ३३ द्वार ।

अधोलोकवासिन्योऽष्टकुमार्यः-

जया णं एक्कमेक्के चक्कवट्टिविजए जगवंतो तित्थयरा समुप्पज्जंति, तेणं कालेणं तेणं समएणं अहोलोगवत्थव्वाओ अट्ठ दिसाकुमारीओ महत्तरिआओ सएहिं सएहिं कूडेहिं सएहिं सएहिं भवणेहिं सएहिं सएहिं पासायवडेंसएहिं पत्तेअं पत्तेअं चउहिं सामाणिअसाहस्सीहिं चउहिं महत्तरिआहिं सपरिवाराहिं सत्तहिं अणीएहिं सत्तहिं अणीआहिवईहिं सोलसएहिं आयरक्खदेवसाहस्सीहिं अण्णेहि अ बहूहिं वाणमंतरेहिं देवेहिं देवीहि अ सद्धिं संपरिवुडाओ महयाहयणट्टगीअवाइअ० जाव जोगभोगाइं भुंजमाणीओ विहरंति । तं जहा-

"भोगंकरा १ भोगवई २, सुभोगा ३ भोगमालिनी ४ ।
तोयधारा५ विचित्ता य ६,पुप्फमाला७ अणिंदिया"।७१।

(तेणं कालेणं इत्यादि) तस्मिन् काले संजवजिनजन्मके भरतैरावतेषु तृतीयचतुर्थारकलक्षणे, महाविदेहेषु चतुर्थारकप्रविभागलक्षणे, तत्र सर्वदाऽपि तदाद्यसमयसदृशकालस्य विद्यमानत्वात् । तस्मिन् समये सर्वत्राप्यर्द्धरात्रलक्षणे, तीर्थकराणां हि मध्यरात्र एव जन्मसंभवात् । अधोलोकवास्तव्याः, चतुर्णां गजदन्तानामधः समभूतलाद् नवशतयोजनरूपां तिर्यग्लोकव्यवस्थां विमुच्य प्रतिगजदन्तं द्विद्विनावेन तत्र भवनेषु वसनशीलाः । यद्यु गजदन्तानां षष्ठपञ्चमकूटेषु पूर्वं गजदन्तसूत्रे आसां वासः प्ररूपितः, तत्र कीदृशमागमनं हेतुरिति,आसामपि चतुःशतयोजनाऽऽदिपञ्चशतयोजनाऽऽदिपञ्चशतयोजनपर्यन्तोच्चत्वगजदन्तगिरिगतं पञ्चशतिककूटगतप्रासादावतंसकवासित्वेन नन्दनवनकूटगतमेघङ्कराऽऽदिदिक्कुमारीणामिवोर्द्धलोकवासित्वाऽऽपत्तेः । अथ प्रकृतं प्रस्तुमः-अष्टौ दिक्कुमार्यो दिक्कुमारा भवनपतिजातीयाः, महत्तरिकाः स्ववर्गेषु प्रधानतरिकाः, स्वकेषु स्वकेषु कूटेषु गजदन्ताऽऽदिगिरिवर्तिषु,स्वकेषु स्वकेषु भवनेषु भवनपतिदेवाऽऽवासेषु,स्वकेषु स्वकेषु प्रासादावतंसकेषु स्वस्वकूटवर्त्तिक्रीडाऽऽवासेषु । सूत्रेषु च सप्तम्यर्थे तृतीया प्राकृतत्वात् । प्रत्येकं प्रत्येकं चतुर्भिः सामानिकानां दिक्कुमारिसदृशद्युतिविभवाऽऽदिकदेवानां सहस्रैः,चतसृभिश्च महत्तरिकाभिर्दिक्कुमारिकातुल्यविभवाऽऽदिभिस्ताभिरनतिक्रमणीयवचनाभिश्च स्वस्वपरिवारसहिताभिः,सप्तभिरनीकैर्हस्त्यश्वरथपदातिमहिषगन्धर्वनाट्यरूपैः, सप्तभिरनीकाधिपतिभिः, सोमशत्रिरात्मरक्षकदेवसहस्रैरित्यादिकं सर्वं विजयदेवाधिकार इव व्याख्येयम् । ननु कासाञ्चिद्दिक्कुमारीणां युक्त्या स्थानाङ्के पल्योपमस्थितेर्मेरुनात् समानजातीयत्वेनासामपि तथाभूतायुषः संज्ञाव्यमानत्वाद् भवनपतिजातीयत्वं सिद्धम्, तेन भवनपतिजातीयानां वानमन्तरजातीयपरिकरः कथं संगच्छते ?। उच्यते-एतासां महर्द्धिकत्वेन ये आज्ञाकारिणो व्यन्तरास्ते आज्ञा इति । अथवा-वानमन्तरशब्देनाऽत्र वनानामन्तरेषु चरन्तीति यौगिकार्थसंश्रयणाद् भवनपतयोऽपि वानमन्तरा इत्युच्यन्ते । उभयेषामपि प्रायो वनकूटाऽऽदिषु विहरणशीलत्वादिति सञ्ज्ञाव्यते । तत्त्वं तु बहुश्रुतगम्यमिति सर्वं सुस्थम् । अथैतासां नामान्याह-(तं जहा इत्यादि) तद्यथा-"भोगंकरा" इत्यादि । रूपकमेतत् करणीयम् ।

एतासामासनानि चलन्ति-

तए णं तासिं अहोलोगवत्थव्वाणं अट्ठण्हं दिसाकुमारीणं महत्तरिआणं पत्तेअं पत्तेअं आसणाइं चलंति । तए णं ताओ अहोलोगवत्थव्वाओ अट्ठ दिसाकुमारीओ महत्तरिआओ पत्तेअं पत्तेअं आसणाइं चलिआइं पासंति, पासित्ता ओहिं पउंजंति, पउंजित्ता जगवं तित्थयरं ओहिणा आभोएंति, आभोइत्ता अण्णमण्णं सद्दावेंति, सद्दावित्ता एवं वयासी-उप्पण्णे खलु भो ! जंबुद्दीवे भयवं तित्थयरे, तं जीयमेअं-तीअपच्चुप्पण्णमणागयाणं अहोलोगवत्थव्वाणं अट्ठण्हं दिसाकुमारीमहत्तरिआणं जगवओ तित्थयरस्स जम्मणमहिमं करित्तए, तं गच्छामो णं अम्हे वि भगवओ तित्थगरस्स जम्मणमहिमं करेमो त्ति कट्टु एवं वयंति, वइत्ता पत्तेअं पत्तेअं आभिओगिए देवे सद्दावेंति, सद्दावेत्ता एवं वयासी ॥

अथैतास्वेवं विहरन्तीषु सतीषु किं जातमित्याह-(तए णमित्यादि) ततस्तासामधोलोकवास्तव्यानामष्टानां दिक्कुमारीणां महत्तरिकाणां प्रत्येकं प्रत्येकमासनानि चलन्तीति । अथैताः किं किमकार्षुरित्याह-(तए णमित्यादि) तत आसनप्रकम्पानन्तरं ता अधोवास्तव्या अष्टौ दिक्कुमार्यो महत्तरिकाः प्रत्येकं प्रत्येकमासनानि चलितानि पश्यन्ति, दृष्ट्वा चाऽवधिं प्रयुञ्जन्ति, प्रयुज्य भगवन्तं तीर्थकरमवधिना आभोगयन्ति, आभोग्य च अन्यमन्यं शब्दयन्ति, शब्दयित्वा च एवमवादिषुः । यदवादिषुस्तदाह-(उप्पण्णे इत्यादि) उत्पन्नः खलु भोः! जम्बूद्वीपे जगवांस्तीर्थङ्करः,तज्जीतमेतत्कृत्यं एषोऽतीतप्रत्युत्पन्नानागतानामधोलोकवास्तव्यानामष्टानां दिक्कुमारीमहत्तरिकाणां भगवतो जन्ममहिमां कर्तुं, तद्गच्छामो वयमपि भगवतो जन्ममहिमां कुर्म इति कृत्वा, धातूनामनेकार्थत्वाद्विशिष्य मनसा एवमनन्तरोक्तं वदन्ति, वदित्वा च प्रत्येकं प्रत्येकमाभियोगिकान् देवान् शब्दयन्ति, शब्दयित्वा चैवमवादिषुः ।

किमवादिषुरित्याह-

खिप्पामेव भो देवाणुप्पिआ ! अणेगखंजसयसण्णिविट्ठे

लीलट्ठिअ० एवं विमाणवण्णओ भाणिअव्वो० जाव जोअणविच्छिण्णे दिव्वे जाणविमाणे विउव्वेह, विउव्वित्ता एअमाणत्तिअं पच्चप्पिणह। तए णं ते आभिओगा देवा अणेगखंभसय० जाव पच्चप्पिणंति।

(खिप्पामेव इत्यादि) भो देवानुप्रियाः ! क्षिप्रमेवाऽनेकस्तम्भशतसन्निविष्टानि लीलास्थितशालभञ्जिकानीत्येवमनेन क्रमेण विमानवर्णको भणितव्यः। स चायम्-"ईहामिगउसभतुरगणरमगरविहगवालकिन्नररुरुसरभचमरकुंजरवणलयपउमलयभत्तिचित्ते खंभुग्गयवरवइरवेइआपरिगयाभिरामे विज्जाहरजमलजुअलजंतजुत्ते विव अच्चीसहस्समालिणीए रूवगसहस्सकलिए भिसमाणे भिब्भिसमाणे चक्खुल्लोअणलेसे सुहफासे सस्सिरीअरूवे घंटावलिअमहुरमणहरसरे सुभे कंते दरिसणिज्जे णिउणोचिअमिसिमिसंतमणिरयणघंटिआजालपरिक्खित्ते।" कियत्पर्यन्तमित्याह-यावद्योजनविस्तीर्णानि दिव्यानि यानायेष्टस्थाने गमनाय विमानानि, अथवा यानरूपाणि वाहनरूपाणि विमानानि यानविमानानि, विकुर्वत-वैक्रियशक्त्या संपादयत, विकुर्वित्वा एतामाज्ञप्तिं प्रत्यर्पयत। अथ यानवर्णकव्याख्या प्राग्वद् ज्ञेया, तोरणाऽऽदिवर्णकेषु पतद्विशेषणस्य व्याख्यातत्वात्। ततस्ते किं चक्रुरित्याह-(तए णमित्यादि) ततस्ते आभियोगिका देवा अनेकस्तम्भशतसंनिविष्टानि यावदाज्ञां प्रत्यर्पयन्ति॥

अथैताः किं कुर्वन्तीत्याह-

तए णं ताओ अहोलोगवत्थव्वाओ अट्ठ दिसाकुमारिमहत्तरिआओ पत्तेअं पत्तेअं चउहिं सामाणिअसाहस्सीहिं चउहिं महत्तरिआहिं० जाव अण्णेहिं बहूहिं देवेहिं देवीहि अ सद्धिं संपरिवुडाओ ते दिव्वे जाणविमाणे दुरूहंति, दुरूहित्ता सव्विड्ढीए सव्वजुईए घणमुइंगपणवपवाइअरवेणं ताए उक्किट्ठाए० जाव देवगईए जेणेव भगवओ तित्थगरस्स जम्मणणगरे जेणेव तित्थयरस्स जम्मणभवणे, तेणेव उवागच्छंति, उवागच्छित्ता भगवओ तित्थयरस्स जम्मणभवणं तेहिं दिव्वेहिं जाणविमाणेहिं तिक्खुत्तो आयाहिणपयाहिणं करेंति, करित्ता उत्तरपुरच्छिमे दिसीभाए ईसिं चउरंगुलमसंपत्ते धरणिअले ते दिव्वे जाणविमाणे ठवेंति, ठवित्ता पत्तेअं पत्तेअं चउहिं सामाणिअसाहस्सीहिं० जाव सद्धिं संपरिवुडाओ दिव्वेहिंतो जाणविमाणेहिंतो पच्चोरुहंति, पच्चोरुहित्ता सव्विड्ढीए० जाव णाइएणं जेणेव भगवं तित्थयरे तित्थयरमाया य तेणेव उवागच्छंति, उवागच्छित्ता भगवं तित्थयरमायरं च तिक्खुत्तो आयाहिणपयाहिणं करेंति, करित्ता पत्तेअं पत्तेअं करयलपरिग्गहिअं सिरसावत्तं मत्थए अंजलिं कट्टु एवं वयासी।

"तए णं ताओ" इत्यादि। ततस्ता अधोलोकवास्तव्या अष्टौ दिक्कुमारीमहत्तरिकाः; हट्ठतुट्ठेत्याद्येकदेशदर्शनेन संपूर्ण आलापको ग्राह्यः। स चायम्-"हट्ठतुट्ठचित्तमाणंदिआ पीअमणा परमसोमणस्सिआ हरिसवसविसप्पमाणहिअया विअसिअवरकमलनयणपचलिअवरकडगतुडिअकेऊरमउडकुंडलहारविरायंतरइअवच्छा पालंबपलंबमाणघोलंतभूसणधरा ससंभमं तुरिअं चवलं सीहासणाओ अब्भुट्ठेंति, अब्भुट्ठित्ता पायपीढाओ पच्चोरुहंति, पच्चोरुहित्ता" इति। प्रत्येकं प्रत्येकं चतुर्भिः सामानिकसहस्रैः चतसृभिश्च महत्तरिकाभिर्यावदन्यैर्बहुभिर्देवैर्देवीभिश्च सार्द्धं संपरिवृताः, तानि दिव्यानि यानविमानान्यारोहन्ति। आरोहणोत्तरकालं येन प्रकारेण सूतिकागृहमुपतिष्ठन्ते तथाऽऽह-(दुरूहित्ता इत्यादि) आरुह्य च सर्वर्द्ध्या सर्वद्युत्या घनमृदङ्ग मेघवदुगम्भीरध्वनिकं मृदङ्ग,पणवो मृत्पटहः, उपलक्षणमेतत्तेनान्येषामपि तूर्याणां संग्रहः। एतेषां प्रवादितानां यो रवस्तेन तया उत्कृष्टया, यावत्करणात्—"तुरिआए चवलाए" इत्यादि पदसंग्रहः प्राग्वत्। देवगत्या यत्रैव भगवतस्तीर्थकरस्य जन्मनगरं यत्रैव च तीर्थकरस्य जन्मभवनं तत्रैवोपागच्छन्ति, उपागत्य च भगवतस्तीर्थकरस्य जन्मभवनं तैर्दिव्यैर्यानविमानैरित्थंकृत्व आदक्षिणप्रदक्षिणं कुर्वन्ति, त्रीन् वारान् प्रदक्षिणयन्तीत्यर्थः। त्रिःप्रदक्षिणीकृत्य च उत्तरपौरस्त्ये दिग्भागे ईशानकोणे ईषच्चतुरङ्गुलमसंप्राप्तानि धरणितले तानि दिव्यानि यानविमानानि स्थापयन्तीति। अथ यच्चक्रुस्तदाह- स्थापयित्वा च प्रत्येकं प्रत्येकम्, अष्टावपीत्यर्थः। चतुर्भिः सामानिकसहस्रैर्यावत् सार्द्धं संपरिवृता दिव्येभ्यो यानविमानेभ्यः प्रत्यवरोहन्ति, प्रत्यवरुह्य च सर्वर्द्ध्या, यावच्छब्दात् सर्वद्युत्यादिपरिग्रहः। किंयत्पर्यन्तमित्याह-"संखपणवभेरिझल्लरिखरमुहिहुडुक्कमुरजमुइंगदुंदुहिनिग्घोसनाइएणं ति।" यत्रैव भगवांस्तीर्थकरस्तीर्थकरमाता च तत्रैवोपागच्छन्ति, उपागत्य च भगवन्तं तीर्थकरं तीर्थकरमातरं च त्रिः प्रदक्षिणयन्ति, त्रिः प्रदक्षिणीकृत्य च प्रत्येकं प्रत्येकं करतलपरिगृहीतं शिरस्यावर्त्तं मस्तके अञ्जलिं कृत्वा, एवं वक्ष्यमाणमवादिषुः।

तदाह-

णमोऽत्थु ते रयणकुच्छिधारिए! जगप्पईवदीविए! सव्वजगमंगल्लस्स चक्खुणो अ मुत्तस्स सव्वजगजीववच्छल्लस्स हिअकारगमग्गदेसिअवागिड्ढिविज्जुप्पभुस्स जिणस्स णाणिस्स नायगस्स बुद्धस्स बोहगस्स सव्वलोगनाहस्स निम्ममस्स पवरकुलसमुब्भवस्स जाईए खत्तिअस्स जं सि लोगुत्तमस्स जणणी, धण्णा सि, तं कयत्था सि, अम्हे णं देवाणुप्पिए! अहोलोगवत्थव्वाओ अट्ठ दिसाकुमारीमहत्तरिआओ भगवओ तित्थगरस्स जम्मणमहिमं करिस्सामो, तेणं तुब्भेहिं ण भइअव्वं ति कट्टु उत्तरपुरच्छिमं दिसीभागं अवक्कमंति।

(नमोऽत्थु ते इत्यादि) नमोऽस्तु ते तुभ्यं, रत्नं भगवल्लक्षणं कुक्षौ धरतीति रत्नकुक्षिधारिके!। अथवा-रत्नगर्भाचक्रभेधारकत्वेनाऽपरस्त्रीकुक्षिभ्योऽतिशायित्वेन रत्नरूपां कुक्षिं धरतीति; शेषं तथैव। तथा जगद्वर्त्तिजनानां सर्वभावानां प्रकाशकत्वेन प्रदीप इव प्रदीपो जगवान्, तस्य दीपके!, सर्वजगन्मङ्गलभूतस्य चक्षुरिव चक्षुः सकलजगद्भावदर्शकत्वेन तस्य, चः समुच्चये। चक्षुश्च द्रव्यभावभेदाभ्यां द्विधा, तत्राऽऽद्यं भाव-

चक्षुरसहकृतं नार्थप्रकाशकं, तेन ज्ञानचक्षुषा जगवानुपमीयते, तच्चामूर्त्तमिति । ततो विशेषमाह-मूर्त्तस्य मूर्तिमतः, चक्षुर्ग्राह्यस्येत्यर्थः। सर्वजगज्जीवानां वत्सलस्योपकारकस्य। उक्तार्थे विशेषणद्वारेण हेतुमाह-हितकारको मार्गो मुक्तिमार्गः सम्यग्ज्ञानदर्शनचारित्ररूपः, तस्य देशिका उपदेशिका, दर्शिकेत्यर्थः। तथा विद्वां सर्वभाषाऽनुगमनेन परिणमनात् सर्वव्यापिनी, सकलश्रोतृजनहृदयसंक्रान्ततात्पर्यार्था, एवंविधा वागृद्धिर्वाक्संपत्, तस्याः प्रभुः स्वामी, सातिशयवचनलब्धिक इत्यर्थः । तस्य । तथाऽत्र विशेषणस्य परनिपातः प्राकृतत्वात् । जिनस्य रागद्वेषजेतुः, ज्ञानिनः सातिशयज्ञानयुक्तस्य, नायकस्य धर्मवरचक्रवर्तिनः,बुद्धस्य विदिततत्त्वस्य, बोधकस्य परेषामावेदिततत्त्वस्य, सकललोकनाथस्य सर्वप्राणिवर्गस्य बोधिबीजाऽऽधानसंरक्षणाभ्यां योगक्षेमकारित्वात्। निर्ममस्य ममत्वरहितस्य, प्रवरकुलसमुद्भवस्य, जात्या क्षत्रियस्य, एवंविधविख्यातगुणस्य लोकोत्तमस्य, यत्त्वमसि जगवन्, तद्धन्याऽसि पुण्यवत्यसि, कृतार्थाऽसि, वयं हे देवानुप्रिये ! अधोलोकवास्तव्या अष्टौ दिक्कुमारीमहत्तरिकाः भगवतो जन्ममहिमां करिष्यामः, तेन युष्माभिर्न भेतव्यम्-असम्भाव्यमानपरजनाऽऽपातेऽस्मिन् रहःस्थाने इमा विसदृशजातीयाः किमिति शङ्काऽऽकुलं चेतो न कार्यमित्यर्थः । (ति कट्टु उत्तरपुरच्छिमं दिसीभागमित्यादि) इतिकृत्वा प्रस्तावादिदमुक्त्वा,ता एवोत्तरपौरस्त्यं दिग्भागमपक्रामन्ति ।

अथैतासामितिकर्त्तव्यमाह-

अवक्कमित्ता वेउव्वियसमुग्घाएणं समोहणंति, समोहणित्ता संखिज्जाइं जोअणाइं दंमं निसिरंति, निसिरित्ता तं जहा रयणाणं० जाव संवट्टगवाए विउव्वंति, विउव्वित्ता तेणं सिवेणं मउएणं अणुद्धूएणं जूमितलविमलकरणेणं मणहरेणं सव्वोउअसुरहिकुसुमगंधाणुवासिएणं पिंमिमनीहारिमगंधुद्धूरेणं तिरिअं पवाइएणं भगवओ तित्थयरस्स जम्मणनवणस्स सव्वओ समंता जोअणपरिमंमलं,से जहाणामए कम्मयरदारए सिआ०जाव तहेव जं तत्थ तणं वा पत्तं वा कट्ठं वा कयवरं वा असुइमचोक्खं पूइअं दुब्भिगंधं, तं सव्वं आहुणिअ आहुणिअ एगंते एगेंति, एडित्ता जेणेव भगवं तित्थयरे तित्थयरमाया य, तेणेव उवागच्छंति, उवागच्छित्ता भगवओ तित्थयरस्स तित्थयरमायाए अ अदूरसामंते आगायमाणीओ परिगायमाणीओ चिट्ठंति ।

अपक्रम्य च वैक्रियसमुद्घातेन समवहन्ति, समवहत्य च संख्यातानि योजनानि दण्डं निसृजन्ति,निसृज्य च किं ताः कुर्वन्ति?, तदेवाऽऽह-तद्यथा रत्नानाम्। यावत्पदात्-"वइराणं वेरुलिआणं लोहिअक्खाणं मसारगल्लाणं हंसगब्भाणं पुलयाणं सोगंधिआणं जोईरसाणं अंजणाणं पुलयाणं रयणाणं जायरूवाणं अंकाणं फलिहाणं रिट्ठाणं अहाबायरे पुग्गले परिसाडेइ,अहासुहुमे पुग्गले परिआएइ, दुच्चं पि वेउव्वियसमुग्घाएणं समोहणंति, समोहणित्ता।" इति पदसंग्रहः । एतत्सविस्तरव्याख्या पूर्वं भरतामियोगिकदेवानां वैक्रियकरणाधिकारे कृता, तेन ततो ग्राह्या ।

वाक्ययोजनार्थं तु किञ्चिल्लिख्यते-तेषां रत्नानां बादरान् पुद्गलान् परिशाट्य सूक्ष्मान् पुद्गलान् गृह्णन्ति, पुनर्वैक्रियसमुद्घातपूर्वकं संवर्त्तकवातान् विकुर्वन्ति । बहुवचनं चात्र विकीर्षितकार्यस्य सम्यक्सिध्यर्थं पुनः पुनर्वातविकुर्वणाज्ञापनार्थम् । विकुर्व्य च तेन तत्कालविकुर्वितेन, शिवेनोपद्रवरहितेन, मृदुकेन भूमिसर्पिणा मारुतेन अनुद्धूतेन अनूर्द्ध्वचारिणा, भूमितलविमलकरणेन मनोहरेण सर्वर्तुकानां पद्मोत्पलसम्भवानां सुरभिकुसुमानां गन्धेनानुवासितेन, पिण्डिमनिर्हारिणा पिण्डिमतः सन् निर्हारो नातिदूरं विनिर्गमनशीलो यो गन्धः,तेन उद्धूरेण,वर्त्तिष्टेनेत्यर्थः। तिर्यक् प्रवातेन तिर्यक् वातुमारब्धेन, भगवतस्तीर्थकरस्य जन्मभवनस्य सर्वतो दिक्षु समन्ताद्दिक्षु योजनपरिमण्डलम्, "से जहाणामए कम्मयरदारए सिआ० जाव" इत्येतत्सूत्रैकदेशसूचितदृष्टान्तिकसूत्रान्तर्गतेन "तहेव" इति दार्ष्टान्तिकसूत्रबलादायातेन संमार्जयतीतिपदेन सहान्वययोजना कार्या ।

तच्चेदं दृष्टान्तसूत्रम्-

" से जहाणामए कम्मयरदारए सिआ तरुणे बलवं जुगवं जुवाणे अप्पायंके थिरग्गहत्थो दढपाणिपाए पिट्ठंतरोरुपरिणए घणनिचिअवट्टिअवट्टखंधे चम्मेट्ठगदुहणमुट्ठिअसमाहयनिचिअगत्ते उरस्सबलसमण्णागए तलजमलजुअलपरिघबाहू लंघणपवणजइणपमद्दणसमत्थे छेए दक्खे पट्ठे कुसले मेहावी निउणसिप्पोवगए एगं महंतं सब्भागहत्थगं वा दंडसंपुच्छणिं वा वेणुसिक्कागिं वा गहाय रायंगणं वा रायंतेउरं वा देवकुलं वा सभं वा पवं वा आरामं वा उज्जाणं वा अतुरिअमचवलमसंभंतं निरंतरं सुनिकण सव्वओ समंता संपमज्जिज्ज त्ति ।"

स यथानामको यत्प्रकारनामकः कर्मकरदारकः स्याद् भवेत् । आसन्नमृत्युर्हि दारको न विशिष्टसामर्थ्यभाग् भवतीत्याह-तरुणः प्रवर्द्धमानवयाः । स च बलहीनोऽपि स्यादित्यत आह-बलवान्। कालोपद्रवोऽपि विशिष्टसामर्थ्यविघ्नहेतुरित्यत आह—युगं सुषमदुःषमाऽऽदिकालः,सोऽस्तीष्टो निरुपद्रवो विशिष्टबलहेतुर्यस्यास्त्यसौ युगवान्। एवंविधश्च को भवति?,युवा यौवनवयस्थः, ईदृशोऽपि ग्लानः सन् निर्बलो भवत्यतः-अल्पातङ्कः, अल्पशब्दोऽत्राभाववचनः;तेन निरातङ्क इत्यर्थः। तथा स्थिरः प्रस्तुतकार्यकरणेऽकम्पोऽग्रहस्तो हस्ताग्रं यस्यासौ तथाऽदृढं निविडतरचयमापन्नं पाणिपादं यस्य स तथा। पृष्ठं प्रतीतम्,अन्तरे पार्श्वरूपे, ऊरू सक्थिनी,एतानि परिणतानि परिनिष्ठिततां गतानि यस्य स तथा, सुखाऽऽदिदर्शनात् पात्रिकः कान्तस्य परिनिपातः, अहीनाङ्ग इत्यर्थः।घननिचितौ निविडतरचयमापन्नौ वज्रिताविव वलितौ, हृदयाग्निमुखौ जातावित्यर्थः। वृत्तौ स्कन्धौ यस्य स तथा। तथा चर्मेष्टकेन चर्मपरिणद्धकुट्टनोपकरणविशेषेण दृढनेन घनेन,मुष्टिकया च मुष्ट्या समाहताः सन्तस्ताडिताः सन्तो ये निचिता निविडीकृताः प्रबृहणप्रेष्यमाणवस्त्रग्रन्थिकाऽऽदयः, तद्वद् गात्रं यस्य तथा। उरसि भवमुरस्यमीदृशेन बलेन समन्वागतः-अन्तरोत्साहवीर्ययुक्तः । तलौ तालवृक्षौ, तयोर्यमलं समश्रेणिकं यद्युगलं द्वयं, परिघश्चार्गला, तन्निभे तत्सदृशे दीर्घसरलपीवरत्वाऽऽदिना बाहू यस्य स तथा । प्लवने गर्ताऽऽदेरतिक्रमे, प्लवने मनाक् विक्रमवति गमने, जवनेऽतिशीघ्रगमने, प्रमर्दने कठिनस्याऽपि वस्तुनश्चूर्णने समर्थः । छेकः कलापण्डितः दक्षः कार्याणामविलम्बितकारी, प्रष्ठो वाग्मी, कुशलः सम्यक्क्रियापरिज्ञानवान्, मेधावी सकृत्श्रुतदृष्टकर्मज्ञः, निपुणशिल्पोपगतः-निपुणं यथा भवत्येवं शिल्पक्रियासु कौशलमुपगतः

प्रातः;एकं महान्तं शलाकहस्तकं सरित्पर्णाऽऽदिशलाकासमुदायं,सरित्पर्णाऽऽदिशलाकामयीं सम्मार्जनीमित्यर्थः। वाशब्दो विकल्पार्थः। दण्डसंयुक्तनीं दण्डयुक्तां सम्मार्जनीं,वेणुशलाकिकां वंशशलाकानिर्वृत्तां संमार्जनीं गृहीत्वा राजाऽङ्गणं वा, राजाऽन्तःपुरं वा, देवकुलं वा, सभां वा-पुरप्रधानानां सुखं निवेशनहेतुमण्डपिकामित्यर्थः । प्रपां वा पानीयशालाम्, आरामं वा दम्पत्योर्नगराऽऽसन्नरतिस्थानम्, उद्यानं वा क्रीमार्थाऽऽगतजनानां प्रयोजनाभावेनोर्द्ध्वलम्बितयानवाहनाऽऽश्रयभूतं तरुखण्डम्,अत्वरितमचपलमसंभ्रान्तम्,त्वरायां चापल्ये संभ्रमे वा सत्यकृतचत्वराऽऽद्यपगमासंभवात्। तत्र त्वरा मानसौत्सुक्यं, चापल्यं कायौत्सुक्यम्, संभ्रमश्च गतिस्खलनमिति । निरन्तरं, न तु अपान्तरालमोचनेन, सुनिपुणमल्पस्थाप्यचोक्ष्यापसारणेन सेप्रमार्जयेदिति ।

अथोक्तदृष्टान्तस्य दार्ष्टान्तिकयोजनायाऽऽह-तथैवैता अपि योजनपरिमण्डलं योजनप्रमाणं वृत्तक्षेत्रं संप्रमार्जयन्तीति । यत्तत्र योजनपरिमण्डले, तृणं वा पत्रं वा काष्ठं वा कचवरं वा अशुचि अपवित्रम्,अचोक्षं मलिनं,पूतिकं दुरभिगन्धं,तत्सर्वमाधूय आधूय संचाल्य संचाल्य,एकान्ते योजनपरिमण्डलाद्बहिर्देशे, एमण्यन्त्यपनयन्ति, अपनीय-अर्थात् संवर्त्तकवातोपशमं विधाय च, यत्रैव भगवांस्तीर्थकरः, तीर्थकरमाता च तत्रैवोपागच्छन्ति, उपागत्य च भगवतस्तीर्थकरस्य तीर्थकरमातुश्च नातिदूरासन्ने आगायन्त्यः-आ ईषत् स्वरेण गायन्त्यः प्रारम्भकाले मन्दस्वरेण गायमानत्वात्, परिगायन्त्यो गीतप्रवृत्तिकालानन्तरं तारस्वरेण गायन्त्यस्तिष्ठन्ति ।

अथोर्ध्वलोकवासिनीनामवसरः-

तेणं कालेणं तेणं समएणं उड्ढलोगवत्थव्वाओ अट्ठ दिसाकुमारीमहत्तरियाओ सएहिं सएहिं कूडेहिं सएहिं सएहिं भवणेहिं सएहिं सएहिं पासायवडेंसएहिं पत्तेअं पत्तेअं चउहिं सामाणिअसाहस्सीहिं एवं तं चेव पुव्ववण्णिअं० जाव विहरंति ।

" तेणं कालेणं " इत्यादि व्यक्तं, नवरम ऊर्द्धलोकवासित्वं चासां समभूतलात् पञ्चशतयोजनोच्चनन्दनवनगतपञ्चशतिकाऽष्टकूटवासित्वेन ज्ञेयम् । नन्वधोलोकवासिनीनां गजदन्तगिरिगतकूटाष्टके यथा क्रीडानिमित्तको वासः, तथैतासामप्यत्र प्रविष्यतीति चेद्, मैवम, यथाऽधोलोकवासिनीनां गजदन्तगिरीणां गन्धभवनेषु वासः श्रूयते, तथैतासामश्रूयमाणत्वेन तत्र निरन्तरं वासः, ततऊर्द्धलोकवासित्वम् ॥

ताश्चेमा नामतः पद्यबन्धेनाऽऽह-

तं जहा-

" मेहंकरा मेहवई, सुमेहा मेहमालिणी ।
सुवच्छा वच्छमित्ता य, वारिसेणा बलाहगा" ॥ १ ॥

मेघङ्करा, मेघवती, सुमेघा, मेघमालिनी, सुवत्सा, वत्समित्रा, चः समुच्चये । वारिषेणा, बलाहका ।

अथ तासां यद् वक्तव्यं तदाह । आसनानि चलन्ति-

तए णं तासिं उड्ढलोगवत्थव्वाणं अट्ठण्हं दिसाकुमारीमहत्तरिआणं पत्तेअं पत्तेअं आसणाइं चलंति । एवं तं चेव पुव्ववण्णिअं भाणिअव्वं० जाव अम्हे णं देवाणुप्पिए ! उड्ढलोगवत्थव्वाओ अट्ठ दिसाकुमारीमहत्तरिआओ भगवओ तित्थगरस्स जम्मणमहिमं करिस्सामो, तेणं तुब्भेहिं ण भाइअव्वं ति कट्टु उत्तरपुरच्छिमं दिसीभागं अवक्कमंति, अवक्कमित्ता० जाव अब्भवद्दलए विउव्वंति, विउव्वित्ता ०जाव तं निहयरयं पणट्ठरयं भट्ठरयं पसंतरयं उवसंतरयं करेंति, करेत्ता खिप्पामेव पच्चुवसमंति,एवं पुप्फवद्दलंसि पुप्फवासं वासंति, वासित्ता० जाव काळागुरुपवर० जाव सुरवराभिगमणजोग्गं करेंति, करेत्ता जेणेव भयवं तित्थयरे,तित्थयरमाया य, तेणेव उवागच्छंति, उवागच्छित्ता जाव० आगायमाणीओ परिगायमाणीओ चिट्ठंति ।

" तए णं तासिं उड्ढलोगवत्थव्वाणं " इत्यादि व्यक्तम , नवरं तदेव पूर्ववर्णितं भणितव्यं, कियत्पर्यन्तमित्याह-(० जाव अम्हे णमित्यादि) अत्र यावच्छब्दोऽवधिवाचको, न तु संग्राहकः। (अवक्कमित्ता० जाव त्ति) अत्र यावत्पदात् " वेउव्विअसमुग्घाएणं समोहणंति, समोहणित्ता० जाव दोच्चं पि वेउव्वियसमुग्घाएणं समोहणंति, समोहणित्ता । " इति बोध्यम्। अब्भवद्दलकानि विकुर्वन्ति, अभ्रे आकाशे वाः पानीयं तस्य दलकानि अभ्रवार्दलकानि,मेघानीत्यर्थः।(विउव्वित्ता०जाव त्ति) अत्र यावत्करणादिदं दृश्यम्-

" से जहाणामए कम्मयरदारए० जाव सिप्पोवगए एगं महंतं दगवारगं वा दगकुंभगं वा दगथालगं वा दगकलसं वा दगभिंगारं वा गहाय रायंगणं वा० जाव सव्वाणं वा समंता आवरिसिज्जा, एवमेव ता अहं उड्ढलोगवत्थव्वाओ अट्ठ दिसाकुमारीमहत्तरिआओ अब्भवद्दलए विउव्वित्ता खिप्पामेव पतणतणायंति, पतणतणाइत्ता खिप्पामेव पविज्जुआयंति, पविज्जुआइत्ता भगवओ तित्थगरस्स जम्मणभवणस्स सव्वओ समंता जोअणपरिमंडलं णच्चोअगं सुहमट्टिअं पविरलपप्फुसिअं रयरेणुविणासणं दिव्वं सुरभिगंधोदयवासं वासंति।"

अत्र व्याख्या-स यथा कर्मदारक इत्यादि प्राग्वद् व्याख्येयम् , एकं महान्तं दकवारकं वा मृत्तिकामयजलभाजनविशेषं, दककुम्भकं वा जलघटं, दकस्थालकं वा कांस्यादिमयं जलपात्रं, दककलशं वा, दकभृङ्गारं वा गृहीत्वा राजाङ्गणं वा यावदुद्यानं वा आवर्षेत् समन्तात् सिञ्चेत् । " एवमेव ता अहं उड्ढलोगवत्थव्वाओ " इत्यादि प्राग्वत् । क्षिप्रमेव (पतणतणायंति त्ति) अत्यन्तं गर्जन्तीत्यर्थः । गर्जित्वा च (पविज्जुआयंति त्ति) प्रकर्षेण विद्युतं कुर्वन्ति; कृत्वा च भगवतस्तीर्थकरस्य जन्मभवनस्य सर्वतः समन्ताद्योजनपरिमण्डलं क्षेत्रं यावत्, अत्र नैरन्तर्ये द्वितीया, निरन्तरं योजनपरिमण्डले क्षेत्रे इत्यर्थः । नात्युदकं नातिमृत्तिकं यथा स्यात्तथा प्रकर्षेण यावन्तो रेणवः स्थगिता भवन्ति, तावन्मात्रेणोत्कर्षेणेति भावः । उक्तप्रकारेण विरलानि घनेतराणि, घनभावेन कर्दमसम्भवात्, प्रस्पृष्टानि प्रकर्षवन्ति स्पर्शनानि, मन्दस्पर्शनसंभवे रेणुस्थगनासम्भवात्, यस्मिन् वर्षे तत्प्रविरलप्रस्पृष्टम्,अत एव रजसां रङ्गरेणुपुद्गलानां च स्थूलतममेतत्पुद्गलानां विनाशनं, दिव्यमतिमनोहरं सुरभिगन्धोदकवर्षं वर्षन्ति, वर्षित्वा च। अथ प्रस्तुतसूत्रमनुश्रियते, तद् योजनपरिमण्डलक्षेत्रं, निहतरजः,कुर्वन्तीति योगः । निहतं भूय अत्यानाभावेन मन्दीकृतं रजो यत्र तत्तथा । तत्र निहतत्वं रजसां क्षणमात्रमुत्थानाभावेनाऽपि संभवति तत आह-नष्टरजः नष्टं सर्वथा अदृश्यीभूतं रजो यत्र तत्तथा । तथा भ्रष्टं वातोद्भूततया

योजनमात्रादू दूरतः क्षिप्तं रजो यत्र तत्तथा । अत एव प्रशान्तं सर्वथाऽसदेव रजो यत्र तत्तथा । अस्यैवाऽऽत्यन्तिकतः व्यापमार्थमाह-उपशान्तं रजो यत्र तत्तथा कुर्वन्ति,कृत्वा च क्षिप्रमेव प्रत्युपशाम्यन्ति,गन्धोदकवर्षणान्निवर्त्तन्त इत्यर्थः। अथासां तृतीयकर्त्तव्यकरणावसरः-एवं गन्धोदकवर्षणानुसारेण पुष्पवार्दलकेन पुष्पवर्षकवार्दलकेन, प्रकृतत्वात् तृतीयार्थे सप्तमी। पुष्पवर्षं वर्षन्तीति ।

अत्रैवमित्यादिवाक्यसूचितमिदं सूत्रं ज्ञेयम—

"तयं पि वेउव्वियसमुग्घाएणं समोहणंति,समोहणित्ता पुप्फबद्दलए विउव्वंति, से जहाणामए मालागारदारए०जाव सिप्पोवगए एगं महं पुप्फचंगेरिं वा पुप्फपडलगं वा पुप्फचंगेरिं वा गहाय रायंगणं वा० जाव समंता कयग्गहगहियकरयलपब्भट्ठविप्पमुक्केणं दसद्धवण्णेणं कुसुमेणं पुप्फपुंजोवयारकलिअं करेज्जा, एवमेव ता अवि उड्ढलोगवत्थव्वाओ०जाव पुप्फबद्दलए विउव्वित्ता खिप्पामेव पतणतणायंति०, जाव जोअणपरिमंडलं जलथलयभासुरप्पभूयस्स विंटट्ठाइस्स दसद्धवण्णस्स कुसुमस्स जाणुस्सेहपमाणमित्तं वासं वासंति" ।३।

अत्र व्याख्या-तृतीयवारं वैक्रियसमुद्घातेन समवघ्नन्ति । कोऽर्थः?-संवर्तकवातविकुर्वणार्थं हि यद् वेलाद्वयमपि वैक्रियसमुद्घातेन समवहननं, तत्किलैकम्, एवमत्रवार्दलकविकुर्वणार्थं द्वितीयम्,इदं तु पुष्पवार्दलकविकुर्वणार्थं तृतीयम्। समवहत्य च पुष्पवार्दलकानि विकुर्वन्ति, स यथानामको मालाकारपुत्रः, अस्यैव प्रस्तुतकार्ये व्युत्पन्नत्वात् । स्यान्नाविपुणशिल्पोपगतः, एकां महतीं पुष्पगाद्धिकां वा, छाद्यते उपरि स्थग्यते इति छाद्येव छाद्धिका,पुष्पैर्भृता छाद्धिका पुष्पछाद्धिका तां, पुष्पपटलकं वा पुष्पाऽऽधारभाजनविशेषः, पुष्पचाङ्गेरिकां वा प्रतीताम्। यावत् समन्तात् रतकसहे वा पराङ्मुखी, तस्याः सुमुखीकरणाय केशेषु ग्रहणं कचग्रहणं, तत्प्रकारेण गृहीतं, तथा करतलाद्विप्रमुक्तं सत् प्रभ्रष्टं करतलप्रभ्रष्टविप्रमुक्तं, प्राकृतत्वात् पदव्यत्ययः, ततो विशेषणसमासः । तेन कचग्रहगृहीतकरतलप्रभ्रष्टविप्रमुक्तेन दशार्द्धवर्णकेन पञ्चवर्णेन कुसुमेन, जात्यपेक्षया एकवचनम्, कुसुमजातेन, पुष्पपुञ्जोपचारो बलिप्रकारः, तेन कलितं कुर्यात्, एवमेता अपि ऊर्द्धलोकवास्तव्या अष्टौ दिक्कुमारीमहत्तरिकाः "पुप्फबद्दलए विउव्विता" इत्यादिकं योजनपरिमण्डलान्तं प्राग्वद् व्याख्येयम । वाक्ययोजना तु-योजनपरिमण्डलं यावत् दशार्द्धवर्णस्य कुसुमस्य वर्षं वर्षन्तीति । कथंभूतस्य कुसुमस्य ?, जलजस्थलजभासुरप्रभूतस्य-जलजं पद्माऽऽदि,स्थलजं वित्थकिलाऽऽदि,भास्वरं दीप्यमानं प्रभूतमतिप्रचुरम्। ततः कर्मधारयः।भास्वरं च तत् प्रभूतं च भास्वरप्रभूतम्, जलजस्थलजं च तद् भास्वरप्रभूतं च तत् तथा। तथा वृन्तस्थायिनः-वृन्तेनाधोभागवर्त्तिना तिष्ठन्तीत्येवंशीलस्य,तथा वृन्तमधोभागे पत्राण्युपरीत्येवं स्थानशीलस्येत्यर्थः। कथम्भूतं वर्षम्?,जान्ववधिकं जङ्घाधो जानुरेधः,तस्य प्रमाणं द्वात्रिंशद्वङ्गुललक्षणं, तेन सदृशी मात्रा यस्य स तथा तं,द्वात्रिंशद्वङ्गुलानि चैवम्-चरणस्य चत्वारि, जङ्घायाश्चतुर्विंशतिः,जानुतश्चत्वारीति। एवमेव सामुद्रिके चरणावसानस्य लक्षणत्वात् ।

वर्षित्वा च कियत्पर्यन्तोऽयमेवमित्यादिवाक्यसूचितम्—

त्रसंग्रह इत्याह—यावत् " कालागुरुपवर सि । " अत्र यावच्छब्दोऽवधिवाची । (०जाव सुरवराभिगमणजोग्गं ति) अत्र यावत्करणात्— " कुंदुरुक्कतुरुक्कडज्झंतधूवमघमघंतगंधुद्धुआभिरामं सुगंधवरगंधिअं गंधवट्टिभूअं दिव्वं ।" इतिपर्यन्तसूत्रं ज्ञेयम । तत् कालागुरुप्रभृतिधूपधूपितम्; धूपाख्यापकव्याख्या प्राग्वत् । अत एव सुरवराभिगमनयोग्यम्-सुरवर इन्द्रस्तस्याभिगमनायाऽवतरणाय योग्यं, कुर्वन्ति,कृत्वा च यत्रैव भगवांस्तीर्थकरस्तीर्थकरमाता च, तत्रैवोपागच्छन्ति, उपागत्य च,यावच्छब्दात्-"भगवओ तित्थयरमायाए य अदूरसामंते " इति ग्राह्यम्। आगायन्त्यः परिगायन्त्यस्तिष्ठन्तीति ।

अथ रुचकवासिनीदिक्कुमारीवक्तव्ये प्रथमे पूर्वरुचकस्थानामधानां वक्तव्यतामाह--

तेणं कालेणं तेणं समएणं पुरच्छिमरुअगवत्थव्वाओ अट्ठ दिसाकुमारीमहत्तरिआओ सएहिं सएहिं कूडेहिं तहेव० जाव विहरंति । तं जहा-

" णंदुत्तरा य णंदा, आणंदा णंदिवद्धणा ।
विजया य वेजयंती, जयंती अपराजिआ ॥ १ ॥"

सेसं तं चेव०जाव तुब्भेहिं ण भाइअव्वं ति कट्टु जगवओ तित्थयरस्स तित्थयरमायाए अ पुरच्छिमेणं आयंसहत्थगयाओ आगायमाणीओ परिगायमाणीओ चिट्ठंति ।

(तेणं कालेणं तेणं समएणं इत्यादि) तस्मिन् काले तस्मिन् समये पौरस्त्यरुचकवास्तव्याः पूर्वदिग्रुचकवर्त्तिरुचककूटवासिन्योऽष्टौ दिक्कुमारीमहत्तरिकाः स्वकेषु स्वकेषु कूटेषु तथैव यावद्विहरन्ति। तद्यथा-नन्दोत्तरा, वः समुच्चये। नन्दा,आनन्दा, नन्दिवर्द्धना,विजया। चः पूर्ववत्। वैजयन्ती,जयन्ती,अपराजिता, इत्येता नामतः कथिताः । शेषमासनप्रकम्पाभिप्रयोगभगवद्दर्शनपरस्परास्थानस्वस्थानियोगिककृतयानविमानविकुर्वणाऽऽदिकं तथैव, यावद्युष्माभिर्न भेतव्यमिति कृत्वा भगवत्तीर्थकरस्य तीर्थकरमातुश्च पूर्वरुचकस्थमागतत्वात् पूर्वतो हस्तगत आदर्शो दर्पणो जिनजनन्योः शृङ्गारादाऽऽदिविलोकनाऽऽद्युपयोगी वासां तास्तथा, विशेषणस्य परनिपातः प्राकृतत्वात्। आगायन्त्यः परिगायन्त्यस्तिष्ठन्तीति ॥ अत्र रुचकाऽऽदिस्वरूपप्ररूपणेयम्-एकादेशेन एकादशे,द्वितीयादेशेन त्रयोदशे, तृतीयादेशेन एकविंशे रुचकद्वीपे बहुमध्ये वलयाऽऽकारो रुचकशैलश्चतुरशीतियोजनसहस्राण्युच्चः,मूले १००२२,मध्ये ७०२३, शिखरे ४०२४ योजनानि विस्तीर्णः,तस्य शिरसि चतुर्थे सहस्रे पूर्वदिशि मध्ये सिद्धायतनकूटः, उभयोः पार्श्वयोश्चत्वारि चत्वारि दिक्कुमारीणां कूटानि, नन्दोत्तराऽऽद्यास्तेषु वसन्तीति ।

अथ दक्षिणरुचकवासिनीनां कर्त्तव्यम्--

तेणं कालेणं तेणं समएणं दाहिणरुअगवत्थव्वाओ अट्ठ दिसाकुमारीमहत्तरिआओ तहेव०जाव विहरंति। तं जहा-

" समाहारा सुप्पइण्णा, सुप्पबुद्धा जसोहरा ।
लच्छीमई सेसवई, चित्तगुत्ता वसुंधरा ॥ १ ॥ "

तहेव० जाव तुब्भाहिं न भाइअव्वं ति कट्टु जगवओ तित्थयरस्स तित्थयरमायाए अ दाहिणेणं भिंगारहत्थगयाओ आगायमाणीओ परिगायमाणीओ चिट्ठंति ॥

सम्प्रति दक्षिणरुचकवास्तव्या इति पूर्ववद्, रुचकशिरसि दक्षिणदिशि मध्ये सिद्धायतनकूटम्, तदुभयतश्चत्वारि चत्वारि कूटानि, तत्र वासिन्य इत्यर्थः । अष्टौ दिक्कुमारीमहत्तरिकाः तथैव यावद्विहरन्ति । तद्यथा--समाहारा, सुप्रदत्ता, सुप्रबुद्धा,

यशोधरा, लक्ष्मीवती, शेषवती, चित्रगुप्ता, वसुन्धरा । तथैव यावदुष्माभिर्नं नेतव्यमिति कृत्वा जिनजननीदक्षिणदिग्भागगतत्वाद्दक्षिणदिग्भागे जिनजननीस्नपनोपयोगिजलपूर्णकलशहस्ता आगायन्त्यः परिगायन्त्यस्तिष्ठन्तीति ॥

साम्प्रतं पश्चिमरुचकस्थानां वक्तव्यमाह-

तेणं कालेणं तेणं समएणं पच्चत्थिमरुअगवत्थव्वाओ अट्ठ दिसाकुमारीमहत्तरिआओ सएहिं सएहिं० जाव विहरंति । तं जहा-

"इलादेवी सुरादेवी, पुढवी पउमावई ।
एगणासा णवमिआ, भद्दा सीआ य अट्ठमी ॥१॥"

तहेव०जाव तुब्भाहिं ण भाइअव्वं ति कट्टु० जाव जगवओ तित्थयरस्स तित्थयरमाउए अ पच्चत्थिमेणं तालिअंटहत्थगयाओ आगायमाणीओ परिगायमाणीओ चिट्ठंति ।

"तेणं कालेणं" इत्यादि सर्वं तथैव,नवरं पश्चिमरुचकवास्तव्याः पश्चिमदिग्भागवर्त्तिरुचकवासिन्य इति । नामान्यासां पद्येनाऽऽह-इलादेवी,सुरादेवी,पृथिवी,पद्मावती,एकनासा, नवमिका, भद्रा, सीता । चः समुच्चये । अष्टमी चेति । कूटव्यवस्था तथैव, पश्चिमरुचकागतत्वाज्जिनजनन्योः पश्चिमदिग्भागे तालवृन्तं व्यजनं तद्धस्तगतास्तिष्ठन्तीति ।

उदीच्यां रुचकवासिनीनां कृत्यानि-

तेणं कालेणं तेणं समएणं उत्तरिल्लरुअगवत्थव्वाओ ०जाव विहरंति । तं जहा-

" अलंबुसा मित्तकेसी, पुंडरीआ य वारुणी ।
हासा सव्वप्पभा चेव, सिरि हिरि चेव उत्तरओ" ॥१॥

तहेव० जाव तित्थयरस्स तित्थयरमाउए अ उत्तरेणं चामरहत्थगयाओ आगायमाणीओ परिगायमाणीओ चिट्ठंति ।

उदीच्यामप्येवमेवेति । तत् सूत्रमाह-"तेणं कालेणं" इत्यादि व्यक्तम् । नवरमुत्तररुचकवास्तव्या उत्तरदिग्भागवर्त्तिरुचकवासिन्यः । नामान्यासां पद्येनाऽऽह-अलम्बुषा, मित्रकेशी, पुण्डरीका, चः प्राग्वत् । वारुणी, हासा,सर्वप्रभा, चैवेति प्राग्वत् । श्रीः, ह्रीश्चोत्तरतः कूटव्यवस्था तथैव, उत्तररुचकाऽऽगतत्वाज्जिनजनन्योरुत्तरदिग्भागे चामरहस्तगता आगायन्त्यः परिगायन्त्यस्तिष्ठन्तीति ।

अथ विदिग्रुचकवासिनीनामागमनावसरः-

तेणं कालेणं तेणं समएणं विदिसिरुअगवत्थव्वाओ चत्तारि दिसाकुमारीमहत्तरिआओ० जाव विहरंति । तं जहा-"चित्ता य चित्तकणगा, सतेरा सोदामणी ।" तहेव ०जाव ण भाइअव्वं ति कट्टु भगवओ तित्थयरस्स तित्थयरमाउए अ चउसु विदिसासु दीविआहत्थगयाओ आगायमाणीओ परिगायमाणीओ चिट्ठंति ।

'तेणं कालेणं' इत्यादि व्यक्तम् । नवरं विदिग्रुचकवास्तव्यास्तस्यैव रुचकपर्वतस्य शिरसि चतुर्थे सहस्रे चतसृषु विदिक्षु एकैकं कूटं, तत्र वासित्वाच्चतस्रो विदिक्कुमार्यो यावद्विहरन्ति । इमाश्च स्थानाङ्गे विद्युत्कुमारीमहत्तरिका इत्युक्ता इति । एतासां चैशान्यादिक्रमेण नामान्येवम्-चित्रा,चः समुच्चये । चित्रकनका,शतेरा,सौदामिनी । तथैव यावन्न भेतव्यमिति कृत्वा विदिग्गागतत्वात् भगवतस्तीर्थकरस्य तीर्थकरमातुश्च चतसृषु विदिक्षु दीपिकाहस्तगता आगायन्त्यः परिगायन्त्यस्तिष्ठन्तीति ।

अथ मध्यरुचकवासिन्य आगमयितव्याः-

तेणं कालेणं तेणं समएणं मज्झिमरुअगवत्थव्वाओ चत्तारि दिसाकुमारीमहत्तरिआओ सएहिं सएहिं कूडेहिं तहेव० जाव विहरंति । तं जहा-"रूआ रूआसिआ, सुरूवा रूवगावई ।" तहेव०जाव तुब्भाहिं ण भाइअव्वं ति कट्टु भगवओ तित्थयरस्स चउरंगुलवज्जणाभिणालं कप्पंति, कप्पेत्ता विअरगं खणंति, खणित्ता विअरगे णाभिं णिहणंति, निहणित्ता रयणाण य वइराण य पूरेंति,पूरेत्ता हरिआलिआए पेढं बंधंति,बंधित्ता तिदिसिं तओ कयलीहरए विउव्वंति । तए णं तेसिं कयलीहरगाणं बहुमज्झदेसभाए तओ चउस्साल्ए विउव्वंति,तए णं तेसिं चउस्सालगाणं बहुमज्झदेसभाए तओ सीहासणे विउव्वंति; तेसि णं सीहासणाणं अयमेआरूवे वण्णावासे पण्णत्ते, सव्वो वण्णगो भाणिअव्वो ॥

(तेणं कालेणं इत्यादि) तस्मिन् काले तस्मिन् समये मध्यरुचकवास्तव्या मध्यभागवर्तिरुचकवासिन्यः। कोऽर्थः?-चतुर्विंशत्यधिकचतुःसहस्रप्रमाणे रुचकशिरोविस्तारे, द्वितीयसहस्रे चतुर्दिग्विदिक्षु चतुर्षु कूटेषु पूर्वाऽऽदिक्रमेण चतस्रस्ता वसन्तीत्यर्थः। श्रीअभयदेवसूरयस्तु षष्ठाङ्गवृत्तौ मल्लध्ययने-"मज्झिमरुअगवत्थव्वा" इत्यत्र रुचकद्वीपस्याभ्यन्तरार्द्धवासिन्य इत्याहुः । अत्र तत्त्वं बहुश्रुतगम्यम् । चतस्रो दिक्कुमारिका यावद्विहरन्ति । तद्यथा-रूपा,रूपासिका,सुरूपा,रूपकावती । तथैव युष्माभिर्नं नेतव्यमिति कृत्वा भगवतस्तीर्थकरस्य चतुरङ्गुलवर्जनाभिनालं कल्पयन्ति, कल्पयित्वा च विदरकं गर्तां खनन्ति, खनित्वा च विदरके कल्पितां नाभिं निधानयन्ति, निधानयित्वा च रत्नैश्च वज्रैश्च, प्राकृतत्वाद्विभक्तिव्यत्ययः । पूरयन्ति, पूरयित्वा च हरितालिकाभिर्दूर्वाभिः पीठं बध्नन्ति । कोऽर्थः? पीठं बद्ध्वा तदुपरि हरितालिकां वपन्तीत्यर्थः । विवरकवचनाऽऽदिकं च सर्वं भगवद्वयवस्याऽऽशातनानिवृत्यर्थम् । पीठं बध्वा च त्रिदिशि पश्चिमाद्यवर्जदिक्त्रये त्रीणि कदलीगृहाणि विकुर्वन्ति । ततस्तेषां कदलीगृहाणां बहुमध्यदेशभागे त्रीणि चतुःशालकानि भवनविशेषान् विकुर्वन्ति । ततस्तेषां चतुःशालकानां बहुमध्यदेशभागे त्रीणि सिंहासनानि विकुर्वन्ति, तेषां सिंहासनानामयमेतादृशो वर्णव्यासः प्रज्ञप्तः, सिंहासनानां सर्वो वर्णकः पूर्ववद् भणितव्यः ।

सम्प्रति सिंहासनविकुर्वणानन्तरीयकृत्यमाह-

तए णं ताओ रुअगमज्झवत्थव्वाओ चत्तारि दिसाकुमारीओ जेणेव जयवं तित्थयरे तित्थयरमाया य तेणेव उवागच्छंति, उवागच्छित्ता भगवं तित्थयरं तित्थयरमायरं च बाहाहिं गिण्हंति, गिण्हित्ता जेणेव दाहिणिल्ले कयलीहरए जेणेव चाउस्साल्ए जेणेव सीहासणे तेणेव उवागच्छंति, उवागच्छित्ता भगवं तित्थयरं तित्थयरमायरं च सीहासणे णिसीआवेंति, णि-

सीआवेत्ता सयपागसहस्सपागेहिं तेल्लेहिं अब्भंगेंति, अब्भंगेत्ता सुरभिणा गंधुव्वट्टएणं उव्वट्टंति, उव्वट्टित्ता भगवं तित्थयरं करयलसंपुडेणं, तित्थयरमायरं च बाहासु गिण्हंति, गिण्हित्ता जेणेव पुरच्छिमिल्ले कयलीहरए जेणेव चउस्सालए जेणेव सीहासणे तेणेव उवागच्छंति, उवागच्छित्ता भगवं तित्थयरं तित्थयरमायरं च सीहासणे णिसीआवेंति, णिसीआवेत्ता तिहिं उदएहिं मज्जावेंति । तं जहा-गंधोदएणं, पुप्फोदएणं, सुद्धोदएणं । मज्जावेत्ता सव्वालंकारविभूसियं करेंति, करेत्ता भगवं तित्थयरं करयलपुडेणं, तित्थयरमायरं च बाहाहिं गिण्हंति, गिण्हित्ता जेणेव उत्तरिल्ले कयलीहरए जेणेव चउस्सालए जेणेव सीहासणे तेणेव उवागच्छंति, उवागच्छित्ता भगवं तित्थयरं तित्थयरमायरं च सीहासणे णिसीआवेंति, णिसीआवेत्ता आभिओगे देवे सद्दावेंति, सद्दावेत्ता एवं वयासी-खिप्पामेव भो देवाणुप्पिया ! चुल्लहिमवंताओ वासहरपव्वयाओ गोसीसचंदणकट्ठाइं साहरह । तए णं ते आभिओगा देवा ताहिं रुअगमज्झवत्थव्वाहिं चउहिं दिसाकुमारीमहत्तरिआहिं एवं वुत्ता समाणा हट्ठतुट्ठा० जाव विणएणं वयणं पडिच्छंति,पडिच्छित्ता खिप्पामेव चुल्लहिमवंताओ वासहरपव्वयाओ सरसाइं गोसीसचंदणकट्ठाइं साहरंति । तए णं ताओ मज्झिमरुअगवत्थव्वाओ चत्तारि दिसाकुमारीमहत्तरिआओ सरगं करेंति, करेत्ता अरणिं घसंति, अरणिं घसेत्ता सरएणं अरणिं महिंति, महित्ता अग्गिं पाडिंति, पाडित्ता अग्गिं संधुक्खेंति, संधुक्खेत्ता गोसीसचंदणकट्ठे पक्खिवंति, पक्खिवित्ता अग्गिं उज्जालिंति, उज्जालित्ता समिहाकट्ठाइं पक्खिविंति, पक्खिवित्ता अग्गिहोमं करेंति, करेत्ता भूतिकम्मं करेंति, करेत्ता रक्खापोट्टलिअं बंधंति, बंधेत्ता णाणामणिरयणभत्तिचित्ते दुवे पाहाणवट्टगोलए गहाय भगवओ तित्थयरस्स कण्णमूले टिट्टिआवेंति, जवज्जं भयवं पव्वयाहि । तए णं ताओ रुअगमज्झवत्थव्वाओ चत्तारि दिसाकुमारीमहत्तरिआओ भयवं तित्थयरं करयलपुडेणं तित्थयरमायरं च बाहाहिं गिण्हंति, गिण्हित्ता जेणेव भगवओ तित्थयरस्स जम्मणभवणे तेणेव उवागच्छंति, उवागच्छित्ता तित्थयरमायरं सयणिज्जंसि णिसीआवेंति, णिसीआवेत्ता भयवं तित्थयरं माउए पासे ठवेंति, ठवित्ता अदूरसामंते आगायमाणीओ परिगायमाणीओ चिट्ठंति ॥

(तए णं ताओ रुअगमज्झवत्थव्वाओ चत्तारि दिसाकुमारीओ इत्यादि) ततस्ता रुचकमध्यवास्तव्याश्चतस्रो दिक्कुमारीमहत्तरिकाः,यत्रैव भगवांस्तीर्थकरस्तीर्थकरमाता च, तत्रैवोपागच्छन्ति, उपागत्य च भगवन्तं तीर्थकरं करतलसंपुटेन,तीर्थकरमातरं च बाहुभिर्गृह्णन्ति, गृहीत्वा च यत्रैव दाक्षिणात्यं कदलीगृहं, यत्रैव च चतुःशालकं,यत्रैव सिंहासनं,तत्रैवोपागच्छन्ति, उपागत्य च भगवन्तं तीर्थकरं तीर्थकरमातरं च सिंहासने निषादयन्ति-उपवेशयन्ति; निषाद्य च शतपाकैः सहस्रपाकैः शतकरवोऽपरापरौषधीरसेन,कार्षापणानां शतेन वा यत्पक्वं तच्छतपाकम्,एवं सहस्रपाकमपि । बहुवचनं तथाविधसुरभितैलसंग्रहार्थम् । तैलैरभ्यङ्गयन्ति, तैलमभ्यञ्जयन्तीत्यर्थः । अभ्यङ्ग्य च सुरभिणा गन्धद्रव्याणामुत्पलपिष्टाऽऽदीनामुद्वर्त्तितचूर्णपिण्डेन गन्धयुक्तोधूमचूर्णपिण्डेन वा उद्वर्तयन्ति,प्रक्रिततैलापनयनं कुर्वन्ति,उद्वर्त्य च भगवन्तं तीर्थकरं करतलपुटेन तीर्थकरमातरं च बाहोर्गृह्णन्ति, गृहीत्वा च यत्रैव पौरस्त्यं कदलीगृहं,यत्रैव चतुःशालं, यत्रैव च सिंहासनं, तत्रैवोपागच्छन्ति, उपागत्य च भगवन्तं तीर्थकरं तीर्थकरमातरं च सिंहासने निषादयन्ति, निषाद्य च त्रिभिरुदकैर्मज्जयन्ति स्नपयन्ति । तान्येव त्रीणि दर्शयति तद्यथेत्यादिना, गन्धोदकेन कुङ्कुमाऽऽदिमिश्रितेन, पुष्पोदकेन जात्यादिमिश्रितेन, शुद्धोदकेन केवलोदकेन, मज्जयित्वा सर्वालङ्कारभूषितौ कुर्वन्ति, मातृपुत्रावितिशेषः । कृत्वा च भगवन्तं तीर्थकरं करतलपुटेन तीर्थकरमातरं च बाहुभिर्गृह्णन्ति, गृहीत्वा च यत्रैवोत्तराहं कदलीगृहं, यत्रैव च चतुःशालकं,यत्रैव च सिंहासनं, तत्रैवोपागच्छन्ति, उपागत्य च भगवन्तं तीर्थकरं तीर्थकरमातरं च सिंहासने निषादयन्ति, निषाद्य च आभियोगान् देवान् शब्दयन्ति, शब्दयित्वा च एवमवादिषुः-क्षिप्रमेव भो देवानुप्रियाः ! चुल्लहिमवतो वर्षधरपर्वताद्गोशीर्षचन्दनकाष्ठानि संहरत-समानयत । ततस्ते आभियोगा देवास्तासां रुचकमध्यवास्तव्याभिश्चतसृभिर्दिक्कुमारीमहत्तरिकाभिरेवमनन्तरोक्तमुक्ता आकृष्टाः सन्तो हृष्टतुष्टा इत्यादि यावद्विनयेन वचनं प्रतीच्छन्त्यङ्गीकुर्वन्ति,प्रतीष्य च क्षिप्रमेव क्षुल्लहिमवतो वर्षधरपर्वतात् सरसानि गोशीर्षचन्दनकाष्ठानि संहरन्ति । ततस्ता मध्यरुचकवास्तव्याश्चतस्रो दिक्कुमारीमहत्तरिकाः शरकं-शरप्रतिकृतिंतीक्ष्णमुखमन्युत्पादकं काष्ठविशेषं कुर्वन्ति, कृत्वा च तेनैव शरकेण सह अरणिं लोकप्रसिद्धं काष्ठविशेषं घटयन्ति-संयोजयन्ति, घटयित्वा च शरकेनाग्निं मथ्नन्ति, मथित्वा च अग्निं पातयन्ति,पातयित्वा च अग्निं सन्धुक्षन्ति-सन्दीपयन्ति, सन्धुक्ष्य च गोशीर्षचन्दनकाष्ठानि,प्रस्तावात् खण्डशः कृतानीति बोध्यम्, यादृशैश्चन्दनकाष्ठैरग्निरुद्दीपितः स्यात् तादृशानीति भावः । प्रक्षिपन्ति, प्रक्षिप्य च अग्निमुज्ज्वालयन्ति उद्दीपयन्ति, उज्ज्वाल्य च प्रदेशप्रमाणानि हवनोपयोगीनीन्धनानि समिधः, तद्रूपाणि काष्ठानि प्रक्षिपन्ति । पूर्वो हि काष्ठप्रक्षेपोऽग्न्युद्दीपनाय, अयं च रक्षाकरणायेति विशेषः । प्रक्षिप्य च अग्निहोमं कुर्वन्ति, कृत्वा च भूतेभस्मनः कर्म क्रिया, तां कुर्वन्ति, येन प्रयोगेणेन्धनानि भस्मरूपाणि भवन्ति तथा कुर्वन्तीत्यर्थः । कृत्वा च जिनजननन्याः शाकिन्यादिदुष्टदेवताभ्यो दुष्टदोषाऽऽदिभ्यश्च रक्षाकरीं पोट्टलिकां बध्नन्ति, बध्वा च नानामणिरत्नानां भक्तिरचनाद् यौ विचित्रौ द्वौ पाषाणवृत्तगोलकौ, पाषाणगोलकाविव्यर्थः । गृहीत्वा भगवतस्तीर्थकरस्य कर्णमूले "टिट्टिआवेंति" इत्यनुकरणशब्दोऽयम् । तेन 'टिट्टिआवेंति' परस्परप्रतारनेन टिट्टीतिशब्दोत्पादनपूर्वकं वादयन्तीत्यर्थः । अनेन हि बाललीलावशादन्यत्र व्यासक्तं भगवन्तं वक्ष्यमाणाऽऽशीर्वचनश्रवणे पटु कुर्वन्तीति भावः । तथा कृत्वा च, भवतु भगवा-

न् पर्वताऽऽयुः, इत्याशीर्वचनं ददतीति । तत उक्तसकलकार्यकरणानन्तरं ता रुचकमध्यवास्तव्याश्चतस्रो दिक्कुमारीमहत्तरिका भगवन्तं तीर्थकरं करतलपुटेन तीर्थकरमातरं च बाहुभिर्गृह्णन्ति, गृहीत्वा च यत्रैव भगवतस्तीर्थकरस्य जन्मभवनं, तत्रैवोपागच्छन्ति, उपागत्य च तीर्थकरमातृशय्यायां निषादयन्ति, निषाद्य च भगवन्तं तीर्थकरं मातुः पार्श्वे स्थापयन्ति, स्थापयित्वा च नातिदूराऽऽसन्ने आगायन्त्यः परिगायन्त्यस्तिष्ठन्ति। एतासां च मध्येऽष्टावधोलोकवासिन्यो गजदन्तगिरीणामधोभवनवासिन्यः। यश्चैतदधिकारसूत्रे-" सपदिं सपदिं कूडेहिं " इति पदम्,तदपरसकलदिक्कुमार्यधिकारसूत्रपाठसंरक्षणार्थम्, साधारणसूत्रपाठे हि यथासम्भवं विधिनिषेधौ समाश्रयणीयाविति ऊर्द्धलोकवासिन्योऽष्टौ नन्दनवने योजनपञ्चशतिककूटवासिन्यः, अन्याश्च सर्वा अपि रुचकसत्ककूटेषु योजनसहस्रोच्चेषु मूले सहस्रयोजनविस्तारेषु शिरसि पञ्चशतविस्तारेषु वसन्ति। उक्तं षट्पञ्चाशद्दिक्कुमारीकृत्यमिति । जं० ५ वक्ष० ।

(६४) देवदूष्याणि-

सव्वे वि एगदूसे-ण णिग्गया जिणवरा चउव्वीसं ।
न चयंति जिणसरीरं, तेण परं ओहिनाणी उ ॥ १ ॥

सर्वेऽपि भगवन्तोऽतीता अपि जिनवराः चतुर्विंशतिसंख्याः, चतुर्विंशतिरित्यनेन सर्वास्वप्यवसर्पिणीषूत्सर्पिणीषु च प्रत्येकं भरतक्षेत्रे चतुर्विंशतिरेव तीर्थकरा अभूवन्निति ख्यापितम्। एकदूष्येण-एकेन वस्त्रेण, निर्गता अभिनिष्क्रान्ताः । तद्यदि भगवन्तोऽप्येकदूष्येण निर्गता इति सोपधयोऽनवद्याः, किं पुनस्तन्मतानुवर्त्तिनः शिष्या न सोपधयः ? । तत्र य उपधिरासेवितो भवद्भिः स साक्षादेवोक्तः । यः पुनर्विनेयेभ्यः स्थविरकल्पिकाऽऽदिभेदभिन्नेभ्योऽनुज्ञातः, स खलु ग्रन्थान्तरादवसेयः । आ० म० १ अ० १ खण्ड ।

देवदूष्यवस्त्रस्थितिमाह--

सक्को य लक्खमुल्लं, सुरदूसं ठवइ सव्वजिणखंधे ।
वीरस्स वरिसमहियं, सया वि सेसाण तस्स ठिई ।१५६।

शक्रश्च लक्षमूल्यं देवदूष्यं वस्त्रं सर्वजिनस्कन्धे स्थापयति । तत्र श्रीवीरस्य साधिकं वर्षं स्थितम् । उक्तं च कल्पसूत्रे--"संवच्छरं साहियं मासं जाव चीवरधारी होत्था तिा" मासैकेनाधिकं वर्षं श्रीवीरेण वस्त्रं धृतम् । शेषजिनानां त्रयोविंशतेरपि तीर्थकृतां, सदाऽपि यावज्जीवमपि, तस्य वस्त्रस्य, स्थितिर्ज्ञेयेति । सत्त० ७३ द्वार ।

(देहमानमुत्सेधाङ्गुलविचारे २२६१ पृष्ठे पूर्वमुक्तम)

(६५)अथ प्रसङ्गतः तीर्थकरप्रतिपादितत्वेन धर्मभेदानाह-

दाणं सीलं च तवो, भावो एवं चउव्विहो धम्मो ।
सव्वजिणेहिं भणिओ, तहा हुहा सुयचरित्तेहिं ॥२९६॥

सुपात्रे दानं देयम्, त्रिकरणशुद्ध्या शीलं पालनीयम्, यथाशक्ति तपो विधिवद्विधेयम्, साधुपुरुषेण शुभभावना भावनीया । एवं चतुर्विधो धर्मः (सव्वजिणेहिं भणिओ)सर्वजिनैश्चतुर्विंशतिजिनैर्नेगमितः कथितः। तथा द्विधा धर्मः श्रुतचारित्राख्यम्,एकः श्रुतधर्मः, द्वितीयश्चारित्रधर्मः । इति गाथाऽर्थः ॥ २९६ ॥ सत्त० ४१ द्वार ।

अथ धर्मप्रसङ्गात् पुण्यमौचित्ये प्रवर्त्तत इत्यौचित्याष्टकम् । पुण्यानुबन्धिपुण्यं प्रधानफलतो दर्शयन्नाह-

अतः प्रकर्षसंप्राप्ता-द्विज्ञेयं फलमुत्तमम् ।
तीर्थकृत्त्वं सदौचित्य-प्रवृत्त्या मोक्षसाधकम् ॥१॥

अत अस्मात् पुण्यानुबन्धिपुण्यात् प्रकर्षसंप्राप्तादतिप्रकृष्टतां गताद्विज्ञेयं ज्ञातव्यं फलं कार्यमुत्तमं प्रधानं तीर्थकृत्त्वं तीर्थकरत्वम्। किंस्वरूपं तदित्याह-सदा सर्वकालमागर्भावस्थाया औचित्यप्रवृत्त्या यथार्हप्रवर्त्तनेन मोक्षसाधकं निर्वाणप्रापकमिति ॥ १ ॥

औचित्यप्रवृत्तिमेवाऽऽसन्नस्य सार्वादिकीं दर्शयितुमाह-

सदौचित्यप्रवृत्तिश्च, गर्भादारभ्य तस्य यत् ।
तत्राऽप्यज्ञिग्रहो न्याय्यः, श्रूयते हि जगद्गुरोः ॥ २ ॥

सदा सर्वकालमौचित्यप्रवृत्तिः संगतभावनम्, चशब्दः पुनःशब्दार्थः। गर्भादारभ्य गर्भावस्थामवधीकृत्य,तस्येति यः प्रकृष्टपुण्यानुबन्धिपुण्यफलभूतस्तस्य तीर्थकरस्य,भवतीति शेषः। कुत एतदेवं सिद्धमित्याह-यद्यस्मात्कारणात्, तत्राऽऽदिगर्भेऽप्यासन्नां प्रव्रज्याप्रतिपत्तौ,अभिग्रहः प्रतिज्ञाविशेषो वक्ष्यमाणस्वरूपो, न्याय्यो न्यायादनपेतः,श्रूयते आकर्ण्यते,हिशब्दो वाक्यालङ्कारे, जगद्गुरोस्त्रिलोकैकगौरवार्हस्य महावीरस्येति भावना ॥ २ ॥

किमर्थमसावभिग्रह इत्याह-

पितृद्वेगनिरासाय, महतां स्थितिसिद्धये ।
इष्टकार्यसमृद्ध्यर्थ-मेवंभूतो जिनाऽऽगमे ॥ ३ ॥

माता च पिता च पितरौ, तयोरुद्वेगश्चित्तसंतापः, तस्य निरासोऽभावः पितृद्वेगनिरासः, तस्मै पितृद्वेगनिरासाय । यतन्ते च महान्तो विश्वस्याऽपि चोद्वेगनिरासार्थम्, तेषां तथास्वभावत्वाद्, विशेषतः पुनः पित्रोरतिदुःखप्रतीकारित्वात्तयोरिति । तथा महतां महापुरुषाणां स्थितिसिद्धये व्यवस्थासाधनाय। अन्येऽपि महान्तो मातापितृद्वेगनिरासेन प्रवर्त्तन्तामित्येतदर्थमित्यर्थः, प्रधानमार्गानुसारित्वाज्जनस्येति । तथा इष्टकार्ये वाञ्छितप्रयोजनं मोक्षार्थिनां मोक्षोपायभूता प्रव्रज्या,तस्य समृद्धिर्निष्पत्तिरिष्टकार्यसमृद्धिः,तस्यै। इदमिष्टकार्यसमृद्ध्यर्थमिदं चाभिग्रहः, कृत इति गम्यमानक्रियाविशेषणम्;मोक्षाभिलाषहेतोरित्यर्थः। सिद्ध्यति हि मोक्ष उचितप्रवृत्त्या,अनुचितप्रवृत्तिस्तु तद्विघ्न इति। एवम्भूतो वक्ष्यमाणस्वरूपः,अभिग्रह इति योगः। जिनाऽऽगमे आप्तवचने,श्रूयते इति संबन्धः । उच्यते चाऽऽवश्यकनिर्युक्तौ-" अह सत्तमम्मि मासे, गब्भत्थो चेवऽभिग्गहं गहिओ । नाहं समणो होहं, अम्मापियरम्मि जीवंते" ॥१॥ इति ॥ ३ ॥

अथवा यथाभूतोऽभिग्रहः श्रूयते, तथाभूतमेवाऽऽह-

जीवतो गृहवासेऽस्मिन, यावन्मे पितरावमी ।
तावदेवाधिवत्स्यामि, गृहानहमपीष्टतः ॥ ४ ॥

किल भगवान् श्रीमन्महावीरवर्द्धमानस्वामी देवभवाच्च्युत्वा पूर्वजनोपात्तनीचैर्गोत्राभिधानकर्मशेषवशाद् ब्राह्मणकुण्डग्रामाभिधाननगरनिवासिऋषभदत्ताभिधानद्विजातिजायाया देवानन्दानिधानायाः कुक्षावुत्पन्नः। अथ द्व्यशीतितमेदिवसे सिद्धासनचलनज्ञानेनावधिप्रयोगपुरन्दरप्रयुक्तहरिनैगमेषिनाम्ना देवेन क्षत्रियकुण्डग्रामाभिधाननगरनायकसिद्धार्थाभिधाननरपतिप्रधानपत्न्यास्त्रिशलाभिधानाया गर्भे संक्रामितः । ततो देवानन्दामुपलब्धचतुर्दशमहास्वप्नापहारं सम्भावितगर्भसंहारं हृतसर्वस्वमिवाऽतिशोकसागरनिमग्नामवधिनाऽवबुद्ध्याऽहो ! अस्म-

निमित्तमेषाऽनाख्येयदुःखमवाप्नवत्येवमेषाऽपि त्रिशला मद्गर्भचलनचेष्टानिमित्तमसुखमथ मा प्रापदित्यालोच्य निश्चलोऽवतस्थे। ततोऽसौ निस्पन्दतां गर्भस्थावगम्य गलितो गर्भो ममेति भावनया गाढतरं दुःखसमुदयमगमत्। ततो भगवांस्तद्दुःखविलोदाय स्फुरति स्म। पर्यालोचयाञ्चकार च-यदुताऽदृष्टेऽपि मयि मातापित्रोरहो! गाढः स्नेहः, दृष्टे पुनः परिचयादवगतगुणग्रामे गाढतरोऽसौ भावी, ततः प्रव्रजनतो वियुज्यमाने शोकातिशयान्महाननन्तस्तापो भविष्यति, ततोऽनयोर्जीवतोस्तत्संतापपरिहारार्थमप्रव्रजितेन मया भाव्यमिति सप्तममासाऽभिग्रहं जग्राहेति श्लोकसमुदायार्थः॥

अक्षरार्थस्त्वयम्-जीवतः प्राणान् धारयतः, पितराविति योगः। गृहवासे गृहस्थतायामस्मिन्नधुनातने, न पुनर्देवाऽऽदिभवसम्भवेऽपि, यावद् यत्परिमाणमिति पितृजीवनक्रियाविशेषणम्। मे मम संबन्धिनावमौ प्रत्यक्षाऽऽसन्नौ त्रिशलाभिधेयौ, न पुनरदृष्टपूर्वदत्तदेवानन्दास्वरूपौ। तावदेव तत्परिमाणमेव, न पुनरधिकं विरताविनिष्वङ्गाख्येत्यमुक्तमवधारणम्, एतच्चाधिवत्स्यामीति क्रियाविशेषणम्। अधिवत्स्यामि अध्यासिष्ये, गृहान् गेहम "गृहशब्दो हि पुंल्लिङ्गो बहुवचनान्तोऽप्यस्तीति।" अथवा-राजत्वाद् बहुगृहाधिपतित्वमनेन दर्शितम्। अहमपि न केवलं पितरौ गृहानधिवत्स्यत इत्यपिशब्दार्थः। इष्टमिच्छन्, तदाश्रित्याऽधिष्ठितः, इच्छया स्वच्छन्दतया, न पुनः पारवश्येनेति भावः। ननु तावन्तं कालं चारित्रमोहनीयकर्मविशेषोदये सति तस्य गृहावस्थानम्, अन्यथा वा?। तत्र यद्याद्यः पक्षः, तदा कर्मविशेषोदय एव तत्रावस्थानकारणं, नाभिग्रहग्रहणं, तत् किं तद्ग्रहणेन?। अथवाचारित्रमोहनीयविशेषोदयाभाव इति पक्षः। तदप्यसङ्गतम्। मोहकर्मविशेषोदयाभावे विरतेरेव भावेन गृहावस्थानासम्भवात् व्यर्थमेवाभिग्रहकरणम्?। अत्रोच्यते-मोहनीयविशेषोदयएव तत्र तस्यावस्थानं, किं तु तत्कर्मणः सोपक्रमत्वेन पितृद्वेषनिरासाऽऽद्यवलम्बनाभिग्रहानङ्गीकरणे विरतेरेव भावान्न गृहावस्थानहेत्वभिग्रहकरणमसङ्गतम्। उच्यते च सोपक्रमता कर्मणाम्। यदाह-" उदयक्खयखउवसमो-वसमा जं चेह कम्मुणो भणिया। दव्वं खित्तं कालं, भवं च भावं च तं पप्प ॥१॥" इति। इहोक्तविशेषणाभिग्रहलक्षणं भावमाश्रित्य चारित्रमोहोदयः, तदभावलक्षणं च भावमाश्रित्य तत्क्षयोपशम इति न व्यर्थमभिग्रहकरणमिति।

ननूक्ताभिग्रहकरणात् पितृद्वेषनिरासो महतां च स्थितिसिद्धिरिति सङ्गतम्, यत्पुनरिष्टकार्यसमृद्धिरिति, तदसाम्प्रतम्, गृहावस्थानस्य प्रव्रज्याविरोधित्वादित्यस्यामाशङ्कायामाह-

इमौ शुश्रूषमाणस्य, गृहानावसतो गुरू।
प्रव्रज्याऽप्यानुपूर्व्येण, न्याय्याऽन्ते मे भविष्यति॥ ५॥

इमौ प्रत्यक्षाऽऽसन्नौ, गुरू इति संबन्धः। शुश्रूषमाणस्य परिचरतो, मे इति योगः। तथा-तच्छुश्रूषणार्थमेव गृहान् गेहमावसतोऽधितिष्ठतः सतः, गुरू मातापितरौ, प्रव्रज्याऽपि चिकीर्षितानगारिताऽपि, आस्तां पितृद्वेषनिरासाऽऽदि, आनुपूर्व्येण परिपाट्या, न्याय्या न्यायोपपन्ना, युक्तेत्यर्थः। अन्ते गुरुशुश्रूषावसाने एव, मे मम, भविष्यति संपत्स्यते॥ ५॥

कुत एतदेवमित्याह-

सर्वपापनिवृत्तिर्यत्, सर्वथैषा सतां मता।
गुरूद्वेगकृतोऽत्यन्तं, नेयं न्याय्योपपद्यते॥ ६॥

सर्वपापनिवृत्तिरशेषसावद्यानुष्ठानव्युपरतिः, यद् यस्मात्सर्वथा सर्वैः प्रकारैर्निमित्ताभावेनापीत्यर्थः, एषा प्रव्रज्या, सतां विदुषां, मता इष्टा, इह तस्मादिति शेषो द्रष्टव्यः। तस्माद्गुरूद्वेगकृतो मातापितृचित्तसन्तापकारिणः, अत्यन्तमतिशयेन, तत्संबोधनपूर्वकं शास्त्रोक्ततत्संबोधनोपायाप्रयोगपूर्वकं वा प्रवृत्तस्य, न नैव, इयं प्रव्रज्या, न्याय्या युक्ता, उपपद्यते घटते, पितृसंतापरक्षणोपायाप्रवृत्तत्वेन निमित्तभावेन तच्चित्तसंतापलक्षणपापकारित्वात्तस्येति। परिहर्तव्यश्च तच्चित्तसंतापः। यदाह-"अप्पमिबुज्झमाणे कहिं वि पमिबोहिज्जा अम्मापियरो।" प्रव्रज्याऽभिमुखीकुर्वीतेत्यर्थः। " अपडिबुज्झमाणेसु य कम्मपरिणईए विहेएज्जा जहासत्ति तदुवगरणं, तओ अणुन्नाए पवियज्जिज्ज धम्मं।" अथ नानुजानीतस्तदा " अणुवहे चेव उवहिजुत्ते सिया।" अल्पायुरहमित्यादिकां मायां कुर्यादित्यर्थः। एवमुपायप्रवृत्तमपि यदा न मुत्कलयतः, तदा तौ त्यजेत्। न च तौ त्यजतस्तच्चित्तसंतापेऽपि तस्य दोषः, विशुद्धभावत्वात्। यदाह-" सव्वहा अपडिबुज्झमाणे वएज्जा अद्धाणे गिलाणओ सव्वत्थ चागनाणं।" यथाऽध्वनि ग्लानीभूतयोः पित्रोरौषधार्थं गच्छतः तत्त्यागोऽत्याग एव भावतः, एवं तयोः स्वस्यान्येषां चोपकाराय प्रव्रजत इति ज्ञातभावना। अत एव-"सोयणमक्कंदण विल-वणं च तं दुक्खिओ तओ कुणइ। सेवइ जं च अकज्जं, तेण विणा तस्स सो दोसो॥१॥" इत्यादिकमाशङ्क्यैव परिहृतम्-" अब्भुवगमेण भणियं, न उ विहिचागो वि तस्स हेउ त्ति। सोगाइम्मि वि तेसिं, मरणे व्व विसुद्धचित्तस्स॥१॥" क्वचित् पठ्यते-" सर्वपापनिवृत्तिर्या।" इति। तत्र व्याख्येयम्-सर्वथा सर्वपापनिवृत्तिरेषा सतां मता, गुरूद्वेगकारिणश्चात्यन्तं नेयं सर्वपापनिवृत्तिर्न्याय्योपपद्यत इति।६।

कस्मादेवमित्याह-

प्रारम्भमङ्गलं ह्यस्याः, गुरुशुश्रूषणं परम्।
एतौ धर्मप्रवृत्तानां, नृणां पूजाऽऽस्पदं महत्॥ ७॥

प्रारम्भमङ्गलमादिमङ्गलं, हि यस्मात्, अस्याः प्रव्रज्यायाः, गुरुशुश्रूषणं मातापितृपरिचरणं, परं प्रकृष्टं, भावमङ्गलमित्यर्थः। प्रारम्भमङ्गलतैवास्य कुतः?, इत्याह-एतौ गुरू धर्मप्रवृत्तानां मोक्षहेतुसदनुष्ठानसमुपस्थितानां, नृणां पुंसां, नृग्रहणं च प्रधानतया तेषां, न तु तदन्यव्यवच्छेदार्थम्। पूजाऽऽस्पदमर्हणापदम, महद् गुरुकम्। यदाह-" इह मातापितृपूजा, आमुष्मिकयोगकारणं ह्येषा। तदनुज्ञया प्रवृत्तिः, प्रधानदीक्षाविधानार्थम्॥ १॥"

पूजाऽऽस्पदत्वमेव समर्थयन्नाह-

स कृतज्ञः पुमान् लोके, स धर्मगुरुपूजकः।
स शुद्धधर्मभाक् चैव, य एतौ प्रतिपद्यते॥ ८॥

स इति। य एतौ प्रतिपद्यते स एव कृतज्ञः पितृकृतोपकारज्ञाता, पुमान्नरः, लोके लौकिकमार्गे, तथा स एव धर्मगुरोर्दीक्षाचार्यस्य, पूजकः पूजयिता धर्मगुरुपूजकः, भविष्यतीति गम्यते। नान्यः। यदाह-"उपकारीति पूज्यः स्याद्, गुरू चाऽऽद्योपकारिणौ। तावप्यर्चयते यो न, स हि धर्मगुरुं कथम्?॥१॥" तथा स इति। स एव शुद्धधर्मभाक् निर्दोषकुशलधर्मभाजनं भवति। चशब्दः समुच्चये। एवशब्दोऽवधारणे। तस्य च दर्शितः प्रयोगः। यः पुमान् एतौ मातापितरौ प्रतिपद्यते सेवनतोऽङ्गीकरोति।

दुष्प्रतिकारित्वात्तयोः । आह च-" दुष्प्रतिकारौ माता-पितरौ स्वामी गुरुश्च लोकेऽस्मिन् । तत्र गुरुरिहामुत्र च, सुदुष्करतरप्रतीकारः ॥ १ ॥ " ॥ ८ ॥ इति० २५ अष्ट० ।

(६६) अथ जिननामसामान्यार्थौ, विशेषार्थश्च कथ्यते-

वयधुरवहणा उसहो, उसहाऽऽइमसुविणलंभणाओ य ।
रागाइजिओ अजिओ, न जिया अक्खेसु पिउणंऽबा ।।९।

(वयधुरवहणा उसहो) व्रतरूपा धुरा व्रतधुरा, तद्वहनाद् वृषभः बलीवर्दः, तर्हि ईदृशाः सर्वेजिना वर्त्तन्ते, भगवति वृषभे को विशेषः?, इत्याशङ्कायां विशेषार्थमाह-(उसहाइमसुविणलंभणाओ य त्ति) जनन्या मरुदेव्या स्वामिन्या चतुर्दशस्वप्नेषु प्रथमं वृषभदर्शनात्, च पुनः, वृषभलाञ्छनाद्वा वृषभः १ । (रागाइजिओ अजिओ त्ति) रागाऽऽदिभिरजितो न पराजित इति अजितः २ । एवंविधाः सर्वेऽपि, अजितजिने को विशेषः?। (न जिया अक्खेसु पिउणंऽबा) भगवति गर्भस्थिते न जिता अक्षेषु पाशकक्रीडासु जिनजनकेन अम्बा जिनमाता । इति गाथार्थः ॥ ९ ॥

सुहअइसयसंभवओ, तइओ जुवि पउरससससंभवओ ।
अभिनंदिजइ तुरिओ, हरीहिं इरिणासया गब्भे ॥१०॥

(सुहअइसयसंभवओ तइओ) शुभाऽतिशयसंभवतस्तृतीयः ३ । ईदृशाः सर्वे, संभवे को विशेषः ?-(जुवि पउरससससंभवओ) जुवि पृथिव्यां प्रचुरसस्यस्य बहुधान्यस्य संभवतः संभवजिनः ३ । (अभिनंदिजइ तुरिओ हरीहिं ति) अभि सामस्त्येन नन्द्यते चतुष्षष्टिदेवेन्द्रैः स्तूयते इति तुर्योऽभिनन्दनः ४। एवंविधाः सर्वे जिनाः, ततोऽस्य विशेषार्थमाह-(हरिणा सया गब्भे ति) देवेन्द्रेण सदा गर्भे गर्भस्थे सति, अभिनन्द्यते इति पूर्वोक्तमेवानुवर्त्तनीयमिति गाथाऽर्थः ॥ १० ॥

सयमवि सुहमइभावा, अंबाइ विवायभंगओ सुमई ।
अमलत्ता पउमपहो, पउमप्पहअंकसेज्जमोहलओ ॥११॥

(सयमवि सुहमइभावा) स्वयमपि शुभमतेर्भावात्सद्भावात् सुमतिः ५ (अंबाइ विवायभंगओ सुमइ त्ति) अम्बाया विवादभङ्गतः सुमतिरुदिति जिनस्य सुमतिरिति नाम । अत्रैकः सामान्यार्थे,सर्वजिनसाधारणत्वात्,द्वितीयो विशेषार्थश्चेति सर्वत्रापि ज्ञेयम् । ५ । (अमलत्ता पउमपहो त्ति) अमलत्वात् निर्मलत्वात् पद्मप्रभः ६ (पउमप्पहअंकसेज्जमोहलओ त्ति) पद्मस्येव प्रभा यस्यासौ पद्मप्रभः, रक्तवर्णत्वात्, पद्माङ्कत्वात्पद्मप्रभः, तथा स्वामिनि गर्भस्थे जनन्याः पद्मशय्यायां दोहदः समुत्पन्नः, दोहदतया पूरितः, अतः पद्मप्रभः ६ । इति गाथार्थः ॥ ११ ॥

सुहपासो य सुपासो, गब्भे माऊइ तणुसुपासत्ता ।
सियलेस्सो चंदपहो, ससिप्पहापाणमोहलओ ॥१२॥

(सुहपासो य सुपासो) शोभनानि पार्श्वानि यस्यासौ सुपार्श्वः ७ । (गब्भे माऊइ तणुसुपासत्ता) स्वामिनि गर्भस्थे मातुस्तनुः सुपार्श्वा जाता, अतः सुपार्श्वः ७। (सियलेस्सो चंदपहो त्ति) सितलेश्यः शुक्ललेश्यस्तेन चन्द्रप्रभः ८ । (ससिप्पहापाणमोहलओ त्ति) गर्भवन्मातुः चन्द्रप्रभा शशिद्युतिस्तत्पानदोहदतो वा चन्द्रप्रभः ८ । इति गाथार्थः ॥ १२ ॥

सुहकिरियाए सुविही, सयं पि जणणी वि गब्भकालम्मि ।
जयतावहरो सियलो, अंबाकरफाससमियपिउदाहो ।१३।

(सुहकिरियाए सुविही सयं पि त्ति) स्वयमपि शुभक्रियाः करोति यस्मात् कारणात् सुविधिः ९ । (जणणी वि गब्भकालम्मि) जिनजनन्यपि गर्भकाले गर्भसमये सुविधिः-सा सम्यगाचारे रता जाता अतः सुविधिरिति जिनस्य नाम दत्तम् ९ । (जयतावहरो सियओ त्ति) जगत्तापहरः,अतः शीतलः १० । (अंबाकरफाससमिअपिउदाहो त्ति) अम्बायाः जनन्याः करस्पर्शात् समितः जनकदाहज्वरो येन स तथा इति शीतलः १० । इति गाथार्थः ॥ १३ ॥

सेयकरो सिज्जंसो, जणणीए देविसिज्जअक्कमणा ।
सुरहरिवसुहिं पुज्जो, पिउसमनामेण वसुपुज्जो ॥१४॥

(सेयकरो सिज्जंसो) श्रेयस्करः कल्याणकारी, तेन श्रेयांसः ११ । (जणणीए देविसिज्जअक्कमणा) भगवति गर्भस्थे जनन्या देव्यधिष्ठितशय्याया आक्रमणात् । श्रेयांसदेवताऽधिष्ठिता शय्या पूर्वमच्युत् केनाप्याक्रमितुमशक्या, तया जिनजनन्या गर्भानुभावतः सा शय्याऽऽक्रान्ता, श्रेयश्च जातमिति श्रेयांसः ११ । (सुरहरिवसुहिं पुज्जो) सुरैर्देवैर्हरिभिरिन्द्रैर्वसुभिर्देवविशेषैः पूज्यः, स एव वासुपूज्यः १२, (पिउसमनामेण वसुपुज्जो त्ति) पितृसमाननाम्ना वा वासुपूज्यः १२ । इति गाथार्थः ॥ १४ ॥

विमलो दुहा गयमलो, गब्भे माया वि विमलबुद्धितणू ।
नाणाइअणंतत्ता-ऽणंतोऽणंतमणिदामसुविणाओ ॥१५॥

(विमलो दुहा गयमलो त्ति) विमलो द्विधा गतमलो बाह्यान्तरमलरहितः, तेन विमलः १३, (गब्भे माया वि विमलबुद्धितणु त्ति) स्वामिनि गर्भस्थिते माता जनन्यपि निर्मलबुद्धिशरीरा जाता इति हेतोर्विमलः १३ । (नाणाइअणंतत्ताऽणंतो त्ति) ज्ञानदर्शनचारित्राणामानन्त्यतः-अनन्तः १४ (अणंतमणिदामसुविणाओ त्ति) अनन्तं महत्प्रमाणं यन्मणिदाम तत्स्वप्नतो वा अनन्तः १४ । इति गाथार्थः ॥ १५ ॥

धम्मसहावा धम्मो, गब्भे माया वि धम्मिया अहियं ।
संतिकरणा उ संती, देसे असिवोवसमकरणा ॥१६॥

(धम्मसहावा धम्मो) धर्मस्वभावाद् धर्मजिनः । (गब्भे माया वि धम्मिया अहियं ति) भगवति गर्भस्थिते माताऽपि धार्मिकाऽधिकं जाता इति हेतोः धर्मजिनः १५ । (संतिकरणा उ संती) शान्तिकरणात् शान्तिः १६ । (देसे असिवोवसमकरणा) तस्मिन् देशे अशिवस्योपद्रवस्योपशान्तिकरणाद्वा शान्तिः १६ । इति गाथार्थः ॥ १६ ॥

कुंथु त्ति महीइ तिओ, जूमिठिअरयणथूभसुविणाओ ।
वंसाइवुड्ढिकरणा, अरो महारयणअरसुविणा ॥१७॥

(कुंथु त्ति महीइ तिओ त्ति)कौ पृथिव्यां स्थितवानिति निरुक्तात् कुन्थुः। (जूमिठिअरयणथूभसुविणाओ) भूमिकास्थितरत्नस्तूपस्वप्नात् कुन्थुः १७। (वंसाइवुड्ढिकरणा अरो त्ति) वंशाऽऽदिवृद्धिकरणात् अरः १८ । (महारयणअरसुविणा) महारत्नाऽरकस्वप्नादर्शेऽरजिनः १८ । इति गाथार्थः ॥ १७ ॥

मोहाईमल्लजया, मल्ली वरमल्लसिज्जमोहलओ ।
मुणिसुव्वओ जहत्था-जिणो तहंऽबा वि तारिसी गब्भे ।१८।

(मोहाईमल्लजया मल्लि त्ति) मोहाऽऽदिमल्लजयाद् मल्लिः, अत्रार्षत्वादिकारः १९। (वरमल्लसिज्जमोहलओ त्ति) वरमाल्यशय्यायाः

प्रधानपुष्पशय्याया दोहदाद् वा मल्लिः १९। (मुणिसुव्वओ जहत्थाऽभिहो त्ति) मुनिसुव्रतः यथार्थाभिधो यथार्थनामा-मन्यते जगतस्त्रिकालावस्थामिति मुनिः, सुष्ठु व्रतान्यस्येति सुव्रतः, ततो मुनिश्चासौ सुव्रतश्चेति, मुनिवत् सुव्रतो मुनिसुव्रत इति वा २० (तईऽवाविं तारिसी गब्भे त्ति) तथाऽम्बाऽपि माताऽपि, भगवति गर्भस्थे सति मुनिवत् सुव्रता जातेति मुनिसुव्रतः २०। इति गाथार्थः ।१७।

रागाऽऽइनामणेणं, गब्भे पुररोहिनामणा उ नमी ।
दुरियतरुचक्कनेमी-ऽरिट्ठमणिनेमिसुविणाओ ॥१९॥

(रागाऽऽइनामणेणं) रागद्वेषाऽऽदिशत्रूणां नामनेन नम्रीभूतत्वकरणेन नमिः । (गब्भे पुररोहिनामणा उ नमि त्ति) गर्भे पुररोधिनामनान्नमिः । अयमर्थः-भगवति गर्भस्थे प्रत्यन्तनृपैरवरुद्धे नगरे भगवत्सुपुण्यशक्तिप्रेरितां प्राकारोपरि स्थितां भगवन्मातरमवलोक्य ते वैरिणो नृपाः प्रणता इति नमिः २१। (दुरियतरुचक्कनेमि त्ति) दुरितानि पापानि तदुपास्तरवस्तद्विषये चक्रनेमिः चक्रधारा, अतो नेमिः। (अरिट्ठमणिनेमिसुविणाओ त्ति) भगवन्मात्रा स्वप्नेऽरिष्टरत्नमयो नेमिर्दृष्टस्तेन "पदैकदेशे पदसमुदायात्" अरिष्टनेमिः २२। इति गाथार्थः ॥१९॥

भावाण पासणेणं, निसि जणणीसप्पपासणा पासो ।
नाणाइधणकुलाऽऽई-ण वद्धणा वद्धमाणो णं ॥२०॥

(भावाण पासणेणं) सकलसंसारवर्तिनां भावानां पदार्थानां दर्शनेनाऽवलोकनेन पार्श्वः । (निसि जणणीसप्पपासणा पासो त्ति) निशि रात्रौ जनन्या शय्यासमीपे व्रजन् सर्पोऽवलोकित इति पार्श्वः २३। (नाणाइधणकुलाईण वद्धणा वद्धमाणो त्ति) ज्ञानदर्शनचारित्राणां वर्द्धनाद् धनकुलाऽऽदीनां च वर्द्धनतो वर्द्धमानः। अत्र ज्ञानाऽऽदीनां वर्द्धनाद् वर्द्धमान इति सामान्यार्थः। कुलधनाऽऽदीनां वर्द्धनाद् वर्द्धमान इति विशेषार्थश्च २४। इति गाथार्थः ।२०।

अथ वीर इति नामापेक्षया सामान्यविशेषार्थमाह-

अहवा भावारिजया, वीरो दुट्ठसुरवामणीकरणा ।
सामन्नविसेसेहिं, कमेण नामत्थदारदुगं ॥२१॥

(अहवा भावारिजया वीरो त्ति) अथवा भावारीणामन्तरङ्गाऽऽरीणां जयाद् वीरः २४। (दुट्ठसुरवामनीकरण त्ति) आमलकीक्रीडायां दुष्टसुरवामनीकरणाद् वीरः २४। (सामन्नविसेसेहिं ति) सामान्यविशेषाभ्यां क्रमेणानुक्रमेण (नामत्थदारदुगं) नामार्थेन नाम्नोऽर्थाद्विकेन द्वारद्विकं ज्ञेयमिति गाथार्थः ॥ २१ ॥ सप्त० ४०-४१ द्वार ।

☞ "एतस्यामवसर्पिण्या-मृषभोऽजितशंभवौ ।
अभिनन्दनः सुमति-स्ततः पद्मप्रभाभिधः ॥ २६ ॥
सुपार्श्वश्चन्द्रप्रभश्च, सुविधिश्चाऽथ शीतलः ।
श्रेयांसो वासुपूज्यश्च, विमलोऽनन्ततीर्थकृत ॥ २७ ॥
धर्मः शान्तिः कुन्थुररो, मल्लिश्च मुनिसुव्रतः ।
नमिर्नेमिः पार्श्वो वीर-श्चतुर्विंशतिरर्हताम् " ॥ २८ ॥

एतस्यामिति वर्तमानायामवसर्पिण्यां दशसागरोपमकोटीकोटिप्रमाणायां कालविशेषे, ऋषति गच्छति परमपदमिति "ऋषिवृषिलुसिभ्यः कित्" ॥ (उणा० ३३१) इत्यभे ऋषभः । यद्वा-" ऊर्वोर्वृषभलाञ्छनमजूद्भगवतो जनन्या च चतुर्दशानां स्वप्नानामादावृषभो दृष्टस्तेन ऋषभः ॥१॥ परीषहाऽऽदिभिर्न जित इति अजितः । यद्वा-गर्भस्थेऽस्मिन् द्यूते राज्ञा जननी न जितेत्यजितः ॥ २ ॥ शं सुखं भवत्यस्मिन् स्तुते शंभवः । यद्वा-गर्भगते ऽप्यस्मिन्नधिकसस्यसंभवात् संभवोऽपि ॥३॥ अभिनन्द्यते देवेन्द्राऽऽदिभिरित्यभिनन्दनः। क्षुज्यादित्वादनद् । यद्वा-गर्भोत्पभृतेयेव अभीक्ष्णं शक्रेणाऽभिनन्दनादभिनन्दनः ॥ ४ ॥ शोभना मतिरस्य सुमतिः । यद्वा-गर्भस्थे जनन्याः सुनिश्चिता मतिरजूदिति सुमतिः ॥ ५ ॥ निष्पङ्कतामङ्गीकृत्य पद्मस्येव प्रभाऽस्य पद्मप्रभः । यद्वा-पद्मशयनदोहदो मातुर्देवतया पूरित इति, पद्मवर्णश्च भगवानिति वा पद्मप्रभः ॥६॥ ॥ २६ ॥ शोभनौ पार्श्वावस्य सुपार्श्वः । यद्वा-गर्भस्थे भगवति जनन्यपि सुपार्श्वाऽजूदिति सुपार्श्वः ॥ ७ ॥ चन्द्रस्येव प्रभा ज्योत्स्ना सौम्यत्वेहयाविशेषोऽस्य चन्द्रप्रभः । तथा गर्भस्थे देव्याः चन्द्रपानदोहदोऽभूदिति चन्द्रप्रभः ॥ ८ ॥ शोभनो विधिर्विधानमस्य सुविधिः । यद्वा-गर्भस्थे भगवति जनन्यप्येवमिति सुविधिः ॥ ९ ॥ सकलसत्त्वसन्तापहरणात् शीतलः । तथा गर्भस्थे भगवति पितुः पूर्वोत्पन्नाऽऽचिकित्स्यपित्तदाहो जननीकरस्पर्शादुपशान्त इति शीतलः ॥ १० ॥ श्रेयांसावंसावस्य श्रेयांसः, पृषोदराऽऽदित्वात् । यथा-गर्भस्थेऽस्मिन् केनाप्यनाक्रान्तपूर्वा देवताऽधिष्ठितशय्या जनन्याऽऽक्रान्तेति श्रेयो जातमिति श्रेयांसः ॥ ११ ॥ वसुपूज्यनृपतेरयं वासुपूज्यः । यद्वा-गर्भस्थेऽस्मिन् वसु हिरण्यं, तेन वासवो राजकुलं पूजितवानिति । वसवो देवविशेषाः, तेषां पूज्यो वा वसुपूज्यः, प्रक्राऽऽद्यणि वासुपूज्यः ॥ १२ ॥ विगतो मलोऽस्य, विमलज्ञनाऽऽदियोगाद्वा विमलः । यद्वा-गर्भस्थे मातुर्मतिस्तनुश्च विमला जातेति विमलः ॥ १३ ॥ न विद्यते गुणानामन्तोऽस्यानन्तः; अनन्तजिदेकदेशो वा अनन्तः, " भीमो भीमसेनः " इति न्यायात् । स चासौ तीर्थकृच्च अनन्ततीर्थकृत् ॥ १४ ॥२७॥ दुर्गतौ प्रपतन्तं सत्त्वसङ्घातं धारयतीति धर्मः । तथा गर्भस्थे जननी दानाऽऽदिधर्मपरा जातेति धर्मः ॥ १५ ॥ शान्तियोगात् तदात्मकत्वात् तत्कर्तृकत्वाच्चाऽयं शान्तिः । तथा गर्भस्थे पूर्वोत्पन्नाऽशिवशान्तिरभूदिति शान्तिः ॥ १६ ॥ कुः पृथ्वी तस्यां स्थितवानिति कुन्थुः, पृषोदराऽऽदित्वात् । तथा-गर्भस्थे भगवति जननी रत्नानां कुन्थुराशिं दृष्टवतीति कुन्थुः ॥ १७ ॥ " सर्वो नाम महासत्त्वः, कुले च उपजायते । तस्याऽभिवृद्ध्ये वृद्धै-रसावर उदाहृतः ॥ १ ॥ " इति वचनादरः। तथा-गर्भस्थे भगवति जनन्या स्वप्ने सर्वरत्नमयोऽरो दृष्ट इत्यरः ॥ १८ ॥ परीषहाऽऽदिमल्लजयान्मल्लिः । तथा-गर्भस्थे भगवति मातुः सुरभिकुसुममाल्यशयनीयदोहदो देवतया पूरित इति मल्लिः ॥ १९ ॥ मन्यते जगतस्त्रिकालावस्थामिति मुनिः, " मनेरुदेतौ चास्य वा " ॥ (उणा० ६१२) इति इप्रत्यये उपान्त्यस्योत्वं, शोभनानि व्रतान्यस्य सुव्रतः, मुनिश्चासौ सुव्रतश्च मुनिसुव्रतः । तथा-गर्भस्थे जननी मुनिवत् सुव्रता जातेति मुनिसुव्रतः ॥ २० ॥ परीषहोपसर्गाऽऽदिनामनात् " नमेस्तु वा" ॥ (उणा० ६१३) इति विकल्पेनोपान्त्यस्येकारोभावपक्षे नमिः । यद्वा-गर्भस्थे भगवति परचक्रनृपैरपि प्रणतिः कृतेति नमिः ॥ २१ ॥ धर्मचक्रस्य नेमिवन्नेमिः; नेमीतीञन्तोऽपि दृश्यते । यथा-" वन्दे सुव्रतनेमिनौ । " इति ॥ २२ ॥ स्पृशति ज्ञानेन सर्वभावानिति पार्श्वः । तथा-गर्भस्थे जनन्या निशि शयनीयस्थयाऽन्धकारे सर्पो दृष्ट इति गर्भानुभावोऽयमिति मत्वा पश्यतीति निरुक्तात् पार्श्वः, पार्श्वोऽस्य वैयावृत्यकरो यक्षः, तस्य नाथः पार्श्वनाथः, "भीमो भीमसेनः" इति न्यायाद् वा पार्श्वः ॥ २३ ॥ विशेषेण ईरयति प्रेरयति कर्माणीति वीरः ॥ २४ ॥ इत्यभिधानचिन्तामणौ श्रीहेमचन्द्रसूरयः । ☜

निशिभक्तम्-

मूलगुणेसुं छण्हं, सेसाणुत्तरगुणेसु निमि भुत्तं (३८७) द्वयोर्जिनयोः ऋषभ१वीरयोः २४ शासने. मूलगुणेषु निशि भोजनप्रत्याख्यानम्, (सेसाणुत्तरगुणेसु निसि भुत्त) शेषाणां द्वाविंशतिमितानां जिनानामुत्तरगुणेषु निशि भोजनप्रत्याख्यानम् । सत्त० १३४ द्वार ।

प्रकीर्णकानि-

.....सव्वेसि पइन्नगा ससीसकया ।

नियनियसीसपमाणा, नेया..... (३७०)

सर्वेषां जिनानां प्रकीर्णकानि स्वशिष्यकृतानि भवन्ति निजनिजशिष्यप्रमाणानि, येषां जिनानां यावन्तः शिष्यास्तेषां तावत्प्रमाणानि प्रकीर्णकानि ग्रन्थविशेषा ज्ञेयाः । सत्त० १२४ द्वार ।

(९७) पञ्चकल्याणकम-

पउमप्पभे णं अरहा पंच चित्ते होत्था । तं जहा-चित्ताहिं चुए,चइत्ता गब्भं वक्कंते,चित्ताहिं जाए, चित्ताहिं मुंडे भवित्ता अगाराओ अणगारियं पव्वइए, चित्ताहिं अणंते अणुत्तरे णिव्वाघाए निरावरणे कसिणे पडिपुन्ने केवलवरनाणदंसणे समुप्पन्ने, चित्ताहिं परिनिव्वए ॥ १ ॥

पुप्फदंते णं अरहा पंच मूले होत्था । मूलेणं चुए, चइत्ता गब्भं वक्कंते एवं चेव।

एएणं अभिलावेणं इमाओ गाहाओ अणुगंतव्वाओ-

" पउमप्पभस्स चित्ता, मूले पुण होइ पुप्फदंतस्स ।
पुव्वाऽसाढा सीयल-स्स उत्तरा विमलस्स भद्दवया॥१॥
रेवइ य अणंतजिणो, पूसो धम्मस्स संतिणो भरणी ।
कुंथुस्स कत्तियाओ, अरस्स तह रेवईओ य ॥ २ ॥
मुणिसुव्वयस्स सवणो,आसिणि नमिणो य नेमिणो चित्ता।
पासस्स विसाहाओ, पंच य हत्थुत्तरे वीरो ॥ ३ ॥ "

समणे भगवं महावीरे पंच हत्थुत्तरे होत्था । तं जहा-हत्थुत्तराहिं चुए, चइत्ता गब्भं वक्कंते, हत्थुत्तराहिं गब्भाओ गब्भं साहरइ, हत्थुत्तराहिं जाए, हत्थुत्तराहिं मुंडे भवित्ता ०जाव पव्वइए, हत्थुत्तराहिं अणंते अणुत्तरे ०जाव केवलवरनाणदंसणे समुप्पन्ने ।

पद्मप्रभ ऋषभनाऽऽदिषु षष्ठ:,पञ्चसु च्यवनाऽऽदिदिनेषु चित्रानक्षत्रविशेषो यस्य स पञ्चचित्रः,चित्रानिरिति कृत्वा बहुवचनम्। च्युतोऽवतीर्ण उपरिमोपरिमग्रैवेयकादेकत्रिंशत्सागरोपमस्थितिकात्, च्युत्वा च (गब्भं ति) गर्भे कुक्षौ व्युत्क्रान्त उत्पन्नः कौशाम्ब्यां धराभिधानमहाराजभार्यायाः सुसीमानामिकायाः माघमासबहुलषष्ठ्यां, जातो गर्भनिर्गमेन कार्तिकबहुलद्वादश्यां, तथा मुण्डो भूत्वा केशकषायाऽऽद्युपेक्षया, अगारान्निष्क्रम्यानगारितां श्रमणतां प्रव्रजितो गतोऽनगारतया च प्रव्रजितः कार्तिकशुद्धत्रयोदश्यां, तथाऽनन्तं पर्यायानन्तत्वात्,अनुत्तरं सर्वज्ञानोत्तमत्वात्, निर्व्याघातमप्रतिपातित्वात्, निरावरणं सर्वथा स्वावरणक्षयात्,कृत्स्नं सकलपदार्थविषयत्वात्, परिपूर्णं स्वावयवापेक्षयाऽखण्डं पौर्णमासीचन्द्रबिम्बवत् । किमित्याह-केवलं ज्ञानान्तरासहायत्वात्, संशुद्धत्वाद्वा । अत एव वरं प्रधानं केवलवरं, ज्ञानं च विशेषावभासं, दर्शनं च सामान्यावभासं ज्ञानदर्शनं, तच्च तथेति केवलवरज्ञानदर्शनं,समुत्पन्नं जातम्, चैत्रशुद्धपञ्चदश्याम्। तथा परिनिर्वृतो निर्वाणं गतः, मार्गशीर्षबहुलैकादश्याम् । आदेशान्तरेण फाल्गुनबहुलचतुर्थ्यामिति ॥ (एवं चेव त्ति) पद्मप्रभसूत्रमिव पुष्पदन्तसूत्रमप्यूह्यतेव्यम्, एवमनन्तरोक्तस्वरूपेण। एतेनानन्तरत्वात्प्रत्यक्षेणानिलापेन सूत्रपाठेनेमास्तिस्रः सूत्रसंग्रहणिगाथा अनुगन्तव्या अनुसर्तव्याः शेषसूत्राभिलापनिष्पादनार्थम्। (पउमप्पभस्सेत्यादि) तत्र पद्मप्रभस्य चित्रानक्षत्रं च्यवनाऽऽदिषु पञ्चसु स्थानकेषु भवतीत्यादिगाथात्तरार्धो वक्तव्यः, सूत्राभिलापस्तवाद्यसूत्रद्वयस्य साक्षादर्शित एव। इतरेषां त्वेवम्-"सीयले णं अरहा पंच पुव्वासाढे होत्था। तं जहापुव्वासाढाहिं चुए, चइत्ता गब्भं वक्कंते, पुव्वासाढाहिं जाए।" इत्यादि। एवं सर्वाण्यपीति। व्याख्या त्वेवम्-पुष्पदन्तो नवमतीर्थकर आनतकल्पादेकोनविंशतिसागरोपमस्थितिकात् फाल्गुनबहुलनवम्यां मूलनक्षत्रे च्युतः, च्युत्वा काकन्दीनगर्यां सुग्रीवराजभार्यायाः रामाभिधानायाः गर्भत्वेन व्युत्क्रान्तो मूलनक्षत्रे मार्गशीर्षबहुलपञ्चम्यां जातः, तथा मूल एव ज्येष्ठशुद्धप्रतिपदि, मतान्तरेण-मार्गशीर्षबहुलषष्ठ्यां, निष्क्रान्तः। तथा मूल एव कार्तिकशुद्धतृतीयायां केवलज्ञानमुत्पन्नम्। तथाऽश्वयुजः शुद्धनवम्याम्, आदेशान्तरेण-वैशाखबहुलषष्ठ्यां,निर्वृत इति। तथा शीतलो दशमार्जिनः प्राणतकल्पाद्विंशतिसागरोपमस्थितिकाद्वैशाखबहुलषष्ठ्यां पूर्वाषाढानक्षत्रे च्युतः, च्युत्वा च भद्दिलपुरे दृढरथनृपतिनार्यायां नन्दायाः गर्भतया व्युत्क्रान्तः, तथा पूर्वाषाढास्वेव माघबहुलद्वादश्यां जातः, तथा पूर्वाषाढास्वेव माघबहुलद्वादश्यां निष्क्रान्तः, तथा पूर्वाषाढास्वेव पौषस्य शुक्ले, मतान्तरेण-बहुलपक्षे, चतुर्दश्यां ज्ञानमुत्पन्नम्, तथा तत्रैव नक्षत्रे श्रावणशुद्धपञ्चम्यां, मतान्तरेण-श्रावणबहुलद्वितीयायां, निर्वृत इति। एवं गाथात्रयोक्तानां शेषाणामपि सूत्राणां प्रथमानुयोगपदानुसारेणोपयुज्य व्याख्या कार्या। नवरं चतुर्दशसूत्रेऽभिलापविशेषोऽस्तीति तद्दर्शनार्थमाह-(समणे इत्यादि) हस्तोपलक्षिता उत्तरा हस्तोत्तरा, हस्तो वोत्तरो यासां ता हस्तोत्तरा उत्तराफाल्गुन्यः,पञ्चसु च्यवनगर्भहरणाऽऽदिषु हस्तोत्तरा यस्य स तथा, गर्भात् गर्भस्थानात् ।(गब्भं ति) गर्भे गर्भस्थानान्तरे संहृतो नीतो, निर्वृतस्तु स्वातिनक्षत्रे कार्तिकामावास्यायामिति । स्था० ५ ठा० १ उ० ।

(९८) पर्यायान्तकृद्भूमिः-

तेसिं चिय नाणाओ, मुणीण गयकम्मयाण सिद्धिगमो ।
अंतमुहुत्ते छातिचउ-वरिसमुं इगदिणाईसु ॥ ३२४ ॥

तेषामृषभनेमिपार्श्वान्तिमशेषाणां केवलज्ञानाद् मुनीनां गतकर्मकाणां सिद्धिगमो मोक्षगमनं संजातम् । ऋषभजिनस्य केवलोत्पत्त्यनन्तरमन्तर्मुहूर्तेन मोक्षमार्गश्रितः, प्रथमभगवति मरुदेवी स्वामिनी मोक्षं गता १। नेमिजिनस्य केवलज्ञानाद्वर्षद्वयादनन्तरं मोक्षमार्गश्रितः २। पार्श्वजिनस्य केवलोत्पत्त्यनन्तरं वर्षत्रयेण मोक्षमार्गश्रितः ३। वीरजिनस्य केवलज्ञानादनन्तरं वर्षचतुष्टयादनन्तरं मोक्षमार्गश्रितः ४। उक्तञ्च-

रिक्तजिनानां विंशतितीर्थगतानामेकदिनाऽऽदिषु मोक्षमार्गश्चलितः ५। इति गाथार्थः ॥ ३२४ ॥ सत्त० १५९ द्वार।

अथ प्रतिक्रमणसंख्या-

दोसिय-राइय-पक्खिय-चउमासिय-वच्छरीयनामाओ।
दुण्हं पण पडिक्कमणा, मज्झिमगाणं तु दो पढमा ।३०६।

दैवसिक-रात्रिक-पाक्षिक-चातुर्मासिक-सांवत्सरिकनामतः (दुण्हं पण पडिक्कमणा) द्वयोर्जिनयोः प्रथमचरमजिनयोः पञ्चाऽपि प्रतिक्रमणानि भवन्ति। (मज्झिमगाणं तु दो पढम त्ति) मध्यवर्तिनां द्वाविंशतिजिनानां शासने द्वे प्रथमे प्रतिक्रमणे दैवसिकरात्रिकाख्ये भवतः, नान्य इति गाथार्थः ।३०६। सत्त० १३३ द्वार।

प्रथमगणधरनामानि-

एएसिं चउव्वीसाए तित्थगराणं चउव्वीसं पढमसीसा होत्था। तं जहा-

"पढमेऽत्थ उसभसेणे, बीए पुण होइ सीहसेणे य।
चारू वज्जणाभे, चमरे तह सुव्वए विदब्भे य॥ ३९॥
दिन्ने वाराहे पुण, आणंदे गोथुभे सुहुमे य।
मंदरे जसे अरिट्ठे, चक्काउहसंबकुंभआभिणए य॥४०॥
इंदकुंभे य सुंभे, वरदत्ते अज्जदिन्न इंदभूई य।
उदितोदितकुलवंसा, विसुद्धवंसा गुणेहिं उववेया।
तित्थप्पवत्तयाणं, पढमा सिस्सा जिणवराणं॥४१॥"

पुण्डरीको वृषभसेनाऽपरनामा १, सिंहसेनः २, चारुदत्तः ३, वज्रनाभः ४, चमरगणिः ५, सुव्रतः (मतान्तरेण प्रद्योतनः) ६, विदर्भः ७, दत्तः ८, वाराहः ९, आनन्दः (मतान्तरेण पद्मनन्दः) १०, कौस्तुभः (कृतार्थः) ११, सुन्दरः (सुधर्मा) १२, मन्दरः १३, यशोधरः १४, अरिष्टः १५, चक्रायुधः १६, साम्बः १७, कुम्भः १८, अभिनयः (अभिचन्द्रः) १९, इन्द्रकुम्भः (मल्ली) २०, शुभः २१, वरदत्तः २२, आर्यदत्तः २३, इन्द्रभूतिः २४। एतानि प्रथमगणधराणां नामानि *। स०।

प्रथमप्रवर्तिन्यः-

एएसि णं चउव्वीसाए तित्थगराणं चउव्वीसं पढमासिस्सिणीओ होत्था। तं जहा-

"बंभी फग्गू सामा, अजिया तह कासवी रई सोमा।
सुमणा वारुणि सुजसा, धारणि धरणी धरा पउमा ।४२।
अज्जा सिवा सुई दा-मणी य रक्खी य बंधुमई।
पुप्फवई अनिन्दा ज-क्खदिन्न तह पुप्फचूला य ॥४३॥
चंदणसहिआ पवत्तणि, चउवीसाणं जिणवरिंदाणं॥"

तत्र ब्राह्मी, फल्गुः, श्यामा, अजिता, काश्यपी, रतिः, सोमा, सुमना, वारुणी, सुलसा (सुयशाः) धारिणी, धरणी, धरा, पद्मा,

* "सिरिउसहसेण पहुसी-हसेण चारू वज्जनाहऽक्खा।
चमरो पज्जोयविय-ब्भदिन्नपहुणो वराहो य ॥३०६॥
पउमंद कयत्थो वि य, सुहम्ममंदरजसा अरिट्ठो य।
चक्काउह संबो कुं-भ भिसह मल्ली य सुंभो य ॥३०७॥
वरदत्त अज्जदिन्ना, इंदहभूई य गणहरा पढमा।" प्रव०८ द्वार।
इति प्रवचनसारोद्धारेऽऽदौ नामनेदोऽपि।

शति प्रथमगाथया चतुर्दशप्रवर्त्तिनीनामानि। आर्या, शिवा, श्रुतिः (शुभा) द्रामिनी (अञ्जुका) रक्षी (भावितात्मा) बन्धुमतिनामा, पुष्पवती, अनिन्द्रा (अमिला) यक्षदत्ता (यक्षिणी) तथा पुष्पचूला, चः समुच्चये, चन्दनासहितास्तु एताः प्रवर्तिन्यः। प्रव० ६ द्वार।

प्रथमश्रावकाः-

सेयंस नंद सुज्जो, संखो उसहस्स नेमिमाईणं। (२१८)

श्रीऋषभस्य प्रथमः श्रावकः श्रेयांसनामा १। नेमिजिनस्य नन्दः २। पार्श्वस्य सुद्योतः ३। शङ्खो वीरस्य ४। शेषाणां विंशतिजिनानामप्रसिद्धाः, पुरातनग्रन्थेष्वनिबन्धनात्। सत्त० १०५ द्वार।

प्रथमश्राविकाः-

सड्ढि सुभद्दा महसु-व्वया सुनंदा य सुव्वसा य॥ (२१७)

ऋषभस्य सुभद्रा १। नेमेः महासुव्रता २। पार्श्वस्य सुनन्दा ३। वीरस्य सुव्रसा ४। अन्येषामप्रसिद्धाः, ग्रन्थेष्वनिबन्धनात्। सत्त० १०६ द्वार।

प्रत्येकबुद्धमुनिसंख्या-

नियनियसीसपमाणा, नेया पत्तेअबुद्धा वि। (२१०)

प्रत्येकबुद्धा अपि मुनयो निजनिजशिष्यप्रमाणा ज्ञेयाः। सत्त० १२५ द्वार। ('मुणि' 'साहु' शब्दे विशेषः)

(प्रमाणाङ्गुलम् 'अंगुल' शब्दे प्रथमभागे ४४ पृष्ठे निरूपितम्)

प्रमादः-

वीरुसहाण पमाओ, अंतमुहुत्तं तहेवऽहोरत्तं। (२१९)

वीरस्यान्तर्मुहूर्त्तमात्रं प्रमादो जातः। ऋषभस्याऽहोरात्रं जातः। अन्येषां प्रमादो नास्ति। सत्त० ८५ द्वार।

परीषहाः-

उदिता परीसहा सिं, पराइया ते य जिणवरिंदेहिं।

उदिताः परीषहाः शीतोष्णाऽऽद्या एषां भगवतां तीर्थकृतां, परं ते परीषहाः सर्वैरपि जिनवरेन्द्रैः पराजिताः। गतं परीषहद्वारम्। आ० म० १ अ० १ खण्ड।

(९९) अथ जिनप्रातिहार्याण्याह-

कंकेल्लि कुसुमवुट्ठी, दिव्वज्झुणि चामरासणाइं च।
भावलयभेरि (दुंदुहि) उत्तं, जिणाण इय पामिहेराइं।२०८।

(कंकेल्लिकुसुमवुट्ठि त्ति) जिनशरीराद् द्वादशगुणः कङ्केल्लिपादपः, अशोकाऽपरपर्यायः १। पञ्चवर्णकुसुमानां वृष्टिः २। (दिव्वज्झुणि चामरासणाइं च) दिव्यध्वनिः ३, श्वेतचामराणि ४, स्वर्णरत्नाऽऽदिमयं सिंहासनम् ५। (भावलयभेरि दुंदुहि त्ति) भावलयं मौलिपृष्ठे भामण्डलम् ६, भेरिदुन्दुभिनामा वाद्यविशेषः ७। (छत्तं) छत्रमातपत्रं जिनमस्तकोपरि ८। (जिणाण इय पामिहेराइं) जिनानामेतानि प्रातिहार्याण्युक्तानीति गाथार्थः ॥२०८॥ सत्त० ६९ द्वार।

(तीर्थकराणां पारणकालो, पारणकद्रव्याणि च 'उसह' शब्दे द्वितीयभागे ११३३ पृष्ठे निरूपितानि)

(१००) पारणदायकाः-

एएसि णं चउव्वीसाए तित्थगराणं चउव्वीसं पढमभिक्खादायारो होत्था। तं जहा-

" सिज्जंस बंभदत्ते, सुरिंददत्ते य इंददत्ते य ।
पउमे य सोमदेवे, माहिंदे सोमदत्ते य ॥ २६ ॥
पुस्से पुणव्वसू पुण, णंद सुणंदे जए य विजए य ।
तत्तो य धम्मसीहे, सुमित्त तह वग्घसीहे अ ॥ २७ ॥
अपराजिए दिससेणे, वीसइमो होइ उसभसेणो य ।
दिण्णे वरदत्त धण्णे, बहुलो तह आणुपुव्वीए ॥ २८ ॥
एए वि सुक्कलेसा, जिणवरजत्तीइ पंजलिउडाओ ।
तं कालं तं समयं, पडिच्छाऽऽई जिणवरिंदे " ॥ २९ ॥

श्रेयांसः १, ब्रह्मदत्तः २, सुरेन्द्रदत्तः ३, इन्द्रदत्तः ४, पद्मः ५, सोमदेवः ६, माहेन्द्रः ७, सोमदत्तः ८, पुष्यः ९, पुनर्वसुः १०, नन्दः ११, सुनन्दः १२, जयः १३, विजयः १४, धर्मसिंहः १५, सुमित्रः १६, व्याघ्रसिंहः १७, अपराजितः १८, विश्वसेनः १९, ऋषभसेनः २० (पाठान्तरे-ब्रह्मदत्तः २०) दिनः २१, वरदत्तः २२ (पाठान्तरे वरदिन्नः २२) धन्यः २३, बहुलब्राह्मणः २४। एते आनुपूर्व्या जिनानां प्रथमभिक्षादातारो ज्ञेयाः । स० ।

पारणदायकगतिः-

अट्ठ य तब्भवसिद्धा, सेसा तम्मि उ भवे व तइए वा ।
सिज्झिस्संति सगासे, जिणाण पडिवन्नपव्वज्जा ॥१६७॥

अष्टौ प्रथमदातारः तस्मिन्नेव भवे मोक्षं गताः, शेषाः षोडशजिनप्रथमदातारः तस्मिन्नेव भवे तृतीये वा भवे जिनानां समीपे प्रतिपन्नप्रव्रज्याः सन्तः सेत्स्यन्ति मोक्षं यास्यन्तीति । सत्त० ७८ द्वार ।

पारणदायकदिव्यपञ्चकम्-

पण दिव्वा जन्नकुसुमा-ण वुट्ठि वसुहार चेलउक्खेवो ।
उंदुहिकुणी सुराणं, अहो सुदाणं ति घोसणया ॥१६८॥

(विवरणं तु 'उसह' शब्दे द्वितीयभागे ११३३ पृष्ठे गतम्)

तत्र पारणदायकवसुधारावृष्टिः-

सव्वेसिं पि जिणाणं, जहियं लद्धा उ पढमभिक्खा उ ।
तहियं वसुधाराओ, सरीरमेत्ता उ वुट्ठाओ ॥१२॥

सर्वेषामपि जिनानां यत्र प्रथमभिक्षा लब्धा, तत्र वसुधारा (सरीरमेत्ता उ त्ति) पुरुषमात्रा उच्चत्वेन देवैर्वृष्टा । स० । सत्त० ।

सद्धुवालसकोडी, सुवन्नवुट्ठीइ होइ उक्कोसा ।
लक्खा सद्धुवालस, जहन्निया होइ वसुहारा ॥१६९॥

सार्द्धद्वादशकोटिस्वर्णवृष्टिश्च भवति उत्कृष्टा, सार्द्धद्वादशलक्षाणि जघन्यका भवति वसुधारा ॥१६९॥ सत्त० ८० द्वार ।

जिनानां पारणकपुरादिगाथाद्वयम्-

हत्थिणपुरं अउज्झा, सावत्थी तह अउज्झ विजयपुरं ।
बंभत्थलं च पाडलि-संडं तह पउमखंडं च ॥ १६१ ॥
सेयपुरं रिट्ठपुरं, सिद्धत्थ महापुरं च धन्नकडं ।
तह वद्धमाण सोमण-स मंदिरं चेव चक्कपुरं ॥१६२॥
रायपुरं तह मिहिला, रायगिहं तह य होइ वीरपुरं ।
बारवई कोवकडं, कुडागं पारणपुराइं ॥१६३॥

हस्तिनापुरम् । पाठान्तरे-गजपुरम् १। अयोध्या २। श्रावस्ती ३। अयोध्या ४। विजयपुरम् ५। ब्रह्मस्थलम् ६। पाटलिखण्डम् ७। तथा पद्मखण्डं नगरम् ८॥ श्वेतपुरम् ९। रिष्टपुरम् १०। सिद्धार्थपुरम् ११। महापुरम् १२। धान्यकटम् १३। वर्द्धमानपुरम् १४। सौमनस्यम् १५। मन्दिरपुरम् १६। चक्रपुरम् १७॥ राजपुरम् १८। मिथिला १९। राजगृहम् २०। वीरपुरम् २१। द्वारवती २२। कोपकटं नगरम् २३। कुण्डागः सन्निवेशः २४। एतानि जिनानां पारणकपुराणीत्यर्थः । सत्त० ७६ द्वार ।

(१०१) तीर्थकरपितृनाम-

जंबुदीवे णं दीवे भारहे वासे इमीसे णं ओसप्पिणीए चउवीसं तित्थगराणं पियरो होत्था । तं जहा-

" णाभी य जियसत्तू य, जियारी संवरे वि य ।
मेहे धरे पइट्ठे य, महसेणे य खत्तिए ॥ ५ ॥
सुग्गीवे दढरहे विण्हू, वसुपुज्जे य खत्तिए ।
कयवम्मा सीहसेणे, भाणू य विस्ससेण य ॥ ६ ॥
सूरे सुदंसणे कुंभे, सुमित्ते विजए समुद्दविजए य ।
राया य आससेणे, सिद्धत्थे चिय खत्तिए ॥ ७ ॥
उदितोदितकुलवंसा, विसुद्धवंसा गुणेहिं उववेया ।
तित्थप्पवत्तयाणं, एए पियरो जिणवराणं ॥ ८ ॥ "

नाभिः १, जितशत्रुः २, जितारिः ३, संवरः ४, मेघः ५, धरः ६, प्रतिष्ठः ७, महासेनः ८, सुग्रीवः ९, दृढरथः १०, विष्णुः ११, वसुपूज्यः १२, कृतवर्मा १३, सिंहसेनः १४, भानुः १५, विश्वसेनः १६, सूरः १७, सुदर्शनः १८, कुम्भः १९, सुमित्रः २०, विजयः २१, समुद्रविजयः २२, अश्वसेनो राजा २३, सिद्धार्थः २४। एते क्रमेण चतुर्विंशतिरर्हतां पितरः क्षत्रिया राजानः । स० ।

तीर्थकरपितॄणां गतिः-

नागेसुं उसभपिआ, सेसाणं सत्त हुंति ईसाणे ।
अट्ठ य सणंकुमारे, माहिंदे अट्ठ बोधव्वा ॥३२०॥

नागेषु नागकुमारेषु भवनपतिद्वितीयनिकायवर्त्तिषु सुरेषु श्रीऋषभनाथपिता नाभिनामा, गत इति शेषः । तथा शेषाणामजितनाथप्रभृतीनां चतुष्पञ्चाशतां सप्तानां पितरो भवन्ति गता ईशाने द्वितीयदेवलोके । सैद्धान्तिकास्तु-श्रीअजितस्वामिपितुर्जितशत्रोर्मुक्तिगमनमाचक्षते, अनुयोगद्वारादौ तथैव भणनात् । यदाह श्रीहेमसूरिः-

" राजा बाहुबलिः सूर्य-यशाः सोमयशा अपि ।
अन्येऽप्यनेकशः केऽपि, शिवं केऽपि दिवं ययुः ॥ १ ॥
जितशत्रुः शिवं प्राप, सुमित्रस्त्रिदिवं गतः ॥ "

इति योगशास्त्रे, त्रिषष्टिचरितेऽपि च ।

तथा सुविधिप्रभृतीनामष्टौ च पितरः सनत्कुमारे तृतीयदेवलोके । तथा कुन्थुप्रमुखाणामष्टौ पितरो माहेन्द्रे चतुर्थदेवलोके गता बोद्धव्याः । प्रव० १२ द्वार ।

(१०२) पूर्वप्रवृत्तिकालः-

पुव्वपवित्ति जिणाणं, असंखकालो इहासि जा कुंथू ।
पासं जा संखिज्जो, वरिससहस्सं तु वीरस्स ॥ ३२१ ॥

ऋषभाऽऽदीनां पूर्वप्रवृत्तिकाल एवम्-ऋषभादारभ्य कुन्थुजिनं यावत् असंख्यातकालमासीत् पूर्वप्रवृत्तिः । अरजिनादारभ्य पार्श्वनाथपर्यन्तं संख्यातकालः पूर्वप्रवृत्तिः । वीरस्य सहस्रवर्षपर्यन्तं पूर्वप्रवृत्तिरासीत् । सत्त० १६२ द्वार ।

पूर्वविच्छेदकालः तम्-

एसेव छेयकालो, नवरं वीरस्स वीससमसहस्सा ।

पासस्स नत्थि सो वा, सेससुयपावित्ति जा तित्थं ॥३२८॥

एवमेव पूर्वरीत्या छेदकालोऽपि ज्ञेयः । श्रीऋषभस्यासंख्यातकालं यावत्पूर्वव्युच्छेदः । एवं कुन्थुजिनं यावद् ज्ञेयम् । ततोऽरजिनस्य संख्यातकालं यावत् पूर्वव्युच्छेदः । एवं पार्श्वनाथं यावद् ज्ञेयम् । नवरं वीरस्य विंशतिवर्षसहस्राणि पूर्वविच्छेदः । श्रीपार्श्वनाथस्य स पूर्वविच्छेदकालो वा नास्ति । अत्र विकल्पः केषाञ्चिदाचार्याणां मतमाश्रित्यावसेयः । शेषश्रुतप्रवृत्तिः यावत्तीर्थम् । अयमर्थः-यावद् यस्य तीर्थङ्करस्य तीर्थं तावत्कालं पूर्वव्यतिरिक्ता श्रुतप्रवृत्तिरिति गाथार्थः । सत्त० १६३ द्वार ।

(१०३) पूर्वभवनिरूपणम्-

(ऋषभस्याष्टौ पूर्वभवाः ' उसह ' शब्दे द्वितीयभागे ११३३ पृष्ठे कथिताः)

चन्द्रप्रभस्य सप्त भवाः-

सिरिवम्मनिवो सोह-म्मसुरवरो अजियसेणचक्की य ।
अच्चुयपहु पउमनिवो, य वेजयंते य चंदपहो ॥ २३ ॥

प्रथमे भवे श्रीवर्मनामा राजा १ । द्वितीयभवे सौधर्मदेवलोके देवः २ । तृतीयभवेऽजितसेननामा चक्रवर्ती ३ । तुर्यभवे अच्युतेन्द्रः ४ । पञ्चमभवे पद्मनामा नृपः ५ । षष्ठभवे द्वितीयानुत्तरविमाने वैजयन्ते देवो जातः ६ । सप्तमभवे चन्द्रप्रभनाम्नाऽष्टमतीर्थपः ७ ।

शान्तिनाथस्य द्वादश भवाः-

सिरिसेणो अजिनंदिय,जुयल सुरा अमियतेयसिरिविजया ।
पाणय बल हरि तो हरि, नरए खयरऽच्चुए दो वि ॥२४॥
वज्जाउह सहसाउह, पिउमुय गेविज्ज तइए नवमे वा ।
मेहरहदढरहा तो, सव्वट्ठे संति गणहारी ॥ २५ ॥

प्रथमभवे-श्रीषेणो राजाऽभूत, तस्याभिनन्दिता राज्ञी १। (जुयल त्ति) द्वितीयभवे उत्तरकुरुक्षेत्रे द्वावपि युगलिनौ जातौ २। (सुर त्ति) तृतीये सौधर्मकल्पे देवः ३। (अमियतेय सिरिविजय त्ति) तुर्यभवे जिनजीवोऽमिततेजोनामा विद्याधरो जातः, प्रियाजीवः श्रीविजयो राजा जातः ४। (पाणय त्ति) पञ्चमे प्राणतनाम्नि दशमे देवलोके द्वावपि देवौ जातौ ५। (बलहरि त्ति) षष्ठभवेऽस्मिन् जम्बूद्वीपपूर्वविदेहमध्यस्थे रमणीयाख्ये विजये सुभगायां नगर्यां जिनजीवो बलभद्रो जातः। प्रियाजीवो वासुदेवो जातः ६। (तो इति) ततः हरिर्नरके गतः। ततो नरकादुद्धृत्य (खयर त्ति) खचरौ द्वावपि विद्याधरौ,संजमं लात्वा सप्तमे भवे अच्युते गतौ ७ ॥२४॥ (वज्जाउह त्ति) ततोऽष्टमभवे जिनजीवो वज्रायुधराजा जातः, स्त्रीजीवः तस्य सहस्रायुधनामा पुत्रो जातः ८। (गेविज्ज त्ति) ततो नवमे ग्रैवेयके द्वावपि देवौ जातौ । मतान्तरे-तृतीये ग्रैवेयके देवौ जातौ ९। (मेहरह त्ति) दशमभवे ततश्च्युतौ तस्मिन् जम्बूद्वीपे प्राग्विदेहविभूषणे पुष्कलावतीविजये पुण्डरीकिण्यां नगर्यां जिनजीवो मेघरथः, प्रियाजीवो दृढरथः, एवं द्वावपि भ्रातरौ जातौ १०। (सव्वट्ठे त्ति) एकादशभवे ततो द्वावपि भ्रातरौ संयमं लात्वा सम्यक्संयमं प्रपाल्य सर्वार्थसिद्धे विमाने देवौ सम्भूतौ ११। (संतिगणहारि त्ति) द्वादशे भवे भगवान् शान्तिनाथः, पूर्वभवप्रियाजीवो सर्वार्थसिद्धविमानात् च्युत्वा भगवतः पुत्रत्वेन जातः, भगवतः चक्रवर्तित्वे सेनानीरभूत्, ततः पश्चात् संजमं लात्वाऽऽद्यगणधरो जातः १२।

मुनिसुव्रतस्य नव भवाः-

सिवकेउ सुहम्मसुरे, कुबेरदत्त तियकप्पि वज्जकुंभन्नओ ।
बंभे सिरिवम्मनिवो, अवराई सुव्वओ नवमे ॥ २६ ॥

प्रथमभवे शिवकेतुनामा राजा १। द्वितीयभवे सौधर्मे देवः २। तृतीयभवे कुबेरदत्तनामा नृपः ३। तुर्यभवे तृतीयकल्पे सनत्कुमारे देवः ४। पञ्चमभवे वज्रकुम्भनामा राजा ५। षष्ठे भवे ब्रह्मनाम्नि पञ्चमदेवलोके देवो जातः ६। सप्तमभवे श्रीवर्मराजा जातः ७। अष्टमेऽपराजितनाम्नि तुर्यानुत्तरे विमाने देवः ८। नवमे भवे मुनिसुव्रतजिनः ९।

नेमिनाथस्य नव भवाः-

धणधणवइ सोहम्मे, चित्तगई खेयरो य रयणवई ।
माहिंदे अवराइय, पीइमई आरणे तत्तो ॥ २७ ॥
सुपइट्ठो संखो वा, जसमइ भज्जाऽवराइयविमाणे ।
नेमिजिणो राईमइ, नवमभवे दो वि सिद्धा य ॥ २८ ॥

प्रथमभवे-धननामा राजाऽभूत्, तस्य धनवती राज्ञी १। द्वितीये भवे सौधर्मे कल्पे द्वावपि देवौ जातौ २। तृतीयभवे चित्रगतिनामा विद्याधरो, राज्ञीजीवो रत्नवती प्रिया ३। तुर्यभवे द्वावपि माहेन्द्रे देवलोके देवौ जातौ ४। पञ्चमभवे अपराजितो राजा, प्रीतिमती राज्ञी ५। षष्ठे भवे आरणदेवलोके द्वावपि देवौ जातौ ६ ॥ २७ ॥ सप्तमभवे सुप्रतिष्ठः; मतान्तरे-शङ्खनामा राजा बभूव; धनवतीजीवो यशोमती भार्या जाता ७। अष्टमभवे अपराजितनाम्नि तुर्यानुत्तरविमाने देवौ जातौ ८। नवमभवे भगवान् श्रीनेमिजिनः, पत्नीजीवः राजीमती जाता ९। तदनन्तरं द्वावपि सिद्धौ मोक्षं गतौ ॥ २८ ॥

पार्श्वस्य दश भवाः-

कमढमरुभूइजाया, कुक्कुडअहि हत्थि नरए सहसारे ।
सप्प खयरिंद नारए, अच्चुयसुर सवर नरनाहो ॥२९॥
नारए गेविज्जसुरो, सीहो निवई य नरय पाणयगे ।
कंठो विप्पो पासो, संजाया दो वि दसमभवे ॥ ३० ॥

प्रथमे भवे-कमठमरुभूतिनामानौ भ्रातरौ जातौ,तत्र मरुभूतिनामा भगवज्जीवः १। द्वितीयभवे कमठजीवः कुर्कुटाहिर्जातः, जिनजीवो हस्तिर्जातः २। तृतीयभवे कमठो नरके गतः,जिनजीवः सहस्रारेऽष्टमदेवलोके गतः ३। चतुर्थभवे कमठजीवः सर्पो जातः, जिनजीवो विद्याधरेन्द्रोऽभूत् ४। पञ्चमभवे कमठजीवो नैरयिको जातः, जिनजीवोऽच्युते देवो जातः ५। षष्ठभवे कमठजीवः शवरः भिल्लोऽजनि, जिनजीवो नरनाथो बभूव ६ ॥ २९ ॥ सप्तमभवे कमठजीवो नरके गतः, जिनजीवो ग्रैवेयके सुरो जातः ७। अष्टमभवे कमठजीवः सिंहो जातः,पार्श्वजीवो नृपतिर्जातः ८। नवमे भवे कमठजीवो नरके नारको जातः,पार्श्वजीवः प्राणतनाम्नि दशमे देवलोके देवो जातः ९। दशमे भवे कमठजीवः कपर्दनामा विप्रोऽभूत्, मरुभूतिजीवः पार्श्वनाथनामा त्रयोविंशतितमो जिनो जातः१०। एवं सन्तौ द्वावपि दशमभवे ॥३०॥सत्त०१द्वार।

(वीरस्य सप्तविंशतिभवाः " वीर " शब्दे वक्ष्यन्ते)

सप्तत्रिंशतस्थाने वीरस्याष्टाविंशतिभवा निरूपिताः,तत्र देवानन्दोदरात् २७ सप्तविंशतिः, त्रिशलोदरादष्टाविंशतितमः ।

शेषजिनानां भवाः-

सत्तट्ठभिमे भणिया, पयडभवा तेसि सेसयाणं च ।

तइयभवदीवपमुहं, नायव्वं वक्खमाणाओ ॥ ३४ ॥

सप्तजिनानामिमे भणिताः प्रकटभवाः, तेभ्यः सप्तजिनेभ्यः शेषाणामनुक्तभवानां सप्तदशजिनानां तृतीयभवद्वीपप्रभृति ज्ञेयं वक्ष्यमाणाद् ग्रन्थात् । अयं भावः-शेषजिनानां त्रयो भवा अधिकाराद् ज्ञेयाः । तथा पूर्वभवद्वीपक्षेत्रविजयाऽऽदिकथनेन, पूर्वभवनामकथनेन च प्रथमभवो ज्ञेयः १, पूर्वभवदेवलोककथनेन च द्वितीयो भवो ज्ञेयः २, तृतीयस्तु जिनभवः ३, इति सर्वेषां जिनानां पूर्वभवा उक्ताः । सप्त० ३ द्वार । ('मल्ली' शब्दे मल्लिनाथस्य त्रयो भवा वक्ष्यन्ते)

(१०४) अथ पूर्वभवगुरवः सर्वेषां जिनानां प्रतिपाद्यन्ते--

वयसेणो अरिदमणो, संभंतो विमलवाहणो य तहा ।
सीमंधर पिहियासव, अरिदमण जुगंधर गुरू य ॥ ४७ ॥
सव्वजगाणंदगुरू, संथाहो वज्जदत्त वयनाहो ।
तह सव्वगुत्तनामे, चित्तरहो विमलवाहणओ ॥ ४८ ॥
घणरह संवर तह सा-हुसंवरो तह य होइ वरधम्मो ।
तह य सुनंदो नंदो, अइजस दामोदरो य पुट्ठिलओ ४९

वज्रसेनः १ । अरिदमनः २ । संभ्रान्तः ३ । विमलवाहनः४ । सीमन्धरः ५ । पिहिताश्रवः ६ । अरिदमनः ७ । युगन्धरः ८ । सर्वजगदानन्दः ९ । संस्तावः १० । वज्रदत्तः ११ । वज्रनाभः १२ । सर्वगुप्तः १३ । चित्ररथः १४ । विमलवाहनकः १५ । घनरथः १६ । संवरः १७ । साधुसंवरः १८ । तथा च भवति वरधर्मः १९ । सुनन्दः २० । नन्दः २१ । अतियशाः २२ । दामोदरः २३ । पोट्टिलकः २४ । सप्त० ६ द्वार ।

पूर्वभवायुः-

धम्मस्स मज्झिमाऊ, सेसाणुक्कोसयं तमिमं । (५६)
तित्तीसं तित्तीसं, गुणतीसं दुसु तितीस इगतीसं ।
अमवीसं तित्तीसं, गुणवीसं वीस बावीसं ॥ ५७ ॥
वीसऽट्ठारस वीसं, वत्तीस कमेण पंचसु तितीसं ।
वीस तितीसं वीसं, वीसऽयरा पुव्वनवआऊ ॥ ५८ ॥

धर्मनाथस्य मध्यमाऽऽयुः । शेषजिनानामुत्कृष्टकमेव तदिदं वक्ष्यमाणम् ॥ ५६ ॥ त्रयस्त्रिंशत्सागराणि १। त्रयस्त्रिंशत्सागराणि २। एकोनत्रिंशत् साग० ३। द्वयोः-त्रयस्त्रिंशत्साग०४। त्रयस्त्रिंशत्साग०५। एकत्रिंशत्साग० ६। अष्टाविंशतिःसाग०७। त्रयस्त्रिंशत्साग० ८। एकोनविंशतिःसाग० ९। विंशतिः साग० १०। द्वाविंशतिः साग० ११ ॥५७॥ विंशतिः साग० १२। अष्टादश सागर० १३। विंशतिः साग० १४। द्वात्रिंशत्साग० १५। क्रमेण पञ्चसु-त्रयस्त्रिंशत् साग० १६। त्रयस्त्रिंशत् साग० १७। त्रयस्त्रिंशत् साग० १८। त्रयस्त्रिंशत् साग० १९। त्रयस्त्रिंशत्साग० २०। विंशतिः साग० २१। त्रयस्त्रिंशत साग० २२। विंशतिः साग० २३। विंशतिः सागराणि २४। इति जिनानां पूर्वभवायुः। सप्त० १३ द्वार ।

पूर्वभवक्षेत्राणि--

बारस पुव्वविदेहे, तिन्नि कमा जरह एरवएँ भरहे ।
पुव्वविदेहे तिन्नि य, मल्लिऽरविदेहे पण भरहे ॥ ३६ ॥
मज्झिमसेरुनगाओ, धायइपुक्खरगयाइँ जरहाइं ।
खित्ताइँ पुव्वखंमे, खंडवियारो न जंबुमि ॥ ३७ ॥

ऋषभाऽऽद्याः द्वादश जिनाः पूर्वमहाविदेहे जाताः १२ त्रीणि क्रमात्-भरते १३, ऐरवते १४, पुनः भरते १५ ज्ञेयाः । शान्तिः १६, कुन्थुः १७, अरः १८, एते त्रयोऽपि जिना पूर्वमहाविदेहे ज्ञेयाः । मल्लिः पश्चिममहाविदेहे १९ । मुनिसुव्रतः २०, नमिः २१, नेमिः २२, पार्श्वः २३, वर्द्धमानः २४, एते पञ्चापि भरते ज्ञेयाः । मध्यममेरुः सुदर्शननामा, तस्मात् धातकीखण्डभरताऽऽदीनि पुष्करार्द्धभरताऽऽदीनि च क्षेत्राणि पूर्वखण्डे । अत्रायं भावः-धातकीखण्डः, पुष्करार्द्धद्वीपश्च इषुकारगिरिभ्यां विभक्तौ स्तः तेनोभयोरपि द्वौ द्वौ खण्डौ भवतः, एकः पूर्वखण्डोऽपरः पश्चिमखण्डश्च । ततोऽत्र यानि तीर्थकृतां पूर्वभवक्षेत्राणि भरताऽऽदीनि तानि सर्वाण्यपि पूर्वखण्डसंबन्धीनि, न तु पश्चिमखण्डसम्बन्धीनीति । ननु तर्हि जम्बूद्वीपगतक्षेत्राणि किंखण्डसंबन्धीनीत्याह-खण्डविचारो जम्बूद्वीपे नास्ति, तत्र कस्यापि भाजकस्यानावादिति । सप्त० ३ द्वार ।

पूर्वभवक्षेत्रादिशः-

विमलो धम्मो मुणिसु-व्वयाइ पण आसि मेरुदाहिणओ ।
मेरुत्तरओऽणंतो, सीओयादाहिणे मल्ली ॥ ३८ ॥
सीयाए उत्तरओ, जसहसुमइसुविहिसंतिकुंथुजिणा ।
सेसा दस दाहिणओ, इय पुव्वभवम्मि खित्तादिसा ॥ ३९ ॥

विमलः, धर्मश्चैतौ द्वौ; मुनिसुव्रतः, नमिः, नेमिः, पार्श्वः, वर्द्धमानः, एवं च पञ्च जिनाः, एते सर्वे सप्त जिना मेरुतो दक्षिणत आसन् । अनन्तोऽनन्तजिज्जिनः ८ मेरोरुत्तरत आसीत् । सीतोदानद्या दक्षिणपार्श्वे श्रीमल्लिजिनः ९ । सीतानद्या उत्तरतः ऋषभः १०, सुमतिः ११, सुविधिः १२, शान्तिः १३, कुन्थुः १४, एते जिनाः समुत्पन्नाः पूर्वभवे । शेषाः स्थिता ये दश जिनास्ते दक्षिणस्यां दिशि जाताः । इति सर्वेषां जिनानां पूर्वभवक्षेत्रदिशः । सप्त० ५ द्वार ।

पूर्वभवजिनहेतुः-

पढमचरिमेहिँ पुट्ठा, जिणहेऊ वीस ते य इमे ॥ (५०)

प्रथमः-ऋषभः, चरमो-वीरः, ताभ्यां स्पृष्टा जिनहेतवो विंशतिः, यैर्हेतुभिः जिनो भवति । ते च इमे वक्ष्यमाणा भवेयुः । सप्त० १० द्वार । आ० क० ।

तानेव हेतूनाह-

अरिहंतसिद्धपवयण-गुरुथेरबहुस्सुए तवस्सीसु ।
वच्छल्लया य एसिं, अभिक्खनाणोवओगे अ ॥ ३९ ॥

अत्र तिस्रो गाथाः तत्र प्रथमगाथायामष्टौ कारणान्युक्तानि, द्वितीयायां नव, तृतीयायां त्रीणि । तत्र प्रथमगाथाव्याख्या-अशोकाऽऽद्यष्टमहाप्रातिहार्याऽऽदिरूपां पूजामर्हन्तीत्यर्हन्तस्तीर्थकराः, अपगतसकलकर्माशाः परमसुखिन एकान्ते कृतकृत्याः सिद्धाः, प्रवचनं द्वादशाङ्गं, तदुपयोगानन्यत्वात् संघो वा प्रवचनम्, गृणन्ति यथावस्थितशास्त्रार्थमिति गुरवो धर्मोपदेशाऽऽदिदातारः, स्थविरा जातिश्रुतपर्यायभेदभिन्नाः । तत्र जातिस्थविराः-वर्षषष्टिप्रमाणाः । श्रुतस्थविराः--समवायाङ्गधारिणः। पर्यायस्थविराः-विंशतिवर्षव्रतपर्यायाः । बहु प्रभूतं श्रुतं येषां ते बहुश्रुताः, बहुश्रुतत्वमापेक्षिकं प्रतिपत्तव्यम् । श्रुतं च त्रिधा-सूत्रतः, अर्थतः, उभयतश्च । तत्र सूत्रधरेभ्योऽर्थधराः प्रधानाः, तेभ्योऽप्युभयधराः प्रधाना इति । विचित्रमनशनाऽऽदिभेदभिन्नं तपो विद्यते येषां ते तपस्विनः सामान्यसाधवः। अर्हन्तश्च सिद्धाश्च प्रवचनं च

गुरवश्च स्थविराश्च बहुश्रुताश्च तपस्विनश्च अर्हत्सिद्धप्रवचनगुरुस्थविरबहुश्रुततपस्विनः । सूत्रे च "बहुस्सुए" इत्यत्र एकारः प्राकृतत्वाद्वचनविपरिणामिकः । तेषु । (पसिं ति) प्राकृतत्वात्सप्तम्यर्थे षष्ठी । तत एतेषु सप्तसु स्थानेषु वत्सलभावो वत्सलता अनुरागः ७, यथाऽवस्थितगुणोत्कीर्तनं तदनुरूपोपचारलक्षणात्तीर्थकरनामकर्मबन्धकारणमिति शेषः । तथा-अभीक्ष्णमनवरतं ज्ञानोपयोगो ज्ञाने व्याप्रियमाणता ८। इदमष्टमं कारणम् ॥ ३१२ ॥

दंसणविणए आव-स्सए अ सीलव्वए निरइयारो ।
खणलवतवचियाए, वेयावच्चे समाही य ॥ ३१३ ॥

द्वितीयगाथाव्याख्या-दर्शनं सम्यक्त्वं, विनयो ज्ञानाऽऽदिविनयः । स च प्रागुक्तो वक्ष्यमाणो वा, दर्शनं च विनयश्च दर्शनविनयम्, समाहारद्वन्द्वः; तस्मिन् । आवश्यकमवश्यकर्त्तव्यं प्रतिक्रमणाऽऽदि; तस्मिन् । शीलानि च व्रतानि च शीलव्रतम्, अत्रापि समाहारद्वन्द्वः । तस्मिन् । तत्र शीलान्युत्तरगुणाः, व्रतानि मूलगुणाः । एतेषु निरतिचारः सन्, तीर्थकरनामकर्म बध्नातीति क्रियायोगः । एतावता पञ्च कारणान्युक्तानि । तथा-क्षणलवे तपसि त्यागे वैयावृत्ये च समाधिस्तीर्थकरनामकर्मबन्धकारणम् । तत्र क्षणलवग्रहणमशेषकालविशेषोपलक्षणम्, क्षणलवाऽऽदिषु कालविशेषेषु निरन्तरं संवेगभावनातो ध्यानाऽऽसेवनतश्च समाधिः क्षणलवसमाधिः । तथा-तपसि बाह्याऽऽभ्यन्तरभेदभिन्ने यथाशक्ति निरन्तरं प्रवृत्तिस्तपःसमाधिः । त्यागो द्विधा-द्रव्यत्यागः, भावत्यागश्च । द्रव्यत्यागो नाम-आहारोपधिशय्याऽऽदीनामप्रायोग्याणां परित्यागः, प्रायोग्याणां च यतिजनेभ्यो दानम् । भावत्यागः-क्रोधाऽऽदीनां विवेकः, ज्ञानाऽऽदीनां च यतिजनेभ्यो वितरणम् । एतस्मिन् द्विविधेऽपि त्यागे सूत्रानतिक्रमेण यथाशक्ति निरन्तरं प्रवृत्तिस्त्यागसमाधिः । वैयावृत्यं दशविधम् । तद्यथा-आचार्यवैयावृत्यम् १, उपाध्यायवैयावृत्यम् २, स्थविरवैयावृत्यम् ३, तपस्विवैयावृत्यम् ४, ग्लानवैयावृत्यम् ५, शैक्षकवैयावृत्यम् ६, साधर्मिकवैयावृत्यम् ७, कुलवैयावृत्यम् ८, गणवैयावृत्यम् ९, सङ्घवैयावृत्यं चेति १० । एकैक त्रयोदशविधम् । तद्यथा-भक्तदानम् १, पानदानम् २, आसनप्रदानम् ३, उपकरणप्रत्युप्रेक्षा ४, पादप्रमार्जनम् ५, वस्त्रप्रदानम् ६, मेषजप्रदानम् ७, अध्वनि साहाय्यम् ८, दुष्टस्तेनाऽऽदिभ्यो रक्षणम् ९, वशतौ प्रविशतां दण्डकग्रहणम् १०, कायिकामात्रकसमर्पणम् ११, संज्ञामात्रकसमर्पणम् १२, श्लेष्ममात्रकसमर्पणं चेति १३ । एतेषु वैयावृत्यभेदेषु यथाशक्ति निरन्तरं प्रवृत्तिर्वैयावृत्यसमाधिः ।

अप्पुव्वनाणगहणे, सुयभत्ती पवयणे पहावणया ।
एएहिँ कारणेहिं, तित्थयरत्तं लहइ जीवो ॥ ३१४ ॥

तृतीयगाथाव्याख्या-अपूर्वस्य पूर्वस्य ज्ञानस्य निरन्तरं ग्रहणमपूर्वज्ञानग्रहणमष्टादशं तीर्थकरनामकर्मबन्धकारणम् । एकोनविंशतितमं श्रुतभक्तिः श्रुतविषयं बहुमानम् । विंशतितमं प्रवचने प्रभावना यथाशक्ति प्रवचनार्थोपदेशदानाऽऽदिरूपा । एभिरनन्तरोक्तैः कारणैस्तीर्थकरत्वं लभते जीवः ।

एतानि च कानिचित् कारणानि सूत्रकार एव स्वयं व्याचष्टे-

संघो पवयणमित्थं, गुरुणो धम्मोवएसयाईया ।
सुत्तत्थोभयधारी, बहुस्सुया हुंति विक्खाया ॥ ३१५ ॥
जाईसुयपरियाए, पडुच्च थेरो तिहा जहक्कमेणं ।
सट्ठीवरिसो समवा–यधारओ वीसवरिसो य ॥ ३१६ ॥
भत्ती पूआ वण्ण–प्पयडण वज्जणमवण्णवायस्स ।
आसायणपरिहारो, अरिहंताईण वच्छल्लं ॥ ३१७ ॥
नाणुवओगो भिक्खं, दंसणमुड्डी अ विणयमुड्डी अ ।
आवस्सयजोएसुं, सीलव्वएसुं निरइयारो ॥ ३१८ ॥
संवेगभावणाज्जा–ण सेवणं खणलवाइकालेसु ।
तवकरणं जइजणसं–विभागकरसंजहसमाही ॥ ३१९ ॥
वेयावच्चं दसहा, गुरुमाईणं समाहिजणणं च ।
किरियादारेण तहा, अपुव्वनाणस्स गहणं तु ॥ ३२० ॥
आगमबहुमाणो वि य, तित्थस्स पभावणं जहासत्ती ।
एएहिँ कारणेहिं, तित्थयरत्तं समज्जिणई ॥ ३२१ ॥

"संघो पवयणं" इत्यादि गाथासप्तकं, व्याख्यातार्थं चैतत्, नवरं स्थविरबहुश्रुतयोर्गाथाऽनुलोम्याद्व्यतिक्रमनिर्देशः । तथा-तृतीय (३१७) गाथायां भक्तिरन्तरो बहुमानविशेषः, पूजा यथौचित्येन पुष्पफलाऽऽहारवस्त्राऽऽदिनिरुपचारः, वर्णस्य श्लाघायाः प्रकटनं प्रकाशनं, वर्जनं परिहरणमवर्णवादस्य अश्लाघायाः, आशातनाया वक्ष्यमाणायाः परिहारो वर्जनम् । एतदर्हदादीनां सप्तानां वात्सल्यं वत्सलता । तथा षष्ठ (३२०) गाथायां वैयावृत्यं प्रक्तदानाऽऽदिक्रियाद्वारेण गुर्वादीनां समाधिजननम् । तत्पुनर्दशधा पूर्वोक्तप्रकारेण । यद्वा-शीलव्रताभ्यामेकमेव कारणं कृत्वा समाधिरिति जिनमेव तीर्थकरगोत्रबन्धस्थानं विवक्ष्यते । ततो वैयावृत्यं दशधा गुर्वादीनां, तथा तेषामेव क्रियाद्वारेण समाधिजननं कार्यकरणद्वारेण स्वस्थताऽऽपादनमिति । तथा-ऋषभनाथेन वर्द्धमानस्वामिना च पूर्वभवे एतान्यनन्तरोक्तानि सर्वाण्यपि स्थानान्यासेवितानि, मध्यमेषु पुनरजितस्वामिप्रभृतिषु द्वाविंशतितीर्थकरेषु केनाप्येकं, केनापि त्रीणि, यावत्केनाऽपि सर्वाण्यपि स्थानानि स्पृष्टानीति । एतच्च तीर्थकरनामकर्म मनुष्यगतावेव वर्तमानः पुरुषः स्त्री नपुंसको वा तीर्थकरभवात् पृष्ठतस्तृतीयभवं प्राप्य बद्धुमारभते । आह-तीर्थकरनामकर्मणो जघन्यत उत्कर्षतश्च बन्धस्थितिरन्तःसागरोपमकोटाकोटीप्रमाणा, ततः कथमुक्तं तीर्थकरभवात् प्राक् तृतीयभवे बध्यत इति ? नैष दोषः । द्विविधो हि बन्धः-निकाचनारूपः, अनिकाचनारूपश्च । तत्र अनिकाचनारूपस्तृतीयभवात् प्राक् सुतरामपि भवति, जघन्योऽप्यन्तःसागरोपमकोटाकोटीप्रमाणत्वात् । निकाचनारूपस्तु तीर्थकरभवात् प्राक् तृतीयभवे एव, "तं च कहं वेइज्जइ, अणिलाए धम्मदेसणाऽऽदीहिं । वज्झइ तं तु भयवओ, इय भव्वो सक्कइत्ता णं" ॥१॥ इति वचनप्रामाण्यात् । तत्र निकाचितमबन्ध्यफलम्, इतरत्तु उभयथाऽपि, निकाचनारूपश्च बन्धस्तृतीयभवाद्वारभ्य तावत्प्रवर्त्तते यावत्तीर्थकरभवे अपूर्वकरणस्य संख्येयभागाः, तत ऊर्द्धं व्यवच्छेदः, केवलज्ञानोत्पत्तौ च अष्टमहाप्रातिहार्याऽऽदिरूपे सुरेन्द्रकृते पूजोपचारे सति सदेवमनुजासुरायां परिषदि ग्लानिपरिहारेण धर्मदेशनया श्रुतचारित्ररूपधर्मप्ररूपणलक्षणया चतुस्त्रिंशता देहसौगन्ध्यादिभिरतिशयैः, पञ्चत्रिंशता वचनातिशयैस्तद्वेद्यत इति । प्रव० १० द्वार ।

पूर्वभवद्वीपाः--

जंबूधायइपुक्खर-दीवा चउ चउ जिणाण पुव्वभवे ।
धायइ विमलाइ तिगे, जंबू संतिप्पमुहनवगे ॥ ३५ ॥

ऋषभाऽऽदिचतुर्णां जिनानां पूर्वभवे जम्बूद्वीप आसीत् । सुमत्यादीनां चतुर्णां जिनानां पूर्वभवे धातकीखण्ड आसीत् । सुविध्यादिचतुर्णां जिनानां पूर्वभवे पुष्करद्वीप आसीत् १२ । विमलाऽऽदीनां त्रयाणां जिनानां पूर्वभवे धातकीखण्डद्वीप आसीत् १५ । शान्त्यादिनवजिनानां पूर्वभवे जम्बूद्वीप असीत् २४ । इति पूर्वभवद्वीपाः । सत्त० २ द्वार ।

पूर्वभवनामानि--

एएसिं चउव्वीसाए तित्थगराणं चउव्वीसं पुव्वत्तवया णामधेया होत्था । तं जहा-

" पढमेऽत्थ वइरणाभे, विमले तह विमलवाहणे चेव ।
तत्तो य धम्मसीहे, सुमित्त तह धम्ममित्ते य ॥११॥
सुंदरबाहू तह दी-हबाहु जुगबाहु लद्धबाहू य ।
दिन्ने य इंददत्ते, सुंदर माहिंदए चेव ॥१२॥
सीहरहे मेहरहे, रुप्पी अ सुदंसणे य बोधव्वा ।
तत्तो य नंदणे खलु, सीहगिरी चेव वीस इमे ॥१३॥
अदीणसत्तु संखे, सुदंसणे नंदणे य बोधव्वे ।
इमिसे ओसप्पिणिए, तित्थकराणं तु पुव्वभवा" ।१४।

जिनानां पूर्वभवनामानि क्रमेण यथा-वज्रनाभः १ । विमलः २ । विमलवाहनः ३ । धर्मसिंहः ४ । सुमित्रः ५ । धर्ममित्रः ६। सुन्दरबाहुः ७ । दीर्घबाहुः ८ । युगबाहुः ९ । लब्धबाहुः १० । दिन्नः ११ । इन्द्रदत्तः १२ । सुन्दरः १३ । माहेन्द्रः १४ । सिंहरथः १५ । मेघरथः १६ । रूपी १७ । सुदर्शनः १८ । नन्दनः १९ । सिंहगिरिः २० । अदीनशत्रुः २१ । शङ्खः २२ । सुदर्शनः २३ । नन्दनः २४ । पूर्वभवे जिनानामेतानि नामानि बभूवुरिति । स० । सत्त० ।

पाठान्तरे-वज्रनाभः १ । विमलवाहनः २ । विपुलबलः ३ । महाबलः ४ । अतिबलः ५ । अपराजितः ६ । नन्दिषेणः ७ । पद्मः ८ । महापद्मः ९ । पुनरपि पद्मः १० । नलनीगुल्मः ११ । पद्मोत्तरः १२ । पद्मसेनः १३ । पद्मरथः १४ । अतिदृढरथः १५ । मेघरथः १६ । सिंहावहः १७ । धनपतिः १८ । वैश्रवणः १९ । श्रीधर्मा २० । सिद्धार्थः २१ । सुप्रतिष्ठः २२ । आनन्दः २३ । नन्दनः २४ ।

पूर्वभवनगर्यः-

पुंडरिगिणी सुसीमा, सुन्नापुरी रयणसंचया नेया ।
चउगतिगम्मि महापुरि, रिट्ठा तह भद्दिलपुरं च ॥ ४२ ॥
पुंमरिगिणि खग्गिपुरी, तहा सुसीमा य वीयसोगा य ।
चंपा तह कोसंबी, रायगिहाऽउज्झ अहिछत्ता ॥४३॥

चतुष्कत्रिके एतानि नगरीनामानि ज्ञेयानि । तथा च-ऋषभः १, सुमतिः ५, सुविधिः ९, एते त्रयो जिनाः पुष्करीकिण्यां पूर्वभवे जाताः। अजितः २, पद्मप्रभः ६, शीतलः १०, एते त्रयो जिनाः सुसीमायां जाताः । संभवः ३, सुपार्श्वः ७, श्रेयांसः ११, एते त्रयो जिनाः शुभापुर्यां जाताः। अभिनन्दनः ४, चन्द्रप्रभः ८, वासुपूज्यः १२, एते जिनास्त्रयो रत्नसंचयायां जाताः। विमलः १३ महापुर्याम् । अनन्तजिनः १४ रिष्टनगर्याम् । धर्मः १५ भद्दिलपुरे जातः । शान्तिः १६ पुण्डरीकिण्यां जातः । कुन्थुजिनः १७ खड्गिपुर्याम् । अरजिनः १८ सुसीमायां पुर्याम् । मल्लिजिनः १९ वीतशोकायाम् । मुनिसुव्रतः २० चम्पायाम् । नमिः २१ कौशाम्ब्याम् । नेमिजिनः २२ राजगृहे । पार्श्वजिनः २३ अयोध्यायाम् । वीरः २४ अहिच्छत्रानगर्यां पूर्वभवे जातः । सत्त० ६ द्वार ।

पूर्वभवराज्यम-

जंबुदीवे णं दीवे इमीसे ओसप्पिणीए तेवीसं तित्थंकरा पुव्वे मंमलिरायाणो होत्था । तं जहा-अजित संभव अभिणंदण०जाव पासो वद्धमाणो य । उसभे णं अरहा कोसलिए पुव्वभवे चक्कवट्टी होत्था । स० २३ सम० ।

पूर्वभवविजयाः-

पुक्खलवइ य वच्छा, रमणिज्जा मंगलावई कमसो ।
नेआ जिणचउगतिगे, जिणतियगे खित्तनामाओ ॥४०॥
पुक्खलवइ आवत्तो, वच्छा सलिलावई जिणचउक्के ।
मुणिसुव्वयाइपणगे, विजया खित्ताण नामेणं ॥ ४१ ॥

जिनानां चतुष्कत्रिके क्रमश एते विजया ज्ञेयाः । यथा पुष्कलावतीविजयः-प्रथमे, पञ्चमे, नवमे । वच्छाविजयो--द्वितीये, षष्टे, दशमे । रमणीयाख्यविजयः-तृतीये, सप्तमे, एकादशे । मङ्गलावतीविजयः-चतुर्थे, अष्टमे, द्वादशे । एवं द्वादशजिनानां विजयाः कथिताः । (जिणतियगे खित्तनामाओ त्ति) जिनत्रिके-विमलः १३ अनन्तः १४ धर्मश्चेति १५ त्रिके क्षेत्रनामतो विजया ज्ञेयाः । तेषां विजयाभावात्तत्स्थाने भरतैरावतभरतरूपाणि पूर्वोक्तानि क्षेत्राण्येव ज्ञेयानीति भाव इति गाथार्थः ॥ ४० ॥ ततः शान्तिः कुन्थुररो मल्लिश्चेतिरूपे जिनचतुष्के क्रमेण पुष्कलावत्याद्या विजयाः । यथा-पुष्कलावतीविजयः षोडशजिने १६ । आवर्त्तविजयः सप्तदशे जिने १७ । वच्छाविजयोऽष्टादशे जिने १८ । सलिलावतीविजय एकोनविंशतितमे जिने १९ । (मुणिसुव्वयाइपणगे त्ति) मुनिसुव्रताऽऽदिपञ्चके-मुनिसुव्रतो नमिर्नेमिः पार्श्वो वीरश्चेतिरूपे (विजया खित्ताण नामेणं ति) क्षेत्रनाम्ना विजया ज्ञेयाः । एतेषां पञ्चानामपि भरतक्षेत्रसम्भवेन विजयाभावात्तत्स्थाने क्षेत्राणामेव नामानि ज्ञेयानीति भावः ॥ ४१ ॥ सत्त० ५ द्वार ।

ऋषभः १, सुमतिः ५, सुविधिः ९, एतेषां पूर्वभवे पुष्कलावतीविजयः । अजितः २, पद्मप्रभः ६, शीतलः १०, एतेषां वच्छाविजयः । संभवः ३, सुपार्श्वः ७, श्रेयांसः ११, एतेषां रमणीयाख्यविजयः । अभिनन्दनः ४, चन्द्रप्रभः ८, वासुपूज्यः १२, एतेषां पूर्वभवे मङ्गलावतीविजयः । विमलः १३, अनन्तः १४, धर्मः १५, एतेषां क्षेत्रनामतो विजया ज्ञेयाः, तेषां विजयाभावात्, तत्स्थाने भरतैरावतरूपाणि पूर्वोक्तानि क्षेत्राण्येव ज्ञेयानि । शान्तिजिनः १६ पुष्कलावतीविजये । आवर्तविजये कुन्थुजिनः १७ । अरजिनः १८ वच्छाविजये । मल्लिजिनः सलिलावतीविजये १९ । मुनिसुव्रतः २०, नमिः २१, नेमिः २२, पार्श्वः २३, वीरः २४, एतेषां क्षेत्रनाम्ना विजया ज्ञेयाः, भरतक्षेत्रे विजयाभावात् तत्स्थाने क्षेत्राणामेव नामानीति ।

पूर्वभवस्वर्गतः-

सव्वट्ठं तह विजयं, सत्तमगेविज्जयं दुसु जयंतं ।
नवमं च गेवि-ज्जयं तओ वेजयंतं च ॥ ५४ ॥
आणय पाणय अच्चुय, पाणय सहसार पाणयं विजयं ।
तिसु सव्वट्ठ जयंतं, अवराइय पाणयं चेव ॥ ५५ ॥
अवराइय पाणयगं, पाणयगमिमे य पुव्वभवसग्गा (५६)

सर्वार्थसिद्धनामकं विमानमृषभजिने १ । एवं सर्वत्र जिननामपूर्वकं योज्यम् । तथा विजयं विमानम् २ । सप्तमग्रैवेयकम् ३ । द्वयोः-जयन्तम् ४, जयन्तम् ५ । नवमग्रैवेयकम् ६ । षष्ठग्रैवेयकम् ७ । वैजयन्तम् । ८ ॥ ५४ ॥ आनतः ९ । प्राणतः १० । अच्युतः ११ । प्राणतः १२ । सहस्रारः १३ । पुनः प्राणतः १४ । विजयमनुत्तरविमानम् १५ । त्रिषु जिनेषु सर्वार्थसिद्धम् १६,सर्वार्थसिद्धम् १७,सर्वार्थसिद्धम् १८। जयन्तं विमानम् १९। अपराजितविमानम् २० । प्राणतदेवलोकः २१ ॥५५॥ अपराजितविमानम् २२। प्राणतनामा दशमदेवलोकः २३। प्राणतकः २४। एते जिनानां पूर्वभवस्वर्गा ज्ञेयाः ॥ सत्त० १२ द्वार ।

पूर्वभवसूत्राणि-

जंबुद्दीवे णं दीवे इमीसे णं उस्सप्पिणीए तेवीसं तित्थगरा पुव्वभवे एक्कारसंगिणो होत्था । तं जहा-अजित संभव अभिणंदण सुमई० जाव पासो वद्धमाणो य ।
उसभे णं अरहा कोसलिए चोद्दसपुव्वी होत्था । स० २३ सम० ।

तत्र श्रुतलाभद्वारमाह-

पढमस्स वारसंगं, सेसाणिक्कारसंगमुयलंभो ॥

प्रथमस्य भगवत ऋषभस्वामिनः पूर्वभवे श्रुतलाभः परिपूर्णं द्वादशाङ्गम् । अवशेषाणामजितस्वामिप्रभृतीनामेकादशाङ्गानि । यस्य च यावान् पूर्वभवे श्रुतलाभः, तस्य तावान् तीर्थकरजन्मन्यपि अनुवर्त्तते । आ० म० १ अ० १ खण्ड ।

(१०५) फणकारणानि, फणानप्याह-

इग पण नव य सुपासे, पासे फण तिन्नि सग इगार कमा ।
फणिसिज्जासुविणाओ, फणिंदजत्तीएँ नऽन्नेसु ॥१२९॥

(इग पण नव य सुपासे त्ति) एकः, पञ्च, नव च फणाः सुपार्श्वे सप्तमजिने, (पासे फण तिन्नि सग इगार त्ति) पार्श्वनाथे फणास्त्रयः ३, सप्त ७, एकादश च (कम त्ति) क्रमात् । (फणिसिज्जासुविणाउ त्ति) फणिशय्यास्वप्नात् श्रीसुपार्श्वे जिने फणाः, यतो गर्भस्थे भगवति जननी एकफणे पञ्चफणे नवफणेऽपि च नागतल्पे स्वप्नमध्ये स्वां सुतां ददर्श ।

यत उक्तं श्रीहेमाऽऽचार्यकृतसुपार्श्वचरित्रे-

" सुतामेकफणे पञ्च-फणे नवफणेऽपि च ।
नागतल्पे ददर्श स्वां, देवी गर्भे प्रवर्द्धिनि ॥ १ ॥
पृष्ट्या देव्या तदा स्वप्ने, दृष्टं तादृग् महोरगम् ।
शक्रोऽपि चक्रे भगव-न्मूर्द्धि च्छत्रमिवापरम् ॥ २ ॥
तदादि चाऽत्सवे-सरणेष्वपरेष्वपि ।
नाग एकफणः पञ्च-फणो नवफणोऽथवा ॥ ३ ॥ " इत्यादि ।

(फणिंदजत्तीएँ इति) फणीन्द्रभक्त्या श्रीपार्श्वनाथे । यतः फणीन्द्रो धरणः श्रीपार्श्वे पूर्वभवोपकारित्वादतीव भक्तिमानिति कारणात् फणा भवन्ति । (नन्नेसि ति) अन्येषां द्वाविंशतिजिनानां न भवन्ति । इति गाथार्थः ॥ १२९ ॥ सत्त० ४३ द्वार ।

फलदायकाः-

आरुग्गं बोहिलाभं, समाहिवरमुत्तमं च मे दिंतु ।
किं णु हु णिदाणमेतं, ... ॥

णु इति वितर्के, किमिदं निदाणं कीरति ? । उच्यते-आसा एत्थ नवति । तं जधा-(भासा असच्चमोसा गाधा) सा असच्चामोसा दुवालसविहा । तत्थ जा जायणी सा एसा संसारविमोक्खत्थं भन्नति । "ण दु खीणपेज्जदोसा, दिंति समाधिं व बोधिं वा । " आह-जदि न पसीदंति, न वा देंति, तो किं नमस्कारो कीरति ? । उच्यते-जधा अम्मा न तूसति, न वा देति, तह वि जो सीतपरिगतो सो अतियति, सो य सकज्जं निप्फाएति; एवं ते वि खीणरागदोसमोहा न किंचि वि देंति, न वा तूसंति, जो पुण पणमति,सो अत्थितमत्थं लभति । उक्तं च-"चन्दं दट्ठा यथा तोयं," इति श्लोकः। अतियत्नजंतेहिं ते वि आरोग्गादीया लाभा लब्भंति, जम्हा एतेसिं एते गुणा, तेण परमा भत्ती कातव्वा।" आ० चू० २ अ० । (बहुस्पृष्टकर्म ' लोगसार ' शब्दे वक्ष्यते)

(१०६) अथ बलवर्णनम-

निवईहिँ बला वलिणो,कोमिमिलुक्खेवसत्तिणो हरिणो ।
तदुगुणबला चक्की, जिणा अपरिमियबला सव्वे ॥१२८॥
हरिसंसयच्छेयत्थं, वीरेण पयासियं बलं नियगं ।
मेरुगिरिकंपणेणं, हेउअभावा न सेसेहिं ॥१३०॥

(निवईहिँ बला वलिणो त्ति) नृपतिभ्यो १ बला बलदेवा बलिनो बलिष्ठाः २। " निवईहिँ " इत्यत्र प्राकृतत्वात्पञ्चम्यर्थे तृतीया । (कोमिमिलुक्खेवसत्तिणो हरिणो त्ति) कोटिशिलोत्पाटनशक्तिमन्तो हरयो वासुदेवाः ३ । (तदुगुणबला चक्कि त्ति) तत्तस्माद्वासुदेवबलाद् द्विगुणबलाश्चक्रिणः चक्रवर्त्तिनः ४। (जिणा अपरिमिअबला सव्वे त्ति) जिनाः सर्वेऽपि अपरिमितबलाः, अनन्तबला इत्यर्थः । अत्र चक्रयादीनां बलप्रमाणं प्रसङ्गात् कथितमिति गाथार्थः । १२९ । (हरिसंसयच्छेयत्थं ति) इन्द्रसंशयच्छेदनार्थम् । (वीरेण पयासियं बलं नियगं ति) श्रीवीरेण प्रकटितं बलं निजकम् । केन प्रकटितम् ?,मेरुपर्वतकम्पनेन । (हेउअभावा न सेसेहिं ति) हेत्वभावाद् न शेषैः शेषजिनैः प्रकटितं, यतः किमपि बलप्रकटने हेतुर्नाभूत्, अतो न प्रकाशितमिति गाथार्थः ॥ १३० ॥ सत्त० ४७ द्वार ।

प्रथमान्तिमयोस्तीर्थकरयोः शरीरमाने भिन्नत्वं, बले च भिन्नत्वं नास्ति, तत्कथम् ?, इति प्रश्ने, उत्तरम्-प्रथमान्तिमजिनयोः शरीरमानभेदेऽपि न बले भेदः । " अपरिमियबला जिणवरिंदा " इत्यागमप्रामाण्यादविशेषेणाऽनन्तबलत्वमवसीयते । १ प्र० ही० २ प्रका० ।

(१०७) अथ जिनभक्तानां राज्ञां नामान्याह-

नरहसगरमियसेणा, य मित्तविरिओ य सत्तविरिओ य ।
तह अजियसेणराया, दाणविरिय महवराया य ॥१२०॥
जुद्धविरिय सीमंधर, तिविट्ठविट्ठू दुविट्ठ अ सयंभू ।

पुरिसुत्तमविण्हू पुरि-ससीह कोणालयनिवो य ॥२२१॥
निवइकुबेर सुभूमा-ऽजिय विजयमहो य चक्किहरिसेणो।
कण्हो पसेण सेणिय,जिणाण जिणभत्तरायाणो॥२२२॥
बित्तीइ सहुबारस, लक्खे पीईइँ दिंति कोडीओ।
चक्की कणयं हरिणो, रययं निवई सहस्सलक्खे ॥२२३॥
भत्तिविहवाणुरूवं, अन्ने वि य दिंति इब्भमाईया।
सोऊण जिणाऽऽगमणं, निउत्तमनिउत्तएसुं वा ॥२२४॥

(भरहसगरमियसेणा य) ऋषभशासने भक्तनृपो भरतः १। एवं सर्वत्र जिननामपूर्वकं भक्तनृपनामानि वाच्यानि। सगरः २। मृगसेनश्च ३। (मित्तविरिओ य सच्चविरिओ य) मित्रवीर्यश्च ४। सत्यवीर्यश्च ५। (तह अजियसेणराया) तथाऽजितसेनो राजा ६। (दाणविरिअ मघवराया य) दानवीर्यः ७। मघवराजा ८ चेति गाथार्थः ॥ २२० ॥ (जुद्धविरिअ सीमंधर त्ति) युद्धवीर्यः ९। सीमन्धरः १०। (तिविट्ठविण्हू दुविट्ठ अ सयंभू) त्रिपृष्ठविष्णुः ११। द्विपृष्ठश्च १२। स्वयंभूः वासुदेवः १३। (पुरिसुत्तमविण्हू पुरिससीह त्ति) पुरुषोत्तमः वासुदेवः १४। पुरुषसिंहः वासुदेवः १५। (कोणालयनिवो य) कोणालकनृपश्च १६। इति गाथार्थः ॥ २२१ ॥ (निवइकुबेरसुभूमा) कुबेरनामा नृपतिः १७। सुभूमनामा १८। (अजियविजयमहो य चक्किहरिसेणो) अजितः १९। विजयमहश्च २०। चक्किहरिषेणः २१। (कण्हो पसेण सेणिय त्ति) कृष्णः २२। प्रसेनजित् २३। श्रेणिकः २४। (जिणाण जिणभत्तरायाणो) जिनानामतिजिनभक्ता राजानो भवन्तीति गाथार्थः ॥ २२२ ॥ (बित्तीइ सहुबारस लक्खे पीईइ दिंति कोडीओ) सार्द्धद्वादशलक्षाणि वृष्ट्या ददति, प्रीत्या सार्द्धद्वादशकोटीर्ददति। (चक्की कणयं) चक्रिणः एतावत्कनकं ददति। (हरिणो रययं) वासुदेवा एतावत् रजतं ददति। (निवई सहसलक्खे) नृपतयः सामान्यराजानः सहस्राणि लक्षाणि च क्रमेण वृष्ट्या प्रीत्या च ददतीति गाथार्थः ॥ २२३ ॥ (भत्तिविहवाणुरूवं) भक्तिविभवानुरूपम्। (अन्ने वि य दिंति इब्भमाईया) अन्येऽपि ददति इभ्यश्रेष्ठिसेनापत्यादयः। (सोऊण जिणाऽऽगमणं) श्रुत्वा जिनागमनं जिनानामागमनं (निउत्तमनिउत्तएसुं वा) मकारस्यालाक्षणिकत्वाद् नियुक्तपुरुषेषु वा, अनियुक्तपुरुषेषु वा। इति गाथार्थः ॥ २२४ ॥ सत्त० १०७ द्वार।

(१०७) मनःपर्यवज्ञानिनः-

.....,सव्वे मणणाणि एगलक्खा य।
पणयालीससहस्सा, पंचसया इगनवइअहिया ॥२२५॥

सर्वेषां तीर्थकृतामेकीकृताः सन्तः मनःपर्यवज्ञानिन एकलक्षाश्च (पणयालीससहस्सा) पञ्चचत्वारिंशत्सहस्राणि (पंच सया इगनवइअहिया) एकनवत्यधिकपञ्चशतानि १४-५४९१, सर्वेषां जिनानां मनःपर्यवज्ञानिसंख्या। सत्त० १७ द्वार।

बारससहस्स तिण्हं, सयसट्ठा सत्त पंच य दिवड्ढं।
एगदस सहु छस्सय, दस सहसा चउसया सट्ठा ।३२७।
दससहसा तिन्नि सया,नव दिवड सया य अट्ठसहसा य।
पंचसय सत्तसहसा, सुविहिजिणे सीयले चेव ॥३२८॥
छसहस्स दोएहमित्तो, पंच सहस्सा य पंच य सयाइं।
पंचसहस्सा चउरो,सहस्स सय पंच यऽज्जहिया ॥३२९॥
चउरो सहस्स तिन्नि य, तिन्नेव सया हवंति चालीसा।
सहसट्ठगं पंचसया, इगवन्ना अरजिणिंदस्स ॥ ३६० ॥
सत्तरसयाइ पन्ना, पंच दस सया य वार सय सट्ठी।
सहसो सय अट्ठऽट्ठम, पंचेव सया उ वीरस्स ॥३६१॥

" बारससहस्स " इत्यादिगाथापञ्चकम्। त्रयाणामृषभाजितसंभवनाथानां तीर्थकृतां द्वादश द्वादश मनःपर्यवज्ञानिसहस्राणि, परमाऽऽदिजिनस्य सार्द्धसप्तशताधिकानि; अजितस्य पञ्चशताधिकानि, शंभवजिनस्य सार्द्धशताधिकानि। तथा श्रीअभिनन्दनस्य मनःपर्यवज्ञानिनामेकादश सहस्राणि सार्द्धषट्शताधिकानि। श्रीसुमतेर्दशसहस्राणि सार्द्धचतुःशताधिकानि। श्रीपद्मप्रभस्य दशसहस्राणि शतत्रयाधिकानि। श्रीसुपार्श्वस्य नव सहस्राणि सार्द्धैकशताधिकानि। श्रीचन्द्रप्रभस्य अष्टौ सहस्राणि। श्रीसुविधिजिनस्य सप्तसहस्राणि पञ्चशताधिकानि। शीतलेऽप्येतावन्त एव। श्रेयांसजिनस्य,श्रीवासुपूज्यजिनस्य च षट् षट् सहस्राणि। (इत्तो त्ति) इतोऽनन्तरं विमलजिनस्य पञ्च सहस्राणि पञ्चशताधिकानि। अनन्तजिनस्य पञ्चसहस्राणि। श्रीधर्मस्य चत्वारि सहस्राणि पञ्चशताधिकानि। श्रीशान्तिजिनस्य चत्वारि सहस्राणि। श्रीकुन्थोस्त्रीणि सहस्राणि चत्वारिंशदधिकशतत्रयाधिकानि। श्रीअरजिनस्य सहस्रत्रिकमेकपञ्चाशदधिकपञ्चशताऽभ्यधिकम्। श्रीमल्लेः सप्तदशशतानि पञ्चाशदधिकानि। श्रीमुनिसुव्रतस्य पञ्चदशशतानि। श्रीनमिजिनस्य द्वादशशतानि षष्ट्यधिकानि। श्रीनेमेरेकं सहस्रम्। श्रीपार्श्वजिनस्य शतान्यर्द्धाष्टमानि, सार्द्धानि सप्त शतानीत्यर्थः। श्रीवीरजिनस्य च पञ्चैव शतानीति। प्रव० २२ द्वार।

(महाव्रतानि पञ्च प्रथमान्तिमतीर्थकृतोः, चत्वारि मध्यमानां द्वाविंशतेरिति 'गोयमकेसिज्ज' शब्दे तृतीयभागे ९६० पृष्ठे स्पष्टीकृतम्)

(१०८) तीर्थंकरमातृनामानि-

जम्बुद्दीवे णं दीवे भारहे वासे इमीसे ओसप्पिणीए चउवीसं तित्थगराणं मायरो होत्था। तं जहा-

"मरुदेवि विजय सेणा, सिद्धत्था मंगला सुसीमा य।
पुहवी लक्खण रामा, नंदा विण्हू जया सामा ॥३२२॥
सुजसा सुव्वय अइरा, सिरिया देवी पभावई पउमा।
वप्पा सिवा य वामा,तिसला देवी य जिणमाया।३२३"सं०।

भगवत ऋषभस्वामिनो माता मरुदेवी। अजितस्वामिनो विजया। शंभवनाथस्य सेना। अभिनन्दनस्य सिद्धार्था। सुमतिनाथस्य मङ्गला। पद्मप्रभस्य सुसीमा। सुपार्श्वस्य पृथिवी। चन्द्रप्रभस्य लक्ष्मणा। सुविधिस्वामिनो रामा। शीतलस्य नन्दा। श्रेयांसस्य विष्णुः। वासुपूज्यस्य जया। विमलस्य श्यामा। अनन्तजिनस्य सुयशाः। धर्मनाथस्य सुव्रता। शान्तिनाथस्य अचिरा। कुन्थुनाथस्य श्रीः। अरस्वामिनो देवी। मल्लिजिनस्य प्रभावती। मुनिसुव्रतस्य पद्मा। नमिनाथस्य वप्रा। अरिष्टनेमेः शिवा। पार्श्वनाथस्य वामा। वर्द्धमानस्वामिनस्त्रिशला। प्रव० ११ द्वार।

तीर्थकरमातृगतिः—

अट्ठण्हं जणणीओ, तित्थयराणं तु हुंति सिद्धाओ ।
अट्ठ य सणंकुमारे, माहिंदे अट्ठ बोधव्वा ॥ ३२७ ॥

अष्टानां तीर्थकृतामृषभाऽऽदीनां चन्द्रप्रभान्तानां जनन्यो मातरो नवन्ति सिद्धाः, तदनु सुविध्यादीनां शान्तिनाथपर्यन्तानामष्टौ जनन्यः सनत्कुमारे तृतीये देवलोके गताः, तथा कुन्थुप्रभृतीनां श्रीमहावीरान्तानामष्टौ जनन्यो माहेन्द्रचतुर्थदेवलोके गता बोद्धव्या इति । प्रव० १२ द्वार ।

(११०) मोक्षाऽऽसनम्—

वीरोसहनेमीणं, पलियंकं सेसयाण उस्सग्गो ।
पलियंकासणमाणं, सदेहमाणा तिगुणूणं ॥ ३१६ ॥

वीरः १, ऋषभः २, नेमिः ३, एतेषां जिनानां पर्यङ्काऽऽसनम् । शेषजिनानामुत्सर्ग आसनम्, मोक्षगमने इति शेषः । पर्यङ्काऽऽसनमानं तु-स्वदेहमानात् तृतीयभागोनं यदा क्रियते, तदा पर्यङ्काऽऽसनमानं भवतीति । सत्त० १५१ द्वार ।

मोक्षस्थानानि—

अट्ठावयचंपुज्जय—पावासम्मेयसेलसिहरेसु ।
उसभ वसुपुज्ज नेमी, वीरो सेसा य सिद्धिगया ॥

अष्टापदचम्पोर्जयन्तपापासम्मेतशैलशिखरेषु यथाक्रममृषभो वासुपूज्योऽरिष्टनेमिर्वीरो भगवान्, शेषाश्च तीर्थकृतः सिद्धिं गताः । अष्टापदे ऋषभस्वामी सिद्धिमगमत् । चम्पायां वासुपूज्यः । ऊर्जयन्तेऽरिष्टनेमिः । भगवान्महावीरः पापायाम् । शेषा अजितस्वामिप्रभृतयः सम्मेतशैलशिखरे इति । आ० म० १ अ० १ खण्ड । प्रव० । पञ्चा० ।

(मोक्षतपः) अधुनाऽन्तक्रियाद्वारावसरः। सा चान्तक्रिया निर्वाणलक्षणा, सा कस्य केन तपसा क्व जाता किंयत्परिवृतस्य चेत्येतदभिधित्सुराह—

निव्वाणमंतकिरिया, सा चोद्दसमेण पढमनाहस्स ।
सेसाण मासिएणं, वीरजिणिंदस्स छट्ठेणं ॥

सा च निर्वाणलक्षणा अन्तक्रिया प्रथमनाथस्याऽऽदितीर्थकृतश्चतुर्दशकेन षष्ठिरुपवासैरभूत् । शेषाणामजितस्वामिप्रभृतीनां पार्श्वनाथपर्यन्तानां द्वाविंशतेस्तीर्थकृतां मासिकेन तपसा, मासोपवासेनेत्यर्थः; अन्तक्रियाऽभवत् । भगवतो वीरजिनेन्द्रस्य पुनः षष्ठेन-द्वाभ्यामुपवासाभ्याम् । आ० म० १ अ० १ खण्ड ।

मोक्षनक्षत्राण्याह—

अजिई मिगसिर अद्दा, पुस्स पुणव्वसु य चित्त अणुराहा ।
जिट्ठा मूलं पुव्वा—साढा धणिवुत्तराजहा ॥ ३११ ॥
रेवइ रेवइ पुस्सो, भरणी कत्तिय य रेवई भरणी ।
सवणऽस्सिणि चित्त विसा-हा साइ जिणमोक्खणक्खत्ता ३१२

ऋषभस्वामिजिनक्षत्रे निर्वाणम् १ । एवं सर्वत्र । मृगशिरः २ । आर्द्रा ३ । पुष्यः ४ । पुनर्वसु ५ । चित्रा ६ । अनुराधा ७ । ज्येष्ठा ८ । मूलम् ९ । पूर्वाषाढा १० । धनिष्ठा ११ । उत्तराभाद्रपदा १२ ॥ ३११ ॥ रेवती १३ । रेवती १४ । पुष्यः १५ । भरणी १६ । कृत्तिका १७ । रेवती १८ । भरणी १९ । श्रवणः २० । अश्विनी २१ । चित्रा २२ । विशाखा २३ । स्वातिः २४ । एतानि जिनानां क्रमेण मोक्षनक्षत्राणि । सत्त० १४८ द्वार ।

मोक्षपरिवारः—

एगो जयवं वीरो, तेत्तीसाएँ सह निव्वुओ पासो ।
छत्तीसेहिं पंचहिँ, सएहिँ नेमी उ सिद्धिगतो ॥
पंचहिँ समणसएहिं, मल्ली संती उ नवसएहिं तु ।
अट्ठसएणं धम्मो, सएहिँ छहिँ वासुपुज्जजिणो ॥
सत्तसहस्साऽणंतइ—जिणस्स विमलस्स छस्सहस्साइं ।
पंचसयाइँ सुपासे, पउमाजे तिण्णि अट्ठ सया ॥
दसहिँ सहस्सेहुसभो, सेसा उ सहस्सपरिवुडा सिद्धा ।

वीरो भगवानेक एकाकी सन् निर्वृतः । त्रयस्त्रिंशता साधुभिः सह निर्वृतः पार्श्वनाथः । पञ्चभिः शतैः, षट्त्रिंशैः-षट्त्रिंशदधिकैः सह सिद्धिं गतो नेमिररिष्टनेमिः । पञ्चभिः श्रमणशतैः सह परिनिर्वृतो मल्लिस्वामी । नवभिः शतैः परिवृतः शान्तिनाथः । अष्टभिः शतैर्धर्मः । षड्भिः शतैर्वासुपूज्यजिनः सिद्धिं गतः। अनन्तजितो जिनस्य निर्वाणं गच्छतः सप्तसहस्राणि परिवारः । विमलनाथस्य षट् सहस्राणि । पञ्चशतानि सुपार्श्वनाथस्य । पद्मप्रभस्य त्रीणि अष्टोत्तराणि शतानि । दशभिः सहस्रैः परिवृत ऋषभस्वामी निर्वाणमगच्छत् । शेषास्त्वजितस्वामिप्रभृतय उक्तव्यतिरिक्ताः प्रत्येकं सहस्रपरिवृताः सिद्धाः । आ० म० १ अ० १ खण्ड । प्रव० ।

मोक्षपथः—

सुमुणिसुसावगरूवो, मुक्खपहो रयणतिगसरूवो वा ।
सव्वजिणेहिं भणिओ, ... [३२५]

सुमुनयः सुश्रावकास्तद्रूपो मोक्षपथः, रत्नत्रयस्वरूपो वा ज्ञानदर्शनचारित्ररूपो वा मोक्षपथः सर्वज्ञैः कथितः । सत्त० १६० द्वार ।

अथ जिनानां मोक्षमासाऽऽदयः कथ्यन्ते—

माहस्स किण्हतेरसि, दोसुं सियचित्तपंचमी नेया ।
वइसाहसुद्धअट्ठमि, तह चित्ते सुद्धनवमी य ॥ ३०६ ॥
कसिणा मग्गसिरंसि, फग्गुणजुद्धयसत्तमी किण्हा ।
जुद्धयसुद्धनवमी, वइसाहे बहुलबीया य ॥३०७॥
कसिणा सावणतइया, आसाढे तह य चउदसी सुद्धा ।
आसाढकसिणसत्तमि, सियपंचमि चित्तजिट्ठेसु ॥३०८॥
जिट्ठे कसिणा तेरसि, वइसाहे पक्खि मग्गसियदसमी ।
फग्गुणसुद्धदुवालसि, किण्हा नवमी य जिट्ठस्स ॥३०९॥
वइसाहअसियदसमी, आसदे सावणेऽट्ठमी सुद्धा ।
कत्तियऽमावसि सिवया—समाइभणिया जिणिंदाणं ३१०॥

(माहस्स किण्हतेरसि) माघस्य कृष्णत्रयोदशी ऋषभस्य निर्वाणे १ । एवं सर्वजिनानां नामपूर्वकं मोक्षगमनमासाऽऽदि वाच्यम् । (दोसुं सियचित्तपंचमी नेय त्ति) द्वयोरजितशंभवजिनयोः चैत्रस्य श्वेतपञ्चमी ज्ञेया २।३। (वइसाहसुद्धअट्ठमि) वैशाखमासस्य शुक्लाऽष्टमी ४। (तह चित्ते सुद्धनवमी य) तथा चैत्रे शुक्लनवमी ५ चेति गाथार्थः ॥ ३०६ ॥ (कसिणा मग्गसिरंसि) कृष्णा मार्गशीर्षमासस्यैकादशी ६। (फग्गुणभ-

दुवयसत्तमी किण्हा) फाल्गुनमासस्य कृष्णा सप्तमी ७। भाद्रपदमासस्य कृष्णा सप्तमी ८। (भद्दवयसुद्धनवमी) भाद्रपदशुद्धनवमी ए। (वइसाहे बहुलबीया य) वैशाखे कृष्णद्वितीया १० चेति गाथार्थः ३०७ ॥ (कसिणा सावणतइया) कृष्णश्रावणस्य तृतीया ११। (आसाढे तह य चउद्दसी सुद्धा) आषाढे तथा चतुर्दशी शुद्धा श्वेता १२ (आसाढकसिणसत्तमि) आषाढस्य कृष्णा सप्तमी १३। (सियपंचमि चित्तजिट्ठेसु) श्वेतपञ्चमी चैत्रे १४। जेष्ठेऽपि श्वेतपञ्चमी १५। इति गाथार्थः। ॥ ३०८॥ (जिट्ठे कसिणा तेरसि) ज्येष्ठे कृष्णा त्रयोदशी १६। (वइसाहे पडिवे मग्गसियदसमी) वैशाखे कृष्णा प्रतिपत् १७। मार्गशीर्षस्य श्वेतदशमी १८। (फग्गुणसुद्धदुवालसि) फाल्गुनशुद्धद्वादशी १९। (किण्हा नवमी य जिट्ठस्स) ज्येष्ठस्य कृष्णा नवमी २० चेति गाथार्थः॥ ३०९ ॥ (वइसाहअसियदसमी) वैशाखस्य कृष्णदशमी २१। (आसाढे सावणेऽट्ठमी सुद्धा) आषाढे शुद्धाऽष्टमी २२। श्रावणेऽपि शुद्धाऽष्टमी २३। (कत्तियऽमावसि) कार्त्तिकस्याऽमावास्या श्रीवीरस्य निर्वाणे २४। (सिवमासमाइनणिआ जिणिंदाणं ति) एवं सर्वजिनेन्द्राणां मोक्षमासाऽऽदयो भणिताः। इति गाथार्थः ॥ ३१० ॥ सत्त० १४७ द्वार।

मोक्षराशयः-

मयरो वसहो मिहुणो,दुसु ककड कन्न दुसु अली य धणू।
धणु कुंभो तिसु मीणो, ककम मेसो वसह मीणो॥३१३॥
मेसो मयरो मेसो,तिसु तुल्ल एए उ मुक्खरासीओ ।(३१४)

ऋषभजिनस्य मोक्षे मकरराशिः १। एवं सर्वजिनानां नामपूर्वं मोक्षराशयो वाच्याः। वृषः २। मिथुनम् ३। द्वयोः-कर्कटः ४, कर्कटः ५। कन्या ६। द्वयोः जिनवरयोः-अली च वृश्चिकः ७, वृश्चिकः ८। धनुः ९। धनुः १०। कुम्भः ११। त्रिषु पुनर्जिनेषु-मीनः १२, मीनः १३, मीनः १४। कर्कटः १५। मेषः १६। वृषभः १७। मीनः १८॥ ३१३ ॥ मेषः १९। मकरः २०। मेषः २१। त्रिषु जिनेषु-तुला २२, तुला २३, तुला २४। एते तु जिनानां मोक्षराशयः। सत्त० १४९ द्वार।

मोक्षविनयः-

....., पंचविहो मोक्खविणओ वि।
दंसणनाणचरित्ते, तवे य तह ओवयारिया चेव।
एसो हु मोक्खविणओ,दुहा व गिहिमुणिकिरियरूवो३२६

दर्शनम्, ज्ञानम्,चारित्राणि, तपः, उपकारिता च। एष पञ्चविधो मोक्षविनयः। द्विविधो वा मोक्षविनयः-गृहस्थक्रियारूपः, मुनिक्रियारूपश्च। सत्त० १६१ द्वार।

मोक्षवेला-

अवरण्हे सिद्धिं गया, संभवपउमाजसुविहिवसुपुज्जा।
सेसा उसहाईया, सेयंसंता उ पुव्वण्हे ॥३२१॥
धम्मअरनमीवीरा—ऽवररत्ते पुव्वरत्तए सेसा (३२२)

अपराह्णे पश्चिमप्रहरे सिद्धिं गता मोक्षं प्राप्ताः शंभवपद्मप्रभसुविधिवासुपूज्याः। शेषाः ऋषभादिश्रेयांसान्ता अष्टौ जिनाः पूर्वाह्णे सिद्धिं गताः। धर्मारनमिवीरा अपररात्रे मोक्षं गताः। शेषा अष्टौ जिनाः पूर्वरात्रे मोक्षं गताः। सत्त० १५५ द्वार।

मोक्षारकशेषकालः-

.....ऽरसेसमवि तं तु नियनियाउ विणा। (३२२)

मोक्षारकशेषमपि पूर्ववद् जन्मारकशेषवत्। परन्तु निजनिजायुर्विना अरकशेषमानं नवति। तथाहि-ऋषभस्य जन्मारकशेषं चतुरशीतिलक्षपूर्वाणि नवाशीतिपक्षाधिकानि तन्निजायुर्वा निष्क्रम्यते, तदा नवाशीतिपक्षा अवशिष्यन्ते। तत एतावत् श्रीऋषभस्य मोक्षारकशेषं भवति। एवं सर्वत्र भावना कार्या। सत्त० १५७ द्वार।

मोक्षारकाः-

पुव्वं व मोक्खअरया, ...।(३२३)

मोक्षारकः पूर्ववत्। " अरका मोक्षिज्जकालरूवे " इत्यादिना प्रोक्त इत्यर्थः। ऋषभस्य तृतीयारके मोक्षः, शेषाणां चतुर्थारके। सत्त० १५६ द्वार।

मोक्षावगाहनामानम्-

सव्वेसि सिवोगाहण-तिन्नागऊणा नियासणपमाणा ॥
(३१७)

सर्वेषां शिवगतानामवगाहना शरीरमानं तृतीयभागोना निजाऽऽसनप्रमाणात् भवति। सत्त १५२ द्वार।

(वीराऽऽद्यासनानि 'आसण' शब्दे द्वितीयभागे ४७० पृष्ठे निरूपितानि) (अवगाहना ' ओगाहणा ' शब्दे तृतीयभागे ७६ पृष्ठे निरूपिता)

(१११) अथ राज्यकालममिधित्सुराह-

तेसट्ठि पुव्वलक्खा, तिपन्न चउचत्त सहस्स छत्तीसा।
गुणतीस सहस्स इगविस,चउदस सहस्सच्छ अऊऽऊहं॥१३९॥
अजिआओ जा सुविही, पुव्वंगा ताविमेऽहिया नेया।
इग चउ अट्ठ बारस सो-ल वीस चउवीस अऊवीसा।१४०
तो सयलक्ख चु चत्तो, तो सुन्नं तीस पनर पंच तओ।
सहस पणवीस तत्तो, पाउणचउवीस इगवीसं ॥ १४१ ॥
सुन्न पनर पण तत्तो, तिसुन्न रज्जं च चक्किकालो वि।
(१४२)

(तेसट्ठि पुव्वलक्ख त्ति) पूर्वलक्षशब्दस्य दशसु योगात् त्रिषष्टिपूर्वलक्षाणि राज्यकाल ऋषभस्य १। एवं नामग्राहं सर्वत्र वाच्यम्।(तिपन्न चउ चत्त सहस्स छत्तीसा) त्रिपञ्चाशल्लक्षपूर्वाणि " अजिआओ जा सुविहीत्यादिना" वक्ष्यमाणत्वात् पूर्वाङ्गेन एकेन सहितानि २। चतुश्चत्वारिंशत्पूर्वलक्षाणि चतुःपूर्वाङ्गसहितानि ३। सार्द्धषट्त्रिंशत्पूर्वलक्षाणि अष्टपूर्वाङ्गाधिकानि ४। (गुणतीससहस्सइगविस) एकोनत्रिंशत्पूर्वलक्षाणि द्वादशपूर्वाधिकानि ५। सार्द्धैकविंशतिपूर्वलक्षाणि षोडशपूर्वाधिकानि ६। (चउदस सहस्सच्छ अऊऽऊहं) चतुर्दशपूर्वलक्षाणि विंशतिपूर्वाङ्गसहितानि ७। सार्द्धषट्पूर्वलक्षाणि चतुर्विंशतिपूर्वाङ्गसहितानि ८। अर्द्धं पूर्ववत्। कोऽर्थः?-पञ्चाशत्पूर्वसहस्राण्यष्टाविंशतिपूर्वाङ्गसहितानि ९। केवलमर्द्धपूर्वलक्षं पञ्चाशत्पूर्वसहस्राणीत्यर्थः १०। इति गाथार्थः ॥१३९॥ अथ पूर्वोक्तेषु पूर्वेषु पूर्वाङ्गप्रक्षेप्यमाह-(अजिआओ जा सुविही पुव्वंगा ताविमेऽहिया नेय त्ति) अजितजिनादारभ्य यावत् सुविधिजिनो नवमजिनो भवति, तावदिमानि वक्ष्यमाणानि पूर्वाङ्गान्यधिकानि ज्ञेयानि। तानि दर्शयति-(इग चउ अट्ठ बारस सो-ल वीस चउवीस

अडवीस त्ति) एकं १, चत्वारि २, अष्टौ ३, द्वादश ४, षोडश ५, विंशतिः ६, चतुर्विंशतिः ७, अष्टाविंशतिः ८। योजना तु प्रागेव दर्शितेति गाथार्थः ॥१४०॥ (तो सयलक्ख डुचत्त त्ति) ..... (?) ततः शून्यं राज्याभावः १२। लक्षशब्दोऽग्रेऽपि योज्यते। त्रिंशल्लक्षवर्षाणि १३। पञ्चदशवर्षलक्षाणि १४। ततः पञ्चलक्षवर्षाणि १५। (सहसपणवीस तत्तो त्ति) सहस्रशब्दस्य नमिजिनं यावद्योगः कृतः पञ्चविंशतिवर्षसहस्राणि १६। (पावणचउवीसइगवीसं ति) पादोनचतुर्विंशवर्षसहस्राणि १७ एकविंशतिवर्षसहस्राणि १८। इति गाथार्थः ॥१४१॥ (सुन्न पनर पण तत्तो) शून्यं राज्याभावः १६, पञ्चदशसहस्राणि वर्षाणाम् २०। पञ्चवर्षसहस्राणि २१। ततः (तिसुन्न रज्जं च चक्किकालो वि) त्रिस्थानेषु शून्यं राज्याभावः २२। २३। २४। राज्यं च एतावन्तं कालं जिनानाम्। सत्त० ५५ द्वार।

(११२) अथ रुद्रनामान्याह-

भीमावलि जियसत्तू, रुद्दे विस्सानले य सुपइट्ठो।
अयलो य पुंडरीओ, अजियधरो अजियनाभो य।३३७।
पेढालो तह सच्चइ, एए रुद्दा इगारसंगधरा।
तसहाजिअ सुविहाई-अडजिण सिरिवीरतित्थभवा ३३६

भीमावलिनामा रुद्रः १। जितशत्रुः २। रुद्रः ३। विश्वानलः ४। सुप्रतिष्ठः ५। अचलः ६। पुण्डरीकः ७। अजितधरः ८। अजितनाभः ९ ॥ ३३८ ॥ पेढालः १०। सत्यकिः ११। एते रुद्रा रुद्रतपःकारका महामुनय एकादशाङ्गधरा एकादशाङ्गीपाठकाः। (तसहाजिअ सुविहाई-अडजिण सिरिवीरतित्थभव त्ति) ऋषभाजितयोः सुविध्याद्यष्टजिनानां श्रीवीरस्य च तीर्थे भवाः। एवमेकादशानामपि तीर्थकृतां तीर्थेष्वेकादशापि रुद्राः। ते च ऋषभशासने भीमावलिनामा जातः १। अजितशासने जितशत्रुनामा जातः २। सुविधिशासने रुद्रनामा ३। शीतलशासने विश्वानलनामा ४। श्रेयांसशासने सुप्रतिष्ठनामा ५। वासुपूज्यशासने अचलनामा ६। विमलशासने पुण्डरीकः ७। अनन्तशासने अजितधरः ८। धर्मशासने अजितनाभः ९। श्रीशान्तिशासने पेढालः १०। वीरतीर्थे सत्यकिः ११। एते एकादश रुद्रा जाताः। सत्त० १६७ द्वार।

अथ जिनवराणां प्रसङ्गाद् गणधराऽऽदिमाएमलिकान्तानामुत्तमपुरुषाणां देवानां च रूपवर्णनमाह-

सव्वसुरा जइ रूवं, अंगुट्ठपमाणयं विउव्विज्जा।
जिणपायंगुट्ठं पइ, न सोहए तं जहिंगालो ॥ १२० ॥
गणहरआहारअणु-त्तरा य जाव णं चक्किवासुबला।
मंमलिया जा हीणा, छट्ठाणगया भवे सेसा ॥ १२१ ॥

(सव्वसुरा जइ रूवं अंगुट्ठपमाणयं विउव्विज्ज त्ति) सर्वे देवाः सम्भूय यद्येकं रूपमङ्गुष्ठप्रमाणकमङ्गुष्ठमात्रं विकुर्वेयुः। (जिणपायंगुट्ठं पइ त्ति) जिनपादाङ्गुष्ठं प्रति-जिनस्य पादौ जिनपादौ तयोरङ्गुष्ठः जिनपादाङ्गुष्ठः, तं प्रति (न सोहए तं जहिंगालो) न शोभते तद्रूपं, यथा अङ्गारो, भगवद्रूपाग्रे तदङ्गारसदृशं दृश्यते। इति गाथा ऽर्थः ॥१२०॥ (गणहरआहारअणुत्तरा य त्ति) गणधराहारकानुत्तराश्च (जाव णं चक्किवासुबल त्ति) यावद् व्यन्तरचक्रिवासुदेवबलदेवाः (मंमलिआ जा हीण त्ति) माएमलिका यावत् क्रमेण रूपेण हीना भवन्ति। यथा जिनेभ्यो गणधरा रूपेण हीनाः १। ततश्चाऽऽहारकं शरीरम् २। ततश्चानुत्तरवासिनः सुराः ३। ततो नवमाद्यूत्क्रमेण ग्रैवेयकसुराः, ततो द्वादशाद्यूत्क्रमेण कल्पवासिनः सुराः, ततो ज्योतिष्कदेवाः, ततो भवनपतिदेवाः, ततो व्यन्तरदेवा रूपेण हीनाः ४। तेभ्योऽपि चक्रिणो रूपेण हीनाः ५। ततो वासुदेवा रूपेण हीनाः ६। ततो बला बलभद्रा रूपेण हीनाः ७। ततो माएडलिका रूपेण हीनाः ८। (छट्ठाणगया भवे सेसा) शेषाः षट्स्थानगता भवेयुः। इति गाथार्थः ॥१२१॥ सत्त ४७ द्वार।

(११३) साम्प्रतं लाञ्छनान्याह-

वसह गय तुरय वानर कुंचो कमलं च सत्थिओ चंदो।
मयर सिरिवच्छ गंमय, महिस वराहो य सेणो य ॥३७१॥
वज्जं हरिणो छगलो, नंदावत्तो य कलस कुम्मो य।
नीलुप्पल संख फणी, सीहो अ जिणाण चिण्हाइं ।३८२।

वृषभः १। गजः २। तुरगः ३। वानरः ४। क्रौञ्चः ५। कमलं च ६। स्वस्तिकः ७। चन्द्रः ८। मकरः ९। श्रीवत्सः १०। गण्डकः ११। महिषः १२। वराहश्च १३। श्येनश्च १४ ॥३८१॥ वज्रम् १५। हरिणः १६। छगलकः १७। नन्द्यावर्तश्च १८। कलशः १९। कूर्मः २०। नीलोत्पलम् २१। शङ्खः २२। फणी २३। सिंहश्च २४। जिनानां नाभेयाऽऽदीनां चिह्नानि क्रमेण ज्ञातव्यानीति। प्रव० २६ द्वार।

लक्षणद्वारम्-

अट्ठुत्तरो सहस्सो, सव्वेसिं लक्खणाइं देहेसु। (१२३)

अष्टोत्तरसहस्रः-अष्टेनाधिकः सहस्रः १००८, सर्वेषां तीर्थपानां शरीरेषु लक्षणानि भवन्ति। सत्त० ४४ द्वार।

लोकान्तिकदेवैर्बोधनम्-

सव्वे वि सयंबुद्धा, लोगंतियबोहिया य जीयं ति।
(सव्वेसिं परिच्चाओ, संवच्चरियं महादाणं ॥)

सर्व एव तीर्थकृतः स्वयंबुद्धा वर्तन्ते, तथापि लोकान्तिकदेवानामियं स्थितिः-यदुत स्वयंबुद्धानपि भगवतो बोधयन्ति, ततो जीतमिति कल्प इति कृत्वा लोकान्तिकदेवैर्बोधिताः सन्तो निष्क्रामन्ति। आ० म० १ अ० १ खण्ड। आ० चू०।

अथ वस्त्रवर्णानाह-

पुरिमंतिमतित्थेसुं, ओहनिजुत्तीभणियपरिमाणं।
सियवत्थं इयराणं, वत्थुपमाणेहिं जहलद्धं ॥ २८७ ॥

(पुरिमंतिमतित्थेसुं) प्रथमजिनतीर्थे अन्तिमजिनतीर्थे च (ओहनिजुत्तीभणियपरिमाणं) ओघनिर्युक्तिसूत्रोक्तपरिमाणम् (सियवत्थं ति) सितं श्वेतं वस्त्रं ज्ञेयम्। (इयराणं वत्थुपमाणेहिं जहलद्धं ति) इतरेषां द्वाविंशतिजिनानां वर्णप्रमाणैः वस्त्रवर्णैर्यथालब्धं यथाप्राप्तम्, अनियतवर्णमनियतप्रमाणं चेत्यर्थः ॥ २८७ ॥ सत्त० १४२ द्वार।

वर्णं जिनानाम्—

पउमाभवासुपुज्जा, रत्ता ससिपुप्फदंत ससिगोरा।
सुव्वयनेमी काला, पासो मल्ली पियंगाभा ॥ ३८३ ॥
वरतवियकणयगोरा, सोलस तित्थंकरा मुणेयव्वा।
एसो वण्णविभागो, चउवीसाए जिणिंदाणं ॥ ३७४ ॥

पद्मप्रभवासुपूज्यौ जपापुष्पवद्रक्तौ । शशिपुष्पदन्तौ-चन्द्रप्रभसुविधी शशिगौरौ चन्द्रवद्गौरवर्णौ । सुव्रतनेमिनौ इन्द्रनीलमणिवत्कालौ । पार्श्वमल्लिजिनौ प्रियङ्गुवर्णौ, प्रियङ्गुः फल्लिनीतरुः,तदाभौ, नीलावित्यर्थः । वरमकृत्रिमं तापितं यत्कनकं तद्वद् गौराः शेषाः षोडश तीर्थङ्करा ज्ञातव्याः । एष वर्णविभागश्चतुर्विंशतेस्तीर्थकराणामिति । प्रव० ३० द्वार ।

दो तित्थयरा नीलुप्पलसमा वन्नेणं पन्नत्ता । तं जहा– मुणिसुव्वए चेव,अरिट्ठणेमी चेव । दो तित्थयरा पियंगुसमा वन्नेणं पन्नत्ता । तं जहा– मल्ली चेव, पासे चेव । दो तित्थयरा पउमगोरा वन्नेणं पन्नत्ता । तं जहा–पउमप्पहे चेव,वासुपुज्जे चेव । दो तित्थयरा चंदगोरा वन्नेणं पन्नत्ता । तं जहा–चंदप्पभे चेव, पुप्फदंते चेव ।

पद्मं रक्तोत्पलं तद्वद्गौरौ, रक्ताविति्यर्थः । तथा–चन्द्रगौरौ चन्द्रद्युताविति्यर्थः । शेषं सुगमम् । स्था० २ ठा० ४ उ० ।

(११४) अथ तीर्थकृतां पञ्चत्रिंशद् वाग्गुणानाह–

वयणगुणा सग सद्दे, अत्थे अमवीस मिलिय पणतीसं ।
तेहिं गुणेहिं मणुन्नं, जिणाण वयणं कमेण इमं ।।२०२।
वयणं सक्कयगंभी–रघोसउवयारुदत्तयाजुत्तं ।
पमिनायकरं दक्खि–न्नसहियमुवणीयरागं च ॥ २०३ ॥
सुमहत्थं अव्वाहय–मसंसयं तत्तनिट्ठियं सिट्ठं ।
पत्थावुचियं पडिहय–परुत्तरं हिययपीइकरं ॥ २०४ ॥
अमुसासाभिकंखं, अन्निजायं अइसिणिद्धमजरं च ।
ससलाहापरनिंदा–वज्जियमपइन्नपसरजुयं ॥ २०५ ॥
पयमक्खरपयवक्कं, मत्तपहाणं च कारगाऽजुयं ।
ठवियविसेससमुयारं, अणेगजाईविचित्तं च ॥ २०६ ॥
परमम्मविब्भमाई–विलंबवुच्छेयखेयरहियं च ।
अदुयं धम्मत्थजुयं, सलाहणिज्जं च चित्तकरं ॥२०७॥

(वयणगुणा सग सद्दे) भगवद्वचनगुणा एते वक्ष्यमाणा भवन्ति-तत्र शब्दे गुणाः सग । (अत्थे अमवीस) अर्थेऽष्टाविंशतिः । (मिलिअ पणतीसं) उभयेऽपि मिलिताः पञ्चत्रिंशत् वचनगुणा भवन्ति । (तेहिं गुणेहिं मणुन्नं) तैर्गुणैर्मनोज्ञम (जिणाण वयणं कमेण इमं)जिनानां वचनं क्रमेणेदं वक्ष्यमाणं ज्ञेयम । कोऽर्थः?- अत्र स्फुटं गुणा न वक्ष्यन्ते,किं तु तैर्विशिष्टं क्रमेण वचनं वक्ष्यतीति गाथार्थः ॥ २०२ ॥ (वयणं सक्कयगंभीरघोसउवयारुदत्तयाजुत्तं)नगवद्वचनं संस्कृताऽऽदिलक्षणयुक्तम् १,गम्भीरघोषयुक्तं गम्भीरशब्दोपेतं मेघस्येव२,उपचारयुक्तमग्राम्यमित्यर्थः३। उदात्ततायुक्तमुच्चैर्वृत्तितायुक्तम् ४। (पमिनायकरं दक्खिन्नसहियं)प्रतिनादकरं प्रतिरवोपेतम् ५,दाक्षिण्यसहितम्,सरलत्वयुक्तं न तु किञ्चिदपि वक्रम् ६ । (उवणीअरागं च) उपनीतरागं च मालवकैशिकयादिग्रामरागयुक्तम् ७। एते सप्ताऽपि शब्दापेक्षया गुणाः । इतिगाथार्थः ॥२०३॥ अथार्थविवक्षया कथ्यन्ते-(सुमहत्थं) सुष्ठु महार्थं बृहदभिधेयम् ८। (अव्वाहयं) अव्याहतं पूर्वापरवाक्यार्थाविरुद्धम् ९, (असंसयं) संशयरहितमसंदिग्धम् १०। (तत्तनिट्ठियं) तत्त्वनिष्ठितं विवक्षितवस्तुस्वरूपानुसारि ११,(सिट्ठं) शिष्टमभिमतसिद्धान्तोक्तार्थ,वक्तुः शिष्टतासूचकं वा १२। (पत्थावुचियं) प्रस्तावोचितं देशकालानुगुणम् १३।(पमिहयपरुत्तरं)निराकृतान्योत्तरं परदूषणविषयम १४(हिअयपीइकरं) हृदयप्रीतिकरमिति गाथार्थः १५ ॥२०४॥ (अमुसासाभिकंखं) मिथः साभिकाङ्क्षमन्योन्यगृहीतं परस्परेण पदानां वाक्यानां वा सापेक्षतायुक्तम् १६। (अन्निजायं) अभिज्ञातं वक्तुः प्रतिपाद्यस्य वा भूमिकाऽनुसारि १७। (अइसिणिद्धमजरं च)अतिस्निग्धमधुरं च,घृतगुडाऽऽदिवत् सुखकारि १८।(ससलाहापरनिंदावज्जिअं) स्वश्लाघापरनिन्दावर्जितमात्मोत्कर्षपरनिन्दाविप्रमुक्तम १९। (अपइन्नपसरजुयं) अप्रकीर्णप्रसरयुक्तं सुसंबद्धं सत् प्रसरणयुक्तम् । असंबद्धाधिकारत्वातिविस्तरयोरत्नावयुक्तमिति गाथार्थः २० ॥ २०५ ॥ (पयमक्खरपयवक्कं) प्रकटाक्षरपदवाक्यं वर्णाऽऽदीनां विच्छिन्नत्वयुक्तम् २१।(मत्तप्पहाणं च)सत्यप्रधानं च साहसोपेतम्२२। (कारगाइजुअं)कारकाऽऽदियुतम्,कारकवचनक्रियाऽऽदियुतं तद्विपर्यासरहितम् २३ । (ठवियविसेसं) स्थापितविशेषमारोपितविशेषं वचनान्तरापेक्षयाऽऽहितविशेषम् २४। (उआरं) उदारमभिधेयस्याऽर्थस्योच्चत्वयुतम् २५ । (अणेगजाईविचित्तं च) अनेकजातिविचित्रं ज्ञात्वा वर्णनीयं वस्तुस्वरूपवर्णनानि तत्संश्रयाद्विचित्रं२६,चः पुनरर्थे इति गाथार्थः॥२०६॥ (परमम्मविब्भमाईविलंबवुच्छेअखेअरहिअं च)परमर्मरहितं परमर्मानुद्घटनस्वरूपम्२७। विभ्रमाऽऽदिरहितं विभ्रमो वक्रमनसो भ्रान्तता,स आदिर्येषां विक्षेपाऽऽदीनां ते विभ्रमाऽऽदिमनोदोषास्तैर्विप्रमुक्तम २८। विलम्बरहितम २९। पदवाक्यवर्णाऽऽदीनां व्युच्छेदरहितं विवक्षार्थसिद्धि यावदव्यवच्छिन्नवचनप्रमेयम् ३०। खेदरहितं च अनायाससंभवम् ३१। (अदुयं) अद्भुतमत्यौत्सुक्यरहितम् ३२। (धम्मत्थजुयं) धर्मार्थयुतं धर्मार्थाभ्यामनपेतम् ३३ । (सलाहणिज्जं च) श्लाघनीयं च उत्कगुणयोगात् प्रशंसनीयम् ३४ । (चित्तकरं) चित्तकरम् उत्पादिताविच्छिन्नकौतूहलम् ३५। इति गाथार्थः ॥२०७॥ सत्त० ९८ द्वार ।

(जिनवाग्यतिशयाः 'अइसेस' शब्दे प्रथमभागे ३२ पृष्ठे दर्शिताः)

(११५) तीर्थकराणां वादिमुनिसंख्याप्रतिपादनार्थमाह–

सट्ठिसया छुवालस, महस्स वारस य चउसयऽन्नाहिया ।
वारेक्कारससहसा, दससहसा छसय पन्नासा ॥३४६॥
छन्नउई चुलसीई, बहत्तरी सट्ठि अट्ठपन्ना य ।
पन्नासा य सयाणं, सीयाला अहव वायाला ॥ ३४७ ॥
बत्तीसा बत्तीसा, अट्ठावीसा सयाण चउवीसा ।
विसहस्सा सोलसया, चउदस वारस दस सयाइं ।३४८।
अट्ठसया बच्च सया, चत्तारि सयाइं हुंति वीरम्मि ।
वाइमुणीण पमाणं, चउवीसाए जिनवराणं ॥ ३४९ ॥

" सट्ठिसया " इत्यादिगाथाचतुष्टयम । प्रथमजिनस्य वादियतीनां द्वादशसहस्राणि साऽर्धषट्शतानि, पञ्चाशदधिकैः षड्भिः शतैरधिकानीत्यर्थः। श्रीअजितजिनस्य द्वादशसहस्राणि चतुःशताधिकानि । श्रीशंभवस्य द्वादशसहस्राणि । श्रीअभिनन्दनस्य एकादशसहस्राणि । श्रीसुमतिजिनस्य दशसहस्राणि पञ्चाशदधिकषट्शताऽधिकानि "छन्नउई" इत्यादिगाथयामुत्तराऽर्धवृत्तिशतानामिति पदं सर्वत्र संबध्यते । ततः श्रीपद्मप्रभस्य वादिनां षण्णवतिः शतानाम्, कोऽर्थः?,नवसहस्राणि षट्शतैरधिकानीति।

श्रीसुपार्श्वजिनस्य चतुरशीतिः, चतुर्भिः शतैरधिका अष्टौ सहस्राणि। चन्द्रप्रभस्य षट्सप्ततिः शतानाम्,पञ्चभिः शतैराधिकानि सप्त सहस्राणीत्यर्थः । श्रीसुविधिजिनस्य षष्टिः शतानां,षट्सहस्राणीत्यर्थः । श्रीशीतलजिनस्य अष्टपञ्चाशच्छतानां, पञ्चसहस्राण्यष्टशताधिकानीत्यर्थः। श्रीश्रेयांसस्य पञ्चाशत् शतानां, पञ्च सहस्राणीत्यर्थः । श्रीवासुपूज्यस्य सप्तचत्वारिंशच्छतानि, चत्वारि सहस्राणि सप्तशताधिकानीत्यर्थः । (अहव वायालसि) अथवा मतान्तरेण-श्रीवासुपूज्यस्य द्विचत्वारिंशच्छतानि, चत्वारि सहस्राणि शतद्वयाधिकानीत्यर्थः श्रीविमलजिनस्य द्वात्रिंशच्छतानि, त्रीणि सहस्राणि शतद्वयाधिकानीत्यर्थः । श्रीअनन्तजिनस्य द्वात्रिंशच्छतानि। श्रीधर्म्मजिनस्य अष्टाविंशतिः शतानां, सहस्रद्वयमष्टशताधिकमित्यर्थः । श्रीशान्तिनाथस्य शतानां चतुर्विंशतिः, द्वे सहस्रे शतचतुष्टयाधिके इत्यर्थः । श्रीकुन्थुजिनस्य द्वे सहस्रे। श्रीअरनाथस्य षोडश शतानि,षट्शताधिकं सहस्रमित्यर्थः । श्रीमल्लिजिनस्य चतुर्दश शतानि, शतचतुष्टयाधिकं सहस्रमित्यर्थः । श्रीमुनिसुव्रतस्य द्वादश शतानि, सहस्रमेकं शतद्वयाधिकमित्यर्थः। श्रीनमिजिनस्य दश शतानि, सहस्रमित्यर्थः । श्रीनेमिजिनस्य अष्टौ शतानि। श्रीपार्श्वजिनस्य षट्शतानि। श्रीवीरजिनस्य चत्वारि शतानि भवन्ति । इति वादिमुनीनां वादसमरेषु सुरासुरैरप्यजेयानां प्रमाणं चतुर्विंशतेर्जिनवराणामिति ॥ प्रव० १६ द्वार । स्था० ।

तीर्थकरविवाहविषयः-

मल्लिं नेमिं मुत्तुं, तेसिं विवाहो य जोगफला । (१३५)

मल्लिजिनं नेमिजिनं च मुक्त्वा, तेषां द्वाविंशतिजिनानामुक्तव्यतिरिक्तानां विवाहश्च जातो भोग्यफलाद्, भोग्यफलकर्मोदयादित्यर्थः । सप्त० ५३ द्वार ।

तीर्थकृतां येषु ग्रामनगराऽदिषु विहार आसीत्तदेवाऽऽह-

मगहारायगिहाइसु, मुणओ खेत्तारिएसु विहरिंसु ।
उसभो य नेमि पासो, वीरो य अणारिएसुं पि ॥

मन्यन्ते स्म जगतः समस्तस्यापि त्रिकालावस्थामिति मुनयो भगवतस्तीर्थकृतः,ते सर्वेऽपि मगधाऽऽदिषु जनपदेषु राजगृहाऽऽदिषु नगरेषु,क्वचार्येषु आर्यक्षेत्रेषु,विहृतवन्तः। इह आर्यक्षेत्रचिन्तायां शास्त्रान्तरेषु मगधाऽऽदयो जनपदाः,राजगृहाऽऽदीनि च नगराण्युक्तानीत्यत्रापि " मगहारायगिहाइसु " इत्युक्तम्, अन्यथा ऋषभस्वामिन आदितीर्थकरत्वात्तदनुरोधेन नगरचिन्तायां विनीताऽऽदिष्वित्युच्येतेति । ऋषभस्वामी, अरिष्टनेमिः, पार्श्वनाथो, वीरश्च भगवानित्येते चत्वारस्तीर्थकृतोऽनार्येष्वपि क्षेत्रेषु विहृतवन्तः । आ० म० १ अ० १ खण्ड ।

(११६) वैक्रियकमुनयः-

वेउव्वियलद्धीणं, वीससहस्सा य सयचउऽब्भहिया ।
वीससहस्सा चउसय, इगुणीसमहस्स अट्ठसया ।३४२।
इगुणिसमहस्स अट्ठा-र चउसया सोलसहस्स अट्ठ सया ।
सतिसय पनरस चउदस,तेरस बारस सहस दससे ।३४३।
इक्कारस दस नव अ-ट्ठ सत्त ठ सहस्स एगवन्न सया ।
सत्त सहस्स सतिसया,दुन्नि य सहसा नवसयाइं ।३४४।
दुन्नि सहस्सा पंच य, सहस्स पनरस सयाइ नेमिम्मि ।
इक्कारससय पासे, सयाइं सत्तेव वीरजिणे ॥ ३४५ ॥

" वेउव्वियलद्धीणं " इत्यादिगाथाचतुष्टयम् । वैक्रियलब्धिमतां नानाविधवैक्रियरूपकरणशक्तानां मुनीनामादिजिनेन्द्रस्य विंशतिः सहस्राणि, षट्शताभ्यधिकानि । श्रीअजितजिनस्य विंशतिसहस्राणि सचतुःशतानि, शतचतुष्टयाधिकानि । श्रीशंभवजिनस्यैकोनविंशतिः सहस्राणि शताष्टकाधिकानि । श्रीअभिनन्दनस्यैकोनविंशतिः सहस्राणि । श्रीसुमतिजिनस्य चतुःशताधिकानि अष्टादश सहस्राणि । श्रीपद्मप्रभस्य षोडश सहस्राणि अष्टोत्तरशताधिकानि । श्रीसुपार्श्वजिनस्य शतत्रयाधिकानि पञ्चदश सहस्राणि । श्रीचन्द्रप्रभस्य चतुर्दश सहस्राणि । श्रीसुविधेस्त्रयोदश सहस्राणि । श्रीशीतलस्य द्वादश सहस्राणि । श्रीश्रेयांसस्यैकादश सहस्राणि । श्रीवासुपूज्यस्य दश सहस्राणि । श्रीविमलस्य नवसहस्राणि । श्रीअनन्तजिनस्याष्टौ सहस्राणि । श्रीधर्म्मजिनस्य सप्त सहस्राणि । श्रीशान्तिनाथस्य षट् सहस्राणि । श्रीकुन्थुजिनस्यैकपञ्चाशत् शतानि, पञ्चसहस्राण्येकशताधिकानीत्यर्थः । श्रीअरजिनस्य सप्त सहस्राणि त्रिभिः शतैरधिकानि । श्रीमल्लिजिनस्य द्वे सहस्रे नवशताधिके । श्रीमुनिसुव्रतस्य द्वे सहस्रे। श्रीनमिजिनस्य पञ्चसहस्राणि । श्रीनेमिजिनस्य पञ्चदश शतानि । श्रीपार्श्वजिनस्य एकादश शतानि । श्रीवीरजिनस्य शतानि सप्तेति ॥ प्रव० १८ द्वार ।

आर्याऽसंग्रहप्रमाणमृषभाऽऽदिजिनानाम्-

तिण्णेव य लक्खाइं, तिण्णि य तीसाइं तिन्नि उत्तीसा ।
तीसा य लच्च पंच य, तीसा चउरो य वीसाइं ॥
चत्तारि य तीसाइं, तिण्णि असीया य तिन्नि मित्तो य ।
वीसुत्तरं लक्खऽहियं, तिसहस्सऽहियं च लक्खं च ॥
लक्खं अट्ठ सयाणि य, बासट्ठिसहस्स चउसयसमग्गा ।
एगट्ठी लच्च सया, सट्ठिसहस्सा सया लच्च ॥
सट्ठि पणपन्न पन्ने-गचत्त चत्ता तहऽट्ठतीसं च ।
छत्तीसं च सहस्सा, अज्जाणं संगहो एसो ॥

भगवत आदितीर्थकरस्याऽऽर्यिकाणां त्रीणि लक्षाणि । अजितस्वामिनस्त्रीणि लक्षाणि, त्रिंशानि-त्रिंशत्सहस्राभ्यधिकानि । शंभवनाथस्य त्रीणि लक्षाणि षट्त्रिंशत्सहस्राभ्यधिकानि । अभिनन्दनस्य षट् लक्षाणि, त्रिंशानि-त्रिंशत्सहस्राभ्यधिकानि । सुमतिनाथस्य पञ्च लक्षाणि त्रिंशत्सहस्राधिकानि । पद्मप्रभस्य चत्वारि लक्षाणि त्रिंशतिसहस्राधिकानि । सुपार्श्वस्य चत्वारि लक्षाणि त्रिंशत्सहस्राभ्यधिकानि । चन्द्रप्रभस्वामिनस्त्रीणि लक्षाण्यशीतिसहस्रोत्तराणि । सुविधिस्वामिनस्त्रीणि परिपूर्णानि लक्षाणि । (तिन्नि मित्तो य इति) त्रिलक्षमार्यासंग्रह इति गम्यते इत्यर्थः । शीतलनाथस्य विंशत्युत्तरं विंशतिसहस्राधिकं लक्षम् । श्रेयांसस्य षट्सहस्राधिकं लक्षम् । वासुपूज्यस्य त्रिसहस्राधिकं लक्षम् । विमलनाथस्य परिपूर्णं लक्षम् । अनन्तजितो लक्षमेकमष्टौ च शतानि । धर्म्मनाथस्य द्वाषष्टिसहस्राणि चतुःशतसमग्राणि-चतुःशताभ्यधिकानि । शान्तिनाथस्य एकषष्टिः सहस्राणि षट्शतानि । कुन्थुनाथस्य षष्टिः सहस्राणि षट्शतानि । अरनाथस्य षष्टिः सहस्राणि । मल्लिस्वामिनः पञ्चपञ्चाशत्सहस्राणि । मुनिसुव्रतस्वामिनः पञ्चाशत्सहस्राणि । नमिनाथस्यैकचत्वारिंशत्सहस्राणि । अरिष्टनेमेश्चत्वारिंशत्सहस्राणि । पार्श्वनाथस्याऽष्टात्रिंशत्सहस्राणि ।

भगवतो वर्द्धमानस्वामिनः षट्त्रिंशत्सहस्राणि। एवमृषभाऽऽदीनां जिनानां यथाक्रममार्यिकासंग्रहः। आ० म० १ अ० १ खण्ड।

सर्वसंयतीनां संख्या-

चोआलीसं लक्खा, बायालसहस्स चोसयसमग्गा ।
अज्जाछक्कं एसो, अज्जाणं संगहो कमसो ॥३४१॥

चतुश्चत्वारिंशल्लक्षाणि षट्चत्वारिंशत्सहस्रैश्चतुःशताधिकैः समग्राणि पूर्णानि आर्याषट्कं च, एष आर्यिकाणां संग्रह इति। प्रव० १६ द्वार।

अथ मुनिस्वरूपम्-

पढमिअरवीरतित्थे, रिउजड–रिउपन्न–वक्कजमा (७६३)

प्रथमजिनतीर्थे मुनयः ऋजुजडाः, इतरस्मिन् मध्यमजिनतीर्थे ऋजुप्राज्ञाः, वीरतीर्थे मुनयो वक्रजडाः। सत्त० १३६ द्वार।

संयतप्रमाणम्-

चुलसीइं च सहस्सा, एगं च दुवे य तिण्णि लक्खाइं ।
तिण्णि य वीसऽहियाइं, तीसऽहियाइं च तिन्नेव ॥
तिन्नि य अट्ठाइज्जा, दुवे य एगं च सयसहस्साइं ।
चुलसीइं च सहस्सा, विसत्तरिं अट्ठसट्ठिं च ॥
छावट्ठिं चोवट्ठिं, बावट्ठिं सट्ठिमेव पन्नासा ।
चत्ता तीसा वीसा, अट्ठारस सोलस सहस्सा ॥
चोद्दस य सहस्साइं, जिणाण जइसीससंगहपमाणं ।

भगवत ऋषभस्वामिनश्चतुरशीतिसहस्राणि श्रमणानाम् । एकं लक्षम्-अजितस्य। द्वे लक्षे शम्भवनाथस्य। त्रीणि लक्षाणि अभिनन्दनस्य। सुमतेः त्रीणि लक्षाणि विंशतिसहस्राभ्यधिकानि । पद्मप्रभस्य त्रीणि लक्षाणि त्रिंशत्सहस्राधिकानि । सुपार्श्वस्य त्रीणि लक्षाणि । चन्द्रप्रभस्य अर्द्धतृतीयानि लक्षाणि। सुविधेर्द्वे लक्षे। शीतलस्य एकं लक्षम् । श्रेयांसस्य चतुरशीतिः श्रमणानां सहस्राणि । वासुपूज्यस्य द्वासप्ततिः सहस्राणि। विमलस्य अष्टषष्टिः सहस्राणि। अनन्तजिनस्य षट्षष्टिः सहस्राणि। धर्मनाथस्य चतुःषष्टिः सहस्राणि। शान्तिनाथस्य द्वाषष्टिः सहस्राणि। कुन्थुनाथस्य षष्टिः सहस्राणि। अरनाथस्य पञ्चाशत्सहस्राणि। मल्लिनाथस्य चत्वारिंशत्सहस्राणि । मुनिसुव्रतस्वामिनस्त्रिंशत्सहस्राणि। नमिस्वामिनो विंशतिः सहस्राणि। अरिष्टनेमेरष्टादश सहस्राणि। पार्श्वनाथस्य षोडश सहस्राणि। भगवतो महावीरस्य चतुर्दश सहस्राणि। एतच्चतुर्दशशिष्यसंग्रहप्रमाणं जिनानामृषभाऽऽदीनां यथाक्रममवसातव्यम्। आ० म० १ अ० १ खण्ड।

एतेषां सर्वसङ्कलनमीलनेन यद् भवति तदाह-

अट्ठावीसं लक्खा, अडयालीसं च तह सहस्साइं ।
सव्वेसिं पि जिणाणं, जईण माणं विणिद्दिट्ठं ॥३३६॥

(अट्ठावीसमित्यादि) अष्टाविंशतिर्लक्षाणि अष्टचत्वारिंशच्च तथा सहस्राणि सर्वेषामपि जिनानां संबन्धिनां यतीनां माने परिमाणं विनिर्दिष्टं विनिश्चितमनेन च ये श्रीजिनेन्द्रैर्निजकरकमलेन दीक्षितास्तेषामेवैकत्र पिण्डिततापरिमाणं,न पुनर्गणधराऽऽदिभिरपि ये दीक्षिताः,तेषामतिबहुत्वादिति। प्रव० १७ द्वार।

तीर्थकृतां संयमनिरूपणम्-

.....सं–जमो य पढमंतिमाण वुविगप्पो ।
सेसाणं सामइओ, सच्चरसंगो य सव्वेसिं ॥

संयमोऽपि सामायिकाऽऽदिरूपः प्रथमान्तिमजिनयोर्द्वैविकल्पः। इत्वरं सामायिकं, छेदोपस्थापनीयं चेत्यर्थः । शेषाणां मध्यमानां द्वाविंशतितीर्थकृतां यावत्कथिकमेवैकं सामायिकं, न शेषं छेदोपस्थापनाऽऽदि, तथाकल्पत्वात् । सप्तदशाङ्गः सप्तदशभेदः, चः पुनरर्थे । सर्वेषां तीर्थकृतामप्यसौ । ते च सप्तदश भेदा अमी-" पञ्चाश्रवाद्विरमणं, पञ्चेन्द्रियनिग्रहः कषायजयः। दण्डत्रयविरतिश्चेति संयमः सप्तदशभेदः ॥ १ ॥ " आ० म० १ अ० १ खण्ड।

(११७) इदानीं परित्यागद्वारमाह-

संवच्छरेण होही, अभिनिक्खमणं तु जिणवरिंदाणं ।
तो अत्थसंपयाणं, पवत्तए पुव्वसूरम्मि ॥

संवत्सरेण जिनवरेन्द्राणामभिनिष्क्रमणं भविष्यति, ततोऽर्थसंप्रदानमर्थस्य सम्यक् तीर्थप्रभावनाभक्त्या, अनुकम्पाभक्त्या च, न तु कीर्तिभक्त्या,प्रदानं जनेभ्यः प्रवर्तते पूर्वसूर्ये,पूर्वाह्ण इत्यर्थः।

कियत्प्रतिदिवसं दीयते ?, इत्याह—

एगा हिरण्णकोडी, अट्ठेव अणूणगा सयसहस्सा ।
सूरोदयमाईयं, दिज्जइ जा पायरासाओ ॥

एका हिरण्यस्य कोटी अष्टौ चाऽन्यूनानि परिपूर्णानि शतसहस्राणि लक्षाणि इति प्रतिदिवसं दीयते। कथं दीयते ?, इत्याह-सूर्योदय आदौ यस्य दानस्य तत्सूर्योदयाऽऽदि,क्रियाविशेषणमेतत्। सूर्योदयादारभ्य दीयते इति भावः। कियन्तं कालं यावदित्याह-प्रातराशात्-प्रातः प्रभाते अशनमाशः, प्रातराशः, तस्मात्तमभिव्याप्य, प्रातर्भोजनकालं यावदिति भावः ।

यथा दीयते तथा प्रतिपादयन्नाह-

सिंघाडगतिगचउक्क–चच्चरचउम्मुहमहापहपहेसु ।
दारेसु पुरवराणं, रत्थामुहमज्झकारेसु ॥

शृङ्गाटकं नाम-शृङ्गाटकाऽऽकृतिपथयुक्तं त्रिकोणं स्थानम्, त्रिकं यत्र रथ्यात्रयं मिलति, चतुष्कं चतुष्पथसमाहारः, चत्वरं बहुरथ्यापातस्थानम्, चतुर्मुखं यस्माच्चतसृष्वपि दिक्षु पन्थानो निस्सरन्ति, महापथो राजपथः, शेषः सामान्यः पन्थाः पथः, तत एतेषां द्वन्द्वः। तथा पुरवराणां द्वारेषु, प्रतोलीष्वित्यर्थः। तथा-रथ्यानां मुखानि-प्रवेशाः, मध्यकारा मध्य एव, कारशब्दस्य स्वार्थिकत्वात्, रथ्यामुखमध्यकाराः, तेषु।

किमित्याह-

वरवरिया घोसिज्जइ, किमिच्छियं दिज्जए बहुविहीए ।
सुरअसुरदेवदाणव–नरिंदमहियाण निक्खमणे ॥

वरं याचध्वं वरं याचध्वमित्येवं घोषणा समयपरिभाषया वरवरिकोच्यते। सा वरवरिका पूर्वं शृङ्गाटकाऽऽदिषु घोष्यते। ततः कः किमिच्छति ?-यो यदिच्छति तस्य तद्दानं समयपरिभाषयैव किमिच्छिकमुच्यते; किमिच्छिकं यथा भवति एवं दीयते। कैः,इत्याह-सुरैर्वैमानिकज्योतिष्कैरसुरैर्भवनपतिभिर्व्यन्तरैः,देवदानवनरेन्द्रैश्चेति। इन्द्रग्रहणं प्रत्येकमभिसंबध्यते-देवेन्द्रैः शक्राऽऽदिभिः, दानवेन्द्रैश्चमरेन्द्राऽऽदिभिः, नरेन्द्रैश्चक्रवर्तिप्रभृतिभिर्महितानां भगवतां तीर्थकृतां निष्क्रमणे इति।

साम्प्रतमेकैकेन तीर्थकृता किंपरिमाणं द्रव्यजातं संवत्सरेण दत्तमित्येतत्प्रतिपादयन्नाह-

तिण्णेव य कोडिसया, अट्ठासीयं ति होंति कोडीओ ।

असिइं च सयसहस्सा, एयं संवच्छरे दिन्नं ॥

त्रीण्येव कोटिशतानि, अष्टाशीतिश्च भवन्ति कोटयः, अशीतिश्च शतसहस्राणि ३८८८०००००, एतावत्प्रमाणमेकैकेन तीर्थकृता संवत्सरे दत्तम्। एतच्च प्रतिदिनदेयं त्रिभिः षष्ट्यधिकैर्वासरशतैर्गुणयित्वा परिभावनीयम्। आ०म० १ अ०१ खण्ड। ['दाण'-'महादाण' शब्देऽस्य महादानत्वं वक्ष्यते, हारिभद्राष्टके, पञ्चाशकेचाऽस्य प्रयोजनं फलं च]

(११८) आविकामानमाह-

पढमस्स पंच लक्खा, चउपन्न सहस्स तयणु पण लक्खा।
पणयालीस सहस्सा, छ लक्ख छत्तीस सहसा य॥ ३७०॥
सत्तावीस सहस्सा-ऽहिय लक्खा पंच पंच लक्खा य।
सोलससहस्सअहिया, पण लक्खा पंच ज सहस्सा।३७१।
उवरिं चउरो लक्खा, धम्मो जा उवरि सहस तेणवई।
इगनवई इगहत्तरि, अदवन अदयाल छत्तीसा॥ ३७२॥
चउवीसा चउदस ते-रसेव तत्तो तिलक्ख जा वीरो।
तउवरि तिनवइ इगासी, बिसत्तरी सयरि पन्नासा ३७३॥
अमयाला छत्तीसा, इगुणचत-ऽट्ठारसेव य सहस्सा।
सट्ठीण माणमेयं, चउवीसाए जिणवराणं॥ ३७४॥

तत्र प्रथमस्याऽऽदिजिनस्य श्राविकाणां पञ्च लक्षाणि चतुःपञ्चाशत्सहस्राधिकानि। ततश्च प्रथमतीर्थकरादनन्तरम्-अजितस्य श्राविकाणां पञ्च लक्षाणि पञ्च चत्वारिंशत्सहस्राधिकानि। श्रीशंभवस्य षट् लक्षाणि षट्त्रिंशत्सहस्राणि च। अभिनन्दनस्य सप्तविंशतिसहस्राधिकानि लक्षाणि पञ्च। सुमतिजिनस्य लक्षाणि पञ्च षोडशसहस्राधिकानि। श्रीपद्मप्रभस्य लक्षाणि पञ्च पञ्चसहस्राधिकानि। इत ऊर्ध्वं पद्मप्रभादारभ्य धर्मजिनं यावत् श्राविकाणां चत्वारि लक्षाणि। प्रत्येकमुपरि च त्रिनवत्यादीनि सहस्राणि। कोऽर्थः?-सुपार्श्वस्य श्राविकाणां लक्षचतुष्टयं त्रिनवतिसहस्राधिकम्। चन्द्रप्रभस्य लक्षचतुष्टयमेकनवतिसहस्राधिकम्। सुविधेर्लक्षचतुष्टयमेकसप्ततिसहस्राधिकम्। शीतलस्य लक्षचतुष्टयमष्टपञ्चाशत्सहस्राधिकम्। श्रेयांसस्य लक्षचतुष्टयमष्टचत्वारिंशत्सहस्राधिकम्। वासुपूज्यस्य लक्षचतुष्टयं षट्त्रिंशत्सहस्राधिकम्। विमलस्य लक्षचतुष्टयं चतुर्विंशतिसहस्राधिकम्। अनन्तस्य लक्षचतुष्टयं चतुर्दशसहस्राधिकम्। धर्मस्य लक्षचतुष्टयं त्रयोदशसहस्राधिकम्। ततः श्रीशान्तिनाथादारभ्य प्रत्येकं लक्षत्रयं श्राविकाणां यावन्महावीरम्, ततश्च त्रिनवत्यादीनि सहस्राणि। तत्र श्रीशान्तेर्लक्षत्रयं त्रिनवतिसहस्राधिकम्। कुन्थोर्लक्षत्रयमेकाशीतिसहस्राधिकम्। अरजिनस्य लक्षत्रयं द्विसप्ततिसहस्राधिकम्। मल्लेर्लक्षत्रयं सप्ततिसहस्राधिकम्। मुनिसुव्रतस्य लक्षत्रयं पञ्चाशत्सहस्राधिकम्। श्रीनमेर्लक्षत्रयमष्टचत्वारिंशत्सहस्राधिकम्। श्रीनेमेर्लक्षत्रयं षट्त्रिंशत्सहस्राधिकम्। श्रीपार्श्वस्य लक्षत्रयमेकोनचत्वारिंशत्सहस्राधिकम्। वीरजिनस्य च लक्षत्रयमष्टादशसहस्रैराधिकम्। आविकाणां मानमेतत् चतुर्विंशतितिजिनानाम्। प्रव० २५ द्वार।

सर्वसंख्या-

इगकोडी पणलक्खा, अमतीससहस्स सट्ठीओ॥३४६॥

सर्वेषां जिनानां पिण्डीकृता एका कोटिः, पञ्च लक्षाणि, अष्टत्रिंशत्सहस्राणि श्राविकाः १०५३८०००। सप्त० ११५ द्वार।

(११९) उत्कृष्टजघन्याभ्यां विचरतां तीर्थकृतां संख्यां, तथोत्कृष्टजन्याभ्यां तेषां जन्मसंख्यां चाऽऽह-

सत्तरिसयमुक्कोसं, जहन्न वीसा य दस य विहरंति।
जम्मं पइ उक्कोसं, वीस दस य हुंति हु जहन्ना॥३२७॥

सप्तत्यधिकं शतमुत्कृष्टत एककालं तीर्थकृतः समयक्षेत्रे विहरन्ति, पञ्चसु भरतेष्वेकैकस्य भावात्, ऐरवतेष्वपि पञ्चसु तावतां भावात्, पञ्चसु महाविदेहेषु प्रत्येकं द्वात्रिंशता विजयैः कलितेषु तीर्थकृतां षष्ट्यधिकशतस्य सद्भावादेतत्संख्यायाः सम्भव इति। तथा-जघन्यतो विंशतिस्तीर्थकृत एककालं विहरमाणाः प्राप्यन्ते। तथाहि-जम्बूद्वीपस्य पूर्वविदेहे शीतामहानद्या द्विभागीकृते दक्षिणोत्तरदिग्भागेनैकैकस्य सद्भावाद् द्वौ, अपरविदेहे शीतोदाया महानद्या द्विभागीकृते तथैव द्वौ जिनेन्द्रौ, मिलिताश्चत्वारः; एवमपरद्वीपद्वयसंबन्धिमहाविदेहचतुष्टयेऽपि चत्वारश्चत्वार इति पञ्चचतुष्कका विंशतिः, ऐरवतैरावतयोस्तु एकान्तसुषमाऽऽदावनाव एव। अन्ये तु सूरयो दशैव जघन्यतो विहरन्तीति मन्यन्ते, पञ्चानां महाविदेहानां पूर्वापरविदेहयोः प्रत्येकमेकैकस्य विहरतः सद्भावेन दशानामेव तीर्थकृतां प्राप्यमाणत्वात्। तथा-जन्म प्रति जन्माऽऽश्रित्योत्कृष्टत एककालं विहरमाणजिनविंशतिवद् विंशतिस्तीर्थकृतो भवन्ति। यतः सर्वेषामपि तीर्थकृतामर्धरात्रसमय एव जन्म, ततो महाविदेहेषु तीर्थकृज्जन्मसमये भरतैरावतक्षेत्रेषु दिवससद्भावेन तीर्थकृदुत्पत्त्यभावादेतावन्त एव प्राप्यन्ते। ननु महाविदेहवर्षेषु विजयेषु चतुर्ण्योऽधिकानामपि तीर्थकृतामुत्पत्तेः संभवात् कथमुत्कृष्टपदे विंशतिरेवेति?! उच्यते-इह हि मेरौ पण्डकवने चूलिकायाश्चतसृषु पूर्वाऽऽदिषु दिक्षु प्रत्येकं चतुर्योजनप्रमाणबाहल्याः पञ्चयोजनशतप्रमाणाऽऽयामा मध्यभागेऽर्द्धतृतीययोजनशतप्रमाणविष्कम्भा अर्द्धचन्द्रसंस्थानसंस्थिताः सर्वश्वेतसुवर्णमय्यश्चतस्रोऽभिषेकशिलाः, तत्र चूलिकायाः पूर्वदिग्भाविन्यां पाण्डुकम्बलशिलायां द्वे तीर्थकराभिषेकसिंहासने। तद्यथा-एकमुत्तरतः, एकं दक्षिणतः। तत्र ये शीताया महानद्या उत्तरतः कच्छाऽऽदिषु विजयेषु तीर्थकरा उपजायन्ते, ते औत्तराहे सिंहासने सुरेन्द्रैरभिषिच्यन्ते। ये पुनः शीताया महानद्या दक्षिणतो मङ्गलावतीप्रमुखेषु विजयेषूत्पद्यन्ते, ते दाक्षिणात्ये सिंहासनेऽभिषिच्यन्ते। तथा चूलिकायाः पश्चिमदिग्भाविन्यां रक्तकम्बलशिलायां द्वे सिंहासने। तद्यथा-एकमुत्तरतः, एकं दक्षिणतः। तत्र शीतोदाया महानद्या दक्षिणतः पद्माऽऽदिषु विजयेषु तीर्थकरा उत्पद्यन्ते, ते दाक्षिणात्ये सिंहासनेऽभिषिच्यन्ते। ये तु शीतोदाया महानद्या उत्तरतो गन्धिलावतीप्रमुखेषु विजयेषु जायन्ते, ते उत्तराहे सिंहासने। तथा चूलिकाया दक्षिणदिग्भाविन्यामतिपाण्डुकम्बलशिलायां ये भरतक्षेत्रसमुद्भवास्तीर्थकरास्तेऽभिषिच्यन्ते। उत्तरदिग्भाविन्यां त्वतिरक्तकम्बलशिलायामैरवतक्षेत्रसमुद्भवास्तीर्थकरास्तेऽभिषिच्यन्ते। सिंहासनानि च सर्वरत्नमयानि सर्वोपर्यपीत्येवं पञ्चधनुःशताऽऽयामविष्कम्भान्यर्द्धतृतीयधनुःशतबाहल्यानीति। ततः समधिकाभिषेकसिंहासनाभावादेव विदेहेषु चतुर्ण्योऽधिकानां तीर्थकृतामेककालमुत्पद्यभाव इति॥ जघन्यतः पुनर्दशैव एककालमुत्पद्यन्ते, पञ्चसु भरतेषु पञ्चसु चैरवतेषु प्रत्येकमेकैकस्य सद्भावात्। ऐरतैरवतेषु हि जिनजन्मसमये महाविदेहेषु दिनसद्भावान्नाधिकानामुत्पत्तिरिति। प्रव० १३-१४ द्वार।

(१२०) सर्वायुः-

चउरासीइ विसत्तरि, सट्ठी पन्नासमेव लक्खाइं ।
चत्ता तीसा वीसा, दस दो एगं च पुव्वाणं ॥
चउरासीइं वाव-त्तरी य सट्ठी य होइ वासाणं ।
तीसा य दस य एगं, च एवमेए सयसहस्सा ॥
पंचाणउइसहस्सा, चउरासीई य पंचपण्णा य ।
तीसा य दस य एगं, सयं च बावत्तरी चेव ॥

भगवत आदितीर्थकरस्य सर्वायुश्चतुरशीतिपूर्वाणां लक्षाणि । अजितस्वामिनो द्वासप्ततिः पूर्वलक्षाणि । शंभवनाथस्य षष्टिः पूर्वलक्षाणि । अभिनन्दनस्य पञ्चाशत्पूर्वलक्षाणि । सुमतेश्चत्वारिंशत् । पद्मप्रभस्य त्रिंशत् । सुपार्श्वस्य विंशतिः । चन्द्रप्रभस्य दश पूर्वलक्षाणि । सुविधेर्द्वे पूर्वलक्षे । शीतलस्यैकं पूर्वलक्षम् ॥ श्रेयांसस्य चतुरशीतिवर्षशतसहस्राणि । वासुपूज्यस्य द्विसप्ततिवर्षलक्षाणि । विमलस्य षष्टिवर्षलक्षाणि । अनन्तजित्त्रिंशद्वर्षलक्षाणि । धर्मस्य दशवर्षलक्षाणि । शान्तिनाथस्यैकं वर्षलक्षम् । कुन्थुनाथस्य पञ्चनवतिवर्षसहस्राणि । अरनाथस्य चतुरशीतिवर्षसहस्राणि । मल्लिस्वामिनः पञ्चपञ्चाशद्वर्षसहस्राणि । मुनिसुव्रतस्य त्रिंशद्वर्षसहस्राणि । नमिनाथस्य दशवर्षसहस्राणि । अरिष्टनेमेरेकं वर्षसहस्रम् । पार्श्वनाथस्यैकं वर्षशतम् । वर्द्धमानस्वामिनो द्वासप्ततिवर्षाणि । आ० म० १ अ० १ खण्ड ।

सामान्यमुनिसंख्या-

गणहरकेवलिमणओ-हिपुव्विवेउव्विवाइणं संखं ।
मुणिसंखाए सोहिय, नेया सामन्नमुणिसंखा ॥२६७॥

गणधराः १, केवलिनः २, मनःपर्यवज्ञानिनः ३, अवधिज्ञानिनः ४, पूर्वधराः ५, वैक्रियलब्धयो ६, वादिनश्च ७, एतेषां संख्यां (मुणिसंखाए सोहिय नेआ सामन्नमुणिसंखा) मुनिसंख्यायाः " चुलसिसहसतेवक्खा " इत्यादुक्तायाः शोधयित्वा निष्कास्य सामान्यमुनिसंख्या ज्ञेया । कोऽर्थः ?-यस्य यावन्तो मुनयो भवन्ति, तेभ्यस्तत्क्षणधराऽऽदयः पृथक् क्रियन्ते, यावन्तोऽवशिष्यन्ते, तावन्तस्तस्य सामान्यमुनयो भवन्तीति गाथार्थः ॥२६७॥

एगुणवीस य लक्खा, तह छासीई हवंति सहसाइं ।
इगवन्नाऽहियाइं, सामन्नमुणीण सव्वग्गं ॥ २६८ ॥

एकोनविंशतिलक्षाणि (तह छासीई हवंति सहसाइं) तथा लक्षोपरि षडशीतिसहस्राणि (इगवन्नाऽहियाइं) एकपञ्चाशदधिकानि (सामन्नमुणीण सव्वग्गं) एतत् सामान्यमुनीनां सर्वाग्रे सर्वसंख्या ज्ञेया । अङ्कतो यथा-१९ ८६०५१ । इति गाथार्थः । २६८ ॥ सत्त० १३२ द्वार ।

परिमतदर्शनाभिकृतप्रश्नो यथा-तीर्थकराणां चतुर्दशसहस्राऽऽदिका साधुसंख्योक्ता, चतुर्दशपूर्व्यादयः किं तत्संख्यामध्ये गण्यन्ते, यदि वा ते भिन्नाः ? इति प्रश्ने, उत्तरम्-तीर्थकराणां चतुर्दशपूर्व्यादयश्चतुर्दशसहस्राऽऽदिपरिवारसंख्यामध्ये गण्यन्ते, न वेति प्रश्नमाश्रित्य-

" गणहरकेवलिमणओ-हिपुव्विवेउव्विवाइणं संखं ।
मुणिसंखाए सोहिय, नेया सामन्नमुणिसंखा ॥ १ ॥
एगुणवीस य लक्खा, तह छासीई हवंति सहसाइं ।
इगवन्नाऽहियाइं, सामन्नमुणीण सव्वग्गं " ॥ २ ॥

तथा-

अट्ठावीसं लक्खा, अरुयालीसं च तह सहस्साइं ।
सव्वेसिं पि जिणाणं, जईण माणं विणिद्दिट्ठं ॥ ३ ॥ "

इति वचनयोरनुसारेण यथोक्तसंख्यामध्ये गण्यन्ते चतुर्दशपूर्व्यादय इति सम्भाव्यते ।

तथा-

" पञ्चाशीतिसहस्राणि, लक्षं सार्द्धशतानि षट् ।
परिवारोऽभवत् सर्वं, मुनयस्त्रिजगद्गुरोः ॥ १ ॥ "

एतदनुसारेण च श्रीऋषभदेवस्य चतुरशीतिसहस्रसंख्यातो भिन्ना एव ते इति । यतः सामान्यसाधुविशेषसाधुसंख्यामीलनेन यथोक्तसंख्या संजावनया पूर्यमाणाऽस्तीति । तत्त्वं तु सर्वविद्वेद्यमिति ॥ ७ प्र० । द्वी० २ प्रका० ।

सामायिकम्-

बावीसं तित्थयरा, सामाइयसंजमं उवइसंति ।
छेओवट्ठावणियं, पुण भयवं उसभो अ वीरो अ ॥ ३० ॥

द्वाविंशतिस्तीर्थकरा मध्यमाः सामायिकसंयमम् (उवइसंति) उपदिशन्ति । यदैव सामायिकमुच्चार्यते तदैव व्रतेषु स्थाप्यते । छेदोपस्थापनिकं पुनर्वदतः-ऋषभश्च, वीरश्च । एतदुक्तं भवति-प्रथमतीर्थकरचरमतीर्थकरतीर्थे हि प्रव्रजितमात्रः सामायिकसंयतो भवति तावद्यावच्चरमपरिज्ञाऽवगमः, एवं हि पूर्वमासीत् । अधुना तु षड्जीवनिकायावगमं यावत्, तथा पुनः सूत्रतोऽर्थतश्चावगतया सम्यगपराधस्थानानि परिहरन्व्रतेषु स्थाप्यत इत्येवं निरतिचारः, साऽतिचारः पुनर्मूलस्थानं प्राप्त उपस्थाप्यत इति ॥ २० ॥ आव० ४ अ० । (विशेषस्तु ' कप्प ' शब्दे तृतीयभागे २३४ पृष्ठे गतः)

अथ सामायिकसंख्यामाह-

सव्वेहिँ चउसमइआ, सम्मसुयदेससव्वविरईहिं ।
भणिया सागरकोमा-कोमीसेसेसु कम्मेसु ॥ २७५ ॥

(भणिय त्ति) सर्वैर्जिनैः चत्वारि सामायिकानि भणितानि । ह्रस्वत्वपुंस्त्वनिर्देशस्तु प्राकृतत्वात् । तानि कैरित्याह-(सम्मसुयदेससव्वविरईहिं) सम्यक्त्वश्रुतदेशसर्वविरतिभिः-सम्यक्त्वसामायिकम्, श्रुतसामायिकम्, देशविरतिसामायिकम्, सर्वविरतिसामायिकं चेति । एतानि कदा भवन्तीत्याह-(सागरकोमाकोडीसेसेसु कम्मेसु) सागरकोटाकोटीशेषेषु कर्मसु, जीवानामित्याहार्य्यम् । ततश्चायं समुदायार्थः-जीवानामेककोटाकोटीस्थितिकेषु सप्तस्वपि कर्मसु, आयुषस्तु स्वभावत एककोटिकमध्यस्थितिकत्वात् चत्वारि सामायिकानि भवन्तीति सर्वैर्जिनैर्भणितमिति गाथार्थः ॥२७५॥ सत्त० १३२ द्वार । (अस्य स्वरूपं विशेषतः 'सामाइय' शब्दे वक्ष्यते)

(१२१) श्रावकव्रतसंख्या-

सङ्घाणं हिंसाइय-अदत्तमेहुणपरिग्गहाणिवित्ती ।
इय पण अणुव्वयाइं, साहूण महव्वया एए ॥ २७५ ॥
दिसिविरई भोगुवभो-गमाण तहऽणत्थदंडविरई य ।
समइय देसऽवगासिय,पोसह तिहिँ संविभागवया ।२७६।

प्रथमं श्रद्धानां सम्यक्त्वपूर्वकं हिंसाऽऽलीकादत्तमैथुनपरिग्रहाणां निवृत्तिः प्रत्याख्यानम् ५ । (इय पण अणुव्वयाइं ति) एतानि पञ्चाणुव्रतानि,हिंसाऽऽदिभ्यो देशतो निवृत्तिरूपत्वात् । (साहूण महव्वया एए त्ति) एतानेव पञ्चापि साधूनां महाव-

तानि, हिंसाऽऽदिभ्यः सर्वतो निवृत्तिरूपत्वात् । इति गाथार्थः । ॥ २७५ ॥ अथ श्राद्धानां त्रीणि गुणव्रतान्याह—(दिसिविरई भोगुवभो-गमाण तहऽणत्थदंडविरई य त्ति) दिग्विरतिः६, भोगोपभोगमानं७, तथाऽनर्थदण्डविरतिश्चेति त्रीणि गुणव्रतानि । अथ चत्वारि शिक्षाव्रतान्याह-(समइय देसऽवगासिअ पोसह तिहिँ संविभागवया) सामायिकम् ९, देशावकाशिकम् १०, पौषधः ११, अतिथिसंविभागः १२। एतानि व्रतानि गृहमेधिनां ज्ञेयानीति गाथार्थः ॥ २७६ ॥ सत्त० १२७ द्वार।

साधुव्रतसंख्या—

साहुगिहीण वयाइं, कमेण पण चार पढमचरिमाणं ।
अन्नेसिं चउ बारस, चउत्थपंचमवएगत्ता ॥ २७४ ॥

श्रीऋषभतीर्थे, श्रीवीरस्य तीर्थे च साधूनां पञ्च महाव्रतानि, श्राद्धानां द्वादश व्रतानि (अन्नेसिं चउ बारस चउत्थपंचमवएगत्ता) अन्येषां द्वाविंशतिजिनानां तीर्थे चत्वारि व्रतानि साधूनां, श्राद्धानां द्वादश व्रतानि । कस्मात् ?, चतुर्थपञ्चमव्रतैकत्वात् चतुर्थपञ्चमव्रतयोरेकत्वादभेदात्, परिग्रहप्रत्याख्याने कृते स्त्रीप्रत्याख्यानं कृतमेव, स्त्रीणामपि परिग्रहरूपत्वात्, परिग्रहमन्तरेणाऽसंभवाच्च ॥ इति गाथार्थः ॥२७४॥ सत्त० १२७ द्वार ।

(१२२) अथ तीर्थकरमातुः चतुर्दश स्वप्नानाह-

गय वसह सीह अभिसे-य दाम ससि दिणयरं झयं कुंभं ।
पउमसर सागर विमा-ण भवण रयणऽग्गि सुविणाइं॥७०॥

गजः १, वृषभः २, सिंहः ३, लक्ष्म्या अभिषेकः ४, (दाम ससि दिणयरं झयं कुंभं) पुष्पस्रक् ५, चन्द्रः ६, दिनं करोतीति दिनकरः सूर्यः ७, ध्वजः, ८ कुम्भः पूर्णकलशः ९, (पउमसरसागरविमाण) पद्मसरः १०, सागरः समुद्रः ११, विमानम् १२। (भवणरयणऽग्गि सुविणाइं ति) भवनम् १३, रत्नोपचयः १३, निर्धूमाग्निश्चेति १४ स्वप्ना ज्ञेयाः। इति गाथार्थः ॥ ७० ॥

स्वप्नकारणान्याह-

नरयउवट्टाण इहं, भवणं सग्गच्चुयाण उ विमाणं ।
वीरसहसेसजणणी, नियंसु ते हरिवसहगयाइं ॥७१॥

नरकोद्वृतानां नरकादागतानां जिनानां जननी अत्र भवनं पश्यति, (सग्गच्चुआण उ विमाणं) स्वर्गाच्च्युतानां तु जननी स्वप्ने विमानं पश्यति । (वीरसहसेसजणणी) जननीशब्दः प्रत्येकमभिसंबध्यते। वीरजननी १,ऋषभजननी २,शेषजिनानां च जनन्यः २२, (नियंसु ते हरिवसहगयाइं) ददृशुस्तान् स्वप्नान् सिंह१वृषभ२गज२२दीन्-वीरजननी पूर्वं सिंहं ददर्श, ऋषभदेवस्य जननी पूर्वं वृषभं ददर्श, शेषजिनानां जनन्यः पूर्वं गजं ददृशुः । इति गाथार्थः ॥ ७१ ॥

दुनरयकप्पगिविज्जा, हरी अ निरयविमाणएहिँ जिणा ।
पढमा चक्कि दुनरया, बला चउसुरेहिँ चक्किबला ॥७२॥

द्विनरकादागताः-द्वादशकल्पादागताः, ग्रैवेयकादागताश्च हरयो वासुदेवा भवन्तीति । (निरयविमाणएहिँ जिणा) प्रथमद्वितीयतृतीयनरकादागताश्च तीर्थङ्करा भवन्ति । प्रथमनरकादागताश्चक्रिणो भवन्ति । (दुनरया बला) द्विनरकादागताश्च बलदेवा भवन्ति । (चउसुरेहिँ चक्किबला) भवनपतिव्यन्तरज्योतिष्कवैमानिकासुरेभ्यः समागताश्चक्रिबलभद्रा भवन्तीति गाथार्थः ॥ ७२ ॥

जिणचक्कीण य जणणी,नियंति चउदस गयाइं वरसुविणे ।
सगचउतिगाइ हरी-बलपमिहरिमंडलियमाया ॥७३॥

(जिणचक्कीण य जणणि त्ति) जिनानां चक्रवर्तिनां च जनन्यः (नियंति चउदस गयाइ वरसुविणे) पश्यन्ति चतुर्दश गजाऽऽदीन् प्रधानस्वप्नान् (सगचउतिगाइ हरी बलपमिहरिमंडलिअमाया) मातृशब्दस्य प्रत्येकं योगात् सप्त हरिमातरः, चतुरो बलदेवमातरः, त्रीन् प्रतिवासुदेवमातरः, एकाऽऽदीन् नवब्रह्मिकमातरः स्वप्नान् पश्यन्तीति गाथार्थः ॥७३॥ सत्त० १८ द्वार।

स्वप्नविचारकाः-

पढमस्स पिया इंदा, सेसाणं जयण—सुविणसत्थविऊ ।
अट्ठ वियारिंसु सुहे, सुविणे चउदस जणणिदिट्ठे ॥७४॥

प्रथमस्य ऋषभजिनस्य पिता, तथा इन्द्राः स्वप्नान् विचारयन्ति स्म । शेषजिनानां जनकाः,तथा स्वप्नशास्त्रविदो विप्राः, (अट्ठ वियारिंसु त्ति) प्राकृतत्वाद् विभक्तिलोपाद् अर्थेन विचारयन्ति स्म। कान् ?, (सुहे सुविणे त्ति) शुभान् स्वप्नान् चतुर्दशसंख्याकान् । पुनः कथंभूतान् ? (जणणिदिट्ठे त्ति) जननिदृष्टान् मातृभिर्विलोकितान्। सत्त०१६ द्वार । ('वीर' शब्दोऽत्र विलोकनीयः)

शेषश्रुतप्रवृत्तिकालः-

....., सेससुअपवित्ति जा तित्थं ॥ ३२८ ॥

शेष इति पूर्वव्यतिरिक्तः श्रुतप्रवृत्तिः यावत् यस्य तीर्थङ्करस्य तीर्थं तावत्कालं स्थास्यति । सत्त० १६३ द्वार ।

तीर्थंकरजीवानां नरके परमाधार्मिककृता पीडा भवति,न वेति ? प्रश्ने, उत्तरम्-अवश्यमेकान्तो ज्ञातो नास्ति । ६ प्र० ही०३ प्रका० ।

(१२३) जंबुद्दीवे णं दीवे उक्कोसपए चोत्तीसं तित्थयरा समुप्पज्जंति ।

(उक्कोसपए चोत्तीसं तित्थगरा समुप्पज्जंति त्ति) समुत्पद्यन्ते, सम्भवन्तीत्यर्थः; न त्वेकसमये जायन्ते, चतुर्णामेवैकदा जन्मसंभवात् । तथाहि-मेरौ पूर्वापरविजयद्वयोर्द्वे द्वे सिंहासने भवतोऽतो द्वावेव द्वावेवाभिषिच्येते,अतो द्वयोर्द्वयोरेव जन्मेति। दक्षिणोत्तरयोः क्षेत्रयोस्तदानीं दिवससद्भावान्न भरतैरावतयोर्जिनोत्पत्तिः, अर्द्धरात्र एव जिनोत्पत्तेरिति । स० ३४ सम० ।

भरतक्षेत्रेऽतीतोत्सर्पिण्यां जिनेश्वराः-

केवलनाणी निव्वा-णि सागरो जिण महाजसो विमलो ।
सव्वाणुभूइ सिरिहर, दत्तो दामोयर सुतेओ ॥२७०॥
सामिजिणो य सिवासी,सुमई सिवगइ जिणो य अत्थाहो ।
नाह नमीसर अनिलो,जसोहरो जिण कयग्घो य ॥२७१॥
धम्मीसर सुद्धमई, सिवकर जिण संदणो य संपइ य ।
अतीउस्सप्पिणिभरहे, जिणेसरे नामओ वंदे ॥ २७२ ॥

केवलज्ञानी, निर्वाणी, सागरो जिनो, महायशाः, विमलो,नाथसुतेजाः। अन्ये सर्वानुभूतिमाहुः। श्रीधरो,दत्तः, दामोदरः,सुतेजाः, इति प्रथमगाथायां दश। स्वामिजिनः,चः समुच्चये । शिवासी । अन्ये मुनिसुव्रतमाहुः। सुमतिः१३, शिवगतिः१४, जिनः अस्ताघः १५, नाथः नमीश्वरः, अनिलो, यशोधरो जिनः, कृतार्थश्च । द्वितीयगाथायामस्यां नव ॥ धर्मीश्वरः।केचिज्जिनेश्वरमाहुः। शुद्धमतिः, शिवकरजिनः, स्यन्दनश्च, सम्प्रतिजिनश्च । अतीतोत्सर्पिण्यां भारते जिनेश्वरानेतान्नमतो वन्देऽहमिति तृतीयगाथायां पञ्च जिनाः । प्रव० ७ द्वार ।

ऐरवते तीर्थंकराः-

जंबुद्दीवे दीवे एरवए वासे इमीसे ओसप्पिणीए चउव्वीसं तित्थगरा होत्था । तं जहा-

" चंदाणणं सुचंदं, अग्गीसेणं च नंदिसेणं च ।
इसिदिन्नं वयहारिं, वंदामो सामचंदं च ॥ ६० ॥
वंदामि जुत्तिसेणं, अजियसेणं तहेव सिवसेणं ।
बुद्धं च देवसम्मं, सयंपि निक्खित्तसत्थं च ॥ ६१ ॥
अस्संजलं जिणवसहं, वंदे य अणंतयं अमियणाणिं ।
उवसंतं च धुवरयं, वंदे खलु गुत्तिसेणं च ॥ ६२ ॥
अतिपासं च सुपासं, देवेसरवंदियं च मरुदेवं ।
निव्वाणगयं च घरं, खीणदुहं सामकोट्ठं च ॥ ६३ ॥
जियरागमग्गिसेणं, वंदे खीणरयमग्गिउत्तं च ।
वोकासियपिज्जदोसं, वारिसेणं गयं सिद्धं ॥ ६४ ॥ "

जम्बूद्वीपैरवते अस्यामवसर्पिण्यां चतुर्विंशतिस्तीर्थंकरा अभूवन्, तांश्च स्तुतिद्वारेणाऽऽह । तद्यथा-(चंदाणणं सुचंदं, अग्गीसेणं च नंदिसेणं च) क्वचिदात्मसेनोऽप्ययं दृश्यते । ऋषिदिन्नं, व्रतधारिणं च वन्दामहे श्यामचन्द्रं च ॥६०॥ वन्दे युक्तिसेनं, क्वचिदयं दीर्घबाहुर्दीर्घसेनो वोच्यते । अजितसेनं, क्वचिदयं शताऽऽयुरुच्यते । तथैव शिवसेनं, क्वचिदयं सत्यसेनोऽभिधीयते, सत्यकिश्चेति । बुद्धं चावगततत्त्वं च देवशर्माणं देवसेनापरनामकं, सततं सदा, वन्दे इति प्रकृतम । निक्षिप्तशस्त्रं च,नामान्तरतः श्रेयांसम ।६१। (अस्संजलं ति)असंज्वलं जिनवृषभं, पाठान्तरेण-स्वयंजलं, वन्दे अनन्तजिनमामिनज्ञानिनं,सर्वज्ञमित्यर्थः। नामान्तरेणाऽयं सिंहसेन इति । उपशान्तं च उपशान्तसंज्ञं,धूतरजसं वन्दे खलु गुप्तिसेनं च ॥६२॥ (अइपासं ति)अतिपार्श्वं च सुपार्श्वं देवेश्वरवन्दितं च मरुदेवं निर्वाणगतं च घरं घरसंज्ञं,क्षीणदुःखं श्यामकोष्ठम् ।६३। (जिय त्ति) जितरागमग्निषेणं, महासेनापरनामकं वन्दे क्षीणरजसमग्निपुत्रं च, व्यवकृष्टप्रेमद्वेषं च वारिषेणं, गतं सिद्धमिति । स्थानान्तरे किञ्चिदन्यथाऽप्यानुपूर्वी नाम्नामुपलभ्यते । स० ।

(भविष्यत्तीर्थंकरा अस्मिन्नेव शब्दे २२७१ पृष्ठे व्याख्याताः)

अथ तेषां पूर्वभवानाह-

एएसि णं चउव्वीसाए तित्थगराणं पुव्वभविया चउव्वीसं नामधेज्जा भविस्संति । तं जहा-

" सेणिय सुपास उदए, पोट्टिल्ल अणगार तह दढाऊ य ।
कत्तिय संखेय तहा, नंद सुनंदे य सतए य ॥ १ ॥
बोधव्वा देवई य, सच्चइ तह वासुदेव बलदेवे ।
रोहिणि सुलसा चेवं, तत्तो खलु रेवई चेव ॥ २ ॥
तत्तो हवइ सयाली, बोधव्वे खलु तहा जयाली य ।
दीवायणे य कण्हे, तत्तो खलु नारए चेव ॥ ३ ॥
अंबड दारुजमे वा, साई बुद्धे य होइ बोधव्वे ।
आगमीतित्थंगराणं, नामाइं पुव्वभवियाइं " ॥४॥

एतेषां यावत्संख्याकं यद् भविष्यति तदाह-

एएसि णं चउव्वीसाए तित्थगराणं पियरो भायरो भविस्संति । चउव्वीसं पढमसीसा भविस्संति । चउव्वीसं पढमसिस्सणीओ भविस्संति । चउव्वीसं पढमभिक्खादायगा भविस्संति । चउव्वीसं चेइयरुक्खा भविस्संति । स०।

ऐरवतवर्षभाविनस्तीर्थंकराः-

जंबुद्दीवे एरवए वासे आगमिस्साए उस्सप्पिणीए चउव्वीसं तित्थगरा भविस्संति । तं जहा-

" सुमंगले अ सिद्धत्थे, निव्वाणे य महाजसे ।
धम्मज्झए य अरहा, आगमिस्सेण होक्खइ ॥ १ ॥
सिरिचंदे पुप्फकेऊ, महाचंदे य केवली ।
सुयसागरे य अरहा, आगमिस्सेण होक्खइ ॥ २ ॥
सिद्धत्थे पुण्णघोसे य, महाघोसे य केवली ।
सच्चसेणे य अरहा, आगमिस्सेण होक्खइ ॥ ३ ॥
सूरसेणे य अरहा, महासेणे य केवली ।
सव्वाणंदे य अरहा, देवउत्ते य होक्खइ ॥ ४ ॥
सुपासे सुव्वए अरिहा, अरहे य सुकोसले ।
अरहा अणंतविजए, आगमिस्सेण होक्खइ ॥ ५ ॥
विमले उत्तरे अरहा, अरहा य महाबले ।
देवाणंदे य अरहा, आगमिस्सेण होक्खइ ॥ ६ ॥
एए वुत्ता चउव्वीसं, एरवयम्मि केवली ।
आगमिस्सेण होक्खंति, धम्मतित्थस्स देसगा" ॥७॥ स०।

(तीर्थकृतां जन्मभूम्यादौ गमनफलं 'दंसणभावणा' शब्दे वक्ष्यते) (तीर्थकृतामाशातना 'आसायणा' शब्दे द्वितीयभागे ४८० पृष्ठे निरूपिता) (केवलज्ञानेन ज्ञात्वा स्वयमेव तीर्थं करोतीति ' उवहाणसुय ' शब्दे द्वितीयभागे १०५६ पृष्ठे उक्तम्)

(१२४) तीर्थंकरा यद्यपि कृतकृत्याः, तथापि तपःकर्म, उपधानश्रुतमुपसर्गसहनं च कुर्वन्ति-

जो जइया तित्थयरो, सो तइया अप्पणम्मि तित्थम्मि ।
वच्चेइ तवोकम्मं, उवहाणसुयम्मि अज्झयणे ॥ ९३ ॥
सव्वेसिं तवोकम्मं, नीरुवसग्गं तु वन्निय जिणाणं ।
नवरं तु वद्धमाण—स्स सोवसग्गं मुणेयव्वं ॥ ९४ ॥
तित्थगरो चउनाणी, सुरमहिओ सिज्झियव्वयं धुवम्मि ।
अणिगूहियबलविरिओ, तवोविहाणम्मि उज्जमइ ॥९५॥
किं पुण अवसेसेहिं, दुक्खक्खयकारणेसु विहिएहिं ।
होइ परक्कमियव्वं, सपच्चवायम्मि माणुस्से ॥ ९६ ॥
आचा० नि० १ श्रु० ९ अ० १ उ० ।

सर्वेषां तीर्थकृतां सदृशानि सूत्राणि-

अत्र शिष्यः प्राऽऽह-

निक्खेवो य निरुत्ता—णि जा य कहणा जवे पगासस्स ।
अह रिसजाईयाऽऽहं—सु किमेवं वद्धमाणो वि ?॥२०५॥

वे निक्षेपाश्चतुष्कसप्तकाऽऽदयो,यानि च निरुक्तानि सूत्रार्थयोः

रनन्तरमुक्तानि,या च चतुर्निरनुयोगद्वारैः प्रकाशस्यार्थस्य कथना, चशब्दादेकार्थिकानामपि या कथना। एतानि यथा ऋषभाऽऽद्यस्त्रयोविंशतिस्तीर्थकरा आख्यातवन्तः,तथा किमेवं भगवान् वर्द्धमानस्वाम्यप्याख्याति,किं वाऽन्यथेति ?। उच्यते-तथैव।

ननु ते उच्चतराः, भगवान् वर्द्धमानस्वामी पुनः सप्तरत्निप्रमाणः,ततः कथं तथैवाऽऽख्यानम् ?, अत आह-

धिइसंघयणे तुल्ला, केवलभावे य विसमदेहा वि।
केवलनाणं तं चिय, पन्नवणिज्जा य चरमे वि ॥९०६॥

यथा विषमदेहा अपि तीर्थकृतः धृतिसंहनने केवलभावे च तुल्याः, तथा प्ररूपणायामपि तुल्याः। यतश्चरमेऽपि भगवति वर्द्धमानस्वामिनि तदेव केवलज्ञानं, त एव च प्रज्ञापनीया भावाः, ये ऋषभाऽऽदीनां, ततः कथं न तुल्या प्ररूपणा ?।

तत्र यो विशेषस्तमुपदर्शयति-

णायऽज्झयणऽऽहरणा, इसिभासियमो पइन्नगसुया य।
एए हुंति अणियया, निययं पुण सेसमुप्पन्नं ॥९०७॥

ज्ञाताध्ययनेषु यान्याहरणानि दृष्टान्ताः, ते हि केचित्त एव भवेयुर्ये ऋषभाऽऽदिभिरुपन्यस्ताः, केचिदन्यथा, ये प्रत्युत्पन्ना इति। तथा यानि ऋषिभाषितानि, प्रकीर्णकश्रुतानि च, एतान्यनियतानि-कदाचिद् भवन्ति, कदाचिन्न भवन्ति। यानि च भवन्ति तान्यपि कदाचित्तथार्थयुक्तानि, कदाचिदन्यथाऽर्थोपेतानि। शेषं पुनरुत्पन्नं प्रायेण नियतम्।

आह-कः पुनरत्र दृष्टान्तः, यथा वर्द्धमानस्वाम्यपि तथैवाऽऽख्यातीति ?। दृष्टान्तमाह-

जह सव्वजणवएसुं, एक्कं चिय सगडवत्तिणिपमाणं।
विसमाणि य वत्थूणी, सगडाईणं तह णिरुत्ता ॥९०८॥

यथा शकटाऽऽदीनाम्,आदिशब्दाद् गन्त्र्यादिपरिग्रहः। यद्यपि विषमाणि वस्तूनि केषाञ्चिन्महान्ति,केषाञ्चित् क्षुल्लकानि, तथाऽपि सर्वेष्वपि जनपदेषु एकमेव तदा शकटवर्तिन्याः प्रमाणं, सर्वत्राक्षाणां चतुर्हस्तप्रमाणत्वात्। तथा निरुक्तानि, उपलक्षणमेतत्, निक्षेपाऽऽदीनि च प्ररूपणामधिकृत्य तुल्यानि।

आह-नन्ववश्यं पूर्वरथानां, संप्रतिरथानां च विस्तरस्यास्ति विशेष एव, महाप्रमाणानां पूर्वमनुष्याणामल्पप्रमाणानामधुनातनमनुष्याणां विशेषो भवति।

तत आह-

जइ वि य वत्थू हीणा, पुव्विल्लरहेहिं संपयरहाणं।
तह वि जुगम्मि जुगम्मी, सहत्थचउहत्थगा अक्खा ॥९०९॥

यद्यपि पूर्वेतनरथेभ्यः साम्प्रतरथानां वस्तूनि हीनानि, तथाऽपि युगे युगे सर्वत्राऽऽत्महस्तेन चतुर्हस्तका अक्षाः, ततः सर्वेष्वपि जनपदेष्वेकं शकटवर्तिन्याः प्रमाणम्। तथा यद्यपि पूर्वकाले महाप्रमाणा मनुष्याः, संप्रतिकाले त्वल्पप्रमाणाः, तथाऽपि सर्वेषां तदेव केवलज्ञानं, तदेव संहननं, त एव च प्रज्ञापनीया भावा इति तुल्या प्ररूपणा।

ननु पञ्चधनुःशतिकप्रभृतीनां महान्तीन्द्रियाणि, तेन तेषां प्रभूततरक्षेत्रे विषयोपलम्भविशेषोऽपि स्यात्।

अत आह-

बहिमेहिं जइवि हीणा, इंदियमाणाउ संपयनराणं।
तह वि य सि उवलद्धी, खित्तविभागेण तुल्ला उ ॥९१०॥

पूर्वेभ्यः पूर्वकालभाविभ्यः पुरुषेभ्यो यद्यपि साम्प्रतनराणां साम्प्रतिमनुष्याणामिन्द्रियमानानि हीनानि,तथाप्यात्माङ्गुलमधिकृत्य क्षेत्रविभागे तेषां तुल्या उपलब्धिः। तथाहि-श्रोत्राऽऽदीन्द्रियप्रमाणंश्रोत्राऽऽदीन्द्रियविषयप्रमाणं चात्माङ्गुलतः,तच्च यथा पूर्वमनुष्याणां द्वादशयोजनाऽऽदिकं क्षेत्रप्रमाणम्,तथाऽधुनातनमनुष्याणामपि। तथा चोक्तम्-" सोइंदियस्स णं भंते ! केवइए विसए पन्नत्ते ?। गोयमा ! जहन्नेणं अंगुलस्स असंखिज्जइभागाओ,उक्कोसेणं बारसहिंतो जोयणेहिं।" इत्यादि। एवं हीनाधिकशरीरप्रमाणत्वेऽपि केवलेनोपलम्भस्तुल्य एवेति न कश्चिद्दोषः। अन्यच्च-शरीराऽऽश्रितानीन्द्रियाणि, ततः शरीरप्रमाणविषये, तदाश्रितानामिन्द्रियाणामपि प्रमाणविशेषभावात्तद्विषयक्षेत्रोपलम्भविशेषः। बृ० १ उ०।

(१२५) प्रकीर्णकवार्ताः-

तित्थयरे भगवंते, अणुत्तरपरक्कमे अमियनाणी।
तिन्ने सुगइगइगए, सिद्धिपहपदेसए वंदे ॥ १०२५ ॥

तीर्थकरान् भगवतोऽनुत्तरपराक्रमानमितज्ञानिनस्तीर्णान् सुगतिगतिगतान् सिद्धिपथप्रदेशकान् वन्दे। (आ० म०) ननु तीर्थकरानित्यनेनैव भगवत इति गतं, तीर्थकृतामुक्तलक्षणभङ्गाव्यभिचारात्, ततः किमनेन विशेषणेन ?। तदयुक्तम्। अस्य नयमतान्तरावलम्बिपरिकल्पितबुद्धाऽऽदितीर्थकरतिरस्कारपरत्वात्। तथाहि-न ते बुद्धाऽऽदयः स्वस्वदर्शनरूपतीर्थकारिणोऽपि तत्त्ववृत्त्या भगवन्तः, यथोक्तसमग्रैश्वर्याऽऽदिगुणकलापायोगादिति। (आ० म०) ननु येऽनुत्तरपराक्रमास्तेऽमितज्ञानिन एव, क्रोधाऽऽदिपरिक्षयोत्तरकालमवश्यममितज्ञानस्य भावात्। सत्यमेतत्। केवलं ये क्लेशक्षयेऽप्यमितज्ञानं नाभ्युपगच्छन्ति। तथा च तद्ग्रन्थः-" सर्वं पश्यतु वा मा वा, तत्त्वमिष्टं तु पश्यतु। कीटसङ्ख्यापरिज्ञानं, तस्य नः क्वोपयुज्यते ?॥ १॥ " इत्यादि। तन्मतव्यवच्छेदफलमिदं विशेषणमित्यदोषः। तदव्यवच्छेदश्चैवम्—सर्वभावपरिज्ञानाभावे तत्त्ववृत्त्यैकस्याऽपि वस्तुनः परिज्ञानायोगात्, सर्वस्याऽपि यथायोगमनुवृत्तव्यावृत्तधर्मतया सर्वैः सह सव्यपेक्षत्वात्। आह च-" एको भावः सर्वथा येन दृष्टः, सर्वे भावाः सर्वथा तेन दृष्टाः। सर्वे भावाः सर्वथा येन दृष्टाः, एको भावः सर्वथा तेन दृष्टः॥ १॥ " आचाराङ्गेऽप्युक्तम्-" जे एगं जाणइ, से सव्वं जाणइ। जे सव्वं जाणइ, से एगं जाणइ।" इति। अथवा-ये स्वसिद्धान्ते छद्मस्थवीतरागास्ते अनुत्तरपराक्रमा भवन्ति, कषायाऽऽदिशत्रूणामाक्रमणात्,न त्वमितज्ञानिनः, केवलज्ञानाभावात्। ततस्तद्व्यवच्छेदार्थमिदं विशेषणमिति। (आ० म०) अनेन ये प्राप्ताऽणिमाऽऽद्यष्टविधैश्वर्यं स्वेच्छाविहरणशीलं पुरुषं तीर्थं प्रतिपादयन्ति। तथा च तद्ग्रन्थः-"अणिमाऽऽद्यष्टावधं प्राप्यैश्वर्यं कृतिनः सदा। मोदन्ते सर्वभावज्ञा-स्तीर्णाः परमदुस्तरम्॥१॥" इत्यादि। तदव्यवच्छेदमाह। (आ० म०) सिद्धिपथप्रदेशकान्,अनेनानेकभव्यसत्त्वोपकारितीर्थकरनामकर्मविपाकोदयसमन्वितं भगवतां स्वरूपमाह। आ० म० १ अ० १ खण्ड।

प्रश्नोत्तराणि-

तीर्थकरा एकस्मिन् समये कति सिद्ध्यन्ति ?, इति प्रश्ने, उत्तरम्-एकस्मिन्समये उत्कर्षतः चत्वारस्तीर्थकराः सिद्ध्यन्तीति सिद्धप्राभृतिकाऽऽदावुक्तमस्तीति। ७६ प्र०। सेन० १ उल्ला०। यथाऽत्र भरते श्रीवीरजन्मर्क्षं भस्मग्रहः, तथाऽन्यक्षेत्रे तीर्थकृतां जन्मर्क्षं

स आगतोऽस्ति, न वेति प्रश्ने, उत्तरम्-दशस्वपि क्षेत्रेषु तीर्थकृतां च्यवनाऽऽदीनि कल्याणकान्येकस्मिन्नेव नक्षत्रे भवन्तीत्यागमोक्तत्वाद्वस्मग्रहाऽऽदिसंक्रमणं सर्वं समानमेवेति । ९३ प्र० । सेन० २ उल्ला० । " वीरस्सायंगुलं दुगुणं ति " कथं सर्वे जिनाः विंशत्यधिकशताङ्गुलाः कथिताः, प्रमाणाङ्गुलस्य पञ्चाशदङ्गसत्कैकविंशतिभागदेहमानं वीरस्य कथितमस्ति, तेन चोत्सेधाङ्गुलैकशताष्टषष्टिमानं जायते, विंशतिशतद्विगुणीकरणे चत्वारिंशदधिकद्विशताङ्गुलानि स्युः, सार्द्धत्रयहस्तमाने तु पाश्चात्यमानं विसंवदतीति प्रश्ने, उत्तरम्-" वीरस्सायंगुलं दुगुणं " इत्येतत्प्रथावृत्तौ मतत्रयमस्ति,तत्रानुयोगद्वारचूर्ण्यभिप्रायेण श्रीवीर आत्माङ्गुलेन चतुरशीत्यङ्गुलप्रमाणश्चतुरशीतिद्विगुणीकरणेऽष्टषष्ट्यधिकशतमुत्सेधाङ्गुलानां भवतीति न किञ्चिदनुपपन्नम्, एतदाश्रित्य विस्तरस्तु संग्रहणीवृत्तावस्ति । ११५ प्र० । सेन० २ उल्ला० । तीर्थकृतां त्रयोदशाऽऽदिभवाः प्रथमसम्यक्त्वलाभापेक्षया ऽप्राप्तिपत्तिसम्यक्त्वलाभापेक्षया वा, प्रसिद्धमहद्भवापेक्षया वा,किं वा प्रकारान्तरेणेति प्रश्ने, उत्तरम्-आवश्यकाऽऽद्यभिप्रायेण श्रीऋषभाऽऽदितीर्थकृतां त्रयोदशाऽऽदिभवाः प्रथमसम्यक्त्वलाभापेक्षया गण्यन्ते, न त्वन्यापेक्षयेति । १६५ प्र० । सेन० २ उल्ला० । सार्द्धद्वीपद्वये जघन्योत्कृष्टत एकस्मिन् समये तीर्थकृतां कत्यभिषेकाः ?,तथा तत्र कत्यरका भवन्तीति प्रश्ने, उत्तरम्-सार्द्धद्वीपद्वये जघन्यत एकसमये दश तीर्थकरा मेरुपञ्चके शक्रैरभिषिच्यन्ते, उत्कृष्टतस्तु विंशतिः, तथा तत्र जघन्यतश्चत्वारोऽरकाः, उत्कृष्टतस्तु पञ्च भवन्तीति ज्ञायते । ६५ प्र० । सेन० ३ उल्ला० । तीर्थकृज्जननी चतुर्दश स्वप्नान् स्फुटान्, चक्रवर्तिजननी त्वस्फुटान् इत्यक्षराणि सन्ति, प्रघोषो वेति प्रश्ने, उत्तरम्-चक्रवर्तिमाताऽस्फुटान् पश्यति । तदुक्तम्-" चतुर्दशाप्यमून् स्वप्नान्, साऽपश्यत् किञ्चिदस्फुटान् । सा प्रभोः प्रमदा सूते, नन्दनं चक्रवर्तिनम् ॥ १ ॥ " इति वासुपूज्यचरित्रे । १०४ प्र० । सेन० ३ उल्ला० । जनन्या द्विश्चतुर्दशस्वप्ना दृष्टाः, उत एकवारम् ?, इति प्रश्ने, उत्तरम्-शान्तिनाथजनन्या द्विश्चतुर्दश स्वप्ना दृष्टाः । यदुक्तं शत्रुञ्जयमाहात्म्येऽष्टमपर्वणि " द्विः स्वप्नदर्शनादर्ह-च्चक्रिजन्मसुनिश्चया । रत्नगर्भेव सा गर्भे, बभार शुभदोहदा ॥ ७६ ॥ " इति । एवमन्यत्रापीति । १०७ प्र० । सेन० ३ उल्ला० । भरतैरवततीर्थकृद्व्यतिरिक्तानां तीर्थकृतां कीदृग् वर्णविभागः ?, इति प्रश्ने, उत्तरम्-पञ्चवर्णान्यतरवर्णरूपो वर्णविभागो ज्ञेयोऽत्रापि पूर्वोक्त एव हेतुरिति । ३५० प्र० । सेन० ३ उल्ला० । बलदेवकर्णद्वैपायनशङ्खाऽऽख्या आगमिष्यच्चतुर्विंशतौ तीर्थकृतो भविष्यन्ति, ते किं नवमराम १ कौन्तेय २ द्वारकादाहकाः ३ श्रीवीरप्रथमश्रावका एव ?; अथवा किमन्ये वेति प्रश्ने, उत्तरम्-शङ्खः श्रीवीरप्रथमश्रावकादन्यस्तीर्थकृत् श्रीस्थानाङ्गवृत्तावुक्तोऽस्ति । द्वैपायनो द्वारिकादाहकोऽन्यो वेति निर्णयः केवलिगम्यः । कृष्णभ्राता बलदेव आवश्यकनिर्युक्त्यादावागमिष्यच्चतुर्विंशतिकायां कृष्णतीर्थे सेत्स्यत्युक्तोऽस्ति, तेन बलदेवः कश्चिन्नामान्तरेणावगन्तव्यः । कर्णस्थाने तु शास्त्रे कृष्णः प्रोक्तोऽस्ति, सोऽपि नामान्तरेण बोध्योऽत एव शास्त्रान्तरैः सह विसंवादं संभाव्य प्रवचनसारोद्धारवृत्तिकारेणापि द्विधा एव भावितीर्थकृज्जीवा व्यक्ता विवृताः सन्ति, न शेषा इति ! ३६० प्र० । सेन० ३ उल्ला० । समवसरणस्थस्य तीर्थङ्करस्य श्राद्धा यतयश्च कथं वन्दन्ते ?, इति प्रश्ने, उत्तरम्-समवसरणस्थस्य तीर्थकृतः श्राद्धा यतयश्च वन्दित्वा यथास्थाने निषीदन्तीति हारिभद्रीयं, परं तद्वन्दनरीतिः क्वापि लिखिता नास्ति, तस्मादाधुनिकवन्दनरीतिरेव संभाव्यत इति । ४३६ प्र० । सेन० ३ उल्ला० । तीर्थकृतां जन्मभवनानन्तरं देवाः कियत्प्रमाणां रत्नाऽऽदिवृष्टिं कुर्वन्तीति प्रश्ने, उत्तरम्-"उसभे णं अरहा कोसलिए० जाव चिट्ठइ, ततो वेसमणो सक्कवयणेणं बत्तीसं हिरण्णकोडीओ, बत्तीसं नंदासणाइं, बत्तीसं भद्दासणाइं भगवतो तित्थगरस्स जम्मणभवणम्मि साहरइ । " इत्यावश्यकबृहद्वृत्तिं ७६ पत्रे, एतदनुसारेण, तथा-

" कुबेरस्तु सौमनस्यं चो-द्वीर्षे मुक्त्वा हरिर्व्यधात् ।
श्रीदामरत्नदामाख्यमूर्ध्वलोके स्वर्णकन्दुकम् ॥ ४२ ॥
द्वात्रिंशदुत्तरे रूप्य-कोटिवृष्टिं विरच्य सः ।
वाहमाघोषयामास-इति सुरैराभियोगिकैः ॥ ४३ ॥ "

इतिकल्पकिरणावल्यनुसारेण च, तीर्थकृतां जन्मभवनानन्तरं देवचिह्निता वृष्टिः द्वात्रिंशद्धिरण्यकोटिप्रमाणा भवतीति । ४४५ प्र० । सेन० ३ उल्ला० ।

' तित्थयर ' शब्दस्थविषयसूची—

(१) तीर्थकरशब्दसिद्धिः ।
(२) तीर्थकृतां तीर्थकरणशीलत्वम् ।
(३) तीर्थकृतामचेलत्वेऽपि संयमविराधनाऽऽदयो दोषा न भवन्तीति निरूपणम् ।
(४) तीर्थकृतामनुत्तरोपपातिकमुनिसंख्या ।
(५) ये तीर्थकरेषु अष्टादश दोषा न भवन्ति तेषां प्ररूपणम् ।
(६) तीर्थकराणामभिग्रहाः ।
(७) अक्षोपाङ्गाऽऽदिष्वबद्धा अपि ये आदेशपदाभिधेयाः पदार्था ज्ञानिभिः प्रकाशिताः तेषां सङ्ख्यानिरूपणा ।
(८) तीर्थकराणां तीर्थे यत्रावश्यकं यस्मिन् समये क्रियते तन्निरूपणम् ।
(९) तीर्थकरा यादृशमाहारं कुर्वन्ति तन्निरूपणम् ।
(१०) तीर्थकृज्जन्मावसरे शक्रस्याऽऽसनचलनानन्तरमवधिना तीर्थकरजन्मावबुध्य हरिनैगमेष्याज्ञाप्रातिपादनम् ।
(११) आदेशानन्तरं हरिनैगमेषी यत्कृतवान् तद्वर्णनम् ।
(१२) हरिनैगमेषिकृतघण्टानादेन यदभूत्तन्निरूपणम् ।
(१३) ततश्च घण्टानादतो यद् प्रवृत्तं तत्प्रतिपादनम् ।
(१४) सौधर्मे कल्पे पदातिपतिकर्तव्यनिरूपणम् । (देवानां चिन्तनम्)
(१५) सौधर्मे शक्राऽऽदेशानन्तरं यज्जातं तन्निरूपणम् ।
(१६) इन्द्रो यत् पालकमादिष्टवान् तदुक्तिवर्णनम् ।
(१७) तदनु यदनुतिष्ठति स्म पालकस्तन्निरूपणम् ।
(१८) तत्कृतप्रेक्षागृहमण्डपवर्णनम् ।
(१९) मणिरूपमणिपीठिकावर्णनम् ।
(२०) आस्थानानिवेशनप्रक्रियाप्रातिपादनम् ।
(२१) तदनन्तरं शक्रक्रियाप्ररूपणम् ।
(२२) सामानिकाऽऽदिभिरास्थानस्य पूर्तेः प्ररूपणम् ।
(२३) प्रतिष्ठासोः शक्रस्य पुरःप्रस्थायिनां क्रमवर्णनम् ।
(२४) ततो यदकार्षीत् शक्रस्तन्निरूपणम् ।
(२५) मेरुगमनवर्णनम् ।

(२६) तत ईशानेन्द्राऽऽगमनावसरः ।
(२७) चमरबलिधरणभवनवासिवाणमन्तरज्योतिष्काऽऽदीनामागमननिरूपणम् ।
(२८) ततोऽच्युतेन्द्रो यदकार्षीत्तन्निरूपणम् ।
(२९) तत्रेन्द्राऽऽदयो यत्कुर्वन्ति तत्प्रतिपादनम्, ततस्तत्रैवाभिषेकनिगमनपूर्वकमाशीर्वादकरणम् ।
(३०) अवशिष्टानामिन्द्राणां वक्तव्यता ।
(३१) तत्रावशिष्टशक्रकृताभिषेकावसरः ।
(३२) ततः कृतकृत्येन शक्रेण भगवतो जन्मपुरप्रापणम् ।
(३३) वैश्रवणद्वारा शक्रकृत्यप्ररूपणम् ।
(३४) अस्मासु स्वस्थानं प्राप्तेषु भगवति मा दुर्दृष्टिं केऽपि निक्षिपन्तिवति शक्राऽऽक्रोद्घोषणा ।
(३५) अष्टाह्निकामहोत्सवः ।
(३६) नवनपत्यादीनामिन्द्रसंख्याप्रतिपादनम् ।
(३७) तीर्थकरकृतोपदेशं प्रकृप्य ये धर्मोपायस्य देशकास्तेषां प्ररूपणम् ।
(३८) तीर्थकरप्रसङ्गात् साधूनां द्वादशोपकरणसंख्यायाः,साध्वीनां पञ्चविंशत्युपकरणसंख्यायाश्च व्यावर्णनम् ।
(३९) श्रीपार्श्ववीरतीर्थकरयोरुपसर्गप्ररूपणम् ।
(४०) सत्सेधाङ्गुलेनाऽऽत्माङ्गुलेन च जिनानां देहमानम् ।
(४१) चतुर्विंशतिजिनानामवधिज्ञानिमुनिसंख्यावर्णनम् ।
(४२) तीर्थकृतां कल्पशोधिः ।
(४३) तीर्थकृद्भिः कर्मन्यावर्णनं, तैरपि कर्मवेदनं च ।
(४४) जिनानां कुमारवासकालमानम् ।
(४५) केवलोत्पत्तिस्थानानि ।
(४६) जिनानां केवलोत्पादकं तपः ।
(४७) तीर्थकृतां केवलोत्पत्तिमासतिथीनां प्ररूपणम् ।
(४८) यस्य वृक्षस्याधो यस्य तीर्थकृतः केवलज्ञानमुत्पन्नं तन्निरूप्य केवलवृक्षप्रमाणनिरूपणम् । तत्राऽपि चैत्यतरूणां विशेषतः प्रमाणकथनम् ।
(४९) यस्मिन् वने यस्य केवलज्ञानमुत्पन्नं तन्नामनिर्देशः ।
(५०) यस्यां वेलायां केवलज्ञानमुत्पन्नं तन्निरूपणम् ।
(५१) जिनानां गृहस्थकाल-केवलिकालमानं निरूप्य श्रामण्यपर्यायात् उच्चैस्पर्यायापगमे केवलिपर्यायः स्वयमेव ज्ञेय इति श्रामण्यपर्यायनिरूपणम् । तथा तीर्थकृतां केवलिमानविमर्शः ।
(५२) तीर्थकृद्गणसंख्याप्रतिपादनम् ।
(५३) तीर्थकृतां गणधराणां संख्याप्ररूपणम् ।
(५४) जिनानां गर्भस्थितिमानम् ।
(५५) गृहवासे यावन्ति ज्ञानानि तीर्थकृतां भवन्ति तन्निरूपणम् ।
(५६) तीर्थकरगोत्राणां, तीर्थकरवंशानां च वर्णनम् ।
(५७) तीर्थकृतां चतुर्दशपूर्विणः ।
(५८) श्रावकसंख्या चतुर्विंशतितीर्थकृताम् ।
(५९) जिनानां चक्रित्वकालः ।
(६०) जिनानां सामायिकाऽऽदिचारित्रस्य प्रतिपादनम् ।
(६१) च्यवननक्षत्रमृषभाऽऽदिजिनानाम् ।
(६२) च्यवनकल्याणकतिथयश्च्यवनमासाश्च ।
(६३) ऋषभाऽऽदीनां क्रमतश्च्युतिराशयः ।
(६४) जिनानां च्यवनवेला ।
(६५) सर्वजिनानां ऊर्ध्वस्थकालमानम् ।
(६६) तीर्थकृतां छद्मस्थतपोमानम् ।
(६७) तीर्थकरयक्षाणां नामानि ।
(६८) तीर्थकरदेवीनां नामानि ।
(६९) तीर्थकरजन्मनगर्यः ।
(७०) तीर्थकरजन्मदेशाः ।
(७१) तीर्थकरजन्ममासाऽऽदिप्ररूपणम् ।
(७२) तीर्थकरजन्मारकप्ररूपणानन्तरं जन्मारकाणां शेषकालविचारः ।
(७३) तीर्थप्रसिद्धजिनजीवप्रतिपादनम् ।
(७४) भविष्यत्तीर्थकरवर्णनम् ।
(७५) युगान्तकृद्भूमिप्ररूपणम् ।
(७६) तीर्थकृतां स्थितिकल्पः ।
(७७) सर्वेषां जिनानां शासने तत्त्वसंख्या ।
(७८) तीर्थप्रवृत्तिकालप्रतिपादनम् ।
(७९) तीर्थकरकल्याणकतपोविधानम् ।
(८०) तीर्थकरजन्मप्रयोजनवर्णनम् ।
(८१) तीर्थोच्छेदकालः ।
(८२) तीर्थकरप्रसङ्गात् द्वादशचक्रिनववासुदेवनवबलदेवनामानि, त्रिषष्टिशलाकापुरुषमानम्, प्रतिवासुदेवनामानि, यस्य तीर्थे ये चक्रिवासुदेवबलदेवा जातास्तेषां च निरूपणम् ।
(८३) वर्तमानकालीनचतुर्विंशतितीर्थकरनामानि, बलदेववासुदेवपितृभ्रातृनामानि, दशारमण्डलानि, वासुदेवबलदेवानां पूर्वभवनामानि, तेषां पूर्वभवधर्माऽऽचार्यनामानि, तन्निदानभूमयः,तन्निदानकारणानि, तेषां प्रतिशत्रुनामानि, तेषां मध्ये ये यत्र यान्ति तन्निरूपणम् ।
(८४) तीर्थोत्पत्तिप्ररूपणम् ।
(८५) तीर्थकराणां निर्गमनकालस्य प्रतिपादनम् ।
(८६) दर्शननामनिरूपणानन्तरं यस्य तीर्थकरस्य समये यद् दर्शनमुत्पन्नं तन्निरूपणम् ।
(८७) ऋषभाऽऽदितीर्थकृतां व्रतपर्यायः, दीक्षातरूणां च नामप्रतिपादनम् ।
(८८) यस्तीर्थकरो येन तपसा निष्क्रान्तस्तदभिधानम् ।
(८९) यावत्परिवारेण भगवन्तो दीक्षामशिक्षयन्, तन्निरूपणम् ।
(९०) तीर्थकृतां दीक्षापुरम्, दीक्षासमये मनःपर्यवज्ञानोत्पत्तेः प्ररूपणम् ।
(९१) तीर्थकराणां दीक्षामासपक्षतिथिप्रतिपादनम्, दीक्षालिङ्गम्, दीक्षासमये लोचमुष्टिः, दीक्षावनानि, यस्मिन् वयसि ते निष्क्रान्तास्तन्निरूपणं च ।
(९२) दीक्षाशिबिकाऽऽदिप्रतिपादनम् ।
(९३) षट्पञ्चाशद्दिक्कुमारीनामानि, तासां करणीयनिरूपणं च ।
(९४) देवदूष्यप्ररूपणम्, देवदूष्यवस्त्रस्थितिमानाऽऽदिनिर्देशः ।
(९५) प्रसङ्गतस्तीर्थकरप्रतिपादितत्वेन धर्मभेदप्ररूपणं, तथौचित्यात्षट्कं च ।
(९६) चतुर्विंशतिजिननामसामान्यार्थस्तद् विशेषार्थश्च ।
(९७) तीर्थकृतां पञ्चकल्याणके नक्षत्रैक्यप्ररूपणम् ।

(९८) तीर्थकृतां केवलज्ञानानन्तरं मुनीनां मोक्षगमनमानम्, प्रतिक्रमणसंख्या, प्रथमगणधरनामानि, प्रथमप्रवर्तिन्यः, प्रथमश्रावकाः, प्रथमश्राविकाः, प्रत्येकबुद्धमुनिसंख्या, तीर्थकृतां प्रमादविचारः, तीर्थकृतां परीषहसहनविमर्शश्च ।

(९९) जिनानामष्टमहाप्रातिहार्याणि ।

(१००) जिनानां प्रथमपारणदायकनामानि, तेषां गतिश्च, पारणदायकार्थं देवकृतदिव्यपञ्चकनामानि, तत्र वसुधाराप्रमाणप्ररूपणम्, जिनानां पारणकपुरनामानि ।

(१०१) तीर्थकराणां पितृनामानि, पितॄणां गतिश्च ।

(१०२) पूर्वप्रवृत्तिकालः, पूर्वविच्छेदकालमानं च ।

(१०३) सर्वतीर्थकराणां यावन्तः पूर्वभवास्तेषु तेषां नामानि ।

(१०४) तीर्थकृतां पूर्वभवगुरवः, तथा तेषां पूर्वभवायुः, पूर्वभवक्षेत्राणि, पूर्वभवक्षेत्रदिशा, पूर्वभवजिनहेतवो विंशतिविधाः, पूर्वभवद्वीपाः, पूर्वभवनामानि, पूर्वभवनगर्यः, पूर्वभवराज्यम्, पूर्वभवविजयाः, पूर्वभवस्वर्गाः, पूर्वभवसूत्राणि, तत्र श्रुतलाभद्वारम् ।

(१०५) पार्श्वसुपार्श्वयोः फणकारणानि, तेषां फणसंख्या च, जिनानामारोग्याऽऽदिफलदायकत्वविचारः ।

(१०६) नृपतिबलदेववासुदेवचक्रितीर्थकृतां बलतारतम्यप्रतिपादनम् ।

(१०७) जिनभक्तानां राज्ञां नामानि ।

(१०८) तीर्थकरमनःपर्यवज्ञानिसंख्याकथनम् ।

(१०९) तीर्थकरमातृनामानि, तासां गतिश्च ।

(११०) तीर्थकराणां मोक्षाऽऽसनं, मोक्षस्थानानि, यावता तपसा तीर्थकृन्मोक्षसिद्धिस्तन्निरूपणम्, मोक्षनक्षत्राणि, मोक्षपरिवारः, मोक्षपथः, मोक्षमासपक्षतिथयः, मोक्षराशयः, मोक्षदिनयः, मोक्षवेला, मोक्षारकशेषकालः, मोक्षारकप्रतिपादनम्, मोक्षगतानां शरीरमानम् ।

(१११) तीर्थकृतां राज्यकालमानम् ।

(११२) तीर्थकृतां श्रुतपरिवारकमुनिसंख्या, तत्र प्रसङ्गात् गणधराऽऽदिमाणमालिकान्तानां, देवानां च रूपवर्णनम् ।

(११३) तीर्थकृतां लाञ्छनानि, तेषां लक्षणद्वारम्, तीर्थकृत्सु लोकान्तिकदेवैर्बोधनम्, जिनवरवर्णानि, जिनानां च वर्णनिरूपणम् ।

(११४) तीर्थकृतां पञ्चत्रिंशद्वाणगुणाः ।

(११५) तीर्थकराणां वादिमुनिसंख्या, तीर्थकृतां विवाहविषयश्च, येषु ग्रामनगरेषु तेषां विहार आसीत् तन्निरूपणम् ।

(११६) तीर्थकृतां वैक्रियकमुनयः, तेषामेवाऽऽर्यिकासंग्रहप्रमाणम्, मुनिस्वरूपम्, संयतसंयतीप्रमाणम्, तीर्थकृतां संयमप्रतिपादनम् ।

(११७) परित्यागद्वारे जिनेन्द्राणामभिनिष्क्रमणसमये दानविचारः ।

(११८) जिनश्राविकामानम् ।

(११९) उत्कृष्टजघन्याभ्यां विचरतां तीर्थकृतां संख्या, तथोत्कृष्टजघन्याभ्यां तेषां जन्मसंख्या च ।

(१२०) सर्वेषां तीर्थकृतां सर्वायुः, तथा तेषां सामान्यमुनिसंख्या, तीर्थकृत्सामायिकोपदेशविचारः, सामायिकसंख्या च ।

(१२१) श्रावकव्रतसंख्या, साधुव्रतसंख्या च ।

(१२२) तीर्थकरमातृदृष्टचतुर्दश स्वप्नाः, स्वप्नकारणानि, स्वप्नविचारकाः, शेषश्रुतप्रवृत्तिकालः ।

(१२३) भरतक्षेत्रेऽतीतोत्सर्पिण्यां जिनेश्वरनामानि, ऐरवते तीर्थकराः, भविष्यत्तीर्थकराणां पूर्वभवनामानि, तेषां पितृमातृप्रथमशिष्यप्रथमशिष्याप्रथमभिक्षादायकसंख्या, ऐरवतक्षेत्रभाविनस्तीर्थकराः ।

(१२४) कृतकृत्या अपि तीर्थकरास्तपःकर्मोपधानश्रुतमुपसर्गसहनाऽऽदिकं कुर्वन्तीति निरूप्य, सर्वेषां तीर्थकराणां सदृशानि सूत्राणीत्यत्र गुरुशिष्ययोः प्रश्नोत्तराणि ।

(१२५) प्रकीर्णकवाताः ।

तित्थयरगामिया–तीर्थकरगणिहका–स्त्री० । तीर्थकरैकवक्तव्यतार्थाधिकारानुगतायां वाक्यपद्धतौ, स० ।

तित्थयरणाणुप्पत्तितव–तीर्थकरज्ञानोत्पत्तितपस्–न० । स्वनामख्याते चित्रतपसि, पञ्चा० ।

तत्स्वरूपमाह–

तित्थंकरणाणुप्प–त्तिमन्निओ तहऽवरो तवो होइ ।
पुव्वोइएण विहिणा, कायव्वो सो पुण इमो त्ति ॥१२॥

तीर्थकरज्ञानोत्पत्तिरिति संज्ञा संजाता यस्य तत्तीर्थकरज्ञानोत्पत्तिसंज्ञितम्,पुंस्त्वं तु सर्वत्र प्राकृतत्वात् । तथेति समुच्चये,अपरमन्यत्,तपो भवति स्यात् । पूर्वोदितेन विधिना ऋषभाऽऽदिक्रमेण गुर्वाज्ञया विशुद्धक्रियया, मतान्तरेण तन्मासादेनोक्तेत्येवं लक्षणेन, (कायव्वो त्ति)कार्यम्(सो पुण त्ति) तत्पुनः प्रस्तुततपः, (इमो त्ति) इदं वक्ष्यमाणम,इतिः समाप्तौ । इति गाथाऽर्थः ॥१२॥

तदेवाऽऽह–

अट्ठमभत्तंतम्मि य, पासोसहमल्लिऽरिट्ठनेमीणं ।
वसुपुज्जस्स चउत्थे–ण छट्ठनत्तेण सेसाणं ॥१३॥

(अस्यार्थोऽनुपदमेव 'तित्थयर' शब्दे २२६३ पृष्ठे केवलतपोनामकेऽधिकारेऽङ्के गतः)

उसभाऽऽइयाणमेत्थं, जायाइं केवलाइं णाणाइं ।
एयं कुणमाणो खलु, अचिरेणं केवलमुवेइ ॥१४॥

ऋषभाऽऽदिकानां जिनानाम्,अत्र तपसि कृते,जातान्युत्पन्नानि, केवलानि केवलसंज्ञितानि, ज्ञानानि संवेदनानि। अत एतत् तीर्थङ्करज्ञानोत्पत्तिसंज्ञितं तपः, कुर्वाणः, खलवचिरेण केवलं लभत इति व्यक्तम् । उपैतीति पाठान्तरं चेति ॥१४॥ पञ्चा०१९विव० ।

तित्थयरणाम–तीर्थकरनामन्–न० । नामकर्मभेदे, यदुदयवशादष्टमहाप्रातिहार्यप्रमुखाश्चतुस्त्रिंशदतिशयाः प्रादुर्भवन्ति । कर्म० ६ कर्म० । आ० । पं० सं० ।

तित्थेण तिहुयणस्स वि,पुज्जो से उदओ केवलिणो(४६)

तीर्थेन तीर्थकरनामकर्मवशात्,त्रिभुवनस्याऽपि देवमानवदानवलक्षणत्रिलोकस्याऽपि, पूज्योऽभ्यर्चनीयो भवति । ' से ' तस्य तीर्थकरनामकर्मण उदयो विपाकः केवलिन उत्पन्नकेवलज्ञानस्यैव,यदुदयाजीवः सदेवमनुजासुरलोकपूज्यमुत्तमोत्तमं तीर्थ

प्रवर्तयति । यदागमः-"तित्थं भंते ! तित्थं, तित्थयरे तित्थं ?। गोयमा ! अरिहा ताव नियमा तित्थंकरे, तित्थे पुण चाउवन्ने समणसंघे पढमगणहरे वा ।" इति परममुनिप्रणीतधर्मतीर्थस्य प्रवर्त्तयितृपदमवाप्नोति,तत्तीर्थकरनाम इत्यर्थः। (४६) कर्म०१कर्म०।

ननु केवलज्ञानाधासौ कृतकृत्यो जवाद् किमिति धर्मदेशनायां प्रवर्तत इत्याशङ्कायामाह-

वीतरागोऽपि सद्वेद्य-तीर्थकृन्नामकर्मणः ।
उदयेन तथा धर्म-देशनायां प्रवर्त्तते ॥ १ ॥

वीतरागोऽपि विगताभिष्वङ्गोऽपि, सरागः किल प्रवर्त्तत इति शब्दार्थः । सद्वेद्यं च सातवेदनीयं, तीर्थकृन्नाम च सद्वेद्यतीर्थकृन्नाम्नी, ते एव कर्म सद्वेद्यतीर्थकृन्नामकर्म्म । अथवा-सता शोभनेन धर्मदेशनाऽऽदिना प्रकारेण यद्वेद्यते तत्सद्वेद्यं, तच्च तीर्थकृन्नामकर्म्म च, तस्य, उदयेन विपाकेन, तथा तेन प्रकारेण समवसरणाऽऽदिश्रीसमनुभवलक्षणेन, धर्मदेशनायां कुशलानुष्ठानप्रज्ञापनायां, प्रवर्त्तते व्याप्रियते इति ॥ १ ॥ हा० ३१ अष्ट० । सम्म० । जी० । ननु सूत्रकर्तुः परमाऽपवर्गप्राप्तिः, अपरं सत्त्वानुग्रहः, तदर्थप्रतिपादकस्याऽर्हतः किं प्रयोजनमिति चेत् ?। उच्यते-न किञ्चित्,कृतकृत्यत्वाद्भगवतः । प्रयोजनमन्तरेणार्थप्रतिपादनप्रयासो निरर्थक इति चेत् ?। न । तस्य तीर्थकरनामकर्मविपाकोदयप्रभवत्वात् । उक्तं च-" तं च कहं वेइज्जइ, अगिलाए धम्मदेसणाए उ ।" इति । श्रोतृणामनन्तरं प्रयोजनं विवक्षिताऽध्ययनार्थपरिज्ञानं, परं निःश्रेयसं पदं, विवक्षिताध्ययनसम्यगर्थावगमतः संयमः, संयमप्रवृत्त्या सकलकर्मक्षयोपपत्तेः । जी० १ प्रति० । "ज्ञानिनो धर्मतीर्थस्य, कर्त्तारः परमं पदम् । गत्वाऽऽगच्छन्ति भूयोऽपि, जवं तीर्थनिकारतः" ॥१॥ (इत्यन्यदीयमतम्) स्था० १ ठा० । आ० म० । पं० सं० । उत्त० । (तीर्थकृन्नामबन्धहेतवः ' तित्थयर ' शब्दे २२६४ पृष्ठे निरूपिताः)

तित्थयरणामगोयकम्म-तीर्थकरनामगोत्रकर्म-न० । तीर्थकरत्वनिबन्धनं नाम तीर्थकरनाम, तच्च गोत्रं च कर्मविशेष एवेत्येकवद्भावात् तीर्थकरनामगोत्रम् । अथवा-तीर्थकर इति नामगोत्रमभिधानं यस्य तत्तीर्थकरनामगोत्रम् । तीर्थकरनामाऽऽख्ये नामकर्मभेदे, स्था० ।

समणस्स जगवओ महावीरस्स तित्थंसि नवहिं जीवेहिं तित्थकरनामगोयकम्मे निव्वत्तिए । तं जहा-* सेणिएणं, सुपासेणं, उदाइणा, पुट्टलेणं अणगारेणं, दढाउणा, संखेणं, सयएणं, सुलसाए साविआए, रेवईए । एस णं अज्जो कण्हे वासुदेवे रामे बलदेवे उदए पेढालपुत्ते पुट्टिले सयए गाहावई दारुए नियंठे सच्चई य णियंठीपुत्ते साविअबुद्धे अम्मंमे परिव्वाए, अज्जा वि णं सुपासा पासावच्चेज्जा आगमेस्साए उस्सप्पिणीए चाउज्जामं धम्मं पन्नवित्ता सिज्झिहिंति० जाव अंतं काहिंति । स्था० ९ ठा० ।

तित्थयरणिग्गमतव-तीर्थकरनिर्गमतपस्-न० । स्वनामख्याते चित्रतपसि, पञ्चा० ।

तत्र तीर्थकरनिर्गमतपः प्रतिपादयंस्तदाह-

तित्थयरणिग्गमो खलु, ते जेण तवेण णिग्गया सव्वे ।
ओसप्पिणीए सो पुण, इमीए एसो विणिद्दिट्ठो ॥ ६ ॥

तीर्थकरैर्निर्गमे गृहवासाद्यत्कृतं तपस्तत्तीर्थकरनिर्गमं तपः । खलुरलङ्कारे । तच्च कीदृशमित्याह--ते तीर्थकरा येन तपसा निर्गता गृहवासात्सर्वेऽवसर्पिण्याम् (सो पुण त्ति) तत्पुनस्तपोऽस्यां वर्त्तमानायाम् (एसो त्ति) एतद् वक्ष्यमाणम् । (विणिद्दिट्ठो त्ति) उक्तमिति गाथार्थः ॥ ६ ॥

एतदेवाऽऽह-

सुमइ त्थ णिच्चभत्ते-ण णिग्गओ वासुपुज्जो (जिणो) चउत्थेणं ।
पासो मल्ली वि य अ-ट्ठमेण सेसा उ छट्ठेणं ॥ ७ ॥

सुमतिः पञ्चमजिनः । " त्थ " इति पादपूरणे निपातः । नित्यजक्तेनानवरतभोजनेन, अविहितोपवास इत्यर्थः । निर्गतो गृहवासान्निष्क्रान्तः। तथा वासुपूज्यो द्वादशो जिनोऽर्हन् चतुर्थेनैकोपवासरूपेण । पार्श्वस्वामिनौ विंशतितमः, मल्लिरेकोनविंशतितमः, अष्टमेनोपवासत्रयरूपेण । शेषास्तु विंशतिः पुनः षष्ठेनोपवासद्वयरूपेणेति गाथाऽर्थः ॥ ७ ॥ (एतदेव ' तित्थयर ' शब्दे २२७७ पृष्ठे निष्क्रमणतपःप्ररूपणावसरे व्याख्यातम्)

एतद्विधानविधिमाह-

उसभाइकमेणेसो, कायव्वो ओहओ सइ वन्नम्मि ।
गुरुआणापरिसुद्धो, विसुद्धकिरियाए धीरेहिं ॥ ८ ॥

ऋषभाऽऽदिक्रमेण नाभेयनिर्गमाऽऽद्यानुपूर्व्या, एष तीर्थकरनिर्गमः, कर्त्तव्यो विधेयः, ओघतः सामान्येनोत्सर्गेणेत्यर्थः । सति विद्यमाने, वन्ने शक्तौ, तथाविधबलाभावे पुनर्व्यतिक्रमणकरणेऽपि न दोष इति भावः । गुर्वाज्ञया परिशुद्धो निर्दोषस्तत्संपादनाद् गुर्वाज्ञापरिशुद्धः । तथा-विशुद्धक्रियया ऽनवद्यानुष्ठानेन, धीरैः सात्त्विकैरिति गाथार्थः ॥ ८ ॥

इहैव मतान्तरमाह-

अन्ने तम्मासदिणे-सु वेंति लिंगं इमस्स नावम्मि ।
तप्पारणसंपत्ती, तं पुण एयं इमेसिं तु ॥ ९ ॥

अन्ये अपरे सूरयः,तेषामृषभाऽऽदिजिनानिर्गमतपसां ये मासाः प्रतीताः, दिनानि च तिथयः, तानि तन्मासदिनानि, तेषु, न मासान्तरतिथ्यन्तरेषु, ब्रुवते तीर्थकरनिर्गमतपः । तथाहि-ऋषभस्वामिनो निष्क्रमणतपोऽङ्गीकृत्य चैत्रमासबहुलाष्टमीदिनएव षष्ठं कार्यं, वर्द्धमानस्वामिनश्च मार्गशीर्षबहुलदशमीदिनएवेति । एवमन्येषामपीति । तथा लिङ्गं लक्षणम्, अस्य ऋषभाऽऽदिनिर्गमतपसः, भावे संसिद्धौ, तेषामृषभाऽऽदीनां यस्य यत्पारणं भोजनमासीत्तस्य संपत्तिः प्राप्तिस्तत्पारणसंपत्तिः,तत्पुनः पारणकमेतद्वक्ष्यमाणमेषामृषभाऽऽदीनाम्, तुशब्दः पूरणे। इति गाथार्थः ॥ ९ ॥ पञ्चा० १६ विव० । (' उसह ' शब्दे द्वितीयभागे ११३३ पृष्ठे यावता कालेन भिक्षा लब्धा, यच्च पारणकमासीत् तन्निरूपितम्)

तित्थयरत्त-तीर्थकरत्व-न० । अर्हत्वे, यो० विं० । आ० म० । (तीर्थकरत्वहेतवः ' तित्थयर ' शब्देऽनुपदमेव २२७४ पृष्ठे व्याख्याताः)

* श्रेणिको राजा १, सुपार्श्वो वर्द्धमानस्वामिपितृव्यः २, उदायी कूणिकपुत्रः श्रेणिकपौत्रः ३ ।

तित्थयरदाण–तीर्थकरदान–न०। तीर्थहीयमाने, वरघोषणायां सत्यां श्रावको, योषिच्च तद्दानं गृह्णीतः, न वेति प्रश्ने, उत्तरम–तीर्थकृद्दानसमये ज्ञाताधर्मकथाऽऽदिषु सनाथानाथपथिककार्पटिकाऽऽदीनां याचकानां प्रहणाधिकारो दृश्यते, न तु व्यवहारिणाम, तेन श्रावकोऽपि कश्चिद्यदि याचकीभूय गृह्णाति तदा गृह्णातु,योषितस्तु प्रायस्तत्राधिकारो न दृश्यत इति।३८९ प्र०। सेन० ३ उल्ला०।

तित्थयरभत्ति–तीर्थकरभक्ति–स्त्री०। परमगुरुविनये, पञ्चा० १ विव०।

तित्थयरमाइतव–तीर्थकरमातृतपस्–न०। तीर्थकरमातृपूजायुक्तं तपस्तीर्थकरमातृतपः। भारूपदे सप्तभिरेकाशनकैर्निष्पाद्ये चित्रतपोभेदे, पञ्चा० १६ विव०।

तित्थयरमोक्खगमणतव–तीर्थकरमोक्षगमनतपस्–न०। स्वनामख्याते चित्रतपसि, पञ्चा०।

तत्स्वरूपमाह-

तित्थयरमोक्खगमणं, अहावरो एत्थ होइ विन्नेओ।
जेण परिनिव्वुया ते, महाणुभावा तओ य इमो॥१५॥

तीर्थकरमोक्षगमनं नाम, अथानन्तरम, (अवरो त्ति) अपरम्, अत्र तपोऽधिकारे, भवति स्यात्, (विन्नेउ त्ति) विज्ञेयम्। येन तपसा, परिनिर्वृता निर्वाणं गताः, ते तीर्थकराः, महानुभावा अचिन्त्यशक्तयः, (तओ य इमो त्ति) ततश्च तीर्थकरनिर्वाणगमनाऽऽख्यं तपः, इदं वक्ष्यमाणमिति गाथाऽर्थः ॥१५॥

तदेवाऽऽह-

निव्वाणमंतकिरिया, सा चोद्दसमेण पढमनाहस्स।
सेसाण मासिएणं, वीरजिणिंदस्स छट्ठेणं॥ १६॥

निर्वाणं निर्वृतिः, अन्तक्रियेति अन्तक्रियाशब्देनोच्यते,साऽन्तक्रिया (चोद्दसमेण त्ति) चतुर्दशभक्तेनोपवासषट्केनेत्यर्थः, प्रथमनाथस्य ऋषभजिनस्य, शेषाणामजिताऽऽदीनां मासिकेन मासोपवासरूपेण,वीरजिनेन्द्रस्य षष्ठेनेति व्यक्तमिति गाथाऽर्थः ॥१६॥ पञ्चा० १६ विव०। ('तित्थयर' शब्देऽपि २२७९ पृष्ठे गतेयं गाथा) "समणस्स णं भगवओ महावीरस्स अट्ठसया अणुत्तरोववाइयाणं गइकल्लाणाणं० जाव आगमेसिभद्दाणं उक्कोसिया अणुत्तरोववाइसंपया होत्था।" स्था० ८ ठा०। (एते 'तित्थयर' शब्दे २२४८ पृष्ठे सर्वेषां तीर्थकृतां व्यक्तेन प्रतिपादिताः)

तित्थयरसम–तीर्थकरसम–पुं०। सर्वाऽऽचार्यगुणयुक्ततया सुधर्माऽऽदिवत्तीर्थकरकल्पे, ग०।

तित्थयरसमो सूरी, सम्मं जो जिणमयं पयासेइ।
आणं अइक्कमंतो, सो कापुरिसो न सप्पुरिसो॥२७॥

स सूरिस्तीर्थकरसमः सर्वाऽऽचार्यगुणयुक्ततया सुधर्माऽऽदिवत्तीर्थकरकल्पो विज्ञेयः। न च वाच्यं चतुस्त्रिंशदतिशयाऽऽदिगुणविराजमानस्य तीर्थकरस्योपमा सूरेस्तद्विकलास्वाऽनुचिता। यथा तीर्थकरोऽर्थं भाषते,एवमाचार्योऽप्यर्थमेव भाषते। तथा यथा तीर्थकर उत्पन्नकेवलज्ञानो भिक्षार्थं न हिण्डते, एवमाचार्योऽपि भिक्षार्थं न हिण्डते, इत्याद्यनेकप्रकारैस्तीर्थकरानुकारित्वस्य सर्वाऽतिशयित्वस्य परमोपकारित्वाऽऽदेश्च ख्यापनार्थम्,तस्य स्वाख्यतरत्वात्। किं च-श्रीमहानिशीथपञ्चमाध्ययनेऽपि भावाऽऽचार्यस्य तीर्थकरसाम्यमुक्तम्। यथा-"से नयवं! किं तित्थयरसंतिअं आणं नाइक्कमिज्जा, उदाहु आयरियसंतिअं? गोयमा! चउव्विहा आयरिया भवंति। तं जहा-नामायरिया, ठवणायरिया, दव्वायरिया, भावायरिया। तत्थ णं जे भावायरिया ते तित्थयरसमा चेव दट्ठव्वा, तेसिं संतिअं आणं नाइक्कमेज्ज त्ति।" स कः यः सम्यक् यथास्थितं, जिनमतं जगत्प्रभुदर्शनं नैगमसंग्रहव्यवहारऋजुसूत्रशब्दसमभिरूढैवंभूतरूपनयसप्तकाऽऽत्मकं, प्रकाशयति भव्यानां दर्शयतीत्यर्थः। २७। ग० १ अधि०।

तित्थयरासिद्ध–तीर्थकरासिद्ध–पुं०। तीर्थकराः सन्तो ये सिद्धा ऋषभाऽऽदिवत्ते तीर्थकरसिद्धाः। सिद्धभेदेषु, पा०। ल०। नं०। आ० चू०।

तित्थयराऽऽणा–तीर्थकराऽऽज्ञा–स्त्री०। जिनोपदेशे, पञ्चा० १६ विव०। "तित्थगराणा मूलं,नियमा धम्मस्स तीए वायाए। किं धम्मो किमहम्मो, मूढा नेउं वि पारेंति॥१॥" दर्श० १ तत्त्व।

तित्थयराभिमुह–तीर्थकराभिमुख–त्रि०। तीर्थंकरसम्मुखे, बृ० १ उ०।

तित्थयरी–तीर्थकरी–स्त्री०। स्त्रीत्वविशिष्टे तीर्थकरे, यथा बुद्धीमल्लिस्वामिनीप्रभृतिका तीर्थकरी, सामान्यसाध्व्यादिका वा वेदितव्या। यतः सिद्धप्राभृतटीकायामेवोक्तम-"बुद्धीओ वि मल्लीपमुहाओ अन्नाओ य सामन्नसाहुणीपमुहाओ व हुंति त्ति।" नं०।

तित्थराय–तीर्थराज–पुं०। शत्रुञ्जयपर्वते, ती० १ कल्प।

तित्थसिद्ध–तीर्थसिद्ध–पुं०। तीर्यते संसारसागरोऽनेनेति तीर्थम, यथाऽवस्थितसकलजीवाजीवाऽऽदिपदार्थसार्थप्ररूपकं परमगुरुप्रणीतं प्रवचनं, तच्च निराधारं न भवतीति सङ्घः, प्रथमगणधरो वा; तस्मिन्नुत्पन्ने ये सिद्धास्ते तीर्थसिद्धाः। प्रज्ञा० १ पद। नं०। ध०। आ० चू०। तीर्थे उक्तलक्षणे सति सिद्धा निर्वृता जम्बूस्वाम्यादिवदिति तीर्थसिद्धाः। पा०। तीर्थे सति सिद्धा निर्वृता ऋषभसेनगणधराऽऽदिवदिति तीर्थसिद्धाः। सिद्धभेदेषु, स्था० १ ठा०।

तित्थसेवण–तीर्थसेवन–न०। तीर्थम् उक्तलक्षणं, तस्य सेवनं तीर्थसेवनम। द्रव्यभावतीर्थसेवायाम्, ध०। तीर्थकरनामकर्मनिबन्धनत्वेन प्राधान्यख्यापनार्थम। तथा-तीर्थे द्रव्यतो जिनदीक्षाज्ञाननिर्वाणस्थानम। यदाह-"जम्मं दिक्खा नाणं, तित्थयराणं महाणुभावाणं। जत्थ य किर निव्वाणं, आगाढं दंसणं होइ॥१॥" इति। भावतस्तु ज्ञानदर्शनचारित्राऽऽधारः श्रमणसंघः, प्रथमगणधरो वा। यदाह-"तित्थं भंते! तित्थं, तित्थयरे तित्थं? गोयमा! अरिहा ताव नियमा तित्थयरे, तित्थे पुण चाउव्वण्णे समणसंघे, पढमगणहरे वा।" इति। तस्य सेवनम्। ध० २ अधि०।

तित्थाणुसज्जणा–तीर्थानुषज्जना–स्त्री०। जिनशास्त्रानुषज्जनायाम, कल्प०।

जप्पभिइं च णं से खुद्दाए नासरासी महग्गहे दोवाससहस्सट्ठिई समणस्स भगवओ महावीरस्स जम्मनक्खत्तं संकंते, तप्पभिइं च णं समणाणं निग्गंथाणं निग्गंथीण य नो सुदिओदिए पूआसक्कारे पवत्तइ॥ १३०॥ जया णं से खुद्दाए भासरासी महग्गहे दोवाससहस्सट्ठिई० जाव जम्मनक्खत्ताओ विइक्कंते भविस्सइ, तया णं समणाणं निग्गंथाणं निग्गंथीण य उदिओदिए पूआसक्कारे भविस्सइ॥१३१॥

यतः प्रभृति स क्षुद्राऽऽत्मा भस्मराशिनामा ग्रहो द्विवर्षसहस्रस्थितिः श्रमणस्य भगवतो महावीरस्य जन्मनक्षत्रं संक्रान्तः, ततः प्रभृति श्रमणानां तपस्विनां,निर्ग्रन्थानां साधूनां, निर्ग्रन्थीनां साध्वीनां च अदितोदित उत्तरोत्तरं वृद्धिमान् ईदृशः यः पूजा वन्दनाऽऽदिसत्कारो वस्त्रदानाऽऽदिबहुमानः,स न प्रवर्त्तते। अत एव शक्रेण स्वामी विज्ञप्तः-यत् क्षणमायुर्बध्नीयत, येन भवत्सु जीवत्सु भवज्जन्मनक्षत्रं संक्रान्तो भस्मराशिग्रहो भवच्छासनं पीडयितुं न शक्ष्यति। ततः प्रभुणोक्तम्-न खलु शक्र ! कदाचिदपि इदं नूतनपूर्वं,प्रक्षीणमायुर्जिनैरेरपि न वर्द्धयितुं शक्यते,ततोऽवश्यंभाविनी तीर्थबाधा भविष्यत्येव, किं तु षडशीतिवर्षाधिके कल्किनि कुनृपतौ त्वया निगृहीते सति वर्षसहस्रद्वये पूर्णे भज्जन्मनक्षत्राद्ग्रहे व्यतिक्रान्ते च त्वत्स्थापितकल्किपुत्रपौत्रदत्तराज्यादारभ्य साधुसाध्वीनाम् अदितोदितः पूजासत्कारो भविष्यतीति ॥१३०॥ सूत्रकारा अपि तदेवाऽऽहुः-(जया णमित्यादि) यदा च क्षुद्रात्मा भस्मराशिर्महाग्रहः द्विवर्षसहस्रस्थितिकः यावद् भगवद्जन्मनक्षत्राद् व्यतिक्रान्तो भविष्यति, तदा श्रमणानां निर्ग्रन्थानां निर्ग्रन्थीनां च अदितोदितः पूजासत्कारो भविष्यति। कल्प० ६ क्षण।

से भयवं! केवइएणं कालेणं पहे कुगुरुभावी होंति ?। गोयमा ! इओ य अट्ठतेरसएहं वाससयाणं साइरेगाणं समइक्कंताणं परओ जविंसु। से भयवं ! केणं अट्ठेणं ?। गोयमा ! तक्कालं इड्ढीरससायगारवसंगए ममीकारअहंकारऽग्गीए अंतो संपज्जलंतबोंदी अहमहं ति कयमाणसे अमुणियसमयसब्भावे गणी भविंसु,एएणं अट्ठेणं। से भयवं ! किं सव्वे वि एवंविहे तक्कालगणी भविंसु ?। गोयमा ! एगंतेणं नो सव्वे,के य पुण दुरंतपंतलक्खणे अदट्ठव्वे णं एगाए जणणीए जमगसमगं पसूए निम्मेरे पावसीले दुज्जायजम्मे सुरोद्दपयंमाजिग्गहियदूरमहामिच्छद्दिट्ठी भविंसु। से भयवं! कहं ते समुवलक्खेज्जा ?। गोयमा ! उस्सुत्तउम्मग्गपवत्तणुद्दिसए,अणुमईपच्चएण वा। महा०७अ०१ चू०।

उत्सर्पिण्यामन्तिमजिनस्य तीर्थानुषज्जना-

उस्सप्पिणि अंतिमजिण—तित्थं सिरिरिसहनाणपज्जाया।
संखेज्जा जावइआ, ताव पमाणं धुवं भविही ॥४५२॥

इह श्रीऋषभस्वामिनः केवलज्ञानपर्यायो वर्षसहस्रोन एकपूर्वलक्षः, तत एवंस्वरूपा ज्ञानपर्यायाः संख्येया यावन्तो भवन्ति तावत्प्रमाणमुत्सर्पिण्यामन्तिमजिनस्य चतुर्विंशतितमस्य भङ्क्त्वाऽनन्तस्तीर्थंकृतस्तीर्थं ध्रुवं निश्चितं भविष्यति। संख्येयपूर्वलक्षणं तत्तीर्थमित्यर्थः। प्रव० २६५ द्वार। दर्श०। ति०। (कदा कस्य श्रुतस्य व्यवच्छेद इति तु 'तित्थयर' शब्दे २२७३ पृष्ठे निरूपितः)

व्यवच्छेदाधिकारादेवेदमाह-

जंबुद्दीवे णं भंते ! दीवे भारहे वासे इमीसे उस्सप्पिणीए देवाणुप्पियाणं केवइयं कालं पुव्वगए अणुसिज्जिस्सइ ?। गोयमा ! जंबुद्दीवे णं दीवे भारहे वासे इमीसे उस्सप्पिणीए मम एगं वाससहस्सं पुव्वगए अणुसिज्जिस्सइ। जहा णं भंते ! जंबुद्दीवे दीवे भारहे वासे इमीसे उस्सप्पिणीए देवाणुप्पियाणं एगं वाससहस्सं पुव्वगए अणुसिज्जिस्सइ, तहा णं भंते ! जंबुद्दीवे दीवे भारहे वासे इमीसे ओसप्पिणीए अवसेसाणं तित्थगराणं केवइयं कालं पुव्वगए अणुसिज्जित्था ?। गोयमा ! अत्थेगइयाणं संखेज्जं कालं, अत्थेगइयाणं असंखेज्जं कालं। जंबुद्दीवे णं दीवे भारहे वासे इमीसे उस्सप्पिणीए देवाणुप्पियाणं केवइयं कालं तित्थे अणुसिज्जिस्सइ ?। गोयमा ! जंबुद्दीवे दीवे भारहे वासे इमीसे उस्सप्पिणीए ममं एगवीसं वाससहस्साइं तित्थे अणुसिज्जिस्सइ। जहा णं भंते ! जंबुद्दीवे दीवे भारहे वासे इमीसे उस्सप्पिणीए देवाणुप्पियाणं एक्कवीसं वाससहस्साइं तित्थे अणुसिज्जिस्सइ, तहा णं भंते ! जंबुद्दीवे दीवे भारहे वासे आगमेस्साणं चरमतित्थगरस्स केवइयं कालं तित्थे अणुसिज्जिस्सइ ?। गोयमा ! जावइएणं उसभस्स अरहओ कोसलियस्स जिणपरियाए तावइयाए संखेज्जाइं आगमेस्साणं चरमतित्थगरस्स तित्थे अणुसिज्जिस्सइ।

(जंबुद्दीवे णमित्यादि) (देवाणुप्पियाणं ति) युष्माकं संबन्धि (अत्थेगइयाणं संखेज्जं कालं ति) पश्चानुपूर्व्या पार्श्वनाथाऽऽदीनां संख्यातं कालम्। (अत्थेगइयाणं असंखेज्जं कालं ति) ऋषभाऽऽदीनाम् (आगमेस्साणं ति) आगमिष्यतां भविष्यतां महापद्माऽऽदीनां जिनानाम्। (कोसलियस्स त्ति) कोशलदेशे जातस्य। (जिणपरियाए त्ति) केवलिपर्यायः, स च वर्षसहस्रन्यूनं पूर्वलक्षमिति। भ० २० श० ८ उ०।

अधुना·····"अणुसज्जणा य दस चोद्दस अट्ठ दुप्पसहे" (३३४) इत्यस्य व्याख्यानमाह-

दस ता अणुसज्जंती, जा चोद्दसपुव्वि-पढमसंघयणं।
तेण परेणऽट्ठविहं, जा तित्थं ताव बोधव्वं ॥ ३४१ ॥

यावत्प्रथमसंहननं, चतुर्दशपूर्वी च, तावद्दश प्रायश्चित्तानि अनुषज्जन्ति स्म। एतौ च प्रथमसंहननचतुर्दशपूर्विणौ समकं व्यवच्छिन्नौ, तयोश्च व्यवच्छिन्नयोरनवस्थाप्यं, पाराञ्चितं च व्यवच्छिन्नम्। ततः परेणानवस्थाप्यपाराञ्चितव्यवच्छेदादऽष्टविधं प्रायश्चित्तं तावदनुषज्जते, अनुवर्त्तमानं बोद्धव्यं, यावत्तीर्थव्यवच्छेदकाले चतुःप्रसभो नाम सूरिर्भविष्यति, तस्मिन् काळगते तीर्थं, चारित्रं च व्यवच्छेदमयते।

यदप्युक्तं "देंता वि न दीसंति" (३३०) इत्यादि। तत्राऽऽह-

दोसु ण वोच्छिज्जेसुं, अट्ठविहं देंतया करेंता य।
न वि केई दीसंती, वयमाणे चारिया चउरो ॥ ३४२ ॥

द्वयोरनवस्थाप्यपाराञ्चितयोः, अथवा-प्रथमसंहननचतुर्दशपूर्विणोः, व्यवच्छिन्नयोरष्टविधं प्रायश्चित्तं ददतः, कुर्वन्तो वा केचिन्न दृश्यन्ते, इति वदति परस्मिन्प्रायश्चित्तं चत्वारो मासा।

दोसु वि वोच्छिन्नेसुं, अट्ठविहं देंतया करेंता य ।
पञ्चक्खं दीसंती, जहा तहा मे निसामेहि ॥ ३४३ ॥

द्वयोरन्तिमयोः प्रायश्चित्तयोः प्रथमसंहननचतुर्दशपूर्विणोर्वा व्यवच्छिन्नयोरष्टविधं प्रायश्चित्तं ददतः, कुर्वन्तश्च प्रत्यक्षं दृश्यन्ते यथा,तथा मम कथयतो निशमय ।

पंचेव निग्गंथा खलु, पुलागवकुसा कुसीलनिग्गंथा ।
तह य सिणाया तेसिं, पच्छित्तं जहक्कमं वोच्छं ॥३४४॥

पञ्चैव खलु निर्ग्रन्था भवन्ति ।तद्यथा-पुलाको, वकुशः, कुशीलः, निर्ग्रन्थः, स्नातकश्च । एतेषां च स्वरूपं व्याख्याप्रज्ञप्तेरवसेयम् । एतेषां प्रायश्चित्तं यथाक्रमं वक्ष्ये ।

प्रतिज्ञां पूरयति-

आलोयणपडिक्कमणे, मीसविवेगे तवे विउस्सग्गो ।
एए उ पच्छित्ता, पुलागनियंठस्स बोधव्वा ॥३४५॥

आलोचना, प्रतिक्रमणं, मिश्रं, विवेकः,तपः, व्युत्सर्गः, एतानि षट् प्रायश्चित्तानि पुलाकनिर्ग्रन्थस्य बोधव्यानि ।

वउसपडिसेवगाणं, पायच्छित्ता हवंति सव्वे वि ।
थेराण भवे कप्पे, जिणकप्पे अट्ठहा होंति ॥३४६॥

वकुशप्रतिसेवकयोर्वकुशस्य, प्रतिसेवनाकुशीलस्य च सर्वाण्यपि दशाऽपि प्रायश्चित्तानि भवन्ति । तौ च वकुशकुशीलौ स्थविराणां कल्पे भवतः, जिनकल्पे, उपलक्षणमेतत्-यथालन्दकल्पे च, तयोः प्रायश्चित्तमष्टधा भवति, अनवस्थाप्यपाराञ्चितयोरभावात् ।

आलोयणा विवेगो य, नियंठस्स दुवे भवे ।
विवेगो य सिणायस्स, एमेया पडिवत्तिओ ॥३४७॥

आलोचनाप्रायश्चित्तविवेकप्रायश्चित्ते निर्ग्रन्थस्य भवतः, स्नातस्य केवल एको विवेकः । एवमेताः पुलाकाऽऽदिषु प्रतिपत्तयः ।

पंचेव संजया खलु, नायसुएण कहिया जिणवरेणं ।
तेसिं पायच्छित्तं, अहक्कमं कित्तइस्सामि ॥३४८॥

ज्ञातसुतेन जिनवरेण वर्द्धमानस्वामिना पञ्चैव खलु संयताः कथिताः, तेषां यथाक्रमं प्रायश्चित्तं कीर्तयिष्यामि ।

तदेव कीर्तयति-

सामइयसंजयाणं, पायच्छित्तानि छेदमूलरहियऽट्ठा ।
थेराण जिणाणं पुण, तवमंतं छव्विहं होइ ॥३४९॥

सामायिकसंयतानां स्थविराणां स्थविरकल्पिकानां छेदमूलरहितानि शेषाण्यष्टौ प्रायश्चित्तानि भवन्ति । जिनानां जिनकल्पिकानां पुनः सामायिकसंयतानां तपःपर्यन्तं षड्विधं प्रायश्चित्तं भवति ।

छेदोवट्ठावणिए, पायच्छित्ता हवंति सव्वे वि ।
थेराण जिणाणं पुण, मूलंतं अट्ठहा होइ ॥३५०॥

छेदोपस्थापनीये संयमे वर्तमानानां स्थविराणां सर्वाण्यपि प्रायश्चित्तानि भवन्ति, जिनकल्पिकानां पुनर्मूलपर्यन्तमष्टधा भवति ।

परिहारविसुद्धीए, मूलंता अट्ठ होंति पच्छित्ता ।
थेराण जिणाणं पुण, छव्विह छेयादिवज्जं च ॥३५१॥

परिहारविशुद्धिके संयमे वर्तमानानां स्थविराणां मूलान्तान्यष्टौ प्रायश्चित्तानि भवन्ति । जिनानां पुनश्छेदाऽऽदिवर्जं षड्विधम ।

आलोयणा विवेगो य, तइयं तु न विज्जती ।
सुहुमे य संपराए य, अहक्खाए तहेव य ॥३५२॥

सूक्ष्मसम्पराये, यथाख्याते च संयमे वर्तमानानामालोचना, विवेक इत्येवंरूपे द्वे प्रायश्चित्ते भवतः, तृतीयं तु न विद्यते ।

ततः प्रस्तुते किमायातमिति चेदत आह-

वउसपडिसेवया खलु, इत्तरि-छेया य संजया दोन्नि ।
जा तित्थऽणुसज्जंती, अत्थि हु तेणं तु पच्छित्तं ॥३५३॥

निर्ग्रन्थचिन्तायां वकुशः,प्रतिसेवकः प्रतिसेवनाकुशीलः,इत्येतौ द्वौ निर्ग्रन्थौ; संयतचिन्तायाम् इत्वरी-इत्वरसामायिकवान्, छेदश्छेदोपस्थाप्यश्चेति द्वौ संयतौ, यावत्तीर्थं तावदनुषज्जतोऽनुवर्त्तेते, तेन ज्ञायते अस्ति संप्रत्यपि प्रायश्चित्तम् । व्य० १० उ० । (विशेषविस्तरस्तु ' वोच्छेय ' शब्दे वक्ष्यते) (कल्किराज्ये तीर्थं नष्टप्रायमासीदिति ' कक्कि ' शब्दे तृतीयभागे १८१ पृष्ठे समुक्तम्)

तित्थाभिसेअ-तीर्थाभिषेक-पुं० । लौकिकतीर्थस्नाने, औ० ।

तित्थिय-तीर्थिक-त्रि० । अन्यमतीये सम्मतपापे, आचा० १ श्रु० ८ अ० १ उ० ।

तित्थुग्गालिय-तीर्थोद्गालिक-न० । स्वनामख्याते प्रकीर्णके, तित्थु० ।

"जयइ ससिपायनिम्मल-तिहुअणविदियसुपुण्णजसकुसुमो ।
उसभो केवलदंसण-दिवायरो दिट्ठिदट्ठव्वो ॥ १ ॥
बावीसइं च निज्जिय-परीसहकसायविग्घसंघाया ।
अजिआईया भविया-ऽरविंदरविणो जयंति जिणा ॥ २ ॥
जयइ सिद्धत्थनरि-दविमलकुलविपुलनहलियमयंको ।
महिपल्लससिमहोरग-महिंदमहिओ महावीरो ॥ ३ ॥
नमिऊण समणसंघं, सुनायपरमत्थपावडं वियडं ।
वोच्छं निच्छयथत्थं, तित्थुग्गालीएँ संखेवं ॥ ४ ॥
रायगिहे गुणसिलए, जाणिया वीरेण गणहराणं तु ।
पयसयसहस्समेयं, वित्थरओ लोगनाहेणं ॥ ५ ॥
अइसंखेवं मोत्तुं, मोत्तूण पवित्थरं अहं भणिमो ।
अप्पक्खरं महत्थं, जह भणियं लोगनाहेणं ॥ ६ ॥
कालोऽवि अणाईओ, पवाहरूवेण होइ नायव्वो ।
तिहणाविहूणो सो खिय, बारसअंगोहिँ निद्दिट्ठो ॥७॥" तित्थु० ।

"एसा य पयसहस्से-ण वन्निया समणगंधहत्थीणं ।
पुट्ठेण य रायगिहे, तित्थुग्गाली उ वीरेणं ॥ १२४५ ॥
सोउं तित्थुग्गालिं, जिणवरवसहस्स वद्धमाणस्स ।
पणमह सुगइगयाणं, सिद्धाणं निट्ठितट्ठाणं ॥ १२४६ ॥
भद्दं सव्वजगुज्जो-यगस्स भद्दं जिणस्स वीरस्स ।
भद्दं सुरासुरनमं-सियस्स भद्दं धुयरयस्स ॥ १२४७ ॥
गुणभवणगहण ! सुयरय-ण ! भरियदंसण ! विसुद्धरत्थागा ! ।
संघनगर ! भद्दं ते, अक्खंडचरित्तपागारा ! ॥ १२४८ ॥
जं उचितं सुयाओ, अहव गतीए जथोवदेसेण ।
तं च विरुद्धं नाउं, सोहेयव्वं सुयधरेहिं ॥ १२४९ ॥
मणपरमोहिपुलाए, आहारगखवगउवसमे कप्पे ।
संजमतियकेवलिसि-ज्झणा उ जंबुम्मि विच्छिन्ना ॥१२५०॥
पुव्वाणं अणुओगो, संघयणं पढमं च संहाणं ।

सुहुममहापाणाणि य, वोच्छिज्जा थूलभद्दम्मि ॥ १२५१ ॥
दसपुव्वा वोच्छिज्जा, संपुण्णा सुरजवम्मि संपत्ते ।
वयरम्मि महाभागे, संघयणं अरूनारायं ॥ १२५२ ॥
वीसदिणोहिं कप्पे, पंच गहाणी उ कप्पतवणा य ।
नवसयतियणउएहिं, वोच्छिन्ना संघआणाए ॥ १२५३ ॥
तीर्थोद्गालिकासिद्धान्तः ।
तेतीसं गाहाओ, दोन्नि सयाऊ सहस्समेगं च ।
तित्थुग्गालियसंखा, एसा नणिया उ अंकेणं" ॥१२५४॥ तित्थु०।

तित्थुण्णतिकारग–तीर्थोन्नतिकारक–त्रि० । प्रवचनप्रभावनाकारिणि, पञ्चा० ८ विव० ।

तित्थुदय–तीर्थोदय–पुं० । तीर्थकरनामोदये, यतः सयोग्यादौ तीर्थकरनामोदयो भवति । यदुक्तम्–"जदए जस्स सुरासुरनरवइनिवहेहिँ पूइओ होइ । तं तित्थयरं नामं, तस्स विवागो हु केवलिणो ॥ १ ॥" ततः पूर्वोक्तैकचत्वारिंशति तीर्थकरनाम क्षिप्यते, जाता द्विचत्वारिंशत्, सा च सयोगिनि भवतीति । (२१) कर्म० २ कर्म० ।

तित्थेस–तीर्थेश–पुं० । तीर्थस्य प्रागुक्तस्य, तदाऽऽधेयस्याऽऽगमस्य वा, ईं लक्ष्मीं महिमानं, श्यति तत्तदसद्भूतदूषणोद्घोषणैः स्वाभिप्रायेण तनूकरोति यः स तीर्थेशः । तीर्थान्तरीये बहिरङ्गापकारिणि, (रत्ना०) तीर्थस्य चतुर्वर्णस्य श्रीश्रमणसङ्घस्येशः स्वामी तीर्थेशः । तीर्थकरे, रत्ना० १ परि० ।

तिदंम–त्रिदण्ड–न० । त्रयाणां दण्डानां समाहारस्त्रिदण्डम् । त्रयाणां दण्डानां समाहारे, औ० । भ० ।

तिदंमि–(ण्)–त्रिदण्डिन्–पुं० । मनोवाक्कायदण्डत्रयपरिक्षणार्थं दण्डत्रयधारके वेदान्तावलम्बिश्रमणभेदे, आ० म० १ अ० २ खण्ड । सूत्र० । (नमस्कारफले त्रिदण्डोदाहरणं ' णमोक्कार ' शब्देऽस्मिन्नेव भागे १७४४ पृष्ठे गतम्)

तिदसावास–त्रिदशावास–पुं० । देवलोके, प्रा० दुवो० ४ पाद ।

तिदिस–त्रिदिश्–न० । त्रिस्रो दिशः समाहृतास्त्रिदिक् । दिक्त्रये, रा० ।

तिध–तथा–अव्य० । "कथं-यथा-तथां थाऽऽदेरेमेहेधा डितः" ॥ ८ । ४ । ४०१ ॥ इत्यपभ्रंशे थादेरवयवस्य डित्संज्ञकः 'इध' इत्यादेशः । प्रा० ४ पाद । साम्ये, अभ्युपगमे, पृष्टप्रतिवाक्ये, समुच्चये, निश्चये च । वाच० ।

तिपरिवत्त–त्रिपरिवर्त्त–त्रि० । त्रिभिर्वारैर्वेष्टनीये, बृ० ३ उ० ।

तिपह–त्रिपथ–न० । त्रयाणां पथां समाहारे, वाच० । अनु० ।

तिपायण–त्रिपातन–न० । "कायवयमणा तिन्नि उ, अहवा देहा उ इंदिया पाणा । सामित्ता वायाणे, होयऽतिवाओ य करणेसुं ॥५४॥" इत्युक्तलक्षणे प्राणिविनाशे, पिं० । त्रीणि कायवाङ्मनांसि, यद्वा–त्रीणि देहाऽऽयुरिन्द्रियलक्षणानि । पातनं चातिपातो, विनाश इत्यर्थः । अत्र च त्रिधा समासविवक्षा । तद्यथा–षष्ठीतत्पुरुषः, पञ्चमीतत्पुरुषः, तृतीयातत्पुरुषश्च । तत्र षष्ठीतत्पुरुषोऽयम्-त्रयाणां कायवाङ्मनसां पातनं विनाशनं त्रिपातनम् । एतच्च परिपूर्णगर्भजपञ्चेन्द्रियतिर्यग्मनुष्याणामवसेयम्,एकेन्द्रियाणां तु कायस्यैव केवलस्य,विकलेन्द्रियसंमूर्च्छिमतिर्यग्मनुष्याणां तु कायवचसोरेवेति । यद्वा-त्रयाणां देहाऽऽयुरिन्द्रियरूपाणां पातनं विनाशनं त्रिपातनम् । इदं च सर्वेषामपि तिर्यग्मनुष्याणां परिपूर्णं घटते, केवलं यथा येषां सम्भवति तथा तेषां वक्तव्यम्,यथा एकेन्द्रियाणां देहस्यौदारिकस्य आयुषस्तिर्यगायूरूपस्येन्द्रियस्य स्पर्शनेन्द्रियस्य, द्वीन्द्रियाणां देहस्यौदारिकरूपस्य आयुषस्तिर्यगायुष इन्द्रिययोश्च स्पर्शनरसनलक्षणयोरित्यादि । पञ्चमीतत्पुरुषस्त्वयम्-त्रिभ्यः कायवाङ्मनोभ्यो, देहाऽऽयुरिन्द्रियेभ्यो वा पातनं व्यापादनमिति त्रिपातनम् । अत्राऽपि त्रिभ्यः परिपूर्णेभ्यः कायवाङ्मनोभ्यः पातनं गर्भजपञ्चेन्द्रियतिर्यङ्मनुष्याणाम्, एकेन्द्रियाणां तु कायादेव केवलात्, विकलेन्द्रियसंमूर्च्छिमतिर्यग्मनुष्याणां तु कायवाग्भ्यामिति, देहाऽऽयुरिन्द्रियरूपेभ्यः पातनं सर्वेषामपि परिपूर्णं सम्भवति । तथा तेषां प्रागिव वक्तव्यम् । तृतीयातत्पुरुषः पुनरयम्–त्रिभिः कायवाङ्मनोभिर्विनाशकेन स्वसम्बन्धिभिः पातनं विनाशनं त्रिपातनम् ॥९२॥ ('आधाकम्म' शब्दे द्वि० भा० ३२० पृष्ठेऽपि व्याख्येषा) पिं० । प्रश्न० । सूत्र० ।

तिपुंज–त्रिपुञ्ज–न० । क्षुद्राशुक्रमिश्रपुञ्जत्रये, विशे० । " आलंवणमलहंती, जह सद्धाणं न मुंचए झत्ति । एवं अकयतिपुंजी, मिच्छं चिय उवसमी एइ ॥१॥ " ध० ३ अधि० ।

तिपुक्खर–त्रिपुष्कर–न० । त्रीणि पुष्कराणि त्रिपुष्करम् । "संख्यापूर्वो द्विगुः " ॥ २ । १ । ५२ । इति समासः । अनु० । " वाराः क्रूरास्तिथिर्भद्रा,नक्षत्रं नन्दपादकम । जातेऽत्र जारजो योगो,मरणेऽत्र त्रिपुष्करम ॥१॥" इति ज्योतिषोक्ते योगभेदे, पुं० । वाच० ।

तिपुड–त्रिपुट–पुं० । त्रयः पुटा यस्य । खेसारीकलापभेदे, शरे, तालकयन्त्रे, गोक्षुरे, हस्तभेदे च । सूक्ष्मैलायाम्, मल्लिकायाम्, त्रिवृदोषधौ, कर्णस्फोटायां, देवीभेदे च । स्त्री० । टाप् । वाच० । जं० ५ वक्ष० ।

तिपुर–त्रिपुर–पुं० । त्रीणि स्वर्गाऽऽदिस्थानानि पुराण्यस्य । असुरभेदे, वाच० । त्रीणि पुराणि त्रिपुरम् । " संख्यापूर्वो द्विगुः " ॥ २ । १ । ५२ ॥ इति समासः । अनु० । पुरत्रयमात्रे, न० । वाच० ।

तिप्प–तृप्–त्रि० । "इक्तृपाऽऽदौ" ॥ ८ । १ । १२८ ॥ इति ऋत इत्वम् । प्रा० १ पाद । अतिशयोपभोगेन निवृत्तेच्छे, आचा० १ श्रु० २ अ० ५ उ० ।

तृप्–धा० । ज्वा०–आत्म० । क्वरणे, आचा० १ श्रु० २ अ० ५ उ० । "तिप्पामि वा पीणामि वा ।" (तिप्पामि त्ति) शरीरबलं तर्पयामि । सूत्र० २ श्रु० १ अ० । " तिप्पंति । " सुखास्वादनेन स्वात्मानं, परांश्च । सूत्र० २ श्रु० २ अ० ।

तिप्पणया–तेपनता–स्त्री० । तिपेः क्वरणार्थत्वादश्रुमोचने, भ० २५ श० ७ उ० । स्था० । शोकातिरेकादेव अश्रुलालाऽऽदिक्षरणप्रापणायाम्, भ० ३ श० ३ उ० । आर्तध्यानलक्षणे, सूत्र० १ श्रु० १ अ० १ उ० । परिदेवने, सूत्र० २ श्रु० ४ अ० । त्रिभिर्योगैः परितापे, आ० चू० ४ अ० ।

त्रिपातनता–स्त्री० । त्रिभ्यो मनोवाक्कायेभ्यः पातनं त्रिपातनं, तद्भावस्त्रिपातनता । त्रिपातनभावे, सूत्र० २ श्रु० ४ अ० ।

तिभाग–त्रिभाग–पुं० । तृतीयो भागस्त्रिभागः । मयूरव्यंसकाऽऽदित्वात्समासः । तृतीयेऽंशे, कर्म० २ कर्म० ।

तिमहुर–त्रिमधुर–न० । त्रीणि मधुराणि समाहृतानि त्रिमधुरम् । "संख्यापूर्वो द्विगुः" ॥ २ । १ । ५२ ॥ इति समासः । अनु० । घृतसितामाक्षिकरूपे मधुरत्रये, वाच० ।

तिमि–तिमि–पुं० । मत्स्यभेदे, प्रज्ञा० १ पद । जी० । कल्प० । " अस्ति मत्स्यस्तिमिर्नाम, शतयोजनविस्तरः । तिमिङ्गिलगिलोऽप्यस्ति, तद्गिलोऽप्यस्ति राघवः ॥१॥" सूत्र २ श्रु० ३ अ० । समुद्रे, वाच० । महामत्स्ये, प्रश्न० १ आश्र० द्वार ।

तिमिंगिल–तिमिङ्गिल–पुं० । तिमिं मत्स्यं गिरति । 'गृ' निगरणे । खश्, मुम् च । "अस्ति मत्स्यास्तिमिर्नाम, तथा चास्ति तिमिङ्गिलः । " वाच० । मत्स्यभेदे, प्रज्ञा० १ पद । मीने, दे० ना० ५ वर्ग १३ गाथा । कल्प० । सूत्र० । जी० । महामत्स्यतमे, प्रश्न० १ आश्र० द्वार ।

तिमिंगिलगिल–तिमिङ्गिलगिल–पुं० । महामत्स्ये, सूत्र० २ श्रु० ६ अ० ।

तिमिच्छाओ–देशी–कक्षिदित्यर्थे, पथिके च । दे० ना० ५ वर्ग १३ गाथा ।

तिमिण–देशी–भाण्डारणि, दे० ना० ५ वर्ग ११ गाथा ।

तिमिर–तिमिर–न० । अन्धकारे, कल्प० ३ क्षण । " जदा कण्हचउद्दसीए रातीए रयरेणुधूमिगा भवति, तदा तमिं तिमिरं भणति । अहवा–पित्तुदएण दव्वचक्खिदियस्संतरकरणं भवति । " नि० चू० ४ उ० । निकाचिते कर्मणि, ध० २ अधि० । विज्ञानाल्पतायाम्, बहत्पारिज्ञाने, आ०चू० ५ अ० । पर्वतकवनस्पतिभेदे, प्रज्ञा० १ पद ।

तिमिरिच्छु–देशी– कल्पद्रुमे, दे० ना० ५ वर्ग १३ गाथा ।

तिमिसा–त्रिमिश्रा–स्त्री० । तूर्यभेदे, औ० ।

तिमिसगुहा–तिमिस्रगुहा–स्त्री० । वैताढ्यगुहायाम्, यया स्वसैन्याधिकवर्ती चिलातकक्षेत्रं याति । स्था० ९ ठा० । ताश्च भरतैरवतवर्षयोर्दीर्घवैताढ्ययोर्द्वे, कच्छाऽऽदिद्वात्रिंशद्विजयेषु द्वात्रिंशदित्येवं चतुःषष्टिश्चक्रिजम्बूद्वीपे । (स्था० ८ ठा०) एवं धातकीखण्डे, पुष्करार्द्धे च प्रत्येकमष्टषष्टिस्तासां प्रमाणम् । स्था० २ ठा० ३ उ० । तत्र कृतमालको देवः । स्था० ५ ठा० ३ उ० । सं० । जं० । आ०क० । (तत्र भरतचक्रिगमनं ' भरह ' शब्दे वक्ष्यते) " तिमिसगुहा अट्ठ जोयणाइं उड्ढं उच्चत्तेणं । " स्था० ८ ठा० ।

तिमिसगुहाकूड–तिमिस्रगुहाकूट–पुं० । न० । तिमिस्रगुहाऽधिपदेवस्य निवासभूतं कूटं तिमिस्रगुहाकूटम् । वैताढ्यपर्वतस्य तृतीये कूटे, जं० १ वक्ष० । स्था० ।

तिमुह–त्रिमुख–त्रि० । त्रिभिर्मुखैर्युक्ते, प्रव० २६ द्वार ।

तिम्म–तिम्म–न० । तिज्-मक्, जस्य गः । " म्मो वा " ॥ ८ । २ । ६२ ॥ इति मस्य विकल्पेन मकारः । प्रा० २ पाद । तीक्ष्णे, तद्वति, त्रि० । वाच० ।

तिय–त्रिक–न० । त्रित्वसंख्यायाम्, रा० । आ० म० । त्रिपथयुक्ते स्थाने, ज्ञा० १ श्रु० १ अ० ।

त्रिज–त्रि० । त्रिभ्यो धातुभूतजीवशरीरेभ्यो जातं त्रिजम् । सवैस्मिन् वस्तुनि, विशे० ।

तियंकर–त्रियङ्कर–पुं० । स्वभावतस्तिर्यक्षु करोति यः । (तद्दृष्टान्तः ' दुट्ठपरिणाम ' शब्दे वक्ष्यते)

तियणाण–त्रयज्ञान–न० । त्रयाणामज्ञानानां समाहारस्त्रयज्ञानम् । मत्यज्ञानश्रुताज्ञानविभङ्गज्ञानरूपे, कर्म० ४ कर्म० ।

तियस–त्रिदश–पुं० । तिस्रो दशा जन्मसत्ताविनाशाऽऽख्याः, न तु वृद्धिपरिणामक्षया मर्त्यानामिव दशा येषां ते त्रिदशाः । देवेषु, वाच० । आ० म० ।

तियसलोग–त्रिदशलोक–पुं० । स्वर्गे, वाच० । आ०म० ।

तियसिंदणमंसिय–त्रिदशेन्द्रनमस्यित–त्रि० । त्रिदशाः सुमनसस्तेषामिन्द्रास्त्रिदशेन्द्रास्तैर्नमस्यितः । देवेन्द्रनते, ग० १ अधि० ।

तियरणमाला–त्रिरत्नमाला–स्त्री० । ज्ञानदर्शनचारित्ररूपरत्नत्रयमालायाम्, संथा० । " चारित्तसुद्धसाला, तियरणमाला तुमे भव्वा । " संथा० ।

तिरासि–त्रिराशि–न० । जीवाजीवनोजीवभेदात्त्रयो राशयः समाहृतास्त्रिराशि । राशित्रये, स्था० ७ ठा० ।

तिरिअजोणि–तिर्यग्योनि–पुं० । तिरश्चामुत्पत्तिस्थाने, प्रज्ञा० १ पद ।

तिरिअंच–तिर्यक्–त्रि० । चतुर्थगतिके तिरश्चां वैक्रियशरीरकरणं मूलशरीरेण सह संबद्धमसंबद्धं वा स्यादिति प्रश्ने, उत्तरम्–संबद्धमसंबद्धं च भवतीति । ७३ प्र० । सेन० २ उल्ला० । युगलिकक्षेत्रतिर्यञ्चः कल्पवृक्षाऽऽहारं कुर्वन्त्यन्यद्वेति प्रश्ने, उत्तरम्–गोप्रभृतयः कल्पवृक्षाऽऽहारं कुर्वन्ति, तथाऽन्यद् धान्यनृणाऽऽदिकमपि कुर्वन्तीति संभाव्यत इति । ५६ प्र० । सेन० ४ उल्ला० ।

तिरिक्ख–तिर्यक्–त्रि० । 'अञ्चु' गतौ । तिरोऽञ्चतीति तिर्यङ्, तिसरस्तिर्यादेशः । प्रज्ञा० १ पद । चतसृणां गतीनां चतुर्थगतिमापन्ने, प्रश्न० १ आश्र० द्वार ।

तिरिक्खजोणिय-तिर्यग्योनिक–पुं० । तिर्यञ्चोके योनय उत्पत्तिस्थानानि येषां ते तिर्यग्योनिकाः । जी० १ प्रति० । स्था० । " तिरिक्खजोणिया तिविहा पण्णत्ता । तं जहा–इत्थी, पुरिसा, नपुंसगा । " स्था० ३ ठा० १ उ० ।

तिर्यग्योनिज-पुं० । तिर्यञ्चोके योनयस्तिर्यग्योनयः, तत्र जातास्तिर्यग्योनिजाः । जी० १ प्रति० । जीवभेदे, स्था० ८ ठा० । जी० । " तिविहा तिरिक्खजोणिया पण्णत्ता । तं जहा–इत्थी, पुरिसा, नपुंसगा । " स्था० ३ ठा० १ उ० । तिर्यक्त्वकारणानि–" चउहिं ठाणेहिं जीवा तिरिक्खजोणियत्ताए कम्मं पगरेंति । तं जहा–माइल्लयाए, नियडिल्लयाए, अलियवयणेणं, कूडतुल्लकूडमाणेणं । " स्था० ४ ठा० ४ उ० ।

तैर्यग्योनिक–त्रि० । तैरश्चे तिर्यग्योनिकृते, स्था० ४ ठा० ४ उ० ।

तिरिक्खपयइ(ण्)–तिर्यक्प्रचयिन्–त्रि० । परस्परसमानाधिकरणत्वे सति परस्परसमानकालीने, यथा रूपरसाऽऽदयः, अणुत्वस्थौल्याऽऽदयश्च । नयो० ।

तिरिक्खभूय–तिर्यग्भूत–त्रि० । पशुकल्पे, प्रश्न० ३ आश्र० द्वार ।

तिरिक्खसामण्ण–तिर्यक्सामान्य–न० । तिर्यग्गुल्मलिताऽनुसृतसामान्यलक्षणे तुल्यसामान्ये, स्था० ।

तिर्यक्सामान्यस्य स्वरूपं सोदाहरणमुपदर्शयन्ति-

प्रतिव्यक्ति तुल्या परिणतिस्तिर्यक्सामान्यं, शबलशाबलेयाऽऽदिपिण्डेषु गोत्वं यथा ॥ ४ ॥

व्यक्तिं व्यक्तिमधिश्रित्य समाना परिणतिस्तिर्यक्सामान्यं विद्धेयम् । अत्र सौगताः संगिरन्ते--गौर्गौरित्याद्यनुगताऽऽकारप्रतिपत्तेरन्यव्यावृत्तिमात्रेणैव व्यक्तिषु प्रसिद्धेरनवसर एव सदृशपरिणामस्वरूपसामान्यस्वीकारः । सर्वतो व्यावृत्तानि हि स्वलक्षणानि न मनागप्यात्मानमन्येन मिश्रयन्तीति । तदेतन्मरुमरीचिकाचक्रोदकास्नानतर्षोऽङ्गिपुटप्रसारणम् । यत इयमन्यव्यावृत्तिर्बहिः,अन्तर्वा भवेत् । तत्र खण्डमुण्डाऽऽदिविशेषप्रतिष्ठैकान्यव्यावृत्तेर्बहिः सद्भावे सामान्यरूपता दुर्निवारा । आन्तरत्वे तु तस्याः कथं बहिरर्थाभिमुख्येनोल्लेखः स्यात् ? । नान्तः, बहिर्वा सेत्यपि स्वाभिप्रायप्रकटनमात्रम् । तथाभूतं ह्यन्यव्यावृत्तिस्वरूपं किञ्चित्,न किञ्चिद्वा । किञ्चिच्चेत्,नूनमन्तर्बहिर्वा तेन नाव्यं,तत्र च प्रतिपादितदोषानतिक्रमः । न किञ्चिच्चेत्, कथं तथाभूतप्रत्ययहेतुः ? । वासनामात्रनिर्मित एवायमिति चेत्, तर्हि बहिरर्थापेक्षा न भवेत् । न ह्यन्यकारणको भावोऽन्यदपेक्षते,धूमाऽऽदेः सन्निवेशाऽऽद्यपेक्षाप्रसङ्गात् । किं च-वासनाऽप्यनुभूतार्थविषयैवोपजायते । न चात्यन्तासत्येन त्वन्मते सामान्यानुभवसम्भवः । अपि च-वासना तथाभूतं प्रत्ययं विषयतयोत्पादयेत्,कारणमात्रतया वा ? । प्राचि पक्षे सकलविशेषानुयायिनी पारमार्थिकी परिच्छेद्यस्वभावा वासनेति पर्यायान्तरेण सामान्यमेवाऽभिहितं भवेत् । कारणमात्रतया तु वासनायाः सदृशप्रत्ययजनने विषयोऽस्य वक्तव्यः,निर्विषयस्य प्रत्ययस्यैवासंभवात् । न च सदृशपरिणामं विमुच्यापरस्तद्विषयः संगच्छते,प्रागुदीरितदोषानुषङ्गात् । किं च-इयमन्यव्यावृत्तिः स्वयमसमानाऽऽकारस्य,समानाऽऽकारस्य वा वस्तुनः स्यात् । प्राक्तनविकल्पकल्पनायामतिप्रसङ्गः,कुरङ्गतुरङ्गतरङ्गाऽऽदिष्वपि तत्संज्ञवाऽऽपत्तेः,तथा च तेष्वनुगताऽऽकारैकप्रत्ययानुषङ्गः स्वयं समानाऽऽकारस्य तु वस्तुनोऽभ्युपगमे समुपस्थित एवायमतिथिः सदृशपरिणामः कथं पराणुद्यताम् ? । ननु यया प्रत्यासत्त्या केचन भावाः स्वयं सदृशपरिणामं बिभ्रति, तयैव स्वयमतदात्मका अपि सन्तस्तथा किं नावभासेरन्निति चेत् ? । तदनुचितम् । चेतनेतरभेदाद्भावप्रसङ्गात् । यथैव हि प्रत्यासत्त्या चेतनेतरस्वभावान् भावाः स्वीकुर्वन्ति, तथैव स्वयमतदात्मका अपि सन्तस्तथा किं नावभासेरन्निति ब्रुवाणस्य ब्रह्माद्वैतवादिनो न वक्त्रं वक्रीभवेत् । चेतनेतरव्यतिरिक्तस्य ब्रह्मणोऽसत्त्वात्कथमस्य तथावभासनम् ? । इत्यन्यत्राऽपि तुल्यम् । न खलु सदृशपरिणामशून्यं स्वलक्षणमप्यस्ति,यत्तथाऽवभासेत । ननु स्वलक्षणस्य विसदृशाऽऽकाराऽऽत्मनः सदृशपरिणामाऽऽत्मकत्वं विरुध्यते । नैवम । ज्ञानस्य चित्राऽऽकारतावद्विकल्पेतराऽऽकारतावच्चैकस्योभयाऽऽत्मकत्वाविरोधात् । ततो व्यावृत्तप्रत्ययहेतुर्विसदृशाऽऽकारतावद् वस्तुनः सदृशपरिणामाऽऽत्मकत्वमप्यनुयायिप्रत्ययहेतुः स्वीकार्यम् ॥ ४ ॥ रत्ना० ५ परि० ।

तिर्यक्सामान्यलक्षणमाह-

तुल्या परिणतिर्भिन्न-व्यक्तिषु यत्तदुच्यते ।
तिर्यक्सामान्यमित्येव, षट्त्वं तु पदेक्षिय ॥१॥

यद् भिन्नव्यक्तिषु भिन्नप्रदेशविशेषेषु, तुल्या समाना एकाकारा परिणतिः द्रव्यशक्तिः, तत्तिर्यक्सामान्यमुच्यते । यथा-घटेषु घटत्वम्, गोषु शाबलेयाऽऽदिषु गोत्वम्, अश्वेषु अश्वत्वं विद्युति सामान्यमूनम्, तथा अनेकाऽऽकारघटसदृशेष्वपि घटत्वमेवेति तिर्यक्सामान्यमिति । अत्र कश्चिदाह-यद् घटाऽऽदिभिन्नव्यक्तिषु यथा घटत्वाऽऽदिकं सामान्यमेकमेवास्ति, तथा पिण्डकुशूलाऽऽदिभिन्नव्यक्तिषु मृदादिसामान्यमेकमेवास्ति, तर्हि तिर्यक्सामान्योर्ध्वतासामान्ययोः को विशेषः ? । तत्राऽऽह-यत्र देशभेदेन या एकाऽऽकारा प्रतीतिरुत्पद्यते, तत्र तिर्यक्सामान्यमभिधीयते । यत्र पुनः कालभेदेन अनुगताऽऽकारा प्रतीतिरुत्पद्यते, तत्र ऊर्ध्वतासामान्यमभिधीयत इति । एवं सति दिगम्बरानुसारी कश्चिदुक्ति-षण्णां द्रव्याणां कालपर्यायरूप ऊर्ध्वताप्रचयः,कालं विना पञ्चद्रव्याणामवयवसंघातरूपस्तिर्यक्प्रचयश्चास्ति । एवं वदतां तेषां मते तिर्यक्प्रचयस्याऽऽधारो घटाऽऽदिस्तिर्यक्सामान्यं भवति । तथा परमाणुरूपप्रचयपर्यायाणामाधारो भिन्न एव युज्यते, तस्मात्पञ्चद्रव्याणां स्कन्धदेशप्रदेशभावेन पकानेकव्यवहार उत्पादनीयः; परं तु तिर्यक्प्रचय इति नामान्तरमप्रयोजकं, वालुकापेषवत्, इति नियमः ॥ ५ ॥ द्रव्या० २ अध्या० ।

तिरिच्छि–तिरश्चीन–त्रि० । तिर्यक्-स्वार्थे खः । तिर्यग्गते, " गतं तिरश्चीनमनूरुसारथेः" इति माघः। वाच० । आचा० । नि० चू० ।

तिरिच्छसंतारिमा–तिरश्चीनसन्तारिमा–स्त्री० । लाङ्गूलवद्रज्जुगामिन्यां नौकायाम्, नि० चू० १ उ० ।

तिरिच्छसंपातिम–तिरश्चीनसंपातिम–त्रि० । तिर्यग्गामिनि, आचा० २ श्रु० १ चू० १ अ० ३ उ० ।

तिरिच्छि–तिर्यच्–त्रि० । "तिर्यञ्चस्तिरिच्छिः" ॥८ । २ । १४३॥ इति तिर्यञ्चशब्दस्य 'तिरिच्छि' इत्यादेशः । प्रा० २ पाद । वक्रे, वाच० ।

तिरिड–पुं० । देशी-तिमिरवृक्षे, दे० ना० ५ वर्ग ११ गाथा ।

तिरिमिअ–देशी-तिमिरयुक्ते, विचिते च । दे० ना० ५ वर्ग २१ गाथा ।

तिरिल्ली–देशी-तृणवाते, दे० ना० ५ वर्ग १२ गाथा ।

तिरिच्छुग–तिर्यग्द्विक–न० । तिर्यग्गतितिर्यगानुपूर्वीरूपे, कर्म० ५ कर्म० ।

तिरिय–तिर्यक्–त्रि० । चतसृषु गतिषु चतुर्थगतिमापन्ने, सूत्र० १ श्रु० ३ अ० १ उ० । स्था० । कर्म० । आचा० । औ० । सं-था० । तिर्यग्लोके, स्था० ३ ठा० ४ उ० । मध्ये, मनु० ।

तीरित–त्रि० । पारं प्रापिते, प्रश्न० १ सम्व० द्वार । अन्तं प्रापिते, व्य० ६ उ० । " पक्खिमा तीरिया किट्टिया । " तीरं पारं नीता पूर्णेऽपि कलाऽवधौ किञ्चित्कालावस्थानेन । स्था० ७ ठा० ।

तिरियंकट्टु–तिर्यक्कृत्वा–अव्य० । अपहस्तयित्वेत्यर्थे, सूत्र० १ श्रु० ३ अ० ३ उ० ।

तिरियगोरवपरिणाम–तिर्यग्गौरवपरिणाम–पुं० । आयुःपरिणामभेदे, येन आयुःस्वभावेन जीवस्य तिर्यग्गतौ गमनशक्तिर्लक्ष्यते, तिर्यग्गौरवं भवति । प्रज्ञाप्तावनुमतम् । प्रज्ञा० ६ ठा० ।

तिरियगइ–तिर्यग्गति–स्त्री० । तिर्यक्षु [illegible] तिर्यग्गतिः । स्था० ५ ठा० ३ उ० । [illegible]

स्तीति तिर्यञ्चः । व्युत्पत्तिनिमित्तं चैतत्, प्रवृत्तिनिमित्तं तिर्यग्गतिनाम। एते चैकेन्द्रियाऽऽदयः, ततस्तिर्यक्षु विषये गतिस्तिर्यग्गतिः। कर्म० ४ कर्म०। तिर्यक्नामकर्मोदयसंपाद्ये तिर्यक्त्वलक्षणे पर्यायविशेषे, स्था० १० ठा०। तिर्यक्परिभ्रमणे, च० प्र०।

कथं सूर्यस्तिर्यक् परिभ्रमतीति ततस्तद्विषयं प्रश्नसूत्रमाह-

ता कहं ते तिरियगती आहिया ति वदेज्जा ?। तत्थ खलु इमाओ अट्ठ पडिवत्तीओ पण्णत्ता। तं जहा—तत्थेगे एवमाहंसु—ता पुरच्छिमिल्लातो लोयंताओ पातो मरीइसंघाए आगासंसि उत्तिट्ठति, से णं इमं लोगं तिरियं करेति, तिरियं करेत्ता पच्चच्छिमिल्लंसि लोगंसि सायं मरीइसंघाए आगासंसि विद्धंसति, एगे एवमाहंसु ॥ १ ॥

एगे पुण एवमाहंसु—ता पुरच्छिमिल्लातो लोगंतातो पातो सूरिए आगासातो उत्तिट्ठति, से णं इमं लोगं तिरियं करेति, करेत्तिा पच्चच्छिमिल्लंसि लोगंतंसि सायं सूरिए आगासंसि विद्धंसति, एगे एवमाहंसु ॥ २ ॥

एगे पुण एवमाहंसु—ता पुरच्छिमिल्लातो लोगंतातो पातो सूरिए सयावट्ठाई आगासातो उत्तिट्ठति, से णं इमं लोगं तिरियं करेति, करेत्ता सायं अहे आगासमणुप्पविसइ, अणुप्पविसित्ता अहे पडिआगच्छइ, अहे पडिआगच्छित्ता पुणरवि अवरुत्तओ पुरच्छिमिल्लाओ लोयंताओ पातो सूरिए आगासाओ उत्तिट्ठति, एगे एवमाहंसु ॥ ३ ॥

एगे पुण एवमाहंसु—ता पुरच्छिमिल्लाओ लोगंतातो पातो सूरिए पुढवियातो उत्तिट्ठति, से णं इमं लोगं तिरियं करेति, करेत्ता पच्चच्छिमिल्लंसि लोगंसि सायं सूरिए पुढविकायंसि विद्धंसति, एगे एवमाहंसु ॥ ४ ॥

एगे पुण एवमाहंसु—ता पुरच्छिमिल्लातो लोगंतातो पातो सूरिए पुढवियातो उत्तिट्ठति, से णं इमं लोगं तिरियं करेति, करेत्ता पच्चच्छिमिल्लंसि लोगंसि सायं सूरिए पुढविकायं अणुप्पविसति, अणुप्पविसित्ता पुढविअहे पडिआगच्छति, अहे आगच्छित्ता पुणरवि अवरुत्तओ पुरच्छिमिल्लातो लोयंतातो पातो सूरिए पुढवियातो उत्तिट्ठति, एगे एवमाहंसु ॥ ५॥

एगे पुण एवमाहंसु—ता पुरच्छिमिल्लातो लोगंतातो पातो सूरिए आउक्कायंसि उत्तिट्ठति, से णं इमं लोगं तिरियं करेति, करेत्ता पच्चच्छिमिल्लंसि लोगंसि सायं सूरिए आउक्काए विद्धंसति, एगे एवमाहंसु ६ ।

एगे पुण एवमाहंसु—ता पुरच्छिमिल्लातो लोगंतातो पातो सूरिए आउक्कायंसि उत्तिट्ठति, से णं इमं लोगं तिरियं करेति,करेत्ता पच्चच्छिमिल्लंसि सायं सूरिए आउक्कायं अणुप्पविसति,अणुप्पविसित्ता अहे पडिआगच्छति, अहे पडिआगच्छित्ता पुणरवि अवरुत्तओ पुरच्छिमिल्लातो लोगंतातो पातो सूरिए आउक्कायंसि उत्तिट्ठति, एगे एवमाहंसु ७ ।

एगे पुण एवमाहंसु—ता पुरच्छिमिल्लातो लोगंतातो बहूइं जोयणाइं, बहूइं जोयणसयाइं, बहूइं जोयणसहस्साइं दूरं उड्ढं उप्पतित्ता एत्थ णं पातो सूरिए आगासातो उत्तिट्ठति, से णं इमं दाहिणड्ढं लोगं तिरियं करेति, करेत्ता उत्तरड्ढं लोगं तमेव रातो, से णं इमं उत्तरड्ढं लोगं तिरियं करेति,करेत्ता दाहिणड्ढं लोगं तमेव रातो, से णं इमाइं दाहिणुत्तरलोगाइं तिरियं करेति, करेत्ता पुरच्छिमिल्लातो लोगंतातो बहूइं जोयणाइं तं चेव०जाव दूरं उड्ढं उप्पतित्ता ,एत्थ णं पातो सूरिए आगासातो उत्तिट्ठति, एगे एवमाहंसु ८ ।

वयं पुण एवं वयामो-ता जंबुद्दीवस्स दीवस्स पाईणपडीणायताए उदीणदाहिणायताए जीवाए मंडलं चउव्वीसेणं सतेणं छेत्ता दाहिणपुरच्छिमंसि उत्तरपच्चच्छिमंसि य चउब्भागमंडलंसि इमीसे रयणप्पभाए पुढवीए बहुसमरमणिज्जातो भूमिभागातो अट्ठ जोयणसताइं उड्ढं उप्पतित्ता एत्थ णं पातो दुवे सूरिया आगासातो उत्तिट्ठंति, ते णं इमाइं दाहिणुत्तराइं जंबुद्दीवभागाइं तिरियं करेंति, करेत्ता पुरच्छिमपच्चच्छिमाइं जंबुद्दीवभागाइं तमेव रातो, ते णं इमाइं पुरच्छिमपच्चच्छिमाइं जंबुद्दीवभागाइं तिरियं करेंति, करेत्ता दाहिणुत्तराइं जंबुद्दीवभागाइं तमेव रातो, ते णं इमाइं दाहिणुत्तराइं पुरच्छिमपच्चच्छिमाणि य जंबुद्दीवभागाइं तिरियं करेंति, करेत्ता पुरच्छिमपच्चच्छिमाइं जंबुद्दीवस्स दीवस्स पाईणपडीणायता० जाव एत्थ णं पातो दुवे सूरिया आगासातो उत्तिट्ठंति।

(ता कहं ते तिरियगई इत्यादि) अस्त्यन्यदपि प्रभूतं प्रष्टव्यं, परमेतावदेव तावत् पृच्छामि-कथं 'ते' त्वया भगवन् ! सूर्यस्य तिर्यग्गतिस्तिर्यक्परिभ्रमणमाख्यातमिति वदेत् ?। एवमुक्तो भगवानेतद्विषये परतीर्थिकप्रतिपत्तिमिथ्याभावोपदर्शनाय प्रथमतस्ता एव प्रतिपत्तीरुपन्यस्यति (तत्थ खलु इत्यादि) तत्र तस्यां सूर्यस्य तिर्यग्गतौ तिर्यग्गतिविषये, खलिरमा वक्ष्यमाणस्वरूपा अष्टौ प्रतिपत्तयः परतीर्थिकाभ्युपगमरूपाः प्रज्ञप्ताः। ता एव क्रमेणाऽऽह-(तत्थेगे इत्यादि) तत्र तेषां परतीर्थिकानामष्टानां मध्ये एके परतीर्थिका एवमाहुः। 'ता' इति पूर्ववत्, पौरस्त्याल्लोकान्तात्, क्रान्तमिति गम्यतेः पूर्वस्यां दिशीति भावार्थः। प्रातः प्रभातसमये मरीचिसंघातः, विकाशसंघात इत्यर्थः। आकाशे उत्तिष्ठति उत्पद्यते। एतेन एतदुक्तं भवति-नैतद्विमानं, नाऽपि रथो, नापि देवतारूपः सूर्यः, यथाऽपरे वदन्ति, किं तु किरणसंघात एवैष वर्तुलगोलाऽऽकारो लोकस्वाभाव्यात्प्रतिदिवसं पूर्वस्यां दिशि प्रातराकाशे समुत्पद्यते, यतः सर्वत्र प्रकाशः प्रसरमधिरोहति। स इत्थम्भूतो मरीचिसंघातः, उपर्युद्यतः सन्, एमिति वाक्यालङ्कारे। इमं प्रत्यक्षतः उपलक्ष्यमाणं तिर्यग्लोकं तिर्यक् करोति। किमुक्तं भवति ?-तिर्यक्परिभ्रमन् इमं तिर्यग्लोकं प्रकाशयतीति, तिर्यक्कृत्वा पश्चिमे लोकान्ते सायं सान्ध्ये समये तथाजगत्स्वाभाव्यात्स मरीचिसंघात आकाशे विध्वंसते ध्वंसमुपयाति। एवं सकलकालमपि। अत्रैवोपसंहारः-(एगे एवमाहंसु) १। एके पुनरेवमाहुः-पौरस्त्याल्लो-

कान्तादूर्द्धं,प्रातः सूर्यो लोकप्रसिद्धोदेवतारूपो भास्करः,तथाजगत्स्वाभाव्याद्याकाशे उत्तिष्ठति उत्पद्यते,स चोत्पन्नः सन् इमं प्रत्यक्षत उपलभ्यमानं मनुष्यलोकं तिर्यक्करोति तिर्यक्परिभ्रमति, लोकं प्रकाशयतीत्यर्थः। तिर्यक्कृत्वा पश्चिमे लोकान्ते सायं सान्ध्ये समये आकाशे विध्वंसते । अत्रोपसंहारः-(एगे एवमाहंसु) २। एके पुनरेवमाहुः-पौरस्त्याल्लोकान्तादूर्द्धं, प्रातः सूर्यो देवतारूपः सदाऽवस्थायी तथाविधपुराणशास्त्रप्रसिद्ध आकाशे उत्तिष्ठति उद्गच्छति,स चोद्गतः सन् इमं प्रत्यक्षत उपलभ्यमानं मनुष्यलोकं तिर्यक्कृत्वा सायं सान्ध्ये समये अधः आकाशमनुप्रविशति, प्रविश्य च अधः प्रत्यागच्छति,अधोलोकं प्रकाशयन् प्रतिनिवर्तते इत्यर्थः। तन्मतेन हि भूरियं गोलाऽऽकारा,लोकोऽपि च गोलाऽऽकारतया व्यवस्थितः । इदं च सम्प्रति तीर्थान्तरीयेषु विजृम्भते, ततस्तद्गतपुराणशास्त्रादेतत् सम्यगवलेयम । अस्य च त्रयो नेदाः । एके एवमाहुः-प्रातः सूर्य आकाशे उद्गच्छति । अपरे आहुः-पर्वतशिरसि। अन्ये आहुः-समुद्र इति । तत्र प्रथमानामिदं मतमुपन्यस्तम् । अधः प्रत्यागत्य च पुनरप्यवरभुवोऽधो भुवः,पृथिव्या अधोभागेन विनिर्गत्येत्यर्थः। पौरस्त्याल्लोकान्तादूर्ध्वमाकाशे प्रातः सूर्य उद्गच्छति । एवं सर्वदाऽपि द्रष्टव्यम् । अत्रोपसंहारः-(एगे एवमाहंसु) ३ । एके पुनरेवमाहुः-पौरस्त्याल्लोकान्तादूर्द्धं प्रातः सूर्यो देवरूपः तथाविधः पुराणप्रसिद्धः पृथिवीकायमध्ये उदयभूधरशिरसि उत्तिष्ठत्युद्गच्छति । स चोत्पन्नः सन्निमं मनुष्यलोकं तिर्यक्करोति, प्रकाशयतीत्यर्थः । तिर्यक् कृत्वा पश्चिमे लोकान्ते सायं सान्ध्ये समये सूर्यः पृथिवीकाये अस्तमयभूधरशिरसि (विध्वंसति) विध्वंसमुपयाति । एवं प्रतिदिवसं सकलकालं जगतः स्थितिः परिभावनीया । अत्रोपसंहारः-(एगे एवमाहंसु) ४ । एके पुनरेवमाहुः-पौरस्त्यात् लोकान्तादूर्द्धं प्रातः सूर्यो देवतारूपः सदाऽवस्थायी पृथिवीकाये उदयभूधरशिरसि उत्तिष्ठति उद्गच्छति, स चोद्गतः सन् इमं प्रत्यक्षत उपलभ्यमानं मनुष्यलोकं तिर्यग् करोति, तिर्यक्कृत्वा पश्चिमलोकान्ते सायं सान्ध्ये समये पृथिवीकायमस्तमयभूधरमनुप्रविशति, प्रविश्य चाधः प्रत्यागच्छति, अधोभागवर्तिनं लोकं प्रकाशयन् प्रतिनिवर्तते। ततः पुनरप्यवरभुवोऽधो भुवः, पृथिव्या अधोभागाद्विनिर्गत इत्यर्थः । पौरस्त्याल्लोकान्तादूर्द्धं प्रातः सूर्यः पृथिवीकाये उदयभूधरशिरसि उत्तिष्ठति-उद्गच्छति,भूतभूगोलवादिनः परं पूर्वे आकाशे उत्तिष्ठतीति प्रतिपन्नाः, एते तु पर्वतशिरसीति विशेषः । अत्रैवोपसंहारः-(एगे एवमाहंसु) ५ । एके पुनरेवमाहुः-पौरस्त्याल्लोकान्तादूर्द्धं प्रातः सूर्योऽप्काये पूर्वसमुद्रे उत्तिष्ठति उत्पद्यते, स चोत्पन्नः सन्निमं प्रत्यक्षत उपलभ्यमानं लोकं तिर्यक्करोति,तिर्यग् कृत्वा पश्चिमे लोकान्ते सायं सान्ध्ये समये सूर्योऽप्काये पश्चिमसमुद्रे विध्वंसते, विध्वंसमायाति। एवं सर्वदाऽपि । अत्रोपसंहारः-(एगे एवमाहंसु) ६। एके पुनरेवमाहुः-पौरस्त्याल्लोकान्तादूर्द्धं प्रातः सूर्यः सदाऽवस्थायी पुराणशास्त्रप्रसिद्धोऽप्काये पूर्वसमुद्रे उत्तिष्ठति उद्गच्छति, स चोद्गतः सन्निमं लोकं तिर्यक् करोति, तिर्यक्परिभ्रमन्निमं लोकं प्रकाशयतीत्यर्थः । तिर्यक् कृत्वा पश्चिमे लोकान्ते सायं सान्ध्ये समये सूर्योऽप्कायं पश्चिमसमुद्रमनुप्रविशति, प्रविश्य चाधः प्रत्यागच्छति, अधोभागवर्तिनं लोकं प्रकाशयन् प्रतिनिवर्तते इति भावः । अधः प्रत्यागत्य चावरभुवोऽधःपृथिव्यधोभागाद्विनिर्गत्येत्यर्थः । पौरस्त्याल्लोकान्तादूर्द्धं, प्रातः सूयोंऽप्काये पूर्वसमुद्रे उत्तिष्ठति उद्गच्छति । एवं सकलकालमपि । अत्रैवोपसंहारः-(एगे एवमाहंसु) ७। एके पुनरेवमाहुः-पौरस्त्याल्लोकान्तादूर्द्धं प्रथमतो बहूनि योजनानि, ततः क्रमेण बहूनि योजनशतानि, तदनन्तरं क्रमेण बहूनि योजनसहस्राणि दूरमूर्द्धमुत्प्लुत्य बुद्ध्या गत्वा, अत्रान्तरे आकाशे प्रातः सूर्यो देवतारूपः सदाऽवस्थायी उत्तिष्ठति उद्गच्छति,स चोद्गतः सन् इमं दक्षिणार्द्धलोकं दक्षिणदिग्भाविनमर्द्धलोकं, दक्षिणलोकस्यार्द्धमित्यर्थः। तिर्यक् करोति,तिर्यक्परिभ्रमन्निमं दक्षिणलोकार्द्धं प्रकाशयतीत्यर्थः। दक्षिणं चार्द्धलोकं तिर्यक् कुर्वन् तदेवोत्तरमर्द्धलोकं रात्रौ करोति, ततः स सूर्यः क्रमेणेममर्द्धलोकम् उत्तरमर्द्धलोकं तिर्यक् करोति, तत्रापि तिर्यक्परिभ्रमन् उत्तरमर्द्धलोकं प्रकाशयतीत्यर्थः । उत्तरं चार्द्धलोकं तिर्यक्परिभ्रमणेन प्रकाशयन् तदेव दक्षिणमर्द्धलोकं रात्रौ करोति, ततः स सूर्य इमौ दक्षिणोत्तरार्द्धलोकौ तिर्यक् कृत्वा भूयोऽपि पौरस्त्याल्लोकान्तादूर्द्धं प्रथमतो बहूनि योजनानि गत्वा, ततः क्रमेण बहूनि योजनशतानि, तदनन्तरं बहूनि योजनसहस्राणि दूरमूर्द्धमुत्प्लुत्य बुद्ध्या गत्वाऽत्रान्तरे आकाशे प्रातः सूर्य आकाशे उत्तिष्ठति उद्गच्छति। एवं सकलकालम । अत्रोपसंहारमाह-(एगे एवमाहंसु) ८। तदेवं परप्रतिपत्तीरुपदर्श्य सम्प्रति स्वमतमुपदर्शयति-(वयं पुण इत्यादि) वयं पुनरुत्पन्नकेवलज्ञानाः केवलज्ञानेन यथावस्थितं वस्तूपलभ्य एवं वक्ष्यमाणप्रकारेण वदामः। तमेव प्रकारमाह-(ता इत्यादि) 'ता' इति पूर्ववत्। जम्बूद्वीपस्य द्वीपस्योपरि यद्यत्ता मण्डलं चतुर्विंशत्यधिकेन शतेन छित्त्वा,चतुर्विंशत्यधिकशतसंख्यान् मण्डलान् परिकल्पयेत्यर्थः। भूयश्च प्राचीनप्रतीचीनाऽऽयतया तदीच्यदक्षिणाऽऽयतया जीवया प्रत्यञ्चया,द्वयरिकया इत्यर्थः । तत्तन्मण्डलं चतुर्विंशतिभागैर्विभज्य दक्षिणपौरस्त्ये उत्तरपश्चिमे च चतुर्भागमण्डले चतुर्भागे एकत्रिंशद्भागप्रमाणे एतावति किल चतुरशीत्यधिकमपि मण्डलशतं सूर्यस्योदये प्राप्यते इति । " चउव्वीसेणं सएणं छित्ता चउब्भागमंडलंसि " इत्युक्तम् । अस्याः प्रत्यक्षत उपलभ्यमानाया रत्नप्रभायाः पृथिव्या बहुसमरमणीयाद् भूमिभागादूर्ध्वम्,अष्टौ योजनशतान्युत्प्लुत्य बुद्ध्या गत्वा,अत्रान्तरे प्रातर्यौ सूर्यौ उत्तिष्ठत उद्गच्छतः, दक्षिणपौरस्त्ये मण्डलचतुर्भागे भारतः सूर्य उद्गच्छति,अपरोत्तरस्मिन् मण्डलचतुर्भागे ऐरावतः सूर्यः। तौ चैवमुद्गतौ भारतैरावतौ सूर्यौ यथाक्रममिमौ दक्षिणोत्तरौ जम्बूद्वीपभागौ तिर्यक् कुरुतः। किमुक्तं भवति ?-भारतः सूर्यो दक्षिणपौरस्त्यमण्डलचतुर्भागे उद्गतः सन् तिर्यक् परिभ्रमति,तिर्यक्परिभ्रमन् मेरोर्दक्षिणभागं प्रकाशयति। ऐरावतः पुनः सूर्योऽपरोत्तरदिग्विभागे उद्गच्छति,स चोद्गतः सन् तिर्यक्परिभ्रमति, तिर्यक्परिभ्रमन् मेरोरुत्तरभागं प्रकाशयतीति। इत्थं च भारतैरावतौ सूर्यौ यदा मेरोर्दक्षिणोत्तरौ जम्बूद्वीपभागौ तिर्यक् कुरुतः, तदैव तौ पूर्वपश्चिमौ जम्बूद्वीपभागौ रात्रौ कुरुतः । एकोऽपि सूर्यस्तदा पूर्वभागं,पश्चिमभागं वा न प्रकाशयतीत्यर्थः । दक्षिणोत्तरौ च भागौ तिर्यक् कृत्वा ताविमौ पूर्वपश्चिमौ जम्बूद्वीपभागौ तिर्यक्कुरुतः। इयमत्र भावना-ऐरावतः सूर्यो मेरोरुत्तरभागे तिर्यक्परिभ्रम्य तदनन्तरं मेरोरेव पूर्वस्यां दिशि तिर्यक्परिभ्रमति। भारतः सूर्यो मेरोर्दक्षिणतस्तिर्यक्परिभ्रम्य तदनन्तरं मेरोरेव पश्चिमे भागे तिर्यक्परिभ्रमतीति। इत्थं च यदा ऐरावतभारतसूर्यौ यथाक्रमं पूर्वपश्चिमभागौ तिर्यक् कुरुतः,तदैव दक्षिणोत्तरौ जम्बूद्वीपभागौ रात्रौ कुरुतः। एकोऽपि सूर्यस्तदा दक्षिणभागमु-

त्तरभागं वा न प्रकाशयतीति । तत इत्थं यथाक्रममैरावतनारतसूर्यौ पूर्वपश्चिमभागौ तिर्यक् कृत्वा यो भारतः सूर्यः, स उत्तरपश्चिमे मण्डलचतुर्भागे उदयमासादयति । यश्चैरावतः, स दक्षिणपौरस्त्ये मण्डलचतुर्भागे इति । एतदेवोपदर्शयन्नुपसंहारमाह-(ते णमित्यादि) भारतैरावतौ सूर्यौ प्रथमतो यथाक्रममिमौ दक्षिणोत्तरौ जम्बूद्वीपभागौ, ततो यथायोगं पूर्वपश्चिमौ जम्बूद्वीपभागौ, भारतः पश्चिमं भागं, ऐरावतः पूर्वभागमित्यर्थः । तिर्यग् कृत्वा जम्बूद्वीपस्योपरि यद्वा तद्वा मण्डलं चतुर्विंशत्यधिकेन शतेन छित्वा भूयश्च प्राचीनप्रतीचीनाऽऽयतया उदीच्यदक्षिणाऽऽयतया च जीवया प्रत्यञ्चया, दवरिकया इत्यर्थः । चतुर्भिर्विभज्य यथायोगं दक्षिणपौरस्त्ये उत्तरपश्चिमे वा मण्डलचतुर्भागे अस्या रत्नप्रभायाः पृथिव्या बहुसमरमणीयाद् भूमिभागादूर्ध्वम् अष्टौ योजनशतानि तत्पुल्यास्मिन्नवकाशे प्रातर्हौ सूर्याभाकाशे उत्तिष्ठत उद्गच्छतः, य उत्तरभागं पूर्वस्मिन्नहोरात्रे प्रकाशितवान्, स दक्षिणपौरस्त्ये मण्डलचतुर्भागे उद्गच्छति । यस्तु दक्षिणभागं प्रकाशयति स्म, स उत्तरपश्चिमे मण्डले चतुर्भागे । एवं सकलकालं जगतः स्थितिः परिज्ञापनीया । चं० प्र० २ पाहु० ।

तिरियतिग–तिर्यक्त्रिक–न० । तिर्यग्गतितिर्यगानुपूर्वीतिर्यगाऽऽयुर्लक्षणे, कर्म० २ कर्म० ।

तिरियदिसा–तिर्यग्दिशा–स्त्री० । पूर्वाऽऽदिकासु दिक्षु, आव० ६ अ० । एताश्चार्वागपि रुचकात्तिर्यक्प्रव्यूढत्वात्तिर्यग्दिश इति व्यपदिश्यन्ते । आ० म० १ अ० २ खण्ड ।

तिरियदिसिप्पमाणाइक्कम–तिर्यग्दिक्प्रमाणातिक्रम–पुं० । तिर्यग्दिशि यावत्प्रमाणं परिगृहीतं तस्यातिलङ्घने, आव० ६ अ० । उपा० ।

तिरियदिसिव्वय–तिर्यग्दिग्व्रत–न० । तिर्यग्दिशः पूर्वाऽऽदिकास्तासां संबन्धि तासु वा व्रतं तिर्यग्दिग्व्रतम् । एतावती दिक् पूर्वेणावगाहनीया, एतावती दक्षिणेनेत्यादि, न परत इत्येवंभूते दिग्व्रते, आव० ६ अ० ।

तिरियदुग–तिर्यग्द्विक–न० । तिर्यग्गतितिर्यगानुपूर्वीद्विके, कर्म० ५ कर्म० ।

तिरियपव्वय–तिरश्चीनपर्वत–पुं० । तिरश्चीनं पर्वतं तिरश्चीनपर्वतम् । गच्छतो मार्गावरोधके पर्वते, भ० १४ श० ५ उ० ।

तिरियजिणत्ति–तिर्यग्जिनत्रि–स्त्री० । तिरश्चीनायां प्राकारवरण्डकाऽऽदिभित्तौ, न० १४ श० ५ उ० । आचा० ।

तिरियलोग–तिर्यग्लोक–पुं० । सातिरेकः सप्तरज्जुप्रमाणोऽधोलोकोर्ध्वलोकयोर्मध्ये अष्टादशयोजनशतप्रमाणस्तिर्यग्भागावस्थितत्वात्तिर्यग्लोकः । स्था० ३ ठा० २ उ० । लोकभेदे, अनु० ।

पुव्वाणुपुव्वी अहोलोए, तिरियलोए, उड्ढलोए ।

तयोश्चाधोलोकोर्ध्वलोकयोर्मध्ये अष्टादश योजनशतानि तिर्यग्लोकः, समयपरिभाषया तिर्यङ् मध्ये व्यवस्थितो लोकस्तिर्यग्लोकः । अथवा–तिर्यक्शब्दो मध्यमपर्यायः, तत्र च क्षेत्रानुभावात्प्रायो मध्यमपरिणामवन्त्येव द्रव्याणि संभवन्त्यतस्तद्योगात्तिर्यङ् मध्यमो लोकस्तिर्यग्लोकः । अथवा–स्वकीयोर्ध्वाधोभागात्तिर्यग्भाग एवातिविशालतयाऽत्र प्रधानम्, अतस्तेन व्यपदेशः कृतः, तिर्यग्भागप्रधानो लोकस्तिर्यग्लोकः ।

उक्तं च–

" मज्झेणुभावं खेत्तं, जं तं तिरियं ति वयणपज्जवओ ।
भन्नइ तिरियं विसालं, अतो व तं तिरियलोगोत्ति ॥ १ ॥ "

(वयणपज्जवउ त्ति)मध्यानुभाववचनस्य तिर्यग्ध्वनेः पर्यायतामाश्रित्येत्यर्थः । अनु० । तिर्यग्लोकविभक्तिस्तु जम्बूद्वीपलवणसमुद्रधातकीखण्डकालोदसमुद्रेत्यादिद्विगुणद्विगुणवृद्ध्या द्वीपसागरस्वयम्भूरमणपर्यन्तस्वरूपनिरूपणम् । सूत्र० १ श्रु० ५ अ० १ उ० । आव० ।

तिरियलोगचूला–तिर्यग्लोकचूडा–स्त्री० । तिर्यग्लोकस्य चूला तिर्यग्लोकचूला, तिर्यग्लोकातिक्रान्तत्वात् । अथवा–तिर्यग्लोकप्रतिष्ठितस्य मेरोरुपरि चत्वारिंशद्योजना चूला तिर्यग्लोकचूडा । तिर्यग्लोकोपरिभागे, नि० चू० १ उ० ।

तिरियवसइ–तिर्यग्वसति–स्त्री० । तिर्यग्योनौ, प्रश्न० १ आश्र० द्वार ।

तिरियवाय–तिर्यग्वात–पुं० । तिर्यगच्छन् यो वाति वातः स तिर्यग्वातः । तिर्यक्षनिमज्जाति वायुभेदे, प्रज्ञा० १ पद ।

तिरियविग्गहगइ–तिर्यग्विग्रहगति–स्त्री० । गतिभेदे, स्था० १० ठा० ।

तिरियसंसारविउस्सय–तिर्यक्संसारव्युत्सर्ग–पुं० । संसारव्युत्सर्गभेदे, औ० ।

तिरियसत्त–तिर्यक्सत्त्व–न० । तिर्यग्योनिजन्तुषु, पञ्चा० २ विव० ।

तिरिच्छ–तिरश्चीन–त्रि० । प्राकृतलक्षणेन निष्पन्ने 'तिरिच्छ' शब्दे " ञस्य ञोऽनादौ " ॥ ८ । ४ । २६ ॥ इति मागध्यामनादौ वर्त्तमानस्य छस्य तालव्यशकाराऽऽक्रान्तश्चकारो भवति । प्रा० ४ पाद । तिर्यग्भवे, वाच० ।

तिरीमं–किरीट–पुं० । न० । शेखरत्राणयुक्ते, औ० । प्रज्ञा० । मुकुटे, स० । शिरोवेष्टने, वाच० ।
तिरीट–पुं० । वृक्षविशेषे, बृ० २ उ० ।

तिरीमपट्टग–तिरीटपट्टक–न० । तिरीटो वृक्षविशेषस्तस्य यः पट्टो वल्कलक्षणं, तन्निष्पन्नं वा तिरीटपट्टकम् । बृ० २ उ० । वृक्षत्वङ्मये वस्त्रे, स्था० ५ ठा० ३ उ० ।

तिरोभाव–तिरोभाव–पुं० । अन्तर्धाने, विशे० ।

तिरोवई–देशी–वृश्चिकतरिते, दे० ना० ५ वर्ग १३ गाथा ।

तिरोहिअ–तिरोहित–त्रि० । अन्तर्हिते, आच्छादिते, वाच० । आचा० ।

तिल–तिल–धा० । गतौ, भ्वादि०-पर०-सक०-सेट् । तेलति, अतेलीत् । वाच० ।
तिल–धा० । स्नेहे, तुदा०-पर०-अक०-सेट् । तिलति, अतेलीत् । वाच० ।
तिल–पुं० । स्वनामख्याते धान्यभेदे, " साली वीही गोहुम-जवा कलमसूरितिलमुग्गा । " प्रज्ञा० १ पद । आचा० । प्रव० । जं० । अ० क० । विपा० । स्था० । तत्फले च । न० । वाच० । वर्णेन तिलसदृशकाले, " जंपियतिलकीडगा य त्ति । " यापिताः कालान्तरं प्राप्ता ये तिला धान्यविशेषास्तद्वद् ये वर्णसाधर्म्यात् तथा । ज्ञा० १ श्रु० १७ अ० ।

एकविंशे महाग्रहे, सू० प्र० २० पाहु० । कल्प० । "दो तिलया।" स्था० २ ठा० ३ उ० ।

तिलकुट्टी–तिल्लकुट्टी–स्त्री० । तैलविकृतौ विकृतिभेदे, प्रव० ४ द्वार । " तिलमल्ली तिलकुट्टी, दद्धतिलं तद्दोसहुव्वरियं । लक्खाइदव्वपक्कं, तिल्लं तिलम्मि पंचेव ॥१॥ " ध० २ अधि० ।

तिल्लग–तिल्लक–पुं० । वृक्षविशेषे, जं० १ श० १ व० । स० । औ० । कल्प० । रा० । जं० । यः स्त्रीकटाक्षनिरीक्षितो विकसति तत्पुष्पे, जं० ३ वक्ष० । विशेषकापरपर्याये ललाटाऽऽभरणविशेषे, औ० । जं० । ज्ञा० । सूत्र० । तं० । पुण्ड्रे, स० ७ सम० । तं० । ज्ञा० । सू० प्र० । चं० प्र० । प्रथमवासुदेवस्य त्रिपृष्ठस्य प्रतिशत्रौ, स० ९ सम० । ति० । स्वनामख्याते द्वीपे, समुद्रे च । प्रज्ञा० १ पद । वसन्तपुरनगरवास्तव्ये स्वनामख्याते श्रेष्ठिनि, यस्य सुदर्शना नाम भार्या । पिं० । (अस्य 'पव्वय' शब्दे कथा वक्ष्यते) देवपूजनावसरे तिलकं क्रियते,न वेति प्रश्ने, उत्तरम्-देवपूजावेलायां तिलककरणनिषेधो ज्ञातो नास्त्यात्मीयगच्छे इति । ७६ प्र० । सेन० ४ उल्ला० ।

तिल्लगकरणी–तिलककरणी–स्त्री० । तिलकः क्रियते यया सा तिलककरणी । दन्तमय्यां सुवर्णाऽऽत्मिकायां वा शलाकायाम्, सूत्र० । यया गोरोचनाऽऽदियुक्तया तिलकः क्रियते । यदि वा गोरोचनया तिलकः क्रियते, सा च तिलककरणीत्युच्यते । गोरोचनायाम्, अथवा-तिलकाः क्रियन्ते पिष्यन्ते वा यत्र सा तिलककरणी । तिलकपेषणोपकरणे, सूत्र० १ श्रु० ४ अ० १ उ० ।

तिलगरयण–तिलकरत्न–न० । पुण्ड्रविशेषे,जं० १ वक्ष० । "तिलगरयणऽरूचंदचित्ते ।" तिलकरत्नानि पुण्ड्रकविशेषास्तैरूर्द्धचन्द्रैश्च चित्राणि नानारूपाणि तिलकार्द्धचन्द्रचित्राणि । जी० १ प्रति० ।

तिलगसूरि–तिलकसूरि–पुं० । वैक्रमीये संवत्सरे १३६० मिते विद्यमाने हर्षपुरीयगच्छीये राजशेखरसूरिशिष्ये, जै० इ० ।

तिल्लगायरिय–तिलकाचार्य–पुं० । स्वनामख्याते आचार्ये, येन जडबाहुविरचितस्य यतिजीतकल्पस्योपरि टीका कृता । जीत० । अयमाचार्यः शिवप्रभसूरिशिष्यः, तेन च वैक्रमीये संवत्सरे १२९६ मिते आवश्यकलघुवृत्तिर्नाम ग्रन्थो विरचितः; दशवैकालिकसूत्रटीका, प्रत्येकबुद्धचरित्रं, प्रतिक्रमणसूत्रलघुवृत्तिश्चेत्यादयो ग्रन्था अप्यनेन कृताः । जै० इ० ।

तिलचुन्न–तिलचूर्ण–न० । चूर्णिकाभेदे, "से किं तं चुन्निया० दे ? । चुन्नियाजेदे जं णं तिलचुन्नाण वा,मुग्गचुन्नाण वा।" प्रज्ञा० १ पद ।

तिलथंभ–तिलस्तम्ब–पुं० । तिलवृक्षगुल्मे, कुम्भग्रामे तिलस्तम्बं दृष्ट्वा गोशालकस्य वीरस्वामिनं प्रति तज्जीवपृच्छा । भ० १५ श० । आ० म० । (एतच्च ' गोसालग ' शब्दे तृतीयभागे १०१५ पृष्ठे उक्तम्)

तिलपिट्ठ–तिलपिष्ट–न० । कुट्टितातिलचये, आचा० २ श्रु० १ चू० १ अ० ७ उ० ।

तिलपीलग–तिलपीलक–त्रि० । तिलयन्त्रवाहनपरे, द्वा० ।

वादाँश्च प्रतिवादाँश्च, वदन्तो निश्चितं तथा ।
तत्त्वान्तं नैव गच्छन्ति, तिलपीलकवद्भुवौ ॥ ५ ॥

तिलपीलकवत् तिलपीडक इव निरुद्धाक्षिसंचारस्तिलयन्त्रवाहनपरो, यथा ह्यसौ नित्यं भ्राम्यन्नपि निरुद्धाक्षितया न तत्परिमाणमवबुध्यते, एवमेतेऽपि वादिनः स्वपक्षानिनिवेशान्धा विश्वं वदन्तोऽपि नोच्यमानतत्त्वं प्रतिपद्यन्ते इति । द्वा० २३ द्वा० ।

तिलपुप्फवण्ण–तिलपुष्पवर्ण–पुं० । चन्द्रसूर्यग्रहनक्षत्रतारारूपे ग्रहभेदे, सू० प्र० २० पाहु० । चं० प्र० । द्वात्रिंशत्तमे महाग्रहे, " दो तिलपुप्फवण्णा । " स्था० १ ठा० । कल्प० ।

तिलभट्ट–तिल्लभट्ट–पुं० । अन्तर्दुष्टव्रणवत्कुथितहृदयाया उन्मत्तरामायाः पत्यौ, तं० ।

तिलमल्ली–तिलमल्ली–स्त्री० । तैलविकृतौ विकृतिभेदे, प्रव० ४ द्वार । ध० ।

तिलयसीह–तिलकसिंह–पुं० । तालध्वजनन्दनामनगरवास्तव्यस्य तालध्वजनामराजस्य स्वनामख्याते युवराजे, दर्श० १ तत्त्व ।

तिलविगइ–तिलविकृति–स्त्री० । तैलविकारे, " तिलमल्ली १ तिलकुट्टी २, दद्धतिलं ३, तद्दोसहुव्वरियं ४ । लक्खाइदव्वपक्कं, तेल्लं ५ तिल्लम्मि पंचेव ॥ १ ॥ " ध० २ अधि० ।

तिलसंगलिया–तिलसंगलिका–स्त्री० । तिलफलिकायाम्, भ० १५ उ० ।

तिलसक्कुलिया–तिलशष्कुलिका–स्त्री० । तिलप्रधानायां पिष्टमयपोट्टलिकायाम्, आचा० १ श्रु० १ अ० ५ उ० । जी० ।

तिलागणि–तिलाग्नि–पुं० । तिला धान्यविशेषाः,तेषामवयवा अपि तिलाः,तेषामग्निस्तद्दहनप्रवृत्तो वह्निस्तिलाग्निः । तिलावयवदहनप्रवृत्ते वह्नौ, स्था० ८ ठा० ।

तिल्लिविल्लिय–तिल्लिविलिक–पुं० । जलचरजीवविशेषे, कल्प० ३ क्षण ।

तिल्लोग–त्रिलोक–पुं० । त्रयो लोकाः समाहृतास्त्रिलोकाः । समाहृतेषु त्रिषु लोकेषु, नं० ।

तिलोगचूडामणि–त्रिलोकचूडामणि–पुं० । त्रिभुवनशिरोरत्नकल्पे, पञ्चा० ८ विव० ।

तिल्लोगदंसि (ण्)–त्रिलोकदर्शिन–पुं० । त्रिलोकमूर्ध्वाधस्तिर्यग्लक्षणं द्रष्टुं शीलं येषां ते त्रिलोकदर्शिनः । तीर्थकृत्सु सर्वज्ञेषु, सूत्र० १ श्रु० १ अ० २ उ० ।

तिल्लोगपुज्ज–त्रिलोकपूज्य–पुं० । सुरनराऽऽदिलक्षणभुवनत्रितयपूजनीये, पञ्चा० ६ विव० ।

तिलोगमहिय–त्रिलोकमहित–पुं० । त्रिलोकमहिते तीर्थकृति, बृ० । त्रयो लोकाः समाहृताः, समवसरणे त्रयाणामपि संज्ञानात् । तथाहि-समागच्छन्ति जगवतां तीर्थकृतां समवसरणेष्वधोलोकवासिनो भवनपतयः, तिर्यग्लोकवासिनो वाणमन्तरतिर्यग्पञ्चेन्द्रियज्योतिष्काः, ऊर्द्धलोकवासिनः कल्पोपपन्नका देवाः,त्रिलोकेन महिताः पूजिताः, त्रिभिर्वा लोकैर्महिता–स्त्रिलोकमहिताः । बृ० १ उ० ।

तिल्लोदग–तिलोदक–न० । निस्त्वचिततिलधावनजले, कल्प० ३ अधि० ७ क्षण । तिलैः केनचित्प्रकारेण प्रासुकीकृते उदके, ग० २ अधि० । स्था० । आचा० ।

तिल्ल–तैल–न०। तिलस्य विकारः, अण्। "तिलाऽऽदिस्निग्धवस्तूनां, स्नेहस्नेहमुदाहृतम्।" इत्युक्ते तिलसर्षपातसीकुसुम्भानां स्निग्धवस्तूनां स्नेहरूपे विकारे, वाच०। प्रश्न०। तैलं चतुर्धा, तिलातसीकुसुम्भसर्षपभेदात्। स्था० ४ ठा०।

तिल्लग–तैलिक–त्रि०। तैलविक्रयकारके, बृ० १ उ०। प्रव०।

तिल्लोदा-तैलोदा–स्त्री०। शशकाऽऽक्ष्येण धूर्तेन परिकल्पिते वृष्टितिलसमुद्भूते नदीभेदे, नि० चू० १ उ०।

तिवँ–तथा–अव्य०। प्राकृते तथेत्यस्य तिमादेशे, "मोऽनुनासिको वो वा" ॥८।४ ३९७॥ इत्यपभ्रंशेऽनादौ वर्त्तमानस्यासंयुक्तस्य मकारस्यानुनासिको वँकारः। प्रा० ४ पाद। तेन प्रकारेणेत्यर्थे, वाच०।

तिवई–त्रिपदी–स्त्री०। मल्लस्येव रङ्गभूम्यां गतिविशेषे, ज्ञा० १ श्रु० १६ अ०। भूमौ पदत्रयन्यासे, औ०। मल्ल इव रङ्गभूमौ त्रिपदीच्छेदं करोति। भ० ३ श० २ उ०। हस्तिनां पादबन्धनार्थे रज्जुभेदे, वाच०।

तिवग्ग–त्रिवर्ग–पुं०। त्रयो वर्गास्त्रिवर्गाः। धर्मार्थकामत्रये, लोकवेदसमयत्रये, सूत्रार्थतदुभयत्रये च। आ० चू० १ अ०। आ० म०। आचा०।

तिवग्गसाहण–त्रिवर्गसाधन–न०। त्रिवर्गस्य वक्ष्यमाणस्वरूपस्य, न त्वेकैकस्य, साधनं सेवनं त्रिवर्गसाधनम्। त्रिवर्गसेवने, ध०।

अन्योन्यानुपघातेन, त्रिवर्गस्यापि साधनम्। (२३)

त्रिवर्गो धर्मार्थकामाः, तत्र यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः, १ यतः सर्वप्रयोजनसिद्धिः सोऽर्थः २, यत आत्मिमानिकरसानुविद्धा सर्वेन्द्रियप्रीतिः स कामः ३। ततोऽन्योन्यस्य परस्परस्याऽनुपघातेनाऽपीडनेन त्रिवर्गस्याऽपि उक्तस्वरूपस्य, न त्वेकैकस्येत्यपिशब्दार्थः; साधनं सेवनम्। त्रिवर्गसाधनविकलस्योभयभवभ्रष्टत्वेन जीवनस्यैरर्थक्यात्। यदाह-"यस्य त्रिवर्गशून्यानि, दिनान्यायान्ति यान्ति च। स लोहकारभस्त्रेव, श्वसन्नपि न जीवति" ॥१॥ तत्र धर्मार्थयोरुपघातेन तादात्विकविषयसुखलुब्धो वनगज इव को नाम न भवत्यापदमापदाम्? न च तस्य धनं, धर्मः, शरीरं वा; यस्य कामेऽत्यन्ताऽऽसक्तिः। धर्मकामातिक्रमार्जनमुपार्जितं परेऽनुभवन्ति, स्वयं तु परं पापस्य भाजनं, सिंह इव सिन्धुरवधात्। अर्थकामातिक्रमेण च धर्मसेवा यतीनामेव धर्मो, न गृहस्थानाम्। न च धर्मबाधयाऽर्थकामौ सेवेत, बीजभोजिनः कुटुम्बिन इव नास्त्यधार्मिकस्याऽऽयत्यां किमपि कल्याणम्। स खलु सुखी योऽमुत्र सुखाविरोधेनेहलोकसुखमनुभवति। तस्मादबाधनेन कामार्थयोर्मतिमता यतितव्यम्। एवमर्थबाधया धर्मकामौ सेवमानस्य ऋणाधिकत्वम्। कामबाधया धर्मार्थौ सेवमानस्य गार्हस्थ्याभावः स्यात्। एवं च तादात्विकमूलहरकदर्येषु धर्मार्थकामानामन्योऽन्यबाधा सुखमेव। तथाहि-यः किमप्यसंचित्योत्पन्नमर्थमपव्ययति स तादात्विकः १, यः पितृपैतामहमर्थमन्यायेन नक्षयति स मूलहरः २, यो भृत्याऽऽत्मपीडाभ्यामर्थं संचिनोति, न तु कस्मैचिदपि व्ययते स कदर्यः ३। तत्र तादात्विकमूलहरयोरर्थभ्रंशेन धर्मकामयोर्विनाशाशङ्कास्ति कल्याणम्। कदर्यस्य त्वर्थसंग्रहो राजदायादतस्कराणां निधिः, न तु धर्मकामयोर्हेतुरिति। अनेन त्रिवर्गबाधा गृहस्थस्य कर्तुमनुचितेति प्रतिपादितम्। यदा तु दैववशाद्बाधा संभवति, तदोत्तरोत्तरबाधायां पूर्वस्य पूर्वस्य बाधा रक्षणीया। तथाहि-कामबाधायां धर्मार्थयोर्बाधा रक्षणीया, तयोः सतोः कामस्य सुकरोत्पादत्वात्। कामार्थयोस्तु बाधायां धर्मो रक्षणीयः, धर्ममूलत्वादर्थकामयोः। उक्तं च-"धर्मश्चेन्नावसीदेत, कपालेनाऽपि जीवतः। आढ्योऽस्मीत्यवगन्तव्यं, धर्मचित्ता हि साधवः॥ १॥" ध० १ अधि०।

तिवणी–त्रिवनी–स्त्री०। औषधिविशेषे, ती० ६ कल्प।

तिवरिस–त्रिवर्ष–पुं०। स्त्री०। प्रव्रज्यापर्यायेण यस्य त्रीणि वर्षाणि नाधिकमित्येष त्रिवर्षो भवति। प्रव्रज्यापर्यायेण त्रिवर्षजाते नवे, व्य० ३ उ०।

तिवरिसपरियाय–त्रिवर्षपर्याय–पुं०। स्त्री०। त्रीणि वर्षाणि पर्यायः प्रव्रज्यापर्यायो यस्य स त्रिवर्षपर्यायः। प्रव्रज्यापर्यायेण त्रिवर्षजाते नवे, व्य० ३ उ०।

तिवलिय–त्रिवलिक–त्रि०। रेखात्रयोपेते, रा०। औ०। ज्ञा०। भ०।

तिवली–त्रिवली–स्त्री०। वलित्रये, प्रश्न० ३ आश्र० द्वार। विपा०।

तिवलीविणीय–त्रिवलीविनीत–त्रि०। तिस्रो वलयो विनीता विशेषतः प्रापिता यत्र तत् त्रिवलीविनीतम्। वलित्रययुक्ते, जी० ३ प्रति० ४ उ०।

तिवरसजाय–त्रिवर्षजात–त्रि०। त्रीणि वर्षाणि जातायास्त्रिवर्षजाता। "कालो त्रिगोपमेयैः" ॥ ३। १। ५७॥ इति तस्पुरुषः। ज्यो० २ पाहु०। जन्मतो वर्षत्रयाणि जातानि यस्य स त्रिवर्षजातः। जन्मतः प्रव्रज्यातो वा त्रिवर्षजाते, त्रं०।

तिवारखलणा–त्रिवारस्खलना–स्त्री०। त्रीन् वारान् यावत्स्मृतिहतौ, पञ्चा० १२ विव०।

तिविंदु–त्रिबिन्दु–न०। बिन्दुत्रयसमाहारे, अनु०।

तिविट्ठु–त्रिपृष्ठ–पुं०। प्राकृतत्वादार्षत्वाच्च 'तिविट्ठु' इति निर्देशः। प्रव० २ द्वार। वर्त्तमानप्रथमवासुदेवे, त्रि०। आ० म०। प्रश्न०। आ० क०। कल्प०। भाव०। प्रव०। आ० चू०। "तिविट्ठे णं वासुदेवे असीइं धणूइं उड्ढं उच्चत्तेणं होत्था।" "तिविट्ठे णं वासुदेवे असीइवाससयसहस्साइं महाराया होत्था।" सं० ८० सम०। त्रिपृष्ठवासुदेवस्य चतुरशीतिवर्षलक्षाणि सर्वाऽऽयुरिति चत्वारि लक्षाणि कुमारत्वे, शेषं तु महाराज्ये इत्यादि। सं० ७० सम०। "तिविट्ठे णं वासुदेवे चउरासीइं वाससयसहस्साइं परमाउयं पालइत्ता अप्पइट्ठाणे नरए नेरइयत्ताए उववन्ने।" (तिविट्ठु त्ति) प्रथमवासुदेवः श्रेयांसजिनकालभावीति, अप्रतिष्ठानो नरकः सप्तमपृथिव्यां पञ्चानां मध्यम इति। सं० ८४ सम०।

पुत्तो पयावइस्सा, मिआवईकुच्छिसंभवो जयवं।
नामेण तिविट्ठु त्ति, आई आसी दसाराणं॥ १॥

अत्र कथा-

"इहास्ति पोतनपुरं, नगरं जितसागरम्।
भूरिश्रीजिनसंशोभि, आवृताखिलजन्तुकम्॥ १॥
राजा रिपुप्रतिशत्रु-र्यत्प्रतापमहाग्निना।
आक्रीडाः शत्रवः सर्वे, ज्वलद्वर्णायुतां ययुः॥ २॥

देव्यास्तस्य च प्रजायाः, बलदेवः सुतोऽनवत् ।
चतुर्भिः सूचितः स्वप्नै-रचलोऽचलसौष्ठवः ॥ ३ ॥
मृगावती च पुत्र्यासीद्, रूपातिशयशालिनी ।
जगाम जनकं नन्तुं, सोद्भिन्ननवयौवना ॥ ४ ॥
दृष्ट्वा तामनुरागेण, स्वाङ्कपर्यङ्कगां व्यधात् ।
विवोढुं तामथोपायं, चिकीर्षुर्विससर्ज च ॥ ५ ॥
पुरप्रधानान्याहूया-ऽप्राक्षीदेतत्ततो नृपः ।
इह यज्जायते रत्नं, स्यात्तत्कस्येति कथ्यताम् ? ॥ ६ ॥
अवोचँस्ते तवैवेति, त्रिरुपादाय तद्वचः ।
आनाययत्ततस्तस्रो-द्वोढुं राजा मृगावतीम् ॥ ७ ॥
ययुस्ते व्रीडया सर्वे, पुत्रीमपि मृगावतीम् ।
गान्धर्वेण विवाहेन, राजा स्वयमुपायत ॥ ८ ॥
प्रजा विरक्ता भोगेभ्य-स्त्यक्त्वाऽनाचारिणं नृपम् ।
सुतमादाय निर्गत्य, प्रययौ दक्षिणापथम् ॥ ९ ॥
विरचय्याचलस्तत्र, पुरीं माहेश्वरीं नवाम् ।
संस्थाप्य जननीं तत्र, तातोपान्तं ययौ स्वयम् ॥ १० ॥
अग्रे च तत्पितुर्लोकै-र्मौलिं नाम व्यलोप्यत ।
स्वप्रजायाः पतित्वेन, प्रजापतिरितीरितम् ॥ ११ ॥
विश्वभूतिश्च्युतः शुक्रा-न्मृगावत्या अथोदरे ।
कथितः सप्तभिः स्वप्नै-र्विष्णुरित्यवतीर्णवान् ॥ १२ ॥
पुण्येष्वहःसु संजज्ञे, तनुजुर्विष्णुरादिमः ।
त्रिकरणमकपृ(ष्ट)ष्ठत्वात्, त्रिपृ(ष्ट)ष्ठ इति संज्ञितः ॥ १३ ॥
अशीतिधनुरुच्चाङ्गः, खेलन् ज्ञात्रा बलेन सः ।
द्विसप्ततिकलाऽभिज्ञः, क्रमाद्यौवनमासदत् ॥ १४ ॥
विशाखभूनिजीवश्च, जवं भ्रान्त्वाऽथ केसरी ।
जज्ञे तुङ्गगिरौ शङ्ख-पुरदेशनिषूदकः ॥ १५ ॥
प्रतिविष्णुः पृच्छति स्मा-ऽश्वग्रीवो मे कुतो मृतिः ? ।
भाविनीति निमित्तज्ञै, सोऽप्याचख्याविदं तदा ॥ १६ ॥
दृप्तस्तेऽभीश्वरमवेगं, यो दूतं धर्षयिष्यति ।
यस्तुङ्गगिरिसिंहं च, हेलयैव हनिष्यति ॥ १७ ॥
ततः शङ्खपुरे शाली-नश्वग्रीवोऽध्यवापयत् ।
धारकेण महीपालान्, तत्त्राणार्थमथाऽऽदिशत् ॥ १८ ॥
राज्ञः प्रजापतेः पुत्रौ, स शुश्राव महौजसौ ।
ततोऽप्यर्थाश्वरत्नवेगं, दूतं तस्मै प्रयुक्तवान् ॥ १९ ॥
तदा प्रजापतेरग्रे, संगीतिरङ्गमागते ।
अकस्मादागतश्वरत्न-वेगस्तङ्कनङ्गदः ॥ २० ॥
अभ्युत्तस्थे भूभुजाऽसौ, तदीयस्वामिशङ्कया ।
मन्त्री पृष्टः कुमाराभ्या-मह्युः कोऽयमाह सः ॥ २१ ॥
अश्वग्रीवस्य दूतोऽयं, राजराजस्य दुर्दमः ।
गच्छन्नयं निवेद्यो ना-दिति तावूचतुर्निजान् ॥ २२ ॥
प्रजापतिस्तमन्येद्यु-र्यं सृजत्कृतगौरवम् ।
स्वजनैर्ज्ञापितौ तौ च, कुमाराबन्वधावताम् ॥ २३ ॥
तमर्द्धमार्गे प्राप्य स्व-हस्तयोश्चक्रतुः सुखम् ।
काकवद् लगुडाऽऽपाते, तत्सहायाश्च नेशिरे ॥ २४ ॥ (?)
ज्ञात्वा प्रजापतिस्तच्च, दूतमानीय तं गृहे ।
सत्कृत्योचे दुर्विनयं, माऽऽख्यः कौमारमीशितुः ॥ २५ ॥
आमेत्युक्त्वा ययौ दूतः, क्ष्मापतेः परमग्रतः ।
पलाय्य यातैः कथितं, सर्वं दूतस्य धर्षणम् ॥ २६ ॥
तद्दूतोऽपि तथैवाऽऽख्य-द्वलीकान्मा कुपन्नृपः ।
अश्वग्रीवोऽनुशिष्यान्यं, दूतं प्रैषीत्प्रजापतेः ॥ २७ ॥

गत्वोचे रङ्क शार्दूलस्त्वं, सिंहाऽजाऽऽङ्कयैष सः ।
राजोवाच सुतावेत-स्फलं दूतखलीकृतेः ॥ २८ ॥
अथारकेऽपि यदभू-दादेशः शालिरक्षणे ।
इत्युक्त्वा प्रस्थितं भूपं, प्रतिबोध्य गतौ सुतौ ॥ २९ ॥
कियत्कालं कथं सिंह-मन्येऽरक्षन्नृपा इति ।
त्रिपृष्ठपृष्टैः शिष्टं तैः, शालीनां परिचारकैः ॥ ३० ॥
पत्र्यश्वेभरथैर्वेप्रं, कृत्वाऽरक्षन् क्षितीश्वराः ।
कर्षणग्रहणं याव-दागता वारकक्रमात् ॥ ३१ ॥
स्थास्यतीयच्चिरं कोऽत्र, त्रिपृष्ठः स्माऽऽह तान् प्रति ।
दर्श्यतां मम सिंहः स, येनैकोऽपि निहन्मि तम् ॥ ३२ ॥
तुङ्गाऽऽचलगुहायां ते-दर्शितः केशरी ततः ।
रथाऽऽरूढौ कुमारौ ता-वयासिष्टामुभौ गुहाम् ॥ ३३ ॥
तां गुहामभितो लोका-श्चक्रुः कलकलाऽरवम् ।
तं च पञ्चाननः श्रुत्वाऽ-भ्यागाज्जृम्भापराऽऽननः ॥ ३४ ॥
अहं रथी पत्तिरसौ, युक्तो नौ नैष संगरः ।
रथात्ततोऽवतार, त्रिपृष्ठः फलकासिभृत् ॥ ३५ ॥
फलकासी मम करे, एष दाढानखाऽऽयुधः ।
तदप्यनुचितं भाति, तत्त्यावपि मुमोच सः ॥ ३६ ॥
दध्यौ तं प्रेक्ष्य सिंहोऽथ, धाष्टर्यादेको यदागमत् ।
यद्यानशस्त्रमुक्तिश्चा-हंयुर्हन्मि तदेषवत् ॥ ३७ ॥
विचिन्त्यैवं महाकोपा-दजानानो हरिं हरिः ।
दत्त्वा फालां करालां स, त्रिपृष्ठोपान्तमापतत् ॥ ३८ ॥
एकेनैव करेणौष्ठा-धरौ धृत्वा हरिं हरिः ।
पाटयामास तं जीर्ण-पट्टांशुकमिव क्षणात् ॥ ३९ ॥
पुष्पाऽऽभरणवस्त्रैश्च, वृष्टं देवतया हरौ ।
शौर्येण विस्मितैर्लोकै-स्तुष्टुवे स स्फुटन्मुखैः ॥ ४० ॥
एकाकिना मारितोऽह-मिति सिंहः स्फुरंस्तदा ।
गौतमजीवस्तत्सुत-स्तमूचे मा स्म खिद्यथाः ॥ ४१ ॥
पशुसिंहो नृसिंहेन, मारितोऽसीति का व्यथा ? ।
प्रीतस्तद्वचसा मृत्वा, तुर्यौर्व्यां नारकोऽभवत् ॥ ४२ ॥
कुमारावाच्यतत्कृत्ती, वलितौ नगरं निजम् ।
ग्राम्यैरूचे हयग्रीवं, स्वैरं तिष्ठ रिपोर्वधात् ॥ ४३ ॥
तत् श्रुत्वा सोऽथ साशङ्कः, प्रैषीद् दूतं प्रजापतेः ।
सुतौ प्रेषय मत्पार्श्वे, कुर्वेऽमू यत्पृथग् नृपौ ॥ ४४ ॥
प्रजापतिर्बभाषेऽह-मेष्यामि न सुतौ तु मे ।
दूतोऽवादीद् न चेदेवं, सज्जो युद्धाय तद्भव ॥ ४५ ॥
इत्युक्ते धर्षयित्वा तं, कुमारौ दूतमूचतुः ।
यत् शिक्षितमरे ! कुर्याः, दुर्दान्तोऽद्यापि ते प्रभुः ॥ ४६ ॥
दूताऽऽख्यातो हयग्रीवः, सर्वौघेणाऽचलद्रुधे ।
त्रिपृष्ठः साचलश्चाद्रौ, रथावर्तेऽमिलत्स्वयम् ॥ ४७ ॥
उभयोः सैन्ययोर्युद्धे, जायमानेऽतिनिष्ठुरे ।
दोलारूढेव तत्काले, जयश्रीः समाभवत् ॥ ४८ ॥
ऊचे त्रिपृष्ठोऽश्वग्रीवं, वीक्ष्यानेकजनक्षयम् ।
युवयोरावयोरेव, वराकैः किं हतैर्जनैः ? ॥ ४९ ॥
आकृष्टियुद्धेऽश्वग्रीवः, खिन्नश्चक्रं विमुक्तवान् ।
त्रिपृष्ठोरसि तुम्बेन, चक्रं निपतति स्म तत् ॥ ५० ॥
त्रिपृष्ठस्तच्छिरस्तेने-वाच्छिनत्तत्क्षणात्त्रयोः ।
पुष्पवृष्टिः कृता देवै -राद्यौ विष्णुबलाविति ॥ ५१ ॥
तदैव प्रणतौ तौ च, समस्तैरपि राजभिः ।
भरतक्षेत्रयाम्यार्द्धं, चक्रतुर्लीलया वशे ॥ ५२ ॥

मौलौ छत्रमिवाधार्षीत्, शिलां कोटिशिलाभिधाम् ।
उत्पाट्य दोष्णैकेनाऽपि, लीलया विष्णुरादिमः ॥ ५३ ॥
सोऽयागात्पोतनपुरं, जगज्जित्वरविक्रमः ।
अभिषिक्तो नृपैर्देवै-रूर्ध्वाक्रियते ततः ॥ ५४ ॥
एकदा गायनाः केऽप्य-गायन्निशि हरेः पुरः ।
तालिकं स्माऽऽह मध्येते, विलज्यैः शयिते त्वया ॥ ५५ ॥
आमित्यूचे विसृष्टास्ते-ऽनेन सुप्तेऽपि न प्रभौ ।
उत्थितः प्रभुरूचे तान्, श्रुत्वा तं किं न चारिताः ?॥ ५६ ॥
सोऽवदद्भूतिलोभेन, तदाकर्ण्याऽकुपन्नृपः ।
तत्कर्णयोः प्रगेऽक्षेप्सी-त्तप्तं त्रपु सुतश्च सः ॥ ५७ ॥
वेद्यं स्यकार्षयत्कर्मा-ऽसातं तेन हरिस्तदा ।
निर्लक्ष्यः क्रियया स्वात्म्याद्, दुष्कर्म प्राज्यमार्जयत् ॥ ५८ ॥
महापरिग्रहाऽऽरम्भ-हिंसाऽऽद्यैः कलुषाऽऽत्मकः ।
चतुरशीत्यब्दलक्षं, राज्यं कृत्वाऽऽद्यकेशवः ॥ ५९ ॥
मृत्वा सप्तमनरक-पृथ्व्यां नैरयिकोऽभवत् ।
अचलस्तत्रियोगाऽऽत्त-व्रतो मृत्वा शिवं ययौ" ॥६०॥आ०क०।
भविष्यदष्टमवासुदेवे, ती० २० कल्प । स०।

तिविमी–देशी-पुट्टिकायाम्, दे० ना० ५ वर्ग १२ गाथा ।

तिविह–त्रिविध-त्रि० । तिस्रो विधा यस्य स त्रिविधः । आ० म० १ अ० २ खण्ड । त्रिप्रकारे, व्य० १ उ० । प्रश्न० । ध० । पा० । आव० । मनोवाक्कायलक्षणे, कृतकारितानुमतिलक्षणे च । सूत्र० १ श्रु० २ अ० ६ उ० । (" तिविहं तिविहेणं पच्चक्खामि " इति 'सामाइय' शब्दे व्याख्यास्यते)

तिविहाऽऽहार–त्रिविधाऽऽहार–पुं० । आहारत्रये, त्रिविधाऽऽहारद्विविधाऽऽहारप्रत्याख्याने आद्यानां पानीयतुर्याऽऽहारौ किं भक्ष्यौ, न वेति प्रश्ने, उत्तरम्-आद्यानां त्रिविधाऽऽहारद्विविधाऽऽहारप्रत्याख्यानेऽपि पानीयतुर्याऽऽहारौ भक्ष्यौ ज्ञेयौ; परमयं विशेषः-येन प्रातस्त्रिविधाऽऽहारप्रत्याख्यानं कृतं स्यात्तस्यैकाशनाऽऽदिकरणसमये तुर्याऽऽहारं कल्पते, न तु स्थानानन्तरमिति; पानीयं तु उभयत्राप्यविरुद्धं कल्पते । द्विविधाऽऽहारप्रत्याख्याने तु द्वयोरपि भक्ष्यतया संज्ञवोऽस्ति, संध्यायां तु त्रिविधाऽऽहारप्रत्याख्याने पानकाऽऽकारानुच्चारणात् सचित्तमपि पानीयं कल्पते, न तु तुर्याऽऽहारः । द्विविधाऽऽहारप्रत्याख्याने तूभयमपि भक्ष्यं संभवतीति । ५१प्र० । सेन० २ उल्ला० ।

तिव्व-तीव्र-न० । रौद्रे, सूत्र० १ श्रु० ५ अ० १ उ० । उत्कटे, आ० म० २ अ० । आव० । दुःसहे, सूत्र० १ श्रु० ५ अ० १ उ० । अत्यर्थे, सूत्र० १ श्रु० २ अ० १ उ० । औ० । असह्ये, सूत्र० २ श्रु० ६ अ० । " कक्कसा, पगाढा, चंडा, दुहा, तिव्वा, दुरहियासेति " एकार्थाः । विपा० १ श्रु० १ अ० । गाढे, प्रव० ६ द्वार । तीव्रानुभवगम्यजनिते, प्रश्न० १ आश्र० द्वार । नि० चू० । प्रबले, द्वा० २१ द्वा० । रौद्रे, आ० म० १ अ० २ खण्ड । उत्कटे, आचा० १ श्रु० ३ अ० १ उ० । दुर्विषहे, दे० ना० ५ वर्ग ११ गाथा । प्रकृष्टे, स० ११ अङ्ग । निम्बाऽऽदिवत् तिक्ते, त्रि० । ज्ञ० ६ श० ३४ उ० । " तिव्वे रोगातंके पाउब्भूए । " सामान्यस्य झगिति मरणहेतौ, ज्ञ० १५ श० ।

तिव्वअणुराग–तीव्रानुराग–पुं० । अत्यन्ताध्यवसाये, ध० २ अधि० ।

तिव्वकसायपरिणइ–तीव्रकषायपरिणति–स्त्री० । उत्कृष्टानां दीर्घकालान्तरावस्थायिनां वा क्रोधाऽऽदिकषायाणां परिणामे, पं० चू० ।

तिव्वखिंसण–तीव्रखिंसन–न० । अत्यर्थनिन्दायाम्, औ० । प्रश्न० ।

तिव्वगिद्धु–तीव्रगृद्धु–त्रि० । अत्यर्थमनुपपन्ने, प्रश्न० ३ आश्र० द्वार ।

तिव्वगिलाण-तीव्रग्लान–त्रि० । आत्यन्तिकव्याधिमति, पञ्चा० ४ विव० ।

तिव्वचरित्तमोहणीय–तीव्रचारित्रमोहनीय–न० । कषायव्यतिरिक्ते नोकषायलक्षणे मोहनीये कर्मणि, भ० ८ श० ९ उ० ।

तिव्वतरग–तीव्रतरक–न० । अतिशयोत्कटे, पञ्चा० १५ विव० ।

तिव्वदंसणमोहणिज्ज–तीव्रदर्शनमोहनीय–न० । मिथ्यात्वतया दर्शनमोहनीये, भ० ८ श० ९ उ० ।

तिव्वपरिणाम–तीव्रपरिणाम–त्रि० । तीव्रो दुःसहः परिणामः परिणतिर्येषां ते तीव्रपरिणामाः । दुःसहपरिणतिकेषु, आचा० १ श्रु० ५ अ० १ उ० ।

तिव्वपावाभिभूय-तीव्रपापाभिभूत–त्रि० । तीव्रेणातिदारुणेन पापेन मिथ्यात्वाऽऽदिनाऽभिभूतः परतन्त्रीकृतस्तीव्रपापाभिभूतः । अतिदारुणेन मिथ्यात्वाऽऽदिना परतन्त्रीकृते, यो० विं० ।

तिव्वभाव–तीव्रभाव–पुं० । गाढसंक्लिष्टपरिणामे, पञ्चा० ३ विव० ।

तिव्वरागा–तीव्ररागा–स्त्री० । उत्कटविषयानुबन्धायां भावायाम्, ध० ३ अधि० ।

तिव्ववेर–तीव्रवैर–त्रि० । अविच्छिन्नोत्कटवैरे, प्रश्न० १ आश्र० द्वार । ज्ञा० ।

तिव्वसंकिलेस–तीव्रसंक्लेश–पुं० । उत्कृष्टदुष्टपरिणामे, उत्कृष्टदुरध्यवसाये, पञ्चा० १६ विव० ।

तिव्वसंवेग–तीव्रसंवेग–पुं० । भृशं दुःखलक्षाऽऽकुलनरकभयेन, स० । 'तीव्रसंवेगसंजातश्रद्धः'–तीव्रसंवेगेन भृशं दुःखलक्षाऽऽकुलभवनयेन संजाता सम्यगुत्पन्ना श्रद्धा श्रद्धानं धर्माऽऽदिषु यस्य स तथा । त्रि० ।

तिव्वसढ–तीव्रशठ–त्रि० । तीव्रैरुपसर्गैरभिद्रुते शठानुष्ठाने, सूत्र० १ श्रु० ३ अ० १ उ० । आत्यन्तिकसदनुष्ठानकरणरुचौ, पञ्चा० ४ विव० ।

तिव्वाजिताव–तीव्राजितताप–त्रि० । दुःसहसन्तापवति, " तिव्वाभितावे नरए पडंति । " तीव्रो दुःसहः खदिराङ्गारमहाराशितापादनन्तगुणोऽभितापः संतापो यस्मिन् स तथा । सूत्र० १ श्रु० ५ अ० १ उ० । तीव्रकर्मबन्धरूपे, सूत्र० १ श्रु० ३ अ० ३ उ० ।

तिव्वाजितावि (णु)–तीव्राजितापिन–त्रि० । तीव्रोऽसह्यो योऽभितापः क्रकचपाटनकुम्भीपाकतप्तत्रपुपानशाल्मल्यालिङ्गनाऽऽदिरूपः, स विद्यते यस्याऽसौ तीव्राभितापी । तीव्रवेदनाऽभिभूते, सूत्र० २ श्रु० ६ अ० ।

तिव्वाभिलास–तीव्राभिलाष–पुं० । अत्यन्ताध्यवसायित्वे, आव० ६ अ० । उपा० ।

तिव्वुएह–तीव्रोष्ण–त्रि० । अत्युष्णे, आव० ५ अ० ।

तिसंकु–त्रिशङ्कु–पुं० । श्रीमदयोध्यानिवासिक्ष्वाकुवंश्यस्य श्रीहरिश्चन्द्रमहानरेन्द्रस्य स्वनामख्याते पितरि, ती० ३७ कल्प ।

तिसंधि–त्रिसन्धि–त्रि० । आदिमध्यावसानेषु सन्धिभावात् (जी० ३ प्रति० ४ उ०) त्रिषु स्थानेषु सन्धियुक्ते, भ० ३ श० ६ उ० ।

तिसट्ठिसलागा–त्रिषष्टिशलाका–स्त्री० । अर्हच्चक्रवर्तिबलदेववासुदेवप्रतिवासुदेवानां त्रिषष्टेः पुरुषाणां शलाकारूपे चक्रे, ही० ३ प्रका० ।

तिसण्ण–त्रिसंज्ञ–त्रि० । तिस्र आहारभयपरिग्रहरूपाः संज्ञा येषां ते तथा । आहारभयपरिग्रहसंज्ञायुक्ते, यो० विं० ।

तिसत्तखुत्त–त्रिसप्तकृत्वस्–अव्य० । एकविंशतिवारेषु, पिं० । जी० । भ० ।

तिसमइय–त्रिसमयिक–त्रि० । त्रयः समयास्त्रिसमयं, तद्यत्रास्ति स त्रिसमयिकः । समयत्रयभाविनि, स्था० ३ ठा० ४ उ० ।

तिसमय–त्रिसमय–न० । त्रयः समयाः समाहृतास्त्रिसमयम् । समयत्रयसमाहारे, आ० म० १ अ० १ खण्ड० ।

तिसमयसिद्ध–त्रिसमयसिद्ध–पुं० । सिद्धत्वसमयात्तृतीयसमयवर्तिनि सिद्धे, प्रज्ञा० १ पद ।

तिसमयाऽऽहारग–त्रिसमयाऽऽहारक–पुं० । आहारं गृह्णातीत्याहारकः । त्रयः समयाः समाहृतास्त्रिसमयं,त्रिसमयमाहारकस्त्रिसमयाऽऽहारकः । "ध्यासौ" ॥ ३ । १ । ६१ ॥ इति समासः । "नाम नाम्नैकार्थे समासो बहुलम्" ॥ ३ । १ । १८ ॥ इति वा समासः । त्रीन् समयान् यावदाहारके, आ० म० १ अ० १ खण्ड० । विशे० । नं० ।

तिसमुट्ठाण–त्रिसमुत्थान–त्रि० । त्रिभ्यो धर्मार्थकामेभ्यः समुत्थानं तद्विषयत्वेनोत्पत्तिरस्येति त्रिसमुत्थानम् । धर्मार्थकामजाते, दश० २ अ० ।

तिसमुद्दक्खायकित्ति–त्रिसमुद्रख्यातकीर्ति–त्रि० । पूर्वदक्षिणापरदिग्विभागव्यवस्थितत्वात् पूर्वापरदक्षिणाख्यः समुद्रास्त्रिसमुद्रम् । उत्तरतस्तु हिमवान्, वैताढ्यो वा । त्रिसमुद्रे ख्याता कीर्तिर्यस्याऽसौ त्रिसमुद्रख्यातकीर्तिः । दक्षिणार्द्धभरतव्यापिकीर्तौ, नं० ।

तिसर–त्रिशरस्–न० । त्रीणि शरांसि त्रिशरः। वाच० । शरत्रये, अनु० । विपा० । राक्षसभेदे, ज्वरे, कुबेरे, वाच० ।

तिसरग–त्रिसरक–न० । द्वारविशेषे, औ० । ज्ञा० । तं० । जं० ।

तिसला–त्रिशला–स्त्री० । सिद्धार्थनरेन्द्रभार्यायां महावीरस्वामिनो मातरि, स्था० १० ठा० । प्रव० । आचा० । स० । भाव० । ('वीर' शब्देऽस्याः सर्वा वक्तव्यता)

तिसलोगा–त्रिश्लोका–न० । त्रयः श्लोकाश्छन्दोविशेषरूपा आधिक्येन यासु तास्तथा । यथा–"सिद्धाणं बुद्धाणं" इत्याद्येकः श्लोकः । "जो देवाण" इत्यादिको द्वितीयः । "एसो वि नमोक्कारो" इत्यादिकस्तृतीयः । इत्येवंरूपश्लोकत्रयाऽऽत्मिकायां स्तुतौ, प्रव० ३९ द्वार ।

तिसीस–त्रिशीर्ष–पुं० । शिखरिपर्वतस्य प्रथमकूटाधिपतौ देवे, स्त्री० ।

तिसुगंध–त्रिसुगन्ध–त्रि० । त्वगेलाकेसरैस्तुल्ये त्रिजातके, "त्वगेलाकेसरैस्तुल्यं,त्रिसुगन्धं त्रिजातकम् ।" जी० ३ प्रति० ४ उ० ।

तिसूल–त्रिशूल–न० । त्रीणि शूलानि शिखाऽग्राणि यत्र । स्वनामख्याते अस्त्रभेदे, वाच० । सूत्र० ।

तिसूलिया–त्रिशूलिका–स्त्री० । लघुत्रिशूले, सूत्र० १ श्रु० ५ अ० १ उ० ।

तिसोवाण–त्रिसोपान–न० । त्रयाणां सोपानानां समाहारस्त्रिसोपानम् । सोपानत्रये, रा० ।

तिसोवाणपडिरूवग–त्रिसोपानप्रतिरूपक–न० । त्रयाणां सोपानानां समाहारस्त्रिसोपानम् । त्रिसोपानानि च तानि प्रतिरूपकाणि चेति विशेषणसमासः । विशेषणस्य परनिपातः प्राकृतत्वात् । सुन्दरे सोपानत्रये, जी० ।

तेसि णं तिसोवाणपडिरूवगाणं अयमेयारूवे वण्णावासे पण्णत्ते । तं जहा–वयरामया निम्मा, रिट्ठामया पतिट्ठाणा, वेरुलियामया खंभा, सुवण्णरुप्पमया फलगा, वइरामया संधी, लोहितक्खमईओ सूईओ, नाणामणिमया अवलंबणा अवलंबणबाहाओ । जी० ३ प्रति० ४ उ० । (टीका सुगमा)

तिस्सगुत्त–तिष्यगुप्त–पुं० । द्वितीयनिह्नवे वसुनामाऽऽचार्यशिष्ये, विशे० । (अस्य वृत्तं ' जीवप्पएस ' शब्देऽस्मिन्नेव भागे १५५४ पृष्ठे गतम्)

तिहा–त्रिधा–अव्य० । त्रिप्रकारे, अनु० ।

तिहि–तिथि–पुं० । स्त्री० । चन्द्रनिष्पादिते अहोरात्रे, सं० प्र० १० पाहु० । पर्वणि, आतु० ।

अथ तिथिस्वरूपं, तिथिमानं चाऽऽह–

कम्मो निरंसयाए, मासो ववहारकारगो लोए ।
सेसा उ संसयाए, ववहारे दुक्करा घित्तुं ॥ (सू०प्र०१० पाहु०)

आदित्यकर्म*चन्द्रनक्षत्राभिवर्द्धितमासानां मध्ये कर्मसंवत्सरसंबन्धी × मासो निरंशतया परिपूर्णत्रिंशदहोरात्रप्रमाणतया लोके सुखेन व्यवहारको भवति । तथाहि बुद्धधराऽऽदयोऽपि बालिशास्त्रिंशदहोरात्रान् परिगणय्य मासं परिकल्पयन्ति । शेषास्तु मासाः सूर्यमासचन्द्रमासाऽऽदयः सांशतया सावयवतया व्यवहारे लोकव्यवहारप्रवर्त्तनाविषये लौकिकैर्ग्रहीतुं दुष्कराः, दुःखेन स्वयं ज्ञातुं शक्यन्ते इत्यर्थः । तथाहि–सूर्यमासः साद्धानि त्रिंशदहानि । चन्द्रमास एकोनत्रिंशदहानि, द्वात्रिंशद्द्वाषष्टिभागा दिनस्य ÷ । नक्षत्रमासः सप्तविंशतिर्दिनानि, एकविंशतिश्च सप्तषष्टिभागा दिनस्य +। अभिवर्द्धितमास

* ऋतुमासस्य कर्ममास इति नामान्तरम् । उक्तं च–"एस चेव उउमासो कम्ममासो ..... नायव्वो ।" व्य० १ उ० ।

× कर्म लौकिको व्यवहारः, तत्प्रधानः संवत्सरः कर्मसंवत्सरः । ऋतुसंवत्सरे । अत्र 'कम्मसंवच्छर' शब्दस्तृतीयभागे ३४५ पृष्ठे द्रष्टव्यः ।

÷ तृतीयभागे ' चंदमास ' शब्दः १०९० पृष्ठे द्रष्टव्यः ।

+ चतुर्थभागे ' नक्खत्त ' शब्दः १७६१ पृष्ठे द्रष्टव्यः ।

एकत्रिंशदहानि, एकत्रिंशत्युत्तरशतं चतुर्विंशत्युत्तरशतभागानां दिनस्य *। न चैतद्बालिशा जानते, केवलं चान्द्रो मासोऽस्ति, तदपेक्षया चिन्त्यमाने परिपूर्णत्रिंशत्तिथ्यात्मकत्वात् लोके व्यवहारपथं चरतीति ।

तिथिपरिमाणज्ञापनार्थमिदमुपक्रम्यते, तत्र तिथिस्वरूपज्ञानार्थं यन्निमित्ता अहोरात्राः, यन्निमित्ताश्च तिथयस्तदेतत्प्ररूपयति-

सूरस्स गमणमंडल-विभागनिप्फाइया अहोरत्ता ।
चंदस्स हाणिवुड्ढी-कएण निप्फज्जए उ तिही ॥

सूर्यस्याऽऽदित्यस्य गमनयोग्यानि यानि मण्डलानि तेषां प्रत्येकं यो विभागो, विशिष्टः समभागतया भाग इत्यर्थः । तेन निष्पादिता अहोरात्राः । किमुक्तं भवति ?-एकैकस्मिन् मण्डले यावता कालेन मण्डलार्द्धं गमनेन पूरयति तावत्कालप्रमाणोऽहोरात्राः ॥ चन्द्रस्य चन्द्रमण्डलस्य पुनः हानिवृद्धिकृतेन कालपरिमाणेन निष्पद्यते तिथिः । अत्रायं भावार्थः-चन्द्रमण्डलस्य कृष्णपक्षे यावता कालेनैकैकः षोडशभागो द्वाषष्टिभागचतुष्टयप्रमाणो हानिमुपपद्यते,यावता च कालेन शुक्लपक्षे एकः षोडशभागः प्रागुक्तप्रमाणः परिवर्द्धते, तावत्कालप्रमाणास्तिथयः । एतावांश्चाहोरात्राणां तिथीनां च परस्परं कालविशेषः-अहोरात्रो द्वाषष्टिभागपरिच्छिन्नो विधीयते । तस्य सत्का ये एकषष्टिभागाः, तावत्प्रमाणा तिथिः ।

इहेदमुक्तम्-चन्द्रस्य वृद्धिहानिकृतेन निष्पद्यते तिथिः । तत्र शिष्याणामुदयादि संमोहः-कथं चन्द्रस्य शाश्वतिकतयोपवर्ण्यमानस्य, वृद्धिहानी घटेते इति ?। ततः शिष्याणां संमोहमपनेतुकामो यथोक्तस्वरूपप्ररूपणार्थमाह-

चंदस्स नेव हाणी,न वि वुड्ढी वा अवट्ठिओ चंदो ।
सुक्किलजावस्स पुणो, दीसइ वुड्ढी य हाणी य ॥

चन्द्रस्य चन्द्रमण्डलस्य स्वरूपतो नैव हानिर्नाऽपि वृद्धिः, किं त्ववस्थित एव सदा चन्द्रः, चन्द्राऽऽदिविमानानां शाश्वतिकत्वात् । यद्येवं कथं साक्षात् प्रत्यक्षत उपलभ्येते वृद्धिहानी ?। तत आह-(सुक्किलेत्यादि)शुक्लभावस्य शुक्लतायाः,दर्शनपथप्राप्तस्यैव कृता इष्यते वृद्धिर्हानिर्वा,न तु स्वरूपतश्चन्द्रमण्डलम् ।

किमत्र कारणम् ?, अत आह-

किण्हं राहुविमाणं, हेट्ठा चउरंगुलं च चंदस्स ।
तेणोवट्टइ चंदो, परिवट्टइ वा वि नायव्वो ॥

इह द्विविधो राहुः । तद्यथा-पर्वराहुः, ध्रुवराहुश्च । तत्र यः पर्वराहुस्तस्य चिन्ता क्षेत्रसमासटीकायां कृता । यस्तु ध्रुवराहुस्तस्य विमानं कृष्णं, तच्च चन्द्रमण्डलस्याधस्तात् चतुरङ्गुलमसंप्राप्तं सत् चारं चरति । तत्र कृष्णपक्षे आत्मीयेन पञ्चदशेन भागेन प्रतिदिवसमेकैकं भागं द्वाषष्टिभागीकृतस्य चन्द्रमण्डलस्य सत्का ये चत्वारो भागास्तावत्प्रमाणमावृणोति । शुक्लपक्षे च प्रतिदिवसं तावन्तमेकैकं भागमात्मीयेन पञ्चदशेन [पञ्चदशेन] भागेनापसरत् प्रकटीकरोति । तेन कारणेन चन्द्रः कृष्णपक्षे अपवर्द्धते हीयते, शुक्लपक्षे परिवर्द्धत इति ज्ञातव्यः । किमुक्तं भवति ?-तेन कारणेन चन्द्रमण्डलस्य वृद्धिहानी प्रतिभासेते, न तु ते तात्त्विकयौ सत इति ।

एतदेव स्पष्टं भावयति—

तं रयणकुमुयसरिस-पुहस्स चंदस्स राहुभवणस्स ।
छोए तिहि त्ति नियमं, भणइ हाणीए वुड्ढीए ॥

यत एवं चन्द्रमण्डलस्य राहुविमानकृताऽऽवरणानावरणजनिते वृद्धिहानी, तत् तस्मात् कारणात् चन्द्रस्य रजतकुमुदपुष्पतुल्यप्रभस्य राहुभवनस्य रजन्यामतिमनोहारितया प्रतिभासनशीलस्य, हानौ वृद्धौ यथोदितस्वरूपायां, यथोदितभागप्रमाणायां च लोके तिथिरिति नियतं निश्चितं भण्यते।

सम्प्रति भागप्रमाणमेव निर्दिदिक्षुराह-

सोलसभागे काऊ-ण जमुवइं हायते ऽत्थ पन्नरसे ।
तत्तियमेत्ते भागे, पुणो वि परिवड्ढई जोण्हे ॥

चतुष्पर्वि चन्द्रमण्डलमित्यर्थः, षोडशभागानं राहुदेवः कृत्वा बुद्ध्या परिकल्प्य, तथाजगत्स्वाभाव्यात् कृष्णपक्षे, अत्र पञ्चदशसु भागेषु मध्ये प्रतिदिवसमेकैकभागहानिकरणेन सकले कृष्णपक्षे पञ्चदश भागान् हापयति । ज्योत्स्ने ज्योत्स्नासम्बन्धिते, शुक्लपक्षे इत्यर्थः, प्रतिदिवसमेकैकभागपरिवर्द्धनेन परिपूर्णपक्षे तावन्मात्रान्, पञ्चदशसंख्यानित्यर्थः । भागान्, पुनरपि परिवर्द्धयति । इयमत्र भावना-इह चन्द्रविमानं द्वाषष्टिसंख्यैर्भागैः परिकल्प्यते,परिकल्प्य च तेषां भागानां पञ्चदशभिर्भागो ह्रियते, हृते च भागे लब्धाश्चत्वारो द्वाषष्टिभागाः,शेषौ द्वौ भागौ तिष्ठतः, तौ च सदाऽनावृतौ । एषा किल चन्द्रमसः षोडशीकलाप्रसिद्धिः। तत्र कृष्णपक्षे प्रतिपदि ध्रुवराहुविमानं चन्द्रमण्डलस्याधो भागेन चतुरङ्गुलमसंप्राप्तं सत् चारं चरदात्मीयेन पञ्चदशेन भागेन द्वौ द्वाषष्टिभागौ सदाऽनावरणस्वभावौ मुक्त्वा शेषद्वाषष्टिसत्कभागाऽऽत्मकस्य चन्द्रमण्डलस्य सत्कं चतुर्भागाऽऽत्मकं पञ्चदशभागमावृणोति । द्वितीयायामात्मीयाभ्यां (?) पञ्चदशभागानावृणोति । ततः शुक्लपक्षे प्रतिपदि पञ्चदशभागान् अनावृतान् करोति, तदा च सर्वाऽऽत्मना परिपूर्णं चन्द्रमण्डलं लोके प्रकटं भवति। उक्तं च-"कइविहे णं भंते ! राहू पन्नत्ते ?। गोयमा ! दुविहे राहू पन्नत्ते । तं जहा-धुवराहू य,पव्वराहू य । तत्थ णं जे से धुवराहू, से णं बहुलस्स पक्खस्स पाडिवए पन्नरसतिभागेणं पन्नरसभागं चंदलेसमावरमाणे आवरमाणे चिट्ठइ । तं जहा-पढमाए पढमं भागं,बिइयाए बिइयं भागं०जाव पन्नरसेसु पन्नरसं भागं । चरमसमए चंदे रत्ते भवइ, अवसेसे समए चंदे रत्ते वा विरत्ते वा भवइ,तं चेव सुक्कपक्खस्स जवदंसेमाणे उवदंसेमाणे चिट्ठइ । तं जहा-पढमाए पढमं भागं, बिइयाए बिइयं भागं० जाव पन्नरसेसु पन्नरसं भागं । " इति । (भ० १२ श० ६ उ०)

तत्र-

कालेण जेण हायइ, सोलसभागो य सा तिही होइ ।
तं चेव य वुड्ढीए, एवं तिहिणो समुप्पत्ती ॥

यावता कालेन कृष्णपक्षे षोडशो भागो द्वाषष्टिभागः सचतुर्भागाऽऽत्मको हीयते हानिमुपगच्छति, स एतावान् कालविशेषस्तिथिर्भवति । तथा चैव वृद्ध्याऽपि तिथिर्भवति । किमुक्तं भवति ?-यावता कालेन शुक्लपक्षे षोडशभागं प्रागुक्तक्रमेण परिवर्द्धते,तावत्प्रमाणः कालविशेषस्तिथिरिति अहोरात्रस्य द्वाषष्टिभागाः, तावत्प्रमाणा तिथिरित्यर्थः । एवंविधैर्भगवद्भिस्तीर्थकरगणधरैः समुत्पत्तिराख्याता ।

कियत्संख्याकास्तास्तिथय इति तत्सङ्ख्यानिरूपणार्थमुपन्यस्तिमाह-

जावइए परिहायइ, भागे वड्ढइ य आणुपुव्वीए ।

* प्रथमभागे 'अनिवर्द्धिय' शब्दः ७२७ पृष्ठे द्रष्टव्यः ।

तावइया होंति तिही, तेसिं नामाणि वोच्छामि ॥

इह यावता कालेनैकश्चन्द्रमण्डलस्य षोडशो भागो द्वाषष्टिभागसत्कचतुर्भागात्मकः परिहीयते,वर्द्धते वा, तावत्कालप्रमाणा एका तिथिरिति प्रागुपपादितम् । ततो यावतो भागान् चन्द्रमसो राहुविमानं कृष्णपक्षे हापयति, यावतश्च भागानानुपूर्व्या क्रमेण शुक्लपक्षे परिवर्द्धयति, तावत्प्रमाणाः शुक्लपक्षे कृष्णपक्षे च तिथयो भवन्ति। तत्र पञ्चदश भागान् कृष्णपक्षे हापयति, पञ्चदशैव भागान् शुक्लपक्षे परिवर्द्धयति; ततः पञ्चदश कृष्णपक्षे तिथयः, पञ्चदश शुक्लपक्षे च । सम्प्रति तासां तिथीनां नामानि वक्ष्यामि ।

प्रतिज्ञातमेव निर्वाहयति-

पाडिवय बिइय तइया, य चउत्थी पंचमी य छट्ठी य ।
सत्तमि अट्ठमि नवमी, दसमी एगारसी चेव ॥
बारसि तेरसि चाउद्दसी य निद्दुवणिगा य पन्नरसी ।
किण्हम्मि य जोण्हम्मि य, एमेव तिही मुणेयव्वा ॥

कृष्णपक्षे प्रथमा तिथिः प्रतिपद्, द्वितीया द्वितीया,एवं यावन्निष्ठापनिका परिसमाप्तिकारिका पञ्चदशी, अमावास्या इत्यर्थः । ज्योत्स्न्येऽपि,पक्षे इत्यर्थः । एष एवानन्तरोदितो नाम्ना विधिर्ज्ञातव्यः । तद् यथा-प्रथमा प्रतिपत्, द्वितीया द्वितीया, तृतीया तृतीया । एवं यावत् परिसमाप्तिकारिका पञ्चदशी, पौर्णमासी इत्यर्थः ॥ इह विचित्रो विधिर्नाम्नामागमे मासाऽऽदीनां तिथिपर्यन्तानामुक्तः, ततस्तिथिनाम्नां प्रस्तावाद् मासोऽपि विनेयजनानुग्रहार्थमुपवर्ण्यते-इह च एकैकस्मिन् संवत्सरे द्वादश मासाः, तेषां च नामधेयानि द्विविधानि । तद्यथा-लौकिकानि, लोकोत्तराणि च । तत्र लौकिकान्यमूनि । तद्यथा-श्रावणः,भाद्रपदः, आश्वयुजः,कार्तिकः, मार्गशीर्षः,पौषः,माघः,फाल्गुनः,चैत्रः, वैशाखः, ज्येष्ठः, आषाढ इति । लोकोत्तराण्यमूनि । तद्यथा-प्रथमः श्रावणे अभिनन्दितः,द्वितीयः प्रतिष्ठितः प्रतिपत्तव्यः,तृतीयो विजयः, चतुर्थः प्रीतिवर्द्धनः, पञ्चमः श्रेयान्, षष्ठः शिवः, सप्तमः शिशिरः,अष्टमो हेमवान्,नवमो वसन्तमासः,दशमः कुसुमसंभवः,एकादशो निदाघः, द्वादशो वर्णविरोहः। तथा चोक्तं जम्बूद्वीपप्रज्ञप्तौ-" एगमेगस्स णं भंते ! संवच्छरस्स कति मासा पन्नत्ता ? । गोयमा ! दुवालस मासा पन्नत्ता । तेसि णं दुविहा नामधिज्जा पन्नत्ता । तं जहा-लोइया, लोउत्तरिया य । तत्थ लोइया नामा इमे। तं जहा-सावणे,भद्दवए०जाव आसाढे। लोगुत्तरिया नामा इमे। तं जहा-

"अभिणंदिते पइट्ठे य, विजए पीइवड्ढणे ।
सेयंसे य सिवे चेव, सिसिरे य सहेमवं ॥ १ ॥
नवमे वसंतमासे, दसमे कुसुमसंभवे ।
एक्कारसे निदाहे य, वण्णविरोहे य बारसमे ।२। "(जं०७ वक्ष०)

एकैकस्मिंश्च मासे द्वौ पक्षौ, तयोश्च नामधेये गुणनिष्पन्ने इमे। तद्यथा-बहुलः पक्षः, शुक्लपक्षश्च । तत्र योऽन्धकारबहुलः पक्षः स बहुलपक्षः । यस्तु ज्योत्स्नाधवलिततया शुक्लः पक्षः स शुक्लपक्षः । उक्तं च-"एगमेगस्स णं भंते ! मासस्स कइ पक्खा पन्नत्ता ? । गोयमा ! दो पक्खा पन्नत्ता । तं जहा-बहुलपक्खे य, सुक्कपक्खे य।" (जं० ७ वक्ष०) एकैकस्मिंश्च पक्षे पञ्चदश दिवसाः । तद्यथा-प्रथमः पूर्वाङ्गो, द्वितीयः सिद्धमनोरमः, तृतीयो मनोहरः, चतुर्थो यशोभद्रः, पञ्चमो यशोधरः, षष्ठः सर्वकामसमृद्धः,सप्तम इन्द्रमूर्धाभिषिक्तः,अष्टमः सौमनसः,नवमो धनञ्जयः,दशमोऽर्थसिद्धः, एकादशोऽभिजातः, द्वादशोऽत्यसनः, त्रयोदशः शतञ्जयः, चतुर्दशोऽग्निवेश्म, पञ्चदश उपशमः । तथा चोक्तं जम्बूद्वीपप्रज्ञप्तौ-" एगमेगस्स णं भंते ! पक्खस्स कइ दिवसा पन्नत्ता ? । गोयमा ! पन्नरस दिवसा पन्नत्ता । तं जहा-पमिवादिवसे, बिइयादिवसे० जाव पन्नरसीदिवसे । एएसि णं भंते ! पन्नरसण्हं दिवसाणं कइ नामधिज्जा पन्नत्ता ?। गोयमा ! पन्नरस नामधेज्जा पन्नत्ता । तं जहा-

" पुव्वंगे १ सिद्धमणो-रमे अ २ तत्तो मणोहरे चेव ३ ।
जसभद्दे य ४ जसहरे ५, छट्ठे सव्वकामसमिद्धे य ६ ॥१॥
इंदमुहाभिसित्ते य ७, सोमणसे ८ धणंजए य बोधव्वे ९ ।
अत्थसिद्धे १० अभिजाए ११, अवसप्पणे १२ सयंजए चेव १३ ।२।
अग्गिवेसे १४ उवसमे १५, दिवसाणं नामधिज्जाइं । "
(जं० ७ वक्ष०)

एकैकस्मिंश्च पक्षे पञ्चदश रात्रयः । तद्यथा-प्रतिपद्रात्रिः, द्वितीयारात्रिः, यावत्पञ्चदशीरात्रिः । तासां च रात्रीणां क्रमेणामूनि नामानि । तद्यथा-प्रथमा उत्तमा, द्वितीया सुनक्षत्रा, तृतीया ऐलापत्या, चतुर्थी यशोधरा,पञ्चमी सौमनसा, षष्ठी श्रीसम्भूता, सप्तमी विजया, अष्टमी वैजयन्ती, नवमी जयन्ती,दशमी अपराजिता,एकादशी इच्छा,द्वादशी समाहारा,त्रयोदशी तेजाः, चतुर्दशी अतितेजाः,पञ्चदशी देवानन्दा । तथा चोक्तम्-"एगमेगस्स णं भंते ! पक्खस्स कइ राईओ पन्नत्ताओ ?। गोयमा ! पन्नरस-राईओ पन्नत्ताओ । तं जहा-पमिवाराई, बीयाराई०जाव पन्नरसीराई । एएसि णं भंते ! पन्नरसण्हं राईणं कइ नामधेज्जा पन्नत्ता ?। गोयमा ! पन्नरस नामधेज्जा पन्नत्ता । तं जहा-

" उत्तमा य सुनक्खत्ता, एलावच्चा जसोधरा ।
सोमणसा चेव तहा, सिरिसंभूया य बोधव्वा ॥१॥
विजया य वेजयंती, जयंति अपराजिया य इच्छा य ।
समाहारा चेव तहा, तेआ य तहाऽइतेआ य ॥२॥
देवाणंदा राई, रयणीए नामधिज्जाइं । " (जं० ७ वक्ष०)

एकैकस्मिंश्च पक्षे पञ्चदश तिथयः । ताश्च द्विधा । तद्यथा-दिवसतिथयः,रात्रितिथयश्च । तत्र दिवसतिथीनाममूनि नामानि । तद्यथा-प्रथमा नन्दा,द्वितीया भद्रा,तृतीया जया,चतुर्थी तुच्छा, पञ्चमी पूर्णा । ततः पुनरपि-षष्ठी नन्दा, सप्तमी भद्रा, अष्टमी जया, नवमी तुच्छा, दशमी पूर्णा । ततः पुनरप्येकादशी नन्दा, द्वादशी भद्रा, त्रयोदशी जया, चतुर्दशी तुच्छा,पञ्चदशी पूर्णा । तथा चोक्तं चन्द्रप्रज्ञप्तौ-"ता कहं ते तिहीओ आहिया ति वएज्जा ?। तत्थ खलु इमा दुविहा तिही पन्नत्ता । तं जहा-दिवसतिही, राइतिही य । ता कहं ते दिवसतिही आहिया ति वएज्जा ?। ता एगमेगस्स पक्खस्स पन्नरस दिवसतिही पन्नत्ता । तं जहा-

" नंदे भद्दे जए तुच्छे, पुण्णे पक्खस्स पंचमी ।
पुणरवि-
नंदे भद्दे जए तुच्छे, पुण्णे पक्खस्स दस्समी ॥१॥
पुणरवि-
नंदे भद्दे जए तुच्छे, पुण्णे पक्खस्स पन्नरसी ।
एवं तिगुणा तिगुणा, तिहीउ सव्वेसि दिवसाणं ॥ २ ॥ "
(चं० प्र० १० पाहु०)

यास्तु रात्रितिथयस्तासामेतानि नामानि । तद्यथा-प्रथमा उग्रवती,द्वितीया भोगवती,तृतीया यशोमती,चतुर्थी सर्वसिद्धा, पञ्चमी शुभनामा । पुनरपि षष्ठी उग्रवती, सप्तमी भोगवती,

अष्टमी यशोमती, नवमी सर्वसिद्धा, दशमी शुभनामा। ततः पुनरप्येकादशी उग्रवती, द्वादशी भोगवती, त्रयोदशी यशोमती, चतुर्दशी सर्वसिद्धा, पञ्चदशी शुभनामेति । उक्तं च चन्द्रप्रज्ञप्तावेव-"ता कहं ते राइतिही आहिय त्ति वएज्जा?। ता एगमेगस्स णं पक्खस्स पन्नरस राइतिही पण्णत्ता। तं जहा-"उग्गवई भोगवई,जसोवई सव्वसिद्ध सुहनामा।" पुणरवि-"उग्गवई भोगवई,जसोवई सव्वसिद्ध सुहनामा।" पुणरवि-"उग्गवई भोगवई, जसोवई सव्वसिद्ध सुहनामा। एवं तिगुणा एया, तिहीउ सव्वासि राईणं' ॥ १ ॥ इति । (चं० प्र० १०पाहु०) तदेवमुक्तानि तिथीनां नामानि, प्रसङ्गतो मासदिवसरात्रीणामपि।

संप्रति यावन्मुहूर्तप्रमाणा तिथिस्तावत्प्रमाणं तिथिं प्रतिपादयति-

एउणतीसं पुण्णा, उ मुहुत्ता सोमतो तिही होइ।
भागा वि य बत्तीसं, बासट्ठिकएण छेएणं ॥

सोमतश्चन्द्रमस उपजायते तिथिः,सा च तत उपजायमाना एकोनत्रिंशत्परिपूर्णमुहूर्ता, एकस्य मुहूर्तस्य द्वाषष्टिकृतेन छेदेन प्रविभक्तस्य सत्का द्वात्रिंशद् भागाः। तथाहि-अहोरात्रस्य द्वाषष्टिभागीकृतस्य सत्का ये एकषष्टिभागाः, तावत्प्रमाणा तिथिरित्युक्तम् । तत्रैकषष्टिस्त्रिंशता गुण्यते, जातान्यष्टादश शतानि त्रिंशदधिकानि १८३०। एते च किल द्वाषष्टिभागीकृतसकलतिथिगतमुहूर्तसत्का अंशाः, ततो मुहूर्ताऽऽनयनार्थं तेषु द्वाषष्ट्या भागो ह्रियते, हृते च भागे लब्धा एकोनत्रिंशन्मुहूर्ताः, द्वात्रिंशच्च द्वाषष्टिभागा मुहूर्तस्य । एतावन्मुहूर्तप्रमाणा तिथिः। एतावता हि कालेन चन्द्रमण्डलगतः पूर्वोदितप्रमाणः षोमशो भागो द्वाभ्यां चोपगच्छति, वर्द्धते वा, तत एतावानेव तिथेः परिमाणकालः। (चं० प्र० १० पाहु०)

साम्प्रतमीप्सितदिने तिथिपरिमाणज्ञापनार्थं करणमाह-

तिहिरासिमेव बाव-ट्ठीनइयं सेसमेगसट्ठिगुणं।
बावट्ठीए नइए, सेसे अंसा तिहिमयत्ती ॥

ईप्सिततिथिराशिद्वाषष्ट्या भागैः परिपूर्णैरहोरात्रा भवन्ति, ततः परिपूर्णाहोरात्रपातनार्थं द्वाषष्ट्या विभागः क्रियते, विभागे च कृते यच्छेषमुपलभ्यते तदेकषष्टिगुणं क्रियते,एकैकस्यास्तिथेर्द्वाषष्टिभागीकृताहोरात्रसत्कैकषष्टिभागप्रमाणत्वात् । कृत्वा चैकषष्टिगुणं द्वाषष्ट्या विभज्यते, द्वाषष्ट्या भागैः परिपूर्णस्याहोरात्रस्य पतनाद् द्वाषष्ट्या च भागे हृते ये अंशाः राशेः पश्चाद्व्यतिष्ठन्ते, सा तिथिपरिसमाप्तिः, तावदंशप्रमाणे तस्मिन् दिने तिथिरित्यर्थः । यथा वा कोऽपि पृच्छति-द्वाषष्ट्या च भागे हृतेऽपि युगे प्रथमे चान्द्रे संवत्सरे आश्वयुजमासे शुक्लपक्षे पञ्चमी कियत्प्रमाणेति ? । तत्र किल तिथिः तावदंशप्रमाणा, तस्मिन् दिने तिथिरित्यर्थः । राशिरादित आरभ्य पञ्चमीपर्यवसानोऽशीतिसंख्या इत्यशीतिर्ह्रियते, तस्या द्वाषष्ट्या भागो ह्रियते, स्थिताः पश्चादष्टादश, ते एकषष्ट्या गुण्यन्ते, जातानि दशशतानि अष्टानवत्यधिकानि १०९८। तेषां द्वाषष्ट्या भागो ह्रियते, स्थिताः पश्चात् चतुश्चत्वारिंशदंशाः, आगतमेतावदेव षष्टिभागप्रमाणा तस्मिन् दिने पञ्चमी तिथिः। एवमन्यत्रापि भावनीयम।(?) ज्यो० ४ पाहु०। चं० प्र०। सू० प्र०। व्य०। आ० म०। आ० चू०। (कालतो ये दिवसा वर्जनीयास्ते ' आलोयणा ' शब्दे द्वितीयभागे ४५० पृष्ठे दर्शिताः) दिवसेभ्यस्तिथयो बलिष्ठाः-" दिवसा व तिही बलिओ, तिहिओ बलियं तु सुच्चई रिक्खं । " द० प०।

अथ पञ्चदशतिथिफलमाह-

पडिवाए पभिवत्ती, नत्थि विवत्ती नणंति बीआए।
तइयाएँ अत्थसिद्धी, विजयग्गी पंचमी भणिया ॥ ४ ॥
जा एस सत्तमी सा, उ बहुगुणा इत्थ संसओ नत्थि।
दसमीएँ पत्थियाणं, भवंति निकंटगा पंथा ॥ ५ ॥
आरुग्गमविग्घं खे-मयं च इक्कारसिं वियाणाहि।
जे वि हु हुंति अमित्ता, ते तेरसिपट्ठिओ जिणइ ॥ ६ ॥
चाउद्दसि पन्नरसिं, वज्जिज्जा अट्ठमिं च नवमिं च।
छट्ठिं च चउत्थिं वा-रसिं च छुन्हं पि पक्खाणं ॥ ७ ॥
पढमी पंचमि दसमी-पन्नरसिक्कारसी वि य तहेव।
एएसु य दिवसेसुं, सेहस्स निफेडणं कुज्जा ॥ ८ ॥
नंदा भद्दा विजया, तुच्छा पुन्ना य पंचमी होइ।
मासेण य उच्चारे, इक्किक्का वत्तए नियए ॥ ९ ॥
नंदे जए य पुन्ने य, सेहनिक्खमणं करे।
नंदे भद्दे सुभद्दाए, पुन्ने अणसणं करे ॥ १० ॥ द०प०।

धर्मकर्माऽऽदिषु तिथिरुदया तिथिरेव ग्राह्या-

तिथिश्च प्रातः प्रत्याख्यानवेलायां या स्यात्सा प्रमाणम, सूर्योदयानुसारेणैव लोकेऽपि दिवसाऽऽदिव्यवहारात्। आहुरपि-
" चाउम्मासिअवरिसे, पक्खिअपंचऽट्ठमीसु नायव्वा।
ताओ तिहिओ जासिं, उदेइ सूरो न अण्णाओ ॥ १ ॥
पूआ पच्चक्खाणं, पडिकमणं तह य निअमगहणं च।
जीए उदेइ सूरो, तीए तिहीए उ कायव्वं ॥ २ ॥
उदयम्मि जा तिही सा, पमाणमिअराए कीरमाणीए।
आणाभंगऽणवत्था, मिच्छत्तविराहणं पावे " ॥ ३ ॥

पाराशरस्मृत्यादावपि-

" आदित्योदयवेलायां, या स्तोकाऽपि तिथिर्नवेत्।
सा संपूर्णेति मन्तव्या, प्रजूता नोदयं विना " ॥ १ ॥

उमास्वातिवाचकप्रघोषश्चैवं श्रूयते-

" कये पूर्वा तिथिः कार्या, वृद्धौ कार्या तथोत्तरा।
श्रीवीरमोक्षकल्याणं, कार्यं लोकानुगैरिह " ॥ १ ॥ इति ।

एवं पौषधाऽऽदिना पर्वदिवसा आराध्या इति पर्वकृत्यानि। ध० २ अधि०। द्वितीयाऽऽदिपञ्चपर्वी श्राद्धविध्यादिस्वीयग्रन्थातिरिक्तग्रन्थे क्वास्ति ?, इति प्रश्ने, उत्तरम्-द्वितीयाऽऽदिपञ्चपर्व्या उपादेयत्वं संविग्नगीतार्थाऽऽचीर्णतया संभाव्यते, अक्षराणि तु श्राद्धविधेरन्यत्र दृष्टानि न स्मरन्ति।१५प्र०।"मासम्मि पव्वछक्कं, तिन्नि अ पव्वाइँ पक्खम्मि।" इतिगाथोक्ता चतुःपर्वी सर्वश्राद्धानां, किं वा लेपश्राद्धाधिकारवर्णिता ?, इति प्रश्ने, उत्तरम्-"मासम्मि पव्वछक्कं,तिन्नि य पव्वाइँ पक्खम्मि।"इति गाथोक्तैव चतुःपर्वी सर्वश्राद्धानां सम्माव्यते,न तु लेपश्राद्धाधिकारोक्ता।१६ प्र०।ही०२प्रका०। यदा पञ्चमी तिथिस्त्रुटिता भवति तदा तत्तपः कस्यां तिथौ क्रियते?, पूर्णिमायां च त्रुटितायां कुत्र ?, इति प्रश्ने, उत्तरम्-यदाऽत्र पञ्चमी तिथिस्त्रुटिता भवति,तदा तत्तपः पूर्वस्यां तिथौ क्रियते, पूर्णिमायां च त्रुटितायां त्रयोदशीचतुर्दश्योः क्रियते, त्रयोदश्यां विस्मृतौ प्रतिपद्यपीति ।५प्र०।ही०७प्रका०।महा-

विदेहेषु कल्याणकतिथ्यादिकमिदमेव, अन्यद्वा?, इति प्रश्ने, उत्तरम्-महाविदेहेषु कल्याणकतिथ्यादिकमिदमेवेति न सम्भाव्यते, यदाऽत्रत्यतीर्थकृतां च्यवनाऽऽदिकल्याणकं, तदा तत्र दिवससङ्ख्यावात्, तत्प्रतिपादकान्यकराण्यपि नोपलभ्यन्ते।७प्र०। ही० १ प्रका०। तिस्र एव पूर्णिमाः पर्वत्वेन संगीर्यते, सर्वा अपि वेत्यत्र प्रश्ने, उत्तरम्-" छन्नं तिहीण मज्झम्मि, का तिही अज्ज वासरे ?। " इत्याद्यागमानुसारेणाऽविच्छिन्नवृद्धपरम्परया च सर्वा अपि पूर्णिमाः पर्वत्वेन मान्या एवेति। २ प्र०। ही०१ प्रका०। पूर्णिमाऽमावास्ययोर्वृद्धौ पूर्वमौदयिकी तिथिराराध्यत्वेन व्यवहियमाणाऽस्तीति केनाचिदुक्तम्,श्रीतातपादाः पूर्ववतनीमाराध्यत्वेन प्रसादयन्ति, तत्किमिति प्रश्ने,उत्तरम्-पूर्णिमाऽमावास्ययोर्वृद्धौ औदयिकयेव तिथिराराध्यत्वेन विज्ञेया। ५ प्र०। ही० ३ प्रका०। " छन्नं तिहीण मज्झम्मि, का तिही अज्ज वासरे ?। " इत्याद्यागमवाक्यम्, तत्कुत्राऽऽगमेऽस्ति, स नामग्राहं प्रसाद्यः, यतोऽत्र स्तनिकाः राजसमक्षमेव वदन्ति, यज्जैनजीर्णग्रन्थमध्ये द्वितीयैकादशीप्रमुखतिथीनां चतुःपर्वीनां मानमाराध्यत्वेन नास्तीति प्रश्ने, उत्तरम्-"छन्नं तिहीण मज्झम्मि, का तिही अज्ज वासरे?।" इत्यादि गाथा श्राद्धदिनकृत्यसूत्रेऽस्ति, तद्व्याख्यानं च ८-१४-१५। एताः सितेतरभेदात् षट् तिथय इति। द्वितीयैकादशीप्रमुखतिथीनामकराणि तु श्राद्धविधेरन्यत्र न सन्ति, तथा ज्ञानपञ्चम्यकराणि महानिशीथे सन्तीति। १८० प्र०। सेन० ३ उल्ला०। " बहुसु य तिहीसु य पव्वणीसु य" मदनाऽऽदित्रयोदश्यादितिथिषु, भ०१३।०३३उ०।

तिहिवुड्ढि-तिथिवृद्धि-स्त्री०। अष्टम्यादितिथिवृद्धौ अग्रेतन्या आराधनं क्रियते, यतस्तद्दिने प्रत्याख्यानवेलायां घटिकाद्विका सा भवति, तावत्या एवाऽऽराधनं भवति, तदुपरि नवम्यादीनां भवनात्, संपूर्णायास्तु विराधनं जातं,पूर्वदिने भवनात्।अथ यदि प्रत्याख्यानवेलायां विलोक्यते, तदा तु पूर्वदिने द्वितयमप्यस्ति, प्रत्याख्यानवेलायां समग्रदिनेऽपीति स्पष्टमाराधनं भवतीति प्रश्ने, उत्तरम्-" कये पूर्वा तिथिः कार्या, वृद्धौ कार्या तथोत्तरा।" इति उमास्वातिवाचकवचनप्रामाण्याद् वृद्धौ सत्यां स्वल्पाऽप्यग्रेतना तिथिः प्रमाणमिति। १८५ प्र०। सेन० ३ उल्ला०।

तिही-तिथी-स्त्री०। ' तिहि ' शब्दार्थे, चं० प्र० १० पाहु०।

तिहु-कुतस्-अव्य०। " कुतसः कउ कहं तिहु " ॥ ८। ४। ४१६ ॥ इत्यपभ्रंशे कुतःशब्दस्य ' तिहु ' इत्यादेशः। कस्मादित्यर्थे, प्रा० ४ पाद।

तिहुयण-त्रिभुवन-न०। अधस्तिर्यगूर्ध्वलोकभेदे, आव०४अ०।

तिहुयणतिलग-त्रिभुवनतिलक-पुं०। श्रीनासिक्यपुरे श्रीजीवितचन्द्रप्रभस्वामिप्रतिमायाम्, ती० ४३ कल्प।

तिहुयणन्नाणु-त्रिभुवनज्ञानु-पुं०। अहिच्छत्रापूजितायां स्वनामख्यातायां पार्श्वजिनप्रतिमायाम्, ती० ४३ कल्प।

तीय-अतीत-त्रि०। अतिशयेन इतो गतोऽतीतः, पिधानवदकारश्लोपः। वर्तमानत्वमतिक्रान्ते, स्था०३ ठा०४ उ०। षो०। आव०।

तीयवयण-अतीतवचन-न०। कृतवानित्येवंरूपे षोडशवचनेषु द्वादशे वचने, आचा० २ श्रु० १ चू०१ अ० १ उ०।

तीर-तीर-पुं०। पर्यन्ते, नि० चू० १ उ०। तटे, सूत्र० २ श्रु० १ अ०। पारे, स्था० ४ ठा० १ उ०। प्रवाहात्परकूले, विशे०। "दकतीरम्मि चिट्ठिस्सए।" उदकतीरं उदकोपकण्ठम्। बृ०१ उ०।

शक्-धा०। सामर्थ्ये। स्वादि०-पर०-अक०-अनिट्। " शकेश्चय-तर-तीर-पाराः" ॥ ८। ४। ८६ ॥ इति शक्नोतेस्तीर इत्यादेशः। 'तीरइ।' शक्नोति। प्रा० ४ पाद।

तॄ-धा०। तरणे, प्लवने, अभिभवे च। स्वादि०-पर०-सक०-सेट्। " ह्र-क्र-तॄ-ज्ञामीरः" ॥ ८। ४। २५० ॥ इति तॄधातोरन्त्यस्य ईर इत्यादेशः। 'तीरइ'। तरति। प्रा० ४ पाद।

तीरंगम-तीरङ्गम-त्रि०। तीरं गच्छन्तीति तीरङ्गमाः, अच्, मुमागमश्च। पारगामिनि, आचा० १ श्रु० ३ अ० ३ उ०।

तीरट्ठ-तिरस्थ-त्रि०। सम्यक्त्वाऽऽदिप्राप्तेः संसारपरिमाणात् तटस्थे, दश० २ अ०।

तीरट्ठि(ण्)-तिरार्थिन्-त्रि०। तीरं पारं भवार्णवस्यार्थयत इत्येवंशीलस्तीरार्थी, तीरस्थायी वा, तीरस्थितिरितिवा प्राकृतत्वात् 'तीरट्ठी' इति। स्था ४ ठा० १ उ०। सूत्र०। भवार्णवतितीर्षौ, दश० १० अ०।

तीरहुत्त-तीरभुक्त-पुं०। विदेहजनपदेषु, "इहेव भारहे वासे पुव्वदेसे विदेहो नाम जणवओ, संपइकाले तिरहुत्तदेसो त्ति भण्णति।" ती० १ कल्प।

तीरित्ता-तारयित्वा-अव्य०। यावज्जीवमाराध्येत्यर्थे, कल्प० ए क्षण।

तीरिय-तारित-त्रि०। पूर्णेऽपि प्रत्याख्यानकालावधौ किञ्चिदधिककालावस्थानेन तीरं नीते, प्रव० ५ द्वार। आचा०। " एता भिक्खुपडिमा तीरिया भवइ।" पूर्णेऽपि तदवधौ स्तोककालावस्थानात्तीरिता भवति। दर्श० १ तत्त्व। आ० चू०। समाप्ते, व्य० १ उ०।

तीसइमुहुत्त-त्रिंशन्मुहूर्त्त-त्रि०। त्रिंशतं मुहूर्त्ताश्चन्द्रभागो येषां तानि तथा। त्रिंशन्मुहूर्त्तानि यावच्चन्द्रेण सह युज्यमाननक्षत्रे, स्था० ६ ठा०।

तीसगुत्त-तिष्यगुप्त-पुं०। राजगृहनगरवास्तव्यस्य वसुनामाऽऽचार्यस्य स्वनामख्याते शिष्ये, स च जीवप्रादेशिकानां निह्नवानां धर्माऽऽचार्यः। विशे०। आ० क०। उत्त०। स्था०। आ० म०। आ० चू०। (तद्वक्तव्यता लेशतो 'जीवपएसिय' शब्देऽस्मिन्नेव भागे १५५४ पृष्ठे उक्ता)

तीसभद्द-तिष्यभद्र-पुं०। माठरसगोत्रस्याऽऽर्यसंभूतविजयस्थविरस्य स्वनामख्याते शिष्ये, कल्प० ८ क्षण।

तीसल्लनिस्सल्ल-त्रिशल्यनिःशल्य-त्रि०। मायानिदानमिथ्यादर्शनरूपशल्यत्रयरहिते, पा०।

.....तीसल्लनिस्सल्लो (९३)

शल्यते बाध्यते प्राणी एभिरिति शल्यानि। ऊयतस्तोमराऽऽदीनि, भावतस्तु मायाऽऽदीनि। निर्गतानि शल्यानि यस्य स निःशल्यः। स चैकशल्यापेक्ययाऽपि स्यादित्याह-त्रीणि च तानि शल्यानि च त्रिशल्यानि, तेषु विषये निःशल्यः त्रिशल्यनिःशल्यः। तत्र मायाशल्यम-माया निकृतिः, सैव शल्यं मायाशल्यम्। नितरां दायते छूयते मोक्षफलमनिन्द्यब्रह्मचर्याऽऽदिसाध्यकुशलकर्मकल्पतरुवनमनेन देवर्द्ध्यादिप्रार्थनपरिणामनिशितासिनेति निदानं, तदेव शल्यं निदानशल्यम्। मिथ्यादर्शनशल्यम-मिथ्या विपरीतं, दर्शनं तत्त्वानवबोधलक्षणं मिथ्यादर्शनं, तदेव शल्यं मिथ्यादर्शनशल्यमिति। (९३) पा०।

तीसा-त्रिंशत्-स्त्री० । " विंशत्यादेर्लुक् " ॥ ८ । १ । २७ ॥ इत्यनुस्वारस्य लुक् । प्रा० १ पाद । " ईर्जिह्वार्त्रिंत्रिंशद्विंशतौ त्या " ॥ ८ । १ । ९२ ॥ इति इकारस्येकारः । त्रिरावृत्तदशसंख्यायाम्, प्रा० १ पाद ।

तीसिया-त्रिंशिका-स्त्री० । त्रिंशद्वर्षपर्यायायां स्त्रियाम्, व्य० ७ उ० ।

तु-तु-अव्य० । समुच्चये, विशे० । नि० चू० । दश० । अवधारणे, विशे० । उत्त० । सूत्र० । दश० । प्रव० । आ० म० । नि० चू० । पञ्चा० विशेषणे, सूत्र० १ श्रु० ४ अ० २ उ० । आचा० । वितर्के, सूत्र० २ श्रु० ४ अ० । आव० । पञ्चा० पूरणे, स्था० ४ ठा० २ उ० । नि० चू० । पञ्चा० । पादपूरणे, पञ्चा० ४ विव० । नि० चू० । पुनःशब्दार्थे, आचा० १ श्रु० ५ अ० १ उ० । दश० पूर्वस्माद्विशेषदर्शने, सूत्र० १ श्रु० १ अ० २ उ० । एवकारार्थे, सूत्र० १ श्रु० २ अ० २ उ० । ग० । अने० । दश० । दश० । नं० । आ० म० । स्था० । अव्यर्थे, दश० १ तत्त्व । यस्मादर्थे, नि० चू० १ उ० । चशब्दार्थे, सूत्र० १ श्रु० १ अ० १ उ० । शब्दार्थप्रदर्शने, नि० चू० १ उ० । भेदे, "तुः स्याद्भेदेऽवधारणे" स्था० । आ० म० । निष्क्रमे, प्रव० ४ द्वार । अव्यत्वेनाऽनेकार्थत्वाद् हेतौ, व्य० १ उ० । कारणापेक्षायाम्, नि० चू० १ उ० । तुशब्दो यच्छब्दार्थे द्रष्टव्यः । "तेणं तु चित्तमचित्तं" तेणं जं तं चित्तमचित्तमित्यर्थः । नि० चू० १ उ० । विकल्पदर्शने, नि० चू० १ उ० । परिग्रहे, नि० चू० १ उ० । साहश्ये, स्था० । अप्रतिषेधे, स्तोकप्रायश्चित्तप्रदानविशेषे, नि० चू० १ उ० । अनेकप्रकारविशेषणे, दश० ४ अ० । पर्यायित्वचने, आचा० १ श्रु० १ अ० ६ उ० ।

तुअर-तुवर-पुं० । धान्यविशेषे, जं० १ वक्ष० । कषायरसे च । तद्वति, त्रि० । आढकयां, सौराष्ट्रमृत्तिकायां च । स्त्री० । षित्वान् ङीष् । स्वार्थे कन् । तुवरिकाऽप्यत्रैव । वाच० ।

तुं-त्वाम्-त्रि० । " तं-तुं-तुमं-तुवं-० ॥ ८ । ३ । ९२ ॥ इत्यादिनाऽमासहितस्य युष्मदः 'तुं' इत्यादेशः । प्रा० ३ पाद ।

तव-त्रि० । "तइ-तुं-ते-तुम्ह०-" ॥ ८ । ३ । ९९ ॥ इत्यादिना षष्ठ्येकवचनेन ङसा सहितस्य 'तुं' इत्यादेशः । प्रा० ३ पाद ।

त्वम्-त्रि० । " युष्मदस्तं तुं०- " ॥ ८ । ३ । ९० ॥ इत्यादिना सिसहितस्य युष्मदः 'तुं' इत्यादेशः । प्रा० ३ पाद ।

तुंग-तुङ्ग-त्रि० । उच्चैस्त्वगुणयुक्ते, स्त० । जं० । औ० । जी० । कल्प० । सू० प्र० । उन्नते, औ० । अत्युच्चे, रा० ।

तुंगार-तुङ्गार-पुं० । दक्षिणपूर्वस्या दिग्भागे, आ० म० १ अ० १ खण्ड । आ० चू० ।

तुंगिय-तुङ्गिक-पुं० । वत्सदेशान्तर्गते स्वनामख्याते ग्रामे, आ० म० १ अ० २ खण्ड । आ० चू० । " जसभद्दं तुंगियं चेव । " तुङ्गिकगणे तुङ्गिकापत्यगोत्रे, नं० ।

तुंगिया-तुङ्गिका-स्त्री० । स्वनामख्यातायां नगर्याम्, भ० ।

तुङ्गिकानगरीश्रावकसमुदायवान् दृष्टान्तश्चैवम-

तीसे णं तुंगियाए नयरीए बहिया उत्तरपुरच्छिमे दिसीभागे पुप्फवईए नामं चेइए होत्था । वण्णओ । तत्थ णं तुंगियाए नयरीए बहवे समणोवासया परिवसंति, अड्ढा दित्ता वित्थिण्णविपुलभवणसयणाऽऽसणजाणवाहणाऽऽइण्णा बहुधणबहुजायरूवरयया आओगपओगसंपउत्ता विच्छड्डियविउलभत्तपाणा बहुदासीदासगोमहिसगवेलगप्पभूया बहुजणस्स अपरिभूया अभिगयजीवाजीवा उवलद्धपुण्णपावा आसवसंवरनिज्जरकिरियाहिगरणबंधपमोक्खकुसला असहेज्जदेवासुरनागसुवण्णजक्खरक्खसकिन्नरकिंपुरिसगरुलगंधव्वमहोरगादीएहिं देवगणेहिं निग्गंथाओ पावयणाओ अणतिक्कमणिज्जा निग्गंथे पावयणे निस्संकिया निक्कंखिया निव्वितिगिच्छा लद्धट्ठा गहियट्ठा पुच्छियट्ठा अभिगयट्ठा विणिच्छियट्ठा अट्ठिमिंजपेम्माणुरायरत्ता अयमाउसो ! निग्गंथे पावयणे अट्ठे, अयं परमट्ठे, सेसे अणट्ठे, ऊसियफलिहा अवंगुयदुवारा चियत्तंतेउरपरघरप्पवेसा बहूहिं सीलव्वयगुणवेरमणपच्चक्खाणपोसहोववासेहिं चाउद्दसट्ठमुद्दिट्ठपुण्णमासिणीसु पडिपुण्णं पोसहं सम्ममणुपालेमाणा समणे निग्गंथे फासुएसणिज्जेणं असणपाणखाइमसाइमेणं वत्थपडिग्गहकंबलपायपुंछणेणं पीढफलगसेज्जासंथारएणं ओसहभेसज्जेणं पडिलाभेमाणा अहापरिग्गहिएहिं तवोकम्मेहिं अप्पाणं भावेमाणा विहरंति । तेणं कालेणं तेणं समएणं पासावच्चिज्जा थेरा भगवंतो जाइसंपण्णा कुलसंपण्णा बलसंपण्णा रूवसंपण्णा विणयसंपण्णा णाणसंपण्णा दंसणसंपण्णा चरित्तसंपण्णा लज्जालाघवसंपण्णा ओयंसी तेयंसी वच्चंसी जसंसी जियकोहा जियमाणा जियमाया जियलोभा जियनिद्दा जियइंदिया जियपरीसहा जीवियासामरणभयविप्पमुक्का बहुस्सुया बहुपरिवारा पंचहिं अणगारसएहिं सद्धिं संपरिवुडा अहाणुपुव्विं चरमाणा गामाणुगामं दूइज्जमाणा सुहं सुहेणं विहरमाणा जेणेव तुंगिया नयरी, जेणेव पुप्फवईए चेइए, तेणेव उवागच्छंति, उवागच्छइत्ता अहापडिरूवं उग्गहं ओगिण्हेत्ता संजमेणं तवसा अप्पाणं भावेमाणा विहरंति ॥

(अड्ढ त्ति) आढ्या धनधान्याऽऽदिभिः परिपूर्णाः, (दित्त त्ति) दीप्ताः प्रसिद्धाः, दृप्ता वा दर्पिताः (वित्थिण्णविपुलभवणसयणाऽऽसणजाणवाहणाऽऽइण्णा) विस्तीर्णानि विस्तारवन्ति विपुलानि प्रचुराणि भवनानि गृहाणि शयनाऽऽसनयानवाहनैराकीर्णानि येषां ते तथा अथवा विस्तीर्णानि विपुलानि भवनानि येषां, शयनाऽऽसनयानवाहनानि वाऽऽकीर्णानि गुणवन्ति येषां ते तथा । तत्र यानं गन्त्र्यादि, वाहनं रथाश्वाऽऽदि । (बहुधणबहुजायरूवरयया) बहु प्रभूतं धनं गणिमाऽऽदिकं, तथा बहुव जातरूपं सुवर्णं रजतं च रूप्यं येषां ते तथा । (आओगपओगसंपउत्ता) आयोगो द्विगुणाऽऽदिवृद्ध्याऽर्थप्रदानं, प्रयोगश्च कलान्तरं, तौ संप्रयुक्तौ व्यापारितौ यैस्ते तथा । (विच्छड्डियविउलभत्तपाणा) विच्छर्दितं विविधमुज्झितं, बहुलोकभोजनत उच्छिष्टावशेषसंभवात्, विच्छर्दितं वा विविधविच्छित्तिमद्, विपुलं भक्तं च पानकं च येषां ते तथा । (बहुदासीदासगोमहिसगवेलगप्पभूया) बहवो दासीदासा येषां, गोमहिषगवेलकाश्च प्रभूता येषां ते तथा । गवेलका उरभ्राः (बहुजणस्स अपरिभूया) बहोर्लोकस्यापरिभवनीयाः, "आसव" इत्यादौ क्रियाः कायिक्यादिका अधि-

करणं गन्त्रीयश्चकाऽऽदि । (कुसल त्ति) आश्रवाऽऽदीनां हेयोपादेयतास्वरूपवेदिनः (असहेज्जेत्यादि) अविद्यमानं साहाय्यं परसाहायिकमत्यन्तसमर्थत्वाच्चेषां तेऽसाहाय्याः, तेच्च ते देवाऽऽदयश्चेति कर्मधारयः । अथवा-व्यस्तमेवेदं, तेन असाहाय्या आपद्यपि देवाऽऽदिसाहाय्यकानपेक्षाः, स्वयं कृतं कर्म स्वयमेव भोक्तव्यमित्यदीनमनोवृत्तय इत्यर्थः। अथवा--पाक्षयिभिः प्रारब्धाः सम्यक्त्वविचलनं प्रति न परसाहायकमपेक्षन्ते, स्वयमेव तत्प्रतिघातसमर्थत्वाज्जिनशासनात्यन्तभावितत्वाच्चेति, तत्र देवा वैमानिकाः(असुरत्ति)असुरकुमाराः(नाग त्ति)नागकुमाराः, उभयेऽप्यमी भवनपतिविशेषाः (सुवण्ण त्ति) सुपर्णा ज्योतिष्काः, यक्षराक्षसकिन्नरकिंपुरुषा व्यन्तरविशेषाः (गरुल त्ति) गरुडध्वजाः सुपर्णकुमारा भवनपतिविशेषाः, गन्धर्वा महोरगाश्च व्यन्तरविशेषाः । (अणतिक्कमणिज्ज त्ति) अनतिक्रमणीया अलङ्घनीयाः (सद्दह त्ति) अर्थश्रवणात् । (गहियच त्ति) अर्थावधारणात् । (पुच्छियच त्ति) सांशयिकार्थप्रश्नकरणात् । (अभिगयट्ठ त्ति) प्रश्नितार्थस्याभिगमनात् । (विणिच्छियच त्ति) पेढम्पर्यार्थस्योपबृंहणात्। अत एव-(अट्ठिमिंजपेम्माणुरागरत्ता) अस्थीनि च कीकसानि, मिञ्जा च तन्मध्यवर्त्ती धातुरस्थिमिञ्जास्तासु प्रेमानुरागेण सार्वज्ञप्रवचनप्रीतिरूपकुसुम्भाऽऽदिरागेण रक्ता इव रक्ता येषां ते तथा । अथवा-अस्थिमिञ्जासु जिनशासनगतप्रेमानुरागेण रक्ता ये ते तथा। केनोल्लेखेनेत्याह-(अयमाउसो! इत्यादि) अयमिति प्राकृतत्वादिदम् ।(आउसो ! त्ति) आयुष्मन्निति पुत्राऽऽदेरामन्त्रणम। (सेसे त्ति) शेषनिर्ग्रन्थप्रवचनव्यतिरिक्तं धनधान्यपुत्रकलत्रमित्रकुप्रवचनाऽऽदिकामिति ।(ऊसियफलिह त्ति) उच्छ्रितमुन्नतं स्फटिकमिव स्फटिकं चित्तं येषां ते उच्छ्रितस्फटिकाः, मौनीन्द्रप्रवचनावाप्त्या परितुष्टमानसा इत्यर्थः । इति वृद्धव्याख्या । अन्ये त्वाहुः-उत्थितोऽर्गलास्थानादपनीयोर्द्धीकृतोऽतिरश्चीनः कपाटपश्चाद्भागादपनीत इत्यर्थः । परिघोऽर्गला येषां ते उच्छ्रितपरिघाः। अथवा--उच्छ्रितो गृहद्वारादपगतः परिघो येषां ते उच्छ्रितपरिघाः । औदार्यातिशयादतिशयदानदायित्वेन निर्भुकाणां गृहप्रवेशार्थमनर्गलितगृहद्वारा इत्यर्थः॥ (अवंगुयदुवारे त्ति) अपावृतद्वाराः, कपाटाऽऽदिभिरस्थगितगृहद्वारा इत्यर्थः । सद्दर्शनलाभेन न कुतोऽपि पाक्षयिकाद्भिष्यन्ति, शोभनमार्गपरिग्रहेणोद्भटितशिरस्त्रिष्ठन्तीति भावः। इति वृद्धव्याख्या । अन्ये त्वाहुः--भिक्षुकप्रवेशार्थमौदार्यादस्थगितगृहद्वारा इत्यर्थः ॥ (चियत्तंतेउरपरघरदारप्पवेसा) (चियत्तो त्ति) लोकानां प्रीतिकर एवान्तःपुरे वा परगृहे वा प्रवेशो येषां ते तथा, अतिधार्मिकतया सर्वत्राशङ्कनीयास्त इत्यर्थः । अन्येत्वाहुः-(चियत्तो त्ति) नाऽप्रीतिकरोऽन्तःपुरपरगृहयोः प्रवेशः शिष्टजनप्रवेशनं येषां ते तथा। अनीर्ष्यासुताप्रतिपादनपरं चेत्थं विशेषणमिति । अथवा-(चियत्तो त्ति) त्यक्ताऽन्तःपुरपरगृहयोः परकीययोर्यथाकथञ्चित्प्रवेशो यैस्तेतथा । (बहूहिं इत्यादि) शीलव्रतान्यणुव्रतानि, गुणा गुणव्रतानि, विरमणानि औचित्येन रागाऽऽदिनिवृत्तयः,प्रत्याख्यानानि पौरुष्यादीनि,पौषधं पर्वदिनानुष्ठानं तत्रोपवासोऽवस्थानं पौषधोपवासः। एतेषां द्वन्द्वोऽतस्तैर्युक्ता इतिगम्यम्। पौषधोपवास इत्युक्तम, पौषधं च यदा यथाविधं च ते कुर्वन्तो विहरन्ति तदर्शयन्नाह-(चाउद्दसेत्यादि) इहोद्दिष्टा अमावस्याः (पडिपुण्ण पोसहं ति) आहाराऽऽदिभेदाच्चतुर्विधमपि सर्वतः । (सत्थमुसलोदगकंबलपायपुंछणेणं ति) । इह पतद्ग्रहः पात्रं, पादप्रोञ्छनं, रजोहरणं,गोच्छकासनं,फलकमवष्टम्भनफलकं, शय्या वसतिर्बृहत्संस्तारको वा, संस्तारको लघुतरः । एषां समाहारद्वन्द्वोऽतस्तेन । (अहापरिग्गहिएहिं ति) यथाप्रतिपन्नैर्न पुनर्हासं नीतैः (थेरे त्ति) श्रुतवृद्धाः । (रूवसंपन्न त्ति) इह रूपं सुविहितनेपथ्यं, शरीरसुन्दरता वा, तेन सम्पन्ना युक्ता रूपसम्पन्नाः । (लज्जालाघवसंपन्न त्ति) लज्जा प्रसिद्धा, संयमो वा, लाघवं द्रव्यतोऽल्पोपधित्वं, भावतो गौरवत्यागः । (ओयंसी ति) ओजस्विनो मानसावष्टम्भयुक्ताः । (तेयंसी ति) तेजस्विनः शरीरप्रभायुक्ताः । (वच्चंसी ति) वर्चस्विनो विशिष्टप्रभावोपेताः, वचःस्विनो वा विशिष्टवचनयुक्ताः । (जसंसी ति) ख्यातिमन्तः । अनुस्वारश्चैतेषु प्राकृतत्वात् । (जीवियासामरणभयसोगविप्पमुक्क त्ति) जीविताऽऽशया, मरणभयेन च विप्रमुक्ता ये ते तथा । इह (?) यावत्करणादिदं दृश्यम्-" तवप्पहाणा गुणप्पहाणा।" गुणाश्च संयमगुणाः, तपःसंयमग्रहणं चेह तपःसंयमयोः प्रधानमोक्षाङ्गताऽभिधानार्थम् । तथा-" करणप्पहाणा चरणप्पहाणा" तत्र करणं पिण्डविशुद्ध्यादि, चरणं व्रतश्रमणधर्माऽऽदि । (निग्गहप्पहाणा) निग्रहोऽन्यायकारिणां दण्डः, (निच्छयप्पहाणा) निश्चयोऽवश्यकरणाभ्युपगमः, तत्त्वनिर्णयो वा । (मद्दवप्पहाणा अज्जवप्पहाणा) ननु जितक्रोधाऽऽदित्वान्मार्दवाऽऽदिप्रधानत्वमवगम्यत एव तत्किं मार्दवेत्यादिना?। उच्यते-तत्रोदयविफलतोक्ता, मार्दवाऽऽदिप्रधानत्वे तूदयाभाव एवेति । (लाघवप्पहाणा) लाघवं क्रियासु दक्षत्वम् (खंतिप्पहाणा मुत्तिप्पहाणा) (एवं विज्जामंतवेयबंभनयनियमसच्चसोयप्पहाणा चारुप्पन्ना) सत्प्रज्ञाः (सोही) शुद्धिहेतुत्वेन शोधयः, सुहृदो वा मित्राणि, जीवानामिति गम्यम् (अणियाणा अप्पुस्सुया अबहिल्लेस्सा सुसामण्णरया अच्छिद्दपसिणवागरण त्ति) अच्छिद्राण्यविरलानि निर्दूषणानि वा प्रश्नव्याकरणानि येषां ते तथा। (कुत्तियावणभूय त्ति) कुत्रिकं स्वर्गमर्त्यपातालैकलक्षणं भूमित्रयं, तत्सम्भवं वस्त्वपि कुत्रिकं, तत्सम्पादक आपणो हट्टः कुत्रिकाऽऽपणः, तद्भूताः समीहितार्थसम्पादनलब्धियुक्तत्वेन सकलगुणोपेतत्वेन वा तदुपमाः । (सद्धिं ति) सार्द्धं सहेत्यर्थः । सम्परिवृताः सम्यक् परिवारिताः, परिकरभावेन परिकरिता इत्यर्थः । पञ्चभिः श्रमणशतैरेव ।

तए णं तुंगियाए नयरीए सिंघाडगतिगचउक्कचच्चरचउम्मुहमहापहपहेसु ०जाव एगदिसाभिमुहा णिज्जायंति, तए णं ते समणोवासया इमीसे कहाए लद्धट्ठा समाणा हट्ठतुट्ठा ०जाव सद्दावेंति, सद्दावित्ता एवं वयासी-एवं खलु देवाणुप्पिया ! पासावच्चेज्जा थेरा भगवंतो जातिसंपण्णा ०जाव अहापडिरूवं उग्गहं ओगिण्हित्ता संजमेणं तवसा अप्पाणं भावेमाणा विहरंति ।

(सिंघाडग त्ति) शृङ्गाटकफलाऽऽकारं स्थानं, त्रिकं रथ्यात्रयमीलनस्थानम्, चतुष्कं रथ्याचतुष्कमीलनस्थानम, चत्वरं बहुतररथ्यामीलनस्थानम्, महापथो राजमार्गः, पन्था रथ्यामात्रम । यावत्करणात्-" बहुजणसद्दोहिं वा " इत्यादिपूर्वव्याख्यातमत्र दृश्यम् ।

तं महाफलं खलु देवाणुप्पिया ! तहारूवाणं थेराणं भगवंता-

णं नामगोयस्स वि सवणयाए, किमंग ! पुण अभिगमण-वंदणनमंसणपडिपुच्छणपज्जुवासणयाए ०जाव गहणयाए; तं गच्छामो णं देवाणुप्पिया ! थेरे भगवंते वंदामो, णमंसामो ०जाव पज्जुवासामो, एयण्णं इहभवे परभवे ०जाव आणुगामियत्ताए भविस्सइ त्तिकट्टु अण्णमण्णस्स अंतिए एयमट्ठं पडिसुणेंति, पडिसुणित्ता जेणेव सयाइं गेहाइं, तेणेव उवागच्छंति, उवागच्छइत्ता ण्हाया कयबलिकम्मा कयकोउयमंगलपायच्छित्ता सुद्धप्पावेसाइं मंगल्लाइं वत्थाइं पवराइं परिहिया अप्पमहग्घाभरणालंकियसरीरा सएहिं सएहिं गेहेहिंतो पडिनिक्खमंति, पडिनिक्खमइत्ता एगयओ मेलायंति, पायविहारचारेणं तुंगियाए नयरीए मज्झं मज्झेणं निग्गच्छंति, निग्गच्छइत्ता जेणेव पुप्फवईए नामं चेइए होत्था, तेणेव उवागच्छंति, उवागच्छइत्ता थेरे भगवंते पंचविहेणं अभिगमेणं अभिगच्छंति । तं जहा–सचित्ताणं दव्वाणं विउसरणयाए, अचित्ताणं दव्वाणं अविउसरणयाए, एगसाडिएणं उत्तरासंगकरणेणं चक्खुप्फासे अंजलिपग्गहेणं मणसा एगत्तीकरणेणं जेणेव थेरा भगवंतो तेणेव उवागच्छंति, उवागच्छइत्ता तिक्खुत्तो आयाहिणपयाहिणं करेंति० जाव तिविहाए पज्जुवासणाए पज्जुवासंति । तए णं ते थेरा भगवंतो तेसिं समणोवासयाणं तीसे य महइ महालियाए परिसाए चाउज्जामं धम्मं परिकहेंति । जहा केसिसामिस्स० जाव समणोवासइत्ताए आणाए आराहए भवइ० जाव धम्मो कहिओ ॥

(पडिसुणेंति त्ति) अभ्युपगच्छन्ति । (सयाइं ति) स्वकीयानि । (कयबलिकम्म त्ति) स्नानानन्तरं कृतं बलिकर्म यैः स्वगृहदेवतानां ते तथा । (कयकोउयमंगलपायच्छित्त त्ति) कृतानि कौतुकमाङ्गल्यान्येव प्रायश्चित्तानि दुःस्वप्नाऽऽदिविघातार्थमवश्यकरणीयत्वाद्यैस्ते तथा । अन्ये त्वाहुः-(पायच्छुत्त त्ति) पादेन पादे वा, लुप्ताश्चकुर्दोषपरिहारार्थं पादच्छुप्ताः, कृतकौतुकमङ्गलाश्च ते पादच्छुप्ताश्चेति विग्रहः । तत्र कौतुकानि मषीतिलकाऽऽदीनि, मङ्गलानि तु सिद्धार्थकदध्यक्षतदूर्वाऽङ्कुराऽऽदीनि । (सुद्धप्पावेसाइं ति) शुद्धाऽऽत्मानो वेश्याणि वेषोचितानि । अथवा शुद्धानि च तानि प्रावेश्यानि च राजाऽऽदिसभाप्रवेशोचितानि शुद्धप्रावेश्यानि । (वत्थाइं पवराइं परिहिय त्ति) क्वचित् दृश्यते । क्वचिच्च-(वत्थाइं पवरपरिहिय त्ति) तत्र प्रथमपाठो व्यक्तः, द्वितीयस्तु प्रवरं यथा भवतीत्येवं परिहिताः प्रवरपरिहिताः (पायविहारचारेणं ति) पादविहारेण, न यानविहारेण, यश्चारो गमनं स तथा तेन । (अभिगमेणं ति) प्रतिपत्त्या अभिगच्छन्ति समीपं गच्छन्ति । (सचित्ताणं ति) पुष्पताम्बूलाऽऽदीनाम् (विउसरणयाए त्ति) व्यवसर्जनया त्यागेन । (अचित्ताणं ति) वस्त्रमुद्रिकानाम् (अविउसरणयाए त्ति) अत्यागेन । (एगसाडिएणं ति) अनेकोत्तरीयशाटकानां निषेधार्थमुक्तम् । (उत्तरासंगकरणेणं ति) उत्तरासङ्ग उत्तरीयस्य देहे न्यासविशेषः । चक्षुःस्पर्शे दृष्टिपाते । (एगत्तीकरणेणं ति) अनेकत्वस्यानेकाऽऽत्मत्वस्यैकत्वकरणमेकालम्बनत्वकरणमेकत्वीकरणं, तेन । (तिविहाए पज्जुवासणाए त्ति) इह पर्युपासनात्रैविध्यं मनोवाक्कायभेदादिति । (महइमहालियाए त्ति) आलप्रत्ययस्य स्वार्थिकत्वाद् महति महत्याः । भ० २ श० ५ उ० ।

तुंगियायण–तुङ्गिकायन–पुं० । तुङ्गर्षिगोत्रापत्ये ऋषौ, कल्प० ८ क्षण ।

तुंगी–देशी–रात्रौ, दे० ना० ५ वर्ग १४ गाथा ।

तुंड–तुण्ड–न० । मुखे, विशे० । आ० क० । पुरोभागे, नि० चू० । "सायं से धूता सगडस्स तुंमे ठिता" नि० चू० १ उ० । आस्ये, दे० ना० ५ वर्ग १४ गाथा ।

तुंमिक–तुण्मिक–पुं० । वेलाकूलवास्तव्ये स्वनामख्याते वणिजि, आ० क० । ('जत्तासिद्ध' शब्देऽस्मिन्नेव भागे १३९० पृष्ठे कथा)

तुंमीर–देशी–मधुरबिम्बे, दे० ना० ५ वर्ग १४ गाथा ।

तुंडूअ–देशी–जीर्णघटे, दे० ना० ५ वर्ग १४ गाथा ।

तुंतुखमिअ–देशी–त्वरायुक्ते, दे० ना० ५ वर्ग ३६ गाथा ।

तुंद–देशी–उदरे, दे० ना० ५ वर्ग १४ गाथा ।

तुंदपरिमिय–तुन्दपरिमित–त्रि० । उदरभरणव्यग्रे, सूत्र० १० श्रु० ७ अ० ।

तुंदिल्ल–तुन्दिल्ल–त्रि० । तुन्दमस्यास्तीति तुन्दिलः । यथेप्सितभोजनेन वर्द्धितोदरे, उत्त० ७ अ० ।

तुंब–तुम्ब–न० । अलाबवाम्, ज्ञा० १ श्रु० १ अ० । रा० नि० चू० । अष्टादशे ज्ञाताध्ययने, स० १८ सम० आव० शकटनाभ्याम्, "जेण कुलं आयत्तं, तं पुरिसं भायरेण रक्खेज्जा । न हि तुंबम्मि विणट्ठे, अरया साहारया होंति ॥ १ ॥" आ० म० १ अ० १ खण्ड । कप्रत्ययोऽपि । अनु० । उत्त० । स्था० ।

तुंबणाय–तुम्बज्ञात–न० । अलाबूदृष्टान्तप्रतिपादके षष्ठेऽध्ययने, ज्ञा० १ श्रु० १ अ० । आ० चू० । ('कम्म' शब्दे चैतत् तृतीयभागे ३३२ पृष्ठे उक्तम्)

तुंबर–तुम्बर–त्रि० । कच्चे आमे, "जह तरुणअंबगरसो, तुंबरकविट्ठस्स वा वि जारिसओ । (१२)" उत्त ३४ अ० ।

तुंबरफल–तुम्बरफल–न० । हरीतकीप्रभृतिषु, वृ० १ उ० ।

तुंबवणग्गाम–तुम्बवनग्राम–पुं० । स्वनामख्याते ग्रामे, यत्र सुनन्दाभिधानां साधानां भार्यां मुक्त्वा धनगिरिणा दीक्षा गृहीता । कल्प० १ क्षण । आ० चू० । आ० म० ।

तुंबवीण–तुम्बवीण–त्रि० । तुम्बयुक्ता वीणा येषां ते तुम्बवीणाः । तुम्बवीणावादकेषु, जीव० ३ प्रति० ४ उ० ।

तुंबवीणिय–तुम्बवीणिक–त्रि० । तुम्बयुक्तायां वीणायां वादके, रा० । आचा० । प्रश्न० । ज्ञा० । अनु० ।

तुंबसाग–तुम्बशाक–पुं० । स्वनामख्याते शाकविशेषे, उत्त० २ अ० ।

तुंबा–तुम्बा–स्त्री० । चमरस्य बलस्य च लोकपालानामग्रमहिषीणां चाभ्यन्तरपरिषदि, स्था० ३ ठा० २ उ० । चन्द्रस्य सू·

र्यस्य च सामानिकाग्रमहिषीणां चाभ्यन्तरपरिषदि, स्था० ३ ठा० २ उ०।

तुंबाग–तुम्बाक–न० । त्वङ्मिञ्जाऽन्तर्वर्त्तिनि, आर्द्रायां तुलस्यां च । स्त्री० । दश० ५ अ० १ उ० ।

तुंबिणी–तुम्बिनी–स्त्री० । वल्लीविशेषे, आचा० १ श्रु० १ अ० ५ उ० ।

तुंबिल्ली–देशी–मधुपटले, वृक्षखले च । दे० ना० ५ वर्ग २३ गाथा ।

तुंबी–देशी–अलाब्वाम्, दे० ना० ५ वर्ग १४ गाथा ।

तुंबुरु–तुम्बुरु–पुं० । श्रीसुमतेर्यक्षे, स च श्वेतवर्णो गरुडवाहनश्चतुर्भुजो वरदशक्तियुक्तदक्षिणपाणिद्वयो, गदानागपाशयुक्तवामपाणिद्वयश्च । प्रव० २६ द्वार । शक्रस्य देवेन्द्रस्य गन्धर्वानीकाधिपतौ, स्था० ७ ठा० । तृतीये गन्धर्वे, प्रज्ञा० १ पद । वृक्षविशेषे, स० ८ समo ।

तुंबेअ–तुम्बेक–न० । ज्ञाताऽध्ययनभेदे, आव० ४अ० ।

तुच्छ–तुच्छ–त्रि० । असारे, आव० ६ अ० । पं० व० । अल्पे, भ० ६ श० ३३ उ० । प्रश्न० । उन्मत्ते, न तुच्छो भवेन्नोन्मादं गच्छेत् । सूत्र० १ श्रु० १४ अ० । चतुर्थीनवमीचतुर्दशीरूपासु तिथिषु, चं० प्र० १० पाहु० । द० प० । सू० प्र० । रिक्ते, स च द्रव्यतो निर्धनो जात्याऽऽदिरहितो घटाऽऽदिवी, भावतो ज्ञानाऽऽदिरहितः । आचा० १ श्रु० २ अ० ६ उ० । ऊषके, काष्ठहारकाऽऽदौ, अथवा–" ज्ञानैश्वर्यधनोपेतो, जात्यन्वयबलान्वितः । तेजस्वी मतिमान् ख्यातः, पूर्णस्तुच्छो विपर्ययात् ॥ १ ॥ " इत्युक्तलक्षणे अपूर्णे, आचा० १ श्रु० २ अ० ६ उ० । अवशुष्के, दे० ना० ५ वर्ग १४ गाथा ।

तुच्छइअ–देशी–रञ्जिते, दे० ना० ५ वर्ग १५ गाथा ।

तुच्छकहणा–तुच्छकथना–स्त्री० । अपरिणतदेशनायाम्, पं० व० ४ द्वार ।

तुच्छकुल–तुच्छकुल–त्रि० । अल्पकुटुम्बे, कल्प० २ क्षण । चाण्डालाऽऽदीनां कुले, न० । स्था० ८ ठा० । आ० म० ।

तुच्छग–तुच्छक–त्रि० । अगम्भीरे, पञ्चा० ७ विव० । आ० चू० । आ० म० । आचा० ।

तुच्छत्त–तुच्छत्व–न० । निःसारतायाम्, प्र० १८ श० ३ उ० ।

तुच्छय–देशी–रञ्जिते, दे० ना० ५ वर्ग १५ गाथा ।

तुच्छरूव–तुच्छरूप–त्रि० । तुच्छं हीनं रूपमाकारो यस्य स तुच्छरूपः । हीनाऽऽकारे, स्था० ४ ठा० ४ उ० ।

तुच्छवुत्ति–तुच्छोक्ति–स्त्री० । तुच्छबुद्धिप्रणीतवचने, द्रव्या० १४ अध्या० ।

तुच्छोभासि(ण)-तुच्छावभासिन्–त्रि० । तुच्छो धनश्रुताऽऽदिरहितोऽत एव तद्विनियोजकत्वात् तुच्छावभासी । ऊषणाम–पूर्णावभासिनि, स्था० ४ ठा० ४ उ० ।

तुच्छोसहिभक्खणया–तुच्छौषधिभक्षणता–स्त्री० । असाराणामौषधीनां भक्षणरूपे उपभोगपरिभोगविरतिव्रतस्यातिचारे, उत्त० १ अ० । तदाहरणम्–" एगो खेत्तरक्खगो, से गाओ खाइ, राया निग्गओ, खायंतं पेच्छइ, ततो वारिए इतो खायइ, रन्ना कोवेगेण पोट्टं फालियं, केत्तियाओ खाइयाओ होज्ज त्ति, नवरि फेणं, अन्नं न किंचि अत्थि । " आव० ६ अ० । ध० र० ।

तुज्झ–तूर्य–न० । वाद्यभेदे, सू० प्र० १० पाहु० ।

तुज्झ–तव-त्वद्–त्रि० । " ङसिङस्भ्यां तउ-तुज्झ-तुध्राः " ॥८।४। ३७२ ॥ इति ङसिङस्भ्यां सह युष्मदस्तुज्झ इत्यादेशः । प्रा० ४ पाद ।

तुट्ट–त्रुट्–धा० । छेदने, दिवा० तुदा०-पर०-सक०-सेट् । " शकाऽऽदीनां द्वित्वम् " ॥ ८ । ४ । ३३० ॥ इति द्वित्वम् । प्रा० ४ पाद । तुट्यति व्यवच्छिद्यते जीवानां जीवितमिति शेषः । सूत्र० १ श्रु० २ अ० १ उ० । तुट्यति व्यवतो सूत्र० १ श्रु० २ अ० १ उ० । जीवितात्व्यवने, सूत्र० १ श्रु० १ अ० १ उ० । त्रोटयेदपनयेत् आत्मनः पृथक्कुर्यात्परित्यजेद्वा । सूत्र० १ श्रु० १ अ० १ उ० ।

तुट्ठ–त्रि० । संतुष्टे, उत्त १८ अ० । तोषं कृतवति, आ० म० १ अ० १ खण्ड । औ० । जी० । प्र० । रा० । आचा० । ज्ञा० । उत्त० । सन्तोषं प्राप्ते, कल्प० १ क्षण ।

तुट्ठि–तुष्टि–स्त्री० । संतोषे, कल्प० १ क्षण । मनःप्रसत्तौ, कल्प० ६ क्षण । नवधा तुष्टिः–प्रकृत्युपादानकालभोगाऽऽख्याः, अम्भःसलिलौघवृष्ट्यपरपर्यायवाच्याश्चतस्र आध्यात्मिकाः; शब्दाऽऽदिविषयोपरतयश्चार्जनरक्षणक्षयभोगहिंसादोषदर्शनहेतुजन्मानः पञ्च बाह्यास्तुष्टयः; ताश्च पारसुपारपारापारानुत्तमाम्भउत्तमाम्भःशब्दव्यपदेश्या इति । स्था० १५ स्थो० । उत्सवे, नि० १ श्रु० १ वर्ग १ अ० ।

तुम–तुम्–धा० । भेदे, तुदा०-पर०-सक०-सेट् । " तुमेस्तोड-तुट्ट-खुट्ट-खुडोक्खुमोल्लुक्क-णिलुक्क-लुक्कोल्लूराः " ॥ ८ । ४ । ११६ ॥ इति 'तुम्'धातोरेते नवाऽऽदेशाः । प्रा० ४ पाद ।

तुमिय–त्रुटित–न० । तूर्ये, जं० ३ वक्ष० । औ० । स्था० । दिव्यतूर्ये, आ० म० १ अ० १ खण्ड । वेणुवीणामृदङ्गाऽऽदिषु आतोद्येषु, रा० । पटहाऽऽदौ, स्था० ८ ठा० । आतोद्ये, रा० । आ० म० । जी० । प्रज्ञा० । वादित्रे, ज्ञा० १ श्रु० १ व० । कल्प० । ततवितततन्त्रीतलतालभिन्नवादित्रे, कल्प० १ क्षण । जं० । दशा० । भ० । औ० । रा० । चतुरशीत्या लक्षैर्गुणिते त्रुटिताङ्के, कर्म० ४ कर्म० । जं० । कल्प० । स्था० । अनु० । ज्यो० । जी० । भ० । बाहुरात्तिकायाम्, स्त्री० । रा० । ज्ञा० । स्था० । आचा० । तं० । औ० । स० । उत्त० । प्रज्ञा० । जं० । भ० । चमरस्य सामानिकानामभ्यन्तरपरिषदि, स्था० ३ ठा० २ उ० । " तुमियं घिम्मलं । " इति देशीभाषा । नि० चू० २ उ० ।

तुडियंग–त्रुटिताङ्ग–न० । चतुरशीत्या लक्षगुणितपूर्वे, स्था० २ ठा० ४ उ० । " चउरासीइं पुव्वसयसहस्साइं से एगे तुडिअंगे " अनु० । जं० । कर्म० । भ० । सुषमसुषमायां भरतैरवतयोरकर्मभूमिषु च ज्ञापिनि कल्पवृक्षे, तं० । आव० । जी० । ति० । स० । त्रुटितानि तूर्याणि तत्करणत्वात् त्रुटिताङ्गः । तूर्यदायिनि, उक्तं च–" मत्तंगेसुयमज्जं१, सुइपेज्जं भायणाणि भिंगेसु २ । तुमियंगेसु य संगत–तुमियाइँ बहुप्पगाराइं॥ १॥ " स्था० १० ठा० ।

तुमओ–देशी–क्षुद्रखाऽऽख्यतूर्यविशेषे, दे० ना० ५ वर्ग १६ गाथा ।

तुम्मग–तुम्बाक–त्रि० । सीवनकर्मकर्त्तरि, नं० । आचा० । आ० चू० । प्रज्ञा० । अनु० । आ० म० ।

तुण्णाग–तुण्णाक–त्रि० । ' तुण्णग ' शब्दार्थे, सं० ।

तुप्पिय–तुप्पित–त्रि० । तुप्पकारणे स्वकलाकौशलतः पूरिते क्षिप्ते, बृ० १ उ० ।

तुण्हिक्क–तूष्णीक–त्रि० । " सेवाऽऽदौ वा " ॥८। २ । ९६ ॥ इति ककारस्य विकल्पेन द्वित्वम् । पक्षे–' तुण्हिअ ' । प्रा० २ पाद । मौनावलम्बिनि, आ० म० १ अ० २ खण्ड । नि० चू० । तूष्णींभावं भजमाने, नि० चू० । " जह णाविए गंभूसं कोती घेत्तूण नाम तुण्हिक्को । " नि० चू १ उ० । मूढौ, निश्चले च । दे० ना० ५ वर्ग १५ गाथा ।

तुण्हुही–देशी–सूकरे, दे० ना० ५ वर्ग १४ गाथा ।

तुद–तोद–पुं० । प्रतोदाऽऽदिषु, "रहंसि जुत्तं सरयंति वालं, आरुस्स विज्झंति तुदेण पिट्ठे । " कोपं कृत्वा प्रतोदाऽऽदिना पृष्ठदेशे तं नारकं परवशं नयन्ति । सूत्र० १ श्रु० ५ अ० २ उ० ।

तुप्प–तुप्र–पुं० । मृतककलेवरं वशाघृताऽऽदिभिः परिणामिते, बृ० १ उ० । नि० चू० । कौतुके, विवाहे, सर्षपे, अक्किते, स्निग्धे, कुतुपे च । दे० ना० ५ वर्ग २२ गाथा ।

तुप्पग्ग–तुप्राग्र–न० । अक्तिताग्रे, कल्प० २ क्षण ।

तुप्पोट्ठ–तुप्रोष्ठ–त्रि० । तुप्रा अक्तिता मदनेन वा चेष्टिताः शीतरक्षाऽऽदिनिमित्तमोष्ठा येषां ते तुप्रोष्ठाः । अक्तितोष्ठेषु ग० २ अधि० । अनु० ।

तुबरी–तुवरी–स्त्री० । मासषकाऽऽदिप्रसिद्धे धान्यविशेषे, ध० २ अधि० ।

तुब्भ–त्वत्–त्रि० । "तुद्द-तुब्भ०-" ॥ ८। ३ । ९७ ॥ इत्यादिना ङसिना सह युष्मदस्तुब्भ इत्यादेशः । प्रा० ३ पाद ।

तुब्भतो–त्वत्तः–त्रि० । " तइ-तुव-तुम-तुद्द-तुब्भा ङसौ ॥ ८ । ३ । ९६ ॥ इति ङसि परतो युष्मदस्तुब्भ इत्यादेशः । एवं 'तुम्हत्तो' इत्यपि । प्रा० ३ पाद ।

तुब्भाण–युष्माकम्–त्रि० । "तु-धो-भे-तुब्भ-तुज्झ-तुब्भाण०-" ॥ ८ । ३ । १०० ॥ इत्यादिना आमासहितस्य युष्मदस्तुब्भाण इत्यादेशः । प्रा० ३ पाद ।

तुब्भे–यूयम्–त्रि० । " भे-तुब्भे-तुज्झे०-" ॥ ८ । ३ । ९१ ॥ इत्यादिना जसा सहितस्य युष्मदस्तुब्भे इत्यादेशः । प्रा० ३ पाद ।

तुम–तव–त्रि० । " तइ-तुं-ते-तुम्हं-तुह-तुहं-तुव-तुम०-" ॥ ८ । ३ । ९९ ॥ इत्यादिना षष्ठ्येकवचनेन सहितस्य युष्मदस्तुम इत्यादेशः । प्रा० ३ पाद । बहुवचनोच्चारणयोर्भे तिरस्कारप्रधानैकवचनान्ते, सूत्र० १ श्रु० ६ अ० । " तुमं ति वत्ता भणइ । " आव० १ अ० । स्था० ।

तुमइ–त्वया–त्रि० । "भे-दि-दे-ते-तइ-तए-तुमं-तुमइ०-" ॥ ८ । ३ । ९४ ॥ इत्यादिना टासहितस्य युष्मदस्तुमइ इत्यादेशः । प्रा० ३ पाद ।

तुमए–त्वया–त्रि० । " भे-दि-दे-ते-तइ-तए-तुमं-तुमइ-तुमए०-" ॥ ८ । ३ । ९४ ॥ इत्यादिना टासहितस्य युष्मदस्तुमए इत्यादेशः । एवं ' तुमं ' इत्यपि । प्रा० ३ पाद ।

तुमतो–त्वत्तः–त्रि० । " तइ तुव-तुम०-" ॥ ८ । ३ । ९६ ॥ इत्यादिना ङसि परतो युष्मदस्तुम इत्यादेशः । प्रा० ३ पाद ।

तुमाइ–त्वया–त्रि० । " भे-दि-दे-ते-तइ-तए-तुमं-तुमइ-तुमए-तुमे-तुमाइ०-" ॥ ८ । ३ । ९४ ॥ इत्यादिना टासहितस्य युष्मदः 'तुमाइ' इत्यादेशः । प्रा० ३ पाद ।

तुव–त्रि० । " तइ-तुं-ते-तुम्हं-तुह-तुहं-तुव-तुम-तुमे-तुमो-तुमाइ०-" ॥ ८ । ३ । ९९ ॥ इत्यादिना षष्ठ्येकवचनेन सह युष्मदस्तुमाइ इत्यादेशः । प्रा० ३ पाद ।

तुमाण–युष्माकम्–त्रि० । "तु-धो-भे-तुब्भ-तुब्भं-तुब्भाण-तुवाण-तुमाण०-" ॥ ८ । ३ । १०० ॥ इत्यादिना आमा सहितस्य युष्मदस्तुमाण इत्यादेशः । प्रा० ३ पाद ।

तुमातो–त्वत्तः–त्रि० । "अतो ङसेर्डातोमात्" ॥ ८ । ४ । ३२१ ॥ इति पैशाच्यामकारात्परस्य ङसेर्डितौ 'आतो-आत्' इत्यादेशौ । प्रा० ४ पाद ।

तुमे–त्वया–त्रि० । "भे-दि-दे-ते-तइ-तए-तुमं-तुमइ-तुमए-तुमे-०" ॥ ८ । ३ । ९४ ॥ इत्यादिना टासहितस्य युष्मदस्तुमे इत्यादेशः । प्रा० ३ पाद ।

तुव–त्वत्–त्रि० । " तइ-तुं-ते-तुम्हं-तुह-तुहं-तुव०-" ॥ ८ । ३ । ९९ । इत्यादिना ङसा सहितस्य युष्मदस्तुमे इत्यादेशः । प्रा० ३ पाद ।

तुम्हं–त्वया–त्रि० । "तइ-तुं-ते-तुम्हं०-" ॥ ८ । ३ । ९६ ॥ इत्यादिना टासहितस्य युष्मदस्तुम्हमित्यादेशः । प्रा० ३ पाद ।

तुम्हकेर–युष्मदीय–त्रि० । युष्माकमिदम् । वाच० । " इदमर्थस्य केरः " ॥ ८ । २ । १४७ ॥ इति इदमर्थस्य प्रत्ययस्य केर इत्यादेशः । प्रा० २ पाद । "युष्मद्यर्थपरे तः" ॥ ८ । १ । २४६ ॥ इति युष्मच्छब्दोऽर्थपरे यकारस्य तकारः । प्रा० १ पाद । युष्मत्संबन्धिनि, वाच० ।

तुम्हाण–युष्माकम्–त्रि० । "तु-धो-भे-तुब्भ-तुब्भं-तुब्भाण-तुवाण-तुमाण-तुहाण-तुम्हाण०- ॥ ८ । ३ । १०० ॥ इत्यादिना आमा सहितस्य युष्मदस्तुम्हाण इत्यादेशः । "कस्वाऽस्यादेर्णस्वोर्वा" ॥ ८ । १ । २७ ॥ इति पक्षेऽनुस्वारोऽपि । प्रा० ३ पाद ।

तुम्हारिस–त्वादृश–त्रि० । " युष्मद्यर्थपरे तः " ॥ ८ । १ । २४६ ॥ इति तकारः । " दृशः क्विप् टक्सकः " ॥ ८ । १ । १४२ ॥ इति क्विप् टक्सक् एतदन्तस्य दृशेर्धातोर्ऋतो रिरादेशः । स्वरसदृशे, प्रा० १ पाद ।

तुम्हे–यूयम्–त्रि० । "भे-तुब्भे-तुज्झे०-" ॥ ८ । ३ । ९१ ॥ इत्यादिना जसा सहितस्य युष्मदस्तुम्हे इत्यादेशे "म्भो-म्ह-ज्झो वा" ॥ ८ । ३ । १०४ ॥ इति वचनात् हकारः । प्रा० ३ पाद ।

तुम्हेच्चय–यौष्माक–त्रि० । " युष्मदस्मदोऽञ्ञ एकत्वे " ॥ ८ । २ । १४६ ॥ इति युष्मदः परस्येदमर्थस्याञ्ञ एकत्व इत्यादेशः । प्रा० २ पाद ।

तुयट्टण–त्वग्वर्तन–न० । शयने, नि० चू० १० उ० । तं० । पिं० । व्य० । दश० । उत्त० । स्था० । बृ० । संस्तारकं प्रस्तीर्य शयने, बृ० ३ उ० । निषण्णाऽऽसीने, 'तुयट्टंति' निषण्णा आसते । भ० १३ श० ६ उ० ।

तुयट्टिय–त्वग्वर्तित–त्रि० । वामपार्श्वतः परावृत्य दक्षिणपार्श्वेन, दक्षिणपार्श्वतः परावृत्य वामपार्श्वेन वा अवतिष्ठमाने, रा० ।

तुयट्टियव्व–त्वग्वर्तितव्य–न० । कर्त्तव्ये शयने, भ० २ श० १ उ० ।

तुयावइत्ता–तोदयित्वा–अव्य० । तोदं कृत्वा 'व्ययामुत्पाद्य' या प्रव्रज्या दीयते मुनिचन्द्रपुत्रस्य सागरचन्द्रेणेव सा तथा । प्रव्रज्याभेदे, स्था० ३ ठा० २ उ० ।

तुय्ह–युष्माकम्–त्रि० । " तु-वो-म्ने-तुय्ह-तुम्ह०-" ॥ ८ । ३ । १०० ॥ इत्यादिना आमा सहितस्य युष्मदस्तुय्ह इत्यादेशः । प्रा० ३ पाद ।

तुय्हे–यूयम्–त्रि० । " भे-तुम्भे-तुज्झ-तुम्ह०- " ॥ ८ । ३ । ९१ ॥ इत्यादिना जसा सहितस्य युष्मदस्तुय्हे इत्यादेशः । प्रा०३ पाद ।

तुय्हेहिं–युष्माभिः–त्रि० । " भे-तुम्हेहिं-उज्झेहिं-तुम्हेहिं-तुय्हेहिं०-" ॥ ८ । ३ । ९५ ॥ इत्यादिना भिसा सहितस्य युष्मदस्तुय्हेहिं इत्यादेशः । प्रा० ३ पाद ।

तुरंत–त्वरमाण–त्रि० । " तुरोऽत्यादौ " ॥ ८ । ४ । १७२ ॥ इति अत्यादौ परतस्त्वरशब्दस्य तुर इत्यादेशः । संप्राप्स्यति, प्रा० ४ पाद । शीघ्रे, तं० ।

तुरग–तुरग–पुं० । अश्वे, अनु० । कल्प० । औ० । प्रव० । रा० । तुरगा भाटव्या महाकायाः पशवः परस्परेति पर्यायाः । जं० ११ श० ११ उ० ।

तुरगमुह–तुरगमुख–पुं० । अनार्यदेशविशेषे, प्रव० २७ द्वार । " कैकयकिरीयहयमुह-खरमुह तह तुरगमेंढयमुहा य । " सूत्र० २ श्रु० १ अ० ।

तुरगमेंढग–तुरगमेढक–पुं० । धर्मसंज्ञारहिते अनार्यदेशविशेषे, सूत्र० १ श्रु० ५ अ० १ उ० ।

तुरगारोहणसिक्खा–तुरगारोहणशिक्षा–स्त्री० । तुरगारोहणविषयकशिक्षाभेदे, कल्प० ७ क्षण ।

तुरतुंगव–तुरतुङ्गव–पुं० । त्रीन्द्रियजीवभेदे, प्रज्ञा० १ पद ।

तुरय–तुरग–पुं० । 'तुरग' शब्दार्थे, अनु० ।

तुरा–त्वरा–स्त्री० । वेगे, अभीष्टलाभार्थे विलम्बासहने च । वाच० । " अत्वरा सर्वकार्येषु, त्वरा कार्यविनाशिनी । त्वरमाणेन मूर्खेण, मयूरो बायसीकृतः ॥ १ ॥ " आ० चू० १ अ० ।

तुरिमिणी–तुरिमिणी–स्त्री० । भारतवर्षे स्वनामख्यातायां नगर्याम्, दर्श० ३ तत्त्व । " पुरी तुरिमिणी तत्र, जितशत्रुर्नराधिपः । भद्राङ्गजो द्विजो दत्तः, कालिकाऽऽचार्यजामिजः ॥ १ ॥ " आ० क० । तुरिमिणीनगर्यामुपसर्गकारी तरुणजनो भूपात् हतमथितविप्रारब्धः । बृ० ४ उ० ।

तुरिय–त्वरित–न० । " तुरोऽत्यादौ " ॥ ८ । ४ । ७१ ॥ इति त्वरशब्दस्य 'तुर' इत्यादेशः । प्रा० ४ पाद । शीघ्रे, रा० । आ० म० । प्रश्न० भ० । अनु० । ज्ञा० । त्वरा संजाता अस्य । त्वरायुक्ते, न० ३ श० २ उ० । ज्ञा० । रा० । जी० । औत्सुक्यवत्याम्, कल्प० २ क्षण । आकुले च । वाच० ।

तूर्य–त्रि० । भेरीमृदङ्गपटहकरतालतालाऽऽदिषु, उत्त० २५ अ० । द्वादशप्रकारस्तूर्यसङ्घातः । स चायम्–" भंभामकुंदमद्दल-कडंबझल्लरिहुडुक्कसालूरा । काहलतलिमा वंसो, संखो पणवो य बारसमो ॥ १ ॥ " आ० म० १ अ० १ खण्ड ।

तुरियगइ–त्वरितगति–स्त्री० । मानसौत्सुक्यप्रवर्तितवेगवद्गतौ, भ० ३ श० २ उ० । " तुरियगई खिप्पगई । " विक्रमारेन्द्रयोरमितगत्यमितवाहनयोः पौरस्त्ये लोकपाले, स्था० ४ ठा० १ उ० । भ० ।

तुरियभासि (ण्)–त्वरितभाषिण्–त्रि० । अविवेकभाषिणि, आचा० २ श्रु० १ चू० ४ अ० २ उ० ।

तुरिया–त्रुटिता–स्त्री० । वादुरचिकायाम्, औ० ।

तुरी–देशी–पींने, तूलिकानामुपकरणे, दे० ना० ५ वर्ग २२ गाथा ।

तुरुक्क–तुरुष्क–न० । सिह्लके, ज्ञा० १ श्रु० १ अ० । जी० । आ० म० । भ० ।

तुरुक्कधूव–तुरुष्कधूप–पुं० । सेह्लकलक्षणे धूपे, उत्त० १ अ० ।

तुरुक्ख–तुरुष्क–न० । सिह्लकाभिधाने गन्धद्रव्ये, स०३४समा० । भौ० । प्रज्ञा० । जं० । रा० ।

तुल्ल–तुल्ल–धा० । उन्माने । चुरा०-उभ० । पक्षे-स्वादि०-पर०-सक०-सेट् । वाच० । " तुलेरोहामः " ॥ ८ । ४ । २५ ॥ इति एयन्तस्य तुलेरोहाम इत्यादेशः । 'ओहामइ' । पक्षे-'तुल्लइ' । प्रा० ४ पाद ।

तुल्लग–देशी–काकतालीये, दे० ना० ५ वर्ग १५ गाथा ।

तुल्लणा–तुलना–स्त्री० । परिच्छेदे, " जहा इमेहिं दसहिं अंगेहिं पमत्तेहिं सूरिओ उट्ठेति, तहा तं कालं तुलेति । " नि० चू०२ उ० । पञ्च तुलना जिनकल्पे उक्ताः, 'तवेण इत्यादि' । तुलना, भावना, परिकर्म चैकार्थाः । विशे० । व्य० । नि० चू० । पं० चू० । ध० । स्था० । उत्त० । (द्रव्याऽऽदितुलनया तोलयित्वैव प्रव्राजनीयः शिष्य इति ' पव्वाजणा ' शब्दे वक्ष्यते)

तुलसी–तुलसी–स्त्री० । पत्रिकाविशेषे, प्रव० ४ द्वार । " रूढी आढइ णीली, तुलसी तह माउलिंगा य । " प्रज्ञा० १ पद । स्था० । पञ्चा० । सरसलतायाम्, दे० ना० ५ वर्ग १४ गाथा । गुल्मविशेषे, आचा० १ श्रु० १ अ० ५ उ० ।

तुला–तुला–स्त्री० । औपम्ये, सूत्र० २ श्रु० २ अ० । " एतं तुलमण्णेसि इह संतिगया दविया णावकंखंति । " का पुनरसौ तुला ?, यथाऽऽत्मानं सर्वथा सुखाभिलाषितया रक्षसि, तथा परमपि रक्ष, यथा परं तथाऽऽत्मानमिति । आचा० १ श्रु० १ अ० ७ उ० । तोलनदण्डे, वाच० ।

संप्रति तुलामानमाह–

पणतीस लोहपलिया, वट्टा वावत्तरंऽगुला दीहा ।
पंचपल धरणगस्स य, समायकरणे तुला होइ ॥

सुगालितानां पञ्चत्रिंशत्संख्यानां लोहपलानामत्यर्थं घनैः कुट्टनेन निर्मापिता, वृत्ता सुवृत्ता, विषमोच्चत्वहीना इत्यर्थः । द्वासप्तत्यङ्गुला दीर्घा (पंचपल धरणगस्स य त्ति) ध्रियते येन तद् धरणं, धरणमेव धरणकं, येन धृत्वा तोल्यते तदित्यर्थः । तस्य प्रमाणं पञ्च पलानि कर्षाश्च्यानि । ततः समायकरणे धरणके तुलायां संयोजिते सति यत्र प्रदेशे तुला ध्रियमाणा समा भवति, नैकस्मिन्नपि पक्षे अग्रतः पृष्ठतो वा नता उन्नता वा भवति, तत्र प्रदेशे समायकरणे-समतासमागमपरिज्ञान-

निमित्तरेखाकरणे, तुला परिपूर्णा भवति । तस्यां चैवंभूतायां तुलायां समकरणीरेखामपहाय शेषा रेखाः पञ्चविंशतिर्भवन्ति ।

तथा चाऽऽह-

सव्वग्गेण तुलाए, लेहाओ पंचवीसई होंति ।
चत्तारि य लेहाओ, जाओ नंदीपिणद्धाओ ॥

तुलायां तौल्यपरिमाणसूचिकाः सर्वाग्रेण सर्वसङ्ख्यया, रेखाः पञ्चविंशतिर्भवन्ति । तासां च पञ्चविंशतिसङ्ख्यानां रेखाणां मध्ये या रेखाः नन्दीपिनद्धाः फुल्लिकायुक्ताः, ताश्चतस्रो वेदितव्याः ।

तत्र पञ्चविंशतिमेव रेखाः प्ररूपयति-

समकरणि अद्धकरिसा, तत्तो करिसुत्तरा य चत्तारि ।
तत्तो पलुत्तराओ, जाव य दसगत्ति लेहाओ ॥
बारसिया पन्नरसी, बीसग एत्तो दसुत्तरा अट्ठ ।
एवं सव्वसमासो, लेहाणं पन्नवीसं तु ॥

तुलायां प्रथमा रेखा तावत् समकरणी भवति, यत्र प्रदेशे धरणकसहिता तुला म्रियमाणा समा भवति तत्र प्रदेशे समतापरिज्ञानार्थमेका रेखा भवतीत्यर्थः। सा पञ्चविंशतिसङ्ख्यागणनेन गृह्यते, तस्याः समतापरिज्ञाननिमित्ततया तौल्यवस्तुपरिमाणेऽनुपयोगात् । ततः प्रथमा रेखा अर्द्धकर्षा अर्द्धकर्षरूपपरिमाणसूचिका भवति । ततः कर्षोत्तरा कर्षाऽऽद्येकैककर्षवृद्धिसूचिकाश्चतस्रो रेखा भवन्ति । तद्यथा-द्वितीया कर्षरूपपरिमाणसूचिका, तृतीया द्विकर्षसूचिका, चतुर्थी त्रिकर्षसूचिका, पञ्चमी चतुःकर्षसूचिका, पलसूचिकेत्यर्थः । (तत्तो इत्यादि) ततः पञ्चमरेखात ऊर्द्धं रेखाः पलोत्तराः, एकैकपलवृद्धिसूचिकास्तावद्वक्तव्या यावद्दशकमिति दशपलसूचिका रेखा । तद्यथा-षष्ठी रेखा द्विपलसूचिका, सप्तमी त्रिपलसूचिका, अष्टमी चतुःपलसूचिका, नवमी पञ्चपलसूचिका, एकादशी षट्पलसूचिका, द्वादशी सप्तपलसूचिका, त्रयोदशी अष्टपलसूचिका, चतुर्दशी नवपलसूचिका, पञ्चदशी दशपलसूचिका । (बारसेत्यादि) ततः षोडशी रेखा द्वादशपलसूचिका, सप्तदशी त्रयोदशपलसूचिका, अष्टादशी चतुर्दशपलसूचिका, एकोनविंशतितमा पञ्चदशपलसूचिका, विंशतितमा षोडशपलसूचिका, एकविंशतितमा सप्तदशपलसूचिका, द्वाविंशतितमा अष्टादशपलसूचिका, त्रयोविंशतितमा एकोनविंशतिपलसूचिका, चतुर्विंशतितमा विंशतिपलसूचिका, पञ्चविंशतितमा एकविंशतिपलसूचिका । (एत्तो दसुत्तरा अट्ठ त्ति) अत ऊर्द्धमष्टौ रेखा दशोत्तराः, दशकवृद्ध्या पलपरिमाणसूचिकाः । तद्यथा-अष्टादशी रेखा त्रिंशत्पलसूचिका, एकोनविंशतितमा चत्वारिंशत्पलसूचिका, विंशतितमा पञ्चाशत्पलसूचिका, एकविंशतितमा षष्टिपलसूचिका, द्वाविंशतितमा सप्ततिपलसूचिका, त्रयोविंशतितमा अशीतिपलसूचिका, चतुर्विंशतितमा नवतिपलसूचिका, पञ्चविंशतितमा पलशतसूचिका, शतिके काण्डे पञ्चविंशतितमा रेखा भवतीत्यर्थः । एवमुक्तेन प्रकारेण रेखाणां सर्वसमासः सर्वसंक्षेपः, सर्वसंख्येत्यर्थः । पञ्चविंशतिरिति ।

यदुक्तम्-पञ्चविंशतिरेखाणां मध्ये चतस्रो रेखा नन्दीपिनद्धिका इति, तदुव्याचिख्यासुराह-

पंचसु य पन्नरसगे, तीसग पन्नासगे य लेहाओ ।
नंदीपिणद्धिकाओ, मेसाओ सज्जुलेहाओ ॥

पञ्चसु पञ्चदशसु त्रिंशति पञ्चाशति च या रेखास्ता नन्दीपिनद्धिकाः । किमुक्तं भवति ?-पञ्चपलपरिमाणसूचिका, पञ्चदशपलपरिमाणसूचिका, त्रिंशत्पलपरिमाणसूचिका, पञ्चाशत्पलपरिमाणसूचिका, एताश्चतस्रो रेखाः फुल्लिकायुक्ताः, शेषा एकविंशतिसङ्ख्या ऋजवः । तदेवमुक्तं तुलास्वरूपम् । ज्यो० १ पाहु० । गृहाणां दारुबन्धकाष्ठे, पलशते नाप्ते, मेषावधितः सप्तमे राशौ, वाच० ।

तुलासम-तुलासम-पुं० । अरक्तद्विष्टे, यथा तुला समस्थिता न चाग्रतो न वा पुरतो नमति, सा इवाऽयं रागद्वेषविमुक्तो मानापमानसुखदुःखाऽऽदिषु समः । बृ० ६ उ० । नि० चू० ।

तुलिय-तुलित-त्रि० । गुणिते, तं० । उत्त० ।

तुलेऊण-तोलयित्वा-अव्य० । सम्यङ् निश्चित्येत्यर्थे, बृ० १ उ० ।

तुल्ल-तुल्य-न० । सदृशे, औ० । समाने, विशे० । एककाले, नं० । प्रज्ञा० ।

तुल्लचरित्त-तुल्यचारित्र-त्रि० । समानसामायिकाऽऽदिसंयमे, बृ० ६ उ० ।

तुल्लट्ठिय-तुल्यस्थित-त्रि० । परस्परापेक्षया समानाऽऽयुष्के, भ० ३४ श० १ उ० ।

तुल्लय-तुल्यक-त्रि० । तुल्यमेव तुल्यकम् । समे, प्र० १० श० ७ उ० ।

अथ तुल्यताऽभिधानार्थमाह-

रायगिहे० जाव परिसा पडिगया, गोयमाऽऽदि ! समणे भगवं महावीरे भगवं गोयमं आमंतेत्ता एवं वयासी-चिरसंसिट्ठो सि मे गोयमा !, चिरसंथुतो सि मे गोयमा !, चिरपरिचितो सि मे गोयमा !, चिरजुसिओ सि मे गोयमा !, चिराणुगओ सि मे गोयमा !, चिराणुवत्तो सि मे गोयमा !, अणंतरं देवलोए, अणंतरं माणुस्सए भवे, किं परं मरणा कायस्स भेदा इतो चुता दो वि तुल्ला एगट्ठा अविसेसमणाणत्ता भविस्सामो । जहा णं भंते ! एयमट्ठं वयं जाणामो पासामो तहा णं अणुत्तरोववाइया देवा एयमट्ठं जाणंति पासंति ? । हंता ! गोयमा ! जहा णं वयं एयमट्ठं जाणामो पासामो तहा णं अणुत्तरोववाइया देवा एयमट्ठं जाणंति पासंति । से केणट्ठेणं० जाव पासंति ? । गोयमा ! अणुत्तरोववाइया णं अणंता मणोदव्ववग्गणाओ लद्धाओ पत्ताओ अभिसमण्णागयाओ भवंति, से तेणट्ठेणं गोयमा ! एवं वुच्चइ० जाव पासंति । कइविहे णं भंते ! तुल्लए पण्णत्ते ?। गोयमा ! दुविहे तुल्लए पण्णत्ते । तं जहा-दव्वतुल्लए, खेत्ततुल्लए, कालतुल्लए, भवतुल्लए, भावतुल्लए, संठाणतुल्लए । से केणट्ठेणं भंते ! एवं वुच्चइ-दव्वतुल्लए, दव्वतुल्लए ?। गोयमा ! परमाणुपोग्गले परमाणुपोग्गलस्स दव्वओ तुल्ले, परमाणुपोग्गले परमाणुपोग्गलवइरित्तस्स दव्वओ णो तुल्ले । दुपदेसिए खंधे दुपदेसियस्स खंधस्स दव्वओ तुल्ले, दुपदेसिए खंधे दुपदेसियवइरित्तस्स खंधस्स दव्वओ णो तुल्ले । एवं० जाव दसपएसिए । तुल्लसंखेज्जपएसिए खंधे संखेज्जपएसियस्स खंधस्स

दव्वओ तुल्ले । संखेज्जपएसिए खंधे संखेज्जपएसियवइरित्तस्स खंधस्स दव्वओ णो तुल्ले । एवं तुल्लअसंखेज्जपएसिए वि; एवं तुल्लअणंतपएसिए वि; से तेणट्ठेणं गोयमा ! एवं वुच्चइ-दव्वतुल्लए दव्वतुल्लए । से केणट्ठेणं भंते ! एवं वुच्चइ-खेत्ततुल्लए खेत्ततुल्लए ?। गोयमा ! एगपएसोगाढे पोग्गले एगपएसोगाढस्स पोग्गलस्स खेत्तओ तुल्ले, एगपएसोगाढे पोग्गले एगपएसोगाढवइरित्तस्स पोग्गलस्स खेत्तओ णो तुल्ले । एवं०जाव दसपएसोगाढे; तुल्लसंखेज्जपएसोगाढे वि; एवं तुल्लअसंखेज्जपएसोगाढे वि; से तेणट्ठेणं०जाव खेत्ततुल्लए । से केणट्ठेणं भंते ! एवं वुच्चइ-कालतुल्लए कालतुल्लए ?। गोयमा ! एगसमयट्ठिईए पोग्गले एगसमयस्स ठिइयस्स पोग्गलस्स कालओ तुल्ले, एगसमयट्ठिईए पोग्गले एगसमयट्ठिइयवइरित्तस्स कालओ णो तुल्ले । एवं०जाव दससमयट्ठिईए; तुल्लसंखेज्जसमयट्ठिईए एवं चेव; तुल्लअसंखेज्जसमयट्ठिईए वि एवं चेव, से तेणट्ठेणं०जाव कालतुल्लए । से केणट्ठेणं भंते ! एवं वुच्चइ-भवतुल्ले भवतुल्ले ?। गोयमा ! णेरइए णेरइयस्स भवट्ठयाए तुल्ले, णेरइए णेरइयवइरित्तस्स भवट्ठयाए णो तुल्ले; तिरिक्खजोणिए एवं चेव; एवं मणुस्से वि; एवं देवे वि; से तेणट्ठेणं० जाव भवतुल्ले भवतुल्ले । से केणट्ठेणं भंते ! एवं वुच्चइ-भावतुल्ले भावतुल्ले ?। गोयमा ! एगगुणकालए पोग्गले एगगुणकालयस्स भावतुल्ले, एगगुणकालए पोग्गले एगगुणकालवइरित्तस्स पोग्गलस्स भावओ णो तुल्ले, एवं ०जाव दसगुणकालए तुल्लसंखेज्जगुणकालपोग्गले तुल्लअसंखेज्जगुणकालए वि, एवं तुल्लअणंतगुणकालए वि, जहा कालए एवं नीलए लोहियए हालिद्दए सुक्किल्लए; एवं सुब्भिगंधे, एवं दुब्भिगंधे, एवं तित्ते०जाव महुरे; एवं कक्खडे० जाव लुक्खे, लदइए जावे उदइयस्स भावस्स भावओ तुल्ले, उदइयभाववइरित्तस्स भावओ णो तुल्ले, एवं उवसमिए वि । खइए खओवसमिए परिणामिए सन्निवाइए भावे सन्निवाइयस्स भावस्स, से तेणट्ठेणं गोयमा ! एवं वुच्चइ-भावतुल्लए भावतुल्लए । से केणट्ठेणं भंते ! एवं वुच्चइ-संठाणतुल्लए संठाणतुल्लए ? । गोयमा ! परिमंडलसंठाणे परिमंडलस्स संठाणस्स संठाणओ तुल्ले, परिमंडलसंठाणे परिमंडलस्स संठाणवइरित्तस्स संठाणस्स संठाणओ णो तुल्ले । एवं वट्टे तंसे चउरंसे आयए, समचउरंससंठाणे समचउरंसस्स संठाणस्स संठाणओ तुल्ले, समचउरंससंठाणे समचउरंसस्स संठाणवइरित्तस्स संठाणओ णो तुल्ले; एवं परिमंडले वि; एवं०जाव हुंडे । से तेणट्ठेणं० जाव संठाणतुल्लए संठाणतुल्लए ।

(रायगिहे इत्यादि) तत्र किल भगवान् श्रीमन्महावीरः केवलज्ञानाप्त्या सखेदस्य गौतमस्वामिनः समाश्वासनायाऽस्मनस्तस्य च भाविनीं तुष्यतां प्रतिपादयितुमाह-(गोयमेत्यादि) (चिरसंसिट्ठो सि त्ति) चिरं बहुकालं यावत्, चिरेवाऽतीते प्रभूते काले संश्लिष्टः स्नेहात्सम्बन्धेनसंश्लिष्टोऽसि भवसि, मे मया मम वा त्वं हे गौतम ! (चिरसंथुतो सि) चिरं बहुकालमतीतं यावत्संस्तुतः स्नेहात्प्रशंसितश्चिरसंस्तुतः । (एवं चिरपरिचिए त्ति) पुनः पुनर्दर्शनतः परिचितश्चिरपरिचितः (चिरजुसिए त्ति) चिरसेवितश्चिरप्रीतो वा । 'जुषी' प्रीतिसेवनयोरिति वचनात् । (चिराणुगओ त्ति) चिरमनुगतो, ममानुगतिकारित्वात् । (चिराणुवत्ती सि त्ति) चिरमनुवृत्तिश्चिरमनुकूलवर्तिता यस्यासौ चिरानुवृत्तिः । इदं च चिरसंश्लिष्टत्वाऽऽदिकं काऽऽसीदित्याह-(अणंतरं देवलोए त्ति) अनन्तरं निर्व्यवधानं यथा भवत्येवं देवलोके, अनन्तरे देवभवे इत्यर्थः । ततोऽपि अनन्तरं मनुष्यजन्मनि, जात्यर्षत्वादेकवचनस्य देवभवेषु मनुष्यभवेषु चेति द्रष्टव्यम । तत्र किल त्रिपृष्ठजन्मनि भगवतो गौतमः सारथित्वेन चिरसंश्लिष्टत्वाऽऽदिधर्मयुक्त आसीत् । एवमन्येष्वपि भवेषु संभवतीति । एवं च मयि तव गाढत्वेन स्नेहस्य न केवलज्ञानमुत्पद्यते, भविष्यति च तवाऽपि स्नेहक्षये तदित्यधृतिं मा कृथा इति गम्यमिति । (किं परं मरण त्ति) किं बहुना (परं त्ति) परतो मरणान्मृत्योः ? । किमुक्तं भवति ?-कायस्य नेदाद्धेतोः (इओ चुय त्ति) इतः प्रत्यक्षाद् मनुष्यभवात् च्युतौ (दो वि त्ति) द्वावप्यावां तुल्यौ, भविष्याव इति योगः । तत्र तुल्यौ समानजीवद्रव्यौ, (एगट्ठ त्ति) एकार्थावेकप्रयोजनौ अनन्तसुखप्रयोजनत्वात् । एकस्थौ वा एकक्षेत्राऽऽश्रितौ सिद्धिक्षेत्रापेक्षयेति । (अविसेसमणाणत्त त्ति) अविशेषं निर्विशेषं यथा भवत्येवमनानात्वौ तुल्यज्ञानदर्शनाऽऽदिपर्यायाविति । इदं च किल भगवता गौतमेन चैत्यवन्दनायाष्टापदं गत्वा प्रत्यागच्छता पञ्चदश तापसशतानि प्रव्राजितानि समुत्पन्नकेवलानि च श्रीमन्महावीरसमवसरणमागीतानि तीर्थप्रणामकरणसमनन्तरं च केवलिपर्षदं समुपविष्टानि गौतमेन चाविदिततत्केवलोत्पादव्यतिकरेणाभिहितानि-यथा आगच्छत भोः साधवः ! जगवन्तं वन्दध्वमिति । जिननाथेन च गौतमोऽभिहितः-यथा गौतम ! मा केवलिनामाशातनां कार्षीः । ततो गौतमो मिथ्यादुष्कृतमदात् । तथा यानहं प्रव्राजयामि तेषां केवलमुत्पद्यते, न पुनमैम, ततः किं तन्मे नोत्पत्स्यत एवेति विकल्पाद्धृतिं चकार । ततो जगद्गुरुणा गदितोऽसौ मनःसमाधानाय । यथा-गौतम ! चत्वारः कटा भवन्ति-सुम्बकटो, विदलकटः, चर्मकटः, कम्बलकटश्चेति । एवं शिष्या अपि गुरौ प्रतिबन्धसाधर्म्येण सुम्बकटसमाऽऽद्यश्चत्वार एव भवन्ति । ('अज्जवइर' शब्दे प्रथमभागे २१६ पृष्ठे प्रसङ्गादुक्तैषा कथा) तत्र त्वं मयि कम्बलकटसमान इत्येतस्यार्थस्य समर्थनाय जगवता तदाऽभिहितमिति । एवं भाविन्यामात्मतुल्यतायां भगवताऽभिहितायामतिप्रियमश्रद्धेयमिति कृत्वा यद्यन्योऽप्येनमर्थं जानाति तदा साधु भवतीत्यनेनाभिप्रायेण गौतम एवाऽऽह-(जहा णं इत्यादि) (एयमट्ठं ति) एतमर्थमावयोर्भावितुल्यतालक्षणम । (वयं जाणामो त्ति) यूयं च वयं चेत्येकशेषाद् वयम । तत्र यूयं केवलज्ञानेन जानीथ, वयं तु जवदुपदेशात् । तथाऽनुत्तरोपपातिका अपि देवा एनमर्थं जानन्तीति प्रश्नः ? । अत्रोत्तरम्-(हंता ! गोयमा ! इत्यादि) (मणोदव्ववग्गणाओ लद्धाओ त्ति) मनोद्रव्यवर्गणा लब्धास्तद्विषयावधिज्ञानल-

धिमात्रापेक्षया (पत्ताओ त्ति) प्राप्तास्तद्द्रव्यपरिच्छेदतः । (अणिसमणागयाओ त्ति) अनिसमन्वागतास्तद्गुणपर्यायपरिच्छेदतः । अयमत्र गर्भार्थः-अनुत्तरोपपातिकदेवा विशिष्टावधिना मनोद्रव्यवर्गणा जानन्ति, पश्यन्ति च; तासां चावयोरयोग्यवस्थायामदर्शनेन निर्वाणगमनं निश्चिन्वन्ति । ततश्चाऽऽवयोर्नाविंतुल्यतालक्षणमर्थं जानन्ति पश्यन्ति चेति व्यपदिश्यत इति । तुल्यताप्रकर्षादेवेदमाह-(कइविहेत्यादि) तुल्यं समं,तदेव तुल्यकम् । (दव्वतुल्लए त्ति) द्रव्यत एकाणुकाऽऽद्यपेक्षया तुल्यकं द्रव्यतुल्यकम् । अथवा-द्रव्यं च तत्तुल्यकं च द्रव्यान्तरेणेति द्रव्यतुल्यकं,विशेषणव्यत्ययात् । (खेत्ततुल्लए त्ति) क्षेत्रत एकप्रदेशावगाढत्वाऽऽदिना तुल्यकं क्षेत्रतुल्यकम् । एवं शेषाण्यपि,नवरं भवो नारकाऽऽदिः,भावो वर्णाऽऽदिः,औदयिकाऽऽदिर्वा,संस्थानं परिमण्डलाऽऽदि । इह च तुल्यव्यतिरिक्तमतुल्यं भवतीति तदपीह व्याख्यास्यते । (तुल्लसंखेज्जपएसिए त्ति) तुल्याः समानाः संख्येयाः प्रदेशा यत्र स तथा, तुल्यग्रहणमिह सङ्ख्यातत्वस्य संख्यातनेदत्वाच्च सङ्ख्यातमात्रेण तुल्यताऽस्य स्यात्,अपि तु समानसंख्यत्वेनेत्यस्यार्थस्य प्रतिपादनार्थम् । एवमन्यत्रापीति । यच्चेह-अनन्तक्षेत्रप्रदेशावगाढत्वमनन्तसमयस्थायित्वं च नोक्तं, तदवगाढप्रदेशानां स्थितिसमयानां च पुद्गलानाश्रित्याऽनन्तानामभावादिति । (भवट्ठयाए त्ति) भव एवार्थो भवार्थः, तद्भावस्तत्ता, तया भवार्थतया । (उदइए भावे त्ति) उदयः कर्मणां विपाकः,स एवौदयिकः क्रियामात्रम् । अथवा-उदयेन निष्पन्न औदयिको भावो नारकत्वाऽऽदिपर्यायविशेषः, औदयिकस्य भावस्य नारकत्वाऽऽदेर्भावतो भावसामान्यमाश्रित्य तुल्यः समः । (एवं उवसमिए त्ति) औपशमिकोऽप्येवं वाच्यः । तथाहि-" उवसमिए भावे उवसमियस्स भावस्स भावओ तुल्ले, उवसमिए भावे उवसमियवइरित्तस्स भावस्स भावओ नो तुल्ले त्ति।" एवं शेषेष्वपि वाच्यम् । तत्र उपशम उदीर्णस्य कर्मणः, क्षयोऽनुदीर्णस्य विष्कम्भितोदयत्वं, स एव औपशमिकः क्रियामात्रम् । उपशमेन वा निर्वृत्त औपशमिकः सम्यग्दर्शनाऽऽदिः । (खइए त्ति) क्षयः कर्मणामात्मनः,स एव क्षायिकः, क्षयेण वा निर्वृत्तः क्षायिकः केवलज्ञानाऽऽदिः । (खओवसमिए त्ति) क्षयेणोदयप्राप्तकर्मणो विनाशेन सहोपशमो विष्कम्भितोदयत्वं क्षयोपशमः, स एव क्षायोपशमिकः क्रियामात्रमेव । क्षयोपशमेन वा निर्वृत्तः क्षायोपशमिको मतिज्ञानाऽऽदिः पर्यायविशेषः । नन्वौपशमिकस्य क्षायोपशमिकस्य च कः प्रतिविशेषः, उभयत्रापि उदीर्णस्य क्षयस्यानुदीर्णस्य चोपशमनाद्वात् ?, उच्यते-क्षायोपशमिके विपाकवेदनमेव नास्ति, प्रदेशवेदकं पुनरस्त्येव, औपशमिके तु प्रदेशवेदनमपि नाऽस्तीति । (परिणामिए त्ति) परिणमनं परिणामः, स एव पारिणामिकः । (सन्निवाइए त्ति) सन्निपात औदयिकाऽऽदिभावानां द्विकादिसंयोगः,तेन निर्वृत्तः सान्निपातिकः । (संठाणतुल्लए त्ति) संस्थानमाकृतिविशेषः । तच्च द्वेधा, जीवाजीवभेदात् । तत्र अजीवसंस्थानं पञ्चधा । तत्र (परिमंडलसंठाणे त्ति) परिमण्डलं संस्थानं बहिर्वृत्तादुत्ताऽऽकारं मध्ये शुषिरं यथा वलयस्य । तच्च द्वेधा, घनप्रतरभेदात् । (वट्टे त्ति) वृत्तं परिमण्डलमेवान्तःशुषिररहितं यथा कुलालचक्रस्य । इदमपि द्वेधा, घनप्रतरभेदात् । पुनरेकैकं द्विधा, समसङ्ख्यविषमसङ्ख्यप्रदेशभेदात् । एवं त्र्यस्रं चतुरस्रं च, नवरं त्र्यस्रं त्रिकोणं शृङ्गाटकस्येव, चतुरस्रं तु चतुष्कोणं, यथा कुम्भिकायाः, आयतं दीर्घं यथा दण्डस्य । तच्च द्वेधा,श्रेण्यायतप्रतराऽऽयतघनाऽऽयतभेदात् । पुनरेकैकं द्विधा,समसङ्ख्यप्रदेशासमसङ्ख्यप्रदेशभेदात् । इदञ्च पञ्चविधमपि विस्रसाप्रयोगाभ्यां भवति । जीवसंस्थानं तु संस्थानाभिधाननामकर्मोत्तरप्रकृत्युदयसम्पाद्यो जीवानामाकारः, तच्च षोढा । तत्राऽऽद्यम्-(समचउरंसे त्ति) तुल्याऽऽरोहपरिणाहं सम्पूर्णावयवस्वाङ्गुलाष्टशतोच्छ्रयं समचतुरस्रं, तुल्याऽऽरोहपरिणाहत्वेन समत्वात्पूर्णावयवत्वेन च चतुरस्रत्वास्यस्य चतुरस्रत्वं सङ्गतमिति पर्यायौ । (एवं परिमंडले वि त्ति) यथा समचतुरस्रमुक्तं तथा न्यग्रोधपरिमण्डलमपीत्यर्थः । न्यग्रोधो वटवृक्षस्तत्परिमण्डलं नाभीत उपरि चतुरस्रलक्षणयुक्तमधश्च तदनुरूपं न भवति तस्मात्प्रमाणाद्धीनतरमिति । (एवं०जाव हुंडे त्ति) इह यावत्करणात्-" साइखुज्जे वामणे त्ति" दृश्यम् । तत्र (साइ त्ति) सादीनोऽभिलोऽधश्चतुरस्रलक्षणयुक्तमुपरि च तदनुरूपं न भवति । (खुज्ज त्ति) कुब्जं ग्रीवाऽऽदौ हस्तपादवोश्चतुरस्रलक्षणयुक्तं संक्षिप्तविकृतमध्यम् । (वामणे त्ति) वामनं लक्षणयुक्तमध्यं ग्रीवाऽऽदौ हस्तपादवोरप्यादिलक्षणन्यूनम् । (हुंडे त्ति) हुण्डं प्रायः सर्वावयवेषु आदिलक्षणविसंवादोपेतमिति । भ० १४ श० ७ उ० ।

चत्तारि पएसग्गेणं तुल्ला पण्णत्ता । तं जहा-धम्मत्थिकाए, अधम्मत्थिकाए, लोगागासे, एगजीवे ।

' चत्तारि ' इत्यादि कण्ठ्यम्, नवरं प्रदेशाग्रेण प्रदेशप्रमाणेनेति तुल्याः समानाः, सर्वेषामेषामसंख्यातप्रदेशत्वात् । (लोगागासे त्ति) आकाशस्यानन्तप्रदेशत्वेन धर्मास्तिकायाऽऽदिभिः सहातुल्यताप्रसक्तेर्लोकग्रहणम् । (एगजीव त्ति) सर्वजीवानामनन्तप्रदेशत्वाद् विवक्षितैतुल्यताभावप्रसङ्गादेकग्रहणमिति । स्था० ४ ठा० ३ उ० ।

तुव-तव-त्रि० "तइ-तु-ते-तुम्हं-तुह-तुहं-तुव०-"॥८। ३। ९१॥ इत्यादिना ङसा सहितस्य युष्मदस्तुव इत्यादेशः । प्रा०३ पाद ।

तुवं-त्वाम्-त्रि० "तं-तुं-तुमं-तुवं०" ॥८। ३। ९२॥ इत्यादिना अमा सहितस्य युष्मदस्तुवं इत्यादेशः । प्रा० ३ पाद ।

तुवतो-त्वत्तः-त्रि० "तइ-तुव०-"॥ ८ । ३ । ९६ ॥ इत्यादिना ङसेः परतो युष्मदस्तुव इत्यादेशः । प्रा० ३ पाद ।

तुवर-त्वर-धा० । वेगे, स्वादि०-आत्म०-अक०-सेट् । " त्वरस्तुवरञ्जवौ" ॥ ८ । ४ । १७० ॥ इति त्वरधातोः 'तुवर' इत्यादेशः । प्रा० ४ पाद । कुसुम्भोदकाऽऽदिके, वृ० ३ उ० । वृक्षविशेषे, औ० । नि० चू० । श्रीमल्लिजिनस्य यक्षे, स च चतुर्मुख इक्षायुधवर्णो गजवाहनोऽष्टभुजो वरदपरशुशूलाभययुक्तदक्षिणपाणिचतुष्टयो,बीजपूरकशक्तिमुद्गराक्षसूत्रयुतवामपाणिचतुष्टयश्च । प्रव० २६ द्वार ।

तुवरपत्त-तुवरपत्र-न० । पलाशपत्राऽऽदिषु, नि० चू० १ उ० ।

तुवरफल-तुवरफल-न० । हरीतक्यादिषु, नि० चू० १ उ० ।

तुवाण-युष्माकम्-त्रि० । " तु-वो-ने-तुम्ह-तुम्हं-तुम्हाण-तुवाण०-" ॥ ८ । ३ । १०० ॥ इत्यादिना आमा सहितस्य युष्मदः 'तुवाण' इत्यादेशः । प्रा० ३ पाद ।

तुस–तुष–पुं० । कोद्रवाऽऽदिषु, स्था० ८ ठा० । आचा० । धान्यत्वचि, वाच० ।

तुसमुट्ठ–तुषमुष्ट–न० । बीजस्य तुषमुष्टकणिकायाम्, स्था० ८ ठा० ।

तुसागणि–तुषाग्नि–पुं० । तुषाः कोद्रवाऽऽदयस्तेषामग्निस्तद्दहनप्रवृत्तो वह्निस्तुषाग्निः । कोद्रवाऽऽदिदहनप्रवृत्ते वह्नौ, स्था० ८ ठा० । जी० ।

तुसार–तुषार–पुं० । हिमे, ज्ञा० १ श्रु० १ अ० । औ० ।

तुसिणीय–तूष्णीक–त्रि० । मौनिनि, उत्त० २ अ० । वचनरहिते, ज्ञा० १ श्रु० २ अ० । वाचंयमे, उपेक्षके, स्था० ३ ठा० ३ उ० । तूष्णीं शीले, उत्त० १ अ० । आचा० ।

तुसिय–तुषित–पुं० । षष्ठकृष्णराजिमध्यवर्तिसुरानन्दनामलोकान्तिकविमानदेवे, भ० ६ श० ५ उ० । स्था० । ज्ञा० । स० । असौ संज्ञाऽन्तरतो मारुतोऽप्यभिधीयते । प्रव० २६७ द्वारा आ० म० ।

तुसेअंजन–देशी–दारुणि, दे० ना० ५ वर्ग १६ गाथा ।

तुसोदग–तुषोदक–न० । व्रीह्यादिधावनजले, कल्प० ७ क्षण । ग० । स्था० ।

तुह–तव–त्रि० । " तइ–तु–ते–तुम्हं–तुह०–" ॥ ८ । ३ । ९९ ॥ इत्यादिना ङसा सहितस्य युष्मदस्तुह इत्यादेशः । प्रा० ३ पाद ।

त्वाम्–त्रि० । "तं–तु–तुमं–तुवं–तुह०–" ॥ ८ । ३ । ९२ ॥ इत्यादिना अमा सहितस्य युष्मदस्तुह इत्यादेशः । प्रा० ३ पाद ।

तुहं–तव–त्रि० । "तइ–तु–ते–तुम्हं–तुह–तुहं०–" ॥ ८ । ३ । ९९ ॥ इत्यादिना ङसा सहितस्य युष्मदः 'तुहं' इत्यादेशः । प्रा० ३ पाद ।

तुहग–तुहक–पुं० । कन्दवनस्पतिविशेषे, उत्त० १ अ० ।

तुहतो–त्वत्तः–त्रि० । "तइ–तुव–तुम–तुह–तुम्भा ङसौ" ॥ ८ । ३ । ९६ ॥ इति पञ्चम्येकवचने परतो युष्मदस्तुह इत्यादेशः । ङसेस्तु 'तो' इत्यादेशः । प्रा० ३ पाद ।

तुहाण–युष्माकम्–त्रि० । "तु–वो–भे–तुम्ह–तुम्ह–तुम्हाण–तुवाण–तुमाण–तुहाण०" ॥ ८ । ३ । १०० ॥ इत्यादिना आमा सहितस्य युष्मदस्तुहाण इत्यादेशः । प्रा० ३ पाद ।

तुहार–युष्मदीय–त्रि० । " युष्मदादेरीयस्य डारः " ॥ ८ । ४ । ४३४ ॥ इत्यपभ्रंशे युष्मदादिभ्यः परस्य ईयप्रत्ययस्य डार इत्यादेशः । प्रा० ४ पाद ।

तुहिणाचल–तुहिनाचल–पुं० । हिमालयपर्वते, " बभार शिरसा स्वर्गं–वाहिनीं तुहिनाचलः ।" आ० क० ।

तृअ–देशी–इक्षुकर्मकरे, दे० ना० ५ वर्ग १६ गाथा ।

तूणइल्ल–तूणावत्–त्रि० । तूणानिधानवाद्यवति, जी० ३ प्रति० ४ उ० । कल्प० । औ० । रा० । प्रश्न० । अनु० । ज्ञा० ।

तूणा–तूणा–स्त्री० । शराऽऽश्रये, जं० ३ वक्ष० । तूणानिधानवाद्यविशेषे, औ० । रा० । अनु० । ज्ञा० ।

तूर–त्वर–धा० । वेगे, त्वादि०–अक०–आत्म०–सेट् । " त्यादिशत्रोस्तूरः " ॥ ८ । ४ । १७१ ॥ इति त्वरधातोस्त्यादिशतृप्रत्यये परतस्तूर इत्यादेशः । 'तूरइ ।' त्वरते । प्रा० ४ पाद ।

तूर्य–न० । "ब्रह्मचर्य–तूर्य–सौन्दर्य–शौण्डीर्ये र्यो रः" ॥ ८ । २ । ६३ ॥ इति र्यस्य रः । प्रा० २ पाद । वादित्रभेदे, उत्त० २ अ० । ज्ञा० ।

तूरंत–त्वरमाण–त्रि० । प्राकृतत्वाच्च शतृप्रत्ययः । " त्यादिशत्रोस्तूरः " ॥ ८ । ४ । १७१ । इति त्वरधातोः शतृप्रत्यये परतस्तूर इत्यादेशः । संत्वराम्यति, प्रा० ४ पाद ।

तूरवइ–तूर्यपति–पुं० । नटमहत्तरे, बृ० १ उ० ।

तूरसद्द–तूर्यशब्द–पुं० । तूर्यशब्देनाभिधीयते संनिनादे, विशे० ।

तूल–तूल–न० । अर्कतूले, सू० प्र० २० पाहु० । आचा० । भ० । आ० म० । कल्प० ।

तूलकम–तूलकृत–त्रि० । अर्काऽऽदितूलनिष्पन्ने, आचा० २ श्रु० १ चू० ५ अ० १ उ० ।

तूलिणी–देशी–शाल्मल्याम्, दे० ना० ५ वर्ग १७ गाथा ।

तूलिया–तूलिका–स्त्री० । संस्कृतरुताऽऽदिभूते शयनोपकरणे, ग० ३ अधि० । बालमरण्यां, चित्रलेखनकूर्चिकायां च । ज्ञा० १ श्रु० ८ अ० ।

तूली–तूली–स्त्री० । अप्रतिलेख्यदूष्यविशेषे, जीत० । जं० । संस्कृतरुताऽऽदिभूते अर्कतूलाऽऽदिभूते वा शयनोपकरणे, बृ० ३ उ० ।

तूवर–तूवर–पुं० । कषाये, रा० । काले अजातशृङ्गे गवि, अजातश्मश्रुके पुरुषे, कषायरसवति, त्रि० । आढक्यां, सौराष्ट्रमृत्तिकायां च । स्त्री० । ङीप् । वाच० ।

तूस–तूष–धा० । तोषे, दिवा०–पर०–अक०–अनिट् । " रुषाऽऽदीनां दीर्घः " ॥ ८ । ४ । २३६ ॥ इति दीर्घः । 'तूसइ ।' तुष्यति । प्रा० ४ पाद ।

तूह–तीर्थ–न० । "ऊःखदक्षिणतीर्थे वा" ॥ ८ । २ । ७२ ॥ इति संयुक्तस्य तीर्थशब्दस्य र्थस्य हः । प्रा० ४ पाद । " तीर्थे हे " ॥ ८ । १ । १०४ ॥ इति तीर्थशब्दे हे सति ईत ऊत्वम् । प्रा० ४ पाद । शास्त्रे, यज्ञे, क्षेत्रे, उपाये, स्त्रीरजसि, नद्यादेरवतरणे, घट्टाऽऽदौ, विद्याऽऽदिगुणयुतपात्रे, उपाध्याये, मन्त्रिणि, योनौ, दर्शने, ब्राह्मणे, आगमे, निदाने, अग्नौ, उपकूपजलाऽऽशये, दैहिके मानसिके भौमिके त्रिविधे पवित्रस्थाने, वाच० ।

तूहण–देशी–पुरुषे, दे० ना० ५ वर्ग १७ गाथा ।

तृणु–तनु–स्त्री० । " स्वराणां स्वराः प्रायोऽपभ्रंशे " ॥ ८ । ४ । ३२९ ॥ इत्यपभ्रंशे स्वरस्थाने स्वरः । तणु । तिणु । तृणु । प्रा० ४ पाद । देहे, अल्पे, विरले, कृशे च । त्रि० । वाच० ।

ते–त्वया–त्रि० । " मे–दि–दे–ते०– " ॥ ८ । ३ । ९४ ॥ इत्यादिना टासहितस्य युष्मदस्ते इत्यादेशः प्रा० ३ पाद ।

तव–त्रि० । "तइ–तु–ते०–" ॥ ८ । ३ । ९९ ॥ इत्यादिना ङसा सहितस्य युष्मदस्ते इत्यादेशः । प्रा० ३ पाद । दश० ।

तस्मिन्–पुं० । प्राकृतशैलीवशात्तस्मिन्नित्यस्य स्थाने 'ते' इत्यादेशः । " ते णं काले णं ते णं समए णं " । रा० जं० । कल्प० । ('काल' शब्दे व्याख्यातम्) तच्छब्दस्य प्रथमाबहुवचने इति । प्रश्न० १ आश्र० द्वार ।

तेअव–प्रदीप–धा० । प्रकर्षेण दीप्तौ, दिवा०–आत्म०–अक०–सेट् । " प्रदीपेस्तेअव–संदुम– सन्धुक्काब्भुत्ताः " ॥ ८ । ४ । १५२ ॥ इति प्रोपसर्गसहितस्य दीपधातोः 'तेअव' इत्यादिशः । 'तेअवइ' पक्षे–'पलीवइ ।' प्रदीप्यते । प्रा० ४ पाद ।

तेआ–तेजस्–स्त्री० । त्रयोदश्याम्, जं० ७ वक्ष० ।

तेइंदिय–त्रीन्द्रिय–पुं० । त्रीणि स्पर्शनरसनघ्राणरूपाणि इन्द्रियाणि येषां ते त्रीन्द्रियाः । कर्म० ४ कर्म० । जी० । यूकामत्कुणगर्दभेन्द्रगोपकुन्थुमत्कोटपिपीलिकोपदेहिकाकर्पासास्थिकत्रपुसबीजकतुम्बुरुकाऽऽदिषु, पं० सं० १ द्वार । उत्त० । आव० । आ० म० ।

सम्प्रति त्रीन्द्रियसंसारसमापन्नजीवप्रज्ञापनाऽर्थमाह–

से किं तं तेइंदियसंसारसमावन्नजीवपन्नवणा ?। तेइंदियसंसारसमावन्नजीवपन्नवणा अणेगविहा पन्नत्ता । तं जहा–ओवइया, रोहिणिया, कुंथू, पिपीलिया,उद्देसगा, उद्देहिया, उक्कलिया, उप्पाया,उप्पमा, तणहारा, कट्ठहारा, पत्तहारा, मालुंया,तणबिंटिया, पत्तबिंटिया, पुप्फबिंटिया, फलबिंटिया, बीयबिंटिया, तेंवुरुमिंजिया, तउसमिंजिया, कप्पासट्ठिमिंजिया, हिल्लिया, झिल्लिया, झिंगिरा, सिंगिरिमा, बाहुया, लहुया,मुरुगा,सोवत्थिया,सुयबेंटा,इंदकाइया, इंदगोवया, तुरतुंबगा,कोत्थलवाहगा,जूया,हालाहला, पिसुया, सतवाइया, गोम्ही,कण्हसियालिया (हत्थिसोंडा), जे यावन्ने तहप्पगारा सव्वे ते संमुच्छिमणपुंसगा । ते समासओ दुविहा पन्नत्ता। तं जहा–पज्जत्तगा य, अपज्जत्तगा य । एएसि णं एवमाइयाणं तेइंदियाणं पज्जत्ताऽपज्जत्ताणं अट्ठ जाइकुलकोडिजोणिप्पमुहसयसहस्सा हवंतीति मक्खायं । सेत्तं तेइंदियसंसारसमावन्नजीवपण्णवणा ॥

(से किं तमित्यादि) अथ का सा त्रीन्द्रियसंसारसमापन्नजीवप्रज्ञापना ?। भगवानाह–त्रीन्द्रियसंसारसमापन्नजीवप्रज्ञापना अनेकविधा प्रज्ञप्ता। तानेव तद्यथेत्यादिनोपदर्शयति। एते च औपचयिकप्रकृतयस्त्रीन्द्रिया देशविशेषतो लोकतश्चावगन्तव्याः । नवरं (गोम्ही कण्हसियालिया जे यावन्ने तहप्पगारा) येऽपि चान्ये तथाप्रकारास्ते सर्वे त्रीन्द्रिया ज्ञातव्या इति शेषः। (ते सव्वे संमुच्छिमनपुंसगा) इत्यादि पूर्ववत् । (एतेसि णमित्यादि) एतेषां त्रीन्द्रियाणामेवमादिकानामौपचयिकप्रभृतीनां पर्याप्ताऽपर्याप्तानां सर्वसङ्ख्यया अष्टौ जातिकुलकोटीनां योनिप्रमुखानि योनिप्रवाहाणि शतसहस्राणि भवन्ति, अष्टौ कुलकोटिलक्षा भवन्तीति भावः। इत्याख्यातं तीर्थकृद्भिः । उपसंहारमाह–(सेत्तमित्यादि) तदेवमुक्ता त्रीन्द्रियसंसारसमापन्नजीवप्रज्ञापना । प्रज्ञा० १ पद । जी० । स्था० ।

अथ त्रीन्द्रियानाह–

से किं तं तेइंदिया ?। तेइंदिया अणेगविहा पन्नत्ता । तं जहा–नेओ जहा पण्णवणाए । ओवइया, रोहिणिया, हत्थिसोंडा, जे यावन्ने तहप्पगारा, ते समासतो दुविहा पन्नत्ता । तं जहा–पज्जत्ता य, अपज्जत्ता य। तहेव जहा बेइंदियाणं, णवरं सरीरोगाहणा, उक्कोसेणं तिन्नि गाउयाइं ठिती, जहण्णेणं अंतोमुहुत्तं, उक्कोसेणं एगूणपण्णराइंदियाणं, सेसं तहेव छगतिया दुआगतिआ परित्ता असंखेज्जा पन्नत्ता । सेत्तं तेइंदिया ।

(से किं तमित्यादि) अथ के ते त्रीन्द्रियाः ?। सूरिराह-त्रीन्द्रिया अनेकविधाः प्रज्ञप्ताः । तद्यथा-(नेओ जहा पण्णवणाए) भेदो यथा प्रज्ञापनायां तथा वक्तव्यः । स चैवम-"ओवाइया, रोहिणिया, कुंथू,पिपीलिया,उद्देसगा, उद्देहिया,उक्कलिया,उप्पाया, उप्पमा, तणहारा, कट्ठहारा, पत्तहारा, मालुंया, तणबेंटका, पत्तबेंटका, पुप्फबेंटया, फलबेंटया, बीयबेंटया, तेंवुरुमिंजिया,तउसमिंजिया, कप्पासट्ठिमिंजिया, हिल्लिया, झिल्लिया, झिंगिरा,झिंगिरडा, बाहुया, लहुया, मुरुगा, सोवत्थिया, सुयबेंटा, इंदकाइया, इंदगोवया, तुरतुंगवा, कोत्थलवाहगा, जूया, हालाहला, पिसुया, सतवाइया, गोम्ही, हत्थिसोंडा । " इति । एते च केचिदतिप्रतीताः,केचिद्देशविशेषतोऽवगन्तव्याः। नवरम्-(गोम्ही कण्हसियाली जे यावण्णे तहप्पगारा इति) येऽपि चान्ये तथाप्रकारा एवंप्रकारास्ते सर्वे त्रीन्द्रिया ज्ञातव्याः । (ते समासतो इत्यादि) समस्तमपि सूत्रं द्वीन्द्रियवत् परिभावनीयं,नवरमवगाहनाद्वारे उत्कर्षतो अवगाहना त्रीणि गव्यूतानि, इन्द्रियद्वारे त्रीणि इन्द्रियाणि, स्थितिर्जघन्येनान्तर्मुहूर्तमुत्कर्षत एकोनपञ्चाशद् रात्रिन्दिवानि । शेषं तथैवोपसंहारमाह-(सेत्तं तेइंदिया) उक्ता त्रीन्द्रियाः । जी० १ प्रति० ।

त्रीन्द्रियवक्तव्यतामाह–

तेइंदिया उ जे जीवा, दुविहा ते पकित्तिया ।
पज्जत्तमपज्जत्ता, तेसिं भेए सुणेह मे ॥ १३७ ॥
कुंथू पिवीलिया दंसा, उक्कुडुद्देहिया तहा ।
तणहार कट्ठहारा य, मालुंगा पत्तहारगा ॥ १३८ ॥
कप्पासट्ठिमिंजा य, तिंदुगा तउसमिंजगा ।
सतावरी य गुम्मी य, बोधव्वा इंदकाइया ॥ १३९ ॥
इंदगोवगमाईया-णेगहा एवमाइआ ।
लोगेगदेसे ते सव्वे, न सव्वत्थ वियाहिया ॥१४०॥
संतइं पप्प नाईया, अपज्जवसिया वि य ।
ठिइं पडुच्च साईया, सपज्जवसिया वि य ॥ १४१ ॥
एगूणवण्णऽहोरत्ता, उक्कोसेण वियाहिया ।
तेइंदिअआउठिई, अंतोमुहुत्तं जहन्निया ॥ १४२ ॥
संखेज्जकालमुक्कोसं, अंतोमुहुत्तं जहण्णगं ।
तेइंदियकायठिई, तं कायं तु अमुंचओ ॥ १४३ ॥
अणंतकालमुक्कोसं, अंतोमुहुत्तं जहण्णयं ।
तेइंदियजीवाणं, अंतोमुहुत्तं जहन्निया ॥ १४४ ॥
एएसिं वण्णओ चेव, गंधओ रसफासओ ।
संठाणदेसओ वावि, विहाणाइं सहस्ससो ॥ १४५ ॥

एतदपि पूर्ववच्चरं त्रीन्द्रियोच्चारणं विशेषः, तथा कुन्थवोऽनुद्धरिप्रभृतयः, पिपीलिकाः कीटिकाः, गुम्मी शतपदी । एवमन्येऽपि यथासंप्रदायं वाच्याः । एकोनपञ्चाशदहोरात्राण्यायुःस्थितिरिति । उत्त० ३६ अ० । पिं० । ओ० । भ० । (त्रीन्द्रियाणां परिभोगः ' परिभोग ' शब्दे वक्ष्यते)

तेइच्छ–चैकित्स्य–न० । चिकित्साया भावश्चैकित्स्यम् । व्याधिप्रतिक्रियारूपे, दश० ३ अ० । आचा० ।

तेइच्छिय–चैकित्सिक–त्रि० । वैद्ये, बृ० १ उ० ।

तेउ–तेजस्–न० । उष्णोद्द्योतलक्षणे, सूत्र० २ श्रु० १ अ० । उष्णरूपे, सूत्र० १ श्रु० १ अ० १ उ० । पक्तृगुणे, सूत्र० १ श्रु० १ अ० १ उ० । अग्निकुमारेन्द्रयोरग्निसिंहाग्निमानवयोः पूर्वदिग्लोकपाले, पुं० । स्था० ४ ठा० १ उ० । भ० ।

तेउकंत–तेजस्कान्त–पुं० । अग्निकुमारेन्द्रयोरग्निसिंहाग्निमानवयोरुत्तरदिग्लोकपाले, स्था० ४ ठा० १ उ० । भ० ।

तेउक्काइय–तेजस्कायिक–पुं० । तेजो वह्निः, तदेव कायः शरीरं येषां ते तेजस्कायाः, तेजस्काया एव स्वार्थिके कप्रत्ययविधानात्तेजस्कायिकाः। जी० १ प्रति० प्रज्ञा० । एकेन्द्रियजीवभेदे, दश० ।

अथ तेजसो जीवत्वसिद्धिमाह-

तेउ चित्तमंत–मक्खाया अणेगजीवा पुढो सत्ता अन्नत्थ सत्थपरिणएण ॥ ३ ॥

सात्मकोऽग्निः, आहारेण वृद्धिदर्शनात्, बालकवत् । दश० ४ अ० । तेजः सात्मकमाहारोपादानात्तद्वृद्धिविशेषोपलब्धेः,तद्विकारदर्शनाच्च, पुरुषवत् । आह च- " अपरप्पेरियतिरियानियमियदिग्गमणओ निलोगो व्व । अनलो आहाराओ, विद्धिविगारोवलंभाओ " ॥ १ ॥ इति । स्था० १ ठा० । सूत्र० । व्य० । विशे० ।

सम्प्रति तेजस्कायिकानाह-

से किं तं तेउक्काइया ? तेउक्काइया दुविहा पण्णत्ता । तं जहा–सुहुमतेउक्काइया य, बादरतेउक्काइया य । से किं तं सुहुमतेउक्काइया ? । सुहुमतेउक्काइया दुविहा पण्णत्ता । तं जहा–पज्जत्तगा य, अपज्जत्तगा य । सेत्तं सुहुमतेउक्काइया । से किं तं बादरतेउक्काइया ? । बादरतेउक्काइया अणेगविहा पण्णत्ता । तं जहा–इंगाले, जाला, मुम्मुरे, अची, अलाए, सुद्धागणी, उक्का, विज्जु, असणी, णिग्घाए,संघरिससमुट्ठिए, सूरकंतमणिणिस्सिए, जे यावन्ने तहप्पगारा, ते समासओ दुविहा पण्णत्ता । तं जहा–पज्जत्तगा य, अपज्जत्तगा य । तत्थ णं जे ते अपज्जत्तगा, तेणं असंपत्ता । तत्थ णं जे ते पज्जत्तगा एएसिं वण्णादेसेणं गंधादेसेणं रसादेसेणं फासादेसेणं सहस्सऽग्गसो विहाणाइं संखिज्जाइं जोणिप्पमुहसयसहस्साइं पज्जत्तगणिस्साए अपज्जत्तगा वक्कमंति, जत्थ एगो तत्थ णियमा असंखेज्जा । सेत्तं बादरतेउक्काइया, सेत्तं तेउक्काइया ।

(से किं तमित्यादि) सुगमं, नवरमङ्गारो विगतधूमः, ज्वाला आज्वल्यमानः, खादिराऽऽदिज्वालाऽनलसम्बद्धा दीपशिखेत्यन्ये । मुर्मुरः फुस्फुकाऽऽदौ भस्ममिश्रिताग्निकणरूपः, अर्चिरनलप्रतिबद्धा ज्वाला, आलातमुल्मुकं, शुद्धाऽग्नेरयः पिण्डाऽऽदौ,उल्का चुडुल्ली, विद्युत्प्रतीता, अशनिराकाशे पतदग्निमयः कणः, निर्घातो वैक्रियाशनिप्रपातः, संघर्षसमुत्थितोऽरणयाऽऽदिकाष्ठनिर्मथनसमुद्भूतः, सूर्यकान्तमणिनिस्सृतः-सूर्यकरकिरणसम्पर्के सूर्यकान्तमणेर्यः समुपजायते, (जे यावन्ने तहप्पगारा इति) येऽपि चान्ये तथाप्रकारा एवंप्रकारास्तेजस्कायिकाः, तेऽपि बादरतेजस्कायिकतया वेदितव्याः,ते समासतो इत्यादि प्राग्वत् । नवरमत्रापि सङ्ख्येयानि योनिप्रमुखाणि शतसहस्राणि सप्त वेदितव्यानि । प्रज्ञा० १ पद ।

अथ तेजस्कायिकप्रतिपादक उद्देशकः समारभ्यते । तस्य चोपक्रमाऽऽदीनि चत्वार्यनुयोगद्वाराणि वाच्यानि तावच्चावश्यमनिष्पन्ने निक्षेपे तेजउद्देशक इतिनाम,तत्र तेजसो निक्षेपाऽऽदीनि द्वाराणि वाच्यानि, अत्र च पृथिवीविकल्पतुल्यत्वात् केषाञ्चिदतिदेशो द्वाराणामपरेषां तद्विलक्षणत्वात् अपोद्धार इत्येतद् द्वयमुररीकृत्य निर्युक्तिकृद् गाथामाह-

तेउस्स वि दाराइं, ताइं जाइं हवंति पुढवीए ।
नाणत्तं तु विहाणे, परिमाणुववोगसत्थे य ॥११६॥

(तेउस्स वीत्यादि) तेजसोऽप्यग्नेरपि द्वाराणि निक्षेपाऽऽदीनि, यानि पृथिव्याः समधिगमेऽभिहितानि, तान्येव वाच्यानि । अपवादं दर्शयितुमाह-नानात्वं भेदो विधानपरिमाणोपयोगशस्त्रेषु, तुरवधारणे । विधानाऽऽदिष्वेव च नानात्वं, नान्यत्रेति । चशब्दाल्लक्षणद्वारपरिग्रहः ॥ ११६ ॥

यथाप्रतिज्ञातनिर्वहणार्थमादिद्वारव्याचिख्यासयाऽऽह-

दुविहा य तेउजीवा, सुहुमा तह बायरा य लोगम्मि ।
सुहुमा य सव्वलोए, पंचेव य बायरविहाणा ॥११७॥

(दुविहेत्यादि) स्पष्टा ॥ ११७ ॥

बादरपञ्चभेदप्रतिपादनायाऽऽह-

इंगाल अगणि अची, जाला तह मुम्मुरे य बोधव्वे ।
बायरतेउविहाणा, पंचविहा वन्निया एए ॥११८॥

(इंगालेत्यादि) दग्धेन्धनो विगतधूमज्वालोऽङ्गारः-इन्धनस्थः स्रोपक्रियाविशिष्टरूपः,तथा विद्युदुल्काऽशनिसंघर्षसमुत्थितः सूर्यमणिसंसृताऽऽदिरूपश्चाग्निः, दाह्यप्रतिबद्धो ज्वालाविशेषोऽर्चिः, ज्वाला छिन्नमूलाऽनङ्गारप्रतिबद्धा, प्रविरलाग्निकणानुविद्धं भस्म मुर्मुरः । एते बादरा अग्निभेदाः पञ्च भवन्तीति । एते च बादराग्नयः स्वस्थानाङ्गीकरणान्मनुष्यक्षेत्रेऽर्द्धतृतीयेषु द्वीपसमुद्रेष्वव्याघातेन पञ्चदशसु कर्मभूमिषु व्याघाते सति पञ्चसु चिदेहेषु, नान्यत्र,उपपाताङ्गीकरणेन लोकासंख्येयभागवर्त्तिनः । तथा चाऽऽगमः-"उववाएणं दोसु उड्ढकवाडेसु तिरियलोयतट्टे य ।" अस्यायमर्थः-अर्द्धतृतीयद्वीपसमुद्रबाहल्ये पूर्वापरदक्षिणोत्तरस्वयम्भूरमणपर्यन्ताऽऽयते ऊर्द्धाधोलोकप्रमाणे कपाटे तयोः प्रविष्टा बादराग्निषूत्पद्यमानकास्तद्व्यपदेशं लभन्ते । तथा-(तिरियलोयतट्टे य त्ति) तिर्यग्लोकस्थालके च व्यवस्थितो बादराग्निषूत्पद्यमानो बादराग्निव्यपदेशभाग् भवति ॥ अन्ये तु व्याचक्षते-तयोस्तिष्ठतीति तत्स्थः, तिर्यग्लोकश्चासौ तत्स्थश्च तिर्यग्लोकतत्स्थः । तत्र च स्थित उत्पन्नबादराग्निव्यपदेशमासादयति । अस्मिंश्च व्याख्याने कपाटान्तर्गत एव गृह्यते, स च द्वयोरूर्द्धकपाट्योरित्यनेनैवोपात्त इति तद्व्याख्यानाभिप्रायं न विद्मः । कपाटस्थापना चेयम्-समुद्घातेन सर्वलोकवर्त्तिनः, ते च पृथिव्यादयो मारणान्तिकसमुद्घातेन समवहता बादराग्निषूत्पद्यमानास्तद्व्यपदेशभाजः सर्वलोकव्यापिनो भवन्ति । यत्र च बादराः पर्याप्तकास्तत्रैव बादरा अपर्याप्तकाः, तेषामुत्पद्यमानत्वात् । तदेवं सूक्ष्मा बादराश्च पर्याप्तकापर्याप्तकभेदेन प्रत्येकं द्विधा भवन्ति । एते च वर्णगन्ध-

रसस्पर्शाऽऽदेशैः सहस्राग्रशो निद्यमानाः सङ्ख्येययोनिप्रमुखशतसहस्रभेदपरिमाणा भवन्ति । तत्रैषां संवृता योनिरुष्णा च सचिताऽचित्तमिश्रभेदात् त्रिधा । सप्त चैषां योनिलक्षा भवन्ति ॥ ११८ ॥

साम्प्रतं चशब्दसमुच्चितं लक्षणद्वारमाह-

जह देहप्परिणामो, रत्तिं खज्जोयगस्स सा जवमा ।
जारियस्स य जह उम्हा, तह जवमा तेउजीवाणं ॥११९॥

(जहेत्यादि) यथेतिदृष्टान्तोपन्यासार्थः । देहपरिणामः प्रतिविशिष्टा शरीरशक्तिः, रात्राविति विशिष्टकालनिर्देशः । खद्योतक इति प्राणिविशेषपरिग्रहः । यथा तस्याऽसौ देहपरिणामो जीवप्रयोगनिर्वृत्तशक्तिराविर्भावकास्ति, एवमङ्गाराऽऽदीनामपि प्रतिविशिष्टा प्रकाशाऽऽदिशक्तिरनुमीयते जीवप्रयोगविशेषाऽऽविर्भाविततेति । यथा वा-उष्णस्पर्शा जीवप्रयोगं नातिवर्त्तते, जीवाधिष्ठितशरीरकानुपात्येव भवति, एषैवोपमाऽऽख्येयजन्तूनाम्, न च मृता उष्णिमः क्वचिदुपलभ्यन्ते, एवमन्वयव्यतिरेकाभ्यामग्नेः सचित्तता मुक्तकग्रन्थोपपत्तिमुखेन प्रतिपादिता । संप्रति प्रयोगमारोप्यतेऽयमेवाऽर्थः-जीवशरीराण्यङ्गाराऽऽदयः, ज्वलत्वाऽऽदिहेतुगुणान्वितत्वात्, साम्प्रतविषाणाऽऽदिसदृशवत्, तथा आत्मसंयोगाऽऽविर्भूतोऽङ्गाराऽऽदीनां प्रकाशपरिणामः, शरीरस्थत्वात्, खद्योतकदेहपरिणामवत्, तथा-आत्मसंप्रयोगपूर्वकोऽङ्गाराऽऽदीनामूष्मा, शरीरस्थत्वात्, ज्वरोष्मवत् । न चाऽऽदित्याऽऽदिनिरनेकान्तः । सर्वेषामात्मप्रयोगपूर्वकं यत उष्णपरिणामभाक्त्वं तस्मान्नानेकान्तः, तथा सचेतनं तेजो, यथायोग्याऽऽहारोपादानेन वृद्धिविशेषतद्विकारवत्वात्, पुरुषवत् । एवमादिना लक्षणेनाऽऽगमेया जन्तवोऽवसेयाः ॥ ११९ ॥ इत्युक्तं लक्षणद्वारम् ।

अथ परिमाणद्वारमाह-

जे बायरपज्जत्ता, पल्लियस्स असंखभागमेत्ता उ ।
सेसा तिण्णि वि रासी, वीसुं लोगा असंखेज्जा ॥१२०॥

(जे बायरेत्यादि) ये बादरपर्याप्ताऽनलजीवाः क्षेत्रपल्योपमासंख्येयभागमात्रवर्त्तिप्रदेशराशिपरिमाणा भवन्ति, ते पुनर्बादरपृथिवीकायपर्याप्तकेभ्योऽसंख्येयगुणहीनाः, शेषाश्चयोऽपि राशयः पृथ्वीकायद्भावनीयाः । किं तु बादरपृथिवीकायापर्याप्तकेभ्यो बादराऽऽग्नेयपर्याप्तका असंख्येयगुणहीनाः सूक्ष्मपृथिवीकायापर्याप्तकेभ्यः सूक्ष्माऽऽग्नेयापर्याप्तका विशेषहीनाः, सूक्ष्मपृथिवीकायपर्याप्तकेभ्यः सूक्ष्माऽऽग्नेयपर्याप्तका विशेषहीना इति ॥ १२० ॥

साम्प्रतमुपभोगद्वारमाह-

दहणे पयावणपगा-सणे य सेए य जत्तकरणे य ।
बायरतेउकाए, जवभोगगुणा मणुस्साणं ॥ १२१ ॥

(दहणेत्यादि) दहनं-शरीराऽऽद्यवयवस्य बाताऽऽद्यपनयनार्थं, प्रकृष्टं तापनं प्रतापनं-शीतापनोदाय, प्रकाशकरणमुद्द्योतकरणं-प्रदीपाऽऽदिना, जत्तकरणमोदनाऽऽदिरन्धनम्, स्वेदोज्वरविशूचिकाऽऽदीनाम् । इत्येवमादिष्वनेकप्रयोजनेषूपस्थितेषु मनुष्याणां बादरतेजस्कायविषया उपभोगरूपा गुणा उपभोगगुणा भवन्तीति ॥ १२१ ॥

तदेवमेवमादिभिः कारणैः समुपस्थितैः सततमारम्भप्रवृत्ता गृहिणो यत्नाभासा वा सुखैषिणस्तेजस्कायजन्तून् हिंसन्तीति दर्शयितुमाह-

एएहिं कारणेहिं, हिंसंति उ तेउकाइए जीवे ।
सायं गवेसमाणा, परस्स दुक्खं उदीरंति ॥ १२२ ॥

(एएहिं इत्यादि) एतैरेतदनाऽऽदिभिः कारणैस्तेजस्कायिकान् जीवान् हिंसन्तीति संघट्टनपरितापनाऽपद्रावणानि कुर्वन्ति, सातं सुखं तदात्मनोऽन्विष्यन्तः परस्य बादराग्निकायस्य, दुःखमुदीरयन्त्युत्पादयन्तीति ॥ १२२ ॥

साम्प्रतं शस्त्रद्वारम्, तच्च द्रव्यभावशस्त्रभेदात् द्विधा, द्रव्यशस्त्रमपि समासविभागभेदात् द्विधैव, तत्र समासतो द्रव्यशस्त्रप्रतिपादनायाऽऽह-

पुढवी आउक्काए, उल्ला य वणस्सई तसा पाणा ।
बायरतेउक्काए, एयं तु समासओ सत्थं ॥ १२३ ॥

पृथिवी धूलिः, अप्कायश्च आर्द्रश्च वनस्पतिः त्रसाश्च प्राणिनः, एतद् बादरतेजस्कायजन्तूनां समासतः सामान्येन शस्त्रमिति ॥ १२३ ॥

विभागतो द्रव्यशस्त्रमाह-

किंची सकायसत्थं, किंची परकाए तदुभयं किंची ।
एयं तु दव्वसत्थं, भावे य असंजमो सत्थं ॥ १२४ ॥

(किंचीत्यादि) किञ्चिच्छस्त्रं स्वकाय एव अग्निकाय एवाग्निकायस्य । तद्यथा-तार्णोऽग्निः पारणाग्नेः शस्त्रमिति । किञ्चिच्च परकायशस्त्रमुदकाऽऽदि । उभयशस्त्रं पुनस्तुषकरीषाऽऽदिव्यतिमिश्रोऽग्निरपरानेः । तुशब्दो भावशस्त्रापेक्षया विशेषणार्थः । एतत्तु पूर्वोक्तं समासविभागरूपं पृथवीस्वकायाऽऽदिद्रव्यशस्त्रमिति । भावशस्त्रं दर्शयति-भावे शस्त्रमसंयमो दुःप्रणिहितमनोवाक्कायलक्षण इति ॥ १२४ ॥

अथोपसंहारमाह-

सेसाइं दाराइं, ताइं जाइं हवंति पुढवीए ।
एवं तेउद्देसे, निज्जुत्ती किंचिया एसा ॥ ॥ १२५ ॥

(सेसाणीत्यादि) उक्तशेषाणि द्वाराणि तान्येव, यानि पृथिव्युद्देशकेऽभिहितानि । एवमुक्तप्रकारेण, तेजस्कायानिधानोद्देशके निर्युक्तिः कीर्तिता व्याख्यातिता भवतीति ॥१२५॥

साम्प्रतं सूत्रानुगमे स्खलिताऽऽदिगुणोपेतं सूत्रमुच्चारणीयम् । तच्चेदम्-

से बेमि णेव सयं लोगं अब्भाइक्खेज्जा, णेव अत्ताणं अब्भाइक्खेज्जा, जे लोयं अब्भाइक्खइ से अत्ताणं अब्भाइक्खइ, जे अत्ताणं अब्भाइक्खइ से लोयं अब्भाइक्खइ ॥३१॥

(से बेमीत्यादि) अस्य च संबन्धः प्राग्वद्वाच्य इति । येन मया सामान्याऽऽत्मपदार्थपृथिव्यप्कायजीवप्रविभागव्यावर्णनमकारि स एवाहमव्यवच्छिन्नज्ञानप्रवाहस्तेजोजीवस्वरूपोपलम्भसमुपजनितजिनवचनसंमदो ब्रवीमि । किं पुनस्तदिति दर्शयति-(नेवेत्यादि) इह हि प्रकरणसंबन्धाल्लोकशब्देनाग्निकायलोकोऽभिधित्सितः, अतस्तमग्निलोकं जीवत्वेन नैव स्वयमात्मनाऽभ्याचक्षीत, नैवाप्रह्नुवीतेत्यर्थः । एतदभ्याख्याने ह्यात्मनोऽपि ज्ञानाऽऽदिगुणकलापानुमितस्याभ्याख्यानमवाप्नोति । अथ च प्राक् साधितत्वाद्भ्याख्यानं नैवाऽऽत्मनो न्याय्यम्, एवं तेजस्कायस्यापि प्रसाधितत्वात् अभ्याख्यानं क्रियमाणं न युक्तिपथम्

वतरति । एवं चास्य युक्त्यागमबलप्रसिद्धस्याभ्याख्याने क्रियमाणे सत्यात्मनोऽप्यहंप्रत्ययसिद्धस्याभ्याख्यानं भवतः प्राप्तम् । एवमस्त्विति चेत्, तन्नेति दर्शयति-(नेव अत्ताणं अब्भाइक्खेज्जा) नैवाऽऽत्मानं-शरीराधिष्ठातारं ज्ञानगुणं प्रत्यात्मसंवेद्यं प्रत्याचक्षीत, तस्य शरीराधिष्ठातृत्वेनाऽऽहृतमिदं शरीरं केनचिदभिसन्धिमता,तथा त्यक्तमिदं शरीरं केनचिदभिसन्धिमतैवेत्येवमादिभिर्हेतुभिः प्रसाधितत्वात् । न च प्रसाधितप्रसाधनं पिष्टपेषणवद् विद्वज्जनमनांसि रञ्जयति । एवञ्च सत्यात्मवत्प्रसाधितमग्निलोकं यः प्रत्याचक्षीत सोऽतिसाहसिक आत्मानमभ्याख्याति निराकरोति, यश्चाऽऽत्माभ्याख्यानप्रवृत्तः स सदैवाग्निलोकमभ्याख्याति, सामान्यपूर्वकत्वाद्विशेषाणाम्, सति ह्यात्मसामान्ये पृथिव्याद्यात्मविभागः सिद्ध्यति, नान्यथा, सामान्यस्य विशेषव्यापकत्वात्; व्यापकविनिवृत्तौ च व्याप्यस्याप्यवश्यंभाविनी विनिवृत्तिरिति कृत्वा । एवमयमग्निलोकः सामान्याऽऽत्मवन्नाभ्याख्यातव्य इति प्रदर्शितम ।

अधुनाऽग्निजीवप्रतिपत्तौ सत्यां तद्विषयसमारम्भकटुकफलपरिहारोपन्यासाय सूत्रमाह-

जे दीहलोगसत्थस्स खेयण्णे, से असत्थस्स खेयण्णे ।

(जे दीहेत्यादि) य इति मुमुक्षुर्दीर्घलोको-वनस्पतिर्यस्मादसौ कायस्थित्या परिमाणेन शरीरोच्छ्रयेण च शेषैकेन्द्रियेभ्यो दीर्घो वर्तते । तथाहि-कायस्थित्या तावत् "वणस्सइकाइएणं भंते ! वणस्सइकाए त्ति कालओ केवच्चिरं होइ ?। गोयमा ! अणंतं कालं अणंताओ उस्सप्पिणिओसप्पिणीओ, खेत्तओ अणंता लोया असंखेज्जा पोग्गलपरियट्टा, ते णं पोग्गलपरियट्टा आवलियाए असंखेज्जइभागे।" परिमाणतस्तु-"पभुप्पन्नवणस्सइकाइयाणं भंते ! केवतिकालस्स निल्लेवणा सिया ?। गोयमा ! पभुप्पन्नवणस्सइकाइयाणं नत्थि निल्लेवणा ।" तथा शरीरोच्छ्रयाच्च दीर्घो वनस्पतिः । " वणस्सइकाइयाणं भंते ! केमहालिया सरीरोगाहणा पन्नत्ता ?। गोयमा ! साइरेगं जोयणसहस्सं सरीरोगाहणा ।" न तथाऽन्येषां एकेन्द्रियाणाम्, अतः स्थितमेतत्सर्वथा दीर्घलोको वनस्पतिरिति । अस्य च शस्त्रमग्निः, यस्मात्स हि प्रवृद्धज्वालाकलापाऽऽकुलः सकलतरुगणप्रध्वंसनाय प्रभवति, अतोऽसौ तदुत्सादकत्वाच्छस्त्रम् । ननु च सर्वलोकप्रसिद्ध्या कस्मादग्निरेव नोक्तः ?, किं वा प्रयोजनमुररीकृत्योक्तं दीर्घलोकशस्त्रमिति ?। अत्रोच्यते-प्रेक्षापूर्वकारितया, न निरभिप्रायमेतत्कृतमिति। यस्मादयमुत्पाद्यमानो ज्वाल्यमानो वा हव्यवाहः समस्तभूतग्रामघाताय प्रवर्त्तते, वनस्पतिदाहप्रवृत्तस्तु बहुविधसत्त्वसंहतिविनाशकारी विशेषतः स्यात्, यतो वनस्पतौ कृमिपिपीलिकाभ्रमरकपोतश्वापदाऽऽदयः संभवन्ति, तथा पृथिव्यपि तरुकोटरव्यवस्थिता स्यात्, आपोऽप्यवश्यायरूपाः, वायुरपीषच्छुषिरस्वभावोऽल्पकिंशल्कयानुसारी संभाव्यते। तदेवमग्निसमारम्भप्रवृत्त एतावतो जीवान्नाशयति, अस्यार्थस्य सूचनाय दीर्घलोकशस्त्रग्रहणमकरोत् सूत्रकार इति ।

तथा चोक्तम-

" जावतेयं न इच्छंति, पावगं जलइत्तए ।
तिक्खमन्नयरं सत्थं, सव्वओ वि दुरासयं ॥ ३३ ॥
पाईणं पडिणं वा वि, उड्ढं अणुदिसामवि ।
अहे दाहिणओ वा वि, दहे उत्तरओ वि य ॥ ३४ ॥
भूयाण-मेस-माघाओ, हव्ववाहो न संसओ ।
तं पईवपयावट्ठा, संजया किंचि नारभे ॥३५॥" (दश०६ अ०)

अथवा बादरतेजस्कायाः पर्याप्तकाः स्तोकाः, शेषाः पृथिव्यादयो जीवकाया बहवः, भवस्थितिरपि त्रीण्यहोरात्राणि स्वल्पा, इतरेषां पृथिव्यप्वायुवनस्पतीनां यथाक्रमं द्वाविंशतिसप्तत्रिदशवर्षसहस्रपरिमाणा दीर्घा अवसेया इति । अतो दीर्घलोकः-पृथिव्यादिः, तस्य शस्त्रमग्निकायः, तस्य खेत्रज्ञो निपुणोऽग्निकायं वर्णाऽऽदितो जानातीत्यर्थः । खेदज्ञो वा,खेदः-तद्व्यापारः सर्वसत्त्वानां दहनाऽऽत्मकः पाकाऽऽद्यनेकशक्तिकलापोपचितः प्रवरमणिरिव ज्वाज्वल्यमानो लब्धाग्निव्यपदेशः यतीनामनारम्भणीयः, तमेवंविधं खेदमग्निव्यापारं जानातीति खेदज्ञः, अतो य एव दीर्घलोकशस्त्रस्य खेदज्ञः स एवाशस्त्रस्य सप्तदशभेदस्य संयमस्य खेदज्ञः। संयमो हि न कञ्चिज्जीवं व्यापादयति, अतोऽशस्त्रम्। एवमनेन संयमेन सर्वसत्त्वाभयप्रदायिनाऽनुष्ठीयमानेनाग्निजीवविषयः समारम्भः शक्यः परिहर्तुं पृथिव्यादिकायसमारम्भश्चेत्येवमसौ संयमे निपुणमतिर्भवति, ततश्च निपुणमतित्वाद्विदितपरमार्थोऽग्निसमारम्भाद् व्यावृत्य संयमानुष्ठाने प्रवर्त्तते ।

इदानीं गतप्रत्यागतलक्षणेनाविनाभावित्वप्रदर्शनार्थं विपर्ययेण सूत्रावयवपरामर्शं करोति-

जे असत्थस्स खेयण्णे, से दीहलोगसत्थस्स खेयण्णे॥३२॥

(जे असत्थस्स इत्यादि) यश्चाशस्त्रे संयमे निपुणः, स खलु दीर्घलोकशस्त्रस्याग्नेः, खेत्रज्ञः खेदज्ञो वा, संयमपूर्वकं ह्यग्निविषयखेदज्ञत्वम । अग्निविषयखेदज्ञतापूर्वकं च संयमानुष्ठानम, अन्यथा तदसंभव एवेत्येतत्प्रत्यागतफलमाविर्भावितं भवति ।

कैः पुनरिदमेवमुपलब्धमित्यत आह-

वीरेहिं एयं अभिभूय दिट्ठं,

(वीरेहीत्यादि) अथवा सद्वृत्तप्रसिद्धौ सत्यां वाक्यप्रसिद्धिर्भवति, इत्यत उपदिश्यते-(वीरेहीत्यादि) घनघातिकर्मसंघातविदारणानन्तरप्राप्तातुलकेवलश्रिया विराजन्त इति वीराः-तीर्थकराः, तैर्वीरैरर्थतो दृष्टमेतत्क्षणधरैश्च सूत्रतोऽग्निशस्त्रं दृष्टम्, अशस्त्रं संयमस्वरूपं चेति । किं पुनरनुष्ठायेदं तैरुपलब्धमिति ? । अत्रोच्यते--(अभिभूयेति) अभिभवो नामाऽऽदिभ्रतुर्क्षा, द्रव्याभिभवो रिपुसेनाऽऽदिपराजयः, आदित्यतेजसा वा चन्द्रग्रहनक्षत्राऽऽदितेजोऽभिभवः, भावाभिभवस्तु—परीषहोपसर्गानीकक्षानदर्शनाऽऽवरणमोहान्तरायकर्मनिर्दलनं, परीषहोपसर्गाऽऽदिसेनाविजयाद्विमलं चरणं, चरणशुद्धेर्ज्ञानाऽऽवरणाऽऽदिकर्मक्षयः, ततक्षयाच्चिरावरणमप्रतिहतमशेषज्ञेयग्राहि, केवलज्ञानमुपजायते । इदमुक्तम्भवति-परीषहोपसर्गक्षानदर्शनाऽऽवरणीयमोहान्तरायाएयभिभूय केवलमुत्पाद्य तैरुपलब्धमिति ।

यथाभूतैस्तैरिदमुपलब्धं तद्दर्शयति--

संजएहिं सया जत्तेहिं सया अप्पमत्तेहिं ॥ ३३ ॥

सम्यग् यताः संयताः प्राणातिपाताऽऽदिभ्यस्तैः, तथा सदा सर्वकालं चरणप्रतिपत्तौ मूलोत्तरगुणभेदायां निरतिचारत्वाद्यत्नवन्तस्तैः, तथा सदा सर्वकालं न विद्यते प्रमादो मद्यविषयकषायविकथानिद्राऽऽख्यो येषां ते प्रमत्ताः, तैरेवंभूतैर्महावीरैः केवलज्ञानचक्षुषेदं दीर्घलोकशस्त्रम्, अशस्त्रं च संयमो दृष्ट-

मुपलब्धमिति । अत्र च यत्नग्रहणादीर्यासमित्यादयो गुणा गृह्यन्ते । अप्रमादग्रहणात्तु मद्याऽऽदिनिवृत्तिरिति । तदेवमेतत्प्रधानपुरुषप्रतिपादितमग्निशस्त्रमपावदर्शनादप्रमत्तैः साधुभिः परिहार्यमिति ॥

एवं प्रत्यक्षीकृतानेकदोषजालमप्यग्निशस्त्रमुपभोगलोभात्प्रमादवशगा ये न परिहरन्ति, तानुद्दिश्य विपाकदर्शनायाऽऽह-

जे पमत्ते गुणट्ठीए से हु दंडे त्ति पवुच्चइ ॥ ३५ ॥

यो हि प्रमत्तो भवति मद्यविषयाऽऽदिप्रमादैरसंयतो 'गुणार्थी' रन्धनपचनप्रकाशाऽऽतापनाऽऽद्यग्निगुणप्रयोजनवान् स कुप्रणिहितमनोवाक्कायोऽग्निशस्त्रसमारम्भकतया प्राणिनां दण्डहेतुत्वाद्दण्डः, प्रकर्षेणोच्यते प्रोच्यते, आयुर्घृताऽऽदिव्यपदेशवदिति ।

यतश्चैवं ततः किं कर्त्तव्यमित्यत आह--

तं परिण्णाय मेहावी, इयाणिं णो जमहं पुव्वमकासी पमाएणं ॥ ३६ ॥

(तं परिण्णाय मेहावी) तमग्निकायसमारम्भं दण्डफलं परिज्ञाय ज्ञपरिज्ञाप्रत्याख्यानपरिज्ञाभ्यां मेधावी मर्यादाव्यवस्थितो वक्ष्यमाणप्रकारेण व्यवच्छेदमात्मन्याचिनोतीति । तमेव प्रकारं दर्शयितुमाह-(इयाणीत्यादि) यमहमग्निसमारम्भं विषयप्रमादेनाऽऽकुलीकृतान्तःकरणः सन् पूर्वमकार्षं, तमिदानीं जिनवचनोपलब्धाग्निसमारम्भदण्डतत्त्वः नो करोमीति ॥

अन्ये त्वन्यथावादिनोऽन्यथाकारिण इति दर्शयितुमाह-

लज्जमाणा पुढो पास-अणगारा मो त्ति एगे पवदमाणा जमिणं विरूवरूवेहिं सत्थेहिं अगणिकम्मसमारंभेणं अगणिसत्थं समारभमाणे अण्णे अणेगरूवे पाणे विहिंसंति, तत्थ खलु भगवता परिण्णा पवेदिता, इमस्स चेव जीवियस्स परिवंदणमाणणपूयणाए जाइमरणमोयणाए दुक्खपडिघायहेउं से सयमेव अगणिसत्थं समारभइ, अण्णेहिं वा अगणिसत्थं समारंभावेइ, अण्णे वा अगणिसत्थं समारभमाणे समणुजाणइ, तं से अहियाए तं से अबोहियाए से तं संबुज्झमाणे आयाणीयं समुट्ठाय सोच्चा भगवओ अणगाराणं इहमेगेसिं णायं भवति-एस खलु गंथे एस खलु मोहे एस खलु मारे एस खलु णरए, इच्चत्थं गढिए लोए जमिणं विरूवरूवेहिं सत्थेहिं अगणिकम्मसमारंभेणं अगणिसत्थं समारभमाणे अण्णे अणेगरूवे पाणे विहिंसइ ॥ ३६ ॥

(लज्जमाणेत्यादि) यावत्-(अण्णे अणेगरूवे पाणे विहिंसइ त्ति) अस्य ग्रन्थस्योक्तार्थस्याऽयमर्थो द्रष्टव्यतः प्रदर्श्यते-लज्जमानाः स्वाऽऽगमोक्तानुष्ठानं कुर्वाणाः सावद्यानुष्ठानेन वा लज्जां कुर्वाणाः, पृथग्विभिन्नाः शाक्याऽऽदयः, पश्येति संयमानुष्ठाने स्थिरीकरणार्थं शिष्यस्य चोदना, अनगारा वयमित्येके प्रवदमानाः, किं तैर्विरूपमाचरितं येनैवं प्रदर्श्यन्त इति दर्शयति--यदिदं विरूपरूपैः शस्त्रैरग्निकर्मसमारम्भेण अग्निशस्त्रं समारभमाणः सन्नन्यानेनेकरूपान् प्राणिनो विहिनस्ति, तत्र खलु भगवता परिज्ञा प्रवेदिता, यथाऽस्यैव परिपठ्यमानजीवितस्य परिवन्दनमाननपूजनार्थं जातिमरणमोचनार्थं दुःखप्रतिघातहेतुं यत्करोति तदर्थं-ति-स परिवन्दनाऽऽद्यर्थी स्वत एवाग्निशस्त्रं समारभते, तथा अन्यैश्चाग्निशस्त्रं समारम्भयति, तथाऽन्यांश्च अग्निशस्त्रं समारभमाणान् समनुजानीते । तच्चाग्नेः समारम्भणं ' से ' तस्य सुखलिप्सोरमुत्रान्यत्र चाहिताय भवति । तथा-तदेव च तस्याबोधिलाभाय भवति । स इति यस्यैतदसदाचरणं प्रदर्शितं स तु शिष्यस्तदग्निसमारम्भणं पापायेत्येवं संबुध्यमान आदानीयं ग्राह्यं सम्यग्दर्शनाऽऽदि सम्यगुत्थायाभ्युपगम्य श्रुत्वा भगवदन्तिकेऽनगाराणां वा इहैकेषां साधूनां ज्ञातं भवति । किं तदर्शयति ?-एषोऽग्निसमारम्भः ग्रन्थः कर्महेतुत्वात्, एष एव मोह एष एव मार एष एव नरकस्तद्धेतुत्वादिति भावः । इत्येवमर्थं च गृही श्लोको यत्करोति तदर्शयति-यदिदं विरूपरूपैः शस्त्रैरग्निकर्म समारभते, तदारम्भेण चाग्निशस्त्रं समारभते, तच्चाऽऽरभमाणोऽन्यानेनेकरूपान् प्राणिनो विहिनस्तीति ॥

कथं पुनरग्निसमारम्भप्रवृत्ता नानाविधान् प्राणिनो विहिंसन्तीति दर्शयितुमाह—

से बेमि-संति पाणा पुढविणिस्सिया तणणिस्सिया पत्तणिस्सिया कट्ठणिस्सिया गोमयणिस्सिया कयवरणिस्सिया, संति संपातिमा पाणा आहच्च संपयंति, अगणिं च खलु पुट्ठा एगे संघायमावज्जंति, जे तत्थ संघायमावज्जंति ते तत्थ परियावज्जंति, जे तत्थ परियावज्जंति ते तत्थ उद्दायंति ॥ ३७ ॥

(से बेमीत्यादि) तदहं ब्रवीमि यथा नानाविधजीवहिंसनमग्निकायसमारम्भेण भवतीति । यथाप्रतिज्ञातार्थं दर्शयति-सन्ति विद्यन्ते प्राणा जन्तवः, पृथिवीकायनिश्रिताः पृथिवीकायत्वेन परिणता इत्यर्थः । तदाश्रिता वा कृमिकुन्थुपिपीलिकागण्डूपदाहिमशूकवृश्चिककर्कटकाऽऽदयः । तथा-वृक्षगुल्मलतावितानाऽऽदयः। तथा-तृणपत्रनिश्रिताः पतङ्गेलिकाऽऽदयः। तथा-काष्ठनिश्रिता घुणोद्देहिकापिपीलिकाऽण्डाऽऽदयः । गोमयनिश्रिताः-कुन्थुपनकाऽऽदयः । कचवरः-पत्रतृणधूलिसमुदायः, तन्निश्रिताः कृमिकीटपतङ्गाऽऽदयः । तथा-सन्ति विद्यन्ते संपतितुमुत्प्लुत्योत्प्लुत्य गन्तुमागन्तुं वा शीलं येषां ते संपातिनः प्राणिनो-जीवा मक्षिकाभ्रमरपतङ्गमशकपक्षिणाताऽऽदयः,एते च संपातिन आहत्योपेत्य स्वत एव । यदि वा अत्यर्थं कदाचिद्वा अग्निशिखायां संपतन्ति चातद्देवं पृथिव्यादिनिश्रितानां जीवानां यद्भवति तदर्शयितुमाह-(अगणिं चेत्यादि) रन्धनपचनतापनाऽऽद्यग्निगुणार्थिभिरवश्यमग्निसमारम्भो विधेयः; तत्समारम्भे च पृथिव्यादिनिश्रितानां जीवानामेता वक्ष्यमाणा अवस्था भवन्ति,ज्ञान्दसत्वात् तृतीयाऽर्थे द्वितीया । ततश्चायमर्थः-अग्निना स्पृष्टाः सन्तः एके केचन संघातमधिकं गात्रसंकोचनं मयूरपिच्छकुचदापद्यन्ते,चशब्दस्याऽधिक्यार्थत्वात्, खलुशब्दोऽवधारणे,अग्नेरेवायं प्रतापो नापरस्येति । यदि वा सप्तम्यर्थे द्वितीया । स्पृष्टशब्दश्च पतितवचनः। ततश्चायमर्थो भवति-अग्नावेव स्पृष्टाः पतिता एके शलभाऽऽदयः,संघातं समेकीभावेनाधिकं गात्रसंकोचनमापद्यन्ते प्राप्नुवन्ति, ये च तत्राग्नौ पतिताः संघातमापद्यन्ते ते प्राणिनः,तत्राग्नौ पर्यापद्यन्ते। पर्यापत्तिः-संमूर्च्छनम्, क्षुभाभिभूता मूर्च्छामापद्यन्ते इत्यर्थः । अथ किमर्थं सूत्रकृता विजक्तिपरिणामोऽकारीति?। उच्यते-मागधदेशीसमनुवृत्तेः, व्याख्याविकल्पप्रदर्शनार्थं वा । अध्याहाराऽऽदयोऽपि व्याख्याङ्गानीत्यनेन

शिष्योक्तापितो भवति।अथ के पुनस्तेऽध्याहाराऽऽदय इति?,उच्यते-अध्याहारो, विपरिणामो, व्यवहितकल्पना, गुणकल्पना,लक्षणा,वाक्यभेदश्चेति । इह च द्वितीयाविभक्तेः सप्तमीपरिणामः कृत इति। ये च तत्राग्नौ पर्यापद्यन्ते ते प्राणिनः कृमिपिपीलिकाभ्रमरनकुलाऽऽदयः,तत्राग्नावपद्रावन्ति प्राणान् मुञ्चन्तीत्यर्थः।तदेवमग्निसमारम्भे सति न केवलमग्निजन्तूनां विनाशः,किं त्वन्येषामपि पृथिवीतृणपत्रकाष्ठगोमयकचवराऽऽश्रितानां सम्पातिनां च व्यापत्तिरवश्यम्भाविनीति। अत एव च भगवत्यां भगवतोक्तम्-"दो पुरिसा सरिसवया अन्नमन्नेहिं सद्धिं अगणिकायं समारंभंति,तत्थ णं एगे पुरिसे अगणिकायं समुज्जालेति, एगे विज्झवेति । तत्थ णं के पुरिसे महाकम्मयराए?, के पुरिसे अप्पकम्मयराए ?। गोयमा ! जे उज्जालेति से महाकम्मयराए, जे विज्झवेति से अप्पकम्मयराए ॥"

तदेवं प्रभूतसत्त्वोपमर्दनकरमग्न्यारम्भं विहाय मनोवाक्कायैः कृतकारितानुमतिभिश्च तत्परिहारः कार्य इति दर्शयितुमाह-

एत्थ सत्थं असमारंभमाणस्स इच्चेते आरंभा परिण्णाया भवंति, तं परिण्णाय मेहावी णेव सयं अगणिसत्थं समारंभे, नेवऽण्णेहिं अगणिसत्थं समारंभावेज्जा, अगणिसत्थं समारंभमाणे अण्णे न समणुजाणेज्जा,जस्सेते अगणिकम्मसमारंभा परिण्णाया भवंति से हु मुणी परिण्णायकम्मे ॥ ३८ ॥ त्ति बेमि ॥

(एत्थ सत्थेत्यादि) अत्राग्निकाये शस्त्रं स्वकायपरकायभेदभिन्नं समारभमाणस्य व्यापारयत इत्येते आरम्भाः पचनपाचनाऽऽदयो बन्धहेतुत्वेन परिज्ञाता भवन्ति । तथाऽत्रैवाग्निकाये शस्त्रमसमारभमाणस्यैते आरम्भाः परिज्ञाता भवन्ति । यस्यैते अग्निकायसमारम्भा ज्ञपरिज्ञया परिज्ञाता भवन्ति, प्रत्याख्यानपरिज्ञया च परिहृता भवन्ति, स एव मुनिः परमार्थतः परिज्ञातकर्मेति । ब्रवीमीति पूर्ववदिति आचा० १ श्रु० १ अ० ४ उ० ।

सम्प्रति तेजस्कायपिण्डमाह-

तिविहो तेउक्काओ, सच्चित्तो मीसओ य अचित्तो ।
सच्चित्तो पुण दुविहो, निच्छय-ववहारओ चेव ॥४१॥

त्रिविधः तेजस्कायः । तद्यथा-सचित्तो, मिश्रोऽचित्तश्च । सचित्तः पुनर्द्विविधः-निश्चयतः, व्यवहारतश्च ।

निश्चयव्यवहाराभ्यामेव सचित्तस्य द्वैविध्यमाह-

इट्ठगपागाईणं, बहुमज्झे विज्जुमाइ निच्छयओ ।
इंगालाई इयरो, मुम्मुरमाई य मिस्सो उ ॥ ४२ ॥

इष्टकापाकः प्रतीतः । आदिशब्दात् कुम्भकारपाकेक्षुरसकवथनचुल्ल्यादिपरिग्रहः। तेषां च बहुमध्यभागे विद्युदादिश्च विद्युदुल्काप्रमुखस्तेजस्कायो निश्चयतः सचित्तः,शेषस्तु अङ्गाराऽऽदिकः, अङ्गारो-ज्वालारहितोऽग्निः, आदिशब्दाद् ज्वालाऽऽदिपरिग्रहः । व्यवहारतः सचित्तः । सम्प्रति मिश्रं तेजस्कायमाह-(मुम्मुरमाई य मिस्सो उ) मुर्मुरः कारीषोऽग्निः, आदिशब्दादूर्ध्वविध्याताऽऽदिपरिग्रहः । इत्थंभूतो मिश्र इति ।

साम्प्रतमचित्तं तेजस्कायपिण्डमाह-

ओयणवंजणपाणग-आयामुसिणोदगं च कुम्मासा ।
सगलगसरक्खसूई, पिप्पलमाई उ उवओगो ॥ ४३ ॥

ओदनः-शाल्याऽऽदिभक्तं, व्यञ्जनं-पत्रशाकतीमनाऽऽदि । पानकं-काञ्जिकम् । तत्र ह्यवश्रावणं प्रक्षिप्यते, ततस्तदुपेक्षया काञ्जिकस्याग्निकायता । आयाममम्-अवश्रावणं,उष्णोदकम्-उद्धृतत्रिदण्डम् । एतेषां च पदानां समाहारद्वन्द्वः । चकारो मण्डकाऽऽदिसमुच्चयार्थः । कुल्माषाः पक्वा माषाः । एते च ओदनाऽऽदयोऽग्निनिष्पन्नत्वेनाग्निकार्यत्वादग्नयो व्यपदिश्यन्ते । भवति च तत्कार्यत्वात्तच्छब्देन व्यपदेशः । यथा-द्रम्मो भक्षितोऽनेनेत्यादौ ओदनाऽऽदयश्चित्ताः, तत एतेषामचित्ताग्निकायत्वेनाभिधानं न विरुध्यते। तथा मगलकाः-पकेष्टकाखण्डानि, सरजस्को-भस्म, सूची लोहमयी वस्त्रसीवनिका । अथवा (सरक्खसूइ त्ति) रक्षा भस्म, सह रक्षया वर्त्तते इति सरक्षा सूची । किमुक्तं भवति?- रक्षा च, सूची चेति । पिप्पलकः-किञ्चिद्वक्रः क्षुरविशेषः । आदिशब्दाच्छरदनिकाऽऽदिपरिग्रहः । एतानि च मगलकाऽऽदीनि पूर्वमग्निरूपतया परिणतान्यासीरन्, ततो भूतपूर्वगत्या संप्रत्यपि अग्निकायत्वेन व्यपदिश्यन्ते, अचित्तानि च । न चैतेषामचित्ताग्निकायत्वाऽनिधाने विरोधः । ... (?) सेप्रत्यचित्ताग्निकायस्य प्रयोजनमाह-(उवओगो त्ति) एतेषामोदनाऽऽदीनां य उपयोगो भोजनाऽऽदावुपयुज्यमानता, तदचित्ताग्निकायेन साधूनां प्रयोजनम्; द्रव्याऽऽदिभेदाच्चतुर्विधत्वमचित्ताग्निकायस्य प्रागिव यथायोगं भावनीयम । उक्तस्तेजस्कायपिण्डः । पिं० । ओघ० । आ० म० कल्प० । बृ० । (प्रथमं तेजस्कायोद्दीपनम् ऋषभदेवेन शिक्षितमिति 'उसह'शब्दे द्वितीयभागे ११२६ पृष्ठे उक्तम्) ('सदीववसइ' प्रस्तावे साधूनामग्निसेवना प्रदर्शयिष्यते) (विकाले विहरतामग्निसेवना ' विहार ' शब्दे वक्ष्यते)

अथ तेजस्कायहिंसानिषेधमाह-

जायतेयं न इच्छंति, पावगं जलइत्तए ।
तिक्खमन्नयरं सत्थं, सव्वओ वि दुरासयं ॥ ३३ ॥

जाततेजा अग्निः, तं जाततेजसं, नेच्छन्ति मनःप्रभृतिभिरपि पापकं पाप एव पापकस्तं, प्रभूतसत्त्वापकारित्वेनाशुभमित्यर्थः । किं नेच्छन्तीत्याह-ज्वलयितुमुत्पादयितुं, वृद्धिं वा नेतुम् । किंविशिष्टमित्याह-तीक्ष्णं च्छेदकरणाऽऽत्मकम्, अन्यतरत् शस्त्रं सर्वशस्त्रम् । एकधाराऽऽदिशस्त्रव्यवच्छेदेन सर्वतोधारशस्त्रकल्पमिति भावः । अत एव सर्वतोऽपि दुराश्रयं सर्वतोधारत्वेनाऽऽश्रयणीयमिति सूत्रार्थः ॥ ३३ ॥

एतदेव स्पष्टयन्नाह-

पाईणं पडिणं वा वि, उद्धं अणुदिसामवि ।
अहे दाहिणओ वा वि, दहे उत्तरओ वि य ॥ ३४ ॥

अग्निरिति शेषः । प्राच्यां प्रतीच्यां वाऽपि, पूर्वायां पश्चिमायां चेत्यर्थः । ऊर्ध्वमनुदिश्वपि, सुपां सुपो भवन्तीति सप्तम्यर्थे षष्ठी । विदिक्ष्वपीत्यर्थः । अधो दक्षिणतश्चापि दहति दाह्यं भस्मीकरोति, उत्तरतोऽपि च सर्वासु दिक्षु विदिक्षु च दहतीति सूत्रार्थः ॥ ३४ ॥

यतश्चैवमतः-

सुयाण-मेस-माघाओ, हव्ववाहो न संसओ ।
तं पईवपयावट्ठा, संजया किं चि नारभे ॥ ३५ ॥

भूतानां स्थावराऽऽदीनामेष आघातः, आघातहेतुत्वादाघातः। हव्यवाहोऽग्निर्न संशय इत्येवमेवैतदाघात एवेति भावः। येनैवं तेन तं हव्यवाहं प्रदीपप्रतापनार्थमालोकशीतापनोदार्थं, संयताः साधवः किञ्चित्सङ्घट्टनाऽऽदिनाऽपि नारभन्ते, संयतत्वापगमनप्रसङ्गादिति सूत्रार्थः ॥ ३५ ॥

यस्मादेवम्-

तम्हा एयं वियाणित्ता, दोसं दुग्गइवड्ढणं ।
तेउकायसमारंभं, जावजीवाइं वज्जए ॥ ३६ ॥

व्याख्या पूर्ववत् ॥ ३६ ॥ दश० ६ अ०।

अथ तेजस्कायविधिमाह-

इंगालं अगणिं अचिं, अलायं वा सजोइयं ।
न उंजिज्जा ण घट्टिज्जा, नो णं निव्वावए मुणी ॥ ८ ॥

अङ्गारं ज्वालारहितम्, अग्निमयःपिण्डमनुगतम्, अर्चिः छिन्नज्वालम्, आलातमुल्मुकं वा; सज्योतिः साग्निकमित्यर्थः। किमित्याह-नोत्सिञ्चेत न घट्टयेत्, तत्रोञ्जनमुत्सेचनं प्रदीपाऽऽदेः, घट्टनं मिथश्चालनं, तथा नैनमग्निं निर्वापयेत् अभावमापादयेन्मुनिः साधुरिति सूत्रार्थः। दश० ८ अ०।

अग्निकायस्य मध्येन नैरयिकाऽऽदयो व्यतिव्रजन्ति-

णेरइयाणं भंते ! अगणिकायस्स मज्झं मज्झेणं वीईवएज्जा ?। गोयमा ! अत्थेगइए वीईवएज्जा, अत्थेगइए णो वीईवएज्जा। से केणट्ठेणं भंते ! एवं वुच्चइ-अत्थेगइए वीईवएज्जा, अत्थेगइए णो वीईवएज्जा ?। गोयमा ! णेरइया दुविहा पण्णत्ता। तं जहा-विग्गहगइसमावण्णगा य, अविग्गहगइसमावण्णगा य। तत्थ णं जे से विग्गहगइसमावण्णए णेरइए से णं अगणिकायस्स मज्झं मज्झेणं वीईवएज्जा, से णं तत्थ झियाएज्जा ?। णो इणट्ठे समट्ठे। णो खलु तत्थ सत्थं कमइ। तत्थ णं जे से अविग्गहगइसमावण्णए णेरइए से णं अगणिकायस्स मज्झं मज्झेणं णो वीईवएज्जा, से तेणट्ठेणं णो वीईवएज्जा। असुरकुमारे णं भंते ! अगणिकायपुच्छा ?। गोयमा ! अत्थेगइए वीईवएज्जा, अत्थेगइए णो वीईवएज्जा। से केणट्ठेणं० जाव णो वीईवएज्जा ?। गोयमा ! असुरकुमारा दुविहा पण्णत्ता। तं जहा-विग्गहगइसमावण्णगा य, अविग्गहगइसमावण्णगा य। तत्थ णं जे से विग्गहगइसमावण्णए असुरकुमारे, से णं जहेव णेरइए० जाव कमइ, तत्थ णं जे से अविग्गहगइसमावण्णए असुरकुमारे, से णं अत्थेगइए अगणिकायस्स मज्झं मज्झेणं वीईवएज्जा, अत्थेगइए णो वीईवएज्जा, जे णं वीईवएज्जा से णं तत्थ झियाएज्जा ?। णो इणट्ठे समट्ठे। णो खलु तत्थ सत्थं कमइ। से तेणट्ठेणं एवं० जाव थणियकुमारा एगिंदिया जहा णेरइया। बेइंदिया णं भंते ! अगणिकायस्स मज्झं मज्झेणं जहा असुरकुमारे तहा बेइंदिए वि, णवरं जे णं वीईवएज्जा से णं तत्थ झियाएज्जा ?। हंता ! झियाएज्जा। सेसं तं चेव० जाव चउरिंदिया। पंचिंदियतिरिक्खजोणिए णं भंते ! अगणिकायपुच्छा ?। गोयमा ! अत्थेगइए वीईवएज्जा, अत्थेगइए णो वीईवएज्जा। से केणट्ठेणं भंते !?। गोयमा ! पंचिंदियतिरिक्खजोणिया दुविहा पण्णत्ता। तं जहा-विग्गहगइसमावण्णगा य, अविग्गहगइसमावण्णगा य। विग्गहगइसमावण्णए जहेव णेरइए० जाव णो खलु तत्थ सत्थं कमइ, अविग्गहगइसमावण्णगा पंचिंदियतिरिक्खजोणिया दुविहा पण्णत्ता। तं जहा-इड्ढिपत्ता य, अणिड्ढिपत्ता य। तत्थ णं जे से इड्ढिप्पत्ते पंचिंदियतिरिक्खजोणिए णं से णं अत्थेगइए अगणिकायस्स मज्झं मज्झेणं वीईवएज्जा, अत्थेगइए णो वीईवएज्जा। जे णं वीईवएज्जा से णं तत्थ झियाएज्जा ?। णो इणट्ठे समट्ठे। णो खलु तत्थ सत्थं कमइ। तत्थ णं जे से अणिड्ढिपत्ते पंचिंदियतिरिक्खजोणिए, से णं अत्थेगइए अगणिकायस्स मज्झं मज्झेणं वीईवएज्जा, अत्थेगइए णो वीईवएज्जा, जे णं वीईवएज्जा से णं तत्थ झियाएज्जा ?। हंता ! झियाएज्जा। से तेणट्ठेणं० जाव णो झियाएज्जा। एवं मणुस्से वि, वाणमंतरजोइसियवेमाणिए जहा असुरकुमारे।

(नेरइयाणमित्यादि) इह च क्वचिदुद्देशकार्थसंग्रहगाथा दृश्यते। सा चेयम्-"नेरइय अगणिमज्झे, दस ठाणा तिरियपोग्गले देवे। पव्वयनिन्ती उल्लं-घणा य पल्लंघणा चेव ॥ १ ॥" इति। अर्थश्चास्या उद्देशकार्थावगमगम्य इति। (णो खलु तत्थ सत्थं कमइ त्ति) विग्रहगतिसमापन्नो हि कार्मणशरीरत्वेन सूक्ष्मः, सूक्ष्मत्वाच्च तत्र शस्त्रमग्न्यादिकं न क्रामति। (तत्थ णं जे से इत्यादि) अविग्रहगतिसमापन्न उत्पत्तिक्षेत्रोपपन्नोऽभिधीयते, न तु ऋजुगतिसमापन्नः, तस्येह प्रकरणेऽनधिकृतत्वात्। स चाग्निकायस्य मध्येन व्यतिव्रजति, नारकक्षेत्रे बादराग्निकायस्याभावान्मनुष्यक्षेत्र एव तद्भावात्। प्रज्ञापनाऽध्ययनाऽऽदिषु श्रूयते-"हुयासणे जलंतम्मि, दड्ढपुव्वो अणेगसो।" इत्यादि। तदग्निसदृशऽऽख्यान्तरापेक्षयाऽवसेयम्। संजायन्ते च तथाविधशक्तिमन्ति ऽङ्गाराणि तेजोलेश्याऽऽख्यवदिति। असुरकुमारसूत्रे विग्रहगतिको नारकवत्, अविग्रहगतिकस्तु कोऽप्यग्नेर्मध्येन व्यतिव्रजेत् यो मनुष्यक्षेत्रमागच्छति, यस्तु न तत्रागच्छत्यसौ न व्यतिव्रजेत्, व्यतिव्रजन्नपि च न ध्मायते वा, ध्मायतेऽतो न खलु तत्र शस्त्रं क्रामते, सूक्ष्मत्वाद्वैक्रियशरीरस्य, शीघ्रत्वाच्च तद्गतेरिति। (एगिंदिया जहा नेरइय त्ति) कथम्?, यतो विग्रहे तेऽप्यग्निमध्येन व्यतिव्रजन्ति, सूक्ष्मत्वान्न दह्यन्ते च, अविग्रहगतिसमापन्नकाश्च तेऽपि नाग्नेर्मध्येन व्यतिव्रजन्ति, स्थावरत्वात्, यच्च तेजोवायूनां गतित्रसतयाऽग्निमध्येन व्यतिव्रजनं दृश्यते, तदिह न विवक्षितमिति संज्ञाप्यते, स्थावरत्वमात्रस्यैव विवक्षितत्वात्। स्थावरत्वे ह्यस्ति कथञ्चित्तेषां गत्यभावो, यदपेक्षया स्थावरास्ते व्यपदिश्यन्ते, अन्यथाऽधिकृतव्यपदेशस्य निर्निबन्धनता स्यात्। यद्वा-द्वयादेरारभ्येण पृथिव्यादीनामग्निमध्येन व्यतिव्रजनं दृश्यते, तदपि न विवक्षितम्, स्वातन्त्र्यकृतस्यैव तस्य विवक्षणात्। चूर्णिकारः पुनरेवमाह-"एगिंदियाणं गई नत्थि त्ति।"

ते न गच्छन्ति । "एगे वाउक्कायाइपरपेरणेसु गच्छंति, विग्गहिं-ज्जंति य" इति ॥ पञ्चेन्द्रियतिर्यक्सूत्रे-(इड्ढिपत्ता य त्ति) वैक्रिय-लब्धिसम्पन्नाः (अत्थेगइए अगणिकायस्सेत्यादि) अस्त्येक-कः कश्चित्पञ्चेन्द्रियतिर्यग्योनो मनुष्यलोकवर्ती स तमग्निकायस-म्भवात्तन्मध्ये न व्यतिव्रजेत्। यस्तु मनुष्यक्षेत्राद् बहिर्नासावग्ने-र्मध्येन व्यतिव्रजेत्, अग्नेरेव तत्राभावात्, तदन्यो वा; तथाविध-सामग्र्यभावात्। (णो खलु तत्थ सत्थं कमइ त्ति) वैक्रियोऽऽदि-लब्धिमति पञ्चेन्द्रियतिरश्चि नाग्न्यादिकं शस्त्रं क्रामत इति । भ० १४ श० ५ उ० । (अग्नेरुज्ज्वालकः प्रज्वालको वा महाकर्म्मे-ति काश्चोदायिप्रश्नेन "अगणिउत्थिय" शब्दे प्रथमभागे ४४७ पृष्ठे विचारितम्)

अथ अङ्गारकारिकासु तेजस्कायस्थितिः-

इंगालकारियाए णं भंते! अगणिकाए केवइयं कालं संचि-ट्ठइ ? । गोयमा ! जहण्णेणं अंतोमुहुत्तं, उक्कोसेणं तिण्णि राई-दियाइं अण्णे वि त्थ वाउयाए वुक्कमइ, ण विणा वाउयाएणं अगणिकाए उज्जलइ । पुरिसे णं भंते ! अयं अयकोट्ठंसि अयोमएणं संडासएणं उव्विहमाणे वा पविहमाणे वा कइ-किरिए ? । गोयमा ! जावं च णं से पुरिसे अयं अयकोट्ठंसि अयोमएणं संडासएणं उव्विहिंति वा, पविहिंति वा, तावं च णं से पुरिसे काइयाए० जाव पाणाइवायकिरिया पंचहिं किरियाहिं पुट्ठे, जेसिं पि णं जीवाणं सरीरेहिंतो अयमुव्व-त्तिए अयकोट्ठे णिव्वत्तिए संडासए णिव्वत्तिए इंगाला णि-व्वत्तिया इंगालकड्ढिणी णिव्वत्तिया भंडा णिव्वत्तिया, ते वि णं जीवा काइयाए० जाव पंचहिं किरियाहिं पुट्ठा ॥

(इंगालकारियाए त्ति) अङ्गारान् करोतीति अङ्गारकारि-का अग्निशकटिका, तस्याम्, न केवलं तस्यामग्निकायो भव-ति (अण्णे वि त्थ त्ति) अन्योऽप्यत्र वायुकायो व्युत्क्रामति। यत्राग्निस्तत्र वायुरिति कृत्वा । कस्मादेवमित्याह-(ण वि-णेत्यादि) भ० १६ श० १ उ० । सूत्र० । नि० चू० । (तेज-स्कायस्य आहारः ' आहार ' शब्दे द्वितीयभागे ४११ पृष्ठे उक्तः) (तेजस्कायस्य प्रतिसेवना ' पडिसेवणा ' शब्दे वक्ष्यते) (ओदनाऽऽदयः किंशरीरा इति ' अगणिजीवसरीर ' शब्दे प्रथमभागे १५६ पृष्ठे उक्ताः)

तेजपुट्ठ—तेजःस्पृष्ट—त्रि० । तेजसा अग्निना स्पृष्टो दह्यमानः । अग्निना दह्यमाने, सूत्र० १ श्रु० ३ अ० १ उ० ।

तेजप्पभ—तेजःप्रभ—पुं० । अग्निकुमारेन्द्रयोरग्निसिंहाग्निमान-वयोः पश्चिमदिग्लोकपाले, स्था० ४ ठा० १ उ० । अग्निकुमारे-न्द्रयोरग्निसिंहाग्निमानवयोरुत्तरदिग्लोकपाले, भ० ३ श० ७ उ० ।

तेजप्फास—तेजःस्पर्श—पुं० । उष्णस्पर्शे, आचा० १ श्रु० ६ अ० ३ उ० । उष्णस्पर्शश्च आतापनाऽऽदिकाले । आचा० १ श्रु० ६ अ० २ उ० ।

तेउलेस्सा—तेजोलेश्या—स्त्री० । तेजोऽग्निज्वाला, तद्वर्णानि यानि द्रव्याणि, लोहितानीत्यर्थः । तत्साचिव्याज्जाता तेजोलेश्या । स्था० १ ठा० । विशिष्टतपोजन्यलब्धिविशेषप्रभवायां तेजोज्वा-लायां लेश्यायां सुखासिकायाम्, विपा० १ श्रु० १ अ० । ठा० । सं० प्र० । जं० ।

निर्ग्रन्थानामेव लब्धिविशेषस्य कारणत्रयमाह-

तिहिं ठाणेहिं समणे णिग्गंथे संखित्तविउलतेउलेस्से भवइ । तं जहा—आयावणयाए, खंतिखमाए, अपाणगेणं तवोकम्मेणं ।

(तिहिमित्यादि) संक्षिप्ता लघूकृता विपुलाऽपि विस्तीर्णाऽपि सती, अन्यथाऽऽदित्यबिम्बवद् दुर्दर्शा स्यादिति । तेजोलेश्या तपोविशेषजं तेजस्वित्वं तैजसशरीरपरिणतिरूपं महाज्वाला-कल्पं येन स संक्षिप्तविपुलतेजोलेश्यः, आतापनानां शीताऽऽदि-भिः शरीरस्य सन्तापनानां भाव आतापनता, शीताऽऽतपाऽऽदेः सहनमित्यर्थः । तया; क्षान्त्या क्रोधनिग्रहेण क्षमा मर्षणं, न त्वशक्ततयेति क्षान्तिक्षमा,तया; अपानकेन पारणककालादन्यत्र तपःकर्मणा षष्ठाऽऽदिनेति। अभिधीयते च भगवत्याम्-"जे णं गो-सालो मंखपुत्ते तवेणं तेएणं हतसोभे कए समाणे आजीवियसंघ-संपरिवुडे हालाहलाए कुंभकारीए कुंभकारावणंसि आजीवियस्स थेरस्स अंतियं हव्वमागए, तए णं से गोसाले मंखलिपुत्ते आजीवियसंघसंपरिवुडे हालाहलाए कुंभकारीए कुंभकारावणंसि आजीवियस्स थेरस्स अंतियं हव्वमागयं पासित्ता एवं वयासी-किं भंते ! अहं गोसाला ! तुमं चिरस्सावि अवक्कंतो समाणो अचिरस्सावि इहमागओ, तं कहं भंते ! एयं मन्नसि ? । तए णं से गोसाले मंखलिपुत्ते आजीवियसंघसंपरिवुडे आजीवियसमयं उवसामेमाणे उवसामेमाणे अवक्कमेमाणे अवक्कमेमाणे एवं वयासी-अंबे कूडागारसालादिट्ठंते, अंबे पउमे य महासुमिणे । सीहे थिग्गल दुद्धी, सत्त सुमिणा पासित्ता णं पडिबुद्धे ॥ १ ॥ अंबे त्ति हे आजीविकाः ! कूटाकारशालादृष्टान्तः, अंबे त्ति हे आजीविकाः ! पद्मं च महास्वप्नः । सिंहो थिग्गलं दुग्धी, सप्त स्वप्नान् दृष्ट्वा प्रतिबुद्धः ॥ १ ॥ इति । स्था० ३ ठा० ३ उ० ।

आत्मज्ञानमग्नस्य वाच्यमस्य तेजोलेश्या युज्यत इत्याह-

तेजोलेश्याविवृद्धिर्या, साधोः पर्यायवर्द्धितः ।
ज्ञापिता भगवत्यादौ, सेत्थंभूतस्य युज्यते ॥ ५ ॥

टीका सुगमा । अष्ट० २ अष्ट० ।

जे इमे अज्जत्ताए समणा णिग्गंथा विहरंति, एएणं क-स्स तेउलेस्सं वीईवयइ ? । गोयमा ! मासपरियाए समणे णिग्गंथे वाणमंतराणं देवाणं तेउलेस्सं वीईवयइ । दुमासप-रियाए समणे णिग्गंथे असुरिंदवज्जियाणं भवणवासीणं देवाणं तेउलेस्सं वीईवयइ । एवं एएणं अभिलावेणं तिमा-सपरियाए समणे णिग्गंथे असुरकुमाराणं देवाणं तेउलेस्सं वीईवयइ । चउमासपरियाए समणे णिग्गंथे गहगणणक्ख-त्ततारारूवाणं जोइसियाणं देवाणं तेउलेस्सं वीईवयइ । पंचमासपरियाए समणे णिग्गंथे चंदिमसूरियाणं जोइसि-याणं जोइसिराईणं तेउलेस्सं वीईवयइ । छम्मासपरियाए समणे णिग्गंथे सोहम्मीसाणाणं देवाणं । सत्तमासपरियाए सणंकुमारमाहिंदाणं देवाणं । अट्ठमासपरियाए समणे णि-ग्गंथे बंभलोगलंतगाणं देवाणं तेउलेस्सं वीईवयइ । णव-मासपरियाए समणे णिग्गंथे महासुक्कसहस्साराणं देवाणं तेउलेस्सं वीईवयइ । दसमासपरियाए समणे णिग्गंथे आण-यपाणयआरणऽच्चुयाणं देवाणं । एक्कारसमासपरियाए समणे णिग्गंथे गेवेज्जगदेवाणं । बारसमासपरियाए समणे णिग्गंथे अणुत्तरोववाइयाणं देवाणं तेउलेस्सं वीईवयइ । तेण परं सुक्के सुक्काजिजाए भवित्ता, तओ पच्छा सिज्झइ० जाव अंतं करेइ ।

(जे इमे इत्यादि) य इमे प्रत्यक्षाः (अज्जत्ताए त्ति) आर्य-तया पापकर्मवहिर्भूततया, अधुनातनतया वा अधुनातनतया, वर्त-मानकाले इत्यर्थः । (तेउलेस्सं ति) तेजोलेश्यां सुखासिकां,

तेजोलेश्या हि प्रशस्तलेश्योपलक्षणं, सा च सुखासिकाहेतुरिति कारणे कार्योपचारात् तेजोलेश्याशब्देन सुखासिका विवक्षितेति । (वीईवयंति) व्यतिव्रजन्ति व्यतिक्रामन्ति । (असुरिंदवज्जियाणं ति) चमरबलिवर्जितानाम्, (तेण परं ति) ततः संवत्सरात्परतः । (सुक्के त्ति) शुक्लो नामाऽनिन्द्यवृत्तोऽमत्सरी कृतज्ञः सदारम्भी हितानुबन्ध इति, निरतिचारचरण इत्यन्ये । (सुक्काभिजाय त्ति) शुक्लाभिजात्यः, परमशुक्ल इत्यर्थः । अत एवोक्तम्-"आकिञ्चन्यं मुख्यं, ब्रह्मापि परं सदागमविशुद्धम् । सर्वं शुक्लमिदं खलु, नियमात्संवत्सरादूर्द्धम् ॥१॥" एतच्च श्रमणविशेषमेवाऽऽश्रित्योच्यते, न पुनः सर्व एवैवंविधो भवतीति । भ० १४ श० ९ उ० । अथ गोशालः प्रभुमागत्याप्राक्षीत्-तेजोलेश्या कथं भवति ? । स्वाम्याह-नैरन्तर्येण षष्ठपारणके मुष्टिमध्यगतकुल्माषपिण्डिकया एकेन च पानीयचुलुकेन यापयतः षण्मासैर्भवति । आ० क० । वर्णतो-वह्निज्वालाशुकमुखकिंशुकतरुणार्कहिङ्गुलकाऽऽदिलोहितद्रव्यसमानवर्णैः, रसतः-परिणताऽऽम्रसुपक्वकपित्थाऽऽदिसमधिकरसैः, गन्धतः-विचिकिलपाटलाऽऽदिसमधिकगन्धैः, स्पर्शतः-शाल्मलीफलतूलाऽऽदिसमधिकस्पर्शैः तेजोवर्गद्रव्यैर्निष्पन्नत्वात्तैजसी संज्ञा । (५ गा०) तेजोवर्गद्रव्यैर्निष्पन्ने लेश्याभेदे, पा० । पं० व० । उत्त० । स० । तेजोलेश्यायाः पुद्गलाः सचित्ताः, अचित्ता वेति प्रश्ने, उत्तरम्-लब्धिः पुद्गलरूपा न भवति, शक्तिरूपा भवति, परं तेजोलेश्यापुद्गला जीवेन मुखाज्जीवप्रदेशसहिता निष्कासिताः, तस्माज्जीवप्रयोगनिष्कासितत्वात्सचित्ता ज्ञायन्त इति । ७४ प्र० । सेन० ३ उल्ला० ।

तेउलेस्सालद्धि-तेजोलेश्यालब्धि-स्त्री० । क्रोधाऽऽध्मिक्यात्प्रतिपन्थिनं प्रति सुखेनानेकयोजनप्रमाणक्षेत्राऽऽश्रितवस्तुदहनदक्षतीव्रतरतेजोलेश्यानिसर्जनशक्तौ, प्रज्ञ० २७० द्वार ।

तेउसमुग्घाय-तैजससमुद्घात-पुं० । तेजसि विषये भवस्तैजसः, स चासौ समुद्घातश्च तैजससमुद्घातः । प्रज्ञ० २३१ द्वार । तेजोलेश्याविनिर्गमकालभाविनि तैजसनामकर्मपुद्गलपरिशातहेतौ समुद्घातविशेषे, प्रज्ञा० ३४ पद । तेजोलेश्याविनिर्गमकालभाविनि तैजसशरीरनामकर्माऽऽश्रये समुद्घातभेदे, प्रज्ञ० २३२ द्वार । तथाहि-तेजोनिसर्गलब्धिमान् क्रुद्धः साध्वादिः सप्ताष्टौ पदानि अवष्वष्क्य विष्कम्भबाहल्याभ्यां शरीरमानमायामतस्तु संख्येययोजनप्रमाणं जीवप्रदेशदण्डं शरीराद् बहिः प्रक्षिप्य क्रोधविषयीकृतं मनुष्याऽऽदिं निर्दहति, तत्र च प्रभूतांस्तैजसशरीरनामकर्मपुद्गलान् शातयति । प्रज्ञ० २३१ द्वार । स्था० । आचा० । ('गोसालग' शब्दे तृतीयभागे १०१६ पृष्ठे वैश्यायनबालतपस्विना तेजोलेश्या गोशालकोपरि प्रयुक्ता, भगवता वीरेण वारितेति निदर्शितम्)

तेउसीह-तेजःसिंह-पुं० । अग्निकुमारेन्द्रयोरग्निसिंहाग्निमानवयोर्दक्षिणदिग्लोकपाले, स्था० ४ ठा० १ उ० । भ० ।

तेउसोय-तेजःशौच-न० । तेजसा अग्निना तद्विकारेण वा भस्मना शौचं तेजःशौचम् । शौचभेदे, स्था० ५ ठा० २ उ० ।

तेंमुअ-न० । देशी-तुम्बुरुणि, दे० ना० ५ वर्ग १७ गाथा ।

तेंदुमय-तेन्दुसक-पुं० । कन्दुके, ज्ञा० १ श्रु० ८ अ० ।

तेंवुरु-तेम्बुरु-पुं० । त्रीन्द्रियजीवभेदे, जी० १ प्रति० ।

तेकाल-त्रैकाल्य-न० । त्रयश्च ते कालाः, तेषां समाहारस्त्रैकाल्यम् । अतीतानागतवर्त्तमानरूपे काले, दर्श० ५ तत्त्व ।

तेगारपव्वय-त्र्याकारपर्वत-पुं० । स्वनामख्याते पर्वते, यत्र सहस्रफणी पार्श्वनाथः पूज्यते । ती० ४ कल्प ।

तेगिच्च-चैकित्स्य-न० । चिकित्साकर्मणि, बृ० १ उ० । व्य० । कल्प० । "तिविहे तेगिच्चम्मि उ, लज्जुय वाउलणसाहणा चेव । पण्णवणमणिच्छंते, दिट्ठंतो भेमिपोयाहिं ॥ १ ॥" इति । व्य० १ उ० । नि० चू० । (आचार्याऽऽदीनां चिकित्सा 'पच्चित्त' शब्दे व्याख्यास्यते)

तेगिच्चायण-चैकित्सायन-त्रि० । चिकित्सगोत्रापत्ये, जं० ४ वक्ष० ।

तेगिच्छिदह-चैकित्स्यह्रद-पुं० । निषधपर्वतस्थे धृतिदेवताके स्वनामख्याते ह्रदे, स्था० २ ठा० ३ उ० ।

तेजलपुर-तेजलपुर-न० । सुराष्ट्रदेशस्थिते स्वनामख्याते पुरे, ती० । यत्र श्रीपार्श्वप्रतिमा पूज्यते । " तेजपालमंतिणो गिरिनारतलहे निअनामंकिअतेजलपुरस्स पुव्वदिसाए उग्गसेणगढं नाम दुग्गं दुगाइनाहप्पमुहजिणमंदिरराहिट्ठं विज्जइ, तस्स य तिण्णि नाम विज्जाइं पसिद्धाइं । तं जहा- उग्गसेणगढं ति वा, खंगारगढं ति वा, जुण्णदुग्गं ति वा । गढस्स बाहिं दाहिणदिसाए चउरिअविइलदुयउवरिआए सुवामयाइं ठाणाइं चिट्ठंति । " ती० ४ कल्प ।

तेजस्सिया-तेजस्विता-स्त्री० । प्रतिवादिक्षोभाऽऽपादिकायां शरीरस्य स्फूर्तिमत्यां देदीप्यमानतायाम्, व्य० १ उ० ।

तेडु-पुं० । देशी-शलभे, पिशाचे च । दे० ना० ५ वर्ग २३ गाथा ।

तेण-स्तेन-त्रि० । चौरे, स्था० ५ ठा० ३ उ० । आचा० । सूत्र० । आव० । तं० । ध० । दश० । व्य० । "तेणा दुविहा तिविहा वा ।" व्य० २ उ० । "णाणातिकारणेहिं गममाणे अंतरा तेणा भवंति ।" नि० चू० ५ उ० । बृ० । पं० भा० । पं० चू० । ग० ।

इयाणिं तेणो-

अक्कंतितो य तेणो, पागतितो गामदेसअद्धाणो ।
तक्करखणगतेणो, परूवणा होति कायव्वा ॥ ३६१ ॥

अप्पाणं बला हरंतो अक्कंतितो, राते हरंतो पागतितो, अधवा-राउलवग्गस्स अक्कंतितो पागयजणस्स हरति । उपागतिउमागतो हरंतो गामतेणो । सदेसे परदेसे व हरंतो देसतेणो । गामदेसंतरेसु हरंतो अंतरतेणो । पंथेसु हरंतो अद्धाणतेणो । तदेविक्कं करोतीति तक्करो, नो अन्नं किंचि किसिमादि करोतीति । खत्तं खणंतो खाणगतेणो ।

सो समासेण चउव्विहो तेणो-

दव्वे खेत्ते काले, भावे वा तेणगस्स निक्खेवो ।
एएसिं तु चउण्हं, पत्तेअपरूवणं वोच्छं ॥ ३६२ ॥

कंठा ।

इमो दव्वतेणो-

सचित्ते अचित्ते, य मीसए होंति दव्वतेणा उ ।
साहम्मिअण्णधम्मिय-गारत्थीहिं च नायव्वा ॥ ३६३ ॥

सचित्तं-दुपदचउप्पदादि, अचित्तं-हिरण्णाऽऽदि, मिस्सं-सभंडमत्तोवगरणं, अस्साऽऽदिफलादि वदेसो व सचित्ताचित्तं, तं पुण सचित्ताऽऽदि दव्वं साहम्मियाण अण्णधम्मियाण गारत्थियाण वा अवहरंतो दव्वतो तेणो । सो तिविहो-उक्कोसो, मज्झिमो, जहण्णो ।

इयाणिं खेत्तकालभावतेणो तिन्नि वि जुगवं भन्नति-

सगदेसपरविदेसग-अंतरतेणा य होंति खेत्तम्मि ।
राइं दिवा व काले, भावम्मि य नाणतेणा तु ॥ ३६४ ॥
हयगयराईलच्छी-माणिक्काइं तु तेणो उक्कोसो ।
गोमहिसखेत्तखणखा-रियाणि तेणो य मज्झिमओ । ३६५ ।
गंठीछेदगपंथिजण-दव्वहरो वा जहण्णतेणो उ ।
एक्केको वि य एत्तो, पडिगपडिच्छुग्गतेणो उ ॥ ३६६ ॥

सदेसतो, परदेसतो, एतेसिमंतरे वा हरंतो खेत्ततेणगो । रातो वा दिया वा हरंतो कालतेणो । नाणतेणो-णाणदंसणचरित्ते हरंतो । हयगयराईलच्छिमाणिक्के हरंतो उक्कोसो । गोमहिसखेत्तखणखारियाऽऽदि वा हरंतो मज्झिमो । पंथियजणमोसगो, गंठिभेदगो, असणाऽऽदि वा हरंतो जहन्नो । एक्केके चउप्पगारा इमे-तेणो, तेणतेणो, पडिच्छगो, पडिच्छगपडिच्छगो ।

इमे उदाहरणा तिसु वि-

गोविंदज्जा णाणे, दंसणे सत्थट्ठ हेतुगट्ठा य ।
एवं वि गआ चरणा, उदायिवहगादिया चरणे ॥ ३६७ ॥
सचित्तं अचित्तं, च मीसगं तेणियं कुणति जो उ ।
समणाण व समणीण व, न कप्पती तारिसे दिक्खा ३६८

गोविंदो णाम णिक्खू, सो एगेणाऽऽयरिएण वादे जितो अट्ठारस वारा । ततो तेण चिंतियं-सिक्खंतसरूवं जाव एतेसिणो लब्भंति, तावेते जेतुं न सक्किता । ताहे सो णाणदंसणचरणट्ठा तस्सेवाऽऽयरियस्स अंते णिक्खंतस्स य सामाइयाऽऽदिपढंतस्स लद्धं संमत्तं । ततो गुरुं वंदित्ता भणति-देहि मे वते । भणु दत्ताणि ते णाणाणि । तेण सब्भावो कहितो । ताहे गुरुणा दत्ताणि से वयाणि । पच्छा तेण एगिंदियजीवसाहणा गोविंदणिज्जुत्ती कया । एस णाणतेणो । (एष चैवार्थो ' गोविंदणिज्जुत्ति ' शब्दे तृतीयभागे १०१२ पृष्ठे प्रदर्शितः) एवं दंसणपभावगसत्थट्ठा, कक्कडगमादिहेतुगट्ठा वा जो णिक्खमति, सो दंसणतेणो । जो एवं करणट्ठा चरणं गेण्हति, भमिउं वा गंतुकामो, जहा वा रण्णो वहणट्ठा उदायिमारगेण चरणं गहियं । आदिसद्दातो मधुरकोमइल्ला, एते सव्वे चरित्ततेणा । एते दव्वाऽऽदितेणा समणसमणीणं ण कप्पंति पव्वावेउं ।

पव्वाविते इमे दोसा-

वह बंधण जहवणं, व खिंसणं आसियावणं चेव ।
णिव्विसयं व णरिंदो, करेज्ज संघं व से भट्ठो ॥ ३६९ ॥

तस्स च, पव्वायगाऽऽयरियस्स वा, सव्वस्स वा गच्छस्स लक्खसाऽऽदिएहिं वहं करेज्ज, बंधणं णियलाऽऽदिएहिं, जहवणं मारणं, खिंसा-धिरत्थु ते पव्वज्जाए त्ति । आसियावणं-पव्वज्जातो, गामनगरातो वा धाडेज्ज । अहवा-णरेंदो रुट्ठो णिव्विसए करेज्ज, कुलगणसंघं वा णिव्विसयं करेज्ज । कुलगणसंघाण वा वहाऽऽदिए वीए पगारे करेज्ज ।

किं चान्यत्-

अयसो य अकित्ती वा, जड्डाहं वा तहिं पवयणस्स ।
तेसिं पि होइ एवं, सव्वे एयारिसा समणा ॥ ३७० ॥

पूर्ववत्, णवरि तेणत्थे वत्तव्वा, तेणं जो पव्वावेति, तस्स आणाऽऽदिया दोसा ।

इमं व से पच्छित्तं-

सग्गामे परगामे, सदेसे परदेसे अंतो बाहिं च ।
दिट्ठाऽदिट्ठा सोही, मासलहू अंते मूलाइं ॥ ३७१ ॥

सग्गामे, परग्गामे, सदेसे, परदेसे, एतेसिं अधो उक्कोसमज्झिमजहण्णा ठविज्जंति । एतेसिं अहो अंतो बाहिं ठविज्जति । एतेसिं अहो दिट्ठाऽऽदि । एतस्सऽधो मूलं ।

मूलं छेदो छग्गुरु, छल्लहु चत्तारि गुरुग लहुगा य ।
गुरुया लहुया मासो, रायविमुक्कस्स जा ताव ॥ ३७२ ॥

मूलाइ जाव मासलहुं ताव ठविज्जति । इमा वारणा-सग्गामे उक्कोसं अंतो दिट्ठं जो अवहरति, तं जो पव्वावेति तस्स मूलं; अदिट्ठे छेदो; बाहिं दिट्ठे छेदो, अदिट्ठे छग्गुरु; मज्झिमे छेदो अंतो छल्लहुए ठायति; जहन्ने छग्गुरुया अंतो चउगुरुगे ठायति । एवं परग्गामे अदिट्ठेकंतिवारणाए छेदादत्तं चउलहुए ठायति । सदेसे छग्गुरु, आदत्तं मासगुरुए ठायति । परदेसे छल्लहु, आदत्तं मासलहुए ठायति, अन्नधा वि वारिज्जंते एतदेव भवति । जम्हा एते दोसा तम्हा ण पव्वावेयव्वा तेणा ।

कारणतो पव्वावे-

मुक्को व मोइओ वा, अहवा वीसज्जितो नरिंदेणं ।
अच्चाणे परदेसे, दिक्खाए उत्तिमट्ठे वा ॥ ३७३ ॥

बंधणागारसोधणे मुक्को सयमणेण, अन्नेण वा दंमेण मोइओ, रण्णा वा विसज्जितो । जहा पन्नवो । अहवा मेयज्जऋषिघातवत् । अच्चाणे परदेसे वा उत्तिमट्ठं वा पडिवज्जंतो दिक्खिज्जति । तेण त्ति गतं । नि० चू० ११ उ० । वन्दनदोषविशेषे, प्रव० ।

हाणं परस्स दिट्ठिं, वंदंते तेणियं हवइ एअं ।
तेणो वि य अप्पाणं, गूहइ ओभावणा मा मे ॥ १६२ ॥

(हाणं परस्स त्ति) परस्याऽऽत्मव्यतिरिक्तस्य साधुश्रावकाऽऽदेर्दृष्टिं हित्वा वञ्चयित्वा वन्दमाने सति शिष्यैः स्तैन्यवन्दनकं भवति । एतदेवोत्तरार्द्धेन स्पष्टतरं व्याचष्टे-स्तेन इव तस्कर इवान्यसाध्वाद्यन्तर्द्धानेनाऽऽत्मानं गूहयति स्थगयति । कस्मादित्याह-(ओभावणा मा मे त्ति) नन्वसावप्यतिविद्वान् किमन्येषां वन्दनकं प्रयच्छतीत्येवंभूताऽपभ्राजना मम मा भूदित्यर्थः । प्रव० २ द्वार । ध० । बृ० । आ० चू० । (साधर्मिकाणामन्यधार्मिकाणां च स्तैन्यं कुर्वन् अनवस्थाप्यो भवतीति ' अणवठप्प ' शब्दे प्रथमभागे २९३ पृष्ठे उक्तम्)

तेणउइ-त्रिनवति-स्त्री० । ऽधिकायां नवतिसंख्यायाम्, " तेणउइ गणा, तेणउइ गणहरा । " स० ९२ सम० ।

तेणग-स्तेनक-त्रि० । चौरे, स्तेनकाश्चौरा विघ्नकरा भवन्ति । ग० ३ अधि० ।

तेणणाय-स्तेनज्ञात-न० । चौरोदाहरणे, पञ्चा० ६ विव० ।

तेणप्पओग-स्तेनप्रयोग-पुं० । स्तेनानां प्रयोगोऽभ्यनुज्ञानम्-हरत यूयमिति हरणक्रियायां प्रेरणेति यावत् । अथवा-स्तेनोपकरणानि कुशिकाकर्त्तरिकाघर्घरिकाऽऽदीनि, तेषामर्पणं विक्रयणं वा स्तेनप्रयोगः । तस्करप्रयोगे स्थूलाऽऽदत्ताऽदानविरते द्वितीयेऽतिचारे, ध० । अत्र च यद्यपि चौर्यं न करोमि न कारयामीत्येवं प्रतिपन्नव्रतस्य स्तेनप्रयोगे व्रतभङ्ग एव, तथापि किमधुना यूयं

निर्व्यापारास्तिष्ठत ?, यदि वो नक्काऽऽदि नास्ति, तदाऽऽहं तद्ददामि; भवदानीतमोषस्य वा यदि विक्रायको न विद्यते,तदाऽहं विक्रेष्ये इत्येवंविधवचनैश्चौरान् व्यापारयतः स्वकल्पनया तच्छ्यापारणं परिहरतो व्रतसापेक्षस्यासावतिचारः । इति द्वितीयोऽतिचारः । (४५ गा०) ध० २ अधि० ।

तेणाणुबंधि (ण्)-स्तेनानुबन्धिन्-पुं० । 'रुद्दज्झाण' शब्देऽर्थोऽस्य द्रष्टव्यः । ध० २ अधि० ।

तेणाहड-स्तेनाऽऽहृत-पुं० । चौराऽऽनीते स्थूलादत्ताऽऽदानविरते प्रथमेऽतिचारे, तत्सामर्थ्यमतिलोभात्काणक्रयेण गृह्णतोऽतिचरति तृतीयव्रतमित्यतिचारहेतुत्वात्स्तेनाऽऽहृतम् । अतिचारता चाऽस्य साक्षाच्चौर्यप्रवृत्तेः । उपा० १ अ० । वृ० । पञ्चा० । श्रा० । स्तेनाश्चौराः, तैर्धर्मानाऽऽनीतं किञ्चित्कुङ्कुमाऽऽदि देशान्तरात्स्तेनाऽऽहृतम् । आव० ६ अ० ।

तेणिक-स्तैनिक्य-न० । स्तेये, प्रश्न० ३ आश्र० द्वार ।

तेणिकहरणबुद्धि-स्तैनिक्यहरणबुद्धि-त्रि० । स्तेयेन हरणे बुद्धिर्येषां ते तथा । स्तेयहरणमतियुक्तेषु, प्रश्न० ३ आश्र० द्वार ।

तेणिस-तैनिस-त्रि० । तिनसान्निधानवृक्षसंबन्धिनि, प्र० ७ श० ६ उ० ।

तेण्ण-स्तैन्य-न० । चौर्ये, नि० चू० १ उ० ।

तेतल-तेतल-पुं० । धरणस्य नागकुमारेन्द्रस्य गन्धर्वानीकाधिपतौ, स्था० ७ ठा० ।

तेतलि (ण्)-तेतलिन्-पुं० । तेतलिपुरराजस्य कनकरथस्यामात्यपितरि, आ० म० १ अ० २ खण्ड । दर्श० । मनुष्यजातिभेदे, जं० १ वक्ष० ।

तेतलिसुय-तेतलिसुत-पुं० । तेतलिपुरराजस्य कनकरथस्यामात्ये, ज्ञा० ।

तत्कथा चैवम-

तेणं काळेणं तेणं समएणं तेतलिपुरे नामं नगरे होत्था । तस्स णं तेतलिपुरस्स बहिया उत्तरपुरच्छिमे दिसीभाए एत्थ णं पमयवणे णामं उज्जाणे होत्था । तत्थ णं तेतलिपुरे णयरे कणगरहे णामं राया होत्था । तस्स णं कणगरहस्स रण्णो पउमावती णामं देवी होत्था । तस्स णं कणगरहस्स रण्णो तेतलिपुत्ते णामं अमच्चे होत्था साममदामजेयदंडे । तत्थ णं तेतलिपुरे कलाए नामं मूसियारदारए होत्था, अड्ढे ०जाव अपरिभूए । तस्स णं भद्दा नामं भारिया होत्था । तस्स णं कलायस्स मूसियारदारगस्स धूया भद्दाए अत्तया पोट्टिला णामं दारिया होत्था, रूवेण य जोव्वणेण य उक्किट्ठा उक्किट्ठसरीरा । तए णं पोट्टिला दारिया अण्णया कयाइ एहाया सव्वालंकारविभूसिया चेडियाचक्कवालसद्धिं संपरिवुडा उप्पिं पासायवरगया आगासतलगंसि कणगमएणं तिंदूसएणं कीलमाणी विहरति । इमं च णं तेतलिपुत्ते अमच्चे एहाए आसखंधवरगए महया भमचमगरहआसवाहणियाए णिज्जायमाणे कलायस्स मूसियारदारगस्स गिहस्स अदूरसामंतेणं वीतीवयति । तते णं से तेतलिपुत्ते मूसियारदारगस्स गिहस्स अदूरसामंतेणं वीतीवयमाणे वीतीवयमाणे पोट्टिलं दारियं उप्पिं आगासतलगंसि कणगमएणं तिंदूसएणं कीलमाणी पासति; पासित्ता पोट्टिलाए दारियाए रूवेण य जोव्वणेण य लावण्णेण य०जाव अज्झोववण्णे कोडुंबियपुरिसे सद्दावेति, सद्दावेइत्ता एवं वयासी- एस णं देवाणुप्पिया ! कस्स दारिया, किंणामधेज्जा य ?। तए णं ते कोडुंबियपुरिसे तेतलिपुत्तं एवं वयासी-एस णं सामी ! कलायस्स मूसियारस्स धूया भद्दाए अत्तिया पोट्टिला णामं दारिया रूवेण य ०जाव सरीरा । तए णं से तेतलिपुत्ते आसवाहणियाओ पडिनियत्ते समाणे अब्भिंतरट्ठाणिज्जे पुरिसे सद्दावेति, सद्दावेत्ता एवं वयासी-गच्छह णं तुब्भे देवाणुप्पिया ! कलायस्स मूसियारदारगस्स धूयं भद्दाए अत्तयं पोट्टिलं दारियं मम भारियत्ताए वरेह । तए णं ते अब्भिंतरट्ठाणिज्जा पुरिसा तेतलिणा एवं वुत्ता समाणा हट्ठतुट्ठा करयल० तह त्ति जेणेव कलायस्स मूसियारस्स गिहे, तेणेव उवागया । तए णं से कलाए मूसियारए तेतलिपुत्ते पुरिसे एज्जमाणे पासति, पासित्ता हट्ठतुट्ठा आसणाओ अब्भुट्ठेइ,अब्भुट्ठेइत्ता सत्तट्ठपयाइं अणुगच्छति, अणुगच्छित्ता आसणेणं उवनिमंतेति । आसत्थे वीसत्थे सुहासणवरगए अब्भिंतरट्ठाणिज्जे पुरिसे एवं वयासी-संदिसह णं देवाणुप्पिया ! किमागमणप्पओयणं ?। तते णं ते अब्भिंतरट्ठाणिज्जा कलायं मूसियं एवं वयासी-अम्हं णं देवाणुप्पिया ! तव धूयं भद्दाए अत्तयं पोट्टिलं दारियं तेतलिपुत्तस्स अमच्चस्स भारियत्ताए वरेमो । तं जति णं जाणासि देवाणुप्पिया ! जुत्तं वा पत्तं वा सलाहणिज्जं वा सरिसो संजोगो वा, ता दिज्जउ णं पोट्टिला दारिया तेतलिपुत्तस्स, ता भण देवाणुप्पिया ! किं दलामो सुक्कं ?। तते णं कलाए मूसियारदारए ते अब्भिंतरट्ठाणिज्जे पुरिसे एवं वयासी-एस चेव देवाणुप्पिया ! मम सुक्के, जं णं तेतलिपुत्ते मम दारियानिमित्तेणं अणुग्गहं करेति । ते अब्भिंतरट्ठाणिज्जे पुरिसे विउलेणं असणपाणखाइमसाइमपुप्फवत्थ० जाव मल्लालंकारेणं सक्कारेति, संमाणेति, पडिविसज्जेति । तए णं कलायस्स मूसियारदारयस्स गिहातो पडिनिक्खमति, जेणेव तेतलिपुत्ते अमच्चे तेणेव उवागच्छइ, उवागच्छइत्ता तेतलिपुत्तं अमच्चं एयमट्ठं निवेदेति । तए णं कलाए मूसियारए अण्णया कयाइं सोहणंसि तिहिकरणणक्खत्तमुहुत्तंसि पोट्टिलं दारियं एहायं सव्वालंकार-

विजूसियं सीयं दुरूहइ, दुरूहित्ता मित्तणातिसद्धिं संपरिवुडे साओ गिहाओ पडिणिक्खमति, पडिणिक्खमित्ता सव्विड्ढीए० जाव रवेणं तेतलिपुरं णयरं मज्झंमज्झेणं जेणेव तेतलिस्स गिहे तेणेव उवागच्छइ, उवागच्छित्ता पोट्टिलं दारियं तेतलिपुत्तस्स अमच्चस्स सयमेव भारियत्ताए दलयति। तए णं तेतलिपुत्ते पोट्टिलं दारियं भारियत्ताए उवणीयं पासति, पासित्ता हट्ठतुट्ठे पोट्टिलाए सद्धिं पट्टयं दुरूहति, दुरूहित्ता सेयपीएहिं कलसेहिं अप्पाणं मज्जावेति, मज्जावेत्ता अग्गिहोमं कारेति, पाणिग्गहणं करेति, पोट्टिलाए भारियाए सद्धिं मित्तनाइ० जाव परियणं विउलेणं असणपाणखाइमसाइमेणं पुप्फवत्थ० जाव पडिविसज्जेति। तते णं से तेतलिपुत्ते पोट्टिलाए भारियाए अणुरत्ते अविरत्ते उरालाइं भोगभोगाइं० जाव विहरति। तते णं से कणगरहे राया रज्जे य रट्ठे य बले य वाहणे य कोसे य कोट्ठागारे य अंतेउरे य मुच्छिए गिद्धिए अभिसमण्णागए जाए पुत्ते वियंगेति, अप्पेगइयाणं हत्थंगुलियाइं छिंदति, अप्पेगइयाणं हत्थे अंगुट्ठए छिंदति, अप्पेगइयाणं पायंगुलियाओ छिंदति, एवं पायंगुट्ठए वि, एवं कण्णसक्कुलीए वि, एवं नासापुमाइं फालेति, एवं अंगमंगाइं वियंगेति। तए णं तीसे पउमावतीए देवीए अण्णया कयाइं पुव्वरत्तावरत्तकालसमयंसि अयमेयारूवे अज्झत्थिए चिंतिए मणोगए संकप्पे समुप्पज्जित्था-एवं खलु कणगरहे राया रज्जे य ०जाव पुत्ते वियंगेति ०जाव अंगमंगाइं वियंगेति, तं जइ णं अहं दारयं पयायामि तं सेयं खलु ममं तं दारगं कणगरहस्स रहस्सियं चेव संरक्खमाणीए संगोवेमाणीए विहरित्तए त्ति कट्टु एवं संपेहेति, संपेहेत्ता तेतलिपुत्तं अमच्चं सद्दावेति, सद्दावेत्ता एवं वयासी-एवं खलु देवाणुप्पिया ! कणगरहे राया रज्जे य ०जाव वियंगेति, तं जइ णं अहं देवाणुप्पिया ! दारगं पयायामि, तए णं तुमं कणगरहस्स रहस्सियं चेव अणुपुव्वेणं संरक्खमाणे संगोवेमाणे संवड्ढेहि। तते णं से दारए उम्मुक्कबालभावे ०जाव जोव्वणगमणुप्पत्ते तव मम य निक्खाभायणे भविस्सति। तते णं से तेतलिपुत्ते पउमावतीए देवीए एयमट्ठं पडिसुणेति, पडिसुणेत्ता पडिगए। तए णं पउमावती देवी पोट्टिला य अमच्ची समगमेव गब्भं परिवहंति, समगमेव गब्भं परिवहंति। तए णं सा पउमावती देवी नवण्हं मासाणं ०जाव पियदंसणं सुरूवं दारगं पयाया, जं रयणिं च णं पउमावती देवी दारगं पयाया तं चेव रयणिं पोट्टिला अमच्ची नवण्हं मासाणं विणिहायमावण्णियं दारियं पयाया। तए णं सा पउमावती देवी अम्मधाइं सद्दावेति, सद्दावेत्ता एवं वयासी-गच्छह णं तुमं देवाणुप्पिया ! अम्मो ! तेतलिपुत्तं रहस्सियं चेव सद्दावेहि। तए णं सा अम्मधाती तह त्ति एयमट्ठं पडिसुणेति, अंतेउरस्स अवदारेणं णिग्गच्छति, णिग्गच्छित्ता जेणेव तेतलिस्स गिहे तेणेव उवागच्छति, उवागच्छित्ता करयल० जाव एवं वयासी-एवं खलु भो देवाणुप्पिया ! पउमावई देवी सद्दावेति। तए णं तेतलिपुत्ते अम्मधाईए अंतिए एयमट्ठं सोच्चा हट्ठतुट्ठे अम्मधाईए सद्धिं साओ गिहाओ णिग्गच्छति, णिग्गच्छित्ता अंतेउरस्स अवदारेणं रहस्सियं चेव अणुप्पविसति, अणुप्पविसित्ता जेणेव पउमावई देवी तेणेव उवागच्छइ, उवागच्छित्ता करयल० एवं वयासी-संदिसह णं देवाणुप्पिए ! जं मए कायव्वं। तए णं सा पउमावती देवी तेतलिपुत्तं अमच्चं एवं वयासी-एवं खलु कणगरहे राया ०जाव वियंगेति, अहं च णं देवाणुप्पिया ! दारगं पयाया, तुमं च णं देवाणुप्पिया! तं दारगं गेण्हाहि ०जाव तव मम समए णिक्खाभायणे भविस्सति त्ति कट्टु तेतलिपुत्तस्स हत्थे दलयति। तते णं तेतलिपुत्ते पउमावतीए देवीए हत्थाओ दारगं गेण्हति, उत्तरिज्जेणं पिहेइ, अंतेउरस्स रहस्सियं अवदारेणं णिग्गच्छति, णिग्गच्छित्ता जेणेव सए गिहे जेणेव पोट्टिला भारिया तेणेव उवागच्छति, उवागच्छित्ता पोट्टिलं च एवं वयासी-एवं खलु देवाणुप्पिया ! कणगरहे राया रज्जे य ०जाव वियंगेति, अयं च णं दारए कणगरहस्स पुत्ते पउमावतीए देवीए अत्तए, तं णं तुमं देवाणुप्पिए! इमं दारगं कणगरहस्स रहस्सियं चेव अणुपुव्वेणं संरक्खाहि य, संगोवाहि य, संवड्ढेहि य, तए णं एस दारए उम्मुक्कबालभावे तव य मम य पउमावतीए य आहारे भविस्सइ त्ति कट्टु पोट्टिलाए पासे णिक्खिवति, णिक्खिवित्ता पोट्टिलाओ पासाओ तं विणिहायमावण्णियं दारियं गेण्हति, उत्तरिज्जेणं पिहेइ, पिहेइत्ता अंतेउरस्स अवदारेणं अणुप्पविसति, अणुप्पविसित्ता जेणेव पउमावती देवी तेणेव उवागच्छइ, उवागच्छित्ता पउमावतीए देवीए पासे ठावेति ०जाव पडिनिग्गते। तए णं तीसे पउमावतीए देवीए अंगपडियारियाओ पउमावतिं देविं विणिहायमावण्णियं च दारियं पासंति, पासित्ता जेणेव कणगरहे राया करयल० एवं वयासी-एवं खलु सामी ! पउमावतीए मतल्लियं दारियं पयाया। तए णं कणगरहे राया तीसे मतल्लियाए दारियाए नीहरणं करेति, बहूइं लोइयाइं मयकिच्चाइं करेति, करेइत्ता कालेणं विगयसोए जाए। तए णं से तेतलिपुत्ते कल्लं कोडुंबियपुरिसे सद्दावेइ, सद्दावेइत्ता एवं व-

यासी-खिप्पामेव चारगसालाए सोहणं करेह ०जाव ठिती वमिया, जम्हा णं अम्हे एस दारए कणगरहस्स रज्जे जाए, तं होऊणं दारए णामेणं कणगज्झए० जाव अलं भोगसमत्थे जाए। तए णं सा पोट्टिला अज्जया कयाइं तेतलिपुत्तस्स अमच्चस्स अणिट्ठा अमणुण्णा अकंता अप्पिया जाया यावि होत्था। णेच्छइ णं तेतलिपुत्ते अमच्चे पोट्टिलाए नामगोत्तमवि सवणयाए, किं पुण दरिसणं वा परिजोगं वा। तए णं तीसे पोट्टिलाए अण्णया कयाइं पुव्वरत्तावरत्तकालसमयंसि इमेयारूवे अज्झत्थिए चिंतिए पत्थिए मणोगए संकप्पे समुप्पज्जित्था-एवं खलु अहं तेतलिपुत्तस्स अमच्चस्स पुव्विं इट्ठा कंता पिया मणुण्णा आसि, इयाणिं अणिट्ठा अकंता अमणुण्णा अप्पिया जाया०जाव नेच्छइ तेतलिपुत्ते अमच्चे मम नामं०जाव परिजोगं वा ओहयमणसंकप्पा०जाव झियायइ। तते णं तेतलिपुत्ते अमच्चे पोट्टिलं ओहयमणसंकप्पं० जाव झियायमाणं पासति, पासइत्ता पोट्टिलं एवं वयासी-मा णं तुमं देवाणुप्पिए! ओहयमणसंकप्पे, तुमं मम महाणससि विउलं असणं पाणं खाइमं साइमं उवक्खडावेहि, उवक्खडावेइत्ता बहूणं समणमाहणाणं०जाव वणीवगाणं देयमाणी य देवावेमाणी य विहरह। तए णं सा पोट्टिला तेतलिपुत्तेणं अमच्चेणं एवं वुत्ता समाणी हट्ठतुट्ठा तेतलिपुत्तस्स अमच्चस्स एयमट्ठं सम्मं पडिसुणेति, पडिसुणेइत्ता कल्लाकल्लिं महाणससि विपुलं असणं पाणं खाइमं साइमं०जाव देवावेमाणी विहरति। तेणं कालेणं तेणं समएणं सुव्वयाओ णामं अज्जियाओ इरियासमियाओ०जाव गुत्तबंभयारिणीओ बहुस्सुयाओ बहुपरिवाराओ पुव्वाणुपुव्विं जेणेव तेतलिपुरे णयरे तेणेव उवागच्छइ, उवागच्छित्ता अहापडिरूवं उग्गहं ओगिण्हित्ता संजमेणं तवसा अप्पाणं भावेमाणीओ विहरंति। तए णं तासिं सुव्वयाणं अज्जाणं एगे संघाडए पढमाए पोरिसीए सज्झायं करेति० जाव अडमाणीओ तेतलिस्स गिहं अणुपविट्ठाओ। तए णं सा पोट्टिला ताओ अज्जाओ एज्जमाणीओ पासति, पासइत्ता हट्ठतुट्ठा आसणाओ अब्भुट्ठेति, अब्भुट्ठित्ता वंदइ, णमंसति, वंदित्ता णमंसित्ता विउलेणं असणं पाणं खाइमं साइमं पडिलाभेइ० पडिलाभित्ता एवं वयासी-एवं खलु अहं अज्जाओ! तेतलिपुत्तस्स अमच्चस्स पुव्विं इट्ठा कंता पिया मणुण्णा आसि, इयाणिं अणिट्ठा अकंता अप्पिया अमणुण्णा० जाव दंसणं वा परिभोगं वा। तं तुब्भे णं अज्जाओ! बहुणायाओ बहुसिक्खियाओ बहुपढियाओ, तुब्भे बहूणि गामागर० जाव आहिंडेह, बहूणं राईसर० जाव गेहाइं अणुपविसह, तं अत्थि याइं जे अज्जाओ! केइ कहिं वि चुण्णजोए वा मंतजोए वा कम्मणजोए वा कम्मजोए वा हियउड्डावणे वा कायउड्डावणे वा आभिओगिए वा वसीकरणे वा कोउयकम्मे वा भूइकम्मे वा कंदे मूले छल्ली वल्ली मूलिया वा ओसहे वा भेसज्जे वा उवलद्धपुव्वे, जेणाहं तेतलिपुत्तस्स अमच्चस्स पुणरवि इट्ठा कंता पिया मणुण्णा भवेज्जामि?। तए णं ताओ अज्जाओ पोट्टिलाए एवं वुत्ताओ समाणीओ दो वि कण्णे ठायंति, पोट्टिलं एवं वयासी-अम्हे णं देवाणुप्पिए! समणीओ निग्गंथीओ० जाव गुत्तबंभयारिणीओ, नो खलु कप्पति अम्हं देवाणुप्पिए! एयप्पयारं कण्णे वि निसामेत्तए, किमंग! पुण उवदिसित्तए वा, आयरियत्तए वा। अम्हे णं तव देवाणुप्पिए! विचित्तं केवलिपण्णत्तं धम्मं परिकहेज्जामो। तए णं सा पोट्टिला ताओ अज्जाओ एवं वयासी-इच्छामि णं अज्जाओ! तुब्भं अंतिए केवलिपण्णत्तं धम्मं णिसामित्तए। तए णं ताओ अज्जाओ पोट्टिलाए विचित्तं धम्मं परिकहेंति। तए णं सा पोट्टिला धम्मं सोच्चा णिसम्म हट्ठतुट्ठा एवं वयासी-सद्दहामि णं अज्जाओ! निग्गंथं पावयणं पत्तिए०जाव से जहेयं तुब्भे वदह, इच्छामि णं अहं तुब्भं अंतिए पंचाणुव्वइयं०जाव गिहिधम्मं पडिवज्जित्तए। अहासुहं देवाणुप्पिया! मा पडिबंधं करेह। तए णं सा पोट्टिला ताहिं अज्जाणं अंतिए पंचाणुव्वयं० जाव गिहिधम्मं पडिवज्जति, ताओ अज्जाओ वंदइ, नमंसति, नमंसइत्ता पडिविसज्जेति। तए णं सा पोट्टिला समणोवासिया जाया० जाव पडिलाभेमाणा २ विहरइ। तए णं तीसे पोट्टिलाए अण्णया कयाइं पुव्वरत्तावरत्तकालसमयंसि कुडुंबजागरियं जागरमाणीए अयमेयारूवे अज्झत्थिए चिंतिए पत्थिए मणोगए संकप्पे समुप्पज्जित्था-एवं खलु अहं तेतलिपुत्तस्स पुव्विं इट्ठा कंता पिया मणुण्णा आसि, इयाणिं अणिट्ठा अकंता अप्पिया अमणुण्णा० जाव परिभोगं वा। तं सेयं खलु ममं सुव्वयाणं अज्जाणं अंतिए पव्वइत्तए, एवं संपेहेति, संपेहेइत्ता कल्लं पाओ जेणेव तेतलिपुत्ते अमच्चे तेणेव उवागच्छइ, उवागच्छइत्ता करयलपरिग्गहियं एवं खलु देवाणुप्पिया! मए सुव्वयाणं अज्जाणं अंतिए धम्मे निसंते०जाव अब्भणुण्णाए पव्वइत्तए। तए णं तेतलिपुत्ते पोट्टिलं एवं वयासी-एवं खलु तुमं देवाणुप्पिए! मुंमे भवित्ता पव्वइया समाणी कालमासे कालं किच्चा अण्णयरेसु देवलोएसु देवत्ताए उववज्जिहिसि, तं जइ णं तुमं देवाणुप्पिए! ममं ताओ देवलोगाओ आगम्म केवलिपन्नत्ते धम्मे बोहेहि, तो अहं विसज्जेमि, अह णं तुमं मम ण संबोहेसि, तो ण विसज्जेमि। तए णं सा पोट्टिला तेतलिपुत्तस्स एयमट्ठं पडिसुणेति। तए णं तेतलिपुत्ते विउलं असणं पा-

णं खाइमं साइमं उवक्खडावेति मित्तनाइ० जाव आमंतेति, आमंतेत्ता ०जाव संमाणेति, पोट्टिलं दारियं०जाव पुरिससहस्सवाहिणीयं सीयं दुरूहइ, दुरूहइत्ता मित्तणाति० जाव परिवुडे सव्विड्ढीए०जाव रवेणं तेतलिपुरस्स मज्झं मज्झेणं जेणेव सुव्वयाणं अज्जाणं उवस्सए, तेणेव उवागच्छइ, उवागच्छित्ता सीयाओ पच्चोरुहति, पच्चोरुहइत्ता पोट्टिलं पुरओ कट्टु जेणेव सुव्वया अज्जा तेणेव उवागच्छति, उवागच्छइत्ता वंदाति, णमंसति, नमंसइत्ता एवं वयासी–एवं खलु देवाणुप्पिया ! मम पोट्टिला भारिया इट्ठा पिया कंता मणुण्णा एस णं संसारभयउव्विग्गा० जाव पव्वइत्तए, पडिच्छंतु णं देवाणुप्पिया ! सिस्सिणिभिक्खं दलयामि। अहासुहं देवाणुप्पिया ! मा पडिबंधं करेह। तए णं सा पोट्टिला सुव्वयाहिं अज्जाहिं एवं वुत्ता समाणी हट्ठतुट्ठा उत्तरपुरच्छिमे दिसीभाए सयमेव आभरणमल्लालंकारं मुयइ, मुयइत्ता सयमेव पंचमुट्ठियं लोयं करेइ, करेइत्ता जेणेव सुव्वयाओ अज्जाओ तेणेव उवागच्छइ, उवागच्छइत्ता वंदइ, नमंसइ, वंदित्ता नमंसइत्ता एवं वयासी–आलित्तेणं एवं जहा देवाणंदा० जाव इक्कारस अंगाइं बहूणि वासाणि सामन्नपरियायं पाउणित्ता मासियाए संलेहणाए अप्पाणं झोसेत्ता सट्ठिं भत्ताइं अणसणाइं आलोइय पडिक्कंता समाहिपत्ता कालमासे कालं किच्चा अन्नुत्तरेसु देवलोएसु देवत्ताए उववन्ना।तए णं से कणगरहे राया अन्नया कयाइं कालधम्मुणा संजुत्ते यावि होत्था।तते णं ते ईसरपभिइओ०जाव णीहरणं करेंति, करेंतित्ता अन्नमन्नं एवं वयासी–एवं खलु देवाणुप्पिया!कणगरहे राया रज्जे य०जाव पुत्ते वियंगं वित्ता अम्हे णं देवाणुप्पिया!रायाहीणा रायाहिट्ठिया रायाहीणकज्जा, अयं च णं तेतलिअमच्चे कणगरहस्स रन्नो सव्वट्ठाणेसु सव्वभूमियासु लद्धपच्चए दिन्नवियारे सव्वकज्जवड्ढावए यावि होत्था, तं सेयं खलु अम्हं तेतलिपुत्तं अमच्चं कुमारं जाइत्तए त्ति कट्टु अन्नमन्नस्स एयमट्ठं पडिसुणेंति, पडिसुणेइत्ता जेणेव तेतलिपुत्ते अमच्चे तेणेव उवागच्छइ, उवागच्छइत्ता तेतलिपुत्तं अमच्चं एवं वयासी–एवं खलु देवाणुप्पिया ! कणगरहे राया रज्जे य रट्ठे य० जाव वियंगेति, अम्हे य णं देवाणुप्पिया ! रायाहीणा० जाव रायाहीणकज्जा, तुमं च णं देवाणुप्पिया ! कणगरहस्स रन्नो सव्वट्ठाणेसु० जाव रज्जधुराचिंतए। तं जइ णं देवाणुप्पिया ! अत्थि केइ कुमारे रायलक्खणसंपन्ने रायाभिसेयारिहे, तए णं तुमं दलयाहि, जा णं अम्हे महया महया रायाभिसेएणं अभिसिंचामो। तए णं तेतलिपुत्ते अमच्चे तेसिं ईसरपभिए एवमट्ठं पडिसुणेति, पडिसुणेइत्ता कणगज्झयं कुमारं एहायं सव्वालंकारविभूसियं० जाव सस्सिरीयं करेत्ता तेसिं ईसर० जाव उवणेति, उवणेइत्ता एवं वयासी–एस णं देवाणुप्पिया ! कणगरहस्स रन्नो पुत्ते पउमावईए देवीए अत्तए कणगज्झए णामं कुमारे अभिसेयारिहे रायलक्खणसंपन्ने मए कणगरहस्स रन्नो रहस्सियं संवड्ढिए,तं एयं तुब्भे महया महया रायाभिसेएणं अभिसिंचह, सव्वं च से उट्ठाणपारियावणियं परिकहेइ। तए णं ते ईसरकणगज्झयं कुमारं महया महया रायाभिसेएणं अभिसिंचंति। तए णं कणगज्झए कुमारे राया जाए महया हिमवंतजाए० जाव रज्जं पालेमाणे विहरइ। तए णं सा पउमावती देवी कणगज्झयं रायं सद्दावेति। सद्दावेइत्ता एवं वयासी-एस णं पुत्ता ! तव रज्जे०जाव अंतेउरे य, तुमं च तेतलिपुत्तस्स अमच्चस्स पहावेणं, तेतलिपुत्तं अमच्चं आदाहि, परियाणाहि, सक्कारेहि, सम्माणेहि० तं अब्भुट्ठेहि, पज्जुवासेहि य, वयंतं पडिसंसाहेहि, अब्भासणेणं उवनिमंतेहि, भोगं च से अणुवड्ढेहि। तए णं से कणगज्झए पउमावतीए देवीए तह त्ति पडिसुणइ० जाव भोगं च संवड्ढेइ। तए णं से पोट्टिले देवे तेतलिपुत्तं अमच्चं अभिक्खणं अभिक्खणं केवलिपन्नत्तं धम्मं संबोहेति, नो चेव णं से तेतलिपुत्ते संबुज्झइ। तते णं तस्स पोट्टिलदेवस्स इमेयारूवे अब्भत्थिए पत्थिए चिंतिए मणोगयसंकप्पे समुप्पज्जित्था–एवं खलु कणगज्झए राया तेतलिपुत्तं आदाति० जाव भोगं च संवड्ढेति, तए णं से तेतलिपुत्ते अभिक्खणं अभिक्खणं संबोहेमाणे विधम्मे णो संबुज्झति, तं सेयं खलु मम कणगज्झयं रायं तेतलिपुत्ताओ विप्परिणामित्तए त्ति कट्टु एवं संपेहेति, संपेहेइत्ता कणगज्झयं तेतलिपुत्ताओ विप्परिणामेति। तए णं तेतलिपुत्ते कल्लं एहाए० जाव पायच्छित्ते आसखंधवरगए बहूहिं पुरिसेहिं सद्धिं संपरिवुडे साओ गिहाओ णिग्गच्छति, णिग्गच्छित्ता जेणेव कणगज्झए राया तेणेव पहारेत्थगमणाए। तए णं तेतलिपुत्तं अमच्चं जहा बहवे राईसरतलवर० जाव पभिइओ पासंति, ते तहेव आढायंति, परियाणंति, अब्भुट्ठेंति,सक्कारेंति, सम्माणेंति, अंजलिपरिग्गहियं करेंति। इट्ठाहिं कंताहिं पियाहिं मणुण्णाहिं मणामाहिं उरालाहिं कल्लाणाहिं सिवाहिं धन्नाहिं मंगल्लाहिं सस्सिरियाहिं वग्गूहिं आलवमाणा य संलवमाणा य पुरओ य पिट्ठओ य पासओ य मग्गओ य समणुगच्छंति। तए णं से तेतलिपुत्ते जेणेव कणगज्झए राया तेणेव उवागच्छइ। तए णं से कणगज्झए राया तेतलिपुत्तं अमच्चं एज्जमाणं पासति, पासेत्ता णो आढाति,णो परियाणइ, णो अब्भुट्ठेति, अणाढा-

यमाणे अपरियाणमाणे परंमुहे णं चिट्ठति। तते णं से तेतलिपुत्ते अमच्चे कणगज्झयस्स रण्णो अंजलिं करेति। तते णं से कणगज्झए राया अणाढिज्जमाणो तुसिणीए परंमुहे संचिट्ठति। तए णं तेतलिपुत्ते अमच्चे कणगज्झयं विप्परिणयं जाणित्ता भीए० जाव संजायभए एवं वयासी-रुट्ठे णं मम कणगज्झए राया, हीणे णं मम कणगज्झए राया, अवज्झाए णं मम कणगज्झए राया, तं ण णज्जइ णं मम केणइ कुमारेणं मारेहेति त्ति कट्टु भीए तत्थे० जाव सणियं सणियं पच्चोसक्केइ, पच्चोसक्केइत्ता तमेव आसवरं दुरूहेति, दुरूहइत्ता तेतलिपुरं णयरं मज्झं मज्झेणं जेणेव सए गिहे तेणेव पहारेत्थगमणाए; तेतलिपुत्तं जे जहा ईसर०जाव पासंति ते तहा नो आढायंति,नो परियाणंति, नो अब्भुट्ठेंति,नो अंजलिं करिंति, इट्ठाहिं० जाव नो संलवंति, नो पुरओ य पिट्ठओ य पासओ य समणुगच्छंति। तते णं तेतलिपुत्ते अमच्चे जेणेव सए गिहे तेणेव उवागच्छइ। जा वि य से तत्थ बाहिरिया परिसा भवति। तं जहा-दासेइ वा,पेसेइ वा, भाइल्लएइ वा, सा वि य णं णो आढाइ० ३। जा वि य से अब्भिंतरिया परिसा भवति। तं जहा-पियाइ वा, मायाइ वा,भज्जाइ वा, सुण्हाइ वा,सा वि य णं च नो आढाति० ३। तए ण से तेतलिपुत्ते जेणेव वासघरे जेणेव सए सयणिज्जे तेणेव उवागच्छति, उवागच्छइत्ता सयणिज्जंसि निसीयति, णिसीयइत्ता एवं वयासी-एवं खलु अहं सयाओ गिहाओ णिग्गच्छामि, तं चेव०जाव अब्भिंतरिया परिसा नो आढाति, नो अब्भुट्ठेइ, तं सेयं खलु मम अप्पाणं जीवियाओ ववरोवित्तए त्ति कट्टु एवं संपेहेति, संपेहेइत्ता तालउडं विसं आसगंसि पक्खिवति, से य विसे णो संकम्मति। तए णं से तेतलिपुत्ते नीलुप्पल०जाव असिं खंधंसि ओहरति,तत्थ वि य से धारा ओपट्टा। तए णं से तेतलिपुत्ते अमच्चे जेणेव असोगवणिया तेणेव उवागच्छति, उवागच्छित्ता पासगं गीवाए बंधेति, बंधइत्ता रुक्खं दुरूहइ, दुरूहइत्ता पासे रुक्खे बंधइ, बंधइत्ता अप्पाणं मुयति,तत्थ वि य से रज्जू छिण्णा। तए णं से तेतलिपुत्ते महइमहालियं सिलं गीवाए बंधेति, बंधइत्ता अत्थाहमतारमपोरिसीयंसि उदगंसि अप्पाणं मुयति, तत्थ वि से थाहे जाते। तए णं से तेतलिपुत्ते अमच्चे सुक्कंसि तणकूडंसि अगणिकायं पक्खिवति, पक्खिवइत्ता अप्पाणं मुयति, तत्थ वि य से अगणिकाये विज्झाए। तए णं तेतलिपुत्ते अमच्चे एवं वयासी-सच्चेयं खलु नो समणा वयंति, सच्चेयं खलु नो माहणा वयंति, सच्चेयं खलु समणा माहणा वयंति,अहं एगो असच्चेयं वयामि,एवं खलु अहं सह पुत्तेहिं अपुत्ते, को मेदं सद्दहिस्सति?, सह मित्तेहिं अमित्ते, को मेदं सद्दहिस्सति?, एवं अत्थेणं दारेणं दासेहिं पेसेहिं परिजणेणं। एवं खलु [तेतलिपुत्ते णं अमच्चे] कणगज्झएणं रण्णा अवज्झाएणं समाणेणं तेतलिपुत्तेणं अमच्चेणं तालउडगे विसे आसगंसि पक्खित्ते, से वि य णं णो संकमइ, को मेदं सद्दहिस्सति?,तेतलिपुत्तेणं अमच्चेणं नीलुप्पल० जाव खंधंसि असिं ओहरिए, तत्थ वि य से धारा ओपल्ला, को मेदं सद्दहिस्सति?, तेतलिपुत्ते अमच्चे पासगं गीवाए बंधित्ता०जाव रज्जू छिण्णा, को मेदं सद्दहिस्सति?, तेतलिपुत्ते अमच्चे महालियं सिलं०जाव बंधेत्ता अत्थाह० जाव उदगंसि अप्पा मुक्के,तत्थ वि य णं थाहे जाते,को मेदं सद्दहिस्सति?, तेतलिपुत्ते अमच्चे सुक्कंसि तणकूडे० अग्गी विज्झाए, को मेदं सद्दहिस्सति?, ओहयमणसंकप्पे० जाव झियायइ। तए णं से पोट्टिले देवे पोट्टिलारूवं विउव्वति, विउव्वइत्ता तेतलिपुत्तस्स अमच्चस्स अदूरसामंते ठिच्चा एवं वयासी-हं भो तेतलिपुत्ता! पुरओ पवाए,पिट्ठओ हत्थिभयं, दुहओ अचक्खुपासे, मज्झे सराणि वरिसंति,गामे पलित्ते अरण्णे झियाइ, अरण्णे पलित्ते गामे झियाइ, आउसे! तेतलिपुत्ता! कओ वयामो?। तए णं से तेतलिपुत्ते अमच्चे पोट्टिलं एवं वयासी-भीयस्स खलु नो पव्वज्जा सरणं, उक्कंठियस्स सदेसगमणं, बुहियस्स (छायस्स) अन्नं,तिसियस्स पाणं,आउरस्स जेसज्जं,माइयस्स (माइज्जस्स) रहस्सं, अभिजुत्तस्स पच्चयकरणं, अच्छाणं परिस्संतस्स (तस्स) वाहणगमणं, तरिउकामस्स पवहणकिच्चं, परं अभिउंजिउकामस्स सहायकिच्चं। खंतस्स दंतस्स जिइंदियस्स एत्तो एगमवि ण भवति। तए णं से पोट्टिले देवे तेतलिपुत्तं अमच्चं एवं वयासी-सुट्ठु णं तुमे तेतलिपुत्ता! एयमट्ठं आयाणाहि त्ति कट्टु दोच्चं पि तच्चं पि एवं वयइ, वयइत्ता जामेव दिसिं पाउब्भूए तामेव दिसिं पडिगए। तए णं तस्स तेतलिपुत्तस्स अमच्चस्स सुभेणं परिणामेणं जाईसरणे समुप्पण्णे। तए णं तस्स तेतलिपुत्तस्स अमच्चस्स अयमेयारूवे अज्झत्थिए चिंतिए पत्थिए मणोगए संकप्पे समुप्पज्जित्था-एवं खलु अहं इहेव जंबुद्दीवे दीवे महाविदेहे वासे पुक्खलावईविजए पोंडरिगिणीए रायहाणीए महापउमे नामं राया होत्था। तए णं अहं थेराणं अंतिए मुंडे भवित्ता०जाव चउद्दस पुव्वाइं बहूणि वासाणि सामण्णपरियायं पाउणित्ता मासियाए संलेहणाए महासुक्के कप्पे देवत्ताए उववन्ने। तए णं अहं ताओ देवलोगाओ आउक्खएणं ठिइक्खएणं भवक्खएणं इहेव तेतलिपुरे णयरे तेतलिस्स अमच्चस्स भद्दाए भारियाए दारगत्ताए पयायाए; तं सेयं खलु मम पुव्वदिट्ठाइं पंच महव्वयाइं सयमेव उवसंपज्जित्ता

णं विहरित्तए एवं संपेहेति, संपेहित्ता सयमेव पंच महव्वयाइं आरुहति, आरुहइत्ता जेणेव पमयवणे उज्जाणे जेणेव असोगवरपायवस्स अहे पुढविसिलापट्टयंसि सुहनिसण्णस्स अणुचिंतेमाणस्स पुव्वाहियाइं सामाइयाइं इक्कारस अंगाइं चोद्दस पुव्वाइं सयमेव अभिसमण्णागयाइं। तते णं तस्स तेतलिपुत्तस्स अणगारस्स सुभेणं परिणामेणं ०जाव तयावरणिज्जाणं कम्माणं खओवसमेणं कम्मरयविकरणकरं अपुव्वकरणं पविट्ठस्स अणंते अणुत्तरे णिव्वाघाए णिरावरणे कसिणे पडिपुण्णे केवलवरनाणदंसणे समुप्पन्ने। तए णं तेतलिपुरे णगरे अहासन्निहिं वाणमंतरेहिं देवेहिं देवीहि य देवदुंदुभीओ समाहयाओ, दसद्धवण्णे कुसुमे निवाइए, दिव्वे गीयं, गंधव्वणिणादे कथाए यावि होत्था। तए णं से कणगज्झए राया इमीसे कहाए लद्धट्ठे समाणे एवं वयासी-एवं खलु तेतलिपुत्ते अमचे मए अवज्झाए० जाव मुंमे भवित्ता पव्वइए, तं गच्छामि णं तेतलिपुत्तं अणगारं वंदामि, णमंसामि, पज्जुवासामि, एयमट्ठं विणएणं भुज्जो भुज्जो खामेमि एवं संपेहेइ, संपेहित्ता एहाए० जाव चाउरंगिणीए सेणाए जेणेव पमयवणे उज्जाणे, जेणेव तेतलिपुत्ते अणगारे तेणेव उवागच्छइ, उवागच्छइत्ता तेतलिपुत्तं अणगारं वंदइ, णमंसइ, एयमट्ठं च विणएणं भुज्जो भुज्जो खामेति, अच्चासन्ने ०जाव पज्जुवासेइ। तते णं से तेतलिपुत्ते अणगारे कणगज्झयस्स रण्णो तीसे य धम्मं परिकहेइ। तए णं से कणगज्झए राया तेतलिपुत्तस्स केवलिस्स अंतिए धम्मं सोच्चा णिसम्म पंचाणुव्वइयं सत्तसिक्खावइयं सावगधम्मं पडिवज्जति, समणोवासए जाए अहिगयजीवाजीवे। तए णं तेतलिपुत्ते केवली बहूणि वासाणि केवलिपरियागं पाउणित्ता० जाव सिद्धे।

अथ चतुर्दशद्वारं विवियते-अस्य चायं पूर्वेण सहाभिसंबन्धः। पूर्वस्मिन् सतां गुणानां सामग्र्यभावे हानिरुक्ता, इह तु तथाविधसामग्रीसद्भावे गुणसंपदुपजायत इत्यभिधीयते, इत्येवं संबन्धमिदं सर्वं सुगमं, नवरम् (कलाए त्ति) कलादो नाम्ना, मूषिकारदारक इति पितृव्यपदेशेनेति। (अब्भितरठाणिज्जे त्ति) आभ्यन्तरस्थानीयनाम्ना इत्यर्थः (?)। (विगंगेइ त्ति) व्यङ्गयति, विगतकर्णनासाहस्ताऽवयङ्गान् करोतीत्यर्थः। अथवा-(विगंगेइ त्ति) विकृन्तति, छिनत्तीत्यर्थः। (संरक्खमाणीए त्ति) संरक्षन्त्या आपदः, संगोपयन्त्याः प्रच्छादनतः (भिक्खाभायणे त्ति) भिक्षाभाजनमिव भिक्षाभाजनं, तदस्माकं भिक्षोरिव निर्वाहकारणमित्यर्थः। "पढमाए पोरिसीए सज्झायं" इत्यादौ यावत्करणादिदं द्रष्टव्यम्-"बीयाए पोरिसीए झाणं झियायइ, तइयाए पोरिसीए अतुरियमचवलमसंभंते मुहपोत्तियं पडिलेहेइ, भायणवत्थाणि पडिलेहेइ, भायणाणि उग्गाहेइ, जेणेव सुव्वयाओ अज्जाओ, तेणेव उवागच्छइ, सुव्वयाओ अज्जाओ वंदइ, नमंसइ, वंदित्ता नमंसित्ता एवं वयासी-इच्छामो णं तुब्भेहिं अब्भणुण्णाए तेयलिपुरे नयरे उच्चनीयमज्झिमाइं कुलाइं घरसमुयाणस्स भिक्खायरियाए अडित्तए। अहासुहं देवाणुप्पिया! मा पडिबंधं करेह। तए णं ताओ अज्जाओ सुव्वयाहिं अज्जाहिं अब्भणुण्णाओ समाणीओ सुव्वयाणं अज्जाणं अंतियाओ उवस्सयाओ पडिणिक्खमंति, पडिणिक्खमइत्ता अतुरिअमचवलमसंभंताए गईए जुगंतरपलोयणाए दिट्ठीए पुरओ इरियं सोहेमाणीओ तेयलिपुरे णयरे उच्चनीयमज्झिमाइं कुलाइं घरसमुदाणस्स भिक्खायरियं अडमाणीओ।" इति। तत्र गृहेषु समुदानं भिक्षा गृहसमुदानं, तस्मै गृहसमुदानाय, भिक्षाचर्यै भिक्षानिमित्तं विचरणम्, अटन्त्यः कुर्वाणाः। (अत्थि याइं मे त्ति) "याइं ति" देशभाषायां, 'मे त्ति' भवतीनाम्। (चुण्णजोए त्ति) द्रव्यचूर्णानां योगः, स्नपनाऽऽदिकर्मकारी (कम्मणजोए त्ति) कुष्ठाऽऽदियोगहेतुः (कम्मजोए त्ति) काम्ययोगः कमनीयताहेतुः, (हियउड्डावणे त्ति) हृदयोड्डापनं चित्ताऽऽकर्षणहेतुः (कायउड्डावणे त्ति) कायाऽऽकर्षणहेतुः। (आभिओगिए त्ति) पराभिभवनहेतुः (वसीकरणे त्ति) वश्यताहेतुः (कोउयकम्मे त्ति) सौभाग्यनिमित्तं स्नपनाऽऽदि (भूईकम्मे त्ति) मन्त्राभिसंस्कृतभूतिदानम्। (रायाहीणा इत्यादि) राजाधीनाः, राज्ञो दूरेऽपि वर्तमाना राजचक्रवर्तिन इत्यर्थः। राजाधिष्ठिताः, तेन स्वयमध्यासिता राजाधिष्ठिताः, राजाधीनानि राजाऽऽयत्तानि कार्याणि येषां ते तथा राजाधीनकार्याः। (सव्वं च से ववहारपरियावण्णियं ति) सर्वं च 'से' तस्य व्यवहारात् चोत्पत्तिः, पारितापनिका च कालान्तरं यावत्स्थिरतरेत्युत्थानपरितापनकं तत्परिकथयतीति। (वयंतं पडिसंसाहेहि त्ति) विनयप्रस्तावाद् व्रजन्तं प्रतिसंसाधयाऽनुव्रज। अथवा वाचा तं प्रतिसंश्लाघय-साधूक्तं साध्वित्येवं प्रशंसां कुर्वित्यर्थः। भोगं वर्तनम्। "रुढे णमित्यादौ" द्वीनोऽयं मम प्रीत्येति गम्यते। अपध्यातो दुष्टचिन्तावान्। ममेति ममोपरि कनकध्वजः। पाठान्तरेण-दुध्यातोऽहं दुष्टचिन्ताविषयीकृतोऽहं कनकध्वजेन राज्ञा, तत् तस्माच्च ज्ञायते केनाऽपि कुमारेण विरूपमारणप्रकारेण मारयिष्यतीति। (खंधंसि ववहरइ त्ति) स्कन्धे व्यपहरति विनिवेशयतीति। धारा (ओपल्ल त्ति) अवदीर्णा, कुण्ठीभूतेत्यर्थः। (अत्थाइं ति) अस्तं निरस्तमविद्यमानमधस्तलं प्रतिष्ठानं यस्य तदस्ताधः, स्ताधो वा प्रतिष्ठानं, तदभावादस्ताघम्। अतारं यस्य तरणं नास्ति, पुरुषः परिमाणं यस्य तत्पौरुषेयं, तन्निषेधादपौरुषेयम्। ततः पदत्रयस्य कर्मधारयः। मकारौ च प्राकृतत्वात्। अतस्तत्र "लद्धं" इत्यादि। अदृष्टं श्रमणा वदन्ति आत्मपरलोकपुण्यपापाऽऽदिकमर्थजातम्, अतीन्द्रियस्याऽपि तस्य प्रमाणाबाधितत्वेन अज्ञानगोचरात्। अहं पुनरेकोऽश्रद्धेयं वदामि-पुत्राऽऽदिपरिवारयुक्तस्यार्थं राजसंमतस्य च अपुत्राऽऽदित्वमराजसंमतत्वं च, विषखड्गपाशकजलाग्निभिरहिस्यत्वं चाऽऽत्मनः प्रतिपादयतो मम युक्तिबाधितत्वेन जनप्रतीतेरविषयत्वेनाश्रद्धेयत्वादिति। प्रस्तुतसूत्रभावना-"तए णमित्यादि।" हं भोः! इत्यामन्त्रणे। पुरतोऽग्रतः प्रपातो गर्तः, पृष्ठतो दृष्टिभयं (दुहओ त्ति) उभयतः। अचक्षुःस्पर्शोऽन्धकारः, मध्ये मध्यभागे यत्र वयमास्महे, तत्र शरा बाणा निपतन्ति, ततश्च सर्वतो भयं वर्त्तते इत्यर्थः। तथा ग्रामः प्रदीप्तोऽग्निना ज्वलति, अरण्यं च ध्मायतेऽनुपशान्तदाहं वर्त्तते। अथवा-ध्यायतीव ध्यायति, अग्नेरविध्यानेन जागर्तीवेत्यर्थः। अथवा-अरण्यं प्रदीप्तं, ग्रामो

ष्मायते न विध्यापयति, एवं सर्वस्यापि ज्ञयानकत्वात् स्थानान्तरस्य चाऽभावात्, आयुष्मँस्तेतलिपुत्र ! (कह त्ति) क्व गच्छामः ?, क्व भोक्तैर्गन्तव्यमस्माभिरित्यन्येनापि ज्ञायतीति प्रश्नः । उत्तरं च-भीतस्य प्रव्रज्या शरणं, भवतीति गम्यते । अथ कथं भीतस्य प्रव्रज्या शरणं भवति ? । अत्रोच्यते-यथोत्कण्ठिताऽऽदीनां स्वदेशगमनाऽऽदीनि । तत्र (बुहियस्स त्ति) बुभुक्षितस्य । मायिनो वञ्चकस्य, रहस्यं गुप्तत्वं, शरणमिति सर्वत्र गमनीयम् । अभियुक्तस्य सम्पादितदूषणस्य, प्रत्ययकरणं दूषणापोहेन प्रतीत्युत्पादनम्, अध्वानं मार्गं गच्छतः परिश्रान्तस्य गन्तुमशक्तस्य (वाहणगमणं) शकटाऽऽद्यारोहणं शरणमिति योज्यम् । तरीतुकामस्य नद्यादिकं प्लवनं तरणं कृत्वं कार्यं यस्य तत्प्लवनकृत्यं तरकाण्डम् । परमभियोक्तुकामस्याभिभवितुकामस्य (सहायकम्मे त्ति) सहायकृत्यं मित्राऽऽदिकृत्यं (खंतेत्यादि) क्षान्तस्य क्रोधनिग्रहेण, दान्तस्येन्द्रियनोइन्द्रियदमेन, जितेन्द्रियस्य विषयेषु रागाऽऽदिनिषेधेन, (एसो त्ति) एतेभ्योऽनन्तरोदितेभ्योऽग्रतः प्रपाताऽऽदिभ्यो ज्ञयेभ्यः एकमपि ज्ञयं न भवति, प्रव्रजितस्य सामायिकपरिणत्या शरीराऽऽदिषु निरभिष्वङ्गत्वाद् मरणाऽऽदिभयाभावादिति । एवं देवेनामात्यः स्ववाचा भीतस्य प्रव्रज्या श्रेयसीत्यभ्युपगमं कारयित्वा एवमुक्तः-(सुट्ठु इत्यादि) अयमर्थो भीतस्य प्रव्रज्या शरणमिति यदि प्रतिज्ञायते, तदा सुष्ठु ते मतं, ज्ञयाभिभूतस्त्वमिदानीमसीति एनमर्थमाजानीहि-अनुष्ठानद्वारेणावबुध्यस्व, प्रव्रज्यां विधेहीति यावत् । इह च यद्यपि सूत्रे उपनयो नोक्तस्तथाऽप्येवं द्रष्टव्यः-" जाव न दुक्खं पत्ता, माणब्भंसं च पाणिणो पायं । ताव न धम्मं गेण्हं-ति भावओ तेयलिसुउ व्व ॥ १ ॥" इति । ज्ञा० १ श्रु० १४ अ० । आ०म० । आ० क० । विशे० । तेतलिसुतप्रतिबद्धवक्तव्यताके चतुर्दश ज्ञाताध्ययने, प्रश्न० ५ सम्व० द्वार । ज्ञा० । आ० चू० ।

तेतिञ्च–तैतिल–पुं० । गण्डूकपशौ, वाच० । स्त्रीविलोचनापरपर्याये वचाऽऽदितृतीयकरणे, जं० ७ वक्ष० ।

तेतिलिपुर–तेतलिपुर–न० । स्वनामख्याते पुरे, यत्र कनकरथस्यामात्यस्तेतलिसुत आसीत् । ज्ञा० १ श्रु० १३ अ० । आ० म० । दर्श० । आ० चू० ।

तेतीस–त्रयस्त्रिंशत्–स्त्री० । " पञ्चत्रयोदशाऽऽदौ स्वरस्य सस्वरव्यञ्जनेन " ॥ ८ । १ । १६५ ॥ इत्यादेः स्वरस्य सस्वरव्यञ्जनेन सह एद्भवति । त्र्यधिकायां त्रिंशत्संख्यायाम्, प्रा० १ पाद ।

तेत्तिअ–तावत्–त्रि० । " इदंकिमश्च डेत्तिअ-डेत्तिल-डेदहाः" ॥ ८ । २ । १५७ ॥ इति तच्छब्दात् 'डेत्तिअ' प्रत्ययः । तत्परिमाणवति, प्रा० २ पाद ।

तेत्तिर–तित्तिर–पुं० । लोमपक्षिभेदे, जी० १ प्रति० ।

तेत्तुल्ल–तावत्–त्रि० । " अतो डेत्तुल्लः " ॥ ८ । ४ । ४३५ ॥ इत्यपभ्रंशे तच्छब्दात्परस्यातोः प्रत्ययस्य 'डेत्तुल्ल' इत्यादेशः । डित्वाट्टिलोपः । प्रा० ४ पाद । तत्परिमाणवति, वाच० ।

तेय–तेजस्–पुं० । " स्तनदामशिरोऽनडुहः " ॥ ७ । १ । ३२ ॥ इति सान्तत्वात्तेजःशब्दस्य पुंस्त्वम् । प्रा० १ पाद । अभितापे, सूत्र० १ श्रु० ५ अ० १ उ० । प्रभावे, अन्त० १ श्रु० ६ वर्ग ३ अ० । वह्नौ, प्रज्ञा० १ पद । स्था० । कान्तौ, उपा० २ अ० । शरीरस्य कान्तौ, स्था० ८ ठा० । नि० । शरीरसंबन्धिनि रोचिषि, प्रभावे च । औ० । " अह तेओ पुण देहे अणोतप्पया चेव । " तेजः पुनर्देहे शरीरेऽनवरतप्यता अन्नज्जनयिता दीप्तियुक्तत्वेनापरिभूतत्वम् । बृ० १ उ० । दीप्तौ, उपा० २ अ० । आचा० । तेजोलेश्यायाम्, स्था० १ ठा० । शरीरप्रज्ञायाम्, ज्ञा० १ श्रु० १ अ० । आहारपाककारणभूतेषु तेजोनिसर्गहेतुषु चोष्मपुद्गलेषु, कर्म० ५ कर्म० । रसाऽऽद्याहारपाकजनने तेजोनिसर्गलब्धिनिबन्धने च । अनु० । वृक्षभेदे, ति० । स्तेये, नं० । चौर्ये, विशे० । पञ्चा० ।

तेयंसी–तेजस्विन्–त्रि० । तेजः शरीरप्रज्ञा, तच्चास्तेजस्वी । ज्ञा० १ श्रु० १ अ० । शरीरप्रज्ञायुक्ते, भ० २ श० ५ उ० । स० । नि० । आचा० । दीप्तिमति, आचा० २ श्रु० १ चू० २ अ० १ उ० । बृ० ।

तेयग–तैजस–न० । तेजःपुद्गलानां विकारस्तैजसम् । " विकारे " ॥ ६ । २ । ३० । इत्यण् । ऊष्मविकारे, भुक्ताऽऽहारपरिणमनकारणे शरीरभेदे, यद्वशाच्च विशिष्टतपःसमुत्थलब्धिविशेषस्य पुंसस्तेजोलेश्याविनिर्गमः । उक्तं च-" सव्वस्स उम्हसिद्धं, रसाऽऽहाराकजणगं च । तेयगलद्धिनिमित्तं, च तेयगं होइ नायव्वं ॥ १ ॥ " जी० १ प्रति० । स्था० । प्रज्ञा० । (तैजसशरीरव्याख्या सर्वा ' सरीर ' शब्दे वक्ष्यते) वैश्वानरे, पुं० । स० ३० सम० ।

तेयगणाम–तैजसनाम–(न्)न० । तेजोनिबन्धनं नाम तैजसनाम, तैजसशरीरनिबन्धने नामकर्मणि, यदुदयवशात्तैजसशरीरप्रायोग्यान् पुद्गलानादाय तैजसशरीररूपतया परिणमयति, परिणमय्य च जीवप्रदेशैः सहान्योऽन्यानुगमरूपतया संबन्धयतीति । कर्म० १ कर्म० ।

तेयगलद्धि–तैजसलब्धि–स्त्री० । क्रोधाऽऽधिक्यात्प्रतिपन्थिनं प्रति सुखेन विशिष्टतपोजन्यानेकयोजनप्रमाणक्षेत्राऽऽश्रितवस्तुदहनसामर्थ्यतो जाज्वल्यमानज्वालामोचनशक्तौ, भ० । सा तु, यो यमी नित्यं षष्ठं तपः करोति पारणके कुल्माषमुष्टया जलचुलुकेन चाऽऽस्ते, तस्य षण्मासान्ते सिद्ध्यतीति । भ० ३ अधि० ।

तेयगसमुग्घाय–तैजससमुद्घात–पुं० । तेजसि विषये भवस्तैजसः, स चासौ समुद्घातश्च तैजससमुद्घातः । तेजोलेश्याविनिर्गमकालभाविनि तैजसशरीरनामकर्माऽऽश्रये समुद्घातविशेषे, पं० सं० २ द्वार । प्रज्ञा० । स० । प्रव० । (किञ्चिद्वक्तव्यता ' तेउसमुग्घाय ' शब्देऽत्रैव भागे २३५० पृष्ठे गता) (अस्य सर्वा वक्तव्यता तु ' समुग्घाय ' शब्दे वक्ष्यते)

तेयजणण–तेजोजनन–न० । माहात्म्योत्पादने, बृ० ३ उ० ।

तेयपाल–तेजःपाल–पुं० । पोरवाडकुलजाते अणहिल्लपाटकनगरराजस्य श्रीवीरधवलस्य मन्त्रिणि, ती० ।

तेजःपालवस्तुपालकल्पः-

"श्रीवस्तुपालतेजः-पालौ मन्त्रीश्वराबुभावास्ताम् ।
यौ भ्रातरौ प्रसिद्धौ, कीर्तनसंख्यां तयोर्ब्रूमः " ॥ १ ॥

पूर्वं गूर्जरधरित्रिमण्डनायां मण्डलीमहानगर्यां श्रीवस्तुपालतेजःपालाऽऽद्या वसन्ति स्म । अन्यदा श्रीमत्पत्तनवास्तव्यप्राग्वाटान्वयाङ्कुरश्रीचण्डपालाऽऽत्मजन्मकुरश्रीचण्डप्रासादाङ्गजमन्त्रिश्रीसोमकुलावतंसाङ्कुरश्रीआसराजनन्दनौ कुमारदेवीकुक्षिसरोवरराजहंसौ श्रीवस्तुपालतेजःपालौ श्रीशत्रुञ्जयगिरिनाराऽऽ-

दितीर्थयात्रायै प्रस्थितौ हडाह्रग्रामं गत्वा यावत् स्वां विभूतिं चिन्तयतस्तावच्चक्रत्रयं सर्वस्वं जातम्। ततः सुराष्ट्रस्यासौख्यमाकलय्य लक्षमेकमवन्यां निधातुं निशीथे महास्वच्छतलं खातं खानयामासतुः।तयोः खानयतोः कस्यापि प्राक्तनः कनकपूर्णः शौल्वकलशो निरगात्, तमादाय श्रीवस्तुपालः तेजःपालजायामनुपमादेवीं मान्यतयाऽपृच्छत्-कैतन्निधीयत इति?। तयोक्तम्-गिरिशिखर एवैतदुच्चैः स्थाप्यते, यथा प्रस्तुतनिधिवन्नान्यसाद्भवेत्। तच्छ्रुत्वा श्रीवस्तुपालस्तद् ऊर्ध्वं श्रीशत्रुञ्जयोज्जयन्तादावव्ययत्। कृतयात्रो व्यावृत्तो धवलक्कपुरमगात्। अत्रान्तरे माद्रणदेवी नाम कान्यकुब्जेश्वरसुता जनका[कु]ञ्चलिकापदे(?) गुर्जरधरित्रीमवाप्य तदाधिपत्यं मुक्त्वा मृता सती तत्रैव देशाधिष्ठात्री देवता समजनि। सैकदा स्वप्ने वीरधवलनृपस्याचीकथत्-यद्वस्तुपालतेजःपालौ राज्यचिन्तकप्राग्रहरौ विधाय सुखेन राज्यं शाधि। इत्थं कृते राज्यराष्ट्रवृद्धिस्तव भविष्यतीत्यादिश्य स्वं च प्रकाश्य तिरोदधे देवी। प्रातरुत्थाय नृपतिर्वस्तुपालतेजःपालावाहूय सत्कृत्य च ज्यायसः स्तम्भतीर्थधवलक्कयोराधिपत्यमेवादात्। तेजःपालस्य तु सर्वराज्यव्यापारमुद्रां ददौ। ततस्तौ षमूदर्शनदान-नानाविधधर्मस्थानविधापनाऽऽदिभिः सुकृतशतानि चिनुतः स्म नित्यमनुसमयम्। तथाहि-लक्षमेकं सपादं जिनबिम्बानां कारितम्, अष्टादश कोट्यः षष्ठवतिर्लक्षाः श्रीशत्रुञ्जयतीर्थे ऽर्पितं व्ययितम्, द्वादश कोट्योऽशीतिर्लक्षाः श्रीउज्जयन्ते, द्वादश कोट्यस्त्रिपञ्चाशद् लक्षा अर्बुदशिखरे, त्रीणिगवसत्यां नव शतानि चतुरशीतिश्च पौषधशालाः कारिताः, पञ्चशतानि दन्तमयसिंहासनानां, पञ्चशतानि पञ्चोत्तराणि समवसरणानां जादरमयानां (?), ब्रह्मशालाः सप्त शतानि, सप्त शतानि सत्रागाराणाम्, सप्तशती तपस्विकापाल्लिकमठानाम्, सर्वेषां भोजननिर्वापाऽऽदिदानं कृतं, त्रिंशच्छतानि द्व्युत्तराणि माहेश्वराऽऽयतनानां,त्रयोदश शतानि चतुरुत्तराणि शिखरबद्धजैनप्रासादानां, त्रयोविंशतिशतानि जीर्णचैत्योद्धाराणाम्,अष्टादशकोटिसुवर्णव्ययेन सरस्वतीभाण्डागाराणां स्थानत्रये भरणं कृतं, पञ्चशती ब्राह्मणानां वेदपाठं करोति स्म, वर्षमध्वे सहस्रपूजात्रितयं, पञ्चाशच्छती श्रमणानां गृहे नित्यं विहरति स्म, तट्टिककार्पटिकानां सहस्रं साधिकं प्रत्यहं भुङ्क्ते स्म, त्रयोदश तीर्थयात्राः सङ्घपतीभूय कृताः। तत्र प्रथमयात्रायां चत्वारि सहस्राणि च पञ्चशतानि शकटानां सशय्यापाल्लकानां,सप्तशती सुखासिकानाम्, अष्टादशशती वाहिनीनाम्, एकाभ्रविंशतिः शतानि श्रीकरिणाम्, एकविंशतिः शतानि श्वेताम्बराणां, एकादश शतानि दिगम्बराणां, चत्वारि शतानि सार्द्धानि जैनगायनानां, त्रयस्त्रिंशच्छती वन्दिजनानाम्। चतुरशीतिस्तडागाः सुबद्धाः, चतुःशती चतुःषष्ट्यधिका वापीनां, पाषाणमयानि द्वात्रिंशद् दुर्गाणि, दन्तमयजैनरथानां चतुर्विंशतिः, त्रिंशं शतं शाकघटितानां,सरस्वतीकण्ठाऽऽभरणाऽऽदीनि चतुर्विंशतिर्विरुदानि श्रीवस्तुपालस्य चतुःषष्टिर्मसीतयः कारिताः। दक्षिणस्यां श्रीपर्वतं यावत्, पश्चिमायां प्रभासं यावत्, उत्तरस्यां केदारं यावत्, पूर्वस्यां वाराणसीं यावत् तयोः कीर्त्तनानि, सर्वाग्रेण त्रीणि कोटिशतानि चतुर्दश लक्षा अष्टादश सहस्राणि अष्टशतानि लोष्टिकत्रितयोनानि द्रव्यव्ययतः त्रिषष्टिवारान् संग्रामे जैत्रपत्रं गृहीतम्। अष्टादश वर्षाणि तयोर्व्यापृतिः। एवं तयोः पुण्यकृत्यानि कुर्वतोः कियताऽपि कालेन श्रीवीरधवलनृपः कालधर्ममवापत्। ततस्ततपट्टे तदीयस्तनयः श्रीमान् वीसलदेवस्ताभ्यां मन्त्रिप्रवराभ्यां राज्येऽभिषिक्तः। सोऽपि समर्थः सन् क्रमेण दुर्मदः सचिवान्तरं विधाय मन्त्रितेजःपाल्लमपाचकार। तदेतदवलोक्य पुरोधाः सोमेश्वरनामा महाकविर्नृपमुद्दिश्य साक्षेपं नव्यं काव्यमपठत्। यथा-

"मांसोन्मांसलपाटलापरिमलव्यालोलरोलम्बितः (?),
प्राप्य प्रौढिमिमां समीर! महतीं पश्य त्वया यत्कृतम्।
सूर्याचन्द्रमसौ निरस्ततमसौ दूरं तिरस्कृत्य यत्,
पादस्पर्शसहं विहायसि रजः स्थाने तयोः स्थापितम्" ॥१॥

इत्यादि तयोः पुरुषरत्नयोर्वृत्तशेषमादित उत्पत्तिस्वरूपं तु लोकप्रसिद्धित एवावगन्तव्यम्।

"गीताक्षायनवर्षेण, सूमाच्छिाय कीर्तिता।
कीर्तनानामियं संख्या, श्रीमतोर्मन्त्रिमुख्ययोः ॥ १ ॥"

श्रीमहामात्यवस्तुपालतेजःपालकीर्त्तनसंख्याकल्पः।

"यदध्यासितमर्हद्भिः, तत्तीर्थं प्रचक्रते।
अर्हन्तश्च तयोश्चित्त-मध्यवात्सुरहर्निशम् ॥ १ ॥
तत्तीर्थरूपयोर्युक्त्या, पुरुषश्रेष्ठयोस्तयोः।
कीर्त्तनोत्कीर्त्तनेनापि, न्याय्या कल्पकृतिर्न किम्? ॥ २ ॥
इत्यालोच्य हृदा कल्प-व्रेशं मन्त्रीशयोस्तयोः।
एतं विरचयाञ्चक्रुः, श्रीजिनप्रभसूरयः ॥३॥" ती० ४१ कल्प।

तेयमंडल–तेजोमण्डल–न०। प्रभापटले, स० ६ सम०।

तेयमाहप्पकंतिजुत्त–तेजोमाहात्म्यकान्तियुक्त–त्रि०। तेजो दीप्तिर्माहात्म्यं महानुभावता, कान्तिः काम्यता, तैर्युक्ते, उपा० १ अ०।

तेयलिपुर–तेतलिपुर–'तेतलिपुर' शब्दार्थे, ज्ञा० १श्रु० १ अ०।

तेयलेस्सा–तेजोलेश्या–स्त्री०। विशिष्टतपोजन्यलब्धिविशेषप्रभवायां तेजोज्वालायाम्, ज्ञा० १ श्रु० २ अ०। (सा कथं भवतीति 'तेयलेस्सा' शब्देऽनुपदमेव २३४६ पृष्ठे ऊष्टव्या)

तेयवंत–तेजस्विन्–त्रि०। प्रभावति, प्रश्न० ४ सम्व० द्वार।

तेयवीरिय–तेजोवीर्य–पुं०। भरतराजस्य पुत्रपरम्परायां भरतात्पञ्चमे महाबलस्य पुत्रे, स्था० ८ ठा०।

तेया–तेजस्–स्त्री०। त्रयोदश्याम्, ज्यो० ४ पाहु०। चं० प्र०। लोकोत्तररीत्या त्रयोदश्यां रात्रौ, कल्प० ६ क्षण।

तेया–त्रेता–स्त्री०। सत्ययुगानन्तरवर्तिनि युगभेदे, वाच०। "तेयाजुगे य दासरही रामो सीयालक्खणसंजुओ वि।" ती०२७ कल्प। दक्षिणाग्निगार्हपत्याऽऽहवनीयाऽऽत्मके समुदिते अग्नित्रये, घृतकीमासाधनस्याकृस्य यस्मिन् पार्श्वे त्रयोऽङ्कास्तस्य पार्श्वस्य उत्तानतया पतने द्यूतविशेषे, वराटकानां मध्ये त्रयाणामुत्तानतया पतने च। 'त्रेताद्यूतसर्वस्वम्'। इति मृच्छकटिकाटीका। वाच०।

तेयाणुबंधि (ण्)–स्तेयानुबन्धिन्–न०। स्तेनस्य चौरस्य कर्म स्तेयं, तीव्रक्रोधाऽऽद्याकुलतया तदनुबन्धवस्तेयानुबन्धिनि, प्र० २५ द्वा० ७ उ०। रौद्रध्यानभेदे, दर्श०। अतितीव्रक्रोधलोभाऽऽकुलमानसस्य श्रमणान्धबधिराङ्गमाऽऽदिष्वपि प्राणप्रहाणबुद्ध्याऽपि परद्रव्यापहरणेच्छा परलोकापायभीरोः। अत एवाऽऽह-श्रीभगवान् जिनभद्रगणिक्षमाश्रमणः-

" तह तिव्वकोहलोहा-उलस्स भूओवघायणमणज्जं। परदव्वहरणचित्तं, परलोगावायनिरवेक्खं" ॥ १ ॥ दर्श० ४ तत्त्व ।

तेयाली–तेयाह्निन्–पुं० । वृक्षभेदे, " ताले तमाले तक्कलितेयालीसालिसारकल्लोणे । " प्रज्ञा० १ पद ।

तेरसी–त्रयोदशी–स्त्री० । चन्द्रस्य त्रयोदशकलाक्रियारूपे तिथौ, वाच० । त्रयोदश्यां यात्रा शुभकरी । तदुक्तम्-" जे वि हु हुंति अमित्ता, ते तेरसिपट्ठिओ जिणइ । " द० प० । ज्यो० ।

तेरह–त्रयोदश (न्)–पुं० । " एत्त्रयोदशाऽऽदौ स्वरस्य सस्वरव्यञ्जनेन " ॥ ८ । १ । १६५ ॥ त्रयोदशन्शब्दे त्रयोदशादिषु संख्याशब्देष्वादेः स्वरस्य परेण सस्वरव्यञ्जनेन सहैकारः । प्रा० १ पाद । "संख्यागस्रदे रः" ॥ ८ । १ । २१७ ॥ इति दस्य रः । प्रा० १ पाद । त्र्यधिकदशसंख्याऽन्विते, वाच० ।

तेरासिय–त्रैराशिक–पुं० । जीवाजीवनोजीवभेदाख्यो राशयः समाहृताख्यिराशि, तत्प्रयोजनं येषां ते त्रैराशिकाः । स्था० ७ ठा० । आ० म० । त्रीन् राशीन् जीवाजीवनोजीवरूपान् वदन्ति ये ते त्रैराशिकाः । औ० । जीवोऽजीवो जीवाजीवश्च, लोकोऽलोको लोकालोकश्च, सत् असत् सदसत् । नयचिन्तायामपि त्रिविधं नयमिच्छन्ति । तद्यथा–द्रव्यास्तिकम, पर्यायास्तिकम, उभयास्तिकं च । उक्तं च-त्रिभी राशिभिश्चरन्तीति त्रैराशिकाः । सं० । त्रिराशिभिर्दीव्यन्ति जिगीषन्तीति त्रैराशिकाः । उत्त० ३ अ० । जीवाजीवनोजीवराशित्रयवादिरोहगुप्तमतानुसारिषु षष्ठेषु निह्नवेषु, आ० क० ।

अथ षष्ठवक्तव्यतामभिधित्सुराह–

पंच सया चोयाला, तइया सिद्धिं गयस्स वीरस्स ।
पुरिमंतरंजियाए, तेरासियदिट्ठि उप्पन्ना ॥२४५१॥

पञ्चवर्षशतानि चतुश्चत्वारिंशदधिकानि तदा सिद्धिं गतस्य श्रीमन्महावीरस्य, अभ्यन्तरे अन्तरञ्जिकायां पुर्यां त्रैराशिकदृष्टिरुत्पन्नेति ॥ २४५१ ॥

कथमुत्पन्ना ?, इत्याह–

पुरिमंतरंजि भुयगिह, बलसिरि सिरिगुत्त रोहगुत्ते य ।
परिवायपोट्टसाले, पोसण पमिसेहणा वाए ॥ २४५२ ॥

संग्रहगाथेयम् । अस्याश्च कथानकादर्थोऽवसेयः । तच्चेदम्-अन्तरञ्जिका नाम नगरी, तस्याश्च बहिर्भूतगृहं नाम चैत्यम् । तत्र च श्रीगुप्तनामाऽऽचार्यः स्थितः । तस्यां च नगर्यां बलश्रीर्नाम राजा । श्रीगुप्ताऽऽचार्याणां च रोहगुप्तो नाम शिष्योऽन्यत्र ग्रामे स्थित आसीत् । अतोऽसौ गुरुवन्दनार्थमन्तरञ्जिकायामागतः । तत्र चैकः परिव्राजको लोहपट्टकेनोदरं बद्धा जम्बूवृक्षशाखया च हस्ते गृहीतया नगर्यां भ्राम्यति । किमेतदिति च लोकेन पृष्टो वदति-मदीयोदरमतीव ज्ञानेन पूरितत्वात् स्फुटतीति लोहपट्टेन बद्धम् । जम्बूद्वीपमध्ये च मम प्रतिवादी नास्ति इत्यस्यार्थस्य सूचनार्थं जम्बूवृक्षशाखा हस्ते गृहीता । ततस्तेन परिव्राजकेन सर्वस्यामपि नगर्यां " शून्याः सर्वेऽपि परप्रवादाः, नास्ति कश्चिन्मम प्रतिवादी । " इत्युद्घोषणापूर्वकः पटहको दापितः । लोहपट्टबद्धपोट्टजम्बूवृक्षशाखायोगाच्च तस्य लोके "पोट्टशाल" इति नाम जातम् । ततस्तत्पटहको नगरीं प्रविशता रोहगुप्तेन दृष्टः, उद्घोषणा च श्रुता । ततोऽहं तेन सार्द्धं वादं दास्यामीत्यभिधाय गुरूनपृष्ट्वाऽपि निष्क्रम्य तेनाऽसौ पटहकः । गुरुसमीपं चाऽऽगत्याऽऽलोचयता कथितोऽयं व्यतिकरस्तेषाम् । आचार्यैः प्रोक्तम्-न युक्तं त्वयाऽनुष्ठितम्, स हि परिव्राजको वादे निर्जितोऽपि विद्यास्वतिकुशलत्वात्तानिरूपतिष्ठते, तस्य चैताः सप्त विद्या वादं स्फुरन्ति ॥२४५२॥

काः पुनस्ताः ?, इत्याह–

विच्चु य सप्पे मूसग, मिगी वराही य काग पोयाई ।
एयाहिं विज्जाहिं, सो य परिव्वायगो कुसलो ॥२४५३॥

(विच्चु य त्ति) वृश्चिकप्रधाना विद्या गृह्यते । (सप्पे त्ति) सर्पप्रधाना विद्या (मूसग त्ति) मूषकप्रधाना । तथा-मृगी नाम विद्या मृगीरूपेणोपघातकारिणी । एवं वराही च । (काग पोयाइ त्ति) काकविद्या, पोताकीविद्या च । पोताकयः शकुनिकाः । एतासु विद्यासु, एतानिर्वा विद्याभिः स परिव्राजकः कुशल इति । ततो रोहगुप्तेनोक्तम्-यद्येवं, तत्किमिदानीं नष्टुं कापि शक्यते ?, निष्क्रम्यैतत्पटहकः, यद्भवति तद्भवतु । ततः सूरिभिः प्रोक्तम्-यद्येवं, तर्हि पठितसिद्धा एवैताः सप्त तत्प्रतिपक्षविद्या गृहाण ॥२४५४॥

काः पुनस्ताः ?, इत्याह–

मोरी नउलि बिराली, वग्घी सीही य उलुगि चोलावी ।
एयाओ विज्जाओ, गिण्ह परिव्वायमहणीओ ॥२४५५॥

वृश्चिकानां प्रतिपक्षभूता मयूरी विद्या, सर्पाणां तु प्रतिपक्षभूता नकुली । मूषकाणां बिमाली । एवं व्याघ्री, सिंही, उलूकी । (उलावि त्ति) पोताकीप्रतिपक्षभूता उलावकप्रधाना विद्येत्यर्थः । एताः परिव्राजकमथनीर्विद्या गृहाण त्वम्, इति सूरिणा प्रोक्ते गृह्णाति रोहगुप्तः । तथा रजोहरणं चाभिमन्त्र्य सूरिभिस्तस्य समर्पितम् । अभिहितश्च यथा-यदन्यदपि किञ्चित्तत्प्रणीतक्रुद्धविद्याकृतमुपसर्गजातमुपतिष्ठते तदा तन्निवारणार्थमेतन्मस्तकस्योपरि भ्रमणीयम् । ततश्चेन्द्राणामप्यजेयो भविष्यसि, किमुत मनुष्यमात्रस्य तस्येति ?। ततश्च गतो राजसभां रोहगुप्तः । प्रोक्तं च तत्र तेन-किमेष ऊमकः परिव्राजको जानाति ?, करोत्वयमेव यदृच्छया पूर्वपक्षम, येनाहं निराकरोमि । ततः परिव्राजकेन चिन्तितम्-निपुणाः खल्वमी भवन्ति, तदमीषामेव सम्मतं पक्षं परिगृह्णामि, येन निराकर्तुं न शक्नोति । विचिन्त्य चेदमभ्यधायि-इह जीवाश्चाजीवाश्चेति द्वावेव राशी, तथैवोपलभ्यमानत्वात्, शुभाशुभाऽऽदिराशिद्वयवत् इत्यादि । ततो रोहगुप्तेन तद्बुद्धिपरिभवनार्थं स्वसंमतोऽयं पक्षो निराकृतः । कथम ?, इति चेत् ?। उच्यते-असिद्धोऽयं हेतुः, अन्यथोपलम्भात्, जीवा अजीवा नोजीवाश्चेति राशित्रयदर्शनात् । तत्र जीवा नरकतिर्यगादयः, अजीवास्तु परमाणुघटाऽऽदयः, नोजीवास्तु गृहकोकिलापुच्छाऽऽदयः । ततो जीवाऽजीवनोजीवरूपास्त्रयो राशयः, तथैवोपलभ्यमानत्वाद्, अधममध्यमोत्तमाऽऽदिराशित्रयवद्, इत्यादियुक्तिभिः निष्प्रत्यूहव्याकरणः कृत्वा जितः परिव्राजको रोहगुप्तेन । ततोऽसौ क्रुद्धो वृश्चिकविद्यया रोहगुप्तविनाशार्थं वृश्चिकान् मुञ्चति । ततो रोहगुप्तस्तत्प्रतिपक्षभूतमयूरीविद्यया मयूरान्मुञ्चति । तैश्च वृश्चिकेषु हतेषु परिव्राजकः सर्पान्मुञ्चति । इतरः तत्प्रतिघातार्थं नकुलान्विसृजति । एवं मूषिकाणां बिमालान्, मृगीणां व्याघ्रान्, शूकराणां सिंहान्, काकानामुलूकान्, पोतकी-

नामुलाचकान् मुञ्चति । ततो गर्दभी मुक्ता, तां चाऽऽगच्छन्तीं दृष्ट्वा रोहगुप्तेन रजोहरणं मस्तकस्योपरि भ्रामयित्वा तेनैव रजोहरणेन ताडिता सती परिव्राजकस्योपरि मूत्रपुरीषोत्सर्गं कृत्वा गताऽसौ । ततः सभापतिना, सभ्यैः, समस्तलोकेन च निन्द्यमानो नगरान्निर्वासितः परिव्राजकः ॥ २४५४ ॥

इतः परं यदवृत्तद्भाष्यकारः प्राऽऽह-

जेऊण पोट्टसालं, छलूओ भणइ गुरुमूलमागंतुं ।
वायम्मि मए विजिओ, सुणह जहा सो महामज्झे ।।२४५५।
रासिदुगगहियपक्खो, तइयं नोजीवरासिमादाय ।
गिहकोकिलाइपुच्छ-च्छेओदाहरणओऽभिहिए ।२४५६।
भणइ गुरू सुट्ठु कयं, किं पुण जेऊण कीस नाभिहियं ?।
अयमवसिद्धंतो णे, तइओ नोजीवरासि त्ति ॥ २४५७ ॥
एवं गए वि गंतुं, परिसामज्झम्मि जणसु नायं णे।
सिद्धंतो किं तु मए, बुद्धिं परिजूय सो समिओ ॥ २४५८ ॥
बहुसो स जप्पमाणो, गुरुणा पडिभणइ किमवसिद्धंतो ?।
जइ नाम जीवदेसो, नोजीवो हुज्ज को दोसो ? ॥ २४५९ ॥

पोट्टशालं परिव्राजकं जित्वा गुरुचरणमूलमागत्य रोहगुप्तोऽपरनाम्ना तु खलुलूको भणति-स परिव्राजकाधमः समस्तनृपसभामध्ये यथा वादे मया विजितस्तथा शृणुत यूयम, कथयामीति । तदेवाऽऽह-राशिद्वयगृहीतपक्षः स परिव्राजको मया वादे विजित इति प्राक्तनेन संबन्धः । किं कृत्वा ?, इत्याह-तृतीयं नोजीवराशिमादाय पक्षीकृत्य, कुतो दृष्टान्तादसौ पक्षीकृत्य ?, इत्याह-गृहकोकिलाऽऽदीनां पुच्छमेव छिन्नत्वाच्छेदः, तदुदाहरणतस्तदृष्टान्तादित्यर्थः । एवं रोहगुप्तेनाभिहिते गुरुर्भणति-सुष्ठु कृतं त्वया यदसौ जितः, किं तु तत्रोत्तिष्ठता त्वया किमेतन्नाभिहितम् ? । किम् ?, इत्याह--तृतीयो नोजीवराशिरित्ययं (णे त्ति) नोऽस्माकमपसिद्धान्तः, जीवाजीवलक्षणराशिद्वयस्यैवाऽस्माभिसिद्धान्तेऽभिहितत्वादिति । तस्मादेवं गतेऽपि, एतावत्यपि गते इत्यर्थः, तत्र परिषन्मध्ये गत्वा भण प्रतिपादय, (नायं णे त्ति) नोऽस्माकं नायं सिद्धान्तः, किं तु स परिव्राजकस्तद्बुद्धिं परिजूय तिरस्कृत्य शमित इवशमं नीतो, दर्पं त्याजित इत्यर्थः । एवं बहुशोऽनेकधा गुरुणा भण्यमानः स रोहगुप्तः प्रतिभणति प्रत्युत्तरयति-आचार्य ! किमयमपसिद्धान्तः ?, यदि हि नोजीवलक्षणतृतीयराश्यभ्युपगमे कोऽपि दोषः स्यात्तदा स्यादयमपसिद्धान्तः, न चैतदस्ति । कुतः ?, इत्याह-यदि नाम गृहकोकिलापुच्छाऽऽदिजीवदेशो नोजीवो भवेन्नोजीवत्वेनाऽभ्युपगम्येत, तर्हि को दोषः स्यात् ?, न कमपि दोषमत्र पश्याम इत्यर्थः । ततः किमित्यपसिद्धान्तत्वे दोषपरिहारार्थं पुनर्मां तत्र प्रेषयसीति भावः ।

कस्मान्न दोषः ?, इत्याह-

जं देसनिसेहपरो, नोसद्दो जीवदव्वदेसो य ।
गिहकोइलाइपुच्छं, विलक्खणं तेण नोजीवो ॥२४६०॥

यद्यस्मान्नोजीव इत्यत्र नोशब्दो देशनिषेधपरो, न तु सर्वनिषेधपरः, नोजीवो जीवैकदेशो, न तु सर्वस्यापि जीवस्याभाव इत्यर्थः । भवत्वेवं देशनिषेधको नोशब्दः, परं गृहकोकिलाऽऽदिपुच्छं जीवदेशो न भविष्यतीत्याशङ्कयाऽऽह--जीवद्रव्यैकदेशश्च गृहकोकिलाऽऽदिपुच्छम्,आदिशब्दाच्छिन्नपुरुषाऽऽदिहस्ताऽऽदयः परिगृह्यन्ते । कथंभूतं तद् गृहकोकिलाऽऽदिपुच्छम् ?, इत्याह-विलक्षणम्, जीवाऽजीवेभ्य इति गम्यते। तथाहि-न तावद् गृहकोकिलाऽऽदिपुच्छं जीवत्वेन व्यपदेष्टुं शक्यते, तत्कायैकदेशत्वेन तद्विलक्षणत्वात् । नाप्यजीव इत्यभिधातुं पार्यते, स्फुरणाऽऽदिभिस्तेभ्योऽपि विलक्षणत्वात् । येनैवं, तेन कारणेन पारिशेष्यान्नोजीव एतदुच्यत इति ॥ २४६० ॥

सिद्धान्तेऽपि धर्मास्तिकायाऽऽदिदेशवचनाद्भुक्त--
एव नोजीवः । कथम ?, इत्याह-

धम्माइदसविहाऽऽदे-सओ य देसो वि जं पिहुं वत्थुं ।
अपिहुब्भूओ किं पुण, छिन्नं गिहकोलियापुच्छं ? ।२४६१।
इच्छइ जीवपएसं, नोजीवं जं च समभिरूढो वि ।
तेणऽत्थि तओ समए, पइदेसो नोघडो जह वा ॥२४६२॥

चकारस्य भिन्नक्रमत्वाच्चयस्मात्कारणाद्देशोऽपीत्यपिशब्दस्यापि भिन्नक्रमत्वाद्धर्मास्तिकायाऽऽदिदेशिनः (अपिहुब्भूओ त्ति) अपृथग्भूतोऽप्येकत्वमापन्नोऽपि देशः (पिहुं वत्थु त्ति) सिद्धान्ते पृथग् वस्तु भणित इति शेषः, पृथग्वस्तुत्वेन निर्दिष्ट इत्यर्थः । किं पुनर्यच्छिन्नमात्मनः पृथग्भूतं कृतं,तद् गृहकोकिलाऽऽदिपुच्छं पृथग् वस्तु न भविष्यति ?,भविष्यत्येवेति । तच्च जीवच्छिन्नत्वेन पृथग्भूतत्वात्, स्फुरणाऽऽदिना चाजीवविलक्षणत्वात्सामर्थ्यान्नोजीव एवेति भावः । कुतः पुनर्वचनाऽऽदेशासिद्धान्ते पृथग् वस्तु भणितः ?, इत्याह-(धम्माइदसविहाऽऽदेसउ त्ति) धर्मास्तिकायाऽऽदीनाममूर्त्तीजीवानां दशविधाऽऽदेशतो दशविधत्वज्ञापनात् । एतदुक्तं भवति--अजीवप्ररूपणां कुर्वद्भिरुक्तं परममुनिभिः-"अजीवा दुविहा पण्णत्ता । तं जहा-रूविअजीवा य, अरूविअजीवा य । रूविअजीवा चउव्विहा पण्णत्ता । तं जहा-खंधा, देसा, पएसा, परमाणुपोग्गला । अरूविअजीवा दसविहा पण्णत्ता । तं जहा-धम्मत्थिकाए, धम्मत्थिकायस्स देसे, धम्मत्थिकायस्स पएसे,एवं अधम्मत्थिकाए वि, आगासत्थिकाए वि, अद्धासमए ।" तदेवं धर्मास्तिकायाऽऽदीनां दशविधत्वभणनेन तद्देशस्य पृथग्वस्तुत्वमुक्तमेव, अन्यथा दशविधत्वानुपपत्तेः। यदा च धर्मास्तिकायाऽऽदीनां देशस्तेभ्योऽपि पृथग्भूतोऽपि पृथग्वस्तूच्यते, तदा गृहकोकिलापुच्छाऽऽदिकं छिन्नत्वेन जीवात पृथग्भूतं सुतरां वस्तु भवति; तच्च जीवाजीवविलक्षणत्वान्नोजीव इत्युक्तमेवेति । अपि च-यद्यस्मात्कारणान्नोजीवप्रदेशं नोजीवं समभिरूढनयोऽपीच्छति, तेन तस्मात्कोऽसौ नोजीवः समये सिद्धान्तेऽस्ति, न पुनर्मयैव केवलेनोच्यते, तथा चानुयोगद्वारेषु प्रमाणद्वारान्तर्गते नयप्रमाणं विचारयता प्रोक्तम-" समभिरूढो सद्दतयं भणइ-जइ कम्मधारएण भणसि तो एवं भणाहि-जीवे य से पएसे य, से सपएसे नोजीवे " इति । तदनेन प्रदेशलक्षणो जीवैकदेशो नोजीव उक्तः, यथा घटैकदेशो नोघट इति । तस्मादस्ति नोजीवलक्षणस्तृतीयराशिः, युक्तयाऽऽगमसिद्धत्वात्, जीवाजीवाऽऽदितत्ववदिति ॥ २४६१ ॥ २४६२ ॥

तदेवं षडुलूकेनोक्त आचार्यः प्रतिविधानमाह-

जइ ते सुयं पमाणं, तो रासी तेसु तेसु सुत्तेसु ।

दो जीवाजीवाणं, न सुए नोजीवरासि त्ति ॥२४६३॥

" धम्माइदसविहाऽऽदेसओ य " इत्याद्युपन्यासात्सूत्रप्रामाण्यवादी किल लक्ष्यते भवान्, तद्यदि सत्यमेष तव सूत्रं प्रमाणम्, ततस्तर्हि तेषु तेषु सूत्रेषु जीवाजीवरूपौ द्वावेव राशी प्रोक्तौ। तथा च स्थानाङ्गसूत्रम्-" दुवे रासी पण्णत्ता । तं जहा-जीवा चेव, अजीवा चेव । " तथाऽनुयोगद्वारसूत्रेऽप्युक्तम्-"कइविहा णं भंते ! दव्वा पण्णत्ता ?। गोयमा ! दुविहा पण्णत्ता। तं जहा-जीवदव्वा य, अजीवदव्वा य ।" तथोत्तराध्ययनसूत्रे चाभिहितम्-" जीवा चेव अजीवा य, एस लोए वियाहिए।" इत्याद्यन्येष्वपि सूत्रेषु द्रष्टव्यम्। नोजीवराशिस्तु तृतीयः श्रुते न क्वचिदप्यभिहितः, तत्कथं तत्सत्त्वप्ररूपणा न श्रुताऽऽज्ञातनेति ?। न च धर्मास्तिकायाऽऽदीनां देशस्तेभ्यो भिन्नः कोऽप्यस्ति, विवक्षामात्रेणैव तस्य भिन्नवस्तुत्वकल्पनात् ॥२४६३॥

एवं पुच्छाऽऽदिकमपि गृहकोकिलाऽऽदिजीवेभ्योऽभिन्नमेव, तत्संबद्धत्वाद्, अतो जीव एव तत्, न तु नोजीव इति दर्शयन्नाह-

गिहकोलियाइपुच्छे, छिन्नम्मि तदंतरालसंबंधो।
सुत्तेऽनिहिओ सुहुमा-ऽमुत्तत्तणओ तदग्गहणं ॥२४६४॥

गृहकोकिलाऽऽदीनां पुच्छाऽऽदिकेऽवयवे क्षुरिकाऽऽदिना छिन्नेऽपि तयोर्गृहकोकिलापुच्छाऽऽदिवस्तुनोर्यदन्तराले विचाले तत्र जीवप्रदेशानां संबन्धः संयोगस्तदन्तरालसंबन्धः सूत्रेऽभिहित एव। तथा च भगवतीसूत्रम्-" अह भंते ! कुम्मा कुम्मावलिया, गोहा गोहावलिया, गोणे गोणावलिया, मणुस्से मणुस्सावलिया, महिसे महिसावलिया, एएसि णं दुहा वा, तिहा वा, असंखेज्जहा वा छिन्नाणं जे अंतरा, ते वि णं तेहिं जीवपएसेहिं फुडा ?। हंता फुडा। पुरिसे णं भंते ! अंतरे हत्थेण वा, पाएण वा, अंगुलियाए वा, कट्ठेण वा, किलिंचेण वा, आमुसमाणे वा, संमुसमाणे वा, आलिहमाणे वा, विलिहमाणे वा, अण्णयरेण वा तिक्खेणं सत्थजाएणं आच्छिंदमाणे वा, विच्छिंदमाणे वा, अगणिकाएणं समोडहमाणे तेसिं जीवपएसाणं किंचि आबाहं वा विबाहं वा उप्पाएइ, छविच्छेयं वा करेइ ?। नो इणट्ठे समट्ठे। नो खलु तत्थ सत्थं संकमइ।" इति। यदि नामैवं सूत्रे जीवप्रदेशानां तदन्तरालसंबन्धोऽभिहितः, तर्हि तदन्तराले ते जीवप्रदेशाः किमिति नोपलक्ष्यन्ते ?, इत्याह-(सुहुमेत्यादि) कार्मणशरीरस्य सूक्ष्मत्वात्, जीवप्रदेशानां चामूर्त्तत्वादन्तराले तेषां जीवप्रदेशानां सतामप्यग्रहणं तदग्रहणमिति ॥ २४६४ ॥

ननु यथा देहे पुच्छाऽऽदौ च स्फुरणाऽऽदिभिर्लिङ्गैर्जीवप्रदेशा गृह्यन्ते, तथा सन्तोऽप्यन्तराले किमिति ते न गृह्यन्ते ?, इत्याह-

गज्झा मुत्तिगयाओ, नाऽऽगासे जह पईवरस्सीओ।
तह जीवलक्खणाइं, देहे न तदंतरालम्मि ॥२४६५॥

इह भूकुड्यवरणमकान्धकाराऽऽदीनि वस्तून्येव मूर्त्तियोगान्मूर्त्तिरुच्यन्ते। ततश्च यथा मूर्त्तिगता यथोक्तवस्तुगता एवेत्यर्थः, प्रदीपरश्मयो ग्राह्या भवन्ति, न तु केवल आकाशे प्रसृताः, तथा तेनैव प्रकारेण जीवो लक्ष्यते यैस्तानि जीवलक्षणानि भाषणोच्छ्वासनिःश्वासधावनवल्गनस्फुरणाऽऽदीनि देह एव गृह्यन्ते, न तु तदन्तराल इति ॥ २४६५ ॥

यतश्चैवं ततः किम् ?, इत्याह-

देहरहियं न गिण्हइ, निरतिसओ नातिसुहुमदेहं व।
न य से होइ विवाहा, जीवस्स भवंतराले व ॥२४६६॥

देहाभावे जीवलक्षणानामनाबाधेहरहितं मुक्ताऽऽत्मानं छिन्नपुच्छाऽऽद्यन्तराले वर्त्तिनं वा जीवं निरतिशयः केवलज्ञानाऽऽद्यतिशयरहितो जन्तुर्न गृह्णाति। तथा-अतिसूक्ष्मो देहो यस्य तमतिसूक्ष्मदेहं निगोदाऽऽदिजीवं कार्मणकाययोगिनं वा जन्तुं नाऽसौ गृह्णाति। न च 'से' तस्य जीवस्यान्तराले वर्त्तिषु प्रदेशेष्वनन्तरदर्शितसिद्धान्तसूत्रोक्तयुक्त्या कुन्तासिसेल्लाऽऽदिशस्त्रैराग्निजलाऽऽदिभिर्वा विबाधा पीडा काचिद्भवति, भवान्तराले कार्म्मणशरीरवर्त्तिजीवप्रदेशवदिति ॥२४६६॥

ननु गृहकोकिलाऽऽदिजीवस्य छिन्नत्वात्पुच्छाऽऽदिकं खण्डं नष्टं, ततश्च तत्तस्मात्पृथग्भूतत्वान्नोजीवः कस्मान्नोच्यते ?, यथा घटच्छिन्नत्वात्पृथग्भूतं रथ्यापतितं घटखण्डं घटैकदेशत्वान्नो-घटः ?, तदयुक्तम्। कुतः ?, इत्याह-

दव्वामुत्तत्ताऽकय-भावादविकारदरिसणाओ य।
अविणासकारणाहि य, नन्नसो व्व न खंमसो नासो ॥२४६७॥

खण्डशो जीवस्य नाशो न भवतीति प्रतिज्ञा, अमूर्त्तद्रव्यत्वाद्,अकृतकभावात्-अकृतकत्वादित्यर्थः। तथा-घटाऽऽदेः कपालाऽऽदिवह्निकारदर्शनाभावाद्, अविनाशकारणत्वाच्च-विनाशकारणानामग्निशस्त्राऽऽदीनामभावाच्चेत्यर्थः,इत्येते हेतवः। सर्वेषु नन्नस इव इति दृष्टान्त इति ॥ २४६७ ॥

खण्डशो नाशे च जीवस्य दोषानाह-

नासे य सव्वनासो, जीवस्स नासो य जिणमयच्चाओ।
तत्तो य अणिम्मोक्खो, दिक्खाबेफल्लदोसा य ॥२४६८॥

शस्त्रच्छेदाऽऽदिना जीवप्रदेशस्य नाशे क्रियमाणे क्रमशः सर्वनाशोऽपि कदाचित्तस्य भवेत्। तथाहि-यत् खण्डशो नश्यति तस्य सर्वनाशो दृष्टः, यथा घटाऽऽदेः, तथा च त्वयेष्यते जीवः, ततः सर्वनाशस्तस्य प्राप्नोति। भवत्वेतदपि, किं नः क्षूयते ?, इति चेत्। तदयुक्तम्। कुतः ?, इत्याह-(नासो येत्यादि) स च जीवस्य सर्वनाशो न युक्तः, यस्माज्जिनमतत्यागहेतुत्वाज्जिनमतत्यागोऽसौ। जिनमते हि जीवस्य सतः सर्वथा विनाशोऽसतश्च सर्वथोत्पादः सर्वत्र निषिद्ध एव। यदाह-" जीवा णं भंते ! किं वड्ढंति, हायंति, अवट्ठिया ?। गोयमा ! नो वड्ढंति, नो हायंति, अवट्ठिया।" इत्यादि। अतो जीवस्य सर्वथा नाशेऽभ्युपगम्यमाने जिनमतत्याग एव स्यात्। तथा ततस्तत्सर्वनाशादनिर्मोक्षो मोक्षाभावः प्राप्नोति, मुमुक्षोः सर्वथा नाशात्। मोक्षाभावे च दीक्षाऽऽदिकष्टानुष्ठानवैफल्यं, क्रमेण च सर्वेषामपि जीवानां सर्वनाशे संसारस्य शून्यताप्राप्तिः, कृतस्य च शुभाशुभकर्मणो जीवस्य सर्वनाश एवमेव नाशात्कृतनाशप्रसङ्ग इत्यादि वाच्यमिति न जीवस्य खण्डशो नाशः। गृहकोकिलाऽऽदीनां पुच्छाऽऽदिखण्डस्य पृथग्भूतत्वेन प्रत्यक्षत एव नाशो दृश्यत इति चेत्। तदयुक्तम्। औदारिकशरीरस्यैव हि तत्खण्डमध्यक्षतो वीक्ष्यते, न तु जीवस्य, तस्यामूर्त्तत्वेन केनाऽपि खण्डयितुमशक्यत्वादिति ।

अथात्रैव पराभिप्रायमाशङ्क्य दूषयति-

अह खंधो इव संघा-यभेयधम्मा सतो वि सव्वेसिं ।

अवरोप्परसंकरओ, सुहाइगुणसंकरो पत्तो ॥ २४६९ ॥

अथ पुद्गलस्कन्ध इव सावयवत्वात्स जीवः सङ्घातभेदधर्माऽभ्युपगम्यते, यथा क्वचिद्विवक्षितपुद्गलस्कन्धेऽन्यस्कन्धगतं खण्डं समागत्य संहन्यते संबध्यते, तद्गतं च खण्डं त्यक्त्वाऽन्यत्र गच्छति, एवं जीवस्याप्यन्यजीवखण्डं संहन्यते, तद्गतं तु भिद्यत इत्येवं सङ्घातभेदधर्मो जीव इष्यत इति । अतः स्वभ्रमशो नाशेऽपि संघातस्यापि सद्भावान्न तस्य सर्वनाश इति परस्याभिप्रायः । अत्र दूषणमाह-(तो वि सव्वेसि इत्यादि) एवमपि च सति सर्वेषामपि सर्वलोकवर्तिनां जीवानां परस्परसङ्गतः सुखाऽऽदिगुणसङ्करः प्राप्तः। इदमुक्तम्भवति-यदैकं जीवसंबन्धि शुभाशुभकर्मान्वितं खण्डमन्यजीवस्य संबध्यते, अन्यसंबन्धि तु खण्डं तस्य संबध्यते, तदा तत्सुखाऽऽदयोऽन्यस्य प्रसज्जन्ति, अन्यसुखाऽऽदयस्तु तस्य, इत्येवं सर्वजीवानां परस्परं सुखाऽऽदिगुणसाङ्कर्यं स्यात् । तथैकस्य कृतनाशः, अन्यस्याकृताभ्यागम इत्यादि वाच्यमिति ॥ २४६६ ॥

अन्यमपि पराभिप्रायमाशङ्क्य दूषणान्तरमाह-

अह अविमुक्को वि तओ, नोजीवो तो पइप्पएसं ते ।
जीवम्मि असंखेज्जा, नोजीवा नत्थि जीवो ते ॥२४७०॥

अथैतद्दोषभयान्न जीवस्य छेदोऽभ्युपगम्यते, किं त्वविमुक्तोऽप्यच्छिन्नोऽपि जीवसंबद्धोऽपि तकोऽसौ जीवदेशो नोजीवस्त्वयेष्यते, यथा धर्मास्तिकायाऽऽद्येकदेशो नोधर्मास्तिकायाऽऽदिः; ततस्तर्हि प्रतिप्रदेशं ते तव नोजीवसद्भावादेकैकस्मिन्नात्मन्यसंख्येया नोजीवाः प्राप्ताः, ततस्ते तव नास्तिकाऽपि जीवसंभवः, सर्वेषामपि जीवानां प्रत्येकमसंख्येयनोजीवत्वप्राप्तेरिति ॥ २४७० ॥

दूषणान्तरमपि प्रसञ्जयन्नाह--

एवमजीवा वि पइ-प्पएसभेएण नोअजीव त्ति ।
नत्थि अजीवा केई, कयरे ते तिन्नि रासि त्ति ? ॥२४७१॥

एवमजीवा अपि धर्मास्तिकायाऽऽदयो द्व्यणुकस्कन्धाऽऽदयो घटाऽऽदयश्च प्रतिप्रदेशभेदतोऽजीवैकदेशत्वाद् नोअजीवाः, घटैकदेशनोघटवदिति, अतोऽजीवाः केचनाऽपि न सन्ति, परमाणूनामपि पुद्गलास्तिकायलक्षणाजीवैकदेशत्वेन नोअजीवत्वात्सर्वत्र नोअजीवानामेवोपपद्यमानत्वात् । ततश्च कतरे ते त्रयो राशयः-त्वया ये राजसभायां प्रतिष्ठिताः, उक्तन्यायेन नोजीवनोअजीवत्रैराशिद्यस्यैव सद्भावात् , इति । तस्माद् बहुदोषप्रसङ्गान्न जीवश्छिद्यत इति स्थितम् ॥ २४७१ ॥

छिद्यतां वाऽसौ तथापि न नोजीवसिद्धिरिति दर्शयन्नाह-

छिन्नो व होउ जीवो, कह सो तल्लक्खणो वि नोजीवो ? ।
अह एवमजीवस्स वि, देसो तो नोअजीवो त्ति ॥२४७२॥
एवं पि रासओ ते, न तिन्नि चत्तारि संपसज्जंति ।
जीवा तहा अजीवा, नोजीवा नोअजीवा य ॥२४७३॥

पुच्छाऽऽद्यवयवच्छेदेन छिन्नोऽपि भवतु गृहकोकिलाऽऽदिजीवः, केवलं तस्य जीवस्य लक्षणानि स्फुरणाऽऽदीनि यस्याऽसौ तल्लक्षणोऽपि सन्नसौ पुच्छाऽऽदिदेशः कथं केन हेतुना नोजीवो भण्यते ? । इदमुक्तं भवति-सम्पूर्णोऽपि गृहकोकिलाजीवः स्फुरणाऽऽदिलक्षणैरेव जीवो भण्यते, स्फुरणाऽऽदीनि च लक्षणानि छिन्ने तदवयवेऽपि पुच्छाऽऽदिके दृश्यन्ते, अतस्तल्लक्षणयुक्तोऽप्यसौ किमिति जीवो न भण्यते, येन नोजीवकल्पनाऽत्र विधीयते ?, इति । (अह एवमिति) अथैवं जीवलक्षणैः सद्भिरपि पुच्छाऽऽदिकस्तदवयवो नोजीव एवेष्यते, न पुनः स्वाग्रहस्त्यज्यत इत्यर्थः । अत्र सूरिराह- (तो त्ति) ततस्तर्हि अजीवस्यापि घटाऽऽदेर्देशो नोअजीवः प्राप्नोति, जीवैकदेशनोजीववदिति । अस्त्वेवं, न किञ्चिद् मम विनश्यतीति चेत् । नैवम् । कुतः ?, इत्याह--(एवं पीत्यादि) एवमप्यभ्युपगम्यमाने ये भवता त्रय एव राशय इष्यन्ते, ते न घटन्ते, किं तु चत्वारो राशयः संप्रसज्जन्ति । तद्यथा--जीवाः, तथा अजीवाः, नोजीवाः, नोअजीवाश्चेति ॥ २४७२ ॥ २४७३ ॥

अत्र यः परस्य परिहारस्तस्य स्वपक्षेऽपि समानतां विदर्शयिषुः सूरिराह-

अह ते अजीवदेसो, अजीवसामण्णजाइलिंगो त्ति ।
लिंगो वि अजीवो चिय, न जीवदेसो वि किं जीवो ? ॥२४७४॥

अथ ते तवाऽजीवस्य जीवस्कन्धाऽऽदेर्देश एकदेशो भिन्नोऽपि स्कन्धात्पृथग्भूतोऽप्यजीव एव, न तु नो अजीवः । कुतः ?, इत्याह-अजीवेन सामान्ये जातिलिङ्गे यस्यासावजीवसामान्यजातिलिङ्ग इति कृत्वा । तत्राजीवत्वं जातिः, पुंल्लिङ्गत्वकृष्णं च लिङ्गम् । एतच्च द्वयमप्यजीवतदेशयोः सामान्यमेव, ततस्तद्देशोऽप्यजीव एव । हन्त ! यद्येवं, तर्हि जीवदेशोऽपि किमिति जीवो नेष्यते, तस्याऽपि जीवेन समानजातिलिङ्गत्वादिति ॥ २४७४ ॥

गाथाचतुर्थपादोक्तमेवार्थं प्रमाणेन दृढयन्नाह-

छिन्नगिहकोकिया वि हु, जीवो तल्लक्खणेहिं सयलो व्व ।
अह देसो त्ति न जीवो, अजीवदेसो त्ति नोऽजीवो ? ॥२४७५॥

छिन्नगृहकोकिलाऽपि-छिन्नः पुच्छाऽऽदिको गृहकोकिलाऽऽदिजीवावयवोऽपीत्यर्थः । किम् ?, इत्याह-जीवः, इति प्रतिज्ञा । हेतुमाह-(तल्लक्खणेहिं ति) तल्लक्षणैर्हेतुभूतैः-स्फुरणाऽऽदितल्लक्षणयुक्तत्वादित्यर्थः । (सयलो व्व त्ति) यथा सकलः परिपूर्णोऽछिन्नो गृहकोकिलाऽऽदिजीव इत्यर्थः । एष दृष्टान्तः । अथ गृहकोकिलाऽऽदेर्जीवस्य पुच्छाऽऽदिकस्तदवयवो देश एवेति कृत्वा न जीव इष्यते, संपूर्णस्यैव जीवत्वात्, यद्येवमजीवस्यापि घटाऽऽदेर्देशो 'नो' नैवाऽजीवः प्राप्नोति, सम्पूर्णस्यैवाजीवत्वात् । ततोऽयमजीवदेशोऽपि नोअजीव एव स्यात्, न त्वजीवः । तथा च सति स एव राशिश्चतुष्टयप्रसङ्ग इति ॥२४७५॥

यदुक्तम्-" इच्छइ जीवपएसं, नो जीवं जं च समभिरूढो वि । " (२४६२) इत्यादि । तत्राऽऽह-

नोजीवं ति न जीवा-दसं देसमिह समभिरूढो वि ।
इच्छइ बेइ समासं, जेण समाणाहिगरणं सो ॥२४७६॥
जीवे य से पएसे, जीवपएसे एव नोजीवो ।
इच्छइ न य जीवदलं, तुमं व गिहकोइयापुच्छं ॥२४७७॥
न य रासिनेयमिच्छइ, तुमं व नोजीवमिच्छमाणो वि ।
अन्नो वि नओ नेच्छइ, जीवाजीवाहियं किं पि ॥२४७८॥

इह-"जीवे य से पएसे य से सपएसे नोजीवे।" इत्यत्रानुयोगद्वारोक्तसूत्राऽऽलापके समभिरूढनयोऽपि नोजीवमिति नेच्छ-

तीति संबन्धः-नोजीवत्वेन नेच्छतीत्यर्थः । कं कर्मतामाऽऽपन्नम् ?। देशम् । कथंभूतम् ?। जीवादन्यं जीवाद्व्यतिरिक्तं देशं नोजीवं समभिरूढनयोऽपि नेच्छति-किं त्वव्यतिरिक्तमेव तं तस्मादिच्छतीत्यर्थः । कुत एतद्विज्ञायते ?, इत्याह-येन कारणेन देशदेशिनोः कर्मधारयलक्षणं समानाधिकरणमेव समासमसौ समभिरूढनयो ब्रवीत्यन्युपगच्छति, न पुनर्नैगमाऽऽदिरिव तत्पुरुषमित्यर्थः । समानाधिकरणसमासश्च नीलोत्पलाऽऽदीनामिव विशेषणविशेष्याणामभेद एव भवति । अतो ज्ञायते-जीवादनन्यरूपमेव देशं नोजीवमिच्छति समभिरूढ इति, एवं कथं तृतीयराशिः स्यात् ?, इति । तदेव समभिरूढाभिमतं समानाधिकरणसमासं दर्शयति-(जीवे य से इत्यादि) जीवश्चासौ प्रदेशश्च जीवप्रदेशः, स एव (नोजीवो त्ति) स एव जीवाद्व्यतिरिक्तो जीवप्रदेशो नोजीव इत्येवमिच्छति समभिरूढनयः, न पुनर्जीवदल जीवात्पृथग्भूतं तत्खण्डं नो जीवमिच्छत्यसौ, यथा गृहकोकिलाऽऽदीनां पुच्छाऽऽदिखण्डं नोजीवं त्वमिच्छसीति । अपि च-नोजीवमिच्छन्नपि समभिरूढनयो यथा त्वं तथा नोजीवराशेर्जीवाजीवराशिद्वयाद्भेदं नेच्छति, किं तु जीवाजीवलक्षणे राशिद्वयमेवेच्छति, नोजीवस्यात्रैवान्तर्भावात् । तथाऽन्योऽपि नैगमाऽऽदिर्नयो जीवाऽजीवेभ्योऽधिकं किमपि नोजीववस्तु नेच्छत्येव । ततस्त्वदीय एवायं नूतनः कश्चिन्मार्ग इति ।

तथाऽभ्युपगम्यापि सूरिराह-

इच्छउ व समभिरूढो, देसं नोजीवमेगनइयं तु ।
मिच्छत्तं सम्मत्तं, सव्वनयमयावरोहेणं ॥२४७९॥
तं जइ सव्वनयमयं, जिणमयमिच्छसि पवज्ज दो रासी ।
पयविप्पडिवत्तीए, वि मिच्छत्तं किं नु रासीसु? ॥२४८०॥

इच्छतु वा समभिरूढनयस्त्वमिव जीवाद्भिन्नमपि तद्देशं नोजीवं, तथाऽप्येकनयस्यैवं मतमैकनयिकं, मिथ्यात्वं चैतच्छास्त्रकथनमतवत्, इत्यतो न तत्प्रमाणीकर्तव्यम् । सम्यक्त्वं तु सर्वनयमतावरोधेन समस्तनयमतसंग्रहेणैव भवति । ततो यदि सर्वनयमयं जिनमतं प्रमाणमिच्छसि, तदा प्रतिपद्यस्व जीवाजीवलक्षणौ द्वावेव राशी । अन्यथा-" पयमक्खरं पि एक्कं, पि जो न रोएइ सुत्तनिद्दिट्ठं । सेसं रोयंतो वि हु, मिच्छद्दिट्ठी मुणेयव्वो ॥ १ ॥" इत्यादिवचनात्पदविप्रतिपत्त्याऽपि मिथ्यात्वमापद्यते, किमुत सकलेषु राशिषु विप्रतिपत्त्या तत्र भविष्यति ?, इति ॥ २४८० ॥

तदेवं युक्तिभिर्गुरुणा संबोध्यमाने रोहगुप्तेऽग्रतः किं संजातम् ?, इत्याह-

एवं पि जप्पमाणो, न पवज्जइ सो जओ तओ गुरुणा ।
चिंतियमयं पणट्ठो, नासिहई मा बहुं लोगं ॥२४८१॥
तो णं रायसभाए, निग्गिण्हामि बहुलोगपक्खवं ।
बहुजणनाओऽवसिओ, होही अग्गेऽकपक्खो त्ति२४८२
तो बलसिरिनिवपुरओ, वायं नाओवणीयमग्गाणं ।
कुणमाणाणमईया,सीसाऽऽयरियाण छम्मासा ॥२४८३॥
एको वि नावसिज्जइ, जाहे तो भणइ नरवई नाऽहं ।
सत्तो सोउं सीयं-ति रज्जकज्जाणि मे भगवं ! ॥२४८४॥
गुरुणाऽभिहिओ भवओ, सुणावणत्थमियमेत्तियं नणियं।
जइ सि न सत्तो सोउं, तो निग्गिण्हामि णं कह्वं ॥२४८५॥

प्रकटार्थाः एवैताः, नवरम्-(बहुजणनाओऽवसिओ त्ति) बहुजनस्य ज्ञातो विदितोऽवसितो मया जितः सन्नग्राह्यवचनः सर्वस्याऽपि भविष्यति । (तो बलसिरिनिवपुरओ त्ति)ततो बलश्रीनाम्नो राज्ञः पुरत इत्यर्थः । (नाओवणीयमग्गाणं ति) नीयते संविच्यि प्राप्यते वस्त्वनेनेति न्यायः प्रस्तुतार्थसाधकं प्रमाणं, येनोपन्यस्तेन सतोपनीतो दौकितः प्रसङ्गेनाऽऽगतः सकलस्याऽपि तर्कस्य मार्गो येषां ते तथा, तेषां न्यायोपनीतमार्गाणां रोहगुप्तश्रीगुप्तसूरीणामिति ।

ततो द्वितीयदिने किमभूदित्याह-

बीयदिणे बेइ गुरू, नरिंद ! जं मेइणीएँ सब्भूयं ।
तं कुत्तियावणे स-व्वमत्थि सव्वप्पतीयमियं ॥२४८६॥
तं कुत्तियावणसुरो, नोजीवं देइ जइ न सो नत्थि ।
अह भणइ नत्थि तो न-त्थि किं व हेऊप्पवंधेणं २४८७
तं मग्गिज्जउ मुल्ले–ण सव्ववत्थूणि किं रयं काल्लेणं ।
इय होउ त्ति पवन्ने, नरिंदपेइवाइपरिसाहिं ॥ २४८८ ॥
सिरिगुत्तेणं छलुगो, छम्मासा विकड्ढिऊण वाएँ जिओ ।
अहरण कुत्तियावण, चोयालसएण पुच्चाणं ॥२४८९॥

द्वितीयदिने ब्रवीति गुरुः श्रीगुप्तसूरिः-नरेन्द्र ! पृथ्वीपते ! इह मेदिन्यां पृथिव्यां वस्तिकमपि सद्भूतं विद्यमानं वस्तु तत्सर्वमपि कुत्रिकाऽऽपणेऽस्तीति सर्वजनस्य भवतां च प्रतीतमेवेदम् । तत्र कूनां स्वर्गपातालमर्त्यभूमीनां त्रिकं कुत्रिकम्; तात्स्थ्यात्तद्व्यपदेश इति कृत्वा, तत्स्थलोका अपि कुत्रिकमुच्यते, कुत्रिकमापणयति व्यवहरति यत्र हट्टेऽसौ कुत्रिकाऽऽपणः । अथवा-धातुजीवमूलत्तलक्षणेभ्यस्त्रिभ्यो जातं त्रिजे, सर्वमपि वस्त्वित्यर्थः । कौ पृथिव्यां त्रिजमापणयति व्यवहरति यत्र हट्टेऽसौ कुत्रिजाऽऽपणः, अस्मिंश्च कुत्रिकाऽऽपणे वणिजः कस्याऽपि मन्त्राऽऽराधितः सिद्धो व्यन्तरसुरः कायकजनसमीहितं सर्वमपि वस्तु कुतोऽप्यानीय संपादयति । तन्मूल्यद्रव्यं तु वणिगेव गृह्णाति । अन्ये तु वदन्ति-वणिग्रहिताः सुराधिष्ठिता एव ते आपणा भवन्ति । ततो मूल्यरूपमपि स एव व्यन्तरसुरः स्वीकरोति । एते च कुत्रिकाऽऽपणाः प्रतिनियतेष्वेवोज्जयिनीभृगुकच्छनगराऽऽदिस्थानेषु क्वापि कियन्तोऽप्यासन्नित्यागमेऽभिहितम् । ततस्तस्मात् कुत्रिकाऽऽपणसुरो यदि मूल्येन याचितः सन् नोजीवं जीवाजीवव्यतिरिक्तं वस्तुरूपं कमपि ददाति, तदाऽसौ न नास्ति, अपि तु निर्विवादमस्त्येव । अथायमेव वदति-नास्ति तद्व्यतिरिक्तः कोऽपि नोजीवः, तदा नास्त्येवाऽसौ, किं तन्नास्तित्वसाधनाय गुरुमहाऽन्यप्रयोजनत्वातिकारिणा क्लेशफलेन हेतुप्रबन्धोपन्यासेन ?, इति । तत्तस्माद् याचयन्तां मूल्येन सर्ववस्तूनि कुत्रिकाऽऽपणसुरः, किमत्र कालेन कालविलम्बेन ?, इत्यर्थः । एवं गुरुभिरुक्ते बलश्रीनरेन्द्रेण, प्रतिवादिना रोहगुप्तेन, सभ्यपर्षदा च युक्तियुक्तत्वादेवं भवतु इति प्रतिपन्ने श्रीगुप्ताऽऽचार्येण षड्लूको रोहगुप्तः पूर्वं षण्मासान्विकृष्यातिबाह्य वादे जितो निगृहीतः। केन ?, इत्याह-कुत्रिकाऽऽपणे यानि वक्ष्यमाणभृङ्गलङ्घलनाऽऽद्याहरणानि तदाहरणानि तद्विषयपृच्छानां चतुश्चत्वारिंशेन शतेन, प्राकृतशैल्या छन्दोबन्धाऽऽनुलोम्यादार्षत्वाद्वा व्यत्ययेन निर्देश इति ॥ २४८६ ॥ २४८७ ॥ २४८८ ॥ २४८९ ॥

कथं पुनरिदं चतुश्चत्वारिंशं शतं पृच्छानां भवतीत्याह-

भूजलजलणानिलनह-कालदिसाऽऽया मणो य दव्वाइं ।
नव्वंति नवेयाइं, सत्तरस गुणा इमे अन्ने ॥ २४९० ॥
रूवरस-गंधफासा, संखा परिमाणमहमह पुहुत्तं च ।
संजोगविभागपरा-परत्तबुद्धी सुहं दुक्खं ॥ २४९१ ॥
इच्छा दोसपयत्ता, एत्तो कम्मं तयं च पंचविहं ।
उक्खेवणऽवक्खेवण-पसारणाऽऽकुंचणं गमणं ।२४९२।
सत्ता सामण्णं पि य, सामण्णविसेसया विसेसो य ।
समवाओ य पयत्था, छ च्चत्तीसप्पभेया य ॥२४९३॥
पगईएँ अगारेण य, नोगारोभयनिसेहओ सव्वे ।
गुणिया ओयालसयं, पुच्छाणं पुच्छिओ देवो ॥२४९४॥

इह द्रव्यगुणकर्मसामान्यविशेषसमवायलक्षणाः षट् मूलपदार्थास्तेन षड्ढूकेन कल्पिताः । तत्र द्रव्यं नवधा । कथम् ?, इत्याह-(भूजलेत्यादि) भूमिः, जलं, ज्वलनः, अनिलः, नभः, कालः, दिक्, आत्मा, मनश्चेत्येतानि नव द्रव्याणि भण्यन्ते । गुणाः सप्तदश भवन्ति । तद्यथा-रूपं, रसः, गन्धः, स्पर्शः, संख्या, परिमाणं, महत्त्वं, पृथक्त्वं, संयोगः, विभागः, परापरत्वे, बुद्धिः, सुखं, दुःखम्, इच्छा, द्वेषः, प्रयत्नश्चेति । इतः कर्म । तत्पुनः पञ्चविधम् । तद् यथा-उत्क्षेपणम्, अवक्षेपणम्, आकुञ्चनं, प्रसारणं, गमनमिति । सामान्यं त्रिविधम् । तद्यथा-सत्ता, सामान्यं, सामान्यविशेषश्चेति । तत्र द्रव्यगुणकर्मलक्षणेषु त्रिषु पदार्थेषु सद्बुद्धिहेतुः सत्ता । सामान्यं द्रव्यत्वगुणत्वाऽऽदि । सामान्यविशेषस्तु-पृथ्वीत्वजलत्वकृष्णत्वनीलत्वाऽऽद्यवान्तरसामान्यरूप इति । अन्ये त्वित्थं सामान्यस्य त्रैविध्यमुपवर्णयन्ति-अविकल्पं महासामान्यं, त्रिपदार्थहेतुसद्बुद्धिभूता सत्ता, सामान्यविशेषो द्रव्यत्वाऽऽदि । महासामान्यसत्तयोर्विशेषणत्वमत्र इत्यन्ये । द्रव्यगुणकर्मपदार्थत्रयसद्बुद्धिहेतुः सामान्यम्, अविकल्पा सत्तेत्यर्थः । सामान्यविशेषस्तु द्रव्यत्वाऽऽदिरूप एव । इत्यत्र प्रसङ्गेनेति । विशेषश्चान्त्यः । समवायपदार्थश्चेति । तदेवमेते द्रव्याऽऽदयः षट् पदार्थाः षट्त्रिंशत्प्रभेदाः-नवानां द्रव्याणां, सप्तदशानां गुणानां, पञ्चानां कर्मणां, त्रयाणां सामान्यानां, विशेषसमवाययोश्च मीलने षट्त्रिंशद्विकल्पा भवन्तीत्यर्थः । एते च सर्वे प्रकृत्या, अकारेण नोकारेण, उभयनिषेधतश्चेत्येतैश्चतुर्भिः प्रकारैर्गुणिताः सन्तो यच्चतुश्चत्वारिंशं शतं पृच्छानां भवति तत्पृष्टः कुत्रिकाऽऽपणदेवः । इदमत्र हृदयम्-नञ्रहितं शुद्धं पदमिह प्रकृतिरुच्यते, तया शुद्धपदरूपया प्रकृत्या पृथिव्यादयः पदार्थाः पृच्छ्यन्ते । तद्यथा-" पृथिवीं देहि " इत्यादि । तथा लुप्तस्य नञः स्थाने योऽकारस्तेन चाकारेण संयुक्तया प्रकृत्या पृच्छा विधीयते । यथा-'अपृथिवीं देहि' इत्यादि । तथा नोकारेण संयुक्तया प्रकृत्या पृच्छा । यथा-'नोपृथ्वीं देहि' इत्यादि । तथा नोकाराकारलक्षणं यदुभयं तेन योऽसौ प्रकृत्या निषेधः तस्माच्च पृष्टः सुरः । यथा-"नोअपृथ्वीं देहि" इत्यादि । एवं जलाऽऽदिष्वपि प्रत्येकमेते प्रकृत्यकारनोकारोभयनिषेधलक्षणाश्चत्वारः पृच्छाप्रकारा वक्तव्या इति । एतदभिप्रायवता प्रोक्तम्-(सव्वेगुणिय त्ति) आह-ननु " पृथ्वीं देहि " इत्यादिका याचना एव कथं पृच्छाः प्रोच्यन्ते ?। सत्यं, किं तु 'पृथ्वीं देहि' इत्यादियाचनाद्वारेण पृथिव्याद्यस्तित्वमेवासौ देवः पृच्छ्यते, नोजीवं याचितो यद्यसौ जीवाजीवव्यतिरिक्तं तं दास्यति तदाऽयमस्ति, नान्यथा इत्येवमेव प्रतिज्ञातत्वात् । ततो याचना अभूतास्तत्त्वतः पृच्छा एवेत्यदोषः ।

कथं पुनरेताः कुत्रिकाऽऽपणसुरस्य पृच्छाः कृताः ?, इत्याशङ्क्य दिङ्मात्रोपदर्शनार्थमाद्यं पृथ्वीलक्षणं भेदमधिकृत्याऽऽह—

पुढवि त्ति देइ ढेहुं, देसो वि समाणजाइलिंगो त्ति ।
पुढवि त्ति सो अपुढविं, देहि त्ति य देइ तोयाऽऽइ ।२४९५।

पृथ्वीं याचितः कुत्रिकाऽऽपणसुरो ढेलुं ददाति । आह-अप्रस्तुतमिदम्, अन्यस्मिन्याचिते अन्यस्य प्रदानात् । नैवम् । कुतः ?, इत्याह-(देसो वीत्यादि) देशोऽपि ढेलुलक्षणः (पुढवि त्ति) पृथिव्येव मन्तव्या, पृथिवीत्वलक्षणाया जातेः स्त्रीलिङ्गलक्षणस्य लिङ्गस्य च समानत्वात् । इह यत्र पृथ्वीत्वजातिः स्त्रीलिङ्गं च वर्तते तत् पृथिवीति व्यवहर्त्तव्यं, यथा- रत्नप्रभाऽऽदि, तथा च ढेलुः, तस्मात्पृथ्वीति । अपृथिवीं देहीत्येवंयाचितोऽसौ देवस्तोयाऽऽदि प्रयच्छति ॥ २४९५ ॥

नोपृथ्वीं याचितस्तर्हि किं ददातीत्याह—

देसपभिसेहपक्खे, नोपुढविं देइ ढेहुदेसं सो ।
ढेहुदव्वावेक्खो, कीरइ देसोवयारो से ॥२४९६॥
इहरा पुढवि चिय सो, ढेहु व्व सपाणजाइलक्खणओ ।
ढेहुदलं ति व देसो, जइ तो लेडू वि जूदेसो ॥ २४९७ ॥

नोशब्दस्य देशप्रतिषेधपक्षे नोपृथ्वीं याचितोऽनन्तरमेव समस्तपृथ्वीत्वेनोपचरितस्य लेष्टोरेव देशं तत्खण्डरूपं ददात्यसौ देवः । आह-ननु देशनिषेधपक्षे नोपृथ्वी तदेश एव गृह्यते, यस्तु लेष्टुदेशः स पृथिवीदेशस्याऽपि देश एव, न तु पृथ्वीदेशः, तत्कथं नोपृथिवीं याचितस्तं ददाति ?, इत्याह-(ढेहुदव्वेत्यादि) लेष्टुद्रव्यापेक्षः 'से' तस्य लेष्टुदेशस्य देशोपचारः क्रियते । इदमुक्तं भवति-लेष्टौ तावदनन्तरोक्तयुक्तेः सम्पूर्णपृथ्वीद्रव्यत्वमारोपितं, ततो लेष्टुलक्षणपृथ्वीद्रव्यापेक्षया तद्देशस्याऽपि पृथ्वीदेशत्वमुपचर्यते, इतरथा अन्यथा पुनः परमार्थतो लेष्टुवत्समानजात्यादिलक्षणत्वादिति पूर्वोक्तहेतोः सोऽपि लेष्टुदेशः पृथिव्येव मन्तव्या । अथ पराभिप्रायमाविष्कृत्य परिहारार्थमाह-(लेठुदलं ति व देसो जइ त्ति) यदि तु ब्रूषे पर ! त्वं मन्यसे-योऽयं लेष्टोर्देशः स दलं लेष्टोरेव खण्डमात्रं, ततः समानजातिलक्षणत्वेऽपि नाऽसौ पृथ्वीति । अत्र परिहारमाह-(तो लेठू वि जूदेसो त्ति) ततस्तर्हि " पुढवि त्ति देइ ढेहुं देसो वि " इत्यादौ यः पूर्वं ढेलुः पृथ्वीत्वेनोक्तः सोऽपि द्रुवः पृथिव्या देश एव । ततस्त्वदभिप्रायेण सोऽपि पृथ्वीदलरूपत्वाद् न पृथ्वी, ढेलुदेशवदिति ॥ २४९६ । २४९७ ॥

अस्त्वेवमिति चेत् , तदयुक्तम् । कुतः ?, इत्याह-

देहि ध्रुवं तो जणिए, सव्वाऽऽणेया न यावि सा सक्का ।
सक्का सक्केण वि या-णेउं किमुयावसेसेणं ? ॥ २४९८ ॥

यदि लेष्टुर्न पृथ्वी, ततस्तर्हि ध्रुवं देहीत्युक्ते सर्वाऽपि संपूर्णा साऽऽनेया प्रसज्यते, न च सा सर्वा शक्रेणाप्यानेतुं शक्या, किमुतावशेषेण कुत्रिकाऽऽपणदेवाऽऽदिमात्रेण ?, इति । तर्हि किमत्र तत्त्वम् ?, इति भवन्त एव कथयन्तु इति ॥ २४९८ ॥

इत्थं प्रेरके उपसन्ने दृष्टान्तोपन्यासद्वारेण सूरिः प्रस्तुतार्थनिर्णयमाह-

जह घडमाणय भणिए,न हि सव्वाऽऽणयणसंभवो किंतु।
देसाइविसिट्ठं चिय, तमत्थवसओ समप्पेइ ॥ २४९९ ॥
पुढवि त्ति तहा भणिए, तदेगदेसे वि पगरणवसाओ।
लेट्ठुम्मि जायइ मई, जहा तहा लेट्ठुदेसे वि ॥ २५०० ॥

यथा सामान्येन घटमानय[पटमानय]इत्युक्तेऽपि न खलु सर्वस्याऽपि घटस्य सामान्यतयैवाऽऽनयनसंभवोऽस्ति, किं तु सर्वस्याऽऽनेतुमशक्यत्वात्, प्रायः सर्वेण प्रयोजनाभावाच्च, अर्थवशात्सामर्थ्यत एव नियतदेशकालाऽऽद्यवच्छिन्नं विशिष्टमेव कञ्चिद् घटमानीय समर्पयति, तथाऽत्रापि पृथ्वीं देहीति ज्ञापिते सर्वस्या आनेतुमशक्यत्वात्, प्रायस्तया प्रयोजनाभावाच्च, यथा तदेकदेशेऽपि पृथिव्येकांशेऽपि लेष्टौ देवस्य समर्पणमिति-र्जायते । कुतः ?, इत्याह-प्रकरणवशाद्, 'अनेनाऽपि तदेकदेशेन लेष्टुना प्रस्तुतार्थः सेत्स्यति' इत्येवं प्रस्तावबशादित्यर्थः । प्रकृतमाह-(तहा लेट्ठुदेसे वि त्ति) यथा पृथिवीं देहीत्युक्ते सति प्रतिपादितन्यायेन तदेकदेशेऽपि लेष्टौ समर्पणमति-र्जायते । तथा तेनैव प्रकारेण नोपृथ्वीं देहीत्युक्ते तत्खण्डरूपे तदेकदेशेऽपि समर्पणबुद्धिरुत्पद्यत इति ॥ २४९९ ॥ २५०० ॥

आह-ननु " इहरा पुढवि च्चिय सो, लेट्ठु व्व
समाणजाइलक्खणओ। " (२४९७) इति
वचनाल्लेष्ट्वेकदेशः पूर्वं भवद्भिः पृथिवी-
त्वेनोक्तः स कथमिदानीं नोपृथिवी
स्याद् ?, इत्याशङ्कयाऽऽह-

लेट्ठुदव्वावेक्खाए, तह वी तदेसजातओ तम्मि ।
उवयारो नो पुढवी, पुढवि च्चिय जाइलक्खणओ २५०१॥

यद्यपि लेष्ट्वेकदेशः पृथिव्येव, तथाऽपि (उवयारो त्ति) तस्मिन् लेष्ट्वेकदेशे नोपृथिवीत्वस्योपचारः क्रियत इत्यर्थः । कया?, इत्याह-लेष्टुऽव्यापेक्षया लेष्टोः प्रागुक्तन्यायेन यत्पृथिवीऽव्यत्वमारोपितं, तदपेक्षयेत्यर्थः। कुतः ?, इत्याह-तद्देशभावतो लेष्टुऽव्यैकदेशत्वादित्यर्थः । प्रागुक्तन्यायेन तावल्लेष्टुरेवेह पृथ्वीऽव्यं, तदपेक्षया च तदेकदेशे नोपृथ्वीत्युपचर्यत इति भावः । परमार्थतस्त्वियं लेष्ट्वेकदेशलक्षणं नोपृथिव्येव मन्तव्यम्, समानजातिलक्षणत्वादिति को वै न मन्यते, अस्माभिरेव प्रागुक्तत्वात्, इदानीमपि च स्मर्यमाणत्वादिति ? ॥ २५०१ ॥

नोअकारोभयनिषेधपक्षमधिकृत्याऽऽह-

पमिसेहदुगं पगई, गमेइ जं तेण नोअपुढवि त्ति।
भणिए पुढवि त्ति गई, देसनिसेहे वि तदेसो॥ २५०२॥

" द्वौ नञौ प्रकृतमर्थं गमयतः " इति वचनाद् नोकाराकारलक्षणं प्रतिषेधद्वयं यस्मात्प्रकृतिं गमयति-प्रकृतमेवार्थं प्रतिपादयतीत्यर्थः। तेन कारणेन ' नोअपृथ्वी ' इति ज्ञापिते नोशब्दस्य सर्वनिषेधपरत्वात् पृथिवीमतिर्भवति-पृथिव्याः प्रतिपत्तिर्भवतीत्यर्थः । (देसनिसेहे वि तदेसो त्ति) देशनिषेधवाचके तु नोशब्दे तस्या जलाऽऽदिरूपाया अपृथिव्या एवोत्तरपदे श्रूयमाणाया देशस्तद्देशो गम्यते, देशनिषेधके नोशब्दे नोअपृथ्वीति याचिते जलाऽऽदिरूपा पृथिव्येकदेशं देवो ददातीत्यर्थः ॥ २५०२ ॥

अथ प्रस्तुतार्थतात्पर्यमाह-

उवयाराओ तिविहं, जुवमजुवं नोजुवं च सो देइ ।
निच्छयओ जुवमजुवं, तह सावयवाइं सव्वाइं ॥२५०३॥

स कुत्रिकाऽऽपणदेवो याचितः सन् वस्तु ददाति। कतिविधम्?, किं वा तत् ?, इत्याह-त्रिविधं त्रिप्रकारं, चतुर्थस्य नोअपूपकस्य प्रथमपक्ष एवान्तर्भावात् । तत्र भुवं ज्ञेष्ठुम्, अजुवं जलाऽऽदि, नोजुवं सूत्र्येकदेशं ददाति । कुतः ?, इत्याह-उपचाराद्-व्यवहारनयमताऽऽश्रयणादित्यर्थः, स एव हि देशदेशिव्यवहारं मन्यते, न तु निश्चय इति भावः । अत एवाऽऽह-(निच्छओ इत्यादि) निश्चयतस्तु ध्रुवमध्रुवं चेत्येवं त्रिविधमेव वस्तु ददाति, तृतीयस्य नोध्रुवपक्षस्य देशदेशिव्यवहार एवोपपद्यमानत्वात्, तस्य च निश्चयनयेनानभ्युपगमादिति । तदेवं "ध्रुजलजलण" (२४९०) इत्यादौ पृथिव्याः प्रथमं निर्दिष्टत्वात्तामधिकृत्योक्तम् । अथ शेषाणि जलाऽऽदिवस्तून्यधिकृत्याऽऽह-(तह सावयवाइं ति) न केवलमित्थं ध्रुवं ददाति, तथा शेषाण्यपि जलाऽऽदिवस्तूनि "पगईए अगारेणं" (२४९४) इत्यादिप्रकारेण विशेष्य याचितः सन् व्यवहारनयमतेन यथोक्तविधिना त्रिप्रकाराणि ददाति । कुतः ?, इति चेत्। उच्यते-यतः सावयवानि सदेशान्येतानि सर्वाण्यपि जलाऽऽदिवस्तूनि, अनस्तृतीयोऽपि देशविषयो दानप्रकार एतेषु संभवतीति भावः । निश्चयनयमतेन तु देशदेशिव्यवहाराभावादेतान्यपि जलाऽऽदीनि द्विप्रकाराण्येव ददातीति । तदेवं सावयवे वस्तुनि प्रकारत्रयेण प्रकारद्वयेन च यथोक्तरीत्या दानं संभवति ॥ २५०३ ॥

अथ निरवयवे वस्तुनि प्रकारद्वयेनैव दानसंभव इति दर्शयन्नाह-

जीवमजीवं दाउं, नोजीवं जाइओ पुणरजीवं ।
देइ चरिमम्मि जीवं, न तु नोजीवं सजीवदलं ॥२५०४॥

जीवं देहीति याचितः सुरो जीवं शुकसारिकाऽऽदिकं दत्वा, 'अजीवं देहि' इति याचितस्तज्जीवमुपलखण्डाऽऽदिकं दत्वा कृतार्थो जायते, नोजीवं याचितः पुनरजीवमुपलखण्डाऽऽदिकमेव ददाति, नोशब्दस्य सर्वनिषेधपरत्वात् । चरमे तु नोअजीवलक्षणे विकल्पे जीवमेव शुकाऽऽदिकं ददाति, द्वयोर्नञोः प्रकृतार्थगमकत्वात्, नोशब्दस्य च सर्वनिषेधकत्वादिति, न तु स कुत्रिकाऽऽपणदेवो जीवं जीवदलं जीवखण्डरूपं क्वापि विकल्पे ददाति । इति जीवाजीवलक्षणौ द्वावेव राशी, न तु तृतीयः, असत्त्वात्, खरविषाणवदिति ॥ २५०४ ॥

ततः किमभूदित्याह-

तो निग्गहिओ छलुओ, गुरू वि सक्कारमुत्तमं पत्तो ।
धिक्किारोवहओ, छलुओ वि सभाहिँ निच्चूढो॥२५०५॥

ततो यदा कुत्रिकाऽऽपणसुरेण जीवव्यतिरिक्तो नोजीवो न दत्तः, असत्त्वात्, तदा निगृहीतो निर्जितः षड्लुकः । गुरुरपि श्रीगुप्ताऽऽचार्यो नरनाथाद् लोकाच्च सत्कारमुत्तमं प्राप्तः । षड्लूकोऽपि गुरुप्रत्यनीकत्वाज्जनप्रयुक्तधिक्कारोपहतो राजसभातो निष्काशित इति ॥ २५०५ ॥

ततः किम ?, इत्याह-

वाए पराजिओ सो, निव्विसओ कारिओ नरिंदेण ।

घोसावियं च नयरे, जयइ जिणो वद्धमाणो त्ति।२५०६।
तेणाजिनिवेसाओ, समयविगप्पियपयत्थमादाय ।
वइसेसियं पणीयं, फाइकयमन्नमन्नेहिं ॥ २५०७ ॥

स रोहगुप्तो गुरुणा वादे पराजितः सन् नरपतिना निर्विषयः समाज्ञातः, पटहकेन च वाद्यमानेन घोषापितं समस्तनगरे- "जयति जिनः श्रीमान्वर्द्धमानः" इति । रोहगुप्तस्य च वादे निर्जितस्याऽपि प्रत्यनीकतोद्वेजितेन गुरुणा खेलमल्लकः शिरसि स्फोटितः । ततो भस्मखरण्टितवपुषा तेनाभिनिवेशात्स्वमतिकल्पितान् द्रव्याऽऽदिपदार्थानाश्रित्य वैशेषिकमतं प्रणीतं, तच्चान्यैस्तच्छिष्याऽऽदिभिरियन्तं कालं यावत्स्फातिमानीतमिति ॥ २५०६ ॥ २५०७ ॥

ननु रोहगुप्त इत्येवास्य नाम, तत्कथं षडुलूक इत्यसकृत्प्रागुक्तोऽसौ ?, इत्याह-

नामेण रोहगुत्तो, गुत्तेण य छप्पए स चोलूओ ।
दव्वाऽऽइछप्पयत्थो-वएसणाओ छलूओ त्ति ॥२५०८॥

नाम्नाऽसौ रोहगुप्तो गोत्रेण च पुनरुलूकगोत्रसम्भूतत्वादसावुलूक इत्याख्यायते-द्रव्यगुणकर्मसामान्यविशेषसमवायलक्षणषट्पदार्थप्ररूपणेन षट्पदार्थप्रधान उलूकः षडुलूक इत्यं व्यपदिश्यते ॥ २५०८ ॥ विशे० । सूत्र० । कल्प० । स० । आ० म० । आ० चू० । नपुंसके, पिं० ।

तेरिच्छिय-तैरश्चिक-तैर्यग्योन-त्रि० । तिर्यग्योनिभ्यो भवस्तैर्यग्योनः । तिर्यग्योनिकृते, विशे० ।

तेल्ल-पुं० तैल-न० । प्राकृतत्वात्पुंस्त्वम् । तिलस्य विकारः, अण् । "तैलाऽऽदौ वा" ॥ ८।२।६७ ॥ इत्यनादौ वर्त्तमानस्य व्यञ्जनस्य वा द्वित्वम् । प्रा० २ पाद । "तिलाऽऽदिस्निग्धवस्तूनां, स्नेहस्तैलमुदाहृतम् ।" इत्युक्ते तिलसर्षपातसीप्रभृतीनां स्निग्धवस्तूनां स्नेहरूपे विकारे, वाच० । "चत्तारि होंति तेल्ला, तिलअयसिकुसुंभसरिसवाणं च। विगईओ सेसाइं, डोलाईणं न विगईओ ॥१॥" पं० व० २ द्वार । स्था० । उत्तरत्र स्थितस्य चात्र संबन्धात् तैलानि चत्वारि भवन्ति । केषां संबन्धीनि ?। तत्राऽऽह-तिलातसीकुसुम्भसर्षपाणां, शेषाणां डोलाऽऽदीनां मधूकफलाऽऽदीनाम्, आदिशब्दाच्चिल्लिकेरएरण्डशिंशपाऽऽदीनां संबन्धीनि तैलानि न विकृतयः । प्रव० ४ द्वार । ध० । अनु० । सूत्र० । ज्ञा० । आ० चू० । नि० चू० । नि० । आव० ।

तेल्लकेला-तैलकेला-स्त्री० । सौराष्ट्रप्रसिद्धे मृन्मये तैलभाजनविशेषे, स च भङ्गभयात् सुष्ठु संगोप्यते । ज्ञा० १ श्रु० १ अ० । भ० । तं० । नि० ।

तेलचम्म-तैलचर्म-न० । तैलाभ्यक्तस्य यत्र स्थितस्य संवाधना क्रियते तत्तैलचर्म । ज्ञा० १ श्रु० १ अ० । तैलाभ्यक्तस्य संवाधनाकरणसाधने चर्मणि, औ० ।

तेलुक्क-त्रैलोक्य-न० । त्रयो लोकास्त्रिलोकाः, त्रिलोका एव त्रैलोक्यम् । नेषजाऽऽदित्वात्स्वार्थे ष्यण् प्रत्ययः । नं० । "ऐत एत्" ॥ ८ । १ । १४८ ॥ इत्यादौ वर्त्तमानस्यैकारस्य एत्वम् । प्रा० १ पाद । भुवनपतिव्यन्तरविद्याधरज्योतिष्कवैमानिकेषु, नं० । स्वर्गमर्त्यपातालरूपे तन्निवासिप्राणिगणे, ग० १ अधि० । भुवनत्रये, प्रश्न० ५ सम्व० द्वार । "तेलुक्कणमियकमजुयला ।" "त्रैलोक्येन स्वर्गमर्त्यपातालरूपेण,तन्निवासिप्राणिगणेनेत्यर्थः । नमितं क्रमयुगलं येषां ते त्रैलोक्यनमितक्रमयुगलाः । ग० १ अधि० । " तेलुक्करंगमज्झे। " त्रैलोक्यमेव यो रङ्गः । मल्लयुद्धमण्डपे, कल्प० ५ क्षण ।

तेलुक्कगुरु-त्रैलोक्यगुरु-पुं० । त्रैलोक्यवासिसत्त्वेभ्यो गुणद्दाति शास्त्रार्थमिति त्रैलोक्यगुरवः, तद्गुणाधिकत्वान्मान्यत्वाद्वा । तीर्थंकरेषु, पं० सू० १ सूत्र ।

तेलुक्कदंसि(ण्)-त्रैलोक्यदर्शिन्-पुं० । सर्वज्ञे, आ० ।

तेलुक्कनिरिक्खियमहियपूइय-त्रैलोक्यनिरीक्षितमहितपूजित-पुं० । निरीक्षिताश्च महिताश्च पूजिताश्चेति निरीक्षितमहितपूजिताः त्रैलोक्येन निरीक्षितमहितपूजिताश्च ये ते तथा । सर्वज्ञे,नं० ।

तेलुक्कमत्थयत्थ-त्रैलोक्यमस्तकस्थ-पुं० । त्रैलोक्यस्य मस्तकं सर्वोपरिवर्ती सिद्धिक्षेत्रविभागस्तस्मिंस्तिष्ठतीति त्रैलोक्यमस्तकस्थः । षो० १५ विव० । सकलश्लोकचूडामणिभूते, पं० व० ४ द्वार ।

तेलुक्कसुंदर-त्रैलोक्यसुन्दर-पुं० । त्रिषु लोकेषु प्रधाने, षो० १५ विव० । त्रैलोक्यसुन्दरतायाम्, त्रैलोक्ये सर्वस्मिन्नपि जगति शेषवस्तुभ्यः सुन्दरता शोभनता तां तथोक्ताम् । षो० १५ विव० ।

तेलोक्कदेवमहिय-त्रैलोक्यदेवमहित-पुं० । भुवनत्रयवासिभिः सुरासुरैरभ्यर्चितेषु, वृ० ३ उ० । त्रिभुवनवासिभिर्भवनपत्यादिभिर्देवैर्महितेषु, व्य० २ उ० ।

तेल्ल-तैल-पुं० । 'तेल' शब्दार्थे, प्रा० २ पाद ।

तेल्लकेला-तैलकेला-स्त्री० । ' तेलकेला ' शब्दार्थे, ज्ञा० १ श्रु० १ अ० ।

तेल्लग-तैलक-पुं० । सुराविशेषे, जी० ३ प्रति० ४ उ० ।

तेल्लचम्म-तैलचर्म-न० । 'तेलचम्म' शब्दार्थे, ज्ञा० १ श्रु० १ अ० ।

तेल्लपल्ल-तैलपल्य-न० । तैलपेढाऽऽख्ये सौराष्ट्रप्रसिद्धे मृन्मये तैलस्य भाजनविशेषे, स च भङ्गभयात्सुष्ठु सङ्गोप्यते । दश० १० अध्या० ।

तेल्लपाइया-तैलपायिका-स्त्री० । जीवभेदे, "तेल्लपाइयातो तातो तिक्खेहिं तुंडेहिं अतीव दंसंति ।" आ० म० १ अ० २ खण्ड ।

तेल्लपूय-तैलपूप-पुं० । तैलप्रधाने पूपे, आचा० २ श्रु० १ चू० १ अ० ६ उ० । जी० ।

तेल्लपूयसंठाणसंठिय-तैलपूपसंस्थानसंस्थित-पुं० तैलेन पक्वः पूपस्तैलपूपः । तैलेन हि पक्वोऽपूपः प्रायः परिपूर्णवृत्तो भवति न घृतपक्व इति तैलविशेषसाम्यम्, तस्येव यत्संस्थानं तेन संस्थितः । तस्मिन्, अत्र तैलाऽऽदित्वाल्लुकारस्य द्वित्वम् । जं० १ वक्ष० । जी० ।

तेल्लसमुग्गय-तैलसमुद्गक-पुं० । सुगन्धितैलाऽऽधारविशेषे, उक्तं च जीवाभिगममूलटीकायाम्-"तैलसमुद्गकः सुगन्धितैलाऽऽधारः ।" जी० ३ प्रति० ४ उ० । रा० ।

तेल्लसुरभियाकरण-तैलसुरभिकाकरण-न० । स्त्रीणां षट्त्रिंशत्कायां कलायाम्, कल्प० १ क्षण ।

तोल्लिय–तैल्विक–त्रि० । तैलविक्रयकारिणि, व्य० ६ उ० । आव० ।

तेल्लोक्कविहियमहियपूइय–त्रैलोक्यविहितमहितपूजित–पुं० । त्रैलोक्येन त्रिलोकवासिना जनेन (विहिय त्ति) समग्रैश्वर्याऽऽद्यतिशयसंदोहदर्शनसमाकुलचेतसा हर्षनरनिर्भरेण प्रबलकुतूहलबलादनिमिषलोचनेनावलोकितः । (महिय त्ति) सेव्यतया वाञ्छितः पूजितश्च पुष्पाऽऽदिनिर्यः स तथा । तस्मिन्, उपा० ७ अ० ।

तेल्लोक्कसक्कय–त्रैलोक्यसत्कृत–पुं० । लोकत्रयपूजिते, पा० ।

तेवँ–तथा–अव्य० । प्राकृतलक्षणेन निष्पन्नस्य तेम इत्यस्य "मोऽनुनासिको वो वा" ॥ ८ । ४ । ३६७ ॥ इत्यपभ्रंशेऽनादौ वर्तमानस्यासंयुक्तस्य मकारस्यानुनासिको विकल्पेन वँकारः । क्वचिद्वाक्षणिकस्याऽपि । तेन प्रकारेणेत्यर्थे, प्रा० ४ पाद ।

तेवग्ग–त्रिवर्ग–पुं० । त्रयो वर्गास्त्रिवर्गाः । लोकरूढ्या धर्मार्थिकामेषु, नं० ।

तेवट्ठि–त्रिषष्टि–स्त्री० । त्र्यधिकायां षष्टिसंख्यायाम्, "तेवट्ठीए राइंदिएहिं" । स० ६३ सम० ।

तेवम–तावत्–त्रि० । "वा यत्तदेतोर्डेवडः" ॥ ८ । ४ । ४०७ ॥ इत्यपभ्रंशे तावतो वकारस्य मित्संज्ञकः 'पवड' इत्यादेशः । प्रा० ४ पाद । तत्परिमाणवति, वाच० ।

तेवण्ण–त्रिचत्वारिंशत्–"गोणाऽऽदयः" ॥ ८ । २ । १७४ ॥ इति निपातनात् त्रिचत्वारिंशदित्यस्य 'तेवण्ण' इत्यादेशः । त्र्यधिकायां चत्वारिंशत्संख्यायाम्, प्रा० २ पाद ।

तेवत्तरि–त्रिसप्तति–स्त्री० । त्र्यधिकायां सप्ततिसंख्यायाम्, स० ७२ सम० ।

तेवीस–त्रयोविंशति–स्त्री० । "पत्त्रयोदशाऽऽदौ स्वरस्य सस्वरव्यञ्जनेन" ॥ ८ । १ । १६५ ॥ इत्यादेः स्वरस्य परेण सस्वरव्यञ्जनेन सह एकारः । त्र्यधिकायां विंशतिसंख्यायाम्, प्रा० १ पाद ।

त्रयोविंश–त्रि० । त्र्यधिकविंशतिसंख्यापूरके, प्रा० १ पाद ।

तेवीसइम–त्रयोविंशतितम–त्रि० । त्र्यधिकविंशतिसंख्यापूरके, स्था० ६ ठा० ।

तेहिं–तेहिं–अव्य० । "तादर्थ्ये केहिं-तेहिं-रेसि-रेसिं-तणेणाः" ॥ ८ । ४ । ४२५ ॥ इत्यपभ्रंशे तादर्थ्ये द्योत्ये 'तेहिं' इति निपातः । प्रा० ४ पाद ।

तेहु–तादृश–त्रि० । "यादृक्-तादृक्-कीदृगीदृशां दादेर्मेहुः" ॥ ८ । ४ । ४०२ ॥ इत्यपभ्रंशे दादेरवयवस्य मित्संज्ञक 'महु' इत्यादेशः । तथाविधेऽर्थे, प्रा० ४ पाद ।

तो–तस्मात्–पुं० । "तदो डोः" ॥ ८ । २ । ६७ ॥ इति तच्छब्दात्परस्य ङसेर्डो इत्यादेशः । प्रा० २ पाद । मं० ।

तोअअ–देशी–चातके, दे० ना० ५ वर्ग १८ गाथा ।

तोक्कअ–देशी–अनिमित्ततत्परे, दे० ना० ५ वर्ग १८ गाथा ।

तोड–तुम्–धा० । भेदे, तुरु-पर०-सक०-सेट् । "तुमेस्तोम०" ॥ ८ । ४ । ११६ ॥ इत्यादिना 'तोड' इत्यादेशः । 'तोमइ' । तुडति । प्रा० ४ पाद । आचा० ।

तोमन–तोदन–न० । व्यथने, सूत्र० १ श्रु० ५ अ० १ उ० । असहने, दे० ना० ५ वर्ग १७ गाथा ।

तोमहिया–तोमहिका–स्त्री० । 'खरमुही' इत्याख्ये वाद्यविशेषे, आचा० २ श्रु० २ चू० ४ अ० ।

तोडु–तोडु–पुं० । चतुरिन्द्रियजीवभेदे, प्रज्ञा० १ पद ।

तोण–तूण–पुं० । "स्थूणा तूणे वा" ॥ ८ । १ । १२५ ॥ इति तूणस्योत्वम् । प्रा० १ पाद । शरभरस्थायाम्, ज्ञा० १ श्रु० १ अ० । शरधीत्यपरनामधेये बाणाऽऽश्रये, विपा० १ श्रु० ३ अ० । जी० । इषौ, नि० १ श्रु० १ वर्ग १ अ० ।

तोणीर–तूणीर–पुं० । "ओत्कूष्माकी-तूणीर-कूर्पर-स्थूल-ताम्बूल-गुडूची-मूल्ये" ॥ ८ । १ । १२४ ॥ इत्यत ओत्वम् । प्रा० १ पाद । इषुधौ, वाच० ।

तोएम–तुण्ड–न० । "ओत्संयोगे" ॥ ८ । १ । ११६ ॥ इति संयोगे परे आदेरुत ओत्वम् । मुखे, प्रा० १ पाद ।

तोतमी–देशी–करम्बे, दे० ना० ५ वर्ग ४ गाथा ।

तोतातिग–तौतातिक–पुं० । मीमांसकभेदे, नित्यमुत्कृष्टं च निरतिशयं यत्सुखं तदभ्युक्तिर्मुक्तिरिति तौतातिकाः । द्वा० ३१ द्वा० ।

तोदग–तोदक–त्रि० । व्यथके, उत्त० २० अ० ।

तोमर–तोमर–पुं० । बाणविशेषे, जं० ३ वक्ष० । प्रश्न० । आचा० । "असिसत्तिकोंततोमर-सूलतिसूलेसु सूइवियगासु ।" सूत्र० १ श्रु० ५ अ० १ उ० । औ० ।

तोमरिअ–देशी–शस्त्रप्रमार्जके, दे० ना० ५ वर्ग ४ गाथा ।

तोमरी–देशी–वल्ल्याम्, दे० ना० ५ वर्ग १७ गाथा ।

तोय–तोय–न० । जले, व्य० २ उ० । आव० । व्यथायाम्, स्था० ४ ठा० ४ उ० ।

तोयधारा–तोयधारा–स्त्री० । ऊर्ध्वलोकवास्तव्यायां पञ्चस्यां दिक्कुमारिकायाम्, आ० म० १ अ० १ खण्ड । आव० । ति० । आ० चू० । जं० । "अट्ठोर्ध्वलोकादेत्यैताः, नत्वाऽर्हन्तं समातृकम् । तत्र गन्धाम्बुपुष्पौघ-वर्षं हर्षाद्विनेतिरे ॥ १ ॥" आ० क० ।

तोयपिट्ठ–तोयपृष्ठ–न० । जलोपरितनभागे, औ० ।

तोरण–तोरण–न० । द्वारावयवविशेषे, पञ्चा० २ विव० । स्था० । आचा० । रा० । प्रश्न० । जी० । प्रज्ञा० । औ० । स० । बहिर्द्वारे स्तम्भोपरिस्थे सिंहाऽऽकारे काष्ठे, द्वारबाह्यभागे च, कन्धरायाम्, न० । वाच० । स्था० ।

तोरणमादि–तोरणाऽऽदि–न० । इह मकारः प्राकृतत्वात् । द्वारावयवविशेषप्रभृतिषु, आदिशब्दात्पीठदेवच्छन्दकपुष्पकरिएयादिपरिग्रहो भवति । पञ्चा० २ विव० ।

तोरामदा–त्वरामत्–न० । नेत्ररोगभेदे, "सव्भूकडक्खा तोरामदा महालसा वंका विवंका कुसीला अरूक्खिआ काणक्खिआ ।" महा० ३ अ० ।

तोल्ल–तोल्ल–पुं० । न० । मगधदेशप्रसिद्धे पले, तं० । गुञ्जाऽशीतिपरिमाणे कर्षे, वाच० । स्वार्थे कन्, एवञ्च वा । तोलकमप्यत्र । वाच० ।

तोल्लण–तोलन–न० । माने, आचा० १ श्रु० ४ चू० १ अ० । पुरुषे, दे० ना० ५ वर्ग १७ गाथा ।

तोवड–देशी-कर्णाऽऽभरणभेदे, कमलकर्णिकायां च । दे० ना० ५ वर्ग २३ गाथा ।

तोस–तोष–पुं० । प्रमोदे, पञ्चा० २ विव० । धने, दे० ना० ५ वर्ग १७ गाथा ।

तोसग–तोसक–पुं० । स्वनामख्याते ऽवन्तिराजे, ति० ।

तोषक–त्रि० । परितोषकारके, वाच० ।

तोसलि (ण्)–तोसलिन्–पुं० । स्वनामख्याते ग्रामे, यत्र गच्छन् वीरः सप्त वारान् रज्ज्वा बद्धः, ततस्तोसलिकक्षत्रियेण मोचितः । आ० म० १ अ० २ खण्ड । आ० चू० । तोसलिदेशस्थे स्वनामख्याते आचार्ये, आचा० अत्र कथानकमिदम्–"तोसली नामाऽऽचार्योऽरण्यमहिषीभिः प्रारब्धः, तोसलिदेशे वा बह्वयो महिष्यः सम्भवन्ति, ताभिश्च कदाचिदेकः साधुरटव्यन्तर्वर्त्यारब्धः । स च ताभिः क्रुद्यमानोऽनिर्वाहमवगम्य चतुर्विधाऽऽहारं प्रत्याख्यातवानिति । आचा० १ श्रु० ८ अ० १ उ० ।

तोसलिपुत्त–तोसलिपुत्र–पुं० । दशपुरनगरस्थे स्वनामख्याते आचार्ये, यत्र सोमदेवब्राह्मणस्य रुद्रसेनायां भार्यायामुत्पन्नश्चतुर्दशविद्यापारगो रक्षितो नाम पुत्रो बभूव । तेन च मातृप्रेरितेन तोसलिपुत्राऽऽचार्याणां समीपे दीक्षा प्रतिपन्ना । विशे० । आ० म० । आ० चू० । आ० क० ।

तोसलिय–तोसलिक–पुं० । तोसलिग्रामाधिपे क्षत्रिये, आ० म० १ अ० १ खण्ड । आ० चू० ।

तोसिय–तोषित–त्रि० । संतोषं प्रापिते, आ० म० १ अ० १ खण्ड ।

इति श्रीमत्सौधर्मबृहत्तपागच्छीय–कलिकालसर्वज्ञकल्प–
श्रीमद्भट्टारक–जैनश्वेताम्बराऽऽचार्य–श्री १००८ श्री–
विजयराजेन्द्रसूरीश्वरविरचिते 'अभिधानराजेन्द्रे'
तकाराऽऽदिशब्दसङ्कलनं समाप्तम् ।





थकारः

थ–थ–पुं० । दन्तस्थानोऽयं स्पर्शसंज्ञको वर्णः । एका० । थुम-डः । भयवारके, व्याधिभेदे, भयचिह्ने, नक्षत्रे च । रक्षणे, मङ्गले, भये च । न० । वाच० ।

" थः पुमानिन्दुकक्षोल-विरामेषु महीधरे (४५)
स्यादास्फालनशब्दे च, ज्वाले था तु स्त्रियां नदी ॥
थं नपुंसकलिङ्गे तु, भवेद्भयनिवारणे ॥ ४६ ॥
त्रिलिङ्ग्यां तु थकारोऽसौ, सितासितपृथुष्वपि । " इति माधवः । एका० ।
"थो मिथ्यावाचके भ्रान्ते, शोके थाऽऽरब्धवस्तुनि ।
निमग्ने चातिगम्भीरे, थं स्तोकार्थे नपुंसकम् ॥ ६४ ॥
मरुदेशप्रदेशेऽपि, थाऽऽद्यन्तः स्थश्चयोषिति ।
देवकूटे कषाये स्त्री, दृढे परिवृढेऽपि था ॥ ६५ ॥
थुः पुंसि पर्वते द्रोणे, व्रणे थुर्नीलेपुमान् ।
निष्ठ्यूते बले भूते, थीबन्तो ज्ञाजने भुवि ॥ ६६ ॥ " इति विश्वदेवशब्दमुमिः । एका० । वाक्यालङ्कारे, इला० १ श्रु० ८ अ० । पादपूरणे च । अव्य० । पञ्चा० ११ विव० ।

थनड्ड–देशी–भस्त्रातके, दे० ना० ५ वर्ग २६ गाथा ।

थंडिल–स्थण्डिल–न० । परानुपरोधात्प्रासुके भूभागे, ग० २ अधि० । आव० ।

अथ स्थण्डिलवक्तव्यता–तत्र गमनविधिरुच्चारप्रश्रवणव्युत्सर्जनं च । तत्र च स्थण्डिले वक्तव्ये येऽर्थाधिकारास्तानभिधित्सुद्वीरगाथामाह–

भेया सोधि अवाया, वज्जणया खलु तहा अणुण्णा य ।
कारणविही य जयणा, थंडिल्ले होंति अहिगारा ॥४२१॥

प्रथमतो भेदाः स्थण्डिलस्य वक्तव्याः, तदनन्तरं स्थण्डिले व्युत्सृजतः शोधिः प्रायश्चित्तम्, ततोऽपायाः, तदनन्तरं वर्जनाद्वारम्, ततः परमनुज्ञा, ततः कारणविधिः, तदनन्तरं यतना । एते वक्ष्यमाणाः स्थण्डिले अधिकाराः ।

तत्र प्रथमतो भेदद्वारप्रतिपादनार्थमाह–

अचित्तेण अचित्तं, मीसेण अचित्त मक्कमीसेणं ।
सचित्त मक्कमेणं, अचित्त चउभंग एक्केके ॥ ४२२ ॥

अचित्ते स्थण्डिले पन्थानमधिकृत्य त्रयो भेदाः–अचित्तं स्थण्डिलमचित्तेन पथा गम्यते ?। अचित्तं मिश्रेण पथा २, केन मिश्रेण ?, इत्यत आह–षट्कायमिश्रेण २। तथा–अचित्तं सचित्तेन पथा ३। स पन्थाः सचित्तः कथम् ?, इत्याह–षट्केन क्रमेणजीवनिकायैः३ । एवमचित्ते स्थण्डिले त्रयो भेदाः । एवं मिश्रे ३। सचित्ते च ३ । एतेषामचित्तमिश्रसचित्तानामेकैकस्मिन् भङ्गे चतुर्नैङ्गी ।

तामेवोपदर्शयति–

अणवायमसंलोए, अणवाए चेव होति संलोए ।
आवायमसंलोए, आवाए चेव संलोए ॥ ४२३ ॥

अनापातमसंलोकमिति प्रथमो भङ्गः । अनापातं संलोकवदिति द्वितीयः । आपातवदसंलोकमिति तृतीयः । आपातवत् संलोकवदिति चतुर्थः । गाथायां मत्वर्थीयप्रत्ययस्य लोपः प्राकृतत्वाद्, अथ्राऽऽदित्वाद्वा अकारप्रत्ययः । अमीषां चतुर्णां भङ्गानां प्रथमो भङ्गोऽनुज्ञातः । शेषाः प्रतिकुष्टाः । निर्ग्रन्थीनां तृतीयोऽनुज्ञातः ।

चतुर्थं स्थण्डिलं व्याख्यानयति–

तत्थाऽऽवायं दुविहं, सपक्ख–परपक्खतो ज णायव्वं ।
दुविहं होइ सपक्खे, संजय तह संजतीणं च ॥४२४॥
संविग्गमसंविग्गा, संविग्गमणुण्ण–एतरा चेव ।
असंविग्गा वि य दुविहा, तप्पक्खियऽपरा चेव ॥४२५॥

तत्राऽऽपातवत्संलोकवतोर्मध्ये आपातमापातवद् द्विविधं ज्ञातव्यम् । तद्यथा–स्वपक्षतः, परपक्षतश्च ; स्वपक्षाऽऽपातवत्, परपक्षाऽऽपातवच्चेत्यर्थः । तत्र स्वपक्षे स्वपक्षविषये द्विविधमापातवत्। तद्यथा–संयतानां, संयतीनां च–संयताऽऽपातवत्–संयत्यापातवच्चेति भावः । संयता अपि द्विविधाः–संविग्नाः–उद्यतविहारिणः, असंविग्नाः–शिथिलाः पार्श्वस्थाऽऽदयः । संविग्ना अपि द्विविधाः–मनोज्ञाः सांभोगिकाः, इतरे अमनोज्ञा असांभोगिकाः । असंविग्ना अपि द्विविधाः–तत्पाक्षिकाः संविग्नपाक्षिकाः, इतरे असंविग्नपाक्षिकाः । उक्तं स्वपक्षाऽऽपातवत् ॥ ४२५ ॥

सम्प्रति परपक्षाऽऽपातवत्प्राऽऽह–

परपक्खे वि य दुविहं, माणुस तेरिच्छगं च नायव्वं ।
एक्केकं पि य तिविहं, पुरिसित्थिनपुंसगं चेव ॥ ४२६ ॥

परपक्षेऽपि–परपक्षविषयेऽप्यापातवद् द्विविधं ज्ञातव्यम्–मानुष्यं, तैरश्चं च–मनुष्याऽऽपातवत्, तिर्यगापातवच्चेत्यर्थः । एकैकमपि मानुषं, तैरश्चं च त्रिविधम् । तद्यथा–पुरुषवत्, स्त्रीवत्, नपुंसकवच्च ।

पुरिसाऽऽवातं तिविधं, दंमिए कोडुंबिए य पागतिए ।
ते सोयऽसोयवाई, एमेव णपुंसइत्थीसु ॥ ४२७ ॥

पुरुषाऽऽपातवत् त्रिविधम् । तद्यथा–दण्डिके, कौटुम्बिके, प्राकृते च–दण्डिकपुरुषाऽऽपातवत्, कौटुम्बिकपुरुषाऽऽपातवत्, प्राकृतपुरुषाऽऽपातवच्चेत्यर्थः दण्डिकाः–राजकुलानुगताः, कौटुम्बिकाः–शेषा महर्द्धिकाः, इतरे प्राकृताः । ते च त्रयोऽपि प्रत्येकं द्विधा–शौचवादिनः, अशौचवादिनश्च । एवमेव अनेनैव प्रकारेण नपुंसकस्त्रियोरपि वक्तव्यम् । किमुक्तं भवति ?–नपुंसकाऽऽपातवच्च प्रत्येकं प्रथमतो दण्डिकाऽऽदिभेदत्रिविधं, ततः शौचवाद्यशौचवादिभेदतः पुनरेकैकं द्विविधम् । उक्तं मनुष्याऽऽपातवत् ।

अधुना तिर्यगापातवदाह–

दित्तमदित्ता तिरिया, जहण्णमुक्कोसमज्झिमा तिविहा ।

एमेवित्थिनपुंसा, दुगुंछिअछुगुंछिया नवरं ॥४२७॥

तिर्यञ्चो द्विविधाः-दृप्ताः,अदृप्ताश्च । दृप्ता दर्पवन्तः,अदृप्ताः शान्ताः । ते प्रत्येकं त्रिविधाः-जघन्याः, उत्कृष्टाः, मध्यमाश्च । जघन्या एमकाऽऽदयः, मध्यमा महिषाऽऽदयः, उत्कृष्टा हस्त्यादयः । एते किल पुरुषा उक्ताः । एवमेव स्त्रीनपुंसका अपि वक्तव्याः, नवरं ते दृप्ताः, अदृप्ताश्च प्रत्येकं द्विविधा विज्ञेयाः । तद्यथा-जुगुप्सिताः, अजुगुप्सिताश्च । जुगुप्सिता गर्दन्यादयः । इतरे अजुगुप्सिताः । उक्तमापातवत् । संलोकवद् मनुष्येष्वेष ऊह्यम् । ते च मनुष्यास्त्रिविधाः । तद्यथा-पुरुषाः, स्त्रियो,नपुंसकाश्च । एकैके प्रत्येकं त्रिविधाः-प्राकृताः,कौटुम्बिकाः,दण्डिकाश्च । पुनरेकैके द्विविधाः-शौचवादिनः, अशौचवादिनश्च ।

उक्तं च-

"आलोगो मणुएसुं, पुरिसित्थिनपुंसगाण बोधव्वो ।
पाययकुडुंबिदंडिय-असोय तह सोयवादीणं" ॥ १ ॥

तत्रैव चाऽऽपातसंलोकौ चरमभङ्गे, द्वितीये आपातः, तृतीये संलोकः । उक्ता भेदप्रभेदयुक्ता एते स्थण्डिलभेदाः । गतं भेदद्वारम् ।

अधुना शोधिद्वारमाह-

मणुयतिरिएसु लहुगा, चउरो गुरुगा य दित्ततिरिएसु ।
तिरियनपुंसित्थीसु य, मणुसित्थिनपुंसगे गुरुगा ॥४२६॥

मनुष्याणां शौचवादिनां पुरुषाणां, तिरश्चां च पुरुषाणामदृप्तानामापाते [गाथायां सप्तमी षष्ठ्यर्थे] संज्ञां व्युत्सृजतः प्रायश्चित्तं चत्वारो लघुकाः । (गुरुगा य दित्ततिरिएसु इति) दृप्तानां तिरश्चामापाते चत्वारो गुरुकाः । तथा-तिर्यग्नपुंसकस्त्रीषु तिर्यग्योनीनां नपुंसकस्त्रीणां दृप्तानामापाते (मणुस्सित्थिनपुंसगे इति) मनुष्याणां स्त्रीनपुंसकानां शौचवादिनामापाते प्रत्येकं प्रायश्चित्तं चत्वारो गुरुकाः ।

मणुयतिरियपुरिसेसुं, दोसु वि लहुगा तवेण कालेण ।
काहगुरू तवगुरुगा, दोहिँ गुरू अहुकंती वा ॥४३०॥

मनुष्याणामशौचवादिनां पुरुषाणां, तिरश्चां सदृप्तानां पुरुषाणामापाते द्वयानामपि पृथक् पृथक् प्रायश्चित्तं चत्वारो लघुकाः, तपसा कालेन च लघवः । मनुष्यस्त्रीनपुंसकानामशौचवादिनामापाते चत्वारो गुरुकाः । द्वाभ्यां गुरुकाः । तद्यथा-कालगुरुकाः, तपोगुरुकाः। अर्द्धापक्रान्तिर्वा द्रष्टव्या । सा चैवम्-तिरश्चां दृप्तानां पुरुषाणामापाते,न (?) मनुष्याणां गृहिणां पाषण्डिनां वा पुरुषाणामशौचवादिनामापाते चत्वारो लघुकाः, तिर्यक्स्त्रीनपुंसकानामदृप्तानामजुगुप्सितानां वाऽऽपाते कालगुरुकाश्चत्वारो लघुकाः । तेषामेव तिर्यक्स्त्रीनपुंसकानां दृप्तानां जुगुप्सितानां चाऽऽपाते चत्वारो गुरुलघुकाः, तपोगुरवः । मनुष्यस्त्रीनपुंसकानामशौचवादिनामपि त एव तपोगुरवः, चत्वारो लघुकाः । इयमेकेषामाचार्याणां मतेनार्द्धापक्रान्तिरुपदर्शिता ।

सम्प्रति भाष्यकारोऽन्यथाऽर्द्धापक्रान्तिमाह-

पागएँ कोमुंचीए, दंडिएँ अस्सोयसोयवादीसु ।
चउगुरुगा जमलपया, अहवा चउ छच्च गुरु-लहुगा ॥४३१॥

प्राकृते, कौटुम्बिके, दण्डिनि च प्रत्येकमशौचवादिनि चार्द्धापक्रान्तिरवसेया । सा चैवम्-प्राकृतानामशौचवादिनां पुरुषाणामापाते चत्वारो लघुकाः, तपसा कालेन च लघवः । तेषामेव शौचवादिनां प्राकृतपुरुषाणामापाते त एव चत्वारो लघवः,कालगुरुकाः । कौटुम्बिकानामशौचवादिनां पुरुषाणामापाते कालगुरुकाः,चत्वारो लघवः । तेषामेव कौटुम्बिकपुरुषाणां शौचवादिनामापाते चत्वारो लघवः, तपोगुरुकाः। दण्डिकपुरुषाणामशौचवादिनामापाते तपोगुरवश्चतुर्लघवः । तेषामेव शौचवादिनामापाते चतुर्लघवो, द्वाभ्यां गुरुकास्तपसा कालेन च।

उक्तं च-

" पागइयसोयवादी-पुरिसाणं लहुग दोहि वी लहुगा ।
ते चेव य कालगुरू, तेसिं चिय सोयवादीणं ॥ १ ॥
ते चिय लहु कालगुरू, कोमुंचीणं असोयवादीणं ।
तेसिं चिय ते चेव उ, तवगुरुगा सोयवादीणं ॥ २ ॥
दंमिएँ असोयमि चिय, सोयम्मि य दोहि गुरुग चउलहुगा ।
एस पुरिसाण भणिओ, इत्थिनपुंसाण वी एवं ॥ ३ ॥ "

(चउगुरुगा जमलपया इति) यमलपदानि स्त्रीनपुंसकलक्षणानि चतुर्गुरुकानि वक्तव्यानि। तानि चैवम्-प्राकृतस्त्रीणामशौचवादिनीनामापाते चत्वारो गुरुकाः, द्वाभ्यां लघवः । तद्यथा-तपसा, कालेन च । तासामेव शौचवादिनीनां चत्वारो गुरुकाः। कौटुम्बिकस्त्रीणामशौचवादिनीनामापाते कालगुरवश्चत्वारो गुरुकाः । तासामेव शौचवादिनीनामापाते तपोगुरुकाश्चत्वारो गुरवः । एवमेव दण्डिकस्त्रीणामशौचवादिनीनामपि, शौचवादिनीनां च चत्वारो गुरुकाः; द्वाभ्यां गुरवः-तपसा, कालेन च । एवमेव नपुंसकानामप्यापाते वक्तव्यम । अत्र च मतान्तरमाह-अथवा स्त्रीणामापाते चतुर्गुरुकाः, उक्तप्रकारेण तपसा कालेन च विशेषिताः, नपुंसकानामापाते षम् लघवो यथोक्तक्रमेण तपःकालविशेषिताः ।

सम्प्रति तिर्यगापातमधिकृत्यार्द्धापक्रान्तिमाह-

तिरिएसु वि एवं चिअ, अछुगुंछदुगुंछदित्तऽदित्तेसु ।
अमणुसेयर लहुगो, संजतिवग्गम्मि चउगुरुगा ॥४३२॥

एवमेवाऽनेनैव प्रकारेण तिर्यग्जुगुप्सिताजुगुप्सितदृप्ताऽदृप्तेष्वर्द्धापक्रान्तिरवसेया । तद्यथा-प्राकृतपुरुषगृहीतानामदृप्तानां तिर्यक्पुरुषाणामापाते चत्वारो लघवः, द्वाभ्यां लघुकाः, तपसा कालेन च । तेषामेव च दृप्तानां त एव चत्वारो लघवः कालगुरुकाः। कौटुम्बिकपरिगृहीतानामपि तिर्यक्पुरुषाणामदृप्तानामापाते च त एव कालगुरुकाश्चत्वारो लघवः। तेषामेव दृप्तानां तपोगुरवश्चत्वारो लघुकाः । दण्डिकपरिगृहीतानां तिर्यक्पुरुषाणामदृप्तानामापाते त एव चत्वारो लघवः, तपोगुरुकाः । तेषामेव दृप्तानामापाते चतुर्लघुकाः, द्वाभ्यां गुरवः-तपसा, कालेन च । तथा प्राकृतपरिगृहीतानां स्त्रीणां नपुंसकानां च तिरश्चामजुगुप्सितानामापाते चत्वारो गुरुकाः, द्वाभ्यां लघवः-तपसा, कालेन च । तेषामेव जुगुप्सितानामापाते चत्वारो गुरुकाः कालगुरवः । कौटुम्बिकपरिगृहीतानां तिर्यक्स्त्रीनपुंसकानामापाते त एव कालगुरुकाश्चत्वारो गुरवः । तेषामेव च जुगुप्सितानामापाते चत्वारो गुमकास्तपोगुरवः । एवमेव दण्डिकपरिगृहीतानामपि तिर्यक्स्त्रीनपुंसकानामदृप्तानामापाते द्रष्टव्याः । दृप्तानामापाते चत्वारो गुरुकाः, द्वाभ्यां गुरवः-कालेन, तपसा च । उक्तास्तिर्यङ्क्वप्यर्द्धापक्रान्तिः । सम्प्रति स्वपक्षाऽऽपाते शोधिमाह-अमनोज्ञानामसांभोगिकानां सांभोगिकानां संविग्नानामितरेषां वाऽसंविग्नानामापाते प्रायश्चित्तं लघुको मासः । संयतीवर्गे समापतति संयतीनामापाते चत्वारो गुरुकाः ।

सम्प्रति प्रागुक्तमेवार्थमुपदिदर्शयिषुराह-

जइतिरियपासंडे-मणुयासोएहिँ दोहिँ लहुलहुगा ।
कालगुरू तवगुरुगा, दोहिँ गुरू अच्छुकंति दुगे ॥ ४३३ ॥

भद्रेष्वदृष्टेषु तिर्यक्षु पुरुषेषु, मनुष्येषु गृहस्थेषु पाखण्डिषु चाशौचवादिषु आपतत्सु चत्वारो लघुकाः, द्वाभ्यां लघवः। मनुष्यस्त्रीनपुंसकानां शौचवादिनामापाते चत्वारो गुरुकाः, द्वाभ्यां गुरवः। तद्यथा-तपोगुरुकाः, कालगुरुकाश्च। शेषेषु तु तिर्यङ्मनुष्यभेदेषु द्विके तपःकालद्वयेऽर्द्धापक्रान्तिः, क्वचित्तपोगुरुका, क्वचित्कालगुरुकेत्येवंरूपाऽवसातव्या। सा च प्राक् दर्शिता। गतं शोधिद्वारम्।

इदानीमपायद्वारमाह-

अमणुण्णेतरगमणे, वितहाऽऽयरणम्मि होइ अहिगरणं ।
पउरदवकरण दट्ठुं, कुसीलें सेहाऽऽदिगमणं च ॥ ४३४ ॥

अमनोज्ञानामसांभोगिकानां संविग्नानामितरेषां चासंविग्नानामागमने आपाते सति वितथाऽऽचरणे दृश्यमाने भवति परस्परमधिकरणम्। इयमत्र भावना-आचार्याणां परस्परमन्यथा सामाचार्यः, ततोऽसांभोगिकानां सामाचारी वितथाऽऽचरणदर्शने नैषा सामाचारीति परस्परमधिकरणं तु वर्त्तते। इतरे कुशीलाः पार्श्वस्थाऽऽदयः, ते प्रचुरेण वारिणा पुतप्रक्षालनं कुर्वन्ति, ततस्तेषां कुशीलानां प्रचुरद्रवेण पुतनिर्लेपकरणं दृष्ट्वा शैक्षकाणाम्, आदिशब्दात् शौचवादिनां मन्दधर्मिणां च गमनं तेषां समीपे भवति।

निग्गंथाणं पढमं, सेसा खलु होंति तेसिँ पमिकुट्ठा ।
दव अप्प कलुस असती, अवण्ण पुरिसेसु पमिसेहो ॥४३५॥

यत एवमापाते दोषास्तस्मान्निर्ग्रन्थानां प्रथमं स्थण्डिलमनापातमसंलोकमित्येवंरूपं, शेषाणि त्रीणि खलु तेषां निर्ग्रन्थानां प्रतिकुष्टानि प्रतिषिद्धानि। अथ परपक्षापाते, तत्रापि पुरुषाऽऽपातं व्रजति तदा नियमतो ह्रदमकलुषं परिपूर्णं च नेतव्यम्। अन्यथा ह्रदे पानीये अल्पे कलुषे वा,यदि वा-असति-विना पानीयेन गतो भवेत्, ततस्ते दृष्ट्वाऽवर्णमश्लाघां कुर्युः, यथा-अशुचयोऽमी, न केवलमवर्णं कुर्युः किं तु प्रतिषेधेऽपि तैः क्रियते, यथा-मार्जकोच्यमीषामशुचीनां भक्तं, पानं वा दद्यात्। एष पुरुषेषु पुरुषाऽऽपाते दोषः।

सम्प्रति स्त्रीनपुंसकाऽऽपाते दोषानाह-

आय-पर-तदुभए वा, संकाईया हवंति दोसा उ ।
पंमित्थिसंगे गहिते, उड्डाहो पमिगमणमादी ॥ ४३६ ॥

स्त्रीणां नपुंसकानां वाऽऽपाते आत्मनि, परे, तदुभयस्मिन् शङ्काऽऽदयोदोषा भवन्ति। तत्राऽऽत्मनि साधुः शङ्काविषयःक्रियते, यथा-एष किमप्युदञ्चामयति। परैः स्त्री,नपुंसको वा शङ्क्यते-यथैते पापकर्माण एनं साधुं कामयन्त इति। तदुभयस्मिन्, यथाद्वावप्येतौ परस्परमत्र मैथुनार्थमागतौ। तदेवमुक्ताऽऽशङ्का। आदिशब्दादवर्णाऽऽदिदोषपरिग्रहः। तथा-स्त्र्यापाते नपुंसकाऽऽपाते वा स साधुरात्मपरोभयसमुत्थेन दोषेण स्त्रिया पण्डकेन वा सार्द्धं सङ्गं मैथुनं कुर्यात्। तत्र केनचिद् रागेण दृष्ट्वा गृहीतः स्यात्, ततः प्रवचनस्योड्डाहः, तथा स उड्डाहित इति कृत्वा प्रतिगमनाऽऽदीनि कुर्यात्।

अस्मिन्नेव चतुर्थे स्थण्डिले तिर्यगापाते दोषानाह-

आहणणादी दित्ते, गरहियतिरिएसु संकमादी य ।
एमेव य संलोए, तिरिए वज्जित्तु मणुएसुं ॥ ४३७ ॥

दृप्ते दृप्ततिर्यगापाते आहननाऽऽदयो दोषाः,आहननं शृङ्गाऽऽदिनिस्तामनम्, आदिशब्दान्मूर्च्छागमनमारणाऽऽदिपरिग्रहः। गर्हितेषु तिर्यक्षु गर्हिततिर्यक्स्त्रीनपुंसकाऽऽपाते शङ्का मैथुने, आदिशब्दात् प्रतिसेवेत्तापीत्यादयो दोषाः। यथा-आपाते दोषा उक्ताः, एवमेव संलोकेऽपि तिर्यग्योनिकान् वर्जयित्वा मनुष्येषु द्रष्टव्याः। किमुक्तं भवति?-एषां संलोके नास्ति कश्चिदनन्तरोदितो दोषः, मनुष्याणां तु स्त्रीपुरुषनपुंसकानां संलोके ये आपाते दोषास्ते वेदितव्याः।

यदि कदाचिदात्मपरोभयसमुत्था मैथुनदोषा न भवेयुः, तथाऽप्यमी संभाव्यन्ते-

जत्थऽम्हे पासामो, जत्थ य आयरइ नातिवग्गो णे ।
परिभवकामेमाणो, संकेयगदित्तको वा वि ॥ ४३८ ॥

यत्र वयममुमागच्छन्तं पश्यामो, यत्र वाऽस्माकं ज्ञातिवर्गो निरन्तरं संचरति विचारार्थं गच्छति, तत्रास्माकं परिभवं कामयमानो; दत्तसंकेतो वा समागच्छति।

किं च-

कलुस दवे असतीए, पुरिसाऽऽलोए हवंति दोसा उ ।
पंडित्थीसु वि य तहा, खुड्डे वेउव्विए मुच्छा ॥ ४३९ ॥

ह्रदे पानीये कलुषे, असति अविद्यमाने च पुरुषाऽऽलोके दोषाः प्रागुक्ता अवर्णाऽऽदयो भवन्ति। तथा-पण्ढा नपुंसकाः, पण्ढेषु स्त्रीषु च संलोकमानेषु क्षुद्रे, वैकुर्विके वा सागारिके दृष्टे मूर्च्छा भवेत्। इयमत्र भावना-नपुंसकः स्त्री वा सागारिकं स्वजातवत् एवातिस्थूलं ह्रस्वं च, यदि वा-कषायितम्, अथवा-तद्दोषेण वैकुर्विकं दृष्ट्वा तद्विषयाभिलाषमूर्च्छामापन्नः-स्तं साधुमुपसर्गयेत्, तस्मात् त्रयाणामपि संलोको वर्जनीयः। गतं चतुर्थं स्थण्डिलम्।

इदानीं तृतीयमापातबदसंलोकमधिकृत्य दोषानाह-

आयसमुत्था तिरिए, पुरुसे दवकलुस असति उड्डाहो ।
आयोभय इत्थीसु अ, आगच्छंते य आसंका ॥४४०॥

तिर्यगापाते आत्मसमुत्था दोषाः। तद्यथा-स्त्रीणां नपुंसकानां चाऽऽपाते मैथुनाऽऽशङ्काऽऽदयो दोषाः, दृप्तानां तिर्यग्पुरुषाणामापाते आत्मन उपघातः। तथा-पुरुषे मनुष्यपुरुषाऽऽपाते ह्रदे कलुषे, असति वा प्रवचनस्योड्डाहः। तथा-स्त्रीषु, चशब्दान्नपुंसकेषु आगच्छत्सु च आत्मोभयविषया, आत्मोभयग्रहणं परस्योपलक्षणम्, आत्मपरोभयविषया आशङ्का। सा च प्रागेव भाविता।

आसायदोस तइए, बिइए संलोयतो भवे दोसा ।
ते दो वि नत्थि पढमे, तहि गमणं तत्थिमा मेरा ॥४४१॥

तृतीये स्थण्डिले आपातदोषाः, द्वितीये च संलोकतो दोषा भवन्ति वेदितव्याः। ते च द्वेऽपि-आपातदोषाः, संलोकदोषाश्च प्रथमे स्थण्डिले न सन्ति, ततस्तत्र गमनं विधेयम्। तत्रेयं मर्यादा।

तामेवाऽऽह-

कालमकाले सन्ना, कालो तइयाएँ सेसगमकालो ।

पढमापोरिसि आपु-च्छपाणगमपुप्फि अन्नदिसिं ॥४४२॥

द्विविधा सेहा। तद्यथा-काले, अकाले च। तत्र कालस्तृतीयस्यां पौरुष्यां, शेषकं सर्वमपि प्रातःप्रभृतिकमकालः। तत्र तावदकाले संज्ञायां विधिरुच्यते-कथं गन्तव्यम् ?, तत्र यदि प्रथमायां पौरुष्यां भवेत् तदा पात्रमुद्ग्राह्य पानकनिमित्तं व्रजति, अथ नोद्ग्राह्यति पात्रं,ततो लोको जानीयात्; यथा-एष बहिर्गमननिमित्तं पानीयं गृह्णाति, ततश्चतुर्थे रसिकं न दद्यात्। अपि चोद्ग्राहिते पात्रेऽयमधिको गुणः-कोऽपि आद्धो ग्रामान्तरं, नगरान्तरं वा गन्तुकामः प्रधावितः, अद्धन्युत्पन्नायां संज्ञायां तं प्रतिलाभयेत्, सोऽपि लाभयेत्,सोऽपि लाभो भवति, शङ्काऽपि च नोपजायते, यथा-एष बहिर्गमनाय पानकनिमित्तं हिण्डते। स पुनः कीदृशं पानीयं गृह्णीयात्?,अत आह-अपुष्पितमच्छं सुगन्धं चतुर्थरसिकं न भवति,तादृशं तत उष्णोदकाऽऽदि गृह्णीयात्। (अन्नदिसिमिति) यस्यां दिशि संज्ञाभूमिस्तस्यां पानकस्य न गन्तव्यम्। यदि पुनस्तस्यां गच्छति, ततोऽतिरिक्तं ग्रहीतव्यं, यदि द्वौ जनौ तदा, यथा तृतीयस्याप्युद्धरति। किं बहुना ?, यावन्तो व्रजन्ति तावतां योग्यमतिरिक्तं तथा गृह्णाति यथा एकस्योद्धरति। एवं पानीयं गृहीत्वा समागतो बहिः प्रतिश्रयस्य पादौ प्रमार्ज्य दण्डकं स्थापयित्वा ऐर्यापथिकीं प्रतिक्रम्य आलोच्य गुरोः पानकं दर्शयित्वा आपृच्छति, गुरुमापृच्छ्य संज्ञाभूमिं व-जामीति गच्छति। तत्र जघन्योऽपि कश्चित् व्रजति, तर्हि यथा एकस्योद्धरति तावत्प्रमाणमात्रके पानकं गृह्णाति, तच्चोद्ग्राहितं पात्रमन्यस्य समर्प्य दण्डकं प्रमार्ज्य आवश्यकीं कृत्वा व्रजति। यथोक्तविधेरकरणे सर्वत्र प्रायश्चित्तं मासलघु।

उक्तमेवार्थं स्पष्टतरमुपदर्शयति-

अतिरेगगहणमुग्गा-हियम्मि आलोय पुच्छियं गच्छे।
एसा उ अकालम्मी, अहिंडिए हिंडिए काले ॥४४३॥

पात्रे उद्ग्राहिते एकजनातिरेकेण पानीयस्य ग्रहणं कर्त्तव्यं, कृत्वा च गुरोः पुरत आलोच्य गुरुमापृच्छ्य संज्ञाभूमिं गच्छेत्। एषा अकाले संज्ञा उक्ता। संप्रति कालसंज्ञा वक्तव्या। काले कालसंज्ञा (अहिंडिते हिंडिते त्ति) इयमत्र भावना-तृतीयस्यां पौरुष्यां कालस्य प्रतिक्रमणे यावन्नाद्यापि भिक्षावेला भवति तावत संज्ञाभूमिं व्रजति। अथाहिण्डिते समुद्दिष्टे भाजनेषु च प्रदत्तकल्पेषु यावन्नावगाहते चतुर्थपौरुषीकालः, तावच्चलति, अथोत्सूरे भिक्षावेला, चिरं वा हिण्डितः, ततोऽवगाढायामपि चरमपौरुष्यां गच्छति।

तत्र को विधिरित्याह-

कप्पेतूणं पाए, एक्केकस्स उ पुणे पमिग्गहगे।
दाउं दो दो गच्छे, तिण्हट्ठ दवं च घेत्तूणं ॥४४४॥

पात्राणि कल्पयित्वा विशोध्य त्रीन् कल्पान् पात्राणां निर्लेपनाय दत्त्वा एकैकस्याऽऽत्मीयाऽऽत्मीयसंघाटकस्य द्वौ द्वौ पतद्ग्रहौ दत्त्वा द्वौ द्वौ संज्ञाभूमिं गच्छतामित्। कथमित्याह-अयामार्थाय ऊर्वं गृहीत्वा, पानकं हि तावत्प्रमाणं ग्रहीतव्यं यावत्पश्चादेकस्योद्धरति। इयमत्र भावना-ये ये संघाटवन्तस्तेषां तेषामेको द्वौ पतद्ग्रहौ धारयति, द्वितीयश्चान्येन समं याति, तेषु चाऽऽगतेषु ये प्रागितरे स्थितास्ते व्रजन्ति, इतरे चाऽऽगताः पात्राणि धारयन्ति,यावन्तश्च गच्छन्ति तावतां योग्यमेकातिरिक्तं पानकं मात्रके गृह्णन्ति।

कथं पुनस्ते गच्छन्तीत्यत आह-

अजुगलिया अतुरंता, विगहारहिया वयंति पढमं तु।
निसिट्ठु डगलगहणं, आवडणं वच्चपासज्ज ॥४४५॥

अयुगलिता न समश्रेणिकयुगलरूपतया स्थिताः, अत्वरिताः, विकथारहिताः स्त्रीभक्ताऽऽदिकथा अकुर्वाणाः प्रथममनापातासंलोकलक्षणं स्थण्डिलं व्रजन्ति। तत्र निषद्य उपविश्य, नोर्द्धस्थिता इत्यर्थः। उर्द्धस्थितानां सम्यक्प्रक्षेपणासंभवात्। डगलग्रहणं कुर्वन्ति-ये भूमावसंबद्धाः पुनर्निर्लेपनाय लेष्टुकास्ते डगलकाः, तानाददते। आदाय चैतेषां भूमावापातनं कुर्वन्ति येन वृश्चिकाऽऽदिस्ततोऽपसरति। उक्तं च-"ते डगले टिट्टियावेइ, ततो जो तत्थ विच्छुगादी, सो अवसरति।" इति। तेषां च डगलकानां प्रमाणं वर्चः पुरीषमासाद्य प्रतिपत्तव्यं, यो भिन्नवर्चाः स त्रीन् डगलकान् गृह्णाति, अन्यो द्वावेकं वा।

आलोएऊण दिसा, संडासगमेव संपमज्जित्ता।
पेहियपमज्जिएसु य, जयणाए थंमिल्ले णिसिरे ॥४४६॥

स्थण्डिलं गत्वा तत्र दिशामापातसंलोकवर्जनार्थमालोकनं कुर्यात्, दिश आलोक्य तदनन्तरं संमासकं संप्रमार्ज्य प्रेक्षितेषु प्रमार्जितेषु च तत्र प्रदेशेषु स्थण्डिलेषु पुरीषं निसृजेत् व्युत्सृजेत्। कथमित्याह-यतनया "दिसिपवणगामसूरिय।" इत्यादिवक्ष्यमाणलक्षणया तत्पुनरनापातासंलोकं स्थाणुमलमेभिर्वक्ष्यमाणैर्दशभिः स्थानैः विशुद्धं ज्ञातव्यम्।

तान्येवाऽऽह-

अणावायमसंलोए, परस्सऽणुवघातिए।
समे अज्झुसिरे यावि-ऽचिरकालकयम्मि य ॥४४७॥
वित्थिण्णे दूरमोगाढे-ऽनासन्ने बिलवज्जिए।
तसपाणबीयरहिए, उच्चाराऽऽदीणि वोसिरे ॥४४८॥

अनापातमसंलोकं,परस्यानुपघातिकं, समम्,अशुषिरम्,अचिरकालकृतं, विस्तीर्णं, दूरमवगाढम्,अनासन्नं, बिलवर्जितं, त्रसप्राणबीजरहितं यत् स्थण्डिलं तत्र उच्चाराऽऽदीनि उच्चारप्रश्रवणप्रभृतीनि व्युत्सृजेत्। एष एककः संयोगो दर्शितः।

संप्रति द्विकाऽऽदिसंयोगानुपदर्शयति-

इगदुगतिगचउपंचग-छगसत्तगअट्ठनवगदसगेहिं।
संजोगा कायव्वा, भंगसहस्सं चउव्वीसं ॥४४९॥

अमीषामनन्तरोदितानां दशानां पादानामेकद्वित्रिचतुःपञ्चषट्सप्ताष्टनवदशकैः संयोगाः कर्त्तव्याः, तेषु च भङ्गाः सर्वसंख्यया चतुर्विंशत्यधिकं सहस्रम्। अथ कस्मिन् संयोगे कियन्तो भङ्गकाः ?। उच्यते-इह भङ्गकानयनकरणमिदम्-दशाऽऽदयोऽङ्का एकैकेन हीनास्तावत् स्थाप्यन्ते यावत् पर्यन्ते एकः, ततस्ते यथाक्रममेभी राशिभिर्गुणयितव्याः। तद्यथा-दशक एककेन, नवकः पञ्चभिः,अष्टकः पञ्चदशभिः, सप्तकस्त्रिंशता, षट्को द्वाचत्वारिंशता, पञ्चकोऽपि द्वाचत्वारिंशता, चतुष्कस्त्रिंशता, त्रिकः पञ्चदशभिः, द्विकः पञ्चकेन, एकक एककेन। स्थापना-

१०	९	८	७	६	५	४	३	२	१
१	५	१५	३०	४२	४२	३०	१५	५	१

अमीषां चामीभिर्गुणाकारैर्गुणने जाता एकाऽऽदिसंयोगेष्वियं भङ्गसंख्या। तद्यथा-एककसंयोगे दश। द्विकसंयोगे पञ्चचत्वारिंशत्। त्रिक-

संयोगे विंशत्युत्तरं शतम्। चतुष्कसंयोगे द्वे शते दशोत्तरे। पञ्चसंयोगे द्वे शते द्विपञ्चाशदधिके। षट्संयोगे द्वे शते दशोत्तरे। सप्तकसंयोगे विंशं शतम्। अष्टकसंयोगे पञ्चचत्वारिंशत्। नवकसंयोगे दश। दशकसंयोगे एकः। एकं च वसत्यादिषु विविक्तेप्रदेशे स्थण्डिलमिति सर्वसङ्कसंख्या एकत्र मीलयित्वा रूपाधिका क्रियते, ततश्चतुर्विंशं सङ्कसहस्रं भवति।

"समनेगणयणेकरणं, दसगाऽऽति ओसरंति जावेक्को।
एए उ गुणेयव्वा, इमेहिँ रासीहिँ सङ्कमसो ॥ १ ॥
एक्कग पंचग पन्नर, तीसा वायाल पंच जा ठाणा।
परतो बायालीसा, पमिलोममवेहि जावेक्को ॥ २ ॥
एक्कगसंजोगादी, गुणिया लद्धा हवंति एमेते।
मिलिया रूवाहिकया, भंगसहस्सं चउव्वीसं ॥ ३ ॥"

संप्रत्येतानि दश शुद्धानि पदानि व्याख्यातव्यानि, यत्र यत्र दोषास्ते तत्र तत्र कथनीयाः, तत्राऽऽपातवत् संक्षोकवच्च पूर्वं व्याख्यातम्। इदानीं परस्यौपघातिकमाह-

आया पवयण संजम, तिविहं उवघातियं मुणेयव्वं।
आराम वच्च अगणी, पायाऽऽदसुई य अन्नत्थ ॥४५०॥

इह पूर्वार्द्धपदानां पश्चार्द्धपदानां च यथाक्रमं योजना। सा चैवम्-औपघातिकमुपघातप्रयोजनकं स्थण्डिलं त्रिविधं ज्ञातव्यम्। तद्यथा-आत्मोपघाति, प्रवचनोपघाति, संयमोपघाति च। तत्राऽऽत्मोपघाति आरामः, तत्र हि संज्ञां व्युत्सृजतो घाताऽऽदि पिट्टनाऽऽदि। प्रवचनोपघाति-वर्चो गूथं, तद्धि जुगुप्सितमशुच्यात्मकत्वात्, ततस्तत्र संज्ञाव्युत्सर्गे ईदृशा एते इति प्रवचनोपघातः। संयमोपघाति-अग्निरग्निस्थानं, तत्र हि संज्ञाव्युत्सर्गे ते अग्न्यारम्भणोऽन्यत्रास्थण्डिले अग्निस्थानं कुर्वन्ति, त्यजन्ति वा तां संज्ञामस्थण्डिले।

संप्रति विषमस्थण्डिले दोषानाह-

विसमपक्खोट्टणि आया, इयरस्स पक्खोट्टणम्मि छक्काया।
झुसिरम्मि विच्छुगादी, उभयक्कमणे तसादीया ॥४५१॥

विषमे स्थण्डिले साधुः प्रक्षोटेत्, पतेदिति भावः। तत्र चाऽऽत्मा विराध्येत। इतरस्य पुरीषस्य, प्रस्रवणस्य च प्रक्षोटने षट्काया विराध्यन्ते। तथाहि-प्रतीतमेवैतत्-पुरीषं, प्रस्रवणं वा प्रक्षोटेन षट्कायान् विराधयति। एषा संयमविराधना। शुषिरे संज्ञाऽऽदि व्युत्सृजतो वृश्चिकाऽऽदिभिरात्मनो विराधना। आदिशब्देन सर्पाऽऽदिपरिग्रहः। उभयं संज्ञाप्रस्रवणं, तेनाऽऽक्रमणे त्रसाऽऽदयः त्रसस्थावरप्राणा विराध्यन्ते। एषा संयमविराधना।

अथ कीदृशं चिरकालकृतं स्थण्डिलमत आह-

जे जम्मि उउम्मि कया, पयावणादीहिँ थंभिया ते उ।
होंति इयरे चिरकया, वासावासे य वारसगं ॥ ४५२ ॥

यानि स्थण्डिलानि यस्मिन् ऋतौ प्रतापनाऽऽदिभिः कृतानि तानि तस्मिन्नचिरकालकृतानि भवन्ति। यथा-हेमन्तकृतानि हेमन्त एवाचिरकालकृतानि। इतराणि तु ऋत्वन्तरव्यवहितानि चिरकालकृतानि, अस्थण्डिलानि तानीति भावः। यत्र पुनरेकं वर्षारात्रं सगोधने ग्रामे उषितस्तत्र द्वादशकं द्वादश संवत्सराणि स्थण्डिलं, परमस्थण्डिलं भवति।

सम्प्रति विस्तीर्णमाह-

हत्थाऽऽयामं चउरस, जहण्ण उक्कोस जोयण विच्छिन्नं।
चउरंगुलप्पमाणं, जहन्नयं दूरमोगाढं ॥ ४५३ ॥

जघन्यं विस्तीर्णं चतुरस्रं चतसृष्वपि दिक्षु हस्ताऽऽयामम्, उत्कृष्टं द्वादशयोजनानि, तच्च चक्रवर्त्तिस्कन्धावारनिवेशे प्रतिपत्तव्यम्। दूरावगाढमाह-यत्राधस्ताच्चतुरङ्गुलप्रमाणमचित्तम्-चत्वारि अङ्गुलान्यचित्ता भूमिः, तज्जघन्यं दूरमवगाढम्, अर्थात्पञ्चादङ्गुलप्रभृतिकमचित्तं यस्याधस्तात्तदुत्कृष्टं दूरमवगाढम्।

साम्प्रतमासन्नमाह-

दव्वाऽऽसन्नं भवणा-दियाण तहियं तु संजमाऽऽयाए।
आयापवयणसंजम-दोसा पुण भावआसन्ने ॥४५४॥

आसन्नं द्विविधम्-द्रव्यतो, भावतश्च। तत्र द्रव्याऽऽसन्नं भवनाऽऽदीनां निकटम्। आदिग्रहणाद् देवकुलानां, ग्रामस्य, पथो, वृक्षस्य च परिग्रहः। यस्य हि वृक्षस्य हस्तिपादप्रमाणस्कन्धः, तस्य समन्ततो हस्तो वर्जयितव्यः। तत्र यदि द्रव्याऽऽसन्ने व्युत्सृजति, ततः संयमे, आत्मनि च विराधना। तत्र यदू गृहाऽऽदीनामासन्नं तत् स्थण्डिलं परित्यज्यान्यत्र स्थण्डिलं कुर्युः, अथ वा पानीयेन तत्प्रक्षालयेयुः। ततः संयमविराधना। आत्मविराधना पिट्टनाऽऽदिप्राप्तेः। भावाऽऽसन्नं नाम तावत्तिष्ठति, यावत्संज्ञा मनाग् नागच्छति, ततोऽनधिसहः स्थण्डिलं गन्तुमशक्नुवन् अस्थण्डिले, भवनाऽऽदीनां वा प्रत्यासन्ने व्युत्सृजेत्। तत्र चाऽऽत्मविराधना, संयमविराधना च प्राग्वत्। अत्रास्थण्डिलमिति कृत्वा सागारिको वा तिष्ठतीति संज्ञां धारयति आत्मविराधना, मरणस्य ग्लानत्वस्य चावश्यं भावात्। अनधिसहेन च सता तेन लोकपुरतोऽस्थाने संज्ञाव्युत्सर्गे पुनर्जुगुप्साऽऽदिलेपने वा प्रवचनोपघातः।

सबिले, त्रसप्राणबीजोपेते दोषानाह-

होंति बिले दो दोसा, तसेसु बीएसु वा वि ते चेव।
संजोगतो य दोसा, मूलगमा होंति सविसेसा ॥ ४५५ ॥

बिले संज्ञां व्युत्सृजतो द्वौ दोषौ। तद्यथा-आत्मविराधना, संयमविराधना च। तत्र यदा बिले प्रविशन्त्या संज्ञया प्रस्रवणेन तत्रता जीवा बाध्यन्ते तदा संयमविराधना। सर्पाऽऽदिभक्षणे आत्मविराधना। त्रसेषु, बीजेषु च तावेव द्वौ दोषौ संयमाऽऽत्मविराधनालक्षणौ। तत्र त्रसेषु बीजेषु प्राणव्यपरोपणात्संयमविराधना सुप्रतीता। त्रसेष्वात्मविराधना, तेषां उपद्रवसंभवात्। बीजेष्वात्मविराधना-बीजशूकाऽवयवानामतिदीक्ष्णानां पदेषु लग्नतः पादप्रक्षोटनतः पतनतो वा। तदेवमेकैकस्मिन् वर्जनीये स्थण्डिले दोषा उक्ताः। अस्माच्च मूलगमदिकैकसंयोगरूपात् द्विकत्रिकाऽऽदिपदानां संयोगतः सविशेषा बहुबहुतरका भवन्ति ज्ञातव्याः। द्विकसंयोगे द्विगुणास्त्रिकसंयोगे त्रिगुणा यावद्दशसंयोगे दशगुणा इति।

सम्प्रति प्रागुक्तमपि प्रायश्चित्तमन्याऽऽचार्यपरिपाट्या, मनाक् विशेषप्रदर्शनार्थतया च पुनराह-

पंथम्मि य आलोए, झुसिरम्मि तसेसु चेव चउलहुगा।
पुरिसावाए य तहा, तिरियावाए य ते चेव ॥ ४५६ ॥

पथ आसन्ने पुरुषाणामालोके, शुषिरे, त्रससंकुले च संज्ञां व्युत्सृजतः प्रायश्चित्तं चत्वारो लघुकाः। तथा सर्वमनुष्यपुरुषाऽऽपाते, सर्वतिर्यक्पुरुषाऽऽपाते च प्रत्येकं त एव चत्वारो द्रष्टव्यः। सर्वग्रहणं मनुष्येषु कौटुम्बिकाऽऽदिभेदपरिग्रहार्थम्।

तिर्यक्चोत्कृष्टाऽऽदिभेदसंग्रहार्थमाह-

इत्थिनपुंसाऽऽवाए, भावासन्ने बिले य चउगुरुगा ।
पणगं लहुयं गुरुगं, बीए सेसेसु मासलहुं ॥ ४५७ ॥

सर्वासां प्राकृताऽऽदिभेदभिन्नानां स्त्रीणामापाते च, तथा भावासन्ने बिलसहिते च स्थण्डिले व्युत्सृजतः प्रत्येकं चत्वारो गुरुकाः, प्रत्येकबीजसंकुले स्थण्डिले लघूनि पञ्चरात्रिन्दिवानि, अनन्तबीजसंकुले गुरुकाणि, शेषेष्वक्षुण्णेषु स्थण्डिलेषु मासलघु। यच्चान्यदा पर्यन्ते तदपि सर्वमाप्नोति । यत्रासामाचारीकरणं तत्रापि मासलघु ।

अपमज्जणा अपडिले-हणा य दुपमज्जणा दुपमिलेहा ।
तिएँ मासिय पणगं लहु,कालतवे वा चरिममुक्को ॥४५८॥

संज्ञां व्युत्सृष्टुकामो न प्रत्युपेक्षते न प्रमार्जयति मासलघु, कालगुरु, तपोलघु । न प्रमार्जयति प्रत्युपेक्षते मासलघु, द्वाभ्यां लघु । एवं त्रिकेषु स्थानेषु मासिकं लघु, कालेन तपसा चोक्तप्रकारेण विशेषितम् । अथ प्रत्युपेक्षते प्रमार्जयति, तत्र दुष्प्रत्युपेक्षिते दुष्प्रमार्जिते रात्रिन्दिवपञ्चकं लघु, दुष्प्रत्युपेक्षिते प्रमार्जिते रात्रिन्दिवपञ्चकं लघु, तपोलघु, कालगुरु । प्रत्युपेक्षिते दुष्प्रमार्जिते रात्रिन्दिवपञ्चकं लघु, द्वाभ्यां लघुकम् । एवं त्रिकेषु त्रिस्थानेषु पञ्चकं, कालेन तपसा चोक्तप्रकारेण विशोधितं, चरमेषु प्रत्युपेक्षितं सुप्रमार्जितमित्येवंरूपे भङ्गे शुद्धो न प्रायश्चित्तभाक् ।

खुड्डो धावणे कुसिरे, तह खुत्तो अपमिलेहणा लहुगो ।
थरवाविच्चगोवय-ठिअमल्लगउड्डणे लहुगा ॥ ४५९ ॥

इयमपि गाथाऽन्याऽऽचार्यपरिपाटिसूचिका, ततो न पुनरुक्तता, नापि विरोधो, मतान्तरत्वात् । क्षुल्लकं स्तोकं यदि धावनं प्रक्षोटनमित्यर्थः। तत्र तथा सुषिरे स्थण्डिले तथाकृत्वोऽप्रत्युपेक्षणायां प्रत्येकं प्रायश्चित्तं लघुको मासः । तथा-गृहे यदि संज्ञां व्युत्सृजति वाप्यां वर्चसि गृहे वर्चस उपरि वा गोष्पदे वा कर्दमस्थितो वा तथा मल्लके व्युत्सृज्य यदि परिष्ठापयति तदा सर्वेष्वेतेषु स्थानेषु प्रायश्चित्तं प्रत्येकं चत्वारो लघवः । गतमपायद्वारम् ।

इदानीं वर्जनाद्वारमाह-

दिसिपवणगामसूरिय-छायाएँ पमज्जिऊण तिक्खुत्तो ।
जस्सुग्गहो त्ति काऊ-ण वोसिरे आयमे वा वि ॥४६०॥

उत्तरदिक्,पूर्वदिक् च लोके पूज्या, ततस्तस्याः पृष्ठप्रदाने लोकमध्ये अवर्णवादो भवति, वानमन्तरं वा किञ्चित् मिथ्यादृष्टिः कुप्येत। तथा च सति जीवितव्यस्य विनाशः, तस्मात् दिवा रात्रौ च पृष्ठं पूर्वस्याम्, उत्तरस्यां तु दिवा। दक्षिणस्यां दिशि रात्रौ निशाचराः संचरन्ति। ततस्तस्यां पृष्ठं रात्रौ वर्जयेत् । उक्तं च- "उभे मूत्रपुरीषे तु, दिवा कुर्याद्दुदङ्मुखः। रात्रौ दक्षिणतश्चैव, तथा चाऽऽयुर्न हीयते ॥ १ ॥" तथा यतः पवनस्ततः पृष्ठं न कुर्यात्, मा लोको ब्रूयात्-अर्घयन्त्येतदेते इति, नासिकायां चार्शांसि मा भूवन् । तथा ग्रामस्य, सूर्यस्य च पृष्ठं न दातव्यं, लोकेऽवर्णवादसंभवात् । तथाहि-सूर्यस्य, ग्रामस्य वा पृष्ठदाने लोको ब्रूते-न किञ्चित् जानन्त्येते यल्लोकोद्द्योतकरस्यापि सूर्यस्य, यस्मिन् ग्रामे स्थीयते तस्याऽपि च पृष्ठं ददतीति । तथा संसक्तग्रहणिश्छायायां व्युत्सृजेत्, येन द्वीन्द्रियत्वनाशो न भवति । तथा त्रिःकृत्वस्त्रीन् वारान् प्रमार्ज्य। उपलक्षणमेतत्-प्रत्युपेक्ष्य च व्युत्सृजेत् । तत्राप्रत्युपेक्षणे अप्रमार्जने, दुष्प्रत्युपेक्षणे दुष्प्रमार्जने च प्रायश्चित्तं प्रागुक्तम्। तथा यस्यावग्रहः सोऽनुजानीयादिति अनुज्ञाय व्युत्सृजेत्, आचमेद्वा। एष गाथार्थः ।

साम्प्रतमेनामेव विवरीषुराह--

उत्तर पुव्वा पुज्जा, जम्माए निसियरा अज्जिवमंति ।
घाणारसा य पवणे, सूरियगामे अवन्नो उ ॥ ४६१ ॥

उत्तरा, पूर्वा च लोके पूज्यते, ततो दिवा रात्रौ च पूर्वस्यामुत्तरस्यां वा पृष्ठं न दद्यात्, तथा न याम्या दक्षिणा, तस्यां रात्रौ निशाचरा देवा अभिपतन्ति समागच्छन्ति, ततस्तस्यां रात्रौ पृष्ठं न दद्यात्, तथा यतः पवनस्ततः पृष्ठकरणे अशुभगन्धघ्राणिनोसिकायां चार्शांस्युपजायन्ते । तस्मात्पवनस्यापि पृष्ठं न कर्त्तव्यम् । सूर्यस्य, ग्रामस्य च पृष्ठकरणे अवर्णो लोकमध्ये यथाऽभिहितः प्राक्, ततस्तयोरपि न दातव्यं पृष्ठमिति ।

"छायाए" इति व्याख्यानार्थमाह--

संसत्तग्गहणी पुण, छायाए निग्गयाइँ वोसिरई ।
छायासति उण्हम्मि वि, वोसिरिय मुहुत्तगं चिट्ठे ॥४६२॥

संसक्ता द्वीद्रियैर्ग्रहणिः पांशुर्यस्यासौ संसक्तग्रहणिः,स द्वीन्द्रियरक्षणार्थं छायायां वृक्षाऽऽदिनिर्गतायां व्युत्सृजति । अथ छायाऽप्याऽपि न निर्गच्छति, मध्याह्ने एव संज्ञा प्रवृत्ता, ततः छायाया 'असति' अभावे उष्णेऽपि स्वशरीरच्छायायां पुरीषस्य कृत्वा व्युत्सृजति, व्युत्सृज्य च मुहूर्त्तं तथैव तिष्ठति, येनैतावता कालेन स्वयोगतः परिणमन्ति, अन्ययोष्णेन महती परितापना स्यात् ।

अथ व्युत्सृजन् स्वोपकरणं कथं धरतीत्यत आह-

उवगरणं वामगऊ-रुगम्मि मत्तो य दाहिणे हत्थे ।
तत्थऽक्खित्थ व पुंछे, तिहिँ आयमणं अदूरम्मि ॥४६३॥

उपकरणं दण्डकं रजोहरणं च वामे ऊरौ स्थापयति, मात्रकं दक्षिणहस्ते क्रियते, अगलकानि च वामहस्तेन धारणीयानि, ततः संज्ञां व्युत्सृज्य तत्रान्यत्र वा प्रदेशे डगलकैः पुतं पुंसयति रूक्षयति, पुंसयित्वा त्रिभिर्नावापूरकैश्चुलुकैरित्यर्थः । आचमनं निर्लेपनं करोति। तथा चोक्तम-"तिहि नावाए पूरएहिं आयमइ, निल्लेवेति वा। नावा पूरओ नाम-पसती।" इति। तदपि चाऽऽचमनमदूरे करोति। यदि पुनर्दूरे आचमति तत उड्डाहः, कश्चित् दृष्ट्वा चिन्तयेत्-अनिर्लेप्यपुतो गत एष इति ।

संप्रत्यालोके प्रायश्चित्तविधिमाह-

आलोगं पि य तिविहं, पुरिसित्थिनपुंसकं च बोधव्वं ।
लहुगा पुरिसाऽऽलोए, गुरुगा य नपुंसइत्थीसु ॥ ४६४ ॥
आवातं पि य दुविहं, माणुसतेरिच्छयं च नायव्वं ।
एक्केक्कं पि य तिविहं, पुरिसित्थिनपुंसगे चेव ॥ ४६५ ॥

आलोकमपि च त्रिविधं त्रिप्रकारम्। तद्यथा-पुरुषाऽऽलोकं, स्त्र्यालोकं, नपुंसकाऽऽलोकम्। गाथायां पदैकदेशे पदसमुदायोपलक्षणानि। तत्र पुरुषाऽऽलोके प्रायश्चित्तं चत्वारो लघुकाः। स्त्र्यालोके नपुंसकाऽऽलोके च चत्वारो गुरुकाः । तदेवमचित्तं स्थण्डिलमचित्तेन पथा भणितम् । अथ सचित्तेन मिश्रेण वा यदा तद् गच्छति तदा तदेव प्रायश्चित्तम ।

इक्काय-चउसु लहुगा, परित्ते लहुगा य गुरुग साहारे ।
संघट्टणे परियावणे, लहु गुरुग निवायणे मूलं ॥४६६॥

षट्कायाः-पृथिव्यप्तेजोवायुवनस्पतित्रसरूपाः, तेषां मध्ये चतुर्षु पृथिव्यप्तेजोवायुरूपेषु संघट्टनाऽऽदिषु लघुकाः प्रायश्चित्तम् । परित्तकवनस्पतिकायेऽपि च लघुकाः । साधारणे अनन्तवनस्पतिकायिके संघट्टनाऽऽदिषु गुरुकाः । तथा द्वीन्द्रियाऽऽदीनां संघट्टने परितापने च यथायोगं लघुका गुरुकाश्च प्रायश्चित्तम् । अपेतनिपातने विनाशे मूलम् । इयं तत्र भावना-पृथिवीकायं संघट्टयति मासलघु, परितापयति, जीविताद् व्यपरोपयतीत्यर्थः, चतुर्लघु । एवमप्काये, तेजस्काये, वायुकाये, प्रत्येकवनस्पतिकाये च द्रष्टव्यम् । उक्तं च-" इक्काया ऽऽदिमचलस्, तद य परित्तम्मि होति वणकाए । लहु गुरु मासो चललहु, घट्टणपरितावणद्दवणे ॥१॥ " एतत् प्रायश्चित्तमेकैकस्मिन् दिवसे संघट्टनाऽऽदिकरणे, यदि पुनर्द्वौ दिवसौ पृथिव्यादि संघट्टयति तदा मासगुरु, परितापयति चतुर्लघु, जीविताच्च व्यपरोपयति चतुर्गुरु, त्रीन् दिवसान् निरन्तरं पृथिव्यादीन् संघट्टयति चतुर्लघु, परितापयति चतुर्गुरु, अपद्रावयति षड्लघु, निरन्तरं चतुर्लघु, निरन्तरं चतुरो दिवसान् संघट्टने चतुर्गुरु, परितापने षड्लघु, अपद्रावणे षड्गुरु, पञ्चदिवसान् निरन्तरं पृथिव्यादीनां संघट्टने षड्लघु, परितापने षड्गुरु, अपद्रावणे मासिकच्छेदः, षड् दिवसान् निरन्तरं संघट्टने षड्गुरु, परितापने मासिकच्छेदः, अपद्रावणे चतुर्मासच्छेदः, परितापने षण्मासिकः, अपद्रावणे मूलम् । उक्तं च-"दोहिं दिवसेहिं मासगुरुए आढवेत्ता चउगुरुए ठाति० जाव अट्ठहिं संपयंति । " अनन्तवनस्पतिकं यदि संघट्टयति तदा मासगुरु, परितापयति चतुर्लघु, अपद्रावयति चतुर्गुरु, द्विदिवसाऽऽदि निरन्तरं संघट्टनाऽऽदिवृद्धयेकैकस्थानवृद्धितः सप्तभिर्दिनैर्मूलं, द्वीन्द्रियं संघट्टयति चतुर्लघु, परितापयति चतुर्गुरु, जीविताद् व्यपरोपयति षड्लघु । अत्र ऽऽदिदिवसं निरन्तरं संघट्टनाऽऽदिषु षड्भिर्दिवसैर्मूलं, त्रीन्द्रियं संघट्टयतश्चतुर्गुरु, परितापयतः षड्लघु, जीविताद्व्यपरोपयतः षड्गुरु । अत्र पञ्चभिर्दिवसैर्मूलं, चतुरिन्द्रियं संघट्टयतः षड्लघु, परितापयतः षड्गुरु, जीविताद् व्यपरोपयतो मासिकश्छेदः । अत्र चतुर्भिर्दिवसैर्मूलं, पञ्चेन्द्रियं संघट्टयतः षड्गुरु, परितापयतश्छेदः, अपद्रावयतो मूलम्, अत्र द्वयोर्द्विदिवसयोरनवस्थाप्यं, त्रिषु दिवसेषु पाराञ्चितम् । गतं वर्जनाद्वारम् ।

अधुनाऽनुज्ञाद्वारमाह-

पढमिल्लुगस्स असती, वाघातो वा इमेहिं ठाणेहिं ।
पमिणीए तेणे वाले, खेत्तुदयनिविट्ठथीअपुमं ॥४६७॥

प्रथममेव 'पढमिल्लुकं' प्राकृतत्वात् स्वार्थे इल्लुकप्रत्ययः प्रथममनापातासंलोकलक्षणं स्थण्डिलं तद् नास्ति, ततस्तस्य प्रथमस्याभावे, अथवा स्वतोऽन्येभिः स्थानैर्व्याघातो भवेत् । तान्येव स्थानान्याह-" पमिणीए " इत्यादि । प्रत्यनीकस्तत्र तिष्ठति, स्तेना वा पथि त्रिविधाः । तद् यथा-उपकरणस्तेनाः, शरीरस्तेना वा । व्याला वा तत्र सर्पाऽऽदयो विद्यन्ते, क्षेत्रं वा तत्र ज्ञातम्, उदकेन वा तत् स्थण्डिलमास्तृतम् । ग्रामो व्रजिका स्कन्धावारो वा तत्र निविष्टः, स्त्री, नपुंसको वा तत्र मैथुनार्थं संयतानागच्छतः प्रतीक्षते ।

पढमासति वाघाए, पुरिसाऽऽलोयम्मि होति जयणाए ।
मत्तगअपमज्जणमगल्ल, कुरुकुअ तिविहे दुविहजेदो॥४६८॥

एवं प्रथमस्य स्थण्डिलस्याभावे, व्याघाते वा द्वितीयं स्थण्डिलमनापातं संलोकवद् गन्तव्यम् । तत्र संयतानां सांभोगिकानां संविज्ञानामालोके गन्तव्यं, तदभावे असांभोगिकानामपि । तत्रापरिणताः पूर्वमेव ग्राहयितव्याः । यथा-केषाञ्चिदाचार्याणां विसदृशमाचर्यम्, ततो यूयं मा तान् वितथसमाचारीकान् दृष्ट्वा प्रतिनोदयेत, तेऽपि यदि नोदयन्ति तर्हि तदासीनास्तिष्ठथ । एवमसंखडाऽऽदयो दोषाः परिहृता भवन्ति । असांभोगिकानामप्यापातस्यासंज्ञवे यत्र पार्श्वस्थाऽऽदीनामालोकस्तत्र गच्छन्ति, तस्याप्यभावे यत्र पार्श्वस्थाऽऽदीनामापातस्तत्र व्रजन्ति । तत्र क्षुल्लकाऽऽदयोऽपरिणताः पूर्वं ग्राहयितव्याः-यथा एते निर्धर्माणो जिनाऽऽज्ञाप्रकोपिनो वितथमाचरन्ति, तन्मा यूयमेतेषां चेष्टितं चित्ते कुरुत, यथैतत् सुन्दरमिति । संयत्यापातवच्च सर्वप्रयत्नेन परिहरेत् । अन्यथा कृतसङ्केतका अत्र समागच्छन्तीतिशङ्काऽऽदयः, आत्मपरोभयसमुत्थाश्च दोषाः संभवन्ति । एषा स्वपक्षे यतना । संप्रति परपक्षेऽभिधीयते-तत्र चानापातवतोऽसंभवे (पुरिसालोयम्मि होति जयणाए इति) पुरुषाऽऽलोके पुरुषाऽऽलोकवति गन्तव्यं, तत्र यतनया भवति कर्तव्यमाचमनाऽऽदि । तामेव यतनामाह-(मत्तगअपमज्जणमगलकुरुकुअ त्ति) प्रत्येकं च प्रचुरं ऊर्वं, मगलकानां चाप्रमार्जनं, न तानि मगलकानि प्रमार्जन्ते, हीनानां दोषसंभवाद्, कुरुकुचाश्चाऽऽचमनानन्तरं कर्तव्याः *। (तिविहे दुविहजेओ इति) त्रिविधे प्रत्येकं द्विविधो भेदो द्रष्टव्यः । इयमत्र भावना-त्रिविधः परपक्षः । तद्यथा-पुरुषस्त्रीनपुंसकाः । एकैकः पुनर्द्विविधः-शौचवादी, अशौचवादी च । अथवाऽन्यथा प्रत्येकं द्विभेदः-श्रावकोऽश्रावकश्च । अथवा-त्रिविधो भेदो नाम-स्थविरो, मध्यमः, तरुणश्च । यदि वा-प्राकृतः, कौटुम्बिको, दण्डिकश्च । एते च त्रयो भेदा यथा पुरुषस्य, तथा स्त्रीनपुंसकयोरपि द्रष्टव्याः । तेषु यतनया गन्तव्यम् ।

कथमित्यत आह-

तेण परं पुरिसाणं, असोयवादीण वच्चे आवायं ।
इत्थिनपुंसाऽऽलोए, परंमुहो कुरुकुया सा य ॥४६९॥

ततः पुरुषाऽऽलोकवतः स्थण्डिलात्परतः, पुरुषाऽऽलोकवतः स्थण्डिलस्याऽऽसति पुरुषाणामशौचवादिनामापातमापातवत् स्थण्डिलं व्रजेत्, तत्र च यतना प्रागुक्ता द्रष्टव्या । तस्याऽप्यसंभवे शौचवादिनामप्यापातवद् गन्तव्यम् । तस्यासंभवे स्त्र्यालोके, नपुंसकाऽऽलोके वा गन्तव्यम् । इयमत्र भावना-प्रथमतोऽशौचवादिनीनां स्त्रीणामालोके गन्तव्यम्, तत्र गतः सन् तासां पराङ्मुख उपविशेत्, यतना च सा कुरुकुचाऽऽदिका कर्तव्या । तस्याऽप्यसंभवे शौचवादिनीनामप्यालोके गन्तव्यं, तदभावे नपुंसकानामशौचवादिनामालोके, तस्याऽसंभवे शौचवादिनामप्यालोके । यतना सर्वत्र सैव ।

तेण परं आवायं, पुरिसेयरइत्थियाण तिरियाणं ।
तत्थ वि य परिहरेज्जा, दुगुंछिए दित्तऽदित्ते य ॥४७०॥

ततः परं शौचवादिनामपि नपुंसकानामालोकस्यासंभवे पुरुषेतरस्त्रीणां तिरश्चामापाते व्रजेत्, तत्रापि दृप्तादृप्तांश्च जुगुप्सितान् परिहरेत्, अपरिहारे यतनां कुर्यात् । अयमत्र भावा-

* कुरुकुचा-बहुना जलेन पादप्रक्षालनाऽऽदि ।

र्थः-शौचवादिनां नपुंसकानामालोकासंभवे तिर्यक्पुरुषाणाम् दुष्टानामापाते व्रजेत् । तत्रेयं यतना-दण्डहस्ता वारंवारेण व्युत्सृजन्ति । उक्तं च-

" तेण परं पुरिसाणं, असोयवादीण वच्चेउं आवायं ।
अत्थिथिनपुंसाणं, आलोयपरम्मुहा कुरुया ॥ १ ॥
पच्चा तिरिपुरिसाणं, अदुट्ठदुट्ठाण वच्चेउं आवायं ॥
दुट्ठेसु दंमहत्था, वारं वारेण वोसिरणं ॥ २ ॥ "

तस्याप्यभावे तिर्यक्स्त्रीणामजुगुप्सितानामापातं व्रजेत्, तदसंभवे जुगुप्सितानामप्यापातं, तदभावे तिर्यक्नपुंसकानामजुगुप्सितानामापातं, तदभावे जुगुप्सितानामप्यापातम्, केवलं तत्र तथोपविशन्ति, यथा परस्परं सर्वे प्रेक्षन्ते ।

तत्तो इत्थिनपुंसा, तिविहा तत्थ वि असोयवाईणं ।
तहियं च सद्दकरणं, आउलगमणं कुरुकुया य ॥४७१॥

ततः स्त्रीनपुंसकानामापाते गन्तव्यं, ते च स्त्रीनपुंसकास्त्रिविधाः । तद्यथा-प्राकृताः, कौटुम्बिकाः, दाण्डिकाश्च । ते च प्रत्येकं द्विधा-शौचवादिनः, अशौचवादिनश्च । तत्र प्रथमतोऽशौचवादिनामापाते व्रजनीयम्, तत्र च शब्दकरणम्,आकुलगमनं,कुरुकुचा च कार्या। इयमत्र भावना-जुगुप्सितानामपि नपुंसकानामापातवतोऽसंभवे मनुष्यस्त्रीणामशौचवादिनामापाते गन्तव्यम्, केवलं स्थविरसहितैःप्रविशद्भिश्च परस्परं महान्तः शब्दा उच्चारणीयाः, येन तास्तान् श्रुत्वा निर्गच्छन्ति, आकुलीभूताश्च तत्र प्रविशन्ति, येन 'व्याकुला अमी'इति ता दृष्टिचित्तेपाऽऽदिकं न कुर्वन्ति, अगर्हाऽऽदिषु च स्थानेषु संज्ञां व्युत्सृजन्ति, यथा शेषोऽपि लोको दूरस्थः प्रेक्षते, तेऽपि च साधवस्तथा उपविशति यथा परस्परं प्रेक्षन्ते, तत एवमात्मपरोभयदोषा न संभवन्ति ।

उक्तं च-

" तत्थ पुण थेरसहिया, आउलसद्दं करिंति पविसंता ।
जह सद्देण ताओ, निंति ततो अगत्तमादीसु ॥
ठाणेसु वोसिरंती, पेच्छंति य जह परोप्परं सव्वे ।
आयपरोभयदोसा, ते एवं वज्जिया होंति " ॥ २ ॥

आचमनानन्तरं च कुरुकुचा कर्त्तव्या, चशब्दाद् मृत्तिकया हस्तपुतप्रक्षालनं, बहिर्मात्रकस्य कल्प इति परिग्रहः । तदसंभवे शौचवादिनामपि मनुष्यस्त्रीणामापाते, तस्याभावे नपुंसकानामशौचवादिनामप्यापाते, तदसंभवे शौचवादिनामप्यापाते गन्तव्यम् । सर्वत्रापि यतनाऽनन्तरोक्तैव ।

इत्थिनपुंसाऽऽवाते, जा उण जयणा उ मत्तगादीया ।
पुरिसाऽऽवाए जयणा, सव्वे च उ मत्तगादीया॥४७२॥

स्त्र्यापाते,नपुंसकाऽऽपाते च या पुनर्यतना मात्रकाऽऽदिका अनन्तरमुक्ता, सैव पुरुषाऽऽपातेऽपि प्राक् मात्राऽऽदिका यतना द्रष्टव्या। एवं तावदचित्तं स्थण्डिलं चतुःप्रकारमचित्तेन पथा गम्यमुक्तम् । तदभावे मिश्रेणापि पथा तदपवादेन गच्छेत्, तदभावे सचित्तेनाऽपि । तत्राऽपि यतना सैव प्रागुक्ता। उक्तं च-" एवमचित्तेण पहेण, जयणा उ भणिया चउब्भंगे । मीससचित्तपहेसु य, पस्स विचय भंगजयणा उ " ॥ १ ॥ संप्रति मिश्रं वक्तव्यं, यतोऽचित्तस्थण्डिलासंज्ञवेऽपवादतो मिश्रमपि गम्यते, तदपि चानापातासंलोकाऽऽदिभेदतश्चतुःप्रकारम्, तस्यापि च त्रयः पन्थानः । तद्यथा-अचित्तः, मिश्रः, सचित्तश्च ।

तानेवाऽऽह-

अच्चित्तेणं मीसं, मीसं मीसेण छक्कमीसेणं ।
सचित्तछक्कएणं, मीसे चउनंगियपदेसे ॥ ४७३ ॥

मिश्रस्थण्डिलमचित्तेन पथा गम्यं, तदभावे मिश्रेणेत्यत्र आह-षड्भिश्रेण षड्जीवनिकायमिश्रेण, तदभावे मिश्रे स्थण्डिले षट्कायसचित्तेन पथा गन्तव्यम् । उक्तं च-" पढममचित्तपहेणं, मीसं मीसेणं छक्कमीसेणं । सच्चित्तछक्कएणं, मीसं तू थंमिलं गच्छे ॥१॥" तच्च मिश्रं स्थण्डिलमन्वध्वनि ग्रामात् ग्रामं प्रति व्रजतो द्रष्टव्यम्। तत्र मात्रकैर्यतना कर्त्तव्या । अथ मात्रकाणि न विद्यन्ते व्युत्सृजतां परिष्ठापयतां च सागारिकसंपातः, तदा धर्मास्तिकायाऽऽदिप्रदेशान् निश्राकृत्य व्युत्सृष्टव्यम्। उक्तं च-"जहियं पुण सागारिय-धम्मादिपएस तहिएँ निस्साए । वोसिरइ एय मीसं, नाणिय समासेण थंमिलं ॥१॥ " उक्तं मिश्रं स्थण्डिलम् । तदभावेऽपवादतः सचित्तमपि गन्तव्यं, तदप्यनापातासंलोकाऽऽदिभेदतश्चतुःप्रकारं, तस्यापि च त्रयः पन्थानः। तद्यथा-अचित्तः, मिश्रः, सचित्तश्च ।

तत्र येन क्रमेण गन्तव्यं, तं क्रममाह-

अचित्तेण सचित्तं, मीसेण सचित्त छक्कमीसेण ।
सचित्तछक्कएणं, सचित्त चउनंगियपदेसे ॥ ४७४ ॥

सचित्तमपि स्थण्डिलं चतुर्भङ्गिकम्, तत्र प्रथमतोऽनापातासंलोकं गन्तव्यम्, तदभावे द्वितीयं, तदभावे तृतीयं, तदभावे चतुर्थमपि । तत्र यतना प्रागेवोक्ता । तत्र च प्रथमतोऽचित्तेन पथा गन्तव्यं, तदभावे तत् सचित्तं मिश्रेण पथा गम्यम् । केन मिश्रेणेत्यत्र आह-षड्भिश्रेण षड्जीवनिकायमिश्रेण, तस्याऽसंज्ञवे सचित्तेन पथा सचित्तं गन्तव्यम्, केन ?, सचित्तेन षड्केन षड्जीवनिकायैः,। अत्रापि मात्रकैर्यतना कर्त्तव्या।मात्रकाणामभावे व्युत्सर्गे परिष्ठापने वा सागारिकसंभवे धर्मास्तिकायाऽऽदिप्रदेशानां निश्रा कर्त्तव्या । उक्तं च-" ज जिय मीसे जयणा, सेव सचित्ते वि होइ कायव्वा । मत्ताइअपरिसेसा, जा धम्मादीपएसा उ ॥ १ ॥ "

तदेवमुक्तं स्थण्डिलमिदानीमेतस्य यः कल्पिकः, तमभिधित्सुराह-

पढियसुयगुणियमगुणिय-धारमधार उवउत्तो परिट्ठवति ।
आलोणाऽऽयरियाऽऽदी, आयरिउ विसोहिकारो से ४७५

यस्मादजानतः प्रायश्चित्तं, तस्माद् येन सप्तसप्तकाऽऽदि सूत्रं पठितं पाठतः, श्रुतमर्थतः, तच्च गुणितमभ्यस्तं वाऽऽस्पदेऽगुणितं वा धारितं वाऽऽस्पदेऽनवधारितं वा, तथापि य उपयुक्तः सन् स्थण्डिलं परिष्ठवति-उक्तप्रकारेणोपयुक्तः परिभोगयति, स विचारकल्पिकः। तथा तेन स्थण्डिलसूत्रेण पठितेन वाऽपठितेन वा अगुणितेन वा धारितेन वा अधारितेन वा उपयुक्तो वाऽनुपयुक्तो वा यां विराधनां करोति, तामाचार्याऽऽदेरालोचयति, तदभावेऽन्यस्याप्युपाध्यायाऽऽदेः, आलोचिते 'से' तस्य विशोधिकारः प्रायश्चित्तप्रदानेन शुद्धिकर्त्ता आचार्यः। किमुक्तं भवति ?-यदा आचार्यः प्रायश्चित्तं ददाति, ततः स शुद्धिमापद्यते । गतं विचारद्वारम्।बृ० १ उ०। प्रति०।पञ्चा०।श्रा०।ध०।नि०चू०। ('णिग्गंथी' शब्दे २०४८ पृष्ठे ऽत्रैव भागे तासां स्थण्डिलं प्रतिपादितम्)

स्थण्डिलगमनविधिः-

से भिक्खू वा भिक्खुणी वा उच्चारपासवणकिरियाए उव्वाहिज्जमाणे सयस्स पायपुंछणस्स असतीए तओ पच्छा साहम्मियं जाएज्जा ॥

"से" इत्यादि। स भिक्षुः कदाचिदुच्चारप्रस्रवणकर्तव्यतयोत्पन्नबलेन बाध्यमानः स्वकीयपादपुञ्छनसमाध्यादावुच्चाराऽऽदिकं कुर्यात्, स्वकीयस्याऽभावेऽन्यसाधर्मिकं साधुं याचेत, पूर्वप्रत्युपेक्षितं पादपुञ्छनकं समाध्यादिकमिति। तदनेनैतत् प्रतिपादितं भवति-वेगधारणं न कर्तव्यमिति।

अपि च-

से भिक्खू वा भिक्खुणी वा सेज्जं पुण थंमिल्लं जाणेज्जा-सअंडं सपाणं० जाव मक्कडासंताणयंसि तहप्पगारंसि थंमिल्लंसि णो उच्चारपासवणं वोसिरेज्जा।

"से" इत्यादि। स भिक्षुरुच्चारप्रस्रवणाऽऽशङ्कायां पूर्वमेव स्थण्डिलं गच्छेत्तस्मिंश्च साण्डाऽऽदिके अप्रासुकत्वादुच्चाराऽऽदि न कुर्यात्।

किञ्च—

से भिक्खू वा भिक्खुणी वा सेज्जं पुण थंडिलं जाणेज्जा-अप्पपाणं अप्पबीयं० जाव मक्कडासंताणयंसि तहप्पगारंसि थंमिलंसि उच्चारपासवणं वोसिरेज्जा।

"से" इत्यादि। अल्पाण्डकाऽऽदिके प्रासुके कार्यमिति।

औद्देशिकं स्थण्डिलम्-

से भिक्खू वा भिक्खुणी वा सेज्जं पुण थंमिल्लं जाणेज्जा-अस्सिं पडियाए एगं साहम्मियं समुद्दिस्स, अस्सिं पडियाए बहवे साहम्मिया समुद्दिस्स, अस्सिं पमियाए एगं साहम्मिणिं समुद्दिस्स, अस्सिं पमियाए बहवे साहम्मिणीओ समुद्दिस्स, अस्सिं पडियाए बहवे समणमाहणवणीवगे पगणिय २ समुद्दिस्स पाणाइं ४ ०जाव उद्देसियं चेतेति, तहप्पगारं थंमिल्लं पुरिसंतरकडं वा ०जाव बहिया णीहडं वा अणयरंसि वा तप्पगारंसि थंडिलंसि णो उच्चारपासवणं वोसिरेज्जा।

"से" इत्यादि। स भिक्षुर्यत् पुनरेवंभूतं स्थण्डिलं जानीयात्। तद्यथा-एकं बहून् वा साधर्मिकान् समुद्दिश्य, तत्प्रतिज्ञया कदाचित् कश्चित् स्थण्डिलं कुर्यात्। तथा-श्रमणाऽऽदीन् प्रगणय्य वा कुर्यात्, तच्चैवंभूतं पुरुषान्तरस्वीकृतमस्वीकृतं वा मूलगुणदुष्टमुद्देशिकं स्थण्डिलमाश्रित्योच्चाराऽऽदि न कुर्यादिति।

किञ्च-अपुरुषान्तरकृते स्थण्डिले उच्चाराऽऽदि न कुर्यात्-

से भिक्खू वा भिक्खुणी वा सेज्जं पुण थंमिलं जाणेज्जा-बहवे समणमाहणकिवणवणीवगअतिही समुद्दिस्स पाणाइं ४ ०जाव उद्देसियं चेतेति, तहप्पगारं थंमिलं अपुरिसंतरकडं ०जाव बहिया अणीहडं वा अणयरंसि वा तहप्पगारंसि णो उच्चारपासवणं वोसिरेज्जा, अह पुण एवं जाणेज्जा-पुरिसंतरकडं०जाव बहिया णीहडं वा अणयरंसि वा तहप्पगारंसि थंमिलंसि उच्चारपासवणं वोसिरेज्जा।

"से" इत्यादि। स भिक्षुर्यावदन्तिके स्थण्डिले ऽपुरुषान्तरस्वीकृते उच्चाराऽऽदि न कुर्यात्, पुरुषान्तरस्वीकृते कुर्यादिति।

अपिच-क्रीतकृताऽऽदिस्थण्डिलम्-

से भिक्खू वा भिक्खुणी वा सेज्जं पुण थंमिलं जाणेज्जा-अस्सिं पमियाए कयं वा कारियं वा पामिच्चियं वा उणणं वा घट्टं वा मट्ठं वा लित्तं वा समट्ठं वा संपधूवितं वा अणयरंसि तहप्पगारंसि थंमिलंसि णो उच्चारपासवणं वोसिरेज्जा।

"से" इत्यादि। स भिक्षुः साधुमुद्दिश्य क्रीताऽऽदावुत्तरगुणाद्यदुष्टे स्थण्डिले उच्चाराऽऽदि न कुर्यादिति।

किञ्च-यत्र गृहपतिपुत्राऽऽदय आगच्छन्ति-

से भिक्खू वा भिक्खुणी वा सेज्जं पुण थंडिलं जाणेज्जा-इह खलु गाहावई वा गाहावइपुत्ता वा कंदाणि वा मूलाणि वा० जाव हरियाणि वा अंतातो वा बाहिं णीहरिति, बाहीओ वा अंतो साहरंति, अण्णयरंसि वा तहप्पगारंसि थंडिलंसि णो उच्चारपासवणं वोसिरेज्जा।

"से" इत्यादि। स भिक्षुर्गृहपत्यादिना कन्दाऽऽदिके स्थण्डिलान्निष्काश्यमाने तत्र वा निक्षिप्यमाणे नोच्चाराऽऽदि कुर्यादिति।

तथा-

से भिक्खू वा भिक्खुणी वा सेज्जं पुण थंमिलं जाणेज्जा-खंधंसि वा पीढंसि वा मंचंसि वा मालंसि वा अट्टंसि वा पासायंसि वा अण्णयरंसि वा थंमिलंसि णो उच्चारपासवणं वोसिरेज्जा।

"से" इत्यादि। स भिक्षुः स्कन्धाऽऽदौ स्थण्डिले नोच्चाराऽऽदि कुर्यादिति।

किञ्च-

से भिक्खू वा भिक्खुणी वा सेज्जं पुण थंमिलं जाणेज्जा-अणंतरहियाए पुढवीए ससणिद्धाए पुढवीए ससरक्खाए पुढवीए मट्टियाए मक्कडाए चित्तमंताए सिलाए चित्तमंताए लेलुए चित्तमंताए कोलावासंसि वा दारुयंसि वा जीवपइट्ठियंसि वा०जाव मक्कडासंताणयंसि अणयरंसि वा तहप्पगारंसि थंमिलंसि णो उच्चारपासवणं वोसिरेज्जा।

"से" इत्यादि। स भिक्षुर्यत्पुनरेवंभूतं स्थण्डिलं जानीयात्। तद्यथा-अनन्तरितायां सचित्तायां पृथिव्यां तत्रोच्चाराऽऽदि न कुर्यात्, शेषं सुगमम्। नवरं (कोलावासंसि त्ति) घुणवासम्।

अपिच-यत्र गृहकन्दाऽऽदीनि परिशाटयन्ति-

से भिक्खू वा भिक्खुणी वा सेज्जं पुण थंडिलं जाणेज्जा-इह खलु गाहावई वा गाहावइपुत्ता वा कंदाणि वा० जाव बीयाणि वा परिसाडेंसु वा, परिसाडेंति वा, परिसाडिस्संति वा अण्णयरंसि वा तहप्पगारंसि थंमिलंसि णो उच्चारपासवणं वोसिरेज्जा।

" से " इत्यादि । स भिक्षुर्यत्पुनरेवंभूतं स्थण्डिलं जानीयात् । तद्यथा-यत्र गृहपत्यादयः कन्दबीजाऽऽदिपरिक्षेपणाऽऽदिकाः क्रियाः कालत्रयवर्त्तिन्यः कुर्युः, तत्रैहिकाऽऽमुष्मिकापायभयाद्धुच्चाराऽऽदि न कुर्यादिति ।

तथा यत्र गृहपतिपुत्राः शाल्याऽऽदीनि वपन्ति-

से भिक्खू वा भिक्खुणी वा सेज्जं पुण थंमिलं जाणेज्जा-इह खलु गाहावई वा गाहावतीपुत्ता वा सालीणि वा वीहीणि वा मुग्गाणि वा मासाणि वा तिलाणि वा कुलत्थाणि वा जवाणि वा जवजवाणि वा पइरिंसु वा, पइरिंसंति वा, पइरिस्संति वा अण्णयरंसि वा तहप्पगारंसि थंमिलंसि णो उच्चारपासवणं वोसिरेज्जा ।

"से" इत्यादि । यत्र च गृहपत्यादयः शाल्याऽऽदीन्युप्तवन्तो, वपन्ति, वप्स्यन्ति वा तत्राप्युच्चाराऽऽदि न विदध्यादिति ।

किंच-यत्र कचवराऽऽदिपुञ्जाः-

से भिक्खू वा भिक्खुणी वा सेज्जं पुण थंमिलं जाणेज्जा-आमोयाणि वा घसाणि वा भिलुहाणि वा विज्जुलाणि वा खाणुयाणि वा कमथाणि वा पगट्ठाणि वा दरीणि वा पदुग्गाणि वा समाणि वा विसमाणि वा अण्णयरंसि वा तहप्पगारंसि णो उच्चारपासवणं वोसिरेज्जा ।

"से" इत्यादि । स भिक्षुर्यत्पुनरेवंभूतं स्थण्डिलं जानीयात् । तद्यथा- आमोकानि कचवरपुञ्जाः, घसा बृहत्यो भूमिराजयः, भिलुहाणि श्लक्ष्णभूमिराजयः, विज्जुलं पिच्छलं, स्थाणुः प्रतीतः, "कमथाणि" इक्षुपोतलिकाऽऽदिदण्डकः, प्रगर्त्ता महागर्त्ताः, दरी प्रतीता, प्रदुर्गाणि कुड्यप्राकाराऽऽदीनि । एतानि च समानि वा विषमाणि वा भवेयुः, तदेतेष्वात्मसंयमविराधनासंभवान्नोच्चाराऽऽदि कुर्यादिति ।

किंच मानुषरन्धनाऽऽदिस्थण्डिलानि-

से भिक्खू वा भिक्खुणी वा सेज्जं पुण थंडिलं जाणेज्जा-माणुसरंधणाणि वा महिसकरणाणि वा वसभकरणाणि वा अस्सकरणाणि वा कुक्कुडकरणाणि वा मक्कडकरणाणि वा लावयकरणाणि वा वट्टयकरणाणि वा तित्तिरकरणाणि वा कवोयकरणाणि वा कपिंजलकरणाणि वा अण्णयरंसि वा तहप्पगारंसि णो उच्चारपासवणं वोसिरेज्जा ।

" से " इत्यादि । स भिक्षुर्यत्पुनरेवंभूतं स्थण्डिलं जानीयात् । तद्यथा-मानुषरन्धनानि चुल्लधादीनि, तथा महिष्यादीनुद्दिश्य यत्र किञ्चित्क्रियते, तथा तत्र स्थाप्यन्ते, तत्र लोकविरुद्धप्रवचनोपघाताऽऽदिभयाद् नोच्चाराऽऽदि कुर्यादिति ।

तथा-वैहानसस्थानाऽऽदि आरामाऽऽदि परिहरेत्-

से भिक्खू वा भिक्खुणी वा सेज्जं पुण थंमिलं जाणेज्जा-वेहाणसट्ठाणेसु वा गिद्धपिट्ठट्ठाणेसु वा तरुपतणट्ठाणेसु वा मेरुपवडणट्ठाणेसु वा विसभक्खणट्ठाणेसु वा अगणिकम्मयट्ठाणेसु वा अण्णयरंसि वा तहप्पगारंसि णो उच्चारपासवणं वोसिरेज्जा ।

से भिक्खू वा भिक्खुणी वा सेज्जं पुण थंडिलं जाणेज्जा-आरामाणि वा उज्जाणाणि वा वणाणि वा वणसंडाणि वा देवकुलाणि वा सभाणि वा पवाणि वा अण्णयरंसि वा तहप्पगारंसि थंडिलंसि णो उच्चारपासवणं वोसिरेज्जा ।

'से" इत्यादि । स भिक्षुर्विहानसस्थानानि मानुषोल्लम्बनस्थानानि, गृध्रस्पृष्टस्थानानि यत्र मुमूर्षवो गृध्राऽऽदिभक्षणार्थं रुधिराऽऽदिलिप्तदेहा निपत्याऽऽसते, तरुपतनस्थानानि यत्र मुमूर्षव एवानशनेन तरुवत्पतितास्तिष्ठन्ति, तरुभ्यो वा यत्र पतन्ति, एवं मेरुपतनस्थानान्यपि । मेरुश्चात्र पर्वतोऽभिधीयत इति । एवं विषभक्षणाग्निप्रवेशस्थानाऽऽदिषु नोच्चाराऽऽदि कुर्यादिति । अपि च-" से " इत्यादि । आरामदेवकुलाऽऽदौ नोच्चाराऽऽदि विदध्यादिति ।

तथा अट्टालकाऽऽदिषु-

से भिक्खू वा भिक्खुणी वा सेज्जं पुण थंमिलं जाणेज्जा-अट्टालयाणि वा चरियाणि वा दाराणि वा गोपुराणि वा अण्णयरंसि थंडिलंसि णो उच्चारपासवणं वोसिरेज्जा ॥

" से " इत्यादि । प्राकारसम्बन्धिन्यट्टालकाऽऽदौ नोच्चाराऽऽदि कुर्यादिति ।

किञ्च-

से भिक्खू वा भिक्खुणी वा सेज्जं पुण थंडिलं जाणेज्जा-तियाणि वा चउक्काणि वा चच्चराणि वा चउम्मुहाणि वा अण्णयरंसि वा तहप्पगारंसि णो उच्चारपासवणं वोसिरेज्जा ।

त्रिकचत्वराऽऽदौ च नोच्चाराऽऽदि व्युत्सृजेदिति ।

किञ्च-

से भिक्खू वा भिक्खुणी वा सेज्जं पुण थंडिलं जाणेज्जा-इंगालदाहेसु वा खारदाहेसु वा मडयदाहेसु वा मडयथूभियासु वा मडयचेइएसु वा अण्णयरंसि वा तहप्पगारंसि थंडिलंसि णो उच्चारपासवणं वोसिरेज्जा ।

'से' इत्यादि । स भिक्षुरङ्गारदाहस्थाने श्मशानाऽऽदौ नोच्चाराऽऽदि विदध्यादिति ।

अपिच-पङ्काऽऽद्यापतनेषु-

से भिक्खू वा भिक्खुणी वा सेज्जं पुण थंडिलं जाणेज्जा-णदियाययणेसु वा पंकाययणेसु वा उग्घाययणेसु वा सेयणवहंसि वा अण्णयरंसि तहप्पगारंसि थंडिलंसि णो उच्चारपासवणं वोसिरेज्जा ।

" से " इत्यादि । नद्यायतनानि यत्र तीर्थस्थानेषु लोकाः पुण्यार्थं स्नानाऽऽदि कुर्वन्ति । पङ्कायतनानि यत्र पङ्किलप्रदेशे लोका धर्मार्थं लोटनाऽऽदिक्रियां कुर्वन्ति, उद्घायतनानि यानि प्रवाहत एव पुण्यस्थानानि, तमागजलप्रवेशोऽथ मार्गो वा सेचनपथेऽवनिकाऽऽदौ नोच्चाराऽऽदि विधेयमिति ।

तथा मृत्खन्यादिषु-

से भिक्खू वा भिक्खुणी वा सेज्जं पुण थंमिलं जाणेज्जा-णवियासु वा मट्टियखाणियासु णवियासु गोप्पयल्लेहियासु गवायणीसु वा खाणीसु वा अण्णयरंसि वा तहप्पगारंसि थंमिलंसि णो उच्चारपासवणं वोसिरेज्जा ।

"से" इत्यादि। स भिक्षुरभिनवासु मृत्खनिषु, तथा नवासु गोप्रलेहासासु गवादनीषु, सामान्येन वा गवादनीषु वा खनिषु नोच्चाराऽऽदि विदध्यादिति।

किञ्च-

से भिक्खू वा भिक्खुणी वा सेज्जं पुण थंडिलं जाणेज्जा-डागवच्चंसि वा सागवच्चंसि वा मूलगवच्चंसि वा हत्थकरवच्चंसि वा अण्णयरंसि वा तहप्पगारंसि थंडिलंसि णो उच्चारपासवणं वोसिरेज्जा।

"से" इत्यादि। 'डागे त्ति' डागप्रधानं शाकं पत्रप्रधानं तु शाकमेव, तद्वति स्थाने मूलगाऽऽदिवति च नोच्चाराऽऽदि कुर्यादिति।

तथा-

से भिक्खू वा भिक्खुणी वा सेज्जं पुण थंडिलं जाणेज्जा-असणवणंसि वा सणवणंसि वा धायइवणंसि वा केयइवणंसि वा अंबवणंसि वा असोगवणंसि वा णागवणंसि वा पुन्नागवणंसि वा चुन्नागवणंसि वा अण्णयरेसु वा तहप्पगारेसु वा पत्तोवएसु वा पुप्फोवएसु वा फलोवएसु वा बीओवएसु वा हरिओवएसु वा णो उच्चारपासवणं वोसिरेज्जा।

"से" इत्यादि। अशनो वीयकः, तद्वनाऽऽदौ च नोच्चाराऽऽदि कुर्यादिति।

तथा पत्रपुष्पफलाऽऽद्युपवेष्टिते कथं वोच्चाराऽऽदि कुर्यादिति दर्शयति स्वपात्रं गृहीत्वा यथा कर्त्तव्यमुच्चारप्रस्रवणम्-

से भिक्खू वा भिक्खुणी वा सयपायं वा परपायं वा गहाय से तमायाए एगंतमवक्कमेज्जा, अणावायंसि असंलोइयंसि अप्पपाणंसि० जाव मक्कडासंताणयंसि अहारामंसि वा उवस्सायंसि ततो संजयामेव उच्चारपासवणं वोसिरेज्जा,वोसिरित्ता से तमादाय एगंतमवक्कमेज्जा,अणावायंसि० जाव मक्कडासंताणयंसि अहारामंसि वा झामथंडिलंसि वा अण्णयरंसि वा तहप्पगारंसि थंडिलंसि अचित्तंसि ततो संजयामेव उच्चारपासवणं परिट्ठवेज्जा, इयं खलु तस्स भिक्खुस्स वा भिक्खुणीए वा सामग्गियं० जाव जएज्जासि त्ति बेमि।

"से" इत्यादि। स भिक्षुः स्वकीयं परकीयं वा पात्रकं समाधिस्थानं गृहीत्वा स्थण्डिलमनापातमसंलोकं गत्वोच्चारं,प्रस्रवणं वा कुर्यात्प्रतिष्ठापयेदिति। शेषमध्ययनसमाप्तिं यावत् पूर्ववदिति। आचा०२ श्रु०२ चू० ३ अ०। बृ०। (स्थविरकल्पिकाः स्थण्डिले शुद्धप्रमार्जनं कुर्वन्ति,न तु जिनकल्पिका इति 'लेव' शब्दे वक्ष्यते) (सार्थेन सह गमने रात्रिविहारे सर्वथैव स्थण्डिलं न प्रार्थयन्ते, धर्माधर्मोऽऽकाशास्तिकायप्रदेशेषु अपि व्युत्सृजन्ति 'विहार' शब्दे वक्ष्यन्ते) (निर्ग्रन्थानां निर्ग्रन्थीनां च मिथ उपाश्रयगमने स्थण्डिलदोषा 'वसहि' शब्दे वक्ष्यन्ते) (रात्रौ विचारभूमौ न गन्तव्यमिति 'विहार' शब्दे वक्ष्यते) (स्थण्डिलयतना नगरोपरोधे 'उवरोह' शब्दे द्वितीयभागे ६१० पृष्ठे उक्ता) ('पज्जुसणा' शब्दे तात्कालिकयो दुर्लभयोः प्राह्याः) (स्थण्डिले उच्चारप्रस्रवणपरिष्ठापना 'परिट्ठवणा' शब्दे दर्शयिष्यते) (स्थण्डिलविषये शिष्यपरीक्षा 'आलोयणा' शब्दे द्वितीयभागे ४१० पृष्ठे गता) संज्ञां व्युत्सृज्याऽऽचार्येण वसतौ रक्षणीयेति 'वसहि' शब्दे एकाकिनां वसतिरक्षणप्रस्तावे वक्ष्यते)

गोचरचर्याविषयः-

गोअरग्गपविट्ठो य, वच्चं मुत्तं न धारए।
ओगासं फासुअं नच्चा, अणुन्नविअ वोसिरे ॥ १९ ॥

गोचराग्रप्रविष्टस्तु वर्चो मूत्रं वा न धारयेत्, अवकाशं प्रासुकं ज्ञात्वाऽनुज्ञाप्य व्युत्सृजेदिति। अस्य विषयो बृहत्संप्रदायादवसेयः। स चाऽयम्-पुव्वमेव साहुणा सन्नाकाइओवयोगं काऊण गोयरे पविसिअव्वं। कहंचि ण कओ, कए वा पुणो होज्जा, ताहे वच्चं मुत्तं न धारेयव्वं, जओ मुत्तनिरोहे चक्खुवघाओ भवति। वच्चनिरोहे जीवियोवघाओ असोहणा अ आयविराहणा। जओ भणियं-" सव्वत्थ संजममित्यादि "। अओ संघाडयस्स सयन्नाणि समप्पिअ पमिस्सए पाणयं गहाय सन्नाभूमीए विहिणा वोसिरिज्जा। वित्थरओ जहा ओहनिज्जुत्तीए ॥ " इति सूत्रार्थः ॥ १९ ॥ दश० ५ अ०।

आचार्येणानेकवारं स्थण्डिलभूमौ न गन्तव्यमिति 'अइसेस' शब्दे प्रथमभागे १५ पृष्ठे उक्तम्) (ग्लानार्थं गच्छतो मध्ये व्युत्सर्गो 'गोयरचरिया' शब्दे तृतीयभागे ६६६ पृष्ठे उक्तः)

श्रावकस्य मलोत्सर्गः-

तत्र च मलोत्सर्गो मौनेन निरवद्याईस्थानाऽऽदिविधिनैवोचितः। यतः-"मूत्रोत्सर्गे मलोत्सर्गे, मैथुने स्नानभोजने। सन्ध्याऽऽदिकर्मे पूजां च, कुर्यात् पञ्च च मौनवान्" ॥१॥ विवेकविलासेऽपि-" मौनी वस्त्राऽऽवृतः कुर्याद्, दिनसन्ध्याऽर्धयेऽपि च। उदङ्मुखः शकृन्मूत्रे, रात्रौ याम्याननः पुनः ॥ १ ॥ इति। ध० २ अधि०।

अथाऽऽह-

जे भिक्खू उच्चारपासवणं परिट्ठवित्ता ण पुंछति, ण पुंछंतं वा साइज्जइ ॥ १४२ ॥

ण पुंछति ण णिद्धुगलेति।

जे भिक्खू उच्चारपासवणं परिट्ठवित्ता कट्ठेण वा कलिंचेण वा अंगुलियाए वा सिलागएण वा पुंछइ, पुंछंतं वा साइज्जइ ॥ १४३ ॥

कलिंचो-वंसकप्परी अण्णतरकट्ठघमिया सलागा, तस्स मासलहुं।

गाहा-

उच्चारमायरित्ता, जे भिक्खू ण पुंछती अहिट्ठाणं।
पुंछिज्ज व अविहीए, सो पावति आणमादीणि ॥३०३॥

आयरित्ता वोसिरित्ता, अविधी कट्ठातिया विदियसुत्ते।

गाहा:-

पच्चालणं दवेणं, जुत्तमजुत्तेण नावणादोसा।
संजम आयविराहण, अविधीए पुंछणे दोसा ॥ ३०४ ॥

अणमगलिते अतीव लच्छारियं, दव्वेण जुत्तेण थोवेणेति भणियं होति, तेण ण सुज्झति । असुद्धे दिट्ठे उड्डाहो, सेहो वा विप्परिणमेज्ज । अह अजुत्तेण बहुणा दव्वेण धोवति तो पभावनादिदोसा, एते अपुंछिज्जंते दोसा । अविधीए पुंछिते इमं पच्चक्खं,अविधिपुंछिएहिं आयविराहणा । अह जीवकाओ त्ति संजमविराहणा य ।

इमा अविधी—

कट्ठेण कलिंचेण व, पत्तसलागाएँ अंगुलीए वा ।
एसा अविधी भणिता, डगलगमादी विधी चेव ॥३०५॥

पंत्ते पलासपत्ताऽऽदि,डगलेण वा, चीरेण वा,अंगुलिए वा एसा तिविधा विधी। डगला पुण दुविधा–संबद्धा जूमीए हुज्ज, असंबद्धा वा होज्ज । जे असंबद्धा ते तिविधा-उक्कोसा तिउवला लेट्टू मसिणा मज्झिमा, इट्टालं जहण्णं ।

जम्हा एते दोसा–

तम्हा पुंछाऽऽदाणं, काऊणं डगलगाण छड्डेज्जा ।
लत्थाणोसहपाणे, असती व ण कुज्ज आदाणं ॥३०६॥

आयाणं डगलगादीण छुभेज्ज उच्चारं वोसिरिज्जा । वितियपदं गाहा पच्चक्खं–लत्थाणं अतिसारो, ओसहपीतो वा ण गेण्हति, असती वा ण गेण्हति ।

जे भिक्खू उच्चारपासवणं परिट्ठवित्ता णायमइ, णायमंतं वा साइज्जइ ॥ १४४ ॥
जे भिक्खू उच्चारपासवणं परिट्ठवित्ता तत्थेव आयमति, आयमंतं वा साइज्जइ ॥ १४५ ॥
जे भिक्खू उच्चारपासवणं परिट्ठवित्ता अइदूरे आयमति, आयमंतं वा साइज्जइ ॥ १४६ ॥

तिण्णि सुत्ता–उच्चारे वोसिरिज्जमाणे अवस्सं पासवणं भवति त्ति तेण सहितं पासवणं पुंछाओ अणगारिए णायमंति, जहा-उच्चारे तत्थेव त्ति; थंभिले जत्थ सण्णा ओसरिया, अतिदूरे हत्थसयपमाणमेत्ते ।

गाहा–

उच्चारं वोसिरित्ता, जे भिक्खू णेव आयमेज्जा वि ।
दूरे अच्चासण्णे, सो पावति आणमादीणि ॥३०७॥

आयमणं णिल्लेवणं, आसण्णं तत्थेव मंडिले ।

अणायमंते इमे दोसा—

अयमो पवयणहाणी, विप्परिणामे व मेहएँ दुगुंछा ।
दोसा अणायमंते, दूराऽऽसण्णाऽऽयमंते य ॥ ३०८ ॥

अयसो-इमे असोइणो त्ति ण एते णिल्लेवेंति, ण पव्वयंति, अण्णे वि पव्वयंते वारेंति। पवयणहाणी-ईसणे चरित्ते वा अच्चुग्गमं कातुंकामस्स विप्परिणामो भवति, सेहाण वा मा एतेहिं विट्ठलेहिं सह संफासं करेह,-एसा कुच्छा । दूरे वि एते दोसा, आसण्णे वि एते चेव दोसा। कहं?-सागारिओ पासति, संजओ आसण्णे वोसिरिउं दूरं गतो, सागारिओ वि जोविउं पराभग्गो, ण णिल्लेवेंति लोगस्स कहेति। आसण्णे तत्थेव संजतो णिल्लेवेउं गतो, सागारिए आगंतुं पलोइयं० जाव णुत्तियं पेक्खति, एतं संकातिअं ण णिल्लेवितं, पच्छा लोगस्स कहेति।

गाहा—

लत्थाणोसहपाणे, दवे असतीए व णायमेज्जाहि ।
थंभिल्लस्स व असती, आसण्णे वा वि दूरे वा ।३०९।

अन्नस्स थंभिल्लस्स असति तत्थेव निल्लेवेति, थंभिलाओ वा दूरं गंतुं निल्लेवेति, सागारिओ पुणो वा लेवावेति ।

जे भिक्खू उच्चारपासवणं परिट्ठविता परं तिण्हं णावापूराणं आयमइ, आयमंतं वा साइज्जइ ॥ १४७ ॥

णाव त्ति पसती, ताहिं तिहिं आयमियव्वं । अण्णे भणंति-अंजली पदमणावापूरं तिहा करेति, अवयवे वि किंचित् वितियं णावापूरं तिहा करेत्ता सव्वावयवं विसोहिति, ततियं णावापूरं तिहा करेत्ता तिण्णि कप्पे करेति सुद्धं, अतो परं जति तो मासलहुं ।

गाहा–

उच्चारमायरित्ता, परेण तिण्हं तु णावपूराणं ।
जे भिक्खू आयामति, सो पावति आणमादीणि ॥३१०॥

इमे दोसा–

उच्छोलणपप्पिलावण–पकरणं तसपाणतरुगणादीणं ।
कुरुवयदोसा य पुणो, परेण तण्हाऽऽयमंतस्स ॥ ३११ ॥

उच्छोलणा पधोविस्स छुब्भना, सोवि तारिसयस्स उच्छोलणादोसा भवंति, पिपीलिगाऽऽदीणं वा पाणाण उप्पिलावणा इवति, जिल्लगंधे तसा पमंति, तरुगणपत्ताणि वा पुप्फाणि वा फलाणि वा पमंति, आतिग्गहणेणं पुढविआउतेउवाउक्कण य, यत्राग्निस्तत्र वायुना भवितव्यमिति कृत्वा कुरुवयकरणे य पाउसत्तं भवति ।

कारणे अतिरित्ते ण आयमे–

वितियपद मसहरो–गअरिसा सागारसोयवादीसु ।
लत्थाणोसहपाणे, परेण तिण्हाऽऽयमेज्जासि ॥ ३१२ ॥

जेण वा णिल्लेवं जिग्गंधं भवतीत्यर्थः । नि० चू० ४ उ० ।

यदुदयेनाऽऽत्मा सदसद्विवेकविकलत्वात् स्थण्डिलवद् भवति स स्थण्डिलः । क्रोधे, सूत्र० १ श्रु० ६ अ० ।

थंभिल्ल–देशी-मरुके, दे० ना० ५ वर्ग २५ गाथा ।

थंब–देशी–विषमे, दे० ना० ५ वर्ग २४ गाथा ।

थंभ-स्तम्भ–पुं० । "थडावस्यन्दे" ॥ ८ । २ । ९ ॥ इति स्यन्दाभावेवृत्तौ स्तम्भेस्तस्य थकारठकारौ । 'थंभो''ठंभो' । प्रा० २ पाद । उत्तमजातीयोऽहं कथमेतेषां भिक्षाचराणां हीनजातीयानां पार्श्वे गच्छामीत्यादिलक्षणे जात्याद्यभिमाने, आ० म० १ अ० ३ खण्ड । उत्त० । आव० । दश० । अहङ्कारे, उत्त० ११ अ० । अवमाननायाम्, प्र० १२ श० ५ उ० । गर्वे, सूत्र० १ श्रु० १३ अ० । शैलदारुमयाऽऽदौ, आचा० २ श्रु० १ चू० १ अ० ७ उ० । स्थाणौ, स्था० ४ ठा० २ उ० ।

थंभण–स्तम्भन–न० । ऊर्द्धीकरणे, औ० ।

थंभणय–स्तम्भनक-न० । नवभयहराऽऽद्यपार्श्वनाथस्थाने पुरभेदे, ती० ४३ कल्प ।

" थंभणयकप्पमज्झे, जं संगहियं न वित्थरभएणं ।
तं सिरिजिणपहसूरी, सिलुंछमिव किं पि जंपइ॥ १ ॥"

वक्खारपव्वए रयणसीहरायाए, तस्स भोपालनामिमं धूमं रुवहाघणसंपन्नं दट्ठूण तापं सयाणुरायस्स तं सेवमाणस्स वा सुमिणो दिट्ठो, पुत्तो नागज्जुणो नाम जाओ। सो अ जाएपण पुत्तसिणेहमोहिअमणेण सव्वासिं महो महीणं फलाइं मूलाइं दलाइं कंदाइं च भुंजाविओ। तप्पभावेणं सो महासिद्धिहिं अलंकिओ सिरूपुरिस त्ति विक्खाओ पुहवि विअरंतो सालवाहणे रन्नो कलागुरू जाओ। सो अ गयणगामिणिविज्जाअज्झयणत्थं पालित्तयपुरसिरिपालप्रायरिए सेवेइ। अन्नया भोअणावसरे पायप्पलेववलेण गयणे उप्पइए पासइ, अट्ठावयाइं तित्थाणि नमंसिआ सट्ठाणमुवागयाए तेसिं पायपक्खालिअजल सत्तुत्तरसयमहोसहाणं आसायणवन्नगंधाईहिं नामाइं निच्चइऊण गुरूवएसं विणा वि पायलेवं काउं कुक्कुरपोत व्व उप्पयंतो अवडतमे निवडिओ। वणजज्जरिअंगो गुरूहिं पुट्ठो-किमेयं ति ?। तेण जहट्ठिए वुत्ते तस्स कोसल्लयमक्कमित्ता आयरिआ तस्स सिरे पउमहत्थं दाउं भणंति-सच्चिअंतदुल्लोदगेण ताणि ओसहाणि वाडित्ता पायपलेवं काउं गयणे चक्किआसि त्ति। तओ तं सिद्धिं पाविअ परितुट्ठो पुणो कया वि गुरुमुहाओ सुणेइ-जहा सिरिपासनाहपुराओ साहिज्जतो सव्वइच्छीलक्खणोवलक्खिज्जंतो अ महासई वि लयाए अमहिज्जंतो रसो कोडिवेही हवइ। तं सोऊण सो पासनाहपडिमं अन्नेसिउमारद्धो ॥ इओ अ बारवईसमुद्दविजयदसारेणं सिरिनेमिनाहमुहाओ महाऽइसयं नाऊण रयणमई सिरिपासनाहपडिमा पासायम्मि ठविता पूइआ। बारवईदाहाणंतरं समुद्देण पाविया सा पडिमा तहेव समुद्दमज्झे ठिआ। कालेण कंतीवासिणो धणवइनामस्स संजत्तिअस्स जाणवत्ते देवयाइसयाओ खलिअं जत्थ जिणबिंबं चिट्ठइ त्ति दिव्ववायाए निच्चियं नाविए तत्थ परिक्खविअ सत्ताहिं आमंतंतूहिं संदाणिअ उद्धरिआ पडिमा, निअनयरीए नेऊण पासायम्मि ठाविआ चिंताइरित्तलाभपहिट्ठेण पूइआ पइदिणं। तओ सव्वाइसाइ तं बिंबं नाऊण नागज्जुणो सिद्धरससिद्धिनिमित्तं अवहरिऊण सेढीनईए तमे वाहिंसु। तस्स पुरओ रससाहणत्थं सिरिसालवाहणरन्नो चंदलेहाभिहाणं महासईदेविं सिद्धवंतरसनिद्देसेण तत्थ आणाविअ पइनिसं रसमद्दणं कारेइ। एवं तत्थ खुज्जो भुज्जो गयागएणं तीए बुद्धु त्ति पमिवन्नो। सा तेसिं ओसहाणं मद्दणकारणं पुच्छेइ। सो अ कोमीरसवेहे वुत्तंतं जहट्ठिअं कहेइ। अन्नया दुण्हं निअपुत्ताणं तीए निवेइअं-जहा एअस्स रससिद्धी होहि त्ति। ते रसलुद्धा निअरज्जं मुत्तुं नागज्जुणपासमागया कइअवेण तं रसं चित्तुमणा पच्छन्नवेसा जत्थ नागज्जुणो भुंजइ तत्थ रससिद्धिवत्तं पुच्छंति। सा य तज्जाणणत्थं तद्दट्ठुं खलूणं रसवइं साहेइ, छम्मासे अइक्कंते खारि त्ति दूसिया तेण रसवई, तओ इंगिएहिं रसं सिद्धं नाऊण पुत्ताण निवेइअं तीए। तेहिं च परंपराए नायं, जहा वासुगिणाए अस्स दज्झंकुराओ मच्चू कहिओ त्ति, तेण च सत्थेण नागज्जुणो निहओ। जत्थ य रसो थंभिओ तत्थ थंभणयं नाम नयरं संजायं। तओ कालंतरेण तं बिंबं वयणमित्तविज्जं चूमिअंतरिअंगं संवुत्तं ॥ इओ अ चंदकुले सिरिवद्धमाणसूरिसीसजिणेसरसूरीणं सीसो सिरिअभयदेवसूरी गुज्जरराजाए संभाणयठाणे विहरिओ। तत्थ महावाहिवसेण अईसारारोगे जाए, पच्चाऽऽसन्ननगरगामेहिंतो पक्खिपडिक्कमणत्थमागंतुकामो विसेसेण आहूओ, मिच्छादुक्कडदाणत्थं सव्वो वि सावयसंघो। तेरसीअद्धरत्ते अ भणिअं-पहुणो सासणदेवयाए भयवं ! जग्गहसु। अह तओ मंदसरेणं वुत्तं पहुणा-के तुमे?। निद्देवीए भणिअं-पभाओ नव सुत्तकुक्कुडीओ उम्मोहेसु। पहुणा भणिअं न सक्केमि। तीए भणिअं-कहं न सक्केसि ?, अज्ज वि वीरतित्थं वीर ! पभावेसि, नवंगवित्तीओ अ काहिसि। भय धया भणियं-अहमेवंविहसरीरे कोहामि। देवया वुत्तं-थंभणयपुरे सेढीनइउवकंठे खंखरपलासमज्झे सयं सयंभूसिरिपासनाहो अत्थइ, तत्थ पुरे देवे वंदेह, जेण सुत्थसरीरा होह। तओ गोसे साहू अ सावयसंघेण वंदिआ पहुणा भणियं-थंभणए पासनाहं वंदिस्सामो। संघेण विनायं-नूणं कोइ उवएसो पहू, णं, तो एवं आइसंति। तओ भणिअं-संघेण अम्हे वि वंदिस्सामो। तओ वाहणेण गच्छंतस्स पहुणो थणयं सरीरं सुत्थं जायं। अओ धवलक्कयाओ परओ चरणचारेण विहरंता पत्ता थंभणपुरं गुरू, सावया सव्वत्थ पासनाहमवलोइंति। गुरुणा भणिआ-खंखरपलासमज्झे पलोएह, तेहिं तहा कए दिट्ठं सिरिपासनाहपडिमामुहं। तत्थ य पइदिणं एगा धेणू आगम्म पमिमामत्थए खीरं झरइ तओ पहिट्ठेहिं, सावएहिं जहादिट्ठं निवेइअं गुरुणो। अभयदेवसूरी वि तत्थ गंतुं मुहदंसणमेत्तेण थोभमाढत्तो-" जय तिहुयणवरकप्परुक्ख " इच्चाइतइयालिअवत्तेहिं। तओ सोलससु वित्तेसु कएसु पच्चक्खी हुआ सव्वंगपमिमा। अओ चेव-"जय पच्चक्खजिणेसर त्ति" सत्तरसमे वित्ते पडिमं। तओ बत्तीसाए पुण्णाए अंतिमवित्तदुगं अईव देवयाइड्ढिकरं ति नाऊण देवयाए विन्नत्तं न य बत्तीसाए वि वित्तेहिं सन्निज्झं करिस्सामि त्ति, अंतिमवित्तदुगं उस्सारेह, मा अम्हं कलियुगे आगमणं दुक्खाय होति। पहुणा तहा कयं। संघेण सह चिइवंदणा कया। तत्थ संघेण उसुगं देवहरयं कारिअं। तओ उवसंतरोगेण पहुणा तोसिओ सिरिपाससामी, तं च महासिद्धं पसिद्धं। कालाइक्कमेण कया ठाणाईणं नवंगाणं वित्ती, आयारंगसूअगंगाणं तु पुव्विं पि सीलंगाऽऽयरिएण कया आसि। तओ परं चिरं वीरतित्थं पन्नाविअं पहुण त्ति।" इति स्तम्भनकल्पशीलोञ्छः। ती० ४२ कल्प।

" दहवाहिविहुरिअंगा, अणसणगहणत्थमाहविअसंघा।
नवसुत्तकुक्कुडिविमो-क्खणाय भणिया निसि सुरीए ॥ १ ॥
दो वि अ हत्थअसत्थी, नवंगविवरणकहावसुकरिया।
थंभणयपासवंदण, उवइट्ठाऽऽरोग्गविहुणो य ॥ २ ॥
थंभणयाओ वलिया, धवलक्कपुराउ पयचरणचारी।
थंभणपुरम्मि पत्ता, सेढीतडजरयवसाभवणे ॥ ३ ॥
गोपयवरणुवलक्खिय-भुवि 'जय तिहुअण' थयरूपच्चक्खं।
पासे पूरिअथवणा, गोविअ सकलं च वित्तदुमा ॥ ४ ॥
संघ करावित्र नवणे, गयरोगा ठविअ पासपहुपडिमा।
सिरिअभयदेवसूरी, वि जयंतु नवंगवित्तिकरा ॥ ५ ॥
यन्मार्गेऽपि चतुःसहस्रसरदो देवाऽऽसते योऽर्चितः,
स्वामी वासवबासुदेववरुणैः स्वर्वार्धिमध्ये ततः।
कान्त्यामिश्यधनेश्वरेण महता नागार्जुनेनार्चितः,
पायात् स्तम्भनके पुरे स नवतः श्रीपार्श्वनाथो जिनः ॥१॥"
ती० ६ कल्प।

थंभणयपुर–स्तम्भनक–न०। भवभयहराऽऽख्यपार्श्वनाथस्थाने पुरभेदे, ती० ६ कल्प।

थंभणया–स्तम्भनता–स्त्री०। ग्रीवायां धमन्यादीनां तिष्ठतो

वाऽऽत्मनोऽङ्गप्रदेशानामवरोधे, प्रज्ञा० १६ पद । आ० म० । सूत्र० ।

थंभणी–स्तम्भनी–स्त्री० । स्तम्भनकारिणि विद्याभेदे, सूत्र० २ श्रु० २ अ० । ज्ञा० ।

थंभिय–स्तम्भित–त्रि० । स्तब्धीकृते, स्था० ८ ठा० । "कडगतुडियथंभियभुया।" प्रज्ञा०२२ पद । औ० । स० । प्रज्ञा० । आ०म० ।

थक्क–फक्क–धा० । गतौ, " फक्कस्थक्कः " ॥ ८ । ४ । ७ ॥ इति फक्कतेस्थक्काऽऽदेशः । प्रा० ४ पाद । अवसरे, दे० ना० ५ वर्ग २४ गाथा । 'थक्कइ' फक्कति । " धातवोऽर्थान्तरेऽपि ॥ ८ । ४ । २५९ ॥ इति नीचां गतिं करोति विडम्बयति वा तदर्थे बोद्धव्याः । प्रा० ४ पाद ।

स्था–धा० । गतिनिवृत्तौ, " स्थष्ठा-थक्क-चिट्ठ-निरप्पाः"॥ ८ । ४ । १६ ॥ इति तिष्ठतेस्थक्काऽऽदेशः । "थक्कइ"-तिष्ठति । प्रा० ४ पाद । प्रस्तावे, पुं० । " थक्के आतो ति नाऊणं " व्य० ६ उ० । देशोऽवसरः स्थक्कमिति पर्यायाः । विशे० ।

थक्कारेंत–थक्कारयत्–त्रि० । 'थक्का' इत्येवं महान्तं शब्दं कुर्वति, आ० म० १ अ० १ खण्ड ।

थगण–स्थगन–न० । पिधाने, स्था० ४ ठा० ४ उ० । संवरणे, आव० ६ अ० ।

थगिय–स्थगित–त्रि० । पिहिते, दश० ५ अ० १ उ० । संवृते, परित्यक्ते, आ० म० १ अ० २ खण्ड । आव० ।

थग्गया–देशी–चञ्चौ, दे० ना० ५ वर्ग २६ गाथा ।

थग्घ–पुं० । देशी–गाधे, दे० ना० ५ वर्ग २४ गाथा ।

थट्टी–देशी–पशौ, दे० ना० ५ वर्ग २४ गाथा ।

थण–स्तन–पुं० । वक्षोजे, पयोधरे, मांसगोले, ज्ञा० २ श्रु० १ वर्ग १ अ० । अनु० । कुचे, है० । आव० ।

थणगच्छीर–स्तनकक्षीर–न० । पयोधरदुग्धे, तं० ।

थणण–स्तनन–न० । रारटने, सूत्र० १ श्रु० ५ अ० २ उ० आक्रन्दने, सूत्र० १ श्रु० ५ अ० १ उ० । आक्रोशे, आचा० १ श्रु० ६ अ० १ उ० । सूत्र० । सशब्दनिःश्वासे, सूत्र० १ श्रु० २ अ० ३ उ० ।

थणदोस–स्तनदोष–पुं० । कायोत्सर्गदोषभेदे, " ओच्चाइक्कण य थणे, चोलपट्टेण उाइ तस्सग्गं । " अवच्चाद्य स्थगयित्वा स्तनौ चोलपट्टेन देशाऽऽदीनां रक्षणार्थम् । अथवा–अनाजोगदोषेण वा अज्ञानदोषेण करोत्युत्सर्गमिति स्तनदोषः ॥ प्रव० ५ द्वार ।

थणपीलण–स्तनपीलन–न० । पयोधरचम्पने, तं० ।

थणहर–स्तनभर–पुं० । " ख-घ-थ-ध-भाम् "॥ ८ । १ । १८७ ॥ इति भस्य हः । वक्षोजगौरवे, प्रा० १ पाद ।

थणिय–स्तनित–न० । मेघगर्जिते, प्रश्न० ४ आश्र० द्वार । अनु० । प्रव० । दीर्घविस्वराऽऽक्रन्दने, सूत्र० १ श्रु० ५ अ० १ उ० । रसिते, स० । भोगसमये दूरतरघनगर्जितानुकारिशब्दे, उत्त० १६ अ० । कृतमन्दध्वनौ, त्रि० । ज्ञा० १ श्रु० १ अ० । स्तनितकुमारे भवनपतिभेदे, तं० ।

थणियकुमार–स्तनितकुमार–पुं० । चूडामणियुक्तहयवरूपाञ्चितध्वजे दशमे भवनपतिनिकाये, प्रज्ञा० २ पद । स्था० । " बावत्तरिं थणियकुमारावाससयसहस्सा पण्णत्ता । " भ० १६ श० १३ उ० ।

थणियसद्द–स्तनितशब्द–पुं० । मेघगर्जिते, स्था० ३ ठा० १ उ० ।

थत्तिअ–देशी–विश्रामे, दे० ना० ५ वर्ग २६ गाथा ।

थद्ध–स्तब्ध–त्रि० । मानवति, स० ३० सम० । अहङ्कारिणि, उत्त० १७ अ० । ग० । यत्किञ्चनकारिणि मानिनि, सूत्र० १ श्रु० २ अ० । स्तब्धकृते द्वितीयदोषदुष्टे वन्दने, बृ० ३ उ० । आव० । प्रव० । स्तब्धस्तावत्-द्रव्यतो, भावतश्च । तत्रैकत्र चतुर्भङ्गिका । तद्यथा–द्रव्यतः स्तब्धो न भावतः, भावतः स्तब्धो न द्रव्यतः । अपरो द्रव्यतो भावतश्च । अन्यः पुनर्न द्रव्यतो नाऽपि भावत इति । अत्र चरमो भङ्गः शुद्धः । शेषभङ्गकेष्वपि भावतस्तब्धोऽशुद्ध एव । द्रव्यतस्तु भङ्गो विकल्पितः उदरपृष्ठस्थूलविवादिव्याधितोऽवनामं कर्तुमशक्तः कारणिकः स्यादपि स्तब्धो न तु निष्कारणिक इति भावः । बृ० ३ उ० ।

थब्भरद्दह–स्तब्धरहद–पुं० । अयोध्यायां स्वर्गद्वारस्थाने ह्रदे, " गोमुहजक्खो जत्थ थब्भरद्दो सरऊनईए समं मिलितो सग्गदुवारं ति पसिद्धिमावन्नो । " ती० १५ कल्प ।

थमिय–देशी–विस्मृते, दे० ना० ५ वर्ग २५ गाथा ।

थय–स्तव–पुं० । 'ष्टुञ्' स्तुतावित्यस्मादच् । आ० चू० ३ अ० । गुणकीर्तने, व्य० ।

अथ स्तुतिस्तवयोर्विशेषमभिधित्सुराह–

एगदुगे तिसिलोका, थुतीसु अन्नेसि होइ जा सत्त ।
देविंदत्थयमादी, तेणं तु परं थया होइ ॥

एकश्लोका, द्विश्लोका त्रिश्लोका वा स्तुतिर्भवति । परतश्चतुःश्लोकाऽऽदिकः स्तवः । अन्येषामाचार्याणां मतेन एकश्लोकाऽऽदिकः यावत् सप्त स्तवः, यथा देवेन्द्रस्तवाऽऽदयः । आदिशब्दात्कर्मस्तवाऽऽदिपरिग्रहः । व्य० ७ उ० । " संघा० । थओ चउव्विहो, णामठवणाओ गताओ " । आ० चू० १ अ० । आ० म० । सूत्र० । पञ्चा० ।

अधुना स्तवनिक्षेपप्रतिपादनार्थमाह–

नामं तवणा दविए, भावे य थयस्स होइ निक्खेवो ।
दव्वथओ पुप्फादी, संतगुणुक्कित्तणा भावे ॥३॥

(नामं ति) नामस्तवः, स्थापनास्तवः, द्रव्यविषयो द्रव्यस्तवः । (भावे त्ति) भावविषयो भावस्तवः । इत्थं स्तवस्य निक्षेपो न्यासो भवति, चतुष्प्रकार इति शेषः । तत्र चुम्बित्वाऽऽमस्थापने अनादृत्य द्रव्यस्तवस्वरूपमाह–द्रव्यस्तवः पुष्पाऽऽदिः, आदिशब्दाद् गन्धरूपाऽऽदिपरिग्रहः । कारणे कार्योपचाराच्चैवमाह–अन्यथा द्रव्यस्तवः पुष्पाऽऽदिनिः समर्च्यनमिति द्रष्टव्यम् । तथा सद्गुणोत्कीर्तना भावे इति । सन्तश्च ते गुणाश्च सद्गुणाः । अनेन असत्सु गुणेषु कीर्तनानिषेधमाह, करणे मृषावाददोषसङ्गात् । सद्गुणानामुत्कीर्तनात् प्राबल्येन परया भक्त्या कीर्तना संस्तवना । यथा–

" प्रकाशितं तथैकेन, त्वया सम्यक् जगत्त्रयम् ।

समग्रैरपि मो नाथ !, परतीर्थाधिपैस्तथा ॥ १ ॥
विद्योतयति वा लोकं, यथैकोऽपि निशाकरः ।
समुद्गतसमग्रोऽपि, किं तथा तारकागणः ? " ॥ २ ॥

इत्यादि लक्षणो भावे इति चारपरामर्शो भावस्तव इत्यर्थः । इति चालितप्रतिष्ठितोऽर्थः सम्यग् ज्ञानाद्य प्रभवतीति चालनां कदाचित् विनेयः करोति, कदाचित् स्वयमेव गुरुरपि । तथा चोक्तम्-" कत्थइ पुच्छइ सीसो, काहिं च पुट्ठ कहंति आयरिया । " इत्यादि ।

तत्र वित्तपरित्यागाऽऽदिना द्रव्यस्तव एव ज्यायानित्यल्पबुद्धीनामाशङ्कासंजनवः, तदुदासार्थं तदनुवादपुरःसरमाह-

दव्वत्थओ य भाव-त्थओ य दव्वत्थओ बहुगुणे त्ति।
बुद्धि सिया अनिउण-मइवयणमिणं छजीवहिअं ॥४॥

द्रव्यस्तवो, भावस्तव इत्यनयोर्मध्ये द्रव्यस्तवो बहुगुणः । प्रभूततरगुण इत्येवंबुद्धिः स्यादेवं चेन्मन्यसे इति भावः । तथाहि-किलाऽस्मिन् क्रियमाणे वित्तपरित्यागात् शुभ एव व्यवसायः, तीर्थस्य चोन्नतिकरणं दृष्ट्वा च तं क्रियमाणमन्येऽपि प्रतिबुध्यन्ते इति स्वपरानुग्रहः, सर्वमिदं संप्रति पक्षे चेतसि निधाय द्रव्यस्तवो बहुगुण इत्यस्यासारताख्यापनायाऽऽह-(अनिउणमइवयणमिति) अनिपुणमतेर्वचनमिदम्-यद् द्रव्यस्तवो बहुगुण इति । किमित्यत आह-षण्णां जीवहितं षण्णां पृथिवीकायाऽऽदीनां जीवहितं जिनास्तीर्थकृतो ब्रुवते ।

किं षड्जीवहितमित्यत आह-

छज्जीवकायसंजमो, दव्वथए सो विरुज्झई कसिणो ।
तो कसिणसंजमविऊ, पुप्फाईयं न इच्छंति ॥५॥

षण्णां जीवनिकायानां पृथिव्यादिलक्षणानां संयमः संघट्टना परित्यागः षड्जीवकायसंयमः। एष हितम्। यदि वा-मैवं, ततः किमित्यत आह-द्रव्यस्तवे पुष्पाऽऽदिसमर्थनलक्षणे षड्जीवनिकायसंयमः कृत्स्नः संपूर्णो विरुध्यते, न सम्यक् संपद्यते, पुष्पाऽऽदिसंलुचनसंघट्टनाऽऽदिना कृत्स्नसंयमव्याघातभावात्, यतश्चैवं (तो त्ति) तस्मात्कृत्स्नसंयमप्रधानं विद्वांसस्ते तत्त्वतः-साधव उच्यन्ते, कृत्स्नसंयमग्रहणमकृत्स्नसंयमविदुषां श्रावकाणां व्यपोहार्थम्-पुष्पाऽऽदिकं द्रव्यस्तवं नेच्छंति-न बहु मन्यन्ते। यश्चोक्तम्-द्रव्यस्तवे क्रियमाणे वित्तपरित्यागात् शुभ एवाध्यवसाय इत्यादि। तदपि यत्किञ्चिदभिधानात्, कस्यचिदल्पसत्त्वस्य अविवेकिनो वा शुभाध्यवसायानुपपत्तेः। दृश्यते च कीर्त्याद्यर्थमपि सत्त्वानां द्रव्यस्तवे प्रवृत्तिः शुभाध्यवसायभावे तु-स एव भावस्तवः। इतरस्तु तत्कारणत्वेनाप्रधानमिति । तथा भावस्तव एव सति तत्त्वतस्तीर्थस्योन्नतिकारणं भावस्तवमतःसम्यगमराऽऽदिभिरपि पूज्यत्वात्समेव च दृष्ट्वा क्रियमाणमन्येऽपि सुतरां प्रतिबुध्यन्ते । शिष्ट इति स्वपरानुग्रहोऽपीहैवेति गाथाभावार्थः ।

आह-यद्येवं किमयं द्रव्यस्तव एकान्ततो हेय एव वर्त्तते, माहोस्विदुपादेयोऽपीति ?। उच्यते-साधूनां हेय एव, श्रावकाणामुपादेयोऽपि ।

तथा चाऽऽह भाष्यकारः-

अकसिणपवत्तगाणं, विरयाविरयाण एस खलु जुत्तो ।
संसारपयणुकरणे, दव्वत्थए कूवदिट्ठंतो ॥ ६ ॥

अकृत्स्नं, संयममिति सामर्थ्यादुच्यते, प्रवर्त्तयन्तीत्यकृत्स्नप्रवर्त्तकाः, तेषां विरताविरतानां श्रावकाणामेष द्रव्यस्तवः खलु युक्त एव। खलुशब्दस्यावधारणार्थत्वात् । किंकृतोऽयमित्याह-संसारप्रतनुकरणः संसारक्षयकारक इति भावः । आह-यः प्रकृत्यैवासुन्दरः स कथं श्रावकाणामपि युक्तः ?। उच्यते-अत्र कूपदृष्टान्तः-" जहा नवनगराइसन्निवेसे कइ पज्जयजलाभावतो तण्हादिपरिगया तदपनोदार्थं कूपं खणंति, तेसिं च जइ वि तण्हाऽऽइया वट्टंति, मट्टियाकद्दमादीहि य मलिणिज्जंति, तहा वि तदुब्भवणं तेसिं तिण्हाइयसोयमलो पुव्वगो य फिट्टइ, सेसकालं च ते तदन्ने य लोगा सुहजायणा भवंति, एवं दव्वथए जइ वि असंजमो, तहा वि तत्तो चेव सा परिणामवुड्ढी भवति । जा असंजमवज्जियं अन्ने च निरवसेसं खवेति-तहा ऽविरता विही एस दव्वत्थओ कायव्वो सुजाणुबंधी, पभूयनिज्जराफलो य त्ति" उक्तः स्तवः। आ० म०२ अ०। सूत्र० पञ्चा० (द्रव्यस्तवो व्याख्यानं ' वेइय ' शब्दे तृतीयभागे २४४५ पृष्ठे प्रत्यपादि)

कयमत्थ पसंगेणं, जहोचिआ चेव दव्वजायणया ।
अप्पोसमणुविक्का, नियमेणं होंति नायव्वा ॥१॥

कृतमत्र प्रसङ्गेन द्रव्यस्तवाऽऽदिविचारेण एवं यथोदितभावे च प्रधानगुणभावतः द्रव्यभावस्तवादिति अन्योऽन्यसमनुविद्धौ नियमेन भवतः ज्ञातव्यौ अन्यथा स्वरूपाभावः। इति गाथार्थः ।

अनयोर्वृद्धिमाह-

अप्पविरिअस्स पढमो, सहकारिविसेसजूअओ सेओ ।
इअरस्स बज्झछाया, इअरो चिअ एस परमत्थो ॥२॥

अल्पवीर्यस्य प्राणिनः प्रथमो द्रव्यस्तवः सहकारिविशेषभूतो वीर्यस्य श्रेयानिति । इतरस्य बहुवीर्यस्य साधोर्बाह्यत्यागादिति बाह्यद्रव्यस्तवत्यागेन इतर एव श्रेयान् भावस्तव इत्येष परमार्थोऽत्र द्रष्टव्यः । इति गाथार्थः ।

विपर्यये दोषमाह-

दव्वत्थयं पि काउं, ण तरइ जो अप्पवीरिअत्तेणं ।
परिसुद्धं भावथयं, काही सो संजवो एस ॥ ३ ॥

द्रव्यस्तवमपि कर्तुमौचित्येन न शक्नोति यः स सत्त्वोऽल्पवीर्यत्वेन हि नापरिशुद्धं भावस्तवं यथोक्तमित्यर्थः । करिष्यत्यसावसंभव एषः, बलाभावात् । इति गाथार्थः ।

एतदेवाऽऽह-

जं सो जक्किट्ठयरं, अवेक्खई वीरिअं इहं णिअमा ।
ण हि पलसयं पि वोढुं, असमत्थो सव्व यं वहइ ॥४॥

यदसौ भावस्तव उत्कृष्टतरमपेक्षते वीर्यं शुभाऽऽत्मपरिणामरूपमिह नियमात् अतोऽल्पवीर्यः कथं करोत्येनमिति । न हि पलशतमपि वोढुमसमर्थः मन्दवीर्यः सत्त्वः सर्वं तं वहति पलशततुल्यो द्रव्यस्तवः, सर्वस्तुल्यश्च भावस्तवः। इति गाथार्थः ।

एतदेव स्पष्टयति--

जो बज्झच्चाएणं, णो इत्तिरिअं पि णिग्गहं कुणइ ।
इह अप्पणो सयासे, सव्वच्चाएण कह कुज्जा ? ॥५॥

यो बाह्यत्यागेन बाह्यं वित्तं नेत्वरमपि निग्रहं करोति । वन्दनाऽऽदौ इहाऽऽत्मनः क्रूरः सदाऽऽसौ यावज्जीवं सर्वत्यागेन बाह्याऽऽभ्यन्तरत्यागेन कथं कुर्यादात्मनो निग्रहम् । इति गाथार्थः।

अनयोरेव तु गुरुलाघवविधिमाह-

आरंभच्चाएणं, णाणाऽऽइगुणेसु वड्ढमाणेसु ।
दव्वत्थयहाणी वि हु, न होइ दोसाय परिसुद्धा ॥६॥

आरम्भत्यागेन हेतुना ज्ञानाऽऽदिगुणेषु वर्द्धमानेषु सत्सु द्रव्यस्तवहानिरपि कर्तुं न्यवति दोषाय परिशुद्धा सानुबन्धा । इति गाथाऽर्थः ॥ ६ ॥

इहैव तन्मयुक्तिमाह-

एत्तो वि य णिद्दिट्ठो, धम्मम्मि चउव्विहम्मि वि कमो अ ।
इह दाणसीलतवभा-वणाभए अन्नहाजोगा ॥ ७ ॥

अत एव द्रव्यस्तवाऽऽदिभावाद् निर्दिष्टो भगवद्भिर्धर्मे चतुर्विधेऽपि क्रमोऽयं वक्ष्यमाणः, इह प्रवचने दानशीलतपोभावनामये धर्मेऽन्यथायोगादस्य धर्मस्येति गाथाऽर्थः ॥ ७ ॥

तदेवाऽऽह-

संतं बज्झपणिच्चं, णाणे दाणं पि जो ण विअरेइ ।
इय खुड्डओ कहं सो, सीलं अइदुद्धरं धरइ ? ॥ ८ ॥

सन्निधमानं, बाह्यमात्मनो भिन्नम्, अनित्यमशाश्वतं, स्थाने मात्राऽऽदौ, दानं विषमाऽऽदि यो न वितरति न ददाति क्षुद्रधात् (इय) एवं क्षुल्लको वराकः कथमसौ शीलं महापुरुषसेवितमतिदुर्द्धरं धारयति ?, नैवेति गाथाऽर्थः ॥ ८ ॥

अस्सीलो अ ण जायइ, सुच्चस्स तवस्स इंदि विसओ वि ।
जह सत्तीए तवस्सी, भावइ कह भावणाजालं ? ॥ ९ ॥

'अशीलश्च न जायते' नियम एष शुक्लस्य तपसो भोक्ताङ्गभूतस्य, इन्द्रि विषयोऽपि यथाशक्त्या तपस्वी मोहपरं तत्र भावयति कथं भावनाजालम् ?, तत्त्वतो नैव । इति गाथाऽर्थः ॥ ९ ॥

एत्थं च दाणधम्मो, दव्वत्थयरूवमो गहेअव्वो ।
सेसा उ सुपरिसुद्धा, णेया भावत्थयसरूवा ॥ १० ॥

अत्र च प्रक्रमे दानधर्मो द्रव्यस्तवरूप एव ग्राह्योऽप्रधानत्वात्, शेषास्तु सुपरिशुद्धाः शीलधर्माऽऽदयो ज्ञेया भावस्तवस्वरूपाः प्रधानत्वादिति गाथाऽर्थः ॥ १० ॥

इहैवातिदेशमाह-

इय आगमजुत्तीहिं, तं तं सुत्तमहिगिच्च धीरेहिं ।
दव्वत्थयाऽऽदिरूवं, विवेइयव्वं सबुद्धीए ॥ ११ ॥

(इय) एवमागमयुक्तिभिस्तत्तत्सूत्रमधिकृत्य धीरैर्बुद्धिमद्भिर्द्रव्यस्तवाऽऽदिरूपं विवेक्तव्यं-सम्यगाख्येयमिति वक्तव्यं स्वबुद्धया । इति गाथाऽर्थः ॥ ११ ॥

उपसंहरन्नाह-

एसेह थयपरिण्णा, समासओ वण्णिआ मए तुब्भं ।
वित्थरओ भावत्थो, इमीए सुत्ताउ णायव्वो ॥ १२ ॥

एषेह स्तवपरिज्ञा स्तवप्रस्तुतिः समासतो वर्णिता मया युष्माकं विस्तरतो भावार्थोऽस्याः स्तवपरिज्ञायाः सूत्राज्ज्ञातव्यः । इति गाथाऽर्थः ॥१२॥ पं० व० ४ द्वार । प्रति० । दर्श० । ध० । परपाक्षिकसंपादितस्तोत्राऽऽदिकं मातङ्गतुरुष्कसंपादितरसवतीवदनास्वाद्यमेव, कश्चिद्विशेषो वा ?, इति प्रश्ने, उत्तरम्-परपाक्षिकसंपादितस्तोत्राऽऽदीनां मातङ्गतुरुष्काऽऽदिसंपादितरसवत्युपमानं सतां वक्तुमेवानुचितमिति किं प्रतिवचनेन ? । १३ प्र० । ही० १ प्रका० । शक्रस्तवपाठे, उत्त० २७ अ० । श्रीआदिनाथवारके ये चतुर्विंशतिस्तवं पठितवन्तः, तमेवार्यतः श्रीमहावीरवारकेऽपि, परं सूत्रपाठनियमो नास्तीति परम्पराऽस्तीति युक्तिरपि च तथैव दृश्यते । १७ प्र० । सेन० ४ उल्ला० ।

थयण-स्तवन-न० । स्तुतौ, "थुइथयणवंदणनमं-सणाणि एगट्ठियाणि एआणि ।" आव० २ अ० ।

थयथुइमंगल-स्तवस्तुतिमङ्गल-न० । स्तवः शक्रस्तवपाठः, स्तुतिस्तूर्द्धीभूय कथनम् । स्तवश्च स्तुतयश्च स्तवस्तुतयः, ता एव मङ्गलं स्तवस्तुतिमङ्गलम् । स्तवस्तुतिरूपे भावमङ्गले, उत्त० २७ अ० ।

स्तवफलप्रतिपादनम्-

थयथुइमंगलेणं भंते ! जीवे किं जणयइ ? । थयथुइमंगलेणं नाणदंसणचरित्तबोहिलाभं जणयइ । नाणदंसणचरित्तबोहिलाभसंपन्ने य जीवे अंतकिरियं कप्पविमाणोववत्तियं आराहणं आराहेइ ॥ १४ ॥

हे भदन्त ! स्तवः शक्रस्तवरूपः, स्तुतिर्या उर्द्धीभूय कथनरूपा । अथवा-एकाऽऽदिसप्तश्लोकान्ता यावद्दशोत्तरशतश्लोका वाच्याः । स्तुतिश्च स्तवश्च स्तुतिस्तवौ, तौ एव मङ्गलं भावमङ्गलरूपं स्तुतिस्तवमङ्गलं, तेन स्तुतिस्तवमङ्गलेन जीवः किं जनयति ? । स्तवस्तुतिमङ्गलेनेति पाठस्तु आर्षत्वात् । गुरुः प्राऽऽह-हे शिष्य ! स्तवस्तुतिमङ्गलेन जीवो ज्ञानदर्शनचारित्रबोधिलाभं जनयति । तत्र ज्ञानं मतिश्रुताऽऽदि, दर्शनं क्षायिकसम्यक्त्वं, चारित्रं विरतिरूपं, तद्रूप एव बोधिलाभो जैनधर्मप्राप्तिर्ज्ञानदर्शनचारित्रबोधिलाभस्तं जनयति, ज्ञानदर्शनचारित्रबोधिलाभसम्पन्नश्च जीव आराधनां ज्ञानाऽऽदीनामासेवनामाराधयति साधयति । कीदृशीमाराधनाम् ?-कल्पविमानोत्पत्तिकां, कल्पाश्च विमानानि च तेषु उत्पत्तिर्यस्याः सा कल्पविमानोत्पत्तिका, ताम् । पुनः कीदृशीमाराधनाम् ?, अन्तक्रियाम्-अन्तस्य संसारस्य, कर्मणां वा अवसानस्य क्रिया अन्तक्रिया, तामेवंभूतां ज्ञानाऽऽद्याराधनां साधयति, कल्पाः सौधर्माऽऽदयो देवलोकाः, विमानानि नवग्रैवेयकपञ्चानुत्तरविमानानि ज्ञानाऽऽद्याराधनया कश्चिद्भरताऽऽदिवत् दीर्घकालेन मुक्तिं प्राप्नोति । कश्चिद् गजसुकुमालवत् स्वल्पकालेनैव मुक्तिं प्राप्नोतीति भावः ॥ १४ ॥ उत्त० २७ अ० । (तद्वक्तव्यता ' गयसुकुमाल ' शब्दे तृतीयभागे ७४३ पृष्ठे दृश्या)

थयपरिण्णा-स्तवपरिज्ञा-स्त्री० । "वण्णिज्जइ जीए इव, भुविहो वि गुणाऽऽभावेण ।" वर्ण्यते यस्यां ग्रन्थपद्धतौ स्तवः द्विविधोऽपि द्रव्यभावरूपो गुणाऽऽदिभावेन गुणप्रधानरूपतया । प्राभृतविशेषे, पं० व० ४ द्वार । प्रति० । (सा च सूत्ररूपा इदानीमनतिप्रसिद्धा, गाथारूपपञ्चवस्तुकप्रकरणे प्रतिपादिता, अस्माभिः ' चेइय ' शब्दे तृतीयभागे १२२० पृष्ठे विन्यस्ता)

थयपाउ-स्तवपाठ-पुं० । शक्रस्तवाऽऽदिस्तवपठने, पञ्चा० ३ विव० ।

थयविहि-स्तवविधि-पुं० । स्तवः पूजा तस्य विधिर्विधानं प्रकारः स्तवविधिः । स्तवपरिज्ञायाम्, " नमिऊण जिणं वीरं,

तिलोगपुज्जं समासओ वोच्छं । थयविहिमागमसुद्धं, सपरेसिमणुग्गहट्ठाए ॥ १ ॥ " पञ्चा० ६ विव० ।

थयसरण–स्तवस्मरण–न० । चतुर्विंशतिस्तवानुचिन्तने, पञ्चा० ८ विव० ।

थर–पुं० । देशी-दधिसरे, दे० ना० ५ वर्ग २४ गाथा ।

थरहरिअ–न० । देशी-कम्पिते, दे० ना० ५ वर्ग २७ गाथा ।

थरू–पुं० । देशी-स्तरौ, दे० ना० ५ वर्ग २४ गाथा ।

थल्ल–स्थल–न० । अटव्याम्, दशा० ७ अ० । उच्चभूमिभागे, उत्त० २ अ० । भूमिप्रदेशविशेषे, स्था० ५ ठा० ३ उ० । ध० । " थल्लेसु बीयाइं । " यदा प्रचुरं वर्षं भवति तदा स्थल्लेषु फलावाप्तिः । उत्त० १२ अ० । आकाशे, नि० चू० १ उ० । (स्थल्लव्याख्या ' णईसंतार ' शब्देऽस्मिन्नेव भागे १७४०, पृष्ठे द्रष्टव्या)

थलत्थ–पुं० । देशी-मण्डपे, दे० ना० ५ वर्ग २५ गाथा ।

थलकुक्कुडियंम–स्थलकुक्कुट्यण्ड–न० । इह कवलप्रक्षेपणाय मुखे विमध्यिते यदाकाशं भवति तत्स्थलं भण्यते, स्थलमेव कुक्कुट्यण्डकं स्थलकुक्कुट्यण्डकम् । कवलप्रक्षेपार्थं विकाशिते मुखे, व्य० ७ उ० ।

थल्लकुक्कुडियंडप्पमाण–स्थलकुक्कुट्यण्डप्रमाण–न० । मुखविवरप्रमाणे कवले, यावत्प्रमाणमात्रेण कवलेन मुखे प्रक्षिप्यमाणेन मुखं न विकृतं भवति । व्य० ७ उ० ।

थलचार–स्थलचार–पुं० । स्थले रथाऽऽदिना देशान्तरावाप्तौ, आचा० १ श्रु० ५ अ० १ उ० ।

थल्लयपुप्फ–स्थल्लजपुष्प–न० । विचकिलकोरण्टकाऽऽदिके स्थल्ल एव जायमाने कुसुमे, आ० म० १ अ० १ खण्ड० प्रज्ञा० ।

थलयर–स्थलचर–पुं० । स्थले चरतीति स्थलचरः । स्था० १० ठा० । स्थल्लजेषु पञ्चेन्द्रियतिर्यक्षु, स्था० १० ठा० । स० ।

स्थलचरभेदाः–

से किं तं थलयरपंचिंदियतिरिक्खजोणिया ? । थलयरपंचिंदियतिरिक्खजोणिया दुविहा पण्णत्ता । तं जहा–चउप्पयथलयरपंचिंदियतिरिक्खजोणिया, परिसप्पथल्लयरपंचिंदियतिरिक्खजोणिया । से किं तं चउप्पयथल्लयरपंचिंदियतिरिक्खजोणिया ? । चउप्पयथलयरपंचिंदियतिरिक्खजोणिया दुविहा पण्णत्ता । तं जहा–संमुच्छिमचउप्पयथल्लयरपंचिंदियतिरिक्खजोणिया, गब्भवक्कंतियचउप्पयथल्लयरपंचिंदियतिरिक्खजोणिया । जहेव जल्लयराणं तहेव चउक्कओ भेदो । सेत्तं चउप्पयथलयरपंचिंदियतिरिक्खजोणिया । से किं तं परिसप्पथल्लयरपंचिंदियतिरिक्खजोणिया । ? । परिसप्पथल्लयरपंचिंदिया दुविहा पण्णत्ता । तं जहा–उरपरिसप्पथल्लयरपंचिंदियतिरिक्खजोणिया, भुयपरिसप्पथल्लयरपंचिंदियतिरिक्खजोणिया । से किं तं उरपरिसप्पथल्लयरपंचिंदियतिरिक्खजोणिया ? । उरपरिसप्पथलयरपंचिंदियतिरिक्खजोणिया दुविहा पण्णत्ता । जहेव जल्लयराणं तहेव चउक्कओ भेओ । एवं भुयगपरिसप्पाण वि भाणियव्वा । सेत्तं भुयगपरिसप्पथलयरपंचिंदियतिरिक्खजोणिया । सेत्तं थल्लयरपंचिंदियतिरिक्खजोणिया ।

अथ के ते पञ्चेन्द्रियतिर्यग्योनिकाः ? । पञ्चेन्द्रियतिर्यग्योनिकास्त्रिविधाः प्रज्ञप्ताः । तद्यथा-जलचराः, स्थलचराः, खचराश्च । अथ के ते जलचराः ? । जलचरा द्विविधाः प्रज्ञप्ताः । तद्यथा-संमूर्च्छिमाश्च, गर्भव्युत्क्रान्तिकाश्च । अथ के ते संमूर्च्छिमाः ? । संमूर्च्छिमा द्विविधाः प्रज्ञप्ताः । तद्यथा-पर्याप्तकाश्च, अपर्याप्तकाश्च । अथ के ते गर्भव्युत्क्रान्तिकाः ? । गर्भव्युत्क्रान्तिका द्विविधाः । तद्यथा पर्याप्तकाः, अपर्याप्तकाश्च । एवं चतुष्पदा उरःपरिसर्पा भुजपरिसर्पाः पक्षिणश्च प्रत्येकं चतुष्प्रकारा वक्तव्याः । जी० ३ प्रति० ४ उ० । प्रज्ञा० ।

थल्ली–स्थली–स्त्री० । देवडोण्याम्, नि० चू० १ उ० ।

थल्लीघोडय–स्थल्लीघोटक–पुं० । देवमङ्करापरपर्याये पक्षिविशेषे, व्य० ७ उ० ।

थव–स्तव–पुं० ' थय ' शब्दार्थे, आ० चू० ३ अ० ।

थवइय–स्तवकित–त्रि० । संजातपुष्पस्तवके, न० १ श० १ उ० । जी० । औ० । ज्ञा० । जं० । रा० ।

थवइल्ल–पुं० । देशी-प्रसारितोरुद्वयोपविष्टे, दे० ना० ५ वर्ग २६ गाथा ।

थवण–स्तवन–न० । ' थयण ' शब्दार्थे, आव० ३ अ० ।

थवथुइमंगल–स्तवस्तुतिमङ्गल–न० । ' थयथुइमंगल ' शब्दार्थे, उत्त० २९ अ० ।

थवपरिण्णा–स्तवपरिज्ञा–स्त्री० । ' थयपरिण्णा ' शब्दार्थे, पञ्चा० ६ विव०

थवपाढ–स्तवपाठ–पुं० । ' थयपाढ ' शब्दार्थे, पञ्चा० ३ विव० ।

थवय–स्तवक–पुं० । पुष्पगुच्छे, जी० ३ प्रति० ४ उ० ।

थवविहि–स्तवविधि–पुं० । 'थयविहि' शब्दार्थे, पञ्चा० ६ विव० ।

थवसरण–स्तवस्मरण–न० । ' थयसरण ' शब्दार्थे, पञ्चा० ८ विव० ।

थविर–स्थविर–पुं० । प्रवर्तितव्यापारान् संयमयोगेषु सीदतः साधून् ज्ञानाऽऽदिषु ऐहिकाऽऽमुष्मिकापायदर्शनतः स्थिरीकरोतीति स्थविरः । प्रव० २ द्वार । प्रति० । स्था० । ध० । उत्त० । आचा० । " स्थविरविचकिल्लायस्कारे " ॥ ८ । १ । १६६ ॥ इति आदेः स्वरस्य परेण सस्वरव्यञ्जनेन सहेत् ' थेरो ' । आर्षे–'थविरो ' इत्यपि प्रा० १ पाद० " अनादौ शेषाऽऽदेशयोर्द्वित्वम् " ॥ ८ । २ । ८९ ॥ इति थद्वित्वनिषेधः प्रा० २ पाद । सीदतां स्थिरीकरणहेतौ, दश० ९ अ० १ उ० । द्वा० । व्य० । ध० ।

अधुना स्थविरस्वरूपमाह-

संविग्गो मद्दविओ, पियधम्मो नाणदंसणचरित्ते ।
जे अट्ठे परिहायइ, सारेंतो ते हवइ थेरो ॥

यः संविग्नो मोक्षाभिलाषी, मार्दवितः संजातमार्दविकः,(?)प्रियधर्मा एकान्तवल्लभः, संयमानुष्ठाने यो ज्ञानदर्शनचारित्रेषु मध्ये यानर्थानुपादेयानुष्ठानविशेषान् परिहापयति हानिं नयति

तान् तं स्मारयन् भवति स्थविरः, सीदमानान्साधून् पेहिकाऽऽमुष्मिकापायप्रदर्शनतो मोक्षमार्गे स्थिरीकरोतीति स्थविर इति व्युत्पत्तेः ।

तथा चाऽऽह-

थिरकरणा पुण थेरो, पवत्तिवावारिएसु अत्थेसु ।
जो जत्थ जई सीयइ, तं सचओ तं पचोदेति ॥

प्रवृत्तिव्यापारितेष्वर्थेषु यो यत्र यतिः सीदति, सदु विद्यमानं वक्रं यस्य स सद्वलः तथाभूतः स प्रचोदयति प्रकर्षेण शिक्षयति स स्थिरकरणात्स्थविर इति । उक्तं स्थविरस्य स्वरूपम् । व्य० १ उ० ।

अथ स्थविरपदयोग्यगुणानाह-

तेन व्यापारितेष्वर्थे-ष्वनगारांश्च सीदतः ।
स्थिरीकरोति सच्छक्तिः, स्थविरो भवतीह सः ॥ ७३ ॥

तेन प्रवर्तकेन व्यापारितेषु नियोजितेष्वर्थेषु तपःसंयमाऽऽदिकार्येषु सीदतः प्रमादाऽऽदिनाऽप्रवर्तमानानगारान् साधून् यः स्थिरीकरोति तत्तदुपायेन दृढीकरोति । कीदृशः ?, सच्छक्तिः-सत्सामर्थ्यः, स साधुर्ह जिनमते स्थविरो भवति नान्य इति भावः ॥ ७३ ॥ ध० ३ अधि० । सप्ततिवर्षाणां षष्टिवर्षाणां वोपरिवर्तिनि (ध० ३ अधि० । कल्प० । व्य०) श्रुतवृद्धे, भ० २ श० ५ उ० । ज्ञा० । चतुर्दशपूर्वविदि (आचा० १ श्रु० १ चू० १ अ० १ उ०) भद्रबाहुस्वाम्यादौ, विशे० । आचार्याऽऽदिगुरौ, स० २ सम० । गच्छप्रतिबद्धे, स्था० ३ ठा० ४ उ० । गच्छमर्हति, व्य० ३ उ० । प्रव० । जरसा जीर्णे, स्थविरभूमिप्राप्ते सूत्रार्थतदुभयोपेते, व्य० २ उ० । धर्मपरिणत्या निवृत्या समञ्जसक्रियासतौ, जी० १ प्रति० । भ० । आ० क० । आ० म० । ध० । ज्ञा० । (स्थविराणां जातिश्रुतपर्यायाः 'थविरभूमि' शब्दे वक्ष्यन्ते)

तओ थेरभूमीओ पण्णत्ताओ । तं जहा-जाइथेरे, सुयथेरे, परियायथेरे । सट्ठिवासजाए समणे निग्गंथे जाइथेरे, ठाणसमवायधरे णं निग्गंथे सुयथेरे, वीसवासपरियाए णं समणे निग्गंथे परियायथेरे ॥

" तओ थेरे " इत्यादि कण्ठ्यम् । नवरं स्थविरो वृद्धस्तस्य भूमयः पदव्यः स्थविरभूमय इति । जातिर्जन्म, श्रुतमागमः, पर्यायः प्रव्रज्या, तैः स्थविरा वृद्धा ये ते तथोक्ता इति । इह च भूमिकाभूमिवतोरभेदादेवमुपन्यासः, अन्यथा भूमिका उद्दिष्टा इति ता एव वाच्याः स्युरिति । एतेषां त्रयाणां क्रमेणानुकम्पापूजनवन्दनानि विधेयानि । यत उक्तं व्यवहारे-

" आहारे उवहिसेज्जा-संथारे खेत्तसंकमे ।
किइकम्मदाणुवत्तीहिं, अणुकंपइ थेरगं ॥ १ ॥
उद्धाणाऽऽसणदाणाइं, जोगाहारप्पसंसणा ।
नीयसेज्जाइणिद्देस-वत्तिए पूयए सुयं ॥ २ ॥
उट्ठाणं वंदणं चेव, गहणं दंडगस्स य ।
अगुरुणो वि य णिद्देसे, तइयाए पवत्तए ॥ ३ ॥ " इति ।
स्थविरा इति । स्था० ३ ठा० २ उ० ।

दस थेरा पण्णत्ता । तं जहा-गामथेरा नगरथेरा रट्ठथेरा पसत्थारथेरा कुलथेरा गणथेरा संघथेरा जाइथेरा सुयथेरा परियायथेरा ॥

(दसेत्यादि) स्थापयन्ति कुर्वन्त्यवस्थितं जनं सन्मार्गे स्थिरीकुर्वन्तीति स्थविराः, तत्र ये ग्रामनगरराष्ट्रेषु व्यवस्थाकारिणो बुद्धिमन्त आदेयाः प्रभविष्णवस्ते तत्तत्स्थविरा इति ३ । प्रशासति शिक्षयन्ति ये ते प्रशास्तारो धर्मोपदेशकाः, ते च ते स्थिरीकरणात्स्थविराश्चेति प्रशास्तृस्थविराः ४ । ये कुलस्य गणस्य सङ्घस्य च लौकिकस्य लोकोत्तरस्य च व्यवस्थाकारिणस्तद्बहुकुक्ष निग्राहकास्ते तथोच्यन्ते ७ । जातिस्थविराः षष्टिवर्षप्रमाणजन्मपर्यायाः ८ । श्रुतस्थविराः समवायाऽऽद्यङ्गधारिणः ९ । पर्यायस्थविरा विंशतिवर्षप्रमाणप्रव्रज्यापर्यायवन्त इति १० । स्था० १० ठा० । तपस्तेजःस्थविरेभ्यः क्षान्तिक्रमास्थविराः अनन्तगुणविशिष्टा इति गोशाले भगवदुक्तिः । भ० १५ श० । पं० भा० । (स्थविरो गोचरचर्यायै उपकरणान्यपि नयेदिति ' उवहि ' शब्दे द्वितीयभागे १०७७ पृष्ठे गतम्)

थविरकंचुइज्ज-स्थविरकञ्चुकीय-पुं० । अन्तःपुरप्रयोजननिवेदके प्रतीहारे, भ० ९ श० ३३ उ० ।

थविरकप्प-स्थविरकल्प-पुं० । ६ त० । आचार्याऽऽदीनां गच्छप्रतिबद्धानां सामाचार्याम् , स्था० ३ ठा० ४ उ० ।

कः पुनरसौ स्थविरकल्पक्रमः ?, इत्याह-

पव्वज्जा सिक्खावय-मऽत्थग्गहणं च अनियओ वासो ।
निप्फत्ती य विहारो, सामायारी ठिई चेव ॥ ७ ॥

इह स्थविराणामयं क्रमः-यदुत प्रथमं तावद्योग्याय विनीतशिष्याय विधिवद्दापिताऽऽलोचनाय प्रशास्तेषु दयाऽऽदिषु स्वयं गुणसुस्थितेन गुरुणा विधिनैव प्रव्रज्या प्रदातव्या । ततः शिक्षापदमिति शिक्षायाः पदं स्थानं शिक्षापदम्, शिक्षैव वा पदं स्थानं शिक्षापदम्; विधिना प्रव्राजितस्य शिष्यस्य ततः शिक्षाऽधिकारो भवतीत्यर्थः । सा च शिक्षा द्विविधा-ग्रहणशिक्षा, आसेवनाशिक्षा च । तत्र द्वादश वर्षाणि यावत्सूत्रं त्वयाऽध्येतव्यमित्युपदेशो ग्रहणशिक्षा । आसेवनाशिक्षा तु-प्रत्युपेक्षणाऽऽदिक्रियोपदेशः । आह च-"सा पुण दुविहा सिक्खा, गहणे आसेवणे य णायव्वा । गहणे सुत्ताहिज्झण, आसेवणे पच्चुवेक्खाई ॥१॥" अन्ये तु-शिक्षाशब्दाद् व्रतमिति पदं पृथक् कृत्वा व्रतमिति को ऽर्थः ?-शिक्षाऽनन्तरं रात्रिभोजनविरमणषष्ठेषु पञ्चसु महाव्रतेषूपस्थाप्यते शिष्यः, इत्येतदपि द्वितीयं व्याख्यानं कुर्वन्ति, एतच्च कल्पचूर्ण्यो चिरन्तनटीकायां च न दृष्टमित्यस्माभिरुपेक्षितम् । ततः सूत्रेऽधीते यद्विनेयः कार्यते, तदाह-(अत्थग्गहणं च त्ति) द्वादश वर्षाण्यधीतसूत्रः भद्रस्तावदर्थग्रहणं कार्यते, तस्य पूर्वाधीतसूत्रस्य द्वादश वर्षाणि यावदेषोऽर्थ आग्राह्य इत्यर्थः । यथाहि-हलारघट्टगन्त्र्यादिमुक्तो बुभुक्षितो बलीवर्दः प्रथमं तावच्छोभनमशोभनं वा तृणाऽऽदिकमास्वादमनवगच्छन्नपि सर्वमभ्यवहरति, पश्चाच्च रोमन्थावस्थायां तदास्वादमवगच्छति, एवं विनेयोऽर्थमनवबुध्यमानोऽपि द्वादश वर्षाणि सर्वं सूत्रमधीते, अर्थावगमाभावे च तत्तस्यानास्वाद्यं भवति, अर्थग्रहणावस्थायां तु तदवगमात्सुस्वादमाप्यायकं च जायते, अतोऽधीतसूत्रेण द्वादश वर्षाण्यवश्यमर्थः श्रोतव्यः । यथा वा-कृषीबलः शाल्यादिधान्यं प्रथमं वपति, ततः पालयति, लुनाति, मलति, पुनीते, गृहमानयति, पश्चात्तु निराकुलचित्तस्तदुपभोगं करोति, तदज्ञावे वपनाऽऽदिपरिश्रमस्य निष्फलत्वप्रसक्तेः; एवं शिष्योऽपि सूत्रमधीत्य यदि तदर्थं नोपेक्षते-

णुयात्,तदा तदध्ययनप्रयासो विफल एव स्यात्; तस्मात्सूत्राध्ययनानन्तरमवश्यमेव द्वादश वर्षाणि तदर्थः श्रोतव्यः । तस्माद्यत एवं स्थविरकल्पक्रमो-यदुत प्रथमं प्रव्रज्या,ततः सूत्राध्ययनं, ततोऽर्थश्रवणमिति । अतोऽनुयोगप्रदानक्रमेणैवेहाधिकार इत्येवं प्रस्तुतमभिसंबध्यते । सूत्राध्ययनानन्तरभावी हि तदर्थव्याख्यानरूपः स्थविरकल्पक्रमदृष्टोऽनुयोग एवाऽवश्यकस्य शास्त्रकृता वक्तुमारब्धः, अतः सूत्राध्ययनकालस्यातिक्रान्तत्वेनेह विवक्षितत्वादनुयोगस्यैवाऽभिधित्सितत्वात् तत्प्रधानक्रमेणैवाधिकार इति भावः । एतावच्चास्यां गाथायां प्रकृतोपयोगि । यत् पुनरन्यद्व्याख्यास्यते-" अनियओ वासो । निप्फत्ती य विहारो " इत्यादि, तत्प्रासङ्गिकमित्यवगन्तव्यम् । तत्र (अनियओ वासो त्ति) ततोऽस्य गृहीतसूत्रार्थस्य शिष्यस्याऽनियतो वासः क्रियते,ग्रामनगरसन्निवेशाऽऽदिष्वनियतनिवासेनैव गृहीतसूत्रार्थः शिष्यो यदाचार्यपदयोग्यः,तदा जघन्यतोऽपि सङ्घाबद्धं दत्त्वाऽऽत्मतृतीयो द्वादश वर्षाणि यावन्नानादेशदर्शनं नियमेन कार्यत इत्यर्थः, आचार्यपदाऽनर्हस्य त्वनियमः। आचार्यपदार्होऽपि किमिति देशदर्शनं कार्यत इति ?, चेत्। उच्यते-स हि नानादेशेषु पर्यटंस्तीर्थकराणां जन्माऽऽदिभूमीः पश्यति; ताश्च दृष्ट्वा अत्र जाताः, इह दीक्षां प्रतिपन्नाः, अस्मिंश्च देशे निर्वृता भगवन्तः,इत्याद्यध्यवसायतो हर्षातिरेकात्तस्य सम्यक्त्वस्थैर्यं भवति; अन्येषां च स पश्चात् तत्स्थिरतामुत्पादयति,श्रुताऽऽतिशायिनश्चाऽऽचार्याऽऽदीक्षानाख्यानेषु पश्यतः सूत्रार्थेषु सामाचार्यां चाऽस्य विशेषोपलम्भो भवति, नानादेशभाषासमाचारांश्चैव बुध्यते, ततश्च तत्तद्देशजानामपि विनेयानां तत्तद्भाषया धर्मं कथयति, ततः प्रतिबोध्य तान् प्रव्राजयति, पूर्वप्रव्रजिताःस्तु तदुपसंपदं प्रतिपद्यन्ते, निःशेषास्मद्भाषासमाचारकुशलोऽयमिति शिष्याणां तदुपरि प्रीतियोगश्च जायते, इत्यादिगुणदर्शनादनियतवासः । (निप्फत्ती य ति) एवं चाऽनियतवासेन द्वादश वर्षाणि पर्यटतस्तस्याऽऽचार्यपदार्हस्य शिष्यत्वेनाऽऽत्मनो निष्पत्तिर्भवति, अन्येषां च प्रभूतशिष्याणां तदन्तिके निष्पत्तिर्जायत इति । (विहारो त्ति) एवं शिष्यत्वेन निष्पन्नौ, सूरिपदे च प्राप्ते, स्वपरोपकारकरणेन दीर्घे च पर्याये परिपालिते, अन्यस्मिंश्च योग्यशिष्ये आचार्यपदे व्यवस्थापिते ततोऽनन्तरं विहरणे विशेषेण भगवदभिहितमार्गे पराक्रमणं विहारो विशेषानुष्ठानरूपोऽनेन कर्त्तव्यः । स च द्विविधः-भक्तपरिज्ञेङ्गिनीपादपोपगमनलक्षणमन्यतमरणं, जिनकल्पपरिहारविशुद्धिककल्पयथालन्दिककल्पप्रतिपत्तिर्वा । अस्मिंश्च द्विविधेऽपि विहारे सामाचारी ज्ञात्वाऽनुष्ठेया । सा चाऽऽद्ये मरणलक्षणे विहारे-

" निप्फाइया य सीसा, सउणी जह अंडयं पयत्तेणं ।
बारस संवच्छरियं, सो संलेहं अह करेइ ॥ १ ॥
चत्तारि विचित्ताइं, विगईनिज्जूहियाइँ चत्तारि ।
संवच्छरे उ दोन्नि उ, एगंतरियं च आयामं ॥ २ ॥
नाइविगिट्ठो य तवो, छम्मासे परिमियं च आयामं ।
अन्ने वि य छम्मासे, होइ विगिट्ठं तवोकम्मं ॥ ३ ॥
वासं कोमीसहियं, आयामं कट्टु आणुपुव्वीए ।
गिरिकंदरं तु गंतुं, पायवगमणं अह करेइ ॥ ४ ॥ "

इत्यादिका ज्ञातव्याः । द्वितीये तु विहारे जिनकल्पाऽऽदिप्रतिपत्तौ सामाचारी निर्दिश्यते-तत्र जिनकल्पाऽऽदिप्रतिपित्सुना आदावेव पूर्वापररात्रकाले तावदिदं चिन्तनीयम्—विशुद्धचारित्राऽनुष्ठानेन कृतं मयाऽऽत्महितम्, शिष्याद्युपकारतः परहितं च, निष्पन्नाश्चेदानीं मम गच्छपरिपालनक्षमाः शिष्याः, ततो विशेषेणैव साम्प्रतं ममाऽऽत्महितमनुष्ठातुमुचितमिति, विचिन्त्य चेदं सति परिज्ञाने आत्मीयमायुःशेषं स्वयमेव पर्यालोचयति, तदभावेऽन्यमतिशयिनमाचार्याऽऽदिकं पृच्छति, तत्र स्तोके स्वायुषि भक्तपरिज्ञाऽऽदीनामन्यतरन्मरणं प्रतिपद्यते । अथ दीर्घमायुः, केवलं जङ्घाबलपरिक्षीणः, तदा वृद्धवासं स्वीकुरुते, पृष्टायां तु शक्तौ जिनकल्पाऽऽदिप्रतिपत्तिमुररीकरोति । तत्र जिनकल्पं प्रतिपित्सुना प्रथममेव तावत्पञ्चभिस्तुलनानिरात्मा तोलनीयः । तद्यथा-

" तवेण सत्तेण सुत्तेण, एगत्तेण बलेण य ।
तुलणा पंचहा वुत्ता, जिणकप्पं पडिवज्जओ " ॥ १ ॥

तुलना,भावना,परिकर्म चेत्येकार्थानि । तत्राऽऽचार्योपाध्यायप्रवर्तकस्थविरगणावच्छेदकलक्षणाः प्रायः पञ्चैव जनाः प्रशस्ताभिरेताभिः पञ्चनिर्जरभावनाभिर्जिनकल्पं प्रतिपित्सवः प्रथममेवाऽऽत्मानं भावयन्ति । अप्रशस्तास्तु कन्दर्पदैवकिल्बिषिकाऽऽभियोगिकासुरसंमोहस्वरूपाः पञ्च भावनाः सर्वथा दूरतः परित्यजन्ति । तत्र तपसाऽऽत्मानं भावयंस्तथा बुभुक्षां पराजयते यथा देवाऽऽद्युपसर्गाऽऽदिनाऽनेषणाऽऽदिकरणतो यदि षण्मासान् यावदाहारं न लभते,तथाऽपि न बाध्यते । सत्त्वभावनया तु भयं पराजयते । तत्र भयजयार्थं रात्रौ सुप्तेषु शेषसाधुपूपाश्रय एव कायोत्सर्गं कुर्वतः प्रथमा सत्त्वभावना भवति । द्वितीयाऽऽदिकास्तूपाश्रयबाह्याऽऽदिप्रदेशेषु । आह च-"पढमा उवस्सयम्मी, बीया बाहिं तइयचउक्कम्मि । सुण्णहरम्मि चउत्थी, अह पंचमिया मसाणम्मि ॥ १ ॥ " सूत्रभावनया तु स्वनामवत् सूत्रं परिचितं तथा करोति यथा रात्रौ दिवा चोच्छ्वास-प्राण-स्तोक-क्षणमुहूर्ताऽऽदिकं कालं सूत्रपरावर्त्तनानुसारेणैव सर्वं सम्यगवबुध्यते, एकत्वभावनया चाऽऽत्मानं भावयन् सङ्घाटकसाध्वादिना सह पूर्वप्रवृत्तानाद्यापसूत्रार्थसुखदुःखाऽऽदिप्रश्नौमिथःकथाऽऽदिव्यतिकरान् सर्वानपि परिहरति, ततो बाह्यममत्वे मूलत एव व्यवच्छेदिते पश्चादेहोपध्यादिभ्योऽपि भिन्नमात्मानं पश्यन् सर्वथा तेष्वपि निरभिष्वङ्गो भवति । (अत्रोदाहरणम्-' एगत्तभावणा ' शब्दे तृतीयभागे १२ पृष्ठे द्रष्टव्यम्) बलभावनायां बलं द्विविधम्-शारीरं, मानसधृतिबलं च । तत्र शारीरमपि बलं जिनकल्पार्हस्य शेषजनाऽतिशयिकमेष्टव्यम्, तपःप्रभृतिभिस्त्वपकृष्यमाणस्य यद्यपि शारीरं बलं तथाविधं न भवति,तथाऽपि धृतिबलेनाऽऽत्मा तथा भावयितव्यो यथा महद्भिरपि परीषहोपसर्गैर्न बाध्यते । एताभिः पञ्चभिर्भावनाभिर्भाविताऽऽत्मा जिनकल्पिकप्रतिरूपो गच्छेऽपि प्रतिवसन्नाहाराऽऽदिपरिकर्म प्रथममेव करोति, तत्राऽऽहारे तृतीयपौरुष्यामवगाढायां बहुघणकाऽऽदिकमन्तं प्रान्तं रूक्षं च । " संसट्ठमसंसट्ठा, उद्धडा तह होइ अप्पलेवा य । उग्गहिआ पग्गहिया, उज्झियधम्मा य सत्तमिया " ॥१॥ एतासां सप्तानां पिण्डैषणानां मध्ये आद्यद्वयवर्जं शेषपञ्चानां मध्यादन्यतरैषणाद्वयाभिग्रहेणाऽऽहारं गृह्णाति,एकया प्रकृत्या, अपरया त्वेषणया पानकमिति । एवमाद्याऽऽगमोक्तविधिना गच्छान्तर्गतः पूर्वमेवाऽऽत्मानं परिकर्म्य ततो जिनकल्पं प्रतिपित्सुः सङ्घं मीलयति, तदभावे स्वगणं तावदवश्यमाह्वयते, ततस्तीर्थंकरसमीपे, तदभावे गणधरसन्निधाने, तदसत्त्वे चतुर्दशपूर्वधरान्तिके, तदसंभवे दशपूर्वधराऽभ्यर्णे, तदलाभे तु

वटाश्वत्थाऽशोकवृक्षाऽऽदीनामासन्नौ जिनकल्पमभ्युपगच्छति, निजपदव्यवस्थापितं सूरिम्, सबालवृद्धं गच्छं, विशेषतः पूर्वविरुद्धाँश्च क्रमयति । तद्यथा-

" जइ किंचि पमाएणं, न सुट्ठु मे वट्टियं मए पुव्विं ।
तं मे ! खामेमि अहं, निस्सल्लो निक्कसाओ य ॥ १ ॥
आणंदमंसुपायं, कुणमाणा ते वि भूमिगयसीसा ।
खामंति तं जहारिहं, जहारिहं खामिया तेण ॥ २ ॥
खामेतस्स गुणा खलु, निस्सल्लयविणयदीवणा मग्गे ।
लाघविअं एगत्तं, अप्पडिबंधो य जिणकप्पे ॥ ३ ॥ "

निजपदस्थापितसूरिप्रभृतीनामनुशास्तिं प्रयच्छति । तद्यथा-

" पाडिच्छ सगणमेयं, अप्पडिबद्धो य होज्ज सव्वत्थ ।
एसो हु परंपरओ, तुमं पि अंते कुणसु एवं ॥ १ ॥
पुव्वपवत्तं विणयं, मा हु पमाएहि विणयजोगेसु ।
जो जेण पगारेणं, जवज्झुज्झइ तं च जाणाहि ॥ २ ॥
ओमो समराइणिओ,अप्पतरसुओ य मा पेणं तुब्भे ।
परिभवह एस तुम्ह वि, विसेसओ संपयं पुज्जो ॥ ३ ॥ "

इत्यादि शिक्षां दत्त्वा गच्छाद्विनिर्गते चक्षुर्गोचराऽतीते तस्मिन्नानन्दिताः साधवः प्रतिनिवर्तन्ते । उक्तं च-

" एक्कओ व पत्तसहिओ, संभग्गो वच्चए निरवइक्खो ।
धीरो घणबंदाओ, नीहरिओ विज्जुपुंजो व्व ॥ १ ॥
सीहम्मि व मंदरकं-दराउ गच्छा विणिग्गए तम्मि ।
चक्खुविसयमइगए, अ इंति आणंदिया साहू ॥ २ ॥
आजोएउं खेत्तं, निव्वाघाएण मासनिव्वाहिं ।
गंतूण तत्थ विहरे, साहू पडिवन्नजिणकप्पो ॥ ३ ॥ "

एवं च प्रतिपन्नजिनकल्पो यत्र ग्रामे मासकल्पं,चतुर्मासकं वा करिष्यति, तत्र षड्भागान् कल्पयति । ततश्च यत्र भागे एकस्मिन् दिने गोचरचर्यायां हिण्डितस्तत्र पुनरपि सप्तम एव दिवसे पर्यटति, भिक्षाचर्यां ग्रामान्तरगमनं च तृतीयपौरुष्यामेव करोति, चतुर्थपौरुषी च यत्राऽवगाहते, तत्र नियमादवतिष्ठते । नक्तं पानकं च पूर्वोक्तैषणाद्वयाभिग्रहेणालेपकृदेव गृह्णाति । एषणाऽऽदिविधयं मुक्त्वा न केनाऽपि सार्द्धं जल्पति । एकस्यां च वसतौ यद्यप्युत्कृष्टतः सप्त जिनकल्पिकाः प्रतिवसन्ति, तथाऽपि परस्परं न जानते । उपसर्गपरीषहान् सर्वानपि सहत एव, रोगेषु चिकित्सां न कारयन्त्येव, तद्वेदनां तु सम्यगेव विषहते, आपातसंलोकाऽऽदिदोषरहित एव स्थण्डिले उच्चाराऽऽदीन् करोति, नाऽस्थण्डिले," अममत्त अपरिकम्मा, णियमा जिणकप्पयाण वसहीओ । एमेव य थेराणं, मोत्तूण पमज्जणं एक्कं ॥ १ ॥ " इति वचनात्परिकर्मरहितायां वसतौ तिष्ठति, यद्युपविशति तदा नियमादुत्कुटुक एव, न तु निषद्यायाम्, औपग्रहिकोपकरणस्यैवाऽभावादिति । मत्तकरिव्याघ्रसिंहाऽऽदिके च संमुखे समापतत्युन्मार्गगमनाऽऽदिना ईर्यासमितिं न भिनत्ति, इत्याद्यन्याऽपि जिनकल्पिकानां सामाचारी समयसमुद्रादवगन्तव्या । (सिद्धं चेव त्ति) तथा पूर्वोक्ते द्विविधेऽपि विहारे स्थितिः श्रुतसंहननाऽऽदिका ज्ञातव्या । तथाहि-जिनकल्पिकस्य तावज्जघन्यतो नवमस्य पूर्वस्य तृतीयमाचारवस्तु, उत्कर्षतस्त्वसंपूर्णानि दशपूर्वाणि श्रुतं भवति । प्रथमसंहननो वज्रर्षभनाराचसमानावष्टम्भश्चायं भवति । स्वरूपेण पञ्चदशस्वपि कर्मभूमिषु, संहृतस्त्वकर्मभूमिष्वपि भवति । उत्सर्पिण्यां व्रतस्थस्तृतीयचतुर्थारकयोरेव; जन्मनाऽपि तृतीयचतुर्थारकेऽपि, अवसर्पिण्यां तु जन्मना तृतीयचतुर्थारकयोरेव, व्रतस्थस्तु पञ्चमारकेऽपि, संहरणेन तु सर्वस्मिन्नपि काले प्राप्यते । प्रतिपद्यमानकः सामायिकच्छेदोपस्थापनीयचारित्रयोः, पूर्वप्रतिपन्नस्तु सूक्ष्मसंपराययथाख्यातचारित्रयोरप्युपशमश्रेण्यामवाप्यते । प्रतिपद्यमानानामुत्कृष्टतः शतपृथक्त्वम्, पूर्वप्रतिपन्नानां तु सहस्रपृथक्त्वं जिनकल्पिकानां लभ्यते । जिनकल्पिकः प्रायोऽपवादं नासेवते, अशबलपरिक्षीणस्त्वविदरमाणोऽप्याराधकः । आवश्यकीनैषेधिकीमिथ्यादुष्कृततहिविषयपृच्छोपसंपल्लक्षणाः पञ्च सामाचार्योऽस्य भवन्ति, न त्विच्छाऽऽदयः । अन्ये त्वाहुः-आवश्यकीनैषेधिकीगृहस्थोपसंपल्लक्षणास्तिस्र एव भवन्ति, आरामाऽऽदिनिवासिन ओघतः पृच्छाऽऽदीनामप्यसंभवादिति । लोचं चाऽसौ नित्यमेव करोति, इत्येवमाद्यपराऽपि स्थितिर्जिनकल्पिकानामागमादवसेया । परिहारविशुद्धिककल्पसामाचार्यादिवक्तव्यताऽत्रैव ग्रन्थे पुरस्ताद्वक्ष्यते ।

यथालन्दिकानां तु-"तवेण सत्तेण सुत्तेण" इत्यादिका भावनाऽऽदिवक्तव्यता यथा जिनकल्पिकानाम् । यस्तु विशेषः स त्वेषतः प्रोच्यते-तत्रोदकार्द्रः करो यावता शुष्यति, तत आरभ्योत्कृष्टतः पञ्चरात्रिन्दिवानि यावत्कालोऽत्र समयपरिभाषया लन्दमित्युच्यते । ततश्च पञ्चरात्रिन्दिवलक्षणस्योत्कृष्टस्य लन्दस्याऽनतिक्रमेण चरन्तीति यथालन्दिकाः । पञ्चको हि गणोऽमुकं कल्पं प्रतिपद्यते । ग्रामं च गृहपङ्क्तिरूपामिः षड्भिर्वीथीभिर्जिनकल्पिकवत्परिकल्पयन्ति, किं त्वेकैकस्यां वीथ्यां पञ्च पञ्च दिनानि पर्यटन्तीत्युत्कृष्टलन्दचारिणो यथालन्दिका उच्यन्ते । एते च प्रतिपद्यमानका जघन्यतः पञ्चदश भवन्ति, उत्कृष्टतस्तु सहस्रपृथक्त्वम् । पूर्वप्रतिपन्नास्तु जघन्यतः कोटिपृथक्त्वम्, उत्कृष्टतोऽपि कोटिपृथक्त्वं भवन्ति । एते च यथालन्दिका द्विविधा भवन्ति-गच्छे प्रतिबद्धाः, अप्रतिबद्धाश्च । गच्छे च प्रतिबन्धोऽमीषां कारणतः, किञ्चिदश्रुतस्थार्थस्य श्रवणार्थमिति मन्तव्यमिति । पुनरेकैकशो द्विधा-जिनकल्पिकाः, स्थविरकल्पिकाश्च । ये जिनकल्पं प्रतिपत्स्यन्ते ते जिनकल्पिकाः, ये तु पुनरपि स्थविरकल्पं समाश्रयिष्यन्ते ते स्थविरकल्पिकाः । एतेषां च स्थविरकल्पिकजिनकल्पिकभेदभिन्नानां यथालन्दिकानां परस्परमयं विशेषः । यदाह-

" थेराणं नाणत्तं, अतरंते अप्पिणंति गच्छस्स ।
गच्छे निरवज्जेणं, करेंति सव्वं पि पडिकम्मं ॥ १ ॥
एक्केक्कपमिग्गहगा, सप्पाउरणा हवंति थेरा उ ।
जेसिं उण जिणकप्पे, न य तेसिं वत्थपायाणि ॥ २ ॥
निप्पडिकम्मसरीरा, अवि अच्छिन्नमलं पि नेव अवणिंति ।
विसहंति जिणा रोगं, करेंति कयाइ न तिगिच्छं ॥ ३ ॥ "

इत्यलं विस्तरेण । तदर्थिना तु कल्पग्रन्थोऽन्वेषणीय इति(७)। विशे० । (संक्षेपत एष स्थविरकल्पः)(विस्तरतस्तु 'अहालंद' शब्दे प्रथमभागे ७६६ पृष्ठे प्रतिपादितः) (शेषाणि तु सर्वाण्यपि जिनकल्पतुल्यवक्तव्यान्येवेत्युक्तं शुद्धिपरिहारनानात्वम्)(विहारद्वारं ' विहार ' शब्दे वक्ष्यते) (स्थापनाकल्पविधिः ' ठवणाकुल ' शब्दे तृतीयभागे १६८६ पृष्ठे गतः)

यदि ज्ञानाऽऽदिपुष्टालम्बनं भवति तदा चिकित्साऽऽदिविधानान् न सहन्ते, इतरथा न सम्यगदीनमनसः सहन्त इति-

दुविहं पि वेयणं ते, निक्कारणओ सहंति जइया वा।

अममत्त अपरिकम्मा, वसही वि पमज्जणं मोत्तुं ॥ ७६३॥

द्विविधामप्याभ्युपगमिकीमौपक्रमिकीं च वेदनां निष्कारणतः सहन्ते, भाज्या वा असहिष्णुत्वाऽऽदिकारणवसतौ न सहन्तेऽपीति भावः। तथा वसतिरपि तेषाममत्वा ममेयमित्यनिष्वङ्गरहिता। "अपरिकम्मा" उपलेपनाऽऽदिपरिकर्मवर्जिता। किं सर्वथैव ?, नेत्याह-प्रमार्जनामेकां मुक्त्वा, कारणे तु सममत्वा सपरिकर्माऽपि भवति, परिणतचारित्राणां शैक्षाऽऽदीनां ममेयमित्यनिष्वङ्गविधानात् सममत्वा सपरिकर्मा त्वपरिकर्मायां वसतेरलाभे ऊह्या।

अथ विशेषमाह-

तिगमाईया गच्छा, सहस्सु-वत्तीसई उसभसेणे।
थेरंमि वि य पढमं, वयंति सेसे वि आगाढे ॥ ७७५ ॥

त्रिकाऽऽदयस्त्रिचतुःप्रभृतिपुरुषपरिमाणा गच्छा भवेयुः। किमुक्तं भवति?-एकस्मिन् गच्छे जघन्यतस्त्रयो जना भवन्ति, गच्छस्य साधुसमुदायरूपत्वात्, तस्य च त्रयाणामधस्तादभावादिति। तत ऊर्ध्वं ये चतुःपञ्चप्रभृतिपुरुषसंख्याका गच्छास्ते मध्यमपरिमाणतः प्रतिपत्तव्यास्तावद्यावदुत्कृष्टं परिमाणं न प्राप्नोति। किं पुनस्तदिति चेत् ?, अत आह-(बत्तीसई उसभसेणे त्ति) द्वात्रिंशत्सहस्राण्येकस्मिन् गच्छे उत्कृष्टं साधूनां परिमाणं, यथा श्रीऋषभस्वामिप्रथमगणधरस्य भगवत ऋषभसेनस्येति। तथा स्थविरमलमपि प्रथमम्-अनापातमसंलोकमेतद्गच्छवासिनो व्रजन्ति। आगाढे तु भावासन्नताऽऽदौ कारणे शेषाण्यपि अनापातसंलोकप्रभृतीनि स्थविरमलानि गच्छन्ति।

कियच्चिरमिति द्वारं विशेषयन्नाह-

केचिर कालं वसिहिह, ण ठंति निकारणम्मि इइ पुट्ठा।
अन्नं वा मग्गंती, उविंति साहारणमलंजे ॥ ७७६ ॥

कियच्चिरं कालं यूयमस्यां वसतौ वत्स्यथेति पृष्टाः सन्तो निष्कारणे न तिष्ठन्ति, किं तु क्षेत्रान्तरं गच्छन्ति। अथ बहिरशिवाऽऽदीनां कारणानि, ततस्तत्रैव क्षेत्रे अन्यां वसतिं मार्गयन्ति। अथ मृग्यमाणाऽन्यत्र न लभ्यते, ततः साधारणं वचनं स्थापयन्ति, यथा निर्व्याघाते तावद् वयं मासं यावद् तिष्ठामहे, व्याघाते तु हीनाधिकमलाघवार्थम्।

शेषद्वाराणि तुल्यवक्तव्यत्वादतिदिशन्नाह-

एमेव सेसएसु वि, केवइया वसिहिह त्ति जा ओयं।
निक्कारणे पडिसेहो, कारणे जयणं तु कुव्वंति ॥७७७॥

एवमेव कियच्चिरद्वारवत्, शेषेष्वपि उच्चारप्रस्रवणाऽऽदिषु कियद्द्वारेषु, कियन्तो वत्स्यथेति द्वारं यावन्नेयम्। किमित्याह-एतेष्वपि निष्कारणे प्रतिषेधो, न वसन्तीति भावः। कारणे तु यतनां कुर्वन्ति। किमुक्तं भवति?-यदि तिष्ठतामुच्चारप्रस्रवणयोः परिष्ठापनमकाले फलिहकाभ्यन्तरतो नानुजानन्तीत्यतस्तत्र न तिष्ठन्ति। अथाशिवाऽऽदिभिः कारणैस्तिष्ठन्ति तत उच्चारं प्रश्रवणं वा मात्रकेषु व्युत्सृज्य बहिः परिष्ठापयन्ति। एवमवकाशाऽऽदिष्वपि ऊह्यम्, नवरमवकाशे यत्र प्रदेशे उपवेशनभाजनधावनाऽऽदि नानुज्ञातं,तत्र नोपदिशन्ति। कमढकाऽऽदिषु च भाजनानि धावन्ति,तृणफलकान्यपि यानि नानुज्ञातानि, तानि न परिभुञ्जते। संरक्षता नाम-यत्र तिष्ठतामगारिणो भणन्ति-गवादिभिर्भज्यमानां वसतिमन्यद्वा समीपवर्ति गृहं संरक्षत,तत्राऽप्यशिवाऽऽदिभिः कारणैः तिष्ठन्तो भणन्ति-यदि वयं तदानीं ऊह्यामस्ततो रक्षिष्याम इति। संस्थापनता नाम-वसतेः संस्कारकरणं, तस्यामपि नियुक्ता भणन्ति-वयमकुशलाः संस्थापनाकर्मणि कर्तव्ये, सप्राभृतिकायामपि वसतौ कारणतः स्थिता देशतः सर्वतो वा क्रियमाणायां प्राभृतिकायां स्वकीयमुपकरणं प्रयत्नेन संरक्षन्ति, यावत्प्राभृतिका क्रियते तावदेकस्मिन् पार्श्वे तिष्ठन्ति, सदीपायां साग्निकायां वसतौ कारणे स्थिता आवश्यकं बहिः कुर्वन्ति। अवधानं नाम-यदि गृहस्थाः क्षेत्राऽऽदि गच्छन्तो भणन्ति-अस्माकमपि गृहेषूपयोगो दातव्यो, मा शून्यस्तेनकाऽऽद्यः प्रविश्योपद्रवं कार्षुरिति, तत्रापि कारणे स्थिताः स्वयमेवावधानं ददति, अनुपस्थापितशैक्षैर्वा दापयति। यत्र च कति जना वत्स्यथेति पृष्टे सति कारणतस्तद्भ्यधिकैः परिमाणनियमः कृतः-यथैतावद्भिः स्थातव्यं नाधिकैः, ततो यद्यन्ये प्राघूर्णकाः समागच्छन्ति तदा तेषामेव स्थापनाय भूयोऽप्यनुज्ञापनीयः सागारिकः, यद्यनुजानाति, ततः सुन्दरमेव, अथ नानुजानाति, ततोऽन्यस्यां वसतौ स्थापनीयास्ते प्राघूर्णका इति।

भिक्षाचर्याऽऽदीनामवशिष्यमाणद्वाराणां विशेषमाह-

नियया ऽनियया भिक्खा-चरिया पाणऽप्पलेवऽलेवाइं।
अंबिलमणंबिलं वा, पडिमा सव्वा वि अविरुद्धा ।७७७।

भिक्षाचर्या नियता कदाचिदाभिग्रहिकी,अनियता कदाचिदनाभिग्रहिकी, पानमन्नं वा लेपकृतं च भवेदलेपकृतं वा, द्राक्षाचिञ्चापानकाऽऽदि तक्रतीमनाऽऽदिकं च लेपकृतं सौवीराऽऽदिकं, वल्लचणकाऽऽदिकं चालेपकृतमाचाम्लमनाचाम्लं वा द्वयमपि कुर्वन्ति, प्रतिमाश्च मासिक्यादिका भद्राऽऽदिका वा सर्वाश्चाप्यमीषामविरुद्धा इति। उक्तं सामाचारीद्वारम्।

अथ स्थितिद्वारमभिधित्सुर्द्वारगाथाद्वयमाह-

खेत्ते काले चरित्ते, तित्थे परियाए आगमे वेए।
कप्पे लिंगे लेसा, झाणे गणणा अभिग्गहा य ॥ ७९८ ॥
पव्वावण मुंमावण, मणसाऽऽवन्ने उ नत्थि पच्छित्तं।
कारणे पडिकम्मम्मि य, भत्तं पंथो य भयणाए ॥७७९॥

क्षेत्रे काले चरित्रे तीर्थे पर्याये आगमे वेदे कल्पे लिङ्गे लेश्यायां ध्याने गणनायाम्, एतेषु स्थितिर्वक्तव्या। अभिग्रहाश्चामीषामभिज्ञातव्याः। एवं प्रव्राजना, मुण्डापना, मनसाऽऽपन्नेऽप्यपराधे नास्ति प्रायश्चित्तं, कारणे प्रतिकर्मणि च स्थितिः भक्तं पन्थानश्च भजनया। इति गाथाद्वयसमुदायार्थः।

अवयवार्थं तु प्रतिद्वारं विभणिषुराह-

पन्नरस कम्मभूमिसु, खेत्तऽच्छोसप्पिणी य तिसु होज्जा।
तिसु दोसु य उस्सप्पे, चउरो पलिभाग साहरणा ॥८००॥

क्षेत्रद्वारे जन्मतः, सद्भावतश्च स्थविरकल्पिकाः पञ्चदशस्वपि कर्मभूमिषु भरतैरावतविदेहपञ्चकलक्षणासु भवन्ति, संहरणतः पञ्चदशानां कर्मभूमीनां त्रिंशतामकर्मभूमीनामन्यतरस्यां भूमौ भवेयुः, अद्धा कालः, तमङ्गीकृत्यावसर्पिण्यां जन्मतः, सद्भावतश्च त्रिषु तृतीयपञ्चमारकेषु भवेयुः। (तिसु दोसु

य उस्सप्पे त्ति) उत्सर्पिण्यां जन्मतस्त्रिषु द्वितीयतृतीयचतुर्थेषु आरकेषु, सद्भावतस्तु द्वयोस्तृतीयचतुर्थारकयोर्नैवन्ति, नोअवसर्पिण्युत्सर्पिणीकाले जन्मतः, सद्भावतश्च दुःषमसुषमाप्रतिभागे भवन्ति। संहरणतस्तु चत्वारोऽपि प्रतिभागा अमीषां विषयतया प्रतिपत्तव्याः । तद्यथा-सुषमसुषमाप्रतिभागः, दुःषमदुःषमाप्रतिभागः, सुषमदुःषमाप्रतिभागः, दुःषमसुषमाप्रतिभागश्चेति ।

पढमबिइएसु पडिव-ज्जमाण इयरे उ सव्वचरणेसु ।
नियमा तित्थे जम्म-ऽट्ठ जहन्ने कोमि उक्कोसे ॥८०१॥
पव्वज्जाएँ मुहुत्तो, जहन्नमुक्कोसिया उ देसूणा ।
आगमकरणे भइया, ठियकप्पे अट्ठिए वा वि ॥ ८०२ ॥

प्रतिपद्यमानका अमी प्रथमे वा सामायिकाऽऽख्ये, द्वितीये वा छेदोपस्थापनीयाऽऽख्ये चारित्रे भवेयुः। इतरे नाम-पूर्वप्रतिपन्नाः, ते सर्वेष्वपि चरणेषु भवन्ति, सामायिकाऽऽदिषु यथाख्यातपर्यन्तेष्विति भावः। तथा नियमादमी तीर्थे भवन्ति, नातीर्थे । पर्यायो द्विधा-गृहपर्यायः, प्रव्रज्यापर्यायश्च । तत्र गृहपर्यायो जघन्यतो जन्मन आरभ्याऽष्टौ वर्षाणि, उत्कर्षतः पूर्वकोटी। प्रव्रज्यापर्यायो जघन्यतोऽन्तर्मुहूर्तः, तदनन्तरं मरणात्प्रतिपाताद्वा। उत्कर्षतस्तु देशोना पूर्वकोटी। आगमोऽपूर्वश्रुताध्ययनं, तस्य करणे भाज्या-अमी कुर्वन्ति वा, न वा तमिति भावः। कल्पद्वारे-स्थितिकल्पे वा अस्थितकल्पे वा भवेयुः । वेदद्वारं सुज्ञानत्वाद्भाष्यकृता न भावितम् । इत्थं तु द्रष्टव्यम्-वेदः स्त्रीपुंसपुंसकभेदात् त्रिविधोऽप्यमीषां प्रतिपत्तिकाले भवेत्। किमुक्तं भवति?-पूर्वप्रतिपन्नानां त्ववेदकत्वमपि भवतीति।

भइया उ दव्वलिंगे, पडिवत्ती सुद्धलेसधम्मेहिं ।
पुव्वपडिवन्नगा पुण, लेसाझाणे य भयणाए ॥ ८०३ ॥

प्रतिपद्यमानकाः, पूर्वप्रतिपन्नकाश्च द्रव्यलिङ्गे भक्ता विकल्पिताः-कश्चित्तत्र भवत्यपीति, भावलिङ्गं तु नियमात्सर्वदैव भवति । तथा प्रतिपत्तिः शुद्धलेश्याधर्मध्यानयोर्भवेत् । किमुक्तं भवति?-प्रथमतः प्रतिपद्यमानकाः शुद्धास्वेव तिसृषु लेश्यासु आज्ञाविचयाऽऽदौ च धर्मध्याने वर्त्तमानाः प्रतिपत्तव्याः । पूर्वप्रतिपन्नकाः पुनः षण्णां लेश्यानामन्यतरस्यां लेश्यायामार्त्ताऽऽदीनां च ध्यानानामन्यतरस्मिन् ध्याने भवेयुः । बृ० १ उ० ।

अथैताभिर्भावलेश्याभिरुपचितस्य कर्मणः कथमुदयो भवति?, इत्याह-

जं चिन्नए उ कम्मं, जं लेसं परिणतस्स तस्सुदए ।
असुभो सुभो व गीतो, अपत्थपत्थन्नउदओ व्व ॥८०४॥

(जं लेसं ति) सप्तम्यर्थे द्वितीया। ततोऽयमर्थः-यस्यां कृष्णाऽऽदीनामन्यतरस्यां लेश्यायां परिणतस्य जीवस्य यदशुभं शुभं वा कर्म ज्ञानाऽऽवरणाऽऽदि चीयते। कर्मकर्तृयं प्रयोगः, चयं बन्धमुपगच्छतीत्यर्थः । तस्यैवमशुभरूपतया, शुभरूपतया वा बद्धस्य कर्मण उदयाऽऽवलिकां प्राप्तस्याशुभः, शुभो वा तथाऽनुरूप एवोदयो गीतः संशब्दितस्तीर्थकरैः । दृष्टान्तमाह-अपथ्यपथ्यान्नउदय इव । यथा अपथ्यान्नं भुक्तवतो ज्वराऽऽदिरोगद्वारेणापथ्य एवोदयो भवति, पथ्यान्नं तु भुक्तवतो मुखनासिकाऽऽविद्वारेण पथ्यः, एवं कर्मणोऽपि प्रशस्ताप्रशस्तलेश्यपरिणामबद्धस्य विपाकः शुभाशुभो भवतीति ।

अथ गणनाद्वारमाह-

पडिवज्जमाणभइया, एको व सहस्ससो व उक्कोसो ।
कोमिसहस्सपुहत्तं, जहन्न उक्कोसपडिवन्ना ॥ ८१० ॥

स्थविरकल्पस्य प्रतिपद्यमानका भाज्या विवक्षितकाले भवेयुः, तत एको द्वौ वा त्रयो वा उत्कर्षतो यावत् सहस्रपृथक्त्वं, पूर्वप्रतिपन्नाः जघन्यतोऽपि कोटिसहस्रपृथक्त्वं, नवरं जघन्यपदादुत्कृष्टपदे विशेषाधिकत्वम् । गतं गणनाद्वारम् । बृ०१ उ० । ('अभिग्गह' शब्दे प्रथमभागे ७१३ पृष्ठेऽभिग्रहा उक्ताः) एते च द्रव्याऽऽदयश्चतुर्विधा अप्यभिग्रहास्तीर्थकरैरपि यथायोगमाचीर्णत्वाद्, मोहमदापनयनप्रत्यलत्वाच्च गच्छवासिनां तथाविधसहिष्णुपुरुषविशेषापेक्षया महान्तः कर्मनिबन्धने प्रतिपत्तव्या इति ।

अथ प्रव्राजनामुण्डापनाद्वारे भावयति-

सच्चित्तदव्वियकप्पं, दुव्विहमवि आयरंति थेरा उ ।
कारणओ असहू वा, जवएसं देंति अन्नत्थ ॥ ८१७ ॥

प्रव्राजनामुण्डापनाभ्याम्, उपलक्षणत्वात् षड्विधोऽपि सचित्तद्रव्यकल्पो गृहीतः। तद्यथा-प्रव्राजना, मुण्डापना, शिक्षापना, उपस्थापना, संभुञ्जना, संवासना चेति। तमेवंविधं षड्विधमपि सचित्तद्रव्यकल्पमाचरन्ति स्थविरा गच्छवासिनः(कारणओ त्ति) तथाविधैरनाद्यैतऽऽदिभिः कारणैः, असहिष्णवो वा स्वयं वस्त्रपात्राऽऽदिनिर्ज्ञानाऽऽदिभिश्च शिष्याणां संग्रहोपग्रहौ कर्तुमसमर्थाः उपदेशमन्यत्र गच्छान्तरे, ददति प्रयच्छन्ति-अमुकत्र गच्छे संविग्नगीतार्था आचार्याः सन्ति तेषां समीपे नवता दीक्षा प्रतिपत्तव्येति। अथ मनसाऽऽपन्ने नास्ति प्रायश्चित्तम।

इदं व्याख्यानयति-

जीवो पमायबहुलो, पडिवक्खे दुक्करं ठवेउं जे ।
कित्तियमेत्तं वोच्छिति, पच्चित्तं दुग्गतारिणी व? ॥८१८॥

अयं जीवः प्रमादबहुलोऽनादिभवाभ्यस्तप्रमादभावनाजनितः, ततः प्रतिपक्षेऽप्रमादे स्थापयितुं दुष्करं भवति, दुःखेनाप्रमादभावनायां स्थाप्यते इत्यर्थः । "जे" इति पादपूरणे। अतो दुर्गत ऋणिक इव अतिप्रचुत ऋणं अतिचपलचित्तसंज्ञापराधवशादयं प्रमादबहुलो जीव उपदेशमापद्यमानं कियन्मात्रं प्रायश्चित्तं वक्ष्यति वोढुं शक्नोतीति मनसाऽऽपन्नेऽप्यपराधे नास्ति तपःप्रायश्चित्तं स्थविरकल्पिकानाम्, आलोचनाप्रतिक्रमणप्रायश्चित्तं तु तत्रापि भवत इति मन्तव्यम्। अथ "कारणे पडिकम्ममि य ति (७९६)" पदं व्याख्यायते-कारणमशिवावमौदर्याऽऽदि, तत्रोत्पन्ने द्वितीयपदमप्यासेवन्ते। तथा निष्कारणे निष्प्रतिकर्मशरीराः, कारणे तु ग्लानमाचार्यवादिनं धर्मकथिकं च प्रतीत्य पादधावनमुखमार्जनशरीरसंबाधनाऽऽदिकरणात् सप्रतिकर्माण इति । "भत्तं पंथो य भयणाए त्ति (७९६)" भक्तं पन्थाश्च भजनया। किमुक्तं भवति?-उत्सर्गतस्तावत्तृतीयपौरुष्यां भिक्षाटनं विहारं कुर्वन्ति । अपवादतस्तु तदानीं भिक्षाया अलाभे काले वा पूर्यमाणे शेषास्वपि पौरुषीष्विति । गतं स्थितिद्वारम् ।

अथोपसंहरन्नाह-

गच्छम्मि य एस विही, नायव्वो होइ आणुपुव्वीए ।
जं एत्थं णाणत्तं, तमहं वोच्छं समासेणं ॥ ८१९ ॥

गच्छे गच्छवासिनामेषोऽनन्तरोक्तो विधिर्ज्ञातव्य आनुपूर्व्या परिपाट्या, यदत्र नानात्वं विशेषस्तदहं वक्ष्ये समासेन ।

एतदेव सविशेषमाह-

सामायारी पुणरवि, तेसि इमा होइ गच्छवासीणं ।
पमिलेहो व जिणाणं, जं जुज्जइ वा तगं वोच्छं ।७३०।

सामाचारी पुनरपि तेषां गच्छवासिनां मासकल्पेन विहरतामेषा वक्ष्यमाणा भवति, जिनानां जिनकल्पिनामस्या एव सामाचार्याः प्रतिषेधो वा वक्तव्यः । वक्ष्या-प्रत्युपेक्षणाऽऽदिकं तेषामपि युज्यते तत् किमपि वक्ष्ये ।

प्रतिज्ञातमेव निर्वाहयति-

पमिलेहण निक्खमणे, पाहुमिया भिक्खकप्पकरणे य ।
गच्छ सतिए अ कप्पे, अंचिल भरिए अ ऊसित्ते ।७३१।
परिहरणा अणुजाणे, पर कम्मे खलु तहेव गेलन्ने ।
गच्छुपमिबंधऽहाइं-दि उवरि दोसा य अववादो।७३२॥

प्रथमतः प्रत्युपेक्षणा वक्तव्या, ततो निष्क्रमणम्-कतिवारा वपाश्रयाद् निर्गन्तव्यमिति। प्राभृतिका सूक्ष्मबादरभेदाद् द्विविधा, भिक्षा गोचरचर्या, कल्पकरणं च भाजनस्य धावनविधिलक्षणमित्येतानि वक्तव्यानि । (गच्छ सइए त्ति) शतिकाः शतसंख्यपुरुषपरिमाणा ये गच्छास्तेषु प्रभूतेन पात्रकेण प्रयोजनं भवेत्। तच्च (कप्पे अंचिल त्ति) कल्प्यं कल्पनीयम्, अम्लं च सौवीरं ग्रहीतव्यम्, अनेन संबन्धेन सौवीरिणीसप्तकमभिधानीयम्। (भरिए त्ति) तस्याः सौवीरिण्याः सप्तविधं भरणं वाच्यम् । (ऊसित्त त्ति) उत्सेचनमुत्सिक्तं, सौवीरस्योत्सिञ्चनमित्यर्थः, तत्स्वरूपं च निरूपणीयम् । (परिहरण त्ति) नोदकः प्रश्नयिष्यति-यदि साम्प्रतं केष्वपि गच्छेष्वित्थमाधाकर्माऽऽद्यो दोषा उद्भवन्ति, तत् पूर्वं सहस्रेषु गच्छेषु साधवः कथमाधाकर्माऽऽदीनां परिहरणं कृतवन्त इति ? । अत्राऽऽचार्यः प्रतिवक्ष्यति। अनुयानं रथयात्रा, उपलक्षणत्वात् स्नात्राऽऽदेरपि परिग्रहः । ततो यथा संप्रति रथयात्राऽऽदौ समवसरणे सहस्रसंख्याका अपि साधवो मिलिताः सन्तश्चाधाकर्माऽऽदिकं परिहरन्ति, तथा पूर्वमपि परिहृतवन्त इत्यनेन संबन्धेनानुयानविषयो विधिर्वक्तव्यः । ततः परं कर्मस्वरूपं निरूपयितव्यम्, खलुर्वाक्यालङ्कारे । तथैव ग्लानविधिः प्रतिपादनीयः । गच्छप्रतिबद्धानां यथाचन्दिकानां सामाचारी दर्शनीया । तत उपरि मासकल्पादूर्द्धं लिप्सतां स्थविरकल्पिकानां दोषा अभिधातव्याः । ततोऽपवादो द्वितीयपदमुपदर्शनीयमिति द्वारगाथाद्वयसमासार्थः । बृ० १ उ० । (प्रत्युपेक्षणा ' पमिलेहणा ' शब्दे वक्ष्यते)

अथ निष्क्रमणद्वारमाह-

निरवेक्खो तइयाए, गच्छे निक्कारणम्मि तह चेव ।
बहुविक्खेव दसविहे, सावेक्खे निग्गमो भइओ ॥ ७३३ ॥

निरपेक्षो जिनकल्पिकः प्रतिमाप्रतिपन्नकाऽऽदिगच्छसत्कापेक्षारहितः, स तृतीयस्यामेव पौरुष्यामुपाश्रयाद् निर्गच्छति, गच्छे गच्छवासिनोऽपि साधवो निष्कारणे तथैव निर्गच्छन्ति, तृतीयस्यां पौरुष्यामित्यर्थः । परं गच्छे यदाऽऽचार्योपाध्यायाऽऽदिविषयभेदाद् दशविधं वैयावृत्यं, तेन यो बहुविधो व्याक्षेपः, तेन सापेक्षे गच्छवासिनि निर्गमो भजनीयः, कदाचित्तृतीयस्यां, कदाचित्प्रथमद्वितीयचतुर्थीषु वा पौरुषीष्विति।

अथैनामेव निर्युक्तिगाथां व्याख्यानयति—

गहिए भिक्खं जोत्तुं, सोहिय आवस्स आलयमुवेइ ।
जहिं णिग्गतो तहिं चिय, एमेव य खित्तसंकमणे ॥७३४॥

निरपेक्षो भगवान् तृतीयपौरुष्यामुपाश्रयान्निर्गत्य भिक्षामटित्वा गृहीते सति भैक्ष्ये अनापाते असंलोके च स्थाने भुक्त्वा आवश्यकं च संज्ञाकायिकीलक्षणं शोधयित्वा, यस्यामेव पौरुष्यां निर्गतस्तस्यामेव भूय आलयमुपाश्रयमुपैति, तृतीयस्यामित्यर्थः । एवमेव च क्षेत्रसंक्रमणेऽपि द्रष्टव्यम्, क्षेत्रात् क्षेत्रान्तरगमनमपि तृतीयस्यां करोतीति भावः । स्थविरकल्पिका अपि निष्कारणे तृतीयस्यामेव भिक्षामटित्वा प्रतिश्रयमनुद्दिश्य संज्ञाभूमिं गत्वा तस्यामेव प्रत्यागच्छन्ति, क्षेत्रसंक्रमणमप्येवमेव, कारणतस्तु न कोऽपि प्रतिनियमः।

तथा चाह-

अतरंतबालवुड्ढे, तवस्सिआएसमाइकज्जेसु ।
बहुसो वि होज्ज विसणं, कुज्जाइकज्जेसु य विभासा ।७३५।
उच्चारविहारादी, संभमजयचेइवंदणाऽऽईया ।
आयपरोभयहेउं, विणिग्गमा वण्णिया गच्छे ॥ ७३६ ॥

अतरन्तो ग्लानस्तस्य, तथा बालवृद्धयोः, तपस्विनः क्षपकस्य, आदेशस्य प्राघूर्णकस्य, आदिशब्दादाचार्योपाध्यायौषधाऽऽदिग्रहणकृपाणि, तेषु बहुशोऽपि बहूनपि वारान् गृहपतिगृहेषु प्रवेशनं गच्छसाधूनां भवति। तथा कुलं नागेन्द्रचान्द्राऽऽदि,आदिशब्दाद् गणः कुलसमुदायो, गणसमुदायः सङ्घः, चतुर्वर्णरूपो वा, तत्कार्येषु च विभाषा कर्त्तव्या । सा चैषां कुले गणे सङ्घे वा आभाव्याऽनाभाव्यविषयः कोऽपि व्यवहारः समुपस्थितस्य यथावत्परिच्छेदनं कर्त्तव्यम्, प्रत्यनीको वा कोऽपि साधूनामुपस्थितस्तस्य शिक्षणं विधेयम्, चैत्यकृत्यं वा कश्चिन्निःशङ्कं मुष्णाति स शासितव्यो वर्त्तत इत्यादि । तथा-उच्चारः पुरीषं, तस्योपलक्षणत्वात्प्रस्रवणाऽऽदेर्व्युत्सर्जनार्थं बहिर्गन्तव्यम्, विहारो नामवसतावस्वाध्यायिके समुत्पन्ने सति स्वाध्यायनिमित्तमन्यत्र गमनम्, आदिग्रहणात् पूर्वगृहीतपीठफलकप्रत्यर्पणप्रभृतिपरिग्रहः। संभ्रमो नाम-उदकाऽग्निहस्त्याद्यागमनसमुत्थ आकस्मिकः संत्रासः । भयं तु सामान्येन समुत्थं क्षुद्रस्तेनाऽऽक्षुपरचक्रप्रभवम्, चैत्यानि जिनबिम्बानि, तेषां वन्दनम्। आदिशब्दादपूर्वबहुश्रुताऽऽचार्यवन्दनाऽऽदिपरिग्रहः । एवमादीनि यान्यात्मनः परेषामुभयस्य वा हेतोः कार्याणि तन्निमित्तं बहुशोऽपि प्रतिमाऽऽश्रयाद्विनिर्गमा वर्णिताः प्रतिपादिता इति । गतं निष्क्रमणद्वारम्। (प्राभृतिका 'वसहि' शब्दे वक्ष्यते) (भिक्षा 'गोयरचरिया' शब्दे तृतीयभागे ६६७ पृष्ठे द्रष्टव्या) (कल्पकरणं ' लेव ' शब्दे वक्ष्यते) (ग्लानाऽऽदिद्वाराणि-ग्लानाऽऽदिशब्देषु द्रष्टव्यानि)

एत्तो उ थेरकप्पं, समासओ मे निसामेहि ।
तिविहम्मि संजमम्मि उ, बोधव्वो होति थेरकप्पो तु ॥
सामाइयछेदपरिहा-रिए य तिविहम्मि एअम्मि ।
ठिए अट्ठिए व कप्पे, सामाइयसंजमो मुणेयव्वो ॥
छेदपरिहारिया पुण, णियमाओ हवंति ठितकप्पे ।
एतेसु थेरकप्पो, जह जिणकप्पीण अग्गहो दोसु ॥
गहणं चऽभिग्गहाणं, पंचहि दोहिं च ण तह इत्तं ।

बाले वुड्ढे सेहे–ऽगीतत्थे णाणदंसणप्पेही ॥
दुब्बलसंघयणम्मि य, गच्छे य इहेसणा ऋणिता।
जहसंभवं तु सेसा, खेत्ताऽऽदि विन्नासियव्व दारा तु ॥
उवरिं तु मासकप्पे, वित्थरिओं विन्नासते तेसिं। पं०भा०।

"इयाणिं थेरकप्पो। तत्थ,गाहा-(तिविहम्मि संजमम्मि)थेरकप्पो। सो तिविहो-सामाइओ,छेओवट्ठावणिओ,परिहारविसुद्धिओ त्ति। सामाइओ त्रियकप्पे,अट्ठियकप्पे वा। छेओवट्ठावणिओ,परिहारविसुद्धिओ त्रिवकप्पे चेव। तत्थ सामाइयसंजमो-त्रियकप्पे वा, अठियकप्पे वा। बिइओ नाम-छेओवट्ठावणिओ,सो त्रियकप्पे नियमा। तइओ परिहारविसुद्धिओ,सो नियमा ठियकप्पे। परिहारविसुद्धिओ तप्पढमयाए जिणपायमूले पडिवज्जति, जहा मासकप्पे, नवरि उदीरणमेत्तं, गणप्पमाणेणं जहण्णेणं तिन्नि गणा, उक्कोसेण सयग्गसो पुरिसप्पमाणेण जहन्नेण सत्तावीसं, उक्कोसेण सयपुहुत्तं। छट्ठे उद्देसे तेसिं सुत्तं विभासिज्जइ। ते दुविहा-जिणकप्पिया, थेरकप्पिया य। जिणकप्पिया आयकहिया, थेरकप्पिया अहारसमासे अत्थिकरण कयाइ जिणकप्पं पडिवज्जंति, कयाइ तमेव कप्पं अवसंपज्जित्ता णं विहरंति, अहवा पुणो वि तमेव गच्छं एंति। सेसं जहा मासकप्पे,पुव्वपडिवन्नए पडुच्च जइ अत्थि जहण्णेण सयपुहुत्तं, उक्कोसेण सहस्सग्गसो। अहालंदिया वि एमेव, नवरि दुविहा-गच्छपडिबद्धा य, गच्छनिग्गया य, जहा मासकप्पे। जे अपडिबद्धा ते दुविहा-जिणकप्पिया य, थेरकप्पिया य। जिणकप्पिया किंचि पडिक्कमं न करेंति। थेरकप्पिया गच्छमाणं ति नियमा पडिग्गहधारी। तत्थ वि गिलाणस्स पडिक्कमं थेरकप्पिया फासुएण पडोयारेण अहालंदियस्स करेंति। सेसं जहा मासकप्पे। नवरं गणप्पमाणेण जहण्णेण तओ गणा, उक्कोसेण सयग्गसो। एवं पडिवज्जमाणयं पुरिसप्पमाणे जहण्णेणं पणरस, उक्कोसेण सयग्गसो। पुव्वपडिवन्नए पडुच्च जहण्णेण सयग्गसो, उक्कोसेण सहस्सपुहुत्तं। सेसा जहा जिणकप्पियाण तिन्नि, एत्थ थेरकप्पिया ते नेयव्वा जहा कप्पे, अज्जाण मासकप्पो व्व नेयव्वो, जहा कप्पो सिज्झइ।" जिनकल्पाऽऽद्या द्रव्यक्षेत्रकालभावाभिग्रहेषु अभिगृह्य तैषणाया आहाराऽऽदि गृह्णन्ति, स्थविरकल्पिकाः किमर्थं प्रकीर्णैषणाया आहाराऽऽदि गृह्णन्ति, प्रकीर्णा अनभिगृहीतैषणा इत्यर्थः। आचार्य आह-"बालवृद्धथेराणं वाहा वुड्ढा य कारणे पव्वाविया, ते जइ अभिग्गहिया एसणाए गेण्हंति। अभिग्गहिए एसणाए य चत्तावेज्जा सरिसो लाभो, सेहाईणं च अभावियाणं दुब्बलसंघयणाणं नाणदरिसणाऽऽइसु य पडिबद्धाणं दिवसं हिंडंताणं चेव लग्गिस्सति। पच्छा संघयणदुब्बलत्तणेण, अभावित्तणेण य संजमं छड्डेति, पासत्थाईहिं परतित्थएहिं वा गमिस्सति, पच्छा तित्थवोच्छेओ भविस्सइ। गच्छो य महिड्ढिओ। ते बालवुड्ढाओ लोयणयणावरभूआ, जिणकप्पियाओ णं च गच्छाओ चेव पसूतिः, प्रवृत्तिरित्यर्थः। जम्हा गच्छेऽपि किं एहाए विसुद्धाए हिंडमाणा उग्गमाइसुद्धं आहाराइ गेण्हंता, भुंजंता य जहण्णेण अट्ठ पवयणमायाओ, उक्कोसेण चोद्दस पुव्वाणि अहिज्जंति, अव्वोच्छित्तिकरा य हुंति, ओहिमणपज्जवकेवलाणं च उप्पाएंति, सोहम्माइकप्पोववएसु जाव सव्वट्ठसिद्धे वि उववज्जंति। एवप्प कारणेण गच्छे पडिबद्धेसणा जहासंभवं।

थिरकप्पियाणं खित्तकाला जहा मासकप्पे, पव्वावणाइ य जहा मासकप्पे।" पं० चू०।

अहुणा उ थेरकप्पे, वोच्छामि विहिं समासेणं ॥
गहणे चउव्विहम्मि वि, तीए गहणं तु परमजत्तेणं।
जं पाणवीयरहियं, हवेज्ज तरमाणए सोही ॥
गहणं चउव्विहं ती, वत्थं पातं च सेज्ज आहारो।
एतेसिं असतीए, गहणं पढमं तु बीयस्स ॥
बितियं पातं भण्णति, किं कारणं तस्स गहणं पढमं तु।
तेण विणा वोहिपभिमा, गिहिन्नायणजोगे हाणी य ॥
अहवा चउव्विहं तु, असणादी तत्थ भोज्जगहणं तु।
तत्थ तु बितियं पाणं, तस्स तु गहणं पढमताए ॥
असतीए फासुयस्सा, तस्सद्धिए कंदबीयसद्धिए वा।
किं कारण तेण विणा, आसुं पाणक्खतो होज्जा ॥
तरमाणे गिण्हति सु-द्धं अतरो पेल्लेज्ज तह संथारे।
संथरतो गेण्हंतो, पावति सट्ठाणपच्छित्तं ॥
सत्त दुए दसए वा, अणेगठाणेण वा भवग्गहणं।
एत्तो तिगातिरित्तं, उग्गमउप्पायणेसणासुद्धं ॥
जइयं ति कप्पति त्ती, तस्स-ऽसतीए असुद्धं पि।
एसो तु थेरकप्पो,..... ॥ पं० भा०।

इयाणिं थेरकप्पो गाहा-(गहणे चउव्विहे ति) चउव्विहे-वत्थं,पायं,आहारो,सेज्जा। चउण्हं वि असइ पढमया य घेप्पइ। किं कारणं?-तेण विणा पभिमाइहाणी चेव। अहवा-असणाइ पढमं, तत्थ बितियं पायग्गहणं परमपयत्तेण नयमाणो पढमं संथरमाणो तसपाणबीयरहिया कंदमूलरहिए गेण्हइ,अतरंतो पुण तसपाणसहिए वा,बीयकंदमूलसहिए वा गेण्हइ। किं कारणं? तेण विणा आसु पाणक्खओ होज्जा। तरमाणो सुद्धं गेण्हेज्जा। अतरंतो पेल्लेज्जा। गाहा-(सत्त दुए त्ति) पिंडेसणपाणेसणाओ। (दसए त्ति) दस एसणादोसा। (अणेगठाणे त्ति) उग्गमाइ पनरस सोलस। एत्तो तिगादिरित्तं नाम-उग्गमउप्पायणएसणासुद्धं। तव्विवरीयं जं एतेहिं चेव उग्गमाईहिं असुद्धं, तं गेण्हेज्जा गच्छसंरक्खणहेउं गच्छवासीहिं। भइयं नाम कारणे कप्पइ, इयरहा न कप्पइ। एस थेरकप्पो। पं० चू०। (स्थविरकल्पिनामुपधिः 'उवहि' शब्दे द्वितीयभागे १०६१ पृष्ठे उक्तः) (स्थविरकल्पो जिनकल्पश्च द्वात्रिंशद्वितीति 'मच्छ' शब्दे तृतीयभागे ८०४ पृष्ठे उक्तम्)

थविरकप्पट्ठिइ–स्थविरकल्पस्थिति–स्त्री० स्थविरा आचार्याऽऽदयो गच्छप्रतिबद्धास्तेषां कल्पस्थितिः स्थविरकल्पस्थितिः। बृ० ४ उ०। कल्पस्थितिभेदे, बृ० ५ उ०। स्था०। पं० चू०। पं० भा०।

संप्रति स्थविरकल्पस्थितिमाह-

संजमकरणुज्जोया, णिप्फातग णाणदंसणचरित्तं।
दीहाउ वुड्ढवासे, वसहीदोसेहि य विमुक्का ॥ ४०७ ॥

संयमः पञ्चाऽऽश्रवविरमणाऽऽदिरूपः, पृथिव्यादिरक्षारूपो वा सदृशविधः, तं कुर्वन्ति यथा तत्पालयन्तीति संयमकरणाः। न-

न्यादिदर्शनात् कर्तर्यनट्प्रत्ययः । उद्द्योतकाः-तपसा प्रवचनस्योज्ज्वालकाः। ततः संयमकरणाश्च ते उद्द्योतकाश्चेति विशेषणसमासः । यद्वा-पूर्वपौरुषीकरणेन संयमकरणमुद्द्योतयन्तीति संयमकरणोद्द्योतकाः । तथा-ज्ञानदर्शनचारित्रेषु शिष्याणां निष्पादकाः, तेषां चाङ्गानाऽऽदीनामव्यवस्थितिकारका भवन्तीति शेषः, यदा च ते दीर्घाऽऽयुषो जङ्घाबलपरिक्षीणाश्च भवन्ति, तदा वृद्धाऽऽवासमध्यासते, तत्रैव क्षेत्रे वसन्तोऽपि वसतिदोषैः काद्यातिक्रान्ताऽऽदिभिः, अशब्दादाहारोपधिदोषैश्च वियुक्ता वर्जिता भवन्ति, न तैर्लिप्यन्त इत्यर्थः ॥ ४०७ ॥

मोत्तुं जिणकप्पठिइं, जा मेरा एस वन्निया हेट्ठा ।
एसा उ ठवणजुत्ता, होति ठिती थेरकप्पस्स ॥४०८॥

जिनकल्पस्थितिग्रहणेन, उपलक्षणत्वात् सर्वेषामपि गच्छनिर्गतानां स्थितिः परिगृह्यते । ततस्तां मुक्त्वा,या अधस्तादस्मिन्नेवाध्ययने मर्यादा स्थितिरेषा अनन्तरमेव वर्णिता । यद्वा-सामायिकाध्ययनमादौ कृत्वा यावदस्मिन्नेवाध्ययने इदं षड्विधकल्पस्थितिसूत्रमन्तरे गच्छनिर्गतसामाचारीं मुक्त्वा या शेषा सामाचारी वर्णिता सा द्विपदयुक्ता उत्सर्गापवादपदद्वययुक्ता स्थविरकल्पसंस्थितिर्भवति ॥ ४०८ ॥ बृ० ६ उ० ।

थविरकप्पिय–स्थविरकल्पिक–पुं० । स्थविरकल्पमाश्रिते, प्रव० ७० द्वार । बृ० ।

थविरभूमि–स्थविरभूमि–स्त्री० । स्थविरो वृद्धस्तस्य भूमयः स्थविरभूमयः । वृद्धपदवीषु, स्था० ३ ठा० २ उ० ।

स्थविरभूमयः-

तओ थेरभूमीओ पन्नत्ताओ । तं जहा-जातिथेरे, सुयथेरे, परियायथेरे य । सट्ठिवरिसजाए जातिथेरे, ठाणसमवायधरे सुयथेरे, वीसवासपरियाए परियायथेरे ॥

अस्य सूत्रस्य संबन्धमाह-

थेराणमंतिए वासो, सो य थेरो इमो तिहा ।
भूमि त्ति य ठाणं ति य, एगट्ठा होंति कालो य ॥

अनन्तरसूत्रे अन्तेवासिन उक्ताः। अन्तिके निवासः स्थविराणाम, स च स्थविरोऽत्र वक्ष्यमाणस्त्रिधेत्यनेन क्रमेण सूत्रमिदं समापतितमित्येष सूत्रसंबन्धः । संप्रत्यस्य व्याख्या-तिस्रः स्थविराणां भूमयः प्रज्ञप्ताः-भूमिरिति स्थानमिति अवस्थारूपः काल इति त्रयोऽपि शब्दा एकार्थाः । " थेरभूमि त्ति वा, थेरठाणं ति वा, थेरकालो त्ति वा एगट्ठमिति । "

तिविहम्मि य थेरम्मी, परूवणा जा जहिं सए ठाणे ।
अणुकंप सुए पूआ, परियाए वंदणाऽऽदीणि ॥

त्रिविधस्थविरे त्रिविधस्थविरविषये या यत्र स्वके स्थाने प्ररूपणा सा सूत्रतः कर्तव्या । तद्यथा-षष्टिवर्षजातो जातिस्थविरः, स्थानसमवायधरः श्रुतस्थविरः, विंशतिवर्षपर्यायः पर्यायस्थविरः । तथा जातिस्थविरस्यानुकम्पा कर्तव्या, श्रुते श्रुतस्थविरस्य पूजा, पर्याये पर्यायस्थविरस्य वन्दनाऽऽदीनि ।

संप्रत्येतान्येव त्रीणि कर्तव्यानि विस्तरेणाऽऽह-

आहारोवहिसेज्जा-संथारे खेत्तसंकमे ।
कितिवंदणुवत्तीहिं, अणुवत्तंति थेरगं ॥
दुठाणाऽऽसणदाणाऽऽदी, जोग्गाऽऽहारप्पसंसणा ।
नीयसेज्जाए निद्देस–वत्तित्तं पूयए सुयं ॥
उट्ठाणं वंदणं चेव, गहणं दंडगस्स य ।
परियायथेरगस्स, करेंति अगुरोरवि ॥

जातिस्थविरस्य कालस्वभावानुमत आहारो दातव्यः, उपधिर्यावता संस्तरति तावत्प्रमाणः, शय्या वसतिः, सा ऋतुक्रमा दातव्या, संस्तारको मृदुकः । क्षेत्रसंक्रमे क्षेत्रान्तरं संक्रामयितव्ये तस्योपधिमन्ये वहन्ति, पानीयेन वाऽनुकम्पना । उक्ता जातिस्थविरस्याऽनुकम्पा । श्रुतस्थविरस्य पूजामाह-(कितिइत्यादि)कृतिकर्म वन्दो ऽनुवृत्तिरत्यां स्थविरं श्रुतस्थविरमनुवर्तयन्ति । किमुक्तं भवति?-श्रुतस्थविरस्य कृतिकर्म वन्दनकं दातव्यम, वन्दतश्च तस्याऽनुवर्तनीयम् । तथा-(उट्ठाण त्ति) आगतस्याऽभ्युत्थानं कर्तव्यम्, आसनप्रदानम् । आदिशब्दात् पादप्रमार्जनाऽऽदिपरिग्रहः । तथा योग्याऽऽहारोपनयनम्, समक्षपरोक्षत्वाभ्यां प्रशंसना गुणकीर्तनम् । तथा-तत्समक्षं नीचशय्यायामवस्थातव्यं, निर्देशवर्तित्वम,एवं श्रुतं श्रुतस्थविरं पूजयेत् । तथा-पर्यायस्थविरस्याऽगुरोरप्यप्रव्राजकस्याप्यवाचनाऽऽचार्यस्याऽभ्युत्थानगच्छत इत्यादि कुर्वन्ति, वन्दनकं,वक्ष्यमाणतो दण्डकस्य च ग्रहणमिति सूत्रम । व्य० १० उ० ।

थविरभूमिपत्त–स्थविरभूमिप्राप्त–त्रि० । आचार्यपदप्राप्ते, व्य० १ उ० । सूत्रार्थतदुभयोपेते, बृ० १ उ० ।

थविरय–स्थविरक–पुं० । जीर्णे, आचा० १ श्रु० १ अ० २ उ० । सूत्र० । शतातीते वृद्धे, "पिया ते थेरओ तात!, ससा ते खुड्डिया इमा।" (३) सूत्र० १ श्रु० ३ अ० २ उ० ।

थविरवेयावच्च–स्थविरवैयावृत्य–न० । स्थविराणां भक्तपानाऽऽदिनिरुपद्रवम्, औ० । (स्थविरवैयावृत्यं 'थविरभूमि' शब्देऽनुपदमेव संक्षेपतः प्रोक्तम)

थविरावली–स्थविराऽऽवली–स्त्री० । ऐदंयुगीनसाधूनामुपकारार्थं प्रवचनेतृणामाचलिकायाम, नं० ।

सा च सुधर्मस्वामिनः प्रवृत्ता-

सुहम्मं अग्गिवेसाणं, जंबूनामं च कासवं ।
पभवं कच्चायणं वंदे, वच्छं सिज्जंभवं तहा ॥ २५ ॥
जसभद्दं तुंगियं वंदे, भूयं चेव य माढरं ।
भद्दबाहुं च पाइन्नं, थूलभद्दं च गोयमं ॥ २६ ॥
एलावच्चसगोत्तं, वंदामि महागिरिं सुहत्थिं च ।
तत्तो कोसियगुत्तं, बहुलस्स सरिव्वयं * वंदे ॥ २७ ॥
हारियगुत्तं साइं, वंदामो हारियं च सामज्जं ।
वंदे कोसियगुत्तं, संडिल्लं अज्जजीयधरं ॥ २८ ॥
तिसमुद्दखायकित्तिं, दीवसमुद्देसु गहियपेयालं ।
वंदे अज्जसमुद्दं, अक्खुभियसमुद्दगंभीरं ॥ २९ ॥
भणगं करगं झरगं, पभावगं णाणदंसणगुणाणं ।
वंदामि अज्जमंगुं, सुयसागरपारगं धीरं ॥ ३० ॥
वंदामि अज्जधम्मं, तत्तो वंदे य भद्दगुत्तं च ।
तत्तो य अज्जवइरं, तवनियमगुणेहिं वइरसमं ॥ ३१ ॥
वंदामि अज्जरक्खिय–खमणे रक्खियचरित्तसव्वस्सो ।

* " सरिव्वयं" सदृशव्रतम् ।

रयणकरंडगभूआ, अणुओगो रक्खिआ जेहिं ॥३३॥
नाणम्मि दंसणम्मि य, तवविणयणिच्चकालमुज्जुत्तं ।
अज्जयनंदिलखमणं, सिरसा वंदे पसंतमणं ॥ ३३ ॥
वड्ढउ वायगवंसो, जसवंसो अज्जनागहत्थीणं ।
वागरणकरणभंगिय-कम्मप्पयडीपहाणाणं ॥ ३४ ॥
जच्चंजणधाउसम-प्पहाणमुद्दियगवल्लयनिहाणं ।
वड्ढउ वायगवंसो, रेवइनक्खत्तनामाणं ॥ ३५ ॥
अयलपुरा णिक्खंते, कालियसुयआणुओगिए धीरे ।
बंभद्दीवगसीहे, वायगपयमुत्तमं पत्ते ॥ ३६ ॥
जेसु इमो अणुओगो, पयरइ अज्जावि अड्ढभरहम्मि ।
बहुनयरनिग्गयजसे, तं वंदे खंदिलायरिए ॥ ३७ ॥
तत्तो हिमवंतमहं-तविक्कमे धिइपरक्कममहंते ।
सज्झायमणंतधरे, हिमवंते वंदिमो सिरसा ॥ ३८ ॥
कालियसुयआणुओ-गधारए धारए य पुव्वाणं ।
हिमवंतखमासमणे, वंदे णागज्जुणायरिए ॥ ३९ ॥
मिउमद्दवसंपन्ने, आणुपुव्वि वायगत्तणं पत्ते ।
ओहसुयसमायारे, नागज्जुणवायए वंदे ॥ ४० ॥
गोविंदाणं पि नमो, अणुओगे विउलधारणिंदाणं ।
निच्चं खंतिदयाणं, परूवणे दुल्लभे दाणं ॥४१॥
तत्तो य भूयदिन्नं, निच्चं तवसंजमे अनिच्चित्तं ।
पंडियजणसामन्नं, वंदामी संजमविहिन्नू ॥ ४२ ॥
वरकणगतविय चंपग-विमलवरकमलगब्भसरिवन्ने ।
भवियजणहिययदइए, दयागुणविसारए धीरे ॥ ४३ ॥
अड्ढभरद्दप्पहाणे, बहुविहसज्झायसुमुणियपहाणे ।
अणुओगियवरवसभे, नाइलकुलवंसनंदिकरे ॥ ४४ ॥
भूयहियकरपगब्भे, वंदेऽहं भूयदिन्नमायरिए ।
भवभयवुच्छेयकरे, सीसे नागज्जुणरिसीणं ॥ ४५ ॥
सुमुणियनिच्चानिच्चं, सुमुणियसुत्तत्थधारयं निच्चं ।
वंदेऽहं लोहिच्चं, सब्भावुब्भावणातच्चं ॥ ४६ ॥
अत्थमहत्थक्खाणिं, सुसमणवक्खाणकहणनिव्वाणिं ।
पयईए महुरवाणिं, पयओ पणमामि दूसगणिं ॥ ४७ ॥
तवनियमसच्चसंजम-विणयज्जवखंतिमद्दवरयाणं ।
सीलगुणग्गहियाणं, अणुओगजुगप्पहाणाणं ॥ ४८ ॥
सुकुमालकोमलतले, तेसिं पणमामि लक्खणपसत्थे ।
पाए पावयणीणं, पभिच्चगसएहिं पणिवइए ॥ ४९ ॥
जे अन्ने भगवंते, कालियसुयआणुओगिए धीरे ।
ते पणिऊणं सिरसा, नाणस्स परूवणं वोच्छं ॥ ५० ॥

इह स्थविरावलिका सुधर्मस्वामिनः प्रवृत्ता, शेषगणधराणां सन्तानप्रवृत्तेरभावात् । नं० ।

तदाह-

अवसेसा गणहरा निरवच्चा वुच्छिन्ना ४ । समणे भगवं महावीरे कासवगुत्ते । समणस्स णं भगवओ महावीरस्स कासवगुत्तस्स अज्जसुहम्मे थेरे अंतेवासी अग्गिवेसायणगोत्ते । थेरस्स णं अज्जसुहम्मस्स अग्गिवेसायणसगोत्तस्स अज्जजंबूनामे णं थेरे अंतेवासी कासवगुत्ते । थेरस्स णं अज्जजंबूनामस्स कासवगोत्तस्स अज्जप्पभवे थेरे अंतेवासी कच्चायणसगोत्ते । थेरस्स णं अज्जप्पभवस्स कच्चायणसगोत्तस्स अज्जसिज्जंभवे थेरे अंतेवासी मणगपिया वच्छसगोत्ते । थेरस्स णं अज्जसिज्जंभवस्स मणगपिउणो वच्छसगोत्तस्स अज्जजसभद्दे थेरे अंतेवासी तुंगियायणसगोत्ते ५ । संखित्तवायणाए अज्जजसज्जहाओ अग्गाओ एवं थेरावली भणिया । तं जहा-थेरस्स णं अज्जजसभद्दस्स तुंगियायणसगोत्तस्स अंतेवासी दुवे थेरा-थेरे अज्जसंभूइविजए माढरसगुत्ते, थेरे अज्जभद्दबाहू पाईणसगुत्ते । थेरस्स णं अज्जसंभूइविजयस्स माढरसगुत्तस्स अंतेवासी थेरे अज्जथूलभद्दे गोयमसगोत्ते । थेरस्स णं अज्जथूलभद्दस्स गोयमसगोत्तस्स अंतेवासी दुवे थेरा-थेरे अज्जमहागिरी एलावच्चसगोत्ते, थेरे अज्जसुहत्थी वासिट्ठसगोत्ते । थेरस्स णं अज्जसुहत्थिस्स वासिट्ठसगुत्तस्स अंतेवासी दुवे थेरा-सुट्ठियसुप्पडिबुद्धा, कोडियकाकंदगा वग्घावच्चसगोत्ता । थेराणं सुट्ठियसुप्पडिबुद्धाणं कोडियकाकंदगाणं वग्घावच्चसगुत्ताणं अंतेवासी थेरे अज्जइंददिन्ने कोसियगुत्ते । थेरस्स णं अज्जइंददिन्नस्स कोसियगुत्तस्स अंतेवासी थेरे अज्जदिन्ने गोयमसगुत्ते । थेरस्स णं अज्जदिन्नस्स गोयमसगोत्तस्स अंतेवासी थेरे अज्जसीहगिरी जाईसरे कोसियसगोत्ते । थेरस्स णं अज्जसीहगिरिस्स जाईसरस्स कोसियसगुत्तस्स अंतेवासी थेरे अज्जवइरे गोयमसगोत्ते । थेरस्स णं अज्जवइरस्स गोयमसगोत्तस्स अंतेवासी थेरे अज्जवइरसेणे उक्कोसियगोत्ते । थेरस्स णं अज्जवइरसेणस्स उक्कोसियगोत्तस्स अंतेवासी चत्तारि थेरा-थेरे अज्जनाइले, थेरे अज्जपोमिले, थेरे अज्जजयंते, थेरे अज्जतावसे । थेराओ अज्जनाइलाओ अज्जनाइला साहा निग्गया । थेराओ अज्जपोमिलाओ अज्जपोमिला साहा निग्गया । थेराओ अज्जजयंताओ अज्जजयंती साहा निग्गया । थेराओ अज्जतावसाओ अज्जतावसी साहा निग्गया इति ॥ ६ ॥ वित्थरवायणाए पुण अज्जजसज्जहाओ पुरओ थेरावली एवं पलोइज्जइ । तं जहा-थेरस्स णं अज्जजसज्जहस्स तुंगियायणसगोत्तस्स इमे दो थेरा अंतेवासी अहावच्चा अभिचाया होत्था । तं जहा-थेरे अज्जभद्दबाहू पाईणसगोत्ते, थेरे अज्जसंभूइविजए माढरसगुत्ते । थेरस्स णं अज्जजहबाहुस्स पाईणसगोत्तस्स इमे

चत्तारि थेरा अंतेवासी अहावच्चा अभिन्नाया होत्था । तं जहा–थेरे गोदासे, थेरे अग्गिदत्ते,थेरे जण्णदत्ते, थेरे सोमदत्ते कासवगोत्ते णं । थेरेहिंतो गोदासेहिंतो कासवगुत्तेहिंतो इत्थ णं गोदासे गणे नामं गणे निग्गए । तस्स णं इमाओ चत्तारि साहाओ एवमाहिज्जंति । तं जहा–तामलित्तिआ, कोडिवरिसिया, पोंडवद्धणिया, दासीखव्वडिया । थेरस्स णं अज्जसंभूइविजयस्स माढरसगोत्तस्स इमे दुवालस थेरा अंतेवासी अहावच्चा अभिन्नाया होत्था । तं जहा–

" नंदणभद्दे थेरे, उवणंदे तीसभद्दे जसभद्दे ।
थेरे अ सुमणभद्दे, मणिभद्दे पुन्नभद्दे य ॥ १ ॥
थेरे अ थूलभद्दे, उज्जुमई जंबुनामधिज्जे य ।
थेरे य दीहभद्दे, थेरे तह पंडुभद्दे य ॥ २ ॥ "

थेरस्स णं अज्जसंभूइविजयस्स माढरसगुत्तस्स इमाओ सत्त अंतेवासिणीओ अहावच्चाओ अभिन्नायाओ होत्था । तं जहा–

"जक्खा य जक्खदिन्ना, भूया तह चेव भूयदिन्ना य ।
सेणा वेणा रेणा, भइणीओ थूलभद्दस्स ॥ १ ॥ "

थेरस्स णं अज्जथूलभद्दस्स गोयमसगुत्तस्स इमे दो थेरा अंतेवासी अहावच्चा अभिन्नाया होत्था । तं जहा–थेरे अज्जमहागिरी एलावच्चसगोत्ते, थेरे अज्जसुहत्थी वासिट्ठसगोत्ते । थेरस्स णं अज्जमहागिरिस्स एलावच्चसगोत्तस्स इमे अट्ठ थेरा अंतेवासी अहावच्चा अभिन्नाया होत्था । तं जहा–थेरे उत्तरे, थेरे बलिस्सहे, थेरे धणड्ढे, थेरे सिरिभद्दे, थेरे कोडिन्ने, थेरे नागे, थेरे नागमित्ते,थेरे छलुए रोहगुत्ते कोसियगुत्ते णं ॥ थेरेहिंतो णं छलुएहिंतो रोहगुत्तेहिंतो कोसियगुत्तेहिंतो तत्थ णं तेरासिया साहा णिग्गया । थेरेहिंतो णं उत्तरबलिस्सहेहिंतो तत्थ णं उत्तरबलिस्सहे नामं गणे णिग्गए । तस्स णं इमाओ चत्तारि साहाओ एवमाहिज्जंति । तं जहा–कोसंबिया, सोइत्तिया, कोडंबाणी, चंदनागरी । थेरस्स णं अज्जसुहत्थिस्स वासिट्ठसगोत्तस्स इमे दुवालस थेरा अंतेवासी अहावच्चा अभिन्नाया होत्था । तं जहा–

" थेरे अ अज्जरोहणे, भद्दजसे मेहगणिअ कामिड्ढी ।
सुट्ठिय सुप्पडिबुद्धे, रक्खिय तह रोहगुत्ते य ॥ १ ॥
इसिगुत्ते सिरिगुत्ते, गणी य बंभे गणी य तह सोमे ।
दस दो अ गणहरा खलु, एए सीसा सुहत्थिस्स ॥२॥"

थेरेहिंतो णं अज्जरोहणेहिंतो कासवगुत्तेहिंतो तत्थ णं उद्देहगणे णामं गणे निग्गए । तस्सिमाओ चत्तारि साहाओ निग्गयाओ, छच्च कुलाइं एवमाहिज्जंति । से किं तं साहाओ ? । साहाओ एवमाहिज्जंति । तं जहा–उदुंबरिज्जिया, मासपूरिया, मइपत्तिया, पुन्नपत्तिया । सेत्तं साहाओ । से किं तं कुलाइं ?। कुलाइं एवमाहिज्जंति । तं जहा–

" पढमं च नागभूयं, बीअं पुण सोमभूइअं होइ ।
अह हल्लगच्छ तइयं, चउत्थयं हत्थलिज्जं तु ॥ १ ॥
पंचमगं नंदिज्जं, छट्ठं पुण पारिहासयं होइ ।
उद्देहगणस्सेए, छच्च कुला हुंति नायव्वा ॥ २ ॥ "

थेरेहिंतो णं सिरिगुत्तेहिंतो हारियसगोत्तेहिंतो इत्थ णं चारणगणे नामं गणे णिग्गए । तस्स णं इमाओ चत्तारि साहाओ, सत्त य कुलाइं एवमाहिज्जंति । से किं तं साहाओ ?। साहाओ एवमाहिज्जंति । तं जहा–हारिअमालागारी, संकासिआ, गवेधुआ, वज्जनागरी । सेत्तं साहाओ । से किं तं कुलाइं ?। कुलाइं एवमाहिज्जंति । तं जहा–

" पढमित्थ वत्थलिज्जं, बीयं पुण पीइधम्मिअं होइ ।
तइअं पुण हालिज्जं, चउत्थयं पूसमित्तिज्जं ॥ १ ॥
पंचमगं मालिज्जं, छट्ठं पुण अज्जवेडयं होइ ।
सत्तमगं कण्हसहं, सत्त कुला चारणगणस्स ॥ २ ॥ "

थेरेहिंतो णं भद्दजसेहिंतो जारद्दायसगोत्तेहिंतो एत्थ णं लडुधाडिगणे नामं गणे णिग्गए । तस्स णं इमाओ चत्तारि साहाओ, तिन्नि कुलाइं एवमाहिज्जंति । से किं तं साहाओ ? । साहाओ एवमाहिज्जंति । तं जहा–चंपिज्जिया, भद्दिज्जिया, काकंदिआ, मेहलिज्जिया । सेत्तं साहाओ । से किं तं कुलाइं ?। कुलाइं एवमाहिज्जंति । तं जहा–

" भद्दजसिअ तह भद्दगु-त्तिअं तइअं च होइ जसभद्दं ।
एयाइं उडुवाडिय-गणस्स तिन्नेव य कुलाइं ॥ १ ॥"

थेरेहिंतो णं कामिड्ढीहिंतो इत्थ णं वेसवाडियगणे णामं गणे निग्गए । तस्स णं इमाओ चत्तारि साहाओ, चत्तारि कुलाइं एवमाहिज्जंति । से किं तं साहाओ ?। साहाओ एवमाहिज्जंति । तं जहा–सावत्थिया,रज्जपालिया,अंतरिज्जिया, खेमलिज्जिया । सेत्तं साहाओ । से किं तं कुलाइं ?। कुलाइं एवमाहिज्जंति । तं जहा–

" गणिअं मेहिय कामड्ढिअं च तह होइ इंदपुरगं च ।
एयाइं वेसवाडिय-गणस्स चत्तारि उ कुलाइं ॥ १ ॥ "

थेरेहिंतो णं इसिगुत्तेहिंतो काकंदिएहिंतो वासिट्ठसगोत्तेहिंतो एत्थ णं माणवगणे णामं गणे निग्गए । तस्स णं इमाओ चत्तारि साहाओ, तिन्नि य कुलाइं एवमाहिज्जंति । से किं तं साहाओ ?। साहाओ एवमाहिज्जंति । तं जहा–कामिड्ढिज्जिया,गोअभिज्जिया,वासिट्ठिआ, सोरट्ठिआ । सेत्तं साहाओ । से किं तं कुलाइं ?। कुलाइं एवमाहिज्जंति । तं जहा–

" इसिगुत्तिय-त्थ पढमं, बीयं इसिदत्तिअं मुणेअव्वं ।
तइयं च अभिजयंतं, तिन्नि कुला माणवगणस्स ॥ १ ॥ "

थेरेहिंतो णं सुट्ठियसुप्पडिबुद्धेहिंतो कोडियकाकंदएहिंतो वग्घावच्चसगोत्तेहिंतो इत्थ णं कोडियगणे णामं गणे निग्गए। तस्स णं इमाओ चत्तारि साहाओ, चत्तारि कुलाइं च एवमाहिज्जंति। से किं तं साहाओ ?। साहाओ एवमाहिज्जंति। तं जहा–"उच्चानागरि विज्जा–हरी य वइरी य मज्झिमिल्ला य। कोडियगणस्स एया, हवंति चत्तारि साहाओ ॥१॥" सेत्तं साहाओ। से किं तं कुलाइं ?। कुलाइं एवमाहिज्जंति। तं जहा–"पढमित्थ बंभलिज्जं, बिइयं नामेण वत्थलिज्जं तु। तइयं पुण वाणिज्जं, चउत्थयं पण्हवाहणयं ॥१॥" थेराणं सुट्ठियसुप्पडिबुद्धाणं कोडियकाकंदगाणं वग्घावच्चसगोत्ताणं इमे पंच थेरा अंतेवासी अहावच्चा अभिन्नाया होत्था। तं जहा-थेरे अज्जइंददिन्ने पियगंथे, थेरे विज्जाहरगोवाले कासवगुत्ते एं, थेरे इसिदत्ते, थेरे अरिहदत्ते। थेरेहिंतो णं पियगंथेहिंतो एत्थ णं मज्झिमा साहा निग्गया, थेरेहिंतो णं विज्जाहरगोवालेहिंतो कासवगोत्तेहिंतो एत्थ णं विज्जाहरी साहा निग्गया। थेरस्स णं अज्जइंददिन्नस्स कासवगुत्तस्स अज्जदिन्ने थेरे अंतेवासी गोयमसगोत्ते। थेरस्स णं अज्जदिन्नस्स गोयमसगुत्तस्स इमे दो थेरा अंतेवासी अहावच्चा अभिन्नाया होत्था। तं जहा–थेरे अज्जसंतिसेणिए माढरसगुत्ते, थेरे अज्जसीहगिरी जाईसरे कोसियगोत्ते। थेरेहिंतो णं अज्जसंतिसेणिएहिंतो माढरसगोत्तेहिंतो एत्थ णं उच्चनागरी साहा निग्गया। थेरस्स णं अज्जसंतिसेणियस्स माढरसगोत्तस्स इमे चत्तारि थेरा अंतेवासी अहावच्चा अभिन्नाया होत्था। तं जहा–थेरे अज्जसेणिए, थेरे अज्जतावसे, थेरे अज्जकुबेरे, थेरे अज्जइसिपालिए। थेरेहिंतो णं अज्जसेणिएहिंतो एत्थ णं अज्जसेणिया साहा निग्गया। थेरेहिंतो णं अज्जतावसेहिंतो एत्थ णं अज्जतावसी साहा निग्गया। थेरेहिंतो णं अज्जकुबेरेहिंतो णं इत्थ णं अज्जकुबेरा साहा निग्गया। थेरेहिंतो अज्जइसिपालिएहिंतो इत्थ णं अज्जइसिपालिया साहा निग्गया। थेरस्स णं अज्जसीहगिरिस्स जाईसरस्स कोसियगुत्तस्स इमे चत्तारि थेरा अंतेवासी अहावच्चा अभिन्नाया होत्था। तं जहा–थेरे धणगिरी, थेरे अज्जवइरे, थेरे अज्जसमिए, थेरे अरिहदिन्ने। थेरेहिंतो णं अज्जसमिएहिंतो गोयमसगुत्तेहिंतो इत्थ णं बंभदीविया साहा निग्गया। थेरेहिंतो णं अज्जवइरेहिंतो गोयमसगोत्तेहिंतो इत्थ णं अज्जवइरी साहा निग्गया। थेरस्स णं अज्जवइरस्स गोयमसगुत्तस्स इमे तिन्नि थेरा अंतेवासी अहावच्चा अभिन्नाया होत्था। तं जहा–थेरे अज्जवइरसेणे, थेरे अज्जपउमे, थेरे अज्जरहे। थेरेहिंतो णं अज्जवइरसेणेहिंतो इत्थ णं अज्जनाइली साहा निग्गया। थेरेहिंतो णं अज्जपउमेहिंतो अज्जपउमा साहा निग्गया, थेरेहिंतो णं अज्जरहेहिंतो इत्थ णं अज्जजयंती साहा निग्गया। थेरस्स णं अज्जरहस्स वच्छसगुत्तस्स अज्जपूसगिरी थेरे अंतेवासी कोसियगुत्ते। थेरस्स णं अज्जपूसगिरिस्स कोसियगुत्तस्स अज्जफग्गुमित्ते थेरे अंतेवासी गोयमसगुत्ते। थेरस्स णं अज्जफग्गुमित्तस्स गोयमसगुत्तस्स अज्जधणगिरी थेरे अंतेवासी वासिट्ठसगोत्ते। थेरस्स णं अज्जधणगिरिस्स वासिट्ठसगोत्तस्स अज्जसिवभूई थेरे अंतेवासी कुच्छसगुत्ते। थेरस्स णं अज्जसिवभूइस्स कुच्छसगोत्तस्स अज्जनहे थेरे अंतेवासी कासवगुत्ते। थेरस्स णं अज्जनहस्स कासवगुत्तस्स अज्जनक्खत्ते थेरे अंतेवासी कासवगोत्ते। थेरस्स णं अज्जनक्खत्तस्स कासवगुत्तस्स अज्जरक्खे थेरे अंतेवासी कासवगोत्ते। थेरस्स णं अज्जरक्खस्स कासवगोत्तस्स अज्जनागे थेरे अंतेवासी गोयमसगुत्ते। थेरस्स णं अज्जनागस्स गोयमसगोत्तस्स अज्जजेहिले थेरे अंतेवासी वासिट्ठसगुत्ते। थेरस्स णं अज्जजेहिलस्स वासिट्ठसगोत्तस्स अज्जविएहू थेरे अंतेवासी माढरसगोत्ते। थेरस्स णं अज्जविएहुस्स माढरसगोत्तस्स अज्जकालए थेरे अंतेवासी गोयमसगोत्ते। थेरस्स णं अज्जकालियस्स गोयमसगोत्तस्स इमे दुवे थेरा अंतेवासी गोयमसगोत्ता–थेरे अज्जसंपलिए, थेरे अज्जभद्दे। एएसि णं दुण्हं थेराणं गोयमसगुत्ताणं अज्जवुड्ढे थेरे अंतेवासी गोयमसगुत्ते। थेरस्स णं अज्जवुड्ढस्स गोयमसगोत्तस्स अज्जसंघपालिए थेरे अंतेवासी गोयमसगोत्ते। थेरस्स णं अज्जसंघपालियस्स गोयमसगोत्तस्स अज्जहत्थी थेरे अंतेवासी कासवगुत्ते। थेरस्स णं अज्जहत्थिस्स कासवगोत्तस्स अज्जधम्मे थेरे अंतेवासी सुव्वयगोत्ते। थेरस्स णं अज्जधम्मस्स सुव्वयगोत्तस्स अज्जसीहे थेरे अंतेवासी कासवगुत्ते। थेरस्स णं अज्जसीहस्स कासवगुत्तस्स अज्जधम्मे थेरे अंतेवासी कासवगुत्ते। थेरस्स णं अज्जधम्मस्स कासवगोत्तस्स अज्जसंमिद्धे थेरे अंतेवासी।

"वंदामि फग्गुमित्तं, च गोयमं धणगिरिं च वासिट्ठं।
कुच्छं सिवभूइं पि य, कोसिय दुज्जंत कण्हे य ॥१॥
तं वंदिऊण सिरसा, भद्दं वंदामि कासवसगुत्तं।
नक्खं कासवगुत्तं, रक्खं पि य कासवं वंदे ॥२॥
वंदामि अज्जनागं, च गोयमं जेहिलं च वासिट्ठं।
विएहुं माढरगुत्तं, कालगमवि गोयमं वंदे ॥३॥

गोयमगुत्तकुमारं, संपलियं तह य भद्दयं वंदे ।
थेरं च अज्जवुड्ढं, गोयमगुत्तं नमंसामि ॥ ४ ॥
तं वंदिऊण सिरसा, थिरसत्तचरित्तनाणसंपन्नं ।
थेरं च संघवालिय–कासवगुत्तं पणिवयामि ॥५॥
वंदामि अज्जहत्थिं, च कासवं खंतिसागरं धीरं ।
गिम्हाण पढममासे, कालगयं चेव सुऊस्स ॥६॥
वंदामि अज्जधम्मं, च सुव्वयं सीहलद्धिसंपन्नं ।
जस्स (स) निक्खमणे देवो, छत्तं वरमुत्तमं वहइ ॥७॥
हत्थं कासवगुत्तं, धम्मं सिवसाहगं पणिवयामि ।
सीहं कासवगुत्तं, धम्मं पि अ कासवं वंदे ॥८॥
तं वंदिऊण सिरसा, थिरसत्तचरित्तनाणसंपन्नं ।
थेरं च अज्जनंदिं, गोयमगुत्तं नमंसामि ॥९॥
मिउमद्दवसंपन्नं, उवउत्तं नाणदंसणचरित्ते ।
थेरं च नंदिमं पि य, कासवगुत्तं पणिवयामि ॥१०॥
तत्तो अ थिरचरित्तं, उत्तमसम्मत्तसत्तसंजुत्तं ।
देवड्ढिगणिखमासमणं, माढरगुत्तं नमंसामि ॥११॥
तत्तो अणुओगधरं, धीरं मइसागरं महासत्तं ।
थिरगुत्तखमासमणं, वच्छसगुत्तं पणिवयामि ॥१२॥
तत्तो अ नाणदंसण–चरित्ततवसुट्ठिअं गुणमहंतं ।
थेरं कुमारधम्मं, वंदामि गणिं गुणेहिं संपन्नं ॥१३॥
सुत्तत्थरयणभरिए, खमदममद्दवगुणेहिं संपन्ने ।
देविड्ढिखमासमणे, कासवगुत्ते पणिवयामि ॥ १४ ॥
कल्प० ४ क्षण ।

थविरोवघाइय–स्थविरोपघातिक–पुं० । स्थविरा आचार्याऽऽदि-गुरवस्तान् आचारदोषेण शीलदोषेणावज्ञाऽऽदिभिर्वोपहन्तीत्येवंशीलः, स एव वा स्थविरोपघातिकः । दशा० २ अ० । स्था० । षष्ठासमाधिस्थे, आ० क० ४ अ० । दशा० । आ० चू० ।

थवी–स्त्री० । देशी-प्रसेविकायाम् , दे० ना० ५ वर्ग २५ गाथा ।

थस–पुं० । देशी–विस्तीर्णार्थेषु, दे० ना० ५ वर्ग २५ गाथा ।

थह–पुं० । देशी–निह्नवे, दे० ना० ५ वर्ग २४ गाथा ।

थाइणी–स्थायिनी–स्त्री० । प्रतिवर्षविजननशीलायाम्, स्थायिन्यो नाम वहवस्ता उच्यन्ते वर्षे वर्षे विजायन्ते याः । बृ० ३ उ० ।

थाऊण–स्थित्वा–अव्य० । गतेर्निवृत्येत्यर्थे, प्रा० ४ पाद ।

थाण–स्थान–न० । " स्थः ठा-थक्क-चिट्ठ–निरप्पाः " ॥ ८ । ४ । १६ ॥ इति स्थाधातोष्ठादेशो बाहुलकत्वान्न । प्रा० ४ पाद ।

थाणणिउत्त–स्थाननियुक्त–त्रि० । स्थाने पदे नियुक्ताः स्थाननियुक्ताः । प्रवर्तकस्थविरगणावच्छेदकाऽऽख्येषु पदस्थगीतार्थेषु, बृ० १ उ० ।

थाणय–देशी–न० । आलवाले, दे० ना० ५ वर्ग २७ गाथा ।

थाणविसेस–स्थानविशेष–पुं० । आसनविशेषे, विशे० ।

थाणाणिउत्त–स्थानानियुक्त–त्रि० । सामान्यसाधुषु, बृ० १ उ० ।

थाणु–स्थाणु–पुं० । " स्थाणावहरे " ॥ ८ । २ । ७ ॥ इति हरेऽर्थे स्थस्य न खः । प्रा० २ पाद । हरे, शिवे, को० । स्तम्भे, स्था० ४ ठा० २ उ० । कीलके, विशे० ।

थाम–स्थामन्–न० । वीर्ये, बृ० १ उ० । " जोगो वीरियं थामं " इत्येकार्थाः । आ० म० १ अ० २ खण्ड । आ० चू० । नि० चू० । पं० सं० । क्रियायाम्, (ग०) सामर्थ्ये, ग० १ अधि० । सूत्र० । प्राणे, शारीरबलयुक्ते, ओघ० । ज्ञा० । पिं० । स्था० । बलवति, त्रि० । नि० चू० ११ उ० । विस्तीर्णार्थेषु, दे० ना० ५ वर्ग २५ गाथा ।

थामवं–स्थामवत्–त्रि० । स्थाम बलं, तदस्य संयमविषयमस्तीति स्थामवान् । उत्त० २ अ० । शीताऽऽतपाऽऽदिसहनं प्रति सामर्थ्यवति, उत्त० २ अ० । मनोबलयुक्ते, (उत्त०) धैर्ययुक्ते, उत्त० २ अ० ।

थामावहारविजढ–स्थामापहारविमुक्त–त्रि० । अनिगृहीतबलवीर्ये, बृ० १ उ० ।

थार–पुं० । देशी–घने, दे० ना० ५ वर्ग २७ गाथा ।

थाल–स्थाल–न० । अट्टे, भ० १५ श० । पाकपात्रे च । आचा० २ श्रु० १ चू० १ अ० १ उ० । रा० । जं० ।

थिरजस-स्थिरयशस्-त्रि० । अनश्वरकीर्तौ, " समणगणपवरगंधहत्थीणं थिरजसाणं । " स० ७ अङ्ग ।

थिरजाय-स्थिरजात-पुं० । स्थिरेण निर्विघ्नेन जात उत्पन्नो गर्भे स्थिरजातः । चिरेण जाते, त्रि० ।

थिरणाम(ण)-स्थिरनामन्-न० । नामकर्मभेदे, यदुदयात् शरीरावयवानां शिरोऽस्थिदन्तानां स्थिरता भवति । " दंतअट्ठिमाइ थिरो (४६)" स्थिरं स्थिरनामोदयेन दन्तास्थ्यादि निश्चलं

भवति, यदुदयाद् शिरोऽस्थिग्रीवाऽऽदीनामवयवानां स्थिरता भवति तत् स्थिरनाम (४६) । कर्म० १ कर्म० । पं० सं० ।

थिरतरय–स्थिरतरक–पुं० । अतिशयस्थिरे, पञ्चा० ११ विव० ।

थिरता–स्थिरता–स्त्री० । उत्कर्षकाष्ठाप्राप्तौ, द्वा० १७ द्वा० । महाव्रतेषु एव धर्मे वा स्थैर्यहेतौ निश्चलत्वे, पा० । ध० । स्थैर्ये, बृ० ४ उ० । स्थिरता–जिनधर्मं प्रति परस्य स्थिरताऽऽपादनं, स्वस्य वा परतीर्थिकसमृद्धिदर्शनेऽपि जिनप्रवचनं प्रति निष्प्रकम्पता । ध० २ अधि० ।

वत्स ! किं चञ्चलस्वान्तो, भ्रान्त्वा भ्रान्त्वा विषीदसि ।
निधिं स्वसन्निधावेव, स्थिरता दर्शयिष्यति ॥ १ ॥
ज्ञानदुग्धं विनश्येत, लोभविक्षोभकूर्चकैः ।
अम्लऊव्यादिवास्थैर्या–दिति मत्वा स्थिरो भव ॥ २ ॥
अस्थिरे हृदये चित्रा, वाग्नेत्राऽऽकारगोपना ।
पुंश्चल्या इव कल्याण–कारिणी न प्रकीर्तिता ॥३॥
अन्तर्गतं महाशल्य–मस्थैर्यं यदि नोद्धृतम् ।
क्रियौषधस्य को दोष–स्तदा गुणमयच्छतः ? ॥ ४ ॥
स्थिरता वाङ्मनःकायै–र्येषामङ्गाङ्गितां गता ।
योगिनः सपशीलास्ते, ग्रामेऽरण्ये दिवा निशि ॥ ५ ॥
स्थैर्यरत्नप्रदीपश्चे–दीप्रः संकल्पदीपजैः ।
तद्विकल्पैरलं धूमै–रलं धूमैस्तथाऽऽश्रवैः ॥ ६ ॥
उदीरयिष्यसि स्वान्ता–दस्थैर्यपवनं यदि ।
समाधेर्धर्ममेघस्य, घटां विघटयिष्यसि ॥ ७ ॥
चारित्रं स्थिरतारूप–मतः सिद्धेष्वपीष्यते ।
यतन्तां यतयोऽवश्य–मस्या एव प्रसिद्धये ॥ ८ ॥
अष्ट० ३ अष्ट० ।

थिरपइण्ण–स्थिरप्रतिज्ञ–त्रि० । भाषितस्यान्यथाकारके, आव० ६ अ० ।

थिरपरिवाडि–स्थिरपरिपाटि–पुं० । स्थिरा अतिशयेन निरन्तराऽभ्यासतः स्थैर्यमापन्ना अनुयोगपरिपाट्यो यस्य स स्थिरपरिपाटिः । प्रव० ६५ द्वार । व्य० । अनु० । ग० । परिचितसूत्रार्थे, आचा० १ श्रु० १ अ० १ उ० ।

थिरव्वय–स्थिरव्रत–पुं० । व्रतेषु स्थिरे, आ० म० १ अ० २ खण्ड ।

थिरसंघयण–स्थिरसंहनन–पुं० । स्थिरं दृढं (प्रथममित्यर्थः) संहननं यस्य सः । आ० म० १ अ० १ खण्ड । बलवत्तरशरीरे, दश० ४ अ० । अविघटमानसंहनने, भ० १५ श० ।

थिरसंघयणया–स्थिरसंहननता–स्त्री० । तपःप्रभृतिषु शक्तियुक्तताम्, उत्त० १ अ० । शरीरसंपद्भेदे, स्था० ८ ठा० । प्रव० ।

थिरसत्त–स्थिरसत्त्व–पुं० । स्थिरं परीषहाऽऽदिसंपातेऽप्यधृष्यं सात्त्वं यस्य स स्थिरसत्त्वः । तस्मिन्, स्था० ४ ठा० ३ उ० । निश्चलमानसत्वावष्टम्भे, बृ० १ उ० ।

थिरसरीर–स्थिरशरीर–पुं० । शरीरबलोपेते, बृ० १ उ० ।

थिरसीस–पुं० । देशी–निर्नीके, निर्भरे, बद्धशिरस्त्राणे, दे० ना० ५ वर्ग ३१ गाथा ।

थिरसुह–स्थिरसुख–न० । निःप्रकम्पानुद्वेजनीये, "स्थिरसुखमासनम्," इति पतञ्जलिः । द्वा० २२ द्वा० ।

थिरा–स्थिरा–स्त्री० । योगदृष्टिभेदे, द्वा० । स्थिरा च निम्नग्रन्थेरेव, सा च रत्नाभा, तद्बोधो हि रत्नप्रास्समानः,तद्भावोऽप्रतिपाती प्रवर्द्धमानो निरपायो नापरपरितापकृत् परितोषहेतुः प्रायेण प्रणिधानाऽऽदियोनिरिति । (२६) द्वा० २० द्वा० ।

प्रत्याहारः स्थिरायां स्या–दर्शनं नित्यमञ्जसम् ।
तथा निरतिचारायां, सूक्ष्मबोधसमन्वितम् ॥ १ ॥

(प्रत्याहार इति) स्थिरायां दृष्टौ प्रत्याहारः स्याद्वक्ष्यमाणलक्षणः । तथा–निरतिचारायां दर्शनं नित्यमप्रतिपाति, सातिचारायां तु प्रक्षीणनयनपटलोपद्रवस्य तदुत्कोपाऽऽद्यनवबोधकल्पमपि भवति, तथाऽतिचारभावाद्, रत्नप्रभायामिव धूल्यादेरुपद्रवः, अञ्जसं भ्रमरहितम्, तथा सूक्ष्मबोधेन समन्वितम् ॥ १ ॥

विषयासंप्रयोगेऽन्तः–स्वरूपानुकृतिः किल ।
प्रत्याहारो हृषीकाणा–मेतदायत्ततोफलः ॥ २ ॥

(विषयेति) विषयाणां चक्षुरादिग्राह्याणां रूपाऽऽदीनामसंप्रयोगे तद्ग्रहणाभिमुख्यत्यागेन स्वरूपमात्रावस्थाने सति अन्तःस्वरूपानुकृतिश्चित्तनिरोधनिरोध्यतासंपत्तिः किल हृषीकाणां चक्षुरादीनामिन्द्रियाणां प्रत्याहारः । यत उक्तम्–" स्वविषयासंप्रयोगे चित्तस्वरूपानुकार इवेन्द्रियाणां प्रत्याहारः।" इति ।(२-५४) कीदृशोऽयमित्याह–एतदायत्ततोफल इन्द्रियवशीकरणैकफलः। अन्यथा यमाने हि प्रत्याहारे तथायत्तानीन्द्रियाणि भवन्ति यथा बाह्यविषयाभिमुखतां नीयमानान्यपि न यान्तीति । तदुक्तम्–"ततः परमा वश्यतेन्द्रियाणामिति ।" (२-५५) ॥ २ ॥

अतो ग्रन्थिविभेदेन, विवेकोपेतचेतसाम् ।
अपायै भवचेष्टा स्या–द्बालक्रीडोपमाऽखिला ॥ ३ ॥

(अत इति) अतः प्रत्याहाराद्, ग्रन्थिविभेदेन विवेकोपेतचेतसां भवचेष्टाऽखिला चक्रवर्त्यादिसुखरूपाऽपि बालक्रीडोपमा बालधूलीगृहक्रीडातुल्या, प्रकृत्यसुन्दरत्वादस्थिरत्वाच्च अपाये स्यात् ॥ ३ ॥

तत्त्वमेतत् परं ज्योति–रेकस्वभावैकमूर्तिकम् ।
विकल्पतल्पमारूढः, शेषः पुनरुपप्लवः ॥ ४ ॥

(तत्त्वमिति) अत्र स्थिरायां ह्रस्वभाव एका मूर्तिर्यस्य तत्तथा, ज्ञानाऽऽदिगुणभेदस्याऽपि व्यावहारिकत्वात् । परं ज्योतिरात्मरूपं तत्त्वं परमार्थसत् । शेषः पुनर्भवप्रपञ्चो विकल्पलक्षणं तल्पमारूढ उपप्लवो भ्रमविषयः, परिदृश्यमानरूपस्याभावात् ॥ ४ ॥

भवन्नोगिफणाऽऽभोगो, भोगोऽस्यामवभासते ।
फलं ह्यनात्मधर्मत्वा–त्तुल्यं यत्पुण्यपापयोः ॥ ५ ॥

(भवेति) अस्यां स्थिरायाम्, भोग इन्द्रियार्थसुखसंबन्धः,भवन्नोगिफणाऽऽभोगः संसारसर्पफणाऽऽटोपोऽवभासते, बहुदुःखहेतुत्वात् । नानुपहत्य भूतानि भोगः संभवति, ततश्च पापम्, ततो दारुणदुःखपरम्परेति । धर्मप्रत्यूहत्वाद्भोगो न दुःखदो भ-

विष्यतीत्यत्राऽऽह-यद् यस्मात् पुण्यपापयोर्हेयोर्हि फलमनात्मधर्मत्वात्तुल्यम् । व्यवहारतः सुशीलत्वकुशीलत्वाभ्यां द्वयोर्विभेदेऽपि निश्चयतः संसारप्रवेशकत्वेन कुशीलत्वाविशेषात् ॥५॥

धर्मादपि भवन् भोगः, प्रायोऽनर्थाय देहिनाम् ।
चन्दनादपि संभूतो, दहत्येव हुताशनः ॥६॥

(धर्मादिति) धर्मादपि भवन् भोगो देवलोकाऽऽदौ, प्रायो बाहुल्येन, अनर्थाय देहिनां, तथा प्रमादविधानात् । प्रायोग्रहणं शुद्धधर्मार्थेऽपि भोगनिरासार्थम्, तस्य प्रमादबीजत्वायोगात् । अत्यन्तानवद्यतीर्थकराऽऽदिफलशुद्धेः पुण्यशुद्ध्यादावागमाभिनिवेशाद्धर्मसारचित्तोपपत्तेरिति । सामान्यतो दृष्टान्तमाह-चन्दनादपि तथा शीतप्रकृतेः संभूतो दहत्येव हुताशनः, दहनस्य दाहस्वभावापरावृत्तेः। प्राय एतदेवं न दहत्यपि कश्चित्, सत्यमन्त्राभिसंस्कृताद्दाहासिद्धेः सकललोकसिद्धत्वादिति वदति। युक्तं चैतत्, निश्चयतो येनांशेन ज्ञानाऽऽदिकं तेनांशेनाऽबन्धनमेव, येन च प्रमादाऽऽदिकं तेन बन्धनमेव । सम्यक्त्वाऽऽदीनां तीर्थंकरनामकर्माऽदिबन्धकत्वस्याऽऽपि तद्विनाभूतयोगकषायगतस्योपचारेणैव संभवाद्, इन्द्रियार्थसंबन्धाऽऽदिकं तूदासीनमेवेत्यन्यत्र विस्तरः ॥ ६ ॥

स्कन्धात्स्कन्धान्तराऽऽरोपे, भारस्येव न तात्त्विकी ।
इच्छाया विरतिर्भोगा-तत्संस्कारानतिक्रमात् ॥७॥

(स्कन्धादिति) स्कन्धात् स्कन्धान्तराऽऽरोपे भारस्येव भोगादिच्छाया विरतिर्न तात्त्विकी, तत्संस्कारस्य कर्मबन्धजनितानिष्टभोगसंस्कारस्याऽनतिक्रमात् । तदतिक्रमो हि प्रतिपक्षभावनया तत्तनूकरणेन स्यात्, न तु विच्छेदेन प्रसुप्ततामात्रेण वेति । इत्थं भोगासारतादिभावनेन स्थिरायां स्थैर्यमुपजायते,सत्यामस्यामपरैरपि योगाऽऽचार्यैरक्षौद्र्याऽऽद्यो गुणाः प्रोच्यन्ते।

यथोक्तम-

" अक्षौद्र्यमारोग्यमनिष्ठुरत्वं,
गन्धः शुभो मूत्रपुरीषमल्पम् ।
कान्तिः प्रसादः स्वरसौम्यता च,
योगप्रवृत्तेः प्रथमं हि चिह्नम् ॥ १ ॥
मैत्र्यादियुक्तं विषयेषु चेतः,
प्रज्ञावयश्चैर्यसमन्वितं च ।
द्वन्द्वैरधृष्यत्वमभीष्टलाभो,
जनप्रियत्वं च तथा परं स्यात् ॥ २ ॥
दोषक्षयापायः परमा च तृप्ति-
रौचित्ययोगः समता च गुर्वी ।
वैराऽऽदिनाशोऽथ ऋतम्भरा धी-
र्निष्पन्नयोगस्य तु चिह्नमेतत् " ॥ ३ ॥ इति ।

इहाप्येतदक्षत्रिमं गुणजातमिति पदाऽऽरभ्य विहेयम् ॥ ७ ॥ द्वा० २४ द्वा० ।

थिरावलिया-स्थिराऽऽवलिका-स्त्री० । वृत्तपरिसर्पिणीभेदे, जी० ३ प्रति० ।

थिरासयत्त-स्थिराऽऽशयत्व-चित्तस्थैर्ये, पं० सू० ४ सूत्र ।

थिरीकरण-स्थिरीकरण-न० । सीदतां चारित्राऽऽदिषु स्थैर्यहेतौ, जीत० । धर्मादू विषीदतां तत्र चारुवचनचातुर्यादवस्थापने, प्रव० ६ द्वार । पञ्चा० । दश० । ध० । स्वगतपरगतधर्मव्यापाराणां स्थिरत्वाऽऽधाने, पञ्चा० ४ विव० । नि० चू० ।

एतेसु चिअ खमणा-ऽऽदिएसु सीदंति चोयणा जा तु ।
बहुदोसे माणुस्से, मा सीद थिरीकरणमेयं ॥३७॥

सीदंतो णाम-जो थिरसंघयणो धितिसंपण्णो दृढो य ण उज्जमति खमणाऽऽदिएसु, एसा सीयणा। चोयणा प्रेरणा, नियोजनेत्यर्थः, तं पुण चोयणं करेति अवायं दंसेउं । जओ भणति-(बहुदोसे माणुस्से)दोसा अवाया । ते य"दंडकसंसत्थगाहा।" अहवा जरसासकासखयकुट्ठाऽऽदओ संपओगविप्पओगदोसेहि य जुत्तं। मा इति परिसेहे । एवं वयणकिरियासहायत्तेण संजमे थिरं करेति त्ति थिरीकरणं । सेसं कंठं । नि० चू० १ उ० । "जहा उज्जेणीए अज्जाऽऽसाढो कालं करेंते संजए अप्पाहेइ । ममं दरिसावं दिज्जह, जहा उत्तरज्झयणे सुए, तं अक्खाणयं सव्वं तहेव । तम्हा णो जहा अज्जासाढो थिरो कओ, एवं जे ऽऽजविया ते थिरीकरेयव्वा । " दश० ३ अ० । दृढीकरणे, नि० चू० ४ उ० ।

थिरीकरणे आसाढो उदाहरणं-" उज्जेणीए आसाढो आयरिओ कालं करिंत साहू समाहीए णिज्जवेति, अप्पाहेति यजहा ममं दरिसावं देज्जह, ते य ण देंति। सो य सव्वेयं गतो पच्चक्खाए, तओ हाविओ य, सलिंगेण सिस्सेण य से ओही पउत्ता, दिट्ठो ओहावंतो आगतो, अंतरा य गामबिउव्वणं जक्खियाकरणं, पच्छण्णयं सरयकालसवसंथारोपधावणं, अंतरा य अण्णगामगमज्झा स तलागदुवारगविउव्वणं जलमज्झे खेलणं आयरिओ पासित्ता वितो । तेहिं समाणं वाणमंतरवसहिमुवागतो, पच्छा कालिया ते एगमेगस्स आभरणाणि हरित्तमारूढो, पच्छा तेसिं दिट्ठंता कहयंति परिवाडीए ।

पढमो भणति--

" जेण भिक्खं वाहिं देमि, जेण पोसेमि णायए ।
सा मे मही अक्कमति, जायं सरणतो भयं ॥ १२४ ॥ "

सो भणति-अतिपंकितोसि, मुंच आभरणाणि ।

बितिओ वि आरूढो, सो भणति-

" बहुस्सुयं चिल्लकडं, गंगा वहइ पाउसे ।
बुज्झमाणग ! भद्दं ते, जप ता किंचि सुहासियं ॥ १२५ ॥"

ततिओ भणति, सुणेहि अक्खाणयं-

" जेण रोहंति वीयाणि, जेण जीयंति कासगा ।
तस्स मज्झे विवज्जामि, जायं सरणतो भयं ॥ १२६ ॥
जमहं दिया य रात्रो य, तप्पेमि मधुसप्पिसा ।
तेण मे उरुओ दड्ढो, जायं सरणतो भयं ॥ १२७ ॥"

अह बा--

" बंधस्स मए भीतेणं, पावओ सरणं कतो ।
तेण दड्ढं ममं अंगं, जायं सरणओ भयं ॥ १२८ ॥ "

चउत्थो भणति--

" लंघणपवणसमत्थो, पुव्वं होऊण संपइं कीस ? ।
दूरयगहियग्गहत्थो, वयंस ! को णामओ वाही ? ॥ १२९॥"

सो भणइ--

" अहासाढेसु मासेसु, मारुओ सुहसीयलो ।
तेण मे भज्जते अंगं, जायं सरणतो भयं ॥ १३० ॥
जेण जीवंति सत्ताणि, निरोहम्मि अणंतए ।
तेण मे भज्जए अंगं, जायं सरणओ भयं ॥ १३१ ॥ "

पंचमो भणइ-

" जाव वुच्चं सुहं वुच्चं, पाहवे निरुवद्दवे ।
मूलाओ खंडिता वल्ली, जातं सरणतो भयं ॥ १३२ ॥"

उट्ठो भणति-

"अभिभवरया खुभिया, पेक्खंति बाहिरा जणा ।
दिसं भयह मायंगा !, जायं सरणतो भयं" ॥१३३॥

अहवा-

"जत्थ राया सयं चोरो, नेडिओ य पुरोहिओ ।
दिसं भयह णायरिया !, जायं सरणओ भयं" ॥१३४॥

अहवा-

"अइरुग्गयए य सूरिए, वेरयधूनगए व वायसे ।
भित्तीगयए य आयवे, सहि ! सुद्दिओ हु जणो न बुज्झइ ॥१३५॥
तुम पत्थ य अम्म हे ! लवे, मा हु विमाणय जक्खमागयं ।
जक्खादमए हु तावए, अहिं दाणि विमग्ग तावयं ॥१३६॥
नवमासय कुच्छिधारिया, पासवणे पुलिसे य महिए ।
धूया मे गेहिए हडे, अलणए असलणए व मे जायए" ॥१३७॥

एवं सव्वाभरणाणि घेत्तूण पयाओ, अंतरा य संजतीविउव्वणं तं दट्ठूण भणति-

"सयमेव य मुक्खलोचिया,
अप्पाणिआ य विघाडि खाणिया ।
ओवाइयलक्खओ य सि,
किं डेला ! वेडेति वाससी ?" ॥ १३८ ॥
" कडए ते कुंडले य ते,
अंजिअक्खि ! तिलयते य ते ।
पवयणस्स उड्डाहकारिए !,
कुट्ठा सेहि ! कतोऽसि आगता ? ॥ १३९ ॥ "
" राईसरिसवमित्ताणि, परछिद्दाणि पाससि ।
अप्पणो बिल्लमित्ताणि, पासंतो वि ण पाससि" ॥ १४० ॥

सा य पडिभणति-

" समणोऽसि संजतो असि, बंभयारी समलोट्ठकंचणे ।
वेहारियवायओ य ते, जिहज्ज ! किं ते पमिग्गहे ? ॥१४१॥"

(उत्त० नि० २ अ०) (एतासां गाथानामर्थः "दंसणपरीसह" शब्देऽग्रे वक्ष्यते) पुणरवि य पयाओ रायरुयखंधावारविउव्वणं, पमिबुद्धो य। जहा तेण देवेण तस्स आसाढभूतिस्स थिरीकरणं कतं, एवं जहासत्तिओ थिरीकरणं कायव्वं ।" नि० चू० १ उ० ।

थिल्लि-थिल्लि-स्त्री० । वेगसराऽऽदिद्रव्यविनिर्मिते यानविशेषे, दशा० ६ अ० । सूत्र० जं० । रा० । ज्ञाटानां यत् 'अडपल्लाणं' रूढं, तदन्यविषयेषु थिल्लिरित्युच्यते । जी० ३ प्रति० ४ उ० । औ० । ज्ञा० । प्र० ।

थिवथिवंत-स्तिवस्तिवत्-त्रि० । ऽिवंऽिवायमाने, तं० । " थिविथिविथं वीभच्छं । " थिविथिवायमानैरन्त्रैर्वीभत्सं, रौद्रमित्यर्थः । तं० ।

थिवुग-स्तिवुक-पुं० । पानीयबिन्दौ, आ० चू० १ अ० । आ० म० । प्रज्ञा० । दश० । विशे० ।

थिवुगसंकम-स्तिवुकसंक्रम-पुं० । " पिम्मगईण जा उदयसंगया तीए अणुदयगयाउ । संकामिऊण वेयइ जं एसो थिवुगसंकामो ॥७९॥ " इत्युक्तलक्षणे संक्रमभेदे, पं० सं० ५ द्वार० । क० प्र० ।

थिहु-स्तिहु-स्त्री० । साधारणबादरवनस्पतिकायभेदे, जी० १ प्रति० ।

थीण-स्त्यान-त्रि० । संघातमापन्ने, स्था० ६ ठा० ।

थीणगिद्धि-स्त्यानगृद्धि-स्त्री० । स्त्याना बहुत्वेन सङ्घातमापन्ना गृद्धिरभिकाङ्क्षा जाग्रदवस्थाऽध्यवसितार्थसाधनविषया यस्यां स्वापावस्थायां सा स्त्यानगृद्धिः; तस्यां हि सत्यां जाग्रदवस्थाऽध्यवसितमर्थमुत्थाय साधयति, स्त्याना वा पिण्डीभूता अस्थिरात्मशक्तिरूपा यस्यामिति स्त्यानर्द्धिरित्यप्युच्यते । तद्भावे हि खल्वस्तः केशवार्द्धबलसदृशी शक्तिर्भवति । अथवा-स्त्याना जमीभूता चैतन्यर्द्धिरस्यामिति स्त्यानर्द्धिरिति, तादृशविपाकवेद्या कर्मप्रकृतिरपि स्त्यानर्द्धिः, स्त्यानगृद्धिरिति वा । स्था० ६ ठा० । प्रव० । उत्त० । "गोणाऽऽदयः" ॥ ८ । २ । १७४ ॥ इति प्राकृतसूत्रेण थीणद्धीतिनिपातः । कर्म १ कर्म० । निद्राविशेषे, कर्म० ६ कर्म० ।

थीणद्धि-स्त्यानर्द्धि-स्त्री० । स्त्याना पिण्डीभूता अस्थिरात्मशक्तिरूपा यस्यां स्वापावस्थायां सा स्त्यानर्द्धिः । तद्भावे हि उत्कर्षतः प्रथमसंहननस्य केशवार्द्धबलसदृशी शक्तिर्भवति, श्रूयते चैवं कथानक आगमे-कस्मिंश्चित्प्रदेशे कोऽपि क्षुल्लको विपाकप्राप्तस्त्यानर्द्धिनिद्रासहितो द्विरदेन दिवा स्वस्थीकृतः, ततः स तस्मिन् बद्धाऽभिनिवेशो रजन्यां स्त्यानर्द्धयुदये वर्तमानः समुत्थाय तद्दन्तयुगलमुत्पाट्य स्वोपाश्रयद्वारि च प्रक्षिप्य पुनः सुप्तवान् इत्यादि । तद्विपाकवेद्या कर्मप्रकृतिरपि स्त्यानर्द्धिः । (६ गा०) कर्म० ६ कर्म० । ग० । पं सं० । जीत० ।

स्त्यानर्द्धिदृष्टान्तानाह-

पोग्गलभोयणफरुसग-दंते बहमाइणंजणे पुत्ते ।
एतेहि पुणो तस्सा, विगिंचणा होति जयणए ॥१४०॥

पुद्गलं पिशितं, मोदको लड्डुकः, फरुसकः कुम्भकारो, दन्ताः प्रतीताः, वटशाखाभञ्जनम्, एतानि पञ्चोदाहरणानि सूत्रे स्त्यानर्द्धिनिद्रायां भवन्ति । एतैरेतद्दृष्टान्तोक्तैर्विद्वद्भिः स्त्यानर्द्धिं परिज्ञाय, तस्य स्त्यानर्द्धिमतः साधोर्यतनया विवेचनं परित्यागः कर्त्तव्यो भवति ।

तत्र पुद्गलदृष्टान्तमाह-

पिसियासि पुव्व महिसं, विगिंचियं दिस्स तत्थ निसि गंतुं ।
अन्नं हंतुं खायति, उवस्सयं सेसगं णेति ॥ १४१ ॥

" एगम्मि गामे एगो कुडुंबी पक्काणि य तलियाणि य निम्मणेसु अणेगसो मंसप्पगारे भक्खेइ । सो अ तहारूवाणं थेराणं अंतिए धम्मं सोउं पव्वाइओ गामाइसु विहरइ । तेण य एगत्थ गामे महिसो विगिंचमाणो दिट्ठो । तस्स मंसे अभिलासो जातो । तेण अभिलासेण अव्वोच्छिन्नेणेव निक्खू हिंडिस्सा अव्वुच्छिन्नेण विहारभूमिं गतो । चरिमा सुत्तपोरिसी कया । आवस्सयं काउं पातोसिया पोरिसी विदिता । तदभिलासो चेव सुत्तो । सुत्तस्सेव थीणद्धी जाया । सो लद्धिओ अणाभोगनिव्वत्तिएणं कारणेणं गतो महिसमंडलं । अन्नं महिसं हंतुं भक्खित्ता सेसं आनेतुं उवस्सयस्स उवरिं ठवितं । पच्चूसे गुरूणं आलोएइ-परिसो सुविणो दिट्ठो । साहूहिं दिसावलोकं करेंतेहिं दिट्ठं कुणिमं, जाणियं-जहा एस थीणद्धी, ताहे लिंगपारंचियं पच्चित्तं से दिन्नं । " अथ गाथाऽक्षरार्थः-पिशिताशी कश्चित्पूर्वं गृहवासे आसीत् । स च महिषं विकर्तितं दृष्ट्वा संजाततद्भक्षणाभिलाषस्तत्र महिषमण्डले निशि रात्रौ गत्वा अन्यं महिषं हत्वा खादति, शेषमुद्धरितमुपाश्रये नयति ।

मोदकदृष्टान्तमाह-

मोयगजत्तमइच्छुं, भंतु कवामे घरस्स निसि खाति ।
नाणं च भरेऊणं, आगतो आवस्सए विगडे ॥१४३॥

एकः साधुर्भिक्षां हिण्डमानो मोदकभक्तं पश्यति । तच्च सुचिरमवलोकितमवभाषितं च, परं न लब्धं, ततस्तदलब्ध्वा तदध्यवसायपरिणत एव प्रसुप्तः । रात्रौ तत्र गत्वा गृहस्य कपाटौ भङ्क्त्वा मोदकान् भक्षयति । शेषैर्मोदकैर्नाजनं कृत्वा समागतः । प्राभातिके आवश्यके विकटयति-ईदृशः स्वप्नो मया दृष्ट इति । ततः प्रभाते मोदकभृतभाजनं दृष्ट्वा ज्ञातम्-यथा स्त्यानर्द्धिरिति,तस्यापि लिङ्गपाराञ्चिकं दत्तम् । शेषं पुद्गलाऽऽस्थानकवद्वक्तव्यम् ।

अथ फरुसकदृष्टान्तमाह-

अवरो फरुसगमुंमो, मट्टियपिंमे व छिंदिउं सीसे ।
एगंते अवयऊइ, पासुत्ता णं विगडणा य ॥ १४३ ॥

अपरः कश्चित् फरुसकः कुम्भकारः क्वापि गच्छे मुण्डो जातः, प्रव्रजित इत्यर्थः । तस्य रात्रौ प्रसुप्तस्य स्त्यानर्द्धिरुदीर्णा । स च पूर्वं मृत्तिकाच्छेदाभ्यासी,ततो मृत्तिकापिण्डानीव समीपप्रसुप्तानां साधूनां शिरांसि छेत्तुमारब्धः । तानि च शिरांसि, कमेवराणि चैकान्ते मपोऽऊति । शेषाः साधवोऽपनृताः । स च जूथोऽपि प्रसुप्तः । ततः प्रभाते ईदृशः स्वप्नो मया दृष्ट इति विकटना कृता । प्रभाते च साधूनां शिरांसि, कमेवराणि च पृथग्भूतानि दृष्ट्वा ज्ञातम-यथा स्त्यानर्द्धिरिति लिङ्गपाराञ्चिकं दत्तम् ।

अथ दन्तदृष्टान्तमाह-

अवरो वि घाडिओ म-चहत्थिणा पुरकवामें भंतूण ।
तस्मुक्खणित्तु दंते, वसहीबाहिं विगडणा य ॥ १४४॥

अपरः कोऽपि साधुर्गृहस्थभावे मत्तहस्तिना शुण्डामुत्क्षिप्य धावता घाटितः पलायमानो महता कष्टेन उज्झितः, एष जूथभिप्रायः । निशीथचूर्णिकृता तु-" एगो साहू गोयरनिग्गतो हत्थिणा पक्खित्तो।" इति लिखितम् । एवमुभयथाऽपि हस्तिकृतं पराभवं स्मृत्वा स साधुस्तस्योपरि प्रद्वेषमापन्नः प्रसुप्तः । उदीर्णस्त्यानर्द्धिरुत्थाय पुरकपाटौ भङ्क्त्वा हस्तिशालां गत्वा तस्य हस्तिनो व्यापादनं कृत्वा दन्तानुत्खन्य वसतेर्बहिः स्थापयित्वा जूथोऽपि सुप्तः । प्रभाते च विकटना-स्वप्नमालोचयति । साधुभिश्च दिगवलोकनं कुर्वाणैर्गजदन्तावोझितौ । ततः स्त्यानर्द्धिमान् असाविति कृत्वा लिङ्गपाराञ्चिकः कृतः ।

वटशाखाभञ्जनदृष्टान्तमाह-

उब्भामग वडसाहे-ण घट्टितो केइ पुव्ववणहत्थी ।
वडसालनंजणाऽऽगण, उस्सगाऽऽलोयणा गोसे ।१४५।

एकः साधुरुद्भ्रामकः भिक्षाचर्यां गतः, तत्र ग्रामद्वयस्यापान्तराले वटवृक्षो महान् विद्यते, स च साधुर्गाढतरमुष्णाभिहतो भरितभाजनस्तृषितबुभुक्षित ईर्यापथिको वेगेनाऽऽगच्छन् । (वडसालेण त्ति) लिङ्गव्यत्ययाद् वटपादपस्य शाखया शिरसि घट्टितः सुष्ठुतरं परितापितः, ततो वटस्योपरि प्रद्वेषमुपगतः, तदध्यवसायपरिणतश्च प्रसुप्तः । उदीर्णस्त्यानर्द्धिरुत्थाय तत्र गत्वा वटपादपं भङ्क्त्वा तन्मूलतटीयां शाखामानीयोपाश्रयोपरि स्थापितवान् । उत्सर्गे च आवश्यककायोत्सर्गत्रिके कृते,तथैव गुरूणामालोचयति,ततो दिगवलोके कृते तथैव ज्ञातम्, लिङ्गपाराञ्चिकश्च कृतः । केचिदाचार्या ब्रुवते-सप्तमभवे वनहस्ती बभूव, ततो मनुजजन्ममागतस्य प्रव्रजितस्योदीर्णस्त्यानर्द्धेः पूर्वजन्माभ्यासाद्वटशालाभञ्जनमभवत् । शेषं प्राग्वत् ।

कथं पुनरसौ परित्यजनीय इत्याह-

केसवअद्धबलं प-मायंति मुय लिंग णत्थि तुह चरणं ।
णेच्छस्स हरइ संघो, ण वि एको मा पदोसं तु ॥१४६॥

केशवो वासुदेवस्तस्य बलादर्द्धबलं स्त्यानर्द्धिमतो भवतीति तीर्थकृदादयः प्रज्ञापयन्ति । एतच्च प्रथमसंहननिनामङ्गीकृत्योक्तम् । इत्यादि । बृ० ४ उ० ।

थिणद्धितिग-स्त्यानर्द्धित्रिक-न० । निद्रानिद्राप्रचलाप्रचलास्त्यानर्द्धिलक्षणे स्त्यानद्धर्युपलक्षिते त्रिके, कर्म० ३ कर्म० । " स्तस्य थोऽसमस्तस्तम्बे" ॥८ ।२। ४५ ॥ इति स्तस्य थः । प्रा० २ पाद ।

थुंडूकिअ-न० । देशी -दरकुपितवदनसंकोचने,मौने च । दे० ना० ५ वर्ग ३१ गाथा ।

थुइ-स्तुति-स्त्री० । स्तवने, आव० २ अ० । सूत्र० । स्तुतिर्द्विधा-प्रणामरूपा, असाधारणगुणोत्कीर्तनरूपा च । नं० । लोकोत्तरसद्भूततीर्थकृद्गुणवर्णनपरायां (प्रव० १ द्वार) एकश्लोकप्रमाणायां (पञ्चा० ४ विव०) ऊर्द्धीभूय जघन्येन चतुष्टयस्तुतिप्रकथने, मध्यमेनाष्टस्तुतिकथने, उत्कृष्टेन १०८ स्तुतिकथने, उत्त० १४ अ० । ध० । नि० चू० । अनुशिष्टौ, व्य० १ उ० । संघा० । (स्तुतिस्तवयोर्विशेषः ' थय ' शब्दे अस्मिन्नेव भागे २३७३ पृष्ठे उक्तः) चैत्यवन्दनायां यत्कायोत्सर्गानन्तरं क्रियते तत्स्तुतय इति रूढाः । (तास्तिस्रश्चतस्रो वा दीयन्ते इति ' चेइयवंदण ' शब्दे तृतीयभागे १३१९ पृष्ठे स्तुतिप्रस्तावे प्रत्ययादि) तिस्रः स्तुतीराहुतीर्वाक्यरूपायाऽऽह हरिभद्रसूरिः-तिस्रः स्तुतयो नियमेनोच्यन्ते,केचित्तु अन्या अपि पठन्ति; न च तत्र नियम इति न तद्व्याख्यानक्रिया । एवमेतत्पठितोपचितपुण्यसंभारा उचितेषूपयोगफलमेतादिति ज्ञापनार्थं पठन्ति-" वेयावच्चगराणं संतिगराणं सम्मद्दिट्ठिसमाहिगराणं करेमि काउस्सग्गं।"इत्यादि यावदु "वोसिरामि।"व्याख्या-पूर्ववत्,नवरं-वैयावृत्यकराणां प्रवचनार्थं व्यापृतभावानां यथाऽम्बाकूष्माण्ड्यादीनां शान्तिकराणां क्रूरोपद्रवेषु सम्यग्दृष्टीनां सामान्येनाऽन्येषां समाधिकराणां स्वपरयोस्तेषामेव स्वरूपमेतदेवैषामिति वृद्धसंप्रदायः । एतेषां संबन्धिनं, सप्तम्यर्थे वा षष्ठी, एतद्विषयम्-एतानाश्रित्य, करोमि कायोत्सर्गमिति । कायोत्सर्गविस्तरः पूर्ववत् , स्तुतिश्च, नवरमेषां वैयावृत्यकराणां तथा तद्भाववृद्धैरित्युक्तप्रायं, तदपरिज्ञानेऽप्यस्मात् तच्छ्रुतसिद्धाविदमेव वचनं ज्ञापकं,न चासिद्धमेतद्, अभिचारुकाऽऽदौ तथेक्षणात्,सदौचित्यप्रवृत्त्या सर्वत्र प्रवर्त्तितव्यमित्येवम्पर्यमस्य,तदेतत् सकलयोगबीजं वन्दनाऽऽदिप्रत्ययमित्यादि न पठ्यते, अपि त्वन्यत्रोच्छ्वसितेनेत्यादि,तेषामविरतत्वात्, सामान्यप्रवृत्तेरित्थमेवोपकारदर्शनात्, वचनप्रामाण्यादिति व्याख्यातम् " सिद्धेभ्यः " इत्यादिसूत्रम् । ल० । आव० । ध० ।

" ता उस्सग्गं किच्चा, विनीयविसिलोगिया य इह थुत्ति ।
नमइ अहवा बहु-माणाइस्सव्वज्झिणिदाण ॥ २६ ॥
पुव्वुत्तकयं विहिणा, कड्ढंति सुस्तत्थवं च संविग्गा ।
सुअस्स भगवं नाणं, उस्सग्गतिओ थुणइ संथुत्ति ॥२७ ॥
तत्तिया अहवा वट्ट माणा तिसिलोगिया य सुहवक्खा ।
कम्मस्स निज्जरट्ठं, महया सद्देण घोसंति ॥ २८ ॥
ठिच्चा तु पुव्वविहिणा, सक्कयथं कहइ जाव पणिहाणं।" (२६)
बन्द० प० ।

" तिन्नि वा कड्ढई जाव, थुईओ तिसिलोइआ ।
ताव तत्थ अणुन्नायं, कारणेण परेण वि ॥ १ ॥ "

तिस्रः स्तुतयः कायोत्सर्गानन्तरं या दीयन्ते ता यावत्कर्षति, भणतीत्यर्थः । किंविशिष्टाः ? तत्राऽऽह-त्रिश्लोकिकाः त्रयः श्लोकाः छन्दोविशेषरूपा आधिक्येन यासु तास्तथा । " सिद्धाणं बुद्धाणं०" इत्येकः श्लोकः । "जो देवाण वि०" इति द्वितीयः । " एक्को वि नमोक्कारो० " इति तृतीय इति । ध० २ अधि० । वृ० । ओघ० । प्रति० ।

एतैर्व्याघातकारणैः समुपस्थितैः देशतः सर्वतो वाऽऽवश्यकमकृत्वा गच्छन्ति । तत्र देशतः कथमकृत्वेत्यत आह-

थुतिमंगलकितिकम्मे, काउस्सग्गे य तिविहकिइकम्मे ।
तत्तो य पमिक्कमणे, आलोयणयाएँ कितिकम्मे ॥

स्तुतिमङ्गलमकृत्वा,स्तुतिमङ्गलाकरणे चाऽयं विधिः-आवश्यके समाप्ते द्वे स्तुती तच्चार्यं तृतीयां स्तुतिमकृत्वा अभिशय्यां गच्छन्ति । तत्र च गत्वा ऐर्यापथिकीं प्रतिक्रम्य तृतीयां स्तुतिं ददति । अथवा-आवश्यके समाप्ते एकां स्तुतिं कृत्वा द्वे स्तुती अभिशय्यां गत्वा पूर्वविधिनोच्चरन्ति । अथवा-समाप्ते आवश्यकेऽभिशय्यां गत्वा तत्र तिस्रः स्तुतीर्ददति । अथवास्तुतिभ्यो यद् वक्ति तत् कृतिकर्म,तस्मिन्नकृते तेऽभिशय्यां गत्वा तत्रैर्यापथिकीं प्रतिक्रम्य मुखवस्त्रिकां च प्रत्युपेक्ष्य कृतिकर्म कृत्वा स्तुतीर्ददति । व्य० ३ उ० । (इत्यादि प्र० भागे ७२४ पृष्ठे विस्तरः)

आवस्सय काऊणं, जिणोवइट्ठं गुरूवएसेणं ।
तिन्नि थुती पडिलेहा, काउस्स विही इमो तत्थ ॥

आवश्यकं जिनोपदिष्टं गुरूपदेशेन कृत्वा पर्यन्ते तिस्रः स्तुतयः प्रवर्त्तमाना वक्तव्याः । तद्यथा-प्रथमा एकश्लोकिका, द्वितीया द्विश्लोकिका, तृतीया त्रिश्लोकिका । इत्यादि । व्य० ७ उ० । पं० व० । पञ्चा० ।

सुकयं आणत्ति पि व, लोए काऊण सुकयकिइकिम्मा ।
वड्ढंतीओ थुइओ, गुरुथुइगहणे कए तिन्नि ॥६॥

सुकृतामाज्ञामिव लोके कृत्वा कथिताऽनीतः सुकृतकृतिकर्म्मा सन्निवेदयत्येवमेतदपि द्रष्टव्यम । तदनु कायप्रमार्जनोत्तरकालं वर्द्धमानाः स्तुतयो ददतः शब्दतश्च गुरुस्तुतिग्रहणे कृते सति तिस्रस्तिस्त्रो भवन्ति । इति गाथाऽर्थः ॥ पं० व० २ द्वार ।

निस्सकडमनिस्सकडे, वि चेइए सव्वहिं थुई तिन्नि ।
वेलं च चेइयाणि य, नाउं एक्किक्किया वा वि ॥

निश्राकृते गच्छप्रतिबद्धे, अनिश्राकृते च तद्विपरीते, चैत्ये सर्वत्र तिस्रः स्तुतयो दीयन्ते, अथ प्रतिचैत्यं स्तुतित्रये दीयमाने वेलाया अतिक्रमो भवति, भूयांसि वा तत्र चैत्यानि,ततो वेलां, चैत्यानि वा ज्ञात्वा, प्रतिचैत्यमेकैकाऽपि स्तुतिर्दातव्येति । वृ० १ उ० ('वंदण' शब्दे विशेषो वक्ष्यते) 'तं काउं आवस्सगं अस्से तिन्नि थुतीओ करेंति । अहवा-एगा एकसिलोगा,बितिया तिसिलोगा, ततिया तिसिलोगा ।" आ० चू० ४ अ० । आव० । सम्पूर्णचैत्यवन्दना स्तुतित्रयेण संपूर्णा भवति । पञ्चा०३ विव०।(चतुर्थस्तुतिस्तु किलाऽर्वाचीनोक्तेति 'चेइयवंदण' शब्दे १३१२ पृष्ठे द्रष्टव्यम) (स्तुतिविषये विशेषः 'चेइयवंदण' शब्दे १३२० पृष्ठे तृतीयभागे द्रष्टव्यः) " सुयस्स भगवओ करेमि काउस्सग्गं वंदणवत्तियाए ।" इत्यादि प्राग्वत् यावद् "वोसिरामि, एयं सुत्तं पढित्ता पणवीसुस्सासमेव काउस्सग्गं करेंति ।" आह च-" सुयनाणस्स चउत्थो त्ति ततो नमोक्कारेण पारित्ता विसुद्धचरणदंसणसुयातिचारा मंगलनिमित्तं चरणदंसणसुयदेसगाणं सिद्धाणं थुतिं कड्ढंति, भणियं च सिद्धाणं थुईए । " इति । सा चेयं स्तुतिः-"सिद्धाणं बुद्धाणं०" इत्यादि । आव० ५ अ० ।

थुइजुयल्ल-स्तुतियुगल्ल-न० । समयपरिभाषया स्तुतिचतुष्टये, पञ्चा० ३ विव० ।

थुइमंगल-स्तुतिमङ्गल-न० । प्रतिक्रमणस्यान्ते स्तुतित्रयभणने, ओघ० ।

थुइवुड्ढि-स्तुतिवृद्धि-स्त्री० । प्रवर्द्धमानस्तुतिपरिपाटे, पञ्चा० ८ विव० ।

थुक्कार-थूत्कार-पुं० । महता शब्देन थुगितिकरणे, रा० ।

थुक्किअ-न० । देशी-उन्नते, दे० ना० ५ वर्ग २८ गाथा ।

थुड-स्थुड-न० । वनस्पतीनां स्कन्धभागे, स्था० १० ठा० ।

थुडुहीर-न० । देशी-चामरे, दे० ना० ५ वर्ग २८ गाथा ।

थुणण-स्तवन-न० । स्तोत्रैर्गुणकीर्तने, आचा० २ श्रु० ३ चू० १ अ० । दशा० ।

थुण्ण-पुं० । देशी-दृते, दे० ना० ५ वर्ग २७ गाथा ।

थुरुथुल्लणय-न० । देशी-शय्यायाम्, दे०ना० ५ वर्ग २८ गाथा ।

थुल्लम-पुं० । देशी-पटकुट्याम्, दे० ना० ५ वर्ग २८ गाथा ।

थुल्ल-थोर-त्रि० । रस्य लः । "सेवाऽऽदौ वा "॥ ८ । २ । ९६ ॥ इति लत्वविकल्पः । प्रा० २ पाद । परिवर्तने, दे० ना० ५ वर्ग २७ गाथा ।

स्थूल-त्रि० । मोटे, आचा० २ श्रु० १ चू० ४ अ० २ उ० ।

थुवअ-स्तावक-त्रि० । " उः सास्नास्नावके " ॥ ८ । १ । ७५॥ इति आदेरात् अत्वम् । स्तोतरि, प्रा० १ पाद ।

थुव्वंत-स्तूयमान-त्रि० । " न वा कर्मभावे व्वः क्यस्य च लुक् " ॥ ८ । ४ । २४२ ॥ इति भावे कर्मणि वा वर्तमानस्य थुधातोरन्ते द्विरुक्तो वकाराऽऽगमो वा । प्रा० ४ पाद । अभिनन्द्यमाने, जं० १५ श० ।

थू-थू-अव्य० । " थू कुत्सायाम् " ॥ ८ । २ । २०० ॥ 'थू' इति कुत्सायां प्रयोक्तव्यम । कुत्सायाम, " थू निल्लज्जो लोओ ।" प्रा० २ पाद ।

थूण-स्तेन-पुं० । " कः स्तेने वा " ॥ ८ । १ । १४७ ॥ इति स्तेनशब्दस्यैतो वा कत्वम । 'थूणो।' पक्षे-'थेणो।' चौरे, प्रा० १ पाद । स्तेने, दे० ना० ५ वर्ग ३९ गाथा ।

थूणा–स्थूणा–स्त्री० । आदनाऽऽदिस्तम्भनार्थयष्टीकाष्ठे, नि० चू० १३ उ० । " थूणा णं भंते ! उड्ढं ऊसिया समाणी जावइयं खेत्तं ओगाहित्ता णं चिट्ठेति, तिरियं पि य णं आयता समाणी तावइयं चेव खेत्तं ओगाहित्ता णं चिट्ठइ ? । हंता गोयमा ! थूणा णं उड्ढं ऊसिया तं चेव चिट्ठइ । " प्रज्ञा० १५ पद । पूर्वैजनपदभेदे, पूर्वस्यां दिशि स्थूणाविषयं यावद् विहरेत् । बृ० १ उ० । अश्वे, दे० ना० ५ वर्ग २७ गाथा ।

थूणाग–स्थूणाक–पुं० । स्थूनामख्याते सन्निवेशे, यत्र एकः सामुद्रिकः छद्मस्थविहरतो वीरजिनस्य लक्षणानि दृष्ट्वा विस्मितः शक्रेण प्रत्युक्तः । आ० म० १ अ० १ खण्ड ।

थूणामंडव–स्थूणामण्डप–पुं० । स्थूणाप्रधान यत्राऽऽच्छादिते मण्डपे, ज्ञा० १ श्रु० ३ अ० ।

थूभ–स्तूप–पुं० । संघातावयविनि, सूत्र० १ श्रु० १ अ० १ उ० । पीठे, जं० २ वक्ष० । रा० । ऋषभजिनगर्भावहाऽऽदिदग्धस्थानेषु भरतेन स्तूपाः प्रावर्तन्त । आचा० (?) । रा० । आ० क० । व्य० । (' आयारपकप्प ' शब्दे द्वितीयभागे ३४५ पृष्ठे देवताविकुर्वितस्तूपैरनुपपत्तिर्विवादो दर्शितः) समूहे, विशे० । " थूभा पुण विच्चगा होंति । " " इट्टगादिचियाचच्चा थूभो नज्जति । " नि० चू० ३ उ० ।

थूभकरंड–स्तूपकरण्ड–न० । ऋषभपुराऽऽसन्ने धन्ययक्षाऽऽवासे उद्याने, विपा० २ श्रु० २ अ० ।

थूभमह–स्तूपमह–पुं० । स्तूपस्य विशिष्टे काले पूजायाम्, आचा० २ श्रु० १ चू० १ अ० २ उ० ।

थूभिया–स्तूपिका–स्त्री० । लघुशिखरे, जं० १ वक्ष० । जी० । रा० । ज्ञा० ।

थूरी–स्त्री० देशी–तन्तुवायोपकरणे, दे० ना० ५ वर्ग २७ गाथा ।

थूल–स्थूल–त्रि० । प्रमाणतः मौल्यतश्च (आचा० १ श्रु० ५ अ० २ उ० । प्रश्न०) महति, प्रश्न० ५ संव० द्वार । बृहति, सूत्र० १ श्रु० १ अ० १ उ० । बृहत्काये सपचितमांसशोणिते, सूत्र० ७ श्रु० ६ अ० । उत्त० । अनिपुणे, उत्त० १ अ० ।

थूलगअदिण्णादाण–स्थूलादत्ताऽऽदान–न० । स्थूलं परिस्थूलविषयत्वेन प्रसिद्धमिदं चौर्याऽऽरोपणहेतुत्वेन प्रसिद्धमदत्ताऽऽदानम् । आव० ६ अ० । तृतीयेऽणुव्रते, आव० । परिस्थूलविषयं चौर्याऽऽरोपणहेतुत्वेन प्रसिद्धमिति कुशाध्यवसायपूर्वकं स्थूलं, विपरीतमितरत्, स्थूलमेव स्थूलकं, स्थूलकं च तत् अदत्तादानं चेति समासः । आव० ६ अ० ।

थूलगअदिण्णादाणवेरमण–स्थूलकादत्ताऽऽदानविरमण–न० । आवकस्य तृतीयेऽणुव्रते, आव० ६ अ० । (' अदिण्णादाणवेरमण ' शब्दे प्रथमभागे ५४० पृष्ठे व्याख्यातमिदम्)

थूलघोण–पुं० । देशी–शूकरे, दे० ना० ५ वर्ग २७ गाथा ।

थूलत्थंतरणासता–स्थूलार्थान्तरनाशता–स्त्री० । स्थूलार्थान्तरघटाऽऽदिनाशतायाम्, विशेषस्य सामान्यरूपादनित्यत्वे, द्रव्या० ११ अध्या० ।

थूलगपाण–स्थूलकप्राण–पुं० । द्वीन्द्रियाऽऽदिजीवे, आ० चू० ६ अ० ।

थूलगपाणवहविरयाइ–स्थूलकप्राणवधविरत्यादि–पुं० । अस्थूलसत्त्वहिंसाविरमणप्रभृतौ, पञ्चा० ६ विव० ।

थूलगपाणवहवेरमण–स्थूलकप्राणवधविरमण–न० । प्रथमाणुव्रते, पञ्चा० । स्थूला असूक्ष्माः कुदृष्टिभिरपि प्राणित्वेन प्रायः प्रतीयमानत्वाद् द्वीन्द्रियाऽऽदयः, त एव स्थूलकाः । अनेनैकेन्द्रियाणां व्युदासः । सम्यग्दृष्टिभिरेव प्रायः प्रतीयमानत्वेन तेषां सूक्ष्मत्वात् । प्राणा उच्छ्वासाऽऽदयः, तद्योगात्प्राणाः प्राणिनः, अनेनाचेतनानां व्युदासः, तद्वधस्येहाप्रत्याख्येयत्वात् । तेषां वधो हिंसा, तस्य विरमणं विरतिः स्थूलकप्राणवधविरमणम् । पञ्चा० १ विव० ।

थूलगपाणाइवाय–स्थूलकप्राणातिपात–पुं० । स्थूला एव स्थूलकाः, प्राणा इन्द्रियाऽऽदयः, तेषामतिपातः स्थूलकप्राणातिपातः । द्वीन्द्रियाऽऽदिजीववधे, आव० ६ अ० ।

थूलगपाणाइवायवेरमण–स्थूलकप्राणातिपातविरमण–न० । प्रथमाणुव्रते, आव० ६ अ० । आ० चू० । ('पाणाइवायवेरमण' शब्दे व्याख्यास्यते)

थूलगमुसावाय–स्थूलकमृषावाद–पुं० । परिस्थूलवस्तुविषयेऽतिपुष्टविवक्षासमुद्भवः स्थूलः, स्थूल एव स्थूलकः, स्थूलकश्चाऽसौ मृषावादश्चेति समासः । आव० ६ अ० । आ० । स्थूलानृतवादे, पञ्चा० १ विव० ।

थूलगमुसावायवेरमण–स्थूलकमृषावादविरमण–न० । द्वितीयाणुव्रते, आव० ६ अ० । (' मुसावाय ' शब्दे व्याख्यास्यते)

थूलभद्द–स्थूलभद्र–पुं० । शकटालपुत्रे आर्यसंभूतविजयस्य शिष्ये, कल्प० ८ क्षण ।

" अथाभूच्चरमे नन्दे, मन्त्रिराट् कल्पवंशजः । (५६)
शकटालः सुतौ तस्य, स्थूलभद्रश्च सिरीयकौ ।
यक्षा च यक्षदिन्ना च, भूताऽथ भूतदिन्नका ॥५७॥
सेणा वेणा तथा रेणा, तत्सुताः सप्त चाभवन् ।
द्विजो वररुचिस्त्वासी-दवनन्दं स शंसति ॥५८॥
अष्टोत्तरशतश्लोकै-र्नन्दो मन्त्रिणमीक्षते ।
मन्त्री न किञ्चिदप्यूचे, तद्भार्याग्रथ सोऽस्तवीत् ॥५९॥
पृष्टस्तयोचे त्वद्भर्त्ता, मत्काव्यानि प्रशंसतु ।
उक्तस्तदर्थं मन्त्र्यूचे, न मिथ्यात्वं स्तवीम्यहम् ॥६०॥
मुदुस्तयोपरुद्धोऽवक्, स तदुक्तं सुभाषितम् ।
दीनाराष्टशतं नन्द-स्तस्यादात्प्रत्यहं ततः ॥६१॥
मन्त्र्यूचेऽस्येश ! किं दत्त, सोऽवदत् त्वत्प्रशंसया ।
मन्त्र्यूचे न प्रशंसामि, लौकिकानि पठत्यसौ ॥६२॥
मत्पुत्र्योऽपि पठन्त्यूचे, राज्ञा स्वः पाठयेः सुताः ।
एकश्रुताऽऽदिपाठास्ताः, मन्त्रिणाऽन्तर्हिता धृताः ॥६३॥
राजसौधे द्विजोऽथाऽऽगा-त्तास्तत्पाठेऽपठन् क्रमात् ।
राज्ञा वररुचेर्दारं, वारितं स ततो निशि ॥६४॥
मुक्त्वाऽम्बुयन्त्रे दीनारान्, गच्छन्तः स्तौति सोऽहि ताम् ।
हत्वाऽहिना तदादाय, दत्ते गच्छेति सोऽवदत् ॥६५॥
तच्छ्रुत्वा पार्थिवोऽमात्य-मूचे दत्तेऽस्य जाह्नवीं ।
मन्त्र्यूचे मयि तत्स्थे, वेदास्यति ददाति तत् ॥६६॥
ज्ञप्तमादापयन्मन्त्री, तद् द्विजस्थापितं जले ।
प्रातर्नन्दोऽगमत्तत्रा-ऽप्यौर्वीन्मन्त्रियुतः स्तवम् ॥६७॥
स्तवान्तेऽन्तर्जलं मग्नः, किञ्चिन्न प्राप स द्विजः ।

मन्त्री पोट्टलिकां राज्ञः, प्रदर्श्यादत्त तस्य ताम् ॥ ६७ ॥
मायीत्युद्भाविताऽयासी--न्मन्त्रिच्छिद्राणि वीक्षते ।
श्रीयकस्याथ वीवाहे, माङ्गलिकाय भूभुजः ॥६७॥
सामग्रीं क्रियमाणां सो--ऽङ्गासीद्दासीमुखात्ततः ।
क्रीडन्ति किमभरूपाणि, दायं दायं सुखाऽऽदिकाम् ॥७०॥
अपाठयद्वररुचिः, सर्वेष्वपि पथेष्विदम् ।
"तं न विजाणइ लोओ, जं सगमाओ करेसिइ ।
नंदराउं मारेवि करि, सिरियउं रज्जे ठवेसइ" ॥७१॥
राजपाठ्यां नृपः श्रुत्वा, तच्चरैर्वीक्ष्य चाकुपत् ।
नमतो मन्त्रिणः क्ष्मायु--क्ततो जज्ञे पराङ्मुखः ॥ ७२ ॥
मन्त्री गृहं गतः पुत्र-मूचे भोः ! मम मृत्युना ।
कुटुम्बं जीवतादेत-ओ चेत्सर्वं विनङ्क्ष्यति ॥ ७३ ॥
ततो नृपं नमन्तं मां, वत्स ! खड्गेन घातयेः ।
आः पापमित्यवादीत्स, मन्युचे मां विषान्मृतम् ॥ ७४ ॥
ध्वनतः पापं न ते सोऽथ, तदादिष्टं तथाऽकरोत् ।
हा हा अकार्यमित्यूचे, राज्ञाऽथ श्रीयकोऽवदत् ॥ ७५ ॥
यो वो नेष्टः स नोऽप्येवं, ततः संस्कार्यं तं नृपः ।
श्रीयकं स्माऽऽह मन्त्री स्याः,सोऽवग् भ्राताऽस्ति मे बृहत्॥७६॥
कोशागृहे स्थूलभद्र--स्तमथाजूहवन्नृपः ।
निर्ययौ द्वादशाब्दान्ते, राज्ञोक्तः स्माऽऽह चिन्तये ॥ ७७ ॥
राजोचे शोकवन्यन्त-श्चिन्तयान्यत्र मा गमः"।
सोऽथ तत्र गतो दध्यौ,"क्व भोगा राज्यचिन्तने ? ॥ ७८ ॥
"मुह्येयं खलु पारवश्यजननी सौख्यच्छिदे देहिनां,
नित्यं कर्कशकर्मबन्धनकरी धर्मान्तरायाऽऽवहा ।
राजार्थैकपरैव संप्रति पुनः स्वार्थप्रजार्थापहृत्,
तद् ब्रूमः किमतः परं मतिमतां लोकद्वयापायकृत् ? ॥७९॥"
गतिश्च नरकाऽन्ता स्या--त्कृत्वा लोचं ततस्तदा ।
रत्नकम्बलदशाली--रजोहरणमप्यथ ॥८०॥
नृपमेत्यावदत्कर्म--लाभस्तेऽस्त्विति चिन्तितम् ।
राज्ञोचे निर्वहेः सुष्ठु, यातोऽसौ दध्यिवान्नृपः ॥८१॥
मिषात् कोशागृहे यास्य--तीत्यैकिष्टोपरि स्थितः ।
मृतकेभ्यो जनोऽपैति, मुखानि पिदधाति च ॥ ८२ ॥
निर्विकारः स जगवान्, ययौ दृष्ट्वाऽथ भूभृता ।
श्रीयकः स्थापितो मन्त्री, स्थूलभद्रः पुनर्मुनिः ॥ ८३ ॥
संभूतसूरेः शिष्योऽभूत्, श्रीयको भ्रातुरञ्जसा ।
मिलितुं याति कोशायाः, स्थूलभद्रस्य सा ॥८४॥
मनुष्यमीहते नान्य-मुपकोशा तु तत्स्वसा ।
तत्संभोक्ता वररुचि-स्तत्कोशां श्रीयकोऽवदत् ॥ ८५ ॥
इतो मृतः पिताऽस्माकं, भ्रातुश्च विरहोऽनघत् ।
तव प्रियवियोगोऽनू--त्तदेनं पाययाऽऽसवम् ॥ ८६ ॥
सख्या तदुक्तया चन्द्र-प्रभां स पायितः सुराम् ।
श्रीयकस्येति कोशाऽऽख्य-स्तोऽथ नाविषमम्बुजम् ॥ ८७ ॥
नृपाऽऽस्थाने वररुचे-रार्पयत्कस्यचित्करात् ।
तेनाऽऽघ्रातं तदैव ऽाक्, तत्रैवाऽवमदासवम् ॥ ८८ ॥
निःसारितोऽथ हीलित्वा, प्रायश्चित्तं द्विजा ददुः ।
तप्तस्य त्रपुणः पानं, तेनाऽसौ पञ्चतां गतः ॥ ८९ ॥
स्थूलभद्रस्तपः कुर्वन्, विहरन् गुरुभिः सह ।
आगमत्पाटलिपुत्रं, वर्षाकालमुखेऽन्यदा ॥ ९० ॥
जग्राहाभिग्रहं साधु-रेकः सिंहगुहास्थितौ ।
अन्यः सर्पबिले चान्यः, कूपकाऽङ्गनदारुणि ॥ ९१ ॥

स्थूलभद्रश्चतुर्मासीं, कर्तुं कोशागृहे पुनः ।
सिंहसर्पौ शमं यातौ, तुष्टा कोशा प्रियाऽऽगमात् ॥ ९२ ॥
उत्थायोचे विधेयं किं, चतुर्मास्याश्रयोऽस्त्विह ।
सैव वह्निशालाऽस्ति, स्थितस्तस्यां प्रभुस्ततः ॥ ९३ ॥
रात्रौ शृङ्गारमाधाय, प्रभुक्षोभार्थमागता ।
न पारितः क्षोभयितुं, प्रभुर्मन्दरसोदरः ॥ ९४ ॥
धर्मं श्रुत्वा ततो जज्ञे, श्राविका धर्मतत्त्ववित् ।
राजादिष्टं नरं मुक्त्वा, सा ब्रह्मव्रतमग्रहीत् ॥ ९५ ॥
चतुर्मासाऽऽगमे सिंह-गुहाऽऽदेरागतान् मुनीन् ।
गुरुः क्ष्माऽऽह स्वागतं वो, हंहो ! दुष्करकारकाः ! ॥९६॥
आयाते स्थूलभद्रे तु, गुरुरुत्थाय सम्भ्रमात् ।
ऊचे ते स्वागतं साधो !, कृतदुष्करदुष्कर ! ॥ ९७ ॥
त्रयोऽपि तेऽथ सासूया:, मिथः क्ष्माऽऽहुस्तपस्विनः ।
अमात्यपुत्र इत्येवं, बह्वमन्यन्त सूरयः ॥ ९८ ॥
अथ सिंहगुहासाधु-रन्यदावृषि मत्सरात् ।
कोशागृहे चतुर्मासी-कृतेऽभिग्रहमग्रहीत् ॥ ९९ ॥
आचार्यैरुपयुज्याऽथ, वारितोऽपि जगाम सः ।
वसतिर्मार्गिता दत्ता, तया तां स निरीक्ष्य च ॥ १०० ॥
अनुरक्तोऽर्थयामास, सा नैच्छद्भणति स्म तम् ।
आनय रूप्यलक्षं मे, सोऽवदन्मे कुतो धनम् ? ॥ १०१ ॥
सोचे नेपालभूपाद्यः, साधूनां रत्नकम्बलम् ।
ददाति लक्षमूल्यं स, तत्रागाद्युध्यवाँश्च तत् ॥ १०२ ॥
आगच्छतश्च चौराणां, लक्षं यातीत्यवक् शुकः ।
स्तेनसेनापतिर्बुद्ध्या--ऽऽयातं भिक्षुमुपैकत ॥ १०३ ॥
गते तत्र पुनः कीरो--ऽवादील्लक्षं गतं गतम् ।
ततस्तमनुगत्योचे, सोऽवग्दण्डोऽस्ति कम्बलम् ॥ १०४ ॥
नये वेश्याकृते मुक्तो, ययौ तस्या ददौ च तम् ।
तया चन्दनिकायां स, क्षिप्तो वारयतो मुनेः ॥ १०५ ॥
सोचे शोचस्यमुं न त्वं, त्वमपीदृग् न विष्यसि ।
मनो विषयपङ्कान्तः, स प्रबुद्धोऽथ तद्गिरा ॥ १०६ ॥
मिथ्यादुष्कृतमुक्त्वाऽगाद्, गुरोरालोचयत्ततः ।
कृपालुर्ध्योऽथ गुरुणा, ज्ञातमात्मपरान्तरम् ॥ १०७ ॥
स्थूलभद्रोऽधिसेहे तां, चिरं परिचितामपि ।
नवाँस्तु प्रार्थयामास, विगुप्तोऽथौर्जनेन च ॥ १०८ ॥
गुरुमङ्कमयग्रः, स्थूलभद्रं च सोऽथ तम् ।
रथिकस्यान्यदा कोशां, ददौ राजा पुरोऽस्य सा ॥ १०९ ॥
स्थूलभद्रगुणानास्थ-न्न तथोपाचरच्च तम् ।
(इतः कथाप्रक्रमं वैनयिकयामुत्तम्)
तस्मिंश्च काले संजज्ञे, दुष्कालो द्वादशाब्दकः ।
इतस्ततोऽम्बुधेस्तीरे, तमतिक्रम्य साधुभिः ॥ ११० ॥
विस्मृतिं याति सिद्धान्ते, गुणनाऽभावतस्तदा ।
पाटलीपत्तने स्थित्वा, यद्यस्याऽऽयाति तच्छ्रुतम् ॥१११॥
मेलयद्भिः समस्तं तै-र्मिलितैकादशाऽऽत्मिका ।
भद्रबाहुर्द्वादशाङ्ग-नृपेषालेषु तिष्ठति ॥ ११२ ॥
सङ्घः सङ्घाटकेनोचे, पूर्वाण्यध्यापयेति तम् ।
गुरुरूचे महाप्राणं, प्रविष्टोऽस्मि ततोऽधुना ॥ ११३ ॥
न क्रमो वाचनां दातुं, संघस्याऽऽख्यन्निवृत्य सः ।
पुनः संघाटकेनोचे, सङ्घाऽऽज्ञां यो विलङ्घते ॥ ११४ ॥
को दण्डस्तस्य सोऽवोच-न्नदैवोद्धाट्यते हि सः ।

ततोऽधुना किं क्रियते, सोऽवग्मोदधाटनं कुरु ॥ ११५ ॥
शिष्यान् प्रेषयतां प्राक्षान्, दास्ये सप्ताहि वाचनाः ।
भिक्षाचर्यां समायातः, कालवेलाधिकाक्षयोः ॥ ११६ ॥
संहाजूरागतश्चैव, तिस्रश्चाऽऽवश्यके पुनः ।
सिद्धे ध्याने महाप्राणे, स पराबर्त्तते श्रुतम् ॥ ११७ ॥
आदेरन्तं ततोऽप्यादिं, यावदन्तर्मुहूर्ततः ।
स्थूलभद्राऽऽदिकाऽऽयासी--च्छिष्यपञ्चशती ततः ॥११८॥
निरन्तरं वाचनानां ममावेऽप्येतुमक्षमाः ।
स्थूलभद्रं विना सर्वे, पराभज्याऽपरे ययुः ॥११९॥
ध्याने स्तोकावशेषे स, पृष्टः श्रीभद्रबाहुना ।
किं खिद्यसे न खिद्येऽहं, कञ्चित्कालं क्षमस्व तत् ॥१२०॥
भिद्यध्यानः सदा सर्व-दिनं दास्यामि वाचनाम् ।
सोऽप्राक्षीत्किं मयाऽधीतं, शेषं वा सूरयोऽप्यधुः ॥१२१॥
अष्टाशीतिर्हि सूत्राणयौ-पम्यं सिद्धार्थमन्दरौ ।
ततो न्यूनेनाऽपि परं, समयेन पठिष्यसि ॥१२२॥
दशपूर्वी द्विवस्तूना-ऽध्यापि ध्याने समर्थिते ।
अथान्तरे विहरणं, प्रययुः पाटलीपुरे ॥१२३॥
सप्ताप्यासप्तवस्तास्तत्र, स्थूलभद्रस्य जामयः ।
उद्यानस्थान् गुरून् स्थूल-भद्रं चाऽऽनन्तुमाययुः ॥१२४॥
गुरूक्त्वाऽवदन् कुत्र, ज्येष्ठाऽऽर्यः सूरयोऽभ्यधुः ।
परत्र गुणयन्नास्ते, वीक्ष्याऽऽयान्तीः सहोदराः ॥१२५॥
ऋद्धिं दर्शयितुं सिंह-रूपमाधाय तस्थिवान् ।
ताः सिंहं वीक्ष्य पूत्कृत्य-चुर्यः सिंहेन भक्षितः ॥१२६॥
गुरुरूचे न सिंहः स, भ्राता वो लब्धिमैक्षयत् ।
दृष्ट्वास्तास्तमथाऽऽनेमु-रप्राक्षीत्सोऽपि कौशलम् ॥१२७॥
यक्षोवाच परिव्रज्य, श्रीयको वर्षपर्वणि ।
अभक्तार्थं मयाऽकारि, निशीथे मृत्युमाप्तवान् ॥१२८॥
ततश्च मामभुञ्जानां, विदेहे देवताऽनयत् ।
तत्र पृष्टः प्रभुः प्राऽऽह, ऋषिहत्याऽऽज्ञ ते न तत् ॥१२९॥
मया निन्येऽध्ययने, स्वाम्युक्ते मुक्तिभावने (?) ।
वन्दित्वा तास्ततो याताः, द्वितीयेऽह्नयुपतस्थुषः ॥ १३० ॥
न गुरुर्वाचनां दत्ते, स क्षात्वा ह्याकृतं ततः ।
नैतत्पुनः करिष्यामी-त्येवं कष्टेन भूयसा ॥१३१॥
क्षामितोऽध्यापयच्छेष-मुक्तो माऽन्यं ददेः पुनः ।
व्युच्छिन्नाऽथ चतुःपूर्वी, दशमाऽन्त्यद्विवस्तुयुक् ॥ १३२ ॥
योगसंग्राहिता चैवं, शिक्षायां स्थूलभद्रवत् । " आ० क० ।

थेरस्स णं अज्जसंभूइविजयस्स माढरसगुत्तस्स अंतेवासी थेरे अज्जथूलभद्दे गोयमसगुत्ते ॥

स्थविरस्याऽऽर्यसंभूतिविजयस्य माढरगोत्रस्य शिष्यः स्थविर आर्यः स्थूलभद्रो गौतमगोत्रोऽभूत् । तत्संबन्धश्चाऽयम्-पाटलिपुरे शकटालमन्त्रिपुत्रः श्रीस्थूलभद्रो द्वादश वर्षाणि कोशागृहे स्थितो वररुचिद्विजप्रयोगोत्पितरि मृते नन्दराजेनाऽऽकार्य मन्त्रिमुद्रादानायाऽर्थितः सन् पितृमृत्यं स्वचित्ते विचिन्त्य दीक्षामादत्त,पश्चाच्च संभूतविजयान्तिके व्रतानि प्रतिपद्य तदादेशपूर्वकं कोशागृहे चतुर्मासीमस्थात्, तदन्ते च बद्धभावविधायिनीमपि तां प्रतिबोध्य गुरुसमीपमागतः सन् दुष्करदुष्करकारक इति संघसमक्षं प्रोचे, तद्वचसा पूर्वाऽऽयाताः सिंहगुहासर्पबिलकूपकाष्ठस्थायिनस्त्रयो मुनयो दूताः, तेषु सिंहगुहास्थायी मुनिर्गुरुणा निवार्यमाणोऽपि द्वितीयचतुर्मास्यां कोशागृहे गतो, दृष्ट्वा च तां दिव्यरूपां चलचित्तोऽजनि, तदनु तया नेपालदेशाऽऽनायितरत्नकम्बलं खाते क्षिप्त्वा प्रतिबोधितः सन्नागत्योवाच-

" स्थूलभद्रः स्थूलभद्रः, स एकोऽखिलसाधुषु ।
युक्तं दुष्करदुष्कर-कारको गुरुणा जगे " ॥ १ ॥
"पुप्फफलाणं च रसं, सुराण मंसाण महिलियाणं च ।
जाणंता जे विरया, ते दुक्करकारए वंदे " ॥ २ ॥

कोशाऽपि तत्प्रतिबोधिता सती स्वकामिनं पुङ्खार्पितबाणैर्दूरस्थाऽस्खलदुत्थानयनगर्वितं रथकारं सर्षपराशिस्थसूच्यग्रस्थपुष्पोपरि नृत्यन्ती प्राऽऽह-

" न दुक्करं भव्वयलुंबिवोडणं, न दुक्करं सरिसवनिव्वाहं ।
तं दुक्करं तं च महाणुभावं,जं सो मुणी पमयवणम्मि वुच्छो ।३।"

कवयोऽपि-

" गिरौ गुहायां विजने वनान्तरे ,
वा संश्रयन्तो वशिनः सहस्रशः ।
दृश्यैऽतिरम्ये युवतीजनान्तिके,
वशी स एकः शकटालनन्दनः ॥ ४ ॥
योऽग्नौ प्रविष्टोऽपि हि नैव दग्ध-
श्चित्रो न खड्गाग्रकृतप्रचारः ।
कृष्णाहिरन्ध्रेऽप्युषितो न दष्टो,
नाकोऽऽजनागारनिवास्यहो यः ॥ ५ ॥
वेश्या रागवती सदा तदनुगा षड्भी रसैर्भोजनं,
शुभ्रं धाम मनोहरं वपुरहो नव्यो वयःसङ्गमः ।
कालोऽयं जलदाऽऽविलस्तदपि यः कामं जिगायाऽऽदरात् ,
तं वन्दे युवतिप्रबोधकुशलं श्रीस्थूलभद्रं मुनिम् ॥ ६ ॥
रे कामं ! वामनधना तव मुख्यमस्त्रं,
वीरा वसन्तपिकपञ्चमचन्द्रमुख्याः ।
स्वत्सेवका हरिविरञ्चिमहेश्वराऽद्याः
हा हा हताश ! मुनिनाऽपि कथं हतस्त्वम् ?॥ ७ ॥
श्रीनन्दिषेणरथनेमिमुनीश्वराऽऽई-
युक्त्वा त्वया मदन रे ! मुनिरेष दृष्टः ।
क्रान्तं न नेमिमुनिजम्बुसुदर्शनानां,
तुर्यो न विघ्यति निहत्य रणाङ्गणे माम् ॥ ८ ॥
श्रीनेमितोऽपि शकटालसुतं विचार्य
मन्यामहे वयममुं भटमेकमेव ।
देवोऽद्रिदुर्गमधिरुह्य जिगाय मोहं
यन्मोहनाऽऽलयमयं तु वशी प्रविश्य ॥ ९ ॥ "

अन्यदा द्वादशवर्षदुर्भिक्षान्ते संघाऽऽग्रहेण श्रीभद्रबाहुनिःसाधुपञ्चशत्याः प्रत्यहं वाचनासप्तकेन दृष्टिवादे पाठ्यमाने सप्तभिर्वाचनानिरन्येषु साधुषु उद्विग्नेषु श्रीस्थूलभद्रो वस्तुद्वयोनां दशपूर्वी पपाठ । अथैकदा यक्षासाध्वीप्रभृतीनां वन्दनार्थमागतानां स्वभगिनीनां सिंहरूपदर्शनेन दूनाः श्रीभद्रबाहवो 'वाचनायामयोग्यस्त्वम्' इति श्रीस्थूलभद्रमूचिवांसः। पुनः संघाऽऽग्रहात् ' अथाऽन्यस्मै वाचना न देया ' इत्युक्त्वा सूत्रतो वाचनां ददुः ।

तथा चाऽऽहुः-

" केवली चरमो जम्बू-स्वाम्यथ प्रभवप्रभुः ।

शय्यंभवो यशोभद्रः, संभूतविजयस्तथा ॥ १ ॥
भद्रबाहुः स्थूलभद्रः, श्रुतकेवलिनो हि षट् ॥ " कल्प० ८ क्षण । ति० । आ० क० । तं० । आ० चू० । नं० । भाव० । स्था० । उत्त० ।

" थेरस्स णं अज्जसंभूइविजयस्स माढरसगुत्तस्स इमाओ सत्त अंतेवासिणीओ अहावच्चाओ अभिन्नायाओ होत्था । तं जहा-

" जक्खा य जक्खदिन्ना, भूया तह चेव भूयदिन्ना य ।
सेणा वेणा रेणा, भइणीओ थूलभद्दस्स ॥ १ ॥ " कल्प० ८ क्षण ।

जसभद्दं तुंगियं वंदे, भूयं चेव य माढरं ।
भद्दबाहुं च पाइन्नं, थूलभद्दं च गोयमं ॥ ३६ ॥

स्थूलभद्र, चः समुच्चये । गौतमं गौतमस्यापत्यम् गौतमः । " ऋष्यन्धकवृष्णिकुरुभ्यश्च " । ४ । १ । १४४ ॥ इत्यण्प्रत्ययः । तं, वन्दे इति क्रियायोगः । नं० ।

श्रीस्थूलभद्रो कोशागृहावस्थितावाहारमपि गृहीतवानिति जनप्रवादः, परं शय्यातरपिण्डत्वेन कथं न जनप्रवादनिबन्धनमिति प्रश्ने, उत्तरम्-श्रीस्थूलभद्रस्य कोशागृहेऽवस्थितिरागमव्यवहारायनुज्ञातत्वेन यथा नानुचिता, तथा शय्यातरपिण्डग्रहणमपि ज्ञेयम् । तेहि सातिशयज्ञानवत्तया त्रैकालिकविहितं विसृश्यैव सर्वमप्यनुजानन्त इति । ११० प्र० । सेन० १ उल्ला० । श्रीस्थूलभद्रस्य यतित्वे वेश्यागृहस्थितिः, सा सिद्धान्तोक्ता, न वा ?, यदि सिद्धान्तोक्ता, स सिद्धान्तो नामग्रहं प्रसाद्य इति प्रश्ने, उत्तरम्-नन्दीसूत्रे पारिणामिक्यां बुद्धौ स्थूलभद्रः, कार्मिक्यां तु वेश्या, सारथिश्च उदाहरणतयोक्ताः सन्ति, एतदर्थप्रतिपादने स्थूलभद्रस्य यतित्वेऽपि वेश्यागृहेऽवस्थानमुक्तमस्तीति । प्र० २२६ प्र० । सेन० ३ उल्ला० । श्रीस्थूलभद्रस्य नाम चतुरशीतिचतुर्विंशतिं यावत्तिष्ठति, तत्कुत्र ग्रन्थेऽस्तीति प्रश्ने, उत्तरम्-श्रीस्थूलभद्रस्य नाम चतुरशीतिचतुर्विंशतिं यावत्तिष्ठति, तच्चारित्राऽऽदित्यस्तीति बोध्यम् । ३१ प्र० । सेन० ४ उल्ला० ।

थूलरोट्टग-स्थूलरोट्टक-पुं० । बृहद्रोट्टके ' वाटी ' इति प्रसिद्धे, ध० २ अधि० ।

थूलवय-स्थूलवचस्-पुं० । स्थूलमनिपुणं वचो येषां ते स्थूलवचसः । अविचार्यभाषिषु, ध० २ अधि० । उत्त० ।

थूलादत्ताऽऽदाण-स्थूलादत्ताऽऽदान-न० । स्थूलं च तददत्तस्याऽविदितीर्णस्य द्रव्यस्याऽऽदानं ग्रहणं स्थूलादत्ताऽऽदानम् । पञ्चा० १ विव० । परिस्थूलवस्तुविषये चौर्याऽऽरोपणहेतुत्वेन प्रसिद्धे अतिदुष्टाध्यवसायपूर्वके चौर्ये, स्था० ५ ठा० १ उ० ।

थूलि-धूलि-स्त्री० । " चूलिकापैशाचिके तृतीयचतुर्थयोराद्यद्वितीयौ " ॥ ८ । ४ । ३२५ ॥ इति धकारस्य थकारः । रेणौ, प्र० ४ पद ।

थूली-स्थूली-स्त्री० । गोधूमस्थूलचूर्णे, गोधूमानां स्थूलचूर्णः सर्पिषा सिक्तः स्थाल्यां पक्वः स्थूलीति मालवप्रसिद्धा । ध० २ अधि० ।

थूह-पुं० । देशी-प्रासादशिखरे, वातके, वल्मीके च । दे० ना० ५ वर्ग ३२ गाथा ।

थेअ-स्थित-त्रि० । " क-ग-च-ज-त-द-प-श-ष-स०-" ॥ ८ । २ । ७७ ॥ इत्यादिना सलुक् । " युवर्णस्य गुणः " ॥ ८ । ४ । २३७ ॥ " क-ग-च-ज-त०-" ॥ ८ । १ । १७७ ॥ इत्यादिना तलुक् । गतेर्निष्ठे, प्रा० दुं० ४ पाद ।

थेग-थेग-पुं० । कन्दविशेषे, ध० २ अधि० । प्रव० ।

थेज्ज-स्थैर्य-न० । स्थिरतायाम्, औ० । अष्ट० । स्थेये, त्रि० । प्रीतिकरतया गच्छचिन्तायाः प्रमाणभूते, अनेकशो वा प्रीतिकरीकृते, व्य० ३ उ० ।

थेज्जकरण-स्थैर्यकरण-न० । चित्तस्थिरतासंपादने, पञ्चा० १ विव० ।

थेण-पुं० । देशी-स्तेने, दे० ना० ५ वर्ग २६ गाथा ।

थेणिल्लिअ-न० । देशी-हृते, भीते च । दे० ना० ५ वर्ग ३२ गाथा ।

थेमिच्च-स्थैमित्य-न० । निश्चलत्वे, द्वा० १८ द्वा० ।

थेय-स्तेय-न० । परस्वापहरणे, द्वा० २० द्वा० ।

थेर-स्थविर-पुं० । ' थविर ' शब्दार्थे, प्रव० २ द्वार । चतुर्मुखे ब्रह्मणि, दे० ना० ५ वर्ग २६ गाथा ।

थेरकंचुइज्ज-स्थविरकञ्चुकिन्-पुं० । ' थविरकंचुइज्ज ' शब्दार्थे, भ० ६ श० ३३ उ० ।

थेरकप्प-स्थविरकल्प-पुं० । ' थविरकप्प ' शब्दार्थे, स्था० ३ ठा० ४ उ० ।

थेरकप्पट्ठिइ-स्थविरकल्पस्थिति-स्त्री० । ' थविरकप्पट्ठिइ ' शब्दार्थे, बृ० ४ उ० ।

थेरकप्पिय-स्थविरकल्पिक-पुं० । ' थविरकप्पिय ' शब्दार्थे, प्रव० ७० द्वार ।

थेरभूमि-स्थविरभूमि-जातिश्रुतपर्यायस्थविरेषु, स्थविरभूमिस्त्रिधा । स्था० ३ ठा० २ उ० । ('थविरभूमि' शब्दे २३६४ पृष्ठे व्याख्याता)

थेरभूमिपत्त-स्थविरभूमिप्राप्त-त्रि० । ' थविरभूमिपत्त ' शब्दार्थे, व्य० १ उ० । बृ० ।

थेरय-स्थविरक-पुं० । ' थविरय ' शब्दार्थे, आचा० १ श्रु० १ अ० २ उ० ।

थेरवेयावच्च-स्थविरवैयावृत्य-न० । ' थविरवेयावच्च ' शब्दार्थे, व्य० १ उ० ।

थेरावली-स्थविरावली-स्त्री० । ' थविरावली ' शब्दार्थे, नं० ।

थेरासण-न० । देशी-पक्षे, दे० ना० ५ वर्ग २७ गाथा ।

थेरोवघाइय-स्थविरोपघातिक-पुं० । ' थविरोवघाइय ' शब्दार्थे, दशा० २ अ० ।

थेव-स्तोक-त्रि० । स्तोके, " थेवं पि हु तं बहु होइ । " (१२०) आव० नि० १ अ० । आ० म० । विशे० । देशी-बिन्दौ, दे० ना० ५ वर्ग २६ गाथा ।

थेवरिअ-देशी-जन्मनि, तूर्ये च । दे० ना० ५ वर्ग २६ गाथा ।

थोअ-पुं० । देशी-रजके, मूलके च । दे० ना० ५ वर्ग ३२ गाथा ।

थोक-स्तोक-त्रि० । " स्तोकस्य थोक्क-थोव--थेवाः " ॥ ८ । २ । १२५ ॥ इति स्तोकस्य थोक्काऽऽदेशः । प्रा० २ पाद । अपर्याप्ते आचा०१ श्रु० २ अ०४ उ० को० । "अणथोवं वणथोवं, अग्गीथोवं कसायथोवं च । न हु भे वोसासियव्वं, थेवं पि हु तं बहुं होइ" ॥ १२० ॥ आव० १ अ० । आ० म० । विशे० ।

थोगुच्चय-स्तोकोच्चय-पुं० । स्तोकस्योद्धरणे, ज्यो० १ पाहु० ।

थोणा-स्थूणा-स्त्री० । " स्थूणातूणे वा " ॥ ८ । १ । १२५ ॥ इति उत ओत्वम् । छादनस्तम्भे, प्रा० १ पाद ।

थोत्त-स्तोत्र-न० । " स्तस्य थोऽस्समस्तस्तम्बे " ॥ ८ । २ । ४४ ॥ इति स्तस्य थः । प्रा० २ पाद । बहुश्लोकप्रमाणे स्तवे, पञ्चा० ४ विव० । को० । स्तोत्राणि तु जिनानाम् (आज्ञानाम्) एव । षो० ६ विव० ।

थोत्तगरुई-स्तोत्रगुर्वी-स्त्री० । स्तोत्रमहत्यां पूजायाम्, पञ्चा० ४ विव० ।

थोत्तरयणकोस-स्तोत्ररत्नकोश-पुं० । मूर्तिसुन्दरसूरिविरचिते जिनस्तवनग्रन्थे, कल्प० ।

तथोक्तं श्रीमुनिसुन्दरसूरिभिः स्वकृतस्तोत्ररत्नकोशे-

" वीरात्त्रिनन्दाङ्क (९९३) शरत्प्रचीकरत्,
स्वचैत्यपूते ध्रुवसेनभूपतिः ।
यस्मिन्महैः संसदि कल्पवाचना--
माद्यां तदानन्दपुरं न कः स्तुते ? ॥१॥ " कल्प० ७ क्षण ।

थोत्तग-स्तोत्रक-पुं० । चकारहिकारतुशब्दवाशब्दाऽऽदिषु निपातेषु, विशे० । आ० म० ।

थोयिव्व-स्तोतव्य-त्रि० । पूजनीये, पञ्चा० ।

चरणपमित्तिरूवो,थोयव्वोचियपवित्तिओ गुरुओ। (२४)

चरणप्रतिपत्तिरूपश्चारित्राभ्युपगमस्वभावः, भावस्तव इति प्रकृतम् । स्तोतव्ये पूजनीये भगवति वीतरागे विषयभूते या उचिता संगता प्रवृत्तिः प्रवर्त्तनं, सा स्तोतव्योचितप्रवृत्तिः,तस्याः स्तोतव्योचितप्रवृत्तेर्हेतोर्गुरुको गरीयान् द्रव्यस्तवापेक्षया। पञ्चा०६ विव० ।

थोर-स्थूल-त्रि० । " स्थूले लो रः " ॥८।१।२५५॥ इति लस्य रः । प्रा० १ पाद । " ओत्कूष्माण्डी--तूणीर-कूर्पर--स्थूल०-- " ॥ ८ । १ । १२४ ॥ इत्यादिना उत ओत्वम् । पृथुले, प्रा० १ पाद । क्रमपृथुत्वपरिवर्तुले, दे० ना० ५ वर्ग ३० गाथा ।

थोल-पुं० । देशी-वल्लिकदेशे, दे० ना० ५ वर्ग ३० गाथा ।

थोव-स्तोक-पुं० । सप्तप्राणाऽऽत्मके कालविशेषे, "सत्त पाणाणि से थोवे, सत्त थोवाणि से लवे।" भ०१ श० १ उ० । ते च प्राणाः सप्त सप्तसंख्याका एकः स्तोकः । ज्यो० १ पाहु० । तं० । कल्प० । कर्म० । ज्ञा० । अनु० । स्था० । प्रव० । अल्पे, प्रश्न० २ आश्र० द्वार । स्था० । विशे० । स्वल्पे, आव० ४ अ० । गणनाप्रमाणहीने, त्रि० । विशे० । दर्श० । "थोवाऽऽहारो थोवभणिओ अ, जो होई थोवणिद्दो अ । थोवोवहिउवगरणे, तस्स हु देवा वि परिणमंति ॥१॥" सूत्र० १ श्रु० ८ अ० ।

थोवअ-स्तोकक-पुं० । वातकपक्षिणि, ज्ञा० १ श्रु० १ अ० ।

थोह-न० । देशी- बले, दे० ना० ५ वर्ग ३० गाथा ।

थोहरी-थोहरी-स्त्री० । स्नुहीतरौ, ध० ३ अधि० । प्रव० ।



इति श्रीमत्सौधर्मबृहत्तपागच्छीय-कलिकालसर्वज्ञकल्प-
श्रीमद्भट्टारक-जैनश्वेताम्बराऽऽचार्य-श्री १००८ श्री-
विजयराजेन्द्रसूरीश्वरविरचिते 'अभिधानराजेन्द्रे'
थकाराऽऽदिशब्दसङ्कलनं समाप्तम् ।











दकारः

द–द–पुं० । दा–दैप्–वा कः । पर्वते, दत्ते, खण्डने, वाच० । दाने, पूजने, क्षीणे, दानशौण्डे, पालके, देवे, दीप्तौ, दुराधर्षे, दयायाम्, दमने, दीने, दन्दशूके, बद्धे, बन्धने, बोधे, बाले, बीजे, बलोद्दिते, विदोषे, चाक्षुषे, चीवरे, वरे, प्राणे च । क्रान्तौ, दिवि, गङ्गायाम्, कुले, कालकृते, उपदायाम्, नैवेद्ये, निर्नाथवनितायाम्, आर्य्यायां च । स्त्री० । छेदे, संबोधने, पाने, वैराग्ये, अपलोचने, दातरि च । त्रि० । प० को० ।

"दः पुमान् दातरि प्राणे, दा स्त्रियां क्रान्तिदानयोः ॥४७॥
छेदे संबोधने पाने, वैराग्ये चापलोचने ।
दस्त्रिलिङ्ग्यां भवेद् मूके, आहकेन्द्रवकेशशि (?) ॥४८॥" इति माधवः । एका० ।

" दो दाने पूजने क्षीणे, दानशौण्डे च पालके ।
देवे दीप्तौ दुराधर्षे, दोर्बुजे दीर्घदेशके ॥६७॥
दयायां दमने दीने, दंदशूकेऽपि दः स्मृतः ।
बद्धे च बन्धने बोधे, बाले बीजे बलोद्दिते ॥६८॥
विदोषेऽपि पुमानेष, चाक्षुषे चीवरे वरे ।
दाऽऽक्रान्तौ दिवि गङ्गायां, कुले कालकृते च दा ॥६९॥
उपदायां च नैवेद्ये, निर्नाथवनिता च दा ।"
इति विश्वदेवशंभुमुनिः । एका० ।

दअरी–स्त्री० । देशी–सुरायाम्, दे० ना० ५ वर्ग ३४ गाथा ।

दआलु–दयालु–त्रि० । दय–आलुच् । वाच० । " क–ख–च–ज–त–द–प–य–वां प्रायो लुक् " ॥ ८ । १ । १७७ । इति स्वरात्परस्यानादिभूतस्यासंयुक्तस्य यस्य प्रायिको लुक् । प्रा० १ पाद । कृपायुक्ते, वाच० ।

दइअ–न० । देशी–रक्षिते, दे० ना० ५ वर्ग ३५ गाथा ।

दइच्च–दैत्य–पुं० । दितेरपत्यम् । दिति–ण्यः । वाच० । " अइदैत्यास्याऽऽदौ च " ॥ ८ । १ । १५१ ॥ इति दैत्यशब्दे ऐतो अइ इत्यादेशः । 'दइच्चो ।' असुरे, प्रा० १ पाद ।

दइण–दैन्य–न० । दीनस्य भावः ष्यञ् । वाच० । " अइदैन्याऽऽदौ च " ॥ ८ । १ । १५१ ॥ इति दैन्यशब्दे ऐतो अइ इत्यादेशः । 'दइन्नं ।' प्रा० १ पाद । दीनत्वे, कार्पण्ये च । वाच० ।

दइय–दयित–पुं० । दय–क्तः । पत्यौ, लुब्धे, रक्षिते, न० । आचा० । ज्ञा० । आ० म० । प्रियमात्रे च । त्रि० । भार्यायाम्, स्त्री० । वाच० ।

दइवज्ञ–दैवज्ञ–पुं० । दैवं पूर्वजन्मार्जितं शुभं जनानां जन्मलग्नाऽऽदिना जानाति । ज्ञ–कः । वाच० । " ज्ञो ञः " ॥ ८ । १ । ८३ ॥ ज्ञस्सम्बन्धिनो अस्य लुग्वा भवति । 'दइवज्जो ।' प्रा० २ पाद । गणके, ज्योतिर्विदि च । वाच० ।

दइवयप्पभाव–दैवकप्रभाव–पुं० । विधिसामर्थ्ये, प्रश्न० २ आश्र० द्वार ।

दइव्व–दैव–न० । देवादागतम् । देवो देवताऽस्य देवस्येदं वा अण् । वाच० । "सेवाऽऽऽदौ वा" ॥ ८ । १ । ६६ ॥ इति अन्यस्य वा द्वित्वम् । 'दइव्वं ।' 'दइवं ।' प्रा० २ पाद । भाग्ये, फलोन्मुखे शुभाशुभकर्म्मणि, " प्राग्जन्मनि कृतं कर्म, शुभं वा यदि वाऽशुभम् । दैवशब्देन निर्दिष्ट–मिहजन्मनि तद्बुधैः ॥१॥" वाच० ।

दउलताबाद–दौलताऽऽबाद–पारसीकः शब्दः । प्रान्तदेशीये स्वनामख्याते नगरे, यत्र जिनप्रभसूरिर्विहृतः । ती० ४८ कल्प ।

दओआस–दकाभास–पुं० । शिवकस्य वेलन्धरनागराजस्य आवासपर्वते, जी० ३ प्रति० ४ उ० । स्था० ।

दओदर–दकोदर–न० । जलोदरे, ज्ञा० १ श्रु० १ अ० ।

दओह–दकौघ–पुं० । पानीयप्रवाहे, बृ० १ उ० । स्था० ।

दंभ–दण्भ–पुं० । दण्भ्यते–व्यापाद्यते प्राणिनो येन स दण्भः । आचा० १ श्रु० २ अ० ३ उ० । प्राणिन आत्मानं वा दण्डयतीति दण्डः । आचा० १ श्रु० ४ अ० १ उ० । स्था० । दण्ड्यते पापकर्मणा लुप्यते येन स दण्डः । ध० २ अधि० । दुष्प्रयुक्तमनोवाक्कायलक्षणैर्हिंसामात्रे, " एगे दंडे । " एकत्वं चाऽस्य सामान्यतयोद्देशात् । स० २ सम० । आतु० । भूतोपमर्दे, ध० २ अधि० । आचा० । सूत्र० । प्राणव्यपरोपणविधौ, सूत्र० १ श्रु० १३ अ० । बधाऽऽदिरूपे परनिग्रहे, स्था० ३ ठा० ३ उ० । दण्ड्यति पीडामुत्पादयतीति दण्डः । दुःखविशेषे, सूत्र० १ श्रु० ५ अ० १ उ० । परितापकारिणि, आचा० १ श्रु० ७ अ० ३ उ० । पापोपादानसङ्कल्पे, सूत्र० २ श्रु० २ अ० । उपतापे, सूत्र० २ श्रु० ६ अ० । मनोवाक्कायानामसद्व्यापारे, उत्त० १६ अ० । आचा० । प्राणिपीडाकारके, आचा० २ श्रु० १ चू० १ अ० १ उ० । दण्डयन्ते धनापहारेण प्राणी यैस्ते दण्डाः । ध० २ अधि० । चारित्रैश्वर्यापहारतोऽसारीक्रियते पंभिरात्मा इति दण्डाः । दुष्प्रयुक्तमनोवाक्कायेषु, ध० ३ अधि० । आचा० । स्था० । दुरध्यवसाये, उत्त० ३१ अ० ।

दण्डं निरूपयन्नाह–

दो दंडा पण्णत्ता । तं जहा–अट्ठादंडे चेव, अणट्ठादंडे चेव । णेरइयाणं दो दंडा पण्णत्ता । तं जहा–अट्ठादंडे चेव, अणट्ठादंडे चेव । एवं चउव्वीसदंडओ० जाव वेमाणियाणं ।

(दो दंडा इत्यादि) दण्डः प्राणातिपाताऽऽदिः, स चार्थायेन्द्रियाऽऽदिप्रयोजनाय यः सोऽर्थदण्डः, निष्प्रयोजनस्त्वनर्थदण्ड इति । उक्तरूपमेव दण्डं सर्वजीवेषु चतुर्विंशतिदण्डकेन निरूपयन्–आह–(नेरइयाणं इत्यादि) एवमिति नारकवदर्थदण्डमानर्थदण्डाभिलापेन चतुर्विंशतिदण्डको नेयो, नवरं नारकस्य स्वशरीररक्षार्थं परस्योपद्रवनमर्थदण्डः, प्रद्वेषमात्रादनर्थदण्डः । पृथिव्यादीनामनाभोगेनाप्याहारग्रहणे जीववधजनावादर्थदण्डः, अन्यथा तु अनर्थदण्डः । अथवा–उभयमपि प्रवान्तरार्थदण्डाऽऽदिपरिणतेरिति सम्यग्दर्शनाऽऽद्यित्रयवतामेव त्वनर्थदण्डो नास्तीति । स्था० २ ठा० १ उ० । त्रयोदण्डाः मन आदयः । स्था० ३ ठा० १ उ० ।

तओ दंडा पण्णत्ता। तं जहा—मणदंडे, वयदंडे, कायदंडे। नेरइयाणं तओ दंडा पण्णत्ता। तं जहा—मणदंडे, वयदंडे, कायदंडे। विगलिंदियवज्जं० जाव वेमाणियाणं।

कण्ठ्यम्, नवरं मनसा दण्ड्यतेऽनेनेति मनोदण्डः। अथवा-दण्ड्यतेऽनेनेति दण्डो,मन एव दण्डो मनोदण्ड इति। एवमितरावपि। विशेषचिन्तायां चतुर्विंशतिदण्डके-(नेरइयाणं तओ दंडेत्यादि) यावद्वैमानिकानामिति सूत्रं वाच्यम्। नवरं (विगलिंदियवज्जं ति) एकद्वित्रिचतुरिन्द्रियान् वर्जयित्वेत्यर्थः। तेषां हि दण्डत्रयं न सम्भवति, यथायोगं वाङ्मनसोरभावादिति। स्था० ३ ठा० ३ उ०। स०। ("कायदंड" शब्दे तृ० भागे ४६२ पृष्ठे, तथा वचोदण्डाऽऽदिशब्देषु तदादरणानि द्रष्टव्यानि) राजनीतिभेदे, स्था०। स च-" वधश्चैव परिक्लेशो, धनस्य हरणं तथा। इति दण्डविधानज्ञैर्-दंडोऽपि त्रिविधः स्मृतः ॥ १ ॥ " स्था० ३ ठा० ३ उ०। ज्ञा०। आ० म०। मिथ्यादर्शनमायानिदानशल्येषु, ध० २ अधि०। शरीरधनयोरपहारे, विपा० १ श्रु० ४ अ०। निग्रहे, आव०। दण्डो, निग्रहो, यातना, विनाश इति पर्य्यायाः। आव० ६ अ०। विपा०। पञ्चा०। अपराधानुसारेण राजग्राह्ये द्रव्ये, ज्ञा० १ श्रु० १ अ०। राज्ञाऽऽज्ञायाम्, अपराधिदण्डने, स्था० ५ ठा० ३ उ०। सैन्ये, प्रायश्चित्तदानावसरे राजस्थापितदण्डपुरुषाणां स्वेच्छाचारिणे दण्डः। व्य० १ उ०। स्वपरदण्डहेतौ च, सूत्र० २ श्रु० ४ अ०। प्राणिनां दण्डहेतौ, आयुर्वै घृतमित्यादिवत्कार्ये कारणत्वोपचारात्। आचा० १ श्रु० १ अ० ४ उ०। दण्डनं दण्डः परिधीनामनुशासनम्। स्था० ७ ठा०। नि० चू०। दण्डयतीति दण्डः। यष्टिविशेषे, जं० २ वक्ष०। सूत्र०। उत्त०। " छट्ठी मायपमाणा, विक्खट्टिओ चउरंगुलेन परिहीणा। दंडो बाहुपमाणो, वि दंडओ कक्खामित्तो य ॥ १ ॥ " इति दण्डचतुर्थोभेदः। जीत०। पं० भा०। उत्त०। नि० चू०।

सचित्तदारुदण्डाऽऽदीनि करोति-

जे भिक्खू सचित्ताइं दारुदंडाणि वा वेणुदंडाणि वा वेत्तदंडाणि वा करेइ, करंतं वा साइज्जइ ॥२९॥ जे भिक्खू सचित्ताइं दारुदंडाणि वा वेणुदंडाणि वा वेत्तदंडाणि वा धरेइ, धरंतं वा साइज्जइ ॥२०॥ जे भिक्खू सचित्ताइं दारुदंडाणि वा वेणुदंडाणि वा वेत्तदंडाणि वा परिभुंजइ, परिभुंजंतं वा साइज्जइ ॥ २९ ॥

दो सुत्ता उच्चारेयव्वा। सचित्ता जीवसहिता,वेणू वंसो,वेत्तो विवंधसा, ते उ चेव दारू सीसवादिकरणं, परहस्ताद् ग्रहणमित्यर्थः। ग्रहणाऽनन्तरकालं अपरिभोगेन धरणमित्यर्थः।

गाहा-

सच्चित्त मीसगे वा, जे भिक्खू दंडए करे व धारे वा।
सो आणा अणवत्थं, मिच्छत्तविराधणं पावे ॥ ९७ ॥
सयमेव डेदणम्मी, जीवा दिट्ठे परेण उड्डाहो।
परछिन्नमीसदोसा, भारेण विराहणा दुविधा ॥ ९८ ॥

सयं डेयणे जीवोवघातो, परेण दिट्ठे उड्डाहो भवति, परिछिन्ने वि मीसवणस्सति त्ति जीवोवघातो भवति, साऽऽत्मत्वाच्च गुरुः, गुरुत्वादात्मसंयमोपघातः।

गाहा-

सुत्तणिवातो एत्थं, परछिन्ने होति दंडए तिविधे।
सो चेव मीसओ खलु, सेसे छहुगा य गुरुगा य ॥ ९९ ॥

तिविधो-वंसवेत्तदारुमयो य, सो चेव परछिन्नो मीसो जायति, एत्थ सुत्तणिवातो (सेसे त्ति) सचित्तो, परिचित्ते चउलहुअं, अणंते चउगुरुअं।

गाहा-

विक्खियपदमणप्पज्झे, गेलण्णऽद्धाणसंजमभए वा।
उवहीसरीरतेणे, पडिणीए साणमादीसु ॥ १०० ॥

अणप्पज्झो करेति।

गिलाणअद्धाणेसु इमं वक्खाणं। गाहा-

बहुणं तु गिलाणस्सा, वाक्खादुवही पलंब अद्धाणे।
अचित्ते मीसेतर, सेसेसु वि गहण जतणाए ॥ १०१ ॥

गिलाणो, बालो, उवही, पलंबाणि वा अद्धाणे उज्झंति,सावयभएण वारणट्ठा घेप्पंति, उवहिसरीराणं बहणट्ठा, तेणगपडिणीयसाणमादीण णिवारणट्ठा, पुव्वं अचित्तं, पच्छा मीसं, सेसा परित्ताणंता, पुव्वं परित्ता, पच्छा अणंता।

सूत्रम्-

जे भिक्खू चित्ताइं दारुदंडाणि वा वेणुदंडाणि वा वेत्तदंडाणि वा कारेइ, कारंतं वा साइज्जइ ॥ ३० ॥ जे भिक्खू चित्ताइं दारुदंडाणि वा वेणुदंडाणि वा वेत्तदंडाणि वा धारेइ, धारंतं वा साइज्जइ ॥ ३१ ॥ जे भिक्खू चित्ताइं दारुदंडाणि वा वेणुदंडाणि वा वेत्तदंडाणि वा परिभुंजइ, परिभुंजंतं वा साइज्जइ ॥३२॥ जे भिक्खू विचित्ताइं दारुदंडाणि वा वेणुदंडाणि वा वेत्तदंडाणि वा करेइ, करंतं वा साइज्जइ ॥ ३३ ॥ जे भिक्खू विचित्ताइं दारुदंडाणि वा वेणुदंडाणि वा वेत्तदंडाणि वा धारेइ, धारंतं वा साइज्जइ ॥ ३४ ॥ जे भिक्खू विचित्ताइं दारुदंडाणि वा वेणुदंडाणि वा वेत्तदंडाणि वा परिभुंजइ, परिभुंजंतं वा साइज्जइ ॥ ३५ ॥

एवं विचित्ते वि दो आलावगा। चित्रकः एकवर्णः, विचित्रो नानावर्णः, करेति धरेति वा, तस्स मासलहुं।

गाहा-

चित्ते व विचित्ते वा, जे भिक्खू दंडए कए य धारे वा।
सो आणा अणवत्थं, मिच्छत्तविराधणं पावे ॥१०२॥

चित्तो णाम-एगतरेण वण्णेण उज्जलो, विचित्तो दोहिं वण्णेहिं, चित्तविचित्तो पंचवण्णेहिं।

गाहा-

सहजेणाऽऽगंतूण व, अण्णतरजुओ विचित्तवण्णेणं।
दुप्पभिति संजओ पुण, विचित्त आविज्जूसिते सुत्तं ।१०३।

सहजो णाम-तद्द्रव्योत्थितः, कलमाषिकावंशदण्डकवत्,आगन्तु-

कः-चित्रकराऽऽदिचित्रितः, सूत्रस्याभिप्रायोऽविभूषाभूषिते प्रायश्चित्तं भवति ।

गाहा-

वितियपदं गेलण्णे, असती अच्छाणसंजमभए वा ।
उवहीसरीरतेणगे, पडिणीए आणमादीणि ॥ १०५ ॥

अणेसि मंमगाणं अन्नावे चित्तविचित्ताऽऽदि गेण्हंति।" नि०चू० ५उ०सूत्र०। प्रव०।(दण्डपञ्चकं 'दंमपणग' शब्देऽनुपदमेव वक्ष्यते) चतुर्हस्ते (स० ४ समo) धनुःपर्य्याये मानभेदे, अनु०। ज०। ज्यो०। कुक्षिद्वयनिष्पन्नो दण्डः । अनु० । दण्ड इव दण्डः। ऊर्ध्वार्ध आयते शरीरबाहुल्ये जीवप्रदेशकर्मपुद्गलसमूहे, आ० १ श्रु० १ अ० । आ० चू० । ("पढमे समये दंडं करेइ।" इति 'केवलिसमुद्घात' शब्दे तृतीयभागे ६६३ पृष्ठे व्याख्यातम्)

दंडकिरिया-दण्डक्रिया-स्त्री० । सर्वविषनिवारिण्यां विद्यायाम्, आव० ४ अ० ।

दंडखाय-दण्डखात-न० । वाराणसीस्थे तीर्थभेदे, यत्र भव्यपुष्कराऽऽवर्तकः पूज्यते । ती० ४३ कल्प ।

दंडग-दण्डक-पुं० । साधूपकरणे, सूत्र० २ श्रु० २ अ० । पादप्रोञ्छनके, जीत० । ध० । बृ० । "अरिहंतचेइआणं" इत्यादौ चैत्यवन्दनस्तवे, ध० २ अधि० । वाक्यपद्धतौ, स्था० १ ठा०("चउवीसदंडय" शब्दे तृतीयभागे १०५८ पृष्ठे व्याख्यातम्) वेत्रलतायाम्, ओघ० । चतुर्विंशतिदण्डकमध्ये भवनद्वीपानां दण्डकदशकप्रोक्तमपरेषां व्यन्तराऽऽदिकानां दण्डक एकैकः प्रोक्तस्तत्र किं कारणमिति प्रश्ने, उत्तरम्-अत्र सूत्रकृतां विवक्षैव प्रमाणमिति । ७० प्र० । सेन० १ उल्ला० ।

दंडगथुइजुगल-दण्डकस्तुतियुगल-न० । दण्डकश्च " अरहंतचेइआणं " इत्यादि, स्तुतिश्च प्रतीता, तयोर्युगलं युग्मम्, पते एव वा युगलं, दण्डकस्तुतियुगलम् । स्वनामख्याते स्तुतियुगले, पञ्चा० २ विव० ।

दंडगमई-दण्डकमयी-स्त्री० । दण्डको वंशवेत्राऽऽदिमयी यष्टिस्तैर्निर्वृत्तायां चिलिमिलिकायाम्, बृ० १ उ० । नि० चू० ।

दंडगराय-दण्डकराज-पुं० । जनस्थानराजे, यो हि शुक्रस्य दुहितुर्देवजान्याः शीलं भञ्जयन् शप्तः सन् सराज्यः क्षारतां प्राप्तः । ती० २७ कल्प ।

दंडगुरुय-दण्डगुरुक-पुं० । दण्डेन गुरुको दण्डगुरुकः । यस्य महान् दण्डो भवति अल्पो दण्डेन गुरु भवति । तस्मिन्, सूत्र०२ श्रु० २ अ० ।

दंडणायग-दण्डनायक-पुं० । तन्त्रपालके, राष्ट्ररक्षके, ज्ञा० १ श्रु० १ अ० । रा० । औ० । भ० । चूपाले, स्वदेशचिन्ताकर्तरि च । कल्प० ३ क्षण ।

दंडणिक्खेव-दण्डनिक्षेप-पुं० । दण्डः प्राणिपीडालक्षणः, तस्य निक्षेपः परित्यागः । संयमे, आचा० २ श्रु० १ चू० १ अ० १ उ० ।

दंडणीइ-दण्डनीति-स्त्री० । दण्डनं दण्डः परिधीनामनुशासनं, तत्र तस्य वा स एव नीतिर्नयो दण्डनीतिः । स्था० ७ ठा० । दण्डेनोपलक्षितायां नीतौ, स्था० ९ ठा० । ति० । आ० म० । कल्प० । आ० चू० । (कस्य कुलकरस्य कीदृशी दण्डनीतिरिति 'कुलगर' शब्दे तृतीयभागे ५९३ पृष्ठे उक्तम्)

दंडतयविरइ-दण्डत्रयविरति-स्त्री० । दण्ड्यते चारित्रैश्वर्य्यापहारतोऽसारीक्रियते एभिरात्मेति दण्डा दुष्प्रयुक्तमनोवाक्कायाः, तेषां त्रयं तस्य विरतिरशुभप्रवृत्तिनिरोधः । दुष्प्रयुक्तमनोवाक्कायत्रयाऽशुभप्रवृत्तिनिरोधे, ध० ३ अधि० ।

दंडदारु-दण्डदारु-न० । ब्रह्मचारिणामग्नेर्दक्षिणतः स्थाप्ये सप्ताङ्गानामन्यतमेऽङ्गे, ज० ११ श० ३ उ० ।

दंडपणग-दण्डपञ्चक-न० । यष्ट्यादिदण्डपञ्चके, प्रव० ।

लट्ठी तहा विलट्ठी, दंमो अ विदंमओ अ नाली अ ।
भणिअं दंमयपणगं, वक्खाणमिणं भवे तस्स ॥६७६॥

यष्टिः, तथा-वियष्टिः, तथा-दण्डः, तथा-विदण्डः, तथा-नालिका, एतद्दण्डपञ्चकं भणितं तीर्थकरगणधरैः, तस्य च दण्डपञ्चकस्येदं वक्ष्यमाणरूपं व्याख्यानं भवेत् ।

एतदेवाऽऽह-

लट्ठी आयपमाणा, विलट्ठि चउरंगुलेण परिहीणा ।
दंमो बाहुपमाणो, विदंडओ कक्खमेत्तओ ॥ ६७७ ॥

" लट्ठी " इत्यादि । यष्टिरात्मप्रमाणः, सार्द्धहस्तत्रयमानो वियष्टिर्यष्टेः सकाशाच्चतुर्भिरङ्गुलैः परिहीनो न्यूनो भवति, दण्डो बाहुप्रमाणः स्कन्धप्रदेशप्रमाणः, विदण्डः कक्षामात्रः कक्षाप्रमाणः ।

लट्ठीए चउरंगुल-समूसिया दंमपंचगे नाली ।
नइपमुहजलुत्तारे, तीए थग्गिज्जए सलिलं ॥ ६७८ ॥

यष्टेः सकाशात् चतुरङ्गुलसमुच्छ्रिता आत्मप्रमाणाच्चतुर्भिरङ्गुलैः अतिरिक्ता, षोडशाङ्गुलाधिकहस्तत्रयमानेत्यर्थः। दण्डपञ्चके दण्डपञ्चकमध्ये नाली नाम दण्डपञ्चमक इति । इदानीमेतेषां पञ्चानामपि दण्डानां प्रयोजनं प्रतिपिपादयिषुरानुपूर्व्या अपि व्याख्याऽङ्गत्वात्प्रथमं नालिकायाः प्रयोजनमाह-नदीप्रमुखजलोत्तारे नदीह्रदाऽऽदिकमुत्तरीतुमनोर्निर्मुनिर्निस्तया नालिकया स्ताध्यते सलिलमिदं गाधमगाधं वा इति परिभीयते ।

अथ यष्ट्यादीनां प्रयोजनमाह-

वज्जइ लट्ठीए जव-णिआ विलट्ठीए कत्थइ दुवारं ।
घट्टिज्जए उवस्सय-तयणं तेणाइरक्खट्ठा ॥ ६७९ ॥

"वज्जइ" इत्यादि । यष्ट्या यष्टिदण्डकेन उपाश्रये भोजनाऽऽदिवेलायां सागारिकाऽऽदिरक्षणार्थं यवनिका तिरस्करिणी बध्यते, तथा-वियष्ट्या वियष्टिदण्डकेन कुत्राऽपि प्रत्यन्तग्रामाऽऽदौ तस्कराऽऽदिरक्षणार्थमुपाश्रयसत्कं द्वारं घट्यते आदन्यते, येन द्वाटारभ्रवणात् तस्करशुनकाऽऽदयो नश्यन्तीति ।

उउबद्धम्मि ज दंमो, विदंडओ घिप्पए वरिसकाले ।
जं सो बहुओ निज्जइ, कप्पंतरिओ जलुज्जयणं ॥६८०॥

तथा ऋतुबद्धे काले निष्क्रान्तमणाऽऽदिवेलायां दण्डको गृह्यते, तेन हि प्रतिष्ठानां द्विपदानां मनुष्याऽऽदीनां, चतुष्पदानां गवाश्वाऽऽदीनां, बहुपदानां शुनकाऽऽदीनां निवारणं क्रियते, दुर्गस्थानेषु च व्याघ्रचौराऽऽदिजये प्रहरणं भवति, वृद्धस्य च अवष्टम्भनहेतुर्भवतीत्यादिप्रयोजनम् ।

तथा वर्षाकाले विदण्डको गृह्यते, यद् यस्मात् लघुको भवति, ततः कल्पान्तरितः कल्पस्याभ्यन्तरे कृतः सुखेनैतद्गृह्यते जलभयेन, यथाऽप्कायेन न स्पृश्यत इति ॥ ६७० ॥

इदानीमेतेषां दण्डानां शुभाशुभस्वरूपप्रतिपादनायाऽऽह-

विसमाइ वङ्कमाई, दस य पव्वाइ एगवन्नाइ ।
दंडेसु अपोल्लाई, सुहाइँ सेसाइँ असुहाइं ॥ ६७१ ॥

पूर्वोक्तेषु पञ्चसु दण्डकेषु,पर्वाणि ग्रन्थिमध्यानि, एवंविधानि द्रव्याणि भवन्तीति सम्बन्धः। तत्र विषमाणि एकत्रिपञ्चसप्तनवरूपाणि, तथा दश च दशसंख्यानि । तथा वङ्कमानानि जपर्युपरि प्रवर्द्धमानानि। तथा एकवर्णानि न पुनश्चित्रवर्णकानि । तथा-(अपोल्लाइ त्ति) अशुषिराणि,निबिडानीत्यर्थः, एवंविधविशेषणविशिष्टपर्वोपेताः स्निग्धवर्णा मसृणा वर्तुलावर्तुलाश्च दण्डका यतिजनस्य प्रशस्ता इति भावः । (सेसाइं असुहाइं ति) शेषाणि पूर्वोक्तविपरीतस्वरूपाणि, पर्वाणि अशुभान्यप्रशस्तानीति । एकाऽऽदिपर्वणां च शुभाशुभफलमित्थमोघनिर्युक्तावुक्तम् । यथा-

" एगपव्वं पसंसंति, दुपव्वा कलहकारिका ।
तिपव्वा लाभसंपन्ना, चउपव्वा मारणंतिया ॥ १ ॥
पंचपव्वा उ जा लट्ठी, पंथे कलहनिवारिणी ।
छप्पव्वाए य आयंको, सत्तपव्वा निरोगिया ॥ २ ॥
अट्ठपव्वा असंपत्ती, नवपव्वा जसकारिया ।
दसपव्वा उ जा लट्ठी, तंहियं सव्वसंपई ॥ ३ ॥" इति ।
प्रव० ८१ द्वार । पं० भा० ।

जे भिक्खू दंडगं वा लट्ठियाअवलेहणियं वा वेणुसइयं वा सयमेव परिघट्टइ वा,संठवेइ वा,जम्माइवेएइ वा,परिघट्टंतं वा संठवंतं वा जम्माइवेयंतं वा साइज्जइ ॥ ३५ ॥

इदमपि प्रथमोद्देशकवद्वक्तव्यम् ।

गाहा-

दंडग विदंडए वा, लट्ठि विलट्ठी य तिविध तिविधा तु ।
वेणुमय वेत्त दारुय, बहु अप्प अहाकडे चेव ॥ १७० ॥
नि० चू० २ उ० ।

दंडपरिहार--दण्डपरिहार--पुं० । महत्यां जीर्णकम्बलिकायाम् बृ० १ उ० ।

दंडपह--दण्डपथ--पुं० । गोदण्डकमार्गे, सूत्र० ।

अंधे व से दंडपहं गहाय,
अविओसिए घासति पावकम्मी । (५)

यथा ह्यन्धश्चक्षुर्विकलो दण्डपथं गोदण्डकमार्गं प्रमुखोज्ज्वलं गृहीत्वाऽऽश्रित्य व्रजन् सम्यगकोविदतया घृष्यते कण्टकश्वापदाऽऽदिभिः पीड्यते, एवं केवललिङ्गधार्यनुपशान्तक्रोधः कर्कशभाण्यधिकरणोद्दीपकस्तथा । (अविओसिए त्ति) अनुपशान्तद्वन्द्वः पापमनार्यं कर्मानुष्ठानं यस्याऽसौ पापकर्मा, घृष्यते चतुर्गतिके संसारे यातनास्थानगतः पौनःपुन्येन पीड्यत इति ॥५॥ सूत्र०१ श्रु०१३ अ०।

दंडपासि(ण्)-दण्डपार्श्विन्-पुं०।दण्डकस्य पार्श्वे दण्डकपार्श्वे, तद्विद्यते यस्याऽसौ दण्डपार्श्वी। स्वल्पतया स्तोकापराधेऽपि कुप्यति दण्डं च पातयति यः तस्मिन्, दशा० ६ अ०। सूत्र० ।

दंडपुंछणय--दण्डपुञ्छनक--न० । दण्डयुक्तायां संमार्जन्याम्, जं० ५ वक्ष० । सणकहस्तकेशरपर्णाऽऽदिशलाकासमुदाये च, आ० म० १ अ० १ खण्ड ।

दंडपुरक्कम--दण्डपुरस्कृत--पुं० । सदा पुरस्कृतदण्डे, दशा० ६ अ० । सूत्र० ।

दंडप्पयार--दण्डप्रकार--पुं० । आज्ञाविशेषे, स० ।

दण्डप्रचार--पुं० । सैन्यविचरणे, स० ।

दंडभी--दण्डभी--स्त्री० । दण्डं जीवकर्मसमारम्भं मृषावादाऽऽदिकं, दण्डाद्भिेतीति दण्डभीः । दण्डभीते, आचा० १ श्रु० ८ अ० १ उ० ।

दंडमाइ-दण्डाऽऽदि-पुं० । मल्लानां धरणिपाताऽऽद्युभयाङ्गयुद्धप्रभृतिषु, पिं० ।

दंडय--दण्डक--पुं० । ' दंडग ' शब्दार्थे, सूत्र० २ श्रु० २ अ० ।

दंडरयण--दण्डरत्न--न० । रत्नविशेषे, आ० चू० १ अ० । "....दंडरयणं परामुसइ । तए णं भवे दंडरयणं रयणपंचसइयं वइरसारमइयं विणासणं सव्वसत्तूसेन्नाणं संघावारेण खइयस्स गुहादरीविसमपव्वारगिरिपवाताणं समीकरणं संतिकरणं सुभकरणं रन्नो हिययइच्छितमणोरहपूरगं दिव्वमप्पडिहतं दंडरयणं गहाय सत्तट्ठपदे पच्चोसक्कइ ।" आ० चू० १ अ० । स्था० । प्रज्ञा० ।

दंडरुइ--दण्डरुचि--पुं० । " एगंतदंडरुइणो । " हिंसनश्रद्धे, प्रश्न० ३ आश्र० द्वार ।

दंडलक्खण--दण्डलक्षण--न० । दण्डस्वरूपनिरूपणे, जं० ।

दण्डलक्षणम्-

" यष्टातपत्राङ्कुशवेत्रचाप-
वितानकुन्तध्वजचामराणाम् ।
व्यापाततश्चामधुकृष्णवर्ण-
कलाक्षमेणैव हिताय दण्डाः (?) ॥ १ ॥
मन्त्रि१चू२धन३कुल४क्षयावहा
रोग५मृत्यु६जननाश्च पर्वभिः ।
द्व्यादिभिर्द्विकविवर्द्धितैः क्रमा-
द्वारशान्तविरतैः समैः फलम् ॥ २ ॥
यात्राप्रसिद्धिरद्विषतां विनाशो २,
ज्ञात्राः प्रभूताः ३ वसुधा४ऽऽगमश्च ।
वृद्धिः ५ पशूनामभिवाञ्छितार्थः ६,
व्यादिष्वयुग्मेषु तदीश्वराणाम् ॥३॥" जं० २ वक्ष० । ज्ञा० । सूत्र० । औ० । स० । (अत्र विशेषो ' लट्ठि ' शब्दे वक्ष्यः)

दंडलतिय-दण्डलातिक-पुं०। दण्डो गृहीतो येन स दण्डलातः, सुखाऽऽदिदर्शनाद् निष्ठान्तस्य परनिपातः । दण्डलात एव दण्डलातिकः (प्राकृतत्वात्) स्वार्थिक इकप्रत्ययः । यथा-पृथिवीकायिक इत्यत्र। गृहीतदण्डे राज्ञि, स्था० १ उ० ।

दंडवइ--दण्डपति--पुं० । यः पुनस्तं दण्डमुद्गमयति तस्मिन्, बृ० २ उ० ।

दंडविज्जा–दण्डविद्या–स्त्री० । वंशदण्डाऽऽदिपर्वसंख्याफलकथने, उत्त० १५ अ० ।

दंडवीरिय–दण्डवीर्य–पुं० । भरतचक्रवर्तिवंशोद्भवे भरतात्सप्तमे स्वनामख्याते नृपे, स्था० ८ ठा० । आव० । आ० चू० ।

दंडसत्थपरिजुण्ण–दण्डशस्त्रपरिजीर्ण–पुं० । दण्डो वेत्रदण्डाऽऽदयः, शस्त्राणि खड्गाऽऽदीनि, ताभ्यां परिजीर्णे समन्ततो दुर्बलभावमापादिते, दश० ६ अ० २ उ० ।

दंडसमायाण–दण्डसमादान–न० । समादीयते कर्म एभिरिति समादानानि कर्मोपादानहेतवः, दण्डा एव मनोदण्डाऽऽदयः प्राणव्यपरोपणाध्यवसायरूपाः समादानानि दण्डसमादानानि। कर्मोपादानहेतुषु प्राणव्यपरोपणाध्यवसायरूपेषु मनोदण्डाऽऽदिषु, जी० ३ प्रति० २ उ० । दण्डयतीति दण्डः पापोपादानसंकल्पः, तस्य समादाने ग्रहणे, सूत्र० २ श्रु० २ अ० । प्रति० । आचा० । आ० चू० ।

दंडायइय–दण्डाऽऽयतिक–पुं० । दण्डस्येवाऽऽयतिर्दीर्घत्वं पादप्रसारणेन यस्यास्ति स दण्डाऽऽयतिकः । स्था० ५ ठा० १ उ० । प्रसारितदेहे, स्था० ७ ठा० । औ० । सूत्र० ।

दंडायत–दण्डाऽऽयत–पुं० । दण्डवद्यष्टिवदायतो दीर्घो दण्डाऽऽयतः । भूम्यस्ताऽऽयतशरीरे, पञ्चा० १८ विव० । सूत्र० । प्रव० ।

दंडारक्खिग–दण्डाऽऽरक्षिक–पुं० । दण्डधरे, नि० चू० । " दंडधरो दंडाऽऽरक्खिगो दंडगहियमाहत्थो सव्वतो अंतेउरं रक्खइ, रण्णो वयणेण इत्थिं पुरिसं वा अंतेपुरं णीजेति, पवेसेति वा । एस दंडाऽऽरक्खिगो । " नि० चू० ६ उ० ।

दंडासणिय–दण्डाऽऽसनिक–पुं० । दण्डस्येवाऽऽयतं पादप्रसारणेन तद्दीर्घं यदासनं तद्दण्डाऽऽसनं,तदस्यास्तीति दण्डाऽऽसनिकः । आसनविशेषाभिग्रहवति, बृ० ५ उ० ।

दंडि (ण्)–दण्डिन्–पुं० । दण्डधारिणि, जं० ३ वक्ष० । औ० । दशा० । सूत्रकर्तरि, दे० ना० ५ वर्ग ३३ गाथा ।

दंडिय–दण्डिक–पुं० । राजनि, व्य० ४ उ० । ध० । करणपतौ च । व्य० १ उ० । स्था० ।

दंडिया–दण्डिका–स्त्री० । लेखोपरि राजमुद्रायाम, बृ० १ उ० ।

दंडुक्कड–दण्डोत्कट–पुं० । दण्डस्य आज्ञा,अपराधिदण्डनं वा, सैन्यं वा उत्कटः प्रकृष्टो यस्य, तेन वोत्कटो यः स दण्डोत्कटः । उत्कटभेदे, स्था० ५ ठा० ३ उ० ।

दण्डोत्कल–पुं० । दण्डेन उत्कलति वृद्धिं याति यः स दण्डोत्कलः । उत्कटभेदे, स्था० ५ ठा० ३ उ० ।

दंत-दन्त-पुं० । दशने, "दशनानि च कुन्दकलिकाः स्युः ।" है० । आचा० । (साधोर्दन्तघर्षणाऽऽचारनिषेधः ' अणायार ' शब्दे प्रथमभागे ३१२ पृष्ठे उक्तः)

दान्त–पुं० । दाम्यतीन्द्रियाऽऽदिदमं करोतीति दान्तः । दश० १० अ० । पापेभ्य उपरते, व्य० १० उ० । इन्द्रियनोइन्द्रियदमने, न० । ज्ञा० १ श्रु० १४ अ० । सूत्र० । जितेन्द्रिये, ज्ञा० १ श्रु० १४ अ० । सूत्र० । दश० । प्रश्न० । उत्त० । व्य० । आचा० । ग० । क्रोधाऽऽदिरहिते, उत्त० २ अ० । भ० । उपशान्ते, सूत्र० १ श्रु० ६ अ० । आ० म० । इन्द्रियजयसम्पन्ने, व्य० १ उ० । समर्थे, स्था० ७ ठा० । वश्येन्द्रिये, धर्मध्यायिनि च । सूत्र० १ श्रु० ११ अ० । पर्वतैकदेशे, दे० ना० ५ वर्ग ३३ गाथा ।

दंतकम्म–दन्तकर्म–न० । दन्तपुत्तलिकाऽऽदिषु, आचा० २ श्रु० २ चू० ४ अ० ।

दंतकलह–दन्तकलह–पुं० । वाग्युद्धे, " अदन्तकलहो यत्र, तत्र शक्र ! वसाम्यहम् । " सूत्र० १ श्रु० ३ अ० २ उ० ।

दंतकुंभी–दन्तकुण्डी–स्त्री० । हट्टनाजने, नकारोऽलाक्षणिकः। तं० ।

दंतकुंभी–दन्तकुटी–स्त्री० । दंष्ट्रासु, तं० ।

दंतणिवाय–दन्तनिपात–पुं० । दशनच्छेद्यरूपेऽसंप्राप्तकामे, द्र० ६ अ० ।

दंतधावण–दन्तधावन–न० । दन्तकाष्ठे, नि० चू० ३ उ० । (दन्तधावनविधिः ' एहाण ' शब्देऽस्मिन्नेव भागे २१६३ पृष्ठे गतः)

दंतपक्खालण–दन्तप्रक्षालन–न० । दन्ताः प्रक्षाल्यन्ते अपगतमलाः क्रियन्ते येन तद्दन्तप्रक्षालनम् । दन्तकाष्ठे, सूत्र० १ श्रु० ४ अ० २ उ० । आचा० । अनु० ।

दंतपहावण–दन्तप्रधावन–न० । अङ्गुल्यादिना क्षालने, द्र० ३ अ० ।

दंतपाय–दन्तपात्र–न० । दन्तनिर्मिते पात्रे, आचा० २ श्रु० १ चू० ६ अ० १ उ० ।

दंतपुर–दन्तपुर–स्वनामख्याते दन्तवक्रस्य राज्ञो नगरे, व्य० १ उ० । वक्ष० । आव० । आ० क० । नि० चू० । आ० चू० ।

दंतमणि–दन्तमणि–पुं० । प्रधानदन्ते, हस्तिप्रभृतीनां दन्तजे मणौ च । प्रश्न० ५ संव० द्वार ।

दंतमल्ल–दन्तमल्ल–पुं० । दन्तकिट्टे, नि० चू० ३ उ० ।

दंतमलमइल–दन्तमलमलिन–न० । दन्तमलमलीमसे, तं० ।

दंतमाल–दन्तमाल–पुं० । द्रुमजातिविशेषे, जं० २ वक्ष० ।

दंतवक्क–दन्तवक्र–पुं० । दन्तपुरराजे, यद्भार्यायाः सत्यवत्याः दन्तमयसौधकरणे दोहदो जातः,तत्रसर एव धनमित्रवणिग्भार्यायाः धनश्रियास्तथैव दोहदं पूरयितुकामस्य दृढमित्रस्य बन्धमात्रस्य सुमोचयिषुर्धनमित्रो यथातथं वदन मुक्तो राजकुलात् । व्य० १ उ० । नि० चू० । आव० । उत्त० । आ० चू० । (इति आलोचनायां ' पच्चिस ' शब्दे व्याख्यास्यते)

दंत (पा) वण–दन्तपावन–न० । दन्ताः पूयन्ते पवित्रीक्रियन्ते येन काष्ठखण्डेन तद् दन्तपावनम् । प्रव० ४ द्वार । दन्तमलापकर्षणकाष्ठे, उपा० १ अ० । दश० । दशननिर्घर्षनकाष्ठे यष्टिमध्वादौ, पञ्चा० ५ विव० । स्था० । दशं० ।

दंत(पा)वणविधि–दन्तपावनविधि–पुं० दन्तमलापकर्षणविधौ, उपा० १ अ० ('आणंद' शब्दे द्वितीयभागे १०६ पृष्ठे विस्तरः)

दंतवाणिज्ज–दन्तवाणिज्य–न० दन्ताऽऽश्रितं दन्तविषयं वाणिज्यम । दन्तक्रयविक्रययोः, ध० २ अधि० । यत्र प्रयमत एव पुलिन्दानां दन्ताऽऽनयननिमित्तं मूल्यं ददाति, आकरे वा गत्वा स्वयं क्रीणाति,ततस्ते वनाऽऽदौ गत्वा तदर्थं घ्नन्ति,तद्विक्रयपूर्वं यदा-

जीवनं तस्मिन्, प्रव० ६ द्वार । ध० र० । आव० । आ० चू० । आ० । पञ्चा० । भ० ।

दंतवेयणा–दन्तवेदना–स्त्री० । दन्तपीडायाम्, जी० ३ प्रति० ४ उ० ।

दंतसेढी–दन्तश्रेणी–स्त्री० । दशनपङ्क्तौ, जं० २ वक्ष० । औ० ।

दंतसेणी–दन्तश्रेणी–स्त्री० । 'दंतसेढी' शब्दार्थे, जं० २ वक्ष० ।

दंतसोहणग–दन्तशोधनक–न० । दन्तानां मलनिःसारणसाधने उपकरणभेदे, पं० भा० ।

पविरलदंतो थेरो, सेच्छड्डाऽऽदीणं तु दंतसग्गाणं ।
छेवाइअरतिसारिय–रक्खट्ठारोहसोहणयं ॥
अच्छाणमादिमुं चिय, पिप्पलतो विकरणट्ठ कंदाणं ।
माणाहिगवत्थादी–पगासमुहजाणकरणट्ठा ॥ पं० भा० ।

"दंतसोहणमाइस्स त्ति ।"(२७) मकारोऽलाक्षणिकः। अपिशब्दस्य गम्यमानत्वाद् दन्तशोधनाऽऽदेरप्यतितुच्छस्य, आस्तामन्यस्य । (२७) वक्ष० १६ भ० ।

दंतावय–दन्ताऽऽमय–पुं० । दन्तरोगे, नि० चू० ३ उ० ।

दंतार–दन्तकार–पुं० । दन्तशिल्पिनि, प्रज्ञा० १ पद ।

दंति(ण्)–दन्तिन्–पुं० । हस्तिनि, आ० चू० १ अ० । अनन्तजीववनस्पतिभेदे, प्रज्ञा० १ पद ।

दंतिअ–पुं० । देशी–शासके, दे० ना० ५ वर्ग ३५ गाथा ।

दंतिंदिय-दान्तेन्द्रिय-त्रि० जितेन्द्रिये, पञ्चा० १७ विव० ।

दंतिक-दन्तिक-न० । मोदकमण्डकाशीकर्षादिकं यद्बहुविधं दन्तखाद्यकं तस्मिन्, बृ० १ उ० । तन्दुलचूर्णे, बृ० १ उ० । नि० चू० । दर्श० । " मंसनिवित्ति काउं, सेवइ दंतिकयंति । " पं० व० १ द्वार ।

दंतिकचुण्ण-दन्तिकचूर्ण-पुं० । तन्दुलश्लोट्टे, तन्दुलचूर्णमोदकाऽऽदिखाद्यकवन्ते, "दंतिकचुण्णं वा ।" दन्तिकचूर्णस्तन्दुललोट्टः । यद्वा-दन्तिकं तन्दुलचूर्णं, चूर्णं तु मोदकाऽऽदिखाद्यकचूर्णम् । बृ० १ उ० ।

दंतिया-दन्तिका–स्त्री० । गुल्मभेदे, प्रज्ञा० १ पद ।

दंतिल्लिया-दन्तवती–स्त्री० । पत्रकाऽऽलयग्रामवास्तव्यस्य स्कन्दकनाम्नो ग्रामकूटपुत्रस्य दास्याम्, आ० चू० १ अ० । आ० म० ।

दंतुक्खलिय–दन्तोत्खलिक–पुं० । फलभोजिषु, नि० १ चू० ३ वर्ग ३ अ० । औ० । भ० ।

दंतुट्ठ–दन्तोष्ठ–पुं० । दन्तानामोष्ठयोश्च समाहारे, स्था० ७ ठा० ।

दंतुर–दन्तुर–त्रि० । उन्नता दन्ताः सन्त्यस्य, दन्त-उरच् । उन्नतदन्तयुक्ते, उन्नताऽऽनते विषमस्थाने च । वाच० । आ० म० ।

दंद–द्वन्द्व–पुं० । शीतोष्णाऽऽदिषु, द्वा० २२ द्वा० । समुच्चयप्रधाने समासभेदे, अनु० ।

से किं तं दंदे ? । दंदे–दन्ताश्च ओष्ठौ च दन्तोष्ठम्, स्तनौ च उदरं च स्तनोदरम्, वस्त्रं च पात्रं च वस्त्रपात्रम्, अश्वश्च महिषश्च अश्वमहिषम्, अहिश्च नकुलश्च अहिनकुलम् । सेत्तं दंदे ।

तत्र समुच्चयप्रधानो द्वन्द्वः । दन्ताश्चौष्ठौ च दन्तोष्ठम्, स्तनौ च उदरं च स्तनोदरमिति प्राण्यङ्गत्वात् समाहारः । वस्त्रपात्रमित्यादौ त्वप्राणिजातित्वाद्, अश्वमहिषमित्यादौ पुनः शाश्वतिकवैरित्वात् । एवमन्यान्यप्युदाहरणानि भावनीयानि । अनु० ।

दंभ–दम्भ–पुं० । मायया परवञ्चने, सूत्र० २ श्रु० २ अ० । स० । स्त्रीकलाभेदे, कल्प० ७ क्षण ।

दंभग–दम्भक–न० । यैरग्निप्रतापितैर्लोहशलाकाभिः परशरीरे अङ्गा उत्पाद्यन्ते तेषु, विपा० १ श्रु० ६ अ० । वञ्चने च । प्रव० २ द्वार ।

दंभबहुल–दम्भबहुल–त्रि० । दम्भो मायया परवञ्चनं तदुत्कटे, सूत्र० २ श्रु० २ अ० ।

दंभुब्भव–दम्भोद्भव–पुं० । स्वनामख्याते राजनि, यो हि मदाऽभिननाश । ध० १ अधि० ।

दंभोलि–दम्भोलि–पुं० । दम्भयति क्षेदयति । दम्भ-ओलिः । वाच० । वज्रे, अस्त्रे, प्रति० । अष्ट० ।

दंस–दृश्–धा० । चाक्षुषज्ञानप्रवर्तने, " दृशेर्दांव-दंस-दक्खवाः " ॥ ८ । ४ । ३२ ॥ इति दृशेरन्तस्य एते त्रय आदेशाः स्युः । "दावइ । दंसइ । दक्खवइ । दरिसइ ।" दर्शयति । प्रा० ४ पाद ।

दंश–पुं० । दन्द् श-अच् । " शषोः सः " ॥ ८ । १ । २६० ॥ इति शकारस्य सकारः । दंसः । प्रा० १ पाद । वनमक्षिकायाम्, आचा० १ श्रु० ६ अ० ३ उ० । आव० । उत्त० । दन्द्श करणाऽऽदौ घञ् । कर्मणि, मर्मणि, दोषे, खण्डने, सर्पाऽऽघाते, दन्ते च । वाच० ।

दर्श–पुं० । दर्शनं दर्शः । सम्यक्त्वे, आ० म० १ अ० १ खण्ड ।

दंसण–दर्शन–न० । दृश्यन्ते अक्षीयन्ते ज्ञायन्ते वा जीवाऽऽद्यः पदार्था अनेनास्मादस्मिन्वेति दर्शनम् । दृश्–ल्युट् । "र्शः–षे–तसवज्रे वा " ॥ ८ । २ । १०५ ॥ इति र्शस्य संयुक्तस्यान्त्यव्यञ्जनात् पूर्वमिकारो वा । "दरिसणं । दंसणं" । प्रा० २ पाद । दृष्टिर्वा दर्शनम् । सम्यक्त्वाऽपरपर्याये, दर्शनमोहनीयकर्माऽऽद्याविर्भूते तत्त्वश्रद्धानरूपे आत्मपरिणामे, " एगे दंसणे । " स्था० १ ठा० । तच्चोपाधिभेदादनेकविधमपि श्रद्धानसामान्यादेकम्, एकजीवस्य चैकदा एकस्यैव भावादिति । नन्वबोधसामान्याद् ज्ञानसम्यक्त्वयोः कः प्रतिविशेषः ?, उच्यते-रुचिः सम्यक्त्वं, रुचिकारणं तु ज्ञानम् । यथोक्तम्–"नाणमवायविईओ, दंसणमिट्ठं जहोग्गहेहाओ (?) । तह तत्तरुई सम्मं, रोएइ जेण तं नाणं ॥ १ ॥ " स्था० १ ठा० । दर्श० । आचा० । सूत्र० । उत्त० । ज्ञा० । औ० । ध० र० । आव० । ध० । दं० । संथा० । द्वा० । प्र० । प्रव० । आ० म० । स० । आतु० । ओघ० । नं० ।

सम्यक्मिथ्याभेदाद् द्विविधं दर्शनम्-

दुविहे दंसणे पण्णत्ते । तं जहा–सम्मद्दंसणे चेव, मिच्छादंसणे चेव ।

" दुविहे दंसणे " इत्यादि सप्त सूत्राणि सुगमान्येव । नवरं दृष्टिर्दर्शनं तत्त्वेषु रुचिः, तच्च सम्यगविपरीतं जिनोक्तानुसारि, तथा मिथ्या विपरीतमिति ।

सम्यग्दर्शनभेदमाह-

सम्मद्दंसणे दुविहे पन्नत्ते । तं जहा-णिसग्गसम्मद्दंसणे चेव, अभिगमसम्मद्दंसणे चेव ।

णिसग्गसम्मद्दंसणे दुविहे पन्नत्ते । तं जहा-पडिवाई चेव, अपडिवाई चेव । अभिगमसम्मद्दंसणे दुविहे पन्नत्ते । तं जहा-पडिवाई चेव, अपडिवाई चेव ।

(सम्मद्दंसणे इत्यादि) निसर्गः स्वभावोऽनुपदेश इत्यनर्थान्तरम् । अभिगमो गुरूपदेशाऽऽदिरिति, ताभ्यां यत्तत्तथा, क्रमेण मरुदेवीभरतवदिति । (निसग्गेत्यादि) प्रतिपतनशीलं प्रतिपाति सम्यग्दर्शनमौपशमिकं क्षायोपशमिकं वा प्रतिपाति क्षायिकं, तत्रैषां क्रमेण लक्षणम्-इहौपशमिकी श्रेणिमनुप्रविष्टस्यानन्तानुबन्धिनां दर्शनमोहनीयत्रयस्य चोपशमादौपशमिकं भवति, यो वाऽनादिमिथ्यादृष्टिरकृतसम्यक्त्वमिथ्यात्वमिश्राभिधानशुद्धाशुद्धोभयरूपमिथ्यात्वपुञ्जत्रिपुञ्जीक एवाऽक्षीणमिथ्यादर्शनोऽकृपक इत्यर्थः, सम्यक्त्वं प्रतिपद्यते, तस्यौपशमिकं भवतीति । कथम्?, इह यदस्य मिथ्यादर्शनमोहनीयमुदीर्णं तदनुभवेनैवोपक्षीणम्, अन्यच्च मन्दपरिणामतया नोदितम्, अतस्तदन्तर्मुहूर्त्तमात्रमुपशान्तमास्ते, विष्टम्भितोदयमित्यर्थः । तावन्तं कालमस्यौपशमिकसम्यक्त्वलाभ इति ।

आह च-

" उवसामगसेढिगय-स्स होति उवसामियं तु सम्मत्तं ।
जो वा अकयतिपुंजे, अखवियमिच्छो लहइ सम्मं ॥ १ ॥
खीणम्मि उदिण्णम्मी, अणुदिज्जंते य सेसमिच्छत्ते ।
अंतोमुहुत्तकालं, उवसमसम्मं लहइ जीवो ॥ २ ॥" इति ।

अन्तर्मुहूर्त्तमात्रकालत्वादेवास्य प्रतिपातित्वम् । यद्यानन्तानुबन्ध्युदये औपशमिकसम्यक्त्वात्प्रतिपततः सास्वादनमुच्यते तदौपशमिकमेव, तदपि च प्रतिपात्येव, जघन्यतः समयमात्रत्वात्, उत्कृष्टतस्तु षडावलिकमानत्वादस्येति । तथा इह यदस्य मिथ्यादर्शनदलिकमुदीर्णं तदुपक्षीणं, यच्चानुदीर्णं तदुपशान्तम्, उपशान्तं नाम-विष्टम्भितोदयमुपनीतमिथ्यात्वभावं च, तदिह क्षायोपशमस्वभावमनुभूयमानं क्षायोपशमिकमित्युच्यते । नन्वौपशमिकेऽपि यथा क्षयश्चोपशमश्च, तथेहापीति को ऽनयोर्विशेषः? उच्यते-अयमेव हि विशेषो-यदिह वेद्यते दलिकं, न तत्र, इह हि क्षायोपशमिके पूर्वशमितमनुसमयमुदेति वेद्यते क्षीयते च, औपशमिके तूदयविष्टम्भनमात्रमेव । आह च-" मिच्छत्ते जमुदिण्णं, तं खीणं अणुदियं च उवसंतं । मीसीभावपरिणयं, वेइज्जंतं खओवसमं ॥१॥" इति । एतदपि जघन्यतोऽन्तर्मुहूर्त्तस्थितिकत्वात्, उत्कर्षतः षट्षष्टिसागरोपमस्थितिकत्वाच्च प्रतिपातीति । यदपि च क्षपकस्य सम्यग्दर्शनदलिकचरमपुद्गलानुभवनरूपं वेदकमित्युच्यते, तदपि क्षायोपशमिकभेदत्वात् प्रतिपात्येवेति । तथा मिथ्यात्वसम्यग्मिथ्यात्वसम्यक्त्वमोहनीयत्रयात् क्षायिकमिति । आह च-"खीणे दंसणमोहे, तिविहम्मि वि नवविहाणजूयम्मि । निप्पच्चवायमउले, सम्मत्ते खाइयं होइ ॥१॥" इति । इदं तु क्षायिकत्वादेवाप्रतिपाति । अत एव सिद्धत्वेऽप्यनुवर्त्तते ।

मिच्छादंसणे दुविहे पन्नत्ते । तं जहा-अभिग्गहियमिच्छादंसणे चेव, अणभिग्गहियमिच्छादंसणे चेव । अभिग्गहियमिच्छादंसणे दुविहे पण्णत्ते । तं जहा-सपज्जवसिए चेव, अपज्जवसिए चेव । एवमणभिग्गहियमिच्छादंसणे वि ।

(मिच्छादंसणे इत्यादि) अभिग्रहः कुमतपरिग्रहः, स यत्राऽस्ति तदाभिग्रहिकं, तद्विपरीतमनभिग्रहिकमिति । (अभिग्गहियेत्यादि) आभिग्रहिकमिथ्यादर्शनं सपर्यवसितं सपर्यवसाने सम्यक्त्वप्राप्तौ, अपर्यवसितमभव्यस्य सम्यक्त्वाप्राप्तेः, तच्च मिथ्यात्वमात्रमप्यतीतकालतयाऽनुवृत्त्याऽऽभिग्रहिकमिति व्यपदिश्यते ॥ ६ ॥ अनाभिग्रहिकं भव्यस्य सपर्यवसितम्, इतरस्याऽपर्यवसितमिति । स्था० २ ठा० १ उ० । आ० म० । दर्शनं त्रिविधम् । तद्यथा-मिथ्यादर्शनं, सम्यग्मिथ्यादर्शनम्, सम्यग्दर्शनं च । आ० म० १ अ० १ खण्ड । दर्शनं मिथ्यात्वमिश्रसम्यक्त्वभेदात्त्रिविधम् । विशे० । क्षायिकक्षायोपशमिकौपशमिकभेदाद्दर्शनं त्रिविधम् । चक्षुरचक्षुरवधिकेवलदर्शनभेदाद्दर्शनं चतुर्धा । विशे० । औपशमिकसास्वादनक्षायोपशमिकक्षायिकभेदात्पञ्चविधम् । सूत्र० १ श्रु० ६ अ० । पं० भा० ।

दर्शनस्य सप्तविधत्वमाह-

सत्तविहे दंसणे पन्नत्ते । तं जहा-सम्मद्दंसणे, मिच्छद्दंसणे, सम्मामिच्छादंसणे, चक्खुद्दंसणे, अचक्खुद्दंसणे, ओहिदंसणे, केवलदंसणे ।

"दंसणे" इत्यादि सुगमम् । नवरं सम्यग्दर्शनं सम्यक्त्वम्, मिथ्यादर्शनं मिथ्यात्वं, सम्यग्मिथ्यादर्शनं मिश्रमिति । एतच्च त्रिविधमपि दर्शनमोहनीयभेदानां क्षयक्षयोपशमोदयेभ्यो जायते, तथाविधरुचिस्वभावं चेति । चक्षुर्दर्शनाऽऽदि तु दर्शनाऽऽवरणीयभेदचतुष्टयस्य यथासंभवं क्षयोपशमक्षयाभ्यां जायते, सामान्यग्रहणस्वभावं चेति । तदेवं श्रद्धानसामान्यग्रहणयोर्दर्शनशब्दवाच्यत्वाद्दर्शनं सप्तधोक्तमिति । अनन्तरं केवलदर्शनमुक्तं, तच्च छद्मस्थावस्थाया अनन्तरं भवतीति । स्था० ७ ठा० ।

अष्टविधत्वम्-

अट्ठविहे दंसणे पन्नत्ते । तं जहा-सम्मद्दंसणे, मिच्छद्दंसणे, सम्मामिच्छद्दंसणे, चक्खुद्दंसणे० जाव केवलदंसणे, सुविणदंसणे ।

"अट्ठविहे दंसणे" इत्यादि कण्ठ्यम् । केवलं स्वप्नदर्शनस्याचक्षुर्दर्शनान्तर्भावेऽपि सुप्तावस्थोपाधितो भेदो विवक्षित इति । स्था० ८ ठा० । पं० ना० । कारकरोचकदीपकभेदाद्वा दर्शनं त्रिविधम् । आतु० (एते भेदाः 'सम्मत्त' शब्दे स्फुटीभविष्यन्ति, सम्यक्त्वपर्यायत्वाद् दर्शनस्य, नवरमिह दर्शनाऽऽदिशब्दे छद्मस्थदर्शनवीतरागदर्शनभेदाः प्रदर्शयिष्यन्ते) श्रद्धानलक्षणे व्यवसाये, व्यवसायांशत्वात्तस्य । स्था० ३ ठा० ३ उ० । 'दृशिर्' प्रेक्षणे, दृश्यते सम्यक् परिज्ञायते सावद्यमनेनेति दर्शनम् । चारित्रे, अनेकार्थत्वाद्धातूनाम् । संथा० । सम्यक्त्वप्रज्ञापकशास्त्रे, आव० ४ अ० । स्था० । शास्त्रमात्रे, विशे० । दर्शनाविशेषके सूत्रे, व्य० १ उ० । बृ० । उत्त० । " गोविंदनिज्जुत्तिमादी दंसणं ।" नि० चू० ११ उ० । अभिप्राये, उपदेशे, आचा० १ श्रु० ३ अ० ४ उ० । दृश्यते सामान्यरूपेण वस्त्विति दर्शनम् । उत्त० ८ अ० । दृश्यते विलोक्यते वस्त्वनेनेति दर्शनम् । यद् वा-दृष्टि-

दर्शनम् । कर्म० ४ कर्म० । दर्शनाऽऽवरणकर्मक्षयोपशमाऽऽदिजे सामान्यमात्रग्रहणे, अनु० । स्था० ।

दंसणावरणिज्जे दुविहे पण्णत्ते । तं जहा–देसदंसणावरणिज्जे, सव्वदंसणावरणिज्जे ।

दर्शनं सामान्यार्थबोधरूपमाच्छादयतीति दर्शनाऽऽवरणीयम् । उक्तं च–"दंसणसीले जीवे, दंसणघायं करेइ जे कम्मं । तं पडिहारसमाणं, दंसणावरणं भवे जीवे ॥ १ ॥" (देस त्ति) देशदर्शनाऽऽवरणीयं, चक्षुरवधिदर्शनाऽऽवरणीयम् । सर्वदर्शनाऽऽवरणीयं तु निद्रापञ्चकं, केवलदर्शनाऽऽवरणीयं चेत्यर्थः। स्था० २ ठा० ४ उ० । सूत्र० । सामान्यविशेषाऽऽत्मके वस्तुनि, सामान्याऽऽत्मके बोधे, कर्म० ४ कर्म० । औ० । आचा० । नं० । निर्विशेषविशेषाणां ग्रहणे, आ० म० २ अ० । नं० । "पासइ त्ति दंसणं,जं सामन्नग्गहणं तं दंसणं, अणागारमित्यर्थः।" नं० । विशे० । ("जं सामण्णग्गहणं, दंसणमेयं विसेसियं नाणे ।" (सम्म० १ गा० २ काण्ड) इति द्रव्यपर्यायास्तिकनययोर्मतेन 'उवओग' शब्दे द्वितीयभागे ८६० पृष्ठे चिन्तितम्)

चक्खु अचक्खू ओही, केवलदंसण अणागारा । (१७)

चक्षुर्दर्शनाऽचक्षुर्दर्शनावधिदर्शनकेवलदर्शनरूपाणि चत्वारि दर्शनानि । तत्र चक्षुषा दर्शनं वस्तुसामान्यांशाऽऽत्मकं ग्रहणं चक्षुर्दर्शनम्, अचक्षुषा चक्षुर्वर्जशेषेन्द्रियचतुष्टयेन मनसा च यद्दर्शनं सामान्यांशाऽऽत्मकं ग्रहणं तदचक्षुर्दर्शनम्, अवधिना रूपिद्रव्यमर्यादया दर्शनं सामान्यांशग्रहणमवधिदर्शनम्, केवलेन संपूर्णवस्तुतत्त्वग्राहकबोधविशेषरूपेण यद्दर्शनं सामान्यांशग्रहणं तत्केवलदर्शनमिति । किंरूपाण्येतानि दर्शनानि?,अत आह–अनाकाराणि सामान्याऽऽकारयुक्तत्वे सत्यपि न विद्यते विशिष्टो व्यक्त आकारो येषु तान्यनाकाराणि । कर्म० ४ कर्म० । अष्ट० । पं० चू० । प्रव० । अवलोकने, पं० । पञ्चा० । आत्मनः प्रकटने, व्य० १ उ० ।

दंसणकप्प–दर्शनकल्प–पुं० । कल्पभेदे, पं० भा० ।

....., एत्तो वोच्चामि दंसणे कप्पं ।
सद्दहणलक्खणं तू, जिणोवदिट्ठेसु भावे तु ।
उवगतछक्कायस्सा, आयरियपरंपरागते अत्थे ।
आगाढकारणेसुं, सद्दहसु णिवेसणं तत्थ।
छक्काए सद्दहितं इण–मण्ण पुणो वि सद्दहेयव्वं ।
आगाढमणागाढे, आयरियव्वं तु जं तत्थ ।
दव्वे खेत्ते काले, भावे पुरिसे निमिच्छ असढाए ।
एतेहि कारणेहिं, सत्तविहं होइ आगाढं ।
एमादीया बुद्धी, एगुत्तरिया य होंति दव्वाणं ।
ओमत्थगपरिहाणी, दव्वागाढं वियाणाहि ।
जंपेति पुणो वेज्जो, सच्चित्तं दुल्लभं च दव्वं च।
अपमिहणंतो अत्थति, जदिसिउं जाव सो जाति ।
जाहे उदिट्ठाणी, ताहे ओमत्थहाणिए भणति ।
अम्ह करेमो जोगं, अलंमे एगस्स किं कुणिमो ?।
एवं तु हावयंता, खेत्तं कालं च भावमासज्ज ।
ता जूहंती जाव तु, लंभे जेसिं तु दव्वाणं ।
अह पुण भणेज्ज एवं, अवस्समेतेहिँ कज्जदव्वेहिं ।
एतं दव्वागाढं, तहिं जए पणगहाणीए ।
खेत्तागाढं इणमो, असती खेत्ताण मासजोग्गाणं ।
असिवं वा अन्नत्था, एदीवया होज्ज रुद्धा तु ।
आयरियादिअहारग, अहवा अन्नत्थ सावया होज्ज ।
अंतर जहिं च गम्मति, वाला तह तेण खुत्तियं वा वि ।
एतेहि कारणेहिं, खेत्तागाढम्मि परिसे पत्तो ।
अत्थंति असढभावा, एगक्खेत्ते वि जयणाए ।
कालस्स वा वि असती, वासावासे वियारणा णत्थि ।
एतेहि कारणेहिं, कालागाढं वियाणाहि ।
वासाजोग्गं खेत्तं, पडिलेहित्ता तु काइओ बहुए ।
वच्चंताण य अंतर–वासं तू णिवडितु पवत्तं ।
महरं चंडवरखेत्तं, ताहे तं चेव पुव्वखेत्तं तु ।
गंतू वसती वासं, समतीते वीतिदमरातं ।
अतिउक्कमं व दुक्खं, अप्पा वा वेदणाभए आसु ।
एतेहि कारणेहिं, भावागाढं वियाणाहि ।
अन्नुक्कमूलाऽऽदी, अहिमक्काई तु वेदणऽप्पा ।
तत्थऽगिताविणाऽऽदी, दाहच्छेदोवगाढाऽऽदी ।
जम्मि विणट्ठे गच्छ–स्स विणासो तह य णाणचरणाणं ।
एतेहि कारणेहिं, पुरिसागाढं वियाणाहि ।
तस्स तु सुद्धालंभे, जावज्जीवं पि होति सुद्धेणं ।
कायव्वं तू णियमा, पुरिसागाढं भवे एतं ।
जेण कुलं आपत्तं, तं पुरिसं आदरेण रक्खाहि ।
ण हु तुंबम्मि विणट्ठे, अरया साहारगा होंति ।
संजोगदिट्ठपाउग्गी, फासुगजवदेसणासु जो कुसलो ।
एतारिसस्स असती, णायव्व तिगिच्छमागाढं ॥
मज्जणतूलिविभासा, अरणे पाउरणए य पाणे य ।
केवलमियाण पदाणे, अन्नध वत्तो गिलाणो तु ॥
उज्जवसद्दावरहितो, अव्वत्ता वावि अहव असमत्था ।
एयऽसहायागाढं, तम्हा णु मुणी ण विहरेज्ज ॥
जावंति पवयणम्मी, पमिसेवा मूलमुत्तरगुणेसु ।
ता सत्तसु सुद्धेसुं, सुद्धमसुद्धा असुद्धेसु ॥
आगाढमणागाढे, एवं जं जत्थ होति करणिज्जं ।
तं तह सद्दहमाणे, दंसणकप्पो भवति एसो ॥ पं० भा० ।

इयाणिं दंसणकप्पो । तत्थ गाहा–(छक्काए) छक्कापसु विसुद्धगएसु इममन्नं सद्दहियव्वं,जो आयरियपरंपराए आगओ अत्थो, आगाढे अणागाढे य आयरिएण तं सद्दहियव्वं, तत्थिमाणि सत्त आगाढाणि । गाहा–(दव्वे खेत्ते) दव्वे ताव वेज्जो पुच्छियव्वो जाव इयाणिं दव्वाणि उवइसइ,तावइयाणि न पडिसेवियव्वाणि । जहा-एवं अम्ह न कप्पइ । जाहे उवइट्ठाणि ताहे ओमत्थपरिहाणीए भणइ । गाहा (एगादीया) एगाईए बुद्धीए अम्हे करेसु, जो-

गं मग्गसु, तं चेव जाव कलमसाली (खेत्तं कालं गाहा) तहेव य जहिं जानो तहिं गायंति । अहवा णणेज्जा-आवस्सियाणि दव्वाणि जाणियव्वाणि, दुल्लहाणि परिजाणह, स तेल्लमाईणि धवइस्सइ, ताहे तं दव्वागाढं पणगपरिहाणीए जयंति, जाव चउगुरुएण वि मेएहंति । (खेत्तागाढं गाहा) खेत्तस्स वा अलंभे असइ मासपाउग्गाणं खेत्ताणं एगत्थ अच्छंति, असिवं वा, अण्णत्थ नईतीरं ति गंतूण अकारगं वा आयरियाणं अण्णत्थ सावया वा, तत्थ अंतरा वा दिग्घजाईया वा अण्णम्मि देसे अंतरा वा ताहे एगत्थ अत्थंति । अहवा खेत्तागाढं अरूढे अद्धाणकप्पनिक्खत्तसहिसण्णाभूमिपाउग्गपलंबाऽऽइसु जयणा,सा सहहियव्वा । एवं खेत्तागाढं । कालओ कालेण बहुतो वासावासपाउग्गं खेत्तं वच्चंताणं अंतरा वासं पविसेज्ज, तं च अंतरा खेत्तं सन्निसण्णं, ताहे तं चेव पुव्वपविलेहियं खेत्तं जंति, उल्लंता वि अच्छिंति वा वासावासे जइ वासइ मग्गसिरेदसराया तिण्णि होंति, उक्कोसेण ओमोयरियाए वा, जा जयणा आहाराऽऽइसु । एयं कालागाढं । इयाणिं भावागाढं । (गाहा अइवक्कंते च) अइवक्कंते ति विसूइयाइ, अदिट्ठविसअप्पा वा वेयणादि य पसूलाइ, तत्थ अग्गी कंदाइ वा परिसाणंताइ दायव्वं । एयं भावागाढं । पुरिसागाढे जम्मि विणट्ठे गच्छस्स विणासो नाणदरिसणचरित्ताऽऽईणं विणासो । (न हु तुंबम्मि विणट्ठे गाहा) ताहे तस्स असुद्धेणावि कीरइ, जाव जीवइ । एयं पुरिसाऽऽगाढं । (गाहा-संजोगदिट्ठपाती) वेज्जस्स वा संजोगदिट्ठपाठिस्स असइ गीयत्थसंविग्गस्स, ताहे गीयत्थवेज्जस्स जा पाहुडिया कीरइ एहाणभोयणचोयणाइ, तं सद्दहइ । एयं ति तिगिच्छागाढं । (गाहा-होज्ज दव्वसहाय) सहाया वा से नत्थि अथत्तव्वया सुत्तेण वा दोसा य हिंडमाणस्स वा एगागियस्स ताहे एगत्थ अत्थइ,एगत्थ अत्थंतो अपायच्छित्तो जाव सहाए न लभइ पाउग्गे । (एयऽसहायागाढं गाहा) जावंति एवमाइयाओ, जावंति परिसेवणाओ मूलुत्तरगुणेसु, ताओ एएसु सत्तसु कारणेसु सुद्धेसु सुद्धाओ, एएसु सत्तसु कारणेसु अ अप्पत्तेसु करेइ असुद्धाओ । एस दंसणकप्पो ।" पं० सू० ।

दंसणकुसील–दर्शनकुशील–पुं० । कुशीलशब्दप्रदर्शितस्वरूपे कुशीलभेदे, महा० ३ अ० ।

दंसणखवग–दर्शनक्षपक–पुं० । पदैकदेशे पदप्रयोगात् दर्शनमोहनीयस्य क्षपके, कर्म० ५ कर्म० । दर्शनमोहनीयक्षये, क्षयोपशमे च । स्था० १ ठा० ।

दंसणगुणप्पमाण–दर्शनगुणप्रमाण–न० । गुणप्रमाणभेदे,अनु० ।

अथ दर्शनगुणप्रमाणमाह-

से किं तं दंसणगुणप्पमाणे ?। दंसणगुणप्पमाणे चउव्विहे पण्णत्ते । तं जहा-चक्खुदंसणगुणप्पमाणे, अचक्खुदंसणगुणप्पमाणे, ओहिदंसणगुणप्पमाणे, केवलदंसणगुणप्पमाणे । चक्खुदंसणं चक्खुदंसणस्स घडपडकमरहाऽऽइएसु दव्वेसु, अचक्खुदंसणं अचक्खुदंसणस्स आयभावे, ओहिदंसणं ओहिदंसणस्स सव्वरूविदव्वेहिं, न पुण सव्वपज्जवेहिं, केवलदंसणं केवलदंसणस्स सव्वदव्वेहिं अ, सव्वपज्जवेहि अ । सेत्तं दंसणगुणप्पमाणे ।

(से किं तं दंसणगुणप्पमाणे इत्यादि) दर्शनाऽऽवरणकर्मक्षयोपशमाऽऽदिजं सामान्यमात्रग्रहणं दर्शनमिति । उक्तं च-"सज्जं सामन्नग्गहणं,भावाणं नेव कट्टुमागारं । अविसेसिऊण अत्थे, दंसणमिइ वुच्चए समए ।१।" तदेषाऽऽत्मनो गुणः, स एव प्रमाणं दर्शनगुणप्रमाणम् । इदं च चक्षुर्दर्शनाऽऽदिभेदाच्चतुर्विधम् । तत्र भावचक्षुरिन्द्रियाऽऽवरणक्षयोपशमाद्, द्रव्येन्द्रियानुपघाताच्च, चक्षुर्दर्शनिनश्चक्षुर्दर्शनलब्धिमतो जीवस्य घटाऽऽदिषु द्रव्येषु चक्षुषी दर्शनं चक्षुर्दर्शनं, प्रवर्तीति क्रियाऽध्याहारः । सामान्यविषयत्वेऽपि चास्य यद् घटाऽऽदिविशेषाभिधानं तत्सामान्यविशेषयोः कथञ्चिद्भेदादेकान्तेन विशेषेभ्यो व्यतिरिक्तस्य सामान्यस्याऽग्रहणख्यापनार्थम् । उक्तं च-" निर्विशेषं विशेषाणां, ग्रहो दर्शनमुच्यते ।" इत्यादि । चक्षुर्वर्जशेषेन्द्रियचतुष्टयं, मनश्चाचक्षुरुच्यते, तस्य दर्शनं न चक्षुर्दर्शनं, तदपि भावचक्षुरिन्द्रियाऽऽवरणक्षयोपशमाद् द्रव्येन्द्रियानुपघाताच्च, अचक्षुर्दर्शनिनोऽचक्षुर्दर्शनलब्धिमतो जीवस्याऽऽत्मभावे भवति, आत्मनि आत्मनि जीवे भावः संश्लिष्टतया संबन्धो, विषयस्य घटाऽऽदेरिति गम्यते, तस्मिन् सति इदं प्रादुर्भवति रूपम् । इदमुक्तं भवति-चक्षुरप्राप्यकारि, ततो दूरस्थमपि स्वविषयं परिच्छिनत्तीत्यस्याऽर्थस्य ख्यापनार्थं घटाऽऽदिषु चक्षुर्दर्शनं भवतीति पूर्वं विषयस्य भेदेनाभिधानम् । श्रोत्राऽऽदीनि तु प्राप्यकारीणि, ततो द्रव्येन्द्रियसंश्लेषद्वारेण जीवेन सह संबद्धमेव विषयं परिच्छिन्दन्तीत्येतद्दर्शनार्थमात्मभावि भवतीत्येवमिह विषयस्याऽभेदेन प्रतिपादनमकारीति । उक्तं च-" पुट्ठं सुणेइ सद्दं, रूवं पुण पासई अपुट्ठं तु । " इत्यादि । अवधेर्दर्शनमवधिदर्शनम् । अवधिदर्शनिनोऽवधिदर्शनाऽऽवरणक्षयोपशमसमुद्भूताऽवधिदर्शनलब्धिमतो जीवस्य सर्वरूपिद्रव्येषु प्रवर्तते, न पुनः सर्वपर्यायेषु, यतोऽवधेरुत्कृष्टतोऽप्येकवस्तुगताः संख्येया असंख्येया वा पर्याया विषयत्वेनोक्ताः, जघन्यतस्तु द्वौ पर्यायौ द्विगुणितौ, रूपरसगन्धस्पर्शलक्षणाश्चत्वारः पर्याया इत्यर्थः । उक्तं च-" दव्वाओ असंखेज्जे, संखेज्जेआ वि पज्जवे लहइ । दो पज्जवे दुगुणिए, लहइ य एगाउ दव्वाओ ॥१॥ " अत्राऽऽह-ननु पर्याया विशेषा उच्यन्ते, न च दर्शनं विशेषविषयं भवितुमर्हति, ज्ञानस्यैव तद्विषयत्वात्कथमिहावधिदर्शनविषयत्वेन पर्याया निर्दिष्टाः, साधूक्तं केवलं पर्यायैरपि घटशरावोदञ्चनाऽऽदिनिर्मृदादिसामान्यमेव तथा तथा विशिष्यते, न पुनस्तेन एकान्तेन व्यतिरिच्यन्ते, अतो मुख्यतः सामान्यं, गुणीभूतास्तु विशेषा अप्यस्य विषयी भवन्तीतिख्यापनार्थोऽत्र तदुपन्यासः, केवलं सकलद्रव्यविषयत्वेन परिपूर्णं दर्शनं, केवलदर्शनिनस्तदावरणक्षयाऽऽविर्भूतलब्धिमतो जीवस्य सर्वरूपेषु मूर्त्तामूर्त्तेषु सर्वपर्यायेषु च भवतीति । मनःपर्यायज्ञानं तु तथाविधक्षयोपशमपाटवात् सर्वदा विशेषानेव गृह्णदुत्पद्यते, न सामान्यम्, अतस्तद्दर्शनं नोक्तमिति । तदेतद्दर्शनगुणप्रमाणम् । अनु० ।

दंसणग्गह–दर्शनग्रह–पुं० । मताऽऽग्रहे, षो० ११ विव० । ('णाण' शब्देऽस्मिन्नेव भागे १७८१ पृष्ठे गतमस्य विवेचनम्)

दंसणचरित्तमोह–दर्शनचारित्रमोह–पुं० । द्विरूपमोहनीये कर्मणि, प्रश्न० । ननु चारित्रमोहस्य हेतुर्मैथुनमिति प्रतीतम् । तदाह-"तिव्वकसाओ बहुमोहपरिणओ रागदोससंजुत्तो । " प्रश्न० ४ आश्र० द्वार ।

दंसणट्ठ–दर्शनार्थ–त्रि० । दर्शनं तत्त्वानां श्रद्धानं, तदर्थे वस्तुनि, स्था० ५ ठा० ३ उ० ।

दंसणट्ठया–दर्शनार्थता–स्त्री० । दर्शनप्रभावकशास्त्रार्थिकत्वे, स्था० ५ ठा० २ उ० ।

दंसणणय–दर्शननय–पुं० । दर्शनेन एव सम्यक्त्वमित्येवंभूते नये, आव० । 'णाणणय' शब्दे १६८६ पृष्ठे ज्ञानप्राधान्यं चारित्रप्राधान्यं च वर्णयित्वाऽऽह; तत्र दर्शननयमतावलम्बी अधिगतज्ञाननये इदमाह-

जह नाणेणं न विणा, चरणं नादंसणिस्स इअ नाणं ।
न य दंसणं न भावो, तेन य दिट्ठी पणिवयामो ॥८४॥

यथा ज्ञानेन विना न चरणं, किं तु सहैव, नादर्शनिन एवं ज्ञानं, किं तु दर्शनिन एव । "सम्यग्दृष्टेर्ज्ञानं, मिथ्यादृष्टेर्विपर्यासः ।" इति वचनात् । तथा न च दर्शनं न भावः, किं तु भाव एव; प्रावल्लिङ्गान्तर्गतमित्यर्थः । तेन कारणेन ज्ञानस्य तद्भावभावित्वाद्दर्शनस्य ज्ञानोपकारकत्वात् प्राग्वद् (दिट्ठी त्ति) प्राकृतशैल्या दर्शनमस्यास्तीति दर्शनी, तं दर्शनिनं प्रणमामः पूजयामः । इति गाथार्थः ॥ ८४ ॥

स्यादेतत् सम्यक्त्वज्ञानयोर्युगपद्भावादुपकार्योपकारकभावानुपपत्तिरित्येतच्चासत्; यतः-

जुगवं पि समुप्पन्नं, सम्मत्तं आहिगमं विसोहेइ ।
जह कयगमंजणाई, जलदिट्ठीओ विसोहंति ॥ ८५ ॥

युगपदपि तुल्यकालमपि समुत्पन्नं संजातं सम्यक्त्वं ज्ञानेन सह अधिगम्यन्ते परिच्छिद्यन्ते पदार्था येन सोऽधिगमः, ज्ञानमेवोच्यते, तमधिगमं विशोधयति, ज्ञानं विमलीकरोतीत्यर्थः । अत्रार्थे दृष्टान्तमाह- यथा कातकाञ्जने जलदृष्टी विशोधयत इति । कतको वृक्षस्तस्येदं कातकं फलम्, अञ्जनं सौवीराऽऽदि, कातकं चाञ्जनं च कातकाञ्जने, अनुस्वारोऽप्राकृतिकः, जलमुदकं, दृष्टिः स्वविषये लोचनप्रसरलक्षणा, जलं च दृष्टिश्च जलदृष्टी, ते शोधयतः । इति गाथार्थः ।

साम्प्रतमुपन्यस्तदृष्टान्तस्य दार्ष्टान्तिकेनांशतो भावनिकां प्रतिपादयन्नाह-

जह जह सुज्झइ सलिलं,तह तह रूवाइँ पासई दट्ठा ।
इय जह जह तत्तरुई, तह तह तत्तागमो होइ ॥ ८६ ॥

यथा यथा शुद्ध्यति सलिलं कातकफलसंयोगात्तथा तथा रूपाणि तत्रस्थानि पश्यति द्रष्टा । (इय) एवं यथा यथा तत्त्वरुचिः सम्यक्त्वलक्षणा,संजायत इति क्रियाः तथा तथा तत्त्वाऽऽगमः तत्त्वपरिच्छेदो भवतीति । एवमुपकारकं सम्यक्त्वं ज्ञानस्येति गाथार्थः ॥८६॥

स्यादेतन्निश्चयतः कार्यकारणभाव एवोपकार्योपकारकभावः, स चासम्भवी युगपदुत्पादिनोरित्यत्रोच्यते-

कारणकज्जविभागो, दीवपगासाण जुगवजम्मे वि ।
जुगवुप्पन्नं पि तहा, हेऊ नाणस्स संमत्तं ॥ ८७ ॥

यद्येवं कारणकार्यविभागो दीपप्रकाशयोर्युगपज्जन्मनि युगपदुत्पादेऽपीत्यर्थः, युगपदुत्पन्नमपि तथा हेतुः कारणं ज्ञानस्य सम्यक्त्वम् । यस्मादेवं तस्मात्सकलगुणमूलत्वाद् दर्शनस्य दर्शनिन एव कृतिकर्म कार्यमात्मनाऽपि तत्रैव यत्नः कार्यः, सकलगुणमूलत्वादेवेति । उक्तं च-"द्वारं मुखं प्रतिस्थान-माधारो भाजनं निधिः । धर्महेतोर्द्विषट्कस्य, सम्यग्दर्शनमिष्यते ॥१॥" अयं गाथाऽभिप्रायः ।

इत्थं चोदकेनोक्ते सत्याहाऽऽचार्यः-

नाणस्स जइ वि हेऊ, सविसयनिअयं तहा वि संपत्तं ।
तम्हा फलसंपत्ती, न जुज्जई नाणपक्खे व्व ॥ ८८ ॥
जह तिक्खरुई वि नरो, गंतुं देसंतरं नयविहूणो ।
पावेइ न तं देसं, नयजुत्तो चेव पाउणइ ॥ ८९ ॥
इय नाणचरणरहिओ, सम्मद्दिट्ठी वि मुक्खदेसं तु ।
पाउणइ नेव नाणाऽऽइसंजुओ चेव पाउणइ । ९०॥

इदमन्यकर्तृकं गाथात्रयं सोपयोगमितिकृत्वा व्याख्यायते- ज्ञानस्य यद्यपि हेतुः कारणं, सम्यक्त्वमिति योगः । अपिशब्दोऽभ्युपगमवादसूचकः । अभ्युपगम्याऽपि भूमः । तत्त्वतस्तु कारणमेव न भवति, तज्जयोरपि विशिष्टयोरुपशमकार्यत्वात्स्वविषयनियतमिति कृत्वा । स्वविषयश्चास्य तत्त्वेषु रुचिरेव । तथाऽपि तस्मात् सम्यक्त्वात् (फलसंपत्ती न जुज्जई) फलसंप्राप्तिर्न युज्यते, मोक्षसुखप्राप्तिर्न घटत इत्यर्थः । स्वविषयनियतत्वादेव, असहायत्वादित्यर्थः । ज्ञानपक्ष इव । अनेन तत्प्रतिपादितसकलदृष्टान्तसंग्रहमाह-यथा ज्ञानपक्षो मार्गेऽऽदिभिर्दृष्टान्तैरसहायस्य ज्ञानस्यैहिकाऽऽमुष्मिकफलासाधकत्वमुक्तम्,एवमत्रापि दर्शनाभिलापेन द्रष्टव्यम् । दिङ्मात्रं तु प्रदर्श्यते-यथा तीक्ष्णरुचिरपि नरः तीव्रश्रद्धोऽपि पुरुषः,गन्तुं देशान्तरं,देशान्तरगमन इत्यर्थः। नयविहीनः,ज्ञानाऽऽगमक्रियालक्षणनयशून्य इत्यर्थः । प्राप्नोति न तं देशं गन्तुमिष्टं तद्विषयश्रद्धायुक्तोऽपि, नययुक्त एव प्राप्नोति । (इय) एवं ज्ञानचरणरहितः सम्यग्दृष्टिरपि तत्त्वश्रद्धानयुक्तोऽपि मोक्षदेशं तु प्राप्नोति नैव सम्यक्त्वप्रभावादेव,किं तु ज्ञानाऽऽदिसंयुक्त एव प्राप्नोति । तस्मात् तत् त्रितयं प्रधानम्,एतत्त्रितययुक्तस्यैव कृतिकर्म कार्यं,त्रितयं चाऽऽत्मना सेवनीयम, " सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः " इति वचनात् । अयं गाथात्रितयार्थः ।

एवमपि तत्त्वे समाख्याते ये खलधर्मभूयिष्ठाः, यानि चासदालम्बनानि प्रतिपादयन्ति, तदेतदभिधित्सुराह-

धम्मनियत्तमईआ, परलोयपरम्मुहा विसयगिद्धा ।
चरणकरणे असत्ता, सेणिअरज्जं ववइसंति ॥ ९१ ॥

धर्मश्चारित्रधर्मः परिगृह्यते, तस्माच्चिवृत्ता मतिर्येषां ते धर्मनिवृत्तमतयः, परः प्रधानो लोकः परलोकः मोक्षः, तस्मात् पराङ्मुखाः, विषयगृद्धाः शब्दाऽऽदिविषयानुरक्ताः; ते एवंभूताश्चरणकरणे अशक्ता असमर्थाः सन्तः श्रेणिकराज्यं व्यपदिशन्त्यालम्बनमिति गाथार्थः ॥ ९१ ॥

न सेणिओ आसि तया बहुस्सुओ,
न यावि पन्नत्तिधरो न वायगो ।
सो आगमिस्साइ जिणो भविस्सई,
समिक्ख पन्नाइ, वरं खु दंसणं ॥ ९२ ॥

(न सेणिओ इत्यादि) न श्रेणिको नरपतिः आसीत्तदा तस्मिन्काले बहुश्रुतो बह्वागमः, महाकल्पाऽऽदिश्रुतधर इत्यर्थः। न चाऽपि प्रज्ञप्तिधरो न चापि भगवतीवेत्ता, न वाचकः-न पूर्वधरः, तथाऽपि सोऽसहायो दर्शनप्रभावादेव (आगमिस्साइ त्ति) आयत्यामागामिनि काले, जिनो भविष्यति तीर्थंकरो भविष्यति । यतश्चैवमतः समीक्ष्य दृष्ट्वा प्रज्ञया बुद्ध्या दर्शनवि-

पाकं तीर्थकराऽऽख्यफलप्रसाधकम(वरं खु दंसणं ति)'खु'शब्दस्यावधारणार्थत्वात् वरं दर्शनमेव, अङ्गीकृतमिति वाक्यशेषः। अयं वृत्तार्थः। किं च--शक्य एवोपाये प्रेक्षावतः प्रवृत्तिर्युज्यते, न पुनरशक्ये शिरःशूलशमनाय तक्षकफणाऽलङ्कारग्रहणकल्पे चारित्रे,चारित्रं च तथ्यतः मोक्षोपायत्वे सत्यप्यशक्याऽऽसेवनं, सूक्ष्मापराधैरपि अनुपयुक्तगमनाऽऽदिभिर्विराध्यमानत्वादायासरूपत्वाच्च नियमेन ज्ञस्थस्य तद्भ्रंश उपजायते सर्वस्यैव।६२।

अतः-

भट्ठेण चरित्ताओ, सुट्ठुअरं दंसणं गहेअव्वं ।
सिज्झंति चरणरहिआ, दंसणरहिआ न सिज्झंति ।६३।

भ्रष्टेन च्युतेन, कुतः ?, चारित्रात्, सुतरां दर्शनं ग्रहीतव्यं, पुनर्बोधिलाभानुबन्धि,स्वर्गाऽऽदेर्यो ग्रहीतव्येऽशक्यमोक्षोपायत्वात्। तथा च सिद्ध्यन्ति चरणरहिताः प्राणिनः दीक्षाप्रहृत्यनन्तरमृतान्तकृत्केवलिनः, दर्शनरहितास्तु न सिद्ध्यन्ति, अतो दर्शनमेव प्रधानं सिद्धिकारणं, तद्भावभावित्वाद्ज्ञानादेरित्ययं गाथाऽर्थः ॥ ६३ ॥ आव० ३ अ०।

दंसणतह–दर्शनतथ्य–शङ्काऽऽद्यतिचाररहिते जीवाऽऽदितत्त्वश्रद्धाने, सूत्र० १ श्रु० १३ अ०।

दंसणपडिमा–दर्शनप्रतिमा–स्त्री०। उपासकानां प्रथमप्रतिमायाम्, भ० २ अधि०। प्रव०। पञ्चा०। ('उवासगपडिमा' शब्दे द्वितीयभागे १०६४ पृष्ठे व्याख्यातेयम्)

दंसणपभावग–दर्शनप्रभावक–पुं०। सर्वज्ञशासनप्रकाशके, जीवा १३ अधि०।

दंसणपरिणाम–दर्शनपरिणाम–पुं०। सम्यग्दर्शनपरिणामे, प्रज्ञा० १३ पद।

दंसणपरीसह–दर्शनपरीषह–पुं०। दर्शनं सम्यग्दर्शनं तदेव क्रियाऽऽदिवादिनां विचित्रमतश्रवणेऽपि सम्यक्परिषह्यमाणं निश्चलचित्ततया धार्यमाणं परीषहः। यद्वा-दर्शनशब्देन दर्शनव्यामोहहेतुरिहिकाऽऽमुष्मिकफलानुपलम्भाऽऽदिरिह गृह्यते,ततः स एव परीषहः दर्शनपरीषहः। दर्शनपरीषहे, उत्त० २ अ०। स०। प्रव०। जिनानां जिनोक्तभावानां चाश्रद्धानवर्जनरूपे परीषहे, भ० ८ श० ८ उ०। "जिनास्तदुक्तजीवा वा, धर्माधर्मौ भवान्तरम्। परोक्षत्वान्मृषा नैव, चिन्तयेत्प्राप्तदर्शनः ॥ १ ॥" ध० ३ अधि०।

एतदेव सूत्रकृदाह-

नत्थि णूणं परे लोए, इड्ढी वा वि तवस्सिणो ।
अदुवा वंचिओ मि त्ति, इइ भिक्खू ण चिंतए ॥४४॥

नास्ति न विद्यते, (णूणं) निश्चितं परलोको,जन्मान्तरमित्यर्थः। भूतचतुष्टयाऽऽत्मकत्वाच्छरीरस्य, तस्य चैदैव पातात्,चैतन्यस्य च भूतधर्मभूतत्वात्, तदतिरिक्तस्य चाऽऽत्मनः प्रत्यक्षतोऽनुपलभ्यमानत्वात्,ऋद्धिर्वा तपोमाहात्म्यरूपा। अपिः पूरणे। कस्य?, तपस्विनः, सा चाऽऽमर्षौषध्यादिः-

" पादरजसा प्रशमनं, सर्वरुजां साधवः कृणात कुर्युः।
त्रिभुवनविस्मयजननान्, दधुः कामाँस्तृणाग्राद्धा ॥ १ ॥
धर्माद्भुतोन्मिश्रित-काञ्चनवर्षाऽऽदिसर्गसामर्थ्यम।
अद्भुतनीमोरुशिला--सहस्रसंपातशक्तिश्च ॥ २ ॥"

इत्यादिका च, तस्या अप्यनुपलभ्यमानत्वादिति भावः। (अथवा वंचिओ मि त्ति) अथवा किं बहुना?,वञ्चितोऽस्मि,नीगोनामिति गम्यते। (इति) इत्यमुना शिरस्तुण्डमुण्डनोपवासाऽऽदिना यातनाऽऽत्मकेन धर्मानुष्ठानेन। उक्तं च-" तपांसि यातनाश्चित्राः, संयमो भोगवञ्चना । " इत्यादि। (इति) इत्यनन्तरमुपदर्शितं भिक्षुनै चिन्तयेत् न ध्यायेत्, परिफल्गुरूपत्वादस्य। तथाहि यत्तावदुक्तम्-"भूतचतुष्टयाऽऽत्मकत्वाच्छरीरस्य जन्मान्तराऽभाव इति।" तदसत्। न हि शरीरस्य जन्मान्तरानुयायित्वमस्माभिरुच्यते, किं त्वात्मनः, न च भूतधर्म एव चैतन्ये आत्मव्यपदेशः, तस्य तद्धर्मत्वेनोत्तरत्र निषेत्स्यमानत्वात्। यदपि ऋद्धिर्वा तपस्विनो नास्ति,तदपि वचनमात्रमेव। अथाऽऽत्मन ऋद्धीनां चाऽऽभावेऽनुपलम्भो हेतुरुक्तः,सोऽपि स्वसंबन्धी, सर्वसम्बन्धी वा ?। तत्र न तावदात्मनोऽभावे स्वसम्बन्ध्यनुपलम्भो हेतुः, स्वयं तस्य घटाऽऽदिवदुपलभ्यमानत्वात्, यथैव हि घटाऽऽदिगता रूपाऽऽद्य उपलक्ष्यन्ते, तथा आत्मगता अपि ज्ञानसुखाऽऽद्य इति नात्र महदन्तरमुत्पश्यामः। उक्तं चाऽऽत्मसंवेदनवाचकेन-"आत्मप्रत्यक्ष आत्माऽयम्" इत्यादि। अथाऽयं न दृग्गोचर इति नास्तीत्युच्यते,नाऽयमप्येकान्तः। यतस्तेनैवोक्तम्-"न च नास्तीह तत्सर्वं, चक्षुषा यन्न गृह्यते।" अन्यथा-चैतन्यमपि न दृग्गोचर इति तस्याऽप्यसत्त्वं स्यात्, अथ तत् स्वसंविदितमिति सदुच्यते, अयमपि तथाभूत एवेति सन्नस्तु। उक्तं हि-" अस्त्येव चाऽऽत्मा प्रत्यक्षो, जीवो ह्यात्मानमात्मना । अहमस्मीति संवेत्ति, रूपाऽऽदीनि यथेन्द्रियैः ॥१॥" इति। किं बहुना ?, यथा चैतन्यमस्तीत्यभ्युपगम्यते, तथाऽऽत्माऽप्यभ्युपगन्तव्यः,तथा चाऽऽह-"ज्ञानं स्वस्थं परस्थं वा,यथा ज्ञानेन गृह्यते। ज्ञाता स्वस्थः परस्थो वा, तथा ज्ञानेन गृह्यताम् " ॥ १ ॥ इति। अथ सर्वसम्बन्ध्यनुपलम्भ आत्माभावे हेतुः, अयमप्यसिद्धः, अहमस्मीतिप्रत्ययेन प्रतिप्राणि स्वात्मनः केवलिनां च सर्वाऽऽत्मनामुपलम्भस्य प्रतिषेद्धुमशक्यत्वात्।एवमूर्तानामप्यभावे सर्वसंबन्ध्यनुपलम्भोऽसिद्धः । स्वसंबन्धी तु नियतदेशकालापेक्षोऽन्यथा वा ?। प्रथमपक्षे को वा किमाह ?, क्वचित्कदाचित्तासामनुपलम्भस्य (उपलम्भकस्य) चासाक्षमपि सम्मतत्वात्। द्वितीयपक्षे पुनरनैकान्तिकता, देशाऽऽदिविप्रकृष्टानामनुपलम्भेऽपि सत्त्वात्,इष्यते च क्वचित्कदाचिच्चरणरेणुस्पर्शनाऽऽदितो रोगोपशमाऽऽदिः; ततश्चेहापि कालान्तरे महाविदेहाऽऽदिषु च सर्वकालमूर्त्यन्तराणामपि संभवस्यानुमीयमानत्वात्। यदपि चञ्चितोऽस्मीति भोगसुखानामनेन शिरस्तुण्डमुण्डनोपवासाऽऽदिना यातनाऽऽत्मकेन धर्मानुष्ठानेनेति। तदप्यसमीक्षिताभिधानम् । भोगसुखानां दुःखानुषक्तत्वेन तत्त्ववेदिनामनादेयत्वात्,तथा च वात्स्यायनोऽप्याह। तद्यथा-"विषसंपृक्तमन्नमनादेयम्,एवं दुःखानुषक्तं सुखमनादेयमिति।"प्रयोगश्च-यद्विपक्षानुविद्धं न तत्त्वतस्तदेव, यथा विषसंमिश्रमन्नम्, अनुविद्धाश्च शोकाऽऽदिभिर्मिश्रं च वैषयिकं सुखम्। न चास्यासिद्धता,कालत्रये यथायोगमतृप्त्यादीनां प्रतिप्राणि स्वसंविदितत्वात्, नाऽपि तपसो यातनाऽऽत्मकत्वम्, मनइन्द्रिययोगानामहान्यैव तत्प्रतिपादनात्। उक्तं हि-" मनइन्द्रिययोगाना-महानिष्ठोदिता जिनैः।ततोऽत्र तत्कथं तस्य, युक्ता स्यात् दुःखरूपता ? ॥१॥" शिरस्तुण्डमुण्डनाऽऽदेश्च किञ्चित्पीडाऽऽत्मकत्वेऽपि समीहितार्थसम्पादकत्वेन न दुःखदायकता। यदुक्तम्-"दृष्टा चेष्टार्थसंसिद्धौ,कायपीडाऽप्यदुःखदा। रत्नाऽऽदिवणिगादीनां, तद्वदत्रापि भाव्यताम्॥१॥"प्रयोगश्च-यदिष्टार्थप्रसाधकं, न तत् कायपीडाऽऽत्मकत्वेऽपि दुःख-

दायि,यथा रत्नवणिजामध्वश्रमाऽऽदि, इष्टार्थप्रसाधकं च तपः, न चास्याप्यसिद्धता, प्रशमहेतुत्वेन तपस्तत्परिपन्थितारतम्यात्परमाऽऽनन्दतारतम्यस्यानुभूयमानत्वेन तत्प्रकर्षे तस्याऽपि प्रकर्षानुमानात् । प्रयोगश्च-यत्तारतम्येन यस्य तारतम्यं तस्य प्रकर्षे तत्प्रकर्षः, यथाऽग्नितापप्रकर्षे तपनीयविशुद्धिप्रकर्षः, अनुभूयते च प्रशमतारतम्येन परमाऽऽनन्दतारतम्यम्, लोकप्रतीतत्वाच्चेति सूत्रार्थः ॥४४॥

तथा—

अत्थू जिणा अत्थि जिणा, अदुवाऽवि नविस्सइ ।
मुसं ते एवमाहंसु, इति भिक्खू न चिंतए ॥४५॥

अस्तूवाऽऽसन् जिनाः रागाऽऽदिजेतारः, अस्तीति विद्यतिप्रतिरूपको निपातः-ततश्च विद्यन्ते जिनाः, अस्य कर्मप्रवादपूर्वसदृशप्राभृतोद्धृततया वस्तुतः सुधर्मस्वामिनैव जम्बूस्वामिनं प्रति प्रणीतत्वात्, तत्काले च जिनसंज्ञवादित्थमुक्तम्; विदेहाऽऽदिक्षेत्रान्तरापेक्षया वेति भावनीयम् । (अदुवेति) अथवा अपिर्भिन्नक्रमः । (भविस्सइ त्ति) वचनव्यत्ययाद्भविष्यन्ति, जिनाः, इत्यपि मृषा अलीकम्, ते जिनास्तित्ववादिनः, (एवं) अनन्तरोक्तन्यायेन (आहंसु त्ति) आहुः ब्रुवते,इति भिक्षुर्न चिन्तयेत्, जिनस्य सर्वज्ञाधिक्षेपप्रतिक्षेपाऽऽदिषु प्रमाणोपपन्नतया प्रतिपादनाच्चदुपदेशमूलत्वाच्च सकलैहिकाऽऽमुष्मिकव्यवहाराणामिति सूत्रार्थः ॥ ४५ ॥

इदानीं शिष्याऽऽगमनद्वारम् । तत्र च "नत्थि णूणं परे लोए(४४)" इति सूत्रावयवसूचितमुदाहरणं निर्युक्तिकृदाह—

ओहाविउकामोऽवि य, अज्जासाढो व पणियभूमीए ।
काऊण रायरूवं, पच्छा सीसेण आगसिद्धो ॥१२३॥

अवधावितुकामोऽपि भिक्षाभ्रमितुकामोऽपि, चः पूरणे, आर्याषाढस्तु पत्रितभूमौ व्यवहारभूमौ, इष्टमध्य इत्यर्थः । कृत्वा राजरूपं पश्चाच्छिष्येणानुशिष्टः । इति गाथाऽक्षरार्थः ॥ १२३ ॥ भावार्थस्तु वृद्धसंप्रदायादवसेयः। स चायम्-"अत्थि वच्छाभूमीए अज्जासाढा नामाऽऽयरिया बहुस्सुया,बहुसीसपरिवारा य । तत्थ य गच्छे जो कालं करेति तं णिज्जावेंति भत्तपच्चक्खाणाऽऽइणा । तो बहवे णिज्जामिया । अन्नया एगो अप्पणतो सीसो आयरतरेण भणितो-देवलोगाओ आगंतूण मम दरिसणं देज्जासु । ण य सो आगतो चक्खित्तचित्ततणओ । पच्छा सो चिंतेइ-सुबहुं कालं किलिछोऽहं,सन्निवेण चेव ओहावति । पच्छा तेण सीसेण देवलोगगएण आभोइतो, पेच्छइ-ओहावेंतं,पच्छा तेण तस्स पहे गामो विउव्वितो,अमपेच्छा य। सो तत्थ अम्मासे पेक्खंतो अत्थितो, न भुंजे न तणहं कालं वा दिव्वप्पभावेण वेएति, पच्छा तं संहरिउं गामस्स बाहिं विजणे उज्जाणे उदारेण सव्वालंकारविभूसिए विउव्वति संजमपरिकखत्थं, दिट्ठा तेण ते, गिण्हामि एसिमाहरणगाणि, वरं सुहं जीवंतो त्ति । सो एगं पुढविदारयं भणति-आणेहि आभरणगाणि । सो भणति-भगवं ! एगं ताव मे अक्खाणयं सुणेहि, ततो पच्छा गेण्हिज्जासि । भणति-सुणेमि । सो भणइ-एगो कुंभकारो, सो मट्टियं खणंतो तडीए अक्कंतो । सो भणति "-

जेण जिक्खं बलिं देमि, जेण पोसेमि णायए ।
सा मे महीं अक्कमइ, जायं सरणओ भयं ॥ १२४ ॥

(जेण त्ति) प्राकृतशैल्या यया भिक्षां बलिं ददामि, यथाक्रमं भिक्षुदेवेभ्य इति गम्यते । (जेण त्ति) यया पोषयामि (णायए त्ति) ज्ञातीन्, सा (मे त्ति) मां मही आक्रामति अवष्टभ्नाति; जातम् उत्पन्नम्, शरणतो भयमिति श्लोकार्थः ॥ १२४ ॥

अयमिदोपनयः—चौरभयादहं भवन्तं शरणमागतः, त्वं चैवं विभेषि, ततो ममाऽपि जातं शरणतो भयम्, एवमुत्तरत्राप्युपनया जातनीयाः । " तेण भणइ-अतिपंमियवाइतो सि त्ति घेत्तूण आभरणगाणि पम्मिग्गहे छुढाणि । गतो पुढविकाइओ । इयाणिं आउक्काओ बीओ, सो वि अक्खाणयं कहेति-जहा एगो तालायरो कहाकहओ पामलओ णाम, सो अन्नया गंगं उत्तरंतो उपरि बुडोदएण हीरति, तं पासिऊण जणो भणति "-

बहुस्सुयं चित्तकहं, गंगा वहति पाडलं ।
बुज्झमाणम ! जहं ते, ब्रूव ता किंचि मुत्तासियं ॥१२५॥

बहुश्रुतं बहुविधं, चित्रकथं नानाकथाकथकं, गङ्गा वहति पाटलं पाटलनामकम, उह्यमानक ! भद्रं ते, ब्रूव ब्रूहि (ता इति) तावद्यावदद्यापि दूरं न नीयस इति भावः, किञ्चिदस्यल्पं सुभाषितं सूक्तमिति श्लोकार्थः ॥ १२५ ॥

सोऽवादीत्-

जेण रोहंति बीयाणि, जेण जीवंति कासया ।
तस्स मज्झे विवज्जामि, जायं सरणतो भयं ॥ १२६ ॥

येन जलेन रोहन्ति प्रादुर्भवन्ति बीजानि, येन जीवन्ति प्राणधारणं कुर्वन्ति कर्षकाः कृषीवलाः, तस्य मध्ये (विवज्जामि त्ति) विपद्ये म्रिये, जातं शरणतो भयमिति श्लोकार्थः ॥१२६॥ " तस्स वि तहेव गेण्हति । एस आउक्काओ गतो । इयाणिं तेउक्काओ ततिओ, तहेव अक्खाणयं कहेति-एगस्स तावसस्स अग्गिणा उम्मओ दड्ढो, पच्छा सो भणति"-

जमहं दिवा य रात्रो य, तप्पेमि महुसप्पिसा ।
तेण मे उमओ दड्ढो, जायं सरणओ भयं ॥ १२७ ॥

यमहं दिवा च रात्रौ च तर्पयामि प्रीणयामि मधुसर्पिषा तेनार्षात्-अग्निना, मे उटजस्तापसाऽऽश्रमो दग्धो, जातं शरणतो भयमिति श्लोकार्थः ॥ १२७ ॥

अथवा-

वग्घस्स मए भीएणं, पावगो सरणं कओ ।
तेण दड्ढं ममं अंगं, जायं सरणओ भयं ॥ १२८ ॥

(वग्घस्स त्ति) सुब्व्यत्ययाद् व्याघ्रात् पुण्डरीकाद् मया भीतेन पावकः अग्निः शरणीकृतः, तेनाङ्गं शरीरं मम दग्धं, जातं शरणतो भयमिति श्लोकार्थः ॥ १२८ ॥
"तस्स वि तहेव गिण्हति । एस तेउक्काओ । इयाणिं वाउक्काओ चउत्थो, तहेव अक्खाणयं कहेति-जहा एगो जुवाणो घणनिचियसरीरो, सो पच्छा वाएहिं गहितो, अप्पेण भण्णति"-

लंघणपवणसमत्थो, पुव्वं होऊण संपयं कीस ? ।
दंडगहियग्गहत्थो, वयंस ! किं नामओ वाही ? ॥ १२९ ॥

(लंघणेत्यादि) लङ्घनम्-उत्प्लुत्य गमनं, प्लवनं धावनं, तत्समर्थः पूर्वं भूत्वा साम्प्रतम् (कीस त्ति) कस्मात् (दंडगहियग्गहत्थो त्ति) प्राकृतत्वाद् गृहीतदण्डाग्रहस्तो,गच्छसीति गम्यते। तदयं ते वयस्य ! किंनामको व्याधिरिति गाथाऽर्थः ॥ १२९ ॥

स प्राऽऽह-

जिह्वाऽऽसादेसु पासेसु, जो सुहो वाइ मारुओ ।
तेण मे नज्जए अंगं, जायं सरणओ भयं ॥ १३० ॥

ज्येष्ठाऽऽषाढयोर्मासयोर्यः शुभशैत्याऽऽदिगुणान्वितत्वेन शोभनो वाति मारुतो वायुः, तेन मे मम भज्यतेऽङ्गम्, तस्य मेघोष्णतिसंभवत्वेन वातप्रकोपादिति भावः । एवं च जातं शरणतो भयम्, घर्मार्दितानां हि शरणमयमिति श्लोकार्थः ॥१३०॥

अथवा-

जेण जीवंति सत्ताणि, णिरोहम्मि अणंतए ।
तेण मे नज्जए अंगं, जायं सरणओ भयं ॥ १३१ ॥

येन वातेन जीवन्ति सत्त्वानि, निरोधे प्रक्रमाद्वातस्य अनन्तके अपरिमिते, तेन मे भज्यतेऽङ्गम्, जातं शरणतो भयमिति श्लोकार्थः ॥ १३१ ॥

"तस्स वि तहेव गेण्हति । एसो वाउक्काओ गतो । इयाणिं वणस्सइकाइओ पंचमो, तहेव अक्खाणयं कहेति-जहा एगम्मि रुक्खे केसिं पि सउणाणं आवासो, तहियं पिल्लगाणि जायाणि, पच्छा रुक्खज्झासाओ वल्ली उट्ठिया, रुक्खं वेढंती उवरिं विलग्गा, वेल्लीअणुसारेण सप्पेण बिलग्गिऊण ते पिल्लगा खाइया । पच्छा सेसगा भणंति "--

जाव वुच्छं सुहं वुच्छं, पादवे निरुवद्दवे ।
मूलाओ उट्ठिया वल्ली, जायं सरणतो भयं ॥ १३२ ॥

यावदुषितं सुखमुषितं पादपे निरुपद्रवे, इदानीं मूलादुत्थिता वल्ली, ततो वृक्षादेव तत्त्वतो भयं, स चोक्तनीत्या शरणमिति जातं शरणतो भयमिति श्लोकार्थः ॥ १३२ ॥

"तस्स वि तहेव गेण्हति । एस वणस्सतिकातो गतो । इयाणिं तसकाओ उट्ठो, तहेव अक्खाणयं कहेति-जहा एगं नगरं परचक्केण रोहियं,तत्थ य बाहरियाए मायंगा,ते अग्गितरएहिं णिक्खिज्जंति, बाहिं परचक्केण घेप्पंति । पच्छा केण वि अलेण भण्णंति"-

अब्भिंतरया खुभिया, पिट्ठंति य बाहिरा जणा ।
दिसं नयह मायंगा !, जायं सरणओ भयं ॥ १३३ ॥

अभ्यन्तरकाः नगरमध्यवर्तिनः, क्षुभिताः परचक्रात्रस्ताः, प्रेरयन्ति निष्काशयन्ति, मा भूदस्माऽऽदिह्यस्य एभ्यो वा भेदः, चशब्दो निष्क्रमः, ततो बाह्याश्च परचक्रलोका उपद्रवन्ति, नयत इति गम्यते । नगरसत्का एत इति, अतो दिशं भजत मातङ्काः !, यतो जातं शरणतो भयं, नगरं हि भवतां शरणं,तत एव भयमिति श्लोकार्थः ॥ १३३ ॥

"अथवा-एगत्थ नयरे सयमेव राया चोरो, पुरोहितो भंडिओ त्ति, ततो दो वि विहरंति । पच्छा लोओ अन्नमन्नं भणति"-

जत्थ राया सयं चोरो, भंडिओ य पुरोहितो ।
दिसं नयह नागरिया !, जायं सरणओ भयं ॥१३४॥

यत्र राजा स्वयं चौरः-स्वपुरं मुष्णाति,भाण्डकश्च पुरोहितः,अतो दिशं नयत नागरकाः !, जातं शरणतो भयमिति श्लोकार्थः॥१३४॥

" अहवा एगस्स धिज्जातीयस्स धूया, सा य जोव्वणत्था, पडिरूवदंसणिज्जा, सो धिज्जातिओ तं पासित्ता अज्झोववण्णो, तीसे कएण अतीव दुब्बलीभूओ, बंभणीए पुच्छितो-निव्वंधे कए कहियं । ताए भण्णति-मा अधिइं करेसु, तहा करेमि जहा केणइ पओएण संपत्ती हवति । पच्छा धूयं भणति-मम्ह पुव्विं दारियं जक्खा भुंजंति, पच्छा घरस्स दिज्जति, तो तव कालपक्खचउद्दसीए जक्खो एहि, मा तं विमाणेसु, मा य तत्थ तुमं उज्जोयं काहिसि । तीए वि जक्खकोऊहल्लेण दीवओ सरावेण ढविओ जीओ, सो य आगतो,सो तं परिभुंजिऊण रत्तिं किलंतो पसुत्तो । इमाए कोउएण सरावं फेडियं, नवरं पेच्छति पियरं, ताए णायं-जं होइ तं होउ, इच्छाए भुंजामि भोए, पच्छा ताई रतिकिलंताई लग्गए सूरेण पडिबुज्झंति । पच्छा बंभणी मागहियं भणति"-

अइरुग्गयए य सूरिए,
चेतियथूभगए य वायसे ।
भित्तीगयए य आयवे,
सहि ! सुहिओ हु जणो ण बुज्झइ ॥ १३५ ॥

अचिरोद्गते च सूर्ये, कोऽनिप्रायः ?-प्रथमोदिते रवौ, चैत्यस्तूपगते च वायसे, अनेनोच्चे विवस्वतीत्याह, भित्तिगते चाऽऽतपे, अनेन चोच्चतर इति । सखि ! सुखितो, दुर्वाक्यबाह्यङ्गारे, जनो न बुध्यते-न निद्रां जहाति । अनेनाऽऽत्मनो दुःखितत्वं प्रकटयति, सा हि भर्तृविरहदुःखिता रात्रौ न निद्रां लब्धवतीति मागधिकाऽर्थः ॥ १३५ ॥

" पच्छा सा तीसे धूया पडिसुणित्ता पडिभणति मागहियं"-

तुम एव य अम्म हे ! लवे,
मा हु विमाणेऍ जक्खमागयं ।
जक्खाहडए हु तायए,
आणिं दाणि विमग्ग तायं ॥ १३६ ॥

त्वमेव चाम्ब ! मातः हे ! इत्यामन्त्रणे, अलापीः-उक्तवती, शिक्षासमये, यथा-(मा हु त्ति) मैव (विमाणय त्ति) विमंस्था विमुखं कृथा यक्षमागतम, यक्षाऽऽहृतको (हु त्ति) खलु तातकोऽन्यमिदानीं विमार्गय अन्वेषय, तातकमिति मागधिकाऽर्थः ॥१३६ ॥

" पच्छा सा धिज्जाइणी भणति "-

(से णूणमित्यादि) (असंखेज्ज त्ति) असङ्ख्यातप्रदेशाऽऽत्मक इत्यर्थः । (अणंताइं दव्वाइंति) जीवपरमाण्वादीनि । " आगासे भइयव्वाइं ति " काकाऽस्य पाठः, सप्तम्याश्च षष्ठ्यर्थत्वादाकाशस्य भक्तव्यानि भक्तव्यानि, धारणीयानीत्यर्थः । पृच्छकस्योऽयमभिप्रायः-कथमसंख्यातप्रदेशाऽऽत्मके लोकाऽऽकाशेऽनन्तानां द्रव्याणामवस्थानम् ?। हंता ! इत्यादिना तत्र तेषामनन्तानामप्यवस्थानमावेदितम् । आवेदयताऽयमभिप्रायः-यथा प्रतिनियतेऽपचरकाऽऽकाशे प्रदीपप्रभापुद्गलपरिपूर्णेऽप्यपरापरप्रदीपप्रभापुद्गला अवतिष्ठन्ते, तथाविधपुद्गलपरिणामसामर्थ्यात्, एवमसंख्यातेऽपि लोके तेष्वेव२ प्रदेशेषु द्रव्याणां तथाविधपरिणामवशेनावस्थानात्, अनन्तानामपि तेषामवस्थानमविरुद्धमिति । असंख्याते लोकेऽनन्तद्रव्याणामवस्थानमुक्तं, तच्चैकैकस्मिन् प्रदेशे तेषां चयापचयाऽऽदिमद्भवतीत्यत आह-(लोगस्सेत्यादि) (कइदिसिं पोग्गला चिज्जंति) कतिभ्यो दिग्भ्य आगत्य एकत्राऽऽकाशप्रदेशे चीयन्ते लीयन्ते ।

आकाशप्रदेशे द्रव्याणि-

लोगस्स णं भंते ! एगम्मि आगासपएसे कइ दिसिं पोग्गला छिज्जंति ?। एवं चेव । एवं उवचिज्जंति, एवं अवचिज्जंति ॥

(छिज्जंति त्ति) व्यतिरिक्ता भवन्ति (उवचिज्जंति त्ति) स्कन्धरूपाः पुद्गलाः पुद्गलान्तरसंपर्कादुपचिता भवन्ति । (अवचिज्जंति त्ति) स्कन्धरूपा एव प्रदेशविघटनेनापचीयन्ते ।

द्रव्याधिकारादेवेदमाह । आधाऽऽदिरूपेण द्रव्यग्रहणम्-

जीवे णं भंते ! जाइं दव्वाइं ओरालियसरीरत्ताए गे-

एहइ, ताइं किं ठियाइं गेण्हइ, अट्ठियाइं गेण्हइ ?। गोयमा ! ठियाइं पि गेण्हइ, अट्ठियाइं पि गेण्हइ। ताइं भंते ! किं दव्वओ गेण्हइ, खेत्तओ गेण्हइ, कालओ गेण्हइ, भावओ गेण्हइ ?। गोयमा ! दव्वओ वि गेण्हइ, खेत्तओ वि गेण्हइ, कालओ वि गेण्हइ, भावओ वि गेण्हइ। ताइं दव्वओ अणंतपएसियाइं दव्वाइं, खेत्तओ असंखेज्जपएसोगाढाइं, एवं जहा पण्णवणाए पढमे आहारुद्देसए० जाव णिव्वाघाएणं छद्दिसिं, वाघायं पमुच्च सिय तिदिसिं, सिय चउदिसिं, सिय पंचदिसिं। जीवे णं भंते ! जाइं दव्वाइं वेउव्वियसरीरत्ताए गेण्हति, ताइं किं ठियाइं० एवं चेव, णवरं णियमं छद्दिसिं, एवं आहारगसरीरत्ताए वि। जीवे णं भंते ! जाइं दव्वाइं तेयगसरीरत्ताए गेण्हति पुच्छा ?। गोयमा ! ठियाइं गेण्हति, णो अट्ठियाइं गेण्हति, सेसं जहा ओरालियसरीरस्स, कम्मगसरीरे एवं चेव, एवं० जाव भावओ गेण्हइ, ताइं किं एगपएसियाइं गेण्हइ, दुपएसियाइं गेण्हइ, एवं जहा भासापदे० जाव आणुपुव्विं गेण्हइ, णो अणाणुपुव्विं गेण्हइ। ताइं भंते ! कइ दिसिं गेण्हइ ?। गोयमा ! णिव्वाघाएणं जहा ओरालियस्स। जीवे णं भंते ! जाइं दव्वाइं सोइंदियत्ताए गेण्हइ, जहा वेउव्वियसरीरं, एवं०जाव जिब्भिंदियत्ताए, फासिंदियत्ताए जहा ओरालियसरीरं, मणजोगत्ताए जहा कम्मगसरीरं, णवरं णियमा छद्दिसिं, एवं वइजोगत्ताए वि, कायजोगत्ताए वि जहा ओरालियसरीरस्स। जीवे णं भंते ! जाइं दव्वाइं आणापाणुत्ताए गेण्हति, जहेव ओरालियसरीरत्ताए०जाव सिय पंचदिसिं॥

(ठियाइं ति) स्थितानि जीवप्रदेशावगाढक्षेत्रस्याभ्यन्तरवर्त्तीनि, अस्थितानि च तदनन्तरवर्त्तीनि। तानि पुनरौदारिकशरीरपरिणामाविशेषादाकृष्य गृह्णाति। अन्ये त्वाहुः-स्थितानि तानि यानि नैजन्ते, तद्विपरीतानि त्वस्थितानि, (किं दव्वओ गिण्हइ त्ति) किं द्रव्यमाश्रित्य गृह्णाति, द्रव्यतः किंस्वरूपाणि गृह्णातीत्यर्थः। एवं क्षेत्रतः क्षेत्रमाश्रित्य कतिप्रदेशावगाढानीत्यर्थः। वैक्रियशरीराधिकारे "नियमं छद्दिसिं ति" यदुक्तं तत्रायमभिप्रायः-वैक्रियशरीरी पञ्चेन्द्रिय एव प्रायो भवति, स च त्रसनाड्या मध्य एव, तत्र च षण्णामपि दिशामानवृतत्वमश्लोकेन विवक्षितलोकदेशस्येत्यत उच्यते-(नियमं छद्दिसिं ति) यच्च वायुकायिकानां त्रसनाड्या बहिरपि वैक्रियकरणं भवति, तदिह न विवक्षितमप्रधानत्वात्, तस्य च तथाविधश्लोकान्तनिष्कुटे वा वैक्रियशरीरी वायुर्न संभवतीति। तैजससूत्रे-(ठियाइं गिण्हइ त्ति) जीवावगाढक्षेत्राभ्यन्तरीभूतान्येव गृह्णाति। (नो अट्ठियाइं गिण्हइ त्ति) न तदनन्तरवर्त्तीनि गृह्णाति, तस्याऽऽकर्षपरिणामाभावात्। अथवा-स्थितानि स्थिराणि गृह्णाति, नोऽस्थितान्यस्थिराणि, तथाविधस्वभावत्वात्। (जहा भासापदे त्ति) यथा प्रज्ञापनायां एकादशे पदे तथा वाच्यम्। तच्च-(दुपएसियाइं गिण्हइ ०जाव अणंतपएसियाइं गिण्हइ इत्यादि) श्रोत्रेन्द्रियसूत्रे-(जहा वेउव्वियसरीरं ति) यथा वैक्रियशरीरद्रव्यग्रहणं स्थितास्थितद्रव्यविषयं षण्णदिक्कं च, एवमिदमपि; श्रोत्रेन्द्रियद्रव्यग्रहणं हि नाभीमध्य एव, तत्र च (सिय तिदिसिमित्यादि) नास्ति व्याघातभावादिति (फासिंदियत्ताए जहा ओरालियसरीरं ति) अयमर्थः-स्पर्शनेन्द्रियतया तथा द्रव्याणि गृह्णाति यथौदारिकशरीरं स्थितास्थितानि षण्णदिगागतप्रभृतीनि चेति प्राहुः। (मणजोगत्ताए जहा कम्मगसरीरं, णवरं नियमा छद्दिसिं, ति) मनोयोगतया तथा द्रव्याणि गृह्णाति यथा कार्मणस्थितान्येव गृह्णातीति भावः। केवलं तत्र व्याघातेनेत्युक्तमिह तु नियमात् षण्णदिशीत्येव वाच्यम्, नाभीमध्य एव मनोद्रव्यग्रहणभावात्। अत्रसानां हि तन्नास्तीति। (एवं वइजोगत्ताए वि) मनोद्रव्यवद्वाग्द्रव्याणि गृह्णातीत्यर्थः। (कायजोगत्ताए जहा ओरालियसरीरस्स वि) काययोगद्रव्याणि स्थितास्थितानि षण्णदिगागतप्रभृतीनि चेत्यर्थः। प्र० २५ श० २ उ०।

दुविहा दव्वा पण्णत्ता। तं जहा-गइसमावन्नगा चेव, अगइसमावन्नगा चेव॥

द्रव्यसूत्रे गतिर्गमनमात्रमेव, शेषं तथैवेति पृथ्वीकायवत्। स्था०१ ठा०। (किं द्रव्यं गुरु, किं वा लघ्विति 'अगुरुलहुय' शब्दे प्रथमभागे १५७ पृष्ठे चिन्तितम्। पुद्गलास्तिकायप्रदेशः किं द्रव्यमिति 'पोग्गलत्थिकाय' शब्दे वक्ष्यते) (द्रव्यक्षेत्रकालभावानां परस्परं समावेशः 'अणुओग' शब्दे प्रथमभागे ३४३ पृष्ठे चिन्तितः) (जीवास्तिकायाऽऽदीनां द्रव्यप्रदेशार्थतयाऽल्पबहुत्वम् 'अत्थिकाय' शब्दे प्रथमभागे ४१४ पृष्ठे द्रष्टव्यम्) संयमे, आचा० १ श्रु० ८ अ० ८ उ०।

वैशेषिकैरीत्या द्रव्याणि, तत्र दोषश्च-

पृथिव्यप्तेजोवायुराकाशं कालो दिगात्मा मन इति नव द्रव्याणि। तत्र पृथिव्यप्तेजोवायूनां पृथग्द्रव्यत्वमनुपपन्नम्। तथाहि-त एव परमाणवः प्रयोगविस्रसाभ्यां पृथिव्यादित्वेन परिणमन्तोऽपि न स्वकीयं द्रव्यत्वं त्यजन्ति, न चावस्थाभेदेन द्रव्यभेदो युक्तः, अतिप्रसङ्गादिति। आकाशकालयोरात्मामिरपि द्रव्यत्वमभ्युपगतमेव। दिशस्त्वाकाशावयवभूतायां अनुपपन्नं पृथग्द्रव्यत्वम्, अतिप्रसङ्गदोषादेव। आत्मनश्च स्वशरीरमात्रव्यापिन उपयोगलक्षणस्याभ्युपगतद्रव्यत्वमिति। मनसश्च पुद्गलविशेषतया पुद्गलद्रव्येऽन्तर्भाव इति परमाणुवद्भावान्मनसश्च जीवगुणत्वादात्मन्यन्तर्भाव इति। यदपि तैरभिधीयते-यथा पृथिवीत्वयोगात्पृथिवीति, तदपि स्वप्रक्रियामात्रमेव। यतो न हि पृथिव्याः पृथग्भूतं पृथिवीत्वमपि, येन तद्योगात्पृथिवी भवेत्, अपि तु सर्वमपि यदस्ति तत्सामान्यविशेषाऽऽत्मकं नरसिंहाऽऽकारमुभयस्वभावमिति।

तथा चोक्तम्-

" नान्वयः सहभेदत्वा-न्न भेदोऽन्वयवृत्तितः।
मृद्भेदद्रव्यसंसर्ग-वृत्ति जात्यन्तरं घटः॥ १॥ "

तथा-

" नरस्य सिंहरूपत्वा-न्न सिंहो नररूपतः।
शब्दविज्ञानकार्याणां, भेदाज्जात्यन्तरं हि सः॥१॥ " इत्यादि।

अथ रूपरसगन्धस्पर्शाः रूपिद्रव्यवृत्तेर्विशेषगुणाः, तथा संख्यापरिमाणानि पृथक्त्वं संयोगविभागौ परत्वापरत्वे इत्येते सामान्यगुणाः, सर्वद्रव्यवृत्तित्वात्। तथा-बुद्धिः सुखदुःखे-

द्वेषप्रयत्नधर्माधर्मसंस्कारा आत्मगुणाः । गुरुत्वं पृथिव्युदकयोः, द्रव्यस्वभावत्वेन परोपाधिकत्वं पृथिव्युदकाग्निषु, स्नेहोऽम्भस्येव, वेगाऽऽख्यः संस्कारो मूर्तद्रव्येष्वेव, आकाशगुणः शब्द इति । तत्र संख्याऽऽदयः सामान्यगुणा रूपाऽऽदिवद्द्रव्यस्वभावत्वेन न परोपाधिकत्वाद् गुणा एव न भवन्ति । अथापि स्युस्तथाऽपि न गुणानां पृथक्त्वव्यवस्था, तत्पृथक्त्वभावे द्रव्यस्वरूपहानेः, गुणपर्यायवद् द्रव्यमिति कृत्वा नान्तरीयकतया द्रव्यग्रहणेनैव ग्रहणं न्याय्यमिति न पृथग्भावः । किं च तस्य भावस्तत्त्वमित्युच्यते । भावप्रत्ययश्च यस्य गुणस्य हि भावाद् द्रव्ये शब्दनिवेशस्तद्भिधाने त्वतलावित्येनेन भवति । तत्र घटो रक्त उदकस्याऽऽहारको जलवान् सर्वैरेव घट उच्यते । अत्र च घटस्य भावो घटत्वं, रक्तस्य भावो रक्तत्वम्, आहारकस्य भाव आहारकत्वं, जलवतो भावो जलवत्त्वमित्यत्र घटसामान्यरक्तगुणक्रियाऽऽद्यसंबन्धरूपाणां गुणानां सद्भावात्, द्रव्ये पृथुबुध्नाकार उदकाऽऽहारणक्रमे कुटकाऽऽख्ये शब्दस्य घटाऽऽदेरभिनिवेशः, तत्र त्वतलौ, इह च रक्ताऽऽख्यको गुणो, यत्सद्भावात्तकतरच्च तद् द्रव्यं यत्र शब्दाभिनिवेशो येन भावप्रत्ययः स्यादिति । किमिदानीं रक्तस्य भावो रक्तत्वमिति न भवितव्यम्?, भवितव्यमुपचारेण । तथाहि-रक्त इत्येतद् द्रव्यत्वेनोपचार्यं तस्य सामान्यं भाव इति रक्तत्वमिति । न चोपचारस्तत्त्वचिन्तायामुपयुज्यते, शब्दसिद्धावेव तस्य कृतार्थत्वादिति । शब्दश्चाऽऽकाशस्य गुण एव न भवति, तस्य पौद्गलिकत्वादाकाशस्य चामूर्त्तत्वादिति । शेषं तु प्रक्रियामात्रं, न साधनदूषणयोरङ्गम् । क्रियाऽपि द्रव्यसमवायिनी गुणवत्पृथगाश्रयितुं न युक्तेति । सूत्र० १ श्रु० १२ अ० । आ० चू० । आ० म० । स्था० । तत्र पृथिव्यप्तेजोवायुराकाशकालादिगाऽऽत्ममनांसि नवैव द्रव्याणि । पृथिव्यप्तेजोवायुरित्येतच्चतुःसंख्यं नित्यानित्यभेदाद् द्विप्रकारं द्रव्यम् । तत्र परमाणुरूपं नित्यम्, सदकारणवन्नित्यमिति वचनात् । तदारब्धं तु द्व्यणुकाऽऽदिकार्यद्रव्यमनित्यम् । आकाशाऽऽदिकं तु नित्यमेव, अनुत्पत्तिमत्त्वात् । एषां च द्रव्यत्वाभिसंबन्धाद् द्रव्यरूपता । द्रव्यत्वाभिसंबन्धाद् यानि तु नैव, न च तानि द्रव्यत्वाभिसंबन्धवन्ति । यथा गुणाऽऽदिवस्तूनीति केवलव्यतिरेकिहेतुबलात् पृथिव्यादीनि द्रव्याऽऽदिगुणाऽऽदिभ्यो व्यावृत्तरूपाणि सिद्धानि, पृथिव्यादीनामपि नेदंवतां पृथिवीत्वाभिसंबन्धाऽऽदिकं लक्षणमितरेभ्यो भेदव्यवहारे तच्छब्दवाच्यत्वे वा साध्ये केवलव्यतिरेकिरूपं द्रष्टव्यम्, अभेदवतां त्वाकाशकालादिगद्रव्याणामनादिसिद्धतच्छब्दवाच्यता द्रष्टव्या । सम्म० ३ काण्ड । (भिक्षायां ग्राह्यद्रव्यविचारो 'गोयरचरिया' शब्दे तृ० भागे ६०६ पृष्ठे उक्तः। पानकसंसक्ताऽऽदिशब्देषु च वक्ष्यते) पित्तले, विलेपे, विलेपनद्रव्ये, भेषजे, भव्ये जन्तुनि, विनये, मद्ये, व्याकरणोक्ते लिङ्गसङ्ख्याऽन्वयिनि पदार्थे, ओर्वृक्कस्य विकारः, तस्येदं वा यत् । वृक्कविकारे, तत्संबन्धिनि च । त्रि० । वाच० । पं० देवविजयगणिकृतप्रश्ने, उत्तरम्-कश्चित् श्राद्धः स्वद्रव्येण प्रतिमां, कश्चित्पुस्तकं च कारयति, लिखति वा, तदा प्रतिमाकर्तुर्वैवद्रव्यं, पुस्तकलेखकस्य ज्ञानद्रव्यं च लगति, न वेति प्रश्ने, उत्तरम्-उभयोरपि यथाकर्म ते वस्तू न लगत इति संभाव्यते । १६७ प्र० । सेन० २ उल्ला० । गोमहिष्यजाप्रभृतीनां सर्पिषः, एवं क्षारामिष्टाऽऽदिपयसां, गोमहिष्यादितक्राणां चैकद्रव्यत्वमुत भिन्नद्रव्यत्वं वा?, आद्यविधौ त्वित्थं प्रोक्तम्-यत्पृथक् पृथक् नामाऽऽस्वादवत्त्वेन द्रव्यत्वम्, परं तेषु तक्राऽऽदिषु पृथक् पृथक् आस्वादवत्त्वं, न तु नामत्वमतस्तत्र कया रीत्या द्रव्यसंख्या गण्यते?, इति प्रश्ने, उत्तरम्-गोमहिष्यजाप्रभृतीनां सर्पिषः, क्षारमिष्टाऽऽदिपानीयानां च, गोमहिष्यादितक्राणां चैकद्रव्यत्वं गण्यते, यत उभयभिन्नत्वे सति भिन्नद्रव्यत्वं स्यादिति । २०१ प्र० । सेन० २ उल्ला० । अहम्मदावादसंघप्रकृतप्रश्नस्तदुत्तरं च । यथा-आम्लतक्रमधुरतक्रयोः, तथोष्णोदकशीतोदकयोः, तथा मेघजलकूपजलयोरेकद्रव्यत्वं गण्यते पृथग् वेति प्रश्ने, उत्तरम्-आम्लतक्रमधुरतक्रप्रमुखाणामेकद्रव्यत्वं गण्यत इति । १२४ प्र० । सेन० ४ उल्ला० । (भाषाद्रव्यस्य अनुवृत्तिकादिनेदाः 'सद्दव्वभेय' शब्दे वक्ष्यन्ते)

दव्वंतर–द्रव्यान्तर–न० । एकद्रव्यादन्यस्मिन् द्रव्ये तद्द्रव्यसदृशे, सम्म० । यथा-गोत्वसदृशपरिणतियुक्तात्तावद्येयद्द्रव्यात्तत्सदृशपरिणतियुक्तं बाहुलेयाऽऽदिद्रव्यन्तरम् । सम्म० ३ काण्ड । " पच्चुप्पन्नं भावं, विगयभविस्सेहिं जं समाणेइ । एयं पडुच्च वयणं, दव्वंतरणिस्सियं जं च ॥३॥ " सम्म० ३ काण्ड ।

दव्वछक्क–द्रव्यषट्क–न० । षडेव षट्कं, द्रव्याणां षट्कं द्रव्यषट्कम् । पृथिव्यप्तेजोवायुवनस्पतिकालस्वभावे षड्द्रव्यसमुदाये, दश० १ तत्त्व ।

दव्वजाय–द्रव्यजात–न० । तथाविधाशनाऽऽदिद्रव्यविशेषे, उत्त० २९ अ० । द्रव्यप्रकारे, प्रश्न० ३ संव० द्वार ।

दव्वट्ठयाए सत्तया–द्रव्यार्थप्रदेशार्थता–स्त्री० । द्रव्यार्थप्रदेशार्थोनयाऽऽश्रयणे, भ० २५ श० ३ उ० ।

दव्वट्ठया–द्रव्यार्थता–स्त्री० । द्रव्यमुपेक्षितपर्यायं वस्तु, तदेवार्थो द्रव्यार्थः, तद्भावस्तत्ता । भ० १० श० ४ उ० । द्रव्यत्वे, अनु० । द्रव्यं च तदर्थश्चेति द्रव्यार्थः, तस्य भावो द्रव्यार्थता । प्रदेशगुणपर्यायाऽऽधारतायामवयविद्रव्यतायाम्, स्था० १ ठा० । द्रव्यास्तिकनयमते, "दव्वट्ठयाए सासया, पज्जवट्ठयाए असासया ।" द्रव्यार्थतया द्रव्यास्तिकनयमतेन शाश्वती, द्रव्यास्तिकनयो हि द्रव्यमेव तात्त्विकमभिमन्यते, न पर्यायान्, द्रव्यं चान्वयपरिणामित्वात् । अन्यथा द्रव्यत्वायोगात्, अन्वयित्वाच्च सकलकालभावीति भवति द्रव्यार्थतया शाश्वती । जी० ३ प्रति० ४ उ० ।

दव्वट्ठाणाउय–द्रव्यस्थानाऽऽयुष्–न० । द्रव्यं पुद्गलद्रव्यं, तस्य स्थानं नेदः परमाणुद्विप्रदेशकाऽऽदि, तस्याऽऽयुः स्थितिः । अथवा-द्रव्यस्याणुत्व्याऽऽदिभावेन यत्स्थानमवस्थानं तदूपमायुर्द्रव्यस्थानाऽऽयुः । द्रव्यस्थितौ, भ० ५ श० ७ उ० ।

दव्वट्ठिइ–द्रव्यस्थिति–स्त्री० । द्रव्याणां वर्तनाकाले, विशे० । भ० (सा च चतुर्विधा 'काल' शब्दे तृतीयभागे ४७१ पृष्ठे गता) ('उवचय' शब्दे द्वितीयभागे ८८१ पृष्ठे वस्त्रदृष्टान्तेन च)

दव्वट्ठिय–द्रव्यार्थिक–पुं० । द्रव्यमेवार्थो यस्य, न तु पर्यायः, स द्रव्यार्थिकः । नयभेदे, आ० म० १ अ० २ खण्ड ।

दव्वट्ठियत–पुं० । द्रव्ये च वस्तुतत्त्वबुद्ध्या स्थितो, न तु पर्याये इति द्रव्यस्थितः । नयभेदे, आ० म० १ अ० २ खण्ड ।

दव्वत्थिक–पुं० । अस्तीति मतिरस्य आस्तिकः । " दैष्टि-

कास्तिकनास्तिक०-॥" इति निपातनादिकण्, द्रव्ये आस्तिको, न तु पर्याये इति द्रव्यास्तिकः । आ० म० १ अ० २ खण्ड । जं० । द्रव्यमात्रप्ररूपके मूलनयभेदे, रत्ना०७ परि० ।

द्रव्यार्थिकमतम्-

द्रव्यार्थिकमते द्रव्यं, तत्त्वं नेष्टमतः पृथक् । (१२)

द्रव्यार्थिकस्य मते द्रव्यं परमार्थतः सत्, अतो द्रव्यात् पृथग् भिन्नं विकल्पसिद्धं गुणपर्यायस्वरूपं तत्त्वं नेष्टम्, सवृत्तिमतोऽपि तस्य परमार्थतोऽसत्त्वादिति भावः । नयो० । ("तित्थयरवयणसंगह-विसेसपत्थारमूलवागरणी । दव्वट्ठिओ य,"(३ गाथा) इत्यादिगाथया 'णय' शब्देऽस्मिन्नेव भागे १८७६ पृष्ठे द्रव्यार्थिकनयो विवृतः) स च शुद्धाऽशुद्धभेदेन द्विधा । तत्र शुद्धो द्रव्यास्तिको नयग्रहनयाभिमतविषयप्ररूपकः । सर्वमेकं सदविशेषादिति शुद्धद्रव्यास्तिकाभिप्रायः । अशुद्धस्तु द्रव्यार्थिको व्यवहारनयमतार्थावलम्बी एकान्तनित्यचेतनाचेतनवस्तुद्वयप्रतिपादकसाङ्ख्यदर्शनाऽऽश्रितः, अत एव तन्मतानुसारिणः साङ्ख्याः । सम्म० १ काण्ड । वक्ष्यति चाऽऽचार्यः-" जं काविलं दरिसणं, एयं दव्वट्ठियस्स वत्तव्वं । " इति नैगमनयाभिप्रायः । द्रव्यास्तिकः शुद्धाशुद्धतया आचार्येण न प्रदर्शित एव । नैगमस्य सामान्यग्राहिणः संग्रहेऽन्तर्भूतत्वाद्विशेषग्राहिणश्च व्यवहारे इति नैगमाभावादिति द्रव्यप्रतिपादकनयप्रत्ययराशिमूलव्याकरणौ द्रव्यास्तिकः शुद्धाऽशुद्धतया व्यवस्थितः, अत्र पर्यायास्तिक ऋजुसूत्रशब्दसमभिरूढैवंभूतनयप्रत्ययराशिमूलव्याकरणौ शुद्धाशुद्धतया व्यवस्थितः । सम्म० १ काण्ड । नयो० । स्या० ।

"दव्वट्ठियनयपयडी" (सम्म० १ काण्ड ४ गाथा) अस्याश्च गाथायाः सर्वमेव शास्त्रं विवरणम् । " दव्वट्ठिओ अ पज्जवनओ य " (३) इत्यादिपश्चार्द्धैकदेशस्य विवरणायाऽऽह सूरिः-

दव्वट्ठियनयपयडी, सुद्धा संगहपरूवणाविसओ ।
पडिरूवे पुण वयण-त्थनिच्छओ तस्स ववहारो ॥ ४ ॥

इति गाथासूत्रम् । अत्र च संग्रहनयप्रत्ययः शुद्धो द्रव्यास्तिको, व्यवहारनयप्रत्ययस्त्वशुद्ध इति तात्पर्यार्थः ॥ अवयवार्थस्तु-द्रव्यास्तिकनयस्य व्यावर्णितस्वरूपस्य, प्रकृतिः स्वभावः, शुद्धेत्यसंकीर्णा विशेषासंस्पर्शवती, संग्रहस्याभेदतया (?) हि नयस्य प्ररूपणा-प्ररूप्यते नयोनैव कृत्वोपचर्यते पदसंहतिः, तस्या विषयोऽभिधेयः, विषयाऽऽकारेण विषयिणो वृत्तस्य विषयव्यवस्थापकत्वात्, उपचारेण विषयेण विषयिप्रकथनमेतत् । अन्यथा कः प्रस्तावः शुद्धद्रव्यास्तिके विधातुं प्रक्रान्ते संग्रहप्ररूपणायाः ?. स च संग्रहप्ररूपणाभिप्रायेण भाव एव । तथाहि-जातिद्रव्यगुणक्रियापरिभाषितरूपेण, स्वार्थद्रव्यालिङ्गकर्माऽऽदिप्रकारेण वा सुबन्तस्य योऽर्थः स भावाद् व्यतिरिक्तो वा नवेदव्यतिरिक्तो वा ? । यदि व्यतिरिक्तस्तदा निरुपाख्यत्वादत्यन्ताभाववत्तिङन्ताऽऽदिरूप इति कथं सुबन्तवाच्यः?। अव्यतिरिक्तश्चेत्कथं न भावमात्रेण सुबन्तार्थस्य, तिङन्तार्थस्यापि क्रियाकालकारकपुरुषोपग्रहवचनाऽऽदिरूपेण परिभाष्यमाणस्य सत्तारूपतैव । तथाहि-पचतीत्यत्र क्रिया विक्लित्तिलक्षणा, काल आरम्भप्रभृतिरपवर्गपर्यन्तो वर्तमानस्वरूपः, कारकः कर्ता, पुरुषः परः, भावाऽऽत्मकैकरूपग्रहः परार्थता, वचनमेकत्वं यद्यपि प्रतिपत्तिविषयः, तथाऽपि सत्त्वमेवैतत् । यतः क्रिया ह्यसती चेत्कारकैर्न साध्येत, खपुष्पाऽऽदिवत्, सती चेदस्तित्वमात्रमेव, सा कारकैराभिमुख्यत इति । एवं कालाऽऽद्योऽप्यसत्तश्चेन्न शशशृङ्गद्विषेरन्, सद्रूपकाश्चेत्कथं नास्तिवादभिन्नाः(?) इति सर्वत्र तिङन्तस्यार्थः, घटोऽस्तीत्यस्यार्थे यद्वाक्यं प्रयुज्यते घटः सन्निति, तत्र भावाभिधायिता पदद्वयस्यापि । तथाहि घट इति विशेषणं, सन्निति विशेष्यम् । अत्र द्वयेनाऽपि वा भावविपरीतेन भाव्यम् । न ह्यन्यथा तद्विशेषणं, नापि तद्विशेष्यं स्याद्, निरुपाख्यत्वात्, अत्यन्ताभाववत् । यदि पुनरभावविपरीतं तद्विष्यते, विशेषणविशेष्ययोः कथं न भावरूपता ? । तेन यदेव घटस्य भावो घटत्वं, तदेव घटः, यच्च सतो भावः सत्त्वं, तदेव सन्निति सर्वत्र संग्रहाभिप्रायतः प्ररूपणाविषयो भाव एव । उक्तं चैतत् समयसद्भावमभिदधताऽऽचार्येणापि--

" अस्यर्थः सर्वशब्दाना--मिति प्रत्याय्य लक्षणम् ।
अपूर्वदेवताशब्दैः, समं प्राऽऽहुर्गवादिषु ॥ १ ॥
घटाऽऽदीनां न चाऽऽकारा-त्प्रत्यापयति वाचकः ।
वस्तुमात्रनिवेशित्वा-त्तत्प्रतिर्नान्तरीयका ॥ २ ॥ " इति ।

अत एव "यत्र विशेषक्रिया नैव श्रूयते तत्रास्तिनैवन्तीपरः प्रथमपुरुषे प्रयुज्यमानोऽप्यस्तीति गम्यते," इत्युक्तं शब्दसमयविद्भिरिति । अवगतिश्चैवं युक्ता-यदि सत्ता पदार्थो न व्यभिचरेत्, अव्यभिचरेत् अव्यभिचारे च तदावेशात्तदात्मकतैव, आसत्तापरित्यागे वा स्वरूपहानमिति न सन्मात्रमेवाध्यक्षस्य, शब्दस्य वा विषयः, निःशेषमशेषपृथक्कृव्यवस्थापितमधुराऽऽदिरसपानकद्रव्यवत् । भेदप्रतिभासस्तु भेदप्रतिपादकाऽऽगमोपहतान्तःकरणानां तिमिरोपप्लुतदृशामेकशशलाञ्छनमण्डलस्यानेकत्वावभासनवदसदिति सर्वमेदानपह्नुवानः सर्वं सन्मात्रतया संगृह्णन् संग्रहः, शुद्धो द्रव्यास्तिकप्रकृतिरिति स्थितम् । तामेव शुद्धां 'पमिरूवे पुण(४)' इत्यादिगाथापश्चार्द्धेन दर्शयत्याचार्यः-प्रतिरूपं प्रतिबिम्बं, प्रतिनिधिरिति यावत् । विशेषेण घटाऽऽदिना द्रव्येण संकीर्णा सत्ता, पुनरिति प्रकृतिं स्मारयति । तेनाऽयमर्थः-विशेषेण संकीर्णा सत्ता प्रकृतिः स्वभावो वचनार्थनिश्चय इति हेयोपादेयोपेक्षणीयवस्तुविषयनिवृत्तिप्रवृत्त्युपेक्षाव्यवहारसंपादनार्थम्, उच्यत इति वचनं, तस्य घट इति विभक्तरूपतयाऽऽस्तीत्यविभक्ताऽऽत्मतया प्रतीयमानो व्यवहारज्ञभोग्योऽर्थः, तस्य निश्चयो निर्णयः पृथग्भूतश्च यः परिच्छेदः, तस्येति द्रव्यास्तिकस्य, व्यवहार इति लोकप्रसिद्धव्यवहारप्रवर्तनपरो नयः सोऽभिमन्यते । यदि हि हेयोपादेयोपेक्षणीयस्वरूपाः परस्परतो विभिन्नस्वभावाः सद्भूतयः शब्दप्रभवे संवेदने भावाः प्रतिभान्ति, ततो निवृत्तिप्रवृत्त्युपेक्षाणो व्यवहारस्तद्विषयः प्रवृत्तिमासादयति, नान्यथा । न चैकान्ततः सन्मात्रविशिष्टेषु संग्रहाभिमतेषु पृथक्स्वरूपतया परिच्छेदो बाधितरूपो व्यवहारनिबन्धनः संभवतीति । तथाहि-यदाह्याऽऽकारे निरपेक्षतया स्वग्राहिणो ज्ञानेऽतिभासमाधत्ते, तत्तथैव सदिति व्यवहर्त्तव्यं, यथा प्रतिनियतं सत्ताऽऽद्विरूपम्, सन्निवेशघटाद्याकारनिरपेक्षं च घटाऽऽदिकं स्वाभासिनि ज्ञाने स्वरूपं सन्निवेशयतीति स्वभावहेतुः। घटाऽऽदिनिरपेक्षत्वं च पटाऽऽदेः घटाऽऽद्यभावेऽपि भावादवभासमानाच्च सिद्धम् । यद्वा-प्रतिशब्दो वीप्सायाम्, रूपशब्दश्च वस्तुन्यत्र प्रवर्त्तते । तेनायमर्थः-रूपं रूपं प्रति प्रतिवस्तु, वस्तु प्रति यो वचनार्थनिश्चयः, तस्य प्रकृतिः स्वभावः स व्यवहार इति । तथाहि-प्रतिरूपमेव वचनार्थनिश्चयो व्यवहारहेतुः, न पुनरस्तित्वमात्रनिश्चयः, यतोऽस्तीत्युक्तेऽपि श्रोता शङ्कामुपगच्छन् लक्ष्यते, अतः किमिच्छन् लक्ष्यतेऽस्ती-

त्याश्रयकार्यां द्रव्यमित्युच्यते,तदपि किम्?,पृथिवी,साऽपि का?, वृक्षः, सोऽपि कः?,चूतः, तत्राप्यर्थित्वे यावत्पुष्पितः फलितः,इत्यादि तावन्निश्चिनोति यावद् व्यवहारलिङ्गिरिति । व्यवहारो हि नानारूपतया सत्तां व्यवस्थापयति, तथैव संव्यवहारसंज्ञनात्। अतो व्यवहरतीति व्यवहार इत्यन्वर्थसंज्ञां बिभ्रदशुद्धा द्रव्यास्तिकप्रकृतिर्भवति ।

विशेषप्रस्तारस्य पर्यायतया मूलव्याकरणी, शब्दाऽऽदयश्च शेषाः पर्यायनयभेदा इति प्रागुक्तं, तत्समर्थनार्थम्-

मूलणिमेणं पज्जव-णयस्स उज्जुसुअवयणविच्छेदो ।
तस्स उ सद्दाईआ, साहपसाहा सुहुमभेया ॥ ९ ॥

इति गाथासूत्रम । अस्य तात्पर्यार्थः-पर्यायनयस्य प्रकृतिराद्या ऋजुसूत्रः,स त्वशुद्धा, शब्दः शुद्धा,शुद्धतरा समभिरूढः,अत्यन्तशुद्धा त्वेवंभूत इति । अवयवार्थस्तु-मूलनिमेणमाधारः,पर्यायो विशेषः, तस्य नय उपपत्तिबलात्परिच्छेदः, तस्य, ऋजु वर्त्तमानसमयं वस्तु,स्वरूपावस्थितत्वात्,तदेव सूत्रयति परिच्छिनत्ति, नातीतानागतं,तस्यासत्त्वेन कुटिलत्वात्। तस्य वचनं पदं वाक्यं वा,तस्य विच्छेदोऽन्तःसीमेति यावत्। ऋजुसूत्रवचनस्येति कर्मणि षष्ठी । तेन ऋजुसूत्रस्यायमर्थो मान्यस्येति प्ररूपयतो वचनं विच्छिद्यमानं यत्तन्मूलनिमेणमत्र गृह्यते। ननु कथं वचनविच्छेदः शब्दरूपः परिच्छेदस्यनयस्य नयस्याऽऽधारः। नैष दोषः, विषयेण विषयिकथनरूपत्वादस्य । न च वचनार्थोऽस्य विषयो, न शब्द इति वक्तव्यं, वचनार्थयोरभेदात् वचनमपि यतो विषयः। अथ विषय एव किमुक्त इति न प्रेरणीयम्,शब्दाभिहितस्यैव प्रमाणत्वमिति ज्ञापनार्थत्वादेवमभिधानम, तस्य च पूर्वापरपर्यायविविक्ते एकपर्याय एव प्ररूपयतो वचनं विच्छिद्यते,एकपर्यायस्य परपर्यायासंस्पर्शात् । उक्तं च तन्मतमर्थं प्ररूपयद्भिः-" पल्लालं न दहत्यग्नि-र्दह्यते न गिरिः कचित् । नासंयतः प्रव्रजति, न-व्यजीवो न सिध्यति ॥१॥ " पलालपर्यायस्याग्निसङ्गावपर्यायादत्यन्तभिन्नत्वाद् यः पलालो नाऽसौ दह्यते,यश्च प्रस्तभावमनुभवति, नासौ पलालपर्याय इति। सम्म०१काण्ड। (" नामं ठवणा दविए,त्ति एस दव्वट्ठियस्स णिक्खेवो । " (६ गाथा सम्म०१ काण्ड) इत्यादिगाथाया ' णय ' शब्देऽस्मिन्नेव भागे १००८ पृष्ठे व्याख्यातोऽर्थः)

एतदेवाऽऽह-

तिर्यगूर्द्धप्रचयिनः, पर्यायाः खलु कल्पिताः ।
सत्यं तेष्वन्वयि द्रव्यं, कुण्मलाऽऽदिषु हेमवत् ॥ १३ ॥

(तिर्यगिति) तिर्यक्प्रचयिनः परस्परसमानाधिकरणत्वे सति परस्परसमानकालीना रूपरसाऽऽदय अशुत्वस्थौल्याऽऽदयश्च, ऊर्द्धप्रचयिनः परस्परसमानाधिकरणत्वे सति परस्परभिन्नकालीना रक्तश्यामत्वाऽऽदयः, संयोगविभागाऽऽदयश्च, पर्यायाः खलु निश्चितं, कल्पिता वासनाविशेषप्रभवविकल्पसिद्धा अपारमार्थिका इति यावत् । तेषु कल्पनारूढेषु पर्यायेष्वन्वयि व्यापकतया प्रतीयमानं द्रव्यं सत्यं, कुण्मलाऽऽदिषु नानाकाञ्चनपर्यायेष्वन्वीयमानं, हेमवत् । अयं भावः-यथा शुक्तौ रजतभ्रान्तौ बाधाऽवतारानन्तरं रजताभावज्ञानेऽपि शुक्तेर्भासमानत्वाद् शुक्तेः सत्यत्वं, रजतस्य चासत्यत्वं, तथा कुण्मलाऽऽद्यभावज्ञानेऽपि हेम्नो भानात् कुण्मलाऽऽदिपर्यायाणामसत्यत्वं हेमद्रव्यस्य सत्यत्वम् । एवमन्यत्रापि भावनीयमिति । नन्वेवं भ्रमाधिष्ठानत्वमेव सत्यत्वं, भ्रमविषयत्वं चासत्यत्वमित्यागतम्,न चासत्यत्वं प्रत्यक्षप्रमीयमानेषु पर्यायेष्वव्याप्तकम्,एवं तत्र तदसत्त्वरूपसत्यत्वमपि तेष्वव्याप्तकमिति चेद्,न,सत्यरजतस्याऽपि प्रतिभासकाले सत्ताभानेन कालत्रयसत एवैतन्मते सत्यत्वस्वीकारात् । अत एव कालत्रयत्यन्ताभावाप्रतियोगित्वमेव परमार्थसत्यत्वमित्यभिप्रेत्याऽऽहैतत्साम्प्रदायिकः ॥१३॥

आदावन्ते च यन्नास्ति, मध्येऽपि हि न तत्तथा ।
वितथैः सदृशाः सन्तो-ऽवितथा इव लक्षिताः ॥१४॥

(आदाविति) आदावन्ते च यद्वस्तु नास्ति,तन्मध्येऽपि मध्यकालेऽपि न तथा,नास्ति इत्यर्थः। न हि प्रागभावध्वंसावच्छिन्नकालसंबन्धः सत्य इत्यभ्युपगन्तुं शक्यम्, उत्पत्तिविनश्यत्तासमययोरुत्पत्तिविनाशव्यापारव्यग्रयोरन्वयिव्यवहारात् ; न च तद्विवेके मध्यभागः कश्चिदवशिष्यते, इक्षुदण्डस्येव सकलमूलाग्रभागच्छेदे । किं च-पूर्वं पश्चाच्चासत्स्वभावस्य कथं मध्यमक्षणे सत्स्वभावत्वम,स्वभावविरोधाद्, मध्यमक्षणे सत्त्वेन पर्यायः पूर्वापरकालयोरसद्व्यवहारकारीति न स्वभावविरोध इति चेत्, तर्हि पूर्वापरकालयोरसत्स्वभाव एवायं मध्यमक्षणसंबन्धेन सद्व्यवहारकारीत्येव किं न स्वीक्रियते?, तस्मान्न निरपेक्षपारमार्थिकसत्ताकं (?) न पर्यायाः,किं तु वितथैः शशविषाणाऽऽदिभिः काल्पनिकत्वेन सदृशाः सन्तोऽनादिलौकिकव्यवहारवासनावशादवितथा इव लक्षिताः, लोकैरिति शेषः ॥ १४ ॥

नन्वेवं द्रव्यार्थिकनये पर्यायाणां शशविषाणप्रायत्वात्तदवगाहिज्ञानमलीकविषयत्वेन मिथ्या स्याद्,न च घटाऽऽदिज्ञानविनिर्मुक्तविषयको द्रव्योपयोगः कश्चिदवशिष्यते, इति नामशेषता च तस्य स्यादित्याशङ्क्य शुद्धाद्वान्तरद्रव्यार्थिकभेदेन तस्य द्वैविध्यानुपपत्तिरित्यभिप्रायवानाह-

अयं द्रव्योपयोगः स्या-द्विकल्पेऽन्त्ये व्यवस्थितः ।
अन्तरा द्रव्यपर्याय-धीः सामान्यविशेषवत् ॥ १५ ॥

(अयमिति) अयं द्रव्योपयोगो द्रव्यार्थिकनयजन्यो बोधोऽन्त्ये विकल्पे शुद्धसंग्रहाऽऽख्ये व्यवस्थितः पर्यायबुद्ध्या अविचक्षितः स्यात्, अन्तरा शुद्धसंग्रहशुद्धर्जुसूत्रविषयमध्ये द्रव्यपर्यायधीरिव स्यात्, सामान्यविशेषबुद्धिवत् । यथा हि परेषां द्रव्यत्वाऽऽदिकं द्रव्यापेक्षया सामान्यं सद् गुणाऽऽद्यपेक्षया विशेषाऽऽख्यां लभते, तथाऽस्माकं घटाऽऽदिकं स्वपर्यायापेक्षया सामान्यं सद् गुणाऽऽद्यपेक्षया पर्यायाऽऽख्यां लभते,इति यद्यवगाही अवान्तरद्रव्यार्थिकः पर्यायोपसर्जनतां, द्रव्यमुख्यतां चाऽवगाहमानो न विरुध्यते,असतोऽप्युपसर्जनतया आश्रयणं च कर्णशष्कुल्यवच्छिन्नाऽऽकाशस्य शब्दग्राहकतां वदतां तार्किकाणाम्, आनुपूर्वीविशेषविशिष्टस्य शब्दस्य श्रोत्रग्राह्यतां वदतां मीमांसकाऽऽदीनां च इष्यत एवेति भावः। यद्वा-घटाऽऽदेर्द्रव्यार्थिकेन पर्यायविनिर्मुक्तद्रव्याऽऽकारेणैव ग्रहः, पर्यायनयेन तत्र पर्यायत्वाऽऽपादने च पर्यायविशिष्टतया ग्रहणमित्येवं सूक्ष्मर्जुसूत्रादन्यविशेषं यावद्व्यवस्थितिः,अन्यविशेषविकल्पे च शुद्धर्जुसूत्रलक्षणे कारणाभावादेव द्रव्योपयोगो व्यवस्थितः स्याद्गुणरतः स्यादिति व्याख्येयम् । न चानयाऽनवस्थयैवैकस्याऽपि बोधस्यानुपपत्तिः, तत्तदवान्तरनेदप्रवृत्तौ वा विषयान्तरसंचारानुपपत्तिः,पर्यायान्तरजिज्ञासोपरमे तद्बोधविश्रान्तेरिति भावनीयम । तदिदमुक्तं सम्मतौ-

" पज्जवणयवत्तव्वं, वत्थुं दव्वट्ठियस्स वयणिज्जं ।
जाव दविओवओगो, अपच्छिमवियप्पणिच्चयणो ॥८॥ "

(पूर्वं ' णय ' शब्देऽस्मिन्नेव भागे १७८६ पृष्ठे गाथेयं व्याख्याता) किं त्विद्मुपयुक्तत्वेन किञ्चिद् विद्यियते-न विद्यते पश्चिमे विकल्पनिर्वचने सर्वविकल्पधीव्यवहारलक्षणे यत्र स तथा, संग्रहावसान इति यावत् । ततः परं विकल्पवचनाप्रवृत्तेरीदृशो यावद् द्रव्योपयोगः प्रवर्तते तावद् द्रव्यार्थिकस्य वचनीयं वस्तु, तच्च पर्यायनयेन वि-विशेषेण तद्भूतं क्रान्तमेव विषयीकृतमेव पर्यायनयाऽऽक्रान्तं सत्तायां मानाभावादित्येकोऽर्थः ।

यद्वा-यद् वस्तु सूक्ष्मतरसूक्ष्मतमाऽऽदिबुद्धिना पर्यायनयेन स्थूलरूपं त्यजता व्युत्क्रान्तं-गृहीत्वा मुक्तं, किमिदं सृस्सामान्यं, यद् घटाऽऽदिविशेषानुपरक्तविषयीजनवदन्त्यमाकारेण (?) यावच्चुल्लकरूपतमोऽन्त्यो विशेषस्तावत्तत्सर्वं द्रव्यार्थिकस्य वचनीयमतो यावदपश्चिमविकल्पनिर्वचनो योऽन्त्यो विशेषस्तावद् द्रव्योपयोगः प्रवर्तते इति द्वितीयोऽर्थः ।

अत एव द्रव्यपर्यायविषयतया, तदितराविषयतया वा न शुद्धजातीयद्रव्यार्थिकपर्यायार्थिकव्यवस्था, किं तूपसर्जनीकृतानर्थप्रधानीकृतस्वार्थविषयतया। तदुक्तम्-

" दव्वट्ठिओ त्ति तम्हा, णत्थि णओ नियमसुद्धजाईओ ।
ण य पज्जवट्ठिओ णा-मको अ भयणाय ह विसेसो ॥ ९ ॥"

प्रजनोपसर्जनप्रधानभावाद्यगाहनादसामान्यसंग्रहेऽपि शुद्धद्रव्यार्थैकान्तिको न स्यादिति चेन्न, स्यादेवं पर्यायनयविचारानवतारदशायामेव तस्य शुद्धत्वव्यवस्थितेः, तदवतारे तु पूर्वप्रवृत्तद्रव्यार्थिकाप्रामाण्यनिश्चयेन तदर्थाभावस्यैव निश्चयात्। तदुक्तम् -

" दव्वट्ठिअवत्तव्वं, अवत्थु णियमेण होइ पज्जाए ।
तह पज्जवत्थु अवत्थुमेव दव्वट्ठिअणयस्स ॥ १० ॥ "
(सम्म० १ काण्ड)

अवस्तु इतरनयप्राधान्योपस्थितिजनितं नयाप्रामाण्यनिश्चयकृताऽवस्तुत्वनिश्चयविषयः, तस्मात्पर्यायविनिर्मुक्तप्रकारताकस्य पर्यायनिष्ठोपसर्जनत्वस्य विषयताकस्य वा द्रव्यार्थिकस्य तत्तत्तर्कोपनीतस्वार्थविचारदशायामेव शुद्धत्वं, पर्यायनयाऽऽयातनावाऽऽकाङ्क्षायां चाशुद्धत्वमिति विवेकः । नयो० ।

अथ नयेषु नयेषु प्रथमो द्रव्यार्थिकनय उक्तः, अतस्तस्य भेदा दश, तेषु प्रथमं भेदं विवरीषुराह -

द्रव्यार्थिकनयस्त्वाद्यो, दशधा समुदाहृतः ।
शुद्धद्रव्यार्थिकस्तत्र, ह्यकर्मोपाधितो भवेत् ॥ ९ ॥

(द्रव्यार्थिकेति) द्रव्यार्थिकपर्यायार्थिकाऽऽदिक्रमेण नया नव वर्तन्ते, तेषु आद्यः प्रथमो द्रव्यार्थिको नयः दशधा दशप्रकारः समुदाहृतः, तत्र च प्रथमो द्रव्यार्थिकनयः शुद्धद्रव्यार्थिक इति ह्यकर्मोपाधितः कर्मणामुपाधितो रहितः शुद्धद्रव्यार्थिकः कथ्यते । सद् द्रव्यम् । लक्षणं त्विदम्-सोदति स्वकीयान् गुणपर्यायान् व्याप्नोतीति सत्, उत्पादव्ययध्रौव्ययुक्तं सद्, अर्थक्रियाकारि च सत् । यदेवार्थक्रियाकारि तदेव परमार्थसत्,यच्च नार्थक्रियाकारि तदेव परतोऽप्यसत्, इति निजनिजप्रदेशसमूहैरखण्डवृत्तास्वभावविभावपर्यायाद् द्रवति, द्रोष्यति, अद्रुद्रुवत् इति द्रव्यम् गुणपर्यायवद् द्रव्यम्,गुणा अस्यो द्रव्यं वा। यदुक्तं विशेषाऽऽवश्यकवृत्तौ--"दवए दुयए दोरव-यवो विगारो गुणाण संदावो । दव्वं भव्वं भाव-स्स सूअभावं च जं जोगं॥२८॥" ('दव्व' शब्देऽनुपदमेवास्याः २४६२पृष्ठे व्याख्या गता) द्रवति तॉस्तान्पर्यायान् प्राप्नोति मुञ्चति वा १। द्रूयते स्वपर्यायैरेव प्राप्यते मुञ्चते वा २। द्रुः सत्ता, तस्या एवायवो विकारो वेति द्रव्यम्। ३-४। अवान्तरसत्तारूपाणि द्रव्याणि महासत्ताया अवयवो विकारो भवत्येवेति भावः। गुणाः क्षपरसाऽऽदयः,तेषां संद्रावः समूहो घटाऽऽदिरूपो द्रव्यम् ५ । तथा(भव्वं भविस्सति) भविष्यतीति भावः,तस्य भाविनः पर्यायस्य योग्यं भद्रव्यं तदपि द्रव्यम्, राजपर्यायार्हकुमारवत् ६ । तथा भूतं हि पञ्चात्कृतो भावः पर्यायो यस्य तदपि द्रव्यम् । इति दिक्। तदेव द्रव्यमर्थः प्रयोजनं यस्यासौ द्रव्यार्थिकः, अस्त्यर्थे ठक्प्रत्ययः । शुद्धः कर्मोपाधिरहितश्चासौ द्रव्यार्थिकश्च शुद्धद्रव्यार्थिक इति ॥ ९ ॥

अथ तस्य द्रव्यार्थिकस्य शुद्धताया विषयं दर्शयन्नाह-

यथा संसारिणः सन्ति, प्राणिनः सिद्धसन्निभाः ।
शुद्धाऽऽत्मानं पुरस्कृत्य, भवपर्यायतां विना ॥ १० ॥
उत्पादव्ययययोर्गौणे, सत्तामुख्यतयाऽपरः ।
शुद्धद्रव्यार्थिको भेदो, ज्ञेयो द्रव्यस्य नित्यवत् ॥ ११ ॥

प्राणा द्रव्यभावभिन्नाः सन्ति येषां ते प्राणिनः । संसारो गतिचतुष्काऽऽविर्भावः,सोऽस्ति येषां ते संसारिणः । यथा येन प्रकारेण शुद्धाऽऽत्मत्वाऽऽद्यिद्धकृष्णेन, सिद्धसन्निभाऽपकर्मनिर्मुक्तजीवनिभा विद्यन्ते । किं कृत्वा सन्ति?,शुद्धाऽऽत्मानं मूलस्वभावं,तथा सदजभावं शुद्धाऽऽत्मनः स्वरूपं,पुरस्कृत्याग्रे कृत्वा,कथम्?,विना,केन विना ?, भवपर्यायतां,भवः संसारस्तस्य पर्यायो भावस्तत्ता भवपर्यायता,तां विना । एतावता या चाऽऽदिकालिकी जीवस्य संसारावस्था वर्त्तते, सा प्रस्तुताऽपि न गण्यते । अविद्यमानोऽपि बाह्याऽऽकारेण सिद्धाऽऽकारः,तथाऽपि गृह्यतेऽन्तर्विद्यमानत्वात् । तदयमात्मा शुद्धद्रव्यार्थिकनयेन सिद्धसम एवास्तीति भावः । अत्र भावमात्रपरा द्रव्यसंग्रहगाथा-" मग्गणगुणठाणेहिं, चउदसहिं हवंति तह असुद्धणया । विण्णेया संसारी, सव्वे सुद्धा हु सुद्धणया ॥ १ ॥ " ॥ १० ॥ (उत्पादेति) उत्पादस्य व्ययस्य च गौणतायां, तथा सत्ताया ध्रुवात्मकतायाश्च मुख्यतायाम्, अपर इति द्वितीयो भेदः शुद्धद्रव्यार्थिकस्य ज्ञेयः । यतः उत्पादव्ययध्रौव्याणां गौणत्वेन सत्ताग्राहकः शुद्धद्रव्यार्थिको नाम द्वितीयो भेदः २ । अस्य मते द्रव्यं नित्यं गृह्यते, नित्यं तु कालत्रयेऽप्यविचलितस्वरूपं,सत्तामादायैवेदं युज्यते,कथम?,पर्यायाणां प्रतिक्षणं ध्वंसिनां परिणामित्वेनानित्यत्वोल्लब्धेः,परं तु जीवपुद्गलाऽऽदिद्रव्याणां सत्ता अव्यभिचारिणी नित्यभावमवलम्ब्य त्रिकालाविचलितस्वरूपाऽवतिष्ठते, ततो द्रव्यस्य नित्यवदिति द्रव्यस्य नित्यत्वेन द्वितीयो भेदः ॥ ११ ॥

अथ तृतीयभेदमुपदिशन्नाह-

कल्पनारहितो भेदः, शुद्धद्रव्यार्थिकाऽभिधः ।
तृतीयो गुणपर्याया-दभिन्नः कथ्यते ध्रुवम् ॥ १२ ॥

भेदः कल्पनया रहितः कल्पनारहितस्तृतीयो भेदः शुद्धद्रव्यार्थिकनामाऽस्ति ३ । यथा जीवद्रव्यं, पुद्गलाऽऽदिद्रव्यं च निजनि-

जगुणपर्यायेभ्यश्चाभिन्नमस्ति, यद्यपि भेदो वर्त्तते ऽन्याऽऽदीनां गुणपर्यायेभ्यः, तथाऽपि भिन्नविषयविपर्यपणा न कृता, अभेदाख्यैवार्पणा कृता, अतः कारणाद्द यद् द्रव्यं तद्द द्रव्यजन्यगुणपर्यायाभिन्नं तिष्ठति । यदेव द्रव्यं तदेव गुणो, यदेव द्रव्यं तदेव पर्यायो, महाघटजन्यखण्डघटवत्तदात्मकत्वात् । अत्र हि विवक्षावशाद्द भिन्नाभिन्नत्वं ज्ञेयमिति ॥ १२ ॥

अथ चतुर्थं भेदमाह--

कर्मोपाधेरशुद्धाऽऽख्य–श्चतुर्थो भेद ईरितः ।
कर्मभावमयस्त्वात्मा, क्रोधी मानी तदुद्भवात् ॥ १३ ॥

(कर्मेति) कर्मोपाधेः सकाशात् कर्ममिश्रजीवद्रव्यस्याशुद्धत्वं जायते, ततः कर्मोपाधेरशुद्धद्रव्यार्थिकश्चतुर्थो भेदः कथितः । यतः कर्मोपाधिसापेक्षोऽशुद्धद्रव्यार्थिक इति भेदः । अस्य च लक्षणं कथयति-यथा कर्मभावमयः कर्मणां ज्ञानाऽऽवरणाऽऽदीनां भावाः प्रकृतयस्ते प्रचुरा यत्रेति कर्मभावमयः, आत्मा तादृग्रूपो लक्ष्यते । येन येन कर्मणा आगत्य आत्मा निरुद्ध्यते, तदा तत्तत्कर्मस्वभावतुल्यपरिणतः सन् व्यवह्रियते, यतः क्रोधोदयाद्द जीवः क्रोधीति व्यपदिश्यते, मानकर्मोदयाज्जीवो मानीति व्यपदिश्यते । एवं यदा यद्द द्रव्यं येन भावेन परिणमति, तदा तद्द द्रव्यं तन्मयं कृत्वा ज्ञेयम् । यथा-लोहोऽग्निना परिणतो यदा काले प्राप्यते तदा अग्निरूप एवोद्भाव्यते, न तु लोहरूपः । एवमात्माऽपि मोहनीयाऽऽदिकर्मोदयेन यदा क्रोधाऽऽदिपरिणतः स्यात् तदा क्रोधाऽऽदिरूप एव बोद्धव्यः । अत एवाष्टावात्मनो भेदाः सिद्धान्ते व्याख्याता इति ।

अथ पञ्चमं भेदमाह-

उत्पादव्ययसापेक्षो–ऽशुद्धद्रव्यार्थिकोऽग्रिमः ।
एकस्मिन्समये द्रव्य–मुत्पादव्ययध्रौव्ययुक् ॥ १४ ॥

उत्पादव्ययसापेक्षः पञ्चमो भेदोऽशुद्धद्रव्यार्थिको ज्ञेयः । यतः-उत्पादव्ययसापेक्षः सत्ताग्राहकोऽशुद्धद्रव्यार्थिकः पञ्चम इति । १४ । यथा एकस्मिन्समये द्रव्यमुत्पादव्ययध्रौव्यरूपं कथ्यते । कथं तद्द ?, यः कटकाऽऽद्युत्पादसमयः स एव केयूराऽऽदिविनाशसमयः, परं तु कनकसत्ता कटककेयूरयोः परिणामित्वाद्वजेनैयैव । एवं सति त्रैलक्षण्यग्राहकत्वेनेदं प्रमाणवचनमेव स्यान्न तु नयवचनमिति चेन्न । मुख्यगौणभावेनैवानेन नयेन त्रैलक्षण्यग्रहणान्मुख्यनयं स्वस्वार्थग्रहणेन नयानां सप्तभङ्गीमुखेनैव व्यापारात् ॥ १४ ॥

अथ षष्ठभेदमाह-

भेदस्य कल्पनां गृह्ण–न्नशुद्धः षष्ठ इष्यते ।
यथाऽऽत्मनो हि ज्ञानाऽऽदि-गुणः शुद्धः प्रकल्पनात्॥१५॥

(भेदेति) अशुद्धद्रव्यार्थिकः षष्ठो भेदो भेदस्य भेदभावस्य कल्पनां गृह्णन् सन् जायते, यथाहि ज्ञानाऽऽद्यो गुणाः शुद्धा आत्मनः कथ्यन्ते इत्यत्र षष्ठी विभक्तिर्भेदं कथयति, जिह्वोः पात्रमित्यत्। परमार्थतस्तु गुणगुणिनोर्भेद एव नास्ति, तस्मात् कल्पितो भेदोऽत्र ज्ञेयो, न तु साहजिकः ॥ १५ ॥

अथ सप्तमं भेदं कथयति-

अन्वयी सप्तमश्चैक–स्वभावः समुदाहृतः ।
द्रव्यमेकं यथा प्रोक्तं, गुणपर्यायभावितम् ॥१६॥

(अन्वयीति) अन्वयद्रव्यार्थिकः सप्तमो भेद एकस्वभाव उक्तः। यथा-द्रव्यं चैकं गुणैः पर्यायैश्च भावितं वर्त्तते,द्रव्यमेकं गुणपर्यायस्वभावमस्ति। गुणेषु रूपाऽऽदिषु,पर्यायेषु कम्बुग्रीवाऽऽदिषु द्रव्यस्य घटस्यान्वयोऽस्ति । यतस्तत्सत्त्वे तत्सत्त्वमन्वयः । अथवा-सति सद्भावोऽन्वयः । यथा-सति दण्डे घटोत्पत्तिः । अत एव यदा द्रव्यं ज्ञायते तदा द्रव्यार्थाऽऽदेशेन तदनुगतसर्वगुणपर्याया अपि ज्ञायन्ते । यथा-सामान्यग्रन्थाभ्यासस्य परस्य सर्वा व्यक्तिरपि अवगन्तव्या, तथा अत्राऽपि ज्ञेयमित्यन्वयद्रव्यार्थिकः सप्तम इति ॥ १६ ॥

अथाष्टमभेदोत्कीर्त्तनमाह-

स्वद्रव्याऽऽदिकसंग्राही, ह्यष्टमो भेद आहितः ।
स्वद्रव्याऽऽदिचतुष्कैक्यः, सन्नर्थो दृश्यते यथा ॥१७॥

(स्वेति) स्वद्रव्याऽऽदिग्राहको द्रव्यार्थिकोऽष्टमो भेदः कथितः । यथा-अर्थो घटाऽऽदिः स्वद्रव्यतः स्वक्षेत्रतः स्वकालतः स्वभावतः सन्नेव प्रवर्त्तते । स्वद्रव्याद्द घटः काञ्चनो, मृन्मयो वा ॥ १ ॥ स्वक्षेत्राद्द घटः पाटलिपुत्रो, माथुरो वा ॥२॥ स्वकालाद्द घटो वासन्तिको, ग्रैष्मो वा ॥३॥ स्वभावात् घटः श्यामो, रक्तो वा ॥४॥ एवं चतुर्ष्वपि घटद्रव्यस्य सत्ता प्रमाणसिद्धैवाऽस्ति। स्वद्रव्याऽऽदिग्राहको द्रव्यार्थिकोऽष्टमो भेद इति ज्ञेयम् ॥ १७ ॥

अथ नवमं भेदमाह-

परद्रव्याऽऽदिकग्राही, नवमो भेद उच्यते ।
परद्रव्याऽऽदिकेभ्योऽस–न्नर्थः संज्ञाप्यते यथा ॥१८॥

तेषु द्रव्यार्थाऽऽदिषु परद्रव्याऽऽदिग्राहको द्रव्यार्थिको नवमः ॥१॥ यथाऽर्थो घटाऽऽदिः परद्रव्याऽऽदिचतुष्टयेभ्योऽसन् वर्त्तते । घटापेक्षया परद्रव्यं पटः, अतस्तत्त्वादिभ्यो घटोऽसन्नस्ति ॥ १ ॥ परक्षेत्राद्द यथा-घटो माथुरो वर्त्तते, न काशीजः, किं तु घटक्षेत्रं मथुरा, तदपेक्षया काशी भिन्ना । अत एव परक्षेत्रात्काशीलक्षणादसन् घटः ॥२॥ परकालाद्द यथा-घटो वसन्ते निष्पन्नोऽतो वासन्तिको घटः, वसन्तापेक्षया ग्रैष्मो भिन्नस्ततो ग्रीष्मकालाज्जातोऽसन्तिको घटोऽसन्॥३॥ परभावाद्द-विवक्षितश्यामाऽऽदिभावापेक्षया रक्तो घटोऽसन् वर्त्तते ॥४॥ एवं परद्रव्याऽऽदिग्राहको द्रव्यार्थिको नवमः ॥ १८ ॥

अथ दशमभेदोत्कीर्त्तनमाह-

परभावसंग्राही, दशमो भेद आख्यते ।
ज्ञानस्वरूपकस्त्वात्मा, ज्ञानं सर्वत्र सुन्दरम् ॥१९॥

परभावसंग्राही परभावग्राहको दशमो भेदः कथितः॥१०॥ यथा-ज्ञानस्वरूपक आत्मा ज्ञानस्वरूपी कथितः, दर्शनचारित्रवीर्यलेश्याऽऽदयो ह्यात्मनो गुणा अनन्ताः सन्ति, परं तु तेषु एकं ज्ञानं सारतरं वर्त्तते । अन्यद्रव्येभ्य आत्मनो भेदो ज्ञानगुणेन दर्शयिष्यते । तस्मात्कारणाच्छ्रीउपस्थिति-कत्वेनाऽऽत्मनः परमस्वभावो ज्ञानमेवाऽऽस्ते। इत्थमन्येषामपि द्रव्याणां परमभावा असाधारणगुणा ग्रहीतव्याः । परमभावग्राहको द्रव्यार्थिको दशम इति । अत्रानेकस्वभावानां मध्ये ज्ञानाऽऽख्यः परमस्वभावो गृहीत इति द्रव्यार्थिकस्य दश भेदाः ॥ १९ ॥ द्रव्या० ५ अध्या० ।

द्रव्यार्थिकभेदानाह-

आद्यो नैगमसंग्रहव्यवहारभेदात् त्रिधा ॥ ६ ॥

आद्यो द्रव्यार्थिकः । रत्ना० ७ परि० । (तत्र नैगमाऽऽदीनां व्याख्याऽन्यत्र)

दव्वणय-द्रव्यनय-पुं० । द्रव्यार्थिकनये, उत्त० ।

द्रव्यनय आह-"यथा नामाऽऽदि नाऽऽकारं, विना संवेद्यते तथा । नाऽऽकारोऽपि विना द्रव्यं,सर्वं द्रव्याऽऽत्मकं ततः ॥१॥" तथाहि-द्रव्यमेव मृदादि निखिलस्थासकोशकुटकपाद्याऽऽद्याकारानुयायि वस्तु सत्,तस्यैव तत् तदाकारानुयायिनः सद्बोधविषयत्वात्, स्थासकोशाऽऽद्याकाराणां तु मृद्द्रव्यातिरेकिणां कदाचिदनुपलम्भात्, तच्चोत्पादाऽऽदिसकलविकारविरहितं तथातथाऽऽविर्भावतिरोभावमात्रान्वितं समुल्लिखितसर्वप्रभेदनिर्भेदबीजं द्रव्यमागृह्णाति तरङ्गाऽऽदिप्रभेदस्तिमितसरःसलिलवत् । उत्त० १ अ० ।

आह च-

दव्वपरिणामचित्तं, मोत्तूणाऽऽगारदरिसणं किं तं ? ।
लप्पायव्वयरहियं, दव्वं चिय निव्वियारं तं ॥ ६६ ॥

को हि नाम स्थापनानयस्याऽऽकारग्रहः?,यस्माद्भवतीति द्रव्यमनादिमदुत्प्रेक्षितपर्यायशुद्धलाऽऽधारं मृदादिपूर्वपर्यायमात्रतिरोभावेऽग्रेतनपर्यायमात्राऽऽविर्भावः परिणामो द्रव्यस्य परिणामो द्रव्यपरिणामः, स एव तन्मात्रं,तदु मुक्त्वा किमन्यदाकारदर्शनं, येनोच्यते"आगारो चिय मइसद्दवत्थु ।" इत्यादि ?। ननु द्रव्यमेव तत्, किंविशिष्टम्?, उत्पादव्ययरहितं, निर्विकारम-उत्फणविफण-कुणमलिताऽऽकारसमन्वितसर्पद्रव्यवद् विकाररहितं; किं हि नाम तत्राऽपूर्वमुत्पन्नं, विद्यमानं वा विनष्टं, येन विकारः स्यादिति भावः । इति गाथाऽर्थः ॥ ६६ ॥

ननु कथमुत्पादाऽऽदिरहितमुच्यते,यावता सर्पाऽऽदिके द्रव्ये उत्फणविफणाऽऽद्याः पर्याया उत्पद्यमाना निवर्त्तमानाश्च प्रत्यक्षेणैव दृश्यन्ते ?, इत्याह-

आविब्भावतिरोभा-वमेत्तपरिणामकारणमचित्तं ।
निच्चं बहुरूवं पि य, नडो व्व वेसंतराऽऽवन्नो ॥ ६७ ॥

आविर्भावश्च तिरोभावश्च, तावेव तन्मात्रं,तदेव परिणामः, तस्य कारणं द्रव्यं, यथा सर्पे उत्फणविफणाऽवस्थयोरिति; न ह्यत्रापूर्वं किञ्चिदुत्पद्यते, किं तर्हि ?, छन्नरूपतया विद्यमानमेवाऽऽविर्भवति । नाप्याविर्भूतं सद्विनश्यति,किंतु छन्नरूपतया तिरोभावमेवाऽऽसादयति । एवं च सत्याविर्भावतिरोभावमात्र एव कार्योपचारात्कारणत्वमस्यौपचारिकमेव । तस्मादुत्पादाऽऽदिरहितं द्रव्यमुच्यत इति । आह-ननु यद्येकस्वभावं निर्विकारं द्रव्यं, तर्ह्यनन्तकालभाविनामनन्तानामप्याविर्भावतिरोभावानामेकहेलयैव कारणं किमिति न भवति ?, इत्याह-अचिन्त्यमचिन्त्यस्वभावं द्रव्यं,तेनैकस्वभावस्याऽपि तस्य क्रमेणैवाऽऽविर्भावतिरोभावप्रवृत्तेः,सर्पाऽऽदिद्रव्येष्वेकस्वभावेष्वप्युत्फणविफणाऽऽदिपर्यायक्रमप्रवृत्तेः प्रत्यक्षसिद्धत्वादिति । ननु यद्येवम्, उत्फणविफणाऽऽदिबहुरूपत्वात्पूर्वावस्थापरित्यागेन चोत्तरावस्थाऽधिष्ठानादनित्यता द्रव्यस्य किमिति न भवति ?, इति चेत्, इत्याह-वेषान्तराऽऽपन्ननटवद् बहुरूपमपि द्रव्यं नित्यमेव । इदमुक्तं भवति-यथा नायकविदूषककपिरक्तसाऽऽदिपात्रावसरेषु वेषान्तराण्यापन्नो वेषान्तराऽऽपन्नो नटो बहुरूपः, एवमुत्फणविफणाऽऽदिभावैर्बह्वपि द्रव्यमपि बहुरूपम्, तथाऽपि नित्यमेव, स्वयमविकारित्वात्, आकाशवत्;यथाहि घटपटाऽऽदिसंबन्धेन बहुरूपमप्याकाशं स्वयमविकारित्वाद् नित्यम्, एवं द्रव्यमपीति भावः । इति गाथाऽर्थः ॥ ६७ ॥

कारणमेव च सर्वत्र त्रिजुवने विद्यते, न क्वचित् कार्यम्, यच्च कारणं तत् सर्वं द्रव्यमेव, इति दर्शयन्नाह-

पिंडो कारणमिट्ठं, पयं व परिणामओ तहा सव्वं ।
आगाराइ न वत्थुं, निक्कारणओ खपुप्फं व ॥ ६८ ॥

मृदादिपिण्डः कारणमिष्टं कारणमात्रमेवाभ्युपगम्यते । कुतः?, इत्याह-परिणामित्वात् परिणमनशीलत्वात्,पयोवद् दुग्धवत् । यथा च पिण्डः, तथाऽन्यदपि सर्वं स्थासकोशकुशूलाऽऽदिकं त्रैलोक्यान्तर्गतं वस्तु कारणमात्रमेव, परिणामित्वात्, पयोवत्, यद् यत् कारणं तत् सर्वं द्रव्यमेव, इति द्रव्यनयस्य स्वपक्षसिद्धिः । ननु मृत्पिण्डाऽऽदीनां कार्यभूताः स्थासकोशकुशूलघटाऽऽद्याः प्रत्यक्षेणैव दृश्यन्ते, संबन्धिशब्दश्च कारणशब्दः सर्वदैव कार्यापेक्ष एव प्रवर्तते, तत् कथं कारणमात्रमेवाऽस्ति, न कार्यम् ?, इति चेत् । नैवम्, आविर्भावतिरोभावमात्र एव कार्योपचारात्, तपचारस्य चावस्तुत्वात् । इति स्वपक्षं व्यवस्थाप्य परपक्षं दूषयितुमाह-(आगारेत्यादि) द्रव्यमात्रं विहाय स्थापनाऽऽदिनयैर्यदाकाराऽऽदिकमभ्युपगम्यते,तत् सर्वमवस्तु । कुतः ?, इत्याह-निष्कारणत्वात् कारणमात्ररूपतयाऽनभ्युपगमात्, तदभ्युपगमे स्वस्मत्पक्षवर्तित्वप्रसङ्गात्, इह यत् कारणं न भवति तद् न वस्तु, यथा गगनकुसुमम्, अकारणं च परैरभ्युपगम्यते सर्वमाकाराऽऽदिकम्, अतो वस्तु । इति गाथाऽर्थः ॥ ६८ ॥ विशे० ।

दव्वणाम-द्रव्यनामन्-न० । द्रव्यलक्षणेऽर्थे, अनु० । तच्च-"से किं तं दव्वणामे ?। दव्वणामे छव्विहे पण्णत्ते । तं जहा-धम्मत्थिकाए० जाव अद्धासमए य । सेत्तं दव्वणामे ।" अनु० ।

दव्वतो-द्रव्यतस्-अव्य० । भावशून्यत्वेनाप्रधानतयाऽयथार्थमित्यर्थे, पञ्चा० १६ विव० ।

दव्वत्त-द्रव्यत्व-न० । द्रवति तांस्तान् पर्यायान् गच्छतीति द्रव्यं ,तस्य भावस्तत्त्वम । द्रव्यभावे, द्रव्या० ।

द्रव्यत्वं द्रव्यजातत्वं, पर्यायाऽऽधारलोक्यः ।
प्रमाणेन परिच्छेद्यं, प्रमेयं प्रणिगद्यते ॥ ३ ॥

द्रवति तांस्तान् पर्यायान् गच्छतीति द्रव्यं, तस्य भावस्तत्त्वम। द्रव्यभावो हि पर्यायाऽऽधारताऽभिव्यक्तस्वजातिविशेषः । "द्रव्यत्वं जातिरूपत्वाद् गुणो न भवति," इदंकुमैयायिकाऽऽदिवाक्यतया आशङ्का न कर्त्तव्या, यतः-"सहभाविनो गुणाः, क्रमभुवः पर्यायाः ।" इदंश्येव जैनशासने व्यवस्थाऽस्तीति । द्रव्यत्वं चेद्गुणः स्याद्गुणाऽऽदिवदुत्कर्षापकर्षवन्नि स्यादिति तु कुचोद्यम्, एकस्वाऽऽदिसंख्यायाः परमतेऽपि व्यभिचारेण तथा व्याप्त्यभावादेव निरसनीयम ॥ ३ ॥ द्रव्या० ११ अध्या० ।

दव्वत्थव-द्रव्यस्तव-पुं० । द्रव्ये द्रव्यविषयः स्तवः पूजा द्रव्यस्तवः । भावस्तवकारणभूते स्तवभेदे, पञ्चा० । स च-

दव्वे भावे य थओ, दव्वे नावथयरागओ सम्मं ।
जिणभवणाऽऽदिविहाणं, नावथओ चरणपरिणामो ॥२॥

द्रव्ये द्रव्यविषयः, भावस्तवकारणभूत इत्यर्थः । भावे भावविषयः पारमार्थिकः, परिणामविशेषरूपो वेत्यर्थः । चशब्दः समुच्चये । स्तवः स्तोतव्यपूजनं, भवतीति गम्यम् । तत्राऽऽद्यं तावदाह-द्रव्ये द्रव्यविषयः स्तवः । क इत्याह-(जिणभवणाऽऽइ-

विहाणं) अर्हद्गृहप्रतिमाऽऽदीनां करणम्, उपलक्षणत्वात्कारणं च। कथं ?, सम्यगागमनीत्या। कुतः ?, भावस्तवरागतः सर्वविरतिबहुमानात्। चरणं हि निर्वाणैकहेतुत्वाच्चरणं, ततस्तत्प्राप्त्युपायश्च द्रव्यस्तव इति विधेयोऽसावित्येवंरूपादिति।

अथ भावस्तवस्वरूपमाह--भावस्तवः परमार्थपूजनमध्यात्मपूजा वा। क इत्याह--चरणप्रतिपत्तिः--सर्वविरत्यभ्युपगमः। इति गाथाऽर्थः ॥ २ ॥

अथ द्रव्यस्तवलक्षणं प्रपञ्चयन्नाह-

जिणजन्नणबिंबठावण-जत्तापूजाऽऽइ सुत्तओ विहिणा।
दव्वत्थओ त्ति नेयं, भावत्थयकारणत्तेण ॥ ३ ॥

जिनस्यार्हतो भवनं च गृहं, बिम्बं च प्रतिमा, स्थापनं च प्रतिष्ठा, यात्रा चाष्टाह्निका महिमा, पूजा च पुष्पाऽऽद्यर्चनम्, आदिर्यस्य जिनगुणगानाऽऽदेस्तज्जिनभवनबिम्बस्थापनयात्रापूजाऽऽदिः। द्रव्यस्तव इति ज्ञेयमिति योगः। तच्च न यथाकथञ्चिदित्याह-सूत्रत आगममाश्रित्य, तदपि विधिना। "जह रेहइ तह समं" इत्यादिना विधानेन द्रव्यस्तवो भावस्तवकारणभूतपूजा, इतिशब्द उपप्रदर्शनार्थः। ज्ञेयं ज्ञातव्यम्। केन हेतुनेत्याह-भावस्तवकारणत्वेन चरणप्रतिपत्तिरूपभावस्तवहेतुत्वात्। द्रव्यशब्दो ह्यत्र कारणपर्यायः। इति गाथाऽर्थः॥३॥

कथं पुनरिदं जिनभवनाऽऽदि भावस्तवहेतुतां प्रतिपद्यत इत्याह-

विहियाणुट्ठाणमिणं, ति एवमेयं सया करेंताणं।
होइ चरणस्स हेऊ, णो इहलोगादवेक्खाए ॥ ४ ॥

विहितमाज्ञाऽऽगमे विधेयतयाऽनुमतं यदनुष्ठानं क्रिया तद्विहितानुष्ठानम्, इदं जिनभवनाऽऽदिकरणलक्षणम्, इति अनेनौचित्येन, एवमनेन भावस्तवानुरागलक्षणेन स्तवविधिलक्षणेन वा प्रकारेण। एतज्जिनभवनाऽऽदिविधानम्, सदा सर्वकालम्, कुर्वतां विदधतां, भवति जायते, चरणस्य सर्वविरतिरूपचारित्रस्य, हेतुर्निमित्तम्। एतदेव जिनभवनाऽऽदि। उक्तविपर्यये यद्भवति तदाह-(नो) नैव। इहलोकाऽऽद्यपेक्षया ऐहभविककीर्त्यादिपारभविकदेवत्वराज्याऽऽदिपदार्थायत्नत्वेन चरणस्य हेतुर्भवति। एतज्जिनभवनाऽऽदिविधानं निदानदूषितत्वात्। इति गाथाऽर्थः ॥ ४ ॥

भावस्तवकारणत्वं तदनुरागश्च द्रव्यस्तवमिश्रग्रन्थमुक्तम्, तत्राऽसौ यथा भावस्तवहेतुः स्यात्तथा दर्शितं, न पुनस्तदनुराग इत्याशङ्क्याऽऽह--

एवं चिय भावत्थए, आणाआराहणा उ रागो वि।
जं पुण इय विवरीयं, तं दव्वत्थओ वि णो होइ ॥ ५ ॥

(एवं चिय) एवमेव विहितानुष्ठानमिदमित्यभिप्रायेणैव, भावस्तवे चरणप्रतिरूपे, रागोऽपि बहुमानोऽपि, न केवलं चरणहेतुत्वमित्यपिशब्दार्थः। कुत एतदेवमित्याह-आज्ञाऽऽराधनादाप्तोपदेशानुपालनात्, निर्निदानतामेव हि जिनाः समनुमन्यन्ते। उक्तविपर्ययमाह-यज्जिनभवनाऽऽदिविधानम्, पुनरिति पूर्वोक्तार्थविलक्षणताप्रतिपादनार्थः, इति विपरीतमनन्तरोक्तविधिविपर्ययः, तम्, तज्जिनभवनाऽऽदिविधानम्, द्रव्यस्तवोऽप्युक्तनिर्वचनो न केवलं भावस्तवः, उत्सूत्रत्वात्, न भवति न जायते। इति गाथाऽर्थः ॥ ५ ॥

शुक्लविधिविपरीततायामपि तद् द्रव्यस्तवो भविष्यतीत्याशङ्क्याऽऽह-

भावे अइप्पसंगो, आणाविवरीयमेव जं किंचि।
इह चित्ताणुट्ठाणं, तं दव्वथओ जवे सव्वं ॥ ६ ॥

भावे च सत्तायां पुनर्द्रव्यस्तवस्योक्तविपरीतत्वेऽपि। किं स्यादित्याह-अतिप्रसङ्गोऽतिव्याप्तिलक्षणानिष्टाऽऽपत्तिरित्यर्थः। अतिप्रसङ्गमेव व्यनक्ति--आज्ञाविपरीतमेव आप्तवचनविपर्यस्तमपि। एवकारस्यापिशब्दार्थत्वाद्, यदित्यनुष्ठानम्, किञ्चिदनियतस्वरूपम्, इह स्तवविचारे, चित्रानुष्ठानं नानाप्रकारा हिंसाऽऽदिक्रिया, तदनुष्ठानम्, द्रव्यस्तवो निर्णीतशब्दार्थो, भवेत् जायेत। सर्वं समस्तम्। आज्ञाविपरीतत्वाविशेषेण जिनभवनाऽऽदिविधानवदिति गाथाऽर्थः ॥ ६ ॥

इहार्थे परमतमाशङ्क्य परिहरन्नाह-

जं वीयरागगामी, अह तं णणु गरहितं पि हु न एवं।
सिय जुचियमेव जं तं, आणाआराहणा एवं ॥ ७ ॥

यदित्यनुष्ठानम्, वीतरागगामि जिनविषयम्, अथेति परप्रश्नार्थः, तदनुष्ठानमाज्ञाविपरीतमपि द्रव्यस्तवो भवति, न पुनर्यत्किञ्चन हिंसाऽऽदिकम्, अतः कथमतिप्रसङ्ग इति परमतम्। एतत्परिहरन्नाह--(नन्विति) परमतान्नामायाम्, गर्हितमपि निन्द्यमपि गालीप्रदानाऽऽदिकम्, आस्तामगर्हितम्। हुशब्दो वाक्यालङ्कृतौ, स इति द्रव्यस्तवः, जवेद्। एवमनेन भवदभ्युपगतन्यायेनाऽऽज्ञाविपरीतमप्यनुष्ठानं वीतरागविषयं द्रव्यस्तव इत्येवंलक्षणेन। पुनः परमतमाशङ्कमान आह-स्याद्भवेत्, तव मतिरिति गम्यम्। यदुत उचितमेव सङ्गतमेव, यदित्याज्ञाविरीतं वीतरागगामि, तदित्यनुष्ठानं द्रव्यस्तवो जवति, न पुनर्गोर्हितमपीति नातिप्रसङ्गः। इत्याचार्य उत्तरमाह--आज्ञाऽऽराधनाऽऽप्तोपदेशपालनैव। एवमनेनैव प्रकारेणाऽऽज्ञाविपरीतमपि यदुचितमनुष्ठानं तद् द्रव्यस्तव इत्येवंलक्षणेन द्रव्यस्तवाभ्युपगमे आज्ञाऽनुपालनारूपत्वादुचितस्य। नाज्ञाबोधीर्णमप्युचितं जवितुमर्हति। इति गाथाऽर्थः ॥ ७ ॥

उचितानुष्ठानस्याऽऽज्ञाऽनुपालनारूपत्वमेव दर्शयन्नाह-

जुचियं खलु कायव्वं, सव्वत्थ सया णरेण बुद्धिमता।
इय फलसिद्धी णियमा, एस चिय होइ आणं ति ॥ ८ ॥

उचितमेव देशकालावस्थाऽऽद्यपेक्षया सङ्गतमेव, खलुरवधारणे, कर्त्तव्यं विधेयम्, सर्वत्र समस्ते देशे, पात्रे वा। सदा सर्वदा, नरेण पुरुषेण। नरग्रहणं प्राणिमात्रोपलक्षणम्। धर्मोपदेशे नराणां प्राधान्यात्, बुद्धिमता मतिमता, बुद्धिविकलो हि न तत् कर्तुं क्षमते, बुद्धिविकलत्वादेव। अथ कस्मादेवमुपदिश्यत इत्याह-इत्यनेनोचितकरणेन, फलसिद्धिः साध्यनिष्पत्तिः, नियमाभिश्रयेण, साध्यश्च मुख्यवृत्त्या मोक्षार्थः, तत्कारणतया धर्मार्थः, प्रसङ्गतश्चेतराविति। प्रकृतार्थयोजनायाऽऽह--एषैवानन्तरोक्ता उचितक्रिया, भवति वर्त्तते, आज्ञा आप्तोपदेशः, तत उचितकरणमाज्ञाऽऽराधनेति स्थितम्। इतिशब्दः समाप्तावुपप्रदर्शने वा। इति गाथाऽर्थः ॥ ८ ॥

उचितकरणं द्रव्यस्तव इत्युक्तम्, अथैतस्यैव विपर्ययमाह--

जं पुण एयविवरीयं, एगंतेणेव भावसुण्णं ति।

तं विसयम्मि वि ण तओ, नावयया हेउतो णेयं ॥९॥

यदितिचानुष्ठानम्, पुनःशब्दो विशेषद्योतनार्थः, एतद्युक्तमौचित्यरहितम् । तथा एकान्तेनैव सर्वथैव, नावश्यं बहुमानशून्यम्, एकान्तग्रहणाद् भावहेतुसंयुक्तस्य कथञ्चिदौचित्यवियुक्तस्यापि द्रव्यस्तवत्वमाह, इतिशब्द उपप्रदर्शनार्थो निगमनार्थश्च । तदित्थमनुष्ठानम्, विषयेऽपि वीतरागेऽपि, विधीयमानम्, आस्तामविषये । न तओ न द्रव्यस्तवो, भवतीति ज्ञेयं ज्ञातव्यम् । कुतः ?, इत्याह-भावस्तवहेतुतः, इह भावप्रत्ययस्य लुप्तस्य दर्शनाद्भावस्तवहेतुत्वाद्भावस्तवकारणत्वात् । इति गाथाऽर्थः ॥ ९ ॥

अथ कस्माद्भावस्तवहेतुभूतमनुष्ठानं द्रव्यस्तवो न प्रवर्तीत्यत्राऽऽशङ्कायामाह-

समयम्मि दव्वसद्दो, पायं जं जोग्गयाएँ रूढो त्ति ।
णिरुवचरितो ज बहुहा, पओगजेदोवलंभाओ ॥१०॥

समये सिद्धान्ते, द्रव्यशब्दो द्रव्यमित्येष ध्वनिः, प्रायो बाहुल्येन, प्रायोग्रहणात् क्वचिदप्राधान्येऽपि, वर्तत इति सूचनार्थः । यदिति यस्मादर्थे, अयं च " भावत्थयहेऊ (१२)" इत्यनेन व्यवहितगाथाऽवयवेन संभवत्यते । योग्यतायां योग्यतावाचित्वे, रूढः प्रसिद्ध इत्येवं वक्ष्यमाणोदाहरणन्यायेन उपचरितादुपचाराश्रिष्कान्तो निरुपचरितोऽकाल्पनिकः, तुशब्द एवकारार्थः, तेन निरुपचरित एव । कुत एतदेवमित्याह-बहुधा बहुभिः प्रकारैः, प्रयोगभेदोपलम्भात् प्रयुक्तविशेषदर्शनात् । इति गाथाऽर्थः ॥ १० ॥

प्रयोगभेदानेव दर्शयन्नाह-

मिउपिंडो दव्वघडो, सुसावगो तह य दव्वसाहु त्ति ।
साहू य दव्वदेवो, एमाइ सुए जओ भणितं ॥११॥

मृत्पिण्डो मृत्तिकापिण्डो द्रव्यघटो द्रव्यतो योग्यतया घटो द्रव्यघटः, सुश्रावकः शोभनः श्रमणोपासकः, तथा चेति समुच्चये । द्रव्यतो योग्यतया साधुर्द्रव्यसाधुः । इतिशब्द उपप्रदर्शनार्थः । साधुश्च संयतः पुनः, द्रव्यतो योग्यतया देवः सुरो द्रव्यदेवः । (एमाइ त्ति) इह चशब्दलोपः प्राकृतत्वात्, ततश्च एवमादि च इत्यादि प्रयोगजातम् । आदिशब्दाद् द्रव्यनारकाऽऽदिग्रहः । श्रुते प्रवचने, यतो यस्माद्भणितमुक्तम्, ततः प्रयोगभेदोपलम्भाद् द्रव्यशब्दो योग्यतायां रूढः । इति गाथाऽर्थः ॥११॥

यतो योग्यतायां द्रव्यशब्दः-

ता भावत्थयहेऊ, जो सो दव्वत्थओ इहं इट्ठो ।
जो ज ण एवंभूओ, स अप्पहाणो परं होति ॥१२॥

तत्तस्माद्भावस्तवहेतुश्चरणप्रतिपत्तिकारणं साक्षात्परम्परया वा यो जिनभवनविधानाऽऽद्यनुष्ठानविशेषः । (सो इति) असौ द्रव्यस्तवः पूर्वोक्तस्वरूपः । इह द्रव्यस्तवाधिकारे, अन्यत्र पुनः स्तवशब्दार्थकः, तत्रानुपयुक्तपुरुषाऽऽदिलक्षणोऽपि,इष्टोऽभिमतो द्रव्यस्तवस्वरूपविदुषाम् । ननु भावस्तवहेतुरपि द्रव्यस्तवोऽनाद्यऽऽदीनामिष्यते, तत्कथमित्याह-यः पुनर्द्रव्यस्तवविशेषः, (न) नैव, एवंभूतोऽमुं प्रकारं भावस्तवकारणत्वलक्षणं प्राप्तः, स द्रव्यस्तवः, अप्रधानोऽशोभनः, परं केवलम्, भवति जायते, द्रव्यस्तवस्याप्राधान्येऽपि प्रवृत्तेः, अशोभनत्वं चास्य भावस्तवहेतुत्वाभावेति गाथाऽर्थः ॥१२॥

अप्राधान्यार्थतामेव द्रव्यशब्दस्य दर्शयन्नाह-

अप्पाहण्णे वि इहं, कत्थइ दिट्ठो उ दव्वसद्दो त्ति ।
अंगारमद्दगो जह, दव्वायरिओ सयाऽऽणवो ॥१३॥

अप्राधान्येऽप्यप्रधानत्वेऽपि, न केवलं योग्यतायामेव । इह प्रवचने, क्वचित् शब्दविषये, दृष्टस्तु उपलब्ध एव, द्रव्यशब्दो द्रव्य इति ध्वनिः, इतिशब्दो वाक्यार्थसमाप्तौ । इहैव निदर्शनामाह-अङ्गारमर्दकः प्रवचनप्रतीतः । यथेति दृष्टान्तार्थः । द्रव्याऽऽचार्य आचार्यत्वयोग्यतायां सत्यामप्रधानाऽऽचार्यः । कियन्तं कालं यावदित्याह-सदा आजन्माऽपीत्यर्थः । अथवा-स च स पुनः, अनव्यो मुक्तेरयोग्यो यत इति गाथाऽर्थः ॥१३॥ (अङ्गारमर्दकसंविधानकं तु ' अंगारमद्दग ' शब्दे प्र० भागे ४३ पृष्ठे गतम्)

" जो उ न एवंभूतो, स अप्पहाणो परं होइ । (१२)" इत्येवं पूर्वोक्तमर्थं निगमयन्नाह-

अप्पाहण्णा एवं, इमस्स दव्वत्थवत्तमविरुद्धं ।
आणावज्झत्तणओ, न होइ मोक्खंगया णवरं ॥१४॥

अप्राधान्याद्भावस्तवहेतुत्वेनाशोभनत्वात्,एवमुक्तेन न्यायेनाप्राधान्यार्थं द्रव्यशब्दप्रवृत्तिदर्शनलक्षणेन, (इमस्स त्ति) अस्य भावस्तवहेतोर्द्रव्यस्तवस्य, द्रव्यस्तवत्वं द्रव्यस्तवता, अविरुद्धं सङ्गतमेव । एवं तर्हि भावस्तवहेतोस्तद्धेतोश्च द्रव्यस्तवत्वाविरूढतायां सत्यामविशेष एव तयोः। सत्यम् । नवरं केवलम्, न भवति न जायते,मोक्षाङ्गता निर्वाणहेतुता । 'इमस्स' इति वर्तते । कुतः ?, आज्ञाबाह्यत्वाद्दाम्भवचनबहिष्कृतत्वात् । यदाज्ञाबाह्यं तन्मोक्षाङ्गं न भवति, तथाविधहिंसाऽऽदिवत्, आज्ञाबाह्यश्चायं भावस्तवहेतुर्द्रव्यस्तवः । इति गाथाऽर्थः ॥ १४ ॥

यथाऽसावप्रधानान्मोक्षो न भवति, तथा फलान्तरमपि किं नास्तीत्याशङ्क्याऽऽह--

भोगाऽऽदिफलविसेसो, ज अत्थि एत्तो वि विसयजेदेण ।
तुच्छो ज तगो जम्हा, हवति पगारंतरेणावि ॥ १५ ॥

भोगा मनोज्ञशब्दाऽऽदयः, आदिशब्दात्स्वर्गसुकुलप्रत्ययातिशुभशरीराऽऽदिपरिग्रहः। ते एव फलविशेषः साध्यभेदो भोगाऽऽदिफलविशेषः,पुनरस्ति भवति,इतोऽपि अप्रधानद्रव्यस्तवादपि, न केवलं प्रधानद्रव्यस्तवादेव । अथ कथमाज्ञाबाह्यानुष्ठानस्यैवं फलतेत्याशङ्क्याऽऽह--विषयजेदेन गोचरविशेषेण,निस्सिलातिशयमाणिक्यमकराऽऽकरभगद्वीतरागलक्षणेन हेतुना; न हि भगद्विषयमाज्ञाविकलमप्यनुष्ठानमफलम्,पात्रप्राधान्यादिति । ननु यद्येवं फलमाज्ञाबाह्यानुष्ठानं, तदा कथमस्याप्रधानद्रव्यस्तवतेत्यत्राऽऽह-तुच्छस्वरूपः पुनः, तकोऽसौ भोगाऽऽदिफलविशेषो,नाऽसौ विवेकिनां फलतयाऽवभासते । कस्मादेवमित्याह-यस्मात् कारणात्, भवति जायते, तको भोगाऽऽदिफलविशेष इति प्रकृतम् । प्रकारान्तरेणाप्युपायान्तरेणाऽपि, जिनभवनाऽऽदिव्यतिरेकेणाऽपि, बालतपःप्रभृतिनिरपीत्यर्थः । " दौर्गत्यदोषविच्छेदिमणिप्राप्तिपटीयसः । पारावाराज्जरत्काच-खण्डप्राप्तिः फलं किमु ? ॥१॥ " इति गाथाऽर्थः ॥ १५ ॥

अथ द्रव्यस्तवस्याऽद्रव्यस्तवताभाशङ्क्य परिहरन्नाह--

उचियाणुट्ठाणाओ, विचित्तभज्जोगतुल्ल मो एस ।
जं ता कह दव्वथओ, इत्थारेणऽप्पभावाओ ॥ १६ ॥

(उचियाणुट्ठाणाओ) इह भावप्रत्ययस्य लुप्तत्वेनोचितानुष्ठा-

नत्वादाप्तोपदिष्टत्वेन विहितक्रियारूपत्वाद्विचित्रयतियोगतुल्यो ग्लानप्रतिचरणस्वाध्यायाऽऽदिरूपनानाविधसाधुव्यापारसदृशो-ऽतिशुभ इत्यर्थः । मकारोऽत्र प्राकृतशैलीप्रभवः । एषोऽनन्तरोक्तो, जिनभवनविधानाऽऽदिकोऽनुष्ठानविशेषः । (यदिति) यस्मादेवम्, तत्तस्मात्, कथं केन प्रकारेण, द्रव्यस्तवो भवति । न कथञ्चिदित्यर्थः । भावस्तव एवाऽयमिति हृदयम् ।

अत्रोत्तरमाह-तद्द्वारेण जिनभवनाऽऽदिविधानमुखेन अल्पः साधुयोगापेक्षया स्तोको,भावः शुभाध्यवसायो यस्मात्स तथा, तस्मात्, इह च भावप्रत्ययो द्रष्टव्यः, अतोऽल्पभावत्वात् । इति गाथार्थः ॥१६॥

अमुमेव गाथार्थं भावयन्नाह-

जिणभवणाऽऽदिविहाण-दारेणं एस होति सुहजोगो ।
उचियाणुट्ठाणं पि य, तुच्छो जइजोगतो णवरं ॥१७॥

जिनभवनाऽऽदिविधानद्वारेण अर्हदाश्रयबिम्बप्रभृतिकरणमुखेन, एष द्रव्यस्तवः, भवति वर्तते, शुभयोगो यतियोगवत् प्रशस्तव्यापारः । तथा-उचितानुष्ठानमपि च विहितक्रियाऽपि च जिनभवनाऽऽदिविधानद्वारेणैव । अपि चेति समुच्चये । यद्यप्येवं तथाऽपि तुच्छोऽसारः, अल्पभावरूपत्वाद्, यतियोगतः साधुव्यापारात्सकाशात्, नवरं केवलम् । यतियोगो हि स्वरूपेणैव शुभः, उचितानुष्ठानरूपश्चायं पुनर्जिनभवनाऽऽदिद्वारेणैव, न तु स्वरूपतः, स्वरूपेण तस्य सनागवद्यरूपत्वात् । इति गाथार्थः ॥ १७ ॥ पञ्चा० ६ विव० । दर्श० । आ० म० । पं० व० । प्रति० । तं० । दर्श० । ('थय' शब्देऽस्मिन्नेव भागे २३८४ पृष्ठे विशेषोऽस्य वीक्ष्यः) (द्रव्यस्तवस्य करणे कारणे च श्रावकोऽधिकारीति अनुमोदने च साधुरपीति च 'चेइय' शब्दे तृतीयभागे १२२२ पृष्ठे प्रत्यपादि)

अयमिहापि द्रव्यस्तवस्य संक्षिप्तोऽर्थः-

श्रमणानामियं पूर्णा, सूत्रोक्ताऽऽचारपालनात् ।
द्रव्यस्तवाद् गृहस्थानां, देशतस्तद्विधित्सयम् ॥१॥
न्यायार्जितधनो धीरः, सदाचारः शुभाऽऽशयः ।
भवनं कारयेज्जैनं, गृही गुर्वादिसंमतः ॥२॥
तत्र शुद्धां महीमादौ, गृह्णीयाच्छास्त्रनीतितः ।
परोपतापरहितां, भविष्यद्वंशसन्ततिम् ॥३॥
अप्रीतिर्नैव कस्याऽपि, कार्या धर्मोद्यतेन वै ।
इत्थं शुभानुबन्धः स्या-दत्रोदाहरणं प्रभुः ॥४॥
आसन्नोऽपि जनस्तत्र, मान्यो दानाऽऽदिना यतः ।
इत्थं शुभाऽऽशयस्फाल्या, बोधिवृद्धिः शरीरिणाम् ॥५॥
इष्टकाऽऽदि दृढं चारु, दारु वा सारवन्नवम् ।
गवाद्यपीडया ग्राह्यं, मूल्यौचित्येन यत्नतः ॥६॥
भृतका अपि सन्तोष्याः, स्वयं प्रकृतिसाधवः ।
धर्मो नावेन न व्याज्या-ऽधर्ममित्रेषु तेषु तु ॥७॥
स्वाऽऽशयश्च विधेयोऽत्रा-निदानो जिनरागतः ।
अन्याऽऽरम्भपरित्यागा-ज्जघन्याऽऽदियतनावता ॥ ८ ॥
इत्थं चैषोऽधिकत्यागा-त्सदारम्भः फलान्वितः ।
प्रत्यहं भाववृद्ध्याऽऽप्त-र्भावयज्ञः प्रकीर्त्तितः ॥ ९ ॥
जिनगेहं विधायैवं, शुद्धमव्ययनीवि च ।
आक् तत्र कारयेद्बिम्बं, साधिष्ठानं हि वृद्धिमत् ॥ १० ॥
विभवोचितमूल्येन, कर्तुः पूजापुरस्सरम् ।
देयं तदनघस्यैव, यथा चित्तं न नश्यति ॥ ११ ॥
द्वा० ५ द्वा० ।

दव्वदेवत्त-द्रव्यदेवत्व-न० । साध्ववस्थायाम्, भ० १४ श० ७ उ० ।

दव्वधम्म-द्रव्यधर्म-पुं० । न० । दानधर्मे, यो दानधर्मः स द्रव्यधर्मोऽवगन्तव्य इति । तथा चोक्तम्-" अन्नं पानं च वस्त्रं च, आलयः शयनाऽऽसनम् । शुश्रूषा वन्दनं तुष्टिः, पुण्यं नवविधं स्मृतम् " ॥ १ ॥ सूत्र० १ श्रु० ए अ० ।

दव्वपिय-द्रव्यप्रिय-त्रि० । द्रव्यं परिहासः, तत्प्रिये, औ० ।

दव्वपुरिस-द्रव्यपुरुष-पुं० । पुरुषत्वेन उत्पत्स्यते यस्तस्मिन्, उत्पन्नपूर्वे च । स्था० । विशेषोऽत्रैनद्सूत्राद् द्रष्टव्यः । भवत्यत्र नाध्यगाथा-" आगमओऽणुवउत्तो, इयरो दव्वपुरिसो तिहा तइओ । एगभवियाइ तिविहो, मूलुत्तरणिम्मिओ वा वि " ॥१॥ मूलगुणनिर्मितः पुरुषप्रायोग्यानि द्रव्याणि, उत्तरगुणनिर्मितस्तु तदाकारवन्ति तान्येवेति भावपुरुषभेदाः । स्था० ३ ठा० २ उ० ।

दव्वपोग्गलपरियट्ट-द्रव्यपुद्गलपरिवर्त्त-पुं० । ७ त० । द्रव्यविषयके पुद्गलपरिवर्त्ते, कर्म० ५ कर्म० । पं० सं० । प्रव० । (तद्व्याख्या 'पोग्गलपरियट्ट' शब्दे वक्ष्यते)

दव्वप्पमाण-द्रव्यप्रमाण-न० । द्रव्याणां गणनायाम्, यथा एतावन्तोऽओदनभेदाः, एतावन्ति च शाकविधानानि, इयन्तश्च खाद्यविशेषाः, एतावन्ति च द्राक्षापानकाऽऽदीनि पानकानि । स्था० ६ ठा० । अनु० ।

दव्वभावतदुभयकप्प-द्रव्यभावतदुभयकल्प-पुं० । द्रव्यभावसंमिश्रिते कल्पे, पं० भा० ।

तदुभयकप्पो अहुणा, एते चिय दव्वभावकप्पा तु ।
दोण्हि वि मिलिया एते, तदुभयकप्पो इमो सो य ॥
आहारे अट्ठविहे, सेज्जोवहि पंचपंचगविसोही ।
दंसणचरित्तगुत्तो, तवसमितिगुणेहिँ सोहेति ॥
असणाऽऽदीतो चउहा, उवकारि चउव्विहो य तस्सेव ।
एसऽट्ठविहाऽऽहारो, परूवणा तस्सिमा होति ॥
असणं तु ओदणाऽऽदी,तदुवकारी उ खीरकुसणाऽऽदी ।
पाणं तु पाणमेव तु, कप्पूराऽऽदी तु उवकारी ॥
खाइम फलाइयं तू, सुताऽऽदी होति तदुवकारो तु ।
साइम तंबोलाऽऽदी, तुएहाऽऽदी तदुवकारी तु ॥
एतं आहाराऽऽदी, जग्गमजप्पायणेसणासुद्धं ।
जप्पाएँ दंसणाऽऽदी-हि जुतो अहवा तदट्ठाए ॥ पं० भा० ।

इयाणिं उभयकप्पो-एए चेव दो दव्वभावकप्पे य मेलिया एगट्ठा य उभयकप्पो भवइ, दव्वियकप्पस्स पुरिमद्धं, भावकप्पस्स पच्छिमद्धं । गाहा-(आहारे अट्ठविहे त्ति) अट्ठविहे

आहारे असणे मूलगुणसुद्धे, उत्तरगुणसुद्धे य । एवं पाणे, एवं खाइमे मूलगुणउत्तरगुणसुद्धे, एवं सादिमे सेज्जोवहीणं, एमेव पंचपंचगविसोही, नावओ य दंसणचरित्ततवाइगुणोहिं सोहेइ। एस उभयकप्पो । पं० चू० ।

दव्वभूय–द्रव्यभूत–पुं० । अनुपयुक्ते, नि० चू० १ उ० ।

दव्वरासि–द्रव्यराशि–पुं० । पुरीषाऽऽदिद्रव्यसमूहे, प्रश्न० ५ संव० द्वार ।

दव्वलिंग–द्रव्यलिङ्ग–न० । भावविकलत्वेनाप्रधानप्रव्रजिताऽऽदिनेपथ्यचरणलक्षणे वेषे, पञ्चा० ४ विव० । जी० ।

दव्वलिंगधर–द्रव्यलिङ्गधर–पुं० । विरूपकप्राये, पं० व० ४ द्वार । द्रव्यलिङ्गी जानानो यदि स्वयं महाव्रतीभूय विहरति, तदाऽऽराधको भवति, न वेति प्रश्ने, उत्तरम्–गुर्वादिसामग्र्यभावे यदि स्वयं महाव्रतीभूय विहरति, तदाऽऽराधकः, अन्यथा नेति । १२३ प्र० । सेन० १ उल्ला० । द्रव्यलिङ्गिनो द्रव्यजिनानां प्रासादे वा प्रतिमायां वा जीवदयायां वा ज्ञानकोशे वा कुत्र कुत्र व्यापार्यते ?, इति प्रश्ने, उत्तरम्–द्रव्यलिङ्गिनो द्रव्यजिनानां प्रासादे प्रतिमायां च नोपयोगः, जीवदयायां ज्ञानकोशे चोपयोगीति ज्ञातमस्ति । १६३ प्र० । सेन ३ उल्ला० ।

दव्वलेस्सा–द्रव्यलेश्या–स्त्री० । औदारिकशरीराऽऽदिवर्णे, भ० १ श० ए उ० ।

दव्वलोय–द्रव्यलोक–पुं० । लोकभेदे, भ० ११ श० १० उ० । ("लोग" शब्दे व्याख्यास्यते चैषः)

दव्ववणाऽऽहरण–द्रव्यव्रणोदाहरण–पुं० । कृतज्ञाते, पञ्चा० १६ विव० ।

दव्ववय–द्रव्यव्यय–पुं० । द्रव्यव्यये, सेन० । सप्तक्षेत्रीमुक्तद्रव्यान्तः साधुसाध्वीद्रव्यस्य व्ययः साधुसाध्वीनां कस्मिन् स्थाने योज्यते श्राद्धैरिति प्रश्ने, उत्तरम्–सप्तक्षेत्रीमुक्तद्रव्यस्य व्ययः साधुसाध्वीक्षेत्रयोरापत्त्राणवैद्याऽऽनयनमार्गसाहाय्यकरणाऽऽदिषु श्राद्धैः कार्यत इति । ३७१ प्र० । सेन० ३ उल्ला० ।

दव्ववेय–द्रव्यवेद–पुं० । स्त्रीपुंसोर्नपुंसकस्य च बाह्ये आकारे, कर्म० ४ कर्म० ।

दव्वसंभारिय–द्रव्यसंभारित–न० । द्रव्यैः कर्पूरपाटलाऽऽदिभिः संभारितं वासितं द्रव्यसंभारितम् । कर्पूरपाटलाऽऽदिवासिते जले, बृ० २ उ० ।

दव्वसंपत्त–द्रव्यसम्यक्त्व–न० । अनाभोगवदुचितमात्रे सम्यक्त्वे, "जिनवयणमेव तत्तं, एत्थ रुई होइ दव्वसम्मत्तं ।" जिनवचनमेव तत्त्वं नान्यदित्यत्र रुचिर्भवतीति द्रव्यसम्यक्त्वम् । पं० व० ४ द्वार । ध० ।

दव्वसमय–द्रव्यसमय–पुं० । द्रव्यस्य सम्यगयनं द्रव्यसमयः । द्रव्यपरिणतिविशेषे, सूत्र० १ श्रु० १ अ० १ उ० ।

दव्वसार–द्रव्यसार–पुं० । द्रव्यलक्षणसारे, प्रश्न० ५ आश्र० द्वार ।

दव्वसिणाण–द्रव्यस्नान–न० । बाह्यस्नाने, ध० । द्रव्यस्नानं वपुःपाविद्यसुखकरत्वाऽऽदिना भावशुद्धिहेतुः । उक्तं चाष्टके–

" जलेन देहदेशस्य, क्षणं यच्छुद्धिकारणम् ।
प्रायोऽन्याद्युपरोधेन, द्रव्यस्नानं तदुच्यते ॥ १ ॥ "

देहदेशस्य त्वङ्मात्रस्यैव, क्षणं, न तु प्रभूतकालं, प्रायः शुद्धिहेतुर्न त्वेकान्तेन, तादृग् रोगग्रस्तस्य क्षणमप्यशुद्धेः, प्रक्षालनार्हमलादन्यस्य मलस्य कर्णनासाऽऽद्यन्तर्गतस्यानुपरोधेनाप्रतिषेधेन । यद्वा–प्रायो जलादन्येषां प्राणिनामनुपरोधेनाऽव्यापादनेन द्रव्यस्नानं बाह्यस्नानमित्यर्थः । ध० २ अधि० ।

दव्वसील–द्रव्यशील–न० । चेतनाचेतनाऽऽदेर्द्रव्यस्य स्वभावे, सूत्र० १ श्रु० ७ अ० ।

दव्वसुद्ध–द्रव्यशुद्ध–न० । तद्रूपाऽऽदिदोषरहिते द्रव्ये, भ० १५ श० । प्राशुके, विपा० २ श्रु० १ अ० ।

दव्वहलिया–द्रव्यहलिका–स्त्री० । कुहूपाऽऽख्यवनस्पतिभेदे, प्रज्ञा० १ पद ।

दव्वहोमा–द्रव्यहोमा–स्त्री० । नानाविधैर्द्रव्यैः कणवीरपुष्पाऽऽदिभिर्मधुघृताऽऽदिभिर्वोच्चाटनाऽऽदिकैः कार्यैः होमो हवनं यस्यां सा द्रव्यहोमा तस्याम्, सूत्र० २ श्रु० २ अ० ।

दव्वाणंतय–द्रव्यानन्तक–न० । जीवद्रव्याणां पुद्गलद्रव्याणां वा यदनन्तकं तस्मिन्, स्था० १० ठा० ।

दव्वाणुओग–द्रव्यानुयोग–पुं० । षड्द्रव्यविचारे, द्रव्या० १ अध्या० । आचा० । ('दवियाणुओग' शब्दे २४६२ पृष्ठे व्याख्यास्यते)

दव्वाणुओगतक्कणा–द्रव्यानुयोगतर्कणा–स्त्री० । द्रव्यगुणपर्यायविचारे, तत्प्रतिपादके ग्रन्थे च । द्रव्या० ।

श्रीयुगाऽऽदिजिनं नत्वा, कृत्वा श्रीगुरुवन्दनम् ।
आत्मोपकृतये कुर्वे, द्रव्यानुयोगतर्कणाम् ॥ १ ॥
विना द्रव्यानुयोगोहं, चरणकरणाऽऽख्ययोः ।
सारं नेति कृतिप्रेष्ठं, निर्दिष्टं सम्मतौ स्फुटम् ॥ २ ॥

(श्रीयुगाऽऽदीत्यादि) तत्र प्रथमामिष्टदेवतानमस्करणेन सप्रयोजनाभिधेयो दर्शितः । आद्यपदद्वयेन मङ्गलाऽऽचरणं, नमस्कारकरणं च १ । आत्मार्थिन इहाधिकारिणः २ । तेषामर्थबोधो भविष्यतीत्युपकाररूपं प्रयोजनम् ३ । द्रव्याणामनुयोगेऽधिकारः ४ । अथ द्रव्यानुयोग इति कः शब्दार्थः ?, अनुयोगो हि सूत्रार्थयोर्व्याख्यानम्, तस्य चत्वारो भेदाः । तत्र प्रथममश्चरणानुयोगः, आचारवचनमाचाराङ्गाऽऽदिसूत्राणि १ । द्वितीयो गणितानुयोगः संख्याशास्त्रं, चन्द्रप्रज्ञप्त्यादिसूत्राणि २ । तृतीयो धर्मकथानुयोगः–आख्यायिकावचनम्, ज्ञाताधर्मकथाऽङ्गाऽऽदिसूत्राणि ३ । चतुर्थो द्रव्यानुयोगः षड्द्रव्यविचारः, सूत्रकृताङ्गाऽऽदिसूत्राणि, सम्मतितत्त्वार्थप्रमुखप्रकरणानि च महाशास्त्राणि, ततोऽत्यभेदविचारणामहं कुर्वे ॥१॥ (विना द्रव्येति) द्रव्यानुयोगोहं द्रव्यगुणपर्यायविचारं विना चरणकरणयोः सारं न, चरणसप्ततयाः करणसप्ततयाश्च सारं केवलं द्रव्यानुयोग एव, इत्ययं निष्कर्षः । सम्मतिग्रन्थे स्फुटं प्रकटं, कृतिप्रेष्ठं बुधजनवल्लभं, निर्दिष्टं कथितं, बुधा एव जानते, न तु बाह्यदृशयः । यतः–" चरणकरणप्पहाणा, ससमयपरसमयमुक्कवावारा । चरणकरणस्स सारं, णिच्छयसुद्धं न याणंति " ॥ ६७ ॥ (सम्म० ३ काण्ड) इतीयं गाथा सम्मतौ कथिता, अतश्चरणकरणानुयोगमूत्र इहोपायो द्रव्यानुयोग एव उक्तः । द्रव्या० १ अध्या० ।

गुणानां हि विकाराः स्युः, पर्याया द्रव्यपर्ययाः ।
इत्यादि कथयन् देव–सेनो नानाति किं हृदि ? ॥१७॥

इत्थं पदार्थाः प्रणिधाय मूर्ध्नि,
परीक्षिता ज्ञानगुरोः सदाज्ञाम् ।
तुच्छोक्तिमुत्सृज्य विमोहमूला-
महर्तत्क्रमाम्भोजरतेन सर्वे ॥ १८ ॥

गुणविकाराः पर्याया एवं कथयित्वा तेषां भेदाधिकारे पर्याया द्विविधाः-द्रव्यपर्याया गुणपर्यायाश्चेति कथयंश्च देवसेनो दिगम्बराऽऽचार्यो नयचक्रग्रन्थकर्त्ता हृदि चित्ते किं जानाति ?, अपि तु संभावितार्थं न किमपि जानातीत्यर्थः । पूर्वापरविरुद्धभाषणादसत्प्रलापप्राय एवेदमित्यभिप्रायः । किञ्च-द्रव्यपर्याया एव कथनीयाः, परं तु गुणपर्याया इति पृथग् भेदोत्कीर्तनेन कर्त्तव्यं, द्रव्ये गुणत्वाधिरोपाद्, गुणे च गुणत्वाभावादिति निष्कर्षः ॥ १७ ॥ इत्थमनया रीत्या पदार्था द्रव्यगुणपर्यायाः परीक्षिताः स्वरूपलक्षणभेदाऽऽदिकथनेन विशदीकृताः । किंकृत्वा ?, ज्ञानगुरोः परम्पराऽऽगतश्रुताऽऽचार्यस्य, सदाज्ञां सत्यनिदेशं, मूर्ध्नि मस्तके, निधाय संस्थाप्य । पुनः किंकृत्वा ?, विमोहमूलां भ्रमनिबन्धनां, तुच्छोक्तिं तुच्छबुद्धिप्रणीतवचनम्, उत्सृज्यापाकृत्य । कीदृशेन मया ?, अर्हत्क्रमाम्भोजरतेन वीतरागचरणकमलसेवनरसिकेन, सर्वे पदार्था मया परीक्षिता इत्यर्थः । भोजेति नामनिरूपणं चेति ॥ १८ ॥ द्रव्या० १४ अध्या० ।

द्रव्याऽऽदिकानां तु विचारमेवं,
विज्ञावयिष्यन्ति सुमेधसो ये ।
प्राप्स्यन्ति ते सन्ति पशांसि लक्ष्म्यः,
सौख्यानि सर्वाणि च वाञ्छितानि ॥ १ ॥
गुरोः श्रुतेश्चानुभवात्प्रकाशितः,
परो हि द्रव्याऽऽद्यनुयोग आन्तरः ।
जिनेशवाग्वीजलधौ सुधाकरः,
सदा शिवश्रीपरिभोगनागरः ॥ २ ॥

एवमनया रीत्या, द्रव्याऽऽदिकानां विचारं ये सुबुद्धयो विज्ञावयिष्यन्ति, ते सुमेधसः, इह सन्ति शोभनानि यशांसि । पुनः लक्ष्म्यः, परत्र सर्वाणि वाञ्छितानि सुखानि प्राप्स्यन्तीति भावः ॥१॥ गुरोः ज्ञानगुरोः, श्रुतेः सिद्धान्तात्, अनुभवात् स्वानुभूतेः, आन्तरोऽन्तर्ज्ञानमयः, परः प्रकृष्टो द्रव्यानुयोगः प्रकाशितः । कीदृशः ?, वीतरागवचनसमुद्रे चन्द्र इव चन्द्रः, निरन्तरं शिवलक्ष्मीविलासे नायक इव नागर इति ॥२॥ द्रव्या० १५ अध्या० ।

दव्वादेस–द्रव्याऽऽदेश–पुं० । आदेशः प्रकारो द्रव्यरूप आदेशो द्रव्याऽऽदेशः । ज्ञ० १४ श० ४ उ० । द्रव्यप्रकारेण द्रव्यत इत्यर्थे, परमाणुत्वाऽऽश्रित्येति यावत् । स्था० ५ ठा० १ उ० ।

दव्वाभाव–द्रव्याभाव–पुं० । निष्परिग्रहत्वेनार्थासत्तायाम्, पञ्चा० ६ विव० ।

दव्वाभिग्गह–द्रव्याभिग्रह–पुं० । लेपकृताऽऽदिद्रव्यविषये, ग० १ अधि० ।

दव्वाभिग्गहचरय–द्रव्याभिग्रहचरक–पुं० । द्रव्याभिग्रहेण चरति भिक्षामटति द्रव्याऽऽश्रिताभिग्रहं वा चरत्यासेवते यः स द्रव्याभिग्रहचरकः । औ० । भिक्षाचर्यांचति, भिक्षाचर्यायास्तद्व्रतोश्चाभेदविवक्षणाद् भिक्षायां च । भ० २५ श० ७ उ० । ग०

दव्वायरिय–द्रव्याऽऽचार्य–पुं० । आचार्यत्वयोग्यतायां प्रधानाऽऽचार्ये, पञ्चा० ६ विव० ।

दव्वालंकार–द्रव्यालङ्कार–पुं० । स्वनामख्याते ग्रन्थे, यत्र चार्वाकमतखण्डनं कृतम् । स्था० ।

दव्वावइ–द्रव्याऽऽपत्–स्त्री० । कल्पनीयाऽशनाऽऽदिद्रव्यदुर्लभतायाम्, जीत० ।

दव्वावस्सय–द्रव्याऽऽवश्यक–न० । द्रव्यरूपमावश्यकं प्रकृतं, तत्राऽऽवश्यकोपयोगाधिष्ठितः साध्वादिर्देहाऽवन्दनकाऽऽदिसूत्रोच्चारणलक्षणश्चाऽऽगम आवर्तकाऽऽदिका क्रिया चाऽऽवश्यकमुच्यते, आवश्यकोपयोगशून्यस्तु तां एव देहाऽऽगमक्रियां द्रव्याऽऽवश्यकम् । तस्मिन्, अनु० ।

दविंद–द्रव्येन्द्र–पुं० । इन्द्रभेदे, स्था० ३ ठा० १ उ० । (व्याख्या तु ' इंद ' शब्दे द्वितीयभागे ५३३ पृष्ठे गता)

दविय–दैविक–पुं० । देवेन कृतोपद्रवे, व्य० २ उ० ।

दव्वी–दर्वी–स्त्री० । भाजनविशेषे, आचा० १ श्रु० १ चू० १ अ० ६ उ० । आव० । पिं० । प्रज्ञा० ।

दव्वीअर–पुं० । देशी-सर्पे, दे० ना० ५ वर्ग ३७ गाथा ।

दव्वीकर–दर्वीकर–पुं० । दर्वीव दर्वी फणा तत्करणशीलाः दर्वीकराः । अहिभेदे, प्रज्ञा० ।

दर्वीकरभेदाननिधित्सुराह-

से किं तं दव्वीकरा ?। दव्वीकरा अणेगविहा पण्णत्ता । तं जहा-आसीविसा, दिट्ठीविसा, उग्गविसा, भोगविसा, तयाविसा, लालाविसा, उस्सासविसा, णिस्सासविसा, कण्हसप्पा, सेदसप्पा, काउदरा, दब्भपुप्फा, कोलाहा, मेलिमिंदा, सेसिंदा, जे यावण्णे तहप्पगारा । से त्तं दव्वीकरा ।

आशयो दंष्ट्रास्तासु विषं येषां ते आशीविषाः । उक्तं च-"आसी दाढा तग्गय-महाविसा आसीविसा मुणेयव्वा" इति । दृष्टौ विषं येषां ते दृष्टिविषाः, उग्रं विषं येषां ते उग्रविषाः, भोगः शरीरं, तत्र विषं येषां ते भोगविषाः, त्वचि विषं येषां ते त्वग्विषाः, प्राकृतत्वाच्च 'तयाविसा' इति पाठः । लाला मुखाऽऽस्रावः, तत्र विषं येषां ते लालाविषाः, निःश्वासे विषं येषां ते निःश्वासविषाः, कृष्णसर्पाऽऽदयो जातिभेदा लोकतः प्रतिपत्तव्याः । उपसंहारमाह-" से त्तं दव्वीकरा । " प्रज्ञा० १ पद ।

दव्वोवओग–द्रव्योपयोग–पुं० । द्रव्यार्थिकनयजन्यबोधे, नं० ।

दव्वोवगाहणा–द्रव्यावगाहना–स्त्री० । द्रव्यस्य पर्यायैरवगाहना आश्रयणं द्रव्यावगाहना । अवगाहनाभेदे, स्था० ४ ठा० । (' ओगाहणा ' शब्दे तृ० भागे ७६ पृष्ठे व्याख्यातेयम्)

दव्वोसह–द्रव्यौषध–न० । बहुद्रव्यसमुदायौषधे, नि० चू० २ उ० ।

दस–दश–त्रि० । सङ्ख्याभेदे, दश० ।

णामं ठवणा दविए, खेत्ते काले तहेव भावे य ।
एसो खलु निक्खेवो, दसगस्स उ छव्विहो होइ ॥१॥

आह-किमिति द्रव्यादीन् विहाय दशशब्द उपन्यस्तः ?। उच्यते-एतत्प्रतिपादनादेव द्रव्यादीनां गम्यमानत्वात् । तत्र नामस्थापने सुगमे । द्रव्यदशकं दश द्रव्याणि-सचित्ताचित्तमिश्रा-

णि मनुष्यरूपकटकाऽऽदिविभूषितानीति। क्षेत्रदशकं दश क्षेत्रप्रदेशाः,कालदशकं-दश काला वर्तनाऽऽदिरूपत्वात्कालस्य दशावस्थाविशेषा इत्यर्थः। वक्ष्यति च-"बाला किड्डा मंदा" इत्यादिना। भावदशकं-दश भावाः, ते च सान्निपातिकभावे स्वरूपतो भावनीयाः। अथ चैत एव विवक्षया दशाध्ययनविशेषा इति। एष एवंभूतः खलु निक्षेपो न्यासः, दशशब्दस्य बहुवचनत्वाद्दशानां पद्विधो भवति। तत्र खलुशब्दोऽवधारणार्थः। एष एव प्रक्रान्तोपयोगीति। तुशब्दो विशेषणार्थः। किं विशिनष्टि ?। नाऽयं दशशब्दमात्रस्य, किं तु तद्वाच्यस्याऽर्थस्याऽपीति गाथाऽर्थः ॥ ६ ॥ दश० १ अ०। अनु०। कल्प०। स्था०।

दसउर—दशपुर—न०। साम्प्रतं 'मन्दसोर' इति प्रसिद्धे स्वनामख्याते नगरे, आ० क०।

" आस्तां तावदलिताऽऽर्यो, वक्ष्ये दशपुरोक्रमम् (२)
अस्त्यकम्पा पुरी चम्पा, तत्राऽऽसीत्स्वर्णहारकः।
कुमारनन्दिः स्त्रीलोलः, श्रीमान् श्रीद इवापरः ॥ ३ ॥
दशैं दशैं सुरूपां स्त्रीं, पञ्चस्वर्णशताऽऽहृते।
वहन् लम्पटः सोऽन्यो-द्योषित्पञ्चशतीपतिः ॥ ४ ॥
अतीर्ष्यालुस्ततः सौध-मेकस्तम्भं विधाप्य सः।
विललास समं ताभि-र्देवीभिरव देवराट् ॥ ५ ॥
अथान्यदा पञ्चशैल-द्वीपगं व्यन्तरीयुगम्।
गच्छन्नन्दीश्वरद्वीप-यात्रायां वृत्रहाऽऽज्ञया ॥ ६ ॥
विद्युन्मालीव तत्कान्तः, प्रच्युतः पञ्चशैलराट्।
ततो विरहदुःखार्तं, शून्यं पश्यदितस्ततः ॥ ७ ॥
कुमारनन्दि चम्पायां, दृष्ट्वोद्याने व्यचिन्तयत्।
एषोऽस्मद्वल्लभो ज्ञात्वा, तत्तस्य स्वमदर्शयत् ॥ ८ ॥
के यूयमिति तेनोक्ते, ताभ्यां देव्याविती रितम्।
ऊचे च याचन्नागच्छेः, पञ्चशैलमधो गते ॥ ९ ॥
नृपमुक्त्वा स तद्भक्तो ऽवादयत् पटहं पुरे।
कुमारनन्दि यः पञ्च-शैले नयति तस्य सः ॥ १० ॥
स्वर्णकोटिं प्रदत्ते तं, दधे वृद्धनियामकः।
पुत्राणां तरूनं दत्त्वा, तं पोते न्यस्य सोऽचलत् ॥ ११ ॥
दूरं गत्वा वनाभे तं, निर्यामः किञ्चिदीक्षसे।
सोऽन्यधात्किमपि श्यामं, प्रेक्ष्य निर्यामकोऽब्रवीत् ॥ १२ ॥
नितम्बेऽद्रेर्वटोऽस्त्येष, पोतोऽस्याऽधोऽयमेष्यति।
त्वमत्रावलम्बेथाः, पोतोऽस्याधः स्फुटिष्यति ॥ १३ ॥
गतस्य तव शैलोर्द्धं, भारुण्डाः पञ्चशैलतः।
द्विजावारुह्यहो व्यास्या, पश्यन्त्येकोदराः खगाः ॥ १४ ॥
तन्मध्यपदमग्नस्त्वं, पञ्चशैले गमिष्यसि।
इत्युक्तः स तथाऽकार्षीत्, पञ्चशैलं जगाम च ॥ १५ ॥
निर्यामकः पुनः पोत-स्फोटादग्रे गतो मृतः।
व्यन्तरीभ्यां तु ताभ्यां स, दृष्टः श्रीस्तस्य दर्शिता ॥ १६ ॥
उक्तश्चानेन देहेन, भोग्ये आवां न ते ततः।
दासाप्रहासाकान्तः स्यां, पञ्चशैलाऽधिपो मृतः ॥ १७ ॥
इत्युक्त्वाऽग्निप्रवेशाऽऽख्यं, कुर्वीथा दानपूर्वकम्।
तत्कथं याम्ययोद्याने, नीत्वा ताभ्याममोदि सः ॥ १८ ॥
अथाऽऽगत्य जनोऽप्राक्षी-द्योक्तितं तत्र किं त्वया ?।
सोऽवदत्ते मया दृष्टे, व्यन्तर्यौ मर्त्यदुर्लभे ॥ १९ ॥
श्रमणोपासको मित्रं, नागिलस्तत्र तेन सः।
वारितोऽप्यविशच्छ्रद्धौ, दत्त्वा दानं निदानवान् ॥ २० ॥
पञ्चशैलाधिपः सोऽभू-द्भवात्त्रिभ्रोऽथ नागिलः।
परिव्रज्याऽच्युते जातः, शक्रसामानिकः सुरः ॥ २१ ॥
अथान्यदाऽष्टमद्वीपे, यात्रायां पटहाऽग्रहे।
पटहोऽक्रेपि शक्रेण, विद्युन्मालिगले बलात् ॥ २२ ॥
वादयन्नथ भीतोऽगात्, ज्ञात्वा तं नागिलोऽवधेः।
आगाद्वृष्टुं स तत्तेजो-ऽसहमानः पलायत ॥ २३ ॥
तेजः संहृत्य मां वेत्सी-त्युक्तोऽवग्वेत्ति को न वः ?।
आद्यरूपमथाऽऽदर्श्य, ज्ञापितो धर्मवैभवम् ॥ २४ ॥
संविग्नः सोऽवदन्मित्र !, कर्तव्यमधुना दिश।
तेनोक्तं कुरु वीराचीं, सम्यक्त्वं भावि ते ततः ॥ २५ ॥
महाद्रिमवतः सोऽथा-ऽऽदाय गोशीर्षचन्दनम्।
कृत्वाऽर्चां तेन वीरस्य, न्यक्षिप्तकाष्ठसंपुटे ॥ २६ ॥
प्रेक्ष्यान्तःसागरे पोतं, षण्मासोत्पातबाधितम्।
निवर्त्य तेषामुत्पात--मार्पयत् तं समुद्गकम् ॥ २७ ॥
उक्तश्चास्तीह देवाधि-देवार्चा भूभुजेऽर्प्य ताम्।
आगल्योऽन्तःपुरे वीत-भये वीतभयस्ततः ॥ २८ ॥
उदायनो नृपस्तत्र, प्रीतभावितमानसः।
तस्य प्रभावती देवी, प्रेयसी परमाऽर्हता ॥ २९ ॥
राज्ञः समर्पितः पोत--वणिग्भ्रंशः स समुद्गकः।
देवाधिदेवप्रतिमा, मध्येऽस्त्यस्येत्यभावत ॥ ३० ॥
पर्यु स्तस्येन्द्राऽऽद्यर्चाऽर्थं, वाहितोऽपि हि नाऽवहत्।
प्रभावत्युक्तदेवाधि-देवश्रीवीरमूर्त्तये ॥ ३१ ॥
रूपशोऽपि परशोः प्राप्तु--रासाऽऽर्चा देवनिर्मिता।
कृतमन्तःपुरे चैत्यं, सदाऽऽनर्च प्रभावती ॥ ३२ ॥
देवी तत्रान्यदाऽनृत्य--द्राजा वीणामवादयत्।
देव्याः शीर्षमदृष्टाऽस्य, भ्रष्टं तद्वादनं करात् ॥ ३३ ॥
देवी रुष्टाऽवदद् दुष्टु, नृत्तं किं मे, न सोऽवदत्।
निर्बन्धात् कथिते देवीं, स्माऽऽहाऽऽर्हत्या न मेऽस्ति भीः ॥ ३४ ॥
देवी स्नात्वाऽन्यदा चेटी--मूचे वासांस्युपानय।
साऽनयद्(ङ्क)त्कवासांसि, देव्यूचे किमिदं हले !॥ ३५ ॥
देवार्चाप्रगुणां मां किं, न जानासीति तां रुषा।
करस्पर्शेनाह--न्मर्माऽऽघाताच्च सा मृता ॥ ३६ ॥
मृतां तां वीक्ष्य देवीति, दध्यौ हा खण्डितं व्रतम्।
ततो राजानमापृच्छ्या--ऽनशनं विदधाम्यहम् ॥ ३७ ॥
निर्बन्धेऽमंस्त तद्राजा, बोध्योऽहमिति चाब्रवीत्।
कृत्वाऽथाऽनशनं मृत्वा, देवी देवोऽभवद्दिवि ॥ ३८ ॥
प्रतिमां देवदत्तां च, कुब्जा देव्याऽर्चयत्।
देवी देवेन स्वप्नाऽऽद्यै--र्बोधितोऽप्यबुधन राट् ॥ ३९ ॥
ततः प्रभावती देवी, भीतो भूत्वाऽगमत्सभाम्।
शुष्कलान्यापेयद्राक्षे, राजा तान्यादसादरः ॥ ४० ॥
सन्ति कैतान्यपृच्छच्च, भीतं सोऽवग्मदाश्रमे।
ततस्तेन समं राजा, तत्कृतेऽगात्तदाश्रमे ॥ ४१ ॥
सोऽथ तैर्मोहुमारेभे, नश्यंस्तेभ्यो ययौ वने।
साधूनालोक्य तत्राऽस्थात्, श्रुत्वा धर्ममबुद्ध च ॥ ४२ ॥
ततः प्रभावतीदेवो, दर्शयित्वा स्वमूचिवान्।
राजन्नितो मे देवर्द्धि--स्तत् त्वमत्र दृढो भव ॥ ४३ ॥
स्मरेः कार्ये च गाढे मा--मित्युक्त्वा तत्र जग्मुषी।
वीक्ष्याऽऽस्थाने तथैव स्वं, सोऽईद्धर्मे दृढोऽभवत् ॥ ४४ ॥
इतश्च श्राद्धो गान्धारो, नत्वा तीर्थनुवोऽखिलाः।
नन्तुं वैताढ्यचैत्यानि, तन्मूलेऽस्थाकुपोषितः ॥ ४५ ॥
तत्र शासनदेव्या स, नित्यचैत्यान्यवन्दत।

तोषाच्चास्मै सर्वकाम- गुटिकानां शतं ददौ ॥ ४६ ॥
सोऽथ वीतभये दिव्य--प्रतिमां नन्तुमागमत् ।
तत्राभूदतिसारोऽस्य, पालितो देवदत्तया ॥ ४७ ॥
उड्डायः सोऽथ तां तस्यै, दत्त्वा प्रव्रजितः स्वयम् ।
वर्णः स्वर्णसमो मे ऽस्त्वि-त्याशैकां गुटिकामसौ ॥ ४८ ॥
तत्प्रभावात्तथाभूता, दध्यौ भोगार्थिनी पुनः ।
एष राजा पितृप्राप्यः, परे चास्य मुखेक्षकाः ॥ ४९ ॥
प्रद्योतार्थमथ प्राऽऽश, द्वितीयां गुटिकामसौ ।
सुवर्णगुटिकारूपं, तस्य तद्देव्यथाऽब्रवीत् ॥ ५० ॥
तेन प्रेष्यत दूतोऽस्यै, प्रेक्ष्ये तं तावदाह सा ।
अनलगिरिणाऽथाऽऽगा-द्भार्यां दृष्टोऽरुदच्च सः ॥ ५१ ॥
अहमेष्यामि यत्नेतां, प्रतिमां सह नेष्यसि ।
स तत्प्रपद्य तत्पार्श्वे, निशां निर्गम्य जग्मिवान् ॥ ५२ ॥
तत्समां प्रतिमामन्यां, कारयित्वाऽगमत्पुनः ।
मुक्त्वैतां तां गृहीत्वा च, सुवर्णगुटिकां च सः ॥ ५३ ॥
तत्रानलगिरेर्मूत्रो-च्चारगन्धेन बाधिताः ।
उदायनगजाः सर्वे- ऽप्यजूवन्निर्मदास्तदा ॥ ५४ ॥
राजपुंभिस्ततो राज्ञो, विज्ञप्तं देव ! दासिका ।
हृता प्रद्योतराजेन, रात्रावागत्य चोरवत् ॥ ५५ ॥
या त्वसौ प्रतिमा साऽस्ति, तेऽभ्यर्थुर्देव ! विद्यते ।
पूजाकालेऽथ पुष्पाणि, दृष्ट्वा म्लानान्यचिन्तयत् ॥ ५६ ॥
प्रतिबिम्बं विमुच्याऽत्र, प्रतिमा सा हृताऽमुना ।
प्रतिमां मुञ्च चेदस्तु, दूतनोचेऽथ तं नृपः ॥ ५७ ॥
नार्पयत्तां स राजाऽथा--चालीज्ज्येष्ठेऽपि तं प्रति ।
दशापि गणराजान-स्तस्य तेन सहाचलन् ॥ ५८ ॥
तापाच्च चमरौ सैन्यं, जलाभावाद्बबाध्यत ।
ततः प्रभावतीदेवः, स्मृतोऽकार्षीत्त्रिपुष्करीम् ॥ ५९ ॥
आदिमध्यान्तगां सैन्य-सुस्थोऽथोज्जयिनीं ययौ ।
पुनर्दूतेन राजोचे, प्रद्योतं को जनक्षयः ? ॥ ६० ॥
द्वयेऽपि सैनिकाः सन्तु, पश्यन्तः पारिपार्श्वकाः ।
आरूढयोः पदात्योर्वा, तुल्यस्थित्यो रणोऽस्तु नौ ॥ ६१ ॥
ऊचे प्रद्योतराजोऽपि, साधुक्तमिदं वचः ।
योत्स्यावहे रथेनाऽऽवां, प्रागभ्येत्य रणाङ्गणे ॥ ६२ ॥
अथाऽऽरुह्यानलगिरिं, प्रद्योतः प्रातरागतः ।
उदायनो रथेनाऽऽगा-दवन्तीशं जगाद च ॥ ६३ ॥
राजन्नसत्यसन्धोऽसि, नास्ति मोक्षस्तथापि ते ।
भावी प्रद्योत! खद्योत--स्त्वं मे वाणार्कसङ्गतः ॥ ६४ ॥
रथं न्यस्याथ मणिखयां, प्रद्योतेनमुदायनः ।
उत्क्षिप्तोत्क्षिप्तसंवादान्तः, क्षिप्त्वा बाणानपातयत् ॥ ६५ ॥
प्रद्योतो निपतन्नागाद्, बद्ध्वोदायनभूभुजा ।
जाने दासीपतिरिति, दत्त्वाऽङ्कं धरणे कृतः ॥ ६६ ॥
गत्वा राजा ततोऽवन्त्यां, दध्याऽऽज्ञां सर्वतो निजाम् ।
निविक्षुः प्रतिमां गृह्ण-न्नधिष्ठाऽयाऽचलत्ततः ॥ ६७ ॥
वर्षाकाले विचालेऽस्था-दवस्कन्दभयादथ ।
धूलीवप्रं विधायाऽस्थु-र्दशाऽपि परितो नृपाः ॥ ६८ ॥
प्रद्योतो धरणस्थोऽपि, बुभुजे भूभुजा सह ।
पृष्टः पर्युषणायां च, भोज्यं सूदेन केऽस्तु किम् ? ॥ ६९ ॥
चण्डोऽवादीद्भयान्मृत्योः, का पृच्छा मेऽद्य सूदप ! ? ।
स बभाषे पर्युषणा, राजेन्द्रोऽद्यान्त्युपोषितः ॥ ७० ॥
सोऽभ्यधान्मेऽप्यनक्तार्थः, पर्वपर्युषणाऽद्य चेत् ।
ममाऽपि मातापितरौ, श्रावकौ यद् बभूवतुः ॥ ७१ ॥
सूदाध्यक्षो नृपस्याऽऽख्य-द्राजोचे धूर्त्त एषकः ।
किं पुनर्मम बद्धेऽस्मिन्, प्रतिक्रान्तिर्न सेत्स्यति ॥ ७२ ॥
ततः सक्रामितो मुक्त्वा, दत्तास्तस्यैव मालवाः ।
ललाटे पट्टबन्धश्च, बद्धोऽङ्कत्वादनाकुले ॥ ७३ ॥
नृपा मुकुटबद्धाः प्राक्, बद्धपट्टा इतोऽब्रुवन् ।
वर्षाण्यतिक्रमेऽस्यासी--न्निजं पुरमुदायनः ॥ ७४ ॥
आगत्याऽऽगत्य यस्तत्र, वसति स्म वणिग्जनः ।
सोऽस्थात्तत्रैव तज्जज्ञे, पुरं दशपुरं ततः ॥ ७५ ॥"
आ० क० दश० । विशे० । आ० चू० । आ० म० । उत्त० । नं० ।

दसकालिय–दशकालिक–न० । कालेन निर्वृत्तं कालिकं, प्रमाणकालेनेति भावः । दशाध्ययनभेदाऽऽत्मकत्वाद्दशप्रकारं कालिकम्, प्रकारशब्दलोपाद्दशकालिकम् । दशवैकालिकाऽऽख्ये ग्रन्थे, दश० १ अ० ।

दसगुण–दशगुण–पुं० । एकगुणापेक्षया दशाऽभ्यस्ते, स्था० १० ठा० ।

दसगुणकालग–दशगुणकालक–पुं० । दशगुण एकगुणकालापेक्षया दशाऽभ्यस्तः कालो वर्णविशेषो येषां तेषु, स्था० १० ठा० ।

दसजाइकुलकोमिजोणिप्पमुहसयसहस्स–दशजातिकुलकोटियोनिप्रमुखशतसहस्र–न० । दशैव जातौ यानि कुलकोटीनां जातिविशेषलक्षणानां योनिप्रमुखाणि उत्पत्तिस्थानद्वाराणि शतसहस्राणि लक्षाणि तेषु, स्था० १० ठा० ।

दसट्ठाण–दशस्थान–न० । दशसु प्रकारेषु, दश स्थानानि नैरयिकाणामनिष्टानि, देवानां चेष्टानि शब्दाऽऽदीनीति । भ० १४ श० ५ उ० । (' वीईवयण ' शब्दे प्रसंगाद् वक्ष्यन्ते)

दसट्ठाणणिव्वत्तिय–दशस्थाननिर्वर्तित–पुं० । दशभिः स्थानैः प्रथमसमयैकेन्द्रियत्वाऽऽदिभिः पर्यायैर्हेतुभिर्यैर्निर्वृत्ता बन्धयोग्यतया निष्पादितास्तैः तेषु, दशभिः स्थानैर्निर्वृत्तिर्वा येषां तेषु च । स्था० १० ठा० ।

दसण–दशन–पुं० । 'दशनानि च कुन्दकलिकाः स्युः' है० । दश्यते अनेन । दंशे, शिखरे च । करणे ल्युट् । कर्त्तरि, भावे ल्युट् । दंशने, दन्ताऽऽदिना आघाते च । प्रव० ३७ द्वार । वाच० ।

दसणाम–दशनामन्–न० । दशविधपदार्थनामनि, अनु० ।

अथ दशनामाभिधानार्थमाह–

से किं तं दसनामे ? दसनामे दसविहे पण्णत्ते । तं जहा–गोण्णे, नोगोण्णे, आयाणपएणं, पडिवक्खपएणं, पहाणयाए, अणाइयसिद्धे, नामेणं, अवयवेणं, संजोगेणं, पमाणेणं । अनु० । (टीका सुगमा)

दसण्ण–दशार्ण–पुं० । दश ऋणानि दुर्गाणि लक्षाणि वा यत्र । ऋणशब्दे वृद्धिः । वाच० । मृत्तिकावतीपुरीप्रतिबद्धे देशविशेषे, प्रज्ञा० १ पद । सूत्र० । उत्त० । प्रव० । आ० म० । नदीभेदे, स्त्री० । वाच० ।

दसण्णकूड–दशार्णकूट–न० । स्वनामख्याते कूटे, आ० क० । आ० म० । आचा० । आ० चू० । प्रति० । ('गयग्गपय' शब्दे तृतीयभागे ८४२ पृष्ठेऽस्य व्याख्या)

दसण्णपुर–दशार्णपुर–न० । स्वनामख्याते नगरे, यत्र दशार्णभद्रो नृपः श्रीभगवन्तं महावीरं दशार्णकूटनगरनिकटसमवसृतं ववन्दे । स्था० १० ठा० । आव० । आ० चू० । आ० म० ।

दसण्णभद्द–दशार्णभद्र–पुं० । स्वनामख्याते दशार्णपुरराजे, स्था० । दशार्णभद्रो दशार्णपुरनगरनिवासी विश्वस्मरविभुर्यो भगवन्तं महावीरं दशार्णकूटनगरनिकटसमवसृतमुद्यानपाद्यवचनादुपलभ्य यथा न केनापि वन्दितो भगवाँस्तथा मया वन्दनीय इति राज्यसंपदवलेपाङ्कितश्च चिन्तयामास । ततः प्रातः सविशेषकृतस्नानविलेपनाऽऽभरणाऽऽदिविभूषः प्रकल्पितप्रधानद्विपपतिपृष्ठाऽऽरूढो वल्गनाऽऽदिविविधक्रियाकारिसदर्पसर्वर्द्धचतुरङ्गसैन्यसमन्वितः पुष्यमाणवकसमुद्घुष्यमाणाऽगणितगुणगणः सामन्तामात्यमन्त्रिराजदौवारिकदूताऽऽदिपरिवृतः सान्तःपुरपौरजनपरिवृत आनन्दमयमिव संपादयन्महीमण्डलमाखण्डलमलं स्वामरावत्या नगरात्निर्जगाम । निर्गत्य च समवसरणमभिगम्य यथाविधि भगवन्तं भव्यजननलिनवनविबोधनाभिनवभानुमन्तं महावीरं वन्दित्वोपविवेश । अवगतदशार्णभद्रभूपाभिप्रायं च तन्मानविनोदनोद्यतं कृताष्टमुखे प्रतिमुखं विहिताष्टदन्ते प्रतिदन्तं कृताष्टपुष्करिणीके प्रतिपुष्करिणि निरूपिताष्टपुष्करे प्रतिपुष्कर विरचिताष्टदले प्रतिदले विरचितद्वात्रिंशद्बद्धनाटके बारणेन्द्रे सारूढं स्वश्रिया निखिलं गगनमण्डलमापूरयन्तममरपतिमवलोक्य कुतोऽस्यादृशमीदृशी विभूतिः ?, कुतोऽनेन निरवद्यो धर्म इति, ततोऽहमपि तं करोमि, इति विज्ञाय प्रवव्राज, जितोऽहमधुना त्वयेति भणित्वा यमिन्द्रः प्रणिपपातेति । सोऽयं दशार्णभद्रः संज्ञाव्यते, परमनुत्तरोपपातिकाङ्गे नाधीतः क्वचित्सिद्धश्च श्रूयत इति । तथा अतिमुक्तक एवं श्रूयते अन्तकृद्दशाङ्गे-पलाशपुरे नगरे विजयस्य राज्ञः श्रीमत्या देव्या अतिमुक्तको नाम पुत्रः षष्ठ्यर्धिको गौतमं गोचराऽऽगतं दृष्ट्वा एवमवादीत्-के यूयम् ?, किं पर्यटत ?। ततो गौतमोऽवादीत्-श्रमणा वयं, भिक्षार्थं च पर्यटामः । तर्हि भदन्ताः ! आगच्छत तुभ्यं भिक्षां दापयामीति भणित्वाऽङ्गुल्या भगवन्तं प्रतिलम्भयामास । अतिमुक्तकः पुनरवोचत्-यूयं क्व वसथ ?। भगवानुवाच-भद्र ! मम धर्माऽऽचार्यः श्रीवर्द्धमानस्वामिन उद्याने वसन्ति, तत्र वयं परिवसामः । भदन्ताः ! गच्छाम्यहं भवद्भिः सार्द्धं भगवतो महावीरस्य पादान् वन्दितुम् ?। गौतमोऽवादीत्-यथासुखं देवानां प्रिय ! । ततो गौतमेन सह गत्वाऽतिमुक्तकः कुमारो भगवन्तं वन्दते स्म । धर्मं श्रुत्वा प्रतिबुद्धो गृहमागत्य पितरावब्रवीत्-यथा संसारान्निर्विण्णोऽहं प्रव्रजामीत्यनुजानीत युवाम् । तावूचतुः-वत्स ! त्वं किं जानासि ?। ततोऽतिमुक्तकोऽवादीत्-अम्ब ! तात ! यदेवाहं जानामि तदेव जानामीति । ततस्तौ तमवादिष्टाम् । कथमेतत् ?। सोऽब्रवीत्-अम्ब ! तात ! जानाम्यहं यदुत-जातेनाऽवश्यं मर्तव्यं, न जानामि तु कदा वा कस्मिन् वा कियच्चिराद्वा । तथा न जानामि कैः कर्मभिर्नैरयाऽऽदिषु जीवा उत्पद्यन्ते । एतत्पुनर्जानामि, यथा-स्वयं कृतैः कर्मभिरिति । तदेवं मातापितरौ प्रतिबोध्य प्रवव्राज, तपःकृत्वा च सिद्ध इति । इह त्वयमनुत्तरोपपातिकेषु दशमाध्ययनतयोक्तस्तदपर एवाऽयं भविष्यतीति । स्था० १० ठा० । आव० । उत्त० । आ० म० । आ० चू० । आ० क० । तथा च-"सट्ठिकरिसहस्स" इति गाथाया व्याचष्टां प्रसाद्यमिति प्रश्ने, उत्तरम्-चतुःषष्टिसंख्या हस्तिसहस्राः, किंलक्षणाः ?, सहाष्टदन्तैर्यानि तानि साष्टदन्तानि, अष्टसंख्यानि शिरांसि अष्टशिरांसि, साष्टदन्तानि च तानि अष्टशिरांसि च साष्टदन्ताष्टशिरांसि चतुःषष्टिगुणीकृतानि साष्टदन्ताष्टशिरांसि येषां ते चतुःषष्टिसाष्टदन्ताष्टशिरसः । अत्र मध्यमपदलोपी समासो ज्ञेयः । अष्टानां च चतुःषष्ट्या गणने द्वादशोत्तराणि पञ्चशतानि शिरांसि प्रतिगजं स्युरिति, तथैकैकस्मिन् दन्तेऽष्टाष्टपुष्करिण इति । ५३ प्र० । सेन० २ उल्ला० । तथा दशार्णभद्राधिकारे हस्तिमुखाऽऽदिविकुर्वणा किमिन्द्रेण कृता, किमुतैरावणदेवेन वेति प्रश्ने, उत्तरम्-आवश्यकचूर्ण्यादानुसारेण हस्तिमुखाऽऽदि सर्वमिन्द्राऽऽदेशादैरावणेन विचक्रे, आवश्यकवृत्त्यादानुसारेण तु तत्सर्वं स्वयं विमैंजसेति । ११७ प्र० । सेन० २ उल्ला० ।

दसतिग–दशत्रिक–न० । दशाऽवयवे समुदाये, संघा० १ अधि० १ प्रस्ता० । ('चेइयवंदण' शब्दे तृतीयभागे १०९८ पृष्ठे दशत्रिकाणि प्रतिपादितानि)

दसदसमिया–दशदशमिका–स्त्री० । दश दशमानि दिनानि यस्यां सा दशदशमिका । दशदशकनिष्पन्नायां भिक्षुप्रतिमायाम्, स्था० ।

दसदसमिया णं भिक्खुपडिमा णं राईदियसएणं अहासुत्तं० जाव आराहिया भवइ ।

(दसेत्यादि) दश दशमानि दिनानि यस्यां सा दशदशमिका, दशदशकनिष्पन्नेत्यर्थः । भिक्षूणां प्रतिमा प्रतिज्ञा भिक्षुप्रतिमा एकेनेत्यादि दशदशकानि दिनानां शतं भवतीति प्रथमे दशदशमिका । द्वितीये विंशतिः । एवं दशमे शतम । सर्वसंकलने पञ्चशतानि पञ्चाशदधिकानि भवन्तीति । (अहासुत्तेत्यादि) (अहासुत्तं) सूत्रानतिक्रमेण, यावत्करणात्-(अहाअत्थं) अर्थस्य निर्युक्त्यादेरनतिक्रमेण (अहातच्चं) शब्दार्थानतिक्रमेण (अहामग्गं) क्षायोपशमिकाद्भावानतिक्रमेण (अहाकप्पं) तदाचारानतिक्रमेण, सम्यक्कायेन, न मनोरथमात्रेण, (फासित्ता) विशुद्धपरिणामप्रतिपत्त्या (पालित्ता) सीमां यावत्तत्परिणामाहान्त्या, शोधिता निरतिचारतया शोभिता वा तत्समाप्तावुचितानुष्ठानकरणतः, तारिता तीरं नीता प्रतिज्ञातकालोपर्यप्यनुष्ठानात्, कीर्तिता नामत इदं चेदं च कर्त्तव्यमस्यां तत्कृते मयेत्येवमिति । आराधिता सर्वपदसंकलनात्, भवति जायत इति प्रतिमाऽध्यासः । स्था० १० ठा० । प्रव० । । स० । अन्त० ।

दसदसय–दशदशक–न० । शते, स्था० १० ठा० ।

दसदिट्ठंत–दशदृष्टान्त–पुं० । मनुष्यलाभे दशसु दृष्टान्तेषु, आ० म० १ अ० २ खण्ड । (ते च 'माणुसत्त' शब्दे वक्ष्यन्ते)

दसदिवसिय–दशदिवसिक–त्रि० । दशाहिके, " दसदिवसियं ठिइवडियं " ज्ञा० १ श्रु० १ अ० ।

दसधणु–दशधनुष्–पुं० । जम्बूद्वीपे द्वीपे आगमिष्यत्यामुत्सर्पिण्यामैरवते वर्षे भविष्यति षष्ठे कुलकरे, स० । ति० । जम्बूद्वीपे द्वीपे भारते वर्षे आगमिष्यत्यामुत्सर्पिण्यां दशमे कुलकरे च । स्था० १० ठा० ।

दसऊवण्ण–दशोद्वर्ण–त्रि० । पञ्चवर्णे, स० ३४ सम० । रा० ।

औ० । जी० । "दसद्धवण्णस्स कुसुमस्स जाणुस्सेहपमाणमेत्तं ।" रा० ।

दसपएसिय–दशप्रदेशिक–पुं० । दशाणुके, स्था० १० ठा० ।

दसपएसोगाढ–दशप्रदेशावगाढ–पुं० । दशप्रदेशेष्वाकाशस्यावगाढा आश्रिता दशप्रदेशावगाढाः । आकाशस्य दशसु प्रदेशेषु आश्रिते, स्था० १० ठा० ।

दसपुव्वि(ण्)-दशपूर्विन्-पुं० अधीतोत्पादाऽऽदिपूर्वदशके, कल्प० ।
"महागिरिः सुहस्ती च, सूरिः श्रीगुणसुन्दरः ।
श्यामाऽऽर्यः स्कन्दिलाऽऽचार्यो, रेवतीमित्रसूरिराट् ॥ १ ॥
श्रीधर्मो भद्रगुप्तश्च, श्रीगुप्तो वज्रसूरिराट् ।
युगप्रधानप्रवराः, दशैते दशपूर्विणः ॥२॥" कल्प० ८ क्षण ।

दसबल–दशबल–पुं० । "दशपाषाणे हः" ॥ ८ । १ । २६२ ॥ इति शकारस्य वैकल्पिको हकारः । 'दसबलो । दहबलो ।" प्रा० १ पाद । दश बलानि यस्य सः । बुद्धभगवति, को० । "दानशीलक्षमावीर्य्य-ध्यानप्रज्ञाबलानि च । उपायाः प्रणिधिर्ज्ञानं, दश बुद्धबलानि वै" ॥ १ ॥ वाच० ।

दसम–दशम–त्रि० । दशानां पूर्णः, डटि मट् । येन दश सङ्ख्या पूर्यते तस्मिन्, आचा० १ श्रु० ९ अ० ४ उ० । पञ्चा० ।

दसमभत्तिय–दशमभक्तिक–पुं० । दिनचतुष्टयमुपोषिते, प्रश्न० ३ संव० द्वार ।

दसमी–दशमी–स्त्री० । ङीप् । सा च "शताऽऽयुर्वै पुरुषः" इति श्रुतेः पुरुषस्याऽऽयुःकालस्य शतसंख्यकतया दशभिर्विभागः । नवतेरुर्द्धं दशवर्षावच्छिन्ने काले पुरुषावस्थाऽऽदौ, वाच० । ध० प० । ज्यो० । ('तिहि' शब्देऽस्मिन्नेव भागे २३३० पृष्ठे दशमीफलान्युक्तानि)

दसमुद्दापमियग्गहत्थ–दशमुद्रामप्रमितग्रहस्त–पुं० । दशाङ्गुलिमुद्रामप्रमितौ अग्रहस्तौ येषां तेषु, जी० ३ प्रति० ४ उ० ।

दसमुद्दियाणंतय–दशमुद्रिकानन्तक–न० । हस्ताङ्गुलीमुद्रिकादशके, भ० ६ श० ३३ उ० ।

दसरत्तट्ठिइवडिया–दशरात्रस्थितिपतिता–स्त्री० । कुलक्रमादागते पुत्रजन्मानुष्ठाने, विपा० १ श्रु० २ अ० ।

दसरह–दशरथ–पुं० । जम्बूद्वीपे भारते वर्षेऽस्यामेवोत्सर्पिण्यां जातेऽष्टमस्य वासुदेवस्य पितरि, स्था० ९ ठा० । आच० । ति० । स० । जम्बूद्वीपे भारते वर्षेऽतीतायामुत्सर्पिण्यां जाते नवमे कुलकरे, स्था० १० ठा० । स० ।

दसविह–दशविध–त्रि० । दशप्रकारके, प्रश्न० ३ संव० द्वार ।

दसविहकप्प–दशविधकल्प–पुं० । कल्पविकल्पाऽऽदिके दशप्रकारे कल्पे, पं० भा० । (दशविधकल्पाः 'कप्प' शब्दे तृतीयभागे २२७ पृष्ठे गताः)

दसवेयालिय–दशवैकालिक–न० । विकालेनापराह्णलक्षणेन निर्वृत्तं वैकालिकम्, दशाध्ययननिर्माणं च तद्वैकालिकं च मध्यपदलोपाद्दशवैकालिकम् । पा० । नं० । शय्यम्भवसूरिकृते स्वनामख्याते श्रुतग्रन्थे, अस्य दशवैकालिकस्यानुयोगः । तत्रानुयोगव्याख्या स्वस्थाने निरवशेषोक्ता ।

इह तु-

एयाइँ पडुच्चेउं, कप्पे वण्णियगुणेण गुरुणा उ ।
अणुओगो दसवेया–ल्यियस्स विहिणा कहेयव्वो ॥ ६ ॥

एतानि निक्षेपाऽऽदिद्वाराणि ('अणुओग' शब्दे) प्रदर्श्य व्याख्याय कल्पे वर्णितगुणेन गुरुणा, षट्त्रिंशद्गुणसमन्वितेनेत्यर्थः । अनुयोगो दशवैकालिकस्य, विधिना प्रवचनोक्तेन कथयितव्य आख्यातव्यः । इति गाथाऽर्थः ॥ ६ ॥ सम्प्रत्यजानानः शिष्यः पृच्छति-यदि दशकालिकस्यानुयोगः, ततस्तद्दशकालिकं भदन्त! किमङ्गमङ्गानि, श्रुतस्कन्धः श्रुतस्कन्धाः, अध्ययनम्, अध्ययनानि, उद्देशक उद्देशका इत्यष्टौ प्रश्नाः । एतेषां मध्ये त्रयो विकल्पाः खलु प्रयुज्यन्ते, तद्यथा-दशकालिकं, श्रुतस्कन्धः, अध्ययनानि, उद्देशकाश्चेति, यतश्चैवमतो दशाऽऽदीनां निक्षेपः कर्तव्यः । तद्यथा-दशानां कालस्य श्रुतस्कन्धस्याध्ययनस्य, उद्देशकस्य चेति ।

तथा चाऽऽह निर्युक्तिकारः-

दसकालियं ति नामं, संखाए कालओ य निद्देसो ।
दसकालिय सुअखंधं, अज्झयणुद्देस निक्खिविउं ॥ ९ ॥

दशकालिकं प्राग्निरूपितशब्दार्थम्, इति एवंभूतं, यन्नाम अभिधानम् । इदं किम् ? , संख्यानं संख्या, तया, कालतश्च कालेन चायं निर्देशः-निर्देशनं निर्देशः, विशेषाभिधानमित्यर्थः । अस्य च निबन्धनं विशेषेण वक्ष्यामः " मणगं पडुच्च " इत्यादिना ग्रन्थेन । यतश्चैवमतः-(दसकालियं ति) कालेन निर्वृत्तं कालिकं, दशशब्दस्य कालशब्दस्य च निक्षेपः । निर्वृत्तार्थस्तु निक्षेपः । तथा श्रुतस्कन्धम्, तथाऽध्ययनमुद्देशं तदेकदेशभूतम् । किम् ? । निक्षेप्तुमनुयोगोऽस्य कर्त्तव्य इति गाथाऽर्थः । दश० १ अ० । (दशशब्दस्य निक्षेपः 'दस' शब्देऽस्मिन्नेव भागे २४७६ पृष्ठे गतः) (कालशब्दस्य च 'काल' शब्दे तृतीयभागे ४७० पृष्ठादारभ्य विशेषो द्रष्टव्यः)

इह पुनर्दिवसप्रमाणकालेनाऽधिकारः, तत्राऽपि तृतीयपौरुष्या, तत्राऽपि बहुतिक्रान्तयेति । आह-यदुक्तम्-" पगयं तु भावेणं ति," तत्कथं न विरुध्यत इति ? । उच्यते-छायोपशमिकभावकाले शय्यंभवेन निर्यूढं, प्रमाणकाले चोक्तलक्षणमित्यविरोधः । अथवा-प्रमाणकालोऽपि भावकाल एव, तस्याऽद्धाकालस्वरूपत्वात्, तस्य च भावत्वादिति ।

तथा चाऽऽह निर्युक्तिकारः-

सामाइयअणुकमओ, वन्नेउं विगयपोरसीए उ ।
निव्वूढं किर सिज्जं–भवेण दसकालियं तेणं ॥ १२ ॥

सामायिकमावश्यकप्रथमाध्ययनं, तस्यानुक्रमः परिपाटीविशेषः, सामायिके वाऽनुक्रमः सामायिकानुक्रमः, ततः सामायिकानुक्रमतः सामायिकानुक्रमेण, वर्णयितुम्, अनन्तरोपन्यस्तगाथाद्वाराणीति प्रक्रमाद्गम्यते । विगतपौरुष्यामेव, तुशब्दस्याऽवधारणार्थत्वाद्, निर्यूढं पूर्वगताद्धृत्य विरचितम् । किलशब्दः परोक्षाऽऽप्ताऽऽगमवादसंसूचकः । शय्यंभवेन चतुर्दशपूर्वविदा, दशकालिकं प्राग्निरूपिताक्षरार्थं, तेन कारणेनोच्यत इति गाथार्थः ॥ १२ ॥ श्रुतस्कन्धयोश्च निक्षेपश्चतुर्विधो द्रष्टव्यः, यथाऽनुयोगद्वारेषु, स्थानाशून्यार्थं किञ्चिदुच्यते-इह नोआगमतः ज्ञशरीरव्यशरीरव्यतिरिक्तं द्रव्यश्रुतं पुस्तकपत्रन्यस्तम् । अथवा-

सूत्रमधमलाऽऽदि । जावश्रुतं त्वागमतो ज्ञाता उपयुक्तः । नोआगमतस्त्विदमेव दशकालिकं,नोशब्दस्य देशवचनत्वात् । एवं नोआगमतो ज्ञशरीरभव्यशरीरव्यतिरिक्तो द्रव्यश्रुतस्कन्धः सचेतनाऽऽदिः। तत्र सचित्तो द्विपदाऽऽदिः। अचित्तो द्विप्रदेशिकाऽऽदिः। मिश्रः सेनाऽऽदिर्देशाऽऽदिरिति । तथा-जावस्कन्धस्त्वागमतस्तदर्थोपयोगपरिणाम एव । नोआगमतस्तु दशकालिकश्रुतस्कन्धएवेति, नोशब्दस्य देशवचनत्वादिति।इदानीमध्ययनोद्देशकन्यासप्रस्तावः। तं चानुयोगद्वारप्रक्रमाऽऽयातं प्रत्यध्ययनं यथासंजवमोघनिष्पन्नं निक्षेपे लाघवार्थं वक्ष्याम इति । ततश्च यदुक्तम्- "दसकालियसुयखंधं, अज्झयणुद्देस निक्खिवेजं" (६) अनुयोगोऽस्य कर्त्तव्य इति तदंशतः संपादितमिति ।

साम्प्रतं प्रस्तुतशास्त्रसमुत्थानवक्तव्यताऽभिधित्सयाऽऽह-

जेण व जं व पमुच्चा, जत्तो जावंति जह य ते उविया ।
सो तं च तओ ताणि य, तहा य कमसो कहेयव्वं ॥ १३ ॥

येन वाऽऽचार्येण,यद्वा वस्तु,प्रतीत्याश्रीकृत्य,यतश्चाऽऽत्मप्रवादाऽऽदिपूर्वतो,यावन्ति वाऽध्ययनानि,यथा च येन प्रकारेण,तान्यध्ययनानि,स्थापितानि न्यस्तानि,स चाऽऽचार्यः, तच्च वस्तु,ततस्तस्मात्पूर्वात्,तानि चाध्ययनानि, तथा च तेनैव प्रकारेण, क्रमशः क्रमेणानुपूर्व्या कथयितव्यं प्रतिपादयितव्यमिति गाथासमासार्थः । अवयवार्थं तु प्रतिद्वारं निर्युक्तिकार एव वक्ष्यति।

तत्राधिकृतशास्त्रकर्तुः स्तवद्वारेणाऽऽद्यद्वारावयवार्थप्रतिपादनायाऽऽह-

सेज्जंभवं गणहरं, जिणपडिमादंसणेण पडिबुद्धं ।
मणगपियरं दसका-लियस्स निज्जूहगं वंदे ॥ १४ ॥

सेज्जंभवमिति नाम, गणधरमिति अनुत्तरज्ञानदर्शनाऽऽदिगुणगणं धारयतीति गणधरस्तम्, जिनप्रतिमादर्शनेन प्रतिबुद्धं, तत्र रागद्वेषकषायेन्द्रियपरीषहोपसर्गाऽऽदिजेतृत्वाज्जिनः, तस्य प्रतिमा सद्भावस्थापनारूपा, तस्याः दर्शनमिति समासः। तेन हेतुभूतेन, प्रतिबुद्धं मिथ्यात्वाज्ञाननिद्राऽपगमेन सम्यक्त्वविकाशं प्राप्तम्। मनकपितरमिति मनकाऽऽख्यायाः पत्न्या जनकम्,दशकालिकस्य प्राक्तनरूपितार्थस्य, निर्यूहकं पूर्वगतोद्धृतार्थविरचनाकर्तारं, वन्दे स्तौमि । इति गाथाऽक्षरार्थः । भावार्थः कथानकादवसेयः । तच्चेदम्- " एत्थ वद्धमाणसामिस्स चरमतित्थगरस्स सीसो तित्थसामी सुहम्मो नाम गणधरो आसि । तस्स वि जंबूनामो, तस्स वि य पभवो त्ति । तस्स उजवा कयाइ पुव्वरत्तावरत्तम्मि चिंता समुप्पन्ना-को मे गणधरो होज्जत्ति?। अप्पणो गणे य संघे य सव्वम्मि उवओगो कतो, ण दीसइ कोइ अन्नोच्छित्तिकरो। ताहे गारत्थेसु उवउत्तो, उवओगं कए रायगिहे सेज्जंभवं माहणं जण्णं जयमाणं पासति । ताहे रायगिहं नगरं आगंतूण संघाडयं वावारेति जण्णवाडं गंतुं भिक्खट्ठा धम्मं कहेह, तत्थ तुम्मे अतित्था विजिजहिह ताहे तुम्हे पणिजह-"अहो कष्टं तत्त्वं न ज्ञायते इति ।" तओ गया साहू, अतित्था विजाय तेहिं भणितं-"अहो कष्टं तत्त्वं न ज्ञायते । " तेण य सेज्जंभवेण दारमूले ठियएहिं तं वयणं सुयं । ताहे सो चिंतेइ-एते उवसंता तवोरासिणो, असच्चं ण वयंति त्ति कातुं अज्झावगसगासं गंतुं भणति-किं तत्तं ?। सो भणति-वेदा तत्तं । ताहे सो असिं कड्ढिऊण भणति-सीसं ते छिंदामि, जह मे तुमं तत्तं न कहेसि । तओ अज्झावओ भणति-पुत्ता ! मम समये भणियमेयं वेदत्थे, परं सीसच्छेदे कहियव्व त्ति संपयं कहयामि जं एत्थ तत्तं, एतस्स जूवस्स हेट्ठा सव्वण्णुमई पडिमा अरहओ सा धुव्व त्ति आरिहओ धम्मो तत्तं। ताहे सो तस्स पायसु पडितो । सो य जण्णवाडओ वक्खोवितं तस्स चेव दिण्णो । ताहे सो गंतूण ते साहू गवेसमाणे गओ आयरियसगासं । आयरियं वंदित्ता साहुणो य भणति-मम धम्मं कहेह । ताहे आयरिया उवउत्ता-जहा इमो सो त्ति, ताहे आयरिएहिं साहुधम्मो कहिओ । संबुद्धो पव्वइओ सो चउद्दसपुव्वी जाओ । जवा य सो पव्वइओ तया य तस्स गुव्विणी महिला होत्था । तम्मि य पव्वइए लोगो णियल्लओ तं तमवसंति-जहा तरुणाए भत्ता पव्वइतो, अपुत्ताए अवि अत्थि तव किं वि पोट्टे त्ति पुच्छति?। सा भणति-उवलक्खेमि मणगं । तओ समपण दारगो जाओ, ताहे णिव्वत्तबारसाहस्स णियलगगेहिं जम्हा पुव्विज्जंतीए माताए से भणिओ मणगं ति, तम्हा मणओ से णामं कयं ति । जवा सो अट्ठवरिसो जाओ ताहे सो मातरं पुच्छति-को मम पिया?। सा भणइ-तव पिया पव्वइओ । ताहे सो दारओ णासिक्कं पिवइसगासं पट्ठितो । आयरिया य तं कालं चंपाए विहरंति । सो वि य दारओ चंपामेवाऽऽगतो । आयरिएण य सण्णाभूमिं गएण सो दारओ दिट्ठो । दारएण वंदितो आयरिओ । आयरियस्स य तं दारगं पेच्छंतस्स णेहो जाओ। तस्स वि दारगस्स तहेव । आयरिएहिं पुच्छियं-भो दारग ! कुतो ते आगमणं ?। सो दारगो भणति-रायगिहातो । आयरिएण भणियं-रायगिहे तुमं कस्स पुत्तो, नत्तुओ वा ?। सो भणइ-सेज्जंभवो नाम बंभणो त्ति तस्साहं पुत्तो, सो य किर पव्वइओ । तेहिं भणियं-तुमं केण कज्जेण आगओऽसि ?। सो भणइ-अहं पि पव्वइस्सं। पच्छा सो दारओ भणति-तो भणह, बंभं तुम्हे जाणह?। आयरिया भणंति-जाणेमो । तेण भणियं-सो कहिं ति?ते भणंति-सो मम मित्तो एगसरीरट्ठितो, पव्वयाहि तुमं मम सगासे। तेण भणियं-एवं करेमि । तओ आयरिया आगंतुं पडिस्सए आलोएंति सन्निसो पसुप्पन्नो । सो पव्वइतो । पच्छा आयरिया उवउत्ता केवतियं कालं एस जिवइ त्ति । णायं-जाव छम्मासा । ताहे आयरियाणं बुद्धी समुप्पन्ना-इमस्स थोवगं आउं,किं कायव्वं ति ?। तं चोद्दसपुव्वी कम्हि विकारणे समुप्पन्ने णिज्जूहति, दसपुव्वी पुण अपच्छिमो अवस्समेव णिज्जूहति । मम पि इमं कारणं समुप्पन्नं, तो अहमवि णिज्जूहामि। ताहे आढत्तो निज्जूहिउं। ते य निज्जूहिजंतो विवाले निज्जूढा थोवावसेसे दिवसे । तेण तं दसवेयालियं प्रणिज्जति।" अनेन च कथानकेन न केवलं येन वेत्यस्यैव द्वारस्य भावार्थोऽभिहितः, किं तु यद्वा प्रतीत्येत्यस्यापीति ।

तथा चाऽऽह निर्युक्तिकारः-

मणगं पडुच्च सेज्जं-भवेण निज्जूहिया दसऽज्झयणा ।
वेयालियाइ ठविया, तम्हा दसकालियं नाम ॥ १५ ॥

मनकं प्रतीत्य मनकाऽऽख्यमपत्यमाश्रित्य,शय्यंभवेनाऽऽचार्येण, निर्यूढानि पूर्वगतादुद्धृत्य विरचितानि, दशाध्ययनानि द्रुमपुष्पिकाऽऽदीनि। (वेयालियाइ ठविय त्ति) विगतः कालो विकालः, विकलनं वा विकाल इति। विकालः शकलः खण्डमेत्यनर्थान्तरम्। तस्मिन् विकालेऽपराह्णे स्थापितानि न्यस्तानि द्रुमपु-

ष्पिकाऽऽदीन्यध्ययनानि यतः, तस्माद्दशकालिकं नाम। व्युत्पत्तिः पूर्ववत्। दशवैकालिकं वा त्रिकालेन निर्वृत्तम्, संकासाऽऽदिपाठाच्चातुरर्थिकष्ठक्। "तद्धितेष्वचामादेः" ॥ ७।२।११७॥ इत्यादिवृद्धैवैकालिकम्। दशाध्ययननिर्माणे च तद्वैकालिकं च दशवैकालिकमिति गाथार्थः।

एवं येन वा यदा प्रतीत्येति व्याख्यातम्। इदानीं यतो निर्यूढानीत्येतद्व्याचिख्यासुराह-

आयप्पवायपुव्वा, निज्जूढा होइ धम्मपन्नत्ती।
कम्मप्पवायपुव्वा, पिंडस्स उ एसणा तिविहा ॥१६॥
सच्चप्पवायपुव्वा, निज्जूढा होइ वक्कसुद्धी उ।
अवसेसा निज्जूढा, नवमस्स उ तइयवत्थूओ ॥ १७ ॥
वीओ वि य आएसो, गणिपिडगाओ चुद्दसंगाओ।
एयं किर निज्जूढं, मणगस्स अणुग्गहट्ठाए ॥ १८ ॥

इहाऽऽत्मप्रवादपूर्वे यत्राऽऽत्मनः संसारिमुक्ताऽऽद्यनेकभेदभिन्नस्य प्रवदनमिति, तस्मान्निर्यूढा भवति धर्मप्रज्ञप्तिः, धर्मजीवनिकेत्यर्थः। तथा-कर्मप्रवादपूर्वात्। किम्?। पिण्डस्य तु एषणा त्रिविधा निर्यूढेति वर्त्तते। कर्मप्रवादपूर्वं नाम-यत्र ज्ञानाऽऽवरणीयाऽऽदिकर्मणो निदानाऽऽदिप्रवदनमिति। तस्मात् किम्?। पिण्डस्यैषणा त्रिविधा गवेषणा-ग्रहणैषणा-ग्रासैषणाभेदान्निर्गता। निर्यूढा सा पुनस्तत्राऽऽत्मना संबन्धेन पतति। आधाकर्मोपनीता ज्ञानाऽऽवरणीयाऽऽदिकर्मप्रकृतीर्बध्नाति। उक्तं च-"आहाकम्मं भुंजमाणे समणे आउ कम्मपगडीओ बंधइ।" इत्यादि। शुद्धपिण्डोपभोक्ता चाशुभान्न बध्नातीत्यत्र प्रसङ्गेन। प्रकृतं प्रस्तुमः। सत्यप्रवादपूर्वाद् निर्यूढा भवति वाक्यशुद्धिस्तु। तत्र सत्यप्रवादं नाम-यत्र जनपदसत्याऽऽदेः प्रवदनमिति। वाक्यशुद्धिर्नाम-सप्तममध्ययनम्। अवशेषाणि प्रथमद्वितीयाऽऽदीनि निर्यूढानि नवमस्यैव प्रत्याख्यानपूर्वस्य तृतीयवस्तुन इति। द्वितीयोऽपि चाऽऽदेशः। आदेशो विध्यन्तरम्, गणिपिटकादाचार्यसर्वस्वाद् द्वादशाङ्गादाचाराऽऽदिलक्षणात्, इदं दशकालिकं,किलेति पूर्ववत्, निर्यूढमिति च। किमर्थम्?। मनकस्योक्तस्वरूपस्य अनुग्रहार्थमिति गाथात्रयार्थः। एवं यत इति व्याख्यातम् ॥ १८॥

अधुना यावन्तीत्येतत्प्रतिपाद्यते-

दुमपुप्फियाइया खलु, दस अज्झयणा सभिक्खुयं जाव।
आहिगारा वि य एत्तो, वोच्छं पत्तेयमेकेके ॥ १९ ॥

तत्र दुमपुष्पिकेति प्रथमाध्ययननाम, तदादीनि दशाध्ययनानि। (सभिक्खुयं जाव त्ति) सभिक्षुकाध्ययनं यावत्, खलुशब्दो विशेषणार्थः। किं विशिनष्टि?। तदन्ये द्वे चूले। यावन्तीति व्याख्यातम्। यथा चेत्येतत् पुनराधिकाराभिधानद्वारेणैव च व्याचिख्यासुः संबन्धकत्वेनेदं गाथाद्वयमाह-अधिकारादपि चातो वक्ष्ये प्रत्येकमेकैकस्मिन्नध्ययने। तत्राध्ययनपरिसमाप्तेर्योऽनुवर्त्तते सोऽधिकारः। इति गाथाऽर्थः ॥ १९॥

पढमे धम्मपसंसा, सो य इहेव जिणसासणम्मि त्ति।
बिइए धिइए सक्का, काउं जे एस धम्मो त्ति ॥ २० ॥
तइए आयारकहा, ज खुड्डिया आयसंजमोवाओ।
तह जीवसंजमो वि य, होइ चउत्थम्मि अज्झयणे ।२१।
जिक्खविसोही तवसं-जमस्स गुणकारिया उ पंचमए।
छट्ठे आयारकहा, महई जोग्गा महयणस्स ॥ २२ ॥

वयणविभत्ती पुण सत्तमम्मि पणिहाणमट्ठमे भणियं।
णवमे विणओ दसमे, समाणियं एस भिक्खु त्ति ॥२३॥

प्रथमेऽध्ययने कोऽर्थाधिकारः?, इत्यत आह-धर्मप्रशंसा। दुर्गतौ प्रपतन्तमात्मानं धारयतीति धर्मः, तस्य प्रशंसा स्तवः, सकलपुरुषार्थानामेव धर्मः प्रधानमित्येवंरूपा। तथाऽन्यैरप्युक्तम्-"धनदोऽर्थार्थिनां प्रोक्तः, कामिनां सर्वकामदः। धर्म एवापवर्गस्य, पारम्पर्येण साधकः ॥ १ ॥" इत्यादि। स चात्रैव जिनशासने धर्मो, नाऽन्यत्र, इहैव निरवद्यवृत्तिसद्भावात्। एतच्चोत्तरत्र न्यक्षेण वक्ष्यामः। धर्माभ्युपगमे च सत्यपि मा नूदभिनवप्रव्रजितस्याधृतेः संमोह इत्यतस्तन्निराकरणार्थाधिकारवदेव द्वितीयाध्ययनम्। आह च-द्वितीयेऽध्ययने अयमर्थाधिकारः। धृत्या हेतुभूतया शक्यते कर्तुम्। 'जे' इति पूरणार्थो निपातः, एष जैनो धर्म इति। उक्तं च-"जस्स धिई तस्स तवो, जस्स तवो तस्स सा गती सुलभा। जे अधितिमंतपुरिसा, तवो वि खलु दुल्लभो तेसिं ॥१॥" सा पुनर्धृतिराचारे कार्या, न त्वनाचारे, इत्यतस्तदर्थाधिकारवदेव तृतीयाध्ययनम्। आह च-तृतीयेऽध्ययने कोऽर्थाधिकारः?, इत्यत आह-आचारगोचरा कथा आचारकथा, सा चैहैवाणुविस्तरमेदात्। यत आह-क्षुल्लिका लघ्वी, सा च आत्मसंजमोपायः। संयमनं संयमः, आत्मनः संयम आत्मसंयमस्तदुपायः। उक्तं च-"तस्माऽऽत्मा संयमे यो हि, सदाचारे रतः सदा। स एव धृतिमान् धर्म-स्तस्यैव च जिनोदितः ॥१॥" इति। स चाऽऽचारः षड्जीवनिकायगोचरः प्राय इत्यतश्चतुर्थमध्ययनम्। अथवाऽऽत्मसंयमस्तदन्यजीवपरिपालनमेव तत्त्वतः,इत्यतस्तदर्थाधिकारवदेव चतुर्थमध्ययनम्। आह च-तथा जीवसंजमोऽपि भवति चतुर्थेऽध्ययनेऽर्थाधिकार इति। अपिशब्दादात्मसंयमोऽपि तद्ग्राह्येव वर्त्तते। उक्तं च-" जसु जीवनिकाएसु, जे चुहे संजए सदा। से चेव होति विण्णेये, परमत्थेण संजए ॥१॥" इत्यादि। एवमेव धर्मः,स च देहे स्वस्थे सति पाल्यते,स चाऽऽहारमन्तरेण प्रायः स्वस्थो न तिष्ठति, स च सावद्येतरभेद इत्यनवद्यो ग्राह्य इत्यतस्तदर्थाधिकारवदेव पञ्चममध्ययनमिति। आह च-भिक्षाविशोधिस्तपःसंयमस्य गुणकारिकैव पञ्चमेऽध्ययनेऽर्थाधिकार इति। तत्र भिक्षणं भिक्षा, तस्या विशोधिः सावद्यपरिहारेणेतरस्वरूपकथनमित्यर्थः, तपःप्रधानः संयमस्तपःसंयमः,तस्य गुणकारिकैवेयं वर्त्तते इति। उक्तं च-" से संजते समक्खाते, निरवज्जाहार जे विऊ। धम्मकायट्ठिते सम्मं, सुद्धजोगाण साहए ॥१॥" इत्यादि। गोचरप्रविष्टेन च सता स्वाचारे पृष्टेन तद्विदाऽपि न महाजनसमक्षं तत्रैव विस्तरतः कथयितव्यः, अपि तु आलये। गुरवो वा कथयन्तीति वक्तव्यम्। अतस्तदर्थाधिकारवदेव षष्ठमध्ययनमिति। आह च-षष्ठेऽध्ययनेऽर्थाधिकारः आचारकथा। साऽपि महती, न क्षुल्लिका, योग्या उचिता, महाजनस्य विशिष्टपरिषद् इत्यर्थः। वक्ष्यति च-" गोयरग्गपविट्ठो उ, न निसिज्जाइ कत्थइ। कहं च ण पबंधेज्जा, चिट्ठित्ता णेव संजए॥१॥" इत्यादि। आलयगतेनापि तेन, गुरुणा वा वचनदोषगुणान्विज्ञेन निरवद्यवचसा कथयितव्यमिति। अतस्तदर्थाधिकारवदेव सप्तममध्ययनमिति। आह च-"वयणविभत्ती" इत्यादि। वचनस्य विभक्तिर्वचनविभक्तिः,विभजनं विभक्तिरित्यनर्थान्तरम्, इत्थंभूतं च सावद्यमित्यर्थः, पुनःशब्दः शेषाध्ययनार्थाधिकारेभ्य अस्याधिकृतार्थाधिकारस्य विशेषणार्थं

इति सप्तमेऽध्ययनेऽर्थाधिकार इति । उक्तं च-" सावज्जऽणवज्जाणं, वयणाणं जो न याणाति विसेसं । बोलुं पि तस्स न खमं, किमंग ! पुण देसणं काउं ॥ १ ॥ " इत्यादि । तच्च निरवद्यं वचः स्वाचारे प्रणिहितस्य भवतीत्यतस्तदर्थाधिकारवदेवाष्टममध्ययनमिति । आह च-प्रणिधानमष्टमेऽध्ययनेऽर्थाधिकारत्वेन भणितमुक्तम् । प्रणिधानं नाम-विशिष्टश्चेतोधर्म इति । उक्तं च-" पणिहाणरहियस्सेह, निरवज्जं पि भासियं । सावज्जत्तुल्लं विण्णेयं, मज्झत्थेणेह संबुधं ॥१॥ " इत्यादि । आचारप्रणिहितश्च यथोचितविनयसंपन्न एव भवतीत्यतस्तदर्थाधिकारवदेव नवममध्ययनमिति । आह च-नवमेऽध्ययने विनयोऽर्थाधिकार इति । उक्तं च-" आयारपणिहाणम्मि, से सम्मं वमुती बुहे । णाणादीणं विणीते जे, मोक्खट्ठा खिप्पिवग्गिहिए ॥ १ ॥ " इत्यादि । एतेष्वेव नवस्वध्ययनार्थेषु यो व्यवस्थितः स सम्यग्भिक्षुरित्यनेन संबन्धेन स भिक्षध्ययनमिति । आह च-दशमेऽध्ययने समाप्तिं नीतमिदं साधुक्रियाऽभिधायकं शास्त्रम् । एतत्क्रियासमन्वित एव भिक्षुर्भवति । अत आह-एष भिक्षुरिति गाथाचतुष्टयार्थः ।

स एवंगुणयुक्तोऽपि भिक्षुः कदाचित् कर्मपरतन्त्रत्वात्कर्मणश्च बलवत्त्वात्सीदेत्, ततस्तस्य स्थिरीकरणं कर्तव्यमतस्तदर्थाधिकारवदेव चूलाद्वयमित्याह-

दो अज्झयणा चूलिय, विसीयमंते थिरीकरणमेगं ।
विइए विवित्तचरिया, असीयणगुणाइरेगफला ॥ २४ ॥

द्वे अध्ययने । किम् ? । चूला चूडेव चूला, तत्र प्रमादवशाद्विसीदति सति साधौ संजमे स्थिरीकरणमेकं प्रथमम्, स्थिरीकरणफलमित्यर्थः । तथा च तत्रावधावप्रेक्षिणः साधोर्दुःप्रजीवित्वे नरकपाताऽऽदयो दोषा वर्ण्यन्ते इति । तथा च द्वितीयेऽध्ययने विविक्तचर्या वर्ण्यते । किंभूता ?, असीदनगुणातिरेकफला, तत्र विविक्तचर्यैकान्तचर्या द्रव्यक्षेत्रकालभावेषु संवरूता, उपलक्षणं चैषा नियतचर्याऽऽदीनामिति । असीदनगुणातिरेकः फलं यस्याः सा तथाविधेति गाथार्थः ॥ २४ ॥

दसकालियस्स एसो, पिंडत्थो वण्णिओ समासेणं ।
एत्तो एक्केक्कं पुण, अज्झयणं कित्तइस्सामि ॥ २५ ॥

दशकालिकस्य प्राग्निरूपितशब्दार्थस्य, एषोऽनन्तरोदितः, पिण्डार्थः सामान्यार्थः, वर्णितः प्रतिपादितः, समासेन संक्षेपेण, अत ऊर्द्धं पुनरेकैकमध्ययनं, कीर्तयिष्यामि प्रतिपादयिष्यामीति,पुनःशब्दस्य व्यवहित उपन्यासः । इति गाथार्थः ।२५। दश० १ अ० ।

अथ शास्त्रकर्तुः स्तवमाह-

सिज्जंभवं गणहरं, जिणपमिमादंसणेण पडिबुद्धं ।
मणगपिअरं वि दसका-लिअस्स निज्जूहगं वंदे ॥ १ ॥

शय्यंभवम्,अनुत्तरज्ञानाऽऽदिधर्मगणं धारयतीति गणधरस्तं, जिनप्रतिमादर्शनेन प्रतिबुद्धं मिथ्यात्वाविरत्यज्ञाननिद्राऽपगमेन सम्यक्त्वविकाशं प्राप्तं,निर्यूहकं पूर्वगतोद्धृतार्थविरचनाकर्तारं, मनकपितरं दशवैकालिककृतं वन्दे स्तौमीति गाथाऽक्षरार्थः । भावार्थस्तु कथानकादवसेयः-श्रीसुधर्मशिष्यो हि जम्बूः, तस्य श्रीप्रभवः, तस्य शय्यम्भवः ॥ १ ॥

मणगं पडुच्च सिज्जं-भवेण निज्जूहिआ दसऽज्झयणा ।
वेआलिआइ ठविआ, तम्हा दसकालिअं नाम ॥ २ ॥

मनकं प्रतीत्य मनकाऽऽख्यमपत्यमाश्रित्य शय्यंभवेन निर्यूढानि पूर्वगतादुद्धृत्य विरचितानि, दश अध्ययनानि द्रुमपुष्पिकाऽऽदीनि सनिर्युक्त्यध्ययनप्रान्तानि । विगतः कालो विकालः, विकलनं वा विकालः, शकलः खण्ड इति । तस्मिन् विकाले निर्वृत्तं दशाध्ययननिर्माणं च इदं वैकालिकम् ॥ २ ॥

यं प्रतीत्य कृतं तद्गतवक्तव्यतामाह-

छहिं मासेहिं अहीयं, अज्झयणमिणं तु अज्जमणगेणं ।
छम्मासा परिआओ, अह कालगओ समाहीए ॥ ३ ॥

षड्भिर्मासैरधीतं पठितमध्ययनमिदं तु अधीयत इत्यध्ययनम् । इदमेव दशवैकालिकाऽऽख्यं शास्त्रम् । केनाऽधीतमित्याह-आर्यमणकेन भावाऽऽराधनयोगात् आराद् यातः सर्वहेयधर्मेभ्य इत्यार्यः, अर्यश्चासौ मणकश्चेति विग्रहः । तेन, षण्मासाः पर्याय इति । तस्याऽऽर्यमणकस्य षण्मासा एव प्रव्रज्याकालः, अल्पजीवितत्वात् । अत एवाऽऽह-अथ कालगतः समाधिनेति । यथोक्तशास्त्राध्ययनपर्यायानन्तरं कालगत आगमोक्तेन विधिना मृतः, समाधिना शुभलेश्याध्यानयोगेनेति गाथाऽर्थः ॥ ३ ॥

अत्र चैवं वृद्धवादः-यथा तेनैतावता श्रुतेनाऽऽराधितमेवमन्येऽप्येतदध्ययनानुष्ठानत आराधका भवन्तीति ।

आणंदअंसुपायं, कासी सिज्जंभवा तहिं थेरा ।
जसभद्दस्स य पुच्छा, कहणा य विआलणा संघे ॥ ४ ॥

आनन्दाश्रुपातम्-अहो आराधितमनेनेति हर्षाश्रुमोक्षणमकार्षुः कृतवन्तः शय्यंभवाः प्राग्व्यावर्णितस्वरूपाः, तत्र तस्मिन् काले स्थविराः श्रुतपर्यायवृद्धाः प्रवचनगुरवः, पूजार्थे बहुवचनमिति । यशोभद्रस्य च शय्यंभवप्रधानशिष्यस्य, गुर्वश्रुपातदर्शनेन किमेतदाश्चर्यमिति विस्मितस्य सतः पृच्छा-भगवन् ! किमेतदकृतपूर्वमित्येवंभूता ?। कथना च भगवतः संसारस्नेह ईदृशः सुतो ममाऽयमित्येवंरूपा । चशब्दादनुतापश्च यशोभद्राऽऽदीनाम् । अहो ! गुरुरिव गुरुपुत्रके वर्तितव्यमिति, न तत् कृतमस्माभिरित्येवंभूतप्रतिबन्धदोषपरिहारार्थम् । न मया कथितं नात्र भवतां दोष इति गुरुपरिसंस्थापनं च । विचारणा सङ्घ इति । शय्यंभवेनाल्पायुषमेनमवेत्य मयेदं शास्त्रं निर्यूढं किमत्र युक्तमिति निवेदिते विचारणा सङ्घे-कालहासदोषात् प्रभूतसत्त्वानामिदमेवोपकारकमवतिष्ठतेनेदित्येवंभूता स्थापना चेति गाथाऽर्थः । दश० २ चू० । वीरमोक्षात् " वासाएँ सहस्सेहिं, वरिससहस्सेहिँ नवहिँ वोच्चेदो । दसवेयालियसुत्तस्स दिणुसाहम्मि वोद्धव्वो ॥८१९॥ " ति० ।

दसवेयालियणिज्जुत्ति-दशवैकालिकनिर्युक्ति-स्त्री० । दशवैकालिकस्य भद्रबाहुस्वामिरचितनिर्युक्तिग्रन्थे, दश० ।

" जयति विजितान्यतेजाः, सुराऽसुराधीशसेवितः श्रीमान् ।
विमलस्वासविरहित-स्त्रिलोकचिन्तामणिर्वीरः ॥ १ ॥"

इहार्थतोऽर्हत्प्रणीतस्य सूत्रतो गणधरोपनिबद्धपूर्वगतोद्धृतस्य शारीरमानसाऽऽदिकदुःखसन्तानविनाशहेतोर्दशकालिकाभिधानस्य शास्त्रस्यातिसूक्ष्मगम्भीरार्थगोचरस्य व्याख्या प्रस्तूयते । तत्र प्रस्तुतार्थप्रत्यूहविघातायेष्टदेवतानमस्कारद्वारेणाऽशेषविघ्नविनायकाऽपोहसमर्थां परममङ्गलाऽऽख्यामिमां प्रतिज्ञागाथामाह निर्युक्तिकारः-

सिद्धिगइमुवगयाणं, कम्मविसुद्धाण सव्वसिद्धाणं ।

नमिऊणं दसकालिय-णिज्जुत्तिं कित्तइस्सामि ॥ १ ॥

सिद्धिगतिमुपगतेभ्यो नत्वा दशकालिकनिर्युक्तिं कीर्त्तयिष्यामीति क्रिया । तत्र सिद्धाश्च निष्ठितार्था भवन्त्यस्यामिति सिद्धिर्लोकाग्रक्षेत्रलक्षणा । तथा चोक्तम्-" इह बोंदिं चइत्ता णं, तत्थ गंतूण सिज्झइ । (औ० २ गा०) " गम्यत इति गतिः, कर्म्मसाधनम् । सिद्धिरेव गम्यमानत्वाद्गतिः सिद्धिगतिः, तामुपस्वामीप्येन गताः प्राप्तास्तेभ्यः सकललोकाग्रक्षेत्रप्राप्तेभ्य इत्यर्थः । प्राकृतशैल्या चतुर्थ्यर्थे षष्ठी । यथोक्तम्-" छट्ठीविभत्तीए भन्नइ चउत्थी । " तत्रैकेन्द्रियाः पृथिव्यादयः सकर्मका अपि तद्गमनमात्रमधिकृत्य यथोक्तस्वरूपा भवन्त्यत आह कर्मविशुद्धेभ्यः । क्रियत इति कर्म ज्ञानाऽऽवरणीयाऽऽदिलक्षणं, तेन विशुद्धा वियुक्ताः कर्मविशुद्धाः, कर्मकलङ्करहिता इत्यर्थः । तेभ्यः कर्मविशुद्धेभ्यः । आह-एवं तर्हि वक्तव्यं न सिद्धिगतिमुपगतेभ्योऽन्यभिचारात् । तथाहि-कर्मविशुद्धाः सिद्धिगतिमुपगता एव भवन्ति । न । अविवक्षितक्षेत्रविभागोपगतसिद्धप्रतिपादनपरदुर्नयनिरासार्थत्वादस्य । तथाचाहुरेके-" रागाऽऽदिवासनामुक्तं, चित्तमेव निरामवत् । सदा नियतदेशस्थं, सिद्ध इत्यभिधीयते" ॥ १ ॥ इत्यलं प्रसङ्गेन । दश० १ अ० ।

दससद्धाविक्खंभण-दशसंज्ञाविष्कम्भण-न० । दश च ताः संज्ञाश्च तासां विष्कम्भणं निरोधस्तस्मिन्, पो० ५ विव० ।

दससमयट्ठिइय-दशसमयस्थितिक-त्रि० । दश समयाद् स्थितिर्येषां तेषु, स्था० १० ठा० ।

दससय-दशशत-न० । सहस्रसङ्ख्याभेदे, स्था० १० ठा० ।

दससयसहस्स-दशशतसहस्र-न० । दशलक्षाऽऽत्मिकायां संख्यायाम्, अनु० ।

दससहस्स-दशसहस्र-न० । सङ्ख्याभेदे, अनु० ।

दसहा-दशधा-अव्य० । दशविधे, उत्त० २३ अ० । आच० ।

दसहासामायारी-दशधासामाचारी-स्त्री० दशधेत्याख्याभिधानं यस्याः सा । दशप्रकारलक्षणायामिच्छाकाराऽऽदिसामाचार्याम्, ध० ३ अधि० । (ताम् दश ' सामायारी ' शब्दे वक्ष्यन्ते)

दसा-दशा-स्त्री० । दन्-श-अङ्, नि०लोपः । चरितगतिसिद्धिगमनलक्षणायामवस्थायाम्, ते० । अनुभागेन युक्तो विभागो दशा । नि० चू० ११ उ० । वर्षशताऽऽयुष्कापेक्षया वर्षदशकप्रमाणायां कालकृतायां जन्तववस्थायाम्, दश० ।

साम्प्रतं प्रस्तुतोपयोगित्वात्कालस्य कालदशकद्वारे विशेषार्थप्रतिपिपादयिषयेदमाह-

बाला किड्डा मंदा, बला य पन्ना य हायणि पवंचा ।
पब्भार मम्मुही सा-यणी य दसमा उ कालदसा ॥१०॥

बाला क्रीडा च मन्दा च बला च प्रज्ञा च हायिनी ईषत्प्रज्ञा प्राग्भारा मृन्मुखी शायिनी । तथाहि एता दश दशा जन्तववस्थाविशेषलक्षणा भवन्ति ।

आसां च स्वरूपमिदमुक्तं पूर्वसूरिभिः-
" आतमित्तस्स जंतुस्स, जा सा पढमिया दसा ।
ण तत्थ सुहदुक्खाइं, बहु जाणंति बालया ॥ १ ॥
बितियं च दसं पत्तो, आणाकिड्डाहि किड्डइ ।
न तत्थ कामभोगेहिं, तिव्वा उप्पज्जई मई ॥ २ ॥
ततियं च दसं पत्तो, पंचकामगुणे नरो ।
समत्थो भुंजिउं जोए, जइ से अत्थि घरे बहू ॥ ३ ॥
चउत्थी उ बला नाम, जं नरो दसमस्सिओ ।
समत्थो बलं दरिसेउं, जइ होइ निरुवहवो ॥ ४ ॥
पंचमिं च दसं पत्तो, आणुपुव्वीइ जो नरो ।
इच्छियत्थं विचिंतेति, कुडुंबं वाऽभिकंखति ॥ ५ ॥
छट्ठी उ हायणी नाम, जं नरो दसमस्सिओ ।
विरज्जइ य कामेसु, इंदिएसु य हायति ॥ ६ ॥
सत्तमिं च दसं पत्तो, आणुपुव्वीइ जो नरो ।
निट्ठुहइ सिक्कणं खेलं, खासति य अभिक्खणं ॥ ७ ॥
संकुचियवलीचम्मो, संपत्तो अट्ठमिं दसं ।
जारीणमणभिप्पेओ, जराए परिणामितो ॥ ८ ॥
णवमी मम्मुही नाम, जं नरो दसमस्सिओ ।
जराघरे विणस्संतो, जीवो वसइ अकामओ ॥ ९ ॥
हीनभिन्नसरो दीणो, विवरीओ विचित्तओ ।
दुब्बलो दुक्खिओ सुवइ, संपत्तो दसमिं दसं ॥ १० ॥ " दश० १ अ० । आ० । नं० । नि० चू० । दीपवत्त्यर्थम्, " अपेक्षन्ते न च स्नेहं, न पात्रं न दशाऽन्तरम् । परोपकारनिरताः, मणिदीपा इवोत्तमाः ॥१॥ " इत्युद्भटः । चित्ते कामकृते विरहिणां नेत्ररागाऽऽद्यवस्थादशके, वाच० । वस्त्राञ्चले, वाच० । दशैव दशसंख्या एव दशा दशाधिकाराभिधायकत्वाद्दशा इति बहुवचनान्तं स्त्रीलिङ्गम् । शास्त्रस्याभिधाने, वा० । दशाध्ययनप्रतिबद्धप्रथमवर्गयोगाद्दशाग्रन्थविशेषे, अणु० १ गु० १ वर्ग १ अ० ।

दस दसाओ पण्णत्ताओ । तं जहा-कम्मविवागदसाओ, उवासगदसाओ, अंतगडदसाओ, अणुत्तरोववाइयदसाओ, आयारदसाओ, पण्हावागरणदसाओ, बंधदसाओ, दोगिद्धिदसाओ, दीहदसाओ, संखेवियदसाओ ॥

(दस त्ति) दशसंख्याः (दसाओ त्ति) दशाधिकाराभिधायकत्वाद्दशा इति बहुवचनान्तं स्त्रीलिङ्गं शास्त्रस्याभिधान इति । कर्मणोऽशुभस्य विपाकः फलं कर्मविपाकः, तत्प्रतिपादिका दशाध्ययनाऽऽत्मकत्वाद् दशाः कर्मविपाकदशाः विपाकश्रुताऽऽख्यस्यैकादशाङ्गस्य प्रथमश्रुतस्कन्धो, द्वितीयश्रुतस्कन्धोऽप्यस्य दशाध्ययनाऽऽत्मक एव । न चासाविहाभिमतः, उत्तरत्र विवरिष्यमाणत्वादिति । तथा-साधुनुपासते सेवन्त इत्युपासकाः श्रावकाः, तद्गतक्रियाकलापप्रतिबद्धा दशा दशाध्ययनोपलक्षिता उपासकदशाः सप्तममङ्गमिति । तथा-अन्तो विनाशः, स च कर्मणस्तत्फलभूतस्य वा संसारस्य कृतो यैस्तेऽन्तकृताः, ते च तीर्थकराऽऽदयः, तेषां दशा अन्तकृद्दशाः, इह चाऽष्टमाङ्गस्य प्रथमवर्गे दशाध्ययनानीति तत्संख्ययोपलक्षितत्वादन्तकृद्दशा इत्यभिधानेनाष्टममङ्गमभिहितम् । तथोत्तरः प्रधानो नास्योत्तरो विद्यत इत्यनुत्तर उपपतनमुपपातो जन्मेत्यर्थोऽनुत्तरा आसामुपपातश्चेत्यनुत्तरोपपातः, सोऽस्ति येषां तेऽनुत्तरोपपातिकाः सर्वार्थसिद्धाऽऽदिविमानपञ्चकोपपातिन इत्यर्थः, तद्वक्तव्यता प्रतिबद्धा दशा दशाध्ययनोपलक्षिता अनुत्तरोपपातिकदशा

नवममङ्गमिति । तथा-चरणमाचारो ज्ञानाऽऽदिविषयः पञ्चधा आचारप्रतिपादनपरा दशा दशाध्ययनाऽऽत्मिका आचारदशा दशाश्रुतस्कन्ध इति या रूढाः, तथा प्रश्नदश्च पृच्छा, व्याकरणानि च निर्वचनानि प्रश्नव्याकरणानि, तत्प्रतिपादिका दशा दशाध्ययनाऽऽत्मिकाः प्रश्नव्याकरणदशा दशममङ्गमिति। तथा-बन्धदशा द्विगृद्धिदशा दीर्घदशाः संक्षेपैकदशाश्चास्माकमप्रतीता इति । स्था० १० ठा० । च० । पा० । अष्ट० । "दस उद्देसणकाला, दसाण कप्पस्स हुंति छव्वीसं । दस चेव य ववहार-स्स हुंति सव्वे वि छव्वीसं ॥४८॥" आ०चू० १ अ० । "छव्वीसाए दसाकप्पववहाराणं उद्देसणकालेहिं ।" आव० ४ अ० । ज्योतिषोक्ते नक्षत्रानुसारेण सूर्याऽऽदिग्रहाणां स्वामित्वेन भोग्यकाले, वाच० ।

दसार–दशार्ह–पुं० । "दशार्हे" ॥८।२। ८५॥ इति हस्य लुक् । प्रा० २ पाद । हरिवंशकुलोद्भवेषु, सूत्र० २ श्रु० १ अ० । आ० म० । समुद्रविजयाऽऽदिवसुदेवान्ता दश दशाराः । स० । अन्त० । समयभाषया वासुदेवे, स्था० २ ठा० ३ उ० । वासुदेवकुलीनप्रजासु, स० । बन्धदशानां चतुर्थेऽध्ययने दशाराणां वक्तव्यता उक्ता, सा चेदानीं नोपलभ्यते, बन्धदशानां व्युच्छिन्नत्वात् । स्था० १० ठा० । बलदेवे, आ० म० १ अ० २ खण्ड । आ० चू० । "दसण्हं दसाराणं बलदेवपूभोक्खाणं ।" नि० १ श्रु० ४ वर्ग १ अ० ।

दसारगंडिया–दशार्हगण्डिका–स्त्री० । दशार्हैकवक्तव्यतार्थाधिकारानुगतासु वाक्यपद्धतिषु, यत्र दशार्हाणां पूर्वजन्माऽऽद्यभिधीयते । स० ।

दसारचक्क–दशार्हचक्र–न० । यादवसमूहे, उत्त० । "दसारचक्केण य सो, सव्वओ परिवारिओ ।" उत्त० २२ अ० ।

दसारमंडण–दशार्हमण्डन–न० । दशार्हाणां वासुदेवकुलीनप्रजानां मण्डनाः शोभाकारिणो दशार्हमण्डनाः । दशार्होत्तमपुरुषेषु, स० ।

दसारमंडव्व–दशार्हमण्डव्य–न० । दशार्हाणां वासुदेवानां मण्डव्यानि दशार्हमण्डव्यानि, बलदेववासुदेवद्वयव्यक्तिलक्षणाः समुदाया दशार्हमण्डव्यानि । बलदेववासुदेवद्वयव्यक्तिलक्षणे समुदाये, स० । (बलदेववासुदेवयोः सर्वा वक्तव्यता 'तित्थयर' शब्देऽस्मिन्नेव भागे ९२७४ पृष्ठे उक्ता) ('बलदेववासुदेव' शब्दयोः भविष्यद्बलदेववासुदेवा वक्तव्यन्ते)

दशार्हप्रसङ्गतः भरतवर्षे भविष्यद्बलदेववासुदेवपितृमातृप्रभृतिनामनिर्देशः-

जंबुद्दीवे णं दीवे भारहे वासे आगमिस्साए उस्सप्पिणीए नव बलदेववासुदेवपियरो भविस्संति । नव वासुदेवमायरो भविस्संति, नव बलदेवमायरो भविस्संति । नव दसारमंडला भविस्संति । तं जहा- उत्तमपुरिसा, मज्झिमपुरिसा, पहाणपुरिसा, तेयंसी०एवं सो चेव वण्णओ नाणियव्वो० जाव नीलगपीतगवसणा । दुवे दुवे रामकेसवा भायरो भविस्संति । तं जहा-

" नंदे य नंदमित्ते, दीहबाहू य महबाहू ।
अइबले महाबले, बलभद्दे य सत्तमे ॥१॥
तिविट्ठू य दुविट्ठू य, आगमिस्सेण वण्णओ ।
जयंते विजए भद्दे, सुप्पभे य सुदंसणे ॥२॥
आणंदे णंदणे पउमे, संकरिसणे अपच्छिमे ।"

पूर्वभवनामाऽऽदीनि-

एएसि णं नवण्हं बलदेववासुदेवाणं पुव्वभविया नव नामधेज्जा भविस्संति, नव धम्माऽऽयरिया भविस्संति, नव नियाणभूमीओ भविस्संति, नव नियाणकारणा भविस्संति, नव पमिसत्तू भविस्संति । तं जहा- तिलए य लोहजंघे वइरजंघे य केसरी पहराए अपराजिए, भीमसेणे महाभीमे सुग्गीवे य अपच्छिमे ।

"एए खलु पमिसत्तू, किण्हीपुरिसाण वासुदेवाणं ।
सव्वे वि चक्कजोही, हम्मिं हंता सचक्केहिं ॥ १ ॥"

देरवते वर्षे तेषां पितृमातृप्रभृतयः-

जंबुद्दीवे दीवे एरवए वासे आगमिस्साए उस्सप्पिणीए नव बलदेववासुदेवपियरो भविस्संति, नव वासुदेवमायरो भविस्संति, नव बलदेवमायरो भविस्संति, नव दसारमंडला भविस्संति । तं जहा-उत्तमपुरिसा, मज्झिमपुरिसा, पहाणपुरिसा० जाव दुवे दुवे रामकेसवा भायरो भविस्संति, नव पमिसत्तू भविस्संति, नव पुव्वभवणामधेज्जा, नव धम्मायरिया, नव णियाणभूमीओ, नव णियाणकारणा, आयाए एरवए आगमिस्साए नाणियव्वा, एवं दोसु वि आगमिस्साए नाणियव्वा । स० ।

दसारवग्ग–दशार्हवर्ग–पुं० । दशार्हसमुदाये, दश० १ अ० ।

दसारवरवीरपुरिस–दशार्हवरवीरपुरुष–पुं० । दशार्हाणां समुद्रविजयाऽऽदीनां दशार्हस्य वा वासुदेवस्य ये वराश्च पुरुषास्ते । ज्ञा० १ श्रु० १६ अ० । दशार्हाः समुद्रविजयाऽऽदयस्तेषु मध्ये वरास्त एव वा वरा वीरपुरुषास्ते दशार्हवरवीरपुरुषाः । दशार्हश्रेष्ठपुरुषेषु, ज्ञा १ श्रु० ५ अ० ।

दसारवंस–दशार्हवंश–पुं० । बलदेववासुदेववंशे, "तीसे णं समाए तओ वंसा समुप्पज्जित्था।" जं० २ वक्ष० । ति० । स० ।

दसासुयखंध–दशाश्रुतस्कन्ध–पुं० । दशाध्ययनप्रतिपादको ग्रन्थो दशा, स चाऽसौ श्रुतस्कन्धश्च दशाश्रुतस्कन्धः । दशाकल्पव्यवहारपर्य्यायेऽसमाधिस्थानाऽऽद्यर्थाभिधायकतयाऽर्थतो वर्द्धमानस्वाम्युक्ते सूत्रतो द्वादशस्वङ्गेषु गणधरैस्ततोऽपि मन्दमेधसामनुग्रहायातिशायिभिः प्रत्याख्यानपूर्वादुद्धृत्य पृथक् दशाध्ययनत्वेन व्यवस्थापिते ग्रन्थे, दशा० ।

" यथास्थितशेषपदार्थसार्थ-कृमार्थसन्धानविधिप्रवीणम् ।
जिनं जनाऽऽनन्दकरं कृपाऽब्धिं, नमामि भव्याम्बुजबोधसूरम् ॥१॥
स्तुमो महावीरजिनस्य तेजो, भवाख्यनीराऽऽकरपारगस्य ।
अनादिदुष्कर्मगणस्य नित्यं, तृणायितं यत्र सुखापमेव (?) ॥२॥
श्रीवसुभूतितनूजं, वन्दे श्रीगौतमाभिधं सदा साधुम् ।
सकललब्ध्येकनिलयं, मलयं गुणचन्दनौघस्य ॥ ३ ॥
येषां प्रसादमासाद्य, जायते शास्त्रकौशलम् ।
श्रीगुरूणामहं तेषां, वन्दे चरणपङ्कजम् ॥ ४ ॥
अध्ययनदशकमेतत्, चूर्णिकृता यद्यपि वर्णितं सम्यक् ।
तदपि त्वरयति मामिह, वृत्तिविधौ वाक्यकृद्भक्तिः ॥ ५ ॥"
इह रागद्वेषाऽऽभिभूतेन संसारपारावारसारिजीवेनेन्द्रिया-

ऽऽयतमप्रमानसानेकातिकटुकदुःखोपनिपातपीडितेन तत्परिहाराय हेयोपादेयपदार्थसार्थविज्ञानविधौ यत्नः कर्त्तव्यः, स च न विशिष्टविवेकमृते, विवेकोऽपि न प्राप्तशेषातिशयकलापाऽऽस्तोपदेशं विना, स चाऽऽप्त आत्यन्तिकदोषप्रक्षयादेव भवितुमर्हति । स च वीतरागस्यैव, अत आरभ्यते अर्हद्वचनानुयोगः। अयं च दशाश्रुतस्कन्धोऽतिगम्भीरोऽल्पाक्षरैर्व्यावर्णितश्चूर्णिकृता, अत एवाऽल्पबुद्धीनामुपकारासमर्थः, तेन तेषामनुग्रहार्थं मया तस्य किञ्चिद्विस्तरतो व्याख्यानमातन्यते-अथ दशाश्रुतस्कन्ध इति कः शब्दार्थः ? । उच्यते-दशाध्ययनप्रतिपादको ग्रन्थो दशा, स चासौ श्रुतस्कन्धश्चेति दशाश्रुतस्कन्धः, दशाकल्प इति वा पर्यायनाम । अयञ्च ग्रन्थोऽसमाधिस्थानाऽऽदिपदार्थशासनाच्छास्त्रम् । ननु दशाश्रुतस्कन्धप्रारम्भोऽयुक्तः, प्रयोजनाऽऽदिनी रहितत्वात्, कण्टकशाखामर्दनाऽऽदिवदित्याशङ्क्याऽपनोदाय प्रयोजनाऽऽदिकमाद्वुपन्यसनीयम् । यदुक्तम्-" पूर्वमेवेह संबन्धः, सान्निध्यं प्रयोजनम् । मङ्गलं चैव शास्त्रस्य, प्रयोक्तव्यं प्रवर्त्तकम् ॥ १ ॥ " दशा० १ अ० । तत्र प्रथमेऽध्ययने विंशतिरसमाधिस्थानानि । द्वितीयेऽध्ययने एकविंशतिः शबलाः । तृतीये त्रयस्त्रिंशदाशातनाः । चतुर्थेऽष्टौ गणिसम्पदः । पञ्चमे दश चित्तसमाधिस्थानानि । षष्ठे एकादशोपासकप्रतिमाः । सप्तमे द्वादश भिक्षुप्रतिमाः । अष्टममध्ययनं कल्पसूत्राऽऽख्यं पृथगस्ति, तत्र तीर्थङ्करचरितं, पर्युषणाकल्पः, स्थविराऽऽवली चेत्यधिकाराः । नवमे त्रिंशन्मोहनीयस्थानानि । दशमे नव निदानस्थानानि । दशा० १० अ० । ध०।" जाणितो दसाण भेदो, जत्थ सरलपहिं होइ सरिसाणं । समणम्मि फग्गुमित्ते, गोयमगोत्ते महासत्ते ॥ १ ॥ " ति० ।

दसाहिया-दशाहिका-स्त्री० । दशदिवसप्रमाणायां पुत्रजन्मक्रियायाम्, भ० ११ श० ११ उ०

दसाहुस्सव-दशाहोत्सव-पुं० । दशदिवसमहे, प्रति० ।

दसिया-दशिका-स्त्री० । वस्त्राञ्चले, बृ० ३ उ० । वर्तिकायां च । दण्डस्याग्रभागे ऊर्णिकादशिका बध्यन्ते । बृ० ७ उ० ।

दसुत्तरा-दशोत्तरा-स्त्री० । दशाधिके अष्टौ रेखा दशोत्तरा दशकवृद्ध्या पलपरिमाणसूचिकाः । ज्यो० २ पाहु० ।

दसू-देशी-शोके, दे० ना० ५ वर्ग ३४ गाथा ।

दसेर-पुं० । देशी-सूत्रकनके, दे० ना० ५ वर्ग ३३ गाथा ।

दस्सु-दस्यु-पुं० । चौरे, आचा० २ श्रु० १ चू० ३ अ० १ उ० । अइत्ताऽऽहरो वा दस्युर्वाऽपहरति । आचा० १ श्रु० ५ अ० ३ उ० ।

दह-दशन्-त्रि० । दन्-श-कनिन् । वाच० । "दशषाषाणे हः" ॥ ८ । १ । २६२ ॥ इति दशन्शब्दे शकारस्य हकारः । 'दह । दश ।' प्रा० १ पाद । सङ्ख्याविशेषे, वाच० ।

दह--पुं० । " ऊरो न वा " ॥ ८ । २ । ८० ॥ इति रेफस्य वा लुक् । ज्वलाऽऽशये , प्रा० २ पाद ।

हृद-पुं० । " हृदे हदोः " ॥ ८ । २ । १२० ॥ इति हकारदकारयोर्भकारत्वम् । प्रा० २ पाद । अगाधजलाऽऽशये, जं० ४ वक्ष० । आचा० । चं० प्र० । सं० । प्रज्ञा० ।

जंबू! मंदरस्स उत्तरदाहिणेणं चुल्लहिमवंतासिहरीसु वासहरपव्वएसु दो महद्दहा पण्णत्ता बहुसमतुल्ला अविसेसमणाणत्ता अण्णमण्णं नाइवट्टंति आयामविक्खंभउव्वेहसंठाणपरिणाहेणं । तं जहा-पउमद्दहे चेव, पुंडरीयद्दहे चेव । तत्थ णं दो देवयाओ महिड्ढियाओ० जाव पलिओवमट्ठिईयाओ परिवसंति । तं जहा-सिरि चेव, लच्छी चेव । एवं महाहिमवंतरुप्पिसु वासहरपव्वएसु दो महद्दहा पण्णत्ता बहुसमतुल्ला० जाव महापउमद्दहे चेव, महापोंडरीयद्दहे चेव । देवताओ-हिरि चेव, बुद्धि चेव । एवं निसढनीलवंतेसु तिगिच्छिद्दहे चेव, केसरिद्दहे चेव । देवताओ-धिई चेव, कित्ती चेव ।

(जंबू इत्यादि) इह च हिमवदादिषु षट्सु वर्षधरेषु क्रमेणैते पद्माऽऽदयः षडेव ह्रदाः। तद्यथा-" पउमे य महापउमे, तिगिच्छि केसरिद्दहे चेव । हरए महपुंडरीए, पुंडरीए चेव य दहाओ ॥ १ ॥ " हिमवत उपरि बहुमध्यभागे पद्मह्रद एव शिखरिणः पौण्डरीकाः, ते च पूर्वापराऽऽयतौ सहस्रयोजनशतविस्तृतौ चतुष्कोणौ दशयोजनावगाढौ रजतकूलौ वज्रमयपाषाणौ तपनीयतलौ सुवर्णमध्यरजतमणिबालुकौ चतुरश्रमणिसोपानौ स्वभावतारौ तोरणध्वजच्छत्राऽऽदिविभूषितौ नीलोत्पलपद्मपुण्डरीकाऽऽदिचितौ विचित्रशकुनिमिथुनविरचितरवौ षट्पद्मपटलोपशोभ्याविति । (तत्थ णं ति) तयोर्महाह्रदयोर्द्वे देवते परिवसतः-पद्मह्रदे श्रीः, पौण्डरीके लक्ष्मीः। ते च भवनपतिनिकायाऽभ्यन्तरजूते, पल्योपमस्थितिकत्वात् । अभ्यन्तरदेवीनां हि पल्योपमार्द्धमेवाऽऽयुरुत्कर्षतो भवति । भवनपतिदेवीनां तूत्कर्षतोऽर्द्धपञ्चपल्योपमान्यायुर्भवति । आह च-" अद्धछट्ठपंचमपलिओवमअसुरजुयलदेवीणं । सेसभवणदेवयाण य, देसूणं अद्धपलियमुक्कोसं ॥१॥ " इति । तयोश्च महाह्रदयोर्मध्ये योजनमाने पद्मे अर्द्धयोजनबाहल्ये दशावगाहे जलान्ताद् द्विक्रोशोच्छ्राये वज्रामरिष्टवैडूर्यमूलकन्दनाले वैडूर्यजाम्बूनदमयबाह्याभ्यन्तरपत्रे कनककर्णिके तपनीयकनककेशरे तयोः कर्णिकेऽर्द्धयोजनमाने तदर्द्धबाहल्ये तदुपरि देव्योर्भवने इति । (एवमित्यादि) महाहिमवति महापद्मो, रुक्मिणि तु महापौण्डरीकः, तौ च द्विसहस्राऽऽयामौ तदर्द्धविष्कम्भौ द्वियोजनमानपद्मन्यासवन्तौ । तयोर्देवते परिवसतः। महापद्मे ह्रीः, पौण्डरीके बुद्धिरिति । (एवमित्यादि) निषधे तिगिच्छिह्रदे धृतिर्देवता, नीलवति केशरिह्रदे कीर्तिर्देवता । तौ च द्वौ चतुर्द्विसहस्राऽऽयामविष्कम्भाविति । भवति चात्र गाथा-"एएसु सुरवहूओ, वसंति पलिओवमट्ठितीओ । सिरिहिरिधीकित्तीओ, बुद्धीलच्छीसमाणाओ ॥१॥ " इति । आ० २ आ० ३ उ० । द्वारवत्यां बलदेवस्य राज्ञः रेवत्यां जाते रथनामन्यजाते पुत्रे, नि० । स च अरिष्टनेमितीर्थकरानगारस्य वरदत्ताभिधानस्यान्तिके प्रव्रज्यानशनेन मृत्वा देवलोके उत्पन्नः, ततश्च्युत्वा महाविदेहे वर्षे सेत्स्यतीति निरयावलिकाऽन्तर्गतवृष्णिदशानां तृतीयेऽध्ययने सूचितम् । नि० १ श्रु० ४ वर्ग १० अ० ।

जंबू! मंदरस्स दाहिणेणं तओ महद्दहा पण्णत्ता । तं जहा-पउमद्दहे, महापउमद्दहे, तिगिच्छिद्दहे । तत्थ णं तओ देवयाओ महिड्ढियाओ० जाव पलिओवमट्ठिईयाओ परिवसंति । तं जहा- सिरी, हिरी, धिई । एवं उत्तरेण वि, णवरं केसरि-

दहे महापोंडरीयदहे पोंडरीयदहे देवयाओ-कित्ती, बुद्धी, लच्छी । स्था० ३ ठा० ४ उ० ।

षष्ठे स्थाने-

जंबुदीवे दीवे छ महद्दहा पण्णत्ता । तं जहा-पउमद्दहे, महापउमद्दहे, तिगिच्छिद्दहे, केसरिद्दहे, पुंडरीयद्दहे, महापुंडरीयद्दहे । तत्थ णं छ देवयाओ महिड्ढियाओ०जाव पलिओवमट्ठितीया परिवसंति । तं जहा-सिरि, हिरि, धिइ, कित्ती, बुद्धी, लच्छी । । स्था० ६ ठा० ।

सव्वे वि णं महद्दहा दस जोयणाइं उव्वेहेणं पण्णत्ता । स्था० ।

दहगलण–हृदगलन–न० । ह्रदस्य मध्ये मत्स्याऽऽदिग्रहणार्थं भ्रमणे, जलनिःसारणे च । विपा० १ श्रु० ७ अ० ।

दहण–दहन–पुं० । दह-ल्युट् । दहतीति दहनः । अग्नौ, विशे० । आ० चू० । ज्वालाभिर्भस्मीकरणे, प्रश्न० १ आश्र० द्वार । कृत्तिकानक्षत्रे, दहनः कृतिकाया देवता । स्था० २ ठा० ३ उ० पाटलिपुत्रनगरवास्तव्यस्य हुताशननाम्नः श्रावकस्य ज्वलनशिखायां भार्यायां जाते स्वनामख्याते पुत्रे, आ०क० । चित्रकवृक्षे, भल्लातके, शुष्कचेतसि च । भावे ल्युट् । दाहे, वाच० ।

दहणसील–दहनशील–पुं० । ज्वालनस्वभावे, त० । " पुप्फस्स मुद्धवो विधवा च कन्या, शत्रं च मित्रं अयसं कलत्रम् । विलासकालेऽपि दरिद्रता च, विनाऽग्निना पञ्च दहन्ति देहम् ॥१२॥"त०।

दहप्पवहण–ह्रदप्रवहण–न० । ह्रदजलस्य प्रकृष्टे वहने, विपा० १ श्रु० ८ अ० ।

दहफुल्लिया–ह्रदफुल्लिका–स्त्री० । वल्लीभेदे, प्रज्ञा० १ पद ।

दहबल–दशबल–पुं० । ' दसबल ' शब्दार्थे, आ० १ पाद ।

दहमद्दण–ह्रदमर्दन–ह्रदस्य मध्ये पौनःपुन्येन परिभ्रमणे, जले निःसारिते पङ्कमर्दने च । विपा० १ श्रु० ८ अ० ।

दहमद्दल–ह्रदमर्दल–न० । ' दहमद्दण ' शब्दार्थे, विपा० १ श्रु० ७ अ० ।

दहमह–ह्रदमख–ह्रदस्य विशिष्टे काले पूजायाम्, आचा० २ श्रु० १ चू० १ अ० २ उ० ।

दहमहण–ह्रदमथन–न० । ह्रदजलस्य तरुशाखाभिर्विलोडने, विपा० १ श्रु० ७ अ० ।

दहमुह–दशमुख–पुं० । " दशपाषाणे हः " ॥ ८ । १ । २६२ ॥ इति शकारस्य वैकल्पिको हकारः । ' दहमुहो । दसमुहो ।' रावणे, प्रा० १ पाद ।

दहवई–ह्रदवती–स्त्री० । " दो दहवईओ । " स्था० २ ठा० ३ उ० । ' दहावई ' शब्दार्थे, स्था० ६ ठा० ।

दहवहण–ह्रदवहन–न० । स्वत एव ह्रदाज्जलनिर्गमे, विपा० २ श्रु० ८ अ० ।

दहवोल्ली–स्त्री० । देशी- स्थाल्याम्, दे० ना० ५ वर्ग ३६ गाथा ।

दहावई–ह्रदावती–स्त्री० । ह्रदा मगाधजलाऽऽशयाः सन्त्यस्यामिति ह्रदावती । जं० ४ वक्ष० । जम्बूद्वीपे मेरोः पूर्वस्यां दिशि शीताया महानद्याः दक्षिणतः सङ्गतायामन्तर्नद्याम्, स्था० ६ ठा० ।

तस्स णं दहावईकुंडस्स दाहिणेणं तोरणेणं . दहावई महाणई पव्वूढा समाणी कच्छगावई आवत्तं विजयं दुहा वि भयमाणी भयमाणी दाहिणेणं सीआ महाणई समप्पेइ । सेसं जहा गाहावईए । जं ४ वक्ष० ।

दहावईकुंड–ह्रदावतीकुण्ड–न० । ह्रदावतीनाम्न्या अन्तर्नद्या उद्गमकुण्डे, जं० ।

कहि णं भंते ! महाविदेहे वासे दहावईकुंडे णामं कुंडे पण्णत्ते ?। गोयमा ! आवत्तस्स विजयस्स पच्चत्थिमेणं कच्छगावईए विजयस्स पुरत्थिमेणं चित्तकूडस्स दाहिणिल्ले णितंबे एत्थ णं महाविदेहे वासे दहावईकुंडे णामं कुंडे पण्णत्ते । सेसं जहा महाहिमवंतकुंडस्स०जाव अट्ठो ।

ह्रदावतीकुण्डं प्रज्ञप्तम् । शेषं यथा महाहिमवत्कुण्डस्य रूपकथनं प्राङ्मागधीद्वीपपरिमाणभवनवर्णकनामार्थकथनप्रमुखं तथा ज्ञेयं, नवरं ह्रदावतीद्वीपो ह्रदावतीति नामार्थः समधिगम्यः, ह्रदा अगाधजलाऽऽशयाः सन्त्यस्यामिति ह्रदावती । साधनिका प्राग्वत् । जं ४ वक्ष० ।

दहि–दधि–न० । दध-इन् । दुग्धविकृतिभेदे, प्रव० ४ द्वार । औ० । जीव० । प्रज्ञा० । स्था० । प्रश्न० । दधिनवनीतघृतादि यत्वार्थेन महाविगइसम्बन्धीनि, तस्माद्धृतानां तानि दध्यादीनि च भवन्ति । पं० व० २ द्वार । आ० चू० । आव० । स्था० । विनष्टद्वातीते दध्यपि जीवसंसक्तिर्यथा-" जइ मुग्गयासमाई, विदलं कच्चंमि गोरसे पडइ । ता तस्स जीवुप्पत्ती, भणंति दहिए वि दुदिणपुव्वंमि ॥ १ ॥ " हरिभद्रसूरयश्चैकाहिकपूर्वापरे-" एवञ्चातस्कारनालदधिनीमनाऽऽदिषु वायुकुथ्याकुलयोनिमूर्छना भवन्तीति । " " दध्यहर्द्वितद्वातीतम् । " इति हैमयोगेऽपि वक्ष्यः । ध० २ अधि० । आचा० । वक्षे च, आ-कि-क्विप् । धारणकर्तरि, त्रि० । वाच० । " पदयोः सन्धिनौ " ॥ ४।११४ ॥ इति सन्धिविकल्पः । " दहि ईसरो । दहीसरो ।" आ० १ पाद । "दहिदूरवसंवड्ढणवासेतिघयमुउलसक्किइविमलदव्वया । " औ० ३ प्रति० ४ उ० । विविकृतिकदुग्धजं दधि विविकृतिकं, विकृतिर्वैति प्रज्ञे, उत्तरम्-एवंविधदुग्धजं दध्यपि निर्विकृतिकं स्यात्, परं प्रसङ्गपरम्पराश्रयेणेदमाह्नमिति वृद्धसम्प्रदायः । १०६ प्र० । सेन० २ उल्ला० । षोडशप्रहरानन्तरं दध्यभक्ष्यं स्यात्, द्वादशप्रहरानन्तरं वेति स्वकीया इत्यापनिति प्रज्ञे, उत्तरम्-" आमगोरससंपृक्तं, द्विदलं पुष्पितौदनम् । दध्यहर्द्वितयातीतं, कवितानं च वर्जयेत् " ॥ १ ॥ इति षोडशकचतुर्थप्रकाशे । एतद्व्याख्यालेशो यथा । इह हि इत्थं स्थितिः-कश्चिद्भावो हेतुगम्येषु त्वागममात्रं प्रतिपद्यते आज्ञारुचिरादिकः स्वादिष्वामगोरससंपृक्तद्विदलाऽऽदौ च हेतुगम्यो जीवसङ्गतः किं त्वागमगम्यश्च । तथाहि-"आमगोरससंपृक्ते द्विदले," आदिशब्दात् पुष्पितौदने, अहर्द्वितयातीते च दधि, कवितानके च ये जन्तवस्ते केवलज्ञानिभिर्दृष्टा इत्यागमगोरससंपृक्तद्विदलाऽऽदिभोजनं वर्जयेदिति, तद्भोजनाद् हिंसाणुव्रतातिक्रमलक्षणो दोष इत्यादिति । अहर्द्वितया-

तीतमिति कोऽर्थः?,दिनद्वयातिक्रमेऽभक्ष्यम्। दिवसप्रहरेण रात्रिप्रहरेण समानतामेव,यथा-त्रिंशद्दिनैर्मासः, पञ्चदशभिर्नैः पक्ष इत्यर्थः। एतावता रात्रिद्वयातिक्रमे द्वादशाऽहिप्रहरातिक्रान्ते दध्यभक्ष्यं, यदा प्रथमदिवसे प्रभाते मेलितं तदा षोडशप्रहरानन्तरमेवाभक्ष्यं भवति ; परं षोडशप्रहरान्नियमो नेति संभाव्यत इति। यतः पूर्वदिने संध्यायां मेलितं द्वादशप्रहरानन्तरमप्यभक्ष्यं जायतीति। ए३ प्र०। सेन० १ उल्ला०।

दहिनप्फ–न०। देशी–नवनीते, दे० ना० ५ वर्ग ३५ गाथा।

दहिघण–दधिघन–पुं०। दधिपिण्डे, जं० १ वक्ष०। प्रज्ञा०। जी०। रा०।

दहिट्ठ–पुं०। देशी–कपित्थे, दे० ना० ५ वर्ग ३५ गाथा।

दहित्थार–पुं०। देशी–दधिसरे, दे० ना० ५ वर्ग ३६ गाथा।

दहिमुहपव्वय–दधिमुखपर्वत–पुं०। पर्वतभेदे, स्था०। दधिवत् इवेतं मुखं शिरो रजतमयत्वाद् येषां ते दधिमुखाः। उक्तं च–" संखदलविमलनिम्मल–दहिघणगोखीरहारसंकासा। गगणतलमणुलिहंता, सोहंते दधिमुहा रम्मा " ॥ १ ॥ इति। स्था० ४ ठा० २ उ०। नन्दीश्वरद्वीपेऽञ्जनपर्वतानां प्रत्येकं चतुर्दिक्षु पुष्करिणीनां मध्यभागस्थेषु स्वनामख्यातेषु पर्वतेषु, स०।

सव्वे वि णं दधिमुहा पव्वया पल्लासंठाणसंठिया सव्वत्थ समा विक्खंभुस्सेहेणं चउसट्ठिं चउसट्ठिं जोयणसहस्साइं पण्णत्ता।

(सव्वे वि णमित्यादि) इतोऽष्टमे नन्दीश्वराऽऽख्ये द्वीपे पूर्वाऽऽदिषु दिक्षु चत्वारोऽञ्जनकपर्वता भवन्ति, तेषां च प्रत्येकं चतसृषु दिक्षु चतस्रः पुष्करिण्यो भवन्ति , तासां च मध्यभागेषु प्रत्येकं दधिमुखपर्वता भवन्ति,ते च षोडश पल्यङ्कसंस्थानसंस्थिताः समानाः सर्वत्र समा विष्कम्भेण मूलाऽऽदिषु दशसहस्रविष्कम्भत्वात्तेषाम्। क्वचित्तु–"विक्खंभुस्सेहेणं" इति पाठः,तत्र तृतीयैकवचनलोपदर्शनाद्विष्कम्भेणेति व्याख्येयम। तथा-उत्सेधेनोच्चत्वेन चतुष्षष्टिरिति। स० ६४ सम०। (अस्य वर्णकस्तु ' अंजणग ' शब्दे प्रथमभागे ४० पृष्ठे उक्तः)

दहिवण्ण–दधिपर्ण–पुं०। वृक्षभेदे, स्था० १० ठा०। प्रज्ञा०। स०। औ०। ति०। रा०।

दहिवासुया–दधिवासुका–स्त्री०। वनस्पतिविशेषे, जी०। " दहिवासुयामंडवगे। " दधिवासुका नाम वनस्पतिविशेषः, तन्मया मण्डपका दधिवासुकामण्डपकाः। जी० ३ प्रति० ४ उ०। जं०। रा०।

दहिवाहण–दधिवाहन–पुं०। चेटकमहाराजदुहितुः पद्मावत्याः पत्यौ चम्पाराजे, आ० क०। आ० चू०। स च स्वभार्यया पद्मावत्या सह दोहदपूरणार्थमुद्यानभूमिकां गतः, तत्र मत्तेन हस्तिना जलमध्यमानीतो मुक्तः प्रत्यागतः, पद्मावती तु वने हृता प्रव्रजिता च पुत्रमेकं जनयित्वा मातङ्गेषु अक्षिपत्, सच कर्कण्डुनामा क्रमेण राजा भूत्वा एकस्मै ब्राह्मणाय ग्रामदानार्थं दधिवाहनं प्रबोध्य मुमुक्षुः स्वतात्रा पद्मावत्या निवारितः,क्रमेण प्राव्राजीत्, दधिवाहनोऽपि प्रव्रजितः। आ० क०। आ० चू०। आव०। ती०। उत्त०। (इयं कथा ' करकंडु ' शब्दे तृतीयभागे ३५७ पृष्ठे उक्ता)

दहिव्वय–दधिव्रत–पुं०। न दध्यत्ति दधिव्रतः। दधिप्रत्याख्यानवति, आव० ४ अ०। " पयोव्रतो न दध्यत्ति, न पयोऽत्ति दधिव्रतः। " रत्ना०।

दा–दा–धा०। जुहो०-उभ०-सक०-सेट्। दाने, पाच०। " स्वराणां स्वराः ॥ ८। ४। २३८ ॥ " इति दाधातोराकारस्यैकारः। " देइ। दाई। " प्रा० ४ पाद।

दाअ–पुं०। देशी–प्रतिच्छवि, दे० ना० ५ वर्ग ३८ गाथा।

दाइ–दाइ–अव्य०। अभिप्रायाभिदर्शने, नि० चू० २ उ०।

दाइज्जमाण–दर्श्यमाण–पुं०। चक्षुषा प्रत्यक्षं कारयिष्यमाणे वस्तुनि, कल्प० ५ क्षण।

दाइय–दायाद–पुं०। पुत्राऽऽदिषु, भ० ९ श० ३३ उ०।

दायिक–पुं०। गोत्रिके, कल्प० ५ क्षण। " दायिकसुतमाणिक्यः, प्रेरितवानस्मदादिजनान्।" भ०४१ श० १९ उ०।

दाइया–दारिका–स्त्री०। बालिकायाम, आ० म० १ अ० २ खण्ड। "एवं परिवाडीए सुंदरी दाइया।" आ० म० १ अ० १ खण्ड।

दाउं–दातुं–अव्य०। स्वकदानं कर्तुमित्यर्थे, उपा० १ अ०। " दाउं वा अणुप्पदाणत्थं रायाभिओगेणं।" प्रति०।

दाकलस–उदककलश–पुं०। लघुतरे घटे, भ० १५ श०।

दाकुंभ–उदककुम्भ–पुं०। महद्घटे, भ० १५ श०।

दाघ–दाह–पुं०। ' दाह ' शब्दार्थे, प्रा० १ पाद।

दाडिम–दाडिम–न०। " मो लः ॥ ८।१। २०२ ॥" स्वरात् परस्यासंयुक्तस्यानादेर्मस्य प्रायो लुग् भवति। ' दाडिम। दाडिम।' वाच०। जी०। औ०। आचा०। ज्ञा० ओघ०। रा०।

दाडिमपुप्फप्पगासपीवराधरा–दाडिमपुष्पप्रकाशपीवराधरा–स्त्री०। दाडिमपुष्पप्रकाशः पीवरः प्रवरः सुभगोऽधरो यासां ता दाडिमपुष्पप्रकाशपीवराधराः। सुन्दराधरोष्ठासु योषित्सु, जी० ३ प्रति० ४ उ०।

दाढा–दंष्ट्रा–स्त्री० " दंष्ट्राया दाढा " ॥ ८। २। १३० ॥ दंष्ट्राशब्दस्य 'दाढा' इत्यादेशो भवति। प्रा० २ पाद। दशनविशेषे, प्रश्न० १ आश्र० द्वार। आव०। "वराहं दाढाए" अनु०। दंष्ट्रार्थं वराहाऽऽदयो व्यापाद्यन्ते। आचा० १ श्रु० १ अ० ६ उ०।

दाढिकालि–दंष्ट्रिकाऽऽवलि–स्त्री०। यमलतन्तुद्वयव्यूतायां पट्याम्, जीत०। यथा मुखमध्ये यमलितोभयदन्तपङ्क्तिरूपा दाढिकाऽऽवलिर्दंष्ट्रिकावलिर्निरीक्ष्यते,एवं धौतपोतिकाऽपि द्विजसत्कसदृशवस्त्रपरिधानरूपा दृश्यमाना दाढिकावलिरिव प्रतिभातीति कृत्वा दाढिकावलिरुच्यते। बृ० ३ उ०।

दाढिगालि–दंष्ट्रिकाऽऽवलि–स्त्री०। 'दाढिकालि' शब्दार्थे, जीत०।

दाढिया–दंष्ट्रिका–स्त्री०। उत्तरोष्ठकेशगुच्छे दशनविशेषे, ओष्ठस्याधोभागे च। ज्ञा० १ श्रु० २ अ०। जं०। विशिष्टदंष्ट्राशालिनि, त्रि०। अनु०।

दाढियालि–दंष्ट्रिकाऽऽवलि–स्त्री०। 'दाढिकालि' शब्दार्थे, जीत०।

दादुद्धिय–दंष्ट्रोद्धृत–त्रि० । उत्खातदंष्ट्रे, दश० १ चू० ।

दाण–दान–न० । दा–भावे ल्युट् । वितरणे, प्रव० ६ द्वार । पञ्चा० । प्रश्न० । लब्धस्याऽऽत्माऽऽदेर्म्लानाऽऽदिभ्यो वितरणे, त्रश्न० ३ संव० द्वार । अशनाऽऽदिप्रदाने, आव० ४ अ० । स्वपरानुग्रहार्थमर्थिने दीयत इति दानम् । सूत्र० १ श्रु० ११ अ० । उत्त० । कल्प० । कर्म० । याचकाभीप्सितार्थे धने. कल्प० ५ क्षण । उत्त० । "दानेन महाभोगो, देहिनां सुरगतिश्च शीलेन । भावनया च विमुक्तिस्तपसा सर्वाणि सिद्ध्यन्ति " ॥ १ ॥ सूत्र० १ श्रु० १२ अ० ।

" दाणं च तत्थ तिविहं, नाणपयाणं च अभयदाणं च ।
धम्मोवग्गहदाणं, च नाणदाणं इमं तत्थ ॥ १२ ॥ "
" सरिसे वि मणुयजम्मे, पयं सयलं पि कैह कयपुन्ना ।
जं जाणंति जप तं, सुनाणदाणप्पभावेण ॥ ६४ ॥
दितो य नाणदाणं, भुवणे जिणसासणं समुद्धरइ ।
सिरिपुंडरीयगणहर, इव पावइ परमपयमउलं ॥ ६५ ॥
ता दायव्वं नाणं, अणुसरियव्वा सुनाणिणो मुणिणो ।
नाणस्स सया भत्ती, कायव्वा कुसलकामेहिं ॥ ६६ ॥
बीयं तु अभयदाणं, तं इह अभएण सयलजीवाणं ।
अभउ त्ति धम्ममूलं, दयाइधम्मो पसिद्धमिणं ॥ ६७ ॥
इक्कं चिय अभयपया–णमित्थ दारुण सव्वसत्ताणं ।
वज्जाहह व्व कमसो, सिज्झंति पहीणजरमरणा ॥ ६८ ॥
नाऊण इमं नयनी–इयाण जीवाण सरणरहियाणं ।
साहीणं दायव्वं, भविएहिं अभयदाणमिणं ॥ ६९ ॥
धम्मोवग्गहदाणं, तइयं पुण असणवसणमाईणि ।
आरंभनियत्ताणं, साहूणं हुंति देयाणि ॥ १०० ॥
तित्थयरचक्कवट्टी, बलदेवा वासुदेवमंडलिया ।
जायंति जगब्भहिया, सुपत्तदाणप्पभावेण ॥ १०१ ॥
जह भयवं रिसहजिणो, घयदाणबलेण सयलजयनाहो ।
जाओ जह नरहवई, नरहो मुणिभत्तदाणेण ॥ १०२ ॥

अपि च–

दंसणमित्तेण वि मुणि–वराण नासेइ दिणकयं पावं ।
जो देइ ताण दाणं, तेण जए किं न सुविहत्तं ? ॥ १०३ ॥
तं सुपवित्तं भवणं, मुणिणो विहरंति जत्थ समभावा ।
न कया वि साहुरहिओ, जिणधम्मो पायडो होइ ॥ १०४ ॥
ता तेसिं दायव्वं, सुद्धं दाणं गिहीहिं नत्तीए ।
अणुकंपोचियदाणं, दायव्वं नियसत्तीए ॥ १०५ ॥

किं च–

न तवो सुठु गिहीणं, विसयाऽऽसत्ताण होइ न हु सीलं ।
सारंभाण न भावो, ता साहीणं सया दाणं ॥ १०६ ॥
इय तिविहं पि हु दाणं, नरवर ! संखेवओ तुहऽक्खायं ।
वियरियसिवसुहबीलं, सेवइ सीहे निसामेसु ॥ १०७ ॥
ध० र० (७०) ।

दाणफलं लवित्तूणं, लावावे तु गिहिअन्नतित्थीहिं ।
जो पादं उप्पाए, लवंगविट्ठं तु तं होति ॥ २०८ ॥

दाणफलं अप्पणा कहेति, गिहिअन्नतित्थएहिं वा कहावेत्ता जो पादं उप्पादेति, एयं लवंगविट्ठं भण्णति ।

तस्सिमे विहाणा–

ओइय ओउत्तरियं, दाणफलं तु दुविधं समासेण ।
अणेगविधं पुण, ओउत्तरियं इमं तत्थ ॥ २०९ ॥

समासतो दुविहं दाणफलं–ओइयं, ओउत्तरियं च । ओइयं अणेगविहं–गोदानं, भूमिदानं, हिरण्णदानं, भक्तपदानाऽऽदि । ओउत्तरियं इमं ।

गाहा–

अन्ने पाणे लेस–ज्जपत्तवत्थे य सेज्जसंथारे ।
भेज्जविहि पाणऽरोगे, नायणजुसाविविहसयणा ॥२१०॥

पाणाऽऽदियाण सत्तण्हं पच्छद्धेणं जहासंखफला । अन्नदाणे भोज्जविही भवति, पानकदाने ऊत्तापानकविधी, लेसज्जदाणेण आरोग्गो, पत्तदाणेण भायणविधी, वत्थदाणेण विभूसणविधी, सेज्जादाणेण विविहा, संथारगदाणेण अणेगभोगंगादिसेज्जाविहाणा भवंति ।

संखेवओ वा फलं इमं–

अहवाऽवि समासेणं, साधूणं पीतिकारओ पुरिसो ।
इह य परत्थ य पावति, पीतीओ पीवरतराओ ॥२११॥

अहवासद्दो विगप्पवायगो । समासो संखेवो, साधूणं भत्तपाणेहिं पीतीतो उप्पाणंतो इहलोए परलोए य पीवराओ पीतीओ पावति, पीवरं प्रधानं, तरशब्दः आधिक्यनरकर्मवाचकः, सर्वजनाधिक्यतरा प्रीत्यः, प्राप्नोतीत्यर्थः । शेषं पूर्ववत्, णवरं–

एसेव गमो णियमा, दुविधा उवहिम्मि होति णायव्वो ।
पुव्वे अवरे य पदे, सेज्जाऽऽहारे वि य तहेव ॥२१२॥

दुविहे उवकरणे–ओहिए, उवग्गहिए य । तस्सग्गाहवणाहिं एसेव गमो, सेज्जआहारेसु वि एसेव विही णाणियव्वो । नि० चू० २ उ० ।

दशविधं दानम्–

दसविहे दाणे पण्णत्ते । तं जहा–
"अणुकंपा संगहे चेवा–ऽभया कालुणिए ति य ।
लज्जाए गारवेणं च, अधम्मे पुण सत्तमे ॥ १ ॥
धम्मे य अट्ठमे वुत्ते, काहिई य कयंति य ।" स्था० १० ठा० ।

(अनुकम्पादानव्याख्या 'अणुकंपादाण' शब्दे प्रथमभागे ३६० पृष्ठे दृष्टव्या) (संग्रहदानविस्तरः 'संगहदाण' शब्दे वक्ष्यते) (अभयदानव्याख्या 'अभयदाण' शब्दे प्र० भागे ७०६ पृष्ठे प्रतिपादिता) (कारुणिकदानव्याख्या 'कालुणिय' शब्दे तृतीयभागे ५०२ पृष्ठे दृष्टव्या) (लज्जादानविस्तरः 'लज्जादाण' शब्दे वक्ष्यते) (गौरवदानव्याख्या 'गारवदाण' शब्दे तृतीयभागे ८७१ पृष्ठे दृष्टव्या) (अधर्मदानव्याख्या 'अधम्मदाण' शब्दे प्रथमभागे ५६० पृष्ठे गता) (धर्मदानव्याख्यानम् 'धम्मदाण' शब्दे वक्ष्यते) (करिष्यतिदानविस्तरस्तु 'काहिइदाण' शब्दे तृतीयभागे ५०६ पृष्ठे दृष्टव्यः) (कृतदानविषयः 'कयदाण' शब्दे तृतीयभागे ३५४ पृष्ठे समुक्तः) १० ॥ शिष्येभ्यो विसर्जने, विशे० । (लोके दानप्रकारश्च प्रथममृषभस्वामिना प्रवर्तित इति 'उसह' शब्दे द्वितीयभागे ११२७ पृष्ठे उक्तः) दाने लौकिका आहुः–" वारिदस्तृप्तिमाप्नोति, सुखमक्षयमन्नदः । तिलप्रदः प्रजामिष्टां–मायुष्कमभयप्रदः "॥९॥ अत्र चैकमेव सुभाषितमभयप्रदानमिति, तुषमध्ये कणिकावत् ।

आचा० १ श्रु० १ अ० १ उ०। " दाणाण सेट्ठं अभयप्पयाणं।" (२३) सूत्र० १ श्रु० ६ अ०। " मध्याह्नेऽर्चा तु सत्पात्र-दानपूर्वं तु भोजनम्।" (६४) सत्पात्रं साध्वादि, तस्मिन् दानपूर्वं दानं दत्त्वेत्यर्थः, भोजनमश्नन्यवहरणं, 'तुः' एवकारार्थः। ततः सत्पात्रदानपूर्वमेव भोजनमिति निष्कर्षः। (६५) श्रा० २ अधि०। (साधुभ्यो दानप्रकारः ' अइहिसंविभाग ' शब्दे प्रथमभागे ३३ पृष्ठे उक्तम्)

इह तत्रानुक्तं तत्स्वरूपम्-

आहारवस्त्रपात्राऽऽदेः, प्रदानमतिथेर्मुदा।
तदीरितं तदतिथि-संविभागव्रतं जिनैः ॥४०॥

अतिथेः साधोः, मुदा हर्षेण, गुरुत्वभक्त्यतिशयेन, न त्वनुकम्पाऽऽदिनेत्यर्थः। प्रदानम्-प्रकर्षेण मनोवाक्कायशुद्ध्या दानं विश्राणनम्। कस्य ?, आहारवस्त्रपात्राऽऽदेः, तत्राऽऽहारोऽशनाऽऽदिः चतुर्विधः, वस्त्रं प्रतीतम्, कम्बलो वा, पात्रं पतद्ग्रहाऽऽदि, आदिशब्दाद् वसतिपीठफलकशय्यासंस्तारकाऽऽदिग्रहणम्, अनेन हिरण्याऽऽदिदाननिषेधः, तेषां यतेरनधिकारित्वात्। तदतिथिसंविभागव्रतम्। जिनैः-अर्हद्भिः, तदीरितं प्रतिपादितम्। तत्र अतिथेः उक्तलक्षणस्य, सद्व्रतः-आधाकर्माऽऽदिद्विचत्वारिंशद्दोषरहितो, विशिष्टो भागो विभागः पञ्चात्कर्माऽऽदिदोषपरिहारायाशनदानरूपोऽतिथेर्विभागः, तद्रूपं व्रतम्। अतिथिसंविभागव्रतमाहाराऽऽदीनां च न्यायार्जितानां प्रासुकैषणीयानां कल्पनीयानां च देशकालश्रद्धासत्कारक्रमपूर्वकमात्मानुग्रहबुद्ध्या यतिभ्यो दानमित्यर्थः। तत्र शालयादिनिष्पत्तिभागो देशः १, सुभिक्षदुर्भिक्षाऽऽदिः कालः २, विशुद्धश्चित्तपरिणामः श्रद्धा ३, अभ्युत्थानाऽऽसनदानवन्दनानुव्रजनाऽऽदिः सत्कारः ४, यथासन्नं पाकस्य पेयाऽऽदिपरिपाट्या प्रदानं क्रमः ५, तत्पूर्वकं देशकालाऽऽद्यौचित्येनेत्यर्थः। यदुक्तम्-" न्यायागयाणं कप्पणिज्जाणं अन्नपाणाईणं दव्वाणं देसकालसद्धासक्कारकमजुत्तं पराए नत्तीए आयाणुग्गहबुद्धीए संजयाणं दाणं अतिहिसंविभागो।"

अनूदितं चैतत् श्रीहेमसूरिभिः-

" प्रायः शुद्धैस्त्रिविधविधिना प्रासुकैरेषणीयैः,
कल्पप्रायैः स्वयमुपहितैर्वस्तुभिः पानकाऽऽद्यैः।
काले प्राप्तान् सदनमसमश्रद्धया साधुवर्गान्,
धन्याः केचित्परमविहिता हन्त! संमानयन्ति ॥ १ ॥
अशनमखिलं खाद्यं स्वाद्यं भवेदथ पानकं,
यतिजनहितं वस्त्रं पात्रं सकम्बलप्रोञ्छनम्।
वसतिफलकप्रख्यं मुख्यं चरित्रविवर्धनं,
निजकमनसः प्रीत्याधायि प्रदेयमुपासकैः ॥ २ ॥ "

तथा-

" साहूण कप्पणिज्जं, जं न वि दिन्नं कहिंचि किंचि तहिं।
धीरा जहुत्तकारी, सुसावगा तं न भुंजंति ॥ ३ ॥
वसहीसयणाऽऽसणभत्तपाणभेसज्जवत्थपायाई।
जइ वि न पज्जत्तधणो, थोवा वि हु थोवयं दिज्जा ॥ ४ ॥ "

वाचकमुख्यस्त्वाह-

" किञ्चित् गुरु कल्पमकल्प्यं, स्यादकल्पमपि कल्प्यम्।
पिण्डः शय्या वस्त्रं, पात्रं वा भेषजाऽऽद्यं वा ॥ १ ॥
देशं कालं पुरुषम्-वस्थामुपयोगशुद्धिपरिणामान्।
प्रसमीक्ष्य भवति कल्प्यं, नैकान्तात् कल्पते कल्प्यम् ॥ २ ॥"

ननु यथा शास्त्रे आहारदातारः श्रूयन्ते, न तथा वस्त्राऽऽदिदातारः, न च वस्त्राऽऽदिदानस्य फलं श्रूयते, तन्न वस्त्राऽऽदिदानं युक्तम्। नैवम्। भगवत्यादौ वस्त्राऽऽदिदानस्य साक्षादुक्तत्वात्। यथा-" समणे निग्गंथे फासुयएसणिज्जेणं असणपाणखाइमसाइमेणं वत्थपडिग्गहकंबलपायपुंछणेणं पीढफलगसिज्जासंथारएणं पडिलाभेमाणे विहरति।" इत्याहारवत्संयमाऽऽधारशरीरोपकारकत्वाद्वस्त्राऽऽद्योऽपि साधुभ्यो देयाः। श्रा०२ अधि०। पञ्चा०। (पोषधं पारयता श्रावकेण नियमात्साधुभ्यो दत्त्वा भोक्तव्यमिति, तद्विधिश्च ' पोसहपारणगविहि ' शब्दे वक्ष्यते)

काले देशे कल्प्यं, श्रद्धायुक्तेन शुद्धमनसा च।
सत्कृत्य च दातव्यं, दानं प्रयताऽऽत्मना सद्भ्यः ॥ १ ॥ "

तथा-

" दानं सत्पुरुषेषु, स्वल्पमपि गुणाधिकेषु विनयेन।
वटकणिकेव महान्तं, न्यग्रोधं सत्फलं कुरुते ॥ २ ॥
इत्यादि।

"दुःखसमुद्रं प्राज्ञा-स्तरन्ति पात्रार्पितेन दानेन।
लघुतेव मकरनिलयं, वणिजः सद्यानपात्रेण ॥ १ ॥ " आचा० १ श्रु० ८ अ० २ उ०।

यदाह-

" पठति पाठयते पठतामसौ,वसतभोजनपुस्तकवस्तुभिः।
प्रतिदिनं कुरुते य उपग्रहं, स इह सर्वविदेव भवेश्वरः ॥१॥ "

लिखितानां च पुस्तकानां संविग्नगीतार्थेभ्यो बहुमानपूर्वकं व्याख्यापनं, व्याख्यापनार्थं दानं, व्याख्यायमानानां च प्रतिदिनं पूजापूर्वकं श्रवणं चेति। साधूनां च जिनवचनानुसारेण सम्यक्त्वचारित्रमनुपालयतां दुर्लभं मनुष्यजन्म सफलीकुर्वतां स्वयं तीर्णानां परं तारयितुमुद्यतानामा तीर्थकरगणधरेभ्यः, आ च तद्दिनदीक्षितेभ्यः सामायिकसेवतेभ्यो यथोचितप्रतिपत्त्या स्वधनवपनं, यथा उपयुज्यमानस्य चतुर्विधाऽऽहारनेपजवस्त्राऽऽश्रयाऽऽदेर्दानम्, न हि तदस्ति यद्द्रव्यक्षेत्रकालभावापेक्षयाऽनुपकारकं नाम, तत्सर्वस्वस्याऽपि दानं, साधुधर्मोद्यतस्य स्वपुत्रपुत्रादेरपि समर्पणं च। श्रा० २ अधि०। ज०। स्था०। दश०। (श्रमणेभ्योऽप्रासुकदानेनाल्पाऽऽयुः, प्रासुकदानेन दीर्घायुरिति 'आउ' शब्दे द्वितीयभागे ११ पृष्ठे प्रतिपादितम्) "दानात्कीर्तिः सुधाशुभ्रा, दानात्सौभाग्यमुत्तमम्। दानात्कामार्थमोक्षाः स्युर्दानधर्मो वरस्ततः ॥ १ ॥ " पञ्चा० २ विव०।

" दानेन सत्त्वानि वशीभवन्ति,
दानेन वैराण्यपि यान्ति नाशम्।
परोऽपि बन्धुत्वमुपैति दाना-
त्तस्माद्धि दानं सततं प्रदेयम् ॥ १ ॥ " श्रा० २०।

न्यायाऽऽत्तं स्वल्पमपि हि, भृत्यानुपरोधतो महादानम्।
दीनतपस्व्यादौ गु-र्वनुज्ञया दानमन्यत्तु ॥ १३ ॥

न्यायाऽऽत्तं ब्राह्मणक्षत्रियविट्शूद्राणां स्वजातिविहितन्यायोपात्तम्, स्वल्पमपि हि स्तोकमपि हि, भृत्यानुपरोधतो भृत्यानुपरोधेन पोष्यवर्गाविघातेन, महादानं विशिष्टदानम्, दीनतपस्व्यादौ विषये, गुर्वनुज्ञया पित्रादिकुलपुरुषानुज्ञया, यदेवंविशेषणं तन्महादानम। दानमन्यत्तु न्यायाऽनुपात्तभृत्याद्युप-

रोधाऽऽदिना विपर्ययेण दीयमानमन्यत् पुनर्दानमेव भवति ॥ १३ ॥ षो० ५ विव० ।

नाऽऽतुरापथ्यतुल्यं य-दानं तदपि चेष्यते ।
पात्रे दीनाऽऽदिवर्गे च, पोष्यवर्गाऽविरोधतः ॥ ११ ॥

यत् आतुरापथ्यतुल्यं ज्वराऽऽदिरोगविधुरस्य घृताऽऽदिदानसदृशं मुशलाऽऽदिदानं दायकग्राहकयोरपकारि न भवति, तद्दानमपि चेष्यते । पात्रे दीनाऽऽदिवर्गे च, पोष्यवर्गस्य मातापित्राऽऽदिपोषणीयलोकस्याऽविरोधतो वृत्तेरनुच्छेदात् ॥ ११ ॥

क्लिङ्किकृपणाऽऽद्याः पात्रम्-

क्लिङ्किनः पात्रमपचाः, विशिष्य स्वक्रियाकृताः ।
दीनान्यकृपणाऽऽदीनां, वर्गः कार्यान्तराक्षमः ॥ १२ ॥

(क्लिङ्किन इति) क्लिङ्किनो व्रतसूचकतथाविधवेषधारिणः सामान्यतः पात्रमादिधार्मिकस्य । विशिष्य विशेषतोऽपचाः स्वयमपाचकाः, उपलक्षणात्परैरपाचयितारः, पच्यमाननानुमन्तारश्च । स्वक्रियाकृतः स्वशास्त्रोक्तानुष्ठानाप्रमत्ताः । तदुक्तम्-" व्रतस्था क्लिङ्किनः पात्र--मपचास्तु विशेषतः । स्वसिद्धान्ताविरोधेन, वर्त्तन्ते ये सदैव हि ॥१॥ " दीनान्यकृपणाऽऽदीनां वर्गः समुदायः, कार्यान्तराक्षमो भिक्षाऽतिरिक्तनिर्वाहहेतुव्यापारासमर्थः । यत उक्तम्-" दीनान्धकृपणा ये तु, व्याधिग्रस्ता विशेषतः । निःस्वाः क्रियाऽन्तराशक्ताः,एतद्वर्गो हि मीलकः ॥ १ ॥ " इति । दीनाः क्षीणसकलपुरुषार्थशक्तयः, अन्धा नयनरहिताः, कृपणाः स्वभावत एव सतां कृपास्थानम्, व्याधिग्रस्ताः कुष्ठाऽऽद्यभिभूताः, निस्वा निर्धनाः ॥ १२ ॥ द्वा० १२ द्वा० । यो० वि० ।

अथ दाने कृतपुण्यकथा-

" शालिग्राम इति ग्राम-स्तत्रैका स्थविराऽभवत् ।
तत्पुत्रो वत्सपालोऽभूत्, सोऽन्यदा पायसोत्सवे ॥ १ ॥
दृष्ट्वा पायसमश्नन्ति, डिम्भरूपाणि सोऽपि च ।
ऊचे मातर्ममाप्यर्थे-मद्य राध्नुहि पायसम् ॥ २ ॥
नास्ति वस्त्वित्यरोदीत्सा-ऽपृच्छन्तुपगृहं स्त्रियः ।
निर्बन्धेऽकथयत्ताश्च, कृपया सर्वमापयन् ॥ ३ ॥
तयाऽथ पायसं रद्धा, सुतस्य परिवेषितम् ।
स्थविरोऽन्तर्गता साधुरागतो मासपारणे ॥ ४ ॥
तदर्धांशं स ददौ साधो र्दध्यौ स्तोकमिदं ततः ।
द्वितीयकं ददौ ऽर्धांशं, पुनश्चिन्तयति स्म सः ॥ ५ ॥
क्षेप्स्यत्यत्रापरः किञ्चि-दित्तदेतद्विनङ्क्षयति ।
तृतीयमप्यदात्यंशं, स्वर्गस्तेनाजितस्तदा ॥ ६ ॥
ज्ञात्वाऽम्बा जेमितं भूयः, क्षैरेय्याऽभृत भाजनम् ।
आकण्ठं बुभुजे ! सोऽथ, विसूच्या मृतवान्निशि ॥ ७ ॥
गतः स्वर्गे ततश्च्युत्वाऽ-त्रैव राजगृहे पुरे ।
श्रेणिको यत्र राजेन्दुर-भयो मन्त्रिपुङ्गवः ॥ ८ ॥
महाजनस्य मुख्योऽभूत्, तत्र श्रेष्ठी धनावहः ।
यदूऽव्यसंख्या नाज्ञायि, बिन्दुसंख्येव वारिधेः ॥ ९ ॥
नन्दानन्दोल्लसद्वृद्धा, भद्रा तस्यानवद्यिका ।
स तदीयोदरे जीवः, सुतत्वेनावतीर्णवान् ॥ १० ॥
कृतपुण्योऽयमात्मेति, तत्रोचे गर्भगे जनः ।
कृतपुण्याभिधश्चक्रे, जन्मतो द्वादशाह्नि सः ॥ ११ ॥
वर्द्धमानः पात्रयोग्यो, ग्राहितः सकलाः कलाः ।
विवाहितस्ततो मात्रा, क्षिप्तो कुलैर्ललितेषु सः ॥ १२ ॥
तैः प्रावेशि स वेश्यौक-स्तत्राऽस्थाद् द्वादशाब्दिकाम् ।
पिता मृतोऽपि नाज्ञायि, मात्रा मा भूत्सुतोऽसुखी ॥ १३ ॥
वित्तमानायितं नित्यं, प्रैषयत्पुत्रवत्सला ।
मृत्यौ तस्याः स्नुषाऽप्येवं, स्वप्रियप्रीतये व्यधात् ॥ १४ ॥
नष्टितेऽथ धने कृत्स्ने, वेटीहस्ते तदङ्गना ।
निजमाभरणं प्रैषी-द्विवेदाऽङ्काऽस्य निःस्वताम् ॥ १५ ॥
सदीनारसहस्रं त-स्तस्याः प्रत्यर्पितं तया ।
अथाऽऽकया सुताऽऽनाणि, निःस्वो निःसार्थतामयम् ॥ १६ ॥
स नैच्छदथ वञ्चित्वा, गृहमार्जनदम्भतः ।
उत्तारितोऽप्यधस्तिष्ठ-न्नूचे दास्या स्थितोऽसि किम? ॥ १७ ॥
अशुद्धपशुरेवासि, निरस्तोऽपि न यासि यत् ।
सोऽथ दध्यौ कृपायोक्तो, धिग्वेश्यावञ्चितोऽस्म्यहम् ॥ १८ ॥
गृहवर्त्माऽविदन् पृष्ठ-न्नूचे तैः कास्ति तद्गृहम ? ।
वेश्याऽऽसक्तस्तत्सुतोऽभू-त्ततः सर्वं क्षयं गतम् ॥ १९ ॥
ततः कथञ्चिद् ज्ञात्वाऽगा-दुज्जीर्णे शीर्णे निजे गृहे ।
भार्या च सहसोत्थाय, कुक्षीना विनयं व्यधात् ॥ २० ॥
लज्जितो विनयात्तस्याः, मातापित्रोश्च शोकतः ।
सर्वस्वहरणाच्चाभूद्, दुःखरत्नत्रयाधिपः ॥ २१ ॥
तदेकजीविता साऽपि, गणिकागात्तदन्तिके ।
तं शोकदुःखचिन्ताऽर्त्तं, प्रिया प्राणेशमब्रवीत् ॥ २२ ॥
अक्काटङ्कसहस्रं तं, निजान्याभरणानि च ।
पुरो विमुच्य हे नाथ ! नीवीयं तत्पणाय्यताम् ॥ २३ ॥ (युग्मम्)
मासमेकं स तत्रास्था-त्प्रियाविनयरञ्जितः ।
ततः साऽप्यक्षसत्त्वाऽभूत्, शुक्तिवद् मौक्तिकोदरा ॥ २४ ॥
सार्थेऽथ प्रस्थितेऽचाख्यद्, मुक्त्वा तत्सत्कृते धनम् ।
कृतपुण्यः पुण्यधनो, धनोपार्जनहेतवे ॥ २५ ॥
उपदेवकुलं सार्थ-मध्ये पल्यङ्कगं निशि ।
प्रियं विमुच्य भार्यां ते, वपुषैव गृहं गते ॥ २६ ॥
श्रेष्ठिन्या चैकया तत्र, भिक्षुः पौत्तः सुतो मृतः ।
श्रुत्वेत्यचिन्त्यपुत्रत्वा-न्मा गाऽऽजकुले धनम् ॥ २७ ॥
नाऽऽरोदयच्च चाऽरोदी-त्तां वार्त्तामप्यहारयत् ।
वार्त्ताकृतो धनं दत्त्वा, सोचे माऽऽस्य इदं क्वचित् ॥ २८ ॥
चतस्रोऽपि स्नुषाश्चोक्ताः, काश्चिदानीयते पुमान् ।
स्युर्युष्माकं यथा पुत्राः, गृहसर्वेश्वरत्वकाः ॥ २९ ॥
ऊचुस्ताः किमिदं श्वश्रु !, युज्यते सा जगाद ताः ।
अकार्यमपि कार्येण, क्रियते नास्ति दूषणम् ॥ ३० ॥
साऽथागात् सस्नुषा सार्थे, कृतपुण्यं विलोक्य तम् ।
सर्वाः सतल्पमुत्पाट्य, सुप्तं स्वगृहमानयन् ॥ ३१ ॥
बुद्ध्वा जागरिते तस्मि-न्नन्यद्यात्कपटे पटुः ।
कुलदेवतया नीतो, वत्स ! त्वमसि मे सुतः ॥ ३२ ॥
एताश्चतस्रस्ते कान्ताः, कान्त्याऽप्यास्तसुरःकनाः ।
सौधं जितविमानश्रि, भुङ्क्ष्व भोगान् यथासुखम् ॥ ३३ ॥
कृतपुण्योऽखिलं बोध्य, वृद्धोक्तं दध्यिवानिति ।
किमेतत्कुद्धचिन्ताऽऽद्यै-र्भजे भोगानुपस्थितान् ॥ ३४ ॥
तत्र द्वादशभिर्वर्षैः, क्रीडन् स्वे वेश्मनीव सः ।
सर्वासामपि पत्नीनां, पुत्रान् द्वित्रानजीजनत् ॥ ३५ ॥
इतस्तत्परिणीतायाः, गुर्व्याः पत्न्याः सुतोऽभवत् ।
सोऽप्येकादशवर्षोऽस्ति, पठन् परिणतसन्निधौ ॥ ३६ ॥
द्वादशाब्द्यां स पत्न्याऽऽगा-त्सार्थस्तत्रैव वायसत् ।

ऊचे स्नुषाः पुनः स्वश्रू--र्नीत्वाऽसौ तत्र मुच्यताम् ॥३७॥
ऊचिरेऽथ स्नुषा नैतद्, युज्यते श्वश्रु ! साऽवदत् ।
यूयं जाताः सपुत्रिण्यः, कार्यं किमधुनाऽमुना ? ॥३८॥
अकृत्यमपि कार्यार्तिः, कृत्वा पश्चान्न मुच्यते ?।
अनङ्गयं भुक्तमित्यार्त्या, तत्किं भक्ष्यं सदैव तत् ?॥३९॥
दुग्धभ्रान्त्या चन्द्रकान्तां, पाययित्वा स शायितः ।
तत्कान्तानिः शम्बलार्थं, मोदका रत्नगर्भिताः ॥४०॥
तस्याकियन्त स्नेहेन, मुक्ता उच्छीर्षके च ते ।
अथोत्पाट्य यथा नीतो, मुक्तस्तत्र तथैव सः ॥४१॥
प्रबुद्धोऽचिन्तयद्याव-त्ततः कथमिहागमम् ?।
तावत्तत्राऽऽगते पत्न्यौ, तथैव तमपश्यताम् ॥४२॥
ताभ्यामूचेऽथ किं नाथ !, व्योम्नोऽकार्षीर्गतोऽऽगतम् ।
मार्गच्छाया न काऽप्यत्र, दृश्यतेऽङ्गेषु येन वा (?) ॥४३॥
ददौ शून्यान् स हुङ्कारान्, धृष्टोऽहमिति चिन्तयन् ।
अथोत्थाय ययौ गेहं, प्रियाऽऽत्तत्तल्पशम्बलः ॥४४॥
आययौ लेखशालायाः, पितरि ज्ञाति चाऽऽत्मजः ।
तस्यादादुदतो वेश्या, शम्बलान्मोदकं करे ॥४५॥
सोऽश्नन्ययौ बहिस्तात्तं, तत्र रत्नं विलोक्य च ।
आर्पयत्कान्दविकस्य, प्रत्यहं मोदकाऽऽशये ॥४६॥
जलान्तःक्षेपणाद् ज्ञातं, जलकान्तं च तेन तत् ।
भुञ्जाना मोदके मग्ने, दृष्ट्वा रत्नं प्रियाऽवदत् ॥४७॥
रत्नीकृत्य लाघवार्थं- मर्जनां किं प्रियाऽऽनयः ? ।
हुमित्युक्त्वा प्रविष्टोऽन्त-स्तत्प्रियाप्रेम भावयन् ॥४८॥
इतश्च सेचनाऽऽख्येभो, नद्यामग्राहि तन्तुना ।
मन्त्रिणा पट्टहोऽदायि, योऽधुना जलकान्तदः ॥४९॥
तस्य राजा निजां पुत्रीं, राज्यार्द्धं च प्रयच्छति ।
तदाऽपश्यत्कान्दविक-स्तं तु तेनामुचद्गजम् ॥५०॥
पृष्टः कान्दविको राज्ञा, कुतस्तेऽभूदिदं वद ?।
चौर्यादातं स भीत्याऽऽह, ददौ मे कृतपुण्यजः ॥५१॥
राजोचे न चेद् वेद य-त्तत्स्वं व्रज निजे गृहे ।
अकार्षीत् कृतपुण्यस्य, देशं पुत्रीं च दत्तवान् ॥५२॥
स त्रिज्ञानोऽनुनग् भोगा-नन्यदाऽभयमूचिवान् ।
प्रियाचतुष्टयोदन्त-मप्यपूर्वं यथा तथा ॥५३॥
अचीकरत्तनश्चैत्यं, द्विद्वारमभयो बहिः ।
कृतपुण्यसमं तत्र, क्षेप्यपत्तं न्यवेशयत् ॥५४॥
सापत्याभिः समस्तानिः, स्त्रीभिर्यक्षोऽयमर्च्यताम् ।
भावी रोगोऽन्यथाऽज्ञाना-मिति चाऽघोषयत्पुरे ॥५५॥
अभयः कृतपुण्यश्च, निविष्टौ यत्तमण्डपे ।
आयान्तीः पश्यतः पौरो--र्यावत्ताः समुपागताः ॥५६॥
यक्षं पतिमिव प्रेम्णा-ऽभ्यर्चंस्ताः प्रेमसाश्रवः ।
यक्षोत्सङ्गेऽपि नृधिया, तदपत्यान्युपाविशन् ॥५७॥
उपलक्ष्याऽभयो बुद्ध्या, स्थविरां तामतर्जयत् ।
कृतपुण्यस्य ताः पत्नीः, सर्वस्वमपि चार्पयत् ॥५८॥
पत्नीभिः सप्तभिः सार्द्धं, संसारसुखमन्वभूत् ।
कृतपुण्यो यथार्थाऽऽख्यो, मर्त्यलोकेऽप्यमर्त्यवत् ॥५९॥
अन्यदा समवासार्षीत्, श्रीवीरस्तत्र तीर्थकृत् ।
कृतपुण्यो नमस्कृत्य, स्वामिनं पृष्टवान् सुधीः ॥६०॥
संपत्तिश्च विपत्तिश्च, कथमात्मन्मम प्रभो ! ।
स्वाम्यूचे हन्त ! ते जज्ञे, जन्मभिः पात्रसदानतः ॥६१॥
रेखाद्वयविधानाच्च, बभूवान्तरिकाद्वयम् ।
तच्छ्रुत्वा तत्क्षणात्सर्वं, सामायिकमुपाददे ॥६२॥" आ० क०।

" नो कप्पइ अज्जप्पभिइ " इत्यारभ्य " तेसिं असणं वा दाउं अणुप्पदाउं " इति सम्यक्त्वग्रहणसमये प्रत्याख्यायते। अत्राऽऽह-ह्ह पुनः को दोषः स्याद्यदेतेषां तेषामन्ययूथिकानामन्नाऽऽदिदाने प्रतिषेध इति ?। उच्यते-तेषां तद्भक्तानां च मिथ्यात्वस्थिरीकरणं, धर्मबुद्ध्या ददतः सम्यक्त्वलाञ्छना, तथा आरम्भाऽऽदिदोषाश्च । पुनरापन्नानामनुकम्पया दद्यादपि ।

यत उक्तम्--

" सव्वेहिं पि जिणेहिं, दुल्लयजियरागदोसमोहेहिं ।
सत्ताणुकंपणट्ठा, दाणं न कहिं वि पडिसिद्धं " ॥१॥

तथा च भगवन्तस्तीर्थकरा अपि त्रिभुवनैकनाथाः प्रविव्रजिषवः सांवत्सरिकमनुकम्पया प्रयच्छन्ति दानमित्यलं विस्तरेण । आव० ६ अ० । आचा० । उपा० ।

से समणुण्णे असमणुण्णस्स असणं पाणं खाइमं साइमं वा णो पाएज्जा, णो णिमंतेज्जा, णो कुज्जा वेयावडियं परं आढायमाणा त्ति वेमि ।

(से समणुण्णे इत्यादि) न केवलं गृहस्थेभ्यः कुतीर्थिकेभ्यो वाऽकल्प्यमिति कृत्वाऽऽहाराऽऽदिकं न गृह्णीयात्समनोज्ञः, असमनोज्ञाय तत्पूर्वोक्तम् अशनाऽऽदिकं न प्रदद्याद्, नाऽपि परमत्यर्थमाद्रियमाणोऽशनाऽऽदिनिमन्त्रणतोऽन्यथा वा तेषां वैयावृत्यं कुर्यादिति । ब्रवीमीतिशब्दाचधिकारपरिसमाप्त्यर्थौ ।

किंभूतस्तर्हि किंभूताय दद्यादित्याह-

धम्ममायाणह पवेदियं वद्धमाणेण मऽमया, समणुण्णे समणुण्णस्स असणं वा पाणं वा खाइमं वा साइमं वा वत्थं वा पायं वा सेज्जं वा० पाएज्जा, णिमंतेज्जा, कुज्जा वेयावडियं परं आढायमाणे त्ति वेमि ।

(धम्मं इत्यादि) धर्मं दानधर्मं जानीत यूयं प्रवेदितं कथितं, केन श्रीवर्द्धमानस्वामिना ?, किंभूतेन ?, मतिमता केवलिना । किंभूतं धर्ममिति दर्शयति-यथा समनोज्ञः साधुरुक्तविहारी, अपरस्मै समनोज्ञाय चारित्रवते सैद्धिनाय सांभोगिकायैकसामाचारीप्रविष्टायाशनाऽऽदिकं चतुर्विधं,तथा वस्त्राऽऽदिकमपि चतुर्द्धा,प्रदद्यात् प्रयच्छेत् । तथा तदर्थं च निमन्त्रयेत्, पेशलमन्यद्वा वैयावृत्यमङ्गमर्दनाऽऽदिकं कुर्याद्, नैतद्विपर्यस्तेभ्यो गृहस्थेभ्यः कुतीर्थिकेभ्यः पार्श्वस्थाऽऽदिभ्योऽसंविग्नेभ्योऽसमनोज्ञेभ्यो वेत्यैतत् पूर्वोक्तं कुर्यादिति । किं तु समनोज्ञेभ्य एव, परमत्यर्थमाद्रियमाणस्तदर्थसीदने परमुत्पद्यमानः सम्यग् वैयावृत्यं कुर्यात्, तदेवं गृहस्थाऽऽदयः कुशीलास्त्याज्या इति निदर्शितम् । अयं तु विशेषः-गृहस्थेभ्यो यावज्जीवयते तावद् गृह्यते, केवलमकल्पनीयं प्रतिषिध्यते, असमनोज्ञेभ्यस्तु दानग्रहणं प्रति सर्वनिषेधः । आचा० १ श्रु० ८ अ० २ उ० । ('असमनोज्ञिय ' शब्दे प्रथमभागे ४६३ पृष्ठे तेभ्योऽशनाऽऽदिदानप्रतिषेधपराणि सूत्राणि प्रतिपादितानि)

पार्श्वस्थाऽऽदिभ्योऽशनाऽऽदि न देयम-

जे भिक्खू पासत्थस्स असणं वा पाणं वा खाइमं वा साइमं

वा देइ, देयंतं वा साइज्जइ ॥ ७० ॥ जे भिक्खू पासत्थस्स असणं वा पाणं वा खाइमं वा साइमं वा पडिच्छइ, पडिच्छंतं वा साइज्जइ ॥८१॥ जे भिक्खू पासत्थं वत्थं वा पडिग्गहं वा कंबलं वा पायपुंछणं वा देइ, देयंतं वा साइज्जइ ॥८२॥ जे भिक्खू पासत्थं वत्थं वा पडिग्गहं वा कंबलं वा पायपुंछणं वा पडिच्छइ, पडिच्छंतं वा साइज्जइ ॥८३॥

गाहा-

जे भिक्खू पासत्थो-सण्णकुसीलाण नितियवासाणं ।
देज्जा अहव पडिच्छे, सो पावति आणमादीणि ॥२७७॥

पासत्थस्स असणं वा पडिच्छइ इत्यादि, एवं ओसन्ने वि दो सुत्ता, संसत्ते वि दो, णितिए वि दो। एतेसिं जो देति, तेसिं वा हत्थाओ पडिच्छति, तस्स आणाऽऽदी।

अहवा-

पासत्थादी पुरिसा, जत्तियमेत्ता उ आहिया सुत्ते ।
जे णाणुविहियाणं, ण होंति करणेण समणुण्णा ।२७८।

कंठा।

किं कारणं तेहिं समाणं दाणग्गहणं पडिसिज्झति ?। भण्यते-

पासत्थमहाछंदे, कुसीले ओसण्णमेव संसत्ते ।
उग्गमउप्पायणए-सणा य वातालमवराहा ॥ २७९ ॥

जम्हा अकप्पमाणं साधूणं ते पासत्थादी करणेणं ति किरियाए समणुण्णा सदिसा न भवन्ति, तम्हा दाणग्गहणं पडिसिज्झति। अहवा-जम्हा ते करणेणं तुल्ला ण भवंति, तम्हा तेहिं सह समणुण्णया ण भवति, संभोगो ण भवतीत्यर्थः। किं चान्यत् । पासत्थगाहा-ते पासत्थादी उग्गमदोसेसु सोलससु उप्पायणादोसेसु य सोलससु दससु य एसणादोसेसु एतेसु बायालमवराहेसु णिच्चं वट्टति, अतो दाणेण तेसिं ते सातिज्जिता, अणुमोदिता इत्यर्थः। तेसिं हत्थाओ गेण्हंतेण उग्गमदोसा पडिसेविता भवंति।

गाहा-

उग्गमउप्पायणए-सणा य तिविहेण तिकरणविसोही।
पासत्थे अहाछंदे, कुसीले नितिए वि एमेव ॥ २८० ॥

उग्गमाऽऽदियाणं तिण्हं पि तिकरणविसोहि त्ति सयं ण करेंति,अण्णं पि ण कारवेंति,अण्णं च करेंतं ण समणुजाणंति। एक्केक्कं मणवयणकाएहिं तिविहं । एवं तिकरणविसोहिं ण करेंति त्ति वक्कसेसं । एवं ण करेंति पासत्थादी चउरो अहाछंदपंचमा। णितियवासी पुण किरियकलावं जति वि असेसं करोति, तहा वि णितियवासित्तणओ एवं चेव दट्ठव्वो।

एयाणि गाहा (?)-

"एतेहि असुद्धपडिसे-वया य अविसुद्धे चउ गुरुगा।"

एयाइं सेहाए ते पासत्थादी आणासोधिते से मग्गणं करेति त्ति वुत्तं भवति। सो णियचरित्तविसोहेइ। एएसु पुण असुद्धेसु णियमा चरित्तभेदो, अशुद्धिरित्यर्थः। चरित्तेणं असुद्धेणं मोक्खाभावो, तेण पडिकुट्ठं दाणकरणं एतेसु, जो पुण एतेसु तिकरणविसोहिं करेति सो णियमा चरित्तं विसोहेति ।

उग्गमदोसा गाहा (?)-

जम्हा उग्गमाऽऽदिदोसा पासत्थादी ण वज्जंति,तम्हा विसुद्धि त्ति चारित्तविसुद्धी,तं इच्छंतो तेसिं पि पासत्थादी वज्जेज्जा,एस णियमो।

किंच-

सुज्झइ गाहा (?)-

जो पासत्थादियाणं देति तस्स पासत्थादिसु रागो लक्खिज्जइ, जो पुण तेसिं हत्था गेण्हति तस्स तेसु मज्झेसं पीती लक्खिज्जति, तम्हा तेसु जा दाणग्गहणे रागपीती, सा वज्जेयव्वा। कम्हा ?, जम्हा कुसंगातो बहू दोसा, अकुसंसग्गातो य गुणा भवंति। तम्हा ते कुसंसग्गिकते दोसे परिहरेज्जा।

ण वि रागो गाहा (?)-

सुहसीलजणो पासत्थादी, तेसु ण वि रागो, ण वि दोसो। अत्थ चोदकः-एवं अत्थावत्तीओ णज्जति, तेसु संसग्गिं पउच्च णाणुण्णा, णावि पडिसेहो। जति अहापवत्तीए संसग्गी भवति, भवतु णाम, ण दोसो ?। उच्यते-जति वि तेहिं ण रागो ण दोसो वा, तहा वि तेहिं जा संसग्गी सा वज्जणिज्जा। कहं ?। उच्यते-वणे सुको वणसुको, वणचरेण वा गहितो सुको वणसुको, तेण कयं उवमं उदाहरणं, तं दट्ठूण आणिऊण बुधा पंमिता अतिकरो संसग्गी, तं णेच्छंति ।

" माताऽप्येका पिताऽप्येको, मम तस्य च पक्षिणः ।
अहं मुनिभिरानीतः, स च नीतो गवाशनैः ॥ १ ॥
गवाशनानां स गिरः शृणोति,वयं च राजन् ! मुनिपुङ्गवानाम् ।
प्रत्यक्षमेतन्नवतोऽपि दृष्टं, संसर्गजा दोषगुणा भवन्ति ॥२॥ "

अण्णं च पडिसिद्धं तित्थकरेहिं, जहा अकुसीलेण सदा भवियव्वं, पुणो पडिसिज्झति-जो कुसीलो तेण सह संसग्गी ण कायव्वो, एस पडिसेहो । असंविग्गस्स पाहुणस्स तिण्णि वारे देति माइट्ठाणविमुक्को। तस्स आउट्टंतस्स एक्कसिं मासलहुं, दो तिण्णि य वारे वि मासलहुं, ततियवाराओ परं नियमा माइस्स मासगुरुं, विसंभोगे य जीतं अविसुद्धं संपुंजति,तस्स च चउगुरुगा,दूरे सोवारणं काउं त्ति ओतिके अणुदेसं संभोतिया गता, तत्थ अप्पणे गंतुमणा पुच्छेज्जा-ते अम्हं किं संभोतिया ?। तत्थ आयरिओ जति एगंतेण भणति संभोतिया, तो मासलहुं। अह भणति-असंभोइया,तो वि मासलहुं, असंजमादी दोसा। तम्हा आयरिएणं साधारणं कायव्वं, भो सुण-संभोती होइया इदाणिं न णज्जति, तुब्भे णाउं पुंजेज्जह । जम्हा एवमादी दोसगुणा भवंति तम्हा तेसिं ण दोयव्वं, णावि तेसिं हत्थाओ पडिच्छियव्वं ।

इमो अववादो-

असिवे ओमोयरिए, रायदुट्ठे भए व गेलण्णे ।
एएहिं कारणेहिं, देज्ज व गिण्हेज्ज जयणाए ॥२८१॥
अद्धाणम्मि विवित्ता, दिवसेसे सिंधु एव ओमम्मि ।
गेण्हणे कोट्ठकंवल्ल-अहिमाइ पमेण ओमज्जे ॥ २८२ ॥

गाहा कंठा ।

जइऊण गाहा (?)-

जइऊण मासिएहिं ति। जे उ उद्देसियमादी ठाणा तेसु पुव्वं गिण्हति त्ति वुत्तं भवति, जता तेसु ण लब्भति तदा पासत्थादिउद्दिट्ठेसु गिहेसु गिण्हेति,तहा वि असतीए,ताहे पुव्वगतो पासत्थो परिचियघरेसु दावेति, तहा वि असतीए पासत्थसंघाडेण हिंडति, एसा तेसिं समीवातो गहणे जयणा, तेसिं वा असंथरे देज्जा, ण दोसो ।

जे भिक्खू ओसण्णस्स असणं वा पाणं वा खाइमं वा साइमं वा देइ, देयंतं वा साइज्जइ ॥७४॥ जे भिक्खू ओसण्णस्स

असणं वा४ पडिच्छइ, पडिच्छंतं वा साइज्जइ ॥७५॥ जे भिक्खू ओसन्नस्स वत्थं वा पडिग्गहं वा कंबलं वा पायपुंछणं वा देयइ, देयंतं वा साइज्जइ ॥ ७६ ॥ जे भिक्खू ओसन्नस्स वत्थं वा पडिग्गहं वा कंबलं वा पायपुंछणं वा पडिच्छइ, पडिच्छंतं वा साइज्जइ ॥७७॥ जे भिक्खू कुसीलस्स असणं वा ४ देयइ, देयंतं वा साइज्जइ ॥७८॥ जे भिक्खू कुसीलस्स असणं वा ४ पडिच्छइ, पडिच्छंतं वा साइज्जइ ॥७९॥ जे भिक्खू कुसीलस्स वत्थं वा पडिग्गहं वा कंबलं वा पायपुंछणं वा देयइ, देयंतं वा साइज्जइ ॥८०॥ जे भिक्खू कुसीलस्स वत्थं वा पडिग्गहं वा कंबलं वा पायपुंछणं वा पडिच्छइ, पडिच्छंतं वा साइज्जइ ॥८१॥ जे भिक्खू णितियवासस्स असणं वा ४ देयइ, देयंतं वा साइज्जइ ॥८२॥ जे भिक्खू णितियस्स असणं वा ४ पडिच्छइ,पडिच्छंतं वा साइज्जइ॥८३॥जे भिक्खू णितियं वत्थं वा पडिग्गहं वा कंबलं वा पायपुंछणं वा देयइ, देयंतं वा साइज्जइ ॥ ८४ ॥ जे भिक्खू णितियं वत्थं वा पडिग्गहं वा कंबलं वा पायपुंछणं वा पडिच्छइ,पडिच्छंतं वा साइज्जइ ॥८५॥जे भिक्खू संसत्तस्स असणं वा ४ देयइ, देयंतं वा साइज्जइ॥ ८६ ॥ जे भिक्खू संसत्तस्स असणं वा ४ पडिच्छइ, पडिच्छंतं वा साइज्जइ॥ ८७ ॥ जे भिक्खू संसत्तस्स वत्थं वा पडिग्गहं वा कंबलं वा पायपुंछणं वा देयइ, देयंतं वा साइज्जइ ॥८८॥जे भिक्खू संसत्तस्स वत्थं वा पडिग्गहं वा कंबलं वा पायपुंछणं वा पडिच्छइ, पडिच्छंतं वा साइज्जइ ॥ ८९ ॥

जे भिक्खू गाहा। पासत्थादी गाहा। पासत्थगाहा। उग्गमगाहा। एताणि गाहा। उग्गमदोसगाहा। सूएज्जइ गाहा। ण वि रागो गाहा। असिवे गाहा। जत्थ सुलभं वत्थं तम्मि विसए, अन्नतरे वा असिवादिकारणे होज्जा, एवमादिकारणेहिं तं विसयमेव गच्छंतो इह अलभंतो पासत्थादिवत्थं गेण्हेज्जा,देज्ज वा तेसिं। अहवा-अन्नाणं गाहा २८२। अद्धाणे वा विहिंता सुसिया अलभंता पासत्थादि तत्थ गेण्हेज्जा,हिमदेसे वा सीताभिभूता पाणिहारियं गेण्हेज्जा, एमेव सिंधुमादिविसए ओमम्मि उज्जलवत्थो भिक्खं लभति, अप्पणो तम्मि उज्जलवत्थे असंते पासत्थादियाण गेण्हेज्ज, गेलन्ने वा किमिकुक्कुडादिए कंबलरयणं पासत्थादियाण देज्ज, गिण्हेज्ज वा, अहिमादिणा रुक्खे वा लग्गलवत्थेणं ओमज्जणं कायव्वं, अप्पणो असंते पासत्थवत्थं गेण्हेज्ज वा, देज्ज वा तेसिं। नि० चू० १५ उ०।

जे भिक्खू अइरेगपडिग्गहं खुड्डगस्स वा खुड्डियाए वा थेरगस्स वा थेरियाए वा अहत्थच्छिन्नस्स अपायच्छिन्नस्स अकण्णच्छिण्णस्स अनासच्छिण्णस्स अणोट्ठच्छिन्नस्स सत्तस्स देयइ, देयंतं वा साइज्जइ ॥ ९ ॥

हत्था अच्छिन्ना जेसिं ते अहत्थच्छिन्ना भाणियव्वा। एवं सव्वे पदा। सत्तो समर्थः। एतेसिं दिंतस्स चउलहुं।

गाहा-

अव्वालबुड्ढदाणे, इत्थीपुरिसाण जुंगिताणं वा।
सुत्तत्थवीरिएण व, पज्जत्तसकोविताणं वा॥ १३६ ॥

अबाला बालभावं अतिक्कंता,अवुड्ढा वुड्ढभावं अप्पत्ता,सरीरेण जातीए वा अजुंगिता, सुत्तं च अधीयं,जेहिं अत्थो वि सुतो,गीयत्था इत्यर्थः। वीर्यं वा उप्पादणशक्तिः, गीयत्थत्तणतो चेव पज्जत्तो, पादक्खिप्पतो त्ति वुत्तं भवति, सकोविता गमणागमणसचेट्ठा, ते य सवीरियत्तणतो चेव सकोविता, एतेसिं जो इत्थीण वा पुरिसाण वा अतिरेगपडिग्गहं देति, अहवा।

गाहा-

अभिणवपुराणगहितं, पातमछिन्नं तहेव छिन्नं च।
निद्दिट्ठमणिद्दिट्ठं, पाते देंताण आणादी ॥ १३७ ॥

अभिणवं पुराणं वा जं तं अच्छिन्नं छिन्नं वा गणिमादियाण निद्दिट्ठं वा अणिद्दिट्ठं वा जो देइ, तस्स आणादिया दोसा। चउलहुं च से पच्छित्तं, जो सुत्तपमिसिद्धाणं देति।

इमाण य अदेंतस्स दोसा। गाहा-

अच्चाणणिग्गयादी-णऽदेंतो दोसा तु वन्निता पुव्विं।
रोगज्जोत्तेसज्जं, णिरुयस्स कमोसहेहिं तु ॥ १३८ ॥

दिक्खंतस्स उवसंथारो, जो हत्थपादादिविगलो, तस्स जुत्तं दाणं,समत्थस्स किं दिज्जति?,गंतुं सयमेव आणेउं सि,सेसं कंठं।

इमेहिं पुण कारणेहिं समत्थस्स दिज्जति-

असिवे ओमोयरिए, रायदुट्ठे जए व गेलन्ने।
सेहे चरित्तसावय-भए व अच्चाण जयणाए ॥१३९॥

एते असिवादिकारणा दाणभायणभूमीए दोज्जा,अंतरदेसे वा अच्चाणे बालवुड्ढादियाण दाणं प्रति जयणा कायव्वा, जत्थ बहुतरा णिज्जरा, जत्थ वा बहुतरा दाणी दोसह, पुव्वं तस्स दायव्वं, जो वा पादच्छिण्णादिओ कमो भणितो, तेण दायव्वं।

गाहा-

एएहिं कारणेहिं, सक्काण वि देंतिऽसंसत्ती।
जेसिं होज्जितरे वा, तेसिं पुण सज्ज परिहाणी ॥१४०॥

अच्छिण्णहत्थादिया सक्का, तेसिं देज्ज, जेण तेसिं असंसत्ती। असंसत्ती णाम-प्रायणघोच्चेदो, अभाव इत्यर्थः। इतरे हत्थपादछिण्णादिया, तेसिं परिहाणी होज्ज वा, ण वा, तेसिं पुण सक्काणं भायणाभावे सज्जति, बहूते चेव परिहाणी, तम्हा तेसिं दायव्वं।

गाहा-

जे चेव सक्कदाणे, असक्क असतीएँ दोस पावेंति।
असतीए सक्काण वि, ते चेव अदेंति पावेंति ॥१४१॥
जं ते असंथरंता, अणेसणं जं च भायणभूमीए।
पावेंति तहा सावय-तेणादिविराहणा जं च ॥ १४२ ॥

सक्कस्स देंतो जे दोसा भणिता, असक्कस्स य अदेंतो जे दोसा भणिया, ते चेव दोसा सक्काण वि असतीए अदेंतो पावति, तम्हा असिवादिकारणे अवेक्खिउं सक्कस्स वि दायव्वं ॥ १४१ ॥ अह ण देंति तो इमे दोसा—ते अच्छि-

ण्हत्थादिया असंथरंता जं अणेसणं पेल्लिस्संति, जं च णायण-भूमीए अंतरा असिवादि वा पाविस्संति, णायणभूमीगयाण वा सयणेहिं सेहो उ णिक्खमाविज्जति, भायणाण वा गच्छंता सावएण खज्जंति, तेणेहिं वा ओडज्झंति, जं चऽण्णं किं वि सरीर-संजमविराहणं पावेंति, तं सव्वं पायच्छित्तं अदेंते पावति ।

अहवा इमाए जयणाए भायणा दायव्वा । गाहा-

पुव्वं तु असंजोगी, दुगतिगबद्धं तहेव दुमादी ।
तो पच्छा इतराण वि, तेसिं देंतो भवे सुद्धो ॥१४३॥

तेसिं लक्खणं असिवादिकारणेहिं दिज्जंते पुव्वं जं असंतो-ऽथं पादं, तं दिज्जति, दोसु वा तिसु वा ठाणेसु जं बद्धं, तं दिज्जति, दुमं वा ताइहाणि वा अलक्खणजुत्ताणि दिज्जंति, जति ते णत्थि, तो पच्छा इयराण वि संभोइयाणि अभिण्णाणि समचउरंसाणिलक्खणजुत्ताणि य देंतो सुद्धो भवति ।

अतिरेकप्रतिग्रहं ददाति-

जे णिक्खू अइरेगपडिग्गहगं खुम्मगस्स वा खुड्डियाए वा थेरगस्स वा थेरियाए वा हत्थछिण्णस्स पायछिण्णस्स कण्णछिण्णस्स णासछिण्णस्स असक्कं ण देइ, ण देयंतं वा साइज्जइ ॥ ७ ॥

पुव्विल्लसुत्ताओ चेव इमं सुत्तं पभिपक्खभूतं, किं च-पुव्वं एते अद्धाणादिया अत्थतो भणिता, इह पुण सुत्ततो चेव भणति ।

गाहा-

अद्धाण बालवुड्ढा-ऽऽउराण दुविहाण जुंगिताणं च ।
सुत्तत्थवीरियाणं, अपज्जतऽविकोविताणं वा ॥१४४॥

दुविधा जुंगिता-जातीए, सरीरेण वा । सेसं पूर्ववत् ।

गाहा-

अभिणवपुराणगहितं, पायमविण्णं तहेव छिण्णं च ।
णिद्दिट्ठमणिद्दिट्ठं, तेसिं अदेंताण आणादी ॥ १४५ ॥

कंठा पूर्ववत ।

गाहा-

अद्धाणओमअसिवे, उद्दिट्ठासति अदेंते जं पावे ।
पायअसन्नावाए, थेरस्स य ऊणे जं कुज्जा ॥ १४६ ॥

पूर्ववत् ।

गाहा-

दुविहजयआतुराणं, तप्पडिचरगाण विज्जहाणी य ।
जुंगितो पुव्वनिसिद्धो, भणति देसेतरो पच्छा ॥१४७॥

आसुकारी दीहरोगेण वा, अहवा-आगंतुओ तदुत्थेण वा णायणाणि विणा जा परिहाणी, तं अदेंतो पावति । जम्हा दुविहो जुंगितो-अणलसुत्तेण पुव्वं णिसिद्धो, ण पच्छद्धो ण विज्जति ? । भणति-जातिजुंगितो वि देसो पव्वाविज्जति, इतरो त्ति सरीरजुंगितो पव्वज्जाए ठितो, पच्छा जाते तेसिं इमा विही अत्थियव्वा ।

गाहा-

जातीपजुंगितो खलु, जत्थ ण णज्जति ताहे तु सो अत्थ ।
अमुगणिमित्तं वि गओ, इतरो जहि णज्जति ताहे तु ।१४८।

पूर्ववत्कंठा ।

गाहा-

जं वच्चंता कारा-वेंति य जं पि व करेंति उड्डाहं ।
किं णु हु गिहिसामण्णे, वि जुंगिता लोकमंका तु॥१४९॥

कंठा पूर्ववत् ।

सरीरविकले दाणं पडुच्च इमो कमो । गाहा-

पाद-ऽच्छिन्नासकरके-ण जुंगिते जातिजुंगितो चेव ।
वोच्चत्थे चउ लहुगा, सरिसे पुव्वं तु समणीणं ॥१५०॥

पादादिविकलं भणिय कमातो जो वोच्चत्थं देति, तस्स चउलहुं, साहुसाहुणीणं सरिसे विकलभावे दोण्ह वि दायव्वं । असति दोण्ह वि समणीसु पुव्वं दायव्वं ।

अदाणे इमो अवदातो । गाहा-

वितियपदमणप्पज्झे, देज्ज व अविकोविते य अप्पज्झे ।
जाणंतो असतीए, उ मंदधम्मेसु वज्जेज्जा ॥ १५१ ॥

अणप्पज्झो खेत्तविसादिगे ण देज्ज, सेहो वा अकोवितो गुणदोसेसु, सो वा ण देज्ज । अप्पज्झो वा जाणंतो वि असतीए णायणस्स ण देज्ज, विज्जमाणं पि पासत्थादिसु वा मंदधम्मेसु ण देज्जा; एवमादिकारणेसु अदेंतो वि सुद्धो । नि० चू० १४ उ० ।

" अमणुन्नमभत्तीए, पत्ते दाणं भवे अणट्ठाय ।
जह कडुयतुंबदाणं, नागसिरिन्नवम्मि दोवइए ॥ १ ॥ "

ज्ञा० १ श्रु० १६ अ० । (अत्र 'दुवई' शब्दे विशेषो द्रष्टव्यः)

दाने जातिर्न निमित्तम्-" जे वा जाइनाइपक्खवायेण साहूणं दाणाइसु पयट्टंति, न गुणाऽगुणचिंताए, ते वि विपज्जासमायणं । तम्हा गुणा पूयणिज्जा, ते चेव दाणाइसु पयट्टेतेण निमित्तं कज्जंतु, किं जाइनाइपत्तिईहिं, जओ स जाईए निद्धम्मा वि अत्थि, ता तेसु दाणं महाफलं होज्जा, अह तेसु य गुणा अत्थि, तहा वि ते चिय पवित्तिनिमित्तं दाणाइसु करिंतु, न किंचि जाइणाइणा । " दश० ३ तत्त्व ।

तीर्थकृते भिक्षादानं महाफलं, तत्र पञ्च दिव्यानि जायन्ते-

तए णं तस्स विजयस्स गाहावइस्स तेणं दव्वसुद्धेणं दायगसुद्धेणं पडिग्गहसुद्धेणं तिविहं तिकरणसुद्धेणं दाणेणं मए पडिलाभिए समाणे देवाउयणिबद्धं संसारपरित्तीकए गिहंसि य से इमाइं पंच दिव्वाइं पाउब्भूयाइं । तं जहा-वसुहारा वुट्ठा १, दसद्धवण्णे कुसुमे णिवातिते २, चेलुक्खेवे कए ३, आहयाओ देवदुंदुभीओ ४, अंतरा वि य णं आगासे अहो दाणे अहो दाणे त्ति घुट्ठे ५। भ० १५ श०।

(श्रमणभाजनेभ्यो दाने फलम् ' आउ ' शब्दे द्वितीयभागे १२ पृष्ठे दर्शितम्)

यच्च तीर्थकृतो दानं तदुक्तम् । अनन्तरं जगद्गुरोर्महादानमुक्तम् । तच्च न युक्तमिति परमतभेदमाह-

कश्चिदाहास्य दानेन, कः स्वार्थः प्रसिद्ध्यति ।
मोक्षगामी ध्रुवं ह्येष, यतस्तेनैव जन्मना ॥१॥

कश्चिद् दुर्विदग्धमतिः, आह ब्रूते, अस्य जगद्गुरोर्दानेन वितरणेन कः स्वार्थः, न कश्चिदित्यर्थः, अर्थः पुरुषार्थो, धर्मार्थकाममोक्षाणामन्य-

तमः, फलं वा प्रसिद्ध्यति निष्पद्यते,अर्थाऽऽदिषु तस्य निरपेक्षत्वात् । दानधर्मस्य च तत्कारणत्वान्मोक्षार्थः सिद्ध्यतीति चेन्नेत्याह-मोक्षं निर्वाणं गमिष्यति यास्यतीति मोक्षगामी, ध्रुवं निश्चितं, हिशब्दो जिनदानस्य प्रयोजनाभावभावनार्थः । एष जगद्गुरुर्धनो यस्मात्कारणात्, तेनैवाऽकृतेन, यस्मिन् जन्मनि दानं ददाति न जन्मपरम्परया, जन्मना भवेन, दानं हि भवपरम्परया मोक्षफलं, येन च तद्भवेनैवावश्यं निर्वातव्यं, तस्य दानेन न कश्चिदर्थ इति ॥१॥

अथोत्तरमाह-

उच्यते कल्प एवास्य, तीर्थकृन्नामकर्मणः ।
उदयात् सर्वसत्त्वानां, हित एव प्रवर्त्तते ॥ २ ॥

उच्यते अनन्तरोदिताऽऽक्षेपस्य समाधिरभिधीयते,कल्पशब्दः करणार्थः । यदाह- " सामर्थ्ये वर्णनायां च, छेदने करणे तथा । औपम्ये चाधिवासे च, कल्पशब्दं विदुर्बुधाः ॥ १ ॥ " करणं च क्रिया, समाचार इत्यर्थः । ततश्च कल्प एव जीतमेव, वक्ष्यमाणे दानाऽऽदिना सर्वसत्त्वहितवर्तनलक्षणेऽस्य जगद्गुरोर्न पुनः फलविशेषं प्रति प्रत्याशा । किंरूपोऽसौ कल्प इत्याह-तीर्थकृतस्तीर्थकरस्य संबन्धि तीर्थकरत्वनिबन्धनं यन्नामाऽऽख्यं कर्माऽहदं तत्तथा, तस्य तीर्थकृन्नामकर्मण उदयाद्विपाकात् सर्वसत्त्वानां सकलशरीरिणाम् । इह च हितशब्दयोगेऽपि न चतुर्थी, संबन्धस्यैव विवक्षितत्वात् । हिते पत्रानुकूलविधावेव, इह यदिति शेषो दृश्यः, तेन यदेतत् प्रवर्त्तते व्याप्रियते जगत्पतिरिति ततश्चास्य दानात् कल्पपरिपालनं विना नान्यत् फलमस्तीति भावनेति ॥ २ ॥

परिहारान्तरमाह-

धर्माङ्गख्यापनार्थं च, दानस्याऽपि महामतिः ।
अवस्थौचित्ययोगेन, सर्वस्यैवानुकम्पया ॥ ३ ॥

धर्मस्य कुशलाऽऽत्मपरिणामविशेषस्याङ्गमवयवः कारणे वा धर्माङ्गं, तस्य ख्यापनं प्रकाशनं धर्माङ्गख्यापनं, तस्मै इदं धर्माङ्गख्यापनार्थं, भावप्रत्ययगर्भत्वान्निर्देशस्य धर्माङ्गताख्यापनार्थमिति द्रष्टव्यम । महादानं दत्तवानिति प्रक्रमगम्यम् । धर्माङ्गं दानं भगवता प्रवृत्तत्वाच्छीलवदिति भव्यजनसंप्रत्ययार्थमित्यर्थः । चशब्दः पूर्वोक्तपरिहारापेक्षया परिहारान्तरसमुच्चयार्थः । कस्येत्याह-दानस्याऽपि विभ्राणनस्यापि, न केवलं शीलाऽऽदेर्धर्माङ्गतेत्यपिशब्दार्थः । महामतिरत्यद्भुतबोधो भगवान्, किं यथाकथञ्चिदस्य धर्माङ्गतायाः ख्यापनं, नेत्याह-अवस्थाया भूमिकाया औचित्ययोग आनुरूप्यलक्षणधर्मसंबन्धः-अवस्थौचित्ययोगः, तेन,स्वभूमिकोचितत्वेनेत्यर्थः । धर्माङ्गता च तस्य किं गृहिणामेव, नेत्याह-सर्वस्यैव, एवशब्दस्याऽपिशब्दार्थत्वान्न केवलं गृहिण एव, निरवशेषस्यापि दातुर्यतेर्गृहिणो वाऽनुकम्पया कृपया, न तु गृहिणामनुकम्पादानमुचितम्, " अणुकंपादाणं पुण, जिणेहिं न कयाइ पडिसिद्धं । " इति वचनात् । यत् पुनः साधुः साधवे ददाति तदनुकम्पानिमित्तं न भवति, भक्तिनिमित्तत्वात्तस्य । यत् पुनरसंयताय दानं तत् साधोर्न संभवति, " गिहिणो वेयावडियं, न कुज्जा अभिवायणवंदणपूयणं च । " इति वचनात् । ततः सर्वस्याऽपि गृहस्थस्यैव व्याख्येयं,नैवम,यतो विशिष्टपुण्याऽऽख्यसद्भावे यतेरप्यनुकम्पादानसंभव इति न दोषः । अमुं चार्थं ग्रन्थकार एव व्यक्तीकरिष्यति । श्रूयते चाऽऽगमे आर्यसुहस्त्याचार्यस्य रङ्कदानं,न चानुकम्पादानं साधुषु न संभवति, " आयरियऽणुकंपाए, गच्छो अणुकंपिओ महाभागो । " इति वचनादिति ॥ ३ ॥

धर्माङ्गमेव दानं यतः-

शुभाऽऽशयकरं ह्येत-दाग्रहच्छेदकारि च ।
सदभ्युदयसाराङ्ग-मनुकम्पाप्रसूति च ॥ ४ ॥

शुभं प्रशस्तमाशयं चित्तं कर्तुं शीलमस्येति शुभाऽऽशयकरं, हि इति यस्मादेवं तस्माद्धर्माङ्गता दानस्येति प्रकृतम् । एतदिति दानम । तथा-आग्रहच्छेदकारि च-चित्तं प्रति ममकाराहङ्काराभिनिवेशनाशकर्तृ, चशब्दः समुच्चये । तथा सत् शोभनोऽभ्युदयान्तरानुबन्धित्वेन योऽभ्युदयः कल्याणावाप्तिः, तस्य साराङ्गं प्रधानकारणं सदभ्युदयसाराङ्गम् । आह च- " दानेन भोगानाप्नोति, यत्र यत्रोपपद्यते । शीलेन भोगान् स्वर्गे च, निर्वाणं चाधिगच्छति ॥ १ ॥ " तथाऽनुकम्पाया दयायाः सकाशात् प्रसूतिः प्रभवो यस्य तदनुकम्पाप्रसूतिः । चशब्दः समुच्चय इति ॥ ४ ॥ हा० २ अष्ट० । पञ्चा० । कल्प० । ह्वा० । (प्रायश्चित्तदानविधिः ' पच्छित्त ' शब्दे वक्ष्यते)

अथ दानं प्रति विधिनिषेधविचारः-

से णाईए, आदियावए, ण समणुजाणति (७७) ।

(से णाईए इत्यादि) स भिक्षुस्तथा कल्प्यं नादद्यात न गृह्णीयान्नाप्यपरमादापयेद् ग्राहयेत, नाप्यपरमनेषणीयमाद्दानं समनुजानीयात् । अथवा-सहक्षीरं सधूमं वा नाद्यान्न भक्षयेन्नापरमादापयेददन्तं वा न समनुजानीयादिति । आचा० १ श्रु० २ अ० ५ उ० ।

दाणट्ठया य जे पाणा, हणंति तसथावरा ।
तेसिं संरक्खणट्ठाए, तम्हा अत्थि त्ति णो वए ॥ १८ ॥

अन्नपानदानार्थमाहारमुदकं च पचनपाचनाऽऽदिक्रिया क्रियया कूपखननाऽऽदिक्रिया चोपकल्पयेत् । तत्र यस्माद्धन्यन्ते व्यापाद्यन्ते त्रसाः स्थावराश्च जन्तवस्तस्मात्तेषां रक्षानिमित्तं साधुरात्मगुप्तो जितेन्द्रियोऽत्र भवदीयानुष्ठाने पुण्यमित्येवं नो वदेदिति ॥१८॥

यद्येवं, नास्ति पुण्यमिति ब्रूयात्तदेतदपि न ब्रूयादित्याह-

जेसिं तं उवकप्पंति, अन्नपाणं तहाविहं ।
तेसिं लाभंतरायं ति, तम्हा णत्थि त्ति णो वए ॥१९॥

(जेसिमित्यादि) येषां जन्तूनां तदन्नपानाऽऽदिकं किल धर्मबुद्ध्यापकल्पयन्ति, तथाविधं प्राणयुपमर्ददोषदुष्टं निष्पादयन्ति, तन्निषेधे च यस्मात्तेषामाहारपानार्थिनां तल्लाभान्तरायो विघ्नो भवेत्,तदभावेन तु पीड्येरन्,तस्मात्कूपखननसत्राऽऽदिके कर्मणि नास्ति पुण्यमित्येतदपि नो वदेदिति ॥१९॥

एनमेवार्थं पुनरपि समासतः स्पष्टतरं विभणिषुराह-

जे य दानं पसंसंति, वहमिच्छंति पाणिणं ।
जे य णं पडिसेहंति, वित्तिच्छेयं करेंति ते ॥२०॥

(जे य दाणमित्यादि)ये केचन प्रपासत्राऽऽदिकं दानं बहूनां जन्तूनामुपकारीति कृत्वा प्रशंसन्ति श्लाघन्ते,ते परमार्थानभिज्ञाः, प्रभूततरप्राणिनां तत्प्रशंसाद्वारेण वधं प्राणातिपातमिच्छन्ति, तद्दानस्य प्राणातिपातमन्तरेणानुपपत्तेः। येऽपि च किल सूक्ष्मधियो वयमित्येवं मन्यमाना आगमसद्भावानभिज्ञाः प्रतिषेधन्ति निषेधयन्ति, तेऽप्यगीतार्थाः,प्राणिनां वृत्तिच्छेदं वर्त्तनोपा-

यविधं कुर्वन्तीति ॥२०॥ सूत्र०१ श्रु०११ अ० । आचा० । आव० (कृतप्रत्याख्यानोऽशनाऽऽदिदानं न कुर्यादिति ' पच्चक्खाण ' शब्दे वक्ष्यते) (जुज्जानैः साधुभिर्ऽमकाऽऽदिभ्यो न देयमसंयतपोषणप्रसङ्गादिति ' भोयण ' शब्दे विस्तरेण वक्ष्यते) " देवेन्द्रशर्मप्रदं दान-मनुकम्पासमन्वितम् । भक्त्या सुपात्रदानं तु, मोक्षदं देशितं जिनैः ॥१॥ " द्वा० १ द्वा० । (अनुकम्पा० (२) इत्यादिभिर्दशभिः श्लोकैरनुकम्पादानम् ' अणुकंपादाण ' शब्दे प्रथमभागे ३६० पृष्ठे व्याख्यातम्)

नन्वेवं " गिहिणो वेयावडियं न कुज्जा " इत्याद्यागमविरोधः ?, इत्यत आह-

वैयावृत्ये गृहस्थानां, निषेधः श्रूयते तु यः ।
स औत्सर्गिकतां बिभ्रद्, नैतस्यार्थस्य बाधकः ॥१२॥

(वैयावृत्य इति) गृहस्थानां वैयावृत्ये तु साधोर्यो निषेधः श्रूयते, स औत्सर्गिकतां बिभ्रन्नैतस्यापवादिकस्यार्थस्य बाधकः । अपवादो ह्युत्सर्गं बाधते, न तूत्सर्गोऽपवादमिति ॥१२॥

सूत्रान्तरं समाधत्ते-

ये तु दानं प्रशंसन्ती-त्यादिसूत्रेऽपि संगतः ।
विहाय विषयो मुग्यो, दशाभेदं विपश्चिता ॥१३॥

(ये त्विति) ये तु दानं प्रशंसन्तीत्यादिसूत्रेऽपि " जे उ दाणं पसंसंति, वहमिच्छंति पाणिणं । जे अंतं पडिसेहंति, वित्तिच्छेयं करंति ते ॥ २० ॥ " इति सूत्रकृतसूत्रेऽपि दशाभेदं विहाय संगतो युक्तो विषयो विपश्चिता मुग्ध पेक्षम्पर्यशुद्ध्या विचारणीयो, न तु पदार्थमात्रे मूढतया ज्ञात्व्यम्, अपुष्टाऽऽलम्बनविषयतयैवास्योपपादनात् । आह च-" ये तु दानं प्रशंसन्ती-त्यादि सूत्रं तु यत् स्मृतम् । अवस्थाभेदविषयं, द्रष्टव्यं तन्महात्मभिः ॥ १ ॥ " इति ॥१३॥

पुनः शङ्कते-

नन्वेवं पुण्यबन्धः स्यात्, साधोर्न च स इष्यते ।
पुण्यबन्धान्यपीडाभ्यां, नग्नं भुङ्क्ते यतो यतिः ॥१४॥

(नन्विति) नन्वेवमपवादतोऽपि साधोरनुकम्पादानेऽभ्युपगम्यमाने पुण्यबन्धः स्यात्, अनुकम्पायाः सातबन्धहेतुत्वात् । न च स पुण्यबन्ध इष्यते साधोः, यतो यस्माद् यतिः पुण्यबन्धान्यपीडाभ्यां हेतुभ्यां नग्नं भुङ्क्ते ॥१४॥

एतदेव स्पष्टयति-

दीनाऽऽदिदाने पुण्यं स्या-त्तददानं च पीमनम् ।
शक्तौ पीमाऽप्रतीकारे, शास्त्रार्थस्य च बाधनम् ॥१५॥

(दीनाऽऽदीति) प्रकटं भोजने दीनाऽऽदीनां याचमानानां दाने पुण्यं स्याद्, न चानुकम्पावाँस्तेषामदत्त्वा कदापि भोक्तुं शक्तः । अतिबाधाद्यधमवलम्ब्य कथञ्चित्तेषामदाने च पीडनं स्यात्तेषां तदानीमप्रीतिरूपं, शासनद्वेषात्परत्र च कुगतिसङ्गतिरूपम् । तदप्रीतिदानपरिणामाभावाच्च दोषो भविष्यतीत्याशङ्क्याऽऽह-शक्तौ सत्यां पीडायाः परदुःखस्याप्रतीकारेऽनुद्धारे च शास्त्रार्थस्य परापीतिपरिहारप्रयत्नप्रतिपादनरूपस्य बाधनं, रागद्वेषयोरिव शक्तिनिगूहनस्यापि चारित्रप्रतिपक्षत्वात् । प्रसिद्धोऽयमर्थः सप्तमाष्टके ॥ १५ ॥

किञ्च दानेन भोगाऽऽप्ति-स्ततो भवपरम्परा ।
धर्माधर्मक्षयान्मुक्ति-र्मुमुक्षोर्नेष्टमित्यदः ॥ १६ ॥

किं च दानेन हेतुना भोगाऽऽप्तिर्भवति, ततो भवपरम्परा मोहधारावृद्धेः, तथा धर्माधर्मयोः पुण्यपापयोः क्षयान्मुक्तिः, इति हेतोरदोऽनुकम्पादानं मुमुक्षोर्नेष्टम् ॥ १६ ॥

सिद्धान्तयति-

नैवं यत्पुण्यबन्धोऽपि, धर्महेतुः शुभोदयः ।
बह्वेर्दाह्यं विनाश्येव, नश्वरत्वात् स्वतो मतः ॥ १७ ॥

(नैवमिति) नैवं यथा प्रागुक्तम्, यत् यस्मात्पुण्यबन्धोऽपि शुभोदयः सद्विपाको धर्महेतुर्मतः, तद्धेतुर्निरेव दशाविशेषेऽनुषङ्गः, पुण्यानुबन्धिपुण्यबन्धसंजवात्, प्राणातिपातविरमणाऽऽदौ तथाऽवधारणात् । न चायं मुक्तिपरिपन्थी, दाह्यं विनाश्यवद्धेरिव तस्य पापं विनाश्य स्वतो नश्वरत्वाच्चाशशलित्वात् । शास्त्रार्थाबाधेन निर्जराप्रतिबन्धकपुण्यबन्धाभावाच्चात्र दोष इति गर्भोऽर्थः ॥ १७ ॥

भोगाऽऽप्तिरपि नैतस्मा-दज्ञोगपरिणामतः ।
मन्त्रितं श्रद्धया पुंसां, जलमप्यमृतायते ॥ १८ ॥

(भोगाऽऽप्तिरिति) भोगप्राप्तिरपि नैतस्मादापवादिकादनुकम्पादानात्, अभोगपरिणामतो भोगानुभवोपनायकाध्यवसायाभावात् । दृष्टान्तमाह-मन्त्रितं जलमपि पुंसां श्रद्धया भक्त्याऽऽमृतायतेऽमृतकार्यकारि भवति । एवं हि भोगहेतोरप्यत्राध्यवसायविशेषाद्भोगानुपपत्तिरुपपद्यत इति भावः ॥ १८ ॥

नन्विदं हरिभद्रसंमत्या भवद्भिर्ध्वंसस्थाप्यते, तेनैव चाभिनिवेशयोक्तमित्याशङ्क्याऽऽह-

न च स्वदानपोषार्थ-मुक्तमेतदपेशलम् ।
हरिभद्रो ह्यदोऽजाणीद्, यतः संविग्नपाक्षिकः ॥१९॥

(न चेति) न च स्वदानस्य स्वीयासंयतदानस्य पोषार्थं समर्थनार्थमुक्तमेतदपेशलमसुन्दरम् । यतो यस्मात्संविग्नपाक्षिको हरिभद्राऽऽदः प्रागुक्तं हि निश्चितमभाणीत् । न हि संविग्नपाक्षिकोऽसूत्रं सूत्रे । तदुक्तं सप्तविंशतितमाष्टकविवरणे-" स्वकीयासंयतदानसमर्थनागर्भार्थकमिदं प्रकरणं सूरिणा कृतमिति केचित्कल्पयन्ति । हरिभद्राऽऽचार्यो हि भोजनकाले शङ्खादनपूर्वकमर्थिभ्यो भोजनं दापितवानिति श्रूयते । न चैतत्संभाव्यते, संविग्नपाक्षिको ह्यसौ, न च संविग्नस्य तत्पाक्षिकस्य वाऽनागमिकार्थोपदेशः संभवति, तत्त्वहानिप्रसङ्गात् । आह च-" संविग्गोऽणुवएसं, ण देइ दुन्नासिअं कहविवागं । जाणंतो तम्मि तहा, अतहक्कारो उ मिच्छत्तं " ॥ १ ॥ इति ॥ १९ ॥

भक्तिस्तु भवनिस्तार-बीजं स्वस्य सुपात्रतः ।
तया दत्तं सुपात्राय, बहुकर्मक्षयक्षमम् ॥ २० ॥

(भक्तिस्त्विति) भक्तिस्तु स्वस्य सुपात्रतो भवनिस्तारबीजम् । आराध्यत्वेन ज्ञानं भक्तिः, आराधना च गौरवितप्रीतिहेतुः, क्रिया गौरवितसेवा चेत्येतदपि फलतो नैतल्लक्षणमतिशेते । तया भक्त्या सुपात्राय दत्तं बहुकर्मक्षये क्षमं समर्थं भवति ॥ २० ॥

तथाहि-

पात्रदानचतुर्भङ्ग्या-माद्यः संशुद्ध इष्यते ।
द्वितीये भजना शेषा-वनिष्टफलदौ मतौ ॥ २१ ॥

(पात्रेति) पात्रदानविषयिणी या चतुर्भङ्गी-संयताय शुद्ध-

दानम्, संयतायाशुद्धदानम्, असंयताय शुद्धदानम्, असंयतायाऽशुद्धदानमित्यनिलापा । तस्यामाद्यो भङ्गः सम्यगतिशयेन शुद्ध इष्यते, निर्जरायां एव जनकत्वात् । द्वितीये भङ्गे काल्पाऽऽदिभेदेन फलभावाऽभावाभ्यां भजना विकल्पाऽऽत्मिका । शेषौ तृतीयचतुर्थभङ्गौ अनिष्टफलदौ एकान्तकर्मबन्धहेतुत्वान्मतौ ॥ २१ ॥

शुद्धं दत्त्वा सुपात्राय, सानुबन्धशुभार्जनात् ।
सानुबन्धं न बध्नाति, पापं बद्धं च मुञ्चति ॥ २२ ॥

(शुद्धमिति) सुपात्राय प्रतिहतप्रत्याख्यातपापकर्मणे शुद्धमाऽऽदिकं दत्त्वा सानुबन्धस्य पुण्यानुबन्धिनः शुभस्य पुण्यस्यार्जनात् सानुबन्धमनुबन्धसहितं पापं न बध्नाति, बद्धं च पूर्वं पापं मुञ्चति त्यजति । इत्थं च पापनिवृत्तौ प्रयाणभङ्गाप्रयोजकपुण्येन मोक्षसौख्यमावेदितं भवति ॥२२॥

भवेत्पात्रविशेषे वा, कारणे वा तथाविधे ।
अशुद्धस्यापि दानं हि, द्वयोर्लाभाय नान्यथा ॥ २३ ॥

(भवेदिति) पात्रविशेषे वाऽऽगमाभिहितस्वरूपकृपकाऽऽदिरूपे, कारणे वा तथाविधे दुर्भिक्षदीर्घाध्वश्रान्तत्वाऽऽदिरूपे आगाढे, अशुद्धस्याऽपि दानं हि सुपात्राय द्वयोर्दातृगृहीत्रोर्लाभाय भवेत्, दातुर्विवेकशुद्धान्तःकरणत्वाद्, गृहीतुश्च गीतार्थाऽऽदिपदवत्त्वात्; नान्यथा पात्रविशेषस्य कारणविशेषस्य वा विरहे ॥ २३ ॥

नन्वेवं संयतायाशुद्धदाने फले द्वयोर्भवतु भजना, दातुर्बहुतरनिर्जराऽल्पतरपापकर्मबन्धनामित्वं तु भगवत्युक्तं कथमपवादाऽऽदावपि भावशुद्ध्या फलाविशेषादित्यत आह-

अथवा यो गृही मुग्धो, लुब्धकज्ञातभावितः ।
तस्य तत् स्वल्पबन्धाय, बहुनिर्जरणाय च ॥ २४ ॥

(अथवेति) अथवा पक्षान्तरे, यो गृही मुग्धोऽसच्छास्त्रार्थो लुब्धकज्ञातेन मृगेषु लुब्धकानामिव साधुषु श्राद्धानां यथाकथञ्चिद्दानाऽऽशुपदौकनेनानुधावनमेव युक्तमिति पार्श्वस्थप्रदर्शितेन भावितो वासितः, तस्य तत्संयतायाऽशुद्धदानं तु मुग्धत्वादेव स्वल्पपापबन्धाय, बहुकर्मनिर्जरणाय च भवति ॥

अल्पाऽऽयुष्कत्वम्-

इत्थमाशयवैचित्र्या-दल्पाऽऽयुष्कहेतुता ।
युक्ता चाशुभदीर्घाऽऽयु-र्हेतुता सूत्रदर्शिता ॥ २५ ॥

(इत्थमिति) इत्थममुना प्रकारेण, आशयवैचित्र्याद्भावभेदात्, अत्र संयताऽशुद्धदाने, अल्पाऽऽयुष्कहेतुताऽशुभदीर्घाऽऽयुर्हेतुता च, सूत्रदर्शिता स्थानाङ्गाऽऽदौ युक्ता, युक्ता,मुग्धानिनिविष्टयोरेतदुपपत्तेः । शुद्धदायकोपकृताऽशुद्धदायके मुग्धेऽल्पशुभाऽऽयुर्बन्धसंभवात् । क्षुल्लकभवग्रहणरूपाया अल्पतायाश्च सूत्रान्तरविरोधेनासंभवादिति । व्यक्तमदः स्थानाङ्गवृत्त्यादौ ॥ २५ ॥

यस्तूत्तरगुणाशुद्धं, प्रज्ञप्तिविषयं वदेत् ।
तेनात्र भजनासूत्रं, दृष्टं सूत्रकृते कथम् ? ॥ २६ ॥

(यस्त्विति) यस्तु आधाकर्मिकस्यैकान्तदुष्टत्वं मन्यमानः प्रकृतेऽर्थे, प्रज्ञप्तिगोचरं भगवतीविषयम्, उत्तरगुणाशुद्धं वदेत्। शक्यपरित्यागबीजाऽऽदिसंसक्ताऽऽदिस्थलेऽप्यप्रासुकानेषणीयपदप्रवृत्तिदर्शनात् । तेन चैवं यूकापरिज्ञवज्ञयात्परिधानं परित्यजता, अत्र विषये, सूत्रकृते, भजनासूत्रम्, कथं दृष्टम् ? । एवं हि तदनाचारश्रुते श्रूयते-" अहागडाइं भुंजंति, अन्नमन्ने सकम्मुणा । उवलित्ते वियाणिज्जा-ऽणुवलित्ते सि वा पुणो " ॥१॥ अत्र ह्याधाकर्मिकस्य फले भजनैव व्यक्तीकृता,अन्योऽन्यपदग्रहणेनार्थान्तरस्य कर्तुमशक्यत्वात्, स्वरूपतोऽसावद्ये भजनाव्युत्पादनस्यानतिप्रयोजनत्वाच्चेति संक्षेपः ॥ २६ ॥

शुद्धं वा यदशुद्धं वा-ऽसंयताय प्रदीयते ।
गुरुत्वबुद्ध्या तत्कर्म-बन्धकृन्नाऽनुकम्पया ॥ २७ ॥

(शुद्धं वेति) असंयताय यच्छुद्धं वाऽशुद्धं वा गुरुत्वबुद्ध्या प्रदीयते तदसाधुषु साधुसंज्ञया कर्मबन्धकृत्, न पुनरनुकम्पया । अनुकम्पादानस्य क्वाऽप्यनिषिद्धत्वात् । " अणुकंपादाणं पुण, जिणेहि न कयाइ पडिसिद्धं । " इति वचनात् ॥ २७ ॥

दोषपोषकतां ज्ञात्वा, तामुपेक्ष्य ददज्जनः ।
प्रज्ज्वाल्य चन्दनं कुर्यात्, कष्ठामङ्गारजीविकाम् ॥२८॥

अतः पात्रं परीक्षेत, दानशौण्डः स्वयं धिया ।
तत् त्रिधा स्यान्मुनिः श्राद्धः, सम्यग्दृष्टिस्तथाऽपरः ।२९।

एतेषां दानमेतत्स्थ-गुणानामनुमोदनात् ।
औचित्यानतिवृत्त्या च, सर्वसंपत्करं मतम् ॥ ३० ॥

दोषेति स्पष्टः ॥ २८ ॥ अत इति स्पष्टः ॥ २९ ॥ (एतेषामिति) एतेषां मुनिश्राद्धसम्यग्दृशां दानम्, एतत्स्थानामेतद्वृत्तीनां गुणानामनुमोदनात्तद्दानस्य तद्भक्तिपूर्वकत्वात् । औचित्यानतिवृत्त्या स्वाचारानुल्लङ्घनेन च, सर्वसंपत्करं ज्ञानपूर्वकत्वेन परम्परया महानन्दप्रदं मतम् ॥ ३० ॥

शुभयोगेऽपि यो दोषो, ऊह्यतः कोऽपि जायते ।
कूपज्ञातेन स पुन-र्नानिष्टो यतनावतः ॥ ३१ ॥

(शुभयोगेऽपीति) पात्रदानबद्धबुद्धीनां साधर्मिकवात्सल्याऽऽदौ शुभयोगेऽपि प्रशस्तव्यापारेऽपि यः कोऽपि ऊह्यतो दोषो जायते, स कूपज्ञातेन आगमप्रसिद्धकूपदृष्टान्तेन, यतनावतो यतनापरायणस्य नानिष्टः, स्वरूपतः सावद्यत्वेऽप्यनुबन्धतो निरवद्यत्वात् । तदिदमुक्तम्-" जा जयमाणस्स भवे, विराहणा सुत्तविहिसमग्गस्स । सा होइ निज्जरफला, अज्झत्थविसोहिजुत्तस्स ॥१॥" अत्र हि अपवादपदप्रत्ययाया विराधनाया व्याख्यानात् फलनैर्दोषिको ज्ञानपूर्वकत्वेन क्रियाभेद एव लभ्यते । यत्तु वर्जनाभिप्रायजन्यां निर्जरां प्रति जीवघातपरिणामाजन्यत्वेन जीवविराधनायाः प्रतिबन्धकाभावत्वेनैवात्र हेतुत्वमिति कश्चिदाह साहसिकः, तस्यापूर्वमेव व्याख्यानमपूर्वमेव चाऽऽगमतर्ककौशलं,केवलायास्तस्याः प्रतिबन्धकत्वाभावाज्जीवघातपरिणामविशेषत्वेन प्रतिबन्धकत्वे च विशेषणाभावप्रयुक्तस्य विशिष्टाभावस्य शुद्धविशेष्यस्वरूपत्वे विशेष्याभावप्रयुक्तस्य तस्य शुद्धविशेषणरूपस्यापि संभवाज्जीवघातपरिणामोऽपि देवानां प्रियस्य निर्जराहेतुः प्रसज्येत । अथ वर्जनाभिप्रायेण जीवघातपरिणामजन्यत्वव्यवच्छेदकं स्वरूपमेव विराधनायास्त्याज्यतेऽतो नेयमस्तु प्रतिबन्धिकेति चेत्, किमेतद्विराधनापदं प्रवृत्तिनिमित्तं, विशेषणं वा ? । आद्ये प्रवृत्तिनिमित्तं नास्तिपदं चोच्यत इत्ययमुन्मत्तप्रलापः । अन्त्ये चोक्तदोषतादवस्थ्यमिति शिष्यबुद्धिबन्धनमात्रमेतत् । अथ यदुन्मत्तविशिष्टं यद्वस्तु निजस्वरूपं जहाति स धर्मस्तत्रोपाधिरिति नियमाद्वर्जना, अभिप्रायविशिष्टा हि जीवविराधना जीवघातपरिणामजन्यत्वं

संयमनाशहेतुं परित्यजतीति भावार्थपर्यालोचनादनुपहितविराधनात्वेन प्रतिबन्धकत्वं लभत इत्युपहितायास्तस्याः प्रतिबन्धकाभावत्वमङ्गीकृतमिति चेन्न, प्रकृतविराधनाव्यक्तौ जीवघातपरिणामजन्यत्वस्यासत्त्वेन त्याजयितुमशक्यत्वात्। अत एव तत्प्रकारकप्रमितिप्रतिबन्धरूपस्यापि तद्ज्ञानस्यानुपपत्तेः। स्यादेतत्। वर्जनाभिप्रायाज्ञानविशिष्टविराधनात्वेन प्रतिबन्धकत्वे न कोऽपि दोषः, प्रत्युत वर्जनाभिप्रायस्य पृथक्कारणत्वाकल्पनाल्लाघवमिति। मैवम। विशेषणविशेष्यभावे विनिगमनाविरहाद्, अन्यथा दोषाभावविशिष्टबाधत्वेनैव दुष्टज्ञाने प्रतिबन्धकत्वप्रसङ्गाद्, विशेष्याभावस्थलेऽतिप्रसङ्गाच्च। तस्माद् वर्जनाभिप्रायस्यैव फलविशेषे निश्चयतो हेतुत्वं, व्यवहारेण च तत्सद्भावीनां भावानुगतानां निमित्तत्वमिति साम्प्रतम। विपश्चितं चेदमन्यत्रेति नेह विस्तरः ॥ ३१ ॥

इत्थं दानविधिज्ञाता, धीरः पुण्यप्रभावकः।
यथाशक्ति ददद्दानं, परमाऽऽनन्दभाग् भवेत् ॥ ३२ ॥

इत्थमिति स्पष्टः ॥ ३२ ॥ द्वा० १ द्वा०।

दक्षिणायाम्, सूत्र० २ श्रु० ५ अ०। 'दो' अवखण्डने ल्युट्। खण्डने, विशे०। आव०। गजमदे, ज्ञा० १ श्रु० ९ अ०। मदकारिणि, "दाणवासिअकपोलमूलं।" कल्प० २ क्षण। तीर्थकृद्दानमहत्याः प्राप्नुवन्ति, न वेति प्रश्ने, उत्तरम्, ते नाप्नुवन्तीति बृद्धवादः, अक्षराणि, तु अन्ये इष्टानि न स्मरन्तीति। १६८ प्र०। सेन० २ उल्ला०। केनापि स्वगृहं जिनगृहे मुक्तं, तत्र श्राद्धः कोऽपि भाटकं दत्त्वा तिष्ठति, न वेति प्रश्ने, उत्तरम्-यद्यपि सार्धिकलाटकप्रदानपूर्वकमवस्थाने दोषो न लगति, तथाऽपि तथाविधकारणमन्तरेदं युक्तिमन्न प्रतिभाति, देवद्रव्यभोगाऽऽदौ निःशूकताप्रसङ्गादिति। ४१७ प्र०। सेन० ३ उल्ला०। पौषधमध्ये याचकाऽऽदेर्दानं दातुं कल्पते, न वेति प्रश्ने, उत्तरम्-मुख्यवृत्त्या पौषधमध्ये याचकाऽऽदेर्दानं दातुं न कल्पते, कस्मिंश्चित्कारणविशेषे तथा जिनशासनोन्नतिं ज्ञात्वा कदाचित्स्यादि ददति तदा निषेधो ज्ञातो नास्तीति। ४३३ प्र०। सेन० ३ उल्ला०।

दाणंतराय–दानान्तराय–न०। दीयते इति दानं, तद्विषयमन्तरायं दानान्तरायम्। प्रथमायामन्तरायस्योत्तरप्रकृतौ यदुदयवशात् सति विभवेऽपि समागते च गुणवति पात्रे दत्त्वाऽस्मै बहुफलमिति ज्ञानेऽपि दातुं नोत्सहते, तद्दानान्तरायम। तस्मिन्, कर्म० ६ कर्म०। पं० सं०। स०।

दाणग्गहण–दानग्रहण–न०। प्रदानाऽऽदानयोः, नि० चू० ५ उ०।

दाणजुय–दानयुत–पुं०। दानरुचौ, कर्म० १ कर्म०।

दाणट्ठ–दानार्थ–न०। दानमर्थो यस्य तद्दानार्थम्। दाननिमित्ते, प्रश्न० ५ संव० द्वार। सूत्र०।

दाणधम्म–दानधर्म–पुं०। दानधर्मकर्तव्यतायाम्, "दानात्कीर्तिः सुभाग्यञ्च, दानात्सौभाग्यमुत्तमम्। दानात्कामार्थमोक्षाः स्यु-र्दानधर्मो वरस्ततः ॥ १ ॥" पञ्चा० २ विव०।

दाणव–दानव–पुं०। दनोरपत्यम्, अण्। ज्ञा० १ श्रु० ८ अ०। "कगचजतदपयवां प्रायो लुक्" ॥ ८। १। १७७ ॥ इति प्रायग्रहणात्स्वरात्परस्यानादिभूतस्यासंयुक्तस्यापि वकारस्यालुक्। 'दाणवो।' प्रा० १ पाद। भवनपतिविशेषे, व्यन्तरभेदे, ज्ञा० १ श्रु० ८ अ०। असुरे, अनु०। स्था०। उत्त०। आ० म०।

दाणविंद–दानवेन्द्र–पुं०। चमराऽऽदौ, आ०म०१ अ०१ खण्ड।

दाणविप्पणास–दानविप्रनाश–पुं०। दत्तापहारे, प्रश्न० ३ संव० द्वार।

दाणसड्ढ–दानश्राद्ध–पुं०। प्रकृत्यैव दानरुचौ, ध० ३ अधि० वृ०।

दाणसूर–दानशूर–पुं०। तृतीये शूरभेदे, "दाणसूरे वेसमणे।" दानशूरो वैश्रवण उत्तराशालोकपालस्तीर्थकराऽऽदिजन्मपारणकाऽऽदिरत्नवृष्टिपातनाऽऽदिनेति। उक्तं च-"वेसमणवयणसंचोइया उ ते तिरियजंभगा देवा। कोडिग्गसो हिरण्णं, रयणाणि य तत्थ वरिसंति ॥ १ ॥" इति। स्था० ४ ठा० ३ उ०। संथा०।

दाणाइ–दानाऽऽदि–पुं०। वितरणप्रभृतौ, आदिशब्दाद् गुरुसेवातपःप्रभृतीनां च संग्रहः। पञ्चा० २ विव०।

दाणामा–दानमयी–स्त्री०। प्रव्रज्यायाम्, "दाणामाए पव्वज्जाए पव्वइए।" ज्ञ० ३ श० २ उ०।

दाणिं–इदानीम्–अव्य०। "इदानीमो दाणिं" ॥ ८। ४। २७६ ॥ शौरसेन्यामिदानीमः स्थाने 'दाणिं' इत्यादेशः। प्रा० ४ पाद। सम्प्रतीत्यर्थे, भ० ३ श० २ उ०। सूत्र०। "अणंतरकरणीयं दाणिं आणवेहु अय्यो।" व्यत्ययात्प्राकृतेऽपि-"अज्ज दाणिं देहि।" प्रा० ४ पाद। "सुणध दाणिं हगे! शक्कावयाज्जातित्थनिवासी धीवले!।" प्रा० ४ पाद। वाक्यालङ्कारे, वृ० १ उ०।

दाणुवएस–दानोपदेश–पुं०। अन्नाऽऽहारप्रदानोपदेशे, आव० ६ अ०। पञ्चा०।

दाथालय–उदकस्थालक–न०। उदकार्द्रस्थालके, भ०१५ श०।

दादलिआ–स्त्री०। देशी–अङ्गुलौ, दे० ना० ५ वर्ग० ३८ गाथा।

दाम–दामन्–न०। दो-मनिन्। "स्तमदामशिरोऽनजः" ॥ ८। १। ३५ ॥ इति पर्युदासान्नपुंसत्वम्। 'दामं।' प्रा० १ पाद। स्रजि, ज्ञा० १ श्रु० १ अ०। माल्यायाम्, भ० ११ श० ११ उ०। कल्प०। प्रज्ञा०। औ०। आ० क०। स्था०। रज्जौ, प्रश्न० ३ आश्र० द्वार। स्त्रियां क्वाच्। दामा। मनःशिलाकस्य वेलन्धरनागराजस्याऽऽवासपर्वते, स्था० ४ ठा० २ उ०। स्त्रियां क्वाच्। दामा। दामे। वाच०। पाशकविशेषे, विपा० १ श्रु० ३ अ०।

दामग–दामक–न०। रज्जुमयपादसंयमने, प्रश्न० ३ आश्र० द्वार।

दामड्ढि–दामार्द्धि–पुं०। शक्रस्य देवेन्द्रस्य देवराज्ञः स्वनामख्याते वृषभानीकाधिपतौ, स्था० ५ ठा० १ उ०।

दामण–दामन–न०। बन्धने, प्रव० ३८ द्वार।

दामणी–दामनी–स्त्री०। गवादीनां बन्धनविशेषभूतायां रज्जौ, भ० १६ श० ६ उ०। जं०। अष्टादशतमायां तीर्थकरप्रवर्त्तिन्याम्, प्रव० ९ द्वार। "कुन्थुस्स दामणी खलु।" ति०। दामन्याकारे स्त्रीणां सुलक्षणविशेषे च। जं० २ वक्ष०। प्रसवे, नयानयोश्च। दे० ना० ५ वर्ग ५२ गाथा।

दामन्नग–दामन्नक–पुं०। राजगृहनगरवास्तव्यस्य मणिकारश्रेष्ठिनः स्वनामख्याते पुत्रे, आव० ६ अ०। आ० चू०। (स च पूर्वभवे मत्स्यमांसप्रत्याख्यानपरिपालनाद् मणिकारश्रेष्ठिनः पुत्रत्वेनोत्पन्नः कर्मेण सागरपतिसार्थवाहस्य गृहस्वामी जातः। ततो

देवलोकं गत्वा ततश्च्युत्वा सेत्स्यतीति 'पच्चक्खाण' शब्दे उदाहरिष्यते)

दामदुग–दामद्विक–न० । मालाद्वये, भ० १६ श० ६ उ० । स्था० ।

दामलिवि–दामलिपि–स्त्री० । ब्राह्मया लिपेः सप्तदशे भेदे, स० १७ सम० ।

दामिली–द्राविडी–स्त्री० । द्रविडदेशोद्भवायां तद्भाषानिबद्धायां मन्त्रविशेषरूपायां विद्यायाम्, सूत्र० २ श्रु० २ अ० ।

दामोअर–दामोदर–पुं० । " नादियुज्योरन्येषाम् " ॥ ८ । ४ । ३२७ ॥ चूलिकापैशाचिकेऽप्यन्येषामाचार्याणां मतेऽनादौ वर्त्तमानस्य तृतीयो न । दामोदरो । प्रा० ४ पाद । जीर्णदुर्गस्योत्तरदिशि गिरिद्वारे पञ्चमवासुदेवस्य प्रतिमायाम्, ती० ४ कल्प ।

दाय–दाय–पुं० । दा–कर्मणि घञ् । " विभागोऽर्थस्य पित्र्यस्य, पुत्रैर्यत्र प्रकल्पते । " इत्युक्ते पित्रादिसम्बन्धवति तदुपरमे तत्सम्बन्धवति पुत्राऽऽदिभिर्विभजनीये द्रव्ये, विवाहकाले जामात्रादिभ्यो देये धने च । भावे घञ् । वाच० । पर्वदिवसाऽऽदौ दाने, ज्ञा० १ श्रु० २ अ० । कल्प० । सामान्यदाने च । न० । औ० । ज्ञा० । भ० । 'दो' भावे घञ् । खण्डने, 'दैप्' करणाऽऽदौ घञ् । अम्बुनि, स्थाने, लये, सोल्लुण्ठनवाक्ये च । वाच० ।

दायग–दायक–पुं० । दातरि, आचा० २ श्रु० १ चू० १ अ० ७ उ० । प्रश्न० ।

दायगदोस–दायकदोष–पुं० । ग्रहणैषणायाः षष्ठे दोषे, पिं० ।

अथ दायकद्वारं गाथाषट्केनाऽऽह–

बाले वुड्ढे मत्ते, उम्मत्ते वेविए य जरिए य ।
अंधेल्लए पगलिए, आरूढे पाउयाहिं च ॥ ६०३ ॥
हत्थेंदुनियलबद्धे, विवज्जए चेव हत्थपाएहिं ।
तेरासि गुव्विणी बा–लवच्छ जुंजंति घुसुघुसंती ॥६०४॥
नज्जंती य दलंती, कंडंती चेव तह य पीसंती ।
पिंजंती रुंवंती, कत्तंती पमद्दमाणी य ॥ ६०५ ॥
छक्कायवग्गहत्था, समणट्ठा निक्खिवित्तु ते चेव ।
ते चेवोगाहंती, संघट्टंताऽऽरभंती य ॥ ६०६ ॥
संसत्तेण य दव्वे–ण लित्तहत्था य लित्तमत्ता य ।
उव्वत्तंती साहा–रणं व दिंती य चोरियं ॥ ६०७ ॥
पाहुडियं व ठवंती, सपक्खवाया परं च उद्दिस्स ।
आभोगमणाभोगे–ण दलंती वज्जणिज्जा य ॥६०८॥

बालाऽऽदिका वर्जनीया इति क्रियायोगः । तत्र बालो जन्मतो वर्षाष्टकस्यान्तर्वर्ती १, वृद्धः सप्ततिवर्षाणां, मतान्तरापेक्षया षष्टिवर्षाणां वा उपरिवर्त्ती २, मत्तः पीतमदिराऽऽदिः ३, उन्मत्तो हसो, ग्रहगृहीतो वा ४, वेपमानः कम्पमानशरीरः ५, ज्वरितो ज्वररोगपीडितः ६, अन्धश्चक्षुर्विकलः ७, प्रगलितो गलत्कुष्ठः ८, आरूढः पादुकयोः काष्ठमयोपानहोः ९ ॥६०३॥ तथा हस्तेन्दुना करविषयकाष्ठबन्धनेन निगडेन च पादविषयलोहमयबन्धनेन बद्धः १०, हस्ताभ्यां पादाभ्यां वर्जितशिक्षत्वात् ११–१२, त्रैराशिको नपुंसकः १३, गुर्विणी आपन्नसत्त्वा १४, बालवत्सा स्तन्योपजीविशिशुका १५, भुञ्जाना भोजनं कुर्वती १६, घुसुघुसन्ती दध्यादि मथ्नती १७ ॥६०४॥ भर्जमाना चुल्ल्यां कम्बिल्लकाऽऽदि वनीपकादौ स्फोटयन्ती १८, दलन्तीऽरघट्टेन गोधूमाऽऽदि चूर्णयन्ती १९, कण्डयन्ती उदूखले तन्दुलाऽऽदिकं उद्धृत्यन्ती २०, पिंपन्ती शिलायां तिलामलकाऽऽदि प्रमृज्नन्ती २१, पिञ्जन्ती पिञ्जनेन रुताऽऽदिकं विरलं कुर्वती २२, रुम्यन्ती कार्पासं लोढिन्या लोठयन्ती २३, कृतन्ती कर्त्तनं कुर्वती २४, प्रमृद्नन्ती रुतं कराभ्यां पौनःपुन्येन विरलं कुर्वती २५ ॥६०५॥ षट्कायव्यग्रहस्ता षट्काययुक्तहस्ता २६, तथा श्रमणार्थं भिक्षामादाय तानेव षट्कायान् भूमौ निक्षिप्य ददती २७, तानेव षट्कायानवगाहमाना पादाभ्यां चालयन्ती २८, संघट्टयन्ती तानेव षट्कायान् शेषशरीरावयवेन च स्पृशन्ती २९, आरभमाणा तानेव षट्कायान् विनाशयन्ती ३० ॥६०६॥ ससक्तेन दध्यादिना द्रव्येण लिप्तहस्ता खरण्टितहस्ता ३१, तथा तेनैव द्रव्येण दध्यादिना संसक्तेन लिप्तमात्रा खरण्टितमात्रा ३२, उद्वर्तयन्ती महत्पिठरादिकमुद्वर्त्य तन्मध्याद्ददती ३३, साधारणं बहूनां सत्कं ददती ३४, तथा चोरितं ददती ३५ ॥६०७। अग्रिमकूराऽऽदिनिमित्तं मूलस्थाद्यामाकृष्य स्थगतिकाऽऽदौ मुञ्चन्ती ३६, सप्रत्यपाया संभाव्यमानापायदात्री ३७, तथा विवक्षितसाध्वव्यतिरेकेण परमन्यं साध्वादिकमुद्दिश्य हठात् स्थापितं तद्ददती ३८, तथा–आभोगेन साधूनामित्थं न कल्पत इति परिज्ञाप्यापथ्यमुद्गं ददती ३९, अथवा–अनाभोगेनाशुद्धं ददती ४०, सर्वसंख्यया चत्वारिंशद्दोषाः ॥ इह प्रक्रियाऽऽदिद्वारेषु–"संसज्जिमेहि वज्जं, अगारिहिएहिं पि गोरसदवेहिं ।" इत्यादिग्रन्थेन संसक्ताऽऽदिदोषाणामभिधानेऽपि यद् भूयोऽप्यत्र " संसत्तेण य दव्वे–ण लित्तहत्था य लित्तमत्ता य । (६०७)" इत्याद्यभिधानं, तदशेषदायकदोषाणामेकत्रोपदर्शनार्थमित्यदोषः ।६०८।

संप्रत्येतेषामेव दायकानामपवादमधिकृत्य वर्जनावर्जनविभागमाह–

एएसि दायगाणं, गहणं केसिं वि होइ भइयव्वं ।
केसिं चि अग्गहणं, तव्विवरीए भवे गहणं ॥ ६०९ ॥

एतेषां बालाऽऽदीनां दायकानां मध्ये केषाञ्चिन्मूलत आरभ्य पञ्चविंशतिसंख्यानां ग्रहणं भजनीयं कदाचित्तथाविधं महत्प्रयोजनमुद्दिश्य कल्प्यते, शेषकालं नेति । तथा केषाञ्चित्षट्कायव्यग्रहस्ताऽऽदीनां पञ्चदशानां हस्तादग्रहणं भिक्षायाः, तद्विपरीतेषु बालाऽऽदिविपरीतेषु दातरि भवेद् ग्रहणम् ।
संप्रति बालाऽऽदीनां हस्ताऽऽदेर्भिक्षाग्रहणे ये दोषाः संभवन्ति ते दर्शनीयाः, तत्र प्रथमतो बालमधिकृत्य दोषानाह–

का सड्ढि अप्पाहण, दिन्ने वच्चग्गहण पज्जंते ।
कंजियमग्गण दिन्ने, उड्डाहपओसचारन्नमा ॥ ६१० ॥

काचिदभिनवा श्राद्धिका श्रमणेभ्यो भिक्षां दत्वा इति निजपुत्रिकां (अप्पाहणं ति) संदिश्य नक्तं गृहीत्वा क्षेत्रं जगाम, गतायां तस्यां कोऽपि साधुसंघाटको भिक्षामागतः, तया च बालिकया तस्मै तन्दुलौदनो वितीर्णः, सोऽपि च संघाटकमुख्यः साधुस्तां बालिकां मुग्धतरामवगत्य लाम्पट्यतो भूयो भूय उवाच–पुनर्देहि पुनर्देहीति । ततस्तया समस्तोऽप्योदनो दत्तः । तत एवमुदित्य घृततक्रदध्यादिकमपि । अपराह्णे च समागता जननी, उपविश्य भोजनाय भणिता च निजपुत्रिका–देहि पुत्रि ! मह्यमोदनमिति । साऽवोचत्–दत्तः समस्तोऽप्योदनः साधवे । साऽब्रवीत्–शोभनं कृतवती, मुद्गान्मे देहि । सा प्राह–मुद्गा अपि साधवे सर्वे अदत्ताः । एवं यद् यत् किमपि सा

याचते, तत्तत्सर्वं साधवे दत्तमिति। ततः पर्यन्ते काञ्जिकमाश्रयति। बालिका भणति-तदपि साधवे दत्तमिति। ततः साऽभिनवश्राद्धिका रुष्टा सती पुत्रिकामेवमपवदति-किमिति त्वया सर्वं साधवे दत्तम्?। सा ब्रूते-स साधुर्नूयो नूयो याचते,ततो मया सर्वमदायि। ततः सा साधोरुपरि कोपाऽऽवेशमाविशन्ती सूरीणामन्तिकमगमत्। अचकथच्च सकलमपि साधुवृत्तान्तं, यथा- भवदीयः साधुरित्थमित्थं मत्पुत्रिकायाः सकाशात् याचित्वा याचित्वा सर्वमोदनाऽऽदिकमानीतवानिति। एवं तस्यां महता शब्देन कथयन्त्यां शब्दश्रवणतः प्रातिवेशिकजनोऽन्योऽपि च परम्परया नूयान्मिलितो, ज्ञातश्च सर्वैरपि साधुवृत्तान्तः,ततो विदधति तेऽपि कोपावेशिनः साधूनामवर्णवादम्-नूनममी साधुवेषविडम्बितश्चारभटा इव लुण्टाकाः, न साधुसद्वृत्ता इति। ततः प्रवचनावर्णवादापनोदाय सूरिभिस्तस्याः सर्वजनस्य च समक्षं स साधुर्निर्भर्त्स्योपकरणं च सकलमाकृष्य वसतेर्निष्काशितः, तत एवं तस्मिन्निष्काशिते श्राविकायाः कोपः शममगमत्। ततः सूरीणामुक्तवती-क्षमाश्रमण! भगवन्! मा मच्चित्तमेव निष्काश्यतां, क्षमस्वैकं ममापराधमिति, ततो भूयोऽपि यथावत्साधुः शिक्षित्वा प्रवेशितः सूत्रं सुगम, नवरम् (उड्डाहपओसचारभडा इति)लोके उड्डाहस्ततो लोकस्य प्रद्वेषभावतश्चारभटा इव लुण्टाका अमी न साधव इत्यवर्णवादः। यत एवं बालाद्विज्ञाग्रहणे दोषाः, ततो बालान्न ग्राह्यमिति।

संप्रति स्थविरदायकदोषानाह-

थेरो गलंतलालो, कंपणहत्थो पमिज्ज वा देंतो।
अपहु त्ति य अवियत्ते,एगयरे वा जुयलए वा ॥६११॥

अत्यन्तस्थविरो हि प्रायो गलल्लालो भवति , ततो देयमपि वस्तु लालया खरण्टितं भवतीति तद्ग्रहणे लोके जुगुप्सा। तथा-कम्पमानहस्तो भवति, ततो हस्तकम्पनवशतो तद् वस्तु भूमौ निपतति। तथा च-षड्जीवनिकायविराधना,तथा-स्वयं वा स्थविरो ददत् निपतेत, तथा च सति तस्य पीडा, भूम्याश्रितषड्जीवनिकायविराधना च। अपि च-प्रायः स्थविरो गृहस्याप्रभुरस्वामी भवति, ततस्तेन दीयमानेनाप्रभुरेष इति विचिन्त्य गृहे स्वामित्वेन नियुक्तस्य "अवियत्ते" प्रद्वेषः स्यात्, स च एकतरस्मिन् साधौ, यद्वा-उभयोरपीति।

मत्तोन्मत्तावाश्रित्य दोषानाह-

अवयासं भाणेज्जो, वमणं असुइ त्ति लोगगरिहा य।
पंतावणं च मत्ते, वमणविवज्जा य उम्मत्ते ॥ ६१२ ॥

मत्तः कदाचिन्मत्ततया साधोरालिङ्गनं विदधाति, भाजनं वा भिनत्ति। यद्वा-कदाचित् पीतमासवं ददानो वमति, वमँश्च साधुं, साधुपात्रं वा खरण्टयति। ततो लोके जुगुप्सा-धिगमी साधवोऽशुचयो ये मत्तादपीत्थं भिक्षां गृह्णन्तीति। तथा- कोऽपि मत्तो मदवशविह्वलतया-रे सुरम! किमत्राऽऽयात इति ब्रुवन् घातमपि विदधाति, तत एवं यतो मत्तेऽवयासाऽऽदयो दोषाः, तस्मान्न ततो ग्राह्यम। एत एवाऽऽलिङ्गनाऽऽदयो दोषा वमनवर्जा उन्मत्तेऽपि, तस्मात्ततोऽपि न ग्राह्यम्।

संप्रति वेपितज्वरितावाश्रित्य दोषानाह-

वेवण परिसामणया, पासे व लुभेज्ज भाणजेओ वा।
एमेव य जरियम्मि वि, जरसंकमणं व उड्डाहो ॥६१३॥

वेपितात्तु दातुः सकाशाद्भिक्षाग्रहणे देयवस्तुनः परिशाटनं भवति। यद्वा-पार्श्वे साधुर्भाजनाद् बहिः स वेपितो देयं वस्तु क्षिपेत्। यद्वा-येन स्वाङ्गादिना भाजनेन कृत्वा भिक्षामानयति तस्य भूमौ निपाते भेदः स्फोटनं स्यात्। एवमेव ज्वरितेऽपि दोषा भावनीयाः। किं च-ज्वरितादू ग्रहणे ज्वरसंक्रमणमपि साधोर्भवेत्, तथा जनोड्डाहो यथा-अहो! अमी आहारलम्पटाः, यदित्थं ज्वरपीडितादपि भिक्षां गृह्णन्तीति।

अन्धगलत्कुष्ठाद्याश्रित्य दोषानाह-

उड्डाह कायपडणं, अंधे जेओ य पासलुहणं वा।
तद्दोसी संकमणं, गलंतजिसाजिन्नदेहे य ॥ ६१४ ॥

अन्धाद्भिक्षाग्रहणे उड्डाहः, स चायम्-अहो! अमी औदारिका यदन्धादपि भिक्षां दातुमशक्नुवतो भिक्षां गृह्णन्तीति। तथा-अन्धोऽपश्यन् पादाद्यां भूम्याश्रितषड्जीवनिकायघातं विदधाति। तथा-लोष्ठाऽऽदौ स्खलितः सन् भूमौ निपतेत्। तथा-वसतिनिष्काशनाद्यर्थोत्पाटितहतगृहीतस्थालबाद्यिभाजनभङ्गः। तथा-स दत्तं वस्तु पार्श्वे भाजनबहिस्तात् प्रक्षिपेत्, अदर्शनात्। तस्माद्यन्धादपि न ग्राह्यम्। तथा कुष्ठदोषिणि, किंविशिष्टे?, इत्याह-गलितनृशंजिन्नदेहे। अत्राऽऽदरत्वाद् व्यत्ययेन पदयोजना। क्व चैवम्-नृशंमतिशयेन गलन् अर्द्धपक्वं रुधिरं च बहिर्वहन भिन्नश्च स्फुटितो देहो यस्य स तथा तस्मिन्, तदादिसंक्रमणे कुष्ठव्याधिसंक्रान्तिः स्यात्, तस्मात्ततोऽपि न ग्राह्यम्।

संप्रति पादुकाऽऽरूढादिचतुष्टयदोषानाह-

पाउयदुरूढपडणं, बद्धे परियाव असुइखिंसा य।
करछिन्नाऽसुइखिंसा,ते चिय पायम्मि पमणं च ॥६१५॥

पादुकाऽऽरूढस्य भिक्षादानाय प्रचलतः कदाचिद् दुःस्थितत्वात् पतनं स्यात्। तथा-बद्धे दातरि भिक्षां प्रयच्छति परितापो दुःखं तस्य भवेत्। तथा-(असुइ त्ति) तत्राप्युत्सर्गाऽऽदौ जङ्घेन तस्याशौचकरणासंभवात्, ततो भिक्षाग्रहणे लोके जुगुप्सा, यथा-अमी अशुचयो यदेतस्मादप्यशुचिपुत्रत्वात् भिक्षामाददत इति। एवं छिन्नकरेऽपि भिक्षां प्रयच्छति लोके जुगुप्सा, तथा-हस्ताभावेन शौचकरणासंभवात्। एतच्चोपलक्षणम्,तेन हस्ताभावे येन कृत्वा भाजने न भिक्षां ददाति। यद्वा-देयं वस्तु तस्य पतनमपि भवति। तथा च सति षड्जीवनिकायव्याघातः। एत एव दोषाः पादेऽपि छिन्नपादेऽपि दातरि द्रष्टव्याः, केवलं पादाभावेन तस्य भिक्षादानाय प्रचलनतः प्रायो नियमतः पतनं पातो भवेत्। तथा च सति भूम्याश्रितकीटिकाऽऽदिकसत्त्वव्याघातः।

संप्रति नपुंसकमधिकृत्य दोषानाह-

आयपरोभयदोसा,अभिक्खगहणम्मि खोभणे नपुंसे।
लोगदुगुंछा संका, परिसया नूणमेए वि ॥ ६१६ ॥

नपुंसके भिक्षां प्रयच्छति आत्मपरोभयदोषाः। तथाहि-नपुंसकाद् भिक्षाग्रहणेऽतिपरिचयो भवति, अतीव परिचयात् तस्य नपुंसकस्य साधोर्वा क्षोभो वेदोदयरूपः समुपजायते। ततो नपुंसकस्य साधुलिङ्गाऽऽद्यासेवनेन द्वयस्यापि मैथुनसेवया कर्मबन्धः, अभीक्ष्णग्रहणशब्दोपादानाच्च कदाचित् भिक्षाग्रहणे दोषाभावमाह, परिचयाभावात्। तथा लोके जुगुप्सा-यथैते नपुंसकादपि निकृष्टभिक्षामाददते इति, साधूनामप्युपरि जनस्य शङ्का भवति तस्माद् यथैतेऽपि साधवो नूनमीदृशा नपुंसकाः।

कथमत्यासन्नेन सह भिक्षाग्रहणव्याजतोऽतिपरिचयं विदधत इति ।

संप्रति गुर्विणीबालवत्से आश्रित्य दोषानुपदर्शयति--

गुव्विणि गब्भे संघट्टणा उ उट्ठंत-वेसमाणीए ।
बालाई मंसेंदुग, मज्जारादी विराहिज्जा ॥ ६१७ ॥

गुर्विण्या भिक्षादानार्थमुत्तिष्ठन्त्या भिक्षां दत्त्वा स्थाने उपविशन्त्याश्च गर्भस्य संघट्टनं संचलनं भवति, तस्मान्न ततो ग्राह्यम् । (बालाई मंसेंदुग त्ति) अत्राऽऽर्षत्वाद् व्यत्ययेन पदयोजना-बालमिति शिशुं भूमौ,मञ्चिकाऽऽदौ वा निक्षिप्य यदि भिक्षां ददाति,तर्हि तं बालं मार्जाराऽऽदयो विनाशकारमेयाऽऽदयो मांसेन्दुकाऽऽदि मांसखण्डं शशकशिशुरिति वा कृत्वा विराधयेत् विनाशयेत् । तथा--आहारखरण्टितौ शुष्कौ हस्तौ भवतः,ततो भिक्षां दत्त्वा पुनर्दाय्या हस्ताभ्यां गृह्यमाणस्य बालस्य पीडा भवेत्,ततो बालवत्सातोऽपि न ग्राह्यम् ॥६१७॥पि०॥

किं च-

थणगं पिज्जमाणी य, दारगं वा कुमारियं ।
तं निक्खिवित्तु रोयंतं, आहरे पाणभोयणं ॥ ४२ ॥

स्तनं पाययन्ती, कमित्याह-दारकं वा,कुमारिकाम् । वाशब्दस्य व्यवहितः संबन्धः । अत एव नपुंसकं वा । तद्दारकाऽऽदि, निक्षिप्य रुदद् भूम्यादौ आहरेत् पाननोजनम् । अत्रायं वृद्धसंप्रदायः-" गच्छवासी, जइ थणजीवी पियंतो णिक्खिवो, तो न गिण्हंति । रोवउ वा, मा वा; अह अन्नं पि आहारेइ, तो जति ण रोवइ,तो गिण्हंति, अह रोवइ,तो न गिण्हंति । अह अपियंतो णिक्खित्तो थणजीवी रोवइ,तओ ण गिण्हंति । अह न रोवति, तो गिण्हंति । गच्छनिग्गया पुण जाव थणजीवी ताव रोवउ वा,मा वा, पियंतओ वा, अपियंतओ वा ण गिण्हंति । जाहे अन्नं पि आहारेउं आढत्तो भवति, ताहे जइ पियंतओ, तो रोवउ वा,मा वा,ण गिण्हंति । अह अपियंतओ, तो जइ रोवइ, तो परिहरंति, अरोविए गेण्हंति । सीसो आह-को तत्थ दोसोऽत्थि ?। आयरिओ भणइ-तस्स निक्खिप्पमाणस्स खरेहिं हत्थेहिं खिप्पमाणस्स अधिरत्तणेण परितावणा दोसा,मज्जाराऽऽदि वा अवहरेज्ज । " इति सूत्रार्थः ॥४२॥

नं जवे जत्तपाणं तु, संजयाण अकप्पियं ।
दिंतियं पडिआइक्खे, न मे कप्पइ तारिसं ॥४३॥

तद्भक्तपानं स्वनन्तरोदितं संयतानामकल्पिकं, यतश्चैवमतो ददतीं प्रत्याचक्षीत, न मम कल्पते तादृशमिति सूत्रार्थः । ॥ ४३ ॥ दश० ५ अ० १ उ० ।

क्षुल्लानां मथन्तीं चाऽऽश्रित्य दोषानाह-

भुंजंती आयमणे, उदगं वोभी य झोगगरिहा य ।
घुसुघुसंती संसत्ते, करम्मि छिन्ने वहे रसगा ॥ ६१९ ॥

क्षुल्लाना दात्री भिक्षादानार्थमाचमनं करोति, आचमने च क्रियमाणे उदकं विराध्यते, अथ न करोत्याचमनं, तर्हि लोके बोट्टिरिति कृत्वा गर्हा स्यात् । तथा-"घुसुघुसंती" दध्यादि मथन्ती यदि तद् दध्यादिसंसक्तं मथ्नाति, तर्हि तेन संसक्तदध्यादिना छिन्ने करे तस्या भिक्षां ददत्याः,तेषां रसजीवानां वधो भवति, ततस्तस्या अपि हस्तान्न कल्पते ।

संप्रति पेषणाऽऽदिदोषानुपदर्शयति-

दगबीए संघट्टण, पीसणकंमदलणज्जणे डहणं ।
पिंजंतं रुवणाई, दिन्ने छिन्ने करे उदगं ॥ ६२० ॥

पेषणकण्डनदलनानि कुर्वतीनां हस्ताद्भिक्षाग्रहणे उदकबीजसंघट्टनं स्यात् । तथाहि-पिंषन्ती यदा भिक्षादानायोत्तिष्ठति तदा पिष्यमाणतिलाऽऽदिसत्काः काश्चिन्मक्षिकाः सचित्ता अपि हस्ताऽऽदौ लगिताः संभवन्ति, ततो भिक्षादानाय हस्ताऽऽदिप्रस्फोटने भिक्षां वा दत्त्वा भिक्षासंपर्कतस्तासां विराधना भवति । भिक्षां वा दत्त्वा भिक्षाऽव्यवखरण्टितौ हस्तौ जलेन प्रक्षालयेत् । ततः पेषणे उदकबीजसंघट्टना । एवं कण्डनदलनयोरपि यथायोगं भावनीयम् । तथा-व्रजने भिक्षां दत्त्वा वेलालगनेन कर्मिल्लक्षिप्तगोधूमाऽऽदीनां दहनं स्यात् । तथा-पिञ्जनं, रुञ्जनमादिशब्दात्कर्तनप्रमर्दने वा कुर्वती भिक्षां दत्त्वा भिक्षाऽव्यवखरण्टितौ हस्तौ जलेन प्रक्षालयेत्,ततस्तत्राप्युदकं विनश्यतीति न ततो भिक्षा कल्पते ।

सम्प्रति षट्कायव्यग्रहस्ताऽऽदिपञ्चकस्वरूपं गाथाद्वयेनाऽऽह-

लोणदगअगणिवत्थी, फलाइ मज्जाइ सजीय हत्थम्मि ।
पाएणोगाहणया, संघट्टण सेसकाएणं ॥ ६२१ ॥
खणमाणी आरंभइ, मज्जणे धोएज्ज सिंचए किंचि ।
छेयविसारणमाई, छिंदइ डहे फुरफुरंते ॥ ६२२ ॥

इह सा षट्कायव्यग्रहस्ता उच्यते, यस्या हस्ते सजीवं लवणमुदकमग्निर्वा युपुरितो वा वस्तिः,फलाऽऽदिकं बीजपूराऽऽदिकं मत्स्याऽऽदयो वा विद्यन्ते,ततः सा यद्येतेषां सजीवलवणाऽऽदीनामन्यतमादपि श्रमणभिक्षादानार्थं भूम्यादौ निक्षिप्तः,तर्हि न कल्पते। तथा-अवगाहना नाम यत्तैषां षड्जीवनिकायानां पादेन संघट्टनं शेषकायेन हस्ताऽऽदिना संमर्दनं संघट्टनमारभमाणा ॥६२१॥ कुश्यादिना भूम्यादि खनन्ती, अनेन पृथिवीकायाऽऽरम्भ उक्तः । यद्वा-मज्जन्ती शुद्धेन जलेन स्नाती। अथवा--धावन्ती शुद्धेनोदकेन वस्त्राणि प्रक्षालयन्ती । यदि वा-किञ्चिद् वृक्षवल्ल्यादि सिञ्चन्ती,एतेनाप्कायाऽऽरम्भो दर्शितः। उपलक्षणमेतत् । ज्वलयन्ती वा फूत्कारेण वैश्वानरं वस्त्यादिकं वा सचित्तवातभृतमित्यतः प्रक्षिपन्ती,एतेनाग्निवायुसमारम्भ उक्तः। तथा-शाकाऽऽदेः छेदविदारणे कुर्वती। तत्र छेदः पुष्पफलाऽऽदेः खण्डनं, विशरणं तेषामेव खण्डानां शोषणायाऽऽतपे मोचनम् । आदिशब्दात्तन्दुलमुद्गाऽऽदीनां शोधनाऽऽदिपरिग्रहः । तथा-छिन्दन्ती षष्ठान् त्रसकायान् मत्स्याऽऽदीन् "फुरफुरंते" इति पोस्फूर्यमाणान्, पीडयोद्वेल्लनित्यर्थः । अनेन त्रसकायाऽऽरम्भ उक्तः । इत्थं षड्जीवनिकायारभमाणाया हस्तान्न कल्पते ।

संप्रति षट्कायव्यग्रहस्तेतिपदस्य व्याख्याने मतान्तरमुपदर्शयति-

छक्कायवग्गहत्था, केई कोल्लाइ कन्नलइयाइ ।
सिद्धत्थगपुप्फाणि य, सिरम्मि दिन्नाइ वज्जेंति ॥६२३॥

केचिदाचार्याः षट्कायव्यग्रहस्तेतिवचनतः कोल्लाऽऽदीनि बदराऽऽदीनि, आदिशब्दात्करीराऽऽदिपरिग्रहः। (कन्नलइया इति)कर्णे पिनद्धानि। तथा-सिद्धार्थकपुष्पाणि शिरसि दत्तानि वर्जयन्ती ।

अन्ने भणंति दससु वि,एसणदोसेसु अत्थि तग्गहणं ।
तेण न वज्जं भणइ, न तु गहणं दायए गहणे ॥६२४॥

अन्ये त्वाचार्यदेशीया भणन्ति। यथा-दशस्वपि शङ्कितादिषु एषणादोषेषु मध्ये तद्ग्रहणं षड्कायव्यग्रहस्तेत्युपादानमस्ति, तेन कारणेन लोकाऽऽदियुक्तदेशविवक्षाग्रहणं न वर्ज्यं, तदेतत्पापीयो, यत आह-नन्वयते अत्रोत्तरं दीयते, न तु दायकग्रहणादेषणादोषमध्ये षट्कायव्यग्रहस्तेत्यस्य ग्रहणं विद्यते, तत्कथमुच्यते, न तद्ग्रहणमिति।

सम्प्रति संसक्तिमद्द्रव्यदाऽऽदिदोषानाह--

संसज्जिमम्मि देये, संसज्जिमदव्वलित्तकरमत्ते ।
संचारायत्तणओ, उक्खिप्पंते वि ते चेव ॥ ६२५ ॥

संसक्तिमति संसक्तिमद्द्रव्यवति, देये मण्डके,संसक्तिमता द्रव्येण स्निग्धः करो मात्रं वा यस्याः सा तथाविधा दात्री भिक्षां ददती करविलग्नान् सत्त्वान् हन्ति,तस्मात्सा वर्ज्यते। तथा-महतः पिठराऽऽदेरपवर्तने संचारः, सूत्रनात्सूत्रमिति संचारिमकीटिकामत्कोटाऽऽदिसत्त्वव्यापातः। इदमुक्तं भवति-महत् पिठरं यदा तदा वा नोत्पाट्यते, नापि यथा तथा वा संचार्यते, महत्त्वादेव, किं तु प्रयोजनविशेषोत्पत्तौ सकृत्, ततस्तदाश्रित्य प्रायः कीटिकाऽऽदयः सत्त्वाः संजनयन्ति। ततो यदा तत्पिठराऽऽदिकमुत्पाट्य किञ्चिद्ददाति तदा तदाश्रितजन्तुव्यापादनं प्राप्तं च दोषा उत्पाट्यमानेऽपि महति पिठराऽऽदौ, तथाऽपि हि भूयो निक्षेपणे हस्तसंस्पर्शतो वा संचारिमकीटिकाऽऽदिसत्त्वव्यापातः। अपि च-तथाभूतस्य महत उत्पाटने दात्र्याः पीडाऽपि भवति, तस्मान्न सकृदुत्पाटनेऽपि भिक्षा कल्पते।

सम्प्रति साधारणं स्तोकं वा ददत्या दोषानाह-

साहारणं बहूणं, तत्थ व दोसा जहेव अणिसट्ठे ।
चोरियए गहणाई, भयए मुएहाइ वा देंते ॥ ६२६ ॥

बहूनां साधारणं यदि ददाति, तर्हि तत्र यथा प्राक् अनिसृष्टे दोषा उक्तास्तथैव द्रष्टव्याः। तथा-चौर्येण मृतककर्मकरे स्नुषाऽऽदौ वा ददति ग्रहणाऽऽदयो ग्रहणबन्धनताडनाऽऽदयो दोषा द्रष्टव्याः, तस्मात्ततोऽपि न कल्पते। पिं०।

विशेषमाह-

गुव्विणीए उवन्नत्थं, विविहं पाणभोयणं ।
भुंजमाणं विवज्जिज्जा, भुत्तसेसं पमिच्छए ॥३७॥

गुर्विण्या गर्भवत्या उपन्यस्तमुपकल्पितम्। किं तदित्याह-विविधमनेकप्रकारं, पानभोजनं द्राक्षापानखण्डखाद्यकाऽऽदि। तत्र भुज्यमानं तथा विवर्जयेत्,मा भूत्तस्याल्पत्वेनाऽभिलाषाऽनिवृत्त्या गर्भपतनाऽऽदिदोष इति। भुक्तशेषं भुक्तोज्झितं, प्रतीच्छेत्, यत्र तस्या निकृत्तोऽभिलाष इति सूत्रार्थः ॥ ३६ ॥

किं च-

सिया य समणट्ठाए, गुव्विणी कालमासिणी ।
उट्ठिया वा निसीएज्जा, निसन्ना वा पुणुट्ठए ॥४०॥

स्याच्च कदाचित्तच्च,श्रमणार्थं साधुनिमित्तं, गुर्विणी पूर्वोक्ता, कालमासवती गर्भाधानान्नवममासवर्तीत्यर्थः। उत्थिता वा यथाकथञ्चित्रिधीदेत्रिषण्णा-ददामीति साधुनिमित्तम। निषण्णा वा स्वव्यापारेण पुनरुत्तिष्ठेत्-ददामीति साधुनिमित्तमेवेति सूत्रार्थः ॥ ४० ॥

तं भवे भत्तपाणं तु, संजयाण अकप्पियं ।
दिंतियं पडिआइक्खे, न मे कप्पइ तारिसं ॥४१॥

तद्भवेद् भक्तपानं तु, तथा निषीदनोत्थानाभ्यां दीयमानं संयतानामकल्पिकम्। इह च स्थविरकल्पिकानामनिषीदनोत्थानाभ्यां यथावस्थितया दीयमानं कल्पिकम। जिनकल्पिकानां त्वापन्नसत्त्वदा प्रथमदिवसादारभ्य सर्वथा दीयमानमकल्पिकमेवेति संप्रदायः। यतश्चैवमतो ददतीं प्रत्याचक्षीत,न मम कल्पते तादृशमित्येतत्पूर्ववदेवेति सूत्रार्थः ॥ ४१॥ दश० ५ अ० १ उ०। केषुचिद्दायकदोषेषु जीतकल्पानुसारेण निर्विकृतिकं प्रायश्चित्तम्। जीत०। प्रव०। आचा० उत्त०। ग०। ध०। ओघ०। दश०। पञ्चा०। आचा०। नि० चू०। स्था०। (नौगतोऽशनाऽऽदि ददाति इत्यत्र ' गोयरचरिया ' शब्दे तृतीयभागे ६६५ पृष्ठे उक्तम्)

दायगसुद्ध-दायकशुद्ध-त्रि०। दायकः शुद्धो यत्राऽऽशंसाऽऽदिदोषरहितत्वात्। दायकदोषरहिते, भव० १५ श०। दायकशुद्धं तु यत्र दाता औदार्याऽऽदिगुणान्वितः। विपा० २ श्रु० १ अ०।

दायण-दापन-न०। यथा गृहीतजलकपानयोर्निवेदने, प्रश्न० १ संव० द्वार।

दायणा-दापना-स्त्री०। पृच्छाप्रतिपृच्छस्यार्थस्य व्याख्याने,"दायणा तयत्थस्स वक्खाणं।"(२६३२) विशे०। आ०म०। आ०चू०।

दायव्व-दातव्य-त्रि०। दातुं योग्ये, आचा० २ श्रु० १ चू० १ अ० २ उ०।

दायाद-दायाद-पुं०। दायं विभजनीयधनमादत्ते। आ-दा-क। पुत्रे, सपिण्डे, बाच०। पितृपिण्डोदकदानयोग्ये, आचा० १ श्रु० २ अ० ३ उ०।

दायार-दायार-पुं०। दायाय दानार्थमियर्ति आगच्छन्तीति दायाराः। याचके, कल्प० १ अधि० ५ क्षण।

दार-दार-पुं०। द॰ द०। दारयन्ति विदारयन्ति पुरुषस्यान्तरङ्गगुणानिति दाराः। आतु०। दारयन्ति भ्रातृस्नेहम्, दृ-णिच्, अप्। पत्न्याम्, सा हि पत्युः भ्रातृस्नेहं भिनत्तीति लोकप्रसिद्धम। बाच०। कलत्रे, प्रव० ६ द्वार। आ० चू०। आव०। स्त्रियाम्, उत्त० २१ अ०।

द्वार-न०। प्रासादभवनदेवकुलाऽऽदीनां (रा०) प्रवेशमुखे, विशे०। प्रव०। भ०। दश०। प्रज्ञा०। नि० चू०। अनु०। रा०। (विजयाऽऽदीनां जम्बूद्वीपद्वाराणां वक्तव्यता 'जंबूदीव' शब्देऽस्मिन्नेव भागे १३७२ पृष्ठे उक्ता) (सूर्यर्क्षविमानद्वारवक्तव्यता 'सूरियाभ' शब्दे द्रष्टव्या) गृहाऽऽदिनिर्गमस्थाने, प्रतीहारे, उपाये, मुखे च। बाच०। कटिसूत्रे, दे०ना० ५ वर्ग ३८ गाथा।

दारग-दारक-पुं०। दृणाति भिनत्ति उदरं दृ-ण्वुल्। बाच०। बालके, व्य० २ उ०। दश०। रा०। आ० क०। सूत्र०। ज्ञा०। आ० म०। डिम्भदारककुमारकाणामल्पबहुत्वतरकालकृतो विशेषः। ज्ञा० १ श्रु० २ अ०। बालिकायाम्, स्त्री०। टाप्। अत इत्वम। बाच०। आ० म०। प्रश्न०। अन्त०। आचा०। नेदके, ग्रामशूकरे, पुं०। बाच०।

दारगकिंखिणी-द्वारकिङ्किणी-स्त्री०। द्वारस्थायां क्षुद्रघण्टिकायाम्, भाव० ४ अ०।

दारट्ठ-द्वारस्थ-पुं०। द्वारपाले, बृ० १ उ०।

दारडूंता-स्त्री०। देशी-पेटायाम्, दे० ना० ५ वर्ग ३८ गाथा।

दारपमियरग-द्वारप्रतिचरक-पुं०। अभ्यन्तरसूत्रस्थायिनि, प्र० व० ७१ द्वार।

दारपिंड–द्वारपिण्ड–पुं० । द्वारशाखायाम्, जी० १ वक्ष० । जी०।

दारपिहाण–द्वारपिधान–न० । द्वारकपाटस्थगने, (तत्र द्वारपिधाने दोषाः । कारणे तत्कर्तव्यता च 'वसह' शब्दे वक्ष्यते)

णो पिहे ण यावपंगुणे,
दारं सुण्णघरस्स संजए ।
पुट्ठेण उदाहरे वायं,
ण समुच्छे णो संथरे तणं ॥ १३ ॥

केनचिच्छयनाऽऽदिनिमित्तेन शून्यं गृहमाश्रितो भिक्षुः, तस्य गृहस्य द्वारं कपाटाऽऽदिना न पिदधीत न स्थगयेन्नापि तच्चालयेत् । यावत् (ण यावपंगुणे त्ति) नोद्घाटयेत्, तत्रस्थोऽन्यत्र वा केनचिद्भयाऽऽदिकं मार्गं वा पृष्टः सन् सावद्यां वाचं नोदाहरेत् न ब्रूयात् । आभिग्रहिको जिनकल्पिकाऽऽदिर्निरवद्यामपि न ब्रूयात् । तथा न समुच्छिन्द्यात् तृणानि कचवरं च प्रमार्जनेन नापनयेत्, नापि शयनार्थी कश्चिदाभिग्रहिकस्तृणाऽऽदिकं संस्तरेत्, तृणैरपि संस्तारकं न कुर्यात्, किं पुनः कम्बलाऽऽदिनाऽन्यो वा शुषिरतृणं न संस्तरेदिति ॥१३॥ सूत्र०१ श्रु० २ अ० २ उ०।

दारवाल–द्वारपाल–पुं० । द्वारारक्षके, आ० म० १ अ०१ खण्ड।

दारविलओग–द्वारविलयोग–पुं० । स्थगने, पं० व० ४ द्वार ।

दारमंतनेय–दारमन्त्रभेद–पुं०दाराणां कलत्राणामुपलक्षणत्वान्मित्राऽऽदीनां च मन्त्रो मन्त्रणं तस्य भेदः प्रकाशनं दारमन्त्रभेदः । स्वदारसन्तोषस्य द्वितीयव्रतस्य तृतीयेऽतिचारभेदे, प्रव० । अस्य चानुवादरूपत्वेन सत्यत्वाद् यद्यपि नातिचारत्वं घटते, तथाऽपि विश्रब्धभाषितार्थप्रकटनजनितलज्जाऽऽदितः कलत्रमित्राऽऽदेर्मरणाऽऽदिसंभवेन परमार्थतोऽस्यासत्यत्वात् कथञ्चिद्भङ्गरूपत्वेनातिचारतैव । रहस्यदूषणे हि रहस्यमाकाराऽऽदिना विज्ञायानधिकृत एव प्रकाशयति, इह तु मन्त्रयितैव स्वयं मन्त्रं भिनत्तीत्यनयोर्भेदः । प्रव० ६ द्वार ।

दारावती–द्वारावती–स्त्री० । सौराष्ट्रदेशप्रतिबद्धायां राजधान्याम्, प्रज्ञा० १ पद ।

दारिआ–देशी–वेश्यायाम्, दे० ना० ५ वर्ग ३७ गाथा ।

दारु–दारु–न० । काष्ठे, सूत्र० १ श्रु० २ अ० ३ उ० । स्था० । ज्ञा० । नि० चू० ।

दारुग–दारुक–पुं० । वासुदेवस्य धारिण्यां देव्यामुत्पन्ने पुत्रे, स चारिष्टनेमेरन्तिके प्रव्रज्य सिद्ध इत्यन्तकृद्दशानां तृतीयवर्गस्य द्वादशेऽध्ययने सूचितम् । अन्त० ३ वर्ग १ अ० । दारुकोऽनगारो वासुदेवस्य पुत्रो भगवतोऽरिष्टनेमिनाथस्य शिष्योऽनुत्तरोपपातिकोक्तचरित इति । स्था० ६ ठा० । कृष्णसारथौ च । ज्ञा० १ श्रु० १६ अ० । दारु-स्वार्थे कन् । देवदारुवृक्षे, वाच० । काष्ठे, न० । आचा० २ श्रु० ५ चू० ३ अ० । आ० म० । आव० । उत्त० ।

दारुघर–दारुगृह–न० । करपत्रस्फाटितदारुफलकमये गृहे, व्य० ४ उ०।

दारुण–दारुण–पुं० । 'द' भये ल्यनट् । दारयति विदारयति चित्तमिति दारुणः । चित्तके, वाच० । दारयन्ति जनमनांसि इति दारुणाः । विलपिताऽऽक्रन्दिताऽऽदिषु, उत्त० ६ अ० । रौद्ररसे, भयानकरसे, ज्ञाव० । रौद्रे च । ज्ञा० १ श्रु० २ अ० । प्रश्न० । दारयन्ति मन्दसत्त्वानां संयमविषयां धृतिमिति दारुणाः । भाषायाम्, स्त्री० । उत्त० २ अ० । भयानके, सूत्र० १ श्रु० २ अ० २ उ० । असह्ये, आचा० १ श्रु० ४ अ० ४ उ० । भयावहे, दुःसहे, भीषणे, भयहेतौ च । वाच० ।

दारुणज्झव–दारुणध्यव–पुं० । रौद्राध्यवसाये, वृ० ३ उ० ।

दारुणमति–दारुणमति–स्त्री० । रौद्रमतौ, प्रश्न० १ आश्र० द्वार।

दारुणविवाग–दारुणविपाक–पुं०। नरकाऽऽदिदुःखकारणत्वेन घोरोदये, पञ्चा० ८ विव० । रौद्रफले, पञ्चा० १५ विव० । तीव्रविपाके कर्मणि, षो० १ विव० ।

दारुणसहाव–दारुणस्वभाव–त्रि० । दारुणः क्रोधान्वितः स्वभावो यस्याऽसौ दारुणस्वभावः । क्रोधान्वितस्वभावे, व्य०१ उ०।

दारुदंडय–दारुदण्डक–न० । रजोहरणस्य काष्ठमयेऽल्पदण्डे, यत्र दारुमयस्य दण्डस्याग्रभागे छर्दिका दशिका बध्यन्ते तद्दारुदण्डकम् । वृ० ५ उ० ।

दारुपव्वय–दारुपर्वत–पुं० । दारुनिर्मापित इव पर्वतविशेषे, जी० ३ प्रति० ४ उ० । रा० ।

दारुपाय–दारुपात्र–न० । काष्ठमये पात्रे, स्था० ३ ठा० ३ उ० । आचा० ।

दारुय–दारुक–पुं० । वसुदेवस्य धारिण्यां जाते स्वनामख्याते पुत्रे, तद्भक्तव्यता गजसुकुमारस्येव । अन्त०२ श्रु० ३ वर्ग १ अ०।

दारुसंकम–दारुसंक्रम–पुं० । जले सेत्वादिकरणे, स्थले गर्ताऽऽदिके च । आचा० १ श्रु० ५ अ० १ उ० ।

दालण–दारुण–न० । विदारणे, प्रश्न० १ आश्र० द्वार ।

दालि–दालि–स्त्री० । मुद्गाऽऽदिद्विदले, प्रव० ३८ द्वार । उत्त० । ध० ।

दालिअ–देशी–चक्षुषि, दे० ना० ५ वर्ग ३८ गाथा ।

दालिद्द–दारिद्र्य–न० । "हरिद्राऽऽदौ लः" ॥ ८ । १ । २५४ ॥ इति असंयुक्तस्य रस्य लः । 'दालिद्दं ।' धनराहित्ये, प्रा० १ पाद ।

दालियंब–दाक्षिकाम्र–न० । दाक्ष्या मुद्गाऽऽदिमय्या निष्पादितेऽम्ले, रूपा० १ अ० ।

दालिमरसिय–दाडिमरासिक–त्रि० । दाडिमरससंसृष्टे, विपा० १ श्रु० ७ अ० ।

दाव–दाव–पुं० । दवानले, आव० ४ अ० ।

दावग्गि–दावाग्नि–पुं० । 'दवग्गि' शब्दार्थे, औ० ।

दावद्दव–दावद्रव–पुं० । समुद्भूतवृक्षविशेषे, ज्ञा० १ श्रु० १ अ० । स० । प्रज्ञा० । आव० । आ० चू० । ('आराहग' शब्दे द्वितीयभागे ३७७ पृष्ठेऽस्य वक्तव्यता)

दावर–द्वापर–न० । यदा प्रत्येकस्यापि प्रथमो भङ्गो न प्राप्यते तदा द्वापर इति । समयपरिभाषया द्वितीये, वृ० १ उ० ।

दावरजुग्म–द्वापरयुग्म–न० । द्वाभ्यामादित एव कृतयुग्माद्भ्यो परिवर्तिभ्यां यदपरं युग्मं कृतयुग्मादन्यत्तन्निपातनविधेर्द्वापरयुग्मे, न० । "जेणं रासीचउक्कएणं अवहारेणं अवहीरमाणे अ·

वहीरमाणे दुपज्जवसिए । से तं दावरजुम्मे ।" भ० १८ श० ४ उ० । द्विपरंपर्यवसिते राशौ च । स्था० ४ ठा० ३ उ० । सूत्र० ।

दावाणल–दावानल–पुं० । वनहुताशने, आव० ४ अ० ।

दावारय–ह्रदकवारक–न० । जलपात्रे, ज्ञ० १५ श० ।

दास–दास–पुं० गृहदास्याः सञ्जाते,कुर्भिक्षाऽऽदिष्वर्थाऽऽदिना वा क्रीते,ऋणाऽऽदिव्यतिरेके वा अवरुद्धे,ग० १ अधि० । ध० । दासा दासीपुत्राऽऽदयः । स्था० ३ ठा० १ उ० । सूत्र० । जी० । कृ० । भृतकविशेषे, क्षा० १ श्रु० २ अ० । चेटके, औ० । प्रश्न० । रा० । पं० भा० । पं० चू० ।

गब्भे कीते अणए, दुब्भिक्खे सावराहरुद्धे वा ।
समणाण व समणीण व, न कप्पती तारिसे दिक्खा ॥३८५॥

गब्भे त्ति ओगालिदासो, किणित्ता दासो कतो, रिणं अदेंतो दासत्तणेण पइट्ठो, दुब्भिक्खे ठाति दासत्तणेण पइट्ठो, किमवि कारणे अवराधा दंडं अदिंतो रण्णा दासो कतो,वंदिगो णिरुद्धो दविणं अदेंतो दासो कतो । एते दिक्खेतुं ण कप्पंति । नि० चू० ११ उ० ।

दासचेडग–दासचेटक–पुं० । दासस्य भृतकविशेषस्य चेटकः कुमारकः दासचेटकः । अथवा-दासश्चासौ चेटकश्चेति दासचेटकः । दासकुमारे, क्षा० १ श्रु० २ अ० ।

दासत्त–दासत्व–न० । गृहदासीपुत्रतायाम्, भ०१२ श०७ उ० ।

दासपोरुस–दासपौरुष–न० । चेटकचेटीपतिप्रमुखाऽऽदेके, उ-त्त० ३ अ० ।

दासरहि–दासरथि–पुं० । दशरथापत्ये, " तेयाउणे य दासरही रामो सीयालक्खणसंजुत्तो पिउआणाए वनवासं गओ ।" सौ० २५ कल्प ।

दासवाय–दासवाद–पुं० । दासोऽयमार्य इति वार्तायाम, स्था० ६ ठा० ।

दासी–दासी–स्त्री० । चेटिकायाम, प्रश्न० २ आश्र० द्वार । औ० । रा० । दास्यो घटयोषितः सर्वोपसदाः, ताभिरपि सह सम्पर्कं परिहरेत् । सूत्र० १ श्रु० ४ अ० १ उ० ।

दासीखब्भिया–दासीकर्वटिका–स्त्री० । स्थविराऽऽदासाग्निगंतस्य गोदासगणस्य चतुर्थशाखायाम्, कल्प० ८ क्षण ।

दासीचोर–दासीचौर–पुं० । चेटीचौरे, प्रश्न० ३ आश्र० द्वार ।

दाह–दाह–पुं० । " हो घोऽनुस्वारात्" ॥ ८ । १ । २६४ ॥ इति सूत्रे क्वचिदननुस्वारादिति वचनाद् हस्य घः 'दाहो । दाघो ।' प्रा० १ पाद । बाह्ये संतापे, आ० म० १ अ० २ खण्ड । भस्मीकरणे, नि० चू० १ उ० । रोगभेदे, जी० ३ प्रति० ४ उ० । विपा० । क्षा० । आ० म० । " अहोत्था विउलो दाहो, सव्वगत्तेसु पत्थिवा ! । " (१९) उत्त० २० अ० । गात्रसन्तापे च । वाच० ।

दाहवक्कंतिय–दाहव्युत्क्रान्तिक–त्रि० । दाहो व्युत्क्रान्त उत्पन्नो यस्याऽसौ दाहव्युत्क्रान्तः, स एव दाहव्युत्क्रान्तिकः । दाहोत्पन्नौ, भ० ६ श० ३३ उ० । क्षा० ।

दाहा–दाहा–स्त्री० । प्रहरणविशेषे, क्षा० १ श्रु० १० अ० ।

दाहिण–दक्षिण–त्रि० । " दुःखदक्षिणतीर्थे वा " ॥ ८ । २ । ७२ ॥ षसु संयुक्तस्य हः । 'दाहिणो । दक्खिणो ।' प्रा० २ पाद । अवामभागस्थे, वाच० । सू० प्र० । आचा० ।

दाहिणगामुय–दक्षिणगामुक–पुं० । दक्षिणस्यां दिशि गमनशीले, सूत्र० २ श्रु० २ अ० ।

दाहिणड्ढभरह–दक्षिणार्द्धभरत–पुं० । भरतक्षेत्रस्य दक्षिणार्द्धे, कल्प० १ क्षण ।

दाहिणड्ढभरहकूड–दक्षिणार्द्धभरतकूट–न० । दक्षिणार्द्धभरतनाम्नो देवस्याऽऽवासभूते कूटे, जं० ४ वक्ष० ।

दाहिणड्ढमाणुस्सखेत्त–दक्षिणार्द्धमनुष्यक्षेत्र–पुं० दक्षिणार्द्धमनुष्यक्षेत्रभवेषु, " दाहिणड्ढमाणुस्सखेत्ताणं आवट्टिं चंदा पभासिंसु वा, पभासंति वा, पभाविस्संति वा, आवट्टिं सूरिया तविंसु वा, तवंति वा, तविस्संति वा । " स० ६५ सम० ।

दाहिणड्ढलोगाहिवई–दक्षिणार्द्धलोकाधिपति–पुं० । लोकस्यार्द्धमर्द्धलोको दक्षिणो योऽर्द्धलोको दक्षिणार्द्धलोकस्तस्य योऽधिपतिः । तस्मिन्, उपा० २ अ० । कल्प० ।

दाहिणत्त–दक्षिणत्व–न० । सरलत्वे, स० ३५ सम० ।

दाहिणदारिय–दक्षिणद्वारिक–न० । दक्षिणं द्वारं येषामस्ति तानि दक्षिणद्वारिकाणि । अश्विन्यादिषु सप्तनक्षत्रेषु,स्था० ७ ठा० । दक्षिणदिशि येषु गच्छतः शुभं भवति । स० ७ सम० ।

दाहिणपच्चच्छिमा–दक्षिणपश्चिमा–स्त्री० । नैर्ऋत्यकोणे, रा० । स्था० ।

दाहिणभुय–दक्षिणभुज–पुं० । दक्षिणहस्ते, रा० । सू० प्र० ।

दाहिणवाय–दक्षिणवात–पुं० । दक्षिणस्याः दिशः समागच्छति वाते, प्रज्ञा० १ पद । स्था० ।

दाहिणा–दक्षिणा–स्त्री० । दक्षिणस्यां दिशि, स्था० ६ ठा० ।

दाहिणायण–दक्षिणायन–पुं० । न० । रवेः कर्कसंक्रमादनन्तरं षण्मासाऽऽत्मके समये, सू० प्र० १० पाहु० ।

दाहिणावत्त–दक्षिणाऽऽवर्त–पुं० । अनुकूलप्रवृत्तावावर्ते,स्था० ४ ठा० २ उ० ।

दाहिणिल्ल–दाक्षिणात्य–त्रि० । दक्षिणदिग्भवमात्रे, स्था० ४ ठा० २ उ० । प्रज्ञा० ।

दि–त्वया–तृतीया । "भे दि०-॥८।३।१३६॥ इत्यादिना त्वया इत्यस्य स्थाने दि इत्यादेशः । प्रा० ३ पाद ।

दिअ–द्विज–पुं० । द्विर्जायते जन-मा वृत्तौ संस्कारेण वाराद्यत्वम् । वाच० । " सर्वत्र लवरामचन्द्रे " ॥ ८ । १ । ७६ ॥ इति संयुक्तस्याधः स्थितस्य रकारस्य लुक् । द्विजः । दिओ । प्रा० १ पाद । " द्वित्योरुत् " ॥ ८ । १ । ९४ ॥ इति सूत्रे क्वचिदेति वचनाद् न उत्वम् । दिओ । प्रा० १ पाद । ब्राह्मणे, ब्राह्मणाऽऽदिवर्णत्रये, "जन्मना जायते शूद्रः,संस्कारैर्द्विज उच्यते।" दन्ते, अण्डजे विहगाऽऽदौ, तुम्बुरुवृक्षे च । वाच० ।

दिप–पुं० । द्वाभ्यां मुखशुण्डाभ्यां पिबति । पा-कः । हस्तिनि, वाच० ।

दिअंबर-दिगम्बर-पुं० । शिवे, नग्ने, आर्हतभेदे, वाच० । साधुभेदे, आ० म० । ही० । भाचा० ।

दिअंबरदंसण-दिगम्बरदर्शन-न० । दिगम्बराणां शास्त्रे, आ० म० १ अ० १ खण्ड ।

दिअज्झ-देशी-सुवर्णकारे, दे० ना० ५ वर्ग ३६ गाथा ।

दिअधुत्त-देशी-काके, दे० ना० ५ वर्ग ४१ गाथा ।

दिअर-देवर-पुं० । देव अरच् । "एत इज्जा वेदना-चपेटा-देवर-केसरे" ॥ ८ । १ । १४६ ॥ इति एत इत्वम । 'दिअरो । देवरो ।' प्रा० १ पाद । पत्युः कनिष्ठभ्रातरि, वाच० ।

दिअलिअ-देशी-मूर्खे, दे० ना० ५ वर्ग ३६ गाथा ।

दिअसिअ-देशी-सदाभोजने, अनुदिने च । दे० ना० ५ वर्ग ४० गाथा ।

दिअह-दिवस-पुं० । दीव्यत्यत्र दिव-असच् किच्च । षष्टिदण्डाऽऽत्मके समये, "दिअहा जंति झडप्पकहिँ, पमहिँ मणोरह पच्छि । " प्रा० ४ पाद ।

दिअहम-दिवस-पुं० । षष्टिदण्डाऽऽत्मके समये, "जे महु दिण्णा दिअहडा, दइए पवसंतेण । ताण गणंतिएँ अङ्गुलिउ, जज्जरिआ उ नहेण ॥ " प्रा० ४ पाद । प्रवसता चलता दयितेन ये मम दिवसा दत्तास्तान् गणयन्त्या ममाङ्गुल्यो नखेन जर्जरिताः । प्रा० द्वि० ४ पाद ।

" नाडीषष्टिमितस्तत्र, सावनो दिवसः स्मृतः ।
त्रिंशद्भागोऽर्करात्रेस्तु, दिवसः सौर उच्यते ॥ १ ॥
चान्द्रस्तु तिथ्यवच्छिन्नो, भौमो भूपरिधेर्मतः । "

इत्युक्तेषु सावनाऽऽदिषु दिनेषु च । वाच० । " नमरा एत्थु बिन्नम्बडइ, केवि दिअहमा बिल्लडु । " प्रा० ४ पाद ।

दिअहुत्त-देशी-पूर्वाह्णभोजने, दे० ना० ५ वर्ग ४० गाथा ।

दिआहम-देशी-भासपक्षिणि, दे० ना० ५ वर्ग ३६ गाथा ।

दिइ-दृति-स्त्री० । इ-क्तिन् । जलाऽऽधारे चर्ममये भाजने, ज्ञा० १ श्रु० १८ अ० । अनु० ।

दिइआ-दृतिका-स्त्री० । चर्मनिर्मितोदकपात्रे, मत्स्यभेदे च । वाच० । अनु० ।

दिक्काण-ऊष्काण-पुं० । मेषाऽऽदीनां लग्नानां दशांशाऽऽत्मके विभवे, " कूणदिक्काणलोगेसुं, उत्तमठं तु कारए । एवं लग्गाणि जाणिज्जा, दिक्काणेसु ण संसओ ॥१॥" ज्यो० प० ।

दिक्खकाल-दीक्षाकाल-पुं० । योगकाले, आ० म० १ अ० २ खण्ड ।

दिक्खभाव-दीक्षाभाव-पुं० । प्रव्रज्याया भावे, पञ्चा० १८ विव० ।

दिक्खा-दीक्षा-स्त्री० । दीक्षणं दीक्षा । प्रव्रज्यायाम्, ओघ० । स्था० ।

साम्प्रतं ज्ञानत्रयभावाभावयोर्दीक्षाऽधिकारित्वानधिकारित्वप्रतिपादनायाऽऽह-

अस्मिन् सति दीक्षाया, अधिकारी तत्त्वतो भवति सम्यक् ।
इतरस्य पुनर्दीक्षा, वसन्तनृपसन्निभा ज्ञेया ॥ १ ॥

अस्मिन् ज्ञानत्रये, सति विद्यमाने, दीक्षाया विरतिरूपायाः, अधिकारी अधिकारवान्, शास्त्रनयोदितत्वेन तत्त्वतः परमार्थतो भवति, सम्यक् पुमान्, इतरस्याऽनधिकारिणः, पुनर्दीक्षा व्रतरूपा, वसन्तनृपसन्निभा विडम्बनाप्राया चैत्रमासपरिहासकृतराजसन्निभा मुख्यनृपदीक्षावत्कार्याकरणेन ज्ञेया ज्ञातव्या ॥ १ ॥

अधुना दीक्षायाः निरुक्तमुपदर्शयन् ज्ञानिन एव तां नियमयन्नाह-

श्रेयोदानादशिव-क्षपणाच्च सतां मतेह दीक्षेति ।
सा ज्ञानिनो नियोगाद्, यथोदितस्यैव साध्वीति ॥ २ ॥

श्रेयोदानाच्छ्रेयः सुन्दरं तस्य दानं वितरणं तस्मात्, अशिवं प्रत्यवायस्तत्क्षपणाच्च तन्निरसनाच्च, सतां मुनीनां मताऽभिप्रेता, इह प्रवचने, दीक्षेति प्रागुक्ता । इत्येवमनया निरुक्तप्रक्रियया, सा दीक्षा, ज्ञानिनो ज्ञातवतो, नियोगान्नियोगेन, यथोदितस्यैवाधिकारिण एव, साध्वीति निरवद्या वर्तते ॥ २ ॥

ननु च यदि ज्ञानिन एव नियमेन साध्वी दीक्षा, ततः कथं पूर्वोक्तज्ञानत्रयविकलानां माषतुषप्रभृतीनां समये सा श्रेयसी श्रूयत इत्याशङ्कयाऽऽह-

यो निरनुबन्धदोषा-च्छ्राद्धोऽनाभोगवान् वृजिननीरुः ।
गुरुभक्तो ग्रहरहितः, सोऽपि ज्ञान्येव तत्फलतः ॥ ३ ॥

य एवंविधो निरनुबन्धदोषाच्छ्राद्धः । निरनुबन्धो व्यवच्छिन्नसन्तानो दोषो रागाऽऽदिर्निरनुबन्धश्चासौ दोषश्च तस्माच्छ्राद्धः श्रद्धावान् । यस्तु सानुबन्धदोषाभिरूपकर्मबन्धकर्मबन्धनात् कथञ्चिच्छ्राद्धो भवति, स नेह गृह्यते । अनाभोगवान् अनाभोगोऽपरिज्ञानमात्रमेव केवलं ग्रन्थार्थोऽऽदिषु सूक्ष्मबुद्धिगम्येषु स विद्यते यस्य स तथा वृजिनं पापं तस्माद्भीरुर्वृजिनभीरुः संसारविरक्तत्वेन । गुरवः पूज्यास्तेषु भक्तो गुरुबहुमानात् । ग्रह आग्रहो मिथ्याऽभिनिवेशस्तेन रहितो ग्रहरहितोऽनेन सम्यग्दर्शनवत्त्वमस्याऽऽवेदयति, सोऽपि य एवमुक्तविशेषणवान्, ज्ञान्येव ज्ञानवानेव । तत्फलतो ज्ञानफलसंपन्नत्वेन, ज्ञानस्याऽपि ह्येतदेव फलं संसारविरक्तत्वगुरुभक्तत्वाऽऽदि, तदस्याऽपि विद्यत इति कृत्वा ॥ ३ ॥

कथं पुनर्ज्ञानफलं माषतुषाऽऽदेर्गुरुबहुमानमात्रेण तथाविधज्ञानविकलस्य सन्मार्गगमनाऽऽदीत्याशङ्कयाऽऽह-

चक्षुष्मानेकः स्या-दन्योऽन्यस्तन्मतानुवृत्तिपरः ।
गन्तारौ गन्तव्यं, प्राप्नुत एतौ युगपदेव ॥४॥

चक्षुरमलमनुपहतं विद्यते यस्य स चक्षुष्मानेकः कश्चित् स्याद्भवेत्पुरुषो मार्गगमनप्रवृत्तः, अन्धो दृष्टिविकलोऽन्यस्तदपरः, केवलं मार्गानुसारितया विशिष्टविवेकसंपन्नत्वेन च । तन्मतानुवृत्तिपरस्तस्य चक्षुष्मतो मतमभिप्रायो वचनं वा तन्मूत्रं तदनुवृत्तिपरस्तदनुवर्त्तनप्रधानः श्रेयानुमतत्यजनपरित्यागेन । एतौ द्वावपि चक्षुष्मदन्धौ गन्तारौ गमनशीलावनवरतप्रयाणकवृत्त्या गन्तव्यं विवक्षितनगराऽऽदि । प्राप्नुत एतौ युगपदेवैककालमेव । इदमुक्तं भवति-चक्षुष्मान् पुरस्ताद् व्रजत्यन्धस्तु पृष्ठतः, एवमनयोर्व्रजतोरेकपदन्यास एवान्तरं नापरं महत्, यदि वा तदपि समानपदन्यासयोः साहित्येन बाहुल्यन्यायेनैव व्रजतोर्नास्तीत्येवमेककालाप्राप्तव्यनगराऽऽदिस्थानप्राप्तद्वयोरपीति । यथैवमेतयोर्नान्तरं तथा गुरुभाषतुषकल्पशिष्ययोर्ज्ञान्यज्ञानिनोः फलं प्रति सन्मार्गगमनप्रवृत्तयोर्मार्गपर्यन्तप्राप्तौ मुक्त्यवस्थायां न किञ्चिदन्तरमिति गर्भार्थः ॥ ४ ॥

एवं समानफलत्वं ज्ञान्यज्ञानिनोः प्रतिपाद्य दीक्षाऽर्हत्वं विशेषज्ञानासमन्वितस्यापि दर्शयति-

यस्यास्ति सत्क्रियायां-मित्थं सामर्थ्ययोग्यताऽविकला ।
गुरुभावप्रतिबन्धाद्, दीक्षोचित एव सोऽपि किल ॥ ८ ॥

यस्य विशिष्टज्ञानरहितस्याप्यस्ति विद्यते सत्क्रियायां सदाचारे, इत्थमनेन प्रकारेण, सामर्थ्ययोग्यता सामर्थ्येन समानफलसाधकत्वरूपेण योग्यताऽविकला परिपूर्णा, गुरुषु धर्माऽऽचार्याऽऽदिषु भावप्रतिबन्धाद् ज्ञानतः प्रतिबद्धत्वेन हेतुना दीक्षोचित एव दीक्षायोग्य एव प्रस्तुतः, किलेत्याप्ताऽऽगमवादः, यतः संसारविरक्त एवास्या अधिकारी शेषगुणवैकल्येऽपीत्युक्तम् ॥८॥

इदानीं दीक्षायाः समानफलतया देयत्वमभिदधानो विषमफलस्य चाऽदेयत्वमुपदर्शयन्निदमाह-

देयाऽस्मै विधिपूर्वं, सम्यक्तन्त्रानुसारतो दीक्षा ।
निर्वाणबीजमेषा-त्यनिष्टफलदाऽन्यथाऽत्यन्तम् ॥ ६ ॥

देया दातव्याऽस्मै योग्याय विधिपूर्वं विधानपूर्वं सम्यगवैपरीत्येन तन्त्रानुसारतः शास्त्रानुसारतो दीक्षा व्रतरूपा निर्वाणस्य बीजं मोक्षसुखयोर्हेतुत्वेन । एवेति दीक्षैषाऽनिष्टफलदा विपर्ययफला संसारफलाऽन्यथाऽयोग्याय दीयमानाऽत्यन्तमतिशयेनेति ॥६॥

का पुनरियं दीक्षेत्याह-

देशसमग्राऽऽख्येयं, विरतिर्न्यासोऽत्र तद्वति च सम्यक् ।
तन्नामाऽऽदिस्थापन-मिदुतं स्वगुरुयोजनतः ॥७॥

देशाऽऽख्या, समग्राऽऽख्या चेयं दीक्षा विरतिरुच्यते, देशविरतिदीक्षा, सर्वविरतिदीक्षा चेत्यर्थः । न्यासो निक्षेपोऽत्र दीक्षायां व्रतन्यास इत्यर्थः । सा विद्यते यस्य तद्वांस्तस्मिंस्तद्वति च पुरुषे देशदीक्षावति, सर्वदीक्षावति च सम्यग् समीचीनं संगतम् । तन्नामाऽऽदिस्थापनं तेषां प्रवचनप्रसिद्धानां नामाऽऽदीनां चतुर्णां स्थापनारोपणमित्युतं उपद्रवरहितमनुपप्लवमिति यावत् । कथं तन्नामाऽऽदिस्थापनम् ? स्वगुरुयोजनतः स्वगुरुनिरात्मीयपूज्यैर्योजनं संबन्धनमौचित्येन यत्र तन्नामाऽऽदीनां ततः सकाशात् ॥ ७ ॥

कथं पुनर्विशिष्टनामन्यासस्य स्वगुरुभिः प्रसादीकृतस्य दीक्षानिमित्तत्वमिति मन्यमानं परं प्रत्याह-

नामनिमित्तं तत्त्वं, तथा तथा चोद्यृतं पुरा यदिह ।
तत्स्थापना तु दीक्षा, तथेनान्यस्तदुपचारः ॥ ८ ॥

नामनिमित्तं नामहेतुकं तद्भावस्तत्त्वं नामप्रतिपाद्यगुणाऽऽत्मकस्वम् कृतप्रशान्ताऽऽदिनामतः प्रशमाऽऽदिस्वरूपोपलम्भात् । तन्नामनि च तद्गुणस्मरणाऽऽद्युपलब्धेस्तथा तथा चोद्यृतं तेन तेनस्वरूपेणोद्यृतमुद्गूढं कृतनिर्वाहम् । पुरा पूर्वं, यद्यस्मादिह प्रवचने, मुनिभिः तत् स्थापना तु तस्यैव नाम्नः स्थापना तु स्थापनैव नामन्यास एव दीक्षा प्रस्तुता, तत्त्वेन परमार्थेनान्यस्तदुपचारोऽन्यक्रियाकलापस्तदुपचारस्तस्या दीक्षाया उपचारो वर्त्तते, विद्योपचारात् ॥ ८ ॥

कस्मात्पुनर्नामाऽऽदिन्यासे महानादरः क्रियत इत्याशङ्क्याऽऽह-

कीर्त्यारोग्यध्रुवपद-संप्राप्तेः सूचकानि नियमेन ।
नामाऽऽदीन्याचार्याः, वदन्ति तत्त्वेषु यतितव्यम् ॥ ९ ॥

कीर्त्तिः श्लाघा, आरोग्यं नीरुजत्वं, प्राक्तनसहजौत्पातिकरोगविरहेण, ध्रुवं स्थैर्यं भावप्राधान्यनिर्देशस्य । पदं स्थानं विशिष्टपुरुषावस्थारूपमाचार्यत्वाऽऽदि । कीर्त्तिश्चारोग्यं च ध्रुवं च पदं च कीर्त्यारोग्यध्रुवपदानि, तेषां संप्राप्तिरपूर्वज्ञानः, तस्या अप्राप्तिपूर्विकायाः प्राप्तेः सूचकानि गमकानि नियमेनावश्यतया, नामस्थापनाद्रव्यभावरूपाण्याचार्याः पूज्या वदन्ति ब्रुवते । तत्तस्मात्तेषु नामाऽऽदिषु यतितव्यं यत्नो विधेयः। इह चेदं तात्पर्यमवसेयम्-अन्वर्थेनाम्नो हि कीर्त्तेनमात्रादेव शब्दार्थप्रतिपत्तेर्विदुषां प्राकृतजनस्य च मनःप्रसादात्कीर्त्तिरापद्यते । यथा सुधर्मस्वामिभद्रबाहुस्वामिप्रभृतीनामुत्तमपुरुषाणां प्रवचने कीर्त्तिरुदपादि । स्थापनाऽप्याकारवती रजोहरणमुखवस्त्रिकाऽऽदिधारणद्वारेण भावगर्भप्रसूत्या आरोग्यमुपजनयति, द्रव्यमप्याचाराऽऽदिश्रुतं सकलसाधुक्रिया चाभ्यस्यमाना व्रतस्थैर्योपपत्तये प्रभवति, भावोऽपि सम्यग्दर्शनाऽऽदिरूपः पूर्वोत्पादावाप्तये संपद्यते । न हि विशिष्टज्ञानमन्तरेणाऽऽगमोक्तविशिष्टपदावाप्तिर्भवति । अथवा सामान्येनैव कीर्त्यारोग्यमोक्षसंप्राप्तेः सूचकानि सर्वाण्येव नामाऽऽदीनीति ॥ ९ ॥

किमिति दीक्षाप्रस्तावे नामाऽऽदिषु यतितव्यमित्याशङ्क्याऽऽह-

तत्संस्कारादेषा, दीक्षा संपद्यते महापुंसः ।
पापविषापगमात् खलु, सम्यग्गुरुधारणायोगात् ॥१०॥

तत्संस्काराज्जामाऽऽदिसंस्कारादेषा द्विविधा दीक्षा व्रतरूपा संपद्यते संजायते महापुंसो महापुरुषस्य, न ह्यमहापुरुषा व्रतधारिणो भवन्ति । पापं विषमिव पापविषं, तस्यापगमात् खल्वपगमादेव, पापविषयोर्वाऽपगमात् । विषापहारिणी दीक्षेति केषाञ्चित् प्रसिद्धिस्तदनुरोधादिदमुक्तम् । पापविषापगमादेव दीक्षेति सम्यगवैपरीत्येन गुरुश्च धारणा च गुरुधारणे, ताभ्यां योगः संबन्धस्तस्माद् गुरुधारणायोगात् । गुरुयोगात्पापापगमो, धारणायोगादेव विषापगम इति ॥ १० ॥

दीक्षा सम्पद्यते महापुंस इत्युक्तं तत्सम्पन्नौ सर्वविरतस्य यद्भवति तदाह-

संपन्नायां चास्यां, लिङ्गं व्याचक्षते समयविदः ।
धर्मैकनिष्ठतैव हि, शेषत्यागेन विधिपूर्वम् ॥ ११ ॥

संपन्नायां च संजातायां चास्यां दीक्षायां लिङ्गं लक्षणं व्याचक्षते कथयन्ति समयविदः आगमवेदिनः, धर्मैकनिष्ठतैव हि धर्मतत्परतैव हि, शेषत्यागेन धर्मादन्यः शेषस्तत्यागेन तत्परिहारेण, विधिपूर्वं शास्त्रोक्तविधानपुरःसरं यथालब्धत्वेवं शेषत्यागेन धर्मैकनिष्ठता सेवनीया नान्यथेति भावः ॥

अस्यामेव सर्वविरतिदीक्षायां क्रान्त्यादियोजनामार्याद्वयेन दर्शयति-

वचनक्रान्तिरिहाऽऽदौ, धर्मक्रान्त्यादिसाधनं भवति ।
शुद्धं च तपोनियमाद्, यमश्च सत्यं च शौचं च ॥१२॥
आकिञ्चन्यं मुख्यं, ब्रह्मापि परं सदागमविशुद्धम् ।
सर्वं शुद्धमिदं खलु, नियमात्संवत्सरादूर्ध्वम् ॥ १३ ॥

वचनक्रान्तिरागमक्रान्तिरिह दीक्षायामादौ प्रथमं धर्मक्रान्त्यादिसाधनं भवति । आदिशब्दाद्धर्मभावाऽऽदिग्रहः धर्मक्रान्त्यादीनां साधनं वचनक्रान्तिर्भवति, तत्पूर्वकत्वात्तेषाम्, शुद्धं चाकि-

इदं च तपो द्वादशभेदं नियमान्नियमेन यमश्च संयमश्च, सत्यं चाविसंवादनाऽऽदिरूपं शौचं च बाह्याभ्यन्तरभेदम् ॥ १२ ॥

अकिञ्चनस्य भाव आकिञ्चन्यं, मुख्यं निरुपचरितम्, ब्रह्मापि ब्रह्मचर्यमपि, परं प्रधानम्, सदागमविशुद्धं सदर्थप्रतिपादक आगमः सदागमः,तेन विशुद्धं निर्दोषं,सर्वं पूर्वोक्तं दशविधमपि क्षान्त्यादिशुक्लमिदं खलु निरतिचारमिदमेव नियमादितरव्यावृत्या शुक्लस्याऽशुक्लनिवर्तकत्वात्संवत्सरादूर्ध्वं क्रियमाणत्यागेन संवत्सरकालात्ययेन शुक्लं भवतीति ॥ १३ ॥

अस्यैव दीक्षावतः पूर्वोत्तरकालभाविगुणयोगमाह-

ध्यानाध्ययनाभिरतिः, प्रथमं पश्चात्तु भवति तन्मयता ।
सूक्ष्मार्थालोचनया, संवेगः स्पर्शयोगश्च ॥ १४ ॥

ध्यानं धर्म्यं शुक्लं च स्थिराध्यवसानरूपं, यथोक्तम-"एकालम्बनसंस्थस्य, सदृशप्रत्ययस्य च । प्रत्ययान्तरनिर्मुक्तः, प्रवाहो ध्यानमुच्यते ॥ १ ॥" अध्ययनं स्वाध्यायपाठः,ध्यानं चाध्ययनं च ध्यानाध्ययने । अध्ययनपूर्वकत्वेऽपि ध्यानस्याहपाश्रुतरत्वादभ्यर्हणीयत्वाच्च पूर्वनिपातः, तयोरभिरतिराशक्तिरनवरतप्रवृत्तिः प्रथममादौ दीक्षासंपन्नस्य, पश्चात्तु पश्चात्पुनर्भवति । तन्मयता तन्मयत्वं तत्परता, सूक्ष्माश्च तेऽर्थाश्च बन्धमोक्षाऽऽदयः, तेषामालोचना,तया सूक्ष्मार्थाऽऽलोचनया, संवेगो मोक्षाऽभिलाषः स्पर्शयोगश्च स्पर्शस्तत्त्वज्ञानं तेन योगः संबन्धः संभवतीति ॥ १४ ॥

स्पर्शयोगश्चेत्युक्तं तत्र स्पर्शलक्षणमाह-

स्पर्शस्तत्त्वाऽऽप्तिः, संवेदनमात्रमविदितं त्वन्यत् ।
बन्ध्यमपि स्यादेतत्, स्पर्शस्त्वक्षेपतत्फलदः ॥ १५ ॥

स्पृश्यतेऽनेन वस्तुनस्तत्त्वमिति स्पर्शः, स च कीदृगित्याह-तत्त्वाप्तिस्तस्य तस्य वस्तुनो जीवाऽऽदेस्तत्त्वं स्वरूपं तस्याऽऽप्तिरुपलम्भो ज्ञानं स्पर्श उच्यते,संवेदनमात्रं वस्तुस्वरूपपरामर्शशून्यमविदितं त्वन्यत् कथञ्चिद्वस्तुग्राहित्वेऽपि न विदितं वस्तु तदित्यविदितमुच्यते,बन्ध्यमपि विफलमपि स्यादेतत् संवेदनमात्रं, स्पर्शस्तु स्पर्शः पुनरक्षेपतत्फलदोऽक्षेपेणैव तत् स्वसाध्यं फलं ददातीत्ययमनयोः स्पर्शसंवेदनयोर्विशेष इति ॥ १५ ॥

संवेगस्पर्शयोगेन दीक्षावान् यत् करोति, तदाह-

व्याध्यभिभूतो यद्व-न्निर्विण्णस्तेन तत्क्रियां यत्नात् ।
सम्यक्करोति तद्व-दीक्षित इह साधुसच्चेष्टाम् ॥१६॥

व्याधिना कुष्ठाऽऽदिनाऽभिभूतो ग्रस्तो यद्वद्यथा, निर्विण्णो निर्वेदं ग्राहितस्तेन व्याधिना तत्क्रियां तच्चिकित्सां व्याधिप्रतीकारकयां यत्नाद्यत्नेन सम्यक्करोति विधत्ते, तद्वत्तथा दीक्षित इह प्रक्रमे साधूनां सच्चेष्टा विनयाऽऽदिरूपा तां साधुसच्चेष्टाम् ॥१६॥ षो०१२ विव० । अथ बृहत्पं० शुभविजयगणिकृतव्रक्षस्तदुत्तरं च-यथा तीर्थकृद्भिः सह ये दीक्षां गृह्णन्ति ते किं तीर्थकृत्कृतपाठोच्चाराऽऽदिकं कुर्वन्युत भिक्षमिति प्रश्ने,उत्तरम्-तीर्थकरैः सार्द्धं दीक्षाग्रहणं कुर्वद्भिः स्वयं दक्षत्वात्तत्तत्क्षेत्रकालाऽऽद्यनुसारेण तपस्याग्रहणं क्रियते,न तु तीर्थकरवत्,प्रथमतीर्थकृता सार्द्धं तु तीर्थकरवत् पाठोच्चारं कुर्वन्तीति ज्ञायते ॥१८७ प्र० । सेन० २ उल्ला० । सिद्धाऽऽदिसंक्रान्तित्रयमध्ये तयाऽवर्तिकामासमध्ये च कानि कानि धर्मकार्याणि शुद्ध्यन्ति,कानि नेति प्रश्ने,उत्तरम्-दिक्षाप्रतिष्ठाऽऽदिकं न शुद्ध्यत्यन्यानि तु शुद्ध्यन्तीति, चतुर्मासकमध्येऽपि उपस्थापनामाल्लारोपणाऽऽदि विना धर्मकार्याणि सर्वाणि शुद्ध्यन्ति, कारणवशात् तदपि विजयदशम्यनन्तरं शुद्ध्यतीति योगोपधानव्रतोच्चाराऽऽदीनां तु दिनशुद्धिरेव विलोक्या न मासवर्षाऽऽदि । १२४ प्र० । सेन० २ उल्ला० । ('पव्वज्जा' शब्दे दीक्षाविधिर्वक्ष्यते) सर्वसत्त्वाभयप्रदानेन भावसत्रे,पं० व० १ द्वार । योग,आ० म० १ अ० २ खण्ड । प्रव० । पञ्चा० । (नपुंसकाऽऽदीनां दीक्षितानां परिष्ठापना ' परिट्ठवणा ' शब्दे वक्ष्यते)

दिक्खागुण-दीक्षागुण-पुं० । जिनदीक्षाधर्मे, जिनसाध्वागमभक्तिप्रभावनाऽऽदौ च । पञ्चा० २ विव० । षो० ।

दिक्खादावण-दीक्षादापन-न० । प्रौढोत्सवैः सुताऽऽदीनां प्रव्राजने, प्रव० । तथैव प्रौढोत्सवैः सुताऽऽदीनामादिशब्दात्पुत्रभ्रातृभ्रातृव्यस्वजनस्नुहृत्परिजनाऽऽदीनां दीक्षादापनम्,उपलक्षणत्वाद्व्रतस्थापनाकारणं च, श्रूयतेऽपि कृष्णचेटककूणिकयोः स्वापत्यविवाहनेऽपि नियमवतोः स्वसुताऽऽदीनामन्येषां च यावच्चापुत्राऽऽदीनां प्रौढोत्सवैः प्रव्राजना,इयं च महाफला । यतः-" ते धन्ना कयपुन्ना,जणओ जणणी अ सयणवग्गो अ । जेसिं कुलम्मि जायइ, चारित्तधरो महापुत्तो " ॥ १ ॥ इति । (६७९ ध० २ अधि० ।

दिक्खावयपरिणय-दीक्षावयःपरिणत-त्रि० । दीक्षावयोभ्यां सम्प्राप्ते, ध० २ अधि० ।

दिक्खाविहाण-दीक्षाविधान-न० । दीक्षाविधौ,पञ्चा० २विव० ।

दिक्खिऊण-प्रेक्षित्वा-अव्य० । दृष्ट्वेत्यर्थे, ती० ३ कल्प ।

दिक्खियजिणोमाण-दीक्षितजिनावमान-अधिवासितजिनप्रोक्षणके, पञ्चा० ७ विव० ।

दिक्खोवयार-दीक्षोपकार-पुं० । भव्यसत्त्वस्य दीक्षादानेनानुग्रहे, पञ्चा० १८ विव० ।

दिगंबर-दिगम्बर-पुं० । ' दिअंबर ' शब्दार्थे, आ० म० १ अ० १ खण्ड ।

दिगायरिय-दिगाचार्य-पुं० । दिगाचार्यशब्देन किमुच्यत इति प्रश्ने, उत्तरम्-सचित्ताचित्तमिश्रवस्त्वनुज्ञाया दिगाचार्य इति योगशास्त्रप्रकाशवृत्तौ प्रायश्चित्ते वैयावृत्यमिति श्लोकव्याख्याने दिगाचार्यशब्दार्थो ज्ञेय इति ।१३२ प्र० । सेन० १ उल्ला० ।

दिगिंछा-देशी-बुभुक्षायाम्, आचा० १ श्रु० ६ अ० ४ उ० । स० । ज्ञ० ।

दिगिंछापरिगय-दिगिञ्छपरिगत-त्रि० । क्षुधाव्याप्ते, उत्त० २ अ० । आ० चू० ।

दिगिंछापरिसह-दिगिञ्छापरि (री) षह-पुं० । इह च दिगिञ्छेति देशीवचनेन बुभुक्षोच्यते,सैवात्यन्तव्याकुलत्वहेतुरत्यसंयमभीरुतया आहारपरिपाकाऽऽदिवाञ्छाविनिवर्त्तनेन परीति सर्वप्रकारेण सह्यत इति परीषहः । क्षुत्परीषहे, उत्त० २ अ० । भ० । स० । ('खुहा' शब्दे तृतीयभागे ७४५ पृष्ठे व्याख्यातम्)

दिगिंछापरीसह-दिगिञ्छापरीषह-पुं० । ' दिगिंछापरिसह ' शब्दार्थे, उत्त० २ उ० ।

दिगु-द्विगु-पुं० । संख्यापूर्वे समासभेदे, " संख्यापूर्वो द्विगुः " ॥ २ । १ । ५२ ॥ इति पाणिनिवचनम् । अनु० ।

से किं तं दिगुसमासे ?। दिगुसमासे अणेगविहे पण्णत्ते । तं जहा-तिण्णि कडुगाणि तिकडुगं, तिण्णि मधुराणि तिमधुरं,

तिण्णि गुणाणि तिगुणं, तिण्णि पुराणि तिपुरं, तिण्णि सराणि तिसरं, तिण्णि पुक्खराणि तिपुक्खरं, तिण्णि बिंदुआणि तिबिंदुअं, तिण्णि पहाणि तिपहं, पंच नदीओ पंचनदि, सत्त गया सत्तगयं, नव तुरंगा नवतुरंगं, दस गामा दसगामं, दस पुराणि दसपुरं । सेत्तं दिगुसमासे ।

"संख्यापूर्वो द्विगुः" ॥ २ । १ । ५२ ॥ त्रीणि कटुकानि समाहृतानि त्रिकटुकम् । एवम्-त्रीणि मधुराणि समाहृतानि त्रिमधुरं, पत्राऽऽदिगणे दर्शनादिह पञ्चमूलीत्यादिषु स्त्रियामीप्रत्ययो न भवति, एवं शेषाण्यप्युदाहरणानि भावनीयानि । अनु० ।

दिग्घ–दीर्घ–पुं० । द–घञ् । घस्य नेत्वम् । "दीर्घे वा" ॥ ८ । २ । ९१ ॥ दीर्घशब्दे शेषस्य घस्य उपरि पूर्वो वा भवति । "दिग्घो । दीहो ।" प्रा० २ पाद । शालललाङ्के, उष्ट्रे, द्विमात्रे स्वरवर्णे च । भाग्यते, वाच० । स्थूले च । त्रि० । जं० २ वक्ष० ।

दिच्छा–दित्सा–स्त्री० । दातुमिच्छायाम्, अनु० ।

दिट्ठ–दिष्ट–न० । दिश–क्तः । भाग्ये, "न दिष्टमिष्टं कुरुते" इति माघः । काले, पुं० । उपदिष्टे, वाच० । प्रतिपादिते च । त्रि० । नयो० ।

दृष्ट–न० । दृश–क्तः । स्वपरसमयैः वीक्षिते, वाच० । दर्शने, बृ० १ उ० । नि० चू० । स्था० । अवलोकिते, पञ्चा० ७ विव० । प्रज्ञा० । दर्श० । प्रश्न० । आव० । स्था० । सूत्र० । व्य० । उत्त० । उपलब्धे, हा० ३१ अष्ट० । अभिमते, अनु० । लौकिके च । त्रि० । वाच० ।

आगमतत्त्वं ज्ञेयं, तद्दृष्टेष्टाविरुद्धवाक्यतया ॥ (१०)

आगमतत्त्वं ज्ञेयं भवति, तत्कथं ज्ञेयम् ? । दृष्ट प्रत्यक्षानुमानप्रमाणोपलब्धानिष्टमागमेन स्ववचनैरेवाभ्युपगतं, ताभ्यामविरुद्धानि वाक्यानि यस्मिन्नागमतत्त्वे तद् दृष्टेष्टाऽविरुद्धवाक्यम्, तद्भावस्तया । (१०) षो० १ विव० ।

दिट्ठंत–दृष्टान्त–पुं० । दृष्टोऽन्तो नाशोऽवसानं यस्मिन् । मरणे, वाच० । दृष्टमर्थमन्तं नयतीति दृष्टान्तः, अतीन्द्रियप्रमाणदृष्टं संवेदनं निष्ठां नयतीत्यर्थः । दश० १ अ० । आ० म० । दृष्टोऽन्तः परिच्छेदो विवक्षितः साध्यसाधनयोः संबन्धस्याविनाभावरूपस्य प्रमाणेन यत्र ते दृष्टान्ताः । प्रज्ञा० ३० पद । साध्यस्योपमाभूते, नं० । उदाहरणे, विशे० ।

दृष्टान्तफलम्-

पुव्वमनिन्ना जिन्ना, य वारिया कहमियाणि कप्पंति ? ।
सुण आहरणं चोयग !, ण कमति सव्वत्थ दिट्ठंतो ॥१९८॥

पूर्वसूत्रे भवद्भिरनिन्नानि भिन्नानि च वारितानि प्रतिषिद्धानि, कथमिदानीमस्मिन् सूत्रे कल्पन्ते ?, इति भणत, न युक्तं पूर्वापरव्याहतमीदृशं वक्तुमिति भावः । अत्राऽऽचार्यः प्राऽऽह-शृणु निशमय, आहरणं दृष्टान्तम्, हे नोदक ! यथा कल्पते । अत्र नोदको गुरुवचनमनाकर्ण्य दुर्विदग्धतादर्पाऽऽध्मातः प्रतिवक्ति-आचार्य ! न सर्वत्राप्यर्थे दृष्टान्तः क्रमते, दृष्टान्तमन्तरेणाप्यर्थप्रतिपत्तेः ।

तथाहि-

जइ दिट्ठंता सिद्धी, एवमसिद्धी उ आणगेज्झाणं ।
अह ते तेसि पसिद्धी, पसाहए किं नु दिट्ठंता ॥१९९॥

यदि दृष्टान्तादर्थानां सिद्धिस्तर्हि आज्ञाग्राह्याणां निगोदभव्याजन्यादीनामर्थानामसिद्धिः प्रसज्येत, अथ ते तवाऽऽज्ञया तेषां प्रसिद्धिस्ततः किं नु रितिं वितर्के । किमेवं दृष्टान्ततोऽर्थसिद्धिः क्रियते ।

किं चान्यत्-

कप्पम्मि अकप्पम्मि य, दिट्ठंता जेण होंति अविरुद्धा ।
तम्हा न तेसि सिद्धी, विहि अविहि विसोवजोग इव ॥२०॥

दृष्टान्तेन यद्यदात्मन इष्टं तत्सर्वं यदृच्छया प्रसाध्यते, तथा कल्प्यते हिंसा कर्तुं विधिनेति प्रतिज्ञा, निष्प्रत्यपायत्वादिति हेतुः । यथा विधिना विषोपभोगदृष्टान्तः । अस्य च भावना यथा-विधिना मन्त्रपरिगृहीतं विषं खाद्यमानमदोषाय भवति, अविधिना पुनः खाद्यमानं महान्तमनर्थमुपढौकयति । एवं हिंसाऽपि विधिना विधीयमाना न दुर्गतिगमनाय प्रभवति, अविधिना तु विधीयमाना दुर्गतिगमनायोपदिष्टा, यतश्चैवमतो निष्प्रत्यपायत्वात् कल्प्यते कर्तुं हिंसेति निगमनम् । एवं कल्पोऽकल्पो वा येन कारणेन दृष्टान्ता अविरुद्धा भवन्ति, कल्प्यमप्यकल्प्यम्, अकल्प्यमपि कल्प्यम् । यदृच्छया दृष्टान्तबलेन क्रियत इति भावः । तस्मान्न तेभ्यो दृष्टान्तेभ्योऽर्थानां सिद्धिर्भवति । गाथायां पञ्चम्यर्थे षष्ठी । विधिनाऽविधिना च विषोपभोग इवेति ।

इत्थं नोदकेन स्वपक्षे स्थापिते सति सूरिराह-

असिद्धी जइ नाएण, नायं किमिह उच्चते ? ।
अह ते नायतो सिद्धी, नायं किं पमिसिज्झए ? ॥२०१॥

यदि ज्ञातेन दृष्टान्तेनार्थानामसिद्धिः, ततस्त्वया ज्ञातं विषदृष्टान्त इह किमुच्यते किमेवमभिधीयते ? । अथ ते ज्ञाततो दृष्टान्तसिद्धिः, ततोऽस्माभिरुच्यमानं ज्ञातं किं प्रतिषिध्यते ? ।

किं च-

अंधकारो पदीवेण, रुज्झए न उ अन्नहा ।
तहा दिट्ठंतिओ भावो, तेणेव उ विसुज्झति ॥ ५०२ ॥

अन्धकारशब्दस्य पुंनपुंसकलिङ्गत्वाद् यथाऽन्धकारो रात्रौ प्रदीपेनैव वर्ज्यते विशोध्यते, न तु नैवान्यथा । विशोधिते च तस्मिन् घटाऽऽदिकं वस्तु परिस्फुटमुपलभ्यते, तथाऽत्रापि दार्ष्टान्तिको दृष्टान्तग्राह्यो भावः पदार्थोऽन्धकारवदतिगहनोऽपि तेनैव दृष्टान्तेन प्रदीपकल्पेन विशुद्ध्यते निर्मलीभवति, विशुद्धे च तस्मिन् परिस्फुटा विवक्षितार्थप्रतिपत्तिर्भवतीति दृष्टान्तोपदर्शनमत्र क्रियते । किञ्च-सौख्यप्रीणिता वयं, स्ववाक्येनैव जगता यद् दृष्टान्तेनार्थप्रसाधनमभ्युपगतम्, अस्माकमपि त्वदीय एव दृष्टान्तः सूत्रस्य सार्थकत्वं प्रसाधयिष्यति । बृ० १ उ० २ प्रक० । आ० चू० । नि० चू० । विशे० । आव० । (न दृष्टान्तमात्रादर्थसिद्धिरिति 'पलंब' शब्दे वक्ष्यते) शास्त्रे, अलङ्कारोक्ते अलङ्कारभेदे च । वाच० ।

दिट्ठंतपरिणाम–दृष्टान्तपरिणाम–पुं० । दृष्टान्तेन श्रद्धापयितव्ये, व्य० ।

दृष्टान्तपरिणामकमाह-

परोक्खं हेउगं अत्थं, पच्चक्खेण उ साहियं ।
जिणेहिं एस अक्खातो, दिट्ठंतपरिणामगो ॥ ५७ ॥

परोक्षं, हेतुकं हेतुना लिङ्गेन गम्यं हेतुकम्, अर्थं प्रत्यक्षेण प्रत्यक्षप्रसिद्धेन दृष्टान्तेन साध्यन् आत्मबुद्धावारोपयन् यो वर्तते एव दृष्टान्तपरिणामको जिनैराख्यातो, दृष्टान्तेन विवक्षितमर्थं परिणामयत्यात्मबुद्धावारोपयतीति दृष्टान्तपरिणामक इति व्युत्पत्तेः। व्य० १० उ०।

दिट्ठंताभास–दृष्टान्ताऽऽभास–पुं० । दुष्टदृष्टान्ते, रत्ना० ।

अथ दृष्टान्ताऽऽभासान् भासयन्ति–

साधर्म्येण दृष्टान्ताऽऽभासो नवप्रकारः ॥ ५८ ॥

दृष्टान्तो हि प्राग् द्विप्रकारः प्रोक्तः, साधर्म्येण वैधर्म्येण च । ततस्तदाभासोऽपि तथैव वाच्य इति साधर्म्यदृष्टान्ताऽऽभासस्तावत् प्रकारतो दर्शितः ॥ ५८ ॥

प्रकारानेव कीर्तयन्ति–

साध्यधर्मविकलः १, साधनधर्मविकलः २, उभयधर्मविकलः ३, संदिग्धसाध्यधर्मा ४, संदिग्धसाधनधर्मा ५, संदिग्धोभयधर्मा ६, अनन्वयः ७, अप्रदर्शितान्वयः ८, विपरीतान्वयश्च ९ इति ॥ ५९ ॥

इतिशब्दः प्रकारपरिसमाप्तौ, एतावन्त एव साधर्म्यदृष्टान्ताऽऽभासप्रकारा इत्यर्थः ॥ ५९ ॥

क्रमेणामूनुदाहरन्ति–

तत्रापौरुषेयः शब्दोऽमूर्तत्वाद् दुःखवदिति साध्यधर्मविकलः (१) ॥ ६० ॥

पुरुषव्यापाराभावे दुःखानुत्पादेन दुःखस्य पौरुषेयत्वात् । तत्रापौरुषेयत्वसाध्यस्यावृत्तेरयं साध्यधर्मविकल इति । (१) ॥ ६० ॥

तस्यामेव प्रतिज्ञायां तस्मिन्नेव हेतौ परमाणुवदिति साधनधर्मविकलः (२) ॥ ६१ ॥

परमाणौ हि साध्यधर्मोऽपौरुषेयत्वमस्ति, साधनधर्मस्त्वमूर्तत्वं नास्ति, मूर्तत्वात्परमाणोः (२) ॥ ६१ ॥

कलशवदित्युभयधर्मविकलः (३) ॥ ६२ ॥

तस्यामेव प्रतिज्ञायां तस्मिन्नेव च हेतौ कलशदृष्टान्तस्य पौरुषेयत्वान्मूर्तत्वाच्च साध्यसाधनोभयधर्मविकलता (३) ॥ ६२ ॥

रागाऽऽदिमानयं वक्तृत्वात्रेवदत्तवदिति संदिग्धसाध्यधर्मा (४) ॥ ६३ ॥

देवदत्ते हि रागाऽऽदयः सदसत्त्वाभ्यां संदिग्धाः, परचेतोविकाराणां परोक्षत्वाद्रागाऽऽद्यन्वयनिश्चायिलिङ्गादर्शनाच्च(४)॥६३॥

मरणधर्माऽयं रागाऽऽदिमत्त्वान्मैत्रवदिति संदिग्धसाधनधर्मा (५) ॥ ६४ ॥

मैत्रे हि साधनधर्मो रागाऽऽदिमत्त्वाऽऽख्यः संदिग्धः (५) ॥६४॥

नायं सर्वदर्शी रागाऽऽदिमत्त्वान्मुनिविशेषवदिति संदिग्धोभयधर्मा (६) ॥ ६५ ॥

मुनिविशेषे सर्वदर्शित्वरागाऽऽदिमत्त्वाऽऽख्यौ साध्यसाधनधर्मौ संदिह्येते, तदन्वयनिश्चायिलिङ्गादर्शनात् (६) ॥ ६५ ॥

रागाऽऽदिमान्निबन्धनः पुरुषो वक्तृत्वादिष्टपुरुषवादित्यनन्वयः (७) ॥ ६६ ॥

यद्यपीष्टपुरुषे रागाऽऽदिमत्त्वं च वक्तृत्वं च साध्यसाधनधर्मौ दृष्टौ, तथाऽपि यो यो वक्ता स स रागाऽऽदिमानिति व्याप्त्यसिद्धेरनन्वयत्वम् (७) ॥ ६६ ॥

अनित्यः शब्दः कृतकत्वाद् घटवदित्यप्रदर्शितान्वयः (८) ॥ ६७ ॥

अत्र यद्यपि वास्तवोऽन्वयोऽस्ति तथाऽपि वादिना वचनेन न प्रकाशित इत्यप्रदर्शितान्वयत्वम् । यद्यप्यत्र वस्तुनिष्ठो न कश्चिद्दोषः, तथाऽपि परार्थानुमाने वचनगुणदोषानुसारेण वक्तृगुणदोषौ परीक्षणीयाविति नवत्वस्य वाचनिकं दुष्टत्वम् । एवं विपरीतान्वयाप्रदर्शितव्यतिरेकविपरीतव्यतिरेकेष्वपि ऊह्यम । (८) ॥ ६७ ॥

अनित्यः शब्दः कृतकत्वात्, यदनित्यं तत्कृतकं घटवदिति विपरीतान्वयः (९) ॥ ६८ ॥

प्रसिद्धानुवादेन ह्यप्रसिद्धं विधेयं; प्रसिद्धं चात्र कृतकत्वं हेतुत्वेनोपादानात्; अप्रसिद्धं त्वनित्यत्वं साध्यत्वेन निर्देशाद्; इति प्रसिद्धस्य कृतकत्वस्यैवानुवादसर्वनाम्ना यच्छब्देन निर्देशो युक्तः, न पुनरप्रसिद्धस्यानित्यत्वस्य; अनित्यत्वस्यैव च विधिसर्वनाम्ना यच्छब्देन परामर्श उपपन्नो, न तु कृतकत्वस्य (९) ॥ ६८ ॥

अथ वैधर्म्यदृष्टान्ताऽऽभासमाहुः–

वैधर्म्येणाऽपि दृष्टान्ताऽऽभासो नवधा ॥ ६९ ॥

सानेव प्रकारानुद्दिशन्ति–

असिद्धसाध्यव्यतिरेकः १, असिद्धसाधनव्यतिरेकः २, असिद्धोभयव्यतिरेकः ३, संदिग्धसाध्यव्यतिरेकः ४, संदिग्धसाधनव्यतिरेकः ५, संदिग्धोभयव्यतिरेकः ६, अव्यतिरेकः ७, अप्रदर्शितव्यतिरेकः ८, विपरीतव्यतिरेकश्च ९, ॥ ७० ॥

अथैतान् क्रमेणोदाहरन्ति–

तेषु भ्रान्तमनुमानं प्रमाणत्वाद्यत्पुनर्भ्रान्तं न भवति न तत्प्रमाणं यथा स्वप्नज्ञानमिति,असिद्धसाध्यव्यतिरेकः स्वप्नज्ञानाक्रान्तत्वस्यानिवृत्तेः (१) ॥ ७१ ॥

निर्विकल्पकं प्रत्यक्षं प्रमाणत्वाद्, यच्च सविकल्पकं न तत्प्रमाणं यथा लैङ्गिकमित्यसिद्धसाधनव्यतिरेको द्वैद्धिकात्प्रमाणत्वस्याऽनिवृत्तेः (२) ॥ ७२ ॥

नित्यानित्यः शब्दः सत्त्वाद्यस्तु न नित्यानित्यः स न संस्तद्यथा–स्तम्भ इत्यसिद्धोभयव्यतिरेकः स्तम्भानित्यानित्यत्वस्य सत्त्वस्य चाव्यावृत्तेः (३) ॥ ७३ ॥

व्यक्तमेतत्सूत्रत्रयमपि (३) ॥ ७३ ॥

असर्वज्ञोऽनाप्तो वा कपिलोऽक्षणिकैकान्तवादित्वाद्यः सर्वज्ञ आप्तो वा स क्षणिकैकान्तवादी यथा सुगत इति संदिग्धसाध्यव्यतिरेकः सुगतेऽसर्वज्ञतानाप्तत्वयोः साध्यधर्मयोर्व्यावृत्तेः संदेहात् (४) ॥ ७४ ॥

अयं च परमार्थतोऽसिद्धसाध्यव्यतिरेक एव क्षणिकैकान्तस्य प्रमाणबाधितत्वेन तदभिधातुरसर्वज्ञतानाप्तत्वप्राप्तेः केवल-

तत्प्रतिक्षेपकप्रमाणमाहात्म्यपरामर्शनशून्यानां प्रमातृणां संदिग्धसाध्यव्यतिरेकत्वेनाऽऽभास इति तथैव कथितः (४) ॥७४॥

अनादेयवचनः कश्चिद्विवक्षितः पुरुषो रागाऽऽदिमत्त्वाद्यः पुनरादेयवचनः स वीतरागः, तद्यथा-शौद्धोदनिरिति संदिग्धसाधनव्यतिरेकः शौद्धोदनो रागाऽऽदिमत्त्वस्य निवृत्तेः संशयात् (५) ॥ ७५ ॥

यद्यपि तद्दर्शनानुरागिणां शौद्धोदनेरादेयवचनत्वं प्रसिद्धं, तथापि रागाऽऽदिमत्त्वान्नावस्तन्निश्चायकप्रमाणवैकल्यतः संदिग्ध एव (५) ॥ ७५ ॥

न वीतरागः कपिञ्जः करुणाऽऽस्पदेष्वपि परमकृपयाऽनर्पितनिजपिशितशकलत्वात्, यस्तु वीतरागः स करुणाऽऽस्पदेषु परमकृपया समर्पितनिजपिशितशकलः, तद्यथा-तपनबन्धुरिति संदिग्धोभयव्यतिरेक इति तपनबन्धौ वीतरागत्वाभावस्य करुणाऽऽस्पदेष्वपि परमकृपयाऽनर्पितनिजपिशितशकलत्वस्य च व्यावृत्तेः संदेहात् (६) ॥७६॥

तपनबन्धुर्पुरुषो वैधर्म्यदृष्टान्ततया यः समुपन्यस्तः स न ज्ञायते किं रागाऽऽदिमानुत वीतरागः, तथा-करुणाऽऽस्पदेषु परमकृपया निजपिशितशकलानि समर्पितवान् वा, तन्निश्चायकप्रमाणापरिस्फुरणात् (६) ॥ ७६ ॥

न वीतरागः कश्चिद्विवक्षितः पुरुषो वक्तृत्वाद्, यः पुनर्वीतरागो न स वक्ता यथोपलखण्ड इत्यव्यतिरेकः (७) ॥ ७७ ॥

यद्यपि किलोपलखण्डादुन्नयं व्यावृत्तं तथापि व्याप्त्या व्यतिरेकासिद्धेरव्यतिरेकत्वम (७) ॥ ७७ ॥

अनित्यः शब्दः कृतकत्वादाकाशवदित्यप्रदर्शितव्यतिरेकः (८) ॥ ७८ ॥

अत्र यदनित्यं न भवति तत् कृतकमपि न भवतीति विद्यमानोऽपि व्यतिरेको वादिना स्ववचनेन नोद्भावित इत्यप्रदर्शितव्यतिरेकत्वम (८) ॥ ७८ ॥

अनित्यः शब्दः कृतकत्वाद्यदकृतकं तन्नित्यं यथाऽऽकाशमिति विपरीतव्यतिरेकः (९) ॥ ७९ ॥

वैधर्म्यप्रयोगे हि साध्याभावः साधनाभावाऽऽक्षिप्तो दर्शनीयो, न चैवमत्रेति विपरीतव्यतिरेकत्वम (९) ॥७९॥ रत्ना०६ परि०।

दिट्ठंतिय–दार्ष्टान्तिक–त्रि० । प्रथमेऽभिनयभेदे, स्था० ४ ठा० ४ उ० । रा० । आ० म० ।

दिट्ठगुण–दृष्टगुण–पुं० । दृष्टाः प्रत्यक्षाऽऽदिप्रमाणतोऽनुद्भूतगुणधर्मा यस्य तस्मिन्, स्था० ।

दिट्ठत्थ–दृष्टार्थ–पुं० । दृष्ट उपलब्धोऽर्थः वेदश्रुताभिधेयरूपो येन स दृष्टार्थः । गीतार्थे, बृ० १ उ० ।

दिट्ठदोसपतिता–दृष्टदोषपतिता–स्त्री० । दृष्टः दोषश्चैर्याऽऽदिर्यस्याः सा तथा । सा चासौ पतिता च दृष्टदोषपतिता । जात्यादिबहिष्कृतायाम, अन्त० ३० वर्ग ८ अ० ।

दिट्ठधम्म–दृष्टधर्म–पुं० । दृष्टोऽवगतो यथावस्थितो धर्मः श्रुतचारित्राऽऽख्यो येन स तथा । अवगतधर्मे, सूत्र० १ श्रु० १३ अ० ।

दिट्ठपह–दृष्टपथ–पुं० । दृष्टो ज्ञानाऽऽदिको मोक्षस्य पन्था येन स दृष्टपथः । दृष्टमोक्षमार्गे, आचा० १ श्रु० २ अ० ६ उ० ।

दिट्ठपाठी–दृष्टपाठी–पुं० । दृष्टः पाठो येन स दृष्टपाठी । अधीतवैद्यके, नि० चू० ४ उ० ।

दिट्ठफल–दृष्टफल–पुं० । दृष्टमेव प्रत्यक्षं फलं पूजाऽऽदिकं फलमर्थः प्रयोजनं यस्याऽसौ दृष्टफलः । अपरोक्षफले, विशे० ।

दिट्ठभय–दृष्टभय–पुं० । दृष्टं संसाराद्भयं सप्तप्रकारं वा येन स तथा । अवगतसप्तप्रकारभये, आचा० १ श्रु० ३ अ० २ उ० ।

से हु दिट्ठभए मुणी, जस्स णत्थि ममाइयं ।

शरीराऽऽदेः परिग्रहात्साक्षात्पारम्पर्येण वा पर्यालोच्यमानं सप्तप्रकारमपि भयमापनीपद्यत इत्यतः परिग्रहपरित्यागे ज्ञातभयत्वमवसीयते । अवगतसंसारभये, आचा० १ श्रु० २ अ० ६ उ० ।

दिट्ठपदिट्ठ–दृष्टादृष्ट–न० । वन्दनकभेदे, "अंतरितो तमसे वा, ण वंदती वंदती उ दीसंतो।" बहुषु वन्दमानेषु साध्वादिना केनचिदन्तरितस्तमसि वा साध्वन्धकारप्रदेशे व्यवस्थितो मौनं विधायोपविश्य चाऽऽस्ते, न तु वन्दते, दृश्यमानस्तु वन्दते । एतद् दृष्टादृष्टं वन्दनकम । बृ० ३ उ० । आव० । आ० चू० । ध० ।

दिट्ठलालिय–दृष्टलालिक–पुं० । दृष्टस्यैव भक्ताऽऽदेर्लोभाऽवष्टब्धस्यापरभक्ताऽऽदिमध्याक्षिप्तस्य श्रोत्राऽऽदिनिः कृतोपयोगस्य नक्ताऽऽदेर्लालनस्तेन चरन्ति ये ते दृष्टलालिकाः । निक्षाग्रहणविशेषयुक्ते, सूत्र० २ श्रु० २ अ० । ध० । आ० चू० । स्था० । औ० ।

दिट्ठसार–दृष्टसार–पुं० । उपलब्धतत्त्वे, व्य० १० उ० ।

दिट्ठसाहम्म–दृष्टसाधर्म्य–न० । दृष्टं न पूर्वोपलब्धेनार्थेन सह साधर्म्यम । सामान्यतो दृष्टानुमाने, अनु० ।

दिट्ठाभड–दृष्टाभाषित–त्रि० । कृतदर्शनाऽऽलापे, भ० ३ श० १ उ० ।

दिट्ठि–दृष्टि–स्त्री० । दर्शनं दृष्टिः । विशे० । चक्षुर्द्वारोत्पन्नदर्शने, अनु० । स्था० । सूत्र० । विशे० । रूपिद्र० । आचा० । आतु० । नं० । सम्यग्भूतपदार्थगते सम्यग्दर्शने, सूत्र० १ श्रु० ३ अ० ३ उ० । तद्भवति, प्र० ६ श० ४ उ० । धर्मप्रज्ञापनायाम्, सूत्र० १ श्रु० ३ अ० ३ उ० । तिप्रणीतवस्तुतत्त्वप्रतिपत्तौ, प्रज्ञा० ३४ पद । जी० । सूत्र० । स्था० ।

जीवा णं भंते ! सम्मद्दिट्ठी, मिच्छादिट्ठी, सम्मामिच्छादिट्ठी ?। गोयमा ! जीवा सम्मद्दिट्ठी वि, मिच्छादिट्ठी वि, सम्मामिच्छादिट्ठी वि । एवं णेरइया वि । असुरकुमारा वि एवं चेव०जाव थणियकुमारा । पुढविकाइयाणं पुच्छा ?। गोयमा ! पुढविकाइया नो सम्मद्दिट्ठी, मिच्छादिट्ठी, णो सम्मामिच्छादिट्ठी । एवं० जाव वणस्सइकाइया । बेइंदियाणं पुच्छा ?। गोयमा ! बेइंदिया सम्मादिट्ठी वि, मिच्छादिट्ठी वि, नो सम्मामिच्छादिट्ठी । एवं० जाव चउरिंदिया । पंचिंदियतिरिक्खजोणियमणुस्सवाणमंतरजोइसियवेमाणिया सम्मद्दिट्ठी वि, मिच्छादिट्ठी वि, सम्मामिच्छादिट्ठी वि । सिद्धाणं पुच्छा ?। गोयमा ! सिद्धा णं सम्मद्दिट्ठी, णो मिच्छदिट्ठी, णो सम्मामिच्छदिट्ठी ।

(जीवा णं भंते ! किं सम्मदिट्ठी इत्यादि) सुगममापदपरिसमाप्तेः, नवरं सास्वादनसम्यक्त्वयुक्तोऽपि सूत्रा ऽभिप्रायेण पृथिव्यादिषु नोत्पद्यते, "उभयाभावो पुढवाइएसु" इति वचनात् । द्वीन्द्रियाऽऽदिषु सास्वादनसम्यक्त्वयुक्त उपपद्यते । ततः पृथिव्यादयः सम्यग्दृष्टयः प्रतिषिद्धा द्वीन्द्रियाऽऽदयोऽभिहिताः ॥ सम्यग्मिथ्यादृष्टिपरिणामः पुनः संज्ञिपञ्चेन्द्रियाणां भवति, न शेषाणां, तथास्वाभाव्यात् । अत उभयेऽपि सम्यग्मिथ्यादृष्टयः प्रतिषिद्धाः । प्रज्ञा० १६ पद । जी० । भ० । (दृष्टिविषयेऽल्पबहुत्वम् ' अप्पाबहुय ' शब्दे प्रथमभागे ६७२ पृष्ठे उक्तम्) अन्तःकरणप्रवृत्तौ, सूत्र० २ श्रु० २ अ० । बुद्धौ, उत्त० २ अ० । नेत्रे, ग० १ अधि० ।

दिट्ठिआ–दिष्ट्या–अव्य० । दिश–यक्–अन्यादि० नि० । वाच० । दिष्टया, दिष्ट्या इति विश्लेषे " ह्रीं-श्री-ह्री-कृत्स्न-क्रियादिष्टयास्वित् " ॥ ८ । २ । १०४ ॥ इत्यनेन यापूर्वं इकारः लोकात् " इस्यानुष्टुप्तसंदष्टे " ॥ ८ । २ । ३४ ॥ इति टस्य ढः । " अनादौ शेषाऽऽदेशयोर्द्वित्वम् " ॥ ८ । २ । ८६ ॥ इति द्वित्वे " कगचजतदपयवां प्रायो लुक् " ॥ ८ । १ । १७७ ॥ इति यलुक् । 'दिट्ठिया ।' प्रा० दुं० २ पाद । मङ्गले, दर्वे, भाग्येनेत्यर्थे च । वाच० ।

दिट्ठिकीव–दृष्टिक्लीब–पुं० । यश्चिलिमिलिकान्तर्गतः सर्वतः सर्वं करोति तादृशे क्लीबे, " दिट्ठिकीवो सव्वं चिलिमिलियंतरितो करेति । " नि० चू० ४ उ० ।

दिट्ठिजुद्ध–दृष्टियुद्ध–न० । योधप्रतियोधयोश्चक्षुषोर्निर्निमेषावस्थाने, जं० २ वक्ष० ।

दिट्ठिणिव्वत्ति–दृष्टिनिर्वृत्ति–स्त्री० । निर्वर्त्तनं निर्वृत्तिर्निष्पत्तिः, दृष्टेर्निर्वृत्तिः दृष्टिनिर्वृत्तिः । दृष्टिनिष्पत्तौ, न० ।

कइविहा णं भंते ! दिट्ठिणिव्वत्ती पण्णत्ता ?। गोयमा ! तिविहा दिट्ठिणिव्वत्ती पण्णत्ता । तं जहा–सम्मदिट्ठिणिव्वत्ती, मिच्छादिट्ठिणिव्वत्ती, सम्मामिच्छादिट्ठिणिव्वत्ती । एवं०जाव वेमाणिया । जस्स जइविहा दिट्ठी । प्रज्ञा० १६ श० ८ उ० ।

दिट्ठिदंम–दृष्टिदण्ड–पुं० । क्रियास्थानभेदे, आव० ।

....., दिट्ठिविवज्जासओ इमो होइ ।
जो मित्तममित्तं ती, काउं घाइज्ज अहवा वि ॥ ४९ ॥
गामाईघाएसु व, अतेण तेणं ति वावि घाइज्जा ।
दिट्ठिविवज्जासे सो, किरिआठाणं तु पंचमयं ॥ ५० ॥
आव० ४ अ० ।

दिट्ठिमं–दृष्टिमत्–पुं० । दर्शनं दृष्टिः सदनुष्ठानं वा यस्यासौ दृष्टिमान् । आचा० १ श्रु० ६ अ० ५ उ० । यथावस्थितान् पदार्थान् श्रद्दधाने, सूत्र० १ श्रु० १४ अ० । सम्यग्दर्शनिनि, सूत्र० १ श्रु० ४ अ० १ उ० ।

दिट्ठिया–दृष्टिका (जा)–स्त्री० । दृष्टेर्जाता दृष्टिजा । अथवा–दृष्टं दर्शनं वस्तु वा निमित्ततया यस्यामस्ति सा दृष्टिका । दर्शनार्थं या गतिक्रिया, दर्शनाद्वा यत्कर्मेति सा दृष्टिजा, दृष्टिका वा । स्था० २ ठा० १ उ० । आव० ।

दिट्ठिराग–दृष्टिराग–त्रि० । दिट्ठिरागो अस्सियमियं किरियाणं अकिरियवादीणमाह–" खुड्डसी णियसण्णट्ठी, वेणइआणं च वच्छीसं । स्वकीयायां स्वकीयायां दृष्टौ रक्ता ह्येते, यतो "जिणधयणबाहिरमती, मूढा णियदंसणाणुरागेण । सव्वेसू कहितमेते, मोक्खपहं न तु पवज्जंति" ॥१॥ स्वकीयायां स्वकीयायां दृष्टौ रक्ते, आ०चू० १ अ० । "रागेण" (४) दृष्टिरागाऽऽदिरूपेण गोविन्दवाचकोक्तमाज्ञयामिच । ध० २ अधि० । आ० म० ।

दिट्ठिवाय–दृष्टिपात (वाद)–पुं० । दृष्टयो दर्शनानि नया वा उच्यन्ते अभिधीयन्ते पतन्ति वा अवतरन्ति यत्रासौ दृष्टिवादो, दृष्टिपातो वा । प्रवचनपुरुषस्य द्वादशेऽङ्गे, स्था० ४ ठा० १ उ० । दृष्टिर्दर्शनं सम्यक्त्वाऽऽदि, वदनं वादो, दृष्टीनां वादो दृष्टिवादः । प्रव० १४४ द्वार ।

दृष्टिवादं पर्यायतो दशधाऽऽह–

दिट्ठिवायस्स णं दस नामधिज्जा पण्णत्ता । तं जहा–दिट्ठिवाएइ वा हेतुवाएइ वा भूयवाएइ वा तच्चावाएइ वा सम्मावाएइ वा धम्मावाएइ वा भासाविजएइ वा पुव्वगएइ वा अणुओगगएइ वा सव्वपाणभूयजीवसत्तसुहावहेइ वा ।

हिनोति गमयति जिज्ञासितमर्थमिति हेतुः, अनुमानोत्थापकं लिङ्गमुपचारादनुमानमेव वा वादो हेतुवादः । तथा-भूताः सद्भूताः पदार्थाः, तेषां वादो भूतवादः । तथा-तथ्यानि वस्तुनामैदम्पर्याणि, तेषां वादस्तथ्यवादः, तथ्यो वा सत्यो वादस्तथ्यवादः । तथा-सम्यगविपरीतो वादः सम्यग्वादः । तथा-धर्माणां वस्तुपर्यायाणां धर्मस्य वा चारित्रस्य वादो धर्मवादः । तथा-भाषा सत्याऽऽदिका, तस्या विचयो निर्णयो भाषाविचयः, भाषाया वाचो विजयः समृद्धिर्यस्मिन् स भाषाविजयः । तथा-सर्वश्रुतात्पूर्वं क्रियन्त इति पूर्वाणि उत्पादपूर्वाऽऽदीनि चतुर्दश, तेषु गतोऽवयवभूतस्तत्स्वभाव इत्यर्थ इति पूर्वगतः । तथा अनुयोगः प्रथमानुयोगस्तीर्थंकराऽऽदिपूर्वभवाऽऽदिव्याख्यानग्रन्थो गणिककाऽनुयोगश्च भरतनरपतिवंशजातानां निर्याणगमनानुत्तरविमानगमनसुकृतव्यतव्याख्यानग्रन्थ इति द्विरूपेऽनुयोगे गतोऽनुयोगगत एतौ च पूर्वगतानुयोगगतौ दृष्टिवादांशावपि दृष्टिवादतयोक्तावयवे समुदायोपचारादिति । तथा-सर्वे विश्वे, ते च ते प्राणाश्च द्वीन्द्रियाऽऽदयो भूताश्च तरवो जीवाश्च पञ्चेन्द्रियाः सत्त्वाश्च पृथिव्यादय इति द्वन्द्वे सति कर्मधारयः, ततस्तेषां सुखं शुभं वा आवहतीति सर्वप्राणभूतजीवसत्त्वसुखाऽऽवहः, सुखाऽऽवहत्वं च संयमप्रतिपादकत्वात्सत्त्वानां निर्वाणहेतुत्वाच्चेति । स्था० १० ठा० ।

से किं तं दिट्ठिवाए ?। दिट्ठिवाए णं सव्वभावपरूवणा आघविज्जइ। से समासओ पंचविहे पण्णत्ते । तं जहा–परिकम्मे १, सुत्ताइ २, पुव्वगए ३, अणुओगे ४, चूलिया ५ ।

दृष्टयो दर्शनानि, वदनं वादः, दृष्टीनां वादो यत्र स दृष्टिवादः । अथवा-पतनं पातो, दृष्टीनां पातो यत्र स दृष्टिपातः । तथाहि-तत्र सर्वेनयदृष्टय आख्यायन्ते । तथा चाऽऽह सूरिः-"दिट्ठिवाएणं " इत्यादि । दृष्टिवादिनः । अथवा-दृष्टिपातेन । यद्वा-दृष्टिवादे, दृष्टिपाते । णमिति वाक्यालङ्कारे । सर्वभावप्ररूपणा आख्यायते, (से समासतो पंचविधे पन्नत्ते इत्यादि) सर्वमिदं प्रायो व्यवच्छिन्नं, तथाऽपि क्षेत्रतो यथागतसंप्रदायकं किञ्चि-

ख्यायते-स दृष्टिवादो, दृष्टिपातो वा समासतः पञ्चविधः प्रज्ञप्तः । तद्यथा-परिकम्मे१, सूत्राणि २, पूर्वगतम ३, अनुयोगः ४, चूलिका ५ ।

से किं तं परिकम्मे ?। परिकम्मे सत्तविहे पण्णत्ते । तं जहा-सिद्धसेणियापरिकम्मे १, मणुस्ससेणियापरिकम्मे २, पुट्ठसेणियापरिकम्मे ३, ओगाढसेणियापरिकम्मे ४, उवसंपज्जणसेणियापरिकम्मे ५, विप्पजहणसेणियापरिकम्मे ६, चुयाचुयसेणियापरिकम्मे ७ ।

से किं तं सिद्धसेणियापरिकम्मे ?। सिद्धसेणियापरिकम्मे चउद्दसविहे पण्णत्ते । तं जहा-माउयापयाइं १, एगट्ठियपयाइं २, पाढोद्दपयाइं ३, आगासपयाइं ४, केउभूयं ५, रासिबद्धं ६, एगगुणं ७, दुगुणं ८, तिगुणं ९, केउभूए १०, पडिग्गहे ११, संसारपडिग्गहे १२, नंदावत्तं १३, सिद्धावत्तं १४ । सेतं सिद्धसेणियापरिकम्मे ॥ १ ॥

से किं तं मणुस्ससेणियापरिकम्मे ?। मणुस्ससेणियापरिकम्मे चउद्दसविहे पण्णत्ते । तं जहा-ताइं चेव माउयापयाइं १, एगट्ठियपयाइं २, पादाद्दपयाइं ३, आगासपयाइं ४, केउभूयं ५, रासिबद्धं ६, एगगुणं ७, दुगुणं ८, तिगुणं ९, केतुभूए १०, परिग्गहे ११, संसारपरिग्गहे १२, नंदावत्तं १३, माणुस्सावत्तं १४ । सेतं मणुस्ससेणियापरिकम्मे ॥ २ ॥

से किं तं पुट्ठसेणियापरिकम्मे ? पुट्ठसेणियापरिकम्मे इक्कारसविहे पण्णत्ते । तं जहा-आगासपयाइं १, केउभूयं २, रासिबद्धं ३, एगगुणं ४, दुगुणं ५, तिगुणं ६, केउभूए ७, परिग्गहे ८, संसारपडिग्गहे ९, नंदावत्तं १०, पुट्ठावत्तं ११ । सेतं पुट्ठसेणियापरिकम्मे ॥ ३ ॥

से किं तं ओगाढसेणियापरिकम्मे ?। ओगाढसेणियापरिकम्मे इक्कारसविहे पण्णत्ते । तं जहा-आगासपयाइं १, केउभूयं २, रासिबद्धं ३, एगगुणं ४, दुगुणं ५, तिगुणं ६, केउभूए ७, पडिग्गहे ८, संसारपडिग्गहे ९, नंदावत्तं १०, ओगाढावत्तं ११ । सेतं ओगाढसेणियापरिकम्मे ॥ ४ ॥

से किं तं उवसंपज्जणसेणियापरिकम्मे ?। उवसंपज्जणसेणियापरिकम्मे इक्कारसविहे पण्णत्ते । तं जहा-आगासपयाइं १, केउभूयं २, रासिबद्धं ३, एगगुणं ४, दुगुणं ५, तिगुणं ६, केउभूए ७, पडिग्गहे ८, संसारपडिग्गहे ९, नंदावत्तं १०, उवसंपज्जणावत्तं ११ । सेतं उवसंपज्जणसेणियापरिकम्मे ॥ ५ ॥

से किं तं विप्पजहणसेणियापरिकम्मे ?। विप्पजहणसेणियापरिकम्मे एक्कारसविहे पण्णत्ते । तं जहा-आगासपयाइं १, केउभूयं २, रासिबद्धं ३, एगगुणं ४, दुगुणं ५, तिगुणं ६, केउभूए ७, पडिग्गहे ८, संसारपडिग्गहे ९, नंदावत्तं १०, विप्पजहणावत्तं ११ । सेतं विप्पजहणसेणियापरिकम्मे ॥ ६ ॥

से किं तं चुयाचुयसेणियापरिकम्मे ?। चुयाचुयसेणियापरिकम्मे एक्कारसविहे पण्णत्ते । तं जहा-आगासपयाइं १, केउभूयं २, रासिबद्धं ३, एगगुणं ४, दुगुणं ५, तिगुणं ६, केउभूए ७, पडिग्गहे ८, संसारपडिग्गहे ९, नंदावत्तं १०, चुयाचुयावत्तं ११, सेतं चुयाचुयसेणियापरिकम्मे ॥ ७ ॥ छ चउक्कनइयाइं, सत्त तेरासियाइं । सेतं परिकम्मे ॥१॥

तत्र परिकर्मनामयोग्यताऽऽपादनं तद्धेतुः शास्त्रमपि परिकर्म । किमुक्तं भवति ?-सूत्रपूर्वगतानुयोगः, तत्रार्थग्रहणयोग्यतासंपादनसमर्थानि परिकर्माणि, यथा गणितशास्त्रे संकलनाऽऽदीन्याद्यानि षोडश परिकर्माणि शेषगणितसूत्रार्थग्रहणयोग्यतासंपादनसमर्थानि । तथाहि-यथा गणितशास्त्रे तद्योग्य-षोडशपरिकर्मगृहीतसूत्रार्थः सन् शेषगणितशास्त्रग्रहणयोग्यो भवति, नान्यथा, तथा गृहीतविवक्षितपरिकर्मसूत्रार्थः सन् शेषसूत्राऽऽदिरूपदृष्टिवादश्रुतग्रहणयोग्यो भवति, नेतरथा । तथा चोक्तं चूर्णौ-" परिकर्मेति योग्यताकरणं, जहा गणियस्स सोलस परिकम्मा, तग्गहियसुत्तत्थो सेसगणियस्स जोग्गो भवति, एवं गहियपरिकम्मसुत्तत्थो सेससुत्ताइं दिट्ठिवायसुयस्स जोग्गो भवइ । इति" तच्च परिकर्म सिद्धश्रेणिकापरिकर्माऽऽदिभूतभेदापेक्षया सप्तविधं, सातृकापदाऽऽद्युत्तरभेदापेक्षया त्र्यशीतिविधं, तच्च समूलोत्तरभेदं सूत्रतोऽर्थतश्च व्यवच्छिन्नं यथागतसंप्रदायतो वाच्यम्, एतेषां सिद्धश्रेणिकापरिकर्माऽऽदीनां सप्तानां परिकर्मणामाद्यानि षट् परिकर्माणि स्वसमयवक्तव्यताऽनुगतानि, स्वसिद्धान्तप्रकाशकानीत्यर्थः । ये तु गोशालकप्रवर्तिता आजीविकाः पाषण्डिनः, तन्मतेन च्युताच्युतश्रेणिकापरिकर्मसहितानि सप्तापि परिकर्माणि, स्वसमयवक्तव्यता तु प्रज्ञाप्यन्ते । संप्रत्येतेष्वेव परिकर्मसु नयचिन्ता । तत्र-नयाः सप्त नैगमाऽऽदयः । नैगमोऽपि द्विधा-सामान्यग्राही, विशेषग्राही च । तत्र यः सामान्यग्राही स संग्रहं प्रविष्टः, यस्तु विशेषग्राही स व्यवहारम् । आह च भाष्यकृत-" जो सामन्नगाही, स नेगमो संगहं गओ अहवा । इयरो ववहारमिओ, जो तेण समाणिदेसो ॥ ३९ ॥ " (विशे०) शब्दाऽऽदयश्च त्रयोऽपि नया एक एव नयः परिकल्प्यते, तत एवं चत्वार एव नयाः, एतैश्चतुर्भिर्नयैराद्यानि षट् परिकर्माणि स्वसमयवक्तव्यतया परिचिन्त्यन्ते । तथा चाऽऽह चूर्णिकृत्-" इयाणिं परिकम्मनयचिंता, नेगमो दुविहो-संगहिओ,असंगहिओ य । संगहं पविट्ठो संगहिओ, असंगहिओ ववहारं । तम्हा संगहो, ववहारो, उजुसुओ, सद्दाइ य इक्को, एवं चत्तारो नया एहिं चउहिं नएहिं ससमयगइपरिकम्मा चिंतिजंति । " तथा चाऽऽह चूर्णिकृत्-" चउक्कं नइयाइं ति । " आद्यानि षट् परिकर्माणि । चतुर्नयिकानि चतुर्नयोपेतानि । तथा-ते एव गोशालकप्रवर्तिता आजीविकाः पाषण्डिनः त्रैराशिका उच्यन्ते । कस्मादिति चेत् ?, उच्यते-इह ते सर्वं वस्तु त्रात्मकमिच्छन्ति । तद्यथा-जीवः, अजीवः, जीवाजीवश्च । लोकः, अलोकः, लोकालोकश्च । सत्, असद्,

सदसत् । नयचिन्तायामपि त्रिविधं नयमिच्छन्ति । तद्यथा-द्रव्यास्तिकम्, पर्यायास्तिकम्, उभयास्तिकं च । उक्तं च-तन्त्रिभी राशिभिश्चरन्तीति त्रैराशिकाः, तन्मतेन सप्तापि परिकर्माणि चिन्त्यन्ते । तथा चाऽऽह सूत्रकृत्-" सत्त तेरासिया ।" इति । सप्त परिकर्माणि त्रैराशिकयानि त्रैराशिकमतानुसारीणि । एतदुक्तं भवति-पूर्वसूत्रयो नयचिन्तायां त्रैराशिकमतमवलम्बमानाः सप्तापि परिकर्माणि त्रिविधयाऽपि नयचिन्तया चिन्तयन्ते स्मेति । (सेतं परिकम्मे) तत् एतत्परिकर्म ॥१॥

से किं तं सुत्ताइं ?। सुत्ताइं बावीसं पण्णत्ताइं । तं जहा—उज्जुसुयं १, परिणयापरिणयं २, बहुभंगियं ३, विप्पच्चइयं ४, अणंतरं ५, परंपरसमाणं ६, भंजूइं ७, संभिण्णं ८, अहच्चायं ९, सोवत्थियं १०, घंटं ११, नंदावत्तं १२, बहुलं १३, पुडपुडं १४, वियावत्तं १५, एवंभूयं १६, दुयावत्तं १७, वत्तमाणुप्पयं १८, समभिरूढं १९, सव्वओभद्दं २०, पणुमं २१, दुपडिग्गहं २२ । इच्चेइयाइं बावीसं सुत्ताइं छिन्नछेयनइयाणि ससमयसुत्तपरिवाडीए, इच्चेइयाइं बावीसं सुत्ताइं अछिन्नछेयनइयाणि आजीवियसुत्तपरिवाडीए, इच्चेइयाइं बावीसं सुत्ताइं तिगनइयाणि तेरासियसुत्तपरिवाडीए, इच्चेइयाइं बावीसं सुत्ताइं चउक्कनइयाणि ससमयसुत्तपरिवाडीए, एवामेव सपुव्वावरेणं अट्ठासीइं सुत्ताइं भवंतीति मक्खाइं । सेतं सुत्ताइं ॥ २ ॥

(से किं तं सुत्ताइं ति) अथ कानि सूत्राणि ? । सर्वस्य पूर्वगतस्य सूत्रार्थस्य सूचनात्सूत्राणि । तथाहि-तानि सूत्राणि सर्वद्रव्याणां सर्वपर्यायाणां सर्वनयानां सर्वभङ्गविकल्पानां प्रदर्शकानि । तथा चोक्तं चूर्णिकृता-"ताणि य सुत्ताणि सव्वदव्वाणं सव्वपज्जवाणं सव्वनयाणं सव्वभंगविकप्पाण य पदंसगाणि सव्वस्स पुव्वगयस्स सुयस्स अत्थस्स य सूयग त्ति सूयण त्ति सूया सूणिया सूहाभिहाणत्था ।" इति । आचार्य आह-सूत्राणि द्वाविंशतिः प्रज्ञप्तानि । तद्यथा-ऋजुसूत्रमित्यादि । एतान्यपि संप्रति सूत्राणि सूत्रतोऽर्थतश्च व्यवच्छिन्नानि यथागतसंप्रदायतो वा वाच्यानि, तानि सूत्राणि नयविभागतो विभज्यमानानि अष्टाशीतिसंख्यानि भवन्ति । कथमिति चेदत आह-(इच्चेयाइं बावीसं सुत्ताइं इत्यादि) इह यो नाम नयसूत्रं भेदेन छिन्नमेवाभिप्रैति न द्वितीयेन सूत्रेण सह संबन्धयति । यथा-" धम्मो मंगलमुक्किट्ठं " इति श्लोकम्, तथा ह्ययं श्लोकः छिन्नच्छेदनयमतेन व्याख्यायमानो न द्वितीयाऽऽदीन् श्लोकानपेक्षते, नाऽपि द्वितीयाऽऽद्यः श्लोको अमुम् । अयमत्राभिप्रायः-तथा कथञ्चनाप्यमुं श्लोकं पूर्वसूत्रयः छिन्नछेदनयमते व्याख्यान्ति स्म, यथा न मनागपि द्वितीयाऽऽदिश्लोकानामपेक्षा भवति, द्वितीयाऽऽदीनपि श्लोकान् तथा व्याख्यानयन्ति स्म, यथा न तेषां प्रथमश्लोकस्यापेक्षा, तथा सूत्राण्यपि यन्नयाभिप्रायेण परस्परं निरपेक्षाणि आख्यान्ति स्म, स छिन्नच्छेदनयः छिन्नो द्विधाकृतः पृथक्कृतः छेदः पर्यन्तो येन सः छिन्नछेदः, प्रत्येकं कल्पितपर्यन्त इत्यर्थः । स चाऽसौ नयश्च छिन्नच्छेदनयः, इत्येतानि द्वाविंशतिसूत्राणि स्वसमयसूत्रपरिपाट्या स्वसमयवक्तव्यतामधिकृत्य सूत्रपरिपाट्यां विवक्षितायां छिन्नच्छेदनयिकानि,अत्र "अतोऽनेकस्वरात्" । ७ । २ । ६ ॥ (हेम०) इति मत्वर्थीय इकप्रत्ययः। ततोऽयमर्थः-छिन्नछेदनयवन्ति द्रष्टव्यानि। तथा (इच्चेइयाइं इत्यादि) इत्येतानि द्वाविंशतिसूत्राणि आजीविकसूत्रपरिपाट्यां गोशालप्रवर्त्तितऽऽजीविकपाषण्डिममतेन सूत्रपरिपाट्यां विवक्षितायामछिन्नच्छेदनयिकानि। इयमत्र भावना-अछिन्नच्छेदनयो नाम यः सूत्रं सूत्रान्तरेण छिन्नमर्थतः सूत्र सूत्रान्तरेण सदृछिन्नमित्यर्थः, तत्संबन्धमनिच्छति । यथा-"धम्मो मंगलमुक्किट्ठं" इति श्लोकम् । तथा ह्ययं श्लोकोऽछिन्नच्छेदनयमतेन व्याख्यायमानो द्वितीयाऽऽदीन् श्लोकानपेक्षते,द्वितीयाऽऽद्योऽपि श्लोको एनं श्लोकम् । एवमेतान्यपि द्वाविंशतिसूत्राणि अक्षररचनामधिकृत्य परस्परं विभक्तान्यप्यछिन्नच्छेदनयमतेनार्थसंबन्धमपेक्ष्य सापेक्षाणि वर्त्तन्ते । तदेवं नयाभिप्रायेण परस्परं सूत्राणां संबन्धाधिकृत्य भेदो दर्शितः। संप्रत्यन्यथा नयविभागमधिकृत्य भेदं दर्शयन्ति-(इच्चेइयाइं इत्यादि) इत्येतानि द्वाविंशतिसूत्राणि त्रैराशिकसूत्रपरिपाट्यां विवक्षितायां त्रिकनयकानि, त्रिकेति प्राकृतत्वात्स्वार्थे कप्रत्ययः । ततोऽयमर्थः-त्रिनयिकानि त्रिनयोपेतानि । किमुक्तं भवति ?-त्रैराशिकमतमवलम्ब्य द्रव्यास्तिकाऽऽदिनयत्रिकेण चिन्त्यन्ते इति । तथा इत्येतानि द्वाविंशतिसूत्राणि स्वसमयसूत्रपरिपाट्यां स्वसमयवक्तव्यतामधिकृत्य सूत्रपरिपाट्यां विवक्षितायां चतुर्नयिकानि संग्रहव्यवहारऋजुसूत्रशब्दरूपनयचतुष्टयोपेतानि संग्रहाऽऽदिनयचतुष्टयेन चिन्त्यन्ते इत्यर्थः । एवमेवोक्तेनैव प्रकारेण (पुव्वावरेणं ति) पूर्वाणि चापराणि च पूर्वापरं, समाहारप्रधानो द्वन्द्वः, पूर्वापरसमुदाय इत्यर्थः । तत एतदुक्तं भवति-नयविभागतो विभिन्नानि पूर्वाणि अपराणि च सूत्राणि समुदितानि सर्वसंख्यया अष्टाशीतिसूत्राणि भवन्ति, चतसृणां द्वाविंशतीनामष्टाशीतिमानत्वाद्,इत्याख्यातं तीर्थकरगणधरैः (सेतं सुत्ताइं) तान्येतानि सूत्राणि ।

से किं तं पुव्वगए ?। पुव्वगए चउद्दसविहे पण्णत्ते । तं जहा—उप्पायपुव्वं १, अग्गेणीयं २, वीरियप्पवायं ३, अत्थिनत्थिप्पवायं ४, नाणप्पवायं ५, सच्चप्पवायं ६, आयप्पवायं ७, कम्मप्पवायं ८, पच्चक्खाणप्पवायं ९, विज्जाणुप्पवायं १०, अवंझं ११, पाणाउं १२, किरियाविसालं १३, लोकबिंदुसारं १४ । उप्पायपुव्वस्स णं दस वत्थू चत्तारि चूलावत्थू पण्णत्ता । अग्गेणीयपुव्वस्स णं चोद्दस वत्थू दुवालस चूलियावत्थू पण्णत्ता । वीरियपुव्वस्स णं अट्ठ वत्थू अट्ठ चूलियावत्थू पण्णत्ता । अत्थिणत्थिप्पवायपुव्वस्स अट्ठारस वत्थू दस चूलियावत्थू पण्णत्ता । नाणप्पवायपुव्वस्स बारस वत्थू पण्णत्ता । सच्चप्पवायपुव्वस्स णं दोण्णि वत्थू पण्णत्ता । आयप्पवायपुव्वस्स णं सोलस वत्थू पण्णत्ता । कम्मप्पवायपुव्वस्स णं तीसं वत्थू पण्णत्ता । पच्चक्खाणपुव्वस्स णं वीसं वत्थू पण्णत्ता । विज्जाणुप्पवायपुव्वस्स णं पण्णरस वत्थू पण्णत्ता । अवंझपुव्वस्स णं बारस वत्थू पण्णत्ता । पाणाउपुव्वस्स णं तेरस वत्थू पण्णत्ता । किरियाविसालपुव्वस्स णं तीसं वत्थू पण्णत्ता । लोगबिंदुसारपुव्वस्स णं पणवीसं वत्थू पण्णत्ता । " दस चोद्दस अट्ठ अट्ठा-रसेव बारस दुवे य वत्थूणि ।

सोलस तीसा वीसा, पण्णरस अणुप्पवायम्मि ॥ १ ॥
बारस इक्कारसमे, बारसमे तेरसेव वत्थूणि ।
तीसा पुण तेरसमे, चोद्दसमे पण्णवीसा उ ॥ २ ॥
चत्तारि दुवालस अ-ट्ठ चेव दस चेव चूलवत्थूणि ।
आइल्लाण चउण्हं, सेसाणं चूलिया नत्थि ॥ ३ ॥
सेतं पुव्वगए ३ ॥

(से किं तं इत्यादि) अथ किं तत् पूर्वगतम् ?। इह तीर्थकरस्तीर्थप्रवर्तनकाले गणधरान् सकलश्रुतार्थावगाहनसमर्थानधिकृत्य पूर्वं पूर्वगतसूत्रार्थं भाषते, ततस्तानि पूर्वाण्युच्यन्ते, गणधराः पुनस्तत्र रचनां विदधते आचाराऽऽदिक्रमेण विदधति, स्थापयन्ति वा । अन्ये तु व्याचक्षते-पूर्वं पूर्वगतसूत्रार्थमर्हन् भाषते, गणधरा अपि पूर्वं पूर्वगतसूत्रं विरचयन्ति, पश्चादाचाराऽऽदिकम् । अत्र चोदक आह-नन्विदं पूर्वापरविरुद्धं, यस्मादाचारनिर्युक्तावुक्तम्-"सव्वेसिं आयारो पढमो" इत्यादि । सत्यमुक्तम्, किं तु तत्स्थापनामधिकृत्योक्तम् । अक्षररचनामधिकृत्य पुनः पूर्वं पूर्वाणि कृतानि, ततो न कश्चिन्पूर्वापरविरोधः । सूरिराह- (पुव्वगतो इत्यादि) पूर्वगतं श्रुतं चतुर्दशविधं प्रज्ञप्तम् । तद्यथा-उत्पादपूर्वमित्यादि । तत्रोत्पादप्रतिपादकं पूर्वमुत्पादपूर्वम् । तथाहि-तत्र सर्वद्रव्याणां सर्वपर्यायाणां चोत्पादमधिकृत्य प्ररूपणा क्रियते । आह च चूर्णिकृत्-" पढमं उप्पायपुव्वं, तत्थ सव्वदव्वाणं पज्जवाण य उप्पायमंगीकाउं पण्णवणा कया । " इति । तस्य पदपरिमाणमेका पदकोटी । द्वितीयमग्रायणीयम् । अग्रं परिमाणं तस्य अयनं गमनं, परिच्छेद इत्यर्थः तस्मै हितमग्रायणीयम्, सर्वद्रव्याऽऽदिपरिमाणपरिच्छेदकारीति भावार्थः । तथाहि-तत्र सर्वद्रव्याणां सर्वपर्यायाणां सर्वजीवविशेषाणां च परिमाणमुपवर्ण्यते । यत उक्तं चूर्णिकृता-" विइयं अग्गेणीयं, तत्थ सव्वदव्वाण पज्जवाण य सव्वजीवाण य अग्गं परिमाणं वण्णिज्जइ । " इति । अग्रायणीयं, तस्य पदपरिमाणं षण्णवतिपदशतसहस्राणि तृतीयं पूर्वं विरचयन्ति । पदैकदेशे पदसमुदायोपचारात् वीर्यप्रवादं तत्र सकर्मेतराणां जीवानामजीवानां च वीर्यं प्रवदन्तीति वीर्यप्रवादं, कर्मणि अणप्रत्ययः । तस्य पदपरिमाणं सप्ततिपदशतसहस्राणि । चतुर्थम् अस्तिनास्तिप्रवादं, तत्र यद्वस्तु लोकेऽस्ति धर्मास्तिकायाऽऽदि, यच्च नास्ति खरशृङ्गाऽऽदि, तत्प्रवदतीत्यस्तिनास्तिप्रवादम् । अथवा--- सर्वं वस्तु स्वरूपेणास्ति, पररूपेण नास्तीति अस्तिनास्तिप्रवादं, तस्य पदपरिमाणं षष्टिः पदशतसहस्राणि । पञ्चमं ज्ञानप्रवादं-ज्ञानं मतिज्ञाना ऽऽदिभेदभिन्नं पञ्चप्रकारं तत्सप्रपञ्चं वदतीति ज्ञानप्रवादं, तस्य पदपरिमाणम्, एका पदकोटी पदैरेकेन न्यूना । षष्ठं सत्यप्रवादं, सत्यं संयमो वचनं वा तत्सत्यसंयमं वचनं वा प्रकर्षेण सप्रपञ्चं वदतीति सत्यप्रवादं, तस्य पदपरिमाणम् एका पदकोटी षड्भिः पदैरधिका । सप्तमं पूर्वम्-आत्मप्रवादमात्मानं जीवमनेकधा नयमतभेदेन यत्प्रवदतीति तदात्मप्रवादं, तस्य पदप्रमाणं षड्विंशतिपदकोट्यः । अष्टमं कर्मप्रवादं कर्म ज्ञानाऽऽवरणीयाऽऽदिकमष्टप्रकारं, तत्प्रकर्षेण प्रकृतिस्थित्यनुभागप्रदेशाऽऽदिभिर्भेदैः सप्रपञ्चं वदति कर्मप्रवादं, तस्य पदपरिमाणम्- एका कोटी अशीतिश्च पदसहस्राणि, नवमं (पच्चक्खाणं ति) अत्रापि पदैकदेकदेशे पदसमुदायोपचारात् प्रत्याख्यानप्रवादमिति द्रष्टव्यम् । प्रत्याख्यानं सप्रभेदं यत्प्रवदति तत्प्रत्याख्यानप्रवादं, तस्य पदप्रमाणं चतुरशीतिपदलक्षाणि । दशमं विद्याऽनुप्रवादं, विद्याऽनेकातिशयसंपन्ना अनुप्रवदति साधनानुकूल्येन सिद्धिप्रकर्षेण प्रवदतीति विद्याऽनुप्रवादं, तस्य पदपरिमाणम्, एका पदकोटी दश च पदलक्षाः । एकादशमवन्ध्यं, वन्ध्यं नाम-निष्फलं, न विद्यते वन्ध्यं यत्र तदवन्ध्यम् । किमुक्तं भवति?-यत्र सर्वेऽपि ज्ञानतपःसंयमाऽऽदयः शुभफलाः, सर्वे च प्रमादाऽऽदयोऽशुभफला यत्र वर्ण्यन्ते तदवन्ध्यं नाम, तस्य पदपरिमाणं षड्विंशतिपदकोट्यः । द्वादशं प्राणायुः, प्राणाः पञ्चेन्द्रियाणि, त्रीणि मानसाऽऽदीनि बलानि, उच्छ्वासनिःश्वासौ च आयुश्च प्रतीतं, ततो यत्र प्राणा आयुश्च सप्रभेदमुपवर्ण्यते, तदुपचारतः प्राणाऽऽयुरित्युच्यते, तस्य पदपरिमाणमेका पदकोटी षट्पञ्चाशच्च पदलक्षाणि । त्रयोदशं क्रियाविशालम्-क्रियाः कायिक्यादयः, संयमक्रियाश्छन्दःक्रियाऽऽदयश्च, ताभिः प्ररूप्यमाणाभिर्विशालं, तस्य पदपरिमाणं नव पदकोटयः । चतुर्दशं लोकबिन्दुसारम् लोके जगति श्रुतलोके वा अक्षरस्योपरि बिन्दुरिव सारं सर्वोत्तमं सर्वाक्षरसन्निपातलब्धिहेतुत्वाद् लोकबिन्दुसारं, तस्य पदपरिमाणमर्द्धत्रयोदश पदकोटयः । (उप्पायपुव्वस्स णं) इत्यादि कण्ठ्यं, नवरं वस्तु ग्रन्थविच्छेदविशेषः, तदेव क्षुल्लकं वस्तु, तानि चाऽऽदिमेष्वेव चतुर्षु पूर्वेषु न शेषेषु । तथा चाऽऽह-"आइल्लाण चउण्हं, सेसाणं चूलिया नत्थि । सेतं पुव्वगए ।" तदेतत् पूर्वगतम् । नं० । (अनुयोगव्याख्या 'अणुओग' शब्दे प्रथमभागे ३४१ पृष्ठादारभ्य द्रष्टव्या) (मूलप्रथमानुयोगः 'मूलपढमाणुओग' शब्दे वक्ष्यते) (गण्डिकानुयोगव्याख्या ' गंडियाणुओग ' शब्दे तृतीयभागे ७७१ पृष्ठे द्रष्टव्या)

से किं तं चूलियाओ ?। चूलियाओ आइल्लाणं चउण्हं पुव्वाणं, सेसाइं पुव्वाइं अचूलियाइं । सेतं चूलियाओ । दिट्ठिवायस्स णं परित्ता वायणा, संखिज्जा अणुओगदारा, संखिज्जा वेढा, संखिज्जा सिलोगा, संखिज्जाओ पडिवत्तीओ, संखिज्जाओ निज्जुत्तीओ, संखिज्जाओ संगहणीओ, से णं अंगट्ठयाए बारसमे अंगे एगे सुयखंधे, चोद्दस पुव्वाइं, संखिज्जा वत्थू, संखिज्जा चूलवत्थू, संखिज्जा पाहुडा, संखेज्जा पाहुडपाहुडा, संखिज्जाओ पाहुडियाओ, संखिज्जाओ पाहुडपाहुडियाओ, संखिज्जाइं पयसयसहस्साइं पयग्गेणं संखिज्जा अक्खरा, अणंता गमा, अणंता पज्जवा, परित्ता तसा, अणंता थावरा, सासया कडनिबद्धनिकाइया जिणपन्नत्ता भावा आघविज्जंति, पन्नविज्जंति, परूविज्जंति, दंसिज्जंति, निदंसिज्जंति, उवदंसिज्जंति । एवं आया, एवं नाया, एवं विन्नाया, एवं चरणकरणपरूवणा आघविज्जति । सेतं दिट्ठिवाए ॥ १२ ॥

अथ कास्ताश्चूलाः ?। इह चूडा शिखरमुच्यते । यथा मेरौ चूलाः, तत्र चूला इव चूला दृष्टिवादे परिकर्मसूत्रपूर्वानुयोगोक्तानुक्तार्थसंग्रहपरा ग्रन्थपद्धतयः । तथा चाऽऽह चूर्णिकृत्-" दिट्ठिवाए जं परिकम्मसुत्तपुव्वाणुओगे चूलिअं न भणियं, तं चूलासु भणियं ति ।" अत्र सूरिराह-चूला आदिमानां चतुर्णां पूर्वाणाम्, शेषाणि पूर्वाण्येव चूलिकानि, ता एव चूलाः, आदिमानां चतुर्णां पू-

र्याणां प्राक् पूर्ववक्तव्यतावसरे चूलावस्तूनीति भणितानि । आह च चूर्णिकृत्-" ताओ अचूलाओ आइल्लपुव्वाणं चउण्हं चूलावत्थू भणियं । " एताश्च सर्वेष्वपि दृष्टिवादस्योपरि किल स्थापिताः । तथैव च पठ्यन्ते, ततः श्रुतपर्वते चूडा इव राजन्ते इति चूला इत्युक्ताः । तथा चोक्तं चूर्णिकृता-"ते सव्वुवरिठिया पढिज्जंति य अतो तेसु य पव्वयचूडा इव चूडा । " इति । तासां च चूलानामियं संख्या प्रथमपूर्वसक्काश्चतस्रः, द्वितीयपूर्वसक्ता द्वादश, तृतीयपूर्वसक्ता अष्टौ, चतुर्थपूर्वसक्ता दश । तथा च पूर्वमुक्तं सूत्रे-"चत्तारि दुवालस अट्ठ चेव दस चेव चूलावत्थूणि आइल्लाणं चउण्हं, सेसाणं चूलिया नत्थि ।" सर्वसंख्यया चतुस्त्रिंशत् चूलिकाः (सेसं चूलिय त्ति) अथैताश्चूलिकाः (दिट्ठिवायस्स णं) इत्यादि पाठसिद्धं, नवरम् (संखेज्जा वत्थु त्ति) संख्येयानि वस्तूनि, तानि च पञ्चविंशत्युत्तरे द्वे शते । कथमिति चेत्? उच्यते-प्रथमे पूर्वे दश वस्तूनि, द्वितीये चतुर्दश, तृतीये अष्टौ, चतुर्थे अष्टादश, पञ्चमे द्वादश, षष्ठे द्वे, सप्तमे षोडश, अष्टमे त्रिंशत्, नवमे विंशतिः, दशमे पञ्चदश, द्वादश एकादश, अथोदश द्वादशे, त्रिंशत्त्रयोदशे, चतुर्दशे पञ्चविंशतिः । तथा च सूत्रे प्राक् पूर्ववक्तव्यतायामुक्तम्-

" दस चोद्दस अट्ठ अट्ठा-रसेव बारस दुवे य वत्थूणि ।
सोलस तीसा वीसा, पन्नरस अणुप्पवायम्मि ॥१॥
बारस एक्कारसमे, बारसमे तेरसेव वत्थूणि ।
तीसा पुण तेरसमे, चउदसमे पन्नवीसाओ ॥२॥ "

सर्वसंख्यया चामूनि द्वे शते पञ्चविंशत्यधिके, तथा संख्येयानि चूलावस्तूनि, तानि च चतुस्त्रिंशत्संख्याकानि । नं० । स० । वृ० । आ० म० । दश० । प्रज्ञा० । सूत्र० । व्य० । कर्म० । अनु० । ओघापेक्षया सूक्ष्मजीवाऽऽदिभावकथने, ध० १ अधि० । स्था० । सर्वदृष्टीनां तत्र समवतारस्तस्य जनके, पं० चू० ।

ननु स्त्रीणां दृष्टिवादः किमिति न दीयते ?, इत्याह-

तुच्छा गारवबहुला, चलिंदिया दुब्बला धिईए य ।
इय अइसेसऽज्झयणा, चुयावाओ य नो थीणं ॥५५२॥

यदि हि दृष्टिवादः स्त्रियाः कथमपि दीयेत, तदा तुच्छाऽऽदिस्वभावतया अहो ! अहं या दृष्टिवादमपि पठामीत्येवंगर्वाऽऽध्मातमानसाऽसौ पुरुषपरिभवाऽऽदिष्वपि प्रवृत्तिं विधाय दुर्गतिमभिगच्छेत् । अतो निरवधिकृपानीरनीरधिभिः परानुग्रहप्रवृत्तैर्भगवद्भिः तीर्थकरैरुत्थानसमुत्थानश्रुताऽऽदीन्यतिशयवस्त्यध्ययनानि दृष्टिवादश्च स्त्रीणां नानुज्ञातः । अनुग्रहार्थं पुनस्तासामपि किञ्चित् श्रुतं देयमित्येकादशाङ्गाऽऽदिविरचनं सफलमिति गाथाऽर्थः ॥ ५५२ ॥ विशे० । कर्म० । बृ० ।

दिट्ठिवायअक्खेवणी-दृष्टिवादाऽऽक्षेपणी-स्त्री० । दृष्टिवादस्य कथाभेदे, स्था० ४ ठा० । (' अक्खेवणी ' शब्दे प्रथमभागे १५२ पृष्ठे व्याख्या)

दिट्ठिवायउवएसा-दृष्टिवादोपदेशा-स्त्री० । दृष्टेर्दर्शनं तस्य करणाऽऽदि वादो दृष्टीनां वादो दृष्टिवादस्तद्विषय उपदेशः प्ररूपणं यस्याः सा दृष्टिवादोपदेशा इति । तृतीये संज्ञाभेदे, प्रव० १४४ द्वार ।

दिट्ठिविपज्जय-दृष्टिविपर्यय-पुं० । मिथ्याऽभिनिवेशे, द्वा० ८ द्वा० ।

दिट्ठिविपरियासदंड-दृष्टिविपर्यासदण्ड-पुं० । दृष्टेर्विपर्यासो रज्जुमिव सर्पबुद्धिस्तया दण्डो दृष्टिविपर्यासदण्डः । हेतुकाऽऽदिबुद्ध्या शराऽऽद्यभिघातेन चटकाऽऽदिव्यापादने, सूत्र० २ श्रु० २ अ० ।

अहावरे पंचमे दंडसमादाणे दिट्ठिविपरियासिया दंडवत्तिए त्ति आहिज्जइ, से जहाणामए केइ पुरिसे माइहिं वा पिइहिं वा भाइहिं वा भगिणीहिं वा भज्जाहिं वा पुत्तेहिं वा धूयाहिं वा सुण्हाहिं वा सद्धिं संवसमाणे मित्तं अमित्तमेव मन्नमाणे मित्ते हयपुव्वे भवइ, दिट्ठिविपरियासिया दंडे ॥ १२ ॥ से जहाणामए केइ पुरिसे गामघायंसि वा णगरघायंसि वा खेडकव्वडमंडबघायंसि वा दोणमुहघायंसि वा पट्टणघायंसि वा आसमघायंसि वा सन्निवेसघायंसि वा निग्गमघायंसि वा रायहाणिघायंसि वा अतेणं तेणमिति मन्नमाणे अतेणं हयपुव्वे भवइ दिट्ठिविपरियासिया दंडे, एवं खलु तस्स तप्पत्तियं सावज्जं ति आहिज्जइ, पंचमे दंडसमादाणे दिट्ठिविपरियासिया दंडवत्तिए त्ति आहिए ॥ १३ ॥

अथाऽपरं पञ्चमं दण्डसमादानं दृष्टिविपर्यासदण्डप्रत्ययिकमित्याख्यायते । तद् यथानाम कश्चित्पुरुषश्चारनटाऽऽदिको मातृपितृभ्रातृभगिनीभार्यापुत्रदुहितृस्नुषाऽऽदिभिः सार्धं वसन्तिष्ठन् ज्ञातिपालनकृते मित्रमेव दृष्टिविपर्यासादमित्रोऽयमित्येवं मन्यमानो हन्याद् व्यापादयेत्, तेन च दृष्टिविपर्यासवता मित्रमेव हतपूर्वं भवतीति, अतो दृष्टिविपर्यासदण्डोऽयम् ॥१२॥ पुनरप्यन्यथा तमेवाऽऽह-(से जहेत्यादि) तद्यथा नाम कश्चित्पुरुषः पुरुषकारमुद्वहन् ग्रामघाताऽऽदिके विभ्रमे भ्रान्तचेता दृष्टिविपर्यासादचौरमेव चौरोऽयमित्येवं मन्यमानो व्यापादयेत्, तदेवं तेन भ्रान्तमनसा विभ्रमाऽऽकुलेनाचौर एव हतपूर्वो भवति, सोऽयं दृष्टिविपर्यासदण्डः । तदेवं खलु तस्य दृष्टिविपर्यासवत् तत्प्रत्ययिकं सावद्यं कर्माधीयते, तदेवं पञ्चमं दण्डसमादानं दृष्टिविपर्यासप्रत्ययिकमाख्यातमिति ॥१३॥ सूत्र० २ श्रु० २ अ० । ध० । आ० चू० । स्था० ।

दिट्ठिविस-दृष्टिविष-पुं० । दृष्टौ विषं येषां ते दृष्टिविषाः । दर्वीकरसर्पजेदे, जी० १ प्रति० । प्रज्ञा० । स्था० ।

दिट्ठिविसभावणा-दृष्टिविषभावना-स्त्री० । दृष्टौ विषं येषां ते दृष्टिविषाः, तत्स्वरूपप्रतिपादिका दृष्टिविषया भावना । पा० । अक्षव्याहतकालिकश्रुतविशेषे, पा० । पं० व० । व्य० ।

दिट्ठिसंचाल-दृष्टिसंचार-पुं० । निमेषाऽऽदौ, ध० २ अधि० । आव० । ल० ।

दिट्ठिसंपण्ण-दृष्टिसंपन्न-पुं० । सम्यग्दृष्टियुक्ते, ध० ३ अधि० । आव० । स्था० ।

दिट्ठिसंपण्णया-दृष्टिसम्पन्नता-स्त्री० । सम्यग्दृष्टितायाम्, स्था० १० ठा० ।

दिट्ठिसंबंध-दृष्टिसम्बन्ध-पुं० । संयतीनां दृष्टिरागीयया दृष्ट्या संबन्धाति । संयते, व्य० ७ उ० ।

दिट्ठिसम्मोह-दृष्टिसम्मोह-पुं० । अन्यथादर्शनहेतौ, षो० ।

दृष्टिसंमोहलक्षणम्-

गुणतस्तुल्ये तत्त्वे, संज्ञानेदाऽऽगमान्यथादृष्टिः ।

भवति यतोऽसावधमो, दोषः खलु दृष्टिसंमोहः ॥११॥

गुण उपकारफलं, तदाश्रित्य तुल्ये समाने द्वयोर्वस्तुनोः,तद्भावस्तत्त्वं तस्मिँस्तुल्ये सति। संज्ञाभेदाऽऽगमान्यथादृष्टिः,आगमेन आगमविषये अन्यथा विपरीता दृष्टिर्मतिरस्येत्यागमान्यथादृष्टिर्बुद्धीहिसमासः। संज्ञाभेदेन नामभेदनाऽऽगमान्यथादृष्टिरिति पुरुषः परिगृह्यते। भवति जायते, यतो यस्माद्दोषादसौ दोषोऽधमो निकृष्टः, खलुशब्दोऽवधारणे, अधम एव दोषो दृष्टिसंमोहाभिधानः । इदमत्र हृदयम्-निदर्शनमात्रेण द्वयोरारम्भयोर्नोगोपभोगलक्षणं फलमाश्रित्य तुल्यमेव तत्त्वम्। तत्रैकस्मिन्नारम्भे प्रवृत्तः पुरुषः तत्फलोपयोगी तमारम्भं साधुं मन्यते,अपरस्तु तत्समान एव प्रवृत्तस्तमारम्भं निर्दोषं मन्यते। तत्फलं च स्वयमेवोपभुङ्क्ते, यतो दोषात् स दृष्टिसंमोह इति। अथवा-गुणः परिणामो भावोऽध्यवसायविशेषस्तदङ्गीकरणेन तुल्ये तत्त्वे संज्ञाभेदाऽऽगमान्यथादृष्टिः पुरुषो यतो दोषात् प्रवर्तते स दृष्टिसंमोहो नाम दोषो भवति। यत्र तु गुणतो भावाऽऽख्याद् गुणात्र तुल्ये तत्त्वे स्वरूपे द्वयोरारम्भाऽऽरम्भयोर्व्यक्तिभेदेन वस्तुनोस्तत्र चैत्याऽऽयतनाऽऽदिविषये क्रयविक्रयग्रामाऽऽदौ शास्त्रीयाध्यवसायभेदेन प्रवृत्तत्वात् स्वयं च तत्फलस्यानुपभोगात् केवलमागमानुसारितया तत्रोपेक्षापरिस्थागेन ग्रामक्रयाऽऽद्यारम्भमपरिहरतोऽपि न दृष्टिसंमोहाऽऽख्यो दोषः, तत्त्वतस्तत्क्याऽऽरम्भपरिवर्जनात्। दर्शनमार्गमो जिनमतं, तत्र संमोहः संमूढता,अन्यथोक्तस्यान्यथाप्रतिपत्तिर्दर्शनसंमोहः। न चैवंविधस्याऽऽगमिकस्य दोषः संभवतीति। तथाचाऽऽगमः--"चोद्दस चेइआणं, खेत्तहिरण्णाइ गामगाणाइ। लग्गंतस्स व जइणो, तिकरणसोही कहं नु भवे? ॥१॥" अयं च स चोद्यः परिहारोऽवसेयः। यदि वा-अहिंसाप्रशमाऽऽदीनां तन्त्रान्तरेष्वपि तुल्ये तत्त्वे परिभाषाभेदमात्रेणाऽऽगमेष्वन्यथादृष्टिः पुरुषो यतो भवति स दृष्टिसंमोह इति ॥११॥ षो० ४ विव०।

दिट्ठिसार–दृष्टिसार–पुं०। दृष्टिसद्भावे, आ० चू० १ अ०।

दिट्ठिसूल–दृष्टिशूल–न०। नेत्रशूले, ज्ञा० १ श्रु० १३ अ०।

दिट्ठिसेवा–दृष्टिसेवा–स्त्री०। दर्शनाचारानुसारेण दृष्टेर्दृष्टिमोक्षणे, प्रव० १६६ द्वार। दश०।

दिट्ठेलय–दृष्ट–त्रि०। चक्षुषा उपलब्धे, भा० म० १ अ० २ खण्ड।

दिण–दिन–पुं०। द्यति तमः सूर्यैकिरणोपलक्षिते षष्टिदण्डाऽऽत्मके तद्विशिष्टे वा चतुर्थभागाऽऽत्मके काले, वाच०। पञ्चा० ए विव०। घञ-सूर्याङ्क-दपक--यामेति पर्यायाः, दिन--दिवस--वासराणां पुन्नपुंसकत्वम्। है०।

दिणकय–दिनकृत–पुं०। सूर्ये, स्था० २ ठा० ३ उ०।

दिणकर–दिनकर–पुं०। दिनं करोति खोदयेन कृ-टक्। दिने करः किरणो यस्य वा। सूर्ये, वाच०। अनु०। दिनकरणशीले, ज्ञा० १ श्रु० १ अ०। रा०। सू० प्र०। आ० चू०। आ० म०। स्था०।

दिणकरपण्णत्ति–दिनकरप्रज्ञप्ति–स्त्री०। सूर्यप्रज्ञप्तिनामके ग्रन्थे, ज्यो० २१ पाहु०।

दिणकिच्च–दिनकृत्य–न०। स्वनामख्याते ग्रन्थे, ध० २ अधि०। दिवसकार्ये, वाच०।

दिणक्खय–दिनक्षय–पुं०। "एकस्मिन्सावने स्यहि, तिथीनां त्रितयं यदा। तदा दिनक्षयः प्रोक्तः" इत्युक्ते एकसावनदिनवृत्तितिथित्रयरूपे काले, वाच०। स्था० ६ ठा०।

दिणबुड्ढि–दिनवृद्धि–स्त्री०। अधिकदिने, अतिरात्रोऽधिकदिनवृद्धिरिति यावत्। स्था० ६ ठा०।

दिणरासि–दिनराशि–पुं०। अहोरात्रपुञ्जे, द्र० १ उ०।

दिणसूरि–दिनसूरि–पुं०। इन्द्रदत्तसूरिशिष्ये खिंदगिरिसूरिगुरौ स्वनामख्याते सूरौ, ग० ४ अधि०।

दिण्ण–दत्त–त्रि०। दा-क्तः। विसृष्टे, त्यक्ते, रक्षिते च। द्वादशपुत्रमध्ये (दत्तक) पुत्रभेदे। वाच०। प्रज्ञा० २ पद। औ०। रा०। आचा०। स्था०। वितीर्णे, ज्ञा० १ श्रु० ८ अ०। प्रश्न०। आचा०। नमेरर्विंशतितमजिनस्य प्रथमभिक्षादायके, स०। आ० म०। निवेशिते, प्रश्न० १ आश्र० द्वार। चन्द्रप्रभस्याष्टमजिनस्य प्रथमे शिष्ये, स०। श्रेयांसस्यैकादशमस्य जिनस्य पूर्वभवे जीवे, स०। अष्टापदपर्वतस्थे स्वनामख्याते तापसे च। पुं०। उत्त० १० अ०। आ० म०। भावे क्तः। दाने, "दत्तं सप्तविधं प्रोक्त-मदत्तं षोडशाऽऽत्मकम्। पण्यमूल्यं भृतिस्तुष्ट्या, क्षेत्रादप्रत्युपकारतः ॥१॥ स्त्रीणां चानुग्रहार्थं च, दत्तं सप्तविधं स्मृतम्" इत्युक्ते दानभेदे च। न०। वाच०। "दिण्णभत्तसवेयणा।" दत्तं भृतिभक्तलक्षणं ऊढ्यं भोजनस्वरूपं वर्तनं मूल्यं येभ्यस्ते तथा। ज्ञा० १ श्रु० ८ अ०। पा०। उत्त०।

दैन्य–न०। दीनस्य भावः ष्यञ्। दीनत्वे, कार्पण्ये च। वाच०। शोके च। स्था० १० ठा०। भाव०।

दिण्णगणि (ए)–दत्तगणिन्–पुं०। वीरमोक्षात् साऽर्द्धद्वादशशते वर्षे जाते स्वनामख्याते प्रसिद्धे गणिनि, त्रि०।

दिण्णय–दत्तक–पुं०। स्वार्थे कन्। "दद्याद् माता पिता वा यं, स पुत्रो दत्तको भवेत्" इत्युक्ते स्वनामख्याते पुत्रभेदे, वाच०। दत्तकः पुत्रतया वितीर्णो, यथा बाहुबलिनाऽनलवेगः श्रूयते, स च पुत्रवत्पुत्रः। स्था० १० ठा०।

दिण्णवयण–दीप्तवचन–न०। कुपितवचने,प्रश्न० ५ संव० द्वार।

दित्त–दीप्त–पुं०। दीप-क्तः। निम्बूके, सिंहे च। स्वर्णे, हिङ्गुनि च। न०। वाच०। जाज्वल्यमाने, चं० प्र० १ पाहु०। जं०। भ०। नं०। नि०। ज्ञा०। उज्ज्वले, नं०। कान्तिमति, रा०। ज्वलिते, दग्धे, भासिते, दीप्तिमति, वाच०। भास्वरे च। त्रि०। चं० प्र० १६ पाहु०। ज्ञा०। लाङ्गलिकायाम्, अग्निशिखौषधौ, ज्योतिष्मत्यां च। टाप्। वाच०। धातुद्रव्यवीर्याऽऽदियुक्ते, "दित्तं च कामा समभिद्दवंति।" उत्त० ३४ अ०। प्रक्षिप्ते, "अहुा दित्ता विलियंविपुलभवणसयणासणजाणवाहणाइण्णा।" भ० २६ श० ३ उ०। स्था०।

दृप्त–त्रि०। दृप-क्तः। गर्विते, वाच०। दर्पवति, औ०। दश०। भ०। ज्ञा०। प्रश्न०। स्था०। जं०।

दित्तचित्त–दीप्तचित्त–पुं०। स्त्री०। हर्षातिरेकेणाप्लुतचित्ते, बृ० ३ उ०।

दीप्तचित्तस्य चिकित्सा-

दित्तचित्तं चिक्खुं गिलायमाणं नो कप्पइ तस्स गणावच्छेइयस्स निज्जूहित्तए अगिलाए तस्स करणिज्जं वे-

यावकियं जाव ततो रोगातंकातो विप्पमुक्को, ततो पच्छा तस्स अहालहुस्सगे नामं ववहारे पट्ठवियव्वे सिया ॥११॥

अस्य व्याख्या संक्षेपतः प्राग्वत् ॥ ११ ॥

संप्रति भाष्यकारो विस्तरमभिधित्सुराह--

एसेव गमो नियमा, दित्ताऽऽदीणं पि होति नायव्वो ।
जो होइ दित्तचित्तो, सो पलवति अनिच्छियव्वाइं।१४६।

एष एवानन्तरः क्षिप्तचित्तस्तत्र गमः प्रकारो लौकिकलोकोत्तरिकनेदाऽऽदिरूपो, दीप्तानामपि दीप्तचित्तप्रभृतीनामपि नियमाद् वेदितव्यः, यत्पुनर्नानात्वं तदभिधातव्यम् । तदेवाधिकृतसूत्रेऽभिधित्सुराह-(जो होइ इत्यादि) यो भवति दीप्तचित्तः सोऽनीप्सितव्यानि बहूनि प्रलपति, बहूनीप्सितप्रलपनं तस्य लक्षणं, क्षिप्तचित्तस्त्वपहृतचित्ततया मौनेनाप्यवतिष्ठते, इति परस्परं सूत्रयोर्विशेष इति भावः ॥ १४६ ॥

अथ कथमेष दीप्तचित्तो भवतीति तत्कारणप्रतिपादनार्थमाह-

इति एस अंसमाणो, खित्तो सम्माणतो हवति दित्तो ।
अग्गीव इंधणेहिं, दिप्पइ चित्तं इमेहिं तु ॥ १५० ॥

इति प्रागुक्तेन प्रकारेण, एष क्षिप्तः क्षिप्तचित्तोऽसंमानतोऽपमानतो भवति, दीप्तो दीप्तचित्तः पुनः सम्माणतो विशिष्टसम्मानाद्यापितो भवति । दीप्तचित्तो नाम-यस्य दीप्तं चित्तं, तच्च चित्तं दीप्यते, अग्निरिवेन्धनैरेभिर्वक्ष्यमाणैर्लाभमदाऽऽदिभिः॥१५०॥

तानेवाऽऽह-

लाभमदेण व मत्तो, अहवा जेऊण दुज्जए सत्तू ।
दित्तम्मि सातवाहणो, तमहं वुच्छं समासेणं ॥१५१॥

लाभमदेन वा मत्तः सन् दीप्तचित्तो भवति, अथवा दुर्जयान् शत्रून् जित्वा, तेष्वपि दीप्ते दीप्तचित्ते लौकिको दृष्टान्तः-शातवाहनो राजा, तमहं शातवाहनदृष्टान्तं समासेन वक्ष्ये ॥१५१॥

यथाप्रतिज्ञातमेव करोति-

महुरा दंमाऽऽणत्ती, निग्गय सहसा अपुच्छियं कयरं ।
तस्स य तिक्खा आणा,दुट्ठा गया दो वि पामेलं ॥१५२॥

गोयावरीए नदीए तमे अ पइट्ठाणं नयरं, तत्थ सालवाहणो राया, तस्स खरगओ अमच्चो, अन्नया सो सालवाहणो राया दंमनायगं आणवेइ-महुरं घेत्तूण सिग्घमागच्छ । सो य सहसा अपुच्छिऊण दंमेहिं सह निग्गतो । ततो चिंता जाया-का महुरा घेत्तव्वा,दक्खिणमहुरा,उत्तरमहुरा वा ?। तस्स आणा तिक्खा, पुणो पुच्छिउं न तीरति । ततो दंमा दुट्ठा काऊण दोसु वि पेसिया, गहिया तो दो वि महुराओ। ततो बद्धावणो पेसिओ । तेणाऽऽगंतूण राया बद्धाविओ-देव! दो वि महुराओ गहियाओ, अम्हे आगतो-देव! अमुगत्थ पदेसे विपुलो निहीपायमो जातो। ततो उवरुवरि कल्लाणनिवेदणेण हरिसवसविसप्पमाणहियओ परवसो जातो। ततो हरिसं धरिउमचायंतो सयाणिज्जं कुट्टइ, खंभे आहणइ, कुट्टे विहवइ, बहूणि य असमंजसाणि पलवति । ततो खरगेणामच्चेणं तमुवायण पक्खोहिउकामेण खंभा कुड्डा बहू विहविया। रन्ना पुच्छियं-केण विहवियं ?। सो भणइ-तुम्भेहिं । ततो मम सम्मुहमलीयमेवं जणति त्ति रुट्ठेण रन्ना खरगो पाएण ताडिओ। ततो संकेइयपुरिसेहिं उप्पाडितो, अन्नत्थ संगोविओ य । ततो कम्हि पओयणे समावडिए रन्ना पुच्छिओ-कत्थ अमच्चो चिट्ठति ?। संकेतियपुरिसेहिं कहियं-देव! तुम्हं अविणयकारि त्ति सो मारितो । राया विसूरिउं पवत्तो-दुट्ठु कयं मए,तयाणिं न किंपि वेइयं ति। ततो समावत्थो जातो,ताहे संकेइयपुरिसेहिं विण्णवितो-देव ! गवेसामि जइ वि कयाइ चंडालेहिं रक्खितो हुज्जा । ततो गवेसिऊण आणीतो, राया संतुट्ठो, अमच्चेण सब्भावो कथितो, तुट्ठेण विउला भोगा दिन्ना।" साम्प्रतमक्षरार्थो विवियते-शातवाहनेन राज्ञा मथुराग्रहणाय दण्डस्य दलस्याऽऽज्ञप्तिः कृता, ते दण्डाः सहसा कां मथुरां गृण्हीम इत्यपृष्ट्वा निर्गताः, तस्य च राज्ञ आज्ञा तीक्ष्णा, ततो भूयः प्रष्टुं न शक्नुवन्ति, ततस्ते दण्डा द्विविधा गता द्विधा विभज्य, एके दक्षिणमथुरायामपरे उत्तरमथुरायां गता इत्यर्थः । द्वे अपि च मथुरे पातयित्वा ते समागताः ॥१५२॥

सुयजम्ममहुरपाडण-निद्दिक्खंजनिवेयणा जुगव दित्तो ।
सयाणिज्जखंभकुड्डे, घट्टेइ इमाइं पलवंतो ॥१५३॥

सुतस्य जन्म, मथुरयोः पातनं, निर्देशभक्तस्य च युगपन्निवेदनायां स हर्षवशात् दीप्तचित्तोऽभवत्, दीप्तचित्ततया च इमानि वक्ष्यमाणानि प्रलपन् शयनीयस्तम्भकुड्यानि घट्टयति ॥ १५३ ॥

तत्र यानि प्रलपति तान्याह-

सच्चं भण गोयावरि ! पुव्वसमुद्देण साहिया संती ।
साहाणकुलसरिसं, जति ते कूले कुलं अत्थि ॥१५४॥

हे गोदावरि ! पूर्वसमुद्रेण साधिकृता कृतपर्याया सती सत्यं भण ब्रूहि,यदि तव कूले शातवाहनकुलसदृशं कुलमस्ति ।१५४।

उत्तरतो हिमवंतो, दाहिणतो साहवाहणो राया ।
समभारभरक्कंता, तेण न पल्हत्थए पुहवी ॥१५५॥

उत्तरे उत्तरस्यां दिशि हिमवान् गिरिर्दक्षिणतः शातवाहनो राजा, तेन समभारभराऽऽक्रान्ता सती पृथिवी न पर्यस्यति ! अन्यथा यद्यहं दक्षिणतो न स्यां, ततो हिमवद्भाराऽऽक्रान्ता नियमतः पर्यस्येत् ॥ १५५ ॥

एयाणि य अन्नाणि य, पलवंतो सो अजाणियव्वाइं ।
कुसलेण अमच्चेणं, खरगेणं सो उवाएणं ॥ १५६ ॥

एतान्यनन्तरोदितानि, अन्यानि च सोऽजणितव्यानि बहूनि प्रलपितवान्, ततः कुशलेन खरकनाम्नाऽमात्येनोपायेन प्रतिबोधयितुकामेन ।

किमित्याह-

विद्दवियं केणं ति य, तुब्भेहिं पायतालणा खरए ।
कत्थ त्ति मारितो सो, दुट्ठु त्ति य दंसणे भोगा ॥१५७॥

विद्रवितं विनाशितं समस्तं स्तम्भकुड्यादि । राज्ञा पृष्टम्-केनेदं विनाशितम् ?। अमात्यः संमुखीभूय सरोषं निष्ठुरं च वक्ति-युष्माभिः । ततो राज्ञा कुपितेन तस्य पादेन ताडना कृता, तदनन्तरं संकेतितपुरुषैः स उत्पाटितः, संगोपितश्च । ततः समागते कस्मिंश्चित्प्रयोजने राज्ञा पृष्टम्-कुत्रामात्यो वर्त्तते ? । संकेतितपुरुषैरुक्तम्-देव ! युष्मत्पादानामविनयकारी मारितः । ततो दुष्टं कृतं मयेति प्रत्यूतं विस्मरितवान् । स्वस्थीभूतेऽस्मिन् ज्ञाते संकेतितपुरुषैरमात्यदर्शनं कारितम् । सद्भावकथनानन्तरं राज्ञा तस्मै विपुला भोगाः प्रदत्ता इति' ॥ १५७ ॥

उक्तो लौकिको दीप्तचित्तो, लोकोत्तरिकमाह-

महऽज्झयणं भत्तखीरे, कंबलगपक्खिगहे फलगसट्ठे ।
पासाए कप्पट्टे, वायं काऊण वा दित्तो ॥ १५८ ॥

महाध्ययनं पौण्डरीकाऽऽदिकं दिवसेन,पौरुष्या वा समागतम्, अथवा-नक्तमुत्कृष्टं लब्धं, नास्मिन्क्षेत्रे भक्तमीदृशं केनापि लब्धपूर्वं, यदि वा-क्षीरं चातुर्जातकसंमिश्रमवाप्तं, नैतादृशमुत्कृष्टं क्षीरं केनापि लब्धपूर्वं, यदि वा-कम्बलरत्नमतिविशिष्टम्,अथवा-विशिष्टवर्णाऽऽदिगुणोपेतम्,अपलक्षणहीनं पतद्ग्रहं(फलग त्ति) यद्वा-फलकं चम्पकपट्टाऽऽदिकम् । अथवा-आद्यमीश्वरमतिदातारमुपासकत्वेन प्रतिपन्नं लब्धम्। यदि वा-प्रासादे सर्वोत्कृष्टे उपाश्रयत्वेन लब्धे, (कप्पट्टे इति) ईश्वरपुत्रे रूपवति प्रज्ञानिधाने लब्धे प्रमोदते, प्रमोदभरवशाच्च दीप्तचित्तो भवति । एतेन लाभमदेन वा मत्त इति लोकोत्तरे योजितम् । अधुना दुर्जेयान् शत्रून् जित्वेत्येतद्योजयति-(वायं काऊण व त्ति) वादं वा परप्रवादिना दुर्जयेन सह कृत्वा तं पराजित्यातिहर्षवशतो दीप्तो दीप्तचित्तो भवति ॥१५८॥

साम्प्रतमेनामेव गाथां विनेयजनानुग्रहाय विवरीषुराह-

पुंडरियमाइयं खलु, अज्झयणं कहिऊण दिवसेणं ।
हरिसेण दित्तचित्तो, एवं होज्जाहि कोई उ ॥ १५९ ॥

कश्चित्पौण्डरीकाऽऽदिकमध्ययनं खलु दिवसेन, उपलक्षणमेतत्-पौरुष्यादिना वा, कथित्वा पठित्वा, हर्षेण दीप्तचित्तो भवेत्, एवमध्ययनलाभेन दीप्तचित्तता ॥ १५९ ॥

दुल्लहदव्वे देसे, पमिसेविय तं अलद्धपुव्वं वा ।
आहारोवहिसही, अहुणाविवाहो व कप्पट्ठो ॥१६०॥

दुर्लभद्रव्ये देशे, तद् दुर्लभद्रव्यं, केनाप्यलब्धपूर्वं, वाशब्दः समुच्चये, प्रतिसेव्य लब्ध्वा, दीप्तचित्तो भवति । एवमाहारे भक्तक्षीराऽऽदिके,उपधौ कम्बलरत्नाऽऽदिके,वसतौ प्रासादाऽऽदिरूपायां लब्धायाम्,यदि वा-(कप्पट्ठो त्ति) ईश्वरपुत्रोऽधुना कृतविवाहः प्रज्ञानिधानं शिष्यत्वेन लब्ध इति हर्षेण दीप्तचित्तो भूयात् ॥ १६० ॥

तत्रैतेषु दीप्तचित्तेषु यतनामाह-

दिवसेण पोरिसीए, तुमए ठवियं इमेण अद्धेण ।
एयस्स नत्थि गव्वो, दुम्मेहतरस्स को तुज्झं ? ॥१६१॥

दिवसेन,पौरुष्या वा त्वया पौण्डरीकाऽऽदिकमध्ययनं स्थापितं पठितं, तदनेन दिवसस्य, पौरुष्या वा अर्धेन, तथाप्येतस्य नास्ति गर्वः, तव पुनर्दुर्मेधसः को गर्वः ?, नैव युक्त इति भावः । एतस्मादपि तव हीनप्रज्ञत्वात् ॥ १६१ ॥

तद्दव्वस्स दुगुंछण, दिट्ठंतो भावणा असरिसेणं ।
पगयम्मि पमत्तेत्ता,विज्जाऽऽदि विसोहि जा कम्मं॥१६२॥

यतो दुर्लभद्रव्यं नक्तं क्षीराऽऽदि तेन लब्धं, तस्य द्रव्यस्य जुगुप्सनं क्रियते,यथा नेदमतिशोभनम्, अमुको वाऽस्य दोष इत्यादि । यद्वा-दृष्टान्तोऽन्येनाप्यीदृशमानीतमिति प्रदर्शनं क्रियते । तस्य दृष्टान्तस्य भावना असदृशेन तस्मात् शतभागेन, सहस्रभागेन वा यो हीनस्तेन कर्तव्या । तथा (पगयम्मि इत्यादि) प्रकृते अवमतरस्य विशिष्टे प्रासादाऽऽदिके संपाद्ये तथाविधं भावकमितरं वा प्राप्य तदभावे कस्यापि महर्द्धिकस्य, विद्याऽऽदि, आदिशब्दाद् मन्त्रचूर्णाऽऽदिपरिग्रहः, यावत्कर्मापि प्रयुज्य, ततोऽवमतरस्य विशिष्टप्रासादाऽऽदिसंपादने तस्यापप्रज्ञना संपादनीया, येन प्रगुणो भवति । ततः पश्चाद्विद्याऽऽदिप्रयोगजनितपापविशुद्ध्यै विशोधिः प्रायश्चित्तं प्रतिपत्तव्येति ॥ १६२ ॥

साम्प्रतमेतदेव विवरीषुराह-

उक्कोसं बहुविहियं, आहारोवगरणफलगमादीयं ।
खुड्डेणोमतरेणं, आणीतो जामितो पन्नणो ॥ १६३ ॥

उत्कृष्टं बहुविधिकं बहुभेदमाहारं भक्तक्षीराऽऽदिकमुपकरणं कम्बलरत्नप्रभृति फलकं चम्पकपट्टतिनिसपट्टाऽऽदिकम, आदिशब्दः स्वगतानेकभेदसूचकः, तथाविधश्राद्धप्रज्ञापनेन विद्याऽऽदिप्रयोगेण वा संपाद्य क्षुल्लेन क्षुल्लकेन,गुणतोऽवमतरेण शतभागसहस्रभागाऽऽदिना हीनेन आनीतमुपदर्श्य सोऽपप्रज्ञाजितः क्रियते, ततः प्रगुणो भवति ॥ १६३ ॥

प्रासादाऽऽदिविषये यतनामाह-

अदिट्ठसड्ढकहणं, आउट्टा अभिणवो य पासाओ ।
कयमित्ते य विवाहे, सिद्धादिसुया कइयवेणं ॥१६४॥

यस्तेन श्राद्धो न दृष्टोऽदृष्टपूर्वः, तस्यादृष्टस्य श्राद्धस्य कथनं प्रज्ञापना,उपलक्षणमेतत्-अन्यस्य महर्द्धिकस्य विद्याऽऽदिप्रयोगतोऽभिमुखीकरणं वा, ततश्च ते आवृताः सन्तस्तस्य लब्धमानिनः समीपमागत्य ब्रुवते-वयमेतेन क्षुल्लकेन प्रज्ञापिताः, ततोऽभिनव एव कृतमात्र एव युष्माकं मे प्रासादो दत्त इति । तथा सिद्धपुत्राऽऽदिकेषु प्रज्ञापनं, विद्याऽऽदिप्रयोगं वा कृत्वा तत्सुतः कृतमात्रधीर्वोह्य एव व्रतार्थं तत्समक्षमुपस्थापनीयो, येन तस्यापप्रज्ञानोपजायते, ततः पश्चादुक्तः । तथा कैतवेन कपटेन सिद्धाऽऽदिसुताः सिद्धपुत्राऽऽदिसुताः कृतमात्र एव विवाहे उत्पादनीयाः, शकुनाऽऽदिवैगुण्यमुद्भाव्य मुच्यन्ते, यदि न स्यात् तास्यकी व्रतभ्रंशेति ॥ १६४ ॥

" वायं काऊण व " इत्यत्र यतनामाह-

चरगाऽऽदि पन्नवेउं, पुव्वं तस्स पुरतो जिणावेंति ।
ओमतरगेण तत्तो, पगुणति ओज्जामितो एवं ॥१६५॥

चरकाऽऽदिकं प्रचण्डं परवादिनमधःकृतसाधोर्वादे वाऽसाध्यं पूर्वं प्रज्ञाप्य प्ररूपितस्याधिकृतस्य वादाभिमानिनः साधोः पुरतोऽवमतरेण चरकाऽऽदिकं जापयन्ति वरवृषभाः,ततः स एवमपप्रज्ञाजितः सन् प्रगुणायते प्रगुणो भवति ॥ १६५ ॥ व्य० २ उ० । बृ० ।

दित्तं निग्गंथिं निग्गंथे गिण्हमाणे वा अवक्खंबमाणे वा नाइक्कमइ ॥ ११ ॥

दीप्तचित्तां निर्ग्रन्थीं गृह्णन्नवलम्बमानो वा नातिक्रामत्याज्ञाम् । तत्र निर्ग्रन्थस्य निर्ग्रन्थ्या वा अपि वक्तव्यता वक्तव्या,नवरमेतत्प्रत्यभिलापः कर्तव्यः । बृ० ६ उ० । स्था० । नि० । ओघ० ।

दित्ततव-दीप्ततपस्-पुं० । दीप्तं तपो यस्य स दीप्ततपः । हुताशन इव कर्मवनदाहकत्वेन ज्वलत्तेजस्के तपस्विनि, विपा० १ श्रु० १ अ० । ज्ञा० । स्था० । औ० । नि० । भ० ।

दित्तधर-दीप्तधर-पुं० । ज्वलितधारके, स्था० १० ठा० ।

दृप्तधर-पुं० । दर्पवद्धारके, स्था० १० ठा० ।

दित्ता-दीप्ता-स्त्री० । ज्वलन्त्याम् , उत्त० १६ अ० ।

दित्ति–दिति (ती)–स्त्री० । दोऽवखण्डने, क्तिच् वा ङीप् । दैत्यमातरि कश्यपपत्न्याम्, भावे क्तिन् । खण्डने, वाच० । पुनर्वसुनक्षत्राधिष्ठातृदेवतायाम्, स्था० २ ठा० ३ उ० । चं० प्र० ।

दीप्ति–स्त्री० । दीप-क्तिन् । कान्तौ, " कान्तिरेव वयोभोग-देशकालगुणाऽऽदिभिः । उद्दीपिताऽतिविस्तारं, प्राप्ता दीप्तिरिहोच्यते ॥ १ ॥ " इत्युक्ते स्त्रीणां गुणभेदे, वाच० । दीपने, ज्ञा० १ श्रु० १० अ० ।

दिप्तिमं–दीप्तिमत्–पुं० । परवादिनामकोत्ये षट्त्रिंशत्सूरिगुणानां चतुस्त्रिंशत्तमे गुणे, ग० १ अधि० । आचा० । प्रव० ।

दित्सा–दित्सा–स्त्री० । दातुमिच्छायाम्, सूत्र० २ श्रु० ४ अ० ।

दिदिक्खा–दिदृक्षा–स्त्री० । द्रष्टुमिच्छा दिदृक्षा । दर्शनेच्छायाम्, नं० । षो० ।

दिदृक्षा भवबीजं च–विद्या चाऽनादिवासना ।
भङ्गचेषैवाऽऽश्रिता साङ्ख्य–शैववेदान्तिसौगतैः ॥२७॥

(दिदृक्षेति) पुरुषस्य प्रकृतिविकारान् द्रष्टुमिच्छा दिदृक्षा सैवेयमिति साङ्ख्याः, भवबीजमिति शैवाः, अविद्येति वेदान्तिकाः, अनादिवासनेति सौगताः ॥ २६ ॥ द्वा० १२ द्वा० ।

दिद्धू–दिग्ध–पुं० । दिह-क्तः । विषाक्तबाणे, बहौ च । भावे क्तः । स्नेहे, क्षेपणे, न० । कर्मणि क्तः । लिप्ते, वाच० । नि० चू० १ उ० ।

दिप्प–दीप्र–त्रि० । प्रकाशिते, " दीप्रदीपाङ्कुरायते । " रत्ना० १ परि० ।

दिप्पंत–दीप्यमान–त्रि० । भासमाने, नि० चू० १ उ० । दीप्यमानविमलग्रहगणसमप्रभाः । दीप्यमानो रजन्यां भास्वान् विमलोऽत्र धूल्याद्यपगमेन ग्रहगणो ग्रहसमूहस्तेन समा प्रभा यासां ताः । जी० ३ प्रति० ४ उ० । अनर्घे, दे० ना० ५ वर्ग ३६ गाथा ।

दिप्पमाण–दीप्यमान–त्रि० । भासमाने, औ० । कल्प० । " दिप्पमाणसोहं । " दीप्यमाना शोभा यस्य तम् । कल्प० ३ क्षण ।

दिप्पा–दीप्रा–स्त्री० । दीपप्रभासदृश्याम्, ध० १ अधि० । योगदृष्टिभेदे, द्वा० ।

प्राणायामवती दीप्रा, योगोत्थानविवर्जिता ।
तत्त्वश्रवणसंयुक्ता, सूक्ष्मबोधसमाश्रिता ॥ १६ ॥

प्राणायामवती प्राणायामसहिता दीप्रा दृष्टिः योगोत्थानेन विवर्जिता, प्रशान्तवाहितात्वाभावात् । तत्त्वश्रवणेन संयुक्ता, शुश्रूषाफलभावात् । सूक्ष्मबोधेन विवर्जिता, वेद्यसंवेद्यपदाप्राप्तेः ॥ १६ ॥ द्वा० २२ द्वा० । (प्राणायामव्याख्या ' पाणायाम ' शब्दे ऽष्टम्यां) (तत्त्वश्रुतिश्च ' तत्तसुइ ' शब्देऽस्मिन्नेव भागे २१८३ पृष्ठे गता)

कर्मवज्रविभेदेना–नन्तधर्मकगोचरे ।
वेद्यसंवेद्यपदजे, बोधे सूक्ष्मत्वमत्र न ॥ २३ ॥

(कर्मेति) कर्मैव वज्रमतिदुर्भेदत्वात् तस्य विभेदेनानन्तधर्मकं भेदाभेदनित्यत्वानित्यत्वाऽऽद्यनन्तधर्मशबलं यद्वस्तु तद्गोचरे वस्तुनस्तथात्वपरिच्छेदेति, वेद्यसंवेद्यपदजे बोधे सूक्ष्मत्वं यत्तदत्र दीप्रायां दृष्टौ न भवति, तदधोभूमिकारूपत्वाद्दस्याः । तदुक्तम्-" भवाम्भोधिसमुत्तारात्, कर्मैवज्रविभेदतः ।
ज्ञेयव्याप्तेश्च कात्स्न्येन, सूक्ष्मत्वं नाऽत्यमत्र तु ॥ १ ॥ " ॥२३॥

अवेद्यसंवेद्यपदं, चतसृष्वासु दृष्टिषु ।
पक्किच्छायाजलचर–प्रवृत्त्याद्यं यथोत्तरम् ॥ २४ ॥

(अवेद्येति) आसु मित्राऽऽद्यासु चतसृषु दृष्टिषु यद्यस्मादवेद्यसंवेद्यपदम् उत्तरणमधिकम् । पक्किच्छायायां जलसंसर्गिण्यां जलधिया जलचरप्रवृत्तिरिवाऽऽभा वेद्यपदसंवेद्यसम्बन्धिनी यत्र तत्तथा । तत्र हि न तात्त्विकं वेद्यसंवेद्यपदं, किं त्वारोपाधिष्ठानसंसर्गितयाऽतात्त्विकम्, अत एवानुत्तरणमित्यर्थः । एतदपि चरमासु चरमयथाप्रवृत्तकरणेन एवेत्याचार्याः । तदिदमभिप्रेत्योक्तम्-" अवेद्यसंवेद्यपदं, यस्मादासु तथोत्तरणम् । पक्किच्छायाजलचर-प्रवृत्त्याद्यमतः परम् ॥ १ ॥ " ॥२६॥

वेद्यं संवेद्यते यस्मि–न्नपायाऽऽदिनिबन्धनम् ।
पदं तद् वेद्यसंवेद्य–मन्यदेतद्विपर्ययात् ॥ २५ ॥

(वेद्यमिति) वेद्यं वेदनीयं वस्तुस्थित्या, तथा भावयोगिसामान्येनाविकल्पकज्ञानग्राह्यमित्यर्थः । संवेद्यते सबोपशमानुरूपं निश्चयबुद्ध्या विज्ञायते, यस्मिन्नाशयस्थाने, अपायाऽऽदिनिबन्धनं नरकस्वर्गाऽऽदिकारणं हिंसाऽऽहिंसाऽऽदि तद्वेद्यसंवेद्यं पदम्, अन्यदवेद्यसंवेद्यपदमेतद्विपर्ययात्तदुक्तलक्षणव्यत्ययात् । यद्यपि शुद्धं यथावद्वेद्यसंवेदनं मार्गानुसारिण्यासन्नवि, योग्यतामात्रेण च मित्राऽऽदिदृष्टिष्वपि संभवि, तथाऽपि वेद्यसंवेद्यपदप्रवृत्तिनिमित्तं ग्रन्थिभेदजनितो रुचिविशेष एवेति न दोषः ॥२५॥

अपायशक्तिमालिन्यं, सूक्ष्मबोधविघातकृत् ।
न वेद्यसंवेद्यपदे, वज्रतणकुलसन्निभे ॥ २६ ॥

(अपायेति) अपायशक्तिमालिन्यं नरकाऽऽद्यपायशक्तिमलिनत्वं, सूक्ष्मबोधस्य विघातकृत् अपायहेत्वासेवनक्लिष्टबीजसङ्क्रान्तस्य सद्ग्रन्थाऽऽवरणतथोपशमाभावनियतत्वात् । न वेद्यसंवेद्यपदे उक्तलक्षणे वज्रतणकुलसन्निभे, प्रायो दुर्गतावपि मानसदुःखाज्ञानेन तद्वद्वेद्यसंवेद्यपदवतो भावपाकायोगात् । एतच्च व्यवहारिकं वेद्यसंवेद्यपदं भावमाश्रित्योक्तम् । निश्चयतस्तु प्रतिपतितसहदृशीनामनन्तसंसारिणां नास्त्येव वेद्यसंवेद्यपदभावः । नैश्चयिकतद्वति क्षायिकसम्यक्त्वे श्रेणिकाऽऽदाविव पुनर्दुर्गत्ययोगेन तत्तल्लोहपदन्यासतुल्यायां अपि पापप्रवृत्तेश्चरमाया एवोपपत्तेः ।

यथोक्तम्-

" अतोऽन्यकुलरा खस्मात्, पापे कर्माऽऽगसोऽपि हि ।
तत्तल्लोहपदन्यास–तुल्या वृत्तिः क्वचिद्यदि ॥ १ ॥
वेद्यसंवेद्यपदतः, संवेगातिशयादिति ।
चरमैव भवत्येषा, पुनर्दुर्गत्ययोगतः ॥ २ ॥ " इति ॥ २६ ॥

तच्चक्तिः स्थूलबोधस्य, बीजमन्यत्र चाक्षतम् ।
तत्र यत्पुण्यबन्धोऽपि, ह्यन्तापायोत्तरः स्मृतः ॥ २७ ॥

(तच्चक्तिरिति) अन्यत्र चावेद्यसंवेद्यपदे तच्चक्तिरपायशक्तिः स्थूलबोधस्य बीजमक्षतमनभिभूतम् । तत्रावेद्यसंवेद्यपदे यद्यस्मात् पुण्यबन्धोऽपि ह्यन्तापायोत्तरो विघ्नानन्तरीयकः स्मृतः, ततस्तत्पुण्यस्य पापानुबन्धित्वात् ॥ २७ ॥

प्रवृत्तिरपि योगस्य, वैराग्यान्मोहगर्भतः ।
प्रसूतेऽपायजननी–मुत्तरां मोहवासनाम् ॥ २८ ॥

(प्रवृत्तिरपीति) तत्रेति प्राक्तनमत्रानुषज्यते । तत्र मोहगर्भतो वैराग्याद् योगस्य प्रवृत्तिरपि सद्गुरुपारतन्त्र्याभावेऽपायजननीमुत्तरां मोहवासनां प्रसूते, मोहमूलानुष्ठानस्य मोहवासनाऽबन्ध्यबीजत्वात्, अतोऽत्र योगप्रवृत्तिरप्यकिञ्चित्करीति भावः ॥ २७ ॥

अवेद्यसंवेद्यपदे, पुण्यं निरनुबन्धकम् ।
जवाभिनन्दिजन्तूनां, पापं स्यात्सानुबन्धकम् ॥२८॥

(अवेद्येति) अवेद्यसंवेद्यपदे पुण्यं निरनुबन्धकमनुबन्धरहितं स्यात् । यदि कदाचिन्न स्यात् पापानुबन्धि, सानुबन्धे तत्र ग्रन्थिभेदस्य नियामकत्वात् । भवाभिनन्दिनां क्षुद्रत्वाऽऽदिदोषवतां जन्तूनां पापं सानुबन्धकमनुबन्धसहितं स्यात्,रागद्वेषाऽऽदिप्राबल्यस्य तदनुबन्धाबन्ध्यबीजत्वात् ॥२८॥

कुकृत्यं कृत्यमाजाति, कृत्यं चाकृत्यमेव हि ।
अत्र व्यामूढचित्तानां, कण्डूकण्डूयनाऽऽदिवत् ॥३०॥

(कुकृत्यमिति) कुकृत्यं प्राणातिपाताऽऽदिकृत्यं करणीयमाभाति । कृत्यं चाहिंसाऽऽदि,अकृत्यमेव हि अनाचरणीयमेव । अवाऽवेद्यसंवेद्यपदे व्यामूढचित्तानां मोहग्रस्तमानसानां, कण्डूत्रानां कण्डूयनाऽऽदिवत् । आदिना कृम्याकुलस्य कुष्ठिनोऽग्निसेवनग्रहः । कण्डूयकाऽऽदीनां कण्डूयादेरिव जवाभिनन्दिनामवेद्यसंवेद्यपदादेव विपर्ययधीरिति भावः ॥३०॥

एतेऽसवेद्यया ऽऽत्मानं, मलिनं कुर्वते निजम् ।
वमिशाऽऽमिषवत्सुच्छे, प्रसक्ता भोगजे सुखे ॥३१॥

(एत इति) एते भवाभिनन्दिनोऽसच्चेष्टया महारम्भाऽऽदिप्रवृत्तिलक्षणया निजमात्मानं मलिनं कुर्वते, कर्मरजःसम्बन्धात्, बडिशाऽऽमिषवद् मत्स्यगलमांसवत् । तुच्छेऽल्पे रौद्रविपाके प्रसक्ताः भोगजे भोगप्रभवे सुखे ॥३१॥

अवेद्यसंवेद्यपदं, सत्सङ्गाऽऽगमयोगतः ।
तद्दुर्गतिप्रदं ज्ञेयं, परमाऽऽनन्दमिच्छता ॥३२॥

(अवेद्येति) यतोऽस्यायं दारुणो विपाकः,तत्तस्मादवेद्यसंवेद्यपदं दुर्गतिप्रदं नरकाऽऽदिदुर्गतिकारणम्, सत्सङ्गाऽऽगमयोगतो विशिष्टसंगमाऽऽगमसम्बन्धात् । परमाऽऽनन्दं मोक्षसुखमिच्छता ज्ञेयम्, अस्यामेव भूमिकायामन्यदा ज्ञातुमशक्यत्वात् । अत एवानुवादपरोऽप्यागम इति योगाऽऽचार्या अयोग्यनियोगासिद्धेरिति ॥३२॥ द्वा० २२ द्वा० ।

दिय–द्विज–पुं० । द्विर्जायते, सुजर्थे वृत्तौ द्विशब्दः, जन–डः । संस्कृतब्राह्मणे, वाच० । आचा० । सूत्र० ।

दिव–न० । दिव–कः । स्वर्गे, दिवौकस इत्यत्रादन्तता । दिवसे, वने च । वाच० । स० ४३ समo ।

दिव–त्रि० । द्वि०व० । द्विकसंख्यायां,तद्युक्ते च । त्रि० । वाच० ।

दियपोय–द्विजपोत–पुं० । पक्षिशिशौ, सूत्र० १ श्रु० १४ अ० ।

दियस–दिवस–पुं० । दीव्यन्त्यत्र, दिव असच् किच्च । सूर्यैकिरणोपलक्षिते पञ्चदशमुहूर्ताऽऽत्मके काले, तं० । ज्यो० । मासस्य त्रिंशत्तमे भागे, ज्यो० १ पाहु० ।

दियसयर–दिवसकर–पुं० । सूर्ये, को० ।

दियसबंभयारि (णि)–दिवसब्रह्मचारिन्–पुं० । दिवसे ब्रह्म चरतीत्येवंशीलो दिवसब्रह्मचारी । दिवसे मैथुनत्यागिनि, पञ्चा० १० विव० । स० । आ० चू० ।

दिया–दिवा–अव्य० । दिव–कः । दिवसे, पा० । भ० ।

दियाभोयण–दिवाभोजन–न० । दिवसभोजने, नि० चू० ११ उ० । (दिवाभोजनस्य अवर्णवादे प्रायश्चित्तम् ' राईभोयण ' शब्दे वक्ष्यते)

दियालोगच्चुय–देवलोकच्युत–त्रि० । ऋषीभूते, "दियालोगच्चुयाभासिया ।" देवलोकच्युतैः ऋषीभूतैराभाषितानि देवलोकच्युताऽऽभाषितानि । स० ४३ समo ।

दिरअ–छिरद–पुं० । " छिन्योरुत् " ॥ ८ । १ । ६४ ॥ इत्यत्र बहुलाधिकारात्क्वचिदुत्वं न । प्रा० १ पाद । छौ रदौ यस्य सः । हस्तिनि, वाच० ।

दिलिवेढय–दिलिवेष्टक–पुं० । ग्रहनेदे, प्रश्न० १ आश्र० द्वार ।

दिलिदिअ–देशी–बाले, दे० ना० ५ वर्ग ४० गाथा ।

दिल्लीपुर–दिल्लीपुर–न० । यमुनातटस्थे इन्द्रप्रस्थनामके नगरे, ती० १६ कल्प ।

दिव–दिव–न० । स्वर्गे, सूत्र० १ श्रु० ६ अ० ।

दिवड्ढ–ध्यर्द्ध–त्रि० । द्वितीयमर्द्धं यस्य तद् द्व्यर्द्धम् । सार्द्धे, सू० प्र० १० पाहु० । चं० प्र० । आ० म० । ज्यो० । स० ।

ध्यपार्द्ध–त्रि० । द्वितीयमपार्द्धं यत्र तद् ध्यपार्द्धम् । सार्द्धे, स्था० ६ ठा० ।

दिवड्ढखेत्त–ध्यपार्द्धक्षेत्र–न० । सार्द्धक्षेत्रे, सू० प्र० १ पाहु० ।

दिवड्ढखेत्तिय–ध्यपार्द्धक्षेत्रिक–त्रि० । द्व्यपार्द्धं क्षेत्रं येषां ते । सार्द्धक्षेत्रिके, स्था० ६ ठा० ।

ध्यर्द्धक्षेत्रिक–त्रि० । द्व्यर्द्धं क्षेत्रं येषां ते । सार्द्धैकक्षेत्रिके, स० ४५ समo । ज्यो० । सू० प्र० । चं० प्र० । आ० म० ।

दिवस–दिवस–पुं० । " दिवसे सः " ॥ ८ । १ । २६३ ॥ इति सस्य पाक्षिको हः । प्रा० १ पाद । दिवसकरप्रभाप्रकाशितनभःखण्डरूपे सूर्यकिरणाऽऽस्पृष्टव्योमखण्डरूपे वा चतुःप्रहराऽऽत्मके समये, विशे० । स० । औ० । ध० । प्रश्न० । द्वी० ।

ता कहं ते दिवसा आहियत्ति वएज्जा ? । ता एगमेगस्स णं पक्खस्स पन्नरस दिवसा पन्नत्ता । तं जहा–पडिवादिवसे, बितियदिवसे, जाव०पन्नरसे दिवसे । ता एतेसि णं पन्नरसण्हं दिवसाणं पन्नरस णामधेज्जा पन्नत्ता । तं जहा–

" पुव्वंगे सिद्धमणो–रमे य तत्तो मणोहरे चेव ।
जसनदे य जसोधरे, सव्वकामसमिद्धे ति य ॥ १ ॥
इंदमुद्धाभिसित्ते, सोमणसं धणंजए य बोधव्वे ।
अत्थसिद्धे अभिजिते, अवसप्पे भतंजए चेव ॥ २ ॥
अग्गिवेसे उवसमे, दिवसाणं नामधेज्जाइं । "

(ता कहं ते इत्यादि) 'ता' इति पूर्ववत् । कथं केन प्रकारेण, केन क्रमेणेत्यर्थः ? । भगवन् ! त्वया दिवसा आख्याता इति व-

देत् ?। भगवानाह-(एगमेगस्स णमित्यादि) 'ता' इति पूर्ववत् । एकैकस्य, अवापान्तरालवर्ती, मकारोऽलाक्षणिकः, णमिति वाक्यालङ्कारे । पक्षस्य पञ्चदश दिवसाः प्रज्ञप्ताः, वक्ष्यमाणक्रमयुक्ताः तमेव क्रममाह-(तं जहेत्यादि) तद्यथा-प्रतिपत्प्रथमो दिवसो, द्वितीया द्वितीयो दिवसः, तृतीया तृतीयो दिवसः, एवं यावत्पञ्चदशी पञ्चदशो दिवसः । (ता एएसि णमित्यादि) तत्र एतेषां पञ्चदशानां दिवसानां क्रमेण पञ्चदश नामधेयानि प्रज्ञप्तानि । तद्यथा-प्रथमः प्रतिपल्लक्षणः पूर्वाङ्गनामा, द्वितीयः सिद्धमनोरमः, तृतीयो मनोहरः, चतुर्थो यशोभद्रः, पञ्चमो यशोधरः, षष्ठः सर्वकामसमृद्धः, सप्तम इन्द्रमूर्धाभिषिक्तः, अष्टमः सौमनसो, नवमो धनञ्जयो, दशमोऽर्थसिद्धः, एकादशोऽभिजित, द्वादशोऽत्यसनं, त्रयोदशः शतञ्जयः, चतुर्दशोऽग्निवेशः, पञ्चदश उपशमः । एतानि दिवसानां क्रमेण नामधेयानि । चं०प्र० १० पाहु० १३ पाहु० पाहु० । द्वादशाऽऽदिमुहूर्तो दिवसः । आ० म० २ अ० । अहोरात्रे, स्था० ५ ठा० ३ उ० । (दिनरात्रिहानिवृद्धी ' सूरमंडल ' शब्दे वक्ष्येते)

दिवसतिहि-दिवसतिथि-स्त्री० । तिथेः पूर्वभागे, सू० प्र० १० पाहु० । चं० प्र० ।

दिवसभयग-दिवसभृतक-पुं० । भृयते पोष्यते स्मेति भृतः, स एव भृतकः, कर्मकर इत्यर्थः । प्रतिदिवसं नियतमूल्येन कर्मकरणार्थं यो गृह्यते सः । प्रतिदिवसं नियतमूल्येन कर्मकरणार्थं गृहीते भृत्ये, स्था० ४ ठा० १ उ० । पं० चू० । पं० भा० ।

दिवसुज्जुत्त-दिवसोद्युक्त-त्रि० । प्रतिदिनमुद्यते, प्रश्न० ३ आश्र० द्वार ।

दिवह-दिवस-पुं० । ' दिवस ' शब्दार्थे, प्रा० १ पद ।

दिवाकर-दिवाकर-पुं० । सूर्ये, उत्त० ११ अ० । रा० । ज्ञा० । औ० । " उत्तिट्ठते दिवायरे जलंत इव । " उत्त० ११ अ० ।

दिवाकरकूम-दिवाकरकूट-पुं० । जम्बूमन्दरदक्षिणे रुचकवरपर्वतस्थाग्नेये कूटे, स्था० ८ ठा० ।

दिवागर-दिवाकर-पुं० । ' दिवाकर ' शब्दार्थे, उत्त० ११ अ० ।

दिवागरकूम-दिवाकरकूट-पुं० । ' दिवाकरकूम ' शब्दार्थे, स्था० ८ ठा० ।

दिविट्ठ-द्विपृष्ठ-पुं० । द्वितीये वासुदेवे, ति० । आव० ।

दिवे-दिवा-अव्य० । " किलाऽथवा-दिवा-सह-नहेः किराहअह दिवे सहुं नाहिं " ॥ ८ । ४ । ४१६ ॥ इति दिवा इत्यस्य 'दिवे' इत्यादेशः । दिवसे, वाच० । " दिवे दिवे गंग पदाणु । " प्रा० ४ पाद ।

दिव्व-दिव्य-त्रि० । दीव्यतेऽनेन दिव-कयप् । उत्तमे, सं० १० समo । औ० । प्रधाने, रा० । प्रश्न० । जी० । प्र० । औ० । ज्ञा० । स्था० । चं० प्र० । सू० प्र० । प्रज्ञा० । विशिष्टे, सं० १० समo । नं० । स्वर्गगतवस्तुविषये, स्था० ३ ठा० ३ उ० । आ० क० । भ० । सुरनिर्मिते, आ० म० १ अ० २ खण्ड । स्था० । आ० क० । देवोचिते, औ० । कल्प० । देवरमणे, रा० । व्यन्तराद्दृहासाऽऽदिविषये पापश्रुतभेदे, ध० ३ अधि० । व्यन्तराऽऽदिकृते उपसर्गे, आव० ५ अ० । विशे० । उत्त० । कल्प० । सूत्र० । आ० चू० । दैवजन्ये, न० । द्यौः स्वर्गस्तद्वासी देवोऽप्युपचारादु द्यौः, तत्र भवो दिव्यः । वैमानिकाऽऽदिदेवसम्बन्धिनि, स्था० ४ ठा० ४ उ० " दिव्वं जाणं मणिव्वुइकरं । " । ज्ञा० १ श्रु० ६ अ० । "दिव्वजुयलपरिहिओ । " उत्त० २५ अ० । मनोहरे, शोभनाऽऽत्मके च । दिवि भवं यत् । स्वर्गे, चन्दने, शपथरूपे, अलौकिकप्रमाणभेदे, गुग्गुलौ, तन्त्रोक्ते भावभेदे च । न० । नायकभेदे, पुं० । वाच० ।

दिव्वग-दिव्यक-त्रि० । व्यन्तराऽऽदिना हास्यप्रद्वेषाऽऽदिजनिते उपसर्गभेदे, सूत्र० १ श्रु० २ अ० २ उ० ।

दिव्वजाग-दिव्ययाग-पुं० । जिनपूजायाम्, कल्प० ५ क्षण ।

दिव्वतुमिय-दिव्यत्रुटित-न० । वेणुवीणामृदङ्गाऽऽद्यातोद्येषु, रा० । दिव्यतूर्य—न० । वाद्यभेदे, रा० ।

दिव्वदेवजुति-दिव्यदेवद्युति-स्त्री० । विशिष्टायां शराऽऽभरणाऽऽदिदीप्तौ, स० १० समo । स्था० ।

दिव्वदेवरिद्धि-दिव्यदेवर्द्धि-स्त्री० । प्रधानपरिवाराऽऽदिरूपायां देवऋद्धौ, स० १० समo । स्था० ।

दिव्वदेवाणुभाव-दिव्यदेवानुभाव-त्रि० । उत्तमवैक्रियकरणाऽऽदिप्रभावे, स० १० समo । स्था० ।

दिव्वधुणि-दिव्यध्वनि-पुं० । सर्वप्राणिश्रुतिसुखदायां स्वस्वभाषापरिणामिन्यां संशयशतव्यवच्छेद्यां योजनव्यापिन्यां भगवद्वाण्याम्, दर्श० १ तत्त्व ।

दिव्वाग-दिव्याक-पुं० । मकुलिसर्पभेदे, प्रज्ञा० १ पद ।

दिव्वायपत्त-दिव्याऽऽतपत्र-स्त्री० । शोभने आतपत्रे, रा० ।

दिव्वासा-स्त्री० । देशी-चामुण्डायाम्, दे० ना० ५ वर्ग ३६ गाथा ।

दिसा-दिक्-स्त्री० । " दिक्प्रावृषोः सः " ॥ ८ । १ । १६ ॥ इति अन्त्यव्यञ्जनस्य सः । 'दिसा' । प्रा० १ पाद । दिश् क्विप् वा टाप् । आशायां, ककुभि च । वाच० । दिशतीति दिक् । आचा० १ श्रु० १ अ० १ उ० । दिश्यते व्यपदिश्यते पूर्वाऽऽदितया वस्त्वनयेति दिक् । स्था० ३ ठा० ३ उ० ।

तां निर्युक्तिकृच्चिकीर्षुराह-

नामं ठवणा दविए, खेत्ते तावे य पन्नवगजावे ।
एस दिसानिक्खेवो, सत्तविहो होइ नायव्वो ॥ ४० ॥

नामस्थापनाद्रव्यक्षेत्रतापप्रज्ञापकभावरूपः सप्तधा दिग्निक्षेपो ज्ञातव्यः, तत्र सचित्ताऽऽदेर्द्रव्यस्य दिगित्यभिधानं नामदिक्, चित्रलिखितजम्बूद्वीपाऽऽदेर्दिग्विभागस्थापनं स्थापनादिक् ।

द्रव्यदिग्निक्षेपार्थमाह-

तेरसपएसियं खलु, तावइएसुं भवे पएसेसुं ।
जं दव्वं ओगाढं, जहण्णगं तं दसदिसागं ॥ ४१ ॥

द्रव्यदिग् द्वेधा-आगमतो, नोआगमतश्च । आगमतो ज्ञातानुपयुक्तः, नोआगमतो ज्ञशरीरभव्यशरीरव्यतिरिक्ता त्रिधम्-त्रयोदशप्रदेशिकं द्रव्यमाश्रित्य या प्रवृत्ता, खलुरवधारणे, त्रयोदशप्रदेशिकमेव दिक्, न पुनर्दशप्रदेशिकं यत् कैश्चिदुक्तमिति, प्रदेशाः-परमाणवस्तैर्निष्पादितं कार्यद्रव्यं तावत्स्वेव क्षेत्रप्रदेशेष्ववगाढं जघन्यं द्रव्यमाश्रित्य दशदिग्विभागपरिकल्पनातो द्रव्यदिगियमिति । तत्स्थापना (२) । त्रिबाहुकं नवप्रदेशिकमभिलिख्य चतसृषु दिक्ष्वेकैकवृद्धिः कार्या ।

क्षेत्रदिशमाह-

अट्ठपएसो रुयगो, तिरियं लोयस्स मज्झयारम्मि ।
एस पभवो दिसाणं, एसेव भवे अणुदिसाणं ॥ ४५ ॥

तिर्यक्लोकमध्ये रत्नप्रभापृथिव्या उपरि बहुमध्यदेशे मेरोरन्तर्द्वौ सर्वक्षुल्लकप्रतरौ, तयोरुपरितनस्य चत्वारः प्रदेशा गोस्तनाऽऽकारसंस्थाना अधस्तनस्यापि चत्वारस्तथाभूता एवमेवाऽष्टाकाशप्रदेशाऽऽत्मकश्चतुरस्रो रुचको दिशामनुदिशां च प्रभव उत्पत्तिस्थानमिति । स्थापना (३) ।

आसामभिधानान्याह-

इंदग्गेई जम्मा, य नेरई वारुणी य वायव्वा ।
सोमा ईसाणा वि य, विमला य तमा य बोधव्वा ॥४३॥

आसामाद्यैन्द्री विजयद्वारानुसारेण शेषाः प्रदक्षिणतः सप्तावसेयाः, ऊर्द्ध विमला तमा बोद्धव्या इति ।

आसामेव स्वरूपनिरूपणायाऽऽह-

दुपएसाइ दुरुत्तर, एगपएसा अणुत्तरा चेव ।
चउरो चउरो य दिसा, चउराइ अणुत्तरा दुण्णि ॥४४॥

चतस्रो महादिशो द्विप्रदेशाऽऽद्या द्विद्विप्रदेशोत्तरवृद्धाः, विदिशश्चतस्र एकप्रदेशरचनाऽऽत्मिकाः, अनुत्तरा वृद्धिरहिताः ऊर्द्धाधो दिगद्वयं स्वनुत्तरमेव चतुःप्रदेशाऽऽदिरचनाऽऽत्मकम् ।

किञ्च-

अंतो साईयाओ, बाहिरपासे अपज्जवसियाओ ।
सव्वाणंतपएसा, सव्वा य भवंति कमजुम्मा ॥ ४५ ॥

सर्वाऽप्यन्तर्मध्ये सादिका रुचकाऽऽद्या इति कृत्वा बहिश्चालोकाऽऽकाशाऽऽश्रयणादपर्यवसिताः, सर्वाश्च दशाप्यनन्तप्रदेशाऽऽत्मिका भवन्ति । (सव्वा य इवंति कमजुम्म त्ति) सर्वासां दिशां प्रत्येकं ये प्रदेशास्ते चतुष्ककेनापहियमाणाश्चतुष्कावशेषा भवन्तीति कृत्वा, तत्प्रदेशाऽऽत्मिकाश्च दिश आगमसंज्ञया " कडजुम्म त्ति " शब्देनाभिधीयन्ते । तथा चाऽऽगमः- " कइ णं भंते ! जुम्मा पण्णत्ता ?। गोयमा ! चत्तारि जुम्मा पण्णत्ता । तं जहा-कडजुम्मे, तेउए,दावरजुम्मे,कलिओए । से केणट्ठेणं भंते ! एवं वुच्चइ ?। गोयमा ! जे णं रासी चउक्कगावहारेणं अवहीरमाणे अवहीरमाणे चउपज्जवसिए सिया, से णं कडजुम्मे । एवं तिपज्जवसिए तेउए, दुपज्जवसिए दावरजुम्मे, एगपज्जवसिए कलिओए त्ति । "

पुनरप्यासां संस्थानमाह-

सगमुट्ठिसंठियाओ, महादिसाओ य होंति चत्तारि ।
मुत्तावली य चउरो, दो चेव य होंति रुयगनिभा ॥४६॥

महादिशश्चतस्रोऽपि शकटोर्द्धसंस्थानाः, विदिशश्च मुक्तावलिनिभाः, ऊर्द्धाधोदिगद्वयं रुचकाऽऽकारमिति ।

तापदिशमाह-

जस्स जओ आइच्चो, उएइ सा तस्स होइ पुव्वदिसा ।
जत्तो य अत्थमेइ उ, अवरादिसा सा उ नायव्वा ॥४७॥
दाहिणपासम्मि य दा-हिणा दिसा उत्तरा उ वामेणं ।
एया चत्तारि दिसा, तावक्खेत्ते उ अक्खाया ॥४८॥

तापयतीति तापः आदित्यः, तदाश्रिता दिक् तापदिक्, शेषं सुगमं, केवलं दक्षिणपार्श्वाऽऽदित्यपदेशः पूर्वाऽभिमुखस्येति द्रष्टव्यः ।

तापदिगङ्गीकरणेनान्योऽपि व्यपदेशो भवतीति प्रसङ्गत आह-

जे मंदरस्स पुव्वे-ण मणुस्सा दाहिणेण अवरेणं ।
जे यावि उत्तरेणं, सव्वेसिं उत्तरो मेरू ॥ ४९ ॥
सव्वेसि उत्तरेणं, मेरू लवणो य होइ दाहिणओ ।
पुव्वेणं उट्ठेई, अवरेणं अत्थमइ सूरो ॥ ५० ॥

ये मन्दरस्य मेरोः पूर्वेण मनुष्याः क्षेत्रदिगङ्गीकरणेन, रुचकापेक्षं पूर्वाऽऽदिदिक्त्वं वेदितव्यं, तेषामुत्तरो मेरुर्दक्षिणेन लवण इति तापदिगङ्गीकरणेन,शेषं स्पष्टम् ।

प्रज्ञापकदिशमाह-

जत्थ य जो पण्णवओ, कस्स वि साहइ दिसासु य निमित्तं ।
जत्तोमुहो य ठाई, सा पुव्वा पच्छओ अवरा ॥ ५१ ॥

प्रज्ञापको यत्र क्वचित् स्थितः दिशां बलात्कस्यचिन्निमित्तं कथयति, स यदभिमुखस्तिष्ठति, सा पूर्वा, पृष्ठतश्चापरेति, निमित्तकथनं चोपलक्षणमन्योऽपि व्याख्यातो ग्राह्य इति ।

शेषदिक्साधनार्थमाह-

दाहिणपासम्मि उ दा-हिणा दिसा उत्तरा उ वामेणं ।
एयासिमंतरेणं, अण्णा चत्तारि विदिसाओ ॥ ५२ ॥
एतासि चेव अट्ठ-एहंतरा अट्ठ होंति अण्णाओ ।
सोलस सरीरउस्सय-बाहल्ला सव्वतिरियदिसा ॥५३॥
हेट्ठा पायतलाणं, अहोदिसा सीसउवरिमा उड्ढा ।
एया अट्ठारस वी, पण्णवगदिसा मुणेयव्वा ॥ ५४ ॥
एवं पक्खिप्पाणं, दसण्ह अट्ठण्ह चेव य दिसाणं ।
नामाइं वोच्छामि, जहक्कमं आणुपुव्वीए ॥ ५५ ॥
पुव्वा य पुव्वदक्खिण, दक्खिण तह दक्खिणाऽवरा चेव ।
अवरा य अवरउत्तर, उत्तर पुव्वुत्तरा चेव ॥ ५६ ॥
सामुत्थाणी कविला, खेज्जेज्जा खलु तहेव अहिधम्मा ।
परियाधम्मा य तहा, सावित्ती पण्णवित्ती य ॥ ५७ ॥
हेट्ठा नेरइयाणं, अहोदिसा उवरिमा उ देवाणं ।
एयाइं नामाइं, पण्णवगस्सा दिसाणं तु ॥ ५८ ॥

एताः सप्त गाथाः कण्ठ्याः, नवरं द्वितीयगाथायां सर्वतिर्यग्दिशां बाहल्यं पिण्डः शरीरोच्छ्रयप्रमाणमिति ।

साम्प्रतमासां संस्थानमाह-

सोलस तिरियदिसाओ, सगडुद्धीसंठिया मुणेयव्वा ।
दो मल्लगमूलाओ, उड्ढे य अहे वि य दिसाओ ॥५९॥

षोडशाऽपि तिर्यग्दिशः शकटोर्द्धसंस्थाना बोद्धव्याः, प्रज्ञापकप्रदेशे संकटा बहिर्विशालाः,नारकदेवाऽऽख्ये द्वे एव ऊर्द्धाऽधोगामिन्यौ शरावाऽऽकारे भवतः, यतः शिरोमूले पादमूले च स्वल्पत्वान्मल्लकबुध्नाऽऽकारे गच्छन्त्यौ च विशाले भवत इति ।

आसां सर्वासां तात्पर्यं यन्त्रकादवसेयम्, तच्चेदम् (४) ।

भावदिङ्निरूपणार्थमाह-

मणुया तिरिया काया, तहऽगवीया चउक्कगा चउरो ।

देवा नेरइया वा, अट्ठारस हुंति भावदिसा ॥ ६० ॥

मनुष्याश्चतुर्भेदाः, तद्यथा-संमूर्छनजाः, कर्मभूमिजाः, अकर्मभूमिजाः, अन्तरद्वीपजाश्चेति । तथा-तिर्यञ्चो द्वीन्द्रियास्त्रीन्द्रियाश्चतुरिन्द्रियाः पञ्चेन्द्रियाश्चेति चतुर्धा, कायाः पृथिव्यप्तेजोवायवश्चत्वारः, तथा-अग्रमूलस्कन्धपर्वबीजाश्चत्वार एव, एते षोडश देवनारकप्रक्षेपाद्दश, पञ्चभिर्भावैर्जनवाञ्छीवो व्यपदिश्यत इति भावदिग्दशभेदेति । अत्र च सामान्यदिग्ग्रहणेऽपि यस्यां दिशि जीवानामविगानेन गत्यागती स्पष्टे सर्वत्र संजनवतः,तयैवेहाधिकार इति तामेव निर्युक्तिकृत्साक्षाद्दर्शयति, भावदिक्कारिनाभाविनी सामर्थ्यादधिकृतैव ।

यतस्तदर्थमन्या दिशश्चिन्त्यन्त इत्यत आह-

पन्नवगदिसऽट्ठारस, भावदिसाओ वि तत्तिया चेव ।
एक्केक्कं विंधेज्जा, हवंति अट्ठारसऽट्ठारा ॥ ६१ ॥
पन्नवगदिसाए पुण, अहिगारो एत्थ होइ णायव्वो ।
जीवाण पोग्गलाण य, एयासु गयागई अत्थि ॥६२॥

प्रज्ञापकापेक्षया अष्टादशभेदा दिशः, अत्र च भावदिशोऽपि तावत्प्रमाणा एव प्रत्येकं संभवन्तीत्यत एकैकां प्रज्ञापकदिशं भावदिगष्टादशकेन विन्ध्येत् तामयेद्, अतोऽष्टादशाष्टादशकाः, ते च संख्यया त्रीणि शतानि चतुर्विंशत्यधिकानि भवन्तीति, एतच्चोपलक्षणम्, तापदिगादावपि यथासंभवमायोजनीयमिति । केत्रादिशि तु चतसृष्वेव महादिक्षु संभवो, न विदिगादिषु, तासामेकप्रदेशिकत्वाच्चतुष्प्रदेशिकत्वाच्चेति गाथाद्वयार्थः । अयं च दिक्संयोगकलापः-" अणुयरीओ दिसाओ आगओ अहमंसि" इत्यनेन परिगृहीतः । सूत्रावयवार्थश्चायम्-इह दिग्ग्रहणात् प्रज्ञापकदिशश्चतस्रः पूर्वाऽऽदिका ऊर्ध्वाऽधोदिशौ च परिगृह्यन्ते, भावदिशस्त्वष्टादशापि, अनुदिग्ग्रहणात्तु प्रज्ञापकविदिशो द्वादशेति, तत्रासंज्ञिनां नैषोऽवबोधोऽस्ति, संज्ञिनामपि केषाञ्चिद्भवति, केषाञ्चिन्नेति, यथाऽहममुष्या दिशः समागत इहेति । " एवमेगेसिं णो णायं भवइ त्ति " एवमित्यनेन प्रकारेण प्रतिविशिष्टदिग्विदिग्गमनं नैकेषां विदितं भवतीत्येतदुपसंहारवाक्यम् ।

एतदेव निर्युक्तिकृदाह-

केसिंचि णाणसण्णा, अत्थी केसिंचि नत्थि जीवाणं ।
कोऽहं परम्मि लोए, आसी कयरा दिसाओ वा ॥६३॥

केषाञ्चिज्जीवानां ज्ञानाऽऽवरणीयकर्मक्षयोपशमवतां ज्ञानसंज्ञाऽस्ति, केषाञ्चित्तु तदावृत्तिमतां न भवतीति । यादृग्भूता संज्ञा न भवति तां दर्शयति-कोऽहं परस्मिन् लोके जन्मनि मनुष्याऽऽदिरासम्, अनेन भावदिग् गृहीता, कतरस्या वा दिशः समायातः, इत्यनेन तु प्रज्ञापकदिग्गृहीतेति, यथा कश्चिन्मन्दिरामदघूर्णितलोललोचनोऽत्यक्तमनोविज्ञानो रथ्यामार्गनिपतितस्तच्चर्याकृष्टइवगणापक्षिप्यमानवदनो गृह्यमानोऽतो मदान्धये न जानाति कुतोऽहमागत इति,तथा प्रकृतो मनुष्याऽऽदिरपीति गाथार्थः ।

न केवलमेषैव संज्ञा नास्ति, अपराऽपि नास्तीति सूत्रकृदाह-

अत्थि मे आया उववाइए, नत्थि मे आया उववाइए, के अहं आसी ?,के वा इओ चुए इह पेच्चा भविस्सामि ?।३।

अस्ति विद्यते ममेत्यनेन षष्ठ्यन्तेन शरीरं निर्दिशति, ममास्य शरीरकस्याधिष्ठाता, अतति-गच्छति सततगतिप्रवृत्तः आत्मा-जीवोऽस्तीति, किंभूतः ?, औपपातिकः,उपपातः-प्रादुर्भावो जन्मान्तरसंक्रान्तिः,उपपाते भव औपपातिक इति,अनेन संसारिणः स्वरूपं दर्शयति, स एवंभूत आत्मा ममास्ति नास्तीति चैवंभूता संज्ञा केषाञ्चिदज्ञानावष्टब्धचेतसां न जायत इति । तथा-कोऽहं नारकतिर्यग्मनुष्याऽऽदिः पूर्वजन्मन्यासम् ?, को वा देवाऽऽदिः 'इतो' मनुष्याऽऽद्वेर्जन्मनः च्युतो विनष्टः, इह संसारे प्रेत्य जन्मान्तरे भविष्यामि उत्पत्स्ये,एषा च संज्ञा न भवतीति । इह च यद्यपि सर्वत्र भावदिशाधिकारः प्रज्ञापकदिशा च, तथाऽपि पूर्वसूत्रे साक्षात् प्रज्ञापकदिग्गृहीता, अत्र तु भावदिगित्यवगन्तव्यम् । ननु चात्र संसारिणां दिग्विदिग्गमनाऽऽदिजा विशिष्टा संज्ञा निषिध्यते, न सामान्यसंज्ञेति, एतच्च संज्ञिनि धर्मिण्यात्मनि सिद्धे सति भवति, " सति धर्मिणि धर्माश्चिन्त्यन्ते " इति वचनात्, स च प्रत्यक्षाऽऽदिप्रमाणगोचरातीतत्वाद्रूपादिः, तथाहि-नासावध्यक्षेणार्थसाक्षात्कारिणा विषयीक्रियते, तस्यातीन्द्रियत्वाद्,अतीन्द्रियत्वं च स्वभावविप्रकृष्टत्वात्,अतीन्द्रियत्वादेव च तदव्यभिचारिकार्याऽऽदिलिङ्गसम्बन्धग्रहणासंभवान्नानुमानेन, तस्याप्रत्यक्षत्वे तत्सामान्यग्रहणशक्त्यनुपपत्तेः,नाप्युपमानेन, आगमस्याऽपि विवक्षायां प्रतिपाद्यमानायामनुमानान्तर्भावात् । अन्यत्र च बाह्येऽर्थे संबन्धाभावादप्रमाणत्वम्, प्रमाणत्वे वा परस्परविरोधित्वान्नाप्यागमेन, तमन्तरेणापि सकलार्थोपपत्तेर्नाप्यर्थापत्त्या, तदेवं प्रमाणपञ्चकाऽतीतत्वात् षष्ठप्रमाणविषयत्वाद्भाव एवाऽऽत्मनः । प्रयोगश्चायम्-नास्त्यात्मा, प्रमाणपञ्चकविषयातीतत्वात्, खरविषाणवदिति, तदभावे च विशिष्टसंज्ञाप्रतिषेधाभावसंभवेनानुत्थानमेव सूत्रस्येति, एतत्सर्वमनुपासितगुरोर्वचः । तथाहि-प्रत्यक्ष एवाऽऽत्मा, तद्गुणस्य ज्ञानस्य स्वसंवित्सिद्धत्वात्,स्वसंविन्निष्ठाश्च विषयव्यवस्थितयः,घटपटाऽऽदीनामपि रूपाऽऽदिगुणप्रत्यक्षत्वादेवाध्यक्षत्वमिति, मरणाभावप्रसङ्गाच्च न भूतगुणश्चैतन्यमाशङ्कनीयम्, तेषां सदा सन्निधानसंभवादिति, हेयोपादेयपरिहारोपादानप्रवृत्तेश्चानुमानेन परात्मनि सिद्धिर्भवतीति, एवमनयैव दिशोपमाना ऽऽदिकमपि स्वधिया स्वविषये यथासंभवमायोज्यं, केवलं मौनीन्द्रेणानेनैवाऽऽगमेन विशिष्टसंज्ञानिषेधद्वारेणाहमिति चाऽऽत्मोल्लेखेनाऽऽत्मसद्भावः प्रतिपादितः, शेषाऽऽगमानां चानाप्तप्रणीतत्वाद्प्रामाण्यमेवेति । अत्र चास्त्यात्मेत्यनेन क्रियावादिनः सप्तभेदा नास्तीत्यनेन चाक्रियावादिन एतदन्तःपातित्वाच्चाज्ञानिकवैनयिकाश्च सप्तभेदा उपलक्ष्यन्ते, ते चामी- " असियसतं किरियाणं, अकिरियवाईण होइ चुलसीई । अन्नाणि य सत्तट्ठी, वेणइयाणं च बत्तीसा " ॥१॥ तत्र जीवाजीवाऽऽश्रवबन्धपुण्यपापसंवरनिर्जरामोक्षाऽऽख्या नव पदार्थाः स्वपरभेदाभ्यां नित्यानित्यविकल्पद्वयेन च कालनियतिस्वभावेश्वराऽऽत्माऽऽश्रयणादशीत्युत्तरं भेदशतं भवति क्रियावादिनाम्,एते चास्तित्ववादिनोऽभिधीयन्ते । इयमत्र भावना-अस्ति जीवः स्वतो नित्यः कालतः ॥ १ ॥ अस्ति जीवः स्वतोऽनित्यः कालतः ॥२॥ अस्ति जीवः परतो नित्यः कालतः ॥३॥ अस्ति जीवः परतोऽनित्यः कालतः ॥४॥ इत्येवं कालेन चत्वारो भेदा लब्धाः, एवं नियतिस्वभावेश्वराऽऽत्मभिरप्येकैकेन चत्वारश्चत्वारो विकल्पा लभ्यन्ते, एते च पञ्च चतुष्का विंशतिर्भवति । इयं च जीवपदार्थेन लब्धा, एवमजीवाऽऽदयोऽ-

ष्यश्च प्रत्येकं विंशतिभेदा भवन्ति । ततश्च नव विंशतयः शतमशीत्युत्तरं भवति १८० । तत्र स्वत इति स्वेनैव रूपेण जीवोऽस्ति, न परोपाध्यपेक्षया ह्रस्वत्वदीर्घत्वे इव, नित्यः-शाश्वतो न क्षणिकः, पूर्वोत्तरकालयोरवस्थितत्वात्, कालत इति काल एव विश्वस्य स्थित्युत्पत्तिप्रलयकारणम् । उक्तं च-"कालः पचति भूतानि, कालः संहरते प्रजाः । कालः सुप्तेषु जागर्ति, कालो हि दुरतिक्रमः ॥ १ ॥" स चातीन्द्रियो युगपच्चिरक्रियाऽभिव्यङ्ग्यो हिमोष्णवर्षाव्यवस्थाहेतुः क्षणलवमुहूर्तयामाहोरात्रमासर्त्वयनसंवत्सरयुगकल्पपल्योपमसागरोत्सर्पिण्यवसर्पिणीपुद्गलपरावर्तातीतानागतवर्त्तमानसर्वाद्धाऽऽदिव्यवहाररूपः ॥ १ ॥ द्वितीयविकल्पे तु काळादेवाऽऽत्मनोऽस्तित्वमभ्युपेयं, किं त्वनित्योऽसाविति विशेषोऽयं पूर्वविकल्पात् ॥ २ ॥ तृतीयविकल्पे तु परत एवास्तित्वमभ्युपगम्यते, कथं पुनः परतोऽस्तित्वमात्मनोऽभ्युपेयते ?, नन्वेतत्प्रसिद्धमेव सर्वपदार्थानां परपदार्थस्वरूपापेक्षया स्वरूपपरिच्छेदो, यथा दीर्घत्वापेक्षया ह्रस्वत्वपरिच्छेदो, ह्रस्वत्वापेक्षया च दीर्घत्वस्येति । एवमेव चानात्मनस्तस्मकुम्भाऽऽदीन् समीक्ष्य तद्व्यतिरिक्ते वस्तुन्यात्मबुद्धिः प्रवर्त्तत इति, अतो यदात्मनः स्वरूपं तत्परत एवावधार्यते, न स्वत इति ॥ ३ ॥ चतुर्थविकल्पोऽपि प्राग्वदिति चत्वारो विकल्पाः ॥ ४ ॥ तथाऽन्ये नियतिं एवाऽऽत्मनः स्वरूपमवधारयन्ति, का पुनरियं नियतिरिति ?। उच्यते-पदार्थानामवश्यंतया यद्यथाभवने प्रयोजककर्त्री नियतिः । उक्तं च-" प्राप्तव्यो नियतिबलाऽऽश्रयेण योऽर्थः, सोऽवश्यं भवति नृणां शुभोऽशुभो वा । भूतानां महति कृतेऽपि हि प्रयत्ने, नाभाव्यं भवति न भाविनोऽस्ति नाशः ॥ १ ॥" इयं च मस्करिपरिव्राजकमतानुसारिणी प्राय इति । अपरे पुनः स्वभावादेव संसारव्यवस्थामभ्युपयन्ति, कः पुनरयं स्वभावः?, वस्तुनः स्वत एव तथापरिणतिभावः स्वभावः ।

उक्तं च-

" कः कण्टकानां प्रकरोति तैक्ष्ण्यं,
विचित्रभावं मृगपक्षिणां च ।
स्वभावतः सर्वमिदं प्रवृत्तं,
न कामचारोऽस्ति कुतः प्रयत्नः ? ॥ १ ॥
स्वभावतः प्रवृत्तानां, निवृत्तानां स्वभावतः ।
नाहं कर्तेति भूतानां, यः पश्यति स पश्यति ॥ २ ॥
केनाञ्चितानि नयनानि मृगाङ्गनानां,
को ऽङ्कुरोति रुचिराङ्गरुहान् मयूरान् ।
कश्चोत्पलेषु दलसन्निचयं करोति,
को वा दधाति विनयं कुलजेषु पुंसु ? ॥ ३ ॥"

तथाऽन्येऽभिदधते-समस्तमेतज्जीवादीश्वरात्प्रसूतं, तस्मादेव स्वरूपेऽवतिष्ठते, कः पुनरयमीश्वरः ?, अणिमाऽऽद्यैश्वर्ययोगादीश्वरः । उक्तं च-" अज्ञो जन्तुरनीशः स्या-दात्मनः सुखदुःखयोः । ईश्वरप्रेरितो गच्छेन्नभ्रं वा स्वर्गमेव वा ॥ १ ॥" तथाऽन्ये ब्रुवते-न जीवाऽऽद्यः पदार्थाः कालाऽऽदिभ्यः स्वरूपं प्रतिपद्यन्ते, किं तर्हि ?, आत्मनः, कः पुनरयमात्मा ?, आत्माद्वैतवादिनां विश्वपरिणतिरूपः । उक्तञ्च-" एक एव हि भूताऽऽत्मा, भूते भूते व्यवस्थितः । एकधा बहुधा चैव, दृश्यते जलचन्द्रवत् ॥ १ ॥" तथा- " पुरुष एवेदं सर्वं यद्भूतं यच्च भाव्यम् " इत्यादि । एवमस्त्यजीवः स्वतः नित्यः कालत इत्येवं सर्वत्र योज्यम् । तथा-अक्रियावादिनो-नास्तित्ववादिनः, तेषामपि जीवाजीवाऽऽश्रवबन्धसंवरनिर्जरामोक्षाऽऽख्याः सप्त पदार्थाः स्वपरभेदद्वयेन तथा कालयदृच्छानियतिस्वभावेश्वराऽऽत्मभिः षड्भिर्निश्चिन्त्यमानाश्चतुरशीतिविकल्पा भवन्ति । तद्यथा-नास्ति जीवः स्वतः कालतः,नास्ति जीवः परतः कालतः, इति कालेन द्वौ लब्धौ, एवं यदृच्छानियत्यादिष्वपि द्वौ द्वौ भेदौ प्रत्येकं भवतः, सर्वेऽपि जीवपदार्थे द्वादश भवन्ति, एवमजीवाऽऽदिष्वपि प्रत्येकं द्वादशैते सप्त द्वादशकाश्चतुरशीतिरिति ८४ । अयमत्रार्थः- नास्ति जीवः स्वतः कालत इति, इह पदार्थानां लक्षणेन सत्ता निश्चीयते, कार्यतो वा ?। न चाऽऽत्मनस्तादृगस्ति किञ्चिल्लक्षणं, येन सत्तां प्रतिपद्येमहि, नाऽपि कार्यमणूनामिव महीध्राऽऽदि संभवति, यच्च लक्षणकार्याभ्यां नाभिगम्यते वस्तु तन्नास्त्येव वियद्दिनीवरवत्, तस्मान्नास्त्यात्मेति । द्वितीयविकल्पोऽपि यच्च स्वतो नात्मानं बिभर्ति गगनारविन्दाऽऽदिकं तत्परतोऽपि नास्त्येव,अथ वा सर्वपदार्थानामेव परत्रागादर्शनात्सर्वाऽर्वाग्भागसूक्ष्मत्वाच्चोपलब्धेः सर्वानुपलब्धितो नास्तित्वमध्यवसीयते । उक्तं च-" यावद् दृश्यं परस्तावद्भागः स च न दृश्यते " इत्यादि । तथा " यदृच्छातोऽपि नास्तित्वमात्मनः, का पुनर्यदृच्छा ?, अनभिसन्धिपूर्विकाऽर्थप्राप्तिर्यदृच्छा ।

" अतर्कितोपस्थितमेव सर्वं,
चित्रं जनानां सुखदुःखजातम् ।
काकस्य तालेन यथाऽभिघातो,
न बुद्धिपूर्वोऽत्र वृथाऽभिमानः ॥ १ ॥
सत्यं पिशाचाः स्म वने वसामो,
न्यग्रोधमारुह्य न रौमहे च ।
यदृच्छया सिध्यति लोकयात्रा,
नेयं पिशाचाः परितोषयन्ति ॥ २ ॥"

यथा काकताल्लीयमबुद्धिपूर्वकं, न काकस्य बुद्धिरस्ति- मयि तालं पतिष्यति, नापि तालस्याभिप्रायः- काकोपरि पतिष्यामि, अथ च तत्तथैव भवति, एवमन्यदप्यतर्कितोपनतमजाकृपाणीयमातुरभेषजीयमन्धकरणटकीयमित्यादि ऊह्यम् . एवं सर्वं जातिजरामरणाऽऽदिकं लोके यादृच्छिकं काकतालीयाऽऽदिकल्पमवसेयमिति । एवं नियतिस्वभावेश्वराऽऽत्मनिरप्यात्मा निराकर्त्तव्यः । तथा-ज्ञानिकानां सप्तषष्टिर्भेदाः । ते चामी-जीवाऽऽद्यो नव पदार्थाः, उत्पत्तिश्च दशमी, सत्, असत्, सदसत्, अवक्तव्यः, सदवक्तव्यः, असदवक्तव्यः, सदसदवक्तव्यः, इत्येतैः सप्तभिः प्रकारैर्विज्ञातुं न शक्यन्ते, न च विज्ञातैः प्रयोजनमस्ति । भावना चेयम्-सन् जीव इति को वेत्ति, किं वा तेन ज्ञातेन ?, असन् जीव इति को जानाति ?. किं वा तेन ज्ञातेनेत्यादि । एवमजीवाऽऽदिष्वपि प्रत्येकं सप्त विकल्पाः, नव सप्तकास्त्रिषष्टिः, अमी चान्ये चत्वारस्त्रिषष्टिमध्ये प्रक्षिप्यन्ते । तद्यथा--सति भावोत्पत्तिरिति को जानाति ?, किं वाऽनया ज्ञातया ?, एवमसति सदसती अवक्तव्या भावोत्पत्तिरिति को वेत्ति ?, किं वाऽनया ज्ञातयेति,शेषविकल्पत्रयमुत्परयुत्तरकालं पदार्थावयवापेक्षमतोऽत्र न संन्यस्यतीति नोक्तम्, एतच्चतुष्टयप्रक्षेपात्सप्तषष्टिर्भवन्ति । तत्र सन् जीव इति को वेत्ति ?, इत्यस्यायमर्थः-न कस्यचिद्विशिष्टं ज्ञानमस्ति, योऽतीन्द्रियान् जीवाऽऽदीनवभोत्स्यते, न च तैर्ज्ञातैः किंचित्फलमस्ति । तथाहि-यदि नित्यः सर्वगतो मूर्त्तो ज्ञानाऽऽदिगु-

योपेतः,एतद्गुणव्यतिरिक्तो वा ?,ततः कतमस्य पुरुषार्थस्य सिद्धिरिति, तस्मादज्ञानमेव श्रेयः। अपि च-तुल्येऽप्यपराधे अकामकरणे लोके स्वल्पो दोषो, ह्रीकोत्तरेऽपि आकुट्टिकानाभोगसहसाकाराऽऽदिषु कुल्लकभिक्षुस्थविरोपाध्यायसूरीणां यथाक्रममुत्तरोत्तरं प्रायश्चित्तमित्येवमन्येष्वपि विकल्पेष्वायोज्यम् । तथा वैनयिकानां द्वात्रिंशद्भेदाः, ते चानेन विधिना भावनीयाः, सुरनृपयतिज्ञातिस्थविराधममातृपितृष्वसु मनोवाक्कायप्रदानचतुर्विधविनयकरणात्। तद्यथा-देवानां विनयं करोति मनसा वाचा कायेन, तथा-देशकालोपपन्नेन दानेनेत्येवमादि । एते च विनयादेव स्वर्गापवर्गमार्गमन्यूपयन्ति,नाचैर्हृष्यनुत्सेकलक्षणो विनयः,सर्वत्र चैवंविधेन विनयेन देवाऽऽदिपूपतिष्ठमानः स्वर्गापवर्गभाग् भवति। उक्तं च-"विणया णाणं णाणा-ओ दंसणं दंसणाहि चरणं च । चरणाहितो मोक्खो, मोक्खे सोक्खं अणाबाहं ।१।" अत्र च क्रियावादिनामस्तित्वे सत्यपि केषाञ्चित्सर्वगतो नित्योऽनित्यः कर्ताऽकर्ता मूर्त्तोऽमूर्तः श्यामाकतण्डुलमात्रोऽङ्गुष्ठपर्वमात्रो दीपशिखोपमो हृदयाधिष्ठान इत्यादिकः । अस्ति चौपपातिकश्च,अक्रियावादिनां त्वात्मैव न विद्यते,कुतः पुनरौपपातिकत्वम् ?, अज्ञानिकास्तु नात्मानं प्रति विप्रतिपद्यन्ते, किंतु तज्ज्ञानमकिञ्चित्करमेषामिति, वैनयिकानामपि नात्माऽस्तित्वे विप्रतिपत्तिः, किंत्वन्यन्मोक्षसाधनं विनयादृते न संभवतीति प्रतिपन्नाः । तत्रानेन सामान्याऽऽत्मास्तित्वप्रतिपादनेनाक्रियावादिनो निरस्ता द्रष्टव्याः। आत्मास्तित्वानभ्युपगमे च-

" शास्ता शास्त्रं शिष्यः, प्रयोजनं वचनहेतुदृष्टान्ताः ।
सन्ति न शून्यं ब्रुवत-स्तदभावाच्चाप्रमाणं स्यात् ॥ १ ॥
प्रतिषेद्धृप्रतिषेध्यौ, स्तश्चेच्छून्यं कथं भवेत्सर्वम् ? ।
तदभावेन तु सिद्धा, अप्रतिसिद्धा जगत्यर्थाः ॥ २ ॥"

एवं शेषाणामप्यत्रैव यथासंभवं निराकरणमुत्प्रेक्ष्यमिति ॥३॥

गतमानुषङ्गिकम् । प्रकृतमनुस्रियते-तत्रेह " एवमेगेसिं णो णायं भवइ " इत्यनेन केषाञ्चिदेव संज्ञानिषेधात्केषाञ्चित्तु भवतीत्युक्तं भवति, तत्र सामान्यसंज्ञायाः प्रतिप्राणि सिद्धत्वात्तत्कारणपरिज्ञानस्य चेहाकिञ्चित्करत्वाद्विशिष्टसंज्ञायास्तु केषाञ्चिदेव भावात् तस्याश्च भवान्तरगाम्यात्मस्वरूपप्रतिपादने सोपयोगित्वात् सामान्यसंज्ञाकारणप्रतिपादनमनादृत्य विशिष्टसंज्ञायाः कारणं सूत्रकृदर्शयितुमाह-

से जं पुण जाणेज्जा सह संमइयाए परवागरणेणं अन्नेसिं अंतिए वा सोचा, तं जहा-पुरत्थिमाओ वा दिसाओ आगओ अहमंसि० जाव अण्णयरीओ दिसाओ अणुदिसाओ वा आगओ अहमंसि,एवमेगेसिं जं णायं भवति-अत्थि मे आया उववाइए, जो इमाओ दिसाओ अणुदिसाओ वा अणुसंचरइ, सव्वाओ दिसाओ अणुदिसाओ, सोऽहं ॥ ४ ॥

'से जं पुण जाणेज्ज त्ति' सूत्रं यावत् 'सोऽहमिति ।' 'से' इति निर्देशो मागधशैल्या प्रथमैकवचनान्तः, स इत्यनेन च यः प्राग्निर्दिष्टो ज्ञाता विशिष्टक्षयोपशमाऽऽदिमान्स प्रत्यवमृश्यते, यदित्यनेनापि यत्प्राग्निर्दिष्टं दिग्विदिगागमनं, तथा कोऽहमभूवमतीतजन्मनि देवो नारकस्तिर्यग्योनो मनुष्यो वा ?, स्त्री पुमान्नपुंसको वा ?। को वाऽमुतो मनुष्यजन्मनः प्रच्युतोऽहं प्रेत्य देवाऽऽदिर्भविष्यामीत्येतत्परामृश्यते,जानीयादयमात्मेदृगहमुक्तलक्षणो भवति-न कश्चिदनादौ संसृतौ पर्यटन्नभ्युपगम्य दिगागमनाऽऽदिकं जानीयात्, यः पुनर्जानीयात्स एवम्-(सह सम्मइयाए त्ति) सहशब्दः संबन्धवाची, सदिति प्रशंसायां, मतिः ज्ञानम् । अयमत्र वाक्यार्थः-आत्मना सह सदा या सन्मतिर्वर्तते, तया सन्मत्या कश्चिज्जानीते,सहशब्दविशेषणाच्च सदाऽऽत्मस्वभावत्वं मतेरविदितं भवति, न पुनर्यथा वैशेषिकाणां व्यतिरिक्ता सती समवायवृत्त्यात्मनि समवैतीति । यदि वा (सम्मइए त्ति) स्वकीयया मत्या स्वमत्येति, तच्च जिनमप्यहाऽऽदिकं स्वकीयं दृष्टमतः सहशब्दविशेषणं, सहशब्दश्चासमस्त इति, सत्यपि चाऽऽत्मनः सदा मतिसन्निधाने प्रबलज्ञानाऽऽवरणाऽऽवृतत्वान्न सदा विशिष्टोऽवबोध इति,सा पुनः सन्मतिः,स्वमतिर्वा अवधिमनःपर्यायकेवलज्ञानजातिस्मरणभेदाच्चतुर्विधा ज्ञेया:,तत्रावधिमनःपर्यायकेवलानां स्वरूपमन्यत्र विस्तरेणोक्तं, जातिस्मरणं त्वाभिनिबोधिकविशेषः, तदेवं चतुर्विधया मत्याऽऽत्मनः कश्चिद्विशिष्टदिग्गत्यागती जानाति, कश्चिच्च परस्तीर्थकृत्सर्वज्ञः, तस्यैव परमार्थतः परशब्दवाच्यत्वात्परत्वं, तस्य तेन वा व्याकरणम्-उपदेशस्तेन जीवांस्तद्भेदाँश्च पृथिव्यादीन् तद्गत्यागतीश्च जानाति, अपरः पुनरन्येषां तीर्थकरव्यतिरिक्तानामतिशयज्ञानिनामन्तिके श्रुत्वा जानातीति, यच्च जानाति तत् सूत्रावयवेन दर्शयति । तद्यथा-पूर्वस्या दिश आगतोऽहमस्मि, एवं दक्षिणस्याः पश्चिमाया उत्तरस्या ऊर्द्धदिशोऽधोदिशोऽन्यतरस्याः दिशोऽनुदिशो वा आगतोऽहमस्मीत्येवमेकेषां विशिष्टक्षयोपशमाऽऽदिमतां तीर्थकरान्यातिशयज्ञानिबोधितानां च ज्ञानं भवति, तथा प्रतिविशिष्टदिगागमनपरिज्ञानान्तरमेषामेतदपि ज्ञानं भवति, यथाऽस्ति मेऽस्य शरीरकस्याधिष्ठाता ज्ञानदर्शनोपयोगलक्षण उपपादुको भवान्तरसंक्रान्तिभागसर्वगतो भोक्ता मूर्तिरहितोऽविनाशी शरीरमात्रव्यापीत्यादिगुणजातमिति । स च द्रव्यकषाययोगोपयोगज्ञानदर्शनचारित्रवीर्याऽऽत्मभेदादष्टधा, तत्रोपयोगाऽऽत्मना साधुत्वेनेहाधिकारः, शेषास्तु तदंशतयोपयुज्यन्त इति उपन्यस्ताः । तथा-अस्ति च ममाऽऽत्मा, योऽमुष्या दिशोऽनुदिशश्च सकाशादनुसञ्चरति गतिप्रायोग्यकर्मोपादानादनु पश्चात् संचरत्यनुसंचरति, पाठान्तरं वा-(अणुसंसरइ त्ति) दिग्विदिशां गमनं नानादिगागमनं वा स्मरतीत्यर्थः । साम्प्रतं सूत्रावयवेन पूर्वसूत्रोक्तमेवार्थमुपसंहरति-सर्वस्या दिशः सर्वस्याश्चानुदिशो य आगतोऽनुसञ्चरति, अनुसंस्मरतीति वा सः, अहमित्यात्मोल्लेखः, अहंप्रत्ययग्राह्यत्वादात्मनः, अनेन पूर्वाऽऽद्याः प्रज्ञापकदिशः सर्वा गृहीताः, आवदिशश्चेति । आचा० १ श्रु० १ अ० १ उ० । आ० चू० । स्था० । (अहं कस्या दिश आगत इति विचारः ' आता ' शब्दे द्वितीयभागे १७२ पृष्ठे निदर्शितः)

द्वाभ्यां दिग्भ्यां प्रव्राजनाऽऽदि प्रवर्तते-

दो दिसाओ अभिगिज्झ कप्पइ निग्गंथाणं वा निग्गंथीणं वा पव्वावित्तए पाईणं चेव, उदीणं चेव । एवं मुंडावित्तए १ सिक्खावित्तए २ उवट्ठावित्तए ३ संभुंजित्तए ४ संवसित्तए ५ सज्झायं उद्दिसित्तए ६ सज्झायं समुद्दिसित्तए ७ सज्झायमणुजाणित्तए ८ आलोइत्तए ९ पडिक्कमित्तए १० निंदित्तए ११ गरहित्तए १२ विउट्टि-

त्तए १३ विसोहित्तए १४ अकरणयाए १५ अब्भुट्ठित्तए आहारिहं पायच्छित्तं तवोकम्मं पडिवज्जित्तए १६ ।

द्वे दिशौ काष्ठे अभिगृह्याऽङ्गीकृत्य, तदभिमुखीभूयेत्यर्थः । कल्प्यते युज्यते, निर्गता ग्रन्थाऋणाऽऽदेरिति निर्ग्रन्थाः साधवः, तेषां निर्ग्रन्थ्यः साध्व्यः, तासां प्रव्राजयितुं रजोहरणाऽऽदिदानेन प्राचीनां प्राचीं, पूर्वामित्यर्थः । उदीचीनामुदीचीमुत्तरामित्यर्थः । उक्तं च-"पुव्वामुहो उ उत्तर-मुहो व देज्जाऽहवा पमिरुज्झा । आए जिणादओ वा, हवेज्ज जिणचेइयाइं वा ॥१॥" इति । (एवमिति) यथा प्रव्राजनसूत्रं दिग्द्वयाभिलापेन अधीतम्, एवं मुण्डनाऽऽदिसूत्राण्यपि षोडशाऽध्येतव्यानीति । तत्र मुण्डयितुं शिरोलुञ्चनेन १, शिक्षयितुं ग्रहणशिक्षापेक्षया सूत्रार्थौ आहयितुमासेवनाशिक्षापेक्षया तु प्रत्युपेक्षणाऽऽदिशिक्षयितुमिति २, उत्थापयितुं महाव्रतेषु व्यवस्थापयितुम् ३, संभोजयितुं भोजनमण्डल्यां निवेशयितुम् ४, संवासयितुं संस्तारकमण्डल्यां निवेशयितुम् ५, सुष्ठु आ मर्यादयाऽधीयत इति स्वाध्यायोऽङ्गाऽऽदिस्तमुपदेष्टुं योगविधिक्रमेण सम्यग्योगेनाधीच्छेदमित्येवमुपदेष्टुमिति ६, सामुदेष्टुं योगसमाचार्यैव स्थिरपरिचितं कुर्विदमिति वक्तुमिति ७, अनुज्ञातं तयैव सम्यगेतद्वारयाऽन्येषां च प्रवेदयेत्येवमभिधातुमिति ८, आलोचयितुं गुरवेऽपराधान् निवेदयितुमिति ९, प्रतिक्रामितुं प्रतिक्रमणं कर्तुमिति १०, निन्दितुमतिचारान् स्वसमक्षं जुगुप्सितुम् ११ । आह च-" सचरित्तपथयावो ।" निन्दति गर्हितं गुरुसमक्षं तानेव जुगुप्सितुम । आह च-" अचरित्तपथयावो । " निन्दति गर्हितं गुरुसमक्षं तानेव जुगुप्सितुम् १२। आह च-" गरहा वि तहा जातीयमेव, नवरं परप्पयासणय त्ति ।" (विउट्टित्तए त्ति) व्यतिवर्तयितुं विशोटयितुं विकुट्टयितुं वा, अतिचारानुबन्धिविच्छेदयितुमित्यर्थः १३, विशोधयितुमतिचारपङ्कापेक्षयाऽऽत्मानं विमलीकर्तुमिति १४, अकरणतया पुनर्न करिष्यामीत्येवमभ्युत्थातुमभ्युपगन्तुमिति १५, यथार्हमतिचाराऽऽद्यपेक्षया यथोचितं पापच्छेदकत्वात्, प्रायश्चित्तविशोधकत्वाद्वा प्रायश्चित्तम् । उक्तं च-" पावं छिंदइ जम्हा, पायच्छित्तं तु भन्नए तेण । पाएण वा वि चित्तं, विसोहए तेण पच्छित्तं ॥१॥" इति । तपःकर्म निर्विकृतिकाऽऽदिकं प्रतिपत्तुमभ्युपगन्तुमिति १६ ।

सप्तदशं सूत्रं साक्षादेवाऽऽह-

दो दिसाओ अभिसिज्झ कप्पइ णिग्गंथाणं वा णिग्गंथीणं वा अपच्छिममारणंतियसंलेहणाझूसणाझूसियाणं भत्तपाणपडियाइक्खियाणं पाओवगयाणं कालं अणवकंखमाणाणं विहरित्तए । तं जहा-पाईणं चेव, उदीणं चेव।

पश्चिमैवापश्चिमा, अमङ्गलपरिहारार्थमपश्चिमा, सा चासौ मरणमेव योऽन्तस्तत्र भवा मारणान्तिकी, सा चासौ संलिख्यतेऽनया शरीरकषायाऽऽदीति संलेखना तपोविशेषः, सा चेति अपश्चिममारणान्तिकसंलेखना, तस्याः (झूसण त्ति) जोषणा सेवा, तया तल्लक्षणधर्मोपेत्यर्थः । (झूसियाणं ति) सेवितानां, तत्सुकानामित्यर्थः । तया वा झूषितानां क्षपितानां, क्षपितदेहानामित्यर्थः, तथा भक्तपाने प्रत्याख्याते यैस्ते तथा, तेषां, पादपवदुपगतानामचेष्टतया स्थितानामनशनविशेषं प्रतिपन्नानामित्यर्थः, कालं मरणकालमनवकाङ्क्षिणां तत्रानुत्सुकानां विहर्तुं स्थातुमिति ॥ १७ ॥ स्था० २ ठा० १ उ० । नि० चू० ।

तिसृभिर्दिग्गतिगत्यादि प्रवर्तते-

तओ दिसाओ पण्णत्ताओ । तं जहा-उड्ढा, अहो, तिरिया । (स्था०) एवं आगई वक्कंती आहारे वुड्ढी णिवुड्ढी गइपरियाए समुग्घाए कालसंजोगे दंसणाभिगमे णाणाभिगमे जीवाभिगमे । तिहिं ठाणेहिं जीवाणं अजीवाभिगमे पण्णत्ते । तं जहा-उड्ढाए, अहोए, तिरियाए । एवं पंचिंदियतिरिक्खजोणियाणं । एवं मणुस्साण वि ।

दिङ्निरूपणपूर्वकं तासु गत्यादि निरूपयन् "तओ दिसाओ" इत्यादि सूत्राणि चतुर्दशानि, सुगमानि च, नवरं दिश्यते व्यपदिश्यते पूर्वाऽऽदितया वस्त्वनयेति दिक्, सा च नामाऽऽदिभेदेन सप्तधा । आह च निर्युक्तिकृत्-"नामं ठवणा दविए, खेत्तदिसा तावखेत्त पन्नवए । सत्तमिया भावदिसा, सा होइऽट्ठारसविहा उ ॥४०॥"(आचा०नि०)तत्र द्रव्यस्य पुद्गलस्कन्धाऽऽदेर्दिग् द्रव्यदिक् १, क्षेत्रस्याऽऽकाशस्य दिक् क्षेत्रदिक्। सा चैवम्-"अट्ठपएसो रुयगो, तिरियं लोगस्स मज्झयारम्मि । एस पभवो दिसाणं, एसेव भवे अणुदिसाणं ॥४२॥ "(आचा०नि०) तत्र पूर्वाऽऽद्या महादिशश्चतस्रोऽपि द्विप्रदेशाऽऽदिकाऽऽश्रुत्तरा अनुदिशस्तु एकप्रदेशा अनुत्तरा ऊर्द्धाधोदिशौ तु चतुराऽऽदि अनुत्तरे। यतोऽवादि-

" दुपएसाऽऽदि पुरुत्तर, एगपएसा अणुत्तरा चेव ।
चउरो चउरो य दिसा, चउराइ अणुत्तरा दोन्नि ॥ ४४ ॥
सगडुद्धिसंठियाओ, महादिसाओ हवंति चत्तारि ।
मुत्तावली य चउरो, दो चेव य होंति रुयगनिभा ॥ ४६ ॥ "

नामानि चासाम्-" इंदग्गेयी जम्मा, य नेरई वारुणी य वायव्वा । सोमा ईसाणा वि य, विमला य तमा य बोधव्वा ॥४३॥ " तापः सविता, तदुपलक्षिता क्षेत्रदिक् तापक्षेत्रदिक्, सा चाऽनियता । यत उक्तम्-"जेसिं जत्तो सूरो, उदेइ तेसिं तई इवइ पुव्वा । तावक्खेत्तदिसाओ, पयाहिणं सेसयाओ सा ॥४७॥" इति । (आचा०नि०)तथा प्रज्ञापकस्याऽऽचार्यादेर्दिक् प्रज्ञापकदिक्। सा चैवम्-" पन्नवओ जो अभिमुहो, सा पुव्वा सेसिया पयाहिणओ । तस्सेवऽणुगंतव्वा, अभोयाई दिसा नियमा ॥५१॥"

भावदिक् चाष्टादशविधा-

" पुढवि-जल-जलण-वाया, मूलो खंधग्गपोरबीया य ।
वि ति चउ पंचिंदिय-तिरि-य-नारगा देवसंघाया ॥१॥
संमुच्छिम-कम्माक-म्मभूमगनरा तहंऽतरद्दीवा ।
भावदिसा दिस्सइ जं, संसारी निययमेहोहिं ॥२॥ " इति ।

इह च क्षेत्रतापप्रज्ञापकादिभिरेवाधिकारः, तत्र च तिर्यग्ग्रहणेन पूर्वाऽऽद्याश्चतस्र एव दिशो गृह्यन्ते, विदिक्षु जीवानामनुश्रेणिगामितया वक्ष्यमाणगत्या गतिव्युत्क्रान्तीनामयुज्यमानत्वात्, शेषपदेषु च विदिशामविवक्षितत्वात् । यतोऽत्रैव वक्ष्यति-"तिहिं दिसाहिं जीवाणं गई पवत्तइ । " इत्यादि । तथा ग्रन्थान्तरेऽप्याहारमाश्रित्योक्तम्-" निव्वाघाएणं नियमा छद्दिसिं ति । " तत्र " तिहिं दिसाहिं ति " सप्तमी तृतीया पञ्चमी वा यथायोगं व्याख्येयेति, गतिः प्रज्ञापकस्थानापेक्षया मृत्वाऽन्यत्र गमनमेवमिति पूर्वोक्तमिलापसूचनार्थः । आगतिः प्रज्ञापकप्रत्यासन्नस्थाने आगमनमिति, व्युत्क्रान्तिरुत्पत्तिः, आहारः प्रतीतः, वृद्धिः शरीरस्य वर्द्धनं, हानिः शरीरस्यैव हानिः, गतिपर्यायश्चलनं जीवत एव, समुद्घातो वेदनाऽऽ-

दिक्लक्षणः,कालसंयोगो वर्तनाऽऽदिकाललक्षणानुवृत्तिर्मरणयोगो वा, दर्शनेनावध्यादिना प्रत्यक्षप्रमाणभूतेनाभिगमो बोधो दर्शनाभिगमः,एवं ज्ञानाभिगमः जीवानां क्षेत्रानामवध्यादिनैवाभिगमो जीवाभिगम इति।" तिहिं दिसाहिं जीवाणं अजीवाभिगमे पन्नत्ते। तं जहा-उड्ढा,अहो,तिरिया।"एवं सर्वत्राभिलापनीयमिति दर्शनार्थपरिपूर्णान्त्यसूत्राभिधानमिति। एतान्यजीवाभिगमान्तानि सामान्यजीवसूत्राणि। चतुर्विंशतिदण्डकचिन्तायां तु नारकाऽऽदिपदेषु दिक्त्रये गत्यादीनां त्रयोदशानामपि पदानां सामस्त्येनासम्भवात्,पञ्चेन्द्रियतिर्यक्षु मनुष्येषु च तत्संज्ञवात्। तदतिदेशमाह-(एवमित्यादि) यथा सामान्यसूत्रेषु गत्यादीनि त्रयोदशपदानि दिक्त्रयेऽभिहितान्येवं पञ्चेन्द्रियतिर्यग्मनुष्येषु इति भावः। एवं चैतानि षड्विंशतिसूत्राणि भवन्तीति। अथैषां नारकाऽऽदिषु कथमसम्भव इति?,उच्यते-नारकाऽऽदीनां द्वाविंशतेर्जीवविशेषाणां नारकदेवेषूत्पादाभावाद्ऊर्ध्वाधोदिशोर्विवक्षया गत्यागत्योरभावः,तथा दर्शनज्ञानजीवाऽजीवाभिगमा गुणप्रत्यया अवध्यादिप्रत्यक्षरूपा दिक्त्रये न सन्त्येव। भवप्रत्ययावधिपक्षे तु नारकज्योतिष्कास्तिर्यगवधयो भवनपतिव्यन्तरा ऊर्ध्वावधयो वैमानिका अधोऽवधय एकेन्द्रियविकलेन्द्रियाणां त्ववधिर्नास्त्येवेति। स्था० ३ ठा० २ उ०।

षड्भिर्दिग्भिश्च गत्यागती प्रवर्त्तेते--

छहिं दिसाहिं जीवाणं गई पवत्तइ। तं जहा-पाईणाए० जाव अहाए, एवमागई वक्कंती आहारे वुड्ढी निवुड्ढी विगुव्वणा गइपरियाए समुग्घाए कालसंजोगे दंसणाभिगमे जीवाऽभिगमे अजीवाभिगमे, एवं पंचेंदियतिरिक्खजोणियाण वि, मणुस्साण वि॥

षड्भिर्दिग्भिर्जीवानां गतिरुत्पत्तिस्थानं गमनं प्रवर्त्तते। अनुश्रेणिगमनात्तेषामित्थमेतानि चतुर्दश सूत्राणि नेयानि। नवरं गतिरागतिश्च। प्रज्ञापकस्थानापेक्षिण्यौ प्रसिद्धे एव, च्युत्कान्तिरुत्पत्तिस्थानप्राप्तस्योत्पादः, सोऽपि ऋजुगतौ षट्स्वेव दिक्षु, तथा आहारः प्रतीतः, सोऽपि षट्स्वेव दिक्षु,एतद्धि त्रसस्थितप्रदेशावगाढपुद्गलानामेव जीवेन स्पर्शनात्, स्पृष्टानामेवाऽऽहरणादित्येवं पञ्चदिक्कता यथासंज्ञवं वृद्ध्यादिष्वप्युह्येति। तथा वृद्धिः शरीरस्य, निर्वृद्धिर्हानिस्तस्यैव, विकुर्वणा वैक्रियकरणं, गतिपर्यायो गमनमात्रं न परलोकगमनरूपः, तस्य गत्यागतिग्रहणेन गृहीतत्वादिति। समुद्घातो वेदनाऽऽदिकः सप्तविधः,कालसंयोगः समयक्षेत्रमध्ये आदित्याऽऽदिप्रकाशसंबन्धलक्षणः,दर्शने सामान्यग्राही बोधः, तच्चेद् गुणप्रत्ययावध्यादिप्रत्यक्षरूपं, तेनाभिगमो वस्तुनः परिच्छेदस्तत्प्राप्तिर्वा दर्शनाभिगमः। एवं ज्ञानाभिगमोऽपि, जीवाभिगमः सर्वाऽभिगमो, गुणप्रत्ययावध्यादिप्रत्यक्षतः। अजीवाभिगमः पुद्गलास्तिकायाऽऽद्यभिगमः, सोऽपि तथैवेति। एवमिति,तथा-"छहिं दिसाहिं जीवाणं गई पवत्तइ" इत्यादिसूत्राण्युक्तानि। एवं चतुर्विंशतिदण्डकचिन्तायाम्--"पंचेंदियतिरिक्खजोणियाणं छहिं दिसाहिं गई।" इत्यादीन्यपि वाच्यानि। तथा मनुष्यसूत्राण्यपि, शेषेषु नारकाऽऽदिपदेषु षट्सु दिक्षु गत्यादीनां सामस्त्येनासंज्ञवः। तथाहि-नारकाऽऽदीनां द्वाविंशतेर्जीवविशेषाणां नारकदेवेषूत्पादाभावाद्ऊर्ध्वाधोदिशोर्विवक्षया गत्यागत्योरभावः, तथा दर्शनज्ञानजीवाऽजीवाभिगमा गुणप्रत्ययावधिलक्षणप्रत्यक्षसन्तानरूपा न सन्त्येव, तेषां भवप्रत्ययावधिपक्षे तु नारकज्योतिष्कास्तिर्यगवधयो, भवनपतिव्यन्तरा ऊर्ध्वावधयो, वैमानिकास्त्वधोऽवधयः, शेषा निरवधय एवेति भावना। विवक्षाप्रधानानि च प्रायोऽन्यत्राऽपि सूत्राणीति। स्था० ६ ठा०।

रायगिहे० जाव एवं वयासी-किमियं भंते! पाईणे त्ति पवुच्चइ?। गोयमा! जीवा चेव, अजीवा चेव। किमियं भंते! पमीणे त्ति पवुच्चइ?। गोयमा! एवं चेव। एवं च दाहिणा, एवं च उदीणा, एवं उड्ढा, एवं अहो वि। कइ णं भंते! दिसाओ पण्णत्ताओ?। गोयमा! दस दिसाओ पण्णत्ताओ। तं जहा-पुरच्छिमा, पुरच्छिमदाहिणा, दाहिणा, दाहिणपच्चच्छिमा, पच्चच्छिमा, पच्चच्छिमुत्तरा, उत्तरा, उत्तरपुरच्छिमा, उड्ढा, अहो॥

(किमियं भंते! पाईण त्ति पवुच्चइ त्ति) किमेतद्वस्तु यत्प्राग्एव प्राचीनं दिग्विवक्षायां प्राचीना प्राचीं पूर्वेति प्रोच्यते?, उत्तरं तु जीवाश्चैवाऽजीवाश्चैव जीवाजीवरूपा प्राची, तत्र जीवा एकेन्द्रियाऽऽदयोऽजीवास्तु धर्मास्तिकायाऽऽदिदेशाऽऽदयः। इदमुक्तं भवति-प्राच्यां दिशि जीवा अजीवाश्च सन्तीति।

एयंसि णं भंते! दसण्हं दिसाणं कइ नामधेज्जा पण्णत्ता?। गोयमा! दस नामधेज्जा पण्णत्ता। तं जहा-"इंदा अग्गेयी य जमा, य नेरई वारुणी य वायव्वा। सोमा ईसाणीया, विमला य तमा य बोधव्वा॥ १॥"

(इंदेत्यादि) इन्द्रो देवता यस्याः सैन्द्री,अग्निर्देवता यस्याः सा आग्नेयी, एवं यमो देवता याम्या, निर्ऋतिर्देवता नैर्ऋती, वरुणो देवता वारुणी, वायुर्देवता वायव्या,सोमदेवता सौम्या, ईशानदेवता ऐशानी, विमलतया विमला, तमा रात्रिस्तदाकारत्वात्तमाऽन्धकारेत्यर्थः, अत्र ऐन्द्री पूर्वा, शेषाः क्रमेण, विमला तूर्द्ध्वा, तमा पुनरधोदिगिति, इह च दिशः शकटोद्धिसंस्थिताः, विदिशस्तु मुक्तावलयाकाराः, ऊर्द्ध्वाधोदिशौ च रुचकाकारे। आह च-" सगमुहिसंठियाओ, महादिसाओ हवंति चत्तारि। मुत्तावली य चउरो, दो चेव य होंति रुयगनिभा।"(४६) इति (आचा०)

इंदा णं भंते! दिसा किं जीवा जीवदेसा जीवप्पएसा; अजीवा, अजीवदेसा, अजीवप्पएसा?। गोयमा! जीवा वि, तं चेव० जाव अजीवप्पएसा वि। जे जीवा ते णियमं एगिंदिया बेइंदिया० जाव पंचिंदिया अणिंदिया; जे जीवदेसा ते णियमं एगिंदियदेसा० जाव अणिंदियदेसा, जे जीवप्पएसा ते णियमं एगिंदियप्पएसा० जाव अणिंदियप्पएसा। जे अजीवा ते दुविहा पण्णत्ता। तं जहा-रूवी अजीवा, अरूवी अजीवा य। जे रूवी अजीवा ते चउव्विहा पण्णत्ता। तं जहा-खंधा, खंधदेसा, खंधप्पएसा, परमाणुपोग्गला।

(जीवा चेत्यादि) ऐन्द्री दिग् जीवाः, तस्यां जीवानामस्तित्वात्। एवं जीवदेशाः,जीवप्रदेशाश्चेति। तथा अजीवानां पुद्गलाऽऽदीनामस्तित्वादजीवाः, धर्मास्तिकायाऽऽदिदेशानां पुनर-

स्तित्वादजीवदेशाः, एवमजीवप्रदेशा अपीति। तत्र ये जीवास्ते एकेन्द्रियाऽऽदयोऽनिन्द्रियाश्च केवलिनो, ये तु जीवदेशास्ते एकेन्द्रियाऽऽदीनाम् ६, एवं जीवप्रदेशा अपि।

जे अरूवी अजीवा ते सत्तविहा पण्णत्ता। तं जहा–नो धम्मत्थिकाए, धम्मत्थिकायस्स देसे, धम्मत्थिकायस्स पएसा; नो अधम्मत्थिकाए, अधम्मत्थिकायस्स देसे, अधम्मत्थिकायस्स पएसा; नो आगासत्थिकाए, आगासत्थिकायस्स देसे, आगासत्थिकायस्स पएसा, अद्धासमए।

(जे अरूवी अजीवा ते सत्तविह त्ति) कथम्?, (नोधम्मत्थिकाए) अयमर्थः-धर्मास्तिकायः समस्त एवोच्यते, स च प्राची दिग्न भवति, तदेकदेशभूतत्वात्तस्याः, किं तु धर्मास्तिकायस्य देशः, सा तदेकदेशभागरूपेति। तथा तस्यैव प्रदेशाः सा भवति, असंख्येयप्रदेशाऽऽत्मकत्वात्तस्याः २। एवमधर्मास्तिकायस्य देशः, प्रदेशाश्च २। एवमाकाशास्तिकायस्य देशः, प्रदेशाश्च २। अद्धासमयश्चेति। तदेवं सप्तप्रकारा रूप्यजीवरूपा ऐन्द्री दिगिति।

अग्गेयी णं भंते! दिसा किं जीवा, जीवदेसा, जीवप्पएसा पुच्छा?। गोयमा! णो जीवा, जीवदेसा वि, जीवप्पएसा वि; अजीवा वि, अजीवदेसा वि, अजीवप्पएसा वि; जे जीवदेसा ते णियमा एगिंदियदेसा।

"अग्गेयी णं" इत्यादि प्रश्नः, उत्तरं तु जीवा निषेधनीया विदिशामेकप्रादेशिकत्वादेकप्रदेशे च जीवानामवगाहाभावात्, असङ्ख्यातप्रदेशावगाहित्वात् तेषाम्, तत्र "जे जीवदेसा ते नियमा एगिंदियदेसे त्ति।" एकेन्द्रियाणां सकललोकव्यापकत्वादाग्नेय्यां नियमादेकेन्द्रियदेशाः सन्तीति।

अहवा एगिंदियदेसा य, बेइंदियस्स देसे १, अहवा एगिंदियदेसा य, बेइंदियस्स देसा २, अहवा एगिंदियदेसा य, बेइंदियाण य देसा ३, अहवा एगिंदियदेसा, तेइंदियस्स देसे, एवं चेव तियभंगो भाणियव्वो। एवं० जाव अणिंदियाणं तियभंगो, जे जीवप्पएसा ते णियमा एगिंदियप्पएसा, अहवा एगिंदियप्पएसा य बेइंदियस्स पएसा, अहवा एगिंदियप्पएसा य बेइंदियाण य पएसा, एवं आदिल्लविरहिओ० जाव अणिंदियाणं। जे अजीवा ते दुविहा पण्णत्ता। तं जहा–रूवी अजीवा य, अरूवी अजीवा य, जे रूवी अजीवा ते चउव्विहा पण्णत्ता। तं जहा–खंधा, खंधदेसा, खंधप्पएसा, परमाणुपोग्गला। जे अरूवी अजीवा ते सत्तविहा पण्णत्ता। तं जहा–नो धम्मत्थिकाए, धम्मत्थिकायस्स देसे, धम्मत्थिकायस्स पएसा, एवं अधम्मत्थिकायस्स वि० जाव आगासत्थिकायस्स पएसा, अद्धासमए वि दिसासु नत्थि, जीवा देसे भंगो होइ सव्वत्थ।

जमा णं भंते! दिसा किं जीवा?। जहा इंदा तहेव णिरवसेसं, णेरइया जहा अग्गेयी, वारुणी जहा इंदा, वायव्वा जहा अग्गेयी, सोमा जहा इंदा, ईसाणी जहा अग्गेयी, विमलाए जीवा जहा अग्गेयीए, अजीवा जहा इंदाए, एवं तमा वि, णवरं अरूवी छव्विहा अद्धासमओ न भण्णइ॥

(अह वेत्यादि) एकेन्द्रियाणां सकललोकव्यापकत्वादेव, द्वीन्द्रियाणां चाल्पत्वेन कचिदेकस्याऽपि तस्य संभवाद्बहुत्वमुच्यते-एकेन्द्रियाणां देशाश्च, द्वीन्द्रियस्य च देश इति द्विकयोगे प्रथमः १। अथवा-एकेन्द्रियपदं तथैव, द्वीन्द्रियपदे त्वेकवचनं, देशपदे पुनर्बहुवचनमिति द्वितीयः, अयं च यदा द्वीन्द्रियो द्व्यादिनिर्देशैस्तां स्पृशति तदा स्यादिति। अथवा एकेन्द्रियपदं तथैव, द्वीन्द्रियपदं देशपदं च बहुवचनान्तमिति तृतीयः। स्थापना-एके० देशाः ३, द्वी० १ देशः १। एके० देशाः ३, द्वी० १ देशः ३। एके० देशाः ३, द्वी० १ देशाः ३। एवं त्रीन्द्रियचतुरिन्द्रियपञ्चेन्द्रियानिन्द्रियैः सह प्रत्येकं भङ्गत्रयं दृश्यम्-एवं प्रदेशपक्षोऽपि वाच्यो, नवरमिह द्वीन्द्रियाऽऽदिषु प्रदेशपदं बहुवचनान्तमेव, यतो लोकव्यापकावस्थानिन्द्रियवर्जजीवानां यत्रैकः प्रदेशस्तत्रासङ्ख्यातास्ते भवन्ति, लोकव्यापकावस्थानिन्द्रियस्य पुनर्यद्यप्येकत्र क्षेत्रप्रदेशे एक एव प्रदेशस्तथाऽपि तत्प्रदेशपदे बहुवचनमेवाग्नेय्यां तत्प्रदेशानामसङ्ख्यातानामवगाढत्वादतः सर्वेषु द्विकसंयोगेष्वाद्यविरहितं भङ्गकत्रयमेव भवतीत्येतदेवाऽऽह-(आदिल्लविरहिओ त्ति) द्विकमङ्ग इति शेषः। (विमलाए जीवा जहा अग्गेयीए त्ति) विमलायामपि जीवानामनवगाहात् (अजीवा जहा इंदाए त्ति) समानवक्तव्यत्वात्, एवं (तमा वि त्ति) विमलावत्तमाऽपि वाच्येत्यर्थः। अथ विमलायामनिन्द्रियसम्भवात्तद्देशाऽऽदयो युक्ताः, तमायां तु तत्सम्भवात्कथं त इति?। उच्यते-दव्यऽऽश्रयस्यं तमाश्रित्य तस्य देशो, देशाः, प्रदेशाश्च विवक्षया तत्रापि युक्ता एवेति। अथ तमायां विशेषमाह-(णवरमित्यादि) (अद्धासमओ न भण्णइ त्ति) समयव्यवहारो हि सञ्चरिष्णुसूर्याऽऽदिप्रकाशकृतः, स च तमायां नास्तीति तत्राद्धासमयो न भण्यत इति। अथ विमलायामपि नास्त्यसाविति, कथं तत्र समयव्यवहारः?, इत्युच्यते-मन्दराद्ययवद्भूतस्फटिककाण्डे सूर्याऽऽदिप्रभासंक्रान्तिद्वारेण तत्र सञ्चरिष्णुसूर्याऽऽदिप्रकाशभावादिति। भ० १० श० १ उ०।

दिगधिदिक्प्रवहद्वारे-

इंदा णं भंते! दिसा किमादिया, किंपवहा, कइपदेसादिया, कइपदेसुत्तरा, कइपदेसिया, किंपज्जवसिया, किंसंठिया पण्णत्ता?। गोयमा! इंदा णं दिसा रुयगादिया रुयगप्पवहा दुपदेसिया दुपदेसुत्तरा, लोगं पडुच्च असंखेज्जपएसिया, अलोगं पडुच्च अणंतपएसिया, लोगं पडुच्च सादिया सपज्जवसिया, अलोगं पडुच्च सादिया अपज्जवसिया, लोगं पडुच्च मुरजसंठिया, अलोगं पडुच्च सगडुद्धिसंठिया पण्णत्ता। अग्गेयी णं भंते! दिसा किमादिया, किंपवहा, कइपएसादिया, कइपएसवित्थिण्णा, कइपएसिया, किं पज्जवसिया, किंसंठिया पण्णत्ता?। गोयमा! अग्गेयी णं दिसा रुयगादिया रुयगप्पवहा एगपदेसादिया एगपदेसवित्थिण्णा अणुत्तरा, लोगं पडुच्च असंखेज्जपदेसिया, अलोगं पडुच्च अणंतपदेसिया, लोगं पडुच्च सादिया सपज्जवसिया, अलोगं पडुच्च अपज्जव-

सिया झिल्लिमुत्तावलिसंठिता पण्णत्ता । जमा जहा इंदा । णेरई जहा अग्गेयी । एवं जहा इंदा तहा दिसा चत्तारि । जहा अग्गेयी तहा चत्तारि विदिसाओ । विमला णं भंते! दिसा किमादिया पुच्छा ?। गोयमा! जहा अग्गेयी, विमला णं दिसा रुयगादिया रुयगप्पवहा चउप्पदेसादिया दुपदेसविवित्थिण्णा अणुत्तरा, लोगं पमुच्च सेसं जहा अग्गेयी, णवरं रुयगसंठिया । एवं तमा वि ॥

(किमादिय त्ति) कः आदिः प्रथमो यस्याः सा किमादिका, आदिश्च विवक्षया विपर्ययेणाऽपि स्यादित्यत आह-(किंपवहत्ति) प्रवहति प्रवर्ततेऽस्मादिति प्रवहः, कः प्रवहो यस्याः सा तथा । (कतिपएसाइय त्ति) कति प्रदेशा आदिर्यस्याः सा कतिप्रदेशाऽऽदिका । (कइपएसुत्तर त्ति) कति प्रदेशा उत्तरे वृद्धौ यस्याः सा तथा । (लोगं पमुच्च मुरजसंठिय त्ति) लोकान्तस्य परिमण्डलाऽऽकारत्वेन मुरजसंस्थानता दिशः स्यात्तच्च लोकान्तं प्रतीत्य मुरजसंस्थितेत्युक्तम् । एतस्य च पूर्वाऽऽदिदिशमाश्रित्य चूर्णिकारकृतेयं भावना-" पुव्वुत्तराए पएसहाणी तहा दाहिणपुव्वाए रुयगदेसे मुरयहेट्ठं दिसि अ ते चउप्पएसा दट्ठव्वा, मज्झे य तुरं हवति त्ति । " (अहोगं पमुच्च सगडुद्धिसंठिय त्ति)रुचके तुरं कल्पनीयम्,आदौ सङ्कीर्णत्वात्तत उत्तरोत्तरं विस्तीर्णत्वादिति । भ० १३ श० ४ उ० । ध० । स्था० ।

जंबुदीवे दीवे मंदरस्स पव्वयस्स बहुमज्झदेसभाए इमीसे रयणप्पभाए पुढवीए उवरिमहेट्ठिल्लेसु खुड्डगपयरेसु एत्थ णं अट्ठपएसिए रुयगे पण्णत्ते, जओ णं इमाओ दस दिसाओ पवहंति । तं जहा-पुरच्छिमा, पुरच्छिमदाहिणा, दाहिणा, दाहिणपच्चच्छिमा, पच्चच्छिमा, पच्चच्छिमुत्तरा, उत्तरा, उत्तरपुरच्छिमा, उड्ढा, अहो । स्था० १० ठा० ।

तुच्छस्य दरिद्रश्रावकस्य दिगाद्यपेक्षया दिश्यते यया शिष्यः सा दिगाचार्योपाध्याया । पञ्चा० ५ विव० ।

एगपक्खियस्स भिक्खुस्स कप्पति इत्तरियं दिसं वा अणुदिसं वा उद्दिसित्तए, जहा वा तस्स गणस्स पत्तियं सिया ।

एकः समानः पक्ष एकपक्षः, सोऽस्यास्तीति एकपाक्षिकः, प्रव्रज्यया श्रुतेन च स्वगणस्य,भिक्षोः कल्पते इत्वरां कियत्कालभाविनीम्, इत्वरग्रहणमुपलक्षणम् । यावत्कथिकां च । दिशमाचार्यत्वमुपाध्यायत्वं वा,अनुदिशं वा आचार्योपाध्यायपदद्वितीयस्थानवर्त्तित्वं, वाशब्दो विकल्पार्थः । उपदेष्टुं वा,तस्य वा स्वयं धारयितुं, यथा वा तस्य गणस्य प्रीतिकं स्यात्, तथा वा दिशमनुदिशं वा उद्दिशेत् । किमुक्तं भवति?-भिन्नपक्षिकमप्यपवादपदेन स्वगणप्रीत्याऽऽचार्याऽऽदिपदाध्यारोपितं कुर्यादिति संक्षेपार्थः ।

व्यासार्थं तु भाष्यकृद्विवक्षुः प्रथमतः पूर्वसूत्रेण सह संबन्धमाह-

निक्खित्तम्मि उ लिंगे, पुणं सातिज्जणाएँ एहाणाऽऽदी ।
दिएणेसु य होइ दिसा, दुविधा वि य एस संबंधो ३१७

यदि लिङ्गं रजोहरणं ' निक्खित्तं ' परित्यक्तं भवति, ततस्तस्मिन्निक्षिप्ते लिङ्गे,यदि वा लिङ्गापरित्यागेऽपि स्नानाऽऽदेः "साइज्जमाणे " अनुमनने, मूलं नाम प्रायश्चित्तं, दानेन समस्तपर्यायोच्छेदतः प्रदत्तेषु व्रतेषु द्विविधाऽप्याचार्यत्वमुपाध्यायत्वरूपा दिक् दीयते,ततोऽयधावनसूत्रानन्तरं दिक्सूत्रोपन्यासः, एष पूर्वसूत्रेण सहाऽस्य सूत्रस्य संबन्धः ।

साम्प्रतमेकपाक्षिकत्वं व्याख्यानयति-

दुविहो य एगपक्खी, पव्वज्ज सुए य होइ नायव्वो ।
सुत्तम्मि एगवायण, पव्वज्जाए कुलिव्वाऽऽदी ॥३२०॥

द्विविधो द्विप्रकार एकपाक्षिको भवति ज्ञातव्यः । तद्यथा-प्रव्रज्यायां, श्रुते च । तत्र सूत्रे सूत्रविषय एकपाक्षिकवाचन एका समाना परस्परं वाचना येषां ते तथा, एकगुरुकुलाधीत इत्यर्थः । प्रव्रज्यया चैकपाक्षिक एककुलवर्ती, आदिशब्दादेकगच्छवर्तिशिष्यसहाध्यायाऽऽदिपरिग्रहः ।

एतदेव रूपद्वयमाह-

सकुलिव्व उ पव्वज्जा, पक्खित्तो एगवायणा सुयम्मि ।
अब्भुज्जतपरिकम्मे, मोहे रोगे च इत्तरिओ ॥ ३२१ ॥

प्रव्रज्यापाक्षिको नाम (सकुलिव्व उ त्ति) स्वकुलसंभवी, उपलक्षणमेतत्, तेन स्वगणसंभवी स्वशिष्य इत्यादिरपि द्रष्टव्यम् । श्रुते श्रुतपाक्षिकः पुनरेकवाचनः । इह सूत्रे इत्वरादिग्रहणाद् यावत्कथिकयापि दिक् सूचिता । तामुभयीमपि व्याख्यानयति-(अब्भुज्जय इत्यादि) आचार्योऽभ्युद्यतविहारपरिकर्मकामः,उपलक्षणमेतत्,अभ्युद्यतमरणं वा प्रतिपत्तुमनाः। यावत्कथिकमाचार्यमुपाध्यायं वा स्थापयितुमाह-चिकित्सां वा कर्तुकाम इत्वरम् । अक्षरयोजना त्वियम-अभ्युद्यतमरणौ वा, यावत्कथिकावाचार्योपाध्यायाविति शेषः । मोहे रोगे चेत्वरः, बहुवचनं द्वित्वेऽपि प्राकृतत्वात्, आचार्यश्च यावत्कथिकाऽऽचार्यस्थापने द्विविधः-सापेक्षो, निरपेक्षश्च ।

तथा चात्र राजदृष्टान्तः,तमेवाऽऽह-

दिट्ठंतो जह राया, सावेक्खो खलु तहेव निरवेक्खो ।
सावेक्खो जुवनरिंदं,ठवेइ इय गच्छुवज्झायं ॥ ३२२ ॥

दृष्टान्तोऽत्र यथा राजा । तथाहि-राजा द्विविधः-सापेक्षो, निरपेक्षश्च । तत्र यः सापेक्षः स जीवन्नेव युवराजं स्थापयति, युवराजश्च स स्थापनीयो यस्मिन्ननुरक्ता परिषत् । ततः कालगतेऽपि राज्ञि न वैराग्यमुपजायते, किं तु तदवस्थमेव राज्यमनुवर्त्तते, यस्तु निरपेक्षः सन् स्थापयति युवराजं, तस्मिंश्च स्थापिते राज्ञि कालगते दायादानां परस्परकलहतो राज्यं विनाशमाविशति । एवमाचार्योऽपि द्विविधः-सापेक्षो, निरपेक्षश्च । तत्र यो गच्छसापेक्षः स जीवन्नेव गणधरं स्थापयति, तस्मिंश्च स्थापिते कालगतेऽप्याचार्ये गच्छो न सीदति । तथा चाऽऽह-इति एवं सापेक्षराज इव युवनरेन्द्रं, सापेक्ष आचार्यो जीवन्नेवेति वाक्यशेषः, गच्छोपाध्यायं गच्छनायकं स्थापयति । पुनर्गच्छनिरपेक्षः सन् आचार्यं जीवन् स्थापयति । तस्मिन् कालगते परस्परकलहभावतो गच्छो विनाशमुपयाति, तस्माद् जीवत्येव गणधरे आचार्ये उपाध्यायो वा स्थापयितव्यः ।

साम्प्रतं मिश्रत्वं चाऽऽचार्योपाध्यायस्थापनाविषयमाह-

गणहरपाउग्गासति, पमायअहवावि ते व कालगते ।
थेराण पगासेंती, जावऽण्णो न ठाविओ तत्थ ॥ ३२३ ॥

गणधरस्य गणधरपदस्य प्रायोग्यो गणधरप्रायोग्यस्तस्यासति अभावे । अथवा-प्रमादतोऽस्थापित एवाऽऽचार्ये काल-

गते इत्वर आचार्ये उपाध्याये वा स्थाप्यते, स च यैः स्थाप्यते, ते स्थविराणां गच्छबृहत्तराणां प्रकाशयन्ति-यावत्तत्र,मूलाऽऽचार्यपदे वाऽन्यो न स्थापितो भवति,तावदेव युष्माकमाचार्ये उपाध्याये वा प्रवर्त्तक इति। इह एकपाक्षिको द्विविध उक्तः-प्रव्रज्यया, श्रुतेन च। अत्र च भङ्गचतुष्टयम्। तद्यथा-प्रव्रज्यया एकपाक्षिकश्रुतेन १, प्रव्रज्यया न श्रुतेन २, न प्रव्रज्यया श्रुतेन ३, न प्रव्रज्यया नापि श्रुतेन ४। एतदपि भङ्गचतुष्टयं कुलाऽऽदिष्वपि योजनीयम्।

तथा चाऽऽह-

पव्वज्जाएँ कुलस्स य, गणस्स संघस्स चेव पत्तेयं।
समगं सुएण भंगा, कुज्जा कमसो दिसाबंधे ॥ ३२४ ॥

दिग्बन्धे आचार्यपदे, उपाध्यायपदे वा स्थाप्यमाने इत्यर्थः,प्रव्रज्यया कुलस्य गणस्य सङ्घस्य च प्रत्येकं श्रुतेन सार्द्धं भङ्गचतुष्टयं प्रत्येकं योजयेदिति भावः। तत्र प्रव्रज्यया भङ्गचतुष्टयमुपदर्शितम्। इदानीं कुलस्योपदर्श्यते-कुलेनैकपक्षः श्रुतेन च १। कुलेनैकपक्षिको न श्रुतेन २। कुलेन नैकपक्षिकः किं तु श्रुतेन ३। न श्रुतेन नापि कुलेन ४। एवं गणेन सङ्घेन च प्रत्येकं भङ्गचतुष्टयं भावनीयम्। तत्र प्रव्रज्यां कुलं गणं वाऽधिकृत्य यः प्रथमभङ्गवर्त्ती स इत्वरो, यावत्कथिको वा स्थापनीयः, तदभावे तृतीयभङ्गवर्त्ती यदि पुनर्द्वितीयभङ्गवर्त्तिनं,चतुर्थभङ्गवर्त्तिनं वा स्थापयति, तदा तस्य स्थापयितुः प्रायश्चित्तं चत्वारो गुरुमासाः, न केवलमेतत् प्रायश्चित्तं, किं चाऽऽज्ञादयोऽपि दोषाः।

तथा चाऽऽह-

आणाऽऽइणो य दोसा, विराहणा होइ-मेहिँ ठाणेहिं।
संकिएँ अजिणवयहणे, तस्स व दीहेण कालेण ॥३२५॥

आज्ञाऽऽदय आज्ञाऽनवस्थाप्यमिथ्यात्वविराधनारूपाः, चशब्दोऽनुक्तप्रायश्चित्तसमुच्चये। तच्च प्रायश्चित्तं प्रागेवोपदर्शितम्, तथा विराधना गच्छस्य भेदो भवति,आभ्यां वक्ष्यमाणाभ्यां स्थानाभ्याम्,तौ एव दर्शयति, शङ्कितेऽभिनवग्रहणे च साधूनां यदि ग्लानावस्था स्थापयितुः दीर्घेण कालेन रोगचिकित्सां वा कृत्वा समागतस्य शङ्कते।

एतदेव विभावयिषुः प्रथमत इत्वरस्य, यावत्कथिकस्य च स्थापने विषयमाह-

परिकम्मं कुणमाणे, मरणस्सऽब्भुज्जयस्स ववहारे।
मोहे रोगतिगिच्छा, ओहावंते वि आयरिए ॥ ३२६ ॥

अभ्युद्यतस्य मरणस्य पादपोपगमनाख्यस्य परिकर्म द्वादशसांवत्सरिकसंलेखनारूपं कुर्वाणे, यदि वा अभ्युद्यतविहारस्य जिनकल्पाऽऽदिप्रतिपत्तिलक्षणस्य परिकर्म तपोभावनाऽऽदिलक्षणं कुर्वति, यावत्कथिक आचार्यः स्थापनीयः, मोहे मोहचिकित्सायां, रोगचिकित्सायां,यदि वा अवधावत्याचार्ये इत्वर आचार्यः स्थापयितव्यः।

तत्र श्रुतानेकपाक्षिकेत्वराऽऽचार्यस्थापने दोषमाह-

दुविहतिगिच्छं काऊ-ण आगतो संकियम्मि कं पुच्छे?।
पुच्छंतु च कं इयरे, गणभेदो पुच्छणाहेउं ॥ ३२७ ॥

श्रुत्वाऽनेकपाक्षिकेत्वराऽऽचार्यस्थापने द्विविधचिकित्सां,मोहचिकित्सां, रोगचिकित्सां चेत्यर्थः। दीर्घकालं कृत्वा समागतः सन् शङ्किते सूत्रे, अर्थे च कं पृच्छेत्?, नैव कञ्चनेति भावः। स्थापिताऽऽचार्यस्य निह्नवाचनाकत्वात्,इतरे वा गच्छवासिनि आचार्ये मोहचिकित्सां वा कुर्वन्तः कं पृच्छन्तु, नैव कञ्चन, पूर्वोक्तादेव हेतोः। ततस्ते वाचनाप्रदायकमलभमाना गच्छान्तरमुपसंपद्येरन्, गच्छान्तरोपसंपन्नौ च प्रश्नहेतोर्गणभेदः स्यात्।

संप्रति श्रुतानेकपाक्षिकयावत्कथिकाऽऽचार्यस्थापने दोषमाह-

न तरइ सो संधाउं, अप्पाधारो व पुच्छिडं देइ।
अन्नत्थ व पुच्छंते, सचित्ताऽऽदी उ गेण्हंति ॥ ३२८ ॥

स श्रुतानेकपाक्षिकः स्थापितो यावत्कथिक आचार्यो निह्नवाचकत्वाद् न शक्नोति संधातुं विस्मृतमालापकं दातुम। अथवा-श्रुतानेकपाक्षिकोऽल्पश्रुतोऽप्युच्यते, ततोऽल्पाधारः, अल्पस्य सूत्रार्थस्य वाऽऽश्रय इति पृष्टः सन्नन्यं पृष्टमालापकं ददाति, अन्यत्र च गणान्तरे गत्वा पृच्छति, ते गच्छान्तरवर्तिन आचार्यास्तेनोत्पादितं सचित्ताऽऽदिकं गृह्णन्ति,अगीतार्थानां न किञ्चिदाभाव्यमिति जिनवचनात्तस्य च तेषां समीपे प्रस्थापना च।

उपसंहारमाह-

सुयतो अणेगपक्खिय, एए दोसा भवे उवेंतस्स।
पव्वज्जाऽणेगपक्खिय, भवंते इमे भवे दोसा ॥ ३२९ ॥

श्रुतानेकपक्षिणमित्वरं,यावत्कथिकं वाऽऽचार्यं स्थापयत एते अनन्तरोदिता दोषा भवन्ति,प्रव्रज्याऽनेकपक्षिणं पुनरित्वरं, यावत्कथिकं वा स्थापयत इमे वक्ष्यमाणा भवन्ति दोषाः।

तानेव प्रतिपिपादयिषुराह-

दोण्ह वि बाहिरभावो, सचित्ताऽऽदीसु भंमणं नियमा।
होइ गणस्स उ भेदो,सुचिरेण न एस अम्हं ति ॥३३०॥

प्रव्रज्यानेकपक्षिक इत्वरयावत्कथिकाऽऽचार्यस्थापने द्वयोरपि, गच्छस्याऽऽचार्यस्य चेत्यर्थः। बहिर्भावो बहिर्भावाध्यवसायो भवति। तथाहि-योऽसौ स्थापयति आचार्यः स गच्छवर्तिनः साधून्समस्तानपि परकीयान्मन्यते, साधवोऽपि गच्छवर्तिनस्तं परमभिमन्यन्ते, एवं परस्परबहिर्भावाध्यवसाये सति स्थापितस्य गच्छवर्तिनां च साधूनामनाभाव्यानि सचित्ताऽऽदीनि गृह्णतां नियमतो भण्डनं कलहो भवति, तथा च सति प्रवचनोड्डाहः प्राक्तृपे व्याख्यातः, प्रायश्चित्ताऽऽपत्तिश्च,अन्यच्च गच्छवर्तिनस्ते साधवो मन्यन्ते सुचिरेणापि प्रभूतेनाऽपि कालेन गच्छता-ऽस्माकमेव, परकीयत्वात्। उपलक्षणमेतत्, सोऽप्यभिमन्यते सुचिरेणाप्येते परकीया इत्येवं परस्परमध्यवसायभावतो गणस्य गच्छस्य भेदो भवति, तस्मादित्वरो, यावत्कथिको वा प्रथमभङ्गवर्त्ती स्थापयितव्यः।

अत्रैवापवादमाह-

अन्नयरतिगिच्छाए, पढमासति तइयभंगमित्तरियं।
तइयस्सेव उ असती, बितिओ तस्सासति चउत्थो ३३१।

अन्यतरचिकित्सायां-मोहचिकित्सायां,रोगचिकित्सायां वा। आचार्यमित्वरमुपलक्षणमेतत्, अभ्युद्यतमरणप्रतिपत्तावभ्युद्यतविहारपरिकर्मप्रतिपत्तौ वा यावत्कथिकमाचार्यमुत्सर्गतः प्रथमभङ्गवर्तिनं स्थापयेत्, प्रथमभङ्गवर्त्तिनोऽसति अभावे, तृतीयं तृतीयभङ्गवर्तिनमित्वरम्, उपलक्षणमेतद्-यावत्कथिकं वा स्थापयेत्। तत्र सूत्रेऽर्थे च स शीघ्रं निष्पादयितव्यः। तृतीयस्याऽपि तृतीयभङ्गवर्तिनः, एवशब्दोऽपिशब्दार्थः, अ-

सत्यभावे पुनर्द्वितीयो द्वितीयभङ्गवर्ती, तस्यासति चतुर्थः। तत्र योऽसौ चतुर्भङ्गवर्ती स्थापयितव्यो भवति स एतादृशगुणः--

पयतीए मिलसहावं, पगतीए संमतं वि णियगं वा ।
नाऊण गणस्स गुरुं, ठावेंति अणेगपक्खे वि ॥३३४॥

अनेकपक्षिणमपि प्रव्रज्यापक्षरहितश्रुतसमानपक्षराहितमपि प्रथमद्वितीयतृतीयभङ्गवर्त्यसंभवे प्रकृत्या, स्वभावेन त्वक्पटभावतो मृदुस्वभावमरोषणस्वभावं, तथा प्रकृत्या स्वभावेन सम्मतमभिमतं,समस्तस्याऽपि गच्छस्येति गम्यते। स्वजनसंबन्धभावतो वा निजकमात्मीयं ज्ञात्वा गणस्य गुरुः स्थापयितव्यः ।

तस्य चतुर्भङ्गवर्त्तिनः सचित्ताऽऽदिषु य आभवनव्यवहारस्तमभिधित्सुराह-

साहारणं तु पढमे, विइए खेत्तम्मि तइए सद्दुक्खे ।
अणहिज्जंते सीसे, तेसिं एक्कारस विभागा ॥ ३३५ ॥

प्रथमे वर्षे साधारणम्,किमुक्तं भवति?-यावल्लभते तस्य तद्,द्वितीये वर्षे यत्क्षेत्रे तदीये लभ्यते तत्क्षेत्रवर्तिनां साधूनां,शेषं गणधरस्य, तृतीये वर्षे समदुःस्थोपनता यद् लभन्ते तत्तेषामेव गच्छवर्त्तिनामाभावयति, शेषं गणधरस्य, चतुर्थाऽऽदिषु वर्षेषु सर्वं गणधरस्य,एष आभवनव्यवहारोऽनधीयाने शिष्ये । किमुक्तं भवति?-ये स्थापिताऽऽचार्यस्य समीपे न पठन्ति तान् प्रति द्रष्टव्यः, ये पुनराचार्यस्य समीपे न पठन्ति तेषामेकादश विभागाः। तथा चाऽऽह-शेषेऽधीयाने एकादश विभागाः प्रकारा आभवद्व्यवहारस्य ।

तानेव प्रतिपिपादयिषुराह-

पुव्वुद्दिट्ठं तस्सा, पच्छुद्दिट्ठं पवायय॑तस्स ।
संवच्छरम्मि पढमे, पडिच्छए जत्थ सच्चित्तं ॥ ३३४ ॥

प्रतीच्छिके गच्छान्तरादध्ययनार्थमधिकृतगच्छोपसंपदं प्रपन्नो यत् आचार्यपदस्थापनातः पूर्वमुद्दिष्टं सचित्तम्, उपलक्षणमेतत्-अचित्तकं, वस्त्रपात्रं प्रथमे वर्षे भवति संपद्यते तत्सर्वं तस्य प्रतीच्छकस्य, एष प्रथमो विकल्पः । यत्पुनराचार्यपदस्थापनातः पश्चाद्दुद्दिष्टं प्रथमे वर्षे संपद्यते सचित्ताऽऽदिकं तत्सर्वं प्रवाचयतोऽधिकृतस्थापनाऽऽचार्यस्याध्यापयितुः, एष द्वितीयो विकल्पः ।

पुव्वं पच्चुद्दिट्ठं, पडिच्छए जं तु होइ सच्चित्तं ।
संवच्छरम्मि बितिए, तं सव्वं पवायय॑तस्स ॥ ३३५ ॥

आचार्यपदस्थापनातः पूर्वं पश्चाद्वा यदुद्दिष्टं सचित्तम्,उपलक्षणमेतदचित्तं वा,द्वितीये संवत्सरे भवति संपद्यते । इत्याह-प्रतीच्छके गच्छान्तरादागत्य सूत्रार्थस्य वा प्रतीच्छन प्रतीच्छा, तया चरति प्रतीच्छिकस्तस्मिन्, तत्सर्वं प्रवाचयतोऽध्यापयितुरधिकृतस्थापिताऽऽचार्यस्य वेदितव्यम् । एष तृतीयोऽपि विकल्पः ।

पुव्वं पच्चुद्दिट्ठं, सीसम्मि उ जं तु होइ सच्चित्तं ।
संवच्छरम्मि पढमे, तं सव्वं गुरुस्स आभवति ॥३३६॥

आचार्यपदस्थापनातः पूर्वं पश्चाद्वा उद्दिष्टं यत् सचित्तम्,उपलक्षणत्वादचित्तं, वस्त्राऽऽदिकं, शिष्ये प्रथमवर्षे भवति संपद्यते तत् सर्वं गुरोराभवति । एष चतुर्थो विभागः ।

पुव्वुद्दिट्ठं तस्सा, पच्छुद्दिट्ठं पवायय॑तस्स ।
संवच्छरम्मि बिइए, सीसम्मि उ जं तु सच्चित्तं ॥३३७॥

यत्सचित्तमचित्तं वाऽऽचार्यपदस्थापनातः पूर्वमुद्दिष्टं सचित्तमचित्तं वा शिष्ये द्वितीये संवत्सरे भवति संपद्यते, तत्सर्वं तस्य शिष्यस्याऽऽभवति । एष पञ्चमो विभागः। यत्पुनराचार्यपदस्थापनातः पश्चादुद्दिष्टं सचित्तमचित्तं वा शिष्ये तृतीये संवत्सरे भवति संपद्यते, तत्सर्वं प्रवाचयतोऽधिकृतगुरोराभवति । एष षष्ठो विभागः ।

पुव्वुद्दिट्ठं तस्सा, पच्छुद्दिट्ठं पवायय॑तस्स ।
संवच्छरम्मि पढमे, तं सिस्सिणिए उ सच्चित्तं ॥३३८॥

आचार्यपदस्थापनातः पूर्वमुद्दिष्टं सचित्तमचित्तं वा प्रथमे संवत्सरे शिष्यिण्याः शिष्याया आभवति । एषोऽष्टमो विभागः ८। यत्पुनराचार्यपदस्थापनातः पश्चादुद्दिष्टं सचित्ताऽऽदिकं प्रथमे संवत्सरे शिष्यायाः संपद्यते, तत्सर्वं प्रवाचयतोऽधिकृतस्य गुरोराभाव्यम् । एष नवमो विभागः ९ ।

पुव्वं पच्चुद्दिट्ठं, सिस्सीए उ जं तु सच्चित्तं ।
संवच्छरम्मि बितिए, एतं सव्वं पवायय॑तस्स ॥ ३३९ ॥

पूर्वं पश्चादुद्दिष्टं सचित्तमचित्तं वा द्वितीये संवत्सरे शिष्यायाः संपद्यते, तत्सर्वं प्रवाचयतोऽधिकृतस्य गुरोः । एष दशमो विभागः ।

पुव्वं पच्चुद्दिट्ठं, पडिच्छयाए उ जं तु सच्चित्तं ।
संवच्छरम्मि पढमे, तं सव्वं पवायय॑तस्स ॥ ३४० ॥

पूर्वं पश्चाद्वा यदुद्दिष्टं सचित्तमुपलक्षणमेतदचित्तं वा प्रथमे वर्षे प्रातीच्छिकयाः शिष्यायाः संपद्यते,तत्सर्वं प्रवाचयतोऽधिकृतस्य गुरोः । एवं न्यायेन द्वितीयाऽऽदिष्वपि संवत्सरेषूक्तः । एष एकादशोऽपि विभागः ।

साम्प्रतमुपसंहारमाह-

जम्हा एते दोसा, दुविहे वि अ पक्खिए तु ठवियम्मि ।
तम्हा उ ठवेयव्वो, कमेणमेणं तु आयरिओ ॥ ३४१ ॥

द्विविधे-अन्यपाक्षिके श्रुतप्रव्रज्यापक्षरहिते वेत्यर्थः । स्थापिते चाऽऽचार्ये यस्मादेते अनन्तरोदिता दोषास्तस्मादनेनानन्तरोदितेन " पढमासति तइयभगं (३३१) " इत्यादिलक्षणेन क्रमेण स्थापयितव्य आचार्य इति ।

अथ प्रथमभङ्गवर्त्ती केन विधिना स्थापयितव्यः?,उच्यते-

एयस्सेगदुगादी, निप्फण्णा तेसि बंधइ दिसाओ ।
संपुच्छणओलोयण-दाणे मिलिएण दिट्ठंतो ॥३४२॥

एतस्य प्रथमभङ्गवर्त्तिनः स्थापिताऽऽचार्यस्य एकद्विकाऽऽदय एकद्वित्रिचतुरादयः शिष्या निष्पन्ना यदि भवन्ति, ततस्तेषां, दिश आचार्यत्वमुपाध्यायत्वं चेत्यर्थः । बध्नाति, तथा योऽसावाचार्यैः संदिष्टो-यथैष सुव्रतोऽथैतश्च निर्मोप्याऽऽचार्यपदे स्थापनीयस्तस्य स्थापितगणधरेणाऽऽचार्यपदे स्थापितस्य शिष्याणां विप्रतारणार्थं संप्रच्छनं, तद्दत्तवहनमवलोकनं साक्षात्समीपं गत्वा संयमयात्रानिर्वहन् प्रच्छन्नं दानं वस्त्रपात्राऽऽदेः । एतेषां समाहारो द्वन्द्वः, तस्मिन्नपि कृते विपरिणामाभावे मिलितेन गोपालद्वयमिलनेन दृष्टान्तो वक्तव्यो, द्वयोर्गोपालयोर्मिलितयोः प्रभूता धनवृद्धिरभूत्, तथा युष्माकमस्माकं च मिलितानां विहरतां भूयान् ज्ञानाऽऽदिलाभो भवतीति मिलितैर्विहर्तव्यमिति ।

साम्प्रतमेनामेव गाथां विवरीषुरिदमाह-

गीयमगीया बहवो, गीयत्थसलक्खणा उ जे तत्थ ।
तेसिं दिसाउ दाणं, विरयति सेसे जहरिहं तु ॥३४३॥

गच्छे बहवः साधवो (गीयमगीया इति) गीतार्था अगीतार्थाश्च, तत्र ये गीतार्थास्तत्रापि सलक्षणा आचार्यलक्षणोपेताः, तेषां दिश आचार्यपदानि, दत्त्वा शेषान्साधून्यथार्हं यथायोग्यं, तथा केषाञ्चिदनुरत्नाधिकत्वेन केषाञ्चित्सामान्यतः शिष्यत्वेन विरतिं प्रयच्छति। एतच्च तदा ऊह्यं यदा प्रत्येकं बहवः शिष्याः प्राप्यन्ते, अन्यथा त्वेक एवाऽऽचार्यः स्थापनीयः, शेषाः समस्ता अपि शिष्यत्वेन संबध्यन्ते, तत्रापि सलक्षणानां देशो क्रियते ।

एतदेव सुव्यक्तमभिधित्सुराह-

मूलायरि रायणिओ, अणुमरिसो तस्स होउवज्झाओ ।
गीयमगीया सेसा, माज्झिल्लया होंति सीसा हु ॥३४४॥

मूलाऽऽचार्यो नाम रात्निको रत्नाधिकः, तस्य मूलाऽऽचार्यस्यानुसदृशोऽनुरूप उपाध्यायः, शेषास्तु ये गीतागीतार्थास्ते तस्य ' माज्झिल्लगा ' अनुरत्नाधिकाः, हकारोऽलाक्षणिकः, शिष्या भवन्ति ।

रायणिया गीयत्था, अलद्धिया धारयंति पुव्वदिसं ।
अपहुच्चंते सव्वक्खणे, केवलमेगे दिसाबंधो ॥३४५॥

ये पुनः रात्निका व्रतपर्यायेणाधिकाः, गीतार्थाः श्रुतसंपन्नुपेता व्रतश्रुतनिष्पन्नाश्च केवलं संग्रहे उपग्रहे चाऽलब्धिकाः, ते पूर्वदिशं पूर्वाऽऽचार्यप्रदत्तं दिशमनुरत्नाधिकत्वलक्षणं धारयन्ति, न त्वाचार्यपदमुपाध्यायत्वं वा तेषामारोप्यते, तल्लब्धिहीनत्वात्। एष विधिः-यावन्तः स्थापिता आचार्यास्तेषां प्रत्येकमनुगन्तव्यम्, एतच्च तदा क्रियते यदा भूयांसः साधवः प्राप्यन्ते। (अपहुच्चंते इत्यादि) अप्रभवति प्रत्येकमाचार्याणां साधुपरिवारे भूयस्यप्राप्यमाणे केवलमेकस्मिन् सलक्षणे विशिष्टाऽऽचार्यलक्षणोपेते दिग्बन्ध आचार्यपदाध्यारोपः क्रियते।

एतदेवाऽऽह-

सीसे य पहुच्चंते, सव्वेसिं तेसि होति दायव्वो ।
अपहुच्चंतेसुं पुण, केवलमेगे दिसाबंधो ॥ ३४६ ॥

शिष्ये शिष्यवर्गे प्रत्येकं प्रभवति तेषामाचार्यलक्षणोपेतानां सर्वेषामपि देशो दातव्यः । अप्रभवत्सु प्रत्येकं पूर्णतया साधुष्वप्राप्यमाणेषु केवलमेकस्मिन् सलक्षणतरे दिग्बन्धः कर्त्तव्यः, शेषाणां तु सल्लक्षणानां दिशोऽनुज्ञाप्याः ।

साम्प्रतं तेष्वाचार्यपदस्थापितेषूपकरणदानविधिमाह-

अचित्तं व जहरिहं, दिज्जइ तेसुं व बहुसु गीएसु ।
एस विही अक्खाओ, अगीएसुं इमो उ विही ॥३४७॥

तेषु वाऽऽचार्यपदस्थापितेषु बहुषु गीतार्थेषु अचित्तं वस्तु पात्राऽऽदि उपकरणं यथाऽर्हं यो यावन्मात्रोऽर्हस्तस्य तावन्मात्रं दीयते, एष विधिराख्यातो गीतार्थेषु सूत्रार्थनिष्पन्नेष्वाचार्यलक्षणोपेतेषु, अगीतेष्वनधिगतसूत्रार्थेष्वाचार्यलक्षणोपेतेष्वयं वक्ष्यमाणो विधिर्द्रष्टव्यः ।

तमेवाऽऽह-

अरिहं व अनिम्मायं, नाउं थेरा भणंति जो उवितो ।
एयं गीयं काउं, दिज्जाहि दिसं अणुदिसं वा ॥३४८॥

अर्हो नाम लक्षणोपेततयाऽऽचार्यपदयोग्यः, परमद्यापि सूत्रेऽर्थे च न निर्मितस्तमर्हमनिर्मातं ज्ञात्वा यो गणधरस्तत्कालं स्थापितस्तं स्थविरा वृद्धा आचार्या भणन्ति-यथा एनं साधुं गीतं गीतार्थं कृत्वा दद्यात् भवान् दिशमनुदिशं वा ।

सो निम्मविय उवितो, अत्थति जइ तेण सह तिनो लद्धं ।
अह न वि चिट्ठइ तहियं,संघामो ता से दायव्वो ।३४९।

योऽसावाचार्येण संदिष्टो-यथैतं साधुं निर्माप्य एतस्यै दिशमनुदिशं वा दद्यात् स निर्म्मापितो निर्म्माप्याऽऽचार्यपदे स्थापितः, ततः स यदि निर्मापितः स्थापितस्तेन सह तिष्ठति विहरति ततो लब्धं समीचीनम् । अथ नैव, अपिशब्द एवकारार्थो, न तिष्ठति तत्र तस्य समीपे तर्हि (से) तस्य सङ्घाटो दातव्यः,यस्य पूर्वाऽऽचार्येण वैयावृत्यकरो दत्तः,सोऽपि तेन सार्द्धं विहरति।

तत्र ये स्थापितगणधरेणैको द्वौ त्रयो वा सहाया दत्तश्च पूर्वाऽऽचार्यप्रदत्तो वैयावृत्यकरस्तान् पाठयति,ये चाभिनवशैक्षका उपस्थापिताः प्रव्राजिताः,तेऽप्यात्मनः शिष्यत्वेन संबन्धनीयाः, एवं संजातपृष्ठविहारः सन् अन्यत्र विहारेण गतः, तस्य तत्र विहरतः शिष्यान् संस्थापितगणधरो विपरिणमयितुकामो यत् समाचरति तदुपदर्शयति-

पेहेइ गंतुं व सयं व पुच्छे,
संबंधमाणो उवहिं व देती ;
सज्झंतिया सिं व समप्पिया वि,
सचित्तमेवं न लभे करेंतो ॥ ३५० ॥

यत्र स निर्मापितः स्थापितो विहरति तत्रोद्यन्तवाहकान्साधून् ततशिष्याणां प्रेषयति । अथवा-स्वयमन्तराऽन्तरा गत्वा तान्पृच्छति। यथा-संस्तरथ यूयं सुखेन, यद् भो भवतां नास्ति तत्कथयत, येनाऽहं ददामीति । तथा तान् शिष्यानात्मनः संबन्धयन् उपधिं चान्तराऽन्तरा ददाति । तथा ये स्वाध्यायनिमित्तं समीपस्थायिनोऽनुरत्नाधिका गीतार्था इत्यर्थः, तान् तेषां निर्माप्यस्थापितानामाचार्याणां मुक्त्वा नात्मनः समालापयति संश्लेषयति, ' लीङ् ' संश्लेषणे इतिवचनात् । एवं तेन गीतार्थाः शिष्याश्च विपरिणम्यमाना निर्मापितस्थापितस्य समीपं मुक्त्वा तं स्थापितगणधरमुपसंपद्यन्ते । स चैवं सचित्तं साधुगच्छलक्षणमात्मसात् कुर्वन् न लभते, व्यवहारतो न ते तस्याऽऽभवन्तीति भावः ।

अथैवमपि ते विपरिणम्यमाना न विपरिणमन्ति, नाऽपि तस्य समीपमायान्ति, ततोऽनेन दृष्टान्तेन तावत्संबन्धयन्ति, तमेव दृष्टान्तमाह-

गोवालगदिट्ठंतं, करेंति जह दोण्णि भाउणो गोवा ।
रक्खंती गोणीओ, पिहप्पिहा असहिया दोवि ॥३५१॥
मेलणे एगस्स उ, दिणा गोणी उ ताहे अन्नस्स ।
इय नाऊणं ताहे, सहिया जाया दुवे गोवा ॥ ३५२ ॥

" दोण्णि गोवाला सहोयरभाउगा भंडणं करेत्ता पत्तेयं पत्तेयं वेयणएणं गावीओ रक्खंति, अन्नया तेसिं एगो रोगी जातो, तओ तेण जाव न रक्खिया तो गावीतो परिहीणो जातो,अन्नया बितिओ पमिलग्गो, सो वि तहेव परिहीणो। ततो तेहिं एगागि-

यस्स न सोहणमिति चिंतिऊण परोप्परं पीती कया, ततो एको पडिलग्गो तस्स वितिओ गावीओ रक्खइ, एवं इयरस्स वि, एवं तेसिं दव्वपरिवुड्ढी जाया । एवं अम्हं पि बीसुं बीसुं विहरंताणं परिहाणी भवति, तम्हा मिलिया विहरामो, जेणं विउला नाणादीणं वुड्ढी हवइ, जं तुब्भं तं तुब्भं चेव नाहं तं हरामि । एवं समल्लेयावेत्ता सीसे लब्भंति, एवं विपरिणामेइ, तह वि सो न लहइ ।"

संप्रत्यक्षरयोजना । गोपालकदृष्टान्तं करोति-यथा द्वौ गोपौ भ्रातृकौ, तौ द्वावप्यसहितौ पृथक् पृथग् वेतनेन गा रक्षतः, अन्यदा एकस्य ग्लानत्वे गा अन्यस्य गोस्वामिना दत्ताः, स वेतनात् परिभ्रष्टः। एवमितरोऽपि ग्लानत्वे वेतनपरिहीणो जातः, तत इति पृथक् असंहतस्थितस्य महती द्रव्यहानिरिति कृत्वा जातौ द्वावपि संहिताविति ।

उपसंहारमाह-

एवं दोण्हि वि अम्हे, विप्पिहा तह विहरिमो सपगं ।
वाघाते णऽण्णोण्णे, सीसा ज परं व न भयंति ॥३५३॥

एवं द्वयेऽपि वयं यद्यपि पृथक् पृथक् तिष्ठामः, तथाऽपि समकं संहिततया विहरामो, येन व्याघाते ग्लानत्वाऽऽदिद्रव्यक्षये, अन्योऽन्यस्य ह्यानाऽऽदिहानिर्नोपजायते, शिष्या वा परं न भजन्ते, एवमपि सत्कुर्वाणो न लभते शिष्यम् । व्य० २ उ० ।

दिग्विपरिणामे-

जे भिक्खू दिसं विप्परिणामेइ, विप्परिणामंतं वा साइज्जइ ॥ १२ ॥ जे भिक्खू दिसं अवहरइ, अवहरंतं वा साइज्जइ ॥ १३ ॥

दिशेति व्यपदेशः-प्रव्रजनकाले, उपस्थापनाकाले वा य आचार्य्यं उपाध्यायो वा व्यपदिश्यते सा तस्य दिशा इत्यर्थः । तस्यापहारः, तं परित्यज्य अन्यमाचार्य्यमुपाध्यायं वा प्रतिपद्यते इत्यर्थः । संजतीए पवत्तिणी ।

अवि य-

रागेण व दोसेण व, दिसावहारं करेति जो भिक्खू ।
सो आणा अणवत्थं, मिच्छत्तविराहणं पावे ॥ १२५ ॥

रागेण-किंचि णीयल्लगं पासित्ता रागो जातो, ताहे तं दिसं गेण्हति, पुरिल्ले आयरिओवज्झाए उज्झेति । दोसेण-को वि कम्हि त्ति कारणे वट्टसद्धो समणो अण्णं आयरियं संदिसति, तस्स चउगुरुं पच्छित्तं, आणादिणो दोसा भवंति ।

अहवा इमो रागेण वहिसति-

जातिकुलरूवनासा-धणबलपरिवारजसतवे लाभे ।
सत्तयबुद्धिधारण, उग्गहसीले समायारी ॥ १२६ ॥

मातुयक्खविसुद्धाइ जाती, पियापक्खविसुद्धं इक्खागुमादियं कुलं, सुविभत्तंऽगोवंगअहीणपंचेंदियत्तणं रूवं, मियमहुरकडुअनिट्ठहाणा नासा, धणिमं पव्वतियस्स ता तत्थ मेऽत्थि, उवचेयमंससोणिओ बलवं, विरियंतरायखओवसमेण वा बलवं, ससमयपरसमयविसारत्तणेण ओगुत्तरे य जसो, चउत्थादिणा बाहिरब्भंतरेण वा तवेण वा जुत्तो आहारोवकरणलाभसंपण्णो विड्ढिआवहेसु अ अणुस्सुओ अइविक्कमो य सत्तमंतो, दुरुज्झवसाणो वा सत्तमंतो, तीसतिवरिसो तिदसो इव वयवं, उप्पाइयादिचउविहबुद्धिसु वेदो बुद्धिमं, बहुं धरेति, बहुविधं धरेइ, अणिस्सियं धरेति, असंदिद्धं धरेति, दुद्धरं धरेइ, धुवं धरेइ, एवं उग्गहणे वि खमादी, सीलउववेतो सीलवं, चक्कवालसमायारीए जुत्तो कुसलो य ।

एवं-

एतेहिं उववेतं, रागेण परं च उद्दिसति कोइ ।
जच्चाइविहूणं वा, उज्झति कोई परिभवेणं ॥१२७॥

एतेहिं उववेयं कोइ रागेण अण्णं आयरियं उद्दिसति, एतेहिं चेव जच्चादिएहिं विहूणं कोइ परिभवेण परिच्चयति, दोसेणेत्यर्थः ।

गाहा-

अहवण मेत्ती पुव्वं, पूयाइड्ढिपरिवारतो रागे ।
अहिकरणमसंपाणे, सभावऽणिट्ठं च दोसेणं ॥ १२८ ॥

'अहवण' शब्दो विकल्पप्रदर्शने, मित्रभावो मैत्री, तत्पूर्वं तन्निमित्तं, महत्यणपूइयं, तेण वा सो पूइतो अट्ठारादिइड्ढिसपण्णं, परिवारसंपण्णं वा, एतेहिं गुणेहिं उववेयं रागेण आयरियं पमिवज्जति, आयरिएण पुण सद्धिं अधिकरणे उप्पण्णे आयरिएण वा असंमाणिओ, सभावेण वा अणिट्ठं आयरियं परिच्चयति एस दोसेण ।

पुरिसंतरियपरिच्चाए अण्णमुद्देसेण य इमे दोसा-

आणादिणो य दोसा, विराहणा होति संजमाऽऽताए ।
दुल्लभबोहीयत्तं, वितियपयविराहणा चेव ॥ १२९ ॥

तित्थकराणं आणाभंगो, आदिसद्दाओ अणवत्था-जहा एयस्स एयमलच्चं तहा अण्णं पि, एवं मिच्छत्तं जणयति, वितियपदविराहणे संजमविराहणा । अत्रेण भणितो-किमायरियं परिच्चयसि ?, उत्तराउत्तरेण अधिकरणं, एत्थ आयसंजमविराहणा, दुल्लभबोधीयत्तं च णिव्वत्तेति, तम्हा दिसावहारं णो करे ।

वितियपदेण अण्णमायरियं उद्दिसिज्जा-

वितियपए आयरिए, ओसण्णोवाइए य काल्लगते ।
ओसण्णे छव्विहो खलु, वत्तमवत्तस्स मग्गणया ॥१३०॥

जइ आयरिओ ओसण्णो जातो, ओहाइतो वा, काल्लगतो वा, एए तिण्णि दारा । एत्थ ओसण्णो छव्विहो-पासत्थो, ओसण्णो, कुसीलो, संसत्तो, अहाछंदो, णितिओ य । तम्मि गच्छे आयरिओ जो संकप्पिओ वत्तो अवत्तो वा सो वत्तावत्तो कहं गणं धरेति त्ति चउभंगेण मग्गणा कज्जति । सोलसवरिसाऽऽदेण वयसा अवत्तो, परेण वत्तो, अणधीयणिसीहो अगीयत्थो सुत्तेण अत्थतो वा, सुत्तेण गीयत्थो वएण वत्तो, सुत्तेण वि वत्तो वएण वि वत्तो, पढमभंगो । वितिओ सुअवत्तो ण वएण । तितिओ सुएण अणुवत्तो वएण वत्तो । चउत्थो दोहिं वि अवत्तो ।

वत्ते खलु गाहा-

वत्ते खलु गीयत्थे, अवत्ते वतेण हवइ अगीयत्थे ।
ओसण्णो छव्विहो खलु, अहवोसण्णे य संगमणा ॥ १३१

वएण वत्तो गीयत्थो एस पढमभंगो, खलु पादपूरणे, अवत्तो वएण एस वितियभंगो, पढमभंगे हवइ अगीयत्थे एस ततियभंगो, पढमभंगिल्लो उभयवत्तो, तस्स

इच्छा-अण्णमायरियं उद्दिसति वा, ण वा, सो वत्तोवमो ओसण्णायरियं सारेति, चोदयतीत्यर्थः । कहं ?, अण्णं गीतं पेसति, अहवा-ओसण्णे सयं गंतुं चोदेति तं, एस च सयं वा गच्छति ।

गाहा-

एगाह पणग पक्खे, चउमासे वरिसे जत्थ वा मिलति ।
चोदेति चोदवेती, अणिच्छे वट्टावए सयं तु ॥ १३२ ॥

एगाहो त्ति ओसण्णे दिणे दिणे गंतुं सारेति, एगाहो वा एगंतरं पंचएहं पंचएहं दिणाण वा सारेति, एवं पक्खे, चाउम्मासे, वरिसंते य, जत्थ वा समोसरणादिसु मिलंति, तत्थ वा सारेति, सव्वहाऽणिच्छंतं ण सयमेव वट्टावेति ।

अण्णं च-

अण्णं च उद्दिसावे, पवेयणट्ठा ण संगहट्ठाए ।
जति णाम सारवेण वि, मुएज्जऽणिच्छे सयं ठाति ।।१३३।

सो उभयवत्तो अण्णं वा आयरियं उद्दिसति, स्यात्किमर्थं ?, पवेयणट्ठा ण गच्छस्स संगहट्ठा वग्गस्स गहणट्ठा, स्वयमेव शक्तत्वात्, मम जीवंते चेव अण्णमायरियं उद्दिसंति, जति णाम परिसेण गारवेण ओसण्णत्तणं मुएज्ज, तहा वि साधू सव्वहा अणिच्छे, सयमेव आयरियपदे ठायति । गतो पढमभंगो ।

इयाणिं बितियभंगो । सुयवत्तो गाहा-

सुयवत्तो वयऽवत्तो, जणति गणं तेऽहं धारिउमसत्तो ।
सारेहि सगणमेयं, अण्णं व वयाम आयरियं ।।१३४।।

जो सुत्तेण वत्तो वएण अवत्तो सो तं आयरियं भणति-एयं ते गणं अहं पडुप्पण्णवयत्तणाओ य धारिउं असत्तो, पाहि तुमं एयं सगणं सारेहि, अहवा ण सारेहि तो अम्हे अण्णं आयरियं वयामो इत्यर्थः ।

आयरियगाहा-

आयरिय-मुवज्झायं, पुच्छंते अप्पणो य अप्पमत्थे ।
तिगसंवच्छरमद्धं, कुलगणसंघे दिसाबंधो ।।१३५।।

आयादुप्पण्णं वयत्तणातो गणं बद्धावेउमसमत्थो अण्णे आयरियउवज्झाए उद्दिसिउमिच्छंतो पुव्वायरियं भणति-अम्हे अण्णस्स आयरियस्स णो उवसंपज्जामो, सो णं उवसंपण्णा ण अम्हं सचित्तादी हरति, तुमं जति सगणं ण सारेति, तो अम्हे णिसट्ठं चेव आयरियं पडिवज्जामो, कुलिव्वं कुलसमवायं दाउं कुले ओवट्टयंति,ताहे कुलेण जो दत्तो स तेसिं तिण्णि वरिसाणि सचित्तादि णो हरति,एवं गणे संघे य तिण्णि वरिसाणि।

परतो इमा विधी-

सचित्तादि हरंति ण, कुलं पि णेच्छामो जं कुलं तुज्झं ।
वच्चामो अण्णगणं, संघं वा जति तुमं ण ठासि ।।१३६।।

पुव्वायरियस्स अग्गतो भणिते-जं तुह कुलं तं कुलिव्वो, अम्हं तिण्ह वरिसाणं उवरि सचित्तादी हरति, जइ तुम्हं अम्हायरिओ ण ठासि तो अम्हे अतो वि परतो गणं संघं वा दूरतरं वयामो ताहे गणायरिओ ण ठासि, तो अम्हे अतो वि परभागेणं संघं वा दूरतरं वयामो, ताहे गणायरियं उद्दिसावेंति, गणसमवाए वा उवट्ठायंति, सो वि संवच्छरं सचित्तादी ण हरति, एवं संघे उवट्ठायंति, सो वि छम्मासे सचित्तादी ण हरति, एवं बितियपदेण दिसाबंधं करेंति ।

गाहा-

एवं वि अठायंते, तावेतुं अट्ठपंचमे वरिसे ।
सयमेव धरेति गणं, अणुलोमवएण सारेइ ।। १३७ ।।

एवं अट्ठपंचमे वरिसे पुव्वायरियं चोदणाहिं तावेउं अवतावेउं जाहे सो ण ठाइ, ताहे अट्ठपंचमेहिं वरिसेहिं वयवत्तीजूतो सयमेव गणं धरेति, जत्थ य पासति तत्थ य पुव्वायरियं अणुलोमेहिं वयणेहिं सारेति, चोदयतीत्यर्थः ।

गाहा-

अहवा जति अत्थि थेरा, सत्ता परिकड्ढिउं ण तं गच्छं ।
पढमभंगसरिस्सओ, तस्स उ गमओ मुणेयव्वो ।।१३८।।

अथवेति विकल्पवाची, अप्पणा गीयत्थे अण्णे य से थेरा गच्छपरिकड्ढणा अत्थि, तो अण्णं आयरियं ण उद्दिसंति, कम्हा न उद्दिसंति ?, भण्णति-जतो पढमभंगसरिसो चेव एत्थ गमो भवति । गतो बितियभंगो ।

इदाणिं ततियभंगो । गाहा-

वत्तव्वयो अगीओ, जति थेरा तत्थ केइ गीतत्था ।
तेसंऽतिए पढंतो, चोदेंते असति अण्णत्थ ।। १३९ ।।

जो पुण वयसा पायो स वयोवत्तो,अगीयत्थो पुण जइ सगच्छे थेरा, गीयत्थो तो सो तेहिं थेराणं अंतिए समीवे पढंतो गच्छस्स चोदणादि सारणं करेति, ओसण्णायरियं वा चोदेति, तेसिं गीयत्थथेराणं असति गणं घेत्तुं अघेत्तुं वा अण्णायरियसमीवे उवसंपज्जति, सुत्तट्ठाणं अट्ठा । गतो ततियभंगो ।

इदाणिं चउत्थो । गाहा-

जो पुण उभओऽवत्तो, बद्धावगअसति सो उ उद्दिसति ।
सव्वे वि उद्दिसंता, मोत्तूण इमे तु उद्दिसति ।। १४० ।।

जो सुत्तेण वएण अवत्तो सो गणबद्धावगस्स असति अण्णत्थ आयरियं उद्दिसति, उवसंपद्यतेत्यर्थः । एते चउभंगिल्ला सव्वे वि इमे मोत्तुं उद्दिसंति ।

गाहा-

संविग्गमगीयत्थं, असंविग्गं अ गीयत्थं ।
आयरियउवज्झाया, उद्दिसमाणस्स चउगुरुगा ।।१४१।।
सत्तरत्तं तवो होति, तओ छेदो पहावति ।
छेदेण छिन्नपरियाए, तओ मूलं ततो दुगं ।।१४२।।
उट्ठाणविरहियं वा, संविग्गं वा वि वयति गीयत्थं ।
चतुरो य अणुग्घाया,तत्थ वि आणादिणो दोसा।१४३।

संविग्गं अगीयत्थं, असंविग्गं गीयत्थं, एते आयरियउवज्झायत्तेण उद्दिसंतस्स चउगुरुगं भवति ।। १४१ ।। अण्णे सत्तदिणे चउगुरु, छेदो, एवं छल्लहु, छग्गुरुगा वि छेदो सत्तदिणे वा, ततो एक्केक्कदिणे मूलं, अणवट्ठा, पारंचिया भवन्ति । अहवा-छग्गुरुगपत्तो परियरणगादिओ, छेदो सत्तदिणेसु

णेयो, ततो परं मूलं, अणवट्ठप्पारंचियाए पच्छित्तं वियाणमाणेण संविग्गो गीयत्थो उद्दिसियव्वो ॥१४२॥ छट्ठाणविरहियं सदोसं संविग्गं गीयत्थं सदोसं जति उद्दिसति, तो चउगुरुगा पायच्छित्तं, आणादिया य दोसा भवंति ।

'छट्ठाणविरहिय त्ति' (१४३) अस्य व्याख्या-

छट्ठाण जाणि तेहिं, तविरहित काहिया चउरो ।
ते चिय उद्दिसमाणा, छट्ठाणगयाण जे दोसा ॥१४४॥

पासत्थो, ओसण्णो, कुसीलो, संसत्तो अहाछंदो, णितिओ य, एतेहिं छहिं ठाणेहिं विरहितो सदोसो । को भवति ? भण्णति- काहियादिया चउरो-कोवाए, माए, संपसारए, पासणिए । अहवा-काहिए, पासणिए, मासाए, अकयकिरिए । एते उद्दिसमाणस्स ते चेव दोसा, जे छट्ठाणगते भणिया । ओसरणेत्ति गयं ।

इदाणिं ओहाइयकालगते त्ति दो दारा-

ओहातियकालगते, जाविच्छा ताहे उद्दिसावेति ।
अव्वत्ते तिविहे वी, नियमा पुण संगट्ठाए ॥ १४५ ॥
तीसु वि दीवितकज्जा-सिद्धिया जाति य तस्स तं णत्थि ।
निक्खिवियं वयंति दुवे, निक्खू किं दाणि णिक्खिवितुं १४६
दोण्हट्ठाए दोण्ह वि, णिक्खमणा होति उज्जमंतेसु ।
सीयंतेसु तु सगणो, भवति मा ते विणासेज्जा ॥१४७॥
वत्तम्मि जो गमो खलु, गणवच्छे सो गमो उ आयरिए ।
णिक्खमणे तम्मि चत्ता, जमुद्दिसे तम्मि ते पच्छा ॥१४८॥
ओहातियओसण्णे, भणति अणाहा वयं विणा तुज्झं ।
कमसम्मिसमसागारिए, दुप्पभितरगं जतो तिण्हं ॥ १४९॥
जो जेण जम्मि णाण-म्मि ठाविती दंसणे व चरणे वा ।
सो तं ततो सुयं त-म्मि चेव काउं भवे णिरिणो ॥१५०॥

जति वि आयरिओ ओहातितो । ओहावणं च दुविधं-सारूविअत्तणेण, गिहत्थत्तणेण वा । कालगते आयरिए जो पढमिल्लेसु तिसु भंगेसु अवत्ता तिण्णि भणिया, तेसिं जाहे इच्छा आयरियवज्झाएसु इमो विधी ॥ वत्तम्मिगाहा । इह गणावच्छेइतितो उवज्झाओ, जया उवज्झाओ आयरिओ वा अण्णं आयरियं उद्दिसति ताहे जो उभयवत्तम्मि भिक्खुम्मि विधी, स चेव गणावच्छेए आयरिए य विधी दट्ठव्वो, णवरं गणणिक्खेवं काउं वयति सगणे, जे अण्णे आयरियउवज्झाया संविग्गा गीयत्था तेनेसिं गणणिक्खेवं करोंति, असंविग्गा अगीतेसु तेसु जति णिक्खवंति तो तेण णिक्खित्तप्पमाणा चत्ता भवंति, तम्हा असंविग्गा गीतेसु णिक्खेवे अभावे सगणा चेव वच्चंति, जमुद्दिसति आयरिओ (तम्मि त्ति) तस्य ते सर्वे शिष्या भवंति, पच्छित्तअणुवसंपण्णकालाओ पच्छा, उवसंपज्जणकालादारब्भेत्यर्थः । ओहाइयगाहा । ओहाइयं ओसण्णं वा आयरियं जत्थ पासति तत्थिमं भणति-तुज्झेहिं विणा अणाहा वयं, वयमित्यात्मनिर्देशे । असागारिए पदेसे तस्स ओसरणो धाविता आयरियस्स कमेसु पदेसु सीसेण णिवडति, भणइ-एहि पसादेण अच्छुट्ठेहासणादी करेह, अम्हे भो सुयमाणयंमिभयं पि व इओ तओ डुलुडुलेमो ॥

सीसो पुच्छति-तस्स गिहीभूतस्स अप्पारिच्छिणो किं पादेसु णिवडिज्जति ? । आयरिओ भणति दुप्पभितरगं जओ तिण्हं-मातु पितु धम्मायरियस्स य, एते परमोवकारिणो, एतेसिं दुक्खेण पच्चुवकारो काउं सक्कति । किं चान्यत्, जो जेण धम्मोवदेसप्पदाणादिणा दंसणे चरणे वा गाविंतो, सो तं गुरुं दंसणचरणेहिंतो चुयंते देवदंसणचरणेसु गाविउं णिग्गयरिणो भवति, कृत्युपकारेत्यर्थः ।

न आयरियउवज्झाया गणपरिवुडा अण्णायरियं उवसंपज्जंति, तदा इमो विधी-

णिक्खिवणे वि य अप्पणो, परे य संतेसु तस्स ते देंति ।
संघाड देयऽसंतो, सो वि ण वावारेऽणापुच्छा ॥१५१॥

जया तेहिं आयरिओवज्झाएहिं आलोयणप्पदाणेण अप्पा णिक्खित्तो भवति, तदा भणंति-इमे य मे साहू, एस पि णिक्खेवो, तेण वि आयरिएण अप्पणो संतेसु साहुसु ण घेत्तव्वा, तस्स चेव ते देंति, अह वत्थव्वायरियस्स भणंति साहूणं ता सव्वे घेत्तुं पामिच्छायरियस्स एगसंघाडगं कप्पगं देंति, सो वि अ पाडिच्छायरिओ वत्थव्वायरियस्स अणापुच्छाए ते सिस्से ण वावारेति एसणाऽऽदिसु ।

सुत्तं-

जे णिक्खू दिसं विप्परिणामेइ, दिसं विप्परिणामंतं वा साइज्जइ ॥ १४ ॥

इमो सुत्तस्स सुत्तेण सह संबंधः । गाहा-

सयमेव य अवहारो, होति दिसाए ण मे गुरू तो से ।
अहं भणिता विप्परिणा-माणा उ अणोसिमा होंति ।१५२।

सयमिति सयम अतिक्रान्तसूत्रे विप्परिणामणा आत्मगता अभिहिता ।

इमा पुण वक्खमाणसुत्ते अण्णे अण्णस्स दिसाविप्परिणामणं करोति-

रागेण व दोसेण व, विप्परिणामं करेति जो णिक्खू ।
दुविहं तिविहं दिसाए, सो पावति आणमादीहिं ।१५३।

दिसं विप्परिणामेति रागेण वा दोसेण वा, रागेण-तम्मि सेहे अज्झोववातो गाढं, ताहे तेण रागेण विप्परिणामेउं अप्पणो अंते आकड्ढेति, दोसेण-मा तस्स सीसो भवउ त्ति वि विप्परिणामेति, आयरिआ उवज्झाया दुविहा दिसा साहूणं, आयरियउवज्झाए वज्जिणी य तिविहा संजतीण दिसा, एया दिसा विप्परिणामेंतस्स आणादिया दोसा ।

सो पुण इमेहिं विप्परिणामेति । गाहा-

महरो अकुलीणो त्ति य, दुम्मेहो दमग मंदबुद्धि त्ति ।
अवि य सपक्खभवट्ठी, सीसो परिभवति आयरियं ।१५४।
महरो एस तव गुरू, तुमं च थेरो न जुज्जते जोगो ।
अविपक्कबुद्धि एसो, वए करेज्जा वि जं किं वि ॥१५५॥

कोइ सेहो परिणयवओ तरुणायरियस्स समीपे पव्वतितुकामो अण्णेण भण्णति-महरो एस तव गुरू, तुमं च परिणयवओ, ण एस आयरियसीससंजोगो जुज्जति । कहं पुत्तणत्तुअसमाणस्स सीसो भविस्ससि ?, कहं वा विणयं काहिसि ?, किं च ते सज्जणादिजणो भणिहिति त्ति ? । अहवा भणति-सो महरो अविपक्कबुद्धी, अविपक्कबुद्धित्तणेण अकज्जं पि कज्जं वयति, अविपक्कबुद्धित्तणातो किं वि दोसं करेज्जा ।

गाहा-

एमेव सेसएसु वि, तं निंदंतो सयं परं वाऽवि ।
संतेण असंतेण व, पसंसए तं कुलादीहिं ॥१५६॥

सेसा-कुलाऽऽदिया पदा,तेहिं कुलाऽऽदिएहिं पदेहिं तं णिंदेति जस्स जवहितो, सो पुण सओ परओ वा संतेहिं वा असंतेहिं वा कुलाऽऽदिएहिं जस्स पदुट्ठो सयं परं वा तं णिंदति, तस्स सेहस्स जमुद्दिसति तम्मि संतेहिं वा सयं परयगं वा पसंसति-इमो कुलीणो, सो अकुलीणो, इमो मेहावी, सो दुम्मेहो, इमो ईसरणिक्खंतो, सो दमगो । अहवा-इमो वत्थपत्तादिएहिं ईसरो, सो दमगो, इमो बुद्धिसंपण्णो, सो अबुद्धिमं । अपि चाऽसौ महपलाभलद्धी, इमो सलद्धिमं । इमेहिं कारणेहिं खिस्सो परो वाए परिजवति आयरियं । अहवा-पसंसते कुलाऽऽदीहिं सेहं-तं कुलमंतो, सो अकुलजो । एवं सेसपदेसु वि कारणे विप्परिणामेण पि करेज्ज ।

गाहा-

नाऊण य वोच्चेयं, पुव्वगए काहियाणुओगे य ।
सुत्तत्थजाणगस्सा, कप्पति विस्सासणा ताहे ॥ १५७ ॥

पूर्ववत् । नि० चू० १० उ० ।

"उभे मूत्रपुरीषे च, दिवा कुर्यादुदङ्मुखः ।
रात्रौ दक्षिणतश्चैव, तथा चाऽऽयुर्न हीयते ॥ १ ॥"

प्रव० १०६ द्वार ।

दिक्सिद्धिः-दिग्धर्मोपेतं द्रव्यं प्रमाणतः सिद्धम् । तथाहि-मूर्तेष्वेव द्रव्येषु मूर्तं द्रव्यमवधिं कृत्वैतदस्मात्, अतः पूर्वेण दक्षिणेन पश्चिमेनोत्तरेण पूर्वदक्षिणेन दक्षिणापरेणापरेणोत्तरेणोत्तरपूर्वेणाधस्तादुपरिष्टादित्यमी दश प्रत्यया यया भवन्ति सा दिगिति । तथा च सूत्रम्-"अत इदमिति यतस्तद्दिशो विक्रमिति ।" एते हि विशेषप्रत्यया नाऽऽकस्मिकाः संभवन्ति । तथा च परस्परापेक्षमूर्तद्रव्यनिमित्तानामितरेतराऽऽश्रयत्वेऽपि प्राच्यादिभेदेन नानात्वं कार्यविशेषाद् व्यवस्थितम् । प्रयोगश्चात्र-यदेतत् पूर्वापराऽऽदि ज्ञानं तद् मूर्तद्रव्यव्यतिरिक्तपदार्थनिबन्धनं, तत्प्रत्ययविलक्षणत्वात् । सम्म० ३ काण्ड । सूत्र० । "दिसो दिसिं ।" एकस्या दिशोऽन्यां दिशं, पुनस्तस्या अन्यां दिशमित्यर्थः । प्रश्न० ३ आश्र० द्वार । विपा० । भ० । नरकपृथिवीषु देवलोकेषु चाऽष्टासु दिक्षु, चतसृषु वा दिक्षु पङ्क्तिगतनरकाऽऽवासविमानविचारः प्रवर्तते, तत्र नाम-स्थापना-द्रव्य-क्षेत्र-ताप-प्रज्ञापक-भावदिशामावश्यकाऽऽयुक्तानां समानां मध्येका दिक् प्रवर्तते,एतासां दिशां मध्यवर्त्तिनी का च दिक्, तथा का च देवलोकाऽऽदिषु दिक् प्रवर्त्तते, तत्सहेतुकं प्रत्याद्यमिति प्रश्ने, उत्तरम्-पङ्क्तिगतनरकाऽऽवासविमानविचाराधिकारे नामाऽऽदीनां समानां दिशां मध्ये क्षेत्रदिग् ज्ञायत इति । १८ प्र० । सैन० १ उल्ला० ।

दिसाकुमार-दिक्कुमार-पुं० । भूषणनियुक्तगजरूपचिह्नधरे भवनवासिदेवभेदे, प्रज्ञा० २ पद । स० । जं० । स्था० । औ० । प्रव० । (दिक्कुमारसंख्या 'गण' शब्देऽस्मिन्नेव भागे १७०५ पृष्ठे द्रष्टव्या)

दिसाकुमारावास-दिक्कुमाराऽऽवास-पुं० । दिक्कुमाराणां भवनाऽऽवासे, "जावत्तरि दिसाकुमाराणं वाससयसहस्सा पण्णत्ता ।" स० ७५ सम० ।

दिसाकुमारिया-दिक्कुमारिका-स्त्री० । दिक्कुमारभवनपतिदेवविशेषजातीयदेवीषु, आ० म० १ अ० १ खण्ड । आ०चू० ।

रुपाऽऽद्याश्चतस्रो दिक्कुमारिकाः-

चत्तारि दिसाकुमारीमहत्तरियाओ पण्णत्ताओ । तं जहा-रूवा, रूवंसा, सुरूवा, रूवावई ॥

"चत्तारि दिसा" इत्यादि सुगमं, नवरं दिक्कुमार्यश्च ता महत्तरिकाश्च प्रधानतमाः, एतासां वा महत्तरिका दिक्कुमारीमहत्तरिकाः,एता मध्यरुचकवास्तव्या अर्हतो जातमात्रस्य नालकर्तनाऽऽदि कुर्वन्तीति । स्था० ४ ठा० १ उ० । चित्राऽऽद्याश्चतस्रो दिक्कुमार्यः । आ० म० १ अ० १ खण्ड । आ० चू० ।

रुपाऽऽद्याः षट् दिशाकुमारिकाः-

छ दिसाकुमारीमहत्तरियाओ पण्णत्ताओ । तं जहा-रूवा, रूवंसा,सुरूवा,रूवावई,रूअकंता,रूअप्पभा । स्था० ६ ठा० ।

रिष्टाऽऽदिष्वष्टसु कूटेष्वष्टौ नन्दोत्तराऽऽद्याः दिक्कुमार्यः-

तत्थ णं अट्ठ दिसाकुमारीमहत्तरियाओ महिड्ढियाओ० जाव पलिओवमट्ठिईयाओ परिवसंति । तं जहा-" णंदुत्तरा य णंदा य, आणंदा णंदिवड्ढणा । विजया वेजयंती य, जयंती अपराजिया ॥ १ ॥ " स्था० ८ ठा० । आ० म० । आ० चू० ।

कनकाऽऽदिकूटेषु समाहाराऽऽद्यष्टौ दिक्कुमार्यः-

तत्थ णं अट्ठ दिसाकुमारीमहत्तरियाओ महिड्ढियाओ० जाव पलिओवमट्ठिईयाओ परिवसंति । तं जहा-"समाहारा सुप्पइण्णा, सुप्पबुद्धा जसोहरा । लच्छीवई सेसवई, चित्तगुत्ता वसुंधरा ॥ १ ॥" स्था० ८ ठा० । आ० म० ।

स्वस्तिकाऽऽदिकूटेष्विलादेव्याद्या अष्टौ दिक्कुमार्यः-

तत्थ णं अट्ठ दिसाकुमारीमहत्तरियाओ महिड्ढियाओ० जाव पलिओवमट्ठिईयाओ परिवसंति । तं जहा-"इलादेवी सुरादेवी, पुढवी पउमावई । एगनासा णवमिया, सीया भद्दा य अट्ठमा ॥१॥" स्था० ८ ठा० । आ०म० । आ०चू० ।

रत्नाऽऽदिकूटेष्वलम्बुषाऽऽद्या अष्टौ दिक्कुमार्यः-

तत्थ णं अट्ठ दिसाकुमारीमहत्तरियाओ महिड्ढियाओ० जाव पलिओवमट्ठिईयाओ परिवसंति । तं जहा-" अलंबुसा मित्तकेसी, पुंडरी वारुणी । आसा य सव्वगा चेव, उत्तराओ सिरी हिरी ॥१॥" स्था० ८ ठा० । आ० म० । आ० चू० ।

अधोलोकवास्तव्यो भोगङ्कराऽऽद्या अष्टौ दिक्कुमार्यः-

अट्ठ अहोलोगवत्थव्वाओ दिसाकुमारीमहत्तरियाओ पण्णत्ताओ । तं जहा-"भोगंकरा भोगवती, सुभोगा भोगमालिणी । सुवच्छा वच्छमित्ता य, वारिसेणा बलाहगा ॥१॥" स्था० ८ ठा० । आ० म० ।

ऊर्ध्वलोकवासिन्यो मेघङ्कराऽऽद्या अष्टौ दिक्कुमार्यः-

अट्ठ उड्ढलोगवत्थव्वाओ दिसाकुमारीमहत्तरियाओ प-ण्णत्ताओ। तं जहा-"मेहंकरा मेहवई, सुमेहा मेघमालिनी। तोयधारा विचित्ता य, पुप्फमाला अणिंदिया ॥ १ ॥" स्था० ८ ठा० । आ० म० ।

(तासां तीर्थकृज्जन्ममहोत्सवे आगता इति 'तित्थयर' शब्देऽस्मिन्नेव भागे ४२७६ पृष्ठे द्रष्टव्याः) षट्पञ्चाशद्दिक्कन्यकानां कुमारीति संज्ञा कथमिति प्रश्ने, उत्तरम्-अत्र भवनपतयः सर्वेऽपि प्रायः क्रीडाप्रिया भवन्तीति कुमारा उच्यन्ते, तथा एता दिक्कुमार्योऽपि भवनपतित्वेन तद्भक्त्योध्या इति। ३२५ प्र० । सेन० २ उल्ला० ।

दिसागइंद-दिग्गजेन्द्र-पुं० । भूमिधारणाय दिक्षववस्थितेषु गजेषु, हा० ।

जोयणसाहस्सीया, एए कूमा हवंति चत्तारि ।
पुव्वाइयाऽणुपुव्वी, दिसागइंदाण ते होंति ॥ १४१ ॥
पउमुत्तरे नीलवंतं, सुहत्थिया अंजणागिरी चेव ।
एए दिसागइंदा, दिवड्ढपल्लिओवमट्ठितिया ॥ १४२ ॥
पुव्वेण होइ विमलं, सयंपभे दक्खिणे दिसाभाए ।
अवरे पुण पच्चिमओ, णिवुज्जोयं च उत्तरओ । १४३ । द्वी० ।

दिसाचक्कवाल-दिक्चक्रवाल-न० । दिक्समूहे, नपोविशेषे च । एकत्र पारणके पूर्वस्यां दिशि यानि फलाऽऽदीनि तान्याहृत्य भुङ्क्ते, द्वितीये तु दक्षिणस्यामित्येवं दिक्चक्रवालेन तत्र तपःकर्म्मणि पारणककरणं तत्तपःकर्म दिक्चक्रवालमुच्यते । नि० १ चू० ३ वर्ग० ३ अ० । भ० ।

दिसाचर-दिक्चर-पुं० । जगद्विजृम्भेषु देशादेषु, पार्श्वापत्तीये-त्यिति चूर्णिकारः । दिशायां चरन्ति यन्ति मन्यन्ते भगवतो वयं शिष्या इति दिक्चराः, देशाटा वा दिक्चरा भगवच्छिष्याः पार्श्वस्थीभूता इति । भ० १५ श० ।

दिसाजत्तिय-दिग्यात्रा-स्त्री० । देशान्तरगमने, उपा० १ अ० ।

दिसाडाह-दिग्दाह-पुं० । अन्यतमस्यां दिशि अधोऽन्धकारे उपरि च प्रकाशाऽऽत्मके दह्यमानमहानगरप्रकाशकल्पे, भ० ३ श० ७ उ० । जी० । नि० चू० । आ० चू० । अनु० । व्य० । स्था० । दिग्दाहो वायव्यादिषु मण्डलेषु भवन् शस्त्राग्नि-क्षुत्पीडाविधायी भवति । सूत्र० २ श्रु० २ अ० ।

दिसाणाग-दिङ्नाग-पुं० । स्वनामख्याते बौद्धविदुषि, सम्म० १ काण्ड० ।

दिसाणुवाय-दिगनुपात-पुं० । दिगनुसरणे, प्रज्ञा० ३ पद ।

दिसादवेक्खा-दिगाद्यपेक्षा-स्त्री० । आचार्योपाध्यायाऽऽदिपरिवाराऽऽलम्बने, पञ्चा० ५ विव० ।

दिसादाह-दिग्दाह-पुं० । 'दिसाडाह' शब्दार्थे, भ० ३ श० ७ उ० ।

दिसादि-दिगादि-पुं० । मेरुमध्यवर्तिनि रुचके, मेरौ च । दिशा-मादिर्दिगादिः । तथाहि-रुचकाऽऽदिदिशां विदिशां च प्रभवो रुचकाष्टप्रदेशाऽऽत्मको मेरुमध्यवर्ती, ततो मेरुरपि दिगादिरुच्यते । सू० प्र० ५ पाहु० । चं० प्र० ।

दिसापरिमाण-दिक्परिमाण-न० । सर्वतोऽमुकदिशि वा इयदवधि गमनाऽऽदिनियमने, ध० २ अधि० ।

दिसापोक्खि(ण)-दिक्प्रोक्षिण्-पुं० । उदकेन दिशः प्रोक्ष्य ये फलपुष्पाऽऽदि समुच्चिन्वन्ति तादृशेषु तपस्विवानप्रस्थेषु, औ० । नि० । भ० । आ० चू० ।

दिसाबंध-दिग्बन्ध-पुं० । आचार्यत्वाऽऽदिलक्षणे दिशो बन्धे, ध० २ अधि० ।

दिसावाल-दिक्पाल-पुं० । दिशामधीश्वरेषु, वाच० । आ० म० ।

दिसामूढ-दिङ्मूढ-त्रि० । पूर्वस्यामपि पश्चिमा इत्याकारकज्ञानवति, "दिसामोहो से जातो, अहवा मूढे दिसं पडुच्च ।" नि० चू० १९ उ० ।

दिसामोह-दिङ्मोह-पुं० । पूर्वस्यामपि पश्चिमा इत्याकारके ज्ञाने, ध० २ अधि० । नि० चू० ।

दिसायरिय-दिगाचार्य-पुं० । गुर्वादिषु दिग्वर्तिसाधूनां सारणाऽऽदिकर्तरि, ही० १ प्रका० । पञ्चा० ।

दिसावलोअ-दिगवलोक-पुं० । दिग्दर्शने, "सागारियसंरक्खणट्ठा उड्ढमहो तिरियं च दिसावलोगो कायव्वो।" नि० चू० ४ उ० ।

दिसावेरमण-दिग्विरमण-न० । प्रथमे गुणव्रतभेदे, उ० २ अधि० ।

दिसासुद्धि-दिक्शुद्धि-स्त्री० । तत्कालोच्चलितशङ्खपणवाऽऽदिनिनादश्रवणपूर्णकुम्भभृङ्गारच्छत्रध्वजचामराऽऽद्यवलोकनशुभगन्धाऽऽघ्राणाऽऽदिस्वभावायां स्वनामख्यातायां शुद्धौ, ध० २ अधि० ।

दिसासोवत्थिय-दिक्स्वस्तिक-पुं० । जम्बूद्वीपे मेरुपूर्वे रुचकपर्वतस्याष्टमे कूटे, स्था० ८ ठा० ।
दिक्सौवस्तिक-पुं० । दिक्प्रोक्षके, दक्षिणाऽऽवर्ते स्वस्तिके च । जी० ३ प्रति० ४ उ० । औ० । जं० ।

दिसासोवत्थियासण-दिक्सौवस्तिकाऽऽसन-न० । येषामधोभागे दिक्स्वस्तिका आलिखिताः सन्ति तेष्वासनविशेषेषु, जी० ३ प्रति० ४ उ० । जं० ।

दिसाहत्थिकूम-दिग्हस्तिकूट-पुं० । दिक्षु हस्त्याकारेषु कूटेषु, जं० ।

दिग्गजकूटवक्तव्यतामाह-

मंदरे णं भंते ! पव्वए जहमालवणे कइ दिसाहत्थिकूडा पण्णत्ता ?। गोयमा ! अट्ठ दिसाहत्थिकूडा पण्णत्ता। तं जहा-
"पउमुत्तरे णीलवंते, सुहत्थी अंजणागिरी ।
कुमुदे अ पलासे अ, वडेंसे रोअणागिरी ॥ १ ॥"
कहि णं भंते ! मंदरे पव्वए जहमालवणे पउमुत्तरे णामं दिसाहत्थिकूडे पण्णत्ते ?। गोयमा ! मंदरस्स पव्वयस्स उत्तरपुरच्छिमिल्लाए सीआए उत्तरेणं एत्थ णं पउमुत्तरे णामं दिसाहत्थिकूडे पण्णत्ते। पंच जोअणसयाइं उड्ढं उच्चत्तेणं, पंच गाउअसयाइं उव्वेहेणं, एवं विक्खंभपरिक्खेवो जाणियव्वो चुल्लहिमवंतसरिसो, पासायाणं तं चेव, पउमुत्तरो देवो, रायहाणी उत्तरपुरच्छिमेणं ॥ १ ॥

एवं णीलवंतदिसाहत्थिकूडे मंदरस्स दाहिणपुरच्छिमेणं पुरच्छिमिल्लाए सीओआए दक्खिणेणं, एअस्स वि णीलवंतो देवो, रायहाणी दाहिणपुरच्छिमेणं ॥ २ ॥

एवं सुहत्थिदिसाहत्थिकूडे मंदरस्स दाहिणपुरच्छिमेणं दक्खिणिल्लाए सीओआए पुरच्छिमेणं, एअस्स वि सुहत्थी देवो, रायहाणी दाहिणपुरच्छिमेणं ॥ ३ ॥

एवं चेव अंजणागिरिदिसाहत्थिकूडे मंदरस्स दाहिणपच्चच्छिमेणं दक्खिणिल्लाए सीओआए पच्चच्छिमेणं एअस्स वि अंजणागिरी देवो, रायहाणी पच्चच्छिमेणं ॥ ४ ॥

एवं कुमुदे वि दिसाहत्थिकूडे मंदरस्स दाहिणपच्चच्छिमेणं पच्चच्छिमिल्लाए सीओआए दक्खिणेणं, एअस्स वि कुमुदो देवो, रायहाणी दाहिणपच्चच्छिमेणं ५ ।

एवं पलासे वि दिसाहत्थिकूडे मंदरस्स उत्तरपच्चच्छिमेणं पच्चच्छिमिल्लाए सीओआए उत्तरेणं, एअस्स णं वि पलासो देवो, रायहाणी उत्तरपच्चच्छिमेणं ६ ।

एवं वडेंसे वि दिसाहत्थिकूडे मंदरस्स उत्तरपच्चच्छिमेणं उत्तरिल्लाए सीओआए महाणईए पच्चच्छिमेणं,एअस्स वि वडेंसो देवो, रायहाणी उत्तरपच्चच्छिमेणं ७ ।

एवं रोअणागिरी दिसाहत्थिकूडे मंदरस्स उत्तरपुरच्छिमेणं उत्तरिल्लाए सीओआए पुरच्छिमेणं, एअस्स वि रोअणागिरी देवो, रायहाणी उत्तरपुरच्छिमेणं, उत्तरिल्लाए सीओआए पुरच्छिमेणं ८ ।

"मंदरे णं भंते ! पव्वए' इत्यादि प्रश्नसूत्रे दिक्षु ऐशान्यादिविदिक्प्रवृत्तिषु हस्त्याकाराणि कूटानि दिग्गजस्तिकूटानि, कूटशब्दवाच्यानामप्येषां पर्वततत्त्वव्यवहार ऋषभकूटप्रकरण इव ज्ञेयः । स्थानाङ्गेऽष्टमस्थाने तु पूर्वाऽऽदिषु दिक्षु हस्त्याकाराणि । उत्तरसूत्रे पद्मोत्तरेति श्लोकः । पद्मोत्तरः, नीलवान्, सुहस्ती,अञ्जनागिरिः। "अञ्जनाऽऽदीनां गिरौ" ॥ ३ । २ । ७७ ॥ (हैम०)इत्यादिना दीर्घः । कुमुदः, पलाशः,अवतंसः, रोचनागिरिः । अन्यत्र रोहणागिरिः, अत्रापि दीर्घत्वं प्राग्वत् । अथैषां दिग्व्यवस्थां पृच्छन्नाह-(कहि णमित्यादि) क्व भदन्त ! मेरोर्दक्षिणशाल्मलवने पद्मोत्तरो नाम दिग्गजस्तिकूटः प्रज्ञप्तः ? । गौतम ! मन्दरस्यैशान्यां पौरस्त्याया मेरुतः पूर्वदिग्वर्तिन्याः शीताया उत्तरस्याम् । अनेनोत्तरदिग्वर्तिन्याः शीताया व्यवच्छेदः कृतः । अत्रान्तरे पद्मोत्तरो नाम दिग्गजस्तिकूटोऽपि मेरुतः पञ्चाशद्योजनातिक्रम एव भवति,प्रासादजिनसमश्रेणिस्थितत्वात् । पञ्च योजनशतान्यूर्द्धोच्चत्वेन,पञ्च गव्यूतशतान्युद्वेधेन,एवमुच्चत्वन्यायेन विष्कम्भः । अत्र विभक्तिलोपः प्राकृतः। परिक्षेपश्च भणितव्यः। तथाहि-मूले पञ्चयोजनशतानि, मध्ये त्रीणि योजनशतानि पञ्चसप्तत्यधिकानि, उपरि अर्द्धतृतीयानि योजनशतानीत्येवंरूपो विष्कम्भः, तथा मूले पञ्चदश योजनशतानि एकाशीत्यधिकानि, मध्ये एकादश योजनशतानि पञ्चशीत्यधिकानि किञ्चिदूनानि,उपरितः सप्त योजनशतान्येकनवत्यधिकानि किञ्चिदूनानि इति परिक्षेपः। प्रासादाऽऽदीनां च एतद्वर्तिदेवसत्कानां सर्वेषां प्रमाणमिति गम्यं, यत् शुद्धहिमवत्कूटपतिप्रासादस्येति । अत्र बहुवचननिर्देशो वक्ष्यमाणदिग्हस्तिकूटवर्त्तिप्रासादेष्वपि समानप्रमाणसूचनार्थम् । पद्मोत्तरदिग्हस्ती पद्मोत्तरोऽत्र देवः,तस्य राजधान्युत्तरपूर्वस्यामुत्तरविदिग्वर्त्तिकूटाधिपत्वादस्येति १। अथ शेषेषूक्तन्यायेन प्रदक्षिणाक्रमेण दर्शयन्नाह-" एवं नीलवंत " इत्यादि व्यक्तं, नवरम् (एवमिति) पद्मोत्तरन्यायेन नीलवन्नाम्ना दिग्हस्तिकूटः । मन्दरस्य दक्षिणपूर्वस्यां पौरस्त्यायाः दक्षिणस्यां, ततोऽयं प्राच्यजिनभवनाऽऽग्नेयप्रासादयोर्मध्ये ज्ञेयः। एतस्यापि नीलवान् देवः प्रभुः,तस्य राजधानी दक्षिणपूर्वस्यामिति २। "एवं सुहत्थि" इत्यादि व्यक्तं, नवरं दाक्षिणात्यायाः मेरुतो दक्षिणदिग्वर्तिन्याः शीतोदायाः पूर्वतः । अनेन मेरुतः पश्चिमदिग्वर्त्तिन्याः शीतोदायाः व्यवच्छेदः कृतः; अत्रान्तरे सुहस्तिदिग्हस्तिकूटः । आग्नेयप्रासाददाक्षिणात्यजिनभवनमध्यवर्त्तीत्यर्थः। एतस्याऽपि सुहस्ती देवः, राजधानी तस्य दक्षिणपूर्वस्यां, नीलवतः सुहस्तिनोरेकस्यामेव दिशि राजधानीत्यर्थः ३ । एवं सर्वविदिग्हस्तिकूटाधिपयोरेकस्यां विदिशि राजधानीद्वयम् २ अग्रेऽपि भाव्यम् । "एवं चेव" इत्यादि व्यक्तं, नवरं दाक्षिणात्यजिनगृहनैर्ऋतप्रासादयोर्मध्ये इत्यर्थः ४ । एवमित्यादि व्यक्तं, नवरं पाश्चात्यायाः पश्चिमाभिमुखं वहन्त्याः शीतोदायाः दक्षिणस्यामिति नैर्ऋतप्रासादपाश्चात्यजिनभवनयोर्मध्यवर्त्तीत्यर्थः ५ । एवमिति व्यक्तं, पाश्चात्यजिनभवनवायव्यप्रासादयोरन्तरे इत्यर्थः ६ । "एव वडेंसे वि दिसाहत्थिकूडे" इत्यादि गतार्थं, नवरमुत्तरायां मेरुत उत्तरदिग्वर्त्तिन्याः शीतायाः पश्चिमतः, अनेन पूर्वदिग्वर्त्तिन्याः शीतायाः व्यवच्छेदः कृतः, वायव्यप्रासादोत्तरार्हद्भवनयोर्मध्यवर्त्तीत्यर्थः ७ । "एव रोअणागिरी दिसाहत्थिकूडे" इत्यादि व्यक्तं, नवरम्-उत्तरायाः शीतायाः पूर्वतः, उत्तरार्हज्जिनभवनैशानप्रासादयोरन्तराले इत्यर्थः ८ । एषु च बहुभिः पूर्वाऽऽचार्यैः शाश्वतजिनभवनस्तोत्रेषु जिनभवनान्युच्यन्ते, इह तु सूत्रकृता नोक्तानि, तेन तत्त्वं केवलिनो विदन्ति । अत एवोक्तं रत्नशेखरसूरिभिः स्वोपज्ञक्षेत्रविचारे-" करिकूडं नइदहं, कुरुकंचणजमलसमणि अट्ठेसु । जिणभवणविलंबाओ, जो तं जाणंति गीअत्था ॥१॥" इति । अथैषां वापी चतुष्कप्रासादानां जिनभवनानां करिकूटानां च स्थाननियमने । अत्र वृद्धानां संप्रदायः । तथाहि-भद्रशाल्मलवने हि मेरोश्चतसृष्वपि दिक्षु नदीद्वयप्रवाहैः रुद्धा अतो दिक्ष्वेव भवनानि भवन्ति, किं तु नदीतटनिकटस्थानि भवनानि,गजदन्तनिकटस्थाः प्रासादाः,भवनप्राग्भावित्वात्,शीतायाः, शीतोदाऽन्तरालेष्वष्टसु करिकूटाः, अत एव विशेषतो दर्श्यते-मेरोरुत्तरपूर्वस्यामुत्तरकुरूणां बहिः शीतायाः उत्तरदिग्भागपञ्चाशद्योजनेभ्योऽपरः प्रासादः, तत्परिक्षेपिण्यश्चतस्रो वाप्यः । एवं शेषेष्वपि प्रासादेषु ज्ञेयम् । मेरोः पूर्वस्यां शीतायाः दक्षिणतः ५० योजनेभ्यः परतः सिद्धायतनं, मेरोर्दक्षिणपूर्वस्यां ५० योजनातिक्रमे देवकुरूणां बहिः शीतायाः दक्षिणत एव प्रासादः, मेरोर्दक्षिणतः ५० योजनातिक्रमे देवकुरूणां मध्ये शीतोदायाः पूर्वतः सिद्धायतनं, मेरोरपरदक्षिणतः ५० योजनान्यवगाह्य देवकुरूणां बहिः शीतोदाया दक्षिणतः प्रासादः, पश्चिमायां ५० योजनातिक्रमे शीतोदाया उत्तरतः सिद्धायतनं, मेरोरपरस्यां ५० योजनान्यवगाह्य उत्तरकुरूणां बहिः शीतोदायाः पश्चिमतः सिद्धायतनमिति। एतेषां चाष्टस्वन्तरेष्वष्टौ करिकूटा इति । जं० ४ वक्ष० । स्था० ।

दिसिदेवया–दिग्देवता–स्त्री० । इन्द्राऽऽदिषु, पञ्चा० ८ विव० । ध० ।

दिसिव्वय–दिग्व्रत–न० । प्रथमे गुणव्रतभेदे, आव ६ अ० ।

साम्प्रतं तेषामेवाणुव्रतानां परिपालनाय भावनाभूतानि गुणव्रतान्यभिधीयन्ते । तानि पुनस्त्रीणि भवन्ति । तद्यथा–दिग्व्रतम् १, उपभोगपरिभोगे परिमाणम् २, अनर्थदण्डवर्जनमिति ३ । तत्राऽऽद्यगुणव्रतस्वरूपाभिधित्सयाऽऽह–

दिसिव्वए तिविहे पन्नत्ते । तं जहा–उड्ढदिसिव्वए, अहोदिसिव्वए, तिरिअदिसिव्वए ॥ ३५ ॥

(दिसिव्वए तिविहे इत्यादि) दिशो ह्यनेकप्रकाराः शास्त्रे वर्णिताः, तत्र सूर्योपलक्षिता पूर्वा, शेषाश्च दक्षिणाऽऽदिकास्तदनुक्रमेण द्रष्टव्याः । तत्र दिशासंबन्धि, दिक्षु वा व्रतम्-एतावत्सु पूर्वाऽऽदिदिग्विभागेषु मया गमनाऽऽद्यनुष्ठेयं, न परत इत्येवंभूतं दिग्व्रतम् । एतच्चोर्ध्वतस्त्रिविधं प्रज्ञप्तम्, तीर्थकरगणधरैः । तद्यथेति पूर्ववत् । ऊर्द्धा दिक्, तत्संबन्धि तस्या वा व्रतम्-एतावती दिगूर्द्धपर्वताऽऽद्यारोहणादवगाहनीया, न परत इत्येवंभूतमिति भावना । अधः दिगधोदिक्, तत्संबन्धि तस्या वा व्रतमधोदिग्व्रतम्-एतावती दिगधः कूपाऽऽद्यवतरणादवगाहनीया, न परत इत्येवंभूतमिति हृदयम् । तिर्यग्दिशः पूर्वाऽऽदिकाः, तासां संबन्धि तासु वा व्रतं तिर्यग्दिग्व्रतम्-एतावती दिक् पूर्वेणावगाहनीया, एतावती दक्षिणेनेत्यादि, न परत इत्येवंभूतेतिभावार्थः । अस्मिंश्च सत्यवग्रहीतक्षेत्राद् बहिः स्थावरजङ्गमप्राणिगोचरो दण्डः परित्यक्तो भवतीति गुणः ।

इदमपि चातिचाररहितमनुपालनीयमतोऽस्यैवातिचारानभिधित्सुराह–

दिसिव्वयस्स समणोवासएणं इमे पंच अइयारा जाणिअव्वा, न समायरिअव्वा । तं जहा–उड्ढदिसिप्पमाणाइक्कमे, अहोदिसिप्पमाणाइक्कमे, तिरिअदिसिप्पमाणाइक्कमे, खेत्तवुड्ढी, सइअंतरधानं ॥ ३६ ॥

(दिसिव्वयस्स समणोवासएणमित्यादि) दिग्व्रतस्योक्तस्वरूपस्य श्रमणोपासकेनामी पञ्चातिचारा ज्ञातव्याः, न समाचरितव्याः । तद्यथा–ऊर्द्धदिग्व्रतप्रमाणातिक्रमः, यावत्प्रमाणं परिगृहीतं तस्यातिलङ्घनमित्यर्थः । एवमन्यत्रापि भावना कार्या । अधोदिक्प्रमाणातिक्रमः, तिर्यग्दिक्प्रमाणातिक्रमः, क्षेत्रस्य वृद्धिः क्षेत्रवृद्धिरित्येकतो योजनशतपरिमाणमभिगृहीतमन्यतो दश योजनान्यभिगृहीतानि, तस्यां दिशि समुत्पन्ने कार्ये योजनशतमध्यादपनीयान्यानि दश योजनानि, तत्रैव सुबुद्ध्या प्रक्षिपति संबर्द्धयत्येकत इत्यर्थः । स्मृतेर्भ्रंशोऽन्तर्द्धानं स्मृत्यन्तर्द्धानम्-किं मया परिगृहीतं, कया मर्यादया व्रतमित्येवमननुस्मरणमित्यर्थः । स्मृतिमूलं नियमानुष्ठानं, भ्रंशे नियमत एव नियमभ्रंश इत्यतिचारः । "पत्थ य सामायारी–उड्ढं जं पमाणं गहियं, तस्स उवरि पव्वयसिहरे रुक्खे वा मक्कडो य पक्खी वा सावयस्स वत्थं आभरणं वा गेण्हिउं पमाणाइरेगं उवरिभूमिं वएज्जा, तत्थ से न कप्पइ गंतुं, जाहे तं पमियं अन्नेण वा आणीयं ताहे कप्पइ । एवं पुण अट्ठावयहेमकूडसम्मेयसुपइट्ठउज्जंतचित्तकूडनंदणवणमंदराऽऽदिसु पव्वएसु नवेज्जा । एवं अहे कूवियाऽऽदिसु विभासा । तिरियं जं पमाणं गहियं, तं तिविहेण वि तिकरणेण णातिक्कमियव्वं । खेत्तवुड्ढी सावगेण न कायव्वा । कहं ?, सो पुव्वेण पंथगं गहाय गओ जाव तं परिमाणं, ततो परेण भंडं अग्घइ त्ति काउं अवरेण जाणि जोयणाणि ताणि पुव्वदिसाए संवुड्ढइ, एसा खेत्तवुड्ढी, से न कप्पइ काउं, सिय त्ति बोलीणो होज्जा, णियत्तियव्वं विस्सरिए वा न गंतव्वं, अन्नो वि न विसज्जियव्वो, जे अन्नाणाए को वि गओ होज्जा, जं विसुमरिय खेत्तगसेण लद्धं, तन्न मेएहेज्जति" ॥ ३६ ॥ आव० ६ अ० । ध० । उपा० । आ० । पञ्चा० । ध० र० । आ० चू० ।

दिसीविभाय–दिग्विभाग–पुं० । ईशानाऽऽदिषु कोणेषु, सू० प्र० १ पाहु० । रा० ।

दिस्स–दृश्य–अव्य० । उत्प्रेक्षेत्यर्थे, सूत्र० १ श्रु० ३ अ० ३ उ० ।

दिस्समाण–दृश्यमान–त्रि० । उपदिश्यमाने, आचा० १ श्रु० ३ अ० १ उ० ।

दृश्यमान–त्रि० । चक्षुषा उपलभ्यमाने, आव० ५ अ० । आचा० ।

दिस्सा–दृश्–अव्य० । उत्प्रेक्ष्येत्यर्थे, भ० १७ श० ८ उ० ।

दिह–दिह्–धा० । उपचये, अनु० । अद्या०–उभ०–सक०–अनिट् । देग्धि, दिग्धे । अधिक्रत । अदिग्ध । वाच० ।

दिहागअ–ह्यिधागत–त्रि० । "सर्वत्र लवरामचन्द्रे" ॥ ४ । २ ७९ ॥ इति वलोपः । धस्य हः । द्विप्रकारं प्राप्ते, प्रा० दुं० १ पाद ।

दिहि–धृति–स्त्री० । 'दिहि' इत्येतदर्थं तु "धृतेर्दिहिः" ॥ ८ । २ । १३१ ॥ इति वक्ष्यामि इति धृतेर्दिहिः । प्रा० १ पाद । "धृतेर्दिहिः" ॥ ८ । २ । १३१ ॥ इति धृतिशब्दस्य दिहिरित्यादेशो वा । 'दिही । धिई ।' प्रा० २ पाद । स्त्री० । धृ-क्तिन् । तुष्टौ, धारणे, योगे, विष्कम्भाबधिके अष्टमे योगे, सुखे, धारणायाम्, अवसादेऽपि शरीराऽऽदेः स्तम्भनशक्तौ, अष्टादशाक्षरपादके छन्दोभेदे, अष्टादशसङ्ख्यायां च । वाच० ।

दीण–दीन–त्रि० । दी-क्तः, तस्य नः । दुःखिते, भीते च । वाच० । रङ्के, पञ्चा० १७ विव० । दैन्यवति, विपा० १ श्रु० २ अ० । आ० । क्षीणसकलपुरुषार्थशक्तौ, ज्ञा० १२ ज्ञा० । पं० व० । करुणाऽऽस्पदे, सूत्र० १ श्रु० १० अ० । दुःस्थे, ज्ञा० १ श्रु० १ अ० । सूत्र० । प्रश्न० । अणु० । शृगालत्वविहारिणि, आचा० १ श्रु० ६ अ० । "दीणाजासं दीणे, गीतं दीणजणिचं पुरिसं । कं पेच्छसि नंदंतं, दीणाए दिट्ठिए सत्य ॥१॥" स्था० ३ उ० ।

दीणजाइ–दीनजाति–त्रि० । दीना वा हीना जातिरस्येति दीनजातिः । हीनजातौ, स्था० ४ ठा० २ उ० ।

दीणदाण–दीनदान–न० । कृपणेभ्योऽनुकम्पावितरणे, पञ्चा० ७ विव० ।

दीणदिट्ठि–दीनदृष्टि–पुं० । विच्छायचक्षुषि, स्था० ४ ठा० २ उ० ।

दीणपण्ह–दीनप्रश्न–पुं० । दीनसूक्ष्मार्थाऽऽलोचने, स्था० ४ ठा० २ उ० ।

दीणपरक्कम–दीनपराक्रम–पुं० । हीनपुरुषकारे, स्था० ४ ठा० २ उ० ।

दीणपरिणय–दीनपरिणत–पुं० । अदीनः सन् दीनतया परिणतो यस्तस्मिन्, स्था० ४ ठा० २ उ० ।

दीणपरियाय–दीनपर्य्याय–पुं० । दीनस्येव पर्य्यायोऽवस्था प्रव्रज्या ऽऽदिलक्षणो यस्य तस्मिन्,स्था० ४ ठा० २ उ० ।

दीणपरिवाय–दीनपरिवार–पुं० । दीनः परिवारो यस्य तस्मिन्, स्था० ४ ठा० २ उ० ।

दीणभावया–दीनभावता–स्त्री० । प्रत्यनीकापमानाऽऽदौ दैन्ये, दीनो भावो मानसाध्यवसायो यस्यासौ दीनभावो,दीनभावस्य भावो दीनभावता । आतु० ।

दीणभासि (ण्)–दीनभाषिण्–पुं० । दीनवद् भाषणशीले,दीनवद्दीनं वा भाषते । स्था० ४ ठा० २ उ० ।

दीणमण–दीनमनस्–पुं० । स्वभावत एवानुद्धतचेतसि, स्था० ४ ठा० १ उ० ।

दीणया–दीनता–अव्य० । दैन्ये, स्था० ४ ठा० २ उ० ।

दीणववहार–दीनव्यवहार–पुं० । दीनान्योन्यदानप्रतिदानाऽऽदिक्रिये, हीनविवादे च । स्था० ४ ठा० २ उ० ।

दीणवित्ति–दीनवृत्ति–पुं० । दीनस्येव वृत्तिर्वर्तनं जीविका यस्य तस्मिन्, स्था० ४ ठा० २ उ० ।

दीणविमण (स्)–दीनविमनस्–त्रि० । दीनो दैन्यवान् विमनाः शून्यचित्तः,दीनश्चासौ विमनाश्चदीनविमनाः दैन्यवच्छून्यचित्ते, विपा० १ श्रु० २ अ० ।

दीणविमणवयण–दीनविमनोवदन–त्रि० । दीनस्येव विमनस इव वदनं यस्य तस्मिन्, ज्ञा० ९ श० ३३ उ० । विपा० ।

दीणसंकप्प–दीनसंकल्प–त्रि० । उत्तमचित्तस्वाभाव्येऽपि कथञ्चिद्दीनविमर्शे, स्था० ४ ठा० २ उ० ।

दीणसीलसमायार–दीनशीलसमाचार–पुं० । दीनधर्म्मानुष्ठाने, स्था० ४ ठा० २ उ० ।

दीणसेवि(ण्)–दीनसेविन्–पुं० । दीनं नायकं सेवते यस्तस्मिन्, स्था० ४ ठा० २ उ० ।

दीणाणुकंपण–दीनानुकम्पन–न० । निःस्वान्धबधिरपङ्गुरोगाऽऽर्तप्रवृत्तिष्वनुकम्पाकरणे, ध० २ अधि० ।

दीणार–दीनार–पुं० । न० । दी–अरक् नुट् च । स्वर्णभूषणे,मुद्रायां, सुवर्णिकपर्य्याये, निष्कमाने, वाच० । आचा० । आ० क० । औ० । नि० चू० । आ० म० ।

दीणारमालिया–दीनारमालिका–स्त्री० । दीनाराऽऽकृतिमालायाम, औ० ।

दीणोभासी–दीनावभासि(षि)न्–पुं० । दीनवदवभासते प्रतिभाति, अवभाषते वा याचत इत्येवंशीले, स्था० ४ ठा० २ उ० ।

दीप्प–दीप्र–त्रि० । ज्वास्वरे, स्था० ७ ठा० ।

दीप्पा–दीप्रा–स्त्री० । दीपप्रभायां, योषद्दृशौ च । ज्ञा० २० ज्ञा० । (अस्या व्याख्या 'दिप्पा' शब्देऽनुपदमेव २५२० पृष्ठे गता)

दीव–दीप–पुं० । दीप-कः । प्रदीपे, दर्श० १ तत्त्व । पो० । नि० चू० । दश० । तैलाऽऽदिस्नेहयोगेन वर्तिकादाहकाशिखाऽन्विते, वाच० । प्रकाशके वस्तुनि, स्था० १० ठा० । दीपशिखायाम्, सम० १० समo । दीपनक्रियाविकल्पे च । विशे० । त्रिविधा दीपाः-अवक्षम्बनदीपाः, शृङ्खलाबद्धा इत्यर्थः । उत्कम्पनदीपा ऊर्द्धदण्डवन्तः। पञ्जरदीपा अभ्रपटलाऽऽदिपञ्जरयुक्ताः। त्रयोऽप्येते त्रिविधाः सुवर्णेऽप्यतदुभयत्वादिति । ज्ञा० १ श्रु० १ अ० । 'दीपी' दीप्तौ । दीपयति प्रकाशयतीति दीपः। भावतः श्रुतज्ञानलाभे,सूत्र० १ श्रु० ६ अ० । ("संकडसंजत्तम्मी,अगम्मि वि असइ सरिसलाभेण । अत्थाइच्छइ पच्छा,सारिम्मे दीवगे उ विही ॥२८॥" इत्यादि 'परिष्ठवणा' शब्दे वक्ष्यते) दीपाहीपशतं प्रदीप्यते ज्वलति,सोऽपि च प्रदीप्यते,दीपो न पुनरन्यान्यदीपोत्पत्तावपि क्षीयते । उत्त० १ अ० । (दीपाऽऽदिभिर्जिनपूजा,तत्फलाऽऽदिकं च 'चेइय' शब्दे तृतीयभागे १२८६ पृष्ठे द्रष्टव्यम्) द्वीप–न० । द्विर्गता आपोऽत्र । अच् आदेरत इच्च । वाच० । द्वाभ्यां प्रकाराभ्यां स्थानदातृत्वाऽऽहाराऽऽद्युपष्टम्भहेतुलक्षणाभ्यां प्राणिनः पान्तीति द्वीपाः । जन्तवासचूतविशेषे क्रौञ्चविशेषे,अनु० । जलवृते भूदेशे, प्रश्न० ४ आश्र० द्वार । प्रज्ञा० । द्वीपोऽपि पूर्ववच्चतुर्धा-तत्र नामद्वीपो-यस्य द्वीप इति नाम । स्थापनाद्वीपो-या द्वीपस्य स्थापना । यथा-चित्रलिखितजम्बूद्वीपाऽऽदिः । द्रव्यद्वीपो द्विधा-आगमतो, नोआगमतश्च । तत्राऽऽगमतस्तदर्थज्ञातानुपयुक्तः,नोआगमतस्तु ज्ञशरीरभव्यशरीरव्यद्वीपौ सुबोधौ । तद्व्यतिरिक्तद्रव्यद्वीपो द्विधा-संदीनः, असंदीनश्च । तत्र यो हि पक्षमासाऽऽदावुदकेन प्लाव्यते स संदीनो, विपरीतस्त्वसंदीनः-सिंहलद्वीपाऽऽदिः । भावद्वीपोऽपि द्विधा-आगमतो, नोआगमतश्च । तत्राऽऽगमतस्तदर्थज्ञातोपयुक्तः। नोआगमतस्तु साधुः । कथमित्याह-यथाहि नदीसमुद्रबहुमध्यप्रदेशे सांयात्रिकाः द्रव्यद्वीपमवाप्याऽऽश्वसन्ति, तथा पारातीतसंसारपारावारान्तरचारखेदभेदक्लिनो देहिनः परमपरोपकारैकप्रवृत्तं साधुं समवाप्याऽऽश्वसन्ति, अतो भावतः परमार्थतो द्वीपो भावद्वीप उच्यते । सोऽपि संदीनासंदीनभेदाद् द्विधा-तत्र परीषहोपसर्गाऽऽद्यैः क्षोभ्यः संदीनः, तदितरस्त्वसंदीनः । अथवा-भावद्वीपः सम्यक्त्वं, तच्च प्रतिपातित्वादौपशमिकं, क्षायोपशमिकं च । संदीनो भावद्वीपः, क्षायिकं चासंदीन इति । ननु क्वचित् तत्पर्यायाऽऽपन्नं वस्तु भावनिक्षेपे निक्षिप्यते, यथाऽत्रैव जम्बूपर्यायमनुभवन् भावजम्बूत्वेन निक्षिप्तः। क्वचित्तदन्यपर्यायाऽऽपन्नं वस्तु भावनिक्षेपे निक्षिप्यते, यथाऽत्रैव भावद्वीपपर्यायमनुभवन् साधुः सम्यक्त्वं चेति परस्परमुदाहरणवैषम्यं कथं युक्तिमदिति ? । अत्रोच्यते-वस्तुगत्या तत्पर्यायाऽऽधारतया भवनं भाव इति कृत्वा तत्पर्यायधार्यं वस्तु भावनिक्षेपे निक्षिप्यते । यत्तु तद्वस्तु भावनिक्षेपे निक्षिप्यते तत्तद्भावगतगुणाऽऽरोपादौपचारिकमिति न दोषः,विवक्षाया विचित्रत्वादिति । प्रस्तुते च-द्विधा गता ह्रवणोद्दस्याऽऽपोऽस्मादिति अस्वर्थवशाद् द्वीपत्वं,पृथिव्यादिपरिणामरूपत्वाद् द्रव्यद्वीपत्वं,तत्र च द्रव्यद्वीपेनात्राधिकारः,तत्रापि संदीनेनेति । अथ वैतं नामाऽऽदिभेदाद् द्वीपश्चतुर्धा--नामद्वीपो-द्वीप इति नाम,नामनामवतोरभेदोपचारात् । स्थापनाद्वीपो-द्वीपस्य स्थालवलयाऽऽद्याकारः। द्रव्यद्वीपो-द्वीपाऽऽश्रयकद्रव्याणि पृथिव्यादीनि, तदात्मकत्वाद् द्वीपानाम् ज्ञ० । भावद्वीपस्तु स्वाद्याद्याकृतिमत् स्वाश्रयाऽऽत्मकं सर्वतः समुद्रजलप्लावितं क्रौञ्चखलकम् । जं० १ वक्ष० । स च द्रव्यभावभेदाद् द्विधा-तत्र द्रव्यद्वीप आश्वासद्वीपः, आश्वास्यतेऽस्मिन्नित्याश्वासः, स चासौ द्वीपश्चाऽऽश्वासद्वीपः । यदिवा-श्वसनमाश्वासः, आश्वासाय द्वीप आश्वासद्वीपः, तत्र नदीसमुद्रबहुमध्यप्रदेशे निश्चयौधिस्थाऽऽदयस्तमवाप्याऽऽश्वसन्ति । असावपि द्विधा--संदीनोऽसंदीनश्चेति । यो हि पक्षमासाद्युदकेन प्लाव्यते स संदीनो,विपरीतस्त्वसंदीनः,सिंहलद्वीपाऽऽदिः,यथा हि सांयात्रिकास्तं द्वीपमसंदीनमुद-

स्वदादेरुक्तितीर्थिकः समवाप्याश्वसन्त्येवं ते भावसंधानायोत्थितं लाघुमवाप्यापरे प्राणिनः समाश्वसन्ति। यदि वा दीप इति प्रकाशदीपः प्रकाशाय दीपः प्रकाशदीपः, स चाऽऽदित्यचन्द्रमण्यादिरसंदीनः,अपरस्तु विद्युदुल्काऽऽदिः संदीनः। यदि वा प्रचुरेश्वनतया विवक्षितकालावस्थाय्यसंदीनो,विपरीतस्तु संदीन इति। यथा ह्यसौ स्फुटावेदनतो हेयोपादेयज्ञानोपादानवतां निमित्तज्ञावमुपयाति तथा क्वचित्समुद्घाऽऽद्यन्तर्वर्तिनामाश्वासकारि च भवति,एवं ज्ञानसंधानायोत्थितः परीषहोपसर्गाक्रोश्यतयाऽसंदीनः साधुर्विशिष्टोपदेशदानतोऽपरेषामुपकारायेति। अपरे भावद्वीप, भावदीपं चान्यथा व्याचक्षते। तद्यथा-भावद्वीपः सम्यक्त्वं,तच्च प्रतिपातित्वादौपशमिकं, क्षायोपशमिकं च। संदीनो भावद्वीपः, क्षायिकं त्वसंदीन इति। तं द्विविधमप्यवाप्य परीतसंसारत्वात्प्राणिन आश्वासन्ति। भावदीपस्तु संदीनः श्रुतज्ञानम्, असंदीनस्तु केवलमिति। तच्चावाप्य प्राणिनोऽवश्यमाश्वासन्त्येवेति। आचा० १ श्रु० ६ अ० ३ उ०। समुद्घातःपतितस्य जन्तोर्जलकल्लोलाऽऽकुलितस्य मुमूर्षोरतिश्रान्तस्य विश्रामहेतौ, सम्यक्त्वाऽऽदिके संसारभ्रमणविश्रामहेतौ,सूत्र० १ श्रु० ११ अ०। (जम्बूद्वीपाऽऽदीनां गणना 'आणुपुव्वी' शब्दे द्वितीयभागे १४७ पृष्ठे गता) (जम्बूद्वीपनाम्ना कियन्तो द्वीपा इति 'जंबूदीव' शब्देऽस्मिन्नेव भागे १३७६ पृष्ठे गताः) (अन्तर्द्वीपा 'अंतरदीव' शब्दे प्रथमभागे ८६ पृष्ठे उक्ताः)

दीवअ–देशी-कुकलासे, दे० ना० ५ वर्ग ४१ गाथा।

दीवंग–द्वीपाङ्ग–पुं० । सुषमसुषमाजाते चतुर्थे कल्पवृक्षभेदे,दीपः प्रकाशकं वस्तु, तत्करणत्वाद्दीपाङ्गः। स्था० १० ठा०। प्रश्न०। यथेह स्निग्धं प्रज्वलन्त्यः काञ्चनमय्यो दीपिका उद्द्योतं कुर्वाणा दृश्यन्ते तद्वद् द्वीपाङ्गो विस्रसापरिणतः प्रहृष्टोद्द्योतेन सर्वमुद्द्योतयन् वर्तते। तं०।

दीवकलिया–दीपकलिका–स्त्री० । दीपशिखायाम्, अनु०।

दीवकुमार–द्वीपकुमार–पुं० । भूषणनियुक्तसिंहरूपधरेषु भवनवासिविशेषेषु, प्रज्ञा० २ पद। स्था०। औ०। भ०।

द्वीपकुमाराः सर्वे समाहारा इत्यादिवक्तव्यता-

दीवकुमारा णं भंते ! सव्वे समाहारा, सव्वे समुस्सासणिस्सासा ?। णो इणट्ठे समट्ठे। एवं जहा पढमए बितियउद्देसए दीवकुमाराणं वत्तव्वया तहेव० जाव समाउया समुस्सासणिस्सासा। एवं णागाऽवि। दीवकुमारा णं भंते ! कइ लेस्साओ पण्णत्ताओ ?। गोयमा ! चत्तारि लेस्साओ पण्णत्ताओ। तं जहा-कण्हलेस्सा० जाव तेउलेस्सा। एएसि णं भंते ! दीवकुमाराणं कण्हलेस्साणं० जाव तेउलेस्साण य कयरे कयरेहिंतो० जाव विसेसाहिया ?। गोयमा ! सव्वत्थोवा दीवकुमारा तेउलेस्सा, काउलेस्सा असंखेज्जगुणा,णीललेस्सा विसेसाहिया,कण्हलेस्सा विसेसाहिया। एएसि णं भंते ! दीवकुमाराणं कण्हलेस्साणं० जाव तेउलेस्साण य कयरे कयरेहिंतो अप्पड्ढिया वा, महिड्ढिया वा ?। गोयमा ! कण्हलेस्सेहिंतो णीललेस्सा महिड्ढिया ०जाव सव्वमहिड्ढिया वा तेउलेस्सा। सेवं भंते ! भंते त्ति ०जाव विहरइ॥ भ० १६ श० १३ उ०।

दीवकुमारावास–द्वीपकुमाराऽऽवास–पुं० । द्वीपकुमाराणां भवनाऽऽवासे,"छावत्तरिं दीवकुमाराणं वाससयसहस्सा पण्णत्ता।" स० ७५ सम०।

दीवग–दीपक–पुं० । दीप-स्वार्थे कन्। प्रदीपे,आ०म०१ अ०२ खण्ड। श्येनपक्षिणि, रागभेदे च। वाच०। सम्यक्त्वभेदे, स्वयं तत्त्वश्रद्धानरहित एव मिथ्यादृष्टिः परस्य धर्मकथाऽऽदिभिस्तत्त्वश्रद्धानं दीपयति प्रकाशयति, तत्सम्बन्धि सम्यक्त्वं दीपकमुच्यते। विशे०।

सयमिह मिच्छदिट्ठी, धम्मकहाईहि दीवइ परस्स।
सम्मत्तमिणं दीवग, कारणफलभावओ णेयं॥ ५०॥

स्वयमिह मिथ्यादृष्टिरभव्यो भव्यो वा कश्चिदङ्गारमर्दकवत्। अथ च-धर्मकथाऽऽदिभिर्धर्मकथया मातृस्थानानुष्ठानेनातिशयेन वा केनचिद्दीपयतीति प्रकाशयति परस्य श्रोतुः सम्यक्त्वमिदं व्यञ्जकम्। आह-मिथ्यादृष्टेः सम्यक्त्वमिति विरोधः?। सत्यम्,किं तु कारणफलभावतो ज्ञेयं-तस्य हि मिथ्यादृष्टेरपि यः परिणामः स खलु प्रतिपत्तुःसम्यक्त्वस्य कारणभावं प्रतिपद्यते, तद्भावभावित्वात्तस्य, अतः कारण एव कार्योपचारात्सम्यक्त्वाविरोधः, यथाऽऽयुर्घृतमिति॥५०॥ धर्म०। रथवीपुरनामनगराद् बहिःस्थे स्वनामख्याते उद्याने, उत्त० ३ अ०। विशे०। आ० म०। आ० चू०। आ० क०। कुङ्कुमे, अर्थालङ्कारभेदे च। न० वाच०। दीपयति-णिच्-ण्वुल्। यमान्याम्, स्त्री०। कार्यप्रकाशके, कुशले च। त्रि०। स्त्रियां टाप्, अत इत्वम्। वाच०।

दीवचंद–दीपचन्द्र–पुं० । ज्ञानधर्माऽऽख्यपाठकशिष्ये स्वनामख्याते पाठके, अष्ट० ३२ अष्ट०।

दीवचंपय–दीपचम्पक–न०। दीपस्थगनके, भ० ७ श० ६ उ०। रा०।

दीवचंवग–दीपचम्पक–न०। 'दीवचंपय' शब्दार्थे, भ० ७ श० ६ उ०।

दीवण–दीपन–पुं० । त्रि०। प्रकाशने, वाच०। ओघ०। दीपनं करोति कथयतीत्यर्थे, बृ० १ उ० २ प्रक०।

दीवणिज्ज–दीपनीय–त्रि०। दीपयति जठराग्निमिति दीपनीयः, बाहुलकात्कर्त्तर्यनीयप्रत्ययः। अग्निवृद्धिकरे, जी० ३ प्रति० ४ उ०। स्था०। ज्ञा०। प्रज्ञा०।

दीवयं–दीव्यत्–पुं० । क्रीमति, सूत्र० १ श्रु० ३ अ० २ उ०।

दीवयंत–दीपयत्–पुं० । शोभयति, कल्प० २ क्षण।

दीवय–द्वीपक–पुं० । चित्रके, जी० १ प्रति०।

दीववंदिर–द्वीपवन्दिर–न०। स्वनामख्याते श्रावकप्रधाने नगरे, पं० व० ४ द्वार।

दीवसमुद्द–द्वीपसमुद्र–पुं० । जम्बूद्वीपाऽऽदिलवणसमुद्राऽऽदिषु, जी०।

द्वीपसमुद्रवक्तव्यतामाह-

कहि णं भंते ! दीवसमुद्दा, केवइया णं भंते ! दीवसमुद्दा, के महालया णं भंते ! दीवसमुद्दा, किंसंठिया णं भंते ! दीवसमुद्दा, किमागारभावपडोयारा णं भंते ! दीवसमुद्दा पण्णत्ता ?। गोयमा ! जंबुदीवा दीवा, स-

वणादिया समुदा. संठाणतो एकविहिविहाणा, वित्थारतो अणेगविहिविहाणा-दुगुणा दुगुणा पमुप्पाएमाणा पमुप्पाएमाणा पवित्थरमाणा पवित्थरमाणा ओभासमाणवीइया बहुउप्पलपउमकुमुदणलिणसुभगसोगंधियपोंमरीयमहापोंमरीयसतपत्तसहस्सपत्तेयफुल्लकेसरोवचिया, पत्तेयं पत्तेयं पउमवरवेइया परिक्खित्ता, पत्तेयं पत्तेयं वणसंमपरिक्खित्ता अस्सिं तिरियलोए असंखेज्जा दीवसमुद्दा सयंभूरमणपज्जवसाणा पण्णत्ता समणाउसो !।

(कइ णं भंते ! दीवसमुद्दा इत्यादि) क कस्मिन्,णमिति वाक्यालङ्कारे, भदन्त ! परमकल्याणयोगिन् !, द्वीपसमुद्राः प्रज्ञप्ताः?। अनेन द्वीपसमुद्राणामवस्थानं पृष्टम्। (केवइया णं भंते ! दीवसमुद्दा इति) कियन्तः कियत्संख्याकाः, भदन्त ! द्वीपसमुद्राः?। अनेन द्वीपसमुद्राणां संख्यानं पृष्टम्। (के महालया णं भंते ! दीवसमुद्दा इति) किं महानाल्य आश्रयो व्याप्यक्षेत्ररूपो येषां ते महाल्ययाः, किंप्रमाणा महालयाः, णमिति प्राग्वत्। द्वीपसमुद्राः प्रज्ञप्ताः ?। किंप्रमाणं द्वीपसमुद्राणां महत्त्वमिति पाठः। एतेन द्वीपसमुद्राणामाधाराऽऽदेपरिमाणं पृष्टम्। तथा-(किंसंठिया णं भंते ! दीवसमुद्दा इति) किं संस्थितं संस्थानं येषां ते किंसंस्थिताः, णमिति पूर्ववत्। भदन्त ! द्वीपसमुद्राः प्रज्ञप्ताः?। अनेन संस्थानं पप्रच्छ। (किमागारभावपडोयारा णं भंते ! दीवसमुद्दा पण्णत्ता इति) आकारभावः स्वरूपविशेषः,कस्याऽऽकारभावस्य प्रत्यवतारो येषां ते किमाकारभावप्रत्यवताराः। बहुलग्रहणाद्वैयधिकरण्येऽपि समासः। णमिति पूर्ववत्। द्वीपसमुद्राः ?। किं स्वरूपं द्वीपसमुद्राणामिति भावः। अनेन स्वरूपविशेषविषयः प्रश्नः कृतः। भगवानाह-(गोयमेत्यादि) गौतम ! जम्बूद्वीपाऽऽदयो द्वीपाः,लवणाऽऽदिका लवणसमुद्राऽऽदिकाः समुद्राः, अनेन द्वीपानां समुद्राणां चाऽऽदिरुक्तः। एतच्चापृष्टमपि भगवता कथितमुत्तरत्रोपयोगित्वात्, गुणवते शिष्यायापृष्टमपि कथनीयमिति ख्यापनार्थं च। (संठाणतो इत्यादि) संस्थानतः संस्थानमाश्रित्य (एगविहिविहाणा इति) एकविधि एकप्रकारं विधानं येषां ते एकविधिविधानाः, एकस्वरूपा इति भावः। सर्वेषां वृत्तसंस्थानसंस्थितत्वात्। विस्तारतो विस्तारमधिकृत्य पुनरनेकविधिविधानाः, अनेकविधानि अनेकप्रकाराणि विधानानि येषां ते तथा, विस्तारमधिकृत्य नानारूपा इत्यर्थः। तदेव नानारूपत्वमुपदर्शयति-(दुगुणा दुगुणा पमुप्पाएमाणा पमुप्पाएमाणा पवित्थरमाणा पवित्थरमाणा इति) द्विगुणं द्विगुणं यथा भवति एवं प्रत्युत्पद्यमानाः प्रत्युत्पद्यमानाः, गुणयमाना इत्यर्थः। प्रविस्तरन्तः प्रविस्तरन्तः, प्रकर्षेण विस्तारं गच्छन्तः। तथाहि-जम्बूद्वीप एकं लक्षं, लवणसमुद्रो द्वे लक्षे, धातकीखण्डश्चत्वारि लक्षाणीत्यादि। (ओभासमाणवीइया इति) अवभासमाना वीचयः कल्लोला येषां तेऽवभासमानवीचयः। इदं विशेषणं समुद्राणां प्रतीतमेव, द्वीपानामपि वेदितव्यम्, तेष्वपि ह्रदनदीतडागाऽऽदिषु कल्लोलसंभवात्। तथा बहुभिरुत्पलपद्मकुमुदनलिनसुभगसौगन्धिकपुण्डरीकमहापुण्डरीकशतपत्रसहस्रपत्रैः (फुल्ल त्ति) प्रफुल्लैर्विकसितैः (केसरे त्ति) केसरोपलक्षितैरुपचिता उपचितशोभाका बहुत्पलपद्मकुमुदनलिनसुभगसौगन्धिकपुण्डरीकमहापुण्डरीकशतपत्रसहस्रप्रफुल्लकेसरोपचिताः,तत्र उत्पलं गर्दभकं, पद्मं सूर्यविकाशि, कुमुदं चन्द्रविकाशि, नलिनमीषदुत्कटपद्मं, सुभगं पद्मविशेषः, सौगन्धिकं कह्लारं, पुण्डरीकं शताम्बुजं, तदेव बृहत् महापुण्डरीकं, शतपत्रसहस्रपत्रे पद्मविशेषौ पत्रसंख्याकृतभेदौ। (पत्तेयं पत्तेयमिति) प्रतिशब्दोऽवीप्सामुख्ये, "वीप्सायामभिप्रती आभिमुख्ये" ॥ २ । १ । १४ ॥ इति च समासः, ततो वीप्साविषयकायां प्रत्येकशब्दस्य निर्वचनं, पद्मवरवेदिका परिक्षिप्ताः, प्रत्येकं प्रत्येकं वनखण्डपरिक्षिप्ताश्च।(सयंभूरमणपज्जवसाणा इति) जम्बूद्वीपाऽऽदयो द्वीपाः स्वयंभूरमणद्वीपपर्यवसानाः- लवणसमुद्राऽऽदयः स्वयंभूरमणसमुद्रपर्यवसानाः। अस्मिन् तिर्यग्लोके यत्र वयं स्थिता असंख्येया द्वीपसमुद्राः प्रज्ञप्ताः। हे श्रमण ! हे आयुष्मन् ! इह अस्मिन् "तिरियलोए" इत्यनेन संस्थानमुक्तम। असंख्येया इत्यनेन संख्यानम, "दुगुणा दुगुणा" इत्यादिना महत्त्वम्, "संठाणतो" इत्यादिना संस्थानम्। जी० ३ प्रति० ४ उ०।

कियन्ति द्वीपसमुद्राणां नामधेयानीति भगवानाह-

केवतिया णं भंते ! दीवसमुद्दा नामधेज्जेहिं पण्णत्ता ?। गोयमा ! जावइया लोगे सुभा नामा सुभा वण्णा० जाव सुभा फासा, एवतिया दीवसमुद्दा नामधेज्जेहिं पण्णत्ता।

गौतम ! यावन्ति लोके सामान्यतः शुभानि नामानि शङ्खकस्वस्तिककलशश्रीवत्साऽऽदीनि, शुभाः वर्णाः, शुभा गन्धाः,शुभा रसाः, शुभाः स्पर्शाः-शुभवर्णनामानि, शुभगन्धनामानि, शुभरसनामानि, शुभस्पर्शनामानि च, एतावन्तो द्वीपसमुद्रा नामधेयैः प्रज्ञप्ताः, एतावन्ति द्वीपसमुद्राणां नामधेयानीति भावः।

सागरोपमप्रमाणतो द्वीपसमुद्रपरिमाणमाह-

केवइया णं भंते ! दीवसमुद्दा उद्धारसमएणं पण्णत्ता ?। गोयमा ! जावइया अड्ढाइज्जाइं उद्धारसागरोवमाणं उद्धारसमया, एवतिया दीवसमुद्दा उद्धारसमएणं पण्णत्ता।

(केवइया णं भंते ! इत्यादि) कियन्तो भदन्त ! द्वीपसमुद्रा उद्धारसमयेन उद्धारपल्योपमसागरोपमप्रमाणेन प्रज्ञप्ताः ?। भगवानाह-गौतम ! यावन्तोऽर्द्धतृतीयानामुद्धारसागरोपमाणामुद्धारसमया एकैकसूक्ष्मबालाग्रापहारसमयाः,एतावन्तो द्वीपसमुद्रा उद्धारेण प्रज्ञप्ताः। उक्तं च-"उद्धारसागराणं, अड्ढाइज्जाण जत्तिया समया। दुगुणा दुगुणपवित्थर-दीवोदहिरज्जुपवइया॥१॥"

दीवसमुद्दा णं भंते ! किं पुढविपरिणामा, आउपरिणामा, जीवपरिणामा, पोग्गलपरिणामा ?। गोयमा ! पुढविपरिणामा वि, आउपरिणामा वि, जीवपरिणामा वि, पोग्गलपरिणामा वि॥

(दीवसमुद्दा णं भंते ! इत्यादि) द्वीपसमुद्राः, णमिति पूर्ववत्। भदन्त ! पृथिवीपरिणामा अप्परिणामाः ?। भगवानाह-गौतम ! पृथिवीपरिणामा अपि अप्परिणामा अपि, पृथिव्य एव जीवपुद्गलपरिणामाऽऽत्मकत्वात् सर्वद्वीपसमुद्राणाम्।

दीवसमुद्देसु णं भंते ! सव्वपाणा सव्वभूया सव्वजीवा सव्वसत्ता पुढविकाइयत्ताए० जाव तसकाइयत्ताए उववण्णपुव्वा ?। हंता गोयमा ! असति अदुवा अणंतखुत्तो, इति दीवसमुद्दा संमत्ता।

(दीवसमुद्देसु णं भंते! सव्वपाणा सव्वभूया इत्यादि) द्वीपसमुद्रेषु, णमिति पूर्ववत्, सर्वेष्विति गम्यते। भदन्त! सर्वे प्राणा द्वीन्द्रियाऽऽदयः, सर्वे भूताः तरवः, सर्वे जीवाः पञ्चेन्द्रियाः, सर्वे सत्त्वाः पृथिव्यादय उत्पन्नपूर्वाः ?। भगवानाह-गौतम! असकृदुत्पन्नपूर्वाः। अथवा-अनन्तकृत्वः, सर्वेषामपि सांव्यवहारिकराश्यन्तर्गतानां जीवानां सर्वेषु स्थानेषु प्रायोऽनन्तशस्तदुत्पादात् ॥ जी० ३ प्रति० ४ उ०।

द्वीपसमुद्राणामुच्चत्वम्-

सव्वे वि णं दीवसमुद्दा दस जोयणसयाइं उव्वेहेणं पण्णत्ता।

"सव्वे वि" इत्यादि सुगमं, नवरमुद्वेधम्-"ओंडत्तं ति भणियं होइ।" द्वीपानाम् "ओमत्तणाभावे वि" अधोदिशि सहस्रं यावद् द्वीपव्यपदेशः, जम्बूद्वीपे तु पश्चिमविदेहे जगतीप्रत्यासत्तौ "ओमत्तमवि अत्थि त्ति।" स्था०१० ठा०। द्वीपसमुद्रोपपत्तिप्रतिपादके दीर्घदशानां षष्ठेऽध्ययने, स्था० १० ठा०।

दीवसागरपण्णत्ति-द्वीपसागरप्रज्ञप्ति-स्त्री०। द्वीपसागराणां प्रज्ञप्तयो यस्यां ग्रन्थपद्धतौ सा द्वीपसागरप्रज्ञप्तिः। पा०। दशमे कालिकश्रुतभेदे, पा०। द्वी०।

दीवसिहा-दीपशिखा-स्त्री०। ब्रह्मदत्तचक्रवर्तिभार्यायां सागरदत्तवणिक्सुतायाम्, उत्त० १३ अ०। त्रि०। ति०।

दीवाइजन्नणभेय-दीपाऽऽदिज्वलनभेद-पुं०। दीपचन्द्रतारकाऽऽदीनां दीपनविशेषे, पञ्चा० २ विव०।

दीवावह-दीपापह-त्रि०। दीपविनाशके, द्वा० २४ द्वा०।

दीवायण-द्वैपायन-पुं०। द्वीपमयनं जन्मभूमिर्यस्य स द्वीपायनः, स एव प्रज्ञाऽऽदित्वात्। "द्वीपे न्यस्तस्तया बाल-स्ततो द्वैपायनोऽभवत्।" इत्युक्ते व्यासे, वाच०। सूत्र० १ श्रु० ३ अ० ४ उ०। षष्ठे ब्राह्मणपरिव्राजके, औ०। स्था०। ती०। दश०। आ० म०। स चाऽऽगमिष्यत्यामुत्सर्पिण्यां विंशतितमस्तीर्थकरो भविष्यति। स०।

दीवावली-दीपाऽऽवली-स्त्री०। दीपपङ्क्तौ, कार्तिकाऽमायां च। ती० २० कल्प। श्रीमहावीरस्य निर्वाणसमये अमावास्या तिथिः, स्वातिनक्षत्रं चाभूताम्, दीपालिकासंबन्धिगुणनसमये च कस्मिंश्चिद्वर्षे ते भवतः, कस्मिंश्चिच्च नेति। एतदुपरि केचनेत्थं कथयन्ति-यदा स्वात्यमावास्ये भवतस्तदा गुणनीयम्। अन्ये च-यस्मिन् दिने "मेरइया" इति लोकप्रसिद्धिकयाविशेषस्तस्मिन् दिने गुणनीयमिति। तत्र "मेरइया" करणे भेदो भवति-एतद्देशमध्ये ये गुर्जरलोकाः सन्ति, तैः पाक्षिकदिने तानि कृतानि, एतद्देशीयैस्तु द्वितीयदिवसे, ततः किं स्वस्वदेशानुसारेण "मेरइया" करणदिने गणनीयम्, उत गुर्जरदेशानुसारेणेति ? प्रश्ने, उत्तरम्-अत्र दीपाऽऽलिकागुणनमाश्रित्य स्वस्वदेशीयलोका यस्मिन् दिने दीपाऽऽलिकां कुर्वन्ति तस्मिन् दिने गुणनीयमिति। ३ प्र०। ही० ४ प्रका०। कल्प०।

जं रयणिं च णं समणे भगवं महावीरे कालगए० जाव सव्वदुक्खप्पहीणे, तं रयणिं च णं नवमल्लई-नवलेच्छई कासीकोसलगा अट्ठारसऽवि गणरायाणो अमावासाए पाराभोअं पोसहोववासं पट्ठविंसु, गए से भावुज्जुए, दव्वुज्जुयं करिस्सामो ॥ १२८ ॥

(जं रयणिं च णं इत्यादि) यस्यां रात्रौ श्रमणो भगवान् महावीरः कालगतः, यावत् सर्वदुःखप्रक्षीणः, तस्यां रात्रौ (न वमल्लई इत्यादि) नवमल्लिकाजातीयाः काशिदेशस्य राजानः, नवलेच्छकाजातीयाः कोशलदेशस्य राजानः, ते च कार्यवशाद् गणमेलापकं कुर्वन्ति इति गणराजानोऽष्टादश, ये चेटकमहाराजस्य सामन्ताः श्रूयन्ते, ते तस्यामावास्यायां पारं संसारपारमाभोगयति प्रापयति यत्तमेवंविधं (पोसहोववासं ति) पौषधोपवासं कृतवन्तः, आहारत्यागपोषधरूपम् उपवासं चक्रुरित्यर्थः। अन्यथा-दीपकरणं न संभवति, ततश्च गतः स ज्ञानोद्द्योतः, ततो द्रव्योद्द्योतं करिष्याम इति तैः दीपाः प्रवर्तिताः, ततः प्रभृति दीपोत्सवः संवृत्तः, कार्तिकशुक्लप्रतिपदि च श्रीगौतमस्य केवलमहिमा देवैश्चक्रे, अतस्तत्रापि जनप्रमोदः, नन्दिवर्द्धननरेन्द्रश्च भगवतोऽस्तं श्रुत्वा शोकाऽऽर्त्तः सुदर्शनया भगिन्या संबोद्ध्य सादरं स्वगेहमनि द्वितीयायां भोजितस्ततो भ्रातृद्वितीयापर्वरूढिः। कल्प० १ अधि० ६ क्षण। ती०। दीपाऽऽलिकाऽऽदिपर्वणि सुखभक्तिकाऽऽदिकरणे मिथ्यात्वमारम्भो वेति प्रश्ने, उत्तरम्-आरम्भो लगतीति ज्ञातमस्ति, न तु मिथ्यात्वमिति ॥ २२४ प्र०। सेन० ३ उल्ला०।

दीवि आ-देशी-उपदेहिकायां, मृगाऽऽकर्षण्यां च। दे० ना० ५ वर्ग ३ गाथा।

दीविय-दीपित-त्रि०। कथिते, ओघ०।

दीविय-दीपिक-पुं०। शाकुनिकपुरुषसंबन्धिपञ्जरस्थतित्तिरौ, ज्ञा० १ श्रु० १७ अ०।

दीविय-दीपिन्-पुं०। चित्रके, आ० म० १ अ० १ खण्ड। प्र०। प्रश्न०। प्रज्ञा०। ज्ञा०। जं०। स्था०। सूत्र०। प्रति०। आचा०।

दीवियग-द्वैप्य-त्रि०। द्वीपसम्भवे, ज्ञा० १ श्रु० ११ अ०।

दीविया-दीपिका-स्त्री०। ह्रस्वो दीपो दीपिका। ह्रस्वे दीपे, जं० २ वक्ष०। "दीवियाचक्कवालविदं।" दीपिकानां चक्रवालं सर्वपरिमण्डलरूपं वृन्दं दीपिकाचक्रवालवृन्दम्। जी० ३ प्रति० ४ उ०। जं०।

दीवुस्सव-दीपोत्सव-पुं०। दीपमालिकायाम्, अष्ट० ३२ अष्ट०।

दीवुस्सयअमावसा-दीपोत्सवामावास्या-स्त्री०। कार्तिकामावास्यायाम्, ती० २० कल्प।

दीसंत-दृश्यमान-त्रि०। चक्षुषा प्रत्यक्षे, सूत्र० १ श्रु० ३ अ० ४ उ०।

दीह-दीर्घ-पुं०। द-अश्व, घस्य नेत्वम्। शाललतावृक्षे, उष्ट्रे, द्विमात्रे स्वरवर्णे च। वाच०। "दीघे दीहे।" आयते, स्था० १ ठा०। सूत्र०। विशे०। प्रज्ञा०। औ०। रा०। प्रचुरे, भ० १ श० ६ उ०। असंख्येये, त्रि०। विशे०। "दीहरहस्सहिमपक्काणि।" विपा० १ श्रु० ८ अ०।

दीहकाल-दीर्घकाल-त्रि०। दीर्घः सन्तानापेक्षया अनादित्वात् कालः स्थितिबन्धकालो यस्य तद् दीर्घकालम्। दीर्घस्थितिके, आ० म० १ अ० २ खण्ड।

दीहकालिगी-दीर्घकालिकी-स्त्री०। कालिसंज्ञायाम्, विशे०।

इह दीहकालिगी का-लिंग त्ति सण्णा जया सुदीहं पि।
संभरइ भूयमेस्सं, चिंतेइ य किह णु कायव्वं ?॥५०७॥

इह दीर्घशब्दस्य लुप्तदर्शनाद् दीर्घकालिकी 'कालिकी' इ-

स्युच्यते, कालिकी चासौ संज्ञा च पुंवद्भावात् 'कालिकसंज्ञा' इति द्रष्टव्यम्। यया सुदीर्घमपि कालं भूतमतीतमर्थं स्मरति, एवञ्च भविष्यद्वस्तु चिन्तयति-कथं नु नाम कर्तव्यम् ?,इत्येषा चिन्तामाश्रित्य दीर्घोऽतीताऽनागतवस्तुविषयः कालो यस्यां सा दीर्घकालिकी कालिकसंज्ञोच्यत इत्यर्थः ॥५०८॥ विशे०। (' सण्णी ' शब्दे चैतया संज्ञिनो द्रष्टव्याः)

दीहकालिय-दीर्घकालिक-त्रि०। दीर्घः कालो विद्यते यस्य स दीर्घकालिकः। स्था० ३ ठा० १ उ०। चिरन्तने,दश० ७ अ०।

दीहकालियउवएस-दीर्घकालिकोपदेश-पुं० दीर्घः कालो दीर्घकालः, सोऽस्यास्तीति दीर्घकालिकः, स चासावुपदेशश्च, उपदेशो भणनं, दीर्घकालोपदेशः। दीर्घकालिके भणने, आ० म० १ अ० १ खण्ड।

दीहखद्ध-दीर्घखद्ध *-त्रि०। प्रचुरतरे, व्य० ४ उ०।

दीहगोरवपरिणाम-दीर्घगौरवपरिणाम-पुं०। यत आयुः स्वभावाद् जीवस्य दीर्घं दीर्घगमनतया लोकान्तात् लोकान्तं यावद् गमनशक्तिर्भवति स दीर्घगौरवपरिणामः। अष्टमे आयुषः परिणामे, इह गौरवशब्दो गमनपर्यायः। स्था० ६ ठा०।

दीहजीह-देशी-शब्दे, दे० ना० ५ वर्ग ४१ गाथा।

दीहदट्ठ-दीर्घदष्ट-त्रि०। सर्पदष्टे, नि० चू० १ उ०।

दीहदिट्ठन्त-दृष्टान्त-पुं०। देशीयशब्दमेतत्। उदाहरणे, दर्श० १ तत्त्व।

दीहणिद्दा-दीर्घनिद्रा-स्त्री०। मरणे, चिरकालव्यापिन्यां निद्रायाम, आचा० १ श्रु० २ अ० ४ उ०। क्षुल्लाऽहित्वाच्च णत्वम्। वाच०।

दीहणिव-दीर्घनृप-पुं०। काम्पिल्यपुरराजे, यो हि ब्रह्मदत्तेन हतः। उत्त० १३ अ०।

दीहदंत-दीर्घदन्त-पुं०। जम्बूद्वीपे द्वीपे भारते वर्षे आगमिष्यन्यामुत्सर्पिण्यां भविष्यति द्वितीये चक्रवर्तिनि, स०। त्रि०। ती०।

दीहदसा-दीर्घदशा-स्त्री०। ब० व०। दशाध्ययने ग्रन्थविशेषे, स्था०।

दीहदसाणं दस अज्झयणा पण्णत्ता। तं जहा-
"चंदे सूरे य सुक्के य, सिरिदेवी पहावई।
दीवसमुद्दोववत्ती, बहुपुत्ती मंदरे इय ॥ १ ॥
थेरे संभूयविजए, पम्ह उस्सासनिस्सासे ॥"

दीर्घदशाः स्वरूपतोऽनवगता एव, तदध्ययनानि तु कानिचिन्निरयाऽवलिकाश्रुतस्कन्धे उपलभ्यन्ते, तत्र चन्द्रवक्तव्यताप्रतिबद्धं चन्द्राध्ययनम्। तथाहि-राजगृहे महावीरस्य चन्द्रज्योतिष्कराजो वन्दनं कृत्वा नाट्यविधिं चोपदर्श्य प्रतिगतः, गौतमश्च भगवन्तं तद्वक्तव्यतां पप्रच्छ, भगवाँश्चोवाच-श्रावस्त्यामङ्गजिन्नाम्न्यां गृहपतिरभूत्पार्श्वनाथसमीपे च प्रव्रजितो विराध्य च मनाक् श्रामण्यं चन्द्रतयोत्पन्नो, महाविदेहे च सेत्स्यतीति। तथा सूरवक्तव्यताप्रतिबद्धं सूरं, सूरवक्तव्यता चन्द्रवद्, नवरं सुप्रतिष्ठो नाम्ना बभूवेति। शुक्रो ग्रहः, तद्वक्तव्यता चैवम्-राजगृहे भगवन्तं वन्दित्वा शुक्रे प्रतिगते गौतमेन पृष्टे तथैव भगवानुवाच-वाराणस्यां सौमिलनामा ब्राह्मणोऽभवत्, पार्श्वनाथं चाऽपृच्छत्-"तं भंते! जवणिज्जं." तथा-"सरिसवया मासा कुलत्था य ते भोज्जा," तथा-"एगे भवं दुवे भवं।" इत्यादि। भगवता चैतेषु विभक्तेष्वाख्यातः श्रावको भूत्वा पुनर्विपर्यासादारामाऽऽदिलौकिकधर्मस्थानानि कारयित्वा दिक्प्रोक्षकतापसत्वेन प्रव्रज्य प्रतिषष्ठपारणकं क्रमेण पूर्वाऽऽदिदिग्भ्य आनीय कन्दाऽऽदिकमभ्यवजहार। अन्यदाऽसौ यत्र क्वचन गतोऽहं पतिष्यामि तत्रैव प्राणांस्त्यक्ष्यामि इत्यभिग्रहमभिगृह्य काष्ठमुद्रया मुखं बद्ध्वा उत्तराभिमुखः प्रस्थौ,तत्र प्रथमदिवसे पराह्णसमये अशोकवरोरधो होमाऽऽदिकर्म कृत्वोवास, तत्र देवेन केनाप्युक्तः-अहो सौमिल ब्राह्मण महर्षे! दुःप्रव्रजितं ते, पुनर्द्वितीयेऽहनि तथैव सप्तपर्णस्याधः उपित उक्तः, तृतीयाऽऽदिषु दिनेषु अश्वत्थवटोदुम्बराणामधः उषितो भणितो देवेन,ततः पञ्चमदिनेऽवादीदसौ-कथं नु नाम मे दुःप्रव्रजितम्?। देवोऽवोचत्-त्वं पार्श्वनाथस्य भगवतः समीपे अणुव्रताऽऽदिकं श्रावकधर्मं प्रतिपद्याधुनाऽन्यथा वर्त्तसे इति दुःप्रव्रजितं तव, ततोऽद्यापि तमेवाणुव्रताऽऽदिकं धर्मं प्रतिपद्यस्व, येन सुप्रव्रजितं तव भवतीति। एवमुक्तः तथैव चकार, ततः श्रावकत्वं प्रतिपाल्यानालोचितप्रतिक्रान्तः कालं कृत्वा शुक्रावतंसके विमाने शुक्रत्वेनोत्पन्न इति। तथा श्रीदेवीसमाध्ययनमध्ययनंश्रीदेवीति। तथाहि-रमा राजगृहे महावीरवन्दनाय सौधर्मादाजगाम,नाट्यं दर्शयित्वा प्रतिजगाम च, गौतमस्तत्पूर्वभवं पप्रच्छ। भगवाँस्तं जगाद-राजगृहे सुदर्शनश्रेष्ठी बभूव,प्रियाभिधाना च तद्भार्या, तयोः सुता भूता नाम बृहत्कुमारिका पार्श्वनाथसमीपे प्रव्रजिता शरीरवकुशा जाता सातिचारा च मृत्वा दिवं गता, महाविदेहे च सेत्स्यतीति। तथा प्रभावती चेटकदुहिता वीतभय-नगरनायकोदायनमहाराजभार्या,यया जिनबिम्बपूजार्थं स्नानानन्तरं चेट्या सितवसनार्पणेऽपि विभ्रमाद्रक्तवसनमुपनीतमनवसरमनयेति मन्यमानया मन्युना दर्पणेन चेटिका हता.मृता च, सा ततो वैराग्यादनशनं प्रतिपद्य देवत्वं प्रतिपन्ना, यया चोज्जयनीराजानं प्रति चित्रकरेण प्रस्थितस्य ग्रीष्मे मासि पिपासाऽभिभूतसमस्तसैन्यस्योदायनमहाराजस्य स्वच्छशीतलजलपरिपूर्णत्रिपुष्करकरेणोपकारोऽकारीत्येवंलक्षणप्रभावतीचरितयुक्तमध्ययनं प्रभावतीति संभाव्यते, न चैवं निरयावलिकाश्रुतस्कन्धे दृश्यत इति पञ्चमम। तथा बहुपुत्रिकादेवीप्रतिबद्धं देवाध्ययनमुच्यते। तथाहि-राजगृहे महावीरवन्दनार्थं सौधर्मादवहुपुत्रिकाभिधाना देवी समवततार,वन्दित्वा च प्रतिजगाम, केयमिति पृष्टे गौतमेन भगवानवादीत्-वाराणस्यां नगर्यां भद्राऽभिधानस्य सार्थवाहस्य सुभद्राऽभिधाना भार्यैव बभूव,सा च वन्ध्या पुत्रार्थिनी त्रिकालार्थमागतमार्यासंघाटकं पुत्रलाभं पप्रच्छ। स च धर्ममचीकथत्। प्राव्राजीच्च सा बहुजनापत्येषु प्रीत्याऽन्यदोर्ध्वदेहिकापरायणा सातिचारा मृत्वा सौधर्मेममत्व, ततश्च्युत्वा च विमलसंनिवेशे ब्राह्मणीत्वेनोत्पत्स्यते,ततः पितृनागिनेयनार्या अविष्यति युगलप्रसवा च, सा षोडशभिर्वर्षैर्द्वात्रिंशदपत्यानि जनयिष्यति, ततोऽसौ तन्निर्वेदादार्याः प्रव्रक्ष्यति, ताश्च धर्मं कथयिष्यन्ति,श्रावकत्वं च सा प्रतिपत्स्यते, कालान्तरे प्रव्रजिष्यति, सौधर्मे चन्द्रसामानिकतयोत्पद्य महाविदेहे सेत्स्यतीति। तथा स्थविरः संभूतविजयो भद्रबाहुस्वामिनो गुरुभ्राता स्थूलभद्रस्य सप्तमालपुत्रस्य दीक्षादाता, तद्वक्तव्यताप्रतिबद्धमध्ययनं स एवोच्यत इति नवमम। शेषाणि श्रीएवयतीनानि। स्था० १० ठा०।

* खण्डशब्देन प्रचुरमभिधीयते। प्रव० २ द्वार।

दीहदिट्ठि–दीर्घदृष्टि–पुं० । दीर्घकालभाविन्यादृश्यार्थस्यानर्थस्य च दृष्टिः पर्य्यालोचनम् । विमृश्यकारित्वे, अविमृश्यकारित्वे हि महादोषसम्भवात् । यत उक्तम्–" सहसा विदधीत न क्रिया-मविवेकः परमाऽऽपदां पदम् । वृणते हि विमृश्यकारिणं, गुणलुब्धाः स्वयमेव सम्पदः ॥१॥" इति । ध० १ अधि० । दीर्घा दृष्टिरस्य । परिमते, दीर्घा दूरगा दृष्टिर्यया । दूरवीक्षणे० ज० ।

दीहद्धा–दीर्घाद्धा–स्त्री० । पल्योपमाद्धायाम्, क० प्र० १ प्रक० ।

दीहपट्ठ–दीर्घपृष्ठ–पुं० । यवराजामात्ये, बृ० १ उ० २ प्रक० ।

दीहपास–दीर्घपार्श्व–पुं० । ऐरवते भाविनि षोडशे जिनेन्द्रे, प्र० व० ७ द्वार । ति० ।

दीहबाहु–दीर्घबाहु–पुं० । ऋषभस्य त्रिसप्ततितमे पुत्रे, कल्प १ अधि० ७ क्षण । जम्बूद्वीपे भारते वर्षे आगमिष्यन्त्यामुत्सर्पिण्यां तृतीये बलदेवे, स० । जम्बूद्वीपे भारते वर्षे अस्यामेवोत्सर्पिण्यां चन्द्रप्रभजिनस्य पूर्वभवे जीवे, स० ।

दीहभद्द–दीर्घभद्र–पुं० । माठरसगोत्रस्याऽऽर्यसंभूतिविजयस्य स्थविरस्यैकदेशे स्वनामख्याते स्थविरेऽन्तेवासिनि, कल्प० २ अधि० ८ क्षण ।

दीहमद्ध–दीर्घाध्व–न० । दीर्घो मध्वा कालो यस्य तद्दीर्घाध्वम् । मकार आगमिकः । दीर्घकालगम्ये, स्था० २ ठा० १ उ० । प्रज्ञा० । जी० । सूत्र० । ज्ञा० ।

दीर्घाध्व–न० । दीर्घोऽध्वा मार्गो यस्मिन् तद्दीर्घाध्वम् । दीर्घमार्गगम्ये, स्था० २ ठा० १ उ० । प्रज्ञा० । भ० । सूत्र० । ज्ञा० । दीर्घमार्गे, स्था० ३ ठा० ४ उ० ।

दीहमद्धा–दीर्घाद्धा–स्त्री० । दीर्घोऽद्धा कालो यस्यां सा दीर्घाद्धा, मकारस्त्वागमिकः । दीर्घकालगम्यायाम्, स्था० ५ ठा० २ उ० ।

दीर्घाध्वा–स्त्री० । दीर्घोऽध्वा मार्गो यस्यां सा दीर्घाध्वा । दीर्घमार्गगम्यायाम्, स्था० ५ ठा० २ उ० । औ० ।

दीहमाउ–दीर्घाऽऽयुष्–न० । चिरजीविते, शुभमितीह विशेषणं दृश्यमिति । स्था० १० ठा० ।

दीहर–दीर्घ–पुं० । " रो दीर्घात् " ॥ ८ । २ । १७१ ॥ इति दीर्घशब्दात्स्वार्थे रः । 'दीहरं । दीहं । ' प्रा० २ पाद । " सर्वत्र लवरामचन्द्रे " ॥ ८ । २ । ७९ ॥ इति रलुक् । "खघथधभाम्" ॥ ८ । १ । १८७ ॥ इति घस्य हः । प्रा० दु० १ पाद । आयते, "अन्ने ते दीहरलोअण अन्नु ते भुअजुअलु । " प्रा० २ पाद ।

दीहराय–दीर्घरात्र–न० । यावज्जीवे, आव० ४ अ० । आचा० ।

दीहलोय–दीर्घलोक–पुं० । वनस्पतौ, आचा० । यस्मादसौ कायस्थित्या परिमाणेन शरीरोच्छ्रयेण च शेषैकेन्द्रियेभ्यो दीर्घो वर्तते । तथाहि–कायस्थित्या तावत् " वणस्सइकाइए णं भंते ! वणस्सइकाए त्ति कालओ केवच्चिरं होइ ? । गोयमा ! अणंतं कालं अणंताओ उस्सप्पिणिओसप्पिणीओ, खेत्तओ अणंता लोया असंखेज्जा पोग्गलपरियट्टा, ते णं पुग्गलपरियट्टा आवलियाए असंखेज्जइभागे । " परिमाणतस्तु–" पंकुप्पन्नवणस्सइकाइया णं भंते ! केवतिकालस्स निल्लेवणा सिया ? । गोयमा ! पकुप्पन्नवणस्सइकाइयाणं नत्थि निल्लेवणा । " तथा–शरीरोच्छ्रयाच्च दीर्घो वनस्पतिः, " वणस्सइकाइया णं भंते ! केमहालिया सरीरोगाहणा पण्णत्ता ? । गोयमा ! साइरेगं जोयणसहस्सं सरीरोगाहणा । " न तथाऽन्येषामेकेन्द्रियाणाम्, अतः स्थितमेतत्सर्वथा दीर्घलोको वनस्पतिरिति । आचा० १ श्रु० १ अ० ४ उ० ।

दीहलोयसत्थ–दीर्घलोकशस्त्र–न० । वनस्पत्युत्सादकेऽग्नौ, आचा० । अस्य च शस्त्रमग्निः, यस्मात्स हि प्रवृद्धज्वालाकलापाऽऽकुलः सकलतरुगणप्रध्वंसनाय प्रभवति, अतोऽसौ तदुत्सादकत्वाच्छस्त्रम् । आचा० १ श्रु० १ अ० ४ उ० ।

दीहवच्छ–दीर्घवृक्ष–पुं० । महति वृक्षे, आचा० २ श्रु० १ चू० ४ अ० २ उ० ।

दीहवेयड्ढ–दीर्घ (विजयार्द्ध) वैताढ्य–पुं० । दीर्घे अर्द्धक्षेत्रविभागकारके पर्वतविशेषे, स्था० ।

जंबू ! मंदरस्स पव्वयस्स उत्तरदाहिणेणं दो दीहवेयड्ढपव्वया पण्णत्ता । तं जहा–बहुसमउल्ला० जाव भारहे चेव दीहवेयड्ढे, एरावए चेव दीहवेयड्ढे । भारहे णं दीहवेयड्ढे दो गुहाओ पण्णत्ताओ । तं जहा–बहुसमउल्लाओ अविसेसमणाणत्ताओ अन्नमन्नं णाइवट्टंति आयामविक्खंभुच्चत्तसंठाणपरिणाहेणं । तं जहा–तिमिसगुहा चेव, खंडगप्पवायगुहा चेव । तत्थ णं दो देवा महड्ढिया० जाव पलिओवमट्ठिइया परिवसंति । तं जहा–कयमालए चेव, णट्टमालए चेव । एरावए णं दीहवेयड्ढे दो गुहा पण्णत्ता । तं जहा–जाव कयमालए चेव, णट्टमालए चेव ।

(दो दीहवेयड्ढ त्ति) वृत्तवैताढ्यव्यवच्छेदार्थं दीर्घग्रहणं, वैताढ्यौ विजयार्द्धौ चेति संस्कारः, तौ च भरतैरवतयोर्मध्यभागे पूर्वापरतो लवणोदधिं स्पृष्टवन्तौ पञ्चविंशतियोजनोच्छ्रितौ तत्पादावगाढौ पञ्चाशद्विस्तृतौ आयतसंस्थितौ सर्वरजतमयौ उभयतो बहिः काञ्चनमयवनवेदिकावृताविति । आह च–" पणवीसं उव्विद्धो, पण्णासं जोयणाणि वित्थिण्णो । वेयड्ढो रयणमओ, भरदक्खेत्तस्स मज्झम्मि ॥१॥ " इति । (भारहे णमित्यादि) वैताढ्ये अपरतस्तस्मिन्गुहागिरिविस्ताराऽऽयामा द्वादशयोजनविस्तारा अष्टयोजनोच्छ्राया आयतचतुरस्रसंस्थाना विजयद्वारप्रमाणद्वारा वज्रकपाटपिहिता बहुमध्ये द्वियोजनान्तराभ्यां त्रियोजनविस्तराभ्यामुन्मग्ननिमग्नजलाभिधानाभ्यां नदीभ्यां युक्ता, तद्रूपेण खण्डप्रपातगुहेति । (तत्थ णं ति) तयोस्तस्मिन्नायां गुहायां कृतमालकः, इतरस्यां नृत्तमालक इति । (एरवए) इत्यादि तथैव । स्था० २ ठा० ३ उ० ।

जंबू ! मंदरस्स पव्वयस्स पुरच्छिमेणं सीयाए महाणईए उत्तरेणं अट्ठ दीहवेयड्ढा, अट्ठ तिमिसगुहाओ, अट्ठ खंडगप्पवायगुहाओ, अट्ठ कयमालगा देवा, अट्ठ णट्टमालगा देवा, अट्ठ गंगाओ, अट्ठ सिंधूओ, अट्ठ गंगाकुंडा, अट्ठ सिंधुकुंडा, अट्ठ उसभकूडा पव्वया, अट्ठ उसभकूडा देवा पण्णत्ता । जंबू ! मंदरपुरच्छिमेणं सीयाए महाणईए दाहिणेणं अट्ठ दी-

इवेयड्ढा एवं चेव० जाव अट्ठ उसभकूडा देवा पण्णत्ता, नवरमेत्थ रत्तारत्तवईओ, तासिं चेव कूडा । जंबू! मंदरपुरच्छिमेणं सीओयाए महाणईए दाहिणेणं अट्ठ दीहवेयड्ढा० जाव अट्ठ नट्टमालगा देवा अट्ठ गंगाकुंडा अट्ठ सिंधुकुंडा अट्ठ गंगाओ अट्ठ सिंधूओ अट्ठ उसभकूडपव्वया अट्ठ उसभकूडा देवा पण्णत्ता । जंबू! मंदरपुरच्छिमेणं सीओयाए महाणईए उत्तरेणं अट्ठ दीहवेयड्ढा० जाव अट्ठ नट्टमालगा देवा अट्ठ रत्तकुंडा अट्ठ रत्तावईकुंडा अट्ठ रत्ताओ० जाव अट्ठ उसभकूडदेवा पण्णत्ता । स्था० ८ ठा० । स० । च० ।

(तेषां कूटानि 'कूड' शब्दे तृतीयभागे ६१८ पृष्ठे उक्तानि)

दीहसद्द–दीर्घशब्द–पुं० । दीर्घवर्णाऽऽश्रिते, मेघाऽऽदिशब्दवद् दूरश्राव्ये च । स्था० १० ठा० ।

दीहसुत्त–दीर्घसूत्र–न० । बृहत्सूत्रे, नि० चू० ।

जे णिक्खू सणकप्पासाओ वा पोण्डकप्पासाओ वा अगकप्पासाओ वा मिलकप्पासाओ वा दीहसुत्ताइं करेइ, करंतं वा साइज्जइ ॥ ९६ ॥ नि० चू० ५ उ० ।

('सुत्त' शब्दे व्याख्यास्यते चैतत्)

दीहसेण–दीर्घसेन–पुं० । भरतक्षेत्रजचन्द्रप्रभजिनसमकालिके ऐरवतजे जिने, नि० । श्रेणिकस्य राज्ञो धारण्यां जाते स्वनामख्याते पुत्रे, स च महावीरस्वामिनोऽन्तिके प्रव्रज्य षोडशवर्षपर्यायः संलेखनया मृत्वा विजये देवलोके उपपद्य ततश्च्युत्वा महाविदेहे सेत्स्यतीत्यनुत्तरोपपातिकदशानां द्वितीयवर्गस्य प्रथमेऽध्ययने सूचितम् । अणु० १ श्रु० २ वर्ग १ अ० । अस्माद्धन्यः श्रेणिकधारण्यामुत एतन्नामा वीरान्तिके प्रव्रज्य द्वादशवर्षपर्यायः संलेखनया मृत्वा सर्वार्थसिद्धे उपपन्नो महाविदेहे सेत्स्यतीत्यनुत्तरोपपातिकदशानां प्रथमवर्गस्य षष्ठेऽध्ययने सूचितम् । अणु० १ वर्ग १ अ० । भरतक्षेत्रजशान्तिनाथजिनसमकालिके ऐरवतजे जिने च । ति० ।

दीहाउ–दीर्घाऽऽयुष्–न० । "आयुरप्सरसोर्वा" ॥ ८ । १ । २० ॥ इत्यन्त्यव्यञ्जनस्य सो वा । 'दीहाउसो । दीहाऊ ।' प्रा० १ पाद । दीर्घं सागरोपमपरिमिततया आयुरेषामिति दीर्घाऽऽयुः । उत्त० ५ अ० । चिरजीविन्ये, कल्प० १ क्षण ।

दीहाउअत्ता–दीर्घायुष्ट्व–स्त्री० । दीर्घस्थितिकजीवितहेतुकर्मत्वे, स्था० ३ ठा० १ उ० । (एतत्कारणानि 'आउ' शब्दे द्वितीयभागे १२ पृष्ठे उक्तानि)

दीहासण–दीर्घाऽऽसन–न० । शय्यारूपे आसने, जं० १ वक्ष० । जी० ।

दीहिया–दीर्घिका–स्त्री० । ऋजुसारिण्याम्, ज्ञा० १ श्रु० १ अ० । रा० । जं० । अनु० । आचा० । जी० । प्रज्ञा० । भ० । नि० चू० । औ० ।

दु–दुर्–अव्य० । अभावे, आचा० १ श्रु० २ अ० ५ उ० । जुगुप्सायाम्, आ० म० १ अ० २ खण्ड ।

दुअं–द्रुतम्–अव्य० । त्वरिते, अनु० । आव० ।

दुअक्खर–देशी–पण्डे, दे० ना० ५ वर्ग ४७ गाथा ।

दुअक्खरय–द्व्यक्षरक–पुं० । दासे, भृतकः कर्मकरस्तद्विषयोऽक्षरको द्व्यक्षरकः, द्व्यक्षरकाभिधानो दास इत्यर्थः । वि० ।

दुअक्खरिया–द्व्यक्षरिका–स्त्री० । दास्याम्, आ० म० १ अ० २ खण्ड ।

दुअल्ल–दुकूल–न० । "दुकूले वा लश्च द्विः" ॥ ८ । १ । ११६ ॥ इति ककारस्य वैकल्पिकोऽकारः, तत्सन्नियोगे लस्य द्वित्वम् । 'दुअल्लं, दुकूलं ।' आर्षे–'दुगुल्ले' । प्रा० १ पाद । वस्त्रे, औ० । दु–अवद्य–कुक् च । दुष्टं कूजति । 'कूल' आवरणे । कौमाम्बरे, श्लक्ष्णवस्त्रे, न० । सूक्ष्मवस्त्रे च । वाच० ।

दुआइ–द्विजाति–पुं० । "द्वित्योरुत्" ॥ ८ । १ । ९४ ॥ इति इकारस्य उत्वम् । प्रा० १ पाद । "सर्वत्र लवरामचन्द्रे" ॥ ८ । २ । ७९ ॥ इति वलुक् । प्रा० २ पाद । वाच० । द्वे जातौ जन्मनि यस्य "ब्राह्मणः क्षत्रियो वैश्य-स्त्रयो वर्णा द्विजातयः ।" इति मनूक्ते वर्णत्रये, "मातुरग्रेऽधिजननं, द्वितीयं मौञ्जीबन्धने" इत्युक्तेस्तयां तथात्वम् । वाच० ।

दुआइक्ख–दुराख्येय–न० । कृच्छ्राऽऽख्येये वस्तुतत्त्वे, स्था० ५ ठा० १ उ० ।

दुआर–द्वार–न० । प्रवेशनिर्गममार्गे, ज्ञा० १ श्रु० १८ अ० । प्रतोल्यां च । ज्ञा० १ श्रु० २ अ० ।

दुआरिया–द्वारिका–स्त्री० । अपद्वारे, ज्ञा० १ श्रु० २ अ० ।

दुआवत्त–द्विकाऽऽवर्त्त–पुं० । षोडशेऽध्ययने छेदनयिके इक्षिप्तस्य सूत्रे, स० १२ अङ्ग ।

दुइअ–द्वितीय–त्रि० । "द्वित्योरुत्" ॥ ८ । १ । ९४ ॥ इतीकारस्योकारः । 'दुइओ ।' प्रा० १ पाद । "पानीयाऽऽदिष्वित्" ॥ ८ । १ । १०१ ॥ इति ईकारस्य इकारः । 'दुइअ ।' प्रा० १ पाद । "सर्वत्र लवरा०–" ॥ ८ । २ । ७९ ॥ इत्यादिना वलुक् । प्रा० २ पाद । "कगचजत०–" ॥ ८ । १ । १७९ ॥ इत्यादिना तलोपः । द्वयोः पूरणः द्वितीयः । द्वयोः पूरणे द्वितीये भागे, वाच० ।

दुइजित्तए–द्रोतुम्–अव्य० । विहर्तुमित्यर्थे, स्था० ५ ठा० २ उ० ।

दुउच्छ–गुप्–धा० । इच्छा०–आत्म०–अक०–सेट् । कुत्सने, वाच० । "जुगुप्सेः छुणछुगुच्छदुगुञ्छाः" ॥ ८ । ४ । ४० ॥ इति छुगुच्छाऽऽदेशः । "कग०–" ॥ ८ । १ । १७७ ॥ इति गलोपे, "छुउच्छइ । दुगुंछइ ।" प्रा० ४ पाद ।

दुउण–द्विगुण–त्रि० । "द्वित्योरुत्" ॥ ८ । १ । ९४ ॥ इतीकारस्योकारः । 'दुउणो । विउणो ।' प्रा० १ पाद । द्वाभ्यां गुण्यते, गुण–धञर्थे कः । द्वाभ्यां गुणिते, वाच० ।

दुऊल–दुकूल–न० । 'दुअल्ल' शब्दार्थे, प्रा० १ पाद ।

दुओणय–द्व्यवनत–न० । अवनतिरवनतमुत्तमाङ्गप्रधानं प्रणमनमित्यर्थः, द्वे अवनते यस्मिन् तद् द्व्यवनतम् । द्विरवनम्य वन्दने, आव० । एवं यदा प्रथममेव "इच्छामि खमासमणो वंदिउं जावणिज्जाए निसीहियाए ।" इत्यभिधाय छन्दोऽनुज्ञापनायाऽवनतमिति द्वितीयं पुनर्यदा कृताऽवर्तो निष्क्रान्तः "इच्छामि" इत्यादि सूत्रमभिधाय छन्दोऽनुज्ञापनायैवाऽवनतमिति । आव० ३ अ० । कृ० । प्रव० ।

दुंदमिअ–देशी–गद्गर्गर्जिते, दे० ना० ५ वर्ग ४५ गाथा ।

दुंदुभग–दुन्दुभक–पुं० । अष्टादशे महाग्रहे, " दो दुंदुभगा ।" स्था० २ ठा० ३ उ० । चं०प्र० । कल्प० । जं० । सू० प्र० ।

दुंदुभि–दुन्दुभि–पुं० । ढक्काविशेषे, भ० ६ श० ३३ उ० । आ० चू० । औ० । रा० । कल्प० । जं० । महत्प्रमाणे मुरजे, नि० चू० १ उ० । भेर्य्याकारे संकटमुखे देवाऽऽतोद्यविशेषे, रा० । ज्ञा० । प्रश्न० । जी० । ह्रा० ।

दुंदुमिणी–देशी–रूपवत्याम्, दे० ना० ५ वर्ग ५ गाथा ।

दुंदुहि–दुन्दुभि–पुं० । ' दुंदुभि ' शब्दार्थे, रा० ।

दुंबती–देशी–सरिति, दे० ना० ५ वर्ग ४८ गाथा ।

दुक्कम–दुष्कृत–न० । दुष्टं कृतं दुष्कृतम् । पापे, सूत्र० १ श्रु० ५ अ० ३ उ० । आचा० । आ० म० । स० । असदनुष्ठाने, असातावेदनीयोदयरूपे पापफले, सूत्र० १ श्रु० ५ अ० १ उ० । पापकरणे, सूत्र० १ श्रु० ४ अ० १ उ० । आ० म० । अकर्तव्ये, आव० ४ अ० । पापविपाके, सूत्र० २ श्रु० १ अ० । दुःखे च । सूत्र० १ श्रु० ५ अ० २ उ० । " मिच्छाए मणदुक्कमाए वयदुक्कडाए कायदुक्कडाए । " आव० ३ अ० । " दुक्कर्मं ति वा, सावज्जमणुचिन्नं ति वा, पावकम्ममासेवितं ति वा वितहमाइन्नं ति वा पडिसेवियं ति वा । " आ० चू० १ अ० ।

दुक्कमकम्म–दुष्कृतकर्म्म–न० । दुष्टं कृतं दुष्कृतं, तदेव कर्म्मानुष्ठानम् । पापानुष्ठाने, दुष्कृतेन कर्म्म ज्ञानाऽऽवरणाऽऽदिकं तद् दुष्कृतकर्म । सूत्र० १ श्रु० ५ अ० २ उ० ।

दुक्कडकम्मकारि(ण्)–दुष्कृतकर्मकारिण्–पुं० । दुष्कृतं कर्म्म कर्तुं शीलं येषां ते दुष्कृतकर्म्मकारिणः । पापानुष्ठानकरणशीलेषु, सूत्र० १ श्रु० ५ अ० २ उ० ।

दुक्कडकारि (ण्)–दुष्कृतकारिण्–पुं० । पापविधायिनि, सूत्र० १ श्रु० ८ अ० ।

दुक्कडगरहा–दुष्कृतगर्हा–स्त्री० । दुष्कृतेष्विहपरभवगतेषु गर्हा । अकर्तव्यबुद्धिसारापरसाक्षिकायाम्, आव० १ अ० ।

दुक्कडतावि (ण्)–दुष्कृततापिन्–पुं० । दुष्कृतेनातिचाराऽऽसेवनेन तप्यते अनुतापं करोतीत्येवंशीलः दुष्कृततापी । अतिचाराऽऽसेवनानुतापकरणशीले, पञ्चा० १५ विव० ।

दुक्कमि(ण्)–दुष्कृतिन्–त्रि० । दुष्कृतं विद्यते येषां ते दुष्कृतिनः नारकेषु, सूत्र० १ श्रु० ५ अ० १ उ० । महापापेषु, सूत्र० १ श्रु० ५ अ० २ उ० ।

दुक्कमिय–दुष्कृतिक–त्रि० । दुष्कृतमसदनुष्ठानं पापं वा तत्फलं वा असातावेदनीयोदयरूपं तद्विद्यते यस्मिन् स दुष्कृतिकः । असदनुष्ठायिनि, सूत्र० १ श्रु० ५ अ० १ उ० ।

दुक्कप्प–दुष्कल्प–पुं० । पार्श्वस्थाऽऽदीनां प्रवचननिन्दितानां कल्पे, पं० भा० ।

दंसणनाणचरित्ते, तवविणए णिच्चकाल पासत्थो ।
एएहिं निंदओ पव–यणम्मि तं जाणसु दुक्कप्पं ॥
दुक्कप्पविहारीणं, एगंताऽऽसातणाएँ बंधो य ।
आसायणाएँ बंधे–ण य दीहो होतु संसारो ॥ पं०भा० ।

ऽयाणि दुक्कप्पो । तत्थ सो दंसणाईहिं पासत्थो अत्थइ, निच्चं निंदिओ गरहिओ य पवयणम्मि, जेण नाई ठाणाणि पडिसेवइ । गाहा–(दुक्कप्पविहारीणं)पासत्थिइं । पं० चू० ।

दुक्कय–दुष्कृत–त्रि० । पापे, षो० १३ विव० । पापकर्मणि, प्रश्न० १ आश्र० द्वार ।

दुक्कर–दुष्कर–त्रि० । कृ–खल् । दुष्करमेव दुष्करम् । कष्टसाध्ये, पञ्चा० १३ विव० । कर्तुमशक्ये, आव० ५ अ० । नि० चू० । ज्यो० । " अहो ! दुक्करकारअ । " भा० २ पाद । " पमिअव्व पइ मणोरहइं, दुक्करु दइउ करेइ । " प्रा० ४ पाद । दुःखेन क्रीयते । कृ–खञ् । आकाशे, वाच० । माघे, रात्रौ, चतुर्थीयस्नाने, दे० ना० ५ वर्ग ४ गाथा ।

दुक्करकरण–दुष्करकरण–न० । दुःकरकारितायाम्, द्रव्य० १० उ० । नि० चू० । " दुक्करकरणं च कहं ?, उच्यते–ण दुक्करं जं पमिसेवियं तं जीवस्स संफुडाणुकूलं दुक्करं, तओ जं चित्तनिवित्तिकरणं तं दुक्करकरणं ति । " नि० चू० २० उ० ।

दुक्काल–दुष्काल–पुं० । धान्यमहर्घताऽऽदिना दुष्टे समये, जं० १ वक्ष० ।

दुक्कुक्कणिआ–देशी–पतद्ग्रहे, दे० ना० वर्ग ४७ गाथा ।

दुक्कुलजम्मप्पसत्थि–दुष्कुलजन्मप्रशस्ति–स्त्री० । दुष्कुलेषु शाकयवनशबरबर्बराऽऽदिसबन्धिषु यज्जन्म असदाचाराणां प्राणिनां प्रादुर्भावस्तस्य प्रशस्तिः प्रज्ञापना । असदाचाराणां प्रादुर्भावप्रज्ञापनायाम्, ध० । तत्र कोत्पद्यन्ते किमित्याह–" दुःखपरम्परानिवेदनमिति । " दुःखानां शारीरमानसाशर्मलक्षणानां या परम्परा प्रवाहस्तस्या निवेदनं प्ररूपणम् । यथा–असदाचारपरायणा जीवा दुष्कुलेषूत्पद्यन्ते, तत्र चासुन्दररूपैरसगन्धस्पर्शशरीरभाजां तेषां दुःखनिराकरणनिबन्धनस्य धर्मस्य स्वप्नेऽप्यनुपलम्भाद् हिंसाऽनृतस्तेयाब्रह्मकर्म्मप्रवणानां नरकाऽऽदिफलः पापकर्म्मोपचय एव संपद्यते, तदभिभूतानामिह परत्र चाऽव्यवच्छिन्नानुबन्धा दुःखपरम्परा प्रसूयते । यदुच्यते–" कर्मभिरेव स जीवो, विवशः संसारचक्रमुपयाति । द्रव्यक्षेत्राद्या भा–वनिबन्धमाबध्नते बहुशः ॥ १ ॥" ध० १ अधि० ।

दुक्कुड–देशी–असहने, दे० ना० ५ वर्ग ४४ गाथा ।

दुक्ख–दुःख–न० । " वाऽऽर्षत्वाच्चैषामेवमादेशः " ॥ ८ । १ । ३३ ॥ इति पुंसि वा प्रयोगः । ' दुक्खा । दुक्खाइं ।' प्रा० १ पाद । " कगटसतदपसवशे ऽक ऽ पामूर्द्धे लुक् " ॥ ८ । २ । ७७ ॥ एषां संयुक्तवर्णसबन्धिनामूर्ध्वं स्थितानां लुग् भवति । दुःखम् । प्रा० २ पाद । दुःखं करोति दुःखयति, दुःखयतीति दुःखम् । पापकर्मणि, उत्त० ६ अ० । सूत्र० । प्रश्न० । उपा० । महा० । आचा० । औ० । दुष्करे, बृ० ६ उ० । क्लेशे, स० ६ समo । संसारे, उत्त० ३२ अ० । रोगे, उत्त० २ अ० । सूत्र० । अमनोज्ञसमुत्पादे, सूत्र० १ श्रु० १ अ० ३ उ० । दुष्कृतकर्मफले, दश० १ अ० । असातावेदनीयोदये, आचा० २ श्रु० ४ चू० १ अ० । प्रतिकूलतयाऽवभासमाने राजसे चित्तधर्मे, ह्रा० ३१ ह्रा० । उदयेन असातवेदनीयोदयं प्राप्ते (सूत्र० १ श्रु० २ अ० ३ उ०) कष्टे, आ० म० १ अ० २ खण्ड । आचा० । अज्ञाने, मोहनीये, आचा० १ श्रु० ५ अ० ५ उ० । असुखरूपे, भ० ५

श० ६ ब० । तापानुभवरूपे, दश० १ अ० । असंवेद्ये, सूत्र० १ श्रु० २ अ० ३ उ० । विविधबाधनायोगरूपे, सूत्र० १ श्रु० १२ अ० । असातोदयाऽऽदिरूपे कर्मफले, सूत्र० १ श्रु० १ अ० १ उ० । अष्टप्रकारके कर्मणि, सूत्र० १ श्रु० ए अ० । असातोदये, अष्ट० २१ अष्ट० । आचा० । सूत्र० । असातोदयकारणे, आचा० १ श्रु० ३ अ० ४ उ० । प्रश्न० । सूत्र० । उत्त० । असातवेदनीयविपाकजनिते, आचा० १ श्रु० ५ अ० २ उ० । परीषहोपसर्गजनितपीडायां च । सूत्र० १ श्रु० ७ अ० ।

"दुःखं स्त्रीकुक्षिमध्ये प्रथममिह भवेद् गर्भवासे नराणां,
बालत्वे चाऽपि दुःखं मललुलिततनुक्षीरपयःपानमिश्रम् ।
तारुण्ये चाऽपि दुःखं भवति विरहजं वृद्धभावोऽप्यसारः,
संसारे रे मनुष्याः! वदत यदि सुखं स्वल्पमप्यस्ति किञ्चित्॥" भ० र० ।

तथाहि-

जाणंति अणुहवंति य, अणुजम्म जरामरणसंभवे दुक्खे ।
न य विसयेसु विरज्जंति, गोयमा! दुग्गइगमणपत्थए जीवे ॥
महा० ६ अ० ।

दुक्खमेवमवीमासं, सव्वेसिं जगजंतुणं ।
एगं समयं तसभावे, जं सम्मं अहियासियं ॥ महा० २ अ० ।

सर्वं परवशं दुःखं, सर्वमात्मवशं सुखम् ।
एतदुक्तं समासेन, लक्षणं सुखदुःखयोः ॥ १ए ॥

सर्वं परवशं पराधीनं दुःखं, तल्लक्षणयोगात् । सर्वमात्मवशमपराधीनं सुखम्, अत एव हेतोः, एतदुक्तं मुनिना संक्षेपेण समासेन, लक्षणं स्वरूपं सुखदुःखयोः । इत्थं च ध्यानजमेव तत्त्वतः सुखं, न तु पुण्योदयजन्यमपीत्यावेदितं भवति । तदाह-" पुण्यापेक्षमपि ह्येवं, सुखं परवशं स्थितम् । ततश्च दुःखमेवैतद्, ध्यानजं तात्त्विकं सुखम् ॥ १ ॥ " द्वा० २४ द्वा० ।

सूईहिं अभिगवत्ताहिं, संजिन्नस्स निरंतरं ।
जावइयं गोयमा ! दुक्खं, गब्भे अट्ठगुणं तओ ॥
गब्भाओ निप्पट्टंतस्स, जोणिजंतुनिपीलणे ।
कोमीगुणं तयं दुक्खं, कोमाकोमीगुणं पि वा ॥
जायमाणाण जं दुक्खं, मरमाणाण जंतुणो ।
तेण दुक्खविवागेणं, जाइं न सरंति अप्पणो ॥ महा० ५ अ० ।

एगे दुक्खे जीवाणं ।

(एगे दुक्खे) एकमेवान्तिमजन्मग्रहणसम्भवं दुःखं यस्य स एकदुःखः । "एगे अदुक्खे त्ति" पाठान्तरे त्वेकश्चैवाऽऽख्या संशुद्धाऽऽदिर्व्यपदेशो यस्य न त्वसंशुद्धः, संशुद्धासंशुद्ध इत्यादिकोऽपि व्यपदेशान्तरनिमित्तस्य कषायाऽऽदेरभावादिति संभवस्येकधाऽऽख्यः । एकधा भङ्गो वा जीवो यस्य स तथेति जीवानां प्राणिनामेकवृत एक इवाऽऽत्मोपम इत्यर्थः । एकान्तहितवृत्तित्वात् । एकत्वं चास्य बहूनामपि समस्वभावत्वादिति । अथवा-पक्षेत्यादिसूत्रान्तरमुक्तरूपसंशुद्धादन्येषां स्वरूपप्रतिपादनापरं, तत्र प्राकृतत्वाद् प्रत्येकमेकं दुःखं प्रत्येकैकदुःखं जीवानां स्वकृतकर्मफलभोगित्वात् । किंभूतं तदित्याह-एकभूतमनन्यतया व्यवस्थितं प्राणिषु, न साङ्गोपाङ्गानामिव बाह्यमिति । स्था० १ ठा० ।

जीवानां दुःखवर्णकः-

काउं गर्भेति दुक्खेहिं, मणुया पुन्नेहिं उज्झिया ।
संखित्तमिमं भणियं, सव्वेसिं जगजंतुणं ॥
दुक्खं माणुसजाईणं, गोयम ! जं तं निबोधत ।
जमणुसमयमणुभवंताण, सयहा जव्वेइयाण वि ॥
निव्विन्नाणं पि दुक्खेहिं, वेरग्गं न तहा वि जवे ।
दुविहं समासओ मुणसु, दुक्खं सारीर माणसं घोरं ॥
एए चेव महारोदं, तिविहं एक्केक्कयं भवे ।
घोरं नाणमुहुत्त, घोरपयंडं महारोदं ॥
अणुसमयमविस्सामं, मुण ..... ।
घोरं मणुस्सजाईणं, घोरपयंडे मुणे तिरिच्छासु ॥
पुत्रो बलिष्ठो, दुहिता रेवती। सा च गोकुलग्रामे संगमेन परिणीता, प्रियमनी स्वाऽऽयुःक्षयात् पञ्चत्वमुपगता, धनदत्तोऽपि संसारभयभीतः प्रव्रज्यामग्रहीत्, गुरुभिश्च सार्द्धं विहरति। ततः कालान्तरे पुनरपि यथाविहारक्रमं तत्रैव ग्रामे समागतो निजदुहितुर्देवकुल्यां वसताववस्थात्। तदानीं च तयोर्द्वयोरपि ग्रामयोः परस्परं वैरं वर्तते स्म। विस्तीर्णग्रामवासिना च गोकुलेन गोकुलग्रामस्योपरि धाटी सूचिता, धनदत्तश्च तन्निवारणाय ग्रामे भिक्षायै व्रजितवांस्ततो देवकुल्यया दुहित्रा ज्ञप्तायां प्रणिपतः-यथा हे पितः! त्वं गोकुलग्रामे यास्यसि, तदा निजदौहित्र्या रेवत्याः कथय-यथा तव जनन्या संदिष्टम्-अद्य ग्रामस्योपरि ब्रह्मधाटया समागमिष्यति, ततः सकलमपि स्वकीयसैन्यं सन्नद्धं स्थापयेरिति। ततः साधुना तस्यै कथितं, तया च निजभर्तुः, तेन च सकलग्रामस्य कथितम्। ततः सर्वोऽपि ग्रामः सन्नद्धबद्धकवचोऽभवत्, आगतश्च द्वितीयदिने धाटया विस्तीर्णग्रामो, जातं परस्परं महद्युद्धम्, तत्र सुन्दरो बलिष्ठश्च धाटया सह गतो, संगमश्च गोकुलग्रामे वसति, त्रयोऽपि च युद्धे पञ्चत्वमुपजग्मुः, देवकी च पतिपुत्रजामातृमरणमाकर्ण्य विह्वलितुं प्रावर्तिष्ट, लोकश्च तन्निवारणाय समागतोऽवादीत्-यदि गोकुलग्रामो धाटीमागच्छन्तीं नाऽज्ञास्यत्, ततोऽसन्नद्धो जायोत्स्यत्। तथा च न पत्यादयो म्रियेरन्। ततः केन दुरात्मना गोकुलग्रामो ज्ञापितः? एतच्च लोकस्य वचः श्रुत्वा संजातकोपा सैवमवादीत्-मया अज्ञानत्वया पित्रा दुहितुः संदिष्टं, ततस्तेन साधुवेषविडम्बकेन मत्पतिपुत्रजामातृमारणेन पित्रा ज्ञापितः। ततः स लोके स्थाने स्थाने धिक्कारं लभते, प्रवचनस्य च साधिक्यमुद्दयादि। सूत्रं सुगमम्। पिं० । पञ्चा० । ध० । ग० । दर्श० । नि० चू० । दूतविद्यायां च । स्व० १ उ० ।

दूईपिंड–दूतीपिण्ड–पुं० । कार्यसङ्कटनाय दूत्यं विधत्ते इति दूतीपिण्डः । द्वितीये उत्पादनादोषे, आचा० २ श्रु० १ चू० २ अ० १५ उ० ।

जे भिक्खू दूईपिंडं भुंजइ, भुंजंतं वा साइज्जइ ॥ ६० ॥

निहिखेदेसगं जेत्ति, आणेति वा, अ तप्पिणमित्तं पिंडं भमति, सो दूतीपिंडो ।

गाहा-

जे भिक्खू दूतिपिंडं, गेण्हेज्ज सयं तु अहव सातिज्जे ।
सो आणा अणवत्थं, मिच्छत्तविराहणं पावे ॥१३६॥

अप्पणा गेण्हति, अण्णं वा गेण्हंतं अणुजाणाति, तस्स आणादिया दोसा, चउलहुं च पच्छित्तं ।

(अमेतनपाठस्तु पिण्डनिर्युक्तिपाठतो गतार्थः)

नवरं द्वितियपदे इमेहिं कारणेहिं करेज्जा-

असिवे ओमोयरिए, रायदुट्ठे भए व गेलण्णे ।
अद्धाणरोहए वा, कुज्जा तं वा वि जयणाए ॥१४५॥

पूर्ववत् व्याख्या । नि० चू० १३ उ० ।

दूण–देशी-हस्तिनि, दे० ना० ५ वर्ग ४५ गाथा ।

दूत–दूत–पुं० । अन्येषां ज्ञात्वा राजाऽऽदेशनिवेदके, औ० । रा० । कल्प० । ज्ञा० । भ० ।

दूतविज्जा–दूतविद्या–स्त्री० । विद्याभेदे, व्य० १ उ० । काचिद् दूतविद्या भवति, तया च दूतविद्यया यो दूत आगच्छति, तस्य देशस्थानमापद्यते, तेनेतरस्य देशस्थानमुपशाम्यति । व्य०५उ० ।

दूभगसत्ता–दुर्भगसत्त्वा–स्त्री० । दुर्भगः सत्त्वः प्राणी यस्याः सा तथा । दुर्भगप्राणिकायां योषिति, ज्ञा० १ श्रु० १६ अ० ।

दूभगनिंबोलिया–दुर्भगनिम्बगुलिका–स्त्री० । निम्बगुलिकेव निम्बफलमिव अत्यनादेयत्वसाधर्म्याद् दुर्भगानां मध्ये निम्बगुलिका दुर्भगनिम्बगुलिका। दुर्भगत्वान्निम्बगुलिकावदनादेयायाम्, ज्ञा० १ श्रु० १६ अ० ।

दुर्भगनिर्बोलिता–स्त्री० । दुर्भगानां मध्ये निर्बोलिता निर्मथिता निमज्जिता दुर्भगनिर्बोलिता । दुर्भगानां मध्ये निमज्जितायाम्, ज्ञा० १ श्रु० १६ अ० ।

दूमग–दावक–त्रि० । उपतापके, प्रश्न० ३ आश्र० द्वार ।

दूसण–दूषण–न० । उपतापने, प्रश्न० ३ आश्र० द्वार ।

धवलण–न० । श्वेतीकरणे, व्य० ४ उ० ।

दुर्मनस्–न० । त्रि० । दुष्टमनसि, सूत्र० १ श्रु० २ अ० २ उ० ।

दूमिअ–धवलित–त्रि० । " धवलेर्डुमः " ॥ ८ । ४ । २४ ॥ इति धवलयतेर्ण्यन्तस्य डुमादेशे " स्वराणां स्वरा बहुलम् । " ॥८ । ४ । २३८॥ इति दीर्घत्वम् । 'दूमिअं ।' प्रा० ४ पाद । सेटयादिना श्वेतीकृते, ध० ३ अधि० । कल्प० । ज्ञा० । नि० चू० । दूमिया नाम सुकुमारत्वेन सुकुमारीकृतकुड्या, सेटिकया धवलीकृतकुड्या वा । बृ० १ उ० ।

दूमिय–धवलित–त्रि० । ' दूमिअ ' शब्दार्थे, प्रा० ४ पाद ।

दूय–दूत–पुं० । अन्येषां गत्वा राजाऽऽदेशनिवेदके, भ० ७ श० ६ उ० । औ० ।

दूयकम्म–दूतकर्म–न० । द्वितीये उत्पादनादोषे, उत्त० २४ अ० । यदा गृहस्थगृहे गुप्तप्रकटसमाचारान् स्वजनाऽऽदीनां कथयित्वाऽऽहारं गृह्णाति तदा दूतकर्माऽऽख्यो द्वितीयो दोषः । उत्त० २४ अ० ।

दूयपलास–दूतपलाश–न० । वाणिजकग्रामनगरस्येशानकोणे स्वनामख्याते चैत्ये, कल्प० १ अ० ।

दूयविज्जा–दूतविद्या–स्त्री० । विद्याभेदे, व्य० १ उ० ।

दूर–दूर–त्रि० । विप्रकृष्टे, भ० १ श० १ उ० । नि० चू० । अगोचरे च । भ० २ श० १ उ० । विप्रकर्षे, ज्ञा० १ श्रु० १ अ० । नि० । अत्यर्थे च । स० । दीर्घकाले, दूरवर्तित्वान्मोक्षे च । पुं० । सूत्र० १ श्रु० २ अ० २ उ० ।

दूरगइय–दूरगतिक–त्रि० । सौधर्माऽऽदिगतिकेषु, स्था० ८ ठा० ।

दूरपाय–दूरपात–न० । दूरात्पतने, प्रश्न० ३ आश्र० द्वार ।

दूरय–दूरग–त्रि० । असमीपवर्तिनि, सूत्र० १ श्रु० ५ अ० २ उ० ।

दूरसुच्चंत–दूरश्रूयमाण–त्रि० । दूरे श्रूयमाणे, प्रश्न० ३ आश्र० द्वार ।

दूरालइय–दूरालयिक–त्रि० । दूरालयो मोक्षस्तन्मार्गो वा, स विद्यते यस्येति मत्वर्थीयठन्, दूरालयिकः। मोक्षगामिनि, आचा० १ श्रु० ३ अ० ३ उ० ।

दूराश्रय-दूराश्रय-पुं० । मोक्षे, मोक्षमार्गे च । आचा० १ श्रु० ३ अ० ३ उ० ।

दूरुज्झ-दूरवत्-त्रि० । दूरस्थे, आव० ४ अ० ।

दूरुद्दिट्ठा-दुरारुह्य-अव्य० । दुष्टमारुह्येत्यर्थे, कृपा० २ अ० ।

दूरुहमाणी-दुरारोहन्ती-स्त्री० । दुष्टमारोहन्त्याम्, दशा० ५ अ० १ उ० ।

दूस-दुष-धा० । दिवा०-पर०-अक०-अनिट् । वैकृत्ये, भाच० । "रुषाऽऽदीनां दीर्घः" ॥ ८ । ४ । २३५ ॥ इति स्वरस्य दीर्घः । 'दूसइ ।' प्रा० ४ पाद । दुष्यति । अदुषत् । अदुष्यत् । भाच० ।

दूष्य-न० । तन्तुसन्तानसम्भवे, जं० २ वक्ष० । वस्त्रे, ज्ञा० १ श्रु० १ अ० । उत्त० । आचा० । आ० म० । नि० चू० । आच्छादनवस्त्रे, औ० । वस्त्रजातौ, जी० ३ प्रति० ४ उ० । चीवांशुकाऽऽदौ च । सूत्र० २ श्रु० २ अ० । प्रव० ।

दूसंतर-दूष्यन्तर-न० । वस्त्ररचितभित्यन्तरे, उत्त० १६ अ० ।

दूसगणि (ण्)-दूष्यगणिन्-पुं० । नन्द्यध्ययनकर्तुर्देवर्द्धिवाचकस्य स्वनामख्याते गुरौ, नं० ।

दूसण-दूषण-न० । दूष-णिच्-ल्युट् । कलङ्के, तं० । रावणस्य मातृष्वसेये भ्रातरि च । वाच० ।

दूसपट्टपरिपूय-दूष्यपट्टपरिपूत-न० । वस्त्रपट्टगालिते, तं० ।

दूसपणग-दूष्यपञ्चक-न० । वस्त्रपञ्चके, दश० ।

दुविहं च दूसपणगं, समासओ तं पि होइ नायव्वं ।
अप्पडिलेहियदूसं, दुप्पडिलेहं च विन्नेयं ॥ ८ ॥ दश० १ अ० ।

अप्पमिलेहियदूसे, तूली उवहाणए य नायव्वं ।
गंडुवधाणाऽऽलिंगिणि, मसूरए चेव पोत्तमए ॥६८५॥

दूष्यं वस्त्रं तद् द्विविधम् । अप्रत्युपेक्ष्यं, दुष्प्रत्युपेक्षं च । तत्र यत्सर्वथाऽपि न प्रत्युपेक्षितुं शक्यते तदप्रत्युपेक्ष्यम्, यच्च सम्यक् न शक्यते प्रत्युपेक्षितुं तद् दुःप्रत्युपेक्ष्यम् । तत्र अप्रत्युपेक्षितदूष्यपञ्चकं यथा-तूली सुसंस्कृतो ऋतभूतोऽर्कतूलाऽऽदिभृतो वा विस्तीर्णः शयनीयविशेषः । तथा उपधानकं हंसरोमाऽऽदिपूर्णमुच्छ्रीर्षकम् । तथा उपधानकस्योपरि कपोलप्रदेशे या दीयते सा गण्डोपधानिका, गल्लमसूरिकेत्यर्थः । तथा जानुकूर्पराऽऽदिषु वा दीयते सा आलिङ्गिनी । तथा वस्त्रकृतं चर्मकृतं वा वृत्तं रूक्षाऽऽदिपूर्णमासनं मसूरकः । एतानि सर्वाण्यपि पोतमयानि वस्त्रमयानि प्रायेणेति ।

अथ दुष्प्रत्युपेक्षितपञ्चकमाह-

पल्हवि कोयवि पावा-रग तवए तह य दाढगाली य ।
दुप्पडिलेहियदूसे, एयं बीयं भवे पणगं ॥ ६८५ ॥

पल्हविः, कोयविः, प्रावारकः, तवकं, तथा दृढगालिश्च, एतद् दुष्प्रत्युपेक्षितदूष्यविषयं द्वितीयं पञ्चकं भवेत् ।

अथैतदेव व्याख्यानयन्नाह-

पल्हवि हत्थुत्थरणं, कोयविओ रूयपूरिओ पगओ ।
दढगालि धोयपोती, सेसपसिद्धा भवे भेदा ॥ ६८६ ॥

पल्हविर्हस्त्यास्तरणं हस्तिनः पृष्ठे यदास्तीर्यते, अरक इत्यर्थः । येचान्ये आस्तरकाऽऽदयोऽल्परोमयुक्ता बहुरोमयुक्ता वा ते सर्वेऽप्यन्तर्भवन्ति । यदुक्तं निशीथचूर्णौ-"जे य बहू अत्थरगा इच्चाइमाणभेदा मउरोमा उब्भूतरोमा वा, ते सव्वे इत्थ निवयंति त्ति ।" (बहू अत्थरग त्ति) यः किल कट्टोपरि न्यस्यते । तथा कोयविको रुतपूरितः पटः, बूरुढीति यदुच्यते । ये चान्ये उल्लवणरोमाणो नेपालकम्बलप्रभृतयस्ते सर्वेऽप्यन्तर्भवन्ति । उक्तं च-" जे अन्ने एवमाइभेदा उल्लूणरोमा कंबलगादि ते सव्वे इत्थ निवयंति ।" तथा-दृढगालिर्धौतपोतिका ब्राह्मणानां संबन्धि सदृशपरिधानवस्त्रमित्यर्थः । ये चान्ये द्विसरसूत्रपट्टीप्रभृतयो भेदास्ते सर्वेऽत्र निपतन्ति । उक्तं च-" विरल्लिमाई भूरिभेदा सव्वे इत्थ निवयंति त्ति ।" (विरल्लिमाइ त्ति) दौरिकाप्रमुखा, शेषौ च प्रावारकतवकलक्षणौ प्रसिद्धावेव भेदौ । तत्र प्रावरकः सल्लोमकः पटः । स च माणिकाप्रभृतिकः । अन्ये तु प्रावारको बृहत्कम्बलः परियस्थिवेत्याहुः । प्रव० ८ द्वार । बृ० । अप्रतिलेखितदूष्यपञ्चके चैकाशानकम् । असत्यपेऽपि तदेव प्रायश्चित्तम् । जीत० ।

दूसमा-दुःषमा-स्त्री० । 'दुसमा' शब्दार्थे, प्र०६ श०७ उ० ।

दूसमित्त-दूष्यमित्र-पुं० । पाटलिपुत्रे मौर्यवंशनाथो सत्यमित्रे स्वनामख्याते राजनि, ती० ३० कल्प ।

दूसरणाम-दुःस्वरनाम-न० । 'दुसरनाम' शब्दार्थे, कर्म० ६ कर्म० ।

दूसरयण-दूष्यरत्न-न० । प्रधानवस्त्रे, ज्ञा० १ श्रु० १ अ० । कल्प० । औ० ।

दूसह-दुस्सह-पुं० । 'दुसह' शब्दार्थे, प्रश्न० १ आश्र० द्वार ।

दूसासण-दुःशासन-पुं० । "लुसयरुक्खसयसां शषसां दीर्घः" ॥ ८ । १ । ४३ ॥ इति प्राकृतलक्षणवशादुपरि लुसयकारस्य शस्याऽऽदेः स्वरस्य दीर्घः । 'दूसासणो ।' प्रा० १ पाद । धनामख्याते दुर्योधनभ्रातरि, वाच० ।

दूसिय-दूषित-त्रि० । दत्तदूषणे, प्राप्तदूषणे, अभिशस्ते, मैथुनापवादयुक्ते, वाच० । औ० ।

दूसियपंडग-दूषितपण्डक-पुं० । पण्डकभेदे, दूषितपण्डको द्विविधः-आसिक्तः, उपसिक्तश्च । बृ० । उपघातितपण्डकोऽपि द्विविधो-वेदोपघाते, उपकरणोपघाते च ।

तत्र दूषितं पण्डकं तावद्व्याख्यानयति-

दूसियवेओ दूसिय, दोसु वि वेएसु सज्जए दूसी ।
दूसेति सेसवेदो, दोसु व सेविज्जए दूसी ॥

दूषितो वेदो यस्य स दूषितवेदः, एष दूषित उच्यते । द्वयोर्वा नपुंसकपुरुषवेदयोः, अथवा नपुंसकस्त्रीवेदयोर्यः सज्जयति प्रसङ्गं करोति, स प्राकृतशैल्या दूषी भण्यते । यो वा शेषौ स्त्रीपुरुषवेदौ दूषयति निन्दति स दूषी, द्वाभ्यां वा-आस्यकपोलकाभ्यां यः सेव्यते, सेवते वा स दूषी ।

अस्यैव भेदानाह-

आसित्तो उसित्तो, दुविहो दूसी उ होइ नायव्वो ।

आसित्तो सावच्चो, अणवच्चो होइ ऊसित्तो ॥

स दूषी द्विविधो ज्ञातव्यो भवति-आसिक्तः,उपसिक्तश्च । आसिक्तो नाम-सापत्यो यस्यापत्यमुत्पद्यते, सबीज इति भावः । यस्तु निरपत्योऽपत्योत्पादने सामर्थ्यविकलो,निर्बीज इत्यर्थः । स उपसिक्त उच्यते । बृ० ४ उ० । नि० चू० । पं०भा० पं०चू० ।

दूसिया–दूषिका–स्त्री० दूषयति नेत्रं क्लिन्नं करोति । दूष-णिच्-ण्वुल् । वाच० । नेत्रयोर्मले, नि० चू० ३ उ० । स्था० ।

दूसहल–देशी-दुर्भगे, दे० ना० ५ वर्ग ४३ गाथा ।

दूहड–देशी-लज्जादुर्मनसि, दे० ना० ५ वर्ग ४८ गाथा ।

दूहव–दुर्भग–त्रि० । "त्वे दुर्भगसुभगे वः" ॥८ । २ । १७२॥ इति यस्य वः । 'दूहवो ।' अल्पभाग्ये, प्रा० १ पाद ।

दे–दे–अव्य० " दे संमुखीकरणे च । " ॥ ८ । २ । १९६ ॥ संमुखीकरणे संख्या आमन्त्रणे च दे इति प्रयुज्यते । " दे पस्सिअ ताव सुंदरि !, दे आपासिअ निअत्तसु । " प्रा० २ पाद ।

देअर–देवर–पुं० । " कगचजतदपयवां०–॥ ८ । १ । १७७ ॥ इत्यादिना वलुक् । 'देअरो ।' प्रा० १ पाद । वाच० । अनु० ।

देउल–देवकुल–न० । "यावत्तावज्जीवितोऽवर्कमानोऽवटप्रधारफदेवकुलैवमेवेतः " ॥ ८ । २ । १७१ ॥ इति सस्वरस्य वकारस्यान्तर्वर्त्तमानस्य वा लुक् । 'देउलं ।' प्रा० २ पाद । देवस्थाने, आ० म० १ अ० २ खण्ड । रा० ।

देउलदरिसण–देवकुलदर्शन–न० । देवप्रतिमादर्शने, पिं० ।

देउलिया–देवकुलिका–स्त्री० । यक्षाऽऽदीनामायतने, बृ० १ उ० २ प्रक० । देवकुलपरिपाट्यके, न० । ओघ० ।

देक्ख–दृश–धा० । रुधा०-पर०-सक०-अनिट् । आलुपद्यते, वाच० । "दृशो नियच्छपेच्छ०–" ॥ ८ । ४ । १८१ ॥ इत्यादिना देक्खाऽऽदेशः । 'देक्खइ ।' प्रा० ४ पाद । पश्यति । अदर्शत् । अद्राक्षीत् । वाच० ।

देज्ज–देय–त्रि० । दातुं योग्ये, ओ० १२ विभ० ।

देप्पिणु–दत्त्वा–अव्य० । " एप्पेप्पिणवेऽयेविधवः " ॥ ८ । ४ । ४४० ॥ इत्यपभ्रंशे क्त्वाप्रत्ययस्यैप्पिणवादेशः । दानं कृत्वेत्यर्थे, 'जेप्पि असेसु कसायबलु,देप्पिणु अभउ जयस्सु ।' प्रा० ४ पाद । अशेषकषायबलं जित्वा जगतोऽभयं दत्त्वा । प्रा० दुं० ४ पाद ।

देयड–दृतिकार–पुं० । शिल्पाऽऽचार्यभेदे, प्रज्ञा० १ पद । ज्ञा० ।

देर–द्वार–न० । "दारे वा" ॥८ । १ । ७९॥ इति द्वारशब्दे आत एत्वा । 'देरं ।' पक्षे-'दुआरं । दारं । बारं ।' निर्गमप्रवेशमुखे,प्रा० १ पाद ।

देवमहत्तर–देवलमहत्तर–पुं० । सूराऽऽचार्यशिष्ये दुर्गस्वामिगुरौ, अयमाचार्यो ज्योतिर्निमित्तशास्त्रेषु अतिविद्वानासीत् । जै० इ० ।

देव–पुं०–न० । देव–पुं० । "गुणाऽऽदयः क्लीबे वा" ॥ ७ । १ । ३४॥ इति वा क्लीबत्वम् । 'देवाणि ।' देवाः । प्रा० १ पाद । दीव्यन्ति निरुपमक्रीडामनुभवन्तीति देवाः । न० । दश० । स्था० । दिव्यन्ति यथेच्छं क्रीडन्तीति देवाः । आ० म० १ अ० १ खण्ड । प्रज्ञा० । स्था० । दीव्यन्ति स्वरूपे इति देवाः । अष्ट० २६ अष्ट० ।

तओ णाणाइं देवे पीहेज्जा । तं जहा–माणुस्सगं भवं,आरिए खेत्ते जम्मं, सुकुलपच्चायाइं ।

(पीहेज्ज त्ति) स्पृहयेदभिलषेत् । आर्यक्षेत्रमर्कमर्कैषर्किंशतिजनपदानामन्यतरं मगधाऽऽदिसुकुले इक्ष्वाकादौ देवलोकात्प्रतिनिवृत्तस्याजातिर्जन्म, आयातिर्वा आगतिः, सुकुलप्रत्यायातिर्वा, तामिति । स्था० ३ ठा० ३ उ० । (देवपरितापः ' परिताव ' शब्दे वक्ष्यते)

इच्चेएहिं तिहिं ठाणेहिं देवे चइस्सामि त्ति जाणइ–विमाणाभरणाइं णिप्पभाइं पासित्ता, कप्परुक्खगं मिलायमाणं पासित्ता, अप्पणो तेयलेस्सं परिहायमाणं जाणित्ता ।

विमानाऽऽभरणानां निष्प्रभत्वमौत्पातिकं,तच्चक्षुर्विभ्रमरूपम्।(कप्परुक्खगं ति)चैत्यवृक्षम,(तेयलेस्सं ति)शरीरदीप्तिं,सुखासिकां वा । 'इच्चेएहिं' इत्यादिनिगमनम् । भवन्ति चैवंविधानि लिङ्गानि देवानां च्यवनकाले । उक्तं च–"माल्यम्लानिः कल्पवृक्षप्रकम्पः, श्रीह्रीनाशो वाससां चोपरागः । दैन्यं तन्द्रा कामरागाङ्गभङ्गो, दृष्टेर्भ्रान्तिर्वेपथुश्चारतिश्च ॥ १ ॥" इति । स्था० ३ ठा० ३ उ० । दीव्यन्ति क्रीडादिधर्मभाजो भवन्ति,दीव्यन्ते स्तूयन्ते ये ते देवाः। स्था० ४ ठा० १ उ० । " दिवु " क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु दिवेरच्प्रत्यये देव इति सिद्धम् । दश० १ अ० । नवनपत्यादिषु, आ० म० १ अ० २ खण्ड । आव० । आ० चू० । दर्श० । ओघ० । पिं० । स० । स्था० । ज्ञा० । प्रज्ञा० । औ० । सूत्र० । उत्त० । विशे० । ज्योतिष्कवैमानिकेषु, उत्त० ११ अ० । अनुत्तरसुरान्तेषु, औ० ।

देवानामस्तित्वं,साध्यत्वसप्तमं गणधरं मौर्यं प्रत्याह भगवान्महावीरः–

ते पव्वइए सोउं, मोरिओ आगच्छइ जिणसगासं ।
वच्चामि ण वंदामी, वंदित्ता पज्जुवासामि ॥ १८६४ ॥
आभट्ठो य जिणेणं, जाइजरामरणविप्पमुक्केणं ।
नामेण य गोत्तेण य,सव्वण्णू सव्वदरिसी णं ।१८६५।
गाथाद्वयमपि प्रकटार्थम् ॥ १८६४ ॥ १८६५ ॥

आभाष्य ततः किमुक्तः ?, इत्याह–

किं मण्णे अत्थि देवा,उयाहु नत्थि त्ति संसओ तुज्झ ।
वेयपयाण य अत्थं,न जाणसी तेसिमो अत्थो ।१८६६।

हे आयुष्मन् मौर्य ! त्वमेवं मन्यसे-किं देवाः सन्ति, न वेति, उभयथाऽपि वेदपदश्रवणात् ? तथाहि-"स एष यज्ञायुधी यजमानोऽञ्जसा स्वर्गलोकं गच्छति।" इत्यादि । तथा–"अपाम सोमममृता अभूम,अगमन् ज्योतिरविदाम देवान्,किं नूनमस्मान्तृणवदरातिः,किमु मूर्तिममृतमर्त्यस्य।" इत्यादि । तथा'को जानाति मायोपमान् देवान् गीर्वाणानिन्द्रयमवरुणकुबेराऽऽदीन् ।' इत्यादि। एतेषां च वेदपदानामयमर्थस्तव बुद्धौ प्रतिभासते, यथा स एष यज्ञ एव दुरितवारणक्षमत्वादायुधं प्रहरणं यस्यासौ यज्ञायुधी, यजमानोऽञ्जसा प्रगुणेन न्यायेन स्वर्गलोकं गच्छति, इति देवसत्ताप्रतिपत्तिः । तथा अपाम-पीतवन्तः, सोमं लतारसम्, अमृता अमरणधर्माणः, अभूम च्युताः स्म, अगमन् गताः, ज्योतिः स्वर्गम्, अविदाम देवान्देवत्वं प्राप्ताः स्म, किं नूनमस्मादृद्धे तृणवत्करिष्यति, कोऽसावित्या-

ह-अरतिः व्याधिः,तथा किमु प्रश्ने,सूतिं जराम्, अमृतमर्थस्येति-अमृतत्वं प्राप्तस्य मर्त्यस्य, पुरुषस्येत्यर्थः । अमरणधर्मिणो मनुष्यस्य किं करिष्यन्ति जराव्याधय इति भावः । अत्रापि देवसत्ताप्रतिपत्तिः। "को जानाति मायोपमान्" इत्यादीनि तु देवाभावप्रतिपादकानि, अतस्तव संशयः । अथ्रुक्ताशयम् । यत्तेऽमीषां वेदपदानामर्थं त्वं न जानासि,चशब्दाद्युक्तिं च न वेत्सि। एतेषां हि वेदपदानां नायमर्थो, यस्तवाभिप्रेतः, किं त्वयं वक्ष्यमाणलक्षण इति ।

अत्र भाष्यम्-

तं मन्नसि नेरइया, परतंता दुक्खसंपहत्ता य ।
न तरंतीहागंतुं, सद्धेया सुव्वमाणा वि ॥ १८६७ ॥
सच्छंदयारिणो पुण, देवा दिव्वप्पभावजुत्ता य ।
जं न कयाइ वि दसिण-मुवेंति तो संसओ तेसु ।१८६८।

मौर्य ! त्वमेवं मन्यसे-नारकाः स्वकृतपापनरकपालाऽऽदिपरतन्त्राः पराधीनवृत्तयोऽतीवदुःखसंघातविह्वलाश्च न शक्नुवन्त्यत्राऽऽगन्तुमतः प्रत्यक्षीकरणोपायाभावात् श्रूयमाणा अपि श्रद्धेया भवन्तु, देवास्तु स्वच्छन्दचारिणो दिव्यप्रभावयुक्ताश्च तथाऽपि यस्माच्च कदाचिद्दर्शनपथमवतरन्ति, श्रूयन्ते च श्रुतिस्मृत्यादिषु, अतस्तेषु शङ्केति ॥ १८६७ ॥ १८६८ ॥

अत्रोत्तरमाह-

मा कुरु संसयमेए, सुदूरमणुयाइभिक्खजाईए ।
पेच्छसु पच्चक्खं चिय, चउव्विहे देवसंघाए ॥१८६९॥

मौर्यपुत्र ! देवेषु मा संशयं कार्षीस्त्वम्,एतानेव हि सुदूरमनुष्यार्थं मनुजाऽऽदिभ्यो भिक्षजातीयान् दिव्याऽऽभरणविलेपनवस्त्रमनसुमनोमालाऽलङ्कृतान् भवनपतिव्यन्तरज्योतिष्कवैमानिकलक्षणांश्चतुर्विधदेवसंघातान् मम वन्दनार्थमिहैव समवसरणाऽऽगतान् प्रत्यक्षत एव पश्येति ॥ १८६९ ॥

अथैतद्दर्शनात्पूर्वं य आसीत्संशयः, स युक्तोऽभवत्।

नैवम् ! कुतः ?, इत्याह-

पुव्वं पि न संदेहो, जुत्तो जं जोइसा सपच्चक्खं ।
दीसंति तक्कया वि य, उवघायानुग्गहा जगओ।१८७०।

इह समवसरणाऽऽगतदेवदर्शनात्पूर्वमपि तवान्येषां च संशयो न युक्तो, यद्यस्माच्चन्द्राऽऽदित्याऽऽदिज्योतिष्कास्त्वया सर्वेणापि च लोकेन स्वप्रत्यक्षत एव सर्वथा दृश्यन्ते, अतो देशतः प्रत्यक्षत्वात् कथं समस्तामरास्तित्वशङ्का ? । किं च-सन्त्येव देवाः, लोकस्य तत्कृतानुग्रहोपघातदर्शनात् । तथाहि-दृश्यन्ते क्वचित्कोचित्प्रदशाः कस्याऽपि किञ्चिद्धिनवप्रदानाऽऽदिनाऽनुग्रहं,तत्प्रहरणाऽऽदिना चोपघातं कुर्वन्तः, ततो राजाऽऽदिवत्कथमेते न सन्तीति ॥ १८७० ॥

पुनरपि परमाशङ्क्य ज्योतिष्कदेवास्तित्वं साधयन्नाह-

आलयमेत्तं च मई, पुरं व तव्वासिणो तह वि सिद्धा ।
जे ते देव त्ति मया, न य निलया निच्चपरिसुद्धा।१८७१।

अथैवंभूता मतिः परस्य भवेत्-आलया एव आलयमात्रं चन्द्राऽऽदिविमानानि, न तु देवाः, तत्कथं ज्योतिष्कदेवानां प्रत्यक्षत्वमभिधीयते ?। किं तद्यथा आलयमात्रमित्याह-(पुरं ति) यथा पुरं शून्यं लोकानामालयमात्रं स्थानमात्रं,न तु तत्र लोकाः सन्ति,एवं चन्द्राऽऽदिविमानान्यप्यालयमात्रमेव, न तु तत्र देवाः केचित्सिध्यन्ति, अतः कथं तेषां प्रत्यक्षत्वम् ? । अत्रोत्तरमाह-तथाऽपि तद्वासिन आलयवासिनः सामर्थ्याये सिद्धास्ते देवा इति मताः संमताः । यो ह्यालयः स सर्वोऽपि तद्विवासिना अधिष्ठितो दृष्टः,यथा प्रत्यक्षोपलभ्यमाना देवदत्ताऽऽद्यधिष्ठिता वसन्तपुराऽऽद्यालयाः, आलयाश्च ज्योतिष्कविमानान्यत आलयत्वान्यथानुपपत्तेर्ये तद्विवासिनः सिद्धास्ते देवा इति मताः । आह-ननु कथं ते देवाः सिध्यन्ति ?, यादृशा हि प्रत्यक्षेण देवदत्ताऽऽदयो दृश्यन्ते तेऽपि तादृशा एव स्युरिति । तदयुक्तम्। विशिष्टा हि देवदत्ताद्यालयेष्वभ्रङ्कषाद्यालया इत्यतस्तद्विवासिनोऽपि विशिष्टाः सिध्यन्ति, ते च देवदत्ताऽऽदिविलक्षणा देवा इति।

अपरस्त्वाह-नन्वालयत्वादित्ययं हेतुस्तद्विवासिजनसाधनेऽनैकान्तिकः, शून्याऽऽलयैर्व्यभिचारात् । अत्रोत्तरमाह-(न य निलया इत्यादि) न च निलया आलया नित्यमेव शून्या भवन्ति । अयमभिप्रायः-ये केचिदालयास्ते प्राग्, इदानीमेष्यति वा काले ऽवश्यमेव तद्विवासिभिरधिष्ठिता एव भवन्ति, न तु नित्यमेव परिशून्याः । ततो यदा तदा वा चन्द्राऽऽद्यालयनिवासिनो देवाः सिध्यन्ति, इति ॥ १८७१ ॥

पुनरप्यत्र परानिप्रायमाशङ्क्य परिहारमाह-

को जाणइ व किमेयं, ति होज्ज निस्संसयं विमाणाइं ।
रयणमयनभोगमणा-दिह जह विज्जाहराईणं ॥१८७२॥

यदि वा एवंभूता मतिः परस्य भवेद्यदुत-चन्द्राऽऽद्यालयस्थेन यक्षीयते नवक्ष्यतादिदं को जानाति किञ्चिद्भवेत्किं सूर्योऽग्निमयो गोलश्चन्द्रस्त्वब्मयः स्वभावतः स्वच्छः, आहोस्विदेवंभूता एवैते भास्वररत्नमया गोलका ज्योतिष्कविमानान्यतः कथमेतेषामालयत्वसिद्धिः ? । अत्र प्रतिविधानमाह- निःसंशयं विमानान्येषाम्, रत्नमयत्वे सति नभोगमनात्, पुष्पकाऽऽदिविद्याधरतपःसिद्धिविमानवदिति । अत्रविशेषणवचनाऽऽदित्यवच्छेदार्थं रत्नमयत्वविशेषणमिति ॥ १८७२ ॥

अपरमपि पराभिप्रायमाशङ्क्य परिहरन्नाह-

होज्ज मई माएयं, तहा वि तक्कारिणो सुरा जे ते ।
न य मायाइविगारा, पुरं व निच्चोवलंभाओ ॥१८७३॥

अथ परस्य मतिर्भवेत्तैते चन्द्राऽऽदिविमानान्यालयाः, किं तु मायेयं मायाविना केनाऽपि प्रयुक्ता । अत्रोच्यते-मायात्वमभीष्टमसिद्धं, बालमात्रेणैव भवताऽभिधानात्तथाऽप्यभ्युपगम्योच्यते, ये तत्कारिणः तथाविधमायाप्रयोक्तारस्ते सुराः सिद्धा एव, मनुष्याऽऽदीनां तथाविधवैक्रियकरणादर्शनात्, अभ्युपगम्य च मायात्वममीषामभिहितं, न चैते मायाऽऽदिविकाराः, नित्योपलम्भात्, सर्वेण सर्वदा दृश्यमानत्वादित्यर्थः, प्रभिरूपाटलिपुत्राऽऽदिपुरवदिति । मायेन्द्रजालकृतानि हि वस्तूनि न नित्यमुपलभ्यन्त इति नित्यविशेषणोपादानमिति ॥ १८७३ ॥

प्रकारान्तरेणाऽपि देवास्तित्वं साधयन्नाह-

जइ नारगा पवज्जा, पगिट्ठपावफलभोइणो तेणं ।
सुबहुगपुण्णफलभुजो, पवत्तियव्वा सुरगणा वि ।१८७४।

इह स्वकृतप्रकृष्टपापफलभोगिनस्तावत्कतिचिन्नारकाः प्रतिपत्तव्याः, ते च यदि प्रपन्नाः (तेणं ति) तर्हि तेनैव प्रकारेण स्वोपार्जितसुष्ठुबहुकपुण्यफलभुजः सुरगणा अपि प्रतिपत्तव्याः। अत्राऽऽह-नान्विदेवातिदुःखितनरास्तिर्यञ्चश्चातिदुःखिताः प्रहृष्ट-

पापफलभुजो भविष्यन्ति, तथा मनुष्या एवातिसुखिताः प्रकृष्टपुण्यफलभुजो भविष्यन्ति, किमहष्टनारकदेवपरिकल्पनयेति ?। तदयुक्तम्। प्रकृष्टपापफलभुजां सर्वप्रकारेणापि दुःखेन भवितव्यम्, न चातिदुःखितानामपि नरतिरश्चां सर्वप्रकारं दुःखं दृश्यते, सुखदर्शनाऽऽलोकाऽऽदिसुखस्य सर्वेषामपि दर्शनात्। प्रकृष्टपुण्यफलभुजामपि सर्वप्रकारेणापि सुखेन भवितव्यम्,न चेहातिसुखितानामपि नराणां सर्वप्रकारं सुखमवलोक्यते, पूतिदेहोद्भवस्य रोगजराऽऽदिप्रभवस्य च दुःखस्य तेषामपि सद्भावात्, तस्मात्प्रकृष्टपापनिबन्धनसर्वप्रकारदुःखवेदिनो नारकाः, प्रकृष्टपुण्यहेतुकसर्वप्रकारसुखभोगिनो देवाश्चाभ्युपगन्तव्या एवेति ॥ १८७४ ॥

ननु यदि देवाः सन्ति, तर्हि स्वच्छन्दचारिणोऽपि किमित्यत्र ते कदाचिदपि नाऽऽगच्छन्तीत्याह-

संकंतदिव्वपिम्मा, विसयपसत्ताऽसमत्तकत्तव्वा ।
अणहीनमणुयकज्जा,नरभवमसुइं न एंति सुरा ॥१८७५॥

नाऽऽगच्छन्तीह सदैव सुरगणाः, संक्रान्तदिव्यप्रेमत्वाद्विषयप्रसक्तत्वात्,प्रकृष्टरूपाऽऽदिगुणकामिनीप्रसक्तरम्यदेशान्तरगतपुरुषवत्; तथाऽसमाप्तकर्तव्यत्वाद्, बहुकर्तव्यताप्रसाधननियुक्तत्रिनीतपुरुषवत्। तथा अनधीनं मनुजानां कार्यं येषां तेऽनधीनमनुजकार्याः, तद्भावस्तत्त्वं, तस्मान्नेहाऽऽगच्छन्ति सुराः, अनभिप्रतगेहाऽऽदौ निःसङ्गयतिवदिति। तथा अशुभत्वाद् नरभवस्य तद्गन्धासहिष्णुतया नेहाऽऽगच्छन्ति देवाः, स्वपरित्यक्तकलेवरवदिति ॥ १८७५ ॥

तर्हि सर्वथा तेऽत्र नाऽऽगच्छन्ति ?, नैवम्, अत एवाऽऽह-

नवरि जिणजम्मदिक्खा-केवलनिव्वाणमहनिओगेणं ।
जत्तीए सोम्म ! संसय-विच्छेयत्थं व एज्ज सुरा ॥१८७६॥
पुव्वाणुरागओ वा, समयनिबंधा तवोगुणाओ वा ।
नरगणपीडाऽणुग्गह-कंदप्पाईहिँ वा केइ ॥ १८७७ ॥

नवरं जिनजन्मदीक्षाकेवलनिर्वाणमहोत्सवनियोगेन तत्कर्तव्यतानियोगेनेह देवा आगच्छेयुः। तत्र सौम्य ! केचिदिन्द्राऽऽदयो निजनकत्या समागच्छन्ति, केचित्तु तदनुवृत्त्या, अन्ये संशयव्यवच्छेदार्थम्,अपरे तु पूर्वजन्मिकपुत्रमित्राऽऽद्यनुरागात्,समयनिबन्धः प्रतिबोधाऽऽदिनिमित्तः सङ्केतनिश्चयः,तस्माच्च केचिदेवा इहाऽऽगच्छन्ति,अन्ये तु महासत्त्वसाध्वादितपोगुणसमाकृष्टाः, केचित्तु पूर्ववैरिकनरगणपीडार्थम्, अपरे तु पूर्वसुहृत्पुत्राऽऽद्यनुग्रहार्थम्, केचिद्देवाः कन्दर्पाऽऽदिनिरिहाऽऽगच्छन्ति । आदिशब्दात्साध्वादिपरीक्षाहेतोरिति द्रष्टव्यमिति। तदेवं निरूपितं देवानामत्राऽऽगमनकारणम्, अनागमनकारणं च ॥ १८७६॥१८७७ ॥

अथ देवसिद्धावन्यदपि कारणमाह-

जाइस्सरकहणाओ, कासइ पच्चक्खदरिसणाओ य ।
विज्जापंतोवायण-सिद्धीओ गहविगाराओ ॥ १८७८ ॥
जक्किट्ठपुण्णसंचय-फलभावाओऽनिहाणसिद्धीओ ।
सव्वाऽऽगमसिद्धाओ, य संति देव त्ति सद्धेयं ॥१८७९॥

सन्ति देवा इत्येतत् श्रद्धेयमिति प्रतिज्ञा, जातिस्मरणप्रत्ययितपुरुषेण कथनात्, नानादेशविचारिप्रत्ययितपुरुषावलोकितकथितविचित्रगृहदेवकुलाऽऽदिवस्तुवत्। तथा कस्याऽपि तपःप्रभृतिगुणपुरुषस्य प्रत्यक्षदर्शनप्रकृतेश्च, केनचित्प्रत्यक्षप्रमाणेनोपलम्भादित्यर्थः। दूरविप्रकृष्टनगराऽऽदिवत्। तथा विद्यामन्त्रोपधाधनेभ्यः कार्यसिद्धेः,प्रसादफलानुमितराजाऽऽदिवत्। तथा (गहविगाराउ त्ति), अत्र प्रयोगः-ग्रहाधिष्ठितपुरुषदेहो जीवव्यतिरिक्तादृश्यवस्त्वधिष्ठातृकः,पुरुषसंभाव्यविकारवत्क्रियादर्शनात्, संचरिष्णुयन्त्रव्यतिरिक्तमध्यप्रविष्टदृश्यमानपुरुषाधिष्ठितयन्त्रवत्।तथा तपोदानाऽऽदिक्रियासमुपार्जितोत्कृष्टपुण्यसंभारफलसद्भावात्,उत्कृष्टपापप्राग्भारफलसद्भावनिश्चितनारकवत्। एतच्च प्रागेव भावितम्। तथा देवा इति यदभिधानं ततोऽपि च देवानां सिद्धिः। एतच्चानन्तरगाथायां व्यक्तीकरिष्यते । तथा सर्वे च ते आगमाश्च सर्वाऽऽगमास्तेष्वविप्रतिपत्त्या सिद्धत्वाच्च सन्ति देवा इति ॥ १८७८ ॥ १८७९ ॥

यदुक्तम्-"अभिहाणसिद्धीउ (१८७६) त्ति" तद्भावयन्नाह-

देव त्ति सत्थयमिदं सुरुत्तणओ घडाऽनिहाणं व ।
अह व मई मणुओ चिय, देवो गुणरिद्धिसंपन्नो॥१८८०।
तं न जओ तच्चत्थे, सिद्धे नवयारओ मया सिद्धी ।
तच्चत्थसीहसिद्धे, माणवसीहोवयारो व ॥१८८१॥

'देवाः' इत्येतत्पदं सार्थकं, व्युत्पत्तिमच्छुद्धपदत्वात्, घटाऽऽदिवत्। तत्र दीव्यन्तीति देवा इति व्युत्पत्तिमत्त्वम्, समासतद्धितरहितत्वेन च शुद्धत्वम्। भावना चात्र प्रागुक्तैव । अथ परस्य मतिर्भवेन्नन्वत्र मनुष्य एवेह दृश्यमानो देवो भविष्यति,किमदृष्टदेवकल्पनया ?। किं सर्वोऽपि मनुष्यो देव इति । नेत्याह-गुणसंपन्नो गणधराऽऽदिः, रिद्धिसंपन्नश्चक्रवर्त्यादिः । अत्रोच्यते-तदेतन्न यस्मात्तथ्ये मुख्ये वस्तुनि क्वचित्सिद्धे सत्यन्यत्रोपचारस्तत्सिद्धिर्मता, यथा मुख्ये यथार्थे सिंहेऽन्यत्र सिंहे ततो माणवके सिंहोपचारः सिध्यति, एवमिहापि यदि मुख्या देवाः क्वचित्सिद्धा भवेयुस्तदा राजाऽऽदेर्देवोपचारो युज्यते, नान्यथेति ॥ १८८० ॥ १८८१ ॥

देवाभावे चाग्निहोत्रक्रियाणां वैफल्यमिति दर्शयन्नाह-

देवाऽभावे विफलं, जमग्गिहोत्ताइयाण किरियाणं ।
सग्गीयं जन्नाण य, दाणाइफलं च तदजुत्तं ॥१८८२॥

सा इत्यथवा,इदं दूषणम्-देवाऽभावेऽभ्युपगम्यमाने,यदग्निहोत्रादिक्रियाणाम्, "अग्निहोत्रं जुहुयात् स्वर्गकामः" इत्यादिना स्वर्गीयं फलमुक्तं,तथा यज्ञानां च यत्फलमभिहितं,दानाऽऽदिफलं च यत्समस्तलोकप्रसिद्धम्,तत्सर्वमयुक्तं प्राप्नोति। स्वर्गो ह्येतेषां फलमुक्तं,स्वर्गिणां चाभावे कुतः स्वर्ग इति। "स एष यज्ञायुधी" इत्यादीनि च वेदवाक्यानि देवास्तित्वप्रतिपादनपराणि वर्त्तन्ते। अतः किं तान् न प्रतिपद्यसे ?। यद्यपि "को जानाति मायोपमान् गीर्वाणानिन्द्रयमवरुणकुबेराऽऽदीन्" इत्यादि वाक्यं, तदपि न देवानां नास्तित्वाभिधायकं, किन्तु सुराणामपि मायोपमत्वाभिधानेन शेषर्द्धिसमुदायानां सुतरामनित्यत्वप्रतिपादकं बोद्धव्यम्। अन्यथा हि देवास्तित्वप्रतिपादकवाक्यानि, श्रुतिमन्त्रपदैरिन्द्राऽऽदीनामाह्वानं चानर्थकं स्यात् ॥ १८८२ ॥

एतदेवाऽऽह-

जमसोमसूरसुरगुरु-सारज्जाईणि जयइ जन्नेहिं ।
मंतावाहणमेव य, इंदाईणं विहा सव्वं ॥ १८८३ ॥

यमेत्यादिपूर्वार्द्धन्यायमर्थः-लक्षयोजनशिप्रभृतिकतुनिर्यथाश्रुति"यम-सोम-सूर्य-सुरगुरु-स्वाराज्यानि जयति"इत्यादीनि देवा

स्तित्वसूचकानि वेदवाक्यानि देवास्तावे वृथैव स्युः । इह चोत्कर्षोऽतिशयप्रभृतयो यज्ञविशेषा मन्तव्याः, स यूपो यज्ञ एव हि क्रतुरुच्यते, यूपरहितस्तु दानाऽऽदिक्रियायुक्तो यज्ञ इति । स्वः स्वर्गस्तत्र राज्यानि जयत्युपार्जयतीत्यर्थ इति । तथा मन्त्रैरिन्द्राऽऽदीनामाह्वानं देवास्तित्वे पर्यवस्यति,अन्यथा वृथैव स्यात् । इन्द्राऽऽदीनां मन्त्रपदैराह्वानमेवमवगन्तव्यम्-" इन्द्र ! आगच्छ मेघातिथे मेघवृषण ।" इत्यादि । तस्मादुक्तितो वेदवाक्येभ्यश्च सन्ति देवा इति स्थितम् । तदेवं छिन्नो मौर्यपुत्रस्य भगवता संशयः ॥१८०३॥ विशे० । सूत्र० । स्था० । आ० म० ।

देवानां स्वरूपं यथा-

अमिलायमल्लदामा, अणिमिसनयणा य नीरजसरीरा ।
चउरंगुलेण भूमिं, न फिसंति सुरा जिणो कहए ॥

सुरा देवाश्चतुर्निकायभाविनोऽपि अम्लानमाल्यदामानः,तथा न विद्यते निमेषो येषां ते, अनिमेषे नयने येषां ते अनिमेषनयनाः, तथा नीरजा निर्मलं शरीरं येषां ते नीरजशरीराः । चतुरङ्गुलेन चतुर्भिरङ्गुलैर्भूमिं न स्पृशन्ति इति जिनः सर्वज्ञः कथयति । व्य० २ उ० ।

देवा दुविहा पण्णत्ता । तं जहा-एगसरीरी चेव,विसरीरी चेव । स्था० २ ठा० २ उ० ।

देवाश्चतुर्विधास्तद्यथा-

से किं तं देवा ?। देवा चउव्विहा पण्णत्ता । तं जहा-भवणवासी, वाणमंतरा, जोइसिया, वेमाणिया ॥

(से किं तमित्यादि) अथ के ते देवाः ?। सूरिराह-देवाश्चतुर्विधाः प्रज्ञप्ताः । तद्यथा-भवनवासिनो,व्यन्तराः, ज्योतिष्काः,वैमानिकाः । प्रज्ञा० १ पद । जं० । स० । जी० । उत्त० ।

देवानाह-

देवा चउव्विहा वुत्ता, ते मे कित्तयओ सुण ।
भोमिज्ज वाणमंतर, जोइस वेमाणिया तहा ॥ २०३ ॥

देवा नरकनिरुक्ताश्चतुर्विधाश्चतुष्प्रकारा उक्ताः, तीर्थंकराऽऽदिभिरिति गम्यते । ' ते ' इति तान् देवान् मे मम कीर्तयतः प्रतिपादयतः शृण्वाकर्णय शिष्यं प्रतीदमाह । तत्कीर्त्तनं भवनभेदाभिधानं विनेति । तद्भेदानाह-(भोमिज्ज त्ति) भूमौ पृथिव्यां भवा भौमेयका भवनवासिनः, रत्नप्रभापृथिव्यन्तर्वर्तित्वाद् भवनानाम् । उक्तं हि-" इमीसे रयणप्पभाए पुढवीए असीउत्तरजोयणसयसहस्सबाहल्लाए उवरिं एगं जोयणसहस्समोगाहेत्ता हेट्ठमेगमि जोयणसहस्सं वज्जेत्ता मज्झे अट्ठहत्तरे जोयणसयसहस्से, एत्थ णं भवणवासीणं देवाणं सत्तत्तवणकोडीओ बावत्तरिं च भवणवाससयसहस्सा हवंतीति मक्खायं । " (वाणमंतर त्ति) आर्षत्वाद्विविधान्यन्तराण्युत्कर्षापकर्षाऽऽश्रयविशेषरूपाणि निवासभूतानि वा गिरिकन्दरविवराऽऽदीनि येषां तेऽमी व्यन्तराः । उक्तं हि-" ते ह्याधस्तिर्यगूर्ध्वं च त्रीनपि लोकान् स्पृशन्तः स्वातन्त्र्यात् परानियोगाच्च प्रायेण प्रतिपन्ननियतगतिप्रचारा मनुष्यानपि क्वचिद् नृत्यवदुपचरन्ति तथाविधेषु च शैलकन्दरान्तरवनविवराऽऽदिषु प्रविवसन्त्यतो व्यन्तरा इत्युच्यन्ते । (जोइस त्ति) द्योतयन्त इति ज्योतींषि विमानानि, तन्निवासित्वाद्देवा अपि ज्योतींषि, ग्रामः समागत इत्यादौ तन्निवासिजनग्रामवत् । विशेषेण मानयन्त्युपलक्षयन्ति सुकृतिन एतानीति विमानानि,तेषु भवा वैमानिकाः । तथेति समुच्चये,इति सूत्रार्थः ।

एषामेवोत्तरभेदानाह-

दसहा उ भवणवासी, अट्ठहा वाणमंतरा ।
पंचविहा जोइसिया, दुविहा वेमाणिया तहा ॥ २०४ ॥

दशधा त्विति दशधैव (भवणवासि त्ति) भवनेषु वस्तुं शीलमेषामिति भवनवासिनः, अष्टधा अष्टप्रकारा वनेषु विचित्रोपवनाऽऽदिषूपलक्षणत्वादन्येषु च विविधाऽऽश्रयेषु क्रीडैकरसिकतया चरितुं शीलमेषामिति वनचारिणो व्यन्तराः, पञ्चविधाः पञ्चप्रकाराः (जोइसिय त्ति) ज्योतिःषु विमानेषु भवा ज्योतिष्काः, ज्योतींष्येव वा ज्योतिष्काः, द्विविधा वैमानिकास्तथेति सूत्रार्थः ।

एतानेव नामग्राहमाह-

असुरा नाग सुवन्ना, विज्जू अग्गी वियाहिया ।
दीवोदहिदिसावाया, थणिया भवणवासिणो ॥ २०५ ॥
पिसाय भूय जक्खा य, रक्खसा किन्नरा किंपुरिसा ।
महोरगा य गंधव्वा, अट्ठविहा वाणमंतरा ॥ २०६ ॥
चंदा सूरा य नक्खत्ता, गहा तारागणा तहा ।
दिसाविचारिणो चेव, पंचहा जोइसालया ॥ २०७ ॥
वेमाणिया उ जे देवा, दुविहा ते वियाहिया ।
कप्पोवगा य बोधव्वा, कप्पाईया तहेव य ॥ २०८ ॥
कप्पोवगा बारसहा, सोहम्मीसाणगा तहा ।
सणंकुमारमाहिंद-बंभलोगा य लंतगा ॥ २०९ ॥
महासुक्कसहस्सारा, आणया पाणया तहा ।
आरणा अच्चुया चेव, इइ कप्पोवगा सुरा ॥ २१० ॥
कप्पाईया उ जे देवा, दुविहा ते वियाहिया ।
गेवेज्जाऽणुत्तरा चेव, गेवेज्जा नवविहा तहिं ॥ २११ ॥
हिट्ठिमाहेट्ठिमा चेव, हेट्ठिमामज्झिमा तहा ।
हेट्ठिमाउवरिमा चेव, मज्झिमाहेट्ठिमा तहा ॥२१२॥
मज्झिमामज्झिमा चेव, मज्झिमाउवरिमा तहा ।
उवरिमाहेट्ठिमा चेव, उवरिमामज्झिमा तहा ॥२१३॥
उवरिमाउवरिमा चेव, इइ गेवेज्जगा सुरा ।
विजया वेजयंता य, जयंता अपराजिया ॥ २१४ ॥
सव्वट्ठसिद्धगा चेव, पंचहाऽणुत्तरा सुरा ।
इइ वेमाणिया एए-ऽणेगहा एवमादओ ॥ २१५ ॥

सूत्राण्येकादश प्रायः प्रतीतान्येव, नवरम्, असुरा इत्यसुरकुमाराः । एवं नागाऽऽदिष्वपि कुमारशब्दः संबन्धनीयः । सर्वेऽपि ह्यमी कुमाराऽऽकारधारिण एव । यथोक्तम्-कुमारवदेव कान्तदर्शनाः कुमाराः मृदुमधुरललितगतयः शृङ्गाराभिजातरूपविक्रियाः कुमारवच्चोद्धतरूपवेषभाषाऽऽयुधरणप्रहरणावरणयानवाहनाः कुमारवच्चोल्बणरागाः क्रीडनपराश्चेत्यतः कुमारा इत्युच्यन्ते । (तारागणा इति) प्रकीर्णतारकासमूहाः, दिशासु

विशेषेण मेरुप्रदक्षिण्यनित्यचारितालक्षणेन चरन्ति परिभ्रमन्तीत्येवंशीला दिशाविचारिणः, तद्विमानानि ह्येकादशभिरेकविंशैर्योजनशतैर्मेरोश्चतसृष्वपि दिक्ष्वबाधया सततमेव प्रदक्षिणं चरन्तीति, तेष्वेवमुक्ताः ज्योतींष्युक्तन्यायतो विमानान्यालया आश्रया येषां ते ज्योतिरालयाः, कल्प्यन्ते इन्द्रसामानिकत्रयस्त्रिंशाऽऽदिदशप्रकारत्वेन विभज्यन्ते देवा एतेष्विति कल्पा देवलोकाः, तानुपगच्छन्त्युत्पत्तिविषयतया प्राप्नुवन्तीति कल्पोपगाः, कल्पानुक्रमेणातीतास्तदुपरिवर्तिस्थानोत्पन्नतयाऽतिक्रान्ताः कल्पातीताः। (सोहम्मीसाणग त्ति) सुधर्मा नाम शक्रस्य सभा, साऽस्मिन्नस्तीति सौधर्मः कल्पः, स एषामवस्थितिविषयोऽस्तीति सौधर्मिकः । तथा ईशानो नाम द्वितीयदेवलोकः,तन्निवासिनो देवा अपि ईशानाः, त एवैशानकाः । एवमुत्तरत्रापि व्युत्पत्तिः कार्या । ग्रीवेव ग्रीवा लोकपुरुषस्य त्रयोदशरज्जूपरिवर्तिप्रदेशः,तन्निविष्टतयाऽतिनाजिष्णुतया च तदाभरणभूता ग्रैवेयका देवाऽऽवासाः, तन्निवासिनो देवा अपि ग्रैवेयकाः । न विद्यन्ते उत्तराः प्रधानाः स्थितिप्रभावसुखद्युतिलेश्यादिभिरेभ्योऽन्ये देवा इत्यनुत्तराः। (हेट्ठिम त्ति) अधस्तनानुपरितनपङ्क्तेरपेक्षया प्रथमत्रयस्थेष्वपि (हेट्ठिम त्ति) अधस्तना अधस्तनाधस्तनाः प्रथमत्रिकाधोवर्तिनः, (हेट्ठिममज्झिमा तह त्ति) अधस्तनमध्यमाः प्रथमत्रिकमध्यवर्तिनः (हेट्ठिमाउवरिमा चेय त्ति) अधस्तनोपरितनाः प्रथमत्रिकोपरिवर्तिनां मध्ये तथा मध्यमा मध्यमत्रिकवर्तिनः,तेष्वपि अधस्तनाः। एवं मध्यममध्यमाः मध्यमोपरितना उपरिवर्तिनस्तेष्वधस्तना उपरितनाधस्तनाः । एवं उपरितनमध्यमा उपरितनोपरितनाः । इतिभेदसमासौ । तत एतावद्भेदा एव ग्रैवेयकाः सुराः । अभ्युदयविघ्नहेतून् विजयन्त इति विजयाः, तथैव वैजयन्ताः " जयादयो बहुलम " ॥ ३ । ३ । १ ॥ इति बहुलवचनात् क्तप्रत्यये उपसर्गैकारः । एवं जयन्ताः । अपरैरनीरभ्युदयविघ्नहेतुभिरजिता अनभिभूता अपराजिताः, सर्वेऽर्थाः सिद्धा इव सिद्धा येषां ते सर्वार्थसिद्धाः, ते हि विजितप्रायकर्मणः उपस्थितनद्रा एव तत्रोत्पत्तिभाज इतीत्यादीनि निगमनम । अत्र च वैमानिका इति वैमानिकभेदाः सामान्यविशेषयोः कथञ्चिदनन्यत्वात्, एवमादय इति। आदिशब्दस्य प्रकारवचनत्वादेवंप्रकारा इत्येकादशसूत्रार्थः ।

लोगस्स एगदेसम्मि, ते सव्वे परिकित्तिया ।
एत्तो कालविभागं तु, तेसिं वोच्छं चउव्विहं ॥२१६॥
संतइं पप्प णाईया, अपज्जवसिया वि य ।
ठिइं पडुच्च साईया, सपज्जवसिया वि य ॥ २१७ ॥

क्षेत्रकालाभिधायिसूत्रद्वयं प्राग्वत् सादिसपर्यवसितत्वभावनार्थम् ।

साहियं सागरं एक्कं, उक्कोसेणं ठिई भवे ।
जो मज्झाणं जहण्णेणं, दस वाससहस्सिया ॥ २१८॥
पलिओवममेगं तु, उक्कोसेणं ठिई भवे ।
वंतराणं जहण्णेणं,दस वाससहस्सिया ॥ २१९ ॥
पलिओवममेगं तु, वाससक्खेण साहियं ।
पलिओवमट्ठभागो, जोइसेसु जहण्णिया ॥ २२० ॥
दो चेव सागराइं, उक्कोसेणं वियाहिया ।
सोहम्मम्मि जहण्णेणं, एक्कं च पलिओवमं ॥ २२१ ॥
सागरा साहिया दोन्नि, उक्कोसेणं वियाहिया ।
ईसाणम्मि जहण्णेणं, साहियं पलिओवमं ॥ २२२ ॥
सागराणि अ सत्तेव, उक्कोसेणं ठिई भवे ।
सणंकुमारे जहण्णेणं, दोण्णिओ सागरोवमा ॥ २२३ ॥
साहिया सागरा सत्त, उक्कोसेणं ठिई भवे ।
माहिंदम्मि जहण्णेणं, साहिया दुन्नि सागरा ॥ २२४ ॥
दस चेव सागराइं, उक्कोसेणं ठिई भवे ।
बंभलोए जहण्णेणं, सत्तओ सागरोवमा ॥ २२५ ॥
चउदस सागराइं, उक्कोसेणं ठिई भवे ।
लंतगम्मि जहण्णेणं, दसओ सागरोवमा ॥ २२६ ॥
सत्तरस सागराइं, उक्कोसेणं ठिई भवे ।
महासुक्के जहण्णेणं, चोद्दस सागरोवमा ॥ २२७ ॥
अट्ठारस सागराइं, उक्कोसेणं ठिई भवे ।
सहस्सारे जहण्णेणं, सत्तरस सागरोवमा ॥ २२८ ॥
सागराऊ अणवीसं तु, उक्कोसेणं ठिई भवे ।
आणयम्मि जहण्णेणं, अट्ठारस सागरोवमा ॥ २२९ ॥
वीसं तु सागराइं, उक्कोसेणं ठिई भवे ।
पाणयम्मि जहण्णेणं, सागरा अउणवीसई ॥ २३० ॥
सागरा एक्कवीसं तु, उक्कोसेणं ठिई भवे ।
आरणम्मि जहण्णेणं, वीसई सागरोवमा ॥ २३१ ॥
बावीसा सागराइं, उक्कोसेणं ठिई भवे ।
अच्चुयम्मि जहण्णेणं, सागरा इक्कवीसई ॥ २३२ ॥
तेवीस सागराइं, उक्कोसेणं ठिई भवे ।
पढमम्मि जहण्णेणं, बावीसं सागरोवमा ॥ २३३ ॥
चउवीस सागराइं, उक्कोसेणं ठिई भवे ।
बिइयम्मि जहण्णेणं, तेवीसं सागरोवमा ॥ २३४ ॥
पणवीस सागराइं, उक्कोसेणं ठिई भवे ।
तइयम्मि जहण्णेणं, चउवीसं सागरोवमा ॥ २३५ ॥
छव्वीस सागराइं, उक्कोसेणं ठिई भवे ।
चउत्थम्मि जहण्णेणं, सागरा पणवीसई ॥ २३६ ॥
सागरा सत्तवीसं तु, उक्कोसेणं ठिई भवे ।
पंचमम्मि जहण्णेणं, छव्वीसं सागरोवमा ॥ २३७ ॥
सागरा अट्ठवीसं तु, उक्कोसेणं ठिई भवे ।
छट्ठम्मि जहण्णेणं, सागरा सत्तवीसई ॥ २३८ ॥
सागरा अउणवीसं तु, उक्कोसेणं ठिई भवे ।
सत्तमम्मि जहण्णेणं, सागरा अट्ठवीसई ॥ २३९ ॥
तीसं तु सागराइं, उक्कोसेणं ठिई भवे ।
अट्ठमम्मि जहण्णेणं, सागरा अउणतीसई ॥ २४० ॥
सागरा इक्कतीसं तु, उक्कोसेण वियाहिया ।
नवमम्मि जहण्णेणं, तीसई सागरोवमा ॥ २४१ ॥

बत्तीस सागराऊ, उक्कोसेणं वियाहिया ।
चउसुं पि विजयाईसु, जहन्ना इक्कतीसई ॥ २४२ ॥
अजहण्णमणुक्कोसं, तेत्तीसं सागरोवमा ।
महाविमाणे सव्वट्ठे, ठिई एसा वियाहिया ॥ २४३ ॥
जा चेव य आउठिई, देवाणं तु वियाहिया ।
सा तेसिं कायठिई, जहण्णमुक्कोसिया भवे ॥ २४४ ॥

सप्तविंशतिसूत्राणि प्रायो निगदसिद्धान्येव, नवरं (साहियं त्ति) प्राकृतत्वात् साधिकम् । (सागरं इति) सागरोपममेकम्, उत्कृष्टेन स्थितिर्भवति । भौमेयकानां भवनवासिनाम्, इयं च सामान्योक्तावप्युत्तरनिकायाधिपस्य बलेरवावगन्तव्या । दक्षिणनिकाये त्विन्द्रस्यापि सागरोपममेव । उक्तं हि- "चमरं वज्जिं सागरमहियं ति ।" जघन्येन दशवर्षसहस्राणि प्रमाणमस्या दशवर्षसहस्रिका । इयमपि सामान्योक्तावपि किल्बिषाणामेव स्थितिप्रज्ञापनाऽऽदीनां देवेषु सहैव ह्रासादित्युत्रापि भावनीयम् । तथा पल्योपमवर्षलक्षाधिकामिति । ज्योतिषामुत्कृष्टस्थित्यभिधानम्, चन्द्रापेक्षम्, सूर्यस्य तु वर्षसहस्राधिकं पल्योपममायुः । ग्रहाणामपि तदेव नातिरिक्तं, नक्षत्राणां तस्यैवार्द्धं, तारकाणां तच्चतुर्भागः, तथा पल्योपमाष्टभागो ज्योतिःषु जघन्या स्थितिरित्यपि तारकापेक्षमेव । शेषाणां पल्योपमचतुर्थभागस्यैव जघन्यस्थितित्वात् । यत उक्तम्-चतुर्भागः शेषाणामिति । इह च सर्वत्र उक्तरूपयोरुत्कृष्टजघन्यस्थित्योरपान्तरालवर्त्तिनी मध्यमा स्थितिरिति द्रष्टव्यं, तथा प्रथम इति प्रक्रमाद् ग्रैवेयके अधस्तनाधस्तने । एवं द्वितीयाऽऽदिष्वपि ग्रैवेयकमितिसंबन्धनीयम् । अविद्यमानं जघन्यमिति अजघन्यत्वमस्यामित्यजघन्या । तथा अविद्यमानमुत्कृष्टमित्युत्कृष्टत्वमस्यामित्यनुत्कृष्टा, अजघन्या चासावनुत्कृष्टा च जघन्यानुत्कृष्टा । मकारो लाक्षणिकः । महच्च तदायुः स्थित्याद्यपेक्षया विमानं च महाविमानं तच्च तत् । सर्वे निरवशेषा अर्थ्यमानत्वादर्था अनुत्तरसुखाऽऽदयो यस्मिंस्तत् सर्वार्थं च महाविमानं सर्वार्थं तस्मिन् स्थितिरिति सर्वत्रायुःस्थितिप्रक्रमाद्देवानां तथा आयुःस्थितिरेव कायस्थितित्वाभिधाने तत्रानन्तरमनुत्पत्तिरेवेत्यभिप्राय इति सप्तविंशतिसूत्रार्थः । अन्तरविधानाभिधायि च सूत्रद्वयं पूर्ववद्व्याख्येयम् ।

अणंतकालमुक्कोसं, अंतोमुहुत्तं जहण्णयं ।
विजहम्मि सए काए, देवाणं होज्ज अंतरं ॥ २४५ ॥
एएसिं वण्णतो चेव, गंधओ रसफासओ ।
संठाणदेसतो वा वि, विहाणाइं सहस्ससो ॥ २४६ ॥

सूत्रद्वयं प्राग्वद्व्याख्येयम् ।

इत्थं जीवाजीवांश्च सविस्तरमुपदर्श्य निगमयितुमाह-

संसारत्था य सिद्धा य, इइ जीवा वियाहिया ।
रूविणो चेवऽरूवी य, अजीवा दुविहा वि य ॥२४७॥

संसारस्थाश्च सिद्धाश्च इत्येवंप्रकारा जीवा व्याख्याता विशेषेण सकलभेदाऽऽख्यान्या प्रकथिताः । रूपिणश्चैव (रूवी य त्ति) अकारप्रश्लेषादरूपिणश्चाजीवा द्विविधा अपि व्याख्याता इति योग इति सूत्रार्थः ।

यदुक्तं जीवाजीवविभक्तिं शृणुतैकमनस इति, तत्र जीवाजीवविभक्तिमभिधाय शृणुतैकमनस इतिवचनात् कश्चिच्छ्रवणमात्रेणैव कृतार्थतां मन्येत नयतस्तदाशङ्काऽपनोदार्थमाह-

इइ जीवमजीवे य, सोच्चा सद्दहिऊण य ।
सव्वनयाण अणुमए, रमेज्जा संजमे मुणी ॥ २४८ ॥

इतीत्येवंप्रकारान् (जीवमजीव त्ति) जीवाजीवानेतानन्तरोक्तान् श्रुत्वा अवधार्य श्रद्धाय च तथेति प्रतिपद्य सर्वे च ते नयाश्च सर्वनया ज्ञानक्रियानयान्तर्गता नैगमाऽऽदयः, तेषामनुमतोऽभिप्रेतस्तस्मिन् । कोऽर्थः ?, ज्ञानसहितसम्यक्चारित्ररूपे रमेत रतिं कुर्यात् । क्व ?, सम्यक्यमनं पृथिव्यादिजीवोपमर्दनस्तृणपञ्चकाऽऽद्यजीवोपादानाऽऽदेश्च उपरमणं संयमः, तस्मिन् मुनिरुक्तरूप इति सूत्रार्थः । उत्त० ३६ अ० ।

पञ्चविधा देवास्तद्यथा-

कइविहा णं भंते देवा ! पण्णत्ता ?। पंचविहा देवा पण्णत्ता । तं जहा-भवियद्दव्वदेवा, नरदेवा, धम्मदेवा, देवाधिदेवा, भावदेवा ।

(कइविहा णमित्यादि) दीव्यन्ति क्रीडां कुर्वन्ति, दीव्यन्ते वा स्तूयन्ते आराध्यतया ते देवाः (भवियदव्वदेव त्ति) द्रव्यभूता देवा द्रव्यदेवाः, द्रव्यता चाप्राधान्याद् भूतभावत्वाद्वा, भाविभावत्वाद्वा । तत्राप्राधान्याद्देवगुणशून्या देवा द्रव्यदेवाः; यथा साध्वाभासा द्रव्यसाधवः । भूतभावपक्षे तु भूतस्य देवत्वपर्यायस्य प्रपञ्चकारणभावदेवत्वाच्च्युता द्रव्यदेवाः । भाविभावपक्षे तु-भाविनो देवत्वपर्यायस्य योग्या देवतयोत्पत्स्यमाना द्रव्यदेवाः । तत्र भाविभावपक्षपरिग्रहार्थमाह-भव्याश्च ते द्रव्यदेवाश्चेति । नरदेवाः, (धम्मदेव त्ति) धर्मेण श्रुताऽऽदिना देवा धर्मप्रधाना वा देवा धर्मदेवाः (देवाहिदेव त्ति) देवान् शेषानतिक्रान्ताः पारमार्थिकदेवत्वयोगाद्देवा देवातिदेवाः " देवाहिदेव त्ति ।" क्वचिद् दृश्यते । तत्र च देवानामधिकाः पारमार्थिकदेवत्वयोगाद्देवा देवाधिदेवाः (भावदेव त्ति) भावेन देवगत्यादिकर्मोदयजातपर्यायेण देवा भावदेवाः ।

भविकद्रव्यदेवा यथा-

से केणट्ठेणं भंते ! एवं वुच्चइ-भवियदव्वदेवा भवियदव्वदेवा ?। गोयमा ! जे भवियपंचिंदियतिरिक्खजोणिए वा मणुस्से वा देवेसु उववज्जित्तए, से तेणट्ठेणं गोयमा ! एवं वुच्चइ-भवियदव्वदेवा ।

(भविए इत्यादि) इह जातावेकवचनमतो बहुवचनार्थं व्याख्येयं, ततश्च ये भव्या योग्याः पञ्चेन्द्रियतिर्यग्योनिका वा, मनुष्या वा देवेषूत्पत्तुं ते यस्माद्भाविदेवभावा इति गम्यम् । अथ तेनार्थेन तेन कारणेन हे गौतम ! तान् प्रत्येवमुच्यते-भव्यद्रव्यदेवा इति ।

से केणट्ठेणं भंते ! एवं वुच्चइ-नरदेवा नरदेवा ?। गोयमा ! जे इमे रायाणो चाउरंतचक्कवट्टी उप्पन्नसमत्तचक्करयण-पहाणा णवणिहिपइणो समिद्धकोसा बत्तीसं रायवरसहस्सा आयामगा सागरवरमेहलाहिपतिणो मणुस्सिंदा से तेणट्ठेणं० जाव नरदेवा ।

(जे इमे इत्यादि) (चाउरंतचक्कवट्टि त्ति)-चतुरन्ताया भर-

ताऽऽदिपृथिव्या एते स्वामिन इति चातुरन्ताः, चक्रेण वर्त्तनशीलत्वाच्च चक्रवर्त्तिनः, ततः कर्म्मधारयः । चतुरन्तग्रहणेन च वासुदेवाऽऽदीनां व्युदासः, ते यस्मादिति वाक्यशेषः। (उप्पन्नसमत्तचक्करयणप्पहाण त्ति) आयत्वाद्विर्देशस्य, उत्पन्नं समस्तरत्नप्रधानं चक्रं येषां ते तथा । (सागरवरमेहलाहिवइणो त्ति) सागर एव वरा मेखला काञ्ची यस्याः सागरवरमेखला पृथ्वी, तस्या अधिपतयो ये ते तथा, सागरमेखलान्तपृथिव्यधिपतय इति भावः । (से तेणट्ठेणं ति) अथ तेनार्थेन तेन कारणेन गौतम ! तान् प्रत्येवमुच्यते नरदेवा इति ।

से केणट्ठेणं भंते ! एवं वुच्चइ–धम्मदेवा धम्मदेवा ? । गोयमा ! जे इमे अणगारा भगवंतो इरियासमिया० जाव गुत्तबंभयारी, से तेणट्ठेणं० जाव धम्मदेवा ॥

(जे इमे इत्यादि) य इमेऽनगारा भगवन्तस्ते यस्मादिति ।

से केणट्ठेणं भंते ! एवं वुच्चइ–देवाधिदेवा देवाधिदेवा ? । गोयमा ! जे इमे अरहंता भगवंतो उप्पन्ननाणदंसणधरा० जाव सव्वदरिसी, से तेणट्ठेणं० जाव देवाधिदेवा देवाधिदेवा ॥

(जे इमे इत्यादि) ये इमे अर्हन्तो भगवन्तस्ते यस्मादुत्पन्नज्ञानदर्शनधरा इत्यादि । (से तेणट्ठेणं ति) अथ तेनार्थेन तान् प्रति गौतम ! एवमुच्यते-देवाधिदेवा देवाधिदेवा इति ।

से केणट्ठेणं भंते ! एवं वुच्चइ–भावदेवा भावदेवा ? । गोयमा ! जे इमे भवणवइवाणमंतरजोइसियवेमाणिया देवा देवगइनामगोयाइं कम्माइं वेदेंति, से तेणट्ठेणं० जाव भावदेवा भावदेवा ॥

(जे इमे इत्यादि) ये इमे भवनपत्यादयस्ते यस्माद्देवगतिनामगोत्रे कर्मणी वेदयन्ति अनेनार्थेन तान् प्रत्येवमुच्यते-भावदेवा भावदेवा इति । भ० १२ श० ६ उ० । (भव्यदेवाऽऽदयः कुत उत्पद्यन्ते इति ' उववाय ' शब्दे द्वितीयभागे ७६५ पृष्ठे समुक्तम्) (अवधिज्ञानं ' लोगेतिय ' शब्दे सूत्रवदम्)

चउवीसाए देवेहिं भवण–वाण–जोइस–वेमाणिआणं दसअट्ठपंचएगविहा इअ चउवीसं देवा केइ पुण विंति अरिहंता ॥३०॥ आव० ४ अ० । आ० चू० । प्रश्न० ।

(महर्द्धिकाऽऽदिदेवानां पुद्गलाऽऽदानपूर्वकं गमनाऽऽदि 'पुग्गल' शब्दे वक्ष्यते) (तेषामनुपरिवर्तनेन 'अणुपरियट्टण' शब्दे प्रथमभागे ३७५ पृष्ठे दृष्टव्या) (अविशुद्धक्षेत्र्यदेवविषयकं ज्ञानं ' विभंग ' शब्दे वक्ष्यते) (पुरन्दराऽऽदिदेवानां लोकानि 'लोग' शब्दे प्रदर्शयिष्यन्ते) (देवानां जराभावाज्जावबक्तव्यता ' जरा' शब्देऽस्मिन्नेव भागे १४२५ पृष्ठे दृष्टव्या)

सुक्कसहस्सारयोश्चतुर्दशदेवाः, अन्यत्र स्वन्यथा । यत आह-

" भवणवणजोइसोहे-म्मीसाणे सत्त होंति रयणीओ ।
एक्केक्कहाणि सेसे, दुदुगे य दुगे चउक्के य ॥ १ ॥
गेवेज्जेसु य दुन्नि य, एक्का रयणी अणुत्तरसुरेसु ॥ " इति

भवधारणीयान्येवमुत्तरवैक्रियाणि तु लक्षमपि संभवन्ति, उत्कृष्टेनैतत्, जघन्यतस्त्वङ्गुलासंख्येयभागप्रमाणान्युत्पत्तिकाले भवधारणीयानि भवन्त्युत्तरवैक्रियाणि त्वङ्गुलासंख्येयभागप्रमाणानीति । स्था० ४ ठा० ४ उ० । (देवानामाहारः ' आहार ' शब्दे द्वितीयभागे ५०७ पृष्ठे गतः) (देवानां शब्दश्रवणं 'सद्द' शब्दे वक्ष्यते) (देवदुर्गतिः 'दुग्गइ' शब्देऽस्मिन्नेव भागे ६५४ पृष्ठे दृष्टव्या) (सदेवीकानामदेवीकानां देवानां परिचारः ' परियारणा ' शब्दे वक्ष्यते) (देवानामाशातना ' आसायणा ' शब्दे द्वितीयभागे ४७८ पृष्ठे द्रष्टव्या) (देवानां धार्मिकत्वसिद्धिः ' चेइय ' शब्दे तृतीयभागे १२२४ पृष्ठे गता) (देवानामुद्वेगः ' उव्वेग ' शब्दे द्वितीयभागे १११३ पृष्ठे प्रतिपादितः) दीव्यन्ते स्तूयन्ते केचित्पूर्वभवपरम्परोपात्ततीर्थकृन्नामकर्मोदयतो नमत्त्रिविष्टपाधिपत्यसुरासुरमर्त्याधिपतिभिरिति देवाः । दश० १ तत्त्व । ज्ञानाऽऽदिप्रकृष्टगुणवति देवनातिशायिनि जिनाऽऽदिके देवविशेषे, दर्श० ।

चउतीसअइसयजुओ, अट्ठमहापाडिहेरकयसोहो ।
अट्ठदसदोसरहिओ, सो देवो नत्थि संदेहो ॥ ६ ॥

तत्र सकलत्रिभुवनातिशायिसर्वाऽऽश्चर्यनिधानभूतसर्वैश्वर्यनिवेदनपरभुवनजननयनाऽऽनन्दविधायकानन्यजनसाधारणचतुस्त्रिंशदतिशयैर्युतः समन्वितो यः स देव इति प्रकृतम् । अष्टमहाप्रातिहार्यैरशोकाऽऽदिभिः कृता विहिता शोभा यस्य सोऽपि देवः। अष्टादशदोषैरज्ञानाऽऽदिभी रहितो विवर्जितो यः स देवः। अयमत्र भावार्थः-यो हि देवो वा खेचरो वा वैक्रियाऽऽदिलब्धिमत्तरो वा इत्थंभूतस्फीतिमानपि यद्यष्टादशदोषरहितो न भवति न स देवइति नात्र संशयः संदेह इति गाथाऽर्थः । दर्श० १ तत्त्व । अकम्पिकगणधरस्य पितरि, आ० म० १ अ० २ खण्ड । आ० चू० । भविष्यति चतुर्विंशतितमे जिने, ति० । "धाविसमो अवडजीवो देवो।" तो० ३० कल्प । राजनि, आ० म० १ अ० २ खण्ड । स्वनामख्याते द्वीपे, प्रज्ञा० १५ पद । "देवे खलु दीवे बलयाऽऽकारसंठिते।" सू० प्र० १९ पाहु० । स्वनामख्याते द्वीपे, समुद्रे च । प्रज्ञा० १५ पद । सम्मान्ये, अनु० । आराध्यतमे च । पञ्चा० १ विव० । केचन प्रचुरकर्मतया सत्यामपि सम्यक्त्वाऽऽदिकायां सामग्र्यां न तद्भव एव मोक्षमास्कन्दन्ति, अपि तु सौधर्माऽऽद्याः पञ्चोत्तरविमानावसाना देवा भवन्तीति । सूत्र० १ श्रु० १५ अ० । स्था० । औ० । मेघाऽऽदीन् स्थितान् दृष्ट्वा न देव देवेति वदेत् ।

तहेव मेहं व नहं व माणवं,
न देव देव त्तिगिरं वएज्जा ।
समुट्ठिए उन्नए वा पओए,
वएज्ज वा वुट्ठबलाहय त्ति ॥ ५२ ॥

तथैव मेघं वा नभो वा मानवं वाऽऽश्रित्य नो देवदेव इति गिरं वदेत्, मेघमुन्नतं दृष्ट्वा उन्नतो देव इति नो वदेत्, पयो नभ आकाशं मानवं राजानं वा देवमिति नो वदेत्, मिथ्यावादप्रसङ्गाऽऽदिप्रसङ्गात् । कथं तर्हि वदेदित्याह-उन्नतं दृष्ट्वा समुत्थित उन्नतो वा पयोद इति वदेद्वा वृष्टो बलाहक इति सूत्रार्थः । दश० ७ अ० । (देवानां परितापकारणानि "परिताव" शब्दे वक्ष्यन्ते)

देव–न० । "एकच दैवे" ॥८।१।१५३॥ इति दैवशब्दे ऐन एत् अइच वा । "दिवं दैवं दइव्वं दव्वं ।" प्रा० १ पाद । पूर्वकृते कर्म्मणि, पो० ७ विव० ।

देवा णं भंते ! संजयाइ वत्तव्वं सिया ? । गोयमा ! णो इणट्ठे समट्ठे अवत्तव्वाणमेयं देवाणं । देवा णं भंते !

असंजयाइ वत्तव्वं सिया ?। गोयमा ! णो इणट्ठे समट्ठे णिद्धुरवयणमेयं देवाणं। देवा णं भंते ! संजयासंजयाइ वत्तव्वं सिया ?। गोयमा ! णो इणट्ठे समट्ठे असब्भूयमेयं देवाणं। से किं खाइणं भंते ! देवाइ वत्तव्वं सिया ?। गोयमा ! देवा णं नोसंजयाइ वत्तव्वं सिया।

(देवा णमित्यादि) (से किं खाइ णं भंते ! देवाइ वत्तव्वं सिय त्ति) "से" इति अथार्थः। किमिति प्रश्नार्थः (खाइ ति) पुनरर्थः। णं वाक्यालङ्कारार्थः। (देवाइ त्ति) यद्वस्तु तद्वक्तव्यं स्यादिति। (नोसंजयाइ वत्तव्वं सियत्ति) नोसंयता इत्येतद्वक्तव्यं स्यात्। असंयतशब्दपर्यायत्वेऽपि नोसंयतशब्दस्यानिष्ठुरवचनत्वाद् मृतशब्दापेक्षया परलोकीभूतशब्दवदिति। भ० ५ श० ४ उ०।

देवई-देवकी-स्त्री०। कृष्णस्य वासुदेवस्य मातरि, स०। आ० क०। आव०। ति०। सा च जम्बूद्वीपे भारते वर्षे आगमिष्यन्त्यामुत्सर्पिण्यां सुनिसुव्रतो नाम एकादशमो जिनो भविष्यति। स०। "पन्नरसमो देवईजीवो मुणिसुव्वओ" ती १६ कल्प। प्रव०।

देवउत्त-देवोप्त-त्रि०। देवेनोप्तो देवोप्तः। देवनिष्पादिते, सू० प्र० १ श्रु० १ अ० ३ उ०।

देवगुप्त-देवरक्षिते, सूत्र० १ श्रु० १ अ० ३ उ०।

देवपुत्र-पुं०। देवस्य पुत्रो देवपुत्रः। देवसुते, सूत्र० १ श्रु० १ अ० ३ उ०।

देवउत्तवाइ (ण्)-देवोप्तवादिन्-पुं०। देवेनोप्तो देवोप्तः, कर्षकेणेव बीजवपनं कृत्वा निष्पादितोऽयं लोक इत्येवंवादिनि परतीर्थिके, सूत्र० १ श्रु० १ अ० ३ उ०।

इदमन्नं तु अन्नाणं, इहमेगेसि आहियं।
देवउत्ते अयं लोए, ... ॥

इदमिति वक्ष्यमाणं, तुशब्दः पूर्वेभ्यो विशेषणार्थः। अज्ञानमिति मोहविजृम्भणमिहास्मिन् लोके एकेषां न सर्वेषामाख्यातमभिप्रायः। किं पुनस्तदाख्यातमिति तदाह-देवेनोप्तो देवोप्तः कर्षकेणेव बीजवपनं कृत्वा निष्पादितोऽयं लोक इत्यर्थः। देवैर्वा गुप्तो रक्षितो देवगुप्तो, देवपुत्रो वेत्यादिकमज्ञानमिति। सूत्र० १ श्रु० १ अ० ३ उ०।

देवउप्फ-देशी-पद्मपुष्पे, दे० ना० ५ वर्ग ४६ गाथा।

देवउल-देवकुल-देवस्थाने, आ०म० १ अ० २ खण्ड। प्रा०।

देवे-दातुम्-अव्य०। "तुम एवमणाणहमणाहिं च" ॥ ८। ४। ४४१॥ इति तुम एवादेशे 'देवं।' दानं कर्तुमित्यर्थे, प्रा० ४ पाद।

देवंधगार-देवान्धकार-पुं०। देवानामप्यन्धकारोऽसौ तच्छरीरप्रभाया अपि तत्राप्रभावनादिति देवान्धकारः। तिमिरकाये, स्था० ४ ठा० २ उ०। देवानामपि तत्रोद्द्योताभावेनान्धकारत्वात्। जं० ६ श० ५ उ०। (अयं कुत्र भवतीति 'लोगुज्जोय' शब्दे वक्ष्यते)

देवकज्ज-देवकार्य-न०। देवकृत्ये, नि० १ श्रु० ३ वर्ग ३ अ०। तथा चाह-"तं नाणं तं च विन्नाणं, तं कलासु अ कोसलं। सा बुद्धी पोरिसं तं च, देवकज्जेण जं वए॥ १॥" इति। ध० २ अधि०।

देवकम्म(ण्)-देवकर्मन्-न०। देवक्रियायाम्, स्था० ५ ठा० २ उ०।

देवकाम्मण-न०। देवश्च काम्मणं च। तथाविधद्रव्यसंयोगे, स्था० ५ ठा० २ उ०।

देवकलिया-देवोत्कलिका-स्त्री०। देवानां वातस्येवोत्कलिका देवोत्कलिका। देवलहरौ, स्था० ४ ठा० ३ उ०। तत्समवायपरिशेषे च। स्था० ३ ठा० १ उ०। जी०।

देवकहकहय-देवकहकहक-पुं०। देवानां प्रमोदभरवशतः स्वच्छावचनैर्बोलः कोलाहलो देवकहकहकः। देवकोलाहले, जी० ३ प्रति० ५ उ०। आचा०। देवप्रमोदकलकले, स्था० ४ ठा० ३ उ०। रा०। (अयं कुत्र भवति इति "लोगुज्जोय" शब्दे वक्ष्यते)

देवकाम-देवकाम-पुं०। देवसंबन्धिविषये, उत्त० ७ अ०।

देवकिब्विस-देवकिल्बिष-पुं०। देवकिल्बिषभावनाजनिते देवभेदे, स्था० ४ ठा० ४ उ०।

कइविहा णं भंते ! देवकिब्विसिया पण्णत्ता ?। गोयमा ! तिविहा देवकिब्विसिया पण्णत्ता। तं जहा-तिपलिओवमट्ठिईया, तिसागरोवमट्ठिईया, तेरससागरोवमट्ठिईया। कहि णं भंते ! तिपलिओवमट्ठिईया देवकिब्विसिया परिवसंति ?। गोयमा ! उप्पिं जोइसियाणं हिट्ठिं सोहम्मीसाणेसु कप्पेसु। एत्थ णं तिपलिओवमट्ठिईया देवकिब्विसिया परिवसंति। कहि णं भंते ! तिसागरोवमट्ठिईया देवकिब्विसिया परिवसंति ?। गोयमा !। उप्पिं सोहम्मीसाणाणं कप्पाणं हिट्ठिं सणंकुमारमाहिंदेसु कप्पेसु, एत्थ णं तिसागरोवमट्ठिईया देवकिब्विसिया परिवसंति। कहि णं भंते ! तेरससागरोवमट्ठिईया देवकिब्विसिया परिवसंति ?। गोयमा ! उप्पिं बंभलोगस्स कप्पस्स हिट्ठिं लंतए कप्पे, एत्थ णं तेरससागरोवमट्ठिईया देवकिब्विसिया परिवसंति। देवकिब्विसिया णं भंते ! केसु कम्मादाणेसु देवकिब्विसियत्ताए उववत्तारो भवंति ?। गोयमा ! जे इमे आयरियपडिणीया उवज्झायपडिणीया कुलपडिणीया गणपडिणीया संघपडिणीया आयरियउवज्झायाणं अयसकरा अवण्णकरा अकित्तिकरा बहूहिं असब्भावुब्भावणाहिं मिच्छत्ताभिनिवेसेहि य अप्पाणं वा २ वुग्गाहेमाणा वुप्पाएमाणा बहूहिं वासाइं सामण्णपरियागं पाउणंति, पाउणित्ता तस्स ठाणस्स अणालोइयपडिक्कंता कालमासे कालं किच्चा अण्णयरेसु देवकिब्विसिएसु देवेसु देवकिब्वि-

सियत्ताए उववत्तारो भवंति, तं चेव तिपलिओवमट्ठिईएसु वा,तिसागरोवमट्ठिईएसु वा,तेरससागरोवमट्ठिईएसु वा । देवकिब्विसिया णं भंते ! ताओ देवलोगाओ आउक्खएणं भवक्खएणं ठिइक्खएणं अणंतरं चयं चइत्ता कहिं गच्छंति, कहिं उववज्जंति ? । गोयमा ! जाव चत्तारि पंच णेरइयतिरिक्खजोणियमणुस्सदेवभवग्गहणाइं संसारं अणुपरियट्टित्ता तओ पच्छा सिज्झंति, बुज्झंति० जाव अंतं करेंति, अत्थेगइया अणाईयं अणवदग्गं दीहमद्धं चाउरंतसंसारकंतारं अणुपरियट्टंति । भ० ए श० ३३ उ० ।

किल्बिषिका देवास्त्रिधा । तद्यथा-

तिविहा देवा किब्विसिया पन्नत्ता । तं जहा—तिपलिओवमट्ठिईया, तिसागरोवमट्ठिईया, तेरससागरोवमट्ठिईया । कहि णं भंते ! तिपलिओवमट्ठिईया देवा किब्विसिया परिवसंति ? । उप्पिं जोइसियाणं हिट्ठिं सोहम्मीसाणेसु कप्पेसु, एत्थ णं तिपलिओवमट्ठिईया देवा किब्विसिया परिवसंति । कहि णं भंते ! तिसागरोवमट्ठिईया देवा किब्विसिया परिवसंति ? । उप्पिं सोहम्मीसाणाणं कप्पाणं हेट्ठिं सणंकुमारमाहिंदकप्पेसु, एत्थ णं तिसागरोवमट्ठिईया देवा किब्विसिया परिवसंति । कहि णं भंते ! तेरससागरोवमट्ठिईया देवकिब्विसिया परिवसंति ? । उप्पिं बंभलोयस्स कप्पस्स हिट्ठिं लंतगे कप्पे, एत्थ णं तेरससागरोवमट्ठिईया देवकिब्विसिया परिवसंति ॥

"तिविहा" इत्यादि स्फुटम्, केवलं (किब्विसिय त्ति) "नाणस्स केवलीणं, धम्मायरियस्स संघसाहूणं । माई अवन्नवाई, किब्विसियं भावणं कुणइ ॥ १ ॥" इति । एवंविधं भावनोपात्तं किल्बिषं पापमुदये विद्यते येषां ते किल्बिषिका देवानां मध्ये किल्बिषिकाः पापाः । अथवा देवाश्च ते किल्बिषिकाश्चेति देवकिल्बिषिकाः, मनुष्येषु चण्डाला इवास्पृश्याः । स्था० ३ ठा० ४ उ० ।

देवकिब्विसिया—दैवकिल्बिषिकी—स्त्री० । देवानां मध्ये किल्बिषाः पापाः, अत एवाऽस्पृश्याऽऽदिधर्मणश्चाण्मालप्रायाः,तेषामियं दैवकिल्बिषिकी । संक्लिष्टभावनाभेदे,बृ० १ उ० । प्रव० । दश० ।

अथ दैवकिल्बिषिकीं विभावयिषुराह-

नाणस्स केवलीणं, धम्मायरियाण सव्वसाहूणं ।
माई अवन्नवाई, किब्विसियं भावणं कुणइ ॥

ज्ञानस्य केवलिनां धर्माऽऽचार्याणां सर्वसाधूनामेतेषामवर्णवादी, तथा मायी स्वशक्तिगूहनान्मायावान्, एष किल्बिषिकां भावनां करोतीति निर्युक्तिगाथासमासार्थः । बृ० १ उ० ।

देवकिब्विसियत्त-देवकिल्बिषिकत्व—न० । देवानां मध्ये किल्बिषाः पापाः प्रायो ऽत एवास्पृश्याऽऽदिधर्मकः, देवश्चासौ किल्बिषश्चेति वा देवकिल्बिषः, तस्य भावस्तत्ता । किल्बिषिकदेवत्वे, स्था० ४ ठा० ४ उ० ।

चउहिं ठाणेहिं जीवा देवकिब्विसियाए कम्मं पगरेंति । तं जहा—अरहंताणं अवण्णं वयमाणे, अरहंतपण्णत्तस्स धम्मस्स अवण्णं वयमाणे, आयरियउवज्झायाणमवण्णं वयमाणे वा, चाउव्वण्णस्स संघस्स अवण्णं वयमाणे ।

अवर्णोऽश्लाघाऽसद्दोषोद्भावनमित्यर्थः । अयमर्थोऽन्यत्रैवमुच्यते-" णाणस्स केवलीणं, धम्मायरियाण सव्वसाहूण । माई अवन्नवाई, किब्विसियं भावणं कुणइ ॥ १ ॥ " इति । इह कन्दर्पभावना नोक्ता, चतुःस्थानकत्वादित्यवसरप्राप्तमस्या इति सा प्रदर्श्यते-" कंदप्पे कुक्कुइए, दवसीले यावि हासणकरे य । विम्हावितो य परं, कंदप्पं भावणं कुणइ ॥१॥ " इति । कन्दर्पः कन्दर्पकथाशीलः, कुकुचितो भयमनेपथ्यो रूक्षशीलो दर्पेणोद्भटगमनभाषणाऽऽदिः, हासनकरो वेषवचनादिना स्वपरहासोत्पादको, विस्मापक इन्द्रजालादिः । स्था० ४ ठा० ४ उ० ।

तवतेणे वयतेणे, रूवतेणे अ जे नरे ।
आयारभावतेणे अ, कुव्वइ देवकिब्विसं ॥ ४६ ॥

तपस्तेनो वाक्स्तेनो रूपस्तेनस्तु यो नरः कश्चित्,आचारभावस्तेनश्च पालयन्नपि क्रियां तथाभावदोषात्, किल्बिषं करोति । किल्बिषिकं कर्म निर्वर्तयतीत्यर्थः । तपस्तेनो नाम क्षपकरूपकतुल्यः कश्चित्केनचित् पृष्टस्त्वमसौ क्षपक इति । स पूजाऽऽद्यर्थमाह-अहमत्र अथवा वक्ति-साधव एव वयमत्र, तूष्णीं वाऽऽस्ते। एवं वाक्स्तेनो धर्मकथिकाऽऽदितुल्यरूपः कश्चित्केनचित्पृष्ट इति । एवं रूपस्तेनो राजपुत्राऽऽदितुल्यरूपः । एवमाचारभावस्तेनो विशिष्टाऽऽचारवत्तुल्यरूप इति । भावस्तेनस्तु परोत्प्रेक्षितं कथञ्चित् किञ्चित् श्रुत्वा स्वयमनुत्प्रेक्षितमपि मयैतत्प्रपञ्चेन चर्चितमित्याहेति सूत्रार्थः ।

लद्धूण वि देवत्तं, उववन्नो देवकिब्विसे ।
तत्थावि से न याणाइ, किं मे किच्चा इमं फलं ॥ ४७ ॥

लब्ध्वाऽपि देवत्वं तथाविधक्रियापालनवसेन उपपन्नो देवकिल्बिषे देवकिल्बिषिकाये इति, तत्राप्यसौ न जानात्यविशुद्धाध्यवसायी, किं मम कृत्वा इदं फलं किल्बिषिकदेवत्वमिति सूत्रार्थः ।

अत्रैव दोषान्तरमाह--

तत्तो वि से चइत्ता णं, लब्भिही एलमूअयं ।
नरगं तिरक्खजोणिं वा, बोही जत्थ सुदुल्लहा ॥४८॥

ततोऽपि देवलोकादसौ च्युत्वा लप्स्यते एलमूकतामजत्वाद्याऽनुकारित्वं मानुषत्वे, तथा नरकं तिर्यग्योनिं वा पारम्पर्येण लप्स्यते,बोधिर्यत्र सुदुर्लभा सकलसंपन्निबन्धना यत्र जिनधर्मप्राप्तिर्दुराया । इह च प्राप्तेरप्येलमूकतामिति वाच्ये असकृदेवप्राप्तिख्यापनाय लप्स्यत इति भविष्यत्कालनिर्देश इति सूत्रार्थः ।

प्रकृतमुपसंहरति-

एयं च दोसं दट्ठूणं, नायपुत्तेण भासियं ।
अणुमायं पि मेहावी, मायामोसं विवज्जए ॥ ४९ ॥

एतं च दोषमनन्तरोदितं सत्यपि आमरणे किल्बिषिकत्वाऽऽदिप्राप्तिरूपं दृष्ट्वाऽऽगमतः ज्ञातपुत्रेण भगवता वर्द्धमानेन भा-

चितमुक्तम्, अणुमात्रमपि स्तोकमात्रमपि, किमुत बहूत्तं, मेधावी मर्यादावर्ती, माया मृषावादमनन्तरोदितं वर्जयेत्परित्यजेत्। इति सूत्रार्थः। दश० ५ अ० २ उ०।

देवकिब्बिसीया-दैवकिल्बिषिकी-स्त्री० । 'देवकिब्बिसिया' शब्दार्थे, बृ० १ उ०।

देवातिदेव–देवातिदेव–पुं० । देवानां मध्येऽतिशयवान् देवातिदेवः । अर्हति, स्था० ५ ठा० १ उ० ।

देवारण्ण–देवारण्य–न० । देवानां क्रीडास्थाने, ज्यो० ६ पाहु० । तमस्काये, देवारण्यमिति वा बलवद्देवभयाद्भयतां देवानां तथाविधाऽऽरण्यमिव शरणभूतत्वात् । भ० ६ श० ५ उ० ।

देवावास–देवाऽऽवास–पुं० । देवानां भवनपत्यादीनां स्थानेषु, भ० १३ श० २ उ० । (तद्वक्तव्यता ' ठाण ' शब्देऽस्मिन्नेव भागे १७०२ पृष्ठे ऊहया) अङ्गवत्यङ्गे, वाच० ।

देवावासंतर–देवाऽऽवासान्तर–न० । देवाऽऽवासविशेषे, भ० १० श० ३ उ० ।

देवावुक्कालिया–देवोत्कालिका–स्त्री० । ' देवकलिया ' शब्दार्थे, स्था० ४ ठा० ३ उ० ।

देवासुरसंगाम–देवासुरसङ्ग्राम–पुं० । देवासुरयुद्धे, भ० ।

अत्थि णं भंते ! देवा असुरा संगामा देवा असुरा ?। हंता अत्थि । देवासुरेणं भंते ! संगामेसु वट्टमाणेसु किं णं तेसिं देवाणं पहरणरयणत्ताए परिणमंति ?। गोयमा ! जं णं ते देवा तणं वा कट्ठं वा पत्तं वा सक्करं वा परामुसंति, तं णं तेसिं णं देवाणं पहरणरयणत्ताए परिणमंति । जहेव देवाणं तहेव असुरकुमाराणं ?। णो इणट्ठे समट्ठे, असुरकुमारा णं देवा णं णिच्चं विउव्विया पहरणरयणा पण्णत्ता ।

(जं णं देवा तणं वा कट्ठं वेत्यादि) इह च यद्देवानां तृणाऽऽद्यपि प्रहरणीयं भवति तदचिन्त्यपुण्यसंभारवशात्सुनुभचक्रवर्तिनः खाङ्गमिव, असुराणां तु यच्चित्यविकुर्वितानि तानि भवन्ति तद्देवापेक्षया,तेषां मन्दतरपुण्यत्वात्तथाविधपुरुषाणामिवेत्यवगन्तव्यमिति । भ० १८ श० ७ उ० ।

देवाहिदेव–देवाधिदेव–पुं० । देवानामिन्द्राऽऽदीनामधिका देवाः पूज्यत्वाद्देवाधिदेवा इति । अष्टादशदोषरहितेषु, दर्श० १ तत्त्व । तीर्थकरेषु, ते च चतुर्विंशत् । सम० २३ समo । आव० । (तद्वक्तव्यता ' तित्थयर ' शब्देऽस्मिन्नेव भागे २२७४ पृष्ठे ऊहया) भायलस्वामिगढस्थायां जिनप्रतिमायां च । भायलस्वामिगढे देवाधिदेवः । ती० ४३ कल्प । आ० क० । नि० चू० ।

देवाहिवइ–देवाधिपति–पुं० । देवेषु अधिपतिर्देवाधिपतिः । देवेष्वधिककान्तिधारिणि, उत्त० ११ अ० । सूत्र० । इन्द्रे, सूत्र० १ श्रु० ६ अ० ।

देविंद–देवेन्द्र–पुं० । द्वीव्यन्तीति देवा भवनवास्यादयस्तेषामिन्द्राः प्रभवो देवेन्द्राः । चमराऽऽदिषु, आव० ४ अ० । आ० म० । कल्प० । ते च द्वात्रिंशत् । स० । द० प० । उपा० । (तद्वक्तव्यता ' इंद ' शब्दे द्वितीयभागे ५३५ पृष्ठे ऊहया) (देवानां मनुष्यलोकगमनं 'मणुस्सलोय' शब्दे वक्ष्यते)

देविंदणाय–देवेन्द्रज्ञात–न० । देवेन्द्रोदाहरणे, पञ्चा० ।

कायव्वो जहसत्ति, पवरो देविंदणाएणं ॥ ८ ॥

यथा हि भगवतामर्हतां जन्ममहाऽऽदिषु सुरेन्द्रः सर्वविभूत्या सर्वाऽऽदरेण च शरीरसत्कारं विधत्ते, तद्वदन्यैरप्यसौ विधेयः ॥ ८ ॥ पञ्चा० ए विव० ।

देविंदत्थव–देवेन्द्रस्तव–पुं० । देवेन्द्रवक्तव्यताप्रतिबद्धे स्वनामख्याते प्रकीर्णकग्रन्थभेदे, द० प० ।

देविंदपूइय–देवेन्द्रपूजित–पुं० । देवेन्द्राः शकाऽऽदयस्तैः पूजितेषु समभ्यर्चितेषु अर्हत्सु, पं० सू० १ सूत्र ।

देविंदमुणीसर–देवेन्द्रमुनीश्वर–पुं० । रुद्रपाल्लीयगच्छोद्भवे सङ्घतिलकसूरिशिष्ये, स च विक्रमसंवत् १४७० वर्षे विद्यमान आसीत्, तेन च प्रश्नोत्तररत्नमालावृत्तिनामा ग्रन्थो विरचितः । जै० इ० ।

देविंदसूरि–देवेन्द्रसूरि–पुं० । जगच्चन्द्रसूरिशिष्ये, धर्मरत्नटीकाकारके स्वनामख्याते आचार्ये, ध० र० । देवभद्रसूरिशिष्ये च । बृ० ६ उ० । " बालत्तणं निअं देविंदसुरी जियमइविहवा जं सुयं गीअनामं कयं ता हुंति।" सङ्घा० १ अधि० १ प्रस्ता० ।

देविंदाइअणुगिति–देवेन्द्राऽऽद्यनुकृति–स्त्री० । देवाधिपदेवदानवप्रनृत्याचारानुकरणे, पञ्चा० ६ विव० ।

देविंदोग्गह–देवेन्द्रावग्रह–पुं० । अवगृह्यते स्वामिना स्वीक्रियते यः सोऽवग्रहः । देवेन्द्रस्य शक्रस्य ईशानस्य वाऽवग्रहः । दक्षिणलोकार्द्धे, उत्तरे च । प्रति० । भ० । देवेन्द्रस्य लोकमध्यवर्तिरुचकदक्षिणार्द्धमवग्रहः । आचा० २ श्रु० १ चू० ७ अ० १ उ० ।

देविंदोववाय–देवेन्द्रोपपात–पुं० । स्वनामख्याते कालिकश्रुतभेदे, पा० ।

देविंधयार–देवान्धकार–न० । अन्धकारभेदे, स्था० ।

तिहिं ठाणेहिं देविंधयारे सिया । तं जहा–अरिहंतेहिं वोच्छिज्जमाणेहिं, अरिहंतपन्नत्ते धम्मे वोच्छिज्जमाणे, पुव्वगए वोच्छिज्जमाणे ॥

देवानां भवनाऽऽदिष्वन्धकारं देवान्धकारं, लोकानुभावादेवेति, लोकान्धकारे तूक्तेऽपि यद्देवान्धकारमुक्तं तत्सर्वत्रान्धकारसद्भावप्रतिपादनार्थमिति । स्था० ३ ठा० १ उ० ।

देविड्ढि–देवर्द्धि–स्त्री० । त्रिधात्रिधा प्रकाराऽन्यां षड्धा देवर्द्धिः । स्था० ३ ठा० ४ उ० ।

देवित्थी–देवस्त्री–स्त्री० । स्त्रीभेदे, जी० २ प्रति० । (तद् वक्तव्यता ' इत्थी ' शब्दे द्वितीय भागे ५७५ पृष्ठे गता)

देविल्लासुय–देविल्लासुत–पुं० । अनुरक्तलोचनायाः पत्न्याः स्वनामख्याते उज्जयनीनृपे, आव० ४ अ० । (तद्वक्तव्यता ' सव्वकामविरत्तया ' शब्दे वक्ष्यते)

देवी–देवी–स्त्री० । द्वीव्यति, दिव अण् गौराऽऽदित्वात् ङीष् । दुर्गायाम्, वाच० । उत्त० । " यत्प्रभावाद्वाप्यन्ते, पदार्थाः कल्पनां विना । सा देवी संविदे नः स्ता-दस्तकल्पलतोपमा ॥ १ ॥" उत्त० १ अ० । मूर्वायाम्, स्फुक्कायां च । देवस्य पत्नी ङीप् । देवपत्न्याम्, वाच० । स्था० । " देवीणं भावणा सुणेयव्वा ।" देवीनां सुरव-

धूनाम्। पञ्चा० २ विव०। प्रव०। राजाग्रमहिष्याम्, व्य० ३ उ०। सू० प्र०। प्रश्न०। "तस्स णं सेणियस्स रण्णो धारणी नामं देवी होत्था।" ज्ञा० १ श्रु० १ अ०। (देवीवर्णकः 'राज' शब्दे वक्ष्यते) जम्बूद्वीपे भारते वर्षे अस्यामेवोत्सर्पिण्यां सप्तमस्यारनामनश्चक्रवर्तिनः स्वनामख्यातायां मातरि, स०। आव०। अत्रैव दशमस्य हरिषेणचक्रवर्तिनः स्वनामख्यातायां पत्न्याम्, स०। अस्यामेवोत्सर्पिण्यामष्टादशमस्याऽरस्वामिनस्तीर्थकरस्य स्वनामख्यातायां मातरि, स०। प्रव०। आव०। (देवीनामाशातना 'आसायणा' शब्दे द्वितीयभागे ४८३ पृष्ठे दर्शिता) विप्रक्षीणाम्रुपधौ च। "देव्यस्ता विप्रयोषितः" इत्युक्ते। वाच०। तथेशाने सौधर्मे ज्योतिश्चक्रे व्यन्तरनिकाये असुराऽऽदिनिकाये च प्रत्येकं देवेभ्यो देवीवर्गो द्वात्रिंशदधिकद्वात्रिंशद्गुण इति प्रज्ञापनायां महादण्डके प्रोक्तमस्त्यन्यत्र तु "तिगुणाविरूवअहिआ।" इत्यादिवचनात्सर्वसुरेभ्यः सर्वदेवीवर्गो द्वात्रिंशद्रूपाधिकद्वात्रिंशद्गुण इत्यत्रोत्तरवचनं कथं संगच्छते प्रज्ञापनायां सनत्कुमाराऽऽदिदेवेभ्यो देवीनामधिकत्वप्रतिपादनाऽऽदिप्रश्ने, उत्तरम्-ईशानाऽऽदिषु यदेवापेक्षया देवीनां द्वात्रिंशद्गुणत्वं तदीशानाऽऽदिदेवभोग्यदेव्यपेक्षयाऽवगन्तव्यं, तेनाधिका अपि तत्र देव्यः संभाव्यन्ते, ताश्च सनत्कुमाराऽऽदिदेवापेक्षया गण्यमाना द्वात्रिंशदधिकद्वात्रिंशद्गुणा भवन्तीति न कश्चन प्रज्ञापनोपाङ्गे "तिगुणा तिरूवअहिआ" इति" गाथोक्तनावाधयोर्भेद इति। ४१ प्र०। सेन० १ उ०।

देवीपडिमा-देवीप्रतिमा-स्त्री०। देव्या मूर्तौ, "तत्थ रण्णो देवीओ य पडिमा कया।" आ० म० १ अ० २ खण्ड।

देवुक्कलिया-देवोत्कलिका-स्त्री०। देवानां वा तस्यैवोत्कलिका देवोत्कलिका। आ० म० १ अ० १ खण्ड। प्रश्न०। तत्समवायविशेषे, स्था० ३ ठा० १ उ०। रा०। देवलहरौ च। स्था० ४ ठा० ३ उ०। (देवोत्कलिका कुत्र भवति इति 'लोगुज्जोय' शब्दे वक्ष्यते)

देवुज्जोय-देवोद्द्योत-पुं०। देवप्रकाशे, स्था०।

तिहिं ठाणेहिं देवुज्जोओ सिया। तं जहा-अरहंतेहिं जायमाणेहिं, अरहंतेहिं पव्वयमाणेहिं, अरहंताणं णाणुप्पायमहिमासु। स्था० ३ ठा० १ उ०। आव०। रा०। (अर्हतां परिनिर्वाणमहिमासु देवोद्द्योतो भवति इति 'लोगुज्जोय' शब्दे वक्ष्यते)

देवेंदगणि (ण्)-देवेन्द्रगणिन्-पुं०। देवभद्रगणिशिष्ये तपागच्छस्थे स्वनामख्याते गणिनि, देवभद्रगणिमधिकृत्य-"तेषामुभौ विनेयौ, देवेन्द्रगणीन्द्रविजयचन्द्राह्वौ।" ग० ४ अधि०। बृहद्गच्छीये आम्रदेवसूरिगुरौ, स च विक्रमसंवत्-११२६ मिते विद्यमान आसीत्। उत्तराध्ययनसूत्रोपरि टीका प्रवचनसारोद्धारग्रन्थ आख्यानमणिकोशश्चेत्यादिका ग्रन्था अनेन चक्रिरे, अयमाचार्यः सैद्धान्तिकशिरोमणिनाम्ना प्रसिद्धः। जै० इ०।

देवेंदवंदिय-देवेन्द्रवन्दित-पुं०। देवानां भुवनपतिव्यन्तरज्योतिष्कवैमानिकानामिन्द्राः स्वामिनो देवेन्द्रास्तैर्वन्दितेऽर्हति, कर्म० २ कर्म०।

देवेंदसीहसूरि-देवेन्द्रसिंहसूरि-पुं०। अञ्चलगच्छीये अजितसिंहसूरिगुरौ, एतेन जैनमेघदूताऽऽद्या ग्रन्था रचिताः। विक्रमसंवत्-१३७१ वर्षेऽयं स्वर्गतः। जै० इ०।

देवेंदसूरि-देवेन्द्रसूरिन्-पुं०। श्रीमद्बृहद्गच्छसूरितपागच्छस्थापकशिष्ये स्वनामख्याते सूरौ, कर्म० १ कर्म०। अयमाचार्यः विक्रमसंवत्-१२७०-१३२७ वर्षाणामन्तराले आसीत्, तेन च सटीकाः कर्मग्रन्थाः, आद्यदिनकृत्यटीकावृत्तिः, नव्यकर्मग्रन्थप्राशकवृत्तिः, सिद्धपञ्चाशकवृत्तिः, धर्मरत्नवृत्तिः, सुदर्शनश्रेष्ठिचरित्रं, देववन्दनभाष्यं, गुरुवन्दनभाष्यं, प्रत्याख्यानभाष्यमृषभाऽऽदिवर्द्धमानान्तस्तुतिः, पाक्षिकप्रतिक्रमणसूत्रवृत्तिरित्याद्यनेके ग्रन्था विरचिताः। विक्रमसंवत्-१३२७ वर्षेऽयं स्वर्गतः। जै० इ०। स्वनामख्याते सूरौ च। "कइ पुण देविंदसूरीहिं चत्तारि विवाणि अज्जऊ पुराओ आणीयाणि।" ती० १२ कल्प।

देवेसरवंदिय-देवेश्वरवन्दित-पुं०। देवेन्द्रवन्दिते, "देवेसरवंदियं च मरुदेवं।" स०।

देव्व-दैव-पुं०। चतुर्थे विवाहनेदे, ध०। यत्र यज्ञार्थमृत्विजः कन्याप्रदानमेव दक्षिणा स दैवः। ध० १ अधि०।

देवोववाय-देवोपपात-पुं०। जम्बूद्वीपे भारते वर्षे आगमिष्यन्त्यामुत्सर्पिण्यां त्रयोविंशतितमे स्वनामख्याते भविष्यति तीर्थकरे, स०।

देस-देश-पुं०। दिश-अच्। जनपदे, बृ० ४ उ०। जीत०। स्था०। आव०। नि० चू०। रा०। मण्डले, स्था० ४ ठा० ३ उ०। जन्मक्षेत्राऽऽदौ, स्था० ३ ठा० ३ उ०। प्रदेशे, स्था० ३ ठा० ३ उ०। भ०। अनु०। प्रकारे, विशे०। स्था०। अवयवविशेषे, स्था० १ ठा०। जी०। अंशे, आतु०। प्रश्न०। पूर्वाऽऽदिदिक्षु, स्था० ७ ठा०। एकदेशे, उपा० १ अ०। प्रस्तावे, विशे०। देशः प्रस्तावोऽवसरो विभागः पर्याय इत्यनर्थान्तरम्। दश० १ अ०। आ० म०। विशे०। ग्रामनगराऽऽदौ, ह्या० १२ अष्ट०। देशनं देशः। कथने, विशे०। आ० म०।

देसकहा-देशकथा-स्त्री०। तृतीये विकथाभेदे. ग० १ अधि०।

देसकहा चउव्विहा पण्णत्ता। तं जहा-देसविहिकहा, देसविअप्पकहा, देसच्छंदकहा, देसनेवत्थकहा।

तथा देशे मगधाऽऽदौ विधिर्विरचना प्रोज्झनमणिभूमिकाऽऽदीनां, क्रियते वा यत्र प्रथमतयेति देशविधिस्तत्कथा देशविधिकथा। एवमन्यत्रापि, नवरं विकल्पः सस्यनिष्पत्तिः, वप्रकूपाऽऽदिदेवकुलभवनाऽऽदिविशेषश्चेति। छन्दो गम्यागम्यविभागो यथा लाटदेशे मातुलभगिनी गम्या, अन्यत्राऽगम्येति। नेपथ्यं स्त्रीपुरुषाणां वेषः स्वभाविको विभूषाप्रत्ययश्चेति इह दोषाः। स्था० ४ ठा० २ उ०। आव०। दश०। नि० चू०। औ०। स०। प्रश्न०। आ० चू०।

इयाणिं देसकहा-

छंदं विधी विकप्पं, णेवत्थं बाहुविहं जणवयाणं।
एता कधा कधिते, चतु जमला सुक्किला चउरो॥१२५॥

गाहापच्छद्धं तदेव।

अग्गद्धस्स इमा वक्खा-

छंदो गंमं विधि रय-णा चेव य हुज्जते य जं पुव्वं।

सारणिकूवविकप्पो, णेवत्थं भोयमादीयं ॥ १२६ ॥

छंदो आयारो, गम्मा जहा लामाणं मावइकुहिया, माउस्सस्स धूया वा गंमा,विहो नाम विन्थरो,रयणा णाम जहा कोसलाविसए आहारभूमी हरितोवलित्ता कज्जति, पउमिणिपत्ताइएहिं भूमी अत्थरिज्जति, ततो पुण्णोवयारो कज्जति, तओ पत्ती उविज्जति, ततो पासेहिं कोडगा कट्ठोरगा संकुया सिप्पीओ य ठविज्जंति,भुज्जते य जं पुव्वं,जहा-कोंकणे पया,उत्तरावहे सत्तुया,अन्नेसु वा जं विसएसु दाऊण पच्छा अणेगभक्खप्पगारा दिज्जंति, सारणीकूवाईओ विकप्पा भण्णंति, णेवत्थं भोयमादीयं भवति । भोयमा णाम-जा ब्राह्मणं कच्चा सा महद्दयाणं जोयमा भण्णति, तं च बालप्पभितिं इत्थिया ताव बंधंति,जाव परिणीया,जाव य आवण्णसत्ता जाया, ततो भायणं कज्जति, सयणं मेलेऊण पगओ दिज्जति, तप्पभिई फिट्टइ जोयमा ।

इदानीं देसकहा दोसदरिसणत्थं भण्णति-

रागदोसुप्पत्ती, सपक्खपरपक्खओ य अधिकरणं ।
बहुगुण इमो त्ति दोसो, मोत्तुं गमणं व अण्णेसिं ।१२७।

देसकहा तं जं देसं वण्णेति, तत्थ रागो, इयरे दोसो, रागदोसओ तं कम्मबंधो, किं च-सपक्खेण वा परपक्खेण वा सह अधिकरणं भवति, कहं ?, साधू एगं विसयं पसंसति, अवरं णिंदति, ततो सपक्खेण वा परपक्खेण वा भणितो-तुमं किं जाणसि फूवसंसुद्धे ?; तो उत्तरपच्चुत्तरातो अधिकरणं भवति । किं चान्यत्-देसेवण्णिज्जमाणे अण्णो साहू चिंतेति-बहुगुणो इमो देसो वणिओ, सो वणिओ सोउं तत्थ गच्छंति। देसकहि त्ति दारं । नि० चू० १ उ० ।

देसकाल–देशकाल–पुं० । देशः प्रस्तावोऽवसरो विभागः पर्याय इत्यनर्थान्तरम् । स देशरूपः कालो देशकालः। अभीप्सितवस्त्ववाप्त्यवसरकालरूपे कालभेदे, विशे० । आतु० । आ० । चू० ।

इदानीं देशकालमभिधित्सुस्तत्स्वरूपं विवृण्वन्नाह-

जो जस्स जयावसरो, कज्जस्स सुभासुभस्स सो पायं ।
जण्णइ स देसकालो,देसोऽवसरो त्ति थक्को त्ति ॥२०६३॥

देशः, अवसरः, थक्कमिति पर्यायाः, तद्रूपः कालो देशकालः,स भण्णते। क इत्याह-यो यस्य शुभस्याशुभस्य वा कार्यस्य निश्चितो यदाऽवसरः स देशकालो भण्णते, कथं निश्चितः ?, इत्याह-सोपायं वक्ष्यमाणोपायत इत्यर्थः । इति गाथार्थः ॥ २०६३ ॥

तत्र शुभस्य साध्वादिनिक्कालक्षणस्य कार्यस्य निश्चयोपायगर्भं प्रस्तावकालमाह-

निरूमगं च गामं, मिहिल्लाथूभं च सुण्णयं दट्ठुं ।
नीयं च काय ओलिं-ति जाया निक्खस्स हरहरा।२०६४।

ओदनाऽऽदिपाककियापरिसमाप्तौ निर्द्धूमकं च ग्रामं, पानीयवाहिकामहिलास्तूनं च, कूपाऽऽदितटं शून्यं दृष्ट्वा तथा नीचं च काकाः, (ओलिति त्ति) अवलीयन्ते गृहाणि प्रत्यागच्छन्तीत्यादि च चिह्नं दृष्ट्वा जानीयात्, यथा संजाता भिक्षुकस्य (हरहर त्ति) अतीव भिक्षाप्रस्तावः इति ॥ २०६४ ॥

६५८

अथाप्रशस्तस्य कार्यस्य निश्चयोपायपूर्वकं प्रस्तावकालमाह-

निम्मच्छियं महुं पा–यसो निद्दी खज्जगावणो सुणो ।
जा यंगणे पसुत्ता, पज्जत्थवइया य पत्ता य ॥२०६५॥

निर्म्माक्षिकमपगतसकलमाक्षिकं मधु, तथा प्रकटश्वाकाशीभूतो निधिः, इत्येतद् दृष्ट्वा तद्ग्रहणस्य यः प्रस्तावो ज्ञायते स देशकालः । तथा खाद्यकाऽऽपणः कुल्लूरिकहट्टः शून्य इत्यवलोक्य यस्तद्गतखाद्यानां ग्रहणप्रस्तावो निश्चीयते, तथा या वाङ्मणे प्रस्तुता प्रोषितपतिका च मदिरामत्ता च, तस्या अपि तदानीमतीवमदनाऽऽकुलीकृतत्वाद्यो ग्रहणप्रस्तावो विज्ञायते,स सर्वोऽपि देशकालः इति निर्युक्तिगाथाद्वयार्थः ॥२०६५॥ विशे० ।

देसकालजाणण–देशकालज्ञान–न० । देशकालज्ञतायाम्, प्रव० ६ द्वार ।

देसकालजुय–देशकालयुत–त्रि० । क्षेत्रकालोचिते, प्रश्न० १ पद ।

देसकालण्णया–देशकालज्ञता–स्त्री० । अवसरोचितार्थसम्पादनरूपायां प्रस्तावज्ञतायाम्, भ० २५ श० ७ उ० ।

देसकालदाण–देशकालदान–न० । कटकाऽऽदौ विशिष्टनृपतेः प्रस्तावदाने, दश० ६ अ० १ उ० ।

देसकालभावण्ण–देशकालभावज्ञ–पुं० । देशं कालं भावं च जानातीति देशकालभावज्ञः । देशकालभावानां ज्ञातरि, प्रव० । देशं कालं भावं च लोकानां ज्ञात्वा सुखेन विहरति शिष्याणां वाऽभिप्रायान् ज्ञात्वा सुखेनानुवर्त्तयति । प्रव० ६५ द्वार । आचा० ।

देसकालावइत्ता–देशकालाव्यतीतत्व–न० । प्रस्तावोचिततारूपे चतुर्थे सत्यवचनातिशये, स० ३५ सम० । रा० ।

देसकालसंवरण–देशकालसंस्मरण–न० । स्मरणभेदे, व्य० १ उ० ।

देसग–देशक–पुं० । देशयति कथयतीति देशकः । कथके, स० १ सम० ।

देसग्ग–देशाग्र–न० । देशान्ते, ज्ञा० १ श्रु० १५ अ० ।

देसघाइ (ण) देशघातिन्–न० । स्वघात्यज्ञानाऽऽदेर्गुणस्य देशं मतिज्ञानाऽऽदिलक्षणं घातयन्तीत्येवंशीलानि देशघातीनि । देशघातिप्रकृतीनां रसस्पर्द्धकभेदे, पं० सं० ५ द्वार । देशघातीनि रसस्पर्द्धकानि भवन्ति । स्वस्य ज्ञानाऽऽदेर्गुणस्य देशमेकदेशं मतिज्ञानाऽऽदिलक्षणं घातयन्तीत्येवं शीलानि देशघातीनि । तानि चानेकप्रकारनिरूशतसङ्कुलानि । तथाहि-कानिचिद् अनेकबृहच्छिद्रशतसंकुलानि, वंशदलनिर्मापितकटवत् । कानिचिन्मध्यमानेकच्छिद्रशतसङ्कुलानि,कम्बलवत् । कानिचित् पुनरतीव सूक्ष्मानेकच्छिद्रशतसङ्कुलानि,तथाविधवस्त्रवत् । तथा तानि स्तोकस्नेहानि विशिष्टैर्नैर्मल्यरहितानि च भवन्ति । तथा चोक्तम्-" देसविघाइत्तणओ, इयरो कडकंबलं सुसंकासो । विविहबहुछिद्दभरिओ, अप्पसिणेहो अविमलो य " ॥ १ ॥ क० प्र० ।

देशघातिस्वरूपमाह-

देसविघाइत्तणओ, इयरो कडकंबलंसुसंकासो ।
विविहबहुछिद्दभरिओ, अप्पसिणेहो अविमलो य॥३७॥

इतरौ देशघाती देशघातित्वात् स्वविषयैकदेशघातित्वाद्भवति, स च विविधबहुछिद्रभृतः । तद्यथा-कश्चित् वंशदलनिर्म्मापितकट इवातिस्थूरच्छिद्रशतसंकुलः, कश्चित्कम्बल इव मध्यमविवरशतसंकुलः, कोऽपि पुनस्तथाविधमसृणवस्त्रोवदतीव सूक्ष्मविवरसंवृतः । (कडकंबलंसुसंकास इति) कटो वंशदलनिर्म्मापितः, कम्बल ऊर्णामयः, अशुकं वस्त्रं, तत्संकाशः, तथा स्वरूपतोऽल्पस्नेहः स्तोकस्नेहाऽविभागसमुदायरूपः, अविमलश्च नैर्म्मल्यरहितश्चेति गाथार्थः ॥ ३८ ॥ पं० सं० ३ द्वार । देशघातिरसस्पर्द्धकान्विते प्रकृतिभेदे, स्त्री० । ङीप् । पं० सं० ३ द्वार । " देसग्घाइरसेणं, पगईओ होंति देसघाईओ।" देशघातिरसेन देशघातिरसस्पर्द्धकसंबन्धेन प्रकृतयो मतिज्ञानाऽऽवरणाऽऽदिरूपाः पञ्चविंशतिसङ्ख्या देशघातिन्यो व्यवाह्रियन्ते । कर्म० ५ कर्म० । पं० सं० । (ताश्च मतिज्ञानाऽऽवरणाऽऽदिरूपाः पञ्चविंशतिप्रकृतयः 'कम्म' शब्दे तृतीयभागे २६६ पृष्ठे उक्ताः)

देसच्चाइ (ण्)-देशत्यागिन्-पुं० । देशस्य जन्मक्षेत्राऽऽदेस्त्यागो देशत्यागः, स यस्मिन्नविनये प्रभुगात्रीप्रदानाऽऽदावस्ति स देशत्यागी । जन्मक्षेत्राऽऽदित्यागवत्यविनये, स्था० ३ ठा० ३ उ० । नि० चू० ।

देसच्चाय-देशत्याग-पुं० । जन्मक्षेत्राऽऽदित्यागे, स्था० ३ ठा० ३ उ० ।

देसच्छंद-देशच्छन्द-पुं० । देशविषयके गम्यागम्यविभागे, स्था० ३ ठा० ३ उ० ।

देसच्छंदकहा-देशच्छन्दकथा-स्त्री० । देशकथाभेदे, स्था० ३ ठा० ३ उ० । (व्याख्या "देसकहा" शब्दे गता)

देसजइ-देशयति-पुं० । " सव्वेण च देसेण च, तेण जुओ होइ देसजई । " सर्वेण द्वादशव्रताऽऽत्मकेन देशेन वाऽन्यतरव्रतप्रतिपत्तिस्वरूपेण युक्तो श्रावके, आतु० । " सम्मद्दंसणसहिओ, गिण्हंतो विरइमप्पसत्तीए । एगव्वयाइचरिमो, अणुमोयइ तत्ति देसजई ॥१॥ " कर्म० २ कर्म० ।

देसजय-देशयत-पुं० । देशे सकलपनिरपराधत्रसवधविषये यतं यमनं संयमो यस्य स देशयतः । सम्यग्दर्शनयुते एकाणुव्रताऽऽदिधारिणि अनुमतिमात्रश्रावके, यदाह श्रीशिवशर्मसूरिवरः कर्मकृतौ-" एगव्वयाइ चरमो, अणुमोयइ तत्ति देसजई । " कर्म० ४ कर्म० ।

देसजुय-देशयुत-पुं० । षड्विंशत्सूरिगुणानां प्रथमे गुणे, प्रव० । यो मध्यदेशे जातो यो वाऽऽर्यमविंशतिषु जनपदेषु स देशयुतः, स ह्यार्यदेशभणितं जानाति । ततः सुखेन तस्य समीपे शिष्याः सर्वेऽप्यधीयते । प्रव० ६४ द्वार ।

देसड-देश-पुं० । " एवंपरंसमंधुवंमामनाक् एम्व पर समाणु धुवु मं मणाइं " ॥ ८ । ४ । ४१८ ॥ इत्यत्र प्रायोग्रहणाद् देशस्य देसडाऽऽदेशः । स्थाने, " माणि पइट्ठइ जइ न तणु, तो देसमा चइज्ज । " माने प्रणष्टे यदि तनुर्न त्यज्यते ततो देशस्त्यज्यते । प्रा० दु० ४ पाद ।

देसण-देशन-न० । प्ररूपणे, नं० ।

देसणा-देशना-स्त्री० । धर्मकथायाम्, षो० १४ विव० । ध० र० । स्था० । कथने, जी० ३७ अधि० । आख्यातं भगवतेदं न कुत्र्याऽऽदिनिःसृतं, यथा कश्चिदन्युपगम्यते-"तस्मिन्ध्यानसमापन्ने, चिन्तारत्नवदास्थिते । निःसरन्ति यथाकामं, कुत्रचाऽऽदित्योऽपि देशनाः ॥ १ ॥ " स्था० १ ठा० ।

देसणिग्गमण-देशनिर्गमन-न० । देशेषु विहारक्रमकरणे, व्य० ३ उ० ।

देसणिसूदग-देशनिषूदक-त्रि० । देशविनाशके, "विज्ञाखचूतिजीवश्च, भवं भ्रान्त्वाऽथ केसरी । जज्ञे तुङ्गगिरौ शङ्खपुरादेशनिसूदकः ॥१॥ " आ० क० ।

देसणी-देशनी-स्त्री० । प्रज्ञापन्याम्, दश० ७ अ० ।

देसणेवत्थ-देशनेपथ्य-न० । देशानुकूले स्त्रीपुरुषाणां वेषे, देशकथाभेदे, स्था० ४ ठा० २ उ० । (व्याख्या 'देसकहा' शब्देऽनुपदमेव गता)

देसदंसण-देशदर्शन-न० । देशनिरीक्षणे, बृ० ।

शिष्यः पृच्छति ?, तेन जिनकल्पिकपदवीसंपादयितुमिच्छता द्वादश वर्षाणि सूत्रग्रहणं कृतं, द्वादशवर्षैरर्थः समग्रोऽपि गृहीतः, अतो देशदर्शनेन विना किमिवास्य न सिद्ध्यतीत्युच्यते-

जइ वि पगासोऽहिगओ, देसीभासाणुओ तहा वि खलु ।
तद्दुय सिया य वीसुं, परयामाई य पच्चक्खं ॥

यद्यपि तेन प्रकाशोऽर्थः सूत्रस्याधिगतः सम्यगविज्ञातः, तथापि खलु निश्चयेनासौ विनेयो देशदर्शनेन देशीभाषायुनः कर्तव्यः । कुतः ?, इत्याह-(उडुय इत्यादि) उडुकमिति स्थानम्, (सिय त्ति) स्यात्शब्दो भवत्यर्थे, आशङ्कायां, भजनायां वा । तत्र भवत्यर्थे सुप्रसिद्धः । आशङ्कायां यथा-" दव्वथओ नावयओ, दव्वथओ बहुगुणो त्ति वुच्चि सिया । " भजनायां यथा-" सिय तिभागे सिय तिन्नागतिभागे " इत्यादि । (वीसुं त्ति) विष्वक्, पृथगित्यर्थः । परकागुद्रा जडमुस्तक इत्यर्थः । एते, आदिग्रहणात् पयः पिच्चं नीरमित्यादयश्च शास्त्रप्रसिद्धाः शब्दाः, तेषु तेषु देशेषु लोकेन तथा तथा व्यवह्रियमाणा देशदर्शनं कुर्वता, प्रत्यक्षमिति प्रत्यक्षत उपलभ्यन्त इति ।

आह-यद्यसौ तान् प्रत्यक्षतो नोपलभेत, ततः का नाम न्यूनता भवेत ?, उच्यते-

जो वि पगासो बहुसो, गुणिओ पच्चक्खओ न उवलद्धो ।
जच्चंधस्स व चंदो, फुसो वि संतो तहा स खलु ॥

योऽपि प्रकाशोऽर्थो बहुशो गुणितः स्वभ्यस्तीकृतः, परं न प्रत्यक्षत उपलब्धः, स जात्यन्धस्येव चन्द्रः स्फुटोऽपि सन् खलुरवधारणे, तथैवास्फुट एव मन्तव्यः । इदमत्र हृदयम्-यथा चन्द्रः प्रकटोऽपि साक्षादर्शनं विना जात्यन्धस्य न परिस्फुटाऽऽकारः प्रतिभासते, एवमस्यापि शास्त्रानुसारतः प्रकटा अपि प्रत्यक्षदर्शनमन्तरेण न परिस्फुटा व्यवहारोपयोगिनोऽर्थाः प्रतिभासन्ते ।

यतश्चैवं ततः-

आयरियत्तअजोविए, भयणा जविओ परीइ नियमेणं ।
अप्पत्तईओ जहन्ने, उत्तयं किं वाऽऽरियं खेत्तं ? ॥

आचार्यपदस्थानव्योऽयोग्यस्तस्मिन् भजनाऽर्थग्रहणानन्तरं देशदर्शनं कार्यते वा, न वा, यस्तु भव्य आचार्यपदयोग्यः स नि-

यमेन पर्येति देशदर्शनाय पर्यटति। स चाऽऽत्मतृतीयो जघन्येनाऽवश्यन्तया कृत्वा प्रेषणीयः। किं च-उभयमिति किमुत्सवकालप्रायोग्यमिदं क्षेत्रम्, उत वर्षावासयोग्यम् ?, तथा किमेतदार्यसार्द्धपञ्चविंशतिजनपदमध्यवर्ति, आहोस्विदनार्यम् ?, एतत्सर्वमपि देशदर्शनं विदधानो जानाति।

अथ देशदर्शनस्यैव गुणान्तराभिधित्सया द्वारगाथामाह-

दंसणसोही थिरकरण, देस अइसेस जणवयपरिच्चा।
काउ सुयं दायव्वं, अविणीयाणं विवेगो य ॥

देशदर्शनं कुर्वतो दर्शनशुद्धिरात्मनः, स्थिरीकरणं चान्येषां भवति। (देस त्ति) नानादेशभाषासु कौशलम्, अतिशेषा अतिशया जनपदपरीक्षा च जायते, तत एतानि दर्शनशुद्ध्यादीनि कृत्वा विनीतेभ्यः श्रुतं दातव्यम्। अविनीतानां विवेकः परित्यागः कर्तव्य इति द्वारगाथासमासार्थः।

अथ विस्तरार्थं विभणिषुराह-

जम्मणनिक्खमणेसु य, तित्थयराणं महाणुभावाणं।
इत्थ किर जिनवराणं, आगाढं दंसणं होइ ॥

जन्मनिष्क्रमणशब्दाभ्यां तदाधारभूता भूमयो गृह्यन्ते, जन्मभूमिषु अयोध्याऽऽदिषु, निष्क्रमणभूमिषु जयन्ताऽऽदिषु, चशब्दाज्ज्ञानोत्पत्तिभूमिषु पुरिमतालाऽऽदिषु, निर्वाणभूमिषु सम्मेतशैलचम्पाऽऽदिषु, तीर्थकराणां महानुभावानां सातिशयाचिन्त्यप्रभावानां संबन्धिनीषु विहरतोऽत्र किल भगवतां जिनवराणां जन्म जज्ञेऽत्र तु भगवन्तो दीक्षां प्रतिपन्नाः, इह केवलज्ञानमासादितवन्तः, इह पुनः परिवृताः, एवं बहुजनमुखेन श्रुत्वा स्वयं च दृष्ट्वा निःशङ्कितत्वभावादागाढमतीव विशुद्धं दर्शनं सम्यक्त्वं भवतीति। गतं दर्शनद्वारम्।

अथ स्थिरीकरणद्वारमाह-

संवेगं संविग्गण, जणए सुविहिओ सुविहियाणं।
आउत्तो जुत्ताणं, विसुद्धलेस्सो सुलेस्साणं ॥

संविग्नानां साधूनां संवेगं जनयति-अहो! अयं भव्याचार्योऽपगताहितसमस्तसिद्धान्तसिन्धुरत्नस्तच्चरणकरणसामाचारीकश्चैत्यं देशदर्शनं करोतीति श्रावनायाः स्थिरीकरणं करोतीत्यर्थः। स्वयं सुविहितानुष्ठानस्तेषामपि सुविहितानां स्वयमायुक्तो विकथानिद्राऽऽदिप्रमादैरप्रमत्तस्तेषामपि युक्तानामप्रमादिनां यश्च विशुद्धलेश्यः तेषामपि सुलेश्यानामिति। गतं स्थिरीकरणद्वारम्। अत्र विशेषश्चूर्णिकृता दर्शनशुद्धिद्वारं विवृण्वतेयं गाथा गृहीता, संवेगस्य सम्यग्दर्शनलक्षणत्वात् संवेगदर्शनेन शुद्धिः कृता भवतीति कृत्वा स्थिरीकरणद्वारं तु मूलत एव नोपात्तं, द्वारगाथायामपि "दंसणसोही देस-प्पवेस अइसेस जणवयपरिच्चा।" इत्येष एव पाठो गृहीतः, अतस्तदभिप्रायेण गतं दर्शनशुद्धिद्वारम्।

अथ देशप्रवेशद्वारं व्याचष्टे-

नाणादेसीकुसलो, नाणादेसीकयस्स सुत्तस्स।
अभिलावे अत्थकुसलो, होइ तओऽणेण गंतव्वं ॥
कहयति अभासियाण वि, अन्नासिए आवि पव्वयावेइ।
सव्वे वि तत्थ पीई, बंधंति सजातिओ णे त्ति ॥
पियधम्मऽवज्जभीरू, साहम्मियवच्छलो असढभावो।
संविग्गावेइ परं, परदेसपवेसणे साहू ॥

नानाप्रकारा मगधमालवमहाराष्ट्रलाटकर्णाटद्रविडगौर्जरादीनाऽऽदिदेशभवा या देशी भाषा, तस्यां कुशलः सन् नानादेशीकृतस्य नानादेशभाषानिबद्धस्य सूत्रस्याऽभिलापे उच्चारणेऽर्थकथने च कुशलो भवति, यत एवं ततोऽनेन देशदर्शनार्थं गन्तव्यम्॥ तथा-नञः कुत्सार्थत्वात् कुत्सिता अव्यक्तवर्णविज्ञाना भाषा येषां तेऽभाषिकास्तेषामप्यसौ धर्मं कथयति, निःशेषदेशभाषानिष्णातत्वात्। अज्ञाषिकाँश्चापि तद्देशज्ञाषया प्रतिबोध्य प्रव्राजयति; सर्वेऽपि च शिष्यास्तत्राऽऽचार्ये प्रीतिं बध्नन्ति, स्वभाषिको "णेअस्माकमयमिति कृत्वा। तथा प्रियधर्मा धर्मश्रद्धालुरवद्यं पापकर्म तस्माद्भीरुरवद्यभीरुः, साधर्मिकाः साधवस्तेषां वत्सलो ऊढ्यतो भक्तपानाऽऽदिना, भावतस्तु स्खलिताऽऽदिषु सारणाऽऽदिना, अशठभावो मातृस्थानरहितः, एवंविधोऽसौ साधुः परदेशप्रवेशने वर्तमानः परमन्यं संयमयोगेषु सीदन्तमपि संविग्नयति सदुपदेशदानाऽऽदिना संविग्नं करोतीति। गतं देशद्वारम्, देशप्रवेशद्वारं वा।

अथातिशयद्वारमाह-

सुत्तत्थथिरीकरणं, अइसेसाणं च होइ उवलद्धी।
आयरियदंसणेणं, तम्हा सेविज्ज आयरिए ॥

आचार्याणां-दर्शनेन, सेवनेनेति यावत्। सूत्रार्थस्थिरीकरणमतिशयानां च पूर्वाणामुपलब्धिः प्राप्तिर्भवति, यत एवं तस्माद् सेवेत पर्युपासीताऽऽचार्यान्।

एतदेव व्याख्यानयति-

उज्जए निसंकियाइं, पुव्विं से जाइं पुच्छमाणस्स।
होइ जओ सुत्तत्थे, बहुस्सुए सेवमाणस्स ॥

उभये सूत्रेऽर्थे च यानि पूर्वं (से) तस्य शङ्कितानि पदानि, तानि आचार्याणां समीपे पृच्छतो निःशङ्कितानि जायन्ते। एवं बहुश्रुतान् सेवमानस्य जयः सूत्रार्थविषयेऽयः सातिशयो भवति, अतो बहुश्रुतपर्युपासनं विधेयम्।

अपि च-

भवियाऽऽरिय देसाणं, दंसणं कुणइ एस इय सोउं।
अन्ने वि उज्जमंते, विणिक्खमंते य से पासे ॥

भव्याचार्य एष देशानां दर्शनं करोति इति श्रुत्वाऽन्येऽपि पर्युपास्यमानाचार्यसंबन्धिनः शिष्या उद्यच्छन्ते सूत्रार्थग्रहणाऽऽदावुद्यमं कुर्वन्ति गृहिणोऽपि च तद्गुणग्रामरञ्जितमनसो विनिष्क्रामन्ति दीक्षां प्रतिपद्यन्ते। (से) तस्य भविष्यदाचार्यस्य पार्श्वे इति।

अतिशयानामुपलब्धिः कथं भवतीत्याह-

सुत्तत्थे अइसेसा, सामायारी य विज्जजोगाऽऽई।
विज्जाजोगाइसुए, विसंति दुविहा अओ होंति ॥

इहातिशयाश्चिविधास्तद्यथा-सूत्रार्थातिशयाः, सामाचार्यातिशयाः, विद्यायोगाः। आदिशब्दान्मन्त्राश्चेति त्रयोऽतिशयाः। तत्र विद्या स्त्रीदेवताऽधिष्ठिता, पूर्वसेवाऽऽदिप्रक्रियासाध्या वा, योगाः पादलेपप्रभृतयो गगनगमनाऽऽदिफलाः, मन्त्राः पुरुषदेवताः, पठितसिद्धा वा। यद्वा-विद्यायोगाः, चशब्दान्मन्त्राश्च श्रुते एवं विशन्ति अन्तर्भवन्ति, अतो द्विविधा अति-

शया भवन्ति, तत्र सूत्रार्थातिशयाः सामाचार्यातिशयाश्चेत्येतेषामतिशयानामुपलब्धिरत्राऽऽचार्यपर्युपासनायां भवति ।

अथ सामाचार्यां अतिशयं विभावयिषुराह-

णिक्खमणे य पवेसे, आयरियाणं महाणुभावाणं ।
सामायारीकुसलो, अ होइ गणसंपवेसेणं ॥

स देशदर्शनं कुर्वाणस्तेषु तेषु नगराऽऽदिषु बहुश्रुतानामाचार्याणां महानुभावानां संबन्धी यो गणो गच्छस्तन्मध्ये यः सम्यगेकीभावेनैकत्रावस्थानलक्षणेन प्रवेशस्तेन बहुशो गच्छान्तरेषु निष्क्रमणे प्रवेशे च सामाचारीकुशलो भवति ।

कथमित्याह-

आगंतुमाहुणाव-म्मि अविदिए धन्नसाल्लमाइठिया ।
उप्पत्तियाउ थेरा, सामायारीउ ठाविंति ॥

आगन्तुकाः प्राघूर्णकाः, उपसंपन्ना वा, तेषां साधूनां भावेऽवदिते कीदृशेनाऽभिप्रायेणाऽऽगताः, के वाऽमीत्यपरिज्ञाते केचित् स्थविरा आचार्या धान्यशाल्यायामादिशब्दात् घृतशाल्याऽऽदिस्थवस्थिता औत्पत्तिकीरनुत्पन्नपूर्वाः सामाचारीः स्थापयन्ति ।

कथमित्याह-

सव्वे वि पिंडगहणं, दंसेउं नीह पिंडवायट्ठा ।
आहिमरमाइसंका, पमिलेहेउं व पविसंति ॥

ते आचार्याः पिण्डपातार्थं भिक्षानिमित्तं साधून् निर्गच्छतो भणन्ति-सर्वैरपि प्रतिग्रहान् दर्शयित्वा निर्गच्छत, अदर्शितप्रतिग्रहैर्न गन्तव्यम् । कुत इत्थं कुर्वन्तीत्याह-आभिमराऽऽद्याशङ्क्या मा कश्चिदभिमर उदायिनृपमारकवत् भक्तपानवेषेणाऽऽगतो भवेत्, आदिग्रहणेन चौरो वा मा धान्याऽऽदिमोषणायाऽऽगतो भवेदित्याद्याशङ्क्याऽपूर्वी सामाचारीं स्थापयन्ति, भिक्षाप्रतिनिवृत्ता अपि च गुरूणां पुरतः सर्वं प्रत्युपेक्ष्य ततः प्रविशद्भिरेवाभिमराऽऽदिभिः कारणैरिति । गतमतिशयद्वारम् ।

अथ जनपदपरीक्षाद्वारमाह-

अब्भे नदी तलावे, कूवे अप्पूरए य नावे वाणिए ।
मंस फलपुप्फभोगी, वित्थिन्ने खेत्ते कप्पविही ॥

स देशदर्शनं कुर्वन् जनपदानां परीक्षां करोति-कस्मिन् देशे कथं धान्यनिष्पत्तिः, तत्र क्वचिद्देशेऽभ्रैः सस्यं निष्पद्यते, वृष्टिपानीयैरित्यर्थः। यथा लाटविषये, क्वापि नदीपानीयैर्यथा सिन्धुदेशे, क्वचित्तु तमागजलैर्यथा ऊविडविषये, क्वापि कूपपानीयैर्यथोत्तरापथे, क्वचिदतिपूरकेण, यथा उन्नासायां पूराइतिरिक्यमानायां तत्पूरपानीयजावितायां क्षेत्रभूमौ धान्यानि प्रकीर्यन्ते । (नावेति) यत्र नावमारोप्य धान्यमानीतमुपभुज्यते, यथा काननद्वीपे, (वाणि त्ति) यत्र वाणिज्येनैव वृत्तिरुपजायते, न कर्षणेन, यथा मथुरायाम्, (मंस त्ति) यत्र दुर्भिक्षे समापतिते मांसेन कालोऽतिवाह्यते । तथा यत्र पुष्पफलभोगी प्रायुर्येण लोको, यथा कोङ्कणाऽऽदिषु, तथा कानि विस्तीर्णानि क्षेत्राणि, कानि वा संक्षिप्तानि (कप्पे त्ति) कस्मिन् क्षेत्रे कः कल्पो यथा सिन्धुविषयेऽनिमिषाऽऽहारा अगर्हिताः । (विहि त्ति) कस्मिन् देशे कीदृशः समाचारो यथा सिन्धुषु रजकः संज्ञोऽयो, महाराष्ट्रविषये कल्पपाला अपि संभोज्या इति ।

अपि च-

सज्झायसंजमहिए, दाणाइसमाउले सुलभवित्ती ।
कालुभयहिए खित्ते, जाण पमिणीयरहिए य ॥

स्वाध्यायहितं यत्राक्षपमे सूत्रार्थपौरुष्यो भवतः, संयमहितं स्त्रीदोषरहितमल्पबीजरहितऽऽदि वा । (दाणाइ त्ति) दानश्राद्धैरादिग्रहणादभिगमश्राद्धैर्वा समाकुलम् । अत एव सुलभा सुप्राया वृत्तिर्देतुराहारस्य सपत्तिर्यत्र तत् सुलभवृत्तिकं, तथा किमिदमागन्तुकभद्रकम, उत वास्तव्यभद्रकमित्याद्युपलक्षणाद् द्रष्टव्यम् । (कालुभयहिए खित्ते त्ति) अभूमि वर्षावासप्रायोग्याणि, अभूमि तु ऋतुबद्धकालयोग्यानि, इत्युभयकालहितानि क्षेत्राणि जानाति, तथा प्रत्यनीकः साध्वादीनामुपद्रवकारी तद्रहितानि च क्षेत्राणि सम्यग् जानातीति । गतं जनपदपरीक्षाद्वारम् । बृ० १ उ० २ प्रक० ।

देसधम्म-देशधर्म-पुं० । देशाऽऽचारे, देशधर्मो देशाऽऽचारः । स च प्रतिनियत एव नेपथ्याऽऽदिभेदलिङ्ग इति । दश० १ अ० ।

देसप्पंत-देशप्रान्त-पुं० । देशस्य शेषसीमायाम्, विपा० १ श्रु० १ अ० ।

देसबंध-देशबन्ध-पुं० । देशतो देशापेक्षया बन्धः । बन्धभेदे, भ० ८ श० ६ उ० ।

देसभासा-देशभाषा-स्त्री० । मालवमहाराष्ट्राऽऽदिप्रसिद्धभाषायाम्, बृ० ६ उ० । पुरुषद्वात्रिंशत्कलाभेदे, कल्प० १ अधि० ७ क्षण ।

देसय-देशक-पुं० । देशयतीति देशकः । उपदेष्टरि, आ० म० १ अ० १ खण्ड० । आव० ।

देसवासी-देशवर्षिन्-पुं० । देशे आत्मनो वा देशेन वर्षतीति देशवर्षी । एकदेशमात्रे वर्षणशीले, स्था० ४ ठा० ४ उ० ।

देसविअप्पकहा-देशविकल्पकथा-स्त्री० । देशकथाभेदे, स्था० । (व्याख्या ' देसकहा ' शब्देऽनुपदमेव गता)

देसविण्णाण-देशविज्ञान-न० । विविधमण्डलेषु सञ्चरतां विचित्रलोकलोकोत्तरव्यवहारज्ञाने, पञ्चा० १७ विव० ।

देसवित्थारणंतय-देशविस्तारानन्तक-न० । एक आकाशप्रतरः सर्वविस्तारानन्तकसर्वाऽऽकाशास्तिकाय इत्येवंरूपेऽनन्तभेदे, स्था० १० ठा० ।

देसविरइ-देशविरति-स्त्री० । देशः प्राणातिपाताऽऽदेः, एकदेशस्तु वृक्षच्छेदनाऽऽदेः, तयोर्विरमणं विरतिर्यस्यां निवृत्तौ सा देशविरतिः । विशे० । अणुव्रतातिथिप्रतिपत्तिपरिणामे, पञ्चा० १० विव० । देशविरतिसम्यक्त्वधारिणो द्वादशदेवलोके यातानवेति प्रश्ने, उत्तरम्-द्वादशदेवलोके याता इत्यक्षराणि पन्नवणासूत्रे वृत्तौ च सन्तीति । ७५ प्र० । सेन० ३ उल्ला० ।

देसविरइगुणट्ठाण-देशविरतिगुणस्थान-न० । देशविरता एकव्रताद्यणुव्रतधरभेदाः श्रावकाः, तेषां गुणस्थानम् । आव० ४ अ० । श्रावकसम्बन्धिगुणस्थाने, प्रव० । तथा सर्वसावद्ययोगस्य देशे एकप्रतिनियतस्थूलसावद्ययोगेऽऽदौ सर्वव्रतविषयानुमतिवर्जनाधद्ययोगानो विरतिर्यस्याऽसौ स देशवि-

रतः, सर्वसावद्ययोगविरतिस्वरूपस्य नास्ति, प्रत्याख्यानाऽऽवरणकषायोदयात् सर्वविरतिरूपं हि प्रत्याख्यानमावृण्वन्तीति-प्रत्याख्यानाऽऽवरणा उच्यन्ते, इति देशविरतः, तस्य गुणस्थानं देशविरतगुणस्थानम् । प्रव० २३ द्वार । कर्म० । पं० सं० । दर्श० ।

देसविरइसामाइय-देशविरतिसामायिक-न० । देशविरतिरुक्तस्वरूपैव सामायिकमिति । सामायिकभेदे, अस्य पर्यायाः-"विरयाविरई संवुडमसंवुडे बालपंडिए चेव देसिक्कदेसविरई अणुधम्मो य ।" विशे० । आ० म० (एषां पदानां व्याख्या तत्तच्छब्दे) (वक्तव्यता सर्वैव 'सामायिय' शब्दे ऽनुक्रम्या)

देसविराहय-देशविराधक-पुं० । देशं स्तोकमंशं ज्ञानाऽऽदित्रयरूपस्य मोक्षमार्गस्य तृतीयभागरूपं चारित्रं विराधयति । प्राप्तस्य चारित्रस्यापालनाद्प्राप्तेवी देशमात्रस्य विराधके, भ० ८ श० ६ उ० ।

देसविरुद्ध-देशविरुद्ध-न० । तत्तद्देशीयशिष्टैरनाचीर्णे, ध० । तत्र यद्यत्र देशे शिष्टजनैरनाचीर्णं तत्तत्र देशविरुद्धम् । यथा-सौवीरेषु कृषिकर्मेत्यादि । अथवा जातिकुलाऽऽद्यपेक्षयाऽनुचितं देशविरुद्धं, यथा ब्राह्मणस्य सुरापानमित्यादि । ध० २ अधि० ।

देसविहिकहा-देशविधिकथा-स्त्री० । देशकथाभेदे, स्था० ४ ठा० २ उ० । (व्याख्या 'देसकहा' शब्देऽनुपदमेव गता)

देससंका-देशशङ्का-स्त्री० । देशविषये जीवाऽऽद्यन्यतमपदार्थैकदेशगोचरे शङ्काभेदे, प्रव० ६ द्वार । यथाऽस्ति जीवः केवलं सर्वगतोऽसर्वगतो वा सप्रदेशोऽप्रदेशो वेति शङ्का देशविषया, जीवाऽऽद्यन्यतमपदार्थैकदेशगोचरेत्यर्थः । प्रव० ६ द्वार । नि० चू० ।

देससाहणबंध-देशसंहननबन्ध-पुं० । देशेन देशस्य संहननलक्षणो बन्धः संबन्धः शकटाङ्गाऽऽदीनामिव । देशसंहननबन्धभेदे, भ० ८ श० ९ उ० ।

देसादायारलंघण-देशाऽऽद्याचारलङ्घन-न० । जनपदग्रामकुलप्रकृतिसमाचारातिक्रमे, पञ्चा० २ विव० ।

देसाराहय-देशाऽऽराधक-पुं० । सम्बोधरहितत्वात्क्रियापरत्वाद् देशं स्तोकमंशं मोक्षमार्गस्याऽऽराधयति । देशमात्राऽऽराधके, भ० ८ श० ६ उ० ।

देसावगासिय-देशावकाशिक-न० । देशे दिग्व्रतगृहीतस्य दिक्परिमाणस्य विभागोऽवकाशोऽवस्थानमवतारो विषयो यस्य तद्देशावकाशं, तदेव देशावकाशिकम् । दिग्व्रतगृहीतस्य दिक्परिमाणस्य प्रतिदिनं संक्षेपकरणलक्षणे, सर्वव्रतसंक्षेपकरणलक्षणे वा । स्था० ४ ठा० ३ उ० ।

तयाणंतरं च णं देसावगासियस्स समणोवासएणं पंच अइयारा जाणियव्वा, न समायरियव्वा । तं जहा-आणवणप्पओगे १, पेसवणप्पओगे २, सद्दाणुवाए ३, रूवाणुवाए ४, बहिया पोग्गलपक्खेवे ५ । उपा० १ अ० । आव० । आ० चू० । सूत्र० । पञ्चा० ।

श्रावकस्य द्वितीयशिक्षाव्रते, आ० । ध० २० । ध० ।

अधुना देशावकाशिकव्रतातिचारानाह-

प्रेषणानयने शब्द-रूपयोरनुपातने ।
पुद्गलप्रेरणं चेति, मता देशावकाशिके ॥ ५६ ॥

प्रेषणं चाऽऽनयनं चेति प्रेषणानयने, शब्दश्च रूपं चेतयोरनुपातनेऽवतारणे, शब्दानुपातो रूपानुपातश्चेत्यर्थः । पुद्गलप्रेरणं चेति पञ्चातिचारा देशावकाशिके देशावकाशिकनाम्नि व्रते ज्ञेयाः । अयं भावः-दिग्व्रतविशेष एव देशावकाशिकव्रतम् । इयांस्तु विशेषो-दिग्व्रतं यावज्जीवं संवत्सरचतुर्मासीपरिमाणं वा, देशावकाशिकं तु दिवसप्रहरमुहूर्ताऽऽदिपरिमाणं, तस्य च पञ्चातिचाराः । तद्यथा-प्रेषणं भृत्यादेर्विवक्षितक्षेत्राद् बहिः प्रयोजनाय व्यापारणम्, स्वयं गमने हि व्रतभङ्गः स्यादिति अन्यस्य प्रेषणम्, देशावकाशिकव्रतं मा भूत्सूक्ष्मनागमनाऽऽदिव्यापारजनितप्राण्युपमर्द इत्यभिप्रायेण गृह्यते, स तु स्वयं कृतोऽन्येन वा कारित इति न कश्चित्फले विशेषः, प्रत्युत स्वयं गमने ईर्यापथविशुद्धेर्गुणः, परस्य पुनरनिपुणत्वादीर्यासमित्यभावे दोष इति प्रथमोऽतिचारः । १ । आनयनं विवक्षितक्षेत्राद् बहिः स्थितस्य सचेतनाऽऽदिद्रव्यस्य विवक्षितक्षेत्रे प्रापणं सामर्थ्यात्प्रेष्येण, स्वयं गमने हि व्रतभङ्गः स्यात्, परेण त्वानयने न भङ्ग इति बुद्ध्या यदाऽऽनाययति सचेतनाऽऽदि द्रव्यं तदाऽतिचार इति द्वितीयः । २ । शब्दस्य चुत्कासिताऽऽदेरनुपातनं श्रोत्रेऽवतारणं शब्दानुपातनं, यथा विहितस्वगृहवृतिप्राकाराऽऽदिव्यवच्छिन्नभूप्रदेशाभिग्रहः प्रयोजने उत्पन्ने विवक्षितक्षेत्राद् बहिर्व्रतभङ्गभयात्स्वयं गन्तुं बहिः स्थितं चाऽऽह्वातुमशक्नुवन् वृतिप्राकाराऽऽदिप्रत्यासन्नवर्तीभूय कासिताऽऽदिशब्दम् आह्वानीयानां श्रोत्रेऽनुपातयति, ते च तच्छ्रवणात्तत्समीपमागच्छन्तीति शब्दानुपातननामातिचारस्तृतीयः । ३ । एवं रूपानुपातनं, यथा रूपं शरीरसंबन्धि उत्पन्नप्रयोजनः शब्दमनुच्चारयन्नाह्वानीयानां दृष्टावनुपातयति, तद्दर्शनाच्च तत्समीपमागच्छन्तीति रूपानुपातनाऽऽख्योऽतिचारश्चतुर्थः । ४ । तथा पुद्गलाः परमाणवस्तत्स्वभावतसमुद्घया बादरपरिणामं प्राप्ता लोष्टाऽऽदयोऽपि तेषां प्रेरणं क्षेपणं विशिष्टदेशाभिग्रहे हि सति कार्यार्थी परगृहगमननिषेधाद्यदा लोष्टकान् परेषां बोधनाय क्षिपति, तदा लोष्टपातसमनन्तरमेव ते तत्समीपमनुधावन्ति, ततश्च तान् व्यापारयतः स्वयमगच्छतोऽप्यतिचारो भवतीति पञ्चमः । ५ । इह चाऽऽद्यत्रयमव्युत्पन्नबुद्धित्वेन सहसाकाराऽऽदिना वा, अन्त्यद्वयं तु मायापरतयाऽतिचारतां यातीति विवेकः । इहाऽऽहुर्बहवः-दिग्व्रतसंक्षेपकरणमणुव्रताऽऽदिसंक्षेपकरणस्याप्युपलक्षणं द्रष्टव्यं, तेषामपि संक्षेपस्यावश्यंकर्तव्यत्वात् । अत्राऽऽह-ननु अतिचाराश्च दिग्व्रतसंक्षेपकरणस्यैव श्रूयन्ते, न व्रतान्तरसंक्षेपकरणस्य, तत्कथं व्रतान्तरसंक्षेपकरणं देशावकाशिकव्रतमिति ? । अत्रोच्यते-प्राणातिपाताऽऽदिव्रतान्तरसंक्षेपकरणेषु वधबन्धाऽऽदय एवातिचाराः, दिग्व्रतसंक्षेपकरणे तु संक्षिप्तत्वात्तेषस्य प्रेष्यप्रयोगाऽऽद्योऽतिचारा भिन्नातिचारसंभवाच्च दिग्व्रतसंक्षेपकरणस्यैव देशावकाशिकत्वं साधूक्तम् ॥ ५६ ॥ इत्युक्ता देशावकाशिकव्रतातिचाराः । ध० २ अधि० । संपूर्णदिवसे देशावकाशिकं क्रियते, तत्रोच्चारणपारणविधिर्लिखनीयः, तथा तत्र सामायिकं गृहीतं पारितं च शुद्ध्यति, न वा, तथा देशावकाशिकेन सह सामायिकमुच्चरति, न वेति प्रश्ने, उत्तरम्-देशावकाशिकोच्चारणविधिः-"दे-

सावगासिअन्नपभोगं पच्चक्खामि " इत्यादिको दृश्यते, परं पारणविधिर्नातो नास्ति, तथा देशावकाशिकमध्ये सामायिकस्य ग्रहणं पारणं च शुध्यति, तेन सह सामायिकग्रहणमपि शुध्यतीति । ४२७ प्र० । सेन० ३ उल्ला० ।

देसाहिवइ–देशाऽधिपति–पुं० देशाऽऽरक्षिके,देशव्यापृतिकेवा। बृ० ४ उ० । स्था० ।

देसि–देशिन्–त्रि० । देशयति, अवयविनि,विशे० ।

देसिकदेसविरय–देशैकदेशविरत–पुं० । श्रावके, आतु० । षण्णां पृथिव्यादिकायानां षष्ठांशत्वाद् देशस्त्रसकायव्यपरोपणलक्षणः,तस्यापि संकल्पजाऽऽरम्भजत्वेन द्विभेदत्वादेकदेशः संकल्पजत्रसविनाशनिवृत्तिरूपः पुनस्तस्यापि सापराधनिरपराधभेदद्वयेन द्विप्रकारत्वादत्र निरपराधसंकल्पजत्रसजीवविनाशनिवृत्तिरूपो देशैकदेशस्तेन स्वयं हननघातनाद्विरतो निवृत्तो देशविरतः ॥ आतु० ।

देसिगणि–देशगणि–पुं० । स्वनामख्याते आचार्ये, " तत्तो अ थिरचरित्तं, उत्तमसम्मत्तसत्तसंजुत्तं । देसिगणिखमासमणं, मादरगुत्तं नमंसामि " ॥ ११ ॥ कल्प० २ अधि० ८ क्षण ।

देसितव–देशितवत्–त्रि० । प्रकाशिते, सूत्र० १ श्रु० ६ अ० ।

देसिता–देशित्वा–अव्य० । कथयित्वेत्यर्थे, आ० म० १ अ० १ खण्ड ।

देसिय–देशिक–पुं० । देशनं देशः कथनं, सोऽस्यास्तीति देशिकः । गुरौ, उपदेष्टरि, आ० म० १ अ० १ खण्ड । विशे० । व्य० । देशयतीति देशिकः । अप्रयायिनि, आव० ५ अ० । बृहत्क्षेत्रव्यापिनि, आचा० २ श्रु० १ चू० १ अ० ३ उ० ।

देसित–त्रि० । उपदिष्टे, कथिते, विशे० । आव० । पा० । ज्ञा० ।

दैवसिक–त्रि० । दिवसभवे, "देसियं च अईआरं, चिंतिज्ज अणुपुव्वसो । " उत्त० २६ अ० ।

देसिल्लग–देशीय–त्रि० । देशोद्भवे, बृ० ३ उ० । यथा पाणमुक्खनकम्म । नि० चू० १६ उ० ।

देसीतो–देशीतस्–अव्य० । देशीभाषामाश्रित्येत्यर्थे,बृ० २ उ० ।

देसीनाममाला–देशीनाममाला–स्त्री० देशीभाषानामकोषे, रा० ।

देसीपोरपमाण–देशीपर्वप्रमाण–त्रि० । अङ्गुष्ठपर्वपरिमितमुष्टिप्रमाणे, देशीशब्दस्याऽङ्गुष्ठवाचकत्वात् । व्य० ८ उ० । नि० चू० ।

देसीभासा–देशीभाषा–स्त्री० । देशप्रसिद्धाऽपभ्रंशभाषायाम्, आ० चू० १ अ० । आचा० ।

देसेय–देशैजस्–त्रि० । देशैश्चले (देशैजा देशतश्चलाः) प्र०२५ श० ४ उ० ।

देसोहि–देशावधि–पुं० । देशप्रकाशके अवधिज्ञाने, स० ।

देह–देह–पुं० । न० । ' दिह ' उपचये, देहः। आहारपरिणामजनितोपचये शरीरे, अनु० । उत्त० । आव० । विशे० । प्रव० । आ० चू० । आ० म० । स्था० । पिशाचनामभेदे, प्रज्ञा० १ पद ।

देहंबलिया–देहबलिका–स्त्री० । अनुस्वारो नैपातिकः। देहबलमित्यस्याऽऽख्याने, ज्ञा० १ श्रु० १६ अ० । भिक्षावृत्तौ, देहंबलिका नाम भिक्षावृत्तिः । आ० म० १ अ० २ खण्ड ।

देहणी–देशी–पहके, दे० ना० ५ वर्ग ४८ गाथा ।

देहदुब्बलदोस–देहदुर्बलदोष–पुं० । संहननदुर्बले, पं० चू० ।

देहपरिणाम–देहपरिणाम–पुं० । प्रतिविशिष्टायां शरीरशक्तौ, आचा० १ श्रु० १ अ० ४ उ० ।

देहपलोयण–देहप्रलोकन–न० । आदर्शाऽऽदौ देहदर्शने, दश० २ अ० ।

देहबल–देहबल–न० । संहननजनिते शरीरसामर्थ्ये, बृ० ३ उ० ।

देहबलिया–देहबलिका–स्त्री० । भिक्षावृत्तौ, आ० म० १ अ० २ खण्ड ।

देहमाण–प्रेक्षमाण–त्रि० । पश्यति, " दिट्ठीए देहमाणो देहमाणो चिट्ठइ । " भ० ९ श० ३३ उ० । सूत्र० ।

देहली–देहली–स्त्री० । द्वारशाखाप्रोते अधःखण्डे,आ०म०२ अ० ।

देहविभूसा–देहविभूषा–स्त्री० । स्नानाऽऽदिरूपायां देहपरिष्क्रियायाम्, बृ० १ उ० ।

देहविमुक्क–देहविमुक्त–पुं० । सिद्धे, भ० ८ श० २ उ० ।

देहव्वावि–देहव्यापिन्–पुं० । शरीरमात्रव्यापके आत्मनि, दश० ४ अ० ।

देहसमाहि–देहसमाधि–पुं० । शरीरसमाधाने,पं० व० ४ द्वार ।

देहसहाव–देहस्वभाव–पुं० । शरीरस्वरूपे, व्य० ५ उ० ।

देहाइणिमित्त–देहाऽऽदिनिमित्त–न० । शरीरगृहपुत्रकलत्रप्रभृत्यर्थे, पञ्चा० ४ विव० ।

देहि–देहिन्–पुं० । आत्मनि, सूत्र० १ श्रु० १ अ० १ उ० ।

दो–द्वौ–पुं० । " द्वेः दो वे " ॥ ८ । ३ । ११६ ॥ द्विशब्दस्य प्रथमायां द्विवचने संस्कृते–द्वौ । प्राकृते–'दो' इति । प्रा० ३ पाद ।

दोआल्ल–देशी–वृषभे, दे० ना० ५ वर्ग ४६ गाथा ।

दोइ–दोइ–अव्य० । ' दो ' इति निपातो विकल्पार्थे, " दोइ सिणेह उवालब्धं । " बृ० ३ उ० ।

दोकिरिय–द्वैक्रिय–पुं० । द्वे क्रिये समुदिते द्विक्रियं, तदधीयते तद्वेदिनो वा द्वैक्रियाः । कालानेदेन क्रियाकृत्यानुभवप्ररूपेषु गङ्गाचार्यप्रवर्तितेषु पञ्चमनिह्नवेषु, स्था० ७ ठा० ।

तद्वक्तव्यता–

अट्ठावीसा दो वा–समया 'तइया' सिद्धिं गयस्स वीरस्स ।
दोकिरियाणं दिट्ठी, उल्लुगतीरे समुप्पन्ना ॥ २६२५ ॥

अष्टाविंशत्यधिके द्वे वर्षशते तदा सिद्धिं गतस्य श्रीमन्महावीरस्यात्रान्तरे द्वैक्रियनिह्नवानां दृष्टिरुल्लुकातीरे समुत्पन्नेति ॥ २५२४ ॥

कथं पुनरियमुत्पन्ना ?, इत्याह–

नइखेमजणवउल्लुग, महागिरि धणगुत्त अज्जगंगे य ।
किरिया दो रायगिहे, महातवोतीरमणिनाए ॥२५२५॥

उल्लुका नाम नदी, तदुपलक्षितो जनपदोऽप्युल्लुका । उल्लुकानद्याश्चैकस्मिंस्तीरे धूलिप्राकाराऽऽवृतनगरविशेषरूपं खेटस्थानमासीत्, द्वितीये तु उल्लुकातीरं नाम नगरम्, अन्ये त्वा-

हुः-एतदेवोल्बुकातीरं धूलीप्राकाराऽऽवृतत्वात्खेटमुच्यते, तत्र च महागिरिशिष्यो धनगुप्तो नाम,अस्यापि शिष्य आर्यगङ्गो नामाऽऽचार्यः । अयं च नद्याः पूर्वतटे, तदाचार्यास्त्वपरतटे । ततोऽन्यदा शरत्समये सूरिवन्दनार्थं गच्छन् गङ्गो नदीमुत्तरति, स च खल्वाटः । ततस्तस्योपरिष्टाद्भुष्णेन दह्यते खल्ली । अधस्तात्तु नद्याः शीतलजलेन शैत्यमुत्पद्यते,ततोऽन्तरे कथमपि मिथ्यात्वमोहनीयोदयादसौ चिन्तितवान्-अहो ! सिद्धान्ते गमापत्क्रियाद्वयानुभवः किल निषिद्धोऽहं त्वेकस्मिन्नेव समये शैत्यमौष्ण्यं च वेदयामि, अतोऽनुभवविरुद्धत्वाद्वेदमार्गमोक्तं शीलनमाभातीति विचिन्त्य गुरूणां निवेदयामास । ततस्तैर्वेदयमाणयुक्तिभिः प्रज्ञापितोऽसौ । यदा च स्वाग्रहग्रस्तबुद्धित्वान्न किञ्चित्प्रतिपद्यते,तदा उद्घाट्य बाह्याः कृतो विहरन् राजगृहनगरमागतः,तत्र च महातपस्तीरप्रभवनाम्नि प्रश्रवणे मणिनागनाम्ना नागस्य चैत्यमस्ति ! तत्समीपे च स्थितो गङ्गः पर्वतपुरःसरं युगपत्क्रियाद्वयवेदनं प्ररूपयति स्म । तच्च श्रुत्वा प्रकुपितो मणि[illegible]स्तमवादीत्-अरे दुष्टशिक्षक ! किमेवं प्रज्ञापयसि ?,य[illegible] । प्रदेशे समवसृतेन श्रीमद्वर्द्धमानस्वामिना एकस्मिन् समये एकस्या एव क्रियाया वेदनं प्ररूपितम, तच्चेहस्थितेन मयाऽपि श्रुतम्, ततिकं ततोऽपि लघुतरः प्ररूपको जातः, येनैवं युगपत्क्रियाद्वयवेदनं प्ररूपयसि ?। तत्परित्यज चैतां कूटप्ररूपणाम्, अन्यथा नाशयिष्यामि त्वाम् । इत्यादितर्जितभयवाक्यैर्युक्तिवचनैश्च प्रबुद्धोऽसौ मिथ्यादुष्कृतं दत्त्वा गुरुमूलं गत्वा प्रतिक्रान्त इति ॥ २४२५ ॥

अत्र भाष्यम्-

नइमुहजुगमुत्तरओ, सरए सीयजलमज्जगंगस्स ।
सूराभितत्तसिरसो, सीउसिणवेयणोभयओ ॥२४२६॥
लग्गोऽयमसग्गाहो, जुगवं उभयकिरिओवओगो त्ति ।
जं दो वि समयमेव य,सीउसिणवेयणाओ मे ॥२४२७॥

गतार्थं,नवरमार्यगङ्गस्य लग्नोऽयमसद्ग्रहो यदुत-युगपत्क्रियाद्वयसंवेदनोपयोगोऽस्ति,यद्यस्मात् मे मम द्वे अपि शीतोष्णवेदने समकालमेव स्तः । प्रयोगश्चात्र-युगपदुभयक्रियासंवेदनमस्ति, अनुभवसिद्धत्वात्, मम पादशिरोगतशीतोष्णक्रियासंवेदनवदिति ॥ २४२६ । २४२७ ॥

एवं गङ्गेनोक्ते किमभूदित्याह-

तरतमजोगेणायं, गुरुणाऽभिहिओ तुमं न लक्खेसि ।
समयाइसुहुमयाओ,मणोऽतिचलसुहुमयाओ य ।२४२८।

गुरुणाऽभिहितोऽसौ-हन्त ! योऽयं युगपत्क्रियाद्वयानुभवस्त्वया गीयते, स तरतमयोगेन क्रमेणैव भवतः संपद्यते, न युगपत्, परं त्वदपि क्रमजनवनमस्य त्वं न लक्षयसि, समयावलिकाऽऽदेः कालस्य सूक्ष्मत्वात्, तथा मनसश्चातिचलत्वेनातिसूक्ष्मत्वेनाऽऽशुसंचारित्वादिति । तस्मादनुभवसिद्धत्वादित्यसिद्धोऽयं हेतुरिति ॥ २४२८ ॥

हेत्वसिद्धिमेव भावयति-

सुहुमाणुचरं चित्तं, इंदियदेसेण जेण जं कालं ।
संवज्जइ तं तम्म-त्तनाणहेउ त्ति नो तेण ॥ २४२९ ॥
उवलभए किरियाओ, जुगवं दो दूरभिन्नदेसाओ ।
पायसिरोगयसीउ-ण्हवेयणाऽणुभवरूवाओ ॥२४३०॥

सूक्ष्मम आशु-रं च चित्तं मनः, तच्च सूक्ष्मं सूक्ष्मानिन्द्रियपुद्गलस्कन्धनिर्वृत्तत्वादाशुचरं तु शीघ्रसंचरणशीलत्वात् । ततश्च तदेवंभूतं चित्तं येन श कायाऽऽद्याकारस्पर्शनाऽऽदिद्रव्येन्द्रियसंबन्धिना देशेन सह यस्मिन् काले संबध्यते संयुज्यते तस्मिन् काले तस्य तन्मात्रज्ञानहेतुर्भवति-येन स्पर्शनाऽऽदिद्रव्येन्द्रियदेशेन संबध्यते तज्जन्यस्यैव शीताऽऽदिविषयस्योष्णाऽऽदिविषयस्य वा एकतरविज्ञानस्य हेतुर्जायते, न तु येनेन्द्रियदेशेन सह तत्काले स्वयं तन्न संबद्धं तज्जन्यज्ञानस्यापि हेतुरित्यर्थः । इतिशब्दो वाक्यसमाप्त्यर्थः । येनैवं तेन कारणेन नो नैव दूरभिन्नदेशौ द्वे क्रिये कोऽपि युगपदुपलभते संवेदयते इति संबन्धः । कथंभूते द्वे क्रिये इत्याह-पादशिरोगतशीतोष्णवेदनयोरनुभवनमनुभवस्तद्रूपे तदात्मके । अत्र प्रयोगः-इह पादशिरोगतशीतोष्णवेदने युगपन्न कोऽपि संवेदयते, भिन्नदेशत्वाद्धिमवच्छिखरस्पर्शनाक्रियाद्वयवदिति, अनुभवसिद्धत्वात्, इत्यसिद्धोऽयं हेतुरिति ॥ २४२९ । २४३० ॥

किञ्च-

उवओगपओ जीवो, उवउज्जइ जेण जम्मि जं काले ।
सो तम्मओवओगो, होइ जहिंदोवओगम्मि ॥२४३१॥

उपयोगेनैव केवलेन निर्वृत्त उपयोगमयो जीवः । ततः स येन केनापि स्पर्शनाऽऽदीन्द्रियदेशेन करणभूतेन यस्मिन् शीतोष्णाऽऽद्यन्यतरविषये (जं काले त्ति) यस्मिन् काले उपयुज्यते सावधानो भवति तन्मयोपयोगो भवति-यत्र शीताऽऽद्यन्यतरार्थे उपयुक्तस्तन्मयोपयोग एव भवति, नान्यत्रोपयुक्त इत्यर्थः। उदाहरणमाह-(जहिंदोवओगम्मि त्ति)यथा इन्द्रोपयोगे वर्त्तमानो माणवकस्तन्मयोपयोग एव भवति,न पुनरर्थान्तरमयोपयोगः । इदमत्र तात्पर्यम्-एकस्मिन्काले एकत्रैवार्थे उपयुक्तो जीवः संभवति, न त्वर्थान्तरे, पूर्वोक्तसाङ्कर्याऽऽदिदोषप्रसङ्गात् । ततश्च युगपत्क्रियाद्वयोपयोगानुभवोऽसिद्ध एवेति ॥ २४३१ ॥

एकस्मिन्नर्थे उपयुक्तः किमित्यर्थान्तरेऽपि नोपयुज्यते ?,इत्याह-

सो तदुवओगमेत्तो-वलद्धसत्ति त्ति तस्सम चेव ।
अत्थंतरोवओगं, जाउ कहं केण वंसेण ? ॥ २४३२ ॥

स जीवः (तदुवओगमेत्तोवलद्धसत्ति त्ति) तस्य विवक्षितैकार्थस्योपयोगस्तदुपयोगः, स एव तन्मात्रं तत्रोपयुक्ता व्यापृता निष्ठां गता शक्तिर्यस्य स तदुपयोगमात्रोपयुक्तशक्तिरिति कृत्वा कथं तत्समकालमेवार्थान्तरं उपयोगं यातु ?, न कथंचिदित्यर्थः, साङ्कर्याऽऽदिप्रसङ्गात् । किं च-सर्वैरपि स्वप्रदेशैरेकस्मिन्नर्थे उपयुक्तो जीवः केनोद्धरितेनांशेनार्थान्तरोपयोगं व्रजतु ?। नास्त्येव हि स काश्चिदुद्धरितोंऽशो येन तत्समकमेवार्थान्तरोपयोगमसौ गच्छेदिति भावः ॥२४३२॥

यदि समकालमेव क्रियाद्वयोपयोगो न भवति, तर्हि कथं तमहं संवेदयामि ?, इत्याशङ्क्याऽऽह-

समयाइसुहुमयाओ, मन्नसि जुगवं च भिन्नकालं पि ।
उप्पलदलसयवेहं, व जह व तदनायचक्कं ति ॥२४३३॥

समयावलिकाऽऽदिकालकृतविभागस्य सूक्ष्मत्वाद् भिन्नकालमपि कालविभागेन प्रवृत्तमपि क्रियाद्वयसंवेदनमुत्पलपत्रशतवेधवद्युगपत्प्रवृत्तमिव मन्यसे त्वम् । न हि उत्पलपत्रशतमौक्तराद्यर्थं व्यवस्थापितं सुतीक्ष्णयाऽपि सूच्या केनचित् समर्थेना-

ऽपि च वेधकर्त्रा समकालमेव विध्यते, किं तु कालभेदेन, उपर्युपरितने अविद्धेऽधोऽधोवर्त्तिनः पत्रस्य वेधायोगाद्, अथ च वेधकर्त्ता युगपद्विहितमेव वेधं मन्यते, तद्वेधनकालभेदस्य सूक्ष्मत्वेन दुर्लक्षत्वात्। यथा वा तत्प्रसिद्धमलातचक्रं कालभेदेन दिक्षु भ्रमदपि भ्रमणकालभेदस्य सूक्ष्मत्वेन दुरवगमत्वान्निरन्तरभ्रमणमेव लक्ष्यते, एवमिहापि शीतोष्णक्रियानुभवकालभेदस्य सूक्ष्मत्वेन दुरवसेयत्वाद्युगपदिव तदनुभवं मन्यते भवानिति ॥ २४३३ ॥

मनोऽपि शिरःपादाऽऽदिभिः स्पर्शनेन्द्रियदेशैरिन्द्रियान्तरैश्च युगपन्न संबध्यते, किं तु क्रमेणैव, केवलमाशुचारित्वेन सूक्ष्मत्वेन च तस्य क्रमसंबन्धो न लक्ष्यत इति दर्शयन्नाह-

चित्तं पि नेंदियाइं, समेइ सममट्ठ य खिप्पचारि त्ति ।
समयं व सुक्कसक्कुलि-दसणे सव्वोवलद्धि त्ति २४३४॥

चित्तमपि च, नैवेन्द्रियाणि, समेमेव समेति-मनोऽपि नैवेन्द्रियैः सह युगपत्संबध्यते इत्यर्थः। उपलक्षणत्वान्नाऽपि शिरःपादाऽऽदिभिः स्पर्शनेन्द्रियदेशैर्युगपत्संबध्यते, अथ च क्षिप्रचारि शीघ्रसंचरणशीलं तदिति कृत्वा समकमिव युगपदिव सर्वत्र संचरत् लक्ष्यते इति शेषः। दृष्टान्तमाह-(समयं वेत्यादि) समयं वेत्येतदनन्तरं योजितमप्यावृत्या पुनरपीह योज्यते। तत्र वाशब्दो यथार्थे, यथाशब्दश्च दृष्टान्तोपन्यासार्थे। यथा-शुष्कशष्कुलिकादशने सर्वेषामपि शष्कुलिकागतरूपरसगन्धस्पर्शशब्दानामुपलब्धिः सर्वोपलब्धेरसमकं प्रवृत्ताऽपि समकं लक्ष्यते, तथाऽत्रापि मनः शिरःपादाऽऽदिभिस्स्पर्शनेन्द्रियदेशैरिन्द्रियान्तरैश्च क्रमेण संबध्यमानमपि युगपत् संबध्यमानं लक्ष्यत इत्यर्थः। इदमत्र हृदयम्-इह दीर्घां शुष्कां च शष्कुलिकां कस्यचिद्भक्षयतस्तद्रूपं चक्षुषा वीक्ष्यमाणस्य रूपज्ञानमुत्पद्यते, तद्गन्धं च घ्राणेनाऽऽजिघ्रतो गन्धज्ञानम्, तद्रसं च रसनया आस्वादयतो रसज्ञानं, तत्स्पर्शं च स्पर्शनेन वेदयतः स्पर्शज्ञानं, चर्वणोत्थं तच्छब्दं च शृण्वतः शब्दज्ञानमुपजायते। एतानि च पञ्चापि ज्ञानानि क्रमेणैव जायन्ते, अन्यथा साङ्कर्याऽऽदिदोषप्रसङ्गात्, मत्यादिज्ञानोपयोगकाले चावध्याद्युपयोगस्याऽपि प्राप्तेः, एकं च घटाऽऽदिकमर्थं विकल्पयतोऽनन्तानामपि घटाऽऽद्यर्थाविकल्पानां प्रवृत्तिप्रसङ्गाच्च। न चैतदस्ति। ततः क्रमेण जायमानान्यप्येतानि ज्ञानानि प्रतिपत्ता युगपदुत्पद्यन्ते इति मन्येत, समयाऽवलिकाऽऽदिकालविभागस्य सूक्ष्मत्वाद्, एवमिहापि शिरःपादाऽऽदिभिः स्पर्शनेन्द्रियदेशैरिन्द्रियान्तरैश्च क्रमेण संबध्यमानमपि मनः प्रतिपत्ता युगपत्संबध्यमानमध्यवस्यति, न तु तत्त्वतोऽसौ मनसः स्वभावः, तथा चोक्तम्-" युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गमिति । " यदि चोक्तन्यायेन सर्वेन्द्रियद्वारेणोत्पद्यमान उपलम्भे क्रमेण संचरतो मनसः संचारो दुर्लक्षस्तर्हि कथमेकस्यैव स्पर्शनेन्द्रियमात्रस्य शीतवेदनोपयोगाद्दुष्णवेदनोपयोगरूप उपयोगान्तरे जन्ये तत्संचारः सुलक्षः स्याद्, अलक्ष्यमाणे च तत्क्रमसंचारे शीतोष्णक्रियाद्वयोपयोगविषयौ युगपदध्यवसायौ जनयत इति ॥२४३४॥

एतदेवाऽऽह-

सव्विंदियलद्धलंभे, जइ संचारो मणस्स दुल्लक्खो ।
एगेंदिओवओगं-तरम्मि किंह होज्ज य सुलक्खो ।२४३५।

व्याख्यातार्थैव ॥ २४३५ ॥

यदि पुनरेकस्मिन्नर्थे उपयुक्तमपि मनोऽर्थान्तरेऽप्युपयोगं गच्छेत्तदा को दोषः स्याद्?, इत्याह-

अन्नविणिउत्तमन्न वि-णिओगं लभइ जइ मणो तेणं ।
इत्थिं पि ठियं पुरओ, किमन्नचित्तो न लक्खेइ ॥२४३६॥

अन्यस्मिन् शीतवेदनाऽऽदिकेऽर्थे विनियुक्तमुपयुक्तमन्यविनियुक्तम्,मनो यदि (अन्नं ति) अन्य उष्णवेदनाऽऽदिकोऽर्थस्तद्विषय उपयोगोऽन्यस्तमन्यं विनियोगमुपयोगं लभते, (तेण त्ति) तर्हि किमित्यन्यचित्तोऽन्यार्थोपयुक्तचित्तो देवदत्ताऽऽदिर्हस्तिनमपि पुरतो व्यवस्थितं न लक्षयति ?, तस्मादेकस्मिन्नर्थे उपयुक्तं मनो न कदाचिदन्यार्थोपयोगं लभते इति ॥ २४३६ ॥

यदि त्वेकोपयोगे उपयोगान्तरमपीष्यते, तदेतदपि किं नेष्यते ?, किमित्याह-

विणिओगंतरलाभे, व किं तथ नियमेण तो समं चेव ।
पइवत्थुमसंखेज्जा-णंता वा जं न विणिओगा ?॥२४३७॥

एकोपयोगकाले विनियोगान्तरस्योपयोगान्तरस्य वा लाभे इष्यमाणे (तो त्ति) ततः किमत्र क्रियाद्वयोपयोगलक्षणेन नियमेन (जं ति) यत्प्रतिवस्तु असंख्येया अनन्ता वा समभेव युगपदेव विनियोगा उपयोगा नेष्यन्ते?। इदमुक्तं भवति-यदि शीतवेदनोपयोगकाले उष्णवेदनोपयोगोऽपीष्यते, तर्हि किमनेन क्रियाद्वयोपयोगनैयत्येन यदसंख्येया अनन्ता वा प्रतिवस्तु युगपदुपयोगा न भवन्ति, यथैककाले द्वितीयोपयोगस्तथा बहवोऽपि भवन्विति भावः। इह च " दसाउ असंखेज्जे, संखेज्जे आवि पज्जवे लभइ । " इति वचनादेकस्मिन्नर्थे समकालमवधिज्ञानिनः किञ्चोत्कृष्टतोऽसंख्येया उपयोगाः प्राप्नुवन्ति, शेषज्ञानिनां त्वनन्ता इत्यभिप्रायवता प्रोक्तम्-" पइवत्थु असंखेज्ज " इत्यादि ॥ २४३७ ॥

अत्र पराभिप्रायमधिकृत्य परिहारमाह-

बहुबहुविहाइगहणे, नणूवओगबहुया सुएऽनिहिया ।
तमणेगग्गहणं चिय, उवओगाणेगया न त्थि ॥२४३८॥

ननु बहुबहुविधक्षिप्राऽनिश्रिताऽसंदिग्धध्रुवसेतरवस्तुग्रहणे पूर्वमिहैवावग्रहाऽऽदीनामनुज्ञाने एकस्मिन्नुपयोगे बहुता श्रुतेऽनिहितैवेति । " पइवत्थुमसंखेज्जे " इत्यादि ह्यिरूसाधनमेवेति परेणोक्ते सत्याह-(तमणेगेत्यादि) तद् बहुबहुविधाऽऽदिरूपं वस्तुनोऽनेकपर्यायाणां सामान्यरूपतया ग्रहणमात्रमेव ज्ञाने उपयोगयोग्यतामात्रव्यवस्थापनमेव, एकस्मिंस्तु वस्त्वेककालमुपयोगानेकता कदापि नास्ति, क्रमेणैवोपयोगानां जायादिति ॥ २४३८ ॥

यदुक्तं "तमणेगग्गहणं चिय" इति तदुपजीव्य परः प्राह-

समकमणेगग्गहणं, जइ सीओसिणदुगम्मि को दोसो? ।
केण व नाणियं दोसो, उवओगदुगे विचारोऽयं ॥२४३९॥

यद्याचार्य! समकं युगपदनेकेषामर्थानां ग्रहणं त्वयाऽभ्यनुज्ञायते, तदा शीतोष्णद्वये गृह्यमाणे को दोषः, येन गङ्गास्रोतोऽनुगमो दूष्यते ?। सूरिराह-(केण वेत्यादि) केन पुनर्भणितं-हन्त! यत्समकमनेकार्थग्रहणे दोषा गृह्यन्ते युगपदपि सामान्यरूपतया सेनावनग्रामनगरादिवदनेकेऽर्थाः इत्येतन्न निवारयामः, वयमित्यर्थः, केवलमिहोपयोगद्वये विचारोऽयं प्रस्तुतः। स चोपयोग एकदा एक एव भवति, न त्वनेक इति ॥ २४३९ ॥

पुनरपि परप्रश्नमाशङ्क्योत्तरमाह-

समयमणेगग्गहणे, एगाणेगोवओगभेओ को ?।
सामन्नमेगजोगो, खंधावारोवओगो व ॥ २४४० ॥
खंधारोऽयं साम-न्नमेत्तमेगोवओगया समयं ।
पइवत्थुविन्नागो पुण,जो सोऽणेगोवओग त्ति ॥२४४१॥

ननु समकं युगपदनेकार्थग्रहणे अभ्युपगम्यमाने कोऽयमेकानेकोपयोगभेदो नाम,येनोच्यते-" उवओगाणेगया नत्थि।" इति। अत्रोत्तरमाह-(सामन्नमेगजोगो त्ति)यः सामान्योपयोगः स एकोपयोगोऽभिधीयते,स्कन्धावारोपयोगवदिति दृष्टान्तः। अमुमेवार्थं स्पष्टयति-"खंधारोऽयमित्यादि ।" समकं युगपदेव स्कन्धावारोऽयमित्येवं यत्सामान्यं सामान्यमात्रग्राहकोपयोग इत्यर्थः, स एकोपयोगता भण्यते । यः पुनः प्रतिवस्तु एते हस्तिनः, अमी अश्वाः, इमे रथाः, एते पदातयः, एते खड्गकुन्ताऽऽदयः, शिरस्त्राणकवचाऽऽदयः, पटकुटिकाः, ध्वजाः, पताकाः, ढक्काशङ्खकाहलाऽऽदयः, करभरासभाऽऽदयश्चेत्यादिको विभागो भेदाध्यवसायः सोऽनेकोपयोग इति ॥ २४४० । २४४१ ॥

आह-एवमेकानेकोपयोगभेदे भवद्भिर्युगपत्किं निषिध्यते ?, इत्याह-

ते च्चिय न संति समयं, सामन्नाणेगगहणमविरुद्धं ।
एगमणेगं पि तयं, तम्हा सामन्नजावेणं ॥२४४२॥

त एवानेकोपयोगाः समकं युगपन्न सन्ति न भवन्तीति निषिध्यन्ते अस्माभिः । यत्तु सामान्येनानेकेषामर्थानां युगपद् ग्रहणं तदविरुद्धमेव । (तम्हा त्ति) तस्माद्युगपदनेकोपयोगनिषेधेन । किमुक्तं भवतीत्याह- (एगमणेगं पीत्यादि) यदिदं स्कन्धावाराऽऽद्युपयोगे युगपदनेकार्थग्रहणमस्माभिरनुज्ञायते, (तयं ति) तदनेकमप्यनेकार्थग्रहणमपि सदित्यर्थः, (एगं ति) एकमेव तत्स्यत एकार्थग्रहणमेवेत्यर्थः, केनेत्याह- (सामन्नजावेणं ति) सामान्यरूपतयेत्यर्थः । अयमत्र तात्पर्यार्थः-यदनेकार्थग्रहणमनुज्ञायते तत् सामान्यमेव रूपमाश्रित्य, विशेषरूपतया त्वनेकार्थग्रहणं नास्त्येव, एकस्मिन् काले एकस्यैव विशेषोपयोगस्य सद्भावादिति ॥ २४४२ ॥

अमुमेवार्थं प्रकृते योजयन्नाह-

उसिणेयं सीएयं, न विन्नागो नोवओगदुगमित्थं ।
होज्ज समं दुगगहणं, सामन्नं वेयणा मे त्ति ॥ २४४३ ॥

उष्णेयं शीतेयं वेदना इत्येवं योऽसौ विज्ञानो भेदोऽसौ नेष्टः शीतोष्णविभागेन शीतोष्णविशेषरूपतया युगपद् ग्रहणं नेष्टमित्यर्थः, अत एव तद्विषयमुपयोगद्वयं युगपन्नेष्टम् । किं युगपद्वस्तुद्वयग्रहणं सर्वथा नेष्टम् ?। नैवं, कुतः ?, इत्याह- भवेत् समं युगपद्वस्तुद्वयग्रहणम् । किं विशेषरूपतया ?, नेत्याह- सामान्यं सामान्यरूपतयेत्यर्थः। कथम?,वेदना मे मम वर्तते इत्येवं युगपद् द्वयग्रहणं भवेद्,न तु शीतोष्णवेदनाविशेषरूपतयेत्यर्थः, युगपदुपयोगद्वयप्रसंगात्, तत्र च दोषाणामुक्तत्वादिति।२४४३।

आह-ननु यदि वेदनामात्रग्राहकं सामान्यज्ञानं, तदेवं शीतोष्णवेदनाविशेषग्राहकमपि तत् कस्मान्नेष्यते ?, इत्याह-

जं सामन्नविसेसा, विलक्खणा तन्निबंधणं जं च ।
नाणं जं च विभिन्ना, दूरं ओवग्गहाऽवायाः ॥२४४४॥

जं च विसेसं नाणं, सामन्ननाणपुव्वयमवस्सं ।
तो सामन्नविसेसं, नाणाइं नेगसमयम्मि ॥ २४४५ ॥

(तो त्ति) तस्मात्सामान्यग्राहकं विशेषग्राहकं च ज्ञानं द्वेऽपि नैकसमये नैककालं भवत इति द्वितीयगाथायां संबन्धः। कुत इत्याह-(जं सामन्नेत्यादि) यद्यस्मात्सामान्यविशेषौ परस्परमतीव विभिन्नलक्षणौ भिन्नजातीयावतः कथं तावेककालमेकज्ञाने प्रतिभासेते ?, एकत्वप्रसङ्गात्, सामान्यतत्स्वरूपवद्विशेषतत्स्वरूपवत्ता ?। मा भूत्तत्प्रतिभासस्तथापि तज्ज्ञाने युगपद्भविष्यत इत्याह- यस्माच्च तन्निबन्धनं सामान्यविशेषहेतुकं सर्वमपि ज्ञानं, तत्कथं तत्प्रतिभासमन्तरेणोत्पद्येत ?। सामान्यविशेषज्ञानयोरेकत्वादेककालं ते भविष्यत इति चेत्,तदयुक्तम्, कुतः ?, इत्याह-यस्माच्च सुदूरं विभिन्नौ सामान्यविशेषज्ञानरूपौ-अवग्रहावायाविति कथं समकालं भवतः ?। यद्यस्माच्चावश्यं सामान्यग्राहकज्ञानपूर्वकमेव विशेषग्राहकं ज्ञानं, नानवगृहीतमीह्यते, नानीहितं निश्चीयत इत्यादिवचनादतः कथं तयोर्युगपत्संभव इति ॥ २४४४ ॥ २४४५ ॥

पुनरपि परः प्राऽऽह-

होज्ज न विलक्खणाइं, समयं सामन्नजेयनाणाइं ।
बहुयाण को विरोहो,समयम्मि विसेसनाणाणं ॥२४४६॥

नन्वाचार्य! एवं तर्ह्यस्तु यदुत सामान्यवेदनामात्रग्राहकं सामान्यज्ञानं, शीतोष्णवेदनाविशेषग्राहकं विशेषज्ञानरूपं भेदज्ञानं चेष्यते के अपि सुदूरविलक्षणत्वात्समकं युगपन्न भवतः; बहूनां तु शीतोष्णाऽऽदिविशेषज्ञानानां समये एकस्मिन् काले जायमानानां विशेषज्ञानरूपतया तेषां बहूनामपि तुल्यत्वेन वैलक्षण्याभावात्को विरोधः ?, येन शीतोष्णवेदनाविशेषज्ञाने युगपद् गङ्गया निषिध्यते इति ॥ २४४६ ॥

अत्रोत्तरमाह-

लक्खणजुत्ता उ च्चिय,सामण्णं च जमणेगविसयं ति ।
तमणेगं न विसेस-न्नाणाइं तेण समयम्मि ॥ २४४७ ॥
तो सामन्नग्गहणा-णंतरमीहियमवेइ तब्भेयं ।
इय सामन्नविसेसा-वेक्खो जावंतिमो नेओ ॥ २४४८ ॥

तेन कारणेन समये एकस्मिन् काले बहूनि विशेषज्ञानानि न भवन्ति। कुतः ?,इत्याह-लक्षणं शीतोष्णाऽऽदिविशेषस्वरूपं तस्य परस्परं भेदाद्विलक्षत्वाच्च तद्ग्राहकाणि ज्ञानानि समकं भवन्ति, यस्माच्चानेकविषयमनेकाधारं सामान्यम्, इत्यतस्तदगृहीत्वा न विशेषज्ञानसम्भूतिरस्तीत्यतोऽपि न युगपद्विशेषज्ञानानि । इदमुक्तं भवति-पूर्वं वेदनासामान्यं गृहीत्वा तत ईहां प्रविश्य शीतेयं पादवर्त्तिवेदनेति वेदनाविशेषं निश्चिनोति । शिरस्यपि प्रथमं वेदनासामान्यं गृहीत्वा तत ईहां प्रविश्य उष्णेयमिह वेदनेत्यध्यवस्यति । न हि घटविशेषज्ञानादनन्तरमेव घटाऽऽश्रयसामान्यरूपे गृहीते घटविशेषज्ञानमुपजायते, " उग्गहो ईहऽवाओय " इत्यमुनैव क्रमेण घटाऽऽदिविशेषज्ञानोत्पत्तेरभिधानात् । एवं च सति विशेषज्ञानादनन्तरमपि विशेषज्ञानं नोत्पद्यते, आस्तां पुनः समकालं, सामान्यानेकविशेषाऽऽश्रयत्वात् । तच्च पूर्वमगृहीत्वा विशेषज्ञानस्याप्रवृत्तेरिति।

यतश्चैवं सामान्येऽगृहीते नास्ति विशेषज्ञानं, (तो त्ति) ततः

[illegible] गानन्तरमीहितं तद्भेदं सामान्यभेदं घटत्वाऽऽदिसा- [illegible] घटाऽऽदिविशेषमित्यर्थः, अवैति घटाऽऽदिरेवायम् [illegible] नीत्यर्थः । तत उत्तरभेदापेक्षया घट एव सामान्यम् [illegible] च गृह्णाते ईहित्वा धातुजोऽयं न मार्त इत्येवं निश्चिनोति [illegible] धातुजोऽयुत्तरभेदापेक्षया सामान्यम् । तस्मिंश्च गृह्णा [illegible] ईहित्वा ताम्रोऽयं न तु राजताऽऽदिः इतीत्थं निश्चिनोतीति । एवं सामान्यविशेषापेक्षा तावत्कर्तव्या, यावदन्तिमो भेदः स कश्चिद्यदनन्तरमीहा न प्रवर्तते । ततश्चैवं न कश्चिद्विशेषज्ञानानां युगपत्प्रवृत्तिसंभवः, सामान्यरूपतया तु समकालमपि विशेषाणां ग्रहणं भवेत् । यथा-सेना, वनमित्यादि, न तु युगपदुपयोग इत्युक्तमेव । तथा च सति भिन्नकाले एव शीतोष्णविशेषज्ञाने । ततो ज्ञानान्तरमेव समकालं शीतोष्णक्रियाद्वयवेदनं भवत इति ॥ २४४७ ॥ २४४८ ॥

इत्यादियुक्तिशतैः प्रज्ञापितोऽपि न स्वाग्रहं मुक्तवान् गङ्गः, ततः किमित्याह-

इय पन्नविओ वि जओ न पवज्जइ तो तओ अहो बज्झो ।
तो रायगिहे नयरे, किरियाओ दो परूवंतो ॥२४४९॥
पणिनागेणारद्धो, जओवउत्तिओ पभिवोहिओ वोत्तुं ।
इच्छामो गुरुमूलं, गंतूण तओ पडिक्कंतो ॥ २४५० ॥

व्याख्यातार्थे एवेति ॥ २४४९ ॥ २४५० ॥ विशे० । बृह० । आ० चू० । आ० म० । औ० ।

दोक्खर-द्व्यक्षर-न० । षण्ढे, बृ० ।

" गती भवे पञ्चलोइयं च, मिदुलया सीयलगत्तया य ।
धूवं भवे दोक्खरनामधेज्जा, सकारपच्चंतरिओ ढकारो ॥१॥"

द्व्यक्षरनामधेयो भवेत्, तच्चात्रद्वयं सकारप्रत्यन्तरितो ढकार इति प्रतिपत्तव्यम्, प्राकृतशैल्या सण्ढो, संस्कृते तु षण्ढ इति । बृ० ४ उ० । दासे, व्य० ४ उ० ।

दोगच्च-दौर्गत्य-न० । दुर्गतिभावे, दारिद्र्ये च । पं० व० ४ द्वार । बृ० । नि० चू० । पञ्चा० ।

दोगिद्धिदसा-द्व्येकर्द्धिदशा-स्त्री० । स्वरूपतोऽप्यनवसितायाम्, "दोगिद्धिदसाणं दस अज्झयणा पण्णत्ता । तं जहा-"वाए विवाए उववाए णाईसं महासुविणे चावत्तरिसव्वसुमिणाहारे रामगुत्ते एमेए दस आहिया ।" द्व्येकर्द्धिदशाश्च स्वरूपतोऽप्यनवसिता । स्था० १० ठा० ।

दोगुंछ-जुगुप्सिन्-त्रि० । निन्दके उत्त० । जुगुप्सते आत्मानमाहारं विना धर्मधुराधरणासमामवेत्तीलो जुगुप्सी । उत्त० ६ अ० ।

दोग्ग-देशी-युग्मे, दे० ना० ५ वर्ग ४६ गाथा ।

दोग्गइ-दुर्गति-स्त्री० । दुष्टा गतिः दुर्गतिः । अथवा दुर्गा गतिः दुर्गतिः । अथवा-दुःखं वा यत् क्लेश्यते सा दुर्गतिः । दुर्गतौ विषमेत्यर्थः । अथवा-कुत्सिता गतिः दुर्गतिः । अनन्तिर्वापितार्थे दुःशब्दः । यथा-दुर्गभः । नरकगतौ, तिर्यग्गतौ च । स्था० १ ठा० ।

दोग्गुण-दौर्गुण्य-न० । दुर्गुणत्वे, हा० ३१ अष्ट० ।

दोच्चंग-द्वितीयाङ्ग-न० । शाकाऽऽदिनाऽन्याम्, " दोच्चंग त्ति " सामयिकी संज्ञा । ओदनाऽऽदिमूलापेक्षया ओजनस्य शाकशाकरूपाणी द्वितीयाङ्गानि । बृ० [illegible] उ० ।

दोच्च-दौत्य-त्रि० । दूतकर्मणि, ज्ञा० १ श्रु० ८ अ० ।

दोतीय-द्वितीयसंख्यापूरके, विपा० १ श्रु० ३ अ० । भ० । उपा० ।

दोया-द्वितीया-स्त्री० । द्वितीयसप्तरात्रिन्दिवप्रतिमायाम्, पञ्चा० १५ विव० ।

दोज्झ-दोह्य-त्रि० । दोहनयोग्ये, "जहा गावो दोज्झाओ त्ति वा ।" आचा० २ श्रु० १ चू० ४ अ० २ उ० ।

दोण-द्रोण-पुं० । माने, चत्वारः पुनराढकाः समुदिता एको द्रोणः । ज्यो० २ पाहु० । औ० । पद्मप्रमाणं द्रोणमानम् । तं० । द्रोणाऽऽख्ये सिन्धुवेलावलयिते नगरे, सूत्र० २ श्रु० २ अ० । द्रोणः कियन्मानमान इति प्रश्ने, उत्तरम्-चतुर्भिः कुडवैः प्रस्थः, प्रस्थैश्चतुर्भिराढकः, चतुर्भिराढकैर्द्रोणः; अत्र नाममालावृत्तौ कुडवशब्देन प्रसृतिद्वयव्याख्यातमस्ति, तदनुसारेण यद्भवति तद्द्रोणमानमवसेयं, परमियन्मानमानो द्रोण इति तु क्वापि व्यक्तं दृष्टं न स्मरतीति । १७८ प्र० सेन २ उल्ला० ।

दोणअ-देशी-आयुक्ते, हालिके च । दे० ना० ५ वर्ग ५० गाथा ।

दोणक्का-देशी-सरघायाम्, दे० ना० ५ वर्ग ५१ गाथा ।

दोणमुह-द्रोणमुख-न० । द्वयोः पथोर्मुखमस्येति द्रोणमुखम् । जलस्थलनिर्गमप्रवेशने, आचा० १ श्रु० ८ अ० ६ उ० । पट्टने, रा० । प्रश्न० । व्य० । भ० । जी० । बाहुल्येन जलनिर्गमप्रवेशो, दश० ७ अ० । स्था० । ग० । यत्र जलस्थलपथाबुभावपि भवतः । कल्प० २ अधि० ४ क्षण । जी० । नि० चू० । जं० । अनु० । स्था० । उत्त० । "दोणमुहं जलथलपहेण ।" यस्य तु जलपथेन स्थलपथेन वा द्वाभ्यामपि प्रकाराभ्यां भाण्डमागच्छति तद् द्वयोः पथोर्मुखमिति निरुक्त्या द्रोणमुखमुच्यते, तच्च तथा भृगुकच्छं ताम्रलिप्ती वा । बृ० २ उ० । नि० चू० । औ० । जलस्थलपथोपेते नगरे, प्रश्न० ३ आश्र० द्वार ।

दोणमेह-द्रोणमेघ-पुं० । यावता वृष्टेनाऽऽकाशबिन्दुभिर्महती नगरी म्रियते तावत्प्रमाणजलवर्षिणि मेघे, विशे० ।

दोणसूरि-द्रोणसूरि-पुं० । अणहिल्लपट्टननगरे अभयदेवसूरिसमकालिके स्वनामख्याते विद्वद्वरे, येन नवस्वङ्गेषु स्थानाङ्गाऽऽदिषु अभयदेवसूरिकृतवृत्तेः संशोधनमकारि ।

" अणहिल्लपाटकनगरे संघवरैर्वर्त्तमानबुधमुख्यैः ।
श्रीद्रोणाचार्याऽऽद्यै-र्विद्वद्भिः शोधिता चेति ॥ १ ॥"
" शास्त्रार्थनिर्णयसुसौरभलम्पटस्य,
विद्वन्मधुव्रतगणस्य सदैव सेव्यः ।
श्रीनिर्वृताऽऽख्यकुलसन्नदपद्मकल्पः,
श्रीद्रोणसूरिरवनद्ययशःपरागः ॥ २ ॥" स्था० १० ठा० । पञ्चा० । भ० । तद्वृत्तिकृत्कुलनभःसूरिमुख्येन पण्डितगणनगुणवत्प्रियेण संशोधिता चेयम् । ज्ञा० १ श्रु० ६ वर्ग १ अ० ।

दोणी-द्रोणी-स्त्री० । नौकायाम्, प्रश्न० १ आश्र० द्वार । जलपरिपूर्णायां महत्यां कुण्डिकायाम्, अनु० ।

दोतिप्पभा-द्युतिप्रभा-स्त्री० । चन्द्रस्याग्रमहिष्याम्, ज्ञा० १ श्रु० ६ वर्ग १ अ० ।

दोच्चिअ–देशी–चर्मकूपे, दे० ना० ५ वर्ग ४६ गाथा ।

दोधार–द्विधाकार–पुं० । द्रव्यस्य द्विधाकरणे, स्था० ५ ठा० ३ उ० ।

दोजागकर–दौर्जाग्यकर–न० । कलाभेदे, स० ७२ समo ।

दोमणसिया–दौर्मनसिका–स्त्री० । वैमन्यस्ये, स्था० ५ ठा० २ उ० ।

दोमासिय–द्वैमासिक–न० । द्विमासपरिणाममस्येति द्वैमासिकम् । मासद्वयपरिमाणे, नि० चू० २० उ० ।

दोमासियपमिमा–द्वैमासिकप्रतिमा–स्त्री० । मासद्वयप्रतिमानिर्वाहे साधुप्रतिज्ञाविशेषे, तत्र हि द्वौ मासौ यावद् द्वे दत्ती भक्तस्य, द्वे एव च पानकस्य । औ० ।

दोमिलि–दोमिल्ली–स्त्री० । ब्राह्म्या लिपेर्द्वैविध्यविधाने, प्रज्ञा० १ पद ।

दोर–दोर–स्त्री० । सूत्रदवरके, रज्जौ, आ० म० १ अ० २ खण्ड, कटिसूत्रे, दे० ना० ५ वर्ग ३८ गाथा ।

दोरज्ज–द्वैराज्य–न० । राज्यद्वयभावे, स्था० ३ ठा० १ उ० ।

दोव–दोव–पुं० । अनार्यभेदे, प्रज्ञा० १ पद ।

दोवारिय–दौवारिक–पुं० । प्रतीहारे द्वारपालके, भ० ६ श० ५ उ० । नि० चू० । ज्ञा० । रा० । "दोवारिज्जा तु दारिट्ठा दोवारिया दारे चेव (अन्तःपुरस्य) जेसिं मिलेति ।" नि० चू० १ उ० । औ० ।

दोवारियभत्त–दौवारिकभक्त–न० । द्वारपालस्य कृतवृत्तेः जरापङ्गुलाऽऽदेः पेट्टकाऽऽदिभक्ते, नि० चू० ६ उ० ।

दोविह–द्विविध–त्रि० । द्विविध एव द्वैविध्यम् । द्विःप्रकारे, उत्त० २ अ० ।

दोवेली–देशी–सायं भोजने, दे० ना० ५ वर्ग ५० गाथा ।

दोस–दोष–पुं० । मिथ्यात्वाविरतिप्रमादकषाययोगेषु, सूत्र० १ श्रु० ११ अ० । प्रश्न० । महे, ध० ३ अधि० । चौर्याऽऽदिके, अन्त० ३ वर्ग० ८ अ० । आत्मनः परस्य वा दूषणे, भ० १२ श० ५ उ० । मालिन्यकारिचेष्टायाम्, त० । कालदोषो दुर्भिक्षाऽऽदिः, क्षेत्रदोषः संयमानुगुण्याऽऽदिः, द्रव्यदोषो भक्ताऽऽदिना शरीरानुकूलता, भावदोषो ग्लानत्वज्ञानाऽऽदिदान्यादिः । पञ्चा० १७ विव० ।

द्वेष–द्विष्यत्यनेनेति द्वेषः । द्वेषवेदनीये कर्मणि, यद्वा द्वेषणं द्वेषः । वेदनीयकर्माऽऽपादिते भावे, अप्रीतिपरिणामे, पं० सू० १ सूत्र० । "एगे दोसे ।" स्था० १ ठा० । आव० । औ० । आ० चू० । भ० । आ० म० । सूत्र० । ज्ञा० । ति० । नि० चू० । कल्प० । प्रज्ञा० । उपशमत्यागाऽऽत्मके, विकारे, उत्त० ६ अ० । परद्वेषाध्यवसाये, आतु० । दुःखाभिज्ञस्य तदनुस्मृतिपूर्वकविग्रहणे, ज्ञा० २५ ज्ञा० । स्वपराऽऽत्मनोर्बाधारूपे, सूत्र० १ श्रु० १६ अ० । क्रोधमानकषायाऽऽत्मके, ग० २ अधि० । स्था० । "दोसे दुविहे पण्णत्ते । तं जहा–कोहे य, माणे य ।" प्रज्ञा० २३ पद ।

अथ दोषस्य द्वेषस्य वा व्याख्यामाह–

दूसंति तेण तम्मि व, दूसणमह देसणं व देसो त्ति ।
देसो च सो चउद्धा, दव्वे कम्मेयरविभिन्नो ॥२९६६॥

"दुष" वैकृत्ये, दुष्यन्ति विकृतिं भजन्ति तेन तस्मिन् वा प्राणिन इति दोषः, दूषणं वा दोषः, इति स्वयमेव द्रष्टव्यम् । अथवा "द्विष" अप्रीतौ, द्विषन्ति अप्रीतिं भजन्ति तेन तस्मिन् वा प्राणिन इति द्वेषः, द्वेषणं वा द्वेषः । इत्यपि स्वयमेव दृश्यम् । कुतः पुनरिदं दृश्यते इत्याह–(अह देसणं व देसो त्ति) अथवा द्वेषणं द्वेष इति भावसाधनपदोपन्यासादनन्तरोक्तः स्वयमेव दृश्यते । (देसो व सो चउद्धा त्ति) स च द्वेषो, वाशब्दाद् दोषो वा, नामाऽऽदिभेदाच्चतुर्धा द्रष्टव्यः । तत्र द्रव्यशरीरव्यतिरिक्ते द्रव्ये विषये (कम्मेयरविभिन्नो त्ति) कर्मद्रव्यदोषः, नोकर्मद्रव्यदोषश्च भवतीत्यर्थः ॥ २९६६ ॥

अस्य च द्विविधस्यापि स्वरूपमाह–

जुग्गा बद्धा वज्झं–तगा य पत्ता उदीरणावलियं ।
अह कम्मदव्वदोसो, इयरो दुट्ठुव्वणाईओ ॥२९६७॥

पूर्ववच्चतुर्विधाः पुद्गलाः कर्मद्रव्यदोषः, नोकर्मद्रव्यदोषस्तु दुष्टव्रणाऽऽदिरिति ॥ २९६७ ॥

भावदोषं भावद्वेषं वा प्राऽऽह–

जं दोसवेयणिज्जं, समुइण्णं एस भावओ दोसो ।
वत्थुविकिइसहावो–ऽनच्चुदयमप्पीइलिंगो वा ॥२९६८॥

यद्दोषवेदनीयं द्वेषवेदनीयं वा कर्म समुदीर्णमुदयप्राप्तमेष भावदोषो भावद्वेषो वा । अयं च स्वभावस्थस्य वस्तुनः शरीरदेशाऽऽदेर्विकृतिस्वभावः कार्ये कारणोपचाराद् प्रकृत्यन्यथाभावरूपः । तत्र भावदोषोऽनीप्सितलिङ्गोऽनिष्टदुष्टव्रणाऽऽदिकार्यगम्यः । भावद्वेषस्त्वप्रीतिलिङ्ग इति ॥ २९६८ ॥

अत्र च क्रोधमानयोः कोऽपि मिश्रपरिणामोऽप्रीतिजातिसामान्यतः संग्रहमतेन द्वेषः, मायालोभौ तु प्रीतिजातिसामान्यतः, स एव रागमिच्छतीति दर्शयन्नाह–

कोहं माणं वाऽपीइ,जाईओ वेइ संगहो दोसं ।
मायालोभे य म पी–इजाइसामन्नओ रागं ॥२९६९॥

गतार्था ॥ २९६९ ॥

व्यवहारनयमाश्रित्याऽऽह–

मायं पि दोसमिच्छइ, ववहारो जं परोवघायाय ।
नाओवादाणे च्चिय,मुच्छा लोभो त्ति तो रागो ॥२९७०॥

न केवलं क्रोधमानौ, किन्तु मायामपि द्वेषमिच्छति व्यवहारनयो, यस्मादियमपि परोपघाताय परवञ्चनायैव विधीयते । ततो माया द्वेषः, परोपघातहेतुत्वात्, क्रोधमानवदिति । न्यायेन नीत्या मायामन्तरेणोपार्जयते उपार्जयंत इति न्यायोपादानं, तस्मिन् न्यायोपादानेऽपि चित्ते यतो मूर्छा भवति, ततस्तदात्मको लोभो रागः । अन्यायोपात्ते तु चित्ते मायाऽऽदिकषायसंभवेन द्वेष एव स्यादिति न्यायोपादानविशेषणमिति भावः ॥२९७०॥

ऋजुसूत्रमाह–

उज्जुसुयमयं कोहो, दोसो सेसाइमयमणेगंतो ।
रागोत्ति व दोसो त्ति व,परिणामवसेण उ वसेओ ॥२९७१॥

ऋजुसूत्रनयस्येदं मतम्-क्रोधः प्रथमकषायो द्वेषः, अप्रीत्यात्मकत्वाच्छेषाणां तु मानमायालोभानां रागद्वेषत्वविचारं प्रत्येतत् तस्य मतम्; किमित्याह-अनेकान्तोऽनिश्चयः । एतदेव व्याचष्टे-शेषे मानाऽऽदिकषायत्रयवर्गे कोऽपि रागः, कोऽपि वा द्वेषः, इत्ययं परिणामवशेनैवावसेयो निश्चेयो नान्यथेति ॥२६७१॥

कुत इत्याह-

संपयगाहि त्ति नओ, न उवओगदुगमेगकालम्मि ।
अप्पीइपीइमेत्तो-वओगओ तं तहा दिसइ ॥ २६७२ ॥

यतः साम्प्रताग्राही वर्तमानैकक्षणवस्तुग्राही तत्कोऽसौ ऋजुसूत्रः, ततः क्रोधमानौ द्वेषौ, मायालोभौ तु राग इत्येवमसौ न मन्यते, मानाऽऽदिक्षणकाले क्रोधाऽऽदिक्षणाभावात्, तदभावश्च तयोः क्रमभावित्वात्, प्राक्तनस्य क्रोधस्यानन्तरमेव विनाशादिति । स एव च मानो द्वेषो भवति, कदा ?, परगुणेषु यो द्वेषोऽप्रीतिस्तदुपयोगे तदध्यवसायपरिणतिकाल इत्यर्थः । अस्तु वा क्रोधमानाऽऽदीनां समकालभाविता, तथाऽप्युपयोगद्वयमसावेककाले न मन्यत इति कथं मिश्रकषायद्वयोपगाद् द्वेषो रागो वा स्यात् ? । एतदेवाऽऽह-(न उवओगदुगमेगकालम्मि त्ति) न च कषायरूपोपयोगमेककालमसौ मन्यते, येन क्रोधमानौ, द्वेषो, मायालोभौ तु रागः स्यादिति । तर्हि किमसौ मन्यते ?, इत्याह-(अप्पीइत्यादि) अप्रीतिप्रीतिमात्रोपयोगतस्तं तं मानाऽऽदिकषायं तथा तथाव्यपदिशति ॥ २६७२ ॥

एतदेव भावयति-

माणो रागो त्ति मओ, साहंकारोवओगकालम्मि ।
सो चेय होइ दोसो, परगुणदोसोवओगम्मि ॥२६७३॥
माया लोभो चेवं, परोवघाओवओगओ दोसो ।
मुच्छोवओगकाले, रागोऽभिस्संगलिंगो त्ति ॥२६७४॥

मानो राग इति ऋजुसूत्रस्य सम्मतः । कः ?, साहङ्कारोपयोगकाले-स्वस्मिन्नात्मन्यहोऽहं नमो मह्यमित्येवं योऽस्यावहङ्कारो निजगुणेषु बहुमानोऽभिष्वङ्गस्तदुपयोगकाले तदुपयोगसमये इत्यर्थः, (स एव च मानो द्वेषो भवति, कदा ?, परगुणेषु यो द्वेषोऽप्रीतिस्तदुपयोगे तदध्यवसायपरिणतिलाभ इत्यर्थः) एवं परोपघाताय व्याप्रियमाणौ मायालोभौ द्वेषः, स्वशरीरस्वजनस्वजनाऽऽदिषु मूर्छोपयोगकाले तु तावेव रागः । कुतः ?, इत्याह-अभिष्वङ्गलिङ्ग इति कृत्वा । अभिष्वङ्गो हि रागो, यश्च स्वशरीराऽऽदिषु मूर्छोपयोगः, स व्यक्तोऽभिष्वङ्ग इति युक्तमस्य रागत्वमिति भावः ॥ २६७३ ॥ २६७४ ॥

अथ शब्दाऽऽदिनयत्रयमतमाह-

सद्दाइमयं माणे, मायाए चिय गुणोवगाराय ।
उवओगो लोभो चिय, जओ स तत्थेव अवरुद्धो ॥२६७५॥
सेसंसा कोहो वि य, परोवघायमइय त्ति तो दोसो ।
तल्लक्खणो य लोभो, अह मुच्छा केवलो रागो ॥२६७६॥
मुच्छाणुरंजणं वा, रागो संदूसणं ति तो दोसो ।
सद्दस्स व भयणेयं, इयरे एक्केक्कियपक्खा ॥ २६७७ ॥

शब्दाऽऽदिनयानामिदं मतं, माने मायायां च स्वगुणोपकाराय आत्मन उपकाराय व्याप्रियमाणायां य उपयोगः स लोभ एव, यतः स स्वगुणोपकारोपयोगः स्वात्मनि मूर्छाऽऽत्मकत्वात् तत्रैव लोभेऽवरुद्धोऽन्तर्भूतः । तथा च सति स मानमाययोः स्वगुणोपकारोपयोगः स्वाऽऽत्मनि मूर्छाऽऽत्मकत्वाल्लोभ इव राग इत्यभिप्रायः । शेषास्तु परोपघातोपयोगरूपा मानमाययोरंशाः क्रोधश्च सर्वः, एते सर्वे परोपघातमयास्ततो द्वेष इति मन्तव्याः । न केवलमेते तथा लोभोऽपि द्वेषः । किं सर्वः ?, नेत्याह-यतस्तल्लक्षणः परोपघातोपयोगरूपः । अथ परानुपघातोपयोगरूपो मूर्छोपयोगाऽऽत्मको लोभः पृच्छ्यते, तत्राऽऽह-केवलो राग एवासाविति । अथवा किं बहुनोक्तेन ?, संक्षिप्य ब्रूमः । किमित्याह-(मुच्छेत्यादि) इह सर्वेष्वपि क्रोधव्यतिरिक्तेषु मानमायालोभकषायेषु यन्मूर्छाऽऽत्मकमनुरञ्जनं यः कश्चिन्मूर्छोपयोग इत्यर्थः । स रागो मन्तव्यः । अथ संदूषणमप्रीत्युपयोगस्तलोऽसौ द्वेषो ज्ञातव्यः । शब्दनयस्वेषं भजना विकल्पना । वाशब्दात् ऋजुसूत्रस्य च । शेषौ तु संग्रहव्यवहारनयौ, नैगमस्यानयोरेवान्तर्भावादेकैकस्थितपक्षौ-एकैकः स्थितो नियमितः पक्षो यत्रोक्तावेकैकस्थितपक्षौ । तथाहि-संग्रहनयः क्रोधमानौ द्वेषमेवेच्छति, मायालोभौ तु रागम् । व्यवहारनयोऽपि लोभं रागमेव मन्यते, शेषकषायत्रयं तु द्वेषमेवेति । अतः शब्दाऽऽदिनया भजनाऽभ्युपगमपरत्वादेकैकस्थितपक्षवादिभ्यां तान्यां भिन्ना इति । तदेवं व्याख्यातौ रागद्वेषौ ॥ २६७५ ॥ २६७६ । ॥ २६७७ ॥ विशे० । "दस दोसे पण्णत्ते । तं जहा-तज्जायदोसे मइभंगदोसे पसत्थारदोसे परिहरणदोसे सलक्खणकारणहेदोसे संकामणंनिग्गहदत्थू दोसे ।" स्था० १० ठा० (व्याख्या तत्तच्छब्दोपरि)

द्वेषे उदाहरणम्-

" श्लोकेन बहुना सार्द्धं, नावा धर्मरुचिं मुनिम् ।
गङ्गामुत्तारयामास, नन्दनामकनाविकः ॥ १ ॥
लोकोऽगादातरं दत्त्वा, मुनिस्तेन धृतः पुनः ।
भिक्षावेला व्यतिक्रान्ता, स तथाऽप्यमुचन्न तम् ॥ २ ॥
अमुच्यमानो रुष्टः सन्, मुनिर्दृग्विषलब्धिकः ।
आलोक्य क्रूरया दृष्ट्या, तमधाक्षीत् पलालवत् ॥ ३ ॥
क्वापि ग्रामे सभायां सोऽभवद् मृत्वा गृहोलकः ।
सोऽपि साधुर्गतस्तत्रा-विशद्धोक्तुं च तां सभाम् ॥ ४ ॥
गृहोलकोऽपि तं दृष्ट्वा, कोपेनाभूज्ज्वलन्निव ।
भुञ्जानस्य मुनेरूर्द्धं, चिक्षेप पावकं ततः ॥ ५ ॥
स मुनिर्यत्र यत्राऽऽस्ते, तत्र तत्र तथैव सः ।
मुनिर्हत्वा स एवायं, नन्द इत्यदहत्तथा ॥ ६ ॥
गङ्गा विशति पाथोधिं, वर्षे वर्षे पराध्वना ।
वाहस्तत्र चिरत्यक्तो, मृतगङ्गेति कथ्यते ॥ ७ ॥
हंसोऽजनिष्ट मृतगङ्गायां, स नन्दाऽऽत्मा गृहोलकः ।
कर्मधर्मसमायोगात्, साधुना सममन्यदा ॥ ८ ॥
साधुः संचरमाणः स, महात्मा तेन वर्त्मना ।
माघमासे वसंस्तत्र, हंसस्तं प्रेक्ष्य सोऽकुपत् ॥ ९ ॥
पक्षौ भूत्वाऽथ नीरेण, शीकरैरशिनन्मुनिम् ।
दग्धस्तत्रापि मृत्वा स, सिंहोऽजूदञ्जनाऽचले ॥ १० ॥
सोऽगात्तत्रापि सार्थेन, सिंहस्तं ऋषितोऽभ्यगात् ।
दग्धस्तेन तथैवासौ, वाराणस्यामभूद्गुहः ॥ ११ ॥
सोऽपि तत्र गतः साधु-र्दृष्ट्वा तं चटुरीर्ष्यया ।
जघान लेष्टुभिर्दुष्टः, मत्वा तमपि सोऽदहत् ॥ १२ ॥
अकामनिर्जरायोगा-द्राजा तत्रैव सोऽभवत् ।

जातीः सस्मार नन्दाऽऽद्या-स्ततो दध्यौ भयद्रुतः ॥१३॥
कथञ्चिद्यदि जाने तं, क्रमयाम्यधुनाऽपि तत् ।
तदज्ञानोपायभूतां, समस्यां स व्यधादिमाम् ॥१४॥
गङ्गायां नाविको नन्दः, सभायां च गृहोलकः ।
मृतगङ्गातटे हंसः, सिंहश्चाञ्जनपर्वते ॥ १५ ॥
चतुर्द्वाराणसीपुर्यां, राजा तत्रैव चाभवत् ।
यः एतां पूरयेत्तस्य, राज्यार्धं ददतास्म्यहम् ॥ १६ ॥
पठन्ति तत्र सर्वेऽपि, समस्यां तामिमां जनाः ।
विहरन् सोऽपि तत्रैवा-ऽऽगत्याऽऽरामे मुनिः स्थितः ॥ १७ ॥
तां चाऽऽरामिकपठितां, श्रुत्वा साधुरपूरयत् ।
एतेषां घातको यश्च, सोऽप्यत्रैव समागतः ॥ १८ ॥
अधीत्याऽऽरामिकस्तां स, पठति स्म नृपाग्रतः ।
राजा मुमूर्छ तत् श्रुत्वा, जघ्नुरारामिकं जनाः ॥ १९ ॥
सोऽवदन्न मयाऽपूरि, स्वस्थो राजा जगाद तम् ।
केनेयं पूरिता ब्रूहि, स स्माऽऽहाऽऽगन्तुकसाधुना ॥ २० ॥
नृपस्तत्र नरान् प्रैषीत्, क्षुप्रसन्नः स चेन्मयि ।
तदेत्य त्वत्पदोपान्तं, नमामि क्रमयामि च ॥ २१ ॥
अनुज्ञातोऽथेत्य मत्वा, आर्षोऽभूद्देशनाश्रुतेः ।
अयाऽऽलोक्य प्रतिक्रान्तो, निर्वृतिं साधुरप्यगात् ॥ २२ ॥" आ० क०।

(रागस्य द्वेषस्य च हेतवः " चरणविहि " शब्दे तृतीयभागे ११२८ पृष्ठे दर्शिताः) अर्थे, कोपे च । दे०ना० ५ वर्ग ५१ गाथा।

दोसंझाण–द्वेषध्यान–न० । अप्रीतिमात्रं परद्रोहाध्यवसायो वा द्वेषः, तस्य ध्यानं, मधुदेवपिङ्गलाऽऽदयोरिव धर्मरुचिनाविकनन्दयोरिव वंशोत्पत्तौ वीरकदेवस्येव वा दुर्ध्याने, आतु०।

दोसउरिया–दोषोरिका–स्त्री० । ब्राह्मीलेख्यविधाने, सम० १८ समo ।

दोसकिरिया–द्वेषक्रिया–स्त्री० । द्वेषजन्यक्रियाभेदे, आ० चू० ४ अ०।

दोसणिग्घायणाविणय–दोषनिर्घातनाविनय–पुं० । क्रुद्धाऽऽदेः क्रोधाऽऽद्यपनयनाऽऽत्मके विनयभेदे, दशा०।

से किं तं दोसनिग्घायणाविणए ? दोसनिग्घायणाविणए चउव्विहे पण्णत्ते। तं जहा–कुद्धस्स कोहं विणएत्ता भवति, दुट्ठस्स दोसं णिगिण्हित्ता भवति, कंखियस्स कंखं छिंदित्ता भवति, आयासुप्पणिधिते यावि भवति । से तं दोसनिग्घायणाविणए ॥

साम्प्रतं दोषनिर्घातनार्थं विपृच्छिषुरिदमाह–" से किं तं " इत्यादि प्रश्नसूत्रं कण्ठ्यम् । गुरुराह–दोषनिर्घातनाविनयश्चतुर्विधश्चतुःप्रकारः प्रज्ञप्तः । तद्यथा–(कुद्धस्सेति) क्रुद्धस्य क्रोधं विनयिता भवति १, दुष्टस्य दोषं निगृहीता भवति २, काङ्क्षितस्य काङ्क्षाव्युच्छेदयिता भवति ३, आत्मसुप्रणिधितश्चापि भवति ४। तत्र क्रुद्धस्य किञ्चिन्निमित्तमासाद्योदीर्णक्रोधं मृदुलक्षणं मृदुवचनाऽऽदिभिर्विनयिता नेता भवति । क्रोधपरित्यागलक्षणमाचारं वा शिक्षयिता भवति १, दुष्टस्य कषायविषयपरिणामवचः, अहङ्कारोद्धुरस्य वा आचारस्वभावशीलो विनयिता भवति । अथ वा दोषोन्नेता भवति २ । (कंखित त्ति) काङ्क्षितो नाम भक्तपानपरसमयपाखण्डगतपरिज्ञानाद्यद्वस्त्वुदर्शनमुत्पन्नाभिलाषस्य काङ्क्षां तत्प्राप्तिरूपां व्युच्छेदयिता तदभिलाषं विनयिता भवति, प्रापयिता इत्यर्थः ३ । वस्त्वन्तरदर्शनात् तदभिलाषापनेता वा भवति ४ । उक्तं च–" संपुण्णमेव तु भवे गणित्तं, जं कंखियाणं पविणेइ कंखं ।" इति । (आय त्ति) आत्मसुप्रणिधितः, कथं संजायतीति चेत् ? । उच्यते–यदा स्वयमेतेष्वनन्तरोक्तेषु न प्रवर्त्तते, तदा स सुप्रणिधित उच्यते । प्रणिधानं वा प्रणिधिः, शोभना निधिः सुप्रणिधिः, सद्भावोऽपि भवति । आकारान्तत्वं प्राकृतत्वात् । " सेतं " इति व्यक्तम । दशा० ५ अ० । व्य० ।

दोसणिज्जंत–देशी–चन्द्रे, दे० ना० ५ वर्ग ५१ गाथा ।

दोसणिस्सियं–द्वेषनिःसृत–न० । द्वेषे निःसृतं मत्सरिणां गुणवत्यपि निर्गुणोऽयमित्यादिरूपे मृषावादे, स्था० १० ठा० ।

दोसदंसि–दोसदर्शिन्–त्रि० । दोषस्य स्वरूपतो वेत्तरि, आचा० १ श्रु० ३ अ० ४ उ० ।

दोसपडिघायविणय–दोषप्रतिघातविनय–पुं० । दोषाः क्रोधाऽऽदयस्तेषां प्रतिघातो निर्घातना, स एव विनयो दोषप्रतिघातविनयः । दोषनिर्घातनाविनये, प्रव० ६५ द्वार ।

दोसपडियारणा–दोषप्रतिचारणा–पुं० । दोषनिषेधे, पञ्चा० १६ विव० ।

दोसपडियारण्णाय–दोषप्रतिकारज्ञात–पुं० । रोगचिकित्सोदाहरणे, पञ्चा० १९ विव० ।

दोसपडिसेह–दोषप्रतिषेध–पुं० । निर्दोषतायाम्, पञ्चा० १३ विव० ।

दोसबंधण–द्वेषबन्धन–न० । द्विष्यत्यनेनेति वा द्वेषः, द्वेष एव बन्धनं द्वेषबन्धनम । द्वेषबन्धने, आ० चू० ४ अ० । द्वेषमोहनीयसंबन्धे च । प्रज्ञा० २ पद ।

दोसरहिय–दोषरहित–पुं० । दोषा रोगाऽऽदयः, तैः रहितः । रोगाऽऽदिरहिते, सू० प्र० २० पाहु० ।

दोसव–दोषवत्–त्रि० । दोषयुक्ते, पञ्चा० ८ विव० ।

दोसवत्तिया–द्वेषप्रत्यया–स्त्री० । अप्रीतिकारकायां क्रियायाम्, आव० ४ अ० । सा दुविहा पण्णत्ता-कोहणिस्सिया य. माणणिस्सिया य । कोहणिस्सिया अप्पणा कुप्पइ, परस्स कोहं उप्पाएइ । माणणिस्सिया स्वयं मज्जति, परस्स वा माणं उप्पाएइ।" आव० ४ अ० । सूत्रभेदे, स्था० २ ठा० ४ उ० । क्रियाभेदे, आ० चू० ४ अ० ।

दोससयगगरी–दोषशतगर्गरी–स्त्री० । दोषाः परस्परकलहमत्सरगालिप्रदानमर्मोद्घट्टनकलङ्कप्रदानजल्पनशापप्रदानस्वपरप्राणाघातचिन्तनाद्यस्तेषां शतानि तेषां गर्गरिका भाजनविशेषः । दोषशतभृतायां कुम्भ्याम्, त्रि० ।

दोसा–स्त्री० । ब्राह्मीलेख्यविधाने, प्रज्ञा० १ पद ।

दोसाणिअ–देशी–निर्भर्त्सिते, दे० ना० ५ वर्ग ५१ गाथा ।

दोसारण–देशी–कोपे, दे० ना० ५ वर्ग ५१ गाथा ।

दोसिणा–ज्योत्स्ना–स्त्री० । चन्द्रलेश्यायाम्, चं० प्र० ।

ज्योत्स्नालक्षणम्–

ता कहं ते दोसिणालक्खणे आहिता ति वदेज्जा ?। ता दोसिणा ति अ चंदलेसा ति अ । दोसिणा ति य किंअट्ठे,किंलक्खणे ? । ता एगट्ठे एगलक्खणे आहिता । सूरलेस्सा ति य आयवे ति य किंअट्ठे किंलक्खणे ?। ता एगट्ठे एगलक्खणे । ता छाया ति य अंधकारे ति य किंअट्ठे किंलक्खणे ?। ता एगट्ठे एगलक्खणे ।

कथं ज्योत्स्नालक्षणमाख्यातमिति ?। एतदेवंरूपमेव प्रश्नसूत्रमाह-(ता कहं ते इत्यादि) 'ता' इति पूर्ववत्, कथं केन प्रकारेण,भगवन् ! त्वया ज्योत्स्नालक्षणमाख्यातमिति वदेत् ? । एवं सामान्यतः पृष्ट्वा विवक्षितपृष्टव्यार्थप्रकटनाय विशेषप्रश्नं करोति (ता चंदलेस्सा इत्यादि) 'ता' इति पूर्ववत्। चन्द्रलेश्या इति ज्योत्स्ना इति। अनयोः पदयोः। अथवा ज्योत्स्ना इति चन्द्रलेश्या इत्यनयोः पदयोरिहाक्षराणामानुपूर्वीभेदेनार्थभेदो दृष्टो, यथा वदनं न दध इति पदानाम्। अपि चानुपूर्वीभेददर्शनादर्थभेददर्शनं यथा पुत्रस्य गुरुः, गुरोः पुत्र इतिवत्। इहापि कदाचिदानुपूर्वीभेवादर्थभेदो भविष्यतीत्याशङ्कापशात चन्द्रलेश्या इति ज्योत्स्ना इत्युक्त्वा, ज्योत्स्ना इति लेश्या इत्युक्तम् । अनयोः पदयोरानुपूर्व्याऽनानुपूर्व्या व्यवस्थितयोः कोऽर्थः, किं परस्परं भिन्ने, उताभिन्ने इति ?। स च किंलक्षणः किंस्वरूपः,लक्ष्यते तदन्यव्यवच्छेदेन ज्ञायते येन लक्षणमसाधारणं स्वरूपं यस्य स तथा। एवं प्रश्ने कृते भगवानाह-(ता एगट्ठे एगलक्खणे इति) 'ता' इति पूर्ववत् । चन्द्रलेश्या इति ज्योत्स्ना इत्यनयोः पदयोः आनुपूर्व्या अनानुपूर्व्या वा व्यवस्थितयोरेक एवाभिन्न एवार्थः। य एव एकस्य पदस्य वाच्योऽर्थः, स एव द्वितीयस्यापीति भावः। (एगलक्खणे इति) एकमभिन्नमसाधारणं लक्षणं यस्य स तथा। किमुक्तं भवति ?-यदेव चन्द्रलेश्या इत्यनेन पदेन चान्यस्य साधारणं स्वरूपं प्रतीयते तदेव ज्योत्स्ना इत्यनेनाऽपि पदेन, यदेव च ज्योत्स्ना इत्यनेन पदेन तदेव चन्द्रलेश्या इत्यनेनाऽपि पदेनेति। एवम्-आतप इति सूर्यलेश्या इति। तथाऽन्धकार इति छाया इति। अथवा-छाया इति अन्धकार इति। एतेषु पदेषु विषये प्रश्ननिर्वचनसूत्राणि भावनीयानि। चं० प्र० २० पाहु० ।

ज्योत्स्नावृद्धिहानी–

ता कता ते दोसिणा बहू आहिता ति वदेज्जा?। ता दोसिणापक्खेणं दोसिणा बहू आहिता ति वदेज्जा । ता कहं ते दोसिणापक्खे दोसिणा बहू आहिता ति वदेज्जा ?। ता अंधकारपक्खातो दोसिणे पक्खे दोसिणा बहू आहिता ति वदेज्जा । ता कहं ते अंधकारपक्खातो दोसिणा बहू आहिता ति वदेज्जा ?। ता अंधकारपक्खातो णं दोसिणापक्खं अयमाणे चंदे चत्तारि वायाले मुहुत्तसते छायालीसं च बावट्ठिभागे मुहुत्तस्स जाइं चंदे विरज्जति,तं जहा-पढमाते पढमं भागं ०जाव पण्णरसीए पण्णरसं भागं। एवं खलु अंधकारपक्खातो दोसिणापक्खे दोसिणा बहू आहिता ति वदेज्जा ?। ता केवतिता णं दोसिणापक्खे दोसिणा आहिता ति वदेज्जा ?। ता परित्ता असंखेज्जा भागा। ता कता ते अंधकारे बहू आहिता ति वदेज्जा ?। ता अंधकारे पक्खे अंधकारे बहू आहिता ति वदेज्जा। ता कहं ते अंधकारे पक्खे अंधकारे बहू आहिता ति वदेज्जा ?। ता दोसिणापक्खातो णं अंधकारपक्खे अंधकारे बहू आहिता ति वदेज्जा । ता कहं ते दोसिणापक्खातो अंधकारे बहू आहिता ति वदेज्जा ?। ता दोसिणापक्खातो णं अंधकारपक्खं अयमाणे चंदे चत्तारि वायाले मुहुत्तसते छायालीसं च बावट्ठिभागे मुहुत्तस्स जाइं चंदे रज्जति, तं जहा–पढमाते पढमं भागं०जाव पण्णरसीए पण्णरसं भागं। एवं खलु दोसिणापक्खातो अंधकारपक्खे अंधकारे बहू आहिता ति वदेज्जा । ता केवतिं णं अंधकारपक्खे अंधकारे आहिता ति वदेज्जा ?। ता परित्ता असंखेज्जा भागा ।

(ता कता ते दोसिणा इत्यादि)'ता' इति पूर्ववत्। कदा कस्मिन् काले भगवन् ! ते त्वया ज्योत्स्ना प्रभूता आख्याता इति वदेत् ?। भगवानाह-(ता दोसिणमित्यादि) 'ता' इति पूर्ववत्, ज्योत्स्नापक्षे ज्योत्स्ना बहुराख्याता इति वदेत् ?। (ता कहं ते इत्यादि) 'ता' इति प्राग्वत्। कथं केन प्रकारेण भगवन्! त्वया ज्योत्स्नापक्षे ज्योत्स्ना बहुराख्याता इति वदेत् ?। भगवानाह-(ता अंधकारे) इत्यादि सुगमम् । "ता कहं ते" इत्यादि प्रश्नसूत्रं निगदसिद्धम । निर्वचनमाह-(ता अंधकारपक्खाओ इत्यादि) 'ता' इति पूर्ववत्। अन्धकारपक्षात् ज्योत्स्नापक्षमयमानश्चन्द्रमाश्चत्वारि मुहूर्तशतानि द्वाचत्वारिंशानि द्विचत्वारिंशद्भधिकानि षट्चत्वारिंशतं च द्वाषष्टिभागान् मुहूर्तस्य यावत् ज्योत्स्ना निरन्तरं प्रवर्द्धते। तथा चाह यानि यावत् चन्द्रो विरज्यते शनैः शनैः राहुविमानेनाऽऽवृतस्वरूपो भवति, मुहूर्तसंख्यागणिते भावना प्राग्वत् कर्त्तव्या। कथमनावृतो भवतीत्याह। तद्यथा-प्रथमायां प्रतिपद्यक्षणायां तिथौ प्रथमपञ्चदशद्वाषष्टिभागसत्कभागचतुष्टयप्रमाणं यावदनावृतो भवति, द्वितीयस्यां तिथौ द्वितीयं भागं यावत् । एवं तावत् द्रष्टव्यं यावत् पञ्चदश्यां पञ्चदशमपि भागं यावदनावृतो भवति, सर्वाऽऽत्मना राहुविमानेनाऽऽवृतो भवतीति भावः। उपसंहारमाह-(एवं खलु इत्यादि)तत एवमुक्तेन प्रकारेण खलु निश्चितमन्धकारपक्षात् ज्योत्स्ना बहुतराऽऽख्याता इति वदेत्। इयमत्र भावना-इह शुक्लपक्षे यथा प्रतिपत्प्रथमक्षणादारभ्य प्रतिमुहूर्तं यावन्मात्रं शनैः शनैः चन्द्रः प्रकटो भवति, तथा अन्धकारपक्षे प्रतिपत्प्रथमक्षणादारभ्य प्रतिमुहूर्तं तावन्मात्रं शनैः २ चन्द्र आवृत उपजायते । तत एवं सति यावत्येवान्धकारपक्षे ज्योत्स्ना तावत्येव शुक्लपक्षे,या पञ्चदश्यां ज्योत्स्ना साऽन्धकारपक्षादधिकेति। अन्धकारपक्षात् शुक्लपक्षे ज्योत्स्ना प्रभूता आख्यातेति। (ता कहं ते इत्यादि) 'ता' इति पूर्ववत्। कियती ज्योत्स्नापक्षे ज्योत्स्ना आख्याता इति वदेत्?। भगवानाह-परीताः परिमिता असंख्येया भागाः निर्विभागा भागाः। एवमन्धकारसूत्राण्यप्युक्तानुसारेण भावनीयानि, नवरमन्धकारपक्षे अमावास्यायां योऽन्धकारः स ज्योत्स्नापक्षादधिक इति ज्योत्स्नापक्षादन्धकारपक्षे अन्धकारपक्षप्रभूत आख्यात इति। चं० प्र० २० पाहु० । सू० प्र० ।

दोसिणाभा–ज्योत्स्नाभा–स्त्री० । ज्योतिषेन्द्रस्य चन्द्रस्याग्रमहिष्याम्, स्था० ४ ठा० १ उ० । जं० । सू० प्र० । जी० ।

दोसिणी–देशी-ज्योत्स्नायाम्, दे० ना० ५ वर्ग ५० गाथा ।

दोसिय–दौषिक–त्रि० । दूष्यं परमस्येति दौषिकः । दूष्यक्रयविक्रयकारिणि, अनु० । व्य० ।

दोसियण्ण–दोषान्न–न० । रात्रिपर्युषितेऽन्ने, प्रश्न० ५ संव० द्वार ।

दोह–ऽोह–पुं० । अनिष्टचिन्तने, अष्ट० २५ अष्ट० ।

दोह–पुं० । दुह-कर्मणि घञ् । दुग्धे, 'सन्दोहश्चाष्टमेऽहनि' इति स्मृतिः । आधारे घञ् । दोहनपात्रे, भावे घञ् । दोहने, वाच० ।

दोहट्टि–दोहट्टि–पुं० । स्वनामख्याते ग्रामे, " दोहट्टिवसतिवासे, श्रेष्ठिश्रीजासकस्य दानरुचेः । तदुपश्लाघादपरं, च श्राविकाया वसुन्धर्याः ॥ १ ॥ " जीवा० ३६ अधि० ।

दोहणवामण–दोहनपाटन–न० । यत्र ग्रामिका गाः दोग्धि । गोदोहनस्थाने, नि० चू० २ उ० ।

दोहणहारी–देशी-जलहारिण्याम्, पारिहारिण्यां च । दे०ना० ५ वर्ग ५६ गाथा ।

दोहणी–देशी-पङ्के, दे० ना० ५ वर्ग ४८ गाथा ।

दोहल–दौहृद–पुं० । गर्भप्रभावोद्भूतेऽन्तर्वत्नीफलाऽऽदावभिलाषविशेषे, कल्प १ अधि० ४ क्षण । सूत्र० । षो० । " प्रदीपि दोहदे लः " ॥ ८ । १ । २२१ ॥ इति दस्य लः । ' दोहलोः ' प्रा० १ पाद ।

दोहा–द्विधा–अव्य० । द्विप्रकारे, " ओक्ख द्विधा कृगः " ॥ ८ । १ । ६७ ॥ द्विधाशब्दे कृगधातोः प्रयोगे इत ओत्वं, धकारादुत्वं च । 'दोहा किज्जइ । दुहा किज्जइ । दोहाइयं । दुहाइयं ।' कृग इति किम्–' दिहागयं । ' क्वचित्केवलस्याऽपि–" दुहा वि सो सुरबहूसत्थो । " प्रा० १ पाद ।

दोहासद्द–देशी-कटीतटे, दे० ना० ५ वर्ग ५० गाथा ।

दोहूअ–देशी-शवे, दे० ना० ५ वर्ग ४६ गाथा ।

ऽवक्क–त्रय–न० । " शीघ्राऽऽदीनां बहिल्लाऽऽदयः " ॥ ८ । ४ । ४२२ ॥ इति सूत्रान्तरपठितत्रयस्य 'द्रवक्क' इति सूत्रेण भयस्य स्थाने ऽवक्काऽऽदेशः । "दिवेहिं विढत्तउं जाहि वढ संचि म एक्कुवि द्रम्मु कोवि ऽवक्कउ सो पडइ जेण समप्पइ जम्मु ॥" प्रा० ४ पाद ।

ऽेहि–दृष्ट–न० । " शीघ्राऽऽदीनां बहिल्लाऽऽदयः " ॥८।४।४२२॥ इति सूत्रान्तरपठितदृष्टेर्ऽेहिः इति सूत्रेण दृष्टे स्थाने ऽेहि आदेशः । " एक्कमेक्कउं जइ वि जो, णदिदरिसु दसव्वायरेण तो वि ऽेहि । जहि कहि विराहो कोसक्कइ संचरे विदहुनयणानेहि पलुट्टाः ।" प्रा० ४ पाद ।

द्वितवर–द्वितवर–पुं० । काकन्दीनगरीवास्तव्ये स्वनामख्याते गृहपतौ, स च वीरान्तिके प्रव्रज्य षोडशवर्षपर्यायो विपुले पर्वते सिद्ध इत्यन्तकृद्दशायां षष्ठवर्गस्य षष्ठेऽध्ययने सूचितम् । अन्त० ५ वर्ग ।

इति श्रीसौधर्मबृहत्तपागच्छीय—कलिकालसर्वज्ञकल्प–जङ्गारक–

जैनश्वेताम्बराऽऽचार्यश्री १००८ श्रीमद्विजयराजेन्द्रसूरीश्वर-

विरचिते " अभिधानराजेन्द्रे " दकाराऽऽदिशब्द–

सङ्कलनं समाप्तम् ।



ध–ध–पुं० । धे–धा–वा डः । धर्म्मे, कुबेरे, ब्रह्मणि, गुहो, गुह्यके, प्रवरे, बह्वौ, वादे, देशभेदे, उपरिभागे, इन्द्रेभकुम्भे, धन्वन्तरौ, ध्वनौ, विशेषे निनादे, शशिनि च । षण्ढे, पारुष्ये, भूनने, खड्गे, सामर्थ्ये, धने, धान्ये च । न० । आधारभूते, भायके, भृते, नीते च । त्रि० ।

" धो विधाता धनं धर्मो, धी गुहो गुह्यके स्वरे ।
धश्च स्वाधारभूतेऽपि, बह्वौ वादे च धायके ॥
देशभेदे भृते भीते, धस्तथोपरि वर्त्तते ।
धं च षण्ढे च पारुष्ये, ... ॥ " एका० ।
" धः पुंसीन्द्रेभकुम्भे स्याद्, धन्वन्तरि तथा द्वयोः ।
स्याद् ध्वनौ च विशेषे च, निनादशशिधातुषु ॥ ५० ॥
क्लीवे तु धं धूनने च, खड्गसामर्थ्यदन्तिषु ।
धनधान्ये ....., ... ॥ ५१ ॥ " एका० ।

धंखाहरण–ध्वाङ्क्षोदाहरण–न० । काकदृष्टान्ते, " धंखाहरणेण विसेया । " ध्वाङ्क्षोदाहरणेन काकज्ञातेन । पञ्चा० १३ विव० । (तत्स्वरूपं 'गुरुकुलवास' शब्दे तृ० भा० ७३७ पृष्ठे दर्शितम्)

धंग–देशी–भ्रमरार्थे, दे० ना० ५ वर्ग ५७ गाथा ।

धंत–देशी–अतिशये, " धंतं पि दुरुकंखी, न लभइ दुरुं अधेणूओ । " व्याख्या–(धंतं पि त्ति) देशीवचनत्वादतिशयेनाऽपि दुग्धकाङ्क्षी, न लभते दुग्धमधेनोः सकाशादिति । वृ० १ उ० ।

ध्वान्त–न० । ध्वन–क्तः । अन्धकारे, वाच० ।

ध्मात–त्रि० । ध्मा–क्तः । दग्धे, आ० म० १ अ० २ खण्ड । विशे० । अग्निसम्पर्केण निर्मलीकृते, आ० म० १ अ० १ खण्ड । जी० । नं० । रा० । अग्निना तापिते च । औ० । शब्दिते, पिं० । दीर्घश्वासहेतुकशब्दयुक्ते च । वाच० । अग्निसंयोगे, जी० ३ प्रति० ४ उ० । जं० । ज्ञा० । ' ध्मा ' शब्दाग्निसंयोगयोरिति वचनात् । आ० म० १ अ० २ खण्ड ।

धंतधोयकणगरुअगसरिसप्पभ-ध्मातधौतकनकरुचकसदृशप्रभ–त्रि० । ध्मातमग्निना तापितं धौतं जलेन क्षालितं यत्कनकं तस्य यो रुचको वर्णस्तत्सदृशप्रभः । गौराङ्गे, औ० ।

धंतधोयरुप्पपट्ट–ध्मातधौतरूप्यपट्ट–न० । ध्मातोऽग्निसम्पर्केण निर्मलीकृतो धौतो क्षुतिखरण्टितहस्तसंमार्जनेनातितेजितो रूप्यमयः पट्टः विशदीकृतो यो रूप्यपट्टो रजतपत्रम् । जी० ४ प्रति० ४ उ० । विशदीकृतो यो रूप्यपट्टो रजतपत्रकं स ध्मातधौतरूप्यपट्टः । रा० । अन्ये तु व्याचक्षते ध्मातोऽग्निसंयोगेन यो धौतः शोधितो रूप्यपट्टः स ध्मातधौतरूप्यपट्टः । रा० । ज्ञा० । अग्निसम्पर्केण निर्मलीकृते क्षुतिखरण्टितहस्तसंमार्जनेनातितेजितेऽग्निसंयोगेन शोधिते रजतपत्रके, " धंतधोयरुप्पपट्टेइ वा " जी० ४ प्रति० ४ उ० । जं० ।

धंतधोयरुप्पपट्टसंकसंखचंदकुंदसालिपिट्ठरासिसमप्पभ–ध्मातधौतरूप्यपट्टाङ्कशङ्खचन्द्रकुन्दशालिपिष्टराशिसमप्रभ–त्रि० । ध्मातधौतरूप्यपट्टाङ्कशङ्खचन्द्रकुन्दशालिपिष्टराशिसदृशप्रभे, ज्ञा० १ श्रु० १ अ० ।

धंधा–देशी–लज्जायाम्, दे० ना० ५ वर्ग ५७ गाथा ।

धंसण–ध्वंसन–न० । भ्रंशे, " धंसेइ जो अभूएणं । " ध्वंसयति मायया भ्रंशयतीति । स० ३० समo । अपनयने, " सउणी जह पंसुगुंडिया, विहुणिय धंसइ ईसियं रयं । " ध्वंसयत्यपनयतीति । सूत्र० १ श्रु० २ अ० १ उ० । अधःपतने, गमने, नाशे च, वाच० ।

धंसाड–मुच–त्यागे, तु०–मुचादि०–उभ०–सक०–अनिट् । " मुचेरुड्डावहेरु–मेल्लोस्सिक्क–रेअव–णिल्लुञ्छु–धंसामाः " ॥ ८ । ४ । ७१ ॥ इति सूत्रेण मुञ्चतेर्धंसाडाऽऽदेशः । ' धंसामइ । ' पक्षे–' मुअइ ' प्रा० ४ पाद । मुञ्चति, अमुचत् । वाच० ।

धंसामिअ–देशी–व्यपगते, दे० ना० ५ वर्ग ५७ गाथा ।

धअ–देशी–पुरुषे, दे० ना० ५ वर्ग ५७ गाथा ।

धगधगंत–धगधगायमान–त्रि० । ज्वाज्वल्यमाने, " धगधगंतसंकुरूवणं । " ज्ञा० १ श्रु० १ अ० । "पज्जलंति जत्थ धगधग-धगस्स गुरुणा वि चोइए सीसा । " (धगधगधगस्सत्ति) अनुकरणशब्दोऽयम् । धगधगेति धगधगायमानं यथा स्यात्तथेत्यर्थः । प्राकृतत्वाच्चैवं प्रयोगः । ग० २ अधि० ।

धगधगाइय–धगधगायित–त्रि० । धगधगेति कुर्वति, " धगधगाइयजलंतजालाकुज्जलाभिरामं । " कल्प० १ अधि० ३ क्षण ।

धट्ठज्जुण–धृष्टद्युम्न–पुं० । धृष्टं प्रगल्भं द्युम्नं बलं यस्य । "धृष्टद्युम्ने णः" ॥ ८ । २ । ६४ ॥ इति प्राकृतसूत्रेण णस्य न द्वित्वम् । प्रा० २ पाद । द्रुपदराजपुत्रे, वाच० ।

धमिया–धटिका–स्त्री० । "मणैर्दशभिरेका च, धटिका कथिता बुधैः ।" इत्युक्तलक्षणे दशमणाऽऽत्मके मानविशेषे, तं० । कल्प० ।

धण–धण–धा० । ध्वाने, भ्वादि०–पर०–सक०–सेट् । धणति । अधाणीत् । अधणीत् । वाच० ।

धण–धा० । ध्वाने, भ्वादि०–पर०–अक०–सेट् । धणति । अधणीत् । अधाणीत् । वाच० ।

धण–धा० । ध्वाने, भ्वादि०–पर०–अक०–सेट् । धणति, अधाणीत् । अधणीत् । वाच० ।

धन–धा० । शब्दे, चुरा०–उभ०–सक०–सेट् । धनयति । अदिधनत् । अधनयीत् । वाच० । धन–घञ् । शब्दे, पुं० । वाच० । रवे, भ्वादि०–पर०–अक०–सेट् । वा–घटादिः । धनति । अधानीत् । अधनीत् । धनयति । धानयति । वाच० ।

धन–धा० । धान्योत्पादने, जुहो०–पर०–अक०–सेट् । दधनति, अधानीत् । अधनीत् । वाच० । रव, भ्वादि०–पर०–अक०–सेट् । धनति ।

अधानीत् । अधनीत् । वाच० धन-अच् । वस्तुनि, अर्थे, वाच० हिरण्यरूप्याऽऽदिके, उत्त० ६ अ० । रा० । " धनियमियरं तु धणं । " यद् घटितमितरद् वा अघटितं तद्धनमुच्यते । बृ० १ उ० । गोमहिष्यादिके, सूत्र०२ श्रु०१ अ० आव० । औ० उत्त० गुरुखएडशर्कराऽऽदिके,धनं गुरुखण्डशर्कराऽऽदि,गोमहिष्यजाऽविकाकरभतुरगाऽऽदि वा । आव०६ अ० भाग०ऽऽदिके,आ० चू० ६ अ० । ' धनम् ' गणिम-धरिम-मेय-पारिच्छेद्य-भेदाच्चतुर्धा । यदाह-" गणिमं जाईफलफोफलाई, धरिमं तु कुंकुमगुडाई । मेज्जं चोपडलोणाइ, रयणवत्थाइ परिछेज्जं । " ॥ १ ॥ (४७ श्लो०) ध० २ अधि० । आ० चू० । दशा० । कल्प० । औ० । ज्ञा० । भ० । धनं च न्यायेनैवोपार्जयेदिति गृहिधर्मः । ध० १ अधि० । धनार्थिनाऽपि धर्म एव कार्यः । " धर्मोऽयं धनवल्लभेषु धनदः । " " तो पडिभणेइ सेट्ठी, धणत्थिणो जइ तुमे तहा वि इमं । धम्मं करेह जं ए-स देइ धणं कामधेणुसमो ॥" ध० २० । अर्थस्यापि पुरुषार्थतया सकलैहिकाऽऽमुष्मिकफलनिबन्धनतया च तदुपार्जनं प्रत्यप्रमादो विधेय इति केषाञ्चिदाशयः । यत आहुः-" धनैर्दुष्कुलीनाः कुलीनाः क्रियन्ते,धनैरेव पापात्पुनर्निस्तरन्ति । धनेभ्यो विशिष्टो न लोकेऽस्ति कश्चिद्, धनान्यर्जयध्वं धनान्यर्जयध्वम् ॥ १ ॥" इति ।

तन्मतमपाकर्तुमाह-

जे पावकम्मेहिँ धणं मणूसा,
समायरंती अमतिं गहाय ।
पहाय ते पास पयट्टिए नरे,
वेराणुबद्धा नरयं उवेंति ॥ २ ॥

ये केचनाविवक्षितस्वरूपाः पापकर्मनिरिति पापोपादानहेतुभिरनुष्ठानैर्धनं ऊर्व्यं मनुष्या मनुजाः, तेषामेव प्रायस्तदर्थोपायप्रवर्तनादित्थमुक्तम् । समाददते स्वीकुर्वन्ति, अमतिमिति प्राग्वत्, नञः कुत्सायामपि दर्शनात्कुमतिम् उक्तरूपां.(गहाय त्ति) गृहीत्वा संप्रधार्य। पठ्यते च-"अमयं गहाए त्ति।" अशोभनं मतममतं नास्तिकाऽऽदिदर्शनम्, अथवा-अमृतमिवाऽमृतम् । आत्मनि परमानन्दोत्पादकतया तच्च प्रक्रमान्नरूपम् । (पहाय त्ति) प्रकर्षेण तन्मध्यादल्पस्याप्यग्रहणाऽऽत्मकेन हित्वा त्यक्त्वा, पाशानिति धनैकरक्षिकान्, पश्यावलोकय । विनयमेवाह-(पयट्टिए त्ति) आर्षत्वात् स्वत एवाशुज्ञानुभावतः प्रवृत्तान्प्रवर्त्तितान्वा, प्रक्रमान्पापकर्मोपार्जितधनेनैव मृत्युमुखमिति भावः । एतच्च गम्यते, नरान् पुरुषान्, पुनरुपादानमादरख्यापकमेकान्तक्षणिकपक्षनिरासार्थं वा । एकान्तक्षणिकपक्षे हि नयैरेवं धनमुपार्जितं तेषामेव प्रवर्तनम् । तथा च बन्धमोक्षाभावश्चेति भावः । एतच्च पश्य वैरं कर्म " वेरे बज्झे य कम्मे य " इतिवचनात् । तेनानुबद्धाः सततमनुगता वैरानुगताः, नरकं रत्नप्रभाऽऽदिकं नारकनिवासं वपयान्ति एतद्भवनाविततया सामीप्येन गच्छन्ति, त एव मृत्युमुखप्रवृत्ता इति प्रक्रमः । यदि वा-पाशा इव पाशाः स्त्र्यादयस्तेषु प्रवृत्तास्तैर्वा प्रवर्त्तिताः पाशप्रवृत्ताः पाशप्रवर्त्तिता वा नरकमुपयान्तीति संबन्धः । ते हि ऊर्व्यमुपाऽऽर्य स्त्र्यादिष्वनिरमन्ते, तदनिरम्या च नरकगतिनाज एव भवन्तीति भावः । शेषं प्राग्वत् । तदनेन सूत्रेण धनमेवैव मृत्युहेतुतया परत्र च नरकप्रापकत्वेन तत्त्वतः पुरुषार्थ एव न भवतीति तत्त्वागतो धर्मे प्रति मा प्रमादीरित्युक्तं भवति । नरकप्राप्तिलक्षणश्चापायो न प्रत्यक्षेणावगम्यतेतैवमृत्युलक्षणापायदर्शनमुदाहरणम् । तत्र बृहत्संप्रदायः-"एगम्मि नयरे एगो चोरो, सो रत्ति विभवसंपन्नेसु घरेसु खत्तं खणियं, सुबहुं दविणजायं घेत्तुं अप्पणो घरेगदेसे कूवं खणेत्ता तत्थ दविणजायं पक्खिवति, जहाच्छियं च सुकं दाऊण कम्मगं विहेउ पसुयं ति उवहवेत्ता तत्थेवागमे पक्खिवइ, मा मे भज्जा चेडरूवाणि परूढपणयाणि होऊण रयणाणि परस्स पगासिति । एवं काले वच्चति अन्नया तेणेगा कन्नया विवाहिया अतीवरूविणी सा पसूया संता तेण न मारिया । दारगो य सो अट्ठवरिसो जाओ । तेणं चिंतियं-अहचिरकालं विधारिया एयं पुव्वं उवहवेउं पच्छा दारयं उद्दाविस्सं, तेण सा उवहवेउं अगमे पक्खित्ता, तेण दारगेण गिहाओ निग्गच्छिऊण हाहा कया, लोगो मिलितो, तेण भणति-एएण मे माया मारिय त्ति । रायपुरिसेहिं सुयंतेहिं गहितो, दिट्ठो कूवो दव्वभरिओ, अडियाणि य सुबहूणि, सो बंधेऊण रायमभमुत्तणीओ, जायणापगारेहिं सव्वं दव्वं दवावेऊण कुमारेणं मारिओ । " एवमन्येऽपि धनं प्रधानमिति तदर्थं प्रवर्त्तमानाः तदपहायैवानर्थावाप्तितो नरकमुपयान्तीति सूत्रार्थः । उत्त० पाई० ४ अ० । (संयमस्थस्य धनेन चेत्प्रयोजनमुत्पद्येत तदा किं कर्तव्यमिति तद्वक्तव्यता ' अट्ठजाय ' शब्दे प्रथमभागे २४१ पृष्ठे उक्ता) स्नेहे, धनिष्ठानक्षत्रे च । वाच० । पार्श्वनाथस्य प्रथमभिक्षादायके, स० । राजगृहनगरस्थे स्वनामख्याते सार्थवाहे, आ० म० द्वि० । आचू० । आचा० । (तद्वक्तव्यता ' जियसत्तुपुत्त ' शब्दे तृतीयभागे ११८९ पृष्ठे उक्ता) ("रोहिणी" शब्दे च दृश्या) देवदत्तदारकस्य पितरि राजगृहनगरस्थे स्वनामख्याते सार्थवाहे, ज्ञा० ।

तत्कथा राजगृहवर्णनमधिकृत्य-

एवं खलु जंबू ! तेणं कालेणं तेणं समएणं रायगिहे णामं णयरे होत्था, णगरस्स वण्णओ । तत्थ णं रायगिहे णयरे सेणिए णामं राया होत्था, महया वण्णओ । तत्थ णं रायगिहस्स णयरस्स बहिया उत्तरपुरच्छिमे दिसीभाए गुणसिलए णामं चेइए होत्था, वण्णओ । तस्स णं गुणसिलयस्स चेइयस्स अदूरसामंते एत्थ णं महं एगे जिण्णुज्जाणे यावि होत्था, विणट्ठदेवउले पक्खियतोरणघरे णाणाविहगुच्छगुम्मलयावल्लिवच्छच्छाइए अणेगवालसयसंकणिज्जे यावि होत्था । तस्स णं जिण्णुज्जाणस्स बहुमज्झदेसभाए एत्थ णं महं एगे जग्गकूवए यावि होत्था, तस्स णं जग्गकूवस्स अदूरसामंते एत्थ णं महं एगे मालुयाकच्छए यावि होत्था, किण्हे किण्होभासे० जाव रम्मे महामेहनिउरंबभूए बहूहिं रुक्खेहि य गुच्छेहि य गुम्मेहि य लयाहि य वल्लीहि य तणेहि य कुसेहि य कुसुमेहि य खाणुएहि य संछण्णेहि य परिच्छण्णे अंतो झुसिरे बाहिं गंभीरे अणेगवालसयसंकणिज्जे यावि होत्था । तत्थ णं रायगिहे णयरे धणे णामं सत्थवाहे अड्ढे दित्ते० जाव विउलभत्तपाणे, तस्स णं धणस्स सत्थवाहस्स भद्दा नामं जारिया

होत्था, सुकुमालपाणिपाया अहीणपडिपुण्णपंचिंदियसरीरा लक्खणवंजणगुणोववेया माणुम्माणप्पमाणपडिपुण्णसुजायसव्वंगसुंदरंगी ससिसोम्माकारकंतपियदंसणा सुरूवा करयलपरिमियतिवलियमज्झा कुंडलुल्लिहियगंडलेहा कोमुइयरयणियरपडिपुण्णसोम्मवयणा सिंगारागारचारुवेसा० जाव पडिरूवा बंझा अवियाउरी जाणुकोप्परमाया यावि होत्था । तस्स णं धणस्स सत्थवाहस्स पंथए णामं दासचेडए होत्था, सव्वंगसुंदरंगे मंसोवचिए बालकीलावणकुसले यावि होत्था । तए णं से धणे सत्थवाहे रायगिहे णयरे बहूणं णगरणिगमसेट्ठिसत्थवाहाणं अट्ठारसण्हं य सेणिप्पसेणीणं बहुसु कज्जेसु य कुडुंबेसु य ०जाव चक्खुभूए यावि होत्था, णियमस्स वि य णं बहुसु कुडुंबेसु य बहुसु गुज्झेसु य० जाव चक्खुभूए यावि होत्था । तत्थ णं रायगिहे णयरे बहिया विजए णामं तक्करे होत्था, पावे चंडालरूवे भीमतररुद्दकम्मे आरुसियदित्तरत्तणयणे खरफरुसमहल्लविगयबीभच्छदाढिए असंपुडियउट्ठे उद्धुयपइण्णलंबंतमुद्धए जमरराहुवण्णे णिरणुक्कोसे णिरणुतावे दारुणे पइण्णए णिस्संसइए णिरणुकंपे अहीव एगंतदिट्ठीए खुरेव एगधाराए णिच्चेव आमिसत्तिसिते अग्गिमिव सव्वभक्खी जलमिव सव्वग्गाही उक्कंचणवंचणमायाणियडिकूडकवडसाइसंपओगबहुले चिरणगरविणट्ठदुट्ठसीलायारचरित्ते जूयपसंगी मज्जपसंगी मंसपसंगी भोज्जपसंगी दारुणहिययदारए माहिसिए संधिच्छेयए उवहिए विस्संभघाई आलीवगतित्थभेए सहसत्थसंपउत्ते परस्स दव्वहरणे णिच्चं अणुबद्धे तिव्ववेरे रायगिहस्स णयरस्स बहूणि अतिगमणाणि य णिग्गमणाणि य दाराणि य अवदाराणि य खिंडिओ य खंडीओ य णगरणिद्धमणाणि य संवट्टणाणि य णिव्वट्टणाणि य जूयखलयाणि य पाणागाराणि य वेसागाराणि य तक्करठाणाणि य तक्करघराणि य सिंघाडगाणि य तियाणि य चउक्काणि य चच्चराणि य णागघराणि य जूयघराणि य जक्खदेउलाणि य सब्भाणि य पव्वताणि य पणियसालाणि य सुण्णघराणि य आलोएमाणे मग्गमाणे गवेसमाणे बहुजणस्स छिद्देसु य विसमेसु य विहुरेसु य वसणेसु य अब्भुदएसु य उस्सवेसु य पसवेसु य तिहीसु य छणेसु य जण्णेसु य पव्वणीसु य जुद्धेसु य मत्तपमत्तस्स य वक्खित्तस्स य वाउलस्स य सुहियस्स य दुहियस्स य विदेसत्थस्स य विप्पवसियस्स य मग्गं च छिद्दं च विहरं च अंतरं च मग्गमाणे गवेसमाणे एवं च णं विहरइ,बहिया वि य णं रायगिहस्स णयरस्स आरामेसु य उज्जाणेसु य सुण्णाणेसु य वाविपोक्खरिणीदीहियागुंजालियासु य सरेसु य सरपंतियासु य सरसरपंतियासु य जिण्णुज्जाणेसु य भग्गकूवेसु य मालुयाकच्छएसु य सुसाणेसु य गिरिकंदरलयणउवट्ठाणेसु य बहुजणस्स छिद्देसु य० जाव एवं च णं विहरइ । तए णं तीसे भद्दाए भारियाए अण्णया कयाइं पुव्वरत्तावरत्तकालसमयंसि कुडुंबजागरियं जागरमाणीए अयमेयारूवे अब्भत्थिए ०जाव समुप्पज्जित्था-अहं धणेणं सत्थवाहेणं सद्धिं बहूणि वासाणि सद्दफरिसरसगंधरूवाणि माणुस्सगाइं कामभोगाइं पच्चणुब्भवमाणी विहरामि । णो चेव णं अहं दारगं वा दारियं वा पयायामि । तं धण्णाओ णं ताओ अम्मयाओ ०जाव सुलद्धेणं माणुस्सए जम्मजीवियफले, तासिं अम्मयाणं जासिं मन्ने णियगकुच्छिसंभूयाइं थणदुद्धलुद्धयाइं महुरसमुल्लावगाइं मम्मणपयंपियाइं थणमूलकक्खदेसभागं अभिसरमाणाइं मुद्धयाइं थणियं पिवंति, तओ य कोमलकमलोवमेहिं हत्थेहिं गिण्हिऊणं उच्छंगे णिवेसियाइं देंति समुल्लावए पिए समहुरे पुणो पुणो मंजुलप्पभणिए, तं णं अहं अधण्णा अपुण्णा अकयलक्खणा अकयपुण्णा एत्तो एगमवि ण पत्ता, तं सेयं मम कल्लं पाउप्पभाए रयणीए०जाव जलंते धणं सत्थवाहं आपुच्छित्ता धणेणं सत्थवाहेणं अब्भणुण्णाया समाणी सुबहुं विपुलं असणं पाणं खाइमं साइमं उवक्खडावेत्ता सुबहुपुप्फवत्थगंधमल्लालंकारं गहाय बहुमित्तणाइणियगसयणसंबंधिपरियणमहिलाहिं सद्धिं संपरिवुडा जाइं इमाइं रायगिहस्स णयरस्स बहिया णागाणि य भूयाणि य जक्खाणि य इंदाणि य खंदाणि य रुद्दाणि य सिवाणि य वेसमणाणि य,तत्थ णं बहूणं णागपडिमाण य० जाव वेसमणपडिमाण य महरिहं पुप्फच्चणियं करेत्ता जाणुपायवडिया एवं वइत्तए-जइ णं अहं देवाणुप्पिया ! दारगं वा दारियं वा पयायामि,तो णं अहं तुब्भं जायं च दायं च भायं च अक्खयणिहिं च अणुवड्ढेमि त्ति कट्टु उवाइयं उवयाइत्तए एवं संपेहेइ,संपेहेइत्ता कल्लं० जाव जलंते जेणामेव धणे सत्थवाहे तेणामेव उवागच्छइ, उवागच्छइत्ता एवं वयासी-एवं खलु अहं देवाणुप्पिया ! तुब्भेहिं सद्धिं बहूणि वासाइं० जाव विहरति समुल्लावए सुमहुरे पुणो २ सुमंजुलप्पजंपिए तेणं अहं अधण्णा अपुण्णा अकयलक्खणा एत्तो एगमवि ण पत्तो, तं इच्छामि णं देवाणुप्पिया ! तुब्भेहिं अब्भणुण्णाया समाणी विपुलं असणं वा पाणं वा खाइमं वा साइमं वा० जाव अणुवड्ढेमि उवाइयं करित्तए । तए णं धणे सत्थवाहे भद्दं भारियं एवं वयासी-ममं पि य णं खलु देवाणुप्पिए ! एस चेव मणोरहे,कहं णं तुमं दारगं वा दारियं वा पया-

एज्जसि जहाए सत्थवाहीए एयमट्ठं अणुजाणामि । तए णं सा भद्दा सत्थवाही धण्णेणं सत्थवाहेणं अब्भणुण्णाया समाणी हट्ठतुट्ठा ०जाव हियया विउलं असणपाणखाइमसाइमं उवक्खडावेइ, उवक्खडावेइत्ता सुबहुं पुप्फगंधमल्लालंकारं गिण्हइ, गेण्हइत्ता सयाओ गिहाओ णिग्गच्छइ, णिग्गच्छइत्ता रायगिहं णयरं मज्झंमज्झेणं णिग्गच्छइ, णिग्गच्छइत्ता जेणेव पोक्खरिणी तेणेव उवागच्छइ, उवागच्छइत्ता पुक्खरिणीए तीरे सुबहुं पुप्फगंधमल्लालंकारं उवेइ, उवेइत्ता पुक्खरिणिं ओगाहेइ, ओगाहेइत्ता जलमज्जणं करेइ, करेइत्ता जलकीडं करेइ, करेइत्ता एहाया कयबलिकम्मा उल्लपडसाडिया जाइं तत्थ उप्पलाइं० जाव सहस्सपत्ताइं ताइं गिण्हइ, गिण्हइत्ता पुक्खरिणीओ पच्चोरुहइ, तं सुबहुं पुप्फवत्थगंधमल्लं गिण्हइ, गिण्हइत्ता जेणामेव णागघरए य ०जाव वेसमणघरए य तेणेव उवागच्छइ, उवागच्छइत्ता तत्थ णं णागपडिमाए य० जाव वेसमणपडिमाए य आलोए पणामं करेइ, करेइत्ता ईसिं पच्चुस्सइ, लोमहत्थगं परामुसइ, णागपडिमाओ य० जाव वेसमणपडिमाओ य लोमहत्थेणं पमज्जइ, पमज्जइत्ता उदगधाराए अब्भुक्खेइ, अब्भुक्खेइत्ता पम्हलसुकुमालाए गंधकासाईए गायाइं लूहेइ, लूहेइत्ता महरिहं वत्थारुहणं मल्लारुहणं गंधारुहणं चुण्णारुहणं वण्णारुहणं च करेइ० जाव धूवं डहइ। जाणुपायवडिया पंजलिउडा एवं वयासी–जइ णं अहं दारगं वा दारियं वा पयायामि तो णं अहं तुब्भं जायं० जाव अणुवड्ढेमि त्ति कट्टु उवाइयं करेइ, जेणेव पोक्खरिणी तेणेव उवागच्छइ, उवागच्छइत्ता विउलं असणं वा पाणं वा खाइमं वा साइमं वा आसाएमाणी०जाव विहरइ, जिमिय०जाव सुइभूया जेणेव सए गिहे तेणेव उवागच्छइ, उवागच्छइत्ता अदुत्तरं च णं जहा सत्थवाही चाउद्दसट्ठमुद्दिट्ठपुण्णमासिणीसु विपुलं असणं० ४ उवक्खडेइ, उवक्खडेइत्ता बहवे णागा य० जाव वेसमणा य उववायमाणी णमंसमाणी०जाव एवं च णं विहरइ । तए णं सा जहा सत्थवाही अण्णया कयाइं केणइ कालंतरेणं आवण्णसत्ता जाया यावि होत्था । तए णं तीसे भद्दाए सत्थवाहीए दोसु मासेसु विइक्कंतेसु तइए मासे वट्टमाणे इमे एयारूवे दोहले पाउब्भूए–धण्णाओ णं ताओ अम्मयाओ० जाव कयलक्खणाओ ताओ अम्मयाओ जाओ णं विउलं असणं० ४ सुबहुं पुप्फगंधमल्लालंकारं गहाय मित्तणाइणियगसयणसंबंधिपरियणमहिल्लाहिं सद्धिं संपरिवुडाओ रायगिहं णयरं मज्झं मज्झेणं णिग्गच्छइ, णिग्गच्छइत्ता जेणेव पोक्खरिणी तेणेव ओगाहिंति, ओगाहिंतित्ता एहायाओ कयबलिकम्माओ सव्वालंकारविभूसियाओ विपुलं असणं० ४ आसाएमाणीओ० जाव परिभुंजमाणीओ दोहलं विणेंति, एवं संपेहेइ, संपेहेतित्ता कल्लं० जाव जलंते जेणेव धण्णे सत्थवाहे तेणेव उवागच्छइ, उवागच्छइत्ता धण्णं सत्थवाहं एवं वयासी–एवं खलु देवाणुप्पिया ! मम तस्स गब्भस्स०जाव विणंति, तं इच्छामि णं देवाणुप्पिया ! तुब्भेहिं अब्भणुण्णाया समाणी ०जाव विहरित्तए ?। अहासुहं देवाणुप्पिया ! मा पडिबंधं करेह । तए णं सा जहा सत्थवाही धण्णेणं सत्थवाहेणं अब्भणुण्णाया समाणी हट्ठतुट्ठा० जाव हियया विउलं असणं० ४ जाव एहाया कय० जाव उल्लपडसाडिया जेणेव णागघरए० जाव धूवं डहेइ, डहेइत्ता पणामं करेइ, करेइत्ता जेणेव पुक्खरिणी तेणेव उवागच्छइ, उवागच्छइत्ता तए णं ताओ मित्तणाइ० जाव णयरमहिल्लाओ भद्दं सत्थवाहिं सव्वालंकारविभूसियं करेंति । तए णं सा जहा सत्थवाही ताहिं मित्तणाइणियगसयणसंबंधिपरियणणयरमहिल्लियाहिं सद्धिं विपुलं असणं० ४ जाव परिभुंजमाणी य दोहलं विणेति, जामेव दिसिं पाउब्भूया तामेव दिसिं पडिगया । तए णं सा भद्दा सत्थवाही संपुण्णदोहला० जाव तं गब्भं सुहं सुहेणं परिवहइ । तए णं सा भद्दा सत्थवाही णवण्हं मासाणं बहुपडिपुण्णाणं अद्धट्ठमाणं रायंदियाणं सुकुमालपाणिपायं० जाव दारगं पयाया । तए णं तस्स दारगस्स अम्मापियरो पढमे दिवसे जाइकम्मं करेंति, तहेव०जाव विपुलं असणं उवक्खडावेंति, तहेव मित्तणाइं जोयावेत्ता अयमेयारूवं गोणं गुणनिप्फण्णं णामधिज्जं करेंति–जम्हा णं अम्हं इमे दारए बहूणं णागपडिमाण य० जाव वेसमणपडिमाण य उवाइयलद्धे, तं होऊणं अम्हं इमे दारए देवदिण्णे णामेणं । तए णं तस्स दारगस्स अम्मापियरो णामधिज्जं करेंति देवदिण्णे त्ति । तए णं तस्स दारगस्स अम्मापियरो जायं च भायं च अक्खयणिहिं च अणुवड्ढेंति । तए णं से पंथए दासचेडए देवदिण्णस्स दारगस्स बालग्गाही जाए देवदिण्णं दारगं कडीए गिण्हइ, गिण्हइत्ता बहूहिं खिज्जणएहि य खिड्डियाहि य दारएहि य दारियाहि य कुमारेहि य कुमारियाहि य सद्धिं संपरिवुडे अभिरममाणे अभिरमइ । तए णं सा भद्दा सत्थवाही अण्णया कयाइ देवदिण्णं दारयं एहायं कयबलिकम्मं कयकोउयमंगलपायच्छित्तं सव्वालंकारविभूसियं करेइ, पंथयस्स दासचेडगस्स हत्थयंसि दलयइ । तए णं से पंथए दासचेडए भद्दाए सत्थवाहीए हत्थाओ देवदिण्णं दारगं कडीए गिण्हइ, गिण्हइत्ता सयाओ गिहाओ पडिणिक्खमइ, पडि-

णिक्खमइत्ता बहूहिं किंभएहि य किंजियाहि य० जाव कुमारियाहिं सद्धिं संपरिवुडे जेणेव रायमग्गे तेणेव उवागच्छइ, उवागच्छइत्ता देवदिन्नं दारयं एगंते ठावेइ, बहूहिं किंभएहि य०जाव कुमारियाहिं सद्धिं संपरिवुडे पमत्ते यावि विहरइ । इमं च णं विजयतक्करं रायगिहस्स णयरस्स बहूणि दाराणि य अवदाराणि य तहेव ०जाव आभोएमाणे मग्गमाणे गवेसमाणे जेणेव देवदिन्ने दारए तेणेव उवागच्छइ, उवागच्छइत्ता देवदिन्नं दारयं सव्वालंकारविभूसियं पासइ, पासतित्ता देवदिन्नस्स दारगस्स आभरणालंकारे संमुच्छिए गढिए गिद्धे अज्झोववन्ने पंथयं दासचेडयं पमत्तं पासइ, पासइत्ता दिसालोयं करेइ, करेइत्ता देवदिन्नं दारगं गिण्हइ, गिण्हइत्ता कक्खंसि अल्लियावेइ, अल्लियावेत्ता उत्तरिज्जेणं पिहेइ, पिहेइत्ता सिग्घं तुरियं चवलं चेइयं रायगिहस्स णयरस्स अवदारेणं णिग्गच्छइ, णिग्गच्छइत्ता जेणेव जिण्णुज्जाणे जेणेव भग्गकूवए तेणेव उवागच्छइ, उवागच्छइत्ता देवदिन्नं दारयं जीवियाओ ववरोवेइ, ववरोवेत्ता आभरणालंकारं गिण्हइ, गिण्हइत्ता देवदिन्नस्स दारगस्स सरीरं णिप्पाणं णिच्चेट्ठं ०जाव विप्पजढं भग्गकूवए पक्खिवइ, पक्खिवइत्ता जेणेव मालुयाकच्छए तेणेव उवागच्छइ, उवागच्छइत्ता मालुयाकच्छयं अणुप्पविसइ, अणुप्पविसइत्ता णिच्चले णिप्फंदे तुसिणीए दिवसं खवेमाणे चिट्ठइ । तए णं से पंथए दासचेडए तओ मुहुत्तंतरस्स जेणेव देवदिन्ने दारए ठविए तेणेव उवागच्छइ, उवागच्छइत्ता देवदिन्नं दारयं तंसि ठाणंसि अपासमाणे रोयमाणे कंदमाणे विलवमाणे देवदिन्नस्स दारगस्स सव्वओ समंता मग्गणगवेसणं करेइ, करेइत्ता देवदिन्नस्स दारगस्स कत्थइ सुइं वा खुइं वा पउत्तिं वा अलभमाणे जेणेव सए गिहे जेणेव धणे सत्थवाहे तेणेव उवागच्छइ, उवागच्छइत्ता धणं सत्थवाहं एवं वयासी-एवं खलु सामी ! जहा सत्थवाही देवदिन्नं दारयं एहायं० जाव मम हत्थंसि दलयइ । तए णं अहं देवदिन्नं दारयं करीए गिण्हामि, गिण्हइत्ता० जाव मग्गणगवेसणं करेमि । तं ण णज्जइ णं सामी ! देवदिन्ने दारए केणइ तेणिए वा अवहरिए वा आकिड्ढिए वा पायवडिए धणस्स सत्थवाहस्स एयमट्ठं णिवेएइ । तए णं से धणे सत्थवाहे पंथयस्स दासचेडयस्स एयमट्ठं सोच्चा णिसम्म तेणव महया पुत्तसोएणाभिभूए समाणे परसुणियत्ते व चंपगपायवे धस त्ति धरणियलंसि सव्वंगेहिं सन्निवइए । तए णं से धणे सत्थवाहे तओ मुहुत्तंतरस्स आसत्थे पच्चागयप्पाणे देवदिन्नस्स दारगस्स सव्वओ समंता मग्गणगवेसणं करेइ, करेइत्ता देवदिन्नस्स दारगस्स कत्थइ सुइं वा खुइं वा पउत्तिं वा अलभमाणे जेणेव सए गिहे तेणेव उवागच्छइ, उवागच्छइत्ता महत्थं पाहुडं गिण्हइ, गिण्हइत्ता जेणेव णयरगुत्तिया तेणेव उवागच्छइ, उवागच्छइत्ता तं महत्थं पाहुडं उवणेइ, उवणेइत्ता एवं वयासी-एवं खलु देवाणुप्पिया ! मम पुत्ते जहाए जायाए अत्तए देवदिन्ने णामं दारए इट्ठे० जाव उंबरपुप्फं पिव दुल्लहे सवणयाए, किमंग ! पुण पासवणयाए । तए णं सा जहा देवदिन्नं दारयं एहायं सव्वालंकारविभूसियं पंथगस्स दासस्स हत्थे दलयइ०जाव पायवडिए, तं सव्वं णिवेइ । तं इच्छामि णं देवाणुप्पिया ! देवदिन्नस्स दारयस्स सव्वओ समंता मग्गणगवेसणं करित्तए । तए णं ते णयरगुत्तिया धणेणं सत्थवाहेणं एवं वुत्ता समाणा सन्नद्धबद्धकवया उप्पीलियसरासणपट्टिया० जाव गहियाउहपहरणा धणेणं सत्थवाहेणं सद्धिं रायगिहस्स णयरस्स बहूणि अइगमणाणि य० जाव पवासु य मग्गणगवेसणं करेमाणा रायगिहाओ णयराओ पडिणिक्खमइ, पडिणिक्खमइत्ता जेणेव जिण्णुज्जाणे जेणेव भग्गकूवए तेणेव उवागच्छइ, उवागच्छइत्ता देवदिन्नस्स दारयस्स सरीरं णिप्पाणं निच्चेट्ठं जीवविप्पजढं पासंति, हा हा अहो अकज्जमिति कट्टु देवदिन्नं दारगं भग्गकूवाओ उत्तारेइ, उत्तारेइत्ता धणस्स सत्थवाहस्स हत्थे दलयंति । तए णं ते णयरगुत्तिया विजयस्स तक्करस्स पयमग्गमणुगच्छमाणा जेणेव मालुयाकच्छए तेणेव उवागच्छइ, उवागच्छइत्ता मालुयाकच्छयंसि अणुप्पविसंति, विजयं तक्करं ससक्खं सहोढं सगेवेज्जं जीवग्गाहं गिण्हइ, गिण्हइत्ता अट्ठिमुट्ठिजाणुकोप्परप्पहारसंभग्गमहियगत्तं करेंति, अवउडबंधणं करेंति, करेंतित्ता देवदिन्नस्स दारयस्स आभरणं गिण्हंति, गिण्हंतित्ता विजयस्स तक्करस्स गीवाए बंधइ, बंधइत्ता मालुयाकच्छयाओ पडिणिक्खमंति, जेणेव रायगिहे णयरे तेणेव उवागच्छंति, रायगिहं णयरं अणुप्पविसंति, रायगिहे णयरे सिंघाडगतिगचउक्कचच्चरमहापहपहेसु कसप्पहारेहि य लयाप्पहारेहि य चिंचाप्पहारेहि य णिवाएमाणा छारं च धूलिं च कयवरं च उवरि पक्खिवमाणा य महया य सद्देणं उग्घोसेमाणा एवं वयासी-एस णं देवाणुप्पिया ! विजए णामं तक्करे०जाव गिद्धे विव आमिसभक्खी बालघायए य बालकुमारए, तं णो खलु देवाणुप्पिया ! एयस्स केइ राया वा रायमच्चे वा अवरज्झइ, णऽन्नत्थ अप्पणो सयाइं कम्माइं अवरज्झंति त्ति कट्टु जेणामेव चारगसाला तेणामेव उवागच्छंति, उवागच्छंतित्ता हडिबंधणं करेंति, भत्तपाणणिरोहं करेंति, तिसंझं कसप्पहारेहि य०जाव णिवाएमाणा विहरं-

धन्व–न० । धन्व–अच् । चापे, वाच० ।

धन्वन्–न० । धन्व० कनिन् । धनुषि, मरुदेशे च । वाच० ।

धान्य–न० । धाने पोषणे साधु–यत् । सतुषे तण्डुलाऽऽदौ, सबीजे शालितिलयवाऽऽदौ च । दश० ६ अ० । वाच० । उत्त० । सूत्र० । धान्यं व्रीहिकोद्रवमुद्गमाषतिलगोधूमयवाऽऽदि । आव० ६ अ० । तच्च सप्तदशविधम्–" सणसत्तरसवीया भवे धण्णं । " शणं सप्तदशं येषां तानि शणसप्तदशानि बीजानि धान्यं भवेदिति । तानि चामूनि–" व्रीहियवो मसूरो, गोधूमो मुद्गमाषतिलचणकाः । अणवः प्रियङ्गुकोद्रव-मकुष्टकाः शालिराढकयः ॥ १ ॥ किं च कलायकुलत्थौ, शणसप्तदशानि बीजानि ।" बृ० १ उ० २ प्रक० । आ० म० ।

कुत्रचिद् धान्यानां चतुर्विंशतिभेदा यथा–

सणसत्तरसादीणं, धण्णाकाणं तु कोमिकोमीणं ।
जेसिं तु नायणट्ठा, परिसया होंति णिइंया ॥ ११२ ॥

शणः सप्तदशो येषां तानि शणसप्तदशानि । तानि चामूनि–शालिः, यवः, कोद्रवः, व्रीहिः, राजकः, तिलाः, मुद्गाः, माषाः, चवलाः, चणकाः, तुवरी, मसूरकः, कुलत्थाः, गोधूमाः, निष्पावाः, अतसी, शणश्च । उक्तं च–" सालिजवकोद्दववीहि-रालगतिलमुग्गमासचवलचणा । तुवरिमसूरकुलत्था, गोहुमनिप्फावअयसिसणा ॥ १ ॥" स्था० १ ठ० ।

धन्नाइं चउवीसं, जव गोहुम साली वीही सट्ठी य ।
कोद्दव अणुया कंगू, रालय तिल मुग्ग मासा य ।१०१८।
अयसि हरिमंथ तिउडग, निप्फावा सिलिंद राय मासा य ।
इक्खू मसूर तुवरी, कुलत्थ तह धन्नय कलाया ॥१०१९॥

धान्यानि चतुर्विंशतिर्भवन्ति । यथा–जवाः, गोधूमाः, शालयो, व्रीहयः, षष्टिकाः, कोद्रवाः, अणुकाः, कङ्गुः, रालकः, तिलाः, मुद्गा माषाश्च । तथा अतसी, हरिमन्थाः, त्रिपुटका निष्पावा शिलिन्दा राजमाषाः, इक्षवः, मसूराः, तुवरी, कुलत्थाः, तथा-धान्यकं, कलाय इति । एतानि च प्रायेण लोकप्रसिद्धानि प्रायुक्तानि,नवरं षष्टिकाः शालिभेदाः,ये षष्टिरात्रेण पच्यन्ते । अणुका जुगन्धरी,बृहच्चिरा कङ्गुः,अल्पतरशिरा राजकः,हरिमन्थाः कृष्णचणकाः, शिलिन्दा मकुष्टाः, राजमाषाश्चवलकाः,धान्यं कुस्तुम्भरी, कलाया अत्र वृत्तचणका इति । प्रव० १५६ द्वार । केचन भूकाटिका वदन्ति यथा श्रीमतां त्रिफलाऽऽद्युत्कटद्रव्यनिष्पन्नचूर्णप्रक्षेपे प्रासुकं पानीयं तथाऽस्माकमप्युत्कटद्रव्यजनितचूर्णप्रक्षेपे धान्यादि प्रासुकीभवतीति किमत्र बाधकमिति प्रश्ने, उत्तरम्–भूकाटिककृताशङ्कामाश्रित्य यथा त्रिफलाप्रक्षेपाद्रुदके वर्णाऽऽदिपरावर्तो भवति तथा यदि धान्यफलाऽऽदावपि भवेत्तदोदकवद् धान्यादि प्रासुकं भवति न च तस्मात्तत्कथं प्रासुकं तदिति । २१ प्र० । सेन० ३ उल्ला० । पञ्चदशकर्माऽऽदाननिषेधवना धान्यनाडिकेराऽऽदिफलगुलहरितालपशूनां विक्रये भक्षोऽभक्षो वा ?, तथा सहालपुत्राऽऽदीनां श्राद्धानां कर्माऽऽदानस्य संभवो, निषेधो वेति प्रश्ने, उत्तरम्–धान्याऽऽदीनां कृतपरिमाणादूर्द्धं क्रयादिकरणे भक्षोऽन्यथा न चेति, तथा सहालपुत्राऽऽदीनां परिमितत्वादङ्गीलादिकर्मकरणेऽपि न कर्माऽऽदानसङ्गेति वृद्धोक्तिः । ७६ प्र० । सेन० ३ उल्ला० ।

धण्णंतरि–धन्वन्तरि–पुं० । धन्वन् शिल्पशास्त्रं तस्यान्तमियर्त्ति अ इन् शक० । "नारायणांशो भगवान्, स्वयं धन्वन्तरिर्महान् ।

पुरा समुद्रमथने,समुत्तस्थौ महोदधेः ॥१॥"इत्युक्ते खर्गवैद्यभेदे, दिवोदासे काशिराजे, विक्रमाऽऽदित्यसभासदे पण्डितभेदे, " धन्वन्तरिक्षपणकामरसिंहशङ्कु-वेतालभट्ट " इत्यादि । वाच० । वैद्यकशास्त्रप्रणेतरि स्वनामख्याते योगिनि, " जोगीव जहा महाबेज्जो।" योगी धन्वन्तरिः,तेन च विभङ्गज्ञानबलेनाऽऽगामिनि काले प्राचुर्येण रोगसंभवं दृष्ट्वाऽष्टाङ्गाऽऽयुर्वेदरूपं वैद्यकशास्त्रं चक्रे । भृ० १ ब्र० २ प्रक० । विजयपुरराजस्य कनकरथस्य स्वनामख्याते वैद्ये, तत्कथा विपाकश्रुतस्याष्टमेऽध्ययने इति । स्था० १० ठा० । (सा च ' छत्तंबरदत्त ' शब्दे द्वितीयभागे ६७३ पृष्ठे दृश्या) जमदग्निपरीक्षार्थं मनुष्यलोकमुपागते देवलोकस्थे स्वनामख्याते तापसे, "इतश्च जैनमाहेशा--वभूतां द्वौ सुरौ दिवि । स्वं स्वं धर्मं प्रशंसन्तौ-वूचतुः साधु तापसौ ॥१॥" आ० क० । आ० चू० । "इतो य दो देवा वेसानरो सद्धो धण्णंतरी तावसलद्धो ।" इति । आ० म० १ अ० २ खण्ड० । द्वारावतीवास्तव्ये कृष्णवासुदेवस्य स्वनामख्याते वैद्ये, आ० क० ।

" बारवई वेअरणी, धन्नंतरि भविअ अभविए विज्जे।
कहणा य पुच्छिअम्मी, गहनिद्देसे असंबोही" ॥१॥ आ० क० ।
" नगरी द्वारवत्यासी--दुपकण्ठं पयोनिधेः ।
भोगावतीव पातालाऽ--वागता दमाएरेकया ॥ १ ॥
रत्नान्यतो गृहीत्वैव, सर्वरत्नमयी कृता ।
पुरीयं वेधसाऽथोऽजू--दब्धेरब्धिरिव स्वः ॥ २ ॥
नाम्ना कृतो नृपस्तत्र, चरित्रैर्धर्मवत्सः पुनः ।
अहिमांशुः प्रतापेन, हिमांशुश्च प्रसत्तितः ॥ ३ ॥
विद्येते तत्र वैद्यौ द्वौ, वैद्यविद्याविशारदौ ।
नव्यो वैतरणीजीवो, धन्वन्तरिरजन्यकः ॥ ४ ॥
चिकित्सां ग्लानसाधूनां, नव्यः प्रासुकभेषजैः ।
विदधाति प्रदत्ते च, स्युश्चेत्तानि स्ववेश्मनि ॥ ५ ॥
अजन्यो ग्लानसाधूना-माख्यत्सावद्यभैषजम् ।
प्रासुकं ब्रूहि नः किञ्चि-दित्युक्ते साधुभिः पुनः ॥ ६ ॥
स ऊचे न मयाऽधीतं, वैद्यकं भवतां कृते ।
एवं तौ द्वौ महारम्भौ, चिकित्सां कुरुतः पुरि ॥ ७ ॥
प्रश्नं कृष्णोऽन्यदाऽप्राक्षी--द्वैद्ययोः काऽनयोर्गतिः ?।
जीवांशौषधिदानेन, जीवहिंसाविधायिनोः ॥ ८ ॥
स्वाम्यूचे सप्तमीं पृथ्वीं, पापो धन्वन्तरिर्गमी ।
नव्यो वैतरणीजीवो, गङ्गाविन्ध्यान्तरे हरिः ॥ ९ ॥
स च तत्र वयःप्राप्तो, भावी यूथपतिः स्वयम् ।
गमिष्यन्त्यन्यदा तत्र, सार्थेन सह साधवः ॥ १० ॥
तत्रैकस्य मुनेः पादे, मग्नं शल्यं दुरुद्धरम् ।
ततस्तदर्थं सर्वेऽस्युः, सशल्यांहिर्मुनिर्जगौ ॥ ११ ॥
मदर्थं वो मृतिर्मा भूत्, शल्यमेतन्ममान्तकृत् ।
तच्छल्योद्धरणाशक्ताः, निर्बन्धात्तेन नोदिताः ॥ १२ ॥
मुक्त्वा तं स्थण्डिले क्षुद्रे, सच्छायस्य तरोस्तले ।
तेऽपि जग्मुः कथमपि, शोकशल्येन शल्यिताः ॥ १३ ॥
तदा च तत्र स ज्ञात्य-लाभाद् वानरयूथपः ।
पुरोगैस्तुमुलध्वनै, साधुं तं वीक्ष्य वानरैः ॥ १४ ॥
यूथपस्तमथोऽपश्य-न्नूहापोहेन तत्क्षणात् ।
जातजातिस्मृतिः सर्वं, प्राग्भवं स्मरति स्म सः ॥ १५ ॥
दृष्ट्वा शल्यं मुनेः शल्यो-द्धरणीं शल्यरोदणीम् ।
गिरौ गत्वाऽनयत्साधुं, निःशल्यं विदधेऽचिरात् ॥ १६ ॥
साधोरग्रे शिक्षित्वाऽऽत्म-त्सोऽथ प्राग्भववैद्यताम् ।
धर्मशास्त्रमुनिः सोऽथा-नशनेन मृतस्त्र्यहात् ॥ १७ ॥ "

अथ किं तस्यानूदित्याह-

" सो वानरजूहवई, कंतारे सुविहिआणुकंपाए ।
भासुरवरबुंदिधरो, देवो वेमाणिओ जाओ ॥ १८ ॥ "

अनुकम्पा भक्तिः । वैमानिकः सहस्रारे ।

" पउउंजावधिमऊंजी-त्तद्वृत्तं मुनिं च सः ।
ऊगेत्यादर्शयद्दिव्यां, देवर्द्धिं तां निजां मुनेः ॥ १९ ॥
ऊचे च त्वत्प्रसादेन, प्राप्यत श्रीरियं प्रभो ! ।
तेनाधोत्याप्य स मुनि-र्नीतः स मुनिसन्निधौ ॥ २० ॥
दृष्ट्वास्तेऽस्माद्दुरागास्त्वं, कथं शल्यमगाश्च ते ।
सोऽथ वानरवैद्यस्यो-दन्तं तेषामचीकथत् ॥ २१ ॥
वानरः साधुभक्त्यैव, क्षेभे सामायिकव्रतम् ।
अन्यथोपात्तदुःकर्मा, स्याद् वराकः स नारकः ॥ २२ ॥ "
आ० क० ।

धन्वंतरिकूव–धन्वन्तरिकूप–पुं० । अहिच्छत्रानगरीस्थे स्वनामख्याते कूपे, " धन्वंतरिकूवस्स यावि पिंजरवण्णाए मट्टियाए गुरुवएसा कंचणं उप्पज्जइ । " ती० ६ कल्प ।

धन्नमन्नु–धन्यंमन्य–त्रि० । आत्मानं धन्यं मन्यमाने, " धन्यं मन्योऽतिभक्तितः । " आ० क० ।

धन्नय–धन्यक–पुं० । शालिजङ्घनगरीनृपतौ, स्था० १० ठा० । काकन्दीनगरीवास्तव्ये स्वनामख्याते सार्थवाहे, तद्भव्यताप्रतिबद्धेऽनुत्तरोपपातिकदशायास्तृतीयवर्गस्य द्वितीयेऽध्ययने च । स्था० १० ठा० ।

दृश्यते तु प्रथमेऽध्ययने-

जंबू ! तेणं कालेणं तेणं समएणं काकंदी णाम नयरी होत्था, रिद्धित्थिमियसमिद्धा । सहसंभवणे उज्जाणे, सव्वोउरि य,जियसत्तू राया । तत्थ णं काकंदीए नयरीए भद्दा नामं सत्थवाही परिवसइ अड्ढा०जाव अपरिभूता । तीसेणं भद्दाए सत्थवाहीए पुत्ते धण्णे नामं दारए होत्था, अहीण० जाव सुरूवे पंचधाइपरिगहितो । तं जहा–खीरधातीए० जहा महाबले० जाव बावत्तरिकलाओ अहीने० जाव अलं जोगसमत्थे जाते यावि होत्था । ततेणं सा भद्दा सत्थवाही धण्णं दारयं अम्मुक्कबालभावं० जाव जोगसमत्थं विजाणित्ता बत्तीसं पासायवडंसिए कारेति, अब्भुग्गयभूतीए० जाव अणेगखंभसयसन्निविट्ठं० जाव बत्तीसाए इब्भवरकण्णयाणं एगदिवसेणं पाणिं गिण्हावेति, बत्तीसओ दाओ० जाव उप्पिं पासाय फुट्टंति० जाव विहरइ । तेणं कालेणं तेणं समएणं सामी समोसढे, परिसा निग्गया, राया जहा कोणिओ तहा निग्गतो । ततेणं तस्स धण्णस्स दारगस्स तम्मि महे जहा जमाली तहा निग्गते,नवरं पायचारेणं०जाव नवरं अम्मयं भद्दं सत्थवाहिं आपुच्छामि । ततेणं अहं

देवाणुप्पिए ! अंतिए० जाव पव्वयामि० जाव जहा जमाली तहा आपुच्छति,पुच्छित्ता जुत्तं पवित्तियं जहा महाबले० जाव जाहे नो संचाएति जहा थावच्चापुत्तस्स जियसत्तू आपुच्छति, छत्तचामराओ सयमेव जितसत्तू निक्खमणं करेति, जहा थावच्चापुत्तस्स कण्हे०जाव पवइए अणगारे जाए इरियासमिते० जाव गुत्तबंभयारी। ततेणं से धण्ण अणगारे जं चेव दिवसं मुंडे जाव पव्वइत्तए,तं चेव दिवसं समणं भगवं महावीरं वंदति,नमंसति, नमंसतित्ता एवं वयासी-एवं खलु इच्छामि णं भंते ! तुब्भेहिं अब्भणुण्णाए समाणा जावज्जीवाए छट्ठं छट्ठेणं अणिक्खित्तेणं आयंबिलपरिग्गहिएणं तवोकम्मेणं अप्पाणं भावेमाणस्स विहरित्तए, छट्ठस्स वि य णं पारणयंसि कप्पति से आयंबिलं पडिग्गहित्तए नो चेव णं अणायंबिलं, तं पि य संसट्ठं नो चेव णं असंसट्ठं, तं पि य णं लेज्जियधम्मियं नो चेव णं अणुज्जियधम्मियं,तं पि य णं जं अप्पे बहवे समणमाहणअतिहिकिवणवणीमगा नावकंखंति ?। अहासुहं देवाणुप्पिया ! मा पडिबंधं करेह। ततेणं से धण्णे अणगारे समणेणं भगवया महावीरेणं अब्भणुण्णाते समाणे हट्ठ० जावज्जीवाए छट्ठं छट्ठेणं अणिक्खित्तेणं तवोकम्मेणं अप्पाणं भावेमाणे विहरति। ततेणं से धण्णे अणगारे पढमछट्ठक्खमणपारणयंसि पढमाए पोरिसीए सज्झायं करेति, जहा गोयमसामी तहेव आपुच्छति,जेणेव काकंदी नगरी तेणेव उवागच्छइ,उवागच्छइत्ता काकंदीए नगरीए उच्चनीच० जाव अडमाणे आयंबिलं णो अणायंबिलं० जाव नावकंखति। ततेणं से धण्णे अणगारे ताए अब्भुज्जतपवत्ताए परिग्गहियत्ताए एसणाए एसमाणे जति णं भत्तं लभति,तो पाणं न लभति जति पाणं लभति,तो भत्तं न लभति। ततेणं से धण्णे अणगारे अदीणे अदीणमणे अकलुसे अविसाई अपरितंतजोगी जयणघडणजोगचरित्ते अहापज्जत्तसमुदाणं पडिगाहिति,पडिगाहितित्ता काकंदीनगरीतो पडिनिक्खमति जहा गोयमो तहा पडिदंसेति। ततेणं से धण्णे अणगारे समणेणं भगवया अब्भणुण्णाते समाणे अमुच्छिए०जाव अणज्झोववण्णे विलमिव पण्णगभूएणं अप्पाणं आहारं आहारेति, आहारेतित्ता संजमेणं तवसा० जाव विहरति। तए णं से समणे भगवं महावीरे अन्नया कया वि काकंदीनयरीतो सहसंबवणाओ पडिनिक्खमति,बहिया जणवयविहारं विहरति। तए णं से धण्णे अणगारे समणस्स भगवओ महावीरस्स तहारूवाणं थेराणं अंतिए सामाइयमाइयाइं एक्कारस अंगाइं अहिज्जति, संजमेणं तवसा अप्पाणं भावेमाणे विहरति। तए णं से धण्णे अणगारे जहा खंदओ० जाव उवसोभेमाणे उवसोभेमाणे चिट्ठति,धण्णस्स णं अणगारस्स पाणं अयमेयारूवे तवरूवलावण्णे होत्था-से जहानामए रुक्खच्छल्ली ति वा कट्ठपाओया ति वा जरग्गाओ वा एहेति वा एवामेव धण्णस्स अणगारस्स पाया सुक्का निम्मंसा अट्ठिचम्मविरत्ता ते पण्णायंति, नो चेव णं मंससोणियत्ताए धण्णे अणगारे ति पायं अयमेयारूवे से जहानामए कलसंगलिया ति वा मुग्गसासंगलिया ति वा तरुणिया छिन्ना उण्हे दिन्ना सुक्का समाणा गिलायमाणी चिट्ठति, एवामेव धण्णस्स पायंगुलिआए सुक्काओ०जाव सोणियत्ताए धण्णस्स जंघाणं अयमेयारूवे से जहाणामए ककजंघा ति वा केकइजंघा ति वा किणियाति वा जंघाय ति वा०जाव सोणियत्ताए,धण्णस्स जाणुणं अयमेयारूवे,से जहानामए काकिपोरेइ वा मयूरपोरेइ वा डिणियाकियापोरेति वा०जाव सोणियत्ताए,धण्णस्स ऊरू अयमेयारूवे,से जहानामए सामकरिइल्लेइ वा वोरिकरिइल्लेइ वा सल्लइसामलितरूणं ते छिण्णिल्लए० जाव चिट्ठति, एवामेव धण्णस्स ऊरू वा सोणियत्ताए,धण्णस्स कडिपट्टस्स इमेयारूवे, से जहानामए उट्टपाए ति वा उरूगपाए ति वा महिसपादेइ वा० जाव सोणियत्ताए, धण्णस्स उदरजाणयस्स इमेयारूवे, से जहानामए सुक्कवल्लदिद्धेइ वा भज्जणयकवल्लेइ वा कट्ठकोलंबथोमे व उदरं सुक्कं, धण्णस्स पांसुलियकंडयाणं इमेयारूवे,से जहानामए वंसयावल्ली ति वा पाणावली ति वा रूक्खावली ति वा,धण्णस्स पिट्ठकरंडयाणं इमेयारूवे,से जहानामए चित्तयकरूरेति वा वायणीघत्तेइ वा ताडीसिंटपत्तेइ वा, एवामेव धण्णस्स बाहाणं इमेयारूवे,से जहानामए समिसंगलियाइ वा पडायासंगलिया ति वा अगच्छियसंगलिया ति वा, एवामेव धण्णस्स हत्थाणं अयमेयारूवे,से जहानामए सुक्कउगणियाइ वा वरुपत्तेइ वा पलासपत्तेइ वा.एवामेव धण्णस्स हत्थंगुलीयाणं अयमेयारूवे,से जहानामए कुलसंगलियाति वा मुग्गमासतरुणियाच्छिए आयवेदिणा सुक्का समाणी,एवामेव धण्णस्स गीवा,से जहानामए करगगीवाइ वा कुंडियागीवाइ वा उक्कत्थवणाए वा,एवामेव धण्णस्स हणुयाए से जहानामए लाउफलेइति वा इओवफलेइ वा अंबगट्ठियाए वा,एवामेव धण्णस्स उट्ठाणं से जहाणामए सुक्कजलोया ति वा सेल्लेसुगुलिया ति वा अलत्तगगुलिया ति वा, एवामेव धण्णस्स जिब्भाए, से जहा वडपत्तेति वा उंबरपत्तेति वा सागपत्तेति वा, एवामेव धण्णस्स नासियाए,से जहाणामए अंबगचोपेसियाइ वा माउलुंगचोपेसियाइ वा तरुणिया, एवामेव धण्णस्स अच्छीणं, से जहानामए वीणाछिद्दे ति वा पजाइयतारगा ति वा, एवामेव धण्णस्स कण्णाणं, से जहाणामए सीसमूसा छल्लियाति वा वालुकच्छल्लीइ वा करेल्लयाछल्लियाइ वा

एवामेव धण्णस्स.....(?) से जहा णामए तरुणगलाओ त्ति वा तरुणगए-लाबुए त्ति वा सिल्हए त्ति वा तरुणए०जाव चिट्ठति, एवामेव धण्णस्स अणगारस्स सीसं सुक्खं निम्मंसं अट्ठिचम्मछिरत्ताए पण्णायंति, नो चेव णं मंससोणियत्ताए, एवं सव्वत्थमेव नवरं उदरत्ताययणा कण्णा जिब्भा ओट्ठा एएसिं अट्ठी न जवति चम्मछिरत्ताए पण्णाइतं भणंति, धण्णेणं अणगारेणं मुखपायजंघोरुहणादिगतं तम्मिकरालाणं कंकमाहेणं पिट्ठमंसिएणं उदरभायणेणं वीतिज्जमाणेहिं पांसुलिकडएहिं अक्खसुत्तमाला विव गणिज्जमाणेहिं पिट्ठकरंडगसंधीहिं गंगातरंगजूतेणं उक्खंडगदेसजायणेणं सुक्कतप्पसमाणेहिं बाहाहिं सिढिलकमाली विव लंबंतेहि य अग्गिदहेहिं कंपणाईओ विव वेयमाणीए सीसघडीए पच्चातवदनकमले ओज्झगयडाभुहे ओल्लुट्ठणयकोसे जीवंजीवेणं गच्छंति, जीवंजीवेणं चिट्ठति, भासं भासिस्सामि, विगलाइ से जहानामए इंगालसगडियाति वा जहा खंदओ तहा०जाव हुतासणाइभासरासिपालिविछे तवेण तए णं तवतेयं सिरीसउव्व सोभेमाणे सोभेमाणे चिट्ठति । तेणं कालेणं तेणं समएणं रायगिहे नयरे गुणसिले चेइए सेणिए राया। तेणं कालेणं तेणं समएणं समणे जगवं महावीरे समोसढे, परिसा निग्गया, सेणिओ निग्गओ, धम्मकहा, परिसा निग्गया तए णं से सेणिए राया समणस्स०अंतिए धम्मं सोच्चा निसम्म समणं भगवं वंदति, नमंसति, नमंसतित्ता एवं वयासी-इमेसि णं जंते ! इंदजूतिपामोक्खाणं चउद्दसण्हं समणसाहस्सीणं कयरे अणगारे महादुक्करकारए चेव महानिज्जराए चेव ?। एवं खलु सेणिया! इमासिं इंदजूतिपामोक्खाणं चउद्दसण्हं समणसाहस्सीणं धण्णे अणगारे महादुक्करकारए चेव महानिज्जराए चेव । से केणं णं जंते! एवं वुच्चति-इमासिं०जाव साहस्सीणं धण्णे णं अणगारे णं महादुक्करकारए चेव महानिज्जराए चेव ?। एवं खलु सेणिया! तेणं कालेणं तेणं समएणं काकंदीनामं नयरी होत्था; उप्पिं पासायवडिंसए विहरति। तते णं अहं अण्णया कयाइ पुव्वाणुपुव्विं चरमाणे गामाणुगामं दूइज्जमाणे जेणेव काकंदी नयरी जेणेव सहसंबवणे उज्जाणे तेणेव जवागए अहापडिरूवं उग्गहं संजमेणं०जाव विहरामि, परिसा निग्गया तहेव०जाव पव्वतिते०जाव विलमिव०जाव आहारेति। धण्णस्स णं अनगारस्स पदाइसरीरवसतो सव्वो०जाव उवसोभेमाणे जवसोजेमाणे चिट्ठति,से तेणट्ठेणं सेणिया! एवं वुच्चति-इमासिं च चउद्दससहस्साणं धम्मे अणगारे महादुक्करकारए महानिज्जराए चेव । तते णं से सेणिए राया समणस्स जगवओ अंतिए एअमट्ठं सोच्चा निसम्म हट्ठतुट्ठ० समणं भगवं तिक्खुत्तो आयाहिणपयाहिणं करेति, करेत्ति वंदति, नमंसति, णमंसित्ता जेणेव धण्णे अणगारे तेणेव जवागच्छइ, उवागच्छइत्ता धण्णं अणगारं तिक्खुत्तो आयाहिणपयाहिणं करेति, वंदति, नमंसति, णमंसित्ता एवं वयासी-धण्णेसि णं तुमं देवाणुप्पिए ! संपुण्णे सुकयत्थे कतलक्खणे सुलद्धे णं देवाणुप्पिया ! तव माणुस्सए जम्मजीवियफले त्ति कट्टु वंदति, नमंसति, णमंसतित्ता जेणेव समणे जगवं महावीरे तेणेव उवागच्छइ, उवागच्छइत्ता समणं जगवं तिक्खुत्तो वंदति, नमंसति, णमंसित्ता जामेव दिसिं पाउब्भूए तामेव दिसिं पडिगए । ततेणं तस्स धण्णस्स अणगारस्स अण्णया कयाइ पुव्वरत्तावरत्तकालसमयंसि धम्मजागरियं जागरमाणे इमेयारूवे अज्झत्थिए-एवं खलु अहं इमेणं उरालेणं जहा खंदओ तहेव चिंता आपुच्छणं थेरेहिं सद्धिं विपुलं दुरूहति मासियाए संलेहणाए नवमासपरियाओ०जाव कालमासे कालं किच्चा उड्ढं चंदिम०जाव नवगेविज्जविमाणपत्थमे जहुं दूरं वीतीवयति, वीतीवतित्ता सव्वट्ठसिद्धे विमाणे देवत्ताए उववण्णे थेरा तहेव उत्तरंति०जाव इमीसे आयारभंडेति जंत त्ति जगवं गोयमे तहेव पुच्छति, पुच्छइत्ति जहा खंदयस्स जगवं वागरेति०जाव सव्वट्ठसिद्धे विमाणे उववण्णे। धण्णस्स णं जंते ! देवस्स केवइयं कालं ठिई पन्नत्ता?। गोयमा ! तेत्तीसं सागरोवमा ठिती पन्नत्ता। से णं जंते ! ततो देवलोगाओ कहिं गच्छहिति०कहिं सिज्झिहिति ?। गोयमा ! महाविदेहे वासे सिज्झिहिति०५,एवं खलु जंबू ! समणेणं०जाव संपत्तेणं पढमस्स अज्झयणस्स अयमट्ठे पण्णत्ते। अणु०३वर्ग १अ०।

धान्यक–न०। कुस्तुम्बरीनामके धान्यभेदे, दश० ६ अ०।

धण्णगर–धान्यकर–न०। स्वनामख्याते पुरे, यत्र विमलजिनेन प्रथममिक्षा लब्धेति। आ० म० १ अ० १ खण्ड।

धण्णजक्ख–धन्ययक्ष–पुं०। ऋषभपुरनथकरणमकोद्यानस्थे यक्षे, विपा० २ श्रु० २ अ०। (तत्कथा 'भद्दणंदि' शब्दे वक्ष्यते)

धण्णणिहि–धान्यनिधि–पुं०। कोष्ठागारे लौकिके निधिभेदे, स्था० ५ ठा० ३ उ०।

धण्णपत्थय–धान्यप्रस्थक–न०। धान्यमानविशेषे, व्य०१ उ०।

धण्णपिडग–धान्यपिटक–न०। धान्यप्रस्थके, व्य० १ उ०।

धण्णपुंजियसमाणा–पुञ्जितधान्यसमाना–स्त्री०। खले लूनपूतविशुद्धपुञ्जीकृतधान्यसमाना सकलातिचारकचवरविरहेण लब्धस्वस्वनावत्वात् पुञ्जितस्य धान्यविशेषणस्य परनिपातः प्राकृतत्वात् (स्था०) प्रव्रज्याभेदे, स्था० ४ ठा० ४ उ०।

धण्णप्पमाण–धान्यप्रमाण–न०। मानमेये प्रमाणं, धान्यविषयं मानं प्रमाणं धान्यप्रमाणम्। मानप्रमाणभेदे, अनु०। (धान्यप्रमाणं 'माण' शब्दे वक्ष्यते)

धण्णमाण–धान्यमान–न० । धान्यप्रमाणे, नि० चू० १ उ० ।

धण्णमासफल–धान्यमाषफल–न० । षोमशदवेतसर्षपाऽऽत्मके हिरण्याऽऽदिपरिमाणभेदे, स्था० ८ ठा० ।

धण्णय–धान्यक–पुं० । ' धण्णग ' शब्दार्थे, स्था० १० ठा० ।

धण्णविक्खित्तसमाणा–विक्षिप्तधान्यसमाना–स्त्री० । यद्विकीर्णं गोखुरक्षुण्णतया विक्षिप्तं धान्यं तत्समाना विक्षिप्तधान्यसमाना, विक्षिप्तस्य धान्यविशेषणस्य परनिपातः प्राकृतत्वात् । स्था० ४ ठा० ४ उ० । या हि सहसमुत्पद्यातिचारकचवरयुक्तत्वात् सामग्यन्तरापेक्षितया कालक्षेपलभ्यस्वस्वभावा सा धान्यविकीर्णसमानोच्यते । इत्युक्तलक्षणे प्रव्रज्याभेदे, स्था० ४ ठा० ४ उ० ।

धण्णविरल्लियसमाणा–विरल्लितधान्यसमाना–स्त्री० । खलक एव यद्विरल्लितं विसारितं वायुना पूतपुञ्जीकृतं धान्यं तत्समाना, विरल्लितस्य धान्यविशेषणस्य परनिपातः प्राकृतत्वात् । स्था० ४ ठा० ४ उ० । या हि लघुनाऽपि यत्नेन स्वस्वभावं लप्स्यत इत्युक्तलक्षणे प्रव्रज्याभेदे, स्था० ४ ठा० ४ उ० ।

धण्णसंकड्ढियसमाणा–संकर्षितधान्यसमाना–स्त्री० । यत्संकर्षितं क्षेत्रादाकर्षितं खलमानीतं धान्यं तत्समाना । संकर्षितस्य धान्यविशेषणस्य परनिपातः प्राकृतत्वात् । स्था० ४ ठा० ४ उ० । या हि बहुतरातिचारोपेतत्वाद् बहुतरकालप्राप्तव्यस्वस्वभावा सा धान्यसङ्कर्षितसमाना । इत्युक्तलक्षणे प्रव्रज्याभेदे, स्था० ४ ठा० ४ उ० ।

धण्णहाणि–धान्यहानि–स्त्री० । राज्यापलक्षणभेदे, यत्प्रभावाद् वृष्टेऽपि मेघे शस्यनिष्पत्तिस्तादृशी नोपजायते । व्य० १० उ० ।

धण्णाउस–देशी–कथ्यमानाऽऽशीर्वादे, दे० ना० ५ वर्ग ५८ गाथा ।

धण्णागार–धान्यागार–न० । कोष्ठागारे, नि० चू० ८ उ० ।

धण्णावत्ति–धान्यावाप्ति–स्त्री० । शस्यलाभे, " फलमिह धान्यावाप्तिः । " षो० ७ विव० ।

धण्णावह–धान्यावह–पुं० । राजगृहनगरस्थे स्वनामख्याते प्रधानश्रेष्ठिनि, आ० चू० १ अ० । ऋषभपुरस्थस्तूपकरण्डकोद्यानवास्तव्ये नृपे, विपा० २ श्रु० २ अ० । ध० र० । (तत्कथा ' भद्दण्णि ' शब्दे)

धत्त–धत्त–पुं० । बहुबीजके वनस्पतिभेदे, जी० १ प्रति० । निहिते, त्रि० । आ० म० १ अ० २ खण्ड । ननु "दधातेर्हिः" ॥७।४ ४२॥ इतिहिशब्दाऽऽदेशस्तर्हि हितमिति भवितव्यं, कथं धत्तमित्युच्यते ?, प्राकृते देशीपदस्याविरुद्धत्वान्न दोषः । अथवा–धत्त इति मिथ्यादृष्ट्युत्पन्न एव यदृच्छाशब्दः । आव० १ अ० ।

धात्त–त्रि० । दधातीति धः, ध आत्तो यस्मिन् स धात्तः, निष्ठान्तस्य " जातिकालसुखादिभ्योऽनाच्छादनात् क्तोऽकृतमितप्रतिपन्नाः " ॥ ६ । २ । १७० ॥ इति परनिपातः अथवा धेनाऽऽत्तो गृहीतो धात्तः । निहिते, आव० १ अ० ।

धमण–धमन–पुं० । धम्यतेऽनेनधमल्युः । नले भस्त्राध्मापके, क्रूरे च । त्रि० । अग्निसंयोगे, न० । "धायणधमणाहिधारणा ।" आचा० नि० १ श्रु० १ अ० ७ उ० ।

धमणि–धमनि–स्त्री० । धम–अनि वा ङीप् । नाड्याम्, उत्त० २ अ० । वाच० । ज्ञा० । प्रश्न० भ० । "नव धमणीओ ।" धमन्यो रसवहा नामधः । तं० । शिरायाम्, उत्त० पाई० २ अ० । कोष्ठकहृदयान्तरे, नाडीमधिकृत्य–"दुवे दुवे धमणिअंतरेसु" धमन्यः कोष्ठकहृदयान्तराणीति । विपा० १ श्रु० १ अ० । दृष्टविलासिन्याम्, ग्रीवायाम्, हरिद्रायां च । वाच० ।

धमणिसंतय–धमनिसंतत–त्रि० । धमनीभिर्नाभिमिः संततो व्याप्तः । उत्त० २ अ० । नाडीव्याप्ते, ज्ञा० १ श्रु० १ अ० । "किं से धमणिसंतए ।" धमनीसंततो नाडीव्याप्तो, मांसक्लेदेन दृश्यमाननाभीकत्वात् । प्र० २ श० ५ उ० । यस्य शरीरं नशाभिर्व्याप्तं दृश्यत इत्यर्थः । उत्त० २ अ० । धमनयः शिरास्ताभिः संततो व्याप्तो धमनिसंततः । शिरानिर्व्याप्ते, उत्त० पाई० २ अ० ।

धमणी–धमनी–स्त्री० । ' धमणि ' शब्दार्थे, उत्त० २ अ० ।

धमधमेंत–धमधमायमान–त्रि० । धमधमेति वर्णव्यक्तिमिवोत्पादयति, ज्ञा० १ श्रु० ६ अ० ।

धमधमेंतघोस–धमधमायमानघोष–त्रि० । धमधमायमानो धमधमेति वर्णव्यक्तिमिवोत्पादयन् घोषः शब्दो यस्य स तथा । धमधमेति वर्णव्यक्त्युत्पादकशब्दोपेते, ज्ञा० १ श्रु० ९ अ० ।

धममहिसी–देशी–नीहारार्थे, दे० ना० ५ वर्ग ६१ गाथा ।

धमास–धमास–पुं० । वृक्षभेदे, ल० प्र० । कपोतलेश्यायां वर्णकमधिकृत्य " धमाससारेइ वा । " प्रज्ञा० १७ पद ।

धम्म–धर्म–पुं० । न० । धृ–मन् । दश० १ अ० । स्वभावे, दर्श० १ तत्त्व । स्था० । आचा० । दश० । दशा० । ज्ञा० । विशे० । सूत्र० । उत्त० । "धम्मस्सऽत्थो जे पगडा धम्मो त्ति वा सभावो त्ति वा दो वि पगडा ।" नि० चू० २० उ० । परिणामः स्वभावः शक्तिर्धर्म इतिपर्यायाः । स्था० ६ ठा० । धर्माः सहभाविनः, क्रमभाविनश्च पर्याया इति । स्था० २ ठा० १ उ० । "सव्वं धम्मं जाणिस्सए । धर्मं जीवाऽऽदिद्रव्यस्वभावमुपयोगोत्पत्त्यादिकं श्रुताऽऽदिरूपं वा । स० १० समo । " लोहो सुयस्स धम्मो । " विशे० । विशेषे, आचा० १ श्रु० ८ अ० ७ उ० ।

(१) धर्मधर्मिणोरेकान्तेन भेदेऽभ्युपगम्यमाने धर्मिणो निःस्वभावताऽऽपत्तिः, स्वभावस्य धर्मत्वात्तस्य च ततोऽन्यत्वात्, स्वो भावः स्वभावः, तस्यैवाऽऽत्मीया सत्ता, न तु तदर्थान्तरधर्मरूपं, ततो न निःस्वभावताऽऽपत्तिरिति चेत्, न, इत्थं स्वरूपसत्ताऽभ्युपगमे तदपरसत्तासामान्ययोगकल्पनाया वैयर्थ्यप्रसङ्गात् । अपि च–यद्येकान्तेन धर्मधर्मिणोर्भेदस्ततो धर्मिणो ज्ञेयत्वाऽऽदिभिर्धर्मैरननुवेधात्तस्य सर्वथाऽनवगमप्रसङ्गः, न ह्यज्ञेयस्वभावं ज्ञातुं शक्यते इति । तथा च सति तदभावप्रसङ्गः, कदाचिदप्यवगमाभावात्, तथाऽपि तत्सत्त्वाभ्युपगमेऽतिप्रसङ्गोऽन्यस्यापि यस्य कस्यचित्कदाचिदप्यनवगतषष्ठभूताऽऽद्यभावाऽऽपत्तेः। एवं च धर्मज्ञाने धर्माणामपि ज्ञेयत्वप्रमेयत्वाऽऽदीनां निराश्रयत्वादभावाऽऽपत्तिः न हि धर्म्याधाररहिताः क्वापि धर्माः संभवन्ति, तथाऽनुपलब्धेः। अन्यच्च परस्परमपि तेषां धर्माणामेकान्तेन भेदाभ्युपगमे सत्त्वाऽऽद्यननुवेधात्कथं भावाभ्युपगमः?, तदन्यसत्त्वाऽऽदिधर्माभ्युपगमे च धर्मित्वप्रसक्तिरनवस्था च, तद्वैकान्तभेदपक्षे धर्मधर्मिज्ञानं, नाऽप्येकान्तभेदपक्षे, यतस्तस्मिन्नभ्युपगम्यमाने धर्ममात्रं वा स्यात्, धर्मिमात्रं वा ?। अन्यथैकान्तभेदानुपपत्तेः, अन्यतराभावो वा अन्यतरस्याप्यभावः, परस्परनान्तरीयकत्वात्। धर्मनान्तरीयको हि धर्मी, धर्मिनान्तरीयकाश्च धर्माः, ततः कथमेकाभावे परस्याप्यवस्थानमिति?। कल्पितो

धर्म्मधर्मिभावः,ततो न दूषणमिति चेत्तर्हि वस्त्वभावप्रसङ्गः। न हि धर्मधर्मिस्वभावरहितं किञ्चिद्वस्त्विति, धर्मधर्मिभावश्च कल्पित इति तदभावप्रसङ्गः । धर्मा एव कल्पिता न धर्मिः,तत्कथमभावप्रसङ्ग इति चेत्, न, धर्माणां कल्पनामात्रभावत्वाभ्युपगमेन परमार्थतोऽसत्त्वाभ्युपगमात्, तदभावे च धर्मिणोऽप्यभावाऽऽपत्तिः। अथ तदेवैकं स्वलक्षणं सकलसजातीयविजातीयव्यावृत्त्येकस्वभावाः धर्मिव्यावृत्तिनिबन्धनाश्च या व्यावृत्तयो भिन्ना इव विकल्पितास्ता धर्मास्ततो न कश्चिद्दोषः । तदप्ययुक्तम् । एवं कल्पनायां वस्तुनोऽनेकान्तात्मकताप्रसक्तेः। अन्यथा सकलसजातीयविजातीयव्यावृत्तयोगात्र हि येन निजस्वभावेन घटाद् व्यावर्तते पटस्तेनैव स्तम्भादपि, स्तम्भस्य घटरूपताप्रसक्तेः। तथाहि-घटाद् व्यावर्तते घटव्यावृत्तिस्वभावतया स्तम्भादपि चेत् घटव्यावृत्तिस्वभावतयैव व्यावर्तते, तर्हि बलात् स्तम्भस्य घटरूपताप्रसक्तिः। अन्यथा-ततः तत्स्वभावतया व्यावृत्ययोगात् । तस्माद्यतो यतो व्यावर्तते तत्तद्व्यावृत्तिनिमित्तभूताः स्वभावा अवश्यमभ्युपगन्तव्याः, ते चानेकान्तेन धर्मिणो भिन्नाः, तदभावप्रसङ्गात् । तथा च-तदवस्थ एव पूर्वोक्तो दोषः, तस्माद्भिन्ना अभिन्नाश्च । भेदाभेदोऽपि धर्मधर्मिणोः कथमिति चेत् ? । उच्यते-इह यद्यपि तादात्म्यतो धर्मिणा धर्मः सर्वेऽपि क्षीरीभावेन व्याप्ताः, तथाऽप्ययं धर्मी, अयते धर्मा इति परस्परं भेदोऽप्यस्ति, अन्यथा तद्भावानुपपत्तिः। तथा च सति प्रतीतिबाधा, मिथो भेदेऽपि च विशिष्टान्योन्यानुवेधेन सर्वधर्म्माणां धर्मिणा व्याप्तत्वादभेदोऽप्यस्ति । अन्यथा तस्य धर्मा इति प्रसङ्गानुपपत्तेः । मं० । सम्म० ।

(२) अथ चैतन्याऽऽद्यो रूपाऽऽदयश्च धर्म्मा आत्माऽऽदेर्घटाऽऽदेश्च धर्मिणोऽत्यन्तं व्यतिरिक्ता अपि समवायसम्बन्धेन सम्बद्धाः सन्तो धर्मिधर्म्मव्यपदेशमश्नुवते, तन्मतं दूषयन्नाह-

न धर्म्मधर्मित्वमतीव भेदे,
वृत्त्याऽस्ति चेन्न त्रितयं चकास्ति ।
इहेदमित्यस्ति मतिश्च वृत्तौ,
न गौणभेदोऽपि च लोकबाधः ॥ ७ ॥

धर्म्मधर्मिणोरतीव भेदेऽतीवेत्यत्रेवशब्दो वाक्यालङ्कारे । तं च प्रायोऽतिशब्दात्किवृत्तेश्च प्रयुञ्जते शाब्दिकाः । यथा-" आवर्ज्जिता किञ्चिदिव स्तनाभ्याम् ।" "उद्वृत्तः क इव सुखावहः परेषाम्" इत्यादि । ततश्चैकान्तभिन्नत्वेऽङ्गीक्रियमाणे धर्म्मधर्मित्वं न स्यात्। अस्य धर्मिण इमे धर्म्माः, एषां च धर्माणामयमाश्रयभूतो धर्म्मीत्येवं सर्वप्रसिद्धो धर्म्मधर्मिव्यपदेशो न प्राप्नोति, तयोरत्यन्ताभिन्नत्वेऽपि तत्कल्पनायां पदार्थान्तरधर्म्माणामपि विवक्षितधर्म्मधर्मित्वाऽऽपत्तेः। एवमुक्ते सति परः प्रत्यवतिष्ठते-वृत्त्याऽस्तीति अयुतसिद्धानामाधाराधेयभूतानामिह प्रत्ययहेतुः संबन्धः समवायः । स च समवयनात्समवाय इति । द्रव्यगुणकर्मसामान्यविशेषेषु पञ्चसु पदार्थेषु वर्तनाद्वृत्तिरिति व्याऽऽख्यायते। तया वृत्त्या समवायसंबन्धेन तयोर्धर्म्मधर्मिणोरितरेतरविनिर्लुण्ठितत्वेऽपि धर्म्मधर्मिव्यपदेश इष्यते। इति नानन्तरोक्तो दोष इति । अत्राऽऽचार्यः समाधत्ते-चेदिति । यद्येवं तव मतिः, सा प्रत्यक्षप्रतिक्षिप्ता; यतो न त्रितयं चकास्ति-अयं धर्म्मी, इमे चास्य धर्म्माः, अयं चैतत्सम्बन्धनिबन्धनं समवाय इत्येतत्त्रितयं वस्तुत्रयं न चकास्ति, ज्ञानविषयतया न प्रतिभासते । यथा किल शिलाशकलयुगलस्य मिथोऽनुसंधायकं राला ऽऽदिद्रव्यं तस्मात्पृथक् तृतीयतया प्रतिभासते, नैवमत्र समवायस्याऽपि प्रतिभानम् । किन्तु द्वयोरेव धर्म्मधर्मिणोः । इति शपथप्रत्यायनीयोऽयं समवाय इति भावार्थः । किं चायं तेन वादिना एको नित्यः सर्वव्यापको मूर्तश्च परिकल्प्यते, ततो यथा घटाऽऽश्रिताः पाकजरूपाऽऽदयो धर्म्माः समवायसंबन्धेन समवेतास्तथा किं न पटेऽपि ?, तस्यैकत्वनित्यत्वव्यापकत्वैः सर्वत्र तुल्यत्वात् । यथाऽऽकाश एको नित्यो व्यापकः, अमूर्तश्च सन्सर्वैः संबन्धिभिर्युगपदविशेषेण संबध्यते, तथा किं नायमपीति विनश्यदेकवस्तुसमवायाभावे च समस्तवस्तुसमवायाभावः प्रसज्यते । तत्तदवच्छेदकभेदाद्भायं दोष इति चेदेवमनित्यत्वाऽऽपत्तिः । प्रतिवस्तु स्वजातभेदादिति : अथ कथं समवायस्य न ज्ञाने प्रतिभासनं, यतस्तस्येहेतिप्रत्ययः सावधानं साधनम् । इहप्रत्ययश्चानुभवसिद्ध एव । इह तन्तुषु पटः, इहाऽऽत्मनि ज्ञानमिह घटे रूपाऽऽदय इति प्रतीतेरुपलम्भात् । अस्य च प्रत्ययस्य केवलधर्मधर्म्यनालम्बनत्वादस्ति समवायाऽऽख्यं पदार्थान्तरं तद्धेतुः, इति पराशङ्कामनिसंधाय पुनराह-इहेदमित्यस्ति मतिश्च वृत्ताविति । इहेदमिति इहेदमिति आश्रयाऽऽश्रयिभावहेतुक इहप्रत्ययो वृत्तावप्यस्ति समवायसंबन्धेऽपि विद्यते, चशब्दोऽपिशब्दार्थः, तस्य च व्यवहितसंबन्धः, तथैव च व्याख्यातम् । इदमत्र हृदयम्-यथा त्वन्मते पृथिवीत्वाद्भिसंबन्धात्पृथिवी, तत्र पृथिवीत्वं पृथिव्या एव स्वरूपमस्तित्वाख्यं,नापरं वस्त्वन्तरं,तेन स्वरूपेणैव समं योऽसावभिसंबन्धः पृथिव्याः,स एव समवाय इत्युच्यते, "प्राप्तानामेव प्राप्तिः समवायः"इति वचनात्। एवं समवायत्वाद्भिसंबन्धात्समवाय इत्यपि किं न कल्प्यते ?। यतस्तस्यापि यत्समवायत्वं स्वस्वरूपं, तेन साकं संबन्धोऽस्त्येव। अन्यथा निःस्वभावत्वात् शशविषाणवदवस्तुत्वमेव भवेत्। ततश्च इह समवाये समवायित्वमित्युल्लेखेन इहप्रत्ययः समवायेऽपि युक्त्या घटत एव । ततो यथा पृथिव्यां पृथिवीत्वं समवायेन समवेतम्, समवायेऽपि समवायत्वमेवं समवायान्तरेण संबन्धनीयं, तदप्यपरेणेत्येवं दुस्तराऽनवस्थामहानदी । एवं समवायस्याऽपि समवायत्वाद्भिसंबन्धे युक्त्या ऽपपादिते साहसिकयमाह्वस्य पुनः पूर्वपक्षवादी वदति-ननु पृथिव्यादीनां पृथिवीत्वाऽऽदिसंबन्धनिबन्धनं समवायो मुख्यस्तत्र त्वतलाऽऽदिप्रत्ययाभिव्यङ्ग्यस्य सगृहीतसकलावान्तरजातिलक्षणव्यक्तिभेदस्य सामान्यस्योद्भवात् । इह तु समवायस्यैकत्वेन व्यक्तिभेदाऽभावे जातेरनुद्भूतत्वाद्गौणोऽयं युष्मत्परिकल्पित इहेतिप्रत्ययसाध्यः समवायस्त्वाभिसंबन्धः,तत्साध्यश्च समवाय इति । तदेतन्न विपश्चिच्चेतश्चमत्कारकारणम् । यतोऽत्रापि जातिरुद्भवन्ती केन निरुध्येत?। व्यक्तेरभेदेनेति चेत् । न तत्तदवच्छेदकवशात्तद्भेदोपपत्तौ व्यक्तिभेदकल्पनाया दुर्निवारत्वात् । अन्यो हि घटसमवायोऽन्यश्च पटसमवाय इति व्यक्त एव समवायस्यापि व्यक्तिभेद इति । तस्मिन्नौ सिद्ध एव जात्युद्भवस्तस्मादन्यत्रापि मुख्य एव समवायः, इहप्रत्ययस्योभयत्राप्यव्यभिचारात् । तदेतत्सकलं सपूर्वपक्षं समाधानं मनसि निधाय सिद्धान्तवादी प्राऽऽह-न गौण इति योऽयं भेदः स नास्ति, गौणलक्षणाभावात् । तल्लक्षणं चेत्थमाचक्षते-" अव्यभिचारी मुख्यो-ऽधिकृतोऽसाधारणोऽन्तरङ्गश्च । विपरीतो गौणोऽर्थः, सति मुख्ये धीः कथं गौणे?।" तस्माद्धर्मधर्मिणोः संबन्धेन मुख्यः समवायः,समवाये च समवायत्वाद्भिसंबन्धे गौण इत्ययं भेदो नानात्वं नास्तीति

भावार्थः । किं च-योऽयमिह तन्तुषु पट इत्यादिप्रत्ययात्समवायसाधनमनोरथः, स खल्वनुहरते नपुंसकादपत्यप्रसवमनोरथम्, इह तन्तुषु पट इत्यादिव्यवहारस्यालौकिकत्वात्पांशुलपादानमपि इह पटे तन्तव इत्येव प्रतीतिदर्शनात् । इह भूतले घटाभाव इत्यत्रापि समवायप्रसङ्गात् । अत एवाऽऽह-अपि च लोकबाध इति । अपि चेति दूषणान्तरद्योतने । लोकः प्रामाणिकलोकः सामान्यलोकश्च, तेन बाधो विरोधो लोकबाधस्तदप्रतीतव्यवहारसाधनात् बाधशब्दस्य " ईहाऽऽद्याः प्रत्ययनेदतः " इति पुंस्त्वलिङ्गता । तस्माद्धर्मधर्मिणोरविष्वग्भावलक्षण एव संबन्धः प्रतिपत्तव्यो नान्यः समवायाऽऽदिः । इति काव्यार्थः ॥७॥ स्या० ।

(३) धर्मानुरूपो हि सर्वत्रापि धर्मी । यथा काठिन्यं प्रति पृथिवी, यदि पुनरनुरूपत्वान्नावेऽपि धर्मधर्मिभावो भवेत् ततः काठिन्यजलयोरपि स नवेत्, तन्न भवति, तस्मादचेतनाः पुद्गलाः । तथा चोक्तम्-

" वाइसभावममुत्तं, विसयपरिच्छेयगं च चेयणं ।
विवरीयसद्दावाणि य, छुट्ठाणि जगप्पसिद्धाणि ॥ १ ॥
ता धम्मधम्मिभावो, कहमेयंसि अणुभवं गाहे ।
अणुरूवत्तानावे,काठिन्नजलाण किं न भवे ?॥२॥" आ० म०१ अ०२ खण्ड। जीवपुद्गलानां गतिपर्यायेण धारणाद् धर्मः। धर्मोस्तिकाये,भ०२० श० २ उ० । अनु० । "एसे धम्मे।"धर्मो धर्मास्तिकायः । स० १ सम० । स्था० । धर्मो धर्मास्तिकायो गत्युपष्टम्भगुणः । स्था० २ ठा० १ उ० । (वक्तव्यता 'धम्मत्थिकाय' शब्दे द्रष्टव्या)मर्यादायाम्, धर्मः, स्थितिः,समयो,व्यवस्था, मर्यादेत्यनर्थान्तरमिति । आ० चू० २ अ० । प्रति० । आचारे,बृ० १ उ० १ प्रक० । उत्त० । धर्मो यतिश्राद्धाचारलक्षण इति । ध० २ अधि० । दुर्गतौ प्रपततो जीवान् धारयति सुगतौ च तान्स्थापयतीति धर्मः । स्था० १ ठा० । " दुर्गतिप्रसृतान् जन्तून्, यस्माद्धारयते पुनः । धत्ते चैतान् शुभे स्थाने, तस्माद्धर्म इति स्मृतः ॥ १ ॥ " नं० । आ० चू० । आव० । ओघ० । आ० म० । ल० । दश० । पञ्चा० । पा० । सूत्र० । इत्युक्तलक्षणे दुर्गतिगर्त्तानिपतज्जन्तुजातधारणप्रवणपरिणामपूर्वके (पञ्चा० १ विव०) कुशलानुष्ठाने, पञ्चा० ४ विव० । सूत्र० । दुर्गतिगर्तानिपतज्जन्तुजातत्राणदानक्षमे,दर्श० १ तत्त्व । संसारोद्धरणस्वभावे, सूत्र० १ श्रु० ६ अ० । स्वर्गापवर्गमार्गभूते, आचा० १ श्रु० ३ अ० १ उ० । दर्श० । ध० २० । आव० । अभ्युदयनिःश्रेयससिद्धिसाधने, (ध० १ अधि०) पुण्यलक्षणे आत्मपरिणामे, धर्माधर्मौ पुण्यपापलक्षणौ स्वानुभवत्वादात्मपरिणामरूपाविति । आव०४ अ० । सूत्र० । (पुण्यभङ्गास्तद्वक्तव्यता च 'पुण्य' शब्दे द्रष्टव्या) सम्यग्दर्शनाऽऽदिके कर्मक्षयकारणे आत्मपरिणामे, सूत्र० २ श्रु० ५ अ० । सम्यग्दर्शनमूलोत्तरगुणसंहतिस्वरूपो धर्म इति । नं० । धर्मः सम्यग्ज्ञानदर्शनचरणाऽऽत्मक इति । तं० । सम्यग्दर्शनज्ञानचारित्राऽऽत्मकं धर्ममिति । सूत्र० १ श्रु० १५ अ० । श्रुतचारित्राऽऽख्याऽऽत्मके कर्मक्षयकारणे जीवस्याऽऽत्मपरिणामे,सूत्र० २ श्रु०५ अ० । धर्मो भावतश्चारित्रधर्मो, धर्महेतुत्वात् श्रुतधर्मश्चेति । दश० १ अ० । स० । आ० चू० । धर्मो द्विविधः-श्रुतधर्मश्चारित्रधर्मश्चेति । आव० ५ अ० । स० । भ० । प्रति० । तं० । पं० सू० । औ० । स्था० । जं० । संथा० । प्रश्न० । सूत्र० । आचा० । उत्त० । पा० । धर्मः संसारोद्धरणस्वभावः,जिनप्रणीतं वा श्रुतचारित्राऽऽख्यमिति । सूत्र०१ श्रु०६अ० । उत्त० । स० । धर्मः क्षायिकचारित्राऽऽदिरिति । स्था०३ ठा०१ उ० । सूत्र० । दुर्गतिनिषेधेन शोभनगतिधारणाद् धर्मं श्रुतचारित्राऽऽख्यमिति । सूत्र० १ श्रु० ११ अ० । स्था० । आव० । " धम्माणं कासवो मुहं । " धर्माणां श्रुतधर्माणां चारित्रधर्माणां च काश्यप आदीश्वरो मुखं वर्तते, धर्माः सर्वेऽपि तेनैव प्रकाशिता इत्यर्थः । उत्त० २५ अ० । सर्वजीवप्राणातिपातविरमणाऽऽदिलक्षणे सम्यक्त्वे, दर्श० १ तत्त्व । सूत्र० । दश० । क्षान्त्यादिके श्रमणधर्मे, दश० ६ अ० । प्रव० । " न ते धम्मबिऊ जणा । " क्षान्त्यादिको दशविधो धर्म इति । सूत्र० १ श्रु० १अ०१ उ० । प्रति० । उत्त० । पा० । स्था० । आव० । प्राणातिपातविरमणाऽऽदिके श्रावकधर्मे, दश० ६ अ० । सूत्र० । दानाऽऽदिके श्रावकधर्मे च । संथा० । धर्मास्तित्वे विशेषावश्यके यथा-" समासु तुल्यं विषमासु तुल्यं, सतीष्वसच्चाप्यसतीषु सच्च । फलं क्रियास्वित्यथ यन्निमित्तं, तद्देहिनां सोऽस्ति नु कोऽपि धर्मः ?॥ १ ॥ " विशे० । (१९१७ गाथादौ०) (विस्तरेणानुमानाऽऽदिना तत्सिद्धिः 'कम्म' शब्दे तृतीयभागे २५२ पृष्ठे दृश्या) (एकान्तेन धर्माधर्मयोरस्तित्वनास्तित्वे नाभ्युपेये इति ' अणेगंतवाय ' शब्दे प्रथमभागे ४२६ पृष्ठे प्रोक्तम्)

(४) अथ धर्मपदवाच्यमाह-

वचनादविरुद्धाद्-यदनुष्ठानं यथोदितम् ।
मैत्र्यादिभावसंभेदं, तद्धर्म इति कीर्त्यते ॥ ३ ॥

उच्यते इति वचनमागमः,तस्माद्वचनमनुसृत्येत्यर्थः, ल्यब्लोपे पञ्चमीयं, यदनुष्ठानमिहलोकपरलोकावपेक्ष्य हेयोपादेययोरर्थयोरिहैव शास्त्रे वक्ष्यमाणलक्षणयोर्हानोपादानलक्षणा प्रवृत्तिरिति तद्धर्म इति कीर्त्यते इत्युत्तरेण योगः । कीदृशाद्वचनादित्याह-अविरुद्धात् कषच्छेदतापेषु अविघटमानात्, तत्र विधिप्रतिषेधयोर्द्वयेनोपवर्णनं कषशुद्धिः, पदे पदे तथोपगूहनकारिक्रियोपदर्शनं छेदशुद्धिः, विधिप्रतिषेधद्वयेषयाणां जीवाऽऽदिपदार्थानां च स्याद्वादपरीक्षया यथात्म्येन समर्थनं तापशुद्धिः । तदुक्तं धर्मबिन्दौ-" विधिप्रतिषेधौ कषः । तत्संप्रयोजनाचेष्टोक्तिश्छेदः । उपपत्तिव्यञ्जनभाववादस्ताप इति।" तच्चाविरुद्धं वचनं जिनप्रणीतमेव, निमित्तशुद्धेः, वचनस्य हि वक्ता निमित्तमन्तरङ्गं, तस्य च रागद्वेषमोहपरतन्त्र्यमशुद्धिस्तेभ्यो वितथवचनप्रवृत्तेः, न चैषा शुद्धिर्जिने भगवति, जिनत्वविरोधात्,जयति रागद्वेषमोहरूपान्तरङ्गान् रिपूनितिशब्दार्थानुपपत्तेः,तपनदहनाऽऽदिशब्दवदन्वर्थतया चास्याभ्युपगमाद्, निमित्तशुद्धत्वाच्चाजिनप्रणीतवचनमविरुद्धं,यतः कारणस्वरूपानुविधायि कार्यं,तन्न दुष्टकारणाऽऽरब्धं कार्यमदुष्टं भवितुमर्हति निम्बबीजादिवेक्षुयष्टिरिति । अन्यथा-कारणव्यवस्थोपरमप्रसङ्गात्,यच्च यत्कच्छाप्रणयनप्रवृत्तेषु तीर्थान्तरीयेषु रागाऽऽदिमत्स्वपि घृणाक्रोधिकरणव्यवहारेण क्वचित्किञ्चिदविरुद्धमपि वचनमुपलभ्यते, मार्गानुसारिबुद्धौ वा प्राणिनि क्वचित्, तदपि जिनप्रणीतमेव, तन्मूलत्वात्तस्य । तदुक्तमुपदेशपदे-" सव्वेसिं वायमूलं, दुवालसंगं जओ जिणक्खायं । रयणागरतुल्लं खलु, तो सव्वं सुंदरं तम्मि " ॥ १ ॥ इति । कीदृशमनुष्ठानं धर्म इत्याह-" यथोदितम् " यथा येन प्रकारेण कालाऽऽद्याराधनानुसारक्रमेण उदितं प्रतिपादितं, तत्रैवाविरुद्धे वचने इति गम्य-

म, अन्यथाप्रवृत्तौ तु तद्द्वेषित्वमेवाऽऽपद्यते न तु धर्म्मः। यथोक्तम्-" तत्कारी स्यात्स नियमा-त्तद्द्वेषी चेति यो जडः । आगमार्थं तमुल्लङ्घ्य, तत एव प्रवर्त्तते " ॥ १ ॥ इति । धर्म्मदासक्षमाश्रमणैरप्युक्तम्-" जो जहवायं न कुणइ, मिच्छादिट्ठी तओ ह को अन्नो ? । वड्ढेइ मिच्छत्तं, परस्स संकं जणेमाणो " ॥१॥ इति । पुनरपि कीदृशमित्याह-मैत्र्यादिभावसंमिश्रम् । मैत्र्यादयः मैत्रीमुदिताकरुणामाध्यस्थ्यलक्षणा ये भावा अन्तःकरणपरिणामाः तत्पूर्वकाश्च बाह्यचेष्टाविशेषाः सत्त्वगुणाऽधिकक्लिश्यमानाऽविनयेषु तैः संमिश्रं संयुक्तं, मैत्र्यादिभावानां निःश्रेयसाभ्युदयफलधर्मकल्पद्रुममूलत्वेन शास्त्रान्तरेषु प्रतिपादनात्, तत्र समस्तसत्त्वविषयः स्नेहपरिणामो मैत्री १, नमनप्रसादाऽऽदिभिर्गुणाधिकेष्वभिव्यज्यमानाऽन्तर्भक्तिरनुरागः प्रमोदः २, दीनाऽऽदिष्वनुकम्पा करुणा ३ अरागद्वेषभावो माध्यस्थ्यमिति ४। तदेवंविधमनुष्ठानं धर्म्म इति धुगतिप्रपतज्जन्तुजातधारणात्स्वर्गाऽऽदिसुगतौ धानाच्च धर्म इत्येवंरूपत्वेन कीर्त्यते शब्द्यते सकलाकल्पितभावकल्पनाकल्पनकुशलैः सुधीभिरिति। नन्वेवं वचनानुष्ठानं धर्म इति प्राप्तं, तथा च प्रीतिभक्त्यसङ्गानुष्ठानेष्वव्याप्तिरिति चेन्न, वचनव्यवहाराक्रियारूपधर्मस्यैवात्र ग्रहणत्वेनाऽव्याप्त्यभावादिति । वस्तुतः प्रीतिभक्तित्वे इच्छागतजातिविशेषौ, तज्जन्यत्वेन प्रीतिभक्त्यनुष्ठानयोर्भेदः, वचनानुष्ठानत्वं वचनस्मरणनियतप्रवृत्तिकत्वम्, एतत्त्रितयभिन्नानुष्ठानत्वम् असङ्गानुष्ठानत्वं निर्विकल्पस्वरसवाहिप्रवृत्तिकत्वं वा । इह तु वचनादित्यत्र वेदात्प्रवृत्तिरित्यत्रेव प्रयोज्यत्वार्थिका पञ्चमी, तथा च वचनप्रयोज्यप्रवृत्तिकत्वं लक्षणमिति न कुत्राप्यव्याप्तिदोषावकाशः, प्रीतिभक्त्यसङ्गानुष्ठानानामपि वचनप्रयोज्यत्वानपायात् ।

" धर्मश्चित्तप्रभवो, यतः क्रियाऽधिकरणाऽऽश्रयं कार्यम् ।
मलविगमेनैतत् खलु, पुष्ट्यादिभेदेन विज्ञेयः ॥ २ ॥
रागाऽऽदयो मलाः खल्वागमसंयोगतो विगम एषाम् ।
तदयं क्रियात एव हि, पुष्टिश्चित्तस्य शुद्धस्य ॥ ३ ॥
पुष्टिः पुण्योपचयः, शुद्धिः पापक्षयेण निर्मलता ।
अनुबन्धिनि द्वयेऽस्मिन्,क्रमेण मुक्तिः परा ह्येषा ॥ ४ ॥ " (षो० ३ विव०)

इत्यादि षोमशकग्रन्थानुसारेण तु पुष्टिशुद्धिमच्चित्तं भावधर्मस्य लक्षणं,तदनुगता क्रिया च व्यवहारधर्मस्येति पर्यवसन्नम्। प्रतिपादितं चेत्थमेव महोपाध्यायश्रीयशोविजयगणिभिरपि स्वकृतद्वात्रिंशिकायाम्। इत्थं च शुद्धानुष्ठानजन्या कर्ममलापगमलक्षणा सम्यग्दर्शनाऽऽदिनिर्वाणबीजज्ञानफला जीवशुद्धिरेव धर्मः। यच्चेहाऽविरुद्धवचनादनुष्ठानं धर्म इत्युच्यते, तत्तूपचारात् । यथा-नष्टमूलादिकं पादरोगः। एतेन व्यवहारज्ञानधर्मयोरुभयोरपि लक्षणे उपपादिते सतः, भावलक्षणस्य मुख्ये उपचारेणैव संज्ञत्वात्, अन्योऽन्यानुगतत्वं च तयोस्तत्र तत्र प्रसिद्धमिति ? ॥३॥

प्रदर्शितं धर्मलक्षणम्। अमुमेव धर्मं भेदतः प्रभेदतश्च विभणिषुराह-

स द्विधा स्यादनुष्ठातृ-गृहिव्रतिविभागतः ।
सामान्यतो विशेषाच्च, गृहिधर्मोऽप्ययं द्विधा ॥ ४ ॥

स यः पूर्वं प्रवक्तुमिष्टो धर्मो द्विधा द्वाभ्यां प्रकाराभ्यां स्याद् भवेत् । कुत इत्याह-"अनुष्ठातृगृहिव्रतिविभागत इति ।" अनुष्ठातारौ धर्मानुष्ठायकौ यौ गृहिव्रतिनौ तयोर्विभागतो विशेषात्, गृहस्थधर्मो यतिधर्मश्चेति भावः । तत्र गृहमस्यास्तीति गृही, तद्धर्मश्च नित्यनैमित्तिकानुष्ठानरूपः, व्रतानि महाव्रतानि विद्यन्ते यस्मिन् स व्रती, तद्धर्मश्च चरणकरणरूपः । तत्र च गृहिधर्मं विशिनष्टि-' गृहिधर्मोऽपीति ।' अयं साक्षादेव हृदि वर्तमानतया प्रत्यक्षो गृहिधर्म उक्तलक्षणः, किं पुनः सामान्यधर्म इत्यपिशब्दार्थः । द्विधा द्विभेदः, द्वैविध्यं दर्शयति-सामान्यतो विशेषाच्चेति । तत्र सामान्यतो नाम सर्वविशिष्टजनसाधारणानुष्ठानरूपः, विशेषात् सम्यग्दर्शनाणुव्रताऽऽदिप्रतिपत्तिरूपः, चकार उक्तसमुच्चय इति ॥ ४ ॥ ध० १ अधि० । (गृहिधर्मः ' गिहिधम्म ' शब्दे तृतीयभागे ७६८ पृष्ठे द्रष्टव्यः)

(५) अथ श्लोकोत्तरमाह-

धम्मो बावीसविहो, अगारधम्मोऽणगारधम्मो य ।
पढमो य बारसविहो, दसहा पुण बीयओ होइ ॥ १२ ॥

धर्म्मो द्वाविंशतिविधः सामान्येन द्वाविंशतिप्रकारः, अगारधर्मो गृहस्थधर्मः, अनगारधर्मश्च साधुधर्मः । प्रथमश्चागारधर्मो द्वादशविधः । दशधा पुनर्द्वितीयोऽनगारधर्म्मो भवतीति गाथासमासार्थः ॥ १२ ॥ दश० ६ अ० । उपा० । पञ्चा० । स्था० । (यतिधर्मः 'जइधम्म' शब्देऽस्मिन्नेव भागे १३६४ पृष्ठे द्रष्टव्यः)

(६) व्यासार्थं चाह-

सम्मत्तमूलमणुवय-पणगं तिन्नि व गुणव्वया होंति ।
सिक्खावयाइं चत्तरो, बारसहा होइ गिहिधम्मो ॥ २ ॥

तत्र सम्यक्त्वं निःसङ्गेऽपि देशवह्याऽऽयातमिथ्यात्वमोहनीयकर्ममलपरिणामः; तन्मूलमाद्यं प्रथमं यस्य तत्सम्यक्त्वमूलम् , अणूनि ह्रस्वानि व्रतानि अणुव्रतानि, महाव्रतापेक्षया तेषामतिसूक्ष्मत्वात् । यदि वा-अनु पश्चात् महाव्रतकथनापेक्षया कथनीयत्वेन व्रतानि अनुव्रतानि, तेषां पञ्चकमणुव्रतपञ्चकमनुव्रतपञ्चकं वा । (तिण्णि त्ति) संख्यायैतानि,तुशब्दस्यैवकारार्थत्वात् त्रीण्येव न तु पञ्च चत्वारि वा,तेषामन्यथारूढत्वात्। किम् ?,गुणव्रतानि,प्राकृतत्वात् पुंल्लिङ्गता,व्रतानि गुणव्रतानि भवन्ति ज्ञायन्ते, श्रावकधर्म्म इत्यध्याहारः । चतुश्चत्वारि शिक्षाऽभ्यासरूपाणि व्रतानि चतुःशिक्षाव्रतानि, तैः सहितः समन्वितः, इतिशब्दस्येह लुप्तदर्शनाद् व्रत इति श्रावकधर्म्मो द्वादशधा द्वादशप्रकारः। इदमत्र हृदयम-सम्यक्त्वमूलमणुव्रतपञ्चकं श्रावकधर्म्मो भवति, त्रीणि गुणव्रतानि च चतुःशिक्षापदसहितश्च श्रावकधर्मो भवति । यद्वा-सम्यक्त्वं मूलमस्य सम्यक्त्वमूलः,नपुंसकता तु प्राकृतप्रभवा । अणुव्रतानां पञ्चकं यत्र सोऽणुव्रतपञ्चकः,प्राकृतवशाच्चान्यथानिर्देशः।ततः पञ्चाणुव्रतिकः, शेषं पूर्ववदिति गाथार्थः। दर्श० २ तत्त्व ।

तथा च-

पाणे य णाइवाएज्जा, अदिन्नं पि य णादए ।
सादियं ण मुसं बूया, एस धम्मे वुसीमओ ॥ १७ ॥

प्राणप्रियाणां प्राणिनां प्राणान्नातिपातयेत् । तथा परेणाऽदत्तं दन्तशोधनमात्रमपि, नाददीत न गृण्हीयात्। तथा-सहाऽऽदिना मायया वर्त्तत इति सादिकं समायम,मृषावादं न ब्रूयात्। तथाहि-परवञ्चनार्थं मृषावादोऽधिक्रियते, स च न मायामन्तरेण भवतीत्यतो मृषावादस्य माया आदिभूता वर्त्तते। इदमुक्तं भवति-यो हि परवञ्चनार्थं समायो मृषावादः स परिहियते। यस्तु

संयमगुप्त्यर्थं न मया मृगा उपलब्धा इत्यादिकः स न दोषायेति । एव यः प्राक् निर्दिष्टो धर्मः, श्रुतचारित्राऽऽख्यस्वभावो वा (वुसीमउ त्ति) छान्दसत्वान्निर्देशार्थस्त्वयम् । वस्तूनि ज्ञानाऽऽदीनि, तद्वतो ज्ञानाऽऽदिमत इत्यर्थः । यदि वा (वुसीमउ त्ति) वश्यस्य आत्मवशगस्य, वश्येन्द्रियस्येत्यर्थः ॥ १९ ॥

अपि च-

अतिक्कमं ति वायाए, मणसा वि न पत्थए ।
सव्वओ संवुडे दंते, आयाणं सुसमाहरे ॥ २० ॥

(अइक्कमंतीत्यादि) प्राणिनामतिक्रमं पीडाऽऽत्मकं, महाव्रतातिक्रमं वा मनोऽवष्टब्धतया परातिरस्कारं वा, इत्येवंभूतमतिक्रमं वाचा मनसाऽपि न प्रार्थयेत् । एतद्द्वयनिषेधे च कायातिक्रमो दूरत एव निषिद्धो भवति । तदेवं मनोवाक्कायकृतकारितानुमतिभिश्च नवकेन भेदेनातिक्रमं न कुर्यात् । तथा इन्द्रियदमनेन तपसा वा दान्तिः सन् मोक्षस्याऽऽदानमुपादानं सम्यग्दर्शनाऽऽदिकं सुष्ठूद्युक्तः सम्यग्विस्रोतसिकारहित आहरेत् आददीत, गृण्हीयादित्यर्थः ॥ २० ॥ सूत्र० १ श्रु० ८ अ० ।

(७) अधुना यतिधर्मस्यावसरः । यद्वा-सम्यगज्ञस्तश्रावकधर्मस्यातितीव्रस्यैकान्ततो भवभ्रमणविमुखस्य संयतातिशेषसुखाभिलाषातिरेकस्य यतिधर्मकरणश्रद्धोत्पद्यते, अतस्तत्स्वरूपनिरूपणायेदमाह-

खंती य मद्दवऽज्जव, मुत्ती तवसंजमे य बोधव्वे ।
सच्चं सोयं आकिं-चणं च बंभं च जइधम्मो ॥४॥

प्रायः प्रतीतार्थैव, नवरमाद्यपदचतुष्टयेन कषायजयः प्रतिपादितः । तपः पुनर्द्वादशप्रकारं, तच्चान्यतोऽवसेयम् । संयमश्च सप्तदशविधः । यत उक्तम्-" पञ्चाऽऽश्रवाद्विरमणं, पञ्चेन्द्रियनिग्रहः कषायजयः । दण्डत्रयविरतिश्चे-ति संयमः सप्तदशभेदः ॥ १ ॥ " सत्यं सर्वथाऽलीकपरिहरणं, शौचं वचनक्रिययोरविसंवादेन सदाचारता, आकिञ्चन्यं किञ्चनं द्रव्यमुच्यते,ततो न किञ्चनमकिञ्चनमकिञ्चनस्य भाव आकिञ्चन्यमद्रव्यतेत्यर्थः । यतिधर्मो भवतीति सर्वत्र योजनीयम् । मुक्तिपदोपादानेऽप्याकिञ्चनस्य लब्धत्वादाकिञ्चनपदोपादानं विशेषद्योतनार्थम् । विशेषश्चात्र संयमोपष्टम्भनिमित्तं किञ्चित्प्राशुकैषणीयमुपकरणं धारयन्नपि मुक्ततोपेत एव भवति । ननु पुनरतिजडताऽवष्टब्धमना दिगम्बरपरिकल्पनया मुक्तिमान् , तस्या असंयमाऽऽदिदोषदुष्टत्वेनानिमित्तत्वात् तर्हि संयमोपकारायैव सकिञ्चनताऽपि भविष्यति मुक्तता, नेत्याह-सर्वथैव संयमोपघातकत्वेनातिदुष्टत्वादिति । चशब्दः समुच्चयार्थः । ब्रह्म च ब्रह्मचर्यं,स्त्रीसेवापरिहार इति गाथार्थः । दश० २ तत्त्व । स्था० ।

तिविहे धम्मे पण्णत्ते । तं जहा-सुयधम्मे, चरित्तधम्मे, अत्थिकायधम्मे ।

(तिविहे धम्मे इत्यादि) श्रुतमेव धर्मः श्रुतधर्मः स्वाध्यायः, एवं चारित्रधर्मः क्षान्त्यादिश्रमणधर्मः । अयं च द्विविधोऽपि द्रव्यभावभेदे धर्मे भावधर्म उक्तः । यदाह-"दुविहो उ भावधम्मो, सुयधम्मो खलु चरित्तधम्मो य । सुयधम्मे सज्झाओ, चरित्तधम्मे समणधम्मो ॥१॥ " इति । अस्तिशब्देन प्रदेशा उच्यन्ते, तेषां कायो राशिरस्तिकायः, स चासौ संज्ञया धर्मास्तिकायधर्मो, गत्युपष्टम्भलक्षणो धर्मास्तिकाय इत्यर्थः । अयं च द्रव्यधर्म इति । स्था० ३ ठा० ३ उ० ।

प्रकारान्तरेण धर्मभेदानाह-

तिविहे भगवया धम्मे पण्णत्ते । तं जहा-सुअहिज्जिए, सुज्झाइए, सुतवस्सिए । जया सुअहिज्जियं भवइ तदा सुज्झाइयं भवइ, जया सुज्झाइयं भवइ तया सुतवस्सियं भवइ । से सुअहिज्जिए सुज्झाइए सुतवस्सिए सुअक्खाए णं भगवया धम्मे पण्णत्ते ॥

" तिविहे" इत्यादि स्पष्टं, केवलं भगवता महावीरेणेत्येवं जगाद सुधर्मास्वामी जम्बूस्वामिनं प्रतीति, सुष्ठु कालविनयाऽऽद्याराधनेनाधीतं गुरुसकाशात् सूत्रतः पठितं स्वधीतं तथा सुष्ठु विधिना तत एव व्याख्यानेनार्थतः श्रुत्वा ध्यातमनुप्रेक्षितं श्रुतमिति गम्यं सुध्यातम्, अनुप्रेक्षणाभावे तत्त्वानवगमेनाध्ययनश्रवणयोः प्रायोऽकृतार्थत्वादिति । अनेन भेदद्वयेन श्रुतधर्म उक्तः। तथा सुष्ठु इहलोकाऽऽद्याशंसारहितत्वेन तपसितं तपस्यनुष्ठानं सुतपसितमिति चारित्रधर्म उक्त इति त्रयाणामप्येवमुत्तरोत्तरतोऽविनाभावं दर्शयति-" जया " इत्यादि व्यक्तं, परं निर्दोषाध्ययनं विना श्रुतार्थाप्रतीतेः सुध्यातं न भवति, तदभावे ज्ञानविकलतया सुतपसितं न भवतीति भावः । यदेतत् स्वधीताऽऽदित्रयं भगवता वर्द्धमानस्वामिना धर्मः प्रकाशः (से त्ति) स स्वाख्यातः सुष्ठूक्तः सम्यग्ज्ञानक्रियारूपत्वात् तयोश्चैकान्तिकाऽऽत्यन्तिकसुखाबन्ध्योपायत्वेन निरुपचरितधर्मत्वात् सुगतिधारणाद्वि धर्म इति । उक्तं च-" नाणपगासयं सो-हओ तवो संजमो य गुत्तिकरो । तिण्हं पि समाओगो, मोक्खो जिणसासणे भणिओ ॥ १ ॥ " इति । जमितिवाक्यालङ्कारे, सुतपसितमिति । स्था० ३ ठा० ४ उ० ।

(८) द्रव्यभावभेदेन द्विविधं धर्मं प्रतिपिपादयिषुराह-

दुह दव्वभाव धम्मो, दव्वे दव्वस्स दव्वपेवं वा ।
तित्ताइसभावो वा, गम्मादित्थी कुलिंगो वा ॥

धर्मो द्विविधः । तद्यथा-द्रव्यधर्मो, भावधर्मश्च । तत्र द्रव्ये इति द्वारपरामर्शः । द्रव्यविषयो धर्म उच्यते-द्रव्यस्यानुपयुक्तस्य धर्मो मूलोत्तरगुणानुष्ठानं द्रव्यधर्मः, " इह अनुपयुक्तो द्रव्यम् " इति वचनात् । द्रव्यमेव वा धर्मो द्रव्यधर्मः धर्मास्तिकायः (तित्ताइ सहावो वा इति) तिक्ताऽऽदिर्वा द्रव्यस्य स्वभावो द्रव्यधर्मः । (गम्मादित्थी कुलिंगो व त्ति) गम्याऽऽदिर्धर्मः स्त्रीविषयो द्रव्यधर्मः, तत्र केषाञ्चित् मातुलदुहिता गम्या केषाञ्चिदगम्येत्यादि । तथा कुलिङ्गो वा कुतीर्थिकधर्मो द्रव्यधर्मः ।

पाठान्तरम्-

दुविहो उ होइ धम्मो, दव्वधम्मो य भावधम्मो य ।
धम्मत्थिकायदव्वे, दव्वस्स व जस्स जो भावो ॥

सुगमा ।

भावधर्मप्रतिपादनार्थमाह-

दुह होइ भावधम्मो, सुयचरणे वा सुयम्मि सज्झातो ।
चरणम्मि समणधम्मो, खंती मुत्ती भवे दसहा ॥

द्विविधो भवति भावधर्मः। तद्यथा-श्रुतः चरणप्रकारः क्षान्त्यादिः।

पाठान्तरम्-

भावम्मि होइ दुविहो, सुयधम्मो खलु चरित्तधम्मो य ।
सुयधम्मो सज्झातो, चरित्तधम्मो समणधम्मो ॥

सुगमा । आ० म० २ अ० । आ० चू० । धर्म्मो दुर्गतिगर्त्तानिपतज्जन्तुजातत्राणदानक्षमः, सोऽपि नामस्थापनाऽद्रव्यभावभेदाच्चिधमानश्चतुर्धा संभवति । तत्र नामधर्मो यथा-कस्यचित्पुरुषाऽऽदेः सचेतनस्य धर्म इति नाम प्रदीयते । स्थापनाधर्मो यथा-कस्यचिद्वस्तुनो धर्म इति स्थापना विधीयते-एष मया धर्मः पुनः समस्ताऽन्यधार्मिकैर्धर्मबुद्ध्या परप्रतारणबुद्ध्या वा विधीयमानः सर्वोऽपि ध्यानाध्ययनाऽऽदिः द्रव्यधर्म एव । तथा-स्वदर्शनप्रतिपन्नानां श्रमणाऽऽदीनां चतुर्णामपि यच्चैत्यवन्दनप्रतिक्रमणस्वाध्यायाऽऽद्यनुष्ठानसेवनमविधिनाऽनुपयोगेन तथा-परोपरोधपरचित्तरञ्जनवतां पार्श्वस्थाऽऽदीनां च यदनुष्ठानं तदपि द्रव्यधर्म एव, विवक्षितार्थसाधकत्वादिति । (विशेषस्त्वत्र 'दव्वधम्म' शब्देऽस्मिन्नेव भागे २४७४ पृष्ठे द्रष्टव्यः) भावधर्मस्तु-श्रुतचारित्ररूपः साधुश्रावकाऽऽदिभिः सम्यगुपयोगपूर्वकं विधीयते । यच्च ग्रामदेशकुलराजधर्मभेदाच्चतुर्विधः,-तत्र ग्रामधर्मो ग्रामाऽऽचारः, एवं देशाऽऽदिष्वप्ययोजनीयम् । दानाऽऽदिभेदेन वा चातुर्विध्यम् । तच्च प्रतीतमेवातो नेह प्रतन्यते । दर्श० ४ तत्त्व ।

तथा च सूत्रकृताङ्गनिर्युक्तौ धर्मस्य नामाऽऽदिनिक्षेपं दर्शयितु माह-

णामं ठवणा धम्मो, दव्वधम्मो य भावधम्मो य ।
सचित्ताचित्तमीसग-गिहत्थदाणे दवियधम्मे ॥ ३ ॥

(नामं ठवणेत्यादि) नामस्थापनाऽद्रव्यभावभेदाच्चतुर्धा धर्मस्य निक्षेपः। तत्राऽपि नामस्थापनेऽनादृत्य ज्ञशरीरभव्यशरीरव्यतिरिक्तो धर्मः सचित्ताचित्तमिश्रभेदात् त्रिधा । तत्राऽपि सचित्तस्य जीवच्छरीरस्योपयोगलक्षणो धर्मः स्वभावः । एवमचित्तानामपि धर्मास्तिकायानां यो यस्य स्वभावः स तस्य धर्म इति। तथाहि-" गइलक्खणओ धम्मो, ठाणलक्खणओ अहम्मो य । भायणं सव्वदव्वाणं, नह अवगाहलक्खणं ॥ १ ॥ " पुद्गलास्तिकायोऽपि ग्रहणलक्षण इति मिश्रद्रव्याणां च क्षीरोदकाऽऽदीनां यो यस्य स्वभावः स तत्प्रेम्णयाऽवगन्तव्य इति । गृहस्थानां च यः कुलनगरग्रामाऽऽदिधर्मो गृहस्थेभ्यो गृहस्थानां वा यो दानधर्मः स द्रव्यधर्मः (सूत्र०)।

भावधर्मस्वरूपनिरूपणायाऽऽह-

लोइयलोउत्तरिओ, दुविहो पुण होति भावधम्मो उ ।
दुविहो वि दुविहतिविहो, पंचविहो होति णायव्वो ।३।

(लोइय इत्यादि) भावधर्मो नोआगमतो द्विविधः । तद्यथा-लौकिको, लोकोत्तरश्च । तत्र लौकिको द्विविधः-गृहस्थानां, पाखण्डिकानां च । लोकोत्तरस्त्रिविधः-ज्ञानदर्शनचारित्रभेदात् । तत्राऽप्याभिनिबोधिकं ज्ञानं पञ्चधा । दर्शनमप्यौपशमिकसास्वादनक्षायोपशमिकवेदकक्षायिकभेदात् पञ्चविधम् । चारित्रमपि सामायिकाऽऽदिभेदात् पञ्चविधम् । गाथाक्षराणि त्वेवं नेयानि । तद्यथा-भावधर्मो लौकिकलोकोत्तरभेदाद् द्विधा, त्रिविधोऽपि चाऽयं यथासंख्येन द्विविधस्त्रिविधः । तत्रैव लौकिको गृहस्थ-पाखण्डिकभेदाद्-द्विविधः । लोकोत्तरोऽपि ज्ञानदर्शनचारित्रभेदात् त्रिविधः । ज्ञानाऽऽदीनि प्रत्येकं श्रीण्यपि पञ्चधैवेति । सूत्र० १ श्रु० ए अ० ।

(७)धर्मपदमधिकृत्यसूत्रस्पर्शिकनिर्युक्तिप्रतिपादनाय।

णामं ठवणा धम्मो, दव्वधम्मो अ भावधम्मो उ ।
एएसिं णाणत्तं, वुच्चामि अहाणुपुव्वीए ॥ ३९ ॥

(णाम ठवणा धम्मो त्ति) अत्र धर्मशब्दः प्रत्येकमभिसंबध्यते। नामधर्मः, स्थापनाधर्मो, द्रव्यधर्मो, भावधर्मश्च । एतेषां नानात्वं नेदं वक्ष्ये अनिधास्ये, यथानुपूर्व्या यथानुपरिपाट्येति गाथार्थः ॥ ३६ ॥

साम्प्रतं नामस्थापने क्षुण्णत्वादागमतो नोआगमतश्च ज्ञात्वानुपयुक्तज्ञशरीरेतरभेदाँश्चानादृत्य ज्ञशरीरभव्यशरीरव्यतिरिक्तद्रव्यधर्माऽऽद्यभिधित्सयाऽऽह-

दव्वं च अत्थिकाओ, पयारधम्मो य भावधम्मो य ।
दव्वस्स पज्जवा जे, ते धम्मा तस्स दव्वस्स ॥ ४० ॥

इह त्रिविधोऽधिकृतो धर्मः । तद्यथा--द्रव्यधर्मः, अस्तिकायधर्मः, प्रचारधर्मश्चेति । तत्र द्रव्यं चेत्यनेन धर्मधर्मिणोः कथञ्चिदभेदाद्द्रव्यधर्ममाह । तथाऽस्तिकाय इत्यनेन तु सूचनात्सूत्रमिति कृत्वा उपलक्षणत्वादवयवे समुदायशब्दोपचाराद्धर्मास्तिकायधर्मम् इति । प्रचारधर्मश्चेत्यनेन ग्रन्थेन द्रव्यदेशमाह। भावधर्मश्चेत्यनेन तु भावधर्मस्य स्वरूपमाह । साम्प्रतं प्रथमोद्दिष्टद्रव्यधर्मस्वरूपाभिधित्सयाऽऽह-द्रव्यस्य पर्याया ये उत्पादविगमाऽऽदयस्ते च धर्मास्तस्य द्रव्यस्य, ततश्च द्रव्यस्य धर्मा द्रव्यधर्मा इत्यनासंसक्तैकद्रव्यधर्मभावप्रदर्शनार्थो बहुवचननिर्देश इति गाथार्थः ॥ ४० ॥

इदानीमस्तिकायाऽऽदिधर्मस्वरूपप्रतिपिपादयिषयाऽऽह-

धम्मत्थिकायधम्मो, पयारधम्मो य विसयधम्मो उ ।
लोइय कुप्पावणिओ, लोगुत्तरओ गिणेगविहो ॥ ४१ ॥

धर्मग्रहणाद्धर्मास्तिकायपरिग्रहः । ततश्च धर्मास्तिकाय एव गत्युपष्टम्भकोऽसंख्येयप्रदेशात्मकोऽस्तिकायधर्म इति । अन्ये तु व्याचक्षते-धर्मास्तिकायाऽऽदिस्वभावोऽस्तिकायधर्म इत्येतच्चायुक्तम। तत्र धर्मास्तिकायाऽऽदीनां द्रव्यत्वेन तस्य द्रव्यधर्माव्यतिरेकादिति। तथा-प्रचारधर्मश्च विषयधर्म एव,तु-शब्दस्यैवकारार्थत्वात् । तत्र प्रचरणं प्रचारः, प्रकर्षेणगमनमित्यर्थः । स एवाऽऽत्मस्वभावत्वाद्धर्मः प्रचारधर्मः । स च किं विषीदन्त्येतेषु प्राणिन इति विषया रूपाऽऽदयः तद्धर्म एव। तथा च वस्तुतो विषयधर्म एवाऽयं यद्भागाऽऽदिमान् सर्वस्तेषु प्रवर्त्तत इति । चक्षुरादीन् द्रव्यवशतो रूपाऽऽदिषु प्रवृत्तिः प्रचारधर्म इति हृदयम् । प्रधानसंसारनिबन्धनत्वेन चास्य प्राधान्यख्यापनार्थं द्रव्यधर्मात्पृथगुपन्यासः । इदानीं भावधर्मः, स च लौकिकाऽऽदिभेदान्नेत्र इति । आह च-लौकिकः कुप्रावचनिकः । लोकोत्तरस्त्वत्र-(लोगो णेगविहो त्ति) लौकिकोऽनेकविध इति गाथाऽर्थः ॥ ४१ ॥

तदेवानेकविधत्वमुपदर्शयन्नाह-

गम्मपसूदेसरज्जे, पुरवरगामगणगोट्ठिराईणं ।
सावज्जो उ कुतित्थिय-धम्मो न जिणेहिं उ पसत्थो ।४२।

तत्र गम्यधर्मो यथा दक्षिणापथे मातुलदुहिता गम्या, उत्तरापथे पुनरगम्यैव । एवं जङ्घायाजङ्घयपेयापेयविज्ञाना कर्त्तव्येति । पशुधर्मो मात्रादिगमनलक्षणः । देशधर्मो देशाचारः; स च प्रतिनियत एव नेपथ्याऽऽदिलक्षण इति । राज्यधर्मः प्र-

तिराज्यं भिन्नः। स च कराऽऽदिः पुरवरधर्मः प्रतिपुरवरं भिन्नः, क्वचित् किञ्चिद्विशिष्टोऽपि पौरभाषाप्रतिपादनाऽऽदिलक्षणः। सङ्घितीया योषिद्देहान्तरं गच्छतीत्यादिलक्षणो वा। ग्रामधर्मः प्रतिग्रामं भिन्नः। गणधर्मो मल्लाऽऽदिगणव्यवस्था यथा समपादपातेन विषमग्रह इत्यादि। गोष्ठीधर्मो गोष्ठीव्यवस्था। इह च समवयःसमुदायो गोष्ठी। तद्व्यवस्था पुनर्वसन्ताऽऽदावेषंकर्त्तव्यमित्यादिलक्षणा। राजधर्मो दुष्टेतरनिग्रहपरिपालनाऽऽदिरिति। भावधर्मतां चाऽस्य गम्याऽऽदीनां विवक्षया ज्ञानरूपत्वाद् द्रव्यपर्यायत्वाद्वा तस्यैव च द्रव्यानपेक्षस्य विवक्षितत्वाद् लौकिकैर्वा भावधर्मत्वेनेष्टत्वात्। देशराज्याऽऽदिभेदश्चैकदेश एवानेकराज्यसंभव इत्येवं सुधिया भाव्यम्। इत्युक्तो लौकिकः। कुप्रावचनिक उच्यते-अनावपि सावद्यप्रायो लौकिककल्प एव। यत आह-(सावज्जो उ इत्यादि) अवद्यं पापं सहावद्येन सावद्यः। तुशब्दस्त्वेवकारार्थः। स चावधारणे। सावद्य एव,कः?, कुतीर्थिकधर्मश्चरकपरिव्राजकाऽऽदिधर्म इत्यर्थः। कुत एतदित्याह-न जिनैरर्हद्भिस्तुशब्दादन्यैश्च प्रेक्षापूर्वकारिभिः प्रशंसितः स्तुतः। सारम्भपरिग्रहत्वाद्। अत्र बहुवक्तव्यम्,तत्तु नोच्यते, गमनिकामात्रफलत्वात्प्रस्तुतव्यापारस्येति गाथार्थः ॥ ४२ ॥ उक्तः कुप्रावचनिकः।

साम्प्रतं लोकोत्तरं प्रतिपादयन्नाह-

दुविहो लोगुत्तरिओ, सुयधम्मो खलु चरित्तधम्मो य।
सुयधम्मो सज्झाओ, चरित्तधम्मो समणधम्मो ॥ ४३ ॥

द्विविधे प्रकारो,लोकोत्तरो लोकप्रधानो, धर्म इति वर्त्तते। तथा चाऽऽह-श्रुतधर्मः, खलु चारित्रधर्मश्च। तत्र श्रुतं द्वादशाङ्गं तस्य धर्मः श्रुतधर्मः। खलुशब्दो विशेषणार्थः। किं विशिनष्टि। स हि वाचनाऽऽदिभेदाच्चित्र इति। आह च-श्रुतधर्मः स्वाध्यायवाचनाऽऽदिरूपस्तत्त्वचिन्तायां धर्महेतुत्वाद् धर्म इति। तथा चारित्रधर्मश्च तत्र 'चर' गतिभक्षणयोरित्यस्य "अर्तिसृधृसूखनसहचर इत्रः" ॥ ३। २। १८४ ॥ इति इत्रप्रत्ययान्तस्य चरित्रमिति भवति। चरन्त्यनिन्दितमनेनेति चरित्रं क्षयोपशमरूपं,तस्य भावश्चारित्रमशेषकर्मक्षयाय चेष्टेत्यर्थः। ततश्चारित्रमेव धर्मश्चारित्रधर्मः इति। चः समुच्चये। अयं च श्रमणधर्म एवेत्याह-चारित्रधर्मः श्रमणधर्मः इति। तत्र श्राम्यतीति श्रमणः " कृत्यल्युटो बहुलम् " ॥ ३। ३। ११३ ॥ इति वचनात् कर्त्तरि ल्युट् श्राम्यतीति तपस्यतीति। एतदुक्तं भवति-प्रव्रज्यादिवसादारभ्य सकलसावद्ययोगविरतौ गुरूपदेशादनशनाऽऽदि यथाशक्त्या प्राणोपरमान्तपश्चरतीति। उक्तं च-" यः समः सर्वभूतेषु, त्रसेषु स्थावरेषु च। तपश्चरति शुद्धात्मा, श्रमणोऽसौ प्रकीर्त्तितः ॥ १ ॥" इति। तस्य धर्मः स्वभावः। श्रमणधर्मश्च क्षान्त्यादिलक्षणो वक्ष्यमाण इति गाथार्थः ॥ ४३ ॥ दश० १ अ०।

धर्मभेदान् सामान्येन निरूपयन्नाह-

दसविहे धम्मे पण्णत्ते। तं जहा-गामधम्मे, नगरधम्मे, रट्ठधम्मे,पासंडधम्मे, कुलधम्मे, गणधम्मे, संघधम्मे, सुयधम्मे, चरित्तधम्मे, अत्थिकायधम्मे। स्था० १० ठा०।

(कस्य दर्शने कति धर्मभेदा इति 'वाद' शब्दे वक्ष्यते)

(१०) धर्मस्य स्वलक्षणाभिलषा सम्बन्धमुपदर्शयति प्रकरणकारः-

अस्य स्वलक्षणमिदं, धर्मस्य बुधैः सदैव विज्ञेयम्।
सर्वाऽऽगमपरिशुद्धं, यदादिमध्यान्तकल्याणम् ॥ १ ॥

(अस्येत्यादि) अस्य धर्मस्य स्वलक्षणं लक्ष्यते तदितरव्यावृत्तं वस्त्वनेनेति लक्षणम्। स्वं च तल्लक्षणं नेति स्वलक्षणमिदं वक्ष्यमाणं बुधैर्विद्वद्भिः सदैव सर्वकालमेव विज्ञेयम। सर्वकालव्याप्त्या लक्षणस्याऽन्यथात्वाभावमुपदर्शयति सर्वैरागमैः परिशुद्धं निर्दोषं यदादिमध्यान्तकल्याणमादिमध्यावसानेषु सुन्दरमिति योऽर्थः ॥ १ ॥

किं पुनर्धर्मस्य स्वलक्षणमित्याह-

धर्मश्चित्तप्रभवो, यतः क्रियाऽधिकरणाऽऽश्रयं कार्यम्।
मलविगमेनैतत् खलु, पुष्ट्यादिमदेष विज्ञेयः ॥ २ ॥

(धर्म इत्यादि) प्रभवत्यस्मादिति प्रभवः। चित्तकरत्वाच्चित्तहेतुकत्वाच्चारित्रं, चित्तं स चाऽसौ प्रभवश्च चित्तप्रभवः स धर्मो विज्ञेयः। विशेषणसमासाश्रयणाच्छब्देन चित्तमेव परामृश्यते, यतश्चित्तक्रिया प्रवर्त्तते विधिनिषेधविषया। सा च क्रिया कार्यं चित्तनिष्पाद्यत्वात्। तच्च स्वरूपेण क्रियालक्षणं कार्यं कीदृशं यच्चित्तात्प्रवर्त्तत इत्याह-अधिकरणाऽऽश्रयमिह यद्यप्यधिकरणशब्दः सामान्येनाऽऽधारवचनस्तथापि प्रकरणात् चित्तस्याधिकरणमाश्रयः शरीरं,चित्तस्य शरीराऽऽश्रयत्वात्। क्रियालक्षणं कार्यमधिकरणाऽऽश्रयं शरीराऽऽश्रयं यतः प्रवर्त्तते चित्तात्तच्चित्तं धर्म इत्युक्तम्। चित्तात्प्रभवतीति पुनरुच्यते चित्तस्य। एतत्पुष्ट्यादिमदित्यनेन सह संबन्धो न स्यात्। यत इत्यनेनापि केवलमेव चित्तं न गृह्येत। तथा धर्मस्यैव विशेषणत्वं स्यान्न चित्तस्य, ततश्च चित्तस्य विशेषणपदैरनिसंबन्धो न स्यादिति दोषः। एतदेव चित्तं मलविगमेन रागाऽऽदिमलापगमेन पुष्ट्यादिमत् पुष्टिशुद्धिसमन्वितमेष धर्मो विज्ञेय इति ॥ २ ॥

मलविगमेनैतत्खलु पुष्टिमदित्युक्तं, तत्र के मलाः कथं च पुष्ट्यादिमत्त्वं चित्तस्येत्येवं वक्तुकामनायां श्रोतुरिदमाह-

रागाऽऽदयो मलाः खल्वागमसंयोगतो विगम एषाम्।
तदयं क्रियात एव हि, पुष्टिः शुद्धिश्च चित्तस्य ॥ ३ ॥

(रागाऽऽदय इत्यादि) इह मलाः प्रकृताश्चित्तस्यैव संबन्धिनः परिगृह्यन्ते। ते च रागाऽऽदयो रागद्वेषमोहा जातिसंग्रहीताः। व्यक्तिभेदेन तु भूयांसः। खलुशब्दावधारणाद्रागाऽऽदय एव नान्ये। आगमनमागमः सम्यक्परिच्छेदस्तेन संयोगः सम्बन्धः आगमसहितो वा यः संयोगः सत्क्रियारूपः। ततः सकाशाद्विगम एषां रागाऽऽदीनां मलापगमः संजायते। तत् तस्मादयमागमसंयोगः क्रिया वर्त्तते सर्वाऽपि शास्त्रोक्ता विधिप्रतिषेधाऽऽत्मिका। अत एव ह्यागमसंयोगात् क्रियारूपात् पुष्टिर्वक्ष्यमाणस्वरूपा शुद्धिश्च चित्तस्य संजायते ॥ ३ ॥

पुष्टिशुद्ध्योर्लक्षणं दर्शयति-

पुष्टिः पुण्योपचयः, शुद्धिः पापक्षयेण निर्मलता।
अनुबन्धिनि द्वयेऽस्मिन्, क्रमेण मुक्तिः परा ज्ञेया ॥४॥

(पुष्टिरित्यादि) उपचीयमानपुण्यता पुष्टिरभिधीयते,शुद्धिः पापक्षयेण निर्मलता, पापं ज्ञानावरणीयाऽऽदि च सम्यग्ज्ञानाऽऽदिगुणविघातहेतुर्घातिकर्मोच्यते। ततक्षयेण यावती काचिदेशतोऽपि निर्मलता संभवति सा शुद्धिरुच्यते, अनुबन्धः सन्तानः

प्रवाहोऽविच्छेद इत्यनर्थान्तरम् । स विद्यते यस्य द्वयस्य तदिदमनुबन्धि तस्मिन् पुष्टिशुद्धिद्वयेऽस्मिन् प्रत्यक्षीकृते सति क्रमेणाऽऽनुपूर्व्या पुण्योपचयपापक्षयाभ्यां प्रवर्द्धमानाभ्यां तस्मिन् जन्मनि भवान्तरेषु वा प्रकृष्यमाणवीर्यस्य जीवस्य मुक्तिः परा तात्त्विकी सर्वकर्मक्षयलक्षणा ज्ञेयेति ॥ ४ ॥

कथं पुनरिदमनुबन्धिद्वयं न भवतीत्याह-

न प्रणिधानाऽऽद्याशय-संविद्व्यतिरेकतोऽनुबन्धि तत् ।
भिन्नग्रन्थेर्निर्मल-बोधवतः स्यादियं च परा ॥ ५ ॥

(नेत्यादि) (प्रणिधानाऽऽद्याशयसंविद्व्यतिरेकत इति) प्रणिधानाऽऽदयश्च ते आशयाश्च वक्ष्यमाणाः पञ्चाध्यवसायस्थानविशेषास्तेषां संवित्संविप्तिः संवेदनमनुभवस्तस्याव्यतिरेकोऽभावस्तस्मात्तदाशयसंविद्व्यतिरेकेणेतद्द्वयं पुष्टिशुद्धिरूपं नानुबन्धि भवति, तस्मादेतद्द्वयमनुबन्धिकर्तुकामेन प्रणिधानाऽऽदिषु यतितव्यम् । इयं च कस्येत्याह- भिन्नग्रन्थेरपूर्वकरणबलेन कृतग्रन्थिभेदस्य तत्प्रभावादेव निर्मलबोधवतो विमलबोधसंपन्नस्य स्याद्भवेदियं च प्रस्तुता प्रणिधानाऽऽद्याशयसंवित् परा प्रधाना ॥ ५ ॥

प्रणिधानाऽऽदिराशय उक्तस्तमेव संख्याविशिष्टं नामग्राहमाह-

प्रणिधिप्रवृत्तिविघ्नजय-सिद्धिविनियोगभेदतः प्रायः ।
धर्मज्ञैराख्यातः, शुभाऽऽशयः पञ्चधाऽत्र विधौ ॥ ६ ॥

प्रणिधिश्च प्रवृत्तिश्च विघ्नजयश्च सिद्धिश्च विनियोगश्च एत एव भेदास्तानाश्रित्य कर्मणिलक्षणेऽपि पञ्चमी । प्रणिधिप्रवृत्तिविघ्नजयसिद्धिविनियोगभेदतः (प्राय इति) प्राचुर्येण शास्त्रेषु धर्मज्ञैर्धर्मवेदिभिराख्यातः कथितः शुभाऽऽशयः शुभपरिणामः पञ्चधा पञ्चप्रकारः । अत्र प्रक्रमे विधौ कर्त्तव्योपदेशे प्रतिपादिताऽऽशयपञ्चकव्यतिरेकेण । पुष्टिशुद्धिलक्षणं द्वयमनुबन्धि न भवतीति ॥ ६ ॥

तत्र प्रणिधानलक्षणमाह-

प्रणिधानं तत्समये, स्थितिमत्तद्वधः कृपानुगं चैव ।
निरवद्यवस्तुविषयं, परार्थनिष्पत्तिसारं च ॥ ७ ॥

(प्रणिधानमित्यादि) प्रणिधानं विशेष्यं, शेषपदानि विशेषणानि । तत्समये प्रतिपक्षविवक्षितधर्मस्थानमर्य्यादायां स्थितिमत्प्रतिष्ठितमविचलितस्वभावं तद्वधः कृपानुगं चैव स्वप्रतिपक्षधर्मस्थानस्याधोऽधस्ताद्ये वर्त्तन्ते जीवा न तावतीं धर्म्मपदवीमाराधयन्ति, तेषु कृपया करुणया अनुरागमनुगतं तेषु करुणापरम् । न तु गुणहीनत्वात्तेषु द्वेषसमन्वितं निरवद्यवस्तुविषयं, निरवद्यं सावद्यपरिहारेण यद्वस्तु धर्म्मगतं तद्विषयो यस्य परार्थनिष्पत्तिसारं च परोपकारनिष्पत्तिप्रधानं चैवंस्वरूपं प्रणिधानमवसेयम् ॥ ७ ॥

इदानीं प्रवृत्तिमाह-

तत्रैव तु प्रवृत्तिः, शुभसारोपायसंगतात्यन्तम् ।
अधिकृतयत्नातिशया-दौत्सुक्यविवर्जिता चैव ॥ ८ ॥

(तत्रैवेत्यादि) तत्रैव तु विवक्षितप्रतिपक्षधर्मस्थाने प्रवृत्तिरेवंस्वरूपा भवति । सा च न क्रियारूपा किं त्वाशयरूपा, शुभसारोपायसंगताऽत्यन्तं बाह्यक्रियाद्वारेण विशेषणं सर्वं योजनीयम् । शुभः सुन्दरः सारः प्रकृष्टो नैपुण्यान्वितो य उपायस्तेन संगता युक्ता, अधिकृते धर्मस्थाने यत्नातिशयः प्रयत्नाऽऽशयस्तस्मात् सा संपद्यते, औत्सुक्यविवर्जिता चैव औत्सुक्यं स्वरूपाभिलाषातिरेकस्तेन विवर्जिता विरहिता प्रयत्नातिशयमेव विधत्ते न त्वौत्सुक्यमिति भावः ॥ ८ ॥

अधुना विघ्नजयमाह-

विघ्नजयस्त्रिविधः खलु, विज्ञेयो हीनमध्यमोत्कृष्टः ।
मार्गे इह कण्टकज्वर-मोहजयसमः प्रवृत्तिफलः ॥ ९ ॥

(विघ्नजयस्त्रिविधः खलु विज्ञेय इति) विघ्नस्य धर्मान्तरायस्य जयः पराभवो निराकरणं स त्रिविधस्त्रिधा त्रिप्रकारो भवेदिति त्रिविधस्त्रिभेदः । खलुशब्दो वाक्यालङ्कारे । त्रैविध्यमेवाऽऽह-हीनमध्यमोत्कृष्टः हीनमध्यमाभ्यां सहित उत्कृष्ट एको हीनो विघ्नजयोऽपरो मध्यमोऽपरस्तूत्कृष्ट इति । त्रैविध्यमेव निदर्शनेन साधर्म्यगर्भमाह-मार्गे इह कण्टकज्वरमोहजयसम इति । मार्गे प्रवृत्तस्य पुंसः कण्टकविघ्नजयसमो ज्वरविघ्नजयसमो मोहविघ्नजयसमः । इदमत्र तात्पर्यम्-यथा नाम कस्यचित्पुरुषस्य प्रयोजनवशान्मार्गेप्रवृत्तस्य कण्टकाऽऽकीर्णेमार्गावतीर्णस्य कण्टकविघ्नो विशिष्टगमनविघातहेतुर्भवति । तदुद्धृते तु पथि प्रवृत्तस्य गमनं निराकुलं संजायते । एवं कण्टकविघ्नजयसमः प्रथमो विघ्नजयः । कण्टकाश्चेह सर्वे एव प्रतिकूलाः शीतोष्णाऽऽदयो धर्मस्थानविघ्नहेतवस्तैरभिद्रुतस्य धर्मार्थिनोऽपि निराकुलप्रवृत्त्यसिद्धेः । आशयभेदश्चायं बाह्यकण्टकविघ्नजयेनोपलक्ष्यते । तथा-तस्यैव ज्वरवेदनाऽभिभूतशरीरस्य विह्वलपादन्यासस्य निराकुलं गमनं चिकीर्षोरपि, कर्तुमशक्नुवतः कण्टकविघ्नाद्भ्यधिको ज्वरविघ्नस्तज्जयस्तु विशिष्टगमनप्रवृत्तिहेतुर्निराकुलशरीरत्वेन परिदृश्यते । इहापि ज्वरकल्पाः शारीरा एव रोगाः परिगृह्यन्ते । तदभिभूतस्य विशिष्टधर्मस्थानाऽऽराधनाऽक्षमत्वात् । ज्वरकल्पशारीरदुःखविघ्नजयस्तु सम्यग्धर्मस्थानाऽऽराधनाय प्रभवति । तस्यैवाध्वनि जिगमिषोः पुरुषस्य दिग्मोहकल्पो मोहविघ्नस्तेनाभिभूतस्य पुनः पुनः प्रेर्यमाणस्याप्यध्वनीनैर्न गमनोत्साहः कथञ्चित् प्रादुर्भवति । मोहविघ्नजयस्तु स्वयमेव मार्गसम्यक्स्वरूपविज्ञानात् परैश्चोच्यमानमार्गश्रद्धानान्मन्दोत्साहतापरित्यागेन गमनप्रवृत्तिहेतुर्भवति । इहापि दिङ्मोहगमनविघ्नकल्पो मिथ्यात्वाऽऽदिजनितो मनोविभ्रमः परिगृह्यते । तज्जयस्तु मिथ्यात्वाऽऽदिदोषनिराकरणद्वारेण । मनोविभ्रमापसारकत्वेन प्रस्तुतधर्ममार्गेऽनवरतप्रयाणकप्रवृत्त्या गमनाय संपद्यते । एवं कण्टकज्वरमोहविघ्नजयसमस्त्रिविधो विघ्नजय उक्तः । स एव विशिष्यते-प्रवृत्तिफलः प्रवृत्तिर्धर्मस्थानविषया फलमस्याऽऽशयविशेषस्य विघ्नजयसंज्ञितस्येति प्रवृत्तिफलः ॥ ९ ॥

एवं तृतीयमाशयभेदं प्रतिपाद्य सिद्धिरूपमाशयमाह-

सिद्धिस्तत्तद्धर्म-स्थानावाप्तिरिह तात्त्विकी ज्ञेया ।
अधिके विनयाऽऽदियुता, हीने च दयाऽऽदिगुणसारा ॥ १० ॥

(सिद्धिरित्यादि) सिद्धिर्नामाऽऽशयभेदः, सा च स्वरूपतः कीदृशी ?, तत्तद्धर्मस्थानावाप्तिरिह तात्त्विकी ज्ञेया तस्य तस्य विवक्षितस्य धर्मस्थानस्याऽऽहंसाऽऽदेरवाप्तिः सिद्धिरुच्यते । सा च तात्त्विकादं च विशेषणं तत्तद्धर्मस्थानावाप्तेरतात्त्विकत्वपरिहारार्थम् । न ह्यतात्त्विकी सा सिद्धिर्भावितुमर्हति । सा च सिद्धिरधिके पुरुषविशेषे सूत्रार्थोभयवेदिन्यज्ञस्तज्ञावनामार्गे तीर्थकल्पे गुरौ विनयाऽऽदियुता विनयवैयावृत्यबहुमानाऽऽदिसमन्विता हीने च स्वप्रतिपक्षधर्मस्थानापेक्षया हीनगुणे निर्गुणे वा,

सामान्येनैव प्राणिगणे दयाऽऽदिगुणसारा दयादानव्यसनपतितदुःखापहाराऽऽदिगुणप्रधानाधिकहीनगुणग्रहणाद् मध्यमोपकारफलत्वेऽपि सा सिद्धिरित्युक्तं भवति ॥ १० ॥

एवं सिद्धिमभिधाय तत्फलभूतमेव विनियोगमाह-

सिद्धेरचोत्तरकार्यं, विनियोगेऽवन्ध्यमेतदेतस्मिन् ।
सत्यद्ध्यसंपत्या, सुन्दरमिति तत्परं यावत् ॥ ११ ॥

सिद्धेरनन्तरकार्यं विनियोगः सिद्धेरुत्तरकालभावि । कार्यं विनियोगो नामाऽऽशयभेदो विज्ञेय इति संबन्धनीयम् । अवन्ध्यं सफलं,न कदाचिन्निष्फलमेतद्धर्मस्थानमाहिंसाऽऽदि,एतस्मिन् विनियोगे सति संजातेऽन्वयसंपत्याऽविच्छेदसंपत्या हेतुभूतया सुन्दरमेतत्पूर्वोक्तं धर्मस्थानम् । इतिशब्दो भिन्नक्रमः। परमित्यनेन संयन्धनीयो यावत् (तत्परमिति) तद्धर्मस्थानं परं प्रकृष्टं यावत्संपन्नमनेन विनियोगस्याऽनेकजन्मान्तरसन्तानक्रमेण प्रकृष्टधर्मस्थानावाप्तिहेतुत्वमावेदयति । इदमत्र हृदयम्-अहिंसाऽऽदिलक्षणधर्मस्थानावाप्तौ सत्यां स्वपरयोरुपकारायाऽविच्छेदेन तस्यैव धर्मस्थानस्य विनियोगो व्यापारः स्वात्मतुल्यपरफलकर्तृत्वमभिधीयते । एवं हि स्वयं सिद्धस्य वस्तुनो विनियोगः सम्यक्कृतो भवति । यदि परस्मिन्नपि तत्संपद्यते विशेषेण नियोगो नियोजनमध्यारोपणमिति कृत्वा आशयभेदत्वाच्च विनियोगस्याऽवन्ध्यत्वाप्रतिपादनप्रक्रियया स्वरूपोपकारहेतुत्वं दर्शयति सूत्रकारः ॥ ११ ॥

एवमेतान्प्राणिधानाऽऽदीनभिधाय कथञ्चित् क्रियारूपत्वप्रसावेषामाशयविशेषत्वसमर्थनायाऽऽह-

आशयभेदा एते, सर्वेऽपि हि तत्त्वतोऽवगन्तव्याः ।
भावोऽयमनेन विना, चेष्टा द्रव्यक्रिया तुच्छा ॥ १२ ॥

आशयभेदा आशयप्रकारा एते पूर्वोक्ताः सर्वेऽपि हि सर्व एव कथञ्चित् क्रियारूपत्वेऽपि तदुपलक्ष्यतया तत्त्वतः परमार्थेनाऽवगन्तव्या विज्ञेयाः परिणामविशेषा एते इति । शुभाऽऽशयः पञ्चधा त्रिविधो वेत्युक्तं स किं भावादपरोऽथ भाव एवेत्याशङ्कायामिदमाह-(भावोऽयमिति) अयं पञ्चप्रकारोऽप्याशयो भाव इत्यभिधीयते। अनेन भावेन विना चेष्टा व्यापाररूपा कायवाङ्मनःसङ्गता द्रव्यक्रिया तुच्छा भावविकला क्रिया द्रव्यक्रिया तुच्छा असारा स्वफलाऽसाधकत्वेन ॥ १२ ॥

कस्मात्पुनर्द्रव्यक्रियायास्तुच्छत्वाऽऽपादनेन भावप्राधान्यमाश्रीयत इत्याह-

अस्माच्च सानुबन्धा-च्छुद्ध्यन्तोऽवाप्यते द्रुतं क्रमशः ।
एतदिह धर्मतत्त्वं, परमो योगो विमुक्तिरसः ॥ १३ ॥

(अस्माच्चेत्यादि) अस्मात् पूर्वोक्ताद्भावादाशयपञ्चकरूपात् सानुबन्धात् अनुबन्धः सन्तानस्तेन सह वर्त्तते यो भावः स सानुबन्धस्तद्विनाभूतः,स चाव्यवच्छिन्नसन्तानस्तस्मादेवंविधाद्भावाच्छुद्ध्यन्तःप्रकर्षः शुद्ध्यन्तोऽवाप्यते प्राप्यते द्रुतमविलम्बितं प्रभूतकालत्ययविगमेन क्रमशः क्रमेणाऽनुपूर्व्या तस्मिन् जन्मन्यपरस्मिन्वा कर्मैकदेशप्रकर्षो ज्ञप्यते । ननु चैष एव भावो धर्मपरमार्थ आहोस्विदन्यद्धर्मतत्त्वमित्यारेकायां परस्य निर्वचनमाह-एतदिह धर्मतत्त्वम् । अत्र यद्यपि भावस्य प्रस्तुतत्वादेतदित्यत्र पुंल्लिङ्गतायामेष इति निर्देशः प्राप्नोति तथाऽपि धर्मतत्त्वमित्यस्य परस्य प्रधानापेक्षया नपुंसकनिर्देशोऽर्थस्तु एतदिह प्रस्तुतं भावस्वरूपं धर्मतत्त्वं मन्यतां परमो योग इति। अयं भावः-परमो योगो वर्त्तते,स च कीदृग् ? विमुक्तिरसः विशिष्टा मुक्तिर्विमुक्तिस्तद्विषयो रसः प्रीतिविशेषो यस्मिन् योगे स विमुक्तिरसः; विमुक्तौ रसोऽस्येति वा गमकत्वात् समासः । अथवा-पृथगेव पदान्तरं न विशेषेण,तेनाऽयं भावोविमुक्तौ रसः प्रीतिविशेषो विमुक्तिरस उच्यते । एतदुक्तं भवति-भाव एव धर्मतत्त्वं भाव एव च परमो योगो भाव एव च विमुक्तिरस इति ॥ १३ ॥

ननु च भावाच्छुद्ध्यन्तोऽवाप्यते इत्युक्तं, शुद्धिश्च पापक्षयेण प्रागुक्ता कथं पुनः पापमतीतेऽनादौ काले यद् भूयो भूय आसेवितं तत्यक्त्वा भावमेवाभिलषति न पुनः पापं बहु मन्यते इत्याह-

अमृतरसाऽऽस्वादज्ञः,कुभक्तरसक्षालितोऽपि बहुकालम् ।
त्यक्त्वा तत्क्षणमेनं, बाञ्छत्युच्चैरमृतमेव ॥ १४ ॥

(अमृतेत्यादि) अमृतरसस्याऽऽस्वादस्तं जानातीत्यमृतरसाऽऽस्वादज्ञः कुभक्तरसक्षालितोऽपि कुत्सितानां कदशनानां यो रसस्तेन क्षालितोऽप्यभिरमितोऽपि पुरुषो बहुकालं प्रभूतकालं नैरन्तर्यवृत्त्याऽत एव " कालाध्वनोरत्यन्तसंयोगे " ॥ २ । ३ । ५ ॥ इति द्वितीया । त्यक्त्वा परित्यज्य तत्क्षणं तस्मिन्नेव क्षणे,शीघ्रमेनं कुभक्तरसममृतरसज्ञत्वेन बाञ्छत्यभिलषत्युच्चैरमृतमेव सुरभोज्यममृतमभिधीयते। तद्धि सर्वरससंपन्नत्वात् स्पृहणीयमतितरां भवति ॥ १४ ॥

एवं त्वपूर्वकरणात्, सम्यक्त्वामृतरसज्ञ इह जीवः ।
चिरकालाऽऽसेवितमपि,न जातु बहु मन्यते पापम् ॥१५॥

(एवं त्वित्यादि) एवं त्वपूर्वकरणात् । एवमेवापूर्वकरणादपूर्वपरिणामात् सम्यक्त्वामृतरसज्ञ इह जीवः सम्यक्त्वामृतरसमनुभवद्वारेण जानातीति तज्ज्ञ उच्यते । चिरकालाऽऽसेवितमपि प्रभूतकालाभ्यस्तमपि न जातुचित् न कदाचित् बहु मन्यते बहुमानविषयीकरोति पापं मिथ्यादर्शनमोहनीयं तत्कार्यं वा प्रबन्धनोपघाताऽऽदि। इह च कुभक्तरसकल्पं पापमिथ्यात्वाऽऽदि। अमृतरसाऽऽस्वादकल्पो भावः सम्यक्त्वाऽऽदिरवसेय इति ॥१५॥

सम्यक्त्वामृतरसज्ञो जीवः पापं न बहु मन्यते इत्युक्तम् । तत्र सम्यग्दृष्टिरपि विरतेरभावात् पापं कुर्वन् दृश्यत एवेत्याशङ्क्याऽऽह-

यद्यपि कर्मनियोगात्, करोति तत्तदपि भावशून्यमलम् ।
अत एव धर्मयोगात्, क्षिप्रं तत्सिद्धिमाप्नोति ॥ १६ ॥

यद्यपि कथञ्चित् कर्मनियोगात् कर्मव्यापारात् करोति विदधाति तत् पापं तद्भावशून्यमलं तदपि क्रियमाणं पापं भावशून्यमिह पापवृत्तिहेतुर्भावः क्लिष्टाध्यवसायस्तेन शून्यमलमत्यर्थं सम्यग्दृष्टिर्हि पापं कुर्वाणोऽपि न भावतो बहु मन्यते । यथेदमेव साध्विति। अत एव पापाऽबहुमानद्वारेण। धर्मयोगाद्धर्मोत्साहाद्धर्मसंबन्धाद्वा क्षिप्रमचिरेण ततसिद्धिमाप्नोतीति धर्मनिष्पत्तिमवाप्नोतीति ॥ १६ ॥ षो० ३ विव० ।

(११) अस्य स्वलक्षणमिदं धर्मस्येत्युक्तं प्राक् तत्रास्यैव धर्मतत्त्वस्य विस्तरेण लिङ्गान्याह-

सिद्धस्य चास्य सम्यग्, लिङ्गान्येतानि धर्मतत्त्वस्य ।
विहितानि तत्त्वविद्भिः, सुखावबोधाय भव्यानाम् ॥१॥

लिङ्गस्य च निष्पन्नस्य चास्य प्रत्यक्षीकृतस्य सम्यगवैपरीत्येन प्रशस्तानि वा लिङ्गानि लक्षणान्येतानि वक्ष्यमाणानि धर्मतत्त्वस्य धर्मस्वरूपस्य विहितानि शास्त्रेऽभिहितानि तत्त्वचिन्तकैः परमार्थवेदिभिः सुखावबोधाय सुखपरिज्ञानाय येन तानि सुखेनैव बुद्ध्यन्ते ज्ञप्यानां योग्यानाम् ॥ १ ॥

तान्येव लिङ्गानि स्वरूपतो ग्रन्थकारः पठति-

औदार्यं दाक्षिण्यं, पापजुगुप्साऽथ निर्मलो बोधः ।
लिङ्गानि धर्मसिद्धेः, प्रायेण जनप्रियत्वं च ॥ २ ॥

उदारस्य भाव औदार्यं वक्ष्यमाणलक्षणं, दक्षिणोऽनुकूलस्तद्भावो दाक्षिण्यं निर्देक्ष्यमाणस्वरूपं, पापजुगुप्सा पापपरिहारः । अथ निर्मलो बोधोऽभिधास्यमानस्वरूपः, लिङ्गानि चिह्नानि धर्मसिद्धेर्धर्मनिष्पत्तेः प्रायेण बाहुल्येन जनप्रियत्वं च लोकप्रियत्वं च ॥ २ ॥

साम्प्रतमौदार्यलक्षणमाह-

औदार्यं कार्पण्य-त्यागाद्विज्ञेयमाशयमहत्त्वम् ।
गुरुदीनाऽऽदिष्वौचि-त्यवृत्ति कार्ये तदत्यन्तम् ॥ ३ ॥

औदार्यं नाम धर्मतत्त्वलिङ्गं, कार्पण्यत्यागात् कृपणभावपरित्यागादतुच्छवृत्त्या विज्ञेयमाशयमहत्त्वमाशयस्याध्यवसायस्य महत्त्वं विपुलत्वम् । तदेव विशिष्यते-गुरुदीनाऽऽदिष्वौचित्यवृत्ति गुरुषु गौरवार्हेषु तद्विकारे । यथोक्तम्-"माता पिता कलाऽऽचार्यः, एतेषां ज्ञातयस्तथा । वृद्धा धर्मोपदेष्टारो, गुरुवर्गः सतां मतः ॥१॥" दीनाऽऽदिषु चानाधारेषु यदौचित्यवृत्ति औचित्येन वृत्तिरस्मिन्नौदार्ये आशयमहत्त्वे वा तदौचित्यवृत्ति, कार्ये कार्यविषये तदौदार्यमाशयमहत्त्वं वा अत्यन्तमतिशयेन औचित्यवृत्तिकारि वा, एतद् गुर्वादिषु ॥ ३ ॥ षो० ४ विव० । (दाक्षिण्यम् [४] इत्यादिना दाक्षिण्यलक्षणं 'दक्खिण्ण' शब्दे २४४१ पृष्ठेऽत्रैव भागे गतम्) (पापजुगुप्सा [५] इत्यादिना पापजुगुप्सालक्षणं 'पावजुगुंछा' शब्दे वक्ष्यते) (निर्मलं [६] इत्यादिना निर्मलबोधलक्षणं 'णिम्मलबोहत्तं' शब्देऽस्मिन्नेव भागे २०७४ पृष्ठे गतम्) (युक्तम् [७] इत्यादिना जनप्रियत्वलक्षणं 'जणप्पियत्त' शब्देऽस्मिन्नेव भागे १३८८ पृष्ठे समुक्तम्)

एवं धर्मतत्त्वलिङ्गान्यौदार्याऽऽदीनि विधिमुखेन प्रतिपाद्य धर्मतत्त्वव्यवस्थितानां पुंसां व्यतिरेकमुखेन विषयतृष्णाऽऽदीनां स्वरूपं प्रतिपिपादयिषुर्दृष्टान्तपूर्वकं विकाराभावमाविर्भावयितुमाह-

आरोग्ये सति यद्व-द्व्याधिविकारा भवन्ति नो पुंसाम् ।
तद्वद्धर्माऽऽरोग्ये, पापविकारा अपि ज्ञेयाः ॥ ८ ॥

(आरोग्ये इत्यादि) आरोग्ये रोगाभावे सति जायमाने यद्वदिति यथा व्याधिविकारा रोगविकारा भवन्ति नो पुंसामारोग्यवतां तद्वदिति । तथा धर्माऽऽरोग्ये धर्मरूपमारोग्यं तस्मिन् सति पापविकारा अपि वक्ष्यमाणा न भवन्तीति विज्ञेयाः । ८ ।

पापविकारा ये न भवन्ति तान् विशेषतो निर्दिशति-

तत्रास्य विषयतृष्णा, प्रभवत्युच्चैर्न दृष्टिसंमोहः ।
अरुचिर्न धर्मपथ्ये, न च पापा क्रोधकणमूर्तिः ॥ ९ ॥

तदेवं स्थिते धर्मतत्त्वयुक्तस्य नास्य पुरुषस्य विषयतृष्णा वक्ष्यमाणलक्षणा प्रभवति जायते उच्चैरत्यर्थं न दृष्टिसंमोहो वक्ष्यमाणलक्षण एव अरुचिरभिलाषाभावो न धर्मपथ्ये न धर्मपथ्यविषये, न च पापा स्वरूपेण पापहेतुर्वा क्रोधकणमूर्तिः क्रोध एव कणमूर्तिः, कणडुशब्दः कणड्वादिषु पठ्यते, तस्य क्विप्प्रत्यस्य रूपमेतत् ॥ ९ ॥ षो० ४ विव० । (विषयतृष्णालक्षणं 'विसयतण्हा' शब्दे वक्ष्यते) (दृष्टिसंमोहश्च 'दिट्ठिसंमोह' शब्देऽस्मिन्नेव भागे २५१७ पृष्ठे गतः)

एवं दृष्टिसंमोहमभिधाय तदनन्तरं धर्मपथ्यविषयाया अरुचेर्लिङ्गमाह-

धर्मश्रवणेऽवज्ञा, तत्त्वरसाऽऽस्वादविमुखता चैव ।
धार्मिकसत्त्वाऽऽसक्ति-श्च धर्मपथ्येऽरुचिर्लिङ्गम् ॥१०॥

(धर्मेत्यादि) धर्मस्य श्रवणमविपरीतार्थमाकर्णनं तत्राऽवज्ञाऽनादरस्तत्त्वे परमार्थे रस आसक्तिहेतुः तस्याऽऽस्वादस्तस्मिन् विमुखता वैमुख्यं तत्त्वरसाऽऽस्वादविमुखता चैव, धार्मिका ये सत्त्वास्तैरसक्तिरसंयोगोऽसंपर्को धार्मिकसत्त्वासक्तिश्च । धर्मपथ्ये धर्मः पथ्यमिव तस्मिन्नरुचेर्लिङ्गमिति प्रत्येकमभिसंबन्धः करणीयः ॥ १० ॥

न च पापा क्रोधकणमूर्तिरित्युक्तं तस्याश्चिह्नमाह-

सत्येतरदोषश्रुति-भावादन्तर्बहिश्च यत् स्फुरणम् ।
अविचार्य कार्यतत्त्वं, तच्चिह्नं क्रोधकणडूतेः ॥ ११ ॥

(सत्येत्यादि) सत्यदोषश्रुतिभावादसत्यदोषश्रुतिभावाच्चान्तर्बहिश्चाश्रयान्तरपरिणाममाश्रित्यान्तर्बहिर्गताऽप्रसन्नताऽऽद्याकारद्वारेण बहिश्च यत् स्फुरणं वा वृद्धिश्चलनं वा अविचार्यानालोच्य कार्यतत्त्वं कार्यपरमार्थं तच्चिह्नं लक्षणं क्रोधकणमूर्तेः क्रोधकणस्य ॥ ११ ॥

एवमेते विषयतृष्णाऽऽदयो व्यतिरेकमुखेनोक्तास्तदभावमुपदर्शयन् मैत्र्यादिगुणसंभवमाह-

एते पापविकाराः, न प्रभवन्त्यस्य धीमतः सततम् ।
धर्मामृतप्रभावा-द्भवन्ति मैत्र्यादयश्च गुणाः ॥ १२ ॥

(एते इत्यादि) एते पापविकाराः पूर्वोक्ता न प्रभवन्ति न जायन्तेऽस्य पुरुषस्य धीमतो बुद्धिमतः सततमनवरतं धर्मामृतप्रभावाद्धर्म एवामृतं धर्मामृतं तत्प्रभावाद्भवन्ति संपद्यन्ते मैत्र्यादयश्च गुणा वक्ष्यमाणस्वरूपाः ॥ १२ ॥

मैत्र्यादीनामेव लक्षणमाह-

परहितचिन्ता मैत्री, परदुःखविनाशिनी तथा करुणा ।
परसुखतुष्टिर्मुदिता, परदोषोपेक्षणमुपेक्षा ॥ १३ ॥

(परेत्यादि) परेषां प्राणिनां हितचिन्ता हितचिन्तनं मैत्री, हेयेति सर्वत्र वाक्यशेषः । परेषां दुःखं तद्विनाशिनी तथा करुणा कृपा, परेषां सुखं तेन तस्मिन् वा तुष्टिः परितोषोऽप्रीतिपरिहारो मुदिता, परेषां दोषा अविनयाऽऽदयः प्रतिकर्तुमशक्यास्तेषामुपेक्षाभवधीरणमुपेक्षा, संभवत्प्रतीकारेषु तु दोषेषु नोपेक्षा विधेया ॥ १३ ॥

एवं मैत्र्यादिगुणान् भावनारूपानभिधाय धर्मतत्त्वलक्षणोपसंहारं चिकीर्षुराह-

एतज्जिनप्रणीतं, लिङ्गं खलु धर्मसिद्धिमज्ञप्तेः ।
पुण्याऽऽदिसिद्धिसिद्धेः, सिद्धं सत्प्रतिहतं सत्केतुभावेन ॥ १४ ॥

(एतदित्यादि) एतत् पूर्वोक्तं सर्वमौदार्याऽऽदिविधिप्रतिषेधविषयं जिनप्रणीतं जिनोक्तं लिङ्गं लक्षणं, खलुशब्दो वाक्यालङ्कारे, धर्मसिद्धिमतः धर्मनिष्पत्तिमज्ञप्तेः प्राणिनः पुण्याऽऽदिसिद्धिसिद्धेः पुण्याऽऽद्युपायनिष्पत्तेः, सिद्धं प्रतिष्ठितं, सत्केतुभावेन सत्का-

रणत्वेनाबन्ध्यहेतुत्वेनेति यावत्। पुण्योपायाश्चत्वारः। यथोक्तम्-" दया भूतेषु वैराग्यं, विधिदानं यथोचितम्। विशुद्धा शीलवृत्तिश्च। पुण्योपायाः प्रकीर्त्तिताः ॥ १ ॥" आदिग्रहणात् ज्ञानयोगपरिग्रहः, ज्ञानयोगोपायपरिनिष्पत्तेश्च सद्धेतुत्वेन सिद्धमेतल्लिङ्गमिति ।१६। षो० ४ विव० ।

(१२) धर्मद्रुममूलप्रतिपादनपरां गाथामाह-

जीवदय सच्चवयणं, परधणपरिवज्जणं सुसीलं च ।
खंती पंचिंदियनि-ग्गहो य धम्मस्स मूलाइं ॥ १ ॥

जीवाश्चेतनाऽऽदिलिङ्गत्वतः कृत्वा एकेन्द्रियाऽऽदयः,तेषां दया रक्षणं जीवदयेति।=ह्रस्वत्वं प्राकृतप्रभवम्। धर्ममूलं भवतीति सर्वत्र क्रियाऽध्याहारः कार्यः। सत्यं यथार्थं वचनं सत्यवचनं,तदपि परे आत्मव्यतिरिक्ता जनास्तेषां धनं वित्तं परधनं तस्य परि समन्ताद्वर्जनं परिहरणं परधनपरिवर्जनं, सुष्ठु शोभनं शीलं सदाचारश्चतुर्थव्रतं वा सुशीलं, भावप्रधानत्वान्निर्देशस्य। सदाचारत्वं चतुर्थव्रतनिःकलङ्कता चेत्यर्थः। क्षान्तिः कषायोपशमः, पञ्चेति पञ्चसंख्यानीन्द्रियाणि स्पर्शनरसनघ्राणचक्षुःश्रोत्राऽऽख्यानि,तेषां निग्रहः, सविषयग्रहणत्यजतावपि रागद्वेषाकरणं व्यावृत्तं धर्ममूलं भवति। यद्वा-तानि सर्वाण्यपि धर्मैलक्षणवृक्षस्य मूलानीव मूलानि। अयमत्र भावार्थः-चकारस्यैवकारार्थस्येह संबन्धादेतानि च प्रत्येकं समुदितानि धर्ममहाद्रुमस्य नरसुरशिवसौख्यकुसुमफलप्रदस्य मूलानि, न तु पुनः परपरिकल्पितयागपञ्चाग्नितपःशूल्यारण्यनिवासकृतकारिसङ्कभक्ताऽऽदिदानप्रभृतीनि तेषां जीवघातनिष्पाद्यत्वेनाधर्मरूपत्वादिति गाथार्थः। दर्श० २ तत्त्व। "भक्ष्याभक्ष्यविवेकाच्च,गम्यागम्यविवेकतः। तपोदयाविशेषाच्च,स धर्मो व्यवतिष्ठते॥१॥" द्वा०७द्वा०। धर्मावलम्बनानि-"धम्मं णं चरमाणस्स पंच निस्साठाणा पण्णत्ता। तं जहा-छक्काया गणो राया गाहावई सरीरं।" (अस्य व्याख्या 'णिस्साठाण' शब्देऽस्मिन्नेव भागे २१४७ पृष्ठे द्रष्टव्या)"दोहिं ठाणेहिं आया केवलिपण्णत्तं धम्मं लभेज्ज सवणयाए।" स्था० २ ठा० ४ उ०। (विशेषः 'खओवसमिय' शब्दे तृतीयभागे ६७० पृष्ठे गतः) (आरम्भपरिग्रहाभ्यां विरताऽविरतस्य धर्मलाभाभावौ ' आरंभ ' शब्दे द्वितीयभागे ३७१ पृष्ठे द्रष्टव्यौ)

(१३) धर्मानधिकारिण आह-

सुत्तेण चोइओ जो, अप्पं उद्दिसिअ तं ण पडिवज्जे ।
सो तत्तवायबज्झो, न होइ धम्मम्मि अहिगारी ॥ ९ ॥

सूत्रेण चोदित इदमित्थमुक्तमेवं यः सत्त्वः अन्यं प्राणिनमुद्दिश्याऽऽत्मतुल्यमुदाहरणतया तत्र प्रतिपद्यते सौत्रमुक्तं, स एवंभूतस्तत्त्ववादबाह्यः परलोकमङ्गीकृत्य परमार्थवादबाह्यो न भवति धर्मे सकलपुरुषार्थहेतावधिकारी, सम्यग्विवेकाभावादिति गाथार्थः। पं० व० ४ द्वार। अथ कलिकालिमामलिनान्तराऽऽत्मानः सन्तः सन्तोऽपि किमेवंविधश्रावकश्रमणगुणगणं श्रोतुं श्रद्धां कर्तुं वा शक्नुवन्ति न सर्वेऽपीत्याह-(रयणत्थिणो वाणिआदि) अथवा-किमिदंयुगीनमानवाः सर्वैरेकान्ततो निराकाङ्क्षकृतार्थवज्रस्वेत्थंभूतगुणगणमदातुं दातुं समर्थो भवन्ति । दर्श० ३ तत्त्व ।

(१४) अथ सद्धर्मग्रहणयोग्यतामाह-

संविग्नस्तच्छुनेरेवं, ज्ञाततत्त्वो नरोऽनघः ।
दृढं स्वशक्त्या जातेच्छः, संग्रहेऽस्य प्रवर्तते ॥ ५० ॥

एवमुक्तनीत्या (तच्छुनेः) तस्याः धर्मदेशनायाः श्रुतेः अवणाऽनन्तरः श्रोता पुमान् अनघो व्यावृत्ततत्त्वप्रतिपत्तिबाधकमिथ्यात्वमालिन्यः सन्नत एव कृततत्त्वः करकमलतलाऽऽकलितनिस्तलास्थूलामलमुक्ताफलवच्छास्त्रालोचनयैनाऽऽलोकितसकलजीवाऽऽदिवस्तुवादः, तथा-(संविग्नः) संवेगमुक्तलक्षणं प्राप्तः सन् जातेच्छो लब्धचिकीर्षापरिणामोऽर्थाद्धर्मे (दृढम्) अतिसूक्ष्माऽऽलोचपूर्वं यथा स्यात्तथा स्वशक्त्या स्वसामर्थ्येन हेतुभूतेन अस्य धर्मस्य संग्रहे सम्यग् वक्ष्यमाणयोगवन्दनाऽऽदिशुद्धिरूपविधिपूर्वं ग्रहे प्रतिपत्तौ (प्रवर्तते) प्रवृत्तिमाधत्ते। अदृढमयथाशक्ति च धर्मग्रहणप्रवृत्तौ भङ्गसंभवेन प्रत्युतानर्थसंभव इति दृढस्वशक्त्योर्ग्रहणं कृतमिति विशेषगृहिधर्मग्रहणयोग्यतापतिपादिता भवति शास्त्रान्तरे चैकविंशत्या गुणैर्धर्मग्रहणार्हो भवतीति प्रतिपादितम्। ध० १ अधि०। (ते च गुणा ' धम्मरयण ' शब्दे वक्ष्यन्ते)

(१५)धर्माधिकारिणः-

जे पुव्वुट्ठाई णो पच्छा णिवाती, जे पुव्वुट्ठाई पच्छा णिवाती, जे णो पुव्वुट्ठाई णो पच्छा णिवाती, सेऽविहारिसिए मिया, जे परिण्णाय लोगमण्णे सयंति ॥ १५९ ॥

यः कश्चिद्विदितसंसारस्वभावतया धर्मैकचरणैकप्रवणमनाः पूर्वं प्रव्रज्यावसरे संयमानुष्ठानेनोत्थातुं शीलमस्येति पूर्वोत्थायी, पश्चाच्च श्रद्धासंवेगतया विशेषेण वर्द्धमानपरिणामो नो निपाती,निपतितुं शीलमस्येति विगृह्य णिनिः। निपतनं वा निपातः, सोऽस्यास्तीति निपाती,सिंहवया निष्क्रान्तः सिंहनया विहारी च गणधराऽऽदिवत्प्रथमो भङ्गः। द्वितीयभङ्गं सूत्रेणैव दर्शयन्नाह-पूर्वमुत्थातुं शीलमस्येति पूर्वोत्थायी, पुनर्विचित्रत्वात्कर्मपरिणतेस्तथाविधभावितव्यतानियोगात्पश्चान्निपाती स्यात्, नन्दिषेणवत्। कश्चिद्दर्शनतोऽपि गोष्ठामाहिलवदिति । तृतीयभङ्गस्य चाभावादनुपादानं, स चायम-(जे णो पुव्वुट्ठायीत्यादि) नो पूर्वोत्थायी पश्चान्निपाती न। तथा ह्युत्थाने सति निपातोऽनिपातो वा चिन्त्यते, सति धर्मिणि धर्मचिन्ता, तदुत्थानप्रतिषेधे च दूरोत्सादितैव निपातचिन्तेति । चतुर्थभङ्गं दर्शयन्नाह यो हि नो पूर्वोत्थायी न च पश्चान्निपाती सोऽविरत एव गृहस्थः सन्नोत्थायी भवति, सम्यग्विरतेरभावान्नापि पश्चान्निपाती, उत्थानमन्तरेणा तत्त्वान्निपातस्य,शाक्याऽऽदयो वा चतुर्थभङ्गपतिता द्रष्टव्याः, तेषामप्युभयासङ्गावादिति। ननु च गृहस्था एव चतुर्थभङ्गपतिता युक्ता वक्तुं, तथाहि-तेषां सावद्ययोगानुष्ठानेनानुत्थानतया प्रतिज्ञाभङ्गराऽऽरोपाभावान्निपाताभावः, शाक्याऽऽदिरपि चतुर्थभङ्गपतित इत्यत आह-(सेऽविइत्यादि)सोऽपि शाक्याऽऽदिर्गणः पञ्चमहाव्रताराऽऽरोपणाभावेन सावद्ययोगानुष्ठानतया नो पूर्वोत्थायी, निपातस्य च तत्पूर्वकत्वान्नो पश्चान्निपातीत्यतस्तादृश एव गृहस्थतुल्य एव स्यात्, आश्रवद्वाराणामुभयेषामप्यसंवृतत्वात्, उदायिनृपमारकवत्। अन्येऽपि ये सावद्यानुष्ठायिनस्तेऽपि तादृक्ष एवेति दर्शयन्नाह-(जे परिण्णाय इत्यादि) येऽपि स्वयूथ्याः पार्श्वस्थाऽऽद्यो द्विविधयाऽपि परिज्ञया लोकं परिज्ञाय पुनः पचनपाचनाऽऽद्यर्थं तमेव लोकमन्वाश्रिता अन्वेषयन्ति वा तेऽपि गृहस्थतुल्या एव नवेयुः ॥ १५९ ॥

स्वमनीषिकापरिहारार्थमाह-

एयं णियाय मुणिणा पवेदितं, इह आणाकंखी पंडिते अणिहे,पुव्वावररायं जयमाणे, सया सीलं संपेहाए सुणिया भवे अकामे अझंझे, इमेण चेव जुज्झाहि, किं ते जुज्झेण बज्झओ ?॥ १५३ ॥

(एयं इत्यादि) एतद् यदुत्थाननिपाताऽऽदिकं प्रागुपन्यस्तं तत्केवलज्ञानावलोकनेन (णियाय त्ति) ज्ञात्वा मुनिना तीर्थकृता प्रवेदितं कथितम्। इदं चान्यत्प्रवेदितमित्याह-(इह इत्यादि) इहास्मिन्मौनीन्द्रे प्रवचने व्यवस्थितः सन् आज्ञां तीर्थकृतोपदेशमाकाङ्क्षितुं शीलमस्येत्याज्ञाकाङ्क्षी आगमानुसारप्रवृत्तिकः,कश्चिद्भवी भूतः-पण्डितः सदसद्विवेकज्ञोऽस्तिहः स्नेहरहितो रागद्वेषविप्रमुक्तोऽहर्निशं गुरुनिर्देशवर्त्ती यत्नवान् स्यादित्येतदाह-(पुव्वावर इत्यादि) पूर्वरात्रे रात्रेः प्रथमो यामोऽपररात्रे रात्रेः पाश्चात्य एतद्यामद्वयमपि यतमानः सदाचारमाचरेत्, मध्यवर्त्तियामद्वयमपि यथोक्तविधिना स्वपन् वैरात्रादिकं विध्यात्, रात्रियतनाप्रतिपादनेन चाहश्चापि प्रतिपादितैव भवति, आद्यन्तग्रहणे मध्यग्रहणस्यावश्यंभावित्वात् । किञ्च-(सया सीलं इत्यादि) सदा सर्वकालं ' शीलम् ' अष्टादशभेदसहस्रसङ्ख्यं, संयमं वा । यदि वा चतुर्धा शीलम्-महाव्रतसमाधानं तिस्रो गुप्तयः पञ्चेन्द्रियदमः कषायनिग्रहश्चेत्येतत्शीलं संप्रेक्ष्य मोक्षाङ्गतयाऽनुपालयेत नाक्षिनिमेषमात्रमपि काल प्रमादवशगो भूयात्। कश्च शीलसंप्रेक्षकः स्यादित्याह-यो हि श्रुत्वा शीलसंप्रेक्षणफलं निःशीलनिर्वृतानां च नरकाऽऽदिपातविपाकमाकर्ण्याऽऽगमात्, ' भवेत् ' स्याद् अकाम इच्छामदनकामरहित इति। तथा नास्य झंझा माया, लोभेच्छा विद्यत इत्यझंझः, कामझंझाप्रतिषेधाच्च मोहनीयोदयः प्रतिषिद्धः, तत्प्रतिषेधाच्च शीलवान् स्यादिति, एतदुक्तं भवति-धर्मं श्रुत्वा स्याद् अकामोऽझंझश्चेत्यनेन चोक्तगुणा गृहीताः, उपलक्षणार्थत्वाच्च मूलगुणा अपि गृहीताः, ततः स्याद् अहिंसकः सत्यवादीत्यादयपि द्रष्टव्यम्। ननु चान्यजीवाच्छरीरमित्येवं भावनायुक्तस्यानिगूहीतबलवीर्यस्य पराक्रममाणस्याऽष्टादशशीलाङ्गसहस्रधारिणोऽपि मे यथोपदेशं प्रवर्त्तमानस्यापि नाशेषकर्ममलापगमोऽद्यापि भवतीत्यतस्तथाभूतमसाधारणकारणमाचक्ष्व, येनाहमाश्वेवाशेषमलकलङ्करहितः स्याम्,अहं च भवदुपदेशादपि सिंहेनापि सह युद्धेय, न मे कर्मक्षयार्थं प्रवृत्तस्य किञ्चिदशक्यमस्तीत्यत्रोत्तरं सूत्रेणैवाऽऽह-(इमेण चेव इत्यादि) अनेनैवौदारिकेण शरीरेणेन्द्रियनोइन्द्रियाऽऽत्मकेन विषयसुखपिपासुना स्वैरिणा सार्द्धं युध्यस्व, इदमेव सन्मार्गावतारणतो वशीकुरु, किमपरेण बाह्यतस्ते युद्धेन ?, अन्तरारिषड्वर्गैकमरिपुजयाच्चा सर्वं सेत्स्यति भवतो, नातोऽपरं दुष्करमस्तीति ॥ १५३ ॥

किं त्वियमेव सामग्री अगाधसंसारार्णवे पर्यटतो भवकोटिसहस्रेष्वपि दुष्प्रापेति दर्शयितुमाह-

जुज्झारिहं खलु दुल्लहं जहित्थकुसलोहिं परिण्णाविवेगे भासिते, चुते हु बाले गब्भातिसु रज्जति, अस्सिं चेयं पवुच्चति, रूवंसि वा छणंसि वा, से हु एगे संविद्धपहे मुणी, अणुहा लोगमुवेहमाणे, इय कम्म परिण्णाय सव्वसो से ण हिंसति, संजमती णो पगब्भती, उवेहमाणो पत्तेयं सायं, बहिया एस णारभे कंचणं सव्वलोए एगप्पमुहे विदिसपतिण्णे णिव्विण्णचारी अरए पयासु ॥ १५४ ॥

(जुज्झारिहं इत्यादि) एतदौदारिकं शरीरं भावयुद्धार्हं, खलुरवधारणे। स च भिन्नक्रमो, दुर्लभमेव दुष्प्रापमेव, उक्तं च-"ननु पुनरिदमतिदुर्लभ-मगाधसंसारजलधिविभ्रष्टम। मानुष्यं खद्योतक-तडिल्लताविलसितप्रतिमम् "॥ १ । इत्यादि । पाठान्तरं वा-"युज्झारियं च दुल्लहं।"तत्रानार्ये संग्रामयुद्धं,परीषहाऽऽदिरिपुयुद्धं त्वार्यं,तद् दुर्लभमेव तेन युध्यस्व,ततो भवतोऽशेषकर्ममलक्षयलक्षणो मोक्षोऽचिराद्देव भावीति भावार्थः। तच्च भावयुद्धार्हं शरीरं लब्ध्वा कश्चित्तेनैव भवेनाशेषकर्ममक्षयं विधत्ते,मरुदेवीस्वामिनीव.कश्चित् सप्तभिरष्टभिर्वा जन्मभैरन्तवत्,कश्चिदपार्द्धपुद्गलपरावर्त्तेन, अपरो न सेत्स्यत्येव, किमित्येवं यत आह-(जहाकुसलेहिं इत्यादि) यथा येन प्रकारेणात्रास्मिन् संसारे कुशलैस्तीर्थकृद्भिः परिज्ञा विवेकः परिज्ञानविशिष्टता, कस्यचित्कोऽप्यध्यवसायः संसारवैचित्र्यहेतुर्भावितः प्रज्ञापितः स च मतिमता तथैवाभ्युपगन्तव्य इति। तदेव परिज्ञानानात्वं दर्शयन्नाह-(चुए इत्यादि) लब्ध्वाऽपि दुर्लभं मनुजत्वं प्राप्य च मोक्षैकगमनहेतुं धर्मं पुनरपि कर्मोदयात् तस्माद् च्युतो बालः अज्ञः गर्भाऽऽदिषु रज्यते, गर्भ आदिर्येषां कुमारयौवनावस्थाविशेषाणां ते गर्भाऽऽद्यः,तेष्वेव गार्ध्यमुपयाति,यथैभिः सार्द्धं मम वियोगो मा भूत् इत्येतदध्यवसायी भवति। यदि वा-धर्मात् च्युतस्तत्करोति येन गर्भादिषु यातनास्थानेषु सङ्गमुपयाति।" रिज्जइ त्ति " वा क्वचित्पाठः, रीयते गच्छतीत्यर्थः । स्यात्-क्वोक्तमिदम ?, यत्प्राग् व्यावर्णितमित्याह-(अस्सिं चेयं पवुच्चइ रूवंसि वा छणंसि वा से हु एगे संविद्धपहे मुणी, अणुहा लोगमुवेहमाणे, इय कम्मं परिण्णाय सव्वसो से ण हिंसति संजमती णो पगब्भती) अस्मिन्नित्याहते प्रवचने एतत्पूर्वोक्तं प्रकर्षेणोच्यते प्रोच्यते। एतच्च वक्ष्यमाणमेवोच्यते इति दर्शयन्नाह-रूपे चक्षुरिन्द्रियविषये अध्युपपन्नो, वाशब्दादन्यत्र वा स्पर्शरसाऽऽदौ क्षणे प्रवर्तते, 'क्षण'हिंसायां,क्षणनं क्षणो हिंसा,तस्यां प्रवर्त्तते,वाशब्दादन्यत्र चानुवर्त्तेयाऽऽदाविति, रूपप्रधानत्वाद्विषयाणां रूपित्वाच्च रूपोपादानम्, आश्रवद्वाराणां च हिंसाप्रधानत्वात्तदादित्वाच्च तदुपादानमिति।बालो रूपाऽऽदिविषयनिमित्तं धर्मच्युतः सन् गर्भाऽऽदिषु रज्यते,अत्राऽऽर्हते मार्गे उदमुच्यते, यस्तु पुनर्गर्भाऽऽदिगमनहेतुं ज्ञात्वा विषयसङ्गं धर्मादच्युतो हिंसाद्याश्रवद्वारेभ्यो निवर्त्तते स किंभूतः स्यादित्याह- स जितेन्द्रियो, दुरवधारणे,स एवैक अद्वितीयो मुनिर्ज्ञानत्रयमन्तः संविरूपथः सम्यग्विद्धस्ताडितः क्षुण्णः पन्था मोक्षमार्गो ज्ञानदर्शनचरिताऽऽख्यो येन स तथा ।(संविद्धनप त्ति)वा पाठः संविरूपनयो बहुभय इत्यर्थः, यो ह्याश्रवद्वारेभ्यो हिंसादिभ्यो निवृत्तः स एव मुनिः कृत्स्नमोक्षमार्गः इति भावार्थः।किञ्च-अन्येन प्रकारेणान्यथा विषयकषायाभिभूतं हिंसाऽऽदिकर्मसु प्रवृत्तं लोकमगृहस्थं लोकं वा पाखण्डिलोकं वा,पचनपाचनैर्द्वैशिकसञ्चिताऽऽहाराऽऽदिप्रवृत्तमुत्प्रेक्ष्यमाणोऽन्यथा वाऽऽत्मानं निवृत्ताशुभव्यापारमुत्प्रेक्ष्यमाणः संविरूपथो मुनिः स्यादिति। लोकं चान्यथोत्प्रेक्ष्य किं कुर्यादित्याह-इति पूर्वोक्तैर्हेतुभिर्यद्यस्मात् कर्म तदुपादानं च सर्वतः परिज्ञाय रूपविषया प्रत्याख्यानपरिज्ञायापि सर्वतः परिहरेत्। कथं परिहरतीत्याह-(से ण हिंस-

ति) स कर्मपरिहर्त्ता कायवाङ्मनोभिर्न हिनस्ति जन्तून्, न घातयत्यपरैर्नाप्यनुमन्यते। किञ्च-पापोपादानप्रवृत्तमात्मानं संयमयति, सप्तदशप्रकारं वा संयमं करोति संयमयति, आचारकिरवन्तं चैनत्-संयम इवाऽऽचरति संयमयति। किं च-(नो पगब्भइ) 'गल्भ' धार्ष्ट्ये, असंयमकर्मसु प्रवृत्तः सन् न-प्रगल्भत्वमायाति, रहस्यप्यकार्यप्रवृत्तो जिह्रेति न धृष्टतामवलम्बते इति, उपलक्षणार्थत्वादस्य क्षुण्णोञ्छपथो मुनिर्न कुप्यति न जात्यादिमानमुद्वहति, न वञ्चनां विधत्ते, न लुभ्यति। किमाकलय्यैतत् कुर्यादित्याह-(जवेहमाणे त्ति) जत्प्रेक्षमाणोऽवगच्छन् प्रत्येकं प्राणिनां सातं मनोऽनुकूलं नान्यसुखेनान्यः सुखीति नाऽपि परदुःखेन दुःखी, अतः प्राणिनो न हिंस्यात्। इति प्राणिनां प्रत्येकं सातमुत्प्रेक्षमाणश्च किं कुर्यादित्याह-वर्ण्यते प्रशस्यते येन स वर्णः साधुकारस्तदादेशी वर्णाऽऽदेशी वर्णाभिलाषी सन्नारभते कञ्चन पापाऽऽरम्भं सर्वस्मिन्नपि लोके, यदि वा- तपः संयमाऽऽदिकमप्यारम्भं यशः कीर्त्यर्थं नाऽऽरभते, प्रवचनोद्भावनार्थं त्वारभते।

तदुद्भावकाश्चामी-

" प्रावचनी धर्मकथी, वादी नैमित्तिकस्तपस्वी च।
विद्यासिद्धः ख्यातः, कविरपि चोद्भावकास्त्वष्टौ ॥ १ ॥ "

यदि वा वर्णी-रूपं तदादेशी-तदभिलाषुकः, नोद्वर्तनाऽऽदिकाः क्रिया आरभेत्, किंभूतः सन्नेतत् कुर्यादित्याह-(एगप्पमुहे) एको मोक्षोऽशेषमलकलङ्करहितत्वात् संयमो वा रागद्वेषरहितत्वात्तत्र प्रगतं मुखं यस्य स तथा, मोक्षे तदुपाये वा दत्तैकदृष्टिर्न कञ्चन पापाऽऽरम्भमारभेत इति। किञ्च-मोक्षसंयमाभिमुखा दिक् ततोऽन्या विदिक् तां प्रकर्षेण तीर्णो विदिक्प्रतीर्णः, स चैवंभूतः सन्नारम्भी स्यात्, कुमार्गपरित्यागेन न पापारम्भान्वेषी भवतीत्यर्थः। किञ्च-(निव्विण्णचारी) चरणं चारः अनुष्ठानं, निर्विण्णस्य चारो निर्विण्णचारः, सोऽस्यास्तीति निर्विण्णचारी, कुत इति चेत्?, यतः प्रजास्वरतः प्रजायन्त इति प्रजाः प्राणिनः, तत्रारतः तदारम्भाद् निवृत्तो निर्ममत्वो वा, यश्च शरीराऽऽदिष्वपि ममत्वरहितः स निर्विण्णचार्येव भवति, यदि वा प्रजाः स्त्रियस्ताः स्वरत आरम्भेऽपि निर्वेदमागच्छति, कारणाभावे कार्यस्याप्यभावादिति।

यश्च प्रजास्वरक्त आरम्भरहितः, स किंभूतः स्यादित्याह-

से वसुमं सव्वसमण्णागयपण्णाणेणं अप्पाणेणं अकरणिज्जं पावं कम्मं तं णो अण्णेसी, जं सम्मंति पासहा तं मोणं ति पासहा जं मोणं ति पासहा तं सम्मं ति पासहा, णऽइमं सक्कं सिढिलेहिं अदिज्जमाणेहिं गुणासातेहिं वंकसमायारेहिं पमत्तेहिं गारमावसंतेहिं, मुणी मोणं समायाए धुणे सरीरगं, पंतं लूहं च सेवंति वीरा सम्मत्तदंसिणो, एस ओहंतरे मुणी, तिण्णे मुत्ते विरए वियाहिए त्ति बेमि ॥१२९॥

(से वसुमं) वसु द्रव्यं, स चात्र संयमः, तद्विद्यतेयस्य स निवृत्ताऽऽरम्भो मुनिर्वसुमान् (सव्वसमण्णागय त्ति) सर्वं सम्यगन्वागतं प्रज्ञानं पदार्थाऽऽविर्भावकं यस्याऽऽत्मनस्तेनाऽऽत्मना सर्वं समन्वागतप्रज्ञानरूपाऽऽत्मनेन यदकर्त्तव्यं पापं कर्म तन्नो कदाचिदप्यन्वेषयति, उपलब्धपरमार्थरूपेणाऽऽत्मना न सावद्यानुविधायी स्यादिति भावार्थः। यदेव सम्यग्ज्ञानं तदेव पापकर्मवर्जनं, यदेव पापकर्मवर्जनं तदेव च सम्यग्ज्ञानमित्येतद्व्रतप्रत्यागतसूत्रेणैव दर्शयितुमाह-सम्यगिति सम्यग्ज्ञानं सम्यक्त्वं वा तत्सहचरितम्, अनयोः सहभावादेकग्रहणे द्वितीयग्रहणं व्याख्येयं, यदिदं सम्यग्ज्ञानं सम्यक्त्वं वेत्येतत्पश्यत तन्मुनेर्भावो मौनं-संयमानुष्ठानमित्येतत्पश्यत, यच्च मौनमित्येतत् पश्यत तत्सम्यग्ज्ञानं नैश्चयिकसम्यक्त्वं वा पश्यत, ज्ञानस्य विरतिफलत्वात् सम्यक्त्वस्य चाभिव्यक्तिकारणत्वात् सम्यक्त्वज्ञानचरणानामेकताऽध्यवसेयेति भावार्थः। एतच्च न येन केनचिच्छक्यमनुष्ठातुमित्याह-नैतत्सम्यक्त्वाऽऽदित्रयं सम्यगनुष्ठातुं शक्यं, कैः?, 'शिथिलैः' अल्पपरिणामतया मन्दवीर्यैः संयमतपसोर्धृतिदृढिमरहितैरिति। किञ्च-(अदिज्जमाणेहिं) आर्द्रैः पुत्रकलत्राऽऽद्यनुषङ्गजनितस्नेहादाकृष्यमाणैरेतत् पूर्वोक्तमशक्यमिति संबन्धः, किञ्च-(गुणासाएहिं) गुणाः शब्दाऽऽदयस्तेषु आस्वादो येषां ते गुणाऽऽस्वादास्तैरिति। किञ्च-(वंकसमायारेहिं) वक्रः भमाचारो येषां ते तथा, तैर्मायाविभिरित्यर्थः। (पमत्तेहिं) विषयकषायाऽऽदिप्रमादैः प्रमत्तैरिति। (गारमावसंतेहिं) अगारं गृहं तदाद्यात्तरलोपाद्रारमित्युक्तं तदागारमावसद्भिः सेवमानैः पापकर्मवर्जनरूपं मौनमनुष्ठानमशक्यमिति सर्वत्र योज्यम्। कथं तर्हि शक्यमित्याह-(मुणी मोणं समायाए धुणे सरीरगं पंतं लूहं च सेवंति वीरा सम्मत्तदंसिणो) (मुणी मोणं ति) मुनिर्जगत्त्रयस्य मन्ता मौनं मुनित्वमशेषसावद्यानुष्ठानवर्जनरूपं समादाय गृहीत्वा धुनीयाच्छरीरकमौदारिकं कर्मशरीरं वा। कथं च तस्य धुननमित्याह-प्रान्तं पर्युषितं वल्लचणकाद्यरूपं वा तदपि रूक्षं विकृतेरभावात्तत् सेवन्ते तदभ्यवहरन्ति, के ते?, वीराः कर्मविदारणसहिष्णवः, किंभूताः?, सम्यक्त्वदर्शिनः, समत्वदर्शिनो वा। यश्च प्रान्तरूक्षसेवी सकिंगुणः स्यादित्याह-(एस ओहंतरे मुणी) एषोऽनन्तरोक्तविशेषणविशिष्टः ओघो जावौघः संसारस्तं तरतीति। कोऽसौ?, मुनिः "वर्तमानसामीप्ये वर्तमानवद्वा" ॥ ३। ३। १३१ ॥ इति तीर्णः पवासौ, स बाह्याभ्यन्तरसङ्गाभावान्मुक्तः, कश्चैवंभूतो?, यः सावद्यानुष्ठानाद्विरत इत्येवं व्याख्यातः। इतिरधिकारसमाप्तौ। ब्रवीमीति पूर्ववत्। आचा० १ श्रु० ५ अ० ३ उ०।

इह त्रीणि वयांसि-युवा मध्यवया वृद्धश्चेति, तत्र मध्यवयाः परिपक्वबुद्धित्वाद् धर्मार्हं इत्येतद्दर्शयति-

मज्झिमेणं वयसा एगे संबुज्झमाणा समुट्ठिता सोच्चा मेधावी वयणं पंडियाणं णिसामित्ता समयाए धम्मे आरियेहिं पवेदिते ते अणवकंखमाणा अणतिवाएमाणा अपरिग्गहमाणा णो परिग्गहावंति सव्वावंति च णं लोगंसि णिहाय दंडं पाणेहिं अकुव्वमाणे एस महं अगंथे वियाहिए॥

युवा मध्यवया वृद्धश्चेति। तत्र मध्यमवयाः परिपक्वबुद्धित्वाद्धर्मार्ह इत्यतो दर्शयति-मध्यमेन वयसाऽप्येके संबुध्यमाना धर्मेचरणाय सम्यगुत्थिता इति, सत्यपि प्रथमचरमवयसोरुत्थाने यतो बाहुल्याद्योग्यत्वाच्च प्रायो विनिवृत्तभोगकुतूहलइति निष्प्रत्यूहधर्माधिकारीति मध्यमवयोग्रहणम्। कथं संबुद्धमानाः समुत्थिता इत्याह-(सोच्चा इत्यादि) इह विविधाः संबुद्धयमानका भवन्ति। तद्यथा-स्वयंबुद्धाः, प्रत्येकबुद्धाः, बुद्धबोधिताश्च। तत्र बुद्धबोधितेनेहाधिकार इति दर्शयति-मेधावी मर्यादाव्यवस्थितः पण्डितानां तीर्थकृदादीनां वचनं हिताहितप्राप्तिपरिहारप्रवर्तकं श्रुत्वाऽऽकर्ण्य पूर्वं पश्चाच्चिरभ्याऽऽ-

वधार्यं समतामालम्बेत । किमिति ?, यतः समतया माध्यस्थ्येनाऽऽर्यैस्तीर्थकृद्भिर्धर्मः श्रुतचारित्राऽऽख्यः प्रवेदित आदौ प्रकर्षेण वा कथित इति । ते च मध्यमे वयसि श्रुत्वा धर्मसंबुद्ध्यमानाः समुत्थिताः सन्तः किं कुर्युरित्याह-(ते अभिकंखमाणा इत्यादि) ते निष्क्रान्ता मोक्षमभिप्रस्थिताः कामनो गानभिकाङ्क्षन्तस्तथा प्राणिनोऽतिपातयन्तः परिग्रहमपरिगृह्णन्त आद्यन्तयोर्ग्रहणे मध्योपादानमपि द्रष्टव्यम् । तथा मृषावादमवदन्त इत्यादिपि वाक्यमेवंभूताश्च देहेऽप्यममत्वाः (सव्वावंति लि) सर्वस्मिन्नपि लोके, चः समुच्चये, स च भिन्नक्रमः । णमितिवाक्यालङ्कारे । नोपरिग्रहवन्तश्च भवन्तीति यावत् । किञ्च-(खिड्डाय इत्यादि) प्राणिनो दण्डयतीति दण्डः परितापकारी तं दण्डं प्राणिषु प्राणिभ्यो वा निधाय क्षिप्त्वा त्यक्त्वा पापं पापोपादानं कर्माष्टादशभेदभिन्नं तद्कुर्वाणोऽनाचरन्नेष महान्न विद्यते ग्रन्थः स बाह्याभ्यन्तरोऽस्येत्यग्रन्थः व्याख्यातस्तीर्थकरगणधराऽऽदिभिः प्रतिपादित इति । आचा० १ श्रु० ८ अ० ३ उ० । इह हि दुरन्तानन्तचतुरन्तासारविसारिसंसारापारपारावारे निमज्जता भव्यजन्तुना जिनप्रवचनप्रतीतचोल्लकाऽऽदिदृशनिदर्शनदुष्प्रापां कथमपि प्रशस्तसमस्तमनुजजन्माऽऽदिसामग्रीमवाप्य भवजलधिसमुत्तरणप्रवणप्रवहणस्वधर्मसङ्ग्रहविधाने प्रयत्नो विधेयः । यदवादि-"भवकोटीदुष्प्रापा-मवाप्य नृभवाऽऽदिसकलसामग्रीम् । भवजलधियानपात्रे, धर्मे यत्नः सदा कार्यः ॥१॥" सङ्ग्रा०१ अधि०१ प्रस्ताव० । कामार्थयोस्तु बाधायां धर्मो रक्षणीयः, धर्ममूलत्वादर्थकामयोः । उक्तं च"-धर्मश्चेन्नावसीदेत, कपालेनापि जीवतः । आत्मोऽस्मीत्यवगन्तव्यं, धर्मवित्ता हि साधवः ॥१॥" (१३) ध०१ अधि० । (धर्मविषये तेतलिपुत्रकथा 'तेतलिसुय' शब्दे २३५२ पृष्ठे गता) "जाव न दुक्ख पत्ता, माणव्भसं च पाणिणो पायं । ताव न धम्मं गेण्हं-ति मायाओ तेयलिसुतं व्व" ॥ १ ॥ ज्ञा० १ श्रु० १४ अ० । "नेह लोके सुखं किञ्चि-च्चादितस्यांहसा भूशम् । मितं च जीवितं नृणां, तेन धर्मे मतिं कुरु" ॥ १ ॥ आ० म० १ अ० २ खण्ड ।

प्रक्रान्तमेव समर्थयन्नाह-

जरा जाव न पीलेइ, वाही जाव न वड्ढइ ।
जाविंदिया न हायंति, ताव धम्मं समायरे ॥ ३६ ॥

जरा वयोहानिलक्षणा यावन्न पीडयति, व्याधिः क्रियासामर्थ्यशत्रुर्यावन्न वर्द्धते । यावदिन्द्रियाणि क्रियासामर्थ्योपकारीणि श्रोत्रादीनि न हीयन्ते तावदवान्तरे प्रस्ताव इति कृत्वा धर्मं स्वमाचरेत् चारित्रधर्ममिति सूत्रार्थः ॥३६॥ दश० ८ अ० ।

पापाद्विरम्य धर्ममेवाऽऽश्रयेत्, तथा च-

वेराणुगिद्धे णिचयं करेति,
इओ चुए सुदुहमट्ठदुग्गं ।
तम्हा उ मेधावि समिक्ख धम्मं,
चरे मुणी सव्वओ विप्पमुक्के ॥ ६ ॥

येन केन कर्मणा परोपतापरूपेण वैरमनुबध्यते जन्मान्तरशतानुयायि भवति, तत्र गृद्धो वैरानुगृद्धः । पाठान्तरं वा "आरम्भसत्तो त्ति" आरम्भे सावद्यानुष्ठानरूपे सक्तो लग्नो निरनुकम्पो निचयं द्रव्योपचयं तन्निमित्ताऽऽपादितकर्मनिचयं स्थानात् च्युतो जन्मान्तरं गतः सन् वा करोत्युपादत्ते, स एवंभूत उपात्तवैरः कृतकर्मोपचय इत्यतोऽस्मात्स्थानाच्च्युतो जन्मान्तरं गतः सन् दुःखयतीति दुःखं नरकाऽऽदिकं यातनास्थानमर्थतः परमार्थतो दुर्गं विषमं दुरुत्तरमुपैति । यत एवं तत्तस्मान्मेधावी विवेकी मर्यादावान् वा संपूर्णसमाधिगुणं जानानो धर्मं श्रुतचारित्राऽऽख्यं समीक्ष्याऽऽलोच्याऽङ्गीकृत्य मुनिः साधुः सर्वतः सबाह्याभ्यन्तरात्सङ्गाद्विप्रमुक्तोऽपगतः संयमानुष्ठानं मुक्तिगमनैकहेतुभूतं चरेदनुतिष्ठेत स्वाचारमाऽऽदिसङ्गाद्विप्रमुक्तो तिश्रितनाम विद्वरेदिति यावत् ॥ ६ ॥ सूत्र० १ श्रु० १० अ० ।

(१६) तथा च-

दियहाइं दोव तिन्नि च, अच्छाणं होइ जं तु ठाणेण ।
सव्वायरेण तस्स वि, संवलयं लेइ पविसंतो ॥
जो पुण दीहपवासो, चुल्लसीइजोणिलक्खनियमेणं ।
तस्स तवसीलमइयं, संवलयं न चिंतेइ ॥
जइजइ पहरे दियहे, मासंवच्छरे ति वोलिंति ।
तह तह गोयम ! जाणसु, चुके आसन्नमरणं च ॥
जस्स न नज्जइ कालं, न य वेला नेव दियहपरिमाणं ।
नाए वि एत्थि कोइ वि, जगम्मि अजरामरो एत्थ ॥
पावो पमायवसओ, जीवो संसारकज्जमुज्जुत्तो ।
चुक्खेहिँ न निव्विन्नो, मुक्खेहिँ न गोयमा ! तिप्पे ॥
जीवेण जाणियं वि, सज्जयाणि जो इ सएसु देहाणि ।
थेवेहिँ तओ सयलं, पि तिहुयणं होज्ज पमिहत्थं ॥
नहदंतमुच्चभमुह-क्खिकेसजीवेण विप्पमुक्केसु ।
तह वि हविज्ज कुलसे-लमेरुगिरिसन्निभे कूमे ॥
हिमवंतमलयमंदर-दीवोदहिधरणिसरिसरासीओ ।
अहियारो आहारो, जीवेणाहारिओ अणंतहुतो ॥
गुरुदुक्खनरकंत-स्स अंसुनिवाएण जं जलं गलियं ।
तं अगमतलायणई-समुद्दमाईसु ण वि होज्जा ॥
आवीयं घणउदीरं, सागरसलिलाउ बहुयरं होज्जा ।
संसारम्मि अणंते, अविलाजोणीए एकाए ॥
सत्ताहविवन्नसुकुहिय-साणं जोणीए देसम्मि ।
किमियत्तणकेवलए-ण जाणि मुक्काणि देहाणि ॥
तेसिं सत्तमपुढवी-ए सिद्धिखेत्तं च पावओ कुरुइं ।
चोद्दसरज्जु लोगं, अणंतनाणेण विन्नेरज्जा ॥
एते य कामजोगे, कालमणंतं इहं सओवभोगे य ।
अप्पुव्वं वि य मन्नइ, जीवो तह वि य विसयसोक्खं ॥
जह कच्छुलो तुवमाणो, दुहं मुणेइ सोक्खं ।
मोहाउरा मणुस्सा, तह कामदुहं सुहं वेंति ॥
जाणंति अणुहवंति य, अणुजम्मजरामरणसंजवे दुक्खे ।
न य विसएसु विरज्जं-ति गोयम ! दुग्गइगमणपत्थिए जीवे ॥
सव्वगहाणं पभवो, महागहो सव्वदोसपायट्टी ।
कामग्गहो दुरप्पा, जेणत्तिन्नूयं जगं सव्वं ॥

तस्स वसं जे गया पाणी–
जाणंति जह जोगिहि–संपयासव्वमेव धम्मफलं ।
तह वि दढमूलहियए,
पावं काऊण दोग्गइं जंति ॥
वच्चइ खणेण जीवो, पंतानिलघाउसिभखोभेहिं ।
जलमहु मा विसीयह, तरतमजोगो इमो दुल्लहो ॥
पंचिंदियत्तणं मा–णुसत्तणं आरिए जणे सुकुलं ।
साहुसमागमसुणणा, सद्दहणा भोगपव्वज्जा ॥
मूलअहिविसविसूइय–पाणियसत्थग्गिसंजमेहिं च ।
देहंतरसंकमणं, करेइ जीवो मुहुत्तेण ॥
जावाउसावसेसं, जाव य थोवो वि अत्थि वयमाओ ।
ताव करेज्जऽप्पहियं, मा तप्पिह हा पुणो एत्थ ॥
सुरधणुविज्जूचवलादि–ट्ठनट्ठसंझाणुरागसिमिणसमं ।
देहं इंति सुविपुन्नसं–मयं भंगुरजं जारिसं ॥
इय जाव ण चुक्कसि ए–रिसस्स खणभंगुरस्स देहस्स ।
उग्गं कट्ठं घोरं, चरसु तवं नत्थि परिवाकी ॥
वाससहस्सं पि जई, काऊणं संजमं सुविउलं पि ।
अंते किलिट्ठभावो, न विसुज्झइ कंडरीय व्व ॥ महा० ६ अ० ॥

(१७) ते धन्ना जे धम्मं, चरिउं जिणदेसियं पयत्तेणं ।
गिहिपासबंधणाओ, उम्मुका सव्वभावेणं ॥ द० प० ।

धर्ममुपदिशन् भगवानादितीर्थकरो भरतनिरस्कारोऽगतसंवेगान् स्वपुत्रानुद्दिश्येदमाह । यदि वा सुरासुरनरोरगतिरश्चः समुद्दिश्य प्रोवाच यथा–

संबुज्झह किं न बुज्झह,
संबोही खलु पेच्च दुल्लहा ।
णो हूवणमंति राइओ,
नो सुलभं पुणरवि जीवियं ॥ १ ॥

संबुध्यध्वं यूयं ज्ञानदर्शनचारित्रलक्षणे धर्मे बोधं कुरुत । यतः पुनरेवंभूतोऽवसरो दुरापः । तथाहि–मानुषं जन्म, तत्रापि कर्मभूमिः पुनरार्यदेशः, सुकुलोत्पत्तिः, सर्वेन्द्रियपाटवं, श्रवणश्रद्धादिप्राप्तौ सत्यां स्वसंवित्स्यवष्टम्भेनाह–किं न बुध्यध्वमित्यवश्यमेवंविधसामग्र्यावाप्तौ सत्यां सकर्णेन तुच्छान् भोगान् परित्यज्य सद्धर्मबोधो विधेय इति भावः ।

तथाहि–

"निर्वाणादिसुखप्रदे नरभवे जैनेन्द्रधर्मान्विते,
लब्धे स्वल्पमचारु कामजसुखं नो सेवितुं युज्यते ।
वैदूर्यादिमहोपलौघनिचिते प्राप्तेऽपि रत्नाकरे,
ह्यातुं स्वल्पमदीप्ति काचशकलं किं चोचितं सांप्रतम्" ॥ १ ॥

अकृतधर्मचरणानां तु प्राणिनां संबोधिः सम्यक्दर्शनज्ञानचारित्राद्यासेवनलक्षणा प्रेत्य परलोकगतानां, खलुशब्दस्यावधारणार्थत्वात् सुदुर्लभैव । तथाहि–विषयप्रमादवशात् सकृत् धर्माऽऽचरणाद् भ्रष्टस्यानन्तमपि कालं संसारे पर्यटनमभिहितमिति । किं च दुरित्यवधारणे । नैवातिक्रान्ता रात्रय

स्तपनमन्ति पुनर्ढौकन्ते । न ह्यतिक्रान्तो यौवनाऽऽदिकालः पुनरावर्तत इति भावः । तथाहि–" भवकोटिभिरसुलभं, मानुष्यं प्राप्य कः प्रमादो मे । न च गतमायुर्भूयः, प्रत्येत्यपि देवराजस्य" ॥ १ ॥ नो नैव संसारे सुलभं सुप्रापं संयमप्रधानं जीवितम् । यदि वा–जीवितमायुस्त्रुटितं सत् तदेव संधातुं न शक्यत इति वृत्तार्थः । सूत्र० १ श्रु० २ अ० १ उ० ।

अथ शतवर्षायुष्कस्य जीवस्यान्यस्यापि धर्मोपदेशं ददाति–

जो वाससयं जीवइ, सुही जोगे य भुंजई ।
तस्स वि सेविउं सेओ, धम्मो य जिणदेसिओ ॥ २३ ॥

यो जीवो वर्षशतं जीवति, प्राणान् धरतीत्यर्थः । च पुनः सुखी भोगान् भुनक्ति, तस्यापि जीवस्य सेवितुं सदा कर्तुं श्रेयो मङ्गलं धर्मो दुर्गतिपतज्जीवाधारः, जिनदेशितः केवलिना भाषितः ॥ २३ ॥

किं पुण सपच्चवाए, जो नरो निच्चदुक्खिओ ।
सुट्ठयरं तेण कायव्वो, धम्मो य जिणदेसिओ ॥ २२ ॥

किं पुनः सप्रत्यपाये संकटे आयुषि काले वा सति इति शेषः । यो नरो नित्यदुःखितः सदा दुःखाऽऽकुलो भवेत् तेन दुःखितजीवेन जिनदेशितो धर्मः सुष्ठुतरं विशेषतः कर्त्तव्यो नन्दिषेणपूर्वभवब्राह्मणवदिति ॥ २२ ॥

नंदमाणो चरे धम्मं, वरं मे लट्ठतरं भवे ।
अनंदमाणो वि चरे, मा मे पावतरं भवे ॥ २४ ॥

नन्दमानः सौख्यं भुञ्जन् धर्मं जिनोक्तं चरेत्, कुर्यादित्यर्थः, किंभूतं धर्मम् ?, वरं श्रेष्ठं शिवप्रापकत्वात्, कथं भावनया धर्मं कुर्यादित्याह–मे ममात्र भवे परभवे च लष्टतरमतिकल्याणं भवेदिति भावनयेति । अनन्दमानोऽपि सौख्यमभुञ्जन्नपि धर्मं कुर्यात्, कथं भावनयेत्याह–मे मम पापतरं मा भवतु ममातिपापं मा भवतु, एकं तावदहं पापफलं भुनज्मि, पुनर्धर्माकरणे मा भवतु मेऽतिपापमिति भावनयेति ॥ २४ ॥

किञ्च–

न वि जाई कुलं वा वि, विज्जा नावि सुसिक्खिया ।
तारेइ नरं व नारिं वा, सव्वं पुन्नेहिं वड्ढई ॥ २५ ॥

नरं पुरुषं, वाशब्दाद्बालाऽऽदिभेदभिन्नं, नारीं स्त्रियं, वाशब्दात्क्लीबं, जातिर्मातृपक्षः, ब्राह्मणादिका जातिर्वा, कुलं पितृपक्षः लब्धभोगादिकं कुलं वा, विद्या वा सुशिक्षिता वा सदध्यस्ता वा, नापीति नैव तारयति भवाब्धितीरं प्रापयति सर्वं स्वर्गापवर्गाऽऽदिसौख्यं पुण्यैः संविग्नसाधुदानाऽऽदिभिर्वर्द्धते प्राप्यते इत्यर्थः । अत्राऽन्यत्राऽपि चकारवकाराऽऽदिशब्दा यथायोगं पूरणसमुच्चयाऽऽदिकेऽर्थे ज्ञातव्या इति ॥ २५ ॥

पुन्नेहिं हीयमाणेहिं, पुरिसागारो वि हायई ।
पुन्नेहिं वड्ढमाणेहिं, पुरिसायारो वि वड्ढई ॥ २६ ॥

पुण्यैरन्नपानवस्त्रपीठफलकौषधाऽऽदिनिः साधुदानाऽऽदिभिरुपार्जितशुभकर्मभिः हीयमानैः क्षयं गच्छद्भिः पुरुषकारः पुरुषाभिमानः, अपिशब्दादन्यदपि यशःकीर्त्तिस्फीतिलक्ष्म्यादिकं हीयते, शनैः क्षयं यातीत्यर्थः, पुण्यैर्वर्द्धमानैः पुरुषकारोऽपि वर्द्धते ॥ २६ ॥

पुण्णाइं खलु आउसो ! किच्चाइं करिणिज्जाइं पीइकराइं

पसकराइं धण्णकराइं जसकराइं कित्तिकराइं, नो खलु आउसो ! एवं चिंतियव्वं–एसंति खलु बहवे समया आवलिया खणा आणापाणू थोवा लवा मुहुत्ता दिवसा अहोरत्ता पक्खा मासा उऊ अयणा संवच्छरा जुगा वाससया वाससहस्सा वाससयसहस्सा वासकोडीओ वासकोडाकोडीओ जत्थ णं अम्हे बहूइं सीलाइं वयाइं गुणाइं वेरमणाइं पच्चक्खाणाइं पोसहोपवासाइं पडिवज्जिस्सामो पडिवज्जिस्सामो करिस्सामो, तो किमत्थं आउसो ! नो एवं चिंतेयव्वं नवइ अंतरायबहुले खलु अयं जीविए, इमे बहवे वाइय-पित्तियसिंभियसन्निवाइया विविहा रोगायंका फुसंति जीवियं ॥

" पुण्णाइं " इत्यादि गद्यम् । खलु निश्चये, हे आयुष्मन् ! पुण्यानि शुभप्रकृतिरूपाणि कृत्यानि कार्याणि करणीयानि कर्तुं योग्यानि (पीतिकराणि त्ति) मित्राऽऽदिना सह स्नेहोत्पादकाऽऽनि,वर्णकराणि एकदिग्व्यापिसाधुवादकराणीत्यर्थः । धनकराणि सद्रत्नसमृद्धिकराणि, कीर्तिकराणि सर्वदिग्व्यापिसाधुवादकराणीत्यर्थः,नैव च खलु एवार्थत्वात्,हे आयुष्मन् ! एवं वक्ष्यमाणं चिन्तितव्यं मनसा विकल्पनीयम् (एसंतो ति) एष्यन्ति, आगमिष्यन्ति, खलुनिश्चये, बहवः समयाः बहवे इत्यत्रेऽपि योज्यम् । तं० । यत्र समयावलिकाऽऽदौ, णं वाक्यालङ्कारे (अम्हे त्ति) वयं बहूनि प्रभूतानि, शीलानि समाधानानि, व्रतानि महाव्रतानि (गुणाइं ति) गुणान् विनयाऽऽदीन् । अत्र " गुणाद्याः क्लीबे वा " ॥ ८ । १ । ३४ ॥ इति क्लीबत्वम् । (वेरमणाइं ति) असंयमाऽऽदिभ्यो निवर्तनानि प्रत्याख्यानानि, नमस्कारसहितपौरुष्यादीनि, पौषधः पर्वदिनमष्टम्यादि, तत्रोपवासा अभक्तार्थकरणानि पौषधोपवासास्तान् प्रतिपत्स्यामहे आचार्याऽऽदिपार्श्वेऽङ्गीकरिष्यामः (पडिवज्जिस्सामो त्ति) प्रस्थापयिष्यामः अङ्गीकरणानन्तरं प्रथमतया कर्तुमारप्स्यामः, करिष्याम इति साक्षात्कारेण सततं निष्पादयिष्यामः ।(त त्ति) तावदादौ किमर्थं नैव चिन्तयितव्यम् । हे आयुष्मन् ! त्वं शृणु, यतो भवति, अन्तरायबहुले विघ्नप्रचुरमिदं,खलु निश्चये,जीवितमायुर्जीवानां,तथा इमे प्रत्यक्षा बहव वातिका वातरोगोद्भवाः, पैत्तिकाः पित्तरोगजाः (सिंभिए त्ति) श्लेष्मभवाः सान्निपातिकाः सन्निपातजन्याः विविधा अनेकप्रकाराः रोगा व्याधयस्ते च ते आतङ्काश्च कृच्छ्रजीवितकारिण इति रोगातङ्का जीवितं स्पृशन्तीति ॥

अथ किं सर्वे मनुजा एवंविधा भवन्ति,नेति दर्शयति इत्याह–

आसिंसु खलु आउसो ! पुव्विं मणुया वण्णयरोगायंका बहुवाससयसहस्सजीविणो । तं जहा–जुगलधम्मिया अरिहंता वा चक्कवट्टी वा बलदेवा वा वासुदेवा वा चारणा विज्जाहरा; ते णं मणुया अईव सोमचारुरूवा जोगुत्तमा जोगलक्खणधरा सुजायसव्वंगसुंदरंगा रत्तुप्पलपत्तमकरचरणकोमलंगुलितला नगनगरमगरसागरचक्कंकवरलक्खणंकियतला सुपइट्ठियकुम्मचारुचलणा आणुपुव्विं सुजायपीवरंगुलिया उन्नयरइयतलिणतंबनिद्धनहा संठियसुसिलिट्ठगूढगुप्फा एणीकुरुविंदावत्तवट्टाणुपुव्वजंघा समुग्गनिमग्गगूढजाणू गयसुमाइंभसुजायसन्निभोरू वरवारणमत्ततुल्लविक्कमविलासगई सुजायवरतुरयगुज्झदेसा आइण्णहय व्व निरुवलेवा पमुइयवरतुरयसीहअइरेगवट्टियकडी साहय सोणंदमुसलदप्पणनिवारियवरकणगच्छरुसरिसवरवइरवलियमज्झा, गंगावत्तप्पयाहिणावत्ततरंगभंगुररविकिरणबोहियकोसायपउमगंभीरविमयनाभी उज्जुयसमसहियसुजायजच्चतणुकसिणनिद्धआइज्जलडहसुकुमालमज्जयरमणिज्जरोमराई झसविहगसुजायपीणकुच्छी झसोयरा पम्हवियमनाभी संगयपासा सन्नयपासा सुंदरपासा सुजायपासा मियमाईयपीणरइयपासा, अकरंडुयकणगरुयगनिम्मलसुजायनिरुवहयदेहधारी पसत्थबत्तीसलक्खणधरा कणगसिलायलुज्जलपसत्थसमतला उवचियवित्थिन्नपिहुलवच्छा सिरिवच्छंकियवच्छा पुरवरफलिहवट्टियभुया भुयंगीसरविसालभोगआयाणफलिहउच्छूढदीहबाहू जुगसंनिभपीणरइयपीवरपउट्ठसंठियउवचिय (घण) थिरसुबद्धसुसिलिट्ठपव्वसंधी रत्तुप्पलोचियमउयमंसलसुजायलक्खणपसत्थअच्छिद्दजालपाणी पीवरवट्टियसुजायकोमलवरंगुलिया तंबतलिणसुइरुइरनिद्धनखा चंदपाणिलेहा सूरपाणिलेहा संखपाणिलेहा चक्कपाणिलेहा सोत्थियपाणिलेहा ससि १-रवि२संख३चक्क४सोत्थिय५विज्जत्तसुविरइयपाणिलेहा वरमहिसवराहसीहसद्दूलउसभनागवरविउलउन्नयमउयकंधा चउरंगुलसुप्पमाणकंबुवरसरिसगीवा अवट्टियसुविभत्तचित्तमंसूपसंसंठियपसत्थमदूलविउलहणुया उवचियसिलप्पवालबिंबफलसंनिभाधरुट्ठा पंडुरससिसगलविमलसंखगोखीरकुंददगरयमुणालियाधवलदंतसेढी, अखंडदंता, अफोडियदंता, अविरलदंता, सुनिद्धिदंता, सुजायदंता, एगदंतसेढी विव अणेगदंता,हुयवहनिद्धंतधोयतत्ततवणिज्जरत्ततलतालुजीहा सारदनवथणियमहुरगंभीरकुंचनिग्घोसदुंदुहिसरा गरुलायय उजुतुंगनासा अवदारियपुंडरीयनयणा कोकासियधवलपत्तलच्छी,आणामियचावरुइलकिण्हचिहुरराइसुसंठियमंगयआययसुजायभमुहा अल्लीणपमाणजुत्तसवणा, सुसवणा, पीणमंसलकपोलदेसभागा, अइरुग्गयसमगमुहचंदछसंठियनिम्माला, उमुवइपडिपुन्नसोम्मवयणा, छत्तागारुत्तमंगदेसा, घणनिचियसुबद्धलक्खणुन्नयकूडागारनिभनिरुवमपिंडियग्गसिरा, हुयवहनिद्धंतधोयतत्ततवणिज्जकेसंतकेसभूमी, सामाइयचूरघणनिचियउवोइयमिउविसयसुहुमलक्खणपसत्थसुगंधिसुंदरभुयमोयगभिंगनीलकज्जलपहट्ठभमरगणनिद्धरंवचूए नि-चियकुंचियपयाहिणावत्तमुद्धसिरया छत्तलक्खणवंजणगुणो-

वत्तेया, माणुम्माणपमाणपडिपुन्नसुजायसव्वंगसुंदरंगा, ससिसोम्माकारकंतपियदंसणा, सन्नाणवसिंगारचारुरूवा, पासाईया, दरिसणिज्जा, अभिरूवा, पडिरूवा, ते णं मणुया ओहस्सरा मेहस्सरा हंसस्सरा कोंचस्सरा नंदिस्सरा नंदिघोसा सीहस्सरा सीहघोसा, मंजुस्सरा मंजुघोसा सुस्सरा सुस्सरघोसा अणुलोमवाउवेगा कंकग्गहणी कवोयपरिणामा, सउणीपासपिट्ठंतरोरुपरिणया, पउमुप्पलसुगंधसरिसनीसाससुरभिवयणा छवीनिरायंका, उत्तमपसत्थअइसेसनिरुवमतणू, जल्लमल्लकलंकसेयरययदोसवज्जियसरीरा, निरुवलेवा, गाया लज्जोविअंगमंगा, वज्जरिसहनारायसंघयणा, समचउरंससंठाणसंठिया, छधणुसहस्साइं, उड्ढं उच्चत्तेणं पन्नत्ता, ते णं मणुया दोएहछप्पणपिट्ठिकरंडगमया पन्नत्ता, समणाउसो ! ते णं मणुया पगइभद्दया पगइविणीया पगइउवसंता पगइपयणुकोहमाणमायालोभा मिउमद्दवसंपन्ना अल्लीणा भद्दया विणीया अप्पिच्छा असंनिहिसंचया अचंका असिमसिकिसिवाणिज्जविवज्जिया, विकिमंतरनिवासिणो, इच्छियकामकामिणो, गेहाकाररुक्खकयनिलया, पुढवीपुप्फफलाहारा ते णं मणुयगणा पन्नत्ता, आसीय समणाउसो ! पुव्विं मणुयाणं छव्विहे संघयणे पन्नत्ते । तं जहा-वज्जरिसहनारायसंघयणे १ रिसहनारायसंघयणे २ नारायसंघयणे ३ अद्धनारायसंघयणे ४ कीलियासंघयणे ५ छेवट्टसंघयणे ६ संपइ खलु आउसो ! मणुयाणं छेवट्टे संघयणे वट्टइ, आसिय आउसो ! पुव्विं मणुयाणं छव्विहा संठाणा पन्नत्ता, तं जहा- समचउरंसे निग्गोहे साए वामणे खुज्जे वामणे हुंडे संपइ खलु आउसो ! मणुयाणं हुंडे संठाणे वट्टइ ।

(१८) अथोपदेशं ददातीत्याह-

संघयणं संठाणं, उच्चत्तं आउयं च मणुयाणं ।
अणुसमयं परिहायइ, ओसप्पिणिकालदोसेणं ॥ १ ॥

संहननं संस्थानं शरीराऽऽदेरुच्चत्वमुच्छ्रयमानमायुश्च मनुजानां, चकारादन्येषां च अनुसमयं समयं समयं प्रति परिहीयते अवसर्पिण्याकालदोषेणेति ॥ १ ॥

कोहमयमाणलोभा, ओसन्नं वड्ढए य मणुयाणं ।
कूडतुलकूडमाणा, तेऽणुमाणेण सव्वं ति ॥ २ ॥

क्रोधमानमायालोभाश्च (ओसन्नं) प्रवाहेण वर्द्धन्ते पूर्वमनुष्यापेक्षया विशेषतो वर्द्धयन्ति, मनुष्याणां कूटतुलानि कूटतोलनाऽऽद्युपकरणानि कूटमानानि कूटकुडवप्रस्थादिमानानि च वर्द्धयन्ति,तेन कूटतुलाऽऽदिनाऽनुमानेनानुसारेण (सव्वं ति) क्रयाणकवाणिज्याऽऽदिकं कूटं वर्द्धते इति ॥ २ ॥

विसमा अज्ज तुलाओ,विसमाणि य जणवएसु माणाणि ।
विसमा रायकुलाइं, जेण उ विसमाइं वासाइं ॥ ३ ॥

विषमा अर्पणायान्यग्रहणायान्याश्च अद्य दुःषमा काले तुला तथा जनपदेषु मगधाऽऽदिदेशेषु मानानि कुडवसेतिकाऽऽदिप्रमाणानि विषमाणि असमानि जातानि,चशब्दाद्नेकप्रकारवञ्चनानि । तथा-विषमाणि अनेकान्यायकारकाणि राजकुलानि वर्त्तन्तेऽद्य तेन कारणेन तुशब्दोऽप्यर्थः। वर्षाण्यपि संवत्सराण्यपि विषमाणि दुःखरूपाणि जातानीति ॥ ३ ॥

विसमेसु य वासेसुं, हुंति असाराइं ओसहिबलाइं ।
ओसहिदुब्बलेण य, आऊ परिहायइ नराणं ॥४॥

विषमेषु वर्षेषु सत्सु भवन्तीति असाराणि सारवर्जितानि औषधिबलानि गोधूमाऽऽदिधान्यानि औषधिदुर्बलत्वेन नराणामन्येषामपि आयुर्जीवितं परिहीयते क्षीयते इति ॥ ४ ॥

एवं परिहायमाणे, खीणे चंदु व्व कालपक्खम्मि ।
जे धम्मिया मणुस्सा, सुजीवियं जीवियं तेसिं ॥५॥

एवमुक्तप्रकारेण परिहायमाने लोके कृष्णपक्षे चन्द्रवद् ये धार्मिका धर्मयुक्ता मनुष्यास्तेषां जीवितं जीवितकालः सुजीवितं सुष्ठु जीवितं ज्ञातव्यमिति ॥ ५ ॥ तं० ।

एवं निस्सारे मा-णुसत्तणे जीविए अ विहुदंति ।
न करेह चरणधम्मं, पच्छा पच्छाणुतप्पिहह ॥२४॥

एवम् उक्तप्रकारेण निस्सारे असारे मानुषत्वे मनुजत्वे, तथा जीविते आयुषि रत्नकोटिकोटिनिरपि अप्राप्ये अधिपतति समये समये क्षयं गच्छतीत्यर्थः, न कुरुत यूयं चरणधर्मं ज्ञानदर्शनपूर्वकं देशसर्वचारित्रं हा इति महत्खेदे, पश्चादायुःक्षयानन्तरम् आयुःक्षयचरमक्षणे वा पश्चात्तापं कायवाङ्मनोनिर्महाखेदं करिष्यथ, नरकस्थशिराजवदिति ॥ २४ ॥

प्रन्थाः प्रहनयन्ति कथं वयं नात्मस्वरूपं जानीमः, इत्युक्ते गुरुराह-

धुवम्मि सयं मोहे, जिणेहिं वरधम्मतित्थमग्गस्स ।
अत्ताणं च न याणह, इह जाए कम्मभूमीए ॥ २५ ॥

धर्मस्य जिनोक्तरूपस्य, तीर्थं पवित्रकरणस्थानकं,तस्य मार्गो ज्ञानदर्शनचारित्ररूपः, वरश्चाऽसौ धर्मः तीर्थमार्गश्च संघः, तथा तस्मिन् प्राकृतत्वाच्चिभक्तिपरिणामः। जिनैः रागाऽऽदिजेतृभिः स्वयमात्मना " ध्रुवम्मीति "कथिते निरूपिते सति आत्मानं न यूयं जानीत,क सति? मोहे सति तीव्रमिथ्यात्वमिश्रमोहनीयकर्मोदये सतीत्यर्थः। इह कर्मभूमौ जाता अपि, अपेक्ष्यमानत्वादिति। अस्या अर्थोऽन्योऽपि सद्गुरुप्रसादात्कार्य इति ॥२५॥ तं०।

एवं खु जरामरणं, पक्खिवइ वग्गुरं च मियजूहं ॥
नयणं पिच्चइ मिच्छं, संमूढा मोहजालेणं ॥ २७ ॥

एतज्जरामरणं,खु निश्चये,जीवमृगयूथं परिक्षपति परिवेष्टयति, च इवार्थे, यथा वागुरा मृगयूथं परिक्षपति, न च पश्यत यूयं प्राप्तं जरामरणं मोहजालेन संमूढा मोहं गताः श्रीगौतमप्रतिबोधितदेवशर्माद्विजवदिति ॥ २७ ॥ तं० ।

अथोपदेशान्तरं ददातीत्याह-

जड्डाणं वड्ढाणं, निव्विन्नाणं च निव्विसेसाणं ।
संसारसूयराणं, कहियं पि निरत्थयं होइ ॥ ९ ॥

जड्डानां द्रव्यभावमूर्खाणां, वड्ढानां केषाञ्चिन्मठपारापतसदृशानां वृद्धानां निर्विज्ञानां विशिष्टज्ञानरहितानां निर्विशेषाणामपवादोत्सर्गज्येष्ठेतराऽऽदिविशेषरहितानां संसारशूकराणामेवंवि-

धानां गृहस्थानां साध्वाभासानामपि कथितमपि उक्तं वक्ष्यमाणं निरर्थकं भवति, ब्रह्मदत्तोदायिनृपमारकाऽऽदिवत् ॥ ९ ॥

किं पुत्तेहिँ पियाहि य, अत्थेण वि पिंडिएण बहुएणं ।
जो मरणदेसकाले, न होइ आलंबणं किंचि ॥ १० ॥

पुत्रैरङ्गजैः किं न किञ्चित्, वित्तैर्भिर्वा किमर्थेनापि पिण्डितेन मीलितेन बहुकेन प्रभूतेन किं नन्दमम्मणादिनेव योऽङ्गजाऽऽदिकलापः मरणदेशकाले मरणप्रस्तावे न भवति आलम्बनमाधाररूपं किञ्चिदिति ॥ १० ॥

पुत्ता चयंति मित्ता, चयंति भज्जा विणंऽमयं चयइ ।
तं मरणदेसकाले, न चयइ सुविअज्जिओ धम्मो ॥११॥

मातापितरं पुत्रास्त्यजन्ति, मित्रं मित्रास्त्यजन्ति, सहजमित्रपूर्वमित्रवत्, भार्याऽपि इमं प्रत्यङ्गं जीवन्तमित्यर्थः, मृतं वा स्वकान्तं त्यजति । यद्वा भार्या, णमिति वाक्यालङ्कारे, आर्षत्वादकारविश्लेषे, (अमयमिति) अमृतं जीवन्तं त्यजति, जीवन्तमेव स्वकान्तं मुक्त्वाऽन्यत्पुरुषान्तरं नर्तृत्वेन प्रतिपद्यते, वनमालावत् । यस्मिन् प्रस्तावे ते पुत्राऽऽदयः त्यजन्ति (तमिति) तस्मिन् प्रस्तावे मरणदेशकाले च न त्यजति (सुइ त्ति) जिनाऽऽज्ञापूर्वकदृढभावेन (वि त्ति) विशेषेण निरन्तरकरणेनार्जितः धर्मः श्रुतचारित्ररूप इति ॥ ११ ॥

अथ गाथाचतुष्टयेन धर्ममाहात्म्यं वर्णयतीत्याह-

धम्मो ताणं धम्मो, सरणं धम्मो गई पइट्ठा य ।
धम्मेण सुचरिएण य, गम्मइ अजरामरं ठाणं ॥१२॥

धर्मः सम्यग्ज्ञानदर्शनचरणाऽऽत्मकः त्राणमनर्थप्रतिहननमर्थसंपादनं च तद्धेतुत्वात्, धर्मः शरणं, रागाऽऽदिनयजीवकजनपरिरक्षणं, धर्मो गम्यते, दुःस्थितैः सुस्थितार्थमाश्रीयत इति गतिः धर्मः प्रतिष्ठानं संसारगर्तोपतत्प्राणिवर्गस्याऽऽधारः, धर्मेण सुचरितेन सुष्ठ्वासेवितेन, चशब्दादनुमोदनेन, साहाय्यदानाऽऽदिना गम्यते, अवश्यं प्राप्यते, अजरामरं स्थानं मोक्षाख्यमित्यर्थः, देवकुमारवत् ॥ १२ ॥

पीइकरो वण्णकरो, भासकरो जसकरो रइकरो य ।
अभयकरो निवुइकरो, परत्त वी अज्जिओ धम्मो ॥१३॥

प्रीतिकरः परमप्रीत्युत्पादकः, वर्णकर एकदिग्व्यापी कीर्तिकरः, यद्वा वपुषि गौरवत्वाऽऽदिवर्णकरः। यद्वा सुराऽऽत्मकज्ञानकरः, ज्ञास्करः कान्तिकरः, यद्वा भाषाकरः वचनपटुत्वमाधुर्याऽऽदिगुणकर इत्यर्थः । यशःकरः सर्वदिग्व्यापिकीर्तिकरः, चशब्दात् श्लाघाशब्दकरः, तत्र श्लाघा तत्स्थान एव साधुवादः । अभयकरो निर्भयकरः । निर्वृतिकरः सर्वकर्मक्षयभावकरः । (परत्त वि अज्जिओ त्ति) परत्र द्वितीये जीवानां परलोके द्वितीय इत्यर्थः धर्मः ॥ १३ ॥

अमरवरेसु अणोवम-रूवं भोगोवभोगरिद्धी य ।
विन्नाण नाणमेव य, लब्भइ सुकएण धम्मेण ॥ १४ ॥

अमरवरेषु महामहर्द्धिकदेवेषु अनुपमरूपं भोगोपभोगकदम्बकं विज्ञानं ज्ञानमेव च लभ्यते, सुकृतेन धर्मेण प्रदेशीराजमेघकुमारधन्यानगाराऽऽनन्दादिनेव । तत्र भोगाः गन्धरसस्पर्शाः, उपभोगाः शब्दरूपविषयाः, यद्वा-सकृद्भोगा उपभोगाः, ते चाऽपानानुलेपनाऽऽदिरूपाः, ऋद्धयो देवदेव्यादिपरिवारभूताः, विज्ञानमनेकप्रकाररूपाऽऽदिकरणं, ज्ञानं मतिश्रुतावधिरूपम् । यद्वा-देवेषु रूपाऽऽदयः प्राप्यन्ते, इह च (विन्नाण त्ति) केवलज्ञानं (नाणं ति) ज्ञानचतुष्कं त्रिकं द्विकं चेति ॥ १४ ॥

देविंदचक्कवट्टि-त्तणाइँ रज्जाइँ इच्छिया भोगा ।
एयाइँ धम्मलाभो, फलाइँ जं चावि निव्वाणं ॥१५॥

देवेन्द्रचक्रवर्तित्वानि राज्यानि गजाश्वरथपदातिभाण्डागारकोष्ठागारवप्रलक्षणानि, यद्वा-स्वाम्यमात्य २ जनपद ३ दुर्ग ४ वस्तु ५ शस्त्र ६ मित्राणि ७, ईप्सिता भोगाः । एतानि धर्मलाभात् फलानि भवन्ति, यच्चापि निर्वाणमिति ॥ १५ ॥ सं० ।

तथा च महानिशीथे-

धम्मे य णमिट्ठे पिए कंते परमत्थसुही सयणजणमित्तबंधूपरिवग्गो धम्मे य णं दिट्ठिकरे धम्मे य णं पुट्ठिकरे धम्मे य णं वन्नकरे धम्मे य णं जच्चाहगरे धम्मे य णं निम्मज्जसकित्तिपसाहगे धम्मे य णं माहप्पजणगे धम्मे य णं सुहु सोक्खपरंपरादायगे, से य णं सेवणिज्जे, से य णं आराहणिज्जे,से य णं पोसणिज्जे,से य णं पालणिज्जे, से य णं कारणिज्जे,से य णं चरणिज्जे, से य णं अणुट्ठिज्जे,से य णं जवइसणिज्जे,से य णं कहणिज्जे,से य णं जणणिज्जे,से य णं पभवणिज्जे, से य णं कारवणिज्जे, से य णं धुवे सासए अक्खए अव्वए सयलसोक्खनिही धम्मे, से य णं अब्भुज्जणिज्जे से य णं अउव्वबलवीरिए पुरिससत्तपरक्कमे संजुए पवरवरे इट्ठे पिए कंते दइए सयलसोक्खदायिनिद्दसंतावुव्वेगभयसदुक्खणट्ठजरामरणाइअसेसजयनिन्नासगे अणासरिससहाए तेलोक्कएक्कसामिसाले, ता अलं सुही सयणजणमित्तबंधुगणधणधण्णसुवन्नहिरण्णरयणोहनिही कोससंवयाइसक्कवाविविज्जुज्जयाऽऽमोवचंचलाए सुमुणिदजाणपरिसाए खणदिट्ठणट्ठभंगुराए अधुवाए असासयाए संसारवुड्ढिकारगाए निरयावयारहेउभूयाए सुगइमग्गविग्घदायगाए अणंतदुक्खपयायगाए रिच्छीए मुदुच्छहा हुवे लाजा धम्मस्स साहणी सम्मद्दंसणनाणचरित्ताराहिणी निरुवयाइसामग्गी अणवरयमहन्निसाणसमएहिं णं खंडखंमेहिं तु परिसहइ, आदड्ढघोरनिट्ठुरा अचंभा जरासणिसणिणवायसंचुण्णिए सहजज्जरजंमणे इव अकिंचिकरे भवइ, जदिहाणुदियहेण इमे तणुकिमलयदलगपरिसंठियं जलबिंदुमिवाकंमे निमिसब्भंतरेण वलिकुमलइजीविए अविदत्तपरलोगपत्थयणाणं तु निप्फले चेव मणुयजम्मे तो भो ण खमे तणुतणुयतरे वि ईसिं पियमाण, जओ णं एत्थ खलु सव्वकालमेव समसत्तुमित्तभावेहिं जवियव्वं, अप्पमत्तेहिं च पंचमहव्वयं धारेयव्वं । तं जहा-कामिणपाणाइवायविरती, अणहीयन्नासित्तं, दंतसोहणमित्तस्स वि अदिन्नस्स वज्जणं मणोवयकायजोगेहिं तु अखंडियअविराहियणवगु-

त्तिपरिवोढियस्स णं परमपवित्तस्स सव्वकालमेव दुच्चरबंभचेरस्स धारणं वत्थपत्तसंजमोवयरणेसुं पि णिम्ममतया असणपाणाईणं तु चउव्विहेणेव राईजोयणचाओ उग्गमुप्पायणेसणाईसु णं विसुद्धपिंडग्गहणं संजोयणाइपंचदोसविरहिएणं परमिएणं काले जिन्ने पंचसमितिविसोहणं तिगुत्तिगुत्तिया इरियासमिइमाईओ जावज्जाओ अणसणाइतवोवहाणट्ठाणं सामाइत्तिकखवणमिमाओ विवित्ते दव्वाइअभिग्गहे, अहो णं जूमीसयणे केसलोए णिप्पडिकम्मसरीरया सव्वकालमेव गुरुनिओगकरणं खुप्पिवासाइपरीसहाहियासणं दिव्वाइउवसग्गाविजयलच्छावलच्छवित्तिया, किं बहुणा अच्चंतदुव्वहे भो वहियव्वे अवीसमंतेहिं चेव सिरिमहापुरिसल्लूढो अट्ठारससीलंगसहस्सभारे तरियव्वे य भो वाहाहि महाहिसमुद्दे अविसाईहिं व णं भो नक्खियव्वे णिरासाए वालुयाकवलोपरि सक्केयव्वं च जो णिसियसुतिक्खदारुणकरवालधाराए पाणचायणं भो सुहुयवहजालावलीजरियव्वे णं जो सुहुमपवणकोच्छलगे गामियव्वं च णं भो गंगापवाहपडिसोएणं तोल्लेयव्वं भो साहसतुल्लाए मंदरगिरिं जेयव्वे य णं भो एगागिएहिं चेव धीरत्ताए सुदुज्जए चाउरंगे बले विधेयव्वा णं भो परोप्परविवरीयजमंतअट्ठचक्कोवरिं वामच्छिन्निउडी उड्डिया गहेयव्वा णं जो सयलतिहुयणविजयारिणिम्मलजसकित्तीजयपभागा, ता भो जो जणा!-

"एयाओ धम्माणुट्ठाणाउ सुदुक्करं णत्थि किंचि मन्नंति।
बुज्झंति नामनारा, ते चिय बुज्झंति वीसमंतेहिं ॥
सीलजरो अइगुरुओ, जावज्जीवमवस्सामो।
ता जज्जिज्जणं पेम्मं, घरसारं पुत्तदव्वेण ॥
माईयं णीसंगा, अविसाई पयरहसव्वुत्तमं धम्मं।
णो धम्मस्स जमुक्का-उक्कंचण वंचणा य ववहारो ॥
निक्कम्मो भो धम्मो, मायादीसल्लरहिओ य।
तूएसु जंगमंतं, तेसु वि पंचिंदियत्तमुक्कोसं ॥
तेसु वि चिय माणुसत्तं, मणुयत्ते आरिए देसे।
देसे कुलं पहाणं, कुले पहाणेइ जाइमुक्कोसा ॥
तीए रूवसमुद्दे, रूवे य बलं पहाणवरं।
होइ बले वि य जीवं, जीए य पहाणयं तु विन्नाणं ॥
विन्नाणे सम्मत्तं, सम्मत्ते सीलसंपत्ती।
सीले खाइयभावो, खाइयभावे य केवलं नाणं ॥
केवलिए पमिपुन्ने, पत्ते अयरामरो मोक्खो।
ण य संसारम्मि सुहं, जाइजरामरणदुक्खगहियस्स।
जीवस्स अत्थि जम्हा, तम्हा मोक्खोववाए उ ॥
आहिंमिऊण सुइरं, अणंतहुत्तो हु जोणिलक्खेसु।
तस्साहणसामग्गी, पत्ता भो भो बहू इण्हिं ॥
तो एत्थ जं ण पत्तं, तदत्थ भो उज्जमं कुणह तुरियं।
विबुहजणाणिंदियमिणं, उज्जह संसारअणुबंधं ॥
लाहिउं भो धम्मसुइं, अणेगजणकोडिदुक्खेसु।
विज्जलयं जइ णाणुच्छ, सम्मं ता णवरि दुल्लहं होही ॥
महा० २ चू०।

तथा च पञ्चसूत्रे-

जायाए धम्मगुणपडिवत्तिसद्धाए जाविज्जा एएसिं सरूवं पयइसुंदरत्तं अणुगामित्तं परोवयारित्तं परमत्थहेउत्तं, तहा दुरणुचरत्तं जंगे दारुणत्तं महामोहजणगत्तं चूओ दुल्लहत्तं ति, एवं जहासत्तीए उचियविहाणेणं अच्चंतभावसारं पडिवज्जिज्जा। तं जहा-थूलगपाणाइवायविरमणं, थूलगमुसावायविरमणं, थूलगअदत्तादाणविरमणं, थूलगमेहुणविरमणं, थूलगपरिग्गहविरमणमिच्चाइ पडिवज्जिऊण पालणे जइज्जा सयाणागाहगे सिआ सयाणाभावगे सिआ सयाणापरंतते सिआ आणा हि मोहविसपरममंतो जलं रोसाइजलणस्स कम्मवाहितिगिच्छासत्थं कप्पपायवो सिवफलस्स वज्जिज्जा अधम्ममित्तजोगं चिंतिज्जाऽभिणवपावित्ए गुणे अणाइजक्खंगए अ अगुणे उदग्गसहकारित्तं अधम्ममित्ताणं उभयलोगगरहिअत्तं असुहजोगपरंपरं च, परिहरिज्जा सम्मं लोगविरुद्धे करुणापरे जणाणं न खिंसाविज्जा धम्मं संकिलेसो खु एसा परमबोहिबीअमबोहिफलमप्पणो त्ति, एवमालोएज्जा न खलु इत्तो परो अणत्थो अंधत्तमेयं संसाराडवीए जणगमणिट्ठावायाणं अइदारुणं सरूवेणं असुहाणुबंधमचत्थं सेविज्ज धम्ममित्ते विहाणेणं अंधे विवाणुकट्ठए वाहिए विव विज्जे दरिद्दे विव ईसरे जीओ विव महानायगे नइओ सुंदरमन्नंति बहुमाणजुत्ते सिआ आणाकंखी आणापडिच्छगे आणाअविराहगे आणानिप्फायगे त्ति, पडिवण्णधम्मगुणारिहं च वट्टिज्जा गिहिसमुचिएसु गिहिसमायारेसु परिसुद्धाणुट्ठाणे परिसुद्धमणकिरिए परिसुद्धवइकिरिए परिसुद्धकायकिरिए वज्जिज्जा अणेगोवघायकारगं गरहिणिज्जं बहुकिलेसं आयइविराहगं समारंभं, न चिंतिज्जा परपीडं, न जाविज्जा दीणयं, न गच्छिज्जा हरिसं, न सेविज्जा वितहाभिनिवेसं, उचिअमणपवत्तगे सिआ, न जाविज्जा अलियं, न फरुसं न पेसुन्नं अनिबद्धं, हिअमिअभासगे सिआ, एवं न हिंसिज्जा चूआणि, न गिण्हिज्ज अदत्तं, न निरिक्खिज्ज परदारं, न कुज्जा अणत्थदंडं, सुहकायजोगे सिआ, तहा लाहोचिअदाणे लाहोचिअभोगे लाहोचिअपरिवारे लाहोचि-

अनिहिकरे सिआ असंतावणे परिचारस्स गुणकरे जहासत्ति अणुकंपापरे निम्ममे नावेणं, एवं खु तप्पालणे वि धम्मो जह अन्नपालणे त्ति। सव्वे जीवा पुढो पुढो ममत्तं बंधकारणं, तहा तेसु तेसु समायारेसु सइसमन्नागए सिआ अमुगोऽहं अमुगकुले अमुगसिस्से अमुगधम्मट्ठाणट्ठिए न मे तव्विराहणा न मे तदारंभो वुड्ढी ममेअस्स एअमित्थ सारं एयमायजूयं एअं हिअं असारमन्नं सव्वं विसेसओ अविहिगहणेणं एवमाइ तिलोगबंधू परमकारुणिगे सम्मं संबुद्धे भगवं अरहंते त्ति, एवं समालोचिअ तदविरुद्धेसु समायारेसु सम्मं वट्टिज्जा। नावमंगलमेअं तन्निप्फत्तीए तहा जागरेज्ज धम्मजागरिआए, को मम कालो किमेअस्स उचिअं, असारा विसया नियमगामिणो विरसावसाणा, जीसणो मच्चू सव्वाऽनावकारी अतिआयागमणो अणिवारणिज्जो पुणो पुणोऽणुबंधी, धम्मो एअस्स ओसहं एगंतविसुद्धो महापुरिससेविओ सव्वहिअकारी निरइआरो परमाणंदहेऊ, नमो इमस्स धम्मस्स, नमो एअधम्मप्पगासगाणं, नमो एअधम्मपालगाणं, नमो एअधम्मपरूवगाणं, नमो एअधम्मपवज्जगाणं, इच्छामि अहमिणं धम्मं पडिवज्जित्तए सम्मं मणवयणकायजोगेहिं,होउ ममेअं कल्लाणं परमकल्लाणाणं जिणाणमणुनावओ,सुप्पणिहाणमेवं चिंतिज्जा पुणो पुणो एअधम्मजुत्ताणमवन्नवायकारी सिआ,पहाणं मोहच्छेअणमेअं,एवं विसुज्झपाणे भावणाए कम्मापगमेणं उवेइ एअस्स जुग्गयं, तहा संसारविरत्ते संविग्गो नवइ, अममे अपरोवतावी विसुद्धे विसुद्धमाणभावे त्ति।

जातायां धर्मगुणप्रतिपत्तिश्रद्धायां नावतस्तथाविधकर्मक्षयोपशमेन भावयेदेतेषां स्वरूपं धर्मगुणानाम्। प्रकृतिसुन्दरत्वं जीवसंक्लेशविशुद्धया, आनुगामुकत्वं भवान्तरानुगमेन, परोपकारित्वं तथापीडाऽऽदिनिवृत्त्या, परमार्थहेतुत्वं परम्परया मोक्षसाधनत्वेन, तथा क्षुद्रानुचरत्वं सदैवानभ्यासात्, भद्रे दारुणत्वं भगवदाज्ञाखण्डनतः, महामोहजनकत्वं धर्मदूषकत्वेन, क्रूरो क्षुद्रत्वं विपक्षानुबन्धपुष्टयेति भावयति। एवमुक्तेन प्रकारेण यथाशक्ति शक्त्यनुरूपं, न तद्धान्याधिक्याभ्यामुचितविधानमेव शास्त्रोक्तेन विधिना, अत्यन्तभावसारं महता प्रणिधानबलेन, प्रतिपद्येत धर्मगुणान् राभसिकया प्रवृत्त्या, अस्या विपाकदारुणत्वात्। किंभूतांस्तानित्याह-(तं जहा इत्यादि) तद्यथा-स्थूरप्राणातिपातविरमणं, स्थूरमृषावादविरमणं स्थूरादत्तादानविरमणं, स्थूरमैथुनविरमणं,स्थूलपरिग्रहविरमणमित्यादि। आदिशब्दादिच्छताऽऽयुक्तरगुणपरिग्रहः। आदावुपन्यासश्चैषां भावत इत्थमेव प्राप्तेरिति।

उक्तं च-

" सम्मत्तम्मि उ लद्धे, पल्लियपुहुत्तेण सावओ होज्जा।
चरणोवसमखयाणं, सागरसंखंतरा होंति ॥ १ ॥
एवं अप्परिवडिए, सम्मत्ते देवमणुयजम्मेसु।
अन्नतरसेढिवज्जं, एगभवेणं च सव्वाइं ॥ २ ॥"

इत्यादि। (पडिवज्जिऊण इत्यादि) प्रतिपद्य पालने यतेत, अधिकृतगुणानाम्। कथमित्याह-सदाज्ञाग्राहकः स्यात्, अध्ययनश्रवणाभ्याम्। आज्ञा आगम उच्यते,सदाज्ञाभावकः स्यात्, अनुपेक्षाद्वारेण, सदाज्ञापरतन्त्रः स्याद्नुष्ठानं प्रति। किमेवमित्याह-आज्ञा हि मोहविषपरममन्त्रः तदपनयनेन, जन्म, द्वेषाऽऽदिज्वलनस्य तद्विध्यापनेन। कर्मव्याधिचिकित्साशास्त्रं, तत्क्षयकारणत्वेन, कल्पपादपः शिवफलस्य, तदवन्ध्यसाधनत्वेन। तथा (वज्जेज्जा इत्यादि) वर्जयेत् अधर्ममित्रयोगम्। अकल्याणमित्रसंबन्धं, चिन्तयेत् अभिनवप्राप्तान् गुणान् स्थूरप्राणातिपातविरमणाऽऽदीन् अनादिभवसङ्गतांश्च अगुणान्, सदैवाविरतत्वेन, तदप्रसहकारित्वमधर्ममित्राणाम्, अगुणाप्राप्ति उभयलोकगर्हितत्वं तत्पापानुमत्यादिना, अशुभयोगपरम्परा च अकुशलानुबन्धतः। तथा (परिहरेज्जा इत्यादि) परिहरेत्समस्तलोकविरुद्धानि तदशुभाध्यवसायाऽऽदिनिबन्धनानि, अनुकम्पापरो जनानां मा भूत्तेषामधर्मः, न खिंसयेद् धर्मम्, न गर्हयेज्जनैरित्यर्थः, संक्लेश एवैषा खिंसाऽशुभभावत्वेन, परमबोधिबीजं, तत्प्रद्वेषेण। अबोधिफलमात्मन इति। जनानां तन्निमित्तभावेन, तथा एवमालोचयेत्सूत्रानुसारेण, न खल्वयं परोऽनर्थोऽबोधिफलात्,तत्कारणत्वाद्वा लोकविरुद्धत्वादिति। अन्धत्वमेतत्संसाराटव्यां हितदर्शनाभावेन,जनकमनिष्टपातानां, नरकाऽऽद्युपपातकारणतया, अतिदारुणं स्वरूपेण संक्लेशप्रधानत्वात्। अशुभानुबन्धमत्यर्थं परम्परोपघातभावेनेत्यत एवोक्तम्- " लोकः खल्वाधारः, सर्वेषां धर्मचारिणां यस्मात्। तस्माल्लोकविरुद्धं, धर्मविरुद्धं च संत्याज्यम् ॥ १ ॥ " इत्यादि। तथा (सेवेज्ज इत्यादि) सेवेत धर्ममित्राणि विधानेन सत्प्रतिपत्त्यादिना,अन्ध इवानुकर्षकान्,पाताऽऽदिभयेन व्याधित इव वैद्यान्, दुःखभयेन दरिद्र इवेश्वरान्, स्थितिहेतुत्वेन। ज्ञात इव महानायकान् आश्रयणीयत्वेन। तथा न इतो धर्ममित्रसेवनात्। सुन्दरतरमन्यदिति कृत्वा बहुमानयुक्तः स्यात् धर्ममित्रेषु। आज्ञाकाङ्क्षी अदत्तायामस्यां तेषाम्, आज्ञाप्रतीच्छकः प्रदानकाले तेषामेव, आज्ञाविराधकः प्रस्तुतायां तेषामेव, आज्ञानिष्पादक इत्यौचित्येन तेषामेव। (परिवज्जेज्जा इत्यादि) प्रतिपक्षधर्मगुणार्हे च वर्त्तेत सामान्येनैव गृहिसमुचितेषु गृहिसमाचारेषु नानाप्रकारेषु परिशुद्धानुष्ठानः सामान्येनैव, परिशुद्धमनःक्रियः शास्त्रानुसारेण, परिशुद्धवाक्क्रियोऽनेनैव, परिशुद्धकायक्रियोऽनेनैव। एतद्विशेषणमभिधातुमाह-वर्जयेदनेकोपघातकारकं सामान्येन, गर्हणीयं प्रकृत्या, बहुक्लेशं प्रवृत्तौ, आयतिविराधकं परलोकेऽपीहाकरं, समारम्भमङ्गारकर्मेऽऽदिरूपम्। तथा न चिन्तयेत् परपीडां सामान्येन। न भावयेद् दीनतां कस्यचिदसंप्रयोगे, न गच्छेद्रूपं कस्यचित्संप्रयोगे,न सेवेत वितथाभिनिवेशम्, अतत्त्वाध्यवसायं, किन्तु उचितमनःप्रवर्त्तकः स्याद्भवनानुसारेण, एवं न भावेत्तानृतमदत्ताख्यानाऽऽदि, न परुषं निष्ठुरं, न पैशून्यं परप्रीतिहारि, नानिबद्धं विकथाऽऽदि, किं तु हितमितज्ञापकः स्यात् सूत्रनीत्या। एवं न हिंस्याद् भूतानि पृथिव्यादीनि, न गृह्णीयाददत्तं स्तोकमपि, न निरीक्षेत परदारान्, रागतः। न कुर्यादनर्थदण्डं अपध्यानाऽऽचरिताऽऽदि,किं तु शुभकाययोगः स्यादागमनीत्या। तथा (लाभोचियदाणेत्यादि) तथा लाभोचितदानः-अशुभाभाऽऽद्यपेक्षया तथा,लाभोचितभो-

गः-अष्टभागाऽऽद्यपेक्षया, लाभोचितपरिवारः चतुर्भागाऽऽदिभर्तव्यपरिमाणेन, लाभोचितनिधिकारः स्यात्, चतुर्भागाऽऽद्यपेक्षयैव । उक्तं चात्र लौकिकैः-

" पादमायान्निधिं कुर्या-त्पादं वित्ताय वर्द्धयेत् ।
धर्मोपभोगयोः पादं, पादं भर्त्तव्यपोषणे ॥ १ ॥"

तथाऽन्यैरप्युक्तम्-

" आयादर्द्धं नियुञ्जीत, धर्मे यदाऽधिकं ततः ।
शेषेण शेषं कुर्वीत, यत्नतस्तुच्छमैहिकम् ॥ १ ॥ " इत्यादि ।

तथा असंतापकः परिजनस्य स्यादिति वर्त्तते शुभप्रणिधानेन । गुणकरो यथाशक्ति भवस्थितिकथनशीलत्वेन, अनुकम्पापरः प्रतिफलनिरपेक्षतया, निर्ममो भावेन भवस्थित्यालोचनात् । क एवंगुणः स्यादित्याह-एवं यस्मात्तत्पालनेऽपि धर्मः, जीवोपकारजनकत्वात्, तथाऽन्यपालन इति जीवविशेषेण । किमित्येतदेवमित्याह-सर्वे जीवाः पृथक्पृथग् वर्त्तन्ते स्वकर्मभेदेन, किं तु ममत्वं बन्धकारणं लोभरूपत्वात् । उक्तं च-

" संसाराम्बुनिधौ सत्त्वाः, कर्मोर्मिपरिघट्टिताः
संयुज्यन्ते वियुज्यन्ते, तत्र कः कस्य बान्धवः ?॥ १ ॥"

तथा-

" अत्यायतेऽस्मिन् संसारे, जन्तो जन्मनि जन्मनि ।
सत्त्वो नैवास्त्यसौ कश्चिद्, यो न बन्धुरनेकधा ॥२॥" इत्यादि ।

सर्वथा परिभावनामात्रमेतत्स्वजनो न स्वजन इति ।(तहा तेसु तेसु इत्यादि) तथा तेषु तेषु समाचारेषु गृहिसमुचितेष्विति वर्त्तते, स्मृतिसमन्वाऽऽगतः स्यात् आभोगयुक्तः कथमित्याह-अमुकोऽहं देवदत्ताऽऽदिनाम अमुककुले इक्ष्वाकाऽऽद्यपेक्षया, अमुकशिष्यो धर्मतः तत्तदाचार्यापेक्षया, अमुकधर्मस्थानस्थितः अणुव्रताऽऽद्यपेक्षया,न मम तद्विराधना साम्प्रतम, न मम तद्धर्म्मो विराधनाऽऽरम्भः । तथा वृद्धिर्ममैतस्य धर्मस्थानस्य, एतद्धि सारं धर्मस्थानमेतदात्मभूतमानुगामुकत्वेन, एतद्धितं सुन्दरपरिणामत्वेन, असारमन्यत्सर्वमर्थजातमाऽऽहेति, विशेषतोऽविधिग्रहणेन विपाकदारुणत्वात् । यथोक्तम्-

" पापेनैवार्थरागान्धः, फलमाप्नोति यत् क्वचित् ।
बडिशामिषवत्तत्तु, विना नाशं न जीर्यति ॥ १ ॥ " इति ।

एतदेवमेवेत्याह-एवमाह त्रिलोकबन्धुः, समुपचितपुण्यसंभारः परमकारुणिकः, तथाभव्यत्वनियोगात् । सम्यक्संबुद्धोऽनुत्तरबोधिबीजतः, जगवानर्हन् सत्त्वविशेष इति । एवं समालोच्य तदविरुद्धेषु अधिकृतधर्मस्थानाविरुद्धेषु समाचारेषु विधिवेषु सम्यग् वर्त्तेत सूत्रनीत्या भावमङ्गलमेतद्विधिना वर्त्तनम्, तन्निष्पत्तेरधिकृतसमाचारनिष्पत्तेरिति । (तहा जागरिज्जेत्यादि) तथा जागृयात् भावनिद्राविरहेण, धर्मजागरया तत्त्वाऽऽलोचनरूपया, को मम कालः वयोऽवस्थारूपः ?, किमेतस्योचितं धर्माऽऽद्यनुष्ठानम् ? । असारा विषयाः, तुच्छाः शब्दाऽऽदयो, नियमगामिनो वियोगान्ताः, विरसावसानाः परिणामदारुणाः, तथा ज्ञयानको मृत्युः, महाभयजनकः, सर्वाभावकारी तत्साध्यार्थक्रियाभावात् । अविज्ञाताऽऽगमनः, अदृश्यस्वजनत्वात् मृत्योः । अनिवारणीयः, स्वजनाऽऽदिवद्वेन । पुनः पुनरनुबन्धी, अनेकयोनिजावेन । धर्म एतस्यौषधं, मृत्योर्यमाधिकरणस्य । किंविशिष्टः ?, इत्याह-एकान्तविशुद्धः निवृत्तिरूपः, महापुरुषसेवितस्तीर्थकराऽऽदिसेवितः, सर्वहितकारी मैत्र्यादिरूपतया । निरतिचारो तथागृहीतपरिपालनेन, परमानन्दहेतुः निर्वाणकारणमित्यर्थः । नम एतस्मै धर्माय मनन्तरोदितरूपाय, नम एतद्धर्मप्रकाशकेभ्योऽर्हद्भ्यः, नम एतद्धर्मपालकेभ्यो यतिभ्यः, नमस्तद्धर्मप्ररूपकेभ्यो यतिभ्य एव, नम एतद्धर्मप्रतिपन्नेभ्यः श्रावकाऽऽदिभ्यः, इच्छाम्यहमेतं धर्मं प्रतिपत्तुम्, अनेनैतत्पक्षपातमाह-सम्यग्मनोवाक्काययोगैः । अनेन तु सम्पूर्णप्रतिपत्तिरूपं प्रणिधिविशेषमाह-जवतु ममैतत् कल्याणम्, अधिकृतधर्मप्रतिपत्तिरूपं परमकल्याणानां जिनानामनुजावतः, तदनुग्रहेणेत्यर्थः । सुप्रणिधानमेवं चिन्तयेत् पुनः पुनः । एवं हि स्याऽऽशयादेव तन्निमित्तोऽनुग्रह इति । तथा एतद्धर्मयुक्तानां यतीनामवपातकारी स्यात्, आज्ञाकारीति जावः । प्रधानं मोहच्छेदनमेतत् । तदाज्ञाकारित्वं तन्मोहच्छेदनयोगनिष्पत्त्यङ्गतयेति हृदयम् । एवं कुशलाभ्यासेन विशुद्ध्यमानो विशुद्ध्यमान एतत्सेवक इति प्रक्रमः । ज्ञापनयोक्तरूपया कर्मापगमेन हेतुना, उपैत्यैतस्य धर्मस्य योग्यताम् । एतदेवाऽऽह-तथा संसारविरक्तस्तद्दोषज्ञावनया,संविग्नो जवति मोक्षार्थी, अममो ममत्वरहितः,अपरोपतापी परपीमापरिहारी, विशुद्धो ग्रन्थ्यादिभेदेन विशुद्ध्यमानभावः शुभकरणैकबद्धयेति षं० सू० २ सूत्र ।

(श्रुतधर्ममधिकृत्य धर्मस्तुतिः ' काउस्सग्ग ' शब्दे तृ० भा० ४१६ पृष्ठे " तमतिमिर " इत्यादिगाथाऽभिर्भावितो)

(१६) साम्प्रतं पदार्थं उच्यते-

धम्मो मंगल्लमुक्किट्ठं,अहिंसा संजमो तवो ।
देवा वि तं नमंसंति, जस्स धम्मे सया मणो ॥ १ ॥

" धर्मो मङ्गलमुत्कृष्ट-महिंसा संयमस्तपः ।
देवाऽपि तं नमस्यन्ति, यस्य धर्मे सदा मनः ॥ १ ॥ "

तत्र 'धृ' धारणे,इत्यस्य धातोः मप्रत्ययान्तस्येदं रूपं धर्म इति । मङ्गलरूपं पूर्ववत् । तथा-'कृष्' विलेखने,इत्यस्य धातोरुपूर्वस्य निष्ठान्तस्येदं रूपमुत्कृष्टमिति । तथा-'हृह्' 'हिंसि' हिंसायाम,इत्यस्य " इदितो नुम् धातोः॥७।१।५८॥ " इति नुमि कृते स्त्र्यधिकारे टाबन्तस्य नञ्पूर्वस्येदं रूपम्, यदुताहिंसेति । तथा-'यमु' उपरमे,इत्यस्य धातोः संपूर्वस्याऽप्रत्ययान्तस्य संयम इति रूपं भवति । तथा-'तप' सन्तापे, इत्यस्य धातोरसुन्प्रत्ययान्तस्य तप इति । तथा-'दिवु' क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु, इत्यस्य धातोरच्प्रत्ययान्तस्य जसि देवा इति जवति। अपिशब्दो निपातः, तदित्येतस्य सर्वनाम्नः पुंस्त्वविवक्षायां द्वितीयैकवचनं तमिति भवति। तथा-नमस्यन्तीत्यस्य प्रातिपदिकस्य " नमो वरिवश्चित्रङः क्यच् ॥३।१।१९॥" इति क्यजन्तस्य झट्क्रियान्तादेशः,ततश्च नमस्यन्तीति भवति। यदिति सर्वनाम्नः षष्ठ्यन्तस्य यस्येति भवति,धर्मः पूर्ववत्। सदेति सर्वस्मिन् काले " सर्वैकान्यकिंयत्तदः काले दा " ॥ ५ । ३ । १५ ॥ इतिदाप्रत्ययः, " सर्वस्य सोऽन्यतरस्यां दि " ॥ ५ । ३ । ६ ॥ इति स आदेशः सदा । तथा-' मन ' ज्ञाने इत्यस्य धातोरसुन्प्रत्ययान्तस्य मन इति जवति । इति पदानि । साम्प्रतं पदार्थ उच्यते-तत्र दुर्गतौ प्रपतन्तमात्मानं धारयतीति धर्मः । तथा चोक्तम्-" दुर्गतिप्रसृतान् जीवान्, यस्माद्धारयते ततः । धत्ते चैतान् शुभे स्थाने, तस्मा-

धर्म इति स्मृतः ॥ १ ॥" मङ्गयते हितमनेनेति मङ्गलमित्यादि पूर्ववत् । उत्कृष्टं प्रधानम्, न हिंसा अहिंसा, प्राणातिपातविरतिरित्यर्थः । संयम आश्रवद्वारोपरमः, तापयन्त्यनेकभवोपात्तमष्टप्रकारं कर्म इति तपः, अनशनाऽऽदि । दीव्यन्तीति देवाः, क्रीडन्तीत्यादिभावार्थः । अपिः संभावने, देवा अपि, मनुष्यास्तु सुतराम् । तमित्येवंविशिष्टं जीवं नमस्यन्तीति प्रकृतार्थम् । यस्य जीवस्य किम् ? । धर्मे प्रागभिहितस्वरूपे, सदा सर्वकालं मन इत्यन्तःकरणम् । अयं पदार्थ इति । पदविग्रहस्तु परस्परापेक्षसमासभाक्त्वेनेह निबन्धनानावान्न प्रदर्शित इति चालनाप्रत्यवस्थाने तु प्रमाणचिन्तायां यथावसरमुपरिष्टाद्वक्ष्यामः ।

(२०) प्रवृत्तिः पुनस्तयोरमुनोपायेनेति प्रदर्शयन्नाह-

कत्थइ पुच्छइ सीसो, कहिं वि अपुच्छा कहंति आयरिआ ।
सीसाणं तु हियट्ठा, विपुलतरागं तु पुच्छाए ॥ २५ ॥

क्वचित् किञ्चिदनवगच्छन् पृच्छति शिष्यः कथमेतदितीयमेव चालना, गुरुरुत्थानं प्रत्यवस्थानम्, इत्थमनयोः प्रवृत्तिः। तथा क्वचिदपृष्टा एव सन्तः पूर्वपक्षमाशङ्क्य किञ्चित्कथयन्त्याचार्याः तत् प्रत्यवस्थानमिति गम्यते । किमर्थं कथयन्त्यत आह-शिष्याणामेव हितार्थं, तुशब्द एवकारार्थः, तथा विपुलतरं तु प्रभूततरं तु कथयन्ति । (पुच्छाए त्ति) शिष्यप्रश्ने सति पटुप्रज्ञोऽयमित्यवगमादिति गाथार्थः । " एवं तावत्समासेन, व्याख्या लक्षणयोजना । क्रमेयं प्रस्तुते सूत्रे, कार्यैवमपरेष्वपि ॥१॥" ग्रन्थविस्तरदोषान्न वक्ष्यामः, उपयोगे तु वक्ष्यामः प्रति सूत्रं, यतः सूत्रस्पर्शकोऽधुना प्रोच्यते । अनुगमनिर्युक्तिविभागश्च विशेषतः सामायिकवृद्व्याख्यातो ज्ञेयः तत्रोद्दिष्टं यतः-

" होइ कयत्थो वोत्तुं, सपयच्छेअं सुअं सुआणुगमे ।
सुत्तालावगनासो, नामादिन्नासविणियोगं ॥ १ ॥
सुत्तप्फासियणिज्जुत्तिणिओगा सेसओ पयत्थाइ ।
पायं सो चिय जोगम-णयाइमयगोयरो होइ ॥ २ ॥
एवं सुत्ताणुगमो, सुत्तालावगकओ अनिक्खेवो ।
सुत्तप्फासियणिज्जुत्तिणया अ वक्खंति समगं तु ॥ ३ ॥"

इत्यलं प्रसङ्गेन गमनिकामात्रमेतत् । दश० १ अ० ।

धर्मो मङ्गलमुत्कृष्टमित्यादौ धर्मग्रहणे सति अहिंसासंयमतपोग्रहणमयुक्तं, तस्याऽहिंसासंयमतपोरूपत्वाव्यभिचारित्वादिति। उच्यते, नाहिंसाऽऽदीनां धर्मकारणत्वाद्धर्मस्य च कार्यत्वात्कार्यकारणयोश्च कथञ्चिद् भेदात्, कथञ्चिदभेदश्चेति, तस्य द्रव्यपर्यायोभयरूपत्वात् । उक्तं च-"णत्थि पुढवीविसिट्ठो, धम्मो त्ति जं तेण जुज्जइ अणुओ । जं पुण घडुत्ति पुव्वं, नासी पुढवी इहो ऽहो ।१।" इत्यादि । गम्यादिधर्मस्यव्यवच्छेदेन तत्स्वरूपज्ञापनार्थं वा, अहिंसाऽऽदिग्रहणमदुष्टमित्यलं विस्तरेण । आह-अहिंसासंयमतपोरूपो धर्मो मङ्गलमुत्कृष्टमित्येतद्वचः किमाज्ञासिद्धम्, आहोस्विद्युक्तिसिद्धमपि ?, अत्रोच्यते-उभयसिद्धम्, कुतः ?, जिनवचनत्वात्, तस्य च विनेयसत्त्वानुग्रहैकयाऽऽदिसिद्धत्वात् ।

आह च निर्युक्तिकारः-

जिणवयणं सिद्धं चेव भण्णई कत्थई उदाहरणं ।
आसज्ज उ सोयारं, हेऊ वि कहिं वि भणेज्जा ॥४७॥

जिनाः प्राग्निरूपितस्वरूपाः, तेषां वचनं तदाज्ञया सिद्धमेव सत्यमेव प्रतिष्ठितमेव, अविचार्यमेवेत्यर्थः, कुतः जिनानां रागादिरहितत्वाऽऽज्ञाया ऽऽहितस्य च सत्यवचनासंभवात् । उक्तं च-" रागाद्वा द्वेषाद्वा, मोहाद्वा वाक्यमुच्यते ह्यनृतम् । यस्य तु नैते दोषास्तस्यानृतकारणं किं स्यात् ॥१॥" इत्यादि । तथापि तथाविधश्रोत्रपेक्षया तत्रापि भण्यते क्वचिदुदाहरणं, तथाऽऽश्रित्य तु श्रोतारं हेतुरपि क्वचिद्भण्यते, न तु नियोगतः, तुशब्दः श्रोतृविशेषणार्थः । किंविशिष्टं श्रोतारम् ?, पटुधियं, मध्यमधियं च, न तु मन्दधियमिति । तथाहि-पटुधियो हेतुमात्रोपन्यासादेव प्रकृतार्थावगतिर्भवति, मध्यमधीस्तु तेनैव बोध्यते, न त्वितर इत्यर्थः। तत्र साध्यसाधनान्वयव्यतिरेकप्रदर्शनमुदाहरणमुच्यते दृष्टान्त इत्यर्थः । साध्यधर्मान्वयव्यतिरेकलक्षणश्च हेतुः । इह च हेतुमुल्लङ्घ्य प्रथममुदाहरणाभिधानं, न्यायानुगतत्वात्तदुल्लङ्घनेनैव हेतोः साध्यार्थसाधकत्वोपपत्तेः । क्वचिद्धेतुमनभिधाय दृष्टान्त एवोच्यत इति न्यायप्रदर्शनार्थं वा। यथा गतिपरिणामपरिणतानां जीवपुद्गलानां गत्युपष्टम्भको धर्मास्तिकायश्चक्षुष्मतो ज्ञानस्य, दीपवत् । उक्तं च-

" जीवानां पुद्गलानां च, गत्युपष्टम्भकारणम् ।
धर्मास्तिकायो ज्ञानस्य, दीपश्चक्षुष्मतो यथा ॥ १ ॥"

तथा क्वचिद्धेतुरेव केवलोऽभिधीयते, न दृष्टान्तः, यथा मदीयोऽयमश्वो, विशिष्टचिह्नोपलब्ध्यन्यथानुपपत्तेरित्यलं प्रसङ्गेनेति गाथार्थः ॥ ४७ ॥

तथा-

कत्थइ पंचावयवं, दसहा वा सव्वहा न पमिसिद्धं ।
न य पुण सव्वं भण्णइ, हंदी सविआरमक्खायं ॥५०॥

श्रोतारमेवाङ्गीकृत्य क्वचित्पञ्चावयवं, दशधा वेति क्वचिद्दशावयवं, सर्वथा गुरुश्रोत्रपेक्षया, न प्रतिषिद्धमुदाहरणाद्यभिधानमिति वाक्यशेषः । यद्यपि च न प्रतिषिद्धं तथाप्यविशेषेणैव, न च पुनः सर्वं भण्यते, उदाहरणाऽऽदि । किमित्यत आह-(हंदी सविआरमक्खायं ति) हन्दीत्युपप्रदर्शने, किमुपदर्शयति-यस्मादिहान्यत्र च शास्त्रान्तरे सविचारं सप्रतिपक्षमाख्यातं, साकल्यत उदाहरणाऽऽद्यभिधानमिति गम्यते । पञ्चावयवाश्च प्रतिज्ञाऽऽद्यः । यथोक्तम्-"प्रतिज्ञाहेतूदाहरणोपनयनिगमनाः । अवयवा दश पुनः प्रतिज्ञाविभक्त्यादयः । वक्ष्यति च-" ते च पइण्णविहत्ती " इत्यादि । प्रयोगांश्चैतेषां लाघवार्थमिहैव स्वस्थाने दर्शयिष्यामीति गाथार्थः । दश० १ अ० ।

"धम्मो मंगल्ल" इत्यादिलक्षणमधिकृत्य निर्दिश्यते-अहिंसासंयमतपोरूपो धर्मो मङ्गलमुत्कृष्टमिति प्रतिज्ञा, इह च धर्म इति धर्मनिर्देशः, अहिंसा संयमतपोरूप इति धर्मविशेषणमुत्कृष्टं मङ्गलमिति साध्यो धर्मः धर्मिधर्मसमुदायः प्रतिज्ञा, इयं च श्लोकार्द्धेनोक्तेति। देवाऽऽदिदेवपूजितत्वादिति हेतुः, आदिशब्दात्सिद्धविद्याधरनरपतिपरिग्रहः । अयं च श्लोकतृतीयपादेन खलूक्तोऽवसेयः, अर्हदादिवदिति दृष्टान्तः । अत्रापि चाऽऽदिशब्दात्क्षणधराऽऽदिपरिग्रहः । अयं च श्लोकचरमपादेनोक्तो वेदितव्य इति । न च भावमनोऽधिकृत्याहिंदृष्टान्ते अस्ति कश्चिद्विरोध इति । इह यो यो देवाऽऽदिपूजितः स स उत्कृष्टं मङ्गलं यथाऽर्हदादयस्तथा च देवाऽऽदिपूजितो धर्म इत्युपनयः, तस्माद्देवाऽऽदिपूजितत्वादुत्कृष्टं मङ्गलमिति निगमनम् । इदं चावयवत्रयं सूत्रोक्तावयवत्रयाविनाभूतमिति कृत्वा तेन सूचितमवगन्तव्यमित्यलं विस्तरेण ।

साम्प्रतमेतानेवावयवान् सूत्रस्पर्शिकनिर्युक्त्या प्रतिपादयन्नाह-

धम्मो गुणा अहिंसा-इया उ ते परममंगलपइन्ना ।
देवा वि लोगपुज्जा, पणमंति सुधम्मामिइ हेऊ ॥ ८७ ॥

धर्म्मः प्राग्निरूपितशब्दार्थः, स च क इत्याह-गुणा अहिंसाऽऽद्याः, आदिशब्दात्संयमतपःपरिग्रहः । तुरेवकारार्थः । अहिंसाऽऽदय एव ते परममङ्गलं प्रधानमङ्गलमिति प्रतिज्ञा; तथा देवा अपि, अपिशब्दात्सिद्धविद्याधरनरपतिपरिग्रहः । लोकपूज्या लोकपूजनीयाः, प्रणमन्ति नमस्कुर्वन्ति, कम् ?, सुधर्म्माणं शोभनधर्म्मव्यवस्थितमित्यर्थं हेतुरर्थसूचकत्वाद्धेतुरिति गाथार्थः ।

दिट्ठंतो अरहंता, अणगारा य बहवो उ जिणसीसा ।
वत्तणुवत्ते नज्जइ, जं नरवइणो वि पणमंति ॥ ८० ॥

दृष्टान्तः प्राग्निरूपितशब्दार्थः, स चाशोकाऽऽद्यष्टमहाप्रातिहार्योऽऽदिरूपां पूजामर्हन्तीत्यर्हन्तः, तथाऽनगाराश्च बहव एव जिनशिष्या इति । न गच्छन्तीत्यगा वृक्षास्तैः कृतमगारं गृहं तद्येषां विद्यत इत्यर्शाऽऽदेराकृतिगणत्वादप्रत्ययः । अगारा गृहस्थाः, न अगारा अनगाराः, चशब्दः समुच्चयार्थः, तुरेवकारार्थः, तत इह बहव एव नात्पाः, रागाऽऽदिजेतृत्वाज्जिनाः, तच्छिष्यास्तद्विनेया गौतमाऽऽद्यः । आह-अर्हदादीनां परोक्षत्वाद् दृष्टान्तत्वमेवायुक्तम् । कथं चैतद्विनिश्चीयते यथा ते देवाऽऽदिपूजिता इति ? । उच्यते-यत्तावदुक्तम्-परोक्षत्वादिति तद् दुष्टम्, सूत्रस्य त्रिकालगोचरार्थत्वात् । कदाचित्प्रत्यक्षत्वादेवाऽऽदिपूजिता इति चैतद्विनिश्चयायाऽऽह-वृत्तमतिक्रान्तमनुवर्त्तमानेन साम्प्रतकालज्ञाविना ज्ञायते, कथमित्यत आह-यद्यस्मात् नरपतयोऽपि राजानोऽपि प्रणमन्तीदानीमपि श्रावसाधुं ज्ञानाऽऽदिगुणयुक्तमिति गम्यते । अनेन गुणानां पूज्यत्वमावेदितं भवतीति गाथार्थः ।

उवसंहारो देवा, जह तह राया वि पणमइ सुधम्मं ।
तम्हा धम्मो मंगल-मुक्किट्ठमिइ अ निगमणं ति ॥ ८१ ॥

उपसंहार उपनयः, स चायम्-देवा यथा तीर्थकराऽऽदीन्तथा राजाऽप्यन्योऽपि जनः प्रणमतीदानीमपि सुधर्म्माणमिति, यस्मादेवं तस्माद् देवाऽऽदिपूजितत्वाद्धर्म्मो मङ्गलमुत्कृष्टमिति च निगमनं, प्रतिज्ञाहेत्वोः पुनर्वचनं निगमनमिति गाथार्थः ।

उक्तं पञ्चावयवमेतदभिधानाच्चार्थाधिकारोऽपि धर्म्मप्रशंसा । साम्प्रतं दशावयवं, तथा स चेह जिनशासन इत्यर्थाधिकारं चोपदर्शयति, इह च दशावयवाः प्रतिज्ञाऽऽदय एव प्रतिज्ञाऽऽदिशुद्धिसहिता भवन्ति । अवयवत्वं च तच्छुद्धीनामधिकृतवाक्यार्थोपकारकत्वेन प्रतिज्ञाऽऽदीनामिव भावनीयमित्यत्र बहु वक्तव्यं, तत्तु नोच्यते, गमनिकामात्रत्वात्प्रारभ्यते ।

साम्प्रतमधिकृतदशावयवप्रतिपादनायाऽऽह-

बिइयपइन्ना जिणसा-सणम्मि साहेंति साहवो धम्मं ।
हेऊ जम्हा सब्भा-विएसु हिंसाइसु जयंति ॥ ९२ ॥

द्वितीया पञ्चावयवोपन्यस्तप्रथमप्रतिज्ञापेक्षया प्रतिज्ञा पूर्ववत्, द्वितीया चाऽसौ प्रतिज्ञा च द्वितीयप्रतिज्ञा, सा चेयं जिनशासने जिनप्रवचने, किम् ?, साधयन्ति निष्पादयन्ति, साधवः प्रव्रजिताः, धर्म्मं प्राग्निरूपितशब्दार्थम् । इह च साधव इति धर्म्मीनिर्देशः, शेषस्तु साधुधर्म्म इत्ययं प्रतिज्ञानिर्देशः । हेतुनिर्देशमाह-हेतुर्यस्मात्सद्भाविकेषु पारमार्थिकेषु निरुपचरितेष्वर्थेष्वित्यर्थः । अहिंसाऽऽदिष्वादिशब्दात्सूनृताऽदत्तादानाऽब्रह्मविरतिपरिग्रहः । अन्ये तु व्याचक्षते (सब्भाविएहिं ति) सद्भावेन निरुपचरितसकलदुःखक्षयायैवेत्यर्थः । यतन्ते प्रयत्नं कुर्वन्तीति गाथार्थः ।

साम्प्रतं प्रतिज्ञाशुद्धिमभिधातुकाम आह-

जह जिणसासणनिरया, धम्मं पालेंति साहवो सुद्धं ।
न कुतित्थिएसु एवं, दीसइ परिपालणोवाओ ॥ ९३ ॥

यथा येन प्रकारेण जिनशासननिरता निश्चयेन रता धर्म्मं प्राग्निरूपितशब्दार्थं पालयन्ति रक्षन्ति, साधवः प्रव्रजिताः, षड्जीवनिकायपरिज्ञानेन कृतकारिताऽऽदिपरिवर्जनेन च शुद्धमकलङ्कं, नैवं तन्त्रान्तरीयाः, यस्मान्न कुतीर्थिकेष्वेवं यथा साधुषु दृश्यते परिपालनोपायः, षड्जीवनिकायपरिज्ञानाऽऽद्यभावात्, उपायग्रहणं च साभिप्रायकं, शास्त्रोक्तः खलूपायोऽत्र चिन्त्यते, न पुरुषानुष्ठानं, कापुरुषा हि वितथकारिणोऽपि भवन्त्येवेति गाथार्थः ।

अत्राऽऽह-

तेसु वि य धम्मसद्दो, धम्मं नियगं च ते पसंसंति ।
नणु नणिओ सावज्जो, कुतित्थिधम्मो जिणवरेहिं ॥ ९४ ॥

तेष्वपि च तन्त्रान्तरीयधर्म्मेषु, किम् ?, धर्म्मशब्दो लोके रूढः, तथा धर्म्मं निजं चाऽऽत्मीयमेव यथातथं ते प्रशंसन्ति स्तुवन्ति, ततश्च कथमेतदित्यत्रोच्यते-नन्वित्यनुज्ञायां, भणित उक्तः, पूर्वं सावद्यः सपापः, कुतीर्थिकधर्म्मश्चरकाऽऽदिधर्म्मः, कैः ?, जिनवरैस्तीर्थकरैः, "ण जिणेहिं उ पसत्थो" इति वचनात्, षड्जीवनिकायपरिज्ञानाऽऽद्यभावादेवेत्यत्रापि बहु वक्तव्यं, तत्तु नोच्यते, ग्रन्थविस्तरभयादिति गाथार्थः ।

तथा-

जो तेसु धम्मसद्दो, सो उवयारेण निच्छएण इहं ।
जह सीहसद्दु सीहे, पाहन्नुवयारओऽणत्थ ॥ ९५ ॥

यस्तेषु तन्त्रान्तरीयधर्म्मेषु धर्म्मशब्दः, स उपचारेणापरमार्थेन, निश्चयेनात्र जिनशासने, कथम् ?, यथा सिंहशब्दः सिंहे व्यवस्थितः, प्राधान्येन, उपचारत उपचारेणान्यत्र माणवकाऽऽदौ, यथा सिंहो माणवकः, उपचारनिमित्तं च शौर्य्यक्रौर्याऽऽदयः, धर्म्मे त्वहिंसाऽऽद्यभिधानाऽऽदय इति गाथाऽर्थः ।

एस पइन्नासुद्धी, हेउ अहिंसाइएसु पंचसु वि ।
सब्भावेण जयंती, हेउविसुद्धी इमा तत्थ ॥ ९६ ॥

एषा उक्तस्वरूपा प्रतिज्ञायाः शुद्धिः प्रतिज्ञाशुद्धिः हेतुरहिंसाऽऽदिषु पञ्चस्वपि सद्भावेन यतन्त इत्ययं च प्राग् व्याख्यात एव, शुद्धिमभिधातुकामेन च भाष्यकृता पुनरुपन्यस्त इत्यत एवाऽऽह-हेतोर्विशुद्धिर्हेतुविशुद्धिर्विषयविभागावस्थापनं विशुद्धिः, इमाः इयं, तत्र प्रयोग इति गाथार्थः ।

जं भत्तपाणउवगर-णवसहिसयणाऽऽसणाइसु जयंति ।
फासुयअकयअकारिय-अणणुमयाणुद्दिट्ठभोई य ॥ ९७ ॥

यद्यस्माद्भक्तं च पानं चोपकरणं च वसतिश्च शयनाऽऽसनाऽऽदयश्चेति समासस्तेषु । किम् ?, यतन्ते प्रयत्नं कुर्वन्ति कथमेतदेवमित्यत्राऽऽह-यस्मा प्रासुकं चाकृतं चाकारितं चाननुमतं चानुद्दिष्टं च तद्भोक्तुं शीलं येषां ते तथाविधाः, तथाऽऽसन्नः प्राप्ताः,

प्रगता असवः प्राणा यस्मादिति प्रासुकं निर्जीवम् । तच्च स्वकृतमपि भवत्यत आह-अकृतं, तदपि कारितमपि भवत्यत आह-अकारितम्, तदप्यनुमतमपि भवत्यत आह-अननुमतम् । तदप्युद्दिष्टमपि न भवति यथाचदर्थिकाऽऽदि, न च तदिष्यत इत्यत आह-अनुद्दिष्टमिति, एतत्परिज्ञानोपायश्चोपन्यस्तस्तत्कल्पप्रदानाऽऽदिलक्षणस्तत्रावगन्तव्य इति गाथार्थः ।

तदन्ये पुनः किमित्यत आह-

अप्फासुयकयकारिय-अणुमयउद्दिट्ठभोइणो हंदि ।
तसथावरहिंसाए, जणा अकुसला उ लिप्पंति ॥ ९८ ॥

अप्रासुककृतकारितानुमोदितोद्दिष्टभोजिनश्चरकाऽऽदयः, हन्दीत्युपप्रदर्शने, किमुपप्रदर्शयति-त्रसन्तीति त्रसा द्वीन्द्रियाऽऽदयः, तिष्ठन्तीति स्थावराः पृथिव्यादयः, तेषां हिंसा प्राणव्यपरोपणलक्षणा, तया जनाः प्राणिनः, अकुशला अनिपुणा स्थूलमनयश्चरकाऽऽदयो लिप्यन्ते संबध्यन्त इत्यर्थः । इह च हिंसाक्रियाजनितेन कर्मणा लिप्यन्त इति भावनीयं, कारणे कार्योपचारात्, ततश्च ते शुद्धधर्मसाधका न भवन्ति, साधव एव भवन्तीति गाथार्थः ।

एसा हेउविसुद्धी, दिट्ठंतो तस्स चेव य विसुद्धी ।
सुत्ते जणिया उ फुडा, सुत्तप्फासे उ इयमन्ना ॥ ९९ ॥

एषा अनन्तरोक्ता, हेतुविशुद्धिः प्राग्निरूपितशब्दार्था, अधुना दृष्टान्तः प्राग्निरूपितशब्दार्थः, तथा तस्यैव च दृष्टान्तस्य विशुद्धिः, किम्?, सूत्रे भणितोक्तैव, स्फुटा स्पष्टा ।

तच्चेदं सूत्रम्-

जहा दुमस्स पुप्फेसु, भमरो आवियइ रसं ।
ण य पुप्फं किलामेइ, सो य पीणेइ अप्पयं ॥२॥

अत्राऽऽह-अथ कस्माद्दशावयवनिरूपणायां प्रतिज्ञाऽऽदीन् विहाय सूत्रकृता दृष्टान्त एवोक्त इति?। उच्यते-दृष्टान्तादेव हेतुप्रतिज्ञे अभ्युह्येते, इति न्यायप्रदर्शनार्थम । कृतं प्रसङ्गेन, प्रकृतं प्रस्तुमः । तत्र यथा येन प्रकारेण द्रुमस्य प्राग्निरूपितशब्दार्थस्य, पुष्पेषु प्राग्निरूपितशब्दार्थेष्वेव, असमस्तपदानिधानमनुमेयगृहिद्रुमाणामाहाराऽऽदिषु पुष्पाण्यधिकृत्य विशिष्टसंबन्धप्रतिपादनार्थमिति । तथा चान्यायोपार्जितवित्तदानेऽपि ग्रहणं प्रतिषिद्धमेव, भ्रमरश्चतुरिन्द्रियविशेषः, किम् ?, आपिबति, मर्यादया पिबत्यापिबति, कम् ?, रस्यत इति रसस्तं निर्यासं, मकरन्दमित्यर्थः । एष दृष्टान्तः । अयं च तद्देशोदाहरणमधिकृत्य वेदितव्य इत्येतच्च सूत्रस्पर्शिकनिर्युक्तौ दर्शयिष्यति । उक्तं च-सूत्रस्पर्शे त्वियमन्येति ।

अधुना दृष्टान्तविशुद्धिमाह-न च नैव, पुष्पं प्राग्निरूपितस्वरूपं, क्लामयति पीडयति, स च भ्रमरः प्रीणाति तर्पयत्यात्मानमिति सूत्रसमुदायार्थः । अवयवार्थं तु निर्युक्तिकारो महता प्रपञ्चेन व्याख्यास्यति ।

तथा चाऽऽह-

जह भमरो त्ति य एत्थं, दिट्ठंतो होइ आहरणदेसे ।
चंदमुहि दारिगेयं, सोम्मत्तव्वहारणं ण सेसं ॥ १०० ॥

यथा भ्रमर इति चात्र प्रमाणे दृष्टान्तो भवत्युदाहरणदेशमधिकृत्य, यथा चन्द्रमुखी दारिकेयमित्यत्र सौम्यत्वावधारणं गृह्यते, न शेषं कलङ्काङ्कितत्वाऽनवस्थितत्वाऽऽदीति गाथार्थः ।

एवं भमराऽऽहरणे, अणिययवित्तित्तणं न सेसाणं ।
गहणं दिट्ठंतविसु-द्धि सुत्ते भणिया इमा चन्ना ॥१०१॥

एवं भ्रमरोदाहरणे अनियतवृत्तित्वं, गृह्यत इति शेषः, न शेषाणामविरत्यादीनां भ्रमरधर्माणां ग्रहणं दृष्टान्त इति । एषा दृष्टान्तविशुद्धिः सूत्रे भणिता, इयं चान्या सूत्रस्पर्शिकनिर्युक्ताविति गाथार्थः ।

एत्थ य जणिज्ज कोई, समणाणं कीरए सुविहियाणं ।
पागोवजीविणो त्ति य, लिप्पंतारंभदोसेण ॥ १०२ ॥

अत्र चैवं व्यवस्थिते सति ब्रूयात्कश्चिद्, यथा-श्रमणानां क्रियते सुविहितानामिति । एतदुक्तं भवति-यदिदं पाकनिर्वर्तनं गृहिभिः क्रियते, इदं पुण्योपादानसंकल्पेन श्रमणानां क्रियते सुविहितानामिति तपस्विनां, गृह्णन्ति च ते ततो भिक्षामित्यतः पाकोपजीविन इति कृत्वा लिप्यन्ते, आरम्भदोषेणाऽऽहारकरणक्रियाफलेनेत्यर्थः । तथा च लौकिका अप्याहुः-" क्रयेण क्रायको हन्ति, उपभोगेन खादकः । घातको वधचित्तेन, इत्येष त्रिविधो वधः ॥ १ ॥ " इति गाथार्थः ।

साम्प्रतमेतत्परिहरणाय गुरुराह-

वासइ न तणस्स कए, न तणं वड्ढइ कए मयकुलाणं ।
न य रुक्खा सयसाहा, फुल्लंति कए महुयराणं ॥१०३॥

वर्षति न तृणस्य कृते, न तृणार्थमित्यर्थः । तथा न तृणं वर्द्धते कृते मृगकुलानामर्थाय, तथा न च वृक्षाः शतशाखाः पुष्यन्ति कृतेऽर्थाय मधुकराणाम्, एवं गृहिणोऽपि न साध्वर्थं पाकं निर्वर्तयन्तीत्यभिप्राय इति गाथार्थः ।

अत्र पुनरप्याह-

अग्गिम्मि हवी हूयइ, आइच्चो तेण पीणिओ संतो ।
वरिसइ पयाहियाए, तेणोसहिओ परोहंति ॥ १०४ ॥

इह यदुक्तं वर्षति न तृणार्थमित्यादि, तदसाधु, यस्मादग्नौ हविर्हूयते, आदित्यस्तेन हविषा घृतेन प्रीणितः सन् वर्षति, किमर्थम्?, प्रजाहितार्थं लोकहिताय, तेन वर्षितेन किम्?, औषध्यः प्ररोहन्त्युत्कल्पन्ति । तथा चोक्तम्-" अग्नावाज्याऽऽहुतिः सम्य-गादित्यमुपतिष्ठते । आदित्याज्जायते वृष्टि-र्वृष्टेरन्नं ततः प्रजाः ॥ १ ॥ " इति गाथार्थः ।

अधुनैतत्परिहारायेदमाह-

किं दुब्भिक्खं जायइ, जइ एवं अह भवे दुरिट्ठं तु ।
किं जायइ सव्वत्था, दुब्भिक्खं अह जवे इंदो ॥१०५॥

किं दुर्भिक्षं जायते यद्येवं कोऽभिप्रायः?, तद्धविःसदा हूयत एव, ततश्च कारणाविच्छेदेन कार्यविच्छेदोऽयुक्त इति । अथ भवेद् दुरिष्टं तु दुर्नक्षत्रं दुर्यजनं वा, अत्राप्युत्तरम्, किं जायते सर्वत्र दुर्भिक्षम्?, नक्षत्रस्य दुरिष्टस्य वा नियतदेशविषयत्वात्, सदैव सद्यजनां भावात्?, उक्तं च-" सदैव देवाः सद्भावो, ब्राह्मणाश्च क्रियापराः । यतयः साधवश्चैव, विद्यन्ते स्थितिहेतवः ॥ १ ॥ " इत्यादि ।

अथ भवेदिन्द्र इति किम्?-

वासइ तो किं विग्घं, निग्घायाईहिं जायए तस्स ।
अह वासइ सुसमए, न वासई तो तणट्ठाए ॥ १०६ ॥

वर्षति ततः किं विघ्नोऽन्तरायः निर्घाताऽऽदिनिर्जायते, आदिशब्दादिन्द्राहाऽऽदिपरिग्रहः । तस्येन्द्रस्य, परमैश्वर्ययुक्तत्वेन विघ्नानुपपत्तेरिति भावना । अथ वर्षति ऋतुसमये गर्भसङ्गत इति वाक्यशेषः । न वर्षति ततस्तृणार्थं, तस्येत्थमभिसंधेरनाधादिति गाथाद्वयार्थः ।

किं च दुमा पुप्फंती, भमराणं कारणा अहासमयं
मा भमरमहुयरिगणा, किच्छामपुज्जा अणाहारा॥१०७॥

किं च दुमाः पुष्पन्ति भ्रमराणां कारणात् कारणेन यथासमयं यथाकालं, मा भ्रमरमधुकरिगणाः क्लाम्येयुः ग्लानिं प्रतिपद्येरन् , अनाहारा अविद्यमानाऽऽहाराः सन्तः, काङ्क्षा नैवैतदित्थमिति गाथार्थः ।

साम्प्रतं परानिप्रायमाह-

कस्सइ बुद्धी एसा, वित्ती उवकप्पिया पयावइणा ।
सत्ताणं तेण दुमा, पुप्फंती महुयरिगणट्ठा॥ १०८ ॥

अथ कस्यचिद् बुद्धिः कस्यचिदभिप्रायः स्याद्यदुत एषा वृत्तिरुपकल्पिता, केन ?, प्रजापतिना, केषाम्?, सत्त्वानां प्राणिनां, तेन कारणेन दुमाः पुष्यन्ति, मधुकरिगणार्थमेवेति गाथार्थः ।

अत्रोत्तरमाह-

तं न जुवइ जेण दुमा,नामागोयस्स पुव्वविहियस्स ।
उदएणं पुप्फफलं, निवत्तइंती इमं चन्नं ॥ १०९ ॥

यदुक्तं परेण तन्न घटते, कुत इत्याह--येन दुमा नामगोत्रस्य कर्मणः पूर्वविहितस्य जन्मान्तरोपात्तस्य, उदयेन विपाकानुभवलक्षणेन, पुष्पफलं निर्वर्तयन्ति कुर्वन्त्यन्यथा सदैव तद्भावप्रसंग इति भावनीयम् । इदं चान्यत्कारणं वक्ष्यमाणमिति गाथार्थः ।

अत्थि बहू वणसंमा, भमरा जत्थ न उवेंति न वसंति ।
तत्थ वि पुप्फंति दुमा, पगई एसा दुमगणाणं ॥११०॥

सन्ति बहूनि वनखण्डानि, तेषु तेषु स्थानेषु भ्रमरा यत्र नोपयान्ति अन्यतो न वसन्ति, तेष्वेव, तथाऽपि पुष्यन्ति द्रुमाः,अतः प्रकृतिरेषा स्वभाव एषां द्रुमगणानामिति गाथार्थः ।

अत्राऽऽह-

जइ पगई कीस पुणो, सव्वं कालं न देंति पुप्फफलं ।
जं काले पुप्फफलं, दयंति गुरुराह अत एव ॥ १११ ॥

यदि प्रकृतिः किमिति पुनः सर्वकालं न ददति न प्रयच्छन्ति, किम् ?, पुष्पफलम्, एवमाशङ्क्याऽऽह-यद्यस्मात् कालेनियत एव पुष्पफलं ददति, गुरुराह-अत एवास्मादेव हेतोः।

पगई एस दुमाणं, जं उउसमयम्मि आगए संते ।
पुप्फंति पायवगणा, फलं च कालेण बंधंति ॥११२॥

प्रकृतिरेषा द्रुमाणां यदृतुसमये वसन्ताऽऽदावागते सति पुष्यन्ति पादपगणा वृक्षसंघातास्तथा फलं च कालेन बध्नन्ति, तदर्थानभ्युपगमे तु नित्यप्रसङ्ग इति गाथार्थः ।

साम्प्रतं प्रकृतेऽप्युक्तार्थयोजनां कुर्वन्नाह-

किं नु गिही रंधंती, समणाणं कारणा अहासमयं ।
मा समणा भगवंतो, किच्छामपुज्जा अणाहारा ॥ ११३ ॥

किं नु गृहिणो राध्यन्ति पाकं निर्वर्तयन्ति श्रमणानां कारणेन, यथाकालं, मा श्रमणा भगवन्त अक्लामन्ननाहारा इति पूर्ववदिति गाथार्थः । नैवैतदित्थमित्यभिप्रायः।

अत्राऽऽह-

समणट्ठाकंपनिमित्तं, पुण्णनिमित्तं च गिहनिवासीओ ।
कोइ जणिज्जा पागं,करेंति सो जन्नइ न जम्हा ?॥११४॥

श्रमणेभ्योऽनुकम्पा श्रमणानुकम्पा तन्निमित्तं, न ह्येते हिरण्यग्रहणाऽऽदिना अस्माकमनुकम्पां कुर्वन्तीति मत्वा भिक्षादानार्थं पाकं निर्वर्तयन्त्यतः श्रमणानुकम्पानिमित्तं, तथा सामान्येन पुण्यनिमित्तं च गृहनिवासिन एव कश्चित् ब्रूयात्, पाकं कुर्वन्ति, स जण्यते, नैतदेवं, कुतो ?, यस्मात्-

कंतारे दुब्भिक्खे, आयंके वा महइ समुप्पन्ने ।
रत्तिं समणसुविहिया, सव्वाहारं न भुंजंति ॥ ११५ ॥

कान्तारेऽरण्याऽऽदौ, दुर्भिक्षेऽन्नाकाले, आतङ्के वा ज्वराऽऽदौ, महति समुत्पन्ने सति, रात्रौ श्रमणाः सुविहिताः शोभनानुष्ठानाः, किम् ?, सर्वाहारमोदनाऽऽदि न भुञ्जते,

अह कीस पुण गिहत्था, रत्तिं आयरतरेण रंधंति ।
समणेहिं सुविहिएहिं, चउव्विहाहारविरएहिं ॥११६॥

अथ किमिति पुनर्गृहस्थास्तत्रापि रात्रौ आदरतरेणात्यादरेण राध्यन्ति श्रमणैः सुहितैश्चतुर्विधाऽऽहारविरतैः सद्भिरिति गाथात्रयार्थः ।

किञ्च-

अत्थि बहुगामनगरा, समणा जत्थ न उवेंति न वसंति ।
तत्थ वि रंधंति गिही, पगई एसा गिहत्थाणं ॥११७ ॥

सन्ति बहूनि ग्रामनगराणि तेषु तेषु देशेषु श्रमणाः साधवो यत्र नोपयान्ति, अन्यतो न वसन्ति,तत्रैव,अथ च तत्रापि राध्यन्ति गृहिणः, अतः प्रकृतिरेषा गृहस्थानामिति गाथार्थः ।

अमुमेवार्थं स्पष्टयन्नाह-

पगई एस गिहीणं, जं गिहिणो गामनगरनिगमेसु ।
रंधंति अप्पणो परि--यणस्स कालेण अट्ठाए ॥११८॥

प्रकृतिरेषा गृहिणां वर्त्तते यद् गृहिणो ग्रामनगरनिगमेषु, निगमः स्थानविशेषः,राध्यन्ति आत्मनः परिजनस्यार्थाय निमित्तं कालेनेति योग इति गाथार्थः।

तत्थ समणा तवस्सी, परकडपरनिट्ठियं विगयधूमं ।
आहारं एसंतो, जोगाणं साहणट्ठाए ॥ ११९ ॥

तत्र श्रमणाः तपस्विन इत्युद्यतविहारिणो नेतरे, परकृतपरनिष्ठितमिति कोऽर्थः ?, परार्थं कृतमारब्धं परार्थं च निष्ठितमन्तं गतं विगतधूमं धूमरहितम्, एकग्रहणे तज्जातीयग्रहणमिति न्यायाद्विगताङ्गारं च, रागद्वेषमन्तरेणेत्यर्थः। उक्तं च-" रागेण सइंगालं, दोसेण सधूमगं वियाणाहि ।" आहारमोदनादिलक्षणमेषन्ते गवेषन्ते, किमर्थमित्याऽऽह-योगानां मनोयोगाऽऽदीनां संयमयोगानां वा साधनार्थं, न तु वर्णाऽऽद्यर्थमिति गाथार्थः ।

नवकोडीपरिसुद्धं, उग्गमउप्पायणेसणासुद्धं ।
छट्ठाणरक्खणट्ठा, अहिंसअणुपालणट्ठाए ॥ १२० ॥

इयं च किल भिक्षकर्तृकी, अस्या व्याख्या-नवकोटिपरि-

शुद्धं, तत्रैता नवकोट्यः, यदुत-" ण हणइ ण हणावेइ, हणंतं नाणुजाणइ । एवं-न किणइ ३, एवं-न पयइ ३ । " एताभिः परिशुद्धं, तथा उद्गमोत्पादनैषणाशुद्धमित्येतद्वस्तुतः संकलोपाधिविशुद्धकोटिख्यापनमेव, एवंभूतमपि किमर्थं भुञ्जते ?, षड्स्थानकरणार्थम् ?, तानि चामूनि-"वेयणवेयावच्चे, इरियट्ठाए य संजमट्ठाए । तह पाणवित्तियाए, छठं पुण धम्मचिंताए " ॥ १ ॥ अपि च-जवान्तरे प्रशस्तभावनाभ्यासाद्दृढिसानुपालनार्थम् । तथा चाऽऽह-आहारत्यागतो भावितमते देहत्यागो भवान्तरेऽप्यहिंसायैव जवतीति गाथार्थः ।

दिट्ठंतसुद्धि एसा, उवसंहारो य सुत्तनिद्दिट्ठो ।
संती विज्जंति त्ति य, संतिं सिद्धिं च साहेंति ॥१२१॥

दृष्टान्तशुद्धिरेषा प्रतिपादिता, उपसंहारस्तु उपनयस्तु सूत्रनिर्दिष्टः सूत्रोक्तः ।

तच्चेदं सूत्रम्-

एमेए समणा मुत्ता, जे लोए संति साहुणो ।
विहंगमा व पुप्फेसु, दाणभत्तेसणे रया ॥ ३ ॥

एवमनेन प्रकारेण एते ये अधिकृताः प्रत्यक्षेण वा परिभ्रमन्तो दृश्यन्ते, श्राम्यन्तीति श्रमणास्तपस्यन्तीत्यर्थः । एते च तन्मात्रतयाऽपि भवन्ति । यथोक्तम्-" निग्गंथसक्कतावस-गेरुयआजीव पंचहा समणा । " अत आह-मुक्ता बाह्याभ्यन्तरेण ग्रन्थेन,ये लोके अर्द्धतृतीयद्वीपसमुद्रपरिमाणे, सन्ति विद्यन्ते, अनेन समयक्षेत्रे सदैव विद्यन्त, इत्येतदाह-साधयन्तीति साधवः, किं साधयन्ति ?, ज्ञानाऽऽदीनि गम्यते । अत्राऽऽह-ये मुक्तास्ते साधव एवेत्यत इदमयुक्तम । अत्रोच्यते-इह व्यवहारेण निह्नवा अपि मुक्ता जवन्त्येव,न च ते साधव इति तद्व्यवच्छेदार्थत्वान्न दोषः । आह-न च ते सदैव सन्तीत्यनेनैव व्यवच्छिन्ना इत्युच्यन्ते, वर्त्तमानतीर्थापेक्षयैवेदं सूत्रमिति न दोषः । अथवाऽन्यथा व्याख्यायते-ये लोके सन्ति साधव इत्यत्र य इत्युद्देशः, लोक इत्यनेन समयक्षेत्र एव मान्यत्व, किम् ?,शान्तिः सिद्धिरुच्यते, तां साधयन्तीति शान्तिसाधवः । तथा चोक्तं निर्युक्तिकारेण-" संती विज्जंति त्ति य, संतिं सिद्धिं च साहेंति । " इदं व्याख्यातमेव, विहङ्गमा इव भ्रमरा इव पुष्पेषु,किम् ?। दानग्रहणैषणासु रताः,दानग्रहणाद्दत्तं गृह्णन्ति नादत्तं, भक्तग्रहणेन तदपि नक्तं प्रासुकं, न पुनराधाकर्म्माऽऽदि,एवणाग्रहणेन गवेषणाऽऽदित्रयपरिग्रहः, तेषु स्थानेषु रताः सक्ता इति सूत्रसमासार्थः । दश० १ अ० ।

(२१) विहङ्गमानां निक्षेपाऽऽसूक्त्वा इत्थमनेकप्रकारं विहङ्गममभिधाय प्रकृतोपयोगमुपदर्शयति-

इहइं पुण अहिगारो, विहंगमणेहिं भमरेहिं (१२७)

इह सूत्रे, पुनःशब्दोऽवधारणे,इहैव, नान्यत्र,अधिकारः प्रस्तावः प्रयोजनम् । केरित्याह-विहंगमनैराकाशगमनैः,भ्रमरैः षट्पदैरिति गाथार्थः ।

दाणेति दत्तगिण्हण, जत्ते जम सेव फासुगेएहणया ।
एसणतिगम्मि निरया, उवसंहारस्स सुद्धि इमा ॥१२८॥

दानेति सूत्रे दानग्रहणं दत्तग्रहणप्रतिपादनार्थम्, दत्तमेव गृह्णन्ति नाऽदत्तम् । जक्तग्रहणं भज सेवायामित्यस्य निष्ठान्तस्य भवति। अथैवास्य प्रासुकग्रहणं प्रासुकमाधाकर्म्माऽऽदिरहितं गृह्णन्ति,नेतरदिति। (एसण त्ति) एषणाग्रहणमेषणात्रितये गवेषणाऽऽदिलक्षणे, निरताः सक्ताः,उपसंहारस्योपनयस्य, शुद्धिरियं वक्ष्यमाणलक्षणेति गाथार्थः ।

अवि भमरमहुयरिगणा,अविदिन्नं आवियंति कुसुमरसं ।
समणा पुण जगवंतो, नादिन्नं जोत्तुमिच्छंति ॥ १२९ ॥

अपि भ्रमरमधुकरिगणाः, मधुकरीग्रहणमिहापि स्त्रीसंग्रहणार्थम् । जातिसंग्रहार्थमिति चान्ये। अविदत्तं सन्तं,किम् ?,आपिबन्ति,कुसुमरसं कुसुमाऽऽसवं, श्रमणाः पुनर्भगवन्तो नादत्तं भोक्तुमिच्छन्तीति विशेषः । इति गाथार्थः ।

साम्प्रतं सूत्रेणैवोपसंहारविशुद्धिरुच्यते-कश्चिदाह-" दाणभत्तेसणे रया " इत्युक्तम्, यत एवमत एव लोको भक्तपाकुक्षमानसक्लेश्यः प्रवक्ष्यत्याधाकर्माऽऽदि । तस्य ग्रहणे सत्वोपरोधः, अग्रहणे च स्वधृत्यलाभ इति । अत्रोच्यते-वयं चेत्यादि सूत्रम्-

वयं च वित्तिं लब्भामो, न य काइ जवहम्मइ ।
अहागमेसु रीयंते, पुप्फेसु भमरो जहा ॥ ४ ॥

वयं च वृत्तिं लप्स्यामः प्राप्स्यामस्तथा यथा न कञ्चिदुपहन्यते । वर्त्तमानैष्यत्काञ्चोपन्यासस्त्रैकालिकन्यायप्रदर्शनार्थः। तथा चैते साधवः सर्वकालमेव यथाकृतेषु आत्मार्थमभिनिर्वर्तितेष्वाहाराऽऽदिषु, रीयन्ते गच्छन्ति, वर्त्तन्त इत्यर्थः । पुष्पेषु भ्रमरा यथा। इत्येतच्च पूर्वं भावितमेवेति सूत्रार्थः ।

यतश्चैवमतो महुगारसमेत्यादि सूत्रम-

महुगारसमा बुद्धा, जे जवंति अणिस्सिया ।
नाणा पिंडरया दंता, तेण वुच्चंति साहुणो,त्ति बेमि ॥५॥

मधुकरसमा भ्रमरतुल्याः, बुध्यन्ते स्म बुद्धाः, अधिगततत्त्वा इत्यर्थः। एवंभूता इत्यत आह--ये भवन्ति वा अनिश्रिताः कुलाऽऽदिष्वप्रतिबद्धा इत्यर्थः ।

अत्राऽऽह-

अस्संजएहिं भमरे-हिं जइ समा संजया खलु जवंति ।
एवं उवमं किच्चा, नूणं अस्संजया समणा ॥ १३० ॥

असंयतैः कुतश्चिदप्यनिवृत्तैः,भ्रमरैः षट्पदैः,यदि समास्तुल्याः, संयताः साधवः, खलिवति समा एव भवन्ति । ततश्चासंज्ञिनोऽपि, ते अत एवैनामित्थंप्रकारामुपमां कृत्वा इदमापद्यते नूनमसंयताः श्रमणा इति गाथार्थः ।

एवमुक्ते सत्याहाऽऽचार्यः, एतच्चायुक्तम्, सूत्रोक्तविशेषणतिरस्कृतत्वात्, तथा च बुद्धग्रहणादसंज्ञिनो व्यवच्छेदः, अनिश्रितग्रहणात् त्वसंयतत्वस्येति ।

निर्युक्तिकारस्त्वाह-

जवमा खलु एस कया, पुव्वुत्ता देसलक्खणोवणया ।
अणिययवित्तिनिमित्तं, अहिंसअणुपालणट्ठाए ॥१३१॥

उपमा, खल्वेषा, मधुकरसमेत्यादिरूपा, कृता, पूर्वोक्तात् पूर्वोक्तेन, देशलक्षणोपनयात् देशलक्षणोपनयेन, यथा चन्द्रमुखी कन्येति, तृतीयार्था चेह पञ्चमी । इयं चानियतवृत्तिनिमित्तं कृता अहिंसाऽनुपालनार्थमिदं च भावयन्त्येवेति गाथार्थः ।

जह दुमगणा उ तह नग-रजणवया पयणपायणसहावा ।
जह भमरा तह मुणिणो, नवरि अदत्तं न भुंजंति ।१३२।

यथा द्रुमगणा वृक्षसंघाताः, स्वभावत एव पुष्पफलनस्वभावास्तथैव नगरजनपदा नगराऽऽदयोकाः,स्वयमेव पचनपाच-

नस्वभावा वर्त्तन्ते, यथा भ्रमरा इति भावार्थं वक्ष्यति । तथा मुनयो, नवरमेतावान्विशेषः--अदत्तं स्वामिभिर्न भुञ्जत इति गाथार्थः ।

अमुमेवार्थं स्पष्टयति-

कुसुमे सहावफुल्ले, आहारंति भमरा जह तहा उ ।
भत्तं सहावसिद्धं, समणसुविहिया गवेसंति ॥ १३३ ॥

कुसुमे पुष्पे, स्वभावफुल्ले प्रकृतिविकसिते, आहारयन्ति कुसुमरसं पिबन्ति, भ्रमरा मधुकराः, यथा येन प्रकारेण कुसुमपीडामनुत्पादयन्तः, तथा तेनैव प्रकारेण, भक्तमोदनाऽऽदि, स्वभावसिद्धमात्मार्थं कृतम्, उद्गमाऽऽदिदोषरहितमित्यर्थः । श्रमणाश्च ते सुविहिताश्च श्रमणसुविहिताः, शोभनानुष्ठानवन्त इत्यर्थः । गवेषयन्ति अन्वेषयन्तीति गाथार्थः ।

साम्प्रतं पूर्वोक्तो यो दोषो मधुकरसमा इत्यत्र, एतत्परिजिहीर्षयैव यावतोपसंहारः क्रियते तदुपदर्शयन्नाह-

उवसंहारो भमरा, जह तह समणा वि अवहजीवंति ।
दंत त्ति पुण पयम्मी, नायव्वं वक्कसेसमिणं ॥ १३४ ॥

उपसंहार उपनयः, भ्रमरा यथा अवधजीविनः, तथा श्रमणा अपि साधवोऽप्येतावतैवांशेनेति गाथादलार्थः । इतश्च भ्रमरसाधूनां नानात्वमवसेयम् । यत आह सूत्रकारः-" नानापिण्डरता दता " इति । नानाऽनेकप्रकाराभिग्रहविशेषात्प्रतिगृहमल्पाल्पग्रहणाच्च पिण्डम आहारपिण्डः, नाना चाऽसौ पिण्डश्च नानापिण्डः, अन्तप्रान्ताऽऽदिर्वा, तस्मिन् रता अनुद्वेगवन्तः । दान्ता इन्द्रियनोइन्द्रियदमेन । अनयोश्च स्वरूपमधस्तात्प्रति पादितमेव; अत्र चोपन्यस्तगाथाचरमदलस्थावसरः दान्ता इति पुनः पदं सौत्रं । किम् ?, ज्ञातव्यो वाक्यशेषोऽयमिति गाथार्थः।

किंविशिष्टो वाक्यशेषः, दान्ता ईर्याऽऽदिसमिताश्च-

तथा चाऽऽह-

जह इत्थ चेव इरियाइ-एसु सुव्वंमि दिक्खियपयारे ।
तसथावरभूयहियं, जयंति सव्वावियं साहू ॥ १३५ ॥

यथाऽत्रैवाधिकृताध्ययने भ्रमरोपमयैषणासमितौ यतन्ते, तथा ईर्याऽऽदिष्वपि तथा सर्वस्मिन् दीक्षितप्रचारे साध्वाचरितव्य इत्यर्थः। किम् ?, त्रसस्थावरभूतहितम्, यतन्ते सद्भाविकं पारमार्थिकं साधव इति गाथार्थः ।

अन्ये पुनरिदं गाथादलं निगमनेव्याख्यानयन्ति, न च तदतिचारु, यत आह-

उवसंहारविमुक्की, एस समत्ता उ निगमणं तेणं ।
वुच्चंति साहुणो त्ती, जेणं ते महुगरसमाणा ॥ १३६ ॥

उपसंहारविमुक्तिरेषा समाप्ता तु, अधुना निगमनावसरः, तत्र सौत्रमुपदर्शयति, निगमनमिति द्वारपरामर्शः। तेनोच्यन्ते साधव इति, येन कारणेन ते मधुकरसमाना उक्तन्यायेन भ्रमरतुल्या इति गाथार्थः ।

निगमनार्थमेव स्पष्टयति--

तम्हा दयाऽऽइगुणसु-ट्ठिएहिं भमरो व्व अवहवित्तीहिं ।
साहूहिं साहिओ त्ती, उक्किट्ठं मंगलं धम्मो ॥ १३७ ॥

तस्माद्दयाऽऽदिगुणसुस्थितैरादिशब्दात्सत्याऽऽदिपरिग्रहः । भ्रमर इवाधवृत्तिभिः कैः ?, साधुभिः साधितोनिष्पादितः, उत्कृष्टं मङ्गलं प्रधानं मङ्गलं, धर्मः प्राक्तनिरूपितशब्दार्थः । इति गाथार्थः ॥ १३७ ॥

इदानीं निगमनविशुद्धिमभिधातुकाम आह-

निगमणसुद्धी तित्थं-तरा वि धम्मत्थमुज्जुया विहरे ।
जन्नइ कायाणं ते, जयणं न मुणंति न करेंति ॥१३८॥

निगमनशुद्धिः प्रतिपाद्यते । अत्राऽऽह-तीर्थान्तरीयाः चरकपरिव्राजकाऽऽदयः किम् ?, धर्मार्थं धर्मायोद्यता उद्युक्ता विहरन्ति, अतस्तेऽपि साधव एवेत्यभिप्रायः। नएयतेऽत्र प्रतिवचनम्-कायानां पृथिव्यादीनां ते चरकाऽऽदयः, किम् ?, यतनां प्रयत्नकरणलक्षणां, न मन्यन्ते न जानन्ति, न मन्वते वा, तथाविधाऽऽगमाऽऽश्रवणान्न कुर्वन्ति परिज्ञानाभावाद्भावितमेवेदमधस्तादिति गाथाऽर्थः ॥१३८॥

किं च-

न य उग्गमाइसुद्धं, भुंजंती मद्दुयरा वणुवरोही ।
नेव य तिगुत्तिगुत्ता, जह साहू निच्चकालं पि ॥१३९॥

न चोद्गमादिशुद्धं भुञ्जते, आदिशब्दादुत्पादनाऽऽदिपरिग्रहः । मधुकरा इव भ्रमरा इव सत्त्वानामनुपरोधिनः सन्तो नैव च त्रिगुप्तिगुप्ता यथा साधवो नित्यकालमपि । एतदुक्तं भवति-यथा साधवो नित्यकालं त्रिगुप्तिगुप्ता एवं तेन कदाचिदपि तत्परिज्ञानशून्यत्वात्तस्मान्न ते साधवः । इति गाथार्थः ॥१३९॥

साधव एव तु साधवः, कथम् ?, यतः-

कायं वायं च मणं, इंदियाइं च पंच दमयंति ।
धारेंति बंभचेरं, संजमयंती कसाए य ॥ १४० ॥

कायं, वाचं, मनश्च, इन्द्रियाणि च पञ्च दमयन्ति । तत्र कायेन सुलभाद्दितपाणिपादास्तिष्ठन्ति, गच्छन्ति वा । वाचा निष्प्रयोजनं न ब्रुवते, प्रयोजनेऽप्यालोच्य सत्त्वानुपरोधेन । मनसा अकुशलमनोनिरोधं, कुशलमनउदीरणं च कुर्वन्ति । इन्द्रियाणि पञ्च दमयन्ति, इष्टानिष्टविषयेषु रागद्वेषाकरणेन । पञ्चेति साहचर्यपरिकल्पितैकादशेन्द्रियव्यवच्छेदार्थम् । तथा च-वाक्पाणिपादपायूपस्थमनांसीन्द्रियाणि तेषामिति । धारयन्ति ब्रह्मचर्यम्, सकलगुप्तिपरिपालनात् । तथा संयमयन्ति कषायांश्च, अनुदयेनोदयविफलीकरणेन च । इति गाथार्थः ॥१४०॥

जं च तवे उज्जुत्ता, तेणेसि साहुवक्खणं पुन्नं ।
तो साहुणो त्ति भन्नं-ति साहवो निगमणं चेयं ॥१४१॥

यच्च तपसि प्राग्वर्णितस्वरूपे, किम् ?, उद्युक्ताः तेन प्रकारेणैतेषां साधूपलक्षणं पूर्णमविकलम्, कथम् ?, अनेन प्रकारेण साधयन्त्यपवर्गमिति साधवः। यतश्चैवं ततः साधव एव भण्यन्ते साधवो, न चरकाऽऽदय इति । निगमनं चैतत् । इति गाथार्थः ॥ १४१ ॥

इत्थमुक्तं दर्शितम् । प्रयोगं तत्रैवं कृत्वा दर्शयन्ति-अहिंसाऽऽदिलक्षणधर्मसाधकाः साधव एव, स्थावरजङ्गमभूतोपरोधपरिहारित्वात्, तदन्यैवंविधपुरुषवत्। विपक्षो दिगम्बरभिक्षुभौताऽऽदिवत्। इह ये स्थावरजङ्गमभूतोपरोधपरिहारिणस्ते उभयप्रसिद्धैवंविधपुरुषवदहिंसाऽऽदिलक्षणधर्मसाधका दृष्टाः।तथा च साधवः स्थावरजङ्गमभूतोपरोधपरिहारिण इत्युपनयः;तस्मात्स्थावरजङ्गमभूतोपरोधपरिहारित्वात्ते अहिंसाऽऽदिलक्षणधर्मसाधकाःसाधव एव इति निगमनम्। पक्षाऽऽदिशुद्धयस्तु निदर्शिता

एवेति न प्रतन्यन्ते, एवमर्थाधिकारद्वयवशात्पञ्चाध्ययनदशाधयनाभ्यां वाक्याभ्यां व्याख्यातमध्ययनम् । दश० १ अ० ।

" पमिपुण्णधम्मविणय-लक्खणेण इह अंतरायविरहाओ ।
जीवा ण हुंति नियमा, तो जत्तो तत्थ कायव्वो ॥
जत्र धम्माउ सोग्गइ, धम्मेणं हुंति सयलसिद्धीओ ।
धम्मेण पवररूवं, तत्तो संघिमए भणियं ॥ "
दर्श० १ तत्त्व ।

" महा सयलं किरियं, कुणंति मुणिणो सिवत्थमेव सया ।
तं पुण ञ्जत्तइ गयसय-ञ्जरागदोसेण धम्मेण ॥ १३ ॥
धम्मेण सरागेण उ, लब्भइ सग्गाइयं फलं सो वि ।
जायइ परंपराए, नियमेणं सुक्खहेउ त्ति ॥ १४ ॥
धम्माओ घणञ्जाणो, त्ति जं पि वुत्तं तयं पि न हु जुत्तं ।
सव्वो वि हु पुरिसत्थो, धम्माउ च्चिय जओ भणिया ॥१५॥"

उक्तं च-

" धनदो धनार्थिनां धर्मः, कामदः सर्वकामिनाम् ।
धर्म एवापवर्गस्य, पारम्पर्येण साधकः ॥ १६ ॥" ध० र० ।

" धर्मोऽयं धनवल्लभेषु धनदः कामार्थिनां कामदः,
सौभाग्यार्थिषु तत्प्रदः किमथवा पुत्रार्थिनां पुत्रदः ।
राज्यार्थिष्वपि राज्यदः किमपरं नानाविकल्पैर्नृणां,
तत्किं यन्न ददाति किं च तनुते स्वर्गापवर्गावपि ॥५४॥" ध० र० ।

" धर्माऽऽख्यः पुरुषार्थोऽयं, प्रधान इति गीयते ।
पापसक्तं पशोस्तुल्यं, विधर्मरहितं नरम् ॥ १ ॥ "
स्था० ३ ठा० ३ उ० ।

(२२) धर्मस्य मोक्षकारणत्वं यथा-

संखाय पेसलं धम्मं, दिट्ठिमं परिनिव्वुडे ।
उवसग्गेऽहियासित्ता, आमोक्खाए परिव्वए ॥२५॥

संख्येति सम्यक् ज्ञात्वा स्वसंमत्या, अन्यतो वा श्रुत्वा (पेसल त्ति) मोक्षगमनं प्रत्यनुकूलं, किं तद् ?, धर्मं श्रुतचारित्राऽऽख्यं, दृष्टिमान् सम्यक्दर्शनी, परिनिर्वृत इति कषायोपशमाच्छीतीभूतः परिनिर्वृतकल्पो वा । उपसर्गानुकूलप्रतिकूलान्, सम्यङ् नियम्याधिसह्याऽऽमोक्षाय मोक्षं यावत् परि समन्ताद् व्रजेत् संयमानुष्ठानेन गच्छेदिति ॥ २५ । सूत्र० १ श्रु० ३ अ० ४ उ० ।

अपि च-

धम्मस्स य पारए मुणी, आरंभस्स य अंतए ठिए ।
सोयंति य णं ममाइणो, णो लब्भंति णियं परिग्गहं ॥७॥

धर्मस्य श्रुतचारित्रभेदभिन्नस्य, पारं गच्छतीति पारगः सिद्धान्तपारगामी, सम्यक् चारित्राऽनुष्ठायी वेति । चारित्रमधिकृत्याऽऽह-आरम्भस्य सावद्यानुष्ठानरूपस्यान्ते पर्यन्ते तद्भावरूपे, स्थितो मुनिर्भवति । ये पुनर्नैवं भवन्ति, ते अकृतधर्माः मरणे दुःखे वा समुत्थिते आत्मानं शोचन्ति । णमिति वाक्यालङ्कारे । यदि च इष्टमरणाऽऽदावर्थनाशे वा (ममाइणो त्ति) ममेदमहमस्य स्वामीत्येवमध्यवसायिनः शोचन्ति । शोचमाना अप्येते निजमात्मीयं परि समन्ताद् गृह्णते आत्मसात्क्रियत इति परिग्रहो हिरण्याऽऽदिरिष्टस्वजनाऽऽदिर्वा, नष्टं मृतं वा न लभन्ते न प्राप्नुवन्तीति । यदि वा धर्मस्य पारं मुनिमारम्भस्याऽन्ते व्यवस्थितमनमागत्य स्वजना मातापित्रादयः शोचन्ति समत्वयुक्ताः स्नेहाद्भवः, न च ते लभन्ते निजमप्यात्मीयपरिग्रहबुद्ध्या गृहीतमिति । अत्रान्तरे नागार्जुनीयास्तु पठन्ति-

" सोऊण तयं उवट्ठियं, केइ गिही विग्घेण बट्टिया ।
धम्मम्मि अणुत्तरे मुणी, तं पि जिणिज्ज इमेण पंडिए ॥१॥ "
सूत्र० १ श्रु० २ अ० २ उ० ।

किं चान्यत्-

जे धम्मं सुद्धमक्खंति, पडिपुण्णमणेलिसं ।
अणेलिसस्स जं ठाणं, तस्स जम्मकहा कओ ? ॥१७॥

ये महापुरुषा वीतरागाः करतलाऽऽमलकवत्सकलजगद्दृष्टारस्त एवंभूताः परहितैकरताः शुद्धमवदातं सर्वोपाधिविशुद्धम्, धर्माख्यान्ति प्रतिपादयन्ति, स्वतः समाचरन्ति च । प्रतिपूर्णमायतचारित्रसङ्गात्संपूर्णं यथाख्यातचारित्ररूपं वा । अनीदृशमनन्यसदृशं धर्माख्यान्युपतिष्ठन्ति । तदेवमनीदृशस्यानन्यसदृशस्य ज्ञानचारित्रोपेतस्य यत् स्थानं सर्वद्वन्द्वोपरमरूपं तदवाप्तस्य कुतो जन्मकथा-जातो मृते वेत्येवंरूपा कथा, स्वप्नान्तरेऽपि तस्य कर्मबीजाभावात् कुतो विद्यत इति । तथोक्तम्-" दग्धे बीजे यथाऽत्यन्तं, प्रादुर्भवति नाङ्कुरः । कर्मबीजे तथा दग्धे, न रोहति भवाङ्कुरः " ॥ १ ॥ इत्यादि ॥ १७ ॥

किञ्चान्यत्-

कओ कयाइ मेधावी, उप्पज्जंति तहागया ।
तहागया अप्पडिन्ना, चक्खू लोगस्सऽणुत्तरा ॥ २० ॥

कर्मबीजाभावात्कुतः कस्मात्कदाचिदपि मेधाविनो ज्ञानाऽऽमर्कास्तथा पुनरावृत्याऽऽगतास्तथागताः पुनरस्मिन् संसारेऽशुचिगर्भाधाने समुत्पद्यन्ते, न कथञ्चित्कदाचित्कर्मोपादानाभावादुत्पद्यन्त इत्यर्थः । तथा तथागतास्तीर्थकृद्गणधराऽऽदयो न विद्यन्ते प्रतिज्ञानिदानबन्धनरूपा येषां ते प्रतिज्ञानिदाना निराशंसाः सत्यहितकरणोद्यता अनुत्तरज्ञानत्वादनुत्तरलोकस्य जन्तुगणस्य सदसदर्थनिरूपणकारणतश्चक्षुर्भूता हिताद्यप्राप्तिपरिहारं कुर्वन्तः सकललोकलोचनभूतास्तथागताः सर्वज्ञा भवन्तीति ॥ २० ॥ सूत्र० १ श्रु० १५ अ० । (आपत्सु दृढधर्मता योगसंग्रहायेति ' आयई ' शब्दे द्वितीयभागे १४५ पृष्ठे गता) धर्माऽऽख्याने तु यथा पित्रादीनामुपकारस्तथा नान्यथा । ' (लोगत्थि ' शब्दे चेदं वक्ष्यते) केवलिप्रज्ञप्तधर्मस्य श्रवणता दुर्लभा । यतोऽवाचि-" सुइहा सरलोयसिरी, रयणायरमेहला मही सुलहा । निव्वुइसुद्धजणियरई, जिणवयणसुई जए दुलहा ॥ १ ॥ " इति । श्रुतस्य वा श्रद्धानता दुर्लभा । उक्तं च-" आहच्च सवणलद्धं, सद्धा परमदुल्लहा । सोच्चा नेयाउयं मग्गं, बहवे परिभस्सइ " ॥ १ ॥ इति । स्था० ६ ठा० ।

उक्तं च-

" लब्भइ सुरसामित्तं, लब्भइ पहुअत्तणं न संदेहो ।
इक्को नवरि न लब्भइ, जिणिंदवरदेसिओ धम्मो ॥ १ ॥
धम्मो पवित्तिरूवो, लब्भइ कइयावि निरयदुक्खभया ।
जो निअवसुस्सहावो, सो धम्मो दुल्लहो लोए ॥ २ ॥
नियबंधुधम्मसवणं, दुल्लहं बुत्तं जिणिंदआणा य ।
अंतप्फासणमेग-त्त हुंति केसिंचि धीराणं ॥ ३ ॥ " अष्ट० २ अष्ट० ।

" एसो य असइ दोसा-सेवणओ धम्मवज्झचित्ताणं ।
ता धम्मे जइयव्वं, सम्मं सइ धीरपुरिसेहिं" ॥ १ ॥ इति ।
स्था० ६ ठा० ।

(२३) मनुजजन्मदुर्लभत्वमुक्त्वा तद्वाप्तावनुत्तरोत्तरगुणावाप्तिरति दुरापेत्याह-

अट्ठीणपंचिंदियत्तं पि से लहे,
उत्तमधम्मसुती हु दुल्लहा ।
कुत्तित्थणिसेवए जणे,
समयं गोयम ! मा पमायए ॥१७॥
लद्धूण वि उत्तमं सुइं,
सद्दहणा पुणरावि दुल्लहा ।
मिच्छत्तणिसेवए जणे,
समयं गोयम ! मा पमायए ॥ १७ ॥
धम्मं पि हु सद्दहंतया,
दुल्लहया काएण फासया ।
इह कामगुणेहिँ मुच्छिया,
समयं गोयम ! मा पमायए ॥ १७ ॥

कथञ्चिदवाप्तेन्द्रियतामप्युक्तन्यायतोऽतिदुर्लभामपि स इति जन्तुर्जीवेत प्राप्नुयात्, तथाऽप्युत्तमः प्रधानो यो धर्मस्तस्य श्रुतिराकर्णना या सा तथा, दुरवधारणे, भिन्नक्रमश्च । ततो दुर्लभैव, किमिति ?, यतः कुत्सितानि च तानि तीर्थानि च कुतीर्थानि शाक्योलूकाऽऽदिप्ररूपितानि, तानि विद्यन्ते येषामनुष्ठेयतया स्वीकृतत्वात्ते कुतीर्थिनः, तान्निषेवते यः कुतीर्थिनिषेवको जनो लोकः, कुतीर्थिनो हि यशःसत्काराऽऽश्रयिणो यदेव प्राणिप्रियं विषयाऽऽदि, तदेवोपदिशन्ति, तत्तीर्थकृतामप्येवंविधत्वात् । उक्तं हि-"सत्कारयशोलाभार्थिभिश्च मूढैरिहान्यतीर्थकरैः । अवसादितं जगदिदं, प्रियाण्यपथ्यान्युपदिशद्भिः ॥ १ ॥" इति सुकरैव तेषां सेवा, तत्सेवनाच्च कुत उत्तमधर्मश्रुतिः ? । पठ्यते च-"कुत्तित्थणिसेवए जणे" इति स्पष्टम् । एवं तद्दुर्लभत्वमवधार्य समयमपि गौतम ! मा प्रमादीः । किं च-लब्ध्वाऽपि उत्तमधर्मविषयत्वादुत्तमां तां श्रुतिमुक्तरूपां, श्रद्धानं तत्त्वरुचिरूपं, (पुणरावि त्ति) पुनरपि दुर्लभं दुरापमपि । इहैव हेतुमाह-मिथ्याभावो मिथ्यात्वम्-अतत्त्वेऽपि तत्त्वप्रत्ययरूपं, तन्निषेवते यः स मिथ्यात्वनिषेवकः, जनो लोकोऽनादिभवाभ्यस्ततया गुरुकर्म्मतया च तत्रैव च प्रायः प्रवृत्तेः । यत एवमतः समयमपि गौतम ! मा प्रमादीः । अन्यच्च-धर्मं प्रक्रमात् सर्वज्ञप्रणीतम्,अपिर्भिन्नक्रमः श्रुत्वाकर्ण्य चाद्रियस्व । ततः श्रद्दधतोऽपि कर्तुमभिलषन्तोऽपि दुर्जनकाः कायेन शरीरेण, उपलक्षणत्वान्मनसा वाचा च स्पर्शका अनुष्ठातारः । कारणमाह-इहास्मिन् जगति कामगुणेषु मूर्च्छिता मूढाः, मूर्च्छिमन्त इत्यर्थः। जन्तव इति शेषः। प्रायेण ह्यपथ्येष्वेव विषयेष्वभिष्वङ्गः प्राणिनाम्, यत उक्तम्-"प्रायेण हि यदपथ्यं, तदेव चाऽऽतुरजनप्रियं भवति । विषयाऽऽतुरस्य जगत-स्तथाऽनुकूलाः प्रिया विषयाः ॥१॥" पाठान्तरतः-कामगुणैर्मूर्च्छिता इव मूर्च्छितवाः विलुप्तधर्मविषयचैतन्यत्वात् यतश्चैवमतो दुरापामिमामविकलां धर्मसामग्रीमवाप्य समयमपि गौतम ! मा प्रमादीरिति। उत्त० पार्श्व० १० अ० । स्था० ।

(२४) पर्यायच्युतस्यैहिकं दोषमाह-

धम्माओ भट्ठं सिरिओववेअं,
जणम्मि विज्जायमिवऽप्पतेअं ।
हीलंति णं दुव्विहिअं कुसीला,
दाढद्धिअं घोरविसं व नागं ॥ १२ ॥

धर्मात् श्रमणधर्मतः,भ्रष्टं च्युतं, श्रियाऽपेतं तपोलक्ष्म्या अपगतं, यज्ञाग्निमग्निहोत्राभिनिवेशं, विध्यातमिव यामावसानेऽल्पतेजसम, अल्पशब्दो भावतेजःशून्यं भस्मकल्पमित्यर्थः, हीलयन्ति कदर्थयन्ति, पतितस्त्वमिति पङ्क्त्याऽपसारणाऽऽदिना, एनमुक्तिष्क्रान्तं, दुर्विहितमुक्तिष्क्रमणादेव दुष्टानुष्ठायिनं, कुशीलास्तत्सङ्गोचिता लोकाः, स एव विशेष्यते-(दाढद्धियं ति) प्राकृतशैल्या उद्धृतदंष्ट्रमुत्खातदंष्ट्रं, घोरविषमिव रौद्रविषमिव, नागं सर्पं यज्ञाग्निसर्पोपमानं, लोकनीत्या प्रधानभावादप्रधानभावख्यापनार्थमिति सूत्रार्थः ॥१२॥

एवमस्य भ्रष्टशीलस्यैवंगतयैहिकं दोषमभिधाय ऐहिकाऽऽमुष्मिकमाह-

इहेव धम्मो अयसो अकित्ती,
दुन्नामधिज्जं च पिहज्जणम्मि ।
चुअस्स धम्माओ अहम्मसेविणो,
संभिन्नवित्तस्स य हिट्ठओ गई ॥ १३ ॥

इहैवेहलोके एवाधर्म इत्ययमधर्मफलेन दर्शयति, यदुतायशः अपराक्रमकृतं न्यूनत्वं, तथा-अकीर्तिरदानपुण्यफलप्रवाहरूपा, तथा-दुर्नामधेयं च 'पुराणः पतितः' इति कुत्सितनामधेयं च । कुत्राह-पृथग्जने सामान्यलोकेऽप्यास्तां विशिष्टलोके, कस्येत्याह-च्युतस्य धर्मात्,उत्प्रव्रजितस्येति भावः । तथा-अधर्मसेविनः कलत्राऽऽदिनिमित्तं षट्कायोपमर्दकारिणः,तथा-संभिन्नवृत्तस्य चारक्षणनीयक्षणेऽतचारित्रस्य च क्लिष्टकर्मबन्धनात् अधस्तादुत्तिर्नरकेषूपपात इति सूत्रार्थः ॥१३॥

अस्यैव विशेषप्रत्यपायमाह-

भुंजित्तु भोगाइँ पसज्झचेअसा,
तहाविहं कटु असंजमं बहुं ।
गई च गच्छे अणभिज्झिअं दुहं,
बोही अ से नो सुलहा पुणो पुणो ॥ १४ ॥

स उत्प्रव्रजितो भुक्त्वा भोगान् शब्दाऽऽदीन्, प्रसह्यचेतसा धर्मनिरपेक्षतया प्रकटेन चित्तेन, तथाविधमङ्गोचितधर्मफलं, कृत्वाऽभिनिवृत्य, असंयमं कृष्याद्यारम्भरूपं,बहुमलत्वात् प्रभूतं,सन् इत्थं भूतो मृतः सन्, गतिं च गच्छत्यनभिध्यात्वा अभिध्यात्वा, इष्टानिष्टामित्यर्थः । कांचित् सुखाऽप्येवंभूता भवत्यत आह-दुःखां प्रकृत्यैवासुन्दरां दुःखजननीं, बोधिश्चासौ जिनधर्मप्राप्तिश्चास्योज्झितस्य न सुलभा पुनः पुनः प्रभूतेष्वपि जन्मसु दुर्लभैव, प्रवचनविराधकत्वादिति सूत्रार्थः ॥ यस्मादेवं तस्मादेवं तदुत्पन्नदुःखोऽप्येतदनुचिन्त्य नोत्प्रव्रजेदित्याह-

इमस्स ता नेरइअस्स जंतुणो,
दुहोवणीअस्स किलेसवत्तिणो ।

पलिओवमं छिज्जइ सागरोवमं,
किमंग ! पुण मज्झ इमं मणोदुहं ॥ १५ ॥

अस्य तावदित्यात्मन एव निर्देशः, नारकस्य जन्तोः, नरकमनुप्राप्तस्येत्यर्थः । दुःखोपनीतस्य सामीप्येन प्राप्तदुःखस्य, क्लेशवृत्तेः-एकान्तक्लेशवेष्टितस्य सतो, नरक एव पल्योपमं क्षीयते, सागरोपमं च यथाकर्मप्रत्ययम्, किमङ्ग ! पुनर्ममेदं संयमरतिनिष्पन्नं मनोदुःखं तथाविधक्लेशदोषरहितम्, एतच्चिन्तयतः पवैतच्चिन्तनेन नोत्प्रव्रजितव्यमिति सूत्रार्थः ॥१५॥

विशेषेणैतदेवाऽऽह-

न मे चिरं दुक्खमिणं भविस्सई,
असासया भोगपिवास जंतुणो ।
न चे सरीरेण इमेणऽवस्सई,
अवस्सई जीविअपज्जवेण मे ॥ १६ ॥

न मम चिरं प्रभूतं कालं दुःखमिदं संयमरतिलक्षणं भविष्यति । किमित्यत आह-अशाश्वती प्रायो यौवनकालावस्थायिनी, भोगपिपासा विषयतृष्णा, जन्तोः प्राणिनः । अशाश्वतीत्व एव कारणान्तरमाह-न चेच्छरीरेणानेनापयास्यति न यदि शरीरेणानेन करणभूतेन वृद्धत्वेऽपि सतोऽपयास्यति, तथाऽपि किमाकुलत्वं यतोऽपयास्यति जीवितपर्यायेण जीवितस्यापगमेन, मरणेनेत्येवंनिश्चितः स्यादिति सूत्रार्थः ॥१६॥

अस्यैव फलमाह-

जस्सेवमप्पा उ हविज्ज निच्छिओ,
चइज्ज देहं न हु धम्मसासणं ।
तं तारिसं नो पइलंति इंदिआ,
उवेंति वाया व सुदंसणं गिरिं ॥ १७ ॥

यस्येति साधोः, एवमुक्तेन प्रकारेण, आत्मा, तुशब्दस्यैवकारार्थत्वात् आत्मैव, भवेन्निश्चितो दृढः, स त्यजेद्देहं क्वचिद्विघ्ने उपस्थिते, न तु धर्मशासनं न पुनर्धर्मज्ञानमिति, तं तादृशं धर्मनिश्चितं, न प्रचालयन्ति संयमस्थानान्न कम्पयन्तीन्द्रियाणि चक्षुरादीनि । निदर्शनमाह-उत्पतद्वाता इव संपतत्पवना इव सुदर्शनं गिरिं मेरुम्। एतदुक्तं भवति-यथा मेरुं वाता न चालयन्ति तथा तमपीन्द्रियाणीति सूत्रार्थः ॥ १७ ॥

उपसंहरन्नाह-

इच्चेव संपस्सिअ बुद्धिमं नरो,
आयं उवायं विविहं विआणिआ ।
काएण वाया अदु माणसेणं,
तिगुत्तिगुत्तो जिणवयणमहिट्ठिजासि ॥१८॥

इत्येवमस्यनन्तरोक्तं क्षुद्रजीवित्वाऽऽदि संप्रेक्ष्याऽऽदित आ .य यथावद् दृष्ट्वा बुद्धिमान्नरः सम्यक् बुद्धगुणेनः, आयमुपायं विविधं विज्ञाय, आयः सम्यग्ज्ञानाऽऽदेः, उपायस्तत्साधनप्रकारः कालविनयाऽऽदिर्विविधोऽनेकप्रकारस्तं ज्ञात्वा, किमित्याह-कायेन, वाचा, अथ-मनसा, त्रिभिरपि करणैर्यथाप्रवृत्तैः त्रिगुप्तिगुप्तः सन् जिनवचनमर्हदुपदेशमधितिष्ठेत् यथाशक्ति तदुक्तैकक्रियापालनपरो भूयात्, भवाय सिद्धौ तत्तो मुक्तिसिद्धेरिति सूत्रार्थः ॥ १८ ॥ दश० १ चू० ।

(२५) किमभिसन्ध्य धर्ममाचक्षीतेति दर्शयति-

दयं लोगस्स जाणित्ता पाईणं पडीणं दाहिणं उदीणं आइक्खे विभए किट्टे वेदवी मे उट्ठिएसु वा अणुट्ठिएसु वा सुस्सूसमाणेसु पवेदए संतिं विरतिं उवसमं णिव्वाणं सोयवियं अज्जवियं मद्दवियं लाघवियं अणइवत्तियं सव्वेसिं पाणाणं सव्वेसिं भूयाणं सव्वेसिं जीवाणं सव्वेसिं सत्ताणं अणुवीइ भिक्खू धम्ममाइक्खेज्जा ।

दयां कृपां लोकस्य जन्तुलोकस्योपरि रूढ्यतो ज्ञात्वा, क्वेतः प्राचीनं, प्रतीचीनं दक्षिणमुदीचीनम्, अपरानपि दिग्विभागानभिसमीक्ष्य सर्वत्र दयां कुर्वन् धर्ममाचक्षीत, कालतो यावज्जीवं, भावतोऽरक्तोऽद्विष्टः; कथमाचक्षीत?। तद्यथा-सर्वे जन्तवो दुःखद्विषः सुखलिप्सव आत्मोपमया सदा द्रष्टव्या इति । उक्तं च-"तत्परस्य संदध्या--त्प्रतिकूलं यदात्मनः । एष संग्रहिको धर्मः, कामादन्यत् प्रवर्त्तते ॥ १ ॥" इत्यादि । तथा धर्ममाचक्षाणो विभजेत् द्रव्यक्षेत्रकालभावभेदैरादौपेण्यादिकथाविशेषैर्वा प्राणातिपातमृषावादादत्ताऽऽदानमैथुनपरिग्रहरात्रिभोजनविरतिविशेषैर्वा धर्मं विभजेत्, यदि वा कोऽयं पुरुषः कं नतो देवताविशेषमभिगृहीतोऽनभिगृहीतो वा एवं विभजेत,तथा कीर्त्तयेद् व्रतानुष्ठानफलं, कोऽसौ कीर्त्तयेद् ?, वेदविदागमविदिति । नागार्जुनीयास्तु पठन्ति-" जे खलु भिक्खू बहुस्सुए बब्भागमे आहरणहेउकुसले धम्मकहालद्धिसंपन्ने सेत्तं कालं पुरिसं समासज्ज कहेयं पुरिसे कं वा दरिसणमभिसंपन्नो एवं पुण जाणीए पन्नू धम्मस्स आघवित्तए । " इति करणीयम् । स पुनः केषु निमित्तभूतेषु कीर्तयेदित्याह-(से उट्ठिएसु वा इत्यादि) स आगमवित् स्वसमयपरसमयज्ञ उत्थितेषु वा भावोत्थानेन यतिषु, वाशब्द उत्तरक्रिया पक्षान्तरद्योतकः । पार्श्वनाथशिष्येषु चतुर्यामोत्थितेष्वेव, वर्द्धमानतीर्थाऽऽचार्याऽऽदिः पञ्चयामं धर्मं प्रवेदयेदिति स्वशिष्येषु वा सदोत्थितेष्वज्ञानज्ञापनाय धर्मं प्रवेदयेदिति । अनुत्थितेषु वा श्रावकाऽऽदिषु शुश्रूषमाणेषु धर्मं श्रोतुमिच्छत्सु गुर्वादेः पर्युपासीनेषु कुर्वत्सु वा संसारोत्तरणाय धर्मं प्रवेदयेत् । तत्किभूतं प्रवेदयेदित्याह-"संतिं" इत्यादि, यावत् " भिक्खू धम्ममाइक्खेज्जा " शमनं शान्तिरहिंसेत्यर्थः। तामाचक्षीत, तथा विरतिम्,अनेन च मृषावादाऽऽदिदोषव्रतसंग्रहः। तमुपशमं क्रोधजयाद्,अनेन चोत्तरगुणसंग्रहः,तथा निर्वृतिर्निर्वाणं मूलगुणोत्तरगुणयोरैहिकाऽऽमुष्मिकफलभूतमाचक्षीत । तथा, शौचं सर्वोपाधिशुचित्वं निर्दोषव्रतधारणं, तथा आर्जवं मायावक्रतापरित्यागात्, तथा मार्दवं मानस्तब्धतापरित्यागात्, तथा लाघवं सबाह्याभ्यन्तरग्रन्थिपरित्यागात् । कथमाचक्षीतेति दर्शयति-अनतिपात्य । यथावस्थितं वस्त्वागममाभिहित, तथाऽनतिक्रम्येत्यर्थः, केषां कथयति?, सर्वेषां प्राणिनां, दशविधाः प्राणा विद्यन्ते येषां ते प्राणिनस्तेषां सामान्यतः संज्ञिपञ्चेन्द्रियाणां, तथा सर्वेषां भूतानां मुक्तिगमनयोग्येन भव्यत्वेन भूतानां व्यवस्थितानां, तथा सर्वेषां जीवानां जिजीविषूणां च, तथा सर्वेषां सत्त्वानां तिर्यङ्नरामराणां संसारे क्लिश्यमानतया करुणाऽऽस्पदानाम्,प-

कार्थिकानि चैतानि प्राणाऽऽदीनि वचनानीत्यतस्तेषां क्रान्त्यादिकं दशविधं धर्मं यथायोगं प्रभुपन्यस्तं शान्त्यादिपदाभिहितमनु विचिन्त्य स्वपरोऽयं निक्रूणशीलो भिक्षुर्धर्मैकथाख्यमाचक्षीत प्रतिपादयेदिति ।

यथा च धर्मं कथयेत्तदाह-

अणुवीइ भिक्खू धम्ममाइक्खमाणे णो अत्ताणं आसाएज्जा, णो परं आसाएज्जा, णो अण्णाइं पाणाइं भूताइं जीवाइं सत्ताइं आसाएज्जा, से अणासायए अणासायमाणे वज्झमाणाणं पाणाणं भूयाणं जीवाणं सत्ताणं जहा से दीवे असंदीणे, एवं से सरणं भवति महामुणी ।

"अणुवीइ भिक्खू" इत्यादि यावत् "सरणं भवति महामुणि त्ति"। स भिक्षुर्मुमुक्षुर्वानुविचिन्त्य पूर्वापरेण धर्मं पुरुषं वाऽऽलोच्य यो यस्य कथनयोग्यस्तं धर्ममाचक्षाणः, आङिति मर्यादायां, यथाऽनुष्ठानं सम्यग्दर्शनाऽऽदेः शातना आशातना, तमात्मानं नो आशातयेत्, तथा धर्ममाचक्षीत, यथाऽऽत्मन आशातना न भवेत् । यदि वा आत्मन आशातना द्विधा-द्रव्यतो, भावतश्च । द्रव्यतो यथाऽऽहारोपकरणाऽऽदेर्द्रव्यस्य काल्पातिपाताऽऽदिकृताऽऽशातना बाधा न भवति तथा कथयेत्, आहाराऽऽदिद्रव्यबाधया च शरीरस्यापि पीडाभावाऽऽशातनारूपा स्यात्, कथयतो वा यथा गात्रभङ्गरूपा भावाऽऽशातना न तस्य स्यात्तथा कथयेदिति । तथा न परं शुश्रूषुराशातयेत्, यतः परो ह्यज्ञतया कुपितः सन्नाहारोपकरणशरीरान्यतरपीडायै प्रवर्तेताऽतस्तदाशातनां वर्जयन् धर्मं ब्रूयादिति । तथा नान्यान् वा सामान्येन प्राणिनो भूतान् जीवान् नो आशातयेद् बाधयेत्, तदेवं स मुनिः स्वतोऽनाशातकैरनाशातयन् तथा परानाशातयतोऽननुमन्यमानोऽपरेषां वध्यमानानां प्राणिनां भूतानां सत्त्वानां जीवानां यथा पीडा नोत्पद्यते तथा धर्मं कथयेदिति । तद्यथा यदि लौकिककुप्रावचनिकपार्श्वस्थाऽऽदिदानानि प्रशंसत्यवटतमागाऽऽदीनि वा, ततः पृथिवीकायाऽऽदयो व्यापादिता भवेयुः, अथ दूषयति-ततोऽपरेषामन्तरायाऽऽपादनेन तत्कृतो बन्धविपाकानुभवः स्यात् । उक्तं च-"जे उ दाणं पसंसंति, वहमिच्छंति पाणिणं । जे य णं पडिसेहंति, वित्तिच्छेयं करंति ते ॥१॥" तस्मात्तदवटतमागाऽऽदिविधिप्रतिषेधव्युदासेन यथाऽवस्थितं दानं शुद्धं प्ररूपयेदसावद्यानुष्ठानं चेति । एवं च कुर्वन्नुभयदोषपरिहारो जन्तूनामाश्वासभूमिर्भवतीत्येतद् दृष्टान्तद्वारेण दर्शयति-यथाऽसौ द्वीपोऽसंदीनः शरणं भवत्येवमसावपि महामुनिः तत्कृणोपायोपदेशतो वध्यमानानां वधकानां च तदध्यवसायान्निवर्तते, न विशिष्टगुणस्थानाऽऽपादनाच्छरण्यो भवति । तथाहि-यथोदितेन कथाविधानेन धर्मकथां कथयन् काँश्चन प्रव्राजयति, कांश्चन श्रावकान्निबध्नाति, काँश्चन सम्यग्दर्शनयुतान् करोति, केषाञ्चित्प्रकृतिभद्रकतामापादयति । आचा० १ श्रु० ६ अ० ५ उ० ।

किञ्चान्यत्-

सयं समेच्चा अदुवा वि सोच्चा,
भासेज्ज धम्मं हियं पयाणं ।
जे गरहिया सणियाणप्पओगा,
ण ताणि सेवंति सुधीरधम्मा ॥ १६ ॥

स्वयमात्मना परोपदेशमन्तरेण समेत्य ज्ञात्वा चतुर्गतिकं संसारं, तत्कारणानि च मिथ्यात्वाविरतिप्रमादकषाययोगरूपाणि, तथाऽशेषकर्मक्षयलक्षणं मोक्षं, तत्कारणानि च सम्यग्दर्शनज्ञानचारित्राणि, एतत्सर्वं स्वत एवावबुद्ध्यान्यस्माद्वाऽऽचार्याऽऽदेः सकाशात् श्रुत्वाऽन्यस्मै मुमुक्षवे धर्मं श्रुतचारित्राऽऽख्यं भाषेत । किंभूतम्?, प्रजायन्त इति प्रजाः स्थावरजङ्गमा जन्तवः, तेभ्यो हितं सदुपदेशदानतः सदोपकारिणं धर्मं ब्रूयादिति । उपादेयं प्रदर्श्य हेयं प्रदर्शयति-ये गर्हिता जुगुप्सिता मिथ्यात्वाविरतिप्रमादकषाययोगाः कर्मबन्धहेतवः, सह निदानेन वर्तन्त इति सनिदानाः, प्रयुज्यन्त इति प्रयोगा व्यापाराः, धर्मकथाप्रबन्धा वा ममास्मात्सकाशात्पूजालाभसंस्काराऽऽदिकं भविष्यतीत्येवंभूतनिदानाऽऽशंसारूपास्तांश्चारित्रविघ्नभूतान् महर्षयः सुधीरधर्माणो न सेवन्ते नानुतिष्ठन्ति । यदि वा-ये गर्हिताः सनिदानाश्च प्रयोगाः, तद्यथा-कुतीर्थिकाः सावद्यानुष्ठानाविरता निःशीला अनिवृताः कुटिलचेष्टाकारिण इत्येवंभूतान् परदोषोद्घाटनया मर्मवेधिनः, सुधीरधर्माणो वाक्शूरकान् न सेवन्ते न ब्रुवत इति ॥ १६ ॥

किं चान्यत्-

केसिंचि तक्काइ अबुज्झ भावं,
खुद्दं पि गच्छेज्ज असद्दहाणे ।
आउस्स कालाइचरं वधाए,
लब्भाणुमाणे य परेसु अट्ठे ॥ ५० ॥

केषाञ्चिन्मिथ्यादृष्टीनां कुतीर्थिकभावितानां स्वदर्शनाग्राहिणां, तर्कया वितर्केण स्वमतिपर्यालोचनेन, भावमभिप्रायं दुष्टान्तःकरणवृत्तित्वमबुध्वा कश्चित्साधुः श्रावको वा स्वधर्मस्थापनेच्छया तीर्थिकतिरस्कारप्रायं वचो ब्रूयात्, स च तीर्थिकस्तद्वचोऽश्रद्दधानोऽरोचयन्नप्रतिपद्यमानोऽतिकटुकं भावयेत्, कुरुत्वमपि गच्छेद्विरूपमपि कुर्यात्, पाठकपुरोहितवत् स्कन्दकाऽऽचार्यस्येति । कुरुत्वगमनमेव दर्शयति-स निन्दावचनकुपितोऽपि वक्रुर्यश्चायुस्तस्याऽऽयुषो व्याघातरूपं परिक्लेशस्वभावं कालातिचारं दीर्घस्थितिकमप्यायुः संवर्तेत । एतदुक्तं भवति-धर्मदेशना हि पुरुषविशेषं ज्ञात्वा विधेया । तद्यथा-कोऽयं पुरुषो राजाऽऽदिः कञ्चन देवताविशेषं गतः कतरद्वा दर्शनमाश्रितोऽभिगृहीतोऽनभिगृहीतो वाऽयमित्येवं सम्यक् परिज्ञाय यथार्हं धर्मदेशना विधेया । यश्चैतदबुद्ध्वा किञ्चिद्धर्मदेशनाद्वारेण परविरोधकृद्ब्रूयात् स परस्मादैहिकाऽऽमुष्मिकयोर्मरणाऽऽदिकमपकारं प्राप्नुयादिति । यत एवं ततो लब्धमनुमानं येन पराभिप्रायपरिज्ञाने स लब्धानुमानः परेषु प्रतिपाद्येषु यथायोगं यथार्हप्रतिपत्त्यर्थान् सद्धर्मप्ररूपणाऽऽदिकान् जीवाऽऽदीन् स्वपरोपकाराय ब्रूयादिति ॥ ५० ॥ सूत्र० १ श्रु० १३ अ० ।

से भिक्खू मायण्णे अन्नयरं दिसं अणुदिसं वा पडिवन्ने धम्मं आइक्खे विन्नए किट्टे जहट्ठिएसु वा अणुवट्ठिएसु वा सुस्सूसमाणेसु पवेदए संतिविरतिं उवसमं निव्वाणं सोयवियं अज्जवियं मद्दवियं लाघवियं अणतिवातियं सव्वेसिं पाणाणं सव्वेसिं भूताणं०जाव सत्ताणं अणुवाइं किट्टिए धम्मं ॥ ५७ ॥

स भिक्षुराहारोपधिशयनस्वध्यायाऽऽदीनां मात्रां जानातीति तद्विधिज्ञः सन् अन्यतरां दिशमनुदिशं वा प्रतिपन्नः समाधिनो धर्ममाख्यापयेत् , यद्येन विधेयस्तथथा-भोगं विभजेत्कर्मफलानि च कीर्तयेदाविर्भावयेत्, तच्चैकार्थप्रवृत्तेन साधुना स्वयमुपस्थितेषु वा कौतुकाऽऽदिप्रवृत्तेषु शुश्रूषमाणेषु श्रोतुं प्रवृत्तेषु स्वपराभिप्रायं वेदयेद्वेदयेत्प्रकथयेदिति यावत् । श्रोतुमुपस्थितेषु यत्कथयेत्तद्दर्शयितुमाह-(संतिविरइं इत्यादि) शान्तिरुपशमः क्रोधजयस्तत्प्रधाना प्राणातिपातान्निवृत्तिः शान्तिविरतिः। यदि वा-शान्तिरशेषक्लेशापगमरूपा तस्यैतदर्थं विरतिस्तां कथयेत्, तथोपशममिन्द्रियोपशमरूपं रागद्वेषाभावजनितम् । तथा-निर्वृतिं निर्वाणमशेषकन्दोपरमरूपं, तथा (सोयवियं ति) शौचं, तदपि भावशौचं, सर्वोपाधिशुद्धता तदाभालिन्यम् । (अज्जवियं ति) आर्जवममायित्वं, तथा-मार्दवं मृदुभावं सर्वत्र प्रश्रयवत्त्वं विनयनम्रतेति यावत् । तथा-(लाघवियं ति) कर्मणां लाघवाऽऽपादनं कर्मगुरोर्वाऽऽत्मनः कर्मापनयनतो लघ्ववस्थासंजननम् । साम्प्रतमुपसंहारद्वारेण सर्वशुभानुष्ठानानां मूलकारणमाह-अतिपतनमतिपातः प्राणयुपमर्दनं, तद्विद्यते यस्यासावतिपातिकस्तत्प्रतिषेधादनतिपातिकस्तं, सर्वेषां प्राणिनां भूतानां यावत्सत्त्वानां धर्ममनुविचिन्त्य वा कीर्तयेत्कथयेत् । इदमुक्तं भवति-सर्वप्राणिनां रक्षाभूतं धर्मं कथयेदिति ॥ ५७ ॥

साम्प्रतं धर्मकीर्तनं यथानिरूपितमधिभवति तथा दर्शयितुमाह-

से भिक्खू धम्मं किट्टमाणे णो अन्नस्स हेउं धम्ममाइक्खेज्जा, णो पाणस्स हेउं धम्ममाइक्खेज्जा, णो वत्थस्स हेउं धम्ममाइक्खेज्जा, णो लेणस्स हेउं धम्ममाइक्खेज्जा, णो सयणस्स हेउं धम्ममाइक्खेज्जा, णो अन्नेसिं विरूवरूवाणं कामभोगाणं हेउं धम्ममाइक्खेज्जा, अगिलाए धम्ममाइक्खेज्जा, नन्नत्थ कम्मनिज्जरट्ठाए धम्ममाइक्खेज्जा ॥ ५८ ॥

स भिक्षुः परकृतपरिनिष्ठिताऽऽहारभोजी यथाक्रियाकूलाऽनुष्ठायी शुश्रूषन् सुधर्मं कीर्तयन्नात्मनस्य हेतोर्ममायमीश्वरो धर्मकथाप्रश्नवणे विशिष्टमाहारजातं दास्यतीति, एतन्निमित्तं न धर्ममाचक्षीत, तथा पानवस्त्रालयशयननिमित्तं न धर्ममाचक्षीत। नान्येषां विरूपरूपाणामुच्चावचानां कार्याणां कामभोगानां वा निमित्तं तथा धर्ममाचक्षीत, ग्लानिमुपगच्छन् न धर्ममाचक्षीत। कर्मनिर्जरायाश्चान्यत्र न धर्मं कथयेदपरप्रयोजननिरपेक्ष एव धर्मं कथयेदिति ॥ ५८ ॥

धर्मकथाश्रवणफलदर्शनद्वारेणोपसंजिघृक्षुराह-

इह खलु तस्स भिक्खुस्स अंतिए धम्मं सोच्चा णिसम्म सम्मं उट्ठाणेणं उट्ठाय वीरा अस्सिं धम्मे समुट्ठिया जे ते एवं सव्वोवगता ते एवं सव्वोवरता ते एवं सव्वोवसंता ते एवं सव्वताए परिनिवुमे त्ति बेमि ॥ ५९ ॥

इहास्मिन् जगति, खलुर्वाक्यालङ्कारे । तस्य भिक्षोर्गुणवतोऽन्तिके समीपे पूर्वोक्तविशेषणविशिष्टं धर्मं श्रुत्वा निशम्यावगम्य सम्यगुत्थानेनोत्थाय धी(वी)राः कर्मविदारणसहिष्णवो, ये चैवंभूतास्ते एवं पूर्वोक्तविशेषणविशिष्टानुष्ठानतया सर्वस्मिन्नपि मोक्षकारणसम्यग्दर्शनाऽऽदिके उप सामीप्येन गताः सर्वोपगतास्तथैवं सर्वेभ्य उपरताः सर्वोपरताः,तथा त एवं सर्वोपशान्ता जितकषायतश्च शीतलीभूताः,तथा एवं सर्वाऽऽत्मतया सर्वसामर्थ्येन सदनुष्ठानेनोद्यमं कृतवन्तो, ये चैवंभूतास्तेऽशेषकर्मक्षयं कृत्वा परि समन्तान्निर्वृत्ता अशेषकर्मक्षयं कृतवन्त इति ब्रवीमीति पूर्ववत् ॥ ५९ ॥ सूत्र० २ श्रु० १ अ० ।

(२६) इह भवजलधिनिमग्नसत्त्वाभ्युज्जिहीर्षाऽभ्युद्यतेन स्वहितसंपादननिपुणेन गुरुलाघवचिन्तावता प्रस्तावार्थव्याकरणसमर्थेन विदुषा सद्धर्मपरीक्षायां यत्नो विधेयः, सा च परीक्षकमन्तरेण न संभवति, तदविनाभावित्वात्परीक्षायाः;सद्धर्मपरीक्षकाऽऽदिभावप्रतिपादनार्थं च आर्य्यापोमशाधिकारप्रतिबद्धं प्रकरणमारेभे हरिभद्रसूरिः, तस्य चाऽऽदावेव प्रयोजनाभिधेयसम्बन्धप्रतिपादनार्थमिदमार्य्यासूत्रं जगाद-

प्रणिपत्य जिनं वीरं, सद्धर्मपरीक्षकाऽऽदिभावानाम् ।
लिङ्गाऽऽदिभेदतः खलु, वक्ष्ये किञ्चित्समासेन ॥१॥

प्रणिपत्य नमस्कृत्य, जिनं जितरागद्वेषमोहं सर्वज्ञं वीरं सदेवमनुष्यासुरलोके श्रमणो भगवान् महावीर इत्यागमप्रसिद्धनामानमनेनेष्टदेवतास्तवद्वारेण मङ्गलमाह । सद्धर्मपरीक्षकाभिधेयो वक्ष्यमाणस्तदादयो ये भावास्तेषां किञ्चिदित्यस्य स्वल्पमात्राभिधायित्वाल्लेशं वक्ष्ये लिङ्गाऽऽदिभेदतः खलिवति लिङ्गवृत्ताऽऽदिविशेषप्रतिपादनद्वारेण यद्यप्यपरैरेव पूर्वाचार्यैः सद्धर्मपरीक्षाऽऽदयो भावाः स्फुटमेवाभिहितास्तथाप्यहं समासेनैवाभिधास्यामीति (१) ॥

सद्धर्मपरीक्षकस्य त्रिविधस्य व्यापारमुपदर्शयति--

बालः पश्यति लिङ्गं, मध्यमबुद्धिर्विचारयति वृत्तम् ।
आगमतत्त्वं तु बुधः, परीक्षते सर्वयत्नेन ॥ २ ॥

बालो विशिष्टविवेकविकलो लिङ्गं वेषमाकारं बाह्यं पश्यति, प्रधानेन धर्मार्थिनोऽपि तस्य तत्रैव नूयसा रुचिप्रवृत्तेः । मध्यमबुद्धिर्मध्यमविवेकसंपन्नो, विचारयति मीमांसते, वृत्तं वक्ष्यमाणस्वरूपं प्राधान्येन समाश्रयति, तत्रैवाभिलाषत्वात् । आगमतत्त्वं त्वागमपरमार्थमेदंपर्यरूपं, बुधो विशिष्टविवेकसंपन्नः, परीक्षते समीचीनमवलोकयति । सर्वयत्नेन सर्वाऽऽदरेण धर्माधर्मव्यवस्थाया आगमनियन्धनत्वात् । यत उक्तम्-" धर्माधर्मव्यवस्थायाः, शास्त्रमेव नियामकम् । तदुक्ताऽऽसेवनाकर्म-स्वधर्मैस्तद्विपर्ययात् ॥ १ ॥" ॥ २ ॥

इदानीं पूर्वोक्तानां बालाऽऽदीनामेव लक्षणमाह-

बालो ह्यसदारम्भो, मध्यमबुद्धिस्तु मध्यमाऽऽचारः ।
ज्ञेय इह तत्त्वमार्गे, बुधस्तु मार्गानुसारी यः ॥ ३ ॥

बालो हि पूर्वोक्तः असन्नसुन्दर आरम्भोऽस्येत्यसदारम्भोऽविद्यमाने वा यदागमे व्यवच्छिन्ने तदारभत इत्यसदारम्भः, न सदा न सर्वदा स्वशक्तिकालाऽऽद्यपेक्ष आरम्भोऽस्येति वा,मध्यमबुद्धिस्तु पूर्वोक्तो मध्यमाऽऽचार आगमैदंपर्यविकलत्वात् प्रावचनिककार्यप्रवृत्तेः ज्ञेय इह प्रक्रमे तत्त्वमार्गे परमार्थमार्गे प्रवचनोक्त-

तिनिमित्ते, बुधस्तूक्तलक्षण एव मार्गानुसारी ज्ञानाऽऽदित्रयानुसारी स्वपरयोस्तद्वृद्धिहेतुत्वेन यः स विज्ञेय इति ॥ ३ ॥

कथं पुनर्बाह्यलिङ्गप्राधान्यदर्शिनो बालत्वमित्याह-

बाह्यं लिङ्गमसारं, तत्प्रतिबद्धा न धर्मनिष्पत्तिः ।
धारयति कार्यवशतो, यस्माच्च विडम्बकोऽप्येतत् ॥ ४ ॥

बाह्यं बहिर्वर्त्ति दृश्यम्, लिङ्गमाकारो वेषस्तदसारम् । यतस्तत्प्रतिबद्धा तदविनाभाविनी, न धर्मनिष्पत्तिर्न धर्मसंसिद्धिर्विदुषां मता । धारयति कार्यवशतः कार्याङ्गीकरणेन स्वाभिप्रेतफलसिद्धये, यस्माच्च विडम्बकोऽप्येतद्धर्मनिष्पत्त्यभावाविवक्षया यस्माच्चेति हेत्वन्तरसूचनम् । एको हेतुर्बाह्यलिङ्गाद्धर्मनिष्पत्तेरभावो, द्वितीयस्तु कुतश्चिन्निमित्ताद्विडम्बकस्याऽपि तद्धारणमाभ्यां बाह्यलिङ्गमसारम् । स तु बालस्तदेव प्राधान्येन मन्यत इति ॥ ४ ॥

ननु च बाह्यलिङ्गस्य कथमप्राधान्यं जवदुभिरुच्यते, यतस्तत्परिग्रहत्यागरूपमित्याशङ्क्याऽऽह-

बाह्यग्रन्थत्यागात्, न चारु न त्वत्र तदितरस्यापि ।
कञ्चुकमात्रत्यागा-न्न हि भुजगो निर्विषो भवति ॥ ५ ॥

(बाह्यत्यादि) बाह्यग्रन्थत्यागाद्धनधान्यस्वजनबन्धाऽऽदित्यागात् न चारु न शोभनं बाह्यलिङ्गं, ननु लिक्षितमेतदत्र लोके । तद् बाह्यलिङ्गमितरस्यापि मनुष्यतिर्यक्प्रभृतेः संभवति । एतमेवार्थं प्रतिवस्तूपमया दर्शयति-कञ्चुकमात्रत्यागादुपरिवर्तित्वङ्मात्रपरित्यागान्न हि नैव भुजगः सरीसृपः कथञ्चिन्निर्विषो भवति ॥ ५ ॥

प्रस्तुतमेवार्थं तन्त्रान्तरसंवादेनाऽऽह-

मिथ्याऽऽचारफलमिदं, ह्यपरैरपि गीतमशुभजातस्य ।
सूत्रेऽप्यविकलमेत-त्प्रोक्तमधेयोत्करस्यापि ॥ ६ ॥

मिथ्या अलीको विशिष्टभावशून्य आचारो मिथ्याऽऽचारः, तस्य फलं कार्यमिदं बाह्यलिङ्गं केवलमेव, हियस्मादपरैरपि तन्त्रान्तरीयैर्गीतं कथितमशुभजातस्याऽन्तरशुभभावरहितस्य पुंसः । मिथ्याऽऽचारस्वरूपं चेदम्-"बाह्येन्द्रियाणि संयम्य, य आस्ते मनसा स्मरन् । इन्द्रियार्थान् विमूढात्मा, मिथ्याऽऽचारः स उच्यते ॥ १ ॥" जन्मान्तरोपार्जिताकुशलकर्मविपाक एवैष यद्भोगोपभोगाऽऽदिरहितेन प्रेक्षावत्पुरुषपरिनिन्दनीयं क्लिष्टं जीविकाप्रायं तथाविधबाह्यलिङ्गधारणमिति । तन्त्रान्तरप्रसिद्धमिममर्थमङ्गीकृत्यापरैरपि इत्युक्तम् । न केवलं तन्त्रान्तरेषु, सूत्रेऽप्यागमेऽपि स्वकीयेऽविकलं परिपूर्णमेतद्बाह्यलिङ्गं स्वकीयमेव प्रोक्तं प्रतिपादितमेदृग्नाविकपारम्नाविकछिद्रान्वेषित्वमेवोत्करस्याप्युच्चारनिकरकलापस्यापि, प्रवचनोक्ताशेषगुणशून्यस्येति यावत् । यत उक्तम्-"अणंतसो दव्वलिंगाइ ।" ॥ ६ ॥

मध्यमबुद्धिर्विचारयति वृत्तमित्युक्तम् तत्र किं तदित्याह-

वृत्तं चारित्रं खल्वसदारम्भविनिवृत्तिमत्तच्च ।
सदनुष्ठानं प्रोक्तं, कार्ये हेतूपचारेण ॥ ७ ॥

वृत्तं वर्त्तनं विधिप्रतिषेधरूपं, तच्च चारित्रमेव, खलुशब्दस्यावधारणार्थत्वात्, तच्चेह सदनुष्ठानं प्रोक्तम् । तत्कीदृशम् ?, असदारम्भविनिवृत्तिमत्, असदारम्भोऽशोभनाऽऽरम्भः प्राणातिपाताऽऽद्याश्रवपञ्चकरूपः, ततो विनिवृत्तिमर्द्धिसाऽऽदिनिवृत्तिरूपमर्द्धिसाऽऽत्मकम्, ननु कथं सदनुष्ठानं चारित्रमभिधीयते । यतश्चारित्रमान्तरपरिणामरूपम्, सदनुष्ठानं तु बाह्यसक्रियारूपं, तदनयोः स्वरूपभेदः परिस्फुट एवास्तीत्याशङ्क्याऽऽह-कार्ये हेतूपचारेण कार्ये सदनुष्ठानरूपे हेतूपचारेण भावोपचरेण तत्पूर्वकत्वात् सक्रियायाः, यच्चाऽऽन्तरपरिणामविकलं तत् सदनुष्ठानमेव न भवतीति भावार्थः ॥ ७ ॥

एतच्च सदनुष्ठानं शुद्धाशुद्धभेदं तद्द्वयमप्याह-

परिशुद्धमिदं नियमा-दान्तरपरिणामतः सुपरिशुद्धात् ।
अन्यदतोऽन्यस्मादपि, बुधविज्ञेयं त्वचारुतया ॥ ८ ॥

परिशुद्धं सर्वप्रकारशुद्धमिदं सदनुष्ठानं नियमान्नियमेनान्तरपरिणामतस्तथाविधचारित्रमोहनीयकर्मक्षयोपशमाऽऽदिजन्यात् सुपरिशुद्धाच्चाख्यानुसारेण सम्यक्त्वज्ञानमूलादिति भावः । अन्यदित्यपरिशुद्धमतोऽन्यस्मादान्तरपरिणामाद्योऽन्यः कश्चिद्धेतुर्लाभपूजाख्यात्यादिस्ततोऽन्यस्मादपि प्रवर्त्तते । ननु परिशुद्धाऽपरिशुद्धयोः सदनुष्ठानयोः स्वरूपं तुल्यमेवोपलभ्यते, तत्कथं प्रतिनियतस्वरूपतया ज्ञायत इत्याह-(बुधविज्ञेयं त्वचारुतया) बुधैस्तत्त्वविद्भिरेवाचारुतया असुन्दरत्वेनेतररूपविविक्तं तद्विज्ञायते, यथा-अचार्विति न पुनरितरैस्तेषां तद्भेदविशेषानुपलम्भादिति ॥ ८ ॥

कः पुनर्विशेषो यदुपलम्भात् सदनुष्ठानासदनुष्ठानयोरिदमवधार्यते, परिशुद्धमेतदिति तदुपदर्शनार्थमाह-

गुरुदोषाऽऽरम्भितया, तेष्वकरणयत्नतो निपुणधीभिः ।
सन्निन्दाऽऽदेश्च तथा, ज्ञायत एतन्नियोगेन ॥ ९ ॥

गुरून् दोषान् प्रवचनोपघातकारिण आरब्धुं शीलमस्येति गुरुदोषाऽऽरम्भी, तद्भावस्तत्ता । लघुषु सूक्ष्मेषु दोषेष्वकरणयत्नः परिहाराऽऽदरस्तस्माच्च निपुणधीभिः कुशलबुद्धिभिस्तथा सतां सत्पुरुषाणां साधुश्रावकप्रभृतीनां निन्दाऽऽदिर्निन्दागर्हाप्रद्वेषाऽऽदिस्तस्माच्च ज्ञायत एतत्परिशुद्धानुष्ठानं, नियोगेनाऽवश्यतया, यो हि गुरुदोषाऽऽदिषु प्रवर्त्तते, तस्यान्तःकरणशुद्धेरभावादसदनुष्ठानमेतदिति निश्चीयते ॥ ९ ॥

"आगमतस्त्वं तु बुधः परीक्षते (२)" इत्युक्तं किंपुनस्तदित्याह-

आगमतस्त्वं ज्ञेयं, तद्दृष्टेष्टाविरुद्धवाक्यतया ।
उत्सर्गाऽऽदिसमन्वित-मलमेदम्पर्यशुद्धं च ॥ १० ॥

आगमतस्त्वं ज्ञेयं भवति, तत्कथम् ?, ज्ञेयं, दृष्टं प्रत्यक्षानुमानप्रमाणेनोपलब्धमिष्टमागमेन स्ववचनैरेवाभ्युपगतं ताभ्यामविरुद्धानि वाक्यानि यस्मिन्नागमतस्त्वे तत् दृष्टेष्टाऽविरुद्धवाक्यं तद्भावस्तत्ता योऽयं प्रत्यक्षानुमानाभ्यां परिच्छिद्यते तस्मिन् यथाऽऽगमतस्त्वमप्यविरोधि भवति, तद्विरुद्धस्य ताभ्यामेव निराकरणात्, प्रत्यक्षानुमानविरुद्धस्याऽऽगमस्याप्रमाणत्वात्, स्ववचनैरेवाऽऽगमेनाभ्युपगतेऽर्थे प्रदेशान्तरवर्तिनाऽस्यैवाऽऽगमस्य वचनं यदि विरोधि न भवेदित्यर्थतस्तत आगमतस्त्वमिष्टाविरोधिवाक्यं भवति, परम्परयाविरोधि वचनमित्यर्थः, तदेव विशिनष्टि-उत्सर्गाऽऽदिसमन्वितमुत्सर्गसामान्यं यथा-"न हिंस्याद् भूतानि" आदिशब्दादपवादो विशेषो ज्ञानाऽऽदिप्रयोजनगतस्ताभ्यां युक्तम् । अलमत्यर्थमेदम्पर्यशुद्धं

च, इदं परं प्रधानमस्मिन्वाक्ये इतीदंपरं तद्भाव ऐदम्पर्यम्, वाक्यस्य तात्पर्ये शक्तिरित्यर्थस्तेन शुद्धं यदागमतत्त्वं तदिह ज्ञेयमिति ॥ १० ॥

तदेवाऽऽगमतत्त्वमुपन्यस्यति ग्रन्थकारः-

आत्माऽस्ति स परिणामी, बद्धः सत्कर्मणा विचित्रेण ।
मुक्तश्च तद्वियोगा-द्धिंसाऽहिंसाऽऽदि तद्धेतुः ॥ ११ ॥

(आत्माऽस्तीत्यादि) आत्मा जीवः, खोऽस्ति लोकायतमत-निरासेनैव यस्य प्रतिपाद्यते, तदागमतत्त्वमित्येवं पदान्तरेष्वपि सम्बन्धनीयम् । स परिणामी, स पूर्वप्रस्तुत आत्मा परिणामी परिणामसहितः, पञ्चस्वपि गतिष्वन्वयी चैतन्यस्वरूपः पुरुषः, परिणामलक्षणं चेदम्-"परिणामो ह्यर्थान्तर-गमनं न च सर्वथा व्यवस्थानम् । न च सर्वथा विनाशः, परिणामस्तद्विदामिष्टः ॥१॥" स च परिणामी जीवो बद्धः सत्कर्मणा विचित्रेण वस्तु सत्कर्म न काल्पनिकं वासनाऽऽदिस्वभावं, तेन बद्धो जीवप्रदेशकर्मपुद्गलान्योन्यानुगतिपरिणामेन । यथोक्तं बन्धाधिकारे-" तत्र पौद्गलमात्मस्थ-मथेतनमतीन्द्रियम । बन्धं प्रत्यादि सत्कर्म, संतति प्रत्यनादिकम् ॥ १ ॥ " (मुक्तश्च तद्वियोगात्) कर्मवियोगात्, आत्यन्तिककर्मपरिक्षयात् (हिंसाऽहिंसाऽऽदितद्धेतुरिति) हिंसा आदिर्यस्य तद्धिंसाऽऽदि, प्राणातिपाताऽऽदिपञ्चकम । अहिंसा आदिर्यस्य तदहिंसाऽऽदि, महाव्रतपञ्चकम, तयोर्बन्धमुक्तयोरर्थतो बन्धमोक्षयोर्वा हेतुर्वर्त्तते हिंसाऽहिंसाऽऽदि इति ॥ ११ ॥

ऐदम्पर्यं शुद्धं चेत्युक्तम् । का पुनरैदम्पर्यशुद्धिरित्याह--

परलोकविधौ मानं, वचनं तदतीन्द्रियार्थदृग् व्यक्तम् ।
सर्वमिदमनादि स्या-दैदम्पर्यस्य शुद्धिरिति ॥ १२ ॥

परलोकविषयो विधिः कर्त्तव्योपदेशस्तस्मिन्, मानं प्रमाणं, वचनमागमः, कीदृशमित्याह-तद्वचनमतीन्द्रियानर्थान् पश्यतीत्यतीन्द्रियार्थदृक्, सर्वज्ञः सर्वदर्शी, तेन व्यक्तमनिश्चयं यथा प्रतिपादितार्थमिति यावत् । सर्वमिदं वचनमनादि स्यात् प्रार्हतः सर्वज्ञेत्राङ्गीकरणेनेयमैदम्पर्यस्य शुद्धिरित्येवंप्रकाराऽवसेयेति ॥ १२ ॥ षो० १ विव० ।

अन्यत्राप्युक्तम्-

"तं शब्दमात्रेण वदन्ति धर्मं,
विश्वेऽपि लोका न विचारयन्ति ।
स शास्त्रसाम्येऽपि विचित्रभेदै-
र्विनिश्चयते क्षीरमिवाङ्गुनीयम ॥ १ ॥
तद्धर्मं विधातुं सकलां समर्थं,
सुदुर्लभं विश्वजनीनमेनम ।
परीक्ष्य गृह्णन्ति विचारदक्षाः,
सुवर्णवद्वं च न भीतचित्ताः ॥ २ ॥ " इति ।

परीक्षोपायमेवाऽऽह-कषाऽऽदिप्ररूपणेति । यथा सुवर्णमात्रसाम्येन तथाविधमुग्धलोकेष्वविचारेणैव शुद्धाशुद्धरूपस्य सुवर्णस्य प्रवृत्तौ कषच्छेदतापाः परीक्षणाय विचक्षणैराऽऽद्रियन्ते, तथाऽत्रापि श्रुतधर्मे परीक्षणीये कषाऽऽदीनां प्ररूपणेति । कषाऽऽदीनेवाऽऽह--"विधिप्रतिषेधौ कष इति ।" "विधिरविरुद्धकर्त्तव्यार्थोपदेशकं वाक्यम ।" यथा-स्वर्गकेवलार्थिना तपोध्यानाऽऽदि कर्त्तव्यं, समितिगुप्तिशुद्धा क्रिया इत्यादि । प्रतिषेधः पुनः-" न हिंस्यात्सर्वभूतानि " " नानृतं वदेत् " इत्यादि । ततो विधिश्च प्रतिषेधश्च विधिप्रतिषौ, किमित्याह-कषः सुवर्णपरीक्षायामिव कषपट्टके रेखा । इदमुक्तं भवति-यत्र धर्मे शुक्ललक्षणो विधिः,प्रतिषेधश्च पदे पदे सुपुष्कल उपलभ्यते स धर्मः कषशुद्धः । न पुनः-" अन्यधर्मस्थिताः सर्वाः, असुरा इव विष्णुना । छद्मछेदनीयास्तेषां हि, वधे दोषो न विद्यते ॥ १ ॥" इत्यादिकवाक्यगर्भ इति । छेदमाह-" तत्सन्नयपालना चेष्टोक्तिश्छेद इति " । तयोर्विधिप्रतिषेधयोरनाविर्भूतयोः सन्नयः, प्राग्भूतयोश्च पालना रक्षारूपा, ततस्तत्संभवपालनार्थो या चेष्टा भिक्षाऽटनाऽऽदिबाह्यक्रियारूपा, तस्या उक्तिश्छेदः । यथा कषशुद्धावप्यन्तरामशुद्धिमाशङ्कमानाः सौवर्णिकाः सुवर्णगोलिकाऽऽदेः छेदमाद्रियन्ते,तथा कषशुद्धावपि धर्मस्य छेदमपेक्षन्ते । स च छेदो विशुद्धबाह्यचेष्टारूपो,विकुट्टा च चेष्टा सा यत्रासन्तापि विधिप्रतिषेधावबाधितरूपौ स्वात्मानं लभेते,लब्धाऽऽत्मानौ चातीचाररक्षणापचारविरहितौ, उत्तरोत्तरां वृद्धिमनुभवतः,सा यत्र धर्मे चेष्टा सप्रपञ्चा प्रोच्यते स धर्मश्छेदशुद्ध इति । यथा कषच्छेदशुद्धमपि सुवर्णं तापमसहमानं कालिकोन्मीलनदोषाक्रान्तं सुवर्णभावमश्नुते,एवं धर्मोऽपि सत्यामपि कषच्छेदशुद्धौ तापपरीक्षायामनिर्वहमाणो न स्वभावमासादयत्यतस्तापं प्रज्ञापयन्नाह-"उभयनिबन्धनभावबादस्ताप इति ।" उभयोः कषच्छेदयोरनन्तरमेवोक्तरूपयोर्निबन्धनं परिणामि, किमित्याह-तापोऽत्र श्रुतधर्मपरीक्षाऽधिकारे । इदमुक्तं भवति-यत्र शास्त्रे ऊर्ध्वरूपतयाऽप्रच्युतानुत्पन्नः पर्यायात्मकतया च प्रतिक्षणमपरापरस्वभावाऽऽस्कन्दनेनानित्यस्वभावो जीवाऽऽदिरवस्थाप्यते स्यात्तत्र तापशुद्धिः । यतः परिणामिन्येवाऽऽत्मादौ तथाविधाशुद्धपर्यायनिरोधेन ध्यानाध्ययनाऽऽद्यपरशुद्धपर्यायप्रादुर्भावोक्तलक्षणः कषो बाह्यचेष्टाशुद्धिलक्षणश्च छेद उपपद्यते, न पुनरन्यथेति । एतेषां मध्यात्को बलीयानितरो वेति प्रश्ने यत्कर्त्तव्यं तदाह-" अमीषामन्तरदर्शनमिति । " अमीषां त्रयाणां परीक्षाप्रकाराणां परस्परमन्तरस्य विशेषस्य समर्थासमर्थरूपस्य दर्शनं कार्यमुपदेशकेन, तदेव दर्शयति-" कषच्छेदयोरयत्न इति " । कषच्छेदयोः परीक्षाक्षमत्वेनाऽऽदरणीयतायामयत्नोऽतात्पर्यं मतिमतामिति । कुत इत्याह-" तदभावेऽपि तापाभावेऽभाव इति । " तयोः कषच्छेदयोर्भावः सत्ता तद्भावस्तस्मिन्, किं पुनरतद्भावे इत्यपिशब्दार्थः । किमित्याह-' तापाभावे ' उक्तलक्षणतापविरहे अनादरः परमार्थतोऽसत्त्वेव परीक्षणीयस्य, न हि तापे विघटमानं हेम कषच्छेदयोः सतोरपि स्वं स्वरूपं प्रतिपद्यमानं, जातिसुवर्णत्वात्तस्य । एतदपि कथमित्याह-" तच्छुद्धौ हि तत्साफल्यमिति । " तच्छुद्धौ तापशुद्धौ, हियस्मात्तत्साफल्यं तयोः कषच्छेदयोः सफलभावः । तथाहि-ध्यानाध्ययनाऽऽदिकोऽर्थो विधीयमानः प्रागुपात्तकर्मनिर्जरणफलः, हिंसाऽऽदिकश्च प्रतिषिद्ध्यमानो नवकर्मोपादाननिरोधफलः, बाह्यचेष्टाशुद्धिध्यानयोरेवानाविर्भूतयोर्योगेनाऽऽविर्भूतयोश्च परिपालनेन फलवती स्यात्, न चापरिणामिन्यात्मन्युक्तलक्षणौ कषच्छेदौ स्वकार्यं कर्तुं प्रभविष्णू स्या त, तयोस्तापशुद्धावेव सफलत्वमुपपद्यते न पुनरन्यथेति । ननु फलविकलावपि तौ भविष्यत इत्यत आह-" फलवन्तौ च वास्तवाविति । " उक्तलक्षणफलजाजौ सन्तौ पुनस्तौ कषच्छेदौ वास्तवौ कषच्छेदौ भवतः, स्वसाध्यक्रियाकारिणो हि वस्तुनो वस्तुत्वमुशन्ति सन्तः, विपक्षे बाधामाह-" अन्यथा याचितकमण्डनमिति ।"

अन्यथा फलविकलौ सन्तौ वस्तुपरीक्षाधिकारे समवतारितावपि नौ याचितकमण्डनम्, द्विविधं ह्यलङ्कारफलं, निर्वाहे सति परिशुद्धाभिमानिकसुखजनिका स्वशरीरशोभा, कथञ्चिन्निर्वहणाभावे च तेनैव निर्वाहः, न च याचितकमण्डने एतद्द्वितीयमप्यस्ति, परकीयत्वात्तस्य, ततो याचितकमण्डनमिव याचितकमण्डनम्। इदमुक्तं भवति-द्रव्यपर्यायोभयस्वभावे जीवे कथञ्चिद्भेदौ निरुपचरिततयोपस्थाप्यमानौ स्वफलं प्रत्यवन्ध्यसामर्थ्यावेव स्यातां,नित्याऽऽद्येकान्तवादे तु स्वबाधशोभार्थं तद्बाधिभिः कल्प्यमानावप्येतौ याचितकमण्डनाऽऽकारौ प्रतिभासेते, न पुनः स्वकार्यकराविति। ध० १ अधि०।

(२७) कथाऽऽदिस्वरूपमाह-

पाणावहाइआणं, पावट्ठाणाण जो उ पमिसेहो ।
झाणज्झयणाऽऽईणं,जो अ विही एस धम्मकसो ॥२१॥

प्राणवधाऽऽदीनां पापस्थानानां सकललोकसम्मतानां यस्तु प्रतिषेधः शास्त्रे,ध्यानाध्ययनाऽऽदीनां यश्च विधिस्तत्रैव, एष धर्मकषो वर्त्तत इति गाथाऽर्थः ॥२१॥

बज्झाणुट्ठाणेणं, जेण न बाहिज्जई तयं नियमा ।
संजवइ अपरिसुद्धं,सो उण धम्मम्मि छेउ त्ति ॥ २२ ॥

बाह्यानुष्ठानेन इतिकर्त्तव्यतारूपेण येन न बाध्यते तद्विधिप्रतिषेधद्वयं नियमात् संभवति चैतत्परिशुद्धं निरतिचारं, स पुनस्तादृशः प्रक्रमादुपदेशोऽर्थो बाह्यधर्मच्छेद इति गाथार्थः।

जीवाऽऽइभावबाओ, बंधाइपसाहगो इहं तावो।
एएहिँ सुपरिसुद्धो, धम्मो धम्मत्तणमुवेइ ॥ २३ ॥

जीवाऽऽदिभावबादः पदार्थवादः बन्धाऽऽदिप्रसाधको बन्धमोक्षाऽऽदिगुण इह तापः उच्यते । एभिः कथाऽऽदिभिः सुपरिशुद्धः स धर्मः श्रुतानुष्ठानरूपः धर्मत्वमुपैति, सम्यग् भवतीति गाथार्थः ॥२३॥

एएहिँ जो न सुद्धो,अन्नयरम्मि उ ण सुट्ठु निग्घमिओ ।
सो तारिसओ धम्मो, नियमेण फले विसंवयइ ॥ २४ ॥

एभिः कथाऽऽदिभिर्यो न शुद्धस्त्रिभिरपि अन्यतरस्मिन् वा कथाऽऽदौ न सुष्ठु निर्घटितः, न व्यक्त इत्यर्थः । स तादृशो धर्मः श्रुताऽऽदिनैयमाद्वैयर्थ्यतया फले स्वसाध्ये विसंवदति, न तत्साधयतीति गाथार्थः । पं० व० ४ द्वार ।

णाणागमो मच्चुमुहस्स अत्थि,
इच्छापणीता वंकाऽऽणिकेया ।
कालगहिता णिचए णिविट्ठा,
पुढो पुढो जाइं पकप्पयंति ॥ १३१ ॥

इहमेगेसिं तत्थ तत्थ संथवो भवति अहोववाइए फासे पडिसंवेदयंति, चिट्ठं कूरेहिं कम्मेहिं चिट्ठं परिचिट्ठति, अचिट्ठं कूरेहिं कम्मेहिं णो चिट्ठं परिचिट्ठति, एगे वदंति अदुवा वि णाणी णाणी वयंति,अदुवा वि एगे ॥१३२॥ आवंती केयावंती लोयंसि समणा य माहणा य पुढो विवादं वदंति, से दिट्ठं च णे सुयं च णे मयं च णे विण्णायं च णे उड्ढं अहं तिरियं दिसासु सव्वओ सुप्पडिलेहियं च णे सव्वे पाणा सव्वे भूया सव्वे जीवा सव्वे सत्ता हंतव्वा अज्जावेयव्वा परियावेयव्वा किलामेयव्वा, परिघेतव्वा, उद्दवेयव्वा, एत्थं पि जाणह णत्थित्थ दोसो, अणारियवयणमेयं, तत्थ जे आरिया ते एवं वयासी-से दुद्दिट्ठं च भे दुस्सुयं च जे दुम्मयं च जे दुव्विण्णायं च जे उड्ढं अहं तिरियं दिसासु सव्वतो दुप्पडिलेहियं च जे, जं णं तुब्भे एवमाइक्खह एवं भासह एवं पण्णवेह एवं परूवेह सव्वे पाणा सव्वे भूया सव्वे जीवा सव्वे सत्ता हंतव्वा,अज्जावेयव्वा,परितावेयव्वा,किलामेयव्वा परिघेतव्वा, उद्दवेतव्वा,एत्थं पि जाणह णत्थित्थ दोसो.अणारियवयणमेयं,वयं पुण एवमाइक्खामो एवं भासामो एवं परूवेमो एवं पण्णवेमो सव्वे पाणा सव्वे भूया सव्वे जीवा सव्वे सत्ता ण हंतव्वा ण अज्जावेयव्वा,ण परिघेतव्वा,ण किलामेयव्वा,ण परितावेयव्वा,ण उद्दवेयव्वा,एत्थं वि जाणह णत्थित्थ दोसो,आरियवयणमेयं,पुव्वं णिकायसमयं पत्तेयं पत्तेयं पुच्छिस्सामि-हं भो पवाइया ! किं भे सायं दुक्खं, उयाहु असायं, समिया पडिवण्णे यावि एवं बूया-सव्वेसिं पाणाणं सव्वेसिं भूयाणं सव्वेसिं जीवाणं सव्वेसिं सत्ताणं असायं अपरिणिव्वाणं महब्भयं दुक्खं ति बेमि ॥ १३३ ॥

(णाणागमो इत्यादि) न ह्यनागमो मृत्योर्मुखस्य कस्यचिदपि संसारोदरवर्तिनोऽस्तीति । उक्तं च-

" वदत यदीह कश्चिदनुसन्तत-सुखपरिभोगलालितः ।
प्रयत्नशतपरोऽपि विगतव्यथ-मायुरवाप्नवान्नरः ॥ १ ॥
न खलु नरः सुरौघसिद्धा-सुरकिन्नरनायकोऽपि यः ।
सोऽपि कृतान्तदन्तकुलि-शाऽऽक्रमेण कृशितो न नश्यति ॥२॥"

तथोपायोऽपि मृत्युमुखप्रतिषेधस्य न कश्चिदस्तीति।

उक्तं च-

" नश्यति नौति याति वितनोति करोति रसायनक्रियां,
चरति गुरुव्रतानि विवराण्यपि विशति विशेषकातरः ।
तपति तपांसि खादति मितानि करोति च मन्त्रसाधनं,
तदपि कृतान्तदन्तयन्त्रकुचक्रमणैर्विदार्यते ॥ १ ॥ "

ये पुनर्विषयकषायाऽऽलिप्वक्षात् प्रमत्ता धर्मं नावबुध्यन्ते,ते किंभूता भवन्तीत्याह-(इच्छा इत्यादि)इन्द्रियमनोविषयानुकूला प्रवृत्तिरिहेच्छा, तया विषयाऽभिमुखमनिष्कर्मबन्धं संसाराभिमुखं वा प्रकर्षेण नीता इच्छाप्रणीताः,ये चैवंभूतास्ते 'वंकाऽऽनिकेता' वङ्कस्यासंयमस्य आ-मर्यादया संयमावधिभूततया निकेतभूता आश्रया वङ्काऽऽनिकेताः, वङ्को वा निकेतो येषां ते वङ्कानिकेताः, पूर्वपदस्य दीर्घत्वम् । ये चैवंभूतास्ते कालगृहीताः कालेन मृत्युना गृहीताः कालगृहीताः, पौनःपुन्यमरणभाज इत्यर्थः, धर्मचरणाय वा गृहीताः-अनिसंधितः कालो यैस्ते कालगृहीताः, आहिताग्निदर्शनादाद्यैत्वाद्वा निष्ठान्तस्य परनिपातः । तथाहि--पाश्चात्ये वयसि परुषपरारि वा अपत्यपरिणयनोत्तरकालं वा धर्मं करिष्याम इत्येवं गृहीतकालाः, ये चैवंभूतास्ते निचये निविष्टा निचये कर्मनिचये तदुपादाने वा सावद्याऽऽरम्भनिचये निविष्टा अध्युपपन्नाः, ये चेच्छाप्रणी-

ता वङ्कानिकेनाः कालगृहीता निचये निविष्टास्ते तत्कर्माणः किमपरं कुर्वन्तीति दर्शयितुमाह-(पुढो पुढो इत्यादि) पृथक् पृथगेकेन्द्रियद्वीन्द्रियाऽऽदिकां जातिमनेकशः प्रकल्पयन्ति प्रकुर्वन्ति । पाठान्तरं वा-" एत्थ मोहे पुणो पुणो " अत्र अस्मिन्निच्छाप्रणीताऽऽदिके हृषीकानुकूले मोहे कर्मरूपे वा मोहे निमग्नाः पुनः पुनस्तत्कुर्वन्ति येन तदप्रच्युतिः स्यात् । तदप्रच्युतौ च किं स्यादित्याह-(इहमेगेसिं इत्यादि) इहास्मिंश्चतुर्दशरज्ज्वात्मके लोके एकेषां मिथ्यात्वाविरतिप्रमादकषाययुतां तत्र तत्र नरकतिर्यगगत्यादिषु यातनास्थानकेषु संस्तवः परिचयो भूयो भूयो गमनाद्भवति । ततः किमित्याह-(अहोववाइए इत्यादि) त एवमिच्छया प्रणीतत्वादिन्द्रियवशगास्तद्भक्तित्वात्तदनुकूलमाचरन्तो नरकाऽऽदियातनास्थानज्ञातसंस्तवास्तीर्थिका अप्यौद्देशिकाऽऽदिनिर्दोषमाचक्षाणाः । (अहोववाइए त्ति) अथ औपपातिकान्नरकाऽऽदिनवान् स्पर्शान् दुःखानुनवान् प्रतिसंवेदयन्ति अनुभवन्ति । तथाहि-लोकायतिका ब्रुवते-"पिब खाद च चारुलोचने! यदतीतं वरगात्रि ! तन्न ते । न हि भीरु ! गतं निवर्त्तते, समुदयमात्रमिदं कलेवरम् ॥१॥" वैशेषिका अपि सावद्ययोगाऽऽरम्भिणः, तथाहि ते भाषन्ते-" अभिषेचनोपवासब्रह्मचर्यगुरुकुलवासवानप्रस्थयज्ञदानमौ(मो)नपदिङ्नक्षत्रमन्त्रकालनियमाः" इत्यादि,अन्येऽपि सावद्ययोगानुष्ठायिनोऽनया दिशा वाच्याः,स्यात् किं सर्वोऽपीच्छाप्रणीताऽऽदिर्यावत्तत्र तत्र कृतसंस्तवोऽध औपपातिकान् स्पर्शान् प्रतिसंवेदयत्याहोस्वित्काश्चिदेव तद्योग्यकर्म्मकार्ये वाऽनुभवति ?,न सर्वं इति दर्शयति (चिट्ठं इत्यादि) 'चिट्ठं' भृशमत्यर्थं,क्रूरैर्वधबन्धाऽऽदिभिः कर्म्मनिः क्रियानिः(चिट्ठमिति)भृशमत्यर्थमेव विरूपां दशां वैतरणीतरणासिपत्रवनपत्रपातान्निघातशाल्मलीवृक्षाऽऽश्लिष्टनाऽऽदिजनितामनुभवंस्तमस्तमाऽऽदिस्थानेषु परितिष्ठति,यस्तु नात्यर्थं हिंसाऽऽदिनिः कर्म्मनिर्वर्त्तते सोऽत्यन्तवेदनानिचितेष्वपि नरकेषु नोत्पद्यते । स्यात् क एवं वदतीत्यत आह-(एगे वयंतीत्यादि) एके चतुर्दशपूर्वविदादयो वदन्ति ब्रुवते। अथवाऽपि ज्ञानी वदति, ज्ञानं सकलपदार्थाऽऽविर्भावकमस्यास्तीति ज्ञानी, स चैतद् ब्रवीति-यद्दिव्यज्ञानी केवली भाषते, श्रुतकेवलिनोऽपि तदेव जानन्ते, यच्च श्रुतकेवलिनोऽपि भाषन्ते निरावरणज्ञानिनोऽपि तदेव वदन्तीत्येतत्फलप्रत्यागतसूत्रेण दर्शयति-(णाणी इत्यादि) ज्ञानिनः केवलिनो यद्वदन्ति,अथवाऽप्येके श्रुतकेवलिनो यद्वदन्ति तद्यथार्थभावित्वादेकमेव, एकेषां सर्वार्थप्रत्यक्षत्वादपरेषां तदुपदेशप्रवृत्तेरिति वक्ष्यमाणेऽप्येकवाक्यतेति । तदाह-(आवंतीत्यादि) यावन्तः, (केआवंती ति) केचन लोके मनुष्यलोके श्रमणाः पाषण्डिका ब्राह्मणा द्विजाऽऽदयः पृथक् पृथग् विरुद्धो वादो विवादस्तं वदन्ति । एतदुक्तं भवति-यावन्तः केचन परलोकं क्षीणसंसारं वस्तु आत्मीयदर्शनानुरागितया पारोक्ष्यं दर्शनमपवदन्तो विवदन्ते । तथाहि भागवता ब्रुवते-" पञ्चविंशतितत्त्वपरिज्ञानान्मोक्षः, सर्वेष्वाश्रमेषु रक्तो निष्क्रियो निर्गुणश्चैतन्यलक्षणो, निर्विशेषं सामान्यं तत्त्वमिति ।" वैशेषिकास्तु भाषन्ते-द्रव्याऽऽदिषट्पदार्थपरिज्ञानान्मोक्षः,समवायिज्ञानगुणेनेच्छाप्रयत्नद्वेषाऽऽदिभिश्च गुणैर्गुणवानात्मा,परस्परनिरपेक्षं सामान्यविशेषाऽऽत्मकं तत्त्वमिति ।" शाक्यास्तु वदन्ति-"यथा-परलोकानुयाय्यात्मैव न विद्यते,निःसामान्यं वस्तु क्षणिकं चेति " । मीमांसकास्तु मोक्षमनेकज्ञानेन व्यवस्थिता इति । तथा केचिद् पृथिव्यादय एकेन्द्रिया जीवा न भवन्त्यपरे वनस्पतीनामप्यचेतनतामाहुः, तथाद्वीन्द्रियाऽऽदीनामपि कृम्यादीनां न जन्तुस्वभावं प्रतिपद्यन्ते, सद्भावे वा न तद्वधे बन्धोऽल्पबन्धता वेति । तथा-हिंसायामपि भिन्नवाक्यता । तदुक्तम्-" प्राणी प्राणिज्ञानं, घातकचित्तं च तद्गता चेष्टा । प्राणैश्च विप्रयोगः, पञ्चभिरापद्यते हिंसा ॥ १ ॥ " इत्येवमादिकं औद्देशिकपरिभोगाभ्यनुज्ञाऽऽदिकञ्च विरुद्धो वादः स्वत एवाभ्यूह्यः । यदि वा-ब्राह्मणाः श्रमणा धर्मविरुद्धं वादं यद्वदन्ति तत् सूत्रेणैव दर्शयति-" से दिट्ठं च णं " इत्यादि यावत्-" णत्थिऽत्थ दोसे त्ति । " ' से त्ति ' तच्छब्दार्थे, यदहं वदये तद् दृष्टमुपलब्धं, दिव्यज्ञानेनास्माभिरस्माकं वा संबन्धिना तीर्थकृता आगमप्रणायकेन, चशब्द उत्तरापेक्षया समुच्चयार्थः, श्रुतं चास्माभिर्गुर्वादेः सकाशात्, अस्मद्गुरुः शिष्यैर्वा तदन्तेवासिभिर्वाऽभमतं युक्तियुक्तत्वादस्माकमस्मत्तीर्थकराणां वा विज्ञानं च तत्त्वभेदपर्यायैरस्माभिरस्मत्तीर्थकरेण वा स्वतो न परोपदेशदानेन । एतच्चोर्द्धाधस्तिर्यक् दशस्वपि दिक्षु सर्वतः सर्वैः प्रत्यक्षानुमानोपमानाऽऽगमार्थापत्त्यादिनिः प्रकारैः सुष्ठु प्रत्युपेक्षितं च पर्यालोचितं च,मनःप्रणिधानाऽऽदिनाऽस्माभिरस्मत्तीर्थकरेण वा । किं तदित्याह-सर्वे प्राणाः सर्वे जीवाः सर्वे भूताः सर्वे सत्त्वा हन्तव्या आज्ञापयितव्याः क्लामयितव्याः परिगृहीतव्याः परितापयितव्या अपद्रावयितव्याः * । अत्रापि धर्मचिन्तायामप्येवं जानीथाः, यथा-नास्त्यत्र यागार्थं देवतोपयाचितकतया वा प्राणिहननाऽऽदौ ' दोषः ' पापानुबन्ध इति । एवं यावन्तः केचन पाषण्डिका औद्देशिकभोजिनो ब्राह्मणा वा धर्मविरुद्धं परलोकविरुद्धं वा वादं भाषन्ते । अयं च जीवोपमर्दैकत्वात् पापानुबन्धी अनार्यप्रणीत इति । आह च-(अणारिय इत्यादि) आराद्याताः सर्वहेयधर्मेभ्य इत्यार्यास्तद्विपर्यासादनार्याः क्रूरकर्माणस्तेषां प्राण्युपघातकारीदं वचनम् । ये तु तथाभूता न ते किंभूतं प्रज्ञापयन्तीत्याह-(तत्थ इत्यादि) तत्रेति वाक्योपन्यासार्थे, निर्द्धारणे वा । ये ते आर्या देशप्रत्याचारित्वार्यास्त एवमवादिषुर्यथा-यत्तदनन्तरोक्तं दुईष्टमेतद् दुष्टं दृष्टं दुर्दृष्टं (ने) युष्माभिर्युष्मत्तीर्थकरेण वा, एवं यावद् दुःप्रत्युपेक्षितमिति । तदेवं दुर्दृष्टाऽऽदिकं प्रतिपाद्य दुःप्रज्ञापनानुवादद्वारेण तदभ्युपगमे दोषाऽऽविष्करणमाह-(जं णमित्यादि)णमिति वाक्यालङ्कारे। यदेतद्वदमाणं यूयमेवमाचक्षध्वमित्यादि । यावदत्रापि यागोपहाराऽऽदौ जानीथ यूयम्-यथा नास्त्येवात्र प्राण्युपमर्दानुष्ठाने दोषः पापानुबन्ध इति, तदेवं परवादे दोषाऽऽविर्भावनेन धर्मविरुद्धतामाविर्भाव्य स्वमतवादमार्यो आविर्भावयन्ति, (वयमित्यादि) पुनःशब्दः पूर्वस्माद्विशेषमाह-वयं पुनर्यथा धर्मविरुद्धवादो न भवति तथा प्रज्ञापयाम इति, तान्येव पदानि सप्रतिषेधानि तु हन्तव्यादीनि यावन्न केवलमत्रास्मदीये वचने नास्ति दोषोऽत्राप्यधिकारे जानीथ यूयं यथाऽत्र हननाऽऽदिप्रतिषेधविधौ नास्ति दोषः पापानुबन्धः, सावधारणत्वाद्वाक्यस्य नास्त्येव दोषः, प्राण्युपघातप्रतिषेधाच्चार्यवचनमेतत् । एवमुक्ते सति ते पाषण्डिका ऊचुः-भवदीयमार्यवचनमस्मदीयं त्वनार्यमित्येतन्निरन्तराः सुहृदः प्रत्येष्यन्ति , युक्तिविकलत्वात् , तदत्राऽऽचार्यो यथा परमतस्यानार्यता स्यात्तथा दिदर्शयिषुः स्वचाभ्युपेता वादिनो न विचलयिष्यन्तीति कृत्वा प्रत्येकमतप्रकल्पना-

* पुस्तके मूलटीकयोः पाठव्यत्यास उपलभ्यते ।

थमाह-(पुव्वामित्यादि) पूर्वमादावेव समयम्-आगमं यदीयाऽऽगमेऽभिहितं तन्निकाच्य व्यवस्थाप्य पुनस्तद्विरूपाऽऽपादनेन परमतानार्यता प्रतिपाद्येत्यतस्तदेव परमतं प्रश्नयति, यदि वा पूर्वं प्राश्निकान्निकाच्य ततः पाषण्डिकान् प्रश्नायितुमाह-(पत्तेयमित्यादि) एकमेकं प्रति प्रत्येकं, भोः प्रावादुकाः! भवतः प्रश्नयिष्यामि, किं (भे) युष्माकं सातं मन आह्लादकारि, दुःखमसातं मनःप्रतिकूलम ?। एवं पृष्टाः सन्तो यदि सातमित्येवं ब्रूयुस्ततः प्रत्यक्षाऽऽगमलोकबाधा स्यात्,अथासातमित्येवं ब्रूयुस्ततः 'समिया' सम्यक् प्रतिपन्नाँस्तान् प्रावादुकान् स्ववाग्यन्त्रितानप्येवं ब्रूयात्, अपिः संभावने, संभाव्यत एतद्भवता, यथा न केवलं भवतां दुःखमसातं, सर्वेषामपि प्राणिनां दुःखमसातं, मनसोऽनभिप्रेतमपरिनिर्वाणमनिर्वृत्तिरूपं महद्भयं दुःखमित्येतत् परिगणय्य सर्वेऽपि प्राणिनो न हन्तव्या इत्यादि वाच्यं, तदहनने च दोषः। यस्त्वदोषमाह तदनार्यवचनम्। इतिरधिकारपरिसमाप्तौ, ब्रवीमीति पूर्ववत्। तदेवं प्रावादुकानां स्ववाग्नियन्त्रणयाऽनार्यता प्रतिपादिता, अत्रैव रोहगुप्तमन्त्रिणा विदिताऽऽगमसद्भावेन माध्यस्थ्यमवलम्ब्यमानेन तीर्थिकपरीक्षाद्वारेण यथा निराकरणं चक्रे तथा निर्युक्तिकारो गाथाभिराचष्टे-

खुड्डगपायसमामं, धम्मकहं पि य अजंपमाणेण ।
उल्लेण अणग्गिणी, परिच्छिया रोहगुत्तेणं ॥ ३२७ ॥

अनया गाथया संक्षेपतः सर्वं कथानकमावेदितम्-क्षुल्लकस्य पादसमासो गाथापादसंक्षेपस्तमजल्पता धर्मकथां च क्षुल्लेनाप्रकटेनान्यलिङ्गिनः प्रावादुकाः परीक्षिता निरूपिता रोहगुप्तेन रोहगुप्तनाम्ना मन्त्रिणेति गाथासमासार्थः । भावार्थस्तु कथानकादवसेयः। तच्चेदम्-चम्पायां नगर्यां सिंहसेनस्य राज्ञो रोहगुप्तो नाम महामन्त्री, स चाऽऽर्हद्दर्शनभावितान्तःकरणो विज्ञातसदसद्भावः, तत्र च कदाचिद्राजाऽऽस्थानस्थो धर्मविचारं प्रस्तावयति स्म,तत्र यो यस्याभिमतः स तं शोभनमुवाच, स च तूष्णींभावं भजमानो राज्ञोक्तः-धर्मविचारं प्रति किमपि न ब्रूते भवान्?। स त्वाह-किमेभिः पक्षपातवद्भिर्विमर्शाभैः, स्वत एव धर्मं परीक्षामहे तीर्थिकानित्यनिधाव राजानुमत्या " सकुमलं वा वदनं न व त्ति । " अयं गाथापादो नगरमध्ये आलब्धः,संपूर्णा तु गाथा भाण्डागारिता, नगर्यां चोद्घुष्टम्-यथा य एनं गाथापादं पूरयिष्यति,तस्य राजा यथेप्सितं दानं दास्यति, तद्भक्तश्च भविष्यतीति । तं च गाथापादं सर्वेऽपि गृहीत्वा प्रावादुका निर्जग्मुः, पुनः समेऽह्नि राजानमास्थानस्थमुपस्थितास्तत्राऽऽद्यापेव परिव्राट् ब्रवीति--

भिक्खं पविट्ठेण मए ऽज्ज दिट्ठं,
पमदामुहं कमलविलासनेत्तं ।
वंकिखत्तचित्तेण न सुट्ठु नायं,
सकुंमलं वा वयणं न व त्ति ॥ ३२० ॥

सुगमा . नवरमपरिज्ञाने व्याक्षेपः कारणमुपन्यस्तं, न पुनर्वीतरागतेति पूर्वगाथाविसंवादादसौ तिरस्कृत्य निर्द्धाटितः।

पुनस्तापसः पठति--

फलोदएणम्मि गिहं पविट्ठो,
तत्थाऽऽसणत्था पमदा मे दिट्ठा ।
वंकिखत्तचित्तेण ण सुट्ठु नायं
सकुंमलं वा वयणं न व त्ति ॥ ३२९ ॥

" फलोदएणं " इत्यादि सुगमं पूर्ववत् ।

तदनन्तरं शौद्धोदनिशिष्यकः प्राऽऽह-

माऽवाविहारम्मि मए ऽज्ज दिट्ठा,
उवासिया कंचणजूसियंगी ।
वंकिखत्तचित्तेण न सुट्ठु नायं,
सकुंमलं वा वयणं न व त्ति ॥३३०॥

पूर्ववत्,एवमनया दिशा सर्वेऽपि तीर्थिका वाच्याः। आर्हतस्तु पुनर्न काश्चिदागत इति राज्ञाऽभाणि, मन्त्रिणा त्वार्हतक्षुल्लकोऽप्येवंभूतपरिणाम इत्येवं संप्रत्यय एषां स्यादित्यतो भिक्षार्थं प्रविष्टः प्रत्यूषस्येव क्षुल्लकः समानीतः, तेनापि गाथापादं गृहीत्वा गाथां बभाषे ।

तथा--

खंतस्स दंतस्स जिइंदियस्स,
अज्झप्पजोगे गयमाणसस्स ।
किं मज्झ एएण विचिंतिएणं,
सकुंमलं वा वयणं न व त्ति ॥ ३३१ ॥

सुगमा। अत्र च क्षान्त्यादिकमपरिज्ञाने कारणमुपन्यस्तं,न पुनस्त्रीक्षेप इत्यतो गाथासंवादात् क्षान्तिदमजितेन्द्रियत्वाध्यात्मयोगाधिगतेश्च कारणाऽभावो धर्मं प्रति ज्ञापोल्लासोऽभूत, क्षुल्लकेन च धर्मप्रश्नोत्तरकालं पूर्वगृहीतशुष्केतरकईमगोलकदृष्टं क्षिप्तौ निक्षिप्य गमनमारेभे, पुनर्गच्छन् राज्ञोक्तम्-किमिति भवान् धर्मं पृष्टोऽपि न कथयति ?, स चाबोचत्-हे मुग्ध ! ननु कथित एव धर्मो भवतः शुष्केतरगोलकदृष्टान्तेन ।

एतदेव गाथाद्वयेनाऽऽह-

उल्लो सुक्को य दो छूढा, गोलया मट्टियामया ।
दो वि आवडिया कुड्डे, जो उल्लो सोऽत्थ लग्गई ॥३३२॥
एवं लग्गंति दुम्मेहा, जे नरा कामलालसा ।
विरत्ता उ न लग्गंति, जहा से सुक्कगोलए ॥३३३॥

(एवं लग्गंति) अयमत्र भावार्थः-ये ह्यङ्गप्रत्यङ्गनिरीक्षणव्यासङ्गात् कामिनीनां मुखं न पश्यन्ति, तदभावे तु पश्यन्ति, ते कामगृध्नुतया साद्रोः, सार्द्रत्वाच्च संसारपङ्के कर्मकर्दमे वा लगन्ति, ये तु पुनः क्षान्त्यादिगुणोपेताः संसारसुखपराङ्मुखाः काष्ठमुनयः ते शुष्कगोलकसन्निभा न क्वचिल्लगन्तीति गाथाद्वयार्थः । आचा० १ श्रु० ४ अ० २ उ० ।

तथा च-

बहुजणणमणम्मि संवुडो,
सव्वट्ठेहिं परे अणिस्सिए ।
दह एव सया अणाविले,
धम्मं पाउरकासि कासवं ॥ ७ ॥

(बहुजणनमणम्मीत्यादि) बहून् जनान् आत्मानं प्रति नामयति प्रह्वीकरोति, तैर्वा नम्यते स्तूयते बहुजननमनो धर्मः ।

स एव बहुभिर्जनैरात्मीयाऽऽत्मीयाऽऽशयेन यथाऽभ्युपगमप्रशंसया स्तूयते प्रशस्यते । कृत्यम् ? । अत्र कथानकम्--"राजगृहे नगरे श्रेणिको महाराजः, कदाचिदसौ चतुर्विधबुद्धघुपेतेन पुत्रेण अभयकुमारेण सार्धमास्थानस्थितस्तान्निस्तान्निः कथाभिरासाञ्चक्रे, तत्र कश्चिदेर्ष्यालुता कथाऽऽनूत्, तद्यथा--इहलोके धार्मिका बहवः, उताऽधार्मिका इति ?। तत्र समस्तपर्षदाऽभिहितम्-यथाऽत्राऽधार्मिका बहवो लोकाः, धर्मं तु शतानामपि मध्ये कश्चिदेवैको विधत्ते, तदाकर्ण्याऽभयकुमारेणोक्तम्-यथा प्रायशो लोकाः सर्वे एव धार्मिकाः, यदि न निश्चयो भवतां, परीक्षा क्रियते। पर्षदाऽभ्यभिहितम्-एवमस्तु। ततोऽभयकुमारेण धवलेतरं प्रासादद्वयं कारितं, धवलितं च खिप्तिममेन नगरे, यथा यः कश्चिदिह धार्मिकः स सर्वोऽपि धवलप्रासादं गृहीतवह्निः प्रविशतु, इतरस्त्वितरमिति । ततोऽसौ लोकः सर्वोऽपि धवलप्रासादमेव प्रविष्टः । निर्गच्छंश्च कथं त्वं धार्मिक इत्येवं पृष्टः कश्चिदाचष्टे-यथाऽहं कर्षकोऽनेकशकुनिगणो मद्धान्यकणैरात्मानं प्रीणयति, खलकसमागतधान्यकणभिक्षादानेन च मम धर्म इति । अपरस्त्वाह--यथाऽहं ब्राह्मणः षट्कर्माऽभिरतस्तथा बहुशौचस्नानाऽऽदिभिर्वेदविहितानुष्ठानेन पितृदेवाँस्तर्पयामि । अन्यः कथयति--यथा वणिक्कुलोपजीवी भिक्षादानाऽऽदिप्रवृत्तः । अपरस्त्वेवमाह-यथाऽहं कुलपुत्रको न्यायाऽऽगतं नैर्गतिकं कुटुम्बं पालयाम्येव। तावत् इत्थाकोऽपीदमाह-यथाऽहं कुलक्रमाऽऽगतं धर्ममनुपालयामीति, मद्भिताश्च बहवः पिशितभुजः प्राणान् धारयन्तीत्येवं सर्वोऽप्यात्मीयमात्मीयं व्यापारमुद्दिश्य धर्मे नियोजयति । तत्राऽपरमसितप्रासादं श्रावकत्वेन प्रविष्टं, तञ्च किमधर्माऽऽचरणं भवद्भयमकारीत्येवं पृष्टं सकृन्मधुनिवृत्तिभङ्गभयलोकमकथयत् । तथा-साधव एवाऽत्र परमार्थतो धार्मिका यथा गृहीतप्रतिज्ञानिर्वाहणसमर्थाः । अस्माभिस्तु--

"अवाप्य मानुषं जन्म, लब्ध्वा जैनं च शासनम् ।
कृत्वा निवृत्तिं मद्यस्य, सम्यक् साऽपि न पालिता ॥ १ ॥
अनेन व्रतभङ्गेन, मन्यमाना अधार्मिकम् ।
अधमाधममात्मानं, कृष्णप्रासादमाश्रिताः ॥ २ ॥"

तथाहि--

"लज्जां गुणौघजननीं जननीमिवार्या--
मत्यन्तशुद्धहृदयामनुवर्त्तमानाः ।
तेजस्विनः सुखमसूनपि संत्यजन्ति,
सत्यस्थितिव्यसनिनो न पुनः प्रतिज्ञाम् ॥ ३ ॥
वरं प्रवेष्टुं ज्वलितं हुताशनं,
न चापि भग्नं चिरसंचितव्रतम् ।
वरं हि मृत्युः सुविशुद्धचेतसो,
न चाऽपि शीलस्खलितस्य जीवितम् ॥ ४ ॥"

तदेवं सर्वोऽप्यात्मानं धार्मिकं मन्यत इति कृत्वा "बहुजनसमनो धर्मः" इति स्थितम् । तस्मिंश्च संवृतः समाहितः सन् नरः पुमान् सर्वार्थैर्वाह्याभ्यन्तरैर्धनधान्यकलत्रममत्वाऽऽदिभिरनिश्रितोऽप्रतिबद्धः सन् धर्मं प्रकाशितवानित्युत्तरेण सह संबन्धः । निदर्शनमाह-ह्रद इव स्वच्छाम्भसा भृतः सदाऽनाविलोऽनेकमत्स्याऽऽदिजलचरसंक्रमेणाऽप्यनाकुलोऽकलुषो वा क्षान्त्यादिलक्षणं धर्मं प्रादुरकार्षीदिति प्रकटं कृतवान् । यदि वा--एवंविशिष्ट एव काश्यपो तीर्थकरसंबन्धिनं धर्मं प्रकाशयेत्, छान्दसत्वात् 'वर्तमाने भूतनिर्देश इति' ॥ ७ ॥

स बहुजननमने धर्मे व्यवस्थितो यादृग् धर्मं प्रकाशयति तद्दर्शयितुमाह । यदि वोपदेशान्तरमेवाऽधिकृत्याऽऽह--

बहवे पाणा पुढो सिया, पत्तेयं समयं उवेहिया ।
जे मोणपदं उवट्ठिते, विरतिं तत्थ अकासि पंडिए ॥८॥

(बहवे इत्यादि) बहवोऽनन्ताः, प्राणा दशविधप्राणभोक्तृत्वात्तद्भेदोपचारात् प्राणिनः, पृथगिति पृथिव्यादिभेदेन सूक्ष्मबादरपर्याप्तकापर्याप्तकनरकगत्यादिभेदेन वा संसारमाश्रितास्तेषां च पृथगाश्रितानामपि प्रत्येकं समतां दुःखद्वेषित्वं सुखप्रियं च समीक्ष्य दृष्ट्वा, यदिवा-समतां माध्यस्थ्यमुपेक्ष्य यो मौनीन्द्रपदमुपस्थितः संयमाऽऽश्रितः स साधुस्तत्राऽनेकभेदभिन्नप्राणिगणे दुःखद्वेषिसुखाभिलाषिणि सति तदुपघाते कर्तव्ये विरतिमकार्षीत् कुर्याद्वेति, पापाद्दीनः पापानुष्ठानात् दवीयान् पण्डित इति ॥ ८ ॥ सूत्र० १ श्रु० २ अ० २ उ० ।

(२८) सूत्रकृताङ्गस्य श्रुतस्कन्धीयनवमाध्ययनोक्तः साधूनामाचरणीयानाचरणीयो धर्मो यथा-

कयरे धम्मे अक्खाए, माहणेण मतीमता ।
अंजु धम्मं जहातच्चं, जिणाणं * तं सुणेह मे ॥ १ ॥

(कयरे इत्यादि) जम्बूस्वामी सुधर्मस्वामिनमुद्दिश्येदमाह । तद्यथा--कतरः किंभूतो दुर्गतिगमनलक्षणो धर्म आख्यातः प्रतिपादितः (माहणेणं ति) मा जम्बून् व्यापादयेत्येवं विनेयेषु वाक्प्रवृत्तिर्यस्याऽसौ माहनो भगवान् वीरवर्धमानस्वामी तेन, तमेव विशिनष्टि-मनुतेऽवगच्छति जगत्त्रयं कालत्रयोपेतं यया सा केवलज्ञानाऽऽख्या मतिः, सा अस्याऽस्तीति मतिमान्, तेनोत्पन्नकेवलज्ञानेन भगवतेति पृष्टे सुधर्मस्वाम्याह--रागद्वेषजितो जिनास्तेषां संबन्धिनं धर्मम् । (अंजुमिति) ऋजुं मायाप्रपञ्चरहितत्वादवक्रं, तथा--(जहातच्चमिति) यथावस्थितं मम कथयतः शृणुत यूयं, न तु यथाऽन्यैस्तीर्थिकैर्दम्भप्रधानो धर्मोऽभिहितस्तथा भगवताऽपीति। पाठान्तरं वा-(* जणगा! तं सुणेह मे) जायन्त इति जना लोकास्त एव जनकास्तेषामामन्त्रणम्-हे जनकाः! तं धर्मं शृणुत यूयमिति ॥ १ ॥

अन्वयव्यतिरेकाभ्यामुक्तोऽर्थः सूक्ता भवतीत्यतो यथोद्दिष्टप्रतिपक्षभूतोऽधर्मस्तदाश्रितांस्तावद्दर्शयितुमाह-

माहणा खत्तिया वेस्सा, चंडाला अदु बोक्कसा ।
एसिया वेसिया सुद्दा, जे य आरंभणिस्सिया ॥ २ ॥

(माहणेत्यादि) ब्राह्मणाः क्षत्रिया वैश्यास्तथा चाण्डालाः, अथ बोक्कसा अवान्तरजातीयाः । तद्यथा-ब्राह्मणेन शूद्र्यां जातो निषादो, ब्राह्मणेनैव वैश्यायां जातोऽम्बष्ठः, तथा निषादेनाम्बष्ठ्यां जातो बोक्कसः, तथा एषितुं शीलमित्येषिका मृगलुब्धिका हस्तितापसाश्च मांसहेतोर्मृगान् हस्तिनश्च एषन्ति, तथा कन्दमूलफलाऽऽदिकं च । तथा ये चाऽन्ये पापधिमका नानाविधैरुपायैर्भक्ष्यमेष्यन्त्यन्यानि वा विषयसाधनानि, ते सर्वेऽप्येषिका इत्युच्यन्ते । तथा वैशिका वणिजो मायाप्रधानाः कलोपजीविनः, तथा शूद्राः कृषीबलाऽऽदयः । आभीरजातीयाः कियन्तो वा वक्ष्यन्त इति दर्शयति । ये चाऽन्ये वर्णापसदा नानारूपसावद्याऽऽरम्भानिश्रिता यन्त्रपीडननिर्लाञ्छन-

कर्मोङ्कारदाहाऽऽदिभिः किंविशिष्टैर्जीवोपमर्दकारिणस्तेषां सर्वेषामेव जीवापकारिणां वैरमेव प्रवर्धत इत्युत्तरश्लोके क्रियेति ॥ २ ॥

परिग्गहनिविट्ठाणं, पावं तेसिं पवड्ढइ ।
आरंभसंभिया कामा, न ते दुक्खविमोयगा ॥ ३ ॥

(परिग्गह इत्यादि) परि समन्ताद् गृह्यत इति परिग्रहो द्विपदचतुष्पदधनधान्यहिरण्यसुवर्णाऽऽदिषु मणीकारः, तत्र निविष्टानामध्युपपन्नानां गार्द्धं गतानां, पापमसातवेदनीयाऽऽदिकं, तेषां प्रागुक्तानामारम्भनिःश्रितानां परिग्रहे निविष्टानां, प्रकर्षेण वर्द्धते वृद्धिमुपयाति जन्मान्तरेष्वपि दुर्मोचं भवति । क्वचित्पाठः-" वेरं तेसिं पवड्ढइ त्ति । " तत्र येन यस्य यथा प्राणिन उपमर्दः क्रियते स तथैव संसारान्तर्वर्ती शतशो दुःखभाग् भवति, जन्मदग्निकृतवीर्योऽऽदीनामिव पुत्रपौत्रानुगं वैरं प्रवर्द्धत इति भावः । किमित्येवम्?, यतस्ते कामेषु प्रवृत्ताः कामाश्चाऽऽरम्भैः सम्यग्भूता आरम्भपुष्टा आरम्भाश्च जीवोपमर्दकारिणोऽतो न ते कामसंभृता आरम्भनिःश्रिताः परगृहे निविष्टा दुःखयतीति दुःखमष्टप्रकारं कर्म,तद्विमोचका भवन्ति, तस्याऽपनेतारो भवन्तीत्यर्थः ॥ ३ ॥

किं चान्यत्-

आघायकिच्चमाहेउं, णाइओ विसएसिणो ।
अन्ने हरंति तं वित्तं, कम्मी कम्मेहिं किच्चती ॥ ४ ॥

(आघायमित्यादि) आहन्यन्ते अपनयन्ति विनाश्यन्ते प्राणिनां दशप्रकारा अपि प्राणा यस्मिन् स आघातो मरणं, तस्मै तत्र वा कृतमग्निसंस्कारजलाञ्जलिप्रदानपिण्डपिण्डाऽऽदिकमाघातकृत्यं तदाधातुमादाय कृत्वा पश्चात् ज्ञातयः स्वजनाः पुत्रकलत्रभ्रातृव्याऽऽदयः । किंभूताः?, विषयान्वेषणं शीलं येषां तेऽप्येवंविधैः सन्तस्तस्य दुःखार्जितं वित्तं द्रव्यजातमपहरन्ति स्वीकुर्वन्ति । तथा चोक्तम्-" ततस्तैरर्जितैरूर्ध्वं-दारैश्च परिरक्षितैः । क्रीडन्त्यन्ये नरा राजन्!, हृष्टास्तुष्टा अलंकृताः ॥ १ ॥ " स तु द्रव्याऽर्जनपरायणः सावद्यानुष्ठानकर्मवान् पापी स्वीकृतैः कर्मभिः संसारे क्रियते छिद्यते, पीड्यत इति यावत् ॥ ४ ॥

माया पिया एहुसा भाया, भज्जा पुत्ता य ओरसा ।
नालं ते तव ताणाय, लुप्पंतस्स सकम्मुणा ॥ ५ ॥

(माया पिया इत्यादि) माता जननी, पिता जनकः, स्नुषा पुत्रवधूः, भ्राता सहोदरः, तथा भार्या कलत्रं, पुत्राश्च औरसाः स्वनिष्पादिताः, एते सर्वेऽपि माऽऽदयो, ये चान्ये श्वशुराऽऽदयः, ते तव संसारचक्रवाले स्वकर्मभिर्विलुप्यमानस्य त्राणाय नालं समर्था भवन्तीति । इहाऽपि तावन्नैते त्राणाय किमुतामुत्रेति। दृष्टान्तश्चात्र कालसौकरिकसुतः सुलसनामा अभयकुमारस्य सखा । तेन महासत्त्वेन स्वजनाऽऽर्त्यार्थितेनापि न प्राणिष्वपकृतमपि स्वात्मन्येवेति ॥ ५ ॥

किं चान्यत्-

एयमट्ठं स पेहाए, परमट्ठाणुगामियं ।
निम्ममो निरहंकारी, चरे भिक्खू जिणाऽऽहियं ॥६॥

(एयमट्ठमित्यादि) धर्मरहितानां स्वकृतकर्मविलुप्यमानानामैहिकाऽऽमुष्मिकयोर्न कश्चित्त्राणायेति, एवं पूर्वोक्तमर्थं स प्रेक्षापूर्वकारी प्रत्युपेक्ष्य विचार्याऽवगम्य च, परमः प्रधानभूतो मोक्षः संयमो वा,तमनुगच्छतीति तच्छीलश्च परमार्थानुगामुकः सम्यग्दर्शनाऽऽदिः,तं च प्रत्युपेक्ष्य, कृत्वाप्रत्ययान्तस्य पूर्वकालवाचितया क्रियान्तरसव्यपेक्षत्वात् । तदाह-निर्गतं ममत्वं बाह्याभ्यन्तरेषु वस्तुषु यस्मादसौ निर्ममः । तथा-निर्गतोऽहङ्कारोऽभिमानः पुत्रैश्वर्यपैशाल्यादिमदजनितः, तथा-तपःस्वाध्यायलाभाऽऽदिजनितो वा यस्मादसौ निरहङ्कारो, रागद्वेषरहित इत्यर्थः । स एवंभूतो भिक्षुर्जिनैराहितः प्रतिपादितोऽनुष्ठितो वा यो मार्गो,जिनानां वा संबन्धी योऽभिहितो मार्गस्तं चरेदनुतिष्ठेदिति ॥ ६ ॥

चिच्चा वित्तं च पुत्ते य, णाइओ य परिग्गहं ।
चिच्चा ण अंतगं सोयं, निरवेक्खो परिव्वए ॥ ७ ॥

(चिच्चा इत्यादि) संसारस्वभावपरिज्ञानपरिकर्मितमतिर्विदितवेद्यः सम्यक् त्यक्त्वा परित्यज्य,किं तद्?, वित्तं द्रव्यजातं, तथा पुत्रांश्च त्यक्त्वा पुत्रेष्वधिकस्नेहो भवतीति पुत्रग्रहणम् । तथा-ज्ञातीन् स्वजनांश्च त्यक्त्वा, तथा-परिग्रहं चाऽऽन्तरं ममकरूपत्वं, णकारो वाक्यालङ्कारे । अन्तं गच्छतीत्यन्तगो, दुष्परित्यज इत्यर्थः । अन्तको विनाशकारीत्यर्थः । आत्मनि वा गच्छतीत्यात्मगः, आन्तर इत्यर्थः । तं तथाभूतं शोकं त्यक्त्वा परित्यज्य, श्रोतो वा मिथ्यात्वाविरतिप्रमादकषायाऽऽत्मकं कर्माऽऽश्रवद्वारभूतं परित्यज्य । पाठान्तरं वा-" चिच्चा अणंतगं सोयं । " अन्तं गच्छतीत्यन्तगं, न अन्तगमनन्तगं, श्रोतः शोकं परित्यज्य निरपेक्षः पुत्रदारधनधान्यहिरण्याऽऽदिकमनपेक्ष्यमाणः सन् भोक्षाय परि समन्ताद् संयमानुष्ठाने व्रजेत् परिव्रजेदिति । तथा चोक्तम्-

" छलिया अवयक्खंता, निरावयक्खा गया अविग्घेणं ।
तम्हा पवयणसारे, निरावयक्खेण होयव्वं ॥ १ ॥
भोगे अवयक्खंता, पडंति संसारसागरे घोरे ।
भोगेहिं निरवयक्खा, तरंति संसारकंतारं ॥ २ ॥ " इति ।

स एवं प्रव्रजितः सुव्रताधस्थिताऽऽत्माऽहिंसाऽऽदिषु व्रतेषु यतेत ॥ ७ ॥

तत्राऽहिंसाप्रसिध्यर्थमाह-

पुढवीआउक्काय-तेउवाउवणस्सइसबीयगा ।
अंडया पोयजराउ-रससंसेयउब्भिया ॥ ८ ॥
एतेहिं छहिं काएहिं, तं विज्जं परिजाणिया ।
मणसा कायवक्केणं, णारंभी ण परिग्गही ॥ ९ ॥

" पुढवीआउ " इत्यादि श्लोकद्वयम् । तत्र पृथिवीकायिकाः सूक्ष्मबादरपर्याप्तकापर्याप्तकभेदभिन्नाः, तथाऽप्कायिका अग्निकायिका वायुकायिकाश्चैवंभूता एव । वनस्पतिकायिकान् लेशतः सभेदानाह-तृणानि कुशवल्लकाऽऽदीनि, वृक्षाश्चूताशोकाऽऽदिकाः । सह बीजैर्वर्तन्त इति सबीजानि, सबीजानि तु शाल्यिगोधूमयवाऽऽदीनि, एते एकेन्द्रियाः पञ्चापि कायाः । षष्ठत्रसकायनिरूपणायाऽऽह-अण्डजाः शकुनिगृहकोकिलकसरीसृपाऽऽदयः । तथा पोता एव पोतजा हस्तिशरभाऽऽदयः । तथा जरायुजा ये जम्बालवेष्टिताः समुत्पद्यन्ते गोमनुष्याऽऽदयः । त-

था रसाद् दधिसौवीरकाद् जाता रसजाः,तथा संस्वेदाज्जाताः संस्वेदजा यूका मत्कुणाऽऽदयः। उद्भिज्जाः खञ्जरीटकदर्दुराऽऽदय इति । अज्ञातभेदा हि दुःखेन रक्ष्यन्त इत्यतो जेदेनोपन्यास इति ॥ ८ ॥ एभिः पूर्वोक्तैः षड्भिरपि कायैस्सस्थावररूपैः सूक्ष्मबादरपर्याप्तकापर्याप्तकभेदभिन्नैर्नारम्भी नापि परिग्रही स्यादिति संबन्धः । तदेतद् विद्वान् सञ्ज्ञप्तिको ज्ञपरिज्ञया परिज्ञाय प्रत्याख्यानपरिज्ञया मनोवाक्कायकर्मभिर्जीवोपमर्दकारिणमारम्भं परिग्रहं च परिहरेदिति ॥ ९ ॥

शेषव्रतान्यधिकृत्याऽऽह--

मुसावायं बहिद्धं च, उग्गहं च अजाइयं ।
सत्था दाणाइं लोगंसि, तं विज्जं परिजाणिया ॥ १० ॥

(मुसावायमित्यादि) मृषा असद्भूतो वादो मृषावादः, तं विद्वान् प्रत्याख्यानपरिज्ञया परिहरेत् , तथा-(अबहिद्धमिति) मैथुनम्, अवग्रहं परिग्रहम्, अयाचितमदत्तास्ऽऽदानम्। यदि वा-" अबहिद्धमिति।" मैथुनग्रहोऽवग्रहमयाचितमित्यनेनादत्तास्ऽऽदानं गृहीतम् । एतानि च मृषावादाऽऽदीनि प्राण्युपतापकारित्वात् शस्त्राणीव शस्त्राणि वर्तन्ते । तथा--दीयते गृह्यतेऽष्टप्रकारं कर्मभिरिति कर्मोपादानकारणानि,अस्मिन् लोके तदेतत्सर्वं विद्वान् ज्ञपरिज्ञया परिज्ञाय प्रत्याख्यानपरिज्ञया परिहरेदिति ॥१०॥

किं चाऽन्यत्-

पलिउंचणं च भयणं च, थंभिब्भुस्सयणाणि य ।
धूणा दाणाइं लोगंसि, तं विज्जं परिजाणिया ॥ ११ ॥

(पलिउंचणमित्यादि) पञ्चमहाव्रतधारणमपि कषायिणो निष्फलं स्यादतस्तत्साफल्याऽऽपादनार्थं कषायनिरोधो विधेय इति दर्शयति । परि समन्तात् कुट्यन्ते वक्रतामापद्यन्तेऽनया येन मायाऽनुष्ठानेन तत्परिकुञ्चनं मायेति भण्यते । तथा-भज्यते सर्वत्राऽऽत्मा ग्रहीक्रियते येन स भजनो लोभस्तम्, तथा-यदुदयेन ह्यात्मा सदसद्विवेकाविकलत्वात् स्थाणिरिवऋजुत्वाद्भवति , स स्थाणिरुच्यते क्रोधः । यस्मिंश्च सत्युच्चैर्भवति जात्यादिना दर्पाऽऽध्मातः पुरुष उन्नतानीवति स उच्छ्रायो मानः, छान्दसत्वाच्चपुंसकनिर्देशः । जात्यादीनामेतत्स्थानानां बहुत्वात् तत्कार्यस्याऽपि मानस्य बहुत्वमतो बहुवचनम्। चकाराः स्वगतभेदसंसूचनार्थाः, समुच्चयार्था वा । धूनयेति प्रत्येकं क्रिया योजनीया । तद्यथा-परिकुञ्चनं मायां धूनय, धूनीहि वा। तथा-भजनं लोभं, तथा-स्थाणिरूपं क्रोधं, तथा-उच्छ्रायं मानं, विचित्रत्वात् सूत्रस्य, क्रमोल्लङ्घननिर्देशो न दोषायेति । यदि वा--रागस्य दुस्त्यजत्वात्, लोभस्य च मायापूर्वकत्वादित्यादावेव मायालोभयोरुपन्यास इति । कषायपरित्यागे विधेये पुनरपरं कारणमाह-एतानि परिकुञ्चनाऽऽदीनि अस्मिन् लोके आदानानि वर्तन्ते तदेतद्विद्वान् ज्ञपरिज्ञया परिज्ञाय प्रत्याख्यानपरिज्ञया प्रत्याचक्षीत ॥ ११ ॥

पुनरप्युत्तरगुणानधिकृत्याऽऽह-

धोयणं रयणं चेव, वत्थीकम्मं विरेयणं ।
वमणंऽञ्जणपल्लीमंथं, तं विज्जं परिजाणिया ॥ १२ ॥

(धोयणमित्यादि) धावनं प्रक्षालनं हस्तपादयोर्वस्त्राऽऽदेरञ्जनमपि,.....(?)तथा-विरेचनं निरुहाऽऽस्थकर्मधोविरेको वा। वमनमूर्ध्वविरेकः । तथा--अञ्जनं नयनयोरिति । एवमादिकमन्यदपि शरीरसंस्काराऽऽदिकं यत् संयमपरिमन्थकारि संयमोपघातरूपं , तदेतद्विद्वान् स्वरूपतस्तद्विपाकतश्च परिज्ञाय प्रत्याचक्षीत ॥ १२ ॥

अपि च-

गंधमल्लसिणाणं च, दंतपक्खालणं तहा ।
परिग्गहित्थि-कम्मं च, तं विज्जं परिजाणिया ॥ १३ ॥

(गंधमल्ल इत्यादि) गन्धाः कोष्ठपुटाऽऽदयः, माल्यं जात्यादिकम्, स्नानं च शरीरप्रक्षालनं देशतः, सर्वतश्च । तथा-दन्तप्रक्षालनं कदम्बकाष्ठाऽऽदिना, परिग्रहः सचित्ताऽऽदेः स्वीकरणम् । तथा-स्त्रियो दिव्यमानुषतैरश्चः । तथा-कर्म हस्तकर्म, सावद्यानुष्ठानं वा । तदेतत्सर्वं कर्मोपादानतया संसारकारणत्वेन परिज्ञाय विद्वान् परित्यजेदिति ॥ १३ ॥

किं चाऽन्यत्-

उद्देसियं कीयगमं, पामिच्चं चेव आहडं ।
पूयं अणेसणिज्जं च, तं विज्जं परिजाणिया ॥ १४ ॥

(उद्देसियमित्यादि) साध्वाद्युपदेशेन यदानाय व्यवस्थाप्यते तदुद्देशिकम् । तथा-क्रीतं क्रयस्तेन क्रीतं गृहीतं क्रीतकीतं, (पामिच्चं ति) साध्वर्थमन्यत उद्यतकं यद् गृह्यते तत्तदुच्यते, चकारः समुच्चयार्थः, एवकारोऽवधारणार्थः । साध्वर्थं यद् गृहस्थेन नीयते तदाहृतम् । तथा-(पूयमिति) आधाकर्मावयवसंपृक्तं शुद्धमप्याहारजातं भवति । किं बहुनोक्तेन ?-यत् केनचिद्दोषेणानेषणीयमशुद्धं तत्सर्वं विद्वान् परिज्ञाय संसारकारणतया निस्पृहः सन् प्रत्याचक्षीतेति ॥ १४ ॥

किं च-

आसूणिमक्खिरागं च, रसगिद्धूवघायकम्मगं ।
उच्छोलणं च कक्कं च, तं विज्जं परिजाणिया ॥ १५ ॥

(आसूणि इत्यादि) येन घृतपानाऽऽदिना आहारविशेषेण रसायनक्रियया वा अशूनः सन् आ समन्तात् शूनीभवति बलवानुपजायते, तदाशूनीत्युच्यते । यदि वा-(आसूणि त्ति) ऋ घातयः-ऋधया क्रियमाणया आ समन्तात् शूनश्लुनो लघुप्रकृतिः कश्चिद्दर्पाऽऽध्मातत्वात् स्तब्धो भवति । तथा-अक्ष्णां रागो रञ्जनं सौवीराऽऽदिकमञ्जनमिति यावत् । एवं रसेषु शब्दाऽऽदिषु विषयेषु वा गृद्धिं गार्द्धं तात्पर्यमासेवा, तथोपघातकर्मेत्युच्यते । तदेव क्षेत्रतो दर्शयति-(उच्छोलणं ति) अयतनया शीतोदकाऽऽदिना हस्तपादाऽऽदिप्रक्षालनम, तथा-कल्कं क्षोभ्याऽऽदिद्रव्यसमुदायेन शरीरोद्वर्तनकं, तदेतत्सर्वं बन्धनायेत्येवं विद्वान् परिमतो ज्ञपरिज्ञया प्रत्याख्यानपरिज्ञया परिहरेदिति ॥ १५ ॥

अपि च-

संपसारा य कयकिरिए, पसिणाऽऽयतणाणि य ।
सागारियं च पिंडं च, तं विज्जं परिजाणिया ॥ १६ ॥

(संपसारा य इत्यादि) असंयतैः सार्धं संप्रसारणं पर्यालोचनं, परिहरेदिति वाक्यशेषः । एवं संयमानुष्ठानं प्रत्युपदेशदानम । तथा-' कयकिरिए ' नाम कृता शोभना गृहकरणाऽऽदिक्रिया येन स कृतक्रिय इत्येवमसंयतानुष्ठानप्रशंसनम्। तथा-प्रश्नस्याऽऽदर्शः प्रश्नाऽऽदेरायतनमाविष्करणं कथनं यथावस्थितप्रश्ननिर्णयनानि । यदि वा-प्रश्नाऽऽयतनानि लौकिकानां

परस्परव्यवहारे मिथ्याशास्त्रगतसंशये वा प्रश्ने सति यथावस्थितार्थकथनद्वारेणाऽऽयतनानि निर्णयनानीति । तथा-सागारिकः शय्यातरः, तस्य पिण्डमाहारम् । यदि वा-सागारिकपिण्डमिति सूतकगृहपिण्डं, जुगुप्सितं वर्णापसदपिण्डं च । चशब्दः समुच्चये । तदेतत्सर्वं विद्वान् ज्ञपरिज्ञया परिज्ञाय प्रत्याख्यानपरिज्ञया परिहरेदिति ॥१६॥

किं चान्यत्-

अट्ठावयं न सिक्खिज्जा, वेहाईयं च णो वए ।
हत्थकम्मं विवायं च, तं विज्जं परिजाणिया ॥ १७ ॥

(अट्ठावयमित्यादि) अर्थ्यते इत्यर्थो धनधान्यहिरण्यादिकः, पद्यते गम्यते येनार्थस्तत् पदं शास्त्रम्, अर्थार्थं पदमर्थपदं चाणक्यादिकमर्थशास्त्रं, तन्न शिक्षयेत्तदन्यसेवाप्यपरप्राणयुपमर्दकारि शास्त्रं शिक्षयेत्, यदि वा अष्टापदं द्यूतक्रीडाविशेषस्तं न शिक्षयेत, नापि पूर्वशिक्षितमनुशीलयेदिति । तथा-वेधो धर्मानुवेधस्तस्मादतीतमधर्मप्रधानं वचो नो वदेत् । यदि वा-वेध इति धर्मवेधो द्यूतविशेषः, तद्गतं वचनमपि नो वदेत्, मास्तां तावत्क्रीडनमिति । हस्तकर्म प्रतीतम् । यदि वा-हस्तकर्म हस्तक्रिया परस्परं हस्तव्यापारप्रधानः कलहस्तं, तथा विरुद्धवादं, शुष्कवादमित्यर्थः । चः समुच्चये । तदेतत्सर्वं संसारभ्रमणकारणं ज्ञपरिज्ञया परिज्ञाय प्रत्याख्यानपरिज्ञया प्रत्याचक्षीत ॥ १७ ॥

किं च-

पाणहा उ य उत्तं च, णाइयं बालवीयणं ।
परकिरियं अन्नमन्नं च, तं विज्जं परिजाणिया ॥ १८ ॥

(पाणहा उ इत्यादि) उपानहौ काष्ठपादुके च, तथा-आतपाऽऽदिनिवारणाय छत्रम् । तथा-नालिका द्यूतक्रीडाविशेषः । तथा-बालैर्मयूरपिच्छैर्वा व्यजनकं, तथा-परेषां संबन्धिनी क्रियामन्योऽन्यां परस्परतोऽन्यनिष्पाद्यामन्यः करोत्यपरनिष्पाद्यां चापर इति । चः समुच्चये । तदेतत्सर्वं विद्वान् पापिमतः कर्मोपादानकारणत्वेन ज्ञपरिज्ञया परिज्ञाय प्रत्याख्यानपरिज्ञया परिहरेदिति ॥ १८ ॥

तथा-

उच्चारं पासवणं, हरिएसु ण करे मुणी ।
वियडेण वावि साहट्टु, णाऽऽचमे य कयाइ वि ॥ १९ ॥

(उच्चारमिति) उच्चारप्रस्रवणाऽऽदिकां क्रियां हरितेषूपरि बीजेषु वा स्थण्डिले वा मुनिः साधुर्न कुर्यात्, तथा-विकटेन विगतजीवेनाप्युदकेन संहृत्यापनीय बीजानि हरितानि वा, नाऽऽचमेत न निलेपनं कुर्यात्, किमुताविकटेनेति भावः ॥१९॥

किं च-

परमत्ते अन्नपाणं, ण भुंजेज्ज कयाइ वि ।
परवत्थं अचेलो वि, तं विज्जं परिजाणिया ॥ २० ॥

(परमत्ते इत्यादि) परस्य गृहस्थस्यामत्रं भाजनं परामत्रं, तत्र पुरःकर्म पश्चात्कर्म, तद्भयाद् हुतनष्टाऽऽदिदोषसंभवाद्वाऽन्यत्र पानं च मुनिर्न कदाचिदपि भुञ्जीत । यदिवा-पतद्ग्रहधारिणाऽच्छिद्रपाणेः पाणिपात्रं परपात्रं, यदि वा-पाणिपात्रस्याच्छिद्रपाणेर्जिनकल्पिकाऽऽदेः पतद्ग्रहः परपात्रं, तत्र संयमविराधनाभयान्न भुञ्जीत, तथा-परस्य गृहस्थस्य वस्त्रं परवस्त्रं तत् साधुरचेलोऽपि सन् पश्चात्कर्माऽऽदिदोषभयाद्, हुतनष्टाऽऽदिदोषसंभवाच्च न विभृयात् । यदि वा-जिनकल्पिकाऽऽदिकोऽचेलो भूत्वा सर्वमपि वस्त्रं परवस्त्रमिति कृत्वा न बिभृयात्, एतत्सर्वं परपात्रभोजिनाऽऽदिकं ज्ञपरिज्ञया परिज्ञाय प्रत्याख्यानपरिज्ञया परिहरेदिति ॥ २० ॥

आसंदी पल्लियंके य, णिसिज्जं च गिहंतरे ।
संपुच्छणं व सरणं वा, तं विज्जं परिजाणिया ॥ २१ ॥

आसन्दीति आसनविशेषः । अस्य चोपलक्षणार्थत्वात्सर्वोऽप्यासनविधिर्गृहीतः । तथा-पर्यङ्कः शयनविशेषः । तथा गृहस्यान्तर्मध्ये गृहयोर्वा मध्ये निषद्यां वाऽऽसनं वा संयमविराधनाभयात् परिहरेत् । तथा चोक्तम्-" गंभीरझुसिरा एते, पाणा दुप्पमिलेहगा । अगुत्ती बंभचेरस्स, इत्थीओ वा वि संकणा ॥ १ ॥ " इत्यादि । तथा-तत्र गृहस्थगृहे कुशलाऽऽद्यभिप्रच्छनमात्मीयशरीरावयवप्रच्छनं वा । तथा-पूर्वक्रीडितस्मरणं चेत्येतत्सर्वं विद्वान् विदितवेद्यः सन्नमर्थीयेति ज्ञपरिज्ञया परिज्ञाय प्रत्याख्यानपरिज्ञया परिहरेत् ॥ २१ ॥

अपि च-

जसं कित्तिं सलाघं च, जा य वंदणपूयणा ।
सव्वलोयंसि जे कामा, तं विज्जं परिजाणिया ॥ २२ ॥

(जसं कित्तिमित्यादि) बहुजनसंघट्टनिबंधनशौर्यलक्षणं यशः, दानसाध्या कीर्तिः, जातितपोबहुश्रुत्यादिजनिता श्लाघा, तथा-या च सुराऽसुराधिपतिचक्रवर्तिबलदेववासुदेवाऽऽदिभिर्वन्दना, तथा-तैरेव सत्कारपूर्विका श्लाघाऽऽदिना पूजना । तथा-सर्वस्मिन्नपि लोके इच्छामदनरूपा ये केचन कामाः, तदेतत्सर्वं यशः कीर्तिमपकारितया परिज्ञाय परिहरेदिति ॥ २२ ॥

किं चान्यत्-

जेणेह णिव्वहे भिक्खू, अन्नपाणं तहाविहं ।
अणुप्पयाणमण्णेसिं, तं विज्जं परिजाणिया ॥ २३ ॥

(जेणेहमित्यादि) येनाऽन्नेन पानेन वा तथाविधेनेति शुद्धपरिशुद्धेन, कारणापेक्षया त्वशुद्धेन वा, इहास्मिन् लोके, इदं संयमयात्राऽऽदिकं दुर्भिक्षरोगाऽऽतङ्काऽऽदिकं वा भिक्षुर्निर्वहेन्निर्वाहयेद्वा, यदन्नं पानं वा तथाविधं द्रव्यक्षेत्रकालभावापेक्षया शुद्धं कल्प्यं गृह्णीयात्, तथैतेषामन्नाऽऽदीनामनुप्रदानमन्यस्मै साधवे संयममात्रानिर्वहणसमर्थमनुतिष्ठेत् । यदि वा-येन केनचिदनुष्ठितेन संयमं निर्वहेन्निर्वाहयेदसारतामापादयेत् । तथाविधमशनं पानं वा, अन्यद्वा तथाविधमनुष्ठानं न कुर्यात् । तथा-एषामशनाऽऽदीनामनुप्रदानं गृहस्थानां परतीर्थिकानां स्वयूथ्यानां वा संयमोपघातकं नानुशीलयेदिति । तदेतत्सर्वं ज्ञपरिज्ञया ज्ञात्वा सम्यक् परिहरेदिति ॥ २३ ॥

यदुपदेशेनैतत्कुर्यात्तदर्शयितुमाह-

एवं उदाहु निग्गंथे, महावीरे महामुणी ।
अणंतनाणदंसी से, धम्मं देसितवं सुतं ॥ २४ ॥

(एवं उदाहु इत्यादि) एवमनन्तरोक्तया नीत्या उद्देशकाऽऽदेरारभ्य (उदाहु त्ति) उदाहृतवानुक्तवान्, निर्गतो बाह्याभ्यन्तरो ग्रन्थो यस्मात्स निर्ग्रन्थो, महावीर इति श्रीमद्वर्धमानस्वामी, महाँश्चासौ मुनिश्च महामुनिः, अनन्तं ज्ञानं दर्शनं च यस्यासावनन्तज्ञानदर्शी, स भगवान्, धर्मं चारित्रलक्षणं सं

सारोच्चरणसमर्थं वा । तथा-श्रुतं च जीवाऽऽदिपदार्थसूचकं, देशितवान् प्रकाशितवान् ॥ २४ ॥

किं चान्यत्-

भासमाणो न भासेज्जा, णेव वंफेज्ज मम्मयं ।
मातिट्ठाणं विवज्जेज्जा, अणुचिंतिय वियागरे ॥ २५ ॥

(भासमाणो इत्यादि) यो हि भाषासमितः स भाषमाणोऽपि धर्मकथासंबन्धभाषक एव स्यात् । उक्तं च-" वयणविहत्तीकुसलो, वओगयं बहुविहं वियाणंतो । दिवसं पि भासमाणो, साहू व गुरुत्तयं पत्तो ॥ १ । " यदि वा-यत्रान्यः कश्चिदाऽऽदिको भाषमाणस्तत्राऽन्तर एव सभृतिकोऽहमित्येवमभिमानवान् न भाषेत । तथा-मर्म गच्छतीति मर्मगं वचो न (वंफेज्ज त्ति) नाभिलपेत् । यद्वचनमुच्यमानं तथ्यमतथ्यं वा सद् यस्य कस्यचिन्मनः पीडामाधत्ते,तद्विवेकी न भाषेतेति भावः । यदि वा-मामकं ममीकारः पक्षपातस्तं भाषमाणो (न वंफेज्ज त्ति) नाभिलपेत् । तथा-मातृस्थानं मायाप्रधानं वचो विवर्जयेत् । इदमुक्तं भवति-परवञ्चनबुद्ध्या गूढाऽऽचारप्रधानो भाषमाणोऽभाषमाणो वाऽन्यदा वा मातृस्थानं न कुर्यादिति । यदा तु वक्तुं कामो भवति, तदा नैतद्वचः परमात्मनोरुभयोर्वा बाधकमित्येवं प्रागेवचिन्त्य वचनमुदाहरेत् । तदुक्तम्-" पुव्वं बुद्धीए पेहित्ता, पच्छा वक्कमुदाहरे । " इत्यादि ॥ २५ ॥

अपि च-

तत्थिमा तइया भासा, जं वदित्ताऽणुतप्पति ।
जं छन्नं तं न वत्तव्वं, एसा आणा णियंठिया ॥ २६ ॥

(तत्थिमेत्यादि) सत्या-असत्या-सत्यामृषा-असत्यामृषेत्येवंरूपासु चतसृषु भाषासु मध्ये तत्रेयं सत्यामृषेत्येतदभिधानात् तृतीया भाषा,सा च किञ्चिन्मृषा किञ्चित्सत्या इत्येवंरूपा । तद्यथा-दश दारका अस्मिन्नगरे जाता मृताः,तदत्र न्यूनाधिकसंभवे सति संख्याया व्यभिचारात्सत्यामृषात्वमिति । यां चैवंरूपां भाषामुदित्वा अनु पश्चात्तापाज्जन्मान्तरे वा तज्जनितेन दोषेण तप्यते पीड्यते क्लेशभाग्भवति । यदि वा-अनुतप्यते, किं मयैवंभूतेन भाषितेनेत्येवं पश्चात्तापं विधत्ते । तत्तथेदमुक्तं भवति-मिश्राऽपि भाषा दोषाय, किं पुनरसत्या,द्वितीया समस्ताऽर्थविसंवादिनी । तथा-प्रथमाऽपि भाषा सत्या, या प्राण्युपतापेन दोषानुषङ्गिणी सा न वाच्या । चतुर्थ्याऽप्यसत्यामृषा भाषा बुधैरनाचीर्णा सा न वक्तव्येति । सत्याया अपि दोषानुषङ्गित्वमधिकृत्याऽऽह-यद्यत्रः (छन्नं ति) क्षणु हिंसायां, हिंसाप्रधानम् । तद्यथा-वप्यतां चौरोऽयं, लूयन्तां केदाराः, दह्यन्तां गोरथका इत्यादि । यदि वा-(छन्नं ति) प्रच्छन्नं यल्लोकैरपि प्रच्छाद्यते तत्सत्यमपि न वक्तव्यमिति । एषाऽऽज्ञा अयमुपदेशो निर्ग्रन्थो भगवांस्तस्येति ॥ २६ ॥

किं च-

होलावायं सहीवायं, गोयावायं च नो वदे ।
तुमं तुमं ति अमणुन्नं, सव्वसो तं ण वत्तए ॥ २७ ॥

(होलावायमित्यादि) होलेत्येवं वादो होलावादः । तथा-सखेत्येवं वादः सखिवादः,तथा-गोत्रोद्घाटनेन वादो गोत्रवादः, यथा-काश्यपस्त्वं गोत्रो, वासिष्ठस्त्वं गोत्रो वेति इत्येवंरूपं वादं साधुर्न वदेत् । तथा-" तुमं तुमं " तिरस्कारप्रधानमेकवचनान्तं बहुवचनोच्चारणयोग्येऽमनोज्ञं मनःप्रतिकूलरूपमन्यदप्येवंभूतमपमानाऽऽपादकं सर्वशः सर्वथा तत् साधूनां वक्तुं न वर्तत इति । यदाश्रित्योक्तं निर्युक्तिकारेण । तद्यथा-" पासत्थोसन्नकुसी-लसंथवो ण किल वट्टए काउं । तदिदं " इत्यादि ॥२७॥

अकुसीले सया भिक्खू, णेव संसग्गियं भए ।
सुहरूवा तत्थुवस्सग्गा, पडिबुज्झेज्ज ते विऊ ॥ २८ ॥

(अकुसीलेत्यादि) कुत्सितं शीलमस्येति कुशीलः, स च पार्श्वस्थाऽऽदीनामन्यतमः,न कुशीलोऽकुशीलः,सदा सर्वकालं,भिक्षणशीलो भिक्षुः,कुशीलो न भवेन्न चापि कुशीलैः सार्धं संसर्गं साङ्गत्यं,भजेत सेवेत । तत्संसर्गदोषोद्भिभावयिषयाऽऽह-" सुखरूपाः सातागौरवस्वभावाः, तत्र तस्मिन् कुशीलसंसर्गे संयमोपघातकारिण उपसर्गाः प्रादुर्भवन्ति । तथाहि-कुशीलवक्तारो भवन्ति-कः किल प्रासुकोदकेन हस्तपादादेर्नाऽऽदिके प्रक्षाल्यमाने दोषः स्यात् । तथा-नाशरीरो धर्मो भवतीत्यतो येन केनचित्प्रकारेणाऽध्याकर्मसाङ्गत्याऽऽदिना, तथा-स्नपानङ्गाऽऽदिना च शरीरं धर्माऽऽधारं वर्तयेत् । उक्तं च-"अप्पेण बहुमेसेज्जा,पंडियलक्खणं ।" इति । "शरीरं धर्मसंयुक्तं,रक्षणीयं प्रयत्नतः । शरीरात्स्रवते पापं, पर्वतात्सलिलं यथा ॥ १ ॥ " तथा साम्प्रतमल्पानि संहननानि, अल्पधृतयश्च संयमे जन्तव इत्येवमादि कुशीलोक्तं श्रुत्वा अल्पसत्त्वास्तत्रानुषज्जन्त्येवं विद्वान् विवेकी प्रतिबुद्धजीव जानीयात्, बुद्ध्वा चाऽऽयरूपं कुशीलसंसर्गं परिहरेदिति ॥ २८ ॥

नच्चत्थ अंतराएणं, परगेहे ण णिसीयए ।
गामकुमारियं किड्डं, नातिवेलं हसे मुणी ॥२९॥

(नच्चत्थेत्यादि)तत्र साधुर्भिक्षाऽऽदिनिमित्तं ग्रामाऽऽदौ प्रविष्टः सन् परो गृहस्थस्तस्य गृहं परगृहं तत्र न निषीदेदुपविशेत्, उत्सर्गतोऽस्यापवादं दर्शयति-नान्यत्रान्तरायेणेति । अन्तरायः शक्त्यभावः,स च जरसा रोगाऽऽतङ्काभ्यां स्यात्तस्मिन्नान्तराये सत्युपविशेत् । यदि वा-उपशमलब्धिमान् कश्चित्सुसहायो गुर्वनुज्ञातः कस्यचित्तथाविधस्य धर्मदेशनानिमित्तमुपविशेदपि । तथा-ग्रामे कुमारका ग्रामकुमारकास्तेषामियं ग्रामकुमारिकाऽसौ क्रीडा हास्यकन्दर्पहस्तसंस्पर्शनाऽऽलिङ्गनाऽऽदिका । यदि वा-वट्टकन्दुकाऽऽदिका, तां मुनिर्न कुर्यात्, तथा वेला मर्यादा तामतिक्रान्तमतिवेलं न हसेन्मर्यादामतिक्रम्य मुनिः साधुर्ज्ञानाऽऽवरणीयाऽऽद्यष्टविधकर्मबन्धभयान्न हसेत् । तथा चाऽऽगमः-"जीवे णं भंते ! हसमाणे उस्सूयमाणे वा कइ कम्मपगडीओ बंधइ ?। गोयमा ! सत्तविहबंधए वा अट्ठविहबंधए वा । " इत्यादि ॥ २९ ॥

किं च-

अणुस्सुओ उरालेसु, जयमाणो परिव्वए ।
चरियाए अप्पमत्तो, पुट्ठो तत्थऽहियासए ॥३०॥

(अणुस्सुओ इत्यादि) उराला उदाराः शोभना मनोज्ञा ये चक्रवर्त्यादीनां शब्दाऽऽदिषु विषयेषु कामभोगा वस्त्राऽऽभरणगीतगन्धर्वयानवाहनाऽऽद्याः,तथा-आज्ञैश्वर्याऽऽद्यश्चेत्येवंप्रकारेषु दृष्टेषु श्रुतेषु वा नोत्सुकः स्यात् । पाठान्तरं वा-न निश्चितोऽनिश्चितोऽप्रतिबद्धः स्यात् । यतमानश्च संयमानुष्ठाने, परि समन्तान्मूलोत्तरगुणेषु उद्यमं कुर्वन व्रजेत्संयमं गच्छेत् । तथा-चर्यायां भिक्षाऽऽदिकायामप्रमत्तः स्यात्,नाऽऽहाराऽऽदिषु रसगार्ध्यं विदध्या-

दिति । तथा-स्पृष्टश्चामिमुतश्च परीषहोपसर्गैस्तत्रादीनमनस्कः कर्मनिर्जरां मन्यमानो विषहेत सम्यक् सह्यादिति ॥३०॥

परीषहोपसर्गाधिसहनमेवाधिकृत्याऽऽह-

हम्ममाणो ण कुप्पेज्जा, वुच्चमाणो न संजले ।
सुमणे अहियासिज्जा, ण य कोलाहलं करे ॥ ३१ ॥

(हम्ममाणो इत्यादि) हन्यमानो यष्टिमुष्टिलकुटाऽऽदिभिरपि न कुप्येन्न कोपवशगो भवेत् । तथा-दुर्वचनान्युच्यमान आकुश्यमानो निर्भर्त्स्यमानो न संज्वलेन्न प्रतीपं वदेन्न मनागपि मनोऽन्यथात्वं विदध्यात्, किं तु सुमनाः सर्वं कोलाहलमकुर्वन्नधिसहेतेति ॥ ३१ ॥

किं चान्यत्-

लद्धे कामे ण पत्थेज्जा, विवेगे एवमाहिए ।
आयरियाइं सिक्खेज्जा, बुद्धाणं अंतिए सया ॥ ३२ ॥

(लद्धे कामे इत्यादि)लब्धान् प्राप्तानप्राप्तानपि कामानिच्छामदनरूपान् गन्धालङ्कारवस्त्राऽऽदिरूपान् वा वैरस्वामिवन्न प्रार्थयेदानुमन्येत,न गृह्णीयादित्यर्थः । यदि वा-यत्र कामावसायितया मदनाऽऽद्यभिलाषरूपान् कामांस्तपोविशेषलब्धानपि नोपजीव्याकार्यनागतान् ब्रह्मदत्तवत्प्रार्थयेत्, एवं च कुर्वतो भावविवेक आख्यात आविर्भावितो भवति । तथा-आर्याण्यार्याणां कर्तव्यानि अनार्यकर्तव्यपरिहारेण । यदि वा-आचार्याणि मुमुक्षूणां यान्याचरणीयानि ज्ञानदर्शनचारित्राणि तानि बुद्धानामाचार्याणामन्तिके समीपे सदा सर्वकालं शिक्षेताभ्यसेदिति । अनेन हि शीलवता नित्यं गुरुकुलवास आसेवनीय इत्यावेदितं भवतीति ॥ ३२ ॥

यदुक्तं बुद्धानामन्तिके शिक्षेतत्स्वरूपनिरूपणायाह-

सुस्सूसमाणो उवासेज्जा, सुप्पञ्जं सुतवस्सियं ।
वी (धी) रा जे अत्तपन्नेसी, धितिमंता जिइंदिया ॥३३॥

(सुस्सूसमाण इत्यादि) गुरोरादेशं प्रति श्रोतुमिच्छा शुश्रूषा, गुर्वादेर्वैयावृत्यमित्यर्थः । तां कुर्वाणो गुरुमुपासीत सेवेत । तस्यैव प्रधानगुणद्वयद्वारेण विशेषणमाह-सुष्ठु शोभना वा प्रज्ञाऽस्येति सुप्रज्ञः स्वसमयपरसमयवेदी गीतार्थ इत्यर्थः । तथा-सुष्ठु शोभनं वा सबाह्याभ्यन्तरं तपोऽस्यास्तीति सुतपस्वी, तमेवंभूतं ज्ञानिनं सम्यक् चारित्रवन्तं गुरुं परलोकार्थी सेवेत । तथा चोक्तम्-"नाणस्स होइ भागी, थिरयरओ दंसणे चरित्ते य । धन्ना आवकहाए,गुरुकुलवासं न मुंचंति ॥ १ ॥" (ग०) य एवं कुर्वन्ति तान् दर्शयति । यदि वा के ज्ञानिनस्तपस्विन इत्याह-वीराः कर्मविदारणसहिष्णवो,धीरा वा परीषहोपसर्गक्षोभ्याः,धिया बुद्ध्या राजन्तीति वा धीरा ये केचनाऽऽसन्नसिद्धिगमनाः आप्तो रागाऽऽदिविप्रमुक्तस्तस्य प्रज्ञा केवलज्ञानाऽऽख्या,तामन्वेषु शीलं येषां ते आप्तप्रज्ञान्वेषिणः, सर्वज्ञोक्तान्वेषिण इति यावत् । यदि वा-आत्मप्रज्ञान्वेषिण आत्मनः प्रज्ञा ज्ञानमात्मप्रज्ञा तदन्वेषिण आत्मज्ञत्वान्वेषिण आत्महितान्वेषिण इत्यर्थः । तथा-धृतिः संयमे रतिः, सा विद्यते येषां ते धृतिमन्तः । संयमधृत्या हि पञ्चमहाव्रतभारोद्वहनं सुसाध्यं भवतीति । तपःसाध्या च सुगतिर्हस्तप्राप्येति । तदुक्तम्- "धीरा धिई तस्स तवो, जस्स तवो तस्स सग-

ई सुलहा । जे अधिइमंतपुरिसा, तवो वि खलु दुल्लहो तेसिं ॥ १ ॥ " तथा-जितानि वशीकृतानि स्वविषयरागद्वेषविजयेनेन्द्रियाणि स्पर्शनाऽऽदीनि यैस्ते जितेन्द्रियाः सुसूषमाणा यथोक्तविशेषणविशिष्टा भवन्तीति ॥ ३३ ॥

तदभिधित्सुराह-

गिहे दीवमपासंता, पुरिसाऽऽदाणिया नरा ।
ते वीरा बंधणुम्मुक्का, नावकंखंति जीवियं ॥ ३४ ॥

(गिहे दीवमित्यादि) गृहे गृहवासे गृहपाशे वा, गृहस्थभाव इति यावत् । (दीवं ति) दीपो द्वीपी, दीपयति प्रकाशयतीति दीपः,स च द्रव्यदीपः भुतज्ञानलाभः। यदि वा-द्वीपः समुद्राऽऽदौ प्राणिनामाश्वासभूतः, स च द्रव्यदीपः संसारसमुद्रे सर्वज्ञोक्तचारित्रलाभः, तदेवंभूतं दीपं द्वीपं वा गृहस्थभावेऽपश्यन्तोऽप्राप्नुवन्तः सन्तः सम्यक् प्रव्रज्योत्थानेनोत्थिता उत्तरोत्तरगुणस्थानैरेवंभूता भवन्तीति दर्शयति-नराः पुरुषाः पुरुषोत्तमत्वाकर्मस्य नरोपादानम्, अन्यथा स्त्रीणामप्येतद्गुणप्राकट्यं प्रथति, अथवा देवाऽऽदिव्युदासार्थमिति । मुमुक्षूणां पुरुषाणामादानीया आश्रयणीयाः पुरुषाऽऽदानीयाः महतोऽपि महीयांसो भवन्ति । यदि वा-आदानीयो हितैषिणां मोक्षस्तन्मार्गो वा सम्यग्दर्शनाऽऽदिकः पुरुषाणां मनुष्याणामादानीयः, स विद्यते येषामिति विगृह्य मत्वर्थीयः 'अर्श आदिभ्योऽच्' ॥५।२।१२७॥ इति । तथा य एवंभूतास्ते विशेषेणेदमन्यद्रूपकारं कर्मेति वीराः तथा बन्धनेन सबाह्याभ्यन्तरेण [पुत्रकलत्राऽऽदि]स्नेहरूपेणोत्प्राबल्येन मुक्ता बन्धनोन्मुक्ताः सन्तो जीवितमसंयमजीवितं, प्राणधारणं वा नाभिकाङ्क्षन्ति नाभिलषन्तीति ॥ ३४ ॥

किं चान्यत्-

अगिद्धे सद्दफासेसु, आरंभेसु अणिस्सिए ।
सव्वं तं समयातीतं, जमेतं लविय बहु ॥ ३५ ॥

(अगिद्धे इत्यादि) अगृद्धोऽनध्युपपन्नो मूर्छितः । क्व?,शब्दरूपेषु मनोज्ञेषु,आद्यन्तग्रहणान्मध्यग्रहणमतो मनोज्ञेषु रूपेषु गन्धेषु रसेषु वा अगृद्ध इति द्रष्टव्यम् । तथेतरेषु वाऽद्विष्ट इत्यपि वाच्यः । तथा-आरम्भेषु सावद्यानुष्ठानरूपेष्वनिःश्रितोऽसंबद्धोऽप्रवृत्त इत्यर्थः। उपसंहर्तुकाम आह-सर्वमेतदध्ययनाऽऽदेरारभ्य प्रतिषेध्यत्वेन यल्लपितमुक्तं मया बहु,तत्समयातीतमतिक्रान्तमितिकृत्वा प्रतिषिद्धम् । यदपि च विधिद्वारेणोक्तं तदेतत्सर्वं कुत्सितसमयातीतं लोकोत्तरं प्रधानं वर्तते ॥ ३५ ॥

यदपि च तैः कुतीर्थिकैर्बहु लपितं तदेतत्सर्वं समयातीतमिति कृत्वा नानुष्ठेयमिति प्रतिषिध्य प्रधाननिषेधद्वारेण मोक्षाभिसंधानेनाऽऽह-

अइमाणं च मायं च, तं परिन्नाय पंडिए ।
गारवाणि य सव्वाणि, णिव्वाणं संधए मुणी ॥३६॥

(अइमाणं चेत्यादि) अतिमानो महामानस्तं, चशब्दात्सहचरितं क्रोधं च, तथा-मायां, चशब्दात्तत्कार्यभूतं लोभं च, तदेतत्सर्वं पण्डितो विवेकी ज्ञपरिज्ञया परिज्ञाय प्रत्याख्यानपरिज्ञया परिहरेत् । तथा-सर्वाणि गारवाणि ऋद्धिरसातरूपाणि सम्यक् ज्ञात्वा संसारकारणत्वेन परिहरेत्परिहृत्य च मुनिः साधुर्निर्वाणमशेषकर्मक्षयरूपं, विशिष्टाऽऽकाशदेशं वा संधयेदभिसंदध्यात्, प्रार्थयेदिति यावत् ॥ ३६ ॥ सू० १ श्रु०

४ अ०। (कदा पुनरुत्पन्ननिरावरणज्ञानानां तीर्थकृतां वाग्योगो प्रवर्तते येनासावाक्यर्थते ?, उच्यते-धर्मकथावसरे। किंभूतस्तैः पुनर्धर्मः प्रवेदितस्तद् वक्ष्यते ' लोगसार ' शब्दे)

तथा च-

केवलिपण्णत्तो धम्मो मंगलं, केवलिपण्णत्तो धम्मो लोगुत्तमो ।

केवलिप्रज्ञप्तः, कोऽसौ ?,धर्मः श्रुतधर्मः, चारित्रधर्मश्च मङ्गलम, अनेन कपिलाऽऽदिप्रज्ञप्तधर्मव्यवच्छेदमाह । आव० ४ अ०।

अपि च-

कुजए अपराजिए जहा, अक्खेहिं कुसले हि दीवयं ।
कडमेव गहाय णो कलिं, नो तेयं नो चेव दावरं।२३।

कुत्सितो जयोऽस्येति कुजयो द्यूतकारः, महतोऽपि द्यूतजयस्य सद्भिर्निन्दितत्वादनर्थहेतुत्वाच्च कुत्सितत्वमिति । तमेव विशिनष्टि-अपराजितो दीव्यन् कुशलत्वादन्येन न जीयते । अक्षैर्वा पाशकैर्दीव्यन् क्रीडंस्तत्पातज्ञः कुशलो निपुणः यथा असौ द्यूतकारोऽक्षैः पाशकैः कपर्दकैर्वा रममाणः (कडमेव त्ति) चतुष्कमेव गृहीत्वा तल्लब्धजयत्वात् तेनैव दीव्यति । ततोऽसौ तल्लब्धजयः सन्न कलिमेकं, नाऽपि त्रेतं त्रिकं च, नापि द्वापरं द्विकं गृह्णातीति ॥ २३ ॥

दार्ष्टान्तिकमाह-

एवं लोगम्मि ताइणा,
बुइए जे धम्मे अणुत्तरे ।
तं गिण्हह जंऽतिउत्तमं,
कडमिव सेसऽवहाय पंडिए ॥ २४ ॥

यथा द्यूतकारः प्राप्तजयत्वात् सर्वोत्तमं दीव्यं चतुष्कमेव गृह्णात्येवमस्मिल्लोके मनुष्यलोके तायिना त्रायिणा वा सर्वज्ञेनोक्तोऽयं धर्मः क्षान्त्यादिलक्षणः श्रुतचारित्राऽऽख्यो वा नाऽस्योत्तरोऽधिकोऽस्तीत्यनुत्तरः, तमेकान्तहितमपि कृत्वाऽप्युत्तमं सर्वोत्तमं च गृहाण विस्रोतसिकारहितः स्वीकुरु । पुनरपि निगमनार्थं तमेव दृष्टान्तं दर्शयति-यथा कश्चिद् द्यूतकारः कृतं कृतयुगं, चतुष्कमित्यर्थः, शेषमेकाऽऽद्यपहाय त्यक्त्वा दीव्यन् गृह्णाति, एवं पण्डितोऽपि साधुरपि, शेषं गृहस्थकुप्रावचनिकपाश्वस्थाऽऽदिभावमपहाय संपूर्णं महान्तं सर्वोत्तमं धर्मं गृह्णीयादिति भावः ॥ २४ ॥

उत्तर मणुयाण आहिया,
गामधम्मा इइ मे अणुस्सुयं ।
जंसी विरता समुट्ठिया,
कासवस्स अणुधम्मचारिणो ॥ २५ ॥

(उत्तरेत्यादि) उत्तराः प्रधानाः, दुर्जयत्वात् । केषाम ?,उपदेशार्हत्वान्मनुष्याणाम् । अन्यथा सर्वेषामेवेति । के ते?,ग्रामधर्माः शब्दाऽऽदिविषया मैथुनरूपा वेति । एवं ग्रामधर्मा उत्तरत्वेन सर्वज्ञैराख्याताः, मयैतदनुपश्रुतम् । एतच्च सर्वमेव प्रागुक्तं,यच्च वक्ष्यमाणं तच्चाभेदेनाऽऽदितीर्थकृता पुत्रानुद्दिश्याऽभिहितं सत् पाश्चात्यगणधराः सुधर्मस्वामिप्रभृतयः स्वशिष्येभ्यः प्रतिपादयन्त्यतो मयैतदनुश्रुतमित्यनवद्यम् । यस्मिन्निति कर्मणि व्यत्ययो पे पञ्चमी, सप्तमी वेति । यान् ग्रामधर्मानाश्रित्य ये विरताः, पञ्चम्यर्थे वा सप्तमी । येभ्यो वा विरताः सम्यक् संयमरूपेणोत्थिताः समुत्थितास्ते काश्यपस्यर्षभस्वामिनो वर्द्धमानस्वामिनो वा संबन्धी यो धर्मस्तदनुचारिणस्तीर्थकरप्रणीतधर्मानुष्ठायिनो भवन्तीत्यर्थः ॥ २५ ॥

किं च-

जे एयं चरंति आहियं,
नाएणं महया महेसिणा ।
ते उट्ठिय ते समुट्ठिया,
अन्नोन्नं सारंति धम्मओ ॥ २६ ॥

(जे एयं इत्यादि) । ये मनुष्या एनं प्रागुक्तं धर्मं ग्रामधर्मविरतिलक्षणं, कुर्वन्ति चरन्ति । आख्यातं ज्ञातेन ज्ञातपुत्रेण, (महयेति) महाविषयस्य ज्ञानस्याऽनन्यभूतत्वाद् महान् तेन तथाऽनुकूलप्रतिकूलोपसर्गसहिष्णुत्वान्महर्षिणा श्रीमद्वर्द्धमानस्वामिना आख्यातं धर्मं ये चरन्ति, ते एव संयमोत्थाने कुतीर्थिकपरिहारेणोत्थिताः । तथा-निह्नवाऽऽदिपरिहारेण त एव सम्यक्त्वमार्गदेशनाऽपरित्यागेनोत्थिताः समुत्थिता इति, नाऽन्ये कुप्रावचनिका जमालिप्रभृतयश्चेति भावः । त एव च यथोक्तधर्मानुष्ठायिनोऽन्योऽन्यं परस्परं धर्मतो धर्ममाश्रित्य धर्मतो वा भ्रश्यन्तं सारयन्ति चोदयन्ति, पुनरपि सद्धर्मे प्रवर्तयन्तीति ॥ २६ ॥

मा पेह पुरा पणामए, अभिकंखे उवहिं धुणित्तए ।
जे दूमण तेहिं णो णया,ते जाणंति समाहिमाहियं ॥२७॥

(मा पेहेत्यादि) दुर्गतिं संसारं वा प्रणामयन्ति प्रह्वीकुर्वन्ति प्राणिनां प्रणामकाः शब्दाऽऽदयो विषयास्तान् पुरा पूर्वं भुक्तान् मा प्रेक्षस्व मा स्मर । तेषां स्मरणमपि यस्मान्महतेऽनर्थाय, अनागतांश्च नोदीक्षेत नाऽऽकाङ्क्षेदिति । तथाभिकाङ्क्षेत् अभिलषेदनारतं चिन्तयेदनुरूपमनुष्ठानं कुर्यात् । किमर्थमिति दर्शयति-उपधीयते दौःस्थ्यं दुर्गतिं प्रत्यात्मा येनाऽसावुपधिर्मायाः अष्टप्रकारं वा कर्म; तद्धूनयाद्यपनयनायाऽभिकाङ्क्षेदिति सम्बन्धः । दुष्टधर्मे प्रत्युपनताः कुमार्गानुष्ठायिनस्तीर्थिकाः । यदि वा-(दूमण त्ति) दुष्टमनःकारिण उपतापकारिणो वा शब्दाऽऽदयो विषयास्तेषु ये महासत्त्वाः न नताः प्रह्वीभूतास्तदाचारानुष्ठायिनो न भवन्ति, ते च सन्मार्गानुष्ठायिनो जानन्ति विदन्ति समाधिं रागद्वेषपरित्यागरूपं धर्मध्यानं च आहितमात्मनि व्यवस्थितम् । आ समन्ताद्धितं वा त एव जानन्ति, नाऽन्य इति भावः ॥ २७ ॥

तथा-

णो काहिए होज्ज संजए,
पासणिए ण य संपसारए ।
नच्चा धम्मं अणुत्तरं,
कयकिरिए ण यावि मामए ॥ २८ ॥

(णो काहिए इत्यादि) संयतः प्रव्राजितः कथया चरति काथिको गोचराऽऽदौ न भवेत् । यदि वा-विरूपां पैशुन्याऽऽपादनीं स्यादिकथां वा न कुर्यात् । तथा-प्रश्नेन राजाऽऽदिकिंवृत्तरूपेण,दर्पणाऽऽदिप्रश्ननिमित्तरूपेण वा चरतीति प्राश्निको न भवेत् । नापि च संप्रसारको देववृष्ट्यनर्थकाण्डाऽऽदिसूच-

ककथाविस्तारको भवेदिति । किं कृत्वेति दर्शयति-ज्ञात्वाऽवबुध्य नास्योत्तरो विद्यत इत्यनुत्तरस्तं श्रुतचारित्राऽऽख्यं धर्मं सम्यगवगम्य, तस्य हि धर्मस्यैतदेव फलं यदुत विकथानिमित्तपरिहारेण सम्यक् क्रियावान् स्यादिति तदर्शयति-कृता स्वभ्यस्ता क्रिया संयमानुष्ठानरूपा येन स कृतक्रियस्तथाभूतश्च, न चाऽपि मामको ममेदमहमस्य स्वामीत्येवं परिग्रहाऽऽग्रही भवेदिति ॥ २८ ॥

छन्नं च पसंस णो करे, न य उक्कोस पगास माहणे ।
तेसिं सुविवेगमाहिए, पणया जेहिँ सुजोसिअं धुयं ॥२९॥

(छन्नमित्यादि) 'छन्नं ति' माया, तस्याः स्वाभिप्रायप्रच्छादनरूपत्वात्, तां न कुर्यात् । चशब्द उत्तरापेक्षया समुच्चयार्थः । तथा-प्रशस्यते सर्वैरप्यविगानेनाऽऽद्रियत इति प्रशस्यो लोभः, तं च न कुर्यात् । तथा-ज्ञात्यादिभिर्मदस्थानैर्बहुप्रकृतिपुरुषमुत्कर्षयतीत्युत्कर्षको मानः, तमपि न कुर्यादिति सम्बन्धः । तथा-अन्तर्व्यवस्थितोऽपि मुखदृष्टिभङ्गविकारैः प्रकाशीभवतीति प्रकाशः क्रोधः, तं च (माहणे त्ति) साधुर्न कुर्यात् । तेषां कषायाणां यैर्महात्मभिर्विवेकः परित्याग आहितो जनितस्त एव धर्मं प्रति प्रणता इति । यदि वा-तेषामेव सत्पुरुषाणां सुष्ठु विवेकः परिज्ञानरूप आहितः प्रथितः प्रस्किं गतः, त एव च धर्मं प्रति प्रणताः, यैर्महासत्त्वैः सुष्ठु जुष्टं सेवितं, धूयतेऽष्टप्रकारं कर्म येन तद्धूतं संयमानुष्ठानम् । यदि वा-यैः सदनुष्ठायिभिः (सुजोसिअं ति) सुष्ठु क्षिप्तं धूननार्हत्वाद् धूतं कर्मेति ॥ २९ ॥

अपि च-

अणिहे सहिए सुसंवुडे, धम्मट्ठी उवहाणवीरिए ।
विहरेज्ज समाहिइंदिए, अत्तहिअं खु दुहेण लब्भइ ॥३०॥

(अणिहे इत्यादि) स्निह्यत इति स्निहः । न स्निहः-अस्निहः, सर्वत्र ममत्वरहित इत्यर्थः । यदि वा-परीषहोपसर्गैर्निर्हन्यते इति निहः, न निहोऽनिहः उपसर्गैरपराजित इत्यर्थः । पाठान्तरं वा-" अणहे त्ति । " नास्याघमस्तीत्यनघो, निरवद्यानुष्ठायीत्यर्थः । सह हितेन वर्तत इति सहितः, सहितो युक्तो वा ज्ञानाऽऽदिभिः, स्वहित आत्महितो वा सदनुष्ठानप्रवृत्तेः। तमेव दर्शयति-सुष्ठु संवृत इन्द्रियनोइन्द्रियैर्विस्रोतसिकारहित इत्यर्थः । तथा-धर्मः श्रुतचारित्राऽऽख्यस्तेनार्थः प्रयोजनं, स एवार्थः, तस्यैव सद्भिरर्थ्यमाणत्वाद् धर्मार्थः, स यस्याऽस्तीति स धर्मार्थी । तथोपधानं तपः, तत्र वीर्यवान्, स एवम्भूतो विहरेत् संयमानुष्ठानं कुर्यात् । समाहितेन्द्रियः संयतेन्द्रिय एव । यत आत्महितं दुःखेनाऽसुमता संसारे पर्यटता अकृतधर्मानुष्ठानेन लभ्यते अवाप्यत इति । तथाहि-"न पुनरिदमतिदुर्लभ-मगाधसंसारजलधिविभ्रष्टम् । मानुष्यं खद्योतक-तडिल्लतावद्विलसितप्रतिमम् ॥ १ ॥" तथाहि-युगसमिलाऽऽदिदृष्टान्तनीत्या मनुष्यत्वं एव तावद् दुर्लभः, तत्राऽप्यार्यक्षेत्राऽऽदिकं दुरापमित्यत आत्महितं दुःखेनाऽवाप्यत इति मन्तव्यम् ।

अपि च-

भूतेषु जङ्गमत्वं, तस्मिन् पञ्चेन्द्रियत्वमुत्कृष्टम् ।
तस्मादपि मानुष्यं, मानुष्येऽप्यार्यदेशश्च ॥ १ ॥
देशे कुलं प्रधानं, कुले प्रधाने च जातिरुत्कृष्टा ।
जातौ रूपसमृद्धी, रूपे च बलं विशिष्टतमम् ॥ २ ॥
भवति बले चाऽऽयुष्कं, प्रकृष्टमायुष्कतोऽपि विज्ञानम् ।
विज्ञाने सम्यक्त्वं, सम्यक्त्वे शीलसंप्राप्तिः ॥ ३ ॥
एतत्पूर्वश्चाऽयं, समासतो मोक्षसाधनोपायः ।
तत्र च बहु संप्राप्तं, भवद्भिरलं न संप्राप्यम् ॥ ४ ॥
तत्कुरुतोद्यममधुना, मद्युक्तमार्गे समाधिमाधाय ।
त्यक्त्वा सङ्गमनार्यं, कार्यं सद्भिः सदा श्रेयः ॥ ५ ॥ " इति । ॥ ३० ॥

एतच्च प्राणिभिर्न कदाचिदयत्नपूर्वमित्येतद्दर्शयितुमाह—

ण हि णूण पुरा अणुस्सुतं,
अदुवा तं तह णो समुट्ठियं ।
मुणिणा सामाइआऽऽहितं,
नाएणं जगसव्वदंसिणा ॥ ३१ ॥

यदेतन्मुनिना जगतः सर्वभावदर्शिना ज्ञातपुत्रीयेण सामायिकाऽऽद्याहितमाख्यातं तन्नूनं निश्चितं न हि नैव पुरा पूर्वं जन्तुभिरनुश्रुतं श्रवणपथमायातम् । अथवा-श्रुतमपि तत् सामायिकाऽऽदि यथाऽवस्थितं तथा नाऽनुष्ठितम् । पाठान्तरं वा-"अवितह त्ति" अवितथं यथावदनुष्ठितमतः कारणादसुमतामात्महितं सुदुर्लभमिति ॥ ३१ ॥

पुनरप्युपदेशान्तरमधिकृत्याऽऽह-

एवं मत्ता महंतरं, धम्मभिणं सहिया बहू जणा ।
गुरुणो छंदाणुवत्तगा, विरया तिन्न महोघमाहितं ॥ ३२ ॥

(एवं मत्ता इत्यादि) एवमुत्कृत्या आत्महितं सुदुर्लभं मत्वा ज्ञात्वा धर्माणां च महदन्तरं धर्मविशेषं कर्मणो वा विवरं ज्ञात्वा । यदि वा-(महंतरं ति) मनुष्याऽऽर्यक्षेत्राऽऽदिकमवसरं सदनुष्ठानस्य ज्ञात्वा एनं जैनं धर्मं श्रुतचारित्राऽऽत्मकं, सह हितेन वर्तत इति सहिता ज्ञानाऽऽदियुक्ता बहवो जना लघुकर्माणः समाश्रिताः सन्तो गुरोराचार्यस्याऽऽदेशतीर्थकरस्य वा छन्दानुवर्तकास्तदुक्तमार्गानुष्ठायिनो, विरताः पापेभ्यः कर्मभ्यः सन्तस्तीर्णा महौघमपारं संसारसागरमेषमाख्यातं मया भवतामपरैश्च तीर्थकृद्भिरन्येषाम् ॥ ३२ ॥ सूत्र० १ श्रु० २ अ० २ उ० ।

किं च-

संधए साहुधम्मं च, पावधम्मं णिराकरे ।
उवहाणवीरिए भिक्खू, कोहं माणं न पत्थए ॥ ३५ ॥

(संधए इत्यादि) साधूनां धर्मः क्षान्त्यादिको दशविधः, सम्यग्दर्शनचारित्राऽऽख्यो वा, तमनुसंधयेद् वृद्धिमापादयेत् । तद्यथा-प्रतिक्षणमपूर्वज्ञानग्रहणेन ज्ञानम् । तथा शङ्काऽऽदिदोषपरिहारेण, सम्यग्जीवाऽऽदिपदार्थाधिगमेन च सम्यग्दर्शनमस्खलितमूलोत्तरगुणसंपूर्णपालनेन प्रत्यहमपूर्वज्ञानग्रहणेन चारित्रं वृद्धिमापादयेदिति । पाठान्तरं वा-" सद्दहे साधुधम्मं च " पूर्वोक्तविशेषणविशिष्टं साधुधर्मं मोक्षमार्गत्वेन श्रद्दधीत निःशङ्कतया गृह्णीयात्, चशब्दात्सम्यगनुपालयेच्च । तथा-पापं पापोपादानकारणं धर्मं प्राण्युपमर्दनेन प्रवृत्तं, निराकुर्यात् । तथा-उपधानं तपः, तत्र यथाशक्त्या वीर्यं यस्य स भवत्युपधानवीर्यः, तदेवंभूतो भिक्षुः क्रोधं, मानं च न प्रार्थयेन्न वर्धयेद्वेति ॥ ३५ ॥ सूत्र० १ श्रु० ११ अ० ।

सोच्चा य धम्मं अरहंतभासियं,
समाहितं अट्ठपदोवसुद्धं ।
तं सद्दहाणा य जणा अणाऊ,
इंदा व देवाहिव आगमिस्सं ॥ २६ ॥

(सोच्चा य इत्यादि) श्रुत्वा च दुर्गतिधारणाद् धर्मं श्रुतचारित्राऽऽख्यमर्हद्भिर्भाषितं सम्यगाख्यातमर्थपदानि युक्तयो हेतवो वा तैरुपशुद्धमवदातं सद्भूतिकं सकैतवं वा, यदि वा अर्थैरभिधेयैः पदैश्च वाचकैः शब्दैरुपसामीप्येन शुद्धं निर्दोषम् । तमेवंभूतमर्हद्भिर्भाषितं धर्मं श्रद्दधानाः । तथा-अनुतिष्ठन्तो जना लोका अनायुषोऽनपगतायुष्कर्मागः सन्तः सिद्धाः सायुषश्चेन्द्राऽऽद्याः देवाधिपा आगमिष्यन्तीति ॥ २६ ॥ सूत्र० १ श्रु० ७ अ० ।

(२६) धर्माधर्मविचारश्च सूक्ष्मबुद्ध्या कर्तव्यः, धर्मविचारे सूक्ष्मबुद्धेराश्रयणीयतामुपदिशन्नाह-

सूक्ष्मबुद्ध्या सदा ज्ञेयो, धर्मो धर्मार्थिभिर्नरैः ।
अन्यथा धर्मबुद्ध्यैव, तद्विघातः प्रसज्यते ॥ १ ॥

(सूक्ष्मेति) सूक्ष्मबुद्ध्या निपुणमत्या, सदा सर्वकालं, ज्ञेयो ज्ञातव्यः, कोऽसावित्याह-धर्मो दुर्गतिप्रपातरक्षणे हेतुः, कैरित्याह-धर्मार्थिभिर्धर्मश्रद्धालुभिर्नरैर्मानवैः, अन्यथा स्थूलबुद्ध्या धर्मविवेचने कुतीर्थिकानामिव धर्मबुद्ध्यैव धर्माभिप्रायेणापि, तद्विघातो धर्मव्याहतिः । प्रसज्यते प्राप्नोतीति ॥१॥

एतदेव दर्शयन्नाह-

गृहीत्वा ग्लानभैषज्य-प्रदानाभिग्रहं यथा ।
तदप्राप्तौ तदन्तेऽस्य, शोकं समुपगच्छतः ॥ २ ॥

गृहीत्वा आदाय, ग्लानायाशक्ताय, भैषज्यप्रदाने औषधवितरणविषये, योऽभिग्रहः प्रतिज्ञा, ग्लानाय मया भैषज्यं दातव्यमित्येवंरूपः स तथा तं, यथेत्युदाहरणोपन्यासार्थः, तस्य ग्लानत्वाभावेन ग्लानभैषज्यप्रदानस्याप्राप्तिरसंभवत्तदप्राप्तिस्तस्यां, तस्य ग्लानभैषज्यप्रदानाभिग्रहस्यान्तःकालावधिपूर्त्या पर्यवसानतस्तत्र, शोकमुद्वेगं, समुपगच्छतो व्रजतोऽभिग्रहीतुर्धर्मबुद्ध्याऽप्यधर्मो भवति । तथा सर्वत्रेति प्रकृतमिति ॥ २ ॥

शोकमेव दर्शयति-

गृहीतोऽभिग्रहः श्रेष्ठो, ग्लानो जातो न च क्वचित् ।
अहो मेऽधन्यता कष्टं, न सिद्धमभिवाञ्छितम् ॥ ३ ॥

गृहीत आत्तोऽभिग्रह उक्तरूपा प्रतिज्ञा, श्रेष्ठोऽतिप्रशस्यः, ग्लानो रोगवान् जातो भूतो वा, मे मम, धनं लब्धुं धनं वाहतीति धन्यस्तद्भावस्तत्ता, तन्निषेधोऽधन्यता, कष्टमिति खेदवचनं, न सिद्धं न निष्पन्नमभिवाञ्छितमभिमतमिति ॥ ३ ॥

प्रकृतयोजनायाऽऽह-

एवं ह्येतत्समादानं, ग्लानभावाभिसन्धिमत् ।
साधूनां तत्त्वतो यत्तद्, दुष्टं ज्ञेयं महात्मभिः ॥ ४ ॥

एवमनेन प्रकारेणाभिग्रहविषयाप्राप्तौ शोकगमनलक्षणेन, हिशब्दोऽधिकृताभिग्रहस्य धर्मव्याघातरूपताभावनार्थः । एतस्य ग्लानभैषज्यप्रदानाभिग्रहस्य समादानं ग्रहणमेतत् समादानं, यच्छब्दोऽत्र द्रष्टव्यो, यद्यस्मात् ग्लानभावे रोगवत्त्वेऽभिसन्धिरभिप्रायो यदि कश्चित् साधुर्ग्लानो भवति तदा शोभनं स्यादस्याभिग्रहस्य सफलत्वप्राप्तेरित्येवंलक्षणो विद्यते यत्र तत् ग्लानभावाभिसंधिमत् साधूनां मुनीनामेतत्समादानमिति योगः । अथवा-साधूनां ग्लानभावाभिसन्धिमादिति योगः । तत्त्वतः परमार्थवृत्त्या तदिति तस्मात्कारणाद् दुष्टं दोषवत्, ग्लानभावाभिसन्धिमत्त्वेन कर्मबन्धहेतुत्वात्, ज्ञेयं ज्ञातव्यं, महात्मभिः प्रशस्यस्वभावैरिति ॥४॥

एवमर्थापत्त्या दोषप्राप्तिरन्यैरप्युपलब्धेति दर्शयन्नाह-

लौकिकैरपि चैषोऽर्थो, दृष्टः सूक्ष्मार्थदर्शिभिः ।
प्रकारान्तरतः कैश्चि-दत एतदुदाहृतम् ॥ ५ ॥

लोके विदिता लौकिका वाल्मीकिप्रभृतयः, तैरपि च न केवलं जैनैरेव, एषोऽनन्तरोदितोऽर्थोऽर्थापत्तिजनितदोषलक्षणो, दृष्ट उपलब्धः । किंभूतैरित्याह-सूक्ष्मार्थदर्शिभिः पटुदृष्टिभिर्हेयवस्तुविवेचकैर्न वै ह्यतिस्थूलबुद्ध्योऽर्थापत्तिगम्यानेवंविधानर्थान् ज्ञातुमलं भवन्ति, ननु मिथ्यादृशां कथं सूक्ष्मार्थदर्शित्वम् ? उच्यते-सत्यज्ञानाऽऽवरणाऽऽदिक्षयोपशमविशेषात् अज्ञानं, तर्हि तेषां कथम् ?, तत्राऽप्युच्यते-सदसतोरविशेषात् आह च-"सयसयविसेसणाओ गाहा ।" प्रकारान्तरतः-अस्मदुक्तप्रकाराद् ग्लानभैषज्यदानाभिग्रहलक्षणादन्येन प्रकारेण कैश्चिद्वाल्मीक्यादिभिरेव, न सर्वैः, कथं तैर्दृष्टोऽयमित्यवसितमित्याह-यतो यस्मादेतद् वक्ष्यमाणमुदाहृतमभिहितमिति ॥ ५ ॥

अङ्गेष्वेव जरा यातु, यत्त्वयोपकृतं मम ।
नरः प्रत्युपकाराय, विपत्सु लभते फलम् ॥ ६ ॥

किल सुग्रीवेण तारोऽऽवासौ रामदेव एवमुक्तः-अङ्गेष्वेव मदीयगात्रेष्वेव जरा जरणपरिणामं यातु गच्छतु, मा प्रत्युपकारद्वारेण प्रतियातनीयं भवत्वित्यवधारणार्थं, किं तत् ?, यद्वालेः सकाशात् तारां विमोच्य मम तदर्पणेन त्वया भवता उपकृतमुपकारः कृतः, ममेत्यात्मानं सुग्रीवो निर्दिशति । तस्मात् किमित्येवमित्याह-नर उपकारकारिमानवः उपकारं प्रतीत्याऽऽश्रित्योपकारः प्रत्युपकारः तस्मै प्रत्युपकाराय उपकृतनरेण क्रियमाणाय संपद्यते यत्फलं विपत्सु व्यसनेषु सत्सु लभते प्राप्नोति तत्फलमुपकारकारिक्रियायाः साध्यम् । अयमभिप्रायः-उपकारको व्यसनगत एव उपकारक्रियायाः फलमुपकृतेन कृतं लभते, न पुनरन्यदा व्यसनाभावे, निरवसरत्वेन तदसंभवादिति । किमुक्तं भवति ?-मा त्वमापदं प्राप, यस्यामहं भवन्तमुपकरोमीति । अन्ये त्वाहुः-नर उपकृतमानवः, प्रत्युपकारार्थं विपत्सूपकारकारिक्रियायाः फलं, फलहेतुत्वादवसरमिति ॥ ६ ॥

एवं तावद्धर्मार्थप्रवृत्तावपि धर्मव्याघातो भवत्यनिपुणबुद्धीनां ग्लानभैषज्याभिग्रहप्रवृत्ताविवेति समर्थितम्, अधुनैवमेव सर्वास्वपि प्रवृत्तिष्विति दर्शयन्नाह-

एवं विरुद्धदानाऽऽदौ, हीनोत्तमगतेः सदा ।
प्रव्रज्याऽऽदिविधाने च, शास्त्रोक्तन्यायबाधिते ॥ ७ ॥
द्रव्याऽऽदिभेदतो ज्ञेयो, धर्मव्याघात एव हि ।
सम्यग् माध्यस्थ्यमाश्रित्य, श्रुतधर्मव्यपेक्षया ॥ ८ ॥

यथा ग्लानभैषज्यदानाभिग्रहे धर्मबुद्ध्या कृतेऽपि धर्मबुद्धिदोषाद् धर्मव्याघातः प्रसज्यतेवमनेनैव न्यायेन विरुद्धस्य शास्त्रविनिवारितस्य जीवोपघातहेतुत्वाद्येद्रव्यस्याऽऽधाकर्माऽऽदेर्दोषदूषितस्य संस्तितिज्ञाऽऽदेर्वा विरुद्धाय वा सदोषत्वेन शास्त्रनिरा

कृताय पात्राय,दानं वितरणं विरुद्धदानं,तदादेर्यस्य शीलतपोभावनाधर्मस्य गुरुविनयऽऽदेवतापूजनाऽऽदेर्वा सविरुद्धदानाऽऽदिस्तत्र ऊव्याऽऽदिभेदतो धर्मव्याघात एव,हेय इति योगः। कुत इत्याह-हीनस्य गुणविमुक्तस्य,देयद्रव्यपात्रस्य वा उत्तमं प्रधानमेतदिति गतिरवगमो बोधो हीनोत्तमगतिः,ततो हीनोत्तमगतेः सदा सर्वदा,शास्त्रनिराकृतत्वेन हि हीनमपि देयं पात्रं चोत्तममिति बोधविपर्ययादनवगच्छन् यदा दाने प्रवर्तते,तदा धर्मस्य व्याघातः स्फुट एवेति। दातव्यद्रव्यविरुद्धता च-"अन्नाईणं सुद्धा-सुकप्पणिज्जाण देसकालजुयं। दाणं जईणमुचियं, गिहीण सिक्खावयं जणियं ॥ १ ॥" इत्येतद्दानविशेषणाविपर्ययाद्वसेया। पात्रविरुद्धता पुनरेवम्-"सीलव्वयरहियाणं,दाणं जं दिज्जई कुपत्ताणं। तं खलु धोवइ वत्थं, रुहिरकयं लोहितेणेव ॥ १ ॥" तथा प्रव्रज्याऽऽदीनां सर्वविरतिप्रतिपत्तिप्रभृतीनां विधानं करणं प्रव्रज्याऽऽदिविधानम्, आदिशब्दादेशविरत्यादिसंग्रहः। तत्र च न केवलं विरुद्धदानाऽऽदावेव, किंभूते प्रव्रज्याऽऽदिविधाने?,इत्याह-शास्त्रोक्तन्यायबाधिते आगमाभिहितनयनिराकृते, हीनोत्तमगतेरिति हेतुरिहापि वर्तते, धर्मव्याघातो हेय इत्येतदपि संबन्धनीयं,तत्र प्रव्रज्याऽऽदिविधाने शास्त्रोक्तोऽयं न्यायः-

"नियनियसद्दावलोयण-जणवायावगमजोगसुद्धीहिं।
लक्खियसे नाणुं, निमित्तओ सइ पइट्ठेज्जा ॥ १ ॥"

तथा-

"पव्वज्जाए जोग्गा, आरियदेसम्मि जे समुप्पन्ना।
जाइकुलेहिं विसिट्ठा, तह खीणप्पायकम्ममला ॥ १ ॥"
इत्यादेः।

देशविरतौ पुनः-

"गुरुमूलेसु य धम्मो, संविग्गो इत्तरं व इयरं वा।
वज्जेसु तओ सरमं, वज्जेइ इमे अईयारे ॥ १ ॥"

जिनदीक्षायां तु-

"दिक्खाएँ चेव रागो, लोगविरुद्धाण चेव चागो त्ति।
सुंदरगुरुजोगो खिय, जस्स तओ एत्थ उचिओ त्ति ॥१॥"

एतद्बाधा चैतद्विपर्ययादिति द्रव्याऽऽदिभेदतो द्रव्यक्षेत्रकालभावविशेषानाश्रित्य विरुद्धदानाऽऽदौ प्रव्रज्याऽऽदिविधाने च हेयो ज्ञातव्यो धर्मव्याघातः। एवं च धर्मबाधैव,न तु धर्माऽऽराधनं, तत्र विरुद्धदाने द्रव्यतो धर्मव्याघातो,यथैषणीयत्वेनाविरुद्धद्रव्ये क्रूराऽऽदौ साधुसंस्तरणहेतौ सत्यपि अनेषणीयतया विरुद्धम्,अत एव हीनमुत्तममिति बुद्ध्या ददतः। एवं क्षेत्रतोऽकान्ताराऽऽदिक्षेत्रे, कालतः सुभिक्षकाले, भावतः स्वस्थावस्थायामिति। हिशब्दः स्फुटार्थः। कथं धर्मव्याघातो हेय इत्याह-सम्यगविपरीतं, माध्यस्थ्यमनाग्रहत्वमालम्ब्याऽऽश्रित्य, तदपि न स्वरुच्या, किं तु श्रुतधर्मव्यपेक्षया आगमापेक्षया, न तु तदनपेक्षयेति ॥ ७ ॥ हा० २१ अष्ट०। (अथ कस्य धर्मानुष्ठानत्वं, कस्य नेति 'धम्माणुट्ठाण' शब्दे वक्ष्यते)

(३०) संयतविरतप्रतिप्रत्याख्यातपापकर्माऽऽदीनां धर्मस्थितत्वाधर्मस्थितत्वाऽऽदि यथा-

से नूणं भंते ! संजयविरयपमिहयपच्चक्खायपावकम्मे धम्मे ठिए, असंजयअविरयपमिहयपच्चक्खायपावकम्मए अहम्मे ठिए, संजयासंजए धम्माधम्मे ठिए ?। हंता ! गोयमा ! संजयविरय०जाव धम्माधम्मे ठिए। एएसि णं भंते ! धम्मंसि वा अहम्मंसि वा धम्माधम्मंसि वा चक्किया केइ आसइत्तए वा०जाव तुयट्टित्तए वा ?। णो इणट्ठे समट्ठे। से केणट्ठेणं खाइअट्ठेणं भंते ! एवं वुच्चइ ०जाव धम्माधम्मे ठिए ?। गोयमा ! संजयविरय ०जाव पावकम्मे धम्मट्ठिए धम्मं चेव उवसंपज्जित्ताणं विहरइ, असंजयपावकम्मे अहम्मे ठिए अहम्मं चेव उवसंपज्जित्ता णं विहरइ, संजयासंजए धम्माधम्मे ठिए धम्माधम्मं उवसंपज्जित्ता णं विहरइ। से तेणट्ठेणं गोयमा !० जाव ठिए।

(से नूणं भंते ! इत्यादि) (धम्म त्ति) संयमे (चक्किया केइ आसइत्तए वेति) धर्माऽऽदौ शक्नुयात्कश्चिदासयितुम्?। नायमर्थः समर्थो, धर्माऽऽदेरमूर्तत्वात्। मूर्त एव चाऽऽसनाऽऽदिकरणस्य शक्यत्वादिति। भ० १७ श० २ उ०।

"तिविहे धम्मे पण्णत्ते। तं जहा-सुयधम्मे, चरित्तधम्मे, अत्थिकायधम्मे।" स्था० ३ ठा०३ उ०। (व्याख्या स्वस्वशब्दे द्रष्टव्या)

अथ धर्मस्थितत्वाऽऽदिकं दण्डकेन निरूपयन्नाह-

जीवा णं भंते ! किं धम्मे ठिया, अहम्मे ठिया, धम्माधम्मे ठिया ?। गोयमा ! जीवा धम्मे वि ठिया, अहम्मे वि ठिया, धम्माधम्मे वि ठिया। णेरइया णं भंते ! पुच्छा ?। गोयमा ! णेरइया णो धम्मे ठिया, अहम्मे ठिया, णो धम्माधम्मे ठिया। एवं० जाव चउरिंदियाणं पंचिंदियतिरिक्खजोणियाणं पुच्छा ?। गोयमा ! पंचिंदियतिरिक्खजोणिया णो धम्मे ठिया, अहम्मे ठिया, धम्माधम्मे वि ठिया। मणुस्सा जहा जीवा, वाणमंतरजोइसियवेमाणिया जहा णेरइया। भ० १७ श० २ उ०।

धर्मप्रतिपादके सूत्रकृताङ्गद्वितीयश्रुतस्कन्धस्य नवमेऽध्ययने च। स० २१ सम०। प्रश्न०। आव०। (तदधिकारार्थवक्तव्यता 'धम्मज्झयण' शब्दे वक्ष्यते) धर्मसारभूतत्वात् चरजीवनिकायाऽऽख्यदशवैकालिकस्य चतुर्थेऽध्ययने, दश० ४ अ०। (तदधिकारार्थवक्तव्यता "छज्जीवणिकाय" शब्दे तृ० भा० १३४५ पृष्ठे गता) धर्मभावं गतो धर्मः। आ० चू० ४ अ०। चरणश्रुतधर्मानुगते ध्यानभेदे, आव० ४ अ०। "धम्माणुरंजियं धम्मं।" आ० चू० ४ अ०। आव०। उत्त०। (एतद्वक्तव्यता 'धम्मज्झाण' शब्दे वक्ष्यते) आत्मनि, देहधारणाद् जीवे, वस्तुगुणरूपे, उपमायाम्, न्याये, उपनिषदि, यमे, सोमाध्यायिनि, सत्सङ्गे च। वाच०। दुर्गतौ प्रपतन्तं सत्त्वमुद्धृतं धारयतीति धर्मः।

पञ्चदशे जिने, आ० म० १ अ० । स० । आ० चू० । प्रव० । ती० । ध० । अनु० । (एतद्वक्तव्यता ' धम्मजिण ' शब्दे वक्ष्यते) आचार्य्यसिंहस्य शिष्ये शाण्डिल्यस्य गुरौ काश्यप गोत्रोत्पन्ने स्वनामख्याते आचार्ये, " थेरस्स णं अज्जसीहस्स कासवगुत्तस्स अज्जधम्मे थेरे अंतेवासी कासवगुत्ते । " कल्प० १ अधि० ८ क्षण । " धम्मं पि अ कासवं वंदे । " कल्प० २ अधि० ८ क्षण । आचार्य्यहस्तिनः शिष्ये आचार्य्यसिंहस्य गुरौ सुव्रतगोत्रे स्वनामख्याते आचार्ये, " थेरस्स णं अज्जहत्थिस्स कासवगुत्तस्स अज्जधम्मे थेरे अंतेवासी सुव्वयगोत्ते । " कल्प० २ अधि० ८ क्षण । " वंदामि अज्जधम्मं, सुव्वयं सीललद्धिसंपन्नं । " कल्प० १ अधि० ८ क्षण । विराटविषयस्थसिंहपुरनगरस्थे स्वनामख्याते ग्रामचौरे च । पुं० । दर्श० २ तत्त्व । धनुषि, " कोयमं गंडीवं, धम्मं धणुयं सरासणं चावं । " को० । ज्योतिषोक्ते लग्नाच्चतुर्थस्थाने च । न० । धाच० ।

विषयसूची-

(१) धर्मधर्मिणोरेकान्तभेदस्वीकारे विप्रतिपत्तिः ।
(२) आत्मघटाऽऽदेश्चैतन्यरूपाऽऽद्यो धर्मिणोऽत्यन्तं व्यतिरिक्ता अपि समवायेन संबद्धाः सन्तो धर्मधर्मिव्यपदेश इति परमतनिराकरणम् ।
(३) धर्मानुरूपो धर्मीति प्रतिपादम् ।
(४) धर्मशब्दार्थनिरूपणम् ।
(५) लोकोत्तरधर्मप्ररूपणम् ।
(६) तद्व्यासार्थनिर्देशः ।
(७) यतिधर्मनिरूपणम् ।
(८) द्रव्यभावभेदेन धर्मस्य द्वैविध्यम् ।
(९) नामस्थापनाद्रव्यभावधर्माणां नानात्वनिरूपणम् ।
(१०) धर्मस्य स्वलक्षणाभिधित्सा ।
(११) धर्मतत्त्वस्य लिङ्गानि ।
(१२) धर्मद्रुममूलप्रतिपादनम् ।
(१३) ये धर्मानधिकारिणस्तेषां विचारः ।
(१४) सद्धर्मग्रहणयोग्यताप्ररूपणम् ।
(१५) धर्माधिकारिणां प्ररूपणम् ।
(१६) ये प्रमाद्यन्ति तेषां दुःखप्रतिपादनम् ।
(१७) धर्माभिमुखीकरणम् ।
(१८) उपदेशदानम् ।
(१९) धर्मपदार्थनिर्वचनम् ।
(२०) धर्मपदार्थे गुरुशिष्ययोः प्रवृत्तिर्येनोपायेन भवति तन्निरूपणम् ।
(२१) भ्रमरदृष्टान्तेनादत्तग्रहणं प्रतिपाद्य तन्निराकरणम् ।
(२२) धर्मस्य मोक्षकारणत्वम् ।
(२३) दुर्लभमनुजदेहावाप्तावुत्तरगुणप्राप्तेरावश्यतावर्णनम् ।
(२४) धर्मभ्रष्टस्यैहिकाऽऽमुष्मिकदोषाभिधानम् ।
(२५) यदभिसन्ध्य धर्माऽऽख्यानं तन्निरूपणम् ।
(२६) सद्धर्मपरीक्षकाऽऽदिभावप्रतिपादनम् ।
(२७) धर्मकषाऽऽदिस्वरूपनिरूपणम् ।
(२८) साधूनामाचरणीयानाचरणीयधर्मप्ररूपणम् ।
(२९) धर्मविचारे सूक्ष्मबुद्धिराश्रयणीया ।
(३०) संयतविरतप्रतिहतप्रत्याख्यातपापकर्माऽऽदीनां धर्मस्थितत्वाधर्मस्थितत्वाऽऽदिप्रतिपादनम् ।

धर्म्य-त्रि० । धर्मादनपेतः, धर्मेण प्राप्यो वा यत् । धर्मयुक्ते, धर्मजन्ये च । वाच० । उत्त० । धर्मः क्षमाऽऽदिलक्षणः, तस्मादनपेतं धर्म्यम् । प्रव० ६ द्वार । जिनप्रणीतभावश्रद्धानाऽऽदिलक्षणे ध्यानभेदे, न० । आव० ४ अ० ।

धम्मउर-धर्मपुर-न० । स्वनामख्याते पुरभेदे, दर्श० १ तत्त्व ।

धम्मंग-धर्माङ्ग-न० । धर्मस्य कुशलाऽऽत्मपरिणामविशेषस्याङ्गमवयवः कारणं वा धर्माङ्गम् । धर्मस्यावयवे, धर्मस्य कारणे च । " धर्माङ्गख्यापनार्थं च, दानस्यापि महामतिः । (३) " हा० २७ अष्ट० ।

धम्मंतराइय-धर्मान्तरायिक-त्रि० । अन्तरायो विघ्नः, सोऽस्ति येषु तान्यन्तरायिकाणि, धर्मस्य चारित्रप्रतिपत्तिलक्षणस्यान्तरायिकाणि धर्मान्तरायिकाणि । वीर्यान्तरायचारित्रमोहनीयभेदे, " धम्मंतराइयाणं कम्माणं । " ज्ञ० ६ श० ३१ उ० ।

धम्मंतराय-धर्मान्तराय-पुं० । धर्मविघ्ने, ग० ।

अथ धर्मान्तरायमाश्रित्य प्रस्तुतमेव निरूपयति-

सीलतवदाणभावण-चउविहधम्मंतरायजयभीए ।
जत्थ बहू गीयत्था,गोयम ! गच्छं तयं जाणियं ॥१००॥

दानं शीलं तपो भावना, एतेषां द्वन्द्वः, ता एव चतस्रो विधाः प्रकारा यस्य दानशीलतपोभावनाचतुर्विधः। सूत्रे च बन्धानुलोम्याद् व्यत्ययनिर्देशः । एवंविधो धर्मः,तस्यान्तरायो विघ्नः, तस्माद्भयं तेन भीताः साशङ्का यत्र गच्छे बहवो गीतार्था भवन्ति, हे गौतम ! स गच्छो ज्ञातः । इति गाथाछन्दः ॥१००॥ ग० २ अधि० ।

धम्मंतेवासि (ण्)-धर्मान्तेवासिन्-पुं० । अन्ते समीपे वस्तुं शीलमस्येत्यन्तेवासी, धर्मार्थमन्तेवासी धर्मान्तेवासी । शिष्ये, स्था० १० ठा० । धर्मप्रतिबोधनतः शिष्यो धर्मार्थितयोपपन्नो वा शिष्यो धर्मान्तेवासी । शिष्यभेदे, स्था० ४ ठा० ३ उ० । " अहं णं तुब्भं धम्मंतेवासी । " शिक्षार्थग्रहणार्थमपि शिष्या भवन्तीत्यत उच्यते धर्मान्तेवासी । भ० १५ श० ।

धम्मकंखिय-धर्मकाङ्क्षित-त्रि० । धर्मे काङ्क्षा संजाताऽस्येति धर्मकाङ्क्षितः । धर्मेच्छावति, त्रि० ।

धम्मकत्ता-धर्मकर्तृ-त्रि० । धर्मानुष्ठानविधायके, दर्श० ।

गुरोः स्वरूपमाविष्कुर्वन्नाह-

धम्मन्नु धम्मकत्ता य, सया धम्मपरायणो ।
सत्ताणं धम्मसत्तत्थ-देसओ भयए गुरू ॥ ४२ ॥

धर्मज्ञो धर्मकर्ता च सदा धर्मानुष्ठानविधायकः, एवंविधो हि स्वपरोपकारकरणक्षमो विशेषेण भवति । यत उक्तम्-" गुणसुट्ठियस्स वयणं, घयमहुसित्तो व्व पायओ भाइ । गुणहीणस्स न सोहइ , नेहविहीणो जह पईवो ॥ १ ॥ " सदा सर्वकालं धर्मपरायणो धर्मानुष्ठायी, तच्चैकदा क्वापि ऊहारमपेक्ष्य प्रवर्तते यस्तस्योभयलोकविरोधकत्वात् । उक्तं च-" से दिया

वा राओ वा एगओ वा परिसागओ वा सुत्ते वा जागरमाणे वा।" तथा सर्वेभ्यो धर्मशास्त्रार्थोपदेशको गुरुरुच्यत इति गाथार्थः ॥ ४२ ॥ दश० ४ तत्त्व ।

धम्मकरण–धर्मकरण–न० । कुशलानुष्ठानाऽऽसेवने, पञ्चा० २ विव० ।

धम्मकस–धर्मकष–पुं० "पाणवहाईआणं, पावट्ठाणाण जो उ पमिसेहो। झाणज्झयणाईणं, जो अ विही एस धम्मकसो ॥१॥" इत्युक्तलक्षणे सम्यग्धर्मपरिशोधनोपायेषु कषच्छेदतापेषु प्रथमे उपाये, पं० व० ४ द्वार। (तद्वक्तव्यता धर्मपरीक्षाऽवसरे 'धम्म' शब्देऽनुपदमेव गता)

धम्मकहा–धर्मकथा–स्त्री० । दुर्गतौ प्रपतन्तं सत्त्वसङ्घातं धारयतीति धर्मः, तस्य कथनं कथा धर्मकथा । ओघ० । ध० । धर्मसम्बन्धाया वार्त्तायाः कथनं धर्मकथा । उत्त० २६ अ० । धर्मदेशनाऽऽदिलक्षणवाक्यप्रबन्धरूपे कथाभेदे, ग० २ अधि० । अहिंसाऽऽदिधर्मप्ररूपणा धर्मकथेति । औ० । यत्र पुनः-इह परत्र च स्वयं च कर्मविपाकोपदर्शनं सा धर्मकथेति । बृ० १ उ० ३ प्रक० । धर्मकथा धर्मोपायकथा । उक्तं च-" दयादानक्षमाऽऽद्येषु , धर्माङ्गेषु प्रतिष्ठिता । धर्मोपादेयतागर्भा, बुधैर्धर्मकथोच्यते ॥ १ ॥" इयं चोत्तराध्ययनाऽऽदिरूपाऽवसेयेति । स्था० ३ ठा० ३ उ० ।

धर्मकथामेव दर्शयति-

अत्थि लोए,अत्थि य अलोए,एवं जीवा, अजीवा,बंधे, मोक्खे,पुण्णे,पावे,आसवे,संवरे, वेयणा, णिज्जरा, अरिहंता, चक्कवट्टी, बलदेवा, वासुदेवा, नरका, णेरइया, तिरिक्खजोणिया, तिरिक्खजोणिणीओ, माया, पिया, रिसओ, देवा, देवलोआ,सिद्धी,सिद्धा,परिणिव्वाणं,परिणिव्वुया, अत्थि पाणाइवाए,मुसावाए,अदिन्नादाणे,मेहुणे, परिग्गहे। अत्थि कोहे,माणे, माया, लोभे० जाव मिच्छादंसणसल्ले। अत्थि पाणाइवायवेरमणे,मुसावायवेरमणे,अदिन्नादाणवेरमणे,मेहुणवेरमणे, परिग्गहवेरमणे० जाव मिच्छादंसणसल्लविवेगे। सव्वं अत्थिभावं अत्थि त्ति वयति, सव्वं णत्थिभावं णत्थि त्ति वयति, सुचिन्ना कम्मा सुचिन्नफला भवंति, दुच्चिन्ना कम्मा दुच्चिन्नफला भवंति, फुसइ पुण्णपावे, पच्चायंति जीवा, सफले कल्लाणपावए। औ० ।

तमेव धम्मं दुविहं आइक्खइ । तं जहा–अगारधम्मं, अणगारधम्मं च। अणगारधम्मो ताव इह खलु सव्वओ सव्वत्ताए मुंमे भवित्ता अगारातो अणगारियं पव्वयइ सव्वाओ पाणाइवायाओ वेरमणं, सव्वाओ मुसावायाओ वेरमणं, सव्वाओ अदिन्नादाणाओ वेरमणं, सव्वाओ मेहुणाओ वेरमणं, सव्वाओ परिग्गहाओ वेरमणं, राईभोअणाओ वेरमणं; अयमाउसो ! अणगारसामाइए धम्मे पन्नत्ते,एअस्स धम्मस्स सिक्खाए उवट्ठिए निग्गंथे वा निग्गंथी वा विहरमाणे आणाए आराहए भवति। अगारधम्मं दुवालसविहं आइक्खइ । तं जहा–पंच अणुव्वयाइं, तिन्नि गुणव्वयाइं, चत्तारि सिक्खावयाइं । पंच अणुव्वयाइं । तं जहा–थूलाओ पाणाइवायाओ वेरमणं,थूलाओ मुसावायाओ वेरमणं,थूलाओ अदिन्नादाणाओ वेरमणं,सदारसंतोसे इच्छापरिमाणे । तिन्नि गुणव्वयाइं । तं जहा–अणत्थदंडवेरमणं,दिसिव्वयं,उवभोगपरिभोगपरिमाणं । चत्तारि सिक्खावयाइं । तं जहा–सामाइअं देसावगासियं, पोसहोववासे, अतिहिसंविभागे, अपच्छिमा मारणंतिआ संलेहणा झूसणाराहणा, अयमाउसो ! अगारसामाइए धम्मे पन्नत्ते । औ० । भ० । उपा० ।

भेदतो धर्मकथामाह-

धम्मकहा बोधव्वा, चउव्विहा धीरपुरिसपन्नत्ता ।
अक्खेवणि विक्खेवणि, संवेगे चेव निव्वेए ॥९९॥

धर्मविषया कथा धर्मकथा, असौ बोद्धव्या चतुर्विधा धीरपुरुषप्रज्ञप्ता, तीर्थकरगणधरप्ररूपितेत्यर्थः । चातुर्विध्यमेवाऽऽह-आक्षेपणी, विक्षेपणी,संवेगश्चैव,निर्वेद इति । सूचनात् सूत्रमिति न्यायात् संवेजनी, निर्वेदनी चैवेत्युपन्यासगाऽथाक्षरार्थः ॥९९॥ दश० ३ अ० ।

आसां कथानां या यस्य कथनीयेत्येतदाह-

वेणइयस्स पढमया, कहा उ अक्खेवणी कहेयव्वा ।
तो समयगहियत्थे, कहिज्ज विक्खेवणी पच्छा ॥१०॥

विनयेन चरति वैनयिकः शिष्यस्तस्मै प्रथमतया आक्षेपणीकथनेन, कथा तु आक्षेपणी सकलक्षणा कथयितव्या । ततः स्वसमयगृहीतार्थे सति तस्मिन् कथयेद्विक्षेपणीमुक्तलक्षणामेव पश्चादिति गाथार्थः ॥ १० ॥

किमित्येतदेवमित्याह-

अक्खेवणिअक्खित्ता, जे जीवा ते हवंति संमत्ते ।
विक्खेवणीए नज्जं, गाढतरागं च मिच्छत्तं ॥ ११ ॥

आक्षेपण्या कथया आक्षिप्ता आवर्जिता आक्षेपण्याक्षिप्ता ये जीवास्ते लभन्ते सम्यक्त्वम् । तथा-आवर्जनशुभभावस्य मिथ्यात्वमोहनीये क्षयोपशमोपायत्वात् । विक्षेपण्यां नाज्यं सम्यक्त्वं कदाचिल्लभन्ते, कदाचिन्नेति, तच्छ्रवणात्तथाविधपरिणामभावात् गाढतरं वा मिथ्यात्वं जन्मतः परसमयदोषानवबोधाद् निन्दाकारिण एतेन दृष्टव्या इत्यभिनिवेशेनेति गाथार्थः ॥ ११ ॥ दश० ३ अ० ।

धर्मकथाकर्तुः किं फलं स्यादतस्तत्फलमाह-

धम्मकहाए णं भंते ! जीवे किं जणयइ ?। धम्मकहाए णं निज्जरं जणयइ,आगामिस्स भद्दत्ताए कम्मं निबंधइ ॥९३॥

धर्मकथया व्याख्यानरूपया निर्जरां जनयति । पाठान्तरतश्च-प्रवचनं प्रभावयति प्रकाशयति । उक्तं हि-"पावयणी धम्मकही, वाई नेमित्तिओ तवस्सी य । विज्जासिद्धो य कवी, अट्ठेव पभावया भणिया॥१॥"(आगमिस्स भद्दत्ताए त्ति)सूत्रत्वादागमिष्यद्भद्रत्वायागमिकालभावि भद्रं कल्याणं यस्मिंस्तथा तस्य भावस्तत्ता, यदि वा-आगमिष्यतीत्यागम आगामिकालस्तस्मिन्

शाहचन्द्रऊनया मनवरतकल्याणतयोपलक्षितं कर्म निबध्नाति शुभानुबन्धि शुभमुपार्जयतीति भावः ॥ ९३ ॥ उत्त० २९ अ० ।
" नयरागदोसमोहा , धम्मकहं जे करेंति समयन्नू ।
अणुदियहमवीसंता, सव्वपावाण मुच्चंति ।" महा० ३ अ० ।

तथा च-

संखाइ धम्मं च वियागरंति,
बुद्धा हु ते अंतकरा भवंति ।
ते पारगा दोण्ह वि मोयणाए,
संसोधितं पण्हमुदाहरंति ॥ १८ ॥

सम्यक् ख्यायते परिज्ञायते यया सा संख्या,सद्बुद्धिस्तया स्वतो धर्मं परिज्ञायाऽपरेषां यथावस्थितं धर्मं श्रुतचारित्राऽऽख्यं व्याकुर्वन्ति प्रतिपादयन्ति । यदि वा-स्वपरशक्तिं परिज्ञाय पर्षदं वा प्रतिपाद्य चार्थं सम्यगवबुध्य धर्मं प्रतिपादयन्ति, ते चैवंविधा बुद्धाः कालत्रयवेदिनो जन्मान्तरसंचितानां कर्मणामन्तकरा भवन्ति । अन्येषां च कर्मापनयनसमर्था भवतीति दर्शयति-ते यथावस्थितधर्मप्ररूपकाद् द्वयोरपि पराऽऽत्मनोः कर्मपाशविमोचनया स्नेहाऽऽदिनिगडविमोचनया वा करणभूतया संसारसमुद्रस्य पारगा भवन्ति । ते चैवंभूताः सम्यक् बोधितं पूर्वोत्तराविरुद्धं प्रश्नं शुद्धमुदाहरन्ति । तथाहि-पूर्वं बुद्धा पर्यालोच्य कोऽयं पुरुषः कस्य चार्थस्य प्रदर्शनसमर्थोऽहं वा किंभूतार्थप्रतिपादनशक्त इत्येवं सम्यक् परीक्ष्य व्याकुर्यादिति । अथवा-परेण किञ्चिदर्थं पृष्टस्तं प्रश्नं सम्यक् परीक्ष्योदाहरेत् सम्यगुत्तरं दद्यादिति । तथा चोक्तम्-" आयरियसयधारि-एणं अन्नेण सरियमुणिएणं। तो संघमज्झयारे, ववहरिउं जे मुहं होंति ॥ १ ॥ " गीतार्थो । यथावस्थितं धर्मं कथयन्तः स्वपरतारका भवन्तीति ॥ १८ ॥ सूत्र० १ श्रु० १४ अ० । (" लोगविजय " शब्दे विस्तरतो वक्ष्यते)

छन्नमुमुणी अणाणाए तुच्छए गिलाइवत्तए एस वीरे पसंसिए अन्ने तिलोगसंजोगं एसणाए पवुच्चति-जं छुक्खं पवेदितं इह माणवाणं तस्स दुक्खस्स कुसला परिन्नमुदाहरंति इति कम्मं परिण्णाय सव्वसो जे अणण्णदंसी से अणण्णारामे जे अणण्णारामे से अणण्णदंसी, जहा पुण्णस्स कत्थति तहा तुच्छस्स कत्थति जहा तुच्छस्स कत्थति तहा पुण्णस्स कत्थति, अदि य इणे अणाइयमाणे,एत्थं पि जाण सेयंति णत्थि,केयं पुरिसे कं च णए ?, एस वीरे पसंसिए, जे बद्धे पडिमोयए, उड्ढं अहं, तिरियं दिसासु, से सव्वओ सव्वपरिण्णाचारी ण लिप्पई छणपदेण,वीरे से मेहावी जे अणुग्घायणस्स खेयण्णे,जे य बंधपमोक्खमण्णेसी कुसले पुण णो बद्धे णो मुक्के ॥१०२॥ से जं च आरभे जं च णारभे, अणारब्भं च ण आरभे, छणं छणं परिन्नाय लोगसण्णं च सव्वसो ॥१०३॥ उद्देसो पासगस्स णत्थि बाले पुण णिहे कामसमणुन्ने असमितदुक्खे दुक्खी दुक्खाणमेव आवट्टं अणुपरियट्टइ त्ति बेमि। आचा० १ श्रु० २ अ० ६ उ० ।

धर्मकथा यतीनां कीदृशीत्याह-

सज्झायाईसंतो, तित्थयरकुलाणुरूवधम्माणं ।
कुज्जा कहं जईणं, संवेगविवड्ढणिं विहिणा ॥

स्वाध्यायाऽऽदिश्रान्तः संस्तीर्थकरकुलानुरूपधर्म्माणां महात्मनाम् , किमित्याह-कुर्यात् कथां यतीनां संवेगविवर्द्धनीं विधिनाऽऽसनचलनाऽऽदिनेति गाथार्थः । पं० व० ३ द्वार । पुरुषेण केवलस्त्रीणां स्त्रिया च केवलपुरुषाणामग्रे धर्मकथा न कर्त्तव्या । तथा चोक्तम्-

वुड्ढाणं तरुणाणं, रत्तिं अज्जा कहेइ जा धम्मं ।
सा गणिणी गुणसागर !,पडिणीया होइ गच्छस्स ॥११६॥

वृद्धानां स्थविराणां, तरुणानां यूनां पुरुषाणां केवलानामकेवलानां वा (रत्तिं ति) " सप्तम्या द्वितीया " ॥८।३।१३७॥ इति प्राकृतसूत्रेण सप्तम्यर्थे द्वितीयाऽऽदिविधानात् रात्रौ या आर्या गणिनी (धम्मं ति) धर्मकथां कथयति , उपलक्षणत्वादिवसेऽपि या केवलपुरुषाणां धर्मकथां कथयति , हे गुणसागर ! हे इन्द्रभूते ! सा गणिनी गच्छस्य प्रत्यनीका भवति । अत्र च गणिनीग्रहणेन शेषसाध्वीनामपि तथाविधाने प्रत्यनीकत्वमवसेयमिति । ननु कथं साध्व्यः केवलपुरुषाणामग्रे धर्मकथां न कथयन्ति ? । उच्यते-यथा साध्वः केवलानां स्त्रीणां धर्मकथां न कथयन्ति, तथा साध्व्योऽपि केवलानां पुरुषाणामग्रे धर्मकथां न कथयन्ति । यत उक्तं श्रीउत्तराध्ययने-" नो इत्थीणं कहं कत्ता हवइ, से निग्गंथे, तं कहमिति च आयरियाऽऽह-निग्गंथस्स खलु इत्थीणं कहं कहेमाणस्स बंभयारिस्स बंभचेरे संका वा कंखा वा विगिच्छा वा समुप्पज्जेज्जा, भेदं वा लभेज्जा, उम्मायं वा पाउणेज्जा,दीहकालियं वा रोगायंकं भवेज्जा,केवलिपन्नत्ताओ वा धम्माओ भंसिज्जा,तम्हा खलु नो इत्थीणं कहं कहेज्ज त्ति ।"(नो इत्थीणं ति) नो स्त्रीणामेकाकिनीनां कथां कथयिता भवति, यथेदं दशब्रह्मचर्यसमाधिस्थानमध्ये द्वितीयं ब्रह्मचर्यसमाधिस्थानं साधूनामुक्तं, तथा साध्वीनामप्येतद् युज्यते । तथा साध्वीनां पुरुषाणामेव केवलानां कथाया अकथने भवतीति । तथा स्थानाङ्गेऽपि-"नो इत्थीणं कहं कहेत्ता हवइ ।" इदं नवब्रह्मचर्यगुप्तीनां मध्ये द्वितीयगुप्तिसूत्रम् । अस्य वृत्तिः-नो स्त्रीणां, केवलानामिति गम्यते । कथां धर्मदेशनाऽऽदिलक्षणवाक्यप्रतिबन्धरूपामित्यादि । यथा च-द्वितीयां गुप्तिं साधवः पालयन्ति तथा साध्व्योऽपि पालयन्ति, सा च साध्वीनां पुरुषाणामेव केवलानामग्रे कथाया अकथने भवत्यतः प्रोच्यते, न केवलपुरुषाणां साध्व्यो धर्मकथां कथयन्तीति गाथाऽक्षरार्थः ॥ ११६ ॥ पं० ३ अधि० ।

तथा च-

मुद्धजणचेत्तसुन्नवो-इसस्सविद्दवणदक्ख समणीओ ।
ईईओ वि य काउ वि, अकंति धम्मं कहंतीओ ॥

मुग्धजनाः स्वल्पबुद्धिलोकास्त एव क्षेत्राणि बीजवपनभूमयस्तेषु शुभबोधः प्रधानाऽऽशयः स एव सस्यं धान्यं, तस्य विद्रवणं विनाशकरणं, तत्र दक्षाः पटवः, प्राकृतत्वाच्चात्र विभक्तिलोपः । श्रमण्य आर्यिका ईतय इव यथा तिड्डाद्याः कानन न सर्वा अटन्ति ग्रामाऽऽदिषु चरन्ति धर्मं दानाऽऽदिकं कथयन्त्यो ब्रुवाणा इति गाथार्थः ।

एतदपि निराकर्तुमाह-

एगंतेणं चिय तं, न सुंदरं जेण ताण पडिसेहो ।
सिद्धंतदेसणाए, कप्पट्ठियए व गाहाए ॥

एकान्तेनैव सर्वथा, तद्धर्मकथनं, नैव सुन्दरं भव्यं, येन तासां साध्वीनां, प्रतिषेधो निराकरणं, सिद्धान्तदेशनाया आगमकथनस्य, यथा प्रतिषेधः कल्पस्थितयैव गाथयेत्यर्थः ।

कल्पगाथामेवाऽऽह-

कुसमयसुईण महणो, विबोहओ भवियपुंडरीयाणं ।
धम्मो जिणपन्नत्तो, एकप्पजइणा कहेयव्वो ॥

कुसमयश्रुतीनां कुसिद्धान्तमतीनां, मथनो विनाशको, विबोधको विकाशको, भव्यपुण्डरीकाणां मुक्तियोग्यप्राणिशतपत्राणां, धर्मो दानाऽऽदिको, जिनप्रज्ञप्तो मुनीन्द्रगदितः, प्रकल्पयतिना निशीथज्ञसाधुना, कथयितव्यो वक्तव्यो, न पुनः साध्वेति हृदयमिति गाथार्थः ।

ननु यदि तासां स दीयतेऽतो निन्द्यते तद्धर्मकथनमित्याह-

संपइ पुणो न दिज्जइ, एकप्पगंथस्स ताण सुत्तत्थो ।
जइया वि य दिज्जंतो, तइया वि य एस पडिसेहो ॥

साम्प्रतमधुना, पुनर्नैव दीयते वितीर्यते, प्रकल्पग्रन्थस्य निशीथस्य, तासामार्यिकाणां, सूत्रार्थः-सूत्रेण पञ्चम्या सहितोऽर्थोऽभिधेयं सूत्रार्थः, उभयमिति हृदयम् । यदाऽपि वा दीयते वितीर्यते स्म, तदापि च तस्मिन्नपि काले, एष व्याख्यानकरणलक्षणः, प्रतिषेधो निवारणमिति गाथार्थः ॥

अमुमेवार्थं दृष्टान्तपूर्वकं दर्शयन्नाह-

हरिभद्दधम्मजणणी-ऍ किं च जाइणिपवत्तिणीए वि ।
एगो वि य गाहत्थो, नो सिट्ठो तु मुणियतत्ताए ॥

सूचनासूत्रस्य हरिभद्रसूरिधर्मजनन्याऽपि धर्मदात्रीत्वेन प्रतिपन्नमात्रा, किं चाऽभ्युच्चये, याकिनीप्रवर्तिन्या एतन्नामधेयया, न केवलमन्याभिरित्यपिशब्दार्थः । एकोऽपि च गाथार्थोऽभिधेयम्, आस्तां प्रभूत इत्यपेरर्थः, नो नैव शिष्टः कथितो मुणिततत्त्वया ज्ञातपरमार्थया । तथा च किल-" चक्किदुगं हरिपणगं । " इत्यादिगाथायाः स्वार्थं पृष्टा हरिभद्रभट्टेन तया च कथित इति सुप्रतीतोऽयमर्थ इति गाथार्थः ।

एवं ज्ञातजीवोपदेशमाह-

बहु मन्नसु मा चरियं, अमुणिततत्ताण तासिं ता ।
जीव ! जइ वा निवारिया, ता वारसु महुरवक्केण ॥

बहु मन्यस्व भव्यमिदमिति मंस्थाः, मेति निषेधे, चरितं धर्मकथनलक्षणम्, अमुणिततत्त्वानामविदितपरमार्थानां, तासामार्यिकाणां, तस्माज्जीवाऽऽमन् ! यदि वा विकल्पार्थः, तिष्ठन्ति । निवारिता निषिद्धास्ततो वारय निषेधय, मधुरवाक्येन कोमलवचसेति गाथार्थः । जीता० २७ अधि० ।

अमुणिय मुणीण चरणा, केई ..कालसमयम्मि ।
इत्थीण केवलीणं, कहिंति धम्मं जवाभिरया ॥

मुनीनाममुणितचरणा अविदिततदीशचारित्राः, केऽप्येके, मध्याह्नकालसमये प्रहरद्वयोर्ध्वं, स्त्रीणां श्राविकाणां, केवलानां श्रावकाऽभिश्रितानां, कथयन्ति धर्मं श्रुतधर्माऽऽदिकं, किं विशिष्टाः ?, भवाभिरताः संसाराऽऽसक्ता इति गाथार्थः ।

एतदपि न संगतमित्याह-

सिद्धंतामयपमिपु-ब्भकन्नपुडयाण संमयं जम्हा ।
न इय धम्मकहणम्मी, एए दोसा पसज्जंति ॥

सिद्धान्तामृतप्रतिपूर्णकर्णपुटकानामागमसुधासंभृतश्रवणच्छदपत्राणां संमतमभिप्रेतं, नेति निषेधे, इदमित्थं धर्मकथनं, यस्मादित्येवं कथने प्रतिपादने, एते वक्ष्यमाणा दोषा दूषणानि प्रसज्यन्ते प्रादुर्भवन्तीति गाथार्थः ।

तानेवाऽऽह-

इत्थिकहा उ अगुत्ती, मज्झण्हे वस्सयाऽऽगमे संका ।
पलिमंथो दसवेका-लियम्मि अन्नं इमं भणियं ॥

स्त्रीषु केवलनारीषु कथा धर्मकथनम्, इदं चोत्तराध्ययने द्वितीयव्याख्याने कथितम् । तुः समुच्चये । अगुप्तिः प्रत्यहं तद्दिग्भिदर्शनतो ब्रह्मचर्यारक्षा, अकालचारित्वप्रस्तावाऽऽगमनत्वेन हि तासां मध्याह्ने केवलानां वस्त्युपाश्रये आगमे आगमनमवस्थानं तथा शङ्का-किमप्यकार्यमेताभिः करिष्यन्तीत्येवं मन्दमतिरूपा, पलिमन्थः स्वकार्यव्याघातः साधूनां, तथा दशवैकालिके समयप्रसिद्धे अन्यदपरमिदं वक्ष्यमाणं भणितं तूक्तमिति गाथार्थः ।

तदेव श्लोकपञ्चकेनाह-

विन्नासा इत्थिसंसग्गो, पणीयं रसभोयणं ।
नरस्सऽत्तगवेसिस्स, विसं तालउडं जहा ॥
जहा कुक्कुडपोयस्स, निच्चं कुललओ भयं ।
एवं तु बंभयारिस्स, इत्थीविग्गहओ भयं ॥
हत्थपायपडिच्छिन्नं, कन्ननासविगप्पियं ।
अवि वाससयं नारिं, बंभयारी विवज्जए ॥
अंगपच्चंगसंठाणं, चारुल्लवियपेहियं ।
इत्थीणं तं न निज्झाए, कामरागविवड्ढणं ॥
चित्तभित्तिं न निज्झाए, नारिं वा सुअलंकियं ।
भक्खरं पि व दट्ठूणं, दिट्ठिं पडिसमाहरे ॥

सर्वा अपि प्रकटार्थाः ।

यत एवमत आह-

एत्तो चिय केई पु-ब्वसूरिणो मोक्खसोक्खतल्लिच्छा ।
आसीसं पि हु दिंता, ते अहोमुहाऍ दिट्ठीए ॥

एतस्मादेव कारणात्, केऽपि पुण्यभाजः, पूर्वसूरयश्चिरन्तनाऽऽचार्याः, मोक्षसौख्यलिप्सवो निर्वाणसुखाभिलाषिणः, आशिषमपि धर्मलाभमपि, न केवलधर्मकथामित्यपिशब्दार्थः, हुः पूर्ववत् । अदुर्दत्तवन्तः, श्राविकाणामिति शेषः । अधोमुखया न्यग् स्ववक्रया दृष्ट्या लोचनेनेति गाथार्थः ।

अत्रापि जीवानुशिक्षामाह-

सिद्धिवधूवरसुहसं-गलालसो जीव ! जइ तुमं ता मा ।
कहसु तुमं जिणधम्मं, इत्थीसु अकालचारीसु ॥

सिद्धिवधूवरसुखसङ्गलालसो मुक्तिकान्ताप्रधानाभिष्वङ्गलम्पटो, जीव ! प्राणिन् ! यदि त्वं भवान्, तस्मान्मा निषेधे, कथय

वद च, जवान् जिनधर्मे सर्वज्ञकृपम, अकालचारिणीषु प्रस्तावादागतासु स्त्रीषु नारीषु इति गाथार्थः । जीवा २४ अधि० । (यस्यां वसतौ धर्मकथाशब्दः संयतीभिः श्रूयते, तत्र वस्तव्यं न वेति ' वसह ' शब्दे वक्ष्यते) (अन्तर्गृहे धर्मकथा न कर्त्तव्येति ' अंतरगिह ' शब्दे प्रथमभागे ८५ पृष्ठे गतम) ननु श्रावकस्य धर्मकथनेऽधिकारोऽस्ति ?, अस्तीति ब्रूमः, गीतार्थादधिगतसूत्रार्थस्य गुरुपरतन्त्रवचनस्य तस्यैव सूत्रार्थस्य कथने को नाम नाधिकारः ?, " पढइ सुणेइ गुणेइ य, जणस्स धम्मं परिकहेइ " इत्यादिवचनात् । तथा चूर्णिः-" सो जिणदाससावओ अट्ठमिचउद्दसीसु उववासं करेइ, पुत्थयं च वाएइ । " इत्यादि । ध० २ अधि० । धर्मस्य श्रुतरूपस्य कथा व्याख्या धर्मकथा । स्वाध्यायभेदे, स्था० ५ ठा० ३ उ० । प्रव० । उत्त० । औ० । धर्मकथा ह्येवं स्वरूपतः " सुद्धं धम्मुवएसं, गुरुप्पसाएण सम्ममवबुद्धं । सपरोवयारजणगं, जो मग्गस्स कहिज्ज धम्मत्थी ।" इति । ध० ३ अधि० । धर्मप्रधाना कथा धर्मकथा । ज्ञाताधर्मकथाऽख्यस्य षष्ठस्याङ्गस्य द्वितीये श्रुतस्कन्धे, ज्ञा० १ श्रु० १ अ० ।

तस्याधिकारार्थो यथा-

दोच्चस्स णं भंते ! सुयक्खंधस्स धम्मकहाणं समणेणं० जाव संपत्तेणं के अट्ठे पण्णत्ते ?। एवं खलु जंबू ! धम्मकहाणं दस वग्गा पण्णत्ता । ज्ञा० २ श्रु० १ वर्ग १ अ० ।

(' अगमहिसी ' शब्दे प्रथमभागे ? पृष्ठे धर्मकथायाः सर्वे वर्गाः)

धम्मकहि (ण्)-धर्मकथिन्-पुं० । धर्मकथा प्रशस्ताऽस्यास्तीति धर्मकथी, शिखाऽऽदित्वादिन् । आक्षेपणीविक्षेपणीसंवेगजननीनिर्वेदनीभेदाच्चतुर्विधां जनितजनमनःप्रमोदां धर्मकथां कथयति, ध० २ अधि० । प्रव० । प्रवचनप्रभावकभेदे, संथा० । नि० चू० । दश० । पिं० ।

आयपरसमुत्तारो, तित्थविवड्ढी य होइ कहयंते ।
अन्नन्नजिणमयेण य, पूयाथिरया य बहुमाणो ॥

क्षीराश्रवाऽऽदिलब्धिसंपन्न आक्षेपणीविक्षेपणीसंवेगजननीनिर्वेदनीभेदाच्चतुर्विधां धर्मकथां कथयन् धर्मकथीत्युच्यते, तस्मिन् धर्मे कथयति आत्मनः परस्य च संसारसागरात् समुत्तारो निस्तरणं भवति; तीर्थविवृद्धिश्च, भवति, प्रभूतलोकस्य प्रव्रज्याप्रतिपत्तेः। तथा देशनाद्वारेण पूजाफलमुपवर्ण्यान्यान्याभिगमेन अन्यान्यश्रावकबोधनेन पूजायां स्थिरता, बहुमानश्च कृतो भवति । बृ० १ उ० । धर्मकथाकथके, पिं० ।

धम्मकाम-धर्मकाम-त्रि० । धर्मे श्रुतचारित्रलक्षणे कामो वाञ्छा यस्य स धर्मकामः । धर्ममेवाऽऽशंसति, तं० ।

धम्मकाय-धर्मकाय-पुं० । धर्मसाधने शरीरे, "सुसिलिट्ठा धम्मकायपीमाहि ।" धर्मसाधनशरीरवेदनेति । पञ्चा० १७ विव० ।

धम्मकित्ति-धर्मकीर्त्ति-पुं० । स्वनामख्याते आचार्ये, नं० । " विबुधवरधर्मकीर्त्ति-श्रीविद्याऽऽनन्दसूरिमुख्यबुधैः ।" कर्म० २ कर्म० । " परिणतवरधर्मकीर्त्तिमुख्यबुधैः । " ध० २० । स्वनामख्याते बौद्धसूरौ, "वेदप्रामाण्यं कस्यचित्कर्तृवादः, स्नाने धर्मेच्छा जातिवादावलेपः । सन्तापाऽऽरम्भः पापहानाय चेति, ध्वस्तप्रज्ञाने पञ्चलिङ्गानि जाड्ये ॥१॥ " इति च तद्वाक्यम । आ० म० १ अ० १ खण्ड ।

धम्मकिरिया-धर्मक्रिया-स्त्री० । धर्मानुष्ठाने, यो० वि० ।

धम्मकुमार-धर्मकुमार-पुं० । नागेन्द्रगच्छीये विबुधप्रभसूरिशिष्ये, अयमाचार्यः विक्रमसंवत् १३३४ मिते विद्यमान आसीत् । शालिभद्रचरित्रनामग्रन्थमरीरचत् । जै० इ० ।

धम्मक्खाइ(ण्)-धर्माऽऽख्यायिन्-पुं० । धर्ममाख्याति भव्यानां प्रतिपादयतीति धर्माऽऽख्यायी । धर्मप्रतिपादके, औ० । सूत्र० । ज्ञा० ।

धर्मख्याति-त्रि० । धर्मात् ख्यातिः प्रसिद्धिर्यस्य सः । धर्मेण प्रसिद्धे, औ० ।

धम्मगुज्झ-धर्मगुह्य-न० । धर्मरहस्ये, "इदमत्र धर्मगुह्यं, सर्वस्वं नैतदेवास्य । " षो० २ विव० ।

धम्मगुरु-धर्मगुरु-पुं० । दीक्षाऽऽचार्ये, " स धर्मगुरुपूजकः । " हा० २५ अष्ट० ।

धम्मघोस-धर्मघोष-पुं० । मथुरास्थे पार्श्वनाथस्य शिष्ये स्वनामख्याते आचार्ये, ती० ८ कल्प० । दक्षिणमथुरास्थे स्वनामख्याते आचार्ये, आ० चू० १ अ० । महावीरस्वामिनः शिष्ये स्वनामख्याते आचार्ये, आ० चू० ४ अ० । आव० । विमलगणिशिष्ये स्वनामख्याते आचार्ये, विमलगणिमधिकृत्य-" शिष्यो गच्छपतिः प्रतापतरणिः श्रीधर्मघोषः प्रभुः । " दर्श० ५ तत्त्व । कौशाम्बीनगरस्थे धर्मवसोराचार्यस्य शिष्ये स्वनामख्याते आचार्ये, आव० ४ अ० । आ० चू० । आ० क० । आतुरप्रत्याख्यानप्रकीर्णकवृत्तिकारकस्य महेन्द्रसूरेर्गुरौ स्वनामख्याते आचार्ये, आतु० । स चाञ्चलगच्छीयो जयसिंहसूरिशिष्यः येन विक्रमसंवत् १२६३ मिते शतपदिका नाम ग्रन्थो विरचितः । अस्य जन्म १२०८ वर्षे मरुदेशे आसीत् । जै० इ० । अन्योऽपि धर्मघोषसूरिर्नागेन्द्रगच्छे हेमप्रभसूरेः शिष्यः, सोमप्रभसूरेश्च गुरुः अन्योऽप्येतन्नामा ऋषिमण्डलस्तोत्रकर्त्ता । जै० इ० । चम्पानगरीवास्तव्ये स्वनामख्याते स्थविरे, ज्ञा० १ श्रु० १६ अ० । तपागच्छस्थे देवेन्द्रसूरेः शिष्ये स्वनामख्याते आचार्ये, ग० ४ अधि० । अयमाचार्यः सङ्घाऽऽचार-कालसप्ततिनामानौ ग्रन्थौ व्यधात्, विक्रमसंवत् १३२७ मितेऽयं सूरिपदमापः । जै० इ० । मगधजनपदस्थवसन्तपुरनगरस्थे स्वनामख्याते आचार्ये, सूत्र० २ श्रु० ६ अ० । आ० क० । वाराणसीनगरस्थे स्वनामख्याते ऽनगारे, आ० चू० ४ अ० । आ० क० । ती० । आव० । चम्पानगरीनृपतेर्मित्रप्रभस्य स्वनामख्याते ऽमात्ये, आव० ४ अ० । उज्जयिनीवास्तव्ये स्वनामख्याते ऽनगारे, आव० ४ अ० । आ० क० । विमलजिनस्य प्रपौत्रके शिष्ये स्वनामख्याते स्थविरे, भ० ।

तद्वक्तव्यता यथा-

तेणं कालेणं तेणं समएणं विमलस्स अरहओ पओप्पए धम्मघोसे णामं अणगारे जाइसंपण्णे । वण्णओ जहा केसिसामिस्स, जाव पंचहिं अणगारसएहिं सद्धिं संपरिवुडे पुव्वाणुपुव्विं चरमाणे गामाणुगामं दूइज्जमाणे जेणेव

हत्थिणाउरे णयरे जेणेव सहसंबवणे उज्जाणे तेणेव उवागच्छइ, उवागच्छइत्ता अहापडिरूवं उग्गहं उग्गिण्हइ, उग्गिण्हइत्ता संजमेणं तवसा अप्पाणं भावेमाणे,० जाव विहरइ । भ० ११ श० ११ उ० ।

धम्मचक्क–धर्मचक्र–न० । तीर्थकृतां धर्मप्रकाशकं चक्रं धर्मचक्रम । तीर्थकृतां पुरः पद्मप्रतिष्ठिते स्फुरत्किरणचक्रे धर्मप्रकाशके चक्रे, तच्च यत्र यत्र जगद्गुरुर्विचरति तत्र तत्र देवैर्नीयमानं गगनगतं गच्छतीति । प्रव० ४० द्वार । आ० म० । आ० चू० । तक्षशिलायां बाहुबलिना कारिते भगवत ऋषभदेवस्य धर्मप्रकाशके चक्रे च, आव० । भगवतस्तक्षशिलागमनमधिकृत्य " कल्लं सव्विड्ढीए, पूए मह दट्ठु धम्मचक्कं तु ।" आव० १ अ० । "बाहुबलिना चिंतियं-कल्ले सव्विड्ढीए वंदिस्सामि त्ति निग्गओ,पभाए सामी गतो विहरमाणो अदिट्ठे,अधिर्ति काऊण जहिं भगवं बुच्छो,तत्थ धम्मचक्कचिंधं कारियं, तं सव्वरयणामयं जोयणपरिमंडलं पंचजोयणुस्सियदंडं ।" आ०म०१ अ०१ खण्ड । आव० । आ० चू० । "गयग्गपयए य धम्मचक्के य ।" तक्षशिलायां धर्मचक्के । आचा० २ श्रु० ३ चू० १५ अ० । प्रति० । तक्षशिलायां बाहुबलिविनिर्मिते धर्मचक्रम । ती० ४३ कल्प ।

धम्मचक्कवट्टि (ण्)–धर्मचक्रवर्तिन्–पुं० । तीर्थकरे, आ० चू० १ अ० ।

धम्मचरण–धर्मचरण–न० । क्षान्त्याद्यासेवने,पं० व० १ द्वार । " धम्मचरणं पडुच्च ।" जी० १ प्रति० ।

धम्मचिंतग–धर्मचिन्तक–पुं० । धर्मशास्त्रपाठके सभासदे, औ० । " धम्मचिंतए वा ।" धर्मचिन्तको धर्मसंहितां परिज्ञातवान् सभासदः । ज्ञा० १ श्रु० १४ अ० । याज्ञवल्क्यप्रभृत्यृषिप्रणीतधर्मसंहिताश्चिन्तयन्ति,ताभिश्च व्यवहरन्ति ये ते धर्मचिन्तकाः । अनु० ।

धम्मचिंता–धर्मचिन्ता–स्त्री० । धर्मा जीवाऽऽदिद्रव्याणामनुयोगोत्पादाऽऽद्यः स्वभावास्तेषां चिन्ताऽनुप्रेक्षा, धर्मस्य वा श्रुतचारित्राऽऽत्मकस्य सर्वज्ञज्ञापितस्य हरिहराऽऽदिनिगदितधर्मेभ्यः प्रधानोऽयमित्येवं चिन्ता धर्मचिन्ता । स० १० समा० । दश० । सूत्रार्थानुचिन्तनाऽऽदिलक्षणशुभचित्तप्रणिधाने, "बद्धं पुण धम्मचिंताए ।" ग० २ अधि० । स्था० ।

धम्मच्छेय–धर्मच्छेद–पुं० । " बज्झाणुट्ठाणेणं, जेणं न बहिज्जई तयं नियमा । संभवइ अपरिसुद्धं, सोऊणं धम्ममिच्छेओ ।" इत्युक्तलक्षणे धर्मपरिशोधनोपायभेदे, पं० व० ४ द्वार ।

धम्मजणणी–धर्मजननी–स्त्री० । धर्मदातृत्वेन प्रतिपन्नमातरि, यथा हरिभद्रसूरेर्याकिनी महत्तरिका " हरिभद्दधम्मजणणी पे, किं च जाइणिपवत्तिणीए वि ।" जीवा० २७ अधि० । पञ्चा० ।

धम्मजस–धर्मयशस्–पुं० । कौशाम्बीवास्तव्यस्य धर्मवसोराचार्यस्य शिष्ये स्वनामख्याते आचार्ये,आ० क० । आव० । आ० चू० । महावीरस्वामिनः स्वनामख्याते शिष्ये, आव० ४ अ० । आ० चू० । वाराणसीनगरस्थे स्वनामख्यातेऽनगारे, आव० ४ अ० । आ० चू० । ती० ।

धम्मजागरिया–धर्मजागरिका–स्त्री० । धर्मचिन्तायाम्, " सो पुव्वावरकाले, जागरमाणो उ धम्मजागरियं ।" पं० व० ४ द्वार । धर्मध्यानेन जागरिका धर्मजागरिका । कल्प० ३ अधि० ९ क्षण । धर्मध्यानानुस्मरणे, " धम्मं जागरित्तए वा ।" धर्मध्यानलक्षणं जागरितुं, धातूनामनेकार्थत्वात्, " झाणं वा झाइत्तए " धर्मध्यानमनुस्मर्तव्यम् । बृ० १ उ० १ प्रक० । धर्माय धर्मचिन्तया वा जागरिका जागरणं धर्मजागरिका । भ० १२ श० १ उ० । धर्मप्रधाना जागरिका निद्राक्षयेण बोधो धर्मजागरिका । भावप्रत्युपेक्षायाम् , सा च–

" किं कय किं वा सेसं, किं करणिज्जं तवं च न करेमि ।
पुव्वावरत्तकाले, जागरओ भावपडिलेहो ॥ १ ॥ "

" अहवा को मम कालो, किमेयस्स उचियं, असारविसया नियमगामिणो विरसावसाणा, भीसणो मच्चू " इत्यादिरूपा । " पुव्वावरत्तकालसमयंसि नो धम्मजागरियं जागरित्ता भवइ ।" स्था० ४ ठा० २ उ० । धर्मेण कुलधर्मेण वा प्रथमायां रात्रौ जागरणं धर्मजागरिका । जन्मतः षष्ठे दिने जागरणमहोत्सवे, " छठे दिवसे धम्मजागरियं जागरेति ।" कल्प० १ अधि० ५ क्षण ।

धम्मजिण–धर्मजिन–पुं० । दुर्गतौ प्रपतन्तं सत्त्वसंघातं धारयतीति धर्मः । तथा-गर्भस्थे जननी दानाऽऽदिधर्मपरा जातेति धर्मः, स चाऽसौ जिनश्च धर्मजिनः । पञ्चदशे स्वनामख्याते जिने, ध० २ अधि० । तत्र सर्वेऽपि भगवन्त ईदृशास्ततो विशेषमाह-" गब्भगए जं जणणी, जायसुधम्म त्ति तेण धम्मजिणो ।" जगवति गर्भगते येन कारणेन विशेषतो जननी जातसुधर्मा दानदयाऽऽदिरूपशोभनधर्मपरायणा, तेन नामतो धर्मजिनः । आ०म०२ अ० । स० । कल्प० । (एतद्वक्तव्यता 'तित्थयर' शब्देऽस्मिन्नेव भागे २२६१ पृष्ठे दृश्या) " धम्मेणं अरहा दसवाससयसहस्साइं सव्वाउयं पालइत्ता सिद्धे० जाव पहीणे " । स्था० १० ठा० ।

धम्मजीवि (ण्)–धर्मजीविन्–पुं० । संयमैकजीविनि, " निग्गंथा धम्मजीविणो ।" दश० ६ अ० ।

धम्मजुव्वणकाल–धर्मयौवनकाल–पुं० । अन्त्यपुद्गलपरावर्तकाले, अन्त्यपुद्गलपरावर्तकालो धर्मयौवनकालश्च कथ्यते । उक्तं च-" तुल्या परिणतिर्जिन-व्यक्तिषु यत्तदुच्यते ! तिर्यक्सामान्यमित्येव, घटत्वं तु घटेष्विव ॥ ५ ॥ " द्रव्या० २ अध्या० ।

धम्मजोग–धर्मयोग–पुं० । धर्मोत्साहे, धर्मसम्बन्धे च । "अत एव धर्मयोगात्, क्षिप्रं तत्सिद्धिमाप्नोति ।" षो० ३ विव० ।

धम्मज्जिय–धर्मार्जित–त्रि० । धर्मेण क्षान्त्यादिरूपेणार्जितमुपार्जितम् । धर्मेणोत्पादिते, "धम्मज्जियं च ववहारं ।" धर्मेण साधुधर्मेणोत्पादितः । उत्त० १ अ० ।

धम्मज्झय–धर्मध्वज–पुं० । धर्मचक्रवर्तित्वसूचके केतौ, महेन्द्रध्वजे । रा० । ऐरवते भविष्यति स्वनामख्याते जिने, ति० । प्रव० । स० ।

धम्मज्झयण–धर्माध्ययन–न० । सूत्रकृताङ्गप्रथमश्रुतस्कन्धस्य धर्मप्रतिपादके नवमेऽध्ययने, सूत्र० ।

तथा च निर्युक्तिकृदाह-

धम्मो पुव्वुद्दिट्ठो, भावधम्मेण एत्थ अहिगारो ।
एसेव होइ धम्मं, एसेव समाहिमग्गो त्ति ॥ १ ॥

(धम्मो पुव्वुद्दिट्ठो इत्यादि)दुर्गतिगमनधारणलक्षणो धर्मः,पूर्वं प्राग् दशवैकालिकश्रुतस्कन्धषष्ठाऽध्ययने धर्मार्थकामाऽऽख्ये उद्दिष्टः प्रतिपादितः । इह तु भावधर्मेणाधिकारः । एष एव च भावधर्मः परमार्थतो धर्मो भवति । अमुमेवार्थमुत्तरयोरप्यध्ययनयोरतिदिशन्नाह-एष एव च भावसमाधिर्भावमार्गश्च भवतीत्यवगन्तव्यमिति । यदि वा-एष एव च भावधर्म एष एव च भावसमाधिरेष एव च तथा भावमार्गो भवति,न तेषां परमार्थतः कश्चिद्भेदः। तथाहि-धर्मः श्रुतचारित्राऽऽख्यः क्षान्त्यादिलक्षणो वा दशप्रकारो भवेद्, भावसमाधिरप्येवंप्रकार एव । तथाहि-सम्यगाधानमारोपणं गुणानां क्षान्त्यादीनामिति समाधिः, तदेव मुक्तिमार्गोऽपि ज्ञानदर्शनचारित्राऽऽख्यो भावधर्मतया व्याख्यातयितव्य इति ॥ १ ॥ सूत्र० १ श्रु० ६ अ० ।

धम्मज्झाण-धर्म(र्म्य)ध्यान-न० । धर्मेमाङ्गाऽऽदिपदार्थस्वरूपपर्यालोचनैकाग्रता । स० १ सम० । धर्मभावं गतो धर्म्यः। आ०चू०४ अ० । धर्मः क्षमाऽऽदिदशलक्षणस्तस्मादनपेतं धर्म्यं सर्वज्ञाऽऽज्ञाऽनुचिन्तनम् । प्रव० ६ द्वार । श्रुतचरणधर्मादनपेतं धर्म्यम् । स्था० ४ ठा० १ उ० । बाह्याऽऽध्यात्मिकनावानां याथात्म्यं धर्म्यस्तस्मादनपेतं धर्म्यम् । सम्म० ३ काण्ड । तदेव ध्यानं धर्म्यं (र्म्य) ध्यानम् । ध्यानभेदे, औ० । ग० ।

तत्स्वरूपं यथा-

" सूत्रार्थसाधनमहाव्रतधारणेषु,
बन्धप्रमोक्षगमनाऽऽगमहेतुचिन्ता ।
पञ्चेन्द्रियव्युपरमश्च दया च जन्तौ,
ध्यानं तु धर्म्यमिति संप्रवदन्ति तज्ज्ञाः ॥१॥ " दश० १ अ० ।

तच्चतुर्विधम्-

धम्मज्झाणे चउव्विहे पन्नत्ते । तं जहा-आणाविजए, अवायविजए, विवागविजए, संठाणविजए ।

अथ धर्मं चतुर्विधमिति स्वरूपेण चतुर्षु पदेषु स्वरूपलक्षणाऽऽलम्बनानुप्रेक्षालक्षणेष्ववतारो विचारणीयत्वेन यस्य तच्चतुष्पदावतारं चतुर्विधस्यैव पर्यायोऽयमिति । क्वचित् " चउप्पडोयारं " इति पाठः । तत्र चतुर्षु पदेषु प्रत्यवतारो यस्येति विग्रह इति । स्था० ४ ठा० १ उ० । (' झाण ' शब्देऽस्मिन्नेव भागे १६६३ पृष्ठे व्याख्यातम्) उक्तं च-

" आगमउवएसेणं, निसग्गओ जं जिणप्पणीयाणं । भावाणं सद्दहणं, धम्मज्झाणस्स तं लिंगं ॥ १ ॥ " इति । तत्त्वार्थश्रद्धानरूपं सम्यक्त्वं धर्मस्य लिङ्गमिति हृदयम् । (स्था०) । अथ धर्मस्याऽऽलम्बनान्युच्यन्ते-" धम्मस्स णं झाणस्स चत्तारि आलंबणा पन्नत्ता । तं जहा-वायणा, पडिपुच्छणा, परियट्टणा, अणुप्पेहा । " (स्था०) अथानुप्रेक्षा उच्यते-"धम्मस्स णं झाणस्स चत्तारि अणुप्पेहाओ पन्नत्ताओ। तं जहा-एगाणुप्पेहा,अणिच्चाणुप्पेहा,असरणाणुप्पेहा,संसाराणुप्पेहा । " स्था० ४ ठा० १ उ० । औ० । प्र० । प्रव० । आव० । तच्च द्विविधम्-बाह्यम्, आध्यात्मिकं च । सूत्रार्थपर्यालोचनं, दृढव्रतता, शीलगुणानुरागो, निर्भृतकायवाग्व्यापाराऽऽदिरूपं बाह्यम् । आत्मनः स्वसंवेदनाग्राह्यमन्येषामनुमेयमाध्यात्मिकं तत्त्वार्थसंग्रहाऽऽदौ चातुर्विध्येन प्रदर्शितं संक्षेपतोऽन्यत्र दशविधम्। तद्यथा-"अपायोपायजीवाजीवविपाकविरागभवसंस्थानाऽऽज्ञाहेतुविचयानि चेति । " लोकसंस्थानविचययोः संस्थानभवविचययोरन्तर्भावाद्भेदेभ्यः पृथगभिधानम् । तत्रापाये विचारो यस्मिंस्तदपायविचयम्; एवमन्यत्रापि योज्यम्, दुष्टमनोवाक्कायव्यापारविशेषाणामपायः कथमनुभानं स्यादित्येवंभूतः संकल्पप्रबन्धो दोषपरिवर्जनस्य कुशलप्रवृत्तित्वादपायविचयम् । तेषामेव कुशलानां स्वीकरणमुपायः स कथमनुमेयः स्यादिति संकल्पप्रबन्ध उपायविचयम्। असंख्येयप्रदेशाऽऽत्मकसाकाराऽनाकारोपयोगलक्षणाऽनादिस्वकृतकर्मफलोपभोगित्वाऽऽदि जीवस्वरूपानुचिन्तनं जीवविचयम् । धर्माधर्माऽऽकाशकालपुद्गलानामनन्तपर्यायाऽऽत्मकानामजीवानामनुचिन्तनमजीवविचयम्। मूलोत्तरप्रकृतिभेदभिन्नस्य पुद्गलाऽऽत्मकस्य मधुरकटुफलस्य कर्मणः संसारिस्थविषयविपाकविशेषानुचिन्तनं विपाकविचयम्। कुत्सितमिदं शरीरकं शुक्रशोणितसमुद्भूतमशुचिभूतघटोपममनित्यमपरिज्ञाने गदाशुचि, न च शिष्टतया सुशुचि, आधेयाशौचं न किञ्चिदत्र कमनीयतरं समस्ति, किम्पाकफलोपभोगोपमाः प्रमुखरसिका विपाककटवः प्रकृत्या भङ्गुराः पराधीनाः सन्तोषामृताऽऽस्वादपरिपन्थिनः सङ्क्लिष्टनिन्दिता विषयाः, तदुद्भवं च सुखं दुःखानुषङ्कि दुःखजनकं च नातोऽस्मिन्नां तृप्तिः न चैतदात्यन्तिकमिति नात्राऽऽस्था विवेकेनाऽऽधातुं युक्तेति विरतिरेवातः श्रेयस्कारिणीत्यादिविरागहेतुचिन्तनं वैराग्यविचयम्। प्रेत्य स्वकृतकर्मफलोपभोगार्थं पुनः प्राङ्नरो नवः। स चारघट्टघटीयन्त्रवन्मूत्रपुरीषान्त्रतन्त्रनिबद्धदुर्गन्धजठरपुरकोटराऽऽदिष्वजस्रमावर्त्तनं, न चात्र किं चिद् जन्तोः स्वकृतकर्मफलमनुभवतश्चेतनमचेतनं वा सहायभूतं शरणतां प्रतिपद्यत इत्यादिभवसंक्रान्तिदोषपर्यालोचनं भवविचयम्। नवनवनगसरित्समुद्रभूरुहाऽऽश्रयः पृथ्वीव्यवस्थिताः, साऽपि घनोदधिघनवाततनुवातप्रतिष्ठा, तेऽप्याकाशप्रतिष्ठाः,तदपि स्वात्मप्रतिष्ठं, तथाधोमुखमल्लकसंस्थाने वर्णयन्त्यधोलोकमित्यादि संस्थानानुचिन्तनं संस्थानविचयम्। अतीन्द्रियत्वाऽऽद्यूदाहरणाऽऽदिसङ्गावेऽपि बुद्ध्यतिशयशक्तिविकलैः परलोकबन्धमोक्षधर्माधर्माऽऽदिभावेष्वत्यन्तदुःखबोधेष्वाप्तप्रामाण्यात् तद्विषयं तद्वचनं तथैवेत्याज्ञाविचयम् । आगमविषयप्रतिपत्तौ तर्कानुसारिबुद्धेः पुंसः स्याद्वादप्ररूपकाऽऽगमस्य कथञ्चिदतापशुद्धिसमाश्रयणीयत्वगुणानुचिन्तनं हेतुविचयम् । एतच्च सर्वं धर्मध्यानं, श्रेयोहेतुत्वात् । एतच्च "संवररूपमशुभाश्रवप्रत्यनीकत्वात्"आश्रवनिरोधः संवर"इति वचनात्। गुप्तिसमितिधर्मानुप्रेक्षाऽऽदीनां चाऽऽश्रवप्रतिबन्धकारित्वात्। अयमपि जीवाजीवाभ्यां कथञ्चिदभिन्ना एव, एकान्तभेदोपपत्तेः । न चायमेकान्तवादिनां घटते, मिथ्याज्ञानाभिमिथ्याज्ञानस्य निमित्तमनुपपत्तेः । संवरशुद्धिस्तुः सर्वदेशभेदोत्पातपक्षेपेक्षयाबाऽऽधानमप्रमत्तसंयतस्यान्तर्मुहूर्त्तकालप्रमाणं स्वर्गसुखनिबन्धनमेतद्धर्मध्यानं प्रतिपत्तव्यम् । सम्म० ३ काण्ड । आ० चू० । (विस्तरतो वक्तव्यता 'झाण' शब्देऽस्मिन्नेव भागे १६६१ पृष्ठे)

धम्मज्झाणि (ण्)-धर्मध्यानिन्-पुं० । धर्मध्यानवति, " जिणसाहुगुणुक्कित्तण-पसंसणादाणविणयसंपन्नो । सुअसीलसंजमरओ, धम्मज्झाणी मुणेअव्वो ॥१॥ " आव० ४ अ० ।

धम्मज्झाणोवगय–धर्मध्यानोपगत–त्रि० । धर्मध्यानयुक्ते, दश० ४ तत्त्व ।

धम्मट्ठ–धर्मार्थ–पुं० । धर्मः श्रुतचारित्राऽऽख्यस्तेनार्थः प्रयोजनम् । धर्महेतुके प्रयोजने, सूत्र० १ श्रु० २ अ० २ उ० । धर्मनिमित्ते, आचा० १ श्रु० ५ अ० १ उ० । हा० । धर्मश्चार्थः,परमार्थतोऽन्यस्यानर्थरूपत्वात् । सूत्र० १ श्रु० २ अ० ३ उ० । तस्यैव सद्भिरर्थ्यमाणत्वात् (सूत्र० १ श्रु० २ अ० २ उ०) धर्मार्थः । सू० अ० १ श्रु० १६ अ० । धर्मरूपेऽर्थे, " जे धम्मट्ठं वियागरे । " जन्तूनां धर्मरूपमर्थं व्याकुर्वन्ति ये धर्मप्रतिपत्तियोग्या इत्यर्थः । सूत्र० १ श्रु० १५ अ० ।

धम्मट्ठकाम–धर्मार्थकाम–पुं० । धर्मः चारित्रधर्मादिस्तस्यार्थः प्रयोजनं मोक्षः, तं कामयतीच्छति विशुद्धविहितानुष्ठानकरणेनेति धर्मार्थकामः । मुमुक्षौ, दश० ६ अ० । धर्मार्थकामेषु, दश० ६ अ० ।

धम्मट्ठविचेट्ठा–धर्मार्थविचेष्टा–स्त्री० । धर्मनिमित्तकऽव्ययोपार्जनचेष्टायाम्, " धर्मार्थे यस्य विचेष्टा, तस्यानीहा गरीयसी । प्रक्षालनाद्धि पङ्कस्य, दूरादस्पर्शनं वरम् ॥ ६ ॥" हा० ४ अष्ट० । प्रति० ।

धम्मट्ठाण–धर्म(र्म्य)स्थान–न० । धर्मश्चासौ स्थानं धर्मस्थानम् । धर्मरूपे आलये, " धम्मट्ठाणे वियाऽऽ उ जं परमे । " दश० १ अ० । धर्मादनपेतं धर्म्यम्, तदेव स्थानम् । उपशमप्रधाने द्वितीये क्रियास्थानभेदे, सूत्र० २ श्रु० २ अ० । तथा च क्रियास्थानस्याधर्मस्थानधर्मस्थानधर्माधर्मस्थानभेदेषु । द्वितीयं धर्मोपादानभूतं पक्षमाश्रित्य पुरुषविजयविभङ्गाद् वक्ष्यति । सूत्र० २ श्रु० २ अ० ।

धम्मट्ठि (ण्)–धर्मार्थिन्–पुं० । धर्मः श्रुतचारित्राऽऽख्यस्तेनार्थो धर्मार्थः । सूत्र० २ श्रु० १ अ० । धर्मः श्रुतचारित्राऽऽख्यस्तेनार्थः प्रयोजनं,स एवार्थस्तस्यैव सद्भिरर्थ्यमाणत्वाद् धर्मार्थः, स यस्यास्तीति धर्मार्थी । सूत्र० १ श्रु० २ अ० २ उ० । धर्मेणार्थो, धर्म्म एव वाऽर्थः परमार्थतोऽन्यस्यानर्थरूपत्वाद् धर्मार्थः, स विद्यते यस्याऽसौ धर्मार्थः । धर्मप्रयोजनवति, सूत्र० १ श्रु० २ अ० ३ उ० । जी० । "धम्मट्ठी धम्मविऊ ।" धर्मः श्रुतचारित्राऽऽख्यस्तेनार्थः, स एवार्थोधर्मार्थः,स विद्यते यस्याऽसौ धर्मार्थी । न पूजाऽऽद्यर्थं क्रियासु प्रवर्त्तते, अपि तु धर्मार्थम् । सूत्र० १ श्रु० १६ अ० । "धम्मट्ठी उवहाणवीरिए । " सूत्र० १ श्रु० २ अ० २ उ० । शिवसुखाभिलाषितया पक्षपातपरिहारेण पूर्वापरपर्यालोचके, दश० ५ तत्त्व । परलोकभीरौ च । पं० व० ।

धर्मार्थितायाः फलम्–

धम्मत्थी दिट्ठत्थे, दढो व पंकम्मि अपमिबंधाओ ।
उत्तारिज्जंति सुहं, धन्ना अण्णाणसलिलाओ ॥१६॥

धर्मार्थिनः प्राणिनः, दृष्टार्थे ऐहिके, दृढ इव वनस्पतिविशेषः, इव पङ्केऽप्रतिबन्धात्कारणाद्धृतार्थ्यन्ते पृथक् क्रियन्ते, सुखं धन्याः पुण्यभाजः, कुतः ?, अज्ञानसलिलान्मोहादिति गाथार्थः । पं० व० ४ द्वार ।

धम्मणायग–धर्मनायक–पुं० । धर्मस्य क्षायिकज्ञानदर्शनचारित्राऽऽत्मकस्य नायकः स्वामी, यथावत्पालनाद् धर्मनायकः । स० १ सम० । तद्वशीकरणात् तत्फलपरिभोगाच्च धर्मनायकः । जी० ३ प्रति० । तीर्थंकरे, कल्प० १ अधि० १ क्षण । रा० । " धम्मनायगाणं २२ ।" इह धर्मोऽधिकृत एव,तस्य [नायकाः] स्वामिनः, तल्लक्षणयोगेन, तद्यथा-तद्वशीकरणभावात् तदुत्तमावाप्तेस्तत्फलपरिभोगात्तद्विघातानुपपत्तेः । तथाहि-एतद्वशिनो भगवन्तो विधिसमासादनेन विधिनाऽभ्यासतो भगवद्भिः, तथा निरतिचारपरिपालनतया पालितश्चातिचारविरहेण, एवं यथोचितदानतो दत्तश्च यथाजन्यम्, तथा तत्रापेक्षाभावेन नामीषां दाने वचनापेक्षा,एवं च तदुत्तमावाप्तयश्च भगवन्तः प्रधानक्षायिकधर्मप्राप्त्या तीर्थकरत्वात्प्रधानोऽयं भगवतां,तथा परार्थसंपादनेन सत्त्वार्थकरणशीलतया, एवं हीनेऽपि प्रवृत्तेः, अम्बबोधाय गमनाऽऽकर्णनात् । तथा तथाजन्यत्वयोगात् अत्युदारमेतदेतेषाम् । एवं तत्फलपरिभोगयुक्ताः सकलसौन्दर्येण निरुपमं रूपाऽऽदि भगवतां, तथा प्रतिहार्ययोगात् नान्येषामेतत्,एवमुदारर्द्धानुभूतेः समग्रपुण्यसंभारजेयं, तथा तदाधिपत्यतो भावात् न देवानां स्वातन्त्र्येण, एवं तद्विघातरहिता अवन्ध्यपुण्यबीजत्वात् एतेषां स्वाश्रयपुष्टमेतत्, तथा अधिकानुपपत्तेर्नातोऽधिकं पुण्यं, एवं पापक्षयभावाद् निर्दग्धमेतत्, तथाऽहेतुकविघातासिद्धेः सदा सत्त्वाऽऽदिभावेन । एवं धर्मस्य नायका धर्मनायका इति ॥ २२ ॥ ल० ।

धम्मणाह–धर्मनाथ–पुं० । पञ्चदशे स्वनामख्याते जिने, " श्रीधर्मनाथमानम्य, रत्नवाहपुरे स्थितम् । तस्यैव पुररत्नस्य, कल्पं किञ्चिद् ब्रवीम्यहम् ॥ १ ॥ " ती० १६ कल्प ।

धम्मणिप्फत्ति–धर्मनिष्पत्ति–स्त्री० । धर्मसिद्धौ, षो० ३ विव० ।

धम्मणिरुच्छाह–धर्मनिरुत्साह–पुं० । सदनुष्ठाननिरुद्यमे, " अहु धम्मणिरुच्छाहो, पुरिसो सूरो सुबलिओ वि । " सूत्र० १ श्रु० ४ अ० १ उ० ।

धम्मण्णु–धर्मज्ञ–पुं० । धर्मवेदिनि, षो० २ विव० । सकलशास्त्रार्थवेदिनि च । दर्श० ४ तत्त्व ।

धम्मतत्त–धर्मतत्त्व–न० । धर्मपरमार्थे, " एतदिह धर्मतत्त्वम् । " षो० ३ विव० । धर्मस्वरूपे, षो० ३ विव० । " लिङ्गान्येतानि धर्मतत्त्वस्य । " षो० ३ विव० । 'प्रतिषिद्धो धर्मतत्त्वज्ञैः' धर्मस्वरूपवेदिभिः । षो० ६ विव० ।

धम्मतित्थ–धर्मतीर्थ–न० । तीर्यते संसारसागरोऽनेनेति तीर्थं, धर्म एव धर्मप्रधानं वा तीर्थं धर्मतीर्थम् । धर्मरूपे तीर्थे, धर्मप्रधाने तीर्थे च । आ० म० २ अ० । ध० । ल० ।

धम्मतित्थयर–धर्मतीर्थंकर–पुं० । तीर्यतेऽनेनेति तीर्थं,धर्मप्रधानं तीर्थं धर्मतीर्थं, धर्मग्रहणाद् द्रव्यतीर्थस्य नद्यादेः शाक्याऽऽदिसम्बन्धिनश्चाधर्मप्रधानस्य परिहारः । तत्करणशीलो धर्मतीर्थंकरः । सदेवमनुजासुरायां पर्षदि सर्वभाषापरिणामिन्यां धर्मतीर्थप्रवर्तके जिने, ध० २ अधि० । आ० म० । ल० । "अह तेणेव कालेणं, धम्मतित्थयरे जिणे । " उत्त० २३ अ० ।

धम्मतोलण–धर्मतोलन–न० । धर्माधिकरणिकनीतिशास्त्रप्रसिद्धे धर्मतोलने, व्य० २ उ० । ('अट्ठजाय' शब्दे प्रथमभागे २४३ पृष्ठे साधुभिर्धर्मतोलने यथा विद्याऽऽदि उपयोक्तव्यं तथोक्तम्)

धम्मत्थकाम–धर्मार्थकाम–पुं० । धर्मार्थं कामयतीति । साधौ, दश० ६ अ० । धर्मश्चारित्रधर्माऽऽदिस्तस्यार्थः प्रयोजनं मोक्षः,

तं कामयन्ते इच्छन्ति विदुरुक्तवेदानुष्ठानकरणेनेति धर्मार्थकामाः। मुमुक्षुषु, दश० ६ अ०.

धम्मत्थिकाय–धर्मास्तिकाय–पुं० । जीवानां पुद्गलानां च स्वभावत एव गतिपरिणामपरिणतानां तत्स्वभावधारणात् तत्स्वभावपोषणाद्धर्मः, अस्त्यश्चेह प्रदेशाः, तेषां कायः सङ्घातः, "गणकाए य निकाए,खंधे वग्गे तहेव रासी य।" इति वचनात्। अस्तिकायः प्रदेशसङ्घात इत्यर्थः, धर्मश्चासौ अस्तिकायश्च धर्मास्तिकायः। प्रज्ञा० १ पद। जी०। कर्म०। अनु०। "जीवानां पुद्गलानां च, गत्युपग्रहकारणम्। धर्मास्तिकायो ज्ञानस्य, दीपश्चक्षुष्मतो यथा ॥ १ ॥" इत्युत्तरखण्डे, भाव० ४ अ०। दर्श०। आ०। सकललोकव्याप्यसङ्ख्येयप्रदेशात्मकामूर्तः। अजीवद्रव्यविशेषे, अनु०। दर्श०। (धर्मास्तिकायस्यास्तित्वम् 'अत्थिकाय' शब्दे प्रथमभागे ५१६ पृष्ठे गतम्)

अथ धर्मास्तिकायस्य लक्षणमाह-

परिणामी गतेर्धर्मो, भवेत्पुद्गलजीवयोः।
अपेक्षाकारणाल्लोके, मीनस्येव जलं सदा ॥ ४ ॥

गतेर्गमनस्य,परिणामी अर्थाद्गतिपरिणामी, पुद्गलजीवयोर्धर्मो धर्मास्तिकायो, भवेत्। कस्माल्लोके चतुर्दशरज्ज्वात्मकाऽऽकाशखण्डे, अपेक्षाकारणात् परिणामव्यापाररहितादधिकरणरूपौदासीन्यहेतोश्च। तत्र दृष्टान्तमाह-" मीनस्येव जलं सदेति।" सदा निरन्तरं, जलं यथा मीनस्य मत्स्यस्य गतिपरिणामि अस्ति, अपेक्षाकारणात्-गमनाऽऽगमनाऽऽदिक्रियापरिणतस्य मत्स्यस्य जलमपेक्षाकारणमस्ति, तथैव धर्मद्रव्यमपि ज्ञेयम्। निष्कर्षस्त्वयम्-स्थले ऊर्ध्वक्रिया व्याकुलतया चेष्टाहेतिच्छात्राभावादेव न भवति, न तु इच्छाभावादिति गत्यपेक्षाकारणे मानाभाव इति चेत्?। न। अन्वयव्यतिरेकाभ्यां लोकसिद्धव्यवहारादेव तद्धेतुत्वसिद्धेरन्यथाऽन्यकारणेनेतराखिलकारणासिद्धिप्रसङ्गादिति दिक् ॥ ४ ॥ ऊत्या० १० अ०।

धम्मत्थिकाएणं भंते ! जीवाणं किं पवत्तइ ?। गोयमा ! धम्मत्थिकाएणं जीवाणं आगमणगमणभासुम्मेसमणजोगवइजोगकायजोगा जे यावण्णे तहप्पगारा चलसभावा सव्वे ते धम्मत्थिकाए पवत्तंति, गतिलक्खणेणं धम्मत्थिकाए ॥

(आगमणगमणेत्यादि) आगमनगमने प्रतीते,भाषा व्यक्तवचनम्, 'नाम' व्यक्तायां वाचीति वचनात्। उन्मेषोऽक्षिव्यापारविशेषः, मनोयोगवाग्योगकाययोगाः प्रतीता एव। एतेषां च द्वन्द्वः। ततस्तेऽह च मनोयोगाऽऽदयः सामान्यरूपाः,आगमनाऽऽदयस्तु तद्विशेषा इति नैदेनोपात्ताः। भवति च सामान्यग्रहणेऽपि विशेषग्रहणं तत्स्वरूपोपदर्शनार्थमिति। (जे यावण्णे तहप्पगारे त्ति) ये चाप्यन्ये आगमनाऽऽदिव्योऽपरे तथाप्रकारा आगमनाऽऽदिसदृशा भ्रमणचलनाऽऽदयः। (चलसभाव त्ति) चलस्वभावाः पर्यायाः, सर्वे ते धर्मास्तिकाये सति प्रवर्त्तन्ते। कुतः?,इत्याह-"गतिलक्खणेणं धम्मत्थिकाय त्ति।" भ०१३ श० ४ उ०। तथा च-"एगे धम्मे।" एकः प्रदेशार्थतया संख्यातप्रदेशाऽऽत्मकत्वेऽपि ऊर्ध्वार्थतया तस्यैकत्वात् जीवपुद्गलानां स्वाभाविके क्रियावत्त्वे सति परिणतानां तत्स्वभावधारणाद्धर्मः। स चासौ नां प्रदेशानां सङ्घ ऽत्मकत्वात् कायोऽस्तिकाय इति। स्था० १ ठा०। न यतो धर्मास्तिकायविचारः-कोऽसौ धर्मो धर्मास्तिकायः। आह-सिद्धे सति वस्तुनोऽस्तित्वे इदमनेन लक्ष्यते इति वक्तुं युक्तम्,अस्य तु सत्त्वमेवासिद्धम्। अत्रोच्यते-यद्यशुद्धपदवाच्यं तत्तदस्ति। यथा स्तम्भाऽऽदिशुद्धपदवाच्यभावात् प्रमाणान्तरबाधितविषयत्वाख्यादोषरहितत्वेन, न च सिद्धत्वात्, न च खपुष्पाऽऽदिषु संकेतितैः स्वादिशुद्धपदैरनेकान्तो वृद्धपरम्पराऽऽयातसंकेतविषयाणामेव शुद्धपदानां वाच्यत्वस्येह हेतुत्वेनेष्टत्वान्निपुणेन प्रतिपत्त्या ज्ञाप्यम्,अन्यथा धूमाऽऽदेरपि गोपालघटिकाऽऽदिष्वन्वयाभावदर्शनादेष प्रसङ्गो दुर्निवारः स्यात्। उक्तं च-"अत्थि त्ति नियविगप्पो,जीवो नियमा सदत्तो सिद्धो। कम्मा सुद्धपयत्ता, धम्मखरसिंगाणुमाणाओ ॥ १ ॥" इत्यादिकं प्रसङ्गेन। उत्त० पाई २८ अ०। (धर्मास्तिकायस्य वर्णाऽऽदिद्रव्याऽऽदिनेदतः स्वरूपं च 'अत्थिकाय' शब्दे प्रथमभागे ५१६ पृष्ठे गतम्) धर्मास्तिकायविषये हीरप्रश्ने नगर्षिगणिकृतप्रश्नो यथा-सम्पूर्णो धर्मास्तिकायो द्रव्यमुच्यते, स्कन्धो वेति ?। अत्रोत्तरम्-सम्पूर्णो धर्मास्तिकायो द्रव्यमुच्यते, कुत्रचित् स्कन्धोऽप्युपचारात्, नात्र किमपि बाधकं ज्ञायते। ही० ३ प्रका०।

सकलमेव धर्मास्तिकायरूपमवयविद्रव्यमाह-

अवयवी नाम अवयवानां तथारूपसंघातपरिणामविशेष एव, न पुनरवयवद्रव्येभ्यः पृथगर्थान्तरं द्रव्यं,तथाऽनुपलम्भात्। तन्तव एव हि आतानवितानरूपं संघातपरिणामविशेषमापन्ना लोके पटद्रव्यपदेशभाजः उपलक्ष्यन्ते,न तदतिरिक्तं पटाऽऽख्यं नाम। उक्तं चान्यैरपि-"तन्त्वादिद्रव्यतिरेकेण,न पटाऽऽद्युपलम्भनम्। तन्त्वादयो विशिष्टा हि, पटाऽऽदिद्रव्यपदेशिनः ॥ १ ॥" प्रज्ञा० १ पद।

धर्मास्तिकायस्यैकार्थिकान्याह-

धम्मत्थिकायस्स णं भंते ! केवइया अभिवयणा पण्णत्ता ?। गोयमा ! अणेगा अभिवयणा पण्णत्ता। तं जहा-धम्मे त्ति वा,धम्मत्थिकाए इ वा, पाणाइवायवेरमणे ति वा, मुसावायवेरमणे ति वा, एवं० जाव परिग्गहवेरमणे कोहविवेगे ति वा०जाव मिच्छादंसणसल्लविवेगे ति वा,इरियासमिए ति वा,भासासमिए ति वा,एसणासमिए ति वा,आदाणभंडमत्तनिक्खेवणासमिए ति वा, उच्चारपासवणखेलजल्लसिंघाणपारिट्ठावणियासमिई ति वा, मणगुत्ती ति वा, वइगुत्ती ति वा, कायगुत्ती ति वा, जे यावण्णे तहप्पगारा,सव्वे ते धम्मत्थिकायस्स अभिवयणा।

(अभिवयण त्ति) अभि इत्यभिधायकानि वचनानि शब्दा अभिवचनानि, पर्यायशब्दा इत्यर्थः। (धम्मे इ व त्ति) जीवपुद्गलानां गतिपर्याये धारणाद्धर्मः, इति रूपप्रदर्शने, वा विकल्पे। (धम्मत्थिकाए व त्ति) धर्मश्चासावस्तिकायश्च प्रदेशराशिरिति धर्मास्तिकायः। (पाणाइवायवेरमणे वा इत्यादि) इह धर्मश्चारित्रलक्षणः, स च प्राणातिपातविरमणाऽऽदिरूपः, ततश्च धर्मशब्दसाधर्म्यादस्तिकायरूपस्यापि धर्मस्य प्राणातिपातविरमणाऽऽदयः पर्यायतया प्रवर्त्तन्त इति। (जे यावण्णेत्यादि) ये चान्येऽपि तथाप्रकाराश्चारित्रधर्मनिधायकाः सामान्यतो विशेषतो वा शब्दाः। ते सर्वेऽपि धर्मास्ति-

कायस्याभिवचनानीति । भ०२० श०२ उ० । (अस्तिकायानामस्तिकायत्वम् 'अत्थिकाय' शब्दे प्रथमभागे ५१६ पृष्ठे गतम्)

धम्मत्थिकायदेस–धर्मास्तिकायदेश–पुं० । धर्मास्तिकायस्य बुद्धिविकल्पितो द्वयादिप्रदेशाऽऽत्मको विभागो धर्मास्तिकायदेशः । अजीवद्रव्यभेदे, प्रज्ञा० १ पद । दर्श० । जी० ।

धम्मत्थिकायप्पएस–धर्मास्तिकायप्रदेश–पुं० । धर्मास्तिकायस्य प्रकृष्टो देशः प्रदेशः, निर्विभागो निरंशो भागो धर्मास्तिकायप्रदेशः । प्रज्ञा० १ पद । अजीवद्रव्यभेदे, दर्श० ५ तत्त्व । जी० । " अट्ठ धम्मत्थिकायमज्झप्पएसा पण्णत्ता । " स्था० ८ ठा० ।

धम्मद–धर्मद–पुं० । धर्मं चारित्ररूपं ददातीति धर्मदः । जी० ३ प्रति० । चारित्रधर्मदायके तीर्थंकरे, कल्प० १ अधि० १ क्षण ।

धम्मदत्त–धर्मदत्त–पुं० । स्वनामख्याते कल्किराजसुते, कल्प० १ अधि० ६ क्षण । ती० । " कल्किपुत्रो धर्मदत्तो, भावी स परमार्हतः । दिने दिने जैनबिम्बं, प्रतिष्ठाप्याबभोद्दयते ॥१॥ " ती० १ कल्प० ।

धम्मदय–धर्मदय–पुं० । धर्मं श्रुतचारित्राऽऽत्मकं दुर्गतिप्रपतज्जन्तुधारणस्वभावं दयते ददातीति धर्मदयः । स० १ सम० । चारित्रधर्मदायके तीर्थंकरे, प्र० १ श० १ उ० ।

धम्मदाण–धर्मदान–न० । धर्मकारणं दानं, धर्म एव वा दानम् । " समतृणमणिमुक्ताभ्यो, यद्दानं दीयते सुपात्रेभ्यः । अक्षयमतुलमनन्तं, तद्दानं भवति धर्मीयं ॥ १ ॥ " इत्युक्तलक्षणे दानभेदे, स्था० १० ठा० ।

धम्मदार–धर्मद्वार–न० । धर्मस्य चारित्रलक्षणस्य द्वारमिव द्वारं धर्मद्वारम् । क्षान्त्यादिके धर्मोपाये, " चत्तारि धम्मदारा पण्णत्ता । तं जहा–खंती, मुत्ती, अज्जवे, मद्दवे । " धर्मस्य चारित्रलक्षणस्य द्वाराणीव द्वाराण्युपायाः क्षान्त्यादीनि धर्मद्वाराणि । स्था० ४ ठा० ४ उ० ।

धम्मदासगणि–धर्मदासगणि–पुं० । स्वनामख्याते आचार्ये, दर्श० ४ तत्त्व । ध० । अनेन भगवता उपदेशमाला नाम ग्रन्थो रचितः । अयमाचार्यो वीरप्रभोरपि पूर्वं बभूवेति प्रसिद्धिः । जै० इ० । तथा चाहुः–"प्रतिहतसकलव्यामो-हतमिस्रा धर्मदासगणिमिश्राः । " ध० र० । तथा चाऽऽह–भगवान् धर्मदासगणिः । दर्श० ४ तत्त्व ।

धम्मदिवस–धर्मदिवस–पुं० । चतुर्दश्यष्टम्याऽऽदिके धर्मदिने, सूत्र० २ श्रु० ७ अ० ।

धम्मदुम–धर्मद्रुम–पुं० । धर्मवृक्षे, संथा० ।

धम्मदूअ–धर्मदूत–पुं० । वृद्धावस्थासूचके पलिताऽऽदिके, तस्या धर्मकरणयोग्यावस्थोपदेशकत्वात्तथात्वम् । आव० ४ अ० ।

धम्मदेव–धर्मदेव–पुं० । धर्मेण श्रुताऽऽदिना देवो धर्मप्रधानो वा देवो धर्मदेवः । प्र० १२ श० ६ उ० । चारित्रवद्रूपे देवभेदे, स्था० ५ ठा० १ उ० ।

धम्मदेसग–धर्मदेशक–पुं० । धर्मं श्रुतचारित्राऽऽत्मकं देशयतीति धर्मदेशकः । भ० १ श० १ उ० । धर्मोपदेशदायके, कल्प० १ अधि० १ क्षण । ब्र० । ध० । रा० ।

धम्मदेसणा–धर्मदेशना–स्त्री० । कुशलानुष्ठानप्ररूपणायाम्, ह्रा० ३१ अष्ट० ।

तत्प्रदानविधिमाह–

सा च संवेगकृत् कार्या, शुश्रूषोर्मुनिना परा ।
बालाऽऽदिभावं संज्ञाय, यथाबोधं महात्मना ॥ १७ ॥

सा च देशना संवेगकृत्संवेगकारिणी, संवेगलक्षणं चेदम्–" तत्थ्ये धर्मे ध्वस्तहिंसाप्रबन्धे, देवे रागद्वेषमोहाऽऽदिमुक्ते । साधौ सर्वग्रन्थसंदर्भहीने, संवेगोऽसौ निश्चलो योऽनुरागः ॥१॥" मुनिना गीतार्थेन साधुना, अन्यस्य धर्मोपदेशेऽनधिकारित्वात् । यथोक्तं निशीथे–

" संसारदुक्खमहणो, विबोहणो नवियपुंमरीयाणं ।
धम्मो जिणपण्णत्तो, एकप्पजइणा कहेअव्वो " ॥ १ ॥ इति ।

(प्रकल्पयतिनेति) अधीतनिशीथाध्ययनेन ।

(परा) शेषतीर्थान्तरीयधर्मातिशायितया प्रकृष्टा कार्या प्रज्ञापनीया । कीदृशस्य पुरतः सा कार्येत्याह–शुश्रूषोः श्रोतुमुपस्थितस्य, मुनिना च किं ज्ञानपूर्वमाख्येयेत्याह–(बालाऽऽदिभावमित्यादि) बालाऽऽदीनां त्रयाणां धर्मपरीक्षकाणाम्, आदिपदेन मध्यमबुद्धिबुधयोर्ग्रहणात्, भावं परिणामविशेषं स्वरूपं वा संज्ञाय सम्यगविपरीतेन ज्ञात्वाऽवबुद्ध्य । ध० १ अधि० । (बालाऽऽदीनां धर्मपरीक्षकाणां स्वरूपं 'धम्म' शब्दे धर्मपरीक्षाऽवसरे २६७४ पृष्ठे गतम्) कथं सा कार्येत्याह–(यथाबोधमिति) बोधानतिक्रमेण, अनवबोधे धर्माऽऽख्यानस्योन्मार्गदेशनारूपत्वेन प्रत्युतानर्थसंभवात् । न ह्यन्धः समाकृष्यमाणः सम्यगध्वानं प्रतिपद्यत इति । मुनिना कीदृशेन ?, महात्मना–तदनुग्रहैकपरायणतया महान् आत्मा यस्य स तेन इति संक्षेपतो धर्मदेशनाप्रधानविधिः, विस्तरतस्तु धर्मबिन्दौ (२ प्रक०) उक्तः ।

स चायम्–" इदानीं तद्विधिमनुवर्णयिष्याम इति । " इदानीं संप्रति तद्विधिं सद्धर्मदेशनाक्रमं वर्णयिष्यामो निरूपयिष्यामो वयमिति । तद्यथा–" तत्प्रकृति–देवताधिमुक्तिज्ञानमिति । " तस्य सद्धर्मदेशनार्हस्य जन्तोः प्रकृतिः स्वरूपं गुणवत्सङ्गलोकप्रियत्वाऽऽदिका, देवताधिमुक्तिश्च बुद्धकपिलाऽऽदिदेवताविशेषभक्तिः, तयोर्ज्ञानं प्रथमतो देशकेन कार्यम् । ज्ञातप्रकृतिको हि पुमान् रक्तो द्विष्टो मूढः पूर्वं व्युद्ग्राहितश्च चेन्न भवति, तदा कुशलैस्तथा तथाऽनुवर्त्य लोकोत्तरगुणपात्रतामानीयते । विदितदेवताविशेषाधिमुक्तिश्च तत्तद्देवताप्रणीतमार्गानुसारिवचनोपदर्शनेन दूषणेन च सुखमेव मार्गेऽवतारयितुं शक्य इति । तथा–"साधारणगुणप्रशंसेति । " साधारणानां लोकलोकोत्तरयोः सामान्यानां गुणानां प्रशंसा पुरस्कारो देशनाऽर्हस्याग्रतो विधेया । यथा–" प्रदानं प्रच्छन्नं गृहमुपगते संभ्रमविधिः, प्रियं कृत्वा मौनं सदसि कथनं चाप्युपकृतेः । अनुत्सेको लक्ष्म्यां निरभिभवसाराः परकथाः, श्रुते चाऽत्यन्तोषः कथमनभिजातैर्विलसति ? ॥१॥ " तथा–" सम्यक् तदधिकाऽऽख्यानमिति । " सम्यगविपरीतरूपतया तेभ्यः साधारणगुणेभ्योऽधिका विशेषवन्तो ये गुणाः तेषामाख्यानं कथनम् । यथा–"पञ्चैतानि पवित्राणि, सर्वेषां धर्मचारिणाम् । अहिंसा सत्यमस्तेयं, त्यागो मैथुनवर्जनम् ॥१॥ " इति । तथा–"अबोधेऽप्यनिन्देति" अबोधेऽप्यनवगमेऽपि सामान्यगुणानां, विशेषगुणानां वा व्याख्यातानामपि अनिन्दा अहो मन्दबुद्धिर्भवान् इत्थमाचक्षाणेष्वप्यस्मासु न बुध्यते वस्तुतत्त्वमित्येवं श्रोतुस्तिरस्कारपरिहाररूपा, निन्दितो हि श्रोता किञ्चिद् बुभुत्सुरपि सन् दूरं विरज्यत इति । तर्हि किं कर्त्तव्यमित्याह–"शुश्रूषाभाव

करणमिति।" धर्मशास्त्रं प्रति श्रोतुमिच्छा शुश्रूषा,तल्लक्षणो भावः परिणामः, तस्य करणं निर्वर्त्तनं श्रोतुस्तैस्तैर्वचनैरिति। शुश्रूषामनुत्पाद्य धर्म्मकथने प्रत्युतानर्थसंभवः। पठ्यते च-"स खलु पिशाचकी वातकी वा,यः परेऽनर्थिनि वाचमुदीरयति। "भूयो भूय उपदेश इति।"भूयो भूयः पुनः पुनरुपदिश्यत इत्युपदेशः। उपदेष्टुमिष्टो वस्तुविषयः कथञ्चिदनवगमे सति कार्यः। किं न क्रियते दृढसन्निपातरोगिणां पुनः पुनः क्रिया तिक्ताऽऽदिक्वाथपानोपचार इति। तथा-" बोधे प्रज्ञोपवर्णनमिति।" बोधे सकृदुपदेशेन, भूयो भूय उपदेशेन वोपदिष्टवस्तुनः परिज्ञाने तस्य श्रोतुः प्रज्ञोपवर्णनं बुद्धिप्रशंसनं, यथा-नाऽल्पसुकर्म्माणः प्राणिन एवंविधसूक्ष्मार्थबोद्धारो भवन्तीति। तथा-" तन्त्रावतार इति।" तन्त्रे आगमेऽवतारः प्रवेश आगमबहुमानोत्पादनद्वारेण तस्य विधेयः। आगमबहुमानश्चैवमुत्पादनीयः-

" परलोकविधौ शास्त्रात्, प्रायो नान्यदपेक्षते।
आसन्नभव्यो मतिमान्, श्रद्धाधनसमन्वितः ॥ १ ॥
उपदेशं विनाऽप्यर्थ--कामौ प्रति पटुर्जनः।
धर्मस्तु न विना शास्त्रा--दिति तत्राऽऽदरो हितः ॥ २ ॥
अर्थाऽऽदावविधानेऽपि, तद्भावः परं नृणाम्।
धर्मेऽविधानतोऽनर्थः, क्रियोदाहरणात्परः ॥ ३ ॥
तस्मात्सदैव धर्मार्थी, शास्त्रयत्नः प्रशस्यते।
लोके मोहान्धकारेऽस्मिन्, शास्त्राऽऽलोकः प्रवर्त्तकः ॥ ४ ॥"
(शास्त्रयत्न इति) शास्त्रे यत्नो यस्येति समासः।
"पापाऽऽमयौषधं शास्त्रं, शास्त्रं पुण्यनिबन्धनम्।
चक्षुः सर्वत्रगं शास्त्रं, शास्त्रं सर्वार्थसाधनम् ॥ ५ ॥
न तस्य भक्तिरेतस्मिं--स्तस्य धर्म्मक्रियाऽपि हि।
अन्धप्रेक्षाक्रियातुल्या, कर्मदोषादसत्फला ॥ ६ ॥
यः शास्त्रो मन्यते मान्या-नहङ्कारविवर्जितः।
गुणरागी महाभाग-स्तस्य धर्मक्रिया परा ॥ ७ ॥
यस्य त्वनादरः शास्त्रे, तस्य श्रद्धाऽऽदयो गुणाः।
कन्मत्तगुणतुल्यत्वा--न्न प्रशंसाऽऽस्पदं सताम् ॥ ८ ॥
मलिनस्य यथाऽत्यन्तं, जलं वस्त्रस्य शोधनम्।
अन्तःकरणरत्नस्य, तथा शास्त्रं विदुर्बुधाः ॥ ९ ॥
शास्त्रभक्तिर्जगद्वन्द्यै-र्मुक्तिदूती परोदिता।
अत्रैवेयमतो न्याय्या, तत्प्राप्त्यासन्नभावतः ॥ १० ॥ "

(अत्रैवेति) मुक्तावेव (इयमिति) शास्त्रभक्तिः, "तत्प्राप्त्यासन्नभावत इति" मुक्तिप्राप्तिसमीपभावादिति। तथा-"प्रयोग आक्षेपणेति।" प्रयोगो व्यापारणं, धर्मकथाकाले आक्षिप्यन्ते आकृष्यन्ते मोहात्तत्वं प्रति अन्यप्राणिनोऽनयेति आक्षेपणी। (तस्याः कथायाश्चातुर्विध्यम् ' अक्खेवणी ' शब्दे प्रथमभागे १५२ पृष्ठे गतम्) तथा-" ज्ञानाऽऽद्याचारकथनमिति।" ज्ञानस्य श्रुतलक्षणस्य, आचारो ज्ञानाऽऽचारः, आदिशब्दाद्दर्शनाऽऽचारचारित्राऽऽचारस्तपआचारो वीर्याऽऽचारश्चेति। ततो ज्ञानाऽऽद्याचाराणां कथनं प्रज्ञापनमिति समासः। ध० १ अधि०। अनन्तरोक्तषट्त्रिंशद्विधे ज्ञानदर्शनाऽऽद्याचारे यथाशक्ति प्रतिपत्तिलक्षणं पराक्रमणं, प्रतिपन्नौ च यथाबलं पालनेति। तथा-" निरीहशक्यपालनेति।" निरीहैर्नैहिकपारलौकिकफलेषु राज्यदेवत्वाऽऽदिलक्षणेषु व्यावृत्ताभिलाषेण शक्यस्य ज्ञानाऽऽचाराऽऽदेर्विहितमिदमिति बुद्ध्या पालना कार्या इति च कथयत इति। तथा-" अशक्ये भावप्रतिपत्तिरिति।" अशक्ये ज्ञानाऽऽचाराऽऽदिविशेष एव, कर्त्तुमपार्यमाणे कुतोऽपि धृतिसंहननकालबलाऽऽदिवैकल्यात् भावप्रतिपत्तिः। भावेनान्तःकरणेन प्रतिपत्तिरनुबन्धः, न पुनस्तत्र प्रवृत्तिरपि, अकालौत्सुक्यस्य तत्रत आर्त्तध्यानत्वादिति। तथा-" पालनोपायोपदेश इति।" एतस्मिन् ज्ञानाऽऽद्याचारे प्रतिपन्ने सति पालनाय उपायस्याधिकगुणतुल्यगुणलोकमध्यसंवासस्वकृतस्य निजगुणस्थानकोचितक्रियापरिपालनानुस्मारणस्वभावस्य चोपदेशो दातव्य इति। तथा-"फलप्ररूपणेति।" अस्याऽऽचारस्य सम्यक् परिपालितस्य सतः फलान्येव तावदुपबृंहणं भावैश्वर्यवृद्धिर्जनप्रियत्वं च, परत्र च सुगतिजन्मोत्तमस्थानलाभः, परम्परया निर्वाणावाप्तिश्चेति यत्कार्यं तस्य प्ररूपणा प्रज्ञापना विधेयेति। ध० १ अधि०। (देवर्द्धिवर्णनं ' देवड्ढिवण्ण ' शब्देऽस्मिन्नेव भागे २६१७ पृष्ठे गतम्) (असदाचारगर्हा ' असदायार ' शब्दे प्रथमभागे ७४० पृष्ठे प्रतिपादिता) (नारकदुःखोपवर्णनम् " णारयदुक्खोववण्ण " शब्देऽस्मिन्नेव भागे २०१२ पृष्ठे गतम्) (दुष्कुलजन्मप्रशस्तिः " दुक्कुलजम्मप्पसत्थि " शब्देऽस्मिन्नेव भागे २५४८ पृष्ठे प्रोक्ता) (मोहनिन्दा 'मोहनिंदा' शब्दे प्रतिपादयिष्यामि) (धर्मबीजं च ' धम्मबीय ' शब्देऽस्मिन्नेव भागेऽनुपदमेव वक्ष्यामि) (संज्ञानप्रशंसनं ' सण्णाणप्पसंसण ' शब्दे प्रतिपादयिष्यते) "वीर्यर्द्धिवर्णनमिति।" वीर्यर्द्धेः प्रकर्षरूपायाः शुद्धाऽऽचारबललभ्यायास्तीर्थकरपर्यवसानायाः वर्णनमिति। यथा-" मेरुं दण्डं धरां छत्रं, यत्केचित्कर्तुमीशते। तत्सदाचारकल्पद्रु-फलमाहुर्महर्षयः ॥१॥" तथापरिणते गम्भीरायाः पूर्वदेशनापेक्षयाऽत्यन्तसूक्ष्मायाः आत्मास्तित्वतद्बन्धमोक्षाऽऽदिकायाः देशनायाः योगो व्यापारः कार्यः। इदमुक्तं भवति-यः पूर्वं साधारणगुणप्रशंसाऽऽदिरनेकधोपदेशः प्रोक्त आस्ते, स यदा तदाचारककर्मह्रासातिशयाद्दृक्शक्तिबलक्षणं परिणाममुपागतो भवति तदा जीर्णे भोजनमिव गम्भीरदेशनायामसौ देशनार्होऽवतार्यत इति। ध० १ अधि०।

इत्थं देशनाविधिं प्रपञ्च्योपसंहरन्नाह-" एवं संवेगकृकर्म्म, आख्येयो मुनिना परः। यथाबोधं हि शुश्रूषो-र्भावितेन महात्मना ॥१॥ " इति व्याख्यातप्रायम्। आह-धर्माख्यापनेऽपि यदा तथाविधकर्म्मदोषान्नावबोधः श्रोतुरुपपद्यते, तदा किंफलं धर्माऽऽख्यानमित्याह-"अबोधेऽपि फलं प्रोक्तं,श्रोतॄणां मुनिसत्तमैः। कथकस्य विधानेन, नियमाच्छुद्धचेतसः ॥१॥ " इति सुगमम्। आह-प्रकारान्तरेणापि देशनाफलस्य संभाव्यमानत्वादलमिदैव यत्नेनेत्याशङ्क्याह-

" नोपकारो जगत्यस्मि-न्तादृशो विद्यते क्वचित्।
यादृशी दुःखविच्छेदा-द्देहिनो धर्म्मदेशना ॥ १ ॥ " इति।

(न) नैवोपकारोऽनुग्रहो, जगति भुवने, अस्मिन्नुपलभ्यमाने, तादृशो विद्यते समस्ति, क्वचित्काले क्षेत्रे वा, यादृशी यादृग्रूपा, दुःखविच्छेदात् शारीरमानसदुःखापनयनात्, देहिनां देशनार्हाणां,(धर्म्मदेशनेति)धर्म्मदेशनाजनितो मार्गश्रद्धानाऽऽदिर्गुणः तस्य निःशेषक्लेशलेशकलङ्कमोक्षाऽऽक्षेप प्रत्यवध्यकारणत्वात्। इति निरूपितो धर्म्मबिन्दौ सद्धर्म्मदेशनाप्रदानविधिः। ध० १ अधि०। सङ्घा०।

बालाऽऽदीनां सद्धर्म्मपरीक्षाकाणां सप्रपञ्चं लक्षणमभिधाय तद्भूतदेशनाविधिमाह-

बालाऽऽदिभावमेवं, सम्यग् विज्ञाय देहिनां गुरुणा।

सद्धर्मदेशनाऽपि हि, कर्त्तव्या तदनुसारेण ॥ १३ ॥

बालाऽऽदीनां भावः परिणामविशेषः, स्वरूपं वा, तमेवमुक्तनीत्या सम्यगविपरीतत्वेन, विज्ञायाऽवबुध्य, देहिनां जीवानां, गुरुणा शास्त्राभिहितस्वरूपेण । यथोक्तम्-"धर्मज्ञो धर्मकर्त्ता च, सदा धर्मप्रवर्त्तकः । सत्त्वेभ्यो धर्मशास्त्रार्थ-देशको गुरुरुच्यते ॥१॥" सद्धर्मस्य देशनाऽपि हि प्रतिपादना कर्त्तव्या । तदनुसारेण बालाऽऽदिपरिणामानुरूपेण यस्य यथोपकाराय संपद्यते देशना, तस्य तथा विधेयेति ॥ १३ ॥

अत्रैव हेतुद्वारेण व्यतिरेकमाह-

यज्ञापितं मुनीन्द्रैः, पापं खलु देशना परस्थाने ।
उन्मार्गनयनमेत-द्भवगहने दारुणविपाकम् ॥ १४ ॥

यद्यस्माज्ज्ञापितमुक्तम्, मुनीन्द्रैः समययुक्तैः, पापं खलु वर्त्तते । देशना परस्थाने बालसंबन्धिनी मध्यमबुद्धेस्तत्संबन्धिनी बुधस्य स्थाने । किमित्याह-उन्मार्गनयनमुन्मार्गप्रापणमेतद्विपरीतदेशनाकरणम् । भवगहने संसारगहने, दारुणविपाकं तीव्रविपाकम् । ते हि विपरीतदेशनया अन्यथा चान्यथा च प्रवर्त्तन्त इति कृत्वा ॥ १४ ॥

कथं पुनर्देशनास्वरूपेण समयोक्तत्वेन सुन्दराऽपि सती परस्थानेऽपायमित्याह-

हितमपि वायोरौषध-महितं तत्श्लेष्मणो यथाऽत्यन्तम् ।
सद्धर्मदेशनौषध-मेवं बालाऽऽद्यपेक्षमिति ॥१५॥

हितमपि योग्यमपि, वायोः शरीरगतस्य वातस्यौषधं स्नेहपानाऽऽदि अहितं, तदेवौषधं श्लेष्मणो यथाऽत्यन्तं भवति । तत्प्रकोपहेतुत्वेन सद्धर्मस्य देशनौषधं स्वरूपेण सुन्दरमपि तद्बन्धहेतुत्वेन एवमहितं भवति । (बालाऽऽद्यपेक्षमिति) बालमध्यमबुद्धिबुधापेक्षं तस्मात्तदपायभीरुणा तत्रितप्रवृत्तेन च गुरुणा तेषां भावं विज्ञाय, देशना विधेयेति शास्त्रोपदेशः ॥१५॥ षो० १ विव० ।

गुरुर्बालाऽऽदीनां देशनां विदधातीत्युक्तम्, तत्र विधिमाह-

बाह्याऽऽदीनामेषां, यथोचितं तद्विदो विधिर्गीतः ।
सद्धर्मदेशनाया-मयमिह सिद्धान्ततत्त्वज्ञैः ॥ १ ॥

बाह्याऽऽदीनामेषां पूर्वोक्तानां, यथोचितं यथार्हम्, तद्विदो बालाऽऽदिस्वरूपविदः, विधिर्गीतः कथितः । सद्धर्मदेशनायां विषये, अयमिह वक्ष्यमाणः, सिद्धान्ततत्त्वज्ञैरागमपरमार्थनिपुणैरिति ॥ १ ॥

तत्र बालस्य परिणाममाश्रित्य हितकारिणीं देशनामाह-

बाह्यचरणप्रधाना, कर्त्तव्या देशनेह बालस्य ।
स्वयमपि च तदाचार-स्तदग्रतो नियमतः सेव्यः ॥ २ ॥

बाह्यचरणप्रधाना बाह्यानुष्ठानप्रवरा, कर्त्तव्या विधेया, देशना प्ररूपणा, इह प्रक्रमे बालस्याऽऽद्यस्य धर्मार्थिनः, स्वयमपि चाऽऽत्मनाऽपि च, तदाचारः-स चासावाचारश्चोपदिश्यमानाऽऽचारस्तदग्रतो बालस्याऽग्रतो, नियमतो नियमेन, सेव्यो भवत्याचरणीयः । यदि पुनः स्वयमन्यथा सेव्यते, अन्यथा चोपदिश्यते, तदा तथितथाशङ्कां जनयति; अतस्तद्भावबुद्ध्ये समुपदिश्यमानं तथैवाऽऽसेव्यमिति ॥ २ ॥

६८१

तामेव बालस्य देशनामाह-

सम्यग् लोचविधानं, ह्यनुपानत्कत्वमथ धरा शय्या ।
प्रहरद्वयं रजन्याः, स्वापः शीतोष्णसहनं च ॥ ३ ॥

सम्यग् लोचविधानं लोचकरणं, कथनीयं भवतीति योगः । हिशब्दश्चार्थे सर्वत्राभिसंबन्धनीयः । अनुपानत्कत्वं च-न विद्यते उपानद्यौ यस्य सोऽयमनुपानत्कस्तद्भावस्तत्त्वम् । अथ धरा शय्या-धरा पृथ्वी सैव शय्या शयनीयं, मान्यत्पर्यङ्काऽऽदि, प्रहरद्वयं रजन्याः स्वापः-प्रथमयामे स्वाध्यायकरणं सामान्येनैव साधूनां, द्वितीयतृतीयप्रहरयोस्तु स्वापः स्वपनं, चतुर्थे पुनः स्वाध्यायकरणं, समयनीत्या शीतोष्णसहनं च-शीतोष्णयोः सहनं स्वसामर्थ्यापेक्षमार्त्तध्यानाऽऽदिपरिहारेण ॥ ३ ॥

षष्ठाष्टमाऽऽदिरूपं, चित्रं बाह्यं तपो महाकष्टम् ।
अल्पोपकरणसंधा-रणं च तच्छुद्धता चैव ॥ ४ ॥

षष्ठाष्टमाऽऽदिरूपं समयप्रसिद्धं, चित्रं नानाप्रकारं, बाह्यं तपो महाकष्टं दुरनुचरम्, अल्पसत्त्वैर्दुर्बलसंहननैश्चेति कृत्वा, अल्पोपकरणसंधारणं च अल्पमेवोपकरणम् [संधारणीयं] तच्छुद्धता चैव शुद्धमाऽऽदिदोषविशुद्ध्या ॥ ४ ॥

गुर्वी पिण्डविशुद्धि-श्चित्रा द्रव्याऽऽद्यभिग्रहाश्चैव ।
विकृतीनां संत्याग-स्तथैकसिक्थाऽऽदिपारणकम् ॥५॥

गुर्वी पिण्डविशुद्धिराधाकर्माऽऽदित्यागेन चित्रा द्रव्याऽऽद्यभिग्रहाश्चैव द्रव्यक्षेत्रकालभावाभिग्रहाः समयप्रसिद्धाः । विकृतीनां संत्यागः क्षीराऽऽदीनाम्, तथैकसिक्थाऽऽदिपारणकम् । एकं सिक्थं भोजनं पारणके । आदिशब्दादेककवलाऽऽदिग्रहः ॥ ५ ॥

अनियतविहारकल्पः, कायोत्सर्गाऽऽदिकरणमनिशं च ।
इत्यादि बाह्यमुच्चैः, कथनीयं भवति बालस्य ॥ ६ ॥

अनियतविहारकल्पोऽनियतश्चासौ विहारश्च नैककक्षेत्रवासित्वम्, तस्य कल्पः समाचारः, कायोत्सर्गाऽऽदिकरणमनिशं च-कायोत्सर्गस्याऽऽदिशब्दान्निषद्याकरणमास्रवनमित्यादि बाह्यमुच्चैर्बाह्यमनुष्ठानं प्रतिश्रयप्रत्युपेक्षणप्रमार्जनकालग्रहणाऽऽदि कथनीयं भवति बालस्य सर्वथोपदेष्टव्यं हितकारीति ॥ ६ ॥

इदानीं मध्यमबुद्धेर्देशनाविधिमाह-

मध्यमबुद्धेस्त्वीर्या-समितिप्रभृति त्रिकोटिपरिशुद्धम् ।
आद्यन्तमध्ययोगै-र्हितदं खलु साधुसद्वृत्तम् ॥ ७ ॥

मध्यमबुद्धेस्तु मध्यमबुद्धेः पुनरीर्यासमितिप्रभृति ईर्यासमित्यादिकम्, प्रवचनमातृरूपं साधुसद्वृत्तं, समाख्येयमितियोगः । तच्च कीदृशं साधूनां सद्वृत्तम् ? । त्रिकोटिपरिशुद्धं रागद्वेषमोहत्रयपरिशुद्धम् । अथवा तिस्रः कोटयो हननपचनक्रयणरूपाः कृतकारितानुमतिभेदेन श्रूयन्ते, ताभिः परिशुद्धम् । अथवा-कषच्छेदतापकोटित्रयपरिशुद्धं, प्रवचनमाश्रन्तर्गतत्वात् सकलप्रवचनस्य । तस्य च कषच्छेदतापपरिशुद्धत्वेनाभिधानात्तदेव च वचनमनुष्ठीयमानम्, सद्वृत्तम्, साधुसद्वृत्तमेव विशिष्यते-आद्यन्तमध्ययोगैर्हितदं खल्विति । आदियोगेन, मध्ययोगेनान्तयोगेन वा, वयसो जीवितव्यस्य वा, हितदमुपकारि । अथवा-आदियोगेन प्रथमवयोऽवस्थागतेनाध्ययनाऽऽदिना, मध्ययोगेन द्वितीयवयोऽवस्थानाविनाऽर्थश्रवणाऽऽदिना, अन्तयोगेन चरमवयोऽवस्थाभाविना धर्मध्यानाऽऽदिना । भावनाविशेषरूपेण, हितदं हितकारि हितफलमेवेति ॥ ७ ॥

एतदेवाऽऽह-

अष्टौ साधुभिरनिशं, मातर इव मातरः प्रवचनस्य ।
नियमेन न मोक्तव्याः, परमं कल्याणमिच्छद्भिः ॥ ८ ॥

अष्टौ साधुभिरनिशं प्रवचनस्य मातरो न मोक्तव्या इति संबन्धः । ताश्च मातर इव, पुत्रस्येति गम्यते । प्रवचनस्य प्रसूतिहेतुत्वेन, हितकारित्वेन च मातृत्वमवसेयम् । नियमेनावश्यंभावेन । कीदृशैः साधुभिः ?, परमं कल्याणमिच्छद्भिरैहलौकिकपारलौकिकपरमकल्याणकामैः ॥ ८ ॥

एतच्च समाख्येयम्-

एतत्सचिवस्य सदा, साधोर्नियमान्न भवभयं भवति ।
भवति च हितपत्यन्तं, फलदं विधिनाऽऽगमग्रहणम् ॥९॥

एतत्सचिवस्य प्रवचनमातृसहितस्य, सदा सर्वकालं, साधोर्यतेर्नियमान्नियमेन, न भवभयं भवति संसारभयं न जायते, निःश्रेयसविषयेच्छानिष्पत्तेः । भवति च संपद्यते च । प्रवचनमातृविधानसंपन्नस्य हितं भाव्यपायपरिहारसारत्वेनात्यन्तं प्रकर्षवृत्त्या फलदं फलहेतुर्विधिना विनयबहुमानाऽऽदरादिना, आगमग्रहणं वाचनाऽऽदिरूपेणेति ॥ ९ ॥

आगमग्रहणस्य गुर्वधीनत्वात् तद्गतमप्युपदेष्टव्यमित्याह-

गुरुपारतन्त्र्यमेव च, तद्बहुमानात्सदाशयानुगतम् ।
परमगुरुप्राप्तेरिह, बीजं तस्माच्च मोक्ष इति ॥ १० ॥

गुरुपारतन्त्र्यमेव च गुर्वायत्तत्वम्,तद्बहुमानात्तद्गुरुविषयाऽऽन्तरप्रीतिविशेषात् । [न तु दृष्टिमात्रज्ञानात्] सदाशयानुगतम् सदाशयः संसारक्षयहेतुर्गुरुत्वं ममेत्येवंभूतः कुशलपरिणामः, तेनानुगतं गुरुपारतन्त्र्यम् । परमगुरुप्राप्तेरिह सर्वज्ञप्राप्तेर्बीजम् , गुरुबहुमानाज्जन्मान्तरे तथाविधपुण्योपादानेन सर्वज्ञदर्शनसंभवाद् गुरुपारतन्त्र्यं सर्वज्ञप्राप्तिबीजं भवति । तस्माच्चैवंविधाद्गुरुपारतन्त्र्यान्मोक्षः [इति हेतोर्गुरुपारतन्त्र्यं साधुनाऽवश्यं विधेयमिति] ॥ १० ॥

पूर्वोक्त एव वस्तुनि सकृत्ताऽऽदौ क्रियासंबन्धं दर्शयति-

इत्यादि साधुवृत्तं, मध्यमबुद्धेः सदा समाख्येयम् ।
आगमतत्त्वं तु परं, बुधस्य भावप्रधानं तु ॥ ११ ॥

मध्यमबुद्धेरेवमादि साधुवृत्तं प्रस्तुतम्,सदा समाख्येयं प्रकाशनीयम, आगमतत्त्वं तु पूर्वोक्तं परं केवलमेव, बुधस्य प्राङ्निरूपितस्य,भावप्रधानं तु परमार्थसारं समाख्येयमिति ॥११॥

कृतसंबन्धमेव बुधोपदेशमाह-

वचनाऽऽराधनया खलु, धर्मस्तद्बाधया त्वधर्म इति ।
इदमत्र धर्मगुह्यं, सर्वस्वं चैतदेवास्य ॥ १२ ॥

वचनाऽऽराधनया आगमाऽऽराधनयैव,खलुशब्द एवकारार्थः। धर्मः श्रुतचारित्ररूपः, संपद्यते । तद्बाधया तु वचनबाधया त्वधर्म इति । इदमत्र विधिप्रतिषेधरूपं वचनमागमाऽऽख्यं धर्मगुह्यं धर्मरहस्यम, सर्वस्वं चैतदेवाऽऽस्य धर्मस्य,एतद् वचनमेव सर्वस्वं सर्वसारो वर्तत इति ॥ १२ ॥

अथ किमर्थं बुधस्यैवमुपदेशः क्रियते सकलानुष्ठानोपसर्जनीभावाऽऽपादनद्वारेणेत्याशङ्क्य तन्मूलत्वं सकलानुष्ठानानामुपदर्शयन्नाह-

यस्मात्प्रवर्त्तकं भुवि, निवर्त्तकं चान्तराऽऽत्मनो वचनम् ।
धर्मश्चैतत्संस्थो, मौनीन्द्रं चैतदिह परमम् ॥ १३ ॥

यस्मात् प्रवर्त्तकं स्वाध्यायध्यानाऽऽदिषु विधेयेषु,क्वचि जन्यलोके,निवर्त्तकं च हिंसाऽनृताऽऽदिभ्यः सकाशादन्तराऽऽत्मनो मनसो वचनमागमरूपं, धर्मश्चैतत्संस्थो वचनसंस्थो वचने संतिष्ठत इति कृत्वा मौनीन्द्रं चैतद्वचनमिह प्रक्रमे परमं प्रधानम् । एतदुक्तम्-" सर्वज्ञोक्तेन शास्त्रेण, विदित्वा योऽत्र तत्त्वतः । न्यायतः क्रियते धर्मः, स धर्मः स च सिद्धये ॥ १ ॥" ॥१३॥

किमेवं वचनमाहात्म्यं ख्याप्यत इत्याह-

अस्मिन् हृदयस्थे सति, हृदयस्थत्वतो मुनीन्द्र इति ।
हृदयस्थिते च तस्मि-न्नियमात्सर्वार्थसंसिद्धिः ॥१४॥

अस्मिन् प्रवचने आगमे, हृदयस्थे सति हृदयप्रतिष्ठिते सति, हृदयस्थश्चित्तस्थस्तत्त्वतः परमार्थेन, मुनीन्द्रः सर्वज्ञ इति कृत्वा,हृदयस्थिते च तस्मिन् भगवति मुनीन्द्रे नियमान्नियमेन, सर्वार्थसंसिद्धिः सर्वार्थनिष्पत्तिः ॥ १४ ॥

किमेवं सर्वप्रयोजनसिद्धिद्वारेण भगवान् संस्तूयत इत्याह-

चिन्तामणिः परोऽसौ, तेनैवं भवति समरसाऽऽपत्तिः ।
सैवेह योगिमाता, निर्वाणफलप्रदा प्रोक्ता ॥ १५ ॥

चिन्ता रत्नं चिन्तामणिः, परः प्रकृष्टोऽसौ भगवान् सर्वज्ञस्तेन भगवतैवमागमबहुमानद्वारेण, भवति जायते, समरसाऽऽपत्तिः समताऽऽपत्तिः । आगमाभिहितसर्वज्ञस्वरूपोपयोगोपयुक्तस्य तदुपयोगाऽनन्यवृत्तेः परमार्थतः सर्वज्ञरूपत्वाद् बाह्याऽऽलम्बनाऽऽकारोपरक्तत्वेन मनसः समापत्तिर्ध्यानविशेषरूपा, तत्फलभूता वा समरसाऽऽपत्तिरित्यभिधीयते । यथोक्तं योगशास्त्रे- " क्षीणवृत्तेरभिजात्यस्येव मणेर्ग्राह्यग्रहीतृग्रहणेषु तत्स्थतदञ्जनता समापत्तिः ।" सैवेह प्रस्तुता समापत्तिरभिलप्यते योगिमाता योगिजननी, योगी चेह सम्यक्त्वाऽऽदिगुणः पुरुषः । यथोक्तम्-"सम्यक्त्वज्ञानचारित्र-योगः सयोग उच्यते । एतद्योगाद्धियोगी स्या-त्परमब्रह्मसाधकः॥१॥" सैव विशिष्यते-निर्वाणफलप्रदा निर्वाणकार्यप्रसाधनी प्रोक्ता तद्विद्भिराचार्यैः ॥१५॥

बालाऽऽदीनां सकर्मदेशनाविधिरधिकृतः,तमेव निगमयन्नाह-

इति यः कथयति धर्मं, विज्ञायौचित्ययोगमनघमतिः ।
जनयति स एनमतुलं, श्रोतृषु निर्वाणफलदमङ्गम् ॥१६॥

इति यः कथयति धर्ममेवमुक्तनीत्या यो गुरुर्धर्मं कथयति, विज्ञाय ज्ञात्वा, औचित्ययोगमौचित्यव्यापारं, तत्संबन्धं वा, अनघमतिर्निर्दोषबुद्धिर्जनयति स गुरुरेनं धर्ममतुलमनन्यसदृशं श्रोतृषु शुश्रूषाप्रवृत्तेषु, निर्वाणफलदं मोक्षफलप्रदम, अङ्गमत्यर्थमिति ॥ १६ ॥ षो० २ विव० । श्रीवीरतीर्थङ्करे देशनां दत्त्वा देवच्छन्दान्तः प्राप्ते सति एकादशगणधरमध्याद् ज्येष्ठत्वाद्गौतम एव धर्मदेशनां ददाति, पट्टधारित्वेन स्थापितत्वात्। सुधर्मस्वामी वा,अन्यो वा यः कश्चिद् गणधरो वेति ? उच्यते,उत्तरम-दीक्षया ज्येष्ठत्वात्सति गौतमस्वामिनि गौतमस्वाम्येव धर्मदेशनां विधत्ते, असति च तस्मिन्नन्योऽपि यो ज्येष्ठो भवति, स विधत्ते इति । २७७ प्र० । सेन० ३ उल्ला० ।

धम्मदेसणाजोग्ग-धर्मदेशनायोग्य-त्रि० । श्रोकोत्तरधर्मप्रज्ञापनार्हे,"स धर्मदेशनायोग्यो,मध्यस्थत्वाज्जिनैर्मतः॥" ध० १ अधि० ।

धम्मधण-धर्मधन-न० । धर्माऽऽत्मके द्रव्ये,जीवा० १२ अधि० ।

" दाणेऊण धणाणिहिं, तेसिं उप्पाडिआणि अच्छीणि । नाऊण

वि जिणवयणं, जे इह विहलंति धम्मधणं ॥ १ ॥ " संघा० १ अधि० १ प्रस्ता० ।

धम्मधरोद्धरणमहावराह–धर्मधरोद्धरणमहावराह–पुं० । धर्मः सर्वज्ञप्रणीतः, स एव जीवाऽऽदिपदार्थाऽऽधारत्वेन धरा पृथिवी, तस्या यदुद्धरणं स्वरूपत्रंशरक्षणाद् यथाऽवस्थितत्वेनावस्थापनम्, तद्विषये महावराह आदिवराहो धर्मधरोद्धरणमहावराहः । धरायां महावराहवद् धर्मस्यावस्थापके, "धम्मधरोद्धरणमहा-वराहजिणचंदसूरिसिस्साणं । " प्रव० २७६ द्वार ।

धम्मधम्मिपत्ति–धर्मधर्मिप्राप्ति–स्त्री० । धर्माणां धर्मिरूपेण प्राप्तिः धर्मधर्मिप्राप्तिः । धर्माणां धर्मिरूपेण प्राप्तौ, अने० १ अधि० ।

धम्मधम्मिभाव–धर्मधर्मिभाव–पुं० । धर्मधर्मितायाम्, आ० म० १ अ० १ खण्ड । (धर्मधर्मिणोर्भेदाभेदविचारो ' धम्म ' शब्देऽनुपदमेव २६६३ पृष्ठे गतः)

धम्मधुरा–धर्मधुरा–स्त्री० । धर्म एवातिसात्त्विकैरुह्यमानतया धूरिव धूर्धर्मधुरा । उत्त० १४ अ० । धर्माऽऽत्मिकायां धुरि, "धणेण किं धम्मधुराहिगारे ।" धर्मधुराधिकारे दशविधयतिधर्मधूर्वहनाधिकारे । उत्त० १४ अ० । धर्मचिन्तायाम्, बृ० १ उ० ।

धम्मपइण्ण–धर्मप्रतिज्ञ–त्रि० । धर्मकरणाभ्युपगमपरे, व्य० १ उ० ।

धम्मपक्खिय–धर्मपाक्षिक–त्रि० । पुण्योपादानभूते, सूत्र० २ श्रु० २ अ० ।

धम्मपडिमा–धर्मप्रतिमा–स्त्री० । धर्मः श्रुतचारित्रलक्षणः, तद्विषया प्रतिमा प्रतिज्ञा, धर्मप्रधानं शरीरं वा धर्मप्रतिमा । धर्मविषयकप्रतिज्ञायाम्, धर्मप्रधाने शरीरे च । स्था० १ ठा० ।

तत्स्वरूपमाह–

" एगा धम्मपडिमा,जं से आया पज्जवजाए ।" प्राग्वन्नवरमपर्यवा ज्ञानाऽऽदिविशेषा जाता यस्य स पर्यवजातो, भवतीति शेषः, विशुद्ध्यतीत्यर्थः । आहिताग्न्यादित्वाच्च जातशब्दस्योत्तरपदत्वमिति । अथवा–पर्यवान्, पर्यवेषु वा यातः प्राप्तः पर्ययातः । अथवा–पर्यवः परिरक्षा, परिरक्षानं वा । शेषं तथैवेति । स्था० १ ठा० ।

धम्मपण्णत्ति–धर्मप्रज्ञप्ति–स्त्री० । धर्मप्ररूपणायाम्, धर्मप्ररूपणावति दर्शने च । उपा० ६ अ० । " महावीरस्सतिए धम्मपण्णत्तिं उवसंपज्जित्ता णं विहरित्तए । " उपा० १ अ० । धर्मप्रज्ञप्तिर्यथावस्थितधर्मप्रज्ञापनात् । दशवैकालिकस्य षड्जीवनिकायाऽऽख्येऽध्ययने च । दश० ४ अ० । " आयप्पवायपुव्वा, निज्जूढा होइ धम्मपण्णत्ती । " दश० १ अ० ।

धम्मपण्णवणा–धर्मप्रज्ञापना–स्त्री० । धर्मस्य क्षान्त्यादिदशलक्षणोपेतस्य प्रज्ञापना प्ररूपणा धर्मप्रज्ञापना । धर्मप्ररूपणायाम्, " धम्मपण्णवणा जा सा ।" सूत्र० १ श्रु० १ अ० २ उ० ।

धम्मपत्थ–धर्मपथ्य–त्रि० । धर्माय पथ्यमिव । धर्माय हिते, धर्मश्रवण–तत्परस्याऽऽस्वाद–धार्मिकसत्त्वसंसर्गादिरूपे, पो० ४ विव० ।

धम्मपय–धर्मपद–न० । धर्मफलके सिद्धान्तपदे, " जइसंतिए धम्मफलाणि सिक्खे । " दश० ६ अ० १ उ० । क्षान्त्यादिके च । " विकरण ते धम्मपयं अणुत्तरं । " आचा० १ श्रु० ५ अ० ४ उ० ।

धम्मपरंपरा–परम्पराधर्म–त्रि० । परम्परया धर्मो यस्य स परम्पराधर्मः । प्राकृतत्वाच्च परम्पराशब्दस्य परनिपातः । परम्परया धर्मं प्राप्ते, उत्त० १४ अ० ।

धम्मपरायण–धर्मपरायण–त्रि० । धर्मानुष्ठायिनि, दर्श० ४ अ० । धर्मध्यानतत्परे, उत्त० १४ अ० । धर्मैकनिष्ठे, उत्त० १४ अ० । " एवं ते कमसो बुद्धा, सव्वे धम्मपरायणा ।" उत्त० १४ अ० । " सथा धम्मपरायणो । " दर्श० ४ तत्त्व ।

धम्मपरूवणा–धर्मप्ररूपणा–स्त्री० । धर्मविषयायां प्ररूपणायाम्, श्रीविमलनाथप्रपौत्रश्रीधर्मघोषस्थविरपार्श्वे प्रव्रज्य महाबलकुमारः पञ्चमकल्पे दशाब्धिस्थितिमनुपाल्यानन्तरं श्रीवीरपार्श्वे प्रव्रज्य सिद्ध इति भगवत्येकादशशतैकादशोद्देशकाऽऽदावुक्तम्, तथा सति श्रीविमलनाथवीरयोः श्रीकल्पसूत्राऽऽदिग्रन्थे महदन्तरं दृश्यते, तत्कथमिति प्रश्ने, उत्तरम्–भगवतीवृत्तौ द्वितीयवृत्तौ द्वितीयव्याख्यानप्रपौत्रके शिष्यसन्ताने इत्युक्तमस्ति, तेन कल्पसूत्रोक्तकालमानमाश्रित्य न काऽप्यनुपपत्तिरिति । ३५३ प्र० । सेन० ३ उल्ला० ।

धम्मपाढग–धर्मपाठक–त्रि० । धर्माध्यापके, आ० म० १ अ० १ खण्ड ।

धम्मपारग–धर्मपारग–त्रि० । धर्मस्य श्रुतचारित्राऽऽत्मकस्य पारगः सम्यग् वेत्ता धर्मपारगः । धर्मस्य सम्यग् वेत्तरि, " बुद्धा धम्मस्स पारगा । " आचा० १ श्रु० ८ अ० ८ उ० ।

धम्मपाल–धर्मपाल–पुं० । कौशाम्बीवास्तव्यस्य धनयक्षस्य श्रेष्ठिनः स्वनामख्याते पुत्रे, ज्ञा० १३ अ० ।

धम्मपिवासिय–धर्मपिपासित–त्रि० । पिपासेव पिपासा, प्राप्तेऽपि धर्मेऽतृप्तिः, धर्मपिपासा संजाताऽस्येति धर्मपिपासितः । धर्मप्राप्तावतृप्ते, त० । भ० ।

धम्मपुरिस–धर्मपुरुष–पुं० । अर्हति, स्था० । (' पुरिस ' शब्दे व्याख्या वक्ष्यते) धर्मः क्षायिकचारित्राऽऽदिः, तदर्जनपरः पुरुषो धर्मपुरुषः । " धम्मपुरिसो तदज्जणवावारपरो जहा साहू । " इत्युक्तलक्षणे पुरुषभेदे, स्था० ३ ठा० १ उ० । विशे० । आ० म० । आ० चू० । "सुहावहं धम्मपुरिसाणं ।" धर्मपुरुषाणां धर्मप्रधाननराणाम् । पञ्चा० ६ विव० ।

धम्मप्पएस–धर्मप्रदेश–पुं० । धर्मशब्देन धर्मास्तिकायो गृह्यते, तस्य प्रकृष्टो देशः प्रदेशो निर्विभागो भागो धर्मप्रदेशः । धर्मास्तिकायस्य निर्विभागे भागे, अनु० ।

धम्मप्पभ–धर्मप्रभ–पुं० । अञ्चलगच्छीये सिंहतिलकसूरिगुरौ, अयमाचार्यः विक्रमसंवत् १३३१ मिते जातः, १३६३ मिते स्वर्गतः । जै० इ० ।

धम्मप्पलज्जण–धर्मप्रलज्जन–त्रि० । धर्मे प्रलज्यते आसज्यते इति धर्मप्रलज्जनः । औ० । धर्मप्रायेषु कर्मसु प्रकर्षेण रज्यत इति धर्मप्रलज्जनः । ' रलयोरैक्यमिति ' कृत्वा रस्य स्थाने लकारः । धर्माऽऽसक्ते, ज्ञा० १ श्रु० १८ अ० ।

धम्मप्पलोइ (ण्)–धर्मप्रलोकिन्–पुं० । धर्मं प्रलोकयत्युपादेयतया प्रेक्षते पार्श्वस्थितेषु वा गवेषयतीति धर्मप्रलोकी । धर्मस्यापादेयतया प्रेक्षके, पार्श्वस्थितेषु धर्मगवेषके च । औ० । ज्ञा०

धम्मप्पवाइ (ण्)–धर्मप्रवादिन्–पुं० । धर्मं प्रवदितुं शीलं यस्य स धर्मप्रवादी । धर्मप्रावादुके, आचाराङ्गचतुर्थाध्ययनस्य द्वितीयोद्देशकार्थाधिकारमधिकृत्य–" विइए धम्मप्पवाइयपरिक्खा ।" धर्मं प्रवदितुं शीलं येषां ते धर्मप्रवादिनः, त एव धर्मप्रवादिकाः, धर्मप्रावादुका इत्यर्थः । तेषां परीक्षा युक्तायुक्तविचारणम् । आचा० १ श्रु० ४ अ० २ उ० ।

धम्मप्पसंसा–धर्मप्रशंसा–स्त्री० । दुर्गतौ प्रपतन्तमात्मानं धारयतीति धर्मः, तस्य प्रशंसा धर्मप्रशंसा । सकलपुरुषार्थानामेव धर्मः प्रधानमित्येवंरूपे धर्मस्य स्तवे, तथाऽन्यैरप्युक्तम्–" रैक्षो धनार्थिनां धर्मः, कामिनां सर्वकामदः । धर्म एवापवर्गस्य, पारम्पर्येण साधकः " ॥ १ ॥ दश० १ अ० । षो० ।

धम्मप्पावाइय–धर्मप्रावादुक–पुं० । धर्मप्रवादिनि, आचा० १ श्रु० १४ अ० १ उ० ।

धम्मप्पिय–धर्मप्रिय–त्रि० । धर्ममित्रे, आचा० २ श्रु० १ चू० ४ अ० १ उ० ।

धम्मफल–धर्मफल–न० । धर्मस्य फलं धर्मफलम्, धर्मेण वा फलं धर्मफलम् । धर्मप्रयोजने, दश० १ अ० ।

धर्मफलमाह–

जया जीवमजीवा य, दो वि एए वियाणइ ।
तया गई बहुविहं, सव्वजीवाण जाणइ ॥ १४ ॥

यदा यस्मिन् काले, जीवानजीवांश्च द्वावप्येतौ विजानाति विविधं जानाति, तदा तस्मिन् काले, गतिं नरकगत्यादिरूपां, बहुविधां स्वपरगतभेदेनानेकप्रकारां,सर्वजीवानां जानाति । यथाऽवस्थितजीवाजीवपरिज्ञानमन्तरेण गतिपरिज्ञानाऽभावात् ॥१४॥

उत्तरोत्तरं फलवृद्धिमाह–

जया गई बहुविहं, सव्वजीवाण जाणइ ।
तया पुण्णं च पावं च, बंधं मोक्खं च जाणइ ॥ १५ ॥

यदा गतिं बहुविधां सर्वजीवानां जानाति, तदा पुण्यं च पापं च बहुविधगतिनिबन्धनं, तथा बन्धं जीवकर्मयोगदुःखलक्षणं, मोक्षं च तद्वियोगसुखलक्षणं जानाति ॥१५॥

जया पुण्णं च पावं च, बंधं मोक्खं च जाणइ ।
तया निव्विंदए भोए, जे दिव्वे जे य माणुसे ॥ १६ ॥
जया निव्विंदए भोए, जे दिव्वे जे य माणुसे ।
तया चयइ संजोगं, सब्भिंतरं च बाहिरं ॥ १७ ॥

यदा पुण्यं च पापं च बन्धं मोक्षं च जानाति, तदा निर्विन्ते मोहाज्ञानात्सम्यग्विचारयत्यसारदुःखरूपतया भोगान् शब्दाऽऽदीन् यान् दिव्यान् यांश्च मानुषान्, शेषास्तु वस्तुतो भोगा एव न भवन्ति ॥ १६ ॥ (जया इत्यादि) यदा निर्विन्ते भोगान् यान् दिव्यान्, यांश्च मानुषान्, तदा त्यजति संयोगं संबन्धं द्रव्यतो भावतः साभ्यन्तरं बाह्यं क्रोधाऽऽदिहिरण्याऽऽदिसंबन्धमित्यर्थः ॥ १७ ॥

जया चयइ संजोगं, सब्भिंतरं च बाहिरं ।
तया मुंडे भवित्ता णं, पव्वइए अणगारियं ॥ १८ ॥

यदा त्यजति संयोगं साभ्यन्तरं बाह्यम् , तदा मुण्डो भूत्वा द्रव्यतो भावतश्च प्रव्रजति प्रकर्षेण व्रजत्यपवर्गं प्रत्यनगारं द्रव्यतो भावतश्चाविद्यमानागारमिति भावः ॥ १८ ॥

जया मुंडे भविता णं, पव्वइए अणगारियं ।
तया संवरमुक्किट्ठं, धम्मं फासे अणुत्तरं ॥ १९ ॥

यदा मुण्डो भूत्वा प्रव्रजत्यनगारम् (तया संवरमुक्किट्ठं ति) प्राकृतशैल्या उत्कृष्टं संवरं धर्मं सर्वप्राणातिपाताऽऽदिविनिवृत्तिरूपं, चारित्रधर्ममित्यर्थः । स्पृशत्यनुत्तरं सम्यगासेवत इत्यर्थः ॥ १९ ॥

जया संवरमुक्किट्ठं, धम्मं फासे अणुत्तरं ।
तया धूणइ कम्मरयं, अबोहिकलुसं कडं ॥ २० ॥

यदोत्कृष्टसंवरं धर्मं स्पृशत्यनुत्तरं तदा धुनाति-अनेकार्थत्वात्पातयति कर्मरजः कर्मैवाऽऽत्मरञ्जनाद्रज इव रजः । किंविशिष्टमित्याह-अबोधिकलुषं कृतम्-अबोधिकलुषेण मिथ्यादृष्टिनोपात्तमित्यर्थः ॥२०॥

जया धूणइ कम्मरयं, अबोहिकलुसं कडं ॥
तया सव्वत्तगं नाणं, दंसणं चाभिगच्छइ ॥ २१ ॥

यदा धुनाति कर्मरजः अबोधिकलुषं कृतम्, तदा सर्वत्रगं ज्ञानमशेषज्ञेयविषयं, दर्शनं चाशेषदृश्यविषयम्,अभिगच्छत्यावरणाभावादधिकयेन प्राप्नोतीत्यर्थः ॥ २१ ॥

जया सव्वत्तगं नाणं, दंसणं चाभिगच्छइ ।
तया लोगमलोगं च, जिणो जाणइ केवली ॥ २२ ॥

यदा सर्वत्रगं ज्ञानं दर्शनं चाधिगच्छति, तदा लोकं चतुर्दशरज्ज्वात्मकमलोकं चानन्तं जिनो जानाति केवली, लोकौ च सर्वैनान्यतरमेवेत्यर्थः ॥ २२ ॥

जया लोगमलोगं च, जिणो जाणइ केवली ।
तया जोगे निरुंभित्ता, सेलेसिं पडिवज्जइ ॥ २३ ॥

यदा लोकमलोकं च जिनो जानाति केवली, तदोचितसमयेन योगानिरुध्य मनोयोगाऽऽदीन् शैलेशीं प्रतिपद्यते भवोपग्राहिकर्मांशक्षयाय ॥ २३ ॥

जया जोगे निरुंभित्ता, सेलेसिं पडिवज्जइ ।
तया कम्मं खवित्ता णं, सिद्धिं गच्छइ नीरओ ॥ २४ ॥

यदा योगानिरुध्य शैलेशीं प्रतिपद्यते, तदा कर्म क्षपयित्वा भवोपग्राह्यपि सिद्धिं गच्छति लोकान्तक्षेत्ररूपां, नीरजाः सकलकर्मरजोविनिर्मुक्तः ॥ २४ ॥

जया कम्मं खवित्ता णं, सिद्धिं गच्छइ नीरओ ।
तया लोगमत्थयत्थो, सिद्धो हवइ सासओ ॥ २५ ॥

यदा कर्म क्षपयित्वा, सिद्धिं गच्छति नीरजाः, तदा लोकमस्तकस्थः त्रैलोक्योपरिवर्ती, सिद्धो भवति शाश्वतः कर्मबीजाभावादनुत्पत्तिधर्मेति भावः । उक्तो धर्मफलाऽऽख्यः षष्ठोऽधिकारः ॥२५॥

साम्प्रतमिदं धर्मफलं यस्य दुर्लभं तमभिधित्सुराह–

मुहसायगस्स समण–स्स सायाउलस्स निगामसाइस्स ।
उच्छोलणापहाविस्स, दुल्लहा सुगइ तारिसगस्स ॥२६॥

सुखाऽऽस्वादकस्याभिष्वङ्गेण प्राप्तसुखमोक्तुः,श्रमणस्य द्रव्यप्रव्र-

जितस्य,साताऽऽत्मकस्य भाविसुखार्थं व्याप्तिस्तस्य,निकामशायिनः सूत्रार्थवेलामप्युल्लङ्घ्य शयानस्य, उत्सोलनाप्रधाविन उत्सोलनयोद्घाट्यतनया प्रकर्षेण धावति पादाऽऽदिशुद्धिं करोति यः स तथा तस्य । किम् ?, इत्याह--दुर्लभा दुष्प्रापा, सुगतिः सिद्धिरूपैवसाता, तादृशस्य भगवदाज्ञालोपकारिण इति गाथार्थः ॥ २६ ॥

इदानीमिदं धर्मफलं यस्य सुलभं तमाह--

तवगुणपहाणयस्स य, उज्जुमई खंतिसंजमरयस्स ।
परिसहे जिणंतस्स, सुलहा सुगइ तारिसगस्स ॥ २७ ॥
पच्छा वि ते पयाया, खिप्पं गच्छंति अमरभवणाइं ।
जेसिं पिओ तवो संजमो य खंती य बंभचेरं च ॥२८॥

तपोगुणप्रधानस्य षष्ठाष्टमाऽऽदितपोधनवतः,ऋजुमतेर्मार्गप्रवृत्तबुद्धेः, क्षान्तिसंयमरतस्य क्षान्तिप्रधानसंयमाऽऽसेविन इत्यर्थः। परीषहान् क्षुत्पिपासाऽऽदीन्, जयतोऽभिभवतः,सुलभा सुगतिरुक्तलक्षणा, तादृशस्य भगवदाज्ञाकारिण इति गाथार्थः ॥२७॥ पश्चादपि वृद्धावस्थायामपि, ते प्रयाताः प्रकर्षेण याता अविराधितसंयमा अपि सन्मार्गं प्रपन्नाः, शीघ्रं गच्छन्ति अमरभवनानि देवविमानानि । ते के ?, इत्याह-येषां प्रियं तपः संयमः, क्षान्तिः, ब्रह्मचर्यं च ॥ २८ ॥ दश० ४ अ०।

धम्मभट्ठ-धर्मभ्रष्ट-त्रि० । धर्मच्युते, दश० १ चू० ।

धम्ममइ-धर्ममति-स्त्री० । धर्मबुद्धौ, " इहजणविप्पओगे, आवई पमियस्स रोगघत्थस्स । वइपरिणामेय तहा, धम्ममई होइ पायेण ॥१॥ " दर्श० १ तत्त्व ।

धम्ममग्ग-धर्ममार्ग-पुं० । परलोकगामिनि मार्गे, पं० व० ४ द्वार ।

धम्ममाण-ध्मायमान-त्रि० । भस्त्रावातेनोद्दीप्यमाने, " लोहगरधम्ममाणधमधमिंतघोसं । " उपा० २ अ० । अग्निना तप्यमाने, ज्ञा० १ श्रु० ए अ० ।

धम्ममित्त-धर्ममित्र-पुं० । धर्मसुहृदि, षो० ६ विव० । पद्मप्रभजिनस्य पूर्वभवनामधेये, स० ।

धम्ममुत्ति-धर्ममूर्त्ति-स्त्री० । अञ्चलगच्छीये शिवसिंहसूरिशिष्ये जयकीर्त्तिसूरिगुरौ, जै० इ० ।

धम्ममुह-धर्ममुख-न० । धर्माणां मुखमिव मुखमुपायो धर्ममुखम् । धर्मोपाये, "धम्माणं कासवो मुहं ।" उत्त० पाई० २५ अ०।

धम्ममूल-धर्ममूल-न० । धर्मलक्षणवृक्षस्य मूलमिव मूलम् । धर्ममूलभूते जीवदयाऽऽदिके, दर्श० २ तत्त्व । (तानि च 'धम्म' शब्देऽस्मिन्नेव भागे २६७३ पृष्ठे दर्शितानि)

धम्ममेह-धर्ममेघ-पुं० । यावत्तत्त्वभावनेन फलमभिप्सोः सर्वथा विवेकख्यातौ, धर्ममुक्तकृष्णं मेहति सिञ्चतीति धर्ममेघः, प्रसंख्याने कुशीदस्य सर्वथा विवेकख्यातौ, धर्ममेघः समाधिरित्युक्तलक्षणे असंप्रज्ञातापरनामधेये समाधिभेदे, द्वा० २० द्वा० ।

धम्मय-धर्मद-पुं० । ' धम्मद ' शब्दार्थे, स० १ सम० ।

धम्मरय-धर्मरत-त्रि० । चारित्रधर्माऽऽसक्तचित्ते, पञ्चा० ५ विव० । उद्युक्तविहारिणि, " धम्मरयपुव्वसूरीणं । " उद्युक्तविहारिचिरन्तनाऽऽचार्याणाम् । जीवा १ अधि० ।

धम्मरयण-धर्मरत्न-न० । धर्म एव रत्नं धर्मरत्नम् । दर्श० २ तत्त्व । धर्माणां मध्ये यो रत्नमिव वर्तते जिनप्रणीतो देशविरतिसर्वविरतिरूपो धर्मो धर्मरत्नम् । ध० १ अधि० । जिनप्रणीतदेशविरतिसर्वविरत्यात्मकधर्मरूपे सकलैहिकाऽऽमुष्मिकसम्पत्तिजनकेऽचिन्त्यचिन्तामणौ, दश० ४ अ० ।

इह हि हेयोपादेयाऽऽदिपदार्थसार्थपरिज्ञानप्रवणस्य जन्मजरामरणरोगशोकाऽऽदिदुर्गदौर्गत्यनिपीडितस्य भव्यसत्त्वस्य स्वर्गापवर्गाऽऽदिसुखसंपत्संपादनाबन्ध्यनिबन्धनं सकलमरत्नमुपादातुमुचितं,तदुपादानोपायश्च गुरूपदेशमन्तरेण न सम्यग् विज्ञायते, न चानुपायप्रवृत्तानामभीष्टार्थसिद्धिरित्यतः कारुण्यपुण्यचेतस्तया धर्माचार्यैर्नां धर्मोपादानपालनोपदेशं दातुकामः सूत्रकारः शिष्टमार्गानुगामितया पूर्वं तावदिष्टदेवतानमस्काराऽऽदिप्रतिपादनार्थमिमां गाथामाह-

नमिऊण सयलगुणरय-णकुलहरं विमलकेवलं वीरं ।
धम्मरयणत्थियाणं, जणाण वियरेमि लवएसं ॥ १ ॥

इह पूर्वार्द्धेनाऽभीष्टदेवतानमस्कारद्वारेण विघ्नविनायकोपशान्तये मङ्गलमभिहितम्,उत्तरार्द्धेन,चाभिधेयमिति । संबन्धप्रयोजने पुनः सामर्थ्यगम्ये । तथाहि-संबन्धस्तावदुपायोपेयलक्षणः,साध्यसाधनलक्षणो वा,तत्रेदं शास्त्रमुपायः,साधनं वा;साध्यमुपेयं वा शास्त्रार्थपरिज्ञानमिति । प्रयोजनं तु द्विविधम्-कर्तुः, श्रोतुश्च । पुनरनन्तर-परम्परभेदादेकैकं द्वेधा । तत्रानन्तरं-कर्तुः स्वानुग्रहः, परम्परम्-अपवर्गाऽऽदिप्राप्तिः। तथा चोक्तम-"सर्वज्ञोक्तोपदेशेन, यः सत्त्वानामनुग्रहम् । करोति दुःखतप्तानां, स प्राप्नोत्यचिराच्छिवम ॥ १ ॥" इति । श्रोतुः पुनरनन्तरं-शास्त्रार्थपरिज्ञानं, परम्परं-तस्याप्यपवर्गप्राप्तिः । उक्तं च-"सम्यक् शास्त्रपरिज्ञाना-च्चिरका भवतो जनाः । लब्ध्वा दर्शनसंशुद्धिं, ते यान्ति परमां गतिम् ॥ १ ॥" इति । साम्प्रतं सम्बन्धाख्या-नत्वा प्रणम्य, कम् ?, वीरं कर्मविदारणात्तपसो विराजनाद्वयर्थवीर्ययुक्तत्वाच्च जगति यो वीर इति ख्यातः। यदवादि-" विदारयति यत्कर्म, तपसा तद् विराजते । तपोवीर्येण युक्तश्च, तस्माद्वीर इति स्मृतः ॥ १ ॥ " तं वीरं श्रीमद्वर्द्धमानस्वामिनम्। किंविशिष्टम्-सकलगुणरत्नकुलगृहम्-सकलाः समस्ता ये गुणाः क्षमादयो ज्ञेयाऽऽदयः,त एव रौद्रदारिद्र्यमुद्रोद्भेदकत्वात्सकलकल्याणकलापकारणत्वाच्च रत्नानि सकलगुणरत्नानि, तेषां कुलगृहमुत्पत्तिस्थानं, तं सकलगुणरत्नकुलगृहम्। पुनः किंविशिष्टम् ?-विमलकेवलम्-विमलं सकलसदाचारककर्मोपरेणुसंपर्कविकलत्वेन निर्मलं केवलं केवलाऽऽख्यं ज्ञानं यस्य स विमलकेवलस्तं, क्त्वाप्रत्ययस्य चोत्तरक्रियासापेक्षत्वादुत्तरक्रियामाह-वितरामि प्रयच्छामि,कम?,उपदेशम्-उपदिश्यते इत्युपदेशो हिताहितप्रवृत्तिनिवृत्तिनिमित्तवचनरचनाप्रपञ्चस्तम्, केभ्यो ?, जनेभ्यो लोकेभ्यः। कथंभूतेभ्यः ?,धर्मरत्नार्थिभ्यो दुर्गतिप्रपतन्तं प्राणिगणं धारयति,सुगतौ धत्ते चेति धर्मः। उक्तं च-"दुर्गतिप्रसृतान् जन्तून्, यस्माद्धारयते ततः । धत्ते चैतान् शुभे स्थाने, तस्माद्धर्म इति स्मृतः ॥१॥" इति। स एव रत्नं प्राक्प्रावर्णितशब्दार्थं, तदर्थिनस्ते मृग्यन्ते इत्येवं शीला ये ते धर्मरत्नार्थिनस्तेभ्यः,सूत्रे च षष्ठी चतुर्थ्यर्थे प्राकृतलक्षणवशात्। यदाहुः प्रभुश्रीहेमचन्द्रसूरिपादाः स्वकृतप्राकृतलक्षणे-" चतुर्थ्याः षष्ठी ॥८।३।१३१॥ " इति गाथाक्षरार्थः ॥ भावार्थः पुनरयम्-नत्वेति पूर्वकालाभिधायिना क्त्वाप्रत्ययेन स्यादूर्वा-

दृशार्हदनादसंवादिना पदेनैकान्तनित्यानित्यवस्तुविस्तारवादिप्रवादिमृगयोर्मुखबन्धो व्यधायि, यतोऽनैकान्तेन नित्योऽनित्यो वा कर्त्ता क्रियाद्वयं कर्तुमीष्टे, क्रियाजनने कर्तृभेदात्, ततो द्वितीयक्रियाकरणे कर्तुरनित्यत्वाभावप्रसङ्गाभ्यां द्वयोरप्यप्राप्तिरिति । सकलगुणरत्नकुक्षिगृहमित्यनेन भगवतः श्रीमत्पञ्चमतीर्थाधिनाथस्य पूजातिशयः प्रकाश्यते । तथा च पूज्यन्त एवार्हत्प्रथमिकाविधीयमानाह्वनामवशसमुत्पन्नशिरःकोटीरकोटीविघट्टसंघट्टैः सुरासुरनरनिकरनायकैरपि गुणवन्तः ।

उक्तं च-

"सव्वो गुणेहिं गरुओ, गुणाहियस्स जह लोगे वीरस्स ।
संभंतमउलविउओ, सहस्सनयणो सययमेइ ॥ १ ॥" इति ।

विमलकेवलमित्यनेन तु ज्ञानातिशयसंपन्नतया प्रसिद्धसिद्धार्थपार्थिवकुलविमलनभस्तलनिशीथिनीनाथस्य जिननाथस्य वचनातिशयः प्रपञ्च्यते । यतः केवलज्ञाने सत्यवश्यंभाविनी भगवतां तीर्थकृतां सदेशनाप्रवृत्तिः, तीर्थकरनामकर्मण इत्थमेव वेद्यमानत्वात् । यदुक्तं श्रीभद्रबाहुस्वामिपादैः-" तं च कहं वेइज्जइ, अगिलाए धम्मदेसणाईहिं । " इत्यादि । वीरमिति सान्वयपदेन च भगवतः समूलकाषंकषितनिःशेषापायनिबन्धनकर्मशत्रुसङ्घातस्य चरमजिनेश्वरस्यापायापगमातिशयः प्रस्पष्टं लिङ्ग्यते, यतोऽपायभूतं भवभ्रमणकारणत्वात्सर्वमपि कर्म । तथा चाऽऽप्तमः-" सव्वं पावं कम्मं, भासिज्जइ जेण संसारे । " इति । धर्मरत्नार्थित्व इत्यनेन श्रवणाधिकारिणामर्थित्वमेव मुख्यं लिङ्गमित्यज्ञापि । यदुक्तं परोपकारभूरिभिः श्रीहरिभद्रसूरिभिः-" तत्थऽहिगारी अत्थी, समत्थओ जो न सुत्तपडिकुट्ठो । अत्था उ जो विणीओ, समुट्ठिओ पुच्छमाणो य" ॥१॥ इति । जनानामित्यनेन बहुवचनान्तेनेदमुदितं भवति-यथा नैकमेवेश्वराऽऽदिकमाश्रित्योपदेशदाने प्रवर्तितव्यं, किं तु सामान्येन सर्वसाधारणतया । तथा चाऽऽह भगवान् सुधर्मस्वामी-"जहा पुन्नस्स कत्थइ,तहा तुच्छस्स कत्थइ । जहा तुच्छस्स कत्थइ, तहा पुन्नस्स कत्थई ॥१॥" इति । वितरामित्युपदेशमितीहायमाशयः-न निजप्रज्ञाभिमानेन,न परपरिभवाभिप्रायेण,न कस्यचिदुपार्जनाय प्रवर्तते,किं तर्हि कथं नु नामाऽमी जन्तवः सद्धर्ममार्गमासाद्यासाद्यपर्यवसितं महानन्दमन्दाऽऽनन्दसंदोहमवाप्स्यन्तीत्यनुग्रहबुद्ध्या परेषामात्मनश्च ।

यदुक्तम्-

" शुद्धमार्गोपदेशेन, यः सत्त्वानामनुग्रहम् ।
करोति निठरां तेन, कृतः स्वस्याप्यसौ महान् ॥ १ ॥"

तथा-

" न भवति धर्मः श्रोतुः, सर्वस्यैकान्ततो हितश्रवणात् ।
श्रवतोऽनुग्रहबुद्ध्या, वक्तुस्त्वेकान्ततो भवति " ॥ १ ॥

इत्युक्तः सभावार्थः सकलोऽपि गाथार्थः ॥ १ ॥

अथ यथाप्रतिज्ञातं विभणिषुः प्रस्तावयन्नाह-

भवजलहिम्मि अपारे, दुल्लहं मणुयत्तणं पि जंतूणं ।
तत्थ वि आरियखेत्तं, दुल्लहं सद्धम्मवररयणं ॥ २ ॥

भवत्यस्मिन् नारकतिर्यङ्नरामररूपेण कर्मवशवर्त्तिनः प्राणिन इति भवः संसारः, स एव जन्मजरामरणादिजलधारणाज्जलधिः, तस्मिन्नादिनिधनतयाऽपारेऽहद्भिरुपदर्श्यन्ते, धम्मम्यमाणानामिति शेषः । दुर्लभं दुरापं,मनुजत्वमपि मनुष्यभावोऽपि, दूरे तावद्देशकुलजातिप्रभृतिसामग्रीत्यपेरर्थः । यज्जगदे जगदेकबन्धुना श्रीवर्द्धमानस्वामिनाऽष्टापदादागतं श्रीगौतममहामुनिं प्रति-

" दुल्लहे खलु माणुसे भवे, चिरकालेण वि सव्वपाणिणं ।
गाढा य विवागकम्मुणो, समयं गोयम ! मा पमायए ॥ ४ ॥"
इति । ध० र० । (अस्या अर्थः ' दुमपत्तय ' शब्देऽस्मिन्नेव भागे २५७० पृष्ठे उक्तः)

अन्यैरप्युक्तम्-

" संसारकान्तारमपास्तपारं, वभ्रम्यमाणो लभते शरीरी ।
कृच्छ्रेण नृत्वं सुखसस्यबीजं,प्ररूढदुष्कर्मशमेन(नूतम)नूनम् ।१।
नरेषु चक्री त्रिदशेषु वज्री, मृगेषु सिंहः प्रशमो व्रतेषु ।
मतो महीभृत्सु सुवर्णशैलो, भवेषु मानुष्यभवः प्रधानः ॥२॥ "

तथा-

" अनर्घ्येष्वपि रत्नानि, लभ्यन्ते विभवैः सुखम् ।
दुर्लभो रत्नकोट्याऽपि, क्षणोऽपि मनुजाऽऽयुषः ॥१॥ " इति ।

जन्तूनां प्राणिनां, तत्रापि मनुजत्वे सत्यपि । अनर्थहरणमिति-नार्थ्यन्ते नाभिलष्यन्ते ये दारिद्र्यदुःखोपद्रवाऽऽदयोऽपायास्ते ह्रियन्ते विध्वस्यन्ते येन तदनर्थहरणं दुर्लभं दुष्प्रापं, किं तदित्याह-सद् साधुः पूर्वापराविरोधप्रभृतिगुणगणालङ्कृतत्वेन परप्रावादुकपरिकल्पितधर्मापेक्षया शोभनो धर्मः सद्धर्मः सम्यग्दर्शनाऽऽदिकः,स एवैहिकार्थमात्रप्रदायीतररत्नापेक्षया शाश्वतानन्तमोक्षार्थदातृत्वेन वरं प्रधानं रत्नं सद्धर्मवररत्नमिति ।

अथामुमेवार्थं दृष्टान्तविशिष्टं स्पष्टयन्नाह-

जह चिंतामणिरयणं, सुलहं न हु होइ तुच्छविहवाणं ।
गुणविहववज्जियाणं, जियाण तह धम्मरयणं पि ॥ ३ ॥

यथा येन प्रकारेण, चिन्तामणिरत्नं सुप्रतीतं, सुलभं सुप्रापम्, (न हु) नैव भवति जायते, तुच्छविभवानाम्-तुच्छः स्वल्पो विभवः-कारणे कार्योपचाराद्विभवकारणं पुण्यं येषां ते तुच्छविभवाः, स्वल्पपुण्या इत्यर्थः,तेषाम्, तथाविधपशुपालवत् । तथा गुणा अक्षुद्राऽऽद्यो वक्ष्यमाणस्वरूपास्तेषां विशेषेण भवनं सत्ता गुणविभवः । अथवा-गुणा एव विभवो विभूतिर्गुणविभवः, तेन वर्जितानां रहितानां, जीवानां पञ्चेन्द्रियप्राणिनाम् । उक्तं च-"प्राण द्वित्रिचतुःप्रोक्ताः,भूतानि तरवः स्मृताः । जीवाः पञ्चेन्द्रिया ज्ञेयाः, शेषाः सत्त्वा इतीरिताः ॥१॥" अपिशब्दस्य वक्ष्यमाणस्येह संबन्धादेवं भावना कार्या-एकेन्द्रियविकलेन्द्रियाणां तावद्धर्मप्राप्तिर्नास्ति, पञ्चेन्द्रियजीवानामपि तत्तदयोग्यताहेतुगुणसामग्रीविकलानां तथा तेन प्रकारेण धर्मरत्नं सुलभं न भवतीति प्रकृते संबन्ध इति ।

पूर्वसूचितपशुपालदृष्टान्तश्चायम-

" बहुविबुधजनोपेतं, हरिरक्षितमप्सरःशतसमेतम् ।
इह अत्थि हत्थिणउरं, पुरं पुरन्दरपुरं च वरं ॥ १ ॥
तत्थ श्रेष्ठिगरिष्ठः, पुन्नागो नागदेवनामाऽऽसीत् ।
निम्मलसीलगुणधरा, वसुंधरा गेहिणी तस्स ॥ २ ॥
तत्तनयो विनयोज्ज्वल-मतिविभवभरो वसुव जयदेवः ।
दक्खो रयणपरिक्खं, सिक्खइ सो वारस समा उ ॥३॥
विज्जितान्यहासममलं, विन्नासं चिन्तितार्थदानपटुम् ।
चिन्तामणिं यमुत्तुं, सेसरयणं गणइ तत्तलसमे ॥ ४ ॥
चिन्तामणिरत्नकृते, सुकृती स कृतोद्यमः पुरे सकले ।
दृष्टं दृष्टेन घरं, घरेण भमिओ अपरितंतो ॥ ५ ॥

न च तमवाप दुरापं, पितरावूचेऽथ यद् मयाऽत्र पुरे ।
चिंतामणी न पत्तो, तो जामि तयत्थमन्नत्थ । ६ ॥
ताऽयाममाणि वत्स !, स्वच्छमते ! कल्पनैव खट्वेषा ।
अन्नत्थ वि कत्थइ न-त्थि एस परमत्थओ भवणे ॥ ७ ॥
तद्रत्नैरसपत्नै-र्यथेष्टमन्यैरपि व्यवहरञ्च ।
निर्मलकमलाकलियं, भवणं ते होइ जेणमिणं ॥ ८ ॥
इत्युक्तोऽपि स चिन्ता-रत्नाऽऽप्तौ रचितनिश्चयश्चतुरः ।
वारिज्जंतो पियरे-हिँ निग्गओ हत्थिणापुरओ ॥ ९ ॥
नगरगणग्रामाकर-कर्वटपत्तनपयोधिवलरेषु ।
तम्मग्गणपवणमणो, सुइरं भंतो किलिस्संतो ॥ १० ॥
तमलभमानो विमनाः, दध्यौ किं नास्ति सत्यमेवेदम् ?।
अहव न तस्सऽत्थित्तं, न अन्नहा होइ सत्युत्तं ॥ ११ ॥
इति निश्चित्य स चेतसि, निपुणं वस्तुमितुमारभत भूयः ।
पत्तराओ मणिखणीओ, पुच्छीपुच्छिं नियच्छंतो ॥ १२ ॥
वृद्धनरेणैकेन च, सोऽभाणि यथा मणीवर्ती हास्ति ।
खाणी मणीण तत्थ य, पवरमणी पावइ सपुन्नो ॥ १३ ॥
तत्र च जगाम मणिगण-ममलममारतमथो मृगयमाणः ।
एगो य तत्थ मिलिओ, पसुवालो वाहिसो अहियं ॥ १४ ॥
जयदेवेन निरैक्ष्यत्, वर्तुल उपलश्च करतले तस्य ।
गहिओ परिच्छिओ तह, नाओ चिंतामणि त्ति इमो ॥ १५ ॥
सोऽयाचि तेन स मुदा, पशुपालः प्राह किममुना कार्यम् ?।
अणइ वणी सगिहगओ, बालाणं कीलणं दाहं ॥ १६ ॥
सोऽजलदोदृशा इह, ननु बहवः सन्ति किं न गृह्णासि ?।
सिट्ठिसुओ भणइ अहं, समुस्सुओ नियगनिहगमणे ॥ १७ ॥
तद्देहि मह्यमेनं, त्वमन्यमपि भद्र ! लप्स्यसे ह्यत्र ।
अपरोक्षयारसील-त्तणेण तह वि हु न सो देइ ॥ १८ ॥
नन एतस्यापि च वर-मयमुपकर्त्ताऽस्तु मा स्म मूदफलः ।
इय करुणारसियमई, सिट्ठिसुओ भणइ आभीरं ॥ १९ ॥
यदि भद्र ! मम न दत्से, चिन्तामणिमेनमात्मनाऽपि ततः ।
आराहसु जेण तुहं, पि चिंतियं देइ खलु एसो ॥ २० ॥
इतरः प्रोचे यदि स-त्यमेष चिन्तामणिर्मयाऽचिन्ति ।
ता वोरकरिरकव्वर-पमुहं मह देउ लहु बहुयं ॥ २१ ॥
अथ हसितविकसितमुखः,श्रेष्ठिसुतः स्माऽऽह चिन्त्यते नैवम् ।
किं तुच्चासतिगंतिम-रयणिमुहे क्षित्तमहिपीठे ॥ २२ ॥
शुचिपट्टनिहितसिचये, स्नपितविलिप्तं मणिं निधायोच्चैः ।
कप्पूरकुसुममाई-हि पूइउं नमिय विहिपुव्वं ॥ २३ ॥
तदनु विचिन्त्यत इष्टं, पुरोऽस्य सर्वमपि लभ्यते प्रातः ।
इय सोउं गोवाओ, वि जागियागाममभिचक्षिओ ॥ २४ ॥
न स्थास्यति हस्ततले, मणिरत्नं नूनमिदमपुण्यस्य ।
इय चिंतिय सिट्ठिसुओ, वि तस्स पुट्ठिं न छड्डेइ ॥ २५ ॥
गच्छन् पथि पशुपालः, प्राह मणे ! जागिका इमा अधुना ।
विक्किणिय किणिय घणसा-रमाइ काहामि तुह पूयं ॥ २६ ॥
मच्चिन्तितार्थपूर्त्या, साम्वयसंङ्गो भवेस्त्वमपि नूनम् ।
एवमणिमुल्लयंते-ण तेण भणियं पुणो एयं ॥ २७ ॥
दूरे ग्रामस्तावन्-मणे ! कथां कथय काञ्चन ममाग्रे ।
अह न सुणसि तोऽहं तुह, कहेमि निसुणेसु एगमणो ॥२८॥
देवगृहमेकहस्तं, चतुर्द्वारो वसति तत्र देवस्तु ।
इय पुणरुत्तं वुत्तो, वि जेणेए जाव नेव मणी ॥२९॥
तावदुवाच स रुष्टो, यदि दुष्कृतिमात्रमपि न मे दत्से ।
ता चिंतियत्थसंपा-यणम्मि तुह केरिसी आसा ? ॥ ३० ॥
तच्चिन्तामणिरिति ते, नाम मृषा सत्यमेव यदि चेदम् ।
जं तुह संपत्तीए, वि न मह फिट्टइ मणे ! चिंता ॥ ३१ ॥
किं च क्षणमपि योऽहं, रत्नातकैर्विना न हि स्थातुम् ।
सत्तो सोहं कहमिह, रत्नासतिगेण न मरामि ?॥ ३२ ॥
तन्मे मारणहेतो-र्वणिजारे ! वर्णितोऽसि तत्कच्च ।
जत्थ न दीससि इय भणि-य लंखिओ तेण सो सुमणी ॥३३॥
जयदेवो मुदितमनाः, संपूर्णमनोरथः प्रणतिपूर्वम् ।
चिंतामणिं गहित्ता, नियनयराभिमुहमह चलिओ ॥ ३४ ॥
मणिमाहात्म्यादुल्लसि-तवैभवः पथिमहा पुरे नगरे ।
रयणचइनामधूयं, परिणीयं सुवुहिसिट्ठिस्स ॥ ३५ ॥
बहुपरिकरपरिकलितो, जननिवहैर्गीयमानसुगुणगणः ।
हत्थिणपुरम्मि पत्तो, पणओ पियराण चलणेसु ॥ ३६ ॥
अभिनन्दितः स ताभ्यां, स्वजनैः संमानितः स बहुमानैः ।
थुणिओ सेसजणेणं, भोगाणं जायणं जाओ ॥ ३७ ॥
क्षातस्यास्योपनयो-ऽयमुक्तकैरमरनरकतिर्यक्षु ।
इयरमणीण खणीसु व, परिभमंतेण कह कह वि ॥ ३८ ॥
जीवेन लभ्यत इयं, मनुजगतिः सन्मणीवर्तीतुल्या ।
तत्थ वि दुल्लहो चिंता-मणि व्व जिणदेसिओ धम्मो ॥ ३९ ॥
पशुपालोऽत्र यथा खलु, मणिं न लेभेऽनुपासनसुकृतघनः ।
अह पुण्णचित्तजुत्तो, वणिपुत्तो पुण तयं पत्तो ॥ ४० ॥
तद्वत्फलगुणविभवो, जीवो लभते न धर्मरत्नमिदम् ।
अविकलनिर्मलगुणगण-विहवजरो पावइ तयं तु ॥ ४१ ॥
दृष्टान्तमेनं विनिशम्य सम्यक्, सद्धर्मरत्नग्रहणे यदीच्छा ।
अमुद्दारिद्र्यविनाशदक्षं, तत्सद्गुणर्ज्यमुपार्जयध्वम् ॥४२॥"
इति पशुपालकथेतिगाथार्थः ।
कतिगुणसंपन्नः पुनस्तत्प्राप्तियोग्य इति प्रश्नमाशङ्क्याऽऽह-

इगवीसगुणसमेओ, जुग्गो एयस्स जिणमए जणिओ ।
तदुवज्जणम्मि पढमं, ता जइयव्वं जओ जणियं ॥४॥

एभिरेकविंशतिगुणैर्वक्ष्यमाणैः समेतो युक्तः । पाठान्तरेण-समृद्धः सम्पूर्णः,समिद्धो वा देदीप्यमानो, योग्य उचितः,एतस्य प्रस्तुतधर्मरत्नस्य, जिनमते ऽर्हच्छासने, भणितः प्रतिपादितः, तदभिज्ञैरिति शेषः । ततः किम् ?, इत्याह-(तदुवज्जणम्मि त्ति) तेषां गुणानामुपार्जने ग्रहणे, प्रथममादौ, तस्माद्धेतोर्यतितव्यम् । इहायमाशयः-यथा प्रासादार्थिनः शल्योद्धारपीठबन्धाऽऽद्याद्रियन्ते, तदविनाभावित्वाद्विशिष्टप्रासादस्य, तथा धर्मार्थिनैतेरते गुणाः सम्यगुपार्जनीयाः, तदधीनत्वाद्विशिष्टधर्मसिद्धेरिति यतो यस्माद्भणितं गदितं, पूर्वसूरिभिरिति गम्यत इति । ध० र० १ अधि० ।

धम्मरयणस्स जोगो, अक्खुद्दो रूवव पगइसोम्मो ।
लोयप्पिओ अकूरो, भीरू असढो सुदक्खिन्नो ॥३७०॥
लज्जालुओ दयालू, मज्झत्थो सोम्मदिट्ठि गुणरागी ।
सक्कह-सपक्खजुत्तो, सुदीहदंसी विसेसन्नू ॥ ३७१ ॥
बुड्ढाणुगो विणीओ, कयन्नुओ परहिअत्थकारी अ ।
तह चेव लद्धलक्खो, एगवीसगुणो हवइ सड्ढो ॥३७२॥

परतीर्थिकप्रणीतानां सर्वेषामपि धर्माणां मध्ये प्रधानत्वेन यो रत्नमिव वर्त्तते स धर्मरत्नम्, जिनोदितो देशविरत्यादिरूपः समाचारः । तस्य योग्य उचितः, ईदृक्स्वरूप एव श्राव-

को भवति । तद्यथा-अक्षुद्र इत्यादि । तत्र यद्यपि क्षुद्रस्तुच्छः, क्षुद्रः क्रूरः, क्षुद्रो दरिद्रः, क्षुद्रो लघुरित्यनेकार्थः क्षुद्रशब्दस्तथाऽपीह तुच्छार्थो गृह्यते, तस्यैव प्रस्तुतोपयोगित्वात् । ततः क्षुद्रस्तुच्छोऽगम्भीर इत्यर्थः । तद्विपरीताऽक्षुद्रः । स च सूक्ष्ममतित्वात्सुखेनैव धर्ममवबुध्यते १ । रूपवान् संपूर्णाङ्गोपाङ्गतया मनोहराऽऽकारः, स च तथारूपसंपन्नः सदाचारप्रवृत्त्या भविकलोकानां धर्मे गौरवमुत्पादयन्प्राज्ञावको भवति । ननु नन्दिषेणहरिकेशबलप्रभृतीनां कुरूपाणामपि धर्मप्रतिपत्तिः श्रूयते, अतः कथं रूपवानेव धर्मेऽधिक्रियते । सत्यम् । इह द्विविधं रूपम्-सामान्यम्,अतिशायि च । तत्र सामान्यं संपूर्णाङ्गत्वाऽऽदि । तच्च नन्दिषेणाऽऽदीनामप्यासीदेवेति न विरोधः। प्रायिकं चैतत्,शेषगुणसद्भावे कुरूपत्वस्याप्यदुष्टत्वात् । एवमग्रेऽपि। अतिशायि पुनर्यद्यपि तीर्थकराऽऽदीनामेव संभवति, तथाऽपि येन कर्मविशेषेण काले वयसि वा वर्त्तमानो रूपवानयमिति जनानां प्रतीतिमुपजनयति तदेवेहाधिकृतं मन्तव्यम । २ । प्रकृत्या स्वभावेन, सौम्योऽभीषणाऽऽकृतिर्विश्वसनीयरूप इत्यर्थः। एवंविधश्च प्रायेण न पापव्यापारे व्याप्रियते,सुखाऽऽश्रयणीयश्च भवति ३ । लोकस्य सर्वजनस्येह परलोकविरुद्धविवर्जनेन दानशीलाऽऽदिगुणैश्च प्रियो वल्लभो लोकप्रियः,सोऽपि सर्वेषां धर्मे बहुमानं जनयति ४ । अक्रूरोऽक्लिष्टाध्यवसायः, क्रूरो हि परच्छिद्रान्वेषणस्य सम्पटः कलुषमनाः स्वानुष्ठानं कुर्वन्नपि फलनाग्भवतीति ५। भीरुरैहिकाऽऽमुष्मिकापायेभ्यस्त्रासनशीलः । स हि कारणेऽपि सति न निःशङ्कमधर्मं प्रवर्त्तते ६ । अशठः सदनुष्ठाननिष्ठः, शठो हि वञ्चनप्रपञ्चचतुरतया सर्वस्याप्यविश्वसनीयो भवति ७ । सदाक्षिण्यः स्वकार्यपरिहारेण परकार्यकरणैकरसिकान्तःकरणः; स च कस्य नाम नानुवर्त्तनीयो भवति ८॥ ३७॥ (लज्जालुओ त्ति) प्राकृतशैल्या लज्जावान् स खलवकृत्याऽऽसेवनवार्तयाऽपि व्रीडति, स्वयमङ्गीकृतमनुष्ठानं च परित्यक्तुं न शक्नोति ९ । दयालुर्दयावान् , दुःखितजन्तुजातत्राणानिलाषुक इत्यर्थः । धर्मस्य हि दया मूलमिति प्रतीतमेव १० । मध्यस्थो रागद्वेषत्यक्तधीः, स हि सर्वत्राकलुषितया विश्वस्याऽपि वल्लभो भवति ११ ॥ सौम्यदृष्टिः-कस्याप्युद्वेजकः, स हि दर्शनमात्रेणाऽपि प्राणिनां प्रीतिं पल्लवयति १२ । गुणेषु गाम्भीर्यस्थैर्यप्रमुखेषु रज्यतीत्येवं शीलो गुणरागी, स हि गुणपक्षपातित्वादेव सगुणान् बहु मन्यते, निर्गुणांश्चोपेक्षते १३ । सकथनरुचय उत्कथाः सदाचारचारित्वाऽऽदिचर्या ये सपक्षा सहयोजनास्तैर्युक्तोऽन्वितो धर्माविबन्धकपरिवार इति भावः । एवंविधश्च न केनचिदुन्मार्गो गन्तुं शक्यते १४ । अन्ये तु सत्कथः, सपक्षयुक्तश्चेति पृथक् गुणद्वयं मन्यते, मध्यस्थः सौम्यदृष्टिश्चेति द्वाभ्यामप्येकमेवेति। तथा सुदीर्घदर्शी सुपर्यायाऽऽलोचितपरिणामपेशलकार्यकारी, स किल परिणामिकया बुद्ध्या सुन्दरपरिणामत्वैहिकमपि कार्यमारभते १५ । विशेषज्ञः सदितरवस्तुविभागवेदी । अविशेषज्ञस्तु दोषानपि गुणत्वेन गुणानपि दोषत्वेनाध्यवस्यति १६ ॥ ३७१ ॥ वृद्धानु परिणतमतीननुगच्छति, गुणार्जनबुद्ध्या सेवत इति वृद्धानुगः । वृद्धजनानुगत्या हि प्रवर्त्तमानः पुमान् न जातुचिदपि विपदः पदं भवति १७ । विनीतो गुरुजनगौरवकृत् , विनयवति हि सपदि संपदः प्रादुर्भवन्ति । स्वल्पमप्युपकारमैहिकं पारत्रिकं चापरेण कृतं जानाति, न निह्नुते इति कृतज्ञः । कृतज्ञो हि सर्वत्राप्यमन्दानन्दां समासादयति १९ । परेषामन्येषां हितानर्थान्प्रयोजनानि कर्तुं शीलं यस्य स परहितार्थकारी, सदाक्षिण्योऽभ्यर्थित एव करोत्यन्यं पुनः स्वत एव परहिताय प्रवर्त्तते इत्यनयोर्भेदः। यश्च प्रकृत्यैव परहितकरणे नितरां निरतो भवति, स निरीहचित्ततयाऽन्यानपि सत्कर्मणि स्थापयति २० । तथा-लब्धमिव लब्धलक्षं शिक्षणीयानुष्ठानं येन स लब्धलक्षः, पूर्वभवाभ्यस्तमिव सर्वमपि धर्मकृत्यं करोत्येवाधिगच्छतीति भावः । ईदृशो हि वन्दनप्रत्युपेक्षणाऽऽदिकं धर्मकर्म सुखेनैव शिक्षयितुं शक्यते । तदेवमेकविंशतिगुणसम्पन्नश्राद्धः श्रावको भवतीति । प्र० २६७ द्वार । ध० । दर्श० । (१-अक्षुद्रत्वे भीमसोमकथा 'भीमसोम' शब्दे) (२-रूपवत्त्वे सुजातकथा 'सुजाय' शब्दे) (३-प्रकृतिसौम्यत्वे विजयश्रेष्ठिकथा 'विजयसेट्ठि' शब्दे) (४-लोकप्रियत्वे विनयंधरकथा ' विणयंधर ' शब्दे) (५-अक्रूरत्वे कीर्तिचन्द्रकथा ' अक्कूर 'शब्दे प्रथमभागे १२६ पृष्ठे प्रतिपादिता) (६-भीरुत्वे विमलदृष्टान्तः 'विमल' शब्दे) (७-अशठभावे चक्रदेवचरित्रम् 'असढ' शब्दे प्रथमभागे ८३९ पृष्ठे गतम्) (८-सुदाक्षिण्ये क्षुल्लककुमारकथा 'अलोभया' शब्दे प्रथमभागे ७८५ पृष्ठे गता) (९-लज्जालुत्वे विजयकुमारकथा 'विजयकुमार' शब्दे) (१०-दयालुत्वे यशोधरवृत्तम् 'सुरिंददत्त' शब्दे) (११-माध्यस्थ्ये सोमवसुवृत्तं 'सोमवसु' शब्दे) (१२-गुणानुरागित्वे पुरन्दरराजचरित्रं ' पुरंदर ' शब्दे) (१३-सत्कथायां रोहिणीज्ञातं 'रोहिणी' शब्दे) (१४-सुपक्षगुणे भद्रनन्दिवृत्तं 'भद्दणंदि' शब्दे) (१५ सुदीर्घदर्शित्वे धनमित्रश्रेष्ठिवृत्तं 'धणमित्त' शब्देऽस्मिन्नेव भागे २६५५ पृष्ठे गतं,'भद्दा' शब्दे च)(१६-विशेषज्ञत्वे सुबुद्धिमन्त्रिवृत्तं 'सुबुद्धि' शब्दे) (१७-वृद्धानुगत्वे मध्यमबुद्धिचरित्रं ' मज्झिमबुद्धि ' शब्दे) (१८-विनीतत्वे भुवनतिलकवृत्तं ' भुवणतिलय ' शब्दे) (१९-कृतज्ञत्वे विमलकुमारकथा ' विमलकुमार ' शब्दे) (२०-परहितकारित्वे भीमकुमारकथा ' भीमकुमार ' शब्दे) (२१-लब्धलक्षत्वे नागार्जुनकथा ' णागज्जुण ' शब्देऽस्मिन्नेव भागे १६३५ पृष्ठे गता)

साम्प्रतमेतन्निगमनायाह-

एए इगवीसगुणा, सुयाणुसारेण किंचि वक्खाया ।
अरिहंति धम्मरयणं, घित्तुं एएहिं संपन्ना ॥ ३७ ॥

एते पूर्वोक्तस्वरूपाः, एकविंशतिसंख्या गुणाः श्रुतानुसारेण शास्त्रान्तरोपलम्भद्वारेण, किञ्चिन्न सामस्त्येन, व्याख्याताः स्वरूपतः फलतश्च प्ररूपिताः । किमर्थम्?,इत्याह-यतोऽर्हन्ति योग्यतासारं धर्मरत्नं ग्रहीतुं, न पुनर्वसन्ततनूपवऽराजबीलामिति भावः । के ?, इत्याह-एभिरनन्तरोक्तैः गुणैः संपन्नाः संगताः संपूर्णा वेति ।

आह-किमेकान्तेनैवावद्गुणसम्पन्ना धर्माधिकारिण उताऽपवादोऽप्यस्तीति प्रश्ने सत्याह-

पायऽक्कगुणविहीणा, एएसिं मज्झिमावरा नेया ।
इत्तो परेण हीणा, दरिद्दपाया मुणेयव्वा ॥ ३० ॥

इहाधिकारिणस्त्रिधा चिन्त्याः-उत्तमा मध्यमा जघन्याश्च । तत्र उत्तमाः सम्पूर्णगुणा एव,पादश्चतुर्थांशोऽर्द्धं दलं, गुणशब्दस्य प्रत्येकमभिसम्बन्धात् पादप्रमाणैरर्द्धप्रमाणैश्च गुणैर्ये विही-

ना विकलाः, एतेषामुक्तगुणानां मध्याद् ये यथाक्रमं मध्यमावरा ज्ञेयाः, चतुर्थांशविहीना मध्यमाः, अर्द्धविहीना जघन्या इति भावः, तेभ्योऽपि हीनतरेषु का वार्त्ता?, इत्याह-(इत्तो परेणं ति) एतेभ्योऽपि, परेणार्द्धादप्यधिकैर्हीना रहिताः, दरिद्रप्राया अकिञ्चनकजनकल्पाः, 'मुणितव्या' वेदितव्याः। यथाहि दरिद्रा उदरकन्दराजरणचिन्ताव्याकुलतया न रत्नक्रयमनोरथमपि कुर्वन्ति, तथैतेऽपि न धर्माभिलाषमपि विदधतीति ।

एवं च स्थिते यद्विधेयं तदाह-

धम्मरयणत्थिणा तो, पढमं एयज्जणम्मि जइयव्वं ।
जं सुरुचूमिगाए, रेहइ चित्तं पवित्तं पि ॥ ३१ ॥

धर्मरत्नमुक्तस्वरूपं, तदर्थिना तल्लिप्सुना, तत्तस्मात् कारणात्, प्रथममादावेषां गुणानामर्जने विदग्धपने यतितव्यं, तदुपार्जनं प्रति यत्नो विधेयः, तदविनाभावित्वाद्धर्मप्राप्तेः । अत्रैव हेतुमाह-यस्मात्कारणाच्छुद्धभूमिकायां प्रभासचित्रकरपरिकर्मितचूमाविद्धाकलङ्काघारे (रेहइ त्ति) राजते, चित्रं चित्रकर्म, पवित्रमपि प्रशस्तमप्यालिखितं सदिति । ध० र० । (प्रभासचित्रकरकथा ' पभासचित्तगर ' शब्दे वक्ष्यते)

श्रावकसाधुसम्बन्धभेदाद् द्विधा धर्मरत्नं प्रतिपाद्येदानीं कः कीदृगिदं कर्तुं शक्नोतीत्येतदाह-

दुविहं वि धम्मरयणं, तरइ नरो घित्तुमविगलं सो उ ।
जस्सेगवीसगुणरय-णसंपया सुत्थिया अत्थि ॥ १४० ॥

द्विविधमपि द्विप्रकारमपि, न पुनरेकतरमेवेत्यपिशब्दार्थः । धर्मरत्नं पूर्वोक्तशब्दार्थम्, (तरइ त्ति) शक्नोति " शकेश्चयतर-तोर-पाराः" ॥ ८ । ४ । ८६ ॥ इति वचनात् । नर इति जातिनिर्देशात्रारो नरजातीयो जन्तुर्न पुनः पुमानेवेति, ग्रहीतुमुपादातुमविकलं सम्पूर्णं, स एव, तुशब्दस्यावधारणार्थत्वात् । यस्य किमित्याह-यस्य श्रीप्रथममहाराजस्यैवैकविंशतिगुणरत्नसम्पत् "अक्खुद्दो रूववं पगइसोमो।" इत्यादिशास्त्रपरुषितप्रतिपादिता गुणमाणिक्यविभूतिः, सुस्थिता क्षुद्रोपाऽऽद्यदूषितत्वान्निरुपद्रवाऽस्ति विद्यते इति । ननु पूर्वमुक्तमेवैकविंशतिगुणसमृद्धो योग्यो धर्मरत्नस्येति तत्किं पुनरिदमुच्यते ?। सत्यम्, पूर्वं योग्यतामात्रमुक्तम्, यथा-बालत्वेऽपि वर्तमानो राजपुत्रो राज्यार्ह उच्यते, संप्रति करणशक्तिरप्यस्यामिधीयते, यथा-प्रौढीभूतो राजपुत्रः कर्तुं शक्नोत्येव राज्यमिति । ध०र०। (श्रीप्रथममहाराजकथा 'सिरिपयम' शब्दे) धर्मरत्नवक्तव्यतायामिह शास्त्रे शान्तिसूरिविरचिते स्वनामख्याते प्रकरणग्रन्थविशेषे च, ध० र० ।

तत्र चैकविंशतिगुणैर्धर्मरत्नयोग्यो भवतीत्यभिधाय विशेषतः पूर्वाचार्याणां श्लाघ्यमाह-

ता सुट्ठु इमं जणियं, पुव्वाऽऽयरिएहिं परहियरएहिं ।
इगवीसगुणोवेओ, जोग्गो मइ धम्मरयणस्स ॥ १४१ ॥

यत एभिर्गुणैर्युक्तो धर्मं कर्तुं शक्नोति, ततः सुष्ठु शोभनमिदं भणितमुक्तं पूर्वाऽऽचार्यैः पूर्वकालसंभवसूरिभिः, परहितरतैरन्यजनोपकारकरणलालसैः, किं तत् ?, इत्याह-एकविंशतिगुणैरुपेतो युक्तो, योग्य उचितः, (मइ त्ति) मदा, धर्मरत्नस्य पूर्वव्यावर्णितस्वरूपस्येति ।

अथ प्रकृतशास्त्रार्थमनुवदन्नुपसंहारगाथायुगलमाह-

धम्मरयणुचियाणं, देसचरित्तीण तह चरित्तीणं ।
लिंगाइ जाइं समए, जणियाइं मुणियतत्तेहिं ॥ १४२ ॥
तेसिं इमो भावत्थो, नियमइ विहवाणुसारओ जणिओ ।
सपराणुग्गहहेउं, समासओ संतिसूरीहिं ॥ १४३ ॥

धर्मरत्नोचितानामुक्तस्वरूपाणां, देशचरित्रिणां श्रमणोपाशकानां, तथा चरित्रिणां साधूनां, लिङ्गानि चिह्नानि, यानि समये सिद्धान्ते, जणितान्यभिहितानि, मुणिततत्तैरवबुद्धसिद्धान्ततत्त्वैरिति प्रथमगाथार्थः ॥१४२॥ तेषामयमुक्तस्वरूपो, नावार्थस्तात्पर्यं, निजमतिविभवानुसारतः स्वबुद्धिसंपदनुरूपं भणितः, सिद्धान्तमहाम्भोधेः पारस्य लङ्घुमशक्यत्वाद्यावदवबुद्धं तावद्भणितमिति भावः । किमर्थः पुनरियान् प्रयासः कृतः ?, इत्याह-स्वपरयोरनुग्रह उपकारः, स एव हेतुः कारणं यस्य जणनस्य तत्स्वपरानुग्रहहेतु, क्रियाविशेषणमेतत्, स्वपरानुग्रहोऽप्यागमादेव भविष्यतीति चेन्न, तत्राऽऽगमे कोऽप्यर्थः । क्वापि भणितस्तमल्पायुषोऽल्पमेधसश्चैदंयुगीना नावगन्तुमीशा इति समासतोऽल्पग्रन्थेन जणितः । कैः ?, इत्याह-शान्तिसूरिर्जिनप्रवचनावदातमतिभिः परोपकारैकरसिकमानसैश्चन्द्रकुलविमलनभस्तलनिशीथिनीनाथैरिति द्वितीयगाथार्थः ॥१४३॥

अथ शिष्याणामर्थित्वोत्पादनायोक्तशास्त्रार्थपरिज्ञानस्य फलमुपदर्शयन्नाह-

जो परिभावइ एयं, सम्मं सिद्धंतगब्भजुत्तीहिं ।
सो मुत्तिमग्गलग्गो, कुग्गहगत्तेसु न हु पमाई ॥ १४४ ॥

यः कश्चिद् लघुकर्मा, परिभावयति सम्यगालोचयत्येनं पूर्वोक्तं धर्मलिङ्गनावार्थं, सम्यग् मध्यस्थभावेन, सिद्धान्तगर्भाभिरागमसारामिर्युक्तिभिरुपपत्तिभिः, स प्राणी, मुक्तिमार्गे निर्वाणनगराध्वनि लग्नो गन्तुं प्रवृत्तः, कुग्रहा दुःषमाभाविनो मतिमोहविशेषाः, त एव गर्ता अवटा गतिविघातहेतुत्वादनर्थजनकत्वाच्च, तेषु नैव पतति, हुशब्दस्यावधारणार्थत्वात् । अत एव सुखेन सन्मार्गेण गच्छतीति ।

उक्तं प्रकरणार्थपरिभावनस्यानन्तरफलम्, अधुना परम्परफलमाह-

इय धम्मरयणपगरण-मणुदियहं जे मणम्मि भावंति ।
ते गलियकलिलपंका, निव्वाणसुहाइं पावंति ॥१४५॥

इत्यनन्तरोक्तं, धर्मरत्नमुक्तशब्दार्थं, तत्प्रतिपादकं प्रकरणं शास्त्रविशेषो धर्मरत्नप्रकरणम्, अनुदिवसं प्रतिदिनम्, उपलक्षणत्वात्प्रतिप्रहरमित्याद्यपि द्रष्टव्यम्, ये केचिदा सप्तमुक्तिगमना मनसि हृदये, भावयन्ति विवेकसारं चिन्तयन्ति, ते शुभतराध्यवसायभाजो गलितोऽपेतः कलिलपङ्कः पातकमलोत्करो येभ्यस्ते गलितकलिलपङ्काः । (निव्वाणसुहाइं ति) निर्वाणं सिद्धिस्तत आधारे आधेयोपचारादिह निर्वाणशब्देन निर्वाणगता जीवा उच्यन्ते, सिद्धा इत्यर्थः । तेषां सुखानि प्राप्नुवन्ति । ध० र० । धर्मरत्नप्रकरणस्य वृत्तिकारो देवेन्द्रसूरिः । " श्रीधर्मरत्नशास्त्रं, बह्वर्थं स्वल्पशब्दसंदर्भम् । स्वपरोपकारहेतो-र्विवृणोमि यथाश्रुतं किञ्चित् " ॥ १ ॥ १० र० ।

" स्वान्ययोरुपकाराय, श्रीमद्देवेन्द्रसूरिणा ।
धर्मरत्नस्य टीकेयं, सुखबोधा विनिर्ममे ॥ ८ ॥
प्रथमां प्रतिमाप्रतिमां, बिभ्राणो गुरुजनेषु भक्तिभरम् ।
विद्वान् विद्याऽऽनन्दः, सानन्दमना लिलेखास्याः ॥ ९ ॥
श्रीहेमकलशवाचक-पण्डितवरधर्मकीर्तिमुख्यबुधैः ।

स्वपरसमयैककुशलै--स्तदैव संशोधिता चेयम् ॥ १० ॥
यदुदितमल्पमतिना, सिद्धान्तविरुद्धमिह किमपि शास्त्रे ।
विद्वद्भिस्तत्त्वज्ञैः, प्रसादमाधाय तच्छोध्यम् ॥ ११ ॥
बह्वर्थमल्पशब्दं, शास्त्रमिदं रचयता मया कुशलम् ।
यदवापि धर्मरत्न-प्राप्तिर्जगतोऽपि तेनाऽस्तु ॥१२॥" ध०२०।

धम्मरहस्स-धर्मरहस्य-न० । धर्मसर्वस्वे, दर्श० १ तत्त्व ।
कुशलकर्मगुप्तौ, " इयं धम्मरहस्सं, विसेयं बुद्धिमंतेहिं ।" पञ्चा० ७ विव०।

धम्मराग-धर्मराग-पुं० । धर्मे चारित्रलक्षणे रागो धर्मरागः । ध० २ अधि० । कुशलानुष्ठानानुरागे, "कंतारे भिन्नहिओ, धयपुत्ते भोत्तुमिच्छइ व्व दुहिओ । जह तह सदणुट्ठाणे, अणुरागो धम्मरागो त्ति ॥१॥" इत्युक्तलक्षणे (संथा०) कुशलानुष्ठानानुरागे, पञ्चा० ३ विव० । धर्मरागश्चारित्रधर्मस्पृहेति । द्वा० १५ द्वा० । यो० वि० ।

धम्मरागि (ण्)-धर्मरागिन्-पुं० । श्रुतचारित्रलक्षणधर्मानुरक्ते, पञ्चा० ७ विव०।

धम्मरुइ-धम्मरुचि-स्त्री० । धर्मपदमात्रश्रवणजनितप्रीतिसहिता धर्मपदवाच्यविषयिणी रुचिर्धर्मरुचिः । ध०२ अधि० । धर्मश्रद्धायाम्, न चैवं ग्राम्यधर्मोऽद्विपदवाच्यविषयिण्यपि रुचिस्तथा स्यादिति वाच्यम्, निरुपपदधर्मपदवाच्यत्वेऽस्यैव ग्रहणात् । न चैवं चारित्रधर्मोऽद्विपदवाच्यविषयिण्यामव्याप्तिः, निरुपपदत्वस्य वास्तवधर्मतात्पर्यप्रसञ्जकोपपदराहित्यस्य विवक्षणादिति दिक् । ध० २ अधि० । धर्मे श्रुताऽऽदौ रुचिर्यस्य स तथा । स्था० १० ठा० । धर्मेण श्रुतधर्मेण रुचिर्यस्य स धर्मरुचिः । श्रुतधर्माभ्यासरुचिके, त्रि० । उत्त० २८ अ० । यो हि धर्मास्तिकायं श्रुतधर्मं चारित्रधर्मं च जिनोक्तं श्रद्धते स धर्मरुचिरिति । स्था० १० ठा० । धर्मधर्मिणोरभेदाद् धर्मश्रद्धाऽऽत्मके सम्यक्त्वभेदे च ।

अथ धर्मरुचेः स्वरूपमाह-

जो अत्थिकायधम्मं, सुयधम्मं खलु चरित्तधम्मं च ।
सद्दहइ जिणाभिहियं, सो धम्मरुइ त्ति नायव्वो ॥२७॥

योऽस्तिकायानां धर्माऽऽदीनां धर्मो गत्युपष्टम्भादिरस्तिकायधर्मस्तम्, जातावेकवचनम्, श्रुतधर्मं सङ्गृहीतोऽऽद्यागमस्वरूपं, खलुर्वाक्यालङ्कारे । चरित्रधर्मं वा सामायिकाऽऽदि, तस्य चार्थित्वात् श्रद्दधाति, तथेति प्रतिपद्यते, जिनाऽभिहितं तीर्थकृदुक्तं, स धर्मरुचिरिति ज्ञातव्यो धर्मेषु पर्यायेषु धर्मे वा श्रुतधर्माऽऽदौ रुचिरस्येति । उत्त०पाई० २८ अ० प्रव० । स्था० । दर्श० । वाराणसीस्थे स्वनामख्यातेऽनगारे, ओघ० । (तत्कथा ' णंद ' शब्देऽस्मिन्नेव भागे १७४८ पृष्ठे गता) रोहितकनगरस्थे स्वनामख्याते साधौ, आ० चू० ४ अ० । (तत्कथा ' वेदना ' शब्दे, परिठावणियासमिइ शब्दे च) मथुरानगरस्थे स्वनामख्याते मुनौ, ती०८ कल्प । चम्पानगरीस्थे धर्मघोषस्याऽऽचार्यस्य स्वनामख्याते शिष्ये, ज्ञा० १ श्रु० १८ अ० । (तत्कथा ' दुवई ' शब्देऽस्मिन्नेव भागे १५७८ पृष्ठे गता) वसन्तपुरस्थस्य जितशत्रोर्नृपस्य स्वनामख्याते पुत्रे, आ० क०

तथाऽनवद्ये धर्मरुचिकथा-

" धात्रीकोमे सदा सक्तं, वसन्तपुरमन्वभूत् ।
जितशत्रुर्नृपस्तत्र, धारणी सहचारिणी ॥ १ ॥
आसीद्धर्मरुचिः सूनु-र्यथार्थाऽऽख्यः सुधांशुवत् ।
सुवासनः पुष्पमिव, ऋजुः कमलनाभवत् ॥ २ ॥
वृद्धत्वादन्यदा राजा, जिघृक्षुस्तापसव्रतम् ।
दातुकामस्तनूजस्य, राज्यं संविग्नमानसः ॥ ३ ॥
सोऽथ मातरमप्राक्षी-द्राज्यं तातः किमुज्झते ? ।
तमूचे जननी वत्स !, राज्यं संसारवर्धनम् ॥ ४ ॥
पुत्रोऽप्युवाच तर्ह्येवं, कार्यं तेन ममाऽपि न ।
उज्झावपि ततो जातौ, तापसौ तापसाऽऽश्रमे ॥ ५ ॥
चतुर्दश्यामथाश्रावि, घोषणा सर्वतोमुखीम् ।
अमावास्येत्यनाकुट्टिः, प्रभाते भविता ततः ॥ ६ ॥
अथैव तत्प्रभात्यर्थं, कार्यः कन्दाऽऽदिसंग्रहः ।
अचिन्तयद्धर्मरुचि-रनाकुट्टिर्वरं सदा ॥ ७ ॥
अमावास्यां च दृष्ट्वा स, साधून् यातोऽन्तिकाध्वना ।
अप्राक्षीदद्य वः किं ना-कुट्टिर्याऽथमहद्वनम् ? ॥ ८ ॥
यावज्जीवमनाकुट्टि-रस्माकं नऊ ! तेऽब्रुवन् ।
ऊहापोहं प्रपद्योऽथ, जातिस्मरणमाप सः ॥ ९ ॥
ततः प्रत्येकबुद्धोऽभू-द्वेषं शासनदेव्यदात् ।
सस्मारैकादशाङ्गानि, सिद्धः कृत्वा चिरं व्रतम् " ॥ १० ॥

एतदेवाऽऽह-

" सोऊण अणाउट्टिं, अणभीओ वज्जिऊण अणगं तु ।
अणवज्जिज्जं सवगओ, धम्मरुई नाम अणगारो ॥ ११ ॥" आ० क०। आ० म०। आचा०। विशे०। वाराणसीस्थे स्वनामख्याते नृपे, आ०म०। आ०चू०। न०। आ०क०। (तत्कथा "पारिणामिया" शब्दे) काम्पिल्यपुरस्थे स्वनामख्याते नृपे, ती०२४ कल्प । (तत्कथा 'कंपिल्ल' शब्दे तृतीयभागे १७६ पृष्ठे गता)

धम्मलद्ध-धर्मलब्ध-त्रि० । धर्मेण सुधिकथा लब्धं धर्मलब्धम्, तद्देशकर्कीलकृताऽऽदिदोषरहिते भक्ताऽऽदौ, " ते धम्मलद्धं विणिहाय भुंजे " (३१) सूत्र० १ श्रु० ११ अ० । (इयं गाथा अस्या अर्थश्च 'कुसील' शब्दे तृतीयभागे ६११ पृष्ठे गतः)

धम्मवत्था-धर्मव्यवस्था-स्त्री० । धर्मस्य प्रमाणप्रसिद्धौ, द्वा० ७ द्वा० । साधुसामग्र्यं धर्मव्यवस्था चानिर्वाह्यत इतीयमत्राभिधीयते । " भक्ष्याभक्ष्यविवेकाच्च, गम्यागम्यविवेकतः । तपोदयाविशेषाच्च, सद्धर्मो व्यवतिष्ठते ॥१॥" द्वा० ६ द्वा० ।

विदित्वा लोकमुत्क्रिप्य, लोकसंज्ञां च लभ्यते ।
इत्थं व्यवस्थितो धर्मः, परमाऽऽनन्दकन्दभूः ॥३२॥

(विदित्वेति) विदित्वा ज्ञात्वा, लोकं स्वेच्छाकल्पिताऽऽचारसक्तं जनम्, उत्क्रिप्य निराकृत्य, लोकसंज्ञां बहुभिर्लौकैराचीर्णमेवास्माकमाचरणीयमित्येवंरूपां च लभ्यते प्राप्यते । इत्थमुक्तरीत्या, व्यवस्थितः प्रमाणप्रसिद्धो, धर्मः परमानन्द एव कन्दस्तस्य भूरुत्पत्तिस्थानम् ॥ ३२ ॥ द्वा० ७ द्वा० ।

धम्मवं-धर्मवत्-त्रि० । धर्मोपेते, आचा० १ श्रु० ३ अ० १ उ०।

धम्मवरचाउरंतचक्कवट्टि(ण्)-धर्मवरचातुरन्तचक्रवर्तिन्-पुं० । धर्म एव वरं प्रधानं चतुरन्तहेतुत्वात् चतुरन्तं चक्रमिव चातुरन्तचक्रम्, तेन वर्तितुं शीलं यस्य सः धर्मवरचातुरन्तचक्रवर्त्ती । जी० ३ प्रति० ४ उ० । त्रयः समुद्राश्चतुर्थो हिमवानिति चत्वारोऽन्ता एषु प्रभुतया नवाश्चातुरन्ताश्चतुरन्तस्वामिनः,

एवंविधा ये चक्रवर्त्तिनः ते चातुरन्तचक्रवर्त्तिनः, धर्म्मस्य वराः श्रेष्ठाः चातुरन्तचक्रवर्त्तिनः धर्म्मवरचातुरन्तचक्रवर्त्तिनः । क० १ अधि० २ क्षण । त्रयः समुद्राश्चतुर्थो हिमवान्, एते चत्वारोऽन्ताः पृथिव्याः पर्यन्ताः, तेषु स्वामितया भवतीति चातुरन्तः, स चासौ चक्रवर्ती चातुरन्तचक्रवर्ती, वरश्चासौ चातुरन्तचक्रवर्ती चेति वरचातुरन्तचक्रवर्ती राजातिशयः, धर्मविषये वरचातुरन्तचक्रवर्ती धर्मवरचातुरन्तचक्रवर्ती । स० १ सम० । औ० । भ० । धर्म एव वरमितरचक्रापेक्षया,कपिलाऽऽदिधर्मचक्रापेक्षया वा चातुरन्त, दानाऽऽदिभेदेन चतुर्विभागश्चतसृणां वा नरकाऽऽदिगतीनामन्तकारित्वाच्चतुरन्तं, तदेव चातुरन्तं यच्चक्रं भवारातिच्छेदात् तेन वर्त्तितुं शीलं यस्य स तथा। भ० १ श० १ उ० । धर्म एव त्रिकोटिपरिशुद्धत्वेन सुगताऽऽदिप्रणीतधर्मचक्रापेक्षया उभयलोकहितत्वेन, चक्रवर्त्यादिचक्रापेक्षया च वरं प्रधानं चतसृणां गतीनां नारकतिर्यङ्नरामरलक्षणानामन्तो यस्मात्तच्चतुरन्तचक्रमिव चक्रं रौद्रमिथ्यात्वाऽऽदिभावशत्रुहननात् तेन वर्तत इत्येवंशीलो धर्मवरचातुरन्तचक्रवर्त्ती । " चाउरंते त्ति " समृद्ध्यादित्वादात्वम् । ध० २ अधि० । शेषधर्मप्रणेतॄणां मध्ये सातिशयत्वादतिशायिनि धर्मनायके तीर्थकरे,कल्प० १ अधि० २ क्षण । तीर्थकरवर्णकमधिकृत्य " धम्मवरचाउरंतचक्कवट्टीणं । " यथाहि पृथिव्यां शेषराजातिशायी वरचातुरन्तचक्रवर्ती भवति, तथा भगवान् धर्मविषये शेषप्रणेतॄणां मध्ये सातिशयत्वात् तथोच्यते । स० १ सम० । इदमत्र हृदयम्-यथोदितधर्म एव वरं प्रधानं चक्रवर्तिचक्रापेक्षया लोकद्वयोपकारित्वेन कपिलाऽऽदिप्रणीतधर्मचक्रापेक्षया वा त्रिकोटिपरिशुद्धतया चत्वारो गतिविशेषा नारकतिर्यङ्नरामरलक्षणाः,तदुच्छेदेन तदन्तहेतुत्वाच्चतुरन्तं,चतुर्भिर्वाऽन्तो यस्मिंस्तच्चतुरन्तम, कैश्चतुर्भिः ?-दानशीलतपोभावनाऽऽख्यैर्धर्मैः, अन्तः प्रक्रमाद्भवान्तोऽभिगृह्यते । चक्रमिव चक्रमतिरौद्रमहामिथ्यात्वाऽऽदिलक्षणभावशत्रुहननात् । तथा च श्रूयन्त एवानेन भावशत्रवो मिथ्यात्वाऽऽदय इति प्रतीतं,दानाऽऽद्यभ्यासादाग्रहनिवृत्त्यादिसिद्धेः, महात्मनां स्वानुभवसिद्धमेतत् । एतेन च प्रवर्त्तन्ते भगवन्तः । तथा भव्यत्वनियोगतो वरबोधिलाभाऽऽसाद्य तथा तथौचित्येन असिद्धिप्राप्तेः, एवमेव वर्त्तनादिति । तदेवमेतेन वर्त्तितुं शीला धर्मवरचतुरन्तचक्रवर्त्तिनः ॥ २४ ॥ ह्व० ।

धम्मवररयणमंमियचामीयरमेहलाग--धर्मवररत्नमण्डितचामीकरमेखलाक--पुं० । दुर्गतौ प्रपतन्तमात्मानं धारयतीति धर्मः, स एव वररत्नमण्डिता चामीकरमेखला यस्य सः धर्मवररत्नमण्डितचामीकरमेखलाकः । "शेषाद्वा" ॥ ७ । ३ । १७५॥ इति कप्प्रत्ययः। उत्तरगुणरूपरत्नमण्डितमूलगुणरूपधर्माऽऽत्मकचामीकरमेखलोपेते अंघमेरौ, तथा च-सद्घस्य मेरुरूपकेण रूपकमधिकृत्य--" धम्मवररयणमंमियचामीयरमेहलागस्स । ' नं० । इह धर्मो द्विधा-मूलगुणरूपः, उत्तरगुणरूपश्च । तत्रोत्तरगुणरूपो रत्नानि, मूलगुणरूपस्तु मेखला, न खलु मूलगुणरूपधर्माऽऽत्मकः चामीकरमेखलाविशेषोत्तरगुणरूपवररत्नविभूषणविकला शोभते । नं० ।

धम्मवसु--धर्मवसु--पुं० । कौशाम्बीनगरस्थे धर्मघोषधर्मयशसोर्गुरौ स्वनामख्याते गुरौ; " कोसंबिअजियसेणो, धम्मघोसधम्मजसे।" आव० ४ अ० । आ० क० । (तत्कथा 'अणायया ' शब्दे प्रथमभागे ४७४ पृष्ठे गता)

धम्मवाय--धर्मवाद--पुं० । धर्मप्रधानो वादो धर्मवादः । " ज्ञातः स्वशास्त्रतत्त्वेन,मध्यस्थेनाधमीरुणा । कथाबन्धस्तत्त्वधिया, धर्मवादः प्रकीर्त्तितः ॥ १ ॥" इत्युक्तलक्षणे वादभेदे, द्वा० ७ द्वा० । अष्ट० । (धर्मवादस्वरूपं ' वाद ' शब्दे) धर्माणां वस्तुपर्यायाणां धर्मस्य वा चारित्रस्य वादो धर्मवादः । दृष्टिवादे, स्था० १० ठा० । (अस्य स्वरूपम् " दिट्ठिवाय ' शब्देऽस्मिन्नेव भागे २५१२ पृष्ठे ऊह्यम्)

धम्मवावार--धर्मव्यापार--पुं० । क्षान्तिप्रत्युपेक्षाऽऽदौ, षो० १० विव० ।

धम्मविउ--धर्मवित्--त्रि० । दुर्गतिप्रसृतजन्तुधारणस्वभावं स्वर्गापवर्गमार्गं वेत्तीति धर्मवित् । आचा० १ श्रु० ३ अ० १ उ० । धर्मं चेतनद्रव्यस्वभावं श्रुतचारित्ररूपं वा वेत्तीति धर्मवित् । आचा० १ श्रु० ३ अ० १ उ० । धर्मं यथावत्तत्फलानि च स्वर्गापवर्गलक्षणानि सम्यग् वेत्तीति धर्मवित् । सूत्र० १ श्रु० १६ अ० । यथावस्थितं परमार्थतो धर्मं सर्वोपाधिविशुद्धं जानातीति धर्म्मवित् । सूत्र० २ श्रु० १ अ० । धर्मपरिच्छेदकरणनिपुणे, " न ते धम्मविऊ जणा । " ते सम्यग्धर्मपरिच्छेदे कर्त्तव्ये विद्वांसो निपुणाः । तथाहि--क्षान्त्यादिको दशविधो धर्मस्तमङ्गत्वेनान्यथा न धर्मं प्रतिपादयन्तीति । सूत्र० १ श्रु० १ अ० १ उ० ।

धम्मविज्ज--धर्मवैद्य--पुं० । आचार्ये, पं० व० १ द्वार ।

धम्मविणिच्चय--धर्मविनिश्चय--पुं० । " धनदो धनार्थिनां धर्म्मः, कामदः सर्वकामिनाम् । धर्म एवाऽपवर्गस्य, पारम्पर्येण साधकः ॥ १ ॥ " इत्यादिरूपे धर्मस्वरूपपरिज्ञानाऽऽत्मके विनिश्चयभेदे, स्था० ३ ठा० ३ उ० ।

धम्मवित्त--धर्मवित्त--न० । धर्मधने, " धर्मश्लेनावसीदेत, कपालेनापि जीवतः । आख्योऽस्मीत्यवगन्तव्यं, धर्मवित्ता हि साधवः ॥ १ ॥ " ध० १ अधि० ।

धम्मवित्तिय--धर्मवृत्तिक--त्रि० । धर्मेणैव चारित्राविरोधेन, श्रुताविरोधेन वा वृत्तिर्जीविका यस्य । धर्माविरुद्धजीविके, " धम्मेण चेव वित्तिं कप्पेमाणा । " औ० ।

धम्मविरुद्ध--धर्मविरुद्ध--त्रि० । धर्मद्वेषिणि, "धर्मविरुद्धं च संत्याज्यम् ।" पं० सू० २ सूत्र० ।

धम्मवीमंसय--धर्मविमर्शक--पुं० । धर्मविचारके, प्रश्न० २ आश्र० द्वार ।

धम्मवीय--धर्मबीज--न० । धर्मकारणे, "तस्मिन् प्रायः प्ररोहन्ति, धर्मबीजानि गेहिनि । विधिनोप्तानि बीजानि, विशुद्धायां यथा भुवि ॥ १६ ॥ " ध० । (' गिहिधम्म ' शब्दे तृतीयभागे ८६६ पृष्ठेऽस्य व्याख्या)

" धर्मबीजं परं प्राप्य, मानुष्यं कर्मभूमिषु ।
न सत्कर्मकृषावस्य, प्रयतन्तेऽल्पमेधसः ॥ २ ॥ "
अस्येति धर्मबीजस्य । ध० १ अधि० ।
" विधिनोप्तात् यथा बीजा-द्वृक्षाऽऽद्युदयः क्रमात् ।
फलसिद्धिस्तथा धर्म-बीजादपि विदुर्बुधाः ॥ १ ॥
वपनं धर्मबीजस्य, सत्प्रशंसाऽऽदि तद्गतम् ।
तच्चिन्ताऽऽद्यङ्कुराऽऽदिः स्या-त्फलसिद्धिस्तु निर्वृतिः ॥ २ ॥

चिन्तासच्छ्रुत्यनुष्ठानं, देवमानुषसंपदः ।
क्रमेणाङ्कुरसत्काण्ड-नालपुष्पसमा मताः ॥ ३ ॥
फलं प्रधानमेवाऽऽहु-र्नानुषङ्किकमित्यपि ।
पलालाऽऽदिपरित्यागात्, कृषौ धान्याऽऽनिवद् बुधाः ॥ ४ ॥
अत एव च मन्यन्ते, तत्त्वभावितबुद्धयः ।
मोक्षमार्गक्रियामेकां, पर्यन्तफलदायिनीम् ॥ ५ ॥" ह० ।

धम्मवीरिय–धर्म्मवीर्य–पुं० । सुपार्श्वजिनसमकालिके स्वनामख्याते चक्रवर्त्तिनि, ति० ।

धम्मवुड्ढि–धर्मवृद्धि–स्त्री० । धर्मसमृद्धौ, पञ्चा० २ विव० ।

धम्मसंगह–धर्मसंग्रह–पुं० । संगृह्यतेऽनेनेति संग्रहः, धर्मस्य संग्रहो धर्मसंग्रहः । यद्वा–धर्मस्य संग्रहो यत्र स धर्मसंग्रहः । मानविजयगणिविरचिते स्वनामख्याते ग्रन्थभेदे, तथाच ग्रन्थकृत्प्रथमं श्लोकद्वयेन मङ्गलं समाचरन् श्रोतृप्रवृत्तये स्वाभिधेयं प्रतिजानीते–

"प्रणम्य प्रणताशेष-सुरासुरनरेश्वरम् ।
तत्त्वज्ञं तत्त्वदेष्टारं, महावीरं जिनोत्तमम् ॥ १ ॥
श्रुताब्धेः सम्प्रदायाच्च, ज्ञात्वा स्वानुभवादपि ।
सिद्धान्तसारं वक्ष्यामि, धर्मसंग्रहमुत्तमम् ॥ २ ॥"
ध० १ अधि० ।

साम्प्रतं सकलशास्त्रार्थपरिसमाप्तिमुपदर्शयन्नाह–
"इत्येष यतिधर्मोऽत्र, द्विविधोऽपि निरूपितः ।
तत्कात्स्न्येन हि धर्मस्य, सिद्धिमाप निरूपणम् ॥ ८७ ॥"
इति पूर्वोक्तप्रकारेण, अत्र शास्त्रे, एष प्रत्यक्षः द्विविधः–साधेक्षनिरपेक्षभेदवान्, न पुनरेक एवेत्यपिशब्दार्थः । यतिधर्म सकलक्षणो निरूपितो निरूपणविषयीकृतः, ततो द्विविधयतिधर्मनिरूपणाद् द्विविधगृहिधर्मस्य च प्रागेव निरूपणात्कात्स्न्येन सर्वप्रकारेण धर्मस्य निरूपणं शास्त्राऽऽदौ प्रतिज्ञातं सिद्धिमाप सम्पूर्णतां प्राप । ध०४ अधि० । (विशेषस्त्वत्र 'अणगारधम्म' शब्दे प्रथमभागे २७६ पृष्ठे गतः)

"ग्रन्थकृद्भिः गणनया, ग्रन्थेऽत्र स्युरनुष्टुभाम् ।
चतुर्दशसहस्राणि, षट्शती चाष्टकोत्तरा ॥ १ ॥" ध० ।

इत्थं शान्तिविजयसूरिवर्णनं प्रतिपाद्य–
" तेषां विनेय उदिताऽऽदरतो विवव्रे,
ग्रन्थं च मानविजयाभिधवाचकोऽमुम् ।
क्षन्तव्यं यदत्र मतिमन्दतया भवेत्त-
न्मेधाविनिर्मये कृपां प्रणिधाय शोध्यम् ॥ ९ ॥
सत्तर्ककर्कशधियाऽखिलदर्शनेषु,
मूर्धन्यतामधिगतास्तपगच्छधुर्याः ।
काश्यां विजित्य परयूथिकपण्डितेन्द्राः,
विस्तारितप्रवरजैनमतप्रभावाः ॥ १० ॥
तर्कप्रमाणनयमुख्यविवेचनेन,
प्रोद्बोधिताऽऽदिममुनिश्रुतकेवलित्वाः ।
अकुर्यशोविजयवाचकराजिमुख्याः,
ग्रन्थेऽत्र मय्युपकृतिं परिशोधनाऽऽद्यैः ॥ ११ ॥
बाल इव मन्दगतिरपि, सामाचारीविचारदुर्गम्ये ।
अत्राजूवं गतिमा–स्तेषां हस्तावलम्बेन ॥ १२ ॥
वर्षे दिग्गजमुनिरस-चन्द्र १६७८ प्रमिते च माधवे मासे ।
शुक्लतृतीयादिवसे, यद्ग्रः सफलोऽयमजनिष्ट ॥ १३ ॥
अहम्मदावादपुरे रसाग्रे,
देशे स्फुरद्गूर्जरदेशमण्डने ।
श्रीवंशजन्मा मनिआऽभिधानो,
वणिग्वरोऽजूच्छुभकर्मकर्त्ता ॥ १४ ॥
नित्यं गेहे दानशाला विशाला,
प्रौढोक्त्या तीर्थराजाऽऽदियात्रा ।
सप्तक्षेत्र्यां वित्तवापश्च यस्य,
ख्यातुं प्रायो ह्यस्मदाद्यैरशक्यः ॥ १५ ॥
साधुः श्रीशान्तिदासः प्रवरगुणनिधिस्तत्सुतोऽजूदुदारो,
धाट्यां विख्यातनामा जगदुसमधिकानेकसत्कृत्यकर्मा ।
रङ्कानामन्नवस्त्रौषधसुवितरणाद्येन दुष्कालनाम,
विध्वस्तं शस्तसूत्या बहुविधि महिता ज्ञातिसाधर्म्यकाश्च ।१७।
पुत्रन्यस्तसमस्तगेहकरणीयस्य स्फुटं वार्द्धके,
सिद्धान्तश्रवणाऽऽदिधर्मकरणे बद्धस्पृहस्यानिशम् ।
सङ्घैक्यसंविधानरचनाशुश्रूषणोत्कण्ठिन-
स्तस्य प्रार्थनयाऽस्य गुम्फनविधौ जातः प्रयत्नो मम ।१७॥
ज्ञानाऽऽराधनमतिना, ज्ञानाऽऽदिगुणान्वितेन वृत्तिरियम् ।
प्रथमाऽऽदर्शे लिखिता, गणिना कान्त्यादिविजयेन ॥ १८ ॥
धात्री संपद्विधात्री भुजगपतिधृता सार्णवा यावदास्ते,
प्रोद्यैः सौवर्णशृङ्गोल्लिखितसुरपयो मन्दराऽद्रिश्च यावत् ।
विश्वे विद्योतयन्तौ तमतु शशिरवी भ्राम्यतश्चेह यावत्,
ग्रन्थो व्याख्यायमानो विबुधजनवरैर्नन्दतादेष तावत् ॥१९॥
ये ग्रन्थार्थविभावज्ञातिनिपुणाः सत्यगुणग्राहिणः,
सन्तः सन्तु मयि प्रसन्नहृदयास्ते किं खलैस्तैरिह ।
येषां गुरुसुभाषितामृतरसास्वादेऽपि चित्ते शृशं,
ग्रीष्मर्त्तौ मरुभूमिकास्विव परं लेशो न संलक्ष्यते ॥ २० ॥
विलोक्यानेकशास्त्राणि, विहिताद् ग्रन्थतस्त्विह ।
प्रेत्यापि बोधिलाभोऽस्तु, परमानन्दकारणम् ।२१।" ध०४अधि०।

धम्मसंहिया–धर्मसंहिता–स्त्री० । धर्मवृद्ध्यर्थं संहिता यथा रचिता । सम्–धा–क्तः । मनुयाज्ञवल्क्यप्रभृतिप्रणीते धर्मप्रतिपादनार्थे शास्त्रे, वाच० । अनु० ।

धम्मसद्धा–धर्मश्रद्धा–स्त्री० । धर्मः श्रुतधर्माऽऽदिस्तत्र तत्करणाभिलाषरूपा श्रद्धा धर्मश्रद्धा । धर्मकरणाभिलाषे, उत्त०२९ अ०।

धर्मश्रद्धैव सकलकल्याणनिबन्धनमिति तामाह–

धम्मसद्धाए णं भंते ! जीवे किं जणयइ ? । धम्मसद्धाए णं सायासोक्खेसु रज्जमाणे विरज्जइ, अगारधम्मं च णं चयइ । अणगारे णं जीवे सारीरमाणसाणं दुक्खाणं छेयणभेयणसंजोगाईणं वोच्छेयं करेइ, अव्वाबाहं च सुहं निवत्तेइ ॥ ३ ॥

धर्मश्रद्धयोत्कटया, सातं सातवेदनीयं, तज्जनितानि सौख्यानि सातसौख्यानि । प्राग्वन्मध्यपदलोपी समासः, तेषु, वैषयिकसुखेष्वित्यर्थः यावत् । रज्यमानः पूर्वं रागं कुर्वन् विरज्यते विरक्तिं गच्छति । अगारधर्मं च गृहाऽऽचारं, गार्हस्थ्यमिति यावत् । चशब्दश्चेह वाक्यालङ्कारे । त्यजति परिहरति । तदत्यागस्य वैषयिकसुखानुरागनिबन्धनत्वात् । ततश्च "अणगारे त्ति" प्राकृतत्वादनगारो यतिः सन् शारीरमानसानां दुःखानाम्, किंरूपाणामित्याह–छेदनभेदनसंयोगाऽऽदीनामिति,छेदनं खड्गादिना द्विधाकरणं, भेदनं कुन्ताऽऽदिना विदारणम्,आदिशब्दस्येहापि संब-

न्ध्यात् ताडनाऽऽदयश्च गृह्यन्ते,ततश्छेदनभेदनाऽऽदिना शारीरदुःखानां संयोगः प्रस्तावादनिष्टसंबन्धः,आदिशब्दादिष्टविओगाऽऽदिग्रहः,ततः संयोगाऽऽदीनां मानसदुःखानां विशेषेण पुनरसंभवलक्षणेनोच्छेदोऽभावो व्युच्छेदः,तं करोतीति तन्निबन्धनकर्मोच्छेदनेनेति भावः । अत एव व्याबाधमुपरतसकलपीडमौक्तमिति यावत् । धः पुनरर्थे भिन्नक्रमः, ततः सुखं पुनर्निर्वर्त्तयति जनयति । पूर्वं संवेगफलाभिधानप्रसङ्गेन धर्मश्रद्धायाः फलनिरूपणमिह तु स्वातन्त्र्येणेत्यपौनरुक्त्यमिति भावनीयम्। उत्त० पाई० २६ अ०।

धर्मश्रद्धावा एव महत्फलमुपदर्शयति-

निसग्गुस्सग्गकारी य, सव्वतो छिन्नबंधणा ।
एगो वा परिसाए वा, अप्पाणं सोऽभिरक्खइ ॥

यः तीव्रधर्मश्रद्धाजाग्रतो निसर्गत एव स्वभावत एव उत्सर्गकारी, सर्वतश्छिन्नबन्धनः,सर्वत्र ममत्वरहित इत्यर्थः। स एको वा एकाकी वा,पर्षदि वा व्यवस्थित आत्मानमभिरक्षति । व्य० १ उ०।

धम्मसद्धालु-धर्मश्रद्धालु-त्रि० । धर्मलिप्सौ, सूत्र० २ श्रु० १ अ०।

धम्मसन्ना-धर्मसंज्ञा-स्त्री० । धर्मश्रद्धायाम्, प्र० ७ श० ६ उ० । मोहनीयकर्मोपशमाद्भवमाने क्षमाऽऽद्यासेवनरूपे संज्ञाभेदे, आचा० १ श्रु० १ अ० १ उ०।

धम्मसन्नास-धर्मसंन्यास-पुं० । गृहस्थधर्मत्यागे, "धर्मसंन्यासवान् भवेत् । ३।" अष्ट० ८ अष्ट० । क्षपकश्रेणियोगिनः शास्त्रोपशमिकक्षान्त्यादिधर्मनिवृत्तिरूपे सामर्थ्ययोगभेदे,द्वा०१६द्वा०। (एतदुपकरणता 'जोग' शब्देऽस्मिन्नेव भागे १६२६ पृष्ठे गता)

धम्मसत्थ-धर्मशास्त्र-न० । धर्मप्रतिपादकं शास्त्रं धर्मशास्त्रम् । मन्वादिप्रयुक्ते स्मृतिशास्त्रे,वा ष० । जीवदयाऽऽदिविचारप्रतिपादके शास्त्रे च । दर्श० ३ तत्त्व । "धम्मसत्थस्स देसओ" दर्श० ४ तत्त्व । "विसेसओ धम्मसत्थकुसलमई।" धर्माभिज्ञायिग्रन्थनिपुणबुद्धिः । पञ्चा० १३ विव० ।

धम्मसमुयायार-धर्मसमुदाचार-पुं० । धर्मरूपश्चारित्राऽऽत्मकः समुदाचारः सदाचारः, सप्रमोदो वाऽऽचारो यस्य स धर्मसमुदाचारः । चारित्रधर्माऽऽत्मकसदाचारोपेते, अत्र्या चारित्रधर्माऽऽत्मकाऽऽचारोपेते च । औ० ।

धम्मसरण-धर्मशरण-न० । धर्माऽऽत्मके शरणे,द० प० ।

पमिवन्नसाहुसरणो, सरणं काउं चुओ वि जिणधम्मं ।
पहरिसरोमंचपयं-चकंचुअंचियतणू जणइ ॥ ४१ ॥
पवरसुकएहिं पत्तं, पत्तेहिं वि नवरि केहि वि न पत्तं ।
तं केवलिपण्णत्तं, धम्मं सरणं पवन्नोऽहं ॥ ४२ ॥
पत्तेण अपत्तेण य, पत्ताणि य जेण नरसुरसुहाइं ।
मुक्खसुहं पुण पत्ते-ण नवरि धम्मो स मे सरणं ॥४३॥
निद्दाछियकलुसकम्मो,कहलुमुहजम्मो(?)खलीयकअहम्मो।
पमुहपरिणामरम्मो, सरणं मे होउ जिणधम्मो ॥ ४४ ॥
काऊणए वि नमयं, जम्मणजरमरणवाहिसयसमयं ।
अमयं व बहुमयं जिण-मयं च सरणं पवन्नोऽहं ॥४५॥
पसमियकामपमोहं, दिट्ठादिट्ठेसु न कलिगविरोहं ।
सिवसुहफलयममोहं, धम्मं सरणं पवन्नोऽहं ॥ ४६ ॥

नरयगइगमणरोहं, गुणसंदोहं पवाइनिक्खोहं ।
निहचियअवग्गहजोहं, धम्मं सरणं पवन्नोऽहं ॥४७॥
नासुरसुवण्णसुंदर-रयणालंकारगारवहरिसं ।
निहिमिव दोगच्चहरं,धम्मं जिणदेसियं वंदे ॥४८॥ द०प०।

धम्मसवण-धर्मश्रवण-न० । दुर्गतौ प्रपतन्तमात्मानं धारयतीति धर्मः श्रुतचारित्ररूपः,तस्य श्रवणमाकर्णनमर्थतो धर्मऽऽकर्णने, षो० १६ विव० । ध० । धर्मशास्त्राऽऽकर्णने च । पञ्चा० १० विव० । तस्माच्च धर्मश्रवणाद् मनःखेदापनोदाऽऽदिगुणः स्यात् । यदाह-"क्लान्तमपोहति खेदं, तत्त्वं निर्याति बुद्ध्यते मूढम । स्थिरतामेति व्याकुल-मुपयुक्तसुभाषितं चेतः॥१॥" अत्यन्तं धर्मश्रवणं चोत्तरोत्तरगुणप्रतिपत्तिसाधनत्वात्प्रधानमिति ॥ २२ ॥ ध १ अधि० ।

धर्मश्रवणे यत्नः, सततं कार्यो बहुश्रुतसमीपे ।
हितकाङ्क्षिभिर्नृसिंहै-र्वचनं ननु हारिभद्रमिदम् ॥१७॥

दुर्गतौ प्रपतन्तमात्मानं धारयतीति धर्मः श्रुतचारित्ररूपः, तस्य श्रवणमाकर्णनमर्थतः, तस्मिन् धर्मश्रमणे यत्नः प्रयत्न आदरः, सततमनवरतं, कार्यः कर्त्तव्यो, बहुश्रुतसमीपे बहुश्रुतसन्निधाने, हितकाङ्क्षिभिर्हिताभिलाषिभिर्नृसिंहैः पुरुषसिंहैः, पुरुषोत्तमैरिति यावत् । वचनं प्रार्थनारूपं, नन्विति वितर्के। एवं वितर्कयत यूयं,हरिभद्रस्येदं हारिभद्रमिदमेवंविधं यदुत बहुश्रुतसमीपे धर्मश्रवणे यत्नो विधेयः। अथवा-वचनमागमरूपं, ननु निश्चितं हारि मनोहारि, भद्रमिदं कल्याणमिदं यतो वर्त्तते, अतो वचनमतधर्मश्रवणे बहुश्रुतसमीपे एव यत्नः श्रेयान्, अबहुश्रुतेभ्यो धर्मश्रवणेऽपि विपरीतार्थोपपत्तेः प्रत्यवायसंभवात् । अथवा-हरिभद्रसूरेः स्तुतिं कुर्वाणोऽपर एव कश्चिदिदमाह-'वचनं ननु हारिभद्रमिदम् ।' हरिभद्रसूरेरिदं धर्ममतं वचनं प्रकरणाऽऽप्तवचनं, तस्माद्धर्मश्रवणे बहुश्रुतसमीपे एव यत्नो विधेयोऽबहुश्रुतेभ्यो दुरभिग्राऽऽचार्यवचनार्थानुपलम्भादेवं वचनमाहात्म्यद्वारेण संस्तौति ॥१७॥ षो० १६ विव०।

धम्मसागर-धर्मसागर-पुं० । कल्पसूत्रोपरि किरणावलिकारके आचार्ये,अनेन च कुमतिकुद्दालाऽऽख्योऽनेके ग्रन्था रचिताः। ते तीव्रभाषानिबद्धा इत्याचार्याणामरुचिपात्रतां गताः । जै० इ०।

धम्मसार-धर्मसार-पुं० । धर्मोत्कर्षे, " जयणा य धम्मसारो, जं भणिया वीयरागेहिं । " पञ्चा० ७ विव० । धर्मसारार्थे, " धम्मस्स सारमुवलब्भ करे पमायं ।" आव० ५ अ० । धर्मस्य सारः परमार्थो धर्मसारः । धर्मस्य परमार्थे, सूत्र० १ श्रु० ८ अ० । धर्मस्य सारः चारित्रं धर्मसारः । चारित्रे,सूत्र० १ श्रु० ८ अ० ।

धम्मसारहि-धर्मसारथि-पुं० । धर्मरथस्य प्रवर्त्तकत्वेन सारथिरिव धर्मसारथिः । यथा-रथस्य सारथी रथं रथिकमश्वाँश्च रक्षति, एवं भगवान् चारित्रधर्माङ्गानां संयमाऽऽत्मप्रवचनाऽऽख्यानां रक्षणोपदेशाद् धर्मसारथिः । भ० १ श० १ उ० । जी० । स० । रा० । धर्मस्य स्वपराश्रेयकथा सम्यक् प्रवर्त्तनपालनदमनयोगतः सारथित्वम् । तथथा-सम्यक् प्रवर्त्तनयोगेन परिषाकाश्रेयकरणात्, प्रवर्त्तकज्ञानलिङ्गैरपुनर्बन्धकत्वात्, प्रकृत्याऽऽसन्नमुख्योपपत्तेः । तथा-शाम्भीर्ययोगात्साधुसहवा-

रिप्राप्तेरनुबन्धप्रधानत्वादतीचारभीरुत्वोपपत्तेः । एतेन पालनायोगः प्रत्युक्तः, सम्यक्प्रवर्त्तनस्य निर्वहणफलत्वात्, नान्यथा सम्यक्त्वमिति समयविदः । एवं दमनयोगेन दान्तो ह्येवं धर्मः कर्मवशितया कृतो व्यभिचारी अनिवर्त्तकभावेन नियुक्तः स्वकार्ये स्वाक्षेपचयकारितया नीतः स्वात्मीभावं तत्प्रकर्षस्याऽऽत्मरूपत्वेन । भावधर्मौ हि भवत्येवैतदेवं, तदाद्यस्थानस्याप्येवं प्रवृत्तेरबन्ध्यबीजत्वात् सुसंवृत्तकाञ्चनरत्नकरण्यकप्राप्तितुल्या हि प्रथमधर्मस्थानप्राप्तिरित्यन्यैरप्यभ्युपगमात्, तदेवं धर्मस्य सारथयो धर्मसारथयः ॥ २३ ॥ ल० । ध० । धर्ममार्गप्रवर्त्तयितरि तीर्थंकरे, " धिइमं धम्मसारही । " (१५) उत्त० १६ अ० । कल्प० । यथा सारथिरुन्मार्गे गच्छन्तं रथं मार्गमानयति, एवं भगवन्तोऽपि मार्गभ्रष्टं जनं मार्गे आनयन्ति । अत्र च मेघकुमारदृष्टान्तः । कल्प० १ अधि० १ क्षण । (मेघकुमारकथा ' मेघकुमार ' शब्दे)

धम्मसासण–धर्मशासन–न० । धर्मज्ञाने, दश० १ चू० । धर्मशास्त्रे च । दश० ।

" साहित्यस्य विशारदो यदि परं जानाति सल्लक्षणं,
तर्के कर्कशमानसोऽतिविमुता यद्यस्ति सा ज्योतिषि ।
किञ्चानेककलाऽऽलयोऽपि विकलः प्राणी परं गीयते,
यो जानाति न स्वर्गमोक्षसुखदं धर्मानुगं शासनम् ॥ " दश० ६ अ० ।

धम्मसाहण–धर्मसाधन–न० । धर्मस्य कर्मानुपादाननिर्जरणलक्षणस्य साधनं हेतुरहिंसाऽऽदिर्धर्मसाधनम् । धर्महेतावहिंसादिके, हा० १२ अष्ट० ।

धम्मसिद्धि–धर्मसिद्धि–स्त्री० । धर्मनिष्पत्तौ, " लिङ्गानि धर्मसिद्धेः । " षो० ४ विव० ।

धम्मसिरी–धर्मश्री–पुं० । अस्याश्चतुर्विंशतिकायाः प्रागनन्तकालेनातीतायां चतुर्विंशतिकायां भवे चरमतीर्थंकरे, ग० । अस्याः ऋषभाऽऽदिचतुर्विंशतिकायाः प्रागनन्तकालेन याऽतीता चतुर्विंशतिका तस्यां मत्सदृशः सप्तहस्ततनुर्धर्मश्रीनामा चरमतीर्थंकरो बभूव । ग० १ अधि० । (तत्कथा ' सावज्जायरिय ' शब्दे)

धम्मसीह–धर्मशील–त्रि० । धर्मः शीलं सततमनुष्ठेयं यस्य स धर्मशीलः । धार्मिके, वाच० । धर्मस्वभावे च । सूत्र० २ श्रु० २ अ० ।

धम्मसीलसमुयायार–धर्मशीलसमुदाचार–त्रि० । धर्मशीलो धर्मस्वभावो धर्माऽऽत्मकः समुदाचारो यत्किञ्चनानुष्ठानं यस्य सः । धर्मस्वभावाऽऽत्मकानुष्ठाने, सूत्र० २ श्रु० २ अ० ।

धम्मसीह–धर्मसिंह–पुं० । अभिनन्दनजिनस्य पूर्वभवनामधेये, स० । पाटलिपुत्रस्थे स्वनामख्याते क्षत्रियमुनौ, संथा० ।

पाडलिपुत्तम्मि पुरे, चंदयपुत्तस्समे य आसी य ।
नामेण धम्मसीहो, चंदसिरी सो पइहिऊणं ॥ ६७ ॥

पाटलिपुत्रे नगरे (चन्दयपुत्तस्समे य त्ति) चन्द्रगुप्तपुत्रस्य समः सबन्धुः सुहृत्, समः सुहृदभिधानेषु दर्शनात् । अथवा-चन्द्रगुप्तसमः मान्यत्वादासीदभूद् नाम्ना धर्मसिंह इति, कथंभूतः ?, (चंदसिरी सो पइहिऊणं) चन्द्रगुप्तश्रीः चन्द्रगुप्तलक्ष्मीकः, (पइहिऊणं ति) प्रस्तावात् तामेव लक्ष्मीं परित्यज्य, चारित्रं गृहीत्वेत्यर्थः ।

ततः किं कृतवानित्याह-

कुल्लयरम्मि पुरवरे, अह सो अज्जुट्ठिओ तिओ धम्मे ।
कासी य गरुयपिट्ठं, पच्चक्खाणं विगयसोगो ॥ ७० ॥

अथ कोल्लयरपुरे स धर्मसिंहाभिधानः क्षत्रियमुनिः,अभ्युत्थितोऽभ्युद्यतः मरणाय, स्थितश्च धर्मे पर्यन्ताऽऽराधनाकृत्यरूपे, (कासी य त्ति) अकार्षीत्, (गरुयपिट्ठं ति) गुरुपृष्ठाभिधानमनाथपतितगोकलेवराऽऽदिमध्ये निपतनरूपं (पच्चक्खाणं विगयसोगो त्ति) प्रत्याख्यानमनशनाङ्गीकाररूपं, विगतशोको विगतदैन्य इति गाथार्थः ॥ ७० ॥

अह सो वि चत्तदेहो, तिरियसहस्सेहिँ खायमाणो य ।
सो वि तह खज्जमाणो, पडिवन्नो उत्तमं अट्ठं ॥ ७१ ॥

अथ स त्यक्तदेहो व्युत्सृष्टशरीरस्तिर्यक्सहस्रैः श्वशृकशृगालगृध्राऽऽदिभिः खाद्यमानश्च, सोऽपि तथा खाद्यमानः प्रतिपन्न उत्तमार्थं सम्यगाराधनामित्यर्थः ॥ ७१ ॥ संथा० । धर्मजिनस्य प्रथमभिक्षादायके च । स० ।

धम्मसुअक्खायभावणा–धर्मस्वाख्यातभावना–स्त्री० । भावनाभेदे, सा यथा-

" स्वाऽऽख्यातः खलु धर्मोऽयं, भगवद्भिर्जिनोत्तमैः ।
यं समालम्बमानो हि, न मज्जेद्भवसागरे ॥ १ ॥ "

स्वाख्यातनामैवाऽऽह-

" संयमः सूनृतं शौचं, ब्रह्माकिञ्चनता तपः ।
क्षान्तिर्मार्दवमृजुता, क्षान्तिश्च दशधा ननु ॥ २ ॥ "

अत्रायं भावः-संयमाऽऽदिदशविधधर्मप्रतिपादनप्रकारेण भगवतामर्हतां स्वाख्यातधर्मत्वानुप्रेक्षणमेवेति । धर्माणां गुणभावना तदाख्यातॄणां भगवतामनुप्रेक्षानिमित्तं स्तुतिरिति । तथा च धर्मकथकोऽर्हन्निति भावनेत्येव प्रत्यासन्नम् । तथा-

" पूर्वापरविरुद्धानि, हिंसाऽऽदेः कारकाणि च ।
वचांसि चित्ररूपाणि, व्याकुर्वद्भिर्निजेच्छया ॥ ३ ॥
कुतार्थिकैः प्रणीतस्य, सद्गतिप्रतिपन्थिनः ।
धर्मस्य सकलस्यापि, कथं स्वाख्यातता भवेत् ? ॥ ४ ॥
यच्च तत्समये क्वापि, दयासत्याऽऽदिपोषणम् ।
दृश्यते तद्वचोमात्रं, बुधैर्हेयं न तत्त्वतः ॥ ५ ॥
यत्प्रोद्दाममदान्धसिन्धुरघटं साम्राज्यमासाद्यते,
यच्चिःशेषजनप्रमोदजनकं संपद्यते वैभवम् ।
यत्पूर्णेन्दुसमद्युतिर्गुणगणः संप्राप्यते यत्परं,
सौभाग्यं च विजृम्भते तदखिलं धर्मस्य लीलायितम् ॥ ६ ॥
यच्च प्लावयति क्षितिं जलनिधिः कल्पोद्भवाम्भोऽऽकुलो,
यत्पृथ्वीमखिलां धिनोति सलिलाऽऽसारेण धाराधरः ।
यच्चन्द्रोष्णरुची जगत्युदयतः सर्वान्धकारच्छिदे,
तच्चिःशेषमपि ध्रुवं विजयते धर्मस्य विस्फूर्जितम् ॥ ७ ॥
अर्हता कथितो धर्मः, सत्योऽयमिति भावयन् ।
सर्वसंपत्करे धर्मे, धीमान् दृढतरो भवेत् ॥ ८ ॥ " ध० ३ अधि० ।

धम्मसुइ–धर्मश्रुति–स्त्री० । अर्हत्प्रणीतधर्माऽऽकर्णने, उत्त० ३ अ० । " किंफलमेयश्रवणा-दधिको धर्मश्रुतौ रागः । " षो० ११ विव० । आ० क० ।

धम्मसेण–धर्मसेन–पुं० । जगवत ऋषभदेवस्य शतपुत्रेषु स्वनामख्यातेऽन्यतमे पुत्रे, कल्प० १ अधि० ९ क्षण० । नन्दनस्य सप्तमबलदेवस्य पूर्वभवनामधेये, स० । ति० ।

धम्मसेणगणिमहत्तर–धर्मसेनगणिमहत्तर–पुं० । वसुदेवहिण्डीग्रन्थस्य द्वितीयतृतीयखण्डयोः कर्तरि, जै० इ० ।

धम्महिय–धर्महित–त्रि० । धर्माय हितमुपकारकं धर्महितम् । धर्मोपकारके, उत्त० पाई० २ अ० ।

धम्माइगर–धर्मादिकर–पुं० । धर्मो द्विभेदः-श्रुतधर्मश्चारित्रधर्मश्च । श्रुतधर्मेणेहाधिकारः, तस्य करणशीलो धर्मादिकरः । आव० ५ अ० । श्रुतधर्मस्य सूत्रतः प्रथमकरणशीले तीर्थंकरे, ध० २ अधि० । प्रसङ्के, न० । आव० ५ अ० । आ० चू० । ल० ।

धम्माणुओग–धर्मानुयोग–पुं० । धारयति दुर्गतौ प्रपतन्तं सत्त्वमिति धर्मः, तस्मिन् धर्मे धर्मविषयेऽनुयोगो धर्मानुयोगः । उत्तराध्ययनाऽऽदिप्रकीर्णकरूपेऽनुयोगभेदे, ओघ० । धर्मकथानुयोग उत्तराध्ययनाऽऽदिक इति । आचा० १ श्रु० १ अ० १ उ० ।

धम्माणुट्ठाण–धर्मानुष्ठान–कुशलानुष्ठाने, ध० १ अधि० ।

" अन्ने भणंति तिविहं, सययविसयजावजोगओ णवरं ।
धम्मम्मि अणुट्ठाणं, जहुत्तर पहाणरूवं तु ॥१॥
एअं च ण जुत्तिखमं, णिच्छयणयजोगओ जओ विसए ।
भावेण य परिहीणं, धम्माणुट्ठाणओ किंह णु ? ॥२॥
ववहारओ उ जुज्जइ, तहा तहा अपुणबंधगाईसुं ॥" इति ।

एतदर्थो यथा--अन्ये आचार्या भणन्ति, त्रिविधं त्रिप्रकारं, सततविषयभावयोगतः, योगशब्दस्य प्रत्येकमभिसंबन्धात् सततताऽऽदिपदानां सततताभ्यासताऽऽदौ लाक्षणिकत्वात् सततताभ्यासविषयाभ्यासभावाभ्यासयोगादित्यर्थः । नवरं केवलं, धर्मेऽनुष्ठानं यथोत्तरं प्रधानरूपं, तुरेवकारार्थः । यथोत्तरं तदेव ततः प्रधानमित्यर्थः । तत्र सततताभ्यासो नित्यमेव मातापित्रादिविनयाऽऽदिवृत्तिः । विषयाभ्यासो मोक्षमार्गनायकेऽर्हल्लक्षणे पौनःपुन्येन पूजनाऽऽदिप्रवृत्तिः। भावाभ्यासो भावानां सम्यग्दर्शनाऽऽदीनां भावाद्वेगेन भूयो भूयः परिशीलनम् ॥१॥ एतच्च त्रिविधमनुष्ठानं न युक्तिक्षमं नोपपत्तिसहं, निश्चयनययोगेन निश्चयनयाभिप्रायेण यतो मातापित्रादिविनयस्वभावे सततताभ्यासे सम्यग्दर्शनाऽऽद्याराधनारूपे धर्मानुष्ठानं दूरापास्तमेव, विषय इत्यनन्तरमपिगम्यः, विषयेऽपि अर्हदादिपूजालक्षणे विषयाभ्यासेऽपि, भावेन भववैराग्याऽऽदिना परिहीणं धर्मानुष्ठानं,कथं नु ?,न कथञ्चिदित्यर्थः । ओकारः प्राकृतत्वात् । परमार्थोपयोगरूपत्वाद्धर्मानुष्ठानस्य, निश्चयनयमते भावाभ्यास एव धर्मानुष्ठानं, नान्यद् द्वयमिति निगर्वः ॥ २ ॥ व्यवहारतस्तु व्यवहारनयादेशे तु, युज्यते द्वयमपि, तथा तथा तेन तेन प्रकारेणापुनर्बन्धकाऽऽदिषु अपुनर्बन्धकप्रभृतिषु, तत्रापुनर्बन्धकः पापं न तीव्रभावात्करोतीत्यादिलक्षणः । आदिशब्दादपुनर्बन्धकस्यैव विशिष्टोत्तरावस्थाविशेषभाजौ मार्गाभिमुखमार्गपतितौ अविरतसम्यग्दृष्ट्यादयश्च गृह्यन्त इति । ध० १ अधि० ।

धम्माणुण्ण–धर्मानुज्ञ–त्रि० । धर्मे श्रुतचारित्रलक्षणेऽनुज्ञाऽनुमोदनं यस्य स धर्मानुज्ञः । दशा० ६ अ० । धर्मे कर्त्तव्येऽनुज्ञाऽनुमोदनं यस्य स धर्मानुज्ञः । ज्ञा० १ श्रु० १८ अ० । धर्मानुमोदेतरि, सूत्र० २ श्रु० २ अ० ।

धम्माणुय–धर्मानुग–त्रि० । धर्मं श्रुतचारित्ररूपमनुगच्छतीति धर्मानुगः । धर्मानुयायिनि, दशा० ६ अ० । ज्ञा० । औ० । सूत्र० ।

धम्माणुराग–धर्मानुराग–पुं० । धर्मबहुमाने, भ० १ श० ७ उ० ।

धम्माणुरागरत्त–धर्मानुरागरक्त–त्रि० । धर्मानुरागो धर्मबहुमानः, तेन रक्त इव यः स तथा । धर्मबहुमानानुरागिणि, ज्ञ० १ श० ७ उ० ।

धम्माणुरागि–(ण्) धर्मानुरागिण्–त्रि० । श्रुतचारित्रलक्षणधर्मानुरक्ते, पञ्चा० ७ विव० । धर्मानिलाषिणि च । दर्श० १ तत्त्व ।

धम्माधम्मट्ठाण–धर्माधर्मस्थान–न० । उपशमप्रधानानुपशमप्रधाने क्रियास्थानस्य तृतीये भेदे,सूत्र० २ श्रु० २ अ० । (धर्माधर्मयुक्तं तृतीयं स्थानमाश्रित्य'पुरिसविजयविभंग'शब्दे वक्ष्यते)

धम्मायरण–धर्माऽऽचरण–न० । धर्मानुष्ठाने, आचा० १ श्रु० ५ अ० २ उ० ।

धम्मायरिय–धर्माऽऽचार्य–पुं० । श्रुतचारित्रधर्माऽऽचारसाधौ, ध० २ अधि० । धर्मः श्रुतधर्मस्तत्प्रधानः प्रणायकत्वेनाऽऽचार्यो धर्माचार्यः । मतोपदेष्टरि, स्था० ७ ठा० । "धम्मायरियं धम्मोवदेसयं समणं भगवं महावीरं वंदामो ।" प्र० २ श० १ उ० । धर्मदाताऽऽचार्यो धर्माचार्यः । स्था० ३ ठा० १ उ० । धर्मदात्र्याचार्ये,ध० २ अधि० । धर्मप्रतिबोधके,स्था० ४ ठा० ३ उ० । बोधिलाभहेतुभूते गुरौ च । पञ्चा० १ वि० । "धम्मो जेणुवइट्ठो,सो धम्मगुरू गिहीव समणो वा ।' ठा० ३ उ० ।

धम्मायार–धर्माचार–पुं० । स्त्रीणां चतुष्षष्टिवर्तिते कलाभेदे, कल्प० ७ अधि० १ क्षण ।

धम्मारम–धर्मारम–पुं० । धर्मे श्रुतधर्माऽऽदावाभिमुख्येनाभिव्याप्या रमते रतिमान् भवतीति धर्मारामः । उत्त० २ अ० । धर्मविषयकरतिमति साधौ, उत्त० १६ अ० । धर्म एव सततमानन्दहेतुतया प्रतिपाद्यतया चाऽऽरामो धर्मारामः। उत्त० २ अ० । धर्म आराम इव पापसंतापोपशमनानां जन्तूनां निर्वृतिहेतुतया अभिलषितफलप्रदानतश्च धर्माऽऽरामः। धर्माऽऽत्मके आरामे,"धम्मारामे चरे भिक्खू, धिइमं धम्मसारही । धम्मारामे रए दंते, बंभचेरसमाहिए ॥१॥" उत्त० १६ अ० ।

धम्मारामरय–धर्माऽऽरामरत–त्रि० । धर्माऽऽरामे रत आसक्तिमान् धर्मारामरतः। धर्माऽऽरामाऽऽसक्ते,उत्त० १६ अ० । धर्मे आ समन्तात् रमन्त इति धर्मारामाः साधवस्तेषु रतो धर्माऽऽरामरतः । साधुभिः सह युक्ते च । उत्त० १६ अ० ।

धम्माराहग–धर्माऽऽराधक–पुं० । धर्मानुकूलवर्त्तिनि, स्था० २ ठा० ४ उ० । सूत्र० ।

धम्माराहण–धर्माराधन–न० । धर्माऽऽसेवने, स्था० २ ठा० ४ उ० । " जे केइ महापुरिसा, धम्माराहणसहा इहं लोए ।" चारित्राऽऽराधनसमर्थाः । पं० व० ३ द्वार ।

धम्मावाय–धर्मवाद–पुं० । धर्माणां वस्तुपर्यायाणां धर्मस्य वा चारित्रस्य वादो धर्मवादः । दृष्टिवादे, स्था० १० ठा० ।

धम्माहिगारि (ण्)–धर्माधिकारिण्–पुं० । धर्मग्रहणयोग्ये धार्मिके, ध० १ अधि० । पञ्चा० । पं० व० ।

धम्मि (ण्)–धर्मिन्–त्रि० । धर्मोऽस्ति यस्याऽसौ धर्म्मी । औ० । धर्म अस्त्यर्थे इनिः । पुण्यवति, वस्तुगुणस्वरूपधर्मयुक्ते, वाच० । आचा० ।

धम्मिट्ठ–धर्मिष्ठ–त्रि० । अतिशयेन धर्मी । इष्ठन इनेर्लुक् । अत्यन्तधर्मवति, वाच० । रा० । धर्मबहुले, सूत्र० २ श्रु० २ अ० । धर्मोऽस्ति यस्य स धर्मी, स एवान्येभ्योऽतिशयवान् धर्मिष्ठः । औ० ।

धर्मेष्ठ–त्रि० । धर्मः श्रुतरूप एवेष्टो वल्लभः पूजितो वा यस्य स धर्मेष्टः । प्रियधर्मे, औ० ।

धर्मीष्ठ–त्रि० । धर्मिणामिष्टो धर्मीष्टः । धर्मिणां वल्लभे, औ० ।

धम्मिट्ठि–धर्मार्द्धि–स्त्री० । ऋद्धिभेदे, " सा मणुइ धम्मिट्ठी, जा मणुइ धम्मकज्जेसु । " ध० २ अधि० ।

धम्मिपरिणाम–धर्मिपरिणाम–पुं० । धर्मिणः पूर्वधर्मनिवृत्तावुत्तरधर्मोत्पत्तिर्धर्मिपरिणामः । परिणामभेदे, यथा–मृल्लक्षणस्य धर्मिणः पिण्डरूपधर्मपरित्यागेन घटरूपार्थान्तरस्वीकारः । द्वा० २४ द्वा० ।

धम्मिय–धार्मिक–त्रि० । धर्मं चरति सततमनुशीलयति वक्ति । धर्मशीले, वाच० । "धम्मियमाहणभिक्खुए सिया ।" धार्मिका धर्मोऽऽचारशीलाः । सूत्र० १ श्रु० ४ अ० १ उ० । धर्मेण श्रुतचारित्ररूपेण चरति धार्मिकः । साधौ, स्था० २ ठा० ४ उ० । द्वा० । सूत्र० । रा० । औ० । भ० । धर्मे श्रुतचारित्राऽऽत्मके नियः स्था० ३ ठा० ३ उ० । धर्मनिरते, द्वा० ३ द्वा० । " न हिंस्यात्सर्वभूतानि स्थावराणि चराणि च । आत्मवत्सर्वभूतानि, यः पश्यति स धार्मिकः ॥१॥" मनु० । "एवं परिहायमाणो, लोगे धंधो व्व कालपक्खम्मि । जे धम्मिया मणुस्सा, सुजीवियं जीवियं तेसिं ॥१॥" ति० । धर्मः प्रयोजनमस्येति धार्मिकः । स्था० ३ ठा० १ उ० । धर्मार्थे, दशा० १० अ० । धर्मे नियुक्तो धार्मिकः । औ० । धर्मेण नियुक्तं धार्मिकम् । धर्मप्रतिबद्धे, धार्मिको धर्मप्रतिबद्धस्वान, नि० १ श्रु० १ वर्ग १ अ० । धार्मिकस्य संयतस्येदं धार्मिकम् । धार्मिकसम्बन्धिनि च । स्था० ३ ठा० १ उ० ।

धर्मित–त्रि० । अतिशयेन सञ्जाते, " धम्मियसण्णकवडकवइय-उप्पीलियकडच्छवच्छगेवेयबद्धगलवरभूसणविराइय ।" धर्मिताऽऽदयः शब्दा एकार्था एव सञ्जातप्रकर्षख्यापनार्थाः । भेदो यश्चैषामस्ति स च कथितोऽवसेयः । औ० ।

धम्मियकरण–धार्मिककरण–न० । धार्मिकस्य संयतस्येदं धार्मिकम्, कृतिः करणमनुष्ठानम् । धार्मिककरणभेदे, स्था० ३ ठा० ४ उ० ।

धम्मियजाण–धार्मिकयान–न० । धर्मार्थगमनसाधने याने, "धम्मियं जाणवरं उवट्ठवेह ।" धर्मार्थं यानं गमनं येन तद्धर्मयानं, तत्मध्ये प्रवरं श्रेष्ठं शीघ्रगमनत्वाऽऽदिगुणोपेतमिति । दशा० १० अ० । द्वा० । अन्त० ।

धम्मियजायणा–धार्मिकयाचना–स्त्री० । धर्मकथापूर्वके याचने, आचा० । " धम्मियाए जायणाए जाएज्जा । " धर्मकथनपूर्वकं गच्छान्निर्गतो याचेत । आचा० २ श्रु० १ चू० ३ अ० ३ उ० ।

धम्मियणाडय–धार्मिकनाटक–न० । जिनजन्माभ्युदयभरतनिष्क्रमणाऽऽदिधर्मसम्बद्धे नाटके, पञ्चा० ६ विव० ।

धम्मियववसाय–धार्मिकव्यवसाय–पुं० । व्यवसायभेदे, प्रति० ।

धम्मियाधम्मियकरण–धार्मिकाधार्मिककरण–न० । धार्मिकस्य संयतस्येदं धार्मिकमेवमितरत्सर्वमधार्मिकोऽसंयतस्तस्य करणम् । अथवा धर्मे भवं धर्मो वा प्रयोजनमस्येति धार्मिकम् । विपर्यस्तमितरत्करणं धार्मिकाधार्मिककरणम् । करणभेदे, स्था० ३ ठा० ४ उ० ।

धम्मियाधम्मियोवक्कम–धार्मिकाधार्मिकोपक्रम–पुं० । धार्मिकश्चासौ देशतः संयमरूपत्वाद्धार्मिकश्च तथेवासंयमरूपत्वाद् धार्मिकाधार्मिकः । उपक्रम उपायपूर्वक आरम्भो धार्मिकाधार्मिकोपक्रमः । देशविरताऽऽरम्भरूपे उपक्रमभेदे, स्था० ३ ठा० ३ उ० ।

धम्मियाराहणा–धार्मिकाऽऽराधना–स्त्री० । आराधनमाराधना ज्ञानाऽऽदिवस्तुनोऽनुकूलयर्तित्वं, निरतिचारज्ञानाऽऽद्यासेवनेति यावत् । धर्मेण श्रुतचारित्ररूपेण चरन्तीति धार्मिकाः साधवस्तेषामियं धार्मिकी । सा चासावाराधना चेति निरतिचारज्ञानाऽऽदिपालना धार्मिकाऽऽराधना । आराधनाभेदे, स्था० २ ठा० ४ उ० । " धम्मियाराहणा दुविहा पण्णत्ता । तं जहा–सुयधम्माराहणा चेव, चरित्तधम्माराहणा चेव । " स्था० २ ठा० ४ उ० । विपक्षभेदेनाऽऽराधनाभेदे, स्था० २ ठा० ४ उ० ।

धम्मियोवक्कम–धार्मिकोपक्रम–पुं० । धर्मे श्रुतचारित्राऽऽत्मके भवः, स वा प्रयोजनमस्येति धार्मिकः, उपक्रमणमुपक्रम उपायपूर्वक आरम्भो धार्मिकोपक्रमः श्रुतचारित्राऽऽश्रयकाऽऽरम्भाऽऽत्मके उपक्रमभेदे, (स्था०) धार्मिकस्य संयतस्य यच्चारित्राऽऽश्रयं ऊर्ध्वकृत्यकाञ्जाजानामुपक्रमः स धार्मिक एवोपक्रमः । स्था० ३ ठा० ३ उ० ।

धम्मिल्ल–धम्मिल्ल–पुं० । संयतेषु केशेषु, वाच० । " धम्मिल्लो केसहत्थंसो मउली " (५७) को० ५७ गाथा । स्वनामख्याते साधौ, आव० ६ अ० । तं० । (तत्कथा धम्मिल्लहिण्डशब्दे । समासतः, ' पद्मकञ्जा ' शब्देऽपि) कुलालसन्निवेशस्थे सुधर्मस्वामिनः पितरि, स्वनामख्याते विप्रे च । कल्प २ अधि० ८ क्षण । आ० म० । आ० चू० । विपरिणामसमापन्ने च । त्रि० । ' अकविलसुसिणिद्धसुगंधरीहधम्मिल्लसिरया । ' धम्मिल्ला विपरिणामसमापन्नाः संयमविज्ञानान्नावात् शिरोजा इति । जं० २ वक्ष० ।

धम्मीसर–धर्मेश्वर–पुं० । भारतवर्षेऽतीतोत्सर्पिण्यां नवे जिनेश्वरापरपर्याये विंशतितमे जिने, प्रव० ७ द्वार ।

धम्मुज्जय–धर्मोद्यत–त्रि० । धर्मस्पृहावति, जीवा० १२ अधि० ।

धम्मुत्तर–धर्मोत्तर–त्रि० । धर्मैर्गुणैरुत्तरो धर्मोत्तरः । आ० चू० ५ अ० । धर्मः प्रशमाऽऽदिरूपस्तदुत्तरस्तत्प्रधानो धर्मोत्तरः । षो० १० विव० । धर्मप्रधाने सम्यग्दर्शनाऽऽदिके, धर्मप्राधान्ये, न० । " धम्मुत्तरं वहुउ । " धर्मोत्तरं चारित्रधर्मोत्तरं चारित्रधर्मप्राधान्यं यथा स्यात् । ध० २ अधि० । ल० । आव० । न्यायबिन्दुटीकाकारके बौद्धाऽऽचार्ये, अयं सौगतः वीरसंवत् ८८४ वर्षे आसीत् । जै० इ० ।

धम्मुत्तरखंति–धर्मोत्तरक्षान्ति–स्त्री० । धर्मः प्रशमाऽऽदिरूपस्तदुत्तरा तत्प्रधाना क्षान्तिर्धर्मोत्तरक्षान्तिः । क्षान्तिभेदे, षो० १० विव० ।

धम्मेक्कणिट्ठ-धर्मैकनिष्ठ-त्रि० । धर्मतत्परे, षो० १२ विव० ।

धम्मोवएस-धर्मोपदेश-पुं० । धर्मः श्रुतचारित्रलक्षणः, तस्योपदेशो देशना । धर्मदेशनायाम्, 'धर्मोपदेशश्रवणम्' । भ०२ अधि० । आचाराङ्ग-ज्ञोकसाराध्ययनपञ्चमोद्देशकाऽऽदिमसूत्रे हृदोपमेनाऽऽचार्येण ज्ञाप्यमित्यत्र वृत्तौ धर्ममाश्रित्य चतुर्भङ्ग्यां प्रत्येकबुद्धास्तूनयाज्ञावाद्यतुर्थभङ्गस्था इत्युक्तप्रकारेण सर्वेऽपि प्रत्येकबुद्धा धर्मोपदेशं न ददत्येतत्कथं संजायतीति ?। यतः-ऋषिभाषितसूत्रे-" पत्तेअबुद्धसाहू, वन्निमो जे भासिउं सिवं पत्ता । पणयालीसं इसिभा-सियाइँ अज्झयणपवराइं " ॥ १ ॥ इति गाथायां प्रत्येकबुद्धानामध्ययनमुक्तमिति किमत्र तत्त्वमिति प्रश्ने ?, उत्तरम्-आचाराङ्गवृत्यनुसारेण प्रत्येकबुद्धाः सभाप्रबन्धेन धर्मोपदेशं न ददतीत्यवसीयते । ऋषिभाषितेषु तु तेषामध्ययनप्रणयनरूपधर्मोपदेश इति न किमप्यनुपपन्नम्, इति । ३८३ प्र० । सेन० ३ उल्ला० ।

धम्मोवएसय-धर्मोपदेशक-त्रि० । धर्मदेशके, भ० ३ अधि० ।

धम्मोवओग-धर्मोपयोग-पुं० । धर्मस्येतिकर्त्तव्यताबोधे, पं० सू० ४ सूत्र ।

धम्मोवगरण-धर्मोपकरण-न० । संयमोपकरणे, आचा० ।

धर्मोपकरणस्य च न परिग्रहत्वम्-

परिग्गहाओ अप्पाणं अवकसेज्जा । (ए०)

परिगृह्यत इति परिग्रहो धर्मोपकरणातिरिक्तमुपकरणं, तस्मादात्मानमवश्यत्वेकदेशमपसर्पयेत् । अथवा-संयमोपकरणमपि मूर्च्छया परिग्रहो भवति; "मूर्च्छा परिग्रहः" (तत्त्वा०७ अ०१७ सूत्र) इति वचनात् । ततः आत्मानं परिग्रहादपसर्पयन्नुपकरणे तुरगवन्मूर्च्छां न कुर्यात् । ननु च यः कश्चिद्धर्मोपकरणाऽऽदावपि परिग्रहो, न स चित्तकालुष्यमृते भवति । तथाहि-आत्मोपकारिणि रागः, उपघातकारिणि च द्वेषः, ततः परिग्रहे सति रागद्वेषौ नेदिष्ठौ, ताभ्यां कर्मबन्धः, तत्कथं न परिग्रहो धर्मोपकरणम् ?। उक्तं च-" ममाहमिति चैष या-वदज्जिमानदाहज्वरः, कृतान्तमुखमेव ता-वदिति न प्रशान्त्युन्नयः । यशःसुखपिपासितैरयमसावनर्थोत्करैः, परैरपसदैः कुतोऽपि कथमप्यपाकृष्यते ॥ १ ॥ " नैष दोषः, न हि धर्मोपकरणे ममेदमिति साधूनां परिग्रहग्रहयोगोऽस्ति । तथा ह्यागमः-" अवि अप्पणो वि देहम्मि, णायरंति ममाइलं । " यदिह परिगृहीतं कर्मबन्धायोपकल्प्यते, स परिग्रहो, यत्तु पुनः कर्मनिर्जरणार्थं प्रभवति, तत्परिग्रह एव न भवतीति ।

आह च-

अमुहा णं पासए परिहरिज्जा,
एस मग्गे आरिएहिं पवेइए ॥ ए१ ॥

(अमुहा णं इत्यादि) णमिति वाक्यालङ्कारे अन्यथेत्यन्येन प्रकारेण, पश्यकः सन्, परिग्रहं परिहरेत् । यथाहि-अविदितपरमार्था गृहस्थाः सुखसाधनाय परिग्रहं पश्यन्ति, न तथा साधुः । तथाहि-अयमस्याऽऽशयः-आचार्यसत्कमिदमुपकरणं, न ममेति रागद्वेषमूलत्वात्परिग्रहग्रहयोगोऽत्र निषेध्यो; न धर्मोपकरणं, तेन विना संसारार्णवपारागमनादिति । उक्तं च-" साध्यं यथाकथञ्चित्, स्वल्पं कार्यं महच्च न तथेति । प्लवनमृते नहि शक्यं, पारं गन्तुं समुद्रस्य ॥ १ ॥ " अत्र चाऽऽर्हताऽऽभासैर्वोटिकैः सह महान् विवादोऽस्तीत्यतो विवक्षितमर्थं तीर्थकराभिप्रायेणापि सिसाधयिषुराह-(एस मग्गे इत्यादि) धर्मोपकरणं न परिग्रहायैत्यनन्तरोक्तो मार्गः, आराद्याताः सर्वहेयधर्मेभ्य इत्यार्यास्तीर्थकृतः, तैः प्रवेदितः कथितो, न तु यथा बोटिकैः कुणिकाताङ्किकालवणिकाऽश्ववालधिबालाऽऽदिस्वकेचिद्विरचितो मार्ग इति । न वा यथा मौद्गल्यस्वातिपुत्राद्यां शौद्धोदनि श्वजीवीकृत्य प्रकाशितः । इत्यनया दिशा अन्येऽपि परिहार्या इति । इह तु स्वशास्त्रगौरवमुत्पादयितुमार्यैः प्रवेदितः । (ए१) आचा० १ श्रु० २ अ० ५ उ० ।

धम्मोवगहदाण-धर्मोपग्रहदान-न० । ज्ञानाभयप्रदातृणा-माहाराऽऽद्यैरुपग्रहः । इत्तैर्यज्जायते शुद्ध-स्तद्धर्मोपग्रहं स्मृतम " ॥ १ ॥ इत्युक्तलक्षणे दानभेदे, ग० २ अधि० ।

धम्मोवाय-धर्मोपाय-पुं० । प्रवचने, तदन्तरेण धर्मस्यासम्भवात् । चतुर्दशसु पूर्वेषु, आ० म० १ अ० १ खण्ड । सामायिकाऽऽदिके च, आ० म० १ अ० १ खण्ड । (धर्मोपायव्याख्या ' तित्थयर ' शब्देऽस्मिन्नेव भागे २२६१ पृष्ठे गता)

धम्मोवायदेसग-धर्मोपायदेशक-पुं० । दुर्गतौ प्रपतन्तमात्मानं धारयतीति धर्मः, तस्योपायो द्वादशाङ्गः प्रवचनम् । अथवा-पूर्वाणि देशयतीति देशकः, धर्मोपायस्य देशको धर्मोपायदेशकः । गणधरे, चतुर्दशपूर्ववित्सु, आ० म० १ अ० १ खण्ड । चतुर्विंशतिसंख्यकेषु जिनेषु, आ० म० । " धम्मोवाओ पवयण-महवा पुव्वाइँ देसया तस्स । सव्वजिणाण गणहरा, चोद्दसपुव्वी उ जे जस्स ॥१॥ " आ० म० १ अ० १ खण्ड । (अस्या गाथाया व्याख्या ' तित्थयर ' शब्देऽस्मिन्नेव भागे २२६१ पृष्ठे गता)

धम्म-धम्ज-'भय' शब्दार्थे, कल्प० १ अधि० ३ क्षण । को० ।

धयण-देशी-गृहे, दे० ना० ५ वर्ग ५७ गाथा ।

धयरट्ठ-धार्तराष्ट्र-पुं० । हंसे, " धयरट्ठा कायंबा । " को० ४० गाथा ।

धर-धृ-पतने, स्वादि०-आ०-अक०-अनिट् । " ऋवर्णस्यारः " ॥ ८ । ४ । ४३४ ॥ इति प्राकृतसूत्रेण धातोरन्त्यस्य ऋवर्णस्य अराऽऽदेशः । 'धरइ ।' प्रा० ४ पाद । धरते । अधृत । वाच० । स्थितौ अक० । धृतौ सक०-क्र्यादि०-उभ०-अनिट् । धरति, ते, अधार्षीत् अधृत । वाच० । तूले, दे०ना० ५ वर्ग ५७ गाथा ।

धर-त्रि० । ध्रियते धरतीति वा धरः, "सिहाऽऽदिभ्यः" ॥५।१।५०॥ इत्यत्रप्रत्ययः । नं० । धारके, औ० । 'धरइ ।' प्रा० ४ पाद । पर्वते, प्रज्ञा० । पर्वते, कूर्मराजे, वसुभेदे, कार्पाससूत्रे च । वाच० । पद्मप्रभस्य षष्ठस्य जिनस्य पितरि कौशाम्बीवास्तव्ये स्वनामख्याते नृपे, आव० १ अ० । स० । स्था० । अस्यामवसर्पिण्यामैरवतवर्षजाते विंशतितमे जिने, स० । पर्वते, को० ५० गाथा ।

धरग-देशी-कार्पासे, दे० ना० ५ वर्ग ५८ गाथा ।

धरण-धरण-पुं० । धृ०-युच् । पर्वतभेदे, लोके, गुणे, धान्ये, दिवाकरे, सेतौ च । वाच० । दक्षिणनागकुमारनिकायेन्द्रे, स्था० ४ ठा० १ उ० । ति० । द्वी० । प्रज्ञा० । भ० । शक्तिसाचतीविजयस्थवीतशोकाराजधानीस्थस्य महाबलस्य राजपुत्रस्य स्वनामख्याते सवयस्ये मित्रे, ज्ञा० १ श्रु० ८ अ० । द्वारवतीवास्तव्येषु समुद्रविजयाऽऽदिषु दशसु दशार्हेष्वन्यतमे दशार्हे, अन्त०१ श्रु०१ वर्ग१ अ०। स०। अनिक्षेपे, ओघ० । लोकशब्दप्रमा-

धकाऽऽत्मके धरिमप्रमाणभेदे, षोडशरूप्यमाषका एकं धरणमिति । ज्यो० २ पाहु० । अधमर्णाऽऽदिभ्यो लक्ष्यद्रव्यग्रहणार्थे लक्षणपूर्वके उपवेशने च । भ० । धरणं लक्ष्यद्रव्यग्रहणार्थं लक्षणपूर्वकमुपवेशनम् । ध० २ अधि० । नागकुमारेन्द्रे, स्था० ।

धरणस्स णं णागकुमारिंदस्स णागकुमाररण्णो धरणप्पभे उप्पायपव्वए दसजोयणसयाइं उड्ढं उच्चत्तेणं, दसगाउसयाइं उव्वेहेणं मूले, दसजोयणसयाइं विक्खंभेणं धरणस्स णं० जाव णागकुमाररण्णो कालवालस्स महारण्णो कालप्पभे उप्पायपव्वए दसजोयणसयाइं उड्ढं उच्चत्तेणं एवं चेव० जाव संखवालस्स वि, एवं लोगपालस्स वि, से जहा धरणस्स । स्था० १० ठा० ।

धरणग–धरणक–न० । रोधने, धरणकं रोधनमपकारिणामधमर्णाऽऽदीनां च । प्रव० ३८ द्वार । ध्रियते येन तद्धरणम्, धरणमेव धरणकम् । येन धृत्वा तोल्यते तस्मिन् तोलनसाधने वस्तुनि, ज्यो० २ पाहु० ।

धरणप्पभ–धरणप्रभ–पुं० । धरणस्य नागकुमारेन्द्रस्य स्वनामख्याते उत्पातपर्वते, स्था० १० ठा० ।

धरणा–धरणा–स्त्री० । मगधदेशस्थायां स्वनामख्यातायां राजधान्याम्, यत्राला देवी । ज्ञा० १ श्रु० ३ वर्ग १ अ० ।

धरणिंद–धरणेन्द्र–पुं० । नागराजे, " नागेसु वा धरणिंदमाहुसेट्ठे । " सूत्र० १ श्रु० ६ अ० । विश्वपुरस्थे स्वनामख्याते राजनि, ग० २ अधि० । (तत्कथा ' फासिंदिय ' शब्दे वक्ष्यते) श्रीपार्श्वनाथप्रसादात्सर्पजीवो नमस्कारं श्रुत्वा मौलौ धरणेन्द्रो जातः, किं वा सामानिकः, तथोपसर्गावसरे समागात्स मौलेः, किं वाऽन्य इति प्रश्ने, उत्तरम्–सर्वज्ञाज्ञानुसारेण मौलौ धरणेन्द्रो ज्ञातो नास्तीति । १४८ प्र० । सेम० ३ उल्ला० ।

धरणि–धरणि–स्त्री० । धृ–अनि०–वा ङीप् । भूमौ, स० ३१ सम० । संथा० । सू० प्र० । चं० प्र० । "मही मेइणी धरा धरणी । " को० । वासुपूज्य (१२) जिनस्य प्रथमाऽऽर्यिकायाम्, प्रव० ६ द्वार । स० । "धरणी य वासुपुज्जे । " ति० । कन्दविशेषे कन्दालौ, वनकन्दे च । वाच० ।

धरणिकील–धरणिकील–पुं० । धरण्याः पृथिव्याः कीलक इव धरणिकीलकः । मेरौ, सू० प्र० ५ पाहु० । चं० प्र० ।

धरणितल–धरणितल–न० । महीपीठे, संथा० । सूत्र० । ज्ञा० ।

धरणितलगमणतुरितसंजणितगमणप्पयार–धरणितलगमनत्वरितसंजनितगमनप्रचार–त्रि० । धरणितलगमनाय भूतलप्राप्तये त्वरितः शीघ्रं संजनित उत्पादितो गमनप्रचारो गतिक्रियाप्रवृत्तिर्येन स तथा । भूतलप्राप्तये शीघ्रोत्पादितगतिक्रियाप्रवृत्तौ, ज्ञा० १ श्रु० १ अ० ।

धरणितलगमणतुरितसंजणितमणप्पयार–धरणितलगमनत्वरितसंजनितमनःप्रचार–त्रि० । भूतलप्राप्तये शीघ्रोत्पादितमनःप्रवृत्तौ, ज्ञा० २ श्रु० १ अ० ।

धरणितलवेणिभूय–धरणितलवेणिभूत–त्रि० । धरणितलस्य वेणिभूतो वनिताशिरसः केशबन्धविशेष इव यः कृष्णत्वदीर्घत्वरूक्षत्वपक्ष्मात्मत्वाऽऽदिसाधर्म्यात् स धरणितलवेणिभूतः । धरण्याः केशबन्धविशेष इव प्रतीयमाने सर्पाऽऽदौ, उपा० २ अ० । भ० ।

धरणिधर–धरणिधर–पुं० । धरणिं धरति । धृ–अच् । पर्वते, विष्णौ, कच्छपे च । वाच० । विमल (१३) जिनस्य स्वनामख्यातायां प्रथमाऽऽर्यिकायाम्, स्त्री० । स० । प्रव० ।

धरणिसिंग–धरणिशृङ्ग–पुं० । धरण्याः शृङ्गमिव धरणिशृङ्गः । मेरौ, चं० प्र० ५ पाहु० । सू० प्र० ।

धरणी–धरणी–स्त्री० । ' धरणि ' शब्दार्थे, स० ।

धरणीखील–धरणीकील–पुं० । ' धरणिखील ' शब्दार्थे, सू० प्र० ५ पाहु० ।

धरणीतल–धरणीतल–न० । ' धरणितल ' शब्दार्थे, संथा० ।

धरणीधर–धरणीधर–पुं० । ' धरणिधर ' शब्दार्थे, स० ।

धरा–धरा–स्त्री० । धृ–अच् । पृथिव्याम्, गर्भाऽऽशये जरायौ, मेदोवहायां नाड्यां च । वाच० । को० २६ गाथा ।

धराहर–धराधर–पुं० । धरां धारयति धृ–अच् । पर्वते, वराहरूपे विष्णौ च । वाच० । वराटविषयस्थे स्वनामख्याते पुरे, न० । यत्र वसन्तसेनो गृहपतिः । दर्श० २ तत्त्व । (तत्कथा " राम " शब्दे वक्ष्यते)

धरिज्जंत–ध्रियमाण–त्रि० । धारणविषयीक्रियमाणे, " उक्तेणं धरिज्जमाणेणं । " प्रश्न० ४ आश्र० द्वार । औ० ।

धरिज्जमाण–ध्रियमाण–त्रि० । ' धरिज्जंत ' शब्दार्थे, प्रश्न० ४ आश्र० द्वार ।

धरिणी–धरिणी–स्त्री० । पृथिव्याम्, को० २५ गाथा ।

धरिम–धरिम–न० । तृणरूप्ये, ज्ञा० १ श्रु० १ अ० । विपा० । तन्मानप्रमाणभेदे, ज्यो० २ पाहु० । स्था० । धरिमं मञ्जिष्ठादीनि । आ० चू० ६ अ० । ज्ञा० । उत्त० । धरिमं यद्गुञ्जाधृतं सद् व्यवह्रियत इति । ज्ञा० १ श्रु० ८ अ० ।

धरिमप्पमाण–धरिमप्रमाण–न० । प्रमाणभेदे, ज्यो० ।

धरिमप्रमाणमाह–

चत्तारि य मधुरत्तण-फलाणि सो मे(से) असरिसवो एक्को ।
सोलस य सरिसवा पुण, हवंति मासयफलं एगं ॥
गुंजा फलाणि दोन्नि उ, रुप्पियमासो हवइ एक्को ।
सोलस य रुप्पिमासो, एक्को धरणो हवेज्ज संखित्तो ॥
अड्ढाइज्जा धरणा, य सुवण्णो सो य पुण करिसो ।
करिसा चत्तारि पलं, पलाणि पुण अद्धतेरस उ पत्थो ॥
भारो य तुला वीसं, एस विही होइ धरिमस्स ॥

चत्वारि मधुरतृणफलानि मधुरतृणतन्दुलाः स मेयविषये सकलजगत्प्रसिद्ध एकः श्वेतसर्षपो भवति । षोडश च श्वेतसर्षपा एकं माषफलं धान्यमाषफलं, द्वे धान्यमाषफले एकं भवति गुञ्जाफलं, द्वे च गुञ्जाफले एको रूप्यमाषः, कर्षमाष इत्यर्थः । षोडश च रूप्यमाषका एकं धरणम् । अर्द्धतृतीयानि धरणानि एकः सुवर्णः, स पञ्च

चैकः सुवर्णः कर्ष इत्युच्यते । चत्वारः कर्षाः पलम्, अर्द्धत्रयोदश पलानि सार्द्धानि द्वादशपलानि प्रस्थः, पलशतिका तुला, विंशतितुला भारः, एष पूर्वाऽऽचार्यप्रदर्शितो धरिमप्रमाणविषयो विधिः । तदेवमुक्तो धरिमप्रमाणविधिः । ज्यो० २ पाहु० ।

धरिस-धृष्-संहतौ अक० । हिंसायां सक०-भ्वादि०-पर०-सेट् । "वृषाऽऽदीनामरिः" ॥ ८ । ४ । २३५ ॥ इति प्राकृतसूत्रेण ऋवर्णस्यारिः । प्रा० ४ पाद । 'धरिसइ ।' धर्षति । प्रागल्भ्ये, स्वादि०-पर०-अक०-सेट् । धृष्णोति । अधार्षीत् । संबन्धने, चुरा०-आत्म०-अक०-सेट् । धर्षयते । अदीधृषत । अदधर्षत । क्रोधे, अभिनवे च । चुरा०-उभ० । पक्षे०भ्वादि०-सक०-सेट् । धर्षयति,ते । धर्षति । अदीधृषत् । अदधर्षत् । अधार्षीत् । वाच० ।

धर्ष-पुं० । धृष्-घञ् । प्रागल्भ्ये, अमर्षे, शक्तिबन्धने, संहतौ, हिंसायां च । वाच० ।

धरिसण-धर्षण-न० । धृष्-भावे ल्युट् । परिभवे, रमणे, धर्षशब्दार्थे च । नि० चू० १ उ० । घांचे० ।

धव-धव-पुं० । धवति, धुनोति, धुनाति वा धु-धू-वा अच् । पत्यौ, ज्ञा० १ श्रु० १ अ० । व्य० । पं० व० । वाच० ।

विधवाशब्दव्याचिख्यासुर्धवशब्दस्य भाष्यकारो व्याख्यानमाह-

विगयधवा खलु विधवा, धवं तु ज्ञत्तारमाहु नेरुत्ता ।
धारयति धीयते वा, दधाति वा तेण उ धवो त्ति ॥

विगतधवा खलु विधवा विगतो धवोऽस्या इति व्युत्पत्तेः । धवं तु ज्ञत्तारमाहुर्नैरुक्ता निरुक्तिशास्त्रविदः । कथं व्युत्पत्तयेत्याह-धारयति तां स्त्रियं, धीयते वा तेन पुंसा सा स्त्री दधाति सर्वात्मना पुष्णाति तां,तेन कारणेन निरुक्तिवशाद् धव इत्युच्यते । व्य० ७ उ० । स्वनामख्याते बहुबीजके वृक्षविशेषे, आव० ५ अ० । रा० । ल० प्र० । जं० । प्रज्ञा० । ति० । धूर्ते नरे च । भावे अप् । कम्पने, वाच० ।

धवल-धवल-पुं० । धवं कम्पं लाति, ला-कः । धववृक्षे, वीरणवृक्षे, श्वेतमरिचे, वृषश्रेष्ठे, चीनकर्पूरे, श्वेतवर्णे च । वाच० । को० ६२ गाथा । रा० । ओघ० । ज्ञा० । तं० । "धवलकमल्लपत्तपयराइरेगरूवप्पभं ।" कल्प० १ अधि० २ क्षण । तं० । तद्धिते सुन्दरे च । त्रि० । शुक्लवर्णायां गवि, स्त्री० ङीप् । गौरा० ङीष् । वाच० । अयोध्यानगरस्थे स्वनामख्याते श्रावके च । पुं० । दर्श० ३ तत्त्व । स्वस्वजात्युत्तमे, दे० ना० ५ वर्ग ५७ गाथा ।

धवलकपुर-धवलार्कपुर-न० । वीरधवलनृपस्य पुरभेदे, ती० ४१ कल्प । "धवलककपुरे वसतो-धनपत्योर्धवकुलचन्द्रिकयोः।" पञ्चा० १६ विव० ।

धवलगिरि-धवलगिरि-पुं० । कैलासापरनामधेयेऽष्टापदपर्वते, ती० ४७ कल्प । (तद्वक्तव्यता ' अट्ठावय ' शब्दे प्रथमभागे २५३ पृष्ठे गता)

धवलपुप्फदंत-धवलपुष्पदन्त-त्रि० । धवलपुष्पवत् सामर्थ्यात् कुन्दकलिकावद् दन्ता यस्य स धवलपुष्पदन्तः । कुन्दकलिकासदृशदन्ते, जी० ३ प्रति० ४ उ० ।

धवलरायधवलराज-पुं० वर्द्धमाननगरस्थे विमलकुमारजनके स्वनामख्याते नृपे, ध० र० । (तत्कथा ' विमलकुमार ' शब्दे वक्ष्यते)

धवलसलाग-देशी । हंसे, दे० ना० ५ वर्ग ५६ गाथा ।

धवलिय-धवलित-त्रि० । धवलवर्णीकृते, स्था० ५ ठा० २ उ० ।

धव्व-देशी-वेगे, दे० ना० ५ वर्ग ५७ गाथा ।

धसाधसि-धसादिति-अव्य० । धसधसेत्यव्यक्तानुकरणे, " कुट्टिमतलंसि सउवगेहिं धसत्ति पडिगया।" धसेत्यनुकरणे,ज्ञा० १ श्रु० ४ अ० ।

धसल-देशी-विस्तीर्णे, दे० ना० ५ वर्ग ५७ गाथा ।

धाई-धात्री-स्त्री० । धीयते पीयतेऽसौ, धा-ष्ट्रन्, स्त्रियां ङीष् । "धाऽयाम्" ॥ ८ । २ । ८१ ॥ इति प्राकृतसूत्रेण धात्रीशब्दे रस्य लुग् वा । 'धत्री ।' ह्रस्वात्प्रागेव रलोपे 'धाई ।' पक्षे 'धारी ।' प्रा० २ पाद । मातरि, वाच० । धयन्ति पिबन्ति बालकास्तामिति, धीयते धार्यते वा बालकानां दुग्धपानाऽऽद्यर्थमिति वा धात्री बालपालिका । प्रव० ६७ द्वार । पञ्चा० । स्तनदायिन्यां जननीकल्पायां बालपालिकायाम्, सूत्र० १ श्रु० ४ अ० १ उ० ।

सा च कर्त्रया क्षीरमज्जनमण्डनक्रीडनाङ्कभेदात्पञ्चधा । पञ्चा० १३ विव० । आचा० । मनु० । ग० । अन्त० । ध० । रा० । उत्त० । ज्ञा० ।

तद्भेदानाह-

खीरे य मज्जणे वि य, मंडणे कीलावणंकधाई य ।
एक्केका वि य दुविहा, करणे कारावणे चेव ॥

क्षीरविषया एका धात्री, या स्तन्यं पाययति । द्वितीया मज्जनविषया । तृतीया मण्डनविषया । चतुर्थी क्रीडनधात्री पञ्चमी अङ्कधात्री । एकैकाऽपि च द्विधा । तद्यथा-स्वयं करणे, कारणे च । तथाहि-या स्वयं स्तन्यं पाययति बालकं सा स्वयं करणे क्षीरधात्री । या त्वन्यया पाययति सा कारणे । एवं मज्जनधात्र्योऽपि भावनीयाः ।

संप्रति धात्रीशब्दस्य व्युत्पत्तिमाह-

धारेइ धीयए वा, धयंति वा तमिति तेण धाई उ ।
जद्दविहवं आसि पुरा, खीराई पंचधा ता उ ॥

धारयति बालकमिति धात्री । यद्वा-धीयते प्राटकप्रदानेन पोष्यते इति धात्री । अथवा-धयन्ति पिबन्ति बालकास्तामिति धात्री । धात्रीति निपातेन तादृप्यनिष्पत्तिः । ताश्च धात्र्यः पुरा पूर्वस्मिन् काले, यथाविभवं विभवानुसारेण, क्षीराऽऽदिविषया बालकयोग्या आसन्, संप्रति तथारूपविभवाभावे ता न दृश्यन्ते । पिं० । आमलक्यां च । स्वार्थे कन् । वाच० ।

धाईपिंड-धात्रीपिण्ड-न० । "धाईदूईनिमित्ते ।" (५७४ गा०) धयन्ति पिबन्ति बालकास्तामिति, धीयते धार्यते बालकानां दुग्धपानाऽऽद्यर्थमिति वा धात्री बालपालिका । सा च पञ्चधाक्षीरधात्री मज्जनकधात्री, मण्डनधात्री, क्रीडनधात्री, उत्सङ्गधात्री च । इह धात्रीत्वस्य करणं कारणं वा तद्धात्रीशब्देनोक्तं द्रष्टव्यम्, तथाविवक्षणात् । ततो धात्र्याः पिण्डो धात्रीपिण्डो धात्रीत्वस्य करणेन कारणेन च य उत्पाद्यते पिण्डः स धात्रीपिण्डः । प्रव० ६७ द्वार । बालस्य क्षीरमज्जनमण्डनक्रीड-

नाकुधाश्यः पञ्च । तासां कर्म धात्रीत्वं, तेन लब्धः पिण्डो धात्रीपिण्डः । जीत० । उत्पादनादोषभेदे, पिं० । दर्श० । पञ्चा० । आचा० । ग० । स्था० । बालस्य क्षीरमज्जनमण्डनक्रीमनालङ्कारारोपणकर्मकारिण्यः पञ्च धात्र्यः,एतासां कर्म निष्कार्थं कुर्वतो मुनेर्धात्रीपिण्डः, भ० ३ अधि० । अशनाऽऽद्यर्थं धातुरूपत्योपकारे वर्त्तत इति धात्रीपिण्डः । आचा० २ श्रु० १ चू० १ अ० ९ उ० ।

तत्र यथा स्तन्यदापनधात्रीत्वं साधुः करोति तथा दर्शयति-

खीराहारो रोवइ, मज्झ कयासाय देहि णं पेज्जे ।
पच्छा वि मज्झ दाही, अलं व जुज्झो व पहामि ॥

पूर्वपरिचिते गृहे साधुर्भिक्षार्थं प्रविष्टः सन् रुदन्तं बालकं दृष्ट्वा तज्जननीमेवमाह-एष बालोऽद्यापि क्षीराऽऽहारः, ततः-क्षीरमन्तरेणावसीदन् आरटति,तस्मान्मह्यं कृताऽऽशाय विदितभिक्षालाभमनोरथाय,झटित्येव भिक्षां देहि,पश्चात् (णं) एनं बालकं (पेज्जे) पाययस्तन्यम । यद्वा-प्रथमत एनं स्तन्यं पाययस्व, पश्चान्मह्यं भिक्षां देहि । यदि वा-अलं मे संप्रति भिक्षया, पाययस्तन्यं बालकमहं पुनर्भूयोऽपि भिक्षार्थमेष्यामि ।

तथा-

मइमं आरोगी दी-हाउ य होइ अवमाणिओ बालो ।
दुल्लभयं खु सुयमुहं, पिज्जेहि अहं व से देमि ॥

अवमानितोऽनपमानितो बालो मतिमान् अरोगी दीर्घायुश्च भवति, विमानितः पुनर्विपरीतः । तथा-दुर्लभं खलु लोके सुतमुखं पुत्रमुखदर्शनं, तस्मात्सर्वाण्यकार्याणि कर्माणि मुक्त्वा त्वमेनं बालकं स्तन्यं पायय । यदि त्वं नो पाययसि तर्हि वा ददाम्यस्मै क्षीरं बालकाय, अन्यस्या वा स्तन्यं पाययामि । अत्र " अहं व से देमि " इत्यनेन स्वयंकरणधात्रीत्वं साधौ दर्शितं, शेषपदैः कारणेन ।

अत्र दोषमाह-

अहिगरणमह पंता, सकम्मुदयागिसाणए य जइहो ।
चडुकारीइ अवओ, नियगो वऽन्नं व णं संके ॥

यदि बालकजननी प्रज्ञा धर्माभिमुखी भवति, तर्हि प्राक्तनैः साधुवचनैरावर्जिता सती अधिकरणमाधाकर्माऽऽदि करोति । अथ प्रान्ता धर्मानभिमुखी,तर्हि प्रद्वेषं यातीति शेषः। तथा यदि सकर्मोदयात्कथमपि स बालो ग्लानो भवति,तर्हि उड्डाहः प्रवचनमालिन्यम्,यथा साधुना तदानीमालपितः,क्षीरं वा पायितोऽन्यत्र वा नीत्वा कस्या अपि स्तन्यं पायितस्तेन ग्लानो जातः। तथाऽतीव चाटुकारीति लोकेऽवर्णोऽश्लाघा, तथा निजको वा भर्त्ता, अन्यद्वा मैथुनाऽऽदिकं, णमिति वाक्यालङ्कारे, तथारूपसाधुवचनश्रवणतः शङ्कते संभावयति ।

अथवा प्रकारान्तरेण धात्रीकरणे दोषस्तं दर्शयति-

अयमवरो उ विकप्पो, भिक्खायरि सहि अछिई पुच्छा ।
दुक्खसहायविन्नासा, हियं मे धाइत्तणं अज्जो ।
वयगंडयधुन्नतणु-त्तणेहिँ तं पुच्छिउं अयाणंते ।
तत्थ गओ तस्समक्खं, जणाइ तं पासिउं बालं ॥

अयमपरो विकल्पो धात्रीकरणे, तमेवाऽऽह-भिक्षाचर्यांप्रविष्टेन साधुना कांचिच्छ्राद्धिका अधृतिधृतिरहिता दृष्ट्वा,ततः पृष्टा सा-किमद्य त्वं सशोका दृश्यसे, तत एवमुक्ता सती सा प्राह-यो दुःखसहायो भवति तस्मै दुःखं निवेद्यते, दुःखसहायश्च स उच्यते, यो दुःखप्रतीकारसमर्थः । ततः साधुराह-अहं दुःखसहायः,तस्मान्निवेद्यतां मे दुःखम् । ततः सा प्राह-अद्य मे मम धात्रीत्वममुकस्मिन्नीश्वरगृहे हुतं स्फेटितं,ततोऽहं विषण्णा । ततः साधुराह-मा त्वं विषादं कार्षीः, अहमवश्यं त्वां तत्राऽचिरेण धात्रीं स्थापयिष्यामीति प्रतिज्ञां विधाय तस्याः पार्श्वे अभिनवस्थापितायाः धाय्या वयःप्रभृतिकमजानानः पृच्छति; यथा किं तस्या वयः?, तारुण्यं परिणतं न वा ?। गण्डावपि स्तनाऽपरपर्यायौ किंपूपराऽऽकारवन्तौ दीर्घौ, यद्वाऽतिशयेन स्थूलौ, शरीरेऽपि तस्याः किं स्थूलत्वं, किं वा कृशत्वं, तत एवं पृष्ट्वा तमेश्वरगृहे गतः सन् तस्समक्षं तं बालकं दृष्ट्वा भणति ।

किं तद्भणतीत्यत आह-

अदुगुंछियं च अणव-ज्जयं च एयं कुलं तु मन्नामि ।
पुव्वेहि नदिट्ठाए, धरई बालेण सुचामो ॥

अहमिदं मन्ये-इदं युष्मदीयं कुलमधुनोत्थितं संप्रत्येवेश्वरीभूतं, यदि पुनः परम्परागतब्रह्मचर्यमिदमभविष्यत्, तर्हि कथं न परम्परया धात्रीलक्षणकुशलमप्यभविष्यदिति भावः । तथा अनवकांक्षितमपरिभावितं महत्तरपुरुषैः, तत एव या वा सा वा धात्री धियते, एतच्च बालेनासंगतधात्रीस्तन्यपानविच्छायेन सूचयामो लक्षयामः । तत एवंभूतधात्रीयुक्तमपीदं कुलं धरते क्रमेण वर्तते, तन्मन्ये पुण्यैः प्राक्तनजन्मकृतैः, यदि वा-यदृच्छया एवमेव, तत एवमुक्ते सति ससंभ्रमं बालकस्य जननी जनको वा साधुं प्रत्याह-भगवन् ! के धाय्या दोषाः ?।

ततः साधुर्धात्रीदोषान् कथयति-

थेरा दुव्वलखीरा, चिमिढो पिल्लियमुहो अइयणीए ।
तणुई उ मंदखीरा, कुप्परथणियाए सूइमुहो ॥

या किल धात्री स्थविरा सा अबलक्षीरा अबलस्तन्या भवति । ततो बालो न बलं गृह्णाति । या त्वतिस्तनी तस्याः स्तन्यं पिबन् स्तनेन प्रेरितमुखश्चपितमुखावयवौष्ठनासिकश्चिपिटश्चिपिटनासिको भवति। या तु शरीरेण कृशा मन्दक्षीरा अल्पक्षीरा, ततः परिपूर्णं तस्याः स्तन्यं बालो न प्राप्नोति, तदभावाच्च क्षीदति । तथा या कूपरस्तनी, तस्याः स्तन्यं पिबन् बालः सूचीमुखो भवति । स हि मुखं दीर्घतया प्रसार्य तस्याः स्तन्यं पिबति,ततस्तथारूपाभ्यासतस्तस्य मुखं सूच्याकारं भवति ।

उक्तं च-

निस्सामा स्थाविरां धात्रीं, सूच्यास्यः कूपरस्तनीम् ।
चिपिटः स्थूलवक्षोजां, घयँस्तन्यीं कृशो नयेत् ॥१॥
जाड्यं भवति स्थविरा-यास्तनुक्षयास्त्वबलंकरम् ।
तस्मान्मध्यबलस्थायाः, स्तन्यं पुष्टिकरं स्मृतम् ॥२॥
अतिस्तनी तु चिपिटं, खरपीना तु दन्तुरम् ।
मध्यस्तनी महाद्रिद्रा, धात्री सा ऽस्य सुखंकरी ॥३॥ "

इत्यादि। एवं चाऽभिनवस्थापिता धात्री उक्तदोषदुष्टा, तस्मान्न युक्ता, किं तु चिरन्तन्येवेति भावः ।

तथा-

जा जेण होइ वन्ने-ण लक्खिया गरहए य तं तेण ।
गरहइ समाण तिव्वं, पसत्थमियरं च दुव्वन्नं ॥

या अभिनवस्थापिता धात्री, येन वर्णेन कृष्णाऽऽदिना उत्कृष्टा भवति, तां तेन वर्णेन गर्हते निन्दति । यथा-" कृष्णा भ्रंशयते वर्णं गौरी तु बलवर्जिता । तस्मात् श्यामा भवेद्धात्री, बलव-

णैः प्रशंसिता ॥१॥" इत्यादि । तथा यामभिनवस्थापितां गृह्णते, तस्याः समाना समानवर्णा चेत् चिरन्तनी धाप्यमाना भवति, तर्हि तां तीव्रामतिशयेन प्रशस्यां प्रशस्तवर्णां लाघते, इतरां त्वभिनवस्थापितां दुर्वर्णाम् । एवं चोक्ते सति गृहस्वामी साध्वभिप्रेतां धात्रीं धारयति, इतरां तु परित्यजति ।

तथा सति यो दोषस्तमाह-

उव्वट्टिया पओसं, छोभग उब्भामओ य से जं तु ।
होज्जा मज्झ वि विग्घो, विसाइ इयरी वि एमेव ॥

या अभिनवस्थापिता धात्री उद्वर्तिता धात्रीत्वात् व्याघिता, सा साधोरुपरि प्रद्वेषं कुर्यात् । तथा सति क्षोभकं दद्यात्, यथाऽयमुद्वृत्तामको जारोऽनया धाया सह तिष्ठतीति । तथा (से) तस्य साधोर्यत्प्रद्वेषवशात्कर्तव्यं वधाऽऽदि, यच्चदोर्नित्यादिसंबन्धात् तदपि कुर्यात् । याऽपि चिरन्तनी संप्रति स्थापिता कदाचिदेवं चिन्तयति-यथैव तस्या धात्रीत्वात् व्याघनं कृतम्, एवमेव कदाचित् रुष्टेन ममापि विघ्नो धात्रीव्यावनरूपोऽन्तरायः करिष्यते, तत एवं विचिन्त्य मारणाय विषाऽऽदि गरप्रभृति प्रयुञ्जीत । उक्ता क्षीरधात्री ।

साम्प्रतं शेषधात्रीराश्रित्य दोषानतिदेशेनाऽऽह-

एमेव सेसियासु वि, सुयमाइसु करण कारणं सगिहे ।
इट्ठीसु य धाईसु य, तहेव उव्वट्टियाए गमो ॥

अत्र षष्ठ्यर्थे सप्तमी । ततोऽयमर्थः-एवमेता यथा क्षीरधात्र्यस्तथा शेषिकास्वपि शेषाणामपि मज्जनाऽऽदिधात्रीणां, सुतमातृकलक्षणानां यत् स्वयं करणं मज्जनाऽऽदेः, यच्चान्यया कारणं, तत् स्वगृहे गतः सन् साधुर्यथा करोति तथा वाच्यं, तथा च सति " अहिगरणनिहपंता " इत्यादिगाथोक्ता दोषा वक्तव्याः यथा तथैव क्षीरगतेनैव प्रकारेण ऋद्धिषु ऋद्धिमत्सु ईश्वरगृहेषु, अभिनवस्थापितानां मज्जनाऽऽदिधात्रीणां (धाईसु य त्ति) भावप्रधानोऽयं निर्देशः, पञ्चम्यर्थे च सप्तमी । ततोऽयमर्थः-धात्रीत्वेऽस्य उद्वर्तितानां व्याघितानां, यो गमः-" उव्वट्टिया पओसं " इत्यादिरूपः, स सकलोऽपि तथैव वक्तव्यः ।

अतिसंक्षिप्तमिदमुक्तमतो विशेषतः एतद्विभावयिषुः प्रथमतो मज्जनधात्रीत्वस्य करणं कारणं च, तथा अभिनवधाया दोषप्रकटनं च यथा साधुः कुरुते तथा भावयति-

छोभइ महीऐ धूली-ऐं गुंमिओ एहाहि अह व णं मज्जे ।
जलभीरु अवत्तनयणो, अइलप्पिलणे अ रत्तच्छो ॥

एष बालो मह्यां लोलति लोमते, ततो धूल्या गुण्ठितो वर्तते, तस्मात् स्नापय । एतद् मज्जनधात्रीत्वस्य करणम् । अथवा-यदि पुनस्त्वं न स्नपयसि, तर्हि अहं मज्जामि स्नापयामि । एतत् स्वयं मज्जनधात्रीत्वस्य करणम् । क्वापि ईश्वरगृहे काऽपि मज्जनधात्री धात्रीत्वात् स्फेटिता, साधुश्च तस्या गृहं भिक्षार्थं प्रविष्टः, तां च धात्रीत्वात्परिभ्रंशेन विषण्णां दृष्ट्वा पूर्वप्रकारेण च वृत्तां कृत्वा च प्रतिज्ञामीश्वरगृहे च गत्वा अभिनवमज्जनधाया दोषप्रकटनायाऽऽह-(जलभीरु इत्यादि) अतिक्षोभेण उत्प्लावनेन प्रभूतजलप्लावनेन क्षुभ्यमानो बालो गुरुरपि जातो नद्यादौ जलभीरुर्भवति । तथा निरन्तरं जलेनोत्प्लाव्यमानोऽव्यक्तनयनोऽप्रवलनयनो रक्ताक्षश्च । यदि पुनः सर्वथाऽपि न मज्ज्यते, तर्हि न शरीरं बलमादत्ते नापि कान्तिभाग्, दृष्ट्या चाऽबलो ज्ञायते ।

एषा च धात्री बालमतिजलोत्प्लावनेन मज्जयति, ततो जलभीरुताऽऽदयो दोषा बालस्य भविष्यन्ति, तस्मादेषा मज्जनधात्री युक्ता । तत एवमुक्ते सति तामभिनवस्थापितां मज्जनधात्रीं गृहस्वामी स्फेटयति, चिरन्तनीमेव कुरुते । तथा च सति स एव प्राक्तना " उव्वट्टिया पओसं " इत्यादिरूपा दोषा द्रष्टव्याः । एवमुत्तरत्रापि प्रतिगाथा भावनीया ।

अथ च मज्जनधात्री कथंभूतं बालं कृत्वा मण्डनधाय्याः समर्पयति, तत आह-

अब्भंगिय संवाहिय, उव्वट्टिय मज्जियं च तो बालं ।
लवणेइ मज्जधाई, मंडणधाईऐं मुद्दहेइं ॥

स्नानधात्री प्रथमतः स्नेहेनाभ्यङ्क्तं, ततो हस्ताभ्यां संवाधितं, तदनन्तरं पिष्टकाऽऽदिना उद्वर्तितं, ततो मज्जितं, शुचिचूर्तं वा देहं बालस्य कृत्वा मण्डनधाय्याः समर्पयति । उक्ता मज्जनधात्री ।

संप्रति मण्डनधात्रीत्वस्य कारणं, करणं च, तथा अभिनवस्थापिताया धाय्या दोषप्रकटनं च यथा साधुः कुरुते तथा दर्शयति-

उसुयाइएहिँ मंमे-हि तावणं अह व णं विभूसेमि ।
हत्थव्वगा व पाए, कया गलिंब्वा व पाए वा ॥

इषुका इषुकारमाभरणम्, अन्ये तिलकमित्याहुः । आदिशब्दात् क्षुरिकाऽऽकाराऽऽद्याभरणपरिग्रहः । इह भिक्षार्थं प्रविष्टः सन् आक्षिकाचित्ताऽऽवर्जनार्थं बालकमनाभरणमवलोक्य तज्जननीमेवमाह-इषुकाराऽऽद्याभरणविशेषैस्तावदेनं बालकं मण्डय विभूषय । एतन्मण्डनधात्रीत्वस्य कारणम् । अथवा-यदि पुनः त्वं न प्रयारयसि, तर्हि अहं विभूषयामि । एतत्स्वयं मण्डनधात्रीत्वस्य करणम् । पूर्वधात्री स्थापनीयेत्यभिनवस्थापिताया मण्डनधाय्या दोषानाह-(हत्थव्वग त्ति) हस्तव्यङ्गानि आभरणानि पादे कृतानि । अथवा-(गलिंब्व त्ति) गलसत्कानि आभरणानि पादे कृतानि, तस्मादेषा मण्डनधात्री मण्डनेऽभिज्ञा, ततस्तस्या मण्डनधात्रीत्वाच्च्यावनमित्यादि पूर्ववद्भावनीयम् । उक्ता मण्डनधात्री ।

संप्रत्यभिनवस्थापिताया क्रीडनधाय्या दोषप्रकटनं, क्रीमनधात्रीत्वे च करणं कारणं च यथा विदधाति साधुस्तथाऽऽह-

ददयरसर वुन्नमुहो, मइयगिरा मलय मम्मणालावो ।
लल्लावणगाईहिँ व, करेइ कारेइ वा किडं ॥

एषा अभिनवस्थापिता क्रीमनधात्री दृढतरस्वरा, ततस्तस्याः स्वरमाकर्ण्य एष बालो वुन्नमुखः क्रीवमुखो भवति । अथवा-मृदुगीरेषा ततोऽनया रम्यमाणो बालो मृदुमीर्जायते । यदि वा मृदुगीः स्वयं क्रीमां कारयति । उक्ता क्रीमनधात्री । मन्मनोल्लापोऽव्यक्तवाक्, तस्मादेषा शोभना, किं तु चिरन्तनेत्यादि प्राग्वित् । तथा क्रिक्षार्थं प्रविष्टः आक्षिकाचित्ताऽऽवर्जनार्थं बालमुल्लापनाऽऽदिभिः स्वयं क्रीमां करोति, अन्यैः कारयति वा । उक्ता क्रीडनधात्री ।

संप्रत्यङ्कधाय्या अभिनवस्थापिताया स्फेटनाय सामान्यतो दोषप्रकटनं यथा साधुः करोति तथा दर्शयति-

थुल्लाऐं वियमपाओ, भग्गकडीसुक्खमीऐं दुक्खं च ।
निम्मंसकक्खकरे-हिँ जीरू ङ होइ पेप्पंतो ॥

इह स्थूलया मांसलया धाय्या कटयां म्रियमाणो बालो विकटपादः परस्परबद्धान्तराग्रपादो भवति । भग्नकट्या, शुष्ककट्या वा

म्रियमाणो दुःखं तिष्ठति । निर्मांसकर्कशकराभ्यां वा म्रियमाणो बालो भीरुर्भवति । एषा चाऽभिनवस्थापिता धात्री अन्यतमदोषदुष्टा, तस्मान्न युक्ता, किं तु प्राक्तनैवेत्यादि प्रागिव । अङ्कधात्रीत्वस्य कारणं,स्वयं करणं स्वयमेव भावनीयम् । तत्रैवम्-कोऽपि साधुर्निर्जरार्थं प्रविष्टो बालं रुदन्तमवलोक्य तज्जननीमेवमाह-अङ्के गृहाणेदं बालकं येन न रोदिति, यदि पुनस्त्वं न प्रपारयसि तर्हि अहं गृह्णामि ।

संप्रति क्रीतनधात्रीत्वस्य करणे दोषं दृष्टान्तेन भावयति-

कोल्लइरे वत्थव्वो, दत्तो आहिंमइं गओ सीसो ।
अवहरइ धाइपिंडं, अंगुलिजलणे य सा दिव्वं ॥

कोल्लकिरे नगरे वार्द्धके वर्त्तमानाः परिक्षीणजङ्घाबलाः संगमस्थविरा नाम सूरयः, तैश्चान्यदा दुर्भिक्षे जाते सति सिंहाभिधानः स्वशिष्यं आचार्यपदे स्थापयित्वा गच्छं च सकलं तस्य समर्प्य अन्यत्र सुभिक्षे देशे विहारक्रमेण प्रेषितः, स्वयं चैकाकी तत्रैव तस्थौ, ततः क्षेत्रे नवनिर्नागैर्विनेयैः तत्रैव यतनया मासकल्पान्, वर्षारात्रं च कृतवान् । यतना च चतुर्विधा । तद्यथा-द्रव्यतः, क्षेत्रतः, कालतो, भावतश्च । तत्र द्रव्यतः-पीठफलकाऽऽदिषु, क्षेत्रतो-वसतिपाटकेषु,कालतः-एकत्र च पाटके मासं स्थित्वा द्वितीयमासे अन्यत्र वसतिगवेषणा । भावतः सर्वत्र निर्ममत्वम् । ततश्च किञ्चिदूने मासकल्पे व्यतिक्रान्ते सिंहाचार्यस्तेषां प्रवृत्तिनिमित्तं दत्तनामानं शिष्यं प्रेषितवान् । स चाऽऽगतोऽस्मिन्नेव विभागे पूर्वं मुक्ताः सूरयस्तस्मिन्नेव स्थिता दृष्टाः । ततः स स्वचेतसि चिन्तयामास । अहो भावतोऽप्यमी मासकल्पं न व्यदधुः, तस्मान्न शिथिलैः सहैकत्र वस्तव्यमिति परिभाव्य वसतेर्बहिः मण्डपिकायामुत्तीर्णस्ततो वन्दिताः सूरयः, पृष्टाः कुशलवार्त्ताम्, कथितं सिंहाचार्यसंदिष्टम् । ततो भिक्षावेलायामाचार्यैः सह भिक्षार्थं प्रविवेश, अन्तप्रान्तेषु गृहेषु अहिंतो भिक्षां जानतो विच्छायमुखः । ततः सूरिभिस्तस्य भावमुपगम्य कस्मिँश्चिदीश्वरगृहे प्रविष्टम् । तत्र च व्यन्तर्याधिष्ठितः सदैव बालको रोदिति । ततः सूरयस्तं दृष्ट्वा चप्पुटिकापुरस्सरमालापयामासुर्यथा वत्स ! मा त्वं रोदीरिति । तत एवमालिप्तसूरिप्रभावतः सा पूतना व्यन्तरी प्राणेशत्, स्थितो रोदितुं बालको, जातः प्रहृष्टो गृहनायकः, ततो दापितास्तेन भूयांसो मोदकाः तांश्च ग्राहितो दत्तः सूरिभिः, अजायत प्रहृष्टः,ततो मुक्तकलितो वसतौ, ते सूरयः स्वशरीरनिःस्पृहा यथागमविधिना प्रान्तकुलस्थमदित्वा वसतावुपाजग्मुः । प्रतिक्रमणवेलायां च दत्तः भणितो-वत्स ! धात्रीपिण्डं त्रिकित्सापिण्डं चाऽऽलोचय । स त्वाह-युष्माभिरेव सहाऽहं विहृतः, ततः कथं मे धात्रीपिण्डाऽऽदिपरिभोगः। सूरयोऽवोचन्-लघुबालकक्रीमनधात्रीपिण्डः चप्पुटिकाकरणतः,पूतनातो मोचितत्वात् त्रिकित्सापिण्डः । स प्रद्विष्टः स्वचेतसि चिन्तयति-स्वयं ज्ञानतोऽपि मासकल्पं न विदधाति, एतादृशं च पिण्डं दिने दिने गृह्णाति, मां पुनरेकदिनगृहीतमप्यालोचयति । तत एवं विचिन्त्य प्रद्वेषतो वसतेर्बहिः स्थितः । ततस्तस्य सूरिविषयप्रद्वेषदर्शनतः कुपितया सूरिगुणाऽऽवर्जितया देवतया तस्य शिक्षार्थं वसतावन्धकारं सचातं वर्षं विकुर्वितम् । ततः स भयभीतः सूरीनाह-भगवन् ! कुत्राहं व्रजामि ?। ततस्तैः क्षीरोदजलबदतिनिर्मलहृदयैरभाणि-वत्स ! एहि वसतौ प्रविशेति । दत्त आह-भगवन् ! न पश्याम्यन्धकारेण द्वारमिति । ततोऽनुकम्पया स्वोष्मणा सूरिभिः निजाङ्गुलिरुत्कृत्य ऊर्ध्वीकृता,सा च दीपशिखेव ज्वलितुं प्रवृत्ता । ततः स दुरात्मा दत्तोऽचिन्तयत्-अहो एतस्य परिग्रहे वह्निरप्यस्ति । एवं चिन्तयन् देवतया निर्भर्त्सितः-हा दुष्ट शिष्याधम ! एतादृशानपि सर्वगुणरत्नाऽऽकरान् सूरीनन्यथा चिन्तयसि । ततो मोदकलाभाऽऽदिको वृत्तान्तः सर्वोऽपि यथावस्थितो देवतयाऽभाणि । मासे जाते तस्य भावतः प्रत्यावृत्तिः । क्षामिताः सूरयः, आलोचितं सम्यक् ।

सूत्रं सुगमम, नवरं ' सा दिव्वं ' देवताप्रातिहार्यम् , एतदेव गाथाद्वयेन भाष्यकृद् विवृणोति ।

पाउसे संगमथेरा, गच्छ विसज्जंति जंघबलहीणा ।
नवन्नागखेत्तवसही, दत्तस्स य आगमो ताहे ॥
उवसयबाहिरठाणं, मंताओ छन्नसंकिलेसो य ।
पूयण बाले मा रुय, पमिलाभण वियमणा सम्मं ॥

सुगमं नवरं (पूयणबाले त्ति) पूतना व्युत्थन्तरी, तया गृहीते धात्रीबालके रोदिति विकटता आलोचनम् । उक्तं धात्रीद्वारम् । पिं० । प्रव० ।

जे भिक्खू धाईपिंडं भुंजइ, भुंजंतं वा साइज्जइ । ५९ ॥

गाहा-

जे भिक्खु धातिपिंडं, गेण्हेज्ज सयं तु अहव सातिज्जे ।
सो आणा अणवत्थं, मिच्छत्तविराहणं पावे ॥ ११५ ॥

सातिज्जणा-अस्सं करेंतं अणुमोदति,सेसं कंठं । नि०चू०१३उ० ।

अववादे कारणे गेण्हंतो अदोसो । गाहा-

असिवे ओमोयरिए,रायदुट्ठे जए व गेलण्णे ।
अद्धाणरोधए वा, जयणागहणं तु गीयत्थे ॥१३५॥

असिवाऽऽदिकारणेहिं गीयत्थो पणगपरिहाणिजयणाए गेण्हंतो सुद्धो । नि० चू० १३ उ० ।

धाउ–धातु–पुं० । धा–तुन् । "धारणाद् धातवस्ते स्युः वातपित्तकफात्मयः।" इत्युक्तेषु वाताऽऽदिषु, "रसासृङ्मांसमेदोऽस्थि-मज्जाशुक्राणि धातवः ।" इत्युक्तेषु रसाऽऽदिषु,वाच० । सूत्र० । धारकत्वपोषकत्वाच्च पृथिव्यादिके, " पुढवी आउ तेऊ य, तहा वाऊ य एगओ । चत्तारि धाउणो रूवं ।" सूत्र० १ श्रु० १ अ० १ उ० । गैरिके,लोहाऽऽदिके,प्रश्न०२ आश्र०द्वार । उत्त० । "अयतंबतउयसीसग-रूप्पसुवण्णे य वइरे य । हरियाले हिंगुलए, मणोसिला सीसगंजणपवाले ॥ १ ॥ अब्भपडलबालुया । " उत्त० ३६ अ० । व्याकरणोक्ते गणपठिते क्रियावाचके भूप्रभृतौ, नामभेदे च । धातवो ज्वादयः क्रियाप्रतिपादकाः । प्रश्न० २ संव० द्वार । (तद्वक्तव्यता ' धाउय ' शब्दे २७४३ पृष्ठे द्रष्टव्या) जीवाजिगमे विजयदेववक्तव्यतायां हरितालहिङ्गुलाऽऽदयः पदार्थाः सन्ति, तेषां प्रयोजने सति व्ययादुत्पत्तिः कुतः ? इति प्रश्ने, उत्तरम्-हरितालाऽऽदीनामुत्पत्तिर्विस्रसात इति । १४७ प्र० । सेन० २ उल्ला० ।

धाउकम्म–धातुकर्मन्–न० । पुरुषद्वासप्ततिकलान्तर्गते कलाभेदे, कल्प० १ अधि० ७ क्षण ।

धाउक्खोभ–धातुक्षोभ–पुं० । धातुवैषम्ये, औ० ।

धाउपाग–धातुपाक–पुं० । द्वासप्ततिकलाऽन्तर्गते कलाभेदे, स० ७२ सम० ।

धाउप्पावेयण-धातुप्रावेदन-न० । धातुदर्शने,नि० चू० १ उ० । (धातुप्रावेदने मयूराङ्कनृपदृष्टान्तः ' अणुउत्थिय ' शब्दे प्रथमभागे ४६७ पृष्ठे गतः)

धाउय-धातुज-न० । वस्त्रभेदे, पं० भा० ।

तत्स्वरूपं पञ्चकल्पभाष्ये यथा-

बुब्बति वंसकरिल्लो, कम्मि वि देसे तरुणतो घणए ।
वड्ढंतो पूरयंती, तं घणयं तिप्पिए तम्मि ॥
संकोडे तूणयतो, तेसि तु एहारूहिँ पच्चए सुत्तं ।
तेण तुयं जे वत्थं, जनइ तं धातुयं णाम । पं० भा० ।

धातुयं नाम जहा कम्मि देसे वंसकरिल्लो उदेतो चेव घडप्पए पिहिज्जइ, ताहे सो सुकुमालओ तत्थेव आलंमलीगओ वड्ढइ, पच्छा पिच्छइ, तओ किच्चइ, तं सुत्तं विज्जइ, तं धाउयं । पं० चू० । भावप्रमाणनिष्पन्ननामभेदे, अनु० ।

से किं तं धाउए ? । भू सत्तायां, (परस्मैभाषा) एध वृद्धौ, स्पर्ध संघर्षे । सेत्तं धाउए ।

भूरयं परस्मैपदी धातुः सत्तालक्षणस्यार्थस्य वाचकत्वेन धातुजं नामेति । एवमन्यत्रापि । अनु० ।

धाउरत्त-धातुरक्त-वि० । गैरिकोपरञ्जिते, " धाउरत्ताओ य गिण्हइ । " भ० २ श० १ उ० । धातुरक्ता गैरिकोपरञ्जिता, शाटिका इति गम्यम् । औ० ।

धाउवाइ(ण्)-धातुवादिन्-पुं० । वादिनेदे, स्था० ६ ठा० ।

धामण-धाटन-न० । प्रेरणे, "धामेंति य हाडेंति य ।" 'धामेंति' प्रेरयन्ति । सूत्र० १ श्रु० ४ अ० २ उ० । " वज्झपुरिसेहिं धामिज्जंता । " वध्यपुरुषैर्धाट्यमानाः प्रेर्यमाणाः । प्रश्न० ३ आश्र० द्वार । आ० म० । नाशने, औ० ।

धामिअ-पुं० । देशी-आरामे, दे० ना० ५ वर्ग ५१ गाथा ।

धामी-देशी-निरस्ते, दे० ना० ५ वर्ग ५७ गाथा ।

धाण-घ्राण-न० । सुभिक्षे, विभवे च । बृह० ३ अ० ।

धाणुरिअ-न० । देशी-फलभेदे, दे० ना० ५ वर्ग ६० गाथा ।

धाय-धाय-पुं० । पणपन्नव्यन्तरविशेषनिकायेन्द्रे, स्था० २ ठा० ३ उ० ।

धात-न० । सुभिक्षे, दश० ७ अ० । " धाय पुण संखमीपुरओ । " धातं सुभिक्षमिति चैकोऽर्थः । बृ० ५ उ० ।

धायइ-धातकी-स्त्री० । धातुं करोति णिच्, टिलोपः, एवुल् । " धातकी कटुका शीता । " गौरा०-ङीष् । एकास्थिके वृक्षविशेषे, स० । प्रज्ञा० । अनु० । स्था० ।

धायइखंड-धातकीखण्ड-पुं० । धातकीनां वृक्षविशेषाणां खण्डो वनसमूहो धातकीखण्डः । धातकीवने, तद्युक्तो यो द्वीपः स धातकीखण्ड एवोच्यते, यथा दण्डयोगाद्दण्डः । स्था० २ ठा० ३ उ० । धातकीनां खण्डानि वनानि यस्मिन् स धातकीखण्डो द्वीपः । ध० २ अधि० । आव० । धातकीवृक्षखण्डोपलक्षितो द्वीपो धातकीखण्डः । लवणसमुद्रं परिक्षिप्य स्थिते कालोदसमुद्रपरिक्षिप्ते द्वीपभेदे, अनु० । (एतद्वक्तव्यता 'धायइसंमदीव' शब्देऽनुपदमेव वक्ष्यते)

धायइरुक्ख-धातकीवृक्ष-पुं० । एकास्थिके वृक्षविशेषे, स्था० ७ ठा० ।

धायइवण-धातकीवन-न० । धातकीसमूहे, " धायइवणंसि वा । " आचा० २ श्रु० २ चू० १० अ० । जी० ।

धायइसंमदीव-धातकीखण्डद्वीप-पुं० । धातकीनां वृक्षविशेषाणां खण्डो वनसमूह इत्यर्थो धातकीखण्डस्तद्युक्तो यो द्वीपः स धातकीखण्ड एवोच्यते । यथा दण्डयोगाद्दण्ड इति धातकीखण्डश्चासौ द्वीपश्चेति धातकीखण्डद्वीपः लवणसमुद्रं परिक्षिप्य स्थिते कालोदसमुद्रपरिक्षिप्ते द्वीपभेदे, स्था० २ ठा० ३ उ० ।

सम्प्रति धातकीखण्डद्वीपवक्तव्यतामाह-

लवणे णं समुद्दे धायइसंमे नाम दीवे वट्टे वलयागारसंठाणसंठिए सव्वओ समंता संपरिक्खित्ता णं चिट्ठति ॥

(लवणसमुद्द इत्यादि) लवणसमुद्रे धातकीखण्डो नाम द्वीपो वृत्तो वलयाकारसंस्थानसंस्थितः सर्वतः सर्वासु दिक्षु समंततः सामस्त्येन संपरिक्षिप्य तिष्ठति ।

धायतिसंडे णं भंते ! किं समचक्कवालसंठिते, विसमचक्कवालसंठिए ?। गोयमा ! समचक्कवालसंठिते, नो विसमचक्कवालसंठिते ॥

(धायइसंमे णं दीवे किं समचक्कवालसंठिए " इति सूत्रं लवणसमुद्रवद् भावनीयम् ।

धायतिसंमे णं भंते ! दीवे केवतिए चक्कवालविक्खंभेणं केवइयं परिक्खेवेणं पण्णत्ते ?। गोयमा ! चत्तारि जोयणसयसहस्साइं चक्कवालविक्खंभेणं एगयाहीसं जोयणसतसहस्साइं दसजोयणसहस्साइं णव य एगसट्ठे जोयणसते किंचि विसेसूणे परिक्खेवेणं पण्णत्ते, से णं एगाए पउमवरवेदियाए एगेणं वणसंमेणं सव्वतो समंता संपरिक्खित्ता दोण्ह वि वण्णओ दीवसमिया परिक्खेवेणं ।

"धायइसंडे णं" इत्यादि प्रश्नसूत्रं सुगमम् । भगवानाह-गौतम ! चत्वारि योजनशतसहस्राणि चक्रवालविष्कम्भेन एकचत्वारिंशदधिकयोजनशतसहस्राणि दशसहस्राणि नव च एकषष्ठानि योजनशतानि किञ्चिद्विशेषोनानि परिक्षेपेण । उक्तं च-" पयालीसं लक्खा, दससयसहस्साइं जोयणाणं तु । नव य सया इगसट्ठा, किंचूणा परिरओ तस्स ॥१॥" (से णमित्यादि) स धातकीखण्डद्वीप एकया पद्मवरवेदिकया, अष्टयोजनोच्छ्रयजगत्युपरिभाविन्येति सामर्थ्याद् गम्यते । एकेन वनखण्डेन पद्मवरवेदिकाबहिर्भूतेन सर्वतः समन्तात्संपरिक्षिप्तः द्वयोरपि वर्णकः प्राग्वत् ।

धायतिसंमस्स णं भंते ! दीवस्स कति दारा पण्णत्ता ?। गोयमा ! चत्तारि दारा पण्णत्ता । तं जहा-विजए, वेजयंते, जयंते, अपराजिए ।

(धायइसंडस्स णमित्यादि) धातकीखण्डस्य भदन्त ! द्वीपस्य कति द्वाराणि प्रज्ञप्तानि ?। भगवानाह-गौतम ! चत्वारि द्वाराणि प्रज्ञप्तानि । तद्यथा-विजयं, वैजयन्तं,जयन्तमपराजितं च ।

कहि णं भंते ! धायतिसंमस्स दीवस्स विजए णामं दारे पण्णत्ते ?। गोयमा ! धायइसंडपुरच्छिमपेरंते कालोयसमुद्दपुरच्छिमद्धस्स पच्चच्छिमेणं सीयाए महाणदीए उप्पिं एत्थ णं धायतिसंडस्स दीवस्स विजए णामं दारे पण्णत्ते ! तं चेव पमा-

णं रायहाणी य अण्णम्मि धायइसंडे दीवे सा वत्तव्वया भाणियव्वा । एवं चत्तारि वि दारा भाणियव्वा ।

(कहि णं भंते! इत्यादि) क्व भदन्त ! धातकीखण्डस्य द्वीपस्य विजयं नाम द्वारं प्रज्ञप्तम् ?। भगवानाह-गौतम ! धातकीखण्डस्य द्वीपस्य पूर्वपर्यन्ते कालोदसमुद्रपूर्वार्द्धस्य पश्चिमदिशि शीतोदाया महानद्या उपरि अत्र एतस्मिन्नन्तरे धातकीखण्डस्य द्वीपस्य विजयं नाम द्वारं प्रज्ञप्तम्। तच्च जम्बूद्वीपविजयद्वारवदविशेषेण वेदितव्यम्, नवरमत्र राजधानी अन्यस्मिन् धातकीखण्डे द्वीपे वक्तव्या । * "कहि णं भंते !" इत्यादि प्रश्नसूत्रं सुगमम् । भगवानाह-धातकीखण्डद्वीपदक्षिणपर्यन्ते कालोदसमुद्रदक्षिणार्द्धस्योत्तरतोऽत्र धातकीखण्डस्य द्वीपस्य वैजयन्तं नाम द्वारं प्रज्ञप्तम् । तदपि जम्बूद्वीपवैजयन्तद्वारवदविशेषेण वक्तव्यम्, नवरमत्रापि राजधानी अन्यस्मिन् धातकीखण्डे द्वीपे। "कहि णं भंते !" इत्यादि प्रश्नसूत्रं गतार्थम् । भगवानाह-गौतम ! धातकीखण्डद्वीपपश्चिमपर्यन्ते कालोदसमुद्रपश्चिमार्द्धस्य पूर्वतः शीतोदाया महानद्या उपरि अत्र धातकीखण्डस्य द्वीपस्य जयन्तं नाम द्वारं प्रज्ञप्तम्। तदपि जम्बूद्वीपजयन्तद्वारवद्वक्तव्यम्। नवरं राजधानी अन्यस्मिन् धातकीखण्डद्वीपे। "कहि णं भंते !" इत्यादि प्रश्नसूत्रं प्रतीतम्। भगवानाह-गौतम ! धातकीखण्डद्वीपोत्तरार्द्धपर्यन्ते कालोदसमुद्र उत्तरार्द्धस्य दक्षिणतोऽत्र धातकीखण्डस्य द्वीपस्यापराजितं नाम द्वारं प्रज्ञप्तम्। तदपि जम्बूद्वीपगतापराजितद्वारवद्वक्तव्यम्। नवरं राजधानी अन्यस्मिन् धातकीखण्डे द्वीपे।

धायइसंमस्स णं भंते ! दीवस्स दारस्स य दारस्स य एस णं केवतियं अबाहाए अंतरे पण्णत्ते ? । गोयमा ! दस जोयणसतसहस्साइं सत्तावीसं च जोयणसहस्साइं सत्त य पणतीसे जोयणसते तिण्णि य कोसे दारस्स य दारस्स य अबाहाए अंतरे पण्णत्ते ।

(धायइसंमस्स णं भंते ! इत्यादि) धातकीखण्डस्य भदन्त ! द्वीपस्य द्वारस्य च द्वारस्य च परस्परमेतत् अन्तरं किंचत् किंप्रमाणमबाधया अन्तरितत्वाद् व्याघातेन प्रज्ञप्तम् ?। भगवानाह-गौतम ! दशयोजनशतसहस्राणि सप्तविंशतिसहस्राणि सप्तशतानि पञ्चत्रिंशानि योजनशतानि त्रयः क्रोशा द्वारस्यच द्वारस्य च परस्परमन्तरमबाधया प्रज्ञप्तम् । तथाहि-एकैकस्य द्वारस्य द्वारशाखाकस्य जम्बूद्वीपद्वारस्येव पृथुत्वं सार्द्धानि चत्वारि योजनानि । ततश्चतुर्णां द्वाराणामेकत्र पृथुत्वपरिमाणमीलने जातान्यष्टादश योजनानि, तान्यनन्तरोक्तात्परिरयपरिमाणात् ४११०१६१ शोध्यन्ते। शोधितेषु च तेषु जातं शेषमिदम्-एकचत्वारिंशल्लक्षा दशसहस्राणि नवशतानि त्रिचत्वारिंशदधिकानि ४११०९४३। एतेषां चतुर्भिर्भागे हृते लब्धं यथोक्तं द्वाराणां परस्परमन्तरम्। उक्तं च-"पणतीसा सत्त सया, सत्तावीसा सहस्स दसलक्खा। धायइसंमे दारं-तरं तु अवरं च कोसतियं ॥ १ ॥"

धायइसंमस्स णं भंते ! दीवस्स पदेसा कालोयणं समुद्दं पुट्ठा ?। हंता पुट्ठा । ते णं भंते ! किं धायइसंमे दीवे कालोयणे समुद्दे ?। गोयमा ! धायइसंमे नो खलु ते कालोयणसमु० । एवं कालोयस्स वि धायइसंमे दीवे जीवा उद्दाइत्ता उद्दाइत्ता कालोयणे समुद्दे पच्चायंति ?। गोयमा ! अत्थेगइया पच्चायंति, अत्थेगइया नो पच्चायंति । एवं कालोयणे वि अत्थेगतिया पच्चायंति, अत्थेगतिया नो पच्चायंति ।

" धायइसंमस्स णं भंते ! दीवस्स एयस्स " इत्यादीनि चत्वारि सूत्राणि प्राग्वद्भावनीयानि ।

से केणट्ठेणं भंते ! एवं वुच्चति-धायइसंमे दीवे, धायइसंमे दीवे ?, धायइसंमे णं दीवे तत्थ तत्थ देसे तस्स तस्स देसस्स तहिं तहिं पदेसे बहवे धायइरुक्खा धायइवणा धायइसंमा णिच्चं कुसुमिया० जाव उवसोभेमाणा उवसोभेमाणा चिट्ठंति । धायइमहाधायइरुक्खे सुदंसणे पियदंसणे पियदेवा महिड्ढिया० जाव पलिओवमट्ठितीया परिवसंति । से तेणट्ठेणं गोयमा ! एवं वुच्चइ, अदुत्तरं च णं गोयमा० जाव णिच्चं ।

(से केणट्ठेणं भंते) इत्यादि ! अथ केनार्थेन भदन्त ! एवमुच्यते-धातकीखण्डो द्वीपो धातकीखण्डो द्वीप इति ?। भगवानाह-धातकीखण्डे द्वीपे तत्र तत्र देशे तस्य तस्य देशस्य तत्र तत्र प्रदेशे बहवो धातकीवृक्षाः, बहूनि धातकीवनानि बहवो धातकीखण्डाः । वनखण्डयोः प्रतिविशेषः प्रागेवोक्तः। "निच्चं कुसुमिया" इत्यादि प्राग्वत् । (धायइमहाधायइरुक्खे इत्यादि) पूर्वार्द्धे उत्तरकुरुषु नीलवद्गिरिसमीपे धातकीनामा वृक्षोऽवतिष्ठते। पश्चिमार्द्धे उत्तरकुरुषु नीलवद्गिरिसमीपे धातकीवृक्षः, तौ च प्रमाणाऽऽदिना जम्बूवृक्षवद् वेदितव्यौ । तयोरत्र धातकीखण्डे द्वीपे यथाक्रमं सुदर्शनप्रियदर्शनौ द्वौ देवौ महर्द्धिकौ यावत्पल्योपमस्थितिकौ परिवसतः। ततो धातकीखण्डोपलक्षितो द्वीपो धातकीखण्डद्वीपः । तथा चाऽऽह-(से तेणट्ठेणमित्यादि) गतार्थम्।

संप्रति चन्द्राऽऽदिवक्तव्यतामाह-

धाइसंमे णं भंते ! दीवे कइ चंदा पहासिंसु वा, पहासंति वा पहासिस्संति वा ?। कति सूरिया तवइंसु वा, तवंति वा, तवइस्संति वा ?। कइ महग्गहा चारं चारिंसु वा, चरिंति वा, चरिस्संति वा ?। कइ णक्खत्ता जोगं जोएंसु वा, जोएंति वा, जोइस्संति वा ? । कइ तारागणकोडिकोडीओ सोभं सोभिंसु वा, सोभेंति वा, सोभिस्संति वा ?। गोयमा ! बारस चंदा पभासेंसु वा, पभासंति वा, पभासिस्संति वा एवं ।

"चउवीसं ससिरविणो, णक्खत्तसता य तिण्णि छत्तीसा ।
एगं च सयसहस्सं, छप्पण्णं धायईसंमे ॥ १ ॥
अट्ठेव सयसहस्सा, तिण्णि सहस्साइं सत्त य सयाइं ।
धायइसंमे दीवे, तारागणकोडकोडीणं ॥२॥ "
सोभं सोभिंसु वा, सोभंति वा, सोभिस्संति वा ।

"धायइसंमे णं भंते ! दीवे कइ चंदा" इत्यादि प्रश्नसूत्रं सुगमम। भगवानाह-गौतम ! धातकीखण्डे द्वादश चन्द्राः प्रभासितवन्तः,प्रभासन्ते,प्रभासिष्यन्ते । द्वादश सूर्यास्तापितवन्तः, तापयन्ति,तापयिष्यन्ति । त्रीणि नक्षत्रशतानि षट्त्रिंशानि योगं चन्द्रमसा सूर्येण च सार्द्धं युक्तवन्तो,युञ्जन्ति,योक्ष्यन्ति । तत्र त्रीणि

* एवं चत्तारि दारा भाणियव्वा ।" इत्यनेन गतार्थत्वात् मूलपाठे सूत्रे नोक्तः, टीकायामुपन्यस्तः ।

षट्त्रिंशानि नक्षत्राणां शतानि, एकैकस्य शशिनः परिवारेऽष्टाविंशतेर्नक्षत्राणां जातत्वात्, एकं षट्पञ्चाशदधिकं महाग्रहसहस्रं चारं चरितवन्तः, चरन्ति, चरिष्यन्ति। एकैकस्य शशिनः परिवारेऽष्टाशीतेर्महाग्रहाणां जातत्वात्। अष्टौ शतसहस्राणि त्रीणि सहस्राणि सप्तशतानि तारागणकोटिकोटीनां शोभितवन्तः, शोभन्ते शोभिष्यन्ते। एतदपि एकशशितारापरिमाणं द्वादशभिर्गुणयित्वा भावनीयम्। उक्तं च-

" बारस चंदा सूरा, नक्खत्तसया य तिन्नि छत्तीसा।
छग्गं च गहसहस्सं, हुप्पन्नं धायईसंमे ॥ १ ॥
अट्ठेव सयसहस्सा, तिन्नि सहस्सा य सत्त य सया उ।
धायइसंडे दीवे, तारागणकोमिकोमीओ ॥ २ ॥" जी० ३ प्रति० ४ उ०।

धायइसंडदीवपुरच्छिमद्धे णं धायइरुक्खे अट्ठ जोयणाइं उद्धमुच्चत्तेणं पण्णत्ते, बहुमज्झदेसभाए अट्ठ जोयणाइं विक्खंभेणं साइरेगाइं अट्ठ जोयणाइं सव्वग्गेणं पण्णत्ते। धायइसंडदीवपच्चच्छिमद्धे णं धायइरुक्खे अट्ठ जोयणाइं उद्धं उच्चत्तेणं पण्णत्ते, बहुमज्झदेसभाए अट्ठ जोयणाइं विक्खंभेणं साइरेगाइं अट्ठ जोयणाइं सव्वग्गेणं पण्णत्ते। एवं धायइरुक्खाओ आढवित्ता० सव्वेव जंबुदीववत्तया जाणियव्वा० जाव मंदरचूलिय त्ति। एवं पच्चच्छिमद्धे वि महाधायइरुक्खाओ आढवित्ता० जाव मंदरचूलिय त्ति। स्था० ७ ठा०।

सम्प्रति धातकीखण्डवक्तव्यतानन्तरं "धायइसंमे" इत्यादिना वेदिकासूत्रान्तेन ग्रन्थेनाऽऽह-

धायइसंमे णं दीवे पुरच्छिमद्धेणं मंदरस्स पव्वयस्स उत्तरदाहिणेणं दो वासा पण्णत्ता बहुसमतुल्ला० जाव भरहे चेव, एरवए चेव। एवं जहा जंबुदीवे तहा एत्थ भाणियव्वं० जाव दोसु वासेसु मणुया छव्विहं पि कालं पच्चणुब्भवमाणा विहरंति। तं जहा-भरहे चेव, एरवए चेव, णवरं कूमसामली चेव, धायईरुक्खे चेव, देवागरुले चेव, वेणुदेवे पियदंसणे चेव। धायईसंडदीवपच्चच्छिमद्धे मंदरस्स पव्वयस्स उत्तरदाहिणेणं दो वासा पण्णत्ता बहुसमतुल्ला० जाव भरहे चेव, एरवए चेव, ० जाव छव्विहं पि कालं पच्चणुब्भवमाणा विहरंति। तं जहा-भरहे चेव, एरवए चेव, णवरं कूमसामली चेव, महाधायईरुक्खे चेव, देवागरुले चेव, वेणुदेवे पियदंसणे चेव॥

करणमधम्। नवरं-चक्रवालस्य विष्कम्भः पृथुत्वं चक्रवालविष्कम्भस्तेनेति। समुद्रवेदिकासूत्रं जम्बूवेदिकासूत्रवद्वाच्यमित्यर्थः। क्षेत्रप्रस्तावाल्लवणसमुद्रवक्तव्यतानन्तरं धातकीखण्डवक्तव्यतां "धायइसंमे" इत्यादिना वेदिकासूत्रान्तेन ग्रन्थेनाऽऽह। करणव्यमायम्, नवरं धातकीखण्डप्रकरणमपि-जम्बूद्वीपलवणसमुद्रमध्यं वलयाकृति धातकीखण्डमालिख्य हिमवदादिवर्षधरान् जम्बूद्वीपानुसारेण चोभयतः पूर्वापरविभागेन भरतहैमवताऽऽदिवर्षाणि च व्यवस्थाप्य पूर्वापरदिशोर्वलयविष्कम्भमध्ये मेरुं च कल्पयित्वाऽऽलेख्यम्। अनेनैव क्रमेण पुष्करवरद्वीपार्द्धमपीति। तत्र धातकीनां वृक्षविशेषाणां खण्डो वनसमूह इत्यर्थो धातकीखण्डः, तद्युक्तो यो द्वीपः स धातकीखण्ड एवोच्यते। यथा दण्डयोगाद् दण्ड इति। धातकीखण्डश्चासौ द्वीपश्चेति धातकीखण्डद्वीपः, तस्य (पुरच्छिमं ठि) पौरस्त्यं, पूर्वमित्यर्थः। यदर्द्धविज्ञानस्तद्धातकीखण्डद्वीपपौरस्त्यार्द्धं, पूर्वापरार्द्धता च लवणसमुद्रवेदिकातो दक्षिणत उत्तरतश्च धातकीखण्डवेदिकां यावत् गताभ्यामिषुकारपर्वताभ्यां धातकीखण्डस्य विभक्तत्वादिति।

उक्तं च-

"पंचसयजोयणुच्चा, सहस्समेगं च होंति वित्थिन्ना।
कालोयणलवणजले, पुट्ठा ते दाहिणुत्तरओ ॥ १ ॥
दो इसुयारनगवरा, धायइसंमस्स मज्झयारंमि।
तेण दुहा निद्दिस्सइ, पुव्वं पच्छिमद्धं च ॥ २ ॥" इति।

तत्र णमिति वाक्यालङ्कारे, मन्दरस्य मेरोरित्येवं धातकीखण्डपूर्वार्द्धपश्चिमार्द्धप्रकरणे प्रत्येकमेकोनसप्ततिसूत्रप्रमाणे जम्बूद्वीपप्रकरणवदध्येतव्ये, व्याख्येये च। अत एवाऽऽह-(एवं जहा जंबुदीवे तहेत्यादि) नवरं वर्षधराऽऽदिस्वरूपमायामाऽऽदिसमता चैवं भावनीया-

" पुव्वद्धस्स य मज्झे, मेरुस्स पुणो वि दाहिणुत्तरओ।
वासाइं तिन्नि तिन्नि य, विदेहवासं च मज्झंमि ॥ १ ॥
अरविवरसंठियाइं, चउरो नक्खाइं ताइं खेत्ताइं।
अंतो संखित्ताइं, कुंडयराइं कमेण पुण पुट्ठो ॥ २ ॥
नरहे सुहविक्खंभो, छावट्ठिसयाइं चोद्दसऽहियाइं।
अउणत्तीसं च सयं, बारसऽहियदुसयभागेणं ॥ ३ ॥
अट्ठारस य सहस्सा, पंचेव सया हवंति सीयाए।
पणवन्नं अंससयं, बाहिरओ नरहविक्खंभो ॥ ४ ॥
चउगुणियभरहवासो, (व्यास इत्यर्थः)
हेमवए तं चउगुणं तइयं। (हरिवर्षमित्यर्थः)
हरिवासं चउगुणियं, महाविदेहस्स विक्खंभो ॥ ५ ॥
जह विक्खंभो दाहिण-दिसाए तह उत्तरे वि वासतिए।
जह पुव्वद्धेसु तओ, तह अवरद्धे वि वासाइं ॥ ६ ॥
सत्ताणउइ सहस्सा, सत्ताणउयाइं अट्ठ य सयाइं ॥
तिन्नेव य लक्खाइं, कुरुणं भागा य बारसहा ॥७॥(विक्कम्भ इति)
अमयमइयं तेवी-ससहस्सा दो य लक्खजीवाओ।
दोण्ह गिरीणाऽऽयामो, संखित्तो तं धणुकुरुणं ॥ ८ ॥
वासहरगिरी वक्खा-रपव्वया पुव्वपच्छिमद्धेसु।
जंबुदीवगइगुणा, वित्थरओ उस्सय तुल्ला ॥ ९ ॥
कंचणगजमगसुरकुरु-नग य वेयड्ढबहुदीहा य।
विक्खंभुव्वेहसमु-स्सएण जह जंबुदीवे य ॥ १० ॥
लक्खाइं तिन्नि दीहा, विज्जुप्पहगंधमायणा दो वि।
छप्पण्णं च सहस्सा, दोन्नि सया सत्तवीसा य ॥११॥
अउणट्ठा दोन्नि सया, इगसत्तरिसहस्सलक्खा य।
सोमणसमालवंता, दीहा कंदा दस सयाइं ॥१२॥
सव्वाओ वि नईओ, विक्खंभोव्वेहदुगुणमाणाओ।
सीयासीओयाणं, चउणि दुगुणाणि विक्खंभो ॥ १३ ॥
वासहरकुरुसु दहा, नईउ कुंडाइं तेसु जे दीवा।
छव्वेदुस्सयतुल्ला, विक्खंभाणामओ हुंति ॥ १४ ॥
जम्बूद्वीपकापेक्षयेति। किमेतूरं जम्बूद्वीपप्रकरणं धातकीख-

एडपूर्वार्द्धनिलापेन वाच्यमित्याह। (जाव दोसु मणुएत्यादि) एतस्माद्धि सूत्रात्परतो जम्बूद्वीपप्रकरणे चन्द्राऽऽदित्यज्योतिषां सूत्राण्यधीतानि, तानि च धातकीखण्डपुष्करार्द्धपूर्वार्द्धऽऽदिप्रकरणेषु न सम्भवन्ति,द्विस्थानकत्वादस्याध्ययनस्य, धातकीखण्डाऽऽदौ च चन्द्राऽऽदीनां बहुत्वादिति। आह च-"दो चंदा इह दीवे, चत्तारि य सायरे लवणतोये। धायइसंडे दीवे, बारस चंदा य सूरा य ॥१॥" इति। चन्द्राणां द्वित्वेन नक्षत्राऽऽदीनामपि द्वित्वं न स्यात्,ततो द्विस्थानेनावतार इति। जम्बूद्वीपप्रकरणादस्य विशेषं दर्शयन्नाह-(नवरमित्यादि) नवरं केवलमयं विशेष इत्यर्थः, कुरुसूत्रानन्तरं तत्र-" कूडसामली चेव. जंबू चेव सुदंसणे त्ति।" उक्तम्। इह तु जम्बूस्थाने "धायई रुक्खे चेव त्ति" वक्तव्यं, प्रमाणं च तयोर्जम्बूद्वीपशाल्मलयादिवत्, तयोरेव देवसूत्रेण " अणाढिए चेव जंबुद्दीवाहिवई " इत्यत्र वक्तव्यत्वे "सुदंसणे चेव त्ति" इह वक्तव्यमिति। " धायइसंडे दीवे " इत्यादि पश्चिमार्द्धप्रकरणं पूर्वार्द्धवदनुसर्तव्यम्। अत एवाऽऽह-(जाव अट्ठविहं पि कालमित्यादि) विशेषमाह-(नवरं कूडसामलीत्यादि) धातकीखण्डपूर्वार्धोत्तरकुरुषु धातकीवृक्ष उक्तः, इह तु महाधातकीवृक्षोऽध्येतव्यो, देवसूत्रे द्वितीयः सुदर्शनसूत्राधीतः, इह तु प्रियदर्शनोऽध्येतव्य इति।

पूर्वार्द्धपश्चिमार्द्धमीलनेन धातकीखण्डद्वीपं सम्पूर्णमाश्रित्य द्विस्थानकं " धायइसंडे णं " इत्यादिनाऽऽह-

धायइसंडपच्चत्थिमद्धे मंदरस्स पव्वयस्स धायइसंडे णं दीवे दो भरहाइं,दो एरवयाइं, दो हिमवंताइं, दो हेरण्णवयाइं, दो हरिवासाइं, दो रम्मगवासाइं, दो पुव्वविदेहाइं, दो अवरविदेहाइं, दो देवकुराओ, दो देवकुरुमहदुमा, दो देवकुरुमहदुमावासी देवा, दो उत्तरकुराओ, दो उत्तरकुरुमहदुमाओ, दो उत्तरकुरुमहदुमावासी देवा, दो चुल्लहिमवंता, दो महाहिमवंता, दो निसहा, दो नीलवंता, दो रुप्पी, दो सिहरी, दो सद्दावई, दो सद्दावईवासी साई देवा, दो वियडावई, दो वियडावइवासी पभासी देवा, दो गंधावइवासी अरुणा देवा, दो मालवंतपरियारगा, दो मालवंतपरियारगवासी पउमा देवा, दो मालवंता, दो चित्तकूडा, दो पउमकूडा, दो नलिनकूडा, दो एगसेला, दो तिकूडा, दो वेसमणकूडा, दो अंजणा, दो मातंजणा, दो सोमणसा, दो विज्जुप्पभा, दो अंकावई, दो पम्हावई, दो आसीविसा, दो सुहावहा, दो चंदपव्वया, दो सूरपव्वया, दो नागपव्वया, दो देवपव्वया, दो गंधमायणा, दो उसुगारपव्वया,दो चुल्लहिमवंतकूडा, दो वेसमणकूडा,दो महाहिमवंतकूडा,दो वेरुलियकूडा, दो निसहकूडा,दो रुयगकूडा, दो नीलवंतकूडा, दो उवदंसणकूडा, दो रुप्पिकूडा, दो मणिकंचणकूडा, दो सिहरिकूडा,दो तिगिच्छिकूडा,दो पउमद्दहा, दो पउमद्दहवासिणीओ देवीओ सिरीओ, दो महापउमद्दहा, दो महापउमद्दहवासिणी हिरीओ देवीओ,एवं०जाव दो पुंडरीयद्दहा, दो पुंडरीयद्दहवासिणीओ लच्छीओ देवीओ, दो गंगप्पवायद्दहा०जाव दो रत्तवईपवायद्दहा, दो रोहियाओ० जाव दो रुप्पकूला। स्था०।

(अन्तर्णदीवक्तव्यता 'अंतरणई' शब्दे प्रथमभागे ८९९ पृष्ठे गता)

दो कच्छा, दो सुकच्छा, दो महाकच्छा, दो कच्छगावई, दो आवत्ता, दो मंगलावत्ता, दो पुक्खला, दो पुक्खलावई, दो वच्छा, दो सुवच्छा, दो महावच्छा, दो वच्छगावई, दो रम्मा, दो रम्मगा, दो रमणिज्जा, दो मंगलावई, दो पम्हा, दो सुपम्हा, दो महापम्हा, दो पम्हगावई, दो संखा, दो नलिणा, दो कुमुदा, दो नलिणावई, दो वप्पा, दो सुवप्पा,दो महावप्पा, दो वप्पगावई, दो वग्गु,दो सुवग्गु,दो गंधिला, दो गंधिलावई,दो खेमाओ, दो खेमपुराओ, दो रिट्ठाओ,दो रिट्ठपुराओ,दो खग्गीओ, दो मंजूसाओ, दो ओसहीओ, दो पुंडरीगिणीओ, दो सुसीमाओ, दो कुंडलाओ,दो अपराइयाओ, दो पभंकराओ, दो अंकावईओ,दो पम्हावईओ,दो सुभाओ,दो रयणसंचयाओ,दो आसपुराओ,दो सीहपुराओ,दो महापुराओ, दो विजयपुराओ, दो अवराजियाओ,दो अवराओ,दो असोयाओ, दो वीयसोगाओ,दो विजयाओ,दो वेजयंतीओ, दो जयंतीओ, दो अपराजियाओ, दो चक्कपुराओ, दो खग्गपुराओ, दो अवज्झाओ, दो अओज्झाओ, दो भद्दसालवणा, दो णंदणवणा, दो सोमणसवणा, दो पंडगवणा,दो पंडुकंबलसिलाओ, दो अतिपंडुकंबलसिलाओ, दो रत्तकंबलसिलाओ,दो अइरत्तकंबलसिलाओ,दो मंदरा, दो मंदरचूलियाओ, धायइसंडस्स णं दीवस्स बेइया दो गाउयाइं उद्धं उच्चत्तेणं पण्णत्ता।

"धायइसंडे" इत्यादिनाऽऽह-द्वे भरते पूर्वार्द्धपश्चिमार्द्धयोर्दक्षिणदिग्भागे तथैवादित्येव सर्वत्र भरताऽऽदीनां स्वरूपं प्राग्वत्। (दो देवकुरुमहदुमत्ति) द्वौ कूटशाल्मलीवृक्षावित्यर्थः,द्वौ तद्वासिदेवौ वेणुदेवावित्यर्थः। (दो उत्तरकुरुमहदुमत्ति) धातकीवृक्षमहाधातकीवृक्षाविति। तद्देवौ सुदर्शनप्रियदर्शनाविति। चुल्लहिमवदादयः षड् वर्षधरपर्वताः,शब्दापातिविकटापातिमाल्यवत् पर्यायाख्यवृत्तवैताढ्याश्च तन्निवासिस्वातिप्रभासारुणपद्मनामदेवानां द्वयेन द्वयेन सहिताः क्रमेण द्वौ द्वावुक्ताः। (दो मालवंत त्ति) मालवन्तावुत्तरकुरुतः पूर्वदिग्वर्तिनौ गजदन्तकौ स्तः, ततो नन्दशालवनतद्वेदिकाविजयेभ्यः परौ शीतोत्तरकूलवर्तिनौ दक्षिणोत्तरायतौ चित्रकूटौ वक्षस्कारपर्वतौ, ततो विजयेनान्तरसंस्थाविजयेन चान्तरितावन्यौ तथैवान्यौ पुनस्तथैवान्याविति पुनः पूर्ववनखण्डवेदिकाविजयाख्यामर्वाक् शीतादक्षिणकूलवर्तीनि तथैव विकटाऽऽदीनां चत्वारि द्वयानि, ततः सौमनसौ देवकुरुपूर्वदिग्वर्तिनौ गजदन्तकौ, ततो गजदन्तकावेव देवकुरुप्रत्यग्भागवर्तिनौ विद्युत्प्रभौ, ततो नन्दशालवनतद्वेदिकाविजयेभ्यः परतस्तथैवाङ्कावत्यादीनां चत्वारि द्वयानि शीतोदादक्षिणकूलवर्तीनि पुनरन्यानि पश्चिमवनखण्डवेदिकालयविजयाभ्यां पूर्वतः क्रमेण त-

चैव चन्द्रपर्वताऽऽदीनां चत्वारि द्वयानि, ततो गन्धमादनावुत्तरकुरुपश्चिमभागवर्तिनौ गजदन्तकाविति । एते धातकीखण्डस्य पूर्वापरपश्चिमार्द्धे च भवन्तीति द्वौ द्वावुक्ताविति इषुकारौ दक्षिणोत्तरयोर्दिशोः धातकीखण्डविभागकारिणाविति । (दो खुल्लहिमवंतकूमा इत्यादि) हिमवदादयः षट् वर्षधरपर्वताः, तेषु ये द्वे द्वे कूटे जम्बूद्वीपप्रकरणे अभिहिते ते पर्वतानां द्विगुणत्वादेकैकशः स्यातामिति वर्षधराणां द्विगुणत्वात् पद्माऽऽदिह्रदा अपि द्विगुणाः, तद्देव्योऽप्येवमिति चतुर्दशानां गङ्गाऽऽदिमहानदीनां पूर्वापश्चिमाभ्यामपेक्षया द्विगुणत्वात् तत्प्रपातह्रदा अपि द्वौ द्वौ स्युरित्याह-(दो गंगप्पवायहहेत्यादि) "दो रोहिआओ" इत्यादौ नद्यधिकारे गङ्गाऽऽदिमहानदीनां सदपि द्वित्वं नोक्तं, जम्बूद्वीपप्रकरणोक्तस्य "महाहिमवंताओ वासहरपव्वयाओ महापउमद्दहाओ दो महानईओ पवहंति।" इत्यादिसूत्रकमस्याऽऽश्रयणात्। तत्र हि रोहिताऽऽदय एवाष्टौ श्रूयन्त इति चित्रकूटपद्मकूटवक्षस्कारपर्वतयोरन्तरे नीलवर्षधरपर्वतनितम्बव्यवस्थितत्वात्। ग्राहवतीकुण्डाद्दक्षिणतोरणविनिर्गता अष्टाविंशतिनदीसहस्रपरिवारा शीताधिगामिनी सुकच्छमहाकच्छविजययोर्विभागकारिणी ग्राहवती नदी। एवं यथायोगं द्वयोर्द्वयोर्वक्षस्कारपर्वतयोर्विजययोरन्तरे क्रमेण प्रदक्षिणया द्वाद्रष्टव्यान्तरनद्यो योज्याः, तद्द्वित्वं च पूर्ववदिति । पङ्कवतीत्यत्र वेगवतीति ग्रन्थान्तरे दृश्यते, क्षारोदेत्यत्र क्षीरोदेत्यन्यत्र, सिंहस्रोता इत्यत्र,शीतस्रोता इत्यपरत्र, फेनमालिनी गम्भीरमालिनी चेति, इह व्यत्ययश्च दृश्यत इति माल्यवद्गजदन्तकमङ्गलावतीभ्यामारभ्य कच्छाऽऽदीनि द्वात्रिंशद्विजयक्षेत्रयुगलानि प्रदक्षिणतोऽवगन्तव्यानीति । तथा कच्छाऽऽदिषु क्रमेण क्षेमाऽऽदिपुरीणां युगलानि द्वात्रिंशदवगन्तव्यानीति। भद्रशालाऽऽदीनि मेरोश्चत्वारि वनानि; "भूमीए भद्दसालं, मेहलजुयलम्मि दोन्नि रम्माइं। णंदणसोमणसाइं, पंडगपरिमंडियं सिहरं ॥१॥" इति वचनात्। मेर्वोर्द्वित्वे वचनानां द्वित्वमिति शिलाग्रतश्च मेरौ पञ्चमकवनमध्ये चूलिकायाः क्रमेण पूर्वाऽऽदिषु । अत्र गाथे-

"पंचमवणम्मि चउरो,सिद्धाओ चउसु वि दिसासु चूलाए।
चउजोयणुस्सियाओ, सव्वजुणकंचणमयाओ ॥ १ ॥
पंच सयायामाओ, मज्झे दीहत्तणऊरुंदाओ।
चंदऊसंठियाओ, कुमदोयरहारगोराओ ॥ २ ॥" इति ।

मन्दरे मेरौ चूलिकाशिखरविशेषः । स्वरूपमस्याः-" मेरुस्स उवरि चूला, जिणभवणविभूसिया चउदिं सुच्चा। बारस अट्ठ य चउरो, मूले मज्झुवरि रुंदा य ॥ १ ॥" इति वेदिकासूत्रे जम्बूद्वीपवत् । स्था० २ ठा० ३ उ० ।

धायइसंडदीवग–धातकीखण्डद्वीपग–त्रि० । धातकीखण्डद्वीपगते, " धायइसंडदीवगाणं चंदाणं ।" जी० ३ प्रति० ४ उ० ।

धायइसंडदीवपच्चच्छिमद्ध–धातकीखण्डद्वीपपश्चिमार्द्ध–न० । धातकीखण्डद्वीपस्य पश्चिमेऽर्द्धभागे, स्था० ७ ठा० ।

धायइसंडदीवपच्चच्छिमद्धग–धातकीखण्डद्वीपपश्चिमार्द्धग–पुं० । धातकीखण्डद्वीपपश्चिमार्द्धगते मनुष्यभेदे, स्था० ६ ठा० ।

धायइसंडदीवपुरच्छिमद्धग–धातकीखण्डद्वीपपौरस्त्यार्द्धग–पुं० । धातकीखण्डद्वीपपौरस्त्यार्द्धगते मनुष्यभेदे, स्था० ६ ठा० ।

धार–धार–न० । वाच० । धाराभिर्निर्वृत्तम, अण् । " धाराभिः पतितं तोयं, गृहीतं स्फीतवाससा । शिलायां वसुधारायां, शीतायां पतितं च यत् ॥१॥" इत्युपक्रम्य, "स्नाजने मृण्मये वाऽपि, स्थापितं धारमुच्यते । " इत्युक्ते शिलाऽऽदिभाजनभूते वर्षोद्भवे जले, धारके, त्रि० । पृ० ३ उ० । उत्त० । वाच० । क्षत्रौ, न० । दे० ना० ५ वर्ग ५९ गाथा ।

धारण–धारण–न० । पालने, स्था० ३ ठा० २ उ० । अप्रतिस्खलने, " अरती तत्थ किं विहारए । " विहारयेत् प्रतिस्खलेत् । आचा० १ श्रु० ६ अ० ३ उ० । " धरंति राइणिया इह ।" धारयन्ति बिभ्रति । सूत्र०१ श्रु०२ अ०३ उ० । वस्त्राऽऽदीनां परिग्रहणे, उपभोगे च । स्था० ३ ठा० ३ उ० ।

धारणा–धारणा–स्त्री० । धृ-युच् । " यमाऽऽदिगुणसंयुक्ते, मनसः स्थितिरात्मनि । धारणा प्रोच्यते सद्भिर्योगशास्त्रविशारदैः ॥ १ ॥ " इत्युक्तायामात्मनि चित्तस्य स्थितौ, वाच० । विषयान्तरपरिहारेण स्थिरीकरणात्मा हि चित्तस्य धारणा । यदाह-'देशबन्धश्चित्तस्य धारणेति ।' द्वा० २४ द्वार । मर्य्यादायाम्, न्याय्यपथस्थितौ, अवधारणे, आ० म० १ अ०१ खण्ड । वाच० । पूर्वश्रुतदृष्टाऽऽदिविषयावधारणं धारणेति । दर्श० ५ तत्त्व । गृहीतस्याविस्मरणे, विशे० । आव० ध० । आ० म० । नि० चू० । आ० चू० । अवगतार्थविशेषधारणं धारणा । भ० ५ श० २ उ० । स्था० । निश्चितस्यैव वस्तुनो व्युत्पत्त्यादिरूपेण धारणं धारणा । विशे० । निश्चितस्यैवाविच्युतिस्मृतिवासनारूपं धारणं धारणा । प्रव०२१६द्वार । ज्ञानाऽऽवरणीयकर्मक्षयोपशमसमुत्थायामविशेषोपादेयवस्तुं प्रज्ञातत्त्वानुपूर्वीगोचरायां चित्तपरिणतौ, त्रि० । तदात्मके मतिज्ञानभेदे च । स्था० ८ ठा० । दश० । सम्म० । नं० । आ० चू० । " धरणं पुण धारणं बिंति ।" धृतिर्धारणमर्थानामिति वर्त्तते । परिच्छिन्नस्य वस्तुनोऽविच्युतिवासनास्मृतिरूपं धरणं पुनर्धारणां ब्रुवते । आ० म० १ अ० १ खण्ड । नं० ।

तथा च मतिज्ञानस्य तृतीयभेदमवायं प्रतिपादयन्ति-

स एव दृढतमावस्थाऽऽपन्नो धारणा ॥ १० ॥

स इति अवायः, दृढतमावस्थाऽऽपन्नः विवक्षितविषयावसाय एव सादरस्य प्रमातुरत्यन्तोपचितः कञ्चित्कालं तिष्ठन् धारणेत्यभिधीयते । दृढतमावस्थाऽऽपन्नो ह्यवायः स्वोपढौकिताऽऽत्मशक्तिविशेषरूपसंस्कारद्वारेण कालान्तरे स्मरणं कर्तुं पर्याप्नोतीति ॥ १० ॥ रत्ना० २ परि० । नं० । तस्याऽर्थस्य निर्णयरूपोऽध्यवसायोऽवायः शाङ्क एवायं, शार्ङ्ग एवायमित्यादिरूपोऽवधारणाऽऽत्मकप्रत्ययोऽवाय इत्यर्थः । तस्यैवार्थस्य निर्णीतस्य धारणं धारणा । सा च त्रिधा-अविच्युतिः,वासना,स्मृतिश्च । तत्र तदुपयोगादविच्यवनमविच्युतिः, सा चान्तर्मुहूर्त्तप्रमाणा । ततस्तया आदितो यः संस्कारः सा वासना । सा च संख्येयमसंख्येयं वा यावत्कालं भवति । ततः कालान्तरे कुतश्चित्तादृशार्थदर्शनाऽऽदिकात् कारणात् संस्कारस्य प्रबोधे यद् ज्ञानमुदयते-तदेवेदं तस्मिन्या प्रागुपलब्धमित्यादिरूपं सा स्मृतिः। उक्तं च-"तदनंतरं तदत्थावि-च्चुयवणं जो य वासणाजोगो । कालंतरे य जं पुण,अणुसरणं धारणा सा उ ॥२६१॥ " (विशे०)एताश्चाविच्युतिवासनास्मृतयो धारणलक्षणसामान्यास्तुल्ययोगक्षेमत्वाद्धारणाशब्दवाच्याः । नं० । आ० म० । विशे० ।

अथ चतुर्थो मतिज्ञानभेदो धारणा, इयं चाविच्युतिवासनास्मृतिभेदात्त्रिधा भवति। अतः सभेदामपि तामाह-

तयणंतरं तयत्था-ऽविच्चवणं जो य वासणाजोगो ।
कालंतरे य जं पुण, अणुसरणं धारणा सा उ ॥३९१॥

तस्मादपायादनन्तरं तदनन्तरं, यत् तदर्थादविच्यवनम्-उपयोगमाश्रित्याऽशः। यश्च वासनया जीवेन सह योगः संबन्धः। यच्च तस्यार्थस्य कालान्तरे पुनरिन्द्रियैरुपलब्धस्य, अनुपलब्धस्य वा एवमेव मनसाऽनुस्मरणं स्मृतिर्भवति,सेयं पुनस्त्रिविधाऽप्यर्थस्यावधारणरूपा धारणा विज्ञेयेति गाथाऽक्षरघटना। भावार्थस्त्वयम्-अवायेन निश्चितेऽर्थे तदनन्तरं यावदद्यापि तदर्थोपयोगः सातत्येन वर्त्तते,न तु तस्मान्निवर्त्तते, तावत्तदर्थोपयोगादविच्युतिर्नाम, सा धारणायाः प्रथमभेदो भवति। ततस्तस्यार्थोपयोगस्य यदावरणं कर्म तस्य क्षयोपशमेन जीवो युज्यते, येन कालान्तरे इन्द्रियव्यापाराऽऽदिसामग्रीवशात् पुनरपि तदर्थोपयोगः स्मृतिरूपेण समुन्मीलति; सा चेयं तदावरणक्षयोपशमरूपा वासना नाम द्वितीयस्तद्भेदो भवति। कालान्तरे च वासनावशात्तदर्थस्येन्द्रियैरुपलब्धस्य, अथवा तैरनुपलब्धस्याऽपि मनसि या स्मृतिराविर्भवति, सा तृतीयस्तद्भेद इति। एवं त्रिभेदा धारणा विज्ञेया। तुशब्दोऽवग्रहाऽऽदिभ्यो विशेषद्योतनार्थः। त्रिप्रतिपत्तयस्त्वेतद्विषया अपि प्रागेव निराकृताः। इति गाथाऽर्थः ॥ ३९१ ॥ विशे०। साऽपि मनःसहितेन्द्रियपञ्चकजन्यत्वात्षोढा। प्रव० २१६ द्वार।

से किं तं धारणा ?। धारणा छव्विहा पण्णत्ता। तं जहा-सोइंदियधारणा, चक्खिंदियधारणा,घाणिंदियधारणा, जिब्भिंदियधारणा, फासिंदियधारणा, नोइंदियधारणा ॥ नं०।

प्रकारान्तरेण धारणायाः षड्भेदानाह-

छव्विहा धारणा पण्णत्ता । तं जहा-बहुं धारेइ, बहुविहं धारेइ, पोराणं धारेइ, दुरुद्धरं धारेइ, अनिस्सडं धारेइ, असंदिद्धं धारेइ । सेत्तं धारणा । स्था० ६ ठा०।

बहु धारयति १ बहुविधं धारयति २ पुराणं धारयति ३ दुर्द्धरं धारयति ४ अनिश्रितं धारयति ५ असंदिग्धं धारयति ६ इति षडपि पदानि व्यक्तानि, नवरम् (पोराणं ति) पुराणं जीर्णं प्रभूतकालसंचितं, तदपि यथाश्रुतं धारयति, यदा पृच्छ्यते, तदा धारणासमर्थत्वात् सर्वं वदति । (दुरुद्धरं ति) दुर्द्धरं दुःखेन धर्तुं शक्यं तथाऽऽगमभक्तगुपिलं (धारय त्ति) "सेत्तं" इत्यादि निगमनवाक्यं व्यक्तम्। दशा० ५ अ०।

धारणाया एकार्थिकान्याह-

तीसे णं इमे एगट्ठिया णाणाघोसा, णाणावंजणा, पंच नामधिज्जा भवंति । तं जहा-धरणा, धारणा, ठवणा, पइट्ठा कोट्ठे । सेत्तं धारणा ।

अत्रापि सामान्यत एकार्थिकानि, विशेषचिन्तायां पुनर्भिन्नार्थानि, तत्रापायानन्तरमवगतस्यार्थस्याविच्युत्या अन्तर्मुहूर्तं कालं यावत् धरणं धरणा, ततस्तमेवार्थमुपयोगाद् युतं जघन्यतोऽन्तर्मुहूर्तादुत्कर्षतोऽसंख्येयात्कालात्परतो यत्स्मरणं सा धारणा। तथा स्थापनं स्थापना, अपायावधारितस्यार्थस्य हृदि स्थापनं वासनेत्यर्थः। अन्ये तु धारणास्थापनयोर्भेदमाश्रित्यासेन स्वरूपमाचक्षते। तथा च प्रतिष्ठानं प्रतिष्ठा,अपायावधारितस्यैवार्थस्य हृदि प्रभेदेन प्रतिष्ठापनमित्यर्थः। कोष्ठ इव कोष्ठः, अविनष्टसूत्रार्थधारणमित्यर्थः। (सेत्तं धारणा) सेयं धारणा। नं०। न विधेयमित्येवंरूपे (स्था० ५ ठा० १ उ०) निषेधविषयके आदेशे, "आणं वा धारणं वा सम्मं पउंजित्ता भवइ।" स्था० ७ ठा०। धारणा विधेयेषु निवर्त्तनलक्षणेति। स्था० ५ ठा० २ उ०। बहुशो निवेदितातिचारलब्धशुद्धीनामवधारणाऽऽत्मके व्यवहारभेदे, पञ्चा० १६ विव०। प्रव०। स्था०। (तद्वक्तव्यता ' धारणाव्यवहार ' शब्देऽनुपदमेव वक्ष्यते) बहुहरणाऽऽधारभूते स्थूणे गृहावयवविशेषे, " अगारस्स णं झियायमाणस्स किं धारणा झियाइ।" भ० ८ श० ६ उ०। धृ-णिच्-ल्युट्। नाड्याम्, अणौ च। स्त्री०। वाच०।

धारणावल–धारणाबल–न०। प्रतिवादिनः शब्दतदर्थावधारणबले, व्य० १ उ०।

धारणाववहार–धारणाव्यवहार–पुं०। गीतार्थसंविग्नेन ऊन्याऽऽद्यपेक्षया यत्रापराधे यथा या विशुद्धिः कृता, तामवधार्य यदन्यस्तत्रैव तथैव तामेव प्रयुङ्क्ते सा धारणा, वैयावृत्यकराऽऽदेर्वा गच्छोपग्रहकारिणोऽशेषानुचितस्योचितप्रायश्चित्तपदानां प्रदर्शितानां धरणं धारणेति। स्था० ५ ठा० २ उ०। सा एव व्यवहारो धारणाव्यवहारः। पञ्च व्यवहाराणां मध्ये चतुर्थे व्यवहारभेदे, भ० ८ श० ८ उ०। पञ्चा०। जीत०। व्य०। धारणाव्यवहारो नाम-गीतार्थेन संविग्नेनाऽऽचार्येण ऊन्यक्षेत्रकालभावपुरुषान् प्रतिसेवनाश्चावलोक्य यस्मिन्नपराधे यत्प्रायश्चित्तमदायि तत्सर्वमन्यो दृष्ट्वा तेष्वेव द्रव्याऽऽदिषु तादृश एवापराधे तदेव प्रायश्चित्तं ददाति। एष धारणाव्यवहारः। अथवा-वैयावृत्यकरस्य गच्छोपग्राहिणः स्वगच्छस्वामिनो वा देशदर्शनसहायस्य वा संविग्नस्योचितप्रायश्चित्तदानं धारणमेव धारणाव्यवहारः। व्य० १ उ०।

अथ धारणाव्यवहारमाह--

गीयत्थेणं दिन्नं, सुद्धिं अवराहिऊण तह चेव ।
दिंतस्स धारणा तह, उद्धियपयधरणरूवा वा ॥८६५॥

इह गीतार्थेन संविग्नेनाऽऽचार्येण कस्याऽपि शिष्यस्य क्वचिदपराधे ऊन्यक्षेत्रकालभावपुरुषान् प्रतिसेवनाश्चावलोक्य या शुद्धिः प्रदत्ता,सा शुद्धिः तथैवावधार्य सोऽपि शिष्यो यदाऽन्यस्यापि तादृश एवापराधे च ऊन्यादिषु तथैव प्रायश्चित्तं ददाति, तदाऽसौ धारणा नाम चतुर्थो व्यवहारः। उद्धृतपदधरणरूपा वा धारणा। इदमुक्तं भवति-वैयावृत्यकरणाऽऽदिना कश्चिद् गच्छोपकारी साधुरद्याप्यशेषच्छेदश्रुतयोग्यो न भवति, ततस्तस्यानुग्रहं कृत्वा यदा गुरुकृतान्येव कानिचित्प्रायश्चित्तपदानि कथयति, तदा तस्य तेषां पदानां धरणं धारणाऽभिधीयत इति ॥ ८६५ ॥ प्रव० १२६ द्वार।

धारणववहारो पुण, वत्तव्वो तं जहक्कमं वुच्छं ॥६४२॥

अत ऊर्द्धं धारणाव्यवहारो वक्तव्यः, तद्यथाक्रममहं वक्ष्ये इति शृणु।

उद्धारणा विधारण, संधारण संपधारणा चेव ।
नाऊण धीरपुरिसा, धारणववहारं तं विंति ॥ ६४३ ॥

धारणायाश्चत्वार्येकार्थिकानि । तद्यथा-उद्धारणा, विधार-

णा, सन्धारणा, संप्रधारणा च । तया छेदश्रुतार्थावधारणलक्षणया यः सम्यक् ज्ञात्वा व्यवहारः प्रयुज्यते, तं धारणाव्यवहारं धीरपुरुषा ब्रुवते ।

संप्रति तेषामेव चतुर्णामेकार्थिनां शब्दव्युत्पत्तिमाह-

पावल्लेण उवेच्च व, उद्धियपयधारणा उ उद्धारा ।
विविहेहिँ पगारेहिं, धारे अत्थं विधारा सा ॥ ६४४ ॥
सम एकीभावम्मी, उद्धरणे ताणि एक्कभावेण ।
धारे तत्थ पयाणि उ, तम्हा संधारणा होइ ॥ ६४५ ॥
जम्हा उ संपहारेउं, ववहारं पउंजती ।
तम्हा उ कारणे तेण, नायव्वा संपहारणा ॥ ६४६ ॥

उत प्राबल्येन उपेत्य वा धृतानामर्थपदानां धारणा उद्धारा उद्धरणा । विविधैः प्रकारैर्विशिष्टं वाऽर्थमुद्धृतमर्थपदं यया धारणया स्मृत्वा धारयति सा विधारा विधारणा । तथा-समशब्द एकीभावे, धृता तु धारणा तान्यर्थपदानि आत्मना सहैकभावेन यस्माद्धारयति तस्मात् धारणा संधारणा भवति । तथा यस्मात्संप्रधार्य सम्यक्प्रकर्षेणाऽवधार्य व्यवहारं प्रयुङ्क्ते,तस्मात्कारणात्तेन शिष्येणेयं प्रधारणा भवति ज्ञातव्या ।

धारणववहारो सो, पउंजियव्वो उ केरिसे पुरिसे ? ।
जन्नति गुणसंपन्ने, जारिसए तं सुणेहि त्ति ॥ ६४७ ॥

एष धारणाव्यवहारः कीदृशे पुरुषे प्रयोक्तव्यः ? । सूरिराह-भण्यते-यादृशे गुणसम्पन्ने प्रयोक्तव्यस्तद्भण्यमाणं शृणु ? ।

तमेवाऽऽह-

पवयणजसम्मि पुरिसे, आगमगहविसारए तवस्सिम्मि ।
सुस्सुयबहुस्सुयम्मि य, विवक्कपरिपागसुद्धम्मि ॥६४८॥

प्रवचनं द्वादशाङ्गं, श्रमणसङ्घो वा तस्य यः कीर्तिमिच्छेत् स प्रवचनयशस्तस्मिन् तपस्विनि, तथा श्रुतं शोभनमाकर्णितं, बहु श्रुतं च येन स सुश्रुतबहुश्रुतः । किमुक्तं भवति-यस्य बह्वपि श्रुतं न विस्मृतिपथमुपयाति स सुश्रुतबहुश्रुतः । अथवा बहुश्रुतोऽपि सन् यस्तस्योपदेशेन वर्तते स मार्गानुसारिश्रुतत्वात् सुश्रुतबहुश्रुतः, तस्मिन्, तथा विशिष्टे विनयौचित्यान्विते वाक्परिपाके विशुद्धिर्यस्मिन्पुरुषे तस्मिन् प्रयोक्तव्यः ।

एतदेवाऽऽह-

एएसु धीरपुरिसा, पुरिसज्जाएसु किंचि खलिएसु ।
रहिए वि धारइत्ता, जहारिहं देंति पच्छित्तं ॥ ६४९ ॥

एतेष्वनन्तरोदितगुणसम्पन्नेषु पुरुषजातेषु किञ्चिदत्र मनाक् प्रमादवशाद् मूलगुणविषये उत्तरगुणविषये वाक्स्खलितेषु रहितेऽपि असत्यप्यादिमे व्यवहारत्रये धीरपुरुषा अर्थपदानि कल्पप्रकल्पव्यवहारगतानि कानिचित् धारयित्वा यथार्हं ददति प्रायश्चित्तम् ।

संप्रति "रहिए वि धारयित्ता" (६४९) इत्यस्य व्याख्यानमाह-

रहिए णाम असंते, आइल्लम्मि ववहारतियगम्मि ।
ताहे वि धारइत्ता, वीमंसेऊण जं भणियं ॥ ६५० ॥

रहिते नाम असति अविद्यमानके व्यवहारत्रिके सति ततो विधाय ..... यद् भणितं भवति । किमुक्तं भवति ?, विमृश्य पूर्वापरपर्यालोचनेन देशकालाऽऽद्यपेक्षया सम्यक् छेदश्रुतार्थे परिज्ञाय ।

किमित्याह-

पुरिसस्स उ अइयारं, वियारइत्ता ण जस्स जं जोग्गं ।
तं देंति उ पच्छित्तं, केणं देंती उ तं सुणह ॥ ६५१ ॥

पुरुषस्यातिचारं द्रव्यतः क्षेत्रतः कालतो भावतश्च विचार्य यस्य यदर्हं प्रायश्चित्तं तत् केन दीयते । आचार्यः प्राह-येन दीयते तत् शृणु ।

तदेवाऽऽह-

जो धारितो सुतत्थो, अणुओगविहीए धीरपुरिसेहिं ।
आलीणपलीणेहिं, जयणाजुत्तेहिँ दंतेहिं ॥६५२॥

यो नाम धीरपुरुषैरालीनप्रलीनैर्यतनायुक्तैर्दान्तैश्चानुयोगविधौ व्याख्यानवेलायां श्रुतस्य भेदश्रुतस्यार्थो धारितोऽविस्मृतीकृतस्तेन दीयते ।

साम्प्रतमालीनाऽऽदिपदानां व्याख्यानमाह-

आलीणा णाणाऽऽदिसु,पदे पदे लीणा उ होंति पल्लीणा ।
कोहाऽऽदी वा पल्लयं, जेसिँ गया ते पलीणाओ ॥६५३॥
जयणाजुतो पयत्तव, दंतो जो उवरतो उ पावेहिं ।
अहवा दंतो इंदिय-दमेण नोइंदिएण च ॥६५४॥

ज्ञानाऽऽदिषु आ समन्तात् लीना आलीनाः। पदे पदे लीना जनवन्ति प्रलीना अथवा-येषां क्रोधाऽऽदयः प्रलयं गताः ते प्रलीनाः,प्रकर्षेण लीना लयं विनाशं गताः क्रोधाऽऽदयो येषामिति व्युत्पत्तेः। यतनायुक्तो नाम सूत्रानुसारतः प्रयत्नवान्, दान्तो यः पापेभ्य उपरतः। अथवा-दान्तो नाम इन्द्रियदमेन,नोइन्द्रियेण नोइन्द्रियदमेन चान्यतः। तदेवं छेदश्रुतार्थधारणावशतो धारणाव्यवहार उक्तः।

साम्प्रतमन्यथा धारणाव्यवहारमाह-

अहवा जेणऽन्नइया, दिट्ठा सोही परस्स कीरंती ।
तारिसयं चेव पुणो, लप्पसि कारणं तस्स ॥ ६५५ ॥
सो तम्मि चेव दव्वे, खेत्ते काले य कारणे पुरिसे ।
तारिसयं अकरेंतो, न हु सो आराहओ होइ ॥६५६॥
सो तम्मि चेव दव्वे, खेत्ते काले य कारणे पुरिसे ।
तारिसयं चिय जूयो, कुव्वं आराहगो होइ ॥६५७॥

अथवेति प्रकारान्तरे, येनान्यदा परस्य शोधिः क्रियमाणा दृष्टा, स तमर्थं स्मरति-यथा एवंभूतेषु द्रव्याऽऽदिष्वेवंभूते कारणे जाते एवंभूतं प्रायश्चित्तं दत्तमिति । पुनरन्यदाऽस्य पुरुषस्य उपलक्षणमेतत्-अन्यस्य वा तादृशमेव पुनः कारणं समुत्पन्नं ततो यदि तस्मिन्नेव,तादृश एवेत्यर्थः। द्रव्ये क्षेत्रे काले,चशब्दाद्भावे च तादृश एव कारणे तस्मिन्नेव तादृशे वा पुरुषे तादृशमकुर्वन्, रागेण वा अन्यं प्रायश्चित्तं ददानो वर्त्तते, तदा स (न हु) नैव आराधको भवति । अथ यः तस्मिन्नेव द्रव्ये क्षेत्रे काले भावे च कारणे पुरुषे च तादृशं करोति, स तदा आराधको भवति ।

धारणाव्यवहारस्यैव पुनरन्यथाप्रकारमाह-

वेयावच्चकरो वा, सीसो वा देसहिंडगो वा वि ।
दुम्मेहत्ता न तरइ, ओहारेउं बहुं जो उ ॥ ६५८ ॥
तस्स उ लद्धरिऊणं, अन्नयपयाइं तु देंति आयरिया ।
जेहिँ न करेति कज्जं, ओहारेत्ता उ सो देसं ॥ ६५९ ॥

यथा आचार्याणां वैयावृत्यकरो, यो वा संमतः शिष्यो, यस्तु वा देशहिण्डको देशदर्शनं कुर्वतः सहाय आसीत्, स समस्तं छेदश्रुतार्थं दुर्मेधस्त्वाद् नावधारयितुं शक्नोति, ततस्तस्योद्धृत्यानुग्रहाय कानिचिदर्थपदान्याचार्या ददति, यैः स छेदश्रुतस्य देशमवधार्य न कार्यं करोति । एष धारणाव्यवहारः ।

उपसंहारमाह-

धारणववहारेसो, अहक्कमं वण्णितो समासेणं ॥ (६६०)

एष धारणाव्यवहारो यथाक्रमं समासेन वर्णितः। व्य०१० उ०।

धारणिज्ज–धारणीय–त्रि० । धारयितुं योग्ये, प्र० १५ श० । आचा० । धारयितुं शक्ये, यापनीये च । ज्ञा० १ श्रु० ८ अ० ।

धारणी–धा(र)रिणी–स्त्री० । सकलगुणधारणाद्धा (र) रिणी। सू० प्र० १ पाहु० । एकादशजिनस्य प्रथमार्यिकायाम्, स्त्र० । " सिज्जंससिजिणस्स धा (र) रिणी पढमा ।" ति० । द्वारवतीवास्तव्यस्य वसुदेवस्य स्वनामख्यातायां भार्यायाम्, " वसुदेवे राया धारणी देवी ।" अन्त० १ श्रु० १ वर्ग १ अ० । द्वारवतीवास्तव्यस्यान्धकवृष्णेः स्वनामख्यातायां भार्यायाम्, "अंधगविण्हिस्स रण्णो धारणी नाम देवी ।" अन्त० १ श्रु० १ वर्ग १ अ० । हस्तिशीर्षनगरस्थस्यादीनशत्रोः राज्ञः स्वनामख्यातायां भार्यायाम्, " हत्थिसीसणयरे अदीणसत्तुरण्णो धारणीपामोक्खाणं देवीसहस्साणं ।" विपा० २ श्रु० १ अ० । अपरविदेहस्थपूतायां राजधान्यां स्थितस्य धनञ्जयस्य भार्यायाम्, आ० चू० १ अ० । मथुरानगरीवास्तव्यस्य जितशत्रोः राज्ञो भार्यायाम्, आ० म० १ अ० २ खण्ड । कौशाम्बीवास्तव्यस्याऽजितसेनस्य राज्ञो भार्यायाम, आव० ४ अ० । आ० चू० । राजगृहनगरस्थस्य श्रेणिकस्य राज्ञो भार्यायाम्, ज्ञा० १ श्रु० १ अ० । अणु० । चम्पानगरीस्थस्य मित्रप्रभस्य राज्ञो भार्यायाम्, आव० ४ अ० । चम्पानगरीस्थस्य दधिवाहनस्य राज्ञः स्वनामख्यातायां भार्यायाम्, आ० म० १ अ० २ खण्ड । पोतनपुरनगरस्थस्य सोमचन्द्रस्य राज्ञो भार्यायाम, आ० म० १ अ० २ खण्ड । आ० चू० । राजगृहनगरस्थस्य विश्वनन्दिनृपस्य भ्रातुर्विशाखभूतेर्भार्यायाम्, आ० म० १ अ० १ खण्ड । मगधनन्दिग्रामस्थस्य गौतमस्य कणवृत्तिकस्य भार्यायाम्, "मगधे नन्दिग्रामे, गौतमः कणवृत्तिकः । तत्पत्नी धारणी तस्याः ।" आ० क० । आव० । कम्पिल्याभिधनगरे स्थितस्य ब्रह्मसेनस्य राज्ञः स्वनामख्यातायां ब्रह्मलावत्यपरनामधेयायां भार्यायाम्, आ० चू० १ अ० । मिथिलास्थस्य जितशत्रोः स्वनामख्यातायां भार्यायां च । सू० प्र० १ पाहु० । चं० प्र० ।

धारय–धारक–त्रि० । धारणसमर्थे, कल्प० १ अधि० १ क्षण । धारको धारयितुं क्षमः। औ०। प्रवर्तके च। नि०१ श्रु०३ वर्ग १ अ०।

धारा–धारा–स्त्री० । धृ-णिच्-अङ् । खड्गाऽऽदेर्निशिताग्रे, भ० १३ श० ६ उ०। वाच०। "खुरो इव एगंतधाराए।" ज्ञा० १ श्रु० १ अ० । जं० । उत्त० । घनोदधिविग्रहे, सन्ततौ, द्रवद्रव्यस्य सन्तत्या पतने, उत्कर्षे, यशसि, अतिवृष्टौ, समूहे, मेघस्याऽऽसारवर्षणे, वाच० । ज्ञा० । कल्प० । सदृशे, पुरीभेदे, " अध्वानां तु गतिर्धारा, विभिन्ना सा च पञ्चधा ।" इत्युक्तेऽध्वानां गतिपञ्चके, "इतीव धारामवधीर्य ।" इति नैषधम । सैन्याग्रिमस्कन्धे च । वाच० । हस्तिनापुरस्थस्य शिवस्य राज्ञो भार्यायां च । आ० म० १ अ० २ खण्ड । रणमुखे, दे० ना० ५ वर्ग ५६ गाथा ।

धारावारि–धारावारि–न० । धाराप्रधाने जले, भ० १३श० ६उ० ।

धारावारिय–धारावारिक–त्रि० । धाराप्रधानं वारि जलं यस्मिन् । धाराप्रधानजलोपेते, " धारावारियलेणाइ वा ।" भ० १३ श० ६ उ० ।

धारावास–देशी–मेघे, भेके च । दे० ना० ५ वर्ग ६३ गाथा ।

धाराहय–धाराहत–त्रि० । मेघजलधारासिक्ते, " धाराहयकयंबपुप्फगं पि व समुस्ससिअरोमकूवे ।" कल्प० १ अधि० १ क्षण । भ० ।

धारि(ण्)–धारिन्–पुं० । धारयतीत्येवंशीलः । प्रज्ञा० २ पद । धृ-णिनिः । धारणशीले, पीलुवृक्षे, धारणकर्तरि, त्रि० । वाच० ।

धारिणी–धारिणी–स्त्री० । ' धारणी ' शब्दार्थे, सू० प्र० १ पाहु० ।

धारित्तए–धारयितुम्–अव्य० । पालयितुमित्यर्थे, स्था० ६ ठा० । परिग्रहीतुमित्यर्थे, उपभोक्तुमित्यर्थे च । " धारित्तए वा परिहारित्तए वा ।" धारयितुं परिग्रहे परिहर्तुमासेवितुमिति । अथवा-"धारणया उवभोगो, परिहरणा होइ परिभोगो ।" स्था० ५ ठा० ३ उ० ।

धारिय–धारित–त्रि० । सम्यग्धारणाविषयीकृते, " धारियगणियसमीहिय-निज्जवणाविउलवायणसमिद्धो । " धारितं सम्यग् धारणाविषयीकृतं न विनष्टमिति भावः । व्य० ३ उ० ।

धारी–धात्री–स्त्री० । ' धाई ' शब्दार्थे, प्रा० २ पाद ।

धारोदग–धारोदक–न० । गिरिनिकरजले, बृ० २ उ० ।

धाव–धाव–जवे, सक०-सेट् च । भ्वादि०-आत्म०-शीघ्रगतौ, अक० सेट् । धावते । अधाविष्ट । वाच० । " खादधावोर्लुक् " ॥ ८ । ४ । २२७ ॥ इति प्राकृतसूत्रेणान्त्यस्य लुक् । प्रा० ४ पाद " स्वरादनतो वा " ॥ ८ । ४ । २४० ॥ इति प्राकृतसूत्रेणाकारान्तवर्जितात्स्वरान्ताद्धातोरन्ते अकाराऽऽगमो वा । प्रा० ४ पाद । धाअइ । धाअइ । धाहिइ । धाओ । बाहुलकाधिकाराद् वर्त्तमानाभविष्यद्विध्याऽऽद्येकवचन एव भवति, तेनेह न । धावन्ति । क्वचिन्न भवति । "धावइ पुरओ ।" प्रा०४ पाद । "कुड्डाइं जे धावइ साउगाइं ।" धावति गच्छति । सूत्र० १ श्रु० ७ अ० ।

धावण–धावन–न० । धाव-ल्युट् । शीघ्रगमने, सूत्र० १ श्रु० ७ अ० । वाच० । धावनमिति वेगेन गमनम् । जीत० । महा० । ज्ञा० । धावनं निष्कारणमतित्वरितमविश्रामं गमनम् । जीत० । शोधने, वाच० । अङ्गयङ्गोद्वर्त्तनस्नाने, नि० चू० ११ उ० । वस्त्राऽऽदीनां प्रक्षालने, प्रव० १ द्वार । सूत्र० । नि०चू० । व्य० । ग० । प्रश्न० । पात्राऽऽदीनां कल्पप्रदाने च । जीत० । बृ० । मुखनयनाऽऽदिधावने, व्य० ६ उ० । (गुणा आचार्यातिशयवर्णनप्रस्तावे ' अइसेस ' शब्दे प्रथमभागे २८ पृष्ठे प्रतिपादिताः) " जे धोयती लूसयहीव वत्थं, अहा हु से णागणियस्स दूरे ।" सूत्र० १ श्रु०७ अ० । वस्त्राण्यधिकृत्य-"णो धोवेज्जा णो धोतरत्ताइं वत्थाइं धरेज्जा ।" नो धावयेत्प्रासुकोदकेनाऽपि न प्रक्षालयेद्, गच्छवासिनो ह्यापवादिकीऽवस्थायां वा प्रासुकोदकेन यतनया धावनमनुज्ञातं, न तु जिनकल्पिकस्येति ।

तथाहि-न च धौतरक्तानि वस्त्राणि धारयेत्पूर्वं धौतानि पश्चाद्रक्तानीति । आचा० १ श्रु० ८ अ० ४ उ० । धावनं च संयतानां वर्षाकालादर्वाक् कल्पते,न शेषकाले, अनेकदोषसम्भवात । पिं० ।

तानेव दोषान् दर्शयति-

उउबद्धे धुवणे वउसं, वंजणविणासो अगाणउवणं च ।
संपाइमवाउवहो, पावणसूओवहाओ य ॥ ९६ ॥

वर्षाकालस्य प्रत्यासन्नं कालमपहाय शेषे ऋतुबद्धे काले, चीवरस्य धावने चरणं वकुशं भवति, उपकरणवकुशत्वात् । तथा-ब्रह्मविनाशो मैथुनप्रत्याख्यानभङ्गः,प्रक्षालितवासःपरिधानदूषितशरीरो हि विरूपोऽपि रमणीयत्वेन प्रतिभासमानो रमणीनां रमणयोग्योऽयमिति प्रार्थनीयो भवति , किं पुनः शरीरावयवरामणीयकोपशोभितः; ततः समस्तकामिनीनां प्रार्थ्यमानानां सव्रीलदर्शितविभ्रमललिताक्षिनिरीक्षणाङ्गमोटनव्याजोपदर्शितकक्षामूलसङ्क्षुब्धतारमणीयपीनकठिनपयोधरविस्तारगम्भीरनाभिप्रदेशपरिभावनतोऽवश्यं ब्रह्मचर्यादपभ्रंशमधिश्रयते। तथा-अस्थानस्थापनम्। इयमत्र भावना-यदि नाम कथञ्चित्तत्त्वं वेदितया संयमविषयनिःप्रकम्पप्रत्यवष्टम्भतो न ब्रह्मचर्यादपभ्रंश्यति, तथाऽपि लोकेन सोऽस्थाने स्थाप्यते-यथा नूनमयं कामी,कथमन्यथाऽऽत्मानमित्थं नृपयति, न खल्वकामी मरणप्रियो भवति। तथा संपातिमानां मक्षिकाऽऽदीनां प्रक्षालनजलाऽऽदिषु निपतताम्, वायोश्च वधो विनाशो भवति। तथा प्लावनेन प्रक्षालनजलपरिष्ठापनेन पृथिव्यां रेणुना चूतोपघातः पृथिव्याश्रितकीटिकाऽऽदिसत्त्वोपमर्दो भवति । तस्माच्च ऋतुबद्धकाले वस्त्रं प्रक्षालनीयम ।

नन्वेते दोषा वर्षाकालादर्वागपि धावने संभवन्ति, ततस्तदानीमपि न चीवराणि प्रक्षालनीयानि, सत्यं, तदानीं चीवरप्रक्षालनेऽनेकदोषसंभवात् ।

अइभारगुरुयपाए, सीयलपाउरणऽजिणगेहणे ।
ओहावणे कायवहो, वासासु अधोवणे दोसा ॥९७॥

इह वर्षाकालादर्वागपि यदि वासांसि न प्रक्षाल्यन्ते तदानीमतिभारो गुरुत्वं वस्त्राणां भवति । तथा वासांसि मलचिक्कानि यदा जलकणानुषक्तसमीरणमात्रेणापि स्पृष्टानि भवन्ति, तदाऽपि स मलः क्लिन्नीभूय दृढतरं वस्त्रेषु संबन्धमापद्यते, किं पुनर्वर्षासु सर्वतः सलिलमयीषु । ततो वर्षासु क्लिन्नमलसंपर्कतो वासांसि गुरुतरभाराणि भवन्ति । तथा (बुडणं ति) वाससां वर्षाकालादर्वागप्यधावने वर्षासु जीर्णता भवति, शाटो भवतीत्यर्थः। किमुक्तं भवति?-यदि नाम वर्षाकालादर्वागपि वस्त्राणि न प्रक्षाल्यन्ते, ततो वर्षासु तेषां मलक्लिन्नतया जीर्णतापादनेन शाटो भवति । न च वर्षास्वभिनववस्त्रग्रहणं, नचाधिकः परिग्रहः,ततो ये वस्त्राभावे दोषाः समये प्रसिद्धास्ते सर्वेऽपि यथायोगमुपढौकन्त इति । तथा मलक्लिन्नेषु वस्त्रेषु शीतलजलकणसंस्पर्शतो मलस्याऽऽर्द्रीभवतः पनको वनस्पतिविशेषः प्राचुर्येणोपजायते, तथा च सति प्राणिव्यापादनप्रसक्तिः। तथा निरन्तरं सर्वतः प्रसरेण निपतति वर्षे शीतले च मारुते वाति मलस्याऽऽर्द्रीभवतः शीतलीभूतानां वाससां प्रावरणे भुक्ताऽऽहारस्याजीर्णतायामपरिणतौ ग्लानता शरीरमान्द्यमुत्तम्भते, तथा च सति प्रवचनस्यापभ्राजना । यथा-अहो ! वठरशिरोमणयोऽमी तपस्विनो,न परमार्थतस्तत्त्ववेदिनो, ये नाम,वर्षास्वप्रक्षालितानां वाससां परिभोगे मान्द्यमुपजायते, इत्येतदपि नावबुध्यन्ते; ते पृथग्जनाऽपरिच्छेद्यं स्वर्गापवर्गमार्गमवगच्छन्तीति दुःश्रद्धेयम्। तथा वर्षास्वप्रक्षालितानि वस्त्राणि प्रावृत्य भिक्षाऽऽद्यर्थं विनिर्गतस्य साधोर्मेघवृष्टौ मलिनवस्त्रकम्बलसंपर्कतोऽप्कायविराधना भवति । एते वर्षासीति वर्षाकालप्रत्यासन्नोऽपि कालो वर्षा इत्युच्यते, तत्सामीप्यात् । भवति च तत्सामीप्यात्तच्छब्दव्यपदेशः । यथा-गङ्गायां घोष इत्यत्र । ततो वर्षासु वर्षाप्रत्यासन्ने काले वस्त्राऽऽदीनामप्रक्षालने दोषास्तस्मादवश्यं वर्षाकालादर्वाग् वासांसि प्रक्षालनीयानि । ये च संपातिमसत्त्वोपघाताऽऽदयो दोषाश्चीवरप्रक्षालने प्रागुक्ताः, तेऽपि सूत्रोक्तनीत्या यतनया प्रवर्त्तमानस्य न संभवन्तीति वेदितव्यम्। यो हि सूत्राज्ञामनुसृत्य यतनया सम्यक् प्रवर्त्तते, स यद्यपि कथञ्चित्प्राण्युपमर्दकारी, तथापि नासौ पापभाग्भवति, नाऽपि तीव्रप्रायश्चित्तभागी, सूत्रबहुमानतो यतनया प्रवर्त्तमानत्वात् । वक्ष्यति च सूत्रम्-" अप्पत्ते चिय वासे, सव्वं उवहिं धुवंति जयणाए।" इति। ततो न कश्चिद्दोषः। नापि तदा वस्त्रप्रक्षालने वकुशं चरणं, सूत्राज्ञया प्रवर्त्तमानत्वात् । नाप्यस्थाने स्थापनदोषो,लोकानामपि वर्षासु वाससामप्रक्षालने दोषपरिज्ञानभावात् । नचैतेऽनन्तरोक्ता अतिभाराऽऽदयो दोषा ऋतुबद्धे काले वाससामप्रक्षालने संभवन्ति, तस्मान्न तदा प्रक्षालनं युक्तमिति स्थितम ।

सम्प्रति वर्षाकालादर्वागपि यावानुपधिरुत्कर्षतो, जघन्यतश्च प्रक्षालनीयो भवति, तावत्तमभिधित्सुराह-

अप्पत्ते चिय वासे, सव्वं उवहिं धुवंति जयणाए ।
असईए लद्धस्स य, जहन्नओ पायनिज्जोगो ॥९८॥

अप्राप्ते एव अनायाते एव, वर्षे वर्षाकाले, वर्षाकालादर्वाक्तने काले इत्यर्थः। जघन्याऽऽदिसामग्र्यां सत्यामुत्कर्षतः सर्वमुपधिकरणं यतनया यतयः प्रक्षालयन्ति। ऊषस्य जलस्य च असति अभावे,जघन्यतोऽपि पात्रनिर्योगोऽवश्यं प्रक्षालनीयः। इह निरूपूर्वो युजिरुपकारे वर्त्तते । तथा चोक्तम्-" पात्तोदूसलेण निज्जोगो उवयारो।" इति। ततो निर्युज्यते उपक्रियतेऽनेनेति निर्योग उपकरणम् ।"अकर्त्तरि०"॥३।३।१९॥इत्यनेन घञ्प्रत्ययः। पात्रस्य निर्योगः पात्रनिर्योगः,पात्रोपकरणं पात्रकबन्धाऽऽदिः। उक्तं च-"पत्ते पत्ताबंधो, पायट्ठवणं च पायकेसरिया । पडलाइं रयत्ताणं, तह गोच्छउ पायनिज्जोगो ॥ १ ॥ " इति ।

आह-किं सर्वेषामेव वस्त्राणि वर्षाकालादर्वागेव प्रक्षाल्यन्ते, किं वाऽस्ति केषाञ्चिद्विशेषः ? । अस्तीति ब्रूमः । केषामिति चेत् ?, अत आह-

आयरियगिलाणाण य, महला य पुणो वि धोवंति ।
मा हु गुरूण अवण्णो, लोगम्मि अजीरणं इयरे ॥९९॥

इह ये कृतपूर्विणो भगवत्प्रणीतवचनानुगताऽऽचाराऽऽदिशास्त्रोपधानानि अधीतिनः स्वसमयशास्त्रेषु ज्ञानिनः सकलस्वपरसमयशास्त्रार्थेषु कृतिनः, कारयितारश्च पञ्चविधेष्वाचारेषु प्रवचनार्थव्याख्याधिकारिणः सूरिमर्यादेशनाभियुक्ताः सूरयस्ते आचार्याः, आचार्यग्रहणमुपलक्षणम्-तेनोपध्यायाऽऽदीनां प्रभूणां परिग्रहः । तेषां तथा ग्लाना मन्दास्तेषां च पुनर्मलिनानि वस्त्राणि धाव्यन्ते प्रक्षाल्यन्ते । मलिनानीत्यत्र नपुंसकत्वे प्राप्तेऽपि सूत्रे पुंस्त्वनिर्देशः प्राकृतलक्षणवशात् । तथाऽऽह पाणिनिः

स्वप्राकृतलक्षणे-"लिङ्गव्यभिचारेपीति।" प्रस्तुतेऽर्थे कारणमाह-मा भवतु, दुर्निश्चितं, गुरूणां मलिनवस्त्रपरिधाने लोकेऽवर्णोऽश्रद्धा-यथा निराकृतयोऽमी मलदुरभिगन्धोपदिग्धदेहाः, ततः किमेतेषामुपकरणं गतैरस्मान्निरिति?। तथा इतरस्मिन् स्नाने मा भवत्वज्ञीर्णमिति भूयो भूयो मलिनानि तेषां प्रक्षाल्यन्ते।

सम्प्रति ये उपधिविशेषा न विश्रम्यन्ति तन्नामग्राहं गृहीत्वा तेषां धावने विधिमाह-

पायस्स पडोयारो, दुनिसिज्ज तिपट्ट पोत्ति रयहरणं।
एए उ न वीसामे, जयणा संकामणा धुवणं ॥ ३० ॥

प्रत्यवतीर्यते पात्रमस्मिन्निति प्रत्यवतार उपकरणम्,पात्रस्य प्रत्यवतारः पात्रवर्जः पात्रनिर्योगः षड्विधः,तथा रजोहरणेऽस्य सत्के द्वे निषद्ये। तद्यथा-बाह्याऽभ्यन्तरा च। इह संप्रति दशिकाऽऽदिभिः सह या दशिमका क्रियते,सा सूत्रनीत्या केवलैव भवति, न सदशिका,तस्या निषद्यात्रयम्, तत्र या दशिमकाया उपरि एकहस्तप्रमाणाऽऽयामा तिर्यग्वेष्टकत्रयपृथुत्वा कम्बलीखण्डरूपा सा आद्या निषद्या, तस्याश्चाग्रे दशिकाः संबध्यन्ते,तां च सदशिकामग्रे रजोहरणशब्देनाऽऽचार्यो ग्रहीष्यति।ततो नासाविह ग्राह्या। द्वितीया त्वेनामेव निषद्यां तिर्यक् बहुभिर्वेष्टकैरावेष्टयन्ती किञ्चिदधिकहस्तप्रमाणाऽऽयामा हस्तप्रमाणमात्रपृथुत्वा वस्त्रमयी निषद्या सा अभ्यन्तरा निषद्योच्यते। तृतीया तु तस्या एवाऽभ्यन्तरनिषद्यायास्तिर्यग्वेष्टकान् कुर्वती चतुरङ्गुलाधिकैकहस्तमाना चतुरस्रा कम्बलमयी भवति। सा च उपवेशनोपकारित्वाद्धुना पादप्रोञ्छनकमिति रूढा, सा बाह्या निषद्येत्यभिधीयते। मिलितं च निषद्यात्रयं दशिकासहितं रजोहरणमुच्यते। ततो रजोहरणस्य सत्के द्वे निषद्ये, इति न विरुद्ध्यते। तथा त्रयः पट्टाः, तद्यथा-संस्तारपट्टः, उत्तरपट्टः, चोलपट्टश्च। एते च सुप्रतीताः। तथा (पोत्ति त्ति) मुखपोतिका-मुखपिधानाय पोतं वस्त्रं मुखपोतम्,मुखपोतमेव ह्रस्वं चतुरङ्गुलात्मिकाद्वितस्तिमात्रप्रमाणत्वात् मुखपोतिका, मुखवस्त्रिकेत्यर्थः। "अतिवर्त्तन्ते स्वार्थिप्रत्ययकाः प्रकृतिलिङ्गवचनानि।"इति वचनाच्च प्रथमतो नपुंसकत्वेऽपि प्रत्यये समानीते स्त्रीत्वम्। तथा-(रयहरण त्ति) दशिमका वेष्टकत्रयप्रमाणपृथुत्वा एकहस्ताऽऽयामा हस्तत्रिभागाऽऽयामदशापरिकलिता प्रथमा या निषद्या प्रागुक्ता सा रजोहरणम्। तथा च भाष्यकृद्वक्ष्यति-"एगनिसेज्जं च रयहरणं।" बाह्याऽऽभ्यन्तरनिषद्यारहितमेकनिषद्यं सदशं रजोहरणमिति। एतानुपधिविशेषान्न विश्रमयेत् नापरिभोग्यान् स्थापयेत्। कस्मादिति चेत् ?। उच्यते-प्रतिवासरमवश्यमेतेषां विनियोगजातत्वात्। ततो यतनया वस्त्रान्तरितेन हस्तेन ग्रहणरूपया संक्रमणया षट्पदिकानामप्रक्षालनीयेषु वस्त्रेषु संक्रमणं ततो धावनं प्रक्षाल[illegible]ति।

एतामेव गाथां भाष्यकृद् गाथात्रयेण व्याख्यानयति-

पायस्स पडोयारो, पत्तगवज्जो य पायनिज्जोगो।
दोन्नि निसिज्जाओ पुण, अब्भिंतर बाहिरा चेव ॥३२॥
संथारुत्तरचोलग, पट्टा तिन्नि य हवंति नायव्वा।
मुहपोत्तिय त्ति पोत्ती, एगनिसिज्जं च रयहरणं ॥३३॥
एए उ न वीसामे, पइदिणमुवओगओ य जयणाए।
संकामिऊण धावं-ति छप्पया तत्थ विहिणाए ॥३४॥

एतास्तिस्रोऽपि व्याख्यातार्थाः, नवरं (संकामिऊण इत्यादि) तत्र विश्रामाभावे सति यतनया षट्पदिका अन्यत्र संक्रमय्य विधिना धावयन्ति प्रक्षालयन्ति। तदेवमविश्रमणीय उपधिरुक्तः,तद्ग्रहणाच्च शेषो विश्रमणीयोपधिर्गम्यते।

ततस्तस्य विश्रमणे विधिं विज्ञापयिषुरिदमाह-

जो पुण वीसामिज्जइ, तं एवं वीयरायआणाए।
पत्ते धावणकाले, उवरिं वीसामए साहू ॥ ३५ ॥

यः पुनरुपधिः प्राप्ते धावनकाले प्रक्षालनकाले,अनेन अकालप्रक्षालनेन भगवदाज्ञाभङ्गलक्षणं दोषमुपदर्शयति; विश्रम्यते निःशेषषट्पदिकाविशोधनार्थमपरिभुक्तो ध्रियते, तमुपधिं वीतरागाऽऽज्ञया सर्वज्ञोपदेशेन, सर्वज्ञोक्तमित्यवधार्यमिति भावः। एवं वक्ष्यमाणेन प्रकारेण साधुर्विश्रमयेत्।

विश्रमणाप्रकारमेवाऽऽह-

अब्भिंतरपरिभोगं, उवरिं पाउणइ नाइदूरे य।
तिन्नि य तिन्नि य एगं, निसिं तु काउं परिच्छिन्ना ॥३३॥

इह साधूनां द्वौ कल्पौ क्षौमौ। एकः कम्बलमयः। तत्र यदा ते प्राव्रियन्ते, तदा एकः क्षौमोऽभ्यन्तरं प्राव्रियते, शरीरलग्नः प्राव्रियते इत्यर्थः। द्वितीयः क्षौमस्तस्योपरि कम्बलमयः तस्याऽप्युपरि। ततः प्रक्षालनकाले विश्रमणाविधिप्रारम्भे रात्रौ स्वपने अभ्यन्तरपरिभोगं सदैव शरीरेण सह संलग्नं परिभुज्यमानं क्षौमं कल्पमुपरि शेषकल्पद्वयाद् बहिर्लम्बीनि दिनानि यावत् प्रावृणोति। येन तत्स्थाः षट्पदिकाः क्षुधा पीड्यमाना आहारार्थम्, अथवा शीताऽऽदिना पीड्यमानास्तं बहिः प्राव्रियमाणं कल्पमपहायाऽऽन्तरे कल्पद्वये शरीरे वा लगन्ति। एष प्रथमो विश्रामणाविधिः। एवं त्रीणि दिनानि प्रावृत्य ततस्त्रीण्येव च दिनानि यावत् रात्रौ स्वापकाले नातिदूरे स्थापयति। किमुक्तं भवति?-स्वापकाले संस्तारकतट एव स्थापयति, येन प्रथमविश्रमणविधिना या न निःसृताः षट्पदिकास्ता अपि क्षुधा पीड्यमाना आहारार्थं ततो विनिर्गत्य संस्तारकाऽऽदौ लगन्ति। एष द्वितीयो विश्रामणाविधिः। तत एकां निशां रात्रिम्, तुः समुच्चये। स्वापस्थानस्योपरि ह्रस्वमानमधोमुखं शरीरलग्नप्राय पर्यन्ते प्रसारितं कृत्वा स्थापयेत्। संस्थाप्य च पश्चात्परीक्षेत, दृष्ट्वा,प्रावरणेन च षट्पदिकां निर्नाशयेत्। तद्यथा-प्रथमं तावद् दृष्ट्वा, निर्नाशयेत्, दृष्ट्वा निर्भालिता अपि यदि न दृष्टास्ततः सूक्ष्मषट्पदिकारक्षणार्थं भूयः शरीरे प्रावृणोति; येन ता आहारार्थं शरीरे लगन्ति। एवं परीक्षणे कृते यदि ता न स्युस्तदा प्रक्षालयेत्। अथ स्युस्तर्हि पुनः पुनर्निर्नाश्य यदा न सन्तीति निश्चितं भवति तदा प्रक्षालयेत्। एवं सप्तभिर्दिनैः कल्पशोधना। एतदनुसारेण शेषस्याप्युपधेः शोधना भावनीया। इह विश्रमणा प्रक्षालनीयस्यापरिभोगरूपा उक्ता,ततो यस्तस्य बहिः प्रावरणाऽऽदिरूपः परिभोगः स परमार्थतोऽपरिभोग इति न तदापि विश्रमणा विरुद्ध्यते।

एतामेव गाथां भाष्यकृद्व्याख्यानयति-

धोवत्थं तिन्नि दिणे, उवरिं पाउणइ तह य आसन्नं।
धारेइ तिन्नि दियहे, एगदिणं उवरि लंबंतं ॥

इयं व्याख्यातार्था।

अत्रैव विश्रमणाविधौ मतान्तरमाह-

केई एक्केक्क-निसिं, संवासेउं तिहा परीच्छंति।

पाउणिऐं जइ न लग्गं-ति उप्पया ताहे धोवंति ॥३७॥

केचिदेके सूरय एवमाहुः-एकैकां निशां रात्रिं त्रिधा त्रिभिः प्रकारैः पूर्वोक्तैः संवास्य । तद्यथा-एकां निशां शोधनीयं कल्पं बहिः प्रावृणोति, द्वितीयां निशां संस्तारकतटे स्थापयति, तृतीयां तु निशां स्वपन् स्वापस्थानस्योपरि लम्बमानमधोमुखं प्रसारितं शरीरलग्नप्रायपर्यन्तं स्थापयति । एवं त्रिधा संवास्य परीक्रान्ते हस्ता निभालयन्ति । निभालिताश्चेत्र दृष्टाः,ततः सूक्ष्मषट्पदिकाविशोधनार्थं प्रावृणवन्ति, प्रावृतौ च यदि न लगन्ति-न लग्नाः प्रतिभासन्ते षट्पदिकास्ततः प्रक्षालयन्ति,लगन्ति चेत्तर्हि भूयो भूयस्तावद् दृष्टया,शरीरप्रावरणेन च परीक्रान्ते,यावन्न सन्तीति निश्चितं भवति ततः प्रक्षालयन्तीति । एषोऽपि विधिरदूषणात्समीचीन इवाऽऽचार्यस्य प्रतिभासत इति मन्यामहे ।

वस्त्रप्रक्षालनं च जलेन भवत्यतो जलग्रहणे विशेषमाह-

तिव्वोदगस्स गहणं,केई नाणेसु असुइपमिसेहो ।
गिहिभायणेसु गहणं, छिऐ वासे मीसगं ठारो ॥ ३८ ॥

वर्षासु गृहच्छादनप्रान्तगलितं जलं तीव्रोदकं,तस्येह यदि वर्षाकालादर्वाक् सर्वोऽप्युपधिः कथञ्चित्सामाप्रयत्नावतो न प्रक्षालितस्तर्हि प्राप्ते वर्षे सति साधुभिस्तीव्रोदकस्य गृहपटलान्तोत्तीर्णस्य जलस्य वस्त्रप्रक्षालनार्थं ग्रहणमादानं कर्त्तव्यम् । तच्चि रजोगुण्डिततधूमधूम्रीकृतदिनकरतापसंपर्कसोष्मतीव्रसंस्पर्शतः परिणतस्वादचित्तम्, अतस्तद्ग्रहणे न काचिद्विराधना । तीव्रोदकस्य ग्रहणे केचिद्गृहभाजनेषु स्वपात्रेषु तीव्रोदकस्य ग्रहणं कर्तव्यमिति । अत्राऽऽचार्य आह-(असुइपमिसेहो)'असुइ त्ति'भावप्रधानोऽयं निर्देशः। ततोऽयमर्थः-अशुचित्वादप्रविज्ञत्वात्परोक्तविधिना तीव्रोदकस्य प्रतिषेधः। तीव्रोदकं हि न प्रलिनत्वात् शुचि, ततः कथं येषु पात्रेषु भोजनं विधीयते, तेषु तस्य ग्रहणमुपपन्नं भवति। मा चूदत्र लोके प्रवचनगर्हा,यथाऽमी अशुचय इति । ततो गृहिभाजनेषु गृहिसत्केषु कुरिण्डकाऽऽदिषु,तस्य तीव्रोदकस्य ग्रहणम् । तच्च तीव्रोदकग्रहणं स्थिते निवृत्ते वर्षे वृष्टावन्तर्मुहूर्तादूर्ध्वमिति गम्यते । अन्तर्मुहूर्तेन सर्वाऽऽत्मना परिणमनसंभवात् । अस्थिते किमित्याह-(मीसगं ति) मिश्रकं निपतति वर्षे तत्तीव्रोदकं मिश्रं भवति । तथाहि-पूर्वनिपतितमचित्तीभूतं, तत्कालं तु निपतत्सचित्तमिति मिश्रम् । ततः स्थिते वर्षे तत्प्रतिग्राह्यं, तस्मिंश्च प्रतिगृहीते तन्मध्ये (ठारो त्ति) क्षारः प्रक्षेपणीयो, येन भूयः सचित्तं न भवति । जलं हि केवलं प्रासुकीभूतमपि भूयः प्रहरत्रयादूर्ध्वं सचित्तीभवति । ततः तन्मध्ये क्षारः प्रक्षिप्यते। अपि च-क्षारप्रक्षेपे समलमपि जलं प्रसन्नतामाभजति, प्रसन्नेन च जलेन प्रक्षाल्यमानानि आचार्याऽऽदिवासांसि सुतेजांसि जायन्ते। तत एतदर्थमपि क्षारप्रक्षेपो न्याय्यः ।

संप्रति धावनगतमेव क्रमविशेषमाह-

गुरुपच्चक्खाणिगिलाण-एसेहमाईण धोवणं पुव्वं ।
तो अप्पणो पुव्वमहा-कडे य इयरे दुवे पच्छा ॥३९॥

गुरुप्रत्याख्यानिग्लानशैक्षाऽऽदीनां पूर्वं प्रथमं धावनं कुर्यात्ततः पश्चादात्मनः । इयमत्र भावना-इह साधुभिः परमहितमात्मनः समीक्षमाणैरवश्यं गुर्वादिषु विनयः प्रयोक्तव्यः, विनयबलादेव सम्यग्दर्शनज्ञानचारित्रवृद्धिसंभवात् । अन्यथा दुर्विनीतस्य सतो गच्छवासस्यैवासज्जवतः सकलमूलक्षानिप्रसक्तेः । ततो धावनप्रवृत्तेन साधुना प्रथमतो गुरूणामाचार्याणां वासांसि प्रक्षालनीयानि, ततः प्रत्याख्यानिनां क्षपकप्रवृत्तीनां तदनन्तरं ग्लानानां, ततोऽप्यनन्तरं शैक्षकाऽऽदीनाम् । तत्र शैक्षा अभिनवप्रव्रजिताः । आदिशब्दाद् बालाऽऽदिग्रहः। सूत्रे च-"सेहमाईणं"इत्यत्र प्रकारोऽलाक्षणिकः। ततस्तदनन्तरमात्मनः। इह सर्वेषामपि गुर्वादीनां यथायोगं विविधान्यपि प्रक्षालनीयवस्त्राणि संभवन्ति। तद्यथा-यथाकृतानि, अल्पपरिकर्माणि, बहुपरिकर्माणि च। तत्र यानि परिकर्मरहितान्येव तथारूपाणि ग्रध्यानि, तानि यथाकृतानि। यानि चैकं वारं स्खण्डित्वा सीवितानि,तान्यल्पपरिकर्माणि। यानि च बहुधा स्खण्डित्वा सीवितानि,तानि बहुपरिकर्माणि। ततस्तत्रापि धावनक्रममाह-(पुव्वमहागमे य त्ति) पूर्वं प्रथमं सर्वेषामपि यथाकृतानि वासांसि धावयेत्, पश्चात्क्रमेण इतरे ढे। किमर्थमिति चेत्? उच्यते-विशुद्ध्यध्यवसायस्फीतिनिमित्तम्। तथाहि-यान्यल्पपरिकर्माणि तानि बहुकर्मोपेक्षया स्तोकं संयमव्याघातकारीणि भवन्तीति । तदपेक्षया शुद्धानि । तेभ्योऽपि यथाकृतान्यतिशुद्धानि, मनागपि परिमन्थदोषकारित्वाभावात् । ततो यथा पूर्वं पूर्वं शुद्धानि प्रक्षाल्यन्ते, तथा संयमबहुमानवृद्धिभावतो विशुद्ध्यध्यवसायस्फीतिरिति पूर्वं यथाकृतानीत्यादिक्रमः ।

संप्रति प्रक्षालनक्रियाविधिमुपदर्शयति-

अच्छोडपिट्ठणासु य न धुवे धोए पयावणं न करे ।
परिभोग अपरिभोगे,छायाऽऽतवे च पेह कल्लाणं ॥४०॥

इह वस्त्राणि धावत आच्छोटपिट्टनाभ्यां न धावेत् । तत्राऽऽच्छोटनं-रजकैरिव शिलायामास्फालनम् । पिट्टनं-घनहीनरएमारमणीभिरिव पुनः पुनः पानीयप्रक्षेपपुरस्सरमुद्गर्योत्पिट्टनेन कुट्टनम् । सूत्रे च सप्तमी तृतीयार्थे । यथा-" तिसु अक्खेसु पुढवी " इत्यादौ । चशब्दोऽनुक्तसमुच्चयार्थः । स च पाणिपादेन प्रमृज्य प्रमृज्य यतनया प्रक्षालयेदिति समुच्चिनोति । ततो धौते प्रक्षालिते धावनजलस्पर्शजनितशीतापनोदायाऽऽत्मनो वस्त्रस्य वा शीघ्रशोषाय अग्नेः प्रतापनं न कुर्यात् । मा चूदावनकारजक्षाऽऽर्द्रीभूतहस्ताऽऽदितो वस्त्रतो वा कथञ्चिद्विन्दूपनिपातेनाग्निकायविराधना। यद्येवं तर्हि कथं वस्त्रस्य शोषणं कर्तव्यमिति। शोषणविधिमाह-परिभोग्यानि, अपरिभोग्यानि च यथाक्रमं छायाऽऽतपयोः शोषयेत्। सूत्रे च विभक्तिलोप आर्षत्वात्। परिभोग्येषु हि वस्त्रेषु तथा पूर्वशोधितेष्वपि कथञ्चित् षट्पदिका संभवति । सा च प्रक्षालनकाले तथोपमर्दितापि कथञ्चिज्जीविता सती दिनकराऽऽतपसंपर्के म्रियते, ततस्तदुत्क्षणार्थं तानि छायायां शोषयेत् । इतराणि स्वातपे, दोषाभावात् । तानि छायायामातपे च शोषार्थं विशारितानि निरन्तरं (पेह त्ति) प्रेक्षेत, येन परास्कन्दिनो नापद्यन्ते । इह पूर्वोक्तविधिना यतनापुरःसरमपि धाव्यमानेषु वस्त्रेषु कथञ्चिद्वायुविराधनारूपः, षट्पदिकोपमर्दाऽऽदिरूपो वाऽसंयमोऽपि संभाव्यते । ततस्तदुच्छुद्ध्यर्थं तस्य साधोर्गुरुणा कल्याणसंज्ञं प्रायश्चित्तं देयम् । पिं० । ओघ० । नि० चू० ।

सचित्तेण उ धुवणे, मुहणंतगमादिए वि चउलहुया ।
अचित्ते धोवणम्मि वि,अकारणे छविहिणिप्फन्ने ॥१०२॥

सचित्तेण उदगेण जइ वि मुहणंतगं धुवति,तदा वि चउलहुयं ।

अह अचित्तेण उदगेण अकारणे धुवति, तओ उवहिणिप्फण्णं भवति । अदोवकरणे पणगं, मज्झिमे मासलहुं, उक्कोसे चउलहुं । सचित्तेणाभिक्खणं धोवणे अट्ठेहिं सपदं, मीसे दसहिं सपदं, अचित्तेण वि णिक्कारणे अभिक्खं धोवणे उवहिणिप्फण्णे सव्वाणा उवरिमं णायव्वं । नि० चू० १ उ० । शुभाध्यवसायान्मिथ्यात्वपुद्गलानां सम्यक्त्वभावसंजननरूपे कर्मणोऽवस्थाभेदे च । आचा० १ श्रु० ६ अ० १ उ० ।

धाविय-धावित-त्रि० । धावितुं प्रवृत्ते, कल्प० १ अधि० ३ क्षण ।

धि (क)-धिक्-अव्य० । धा०-धक्क वा मिकिः । अनिष्टशब्दैर्नियञ्जने, निर्भर्त्सने, निन्दायाम्, स्था० ७ ठा० । वाचo । व्य० । जं० । "धिगत्थु ते जसोकामी।" धिक्शब्दः कुत्सायाम् । दश० २ अ० । निन्दनीये च । वाचo ।

धिइ-धृति-स्त्री० । धरणं धृतिः । आ० म० १ अ० १ खंड । धृ-क्तिन् । "इत्कृपाऽऽदौ" ॥ ८ । १ । १२८ ॥ इति प्राकृतसूत्रेणेकारः । प्रा० १ पाद । धारणे, आ० म० १ अ० १ खंभ । पतनप्रतिबन्धकसंयोगे, ठा० ४ ठा० । धारणारूपे मतिज्ञानभेदे, विशे० । सन्तोषे, कल्प० १ अधि० ५ क्षण । धृतियेन केनचिद्भक्षणभोजनाऽऽदिना निर्वाहमात्रनिमित्तेन सन्तोषः । यो०बिं० । अष्ट० । धैर्ये, कल्प० १ अधि० ५ क्षण । धृतिर्धैर्यं चित्तस्यैकाग्र्यम् । उत्त० ३१ अ० । धृतिः संयमे धैर्ये चित्तसमाधानम् । सूत्र० १ श्रु० ८ अ० । रागद्वेषानाकुलतया मनःप्रणिधाने, आव० ५ अ० । धृतिर्वज्रकुड्यवदच्छेद्यं प्रणिधानम् । बृ० ६ उ० । ठा० । स्था० । ध० । पा० । संथा० । गo। धृतिरुद्वेगाऽऽदिदोषपरिहारेण चित्तस्वास्थ्यम् । पञ्चा० ४ विव० । स० । कृ० । प्रव० । चं०प्र० । धृतिश्चित्तदार्ढ्यमिति । प्रश्न० १ सम्व० द्वार । सू० प्र० । विपा० । धरणं धृतिः । सम्यग्दर्शनचारित्रावस्थाने,सूत्र० १ श्रु० ११ अ० । उत्त० । "भई धिइवेलापरिगयस्स ।" धृतिर्मूलोत्तरगुणविषयः प्रतिदिवसमुत्सहमान आत्मपरिणामविशेषः । नं० । तत्परिपालनीयत्वादर्हिसायाम् । प्रश्न० १ सम्व० द्वार । न रागाऽऽद्याकुलतया धृतिर्मनःप्रणिधानं, विशिष्टा प्रीतिः । इयमत्यन्तमोहनीयकर्मक्षयोपशमाऽऽदिसंभूता,रहिता दैन्यौत्सुक्याभ्यां, धीरगम्भीराऽऽशयरूपा अवन्ध्यकल्याणनिबन्धनावस्त्वाद्यत्युपशया । ल० । "धिती तु मोहस्स उवसमे होइ ।" मोहक्षयोपशमाद् धृतिर्भवति । नि० चू० १ उ० । "दोइ धितीयऽहिगारो, विसेसओ खित्तकालेसु ।" आचा० १ श्रु० ५ अ० १ उ० । द्रव्ये तावदरण्यविरसप्रान्तकक्षाऽऽदिके धृतिर्नावयितव्या, क्षेत्रेऽपि कुतीर्थिकभाविते प्रकृत्यमनोज्ञे वा नोद्वेगः कार्यः, काले ऽपि दुष्कालाऽऽदौ यथालाभसन्तोषेण भाव्यम्, भावेऽप्यक्रोशोपहसनाऽऽदौ नोद्वेष्टितव्यम् । विशेषस्तु क्षेत्रकालयोरसमयोरपि धृतिर्नाऽन्या, द्रव्यभावयोरपि प्रायशस्तन्निमित्तत्वात् । आचा० १ श्रु० ५ अ० २ उ० । धैर्यायाधिष्ठाय्यां देवतायाम्, ज्ञा० १ श्रु० १ अ० । जम्बूमन्दरदक्षिणस्यां दिशि स्थितस्य निषधवर्षधरपर्वतस्य तिगिच्छद्रहाधिष्ठाय्यां धृतिकूटस्थायां देवतायाम्, स्था० ३ ठा० ४ उ० । जं० । धृतिस्तिगिच्छद्रहसुरीति । स्था० ६ ठा० । निरयावलिकोपाङ्गस्य पुष्पचूलाऽऽख्यचतुर्थवर्गस्य तृतीयाध्ययनेप्रतिबद्धवक्तव्यतायां स्वनामख्यातायां देव्याम्, नि० १ श्रु० ४ वर्ग १ अ० । विष्कुम्भाधिकेऽष्टमे योगे, अष्टादशाऽक्षरपादके छन्दोभेदे, अष्टादशसंख्यायां वा वाचo ।

धिइकंद-धृतिकन्द-पुं० । धृतिश्चित्तस्वास्थ्यं, स एव कन्दः स्कन्धाधोभागरूपो यस्य स तथा । चित्तस्वास्थ्यरूपस्कन्धाधोभागयुते संवरपादपे, प्रश्न० ५ सम्व० द्वार ।

धिइकूड-धृतिकूट-न० । धृतिस्तिगिच्छद्रहसुरी तस्याः कूटं धृतिकूटम । जम्बूमन्दरदक्षिणस्यां दिशि स्थितस्य निषधवर्षधरपर्वतस्य तिगिच्छद्रहाधिष्ठाय्या धृतिदेव्याऽधिष्ठिते स्वनामख्याते कूटे, जं० ४ वक्ष० । स्था० ।

धिइजुत्त-धृतियुक्त-त्रि० । धृतिश्चित्तस्वास्थ्यं तद्युक्तो धृतियुक्तः । चित्तस्वास्थ्योपेते, पञ्चा० १८ विव० ।

धिइजुय-धृतियुत-त्रि० । धृतिश्चित्तावष्टम्भस्तद्युतो धृतियुतः । मानसावष्टम्भयुते, स हि नातिगहनेष्वत्यर्थेषु भ्रममुपयाति । ग० १ अधि० । प्रव० ।

धिइधणिय-धृतिधनिक-पुं० । धृतेर्मनःस्वास्थ्यस्य धनिकः स्वामी धृतिधनिकः । मनःस्वास्थ्यस्वामिनि, स० ६ अङ्ग ।

धिइधणियणिप्पकंप-धृतिधनिकनिष्प्रकम्प-त्रि० । धृतिरज्जुबन्धनेन धनिकमत्यर्थं निष्प्रकम्पोऽविचलो यः स मध्यमपदलोपाद् धृतिधनिकनिष्प्रकम्पः । धृतिरज्जुबन्धनेनात्यर्थमविचले, औ० ।

धिइधणियबद्धकच्छ-धृतिधनिकबद्धकक्ष-त्रि० । धृतिरेव धनिकमत्यर्थं बद्धा कक्षा येन स तथा । भ० ए श० ३३ उ० । धृतौ सन्तोषे, धैर्ये वा "धणिय त्ति" अत्यर्थं बद्धकक्षः धृतिधनिकबद्धकक्षः । कल्प० १ अधि० ५ क्षण । धृत्या चित्तस्वास्थ्येन " धणिय त्ति " अत्यर्थं बद्धा कक्षा येन स तथा । ज्ञा० १ श्रु० १ अ० । संथा० । धृतिश्चित्तसमाधानं, तद्रूपा "धणिय त्ति " अत्यर्थं, बद्धा निष्पीडिता कक्षा बन्धविशेषो यत्र तत्तथा । धृतिबलयुक्ते, स० ११ अङ्ग । " धिइधणियबद्धकच्छा । " धृत्या चित्तस्वास्थ्येन धनिकमत्यर्थं बद्धा कृता आराधनारूपा कक्षा प्रतिज्ञा परिकरो वा यैस्ते धृतिधनिकबद्धकक्षाः । संथा० ।

धिइबल-धृतिबल-न० । धृतेश्चित्तसमाधेर्बलमवष्टम्भो धृतिबलम । चित्तसमाधैरवष्टम्भे, ध० ३ अधि० । धृतिश्चित्तसमाधिर्बलमवष्टम्भो धृतिबलम, तत्कारणत्वान्महाव्रतमपि धृतिबलम । चित्तसमाधिबलक्षणे सामर्थ्ये, पा० । पञ्चा० । ध० । तत्कारणत्वान्महाव्रताऽऽदौ च । पा० । सात्त्विके, कातरे च । त्रि० । बृ० १ उ० ।

धिइबलय-धृतिबलक-न० । स्वार्थे कः । चित्तसमाधिबलक्षणे सामर्थ्ये, तत्कारणत्वान्महाव्रताऽऽदौ च । पा० ।

धृतिबलद-त्रि० । चित्तसमाधिबलक्षणसामर्थ्यदायके महाव्रताऽऽदौ, पा० ।

धिइबलिय-धृतिबलिक-त्रि० । धृतिर्वज्रकुड्यवदच्छेद्यं प्रणिधानं, तया बलिको बलवान् । बृ० ६ उ० । अतिशयेन धृतिमति, दर्श० १ तत्त्व । चित्तसमाधानबलक्षणसामर्थ्ययुक्ते च । पञ्चा० ७ विव० । ध० ।

धिइमइ–धृतिमति–स्त्री० । धृतौ मतिर्धृतिमतिः । आव० ४ अ० । धृतिप्रधाना मतिर्धृतिमतिः । आव० ४ अ० । स० । योगसंग्रहनेदे, आ० चू० ४ अ० । प्रश्न० ।

धृतिमतिद्वारमाह–

" नगरी य पंडुमहुरा, पंमववंसे मई अ सुमई अ ।
वारीवसभाऽऽइरणे, उप्पाइअ सुट्ठु पअ पव्वज्जा ॥ १ ॥ "

वारिवृषभः प्रवहणम् ।

" नगरी च पाण्डुमथुरा, तत्राऽऽसन् पञ्च पाण्डवाः ।
स्थापितः प्रव्रजद्भिस्तै-र्निजराज्ये निजः सुतः ॥ २ ॥
नेमिनं तु दधावुस्ते (?), हस्तिकल्पपुरेऽन्तरा ।
भिल्लागनाः प्रश्नं काल-गतं श्रुत्वा विषादिनः ॥ ३ ॥
आत्तं नक्तं परित्यज्य, गत्वा शत्रुञ्जयाचले ।
विधायानशनं प्राप्य, केवलं निर्वृतिं ययुः ॥ ४ ॥
तद्वंशे पाण्डुसेनोऽभू-न्नृपस्तस्य सुताद्वयम् ।
मतिश्च सुमतिश्चैव, ते द्वे अपि च रैवते ॥ ५ ॥
नन्तुं चैत्यानि पोतेन, प्रस्थिते सागराध्वना ।
उत्पाते तत्र संजाते, रुद्धाऽऽदीन् जनताऽस्मरत् ॥ ५ ॥
ताभ्यां पुनर्भृशं स्वात्मा, संयमे विनियोजितः ।
जिनप्रवहणे प्राप्य, ज्ञानं मुक्तिरलभ्यत ॥ ६ ॥
सुस्थितो लवणाधीशो-ऽकार्षीत्पूजां तदङ्गयोः ।
दिव्योद्द्योतेन तत्तीर्थं, प्रभासाभिधयाऽभवत् ॥७॥" आ०क० ।

धिइमइववसायदुब्बल–धृतिमतिव्यवसायदुर्बल–त्रि० । धृतिमतिव्यवसाया दुर्बला यस्य स तथा । धृतिमतिव्यवसायेषु दुर्बलो धृतिमतिव्यवसायदुर्बलः । दुर्बलधृतिमतिव्यवसाये, धृतिमतिव्यवसायेषु दुर्बले च । स० ४२ सम० ।

धिइमंत–धृतिमत्–त्रि० । धैर्यवति, उत्त० २६ अ० । चित्तस्वास्थ्ययुक्ते, अरतिरत्यनुलोमप्रतिलोमोपसर्गसहे, स्था० ८ ठा० । असह्यपरीषहाभिद्रुतोऽपि चारित्रधृतिमानिति । सूत्र० १ श्रु० ६ अ० । धृतिः समाधानं संयमे यस्य स धृतिमान् । आचा० २ श्रु० ४ चू० १६ अ० । सूत्र० । संयमस्वस्थे, ध० ३ अधि० । दश० " धितिमंता जिइंदिया । " धृतिः संयमे रतिः, सा विद्यते येषां ते धृतिमन्तः । संयमधृत्या हि पञ्चमहाव्रतभारोद्वहनं सुसाध्यं भवतीति । सूत्र० १ श्रु० ६ अ० । दश० । (एतच्च 'धम्म' शब्देऽस्मिन्नेव भागे २७०५ पृष्ठे समुक्तम्)

धिइवीरियपरिहीण–धृतिवीर्यपरिहीण–त्रि० । मानसिकावष्टम्भबलरहिते, बृ० २ उ० ।

धिक्कय–धिक्कृत–त्रि० । धिक् निन्दनीयः कृतः । कृ-क्तः । धिक्कारं प्राप्ते, व्य० १ उ० । भावे तु धिक्कार, न० । बृ० ६ उ० ।

धिक्करण–धिक्करण–न० । धिक्शब्दविषयीकरणे, ज्ञा० १ श्रु० १६ अ० ।

धिक्कार–धिक्कार–पुं० । धिक्-कृ-घञ् । तिरस्कारे, वाच० । धिगधिक्केपार्थे एव,तस्य करणमुच्चारणं धिक्कारः । स्था० ७ ठा० । धिक्-कृ-घञ् । तिरस्कारे, वाच० । तदात्मके दण्डनीतिनेदे, स्था० ७ ठा० । जं० । आ० म० । कल्प० । ति० ।

धिज्ज–धैर्य–न० । धीरस्य भावे ष्यञ् । " ईदू धैर्ये " ॥ ८ । १ । २५५ ॥ इतिप्राकृतसूत्रेण धैर्यशब्दे ऐत ईः । प्रा० १ पाद । " धैर्ये वा " ॥८ । २ । ६४॥ धैर्ये यस्य रो वा । 'धीरं । धिज्जं' प्रा० १ पाद । " स्यादृ-भव्य-गेय-चैर्य-सभेषु, यात् " ॥८। २ । १०७ ॥ इतिप्राकृतसूत्रेण चैर्य्यसभेषु शब्देषु संयुक्तस्य यात्पूर्व इदू भवति । 'धीरियं ।' प्रा० २ पाद । " स्थिरचित्तोऽतिधीरो तु, तद्धैर्य्यमिति गीयते । " इत्युक्ते मनसः स्थैर्य्ये, वाच० । ' धैर्य्ये चित्तसमाधानम् ।' सूत्र० १ श्रु० ७ अ० । " पत्तियाइं धिज्जाइं ।" प्रीतौ दाने वा स्थैर्य्यवन्ति । कल्प० ३ अधि० ६ क्षण । घो० । सत्त्वे, प्रश्न० २ संव० द्वार । " मनसो निर्विकारत्वं, धैर्य्यं सत्त्वमपि हेतुषु । " इत्युक्ते मनसो विकाराभावे, अव्याकुलत्वे, विघ्नाऽऽद्युपस्थितावपि प्रारब्धापरित्यागहेतौ चित्तवृत्तिभेदे च । वाच० ।

धेय–त्रि० । धारणीये, पालनीये, ज्ञा० १ श्रु० १ अ० ।

धेय्य–त्रि० । हृदि धारणीये, ज्ञा० १ श्रु० १ अ० ।

धिज्जाइय–धिग्जातिक–त्रि० । धिग्जातिमति, आव० २ अ० । नि० चू० । 'तत्थ भद्दा नाम धिज्जाइणी ।' आ० म० १ अ० २ खण्ड ।

धिज्जाईय–धिग्जातीय–त्रि० । धिग्जात्युत्पन्ने, आव० ३ अ० । नि० चू० । आ० म० ।

धिज्जीविय–धिग्जीवित–न० । कुत्सितजीविते, सूत्र० २ श्रु० २ अ० ।

धिट्ठ–धृष्ट–त्रि० । धृष्-क्तः । " मसृण-मृगाङ्क-मृत्यु-शृङ्ग-धृष्टे वा " ॥८ । १ । १३०॥ इति प्राकृतसूत्रेण ऋत इद्वा । प्रा० १ पाद । निर्लज्जे, प्रगल्भे, नायकभेदे च । वाच० ।

धिप्प–दीप–धा० । दीप्तौ, दिवा०-आत्म०-सेट् । " दीपौ धो धा " ॥ ८ । १ । २२३ ॥ दीप्यतौ दस्य धो धा । 'धिप्पइ । दिप्पइ ।' प्रा० १ पाद । दीप्यते । अदीपि । अदीपिष्ट । दीपू-णिच् । अदीदीपत्-त । अदीदिपत्-त । वाच० ।

धिम्मल्ल–धिङ्मल्ल–न० । निन्द्यमले, त्रं० ।

धिसण–धिषण–पुं० । बृहस्पतौ, को० ९७ गाथा ।

धी–धी–स्त्री० । धैं-क्विप्,सम्प्रसारणं च । बुद्धौ, धीर्बुद्धिरित्यनर्थान्तरम् । पं० चू० । आचा० । गा० । " धी मई बुद्धी । " को० ३१ गाथा । आतु० । गा० । सूत्र० । अनु० । आचा० । तत्त्वावगमे च । धीर्बुद्धिस्तत्त्वावगमः । धिय-ई-श्रीः धीः । बुद्धिसम्पत्तौ च । गा० । धीश्चित्तं,तत्र य ईः कामः स धीः । चित्तस्य कामे,गा० । अभेदोपचारात् परिणते च । पुं० । गा० ।

धीजु–धीयु–त्रि० । धीर्बुद्धिर्विज्ञानं,तस्या युरपृथग्भूतः धीयुः । बुद्धियुते, गा० ।

धीधण–धीधन–त्रि० । बुद्धिधने, " नियमेन धीधनैः पुंभिः । " षो० १६ विव० ।

धीम–धीम–पुं० । धीर्बुद्धिस्तत्त्वतस्तन्मिमीते शब्दयति प्ररूपयति धीमः । बुद्धितत्त्वप्रतिपादके मनवति कपिले, गा० । धियं ज्ञानमेव मिमीते शब्दयति प्रापयति धीमः । बहिरर्थाऽऽकाराणामविद्यादर्शितत्वादविद्यमानत्वेन ज्ञानाद्वैतप्रतिपादके बुद्धे, गा० । ज्ञानत्रयाभिरामत्वे, कल्प० १ अधि० ३ क्षण ।

धीमह–धीमह–त्रि० । अभेदोपचारात् धियः परिणताः महन्तीति महः पूजका आराधकाः, महेः क्विप् । धियां महः धीमहः । विद्वज्जनपर्युपासकेषु, गा० । धियः परिणता महः पूजका यस्य स तथा । विद्वज्जनपर्युपासिते, गा० ।

धीमंत–धीमत्–पुं० । धीः प्रज्ञाऽस्त्यस्य मतुप् । बृहस्पतौ, बुद्धिमति, पण्डितेऽर्हो च । त्रि० । वाच० । ज्ञा०१६ ज्ञार । यो० विं० । कल्प० । ज्ञानचतुष्टययोगाद् महाप्रज्ञे च । हा० २७ अष्ट० ।

धीर धीर–त्रि० । धियं बुद्धिं राति ददातीति धीरः । रा–कः । उत्त० ७ अ० । आतु० । धिया औत्पत्यादिकया बुद्ध्या राजत इति धीरः । ग० १ अधि० । व्य० । आचा० । सूत्र० । उत्त० । नं० । भाव० । आतु० । धियमीरयति धी ईर अण्, ङी रूपा । वाच० । तीर्थकरे, गणधरे च । आचा० १ श्रु० ५ अ० ३ उ० । आव० । आतु० । बुद्ध्या विराजिते, ध० २ अधि० । आचा० । धीरो विशुद्धकुक्षिमानिति । आतु० । 'धीरः सदबुद्ध्यबलङ्कृतः ।' सूत्र० १ श्रु० १३ अ० । बुद्धिमति, प्रश्न० ५ संव० द्वार । दश० । व्य० । पञ्चा० । सूत्र० । उत्त० । विवेकिनि, सूत्र० १ श्रु० ७ अ० । विदुषि, आतु० । धीरा विदितवेदितव्याः । सूत्र० १ श्रु० १३ अ० । आतु० । साहसिके, सूत्र० १ श्रु० १ अ० ४ उ० । दृढचित्ते, दश० ५ तत्त्व । पं० चू० । परीषहोपसर्गाऽऽदिभिरक्षोभ्ये, अष्ट० ३० अष्ट० । प्रश्न० । सूत्र० । उत्त० । पिं० । स्था० । आचा० । बृ० । औ० । धीराः कर्मविदारणसहिष्णवः । सूत्र० १ श्रु० ३ अ० ४ उ० । स्थिरे, आ० म० १ अ० १ खण्ड । उत्त० । नं० । महासत्त्वे, पञ्चा० ४ विव० । सूत्र० । स० । धैर्यान्विते, विनीते, बलिराजे, बुद्धिप्रेरके बुद्धिसाक्षिणि परमेश्वरे च । पुं० । कुङ्कुमे, न० । नायिकाभेदे, काकोल्याम्, महाज्योतिष्मत्याम्, स्थिरायां चित्तवृत्तौ च । स्त्री० । वाच० ।

धैर्य–न० । 'धिज्ज' शब्दार्थे । प्रा० १ पाद ।

धीरकरण–धीरकरण–न० । धीरत्वोत्पादने, धीरकरणकारणानि । स० ६ अङ्ग ।

धीरकित्तिपुरिस–धीरकीर्तिपुरुष–पुं० । धीराणां सतां या कीर्तिस्तत्प्रधानः पुरुषो धीरकीर्तिपुरुषः । सत्कीर्तिप्रधाने पुरुषे, प्रश्न० ४ आश्र० द्वार ।

धीरत्त–धीरत्व–न० । परीषहोपसर्गाक्षोभ्यतायाम्, सूत्र० १ श्रु० ७ अ० । "धीरस्स पस्स धीरत्तं, सव्वधम्माणुवत्तिणो ।" उत्त० ७ अ० ।

धीरपुरिस–धीरपुरुष–पुं० । धीबुद्धिस्तया राजत इति धीरः, स चासौ पुरुषश्च धीरपुरुषः । प्रज्ञा० १ पद । एकान्ततो वीर्यान्तरायकर्मोपगमात् तीर्थकरे, धिया राजितत्वाद् गणधरे च । आव० ४ अ० । व्य० । दश० । महासत्त्वे, महाबुद्धौ, "धीरपुरिसपण्णत्तं ।" महासत्त्वमहाबुद्धितीर्थकरगणधरप्ररूपितम् । आव० ६ अ० । बुद्धिमति नरे, अक्षोभ्यनरे च । पञ्चा० ४ अ० ।

धीरवणा–धीरापना–स्त्री० । दुःखेन परिताप्यमानस्य धीरो भव धीरो भव, अहं तवैतद् दुःखं विश्रामणाऽऽदिनाऽपनेष्यामि, अपि च पुण्यप्रागिन् ! सहस्वैतद् दुःखं सम्यग्, अत एव तत्सहनानन्तरमचिरात्सर्वदुःखप्रहीणो भविष्यसीत्यादिके आश्वासने, "धीरवणं चेव धम्मकहणा य ।" व्य० १ उ० ।

धीरिय–धैर्य–न० । 'धिज्ज' शब्दार्थे, प्रा० १ पाद ।

धुअगाअ–न० । देशी–भ्रमरार्थे, दे० ना० ५ वर्ग ५७ गाथा ।

धुक्कुधुअ–न० । देशी–उल्लसिते, दे० ना० ५ वर्ग ६० गाथा ।

धुक्कुधुगिअ–न० । देशी–उल्लसिते, दे० ना० ५ वर्ग ६० गाथा ।

धुंधुमार–धुन्धुमार–पुं० । सुंसुमारपुरस्थे स्वनामख्याते नृपे, "सुंसुमारधुंधुमारे, अंगारवई य पज्जोए ।" आ० चू० ४ अ० । आ० क० । इन्द्राण्याम्, दे० ना० ५ वर्ग ६० गाथा । (तत्कथा 'संवेग' शब्दे वक्ष्यते)

धुण–धुष–धा० । धूञ् कम्पने, स्वादि० उभ० सक० वेट् । "धूगेधुवः" ॥८।४।५६॥ इति प्राकृतसूत्रेण धुव इत्यादेशो वा । 'धुवइ' प्रा० ४ पाद । "चि-जि-शु-हु-स्तु-लु-पु-धूगां णो ऽहस्वश्च" ॥८।४।२५१॥ एषामन्ते णकाराऽऽगमो, ह्रस्वश्च । 'धुणइ' प्रा० ४ पाद । धावति-ते । अधावीत् । अधविष्ट । अधोष्ट । वाच० । धू कम्पने, स्वा० । उभ०–सक०–वेट् । धूनोति । धुनीते । धुनाति । धुनीते । अधावीत् । अधविष्ट । अधोष्ट । "धूनोति चम्पकवनानि धुनात्यशोकम् ।" इति । "वा युर्विधूनयति ।" इति च कविरहस्यम् । वाच० । ज्ञानकर्मणोः "नवा कर्मभावे व्वः क्यस्य च लुक् ॥ ८ । ४ । २४२ ॥ इति प्राकृतसूत्रेण क्यस्य लुक्, द्विरुक्तो व्यकाराऽऽगमः । "धुव्वइ । धुणिज्जइ ।" प्रा० ४ पाद ।

धुणण–धूनन–न० । अपनयने, सूत्र० कुशीकरणे, आचा० १ श्रु० ४ अ० ४ उ० । परित्यागे, आचा० १ श्रु० ६ अ० १ उ० । स्था० । भिन्नग्रन्थेरनिवृत्तिकरणेन सम्यक्त्वावस्थानरूपे कर्मणोऽवस्थाभेदे, आचा० १ श्रु० ६ अ० १ उ० ।

धुणित्तए–धूनयितुम्–अव्य० । अपनेतुमित्यर्थे, सूत्र० १ श्रु० २ उ० । "उवहिं धुणित्तए ।" धूननायापनयनाय । सूत्र० १ श्रु० २ अ० २ उ० ।

धुणिया–धूत्वा–अव्य० । कृपयित्येत्यर्थे, दश० ६ अ० ३ उ० । सूत्र० ।

धुणेज्ज–धूनयेत्–न० । पापकर्मणि, आ० चू० १ अ० ।

धुण्ण–धून्य–पापे, दश० ६ अ० १ उ० ।

धुण्णवहुल्ल–धून्यबहुल्ल–न० । धूयते इति धून्यं प्रावरणं कर्म तत्प्रचुरे, दश० ६ अ० ।

धुण्णमल्ल–धून्यमल्ल–न० । पापमले, दश० ६ अ० १ उ० ।

धुतोवाय–धुतोपाय–पुं० । अष्टप्रकारकर्मधूननोपाये संयमाऽऽदिके, आचा० १ श्रु० ६ अ० १ उ० ।

धुत्त–धूर्त्त–पुं० । धुर्व–धुर–वा–क्तः । "र्तस्याऽऽधूर्त्ताऽऽदौ" ॥ ८ । २ । ३० ॥ इति प्राकृतसूत्रेणाधूर्त्ताऽऽदाविति निषेधात् तस्य टो न । प्रा० २ पाद । धुस्तूरवृक्षे, चोरकवृक्षे, नायकभेदे, "धूर्त्तोऽपरो धुम्बति ।" लौहकीटे, विमूलवणे च । वञ्चके, द्यूतकारके च । त्रि० । "धुत्तेव कलिणा जिए ।" उत्त० ५ अ० । विस्तीर्णे, दे० ना० ५ वर्ग ५० गाथा ।

धुत्तक्खाण–धूर्ताऽऽख्यान–न० । धूर्तकथानके, ग० । तद्यथा– "अवंतीजणवए उज्जेणी णाम णगरी । तीसे उत्तरपासे जिण्णुज्जाणं नाम उज्जाणं । तत्थ बहवे धुत्ता समागया । तेसिं अहिवइणो इमे–सगो १, एलासाढो २, मूलदेवो ३, खंडपाणा य इत्थिया ४ । एक्केक्कस्स पंच पंच धुत्तसता । धूर्ताण य पंच सता खंडपाणाए । अद्धाणया पाउसकाले सत्ताहवहले धुक्खत्ताणं इमेरिसी कहा संवुत्ता–को अम्हं देज्ज भत्तं ति ? । मू-

लदेवो भणति-जं जेण अणुभूयं, सुयं वा, सो तं कहयतु. जो तं ण पत्तियइ तेण सव्वधुत्ताणं भत्तं दायव्वं । जो पुण भारहरामायणसुइस्समुत्थाहिं उवणयउववत्तीहिं पत्तीहिति, सो मा किंचि दळयतु । एवं मूलदेवेण भणिए सव्वेहिं वि भणियं-साहु साहु त्ति । ततो मूलदेवेण भणियं--को पुव्वं कहयति ? । एलासाढेण भणियं-अहं भे कहयामि । ततो सो कहिउमारद्धो-अहयं गावीओ गहाय अडविं गओ । पेच्छामि चोरे आगच्छमाणे, तो मे पायरणिं कंबलिं पत्थरिऊण तत्थ गावीओ मुंचिऊणाऽहं पोट्टत्तयं बंधिऊण गाममागओ, पेच्छामि य गाममज्झयारे गोदहे रममाणे । ताऽहं गहियगावो पत्थिउमारद्धो(?), खणमेत्तेण य ते चोरा कलयलं करेमाणा तत्थेव णिवइता । सो य गामो सदुपदचउप्पदो,एकं वालुकं एगाए अजियाए गसियं, साऽवि अजिया चरमाणी अजगरेण गसिया । सोवि अजगरो एगाए ढेंकाए गहिओ,सा उड्डिउं वमपायवे णिलीणा । तीसे य एगो पाओ पलंबति । तस्स य वडपायवस्स अहे खंधावारो ठिओ । तम्मि वडे ढेंकाए गयवरो आगछितो । सा उड्डिउं पयत्ता, आगसिओ पाओ, गयवरे कट्टितुमारद्धे डोवेहिं कलयलो कओ । तत्थ सहस्सेहिणो गहियचक्खा पत्ता । तेहिं सा जमगसमगसरेहिं पूरिया । सा मया । रण्णा तीए पेट्टं फालावियं,अयगरो दिट्ठो । सो वि फालाविओ,अजिया दिट्ठा । सा वि फालाविया,वालुंकं दिट्ठं रमणिज्जं । एत्थंतरे ते गोदहा उपरता पतंगसेणा इव भूविलाओ,सो गामो वालुंकाओ णिग्गंतुमारद्धो । अहं पि गहियगावो णिग्गओ, सव्वो सो जणो सचक्खा णिग्गओ । अहं पि अवलंबिऊण गावो इहमागतो । तं जणह कहं सच्चं ?। सेसगा भणंति-सच्चं सच्चं । एलासाढो भणति-कहं गावीओ कंबलीए मायाओ ?। गामो वा वालुंके ?। सेसगा जणंति-नारहसुतीए सुच्चति-जहा पुव्वं आसी एगण्णवं जगं सव्वं,तम्मि य जले अंडमासी । तम्मि अ अंडगे ससेलवणकाणणं जगं सव्वं जइ मायं तो कहं तुह कंबलीए गावो, वालुंके वा गाममाणमाहिति । जं भणसि जहा-ढेंकुदरे अयगरो,तस्स य अजिया,तीए वालुंकं, एत्थ वि भणइ उत्तरं-ससुरासुरं सनारकं ससेलवणकाणणं जगं सव्वं जइ वि पहुस्स उदरे मायं, सो वि य देवईउदरे माओ, सा वि य सयणिज्जे माया जइ एयं सव्वं तो तुह वयणं कहं असच्चं भविस्सति ?॥ १ ॥

ततो सगो कहितुमारद्धो-अम्हे कुसुंबिपुत्ता । कयाइ च करिसणाणि अहं सरयकाले छेत्तुं अतिगओ । तम्मि अ खेत्ते तिलो खुत्तो । सो य परिसो जातो,जो परं कुडाडेहिं छेत्तव्वो, तं समंता परिब्भमामि,पेच्छामि य गआयवरं रणं,तणमिओ विन्नो पन्नाओ(?),पेच्छामि य अइप्पमाणं तिलरुक्खं । तम्मि वि लग्गो,पत्तो य गयवारो सोमं अपावंते कुलालचक्कं व तं तिलरुक्खं परिब्भमति । चालेइ य तं तिलरुक्खं, तेण य चालिओ जलहरो विव तिलोऽनिवुट्ठिं मुंचति । तेण य भमंतेण चक्कतिला विव ते तिला पीलिया । तओ तेल्लोदा णामणदी वूढा,सो य गओ तत्थेव,तिअचलणीए खुत्तो मओ य, मया वि से चम्मं गहियं । इतिओ कओ, तेल्लस्स भरिओ,अहं पि खुधिओ खभारं भक्खयामि । दस य तेल्लघडा तिसिओ पिबामि, तं च तेल्लपडिपुन्नं दइयं घेत्तुं गामं पट्ठिओ,गामबहिया रुक्खसालए णिक्खिविउं तं दइयं गिहमतिगओ,पुत्तो य मे दइयस्स पेसिओ,सो तं जाहे ण पावइ,ताहे रुक्खं पासेउं गहिय हत्थे अहं पि गिहाओ उट्ठिओ परिब्भमंतो इहमागओ । एयं पुण मे अणुभूयं,जो ण पत्तियति,सो देउ भत्तं । सेसगा जणंति-अत्थि एसो य भावो, भारहरामायणे सुई सुणिज्जति-"तेषां कटतटभ्रष्टैर्गजानां मदबिन्दुभिः । प्रावर्तत नदी घोरा, हस्त्यश्वरथवाहिनी ॥ १ ॥" जं भणिसि कहं एमहंतो तिलरुक्खो भवति ?। एत्थ भणइ-पारलिपुत्ते किल मासपादवे भेरी णिम्मविया,तो किं तिलरुक्खो एमहंतो न होज्जाहि ?॥२॥

ततो मूलदेवो कहिउं मारद्धो । सो भणति-तरुणत्तणे इत्थियसुहाभिलासी धाराधरणद्धपाए सामिगिहं पहिओ अतक्कमल्लुहत्थो, पेच्छामि य वणगजं मम वहाए पल्लमाणं, ततोऽहं भीतो अत्ताणो असरणो किंचि खिल्लुकणछायं अपासमाणे जलउड्डणणासणं कमलसुं अतिगओम्मि । सो वि य गयवरो मम वहाए तेणेवंतेण अतिगओ । ततो मे सो गयवरो छम्मासं अंतो कुंभियाए वामोहिओ । तओऽहं छट्ठमासंते कुंभियगीवाए णिग्गओ । सो वि य गयवरो तेणेवंतेण णिग्गओ । णवरं बालग्गेण गीवाए लग्गो । अहमवि पुरओ पेच्छामि अणोरपारं गंगं, सा मे गोप्पयमिव तिण्णा गओम्हि सामिगिहं,तत्थ मे तण्हा छुहा समे अगणेमाणेण गंगाओ पडंती मत्थए छम्मासा धारिया धारा । तओ पणमिऊण महासेणं पयाइं संपत्तो उज्जेणिं, तुज्झं च इहं मिलिओ इति । तं जइ सच्चं एयं तो मे देऊहि पत्तियावेह । अहमजहा अलियं, तो धुत्ताणं देहउ भत्तं । तेहिं भणियं सच्चं । मूलदेवो भणइ-कहं सच्चं । ते जणंति-सुणेह, पुव्वं बंभणस्स मुहाओ विप्पा णिग्गया, बाहाओ खत्तिया,ऊरूसु वइस्सा, पाएसु सुद्दा । जइ इत्तिओ जणवओ तस्सुदरे माओ, तो तुमं हत्थी य कुंभियाए किं ण माहिद्द । अण्णं च किल बंभणो विण्हु य छट्ठाइं कुणंतो धावंता गता, दिव्वं वाससहस्सं तहा वि ण्हिगस्संतो ण पत्तो,तं जइ एमहंतं लिंगं छम्मासं सरीरे मायं तो तुहं हत्थी य कुंभियाए ण माहिद्द । जं भणसि-बालग्गे हत्थी कहं लग्गो ?। तं सुणसु-विण्हू जगस्स कत्ता, एगण्णवे तप्पति तवं जलसयणगतो, तस्स य णाभीओ बंभो पउमगब्भाणीओ णिग्गओ, णवरं पंकयं णाभीए लग्गो, एवं जइ तुमं हत्थी य वि णिग्गता, हत्थी बालग्गे लग्गो, को दोसो ?,जं भणसि--गंगा कहमुत्तिण्णा ?। रामेण किल सीताए पविसिट्ठेउं सुग्गीवो, तेणावि इणमंतो, सो बाहाहि समुद्दं तरिउं लंकापुरिं पत्तो । सीयाए पुच्छिओ--कहं समुद्दो तिण्णो ?। भणति--"तव प्रसादात् वचसः प्रसादा--द्भर्तुश्च ते देवि ! गुरुप्रसादात् । साधुप्रसादाच्च पितुः प्रसादा--त्तीर्णो मया गोष्पदवत्समुद्रः ॥१॥" जइ तेण तिण्णो समुद्दो बाहाहिं,तेण तुमं कहं गंगं ण तरिस्ससि ? । जं भणसि--कहं छम्मासे धारा धरिता । एत्थ वि सुणसु-दिव्वं वाससहस्सं तवं कुणमाणं भगीरहं दट्ठुं तत्थागयमाणेहिं लोगपियत्था सुरगणेहिं गंगा अब्भत्थिता-अवतराहि मणुयलोगं । तीए भणियं-को मे धरेहि त्ति णिवडिमिति?,पसुवइणा भणियं-अहं ते पगजडाए धारयामि । तेण सा दिव्वं वाससहस्सं धरिया । जइ तेण सा धरिया । तुमं कहं छम्मासं ण धरिस्ससि ? ॥३॥

अह पत्ता खंभपाणा, कहितुमारद्धा । सा य भणति--

"उल्लंघितं ति अम्हे--हि भणइ जइ अंजलिं करिय सीसे ।
उवसप्पह जइ अ ममं, तो भत्तं देमि सव्वेसिं ॥१॥
ततो भणंति धुत्ता, अम्हे सव्वं जगं तुलेमाणा ।
कह एवं खलु वयणं, तुज्झ सगासे जणीहामो ?" ॥ २ ॥

ततो ईसिं हसिऊण खंभपाणा कहयति-अहं रायरयगस्स धूया,

अह अन्नया सह पिउणा वत्थाणं महासगमं भरेऊण पुरिससहस्सेण समं णदिं सलिलपुण्णं पत्ता। धोयाइं वत्थाइं, तो आयवे दिन्नाणि उव्वायाणि, आगतो महावाओ। तेण ताणि सव्वाणि वत्थाणि अवहरियाणि। ततोऽहं रायभया गोदारुवं काऊण रयणीए णगरुज्जाणं गया। तत्थाहं रत्तासोगपासं चूयलया जाता। अन्नया य सुणेमि-जहा रयणा उम्मिलंतु, अभयघोसं पमहसहं सोऊण पुणन्नवसरीरा जाया, तस्स सगडस्स णाडगवरत्ता य अंबुएहिं नक्खिया ओ। तओ मे पिउणा णागवरत्ताओ अणिस्समाणेण महिसत्तिण्णा लद्धा। तत्थ भणह किमेत्थ सच्चं?। ते भणंति-वंचकेसवा अंतं ण गया लिंगस्स वाससहस्सेण जति तं सच्चं तुह वयणं कहमसच्चं नविस्सइ त्ति?। रामायणे वि सुणिज्जइ-जं हणुमंतस्स पुच्छं महंतमासी, तं च किल अणेगेहिं वत्थसहस्सेहिं वेढिऊण तेल्लघमसहस्सेहिं सिंचिऊण पलीवियं, तेण किल लंका पुरी दड्ढा। एवं जइ महिसस्स वि महंतपुच्छेण णागवरत्ताओ जायाओ कोदोसो?। अन्नं च इमं सुई सुव्वई-जहा गंधारो राया, रण्णे कुवत्तणं पत्तो, अवरो वि राया। किमस्सो (?) णाम महाबलपरक्कमो, तेण य सक्को देवराया समरे णिज्जिओ। ततो तेण देवराइणा सावत्रसतोऽरण्णे अयगरो जाओ। अन्नया य पंसुसुआ रज्जभट्ठाऽरण्णे निग्गया, अन्नया य रज्जाहराय निग्गओ भीमो, तेण य अयगरेण गसिओ, धम्मसुतो य अयगरं पत्तो, ततो सो अयगरो माणुसीए वायाए तं धम्मसुयं सत्त पुच्छातो पुच्छेइ। तेण य कहियाओ सत्त पुच्छातो। ततो भीमं णिग्गिलइ, तस्स य सावस्स अंतो जाओ। जातो पुणरवि राया, जइ एयं सच्चं तो तुमंपि सव्वूतं गोहाभूय सभावं गंतूण पुणरवा जाया। तो खमपणा भणइ-एवं गते वि मऊ पणामं करेह। जइ कहंचि न जिप्पह, तो काणा वि कवड्डिया तुब्भं मुल्लं ण लभति। ते भणंति-को अम्हे सत्तो णिज्जिणिउं?। तो साहसिकेण भणति-तेसिं-वा-तहरियाणं वत्थाणं गवेसणाय निग्गयाणं पुच्छिऊण, अहं च मम दासचेडा णट्ठा, तयं अन्नेसामि, ताहं गामणगराणि अममाणी इहं पत्ता। तं ते दासचेडा तुम्हे, ताणि वत्थाणि इमाणि, जाणे, तुब्भं परिहिआणि। तं जइ सच्चं, तो देह वच्चा। अह अलिअं तो देहि भत्तं। * ग० २ अधि०। नि० चू०।

धुत्तसंवलय-धूर्तशम्बूक-न०। पुरुषद्वासप्ततिकलाऽन्तर्गते कलाभेदे, कल्प० १ अधि० ७ क्षण।

धुत्ति-धूर्ति-स्त्री०। जरायाम्, आ० म० १ अ० २ खण्ड०। प्रा०।

धुत्तिमा-धूर्तिमा-पुं०। स्त्री०। धूर्तत्वे, "वेमाऽज्जल्याद्याः स्त्रियाम्" ॥ ७। १। ३५॥ इति वा स्त्रीत्वम्। प्रा० १ पाद।

धुम्म-धूम्र-पुं०। धूमं तद्वर्णं राति। रा-कः-पृषो०। कपोतवर्णे, स्था० १ ठा०। सिद्धके, वाच०।

धुय-धु (धू) त-न०। त्यजने, स्था० ६ ठा०। संयमे, सूत्र० १ श्रु० ७ अ०। धूयतेऽष्टप्रकारं कर्म येन तद् धूतम्। संयमानुष्ठाने, धूननाहेत्वाद् धूतम्। सूत्र० १ श्रु० २ अ० २ उ०। धूयते इति धूतम्। प्राग्बद्धे कर्मणि, सूत्र० २ श्रु० २ अ०। वृ०। अष्टप्रकारके कर्मणि, आचा० १ श्रु० ६ अ० १ उ०। मोक्षे, सूत्र० १ श्रु० ७ अ०। धूतं सङ्गानां त्यजनम्, तत्प्रतिपादकमध्ययनं धूतम्। स्था० ६ ठा०। आचाराङ्गप्रथमश्रुतस्कन्धस्य षष्ठेऽध्ययने च। न०। आचा० १ श्रु० ६ अ० १ उ०। स०। (तद्वक्तव्यता 'धुयज्झयण' शब्देऽनुपदमेव वक्ष्यते) कम्पिते, स्फेटिते, नं०। वृ०। क्षिप्ते, आतु०। दश०। अपनीते, सूत्र० १ श्रु० ४ अ० २ उ०। त्यक्ते, "धुतकेसमंसु लोमनहेहिं।" प्रश्न० १ संव० द्वार। भर्त्सिते, तर्किते, वाच०। अपगते च। त्रि०। वृ० ६ उ०।

संप्रति निक्षेपः, स च चतुर्धा, तत्रापि नामस्थापने सुगमत्वादनादृत्य द्रव्यभावधूतप्रतिपादनाय गाथाशकलमाह-

दव्वधुतं वत्थादी, भावधुयं कम्ममट्ठविहं (२५१)

(दव्वधुतमित्यादि) द्रव्यधूतं द्विधा-आगमतो, नोआगमतश्च। आगमतो ज्ञाता, तत्र चोपयुक्तः। नोआगमतस्तु ज्ञशरीरभव्यशरीरव्यतिरिक्तं द्रव्यधूतम्। द्रव्यं च तद्बद्धाऽऽदि, धूतं च रजोऽपनयनार्थं द्रव्यधूतम्। आदिग्रहणाद् वृक्षाऽऽदिफलार्थं, भावधूतं कर्माष्टविधं तद्विमोक्षार्थं धूयत इति गाथाशकलार्थः।

पुनरप्येतदेवार्थं विशेषतः प्रतिपादयितुमाह-

अहियासेत्तुवसग्गे, दिव्वे माणुस्सए तिरिक्खे य।
जो विहुणइ कम्माइं, भावधुयं तं वियाणाहि॥ २५२॥

अधिकमासह्यात्यर्थं सोढा, कानतिसह्य?, उपसर्गान्, किंभूतान्?, दिव्यान्मानुषांस्तिरश्चश्च, यः कर्माणि संसारतरुबीजानि, विधूनयत्यपनयति, तद्भावधूतमित्येवं जानीहि। क्रियाकारकयोरभेदाद्वा कर्मधूनन भावधूतं जानीहीति भावार्थः॥ आचा० १ श्रु० ३ अ० १ उ०।

धुयकिलेस-धु (धू) तक्लेश-त्रि०। क्षिप्तसप्तनयक्लेशे, आतु०। धूता अपनीताः क्लेशाः कर्माणि येनासाविति। क्षीणाष्टकर्मणि, वृ० १ उ०।

धुयचारि (ण्)-धु (धू) तचारिन्-धुनातीति धुतं, संयमो मोक्षो वा, तं चरतीति। संयमाऽऽदिचरणशीले, आचा० १ श्रु० २ अ० ३ उ०।

धुयज्झयण-धु (धू) ताध्ययन-न०। आचाराङ्गप्रथमश्रुतस्कन्धस्यषष्ठेऽध्ययने, आचा०।

तस्योद्देशार्थाधिकारं निर्युक्तिकारो विभणिषुराह-

पढमे नियगविहुणणा, कम्माणं बितिए तइयम्मि।
उवगरणसरीराणं, चउत्थए गारवतियस्स॥ २५०॥
उवसग्गा सम्माणा, य विहुणया पंचमम्मि उद्देसे (२५१)

प्रथमोद्देशके निजकाः स्वजनास्तेषां विधूननेत्ययमर्थाधिकारः, द्वितीये कर्मणां, तृतीये उपकरणशरीराणां, चतुर्थे गौरवत्रिकस्य, विधूननेति सर्वत्र सम्बन्धनीयम्। उपसर्गाः सम्मानना नि च यथा साधुभिर्विधूतानि तथा पञ्चमोद्देशके प्रतिपाद्यत इत्यर्थः। आचा० १ श्रु० ६ अ० १ उ०।

धुयपाव-धु (धू) तपाप-त्रि०। अपनीतपापे, "नमोत्थु धुयपावाणं।" आतु०।

धुयबहुल-धु (धू) तबहुल-त्रि०। धूयते इति धूतं, प्रायो बद्धं कर्म, तत्प्रचुरे, सूत्र० २ श्रु० २ अ०।

धुयमोह-धु (धू) तमोह-त्रि०। धूतो मोहरागद्वेषरूपो येन सः। सूत्र० १ श्रु० ४ अ० २ उ०। धूतो मोहोऽज्ञानं येन सः। विक्षिप्तमोहे, दश० १ अ०।

* एतच्च निशीथपुस्तकादू लिखितमित्यग्रे लिखितमस्ति।

धुयरय–धु (धू) तरजस्–त्रि० धूतमपनीतं रजः कर्म येन स धूतरजाः । सूत्र० १ श्रु०४ अ० २ अ० धूतं कम्पितं स्फोटितं रजो बध्यमानं कर्म येन स धूतरजाः । नं० । अपगतपापकर्मणि, वृ० ६ उ० ।

धुयरागमग्ग–धु (धू) तरागमार्ग–पुं० । धूतोऽपनीतो रागमार्गो रागपन्था यस्मिन् । अपनीतरागपथे, सूत्र०१ श्रु०४ अ० २ उ० ।

धुयवाय–धु (धू) तवाद–पुं० । धूतमष्टप्रकारं कर्म,धूननं ज्ञातिपरित्यागो वा,तस्य वादो धूतवादः । कर्मपरित्यागकथने, आचा० ।

आयाण जो, सुस्सूस भो, धुयवायं पवेदइस्सामि । इह खलु अत्तत्ताए तेहिं तेहिं कुलेहिं अभिसेएणं अभिसंभूता, अभिसंजाता, अभिणिव्वट्टा, अभिसंवुड्ढा, अभिणिक्खंता,अणुपुव्वेणं महामुणी ॥१७९॥

भोरिति शिष्याऽऽमन्त्रणे,यदहमुत्तरत्राऽऽवेदयिष्यामि भवतस्तद् आजानीहि अवधारय, शुश्रूषस्व श्रवणेच्छां विधेहि, भोरिति पुनरप्यामन्त्रणमर्थगरीयस्त्वख्यापनाय, नाऽत्र भवता प्रमादो विधेयो, धूतवादं कथयिष्याम्यहम् । धूतम–अष्टप्रकारकर्मधूननं ज्ञातिपरित्यागो वा तस्य वादो धूतवादः,तं प्रवेदयिष्यामि, अवहितेन च भवता भाव्यमिति । नागार्जुनीयास्तु पठन्ति-(धूतोवायं पवेदंति त्ति) अष्टप्रकारकर्मधूननोपायं, निजधूननोपायं वा प्रवेदयन्ति तीर्थङ्कराऽऽदयः। कोऽसावुपायः?,इत्यत आह-इहास्मिन् संसारे, चतुर्वर्णाक्यालङ्कारे । आत्मनो भाव आत्मता–जीवास्तिता, स्वकृतकर्मपरिणतिर्वा, तयाऽभिसंभूताः-संजाताः,न पुनः पृथिव्यादिभूतानां कायाऽऽकारपरिणामतया, ईश्वरप्रजापतिनियोगेन वेति। तेषु तेषूच्चावचेषु कुलेषु यथास्वकर्मोदयाऽऽपादितेष्वभिषेकेण शुक्रशोणितनिषेकाऽऽदिक्रमेणेति । तत्राऽयं क्रमः–"सप्ताहं कललं विद्यात्,ततः सप्ताहमर्बुदम् । अर्बुदाज्जायते पेशी, पेशीतोऽपि घनं भवेत् " ॥ १ ॥ इति । तत्र यावत्कललं तावदभिसंभूताः, पेशीं यावदभिसंजाताः,ततः साङ्गोपाङ्गस्नायुशिरोरोमाऽऽदिक्रमाभिनिर्वर्त्तनाद्भिनिर्वृताः, ततः प्रसूताः सन्तोऽभिसंवृद्धा धर्मश्रवणयोग्यावस्थायां वर्त्तमाना धर्मकथाऽऽदिकं निमित्तमासाद्योपलब्धपुण्योपचयाऽभिसंबुद्धाः,ततः सदसद्विवेकं जानाना अभिनिष्क्रान्ताः,ततोऽधीताचाराऽऽदिशास्त्रास्तदर्थभावनोपबृंहितचरणपरिणामा आनुपूर्व्येण शिक्षक-गीतार्थ-कृपक-परिहारविशुद्धिकै-काकिविहारि-जिनकल्पिकावस्थाना मुनयोऽभूवन्निति ॥ १७६ ॥

अभिसंबुद्धं च प्रव्रजिषुमुपलभ्य यन्निजाः कुर्युस्तद्दर्शयितुमाह—

तं परिक्कमंतं परिदेवमाणा मा णे चयाहि इति ते वयंति छंदोवणीया अज्झोववण्णा अक्कंदकारी जणगा रुदंति, अतारिसे मुणी,ण ओहं तरए जणगा जेण विप्पजढा,सरणं तत्थ णो समेति,कहं णु णाय से तत्थ रमति ?, एयं णाणं सया समणुवासिज्जासित्ति बेमि ॥ १८० ॥

तमवगततत्त्वं गृहवासपराङ्मुखं महापुरुषसेवितं पन्थानं पराक्रममाणमुपलभ्य मातापितृपुत्रकलत्राऽऽदयः परिदेवमाना माऽस्मान् परित्यज, इत्येतत्ते कृपामापादयन्तो वदन्ति, किं चापरं वदन्तीत्याह-छन्देनोपनीताः छन्दोपनीताः, तवाभिप्रायाऽनुवर्त्तिनः, त्वयि चाभ्युपपन्नाः, तदेवंभूतानस्मान्माऽवमंस्था इत्येवमाक्रन्दकारिणो जनकाः मातापित्रादयो, जना वा रुदन्ति । एवं च वदेयुरित्याह-न तादृशो मुनिर्जनैर्वेत्ति, न चौघं संसारं तरति, येन पाषण्डविप्रलब्धेन जनका मातापित्रादयोऽपोढाः त्यक्ता इति । स चावगतसंसारस्वभावो यत्करोतीति तदाह-न ह्यसावनुरक्तमपि बन्धुवर्गं तत्र तस्मिन्नवसरे शरणं समेति, न तदभ्युपगमं करोतीत्यर्थः । किमित्यसौ शरणं नैतीत्याह-कथं नु नामाऽसौ तत्र तस्मिन् गृहवासे सर्वैनिकाराऽऽस्पदे नरकप्रतिनिधौ शुभद्वारपरिघे रमते ?, कथं गृहवासे दुर्हेकहेतौ विघटितमोहकपाटः सन् रतिं कुर्यादिति । उपसंहरन्नाह--एतत् पूर्वोक्तं ज्ञानं सदा आत्मनि सम्यगनुवासयेः व्यवस्थापयेः, 'इति' अधिकारपरिसमाप्तौ, धूताध्ययनस्य प्रथमोद्देशकः परिसमाप्तः । उक्तः प्रथमोद्देशकः ।

साम्प्रतं द्वितीय आरभ्यते । अस्य चायमभिसंबन्धः-इहानन्तरोद्देशके निजकविधूनना प्रतिपादिता, सा चैवं फलवती स्याद्यदि कर्मविधूननं स्यादतः कर्मविधूननार्थमिदमुपक्रम्यत इत्यनेन संबन्धेनाऽऽयातस्यास्योद्देशकस्याऽऽदिसूत्रम्-

आउरं लोयमायाए चइत्ता पुव्वसंजोगं हिच्चा उवसमं वसित्ता बंभचेरंसि वसु वा अणुवसु वा जाणित्तु धम्मं अहा तहा अहेगे तमचाइंति कुसीला ॥ १८१ ॥

(आउरं इत्यादि) लोकं मातापितृपुत्रकलत्राऽऽदिकं तमातुरं स्नेहानुषङ्गतया वियोगात्कार्यावसादेन वा, यदि वा जन्तुलोकं कामरागाऽऽतुरम्,आदाय ज्ञानेन परिगृह्यात्मसात्कृत्वा परिच्छिद्य,तथा त्यक्त्वा च पूर्वसंयोगं मातापित्रादिसंबन्धं, तथा हित्वोपशमम् । उषित्वाऽपि ब्रह्मचर्ये, किंभूतः सन्निति दर्शयति-वसु द्रव्यं, तद्भूतः कषायकाल्विकाऽऽदिमलापगमाद् वीतराग इत्यर्थः,तद्विपर्ययेणानुवसुः, सराग इत्यर्थः। यदि वा-वसुः साधुः, अनुवसुः श्रावकः। तदुक्तम्-" वीतरागो वसुर्ज्ञेयो, जिनो वा संयतोऽथवा । सरागो ह्यनुवसुः प्रोक्तः, स्थविरः श्रावकोऽपि वा ॥ १ ॥ " तथा ज्ञात्वा धर्मं श्रुतचारित्राऽऽख्यं यथा तथावस्थितं धर्मं प्रतिपद्याप्यथैके मोहोदयात्तथाविधभवितव्यतानियोगेन तं धर्मं प्रतिपालयितुं न शक्नुवन्ति। किंभूताः ?, कुत्सितं शीलं येषां ते कुशीला इति । यत एव धर्मपालनाशक्ता अत एव कुशीलाः ॥ १८१ ॥

एवंभूताश्च सन्तः किं कुर्युरित्याह-

वत्थं पडिग्गहं कंबलं पायपुंछणं विलसेज्जा, अणुपुव्वेण अणहियासेमाणा परीसहे दुरहियासए, कामे ममायमाणस्स इयाणिं वा मुहुत्तेण वा अपरिमाणाए भेदो, एवं से अंतराइएहिं कामेहिं अकेवलिएहिं अवितिण्णा चेए ॥१८२॥

(वत्थं इत्यादि) केचिद्भवशतकोटिदुरापमवाप्य मानुषं जन्म समासाद्यालब्धपूर्वां संसारार्णवोत्तरणप्रत्यलां बोधिद्रोणीमङ्गीकृत्य मोक्षतरुबीजं सर्वविरतिलक्षणं चरणं पुनर्दुर्निवारतया मन्मथस्य, पारिप्लवतया मनसो, ह्रोतुपतयेन्द्रियग्रामस्यानेकभवाभ्यासाऽऽपादितविषयमधुरतया प्रबलमोहनीयोदयादशुभवेदनीयोदयाऽऽसन्न प्राङ्नरकवादयशःकीर्त्युत्कटतया अविगणय्यमतिमविचार्य कार्याकार्यमुररीकृत्य महाव्यसनसागरं साम्प्रतेक्षितया अधः कृतकुलक्रमाऽऽ-

चारास्तस्यजेयुः । तस्यागश्च धर्मोपकरणपरित्यागाऽवतीत्यतस्तद्दर्शयति-वत्थमित्यनेन क्षौमिककल्पो गृहीतः, तथा पतद्ग्रहः पात्रं, कम्बलमौर्णिकं कल्पं, पादनिर्योगं वा । पादप्रोञ्छनकं रजोहरणम् । एतानि निरपेक्षतया व्युत्सृज्य,कञ्चिद्देशविरतिमभ्युपगच्छति, कश्चिद्दर्शनमेवाऽऽश्रयते, कश्चित्ततोऽपि भ्रश्यति,कथं पुनर्दुर्लभं चारित्रमवाप्य पुनस्तत्यजेदित्याह-परीषहान् दुरधिसहनीयानानुक्रमेण परिषोढ्या यौगपद्येन वोदीर्णानविसहमानाः परीषहैर्भग्नमोहपरवशतया पुरस्कृतदुर्गतयो मोक्षमार्गं परित्यजन्ति । भोगार्थं त्यक्तवामपि पापोदयाद्यत्स्यात्तदाह--(कामे इत्यादि) कामान् विरूपानपि (ममायमाणस्स त्ति) स्वीकुर्वतो भोगाध्यवसायिनोऽन्तरायोदयाविदानीं तत्क्षणमेव प्रव्रज्यापरित्यागानन्तरमेव, भोगप्राप्तिसमनन्तरमेवान्तर्मुहूर्त्तेन वा, करभरीकरस्येवाहोरात्रेण वा, ततोऽप्यूर्द्धं शरीरभेदो भवत्यपरिमाणाय, एवंभूत आत्मना सार्द्धं विवक्षितशरीरभेदो भवति । येनानन्तेनापि कालेन पुनः पञ्चेन्द्रियत्वं नावाप्नोति । एतदेवोपसंजिहीर्षुराह-एवं पूर्वोक्तप्रकारेण, स भोगाभिलाषी, आन्तरायिकैः कामैर्बहुप्रत्यपायैर्न केवलं तत्र भवे अकेवलिकाः सद्बन्धाः सप्रतिपक्षा इति यावदसंपूर्णा वा, तैः सङ्किरविवीर्णाः संसारं तीर्त्वा, द्वितीयार्थे तृतीया । वः समुच्चये । एत इति भोगाभिलाषिणः कामैरतृप्ताः एव शरीरभेदमवाप्नुवन्तीति तात्पर्यार्थः ॥ १८२ ॥

अपरे त्वासन्नतया मोक्षस्य कथञ्चित् कुत्रचित्कदाचिद्वाऽप्यचरणपरिणामं प्रतिक्षणं लघुकर्मतया प्रवर्द्धमानाध्यवसायिनो भवन्तीति दर्शयितुमाह-

अहेगे धम्ममादाय आदाणप्पभितिसु पणिहिए चरे अपलीयमाणे दढे ॥ १८३ ॥

सव्वं गिद्धिं परिण्णाय एस पणते महामुणी ॥ १८४ ॥

अइयच्च सव्वतो संगं ण महं अत्थि त्ति इति एगो अहमंसि जयमाणे एत्थ विरते, अणगारे, सव्वओ मुंमे रीयते, जे अचेले परिवुसिए संचिट्ठति ओमोयरियाए ॥ १८५ ॥

से आकुट्ठे वा, हए वा, लुंचिते वा, पलियं पकंथे, अदुवा पकंथे, अतहेहिं सद्दफासेहिं इति संखाए एगतरे अण्णतरे अभिण्णाय तितिक्खमाणे परिव्वए । जे य हिरी जे य अहिरीमाणे चिच्चा सव्वं विसोत्तियं फासे समियदंसणे ॥ १८६ ॥

(अहेगे इत्यादि) अथानन्तरमेके विशुद्धपरिणामतया आसन्नापवर्गतया धर्मं श्रुतचारित्राऽऽख्यमादाय गृहीत्वा वस्त्रपतद्ग्रहाऽऽदिधर्मोपकरणसमन्विता धर्मकरणेषु प्रणिहिताः परीषहसहिष्णवः सर्वज्ञोपदिष्टं धर्मं चरेयुरिति । अत्र च पूर्वाणि प्रमादसूत्राण्यप्रमादाभिप्रायेण पठितव्यानीति । उक्तं च-"यत्र प्रमादेन तिरोऽप्रमादः,स्याद्वाऽपि यत्नेन पुनः प्रमादः । विपर्ययेणाऽपि पठन्ति तत्र,सूत्राणयधीकारवशाद्विधिज्ञाः॥१॥" किंभूताः पुनर्धर्मं चरेयुरित्याह-(अपलीय इत्यादि)कामेषु मातापित्रादिके वा लोके न प्रलीयमाना अप्रलीयमाना अनभिसक्ता धर्मचरणे दृढास्तपःसंयमाऽऽदौ दृढिमानमालम्बमाना धर्मं चरन्तीति॥१८३॥किञ्च-(सव्वं इत्यादि)सर्वां गृद्धिं भोगकाङ्क्षां दुःखस्वरूपतया,परिज्ञाय,प्रत्याख्यानपरिज्ञया परित्यजेत् । परित्यागे गुणमाह-(एस इत्यादि) (एस इति) कामपिपासापरित्यागी,प्रकर्षेण नतः प्रह्वः संयमे, कर्मधूननायां वा महामुनिर्भवति नापर इति १८४ ॥ किञ्च-(अइयच्च इत्यादि) अतिगत्याऽतिक्रम्य सर्वतः सर्वैः प्रकारैः सङ्गसंबन्धं पुत्रकलत्राऽऽदिजनितं,कामनुषङ्गं वा,किं भावयेदित्याह-(ण महं अत्थि इत्यादि) न मम किमप्यस्तीति यत्संसारे एतत् आलम्बनाय स्यादिति,तदभावाच्चेत्युक्तक्रमेणैकोऽहमस्मिन् संसारोदरे, न चाहमन्यस्य कस्यचिदित्येतद्भावनाभावितश्च यत् कुर्यात्तदाह-(जयमाणे इत्यादि) अत्राऽस्मिन्मौनीन्द्रे प्रवचने विरतः सन् सावद्यानुष्ठानादशविधचक्रवालसामाचार्यां यतमानः, कोऽसावनगारः प्रव्रजितः, एकत्वभावनां भावयन्नवमौदर्ये सन्तिष्ठत इत्युत्तरसूत्रेण संबन्धः । इयमेव क्रियाऽनन्तरसूत्रेष्वपि लगयितव्येति । किञ्च-(सव्वओ इत्यादि) सर्वतोऽन्यतो भावतश्च मुण्डो रीयमाणः संयमानुष्ठाने गच्छन्,किंभूत इत्याह--(जे इत्यादि) योऽचेलोऽल्पचेलो जिनकल्पिको वा पर्युषितः संयमे उद्युक्तविहारी अन्तप्रान्तभोजी तदपि न प्रकाममित्याह (संचिट्ठइ) संतिष्ठते अवमौदर्ये न्यूनोदरतायां वर्त्तमानः सन् ॥ १८५ ॥ कदाचित्प्रत्यनीकतया ग्रामकण्टकैस्तुद्येतेत्येतद्दर्शयितुमाह—(से इत्यादि) स मुनिर्वाग्भिराक्रुष्टो वा, दण्डाऽऽदिभिर्हतो वा, लुञ्चितो वा केशोत्पाटनतः, पूर्वकृतकर्मपरिणत्युदयादेतदवगच्छन् सम्यक् तितिक्षमाणः परिव्रजेदित्येतच्च भावयेत् । तद्यथा--" पावाणं च खलु भो कडाणं कम्माणं पुव्विं दुच्चिण्णाणं दुप्पडिक्कंताणं वेइयत्ता मोक्खो णत्थि अवेयइत्ता तवसा वा झोसइत्ता । " इत्यादि । कथं पुनर्वाग्भिराक्रुश्यत इत्याह-(पलियं इत्यादि) (पलियं त्ति) कर्म जुगुप्सितमनुष्ठानं, तेन पूर्वाऽऽचरितेन कुचिन्दाऽऽदिना प्रकथ्य जुगुप्स्यते । तद्यथा--भोः कौलिक ! प्रव्रजत त्वमपि मया सार्द्धमेवं जल्पसीति ?। अथवा -जकारचकाराऽऽदिभिरपरैः प्रकारैर्निन्दां विधत्ते.एभिर्वा वक्ष्यमाणैः प्रकारैरित्याह-(अतहेहिं इत्यादि) अतथ्यैश्चितथैरसद्भूतैः शब्दैः,औरस्त्वं पारदारिक इत्येवमादिकैः,स्पर्शैश्च असद्भूतैः साधोः कर्तुमयुक्तैः कशचरणच्छेदनाऽऽदिभिः, स्वकृताद्दष्टफलमित्येतत् संख्याय ज्ञात्वा तितिक्षमाणः परिव्रजेदिति । यदि वैतत् संख्याय (अत्रस्थः पाठः परीसहोपसर्गसहनविषयः 'परीसह' शब्दे ऽष्टव्यः)परीषहाश्चानुकूलप्रतिकूलतया भिन्ना इत्येतद्दर्शयितुमाह-(एगयरे इत्यादि) एकतरानानुकूलानन्यतरान् प्रतिकूलान् परीषहानुदीर्णानभिज्ञाय, सम्यक् तितिक्षमाणः परिव्रजेदिति । यदि वा-अन्यथा परीषहाणां द्वैविध्यमित्याह-(जे इत्यादि) ये च परीषहाः सत्कारपुरस्काराऽऽदयः साधोर्हारिणो मनआह्लादकारिणो, ये तु प्रतिकूलतया अहारिणो मनसोऽनिष्टाः । यदि वा-ह्रीरूपा याचनाऽऽक्रोशाऽऽदय अह्रीमनसश्चाज्ञाकारिणः शीतोष्णाऽऽदय इत्येतान् द्विरूपानपि परीषहान् सम्यक् तितिक्षमाणः परिव्रजेदिति । किञ्च-(चिच्चा इत्यादि) त्यक्त्वा सर्वां परीषहकृतां विश्रोतसिकाम् । परीषहाऽऽपादितान् स्पर्शान् दुःखानुभवान् स्पृशेदनुभवेत् सम्यगधिसहेत । स किंभूतः?, सम्यगितं गतं दर्शनं यस्य स समितदर्शनः, सम्यग्दृष्टिरित्यर्थः ॥ १८६ ॥

तत्सहिष्णवश्च किंभूताः स्युरित्याह-

एते भोगिणा वुत्ता,जे लोगंसि अणागमणधम्मिणो॥१८७॥

(एए भो इत्यादि) ओरित्यामन्त्रणे, एते परीषहसहिष्णवो निष्किञ्चना निर्ग्रन्था भावनाग्राः, उक्ता अभिहिताः । यस्मिन् मनुष्यलोके, अनागमनं धर्मो येषां ते अनागमनधर्माणः, यथाऽऽरोपितप्रतिज्ञाभारवाहित्वाच्च पुनर्गृहं प्रत्यागमनेऽप्सव इति ॥१८७॥

किञ्च-

आणाए मामगं धम्मं .....(?) एस उत्तरवादे इह माणवाणं वियाहिते ॥ १८८ ॥

(आणाए इत्यादि) आज्ञाप्यतेऽनयेत्याज्ञा, तया मामकं धर्मं सम्यगनुपालयेत्तीर्थङ्कर एवमाहेति । यदि वा-धर्मानुष्ठानेऽप्येवमाह-धर्म एवैको मामकोऽन्यत्तु सर्वं पारकयमित्यतस्तमहमाज्ञया तीर्थङ्करोपदेशेन सम्यक् करोमीति । किमित्याज्ञया धर्मोऽनुपाल्यत इत्यत आह-(एस इत्यादि) एषोऽनन्तरोक्त उत्तरवाद उत्कृष्टवाद इह मानवानां व्याख्यात इति ॥ १८८ ॥

किञ्च-

एत्थोवरए तं झोसमाणे आयाणिज्जं परिण्णाय परियाएणं विगिंचइ ॥ १८९ ॥

(एत्थोवरए इत्यादि) अत्राऽस्मिन् कर्मधूननोपाये संयमे तप सामीप्येन रत उपरतः, तदष्टप्रकारं कर्म शोषयन् क्षपयन् धर्मे चरेदिति । किञ्चापरं कुर्यादित्याह-(आयाणिज्जं इत्यादि) आदीयत इत्यादानीयं कर्म, तत्परिज्ञाय मूलोत्तरप्रकृतिभेदतो ज्ञात्वा, पर्यायेण आमर्शनेन विवेचयति, क्षपयतीत्यर्थः । अत्र वा शेषकर्मधूननासमर्थं तपस्तद् बाह्यमधिकृत्य व्याख्यातम् ॥ १८९ ॥

इहमेगेसिं एगचरिया होति । तत्थियरा इयरेहिं कुलेहिं सुद्धेसणाए सव्वेसणाए सो मेहावी परिव्वए । सुब्भिं अदुवा दुब्भिं । अदुवा तत्थ भेरवा पाणा पाणे किलेसंति । ते फासे पुट्ठो धीरो अहियासिज्जासि त्ति बेमि ॥ १९० ॥

(इहमेगेसिं इत्यादि) इहास्मिन् प्रवचने, एकेषां शिथिलकर्मणामेकचर्या जिनकल्पिकविहारप्रतिमाऽभ्युपगमो भवति । तत्र च नानारूपा अभिग्रहविशेषास्तपश्चरणविशेषाश्च भवन्तीत्यतस्तावत्प्राप्तातिकामधिकृत्याऽऽह-(तत्थियरा इत्यादि) तस्मिन्नेकाकिविहारे, इतरे सामान्यसाधुभ्यो विशिष्टतरा इतरेष्वन्तप्रान्तेषु कुलेषु शुद्धैषणया दशैषणादोषरहितेनाऽऽहाराऽऽदिना, सर्वैषणयेति सर्वा याऽऽहाराऽऽद्युद्गमोत्पादनग्रासैषणरूपा, तया सुपरिविशुद्धेन विधिना संयमे परिव्रजेत् । बहुत्वेऽप्येकदेशतामाह-(सो मेहावी इत्यादि) स मेधावी मर्यादाव्यवस्थितः संयमं परिव्रजेदिति । किञ्च-(सुब्भिं इत्यादि) स आहारस्तेष्वितरेषु कुलेषु सुरभिर्वा स्याद् । अथवा-दुर्गन्धः । न तत्र रागद्वेषौ विदध्यात् । किञ्च-(अदुवा इत्यादि) अथवा तत्रैकाकिविहारित्वे पितृवनप्रतिमाप्रतिपन्नस्य सतो भैरवा भयानका यातुधानाऽऽदिकृताः शब्दाः प्रादुर्भवेयुः । यदि वा-भैरवा बीभत्साः प्राणाः प्राणिनो दीप्तजिह्वाऽऽद्योऽपरान् प्राणिनः क्लेशयन्त्युपतापयन्ति; त्वं तु पुनस्तैः स्पृष्टस्तान् स्पर्शान् दुःखविशेषान् धीरोऽक्षोभ्यः सन्नतिसहस्व । इतिरधिकारपरिसमाप्तौ, ब्रवीमीति पूर्ववद्गुताध्ययनद्वितीयोद्देशकः परिसमाप्तः ॥ १९० ॥ उक्तो द्वितीयोद्देशकः । आचा० १ श्रु० ६ अ० २ उ० ।

तदेवं संसारश्रेणिं विश्लेषयित्वा यः संसारसागरं तीर्णवत्तीर्णो मुक्तवन्मुक्तो विरतो व्याख्यातस्तं च तथाभूतं किमरतिरभिभवेदुत न वेति अचिन्त्यसामर्थ्यात्कर्मणोऽभिभवेदित्येतदेवाऽऽह-

विरयं भिक्खुं रीयंतं चिररातोसियं अरती तत्थ किं विधारए ?, संधेमाणे समुट्ठिए, जहा से दीवे असंदीणे ॥ १९१ ॥

(विरयं इत्यादि) विरतमसंयमाद्विलक्षणशीलं भिक्षुं, रीयमाणं निश्चरन्तमप्रशस्तेभ्योऽसंयमस्थानेभ्यः प्रशस्तेष्वपि गुणोत्कर्षाद्गुपर्युपरि वर्त्तमानं चिररात्रं प्रभूतकालं संयमे क्षपितश्चिररात्रोषितस्तमेवंगुणयुक्तमरतिः संयमोद्विग्नता, तत्र तस्मिन् संयमे वर्त्तमानं किं धारयेत् किं प्रतिस्खलेत ?। किंशब्दः प्रश्ने, किं तथाभूतमपि मोक्षप्रस्थितं प्रणाश्यविषयमरतिर्विधारयेत् ?। ओमित्युच्यते । तथाहि-दुर्बलान्याविनयवन्ति चेन्द्रियाण्यचिन्त्या मोहशक्तिर्विचित्रा कर्मपरिणतिः किं न कुर्यादिति । उक्तं च-" कम्माणि णूण घणचिक्कणाइ गरुआइ वइरसाराइं णाणहियं पि पुरिसं, पंथाओ उप्पहंतीणे ।१।" यदि वा किं क्षेपे किं तथाभूतं विधारयेदरतिर्नैव विधारयेदित्यर्थः। तथा ह्यसौ क्षणे क्षणे विशुद्धतरचरणपरिणामतया विष्कम्भितमोहनीयोदयत्वाल्लघुकर्मा भवतीति कुतस्तमरतिर्विधारयेदित्याह-(संधेमाणे इत्यादि) क्षणे क्षणेऽध्यवच्छेदेनोत्तरोत्तरं संयमस्थानकण्डकं संदधानः स सम्यगुत्थितः समुत्थित उत्तरोत्तरगुणस्थानकं वा संदधानो यथाख्यातचारित्राभिमुखः समुत्थितोऽसावतस्तमरतिं कथं विधारयेदिति । स चैवंभूतो न केवलमात्मनस्त्राता, परेषामप्यरतिविधारकत्वात् त्राणायेत्येतदर्शयितुमाह-(जहा से इत्यादि) द्विर्गता आपोऽस्मिन्निति द्वीपः, स द्रव्यभावभेदाद् द्विधा, तत्र द्रव्यद्वीप आश्वासद्वीपः, आश्वास्यतेऽस्मिन्नित्याश्वासः, स चासौ द्वीपश्चाऽऽश्वासद्वीपः। यदि वा-आश्वसनमाश्वासः, आश्वासाय द्वीप आश्वासद्वीपस्तत्र नदीसमुद्रबहुमध्यप्रदेशे भिन्नबोधिकाऽऽद्यस्तमवाप्याऽऽश्वसन्त्यसावपि द्वेधा-संदीनोऽसंदीनश्चेति यो हि पक्षमासाद्युदकेन प्लाव्यते स संदीनो, विपरीतस्त्वसन्दीनः सिद्धद्वीपाऽऽदिः। यथा हि सांयात्रिकास्तं द्वीपमसन्दीनमुदन्वदादेरुत्तीर्षवः समवाप्याऽऽश्वसन्त्येवं तं भावसंधानायोत्थितं साधुमवाप्यापरे प्राणिनः समाश्वसन्ति । यदि वा-दीप इति प्रकाशद्वीपः, प्रकाशाय दीपः प्रकाशद्वीपः, स चादित्यचन्द्रमण्यादिरसन्दीनोऽपरस्तु विद्युल्लुलकाऽऽदिः संदीनः । यदि वा प्रचुरेन्धनतया विवक्षितकालावस्थाय्यसन्दीनो, विपरीतस्तु संदीन इति । यथा ह्यसौ स्फुटावेदनतो हेयोपादेयहानोपादानवतां निर्मितभावमुपयाति, तथा क्वचित्समुद्घाऽऽद्यन्तर्वर्त्तिनामाश्वासकारी च भवत्येवं ज्ञानसन्धानायोत्थितः परीषहोपसर्गाक्षोभ्यतयाऽसन्दीनः साधुर्विशिष्टोपदेशदानतोऽपरेषामुपकारायेत्यपरे भावद्वीपं भावदीपं वाऽन्यथा व्याचक्षते । तद्यथा-ज्ञानद्वीपः सम्यक्त्वं, तच्च प्रतिपातित्वादौपशमिकं, क्वायोपशमिकं च सन्दीनो भावद्वीपः, क्वायिकं त्वसंदीन इति । तं द्विविधमप्यपरितसंसारत्वात्प्राणिन आश्वासन्ति, भावदीपस्तु सन्दीनः श्रुतज्ञानम्, असन्दीनस्तु केवलमिति, तच्चावाप्य प्राणिनोऽवश्यमाश्वासन्त्येवेति । अथवा-धर्मं संदधानः समुत्थितः सन्नरतेर्दुष्प्रधृष्यो भवतीत्युक्ते कश्चिदाक्षिपेत्-किंभूतोऽसौ धर्मो

यत्सन्धानाय समुत्थित इति ?। अत्रोच्यते-यथाऽसौ द्वीपोऽसन्दीनः सलिलप्लुतो वरुगूबदनानामितरेषां च बहूनां जन्तूनां शरण्यतयाऽश्वासहेतुर्भवति ॥ १६६ ॥

एवं से धम्मे आरियपदेसिए ॥ १६७ ॥

एवमसावपि धर्म आर्यप्रदेशितस्तीर्थङ्करप्रणीतः कषतापच्छेदनैर्विदितोऽसन्दीनः, यदि वा कुतर्कोप्रधृष्यतया संदीनोऽद्योऽन्यः प्राणिनां त्राणायाऽश्वासभूमिर्भवति,तस्य चाऽऽर्यदेशितस्य धर्मस्य किं सम्यगनुष्ठायिनः केचन सन्ति ?। ओमित्युच्यते ।१६७।

यदि सन्ति, किंभूतास्त इत्यत आह-

ते अणवकंखमाणा पाणे अणतिवातेमाणा दतिआ मेहाविणो पंडिया ॥ १६८ ॥ एवं तेसिं भगवओ अणुट्ठाणे जहा से दियपोए । एवं ते सिस्सा दिया य राओ य अणुपुव्वेणं वाइय त्ति बेमि ॥ १६९ ॥

(ते इत्यादि) ते साधवो भावसंधानोद्यताः संयमारतेः प्रमोदका मोक्षनेदिष्ठान्नोगाननवकाङ्क्षन्तो धर्मे सम्यगुत्थानवन्तः स्युरित्येतदुत्तरत्रापि योज्यम् । तथा प्राणिनोऽनतिपातयन्त उपलक्षणार्थत्वाच्चैषमहाव्रतग्रहणमायोज्यम् । तथा कुशलानुष्ठानप्रवृत्तत्वाद्दयिताः सर्वलोकानाम् । तथा मेधाविनो मर्यादाव्यवस्थिताः, पण्डिताः पापोपादानपरिहारतया सम्यक् पदार्थज्ञा धर्मचरणाय समुत्थिता भवन्तीति ॥ १६८ ॥ ये पुनस्तथाभूतज्ञानाभावात्सम्यग् विवेकविकलतया नाद्यापि पूर्वोक्तसमुत्थानवन्तः स्युस्ते तथाभूता आचार्योऽदिभिः सम्यगनुपाल्य यावद्विवेकिनोऽभूवन्नित्येतद्दर्शयितुमाह-(एवं इत्यादि) एवमुक्तविधिना तेषामपरिकर्मितमतीनां भगवतो वीरवर्द्धमानस्वामिनो धर्मे सम्यगनुत्थाने सति तत्परिपालनतस्तथा सदुपदेशदानेन परिकर्मितमतित्वं विधेयमिति । अत्रैव दृष्टान्तमाह-(जहा से इत्यादि) द्विजः पक्षी,तस्य पोतः शिशुर्द्विजपोतः,स यथा तेन द्विजेन गर्भप्रसवात्प्रभृत्यण्डकोद्भूनोद्भूनतरभेदाऽऽदिकावस्थासु यावन्निष्पन्नपक्षस्तावत्पाल्यते, एवमाचार्येणापि शिष्यकः प्रव्रज्यादानादारभ्य सामाचार्युपदेशदानेनाध्यापनेन तावदनुपाल्यते यावत्कृतार्थोऽभूत् । यः पुनराचार्योपदेशमतिलङ्घ्य स्वैरित्वाद्यथाकथञ्चित्क्रियामनुप्रवर्त्तेत स उज्जयिनीराजपुत्रवद्विनश्येदिति । तद्यथा-उज्जयिन्यां जितशत्रो राज्ञो द्वौ पुत्रौ, तत्र ज्येष्ठो धर्मघोषाऽऽचार्यसमीपे संसारासारतामवगम्य प्रव्रव्राज, क्रमेण चाधीताऽऽचाराऽऽदिशास्त्रोऽवगततदर्थश्च जिनकल्पं प्रतिपत्सुर्द्वितीयां सत्त्वभावनां भावयति । सा च पञ्चधा-तत्र प्रथमोपाश्रये,द्वितीया तद्बहिः,तृतीया चतुष्के-चतुर्थी शून्यगृहे, पञ्चमी श्मशाने । तत्र पञ्चमीं भावनां भावयतः स कनिष्ठो भ्राता तदनुरागादाचार्यान्तिकमागत्योवाच-मम ज्यायान् भ्राता क्वाऽऽस्ते ?। साधुभिरभाणि-किं तेन ?। स आह-प्रव्रजाम्यहम् । आचार्येणोक्तो-गृहाण तावत् पुनर्द्रक्ष्यसि । स तु तथैव चक्रे । पुनरप्यपृच्छत् । आचार्याऊचुः-किं तेन दृष्टेन ?, नासौ कस्य चिदुल्लापमपि ददाति जिनकल्पं प्रतिपत्तुकाम इति । असावाह-तथापि पश्यामि तावदिति निर्बन्धे दर्शितस्तूष्णीं भावस्थित एव वन्दितः, तदनुरागाच्च निषिद्धोऽप्याचार्येण निवार्यमाणोऽप्युपाध्यायेन म्रियमाणोऽपि साधुभिरसाम्प्रतमेतद्भवतो दुष्करं दुरध्यवसेयमित्येवं कथ्यमानेऽप्यहमपि तेनैव पित्रा ज्ञात इत्यबद्धमूलेन मोहात्तथैव तस्थौ, यथा ज्येष्ठभ्रातेति । इतरो देवतयाऽऽगत्य वन्दितः । शिक्षकस्तु न वन्दितः । ततोऽसावपरिकर्मितमतित्वात् कुपितः । आधाधिरनि कृत्वा देवताऽपि तस्योपरि कुपिता सती तलप्रहारेणाक्षिगोलकौ बहिर्निश्चिक्षेप । ततस्तदुच्यायान् हृदयेनैव देवतामाह-किमित्ययमन्यस्त्वया कदर्थितः,तदस्याक्षिणी पुनर्नवी कुरु । सा त्ववादीज्जीवप्रदेशैर्मुक्ताविमौ गोलकौ, न शक्यौ पुनर्नवीकर्तुम् । इत्युक्त्वा ऋषिवचनमलङ्घनीयमित्यवधार्य तत्क्षणादेव पाकव्यापादितेक्षाक्षिगोलकौ गृहीत्वा तदक्षिणी चकारेति । एवं सदुपदेशप्रवर्त्तनं सापायमित्यवधार्य शिष्येण सदाऽऽचार्योपदेशवर्त्तिना भाव्यम्, आचार्येणाऽपि सदा स्वपरोपकारवृत्तिना सम्यक् स्वशिष्या यथोक्तविधिना प्रतिपालनीया इति स्थितमिति ॥१६७॥ तदेवोपसंहरन्नाह-(एवं इत्यादि) यथा द्विजपोतो मातृपितृभ्यामनुपाल्यते, एवमाचार्येणापि शिष्या अहर्निशमनुपूर्वेण क्रमेण वाचिताः पाठिताः, शिक्षां ग्राहिताः, समस्तकार्यसहिष्णवः संसारोत्तरणसमर्थाश्च भवन्तीति । इतिरधिकारपरिसमाप्तौ, ब्रवीमीति पूर्ववत् । आचा० ।

साम्प्रतं चतुर्थ आरभ्यते । अस्य चायमभिसंबन्धः-इहानन्तरोद्देशके शरीरोपकरणधूननाऽभिहिता, सा च परिपूर्णा,न गौरवत्रिकसमन्वितस्येत्यतस्तं धूननार्थमिदमुपक्रम्यत इत्येनेन संबन्धेनाऽऽयातस्यास्योद्देशकस्यास्खलिताऽऽदिगुणोपेतं सूत्रमुच्चारणीयम् । तच्चेदम्-

एवं ते सिस्सा दिया य राओ य अणुपुव्वेणं वाइया तेहिं महावीरेहिं पण्णाणमंतेहिं, वेसंतिए पण्णाणमुवलब्भ हेच्चा उवसमं फारुसियं समादियंति ॥ १७० ॥ वसित्ता बंभचेरंसि आणं तं णो त्ति मण्णमाणा ॥ १७१ ॥

(एवं ते सिस्सा इत्यादि) एवमिति द्विजपोतसंवर्द्धनकमेणैव, ते शिष्याः स्वहस्तप्रव्राजिता उपसंपदागताः प्रातीच्छकाश्च, दिया च रात्रौ चानुपूर्वेण क्रमेण वाचिताः पाठितास्तत्र कालिकमहः प्रथमचतुर्थपौरुष्योरध्याप्यते,उत्कालिकं तु कालवेलावर्जं सकलमप्यहोरात्रमिति । तथाऽध्यापनाऽऽचाराऽऽदिक्रमेण क्रियते । आचारश्च त्रिवर्षपर्यायोऽध्याप्यत इत्यादि क्रमेणाध्यापिताः शिष्याश्चारित्रं ग्राहिताः,तद्यथा-युगमात्रदृष्टिना गन्तव्यम् कूर्मवत्संकुचिताङ्गेन भाव्यमित्यादि । एवं शिक्षां ग्राहिता वाचिता अध्यापिताः । कैरिति दर्शयति-तैर्महावीरैस्तीर्थंकरगणधराऽऽचार्याऽऽदिभिः । किम्भूतैः?,प्रज्ञावद्भिर्ज्ञानिभिरेवोपदेशाऽऽदि दत्तं लगतीत्यतो विशेषणम्, ते तु शिष्या द्विप्रकारा अपि प्रेक्षापूर्वकारिणस्तेषामाचार्याऽऽदीनामन्तिके समीपे, प्रकर्षेण ज्ञायतेऽनेनेति प्रज्ञानं श्रुतज्ञानं, तस्यैवापरस्मादवधिसद्भावादित्यतस्तदुपलब्ध्य लब्धबहुश्रुतीभूताः प्रबलमोहोदयापनीतसदुपदेशोत्कटमदत्वात् त्यक्तोपशमम् । स च द्वेधा-द्रव्यभावभेदात् । तत्र द्रव्योपशमः-कतकफलाऽऽद्यापादितः कलुषजलादेः भावोपशमस्तु ज्ञानाऽऽदित्रयात् । तत्र यो येन ज्ञानेनोपशाम्यति स ज्ञानोपशमस्तद्यथा-आक्षेपण्याद्यन्यतरया धर्मकथया कश्चिदुपशाम्यतीत्यादि । दर्शनोपशमस्तु-यो हि शुद्धेन सम्यग्दर्शनेनापरमुपशमयति, यथा श्रेणिकेनाऽश्रद्धानो देवः प्रतिबोधित इति,दर्शनप्रज्ञावैर्वा संमत्यादिभिः कश्चिदुपशाम्यति । चारित्रोपशमस्तु-क्रोधाऽऽद्युपशमो विनयनम्रतेति । तत्र केचन क्षुद्रका ज्ञानोदन्वतोऽद्याप्युपर्येव प्लवमानास्तमेवंभूतमुपशमं त्यक्त्वा ज्ञानलवोत्तम्भितगर्वाऽऽध्माताः पारुष्यं परुषतां समाददति गृह्णन्ति । तद्यथा-

परस्परगुणनिकायां, मीमांसायां वा । एकोऽपरमाह-त्वं न जानीषे,न चैषां शब्दानामयमर्थो यो भवताऽभाणि। अपि च कश्चिदेव मादृशः शब्दार्थनिर्णयायालं न सर्वे इत्युक्ते च पृष्टा गुरवः स्वयमपि परीक्षितं निश्चितं पुनरिदं न वा वादिनि च मल्लमुष्टये च मादृगेवान्तरं गच्छेत् । द्वितीयस्त्वाह-नन्वस्मदाचार्या एवमाज्ञापयन्तीत्युक्ते पुनराह-सोऽपि वाकुशलो बुद्धिविकलः किं जानीते,त्वमपि च शुकवत्पाठितो निरूहापोह इत्यादीन्यन्यान्यपि, डुगृंहीतकतिचिदक्षरो महोपशमकारणं ज्ञानं विपरीततामापादयन् स्वौद्धत्यमाविर्भावयन् भाषते । उक्तं च-

" अन्ये स्वेच्छारचिता-नर्थविशेषान् श्रमेण विज्ञाय ।
कृत्स्नं वाङ्मयमिति, स्वादन्त्यज्ञानि दर्पेण ॥ १ ॥
क्रीडनकमीश्वराणां, कुक्कुटलावकसमानवाङ्मात्रम् ।
शास्त्रमपि हास्यकथां, लघुनां वा लुब्धको नयति ॥ २ ॥ "

इत्यादि । पाठान्तरं वा-" हेच्चा उवसमं अहेगे फारुसियं समारुहंति ।" त्यक्त्वोपशमम्,अथानन्तरं बहुश्रुतीभूता एके,न सर्वे,परुषतामालम्बते,ततश्चालपिता शब्दिता वा तूष्णीं भावं भजन्ते,दुर्डुरशिरःकम्पनाऽऽदिना वा प्रतिवचनं ददति । किञ्च-(वसित्ता इत्यादि) एके पुनर्ब्रह्मचर्यं संयमः,तत्रोषित्वा,आचारो वा ब्रह्मचर्यं, तदर्थोऽपि ब्रह्मचर्यमेव, तत्रोषित्वा आचारार्थानुष्ठायिनोऽपि तद्भक्तिसिक्तास्तामाज्ञां तीर्थकरोपदेशरूपां नो मन्यमानाः, नोशब्दो देशप्रतिषेधे, देशतस्तीर्थकरोपदेशं न बहु मन्यमानाः सातगौरवबाहुल्याच्छरीरवाकुशिकतामालम्बन्ते । यदि वा-अपवादमालम्ब्य प्रवर्तमाना उत्सर्गचोदनाचोदिताः सन्तो नैषा तीर्थकराऽऽज्ञेत्येवं मन्यन्ते । दर्शयन्ति चाऽपवादपदानि-" कुज्जा भिक्खू गिलाणस्स, अगिलाए समाहियं । " इत्यादि । ततश्च यो येन ग्लायति तस्य तदपनयनार्थमाधाकर्माऽऽद्यपि कार्यं स्यादेतत्किं तेषां नाख्याताः कुशीलानां प्रत्यपायाः, यथा-आशातनाबहुलानां दीर्घः संसार इति ॥ १०१ ॥

तदुच्यते-

अग्घा(क्खा)यं तु सोच्चा णिसम्म समणुण्णा जीविस्सामो, एगे णिक्खम्म ते असंजमं ति वि मज्झमाणा कामेहिं गिद्धा अज्झोववण्णा समाहिमाघायमजुसंता सत्थारमेव फरुसं वदंति ॥ १०२ ॥

(अग्घायं ति) तुरवधारणे । आख्यातमेवैतत् कुशीलविपाकाऽऽदिकं श्रुत्वा निशम्याबुद्ध्य चाऽऽशास्तारमेव परुषं वदन्तीति सम्बन्धः । किमर्थं तर्हि शृण्वन्तीति चेदुच्यते-" समणुण्णा " इत्यादि । समनोज्ञाः लोकसम्मताः, जीविष्याम इति हृत्वा प्रश्नव्याकरणार्थं शब्दशास्त्राण्यधीयते । यदि वा-अनेनोपायेन श्लोकसम्मता जीविष्याम इति कृत्वैके निष्क्रम्याऽथ वा समनोज्ञा उद्युक्तविहारिणः सन्तो जीविष्यामः संयमजीवितेनेत्येवं निष्क्रम्य पुनर्मोहोदयादसम्भवन्तस्ते गौरवत्रिकान्यतरदोषा ज्ञानाऽऽदिके मोक्षमार्गे न सम्यग् प्रवर्तमाना नोपदेशे वर्तमाना विविधं दह्यमानकामैर्मूर्छा गौरवत्रिकेऽध्युपपन्ना विषयेषु समाधिमिन्द्रियप्रणिधानमाख्यातं तीर्थकृतादिभिर्यमावेदितं तमजुषन्तः सेवमाना दुर्विदग्धा आचार्याऽऽदिना शास्त्राभिप्रायेण चोद्यमाना अपि तच्छास्तारमेव परुषं वदन्ति-नास्मिन् विषये भवान् किञ्चन जानाति, यथाऽहं सूत्रार्थं शब्दं गणितं निमित्तं वा जाने तथा कोऽन्यो जानीते,इत्येवमाचार्याऽऽदिकं शास्तारं हीलयन्ति परुषं वदन्ति । यदि वा-शास्ता तीर्थकृताऽऽदिस्तमपि परुषं वदन्ति । तथाहि-क्वचित् स्खलितंचोदिता जगदुः-किमन्यदधिकं तीर्थकृद्वक्त्र्यत्यस्मत्कलत्रनादपीति । इत्यादिभिरपाचीनैरालापैरलीकविद्यामदावलेपाच्छास्त्रकृतामपि दूषणानि वदेयुः ॥ १०२ ॥

न केवलं शास्तारं परुषं वदन्त्यपरानपि साधूनपवदेयुरित्येतदाह-

सीलमंता उवसंता (संखाए) रीयमाणा असीला अणुवयमाणस्स वितिया मंदस्स बालया ॥ १०३ ॥

(सीलमंता इत्यादि) शीलमष्टादशशीलाङ्गसहस्रसंख्यम् । यदि वा-महाव्रतसमाधानं, पञ्चेन्द्रियजयः, कषायनिग्रहश्चिगुप्तिगुप्तता चेत्येतच्छीलं विद्यते येषां ते शीलवन्तः । तथोपशान्ताः कषायोपशान्ताः कषायोपशमात् । अत्र शीलवद्ग्रहणेनैव गतार्थत्वादुपशान्ता इत्येतद्विशेषणं कषायनिग्रहप्राधान्यख्यापनार्थम् । सम्यक् ख्याप्यते प्रकाश्यतेऽनयेति संख्या प्रज्ञा, तया रीयमाणाः संयमानुष्ठाने पराक्रममाणाः सन्तः कस्यचिद्विश्रान्तनागधेयतयाऽशीला एत इत्येवमनुवदतोऽनु पश्चाद्वदतः पृष्ठतोऽपवदतोऽन्येन वा मिथ्यादृष्ट्यादिना कुशीला इत्येवमुक्तेऽनुवदतः पार्श्वेषाऽऽर्द्वितीयैषा मन्दस्यान्यस्य बालता मूर्खता, एकं तावत् स्वतश्चारित्रापगमः,पुनरपरानुद्युक्तविहारिणोऽपवदत इत्येषा द्वितीया बालता । यदि वा-शीलवन्त एते उपशान्ता वेत्येवमन्येनाभिहिते, केषां प्रचुरोपकरणानां शीलवत्त्वोपशान्तता वा इत्येषमनुवदतो हीनाऽऽचारस्य द्वितीया बालता भवतीति ॥ १०३ ॥

अपरे च वीर्यान्तरायोदयात् स्वतोऽवसीदन्तो पामरसाधुप्रशंसाऽन्विता यथाऽवस्थितमाचारगोचरमावेदयेयुरित्येतदर्शयितुमाह-

णियट्टमाणा वेगे आयारगोयरमाइक्खंति ॥१०४॥ णाणभट्ठा दंसणलूसिणो णममाणा एगे जीवितं विप्परिणामंति ॥ १०५ ॥ पुट्ठा वेगे णियट्टंति जीवियस्सेव कारणा णिक्खंतं पि तेसिं दुण्णिक्खंतं भवति ॥ १०६ ॥

(णियट्टमाणा इत्यादि) एके कर्मोदयात्संयमान्निवर्त्तमाना लिङ्गाद्वा, वाशब्दादनिवर्त्तमाना वा यथावस्थितमाचारगोचरमाचक्षते-वयं तु कर्तुमसहिष्णव आचारस्त्वेवंभूतमित्येषां द्वितीया बालता न भवत्येव, न पुनर्वदन्त्येवम्भूत एवाऽऽचारो योऽस्माभिरनुष्ठीयते, साम्प्रतं दुःषमाऽनुभावेन बलाऽऽद्यपगमान्मध्यस्थभूतैव वर्त्तिनी श्रेयसी,नोत्सर्गावसर इति। उक्तं हि-

"नात्यायतं न शिथिलं, यथा युञ्जीत सारथिः ।
यथा भरं वहत्यश्वाः, योगः सर्वत्र पूजितः ॥१॥"

अपि च-

" जो जत्थ होइ भग्गो, उवसासं सो परं अविंदंतो ।
गंतुं तत्थ वयंतो, इमं पहाणं ति घोसेइ " ॥ १ ॥ इत्यादि ।

॥१०४॥ किम्भूताः पुनरेतदेव समर्थयेयुरित्याह-(णाणभट्ठा) सदसद्विवेको ज्ञानं, तस्माद् भ्रष्टाः। तथा-(दंसणलूसिणो त्ति) सम्यग्दर्शनविध्वंसिनोऽसदनुष्ठानेन स्वतो विनष्टा अपरानपि शङ्कोत्पादनेन सन्मार्गाद् व्यावयन्ति । अपरे पुनर्बाह्यक्रियैवेता

अप्यात्मानं नाशयन्तीत्याह--(णममाणा इत्यादि) नमन्तोऽप्याचार्यादेर्द्रव्यतः श्रुतज्ञानार्थं ज्ञानाऽऽदिभावविनयायाभावात्कर्मोदयादेके, न सर्वे संयमजीवितं विपरिणामयन्त्यपनयन्ति, स्वचरितादात्मानं ध्वंसयन्तीत्यर्थः ॥ १०५ ॥ किं चापरमित्याह-(पुढा वेगे इत्यादि) एके अपरिकर्मितमतयो गौरवत्रिकप्रतिबद्धाः स्पृष्टाः परीषहैर्निवर्त्तन्ते संयमाल्लिङ्गाद्वेति, किमर्थम् ?, जीवितस्यैवासंयमाऽऽश्रयस्य, कारणान्निमित्तात्, सुखेन वयं जीविष्याम इति सावद्यानुष्ठानतया संयमान्निवर्त्तन्ते । तथाभूतानां च यत्स्यात्तदाह-(णिक्खंतं पि इत्यादि) तेषां गृहपाशान्निष्क्रान्तमपि ज्ञानदर्शनचारित्रमूलोत्तरगुणान्यतरोपघातान्निष्क्रान्तं दुर्निष्क्रान्तं भवति ॥ १०६ ॥

तत्कर्माणां च यत्स्यात्तदाह-

बालवयणिज्जा हु ते णरा, पुणो पुणो जातिं पकप्पंति, अहे संभवंता विद्दायमाणा अहमंसि विउक्कसे, उदासीणे फरुसं वदंति पलियं पगंथे, अदुवा पगंथे अतहेहिं, तं मेहावी जाणिज्जा धम्मं ॥ १०७ ॥

(बाल इत्यादि) हुर्हेतौ । यस्मादसम्यगनुष्ठानाद्दुर्निष्क्रान्तास्तस्माद् बालानां प्राकृतपुरुषाणामपि वचनीया गर्ह्या बालवचनीयाः । (तेणरा इति) किञ्च-(पुणो पुणो इत्यादि) पौनःपुन्येनारहट्टघटीयन्त्रन्यायेन जातिरुत्पत्तिस्तां कल्पयन्ति । किम्भूतास्त इत्याह--(अहे इत्यादि) अधः संयमस्थानेषु समभवन्तो वर्तमाना विद्यया वाऽधो वर्तमानाः सन्तो विद्वांसोऽयमित्येवं मन्यमाना लघुतयाऽऽत्मानं व्युत्कर्षयेयुरात्मनः श्लाघां कुर्वते,यत किञ्चित् जानानोऽपि मानोत्तम्भितत्वाऽऽलसातागौरवबहुलोऽहमेवात्र बहुश्रुतो यदाचार्यो जानाति तन्मयाऽल्पेनैव कालेनाधीतमित्येवमात्मानं व्युत्कर्षयेदिति । नात्मा श्लाघ्यतयैवाऽऽसते परानप्यपवदेयुरित्याह-(उदासीणे इत्यादि) उदासीना रागद्वेषरहिता मध्यस्था बहुश्रुतत्वे सत्युपशान्ताः, तान् स्खलितान् चोदनोद्यतान् परुषं वदन्ति । तद्यथास्वयमेव तावत्कृत्यमकृत्यं वा जानीहि, ततोऽन्येषामुपदेष्यसीति। यथा च परुषं वदन्ति तथा सूत्रेणैव दर्शयितुमाह--(पलियं इत्यादि) (पलियं ति) अनुष्ठाने, तेन पूर्वाऽऽचरितेनानुष्ठानेन तृणाऽऽहाराऽऽदिना प्रकथयेदेवम्भूतस्त्वमिति। अन्यथा वा कुष्टमण्टाऽऽदिनिर्गुणैर्मुखविकाराऽऽदिभिर्वा प्रकथयेदिति। किम्भूतैरतथैरविद्यमानैरित्युपसंहरन्नाह -(तं इत्यादि) तद्वाक्यमवाक्यं वा, तं वा धर्मं श्रुतचारित्राऽऽख्यं, मेधावी मर्यादाव्यवस्थितो, जानीयात्सम्यक् परिच्छिन्द्यादिति ॥ १०७ ॥

सोऽसम्यग्वादप्रवृत्तो बालो गुर्वादिना यथाऽनुशास्यते, तथा दर्शयितुमाह-

अहम्मट्ठी तुमं सि णाम बाले, आरंभट्ठी, अणुवयमाणे हणमाणे घायमाणे, हणओ यावि समणुजाणमाणे, घोरे धम्मे उदीरिए उवेहइ, णं अणाणाए एस विसण्णे वितहे वियाहिए ति बेमि ॥ १०८ ॥

(अहम्मट्ठी इत्यादि) अर्थोऽस्यास्तीत्यर्थी, अधर्मेणार्थी, यतो नाम त्वमेवम्भूतोऽनुशास्यते, कुतोऽधर्मार्थी, यतो बालोऽसि, कुतो बालो यत आरम्भार्थी सावद्याऽऽरम्भप्रवृत्तः, कुत आरम्भार्थी,यतः प्राण्युपमर्दवादाननुवदन्नेतद् ब्रूषे । तद्यथा-जहि प्राणिनोऽपरैरेवं घातयन् व्रतश्चापि समनुजानासि गौरवत्रिकानुबद्धः पचनपाचनाऽऽदिक्रियाप्रवृत्तस्तत्प्रणुदतकीं तत्समकं तानुवदसि-कोऽत्र दोषो?,न ह्यशरीरैर्धर्मः कर्तुं पार्यते, अतो धर्माऽऽधारं शरीरं बलतः पालनीयमिति। उक्तं च-"शरीरं धर्मसंयुक्तं, रक्षणीयं प्रयत्नतः । शरीराच्छ्रवते धर्मो, यथा बीजात्सदङ्कुरः ॥ १ ॥" इति । किञ्चैवं ब्रवीषि त्वं, तद्यथाघोरो भयानको धर्मः सर्वाऽऽश्रवनिरोधाद् दुरनुचर उत्प्राबल्येनोदितः कथितः प्रतिपादितस्तीर्थकरगणधराऽऽदिभिरित्येवमध्यवसायी भवान्तरमनुष्ठानत उपेक्षते उपेक्षां विधत्ते, णमिति वाक्यालङ्कारे । नानाज्ञया तीर्थकरगणधरानुपदेशेन, स्वेच्छया प्रवृत्त इति, क एवम्भूत इति दर्शयति-एष इत्यनन्तरोक्तोऽधर्मार्थी बाल आरम्भार्थी प्राणिनां हन्ता घातयिता ततोऽनुमन्ता धर्मोपेक्षक इति विषण्णः कामभोगेषु विविधं तद्दर्शयतीति वितर्दो हिंसकः,'तर्द' हिंसायामित्यस्मात्कर्तरि पचाऽऽद्यच् । संयमे वा प्रतिकूलो वितर्द इत्येवंरूपस्त्वमेष व्याख्यात इत्यतोऽहं ब्रवीमि, त्वं मेधावी धर्मं जानीया इति ॥१०८॥

एतच्च वक्ष्यमाणमहं ब्रवीमीत्यत आह-

किमणेण जो जणेण करिस्सामि त्ति मण्णमाणा एवं एगे विदित्ता, मातरं पितरं हिच्चा णाइओ य परिग्गहं वीरायमाणे समुट्ठाय अविहिंसा सुव्वया दंता पास दीणे लुप्पइए पडिवयमाणे ॥ १०९ ॥ वसट्टा कायरा य जणा लूसगा भवंति ॥ ११० ॥ अहमेगेसिं सिलोए पावए भवति, से समणविब्भंते समणविब्भंते ॥ १११ ॥

(किमणेणं इत्यादि) केचन विदितवेद्या धीरायमणाः सम्यगुत्थानेनोत्थाय पुनः प्राण्युपमर्दका भवन्तीति कथमुत्थाय किमहमनेन, जोरित्यामन्त्रणे, जनेन मातापितृपुत्रकलत्राऽऽदिना स्वार्थपरेण परमार्थतोऽनर्थरूपेण करिष्यामीति, न ममायं कस्यचिदपि कार्यस्य रोगापनयनाऽऽदेरस्तीत्यनेन किमहं करिष्ये ?। यदि वा-प्रव्रजिष्युः केनचिदभिहितः किमनया सिकताकवलसन्निभया प्रव्रज्यया करिष्यति भवान्, अहष्टवशाऽऽयातं तावद्भोजनाऽऽदिकं भुङ्क्ष्वेत्यभिहितो विरागतामापन्नो ब्रवीतिकिमहमनेन भोजनाऽऽदिना करिष्ये, श्रुतं मयाऽनेकशः संसारे पर्यटता, तथापि तृप्तिर्नाभूत्किमिदानीमनेन जन्मना भविष्यतीत्येवं मन्यमाना एके विदितसंसारस्वभावा विदित्वाऽप्येवं ततो मातरं जननीं पितरं जनयितारं हित्वा त्यक्त्वा, ज्ञातयः पूर्वापरसंबन्धिनः स्वजना वा, परिगृह्यत इति परिग्रहो धनधान्यहिरण्यद्विपदचतुष्पदाऽऽदिस्तं, किम्भूताः ?, धीरमिवात्मानमाचरन्तो धीरायमाणाः, सम्यक् संयमानुष्ठानेनोत्थाय समुत्थाय विविधैरुपायैः, न विद्यते विहिंसा येषां ते अविहिंसाः, तथा शोभनं व्रतं येषां ते सुव्रताः, दान्ता इन्द्रियनोइन्द्रियदमनाद्दान्ता इत्येवं समुत्थाय । नागार्जुनीयास्तु पठन्ति-" समणा भविस्सामो अणगारा अकिंचणा अपुत्ता अपसू अहिंसगा सुव्वया दंता परदत्तभोइणो पावं कम्मं ण करेस्सामो समुट्ठाए । " सुगमत्वान्न विव्रियते इति। एवं समुत्थाय पूर्वं पश्चात्पश्चिम निजालय दीनान् शृगालत्वविहारिणो व्रतं जिघृक्षून् पूर्वमुत्पतिता न संयमाऽऽरोहणात्पश्चात्पोदयात् प्रतिपतत इति।१०९। किमिति दीना भवन्तीति दर्शयति-यतोऽवशा इन्द्रिय-

विषयकषायाणां तत आर्त्ता वशाऽऽर्त्ताः, तथाभूतानां च कर्मानुषङ्गः । तदुक्तम्-"सोइंदियवसट्टे णं भंते ! कति कम्मपगडीओ बंधइ ?। गोयमा ! आउवज्जाओ सत्त कम्मपगडीओ० जाव अणुपरियट्टइ। कोहवसट्टे णं भंते ! जीवे किं ?। एवं ते चेव।" एवं मानाऽऽदिष्वपीति । तथा कातराः परीषहोपसर्गोपनिपाते सति विषयलोलुपा वा कातराः। के ते ?, जनाः, किं कुर्वन्ति ?, ते प्रतिजनाः सन्तो लूषका भवन्ति-को क्षुद्रादशीलाङ्गसहस्राणि धारयिष्यतीत्येवमभिसंधाय ऊर्ध्वमिङ्गं, प्रावलिङ्गं वा परित्यज्य प्राणिनां विराधका भवन्ति ॥ ११० ॥ तेषां च पश्चात्कृतलिङ्गानां यत्स्यात्तदाह—(अहमेगेसिं इत्यादि) अथाऽऽनन्तर्ये, एकेषां जन्मप्रतिज्ञानां सुप्रव्रजितानां तत्समनन्तरमेवान्तर्मुहूर्तेन वा पञ्चत्वाऽऽपत्तिः स्यात्, एकेषां तु श्लोकः श्लाघारूपः पापको भवेत् स्वपक्षात्परपक्षाद्वा महत्ययशःकीर्तिर्भवति । तद्यथा-स एव पितृवनकाष्ठसमानो भोगाभिलाषी व्रजति तिष्ठति वा, नास्य विश्वसनीयं, यतो नास्याकर्त्तव्यमस्तीति । उक्तं च-" परलोकविरुद्धानि, कुर्वाणं दुश्चरित्रमत्यजेत् । आत्मानं यो न सन्धत्ते, सोऽन्यस्मै स्यात्कथं हितः ॥१॥" इत्यादि । यदि वा सूत्रेणैवाश्लाघतां दर्शयितुमाह- (से समण इत्यादि)सोऽयं श्रमणो भूत्वा विविधं भ्रान्तो भग्नः श्रमणविभ्रान्तः श्रमणविभ्रान्तः। वीप्सयाऽत्यन्तजुगुप्सामाह ॥१११॥

किञ्च-

पासहेगे समणागएहिं असमणागए समणमाणेहिं असमणमाणे विरतेहिं अविरते दविएहिं अदविए अभिसमेच्चा पंडिए मेहावी णिट्ठियट्ठे वीरे आगमेणं सया परक्कमेज्जासि त्ति बेमि ॥ ११२ ॥

पश्यत यूयं कर्मविदारणसामर्थ्यमेके विश्रान्तभागधेयाः समन्वागतैरुद्युक्तविहारिभिः सह वसन्तोऽप्यसमन्वागताः शीतलविहारिणः, तथा नममानैः संयमानुष्ठानेन विनयवङ्किरनममाना निर्धूणतया सावद्यानुष्ठायिनो, विरतैरविरता द्रव्यभूतैरद्रव्यभूताः पापकलङ्कितत्वादेवंभूतैरपि साधुभिः सह वसन्तोऽप्येवम्भूतानभिसमेत्य ज्ञात्वा, किं कर्त्तव्यमिति दर्शयति-पण्डितस्त्वं ज्ञातज्ञेयो मेधावी मर्यादाव्यवस्थितो निष्ठितार्थो विषयसुखनिष्पिपासो धीरः कर्मविदारणसहिष्णुर्भूत्वाऽऽगमेन सर्वज्ञप्रणीतोपदेशानुसारेण, सदा सर्वकालं पराक्रामयेत्, इतिरधिकारपरिसमाप्तौ, ब्रवीमीति पूर्ववत्, धूताध्ययनस्य चतुर्थोद्देशकः समाप्तः । सम्प्रति पञ्चम आरभ्यते-अस्य चायमभिसम्बन्धः-इहानन्तरोद्देशके कर्मविधूननार्थं गौरवत्रयविधूननाऽभिहिता, सा च कर्मविधूननोपसर्गविधूननाव्यतिरेकेण न संपूर्णभावमनुभवति, नापि सत्कारपुरस्कारात्मिकां समानधूननामन्तरेण गौरवविधूनना सम्पूर्णतामियादित्यत उपसर्गसमानविधूननार्थमिदमुपक्रम्यत इत्यनेन सम्बन्धेनाऽऽयातस्यास्योद्देशकस्यास्खलिताऽऽदिगुणोपेतं सूत्रमुच्चारणीयम् । तच्चेदम्-

से गिहेसु वा गिहंतरेसु वा गामेसु वा गामंतरेसु वा णगरेसु वा णगरंतरेसु वा जणवएसु वा जणवयंतरेसु वा संतेगतिया जणा लूसगा भवंति, अदुवा फासा फुसंति, ते फासे पुट्ठो धीरो अहियासए ओए समियदंसणे ॥११३॥

"से गिहेसु वा इत्यादि, ०जाव धीरो अहियासए।" (से ति)

स परिणतो मेधावी निष्ठितार्थो धीरः सदा सर्वज्ञप्रणीतोपदेशानुविधायी गौरवत्रिकाप्रतिबद्धो निर्ममो निष्किञ्चनो निराशि एकाकिविहारितया ग्रामानुग्रामं रीयमाणः क्षुत्तितिक्षारागरुक्तोपसर्गपरीषहाऽऽपादितान् दुःखस्पर्शान्निर्जरार्थी सम्यगधिसहेत । क्व पुनर्व्यवस्थितस्य के परीषहोपसर्गा अभिपतेयुरिति दर्शयति-आहाराऽऽर्थं प्रविष्टस्य गृहेषु वा, उच्चनीचमध्यमावस्थासंभूतकं बहुवचनम् । तथा-गृहान्तरेषु,प्रसन्ति बुद्ध्यादीन् गुणानिति ग्रामाः, तेषु वा, तदन्तराळेषु वा । नैतेषु करोऽस्तीति नकराणि, तेषु वा, तदन्तराळेषु वा । जनानां लोकानां पदान्यवस्थानानि येषु ते जनपदा अवन्त्यादयः साधुविहरणयोग्या अर्द्धषड्विंशतिः,तेषु वा, तदन्तराळेषु वा, ग्रामनगरान्तरे वा, ग्रामजनपदान्तरे वा, नगरजनपदान्तरे वा,उद्याने वा, तदन्तरे वा, विहारभूमिमागतस्य वा गच्छतो वा तद्वेषं तस्य भिक्षोर्ग्रामाऽऽदीनधिष्ठायानस्य कायोत्सर्गाऽऽदि वा कुर्वत एके कालुष्योपहताऽऽत्मानो ये जना लूषका भवन्ति, 'लूष'हिंसायामित्यस्माद् ल्युरुन्ते रूपम् । सन्ति विद्यन्ते,तत्र नारकाभावादुपसर्गकरणं प्रत्यवस्तु (?) तिर्यग्नरयोरपि कादाचित्कत्वान्मे तृणमेवानुकूलप्रतिकूलवङ्काद्याजनग्रहणम् (?)। यदि वा-जायन्त इति जनाः तिर्यग्नरामरा एव जनशब्दाभिहिताः, ते च जना अनुकूलप्रतिकूलान्यतरभयोपसर्गाऽऽपादनेनोपसर्गयेयुरिति । तत्र दिव्याश्चतुर्विधाः । तद्यथा-हास्यात्,प्रद्वेषाद्विमर्शात्, पृथग्विमात्रातो वा । तत्र केचित्किलः कश्चित् व्यन्तरो विविधानुपसर्गान् हास्यादेव कुर्यात्-यथा भिक्षार्थं प्रविष्टैः क्षुल्लकैर्भिक्षालाभान्मोदकपललविकटतर्पणाऽऽदिनोपयाचितकं व्यन्तरस्य प्रपेदे, भिक्षाऽवाप्तौ च तज्जायमानस्य कुतश्चिदुपलभ्य विकटाऽऽदिकं तैर्हृष्टैके, तेनापि केचैव ते क्षुल्लकाः क्षीवा इव व्यध्यायिषत प्रद्वेषेण-यथा भगवतो माघमासरजन्यां तापसीरूपधारिण्या व्यन्तर्याऽदिकजटाभारवल्कलविप्रुभिः सेचनमकारि विमर्शार्थमयं दृढधर्मा न वेत्यनुकूलप्रतिकूलोपसर्गैः परीक्षयेत् । तथा संविग्नः साधुभावितया कयाचिद् व्यन्तर्या स्त्रीवेषधारिण्या स्त्यदेवकुलिकावासितः साधुरनुकूलोपसर्गैरुपमर्दितो दृढधर्मेति च कृत्वा वन्दित इति । तथा पृथग्विधा मात्रा येषूपसर्गेषु ते पृथग्विमात्रा हास्याऽऽदित्रयान्यतराऽऽरब्धा अन्यतरावसायिनो भवन्ति । तद्यथा-जगवति संगमकेनेव विमर्शाऽऽरब्धः प्रद्वेषेण पर्यवसिता इति मानुषा अपि हास्यप्रद्वेषविमर्शकुशीलप्रतिषेवनाभेदाच्चतुर्धा । तत्र हास्याद्देवसेना गणिका कुल्लकमुपसर्गयन्ती दण्डेन ताडिता राजानमुपस्थिता, कुल्लकेन तथाभूतेन श्रीगृहोदाहरणेन राजा प्रतिबोधित इति । प्रद्वेषाद्बालसुकुमारस्येव श्वशुरभूतेनेति विमर्शाच्चन्द्रगुप्तो राजा चाणक्यचोदितो धर्मपरीक्षार्थमन्तःपुरिकाभिर्धर्मावेदयन्तं साधुमुपसर्गयति, साधुना च प्रत्यायता श्रीगृहोदाहरणं राज्ञे निवेदितमिति । तत्र कुत्सितं शीलं कुशीलं, तस्य प्रतिसेवनं कुशीलप्रतिसेवनं, तदर्थं कश्चिदुपसर्गं कुर्याद्यथेर्ष्यालुगृहपर्युषितः साधुश्रुतसूनिः सीमन्तिनीभिः प्रोषितभर्तृकाभिः सकलां रजनीमेकैकया प्रतिमया उपसर्गितो, न चाऽसौ तासु लुलुभे, मन्दरवच्चिष्प्रकम्पोऽभूदिति तैर्यग्योनैता अपि भयप्रद्वेषाऽऽहारापत्यसंरक्षणज्ञेदाश्चतुर्धैव । तत्र भयात् सर्पाऽऽदिभ्यः प्रद्वेषाद्यथा गगनतश्चण्डकौशिकात् आहारात् सिंहव्याघ्राऽऽदिभ्यः अपत्यसंरक्षणात्काकयादिभ्य इति । तदेवमुक्तविधिनोपसर्गाऽऽपादकत्वाज्जना लूषका भवन्ति । अथवा तेषु ग्रामाऽऽदिषु स्थानेषु तिष्ठ-

सो गच्छतो वा स्पर्शान् दुःखविशेषान् आत्मसंवेदनीयाः स्पृशन्त्यभिभवन्ति । ते चतुर्विधाः । तद्यथाः-घट्टनताऽङ्किकणुकाऽऽदिना,पतनता भूमिमूर्च्छाऽऽदिना,स्तम्भनता घाताऽऽदिना,श्लेषणता तास्रुतः पातादङ्गुल्यादेर्वा स्यात् (? । यदि वा-वातपित्तश्लेष्माऽऽदिक्षोभात् स्पर्शाः स्पृशन्ति । अथवा-निष्किञ्चनतया तृणस्पर्शैर्दंशमशकशीतोष्णाऽऽदितापिताः स्पर्शा दुःखविशेषाः कदाचित् स्पृशन्त्यभिभवन्ति,तैश्च स्पृष्टपरीषहैस्तान् स्पर्शान् दुःखविशेषान् धीरोऽक्षोभ्यतयाऽधिसहेत,नरकाऽऽदिदुःखभावनयाऽवश्यकर्मोदयाऽऽगतं पुनरपि मयैवैतत्सोढव्यमित्याकलय्य सम्यक् तितिक्षेदिति । कीदृक्षोऽधिसहेत ?, इत्यत आह-यदि वा स एवम्भूतो न केवलमात्मनस्त्राता, तदुपदेशदानतः परेषामपीति दर्शयितुमाह-(ओए इत्यादि) ओज एको रागाऽऽदिविरहात् सम्यगितं गतं दर्शनमस्येति समितदर्शनः, सम्यग्दृष्टिरित्यर्थः । यदि वा शमितमुपशमं नीतं दर्शनं दृष्टिर्ज्ञानमस्येति समितदर्शनः,उपशान्ताध्यवसाय इत्यर्थः। अथवा-समतामितं गतं दर्शनं दृष्टिरस्येति समितदर्शनः समदृष्टिरित्यर्थः । एवम्भूतः स्पर्शानधिसहेत यदि वा धर्ममाचक्षीतेत्युत्तरक्रियया सह सम्बन्धः ॥ ११३ ॥ आचा० ।

(किमभिसन्ध्य धर्ममाचक्षीतेति 'धर्म' शब्देऽस्मिन्नेव भागे २६६२ पृष्ठे दर्शितम्)

किंगुणश्चाऽसौ द्वीप इव शरण्यो भवतीत्याह-

एवं से उट्ठिए ठियप्पा अणिहे अचले चले अबहिल्लेस्से परिव्वए ॥ ११९ ॥ संखाय पेसलं धम्मं दिट्ठिमं परिणिव्वुडे ॥ १२० ॥ तम्हा संगं ति पासहा गंथेहिं गंथिया णरा विसण्णा कामकंता, तम्हा लूहाओ णो परिचिसेज्जा ॥ १२१ ॥

(एवं इत्यादि)एवमिति वक्ष्यमाणप्रकारेण,स शरण्यो महामुनिर्भवोत्थानेन संयमानुष्ठानरूपेण,उत्प्राबल्येन स्थित उत्थितः,तथा स्थितो ज्ञानाऽऽदिके मोक्षाध्वन्यात्मा यस्य स स्थिताऽऽत्मा, तथा स्निह्यतीति स्निहो,न स्निहोऽस्निहः रागद्वेषरहितत्वादप्रतिबद्धः, तथा च न चलतीत्यचलः परीषहोपसर्गवातैरितोऽपीति। तथा चलोऽनियतविहारित्वात्तथा संयमाद्बहिर्निर्गता ह्रेषाऽध्यवसायो यस्य स बहिर्लेश्य , यो न तथा सोऽबहिर्लेश्यः, स एवम्भूतः परि समन्तात्संयमानुष्ठाने व्रजेत्परिव्रजेत्,न क्वचित्प्रतिबध्यमान इति यावत् ॥ ११६ ॥ स च किमिति संयमानुष्ठाने परिव्रजेदित्याह (संखाय इत्यादि) सङ्ख्यायाऽवधार्य पेशलं शोभनं धर्ममविपरीतार्थं,दर्शनं दृष्टिः, सदनुष्ठानं वा यस्यास्त्यसौ दृष्टिमान्, स कषायोपशमात् क्षयाद्वा परि समन्तान्निर्वृतः शीतीभूतः ॥ १२० ॥ यस्त्वसङ्ख्यातवान् पेशलं धर्मं मिथ्यादृष्टिरसौ न निर्वातीति दर्शयितुमाह-(तम्हा इत्यादि) इतिहेतोर्यस्माद्विपरीतदर्शनो मिथ्यादृष्टिः सङ्गवान् निर्वाति तस्मात्सङ्गं मातापितृपुत्रकलत्राऽऽदिजनितं,धनधान्यहिरण्याऽऽदिजनितं वा सङ्गं, विपाकं वा पश्यत यूयं विवेकेनावधारयत। सूत्रेणैव सङ्गमाह-(गंथेहिं इत्यादि) त एव सङ्गिनो नराः सबाह्याभ्यन्तरैर्ग्रन्थैर्ग्रथिता अवबद्धा विषण्णा ग्रन्थसङ्गे निमग्नाः कामैरिच्छामदनरूपैराक्रान्ता अवरुद्धा न निर्वान्ति यद्येवं ततः किं कर्तव्यमित्याह-(तम्हा इत्यादि) यस्मात्कामयुताऽऽसक्तचेतसः स्वजनधनधान्याऽऽदिमूर्च्छिताः कामजैः शारीरमानसाऽऽदिभिर्दुःखैरुपतापितास्तस्मात् कुतात्संयमात् निःसङ्गाऽऽत्मकाक्षो परिवित्रसेन्न संयमानुष्ठानाद्विभियात् । यतः प्रभूतनरदुःखानुषङ्गिणो हि सङ्गिन इति ॥ १२१ ॥

कस्य पुनः संयमान्न परिवित्रसनं सम्भाव्यत इत्याह-

जस्सिमे आरंभा सव्वतो सव्वत्ताए सुपरिण्णाया भवंति, जेसिमे लूसिणो णो परिवित्तसंति, से वंता कोहं च माणं च मायं च लोहं च, एस तुट्टे वियाहिए त्ति बेमि ॥ १२२ ॥ कायस्स वि वायाए स संगामसीसे वियाहिए, से हु पारंगमे मुणी अविहम्पमाणे फलगावतट्ठी कालोवणीए कंखेज्ज कालं०जाव सरीरभेदो त्ति बेमि ॥ १२३ ॥

(जस्सिमे इत्यादि) यस्य महामुनेरवगतसंसारमोक्षकारणस्येमे सङ्गा आरम्भा अनन्तरोक्तत्वादतिजानतः सर्वज्ञनाऽऽचरितत्वात्प्रत्यक्षाऽऽसन्नत्वाच्चानेदमिहेतानः सर्वतः सर्वाऽऽत्मकतया सुपरिज्ञाता भवन्ति । किम्भूता आरम्भाः ?, येष्वमे ग्रन्थमथिताः विषण्णाः कामज्वराऽऽक्रान्ता जना लूषिणो लूषणशीला हिंसका अज्ञातमोहोदयाश्च परिवित्रसन्ति न विषीदति, यो ह्येवम्भूतांश्चाऽऽरम्भान् ज्ञपरिज्ञया परिज्ञाय प्रत्याख्यानपरिज्ञया परिहरति तस्येते सुपरिज्ञाता भवन्ति । यश्चाऽऽरम्भाणां परिज्ञाता स किमपरं कुर्यादित्याह-(से वंता इत्यादि) स महामुनिः पूर्वव्याख्यातस्वरूपो वान्त्वा त्यक्त्वा क्रोधं च मानं च मायां च लोभं चेति स्वगतभेदसंसूचनार्थो व्यस्तनिर्देशः, सर्वानुषायित्वात् क्रोधस्य प्रथमोपादानम्,तत्सम्बन्धत्वान्मानस्य लोभार्थं नायोपादीयत इत्यतस्तत्कारणत्वान्मायाया लोभस्याऽऽदावुपन्यासः,ततः स च दोषाऽऽश्रयत्वात् सर्वगुरुत्वाच्च सर्वोपरि लोभस्य ज्ञपरिज्ञया परिज्ञाय प्रत्याख्यानपरिज्ञया परिहारमुपन्यास इति । चकारो ह्येतरेतरापेक्षया समुच्चयार्थः। स एवं क्रोधाऽऽदीन्वान्त्वा मोहनीयं क्षेपयति, स चैव अपगतमोहनीयः संसारसन्ततेः,'तुट्ठो' अपसृतो व्याख्यातस्तीर्थकृतादिभिः, इतिरधिकारपरिसमाप्तौ । ब्रवीम्येतत्पूर्वोक्तम् । यदि वैतद्वक्ष्यमाणमित्याह-(कायस्स इत्यादि) काय औदारिकाऽऽदित्रयं, घातिचतुष्टयं वा,तस्य व्याघातो विनाशः । अथवा चीयत इति कायस्तस्य विशेषेणाङ्गमर्दयाऽऽयुष्कक्षयाबधिलक्षणया, घातो व्याघातः शरीरविनाश एव सङ्ग्रामशीर्षकमुपतया व्याख्यातः । यथा हि-सङ्ग्रामशिरसि परानीकनिशाताऽऽकृष्टकृपाणनिर्यल्लप्रभासं चलितोद्यत्सूर्यपिण्डदुद्भूतविद्युच्चमत्कृतिकारिणि कृतकरणोऽपि सुभटश्चित्तविकारं विधत्ते, एवं मरणकालेऽपि समुपस्थिते परिकर्मितमतेरन्यथाभावः कदाचित्स्यादतो यो मरणकाले न मुह्यति, स पारगामी मुनिः संसारस्य कर्मणो वा उत्कृसभारस्य वा पर्यन्तयायीति । किञ्च-(अविहम्पमाणे इत्यादि) विविधं परीषहोपसर्गैर्हन्यमानो विहन्यमानो, न विहन्यमानोऽविहन्यमानः, न निर्विण्णः सर्वैहानसंगच्छें (? पृष्ठमन्यद्वा बालमरणं प्रतिपद्यत इति । यदि वा-हन्यमानोऽपि सबाह्याभ्यन्तरतया तपःपरीषहोपसर्गैः फलकवदवतिष्ठते न कातरीभवति । तथा कालेनोपनीतः कालोपनीतो मृत्युकालेनाऽऽसन्नतां नीतः सन् द्वादशवर्षसङ्लेखनयाऽऽत्मानं संलिख्य गिरिगह्वराऽऽदिस्थण्डिलपादपोपगमनेङ्गितमरणप्रकपरिज्ञान्यतरावस्थोपगतः कालं मरणकालमायुष्कक्षयं यावच्छरीरस्य जीवेन सार्द्धं भेदो भवति, ता-

वद्याकाङ्क्षेत्, अयमेव च मृत्युकालो यदुत शरीरभेदो, न पुनर्जीवस्याऽऽत्यन्तिको विनाशोऽस्तीति। इतिरधिकारपरिसमाप्तौ। ध्रुवीमीत्यादिकं पूर्ववदिति पञ्चमोद्देशकः। तत्समाप्तौ च समाप्तं धुताऽऽख्यं षष्ठाध्ययनमिति। आचा०१ श्रु०६ अ०५ उ०।

धुर-धुर-पुं० । अष्टाशीतिमहाग्रहेष्वन्यतमे स्वनामख्याते ग्रहे, "दो धुरा।" स्था० २ ठा० ३ उ०। कल्प०।

धुरा-धुरा-स्त्री० । धुर्व-किप्। "रो रा" ॥ ८ । १ । १६ ॥ इति प्राकृतसूत्रेण स्त्रियामन्त्यरेफस्य रा इत्यादेशः। प्रा० १ पाद। चिन्तायाम्, रथाग्रभागे, यानमुखे, भारे च। दाप्। धुराऽऽख्यत्र। वाच०।

धुरी-धुरी-स्त्री० । अक्षे. अनु०।

ध्रुव-ध्रुव-पुं० । शङ्खौ, विष्णौ, हरे, उत्तानपादनृपपुत्रे, वसुनेदे, ज्यौतिषोक्ते योगभेदे, नासाग्रे, स्थाणौ, ललाटस्थे आवर्त्तभेदे, भ्रूगोलकयोरुत्तरदक्षिणकेन्द्रद्वयोपरि स्थिते स्थिरे तारानेदे च। वाच०। भगवत ऋषभदेवस्य भरताऽऽदिशतपुत्रेष्वन्यतमे स्वनामख्याते पुत्रे, कल्प० १ अधि० ७ क्षण। शाश्वतत्वाद् मोक्षे, तदुपाये संयमे च। सूत्र० १ श्रु० २ अ० १ उ०। "ध्रुवमग्गमेव पवयंति।" ध्रुवो मोक्षः संयमो वा तन्मार्गमेव प्रवदन्ति। सूत्र० १ श्रु० ४ अ० १ उ०। आचा०। मोक्षकारणीभूते ज्ञानाऽऽदिके, आचा० १ श्रु० २ अ० ३ उ०। कर्मणि, तत्फलभूते संसारे, अनु०। स्थैर्ये, षो० १२ विव०। अवश्यते, विशे०। "ध्रुवमोगिण्हइ।" ध्रुवमवश्यम्, सर्वदेत्यर्थः। स्था० ६ ठा०। अवश्यमिर्थे, भा०। तर्के, आकाशे, उत्तराऽत्रयरोहिणीनक्षत्रेषु च। न०। वाच०। अर्थतो ध्रुवत्वाच्छाश्वतत्वाद् ध्रुवम्। आवश्यके, विशे०। त्रिकालभावित्वाद् ध्रुवः। नित्ये, "ध्रुवे णिच्चिए सासए अक्खए अव्वए अवट्ठिए निच्चे।" (स्था०) इन्द्रशक्राऽऽदिवत्पर्यायशब्दा ध्रुवाऽऽद्यो नानादेशजातविनेयप्रतिपत्त्यर्थमुपन्यस्ताः। स्था० ५ ठा० ३ उ०। विशे०। आचा०। ग०। आ० म०। ध्रुवोऽप्रच्युतानुत्पन्नस्थिरस्वभावः। सूत्र० २ श्रु० ४ अ०। अप्रतिहार्ये, नि० चू० ५ उ०। "ध्रुवा जे अविणासधम्मिणो।" आ० चू० १ अ०। त्रिकालावस्थायित्वाद् ध्रुवं, मेर्वादिवदचले, जी० ३ प्रति० ४ अधि०। न०। ध्रुवोऽवश्यंभावित्वात्। स्था० ५ ठा० ३ उ०। अवश्यं भाविनि, सूत्र० २ श्रु० १ अ०। विशे०। आव०। निश्चिते, विशे०। आचा०। उक्त०। ध्रुवं नियतं नैत्यिकमिति त्रयोऽप्येकार्थाः। व्य० १ उ०। ठा०। वृ०। अव्यभिचारिणि च। सूत्र० १ श्रु० २ अ० १ उ०। आचा०। सत्यते, अपरिणामिनि नित्ये, स्थिरे च। त्रि० मूर्वायाम्, शालपर्य्यां च। स्त्री०। शरारिपक्षिणि, पुं०। स्त्री०। संज्ञायां कन्। गीतिभेदे, न०। वाच०।

ध्रुवकम्मिय-ध्रुवकर्मिक-पुं० । द्रोहकाराऽऽदौ, व्य० १ उ०। कल्प०। ओघ०।

ध्रुवचारि (ण्)-ध्रुवचारिन्-पुं० । ध्रुवो मोक्षस्तत्कारणं च ज्ञानाऽऽदि ध्रुवं,तदाचरितुं शीलं यस्य। मोक्षचरणशीले, मोक्षकारणज्ञानाऽऽद्याचरणशीले च। आचा० १ श्रु० २ अ० २ उ०।

ध्रुवजोगि (ण्)-ध्रुवयोगिन्-पुं० । नित्ययोगवति, दश०१० अ०।

ध्रुवणिग्गह-ध्रुवनिग्रह-पुं० । प्रवाहतोऽनादिकालीनत्वाद् ध्रुवं कर्म, तन्निगृह्णातेऽनेनेति ध्रुवनिग्रहः। विशे०। अनादित्वात् कचिद्व्यपर्य्यवसितत्वाद् ध्रुवं कर्म, तत्फलभूतः संसारो वा, तस्य निग्रहहेतुत्वान्निग्रहो ध्रुवनिग्रहः। आवश्यके, अनु०।

ध्रुवपगडि-ध्रुवप्रकृति-स्त्री० । ध्रुवकर्मप्रकृतौ, भाचा०। ध्रुवकर्मप्रकृतयश्चैमाः-पञ्चधा ज्ञानाऽऽवरणीयं, नवधा दर्शनाऽऽवरणीयं, मिथ्यात्वं, कषायषोडशकं, भयं, जुगुप्सा, तैजसकार्मणशरीरवर्णगन्धरसस्पर्शाः, गुरुलघूपघातनिर्माणानां पञ्चधाऽन्तरायः। एताः सप्तचत्वारिंशद् ध्रुवप्रकृतयः। आचा० १ श्रु० २ अ० १ उ०। (अस्या भेदाः 'णाणावरणिज्ज' शब्देऽस्मिन्नेव भागे १७०५ पृष्ठे प्रतिपादिताः) (दर्शनाऽऽवरणीयभेदाः 'दंसणावरण' शब्देऽस्मिन्नेव भागे २४३७ पृष्ठे गताः) (मिथ्यात्वभेदवर्णनं 'मिच्छत्त' शब्दे) (कषायषोडशकस्वरूपं 'कसाय' शब्दे तृतीयभागे ३६४ पृष्ठे गतम्) (भयस्वरूपं 'भय' शब्दे विस्तरतो वर्णयिष्यामि) (जुगुप्सालक्षणं 'दुगुंछा' शब्देऽस्मिन्नेव भागे २०५३ पृष्ठे गतम्) (तैजसकार्मणशरीरवर्णनम् 'अगुरुलहुय' शब्दे प्रथमभागे १५७ पृष्ठे गतम्) (वर्णस्वरूपं 'वण्ण' शब्दे वर्णयिष्यामि) (गन्धविस्तरः 'गंध' शब्दे तृतीयभागे ७६४ पृष्ठे गतः) (रसविभागः 'रस' शब्दे स्पष्टीभविष्यति) (स्पर्शविवेचनं 'फास' शब्दे वक्ष्यते) (गुरुलघुस्वरूपं 'अगुरुलहुय' शब्दे प्रथमभागे १५७ पृष्ठे गतम्) (उपघातभेदाः 'उवघाय' शब्दे द्वितीयभागे ७८० पृष्ठे विस्तरतो गताः) (निर्माणनामस्वरूपम् 'णिम्माणणाम (ण्)' शब्देऽस्मिन्नेव भागे २०८४ पृष्ठे ऊहनीयम्) (सर्वेऽप्यन्तरायप्रकृतिभेदाः 'अंतरा (य)इय' शब्दे प्रथमभागे ६७ पृष्ठे प्रदर्शिताः)

ध्रुवबंध-ध्रुवबन्ध-पुं० । यः पुनरग्रेऽपि नियतः कदाचिद् व्यवच्छेदं प्राप्स्यति, सोऽभव्यसंबन्धी बन्धो ध्रुवबन्धः। कर्मबन्धभेदे, क० प्र० २ प्रक०।

ध्रुवबंधिणी-ध्रुवबन्धिनी-स्त्री० । ध्रुवो बन्धो विद्यते यस्यां सा ध्रुवबन्धिनी। कर्मप्रकृतिभेदे, पं० सं० ३ द्वार। निजहेतुसद्भावे यासां प्रकृतीनां ध्रुवोऽवश्यंभावी बन्धो भवति, ता ध्रुवबन्धिन्यः कर्मप्रकृतयः। कर्म० ५ कर्म०। (ताश्च सप्तचत्वारिंशत्संख्याकाः 'कम्म' शब्दे तृतीयभागे २६१ पृष्ठे)

ध्रुवमग्ग-ध्रुवमार्ग-पुं० । ध्रुवो मोक्षः संयमो वा, तस्य मार्गः। मोक्षमार्गे, संयममार्गे च। "ध्रुवमग्गमेव पवयंति।" सूत्र० १ श्रु० ४ अ० १ उ०।

ध्रुवराहु-ध्रुवराहु-पुं० । सदैव चन्द्रविमानस्याधस्तात् संचरति राहुभेदे, सु० प्र० २० पाहु०। चं० प्र०। (तत्कथयता 'राहु' शब्देऽवधार्यो)

ध्रुववग्गणा-ध्रुववर्गणा-स्त्री० । ध्रुवा नित्या लोकव्यापितया सर्वैकाद्धावस्थायिनी वर्गणा ध्रुववर्गणा। वर्गणाभेदे, आ० म० १ अ० १ खण्ड। (तद्वक्तव्यता 'वग्गणा' शब्दे)

ध्रुववण्ण-ध्रुववर्ण-पुं० । ध्रुवोऽव्यभिचारी, स चाऽसौ वर्णः संयमो मोक्षो वा ध्रुववर्णः। अव्यभिचारिणि संयमे, मोक्षे च। ध्रुवो वर्णो यशः कीर्तिर्वा ध्रुववर्णः। शाश्वते यशसि, शाश्वत्यां कीर्त्यां च। "ध्रुववण्णं स पेहिया।" आचा० १ श्रु० ए अ० १ उ०।

ध्रुवसंतकम्म-ध्रुवसत्कर्म-न० । यत्सर्वसंसारिणामनवाप्तोत्तरगुणानां सातत्येन भवति तद् ध्रुवसत्कर्म। कर्मभेदे, पं० सं०

३ द्वार । (ध्रुवसत्कर्मप्रकृतयः 'कम्म' शब्दे तृतीयभागे ३६१ पृष्ठे उक्ताः)

ध्रुवसंतकम्मिया–ध्रुवसत्कर्मिका–स्त्री० । ध्रुवं सत्कर्म यस्याः सा ध्रुवसत्कर्मिका । कर्मप्रकृतिभेदे, क० प्र० २ प्रक० ।

ध्रुवसत्तागा–ध्रुवसत्ताका–स्त्री० । ध्रुवा अव्यवच्छेदकालादवस्थितकालजाविनी सत्ता यस्याः सा ध्रुवसत्ताका । कर्मप्रकृतिभेदे, पं० सं० ३ द्वार । या सर्वसंसारिणामप्राप्तसम्यक्त्वाऽऽद्यन्तरगुणानां सातत्येन जवन्ति ता ध्रुवसत्ताकाः । कर्म० ५ कर्म० । (ताश्च त्रिंशदुत्तरशतसंख्याः 'कम्म' शब्दे तृतीयभागे ३६१ पृष्ठे उक्ताः) ध्रुवसत्ताकत्वं तासां सम्यक्त्वलाजादर्वाक् सर्वजीवेषु सदैव सद्जावात् । कर्म० ५ कर्म० ।

ध्रुवसेण–ध्रुवसेन–पुं० । वीरनिर्वाणावशताशीतिवर्षेष्वतीतेषु जाते स्वनामख्याते नृपे, यस्य पुत्रमरणाऽऽर्तस्य शोकापहारार्थं कल्पसूत्रस्य वाचनाऽऽरब्धेति । कल्प० १ अधि० ६ क्षण ।

ध्रुवोदया–ध्रुवोदया–स्त्री० । ध्रुव आ उदयकालव्यवच्छेदादर्वाक्कालावस्थायी उदयो विपाकानुजवनलक्षणो यस्याः सा ध्रुवोदया । " अवुच्छिन्नो उदओ, जाणं पयमीण ता ध्रुवोदइया । " यासामव्यवच्छिन्नाऽनुसन्ततः स्वोदयव्यवच्छेदकालं यावत् । पं० सं० ३ द्वार । कर्म० । उदयास्ता ध्रुवोदयाः, ('कम्म' शब्दे विवृतमेतत्)

धूआ–दुहितृ–स्त्री० । अङ्गजायाम्, " धूआ दुहिआ । " को० २५२ गाथा ।

धूअरायमग्ग–धूतराजमार्ग–पुं० । धूतोऽपनीतो राजमार्गो राजपथ्या यस्मिन् । अपनीतराजपथे, सूत्र० १ श्रु० ४ अ० २ उ० ।

धूओवाय–धूतोपाय–पुं० । ' धुओवाय ' शब्दार्थे, आचा० १ श्रु० ६ अ० १ उ० ।

धूण–देशी–गजे, दे० ना० ५ वर्ग ६० गाथा ।

धूम–धूम–पुं० । धू-मक् । आर्द्रकाष्ठजाते मेघकज्जलयोः कारणे वह्निध्वजे पदार्थे, वाच० । " अंतो धूमेण मारेइ । " धूमेन वह्निलिङ्गेन । स० ३० समo । व्याधिशमनाय धूमश्चायोगर्भः । पं० व० ४ द्वार । औ० । धूमो मनःशिलाऽऽदिसम्बन्धी–धूतप्रासनाऽऽदिकः । उत्त० १५ अ० । द्वेषे, "इंगालधूमपरिसुद्धं उवहिं चारए स भिक्खू जो इंगालो त्ति रागो धूमो त्ति दोसो तेहिं, परिसुद्धं न तेहिं ।" परिशुद्धजतीत्यर्थः । नि० चू० १६ उ० । द्वेषाग्निना दह्यमानस्य निन्दाऽऽत्मके कलुषभावे च । धूमो द्विधा । तद्यथा-द्रव्यतो, भावतश्च । तत्र द्रव्यतो योऽर्द्धदग्धानां काष्ठाऽऽदीनां सम्बन्धी । जावतो–द्वेषाग्निना दह्यमानस्य सम्बन्धी कलुषभावो निन्दाऽऽत्मकः । पिं० । चरणेन्धनस्य द्वेषेण धूमवत इव करणं मनुष्यप्रत्ययलोपाद् धूमः । ग० १ अधि० । चारित्रेन्धनस्य धूमवत इव करणमिति विग्रहे कारिते मनुष्यलोपे च धूमः । चारित्रेन्धनस्य धूमायमानतारूपे ग्रासैषणादोषभेदे, पञ्चा० १३ विव० ।

धूमंग–देशी–भ्रमरार्थे, दे० ना० ५ वर्ग ५७ गाथा ।

धूमकेतु–धूमकेतु–पुं० । धूम इव केतुः । उत्पातरूपेऽशुभसूचके, वाच० । अष्टाशीतिमहाग्रहाणामन्यतमे महाग्रहे, चं० प्र० १० पा० हु० १ पाहु० पाहु० । प्रज्ञा० । प्रज्ञा० । स्था० । कल्प० । सू० प्र० । अत्रौ, "एक्कंदे जाव्रेयं जोइं. धूमकेउं दुरासयं ।" धूमकेतोरग्नेर्ज्योतिरुल्कां प्रस्कन्देत । उत्त० २२ अ० । धूमकेतु धूमचिह्नं धूमध्वजं नोल्काऽऽदिरूपम् । दश० २ अ० । " दो धूमकेऊ । " स्था० २ ठा० ३ उ० ।

धूमचारण–धूमचारण–पुं० । चारणभेदे, धूमवर्तितिरश्चीनामूर्द्धगां वाऽवश्रम्यास्खलितगमनाऽऽस्कान्दिनो धूमचारणाः । ग० २ अधि० । प्रज्ञा० ।

धूमजोणि–धूमयोनि–पुं० । धूमो योनिरस्य । मेघे, मुस्तके च । ६ त० । वह्नौ, आर्द्रकाष्ठे च । वाच० । " अन्नाइं धूमजोणी । " को० २७ गाथा ।

धूमज्झय–धूमध्वज–पुं० । वह्नौ, धूमचिह्ने वह्नौ, दश० २ अ० । एकार्थिकानि– " धूमज्झओ हुयवहो, विहावसू पावओ सिही वण्हो । अणलो जलणो डुहणो, हुआसणो हव्ववाहो य ॥६१ " को० ६ गाथा ।

धूमण–धूमन–न० । अनागतव्याधिनिवृत्तये धूमपाने, दश० ३ अ० । नापि कासाऽऽद्यपनयनार्थं तं धूमं योगवर्त्ति निष्पादित मापिबेत् । सूत्र० २ श्रु० १ अ० ।

धूमदोस–धूमदोष–पुं० । अन्तप्रान्ताऽऽहाराहारे द्वेषाद्यारित्रस्यापि धूननाद्धूमदोषः । आचा० २ श्रु० १ अ० ३ उ० । निन्दन् पुनः पुनश्चारित्रेन्धनम्, दहन् धूमकरणाद् धूमदोषः । ग्रासैषणादोषभेदे, ध० ३ अधि० । द्वेषेण भुञ्जानस्य धूमदोषः । जीत० । उत्त० । " दोसेण सधूमगं मुणेयव्वं । " पिं० । द्वेषेणाऽऽध्मातस्य यद् भोजनं तत्सधूमं, निन्दाऽऽत्मककलुषभावरूपधूमसंमिश्रत्वात् । पिं० ।

धूमदार–देशी–गवाक्षे, दे० ना० ५ वर्ग ६१ गाथा ।

धूमद्धअ–देशी–तडाके, महिषे च । दे० ना० ५ वर्ग ६३ गाथा । वह्नौ, को० ६ गाथा ।

धूमद्धयमहिसी–स्त्री० । देशी । कृत्तिकासु, दे० ना० ५ वर्ग ६२ गाथा ।

धूमपलीयाम–धूमप्रदीप्राम–पुं० । आमनेदे, नि० चू० । " धूमपलियामं णाम जहा खड्डे खणित्ता तत्थ करीसो छुब्भति, तीसे खड्डामप परिपेरंतेहिं अण्णाओ खड्डाओ खणित्ता तासु तेंदुआदीणि फलाणि छुभिता जा, सा करीसगखड्डुगा, तत्थ अग्गी छुब्भति सा तेसिं च तेंदुगखड्डाणं मिलिया, ताहे धूमो तेहिं पविसित्ता ताणि फलाणि पावति, तेणं ते पच्चंति, तत्थ जे अपक्काते धूमपलियामा भण्णंति ॥ " नि० चू० १५ उ० ।

धूमप्पभा–धूमप्रभा–स्त्री० । धूमस्य प्रभा यस्यां सा धूमप्रभा । धूमाऽऽजव्योपलक्षितायां स्वनामख्यातायामरिष्टापरनामधेयायां पञ्चम्यां पृथिव्याम्, प्रव० १७ द्वार । स्था० । अनु० । भ० । प्रज्ञा० । सम० । (धूमप्रभायां कियदकाशे नैरयिकानां वास इति ' उवास ' शब्देऽस्मिन्नेव भागे १७०१ पृष्ठे उक्तव्यः)

धूममहिसी–धूममहिषी–स्त्री० । धूमस्य महिषीव । कुञ्जटिकायाम्, वाच० । " धूममहिसी य । " को० ५५ गाथा ।

धूमरी–देशी–नीहारार्थे, दे० ना० ५ वर्ग ६१ गाथा ।

धूमवण्ण–धूमवर्ण–पुं० । धूमसुरे, ज्ञा० १ श्रु० १७ अ० ।

धूमसिहा-धूमशिखा-स्त्री० । धूमाग्रभागे, " चत्तारि धूमसिहाओ पण्णत्ताओ । तं जहा-वामा णाममेगा वामावत्ता, वामा णाममेगा दाहिणावत्ता, दाहिणा णाममेगा वामावत्ता, दाहिणा णाममेगा दाहिणावत्ता" । स्था० ४ ठा० २ उ० । नीहारार्थे, दे० ना० ५ वर्ग ६१ गाथा ।

धूमा-धूमा-स्त्री० । धूमिकायाम्, स्था० १० ठा० ।

धूमिआ-देशी-नीहारार्थे, दे० ना० ५ वर्ग ६१ गाथा ।

धूमिय-धूमित-त्रि० । धूमयुते, " अप्पत्तियधूमधूमितं चरणं । " पिं० ।

धूमिया-धूमिका-स्त्री० । मिहिकाभेदे, धूमिका मिहिकाभेदः, वर्णतो धूमिका धूमाऽऽकारा, धूम्रेत्यर्थः । स्था० १० ठा० । धूमिकामिहिकयोर्वर्णकृतो भेदः । धूमिका धूम्रवर्णा, धूसरेत्यर्थः । मिहिका त्वापाण्डुरेति । भ० ३ श० ७ उ० । दे० ना० । "धूमिया य मिहिया य ।" को ३८ गाथा । धूमिका रूक्षा प्रविरला धूमाभा प्रतिपत्तव्या । अनु० । जी० । स्था० । तदात्मके आन्तरिक्षेऽस्वाध्यायभेदे, स्था० १० ठा० ।

धूय-धूत-न० । ' धुय ' शब्दार्थे, स्था० ६ ठा० ।

धूयकिलेस-धूतक्लेश-त्रि० । ' धुयकिलेस ' शब्दार्थे, आतु० ।

धूयचारि(ण)-धूतचारिन्-पुं० । ' धुयचारि (ण) ' शब्दार्थे, आचा० १ श्रु० २ अ० ३ उ० ।

धूयज्झयण-धूताध्ययन-न० । ' धुयज्झयण ' शब्दार्थे, आचा० १ श्रु० ८ अ० ४ उ० ।

धूयपाव-धूतपाप-त्रि० । ' धुयपाव ' शब्दार्थे, आतु० ।

धूयबहुल-धूतबहुल-त्रि० । ' धुयबहुल ' शब्दार्थे, सूत्र० १ श्रु० २ उ० ।

धूयमोह-धूतमोह-त्रि० । ' धुयमोह ' शब्दार्थे, सूत्र० १ श्रु० ४ अ० २ उ० । दश० ।

धूयरय-धूतरजस्-त्रि० । ' धुयरय ' शब्दार्थे, सूत्र० १ श्रु० ४ अ० २ उ० ।

धूयरागमग्ग-धूतरागमार्ग-पुं० । 'धुयरागमग्ग' शब्दार्थे, सूत्र० १ श्रु० ४ अ० २ उ० ।

धूयवाय-धूतवाद-पुं० । ' धुयवाय ' शब्दार्थे, आचा० १ श्रु० ६ अ० १ उ० ।

धूया-दुहितृ-स्त्री० । दोग्धि च केवलं जननीं स्तन्यार्थमिति दुहिता । ततश्च " दुहितरि धो हिलोपश्च ।" इति वचनादादेर्धत्वे हिलोपे च " ऊदुत्सु पुष्योत्सवोत्सुकदुहितृषु । " इति वचनात् उत ऊत्वे च "धूया ।" (५७) उत्त० १ अ० । " दुहितृभगिन्योर्धूया-वहिण्यौ " ॥ ८ । २ । १२५ ॥ इति प्राकृतसूत्रेण दुहितृशब्दस्य वा धूयाऽऽदेशः । 'धूया । दुहिआ ।' प्रा० २ पाद । सुतायाम्, वाच० । जं० । उत्त० । " ताणं धूयाणं । " आचा० १ श्रु० २ अ० ५ उ० । नि० चू० । आ० म० ।

धूरिअ-न० । देशी-दीर्घे, दे० ना० ५ वर्ग ६२ गाथा ।

धूलडिआ आ-धूलिका-स्त्री० । " धूलि-कात् " अ-मड-मुल्लाः स्वार्थिककलुक् च " ॥ ८ । ४ । ४२६ ॥ इति सूत्रेणापभ्रंशे स्वार्थे धूलिशब्दाद् डडप्रत्ययः । मिति परे इकारलोपे " धूलड " इति । " योगजास्तेषाम् " ॥ ८ । ४ । ४३० ॥ इति सूत्रेणापभ्रंशे अ-मम-कुल्लानां योगे रूपप्रत्ययात्तादू अप्रत्ययः । प्रा०४ पाद । आन्तान्तादू डाः " ॥ ८ । ४ । ४३२ ॥ इति प्राकृतसूत्रेणापभ्रंशे स्त्रियां वर्त्तमानादप्रत्ययान्तप्रत्ययान्तात् आप्रत्ययः । 'धूलमअआ ' इत्यवस्थायाम् " अस्येदे " ॥ ८ । ४ । ४३३ ॥ इति प्राकृतसूत्रेणापभ्रंशे स्त्रियां वर्त्तमानस्य नाम्नो योऽकारस्तस्याकारे प्रत्यये परे इकारः । प्रा० ४ पाद । धूल्याम्, वाच० ।

धूलि-धूलि-स्त्री० । धू-लि-कः, वा ङीष् । रजसि, परागे च । जी० ३ प्रति० ४ अधि० ।

धूलिजंघ-धूलिजङ्घ-त्रि० । धूल्या धूसरे जङ्घे यस्य स धूलिजङ्घः । शाकपार्थिवाऽऽदिदर्शनान्मध्यमपदलोपी समासः । पादलग्नधूलिके, व्य० १० उ० । नि० चू० ।

धूलिणाय-धूलिज्ञात-न० । चिक्खिल्लज्ञाते, तीर्थकराऽऽचार्यगणधरशिष्याणां समीपे स्वाध्यायमधिकृत्य " इति उदिए धूलिणायमाहंसु ।" यथा धूलिरेकत्र स्थापिता, तत उद्धूत्यान्यत्र यत्राऽऽस्तीर्यते तत्रावश्यं किञ्चित्परिशटति, ततोऽप्यन्यत्र प्रस्तीर्यमाणा भूयो भूयः परिशटति, यथा वा प्रासादे लिप्यमाने मनुष्यपरम्परया चिक्खिल्लः प्रत्यर्प्यमाणो बहु परिशटितः स्तोकमात्रावशेष एव सर्वोत्तिममनुष्यस्य हस्तं प्राप्नोति । बृ० १ उ० २ प्रक० ।

धूलिधूसर-धूलिधूसर-त्रि० । लग्नधूलिके, " धूलिधूसरसर्वाङ्गौ । " आ० क० । आचा० ।

धूलिबहुल-धूलिबहुल-त्रि० । प्रचुरपांशुके, प्र० ७ श० ६ उ० ।

धूलिवरिस-धूलिवर्ष-पुं० । पांशुवृष्टौ, " धूलीवरिसं वरिसइ ।" आ० म० १ अ० २ खण्ड ।

धूली-धूली-स्त्री० । ' धूलि ' शब्दार्थे, जी० ३ प्रति० ४ उ० ।

धूलीवट्ट-देशी-अभ्रे, दे० ना० ५ वर्ग ६१ गाथा ।

धूव-धूप-पुं० । " पो वः " ॥ ८ । १ । २३१ ॥ स्वरात्परस्याऽसंयुक्तस्यानादेः पस्य प्रायो दन्तोष्ठस्थानीयो वकारः । 'धूवो ।' प्रा० १ पाद । धूपयति रोगान् दोषान् वा । धूप अच् । गुग्गुलप्रभृतिगन्धद्रव्योत्थे धूमे, तत्साधनद्रव्ये च । वाच० । " कप्पूरमलयचंदणकालागुरुपवरकुंदुरुक्कतुरुक्कधूवमउअंतसुरभिमघमघंतगंधुद्धुयाभिरामे ।" धूपश्च दशाङ्गाऽऽदिगन्धद्रव्यसंयोगजः । जं० १ वक्ष० । एतेषां सम्बन्धी यो धूपस्तस्य दह्यमानस्य सुरभिर्यो मघमघायमानोऽतिशयवान् गन्ध उद्भूत उद्गतः, तेनाभिराममभिरमणीयं यत्तत्तथा । ज्ञा० १ श्रु० १ अ० । नि० चू० । आ० म० । प्रज्ञा० । प्रश्न० । जं० । अनु० ।

धूवघडी-धूपघटी-स्त्री० । "पो वः " ॥८।१।२३१॥ इति पस्य वकारः प्रा०१पाद । धूपभृतघटिकायाम्, "ताओ णं धूवघडीओ कालागुरुपवरकुंदुरुक्कतुरुक्कधूवमघमघंतगंधुद्धुआभिरामाओ सुगंधवरगंधिआओ गंधवट्टिभूआओ उराळेणं मणुण्णेणं घाणमणणिव्वुइकरेणं गंधेणं ते पएसे सव्वओ समंता आपूरेमाणीओ सिरीए अईव उवसोभेमाणा चिट्ठंति ।" जं० १ वक्ष० । जी० ।

धूवण-धूपन-पुं० । धूप-ल्युट् । यत्तधूपे, वाच० । धूपप्रदाने, न० । " अणणुयरेण धूवणजाएण धूवेज्ज वा । " आचा० २

श्रु० २ चू०१३ अ० । धूपनमित्यात्मवस्त्राऽऽदेः,तच्चानाचरितम् । ज्ञा० १ श्रु० १७ अ० । नो शरीरस्य स्वीयवस्त्राणां वा धूपनं कुर्यात् । सूत्र० २ श्रु० १ अ० ।

धूवणजाय–धूपनजात–न० । धूपनप्रकारे, आचा० २ श्रु० २ चू० १३ अ० ।

धूवणविहि–धूपनविधि–पुं० । धूपदानप्रकारे, "धूवणविहिपरिमाणं करेइ णण्णत्थ अगुरुतुरुक्कधूवमाइएहिं ।" उपा० १ अ० । (विशेषस्तु ' आणंद ' शब्दे द्वितीयभागे १०७९ पृष्ठे द्रष्टव्यः)

धूवधूम–धूपधूम–पुं० । अगुर्वादिगन्धद्रव्योत्थे धूमे, दर्श० १ तत्त्व ।

धूवपूया–धूपपूजा–स्त्री० । धूपप्रदानरूपे पूजाभेदे, दर्श० १ तत्त्व ।

धूविय–धूपित–त्रि० । धूप–क्त–वा आयाभावः । अघ्रादिगमनेन आन्ते, सन्तापिते च । वाच० । अगुर्वादिसुगन्धिद्रव्यैः सुगन्धीकृते च । "दुग्गंधत्ति काउं अगुरुमाईहिं सुगंधीकयं ।" ग० १ अधि० । दुर्गन्धाऽऽद्यपनयनार्थं धूपाऽऽदिना धूपित इति । आचा० २ श्रु० १ चू० २ अ० १ उ० ।

धूसर–धूसर–पुं० । गर्दभे, उष्ट्रे, कपोते, तैलाऽऽक्तारे ईषत्पाण्डुवर्णे, कृष्णश्वेतवर्णे, शुक्लपीतवर्णे च । तद्वर्णवति, त्रि० । वाच० । " धूलिधूसरसर्वाङ्गौ ।" आ० क० । आचा० ।

धूसरिअ–धूसरित–त्रि० । " गुंमिअं उक्कूलिअं च धूसरिअं ।" को० १९२ गाथा ।

धे–ध्यै–धा० । चिन्तने, भ्वा०–पर०–सक०–अनिट् । ध्यायति । अध्यासीत् । वाच० । भ० १ श० १ उ० ।

ध्मै–धा० । तृप्तौ, भ्वा०–पर०–अक०–अनिट् । ध्मायति । अध्मासीत् । वाच० ।

धेज्ज–धेय–त्रि० । धारणीये, पालनीये, ज्ञा० १ श्रु० १ अ० ।

धेय्य–त्रि० । हृदि धारणीये, ज्ञा० १ श्रु० १ अ० । विपा० ।

धेणु–धेनु–स्त्री० । धयति सुतान् धे–नु–ङीप् । नवप्रसूतायां गवि, वाच० । बृ० १ उ० ३ प्रक० । प्रा० । आचा० ।

धेवय–धैवत–पुं० । अतिसंधयते अनुसंधयति शेषस्वरानिति निरुक्तिवशाद् धैवतः । "अनुसंधयते यस्मा-देतान्पूर्वोत्थितान् स्वरान् । तस्मादस्य स्वरस्यापि, धैवतत्वं विधीयते ॥१॥" इत्युक्त्यार्थकेरेवतापरनामभेदे, स्था० ७ ठा० । अनु० । गत्वा नाभेरधोभागं, दक्षिणं प्राप्योर्ध्वगः पुनः । धावन्निव च यो याति, कण्ठदेशं स धैवतः ॥ १ ॥ " इत्युक्तलक्षणे कण्ठोक्ते स्वरभेदे, वाच० । " धेवयस्सरसंपन्ना, भवंति कलहंसिया ।" स्था० ७ ठा० ।

धोज्ज–धुर्य–त्रि० । धौरेये, "धोज्जेहिं हुंति उवणीया ।" धुर्यैः–धौरेयैः । व्य० १ उ० ।

धोय–धौत–त्रि० । धाव–क्त–ऊव् । अतिनिर्मलीकृते, जी० ३ प्रति० ४ उ० । आ० म० । ज्ञा० । जलाऽऽदिना प्रक्षालिते, भ० ६ श० ३ उ० । प्रनूतजलक्षालनक्रियया धौतं मलिनं सत् प्रक्षालितम् । बृ० १ उ० २ प्रक० । औ० । "कहं देहो धोइउं सक्को ।" धोतुं क्षालयितुं शक्यम् । तं० । अतिनिर्मलीकृते, रा० । प्रज्ञा० । धौतं ' चोक्खं ' कृतमिति । बृ० ३ उ० । शोधिते, ज्ञा० १ श्रु० १ अ० । रा० । जी० । शुभ्रे च । रजते, न० । वाच० ।

धोयरत्त–धौतरक्त–त्रि० । पूर्वं धौते पश्चाद्रक्ते वस्त्राऽऽदौ, " णो धोयरत्ताइं वत्थाइं धारएज्जा ।" पूर्वं धौतानि पश्चाद्रक्तानि । आचा० १ श्रु० ८ अ० ४ उ० ।


धोवण–धावन–न० । ' धावण ' शब्दार्थे, प्रव० १ द्वार ।

ध्रुव–ध्रु–व्यक्तायां वाचि, "ध्रु (ध्रू) गो ध्रु (ध्रु)वो वा" ॥८।४।३९१॥ अपभ्रंशे ध्रु (ध्रू) गो धातोर्ध्रु (ध्रु) व आदेशो वा भवति । "ध्रुवह सुद्धासिउ किं पि" पक्षे–"इत्तउं ब्रोप्पिणु सक्कणिहिउ,पुणु दूसासणु ब्रोप्पि । तो हउं जाणउं एहो हरि,जइ महु अग्गइं ब्रोप्पि ॥१॥" दुर्योधनोक्तिरियम्–शकुनिर्नाम मातुल श्यद् ब्रूक्त्वा स्थितः पुनर्दुःशासनो ब्रूत्वा स्थितः । अहं ततस्तर्हि जाने यदि एष हरिर्ममाग्रे ब्रूत्वा तिष्ठति शेष इत्यर्थः । पक्षे–ब्रूत्वा । प्र० । "एप्पेप्पिणेप्पिणवः" ॥८।४।४४०॥ क्त्वास्थाने एप्पिणु । "स्वराणां स्वराः प्रायोऽपभ्रंशे" ॥८।४।३२९॥ इति एकारेण सहऋकारस्य उकारः । ब्रोप्पिणु । ब्रूप्पिणु । क्त्वा प्र० । "एप्पेप्पिणु०" ॥८।४।४४०॥ इति क्त्वास्थाने एप्पि । शेषं पूर्ववत् । ब्रोप्पि । प्रा० दुं० ४ पाद । यथाऽत्र भरते मेरुदिशि ध्रुवो वर्तते, तथा महाविदेहेष्वैरवते वर्ततेन वा ? तथा–जम्बूद्वीपे कति ध्रुवास्सन्ती ?, इति प्रश्ने, उत्तरम्–भरतवदन्यत्रापि ध्रुवाः संज्ञाव्यन्ते, परमेतत्प्रतिपादकान्यङ्गराणि तु न दृष्टानि स्मरन्तीति । २२३ प्र० । सेन० ३ उल्ला० ।

ध्रुवु–ध्रुवम्–न० । " एवं–परं–समं–ध्रुवं–मा–मनाक् एम्व–परसमाणु–ध्रुवु–मं–मणाउं " ॥ ८ । ४ । ४१८ ॥ इति प्राकृतसूत्रेण ध्रुवमो ध्रुवुः । नित्यमित्यर्थे, प्रा० ४ पाद । " चंचल जीविउ ध्रुवु मरणु, पिउ रूसिज्जइ काइँ । होसइँ दिअहा रूसणा दिव्वइँ वरिससयाइं ॥ १ ॥ " जीवितं चञ्चलं, मरणं ध्रुवं, हे प्रिये ! रुष्यते कथं ?, रोषणस्य दिवसा अपि दिव्यानि वर्षशतानि भविष्यन्तीत्यर्थः । प्रा० ४ पाद ।

इति श्रीमत्सौधर्मबृहत्तपागच्छीय–कलिकालसर्वज्ञकल्प–श्रीमद्भट्टारक–जैनश्वेताम्बराऽऽचार्य–श्री १००८ श्रीविजयराजेन्द्रसूरीश्वरविरचिते 'अभिधानराजेन्द्रे'

धकाराऽऽदिशब्दसङ्कलनं समाप्तम् ।



न–न–पुं० । न इति तवर्गस्य पञ्चमो वर्णः स्पर्शसंज्ञो नासिकादन्तस्थानीयः "नो नरे च सनाथेऽपि,नोऽनाथेऽपि प्रदृश्यते ।(७६) एका० । "नशब्दलिङ्गेषु लिङ्गेषु, पठ्यते भिन्नसूत्रमयोः ॥५३॥" एका० । "नः पुंसि वहौ हेरम्बे (५२)" "नकारस्तु स्त्रियां नाम्नौ (५३) ।" नशब्दलिङ्गेषु लिङ्गेषु, पठ्यते भिन्नसूत्रमयोः ॥५३॥" एका० २० ।

न–अव्य० । निषेधे, "वाऽऽदौ" ॥८।२।२२६॥ असंयुक्तस्याऽऽदौ वर्तमानस्य नस्य णो वा भवति । णत्वपक्षे-ण । प्रा० १ पाद । " नात्पुनर्यादाइ वा " ॥ ८ । १ । ६५ ॥ नञः परे पुनः शब्दे आदेरस्य आ आइ इत्यादेशौ वा भवतः । ' न उणा, न उणाइ । ' पक्षे ' न उण, न उणो ' प्रा० १ पाद ।

नअ–नग–पुं० । " क–ग–च–ज–त–द–प–य–वां प्रायो लुक् " ॥ ८ । १ । १७७ ॥ इति गलुक् । पर्वते, प्रा० १ पाद ।

नअण–नयन–न० । " क–ग–च–ज–त–द–प–य–वां प्रायो लुक् " ॥ ८ । १ १७७ ॥ इति यलुक् । प्रा०१ पाद । चक्षुषि, प्रा० १ पाद ।

नअर–नगर–न० । 'क–ग–च०' ॥८ । १ । १७७॥ इत्यादिना गलुक् । "अवर्णो यश्रुतिः" ॥ ८ । १ । १८० ॥ इति अकारो यश्रुतिकः । क्वचिन्न–नअरं । पुरे, प्रा० १ पाद ।

नई–नदी–स्त्री० । स्रवति, सूत्र० १ श्रु० १ अ० ५ उ० । " वा.ऽऽदौ" ॥ ८ । १ । २२९ ॥ असंयुक्तस्याऽऽदौ वर्तमानस्य नस्य णो वा भवति । 'नई ।' पक्षे-णई । प्रा० १ पाद । भ० । प्रश्न० । " सरिया तरंगिणी निण्ण–या नई आवगा सिंधू । " को० २६ गाथा । (अत्र विशेषवक्तव्यता ' णई ' शब्देऽस्मिन्नेव भागे १७३८ पृष्ठे गता)

नउ–नउ–अव्य० । "इवार्थे नं-नउ-नाइ-नावइ-जणि-जणवः" ॥८।४।४४४॥ इति इवार्थे नउ इत्यादेशः "रविअत्थमणि समाकुलेण-प्प कणिठ विहणेण न छिण्णु । चक्किं खणेण मुणालिआइ, नउ जीवगलु दिण्णु ॥१॥ " सूर्यास्तमने समाकुलेन चक्रवाकेन कण्ठे वितीर्णं दत्तं स्थापितं सत् मृणालिकायाः कमलिन्याः खण्डं न छिन्नं न भक्षितं, ' नउ ' उत्प्रेक्ष्यते, जीवस्य निर्गच्छतोऽर्गला दत्ता ॥ प्रा० ४ पाद ।

नं–नं–अव्य० । "इवार्थे नं-नउ-नाइ-नावइ-जणि-जणवः " ॥८।४।४४४॥ इति इवार्थे नं इत्यादेशः "मुख–कबरी–बन्ध तहे,सोह धरहिं,नं मल्ल–जुज्झु ससि–राहु करहिं । तहें सोहहिं कुरल भमरउल्लतुलिअ, नं तिमिरमिंम खेलंति मिलिअ । " तस्या मुख–कबरीबन्धौ वदनवेणीबन्धौ शोभां धरतः 'नं' उत्प्रेक्षते-शशिराहुमल्लयुद्धं कुरुतः । तस्याः कुरलाः केशाः शोभन्ते । किंभूताः? भ्रमरकुलतुलिता मधुकरयूथसमानाः, 'नं' उत्प्रेक्ष्यते-तिमिरडिम्भा अन्धकारबालका मिलित्वा क्रीडन्तीत्यर्थः। प्रा०४ पाद । "नं ब्रह्मणि तथाऽनन्ते,सानन्दे नं च नन्दने ॥ ७६ ॥ " एका० । "नमाख्यज्ञानयोर्भवेत् । " (५३) एका० ।

नंदण–नन्दन–न० । देववने, " नंदणं अमरुज्जाणं । " को० ६७ गाथा । (अस्य बहुवोऽर्थाः ' णंदण ' शब्देऽस्मिन्नेव भागे १७४९ पृष्ठे दर्शिताः)

नंदणा–नन्दना–स्त्री० । तनयायाम्, " अंगया नंदणा सुआ, तणया ।" को० १०२ गाथा ।

नंदी–नन्दी–स्त्री० । हर्षे, ज्ञानपञ्चके, ज्ञाते, आ० म० १ अ० १ खण्ड । " नंदी मंगलहेउं । " बृ० १ उ० । गवि, " नंदी तंबा बहुला, गिट्ठी गोला य रोहिणी सुरही । " को० ४५ गाथा । (नन्द्याः परिपूर्णतया व्याख्या ' णंदि ' शब्देऽस्मिन्नेव भागे १७५१ पृष्ठे प्रतिपादिता)

नकर–नगर–न० । नगा वृक्षाः पर्वता वा सन्त्यस्मिन्निति नगरम् । पुरभेदे, " चूलिकापैशाचिके तृतीयचतुर्थयोरायद्वितीयौ " ॥८ । ४ । ३२॥ इति गस्य कः । 'नगरं । नकरं ।' प्रा० ४ पाद ।

नकसिरा–नासिकाशिरा–स्त्री० । घ्राणशिरायाम्, 'खुंखुणओ नक्कसिरा ।" को० ११४ गाथा ।

नक्ख–नख–पुं० । कररुहे, "सेधाऽऽदौ वा" ॥ ८ । २ । ९७ ॥ इति खद्वित्वम् । प्रा० २ पाद । जी० । औ० । दे० ना० । "नक्खा नहा कररुहा ।" को० १०६ गाथा ।

नक्खत्त–नक्षत्र–न० । ज्योतिष्कभेदे, द० प० । स्था० । जं० । " रिक्खं ऋक्षं नक्खत्तं । " को० ६६ गाथा । सु० प्र० । चं० प्र० । (विस्तरतो व्याख्या ' णक्खत्त ' शब्देऽस्मिन्नेव भागे १७६० पृष्ठे गता)

नग्गोह–न्यग्रोध–पुं० । वटे, प्रज्ञा० १ पद । नि० चू० । " नग्गोहं वडरुक्खं ।" को० ३५७ गाथा ।

नट्ट–नाट्य–न० । नृत्ते, ज्ञा० १ श्रु० १ अ० । बृ० । जं० । रा० । " नट्टं लासं तंडवं । " को० १६६ गाथा । (अस्य द्वात्रिंशद्भेदाः ' णट्ट ' शब्देऽस्मिन्नेव भागे १७९८ पृष्ठे दर्शिताः)

नड–नट–पुं० । नाटकानां नाटयितरि, ज्ञा० १ श्रु० १ अ० । " नडो कुसीलओ ।" को० २७२ गाथा । (अस्य भेदौ ' णड ' शब्देऽस्मिन्नेव भागे १८०४ पृष्ठे दर्शितौ)

नडिअ–नटित–न० । विडम्बिते, ज्ञा० १ श्रु० ९ अ० । " जूरिअं उत्तसिअं नडिअं । " को० १९६ गाथा ।

नत्तंचर–नक्तञ्चर–पुं० । नक्ते नक्तं वा चरतीति नक्तञ्चरः । राक्षसे, चौरे, विडाले च । " क–ग–च–ज–त–द–प–य–वां प्रायो लुक् "॥ ८ । १ । १७७ ॥ इति कलुक् । "नत्तंचरो" प्रा०१पाद ।

नद्धून–नष्ट्वा–अव्य० । नश्–क्त्वा । "द्धून–त्थूनौ ष्टः" ॥ ८ । ४ । ३१३ ॥ इति ष्ट्वा इत्यस्य स्थाने द्धूनादेशः । अदृश्यीभूयेत्यर्थे, प्रा० ४ पाद ।

नम्म–नर्मन्–न० । हास्ये, " केली नम्मं च परिहासो ।" को० १६६ गाथा । " स्नमदामशिरोऽनभः " ॥ ८ । १ । ६२ ॥ इति प्राकृते वा पुंस्त्वम् । "नम्मो।" परिहासे,केलौ च । प्रा० ४ पाद ।

नम्मया–नर्मदा–स्त्री० । विन्ध्याद्रिनिर्गतायां प्रसिद्धनद्याम्, " मेअलकन्ना य नम्मया रेवा । " को० १३० गाथा । आव० ।

नम्रता–स्त्री० । औचित्ये, नमनशीलतायाम्, द्वा० १२ द्वा० ।

नयण–नयन–न० । प्रापणे, आ० म० १ अ० १ खण्ड । निवेशने, पं० सं० ५ द्वार । नेत्रे, " अच्छि नयणं च लोअणं नित्तं । " को० १११ गाथा ।

नयणजल–नयनजल–न० । नेत्रजले, "छप्फं वाहो य नयणजलं । " को० ११२ गाथा ।

नयणा–स्त्री०–नयन–न० । "वाऽद्यर्थवचनाऽऽद्याः " ॥ ८ । १ । ३३ ॥ इति नयनशब्दस्य प्राकृते स्त्रीत्वमपि । 'नयणा–नयणाइं' प्रा० १ पाद ।

नर–नर–पुं० । पुरुषे, प्रा० १ पाद । आचा० । आ० म० । " मणुआ नरा मणुस्सा, मच्चा तह माणवा पुरिसा । " को० ६० गाथा । (नराणां भेदाः ' णर ' शब्देऽस्मिन्नेव भागे १६०३ पृष्ठे उक्ताः)

नरणाह–नरनाथ–पुं० । राजनि, " नरनाहो पत्थिओ निवो राया । " को० १०० गाथा ।

नल–नर–" रसोर्लशौ " ॥ ८ । ४ । २७८ ॥ इति मागध्यां रस्य लः । नले, प्रा० ४ पाद ।

नलय–नलक–न० । कमलतन्तौ, " नलयं बामंजयं उसीरं च । " को० १४६ गाथा ।

नलिण–नलिन–न० । कमले, " अंबुरुहं सयवत्तं, सरोरुहं पुंडरीअमरविंदं । राईवं तामरसं, महुप्पलं पंकयं नलिणं ॥१०॥" को० १० गाथा । (अस्य बहवोऽर्थाः ' णलिण ' शब्देऽस्मिन्नेव भागे १७२८ पृष्ठे दर्शिताः)

नलिणी–नलिनी–स्त्री० । कमलिन्याम्, " भिसिणी नलिणी कमलिणी य । " को० १४७ गाथा । पद्मिन्याम्, ज्ञा० १ श्रु० १ अ० ।

नवरंग–नवरङ्ग–त्रि० । " रङ्गायं च नवरंगं । " को० २६१ गाथा ।

नवरि–अव्य० । शीघ्रे, " सयराहं नवरि य छु-त्ति झत्ति सहसत्ति इक्कसरिअं च । अविहाविअं-मिक्कवए,अतक्कियं तक्खणं सहसा ॥ १७ ॥ " को० १७ गाथा ।

नवसिअ–नमस्थित–त्रि० । नमस्कारकर्तरि, " ओवाइअं नवसिअं । " को० १२६ गाथा ।

नह–नख–पुं० । पाणिपादजे, प्रव० ४० द्वार । " नक्खा नहा करुहा । " को० १०६ गाथा ।

नभस्–न० । आकाशे, एकार्थिकानि–" खं अब्भं अंतरिक्खं, वोमं नह-मंबरं गयणं । " को० २७ गाथा ।

नाअ–नाक–पुं० । स्वर्गे, " तिविहपं तह सुरालओ नाओ । " को० ६५ गाथा ।

ज्ञात–त्रि० । अवबुद्धे, प्रा० ४ पाद ।

नाइ–नाइ–अव्य० । " इवार्थे नं-नउ-नाइ-नावइ-जणि-जणवः " ॥ ८ । ४ । ४४४ ॥ इति इवार्थे 'नाइ' आदेशः । "वलयावलिनिवणभय-ण घण उक्कुभुम जाइ । वल्लहविरहमहादहच, थाह गवसेइ नाइ ॥१॥" नायिका वलयावलिनिष्क्रमनभयेन कूर्परेचुज्जा याति । "नाइ" उत्प्रेक्ष्यते-वल्लभविरहमहाह्रदस्य स्ताघं गवेषयतीत्यर्थः । प्रा० ४ पाद ।

नाम–नामन्–न० । अन्यबोधाय कृते पदार्थानां संज्ञायाम्, " सन्ना गुत्तं च नाम अभिहाणं । " को० १६१ गाथा । (नाम्नो भेदा ' णाम ' शब्देऽस्मिन्नेव भागे १९७ पृष्ठे दर्शिताः)

नारी–नारी–स्त्री० नरस्त्रियाम्, वृ० ४ उ० । " पुरिसाणं नो अम्मो परिसो अरी अत्थि त्ति नारी उ । " तं० । (व्याख्या ' णारी ' शब्देऽस्मिन्नेव भागे २०१३ पृष्ठे गता)

एकार्थिकानि–

" रामा रमणी सीमं-तिणी बहू वामलोअणा विलया ।
महिला जुवई अबला, निअंबिणी अंगणा नारी ॥ १२ ॥ "

तद्भेदेऽप्येकार्थिकानि–

" सच्छंदा उद्दामा, निरग्गला मुक्कला विसंखलया ।
निरवग्गहा य सइरा, निरंकुसा हुंति अप्पवसा ॥ १३ ॥ "
को० १२-१३-गाथा ।

नारुट्ट–नारुट्ट–पुं० । कूसारे, को० १३२ गाथा । दे० ना० ।

नालिअ–मूढ–त्रि० । " शीघ्राऽऽदीनां वहिल्लाऽऽदयः " ॥ ८ । ४ । ४२२ ॥ इत्यन्तर्गणसूत्रेण मूढस्य नालिआऽऽदेशः । मूर्खे, बाले, जमे, प्रा० । "जो पुण ममणि जि खसफसिहूअउ, चिंतइ देइ न दम्मुन रूअउ । रइ-वस-भमिरु करग्गुल्लालिउ,घरहिं जि कोंतु गुणइ सो नालिउ ॥ १ ॥ " यः पुनर्मनस्येव (खसफसिहूअउ) व्याकुलीभूतः सन् चिन्तयति-द्रम्मं न ददाति न रूपकम्, स मूढो रतिवशेन भ्रमणशीलः सन् कराग्रोल्लालितं कुन्तं भल्लं गृहे एव गुणयति, चालयतीत्यर्थः । प्रा० ४ पाद ।

नालिआ–नालिका–स्त्री० । समयनियामके यन्त्रविशेषे, " नालिया घडिआ । " को० २७२ गाथा । ज्यो० । अनु० । (नालिका किंप्रमाणेत्यादि सर्वा वक्तव्यता ' णालिया ' शब्देऽस्मिन्नेव भागे २०१४ पृष्ठे गता)

नालिका–स्त्री० । ताम्राऽऽदिमयघटिकायाम्, अनु० ।

नावइ–नावइ–अव्य० । इवार्थे, " इवार्थे नं-नउ-नाइ-नावइ-जणि-जणवः " ॥ ८ । ४ । ४४४ ॥ इति इवार्थे नावइ आदेशः । "पेक्खेविणु मुहु जिणवरहो, दीहरनयण सलोणु । नावइ गुरुमच्छरभरिउ,जलणि पवीसइ लोणु ॥१॥" 'नावइ' इत्प्रेक्ष्यते, गुरुमत्सरभृतं लवणं ज्वलने प्रविशति, किं कृत्वा ?, जिनवरस्य दीर्घनयनं सलवणं सलावण्यं मुखं प्रेक्ष्येत्यर्थः । प्रा० ४ पाद ।

नास–नाश–पुं० । अभावे, द्रव्या० ६ अध्या० । (अस्य भेदप्रतिपादनं ' णास ' शब्देऽस्मिन्नेव भागे २०१५ पृष्ठे गतम्) " पलयो निहणं नासो । " को० १६७ गाथा ।

नाशि–नश–धा० । णिच्-विघाते, "स्वराणां स्वराः" ॥ ८ । ४ । २३८ ॥ इति ह्रस्वाकारस्थाने दीर्घाऽऽकारः । प्रा० ४ पाद ।

नासइ–नश्यति–धा० । " नशेर्विउम-नासव-हारव-विप्पगाल-पलावाः " ॥ ८ । ४ । ३१ ॥ इति नशेर्यन्तस्य नासाऽऽदेशः । 'नासइ ।' नाशयति । प्रा० ४ पाद ।

नासा–नासा–स्त्री० । घ्राणग्रहणेन्द्रिये, " नासा घाणं घोणा । " को० १११ गाथा ।

निअंब–नितम्ब–पुं० । कटिपश्चाद् भागे, कटके च । पाच० । " रमणंतियं निअंबो । " को० ११५ गाथा ।

निअंबिणी–नितम्बिनी–स्त्री० । स्त्रियाम्, को० १२ गाथा । (अस्यैकार्थिकानि ' नारी ' शब्दे गतानि)

निअंसण–निवसन–न० । परिधाने, औ० । जीवा० । उत्त० । कटीवस्त्रे, " जाण सिचयं कडिल्लं, निअंसणं साडुली य परिदृणयं । " को० ६६ गाथा ।

निअकल–निअकल्ल–त्रि० । गोह्याऽऽकारे, "पेढाल–निअकल्ल–बहुलाइं परिमंसलत्थंमि । " को० ७४ गाथा । दे० ना० ।

निअगुणसलाहा–निजगुणश्लाघा–स्त्री० । स्वगुणप्रशंसायाम्, " विगत्थणं निअगुणसलाहा ।" को० १४७ गाथा ।

निअत्त–निवृत्त–त्रि० । " निवुत्तवृन्दारके वा " ॥ ८।१।१३२॥ इति ऋत वृद्धा । 'निवुत्तं । निअत्तं ।' विरते, प्रा० १ पाद ।

निअय–नियत–त्रि० । नियमिते, "निअं निअयं सासयं ।" को० १६० गाथा । सूत्र० । ध्रु० । (' निच्च ' शब्देऽस्य बहून्येकार्थिकानि (१५३) गाथार्द्धेन प्रतिपादितानि)

निअय–त्रि० । स्वकीये, " अप्पुल्लयं निअयं । " को० २३१ गाथा । आव० ।

निअर–निकर–पुं० । समुदाये, को० १८–१९–गाथा । (अस्यैकार्थिकानि ' निउरंब ' शब्दे वक्ष्यते)

निअलिअ–निगडित–त्रि० । बद्धे, " बद्धं संदाणिअं निअलिअं च ।" को० १६७ गाथा ।

निआण–निदान–न० । आदिकारणे, को० १७६ गाथा । (अत्र विशेषः ' णियाण ' शब्देऽस्मिन्नेव भागे २०६४ पृष्ठे गतः)

निउंचिअ–निकुञ्चित–त्रि० । संकुचिते, " संकोडिअं निउंचिअं । " को० १८६ गाथा ।

निउण–निपुण–त्रि० । कुशले, " चतुरा निउणा कुसला, वेआ विउसा बुहा य पत्तट्ठा ।" को० ६० गाथा । (अस्य शब्दस्य बहवोऽर्थाः ' णिउण ' शब्देऽस्मिन्नेव भागे २०१७ पृष्ठे दर्शिताः)

निगुण–त्रि० । नियतगुणे, विशे० ।

निउरंब–निकुरम्ब–पुं० । समूहे, एकार्थिकानि–" उप्पंको उप्पीलो, उक्केरो पहयरो गणो पयरो । ओहो निवहो संघो, संघाओ संहरो निअरो ॥ १८ ॥ संदोहो निउरंबो, भरो निहाओ ।" को० १८–१९–गाथा । औ० । रा० । जी० ।

निक्किव–निष्कृप–त्रि० । निर्दये, " निरंधसा निसंसा, निच्चुड्ढा निक्किवा अकरुणा य ।" को० ७३ गाथा । पं० व० । (अस्य लक्षणं ' खिक्किव ' शब्देऽस्मिन्नेव भागे २०२२ पृष्ठे द्रष्टव्यम्)

निक्खय–निक्षत–त्रि० । ' णिक्खय ' शब्दार्थे, को० २४० गाथा । दे० ना० ।

निक्खित्त–निक्षिप्त–त्रि० । " णिक्खित्त ' शब्दार्थे, " निमिअं निहिअं च निक्खित्तं ।" को० १६३ गाथा ।

निग्गहट्ठाण–निग्रहस्थान–न० । वादकाले वादी प्रतिवादी येन निगृह्यते तन्निग्रहस्थानम् । सूत्र० १ श्रु० १२ अ० । वादिवक्तव्यार्थके प्रतिज्ञाहान्यादौ, स्था० १ ठा० । विप्रतिपत्तिः, अप्रतिपत्तिश्च निग्रहस्थानम् । तत्र विप्रतिपत्तिः साधनाभासे साधनबुद्धिर्दूषणाभासे च दूषणबुद्धिरिति । अप्रतिपत्तिः साधनस्यादूषणं, दूषणस्य चानुद्धरणम् । तच्च-निग्रहस्थानं द्वाविंशतिविधम । तद्यथा-प्रतिज्ञाहानिः १, प्रतिज्ञाऽन्तरम् २, प्रतिज्ञाविरोधः ३, प्रतिज्ञासंन्यासः ४, हेत्वन्तरम् ५, अर्थान्तरम् ६, निरर्थकम् ७, अविज्ञातार्थकम् ८, अपार्थकम् ९, अप्राप्तकालम् १०, न्यूनम् ११, अधिकम् १२, पुनरुक्तम् १३, अननुभाषणम् १४, अज्ञानम् १५, अप्रतिभा १६, विक्षेपः १७, मतानुज्ञा १८, पर्यनुयोज्योपेक्षणम् १९, निरनुयोज्यानुयोगः २०, अपसिद्धान्तः २१, हेत्वाभासाश्च २२ । तत्र १-हेतावनैकान्तिकीकृते प्रतिदृष्टान्तधर्मं स्वदृष्टान्तेऽभ्युपगच्छतः प्रतिज्ञाहानिर्नाम निग्रहस्थानम् । यथा-अनित्यः शब्द ऐन्द्रियकत्वाद् घटवदिति प्रतिज्ञासाधनाय वादी वदन् परेण सामान्यमैन्द्रियकत्वमपि नित्यं दृष्टमिति हेतावनैकान्तिकीकृते यद्येवं ब्रूयात्–सामान्यवद् घटोऽपि नित्यो भवत्विति । स एवं ब्रुवाणः शब्दाऽनित्यत्वप्रतिज्ञां जह्यात् १। २-प्रतिज्ञातार्थप्रतिषेधे परेण कृते तत्रैव धर्मिणि धर्मान्तरं साधनीयमभिदधतः प्रतिज्ञान्तरं नाम निग्रहस्थानं भवति । अनित्यः शब्द ऐन्द्रियकत्वादित्युक्ते तत्रैव सामान्येन व्यभिचारे चोदिते यदि ब्रूयात्युक्तं सामान्यमैन्द्रियकं नित्यम्, तद्धि सर्वगतम्, असर्वगतस्तु शब्द इति । तदिदं शब्दे अनित्यत्वलक्षणपूर्वप्रतिज्ञातः प्रतिज्ञाऽन्तरमसर्वगतः शब्द इति निग्रहस्थानम् । अनया दिशा शेषाण्यपि विंशतिर्ज्ञेयानि २ । स्था० । (३- प्रतिज्ञाविरोधविवेचनम्–' पइण्णाविरोह ' शब्दे) । (४- प्रतिज्ञासंन्यासविवरणम्–' पइण्णासंण्णास ' शब्दे पञ्चमभागे दर्शयिष्यते) । (५- हेत्वन्तरव्याख्या–' हेउअंतर ' शब्दे द्रष्टव्या) । ६–" प्रकृतादर्थादप्रतिसम्बद्धार्थमर्थान्तरम् ७ " । गौ० सू० । यथोक्तलक्षणे पक्षप्रतिपक्षपरिग्रहे हेतुतः साध्यसिद्धौ प्रकृतायां ब्रूयात्–नित्यः शब्दोऽस्पर्शत्वादिति हेतुः । हेतुर्नाम हिनोतेर्धातोस्तुनि प्रत्यये कृदन्तपदं, पदं च नामाऽऽख्यातोपसर्गनिपाताः । अभिधेयस्य क्रियाऽन्तरयोगाद्विशिष्यमाणरूपः शब्दो नाम,क्रियाकारकसमुदायः कारकसंख्याविशिष्टक्रियाकालयोगाभिधाय्याख्यातं, धात्वर्थमात्रं च कालाभिधानविशिष्टं,योगेष्वर्थादभिद्यमानरूपा निपाताः, उपसृज्यमानाः क्रियावद् द्योतका उपसर्गा इत्येवमादि, तदर्थान्तरं वेदितव्यमिति । भा० । (अस्य ' अत्थंतर ' शब्देऽपि, प्रथमभागे ५०७ पृष्ठे किञ्चिद्वक्तव्यमस्ति) (७-निरर्थकविवेचनम्–' निरत्थय ' शब्देऽग्रे २७७५ पृष्ठे वक्ष्यते) (८–" परिषत्प्रतिवादिभ्यां त्रिरभिहितमप्यविज्ञातमविज्ञातार्थम् ९ ।" गौ० सू० । यद्वाक्यं परिषदा, प्रतिवादिना च त्रिरभिहितमपि न विज्ञायते क्लिष्टशब्दमप्रतीतप्रयोगमतिद्रुतोच्चारितमित्येवमादिना कारणेन तदविज्ञातमविज्ञातार्थमसामर्थ्यसंवरणाय प्रयुक्तमिति निग्रहस्थानम् । ज्ञा० (सूत्रस्याऽस्य वृत्तिर्ग्रन्थतोऽवसेया) । (९–"पौर्वापर्ययोगादप्रतिसंबद्धार्थमपार्थकम् १०" गौ० सू० । यत्रानेकस्य पदस्य,वाक्यस्य वा पौर्वापर्येणान्वययोगो नास्तीत्यसम्बद्धार्थकत्वं गृह्यते, तत्समुदायोऽर्थस्यापायादपार्थकम् । यथा-दश दाडिमानि,षडपूपाः,कुण्डमजाजिनं पललपिण्डः,अथ रौरुकमेतत् कुमार्याः पाय्यं, तस्याः पिता अप्रतिशीन इति । भा० । (ग्रन्थादेव वृत्तिर्विलोक्या)

१०-"अवयवविपर्यासवचनमप्राप्तकालम् ११"। गौ०सू०। प्रतिज्ञाऽऽदीनामवयवानां यथालक्षणमर्थवशात् क्रमः, तत्रावयवविपर्यासेन वचनमप्राप्तकालसम्बन्धार्थकालं निग्रहस्थानमिति। भा० अप्राप्तकालं लक्षयति अवयवस्य कथैकदेशस्य विपर्यासो वैपरित्यम्। तथा च समयबन्धविपर्ययीभूतक्रमविपरीतक्रमेणाऽभिधानं पर्यनुयोज्यम्, तत्रायं क्रमः-वादिना साधनमुक्त्वा सामान्यतो हेत्वाभास उद्धरणीय इत्येकः पादः। प्रतिवादिनश्च तत्रापाकरणं द्वितीयः पादः। प्रतिवादिनः स्वपक्षसाधनं, तत्र हेत्वाभासोद्धरणीयश्चेति तृतीयः पादः। जयपराजयव्यवस्था चतुर्थः पादः। एवं प्रतिज्ञाहेत्वादीनां क्रमः। तत्र समाक्रोमव्यामोहाऽऽदिना व्यत्यस्ताभिधानमप्राप्तकालमिति वृत्तिः ॥ ११ ॥ (न्यूनव्याख्या-'न्यून' शब्देऽनुपदमेव २७७७ पृष्ठे करिष्यते) (१२-अधिकव्याख्या 'अहिय' शब्दे प्रथमभागे ८८७ पृष्ठे गता) (१३-पुनरुक्तविषयः 'पुणरुत्त' शब्दे द्रष्टव्यः)। १४-"विज्ञातस्य परिषदा त्रिरभिहितस्याप्यनुच्चारणमननुभाषणम् १७"। गौ० सू०। विज्ञातस्य वाक्यार्थस्य परिषदा प्रतिवादिना त्रिरभिहितस्य यदप्रत्युच्चारणं तदननुभाषणं नाम निग्रहस्थानमिति, अप्रत्युच्चारयन् किमाश्रयं परपक्षप्रतिषेधं ब्रूयात्। भा०। अननुभाषणं लक्षयति-परिषदा विज्ञातस्य विशिष्य बुद्ध्यर्थस्य वादिना त्रिभिरभिहितस्य तथा च प्रथमवचनेऽननुभाषणे वादिना वारत्रयं वाक्यमिति दर्शितम्, तथा च त्रिभिरभिधानेऽपि यत्रानुभाषणविरोधी व्यापारः,तत्राननुभाषणं निग्रहस्थानमित्यर्थः। (अत्रत्याऽवशिष्टा वृत्तिस्तु ग्रन्थतोऽवसेया) १५-"अविज्ञातं चाऽज्ञानम् १८"। गौ०सू०। विज्ञातार्थस्य परिषदा प्रतिवादिना त्रिरभिहितस्य यदविज्ञानं तदज्ञानं निग्रहस्थानमिति। अयं खल्वविज्ञाय कस्य प्रतिषेधं ब्रूयादिति। (पुनरस्य वक्तव्यं 'अजाण' शब्दे प्रथमभागे ४८७ पृष्ठेऽप्यस्ति)। १६-"उत्तरस्याप्रतिपत्तिरप्रतिभा १९"। गौ०सू०। परपक्षप्रतिषेधः उत्तरं तद् यदा न प्रतिपद्यते तदा निगृहीतो भवति। भा०। अप्रतिभां लक्षयति-उत्तरार्हेण परोक्तं बुध्वाऽपि यत्रोत्तरसमये उत्तरं न प्रतिपद्यते तत्राप्रतिभा निग्रहस्थानम्। न चात्राननुभाषणस्याऽवश्यकत्वात् ' तदेव दूषणमस्त्विति वाच्यम्। परोक्ताऽननुवादे हि तत् यत्र परोक्तमनूद्यापि नोत्तरं प्रतिपद्यते तत्रासाङ्कर्यात् स्वसूचनश्लोकपाठाऽऽद्यपेक्षा चेयमिति वृत्तिः। १७। (१७-विक्षेपो 'विक्खेव' शब्दे)। (१८-मतानुज्ञा-'मयाणुण्णा' शब्दे)। (१९-पर्यनुयोज्योपेक्षणं-'पज्जणुजुज्जुपेक्खण' शब्दे)। (२०-निरनुयोज्यानुयोगः ' निरणुजुज्जाणुओग ' शब्देऽग्रे वक्ष्यते) २१-" सिद्धान्तमभ्युपेत्यानियमात् कथाप्रसङ्गोऽपसिद्धान्तः २४ । " गौ० सू०। कस्यचिदर्थस्य तथाभावं प्रतिज्ञाय प्रतिज्ञातार्थविपर्ययादनियमात् कथां प्रसञ्जयतोऽपसिद्धान्तो वेदितव्यः यथा न सदात्मानं जहाति,न सतो विनाशो,नासदात्मानं लभते,नासदुत्पद्यत इति सिद्धान्तमभ्युपेत्य स्वपक्षं व्यवस्थापयति। एकप्रकृतीदं व्यक्तं विकाराणामन्वयदर्शनाद् मृदन्विताना शरावाऽऽदीनां दृष्टमेकप्रकृतिकत्वम। तथा चायं व्यक्तभेदः सुखदुःखमोहान्वितो दृश्यते, तस्मात् समन्वयदर्शनात् सुखाऽऽदिभिरेकप्रकृतीदं शरीरमिति एवमुक्तवानुपयुज्यते-अथ प्रकृतिविकार इति कथं लक्षितव्यमिति ?। यस्यावस्थितस्य धर्मान्तरनिवृत्तौ धर्मान्तरं प्रवर्त्तते सा प्रकृतिः, यच्च धर्मान्तरं प्रवर्त्तते स विकार इति। सोऽयं प्रतिज्ञातार्थविपर्यासादनियमात् कथां प्रसञ्जयति प्रतिज्ञातं खल्वनेन नासदाविर्भवति सत् तिरोभवतीति। सदसतोश्च तिरोभावाऽऽविर्भावमन्तरेण न कस्यचित्प्रवृत्तिः प्रवृत्युपरमश्च भवति, मृदि खल्ववस्थितायां भविष्यति शरावाऽऽदिलक्षणो धर्मान्तरमिति प्रवृत्तिर्भवति अभूदिति च प्रवृत्युपरमः तदेतन्मृच्छ्राणामपि न स्यात्। एवं प्रत्यवस्थितो यदि सतश्चाऽऽत्महानमसतश्चाऽऽत्मलाभमभ्युपैति, तदस्यापसिद्धान्तो निग्रहस्थानं भवति। अथ नाभ्युपैति पक्षोऽस्य न सिद्ध्यति। ज्ञा०। (वृत्तिर्ग्रन्थादेवावसेयेति) (२२-हेत्वाभासा ' हेत्वाभास ' शब्दे द्रष्टव्याः) गौ० सू० वा० ज्ञा० वि० बृ०।

निग्गिण्ण-निर्गीर्ण-त्रि०। निर्गीर्णे,"नीहरिअं निग्गिण्णं।" को० १६७ गाथा।

निग्घत्तिअ-निक्षिप्त-त्रि०। निक्षिप्ते, " खित्तं निग्घत्तिअं च आइट्ठं।" को० १८६ गाथा।

निच्च-नित्य-त्रि०। ' णिच्च ' शब्दार्थे, " सइ अविरय अविरामं, अणुवेलं संतयं सया निच्चं।" को० ८७ गाथा।

निच्चुड्ड-निच्चुड्ड-त्रि०। 'निक्किव' शब्दार्थे, को० ७३ गाथा।

निच्चूढ-उद्धृत्त-त्रि०। " क्तेनाप्रुषाऽऽदयः " ॥८। ४। २५८॥ इति उद्धृत्तस्थाने निच्चूढाऽऽदेशः। 'निच्चूढं। उद्धृत्तम्'। उक्तिसे, प्रा० ४ पाद।

निज्झर-निर्झर-न०। उदकप्रस्रवणे, भ० ५ श० ७ उ०। " ओज्झरं निज्झरं।" को०२१६ गाथा। क्षि-धातोस्तु 'णिज्झर' एव। स च णकाराऽऽदिसंकल्पने गतः। "क्षेर्णिज्झरो वा" ॥८। ४। २०॥ इति णकाराऽऽक्रान्त एव। प्रा० ४ पाद।

निज्झाय-दृश-धा०। प्रेक्षणे, " दृशो निअच्च-पेच्छावयच्छावयज्झ-वज्ज-सव्ववदेक्खौ अक्खावक्खावअक्ख-पुलोए-पुलएनिआवआस-पासाः ॥ ८। ४। १८१ ॥ " इति दृशः 'निज्झाय' आदेशः। 'निज्झाअइ।' पश्यति। प्रा० ४ पाद।

निट्ठुइअ-क्षरित-त्रि०। क्षरिते, " निट्ठुइअं खरिअं छिप्पिअं च नीसंदिअं च पज्झरिअं." को० ८० गाथा।

निट्ठुर-निष्ठुर-त्रि०। ' णिट्ठुर ' शब्दार्थे, " कढिणा य कक्कसा निट्ठु-रा खरा खप्पुरा फरुसा।" को० ७४ गाथा।

निमाल्ल-निर्माल्य-न०। " कपाले, ज्ञाले अलिअं निमालं। को०११२ गाथा। केचिदव्युत्पन्नमपि वदन्ति। लल्लाटशब्दस्य तु "ल्लाटे च" ॥ ८। १। २५७॥ इति सूत्रेण ललाटस्य णकाराऽऽदिरेवाऽऽदेशः। " णिमालं " । प्रा० १ पाद।

निम्म-नीम-न०। " नीडं निम्मं कुलायं च।" को०१२६ गाथा। पक्षिणां निलये, वाच०।

निम्मया-निम्नगा-स्त्री०। नदीगामिनि नद्याम्, को० २८ गाथा। प्रज्ञा०। ('नई' शब्देऽनुपदमेव विशेषो गतः)

नित्त-नेत्र-न०। नयने, स्था० १० ठा०। " अच्छी नयणं च लोअणं निसं।" को० १११ गाथा।

नित्थाम-निःस्थामन्-त्रि०। बलहीने, " ओलुग्गो नित्थामो।" को० १७० गाथा।

निद्दलिअ-निर्दलित-त्रि०। मर्दिते, "उच्चुण्णं मद्दिअं च निद्दलिअं।" को० २०१ गाथा।

निद्देस-निर्देश-पुं०। आज्ञायाम,"आएसो आसणं च निद्देसो।" को० १७३ गाथा। (अत्र बहु वक्तव्यं 'णिद्देस' शब्देऽस्मिन्नेव

भागे २०७२ पृष्ठे गतम्) (निर्देशनिक्षेपः, तत्स्वरूपं च 'उद्देस' शब्दे द्वितीयभागे ७६६ पृष्ठे गतम्)

निद्धंधस–निर्धन्धस–त्रि० । निर्दये, को० ७३ गाथा । (अस्यैकार्थिकानि " निक्किव " शब्देऽनुपदमेव गतानि)

निद्धामिअ–निर्धामित–त्रि० । निर्गते, " निद्धामिअं नीणिअं । " को० १७६ गाथा ।

निबंधण–निबन्धन–न० । कारणे, "निबंधणं कारणं निमाणं च ।" को० १७६ गाथा । विशे० । वाच० ।

निब्भर–निर्भर–त्रि० । अतिशयपूरिते, " निब्भर-महसयभरियं । " को० २१४ गाथा । वाच० । आ० म० ।

निब्भिण्ण–निर्भिन्न–त्रि० । विदारिते, " कप्परिअं दारियं च निब्भिण्णं । " को० १९६ गाथा ।

निमिअ–स्थापित–त्रि० । 'णिक्खित्त' शब्दार्थे, "क्तेनाप्फुणाऽऽदयः" ॥८।४।२५८॥ इति स्थापितस्य 'निमिअ' आदेशः । प्रा० ४ पाद । (अस्यैकार्थिकानि ' निक्खित्त ' शब्दे गतानि)

निम्मल्ल–निर्माल्य–न० । देवार्चाऽऽख्ये, वाच० । " सम्मालो निम्मल्लं । " को० १४१ गाथा । पिं० ।

निम्महिअ–निर्मथित–त्रि० । निराकृते, " मंथुग्गिरणम्मि निम्महिअं । " को० १६६ गाथा ।

निम्माण–निर्मा–धा० । विरचने, " निर्मो निम्माण-निम्मवौ " ॥ ८ । ४ ।१६॥ निर्पूर्वस्य मिमेतेरेतावादेशौ वा । निम्माणइ । निम्मइ । विरचयति । प्रा० ४ पाद ।

निम्माय–निर्मात–त्रि० निष्पन्ने, बृ० ६ उ० । " निव्वत्तिअं निम्मायं । " को० २०० गाथा ।

नियच्छिअ–निदर्शित–त्रि० । मिलिते, " सच्चविअ-दिट्ठ-सइअ-नियच्छियाइं निहालिअ-त्थम्मि । " को० ७८ गाथा ।

नियम–निकट–त्रि० । समीपे, अस्यैकार्थिकानि- " अब्भासं अब्भरणं, आसन्नं सविहमतिअं निअमं । " को० ६१ गाथा ।

निरंकुसा–निरङ्कुशा–स्त्री० । स्वतन्त्रस्त्रियाम्, को० १३ गाथा । (अस्यैकार्थिकाः ' नारी ' शब्दे गताः)

निरग्गला–निरर्गला–स्त्री० । स्वच्छन्दनार्याम्, को० १३ गाथा । (एतत् पर्यायाः ' नारी ' शब्दे गताः)

निरणुजुज्जाणुओग–निरनुयोज्यानुयोग–पुं० । विंशतितमे निग्रहस्थानभेदे, स्था० । " अनिग्रहस्थाने निग्रहस्थानाभियोगो निरनुयोज्यानुयोगः । " ५३ । गौ० सू० । निग्रहस्थानलक्षणस्य मिथ्याध्यवसायादनिग्रहस्थाने निगृहीतोऽसि परं ब्रुवन् निरनुयोज्यानुयोगाभिगृहीतो वेदितव्य इति । आ० । निरनुयोज्यानुयोगं लक्षयति—अवसरे यथार्थनिग्रहस्थानोद्भावनाऽतिरिक्तं यन्निग्रहस्थानोद्भावनं तदित्यर्थः । एतेनावसरे निग्रहस्थानोद्भावने एकनिग्रहस्थाने निग्रहस्थानान्तरोद्भावने च नाव्याप्तिः । सोऽयं चतुर्धा—बलं, जातिः, आभासोऽनवसरग्रहणं च । आभासो व्यभिचाराऽऽद्यासिद्ध्याद्युद्भावनम् । अनवसरग्रहणञ्चाकाले एवोद्भावनम् । यथा-त्यक्ष्यसि चेत् प्रतिज्ञाहानिः विशेषयसि चेत् हेत्वन्तरम् । एवमवसरमतीत्य कथनमपि यथा लक्ष्यमाणग्राह्यस्यापशब्दाऽऽदेः परिसमाप्तौ एवमनुक्तग्राह्याज्ञानाऽऽद्यननुभाषणावसरेऽनुद्भाव्य बोधाऽऽविष्करणानुभाषणप्रवृत्ते वादिनि तदुद्भावनमित्यादिकमूह्यमिति वृत्तिः । २३ । गौ० सू० वा० भा० वि० बृ० ।

निरत्थ (ग) य–निरर्थक–पुं० । सप्तमे निग्रहस्थानभेदे, स्था० । "वर्णक्रमनिर्देशवन्निरर्थकम् ।"८ गौ०सू० । यथा-नित्यः शब्दः कचटतपाः जबगडदशत्वात् झभञ्घढधष्त्वदिति एवं प्रकारं निरर्थकम् । अभिधानाभिधेयभावानुपपत्तौ अर्थगतेरनादाद् वर्णा एव क्रमेण निर्दिश्यन्त इति । भा० । निरर्थकं लक्षयति-वर्णानां क्रमेण निर्देशो जबगडेत्यादिप्रयोगः,तत्तुल्यो निर्देशो निरर्थकं निग्रहस्थानम्, अवाचकपदप्रयोग इति फलितार्थः । वाचकत्वं शक्त्या,निरूढलक्षणया,शास्त्रपरिज्ञानया वा बोध्यम् । समयबन्धव्यतिरेकेणेति विशेषणीयं, तेन यत्रापभ्रंशेन विचारः कर्त्तव्य इति समयसम्बन्धस्तत्रापभ्रंशे न दोषः,ऋदिति संवरणे तु न दोष इत्युक्तप्रायम् । अस्य सम्भवः प्रमादादित्यवधेयमिति वृत्तिः । ७ । गौ० सू० वा० भा० वि० बृ० । बृ० । उत्त० । विशे० ।

निरवग्गहा–निरवग्रहा–स्त्री० । स्वच्छन्दविहारिण्यां रमायाम्, को० १३ गाथा । (पर्यायाश्चास्य ' नारी ' शब्दे गताः)

निराय–निराय–त्रि० । सरले, " पउणं निरायं उज्जुयं । " को० १७५ गाथा ।

निरोह–निरोध–पुं० । तापे, " धम्मो तावो दाहो, तम्हा तवइं निरोहो य । " को० ४६ गाथा । (अस्यान्येऽप्यर्थाः ' णिरोह ' शब्देऽस्मिन्नेव भागे २२१६ पृष्ठे गताः)

निलय–निलय–पुं० । गृहे, उत्त० ३२ अ० । को० । (अस्यैकार्थिकाः ' निहेलण' शब्दे वक्ष्यन्ते)

निल्लीण–निलीन–त्रि० । लीने, " परिलीणं च निल्लीणं । " को० १६६ गाथा ।

निव–नृप–पुं० । "इक्कृपाऽऽदौ" ॥ ८ । १ । १२८ ॥ इति आदेर्ऋत इत्वम् । 'निवो ।' प्रा० १ पाद । राजनि, को० १०० गाथा । नि० चू० । आचा० । बृ० । (अस्य पर्यायाः ' नरणाह ' शब्दे ऊह्याः)

निवह–निवह–पुं० । सङ्घाते, को० १५ गाथा । (अस्य पर्यायाः ' निउरंब ' शब्दे) (गम-नशोस्तु णकाराऽऽक्रान्त एवादेशः 'णिवह ' इति) (निवह-णिवह-शब्दयोस्तुल्यार्थत्वम्)

निव्व–नीव्र–न० । पटले, " निव्वं पडलं । " को० २११ गाथा । कङ्कुदे, दे० ना० ५ वर्ग ४८ गाथा ।

निव्वमिअ–निष्पतित–त्रि० । कृते, को० १९६ गाथा । (अत्र पर्यायविषये ' निम्माय ' शब्दो विलोकनीयः)

निव्वल्ल–निर्वल्ल–त्रि० । निर्गतं बलं सामर्थ्यं यस्येति निर्बलम्, " निरः पदेर्बलः "॥८।४।१२०॥ निर्पूर्वस्य पदेर्बल्ल इत्यादेशः । ' निव्वल्लइ । ' पक्षे निप्पज्जइ निस्सारे, प्रा० ४ पाद ।

निव्वाण–निर्वाण–न० । मोक्षे, पर्यायाः-" सोअमणं परमपयं, मुत्ती सिद्धी सिवं च निव्वाणं । " को० २० गाथा । (अत्र विशेषः ' णिव्वाण ' शब्देऽस्मिन्नेव भागे २१२१ पृष्ठादारभ्य ऊह्य पर्यालोचितः)

निव्विट्ठ–निर्विष्ट–त्रि० । उपयुक्ते, " निव्विट्ठं उवउत्तं । " को० १७७ गाथा । अनुपारिहारिके, स्था० ३ ठा० ४ उ० । उचिते, दे० ना० ४ वर्ग ३४ गाथा ।

निसंस-नृशंस-त्रि० । " शषोः सः " ॥ ८ । १ । २६० ॥ इति शस्य सः । ' निसंसो ।' क्रूराचारदृष्टे, प्रा० १ पाद । क्रूरे, को० ७३ गाथा । (अस्य पर्यायाः ' निक्किव ' शब्दे गताः)

निसा-निशा-स्त्री० । रात्रौ, हरिद्रायाम्, कृ० ५ उ० । वाच० । निशाशब्दपर्यायाः-" रयणी विहावरी स-व्वरी निसा जामिणी राई । " को० ४७ गाथा ।

निसाअर-निशाचर-पुं० । रात्रिचरे, " इः सदादौ वा " ॥ ८ । १ । ७२ ॥ इति ह्रस्वपक्षे-'निसिअरो ।' प्रा० १ पाद । वाच० । " अवर्णो यश्रुतिः " ॥ ८ । १ । १८० ॥ इति यश्रुतौ 'निसायरो ।' अस्य प्राथिकत्वपक्षे-'निसाअरो ।' प्रा० १ पाद ।

निसामिअ-निशामित-त्रि० । श्रविते, को० १८४ गाथा ।

निसामिअय-निशामितक-त्रि० । आकर्णिते, "निसुअं आयण्णिअं निसामिअयं । " को०१७४ गाथा । दे० ना० ।

निसायंत-निशातान्त-न० । तीक्ष्णधारविशिष्टे, " अच्छायंतं निसायंतं । " को० २७० गाथा ।

निसाय-निशात-त्रि० । तीक्ष्णीकृते, "तिक्खाभिअं निसाअं ।" को० २०० गाथा ।

निसायर-निशाकर-पुं० । चन्द्रे, "इंदू निसायरो ससहरो विहू गहवई रयणिनाहो । मयलंछणो हिमयरो, रोहिणिरमणो ससी चंदो ॥ ५ ॥ " को० ५ गाथा । रात्रिचरे, वाच० । " कगचज० " ॥ ८ । १ । १७७ ॥ इत्यादिना कलोपे " अवर्णो यश्रुतिः " ॥ ८ । १ । १८० ॥ इति यश्रुतिः । 'निसायरो ।' प्रा० १ पाद ।

निसीढ-निशीथ-पुं० । " निशीथपृथिव्योर्वा " ॥ ८ । १ । २१४ ॥ इति थस्य ढो वा । 'निसीढो निसीहो ।' अर्द्धरात्रे, रात्रिमात्रे च । प्रा० १ पाद ।

निसुअ-निश्रुत-त्रि० । आकर्णिते, " निसुअं आयण्णिअं निसामिअं । " को० १८४ गाथा । दे० ना० ।

निसुदिअ-नत-त्रि० । भारनम्रे, " निसुदिअं भरकंतभरोणयं । " को० १६४ गाथा ।

निसुद्ध-निशुद्ध-त्रि० । शुद्धे, " ओसक्कं पासिअं निसुद्धं च । " को० १९४ गाथा ।

निसेह-निषेध-पुं० । " निषेधेर्हक्कः " ॥ ८ । ४ । १३४ ॥ इति निषेधेर्हक्कादेशो वा । 'हक्कइ,निसेहइ ।' प्रतिषेधे,प्रा०४ पाद ।

निस्स-निःस्व-त्रि० । निर्धने, " दोरो अकिंचणो दुग्गओ दरिद्दो य दुग्गओ निस्सो । " को० ३५ गाथा ।

निस्सेणि-निःश्रेणि-स्त्री० । अधिरोहण्याम्, " अधिरोहणिआ य निस्सेणी । " को० १२० गाथा ।

निह-निभ-न० । छले, " छद्मं अवएसो निहं च मिसं । " को० १४२ गाथा । सदृशे, आ०म० १ अ० । मायिनि, सूत्र०१ श्रु०६ अ० । क्रोधाऽऽदिभिः पीडिते, सूत्र० १ श्रु० २ अ० १ उ० । आघातस्थाने, सूत्र० १ श्रु० ५ अ० २ उ० ।

स्निह-त्रि० । रागवति, आचा० १ श्रु० ४ अ० ३ उ० । रागद्वेषयुक्ते, आचा० १ श्रु० ५ अ० ३ उ० । ममत्वसहिते, सूत्र० १ श्रु० २ अ० २ उ० ।

निहण-निधन-न० । प्राणत्यागे, " पत्तयो निहणं नासो । " को० १६७ गाथा ।

निहय-निहत-त्रि० । मारिते, उत्त० १२ अ० । भावरिपुमिरिन्द्रियकषायकर्मनिर्हन्यमाने, आचा० १ श्रु० ४ अ० ३ उ० । " निहयं निक्खयं । " को० २४० गाथा ।

निहस-निकष-पुं० । " निकष-स्फटिक-चिकुरे हः " । ८ । १ । १८६ ॥ इति कस्य हः । प्रा० १ पाद । " शषोः सः " । ८ । १ । २६० ॥ इति षस्य सः । प्रा० १ पाद । कषपट्टरेखायाम्, प्रज्ञा० १७ पद २ उ० । " निहसो कसो । " को० ३६३ गाथा ।

निहाअ-निघात-समूहे, को० १६ गाथा । दे० ना० । (अस्यपर्यायाः ' निहरंघ ' शब्दे गताः)

निहालिअ-निभालित-त्रि० । दृष्टे, " सच्चविअ-दिट्ठ-पुलइअ-निअच्छिआइं निहालिअ-त्थमि । " को० ७८ गाथा ।

निहिअ-निहित-त्रि० । स्थापिते, "निमिअं निहिअं च निक्खित्तं ।" को०१९३ गाथा । नि-धा-क्तः । " सेवाऽऽदौ वा " ॥ ८ । २ । ६६ ॥ इति तद्धित्वं वा । निहित्तं । पक्षे-तो लोपः । प्रा० २ पाद । निक्खित्ते, पञ्चा० १० विव० ।

निहिनाथ-निधिनाथ-पुं० । कुबेरे, " वेसमणो निहिनाहो, जक्खाहिवई कुबेरो य । " को० २४ गाथा ।

निहुअ-निभृत-त्रि० । " उदृत्वादौ " । ८ । १ । १३१ ॥ ऋतुइत्यादिषु शब्देषु आदेर्ऋत उत्वम् । प्रा० १ पाद । तदर्थमनुद्युक्ते, सूत्र० १ श्रु० ८ अ० । निश्चेष्टे, बृ० ३ उ० । निश्चले, उत्त० १६ अ० । अलंप्रज्ञाने, कायस्थित्या उचितधर्मे, दश० ६ अ० । " मसिणं सणिअं मट्ठं, मंदं अलसं जडं मराल च । खेड्डं निहुअं सइरं, वीसत्थं मंथरं थिमिअं ॥१५॥" को०१५ गाथा ।

निहेलण-निलय-पुं० । " गोणाऽऽदयः " ॥ ८ । २ । १७४ ॥ इति निलयस्थाने ' निहेलण ' आदेशः । गृहे, प्रा० २ पाद । " भवणं घर-मावासो, निलयो वसही निहेलणमगारं । " को० ४६ गाथा ।

नीअ-नीत-त्रि० । गते, " हिअं नीअं । " को० २६७ गाथा ।

नीच-त्रि० । अत्यन्तावनतकन्धरे, उत्त० १ अ० । उच्चविपरीते, स्था० ३ ठा० ४ उ० । अपूज्ये, भ० ३ श० १ उ० । निम्ने, नि० चू० १ उ० । नीचैः स्थाने, मालाऽऽदौ, उत्त० १ अ० । " अहमा इयरा य पायया नीआ । " को० १०३ गाथा ।

नित्य-त्रि० । सदाऽवस्थायिनि, स्था० १० ठा० ।

नीचअ-नीचैस्-अव्य० । नीचे, "उच्चैर्नीचैसि अअः" ॥८। १ । १५४ ॥ इति ऐतो अअ इत्यादेशः । ' नीचअं । ' अत्यल्पे, क्षुद्रे च । प्रा० १ पाद ।

नीड-नीड-न० । कुलाये, " निडुं नीमं कुलायं च । " को० १२६ गाथा । प्रा० ।

नीणिअ-नीणित-त्रि० । गते, " निक्कामिअं नीणिअं । " अव्युत्पन्न एवायं शब्दः । व्युत्पत्तिपक्षे तु-"णीणिअ" इत्येव णकाराऽऽक्रान्तो भविष्यतीति विशेषः । को० १७६ गाथा । स्वस्थाने प्रापिते, ज्ञा० १ श्रु० १६ अ० । उत्त० । सूत्र० ।

नीरंगी-नीरङ्गी-स्त्री० । शिरोऽवगुण्ठने, " नीरंगी अंगुट्ठी । " को० ११६ गाथा । दे० ना० ।

नीमी–नीवी–स्त्री० । " स्वप्ननीव्योर्नो ॥ ८ । १ । २५६ ॥ इति वस्य मो वा । 'नीमी,नीवी' मूलधने, वस्त्रे च । प्रा० १ पाद ।

नीर–नीर–न० । जले, " अंबु सलिलं वणं वारि, नीरं उदयं दयं पयं तोयं । " को० २८ गाथा । दर्श० ।

नीलकंठ–नीलकण्ठ–पुं० मोरे, "मोरो सिही बरहिणो, सिहंडी नीलकंठो य । " को० ४२ गाथा । शक्रस्य देवेन्द्रस्य महिषानीकाधिपतौ, स्था० ४ ठा० २ उ० ।

नीलुप्पल–नीलोत्पल–न० । नीलकमले, "नीलुप्पलं वियाणह, कुवलयं इंदीवरं च कंदुट्टं । " को० ३६ गाथा । कुवलये, जं० १ वक्ष० । उपा० ।

नीव–नीप–पुं० । " पो वः " ॥ ८ । १ । २३१ ॥ स्वरात्परस्यासंयुक्तस्यानादेः पस्य प्रायो वो भवति । ' कासवो । पार्व । उवमा ।' प्रा० १ पाद । " कलंबो, नीवो । " को० २५५ गाथा ।

नीवी–नीवी–स्त्री० । वस्त्रग्रन्थौ, " उग्गट्ठी उच्चओ नीवी । " को० १७५ गाथा । मूलधने, वाच० ।

नीसंदिअ–निःष्यन्दित–त्रि० । निष्पतिते, "निट्ठुअ खिरिअं छिप्पिअं, च नीसंदिअं च पब्भरिअं । " को० ८० गाथा ।

नीसामन्न–निःसामान्य–पुं० । गाम्भीर्ययुक्ते, " नीसामन्ना गरुआ । " को० १०३ गाथा ।

नीहरिअ–निःसृत–त्रि० । निर्गीर्णे, "नीहरिअं निग्गिण्णं " १६७ गाथा । दे० ना० ।

नीहार–नीहार–पुं० । मूत्रपुरीषोत्सर्गे, स० ३४ सम० । " धूमिकायाम्, " सिरहा नीहारो धूमिआ य महिआ य धूममहिसी य । " को० २८ गाथा ।

नु–नु–स्त्री० स्तुतौ, "प्रस्तुते वा परिशिष्टे, शुद्धे निर्णेतरि स्मृतः। नुः स्त्रियां तु स्तुतौ ।" एका० ५४ श्लोक । नुः स्तुतौ दीर्घ ह्रस्वस्त्री । वारिणि, पृच्छायां, वितर्के, एका० ७८ श्लोक ।

नुन्न–नुन्न–त्रि० । मिश्रयुतार्थे, " नुन्नशब्दस्त्रिलिङ्गः स्यान्मिश्रयुतार्थस्य वाचकः । " एका० ५५ श्लोक ।

नू–नू–पुं० । दर्पे, "नूदर्पेऽपि तथेदितः ।" एका० ७७ श्लोक। "नूशब्दः पातके पुंसि, यायौ क्लीबे । " एका० ७६ श्लोक ।

नून–न्यून–न० । एकादशे निग्रहस्थानभेदे, स्या० । " हीनमन्यतमेनाप्यवयवेन न्यूनम् " १२। गौ०सू० । प्रतिज्ञाऽऽदीनामवयवानामन्यतमेनाप्यवयवेन हीनं न्यूनं निग्रहस्थानं,साधनाभावे साध्यासिद्धिरिति । भा० न्यूनं लक्षयति-अवयवेन स्वशास्त्रसिद्धेन तेन सौगतस्य द्व्यवयवमभिधानेऽपि न न्यूनत्वम् । नन्वेवं त्रयवयवहीनत्वम्-अवयवत्वावच्छिन्नाभावः, तथा चाकथनमेव स्यादत आह-अन्यतमेनापीति । तथा च-यत्किञ्चिदवयवशून्यावयवाभिधानं फलितम् । नचायमपसिद्धान्तः, सिद्धान्तविरुद्धानभ्युपगमात्, अपि तु सभाद्यौभाऽऽदिनाऽनभिधानादिति वृत्तिः ॥ १२ ॥ गौ० सू० वा० भा० वि० वृ० ।

नूमिअ–छादित–त्रि० । प्रच्छादिते, "पच्छाइअ-नूमिआइं वहआइं ।" को० १७६ गाथा । " छदेर्णुम नूमसन्नुम-ढक्कौस्थालपव्वालाः " ॥ ८ । ४ । २१ ॥ इति छदेर्एयन्तस्यैते षडादेशा वा भवन्ति । ' नूमइ ।' पक्षे-'छायइ ।' प्रा० ४ पाद ।

नेउर–नूपुर–न० । स्त्रीणां पादाऽऽभरणे, "हंसयं नेउरं च मंजीरं । " को० ११२ गाथा ।

नेलच्छ–षण्डक–पुं० षण्ढे,वृषभेऽपि, "नेलच्छो पंडओ।" को० २३५ गाथा । " गोणाऽऽदयः " ॥ ८ । २ । १७४ ॥ इति षण्डकशब्दस्य नेलच्छाऽऽदेशः । "नो णः" ॥ ८ । १ । २२८॥ इत्यस्य वैकल्पिकत्वात् णत्वाभावपक्षे रूपम् । प्रा० १ पाद ।

नेवत्थ–नेपथ्य–न० । वेषे, "वेसो नेवत्थं । " को० २३३ गाथा। स्त्रीपुरुषाणां वेषे, स्था० ४ ठा० २ उ० । परिधानाऽऽदिरचने, ज्ञा० १ श्रु० १ अ० । केशचीवरसमारचने, दर्श० ४ तत्त्व । नि० चू० । निर्मलवेषे, ज्ञा० १ श्रु० १६ अ० । स्था० ।

नेह–स्नेह–पुं० । " क-ग-च-ज-त-द-प-य वां प्रायो लुक् " ॥ ८ । १ । १७७ ॥ इति सलुक् । प्रा० १ पाद । मोहोदयजे प्रीतिविशेषे, पुत्राऽऽदिष्वत्यन्तानुरागे, आतु० । जीत० ।

नो–नो–पुं० । स्तुतौ, एका० ।

नौ–स्तुतौ,पुं०स्त्री० एका० । ' नौश्चरणेऽस्त्रियाम् ।' एका० ।

नोमालिया–नवमालिका–स्त्री० "ओत् पूतर-वदर-नवमालिका-नवफलिका-पूगफले" ॥ ८ । १ । १७० ॥ इति ओत्वम् । प्रा० १ पाद । 'नेवार' इति ख्याते सुगन्धपुष्पप्रधाने वृक्षभेदे, जं० १ वक्ष० । ज्ञा० । जी० । (प्रायः णकाराऽऽदयः सर्वे शब्दाः "वाऽऽदौ" ॥ ८ । १ । २२६ ॥ इत्यस्य वैकल्पिकत्वाद् नकाराऽऽदिषु बोध्याः)

इति श्रीमत्सौधर्मबृहत्तपागच्छीय–कलिकालसर्वज्ञकल्प–भट्टारक–जैनश्वेताम्बराऽऽचार्य–श्री श्री १००८ श्रीमद्विजयराजेन्द्रसूरीश्वरविरचिते 'अभिधानराजेन्द्रे' नकाराऽऽदिशब्दसङ्कलनं समाप्तम् ।

तत्समाप्तौ च समाप्तोऽयं चतुर्थो भागः ॥ ४ ॥

॥ श्रीः ॥

दृप्तभ्रान्तविपक्षदन्तिदमने पञ्चाननग्रामणी-
राजेन्द्रानिघकोशसंप्रणयनात् संदीप्तजैनश्रुतः ।
संघस्योपकृतिप्रयोगकरणे नित्यं कृती तादृशः,
कोऽन्यः सूरिपदाङ्कितो विजयराजेन्द्रात्परः पुण्यवान् ॥

